श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

रामायणतिलक–रामायणशिरोमणि–गोविन्दराजीयरामायण-
भूषणेतिटीकात्रयोपेतम् ।

(१)
बालकाण्डम् ।

एल्फिन्स्टन कॉलेजसंज्ञकाग्रेसपाठशालाया संस्कृताध्यापकैर्मुम्बोल्लकरोपाह्व-
कट्टी श्रीनिवासशास्त्रिभिः

संशोधितं पाठान्तरैः सनार्थीकृतं स्थलविशेषेषु टिप्पणीभिः समलंकृतं च ।

प्राप्तिस्थानम्
"गुजराती" प्रिन्टिंग प्रेस–मुद्रणालयः
३०८, बझारगेट स्ट्रीट, रीझर्व बँकस्य पृष्ठभागे, एल्फिन्स्टन सर्कल, मुम्बापुर्याम् ।

शकः १८३४ ख्रिस्ताब्दः १९१२.

मूल्यं पंचरूपकाणि ।

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

RAMAYAN

OF

VÂLMÎKI

WITH THREE COMMENTARIES CALLED

TILAKA, SHIROMANI, and BHOOSHANA

WITH NUMEROUS READINGS AND NOTES

EDITED BY

SANSKRITA ADHYAPAKA IN THE ELPHINSTONE COLLEGE,—BOMBAY

THE NEWS PRINTING PRESS

of the "Gujarati"

BAKE HOUSE LANE, FORT,

BOMBAY.

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रामायणम्

रामायणतिलक-रामायणशिरोमणि-रामायणभूषणेति-
टीकात्रयोपेतम् ।

एल्फिन्स्टनकॉलेजसंस्कृताध्यापकैर्मुधोळकरोपाह्वैः

संशोधितं पाठान्तरैः सनाथीकृतं स्थलविशेषेषु टिप्पणीभिः समलंकृतं च ।

प्राप्तिस्थानम्

[illegible] पी. न्यूस प्रिंटिंग मुद्रणालयः ।

काळाघोडा, बेक-हाउस लेन, कोट, मुंबई.

॥ श्रीः ॥

भू मि का.

अस्ति किल परमप्राचीनोऽत एवादिकाव्येतिख्यातः श्रीरामचरितामृतवर्णनप्राप्तालघुमहिमा पाठकाघौघकक्ष-क्षपणसंधुक्षितदावानलोऽखिलमनुजश्रवणाक्षिपथगाम्यतिपावनः श्रीरामायणाख्यो ग्रन्थः सर्वथानवद्यदाशरथिकथाप्रसा-रौत्सुक्यमात्रप्रादुर्भूतपरमेष्ठिलब्धसंदेशप्रसादेन कालत्रयाप्रतिहतप्रज्ञेनादिकविश्रीमहर्षिकुलपतिवाल्मीकिना प्रणीतः। यत्र च रावणाद्युग्ररक्षःसंहतिबलात्कृतिसमासादितनिरतिशयपरिभवैः सुखचैररपि दुःखैकसहायैर्निर्जरैरप्यकिञ्चित्का-रिभिर्विबुधैरपि कर्तव्यमूढैर्गुरुधिषणोपगूढैरप्यनवशिष्टधिषणाकणैः स्वस्थैरपि परायत्तप्राणैस्त्राणवरणपरायणैरनन्य-शरणैराश्रितभगवच्चरणावरणैः सुमनोभिः प्रार्थितावतरणस्य निजभृत्यरक्षणकल्याणाचरणकरुणापूर्णवीराग्रगण्यस्य भ-वार्णवातरणनिर्विण्णान्तःकरणभक्तोद्धरणभरणालङ्कर्मीणस्याभ्युपेतातुलामिताभरणस्य चक्रपाणेरात्मीयानुग्रहप्रतीपनि-ग्रहसाग्रहपरिगृहीतनीतिगृहविग्रहस्य योगिचेतोऽभिरामस्य श्रीरामस्य शौर्यौदार्यधैर्यार्यशेषसद्गुणमणिमण्डितमत्यद्भुतं सच्चरित्रं वर्णितम्।

तस्मिंस्तु पित्रादेशैकतानसत्यशीलतैकपत्नीव्रतनिरतिशयप्रजावात्सल्यस्वाश्रितपालनप्रतिज्ञातार्थपूरणनिःसीम-विक्रमक्षमाः संधिविग्रहादिवर्णाश्रमव्यवस्थित्यादयश्च नृपोचिताचारा अपि प्रतीक्ष्यावतंसश्रीरघुपतेः, भर्तृपरदेवतामति-तन्निरन्तरशुश्रूषानुवर्तनप्रियंवदतासदृशपातिव्रत्यार्हणीयश्वशुरादिगुरुजनाज्ञाकरणादयश्चायोनिजाया जानक्याः, नैस-र्गिकसान्द्रासामान्याग्रजसौहृदतत्समदुःखसुखानुभवसङ्कटसमयापरिवर्जनादयो लक्ष्मणस्य, परमार्थात्मज्ञानतच्चिन्तनर-णरणिकातत्प्रातिकूल्यप्रातृद्व्यतदनुचरत्यागपूर्वकैककुत्स्थसमाश्रयणात्तत्सुपार्पाकदार्शितहेयहा ेपादेयसंग्रहादयो न्या-य्यावलम्बनाधिगतसदुदर्कत्वं च विभीषणस्य, अङ्गीकृतकार्यपारगमनमपरिहार्यविपद्यनिवार्यस्थैर्य समयविशेषप्र ॥ १३ तित्वं समीक्ष्यकरणस्वाम्यभीष्टसाधनं चेत्येवमादयः सेवकधर्माः कृत्स्नाश्चानवरतसीताजानिविश्वासपात्रस्यार ॥ १४ र्त्तीर्णदृष्टपारपारावारस्य मारुतेः, अतएवोक्तस्तु रघुवरेणास्मिन्नेव ग्रन्थे हनुमान् 'मय्येव जीर्णतां यातु यत्त्व ॥ १५ हरे। नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति' इति, एवमन्येषामप्यङ्गदकौसल्यादशरथशबरीत्रिजटादीनां ॥ १६ समसमयक्षेमंकरगुणाः परःसहस्राः, मन्थराकैकेय्यादीनां दोषा अपि श्रवणकटुपरिणामविरसा यथार्थं तत्तदवसर ॥ १७ प्रदर्शिताः। यैश्चैतत्पठनक्षणसहसाधिरूढसहृदयहृदयैरुद्भिन्नपुलकाङ्कितगात्राः सर्वेऽपि मन्देतरानन्दसंदोहान्द ना ॥१८ शिरसो विषण्णचित्ताश्चाल्पकालमपि परवशा जायेरन्निति कथनं न कर्हिचिदप्यसाम्प्रतम्। ग्रन्थ ॥ १९ । रामं न पश्येत्तु, यं च रामो न पश्यति। निन्दितः स भवेल्लोके स्वात्माप्येनं विगर्हते" इति। ए द्वदम् ॥ २० । पुरुषवर्णनाढ्यस्य माहात्म्यम्। अन्यत्र च "चरितं रघुनाथस्य शतकोटिप्रविस्तरम्। एकैकमक्ष समाहिताः ॥ २१ । शनम्" इति। अतो दृष्टादृष्टप्रयोजन ऐहिकामुष्मिकनिर्वृतिप्रदश्चारुसर्वाङ्गोऽयं समस्तैरप्य द्धिमवाप्नुयात् ॥ २२ । त्सिद्धम्। सोऽपि नैकाक्यपि तु सटीकस्तत्रापि नैकयैव परं च टीकात्रयेण परिष्कृत कोविदाः ॥ २३ । त्कण्ठाकार्यप्ययमित्यविसंवाद्येव। यणपरामृतम् ॥ २४ । तास्वादिमा रामायणतिलकाभिधा महामहोपाध्यायनागोजीभट्टनिर्मिता। ते च नि भवति ध्रुवम् ॥ २५ । प्रशस्तदकृतटीकाः पुरातनशास्त्रेतिहासग्रन्था विरलाः स्वतन्त्रा अपि बहवस्तालिखिता द्धिः प्रवर्त्तते ॥ २६ । यमतःकैरवानन्दनचन्द्रिकैवेति न विस्तृतवर्णनसापेक्षा। मध्यमा न गमार स भवेऽच्युतः स्यात् ॥ २७ ॥

गोविन्दराजः पूर्वनिर्दिष्टद्वयादपि प्राचीनतरः प्राधान्येन मीमांसावेत्ता अन्यसमयेष्वपि कृतपरिचय इति बालकाण्ड-समाप्तौ तत्कृतपद्येनावसीयते । अनेनापि प्राचेतसहृद्यार्थविवरणे प्रमाणोदाहृतिख्यापनपुरःसरसातिशयायासरञ्जित-सूरितया भूयसी धन्यता संपादितेति तद्विवृतिप्रेक्षितृणामयत्नसंवेद्यमित्यलं पल्लवितेन ।

यद्यपि गतास्ते धन्या वासरा यत्र हि कालिदासप्रभृतयः पुराणकवयः साक्षात्कृतशब्दब्रह्माणो रात्रिंदिवं यथेष्टोपभुक्तसरस्वतीविलासाः किं बहुनाऽसंख्येयसुधर्माश्रितबुधगुरुकविकलाधरोपाहसदिव सदोपाकरकलङ्कि त्रिविष्टपं तदानीन्तनार्यभूमिः । स्थाने च तत् । सांप्रतं वर्धमानकलिमालिन्यादास्माकीनदौर्भाग्यातिरेकाच्च मरुसरिदिव परं क्रशिमानमागता गीर्वाणवाणी, अथवान्यत्रात्यनुरक्तेति स्वविरागभीरुविश्वसृड्निरुद्धेव कुण्ठितगतिः, यथोक्तं भोजराजेन "वाणीविलासमपरत्र कृतोपलम्भमम्भोजभूरसहमान इवाविरासीत्" इति, किंवा " अतिपरिचयादवज्ञा संततगमनादनादरो भवति" इत्यभियुक्तोक्तिदिशा सतिरस्कृति मुक्त्वैतज्जनपदं नव्याश्रुतदृष्टचरद्वीपान्तरदिदृक्षावद्धकुतूहलवशंवदा जगामेव लोकान्तरं हंत तत्रैवारचितविस्तारतया दृढघटितसंपन्नसंबन्धात्कुतोऽपि वाग्मान्व्यस्मरदिवाकिंचनान् । श्रुतिगोशिरपि नामावशिष्टः श्रुतिपथमात्रगामी, दर्शनजातमपि दत्तजलाञ्जलि, तदुभयावलम्बी धर्मोऽपि "छिन्ने मूले नैव शाखा न पत्रम्" इतिन्यायेन निरालम्बनो ध्वस्तप्राय एव । वत तथापि त्रय्याविहिताचारबलबद्धेन तदुद्भूतिनिश्चयाचलशेमुषीकेण " इतिहासपुराणाद्यैर्वेदार्थमुपबृंहयेत्" इति स्मृतिवचनधृताशिथिलप्रतीतिना " निर्विघ्नप्रसरे कलावपि बलान्निष्कण्टकं वैदिकं पन्थानं किल तत्र परिणात्येको हि लोकोत्तरः " इति पद्यनिर्धारितलोकाग्रणीत्वोर्हणापनिनीषुणा म्लानिं सुदूरं भारत्या धर्मस्य च समुद्धिर्धीषुणा च चिरन्तनसारग्रन्थमर्मणीनार्यावर्तीयापारग्रन्थरत्नाकरमथनेनास्मच्छ्रेष्ठिमुकुटरत्नेनेच्छारागमेण यथार्थाह्वयेन बहुप्रयासानल्पवित्तव्ययेन विप्रकृष्टविविधदेशेभ्य आत्मसात्कृतेनोपरिप्रदर्शितव्याख्यात्रयेणोपस्कृत्य सुवर्णमणिहारेणेवाधिगतयष्टित्रिकेण पण्डितद्वारा संशोध्य पाठान्तरैश्च संयोज्य स्थलविशेषेषु संदिग्धेषु काठिन्योल्लाघणाय लिखितसंक्षिप्तटिप्पणिकाभिश्च सनाथीकृत्य स्वमुद्रालये मुद्रयित्वा सोऽयं श्रीरामायणग्रन्थः प्रकटितः । भोः कोविदाः सुहृदः किं वक्तव्यमादौ [illegible] वाङ्मनसागोचरश्रेयःपूरिणी श्रोत्रध्येतृश्रवणमनोऽमृतवर्षिणी चाथापि एकत्रैव मिलितं टीकात्रयमलब्धमन्यत्र रस्वतीस्वयंगृहीतकण्ठग्रहा नागोजीभट्टप्रमुखाश्च व्याख्यातारः प्रयत्नशतदुष्प्रापं यदृच्छासंगतमेतन् सप्रेमध्यक्षीकुर्वतो मेऽद्य "वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुनर्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां इति महाकविश्रीहर्षोक्तिः "सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः" इति कविकुलतिलकवेङ्कटाध्वतिश्च मूर्तिमत्यावपरोक्षीभूय स्फुरत इव पुरतः । मन्ये चाहं यदत्र सारासारविचारे स्वायत्ताधिकारा निरवद्यवेशारदा विचक्षणप्रवरा एव प्रमाणमिति । प्रार्थये च तानेतादृगपूर्वानर्घग्रन्थं सकृदपि वाचनादिना हंसक्षीरन्यायेन मानमस्मच्छ्रेष्ठिनं च लेशतोऽपि कृतार्थयन्त्विति । आशंसे च चराचरनियन्ता राघवशार्दूलो यथा राक्षसनिष्कण्टकं महदैश्वर्यं निरन्तरसांनिध्यं च भक्तवर्यायाञ्जनेयाय तथास्मच्छ्रेष्ठिने तदुभयं स्थिरोज्जनीनवृत्तकार्यपूर्लाघपुरुषायुषजीवित्वमजरामरं कीर्तिं च वितरत्विति.

विद्वज्जनकृपाभिलाषी,

मुधोळवास्तव्यकट्टयुपाभिधश्रीनिवासशर्मा.

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणमाहात्म्यम् ।

श्रीगणेशाय नमः । श्रीसीतारामचन्द्राभ्यां नमः । श्रीहनुमते नमः ।
श्रीरामश्शरणं समस्तजगतां रामं विना का गती रामेण प्रतिहन्यते कलिमलं रामाय कार्यं नमः ।
रामात्तृप्यति कालभीमभुजगो रामस्य सर्वं वशे रामे भक्तिरखण्डिता भवतु मे राम त्वमेवाश्रयः ॥ १ ॥
चित्रकूटालयं राममिन्दिरानन्दमन्दिरम् । वन्दे च परमानन्दं भक्तानामभयप्रदम् ॥ २ ॥
ब्रह्मविष्णुमहेशाद्या यस्यांशा लोकसाधकाः । नमामि देवं चिद्रूपं विशुद्धं परमं भजे ॥ ३ ॥
ऋषय ऊचुः । भगवन्सर्वमाख्यातं यत्पृष्टं विदुषा त्वया । संसारपाशबद्धानां दुःखानि सुबहूनि च ॥ ४ ॥
एतत्संसारपाशस्य छेदकः केन सः स्मृतः । कलौ वेदोक्तमार्गाश्च नश्यन्तीति त्वयोदिताः ॥ ५ ॥
अधर्मनिरतानां च यातनाश्च प्रकीर्तिताः । घोरे कलियुगे प्राप्ते वेदमार्गबहिष्कृते ॥ ६ ॥
पाखण्डत्वं प्रसिद्धं वै सर्वेश्च परिकीर्तितम् । कामार्त्ता ह्रस्वदेहाश्च लुब्धा अन्योन्यतत्पराः ॥ ७ ॥
कलौ सर्वे भविष्यन्ति स्वल्पायुर्बहुपुत्रकाः । स्त्रियः स्वपोषणपरा वेश्याचरणतत्पराः ॥ ८ ॥
पतिवाक्यमनादृत्य सदाऽन्यगृहतत्पराः । दुःशीलेषु करिष्यन्ति पुरुषेषु सदा स्पृहाम् ॥ ९ ॥
असद्वार्त्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः । परुषानृतभाषिण्यो देहसंस्कारवर्जिताः ॥ १० ॥
वाचालाश्च भविष्यन्ति कलौ प्रायेण योषितः । भिक्षवश्चापि मित्रादिस्नेहसंबन्धयन्त्रिताः ॥ ११ ॥
अन्योपाधिनिमित्तेन शिष्यान्बध्नन्ति लोलुपाः । उभाभ्यामपि पाणिभ्यां शिरःकण्डूयनं स्त्रियः ॥ १२ ॥
कुर्वन्त्यो गृहभर्तॄणामाज्ञां भेत्स्यन्त्यतन्द्रिताः । पाखण्डालापनिरताः पाखण्डजनसङ्गिनः ॥ १३ ॥
यदा द्विजा भविष्यन्ति तदा वृद्धिंगतः कलिः । घोरे कलियुगे ब्रह्मन् जनानां पापकर्मिणाम् ॥ १४ ॥
मनःशुद्धिविहीनानां निष्कृतिश्च कथं भवेत् । यथा तुष्यति देवेशो देवदेवो जगद्गुरुः ॥ १५ ॥
ततो वदस्व सर्वज्ञ सूत धर्मभृतांवर । वद सूत मुनिश्रेष्ठ सर्वमेतदशेषतः ॥ १६ ॥
कस्य नो जायते तुष्टिः सूत त्वद्वचनामृतात् । ॥ १७ ॥
सूत उवाच । शृणुध्वं ऋषयः सर्वे यदिष्टं वो वदाम्यहम् । गीतं सनत्कुमाराय नारदेन महात्मना ॥ १८ ॥
रामायणं महाकाव्यं सर्ववेदेषु सम्मतम् । सर्वपापप्रशमनं दुष्टग्रहनिवारणम् ॥ १९ ॥
दुःस्वप्ननाशनं धन्यं भुक्तिमुक्तिफलप्रदम् । रामचन्द्रकथोपेतं सर्वकल्याणसिद्धिदम् ॥ २० ॥
धर्मार्थकाममोक्षाणां हेतुभूतं महाफलम् । अपूर्वं पुण्यफलदं शृणुध्वं सुसमाहिताः ॥ २१ ॥
महापातकयुक्तो वा युक्तो वा सर्वपातकैः । श्रुत्वैतदार्षं दिव्यं हि काव्यं सिद्धिमवाप्नुयात् ॥ २२ ॥
रामायणेन वर्त्तन्ते सुतरां ये जगद्धिताः । त एव कृतकृत्याश्च सर्वशास्त्रार्थकोविदाः ॥ २३ ॥
धर्मार्थकाममोक्षाणां साधनं च द्विजोत्तमाः । श्रोतव्यं च सदा भक्त्या रामायणपरामृतम् ॥ २४ ॥
पुराऽर्जितानि पापानि नाशमायान्ति यस्य वै । रामायणे महाप्रीतिस्तस्य वै भवति ध्रुवम् ॥ २५ ॥
रामायणे वर्त्तमाने पापपाशेन यन्त्रितः । अनादृत्य असद्गाथाः सत्कथबुद्धिः प्रवर्त्तते ॥ २६ ॥

रामायणं नाम परंतु काव्यं सुपुण्यदं वै शृणुत द्विजेन्द्राः ।
यस्मिञ्छ्रुते जन्मजरादिनाशो भवत्यदोषः स नरोऽच्युतः स्यात् ॥ २७ ॥

वरं वरेण्यं वरदं तु काव्यं संतारयत्याशु च सर्वलोकम् ।
सङ्कल्पितार्थप्रदमादिकाव्यं श्रुत्वा च रामस्य पदं प्रयाति ॥ २८ ॥
ब्रह्मेशविष्ण्वाख्यशरीरभेदैर्विश्वं सृजत्यत्ति च पाति यश्च ।
तमादिदेवं परमं वरेण्यमाधाय चेतस्युपयाति मुक्तिम् ॥ २९ ॥
यो नामजात्यादिविकल्पहीनः परावराणां परमः परः स्यात् ।
वेदान्तवेद्यः स्वरुचा प्रकाशः स वीक्ष्यते सर्वपुराणवेदैः ॥ ३० ॥

ऊर्जे माघे सिते पक्षे चैत्रे च द्विजसत्तमाः । नवाह्ना खलु श्रोतव्यं रामायणकथामृतम् ॥ ३१ ॥
इत्येवं शृणुयाद्यस्तु श्रीरामचरितं शुभम् । सर्वान् कामानवाप्नोति परत्रामुत्र चोत्तमान् ॥ ३२ ॥
त्रिसप्तकुलसंयुक्तः सर्वपापविवर्जितः प्रयाति रामभवनं यत्र गत्वा न शोचते ॥ ३३ ॥
चैत्रे माघे कार्तिके च सिते पक्षे च वाचयेत् नवाहस्तु महापुण्यं श्रोतव्यं च प्रयत्नतः ॥ ३४ ॥
रामायणमादिकाव्यं स्वर्गमोक्षप्रदायकम् तस्माद्घोरे कलियुगे सर्वधर्मबहिष्कृते ॥ ३५ ॥
नवभिर्दिनैः श्रोतव्यं रामायणकथामृतम् रामनामपरा ये तु घोरे कलियुगे द्विजाः ॥ ३६ ॥
त एव कृतकृत्याश्च न कलिर्बाधते हि तान् कथा रामायणस्यापि नित्यं भवति यद्गृहे ॥ ३७ ॥
तद्गृहं तीर्थरूपं हि दुष्टानां पापनाशनम् तावत्पापानि देहेऽस्मिन्निवसन्ति तपोधनाः ॥ ३८ ॥
यावन्न श्रूयते सम्यक् श्रीमद्रामायणं नरैः दुर्लभैव कथा लोके श्रीमद्रामायणोद्भवा ॥ ३९ ॥
कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ऊर्जे मासि सिते पक्षे चैत्रे च द्विजसत्तमाः ॥ ४० ॥
यस्य श्रवणमात्रेण सौदासादयो मोचिताः गौतमशापतः प्राप्तः सौदासो राक्षसीं तनुम् ॥ ४१ ॥
रामायणप्रभावेन विमुक्तिं प्राप्तवान्पुनः यस्त्वेतच्छृणुयाद्भक्त्या रामभक्तिपरायणः ॥ ४२ ॥
स मुच्यते महापापैः पुरुषः पातकादिभिः ॥ ४३

इति श्रीस्कन्दपुराणे उत्तरखण्डे नारदसनत्कुमारसंवादे रामायणमाहात्म्ये कल्पानुकीर्त्तनं नाम प्रथमोऽध्यायः ॥ १

ऋषय ऊचुः । कथं सनत्कुमाराय देवर्षिर्नारदो मुनिः ।प्रोक्तवान्कृतवान्धर्मान्कथं तौ मिलितावुभौ ॥ १ ॥
कस्मिन् क्षेत्रे स्थितौ तात तावुभौ ब्रह्मवादिनौ । यदुक्तं नारदेनास्मै तत्त्वं ब्रूहि महामुने ॥ २ ॥
सूत उवाच । सनकाद्या महात्मानो ब्रह्मणस्तनयाः स्मृताः । निर्ममा निरहंकाराः सर्वे ते ऊर्ध्वरेतसः ॥ ३ ॥
तेषां नामानि वक्ष्यामि सनकश्च सनन्दनः । सनत्कुमारश्च तथा सनातन इति स्मृतः ॥ ४ ॥
विष्णुभक्ता महात्मानो ब्रह्मध्यानपरायणाः । सहस्रसूर्यसंकाशाः सत्यवन्तो मुमुक्षवः ॥ ५ ॥
एकदा ब्रह्मणः पुत्राः सनकाद्या महौजसः । मेरुशृङ्गे समाजग्मुर्वीक्षितुं ब्रह्मणः सभाम् ॥ ६ ॥
तत्र गङ्गां महापुण्यां विष्णुपादोद्भवां नदीं । निरीक्ष्य स्नातुमुद्युक्ताः सिताख्यां प्रथितौजसः ॥ ७ ॥
एतस्मिन्नन्तरे विप्रो देवर्षिर्नारदो मुनिः । आजगामोच्चरन्नाम हरेर्नारायणादिकम् ॥ ८ ॥
नारायणाच्युतानन्त वासुदेव जनार्दन । यज्ञेश यज्ञपुरुष राम विष्णो नमोऽस्तु ते ॥ ९ ॥
इत्युच्चरन् हरेर्नाम पावयन्नखिलं जगत् । आजगाम स्तुवन्गङ्गां मुनिर्लोकैकपावनीम् ॥ १० ॥
अथायान्तं समुद्वीक्ष्य सनकाद्या महौजसः । यथार्हमर्हणं चक्रुर्ववन्दे सोऽपि तान्मुनीन् ॥ ११ ॥
अथ तत्र सभामध्ये नारायणपरायणम् । सनत्कुमारः प्रोवाच नारदं मुनिपुङ्गवम् ॥ १२ ॥
सनत्कुमार उवाच।सर्वज्ञोसि महाप्राज्ञ मुनीशानां च नारद।हरिभक्तिपरो यस्माच्चत्तो नास्त्यपरोधिकः १३
येनेदमखिलं जातं जगत्स्थावरजङ्गमम् । गङ्गा पादोद्भवा यस्य कथं स ज्ञायते हरिः ॥ १४ ॥

अनुग्राह्योऽस्मि यदि ते तत्त्वतो वक्तुमर्हसि ।

नारद उवाच । नमः पराय देवाय परात्परतराय च ॥ १५ ॥

परात्परनिवासाय सगुणायागुणाय च । ज्ञानाज्ञानस्वरूपाय धर्माधर्मस्वरूपिणे ॥ १६ ॥
विद्याविद्यास्वरूपाय स्वस्वरूपाय ते नमः । यो दैत्यहन्ता नरकान्तकश्च भुजाग्रमात्रेण च धर्मगोप्ता ॥१७॥
भूभारसंघातविनोदकामं नमामि देवं रघुवंशदीपम् । आविर्भूतश्चतुर्द्धा यः कपिभिः परिवारितः ॥ १८ ॥
हतवान् राक्षसानीकं रामं दाशरथिं भजे । एवमादीन्यनेकानि चरितानि महात्मनः ॥ १९ ॥
तेषां नामानि संख्यातुं शक्यते नाब्दकोटिभिः । महिमानं तु यन्नाम्नः पारं गन्तुं न शक्यते ॥ २० ॥
मनवोपि मुनीन्द्राश्च कथं तं क्षुल्लको भजेत् । यन्नाम्नः स्मरणेनापि महापातकिनोऽपि ये ॥ २१ ॥
पावनत्वं प्रपद्यन्ते कथं स्मरामि क्षुल्लधीः । रामायणपरा ये तु घोरे कलियुगे द्विजाः ॥ २२ ॥
त एव कृतकृत्याश्च तेषां नित्यं नमोऽस्तु ते । ऊर्जे मासि सिते पक्षे चैत्रे माघे तथैव च ॥ २३ ॥
नवाह्ना किल श्रोतव्यं रामायणकथामृतम् । गौतमशापतः प्राप्तः मुदासो राक्षसाधमः ॥ २४ ॥

रामायणप्रभावेन विमुक्तिं प्राप्तवानसौ ।

सनत्कुमार उवाच । रामायणं कन प्रोक्तं सर्वधर्मफलप्रदम् ॥ २५ ॥

प्राप्तः कथं गौतमेन सौदासो मुनिसत्तम । रामायणप्रभावेन कथं भूयो विमोक्षितः ॥ २६ ॥
अनुग्राह्योऽस्मि यदि ते तत्त्वतो वक्तुमर्हसि । सर्वमेतदशेषेण मुने नो वक्तुमर्हसि ॥ २७ ॥

शृण्वतां वदतां चैव कथां पापविनाशिनीम् ।

नारद उवाच। शृणु रामायणं विप्र यद्वाल्मीकिमुखोद्गतम् ॥ २८ ॥

नवाह्ना खलु श्रोतव्यं रामायणकथामृतम् आस्ते कृतयुगे विप्रो धर्मकर्मविशारदः ॥ २९ ॥
सोमदत्त इति ख्यातो नाम्ना धर्मपरायणः विप्रस्तु गौतमाख्येन मुनिना ब्रह्मवादिना ॥ ३० ॥
श्राविताः सर्वधर्मैश्च गङ्गातीरे मनोरमे । पुराणशास्त्रकथनैस्तेनासौ बोधितोपि च ॥ ३१ ॥
श्रुतवान्सर्वधर्मान्वै तेनोक्तानखिलानपि कदाचित्परमेकान्ते परिचर्यापरोऽभवत् ॥ ३२ ॥
उपस्थितायापि तस्मै प्रणामं नाद्यकारि च स तु शान्तो महाबुद्धिर्गौतमस्तेजसां निधिः ॥ ३३ ॥
शास्त्रोदितानि कर्माणि करोति स मुदं ययौ यस्त्वर्चितो मया देवः शिवः सर्वजगद्गुरुः ॥ ३४ ॥
गुर्ववज्ञाकृतं पापं राक्षसत्वे नियोक्तवान् उवाच प्राञ्जलिर्भूत्वा विनयेषु च कोविदः ॥ ३५ ॥

विप्र उवाच । भगवन्सर्वधर्मज्ञ सर्वदर्शिन्सुरेश्वर । क्षमस्व भगवन्सर्वमपराधः कृतो मया ॥ ३६ ॥

गौतम उवाच। ऊर्जे मासे सिते पक्षे रामायणकथामृतम् ।
नवाह्ना चैव श्रोतव्यं भक्तिभावेन सादरम् ॥ ३७ ॥
नात्यन्तिकं भवेदेतद्वादशाब्दं भविष्यति ।

वि. उवाच । केन रामायणं प्रोक्तं चरितानि तु कस्य वै ॥ ३८ ॥

मनसा प्रीतिमापन्नो ववन्दे चरणौ गुरोः । एतत्सर्वं महाप्राज्ञ सङ्क्षेपाद्वक्तुमर्हसि ॥ ३९ ॥

गौतम उवाच। शृणु रामायणं विप्र वाल्मीकिमुनिना कृतम् । येन रामावतारेण राक्षसा रावणादयः ॥४०॥

हतास्तु देवकार्यं हि चरितं तस्य तच्छृणु । कार्त्तिके च सिते पक्षे कथा रामायणस्य तु ॥ ४१ ॥
नवमेऽहनि श्रोतव्या सर्वपापप्रणाशिनी । इत्युक्त्वा चार्थसंपन्नो गौतमः स्वाश्रमं ययौ ॥ ४२ ॥
विप्रोऽपि दुःखमापन्नो राक्षसीं तनुमाश्रितः । क्षुत्पीडितः पिपासार्त्तो नित्यं क्रोधपरायणः ॥ ४३ ॥

कृष्णक्षपाद्युतिर्भीमो बभ्राम विजने वने । मृगांश्च विविधांस्तत्र मनुष्यांश्च सरीसृपान् ॥ ४४ ॥
विहगान्प्लवगांश्चैव प्रसभात्तानभक्षयत् । अस्थिभिर्बहुभिर्विप्राः पीतरक्तकलेवरैः ॥ ४५ ॥
रक्तार्द्रप्रेतकैश्चैव तेनासीत्तु भयङ्करः । ऋतुत्रये स पृथिवीं शतयोजनविस्तराम् ॥ ४६ ॥
कृत्वाऽतिदुःखितो पश्चाद्वनान्तरमगात्पुनः । तत्रापि कृतवान्नित्यं नरमांसाशनं तदा ॥ ४७ ॥
जगाम नर्मदातीरे सर्वलोकभयङ्करः । एतस्मिन्नन्तरे प्राप्तः कश्चिद्विप्रोऽतिधार्मिकः ॥ ४८ ॥
कलिङ्गदेशसम्भूतो नाम्ना गर्ग इति स्मृतः । वहन्गङ्गाजलं स्कन्धे स्तुवन्विश्वेश्वरं प्रभुम् ॥ ४९ ॥
गायन्नामानि रामस्य समायातोऽतिहर्षितः । तमायान्तं मुनिं दृष्ट्वा सुदासो नाम राक्षसः ॥ ५० ॥
प्राप्तो नः पारणेत्युक्त्वा भुजावुद्यम्य तं ययौ । तेन कीर्तितनामानि श्रुत्वा दूरे व्यवस्थितः ॥ ५१ ॥
असक्तस्तं द्विजं हन्तुमिदमूचे स राक्षसः ॥

राक्षस उवाच । अहो भद्रमहाभाग नमस्तुभ्यं महात्मने ॥ ५२ ॥
नामस्मरणमात्रेण राक्षसा अपि दूरगाः । मया प्रभाक्षिताः पूर्वं विप्राः कोटिसहस्रशः ॥ ५३ ॥
नामप्रावरणं विप्र रक्षति त्वां महाभयात् । नामस्मरणमात्रेण राक्षसा अपि भो वयम् ॥ ५४ ॥
परां शान्तिं समापन्ना महिमानोच्युतस्य हि । सर्वथा त्वं महाभाग रागादिरहितो द्विज ॥ ५५ ॥
रामकथाप्रभावेण पाह्यस्मात्पातकोन्नतात् । गुर्ववज्ञा मया पूर्वं कृता च मुनिसत्तम ॥ ५६ ॥
कृतश्चानुग्रहः पश्चाद्गुरुणोक्तमिदं वचः । वाल्मीकेर्मुनिना पूर्वं कथा रामायणस्य च ॥ ५७ ॥
ऊर्जे मासे सिते पक्षे श्रोतव्या च प्रयत्नतः । गुरुणापि पुनः प्रोक्तं रम्यं तु शुभदं वचः ॥ ५८ ॥
नवाह्ना खलु श्रोतव्यं रामायणकथामृतम् । तस्माद्ब्रह्मन्महाभाग सर्वशास्त्रार्थकोविद ॥ ५९ ॥
कथाश्रवणमात्रेण मुच्यन्ते पापकर्मभिः ।

नारद उवाच । ततो रामायणं ख्यातं राममाहात्म्यमुत्तमम् ॥ ६० ॥
निशम्य विस्मयाविष्टो बभूव द्विजसत्तमः । ततो विप्रः कृपाविष्टो रामनामपरायणः ॥ ६१ ॥
सुदासराक्षसं नाम चेदं वाक्यमथाब्रवीत् ।

विप्र उवाच । राक्षसेन्द्र महाभाग मतिस्ते विमलाऽभवत् ॥ ६२ ॥
अस्मिन्नूर्जे सिते पक्षे रामायणकथां शृणु । शृणु त्वं राममाहात्म्यं रामभक्तिपरायण ॥ ६३ ॥
रामध्यानपराणां च कः समर्थः प्रबोधितुम् । रामभक्तिपरो यत्र तत्र ब्रह्मा हरिः शिवः ॥ ६४ ॥
तत्र देवाश्च सिद्धाश्च रामायणपरा नराः । तस्मादूर्जे सिते पक्षे रामायणकथां शृणु ॥ ६५ ॥
नवाह्ना खलु श्रोतव्यं सावधानः सदा भव । इत्युक्त्वा कथयामास रामायणकथां मुनिः ॥ ६६ ॥
कथाश्रवणमात्रेण राक्षसत्वमपाकृतम् । विसृज्य राक्षसं भावमभवद्देवतोपमः ॥ ६७ ॥
कोटिसूर्यप्रतीकाशो नारायणसमप्रभः । शङ्खचक्रगदापाणिर्हरेः सद्म जगाम सः ॥ ६८ ॥
स्तुवन्तं ब्राह्मणं सम्यक् जगाम हरिमन्दिरम् । ॥ ६९ ॥

नारद उवाच । तस्माच्छृणुध्वं विप्रेन्द्रा रामायणकथामृतम् ।स तस्य महिमा तत्र ऊर्जे मासि च कीर्त्यते ॥७०॥
यन्नामस्मरणादेव महापातककोटिभिः । विमुक्तः सर्वपापेभ्यो नरो याति परां गतिम् ॥ ७१ ॥
रामायणे हि यन्नाम सकृदप्युच्यते सदा । तदैव पापनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ७२ ॥
ये पठन्ति सदाख्यानं भक्त्या शृण्वन्ति ये नराः । गङ्गास्नानाच्छतगुणं तेषां संजायते फलम् ॥ ७३ ॥

इति श्रीस्कन्दपुराणे उत्तरखण्डे नारदसनत्कुमारसंवादे रामायणमाहात्म्ये राक्षसमोक्षणं नाम द्वितीयोऽध्यायः ॥२॥

सनत्कुमार उवाच।अहो विप्र इदं प्रोक्तमितिहासं च नारद।रामायणस्य माहात्म्यं त्वं पुनर्वद विस्तरात् ॥१॥
अन्यमासस्य माहात्म्यं कथयस्व प्रसादतः । कस्य नो जायते तुष्टिर्मुने त्वद्वचनामृतात् ॥ २ ॥
नारद उवाच । सर्वे यूयं महाभागाः कृतार्था नात्र संशयः । यतः प्रभावं रामस्य भक्तितः श्रोतुमुद्यताः॥३॥
माहात्म्यश्रवणं यस्य राघवस्य कृतात्मनाम् । दुर्लभं प्राहुरत्यन्तं मुनयो ब्रह्मवादिनः ॥ ४ ॥
शृणुध्वमृषयश्चित्रमितिहासं पुरातनम् । सर्वपापप्रशमनं सर्वरोगविनाशनम् ॥ ५ ॥
आसीत्पुरा द्वापरे च सुमतिर्नाम भूपतिः । सोमवंशोद्भवः श्रीमान् सप्तद्वीपैकनायकः ॥ ६ ॥
धर्मात्मा सत्यसंपन्नः सर्वसंपद्विभूषितः । सदा रामकथासेवी रामपूजापरायणः ॥ ७ ॥
रामपूजापराणां च शुश्रूषुरनहंकृतिः । पूज्येषु पूजानिरतः समदर्शी गुणान्वितः ॥ ८ ॥
सर्वभूतहितः शान्तः कृतज्ञः कीर्तिमान्नृपः । तस्य भार्य्या महाभागा सर्वलक्षणसंयुता ॥ ९ ॥
पतिव्रता पतिप्राणा नाम्ना सत्यवती श्रुता । नावुभौ दम्पती नित्यं रामायणपरायणौ ॥ १० ॥
अन्नदानरतौ नित्यं जलदानपरायणौ । तडागारामप्रपादीनसंख्यातानकारयन् ॥ ११ ॥
सोपि राजा महाभागो रामायणपरायणः । वाचयेच्छृणुयाद्वापि भक्तिभावेन भावितः ॥ १२ ॥
एवं रामपरो नित्यं राजा तु धर्मकोविदः । तस्य प्रिया सत्यवती देवी अपि सदाऽस्तुवन् ॥ १३ ॥
विश्रुतौ त्रिषु लोकेषु दम्पती तौ हि धार्मिकौ । आययौ बहुभिः शिष्यैर्द्रष्टुकामो विभाण्डकः ॥ १४ ॥
विभाण्डकं मुनिं दृष्ट्वा सुखमाप्तो जनेश्वरः । पाद्यमर्घ्यं सपत्नीकः पूजाभिर्बहुविस्तरम् ॥ १५ ॥
कृतातिथ्यक्रियं शान्तं कृतासनपरिग्रहम् । निजासनगतो भूपः प्राञ्जलिर्मुनिमब्रवीत् ॥ १६ ॥
राजोवाच । भगवन् कृतकृत्योद्य त्वदभ्यागमनेन भो। सतामागमनं सन्तः प्रशसन्ति सुखावहम् ॥ १७ ॥
यत्र स्यान्महतां प्रेम तत्र स्युः सर्वसम्पदः । तेजः कीर्तिर्धनं पुत्र इति प्राहुर्विपश्चितः ॥ १८ ॥
तत्र वृद्धिं गमिष्यन्ति श्रेयांस्यनुदिनं मुने । यत्र सन्तः प्रकुर्वन्ति महतीं करुणां प्रभो ॥ १९ ॥
यो मूर्ध्नि धारयद्ब्रह्मन्विप्रपादतलोदकम् । स स्नातो सर्वतीर्थेषु पुण्यवान्नात्र संशयः ॥ २० ॥
मम पुत्राश्च दाराश्च सम्पदश्च समर्पिताः । समाज्ञापय शान्तात्मन् वयं किं करवाणि ते ॥ २१ ॥
इत्थं वदन्तं भूपं तं स निरीक्ष्य मुनीश्वरः । स्पृशन्करेण राजानं प्रत्युवाचातिहर्षितः ॥ २२ ॥
ऋषिरुवाच । राजन्यदुक्तं भवता तत्सर्वं त्वत्कुलोचितम् । विनयावनताः सर्वे परं श्रेयो भजन्ति हि ॥ २३ ॥
प्रीतोस्मि तव भूपाल सन्मार्गपरिवर्तिनः । स्वस्ति तेऽस्तु महाभाग यत्पृच्छामि तदुच्यताम् ॥ २४ ॥
हरिसन्तोषकान्यासन्पुराणानि बहून्यपि । माघे मासि चोद्यतोसि रामायणपरायणः ॥ २५ ॥
तव भार्योपि साध्वीयं नित्यं रामपरायणा । किमर्थमेतद्वृत्तान्तं यथावद्वक्तुमर्हसि ॥ २६ ॥
राजोवाच।शृणुष्व भगवन्सर्वं यत्पृच्छसि वदामि तत् । आश्चर्यं यद्धि लोकानामावयोश्चरितं मुने ॥ २७ ॥
अहमासं पुरा शूद्रो मालतिर्नाम सत्तम । कुमार्गनिरतो नित्यं सर्वलोकाहिते रतः ॥ २८ ॥
पिशुनो धर्मविद्वेषी देवद्रव्यापहारकः । महापातकिसंसर्गी देवद्रव्योपजीवकः ॥ २९ ॥
गोघ्नश्च ब्रह्महा चौरो नित्यं प्राणिवधे रतः । नित्यं निष्ठुरवक्ता च पापी वेश्यापरायणः ॥ ३० ॥
किञ्चित्काले संस्थितोऽहमनादृत्य महद्वचः । सर्वबन्धुपरित्यक्तो दुःखी वनमुपागमम् ॥ ३१ ॥
मृगमांसाशनं नित्यं तथा मार्गविरोधकृत् । एकाकी दुःखबहुलो निवसन्निर्जने वनम् ॥ ३२ ॥
एकदा क्षुत्परिश्रान्तो निदाघान्ते पिपासितः । वसिष्ठस्याश्रमं दृष्ट्वा अपश्यन्निर्जनं वनम् ॥ ३३ ॥
हंसकारण्डवाकीर्णं तत्समीपे महत्सरः । पर्यन्ते वनपुष्पौघैश्छादितं तन्मुनीश्वर ॥ ३४ ॥
अपिबं तत्र पानीयं तत्तटे विगतश्रमः । उन्मूल्य बिल्वमूलानि मया क्षुच्च निवारिता ॥ ३५ ॥

वसिष्ठस्याश्रमं तिष्ठन् निवासं कृतवानहम् । शीर्णैः स्फटिकसङ्काशैस्तत्र गृहमकारिषम् ॥ ३६ ॥
पर्णैस्तृणैश्च काष्ठैश्च गृहं सम्यक् प्रकल्पितम् । तत्राहं व्याधसत्वस्थो हत्वा बहुविधान्मृगान् ॥ ३७ ॥
आजीविकां च कुर्वाणो वत्सराणां च विंशतिम् । अथोपनयता साध्वी विन्ध्यदेशे समुद्भवा ॥ ३८ ॥
निषादकुलसम्भूता नाम्ना कालीति विश्रुता । बन्धुवर्गैः परित्यक्ता दुःखिता जीर्णविग्रहा ॥ ३९ ॥
ब्रह्मन्क्षुत्तृट्परिश्रान्ता शोचती मुक्तिकीं क्रियाम् । दैवयोगात्समायाता भ्रमन्ती विजने वने ॥ ४० ॥
मासे ग्रीष्मे च तापार्त्ता ह्यन्तस्तापप्रपीडिता । इमां दुःखवतीं दृष्ट्वा जाता मे विपुला घृणा ॥ ४१ ॥
मया दत्तं जलं चास्यै मांसं वनफलं तथा । गतश्रमा तु सा पृष्टा मया ब्रह्मन् यथातथम् ॥ ४२ ॥
न्यवेदयत्स्वकर्माणि तानि शृणु महामुने । इयं काली तु नाम्ना वै निषादकुलसम्भवा ॥ ४३ ॥
दाम्भिकस्य सुतां विद्धि न्यवसद्विन्ध्यपर्वते । परस्वहारिणी नित्यं सदा पैशुन्यवादिनी ॥ ४४ ॥
बन्धुवर्गैः परित्यक्ता यतोहं पापचारिणी । कान्तारे विजने ब्रह्मन्त्वत्समीपमुपागता ॥ ४५ ॥
इत्येवं स्वकृतं कर्म सर्वं मह्यं न्यवेदयत् । वसिष्ठस्याश्रमं पुण्यं अहं चेयं च वै मुने ॥ ४६ ॥
दम्पतीभावमाश्रित्य स्थितौ मांसाशिनौ तदा । उद्यमार्थे गतौ चैव वसिष्ठस्याश्रमं तदा ॥ ४७ ॥
दृष्ट्वा चैव समाजं च देवर्षीणां च सत्तम । रामायणपरा विप्रा माघे दृष्ट्वा दिने दिने ॥ ४८ ॥
निराहारौ च विक्रान्तौ क्षुत्पिपासाप्रपीडितौ । अनिच्छया गतौ तत्र वसिष्ठस्याश्रमं प्रति ॥ ४९ ॥
रामायणकथां श्रोतुं नवाह्ना चैव भक्तितः । तत्काल एव पञ्चत्वमावयोरभवन्मुने ॥ ५० ॥
कर्मणा तेन तुष्टात्मा भगवान्मधुसूदनः । स्वदूतान्प्रेषयामास मदाहरणकारणात् ॥ ५१ ॥
आरोप्य मां विमाने तु जग्मुस्ते च परं पदम् । आवां समीपमापन्नौ देवदेवस्य चक्रिणः ॥ ५२ ॥
भुक्तवन्तौ महान्भोगान्यावत्कालं शृणुष्व मे । युगकोटिसहस्राणि युगकोटिशतानि च ॥ ५३ ॥
उषित्वा रामभवने ब्रह्मलोकमुपागतौ । तावत्कालं च तत्रापि स्थित्वेन्द्रपदमागतौ ॥ ५४ ॥
तत्रापि तावत्कालं च भुक्त्वा भोगाननुत्तमान् । ततः पृथ्वीं वयं प्राप्ताः क्रमेण मुनिसत्तम ॥ ५५ ॥
अत्रापि सम्पदतुला रामायणप्रसादतः । अनिच्छया कृतेनापि प्राप्तमेवंविधं मुने ॥ ५६ ॥
नवाह्ना किल श्रोतव्या कथा रामायणस्य च । भक्तिभावेन धर्मात्मञ्जन्ममृत्युजरापहम् ॥ ५७ ॥
अवशेनापि यत्कर्म कृतं तु सुमहत्फलम् । ददाति शृणु विप्रेन्द्र रामायणप्रसादतः ॥ ५८ ॥

नारद उवाच। एतत्सर्वं निशम्यासौ विभाण्डको मुनीश्वरः। अभिनन्द्य महीपालं प्रययौ स्वतपोवनम् ॥ ५९ ॥
तस्माच्छृणुध्वं विप्रेन्द्रा देवदेवस्य चक्रिणः । रामायणकथा चैव कामधेनूपमा स्मृता ॥ ६० ॥
माघे मासे सिते पक्षे रामायणं प्रयत्नतः । नवाह्ना किल श्रोतव्यं सर्वधर्मफलप्रदम् ॥ ६१ ॥
य इदं पुण्यमाख्यानं सर्वपापप्रणाशनम् । वाचयेच्छृणुयाद्वापि रामभक्तिश्च जायते ॥ ६२ ॥

इति श्रीस्कन्दपुराणे उत्तरखण्डे नारदसनत्कुमारसंवादे रामायणमाहात्म्ये माघफलानुकीर्तनं नाम तृतीयोऽध्यायः॥ ३॥

नारद उवाच। अन्यमासं प्रवक्ष्यामि शृणुध्वं सुसमाहिताः। सर्वपापहरं पुण्यं सर्वदुःखनिबर्हणम् ॥ १ ॥
ब्राह्मणक्षत्रियविशां शूद्राणां चैव योषिताम् । समस्तकामफलदं सर्वव्रतफलप्रदम् ॥ २ ॥
दुःस्वप्ननाशनं धन्यं भुक्तिमुक्तिफलप्रदम् । रामायणस्य माहात्म्यं श्रोतव्यं च प्रयत्नतः॥ ३ ॥
अत्रैवोदाहरन्तीमामितिहासं पुरातनम् । पठतां शृण्वतां चैव सर्वपापप्रणाशनम् ॥ ४ ॥
आसीत्पुरा कलियुगे कलिको नाम लुब्धकः । परदार–परद्रव्य–हरणे सततं रतः ॥ ५ ॥
परनिन्दापरो नित्यं जन्तुपीडाकरस्तथा । हतवान् ब्राह्मणान् गावः शतशोथ सहस्रशः॥ ६ ॥

देवस्वहरणे नित्यं परस्वहरणे तथा । तेन पापान्यनेकानि कृतानि सुमहान्ति च ॥ ७ ॥
न तेषां शक्यते वक्तुं संख्यावत्सरकोटिभिः । स कदाचिन्महापापो जन्तूनामन्तकोपमः ॥ ८ ॥
सौवीरनगरं प्राप्तः सर्वैश्वर्यसमन्वितम् । योषिद्भिर्भूषिताभिश्च सरोभिर्विमलोदकैः ॥ ९ ॥
अलङ्कृतं विपणिभिर्ययौ देवपुरोपमम् । तस्योपवनमध्यस्थं रम्यं केशवमन्दिरम् ॥ १० ॥
छादितं हेमकलशैर्दृष्ट्वा व्याधो मुदं ययौ । हराम्यत्र सुवर्णानि बहूनीति विनिश्चितः ॥ ११ ॥
जगाम रामभवनं कीनाशश्चौर्यलोलुपः । तत्रापश्यद्द्विजवरं शान्तं तत्त्वार्थकोविदम् ॥ १२ ॥
परिचर्यापरं विष्णोरुत्तङ्कं तपसां निधिम् । एकाकिनं दयालुं च निःस्पृहं ध्यानलोलुपम्॥ १३ ॥
दृष्ट्वासौ लुब्धको मेने तं चौर्यस्यान्तरायिणम् । देवस्य द्रव्यजातं तु समादाय महानिशि ॥ १४ ॥
उत्तङ्कं हन्तुमारेभे उद्यतासिर्मदोद्धतः । पादेनाक्रम्य तद्वक्षो गलं संगृह्य पाणिना ॥ १५ ॥

हन्तुं कृतमतिं व्याधं उत्तङ्को प्रेक्ष्य चाब्रवीत् ।

उत्तङ्क उवाच । भो भो साधो वृथा मां त्वं हनिष्यासि निरागसम् ॥ १६ ॥
मया किमपराद्धं ते तद्वद त्वं च लुब्धक । वृथापराधिनो लोके हिंसां कुर्वन्ति यत्नतः ॥ १७ ॥
न हिंसन्ति वृथा सौम्य सज्जना अपि साधवः । विरोधेष्वपि मूर्खेषु निरीक्ष्यावस्थितान् गुणान्॥१८॥
विरोधं नाधिगच्छन्ति सज्जना शान्तचेतसः । बहुधा वाच्यमानोपि यो नरः क्षमयान्वितः ॥ १९ ॥
तमुत्तमं नरं प्राहुर्विष्णोः प्रियतरं तथा । ॥ २० ॥

सज्जनो न याति वैरं परहितरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभीकरोति मुखं कुठारस्य ॥ २१ ॥

अहोविधिर्वै बलवान् बाधते बहुधा जनान् । सर्वसङ्गविहीनोपि बाध्यते तु दुरात्मना ॥ २२ ॥
अहो निष्कारणं लोके बाधन्ते दुर्जना जनान्। धीवराः पिशुना व्याधा लोकेऽकारणवैरिणः ॥ २३ ॥
अहो बलवती माया मोहयत्यखिलं जगत् । पुत्रमित्रकलत्राद्यैः सर्वदुःखेन योज्यते ॥ २४ ॥
परद्रव्यापहारेण कलत्रं योषितं च यत् । अन्ते तत्सर्वमुत्सृज्य एक एव प्रयाति वै ॥ २५ ॥
मम माता मम पिता मम भार्या ममात्मजा । ममेदमिति जन्तूनां ममता बाधते वृथा ॥ २६ ॥
यावदर्पयति द्रव्यं तावद्भवति बान्धवः । अर्जितं तु धनं सर्वे भुञ्जन्ते बान्धवाः सदा ॥ २७ ॥
दुःखमेकतमो मूढस्तत्पापफलमश्नुते । इति ब्रुवाणं तमृषिं विमृश्य भयविह्वलः ॥ २८ ॥
कलिकः प्राञ्जलिः प्राह क्षमस्वेति पुनः पुनः । तत्सङ्गस्य प्रभावेन हरिसन्निधिमात्रतः ॥ २९ ॥
गतपापो लुब्धकश्च सानुतापोऽभवद्ध्रुवम् । मया कृतानि पापानि महान्ति सुबहूनि च ॥ ३० ॥
तानि सर्वाणि नष्टानि विप्रेन्द्र तव दर्शनात् । अहं वै पापधीर्नित्यं महापापसमाचरम् ॥ ३१ ॥
कथं मे निष्कृतिर्भूयात् कं यामि शरणं विभो । पुनर्जन्मार्जितैः पापैर्लुब्धकत्वमवाप्तवान् ॥ ३२ ॥
अत्रापि पापजालानि कृत्वा कां गतिमाप्नुयाम् । इति वाक्यं समाकर्ण्य कलिकस्य महात्मनः ॥ ३३ ॥

उत्तङ्को नाम विप्रर्षिरिदं वाक्यमथाब्रवीत् ।

उत्तङ्क उवाच । साधु साधु महाप्राज्ञ मतिस्ते विमलोज्ज्वला ॥ ३४ ॥
यस्मात्संसारदुःखानां नाशोपायमभीप्ससि । चैत्रे मासि सिते पक्षे कथा रामायणस्य च ॥ ३५ ॥
नवाह्ना किल श्रोतव्या भक्तिभावेन सादरम् । यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ ३६ ॥
तस्मिन् क्षणेऽसौ कलिको लुब्धको वीतकल्मषः । रामायणकथां श्रुत्वा सद्यः पञ्चत्वमागतः ॥ ३७ ॥
उत्तङ्कः पतितं वीक्ष्य लुब्धकं तं दयापरः । एतद्दृष्ट्वा विस्मितश्च अस्तौषीत्कमलापतिम् ॥ ३८ ॥

कथां रामायणस्यापि श्रुत्वा च वीतकल्मषः । दिव्यं विमानमारुह्य मुनिमेतदथाब्रवीत् ॥ ३९ ॥
विमुक्तस्त्वत्प्रसादेन महापातकसङ्कटात् । तस्मान्नतोस्मि ते विद्वन् यत्कृतं तत्क्षमस्व मे ॥ ४० ॥
सूत उवाच। इत्युक्त्वा देवकुसुमैर्मुनिश्रेष्ठमवाकिरन् । प्रदक्षिणात्रयं कृत्वा नमस्कारं पुन पुनः ॥ ४१ ॥
ततो विमानमारुह्य सर्वकामसमन्वितम् । अप्सरोगणसङ्कीर्णं ययेदे हरिमन्दिरम् ॥ ४२ ॥
तस्माच्छृणुध्वं विप्रेन्द्राः कथां रामायणस्य च । चैत्रे मासि सिते पक्षे श्रोतव्यं च प्रयत्नतः ॥ ४३ ॥
नवाह्ना किल रामस्य रामायणकथामृतम् । तस्माद्दतुषु सर्वेषु हितकृद्धरिपूजकः ॥ ४४ ॥
ईप्सितं मनसा यद्यत् तदाप्नोति न संशयः । सनत्कुमारैर्यत्पृष्टं तत्सर्वं गदितं मया ॥ ४५ ॥
रामायणस्य माहात्म्यं किमन्यच्छ्रोतुमिच्छसि । ॥ ४६ ॥

इति श्रीस्कन्द० उत्तरखण्डे नारदसनत्कुमारसंवादे रामायणमाहात्म्ये चैत्रमासफलानुकीर्तनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

सूत उवाच।रामायणस्य माहात्म्यं कथितं वो मुनीश्वराः।इदानीं श्रोतुमिच्छामि विधिं रामायणस्य च॥ १ ॥
एतच्चापि महाभाग मुने तत्त्वार्थकोविद । कृपया परयाविष्टो यथावद्वक्तुमर्हसि ॥ २ ॥
नारद उवाच।रामायणविधिं चैव शृणुध्वं सुसमाहिताः। सर्वलोकेषु विख्यातं स्वर्गमोक्षविवर्धनम्॥ ३ ॥
विधानं तस्य वक्ष्यामि शृणुध्वं गदतो मम । रामायणकथां कुर्वन् भक्तिभावेन चार्चिताः ॥ ४ ॥
येन चीर्णेन पापानां कोटिकोटिः प्रणश्यति । चैत्रे माघे कार्त्तिके च पञ्चम्यामथवारभेत् ॥ ५ ॥
सङ्कल्पं तु ततः कुर्यात्स्वस्तिवाचनपूर्वकम् । अहोभिर्नवभिः श्राव्यं रामायणकथामृतम् ॥ ६ ॥
आदितश्चान्तपर्यन्तं नवाह्ना तत्कथामृतम् । प्रत्यहं शृणुयाद्यस्तु रामचन्द्रप्रसादतः ॥ ७ ॥
प्रत्यहं दन्तकाष्ठं च अपामार्गस्य शाखया । कृत्वा स्नायीत विधिवद्रामभक्तिपरायणः ॥ ८ ॥
स्वयं च बन्धुभिः सार्द्धं शृणुयात्प्रयतेन्द्रियः । स्नानं कृत्वा यथाचारं दन्तधावनपूर्वकम् ॥ ९ ॥
शुक्लाम्बरधरः शुद्धो गृहमागत्य वाग्यतः । प्रक्षाल्य पादावाचम्य स्मरन्नारायणं प्रभुम् ॥ १० ॥
नित्यं देवार्चनं कृत्वा पश्चात्सङ्कल्पपूर्वकम् । रामायणपुस्तकं च अर्चयेद्भक्तिभावतः ॥ ११ ॥
आवाहनासनाद्यैश्च गन्धपुष्पादिभिर्व्रती । ॐ नमोनारायणायेति पूजयेद्भक्तितत्परः ॥ १२ ॥
एकवारं द्विवारं वा त्रिवारं वापि शक्तितः । होमं कुर्य्यात्प्रयत्नेन सर्वपापनिवृत्तये ॥ १३ ॥
एवं यः प्रयतः कुर्याद्रामायणविधिं तथा । स याति विष्णुभवनं पुनरावृत्तिदुर्लभम् ॥ १४ ॥
रामायणव्रतकर्त्ता धर्मकारी च सत्तमः । चाण्डालं पतितं वापि वस्त्रान्नेनापि नार्चयेत् ॥ १५ ॥
नास्तिकान् भिन्नमर्य्यादान्निन्दकान् पिशुनानपि । रामायणव्रतपरो वाङ्मात्रेणापि नार्चयेत् ॥ १६ ॥
कुण्डाशिनं गायकं च तथा देवलकाशनम् । भिषजं काव्यकर्त्तारं देवद्विजविरोधिनम् ॥ १७ ॥
परान्नलोलुपं चैव परस्त्रीनिरतं तथा । रामायणव्रतपरो वाङ्मात्रेणापि नार्चयेत् ॥ १८ ॥
इत्येवमादिभिः शुद्धो वशी सर्वहिते रतः । रामायणपरो भूत्वा परां सिद्धिं गमिष्यति ॥ १९ ॥
नास्ति गङ्गासमं तीर्थं नास्ति मातृसमो गुरुः ।नास्ति विष्णुसमो देवो नास्ति रामायणात्परम्॥ २० ॥
नास्ति वेदसमं शास्त्रं नास्ति शान्तिसमं सुखम् ।नास्ति शान्तिपरं ज्योतिर्नास्ति रामायणात्परम्॥ २१ ॥
नास्ति क्षमासमं सारं नास्ति कीर्त्तिसमं धनम् ।नास्ति ज्ञानसमो लाभो नास्ति रामायणात्परम्॥ २२ ॥
तदन्ते वेदविदुषे गां दद्याच्च सदक्षिणाम् । रामायणं पुस्तकं च वस्त्रालङ्करणादिकम् ॥ २३ ॥
रामायणपुस्तकं यो वाचकाय प्रयच्छति । स याति विष्णुभवनं यत्र गत्वा न शोचति ॥ २४ ॥
नवदिनफलं कर्तुः शृणु धर्मविदां वर । पञ्चमेहनि चारभ्य रामायणकथामृतम् ॥ २५ ॥

कथाश्रवणमात्रेण सर्वपापैः प्रमुच्यते । यदीह यत्कृतं तस्य पुण्डरीकफलं लभेत् ॥ २६ ॥
व्रतधारी तु श्रवणं यः कुर्यात्स जितेन्द्रियः । अश्वमेधस्य यज्ञस्य द्विगुणं फलमश्नुते ॥ २७ ॥
रामायणं श्रुतं येन कथितं मुनिसत्तमाः । स लभेत्परमं पुण्यमग्निष्टोमाष्टसंभवम् ॥ २८ ॥
पञ्चकृत्वो व्रतमिदं येन सर्वं महात्मना । अग्निष्टोमाक्षयं पुण्यं द्विगुणं पुण्यमाप्नुयात् ॥ २९ ॥
एवं व्रतं च षड्वारं कुर्याद्यस्तु समाहितः । अग्निष्टोमस्य यज्ञस्य फलमष्टगुणं लभेत् ॥ ३० ॥
नारी वा पुरुषः कुर्य्यादष्टकृत्वो मुनीश्वराः । नरमेधस्य यज्ञस्य फलं पञ्चगुणं लभेत् ॥ ३१ ॥
नरो वा प्यथ नारी वा नवरात्रौ समाचरेत् । गोमेधसवजं पुण्यं स लभेत्त्रिगुणं नरः ॥ ३२ ॥
रामायणं तु यः कुर्य्याच्छान्तात्मा प्रयतेन्द्रियः । स याति परमानन्दं यत्र गत्वा न शोचति ॥ ३३ ॥
रामायणपरो नित्यं गङ्गास्नानपरायणः । धर्ममार्गप्रवक्तारो मुक्ता एवं न संशयः ॥ ३४ ॥
यतीनां ब्रह्मचारीणां व्रतीराणां च सत्तमाः । नवाह्ना किल श्रोतव्यं कथा रामायणस्य च ॥ ३५ ॥
श्रुत्वा नरो रामकथामेतदाप्नोति भक्तितः । ब्रह्मणः पदमासाद्य तत्रैव परिमोदते ॥ ३६ ॥
तस्माच्छृणुध्वं विप्रेन्द्रा रामायणकथामृतम् । श्रोतॄणां च परं श्राव्यं पवित्राणामनुत्तमम् ॥ ३७ ॥
दुःस्वप्ननाशनं धन्यं श्रोतव्यं च प्रयत्नतः । वरोत्र श्रद्धया युक्तं श्लोकं श्लोकार्द्धमेव च ॥ ३८ ॥
पठनान्मुच्यते सद्यो ह्युपपातककोटिभिः । सतामेव प्रयोक्तव्यं गुह्याद्गुह्यतमं तु यत् ॥ ३९ ॥
वाचयेद्रामभवने पुण्यक्षेत्रे च संसदि । ब्रह्मद्वेषरतानां च दम्भाचाररतात्मनाम् ॥ ४० ॥
लोकवञ्चकवृत्तीनां न ब्रूयादिदमुत्तमम् । त्यक्तकामादिदोषाणां रामभक्तिरतात्मनाम् ॥ ४१ ॥
गुरुभक्तिरतानां च वक्तव्यं मोक्षसाधनम् । सर्वदेवमयो रामः स्मृतश्चार्त्तिप्रणाशनः ॥ ४२ ॥
सद्भक्तवत्सलो देवो भक्त्या तुष्यति नान्यथा । अवशेनापि यन्नामकीर्त्तिते वा स्मृतेऽपि वा ॥ ४३ ॥
विमुक्तपातकः सोपि परमं पदमश्नुते । संसारघोरकान्तारदावाग्निमधुसूदनः ॥ ४४ ॥
स्मरणं सर्वपापानि नाशयत्याशु सत्तमाः । मदर्थकमिदं पुण्यं काव्यं शुश्राव चोत्तमम् ॥ ४५ ॥
श्रवणात्पठनाद्वापि सर्वपापविनाशकः । यस्य रामरसे प्रीतिर्वर्त्तते भक्तिसंयुता ॥ ४६ ॥
स एव कृतकृत्यश्च सर्वशास्त्रार्थकोविदः । तदार्जितं तपः पुण्यं तत्सत्यं सफलं द्विजाः ॥ ४७ ॥
यदर्थश्रवणे प्रीतिरन्यथा न हि वर्त्तते । रामायणपरा ये तु रामनामपरायणाः ॥ ४८ ॥
त एव कृतकृत्याश्च घोरे कलियुगे द्विजाः । नवाह्ना किल श्रोतव्यं रामायणकथामृतम् ॥ ४९ ॥
ते कृतज्ञा महात्मानस्तेषां नित्यं नमो नमः । रामनामैव नामैव नामैव मम जीवनम् ॥ ५० ॥
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ।

सूत उवाच । एवं सनत्कुमारस्तु नारदेन महात्मना ॥ ५१ ॥
सम्यक् प्रबोधितः सद्यः परां निर्वृतिमाप ह । तस्माच्छृणुध्वं विप्रेन्द्रा रामायणकथामृतम् ॥ ५२ ॥
नवाह्ना किल श्रोतव्यं सर्वपापैः प्रमुच्यते । श्रुत्वा चैतन्महाकाव्यं वाचकं यस्तु पूजयेत् ॥ ५३ ॥
तस्य विष्णुः प्रसन्नः स्याच्छ्रिया सह द्विजोत्तमाः । वाचके प्रीतिमापन्ने ब्रह्मा विष्णुमहेश्वराः ॥ ५४ ॥
प्रीता भवन्ति विप्रेन्द्रा नात्र कार्य्या विचारणा । रामायणवाचकाय गावो वासांसि काञ्चनम् ॥ ५५ ॥
रामायणपुस्तकं च दद्याद्वित्तानुसारतः । तस्य पुण्यफलं वक्ष्ये शृणुध्वं सुसमाहिताः ॥ ५६ ॥
न बाधन्ते ग्रहास्तस्य भूतवेतालकादयः । तस्यैव सर्वश्रेयांसि वर्द्धन्ते चरिते श्रुते ॥ ५७ ॥
न चाग्निर्बाधते तस्य न चौरादिभयं तथा । एतज्जन्मार्जितैः पापैः सद्य एव विमुच्यते ॥ ५८ ॥
सप्तवंशसमे ते तु देहान्ते मोक्षमाप्नुयात् । इत्येतद्वः समाख्यातं नारदेन प्रभाषितम् ॥ ५९ ॥

सनत्कुमारमुनये पृच्छते भक्तितः पुरा । रामायणमादिकाव्यं सर्ववेदार्थसम्मतम् ॥ ६० ॥
सर्वपापहरं पुण्यं सर्वदुःखनिबर्हणम् । समस्तपुण्यफलदं सर्वयज्ञफलप्रदम् ॥ ६१ ॥
ये पठन्त्यत्र विबुधाः श्लोकं श्लोकार्द्धमेव च । न तेषां पापबन्धस्तु कदाचिदपि जायते ॥ ६२ ॥
रामार्पितमिदं पुण्यं काव्यं तु सर्वकामदम् । भक्त्या शृण्वन्ति विदन्ति तेषां पुण्यफलं शृणु ॥६३॥
शतजन्मार्जितैः पापैः सद्य एव विमोचिताः । सहस्रकुलसंयुक्तैः प्रयान्ति परमं पदम् ॥ ६४ ॥
किं तीर्थैर्गोप्रदानैर्वा किं तपोभिः किमध्वरैः । अहन्यहनि रामस्य कीर्त्तनं परिशृण्वताम् ॥ ६५ ॥
चैत्रे माघे कार्तिके च रामायणकथामृतम् । नवैरहोभिः श्रोतव्यं रामायणकथामृतम् ॥ ६६ ॥
रामप्रसादजनकं रामभक्तिविवर्धनम् । सर्वपापक्षयकरं सर्वसंपद्विवर्द्धनम् ॥ ६७ ॥
यस्त्वेतच्छृणुयाद्वापि पठेद्वा सुसमाहितः । सर्वपापविनिर्मुक्तो विष्णुलोके स गच्छति ॥ ६८ ॥

इति श्रीस्कन्दपुराणे उत्तरखण्डे रामायणमाहात्म्ये नारदसनत्कुमारसंवादे फलानुकीर्त्तनं नाम पञ्चमोऽध्यायः ॥५॥

॥ ॐ तत्सत्परमात्मने नमः ॥

अथ स्मार्तानां श्रीरामायणपठनोपक्रमानुसन्धेयक्रमः ।



श्रीमहागणपतिध्यानम् ॥ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननम् ॥ २ ॥ अनन्तरं श्रीमच्छङ्करभगवत्पादादिगुरुपरम्परानुसन्धेया ॥ **सरस्वतीप्रार्थना** ॥ ॥ दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण । भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा भासमाना समाना सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ ३ ॥ ॥ **वाल्मीकिनमस्क्रिया** ॥ ॥ कूजन्तं राम रामेति मधुरं मधुराक्षरम् । आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ४ ॥ वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः । शृण्वन्रामकथानादं को न याति परां गतिम् ॥ ५ ॥ यः पिबन्सततं रामचरितामृतसागरम् । अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ ६ ॥ ॥ **हनुमन्नमस्क्रिया** ॥ ॥ गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् । रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ७ ॥ अञ्जनानन्दनं वीरं जानकीशोकनाशनम् । कपीशमक्षहन्तारं वन्दे लङ्काभयंकरम् ॥ ८ ॥ उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः । आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ९ ॥ आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् । पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥ १० ॥ यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् । बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥ ११ ॥ मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् । वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ १२ ॥ ॥ **श्रीरामायणप्रार्थना** ॥ ॥ यः कर्णाञ्जलिसंपुटैरहरहः सम्यक्पिबत्यादराद्वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु । जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं संसारं स विहाय गच्छति पुमान्विष्णोः पदं शाश्वतम् ॥ १३ ॥ तदुपगतसमाससन्धियोगं समधुरोपनतार्थवाक्यबद्धम् । रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ १४ ॥ वाल्मीकिगिरिसंभूता रामसागरगामिनी । पुनातु भुवनं पुण्या रामायणमहानदी ॥ १५ ॥ श्लोकसारसमाकीर्णं सर्गकल्लोलसङ्कुलम् । काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥ १६ ॥ वेदवेद्ये परे पुंसि जाते दशरथात्मजे । वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥ १७ ॥ ॥ **श्रीरामध्यानक्रमः** ॥ ॥ वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् । अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ १८ ॥ वामे भूमिसुता पुरश्च हनुमान् पश्चात्सुमित्रासुतः शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च । सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥ १९ ॥ नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै । नमोस्तु रुद्रेन्द्रयमानिलेभ्यो नमोस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ २० ॥ ततः श्रीकोशोपरि श्रीरामावाहनादिनैवेद्यान्तपूजा विधेया । पारायणावसाने च पुनः पूजा कर्तव्या ॥

पारायणसमापनसमयानुसन्धेयश्लोकक्रमः ॥ ॥ स्वस्ति प्रजाभ्यः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः । गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥ १ ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी। देशोयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ २ ॥ अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः। अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ ३ ॥ चरितं रघुनाथस्य शतकोटिप्रविस्तरम्। एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥ ४ ॥ शृण्वन्नामायणं भक्त्या यः पादं पदमेव वा। स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥ ५ ॥ रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथाय नाथाय सीतायाः पतये नमः ॥ ६ ॥ यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते। वृत्रनाशे समभवत्तत्ते भवतु मङ्गलम् ॥ ७ ॥ यन्मङ्गलं सुपर्णस्य विनताऽकल्पयत्पुरा। अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥ ८ ॥ मङ्गलं कोसलेन्द्राय महनीयगुणात्मने। चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ९ ॥ अमृतोत्पादने दैत्यान् घ्नतो वज्रधरस्य यत्। अदितिर्मङ्गलं प्रादात्तत्ते भवतु मङ्गलम् ॥ १० ॥ त्रीन्विक्रमान् प्रक्रमतो विष्णोरमिततेजसः। यदासीन्मङ्गलं राम तत्ते भवतु मङ्गलम् ॥ ११ ॥ ऋतवः सागरा द्वीपा वेदा लोका दिशश्च ते। मङ्गलानि महाबाहो दिशन्तु तव सर्वदा ॥ १२ ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात्। करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥ १३ ॥

श्रीसीताविवाहपट्टाभिषेकसर्गयोस्तु—'इयं सीता अभ्यषिञ्चन्' इति श्लोकपठनात् पूर्वं विशेषतो ध्यानावाहनदेवेज्यादिनीराजनान्तसपर्या संविधेया ॥

अथ वैष्णवानां श्रीरामायणपठनोपक्रमानुसन्धेयक्रमः।

प्रथमतः स्वस्वसंप्रदायनिर्वाहकाचार्यानुसन्धानम्। ततः लक्ष्मीनाथेत्यारभ्य प्रणतोस्मि नित्यमित्यन्तम्। अनन्तरं श्रीशैलपूर्णाविषयं पितामहस्येति श्लोकमारभ्य श्रीभाष्यकारप्रभृतिस्वाचार्यपर्यन्तविषयाः साम्प्रदायिकश्लोका अनुसन्धेयाः। यद्वा श्रीधरादिस्वाचार्यपर्यन्ताः प्रतिव्यक्तिश्लोका अनुसन्धेयाः ॥ ततः—कूजन्तं राम रामेति मधुरं मधुराक्षरम्। आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ १ ॥ वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः। शृण्वन्रामकथानादं को न याति परां गतिम् ॥ २ ॥ यः पिबन्सततं रामचरितामृतसागरम्। अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ ३ ॥ गोष्पदीकृतवाराशिं मशकीकृतराक्षसम्। रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ४ ॥ अञ्जनानन्दनं वीरं जानकीशोकनाशनम्। कपीशमक्षहन्तारं वन्दे लङ्काभयंकरम् ॥ ५ ॥ मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्। वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ ६ ॥ उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः। आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ७ ॥ आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम्। पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥ ८ ॥ यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम्। बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥ ९ ॥ वेदवेद्ये परे पुंसि जाते दशरथात्मजे। वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ १० ॥ तदुपगतसमासस-न्धियोगं सममधुरोपनतार्थवाक्यबद्धम्। रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ ११ ॥ श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम्। आजानुबाहुमरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि ॥ १२ ॥ वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम्। अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ १३ ॥ ततो यथाशक्ति श्रीकोशोपरि भगवदाराधनं कर्तव्यम् ॥

पारायणसमापनक्रमः ॥ ॥ एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः । प्रत्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ १ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ २ ॥ काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी । देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ ३ ॥ कावेरी वर्धतां काले काले वर्षतु वासवः । श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम् ॥ ४ ॥ स्वस्ति प्रजाभ्यः परिपालयन्तां न्याय्येन मार्गेण महीं महीशाः । गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥ ५ ॥ मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये । चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ६ ॥ वेदवेदान्तवेद्याय मेघश्यामलमूर्तये । पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ ७ ॥ विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः । भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ ८ ॥ पितृभक्ताय सततं भ्रातृभिः सह सीतया । नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ ९ ॥ त्यक्तसाकेतवासाय चित्रकूटविहारिणे । सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ १० ॥ सौमित्रिणा च जानक्या चापबाणासिधारिणे । संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ११ ॥ दण्डकारण्यवासाय खण्डितामरशत्रवे । गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ १२ ॥ सादरं शबरीदत्तफलमूलाभिलाषिणे । सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ १३ ॥ हनुमत्समवेताय हरीशाभीष्टदायिने । वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥ १४ ॥ श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे । जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १५ ॥ आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया । राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १६ ॥ मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः । सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १७ ॥ ततः पितामहस्येत्यारभ्य स्वाचार्यान्ताः श्लोका अनुसन्धेयाः । सीताविवाहपट्टाभिषेकसर्गयोस्तु–इयं सीता मम सुता, अभ्यषिञ्चन्नरव्याघ्रम् इति श्लोकपठनात् पूर्वं मध्ये विशेषतो भगवदाराधनं च कर्त्तव्यम् ॥

अथ माध्वानां रामायणपठनोपक्रमोनुसन्धेयक्रमः।

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः। शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥ लक्ष्मीनारायणं वन्दे तद्भक्तप्रवरो हि यः । श्रीमदानन्दतीर्थाख्यो गुरुस्तं च नमाम्यहम् ॥ २ ॥ वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥ ३ ॥ सर्वविघ्नप्रशमनं सर्वसिद्धिकरं परम् । सर्वजीवप्रणेतारं वन्दे विजयदं हरिम् ॥ ४ ॥ सर्वाभीष्टप्रदं रामं सर्वारिष्टनिवारकम् । जानकीजानिमनिशं वन्दे मद्गुरुवन्दितम् ॥ ५ ॥ अभ्रमं भङ्गरहितमजडं विमलं सदा । आनन्दतीर्थमतुलं भजे तापत्रयापहम् ॥ ६ ॥ भवति यदनुभावादेडमूकोऽपि वाग्मी जडमतिरपि जन्तुर्जायते प्राज्ञमौलिः । सकलवचनचेतो देवता भारती सा मम वचसि निधत्तां सन्निधिं मानसे च ॥ ७ ॥ मिथ्यासिद्धान्तदुर्ध्वान्तविध्वंसनविचक्षणः । जयतीर्थाख्यतरणिर्भासतां नो हृदम्बरे ॥ ८ ॥ चित्रैः पदैश्च गम्भीरैर्वाक्यैर्मानैरखण्डितैः । गुरुभावं व्यञ्जयन्ती भाति श्रीजयतीर्थवाक् ॥ ९ ॥ कूजन्तं रामरामेति मधुरं मधुराक्षरम् । आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ १० ॥ वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः । शृण्वन्रामकथानादं को न याति परां गतिम् ॥ ११ ॥ यः पिबन्सततं रामचरितामृतसागरम् । अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ १२ ॥ गोष्पदीकृतवारांशिं मशकीकृतराक्षसम् । रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ १३ ॥ अञ्जनानन्दनं वीरं जानकीशोकनाशनम् । कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ १४ ॥ मनोजवं मारुततुल्यवेगं

जितेन्द्रियं बुद्धिमतां वरिष्ठम् । वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ १५ ॥ उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः । आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥ १६ ॥ आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् । पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥ १७ ॥ यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् । बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥ १८ ॥ वेदवेद्ये परे पुंसि जाते दशरथात्मजे । वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ १९ ॥ आपदामपहर्तारं दातारं सर्वसम्पदाम् । लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २० ॥ तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् । रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ २१ ॥ वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् । अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं व्याख्यातं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ २२ ॥ वन्दे वन्द्यं विधिभवमहेन्द्रादिवृन्दारकेन्द्रैर्व्यक्तं व्याप्तं स्वगुणगणतो देशतः कालतश्च । भूतावद्यं सुखचितिमयैर्मङ्गलैर्युक्तमङ्गैः सानाथ्यं नो विदधदधिकं ब्रह्म नारायणाख्यम् ॥ २३ ॥ भूपारत्नं भुवनवलयस्याखिलाश्चर्यरत्नं लीलारत्नं जलधिदुहितुर्देवतामौलिरत्नम् । चिन्तारत्नं जगति भजतां सत्सरोजद्युरत्नं कौसल्याया लसतु मम हृन्मण्डले पुत्ररत्नम् ॥ २४ ॥ महाव्याकरणाम्भोधिमन्थमानसमन्दरम् । कवयन्तं रामकीर्त्या हनुमन्तमुपास्महे ॥ २५ ॥ मुख्यप्राणाय भीमाय नमो यस्य भुजान्तरम् । नानावीरसुवर्णानां निकषाश्मायितं बभौ ॥ २६ ॥ स्वान्तस्थानन्तशय्याय पूर्णज्ञानमहार्णवे । उत्तुङ्गवाक्तरङ्गाय मध्वदुग्धाब्धये नमः ॥ २७ ॥ वाल्मीकेर्गीः पुनीयान्नो महीधरपदाश्रया । यदुग्धमुपजीवन्ति कवयस्तर्णका इव ॥ २८ ॥ सूक्तिरत्नाकरे रम्ये मूलरामायणार्णवे । विहरन्तो महीयांसः प्रीयन्तां गुरवो मम ॥ २९ ॥ हयग्रीव हयग्रीव हयग्रीवेति यो वदेत् । तस्य निस्सरते वाणी जह्नुकन्याप्रवाहवत् ॥ ३० ॥

पारायणसमापनक्रमः ॥ ॥ स्वस्ति प्रजाभ्यः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः । गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ताः सुखिनो भवन्तु ॥ १ ॥ काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी । देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ २ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ३ ॥ मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये । चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ४ ॥ इत्यादिश्लोकाः श्रीवैष्णवपद्धतिवदनुसन्धेयाः ॥

एवं पाठक्रमं ज्ञात्वा ध्यात्वा रामं सशक्तिकम् ॥
कुर्वन् पाठं सावधानमभीष्टं सावयेन्नरः ॥ १ ॥

श्रीः

आदिकविश्रीवाल्मीकिमुनिप्रणीत-

रामायणस्य

बालकाण्डम् ।

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

तिलक–रामायणशिरोमणि--गोविन्दराजीये(भूषणे)ति-
टीकात्रयसमलंकृतम्

बालकाण्डम् ।

प्रथमः सर्गः ।

आदिकविश्रीवाल्मीकेर्नारदं प्रति प्रश्नः । तस्योत्तररूपेण संक्षेपतो नारदकृतं रामचरितवर्णनं, तच्छ्रवणफलकथनं च

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् । नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवम् ॥ १ ॥

अथ रामकृता तिलकाख्या टीका ।

श्रीगणेशाय नमः ॥ श्रीसीतारामचन्द्राभ्यां नमः ॥

श्रीमद्राघवपादपद्मयुगलं पद्मार्चितं पद्मया पद्मस्थेन तु पद्मजेन विनुतं पद्माश्रयस्थाप्तये ।
यद्वेदैश्च नुतं सुखैकनिलयं सर्वाश्रयं निष्क्रियं शश्वच्छंकरशंकरं मुहुरहो सन्नौमि तल्लब्धये ॥ १ ॥
श्रीमद्ब्रह्म तदेव बीजममलं यस्याङ्कुरश्चिन्मयः काण्डैः सप्तभिरन्वितोऽतिविततो ऋष्यालवालोदितः ।
पत्रैस्तत्त्वसहस्रकैः सुविलसच्छाखाशतैः पञ्चभिश्चात्मप्राप्तिफलप्रदो विजयते रामायणस्वस्तरुः ॥ २ ॥
वाल्मीकिगिरिसंभूता रामाम्भोनिधिसंगता । श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम् ॥ ३ ॥
वेदवेद्ये परे पुंसि जाते दशरथात्मजे । वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ ४ ॥
रामं रामानुजं सीतां भरतं भरतानुजम् । सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥ ५ ॥
कूजन्तं रामरामेति मधुरं मधुराक्षरम् । आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ६ ॥
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः । शृण्वन्रामकथानादं को न याति परां गतिम् ॥ ७ ॥
यः पिबन्सततं रामचरितामृतसागरम् । अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ ८ ॥
गोष्पदीकृतवारीशं मशकीकृतराक्षसम् । रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ९ ॥
अञ्जनानन्दनं वीरं जानकीशोकनाशनम् । कपीशमक्षहन्तारं वन्दे लङ्काभयंकरम् ॥ १० ॥
उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ११ ॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ १२ ॥

रामाय रामभद्राय रामचन्द्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १३ ॥
जयति रघुवंशतिलकः कौसल्याहृदयनन्दनो रामः । दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥ १४ ॥
जितं भगवता तेन हरिणा लोकधारिणा । अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥ १५ ॥
नत्वा रामं शिवं साम्बं रामो रामप्रवर्तकः । रामायणस्य तिलकं कुरुते रामतुष्टये ॥ १६ ॥

ननु रामायणस्यैहिकामुष्मिकफलदत्वे मानाभावादैहिकं तद्व्याख्यानेनेति चेन्न 'इदं पवित्रं पापघ्नम्' इत्यादि–'जनश्च शश्वदोऽपि महत्त्वमीयात्' इत्यन्तश्लोकैरैहिकार्थसाधकत्वस्य स्पष्टमत्रैव श्रूयमाणत्वात्, 'शृण्वन्रामायणं भक्त्या यः पादं पदमेव वा। स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा' इति मूलरामायणवचनेन ब्रह्मलोकावाप्तेः फलस्य स्पष्टमुक्तत्वाच्च। अपि च गायत्र्या ब्रह्मानुसंधानाद्ब्रह्मलोकावाप्तिवत्तत्प्रतिपाद्यस्य लीलावतारूपतया रामस्य विभववैभवानुसंधानेन ब्रह्मलोकावाप्तिरुचितैव। न च 'काव्यालापांश्च वर्जयेत्' इति निषेधप्रसक्तिस्तस्यानृषिप्रणीतपुरुषार्थसाधनकाव्यविषयत्वात्, यत्रास्याध्ययने त्रैवर्णिकस्याधिकारो गायत्रीप्रतिपाद्यार्थप्रतिपादकत्वात् श्रवणे तु स्त्रीशूद्रादीनामप्यधिकारः। अथादिकविर्वाल्मीकिः सर्वोत्तमवस्तुवर्णनाय कृतसंकल्पो दिव्यतत्काव्यकृतिशक्तिलाभाय तादृशवस्तुज्ञानाय च कृतकष्टसमाधिसाधितपरमपुण्यचयस्ततपुण्यचयसूचितभगवन्नियोगसमुपागतं देवर्षिं नारदमभ्यर्च्य 'को न्वस्मिन्' इत्यादि पप्रच्छ। स च देवर्षी रामकथामुदितमना रामचरितमनुस्मृत्य संक्षेपत उपदिश्य यथागतं जगाम। ततस्तदनुग्रहलब्धं रामचरितरहस्यं निरवशेषं तत्प्रसादादेव सम्यग्विज्ञाय भूलोकवर्तिनां चतुर्णां वर्णानां तापत्रयविमोचनाय ब्रह्मांशभूत एव भगवान्प्राचेतसो वाल्मीकिः स्वकृतशतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यपरमब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामग्राहयत्। तस्यास्य दिव्यकाव्यस्यायः सर्गो वाल्मीकेर्नारदस्योपदेशरूपः। तत्र 'नापृष्टः कस्यचिद्ब्रूयात्' इति न्यायेनापेक्षितप्रश्नोपक्षेपः—

तपःस्वाध्यायेत्यादि। 'श्रुत्वा चैतत्' इत्यन्तेन संबन्धः। तपस्त्वेन श्रुतः स्वाध्यायस्तपःस्वाध्यायः। "तपः स्वाध्याय इति ब्राह्मणम्" इत्यापस्तम्बोक्तेः। स्वाध्यायशब्देनाप्रायत्यानध्ययनकालदेशपरिहारादिनियमोपेततया फलवदर्थावबोधपर्यन्तं स्वशाखाध्ययनमुच्यते। तस्मिन्निरतः तदभ्यासनिरत इति यावत्। यत्तु तपश्च स्वाध्यायश्च तपःस्वाध्यायौ तयोर्निरतः। तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनियमादिकमोच्यते। यद्वा "यस्य ज्ञानमयं तपः" इति श्रुतेस्तपःशब्देन ब्रह्मविषयज्ञानमुच्यत इति, तन्न। तपोविशिष्टपुंविशेषप्रसिद्धमुनिपुंगवशब्देनैवोक्ततपःसंपत्तेः सिद्धत्वादिति कृतककृतः। एवं हि तपोरतमित्येव सिद्धे स्वाध्यायपदवैयर्थ्यापत्तिः। तस्मात्तपःशब्देन निदिध्यासनजन्यपरिपाकवद्ब्रह्मज्ञानमुच्यते। मुनिपुंगवशब्देन मननजन्यपरिपाकवत्त्वमेवोच्यत इति न तेन गतार्थतेत्यन्ये। वाग्विदां स्वरूपतोऽर्थतश्च शब्दब्रह्मतत्त्वविदां पाणिनिपतञ्जल्यादीनां मध्ये वरं श्रेष्ठम्। मुनिशब्द उक्तार्थः। तेषु पुंगवं श्रेष्ठम्। एवं विशिष्टं नारदम्। तपस्वी कृच्छ्रैकादशुपवासादिलक्षणं मुख्यं तपः, "तपो नानशनात्परम्" इति श्रुतेः स्वाध्यायरूपं च तपः, समनस्केन्द्रियाणामैकाग्र्यरूपं च तपस्तद्वान्। वाल्मीकिर्वल्मीकस्यापत्यम् 'वल्मीकप्रभवो यस्मात्तस्माद्वाल्मीकिरित्यसौ' इति ब्रह्मवैवर्तोक्तेः। वल्मीकप्रभव त्वेन गोणीपुत्रादिवद्गौणमस्य वल्मीकापत्यत्वं गृहीत्वेत्यर्थः। यद्वा वल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः। नारदम् नराणामिदं नारमज्ञानं तद्यति खण्डयति ज्ञानोपदेशेनेति नारदः 'गायत्रारायणकथां सदा पापभयापहाम्। नारदो नाशयत्रेति नृणामज्ञानजं तमः' इति नारदीयोक्तेः। तं पप्रच्छेत्वन्वयः। अत्र प्रष्टुरुक्तविशेषणेन दिव्यार्थविषयश्रवणाधिकारसंपदुक्ता। वक्तुरप्युक्तविशेषणैः सार्वज्ञ्यादि प्रतिपादितम्। ग्रहणधारणहेतुशिष्यानुग्रहशक्तिमत्त्वं च प्रतिपादितम्॥ १॥

रामायणशिरोमण्याख्या टीका।

श्रीगणेशाय नमः।

श्रीसीतारामचन्द्राभ्यां नमः॥ श्रीहनुमते नमः

स्वस्तिश्रीमन्तं करुणावन्तं श्रीहनुमन्तं नौमि कले।
नित्यं विहरन्तं हरिजनवन्तं क्षमावहन्तं कीशबले॥
सीतापतिपातिकं पररसरसिकं श्रितजनमतिकं दीनपातिम्।
रघुनायकहृदयं हृद्रिपुविजयं शरणदमभयं सर्वनतिम्॥ १॥
वन्दे श्रीसहितं गुरुमतिमहितं श्रुतिरसदयितं परममहम्।
सीतारघुवीरं सुखमतिधीरं सुखदगभीरं विदितमहम्॥
विधिहरिहरवन्द्यं श्रितजननन्द्यं प्रीतिमदाद्यं श्रुतिगम्यम्।
साकेतपुरेशं द्विभुजपरेशं सर्वसुरेशं द्युतिरम्यम्॥ २॥
निश्शेषश्रुतिसारभूतममलं संतापसन्नाशकं
सीताराम पदारविन्दरसिकैः संसेव्यमानं सदा
वाल्मीकेर्मुखनिस्सृतं सुरनुतं रामायणं श्रीकरं
ब्रह्मानन्दविबुधैर्निनान्तरणितं दयात्स्वमर्थं हि नः॥ ३॥
आसीद्भूसुरवंशविश्रुतयशाः श्रीतोडिरामस्ततः
सीताराम इति श्रुतोऽजनि ततोऽभूच्छ्रीलवंशीधरः।
लब्ध्वा संमतिमस्य रामचरणौ ध्यायंस्त्रिवेण्यास्तटे
श्रीवाल्मीकिमुनेः कृतौ कृतमना ह्यासं विचारावधौ॥ ४॥
सीतारामसमारम्भां शुकाचार्यादिमध्यगाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरंपराम्॥ ५॥
वंशीधरबुधैः सार्धं सहायः शिवपूर्वकः।
करोमि रामरामाय रामायणशिरोमणिम्॥ ६॥

अथ लवकुशयोमेङ्गलानि लिख्यन्ते।

श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम्।
आजानुबाहुमरविन्ददलायताक्षं रामं निशाचरविनाशकरं नमामि
कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥ २॥
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः।
शृण्वन् रामकथानादं को न याति परां गतिम्॥ ३॥
यः पिबन्सततं रामचरितामृतसागरम्।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम्॥ ४॥
गोष्पदीकृतवारीशं मशकीकृतराक्षसम्।
रामायणमहामालारत्नं वन्देऽनिलात्मजम्॥ ५॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयंकरम् ॥ ६ ॥
आमिषीकृतमार्तण्डं गोष्पदीकृतवारिधिम् ।
तृणीकृतदशग्रीवमाञ्जनेयं नमाम्यहम् ॥ ७ ॥
आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥ ८ ॥
यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥ ९ ॥
उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥१०॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं मनसा स्मरामि ॥११॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १२ ॥
वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥ १३ ॥
शृण्वन्रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूजितः सदा ॥ १४ ॥
यः कर्णाञ्जलिसंपुटैरहरहः सम्यक् पिबत्यादरा-
द्वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजरापिपत्तिमरणैरत्यन्तसोपद्रवं
संसारं स विहाय गच्छति पुमान्विष्णोः पदं शाश्वतम् ॥ १५ ॥
वाल्मीकिगिरिसंभूता रामसागरगामिनी ।
पुनाति भुवनं पुण्या रामायणमहानदी ॥ १६ ॥
श्लोकसारसमाकीर्णं सर्गकल्लोलसंकुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥ १७ ॥
रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥ १८ ॥
जितं भगवता तेन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥ १९ ॥
इति लवकुशयोर्मङ्गलस्तवं पठित्वा रामायणं पठेत् ।

" इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः " इत्यादिश्रुतिषु पुरुषस्यैव परत्वप्रतिपादनात् ' धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि । पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम्' इत्यादिवाल्मीकीयवचनात्पुरुषत्वस्य रघुनाथमात्रपर्यवसन्नत्वात् श्रुतौ चाव्यक्तशब्देन ' अव्यक्तं शंकरे विष्णावव्यक्तं महदादिषु । आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत् ' इति विश्वकोशाभिधानेन विष्ण्वादीनां ग्रहणात्साकारनिराकारब्रह्माङ्गित्वं रघुनाथस्य बोधितम् । अत एव लक्ष्मणांशभूतसंकर्षणान्तःस्थितश्रीरामस्य ' शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू ' इत्याद्युक्तिः संगच्छते । अत एव ' एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् ' अस्य पुंसो रघुनाथस्यैतेंऽशकलाः विष्णुर्नित्यं वृन्दावनविहारी स्वयं रघुनाथ एवेत्यर्थकस्य संगतिः । तु-शब्द एवार्थे । अयं भावः । निखिलेश्वरापेक्षया नन्दनन्दनौ रामान्तरङ्ग इति । अत एव—"देवानां पूरयोध्या तस्यां हिरण्मयः कोशः " इत्यादिश्रुतिभिस्तद्धान्नोऽपि सर्वपरत्वं व्याख्यातम् । अत एव 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' इति गीतावाक्ये अहमित्यपहाय अन्य इति वासुदेवोक्तिः संगच्छते । 'अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ' इत्युक्तिस्तु नन्दनन्दनेनाभेदमारोप्येति । किंच रामवाचकपुरुषोत्तमशब्दः निखिलेश्वर-नियन्तृपरः । अयं पुरुषोत्तमशब्दस्तु निखिलभूतजीवनियन्तृपर इति न विरोधः । रामादन्यत्रोपलब्धपुरुषोत्तमशब्दार्थस्तु पुरुषः परमपुरुषो राम एव उत्तमो यस्मादिति । अत एव ' वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् । ब्रह्मणा चोदितं तच्च शतकोटिप्रविस्तरम् ॥ व्याहृतं नारदेनैव वाल्मीकाय निवेदितम् ' इत्यादिवचनैर्ब्रह्मणो रामोपासकत्वं बोधितम् । अत एव शंकराचार्यरामानुजाचार्यमध्वाचार्याशित्वेन तत्तदभिमतैः शिवलक्ष्मणवायुभी रघुनाथ एवाश्रितः । अत एव " यदद्वैतं ब्रह्म यस्य तनुभा " इत्यादिश्रुतिः ' सर्वेषामवताराणामवतारी रघूत्तमः । रामपादनखज्योत्स्ना परब्रह्मेति गीयते इत्याद्यगस्त्यसंहितावचनं च संगच्छते । अत एव—'तस्मिन्साकेतलोके विधिहरहरिभिः सन्ततं सेव्यमाने दिव्ये सिंहासने स्वे जनकतनयया राघवः शोभमानः । युक्तो मत्स्यैरनेकैः करिभिरपि तथा नारसिंहैरनन्तैः कूर्मैः श्रीनन्दनन्दैर्हयगलहरिभिर्नित्यमाज्ञोन्मुखैश्च ॥ यज्ञः केशववामनौ नरवरो नारायणो धर्मजः श्रीकृष्णो हलधृक् तथा मधुरिपुः श्रीवासुदेवोऽपरः । एते नैकविधा महेन्द्रविधयो दुर्गादयः कोटिशः श्रीरामस्य पुरो निदेशसुमुखा नित्यास्तदीये पदे' इत्यादीनि बृहद्ब्रह्मसंहितावचनानि संगच्छन्ते । अत्र नन्दनन्दनशब्दः नन्दं नन्दयति विविधोक्त्या शोकत्याजनाद्वर्धयतीति मधुरानिवासिपरः । श्रीकृष्णशब्दो द्वारकानिवासिपर इति न विरोधः । अत एव—' नारायणादिरूपाणि साकारैश्वर्यमुत्तमम् । नित्यं ब्रह्म निराकारैश्वर्यं नित्यं विभाति च' इति सुन्दरीतन्त्रवचनम् । ' नारायणोऽपि रामांशः शङ्खचक्रगदाधरः ' इति वाराहसंहितावचनं च । ' आनन्दो द्विविधः प्रोक्तो मूर्तश्चामूर्त एव च । अमूर्तस्याश्रयो मूर्तः परमात्मा नराकृतिः ' इति पञ्चरात्रवचनं च । ' ययौ तथा महाशंभू रामलोकमगोचरम् । तत्र गत्वा महाशंभू राघवं नित्यविग्रहम् ॥ ददर्श परमात्मानं समासीनं मया सह । सर्वशक्तिकलानाथं द्विभुजं रघुनन्दनम् ॥ द्विभुजाद्राघवान्नित्यात्सर्वमेतत्प्रवर्तते ' इति सुन्दरीतन्त्रवचनं च । ' स्थूलं चाष्टभुजं प्रोक्तं सूक्ष्मं चैव चतुर्भुजम् । परं च द्विभुजं रूपं तस्मादेतत्त्रयं यजेत् ' इत्यानन्दसंहितावचनं च । ' यो वै वसति गोलोके द्विभुजस्तु धनुर्धरः । सदानन्दमयो रामो येन विश्वमिदं ततम् ' इति सदाशिवसंहितावचनं च । " रमन्ते योगिनो यस्मिन्नित्यानन्दे चिदात्मनि । इति रामपदेनासौ परब्रह्माभिधीयते " इति रामोपनिषद्वचनं च । " राम एव परं ब्रह्म राम एव परं तपः । राम एव परं तत्त्वं श्रीरामो ब्रह्म

तारकम् " इति हनुमदुपनिषद्वचनं च । " आनन्दरूपो निष्परिणाम एष लोकश्चैतस्माद्गमते ' इति शाण्डिल्यशाखावचनं च । ' ब्रह्मविष्णुमहेशाद्या यस्यांशा लोकसाधकाः । तं रामं सच्चिदानन्दं नित्यं रासेश्वरं भजे ' इति हनुमत्संहितावचनं च संगच्छते । तद्धामपरत्वप्रतिपादिका श्रुतिः—

" अष्टाचका नवद्वारा देवानां पूरयोध्या तस्यां हिरण्मयः कोशःस्वर्गो लोको ज्योतिषावृतः यो वैतां ब्रह्मणो वेद अमृतेनावृतां पुरीं तस्मै ब्रह्म च ब्रह्मा च आयुः कीर्तिं प्रजां ददुः " इति । तैत्तिरीयशाखान्तर्गतारण्यमध्ये । " अथ यदरण्यायनमित्याचक्षते । ब्रह्मचर्यमेव तत् अरश्च ह वै प्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरंमदीयं सरः तदश्वत्थः सोमसवनः तदपराजिता पूर्ब्रह्मणः प्रभुमितं हिरण्मयं तत्र एवैतावरं च प्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकः । तेषां सर्वेषु लोकेषु कामचारो भवति " इति च । अत एव प्रभोः प्रभुरित्यादि संगच्छते । अथ यदरण्यायनमितिश्रुतेरर्थस्तु——

अथ यत् अरण्यायनमरण्यप्रापकं तदेव ब्रह्मचर्यमित्याचक्षते वेदा इति शेषः । तेन ब्रह्मचर्येण ये जना ब्रह्मलोके विद्यमानौ अरं च प्यं चार्णवौ अनुविन्दन्ति मनसा प्राप्नुवन्ति तेषामेवषः श्रुतिप्रसिद्धो ब्रह्मलोको भवति तेषामेव सर्वेषु लोकेषु कामचारो भवति हिरण्यगर्भलोकं व्यावर्तयितु श्रुतिरेव निर्वक्ति इतो-भूलोकविहारात् तृतीयस्यां दिवि प्रकृतमण्डलाद्बहिर्भाग इत्यर्थः । ब्रह्मलोके ब्रह्मप्रकाशितभुवने अरश्च अरनामका प्या प्यनामकश्च ह वै प्रसिद्धौ अर्णवौ समुद्रौ तत्र तत्रैव ऐरम् इरा प्राकृतावलक्षणमन्न तन्मय एरो मण्डः तेन पूर्णमैरं मदीयं प्रमोदप्रापकं सरोऽस्तीति शेषः । तत् तत्रैव सोमसवना मृतस्रावी अश्वत्थश्चलदलः तत् तत्रैव ब्रह्मणः सत्यज्ञानानन्तप्रकाशकरामस्य अपराजिता अयोध्यापरपर्यायाऽपराजिताशब्दवाच्या पूः । तत् तस्यां पुर्यां प्रभुमितं प्रभुभ्यां तत्स्वामिसीतारामाभ्यामेव मितं निःशेषतो ज्ञातं हिरण्मयं मण्डपमस्तीति शेषः । प्रभुभ्यामित्यत्र " पुमान् स्त्रिया " इत्येकशेषः । अयोध्याकाण्डे चतुश्चत्वारिंशसर्गे सूर्यस्यापीत्यस्यायमर्थः । सूर्यस्य सर्वावभासकादित्यस्यापि सूर्योऽवभासक इत्यर्थः ।

ननु " तमेव भान्तमनुभाति सर्वम् " इत्यादिश्रुत्या सूर्यावभासकत्वं ब्रह्मणः प्रसिद्धमिति । ब्रह्म किमित्यत आह—अग्नेः सर्वाद्यस्य प्रकाशब्रह्मणोऽप्यग्निः प्रकाशक इत्यर्थः । अत एव प्रभोः सर्वनियन्तुर्ब्रह्मादित्यस्यापि प्रभुर्नियन्ता । अग्निशब्दस्य ब्रह्मपरत्वमश्यत्वादग्निनामासावित्यादिना मध्वाचार्यैर्व्याख्यातम् । अभिमतश्चायं सिद्धान्तो गोविन्दाचार्याणामपि । अत एव प्रभोः सर्वनियन्तुरपि नियन्तेति तैर्व्याख्यातम् । सर्वनियन्तृत्वं च विष्ण्वादीनामेवेति भावः । किंच सूर्यस्य प्रकाशकारणस्यापि सूर्यः कारणमित्यर्थः । ननु सूर्यकारणत्वेन वह्निः प्रसिद्ध इति किं स इत्यत आह—अग्नेरप्यग्निः कारणमित्यर्थः । ननु सर्वकारणत्वेन ब्रह्मणः प्रसिद्धत्वादिति किं तदित्यत आह—प्रभोः सकलनियन्तुरपि च प्रभुर्नियन्तेत्यर्थः । अत एव सर्वपरमकारणत्वं तस्यैवेत्याह—श्रियः श्रीरित्यादिभिः । सूर्यस्य सर्वजगदवभासकस्यापि सूर्यः अग्नेः सर्वदाहकस्याप्यग्निर्दाहक इति भूषणोक्तार्थस्तु न युक्तः । दाहकत्वेन प्रकाशकत्वेन च द्वयोः प्रसिद्ध्या अन्यतरोपादानस्य निरर्थकत्वापत्तिः । नापि सूर्यस्यापि प्रकाशको दाहकश्च अग्नेरपि प्रकाशको दाहकश्चेत्यर्थो युज्यते पतत्प्रकर्षदोषवत्तापत्तेरिति दिक् । न च ' रामपादनखज्योत्स्ना परब्रह्मेति गीयते ' इदमप्रमाणं विरुद्धार्थप्रतिपादकत्वात् । घटः पट इतिवत् । एतत्प्रतिपाद्यार्थस्य विरुद्धत्वं तु—

" सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् । यः पृथिव्यां तिष्ठन् यं पृथिवी न वेद यस्य पृथिवी शरीरं यः प्रधानमन्तरे संचरन् यं प्रधानं न वेद यस्य प्रधानं शरीरं यो विज्ञानमन्तरे संचरन् यं विज्ञानं न वेद यस्य विज्ञानं शरीरं सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दं ब्रह्मेति व्यजानात् । तदेजति तन्नैजति तद्दूरे तदु अन्तिके "

इत्यादिश्रुतिभिः सर्वकारणीभूतस्वगतसजातीयविजातीयभेदशून्यसर्वान्तर्यामिदेशकालवस्तुपरिच्छेदशून्यसर्वशक्तिनित्यशुद्धबुद्धस्वयंप्रकाशस्य ब्रह्मणो देशकालवस्तुपरिच्छिन्नरामनखज्योत्स्नात्वेन प्रतिपादनात् । तथाच यत्समानाधिकरणात्यन्ताभावप्रतियोगिताऽनवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यमिति व्याप्तिस्वरूपात्, विरुद्धार्थप्रतिपादकवाक्याधिकरणीभूतेदन्त्वाश्रयवृत्तिघटाद्यभावीयप्रतियोगिताऽनवच्छेदकीभूतप्रमाणप्रतियोगिकभेदत्वावच्छिन्नसामानाधिकरण्यं विरुद्धार्थप्रतिपादकत्वस्यास्तीति द्वितीयप्रमाणेन एतदर्थस्याप्रमाण्यग्रस्तत्वाद्रामस्य ब्रह्मप्रकाशित्वमसिद्धमिति वाच्यम् । अद्वैतसिद्धान्ते " भारूपः सत्यसंकल्पः " इत्यादिश्रुतिभिर्ब्रह्मणः प्रकाशस्वरूपत्वेन प्रतीयमानत्वात् " तस्य भासा सर्वमिदं विभाति " इत्यादिश्रुतिभिश्च रामस्य प्रकाशाश्रयत्वश्रुत्या एतदर्थस्य विरुद्धत्वाभावेन स्वरूपासिद्ध्या, इदं प्रमाणप्रतियोगिकभेदानुयोगित्वाभाववत् प्रमाणप्रतियोगिकभेदानुयोगित्वाभाववाप्याप्तोच्चारितत्वादिति सत्प्रतिपक्षितत्वेन च " तस्य भासा सर्वमिदं विभाति " इति परमप्रमाणभूतश्रुत्यनुगामित्वेन प्रामाण्यनिश्चयाद्बाधितत्वेन च एतद्वितीयस्य प्रमाणाभासत्वात् । तद्वत्तावुद्धिं प्रति तदभाववत्तावुद्धेरिव तदभावव्याप्यवत्तावुद्धेश्च प्रतिबन्धकत्वात् । यद्यपि स्वरूपासिद्धेर्न साक्षादनुमितिप्रतिबन्धकत्वं तथापि धूमाभाववद्ध्रदत्वावच्छिन्नानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयविषयतायाः यथा वह्निव्याप्यधूमवान् ह्रद इति परामर्शनिरसनद्वारा वह्निमान् ह्रद इत्यनुमितिप्रतिबन्धकत्वं तथा । विरुद्धार्थप्रतिपादकत्वाभाववदिदन्त्वावच्छिन्नानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयविषयितायाः प्रमाणप्रतियोगिकभेदविशिष्टत्वव्याप्यविरुद्धार्थप्रतिपादकत्ववदिदमिति परामर्शनिरसनद्वारा इदमप्रमाणमित्यनुमितिप्रतिबन्धकत्वम् । एवमन्यत्रापि यथासंभवमूह्यम् । तथा इदं वाक्यं प्रमाणं श्रुतिसिद्धार्थबोधकत्वात्, ' न जायते म्रियते वा

कदाचित्' इत्यादिवत्। इदं क्वचिदाश्रितं प्रकाशत्वात्सूर्यप्रकाशवदित्याद्यनुमानान्तराणामपि सानुकूलत्वात्। न च रामस्य ब्रह्मप्रकाशकत्वे ब्रह्मणो देशकालवस्तुपरिच्छेदशून्यत्वाभावापत्तिः। तथाहि प्रकाशस्य प्रकाश्यतिरिक्तत्वेन वस्तुदेशपरिच्छेदः अत एव मध्यमपरिमाणत्वापत्त्या च कालपरिच्छेदः परिच्छेदपरिच्छेदशून्यत्वयोरेकत्रासंभवः। प्रकाशस्य प्रकाश्यायत्ततया स्वातन्त्र्यानुपपत्तिश्चेति वाच्यम्। प्रकाशप्रकाशिनोस्तादात्म्यस्वीकारेणादोषात्। न च ब्रह्मातिरिक्तवस्तुस्वीकारे "एकमेवाद्वितीयम्" इत्यादिश्रुतिभिर्ब्रह्मणि प्रतीयमानस्य स्वगतसजातीयविजातीयभेदशून्यत्वस्य हान्यापत्तिरिति वाच्यम्। इष्टापत्तेः। श्रुतेः स्वगतसजातीयविजातीयभेदशून्यार्थबोधकत्वाभावात्। सार्वकालिकद्वित्वसङ्ख्यापूरकप्रतियोगिकभेदसमानाधिकरणप्राधान्यविशिष्टसदित्यर्थस्य स्वारसिकत्वात्। सजातीयत्वं च प्रधानत्वेन रूपेण अत एवाक्ष्यादिप्रतिपादनं संगच्छते। स्वगतभेदशून्यत्वप्रतिपादने तु विरुध्येत प्रधानान्तरस्यप्रकाशिनः सत्त्वादयमर्थो विरुद्ध इति तु न भ्रमितव्यम्। दत्तोत्तरत्वात्। अनुभूतं च तयोस्तादात्म्यं सविता प्रकाशते सवित्रा दग्ध इत्यादौ। अत एव विधिनिषेधकबोधकवाक्यानां न वैयर्थ्यम्। "अपाणिपादो जवनो ग्रहीता" इत्यादिना पाण्यादिनिषेधस्तु प्राकृतपाण्यादीनामिति न विरोधः। पारमार्थिकपाणिपादनिषेध इत्यर्थस्तु न युक्तः जवन इत्यादिना विरोधापत्तेः। अत एव " सत्यं भिदा सत्यं भिदा नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां विदधाति कामान्। भोक्ता भोग्यं प्रेरितारं च मत्वा " 'नत्वेवाहं जातु नासं' " भेदव्यपदेशाच्च ' इत्यादीनि श्रुतिस्मृतिसूत्राणि संगच्छन्ते। न च गुणक्रियाश्रयस्य द्रव्यत्वनियमात्प्रकाशिनो द्रव्यत्वापत्तिरिति वाच्यम्। इष्टापत्तेः। स्वीकृतं च नैयायिकैः परमात्मनो द्रव्यत्वम्। न चेदमनित्यं संयोगाश्रयत्वात् घटवदित्यनुमानेनानित्यत्वापत्तिरिति वाच्यम् संयोगाश्रयत्वस्यानित्यत्वाभाववति कालादौ वृत्तित्वेन व्यभिचरितत्वात्। " नित्यो नित्यानाम् " इत्यादिश्रुतिप्रामाण्येनेदन्त्वाश्रयस्यानित्यत्वाभावविशिष्टत्वेन बाधाच्च। एवं च हेतोस्तत्रावृत्तित्वेन स्वरूपासिद्धेश्च। इदं नित्यं नित्यगुणाश्रयत्वात् कालादिवदित्यनुमानेन सत्प्रतिपक्षितत्वाच्च। वक्तव्या चैषैव युक्तिः प्रकाशस्य गुणाद्यन्यतमत्वस्वीकारे अनित्यवादनिरासाय दर्शनान्तरीयैरपि। न च प्रकाशस्याधेयत्वापत्त्या "अनाश्रयम्" इत्यादिश्रुतिविरोधः। तासां प्रकाशिपरत्वेनाविरोधात्। अत एव ' स्वमहिम्नि प्रतिष्ठितम् ' इत्यादिना न विरोधः। प्रकरणविरोध इति न भ्रमितव्यम्। तयोस्तादात्म्यात्। स्वीकृतं च वार्तिककारानुयायिभिः " आत्मैवेदं सर्वम् " इत्यादिश्रुतिव्याख्यावसरे तादात्म्यमिति दिक्।

एतदनुरोधेन 'विष्णुना सदृशो वीर्ये' इत्यस्य विष्णुर्न आसमन्ताद्भावेन सदृशो यस्येत्यादिरर्थः। ' विष्णोरर्धं महाभागम् ' इत्यस्य विष्णोः अर्धं वर्धकमित्यर्थः। उत्तरकाण्डघटकीभूते 'पितुस्तु मम जामाता विष्णुः किल सुरेश्वरः। अभिप्रेतस्त्रिलोकेशजतस्मान्नान्यस्य मे पिता' इत्येतत्पदे विष्णुशब्दो व्यापकव्यापकपरः। सुरेश्वरशब्दो दानीश्वरपरः। अत एव त्रिलोकेश इत्यनेन न गतार्थता। तत्प्रकरणान्तर्गते 'ततो मनोरथं सत्यं पितुर्नारायणं प्रति' इत्यत्र नारायणशब्दार्थस्तु नारेण नीत्यैव अयते इति नारायणो मर्यादापुरुषोत्तम इत्यर्थः। एवं गृढार्थमजानतो नारायणादिवाच्या बहवः सन्ति तत्र क ईप्सित इति शङ्कां निरसन्त्याह–'नारायणो मम पतिर्न त्वन्यः पुरुषोत्तमात् ' एतदर्थस्तु पुरुषोत्तमादन्यः पुरुषोत्तमप्रतियोगिकभेदानुयोगी नारायणो मम पतिर्न पुरुषोत्तम एवेत्यर्थ इति। प्रकरणस्याभिधानियामकत्वादत्र पुरुषोत्तमशब्दः "पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः " इति श्रुतिघटकपुरुषार्थकः। अतो नारायणस्यार्थान्तरप्रतिपादकपुरुषोत्तमशब्दप्रतिपाद्यत्वेऽपि न क्षतिः। एतदर्थविवक्षयैव ' नारायणो मम पतिर्नान्यः कश्चिन्मतो मम ' इति न त्वन्यः संमतो ममेति वा नोक्तम्। एवंचात्रादेयकोटिप्रविष्टनारायणशब्दो मर्यादापुरुषोत्तमपर एव। ' तस्मात्त्वयोनिजा साध्वी भवेयं धर्मिणः सुता ' इति वेदवतीवचनार्थस्तु तस्मात् संभावितकृतत्वादिमतीत्वाद्धेतोरयोनिजा योनिसंबन्धाभावेन प्रादुर्भूता साध्वी पतिव्रताशिरोमणिः धर्मिणो जनकस्य सुता अहं भवेयम् प्राप्नुयाम्। प्रार्थ्यर्थकोऽत्र भवतिः। ' पश्य मृगो धावति। पश्य लक्ष्मण पम्पायां बकः परमधार्मिकः। जानामि सीता धरणीप्रसूता जानामि रामो मधुसूदनश्च। जानामि मृत्युं मम तस्य हस्तात्तथापि सीतां न समर्पयामि ' इत्यादाविव वाक्यार्थस्य क्रियायामन्वयात्तस्यैव कर्मत्वेन तद्वाचकस्य प्रातिपदिकत्वाभावेन न ततो द्वितीयोत्पत्तिः 'सैषा जनकराजस्य प्रसूता तनया प्रभो। तव भार्या महाबाहो विष्णुस्त्वं हि सनातनः। ' एतदर्थस्तु हे प्रभो! हे महाबाहो! सा सीता परमप्रेमास्पदीभूतवेदवतीप्राप्तीच्छाविषयीभूता जनकराजस्य तनया नित्यपुत्री अत एव प्रसूता तत्रैव प्रादुर्भूता एषा तव भार्या जानकी त्वं तु सनातनः सनति सर्वं रचयतीति सनम् " यतो वा इमानि भूतानि जायन्ते " इत्यादिश्रुतिप्रतिपादितं प्रकाशब्रह्म तदुपलक्षितब्रह्मादीन् आतनोति तत्तत्कार्यनियामकत्वेन विस्तारयति। किं च सनं तदेव अः विष्णुश्च आः ब्रह्मा च आः शिवश्च ते सनाः तान् तनोति सः 'अकारो वासुदेवः स्यादाकारस्तु पितामहः ' इत्येकाक्षरः। आः स्वयंभूरिभो वाजी खेदः शंकरवासवौ ' इति मात्रिकाकोशः। स विष्णुः हिस्त्वर्थः। पूर्वं क्रोधहतः शत्रुर्ययासौ निहतस्तया। उपाश्रयित्वा शैलाभस्तव वीर्यममानुषम् ' अस्यार्थः–यया वेदवत्या शैलाभः शत्रुरसौ रावणः पूर्वं क्रोधहतः क्रोधेन हतो निहतप्रायः तया वेदवत्या उपाश्रयित्वा जानकीमाश्रित्य निहतः अतस्तव वीर्यममानुषं प्राकृतमानुषवीर्याद्विलक्षणम्। प्रतापिसख्यस्य रावणभवनसमये पुनरेषा प्रादुर्भवितेति बोधयन्नाह–' एवमेषा महाभागा मर्त्यैरुत्पत्स्यते पुनः। क्षेत्रे हलमुखोत्कृष्टे वेद्यामग्निशिखोपमा ' वेदवत्या उत्पत्तिप्रकारं बोधयन्नाह–एवमिति। या एषा वेदवती पूर्वं कृतयुगे आसीत् सा त्रेतायुगमनुप्राप्य रक्षसस्तस्य रावणस्य वधार्थं स्वस्वामिन्यै सीतायै वधयोग्यतां निवेदयितुमित्यर्थः। महात्मनो जनकस्य मैथिलकुले उत्पन्नेति

दिक्। वेदवतीप्रकरणस्थपद्यानामीदृशार्थः तुष्यतु दुर्जनन्यायेनोक्तः। वस्तुतस्तु लक्ष्मीरेव वेदवती कुशध्वजगृहे प्रादुर्भूता नारायणरूपभरतेनोद्वाहिता तदनुमत्यैव मन्थरया रामः प्रव्राजित इत्युत्तरकाण्डे वक्ष्यते 'विक्रमस्ते यथा विष्णो रूपे चैवाश्विनोरिव। बुद्ध्या बृहस्पतेस्तुल्यः प्रजापतिसमो ह्यसि॥ क्षमा ते पृथिवीतुल्या तेजसा भास्करोपमः। वेगस्ते वायुना तुल्यो गाम्भीर्यमुदधेरिव॥ अप्रकम्प्यो यथा स्थाणुश्चन्द्रे सौम्यत्वमीदृशम्' इत्युत्तरकाण्डीयसप्तत्रिंशसर्गश्लोकेष्वप्युपमानोपमेयभाव इषुवत्सविता गच्छतीतिवद्बोध्यः। किं च प्रजापतीनां ब्रह्मादीनां समः सृष्ट्यादिष्वेकाकारवर्तनं यस्मात्सः अत एव बृहस्पतेरपि बुद्ध्या तुल्यः तोलयितुमैश्वर्यादिना इयत्तां कर्तुं शक्यो यस्त्वन्नासि एतत्रत्यर्थस्तु बुद्ध्या अ इति छित्त्वा लब्धः। तस्य तव विक्रम इव विष्णोर्विक्रमः कविभिर्वर्ण्यत इति शेषः। ते रूपमिवाश्विनो रूपे। ते क्षमा पृथिवीक्षमा तुल्या यस्याः। स त्वं तेजसा भास्करोपमः भास्कर उपमोपमेयो यस्य। ते वेगः वायुना तुल्यः वायुर्न आसमन्तात्तुल्यो यस्य। ते गाम्भीर्यमिव उदधेर्गाम्भीर्यम्। त्वमिव स्थाणुः शिवः अप्रकम्प्यः। ईदृशं भवत्सौम्यत्वमदृशं सौम्यत्वं चन्द्रे अस्तीत्यर्थः। अत एव 'चन्द्रे सौम्यत्वमीदृशम्' इत्यस्य न वैरूप्यम्। 'उत्तस्थौ नागशयनात् हरिर्नारायणो यथा' इत्येतदर्थन्तु नागशयनात् न आगः आगमनमुत्पत्तिर्यस्य नित्यसिद्धमित्यर्थः। तदेव शयनमिति कर्मधारयः। तस्मात् नारायणः नारेण नीत्यैव अयनं गतिर्यस्य मर्यादापुरुषोत्तम इत्यर्थः। हरिः आश्रितानां निःशेषसंतापस्य निवर्तको रामः यथा यथावदुत्तस्थौ। एतेन मृतसंमाननं सूचितम्। अत एव नान्यतरवैयर्थ्यम्। उत्तरकाण्डे पञ्चाशत्तमे सर्गेऽयं श्लोकः 'भविष्यति दृढं रामो दुःखप्रायो विसौख्यभाक्। प्राप्स्यते च महाबाहुर्विप्रयोगं प्रियैर्दृढम्' एतदर्थः विसौख्यभाक्। विशेषसुखस्य भोक्तापि रामः दुःखप्रायो भविष्यति। तत्र हेतुः यतो महाबाहुः रामः प्रियैः विप्रयोगं वियोगं दृढं प्राप्स्यते। तदेव विशदयन्नाह-'त्वां चैव मैथिलीं चैव शत्रुघ्नभरतौ तथा। स त्यजिष्यति धर्मात्मा कालेन महता महान्॥' इदमेकत्र न वक्तव्यमित्याह-'इदं त्वयि न वक्तव्यं सौमित्रे भरतेऽपि वा। राज्ञा वो व्याहृतं वाक्यं दुर्वासा यदुवाच ह॥' त्वयि त्वया अत्र भरते न वक्तव्यमित्यनेन भरतेनैवावश्यं दुःखं भोक्तव्यमिति बोधितम्। तेन ज्ञाने दुःखाल्पत्वं भविष्यतीति व्यक्तम्। तेन वक्ष्यमाणशापो भरतोद्देश्यक एवेति ध्वनितम्। तेन विष्णुभरतस्यैव स्वरूपान्तरमिति व्यञ्जितम्। वक्ष्यमाणेन शत्रुघ्नस्यापि सन्निधावित्यनेन शत्रुघ्नज्ञाने भरतोऽप्यवश्यं ज्ञास्यतीति व्यक्तम्। तेन द्वयोः परस्परप्रेमास्पदत्वं व्यक्तम्। शापाकारं बोधयन्नाह तत्रेति। 'तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम्' अत्र पत्नीति त्वच्छब्दार्थे विशेषणम्। पत्नीसहित इत्यर्थः। त्रीह्यादित्वादिनिः। ग्रहणरूपधात्वर्थविहितणिजन्तप्रकृतिकभावघञन्तप्रकृतिकतद्धितान्तप्रकृतिकप्रथमान्तो वा। वियोगमिष्टवियोगजनितदुःखम्। अत एव विप्रयोग प्रियैर्दृढमित्युपक्रमेण न विरोधः। न च शापवाक्यानां भरतोद्देश्यकत्वे 'इहागतो हि पुत्रत्वं तव पार्थिवसत्तम। राम इत्यभिविख्यातस्त्रिषु लोकेषु मानद' इति विरुध्येत रामपरतया प्रतीयमानत्वादिति वाच्यम्। अस्य गूढार्थकत्वात्।

तथाहि रामे इहास्मिँल्लोके तव पुत्रत्वमिति प्राप्ते सति त्रिषु लोकेषु अभितः विख्याः विशेषेण ख्यातिर्यस्य स एवातो व्यापकः। किं च विराकाश इव ख्यातं ख्यातिर्यस्य गगनसदृशः इह तव पुत्रत्वमागतः प्राप्तः विष्णुः भृगुशापकृतं महत्तत्प्रसिद्धं फलं प्राप्स्यते रामस्तु दीर्घकालमयोध्याधिपतिर्भविष्यति। उत्तरकल्पे अभीति सप्तम्यन्तं रामविशेषणम्। अं विष्णुं भाति प्रकाशयतीति तदर्थः। नन्वेवमपि उत्तरकाण्डसप्तविंशसर्गे इन्द्रप्रार्थितविष्णुप्रतिज्ञाबोधकेन 'प्रतिजाने च देवेश त्वत्समीपे शतक्रतो। भवितास्मि यथास्याहं रक्षसो मृत्युकारणम्' अनेन विरुध्येतेति चेन्न। कारणं भवितास्मीत्यनेन साक्षात्स्वकर्तृत्वाभावबोधनात्। अत एव अहमेव निहन्तास्मीत्यस्य घातयितास्मीत्यर्थः। अन्तर्भावितणिजर्थोऽत्र हन्तिः। 'रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा। प्रीयते सततं रामः सहि विष्णुः सनातनः॥ आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः।' एतदर्थस्तु आदयति ब्रह्मादिद्वारा सर्वान् भोजयति तच्छीलः आदिदेवो नित्यप्रमोदः स एव स इति कर्मधारयः। महाबाहुः महान्तौ बाहू यस्य आजानुबाहुरित्यर्थः। हरिः आश्रितसकलसंतापहारकः नारायणो मर्यादापुरुषोत्तमः प्रभुः सर्वस्वामी सनातनो ब्रह्मादिप्रवर्तकोऽपि सः श्रुतिप्रसिद्धो विष्णुः स्वप्रकाशद्वारा सर्वत्र पूर्णो रामः इदं रामायणं सदा शृण्वतः पठतः पुरुषस्योपरि सततं प्रीयेत।

रामायणप्रवृत्तिं बोधयन्नाह-'एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः। प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्' एवमेतत्प्रकारकं पुरा पूर्वं विष्णोर्वृत्तं प्रवृत्तमत एव विस्रब्धं विश्वासोत्पादकमेतदाख्यानं प्रव्याहरत यूयं पठत अतो वो भद्रं कल्याणमस्तु। वो बलं च प्रवर्धताम् 'सर्व एते महाभागा रावणाद्बलवत्तराः। न चान्यो राक्षसान्हन्ता सुरारीन्देवकण्टकान्॥ ऋते नारायणं देवं शङ्खचक्रगदाधरम्। भवान्नारायणो देवश्चतुर्बाहुः सनातनः॥ राक्षसान् हन्तुमुत्पन्नो ह्यजय्यः प्रभुरव्ययः।' इति वक्ष्यमाणपद्यानां त्वयमर्थः-नारो नीतिस्तेनैव अयते गच्छतीति नारायणस्तं मर्यादापुरुषोत्तममित्यर्थः तथाहि-'न्याय्यात्पथः प्रचलनं यतो नैवास्य विद्यते। अतो नारायणो रामो विद्वद्भिः परिकीर्तितः' इत्यामवचनम्। देवं नित्यविहारिणं शङ्खचक्रगदाधरं शङ्खचगक्रदाः सन्ति अस्य स नारायणोऽधरो यस्मात् तं विष्णोरुत्तममित्यर्थः। ऋते विना अन्यः राक्षसान् हन्ता न। ननु स क इत्यत आह स भवानेव तद्विशेषणं नारायणोदेवः नारायणश्च आः ब्रह्मा च उः रुद्रश्च तेषां देवः पूज्यः अत एव चतुर्बाहुः चतुरोऽर्थादीन् वाहयति आश्रितेभ्यः प्रापयतीति सः सनातनो नित्यः

अजय्यः सर्वैर्जेतुमशक्यः अव्ययः सर्वविकारशून्यः प्रभुः प्रभोरपि प्रभुः राक्षसान् राक्षसत्वं हन्तुं निवर्तयितुं भवानेव उत्पन्नः प्रादुर्भूतः । अत एव 'विष्णुना सदृशो वीर्ये विष्णोस्तुल्यपराक्रमान् । न कालस्य न शक्रस्य न विष्णोर्वित्तपस्य च ॥ तानि कर्माणि श्रूयन्ते यानि युद्धे हनूमतः' इत्यादिभेदप्रतिपादकवचनैर्न विरोधः । अत एव न द्विभुजरामे चतुर्बाहुत्वप्रतिपादनं प्रत्यक्षविरोधः । चतुर्बाहुर्नारायणोऽपि भवानेवेति विशिष्य न विरोध इति तु न भ्रमितव्यम् । विशेषणवैयर्थ्यात् । चतुर्भुजशब्दस्यापि नारायणे संकेतितत्वेन पौनरुक्त्यस्य दुरुद्धरत्वाच्च 'इमं मुहूर्तं दुर्धर्ष स्मर त्वं जन्म वैष्णवम्' इत्युत्तरकाण्डनवतितमसर्गघटकपद्यघटकीभूतवैष्णवशब्दार्थस्तु विष्णोरिदं विष्णुप्रार्थनया प्रादुर्भूतं स्वकीयं जन्मेति विष्णूनां वैकुण्ठेशक्षीराब्धीशभूम्नामिदं जन्म भरतादिरूपेण प्राकट्यं स्मरेति वा । उत्तरकाण्डचतुरुत्तरशततमसर्गघटकस्य ' तवाहं पूर्वके भावे पुत्रः परपुरंजय । मायासंभावितो वीर कालः सर्वसमाहरः ॥ ' इति कालवचनस्य तु अयमर्थः । पूर्वके पूर्व एव पूर्वकः तस्मिन्प्रथमे भावे सृष्ट्यादावित्यर्थः । मायासंभावितः जीवादिविषयकत्वत्कृपया प्रादुर्भावितः अत एव तव पुत्रः । अपुत्र इति छेदो वा त्वत्पुत्रसदृशः सर्वसमाहरः सर्वव्यवहारहेतुः कालोऽहमस्मीति शेषः । तत्र ' संक्षिप्य हि पुरा लोकान् मायया स्वयमेव हि । महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ' इति ब्रह्मवचनस्य त्वयमर्थः । पुरा लोकान् संक्षिप्य संक्षेपरूपेण कृत्वा महार्णवे शयानः महार्णवे शयः शयनं यस्य स एव अनिति पालयति विश्वमिति आ विष्णुस्तस्मान्मायया जीवादिविषयककृपयाप्सु मां त्वमजीजनः उत्पादितवान् । " शयवासवासिष्वकालात् " इति सप्तम्या अलुक् । तत्र– ' ततस्त्वमसि दुर्धर्षस्तस्माद्वावात्सनातनात् । रक्षां विधास्यन् भूतानां विष्णुत्वमुपजग्मिवान् ॥ अदित्यां वीर्यवान् पुत्रो भ्रातॄणां वीर्यवर्धनः ।' इत्यस्य त्वयमर्थः भ्रातॄणां वीर्यवर्धनः वीर्यवान् भूतानां रक्षां विधास्यन् । अदित्यां यः पुत्रः तस्मिन्पुत्रे विष्णुत्वं स्वरूपव्यापकत्वं यतस्त्वमुपजग्मिवान् प्रापितवान् तस्मात्सनातनान्नित्याद्भावात्स्वप्रभावात् ततो विस्तारको दुर्धर्षस्त्वमसि । ' अथवा विजिगीषा ते सुरलोकाय राघव । सनाथा विष्णुना देवा भवन्तु विगतज्वराः ' इत्यस्य त्वयमर्थः हे राघव ! सुरलोकाय यदि ते विजिगीषा तर्हि सनाथा इन्द्रसहिता देवा विष्णुना सह विगतज्वरा भवन्तु । भवद्दर्शनादिति शेषः । एतेन विष्ण्वादीनां रामदर्शने उत्कण्ठातिशयः सूचितः । एतदर्थविवक्षयैव त्वयेति नोक्तम् । उत्तरकाण्डषड्डुत्तरशततमसर्गघटकीभूतस्य ' ततो विष्णोश्चतुर्भागमागतं सुरसत्तमाः । हृष्टाः प्रमुदिताः सर्वे पूजयन्ति स्म राघवम् ' इत्यस्यायमर्थः विष्णोः क्षीराब्धीशस्य चतुर्भागं सर्वांशविशिष्टं राघवं रघुकुलप्रादुर्भूतं लक्ष्मणं पूजयन्ति स्म । उत्तरकाण्डे दशाधिकशततमे सर्गे ' ततः पितामहो वाणीं त्वन्तरिक्षादभाषत । आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव ॥ भ्रातृभिः सह देवाभैः प्रविशस्व स्वकां तनुम् । यामिच्छसि महाबाहो तां तनुं प्रविश स्वकाम् ॥ वैष्णवीं तां महातेजो यद्वाकाशं सनातनम् । त्वं हि लोकगतिर्देव न त्वां केचित्प्रजानते ॥ ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम् ' इत्यादेरयमर्थः हे विष्णो ! स्वप्रकाशद्वारा सर्वत्र पूर्णदेवाभैः देवान् आभान्ति प्रकाशयन्ति अन्तर्भावितण्यर्थः देवप्रकाशकैरित्यर्थः । भ्रातृभिः सह स्वकां तनुमिव तनुवन्नित्यसंबद्धं स्वप्रकाशप्रकाशितं स्वलोकमित्यर्थः । प्रविशस्व सभ्रातृरामप्रवेशनं संप्रार्थ्य तदीप्सितान्यकर्तृकप्रवेशं संप्रार्थयन्नाह—यामिति । हे महाबाहो ! यां व्यक्तिं यं यं जनमित्यर्थः । इच्छसि प्रवेशयितुं वाञ्छसि तां तं तं जनमित्यर्थः । वैष्णवीं वैकुण्ठेशक्षीराब्धीशभूमसंबन्धिनीं तां तनुं तत्तल्लोकमित्यर्थः । आकाशमाकाशवद्विपुलं सनातनं यन्महातेजः । स्वकां तनुं स्वलोकमित्यर्थः । तत् वा प्रविश प्रवेशय अत एव न पौनरुक्त्यम् । हिरिवार्थे । ' पितामहवचः श्रुत्वा विनिश्चित्य महामतिः । विवेश वैष्णवं तेजः सशरीरः सहानुजः ॥ ' इत्यस्य त्वयमर्थः स रामः महामतिरनुजः अतिबुद्धीन् अनुजांशान् वैष्णवं वैकुण्ठेशादिसंबन्धिनं लोकं विवेश प्रवेशयामास तेजः साकेतलोकं तु सशरीरः सन् विवेश । राजा गच्छतीत्यादाविव रामपरिकरेष्वपि गमनकर्तृत्वं बोध्यम् । अत एव भ्रात्रंशानां प्रवेशनमुक्त्वा भ्रातृप्रवेशनं नोक्तम् । महामतिरनुज इति समुदायार्थस्य कर्मत्वम् । अत एव न तद्वाचका द्वितीया । तस्य प्रातिपदिकत्वाभावात् । वाक्यार्थस्य कर्मत्वस्वीकारादेव । ' श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः । पश्य लक्ष्मण पम्पायां बकः परमधार्मिकः । जनामि रामो मधुसूदनश्च । पश्य मृगो धावति ' इत्यादीनां संगतिः । अनुजः वैष्णवमित्यत्र च जात्यभिप्रायेणैकवचनम् । ' ततो विष्णुमयं देवं पूजयन्ति स्म देवताः ' इत्यस्य त्वयमर्थः । विष्णुमयं विष्णून् वैकुण्ठेशादीन् मयते तत्तल्लोकं प्रापयतीति स तं देवं नित्यप्रमोदं रामं देवताः ब्रह्मप्रभृतिसुराः पूजयन्ति स्म प्राशंसन् । ' अथ विष्णुर्महातेजाः पितामहमुवाच ह । एषां लोकं जनौघानां दातुमर्हसि सुव्रत ' इत्यस्य तु अयमर्थः । अथ साकेतलोकप्राप्त्यनन्तरं महातेजाः विष्णुः स्वप्रकाशद्वारा सर्वत्र पूर्णः । किंच विषा सर्वव्यापकेन विष्णुना नयते स्तूयते असाविति विष्णुः । विष्ण्वादिस्तुत इत्यर्थः । संज्ञापूर्वकविधेरनित्यत्वाज्जश्त्वाभावः । आगमशास्त्रस्यानित्यत्वात्तुगभावः । पितामहं साकेतस्थब्रह्माणमुवाच ' त्यक्तात्मानश्च मत्कृते ' इत्यस्य त्वयमर्थः मत्कृते त्यक्तः आत्मा प्रयत्नो यैस्ते । ' तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः । लोकान्संतानकान्नाम यास्यन्तीमे समागताः ॥ ' अस्यार्थः विष्णुवचनं विष्ण्वादिस्तुतरामवाक्यं श्रुत्वा उवाचेति शेषः । तद्वचनमेवाह समागताः भवद्भिः सार्धमिह प्राप्ताः सन्तानकान्साकेतान्तर्वर्तिदेशविशेषान् यास्यन्ति प्राप्स्यन्ति । क्वास्ति स लोक इत्यत आह–

' स्वैर्ब्रह्मगुणैर्युक्ते ब्रह्मलोकादनन्तरे ' ब्रह्मलोकात् ब्रह्मणो महाविष्णोर्लोकात् साकेतोत्तरद्वारवर्तिमहावैकुण्ठादित्यर्थः ।

अनन्तरे समीपे सर्वैर्निखिलैर्ब्रह्मगुणैः परमानन्दादिभिर्युक्ते स लोकोऽस्तीत्यर्थः । ' वानराश्च स्वकां योनिमृक्षाश्चैव तथा ययुः ' वानरा ऋक्षाश्च स्वकां योनिं स्थानं साकेतमित्यर्थः । ययुः प्रापुः रामेण सहैवेति शेषः । वानरादिषु निलीनानां देवांशानां वृत्तमाह–' येभ्यो विनिःसृताः सर्वे सुरेभ्यः सुरसंभवाः । तेषु प्रविविशे चैव सुग्रीवः सूर्यमण्डलम् ' सुग्रीवः सुर्यविनिलीनसूर्यांशः । ' तथा ब्रुवति देवेशे गोप्रतारमुपागताः ' एतेन साकेतस्थयोः संवादस्तैः श्रुत इति ध्वनितम् । तेन तेषां दिव्येन्द्रियप्राप्तिर्जातेति ध्वनितम् । एवमन्यविरोधाभासेष्वप्यूह्यम् । तत्रापाततो विरुद्धत्वेन प्रतिभासमानानां ' विष्णुना सदृशो वीर्ये । विष्णोरर्धं महाभागम् ' इत्यादिवचनानां विशेषतस्तत्वनिर्णयाय महापातकनाशकैकवर्णघटितश्रीमद्वाल्मीकीयरामायणं व्याख्यायते । श्रुतश्रुतीनां प्राप्तमहत्सङ्गानां समातिशयरहितसत्यज्ञानानन्दस्वरूपदेशकालवस्तुपरिच्छेदशून्यसाकारनिराकारब्रह्मनियन्त्रवाङ्मनसगोचरवेदतत्पर्यगम्यसर्वेश्वरेश्वरश्रीसतिरामप्राप्तीच्छावतां तदन्वेषणशीलानां तदवबोधाय परमकारुणिकपरमरामरसास्वादनतत्परनारदब्रह्मोपदेशमवगत्य परमकारुणिक ऋषिर्वाल्मीकिर्वेदोपबृंहणभूतं रामाचरितप्रतिपादकं चतुर्विंशतिसहस्रसङ्ख्यात्मकश्लोकात्मकं श्रीमद्रामायणं प्रकटयामास । तत्र प्रथमे श्लोके गुरौ गुरुधर्मान्प्रदर्शयन्नाह––

तपःस्वाध्यायनिरतमिति । यस्य ज्ञानमयं तप इत्यादिप्रामाण्येन तपसो ज्ञानस्य प्रतिपादको यः स्वाध्यायो वेद उपनिषद्भाग इत्यर्थः । तत्र निरतं नितरां रतम् । एतेन "तं त्वौपनिषदं पुरुषं पृच्छामि " इतिश्रुतिगम्यविषयकपिपृच्छिषा वाल्मीकेः सूचिता । किंच तपो वेदः " तपो हि स्वाध्यायः" इतिश्रुतेः तस्य सूः प्रादुर्भावो यस्मात्स तपस्सूर्ब्रह्मा तस्याध्या उत्कण्ठापूर्वकं स्मरणं तेनायने प्राप्नोतीति सः तपःस्वाध्यायः साकेतनित्यविहारी रघुनाथस्तत्र निरतं तद्ध्यानपरायणमित्यर्थः । तत्र निरतं पप्रच्छेत्यनेन साकेताधीशविषयकसामान्यज्ञानवान्वाल्मीकिरिति ध्वनितम् । किंच तपसे तपः कारयितुं सूर्ब्रह्मकर्मकप्रेरणा यस्य स तपस्सूर्विष्णुः प्रेरणार्थकषधातोर्भावक्विबन्तः सूरिति निष्पन्नस्तस्याध्या उत्कण्ठापूर्वकं स्मरणं तेनायते तत्स्मृतिविषयीभवतीति तपस्स्वाध्यायः स एव तत्र निरतमित्यर्थः । किंच तपसः सूः तपःकर्मकब्रह्मप्रेरणा यस्मै स तपःसूः शिवः तस्याध्या तेनायते यः स एव तत्र निरतम् । किंच उक्तदिशा तपस्सूशब्दस्य ब्रह्मविष्णुमहेशपरत्वमवगतम् । तथा चैकशेषेण तपस्सूं ब्रह्मविष्णुमहेश्वराणामाध्या उत्कण्ठापूर्वकं स्मरणं तेनायते स साकेताधीश एव तत्र निरतं तद्विषयकज्ञानवन्तमित्यर्थः । तपःस्वाध्याय इत्यनेन ब्रह्मविष्णुमहेश्वरोपास्यत्वमुपायान्तरागम्यत्वं च साकेताधीशस्य सूचितम् । अत एव वाग्विदां वाग्वेदितॄणां मध्ये वरं श्रेष्ठम् । किंच वाग्विद्भिर्वेदायभिज्ञैर्ज्ञेयते साकेताधीशज्ञानलाभार्थं स्वीक्रियते पूजालङ्कारादिभिरर्च्यते वासौ वाग्विदां वरस्तं संभक्तिस्वीकारान्यतरार्थकट्टधातोः कर्मणि प्रत्ययः । अत एव मुनिपुंगवं विज्ञानिश्रेष्ठम् ' बुधे च पुंगवः श्रेष्ठे वृषभे भिषजां वरे ' इति विश्वः । अत एव नारदं न ऋच्छति विज्ञानमन्तरा न निवर्तते इति नारमज्ञानं तदयति साकेताधीशज्ञापनद्वारा निर्मूलयतीति नारदस्तम् । उक्तं च नारदीये–'नारदो नाशयत्नेति नृणामज्ञानजं तमः ' इति । तपस्वी साकेताधीशसामान्यज्ञानवान् वाल्मीकिर्वेल्मीकगौणपुत्रः परिपप्रच्छ । गौणत्वं च बहुकालिकतपस्स्थितिहेतुकवल्मीकाकृतित्वप्राप्त्यनन्तरं वरुणकृतवृष्ट्या निष्पन्नत्वात् अत एव वक्ष्यमाणप्राचेतसत्वव्यवहारोऽपि न विरुद्धः प्रचेतोनिरूपितगौणपुत्रत्वस्याप्यस्मिन्सुवचत्वात् गौणपुत्रत्वयोर्विरोधाभावात् अत एव भृगुपुत्रत्वमप्यस्मिन्न विरुद्धम् । भृगुनिरूपितमुख्यपुत्रत्वस्यास्मिन्विद्यमानत्वात् गौणपुत्रत्वमुख्यपुत्रत्वयोर्विरोधाभावात् अत एव ' अथाब्रवीन्महातेजा ब्रह्मा लोकपितामहः । वल्मीकप्रभवो यस्मात्तस्माद्वाल्मीकिरित्यसौ ' इति ब्रह्मवैवर्तवचनम् । ' अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ' इति लवकुशोक्तिश्च । ऋक्षो भृद्वार्गवस्तस्माद्वाल्मीकिर्योऽभिधीयते ' इति विष्णुपुराणवचनं च संगच्छते । अत्र तस्मादित्युत्तरान्वयि । अत एव ज्ञापकादस्य ऋक्ष इति रूढं नाम तस्यात्रानुक्तिस्तु आत्मनाम गुरोर्नामेत्यादिस्मृत्याऽऽत्मनामग्रहणस्य निषिद्धत्वान्निषेधस्य च रूढनामविषयत्वात् । वस्तुतस्तु स्मृतौ ग्रह उच्चारणमर्थः ज्ञानार्थत्वे निषेधस्यासंभवापत्तिः । लेखनमात्रे च नोच्चारणमित्याग्रहीकारस्तदा रामाचरितस्य दुर्लभत्वबोधनफलकस्वतपःप्रख्यापनार्थं यौगिकनामोक्तिरिति बोध्यम्।अत्र प्रथमो वर्णः गायत्रीप्रथमवर्णप्रतिनिधिभूतः एवं प्रतिश्लोकसहस्रादिवर्णाः गायत्री द्वितीयादिवर्णप्रतिनिधिभूताः अत एव श्रीमद्रामायणस्य गायत्रीमयत्वमिति वर्णयन्ति। तच्चिन्त्यम् । प्रतिश्लोकसहस्रादौ तादृशवर्णानामनुपलब्धेः। केषाञ्चिदुपलब्धत्वेऽपि पदैकदेशत्वात् । अर्थवत्त्वाभावेन प्रयोजनाभावात्। वर्णमात्रघटकत्वेन गायत्रीमयत्वे निखिलपुराणेतिहासादीनां तत्त्वापत्तेः । इष्टापत्तावस्योत्कर्षत्वानापत्तेः। नच तद्वर्णमयत्वाभावे गायत्रीमयत्वानुपपत्तिः । तथात्वे वेदसंमितत्वाभावापत्त्या 'पुण्यं वेदैश्च संमितम् ' इत्यादिवचनस्यासंभवापत्तिरिति वाच्यम् । तद्वर्णमयत्वाभावेऽपि तदर्थवत्त्वेन तन्मयत्वस्याबाधात् । तदर्थवत्त्वे तद्वर्णमयत्वस्याहेतुत्वात् । अत एव निखिलवेदानां गायत्रीतादृशवर्णमयत्वाभावेऽपि तदर्थवत्त्वं संगच्छते । तदर्थवत्त्वं तु गायत्रीप्रतिपाद्यसवित्रन्तर्यामिपरमात्मप्रतिपाद्यत्वेन । अत एव आदित्यहृदये 'ब्रह्मशानाच्युतेशाय ' लक्ष्मणप्रतिज्ञाने 'पौरुषे चाप्रतिद्वन्द्वः' सुमित्रोपदेशे ' प्रभोः प्रभुः ' इत्याद्युक्तयः संगच्छन्त इति दिक् ॥ १ ॥

श्रीगोविन्दराजीया(भूषणाख्या) टीका ।

श्रीगणेशाय नमः ॥ श्रीसीतारामचन्द्राभ्यां नमः ॥

आचार्यं शठकोपदेशिकमथ प्राचार्यपारंपरीं
श्रीमल्लक्ष्मणयोगिवर्यमनुनावास्तव्यनाथादिकान् ।
वाल्मीकिं सह नारदेन मुनिना वाग्देवतावल्लभं
सीतालक्ष्मणवायुसूनुसहितं श्रीरामचन्द्रं भजे ॥ १ ॥

श्रीमत्यञ्जनभूधरस्य शिखरे श्रीमारुतेः सन्निधा-
वग्रे वेङ्कटनायकस्य सदनद्वारे यतिक्ष्माभृतः ।
नानादेशसमागतैर्बुधगणै रामायणव्याकियां
विस्तीर्णां रचयेति सादरमहं स्वप्नेऽस्मि संचोदितः ॥ २ ॥
क्वाहं मन्दमतिर्गभीरहृदयं रामायणं तत्क्व च
व्याख्यानेऽस्य परिश्रमस्तवहमहो हासास्पदं धीमताम् ।
को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपा-
कूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥ ३ ॥
वैयर्थ्यं पुनरुक्तताभवुचितारम्भं विरोधं मिथो-
ऽसाधुत्वं च पदप्रबन्धरचनावाक्येषु निःशेषयन् ।
स्वारस्यं च पदे पदे प्रकटयन् रामायणस्य स्वयं
व्याख्यामेष तनोति सज्जनमुदे गोविन्दराजाह्वयः ॥४॥
पूर्वाचार्यकृतप्रबन्धजलधेस्तात्पर्यरत्नावली-
र्ग्राहंग्राहमहं शठारिगुरुणा संदर्शितेनाधुना ।
अन्यव्याकृतिजातरूपशकलैरायोज्य सज्जीकृतैः
श्रीरामायणभूषणं विरचये पश्यन्तु निर्मत्सराः ॥ ५ ॥
सुस्पष्टमष्टादशकृत्व एत्य श्रीशैलपूर्णार्यतिशेखरोयम् ।
शुश्राव रामायणसंप्रदायं वक्ष्ये तमाचार्यपरंपरात्तम् ॥ ६ ॥
क्वचित्पदार्थं क्वचिदन्वयार्थं क्वचित्पदच्छेदसमर्थनानि ।
क्वचित्क्वचिद्गादनिगूढभावं वक्ष्ये यथापेक्षमवेक्षणीयम् ॥ ७ ॥

श्रियः पतिरवाप्तसमस्तकामः समस्तकल्याणगुणात्मकः सर्वेश्वरः 'वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैः सह ॥' इत्युक्तरीत्या श्रीवैकुण्ठाख्ये दिव्यलोके श्रीमहामणिमण्डपे श्रीभूमिनीलाभिः सह रत्नसिंहासनमध्यासीनो नित्यैर्मुक्तैश्च निरन्तरपरिचर्यमाणचरणनलिनोऽपि तद्वदेव स्वचरणयुगलपरिचरणार्हानपि तद्दीनान्प्रलये प्रकृतिविलीनान्मधूच्छिष्टमग्नहेमकणसदृक्षान्क्षीणज्ञानान् जीवानवलोक्य 'एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः । जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते ॥' इत्युक्तरीत्या दयमानमनाः 'विचित्रा देहसंपत्तिरीश्वराय निवेदितुम् । पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता ॥' इत्युक्तप्रकारेण महदादिसृष्टिक्रमेण तेषां स्वचरणकमलसमाश्रयणोचितानि करणकलेवराणि दत्त्वा नदीतरणाय दत्तैः प्लवैर्नदीरयानुसारेण सागरमवगाहमानेष्विव तेषु तैर्विषयान्तरप्रवणेषु तेषां सदसद्विवेचनाय शासनाच्छास्त्रमित्युक्तरीत्या स्वशासनरूपं वेदाख्यं शास्त्रं प्रवर्त्यापि तस्मिन्नप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिभिस्तैरनादृते स्वशासनातिलङ्घिनं जनपदं स्वयमेव साधयितुमभियियासुरिव वसुधाधिपतिः स्वाचारमुखेन तान् शिक्षयितुं रामादिरूपेण चतुर्धावतितीर्पुरन्तराऽमरगणैः सदुहिणैरभ्यर्थितः स्वाराधकस्य दशरथस्य मनोरथमपि पूरयितुं चतुर्धावततार । तत्र रामरूपेणावतीर्य रावणं निहत्य पितृवचनपरिपालनादिसामान्यधर्ममन्वतिष्ठत् । लक्ष्मणरूपेण रावणिं निरस्य भगवच्छेषस्वरूपं विशेषधर्मं भरतरूपेण गन्धर्वान्निर्वास्य भगवदीयरतन्त्ररूपं शत्रुघ्नरूपेण लवणासुरं ध्वंसयित्वा भागवतशेषत्वं

तानिमान्धर्मांस्तानीमानि चापदानानि तत्कालमात्रपर्यवसितानि भविष्यन्तीति मन्वानः सर्वलोकहितपरः पितामहो भगवान् ब्रह्मा रामचरित्रपवित्रितं शतकोटिप्रविस्तरं प्रबन्धं निर्माय तं नारदादीनध्याप्य भूलोकेऽपि सततराममन्त्रानुसंधानसंधुक्षितहृदयवाल्मीकिमुखेन संग्रहेण प्रवर्तयितुं नारदं प्रेषयामास । तदुक्तं मात्स्ये–'वाल्मीकिना च यत्प्रोक्तं रामोपाख्यानमुत्तमम् । ब्रह्मणा चोदितं तच्च शतकोटिप्रविस्तरम् ॥ आहृत्य नारदेनैव वाल्मीकाय निवेदितम् ' इति । वाल्मीकिरपि निखिलवेदान्तविदितपरतत्त्वनिर्धारणपरया यदृच्छयोपगतं नारदं पृष्ट्वावगतपरतत्त्वस्वरूपः तदनु प्रसन्नेन विधिना दत्तसकलसाक्षात्कारप्रबन्धनिर्माणशक्तिर्वेदोपबृंहणमारभमाणः तस्यार्थप्रधानसुहृत्संमितेतिहासतां व्यङ्ग्यप्रधानकान्तासंमितकाव्यतां च पुरस्कुर्वन् काव्यालापांश्च वर्जयेदिति निषेधस्यासत्काव्यविषयतां च निर्धारयन्स्वग्रन्थे प्रेक्षावतां प्रवृत्त्यर्थं तदङ्गानि दर्शयति प्रथमतश्चतुःसर्ग्या । तत्र प्रथमसर्गेण विषयप्रयोजने दर्शयति । तत्र च 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ' इति वेदान्तरहस्यस्य प्रश्नपूर्वकं ज्ञेयत्वविधानात् 'नापृष्टः कस्यचिद्ब्रूयात्' इत्यपृष्टोत्तरस्य प्रत्यादिष्टत्वाच्च प्रश्नमाविष्करोत्यादितः पञ्चश्लोक्या । अथ प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय प्रचयगमनाय च गुरुनमस्कारं देवतानमस्कारं च विदधाति–

तपस्स्वाध्यायेति। तत्र "आचार्यादेव विद्या विदिता साधिष्ठं प्रापत् । आचार्यवान् पुरुषो वेद " इत्यादिश्रुत्या सदाचार्योपदेशस्यैवातिशयावहत्वात्स्वगुरोराचार्यलक्षणपूर्तिं दर्शयति द्वितीयान्तपदैः । तत्र वेदसंपन्नत्वमाह–**तपःस्वाध्यायनिरतमिति**। तपश्च स्वाध्यायश्च तपःस्वाध्यायौ । अल्पाच्तरं पूर्वमिति तपःशब्दस्य पूर्वनिपातः तपश्चान्द्रायणादि । स्वाध्यायो वेदः । 'स्वाध्यायो वेदतपसोः' इति वैजयन्ती । तयोर्निरतं निरन्तरासक्तम् । आवश्यकत्वादेतदुभयमुक्तम् । तदाह मनुः 'तपो विद्या च विप्रस्य निःश्रेयसकरं परम् । तपसा कल्मषं हन्ति विद्यया ज्ञानमश्नुते ' इति । यद्वा तपो ज्ञानं तप आलोचन इत्यस्माद्धातोरसुन्प्रत्ययः । श्रुतिश्चात्र भवति " यस्य ज्ञानमयं तपः " इति । योग इति यावत् । स्वाध्यायो वेदः तयोर्निरतं 'स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमावसेत् । स्वाध्याययोगसंपत्त्या गमिष्यति परां गतिम् ' इत्युक्तप्रकारेण सक्तमित्यर्थः । यद्वा तपो वेदः "तपो हि स्वाध्यायः" इतिश्रुतेः । स्वाध्यायो जपः 'स्वाध्यायो वेदजपयोः ' इत्युक्तेः । तत्र निरतम् । " स्वाध्यायान्मा प्रमदः " । 'वेदमेव जपेन्नित्यम् ' इत्युक्तरीत्या सक्तमित्यर्थः । यद्वा तपो ब्रह्म "ब्रह्मैतदुपास्स्वैतत्तपः" इतिश्रुतेः । तपःप्रधानः स्वाध्यायस्तपःस्वाध्यायः । शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । वेदान्त इति यावत् तत्र निरतम् । "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इत्युक्तरीत्याध्ययनाध्यापनादिपरमित्यर्थः । यद्वा तपो व्याकरणम् तथोक्तं वाक्यपदीये 'आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः । प्रथमं छन्दसामङ्गमाहुर्व्याकरणं बुधाः' इति तदितरेपाम-

ङ्गानामुपलक्षणं तत्सहितः स्वाध्यायः तपःस्वाध्यायः तत्र निरतं साङ्गवेदाध्यायिनमित्यर्थः । यद्वा तपः स्वं यस्यासौ तपःस्वः अध्यायो वेदः । इङ् अध्ययने इत्यस्माद्धातोरध्यायन्यायेत्यादिना निपातनात् अत एव "स्वाध्यायोऽध्येतव्यः" इत्यत्र स्वस्य अध्यायः स्वाध्यायः स्वशाखेत्याचार्यैर्व्याख्यातं तत्र निरतोऽध्यायनिरतः तपःस्वश्चासावध्यायनिरतश्च तपःस्वाध्यायनिरतः इति कर्मधारयः तम्। यद्वा तपो ब्रह्म तद्रूपः स्वाध्यायः तपःस्वाध्यायः तस्मिन् निरतं सामगानलोलमित्यर्थः। 'वेदानां सामवेदोऽस्मि'इति भगवता गीतत्वात्।एवं वेदाध्ययनमुक्तम्। अथ 'यदधीतमविज्ञातं निगदेनैव शब्द्यतेऽनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्' इति केवलाध्ययनस्य निन्दितत्वात्तदर्थज्ञत्वमाह–वाग्विदां वरमिति । वाग्वेदः ' अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा ' इति वाक्शब्दस्य वेदे प्रयोगात् । तां विदन्ति जानन्तीति वाग्विदः वेदार्थज्ञाः तेषां मध्ये वरं श्रेष्ठं निर्धारणे षष्ठी । यद्वा वाक् व्याकरणं 'यश्च व्याकुरुते वाचम् । वाग्योगविदुप्यति चापशब्दैः' इत्यादौ व्याकरणपर्यायत्वेन शिष्टैर्व्यवहृतत्वात् । एतदङ्गान्तराणामुपलक्षणं षडङ्गविदामग्रेसरमित्यर्थः । एतेन वेदार्थाभिज्ञत्वमर्थसिद्धम् । यद्वा वाग्विदो यावद्विवक्षितार्थप्रतिपादनक्षमशब्दप्रयोगविदः तेषां वरम् । पूर्वं वेदाध्ययनमुक्तम् । अत्र तदध्यापनम् । यद्वा गोबलीवर्दन्यायेन वाचो वेदव्यतिरिक्तानि शास्त्राणि तद्विदां वरम् । अनेन चतुर्दशविद्यास्थानवेदित्वमुक्तम् । यद्वा भूमविद्योपक्रमे नारदेनात्मनः सर्वविद्याभिज्ञत्वमुक्तम् " ऋग्वेदं भगवोऽध्येऽमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि " इति तदिदमुच्यते–वाग्विदां वरमिति । यद्वा वाक् सरस्वती 'गीर्वाग्वाणी सरस्वती ' इति वचनात्। तया वित्यन्ते लभ्यन्त इति वाग्विदः सरस्वतीपुत्रा मरीच्यादयः। विद्लृ लाभ इत्यस्माद्धातोः कर्मणि क्विप् । भगवद्भक्ततया तेषां वरम्–अनेनाभिजात्यमुक्तम् । तपःस्वाध्यायनिरतमित्यनेन विद्योक्ता । समाहितत्वमाह मुनिपुंगवमिति । तेन "अभिजनविद्यासमुदेतं समाहितं संस्कर्तारमभीप्सेत् " इत्यापस्तम्बोक्तमाचार्यलक्षणं ज्ञापितम् । मुनयो मननशीलाः "मनेरुच्च" इति इन्प्रत्ययः । पुमांश्चासौ गौश्चेति पुंगवः "गोरतद्धितलुकि" इति समासान्तष्टच्प्रत्ययः श्रेष्ठ इत्यर्थः । ' वृषे च पुंगवः श्रेष्ठे वृषभे भिषजां वरे ' इति विश्वः । मुनिषु पुंगवो मुनिपुंगवः तम् । सप्तमीति योगविभागान्नागोत्तमादिवत्समासः । तपःस्वाध्यायनिरतमित्यनेन वेदार्थस्य श्रवणमुक्तं वाग्विदां वरमित्यनेन मननं मुनिपुंगवमित्यनेन निदिध्यासनम् । यद्वा " तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् । बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः " इत्युक्तक्रमेण त्रिभिरेतैः पदैः पाण्डित्यबाल्यमौनान्युक्तानि । नरस्य संबन्धि नारम् "नराच्चेति वक्तव्यम्" इत्यण् । अज्ञानमित्यर्थः । तत् यति खण्डयतीति नारदः । दो अवखण्डने इत्यस्माद्धातोः । "आदेच उपदेशेऽशिति" इत्यात्वे सति "आतोऽनुपसर्गे कः" इति कप्रत्ययः । अज्ञाननिवर्तक इत्यर्थः । उक्तं च नारदीये 'गायन्नारायणकथां सदा मायाभयापहाम् । नारदो नाशयन्नेति नृणामज्ञानजं तमः ' इति । यद्वा नारं ज्ञानं तद्ददातीति नारदः । यद्वा नरति सद्गतिं प्रापयतीति नरः परमात्मा । नृ नय इत्यस्माद्धातोः पचाद्यच् । तदुक्तं भारते–' नरतीति नरः प्रोक्तः परमात्मा सनातनः' इति । स एव नारस्तं ददात्युपदिशतीति नारदस्तम् । एवमाचार्यलक्षणपूर्तिमुक्त्वा अधिकारित्वसंपूर्तिप्रदर्शनाय शिष्यलक्षणमाह–तपस्वीत्यादिना । तपोऽस्यास्तीति तपस्वी "तपःसहस्राभ्यां विनीनी" इतिमत्वर्थीयो विनिप्रत्ययः । भूमादयो मत्वर्थाः । तदुक्तम् ' भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः ' इति । प्रशस्ततपस्क इत्यर्थः । तेन " तपसा ब्रह्म विजिज्ञासस्व । स तपोऽतप्यत । स तपस्तप्त्वा । आनन्दो ब्रह्मेति व्यजानात्" इतिश्रुतं ब्रह्मज्ञानसाधनं तप उक्तम् । यद्वा तपो वेदो व्याकरणं ज्ञानं च तद्वान् । तपःशब्दानां तत्त्रात्पर्येकशेषाद्यन्यतमेन अर्थस्मरणे सति एकपदोपात्तकृतिकालादीनामिव अन्वयबोधः सुलभः । तथाचाधीतसाङ्गसशिरस्कवेदोऽधिगताल्पास्थिरफलकेवलकर्मज्ञान इत्युक्तम् । निर्वेदश्च तपः। 'तपस्वी तापसे शोच्ये' इति वैजयन्ती । तेन संजातमोक्षाभिलाष इत्युक्तम्। तादृश एव हि ब्रह्मज्ञानाधिकारी । तपस्वीत्यनेन शमदमादिसंपत्तिरपि सिद्धा । यद्वा तपो न्यासः "तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः" इतिश्रुतेः । न्यासः शरणागतिः प्रणिपातरूपा एवम् 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया' इत्यायुक्तानि प्रणिपातपुरःसराणि दर्शितानि । वल्मीकस्यापत्यं वाल्मीकिः "अत इञ्" इतीञ्प्रत्ययः । नन्वसौ कथं वल्मीकापत्यं यतोऽयं भृगुपुत्र एव प्रतीयते।तथा च विष्णुपुराणे 'ऋक्षोऽभूद्भार्गवस्तस्माद्वाल्मीकिर्योऽभियीयते' इति । अत्रापि उत्तरकाण्डे वक्ष्यति 'भार्गवेणेति संस्कृतौ । भार्गवेण तपस्विना' इति च । अन्यत्र च प्रचेतोपत्यत्वमभिधीयते ' चक्रे प्रचेतसः पुत्रस्तं ब्रह्माप्यन्वमन्यत' इति 'वेदः प्राचेतसादासीत्' इति च प्रसिद्धम्। अतः कथमस्य वाल्मीकापत्यत्वम् । उच्यते । निश्चलतरतपोविशेषेणास्य वल्मीकात्रौ जातायां प्रचेतसा वरुणेन कृतनिरन्तरवर्षेण प्रादुर्भावोऽभूदिति भृगुपुत्रस्यैवास्य प्रचेतसोऽपत्यत्वं वाल्मीकापत्यत्वं च संगच्छते । ननु कथं तत्प्रभवत्वमात्रेण तदपत्यत्वं भैवम्, गोणीपुत्रः कलशीसुत इत्यादिव्यवहारस्य तत्प्रभवेऽपि बहुलमुपलब्धेः । उक्तं च ब्रह्मवैवर्ते 'अथात्रवीन्महातेजा ब्रह्मा लोकपितामहः । वल्मीकप्रभवो यस्मात्तस्माद्वाल्मीकिरित्यसौ' इति। मास्त्वपत्यार्थत्वम् तथापि वाल्मीकिशब्दः साधुरेव गहादिषु पठ्यते । तथा च रघुनन्दनशब्दो रामे राघवरघुनन्दनशब्दवदुभयोर्वाल्मीकिशब्दः पुत्रत्वोपचारात्। अत एव क्वचिद्वाल्मीकिना महर्षिणा इति संबन्धमात्रेऽण् प्रयुज्यते । सत्स्वपि नामान्तरेषु वाल्मीकिशब्देनाभिधानं ज्ञानाङ्गशमदमाद्युपेतत्वस्फोरणाय। परिपप्रच्छ परिविशेषेण पृष्टवान्। कोऽन्वस्मिन्नित्यादिवक्ष्यमाणमिति शेषः। तप इति भिन्नं पदं वा ब्रह्मवाचि । नारदं ब्रह्म परिपप्रच्छेत्यर्थः । अतो न द्विकर्मकत्वहानिः। उक्तं हि वृत्तिकृता 'दुह्याच्पचद्दण्ड्रुधिप्रच्छिचिब्रूशासु

को न्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान्। धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥ २॥

जिमथ्मुषाम्' इत्यादिना प्रच्छेर्द्विकर्मकत्वम्।परिपप्रच्छेति परोक्षे लिट्। प्रश्नस्य परोक्षत्वं विवक्षितभगवद्गुणानुसंधानकृतवैचित्र्यात्सम्प्रत्येहं किल विललापेतिवत्। विभक्तिप्रतिरूपकमव्ययं वा। स्वविनयव्यञ्जनाय प्रथमपुरुषनिर्देशो वा 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इतिवत्। स्वस्मिन्नन्यत्वमारोप्य परोक्षनिर्देशो वा। अनेन "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इत्यार्थवर्णिकी श्रुतिर्गुरूपसदनविषयोपबृंह्यते।

तथाहि तपस्वीत्यनेन परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादित्यस्यार्थोऽदर्शि। अधीतसाङ्गसशिरस्कवेदोऽधिगतात्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषो हि तपस्विशब्दार्थो वर्णितः। वाल्मीकिरित्यनेन सम्यक्प्रशान्तचित्ताय शमान्वितायेत्यस्यार्थो दर्शितः। स्वाध्यायनिरतमित्यनेन श्रोत्रियपदार्थ उक्तः "श्रोत्रियंश्छन्दोऽधीते" इति श्रोत्रियशब्दार्थप्रकाशनात्। वाग्विदां वरमित्यनेन विद्वच्छब्दार्थः। मुनिपुंगवमित्यनेन ब्रह्मनिष्ठशब्दार्थः। नारदशब्देन गुरुशब्दार्थः। 'गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः। अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते' इति तन्निरुक्तिः। परिपप्रच्छेत्यनेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्येतदुपपादितम्। "विधिवदुपसन्नः पप्रच्छ" इति श्रुतेः। अत्र ब्रह्मवाचितपःशब्दप्रयोगेण देवतानमस्काररूपं मङ्गलमाचरितम्। तथोक्तम् अइति भगवतो नारायणस्य प्रथमाभिधानमभिदधता किं नाम मङ्गलं न कृतमिति। 'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे मङ्गलार्थाः स्युर्लिपितो गणतोऽपि च' इति। निरन्तरनिरतिशयानन्दरूपं तपो ज्ञानरूपं ब्रह्म स्वाध्याय सुष्ठु ध्यात्वेति वा देवतानमस्कारः गुरुनमस्कारश्च कृतो भवति।कथं तपःसु निरतं नारदमाध्याय परिपप्रच्छेति। यद्वा परि पूजयित्वेत्यर्थः। 'परिः समन्ततो भावव्याप्तिदोषकथासु च। भाषाश्लेषे पूजने च वर्जने वचने शुभे' इतिवचनात्। नारदं संपूज्य पप्रच्छेत्यर्थः। 'पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम्। मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च'इतिवत्। अस्य श्रीरामायणस्य गायत्र्यक्षरसंख्यानुसारेण चतुर्विंशतिसहस्रग्रन्थसङ्ख्यया प्रवृत्तत्वात् प्रथमसहस्रोपक्रमे तकारः प्रयोक्तव्य इति सत्स्वपि ब्रह्मवाचकेषु शब्दान्तरेषु तपःशब्दस्यैव प्रयोगः। प्रबन्धादौ तकारप्रयोगश्चावश्यकः। तस्य वक्तुर्वाचकस्य च सौख्यकरत्वात्।तथोक्तम्'वस्तुलाभकरो णस्तु तकारः सौख्यदायकः' इति। साहित्यचूडामणौ तु 'तकारो विघ्ननाशकः' इत्युक्तम्। किंच तकारस्य जलं भूतं बृहस्पतिर्देवता। अतः शुभावहोऽनेन प्रबन्धारम्भः। अत एवोक्तं चमत्कारचन्द्रिकायाम् 'वर्णानामुद्भवः पञ्चाद्वयक्तिः सङ्ख्या ततः परम्। भूतबीजविचारश्च ततो वर्णग्रहा अपि' इत्यारभ्य 'एतत्सर्वमविज्ञाय यदि पद्यं वदेत्कविः। केतकारूढकपिवद्भवेत्कण्टकपीडितः' इति। 'कारणात्पञ्चभूतानामुद्भूता मातृका यतः। अतो भूतात्मका वर्णाः पञ्चपञ्चविभागतः॥ वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात्। पञ्च ह्रस्वाः पञ्च दीर्घा बिन्दून्ताः सन्धयस्तथा॥ तत्र स्वरेशः सूर्योऽयं कवर्गेशस्तु लोहितः। चवर्गप्रभवः काव्यष्टवर्गाद्बुधसंभवः॥ तवर्गोत्थः सुरगुरुः पवर्गोत्थः शनैश्चरः। यवर्गजोऽयं शीतांशुरिति समग्रहाः क्रमात्' इति॥ अत्र तपःस्वा इति यगणः आदिलघुत्वात्। तदुक्तम 'आदिमध्यावसानेषु यरता यान्ति लाघवम्। भजसा गौरवं यान्ति मनौ तु गुरुलाघवम्' इति।यगणप्रयोगश्चार्थकर इत्युक्तं चमत्कारचन्द्रिकायाम् 'करोत्यर्थानादिलघुर्यगणो वायुदैवतः'इति। ननु तपस्तापः सुतरामाधिः स्वाधिस्तयोराये निरतमिति ग्रन्थारम्भे अश्लीलवचनमनुचितम्। तदुक्तम्'अश्लीलं तदमाङ्गल्यं जुगुप्सात्रीडभीकरम्' इति। मैवम्। प्रसिद्धिविशेषेण तपोवेदयोरेव प्रथमतरं बुद्ध्यारोहेणाश्लीलत्वप्रसङ्गाभावात्। यथा भगिनीलिङ्गादिप्रयोगेषु। अत्र सर्वत्र प्रायेण पथ्यावक्त्रं वृत्तम्। तदुक्तं वृत्तरत्नाकरे 'यजोर्जेन सरिद्भुर्तुः पथ्यावक्त्रं प्रकीर्तितम्' इति। वृत्तविशेषास्तु तत्र तत्र वक्ष्यन्ते। अत्र वृत्त्यनुप्रासः शब्दालंकारः तकारादीनामावृत्तेः। तदुक्तं काव्यप्रकाशे 'वर्णसाम्यमनुप्रासः' इति। विशेषणानां साभिप्रायत्वात्परिकरो नामार्थालंकारः। उक्तमलंकारसर्वस्वे 'विशेषणानां साभिप्रायत्वे परिकरः' इति। तपःस्वाध्यायनिरतत्वादीनां गुरूपसत्तिहेतुज्ञानानुष्ठानप्रतिपादकत्वात् पदार्थहेतुकं काव्यलिङ्गमलंकारः। 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमलंकृतिः' इतिलक्षणात्। अत्र वाल्मीकिनारदयोः स्वरूपकथनेन शिष्याचार्याभ्यामेवं भवितव्यमिति द्योतनाद् वाक्यगतवस्तुना वस्त्वनिः॥ १॥

२] ति० टी०–अथ प्रश्नमभिनयति—को न्विति। उशब्दो वितर्के। सांप्रतं वर्तमानकालेऽस्मिँल्लोके भूलक्षणे को नु गुणवान्। प्रशस्तबहुगुणवानित्यर्थः। भूमप्रशंसादौ मतुप्। अस्यैव प्रपञ्चः कश्च वीर्यवानित्यादि। दिव्यास्त्रबलादिजशक्तिविशेषेण पराभिभवसामर्थ्यं वीर्यं तद्वान्। कश्च श्रौतस्मार्तसकलधर्मरहस्यज्ञः। बह्वीमप्यपकृतिमुपेक्ष्यैकामप्युपकृतिं बह्वीं मन्यत इति कृतज्ञः। सत्यवाक्यः सर्वावस्थास्वपि यथाश्रुतदृष्टतत्त्वार्थवक्ता। दृढव्रतः आपत्यपि धर्माय परिगृहीतव्रततविशेषस्य त्यागरहितः॥ २॥

रा० टी०–प्रभाकारमाह–को न्वस्मिन्नित्यादिभिः। अस्मिन् लोके सांप्रतमस्मिन्काले गुणवान् अतिशयसौशील्यादिमान् कोऽस्ति अस्तीत्यध्याहियते। यत्र क्रियान्तरं न श्रूयते तत्राऽस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽपि प्रयुज्यते इति भाष्योक्तेरस्तेः सर्वत्र संबन्धो बोध्यः। तत्र भवन्तीति लटः संज्ञा। वीर्यवान् अतिशयपराक्रमवाँश्च कः। धर्मज्ञः अतिशयधर्मज्ञाता च कः। कृतज्ञः कृतं कथंचिज्जातोपकृतिमेव जानाति स्मरति नानन्तरजाताऽपकृतिगणं जानातीति। कृतज्ञश्च कः वक्ष्यति च 'कथंचिदुपकारेण कृतेनैकेन तुष्यति। न स्मरत्यपकाराणां शत-

चारित्रेण च को युक्तः सर्वभूतेषु को हितः। विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३ ॥

मप्यात्मवत्तया ' इति । सत्यवाक्यः सत्यं मृषासंसर्गरहितं वाक्यं लीलाभाषादिष्वपि यस्य स च कः । वक्ष्यति च 'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन' इति । दृढव्रतः एकपत्न्यादिविषयकदृढव्रतवाँश्च कः । तथा वक्ष्यति 'अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । नहि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ' इति अस्मिँल्लोके अस्मिन् काले इत्युक्तेः प्रकटीभूतेश्वरेश्वरविषयकोऽयं प्रश्न इति ध्वनितम् । अन्यथा 'अयोध्यां च परित्यज्य पादमेकं न गच्छति' इत्याद्युक्त्या सार्वकालिकरघुनाथस्थितेः प्रसिद्धत्वादस्मिन्काले इत्याद्युक्तेरनर्थकत्वं प्रसज्येत । सर्वत्र किंशब्दसंबन्धेन परिगणितगुणाद्यन्यतमस्यापि रघुनाथादन्यत्रानुपलम्भत्वं बोधितम् । तेन प्रष्टुस्तद्गुणादिषु प्रीत्यतिशयो व्यक्तः ॥ २ ॥

गो० टी०—कथं परिपप्रच्छेत्याकाङ्क्षायां प्रश्नप्रकारं दर्शयति—**को न्वित्यादि**श्लोकत्रयेण । ' नुः पृच्छायां विकल्पे च ' इत्यमरः । अस्मिन् लोके भूलोके सांप्रतमस्मिन्काले । 'अस्मिन्काले ऽधुनेदानीं संप्रत्येतर्हि सांप्रतम्' इति वाणः । लोकान्तरे विष्णोर्विदितत्वात् । अत्रैव कालान्तरे नृसिंहादेः प्रसिद्धत्वाच्च तद्व्यावृत्त्यर्थमेवमुक्तम् । गुणा अस्य सन्तीति गुणवान् । भूमादयो मत्वर्थाः । अस्मिन् लोके अस्मिन्काले को वा सकलकल्याणगुणसंपन्न इत्यर्थः । एवं सामान्येन गुणसमुदायं पृष्ट्वा विशिष्य तत्तद्गुणाश्रयं पृच्छति कश्च वीर्यवान् इत्यादिना । यद्वा गुण्यते आवर्त्यते पुनः पुनराश्रितैरनुसंधीयत इति गुणः सौशील्यम् । 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति विश्वः । सुशीलं हि नाम महतो मन्दैः सह नीरन्ध्रेण संश्लेषः तस्याधिक्यं सौशील्यं तद्वान् । सौशील्ये गुणशब्दोऽभियुक्तैः प्रयुक्तः । 'वशी वदान्यो गुणवानृजुः शुचिः ' इति । को वा सौशील्यवानित्यर्थः । सर्वत्र प्रश्ने न्विति किंशब्दोऽपि यत्र न प्रयुक्तस्तत्रानुषज्जनीयः । एकेनैव किंशब्देनोपपत्तावप्यादरातिशयात् पुनः पुनस्तत्प्रयोगः । प्रदानवदेव तदुक्तमिति न्यायेन प्रतिगुणं गुण्यावृत्त्यभिप्रायेण वा लोके गुणसंबन्धाद्गुण्यतिशयः । इह तु गुणिसंबन्धाद्गुणातिशय इति द्योतनाय गुणिनः प्रथमं निर्देशः । गुणाः सत्यज्ञानेत्युक्तेः । कश्च वीर्यवान् चकार उक्तसमुच्चये । सत्स्वपि विकारहेतुष्वविकृतत्वं वीर्यम् 'औषधं वीर्यवद्' इत्यादौ तथादर्शनात् तद्वान् । धर्मः अलौकिकश्रेयःसाधनं तं सामान्यरूपं विशेषरूपं च जानातीति धर्मज्ञः । चकारोऽनुक्तसमुच्चयार्थः । परिहार्यार्थमज्ञश्चेत्यर्थः । कृतमुपकारं स्वल्पं प्रासङ्गिकमपि बहुतया जानातीति कृतज्ञः अपकारास्मरणं चशब्दार्थः । वक्ष्यति 'न स्मरत्यपकाराणां शतमप्यात्मवत्तया । कथंचिदुपकारेण कृतेनैकेन तुष्यति' इति । सत्यं कृच्छ्रेष्वप्यनृतशून्यं वाक्यं वचनं यस्य सः सत्यवाक्यः । तथा वक्ष्यति 'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन' इति । दृढव्रतः निश्चलसंकल्पः 'अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । नहि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः' इति ॥ २ ॥

३] **ति० टी०**—**चारित्रेणेति** । चरित्रमेव चारित्रम् । स्वार्थिकोऽण् । वृत्तसंपदनेनोच्यते । सर्वभूतेषु सर्वप्राणिषु मध्ये कः पुमान्हितः । ऐहिकामुष्मिकहितवहोऽशत्रुभ्यः । यत्तु सर्वप्राणिषु सापराधिष्वपि हितकरणशील इति व्याचक्षते तत्तु हितयोगे चतुर्थ्यापत्तेरयुक्तम् । विद्वानात्मानात्मसकलपदार्थतत्त्वज्ञः । समर्थो लौकिकव्यवहारे प्रजारञ्जनादौ चातुर्यं सामर्थ्यं तद्वान् । कामाधिकसौन्दर्यवत्त्वेन नित्यसुखरूपत्वेन चैकप्रियं केवलप्रियं दुःखासंभिन्नप्रियत्ववदर्शनं यस्य सः । यत्त्वेकं प्रति प्रियं दर्शनं यस्येति तदयुक्तम्, सर्वप्रियत्वस्य प्रतिपादनात् । एकोऽद्वितीयः स चासौ प्रियदर्शनश्चेत्यर्थ इति तीर्थः ॥ ३ ॥

रा० टी०—**चारित्रेणेति** । चारित्रेण नित्यकुलाचारेण युक्तो नित्ययुक्तश्च कः । ' विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः' इत्यनेन नित्यचारित्रनित्ययुक्तेतद्धटकीभूतनित्यपदलोपो ज्ञातव्यः । अन्यथा क्षणिककुलाचारक्षणिकयुक्तत्वस्य बहूनां प्रसिद्धत्वादेतत्प्रश्नस्य निरर्थकत्वापत्तिः । एतेन प्रश्नविषयीभूतस्य सर्वविलक्षणत्वं बोधितम् । सर्वभूतेष्वपराधयुक्तेष्वपि हितः प्रियकर्ता च कः एतेन परमात्मनो युद्धादिप्रवृत्तिस्तदनुग्रहायैवेति प्रश्नकर्तुर्ज्ञानमस्तीति सूचितम् । किंच सर्वाणि भूतानि येभ्यः तानि तेषु ब्रह्मणीत्यर्थः । बहुत्वमादरार्थम् । हितो नियामकत्वेन प्राप्तश्च कः । गत्यर्थधिधातुप्रकृतिकनिष्ठाप्रत्ययान्तो हित इति । विद्वान्सर्वज्ञश्च कः समर्थः अघटितघटनापटीयांश्च कः । एकप्रियदर्शनः एकं प्राकृतभिन्नं प्रियं दर्शनं यस्य प्राकृतभिन्नत्वविशिष्टप्रियदर्शनविशिष्टश्च क इत्यर्थः । किंच एकैः प्रधानैर्ब्रह्मादिभिः प्रियत्वेन दृश्यतेऽसाविति एकप्रियदर्शनः ब्रह्मादिप्रीतिविषयीभूतश्च क इत्यर्थः । किंच एकः सर्वादिभूतः स एव प्रियदर्शनः सर्वादिभूतत्वसमानाधिकरणप्रियदर्शनवाँश्च क इत्यर्थः । किंच एकं केवलं प्रियं दर्शनं यस्य नित्यप्रीतिविषयीभूतदर्शनविषयीभूतश्च कइत्यर्थः । किंच एकः साधारणः सरलस्वभाव इत्यर्थः । प्रियं दर्शनं यस्य स प्रियदर्शनः स एव स इति कर्मधारयः । सरलस्वभावत्वसमानाधिकरणप्रीतिविषयीभूतदर्शनविषयीभूतत्ववाँश्च क इत्यर्थः । किंच एकः सर्वत्र समबुद्धिः स एव प्रियदर्शनः सर्वत्र समत्वे सति प्रियदर्शनश्च क इत्यर्थः । किंच एके अल्पाः प्रियदर्शना यस्मात् अन्यत्र सर्वत्राल्पप्रियदर्शनत्वबुद्धिसंपादकप्रियदर्शनविषयीभूतश्च क इत्यर्थः । किंच एकप्रियदर्शनः अद्वितीयप्रियदर्शनविषयीभूतश्च क इत्यर्थः । तथा च कोशः ' एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पसंख्यायां च प्रवर्तते ' इति । यत्र चकारन्यूनता तत्र तदाकृत्यान्वयो बोध्यः ॥ ३ ॥

गो० टी०—चरित्रमाचारः तदेव चारित्रं वायसराक्षसादिवत्स्वार्थेऽण्प्रत्ययः तेन युक्तः सर्वदाप्यनुल्लङ्घितकुलाचार इत्यर्थः। सर्वभूतेषु सर्वप्राणिषु विषये। 'भूतं क्ष्मादौ च जन्तौ च न स्त्रियां गुणसत्त्वयोः,' इति वाणः। हितः हितकरः हितशब्दात्तत्करोतीति णिच्

आत्मवान्को जितक्रोधो द्युतिमान्कोऽनसूयकः । कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥ ४ ॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे । महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥ ५ ॥

पचाद्यच् णिलोपे पूर्वरूपे च रूपम्।भूतशब्देन स्वपरतारतम्याभाव उक्तः।सर्वशब्देन सापराधेष्वपि हितकरत्वमुक्तम् । वेत्तीति विद्वान् सर्वशास्त्रज्ञः "विदेः शतुर्वसुः" इत्यनेन वस्वादेशः । समर्थः सर्वकार्यधुरंधरः । प्रियं दर्शनं यस्यासौ प्रियदर्शनः एकश्चासौ प्रियदर्शनश्च एकप्रियदर्शनः । अयमिव नान्यो लोके प्रियदर्शनोऽस्तीत्यर्थः । यद्वा एकप्रियदर्शनः एकरूपाप्रियदर्शनः । लोके हि कस्यचिद्दर्शनं कदाचित्प्रियं भवति कदाचिदप्रियं च भवति । 'तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम्' इति वचनात् । अयं तु न तथा । किंतु 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इत्युक्तरीत्या सदानुभवेऽप्यपूर्ववद्विस्मयमादधान इत्यर्थः। तथैवोत्तरयिष्यति–सदैकप्रियदर्शन इति। 'एके मुख्यान्यकेवलाः' इत्युभयत्राप्यमरः ॥ ३ ॥

४] ति० टी०–आत्मवानिति । वशीकृतान्तःकरण इत्यर्थः । जितक्रोधो निन्दाहिंसादिजनकचित्तवृत्तिविशेषरहितः। क्रोधोऽत्र कामादीनामप्युपलक्षणम् । द्युतिः सर्वलोकस्य दिदृक्षाजनको देहकान्तिविशेषस्तद्वान् । अनसूयको विधैर्यादितपःसु परौन्नत्यासहनमसूया तद्रहितः । असूयतेः कण्ड्वादियङन्तादुपतापार्थाण्ण्वुल् । संयुगे युद्धकाले जातरोषस्य कस्य रोषाद्देवाश्च देवा अपीन्द्रादयोऽपि अपिना असुराश्च बिभ्यति अतिबलवतोऽस्मानप्यस्य क्रोधः संहरिष्यतीति भयं प्राप्नुवन्तीत्यर्थः। कस्येति संबन्धसामान्ये षष्ठीत्यन्ये। कस्य संयुगे कस्माद्बिभ्यतीति तीर्थः ॥ ४ ॥

रा० टी०–आत्मवानिति । आत्मा कथंचित्स्वसांमुख्यमात्रेण रक्षकत्वरूपः प्रशस्तः स्वभावोऽस्यास्तीत्यात्मवाँश्च कः । किंच आत्मानः जीवधृतिदेहस्वभावपरमात्मानः सन्ति नियम्यत्वेनास्येति । तत्र प्रमाणम् "भीषास्माद्वातः पवते" इत्यादि 'कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया' इत्याद्यागमः । आत्मशब्दस्य जीवादिवाचकत्वे 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरोऽनुसंधेयः। अत्र वर्ष्मशब्देन लक्षणया जीवस्यापि ग्रहणम् । अत एव आत्मा द्विविधो जीवात्मा परमात्मा चेत्यादिग्रन्थाः संगच्छन्ते । जितक्रोधः सापराधेष्वपि क्रोधरहितश्च कः एतेनापराधिभ्यो दण्डदानं तच्छुद्धिहेतुकमिति ध्वनितम् । द्युतिमान् अतिशयप्रकाशवान् सर्वेषां प्रकाशकानां प्रकाशकश्च क इत्यर्थः । "तस्य भासा सर्वमिदं विभाति" इति श्रुतिः । किंच अजितक्रोधो द्युतिमानिति पदच्छेदः । अजितः ईश्वरैरपि जेतुमशक्यः क्रोधः कृतिर्यस्य सोऽजितक्रोधः भावकप्रत्ययान्तयत्नार्थककृञ्धातुनिष्पन्नः क इति।अत एव अधः सर्वे द्युतिमन्तो यस्मात्तादृशश्च कः । अनसूयकः नासूया गुणेषु दोषाविष्करणं यस्य यस्मिन्वेत्यनसूयकश्च कः । शैषिके कपि "आपोऽन्यतरस्याम्" इति ह्रस्वः। असूया तु 'दोषारोपो गुणेष्वपि' इत्यमरः। किंच अनिति पालयति सर्वमिति अनो विष्णुः पचाद्यच् तत्र सुः प्रेरणा यस्य सोऽनसूः प्रेरणार्थकसूधातोर्भावक्विबन्तः सूरिति उपलक्षणतया शिवब्रह्मविष्णुप्रेरक इत्यर्थः । उः शंभुः यः सर्वत्र प्राप्तिमान् विष्णुः याधातुप्रकृतिकयत्यर्थकप्रत्ययान्तप्रकृतिकार्शआद्यजन्तो य इति । 'यकारस्तु प्रजापतिः' इत्यभिधानात् यो ब्रह्मा च तयोरेकशेषे यावितिततः उश्च यौ च उयाः शंभुविष्णुब्रह्माणस्तेषां कं सुखं यस्मात् स उयकः 'कं सुखेऽपि प्रकीर्तितम्' इतिकोशः । शंभुविष्ण्वादिभ्योऽपि सुखदाता अनसूश्चासौ उयकश्च अनसूयकश्च कः जातरोषस्य कृपया शिक्षार्थं स्वीकृतकोपाभासस्य कस्य संयुगे संग्रामे देवाः चकारादन्येऽप्यसुरादयो बिभ्यति भयं प्राप्नुवन्तीत्यर्थः । कस्य संयुगे इत्यन्वयात्र किंशब्दाद्धीत्यर्थानामित्यपादानमूलकपञ्चमीप्रसक्तिः । कस्य बिभ्यतीत्यन्वये तु अपादानत्वाविवक्षया तदप्रसक्तिः संबन्धसामान्यविवक्षया च षष्ठी ॥ ४ ॥

गो० टी०–आत्मवानिति । आत्मवान् धैर्यवान् 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि' इत्यमरः । अपकम्प्यधैर्य इत्यर्थः । जितक्रोधः विधेयकोपः । दण्डार्हेष्वेवाहितकोप इत्यर्थः। 'क्रोधमाहारयत्तीव्रम्' इति हि वक्ष्यति । द्युतिमान्कान्तिमान् 'रूपं संहननं लक्ष्मीं सौकुमार्यं सुवेषताम् । ददृशुर्विस्मिताकारा रामस्य वनवासिनः' इति हि वक्ष्यति । गुणेषु दोषाविष्करणमसूया। 'असूया तु दोषारोपो गुणेष्वपि' इत्यमरः । अविद्यमानासूया यस्यासावनसूयकः ।"शेषाद्विभाषा" इति कपि "आपोऽन्यतरस्याम्" इति ह्रस्वः।यद्वा अनसूयकः असूभ् कण्ड्वादौ पठितः । तस्मात् "कण्ड्वादिभ्यो यक्"इतियक्प्रत्ययः"अकृत्सार्वधातुकयोः" इति दीर्घः। ततो "निन्दहिंस–" इत्यादिना क्तृच् स न भवतीत्यनसूयकः । देवाश्चेति चकारेणासुरादयः समुच्चीयन्ते । जातरोषस्य कस्य संयुगे देवादयः सर्वे बिभ्यतीत्यन्वयः । अतो न "भीत्रार्थानाम्" इति किंशब्दात्पञ्चमी । शत्रुविषयः कोपो मित्राणामपि भयमावहतीत्यर्थः । यद्वा चकारोऽप्यर्थः । अनुकूला अपि बिभ्यति किं पुनः प्रतिकूला इत्यर्थः । यद्वा संयुगे जातरोषस्य कस्य बिभ्यतीत्येवान्वयः । "शेषे षष्ठी" । 'संज्ञापूर्वको विधिरनित्यः' इत्यपादानसंज्ञापूर्वकपञ्चम्यभावः । अत्र श्लोकत्रये समृद्धिमद्वस्तुवर्णनादुदात्तालंकारः ॥ ४ ॥

५] ति० टी०–एतदित्युक्तगुणसामान्यापेक्षया नपुंसकम्। एतद्दिव्यपुरुषगुणजातं कस्यास्तीति श्रोतुमहमिच्छामि । उक्तगुणसामग्र्यस्यैकत्र दुर्लभत्वात्तादृशपुरुषविशेषज्ञाने मे परं सर्वस्मादपि कौतुकान्तरादुत्कटं कौतुकं वर्तते । नन्वेवंविधनरो मयापि दुर्ज्ञेयो नेत्याह–हि यतो महर्षे अपरोक्षीकृताशेषार्थ ! त्वमेवंविधमुक्तगुणवन्तं नरं दिव्यपुरुषं ज्ञातुं समर्थोऽसि सर्वलोकप्रसिद्धसामर्थ्योऽसि । तस्मात्त्वत्त एव श्रोतुमिच्छामीति पूर्वेण संबन्धः ॥ ५ ॥

रा० टी०–स्वकृतप्रश्नोत्तरस्य द्रुतं शुश्रूषया ऋषिं प्रोत्साहयन्नाह–**एतदित्यादिना** । हे महर्षे ऋषिश्रेष्ठ ! यतो मे

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः । श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ ६ ॥
बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः । मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ ७ ॥

परं कौतूहलमाश्रर्यमस्ति अतो भवतः एतन्मत्प्रश्नविषयीभूततत्त्वमहं श्रोतुमिच्छामि यत एवंविधं नरमीश्वरनियन्तृदिव्यपुरुषं ज्ञातुं बोधयितुं त्वं समर्थोऽसि अन्तर्भावितणिजर्थः । परं कौतूहलं हि मे इत्युक्त्या "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्यादिश्रुतिबोधितवाङ्मनसगोचरातीतप्राकट्यं कथमिति हेतुर्व्यक्तः । तेन तद्वस्तुनो दुर्लभत्वं बोधितम् ॥ ५ ॥

गो० टी०–अथायं प्रभो विजिगीषामूलमिति नारदो मन्येतापीतिमन्वानः स्वप्रभो जिज्ञासाहेतुक इति दर्शयन् प्रश्नमुपसंहरति–एतदिति । एतत्पूर्वोक्तगुणाश्रयभूतं वस्तु अहं जिज्ञासुः न विजिगीषुः श्रोतुं न तु क्षेप्तुमिच्छामि न तु ब्रूहि इति निर्बध्नामि अहं तावदिच्छामि मयि भवतः प्रसादोऽस्ति चेद्वक्तुमर्हसीति भावः । तत्र हेतुमाह–परमिति । हिर्हेतौ 'हिर्हेतावववधारणे' इति वाणः । यस्मात्कारणान्मे परमुत्कृष्टं कौतूहलं विस्मयोऽस्ति तस्मादिच्छामि । यद्वा हिः प्रसिद्धौ सुखविकासाद्यनुभावैर्मम हर्षस्तव स्पष्ट इत्यर्थः । स्वप्रश्नोत्तरदानदेशिकालाभान्निर्विण्णः संप्रति भवद्दर्शनेन संजाताभिलाषोऽस्मि ब्रूहि मत्प्रष्टृमिति भावः । आचार्यस्य ज्ञानवत्तामनुमाय शिष्येणोपपत्तिः क्रियते इतिन्यायेन नारदस्य प्रष्टव्यविषयज्ञानसंभावनामाह–महर्ष इति । ऋषिः ज्ञानस्य पारं गन्ता । ऋप्गतावित्यस्माद्धातोः "इगुपधाज्ञिकित्" इतीन् । गत्यर्थो ज्ञानार्थः । महांश्चासौ ऋषिश्च महर्षिः "आन्महतः समानाधिकरणजातीययोः" इत्यात्वम् । हेतुगर्भविशेषणं महर्षित्वात्त्वमेवंविधं नरं पुरुषं ज्ञातुमर्हसि ब्रह्मणः सकाशाद्विदितसकलविशेषस्त्वं कथं मे जिज्ञासोर्न वदेरिति भावः । अत्र पूर्वार्धे काव्यलिङ्गमलंकारः उत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुत्वात् 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमलंकृतिः' इतिलक्षणात् । उत्तरार्धे परिकर इति अनयोः संसृष्टिः । अन्ते चास्येतिकरणं बोध्यम् इति परिपप्रच्छेति संबन्धः ॥ ५ ॥

६]ति० टी०–श्रुत्वेति। एतदुक्तप्रश्नजातम्। त्रिलोकज्ञः भूर्भुवःस्वर्लोकलक्षणास्त्र्यवयवलोकांस्तत्रत्यवृत्तान्तं जानातीत्यर्थः । एवं च द्विगुत्वाभावान्न ङीप् । नारदो वाल्मीकेरेतद्वचः श्रुत्वा श्रूयतामिति चामन्त्र्यैकाग्र्यसिद्धयेऽभिमुखीकृत्य स्वगतस्यार्थस्य चिरं प्रतिपिपादयिषितस्य जिज्ञासुलाभेन प्रहृष्टो भूत्वा वक्ष्यमाणं वाक्यमब्रवीत् ॥ ६ ॥

रा० टी०–उत्तरं वर्णयितुं वृत्तमाह–श्रुत्वेत्यादिना । त्रिलोकज्ञः त्रिषु ब्रह्मविष्णुमहेश्वरेषु लोको दृष्टिर्यस्य स त्रिलोकः सर्जनाद्यर्थं तत्तत्काले तत्तदाज्ञापकसाकेताधीश इत्यर्थः । तज्जानातीति त्रिलोकज्ञो नारदो वाल्मीकेरेतदुक्तं वचः श्रुत्वा चान्त्रित्यविहारिसाकेताधीशमनुसंधाय तं प्रश्नकर्तारमामन्त्र्य प्रशस्य च हृष्टः अतिहर्षविशिष्टः सन् श्रूयतामिति वाक्यमब्रवीत् । तत्तदाज्ञापक इत्यनेन साकेताधीशस्य त्रिगुणातीतत्वं ध्वनितम् । तज्जानातीत्यनेन ऋषेर्विज्ञानिश्रेष्ठत्वं व्यक्तम् । प्रहृष्ट इत्यनेन एतादृक्प्रश्नकर्तृशिष्यः परमात्मातिकृपया लभ्यत इत्यतीव भाग्यवत्ता ममेति हेतुर्ध्वनितः । तेन नासंवत्सरवासिने प्रब्रूयादिति निषेधस्यानवसरः सूचितः । अनुसंधाय इत्यनेन तद्वस्तुनो दुर्बोधत्वं बोधितम् ॥ ६ ॥

गो० टी०–एवं "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्युक्तं गुरूपसदनविधिमुपबृंह्य "येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इत्युक्तं प्रवचनविधिमुपबृंहयति–श्रुत्वेत्यादिना । तत्र "नासंवत्सरवासिने प्रब्रूयात्" इतिनियमस्य ज्येष्ठपुत्रव्यतिरिक्तविषयात् वाल्मीकेश्च भृगुपुत्रतया भ्रातृपुत्रत्वात् शुश्रूषानिरपेक्षं प्रीत्योपदिदेशेत्याह–श्रुत्वा चेति । त्रयाणां लोकानां समाहारस्त्रिलोकं पात्रादित्वान्न ङीप् । यद्वा त्रित्वविशिष्टो लोकस्त्रिलोकः । नवरसरुचिरामित्यत्र काव्यप्रकाशे तथैव व्याख्यानात् । यद्वा त्रयो लोका यस्मिन् तत्त्रिलोकमिति ब्रह्माण्डमुच्यते तज्जानातीति त्रिलोकज्ञः । भूर्भुवःस्वरिति त्रैलोक्यम् । यद्वा विष्णुपुराणोक्तरीत्या कृतकमकृतकं कृतकाकृतकमिति त्रयो लोकाः । महर्लोकपर्यन्ताः कृतकाः । जनोलोकः कृतकाकृतकः । सत्यलोकोऽकृतक इति । यद्वा लोका जनाः । 'लोकस्तु भुवने जने' इत्यमरः । बद्धमुक्तनित्यमुक्तास्त्रयो लोकाः । नारदः ब्रह्मपुत्रतया तज्ज्ञानार्ह एतत्पूर्वोक्तरीत्या व्यङ्ग्यार्थगर्भं वाल्मीकेः स्वाभिमतस्य पुत्रस्य वचः परिपूर्णार्थं वाक्यं श्रुत्वा निशम्य चकारेण तदूहित्वा चेत्यर्थः । प्रहृष्टः स्वेनोपदिदिक्षितस्यैव पृष्टत्वेन संतुष्टः शतकोटिप्रविस्तररामायणे स्वावगतस्यैव अनेन पृष्टत्वात् रामगुणस्मरणामृतपानलाभादपूर्वशिष्यलाभाद्वा 'सोऽहं मन्त्रविदेवास्मि नात्मवित्' इत्युक्तरीत्या सनत्कुमारं प्रति स्वस्योपसर्पणस्मारकत्वाद्वा प्रहृष्टः सन् । कर्तरि क्तः । रामगुणानुसंधानजनितं निजवैचित्र्यं व्याजेन परिहर्तुं श्रूयतामित्यामन्त्र्याभिमुखीकृत्य वाक्यमुत्तररूपमब्रवीत् व्यक्तमुक्तवान् ॥ ६ ॥

७] ति० टी०–बहव इति । ये बहवो गुणास्त्वया कीर्तितास्त एकत्र प्राकृतपुरुषमात्रे दुर्लभा एव । चःपादपूरणे । अथापि हे मुने ! यस्तैर्युक्तस्तं बुद्ध्वा स्मृत्वाहं वक्ष्यामि तादृशो नरः श्रूयताम् । प्राप्तकाले लोट् । तस्य श्रवणं ते प्राप्तकालमित्यर्थः ॥ ७ ॥

रा० टी०–तद्वाक्यमेवाह–बहव इत्यादिना । ये बहवो गुणास्त्वया कीर्तिताः पृष्टाः । चादपृष्टा अपि प्राकृतविलक्षणा एतज्जातीयका गुणास्ते दुर्लभा एव । ईश्वरनियन्तृपरमपुरुषाद्विन्ने नैव सन्तीत्यर्थः । अत्र एकघटसत्त्वेऽपि घटान्तराभावतात्पर्येण घटो नास्तीत्यनुभवाभावादभावीयप्रतियोगिताया सामान्यधर्मावच्छिन्नत्वनियमः । तेन गुणान्यतमस्याप्यभावः सूचितः । एकसत्त्वेऽपि द्वयं नास्तीति न्यायस्य तु नात्रावसर-

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः । नियतात्मा महावीर्यो द्युतिमान्धृतिमान्वशी ॥ ८ ॥

स्तस्य द्वित्वादिवाचकोपात्तविषयत्वात् । यदि च ये गुणास्त्वया कीर्तितास्ते बहवोऽन्यत्र न सन्तीत्यन्वयस्तदान्यत्रापि क्वचित्केचन सन्तीति प्रतीयते । पूर्वकल्पेऽपि यदि जसुपात्तसंख्याया विवक्षा तदा सोऽप्युत्तरेण सम एवेति दिक् । अतो बुद्धा ईश्वरनियन्तृदिव्यपुरुषं विचार्य अहं वक्ष्यामीति तैर्भवत्पृष्टापृष्टान्यावृत्तिप्राकृतविलक्षणगुणैर्युक्तो नरः एकत्वविशिष्टः प्राकृतविलक्षणपुरुषस्त्वया श्रूयताम् । बुद्धा वक्ष्यामीत्यनेन पुनः पुनर्विचारादेव तद्वस्तु लभ्यत इति सूचितम् ॥ ७ ॥

गो० टी०—वक्ष्यमाणस्यासदुत्तरत्वपरिहारायात्मनो वाल्मीकेराश्रयाभिज्ञत्वमाह—बहव इति । यद्वा वेदान्तोदितगुणानां विष्णोरन्यत्रासंभवात्तेषां पुरुषशब्दवाच्यत्वासंभवाच्चतुर्मुखसंप्रदायाच्च विष्णावेव परतत्त्वतां परिशेषयन्नाह—बहव इति । बहवो विपुलाः अनेकगुणवितितिमूलभूता इत्यर्थः । अनेनापृष्टानामपि वक्ष्यमाणानां गुणानां निदानमुपदर्शितम् । यद्वा बहवः अपरिच्छिन्ना इत्यर्थः । श्रूयते हि अपरिच्छिन्नत्वं गुणानाम् । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इति । अत्रानन्दस्यैकस्यापरिच्छिन्नत्वोक्तिरितरेषामप्यपरिच्छिन्नत्वप्रदर्शनार्था । उक्तं हि यामुनाचार्यैः 'उपर्युपर्यब्जभुवापि पूरुषान्' इत्यादिना । दुर्लभाः परमपुरुषादन्यत्रासंभाविताः अन्येषां न ब्रह्मा नेशान इत्यादिनाऽसंभाव्यत्वादिवचनादिति भावः । अनेन प्रभस्य देवताविशेषनिर्धारणपरत्वमात्मनावगतमिति व्यञ्जितम् चकार उक्तसमुच्चयार्थः अनुक्तसमुच्चयार्थो वा । तेन स्वाभाविकानवधिकातिशयाऽसंख्येयकल्याणरूपा इत्युक्तम् । एवकार इतरत्र सर्वात्मना असंभावितत्वमभिव्यनक्ति । य इति वेदान्तप्रसिद्धिरुच्यते । गुणाः वीर्यादयः कीर्तिता इत्यनेन गुणानां प्रभकालेऽपि भोग्यतातिशयः सूच्यते । तैर्युक्तो न तु कल्पित इति निर्गुणवादनिरासः । नरः पुरुषः । 'पुरुषाः पूरुषा नराः' इतिनिघण्टुः । "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" 'पुरुषः पुण्डरीकाक्ष इतिश्रुतिस्मृत्युदुगतः पुरुषशब्दोऽनेन प्रत्यभिज्ञाप्यते । श्रूयतां न तु यथाकथंचित्परिकल्प्यतां श्रण्विति अभिधानाद्विनयोक्तिरियं तात्कालिकं किंचित्प्रकल्प्यते इति भ्रमं वारयति अहं बुद्धा वक्ष्यामीति मत्पितुर्ब्रह्मणः सकाशाच्छतकोटिप्रविस्तररामायणमुखेन विदित्वा वक्ष्यामि । अनेन संप्रदायाभिज्ञत्वमात्मनो दर्शितम् । यद्वा रामगुणानुसंधानवैचित्र्येन न मे किंचित्प्रतिभाति क्षणाद् बुद्धा वक्ष्यामीत्यर्थः । अतो मध्ये वाक्यान्तरमलंकाराय अन्यथा वाक्यगर्भितमिति काव्यदोषः स्यात् । अहं वक्ष्यामि अहं भूत्वा वक्ष्यामि नेदानीं नारदोऽस्मि रामगुणश्रवणशिथिलत्वात् । रामगुणमग्नोयं नदीप्रवाहमग्न इव अवलम्बनयष्टिमपेक्षते हे मुने इति । यद्वा प्रभकाले समवधानविशेषमालक्ष्य श्लाघते मुने इति । अथ क्षणात्संक्षुब्धितो नारदो वाक्यशेषं पूरयति तैरिति । नर इत्यनेन परतत्त्वनिर्धारणं प्रभफालितार्थं द्योतयति । बुद्धा इत्यनेन श्रुतिस्थतत्तच्छब्दार्थो विवृतः ॥ ७ ॥

८] ति० टी०—इक्ष्वाकिवंति । इक्ष्वाकुवंशात्प्रभव आविर्भावो यस्य स तथा । रामो नाम राम इति नाम्ना प्रसिद्धो जनैश्च श्रुतोऽस्ति । तस्मिन्नेवैकत्र सर्वे त्वत्पृष्टा गुणाः, अन्ये च गुणा इति शेषः । तच्चेदं यौगिकं नाम । रमन्ते योगिनोऽस्मिन् यद्वा रमयति स्वकानिति योगस्य प्रदर्शनात् । तत्रान्त्ये नारकपूरुषादिवत् "अन्येषामपि दृश्यते" इति दीर्घः । तानेव गुणानाह नियतात्मा निगृहीतान्तःकरणः । वीर्यं व्याख्यातम् । द्युतिः कान्तिः । आपत्संपदोरविकृतिश्चित्तस्य धृतिस्तद्वान् । वशी जितशेषबहिरिन्द्रियः ॥ ८ ॥

रा० टी०—रघुनाथस्यैव पृष्टापृष्टतद्गुणाश्रयत्वं बोधयन्नाह—इक्ष्वाकुवंशेत्यादिना । इक्ष्वाकुवंशप्रभवः इक्ष्वाकुवंशे एव प्रभवः स्वपरिकराज्ञापनपूर्वकं प्राकट्यं यस्य सः । नियतात्मा नितरां यतः प्रयत्नं प्राप्त आत्मा ईश्वरो यस्मात्सः । किंच नियताः तत्तत्कार्ये नियमिताः आत्मानो जीवधृतिदेहस्वभावपरमात्मानो येन सः । अत एव महावीर्यः महदीश्वरवर्तिवीर्यादप्यधिकं वीर्यं यस्य सः । अत एव द्युतिमान् ईश्वरः प्रकाशकर्ता । अत एव धृतिमान्सर्वाश्रयः । किंच धृतिः ईश्वरावतारधारणप्रेरणा तद्वान् अन्तर्भावितण्यर्थः । अत एव वशी साक्षात्स्वनियम्येश्वरद्वारा च सर्ववशकर्ता । अत एव जनैरस्मदादिभिर्नित्यं श्रुतः श्रूयमाणो नाम प्रसिद्धः रामोऽस्ति । किंच नामजनैः "नामरूपे व्याकरवाणि" इति श्रुतिबोधितनामरूपजनकैः परब्रह्मणा श्रुतः । स्वप्रकटितवेदवाक्यैर्नित्यं श्रूयत इत्यर्थः । बहुत्वमादरार्थम् । नाम इतिरूपस्याप्युपलक्षकम् । परब्रह्मणा नित्यं श्रूयत इत्युक्तेः परब्रह्मोपास्यत्वं रघुनाथस्य सूचितम् । तेन रघुनाथगुणानामीश्वरमोहकत्वं व्यक्तम् । रामपदार्थस्तु रेण रामवाचकमहामन्त्ररूपरकारोच्चारणेन अमति आश्रितहृदये प्राप्नोतीति रामः । एतेन सौशील्यादिगुणो व्यक्तः । इदं गुणवान्क इत्यस्योत्तरम् । किंच रेण रकारोपलक्षितपरशुरामादिना अम्यते सेवार्थं गम्यते असाविति रामः । परशुरामादिसेव्य इत्यर्थः । तेनातिशयपराक्रमवत्त्वं सूचितम् । इदं वीर्यवान्क इत्यस्योत्तरम् । किंच रो दानस्य अमः इयत्ताभावो यस्य स रामः । अपरिमितदातेत्यर्थः । तेनातिशयधर्मज्ञातृत्वं बोधितम् । इदं धर्मज्ञः क इत्यस्योत्तरम् । किंच रमयति अभिरमयति स्वाश्रितत्वसमानाधिकरणापकारित्वविशिष्टमपीति रामः "जनीजृष्क्नसुरञोमन्ताश्च" इत्यत्र "वा चित्तविरागे" इत्यतो वेत्यनुवृत्तेर्मितसंज्ञाया वैकल्पिकत्वाद्ह्रस्वत्वविरहः । रम एव राम इति प्रज्ञाद्यणन्तो वा । एतेन कृतज्ञत्वं व्यक्तम् । इदं कृतज्ञः क इत्यस्योत्तरम् । किंच 'सकृदेव प्रपन्नाय । अभ्यहं जीवितं जह्याम्' इत्यादिस्मृत्यां रमन्ते कर्मभक्तिज्ञानयोगिनो यस्मिन्स रामः । एतेन सत्यवाक्यत्वं सूचितम् । इदं सत्यवाक्यः क इत्यस्योत्तरम् । किंच राः दानमेव मा लक्ष्मीर्यस्य स रामः अनिवृत्तदातृत्ववानित्यर्थः । एतेन दृढव्रतत्वं सूचितम् । इदं दृढव्रतः क इत्यस्योत्तरम् ।

किंच राकारवाच्यां पृथिवीममति स्वीयपालनार्थं समये प्राप्नोतीति रामः। एतेन नित्यं नित्यकुलाचारयुक्तत्वं व्यञ्जितम्। इदं चारित्रेण च को युक्त इत्यस्योत्तरम्। किंच रयुकानां स्वस्वैश्वर्यविशिष्टानां विष्णुब्रह्मरुद्राणाममः पालनाद्यर्थं यथालोकं गमनं यस्मात्स रामः। विष्ण्वादिप्रेरक इत्यर्थः। एतेन सर्वभूतहितत्वं ब्रह्मणि नियामकत्वेन प्राप्तत्वं च द्योतितम्। इदं सर्वभूतेषु को हित इत्यस्योत्तरम्। किंच रं वह्निसूर्यादितेजः अमति सर्वलोकहितार्थं प्रकाशकत्वेन प्राप्नोतीति रामः प्रकाशकानां प्रकाशक इत्यर्थः। अत्रार्थे "तस्य भासा सर्वमिदं विभाति" इति श्रुतिरनुग्राहिका। अत एव 'सूर्यस्यापि भवेत्सूर्यः' इत्याद्यप्यनुकूलम्। एतेन सर्वज्ञत्वं व्यक्तम्। इदं सर्वज्ञः क इत्यस्योत्तरम्। किंच रः रेफः नित्यमुच्चार्यमाणत्वेनास्यास्तीति रः शिवः स च अश्च आश्च राः हरहरित्रह्माणः तैरम्यते काले सेवनार्थं गम्यते इति रामः। एतेनाघटितघटनापटीयस्त्वं सूचितम्। इदं समर्थः क इत्यस्योत्तरम्। किंच रेण स्वस्वैश्वर्येण युक्तौ यौ अश्च आश्च औ विष्णुब्रह्माणौ ताभ्यां तदुपलक्षितशिवेन च अम्यते मनसा सदैव प्राप्यत इति रामः। वस्तुतस्तु दीर्घाकारः शंभोरपि वाचक इति नोपलक्षणप्रयोजनम्। एनेन विष्ण्वादिप्रियदर्शनत्वं व्यञ्जितम्। तेन यदि विष्ण्वादिप्रियदर्शनत्वं तर्हि अन्याप्रियदर्शनत्वं किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः। इदमेकप्रियदर्शनः क इत्यस्योत्तरम्। किंच राम् राक्षसत्वमपि अमयति स्वसांमुख्यमात्रेण दूरीकरोतीति रामः। एतेन स्वसांमुख्यमात्रेण रक्षकत्वं जीवादिनियामकत्वं च व्यक्तम्। इदमात्मवान् क इत्यस्योत्तरम्। किंच रौ भूमिराजानाविव अम्यते क्षमया अनवगाह्यहृदयत्वेन च प्रतीयते असाविति रामः। एतेन जितक्रोधत्वम् अजितक्रत्वं च व्यक्तम्। इदं जितक्रोधः कः अजितक्रः क इत्यनयोरुत्तरम्। किंच रस्य वाच्यो योऽमः न मीयते देशकालवस्तुभिः परिच्छिद्यते असाविति रामः। देशकालवस्तुपरिच्छेदशून्यप्रकाशवानित्यर्थः। एतेन द्युतिमत्त्वमधोद्युतिमत्त्वं च व्यक्तम्। इदं द्युतिमान् अधोद्युतिमान् क इत्यस्योत्तरम्। किंच रस्य धनस्य अमः अनियन्ता यस्य स रामः अपरिमितैश्वर्य इत्यर्थः। एतेन विष्णावैश्वर्यमेतदायत्तमेवेति ध्वनितम्। तेन विष्ण्वादिसुखदातृत्वं विष्ण्वादिप्रेरकत्वमसूयारहितत्वं च ध्वनितम्। इदमनसूयकः क इत्यस्योत्तरम्। किंच राणि देवादिराजादिहृदयानि अमयति क्रोधाभाससमये प्रकम्पयतीति रामः। एतेन देवादिभयहेतुत्वं ध्वनितम्। इदं कस्य बिभ्यति देवाश्चेत्यस्योत्तरम्। पृष्टषोडशसङ्ख्याकगुणानामुत्तरं षोडशसंख्याकरामपदार्थैर्बोधयित्वा अपृष्टगुणानपि कांश्चिद्बोधयन्नर्थान्तरत्रयमाह। किंच रैरिन्द्रियैः अ अमः न प्रक्षिरस्येति रामः वाङ्मनसगोचरातीत इत्यर्थः। वाङ्मनसगोचरातीतत्वोक्त्या वेदतात्पर्यविषयीभूतत्वं रघुनाथस्य व्यक्तम्। तेन तत्कृपयैव स लभ्यत इति सूचितम्। तथा च श्रुतिः "यमेवैष वृणुते तेन लभ्यः" इति। तेन तस्य कर्मालभ्यत्वं ध्वनितम्। तत्रार्थे श्रुतिः "न कर्मणा न प्रजया धनेन" इत्यादिः। किंच रावाच्यायाः पृथिव्याः अमः प्राप्तिर्यस्याः सा रामा सीता सास्ति नित्यमस्येति रामः नित्यं सीतासंयुक्त इत्यर्थः। एतेन सीतारामयोः प्राकृतविलक्षणश्लेषाश्रयत्वं सूचितम्। तेन तस्य संयुक्तोपास्यत्वं व्यक्तम्। किंच रैर्महाराजाधिराजैः अम्यते प्राकट्यसमये सेवार्थं गम्यत इति रामः। तेन सर्वलोकस्वामित्वं व्यक्तम्। तेन श्रेयस्कामै राम एवाश्रयणीय इत्यादेयं वस्तु व्यक्तमिति दिक्। अत्रापरिमितवाचकामशब्दस्तु माधातुप्रकृतिककप्रत्ययान्तेन नञ्समासात्सिद्धः। रकारस्य रामादिवाचकत्वं 'रश्च रामेऽनिले वह्नौ भूमावपि धनेऽपि च। इन्द्रिये धनरोधे च भूपे रश्च प्रकीर्तितः' इत्येकाक्षरः प्रमाणम्। अकाराकारयोर्विष्णुब्रह्मवाचकत्वे 'अकारो वासुदेवः स्यादाकारस्तु पितामहः' इत्यादिना स एव। राशब्दस्य राक्षसवाचकत्वे "स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः। राक्षसा येन मरणं यान्ति" इत्यादिरामतापिन्युक्तश्रुतिः प्रमाणम्। 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः' इत्यनेन नित्यं श्रुत इत्येतद्घटकीभूतनित्यशब्दलोपः। यद्यपि पृष्टापृष्टगुणा रामपदेनैव बोधितास्तथापि स्पष्टतस्तत्तद्गुणप्रतिपत्त्यर्थं विशेषणान्तरोपादानम्। तत्र इक्ष्वाकुवंशप्रभव इत्यनेन चारित्रेण च को युक्त इत्यस्योत्तरम्। एवं यथासंभवमूह्यम्॥ ८॥

गो० टी०—अथ वेदान्तोदितगुणानां रामे प्रदर्शनमुखेन रामत्वेनावतीर्णो विष्णुरेव वेदान्तवेद्यं परं तत्त्वमिति दर्शयति—इक्ष्वाकुवंशप्रभव इत्यादिना सर्गशेषेण। तत्र वेदान्तोदितगुणगणानां निधी रामत्वेनावतीर्णो विष्णुरेवेति महावाक्यार्थः। 'इक्ष्वाकुवंश' इत्यारभ्य 'सत्ये धर्म इवापरः' इत्यन्ता सार्धैकादशश्लोक्येकान्वया। इक्ष्वाकुर्नाम वैवस्वतमनोर्ज्येष्ठः पुत्रः तस्य वंशः पुत्रपौत्रादिपरंपरा। प्रभवत्यस्मादिति प्रभवः प्रादुर्भावस्थानम्। इक्ष्वाकुवंशः प्रभवो यस्य सः इक्ष्वाकुवंशप्रभवः। जनकादिमहाकुलेषु विद्यमानेषु कुतोऽत्रैव भगवानवतीर्ण इत्यपेक्षायामिक्ष्वाकुपदं प्रयुक्तम्। इक्ष्वाकुर्हि चिरं हरिमाराध्य तन्मूर्तिविशेषं नारायणमलभतेति पौराणिकी गाथा। अतस्तत्पक्षपातेन तद्वंशेऽवतीर्ण इति सूचयितुमिक्ष्वाकुपदम्। वंशेत्यनेन गुणवान् क इति पृष्टं सौशील्यमुक्तम्। रमयति सर्वान् गुणैरिति रामः 'रामो रमयतां वरः' इत्यार्षनिर्वचनबलात् कर्तर्यपि कारके घञ् वर्ण्यते। यद्वा रमन्तेऽस्मिन्सर्वे जना गुणैरिति रामः "अकर्तरि च कारके संज्ञायाम्" इति घञ्। तथा चागस्त्यसंहितायामुक्तम् 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते' इति। नामेति प्रसिद्धौ। चित्रकूटवासिना त्वया विदितो हीत्यर्थः। न केवलं भवता मामरैरपि विदित इत्याह—जनैः श्रुत इति। श्रुतः अवधृतः। 'श्रुतं शास्त्रावधृतयोः' इत्यमरः। ताटकाताटकेयवधविश्वामित्राध्वरत्राणाहल्याशापविमोक्षहरधनुर्भङ्गपरशुरामनिग्रहसप्ततालवेधवालिवधसिन्धुबन्धमूलबलनिबर्हणादिभिरवधारितनारायणभाव इत्यर्थः। य एवंभूतः स एव नियतात्मा स एव महावीर्य इत्येवं प्रतिपदं वक्ष्यमाणं तत्पदमनुपज्यते। रामरूपेणावतीर्णो विष्णुरेव वेदान्तोदिततत्तद्गुणक इति सर्वत्र तात्पर्यार्थः।

बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः । विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ ९ ॥
महोरस्को महेष्वासो गूढजत्रुररिन्दमः । आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥

आदौ स्वरूपनिरूपकधर्मानाह–नियतात्मेत्यादिना । नियतात्मा नियतस्वभावः निर्विकार इति यावत् । " नास्य जरयैतज्जीर्यते न वधेनास्य हन्यते अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः" इत्यादिश्रुतेः । महावीर्यः अचिन्त्यविविधविचित्रशक्तिकः । "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च " इतिश्रुतेः । द्युतिमान् स्वाभाविकप्रकाशवान् । स्वयंप्रकाशः ज्ञानस्वरूप इति यावत् । "विज्ञानघन एव प्रज्ञानघनः" इतिश्रुतेः । धृतिमान् निरतिशयानन्दः । ' धृतिस्तु तुष्टिसंतोष ' इति वैजयन्ती । " आनन्दो ब्रह्म " इति श्रुतेः । सर्वं जगद्वशेऽस्यास्तीति वशी । सर्वस्वामीत्यर्थः । "सर्वस्य वशी सर्वस्येशानः" इतिश्रुतेः८

९] **ति० टी०–बुद्धिमानिति** । प्रशस्तबुद्धिः बुद्धेः प्राशस्त्यं च सकृद्गृहीताविस्मरणावापोद्धापादिशक्तिमत्त्वम् । सर्वत्र प्रशंसादौ मतुप् । नीतिः कामन्दकादिप्रसिद्धराजनीतिस्तद्वांस्तज्ज्ञाता । वाग्मी प्रशस्तवाक् । श्रीमान्सर्वातिशायिशोभैश्वर्यादियुक्तः । यद्वा " ऋचः सामानि यजूंषि । सा हि श्रीरमृता सताम् " इत्युक्तश्रौतश्रीमान् । शत्रूणां बाह्यान्तराणां निबर्हणो नाशकर्ता । बाहुलकात्कर्तरि ल्युट् । विपुलांस इत्यादिना सामुद्रिकलक्षणं कथ्यते । विपुलौ मांसलोन्नतावंसौ भुजशिरसी यस्य सः । ' स्कन्धो भुजशिरोंऽसः ' इति कोशः । अस्य सुलक्षणत्वं च वररुचिनोक्तम्–' कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धौ ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्ते सुखप्रदाः' इति । महाबाहुः "आन्महतः–" इत्यात्वम् । ' शिरो ललाटश्रवणे ग्रीवा वक्षश्च हत्तथा । उदरं पाणिपादं च पृष्ठं दश महत्सुखम्' इति ब्राह्मेऽस्य सुलक्षणत्वमुक्तम् । कम्बुग्रीवः कम्बुवद्रेखात्रयविशिष्टग्रीवः । महाहनुर्मांसलकपोलोपरिभागः । ' पूर्णमांसलहनुस्तु भूपतिः' इति संहिता ९

रा० टी०–बुद्धिमानिति । बुद्धिमान् अतिशयबुद्धिविशिष्ट इत्यर्थः । तद्बुद्धावतिशयत्वं च ब्रह्मविष्ण्वादिबुद्धिप्रवृत्तिहेतुत्वेन । इदमेव "यः सर्वज्ञः स सर्ववित्" इति श्रुत्योक्तम् । अतएव नीतिमान् ब्रह्मादिभ्योऽपि नीतिशिक्षक इत्यर्थः । अत्रार्थे श्रुतिः " धाता यथापूर्वमकल्पयत् । एष सेतुर्विधारणः । एषां लोकानामसम्भेदाय" इत्यादिः । वाग्मी अतिशयवचनवान् तद्वचनस्यातिशयत्वं च ब्रह्मादिमोहकत्वेन । श्रीमान् श्रियः ईलक्ष्मीस्वामिनी सीतेत्यर्थः । स्तद्वान् नित्यं तद्युक्त इत्यर्थः । शत्रुनिबर्हणः शत्रून्स्वाश्रितजनापकारिणो निबर्हयति साक्षाद्विष्ण्वादिद्वारा च दूरीकरोति अपकारित्वधर्मं निवर्त्तयतीति शत्रुनिबर्हणः "एष भूतपतिरेष भूतपालः" इत्यादिश्रुतिरेतदर्थबोधिका । शरीरलक्षणत्वेनापि सर्वविलक्षणत्वं रघुनाथस्य द्योतयञ्छरीरलक्षणान्याह–**विपुलांस** इत्यादिना सार्द्धश्लोकद्वयेन।विपुलौ मांसलोन्नतौ अंसौ स्कन्धौ यस्य स विपुलांसः। महापुरुष इत्यर्थः। अतएवोन्नतस्कन्धवत्त्वं च महापुरुषलक्षणमिति सामुद्रिके उक्तम् । ' स्कन्धो भुजशिरोंसः ' इति कोशः । एतेनान्यत्रापि यदीदं लक्षणमवगम्यते तदा तत्रैतदंशविशेष इत्यूहनीयम्। 'पौरुषे चाप्रतिद्वन्द्वशरैनं जहि रावणिम् ' इत्यादि वक्ष्यमाणेनात्रैव महापुरुषत्वस्य पर्यवसन्नत्वात् । अतएव ' कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धौ ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्ते सुखप्रदाः ' इत्याद्यप्यनुकूलम् । महाबाहुः महान्तौ मांसलौ बाहू यस्य सः। अतएवाजानुबाहुरित्येनेन न पौनरुक्त्यम् । कम्बुग्रीवः कम्बुतुल्या रेखात्रयविशिष्टा ग्रीवा यस्य सः । महाहनुः महत्यौ पुष्टे हनू कपोलोपरिभागौ यस्यसः ॥ ९ ॥

गो० टी०–अथ सृष्ट्युपयोगिगुणानाह–बुद्धिमानित्यादिना । बुद्धिमान् सर्वज्ञः "यः सर्वज्ञः स सर्ववित्" इतिश्रुतेः । नीतिमान्मर्यादावान् । श्रुतिरत्र "धाता यथापूर्वमकल्पयत् । एष सेतुर्विधरण एषां लोकानामसंभेदाय" इति । शोभना वागस्यास्तीति वाग्मी "वाचोग्मिनिः" इति ग्मिनिप्रत्ययः। कुत्वे जश्त्वे च कृते गकारलाभात् पुनर्गकारउक्तिशोभनत्वज्ञापनायेति न्यासकारः। सर्ववेदप्रवर्त्तकइत्यर्थः । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै " इतिश्रुतिः । श्रीमान् समृद्धोभयविभूत्यैश्वर्यः । 'श्रीः कान्तिसंपदोर्लक्ष्म्याम्' इतिवाणः । "सर्वमिदमभ्यत्ति" इति श्रुतिः । शत्रून् तद्विरोधिनो निबर्हयति नाशयतीति शत्रुनिबर्हणः । बर्ह हिंसायामित्यस्माद्धातोः कर्त्तरि ल्युट् । "एष भूतपतिरेष भूतपालः" इतिश्रुतेः । "अथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणात्सर्वएव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदितिनाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद " इत्यन्तरादित्यविषयोदितं सर्वाङ्गसुन्दरविग्रहं दर्शयति–**विपुलांस** इत्यादिना सार्द्धश्लोकद्वयेन । विपुलांसः उन्नतस्कन्धः । उन्नतस्कन्धत्वं च महापुरुषलक्षणमिति सामुद्रिकोक्तं ' कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धौ ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्ते सुखप्रदाः ' इति। महाबाहुः वृत्तपीवरबाहुः। आयतत्वं तु वक्ष्यति आजानुबाहुरिति । 'आजानुलम्बिनौ बाहू वृत्तपीनौ महीश्वरे' इति सामुद्रिकलक्षणम् । कम्बुग्रीवः शङ्खतुल्यकण्ठः । इन्द्रमुखीतिवत् शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । ' कम्बुग्रीवश्च नृपतिर्लम्बकर्णोतिभूषणः' इति लक्षणं । ' रेखात्रयान्विता ग्रीवा कम्बुग्रीवेति कथ्यते ' इतिहलायुधः । महत्यौ हनू यस्यासौ महाहनुः। "स्त्रियाः पुंवत्" इत्यादिना पुंवद्भावः। हनुःकपोलोपरिभागः। 'अधस्ताच्चिबुकं गण्डकपोलौ तत्परा हनुः ' इत्यमरः। ' मांसलौ तु हनू यस्य भवतस्त्वीषदुन्नतौ । स नरो मृष्टमश्नाति यावदायुः सुखान्वितः ' इतिलक्षणम् ॥ ९ ॥

१०] **ति० टी०–महोरस्क इति** । महद्विशालमुरो यस्य सः । 'उरः शिरो ललाटं च' इत्युपक्रम्य ' विशालास्ते सुखप्रदा '

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् । पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥ ११ ॥

इत्युक्तेः । महेष्वासो महानिष्वासो धनुरस्य । गूढजत्रुगूढे मांसलत्वान्निमग्ने जत्रुणी वक्षोंऽससंधिगते अस्थिनी यस्य । अरिन्दमो निजभक्तानामरीन्कामादीन्निजभक्त्यन्तरायकर्तृपापानि वा दमयतीत्यरिन्दमः । यद्वा अरिन्दम इति राज्ञोऽन्वर्थसंज्ञा । शत्रुञ्जय इतिवत् । आजानुबाहुर्जानुपर्यन्तदीर्घबाहुः । ' दीर्घभूबाहुमुष्कश्च चिरञ्जीवी धनी नरः ' इति ब्राह्मे । सुशिराः ' समवृत्तशिराश्चैव च्छत्राकारशिरास्तथा । एकच्छत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति ' इति नारदः । सुललाटो रेखाधिकललाटः । ' ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा ' इति कात्यायनः । सुविक्रमो गजसिंहादिगतिसदृशगतिः विक्रमः पादविक्षेपः । ' स्वरो गतिश्च नाभिश्च गम्भीरः स प्रशस्यते ' इति ब्राह्मे ॥ १० ॥

रा० टी०–महोरस्क इति । महद्विशालत्वादिना प्रशंसनीयमुरो यस्य सः। अतएव स्थिरं विशालं कठिनमुन्नतं मांसलं समम् । ' वक्षो यस्य महीपालस्तत्समो वा भवेन्नरः ' इत्यादिनैतस्य सुलक्षणत्वमुक्तम् । पीनवक्षा इत्यनेन तु न पौनरुक्त्यम् । आदिशब्देन पीनत्वातिरिक्तानां ग्रहणात् । पीनशब्दस्य मांसलार्थकत्वात् । महेष्वासः महान्सिर्वपूज्यः इष्वासो धनुर्यस्य सः । गूढजत्रुः गूढे मांसलत्वेन निमग्ने जत्रुणी अंसद्वयमध्यवर्तिसक्थिनी यस्य सः। अयं जत्रुशब्दार्थः 'स्कन्धो भुजशिरोंसोऽस्त्री सन्धी तस्यैव जत्रुणी ' इत्यमरादवगन्तव्यः । अरिन्दमः अरिन्दमा रेखा यस्य सः। अतएव लक्षणप्रतिपादकेभ्यो नास्य वैरूप्यम् ।नापि शत्रुनिर्बहण इत्यनेन पौनरुक्त्यम् । आजानुबाहुः जानुपर्यन्तदीर्घबाहुः । सुशिराः शोभनं समवृत्तं छत्राकारं च शिरो यस्य सः। अस्य सुलक्षणत्वं ' समवृत्तशिराश्चैव छत्राकारशिरास्तथा । एकछत्रां महीं भुक्ते दीर्घमायुश्च जीवति ' इत्यादिनोक्तम् । सुललाटः सुष्ठु अर्द्धचन्द्रनिभं ललाटं यस्य सः। इदमपि लक्षणम् ' अर्द्धचन्द्रनिभं तुङ्गं ललाटं यस्य स प्रभुः ' इत्यादिनोक्तम् । सुविक्रमः शोभनस्सिंहवृषभगजव्याघ्रपादन्यासतुल्यः विक्रमः पादविक्षेपो यस्य सः । एतल्लक्षणं तु 'सिंहर्षभगजव्याघ्रगतयो मनुजा सुने । सर्वत्र सुखमेधन्ते सर्वत्र जयिनस्सदा ' इति जगद्वल्लभायां व्याख्यातम् ॥ १० ॥

गो० टी०–महोरस्कइति । महद्विशालमुरो यस्यासौ महोरस्कः । " उरःप्रभृतिभ्यः कप् " इतिकप् । लक्षणं तु ' स्थिरं विशालं कठिनमुन्नतं मांसलं समम् । वक्षो यस्य महीपालस्तत्समो वा भवेन्नरः' इति । मांसलत्वं तु वक्ष्यति पीनवक्षा इति । महान् इष्वासो धनुर्यस्यासौ महेष्वासः । अनेन तदुचितसंहननविशेषो लक्ष्यते । अतो न प्रक्रमविरोधः । गूढे मांसलत्वेनाप्रकाशे जत्रुणी अंसद्वयसंधिगतास्थिनी यस्यासौ गूढजत्रुः। ' स्कन्धो भुजशिरोंसोऽस्त्री संधी तस्यैव जत्रुणी' इत्यमरः । ' विषमैर्जत्रुभिर्निःस्वा अतिसूक्ष्मैश्च मानवाः । उन्नतैर्भोगिनो निम्नैर्निःस्वाः पीनैर्नराधिपाः' इतिलक्षणं । अरिं दमयति निवर्त्तयतीत्यरिन्दमः । " संज्ञायां भृतृवृजिधारिसहितपिदमः" इतिखच् । असंज्ञायामप्यार्षः। अरिशब्देन पाप्मा विवक्षितः। अपहतपाप्मेत्यर्थः। अनेनायं विग्रहप्रियो न कर्ममूलः किंत्वनुग्रहमूलः । ' इच्छागृहीताभिमतोरुदेहः ' इति स्मृतेः । अतः न प्रक्रमभङ्गः । जानुरूपर्व तत्पर्यन्तं विलम्बिबाहुराजानुबाहुः सुष्ठु समं वृत्तं छत्रायतं शिरो यस्यासौ सुशिराः । ' समवृत्तशिराश्चैव छत्राकारशिरास्तथा । एकछत्रां महीं भुङ्क्ते दीर्घमायुश्च जीवति ' इतिलक्षणं । सुललाटः ललाटसौष्ठवं प्रोक्तं । ' अर्धचन्द्रनिभं तुङ्गं ललाटं यस्य स प्रभुः ' इति । शोभनः विक्रमः पादविक्षेपो यस्यासौ सुविक्रमः । शोभनत्वं च गजादितुल्यत्वम् । तथोक्तं जगद्वल्लभायां 'सिंहर्षभगजव्याघ्रगतयो मनुजा सुने । सर्वत्र सुखमेधन्ते सर्वत्र जयिनःसदा ' इति ॥ १० ॥

११] ति० टी०–सम इति । समो नातिदीर्घो नातिह्रस्वः । ' षण्णवत्यङ्गुलोत्सेधो योनांशः स दिवौकसाम् ' इत्युक्तेः । समान्यन्यूनानधिकपरिमाणानि विभक्तानि पृथग्भूतान्यङ्गान्यवयवा यस्य सः । ' भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ सिकतौ यस्य समौ ज्ञेयः स भूपतिः ' इत्युक्तेः । स्निग्धवर्णः स्निग्धश्यामलवर्ण इत्यर्थः । ' स्निग्धेन्द्रनीलवर्णस्तु भोगं विन्दति पुष्कलम् ' इत्युक्तेः । प्रतापः स्मृतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान् । ' प्रतापो पौरुषातपौ ' इति कोशः । पीनवक्षा मांसलसमोन्नतवक्षाः । विशालाक्षो विस्तृतायतनेत्रः । ' नासिका चक्षुषी कर्णौ यस्यायतौ ' इत्युक्तेः । लक्ष्मीवान्सीतारूपलक्ष्मीशक्तिमान् सर्वावयवसौन्दर्यवान्वा । मोपधत्वाद्वत्वम् । एवमुक्तरीत्या शुभानि सामुद्रिकशास्त्रोक्तानि लक्षणानि यस्य स शुभलक्षणः ॥ ११ ॥

रा० टी०–समइति । समः अतिह्रस्वातिदीर्घत्वाभाववान् सुलक्षणप्रतिपादकशास्त्रोक्तोन्नतत्वविशिष्ट इत्यर्थः । इदमपि लक्षणम् ' षण्णवत्यङ्गुलोत्सेधस्सार्वभौमो भवेन्नृपः ' इत्यादिनोक्तम् । समविभक्ताङ्गः समानि न्यूनाधिकपरिमाणशून्यानि विभक्तानि अमीलितान्यङ्गानि करचरणादीनि यस्य सः।इदमपि लक्षणं ' भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ च सुस्फीतौ यस्य स्तः स तु भूपतिः ' इत्यादिनोक्तम् । स्निग्धवर्णः स्नेहयुक्तो वर्णश्श्यामलो यस्य सः। इदमपि लक्षणं ' स्निग्धेन्द्रनीलवर्णस्तु भोगं विन्दति पुष्कलम् ' इत्यादिना प्रतिपादितम्। प्रतापवान् परमतेजस्वी अतएव नास्य प्रकरणाद्वैरूप्यम् । पीनवक्षाः पीनं मांसलं वक्षो यस्य सः । विशालाक्षः विशाले पद्मपत्रायिते अक्षिणी यस्य सः "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्" इतिषच् । इदमपि लक्षणं सामुद्रिके ' रक्तान्तैः पद्मपत्राभैर्लोचनैस्सुखभोगिनः ' इत्यनेन प्रतिपादितम् । अतएव लक्ष्मीवान्सर्वावयवशोभासंपन्नः शुभलक्षणः शुभानि अनुक्तान्यपि लक्षणानि यस्य सः ॥ ११ ॥

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः । यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान्॥ १२ ॥
प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः । रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ १३ ॥

गो० टी०–समः नातिदीर्घो नातिह्रस्वः । तथात्वं च तत्रैवोक्तं । 'षण्णवत्यङ्गुलोच्छ्रायः सार्वभौमो भवेन्नृपः' इति । समानि अन्यूनाऽधिकपरिमाणानि विभक्तानि अश्लिष्टानि अङ्गानि करचरणाद्यवयवा यस्य स समविभक्ताङ्गः । तानि चोक्तानि सामुद्रिकैः । 'भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः' इति । स्निग्धः स्नेहयुक्तो वर्णो यस्यः स स्निग्धवर्णः । तत्रोक्तं वररुचिना 'नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचः स्नेहेन शय्या च पादस्नेहेन वाहनम्' इति । प्रतापवान् तेजस्वी समुदायशोभासंपन्न इत्यर्थः । पीनवक्षा मांसलवक्षाः । विशाले पद्मपत्रायते अक्षिणी यस्य सः विशालाक्षः । "बह्वृचोहो सक्थ्यक्ष्णोः स्वाङ्गात्" इति पच् । अत्र सामुद्रिकं । 'रक्तान्तैः पद्मपत्राभैर्लोचनैः सुखभोगिनः' इति । लक्ष्मीवान् अवयवशोभायुक्तः । शुभलक्षणः अनुक्तसकललक्षणसंपन्नः ॥ ११ ॥

१२] **ति० टी०–धर्मज्ञ इति**। सत्याऽमोघा सन्धा 'सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम' इत्यादिरूपिणी प्रतिज्ञा यस्य । यशस्वी रावणवधादिना दिव्ययशःसंपन्नः । ज्ञानसम्पन्नो ब्रह्मज्ञानपरिपूर्णः । अतएव जटायुपं प्रति 'मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्' इत्युक्तिः संगच्छते । ब्रह्मज्ञस्यैव ब्रह्मोपदेशेऽधिकारात् । विना ब्रह्मोपदेशमनुत्तमलोकावाप्त्यसंभवात् । न विद्यन्ते उत्तमा येभ्यस्तेऽनुत्तमाः । 'आत्मानं मानुषं मन्ये रामं दशरथात्मजम्' इत्यादिवचस्तु मायामात्रमित्यन्यत्र विस्तरः । शुचिः प्रातःस्नानादिना प्राणायामाभ्यासादिना प्रत्याहारादिजन्यरागद्वेषहानेन च मायिकशरीरत्वाच्च नित्यं बाह्याभ्यन्तरशुद्धः । वश्यः पित्राचार्यदेवेषु । विनीतः समाधिमाज्जितत्त्वसमाधिमान् ॥ १२ ॥

रा० टी०–धर्मज्ञइति । धर्म्मज्ञः धर्म्मं शरणागतरक्षणादिरीतिं । स्वीकृतो न त्याज्य इत्याद्याकारिकां जानातीति सः । वक्ष्यति च ' मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन ' इत्यादिना । अतएव सत्यसन्धः सत्या सन्धा प्रतिज्ञा यस्य सः । वक्ष्यत्येतत् ' अभ्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । नहि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ' इत्यादिना सन्धाशब्दस्य प्रतिज्ञापरता ' प्रतिज्ञाने वधे सन्धा ' इति वैजयन्ती कोशादवगन्तव्या । प्रजानां जनानां हिते स्वलोकप्राप्तये एव रतः प्रकटक्रीडाकारकः । अतएव वक्ष्यमाणेन रक्षिता जीवलोकस्येत्यनेन न गतार्थता । चशब्दएवार्थे । हितशब्दः प्राप्त्यर्थकहिधातुप्रकृतिकभावक्तिबन्तः । अतएव यशस्वी नित्यं निरतिशयातिशययशोविशिष्टः । ज्ञानसम्पन्नः ज्ञानेन अहमन्यगतिः रघुनाथएवागतिकगतिरित्याकारकेण सम्पद्यते प्राप्नोतीति क्तप्रत्ययोपस्थितभूतत्वस्याविवक्षा । सम्पूर्वकपदः प्राप्त्यर्थकत्वं सम्पद्यते । विधिवशात्खलु कोपि काल इत्यादौ प्रसिद्धम् । अतएव शुचिः अतिपावनहेतुः । वश्यः पित्राचार्य्यादिषु विनीतः स्वाश्रिततन्त्रो वा अतएव 'अहं भक्तपराधीनः' इत्यादि सङ्गच्छते । अतएव समाधिमान् आश्रितपालनविषयकविचारविशिष्टः॥ १२॥

गो० टी०–एवमाश्रितानुभाव्यदिव्यमङ्गलविग्रहशालित्वमुक्त्वाश्रितरक्षणोपयोगिगुणानाह–**धर्मज्ञइत्यादिना**। स्वजनस्य च रक्षितेत्यन्तेन । धर्मं शरणागतरक्षणरूपं जानातीति धर्मज्ञः । वक्ष्यति 'मित्रभावेन संप्राप्तं न त्यजेयं कथंचन । दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम्' इति । सत्या सन्या प्रतिज्ञा यस्य स सत्यसन्धः । 'प्रतिज्ञानेऽवधौ सन्या' इतिवैजयन्ती । 'अभ्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् । नहि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः' इति । प्रजानां प्राणिनां हिते हितकरणे रतः तत्परः । यशस्वी आश्रितरक्षणैककीर्त्तिः । "तस्य नाम महद्यशः" इतिश्रुतेः । ज्ञानसंपन्नः । "यः सर्वज्ञः स सर्ववित्" इत्युक्तरीत्या स्वरूपतः स्वभावतश्च सर्वविषयज्ञानशीलः । शुचिः पावनः परिशुद्धो वा । ऋजुरिति यावत् । वश्यः वशं गतः । "वशं गत" इति निपातनाद्यत् । आश्रितपरतन्त्रइत्यर्थः । समाधिमान् समाधिः आश्रितरक्षणचिन्ता तद्वान् ॥ १२ ॥

१३] **ति० टी०–प्रजापतीति** । प्रजापतिसमः यद्यपि रामो ब्रह्मैव तथापि मानुषधर्माणां शोकमोहादीनां मायिकानां तत्र दर्शनेनौपाधिकभेदमादाय तत्समत्वोक्तिः । मार्गवलोकप्रतिबन्धरूपाज्जटायुमोक्षप्रदानरूपात्स्वेन सह सर्वायोध्यावासिजनस्य सशरीरस्य ब्रह्मलोकनयनरूपाच्च कारणात्तत्समत्वम् । सर्वथा स्वतन्त्रस्यैवेदृशेषु योग्यत्वात् । श्रीमानित्येवमादीनां पौनपुन्यं सकलैश्वर्यादिमत्त्वद्योतनार्थम् । धाता पितेव सर्वप्रजाधारणपोषणसामर्थ्ययुक्तः । रिपुनिषूदन आश्रितजनरिपुनाशकः कामादिरिपुनाशकश्च । अन्यथा जगद्गुरोर्भगवतो रिपोरेवाभावेनैतद्विशेषणासंगतिः स्यात् । बाहुलकात्कर्तरि ल्युट् । जीवलोकस्य प्राणिसमूहस्य सकलव्यवहारप्रवर्तकत्वेन रक्षिता । धर्मस्य तत्तद्वर्णाश्रमधर्मस्य मर्यादापरिपालनद्वारा रक्षिता ॥ १३ ॥

रा० टी०–प्रजापती । प्रजापतिसमः प्रजापतीनां प्रजानियन्तृणां ब्रह्मादीनां समः प्रजापालनादिषु समत्वमेकाकारवर्त्तनं यस्मात्सः । भावप्रधानो निर्देशः । श्रीमान् नित्यं विभूतिधारी अग्निहोत्रीति यावत् । अत्र ' श्रीर्वेशरचना शोभा भारती सरलद्रुमे । लक्ष्म्यां त्रिवर्गसम्पत्तिविशेषोपकरणेषु च ॥ विभूतौ च मतौ च स्त्री स्नु स्त्रियां निर्भरे स्त्रवे ' इति मेदिनी प्रमाणम् । ' भूतिर्भस्मनि संपदि ' इत्यपि । अतएव धाता वेदोक्तकर्मकारी । अतएव रिपुनिषूदनः रिपून्वेदद्रुहो निषूदयति तद्दोषदृत्वं निवर्त्तयतीति सुषामादित्वात्षत्वम् । अतएव जीवलोकस्य रक्षिता जीवन्ति प्राणधारणं कुर्वन्तीति जीवा मनुष्यादयः जीवयन्ति प्राणधारणं कारयन्तीति जीवाः ईश्वराः ते च ते

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता । वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ १४ ॥
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान् । सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ १५ ॥

चेत्येकशेषः । लोकाः भुवनानि तेषां समाहारः जीवलोकं तस्य रक्षिता पालकः। अतएव धर्मस्य परिरक्षिता तत्तद्धर्मप्रवर्त्तक इत्यर्थः॥

गो०टी०–प्रजापतिसमः 'मध्येविरिञ्चिगिरिशं प्रथमावतारः' इत्युक्तरीत्या जगद्रक्षणाय प्रजापतितुल्यतयावतीर्णः । श्रीमान् पुरुषकारभूतया लक्ष्म्या अविनाभूतः । धाता पोषकः। डुधाञ् धारणपोषणयोरितिधातोस्तृच् । रिपून्शत्रून् निपूदयति निरस्यतीति रिपुनिषूदनः । "मृदीपदीक्षश्च" इति प्रतिषेधस्यानित्यत्वात् "अनुदात्तेतश्च हलादेः" इतियुच् नन्यादिपाठाद्वा ल्युः । सुषमादित्वात्षत्वं । आश्रितविरोधिनिरसनशीलइत्यर्थः । अथावतारैकान्तानुगुणानाह–रक्षितेति । लोके सार्वभौमः स्वकीयजनरक्षण एव यतते । अयं तु न तथा किंतु सर्वस्य प्राणिजातस्य रक्षिता । तच्छीलत्वे तृच् । शेषे षष्ठी। ननु यदि सर्वेषां रक्षिता तर्हि दुष्कृतिनमपि सुखिनमापादयेदित्यत्राह–धर्मस्यपरिरक्षितेति । आचरणप्रचारणाभ्यां सर्वधर्मस्य व्यवस्थापयिता । उच्छास्त्रप्रवर्त्तिनोपि चिकित्सकन्यायेन अलङ्घयितेत्यर्थः ॥ १३ ॥

१४] ति० टी०–रक्षितेति । स्वस्य धर्मस्य यज्ञाध्ययनदानदण्डयुद्धादिरूपस्य रक्षिता सादरमनुष्ठाता । स्वजनस्य स्वभक्तजनस्यावश्यंभाविनोऽप्यनिष्टस्य निरासपूर्वकं परमेष्टमोक्षदानेन रक्षिता । तच्चाम्बरीषप्रह्लादध्रुवादीनां रक्षणेन प्रसिद्धमेव । वेदानामृग्यजुःसामाथर्वणां छन्दःकल्पव्याकरणज्योतिषनिरुक्तशिक्षारूपवेदाङ्गानां च तत्त्वज्ञः पाठतोऽर्थतश्च ज्ञाता । शस्त्रास्त्रादिप्रतिपादकं शास्त्रं धनुर्वेदस्तस्मिन्निष्ठितः सम्यक्तज्ज्ञाता ॥ १४ ॥

रा० टी०–रक्षितेति । स्वस्य धर्मस्य प्रवर्तकत्वरूपमहाराजाधिराजत्वस्य परिरक्षिता नित्यं स्वीकर्त्ता । अतएव स्वजनस्यापि रक्षिता परिरक्षिता । यस्मिन्सर्वरक्षकत्वं तस्मिन्स्वजनरक्षकत्वं सिद्धमेवेति । पुनः स्वजनरक्षकत्वप्रतिपादनं गोबलीवर्दन्यायेन विशिष्टबोधनाय । अतएव वेदवेदाङ्गतत्त्वज्ञः वेदानामृग्यजुःसामाथर्वणां अङ्गानां ' शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दो विचितिरित्येतैः षडङ्गो वेद उच्यते ' इत्यत्रोक्तानां तत्त्वं जानातीति सः पाठतोऽर्थतश्च निखिलज्ञातेत्यर्थः । धनुर्वेदे च निष्ठितः धनुर्वेदे शस्त्रास्त्रप्रतिपादकशास्त्रे निष्ठितः परमज्ञातेत्यर्थः ॥ १४ ॥

गो० टी०–स्वस्य स्वकीयस्य शरणागतरक्षणरूपस्य धर्मस्य विशेषधर्मस्य विशिष्यरक्षिता । यद्वा । धर्मस्य तत्तद्वर्णाश्रमधर्मस्य नित्यं समन्ततो रक्षिता । लोके सर्वधर्मप्रवर्त्तकोपि ' धर्मोपदेशसमये जनाः सर्वेऽपि पण्डिताः । तदनुष्ठानसमये मुनयोपि न पण्डिताः ' इति न्यायेन स्वधर्मानुष्ठाने स्वलति न तथायमित्याह । स्वस्य धर्मस्य रक्षिता स्वासाधारणस्यक्षत्रिय धर्मस्य रक्षितेत्यर्थः । लोके सर्वरक्षकोपि कश्चित्स्वजनरक्षणं कर्तुं न प्रगल्भते । 'दास्यमैश्वर्यभावेन ज्ञातीनां च करोम्यहम्। अर्धभोक्ता च भोगानां वाग्दुरुक्तानि च क्षमे' इति भगवतोप्युक्तेः। तदपि कर्तुमीहते इत्याह–स्वजनस्य च रक्षितेति। स्वजनस्य च । स्वजनस्यापीत्यर्थः । अनेन स्वजनरक्षणस्य दुर्घटत्वं सूचितं। यद्वा चस्त्वर्थः। स्वजनस्य शरणागतस्य विशेषेण रक्षिता । विशेषस्तु तदपराधसहिष्णुत्वं । वक्ष्यति ' मित्रभावेन संप्राप्तं न त्यजेयं कथंचन। दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम' इति । यद्वा लोके कश्चित्सर्वान् रक्षन् स्वजनं पीडयति । असौ तु स्वजनस्यापि रक्षितेत्यर्थः । अथवा स्वावतारप्रयोजनमाह–रक्षितेति । गीतायां हि 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्।धर्मसंस्थापनार्थाय संभवामि युगेयुगे' इति। स्वजनस्य स्वशेषभूतस्येति सर्वलोकविशेषणं रक्षणहेतुसंबन्धद्योतनार्थम्। रक्षिता इष्टप्रापकः। अनेन साधुपरित्राणमुक्तम्। चशब्दोन्वाचये।रक्षिता च अनिष्टनिवर्त्तकः। अनेनानुषङ्गिकदुष्कृद्विनाशउक्तः। धर्मस्य सामान्यविशेषरूपस्य स्थापनमाहेतरवाक्यद्वयेन । रक्षिता स्वस्य धर्मस्य सीतापरिणयसुखेन स्वाश्रमोचितधर्माणामनुष्ठाता। यद्वा स्वस्य धर्मः परत्वं तस्य रक्षिता। हरधनुर्भङ्गपरशुरामजयादिना हि परत्वं स्थापितं । यद्वा धर्मो धनुः। 'स्वाम्यस्वभावसुकृतेष्वथी धर्म तु कार्मके ' इति वाणः । सदा धनुर्द्धरः । स्वजनस्य च रक्षिता स्वभूतो जनः स्वजनः ज्ञानी 'ज्ञानी त्वात्मैव मे मतम्' इति गीतायामुक्तत्वात् । तस्य रक्षिता। आत्मन इव सर्वयोगक्षेमावह इत्यर्थः । अथाऽस्याष्टादशविद्यास्थानाभिज्ञत्वमाह–वेदेति । विदन्त्यनेन धर्मादिकमिति वेदः । करणे घञ् । स चतुर्विधः । ऋग्यजुःसामाथर्वणभेदात् । वेदस्य किंचित्कराणि वेदाङ्गानि । तानि च षट् । तथोक्तं 'शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छन्दसां विचितिश्चेति षडङ्गानि प्रचक्षते' इति । तत्र शिक्षा नाम अकारादीनां वेदवर्णानां स्थानकरणप्रयत्नस्वरादिबोधिका । यागक्रियाक्रमोपदेशः कल्पः। साधुशब्दव्याख्यानं व्याकरणम् । 'वर्णागमोवर्णलोपोवर्णविपर्यय ' इत्यादिना निश्चयेनोक्तं निरुक्तम् । कर्मानुष्ठानकालादिप्रतिपादकं शास्त्रं ज्यौतिषम् । छन्दसां पद्यानां शास्त्रं छन्दोविचितिः । वेदाश्च वेदाङ्गानि च वेदवेदाङ्गानि तेषां तत्त्वं तत्त्वार्थः तं जानातीति तथोक्तः । " इगुपधज्ञाप्रीकिरः कः " इति कप्रत्ययः । धनुर्वेदो नाम धनुर्हस्तमुष्टिस्थितिविशेषाकर्षणविमोक्षणदिव्यास्त्रादिप्रयोगप्रतिपादको ग्रन्थः । चकार इतरोपवेदसमुच्चयार्थः । क्षत्रियो धनुर्वेदप्रधान इति तस्य निर्देशः। ते चोपवेदाश्चत्वारः । तथाहि 'आयुर्वेदो धनुर्वेदो वेदो गान्धर्व एव च । अर्थशास्त्रमिति प्रोक्तमुपवेदचतुष्टयम्' इति । आयुर्वेदो बाहटं वैदिकधर्मानुष्ठानविरोधिरोगनिवर्त्तकौषधादिप्रतिपादकम्। गान्धर्ववेदो भरतशास्त्रं सामगानोपयोगि । अर्थशास्त्रं चाणक्यादिप्रणीतं । नीतिशास्त्रं कर्मानुष्ठानेषूपयोग्यर्थसाधनं तेषु निष्ठितः निष्ठावान् ॥ १४ ॥

१५] ति० टी०–सर्वेति । साङ्ख्ययोगतर्कपूर्वोत्तरमीमांसासूत्राणि सव्याख्यानानि शास्त्राणि, स्मृतय उपस्मृतयश्च

सर्वदाभिगतः साद्भिः समुद्र इव सिन्धुभिः । आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ १६ ॥
स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः । समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥ १७ ॥
विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः । कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ १८ ॥

तत्त्वार्थशासकत्वाच्छास्त्रम्, सर्वमूलशब्दशासकत्वाद्व्याकरणं च शास्त्रम्, तथैव कामन्दकादीन्यपि नीतिशास्त्राणि, सर्वेषामेषामर्थतत्त्वज्ञः। स्मृतिमानुक्ताधीतवेदशास्त्रार्थविस्मरणरहितः । प्रतिभानवान्व्यवहारकाले श्रुतस्याश्रुतस्य चोचितार्थस्य शीघ्रं प्रतिभासः प्रतिभानं तद्वान् । तदुक्तम्—'प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः' इति । सर्वलोकप्रियो दृष्टस्मर्तृलोकानामिहामुत्र हितावहः । साधुर्मृदुमधुरस्वभावः । अदीनात्मा सहजासाधारणक्षात्रभावेनादीनस्वभावः । अतिव्यसनपरम्परायामप्यक्षुभितान्तःकरणो वा । विचक्षणो यथोचितलौकिकालौकिकसर्वक्रियासु कुशलः ॥ १५ ॥

रा० टी०—**सर्वेति** । सर्वशास्त्रार्थतत्त्वज्ञः रूढियोगवृत्त्या शास्त्रशब्दप्रतिपादितसाङ्ख्ययोगतर्कपूर्वोत्तरमीमांसास्मृत्यायर्थतत्त्वाभिज्ञः। वेदाङ्गानां पृथगुपादानं तन्महत्त्वद्योतनाय । स्मृतिमान् अधीतवेदादेविस्मरणरहितः । प्रतिभानवान् प्रतिभानं श्रुताऽश्रुतोभयोचितार्थस्य झटिति स्फूर्तिस्तद्वान् । अतएव सर्वलोकप्रियः सर्वेषां लोकानां जनानां प्रियः ' लोकस्तु भुवने जने ' इति कोशः । साधुः मृदुमधुरस्वभावः । अदीनात्मा न कदाचिदीनः आत्मा स्वभावो यस्य सः । नित्यक्षत्रियत्वादित्यर्थः । विचक्षणः लौकिकालौकिकक्रियाकुशलः ॥ १५

गो० टी०—**सर्वशास्त्रार्थतत्त्वज्ञइति**। सर्वशास्त्राणि उपात्तव्यतिरिक्तानि उपाङ्गानि गोबलीवर्दन्यायात् ' धर्मशास्त्रं पुराणं च मीमांसान्वीक्षिकी तथा । चत्वार्येतान्युपाङ्गानि शास्त्रज्ञाः संप्रचक्षते' इति। तत्र धर्मशास्त्रं पूर्वकाण्डोपबृंहणं पुराणं वेदान्तोपबृंहणम् । न्यायमीमांसे सर्ववेदसाधारण्यौ तेषामर्थतत्त्वं अर्थयाथात्म्यं निगूढाशयमित्यर्थः । तज्जानातीति तथा । अष्टादशविद्यास्थानतत्त्वज्ञइत्यर्थः । स्मृतिमान् ज्ञातार्थविषये विस्मरणलेशरहितः । प्रतिभानवान् व्यवहारकाले श्रुतस्याश्रुतस्य वा झटिति स्फुरणं प्रतिभानं तद्वान् । अथ सर्वदा सदुपास्यत्वमाह—**सर्वेति**। सर्वे लोकाः प्रिया यस्यः स सर्वलोकप्रियः । सर्वेषां लोकानां प्रियः सर्वलोकप्रियः सर्वलोकप्रियत्वात्। सद्भिरभिगन्तव्यइत्यर्थः । साधुः तत्कार्यसाधकः उणप्रत्ययः। यद्वा साधुरुचितः सदभिगमनोचित इत्यर्थः । ' साधुस्त्रिषूचिते सौम्ये सज्जने वार्धुषावपि ' इति वैजयन्ती । अदीनात्मा अकार्पण्यात्मा । अतिगम्भीरप्रकृतिरिति यावत् । विचष्टइतिविचक्षणः । नन्यादित्वाल्ल्युः ' अस्युस्यनेचक्षिङः ख्याञ्नेतिवाच्यम् ' इतिख्याञादेशाभावः । विविधं वक्तीत्यर्थः ॥ १५ ॥

१६] ति० टी०—**सर्वदेति** । सर्वदा होमदेवपूजासभाधिष्ठानकालेषु तत्तत्कालोचितैः सद्भिः सात्विकस्वभावैः पुरोहितद्विजमन्त्रिप्रधानादिभिः सिन्धुभिर्नदीभिः समुद्र इव अभिगतः सेवितः । यद्वा सद्भिर्भक्तैः सदा सेवितः । भगवत्सेवायां कालनियमाभावात् । दृष्टान्तेन तं प्राप्तानां सतां भक्तानां तेन सहैक्यं ध्वनयति । आर्यः सर्वपूज्यः । सर्वेषु सुखदुःखोदर्केषु समो हर्षविषादरहितः शत्रुमित्रोदासीनेषु वैषम्यरहितः । तत्तत्कार्यानुरूपफलदातेत्यर्थ इत्यन्ये । सदैव सर्वावस्थासु मुहुर्मुहुरनुभवेऽप्यननुभूतपूर्ववद्विस्मयनीयदर्शनः ॥ १६ ॥

रा० टी०—अतएव सद्भिर्वसिष्ठादिभिः सर्वदाभिगतः नित्यं प्राप्तः। तत्र दृष्टान्तमाह सिन्धुभिर्नदीभिस्समुद्र इव'सिन्धुर्नदी सरिति स्त्रियाम्' इति कोशः। आर्यः ईश्वरेश्वरोऽपि सर्वसमः पित्राचार्यादिमत्त्वेन लोकसदृश एव । अतएव वसिष्ठादिशिष्यत्वादि राघवस्य सङ्गच्छते । एतेन रघुनाथस्य परमदयालुत्वातिशयस्सूच्यते। चोऽप्यर्थे । अतएव सदैव नित्यमेव प्रियं दर्शनं यस्य सः। प्रतिक्षणमनुभूतोऽपि अननुभूतइव लक्ष्यत इत्यर्थः । अतएव ' तदेव रूपं रमणीयतायाः क्षणे क्षणे यन्नवतामुपैति ' इत्युक्तम्। एतेन रघुनाथस्य विलक्षणसौन्दर्यातिशयस्सूचितः ॥ १६ ॥

गो० टी०—अतएव सर्वदा सदुपास्यमानत्वमाह—**सर्वदेति**। सर्वदा अस्राभ्यासकालेष्वपि सद्भिः सत्पुरुषैः अभिगतः परिगतः । परिवारितइत्यर्थः । कथमिव समुद्रः सिन्धुभिरिव नदीभिरिव । ' स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे' इति वैजयन्ती । सर्वदाभिगतः सद्भिः स्वरलीकेलिश्रमविश्रान्तएकान्ते छायामवगाहमाने रामे सन्तः सर्वे तत्तदर्थविशेषश्रवणाय परिवृत्य स्थिताइत्यर्थः । तथा च वक्ष्यति ' ज्ञानवृद्धैर्वयोवृद्धैः शीलवृद्धैश्च सज्जनैः । कथयन्नास वै नित्यमस्रयोग्यान्तरेष्वपि' इति । अस्रयोग्योऽस्राभ्यासः । समुद्र इव सिन्धुभिः एवं सदभिगमनं न रामस्याज्ञातज्ञापनाय । तस्य स्वतएव पूर्णत्वात् । किं तु स्वेषामेवापूर्वार्थविशेषलाभाय गत्यन्तराभावादिति भावः । सिन्धवो हि स्वासनलाभायैव समुद्रमभियान्ति न तु तस्यातिशयापादनाय । एवमभिगमनहेतुभूतं सौलभ्यादिकं विशदयति—**आर्यइति** । आङ्पूर्वाद्दृगतावित्यस्माद्धातोः कर्मणि ण्यत्प्रत्ययः । अभिगन्तुमर्हइत्यर्थः । किं सतामेव नेत्याह—सर्वसमः जातिगुणवृत्त्याऽतारतम्यं विना सर्वेषामाश्रयणीयत्वे तुल्यः । अस्य कादाचित्कत्वं वारयत्येवकारः । चकारउक्तसमुच्चयार्थः। किंचिदुपदेशाभावेपि सौन्दर्यादभिगन्तव्यत्वमाह—**सदैकप्रियदर्शनइति** । सदानुभवेपि नवनवतया भासमानइत्यर्थः ॥ १६ ॥

१७-१८] ति० टी०—**स चेति** । स रामः सर्वैर्गुणैर्युक्त उक्तैर्वक्ष्यमाणैश्च । कौसल्यानन्दवर्धनत्वेन महाकुलप्रसूतत्वप्रधानमहिषीपुत्रत्वादिरूपस्याभिषेकोचितधर्मस्य सत्ता दर्शिता । गाम्भीर्यमगाधाशयत्वं तत्र समुद्रतुल्यः । धैर्यं मनसाप्यधृष्यत्वम्, इष्टवियोगादावनभिभूतचित्तत्वं, च रणेऽचलतया सहा-

याभावेऽपि स्थितिश्च, तेन हिमवत्सदृशः ॥ १७ ॥ **विष्णुनेति**। यद्यपि रामो विष्णुरेव सर्वरूपश्च तथापि मानुषोपाधिभेदात्सर्वत्र सादृश्यं द्रष्टव्यम् । यद्वा विष्णुना सदृश इत्यनन्वयालङ्कारः। चन्द्रवत्प्रजाव्यवहारनिरीक्षणकाले सौम्यदर्शनः। क्रोधे युद्धकालिके कालाग्निसदृशः। परैरधृष्य इति यावत्। क्षमाप्रतीकारसामर्थ्येऽप्यपकारसहिष्णुता तया पृथिवीतुल्यः ॥ १८ ॥

रा० टी०–इदानीं " न तत्समश्चाभ्यधिकश्च दृश्यते " इति श्रुत्या ' समो न विद्यते यस्य विशिष्टः कुत एवहि' इति स्मृत्या च वास्तवरघुनाथोपमानाभावेऽपि वस्तुनो दुरवगाहत्वाद्बालान्बोधयितुमिपुवत्सविता गच्छतीतिवत्तदृणांशांशसदृशगुणवतः उपमानत्वानर्हानपि तदृणसदृशगुणवन्तमीश्वरमपि उपमानत्वेन प्रकल्प्याह–**सचेत्यादिना** सार्द्धश्लोकद्वयेन। अस्मिन्पक्षेऽर्थस्पष्ट एव। यद्वा तदृणलेशगुणानामन्यत्रापि प्रतीयमानत्वात्तत्तदुपमानत्वेन रघुनाथं वर्णयन्नाह–**सचेत्यादिना**। सर्वगुणोपेतः सर्वैरुक्तवक्ष्यमाणैर्गुणैरुपेतो युक्तः कौसल्यानन्दवर्द्धनः कोसलस्य दक्षिणकोसलाधिपतेरपत्यं स्त्री कौसल्या " वृद्धेत्कोसलाजादाञ्ज्यङ्" इति ज्यङ्। ज्यङ्प्रत्ययान्ताच्चाप्। तस्या आनन्दं वर्धयतिसः प्रतिक्षणमद्भुतमातृनवानन्ददातेत्यर्थः। किञ्च कौसल्याया आनन्दो यस्मात् स कौसल्यानन्दो दशरथस्तं कौसल्या च आनन्दस्तदानन्दकर्त्ता दशरथश्च कौसल्यानन्दौ तौ वा यशःप्रख्यापनेन प्रतिक्षणं विलक्षणप्रमोददानेन च वर्द्धयतीति सः। असदृशः वास्तवसादृश्यप्रतियोगित्वानुयोगित्वानाक्रान्तः। अत्रार्थे श्रुतिस्मृती " न तत्समश्चाभ्यधिकश्च दृश्यते" । 'समो न विद्यते यस्य विशिष्टः कुत एव हि ' इति असदृशपदाद्वत्या बहुव्रीहितत्पुरुषोभयाश्रयणादयमर्थो लब्धः । वीर्यं सोमवत्प्रियदर्शनः वीर्येण स्वस्वप्रभावेण युक्ताः इःकामः ईर्लक्ष्मीः सोमः उमासहितशिवोऽस्त्याधारत्वेनास्येति सोमवान् चन्द्रश्च ते प्रियदर्शना यस्मात्सः। 'वीर्यं शुक्रे च शक्तौ च वीर्यं तैजःप्रभावयोः' इति हैमः। ' इकारः कथ्यते कामोः लक्ष्मीरीकार उच्यते ' इत्येकाक्षरः। एतेन प्रियदर्शनत्वेन प्रसिद्धाः कामलक्ष्मीचन्द्रमसः यत्प्रसादात्प्रियदर्शनास्तस्य प्रियदर्शनत्वं किं वक्तव्यमिति काव्यार्थापत्तिरलङ्कारो ध्वनितः। किञ्च वीर्यस्य शुक्रहेतुभूतकामस्य ईर्भस्मत्वप्राप्तिर्यस्मात्स एव सोमवाँश्चन्द्रशेखरः तस्य प्रियं तृप्तिकारकं दर्शनं यस्य। यद्दर्शनमन्तरा शिवस्यापि न तृप्तिरित्यर्थः। क्रोधे भक्तापकारिदोषापनयनहेतुभूते क्रोधाभासे कालाग्निः सदृशो यस्य। क्षमया पृथिवी समा यस्य। त्यागे धनदश्चासौ इनो राजा च धनदेनो रन्तिदेवः कुबेरो वा समो यस्य तादृशः। यो विष्णुना विष्णुः स्वप्रकाशद्वारा व्यापक एव ना नराकृतिः परमपुरुषो रघुनाथस्स इव। गाम्भीर्ये समुद्रः। रघुनाथनिष्ठगाम्भीर्यांशांशसदृशगाम्भीर्यवान्समुद्रो लक्ष्यत इत्यर्थः। स इव धैर्येण हिमवान्। तन्निष्ठधैर्यांशांशसदृशधैर्यवान् हिमवाँश्च लक्ष्यत इत्यर्थः। सत्ये स इव। अपर उत्कृष्टो धर्मो लक्ष्यत इत्यर्थः। यद्वा। सर्वगुणोपेतः उक्तवक्ष्यमाणगुणयुक्तः। अतएव विष्णुर्न आसमन्ताद्भावेन सदृशो यस्येत्यर्थः। नैकधेत्यादिवत्समासः। कौसल्यानन्दवर्द्धनः । वीर्ये सोमवत्प्रियदर्शनो रघुनाथः क्रोधे कालाग्निसदृशः क्षमया पृथिवीसमः त्यागे धनदेन समः वर्ण्यते । कविभिरिति शेषः। स्वस्ववाक्यावनार्थमिति भावः । स इव गाम्भीर्ये समुद्रः स इव धैर्येण हिमवान्स इव सत्येऽपरो-धर्मः वर्ण्यत इत्यर्थः। अत्र पक्षे अव्याख्यातार्थपदस्य पूर्वव्याख्यातार्थो बोध्यः। कौसल्यानन्दवर्द्धन इत्यनेन जनकादधिकपुत्रानन्दो मातरीति ध्वनितम्। एतेन ' विष्णोरर्द्धं महाभागम् ' इत्यादौ रघुनाथस्य विष्णोरर्द्धत्वोक्त्या तत्सादृश्यं रामे सुवचमिति भूषणोक्तं व्याख्यानं निरस्तम्। 'सूर्यस्यापि भवेन्मया ह्यग्रेरग्निः प्रभोः प्रभुः' इत्यादिना विरोधात्। न च विष्णुर्न आसमन्ताद्भावेन सदृशो यस्येति बहुव्रीहिस्वीकारे विष्णोरर्द्ध महाभागमितिविरुध्येतेति वाच्यम्। तत्रार्द्धशब्दस्य वर्द्धकपरत्वात्। अर्द्धयतीत्यर्द्ध इति व्युत्पत्तेः। पचाद्यच्। विष्णवैश्वर्यावतारादीनां रघुनाथायत्तत्वाद्रामनादिस्वरूपस्य रघुनाथप्रेरणावर्द्धयित्वाच्च वर्द्धकत्वं सुवचमेव। अतएव 'सर्वैपामवताराणामवतारी रघूत्तमः' इत्यादि सङ्गच्छते। अतएव सूर्यस्यापीत्यादिना न विरोधः। किञ्चात्रार्द्धशब्दस्य समांशवाचकत्वे वाक्यार्थ एव दुरुपपादस्स्यात्। तथाहि नहि विष्णोस्स्वरूपे समांशविभागो युक्तः। विष्णोरपि द्विभुजत्वापत्तेः शक्तिविशेषेण द्विभुजत्वाभावेऽप्यनित्यत्वप्रसङ्गात्। वचनप्रामाण्येनानित्यत्वाभावेऽपि तद्विवक्षितार्थिकत्वस्य विष्णौ दुरुपपादत्वाच्च। नह्यधिकभुजादिकं शक्त्याधिक्ये नियामकम्। कार्तवीर्यार्जुनस्य सहस्रभुजत्वेपि चतुर्भुजविष्ण्वपेक्षया शक्त्याधिक्यस्य कार्त्तवीर्यार्जुनेऽश्रुतत्वात्। नाप्यैश्वर्यादौ समांशविभागो युज्यते। तदैश्वर्यादेरपरिमेयत्वात्। नह्यनन्तपदार्थे समप्रविभागं कर्तुं कश्चिच्छक्नोति। अतएव नह्याकाशं कश्चिदर्द्धत्वेन विभजते नापि खण्डवाचकत्वमनित्यत्वप्रसंगात्। अखण्डप्रतिपादकश्रुतिविरोधाच्च। अन्यतरस्याधिकत्वे मानाभावेनान्यतरस्यैवोपमानत्वमित्यत्र विनिगमकाभावाच्च। अर्द्धस्य महाभागविशेषितत्वे रघुनाथस्यैवाधिकत्वेन्यविवक्षितोपमानत्वस्य विष्णौ भङ्गाच्च। अतो वर्द्धकपर एवार्द्धशब्दस्य समांशखण्डयोः रूढया यौगिकार्थस्य बाधादयमर्थो न युक्त इति तु न भ्रमितव्यम्। प्रत्ययादिभेदेन शब्दभेदात्। अतएव "कप्यासं पुण्डरीकमेवमक्षिणी पुरुषः" इत्यादौ कपिशब्दस्य वानरे रूढत्वेऽपि सूर्यपरत्वं रामानुजाचार्यैर्व्याख्यातम्। पुनर्भूशब्दस्य 'पुनर्भूर्दिधिषूरूढा' इत्यादिना द्विर्विवाहितायां रूढत्वेऽपि 'पुनर्भूर्यौगिकः पुंसि' इति दीक्षितैरुक्तम्। "रुजार्थानाम्भाववचनानामज्वरेः" इति सूत्रे वचनशब्दस्य वाचि रूढत्वेऽपि कर्तृपरत्वमाश्रित्य भावकर्तृकाणामित्यर्थस्सम्पादितो महाभाष्यादौ। बृहदारण्यकश्रुतौ पञ्चमेऽध्याये नवमब्राह्मणे जनकसभागतयाज्ञवल्क्यशाकल्यसंवादे "कतमोऽध्यर्द्धः" इति प्रश्ने "योयं पवते" इत्युक्तम्। "कथमध्यर्द्धः"इति प्रश्ने "यदस्मिन्निदꣳ सर्व्वमध्यार्ध्नोत्" इत्युत्तरम्। तत्रार्द्धशब्दस्य वर्द्धकपरत्वम्। विष्णुशब्दस्य पायसपरत्वे विष्णोरर्द्धमित्यादौ विष्णुशब्देन वस्तुतो नारायणस्यानुपस्थानात्तत्प्रतियोगिकसादृश्यानुयोगिकत्वं रामे युक्तम्। विष्णोरर्द्धमित्युक्तेरिति भूषणकारोक्तेरसम्भवाच्च। वि-

धनदेन समस्त्यागे सत्ये धर्म इवापरः । तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् ॥ १९ ॥
ज्येष्ठं ज्येष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् । प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥ २० ॥

ष्णोरीश्वरत्वेनेश्वरस्येश्वरान्तराप्रसिद्धिरित्यपि न भ्रमितव्यम् । " तमीश्वराणां परमं महेश्वरम् " इत्यादिश्रुतिषु ईश्वरान्तरस्य प्रसिद्धत्वादिति दिक्। सार्द्धश्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–अथ 'इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्तते न गोविन्दगुणक्षयात् ' इति भगवद्गुणानां वर्षायुतेनापि वर्णयितुमशक्यत्वेन संग्रहेण वदन्नुत्तरमुपसंहरति– **सचेति** । कोसलस्य राज्ञोऽपत्यं स्त्री कौसल्या " वृद्धेत्कोसलाजादाञ्ण्यङ् इतिञ्ण्प्रत्ययः" यञ्श्राप् " इतिचाप् । तस्या आनन्दं वर्द्धयतीति कौसल्यानन्दवर्द्धनः । चशब्द एवकारार्थः । कौसल्यासुतत्वेनावतीर्णो विष्णुरेव वेदान्तोदितसकलगुणसंपन्नः परमात्मा न तु ब्रह्मादिष्वन्यतमइत्यर्थः । दशरथनन्दन इत्युक्तिः पुत्रलाभफलस्य कौसल्यैव लाभात् । अतएव वक्ष्यति " कौसल्या लोकभर्त्तारं सुषुवे यं मनस्विनी ' इति । अथास्य निस्सीमाभ्यधिकत्वं वक्तुं लोके प्रकृष्टवस्तूनां तदेकैकगुणसाम्यमाह–**समुद्रइत्यादिश्लोकद्वयेन** । गाम्भीर्यं नाम स्वान्तर्गतपदार्थाप्रकाशकत्वं यथा समुद्रः स्वान्तर्गतं रत्नादिकमप्रकाशयन्नेव वर्त्तते तथायमपि स्वीयं परत्वमप्रकटयन्नेवास्ते इत्यर्थः । वक्ष्यति ' आत्मानं मानुषं मन्ये ' इति । धैर्यं नाम शोकहेतुसद्भावेपि निःशोकत्वं । तेन हिमवानिव हिमवत्सदृशः ' गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः । अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ' इति ह्युक्तं । अत्र वस्तुतः समुद्रादेरुपमानत्वाभावेऽपि प्रतिपत्तृणामुपमानत्वं संभवतीत्येवमुक्तं यथा ' इषुवदृच्छति सविता ' इत्यत्र ॥ १७ ॥ **विष्णुनेति** । वीर्ये विषये विष्णुना सदृशः विष्णोरर्धत्वेन रामस्य विष्णुसादृश्यं स्तुवचमेव । " स उ श्रेयान् भवति जायमानः " इत्युक्तत्वेन तदंशस्यापि तत्सदृशत्वं युक्तमेव । सोमवत्प्रियदर्शनः शोकनिवृत्तिपूर्वकमाह्लादकरः । क्रोधे कालाग्निसदृशः कालाग्निक्रोधसमक्रोध इत्यर्थः । स्वविषयापराधमेव स्वयं सहते । स्वाश्रितविषयापराधकरणे तु ज्वलज्ज्वलन इव शीतलतरेऽपि हृदये कोपमावहतीत्यर्थः । जले हि कालाग्निर्ज्वलति । क्षमया क्षमारूपसदृशधर्मेण पृथिवीसमः । पृथिवीतुल्यक्षमइत्यर्थः । स्वस्मिन्नपकारकरणे अचेतनवद्वर्त्तत इत्यर्थः । 'न स्मरत्यपकाराणां शतमप्यात्मवत्तया ' इति वक्ष्यति ॥ १८ ॥

१९–२०] ति० टी०–धनदेनेति। त्यागे धनत्यागे धर्मार्थं धनव्ययविषयेऽपेक्षितधनसंपत्तौ धनदेन नवनिधीशेन समः । अस्मिन्नेवांश उपमा, न तु त्यागांशे । तस्य धनसंग्रह एव प्रवृत्तेः । धनदव्यवहारस्तु कतिपयत्रिदशेभ्यो भगवदाज्ञया कतिपयधनदानमात्रादिति बहवः । सत्ये सत्यवचनेऽपरो धर्म इव धर्मस्य मूर्त्यन्तरमिवेत्युत्प्रेक्षा । एतदन्तं बालकाण्डीयार्थसंग्रहः । ' तमेवम्' इत्यादिनायोध्याकाण्डीयार्थसंग्रह आरभ्यते । तत्रेक्ष्वाकुवंशप्रभव इत्यनेन भगवदाविर्भावः सूचितः । महावीर्यः शत्रुनिबर्हण इत्यनेन विश्वामित्रानुग्रहजशस्त्रास्त्रसंपत्तिताटकावधादि सूचितम् । लक्ष्मीवानित्यनेन सीतापरिणयः सूचितः। सत्यपराक्रममित्यनेन भार्गवलोकप्रतिबन्धादि सूचितम् । एवंगुणसंपन्नं प्रागुक्तरीत्या सकलकल्याणगुणयुक्तम् । सत्यपराक्रममित्यमोघपराक्रमम् ॥ १९ ॥ **ज्येष्ठमिति** । ज्येष्ठगुणैर्यौवराज्याभिषेकार्हगुणैर्युक्तम् । प्रकृतीनां प्रजानां हितैरिहामुत्रहितावहैर्युक्तम् । ज्येष्ठं सुतं रामम् । प्रकृतिप्रियकाम्यया प्रकृतीनां प्रियं कर्तुमिच्छया । ' छान्दसः काम्यच् ' इति प्राञ्चः । प्रकृतिसंबन्धेनात्मनः प्रियं कर्तुमिच्छया। युवराजेन हि प्रजाकृत्ये संपादिते सति व्यवहारादिनिरीक्षणजन्यश्रमनिवृत्तिरूपं प्रियं स्वस्य भवतीति वयम् ॥ २० ॥

रा० टी०–बालकाण्डोक्तं सूचयित्वाऽयोध्याकाण्डवृत्तमाह– तमेवमित्यादिना । सत्यपराक्रमम् अमोघवीर्यं प्रियं सर्वप्रीतिविषयीभूतं जेष्ठं पूर्वप्रादुर्भूतं श्रेष्ठगुणैर्युक्तम् । श्रेष्ठे ज्येष्ठे येऽनुचिताः गुणा वात्सल्यादयस्तैर्युक्तम्। प्रकृतीनाम्प्रजानां हितैर्हितफलकोपदेशैर्युक्तम्। एवं सर्वगुणसम्पन्नं तं सुतं स्वपुत्रं रामं प्रकृतिप्रियकाम्यया प्रजाकल्याणेच्छया महीपतिः अप्रतिहतचक्रो राजाधिराजो दशरथः प्रीत्या अतिप्रेम्णा यौवराज्येन संयोक्तुमैच्छत् दशरथशब्दार्थस्तु दशसु दिक्षु अप्रतिहतो रथो यस्य सः अर्द्धचतुष्टयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–त्यागे त्यागविषये धनदेन कुबेरेण समः । तद्वदातेत्यर्थः । कुबेरस्य त्यागित्वं ' त्यागे च धनदो यथा ' इत्यादिवक्ष्यमाणवचनशतसिद्धं । न च तस्य लुब्धत्वं कुतश्चित्सिद्धं त्यागे सत्यपि धनदवदाढ्यइति व्याख्यानं तु प्रक्रमविरुद्धं । न ह्याढ्यत्वं कश्चिद्गुणः । तथासति लुब्धत्वमेवास्य सिद्धं स्यात् । सत्ये सत्यवचने अपरः उत्कृष्टवस्त्वन्तररहितः धर्मः धर्मदेवतेव स्थितः । धर्मदेवतेव निरपायसत्यवचनइत्यर्थः । सत्ये अपरो धर्म इव स्थित इति व्याख्याने प्रकृतौपम्ये विरोधः । तस्योत्प्रेक्षारूपत्वात् । क्वचिदुपमा क्वचिदुल्लेखः क्वचिदुत्प्रेक्षेति विजातीयसंकर इत्यप्याहुः । एवं वेदान्तोदितजगत्कारणत्वसर्वज्ञत्वसर्वशक्तित्वसर्वान्तर्यामित्वप्रमुखसमस्तकल्याणगुणाकरं ब्रह्म किं रामत्वेनावतीर्णो विष्णुरुत ब्रह्म रुद्रादिष्वन्यतम इति वाल्मीकिना वेदोपबृंहणाय पृष्टे वेदान्तोदितगुणानां तदन्येष्वसंभवात्तस्यैव संभवाच्च स एव वेदान्तोदितं परं तत्त्वमित्युपदिष्टं । तत्र-तत्र जगत्कारणप्रकरणेषु प्रयुक्ताः स्वयम्भूशिवादिशब्दाः सद्ब्रह्मादिसामान्यशब्दवदपर्यवसानवृत्त्यावयववृत्त्या वा परमात्मपरा इत्यप्यर्थसिद्धम् ! एवं वेदान्तसारार्थः संदर्शितः । ननु ब्रह्मस्वरूपमिव फलस्वरूपं तदुपायस्वरूपमपि वेदार्थत्वादुपबृंहणीयं तदुभयं किमिति न पृष्टं नोपदिष्टं च । मैवं । परिपप्रच्छेत्यत्र परिणा तदुभयस्वरूपमपि पृष्टमेवोत्तरे च 'प्रजानां च हिते

यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः । तस्याभिषेकसंभारान्दृष्ट्वा भार्याऽथ कैकयी ॥ २१
पूर्वं दत्तवरा देवी वरमेनमयाचत । विवासनं च रामस्य भरतस्याभिषेचनम् ॥ २२

रत' इत्यादिनोपायत्वं सदैकप्रियदर्शन इत्यादिनोपेयत्वं च तस्यैवेत्युक्तं । ननु सिद्धस्यैव तस्योपायत्वे सर्वमुक्तिप्रसंग इति चेन्न । य उपायोपेयाधिकारी तस्यैव फलं दिशति नानधिकारिण इति व्यवस्थापनात् । अधिकारश्च तत्प्राप्त्यपेक्षासाधनान्तरपरित्यागश्चेत्युत्तरग्रन्थे सुव्यक्तं । ननु वेदोपबृंहणमिदं रामायणमित्युक्तं। धर्मोपि वेदार्थः । स कथं नोपबृंहितः । किंचेयता ग्रन्थेन वेदान्तार्थ उपबृंहितः । किमतः परग्रन्थेन । उच्यते । उक्तानुक्तांश कल्याणगुणांस्तच्चरित्रनिदर्शनमुखेन प्रतिपादयितुमुत्तरग्रन्थः पूर्वभागोपबृंहणं च रामायणपुरुषाचारमुखेन हि सामान्यधर्मो विशेषधर्मश्चोपबृंहितः । ननु तथापि कथं बालकाण्डकथा नोपदर्शिता । मैवं । तत्र प्रदर्शनीयगुणविशेषाभावात् । नच साप्यत्यन्ताप्रदर्शिता । इक्ष्वाकुवंशप्रभवत्यवतरणं महावीर्य इति ताटकाताटकेयादिवधः धनुर्वेदे च निष्ठित इति कौशिकाधिगतनिखिलदिव्यास्त्रवत्त्वं श्रीमानिति वैदेहीलाभश्चेति बालकाण्डकथासूचनात् । अथायोध्याकाण्डकथां प्रस्तौति–**तमेवमित्यादिना**। आदौ श्लोकद्वयमेकान्वयं । दशसु दिक्षु रथो यस्य स दशरथः । अप्रतिहतरथत्वेन रामाय राज्यं दत्तं भीतिदत्तत्वाभावेन पुनरनादातव्यत्वमुक्तं । महीपतिः अस्वामिदत्तत्वाभाव उच्यते । एवं दातृदोषेण पुनरनाहरणीयत्वमुक्त्वा संप्रदानगुणेनाप्याह–**तमित्यादिना** । तं प्रसिद्धं । एवंगुणसंपन्नं पूर्वोक्तसर्वगुणसमृद्धं । सर्वस्य स्वामिभूतमिति यावत् । सत्यपराक्रममभोघपराक्रमं सर्वरक्षणशक्तमिति यावत् ॥ १९ ॥ ज्येष्ठं जन्मक्रमेणापि राज्यार्हं । श्रेष्ठगुणैर्युक्तं नीतिशास्त्रोक्तषाड्गुण्ययुक्तं सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः षड्गुणाः कामन्दकोक्ताः । प्रियं प्रीतिविषयं । अनेन तात्कालिकप्रीतिदानव्यावृत्तिः । सुतं जन्मनैव राज्यार्हं । प्रकृतीनां प्रजानां हितैः हितकरणैर्युक्तं । अनेन सर्वानुकूल्यमुक्तं । एवंभूतं रामं प्रकृतिप्रियकाम्यया अमात्यादीनां प्रीतिकरणेच्छया । इच्छायां काम्यच्प्रत्ययः । "अप्रत्ययात् " इत्यप्रत्ययः । " अजाद्यतष्टाप् " प्रीत्या स्वप्रीत्या च । चकारोर्थसिद्धः । " गामश्वं पुरुषं जगत् " इतिवत् । मन्त्रिवृद्धैरालोचनपूर्वकं कृतत्वादप्रत्याख्येयत्वमुच्यते । ' प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे । छन्दःकारणगुह्येषु जन्मामात्यादिमातृषु' इत्युभयत्र वैजयन्ती ॥ २० ॥

२१–२२]ति० टी०–**यौवराज्येनेति**। युवराजस्य भावो यौवराज्यम् । पितरि राज्यं कुर्वत्येव सर्वराजव्यापारेऽभिषेकपूर्वकमधिकृतः पुत्रो युवराजः । संयोक्तुं योजयितुम् । महीपतिर्दशरथः ऐच्छत् । अथ तस्य रामस्य यौवराज्याभिषेकेऽपेक्षितान्संभारान् " औदम्बर्या सन्दी तस्यै प्रादेशमात्राः पादाः स्युः " इत्यादिना बह्वृचब्राह्मणेनोपदिश्यमानान्दधिमधुसर्पिरादीन्संभृतान्दृष्ट्वा मन्थरावचनाज्ज्ञात्वा । कैकेयी राज्ञः कनीयसी भार्या । अत्र कैकेयीत्येव । यद्यपि केकयशब्दादञि " केकयमित्रयु–" इत्यादिना यादेरियादेशे गुणे आदिवृद्धौ ङीपि "यस्येति च" इति लोपे साधु, तथापि 'अपि मापं मषं कुर्याच्छन्दोभङ्गं न कारयेत्' इति न्यायेन कैकयीति प्रयोगः। पुंयोगलक्षणे ङीषि 'केकयी' इति पाठ इत्यन्ये ॥ २१ ॥ पूर्वं पूर्वस्मिन्काल इन्द्रसहायार्थं प्रवृत्तदशरथस्य दैत्यैर्युद्धकाले दशरथेतरप्रयुक्तामासुरीं मायां धवलाङ्गुनिदत्तविद्यया निवारयित्र्यै कैकेय्यै तुष्टेन दशरथेन दत्तौ वरौ यस्यै सा। देवी सैव राज्याभिषेकसमये प्राप्ताभिषेका देवी तद्वृत्तिप्रियतमैनं वक्ष्यमाणलक्षणं वरं प्राप्तकालत्वादयाचत राजानम्। याचेर्द्विकर्मकत्वात् । वरद्वयमाह---रामस्य राज्यादुद्वासनम् . भरतस्य स्वपुत्रस्याभिषेचनम् ॥ २२ ॥

रा० टी०–**तस्येति**। अथाऽनन्तरं पूर्वं शम्बरासुरविजयकाले सारथ्यकरणेन राजप्रसादसमये राज्ञा दत्तवरा दत्तो वरो यस्यै सा देवी कैकयी भार्या अभिषेकसम्भारान् वेदोक्तदध्यादिसामग्रीर्दृष्ट्वा मन्थरावाक्यादवगत्य रामस्य विवासनं भरतस्याभिषेचनं च एनं वरं भूपतिमयाचत। दृशिर्ज्ञानसामान्ये। कैकयीशब्दार्थस्तु केकयस्य ककयजनपदाधिपतेः कन्या कैकयी "पुंयोगादाख्यायाम्" इति ङीप्। तत्र योगशब्देनाविशेषाज्जन्यजनकभावोऽपि गृह्यते। प्रसिद्धश्च कैकयीशब्दः 'प्राक्कैकयीतो भरतस्ततोभूत्' इत्यादिना भट्टिकाव्यादौ जनपदशब्दादित्यत्रि टित्त्वेति ङीपि तु कैकेयीति स्यात्। 'ताद्धितेष्वचाम्' इति वृद्धेः। "केकयमित्रयुप्रलयानां यादेरियः" इतीयादेशाश्च। "अतश्च" इति लुक् तु न। "नप्राच्यभर्गादि–" इति निषेधात्। प्रसिद्धश्च कैकयीशब्दोऽपि कैकेयिकामाः फलितास्त्वेतायदौ रघुकाव्ये वक्ष्यते च। अत्रापि बहुशः स्थले कैकयीशब्दस्यापि प्रामाणिकत्वे इयादेशविधायके विकल्पानुवृत्तिरनुसर्त्तव्या अनुसृता च कैश्चित्। किञ्च कं सुखमेव एकं कवलं कैकंतथाति देवादीन् प्रापयतीति कैकयी। गौरादित्वं प्रज्ञादित्त्वं वाकल्प्यमिति दिक्। सार्द्धश्लोक एकान्वयी ॥ २१ ॥ २२ ॥

गो० टी०–युवा चासौ राजा च युवराजः तस्य भावः कर्म वा यौवराज्यम् । ब्राह्मणादित्वात् ष्यञ् । तेन पितरि राज्यं निर्वहत्येव सर्वनिर्वाहकत्वेनाभिषिक्तः पुत्रो युवराजस्तस्य भावेनेत्यर्थः । संयोक्तुं घटयितुमैच्छत्। तत्संभारान् समभरदित्यर्थः। एवं पुनरादानायोग्यं रामाय राज्यप्रदानमुक्त्वा अपरिहरणीयमनन्तरभावि कैकेय्या याचनमाह–**तस्येति**। सार्द्धश्लोक एकान्वयी । अथ रामाय राज्यप्रदानेच्छानन्तरं तस्य रामस्याभिषेकः कर्मविशेषः । तस्य संभारानुपकरणानि । " औदुम्बर्या सन्दी तस्यै प्रादेशमात्राः पादाः स्युः " इत्यादीनि " दधिमधुसर्पिरातपवर्ष्माऽपः " इत्यन्तानि ब्राह्मणोक्तानि दृष्ट्वा मन्थरामुखेन दर्शन इव ज्ञात्वा। भार्या भर्तुं योग्या न तु स्वातन्त्र्यार्हा। पूर्वं पूर्वकाले । विभक्तिप्रतिरूपकमव्ययम् । तेन दशरथेन दत्तवरा शम्बरासुरविजयकाले सारथ्यकरणपारितोषिकतया दत्तवरा । याचनहेतुत्वेनेदमुक्तम् । तच्छब्दस्य दशरथपरामर्शितया

स सत्यवचनाद्राजा धर्मपाशेन संयतः । विवासयामास सुतं रामं दशरथः प्रियम् ॥ २३ ॥
स जगाम वनं वीरः प्रतिज्ञामनुपालयन् । पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् ॥ २४ ॥
तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह । स्नेहाद्विनयसंपन्नः सुमित्रानन्दवर्धनः ॥ २५ ॥

शम्बरासुरसमरं सूचितम् । दशसु दिक्षु अप्रतिरुद्धरथो हि सः । दीव्यतीति देवी । पचाद्यच् । देवडिति टित्त्वेन पाठात् ङीप् । भोगोपकरणभूतेति व्यामोहमूलोक्तिः । कैकयी केकयानां राजा कैकयः । ' क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् ' इत्यञ् । "जनपदे लुप्" । केकयस्यापत्यं स्त्री कैकयी । "जनपदशब्दात्क्षत्रियादञ्" इत्यपत्यार्थेऽञ् । "टिड्ढाणञ्" इत्यादिना ङीप् । नन्वञ्प्रत्यये " केकयमित्रयुप्रलयानां यादेरियः " इतीयादेशः किं न स्यात् । उच्यते । " जरायाजरसन्यतरस्याम् " इत्यतोऽन्यतरस्यामित्यनुवृत्तेस्तस्य वैकल्पिकत्वात् । नचेयादेशाभाव आर्ष इति वाच्यम् । कैकेयीकैकयीति शब्दभेदप्रकाशिकायामुक्तेः ।

प्राक् कैकयीतो भरतस्ततोऽभूत् ' इतिभट्टिप्रयोगात् । केकयीतिपाठे तु केकयान् जन्मभूमित्वेनाचष्ट इति केकयी । तदाचष्टइति णिजन्तादौणादिके स्त्रियामिकारप्रत्यये टिलोपे णिलोपे च कृते "कृदिकारादक्तिनः" इति ङीबित्याहुः । केकयशब्दो मूलप्रकृतिरेवोपचारात् स्त्र्यपत्ये वर्त्तते । शार्ङ्गरवादिपाठात् ङीनिति न्यासकारः । कैकयी । एनं दशरथम् । " द्वितीयाटौस्स्वेनः " इत्यन्वादेशे एनादेशः । रामस्य विवासनं भरतस्याभिषेचनं च वरमयाचत अर्थितवती । याचिर्द्विकर्मकः ॥ २१ ॥ २२ ॥

२३] ति० टी०–स इति । सत्यवचनात् । धर्मपरनिर्देशेन सत्यप्रतिज्ञत्वादित्यर्थः । अतो हेतोः सत्यरूपेण धर्मपाशेन संयतो बद्धः सन्दशरथः प्रियं सुतमपि विवासयामास ॥ २३ ॥

रा० टी०–सइति । धर्मस्य पः पालनं तस्य आशो व्याप्तिस्तेन संयुतः । धार्मिकशिरोमणिरित्यर्थः । स राजा महाराजाधिराजो दशरथः सत्यवचनात्सत्याऽयोध्या राजधान्यस्त्यस्योति सत्यो रघुनाथस्तस्मिन्यद्वचनं ब्रह्मप्रार्थनास्वीकारमूचकवाक्यं तस्माद्धेतोः प्रियं सुतं रामं विवासयामास । एतेनारण्यगमनमन्तरा ब्रह्मप्रार्थनास्वीकारसिद्धिर्न स्यादिति हेतुर्व्यक्तः । तेन महाराजाधिराजस्य ब्रह्मप्रार्थनादिविज्ञातृत्वं परमदयालुत्वं च रघुनाथसुखसुखित्वं च व्यक्तम् । तेन महाराजदशरथवदेव वर्त्तितव्यमित्युपदेशो व्यञ्जितः । एतदर्थविक्षैवयव धर्मपाशेन बन्धितस्संबद्धो वेति नोक्तम् । अतएव धर्मपाशेन संयुतइत्यनेन सत्यवचनादित्यस्य न गतार्थत्वम् । एतेन सत्यवचनादित्यस्य विरुद्धमर्थं प्रकल्प्य दशरथो न मुक्त इति भूषणकारवचनमाकाशमनवकाशमितिवद्धत्येयम् । न च कालवशादुग इत्यादिवक्ष्यमाणायोध्याकाण्डवाक्येन रघुनाथानुचरेषु कालवशत्वाभावसंपादनात् प्राकृतेषु कालवशत्वाभावस्यासम्भवेन रघुनाथानुचराणां प्राकृतविलक्षणत्वप्रतिपादनेन विरोधाच्च ॥ २३ ॥

गो० टी०–सइति । राजा सर्वरञ्जकः । ' राजा प्रकृतिरञ्जनात् ' इति प्रयोगात् । औणादिकः कनिन् प्रत्ययः । यद्यपि ' रजकरजनरजस्मपसंख्यानम् ' इतिवचनादत्र नलोपप्रसक्तिर्नास्ति तथापि रजस्साहचर्यादौणादिकस्य तत्र ग्रहणम् । स पूर्वं रामाय दत्तराज्यः । मन्त्रिप्रमुखैरालोचनपूर्वकं प्रतिज्ञातरामाभिषेक इत्यर्थः । दशरथः । धर्म एव पाशो धर्मपाशः । "उपमितं व्याघ्रादिभिः" इतिसमासः । व्याघ्रादेराकृतिगणत्वात् । तेन संयतो बद्धः सन् सत्यवचनात् । स्त्रीविषयवचनसिद्धिहेतोः प्रियं सुतं विवासयामास । 'रामो विग्रहवान् धर्मः' इत्युक्तरीत्या प्रथमं अङ्गीकृतं परमधर्मं परित्यज्यानन्तरं प्रवृत्तं स्त्रीविषयं क्षुद्रधर्ममवलम्बितवानित्यर्थः । एतेन 'साङ्क्रीत्यं पारिहास्यं वा स्तोभं हेलनमेव वा । वैकुण्ठनामग्रहणमशेषाघविनाशनम् ॥ आकुश्य पुत्रमघवान् यदजामिलोपि नारायणेति म्रियमाण उपैति मुक्तिम् कामाद्वोप्योभयात्कंसः' इत्येवं यथाकथञ्चित् भगवन्नामवतां मुक्तिसिद्धौ सर्वदा रामपरायणस्य दशरथस्य कथं न मुक्तिरिति शङ्का दूरोत्सारिता । सिद्धसाधनत्यागात् काशकुशावलम्बनात् धर्मपाशप्रतिबन्धाच्च मुक्तिप्रसंगाभावात् । तथाच मुमुक्षुणा दशरथवत्त वर्तितव्यमित्युक्तं भवति ॥ २३ ॥

२४] ति० टी०–स इति । वीरोऽनैकैरपराङ्मुखतया योद्धापि स रामः पितुः प्रतिज्ञां सत्यतया स्वविवासनेनानुपालयन् । यद्वा कैकेयीसंनिधौ पितृवचनपरिपालनविषयां स्वकृतां प्रतिज्ञां परिपालयत्पितृवचनकृतान्निर्देशादाज्ञातो मातुश्च कैकेय्याः प्रियकारणात्प्रियसिद्धिनिमित्तं वनं जगाम । अनेन पितृतत्पत्नीसंतोषकरणमेव सर्वात्मना पुत्रस्य धर्म इति भगवतोपदिष्टम् ॥२४॥

रा० टी०–सइति । केकय्याः प्रिये विवासने यत्कारणं ब्रह्मप्रार्थनास्वीकारसिद्ध्या भवितव्यम् । तस्माज्जातात्पितुर्वचननिर्देशाद्धेतोः प्रतिज्ञां स्वकृतप्रतिश्रवमनुपालयन्स वीरो रामो वनं जगाम ॥ २४ ॥

गो० टी०–पितृवचनपरिपालनमवश्य कर्त्तव्यमतद्रामाचारमुखेन दर्शयति–सजगामेति । स रामः वीरोपि राज्यपरिपालनसमर्थोपि कैकेय्याः प्रियकारणात् प्रीतिहेतुभूतात् स्त्रीपारवश्येनोक्तादपीत्यर्थः । पितुर्वचननिर्देशात् वचनमेव निर्देशः आज्ञा । ' आज्ञायामपि निर्देशं ' इति वाणः । तस्माद्धेतोः प्रतिज्ञां कैकेयीसमक्षं कृतां प्रतिज्ञामनुपालयंश्च । "लक्षणहेत्वोः क्रियायाः" इति हेत्वर्थे शतृप्रत्ययः । वक्ष्यति । ' तद्भूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् । करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ' इति स्वप्रतिज्ञापालनार्थं पितृवचनपालनार्थं चेत्यर्थः । वनं दण्डकावनमुद्दिश्य जगाम ॥ २४ ॥

२५] ति० टी०–तमिति । व्रजन्तं भ्रातरम् । प्रियो रामे सहजप्रीतिमान् ॥ २५ ॥

१ संयुत इति पाठः । २ केकय्या इति पाठः ।

भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन्। रामस्य दयिता भार्या नित्यं प्राणसमा हिता ॥ २६ ॥
जनकस्य कुले जाता देवमायेव निर्मिता। सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः ॥ २७ ॥

रा० टी०–**तमिति**। भ्रातुर्दयितः नित्यं भ्रातृनिष्ठप्रीतिविषयः प्रियः नित्यं रामविषयकप्रीतिमान् अतएव विनयसम्पन्नस्सुमित्रानन्दवर्द्धनो भ्राता लक्ष्मणः सौभ्रात्रं सुभ्रातृत्वम्। वियोगासहिष्णुत्वसूचकचेष्टादीत्यर्थः। अनुदर्शयन्नाचरन् व्रजन्तं तं भ्रातरं रामं स्नेहादनुजगाम। ह इति महत्सुप्रसिद्धम्। सुमित्रानन्दवर्द्धनः कौशल्यानन्दवर्द्धनवद्व्याख्येयः। सुमित्राशब्दार्थस्तु सुमिदं रामविषयकातिस्नेहं त्रायते पालयति नित्यं नवंनवं संवर्द्धयतीत्यर्थः। मिदशब्दोभावक्विबन्तः। त्रशब्दः कर्तृकप्रत्ययान्तः। सार्द्धश्लोक एकान्वयी ॥ २५ ॥

गो० टी०–इक्ष्वाकुवंशेत्यादिना समस्तकल्याणगुणपरिपूर्णत्वोक्त्या परत्वमुक्तं तमेवमित्यादिनाभिषेकप्रवृत्तिनिवृत्तिकथनात्सौलभ्यमुक्तं। अथ परत्वसौलभ्यानुगुणं समाश्रयणमाह–**तंव्रजन्तमिति**। यद्वा। अथ सिद्धसाधननिष्ठैः लक्ष्मणवत् कैङ्कर्यपरैर्भवितव्यमिति व्यञ्जयन्नाह–**तं व्रजन्तमिति**सार्द्धश्लोकएकान्वयः। प्रीणातीति प्रियः। रामे प्रीतिमान्। "इगुपधज्ञाप्रीकिरःकः" इति कः। अनेनानुगतिहेतुर्भक्तिरुक्ता। भ्राता 'भ्राता स्वामूर्तिरात्मनः' इति मूर्तिभूतः। विनयसंपन्नः कैङ्कर्यहेतुविनययुक्तः। विनयः शेषत्वज्ञानं रामकैङ्कर्यरूपाचारो वा। 'विनयो धर्मविद्यार्थाशिक्षाचारप्रशान्तिषु' इति वैजयन्ती। सुमित्रायाः आनन्दं वर्द्धयतीति सुमित्रानन्दवर्द्धनः। 'सृष्टस्त्वं वनवासाय । रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्। अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्' इति सुमित्रयैवोक्तत्वात्। दयितः राममेष्टतमः। "यमेवैष वृणुते तेन लभ्यः" इत्युक्तरीत्या प्रियतमत्वेन वरणीय इत्यर्थः। लक्ष्मणः कैङ्कर्यलक्ष्मीसंपन्नो भविष्यतीति ज्ञात्वा लक्ष्मण इति वसिष्ठेन कृतनामधेयः 'स तु नागवरः श्रीमान्। अन्तरिक्षगतः श्रीमान्' इत्युक्तेः कैङ्कर्यलक्ष्मीवत्त्वं। लक्ष्मणो लक्ष्मिसंपन्न इति वक्ष्यति। पामादिषु पाठात् "लक्ष्म्याअच्च" इतिपामादिगणसूत्रान्मत्वर्थीयो नप्रत्ययः अकारश्चान्तादेशः। 'लक्ष्मीवान् लक्ष्मणः श्रीमान्' इतिपर्यायपाठश्च। सुभ्रातुर्भावः सौभ्रात्रं। भावे अण्। अनुशतिकादित्वात् उभयपदवृद्धिः। रामं विना क्षणमपि जीवनाक्षमत्वं सुभ्रातृत्वं। वक्ष्यति। 'नच सीता त्वया हीना न चाहमपि राघव। मुहूर्त्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ' इति रामस्य लक्ष्मणविरहासहत्वं सुभ्रातृत्वं। तच्च वक्ष्यति। 'न च तेन विना निद्रां लभते पुरुषोत्तमः। मृष्टमन्नमुपानीतमभाति नहि तं विना' इति। तदनुदर्शयन् सन्। यद्वा एवं सुभ्रातृभिर्वर्त्तितव्यमिति दर्शयन्नित्येवेति गम्योत्प्रेक्षा। व्रजन्तमेकान्ते स्वाभिमतसकलकैङ्कर्यप्रयानप्रवृत्तं भ्रातरं। उपलक्षणमिदं। 'माता पिता च भ्राता च निवासः शरणं सुहृत्। गतिर्नारायण' इत्युक्तसकलविधबन्धुः। वक्ष्यति। 'अहं तावन्महाराजे पितृत्वं नोपलक्षये। भ्राता भर्त्ता च बन्धुश्च पिता च मम राघवः' इति स्नेहात् 'बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्द्धनः' इत्युक्तरामभक्तेरेव हेतोरनुजगाम। येनयेन भ्राता गच्छति तेनतेन सह गच्छतीतिवदपूर्वोयं कश्चिद्वृत्तिविशेष इति ऋषिर्विस्मयते हेति। 'ह विस्मये विषादे च' इतिविश्वप्रकाशः। आशालेशमात्रेण स्वस्मिन्नेवाधिकप्रेमाणं भगवन्तं क्वचिन् एकान्तस्थले स्वमनोरथानुरूपविशिष्टविषयसकलकैङ्कर्यलाभायानुसरन्नधिकार्यत्र विनिर्दिश्यते ॥ २५ ॥

२६–२७] ति० टी०–**भ्रातरमिति**। भ्रातुः रामस्य दयितः प्रियः। सौभ्रात्रं सुभ्रातृभावम्। स्नेहमिति यावत्। स्नेहादेव जगाम। न पित्रादिनिर्देशादिति भावः। अथ रामस्य दयितेष्टा। प्राणसमा निरतिशयप्रेमास्पदमहिता नित्यं हितकारिणी ॥२६॥ जनकस्य कुलेऽन्वये जाता। यद्यप्येषाऽयोनिजा तथापि सीरध्वजस्य देवयजनलाङ्गलपद्धतावाविर्भूतत्वादेवमुक्तिः। अतएवाह–देवमायेवेति। सेवाचिन्त्योदयस्थितिलया। देवैरेव स्वकार्यसिद्ध्याकाङ्क्षिभिर्निर्मितताविर्भाविता। यद्वा इवशब्द एवार्थे। देवेन भगवताविर्भाविता स्वमायैव। भगवतोऽनाद्यन्ता सर्वकार्यसहायभूता सहजशक्तिरेव हि मायाः। यत्तु तिलोत्तमादिवद्देवमायेव स्थितेति, तत्र। निर्मितपदवैयर्थ्यापत्तेः। सर्वैः स्त्रीलक्षणैः संपन्ना युक्ता ॥ २७ ॥

रा० टी०–**रामस्येति**। प्राणसमा प्राणसदृशी दयिता प्रिया हिता प्रियकरी किञ्च प्राणवत्समाहिता रघुनाथेन नित्यं स्वीकृता जनकस्य कुले जाता प्रादुर्भूता सर्वलक्षणसम्पन्नेत्यादिविशेषणचतुष्टयविशिष्टा सीतेव निर्मिता प्रकटिता देवमायाविष्णवतारभूतमोहिनीत्यर्थः। देवमायाशब्दार्थस्तु देवानां मा आयुर्बलादिसम्पत्तिस्तां यात्यमृतदानद्वारा प्रापयति सा अन्तर्भावितणिजर्थौ यातिः। किञ्च निर्गतं मितमियत्ता यस्यास्सा देवस्य परमात्मनो मायाकृपेव अपरिमितपरमात्मदयालुतैव ततो निश्चित्य प्रादुर्भूतेवेत्यर्थः। अतएव नारीणां सर्वैर्लक्षणैस्सामुद्रिकोक्तशुभसूचकसकललक्षणैः सम्पन्ना नित्यं संयुक्तेत्यर्थः। अतएवोत्तमा ब्रह्माण्यादितोऽपि श्रेष्ठा। अतएव वधूः रघुनाथमनोहारिणीत्यर्थः। सीता रामस्य भार्या राममनुगता अन्वगच्छत्। तत्र दृष्टान्तः शशिनं चन्द्रमसं यथा रोहिणी चन्द्रस्यासाधारणस्त्री। अनेनोपमालङ्कारेण यथा चन्द्रः संयुक्तसुखप्रदः वियुक्तदुःखप्रदः तथा रघुनाथोऽपि धर्मसंयुक्तसुखप्रदः धर्मवियुक्तदुःखप्रदः प्रतीत इत्युपमालङ्कृतिर्व्यञ्जिता। तेन रघुनाथस्य सर्वसमत्वं ध्वनितम्। अत्राप्युपमानोपमेयभाव इषुवत्सविता गच्छतीतिवत्। किञ्च राममनुगता सीता शशिनं रोहिणी इव अनुगतेत्यर्थः। वधूशब्दः लुप्ताकारकावपूर्वककम्पनार्थकधूप्रकृतिककिबन्तः। 'माया दम्भे कृपायां च' इति कोशान्मायाशब्दः कृपापरः। अपिर्हेतौ अर्द्धचतुष्टयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०–अथ सीतायाः। साधनदशायां पुरुषकारतया

सीताऽप्यनुगता रामं शशिनं रोहिणी यथा । पौरैरनुगतो दूरं पित्रा दशरथेन च ॥ २८ ॥
शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् । गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २९ ॥
गुहेन सहितो रामो लक्ष्मणेन च सीतया । ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥ ३० ॥

फलदशायां प्राप्यतया चान्वयात्तया नित्ययोगं दर्शयति–**रामस्येत्यादिश्लोकद्वयेन** । रामस्याभिरामस्यापि दयिता अभिरामा नित्यं भार्या हृदि संततं धार्या । बिभर्त्तेः "ऋहलोर्ण्यत्" इतिण्यत् । प्राणसमा उक्तार्थद्वये हेतुरयं । हिता चेतनहितपरा । मित्रमौपयिकं कर्तुमित्यादि वक्ष्यति । रामहितपरा वा । वक्ष्यति 'स्मारये त्वां न शिक्षये' इति । जनकस्य कुले जाता । आचारप्रधानेत्यर्थः । देवमायेव निर्मिता अमृतमथनानन्तरमसुरमोहनार्थं निर्मिता विष्णुमायेव स्थिता । 'मायया मोहयित्वा तान् विष्णुः स्त्रीरूपमास्थितः' इतिउक्तेः । यद्वा । निर्मिताकृतमूर्त्तिः देवमाया विष्णोराश्चर्यशक्तिरिव स्थिता । अनेन सौन्दर्यपराकाष्ठोक्ता । अथवा निर्मिता कृतावतारा देवमाया देवस्य विष्णोर्लक्ष्मीः । वक्ष्यति उत्तरकाण्डे 'ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्' इति । इवशब्दो वाक्यालङ्कारे एवकारार्थे वा ॥ २६ ॥ सर्वलक्षणसंपन्ना सामुद्रिकोक्तैः सर्वैरुत्तमस्त्रीलक्षणैः संपन्ना नारीणामुत्तमा पूर्वोक्तसर्वप्रकारेण सर्वस्त्रीश्रेष्ठा । पुरुषोत्तमरामानुरूपनार्युत्तमेत्यर्थः । वधूर्दशरथस्नुषा अचिरोढा वा । 'अचिरोढा तु वधूः' इतिवैजयन्ती । सीता सीता लाङ्गलपद्धतिः तज्जन्यत्वात्तद्व्यपदेशः । अनेनायोनिजत्वोक्तेर्दिव्यलोकवासकालिकसौन्दर्यान्यूनतोक्ता । अपिशब्देन लक्ष्मणानुगतिः समुच्चीयते । राममनुगता निरवधिकसौन्दर्याकृष्टहृदयतयानुगतवती रोहिणी यथा । यथाशब्द इवार्थः । 'यथा तथेवैवं साम्ये' इत्यमरः । रोहिणीनाम चन्द्रस्यासाधारणपत्नी । 'वरिष्ठा सर्वनारीणामेषा च दिवि देवता । रोहिणी न विना चन्द्रं मुहूर्त्तमपि दृश्यते' इति । न केवलं रामसौन्दर्याकृष्टानुगता किं तु कलङ्किनं रोहिणीव पातिव्रत्यस्वरूपप्रयुक्तागतेत्यर्थः । अयमर्थोऽनसूयासमक्षं व्यक्तीभविष्यति ॥ २७ ॥

२८–२९] **ति० टी०–सीतेति** । सीता लाङ्गलपद्धतिस्तदुत्पत्त्यात्सीता । शशिनं रोहिणीव राममनुगता ॥ २८ ॥ **शृङ्गे-ति** । गङ्गाकूले वर्तमानशृङ्गवेरपुरे स्थितं निषादाधिपतिं प्रियमिष्टं गुहमासाद्य तत्सहितो लक्ष्मणादिसहितश्च रामः सूतं रथेन स्वप्रापणायमागतं गङ्गाकूले व्यसर्जयत्परावर्तितवान् ॥ २९ ॥

रा० टी०–पौरैरिति । **पौरैः** पुरोद्भवैर्बालवृद्धादिभिरपि दशरथेन पित्रा च दूरं स्वस्वोचितादधिकमनुगतः द्रुतं पुनः अल्पानुगमने कर्तव्ये दूरानुगमनेन तेषां प्रीत्यतिशयो ध्वनितः । धर्मात्मा परमधर्मप्रवर्त्तकः रघुनाथः शृङ्गवेरपुरे जातं प्रियं परमप्रीतिमन्तं निषादाधिपतिं गुहं गङ्गाकूले आसाद्य सम्प्राप्य सूतं रथेन स्वप्रापणार्थमागतं सुमन्त्रं व्यसर्जयत्।स रथं परावर्त्तयदित्यर्थः । शृङ्गवेरशब्दार्थस्तु शृङ्गं वाति अवयवत्वेन प्राप्नोतीति शृङ्गवाः शृङ्गयृषिः तस्य ईरः प्राप्तिर्यस्मिन्तत् शृङ्गवेरम् । किञ्च शृङ्गाणि सन्ति येषां ते शृङ्गाः मृगाः पर्वता वा । अर्शआद्यच् । तैस्सह तेषु वा अवेरत्रित्यं प्राप्तिर्यस्य स एव ऋषिः तस्य पुरं तद्विवाहे लब्धपत्तनमिति यावत् । अवेरयुपसर्गाकारलोपः । अयं पाठो मदसम्मतः । भूषणकारसम्मतश्शृङ्गिवेरेति पाठे "अतइनिठनौ" इति इन्प्रत्ययः । एतेन तदेशस्यातिपवित्रत्वं सूचितम् । तत्र जातमित्यनेन शृङ्गयृषेस्सेवकोयमिति ध्वनितम् । तेन स रघुनाथकृपाधिकारीति सूचितम् । गुहशब्दार्थस्तु गूहति परमात्मप्रेम्णा श्रेष्टानप्याच्छादयतीति गुहः रघुनाथविषयकपरमप्रीतिमानित्यर्थः । इगुपधलक्षणः कः । सार्द्धश्लोक एकान्वयी ॥ २८ ॥ २९ ॥

गो० टी०–रामभक्त्यविशेषाल्लक्ष्मणसीतावत् पौराणामप्यनुवृत्तिं दर्शयति–**पौरैरिति** । पुरे भवाः पौराः । अनेन स्त्रीबालवृद्धाविशेषउक्तः । दूरमनुगतइत्यनेन विरहासहिष्णुत्वोक्त्या पौराणां परमा भक्तिरुक्ता । 'पुनर्विश्लेषभीरुत्वं परमा भक्तिरुच्यते' इतिवचनात् । पौरैरित्यनेन तदेशवासएव रामभक्तिहेतुरित्युक्तं । पित्रा दशरथेन च । चशब्दोऽन्वाचये । अल्पमनुगतइत्यर्थः । आद्वारं हितेनानुगतं पित्रेत्यनेन पुत्रकृतवात्सल्यादनुगत इत्युक्तं । एवं परत्वसौलभ्ये दर्शिते । अथ वात्सल्यसौशील्ये दर्शयति–**शृङ्गिबेरपुरइति** । धर्मौ आश्रितवात्सल्यसौशील्ये आत्मा स्वभावो यस्य सः तथा आश्रितवात्सल्यसौशील्यस्वभावो रामः शृङ्गिबेरपुरे शृङ्गिणः कृष्णसारादयः तेषां बेराणि कृत्रिमशरीराणि । 'प्रतिछन्दः प्रतिनिधिर्बेरं सप्रतिरूपकम्' इति वैजयन्ती । वञ्चनेन सजातीयमृगग्रहणार्थानि यस्मिन् तत्शृङ्गिबेरं । तथात्वात् । नदारख्ये पुरे गङ्गाकूले शृङ्गिबेरपुरसन्निहितगङ्गातीरे इत्यर्थः । एतेन गङ्गातीरत्वमात्रेण नोद्देश्यत्वं किंतु भक्तसेवितत्वेनेत्युक्तं । 'सा काशीति नचाकशीति' इत्याद्यभियुक्तोक्तेः । निषादाः प्रतिलोमजातिविशेषाः । 'निषादो मृगघाती स्यात्' इति वैजयन्ती । तेषामधिपतिरिति जात्यपकर्ष उक्तः । प्रीणातीति प्रियः तं स्वस्मिन् प्रीतिमन्तमित्यर्थः । गूहति गोपयति वञ्चयति परस्वमितिगुहः । इगुपधलक्षणः कप्रत्ययः । तं जातितो वृत्तितो गुणतः कुलतश्च हीनमपि स्वस्मिन्नानुकूल्यमात्रेणादरणीयत्वमुक्तं । निषादाधिपतिमासाद्येत्यनेन सौशील्यमुक्तं । महतो मन्दैस्सह नीरन्ध्रेण संश्लेषा हि सौशील्यं । धर्मात्मेत्यनेन महत्त्वमुक्तं । आसाद्येत्याभिविधिवाचिना अर्थात् नैरन्ध्र्यमुक्तं । शृङ्गिबेरपुरे गुहमासाद्येत्यनेन दोषभोग्यत्वरूपं वात्सल्यमुक्तं । सूतं सुमन्त्रं पारम्पर्येणानुवर्त्तमानमपि व्यसर्जयत् व्यसृजत् । स्वार्थे णिच् । सद्यः प्रसूतवत्सवात्सल्यात् पूर्ववत्संपरिहरन्त्या धेनोरिव वात्सल्यातिशय उक्तः ॥ २८ ॥ २९ ॥

३०–३१] **ति० टी०–गुहेनेति** । पूर्वार्धं पूर्वश्लोकान्व

चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् । रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥ ३१ ॥
देवगन्धर्वसङ्काशास्तत्र ते न्यवसन्सुखम् । चित्रकूटं गते रामे पुत्रशोकातुरस्तथा ॥ ३२ ॥

यि । अथ ते सीतारामलक्ष्मणा वनेन पुरोवीतप्राप्तवनद्वारेण परमपरं वनं गत्वा । तेवनं पादचारस्तेन वनं गत्वेत्यर्थ इति संप्रदायः ॥ ३० ॥ **चित्रेति** । अनु पश्चाद्भरद्वाजस्य शासनाच्चित्रकूटं प्राप्य तत्र रम्यमावसथं पर्णशालां कृत्वा तत्र वने रममाणा स्त्रयो देवगन्धर्वसदृशाः सुखं न्यवसन्नित्यन्वयः ॥ ३१ ॥

रा० टी०—सूतविसर्जनानन्तरकालिकं रामवृत्तमाह—**गुहेनेत्यादिना**। गुहेन लक्ष्मणेन च सीतया च सहितो रामः अवनेन अवनी पृथ्वी एवास्त्याधारत्वेन यस्मिन्गमने तेन पादत्राणादिरहितसञ्चारेणेत्यर्थः । किञ्च तेवनेन लीलया वनं गङ्गाजलसमीपं गत्वा प्राप्य अतिष्ठदिति शेषः । अत्र प्रथमपक्षे ते इति तत्रान्वयि अमृतस्वरूपे इति तदर्थः । 'तश्चौरामृतपुच्छेषु क्रोडे म्लेच्छे च कुत्रचित्' इति मेदिनी। चकारउभयान्वयी। तेवनेनेति देवनार्थकतेवृधातुप्रकृतिकल्युडन्ततत्वेन सिद्धम्। यद्वा। सरामः गुहादिनैव सह वनं गङ्गाजलसमीपं हितः चलित आसीदिति शेषः । हित इति गत्यर्थकहिप्रकृतिकनिष्ठान्तम् । "विनापि तयोगं तृतीया" इति सिद्धान्तः। देवगन्धर्वसङ्काशाः देवादिप्रकाशकास्ते त्रयः सीतारामलक्ष्मणाः बहूदकाः अगाधजलाः नदीः गङ्गां तीर्त्वा । बहुत्वमादरार्थम्। भरद्वाजस्य शासनात् भरद्वाजशिक्षातः चित्रकूटमनुप्राप्य द्रुतं सङ्गम्य तत्र चित्रकूटे रम्यमावसथं पर्णशालां कृत्वा रममाणाः विहरन्तः सन्तः सुखं न्यवसन् । देवगन्धर्वसङ्काशाइत्यनेन रामस्याटवीगमनमात्रेणास्मदरयो निहतप्राया इति देवादिनिश्चयः सूचितः । सार्द्धश्लोकद्वयं संमिलितान्वयि॥३०॥३१॥

गो० टी०—स्वस्मिन्नाशालेशमात्रेण जनितं गुहविषयप्रेमातिशयं दर्शयति—**गुहेनेति** । रामः गुहेन सहितः सन् लक्ष्मणेन सीतया च सहितः । गुहसंधानानन्तरमेव लक्ष्मणसीताभ्यां नित्यानपायिभ्यां साहित्यमासीत् । ततः पूर्वं सिद्धमपि सदसत्प्रायभासीदित्यर्थः । यद्वा दृष्टान्तार्थं लक्ष्मणसीतासाहित्यकथनं तादृशस्नेहो गुहेप्यासीदिति भावः । सहितः संहितः 'समोवाहिततत्तयोः' इतिमलोपः । सः रामः लक्ष्मणेन सीतया च सह गुहेन सहितः प्रहितः । गङ्गां तारित इत्यप्याहुः ॥ ३० ॥ भरद्वाजस्य शासनात् चित्रकूटमनुप्राप्य प्रजाभरणशीलो भरद्वाजः । इत्थं निरुक्तमृगारण्यके—"एष एव विभ्रद्वाजः प्रजा वै वाजः ता एष बिभर्ति यद्विभर्ति तस्माद्भरद्वाजइत्याचक्षते" इति । यद्वा 'वाजं रेतः वाजकरणम्' इत्यादौ तथाप्रयोगात् । विभ्रद्वाजं भरद्वाजः । नित्यब्रह्मचारीत्यर्थः । "भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास" इतिश्रुतेः । तस्य शासनान्नियमनाच्चित्रकूटे भवद्भिः स्थातव्यं तस्यैवमेव मार्ग इत्येवंरूपात् । अनु सदृशं 'पश्चात्सादृश्ययोरनु' इत्यमरः । राजकुमारौ स्वेषामुचितमित्यर्थः।' सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः । यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने ' इति वक्ष्यति । पश्चाद्भागे वा चित्राणि आश्चर्यावहानि कूटानि शिखराणि यस्यासौ चित्रकूटः तं । ' आश्चर्यालेख्ययोश्चित्रम् ' इत्यमरः । प्राप्य गत्वा रम्यं रमणीयं जलरामणीयकस्थलरामणीयकादियुक्तं आवसथं पर्णशालारूपं गृहं । ' विष्ण्यमोको निवसनं स्थानावसथवास्तु च ' इत्यमरः । कृत्वा निर्माय । अत्र पर्णशालानिर्माणे लक्ष्मणस्य साक्षात्कर्तृत्वं इतरयोस्तु उचितदेशप्रदर्शनादिना प्रयोजककर्तृत्वं "समानकर्तृकयोः पूर्वकाले" इत्यत्र सूत्रे गृहैकत्वबदुद्देश्यगतत्वेन द्वित्वस्याविवक्षितत्वादनेकक्रियासपि क्त्वाप्रत्ययः संभवतीति न्यासकारोक्तेः क्त्वाप्रत्ययबाहुल्यं । तत्र वने चित्रकूटोपान्तवने रममाणाः लीलारसमनुभवन्तः सन्तः सीतारामयोः पुष्पावचयसलिलक्रीडादिकं रतिः । ' वैदेहि रमसे कचिच्चित्रकूटे मया सह । पश्यन्ती विविधान्भावान्मनोवाक्कायसंयुतान् ' इति हि वक्ष्यति । लक्ष्मणस्य तु विशिष्टविषयकैङ्कर्यलाभजा प्रीतिः । वक्ष्यति ' भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते । अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ' इति । त्रयो रममाणाः इत्यनेनानन्दहेतुभेदेप्यानन्दांशे तौल्यमुच्यते परमं साम्यमुपैति । भोगमात्रसाम्यलिङ्गाच्चेतिवत्। रममाणा इति वर्त्तमाननिर्देशेन नैरन्तर्यमुक्तं । वर्त्तमानार्थकस्याप्यस्य न्यवसन्निति भूतप्रत्ययान्तविशेषणत्वं । "धातुसंबन्धे प्रत्ययाः" इन्यनुशासनात् 'अग्निष्टोमयाजी पुत्रस्ते भविता' इतिवत् संभवति ॥ ३१ ॥

३२] ति० टी०—तथा पुत्रशोकातुरोऽनिर्वाच्यपुत्रवियोगजन्यशोकपीडितः ॥ ३२ ॥

रा० टी०—रामगमनौत्तरकालिकायोध्यावृत्तमाह—**चित्रकूटमित्यादिना**। रामे चित्रकूटं तथा उक्तप्रकारेण गते प्राप्ते सति पुत्रशोकातुरः प्रकटितपुत्रवियोगजनितशोकाक्रान्तः राजा दशरथः सुतं विलपन् हा सुत इति विलापं कुर्वन्स्वर्गं स्वः स्वर्गे गीयते नित्यं प्रशस्यतेऽसौ स्वर्गः । अप्रकटाप्यपरपर्यायसाकेतलोकस्तज्जगाम । स्वरशब्दस्य स्वर्गवाचकत्वं स्वरिति स्वर्गे परलोके चेत्यादिना मनोरमादौ स्पष्टम् । अर्द्धद्वयमेकान्वयि । एव मुत्तरत्रापि ॥ ३२ ॥

गो० टी०—अतएव देवगन्धर्वसंकाशाः सन्तः देवगन्धर्वा मनुष्यगन्धर्वेभ्योधिकानन्दाः । यद्वा देवी च देवश्च देवौ लक्ष्मीनारायणौ । "पुमान्स्त्रिया" इत्येकशेषः । गानं धारयन्तीति गन्धर्वाः । "एतत्सामगायन्नास्ते" इत्युक्ताः। सर्वदा सामगानपरोमुक्तः । देवौ च गन्धर्वश्च देवगन्धर्वाः तत्सदृशाः देवगन्धर्वसंकाशाः । निभादित्वादुत्तरपदभूता एव सन्तः सदृशवचनाः । तथाहामरः । ' स्युरुत्तरपदे त्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः ' इति । तेते एव सन्तः साकेतवासिन एव सन्तः सुखं न्यवसन् । वक्ष्यति ' सुरम्यमासाद्य तु चित्रकूटं नदीं च

राजा दशरथः स्वर्गं जगाम विलपन्सुतम् । गते तु तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः ॥ ३३ ॥
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः । स जगाम वनं वीरो रामपादप्रसादकः ॥ ३४ ॥
गत्वा तु स महात्मानं रामं सत्यपराक्रमम् । अयाचद्भ्रातरं राममार्यभावपुरस्कृतः ॥ ३५ ॥

तां माल्यवतीं सुतीर्थाम् । ननन्द रामो मृगपक्षिजुष्टां जहौ च दुःखं पुरविप्रवासात्' इति । यद्वा तेएव सन्तः वनवासिनएव सन्तः । नागरिका अपि चिरं वनचरा इवावसन्नित्यर्थः । सुखग्लान्यादिभिस्तेषां वैदेशिकत्वगन्धोपि नाज्ञायतेतिभावः । सुखं यथा भवति तथान्यवसन् । कदाचिदपि दुःखलेशोपि नान्वभावीत्यर्थः । अत्र क्रियाभेदात् तच्छब्दद्वयप्रयोग इत्यप्याहुः । ते तीर्त्वा जग्मुरिति क्रियापदमध्याहृत्य केचिद्योजयन्ति । अत्र देवगन्धर्वसंकाशा इति पदगतेनोपमालङ्कारेण किंचिद्वस्तु ध्वन्यते । यस्तावत्स्वरूपज्ञानपूर्वकं भगवत्यनुरक्तो भवति तं भगवान् देव्या समागत्य दिव्यं विमानमारोप्यातिवाहिकगणैः सत्कार्य विरजां तीर्त्वा तिल्यकान्तारमासाद्यामानवेनानुज्ञाप्य दिव्यलोके महामणिमण्डपमुपेत्य दिव्यसिंहासनारूढः श्रिया सह मोदमानस्तद्रचितसर्वदेशसर्वकालसर्वावस्थोचितसकलविधकैङ्कर्योऽस्मै स्वानन्दसममानन्दं दत्त्वा तेन सह यावत्कालमास्तइति॥ ३२ ॥

३३] ति० टी०–राजेति । तस्मिन्दशरथे गते लोकान्तरं गते मृते वसिष्ठाद्यैर्द्विजैस्त्रैवर्णिकैः । इदमुपलक्षणम् । तत्सहितैर्मन्त्रिवृद्धैरित्यपि बोध्यम् ॥ ३३ ॥

रा० टी०–गतइति। तस्मिन्महाराजदशरथे गते अप्रकटसाकेतं प्राप्ते सति वशिष्ठप्रमुखैर्वसिष्ठाद्यैर्द्विजै राज्याय राज्यं कर्तुं नियुज्यमानोपि महाबलो भरतः राज्यं नैच्छत्। एतेन भरतस्य परमसुभ्रातृत्वं बोधितम्। राज्यायात्र चतुर्थी "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति सूत्रविहिता। तुशब्दोप्यर्थे। मृत इति पाठस्तु सन्दर्भशुद्ध्या न च कालवशानुग इत्यनेन विरोधाच्च न ऋषिप्रणीत इति प्रतीयते। सत्वे तु तस्मिन् प्रसिद्धे दशरथे मृते लोकान्तरं प्राप्ते सतीत्यर्थः। मृत इति आचारक्विबन्तप्रकृतिकक्त्रजन्तप्रकृतिकसप्तम्यन्तम्। किञ्च मृते मकारवाच्येषु जीवजातेषु ऋतः कृपा यस्य तस्मिन् लोककृपामूलकरामप्रेषणहेतुकसाकेतलोकप्राप्तिमति सतीत्यर्थः। मकारस्य जीववाचकत्वे प्रमाण म् "पञ्चविंशोयमात्मा" इति । श्रुतिः अतएव प्रणवार्थव्याख्याने 'अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृन्मकारार्थो जीवस्तदुपकरणं वैष्णवमिति' रामानुजाचार्यैर्व्याख्यातम् ॥ ३३ ॥

गो० टी०–गतेत्विति । तस्मिन् दशरथे गते सति स्वर्गप्राप्तिरपि नश्वरत्वेनानुपादेयेत्युक्तं । महाबलः राज्यभरणसमर्थः अतएव भरतः । भरतइति राज्यस्य भरणादित्युक्तरीत्या भावज्ञेन वसिष्ठेन भरत इति कृतनामा। वसिष्ठप्रमुखैर्द्विजैः वसिष्ठादिभिर्ब्राह्मणैः। राज्याय राज्यं कर्तुं नियुज्यमानः। " क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । राज्यं राजत्वं। "येचाभावकर्मणोः" इतिप्रतिषेधादनो न प्रकृतिभावः नैच्छन्नाभ्यलषत्। महाबलइत्यनेन सत्यामेव शक्तौ स्वरूपविरुद्धत्वाद्राज्यं नाङ्गीचकारेत्यवगम्यते । अतएव वक्ष्यति 'राज्यं चाहं च रामस्य धर्म वक्तुमिहार्हसि । विललाप सभामध्ये जगर्हे च पुरोहितम् ॥ कथं दशरथाज्जातो भवेद्राज्यापहारकः ' इति ॥ ३३ ॥

३४] ति० टी०–राज्याय राज्यं कर्तुं तैर्नियुज्यमानः प्रेर्यमाणो महाबलः समर्थोऽपि सौभ्रात्राद्राज्यं नैच्छत् । ततो रामपादप्रसादकः पूज्यं रामं प्रसादयितुं वनं जगाम । पादशब्दः पूज्यवाची ॥ ३४ ॥

रा० टी०–सइति । रामपादप्रसादकः रामस्य पादौ प्रसादयति सः। किञ्च रामपादप्रसादादेव कं सुखं यस्य स वीरो भरतः वनं रामाधिष्ठितचित्रकूटारण्यं। जगाम रामपादप्रसादकइत्यनेन रघुनाथाङ्गानां चेतनत्वं भरतस्य प्रेमाधिक्यं च सूचितम् । तदङ्गानां चेतनत्वप्रतिपादिका "आनन्दरूपममृतं यद्विभाति तदा प्रणखादानन्दमेव सच्चिदानन्दात्मको भगवान् सच्चिदानन्दात्मिकास्य व्यक्तिः" इत्यादिः श्रुतिः। अर्द्ध पृथक् ॥ ३४॥

गो० टी०–सजगामेत्यर्द्धमेकं वाक्यम् । वीर्येण युक्तो वीरः। वीर्यमत्र शत्रुभूतरागादिजेतृत्वम् । विषयानाकृष्टचित्त इत्यर्थः। यद्वा ' एभिश्च सचिवैः सार्द्धं शिरसा याचितो मया। भ्रातुः शिष्यस्य दासस्य प्रसादं कर्तुमर्हसि ' इत्युक्तरीत्या चतुरङ्गबलसहितः स भरतः रामपादप्रसादकः। पादशब्दः पूज्यवाची । ' पूज्ये तु पादनामाङ्क ' इत्यमरः । प्रसादकः। " तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् " इति ण्वुल्। पूज्यं रामं प्रसादयितुमित्यर्थः। यद्वा रामचरणयोः प्रसादकः। रामस्यैव प्रसाद्यत्वेऽपि पादयोः प्रसाद्यत्वोक्तिः शेषभूतव्यवहारानुसारेण । राजानं द्रष्टुमिति वक्तव्ये राजपादौ द्रष्टुमिति हि भृत्यजनो व्यवहरति । वनं जगाम प्राप । वस्तुतो रामस्य कोपाभावेपि भरताय राज्यं दत्तमिति बुद्धिं निवर्तयितुमित्यर्थः। ' पूजिता मामिका माता दत्तं राज्यमिदं मम । तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ' ॥ ३४ ॥

३५] ति० टी०–गत्वेति । स भरतो महात्मानं सत्यप्रतिज्ञत्वादिधर्मैर्महावैभवं भ्रातरं रामं गत्वार्यभावपुरस्कृतो विनीतवेषस्तं रामं राज्याय प्रतिनिवृत्तिमयाचत् । याचिद्विकर्मकः ॥ ३५ ॥

रा० टी०–गत्वेति । आर्ये रामे भावः परप्रीतिः पुरस्कृता प्रकटीकृता येन। किञ्च आर्यस्य भावः अतिचिन्तनं पुरस्कृतं येन स भरतः। सत्यपराक्रमम् अमोघवीर्यवन्तं महात्मानं महान्तः सर्वपराः आत्मानो भृत्यादयो यस्य तं भ्रातरं रामं गत्वा प्राप्य रामम् उक्तविशेषणविशिष्टमयाचदेव । अत्र रामविशेषणानामावृत्तिर्बोध्या । यद्वा रामस्य मा परमसम्पत्तिः सीता तस्यामार्यभावः श्रेष्ठत्वं पुरस्कृतं येन स भरतः सत्य-

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् । रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥ ३६ ॥
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः । पादुके चास्य राज्याय न्यासं दत्त्वा पुनःपुनः ॥ ३७ ॥
निवर्तयामास ततो भरतं भरताग्रजः । स काममनवाप्यैव रामपादावुपस्पृशन् ॥ ३८ ॥

पराक्रमम् सत्यपरान्सत्यवक्तॄनाक्रमते प्राप्नोति स तम्। महात्मानम् मन्यते सर्वैश्चरैः पूज्यत इति महः आत्मा स्वरूपं यस्य तं भ्रातरं रामं गत्वा प्राप्यायाचदेव । अतएवान्यतररामपदस्य न निष्प्रयोजनत्वम् । तुशब्द एवार्थे ॥ ३५ ॥

गो० टी०–गत्वात्विति। अत्र स इत्यनुपज्यते। स आर्यभावपुरस्कृतः पुरस्कृतः आर्यभावः येन सः। आहिताग्न्यादित्वात्परनिपातः। यद्वा आर्यभावेन स्वस्यार्यभावेन पुरस्कृतः पूजितः। उचितमनेन क्रियत इति श्लाघित इत्यर्थः। ' पूजितः स्यात्पुरस्कृतः' इति वाणः। तथाविधः सन् सुमहान् आत्मा अन्तःकरणं यस्य तं सुमहात्मानं स्वतः प्रसन्नहृदयमित्यर्थः। सत्यपराक्रमं सत्ये पराक्रमोऽप्रच्युतत्वं यस्य तं रामं गत्वा तु प्राप्य तु विशेषोक्ति तस्याग्रे स्थितिरेवालं याचनमतिरिच्यत इति भावः। भ्रातरं राममयाचत प्रार्थयामास । स्वाभीष्टमिति शेषः। याचेर्द्विकर्मकत्वात्स्वरितेत्वादुभयपदी । क्रियाभेदाद्रामशब्दस्य न पुनरुक्तता ॥ ३५ ॥

३६–३७] ति० टी०–ननु पितृमातृदत्तं राज्यं तवैव योग्यमिति मम प्रतिनिवृत्तिरनुचितेत्यत्राह—त्वमेवेति। सर्वगुणश्रेष्ठे ज्येष्ठे सति कनिष्ठो न राज्यार्ह इति धर्मं त्वमेव जानासीति त्वमेव राजेति वचो राममब्रवीत् । रामोऽपि रमयतीति व्युत्पत्त्याश्रितचित्तरञ्जकोऽपि पितुरादेशाद्राज्यं नैच्छदित्युत्तरेणान्वयः । अत्र हेतुगर्भं विशेषणम् । परमोदारः स्वसुखसाधनस्य परस्मै दानमौदार्यं तद्युतः । सुमुखो राज्यादपि वनेऽस्मान्न्यायाधिकसुखप्रसादयुक्तः । सुमहायशाः प्रतिज्ञापालनरूपयशोभङ्गभिया नैच्छदिति कृतकृत्यः । तीर्थस्तु—परमोदारो याचकाभीष्टप्रदाननिरतोऽर्थिलाभेन प्रसन्नमुखः । सुमहायशा अप्यर्थ्यवैमुख्येन प्रसिद्धकीर्तिरपि पित्राज्ञयैव भरतवाक्यं नैच्छदित्याह ॥ ३६ ॥ ततोऽस्य भरतस्य राज्याय राज्यरक्षणसामर्थ्य लब्धुमहल्यादौ दृष्टशक्तिकाचिन्त्यवैभवस्वपदस्पृष्टे पादुके न्यासरूपेण दत्त्वा पुनःपुनः प्रतिनिवृत्तिं याचमानं भरतं चतुर्दशसमानन्तरं सर्वथा प्रतिनिवर्तितव्यमित्यभ्युपेत्य निवर्तयामास । अस्येति राज्यापेक्षया षष्ठी । दत्त्वेत्यत्र अस्मै इत्यर्थलभ्यम् । दत्त्वेत्यन्वयेऽपि संप्रदानस्य शेषत्वविवक्षया षष्ठीत्यन्ये । यत्तु निक्षेपे मुख्यदानाभावान्न चतुर्थी दत्त्वेत्यन्वयेऽपीति, तन्न । खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति महाभाष्यप्रयोगविरोधात् ॥ ३७ ॥

रा० टी०–याचनमेवाह–त्वमेवेत्यर्द्धेन । हे धर्मज्ञ ! शास्त्रद्वारा ज्येष्ठस्यैव राज्याधिकार इत्यादिधर्मबोधकत्वमेव राजा भवेति वचः वचनं राममब्रवीत्। एतेन 'रामोद्विर्नाभिभाषते' इत्यादिशास्त्रप्रसिद्धानां रामगुणानां भरतस्य विस्मृतिरिति ध्वनितम्। तेन प्रेमप्रवाहप्राबल्यं सूचितम् । अर्द्धं पृथक् । रघुनाथवृत्तमाह–रामोपीत्यनेन। परमोदारः सर्वोदारशिरोमणिः। अतएव सुमुखः अदेयपदार्थयाचनश्रवणेऽपि प्रसन्नवदनः। अतएव सुमहायशाः परिपूर्णयशस्को महाबलो रामः पितुरादेशात्पित्राज्ञापनं संस्मृत्य न्यासं भरताय स्थापितं राज्यं भरतप्रार्थनयाऽपि नैवैच्छत् । ततोऽनन्तरमेव भरताग्रजो रामः राज्याय राज्यं कर्तुं पादुके अस्य अस्मै भरताय दत्त्वा भरतं पुनःपुनर्निवर्त्तयामास । चावेवार्थौ। अर्द्धचतुष्टयमेकान्वयि । पुनःपुनर्निवर्त्तयामासेत्यनेन भरतस्य रामवियोगासहिष्णुत्वं व्यक्तम्। राज्यं कर्तुं पादुके दत्त्वेत्यनेन पादुकयोश्चेतनात्वं ध्वनितम् ॥ ३६ ॥ ३७ ॥

गो० टी०–स्वाभीष्टमेवाह–त्वमेवेति । धर्मज्ञः ज्येष्ठे विद्यमाने न कनिष्ठो राज्यमर्हतीति धर्मं जानन् त्वमेव राजा नान्यइति रामं वचोऽब्रवीत्। " अकथितं च " इति द्विकर्मकत्वम्। ननु भरतकृता प्रपत्तिः कुतो नाफलत्। अधिकारवैगुण्याद्वा शरण्यवैगुण्याद्वा । नाद्यः अपेक्षातिरिक्तस्याभावात् । नान्त्यः तस्य सर्वगुणपरिपूर्णत्वादित्याशङ्क्य प्रबलप्रतिबन्धकस्य प्रारब्धस्य सद्भावात् न सा फलितेत्याह–रामोपीति । अपिशब्दः प्रतिविशेषणमन्वेति । रामोऽपि रमयतीति व्युत्पत्त्या स्वरूपगुणैराश्रितचित्तरञ्जनस्वभावोऽपि परमोदारोऽपि स्वपर्यन्तापेक्षितार्थप्रदोऽपि " य आत्मदा बलदा " इति श्रुतेः । सुमुखोपि अर्थिजनलाभेन प्रसन्नमुखोपि सुमहायशाः अपि ' नश्यर्थिनः कार्यवशादुपेताः ककुत्स्थवंशे विमुखाः प्रयान्ति ' इत्युक्तरीत्या महाकीर्तिरपि महाबलोप्याश्रितमनोरथपूरणे निपुणोऽपि रामः पितुरादेशाद्भरतप्रतिबन्धकान्नैच्छत् चकारात्तदवसाने त्वैच्छदित्यर्थः। आदेशो नियोगः ॥ ३६ ॥ सर्वथा प्रपत्तेर्वैफल्यमनुचितमिति यावत्प्रतिबन्धकानिवृत्तिफलप्रतिनिधिं दर्शयतिम्मेत्याह–पादुकेचेति । चस्त्वर्थः। किंतु भरताग्रजः फलप्रदानोचितसंबन्धशीलः राज्याय राज्यं कर्तुं "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । अस्य भरतस्य पादुके न्यासं स्वप्रतिनिधिं दत्त्वा रामपादुके राज्यं कुरुतः अहं तयोः परिचारक इति भावयेति दत्त्वेत्यर्थः। पुनःपुनर्भरतं तस्मादेशान्निवर्त्तयामास । पुनःपुनरित्यनेन भरतस्य रामाविरहासहिष्णुत्वं द्योत्यते । स्वार्थत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपत्वाभावान्न चतुर्थी । किंतु संबन्धसामान्ये षष्ठी ॥ ३७ ॥

३८] ति० टी०–स भरतो रामप्रतिनिवृत्तिरूपं काममनवाप्यैव रामपादौ नमस्कुर्वन्प्रतिनिवृत्त इति शेषः ॥ ३८ ॥

रा० टी०–सइति। स भरतः कामं प्रकटरघुनाथवियोगाभावमनवाप्य रामागमनकाङ्क्षया नन्दिग्रामे एव स्थित्वा रामपादौ तदुपलक्षितपादुके उपस्पृशन्राज्यमकरोत् । एतेन राज्यकरणे भरतस्य पादुकापारतन्त्र्यं बोधितम्। अर्द्धद्वयमेकान्वयि ३८

नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया । गते तु भरते श्रीमान्सत्यसन्धो जितेन्द्रियः ॥ ३९ ॥
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च । तत्रागमनमेकाग्रो दण्डकान्प्रविवेश ह ॥ ४० ॥
प्रविश्य तु महारण्यं रामो राजीवलोचनः । विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥ ४१ ॥

गो० टी०–अथ प्रपन्नस्य यावत्प्रारब्धनिवृत्तिशेषिणि वृत्तिं दर्शयन्नाह–**सकाममिति** । स भरतः कामं रामकैङ्कर्यमनोरथमप्राप्यैव रामपादौ रामस्य पादुके । पादशब्दः पादुकोपलक्षकः । उपस्पृशन् प्रत्यहं सेवमानः सन् रामागमनकाङ्क्षया कदा राम आगमिष्यतीति प्रत्याशया चतुर्दशवर्षरूपप्रतिबन्धकमुत्तीर्य कदा रामकैङ्कर्यं लप्स्ये इति मनोरथमभिवर्धयन्नित्यर्थः । रामरहिततन्निवासस्यातिदुःखावहतयाऽयोध्यां विहाय नन्दिग्रामे नन्दिग्रामाख्ये अयोध्यासन्निहिते कुत्रचित् ग्रामे राज्यमकरोत् तदाज्ञैकैङ्कर्यमकरोत् । परस्मैपदेन स्वस्य तस्मिन् फलत्वानिवृत्तिरवगम्यते ॥ ३८ ॥

३९-४०] **ति० टी०**–ततो नमस्कृत्य प्रतिनिवृत्तो नन्दिग्रामे स्थित्वा रामश्चतुर्दशसमारूपप्रतिज्ञातसमयानन्तरं राज्यायागमिष्यतीति रामागमनकाङ्क्षया पादुके पुरस्कृत्य राज्यमकरोत् । उत्तरार्धं स्पष्टम् ॥ ३९ ॥ **रामइति** । उक्तगुणविशिष्टो रामस्त्वत्यासन्नतया नागरस्य मन्त्रिवृद्धादिपौरजनस्य भरतस्य च तत्र चित्रकूट आगमनमालक्ष्य संभाव्य तेषां प्रतिनिवर्तनप्रयासाद्वरमितोऽपि दूरगमनमिति संचिन्त्य दण्डकान्दण्डकारण्यानि । अवान्तरबहुत्वाद्बहुवचनम् । तेषां रक्षश्चोरादिभूयिष्ठत्वादेकाग्रः सज्जो भूत्वा प्रविवेश । हेति प्रसिद्धौ॥४०॥

रा० टी०–अयोध्याकाण्डार्थमुक्त्वाऽरण्यकाण्डार्थं वक्तुमुपक्रमते। **गतेत्विति**त्यादिना। भरते गते सत्येव श्रीमान्तापससंपद्विशिष्टः । तत्र हेतुः सत्यसन्धः सत्यप्रतिज्ञः अतएव जितेन्द्रियः अतएव एकाग्रः नियतवृत्तिः। किञ्च एकां मुख्यां समाधिकरहितां गतिं एति ददातीति एकाग्रः परमपुरुषार्थदाता । रामस्तु नागरस्य नगरोद्भवस्य जनस्य साधारणस्येत्यर्थः । चेन भरतादेरपि पुनस्तूर्णं गमनं स्यादित्यालक्ष्य विचार्य दण्डकान् दण्डकारण्यानि तूर्णमेव प्रविवेश तदन्तर्गतवनानां बहुत्वाद्बहुवचनम्। एतेन पुनर्गमने तेषां श्रमः स्यादिति हेतुर्व्यक्तः। तेन तच्छ्रमासहिष्णुत्वं रघुनाथस्य सूचितम्। परमपुरुषार्थदाता इत्यनेन परमपुरुषार्थदानार्थमेवैतत्प्राकट्यादिकमिति ध्वनितम् । तेन परमपुरुषार्थाकाङ्क्षिभिरयमेवाश्रयणीय इत्युपदेशो व्यञ्जितः। सार्द्धश्लोक एकान्वयी। तुहशब्दावेवार्थौ ॥ ३९ ॥ ४० ॥

गो० टी०–अयोध्याकाण्डप्रतिपाद्यपितृवचनपरिपालनसिद्धिं निगमयन्नुत्तरकाण्डार्थं प्रस्तौति–**गतेत्विति** । अत्रार्द्धत्रयमेकं वाक्यम् । भरते तु विशेषोस्तीति तमेवाह । श्रीमान् प्रतिज्ञाभङ्गभयजनितविषादविगमादुत्पन्नकान्तिविशेषः सत्यसन्धः भरतनिर्बन्धेनाप्यविचाल्यप्रतिज्ञः । ' सन्धा प्रतिज्ञा मर्यादा' इत्यमरः । जितेन्द्रियः मातृभरतादिप्रार्थनाव्याजे सत्यपि राज्यभोगलौल्यरहितः रामः । नगरे भवो नागरः । "तत्र भवः" इत्यण् । तस्य जनस्य तत्र चित्रकूटे पुनरागमनमालक्ष्य आलोच्य चकारादृषिविप्रकारदर्शनाच्च तत्प्रदेशं विहाय एकाग्रः पितृवचनपालने दत्तावधानो विरोधिभूयिष्ठदेशत्वेन सावधानो वा दण्डकान् प्रविवेश । हेति विषादे । 'एकसर्गोनन्यवृत्तिरेकाग्रैकायनावपि' इति वैजयन्ती । सीतालक्ष्मणयोश्च प्रवेशोऽर्थसिद्धः । दण्डकस्य राज्ञो जनपदो दण्डकः । "तस्य निवासः" इत्यण् "जनपदे लुप्" इति लुप् । शुक्रशापेन वनतां प्राप्तः । कुत्सायां कन् । अवान्तरवनबहुत्वाद्बहुवचनम् । वक्ष्यत्युत्तरकाण्डे 'शप्तो ब्रह्मर्षिणा तेन पुरा वै दण्डको हतः । ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते ॥ तपस्विनः स्थिता यत्र जनस्थानमतोऽभवत्' इति । दण्डकामिति पाठे दण्डको नाम राजाऽस्यामटव्यामस्तीति दण्डका । " अर्शआदिभ्योऽच् " इत्यच्प्रत्ययः । ततष्टाप् । क्षिपकादित्वान्नेत्वम् । एवमयोध्याकाण्डवृत्तान्तसंग्रहेण पितृवचनपरिपालनरूपसामान्यधर्मः शेषभूतस्य शेषिविषयकैङ्कर्यवृत्तिः प्रपन्नस्य भगवत्पारतन्त्र्यं प्रदर्शितम् । शत्रुघ्नवृत्तान्तप्रदर्शनेन तस्य भागवतपारतन्त्र्यं च सूचितम् ॥ ३९ ॥ ४० ॥

४१] **ति० टी०– प्रविश्येति** । महारण्यमित्यरण्यकाण्डकथासंग्रहः । राजीवं पद्मम् । अनेन राक्षसयुद्धारम्भकृतहर्षो ध्वनितः । शरभङ्गाद्या ऋषयः ॥ ४१ ॥

रा० टी०–अरण्यप्रवेशानन्तरं यद्वृत्तं तदाह–**प्रविश्येत्यादिना** । राजीवलोचनः पद्मपत्रविशालाक्षः रामः महारण्यं प्रविश्य । तुशब्देन शोभावलोकनादिकं च कृत्वा विराधं तन्नामकराक्षसं हत्वा शरभङ्गं तन्नामकमृषिं ददर्श । हशब्देन तदनुज्ञया सुतीक्ष्णं च अगस्त्यं च अगस्त्यभ्रातरम् इध्मवाहनामानं च तथातिप्रीत्या ददर्श । सार्द्धश्लोकएकान्वयी । अगस्त्यं च अगस्त्यभ्रातरमित्यत्र सन्ध्यभावस्तु संहिताया अविवक्षया । अपिश्चार्थे ॥४१॥

गो० टी०–अथ ब्राह्मणेषु विशिष्य सत्यप्रतिज्ञत्वप्रतिपादनपरमारण्यकाण्डवृत्तान्तं संगृह्णाति–**प्रविश्येत्यादिना** । रामो महारण्यं दण्डकारण्यं प्रविश्य । तु विशेषोस्ति तमाह । राजीवलोचनः अपूर्वसंस्थानविपिनविलोकनजनितकुतूहलेन विकसितनयनारविन्दः सन् तेनैवोत्साहेन विराधं राक्षसं हत्वा तद्धननमुपहारीकृत्य शरभङ्गं ददर्श । हेत्यैतिह्ये । तदनुज्ञया सुतीक्ष्णं चापीत्येकनिपातः समुच्चयार्थकः । अगस्त्यमगस्त्यभ्रातरं ददर्श । तथेति समुच्चये। अगस्त्यभ्राता सुदर्शनाख्यः । तदुक्तं सनत्कुमारसंहितायामगस्त्येन 'यवीयानेष मे भ्राता सुदर्शन इति स्मृतः' इति । कुम्भसम्भवस्यागस्त्यस्य भ्राता सहपोषणादिति बोध्यम्। अगस्त्यं च अगस्त्यभ्रातरमित्यत्र सन्धिकार्याभावो वाक्ये संहिताया अनित्यत्वात् । तथोक्तं ' पदेषु संहिता नित्या

सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा । अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥ ४२ ॥
खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ । वसतस्तस्य रामस्य वने वनचरैः सह ॥ ४३ ॥
ऋषयोऽभ्यागमन्सर्वे वधायासुररक्षसाम् । स तेषां प्रतिशुश्राव राक्षसानां तदा वने ॥ ४४ ॥

नित्या धातूपसर्गयोः ॥ नित्या समासे वाक्ये तु सा विवक्षामपेक्षते' इति ॥ ४१ ॥

४२] ति० टी०–चापीति निपातसमुच्चयः पद्यपूरकः । अगस्त्यभ्रातेध्मवाहननामेति केचित् । ' ततो मुनेरगस्त्यस्य भ्रातागस्त्य इति श्रुतः । स चिन्वन्कानने वन्यं सखीभिः कोपितोऽशपत् ' इति मार्कण्डेयपुराणे श्रूयते । दिव्यं धनुरादिकं कार्याय प्रतिगृहाणेत्येवं रूपादगस्त्यवचनात् । ऐन्द्रमिन्द्रादगस्त्यागतं शरासनं धनुर्जग्राह । पूर्वं भार्गवं जित्वा ततः प्राप्तं यद्वैष्णवं धनुर्भगवता रामेण वरुणे न्यस्तं तदिन्द्रेण वरुणादानायागस्त्ये स्थापितमित्यग्रेऽरण्यकाण्डे स्फुटम् । यद्वेन्द्रा विष्णुः ॥ ४२ ॥

रा० टी०–अगस्त्येति। अगस्त्यवचनात् अगस्त्याज्ञात एव। ऐन्द्रम् इन्द्रदत्तं शरासनं धनुः ऐन्द्रं खड्गं च ऐन्द्रौ अक्षयसायकौ न क्षयौ नाशाभावौ सहस्रशः क्षेपेऽपि येषां ते अक्षयास्सायकाः ययोस्तौ तूणी निषङ्गौ च । परमप्रीतः सन्नेव जग्राह। परमप्रीत इत्यनेनागस्त्यसम्माननं ध्वनितम्। एकश्चकार एवार्थे। अर्द्धद्वयमेकान्वयि ॥ ४२ ॥

गो० टी०–अगस्त्येति। अत्र राम इत्यनुषज्यते । रामः परमप्रीतः सन् । जगदेकवीरस्य स्वस्य सदृशायुधजाललाभाद्भृशं संतुष्टः सन् अगस्त्यवचनादेव न तु स्वाभ्यर्थनात् । ऐन्द्रमिन्द्रेण दत्तं "तस्येदम्" इति सम्बन्धसामान्येऽण् । 'दत्तो मम महेन्द्रेण' इति वक्ष्यमाणत्वात् । इदं शरासनादित्रयसाधारणं विशेषणम्। शरा अस्यन्ते क्षिप्यन्तेऽनेनेति शरासनं धनुः तच्च । खड्गं च अक्षयसायकौ समरसीन्नि सहस्रशो विनियोगेप्यक्षयशरौ तूणी निषङ्गौ जग्राह स्वीकृतवान् । वचनाज्जग्राहेत्यनेन खड्गादिकमगस्त्यो न स्पृष्टवान् किंतु निर्दिष्टवानित्युच्यते ॥ ४२ ॥

४३-४४] ति० टी०–खड्गंचेति । अनुरूपनिजायुधलाभात्परमप्रीतः । अक्षयाः सायका बाणा ययोस्तौ । तूणी इषुधी । वनचरैर्वानप्रस्थैः ॥ ४३ ॥ ऋषयइति । तद्वने वसतो रामस्यान्तिकमसुराः कबन्धादयो रक्षांसि खरादयस्तेषां वधाय वधं प्रार्थयितुं सर्वे ऋषयोऽभ्यागमन् । स रामस्तेषां राक्षसानां वधं तस्मिन्वने तेभ्यो ऋषिभ्यः प्रतिशुश्राव । प्राप्तकालमसुररक्षो योधयिष्ये नोपेक्षिष्य इति तद्वचोऽङ्गीकृतवा नित्यर्थः ॥ ४४ ॥

रा० टी०–वसत इति। वनचरैः वानप्रस्थैः सह वने वसतस्तस्य रामस्य समीपम् असुररक्षसाम् असुराः कबन्धादयः रक्षांसि खरादयः ते च तानि चेति द्वन्द्वः । अत्र पक्षे विभीषणव्यावृत्तिस्तु रामभक्तत्वेन विभीषणस्य राक्षसत्वाभावात् । कबन्धस्याऽसुरत्वंतु 'श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण । एवमुक्तस्तु धर्मात्मा दनुनानेन राघव ' इत्यादिनावगम्यते । यदि च ' त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः । भीषणोयं महाकायो राक्षसो भुजविक्रमः ॥ एतत्सञ्जल्पितं श्रुत्वा तयोः कुद्धस्तु राक्षसः ' । कबन्धं नामराक्षसमित्याद्युक्तिः तस्मिन् राक्षसत्वस्यैव निश्चयस्तदा पूर्वोदाहृतवाक्ये दनोर्दनुनामकराक्षसस्येत्यर्थः। दनुना दनुनामकस्वपितृसदृशेनेत्यर्थः। किञ्च दैत्यपुत्रत्वेपि कर्मजनितराक्षसत्वस्य सत्वे बाधकाभावेन न कश्चिद्विरोधः। एवं चाऽप्यमर्थः । असुराः सुरविरुद्धान्येव रक्षांसीति कर्मधारयः । तेन विभीषणव्यावृत्तिः । युक्तश्चायमेवार्थः । राक्षसानां तदा वने वधःसंयति रक्षसामित्याद्यनुरोधात् । एवं च यद्यसुरवधोप्युपलभ्येत तर्हि तत्र कर्मणा राक्षसत्वं बोध्यम् । तेषां वधाय वधं प्रार्थयितुं सर्वे वनस्था ऋषयोऽभ्यागमन् । असुररक्षांसीत्यनेन विभीषणभक्तिस्सर्वर्षिज्ञानविषयीभूतेति ध्वनितम्। तदा तस्मिन्काले वने स्थितः । किञ्च अवने सर्वरक्षणे प्रवृत्तः स रघुनाथः राक्षसानां संबन्धि तेषामृषीणां प्रार्थनावचनं प्रतिशुश्राव अङ्गीचकार । किञ्च तेषामृषीणांप्रति प्रत्येति प्रत्यापयति बोधयत्यर्थमिति वचनम् । प्रतिपूर्वकइण् धातुप्रकृतिककिबन्तप्रयोगः । नपुंसकत्वाद्ह्रस्वत्वम्। आगमशास्त्रस्यानित्यत्वात्तुगभावः। गत्यर्थकदीर्घप्रकृतिककिबन्तो वा । गत्यर्थानां ज्ञानार्थकत्वं प्रसिद्धमेव । अतएवानेन प्रतिज्ञातश्चेत्यस्य न पौनरुक्त्यम् । अन्यथा प्रतिपूर्वकश्रुधातोः प्रतिज्ञातार्थकत्वेन तदुरुपपादं स्यात्। सार्द्धश्लोक एकान्वयी । अवने इति व्याख्यानात्प्रथमोच्चारितवनेनास्य न निष्प्रयोजनकत्वम् । राक्षसानामपि वधव्याजेन मोक्षदायकत्वात्सर्वसंरक्षकत्वं । रघुनाथे सुवचमेव । अतएव समत्वप्रतिपादिकाः श्रुतयस्सानुकूलाः तेन रघुनाथस्य निर्हेतुकदयालुत्वं सूचितम् ॥ ४३–४४ ॥

गो० टी०–एवं विरोधिनिरसनानुकूल्यदर्शनलब्धावसरमुनिजनाभ्यर्थनमाह–वसतइति । वने शरभङ्गवने तस्य वसतः तस्मिन्वसतीत्यर्थः । षष्ठीचेति योगविभागात् "यस्य च भावेन भावलक्षणम्" इत्यस्मिन्नर्थे षष्ठी । यद्वा षष्ठ्यर्थसंबन्धसामान्यस्य उक्तविशेषे पर्यवसानं । ' शरभङ्गाश्रमे राममभिजग्मुश्च तापसा ' इतिवक्ष्यमाणत्वाच्च शरभङ्गवन इति सिद्धं । सर्वे वैखानसवालखिल्यादय ऋषयः शरभङ्गाश्रमवासिनो वनचरैश्चित्रकूटपम्पावनप्रभृतिवनवासिभिः सह । वक्ष्यति ' पम्पावननिवासानामनुमन्दाकिनीमपि । चित्रकूटालयानां च क्रियते कदनं महत् ' इति । यद्वा वनचरैः सह वने वसतस्तस्य । "षष्ठी चानादरे" इत्यनादरे षष्ठी । सविशेषणेहातिन्यायेन तस्य वने वासमनादृत्येत्यर्थः। वक्ष्यतिहि ' ते वयं भवता रक्ष्या भवद्विषयवासिनः । नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वर' इति।

प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् । ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥ ४५ ॥
तेन तत्रैव वसता जनस्थाननिवासिनी । विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ४६ ॥
ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान् । खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ॥ ४७ ॥

यद्वा वने वसतस्तस्य समीपमित्युपस्कार्यम् । आसुराणि असुरप्रकृतीनि रक्षांसि । अनेन ' विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ' इत्युक्तविभीषणव्यावृत्तिः । यद्वा असुराश्च रक्षांसि चेति द्वन्द्वः । असुराः कबन्धादयः । तत्र दनुशब्दप्रयोगात् । यद्वा असूत्प्राणान्रान्ति गृह्णन्ति इत्यसुराणि । असुराणि च तानि रक्षांसि चेति कर्मधारयः । तेषां वधाय वधं कारयितुं प्रार्थयितुं वा । " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति चतुर्थी । अभ्यागमन् अभिमुखतया आगताः । नह्याभिमुख्यादन्यच्छरणागतिर्नास्ति । ' सत्सु कार्यवतां पुंसामलमेवाग्रतः स्थितिः ' । यद्वा असुररक्षसां वने वसतस्तस्य असुररक्षसां वधायाभ्यागमन्नित्युभयत्राप्यन्वयः । काकाक्षिन्यायान्मध्यमणिन्यायाद्वा ॥ ४३ ॥ मुनीनां दुर्दशमालोक्य तद्विरोधिनिरसनं प्रतिज्ञातमित्याह–**सतेषामिति**। स रामः राक्षसानां वने दण्डकारण्ये तेषामृषीणां तथा प्रतिशुश्राव । यथा तैरर्थितं तथा प्रतिजज्ञे इत्यर्थः । ' आश्रवः सङ्गरः सन्धा प्रतिश्रवः संश्रवः प्रतिज्ञा च ' इति हलायुधः ॥ ४४ ॥

४५] ति० टी०–प्रतिज्ञात इति । अग्निकल्पानामग्निसदृशानामृषीणाम् । सन्निधाविति शेषः । अपेक्षित इति वा शेषः । संयति यूद्वेऽचिन्त्यामितनिजशक्तिवैभवादक्षसां वधः प्रतिज्ञातश्चेति संबन्धः ॥ ४५ ॥

रा० टी०–ऋषिवचनश्रवणानन्तरं रामवृत्तमाह–प्रतिज्ञातश्चेत्यादिना। अग्निकल्पानाम् अग्निसदृशानाम् परमतेजस्विनामित्यर्थः । किञ्च अग्निवत्कल्पन्ते इत्यग्निकल्पाः अग्निसदृशसामर्थ्यवन्तः । यथाग्निः स्वसंबन्धमात्रेण तूलादीनां भस्म करोति तथा स्वदर्शनदानमात्रेण जनपापभस्मकर्तारः । किञ्च अग्निं कल्पयन्ति प्रकल्पयन्ति विधिना प्रतिदिनं सँस्कुर्वन्तीत्यग्निकल्पाः अग्निहोत्रिणः तेषां दण्डकारण्यवासिनामृषीणां सन्निधावेव । रक्षसाम् राक्षसानां वधः संयति सङ्ग्रामे रामेण प्रतिज्ञातः । च शब्दएवार्थे ॥ ४५ ॥

गो० टी०–मुनिभिरर्थितो रामेण प्रतिज्ञातश्च कोर्थ इत्याह–प्रतिज्ञातश्चेति। रामेण प्रतिज्ञातोर्थस्तु अग्निकल्पानामीषन्न्यूनमग्निसादृश्यं प्राप्तानाम् "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" इति कल्पप्प्रत्ययः । अतएव दण्डकारण्यवासिनामृषीणामित्यत्र चतुर्थ्यर्थे षष्ठी । संयति युद्धे ' समुदायः स्त्रियां संयत् समित्याजिसमियुधः ' इत्यमरः । रक्षसां वधः " कर्तृकर्मणोः कृति " इति कर्मण्यर्थे षष्ठी । प्रतिज्ञातं त्विति पाठे सामान्ये नपुंसकम् । प्रतिज्ञातं वस्तु वध इत्यर्थः ॥ ४५ ॥

४६] ति० टी०–तेनेति । तेन रामेण तत्रैव दण्डकारण्यदक्षिणप्रदेशवर्तिपञ्चवट्याश्रमे जनस्थानं नाम दण्डकारण्ये रावणस्य बलनिवेशस्थानम् । कामरूपिणीच्छया नानारूपधारिणी । यद्वा पुंसां काम्यमानरूपवती । विरूपिता कर्णनासाछेदेन वैरूप्यं प्रापिता । शूर्पणखेत्यत्र "नखमुखात्संज्ञायाम्" इति ङीप्निषेधः । " पूर्वपदात्संज्ञायाम्–" इति णत्वम् । विरूढं रूपं विरूपं तत्संज्ञातमस्या इति तारकादित्वादितच् ॥ ४६ ॥

रा० टी०–प्रतिज्ञाकरणानन्तरकालिकं वृत्तमाह–तेनेति । तत्रैव दण्डकारण्यदक्षिणप्रदेशवर्तिपञ्चवट्याश्रमे एव वसता तेन रामेण जनस्थाननिवासिनी जनस्थाने रावणबलनिवेशस्थले निवसनशीला । कामरूपिणी कामं स्वेच्छाविषयीभूतं रूपमस्त्यस्याः सा राक्षसी शूर्पणखा प्रयोज्यभूतलक्ष्मणेन विरूपिता नासिकाच्छेदेन कुत्सितरूपं प्रापिता । कामरूपिणीत्यत्र असुब्वत इति भाष्यप्रयोगोक्तदिशा लाघवमूलककर्मधारयान्न मत्वर्थीय इति निषेधाप्रवृत्तिः । शूर्पणखेत्यत्र " पूर्वपदात्संज्ञायाम् " इति णत्वम् । " नखमुखात्संज्ञायाम् " इति ङीपभावः ॥ ४६ ॥

गो० टी०–अथ प्रतिज्ञानिर्वाहत्रीजमुपक्षिपति–तेनेति । तत्रैव जनस्थाने वसता तेन रामेण जनस्थाने निवसतीति जनस्थाननिवासिनी " सुप्यजातौ णिनिस्ताच्छील्ये " इति णिनिः । कामेनेच्छया रूपमस्या अस्तीति कामरूपिणी । शूर्पतुल्या नखा यस्याः सा शूर्पणखा " पूर्वपदात्संज्ञायामगः " इति णत्वम् " नखमुखात्संज्ञायाम् " इति ङीपप्रतिषेधः । शूर्पणखाख्या राक्षसी विरूपिता कर्णनासिकाच्छेदेन वैरूप्यं प्रापिता । 'रामस्य दक्षिणो बाहुः' इति लक्ष्मणस्य रामबाहुत्वाद्रामस्य विरूपकरणकर्तृत्वोक्तिः । शूर्पनखीतिपाठे न सा संज्ञा ॥ ४६ ॥

४७] ति० टी०–तत इति । ततस्तद्वैरूप्यकरणानन्तरम् । सर्वराक्षसान् जनस्थाननिवासिन इति शेषः । उद्युक्तान्युद्धार्थं सन्नद्धान् ॥ ४७ ॥

रा० टी०–तत इति । ततः शूर्पणखाविरूपकरणानन्तरमेव शूर्पणखावाक्यात् । शूर्पणखोक्तवृत्तश्रवणादेव उद्युक्तान् कृतयुद्धोद्यमान्सर्वराक्षसान् जनस्थाननिवासिनिखिलरक्षांसि तत्र विशिष्टं खरं त्रिशिरसं च दूषणं च राक्षसं तेषां पदानुगाननुचरांश्च रणे एव रामो निजघान । सार्द्धश्लोक एकान्वयी ॥ ४७ ॥

गो० टी०–ततइत्यादि । सार्द्धश्लोकमेकं वाक्यम् । ततः शूर्पणखावैरूप्यकरणानन्तरं शूर्पणखावाक्यादुद्युक्तान् युद्धार्थं सन्नद्धान् सर्वराक्षसान् चतुर्दशसहस्रसंख्याकप्रधानराक्षसान् । तेष्वपि प्रधानं ' खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ' चैवेतिनिपातद्वयसमुदायः समुच्चयार्थः । तेषां पूर्वोक्तानां राक्षसानां खरादीनां च पदानुगान् अनुचरांश्च रणे युद्धे निजघान हतवान् । यद्वा खरादीन् तेषां पदानुगान् सर्वराक्षसांश्च निजघानेति योजना ॥ ४७ ॥

निजघान रणे रामस्तेषां चैव पदानुगान् । वने तस्मिन्निवसता जनस्थाननिवासिनाम् ॥ ४८ ॥
रक्षसां निहतान्यासन्सहस्राणि चतुर्दश । ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः ॥ ४९ ॥
सहायं वरयामास मारीचं नाम राक्षसम् । वार्यमाणः सुबहुशो मारीचेन स रावणः ॥ ५० ॥
न विरोधो बलवता क्षमो रावण तेन ते । अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥ ५१ ॥
जगाम सहमारीचस्तस्याश्रमपदं तदा । तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥ ५२ ॥

४८] ति० टी०–पदानुगाननुचरान् । निवसता । रामेणेति शेषः । उत्तरश्लोकान्वयी ॥ ४८ ॥

रा० टी०–हतराक्षससंख्यां बोधयन्नाह–वने इत्यनेन । तस्मिन्वने निवसता रघुनाथेन जनस्थाननिवासिनां रक्षसां चतुर्दश सहस्राणि चतुर्दशसहस्रसङ्ख्यासङ्ख्यातानि निहतान्यासन् । रक्षसामित्यत्र षष्ठी राहोः शिर इतिवद्भेदाभेदाभ्यां । किञ्च रक्षसांमध्ये यानि चतुर्दशसहस्राणि जनस्थाने रावणेन नियुक्तानि तानि निहतान्यासन् । सङ्ख्यापरतया व्याख्यानेऽपि सङ्ख्येयवधं सङ्ख्यायामारोप्य सङ्ख्यावध इतिबोध्यम् । परन्तु सङ्ख्येयपरत्वेन व्याख्याने 'दशवर्षसहस्राणि दशवर्षशतानि च' इत्यत्र वक्ष्यमाणदिशा सहस्राणि चतुर्दशेत्यस्य द्विचत्वारिंशत्सहस्रसङ्ख्या सङ्ख्यातानि रक्षांसीति बोध्यम् । सङ्ख्यापरतया व्याख्याने तु चतुर्दशसहस्रसङ्ख्यासङ्ख्यातानीति बोध्यम् । सङ्ख्यापरत्वेन बहुवचनानुपपत्त्यभावात् । तथा च कोशः 'विंशत्याद्यास्तदैकत्वे सर्वाः सङ्ख्येयसङ्ख्ययोः । सङ्ख्यायां द्विबहुत्वे स्त' इत्यादिः । अर्द्धद्वयमेकान्वयि ४८

गो० टी०–हतान् राक्षसान् परिसञ्चष्टे–वनइति । तस्मिन्वने निवसता रामेणेत्यनेनासहायत्वं दर्शितम् । जनस्थाननिवासिनामित्यनेनारण्यवर्तित्वेनातिघोरत्वमुक्तम् । रक्षसां चतुर्दशसहस्राणीति यौगपद्यमुक्तम् । निहतानीति निःशेषत्वमुच्यते । सहस्राणीति संख्यासंख्येययोरभेदेन निर्देशः । चतुर्दशसहस्रसंख्याकानि सैन्यानि वा ॥ ४८ ॥

४९] ति० टी०–रक्षसामिति । चतुर्दशसहस्राणि तत्सङ्ख्यासङ्ख्यातानि । सैन्यानीति शेषः । ज्ञातयः खरादयः । खरादयो हि रावणस्य वैमात्रेयाः । श्रुत्वा । शूर्पणखामुखादिति शेषः । मूर्च्छितो व्याप्तचित्तः ॥ ४९ ॥

रा० टी०–तत इति । ततो रघुनाथकृतराक्षसवधानन्तरं ज्ञातिवधं राक्षसध्वंसं रावणः श्रुत्वा । शूर्पणखावाक्यादिति शेषः । क्रोधमूर्छितः क्रोधव्याप्तचित्तोऽभवदित्यस्याध्याहारः । अर्द्धं पृथगन्वयि ॥ ४९ ॥

गो० टी०–एवं रामस्य सत्यप्रतिज्ञत्वे दर्शिते सीतायाः पुरुषकारत्वं वक्तुं बीजमुपक्षिपति–ततइति । ततः खरादिवधानन्तरं ज्ञातिवधं खरवधम् । खरस्य ज्ञातित्वं स्वमातृष्वसुर्विश्रवसो जातत्वादित्यारण्यपर्वणि व्यक्तम् । श्रुत्वा अकम्पनशूर्पणखामुखेन ज्ञात्वा । रावणः रौति रावयतीति रावणः । वक्ष्यत्युत्तरकाण्डे ' यस्माल्लोकत्रयं ह्येतद्रवतो भयमागतम् । तस्मात्त्वं रावणो नाम नाम्ना तेन भविष्यसि ' इति । यद्वा विश्रवसोऽपत्यं रावणः शिवादिगणे विश्रवसो विश्रवणरवण इति पाठाद्रवणादेशः अण् च । क्रोधमूर्छितः क्रोधेन मूर्छितः मूढः ' मूर्छितौ मूढसोच्छ्रयौ ' इति वैजयन्ती । नचायं मूर्च्छतेर्निष्ठा मूर्त्त इति तदूपत्वात् । किंतु मूर्च्छास्य संजातेति मूर्छितः तारकादित्वादितच् । मारीचं नाम राक्षसं सहायं वरयामास ॥ ४९ ॥

५०–५२] ति० टी०–क्रोधेन व्याप्तः स रावणो मारीचेन बहुशो बहुवारं परदारहरणस्य परमाधर्मत्वं बलवद्विरोधस्य निजनाशान्तत्वम् । अतस्तेन रामेण बलवता विश्वामित्राश्रमे मदनुभूतबलेन ते तव विरोधो न क्षमो न युक्तो न हितश्चेति वार्यमाणोऽपि मारीचं नाम प्रसिद्धं राक्षसं सीताहरणे सहायं वरयामास । ' वृञ् वरणे ' इति स्वार्थे ण्यन्तोऽपि ॥ ५० ॥ नेति । पूर्वार्धं पूर्वान्वयि । कालचोदितो मृत्युप्रेरितो रावणस्तद्वाक्यं मारीचवाक्यं त्वनादृत्य ॥ ५१ ॥ सहमारीचो मारीचसहितः । " वोपसर्जनस्य " इति विकल्पात्सहस्य सादेशाभावः । तस्य खरादिहन्तृत्वेन प्रसिद्धस्य रामस्याश्रमपदमाश्रमस्थानं जगाम । ततस्तेन मायाविना मारीचेन तौ नृपात्मजौ रामलक्ष्मणौ दूरमपवाह्यापसार्य ॥ ५२ ॥

रा० टी०–सहायमिति । हे रावण ! बलवता तेन रामेण समं ते तव विरोधः त्वत्कर्तृको द्रोहः न क्षमः न युक्तः । एवं बहुशः बहुप्रकारवचनैः मारीचेन वार्यमाणः स रावणः कालचोदितः कालवशः सन् तद्वाक्यं मारीचोपदेशमनादृत्य मारीचं नाम तमेव राक्षसं सहायं वरयामास । सहायत्वेन स्वीचकारेत्यर्थः । तदा मारीचसाहाय्यस्वीकारकाले सहमारीचः मारीचसहितो रावणः तस्य रघुनाथस्य अश्रमपदम् अश्रमं श्रमनिवर्त्तकं पदं स्थानं जगाम । तदा तस्मिन्काले तेन मायाविना मारीचेन नृपात्मजौ नित्यराजसुतौ रामलक्ष्मणौ दूरमपवाह्य अपसार्य जटायुषं गृध्रं हत्वा निहतप्रायं कृत्वा रामस्य भार्यां जहार लङ्कां प्रापयामास । रावण इतिशेषः । सार्द्धश्लोकत्रयमेकान्वयि । तदेत्युभयान्वयि ॥ ५०–५२ ॥

गो० टी०–वार्यमाणइति । अत्रान्ते इतिकरणं द्रष्टव्यम् । स रावणः । हे रावण ! ते बलवता खरादिषु दृष्टापदानवता । बलीयसा तेन रामेण विरोधो न क्षमो न युक्तः । 'क्षमस्त्रिषु हिते योग्ये युक्ते शक्तौ पटावपि ' इति शब्दरत्नाकरे । इति सुबहुशो सुहुर्मुहुः वार्यमाणोऽभूत् ॥ ५० ॥ अनादृत्येति । रावणः कालचोदितः कालेन मृत्युना प्रेरितः सन् तद्वाक्यं मारीचवाक्यमनादृत्य सहमारीचः मारीचसहितः । "तेनसहेतितुल्ययोगे" इति समासः । "वोप-

जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् । गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥ ५३ ॥
राघवः शोकसंतप्तो विललापाकुलेन्द्रियः । ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ॥ ५४ ॥
मार्गमाणो वने सीतां राक्षसं संददर्श ह । कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ ५५ ॥

सर्जनस्य" इति सहशब्दस्य सभावाभावः । तदा तस्मिन्नेव काले तस्य खरदूषणादिहन्तृत्वेन प्रसिद्धस्य रामस्य आश्रमपदमाश्रमस्थानम् । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । जगाम प्राप ॥ ५१ ॥ **तेनेति** । मायाविना प्रशस्तमृगमायावता । "अस्मायामेधास्रजो विनिः" इति विनिप्रत्ययः । लोभनीयविचित्रकनकमृगवेषधारिणेत्यर्थः । तेन मारीचेन प्रयोज्येन नृपात्मजौ दशरथपुत्रौ दूरं यथा भवति तथा अपवाह्य अपसार्य दृश्यादृश्यतया रामं रामस्वरतुल्यस्वरेण लक्ष्मणं च दूरं निःसार्येत्यर्थः । मध्ये सीताविमोचनाय प्राप्तं जटायुषं जटायुर्नामकं गृध्रं हत्वा मरणपर्यवसायिनीं हिंसां कृत्वा रामस्य भार्यां नित्यानपायिनीं सीतां जहार हृतवान् । अत्रास्यं व्यादाय स्थितीतिवदपूर्वकाले क्त्वा प्रत्ययः । सीतां हृत्वा जटायुषं जघानेत्यर्थः । अत्र मायानिर्मिता सीतैवापहृता स्वयमग्रावन्तर्हिता अतएव मायासीतायामग्निप्रविष्टायां निजसीतायां उत्थानं यथाकथंचिल्लोकापवादात्पुनः संत्यागश्चोपपद्यते इत्याहुः ॥ ५२ ॥

५३] ति० टी०–**जहारेति** । हत्वा हतप्रायं कण्ठगतप्राणं कृत्वा रामस्य भार्यां जहारेति संबन्धः । निहतं निहतप्रायम् । श्रुत्वा । गृध्रमुखादिति शेषः ॥ ५३ ॥

रा० टी०–सीताहरणौत्तरकालिकं वृत्तमाह–**गृध्रं चेत्यादिना**। सीतान्वेषणसमय इति शेषः। गृध्रं जटायुषं निहतं च निहतमिव। चशब्द इवार्थे। दृष्ट्वा तन्मुखान्मैथिलीं हृतां च श्रुत्वा शोकसन्तप्तः सम्भोगपोषकप्रकटसीताविरहजन्यदुःखाक्रान्तः अतएवाकुलेन्द्रियो राघवः विललाप । अर्द्धद्वयमेकान्वयि ॥ ५३ ॥

गो० टी०–**गृध्रंचेति** । मृगरूपमारीचहननं पर्णशालायां सीताया अदर्शनेन तदन्वेषणं च चकारेण समुच्चीयते। निहतं मुमूर्षुं गृध्रं जटायुषं दृष्ट्वा तद्वचनान्मैथिलीं सीतां हृतां रावणेनापहृतां श्रुत्वा राघवः शोकेन सन्तप्तः सम्यक् तप्तः सन् सीताया अदर्शनेन तप्तः जटायोर्मरणेन सुतरां तप्तः। अतएव व्याकुलेन्द्रियः कलुषितसर्वेन्द्रियः सन् विललाप परिदेवनमकरोत्। 'विलापः परिदेवनम्' इत्यमरः। 'राज्याद्भ्रंशो वने वासः सीता नष्टा हतो द्विजः। ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम्'। अत्र राघवमैथिलीशब्दाभ्यां कुलद्वयावद्यकरमिदमपहरणमिति शोकातिशयहेतुरुच्यते। ननु विष्ण्ववतारभूतस्यास्य कथं शोकमोहौ सम्भवत इति। सम्भवत एव पुरुषधौरेयस्य। यदि हि लोकोत्तरगुणविशिष्टवस्तुविनाशेऽपि तौ न स्यातां तर्हि स कथं पुरुषधौरेयः स्यात्। तच्च कथमतिसुन्दरं स्यात्। तयोरुभयोर्नमस्कार एव स्यात्। वक्ष्यति च महापुरुषगुणमणिवर्णनप्रकरणे 'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः' इति। मारुतिश्च वक्ष्यति 'दुष्करं कृतवान् रामो हीनो यदनया प्रभुः। धारयत्यात्मनो देहं न शोकेनावसीदति' इति ॥ ५३ ॥

५४-५५] ति० टी०–विललाप पर्यदेवयत्। आकुलेन्द्रियः शोकपरवशेन्द्रियः। तेनैव शोकेन निवृत्तिहेतुमप्राप्तेनाभिभूयमान एव सन्गृध्रं रावणेन सीतापहरणेनेति निवेश्य मृतं दग्ध्वा विधिना संस्कृत्य ॥ ५४ ॥ सीतां वने मार्गमाणः। मार्गयमाण इत्यर्थः। रूपेण विकृतं कबन्धं राक्षसम्। ददर्शेति संबन्धः ॥ ५५ ॥

रा० टी०–**ततइति** । ततो जटायुषो मरणानन्तरमेव तेन प्राकृतविलक्षणेन शोकेन सम्भोगपोषकशोकमूलकव्यापारेणोपलक्षितो रघुनाथः जटायुषं गृध्रं दग्ध्वा । प्रमीतक्रियां विधिना कृत्वेत्यर्थः । वने सीतां मार्गमाणः अन्वेषयन् घोरदर्शनं भयोत्पादकस्वरूपं रूपेण विकृतं रूपज्ञाप्यविकारविशिष्टं कबन्धंनाम प्रसिद्धं राक्षसं सन्ददर्श । ह प्रसिद्धमेतत्। सार्द्धश्लोक एकान्वयी । जटायुषः प्रमीतक्रियाकरणेन रघुनाथस्य परमकृतज्ञत्वं व्यञ्जितम् । तेन तिर्यक्जातीनामपि ज्ञानवतां वेदाधिकार इति ध्वनितम्। प्रसिद्धश्च काकभुशुण्डादिषु ॥५४॥५५॥

गो० टी०–**ततइति**। अर्द्धत्रयमेकं वाक्यं । तेनैव शोकेन गृध्रहननजनितेनैव शोकेन सीतापहरणजशोकादप्यधिकेनेत्यर्थः। ततः व्याप्तो रामः गृध्रं तिर्यग्विशेषमपि जटायुषं पितृसखत्वात् शेषिकार्याय त्यक्तप्राणत्वाच्च दग्ध्वा ब्रह्ममेधेन संस्कृत्य। 'यत्तु प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः। तत्स्वर्गगमनं तस्य क्षिप्रं रामो जजाप ह' इति वक्ष्यमाणत्वात् मुक्तत्यक्तशरीरत्वाच्चेदं ब्रह्ममेधमर्हतीति। तथोक्तं नृसिंहपुराणे 'मत्कृते निधनं यस्मात्त्वया प्राप्तं द्विजोत्तम। तस्मात्त्वं मत्प्रसादेन विष्णुलोकमवाप्स्यसि' इति सामान्यतश्चोक्तम्। यथाग्नेये 'विष्णोः कार्यं समुद्दिश्य देहत्यागो यतः कृतः। ततो वैकुण्ठमासाद्य मुक्तो भवति मानवः' इति। आश्वमेधिके च 'प्राणांस्त्यजति यो मर्त्यो मां प्रपन्नोऽपि मत्कृते। बालसूर्यप्रकाशेन व्रजेयानेन मद्गृहम्' इति। अत्रापि वक्ष्यति 'या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः। अपरावर्तिनां या च या च भूमिप्रदायिनाम्॥ मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्' इति। अत्रापरा दक्षिणे च पुनरावर्त्तते इत्युक्ता मुक्तिरेव। ननु युद्धे अपलायनम्। तत्फलस्य स्वतः सिद्धत्वेन तदनुग्राह्यत्वाभावात्। नच संस्काराभावे सुकृतफलस्यानुत्पत्त्या तत्करणेन तदनुग्राह्यत्वमेवेति वाच्यम्। तिरश्चो यज्ञानधिकारेण तस्य तदभावेन तस्य तदनुग्राह्यत्वात्। अङ्गिफलस्यैवाङ्गफलत्वेन उपासनाङ्गानां यज्ञदानादीनामपि मुक्तिरेव फलमित्यभिप्रायेण या गतिर्यज्ञशीलानामित्याद्युक्तम्। यद्वा "इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन्" इत्यादिश्रुत्युक्तरीत्या मुक्तस्य सर्वलोकसंचारसंभवाद्या गतिरित्याद्युक्तं क्रममुक्तिपरमिदं वचनम्।

तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः । स चास्य कथयामास शबरीं धर्मचारिणीम् ॥ ५६ ॥
श्रमणां धर्मनिपुणामभिगच्छेति राघव । सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः ॥ ५७ ॥
शबर्या पूजितः सम्यग्रामो दशरथात्मजः । पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥ ५८ ॥

नन् ' आत्मानं मानुषं मन्ये ' इति मनुष्यत्वं भावयतः कथं परत्वासाधारणचिह्नं मोक्षप्रदत्वमुच्यते इति चेन्न । सत्येन लोकान् जयतीत्युक्तस्य सर्वलोकजयस्य मानुषत्वेऽप्यविरोधात् । एनं जटायुषं दग्ध्वा वने तां सीतां मार्गमाणः अन्वेषणं कुर्वन् । मार्ग अन्वेषण इत्यस्माद्धातोः शानच् । " आधृषाद्वा " इति विकल्पाण्णिजभावः । रूपेण शरीरेण विकृतं विकारयुक्तम् । "येनाङ्गविकारः " इति तृतीया । कुक्षिनिक्षिप्तमस्तकमित्यर्थः । घोरदर्शनं भयङ्करदर्शनं कबन्धं कबन्धाकारत्वात्कबन्धनामकं राक्षसं ददर्श । हेति खेदे । अमृतमन्वेषता कालकूटमलम्भीत्यर्थः । यद्यप्ययं दानव एव तथापि राक्षसप्रकृतित्वात्तथोक्तमिति ज्ञेयम् ॥

५६] ति० टी०–तमिति । तं कबन्धं निहत्य ददाह । महाबाहू रामः । स च कबन्धः स्वर्गतः स्वर्गगमनयोग्यं स्वीयं गन्धर्वरूपं प्राप्तवान् । ततस्तेन रूपेण । अस्य रामस्य ॥ ५६ ॥

रा० टी०–तमिति । महाबाहू रघुनाथः तं कबन्धं निहत्य ददाह । स च कबन्धः स्वः परलोकंगतः स गन्धर्वरूपी कबन्धः । गमनसमये इति शेषः । हे राघव ! धर्मनिपुणीं परमधर्मज्ञामतएव श्रमणीं तपस्विनीं अतएव धर्मचारिणीं परमधर्मानुष्ठात्रीं शबरीमभिगच्छ इति अस्य अस्मै रघुनाथाय कथयामास च । सार्द्धश्लोक एकान्वयी ॥ ५६ ॥

गो० टी०–तमिति । महाबाहुः कबन्धभुजनिकर्तनक्षमभुजो रामः तं कबन्धं निहत्य तत्प्रार्थनया ददाह दग्धवान् । स च कबन्धो दाहेन हेतुना स्वः स्वर्गं गतः । इदमर्धमेकं वाक्यम् । सचेति । स स्वर्गं गच्छन् कबन्धोऽपि अस्य उपकारस्मृत्या क्षणमाकाशे स्थित्वा धर्मचारिणीं गुरुशुश्रूषादिधर्माचरणशीलाम् । आचार्याभिमानरूपचरमपर्वनिष्ठाभिमित्यर्थः । ' पादमूलं गमिष्यामि यानहं पर्यचारिषम् ' इति वक्ष्यमाणत्वात् । धर्मे अतिथिसत्काररूपे निपुणां समर्थां धर्मसूक्ष्मज्ञामित्यर्थः । रामः समागमिष्यतीति स्वादूनि फलान्यास्वाद्यास्वाद्य परीक्ष्य निश्चित्य फलानीति प्रसिद्धिः । श्रमणीं परिव्राजिकाम् । ' चतुर्थमाश्रमं प्राप्ता श्रमणी नाम ते स्मृता ' इतिस्मरणात् । शबरीमिति । शबरीं विलोमाख्यिम् । तदुक्तं नारदीये 'नृपाणां वैश्यतो जातः शबरः परिकीर्त्तितः । मधूनि वृक्षादानीय विक्रीणीते स्ववृत्तये ' इति । " जातेरस्त्रीविषयात् " इतिङीप् । अभिगच्छ आभिमुख्येन गच्छेति राघवं कथयामास । राघव इति पाठे तस्योत्तरश्लोकेनान्वयः । राघवेति पाठे हे राघव । शबरीमभिगच्छेति अस्य रामस्य कथयामासेत्यर्थः । अत्र भागवतभक्तिमहिम्ना हीनजातेरप्यभिगन्तव्यत्वमुक्तम् ॥ ५६ ॥

५७] ति० टी०–श्रमणां तापसीम् । धर्मनिपुणां सकलधर्मज्ञाम् । धर्मचारिणीमित्यस्य तु सकलधर्मानुष्ठात्रीमित्यर्थः । श्रमणामित्यत्र कर्तरि ल्युट् । तपसा श्राम्यतीत्यर्थात् । तामभिगच्छेति कथयामासेत्यन्वयः ॥ ५७ ॥

रा० टी०–सइति । शत्रुसूदनः स्वाश्रितारिदोषनिवर्त्तकः महातेजाः समाधिकरहिततेजोविशिष्टः स रघुनाथः शबरीमभ्यगच्छत् । अर्द्धं पृथगन्वयि ॥ ५७ ॥

गो० टी०–सइति । महातेजाः चरमपर्वनिष्ठजनलिप्सयाऽतिसंतुष्टः स राघवः शत्रुसूदनः । ' गमिष्याम्यक्षयाँल्लोकान्त्वत्प्रसादादरिन्दम ' इत्युक्तरीत्या तत्प्राप्तिप्रतिबन्धकनिवर्तकः । " सात्पदाद्योः " इतिषत्वाभावः । शबरीं नीचत्वसीमाभूमिभूतामभ्यगच्छदिति सौशील्यातिशयोक्तिः । दशरथात्मजः रामः शबर्या सम्यक् पूजितः । षष्टिवर्षसहस्राणि वन्ध्यस्य दशरथस्य प्रसादेऽत्यन्तादरकृतभोजनादप्यतिशयितं तत्कालमात्रसमागतशबरीसमर्पितमृष्टान्नमिति भावः । शरभङ्गादिभिरगस्त्यान्तैः कृतं पूजामात्रम् । शबर्या कृतं तु सम्यक्पूजनम् । तस्याश्चरमपर्वनिष्ठत्वादिति भावः । उक्तं हि ' मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत् ' इति । यद्वा सम्यक् पूजनं परीक्षितरसैः फलैर्भोजनम् । पूजित इत्यत्र " मतिबुद्धिपूजार्थेभ्यश्च " इतिवर्त्तमाने क्तः । तथा च शबर्येत्यत्र " क्तस्य च वर्त्तमाने " इति कथं न षष्ठीति चेत् । अत्र केचिदाहुः आर्षः षष्ठ्यभाव इति । अन्ये तु नायं वर्त्तमाने क्तः किं तु भूते । तद्योगे च " न लोकाव्यय " इत्यादिना षष्ठीप्रतिषेधात्तृतीयैवेति । वस्तुतः पूजास्य संजातेति पूजितः । तारकादित्वादितच्प्रत्ययः । अनेन तृतीया भवत्येव ॥ ५७ ॥

५८] ति० टी०–शबर्येति । सम्यक्पूजितो यथाविध्यर्घ्यादिभिरुपचारैः पूजितः । पम्पेत्यादिना किष्किन्धाकाण्डकथासंग्रहः । सङ्गतो मिलितः ॥ ५८ ॥

रा० टी०–शबर्येति । दशरथात्मजो दशरथनित्यसुतो रामः शबर्या सम्यक् पूजितः । आसीदिति शेषः । सम्यक्पूजित इत्यनेन शबर्याहृतफलादेः रघुनाथपरमप्रीतिविषयत्वं ध्वनितम् । तेन रघुनाथस्य परमभक्तवात्सल्यं सूचितम् । अर्द्धं स्वान्वयि । आरण्यकाण्डवृत्तमुक्त्वा किष्किन्धाकाण्डवृत्तमाह–पम्पातीर इत्यादिभिः । वानरेण नित्यवानराकृतिना हनुमता सह पम्पातीरे संगतः संमिलितः । आसीदिति शेषः । ह इति हर्षे । अर्द्धं स्वान्वयि ॥ ५८ ॥

गो० टी०–एवं सत्यप्रतिज्ञत्वप्रधानमारण्यकाण्डचरितं संगृह्य मित्रकार्यनिर्वाहकत्वपरां किष्किन्धाकाण्डकथां संगृह्णाति–

१ श्रमणीमिति पाठः । २ राघवमिति पाठः । ३ आर्षमात्मनेपदमितिभावः । वस्तुतस्तु ताच्छील्याद्यर्थेषु चानशैतदूपम् । तृणं नखादन्नपि जीवमानइतिवत् ।

हनुमद्वचनाच्चैव सुग्रीवेण समागतः । सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥ ५९ ॥
आदितस्तद्यथा वृत्तं सीतायाश्च विशेषतः । सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥ ६० ॥
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् । ततो वानरराजेन वैरानुकथनं प्रति ॥ ६१ ॥
रामायावेदितं सर्वं प्रणयाद्दुःखितेन च । प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ॥ ६२ ॥

पम्पेति । पम्पानाम पद्मसरः तस्यास्तीरे तटकाननइत्युद्दीपकसंनिधानोक्तिः । हनुमता प्रशस्तहनुना । वीरकिणाङ्कितभुखेनेत्यर्थः । वानरेण संगतः संयुक्तो राम इति शेषः । हेति हर्षे । विरहिजनप्राणापहारिणि पम्पोपवने स्वकामिनीघटकसमागमोऽयं चौरैर्वनेऽपहृतसर्वस्वस्य स्वजनमुखावलोकनवदतीवाश्वासनमिति मुनेर्हर्षः । हनुमता का गतिरिहेदानीमिति अग्निमात्रपर्याकुलतादशायां विजयकिणाङ्कितवदनवता पुरुषेण सङ्गमो यदृच्छया संजातः । वानरेणेति विशेषणेन रावणवत्संन्यासिवेषरहिततया स्ववेषेण समागमादाश्वसनीयता द्योत्यते । हनुमद्वचनात्सुग्रीवेण समागतः । चैवेति निपातसमुदायः समुच्चयार्थः । अनुकूलपुरुषकारलाभादुचितमित्रलाभो जात इति भावः ॥५८॥

५९] **ति० टी०**–हनुमद्वचनात्सुग्रीवो युष्मन्मैत्रीमपेक्षत इत्यादिरूपात् । समागतो मैत्रीं कृतवान् । हनुशब्दो ह्रस्वान्तो दीर्घान्तश्च । सुग्रीवायेति । सङ्गतायेति शेषः । शंसदकथयत् । छान्दसोऽडभावः । महाबलः सुग्रीवेण स्वकार्यसाधकमहाबलत्ववेनावगतः ॥ ५९ ॥

रा० टी०–हनुमदिति । हनुमद्वचनात्सुग्रीवो युष्मन्मैत्रीमपेक्षते इत्याद्याकारकादेव सुग्रीवेण समागतः सम्मिलितः महाबलः समाधिकरहितबलविशिष्टो रामः सुग्रीवाय आदितः स्वप्राकट्यादेवारभ्य तत्प्रसिद्धं स्वकीयं सर्वं वृत्तं सीतायाश्च तत्प्रसिद्धं वृत्तं विशेषतो विस्तरतो यथा यथावत् शंसत् अशंसत् । आगमशास्त्रस्यानित्यत्वाद्ङ्विरहः । सार्द्धश्लोक एकान्वयी । एकश्च एवार्थे ॥ ५९ ॥

गो० टी०–अथ सख्यहेतुं रहस्योद्भेदं दर्शयति–**सुग्रीवायेति** । महाबल इत्यनेन वृत्तस्मरणकालिककातर्यगोपनहेतुर्धैर्यमुच्यते । रामआदितः जन्मन आरभ्य तत्प्रसिद्धं सर्वं वृत्तं सुग्रीवाय शंसत् । अनित्यमागमशासनमित्यडभावः । अकथयदित्यर्थः । सीतायाः तद्वृत्तं च रावणहृतत्वादिकं यथावृत्तं वृत्तमनतिक्रम्य । पदार्थाऽनतिवृत्तावव्ययीभावः । तदन्वेषणस्यावश्यकर्त्तव्यतया विशेषेणाशंसत् ॥ ५९ ॥

६०] **ति० टी०**–**आदित इति** । जन्मनआरभ्येत्यर्थः । तत्प्रसिद्धं वृत्तं स्वीयं सीतायाश्च वृत्तं विशिष्य रावणापहारान्तं अशंसत् । यद्यपि महाबलत्वाद्विनापि सहायं सर्वनिर्वाहकस्तथापि लोकरीतिमनुसृत्य सुग्रीवमैत्रीमुद्दिश्य सर्वमकथयदिति बोद्धव्यम् । वानरः सुग्रीवोऽपि रामस्य संबन्धि तत्सर्वं श्रुत्वा ॥६०॥

रा० टी०–सुग्रीव इति । वानरः नित्यवानराकृतिः सुग्रीवोपि रामस्य तत्सर्वं वृत्तं चात्सीतावृत्तं श्रुत्वैव प्रीतः सन्वेद अग्निसाक्षिकम् अग्निरेव साक्षाद्द्रष्टा यस्मिंस्तत्सख्यं रामेण सह चकार । अत्र प्रीत इत्यनेन सर्वकार्यसिद्धिर्जातेवेति सुग्रीवनिश्चयो ध्वनितः । एकश्च एवार्थे । अर्द्धद्वयमेकान्वयि ॥ ६० ॥

गो० टी०–सुग्रीवइति । चार्षाति निपातसमुदायः समुच्चयार्थः । वानरः सुग्रीवोऽपि रामस्य संबन्धि तत्सर्वं पूर्वोक्तं वृत्तान्तं श्रुत्वा प्रीतः रामस्य प्रयोजनापेक्षितत्वान्मामकमपि प्रयोजनं निर्वर्त्तयिष्यतीति संतुष्टः सन् । अग्निः साक्षी साक्षाद्द्रष्टा यस्य तदग्निसाक्षिकम् । " शेषाद्विभाषा " इतिकप्प्रत्ययः । रामेण सख्यं सखित्वम् । "सख्युर्यः" इति भावार्थे यप्रत्ययः । चकार कृतवान् । वानररामशब्दाभ्यां सख्यस्यासदृशत्वं व्यञ्जितं तेन च रामस्य सौशील्यातिशयो व्यज्यते । गुहस्य हीनमनुष्यजातितया तत्सख्यं सौशील्यहेतुः । तत्रापि स्त्रीत्वेन शबर्यभिगमनं ततस्तरां सौशील्यं सुग्रीवस्य तिर्यक्त्वेन ततस्तमाम सौशील्यमिति भावः ॥ ६० ॥

६१-६२] **ति० टी०**–स्वसमानदुःखमहाबलसंबन्धलाभात्प्रीतः सुग्रीवोऽग्निसाक्षिकमग्निरेव साक्षाद्द्रष्टा यस्य तादृशं सख्यं चकार । ततो वैरानुकथनं वालिनस्तव च वैरे किं कारणमिति रामकृतप्रश्नं प्रति । प्रश्नोत्तरमिति यावत् ॥ ६१ ॥ रामाय यत्प्रत्युत्तरमावेदितव्यं तत्सर्वं रामवदारापहारान्तकष्टैः सञ्जातदुःखेन सुग्रीवेण प्रणयाद्रामायावेदितम् । तदा तद्वृत्तान्तश्रवणानन्तरकाले रामेण वालिवधं प्रति वालिवधमुद्दिश्यावश्यं वालिनं वधिष्यामीति प्रतिज्ञातम् ॥ ६२ ॥

रा० टी०–तत इति। ततः सख्यकरणानन्तरं दुःखितेन कृतदुःखमूचकचेष्टितेन वानरराजेन सुग्रीवेण वैरानुकथनम् । वालिना सह तव वैरे किं निमित्तमिति रघुनाथप्रश्नं प्रति उत्तरमित्यर्थः । सर्वं प्रणयादेव रामायावेदितम् । तदा तस्मिन्काले एव रामेण वालिवधं प्रति प्रतिज्ञातम् । वालिनमवश्यं हन्तास्मीति प्रतिज्ञां कृतवानित्यर्थः । सार्द्धश्लोक एकान्वयी । चशब्दावेवार्थौ ॥६१॥६२॥

गो० टी०–ततइति । ततः सख्यकरणानन्तरं दुःखितेन परमसुहृद्भूतरामसन्निधानादुद्बुद्धपूर्ववृत्तान्ततया बाष्पं मुञ्चतेत्यर्थः । वानरराजेन सुग्रीवेण । " कर्तृकरणयोस्तृतीया " इति कर्तरि तृतीया । वैरस्य वालिविरोधस्यानुकथनमनुकूलकथनम् । प्रभानुकूलमुत्तरमित्यर्थः । वालिना सह तव कुतो वैरमासीदित्येवं प्रश्नः । तंप्रति वक्तव्यं सर्वं रहस्यप्रकाशरूपं प्रणयात्स्नेहाद्विस्रम्भाद्वा । ' प्रणयास्त्वमी । विस्रम्भयाञ्चाप्रेमाणः ' इत्यमरः । रामायावेदितमासमन्तादुक्तम् । कात्स्न्यैनोक्तमित्यर्थः **प्रतिज्ञातं चेति** । चशब्दो भिन्नक्रमः । रामेण च तदा आवेदनानन्तरकाले वालिवधंप्रति प्रतिज्ञातम् । वालिवधप्रतिज्ञा कृते-

वालिनश्च बलं तत्र कथयामास वानरः । सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे ॥ ६३ ॥
राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् । दर्शयामास सुग्रीवो महापर्वतसंनिभम् ॥ ६४ ॥
उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः । पादाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम् ॥ ६५ ॥
बिभेद च पुनः सालान्सप्तैकेन महेषुणा । गिरिं रसातलं चैव जनयन्प्रत्ययं तदा ॥ ६६ ॥

त्यर्थः । भावे क्तः । वानरः सुग्रीवश्च तत्र ऋष्यमूके वालिनो बलम् । 'समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम् । क्रामत्यनुदिते सूर्ये वाली व्यपगतक्रमः' इत्यादिना वक्ष्यमाणं बलमुत्साहवर्द्धनाय कथयामास ॥ ६१ ॥ ६२ ॥

६३] ति० टी०–वालिनश्चेति । तत्र ऋष्यमूकपर्वते । वानरः सुग्रीवो वालिनो बलमरुणोदयानन्तरं सूर्योदयात्प्रागेव रावणं गृहीत्वा चतुःसमुद्रलङ्घनादिरूपं कथयामास । किञ्च सुग्रीवो रामो वालितुल्यो न वेति शङ्कितः सञ्जातशङ्क आसीत् ॥ ६३ ॥

रा० टी०–वालिन इति । तत्र च तस्मिन्नपि समये सुग्रीवो वानरः राघवे वीर्येण शङ्कितः अयं वालिवधयोग्यबलो नवेति सन्देहवान् आसीत् । अतएव वालिनः नित्यमेव बलं कथयामास । नित्यमेतेत्यनेन वालिनोऽनवधानताविरहः सूचितः । तस्मिन्नपि समये शङ्कित आसीदित्यनेन बलवद्दोहस्य दुर्निवारत्वं सूचितम् । एकश्चकारोऽप्यर्थे । द्वितीय एवार्थे ॥ ६३ ॥

गो० टी०–सुग्रीवइति । सुग्रीवो राघवे विषये वीर्येण हेतुना नित्यं दर्शनादारभ्य सालभेदनपर्यन्तं मुहुर्मुहुराशङ्कित आसीच्च । अयं वालितुल्यवीर्यो नवेति शङ्कितवानित्यर्थः । नित्यशब्दस्य वीप्सापरत्वं महाभाष्ये " नित्यप्रहसितो नित्यप्रजल्पित " इति । " मतिबुद्धि " इत्यादिसूत्रे शङ्कितादयोऽप्यर्थसिद्धा इति सूचनात् कर्त्तरि निष्ठा ॥ ६३ ॥

६४] ति० टी०–राघवेति । राघवस्य वालिमहाबलत्वे विश्वासार्थमुत्तमं बलप्रत्यायनोत्तमसाधनं महापर्वतसदृशं दुन्दुभेर्दैत्यस्य शरीरं दर्शयामास । यस्य काय इदानीमेतादृशस्तादृशो दुन्दुभिर्वालिना हत्वैतावदूरं प्रक्षिप्त इत्युक्त्वा दर्शयामासेत्यर्थः ॥ ६४ ॥

रा० टी०–राघवेति । सुग्रीवः राघवप्रत्ययार्थं वालिमहाबलत्वे राघवविश्वासार्थमेव महापर्वतसन्निभं महापर्वततुल्यं दुन्दुभेः वालिनिहतदुन्दुभिनामासुरस्य उत्तमं बलप्रत्यायने परमं निमित्तं कायं शरीरं दर्शयामास । तुशब्द एवार्थे ॥ ६४ ॥

गो० टी०–राघवेति । तुशब्दो विशेषवाची । न केवलं शङ्कितोऽभूत् । किंतु प्रत्ययार्थमन्यदर्शयामास चेत्यर्थः । राघवप्रत्ययार्थं रामविषयज्ञानार्थम् । रामबलविज्ञानार्थमित्यर्थः । रामविषयविश्वासजननार्थमिति वा । ' प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु ' इत्यमरः । दुन्दुभेः दुन्दुभ्याख्यस्य वालिहतस्यासुरस्य उत्तममशिथिलमतएव महापर्वतसन्निभम् । उत्तमसुव्रतं वा कायं कायाकारास्थि दर्शयामास । रामायेति शेषः । वाली एतदस्थिपादाग्रेऽन्यस्य ऊर्ध्वं क्षिपतीत्युक्त्वा दर्शयामासेत्यर्थः ॥ ६४ ॥

६५] ति० टी०–उत्स्मयित्वेति । बाहुलकात्स्वार्थे णिच् । ईषत्स्मितं कृत्वा ॥ ६५ ॥

रा० टी०–उत्स्मयित्वेति । महाबाहुः आजानुबाहुः महाबलो रघुनाथः अस्थि प्रेक्ष्य तदस्थिसमूहं दृष्ट्वा उत्स्मयित्वा उत्स्मित्य च पादाङ्गुष्ठेन संपूर्णं तदस्थि दशयोजनं चिक्षेप । उत्स्मयित्वेत्यनेन दृष्ट्वापि नित्यम्वसखं मां न विजानातीति हेतुर्व्यञ्जितः । पादाङ्गुष्ठेनेत्यनेनोत्क्षेपणे श्रमाभावः सूचितः । उत्स्मयित्वेत्यत्र आर्षोऽल्यबभाव इडागमश्च । उत्स्मयित्वेत्यत्र बाहुलकात् स्वार्थे णिजिति भट्टाद्युक्तिश्चिन्त्या । रूपासिद्धेः ॥ ६५ ॥

गो० टी०–उत्स्मयित्वेति । महाबलः अपरिमेयबलः । महाबाहुः बलानुगुणकार्यकरणसमर्थभुजः रामः अस्थि प्रेक्ष्य उत्स्मयित्वा कियन्मात्रमेतदित्यनादृत्य स्मित्वा । इडार्षः । पादाङ्गुष्ठेन सम्पूर्णमन्यूनं दशयोजनम् । पात्रादित्वात्समाहारे ङीबभावः । अत्यन्तसंयोगे द्वितीया । उच्चिक्षेप उद्यम्य चिक्षेप । " व्यवहिताश्च " इति उपसर्गस्य व्यवहितप्रयोगः । वालिना पादेन क्षिप्तम् । रामेण तु पादाङ्गुष्ठेन उत्क्षिप्यते । तेन द्वे धनुःशते । अनेन दशयोजनमिति विशेषः ॥ ६५ ॥

६६] ति० टी०–बिभेदेति । पुनश्च प्रत्ययं जनयन्स्वबलविश्वासमुत्पादयन् । हेतौ शता । फलमपि हेतुः । तदैकेनैव महेषुणा सकृत्प्रयोगेणैव सप्तसालान्सप्तसालवृक्षांस्तत्समीपस्थं गिरिं पर्वतं रसातलं षष्ठमधोलोकं च बिभेद । अतलवितलसुतललतलातलमहातलरसातलपाताला इति सप्ताधो लोकाः । एकसालमात्रभेदनेऽस्य वालिसाम्यशङ्का जायेत तन्निवृत्त्यर्थमनुक्तानामपि शा (रसात) लगिरिप्रस्थादीनां भेदनमिति मन्तव्यम् ॥ ६६ ॥

रा० टी०–बिभेदेति । तदा तस्मिन्काले पुनः सप्त सप्तसंख्याकान् शालान् वृक्षविशेषान् गिरिं तत्समीपस्थपर्वतं च रसातलं पृथिव्यधोभागवर्तिसप्तलोकांश्च एकेन सकृत्प्रयोगविशिष्टेनैव महेषुणा समाधिकरहितप्रभावविशिष्टबाणेन प्रत्ययं जनयन्सुग्रीवविश्वासमुत्पादयितुं रघुनाथः बिभेद । हेत्वर्थकः शतृप्रत्ययः । एतेन रामबाणसदृशः रामबाण एवेति अनन्वयालङ्कारो ध्वनितः ॥ ६६ ॥

गो० टी०–चिरं युद्धपरिश्रान्तेन वालिना आर्द्रं शरीरं प्रक्षिप्तम् । त्वया तु स्वस्थेन शुष्कमित्यनाश्वसन्तं प्रति प्रत्ययान्तरमकरोदित्याह—बिभेदेति । अत्र राम इत्युपजयते । पुनश्च सप्त सालान् सर्जकतरून् तत्समीपस्थं गिरिं रसातलमधोलोकेषु षष्ठलोकं च प्रत्ययं विश्वासं जनयन् प्रत्ययजननार्थम् । " लक्षणहेत्वोः " इति शतृप्रत्ययः । एकेन महेषुणा बिभेद । महे-

ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः । किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ ६७ ॥
ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः । तेन नादेन महता निर्जगाम हरीश्वरः ॥ ६८ ॥
अनुमान्य तदा तारां सुग्रीवेण समागतः । निजघान च तत्रैनं शरेणैकेन राघवः ॥ ६९ ॥
ततः सुग्रीववचनाद्धत्वा वालिनमाहवे । सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥ ७० ॥
स च सर्वान्समानीय वानरान्वानरर्षभः । दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥ ७१ ॥

हेयुणेत्यनेन सुग्रीवकार्यसाधनाय रामेण तप्तपरशुधारणं कृतमिति ध्वन्यते ॥ ६६ ॥

६७] ति० टी०–तत इति । ततः सालभेदानन्तरं तनातिदुष्करेण कर्मणा वालिवधे विश्वासं प्राप्तः प्रीतमनाः कपिराज्यलाभोऽचिरादेवेति सन्तुष्टमनाः महाकपिः सुग्रीवः किष्किन्धाख्यां गुहां रामसहितो जगाम ॥ ६७ ॥

रा० टी०–तत इति । ततः शालभेदानन्तरं स महाकपिः सुग्रीवः तेन दुरूहबाणकर्मणा प्रीतमनाः प्रसन्नचित्तः विश्वस्तः वालिकर्मकवधयोग्योयमिति विश्वासं प्राप्तश्चासीदिति शेषः । तदा तस्मिन्काले रामसहितः सन् किष्किन्धां तदाख्यां गुहां जगाम विवेश । प्रीतमना इत्यनेन रघुनाथसदृशो न कश्चिद्धलवानिति निश्चयो जात इति हेतुर्ध्वनितः ॥ ६७ ॥

गो० टी०–ततइति । ततः सालादिभेदनानन्तरं तेनातिमानुषचरित्रेण विश्वस्तः अयमवश्यं वालिहननक्षम इति विश्वासं प्राप्तः प्रीतमनाः अचिरादेव राज्यं लप्स्ये इति सन्तुष्टचित्तः महाकपिः आत्मानं कपिराजं मन्यमानः स सुग्रीवः रामसहितः सन् तदा तस्मिन्नेव काले किष्किन्धां किष्किन्धाख्यां गुहां गुहावत्पर्वतमध्यवर्तिनीं पुरीं जगाम । चकारेण पुनर्गमनं समुच्चीयते ॥ ६७ ॥

६८] ति० टी०–तत इति । हरिवरः कपिश्रेष्ठोऽगर्जत्सिंहनादं कृतवान् । हरीश्वरो वाली ॥ ६८ ॥

रा० टी०–ततइति । ततो गुहागमनानन्तरं हेमपिङ्गलः सुवर्णवर्णसदृशवर्णः हरिवरः सुग्रीवः अगर्जत् । सुग्रीववृत्तमुक्त्वा वालिवृत्तमाह–महता अन्यकालिकनादविलक्षणेन तेन तात्कालिकसुग्रीवकृतेन नादेन हरीश्वरो वानरराजो वाली निर्जगाम । हेमपिङ्गल इत्यनेन सुग्रीवस्य शोकजनितवैवर्ण्यध्वंसः सूचितः६८

गो० टी०–ततः किष्किन्धागमनानन्तरं हरिवरः आत्मनः कपिवरत्वनिश्चयवान् हेमपिङ्गलः स्वर्णवत्पिङ्गलवर्णः । हर्षप्रकर्षेण निष्टप्तवैवर्ण्य इत्यर्थः । सुग्रीवो गर्जितानुगुणकण्ठध्वनिः अगर्जत् घोषं चकार । महता पूर्वगर्जितविलक्षणेन तेन नादेन हेतुना हरिवरो वाली गृहान्निर्जगाम ॥ ६८ ॥

६९–७०] ति० टी०–अन्विति । तदाङ्गदमुखादवगतसुग्रीवमित्रत्वेन संयुगनिर्गमनं वारयन्तीं तारां स्वस्त्रियं मयाऽकृतापकारो धर्मज्ञो रामो मह्यं नापकरिष्यतीत्यादिवचनैरनुमान्यानुमतिं प्रापय्य । कृतानुमतिकां कृत्वेति यावत् । सुग्रीवेण सह वाली युद्धाय समागतोऽभवत् । तत्र संयुगे । एनं वालिनम् ॥ ६९ ॥ ततइति । सुग्रीववचनात् 'वालिनं जहि काकुत्स्थ मया बद्धोऽयमञ्जलिः' इत्येवंरूपात्सुग्रीववचनात् । आहवे रणे । प्रत्यपादयत्प्रतिष्ठापितवान् । सुग्रीववचनादित्यनेनानपकारिवालिवधस्यायुक्तत्वेऽपि मित्रापकारित्वेन तदुक्त्या हननमिति ध्वनितम् ॥ ७० ॥

रा० टी०–अनुमान्येति । तदा तस्मिन्काले रामसुग्रीवयोर्मैत्री जातेति श्रूयते अतः स जेतुमशक्य इति प्रतीयते अतस्तत्र न गन्तव्यमिति वदन्तीं तारां स्वस्त्रियमनुमान्य धर्मात्मा राघवोऽनपराधिनं मां न हन्तेत्यादिवचनैः सन्तोष्य सुग्रीवेण समागतो वाली युयुधे इति शेषः । अर्थ पृथगन्वयि । निजघानेति । तत्र तस्मिन् आहवे सङ्ग्रामे ततः तस्मात् 'वालिनं जहि काकुत्स्थ' इत्यादिना प्रसिद्धात्सुग्रीववचनात्सुग्रीवप्रार्थनातः एनं वालिनमेकेन शरेण । चकारात्सकृत्प्रयुक्तेन राघवो निजघान भक्तापकारजनितं वालिनो दोषं निवर्तयामास । अतएव निशब्दप्रयोगः । वालिवधौत्तरकालिकं वृत्तमाह । राघवो रघुनाथः वालिनं हत्वा तद्राज्ये वालिराज्ये सुग्रीवमेव प्रत्यपादयत् । संस्थापयामासेत्यर्थः । एवकारेणाङ्गदव्यवच्छेदः । सार्द्धश्लोकः सम्मिलितान्वयः । अत्र राघवसुग्रीवमैत्रीं श्रुत्वापि अनपराधिनं मां राघवो न हन्तेत्युक्तेः । मित्रत्वेन रघुनाथशरीरभूतः सुग्रीव इत्यंशे वालिनोऽज्ञानं सूचितम् । वालिनो दोषं निवर्तयामासेत्यनेन रघुनाथस्य परमदयालुत्वं सूचितम् ॥ ६९ ॥ ७० ॥

गो० टी०–अनुमान्येति । वाली तदा निर्गमनकाले तारामग्र्य वनादागतेनाङ्गदेन सुग्रीवो रामसहायस्तिष्ठतीति कथितम् । अद्य पराजितो निर्गतः पुनरागतः अतस्त्वद्गमनमनुचितमिति वारयन्तीं तारामनुमान्य धार्मिकाग्रेसरो रामः कथं मामनपराधिनं हन्यादिति परिसान्त्व्य सुग्रीवेण समागतः । अयुध्यतेत्यर्थः । राघवः महाकुलप्रसूतत्वेन धर्मसूक्ष्मज्ञः तत्र युद्धभूमौ एनं परेण युद्धकृतमपि वालिनं तदा परेण युद्धकाले । चोवधारणार्थः । एकेन शरेण निजघान । द्वितीयशरप्रयोगे तदाभिमुख्येन तद्बधो दुर्लभ इति भावः । युद्धेऽभिमुखस्य बलं वालिनमेव गच्छतीति वरप्राप्तिद्धिः ॥६९॥ ततइति । सुग्रीववचनात्सुग्रीवप्रार्थनावचनात् । आहवे सुग्रीवस्य युद्धे वालिनं हत्वा ततः वालिवधानन्तरं राघवः तद्राज्ये वालिराज्ये सुग्रीवमेव प्रत्यपादयत् स्थापयामासेत्यर्थः७०

७१] ति० टी०–स चेति । स सुग्रीवः । दिदृक्षुरन्वेषिषुः सर्वान्वानरान्समानीय सर्वा दिशः प्रस्थापयामास ॥७१॥

रा० टी०–राज्यप्राप्त्यनन्तरं सुग्रीवकृत्यमाह–सचेत्या-

ततो गृध्रस्य वचनात्सम्पातेर्हनुमान्बली । शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ ७२ ॥
तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् । ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥ ७३ ॥
निवेदयित्वाऽभिज्ञानं प्रवृत्तिं विनिवेद्य च । समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७४ ॥

दिना । वानरर्षभः वानरराजत्वेनाभिषिक्तः जनकात्मजां दिदृक्षुः सा क्वास्तीति ज्ञातुकामः । दृशिर्ज्ञानसामान्ये । स सुग्रीवः सर्वान्वानरान् चकारादृक्षान्समानीय आहूय दिशः चतस्रः ककुभः प्रस्थापयामास ॥ ७१ ॥

गो० टी०–अथ सुग्रीवस्य प्रत्युपकारं दर्शयति–**सचेति** । वानरर्षभः वानरराजत्वेनाभिषिक्तः स च सुग्रीवोऽपि जनकात्मजां दिदृक्षुः द्रष्टुमिच्छुः सन् सर्वान् नानादेशनिवासिनो वानरान् समानीय आहूय दिशश्चतस्रः प्रति प्रस्थापयामास । शीघ्रं सीतां दृष्ट्वाऽऽगच्छतेति आदिष्टवानित्यर्थः ॥ ७१ ॥

७२] ति० टी०–**तत इति** । गृध्रस्य सम्पातेर्वचनात् ' तस्यां वसति वैदेही दीना कौशेयवासिनी ' इत्येवंरूपात् । पुप्लुव उल्लङ्घितवान् । इतः सुन्दरकाण्डकथासङ्ग्रहः ॥ ७२ ॥

रा० टी०–सुन्दरकाण्डवृत्तमाह–**ततइत्यादिभिः** । ततः प्रस्थानानन्तरं बली अपरिमेयपराक्रमो हनुमान् सम्पातेः तन्नामकगृध्रस्य वचनात्सागरान्तर्लङ्कायां सीताऽस्तीति तं तरत तां द्रक्ष्यथ इत्याद्याकारकाच्छतयोजनविस्तीर्णं लवणार्णवं लवणसमुद्रं पुप्लुवे उल्लङ्घे । अत्र बलीत्यनेन सर्वकार्यसिद्धिं कर्त्ताऽयमिति ध्वनितम् । नच पुप्लुवे लवणार्णवमित्यत्र प्लुधातोरुत्तरदेशसंयोगानुकूलव्यापारार्थकत्वेन लवणार्णवस्य संयोगाश्रयत्वाभावेन कर्मत्वानापत्तिरिति वाच्यम्। समुद्रशब्दस्य लक्षणया समुद्रोत्तरतीरपरतया तस्य संयोगाश्रयत्वेनाऽदोषात् । वस्तुतस्तु अधोदेशसंयोगाभावानुकूलोत्तरदेशसंयोगानुकूलव्यापारः प्लवतेरर्थः । एवं च अधोदेशसंयोगाभावरूपफलाश्रयत्वाल्लवणार्णवस्य कर्मत्वम् । उत्तरदेशस्य धात्वर्थकुक्षिप्रविष्टत्वान्न द्विकर्मकत्वम् । उत्तरदेशसंयोगानुकूलव्यापारार्थकत्वेन लक्षणया लवणार्णवं पुप्लुव इत्यादेर्निर्वाहेऽपि गच्छतिप्लवत्योः पर्यायतापत्त्या ग्रामकर्मकजिगमिषायां ग्रामं गच्छतीत्यादिवद्ग्रामं प्लवत इत्यस्यापत्तिः । प्लुधातुसमभिव्याहृतकर्मणि लक्षणैवेत्यत्र तु न विनिगमकम् । किञ्च ग्रामपार्श्वेन ग्रामोत्तरदेशसंयोगेऽपि ग्रामं प्लवत इति प्रयोगापत्तिरिति दिक् ॥ ७२ ॥

गो० टी०–ततः सुन्दरकाण्डकथां **संगृह्णाति–ततइति** । ततः प्रस्थानानन्तरं बली अपरिच्छेद्यबलः । भूमार्थे मत्वर्थीयः । हनुमान् प्रशस्तहनुः । अन्वर्थसंज्ञेयम् । तथा चेन्द्रो वक्ष्यति ' मत्करोत्सृष्टवज्रेण हनुस्तस्य तदा क्षतः । नाम्नैष हरिशार्दूलो भविता हनुमानिति ' । आभ्यां पदाभ्यां पूर्वकथाप्रस्तावेन जाम्बवता कृतोत्साहत्वम् । तदुद्भूतनिरवधिकबलवत्त्वं च द्योत्यते । सम्पातेः सम्पातिनामकस्य जटायुर्ज्येष्ठस्य पक्षिणो वचनात् । इतः शतयोजनात्परे समुद्रमध्ये लङ्कायां सीता वर्त्तते । ' तरे समुद्रं तां पश्यसि ' इतिवचनात् । शतयोजनविस्तीर्णं लवणार्णवं पुप्लुवे । प्लुत्वा ततारेत्यर्थः ॥ ७२ ॥

७३] ति० टी०–**तत्रेति** । अशोकवनिकां गतां प्रमदवनस्थितां ध्यायन्तीम् । राममिति शेषः ॥ ७३ ॥

रा० टी०–**तत्रेति** । तत्र समुद्रतरणानन्तरकाले रावणपालितां लङ्कां पुरीं समासाद्य प्राप्य अशोकवनिकां गतां रावणेन स्थापितां ध्यायन्तीं रामं स्मरन्तीं सीतां हनुमान्ददर्श । अशोकवनिकां गतामित्यनेन सीताशोकध्वंसो द्रुतं भवितेति ध्वनितम् ॥ ७३ ॥

गो० टी०–**तत्रेति** । हनुमान् रावणपालितां लङ्कां समासाद्य तत्र लङ्कायामशोकवनिकामन्तःपुरोद्यानं गतां ध्यायन्तीं राममेव नैरन्तर्येण स्मरन्तीं सीतां ददर्श ॥ ७३ ॥

७४] ति० टी०–**निवेदयित्वेति** । अभिज्ञानमङ्गुलीयकरूपम् । प्रवृत्तिं रामसुग्रीवसख्यादिसर्ववृत्तान्तम् । समाश्वास्य राघवस्य सर्वोऽपि व्यापारस्तत्प्रत्यापत्त्येकफलक इत्यादिनत्वकथनेन वैदेहीं समाश्वास्य । ' गृहीत्वा प्रत्यभिज्ञानम् ' इति पाठे प्रत्यभिज्ञानं सीतालक्कस्थितचूडामणिरूपम् । तोरणमशोकवनिकागतप्रासादबहिर्द्वारसन्निवेशम् । चकारादशोकवनं च मर्दयामास ॥ ७४ ॥

रा० टी०–**निवेदयित्वेति** । अभिज्ञानं रामप्रेषितोऽयमिति बोधकं रघुनाथदत्ताङ्गुलीयकं निवेदयित्वा वैदेह्यै दत्त्वा प्रवृत्तिं सुग्रीवमैत्रीकरणादिवृत्तान्तं च निवेद्य कथयित्वा चकारात्सीतैकवेद्यरघुनाथाङ्कचिह्नं बोधयित्वा वैदेहीं च समाश्वास्य रामः शीघ्रमागन्तेति प्रतिबोध्य तोरणमशोकवनिकाबहिर्द्वारं मर्दयामास दध्वंसे ।' तोरणोऽस्त्री बहिर्द्वारम् ' इत्यमरः । किञ्च निवेत् परमवक्ता हनुमान् अभिज्ञानं मुद्रिकामयित्वा । प्रापय्येत्यर्थः। अन्यत्पूर्ववत्। आख्यानार्थकणिजन्तानिपूर्वकविधातोः क्विपा सिद्धं निवेदिति । अत्रार्थे न ल्यबभावे क्लेशकल्पना तत्प्रसक्तिविरहात् ॥ ७४ ॥

गो० टी०–**निवेदयित्वेति** । ततो हनुमान् अभिज्ञानमङ्गुलीयकरूपं रामचिह्नं निवेदयित्वा समर्प्य । अनित्यत्वात्समासेऽपि ल्यबभावः । अतएवाह न्यासकारः वाछन्दसीति वक्तव्ये क्त्वापि छन्दसीति वचनमसमासेऽपि ल्यर्थम् । तेनार्च्यदेवानागत इति सिद्धमिति । अनेन व्यभिचारेण समासे ल्यब्विधेरनित्यत्वं सिद्धमेव । प्रवृत्तिं सुग्रीवसख्यकरणसेनासमूहीकरणप्रभृतिरामागमनवृत्तान्तं 'वार्त्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः । चकारात् 'नैव दंशान्न मशकान्न कीटान्न सरीसृपान् । राघवोपनयेद्वात्रात्त्वद्गतेनान्तरात्मना' इति रामस्य सीतैकपरायणत्वादिकं समुच्चीयते । निवेद्य उक्त्वा च वैदेहीं समाश्वास्य सख्यस्ते कान्तः

पञ्च सेनाग्रगान्हत्वा सप्त मन्त्रिसुतानपि । शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥ ७५ ॥
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् । मर्षयन्राक्षसान्वीरो यन्त्रिणस्तान्यदृच्छया ॥ ७६ ॥
ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् । रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥ ७७ ॥
सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् । न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ ७८ ॥

समागमिष्यतीति सान्त्वयित्वा तोरणमशोकवनिकाबहिर्द्वारं मर्दयामास । ' तोरणोऽस्त्री बहिर्द्वारम् ' इत्यमरः ॥ ७४ ॥

७५] ति० टी०–पञ्चेति । सेनाग्रगाः सैन्यपतयः पिङ्गलनेत्रप्रभृतयः मन्त्रिसुता जम्बुमाल्यादयः । अक्षं रावणसुतं निष्पिष्य चूर्णीकृत्य ग्रहणमिन्द्रजित्प्रयुक्तब्रह्मास्त्रकृतबन्धनं समुपागमत्प्राप्तः ॥ ७५ ॥

रा० टी०–पञ्चेति । सेनाग्रगान्सेनापतीन् पिङ्गलनेत्रादीन् पञ्च सप्त मन्त्रिसुतान् जम्बुमाल्यादीनपि शूरं शौर्यविशिष्टमक्षं रावणसुतं च निष्पिष्य विनाश्य ग्रहणं मेघनादप्रयुक्तब्रह्मास्त्रबन्धनं समुपागमत् ॥ ७५ ॥

गो० टी०–पञ्चेति । अग्रे गच्छन्तीत्यग्रगाः सेनाया अग्रगाः सेनाग्रगाः । अन्तादिष्वपाठेष्वपि ' अन्यत्रापि दृश्यते ' इति डप्रत्ययः । तान् पञ्च पिङ्गलनेत्रप्रमुखान् जम्बुमालिप्रमुखान्सप्त मन्त्रिसुतानपि हत्वा शरमक्षमक्षकुमारं रावणद्वितीयपुत्रं निष्पिष्य चूर्णीकृत्य ग्रहणमिन्द्रजित्प्रयुक्तब्रह्मास्त्रेण ब्रह्मणो बन्धनं समुपागमत्प्राप्तः ॥ ७५ ॥

७६] ति० टी०–अस्त्रेणेति । मदस्त्रस्यामोघत्वात्तेन बन्धनमात्रं चतुष्पञ्चघटिकानन्तरं पुनर्मोक्ष्यतेति ब्रह्मदत्तवरात् । तावता कालेन ब्रह्मास्त्रमुक्तमात्मानं ज्ञात्वापि यदृच्छया कार्यान्तरप्रसङ्गेन रावणदर्शनापेक्षया । यन्त्रिणो बद्धा नेतॄंस्तान्राक्षसान्प्रति वीरो हन्तुं समर्थोऽपि मर्षयन्क्षमां कुर्वन् । रावणसमीपं प्राप्तवानिति शेषः । ' ममर्ष ' इति वा पाठः ॥ ७६ ॥

रा० टी०–अस्त्रेणेति । पैतामहाद्ब्रह्मदत्तात् । मदस्त्रादपि ते निर्मुक्तिर्भविष्यतीति वरादात्मानमस्त्रेण उन्मुक्तं ब्रह्मास्त्रबन्धनशून्यं ज्ञात्वा बुद्धा यत्स्वामिकार्यविचारशीलो वीरो हनुमान् यदृच्छया रावणसभागमनहेतुना यन्त्रिणः बद्धा नयनकर्तॄन्राक्षसान्मर्षयंस्तदपरार्धं सहमान आस्तेति शेषः । राक्षसानामपराधतादात्म्यात्कर्मत्वम् । प्रयत्नार्थकयद्धातुप्रकृतिकक्विबन्तो यदिति । यदिति विशेषणोक्त्या रावणसभागमनतद्वचनश्रवणमन्तरा तदभिप्रायो दुर्विज्ञेय इति रावणसभागमने हेतुर्ध्वनितः । तेन रघुनाथसख्यकरणे अनाज्ञापितपरमहितसत्कार्यकारिहनुमत्तुल्यः हनुमानेवेति अनन्वयालङ्कारो ध्वनितः । तेन रघुनाथाश्रितैः हनुमानाश्रयणीय इत्यादेर्यं वस्तु व्यक्तम् ॥ ७६ ॥

गो० टी०–अस्त्रेणेत्यादि । श्लोकद्वयमेकान्वयि । वीरः सुरासुराप्रधृष्यरावणपालितलङ्काप्रधर्षणादिना प्रख्यातवीर्यः । महाकपिः स्वयमक्षत एवानेकराक्षसहननक्षम इत्यर्थः । पैतामहात्पितामहदत्ताद्वरादात्मानं यदृच्छया प्रयत्नं विना अस्त्रेण ब्रह्मास्त्रेण उन्मुक्तं परित्यक्तं ज्ञात्वा यन्त्रिणः आत्मानं रज्जुयन्त्रेण बद्धा इतस्ततः कृषत इत्यर्थः । राक्षसान् मर्षयन् तदपराधान् क्षममाण इत्यर्थः ॥ ७६ ॥

७७] ति० टी०–तत इति । ततो रावणदर्शनादिव्यापारानन्तरं सीतामृते सीतावस्थानप्रदेशं विना लङ्कां दग्ध्वा रामाय प्रियं सीतादर्शनरूपप्रियवार्तामाख्यातुं पुना रामान्तिकं महाकपिर्हनुमानायादागतः ॥ ७७ ॥

रा० टी०–तत इति । ततः स्वविषये रावणकृत्यानन्तरमेव महाकपिः वानरश्रेष्ठः पूजनीयो वानर इति वा । मैथिलीं मैथिलराजप्रादुर्भूतां सीतामृते विना लङ्कां तदाख्यां पुरीं दग्ध्वा सन्दश्य प्रियं रघुनाथपरमाह्लादजनकीभूतसन्देशमाख्यातुं वक्तुं रामाय पुनरायात् " गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि " इति चतुर्थी । प्रियमाख्यातुमित्युक्त्या सीतारघुनाथवृत्तान्तादन्यत् किञ्चित्र हनुमान् स्मरतीति व्यक्तम् । चशब्द एवार्थे ७७

गो० टी०–तत इति । मैथिलीं मिथिलराजसुतां सीतामृते विना कुलप्रभावात्तन्मात्रमदग्ध्वा लङ्कां पुरीं दग्ध्वा रामाय प्रियं सीतादर्शनप्रियमाख्यातुं वक्तुं पुनरायात् ॥ ७७ ॥

७८] ति० टी०–सोऽभीति । प्रदक्षिणं प्रदक्षिणादिमुख्यमुपचारम । महात्मानं परमात्मानम् । अमेयात्माऽपरिच्छेद्यबलबुद्धिधैर्यादिवैभवः । तत्त्वतः । सार्वविभक्तिकस्तसिः । दृष्टा सीतेति तत्त्वं न्यवेदयदित्यर्थः । अत्र दृष्टेति पदस्य प्रथमप्रयोगो रामस्य सीतेति श्रवणे तद्विषयक्रियापदसंशयो माभूदित्यर्थः ॥ ७८ ॥

रा० टी०–रघुनाथप्राप्तिकालिकं हनुमद्वृत्तमाह–सोऽभिगम्येत्यादिना । अमेयात्मा अपरिमितधैर्यबलादिमान्स हनुमान् महात्मानं परमधैर्यवन्तं राममभिगम्य साम्मुख्येन प्राप्य प्रदक्षिणं च कृत्वा । विनापि चं समुच्चयः । तत्त्वतो वस्तुतः सीता मया दृष्टेति न्यवेदयत् सम्यक् कथयामास । प्रदक्षिणं कृत्वेत्यनेन कथनात्पूर्वमाचरणादपि सीतादर्शनं बोधितमिति व्यञ्जितम् । अत्र पूर्वं दृष्टेत्युक्त्या एतदुच्चारणात्पूर्वं सीतापदमात्रश्रवणेन तद्विषयकसंशयो माभूदिति हेतुर्व्यक्तः । परमधैर्यवन्तमित्युक्त्या क्षणांशमपि वियोगानर्हीभूतसीताविवियोगेऽयं प्राणान्कथं धारयतीति हनुमत्सन्देहनिवर्त्तको हेतुः सूचितः । तेन हनुमतः परमाभिज्ञत्वं सूचितम् । तत्त्वत इत्यनेन मायिकसीतादर्शनव्यावृत्तिर्बोधिता ॥ ७८ ॥

गो० टी०–सोऽभिगम्येति । अमेयात्मा अपरिच्छेद्यबुद्धिः स हनुमान् महात्मानं सीताविवियोगज्वरेऽप्यवार्यधैर्यं राममभिगम्य आभिमुख्येन प्राप्य । अनेन हनुमतः कृतकार्यत्वं बो-

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः । समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥ ७९ ॥
दर्शयामास चात्मानं समुद्रः सरितां पतिः । समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ ८० ॥
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे । रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ८१ ॥
तामुवाच ततो रामः परुषं जनसंसदि । अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ८२ ॥

तितम् । प्रदक्षिणं च कृत्वा सीता तत्त्वतो यथावद्दृष्टेति न्यवेदयत् अकथयत् । सीता दृष्टेति वक्तुं शक्यत्वेपि दृष्टा सीतेत्युक्तिः रामस्य सीतादर्शनजीवनादिविषयसंशयो माभूदिति वदन्ति । अन्ये त्वदृष्टेति प्रतिभासेतेति दृष्टेत्युक्तमिति । अपरे तु सन्तोषातिशयप्रकटनाय प्रथमं कृतकार्यनिर्देश इति ॥ ७८ ॥

७९] ति० टी०–तत इति । ततो युद्धकाण्डकथासङ्ग्रहः । क्षोभयामास । लङ्कागमनमार्गदान औदासीन्यात्समुद्रमापातालमाकुलीचकारेत्यर्थः ॥ ७९ ॥

रा० टी०–सुन्दरकाण्डवृत्तं समाप्य युद्धकाण्डवृत्तमाह–तत इत्यादिभिः । ततो हनुमद्वाक्यश्रवणानन्तरम् । सुग्रीवसहितो रघुनाथः महोदधेः समुद्रस्य तीरं गत्वा प्राप्य आदित्यसन्निभैः आदित्यप्रकाशकैः शरैर्बाणैः समुद्रं क्षोभयामास आपातालमाकुलीचकार । एतेन बाणव्यापारात्पूर्वं लङ्कामार्गदाने समुद्रस्यानवधानता सूचिता ॥ ७९ ॥

गो० टी०–अथ युद्धकाण्डकथां संगृह्णाति–ततइत्यादि । ततः हनुमद्वाक्यश्रवणानन्तरं सुग्रीवसहितः सन् महोदधेः शतयोजनविस्तीर्णसिन्धोस्तीरं गत्वा आदित्यसन्निभैः शरैः समुद्रं क्षोभयामास आपातालमाकुलीचकार ॥ ७९ ॥

८०] ति० टी०–दर्शयामासेति । समुद्रः । शरक्षोभित इति शेषः । समुद्रवचनात् 'एष सेतुं महोत्साहः करोतु मयि वानरः । तमहं धारयिष्यामि ' इत्येवंरूपान्नलं सेतुमकारयत् । नलेन सेतुं कारितवानित्यर्थः ॥ ८० ॥

रा० टी०–दर्शयामासेति । प्राप्तक्षोभानन्तरम् । एवोनन्तरार्थकः । सरितां पतिः समुद्रः आत्मानं स्वस्वरूपं दर्शयामास । चकारात्स्वापराधक्षमापनवचनं समुच्चारयामास । रामः समुद्रवचनात् समुद्रप्रार्थनातः । चकारात्स्वाश्रितकल्याणाय स्वाचरितमूचनार्थं नलं सेतुमकारयत् नलेन सेतुं रचयामास । नलस्य कर्मत्वं " हकोरन्यतरस्याम् " इति विहितम् । स्वाश्रितकल्याणायेत्यनेन रघुनाथस्य परमदयालुत्वं सूचितम् ॥ ८० ॥

गो० टी०–दर्शयामासेति । सरितां नदीनां पतिः । अनेन रामकोपशान्तये कालिय इव समुद्रः सपत्नीकः समागत इति ध्वन्यते । समुद्रः आत्मानं निजरूपं दर्शयामास । रामायेति शेषः । समुद्रवचनादेव नलं सेतुमकारयच्च नलेन सेतुं कारयामास । "हकोरन्यतरस्याम् " इति प्रयोज्यकर्तुः कर्मत्वम् ॥ ८० ॥

८१] ति० टी०–तेनेति । तेन सेतुना । आहवे युद्धे । अत्र कश्चिन्मध्ये 'अभ्यषिञ्चत्' इत्यादिश्लोकद्वयम्—'अभ्यषिञ्चत्सलङ्कायां राक्षसेन्द्रं विभीषणम्। कर्मणा तेन महता देवा इन्द्रपुरोगमाः ॥ सदेर्षिगणास्तुष्टा राघवं तेऽभ्यपूजयन् । तथा परमसन्तुष्टैः पूजितः सर्व दैवतैः॥' लङ्कायां राज्ये राक्षसेन्द्रं तत्त्वव्यवहारविषयो भवति यथा तथाऽभ्यषिञ्चत् । तेन कर्मणा रावणहननादिरूपेण । सदेर्षिगणा देर्षिसहिता गणाः । अर्थादृषिगणास्तत्सहिता देवा इत्यर्थः । तदिदं श्लोकद्वयम् । 'पूजितः सर्वदैवतैः। अभिषिच्य च' इत्यनेन पुनरुक्तमिति प्रक्षिप्तमेव बोध्यम्। सीतां प्राप्यानु पश्चात्परां व्रीडां रक्षोगृहे चिरोषितां पुनर्गृहीतवानिति लोकापवादशङ्क्यातिशयितां लज्जामुपागमत् ॥ ८१ ॥

रा० टी०–सेतुबन्धनौत्तरकालिकं वृत्तमाह–तेनेत्यादिना । रामः तेन स्वकारितेन सेतुना लङ्कां पुरीं गत्वा प्राप्य आहवे तत्रत्यसंग्रामे रावणं हत्वा परां लक्ष्म्यादिश्रेष्ठां सीतामनुप्राप्य सम्यक् स्वीकृत्य व्रीडामिन्द्रादिसाहाय्यकारकरघुकुलोद्भवो वानरसाहाय्येन स्वपरिग्रहं प्राप्त इति वानरप्रभावानभिज्ञजना वदिष्यन्तीति लज्जाभासमुपागमत् प्राप । अत्र व्रीडां प्रापेत्युक्त्या रघुनाथस्य परममर्यादापालकत्वं व्यक्तम् ॥ ८१ ॥

गो० टी०–तेनेति । रामस्तेन सेतुना लङ्कां पुरीं गत्वा आहवे युद्धे रावणं हत्वा सीतां प्राप्य अनु पश्चात् परामतिशयितां व्रीडां लज्जामुपागमत् पौरुषनिर्वहणाय रिपुहननपूर्वकं सीता पुनः प्राप्ता । परगृहस्थितां कथमङ्गीकरिष्यामीति लज्जितोऽभूदित्यर्थः ॥ ८१ ॥

८२] ति० टी०–तामिति । जनसंसदि वानरराक्षससभायां परुषं मर्मस्पृक् । ' दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम् ' इत्यादिवचनमुवाच । लोकस्य नास्यां रामस्य कामादिदोषतः पुनर्जिघृक्षास्तीति प्रत्यायनार्थम् । अमृष्यमाणा पातिव्रत्यसंशयजनितमुक्तवचनम् । सतीत्यनेन पातिव्रत्यबलाल्लिङ्गेच्छयाग्निप्रादुर्भावनशक्तिमत्त्वद्योतनमिति केचित् । लक्ष्मणप्रादुर्भावितो ज्वलन इत्यन्ये ॥ ८२ ॥

रा० टी०–तामिति । ततोऽनन्तरं जनसंसदि वानरादिसभामध्ये तां सीतां रामः परुषं वक्तुमनर्हं वचः उवाच । जनसंसदीत्यनेन परुषोक्तिर्न स्वाभिप्रेतेति ध्वनितम् । सती सतीभिः पतिव्रताभिः ईयते मनसा प्राप्यते । स्वसतीत्वनिर्वाहार्थं नित्यं स्मर्यत इत्यर्थः । किञ्च सतीनां ईः सम्पत्तिर्यस्याः सा । सतीनां परमदेवतेत्यर्थः । पूर्वान्तवद्भावेन ङ्यन्तत्वात्सुलोपः । सा लक्ष्म्यादिपरा सीता अमृष्यमाणा अन्यप्रत्ययार्थं वचोऽन्यार्थमसहमाना ज्वलनं प्राकृतवह्नित्वेन जनैः प्रतीयमानं विवेश स्वस्वरूपभूततेजसि तस्थौ । अतएव सतीत्यनेन अमृष्यमाणा इत्यस्य न विरुद्धत्वम् । एतेन सीतारामयोः परमचतुररसिकशिरोमणित्वं ध्वनितम् ॥ ८२ ॥

ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् । कर्मणा तेन महता त्रैलोक्यं सचराचरम् ॥ ८३ ॥
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः । बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः ॥ ८४ ॥
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् । कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८५ ॥

गो० टी०–तामिति । ततः व्रीडाप्राप्तेर्हेतोः । 'यत्तद्यतस्ततो हेतौ' इत्यमरः । तां तादृशपातिव्रत्यां सीतां जनसंसदि देवादिसभायां परुषं वचनमुवाच । "अकथितं च" इति द्विकर्मकत्वम् । जनसंसदीत्यनेन प्रत्ययोत्पादनार्थं शपथं कुर्विति सूचितम् । सती पतिव्रता सीता अमृष्यमाणा रामोक्तपरुषवचनमसहमाना ज्वलनं लक्ष्मणानीतमाग्निं विवेश ॥ ८२ ॥

८३-८४]ति० टी०–तत इति। अग्निवचनात् 'विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव'इत्येवंरूपात्। विगतकल्मषां निष्पापां स्वयं ज्ञात्वा लोकस्य च तथात्वं प्रत्याय्य । सीतामङ्गीचकारेति शेषः । क्वचित्तु ' अयंहीदमलं रामो वचनाच्च गुरोस्तदा ' इति पठ्यते । तत्रामलामिति पुनरुक्तमापद्यते ॥ ८३ ॥ सदेवर्षीति। तेन कर्मणा सीताप्रत्यानयनान्तेन कर्मणा । ऋषिदेवगणसहितं चराचरप्रजासहितं त्रैलोक्यं तुष्टं तुतोष । तत्सन्तोषेण च प्रहृष्टसन्तोषवशादेव सर्वदैवतैः पूजितश्च रामो बभौ । अत्र केचिच्चराणां वृक्षादीनां रावणकृतपीडापरिज्ञानाभावेन रावणवधजन्यसन्तोषभावादेवं व्याचक्षते—' देवऋषिगणम् ' इति पाठः । " ऋत्यकः " इति प्रकृतिभावः । तत्र देवगणा इन्द्रादयः , ऋषिगणा विश्वामित्रादयः । एतदूपं यत्त्रैलोक्यं सचराचरम् । अत्र चरप्रजा गतिभक्षणमात्रप्रधानास्तिर्यक्स्रोतसः पशुपक्ष्यादय ऐगवतादयः । अचरप्रजाश्चरप्रजाभिन्नाज्ञानयुक्तप्रजा अवाक्स्रोतसो मनुष्याः । एवं च स्वस्वशेषतिर्यगवाक्स्रोतोयुतं देवर्षिगणरूपं त्रैलोक्यं तुष्टम् । रावणस्य मर्त्योपेक्षित्वात्प्राधान्येन देवर्षिग्रहणमित्याहुः ॥ ८४ ॥

रा० टी०–ततइति । ततः ज्वलनप्रवेशानन्तरम् । अग्निवचनात् ' विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव ' इत्याद्याकारकात् । विगतकल्मषां कल्मषसंबन्धशून्यां सीतां ज्ञात्वा जनान् बोधयित्वा । स्वीचकारेति शेषः । महता अतिप्रशंसनीयेन तेन सर्वप्रतीतिजनकेन महात्मनः सर्वश्रेष्ठस्य राघवस्य कर्मणा सदेवर्षिगणं देवर्षिगणसहितं सचराचरं चराचरसहितं त्रैलोक्यं तुष्टं सन्तोषं प्राप्तमासीत् । अतएव सर्वदैवतैः निखिलसुरैः पूजितः । अतएव सम्प्रहृष्टः परमहर्षं प्राप्तो रामः बभौ शुशुभे । श्लोकद्वयं सम्मिलितान्वयि । विगतकल्मषां बोधयित्वेत्यनेन रामस्य लोकापवादभीरुत्वं बोधितम् । तेन रघुनाथे सौशील्यगुणो व्यक्तः । सर्वदैवतैः पूजितस्तर्हि मनुष्यादिभिः पूजित इति किं वक्तव्यमिति काव्यार्थापत्तिरलङ्कारो व्यक्तः । ज्ञात्वेत्यत्रान्तर्भावितण्यर्थः ॥ ८३ ॥ ८४ ॥

गो० टी०–'ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् । बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः' इति क्रमः। अन्यस्तु लेखकप्रमादकृतः । ततः अग्निप्रवेशानन्तरमग्निवचनात्सीतां विगतकल्मषां करणत्रयेपि दोषगन्धरहितां ज्ञात्वा रामः सम्प्रहृष्टः सन् बभौ सर्वदैवतैः पूजितश्च बभूव । अहो रामस्य धर्मापेक्षितेति स्तुतोऽभूदित्यर्थः ॥ ८३ ॥ कर्मणेति । महात्मनो महास्वभावस्य राघवस्य तेन कर्मणा रावणवधेन सचराचरं स्थावरजङ्गमसहितं सदेवऋषिगणं त्रैलोक्यं त्रिलोकी । स्वार्थे ष्यञ् । तुष्टं सन्तुष्टमासीत् । स्थावरस्य सन्तोषः पल्लवोद्गमादिनाऽवगम्यते । ' अन्तःसंज्ञा भवन्त्येते ' इति विष्णुपुराणम् ॥ ८४ ॥

८५]ति० टी०–अभिषिच्येति। राक्षसेन्द्रं भावितस्वव्यवहारविषयम् । कृतकृत्यः प्राक्प्रतिज्ञातविभीषणाभिषेकलक्षणकृत्यस्यापि कृतत्वात्कृतकृत्यः । अत एव विज्वरो विगतावश्यकर्तव्यविषयचिन्तातापः । प्रमुमोदेति च्छान्दसं परस्मैपदम् ८५

रा० टी०–सिंहावलोकनन्यायेन सीतासमागमनात् पूर्वकालिकं विभीषणराज्याभिषेकं प्रदर्शयन् रघुनाथवृत्तमाह–अभिषिच्येत्यादिना। तदा सीतासमागमात्पूर्वस्मिन्काले राक्षसेन्द्रं राक्षसनिष्टस्वतानिरूपितस्वामितायोग्यं विभीषणं लङ्कायामभिषिच्य यथाविधि राज्याभिषेकं कारयित्वा । चकारात् विभीषणकृतसत्कृतिं प्राप्य । अतएव कृतकृत्यः कृतं निष्पादितं कृत्यं कर्त्तव्यं ब्रह्मादिप्रार्थनया स्वीकृतं राक्षसनिवर्त्तकत्वादि येन सः । अतएव विज्वरः विगतः ज्वरः सज्जनस तापा यस्मात्स रामः प्रमुमोद प्रमोदं प्राप । ह इति विभीषणप्रमोदद्योतकम् । अनुदात्तेत्वप्रयुक्तात्मनेपदस्यानित्यत्वात्परस्मैपदम् । वौ पक्षिणि जटायुषि ज्वरः पश्चात्तापो यस्येत्यपि विज्वरशब्दार्थं वर्णयन्ति गोविन्दाचारिणः । अप्रकृतत्वात् रघुनाथदर्शनजन्यप्राप्तपुरुषार्थकत्वेन शोकानर्हत्वाच्च एतद्विवरणीभूतयुद्धकाण्डे तत्स्थानदर्शनरूपप्रकरणेऽपि रामकर्तृकज्वरस्यावर्णनाच्च। " तेषां सर्वेषु लोकेषु कामचार " इत्यादिश्रुतिबोधितसर्वलोकगमनसामर्थ्यविशिष्टप्राप्तपरमपुरुषार्थदशरथसखजटायुपस्तेनसहागमनसम्भवाच्च न तद्व्याख्यातमस्माभिः ॥ ८५ ॥

गो० टी०–अभिषिच्येति । यद्यपि सीतासमागमात् पूर्वं विभीषणाभिषेकः तथाप्यत्र क्रमो न विवक्षित इति ज्ञेयम् । रामः विभीषयतीति विभीषणस्तम् । नन्यादित्वाल्ल्युः । शत्रुभयङ्करमित्यर्थः । लङ्कायां चाभिषिच्य समुद्रतीरेऽभिषेकः समुचीयते । यद्वा चोऽवधारणार्थः । अभिषिच्यैव कृतकृत्यो न तु रावणं हत्वैव । लङ्कायां विभीषणमभिषिच्य लुहिवनं छित्त्वा सहकारं स्थापयित्वेतिवत् । यद्वा चोन्वाचये । प्रधानतयाऽपवर्गमनुगृह्यानुषङ्गिकतया राज्येऽभिषिच्येत्यर्थः । ' शरीरारोग्यमर्थाश्च भोगांश्चैवानुषङ्गिकान् । ददाति ध्यायतां पुंसामपवर्गप्रदो हरिः ' इति वचनात्। अभिषिच्य तदा रामः अभिषेकात्पूर्वं कथं स्यादिति विवर्णोऽभूत् । अथ रमणीयोऽभूत् तदा रामो रामोऽभूत् । विज्वरः भरतो

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् । अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥ ८६ ॥
भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः । भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ॥ ८७ ॥
पुनरारुह्यायिकां जल्पन्सुग्रीवसहितस्तदा । पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥ ८८ ॥
नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः । रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ८९ ॥

यथा राज्यं न स्वीकृतवान् तथायमपि चेत् किं कुर्यामिति पूर्वं ज्वरोऽभूत् । स इदानीं निवृत्त इत्यर्थः । यद्वा नागपाशप्रभृतिषु 'यन्मया न कृतो राजा राक्षसानां विभीषणः । तच्च मिथ्याप्रलप्तं मां प्रधक्ष्यति न संशयः ' इति । योऽयमन्तस्तापः स इदानीं निवृत्त इत्यर्थः । न केवलं विज्वरः प्रमुमोद च प्रकर्षेण मोदं प्राप्तश्च । चक्षिङो ङित्करणादनित्यमनुदात्तेत आत्मनेपदत्वम् । अतोऽत्र परस्मैपदप्रयोगः । अनेन रामस्य रावणवधसीताप्राप्ती आनुषङ्गिकफले । स्वाश्रितविभीषणाभिषेचनमेव परमपुरुषार्थ इत्यवगम्यते । यद्वा वौ पक्षिणि जटायुषि ज्वरो यस्य सः । यथा लोके कस्यचित्पुत्रस्योत्सवे कथंचिन्मोदमानोऽपि पिता पूर्वातीतपुत्रस्मरणात् सन्तप्त एव भवति । एवं सर्वलोकपिता स्वामी च विभीषणाभिषेकसमये विनाभिषेकमतीतं जटायुषं स्मरन् किंचिदन्तस्तापोपपन्न एव मुमुदे इत्यर्थः । यद्वा विज्वर इत्यनिष्टनिवृत्तिरुक्ता । प्रमुमोदेतीष्टप्राप्तिः । हेति प्रसिद्धौ विस्मये वा । हन्त रामस्य सत्यप्रतिज्ञत्वमित्यर्थः ॥ ८६ ॥

८६] ति० टी०–देवताभ्य इति । सुप्तोत्थितवदुत्तिष्ठन्तु वानरा इत्येवंरूपं वरं रावणवधजनितहर्षवशात्स्वदिदृक्षया समागताभ्यो देवताभ्यः प्राप्य सुहृद्भिः सुग्रीवविभीषणादिभिः संवृतः पुष्पकेणायोध्यामुद्दिश्य प्रस्थितो जगाम ॥ ८६ ॥

रा० टी०–देवताभ्यइति । सुहृद्वृतः सुग्रीवादिविभीषणादिसहितो रामः देवताभ्यः रघुनाथविजयस्तवनाय आगतसुरेभ्यः वरं सुप्तोत्थिता इव वानरा उत्तिष्ठन्त्वित्यादिरूपं प्राप्य लब्ध्वा अतएव वानरान्समुत्थाप्य देवतादत्तवरेण यथावत्स्मृत्यादिविशिष्टान् सम्बोध्य पुष्पकेण विभीषणममर्पितकुबेरविमानविशेषेण अयोध्यां प्रस्थितः । अयोध्यादेश्यकसंयोगानुकूलव्यापारवानासेति शेषः । देवताभ्यो वरं प्राप्येत्युक्त्या 'यः कालकालो गुणी सर्वविद्यः ' इत्याद्यागमगम्यदेवतादिस्थितिपरमहेतुभूतरघुनाथेन देवसम्माननं कृतमिति ध्वनितम् । चो हेतौ ॥ ८६ ॥

गो० टी०–देवताभ्यइति । रामः देवताभ्यः रामविजयश्लाघनायागताभ्यः वरं प्राप्य तेन वरेण वानरान् रणे मृतान् समुत्थाप्य सुप्तानिवोत्थाप्य सुहृद्भिः सुग्रीवविभीषणादिभिर्वृतः सन् पुष्पकेण कुबेरं विजित्य रावणेन समानीतेन पुष्पकाख्यविमानेन अयोध्यांप्रति प्रस्थितः ॥ ८६ ॥

८७] ति० टी०–भरद्वाजेति । 'चतुर्दशे तु सम्पूर्णे वर्षेऽहनि रघूत्तम । न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम्' इति भरतेन प्रतिज्ञातत्वाद्भरद्वाजाश्रमे चतुर्दशसमाप्त्यनन्तरं सुनिवचनेनैकदिनविलम्बस्य प्राप्तत्वात्स्वागमनप्रबोधनाय हनुमद्विसर्जनम् । यद्वा महत्या वानरसेन्या सहाकस्माद्गमने भरतादेः शङ्का मा भूदिति तद्विसर्जनम् ॥ ८७ ॥

रा० टी०–भरद्वाजेति । सत्यपराक्रमः सत्यो ध्वंसाप्रतियोगी पराक्रमो यस्य । किञ्च सत्याऽयोध्या साऽस्त्याधारत्वेन येषां ते सत्या अयोध्यावासिनः तान्नित्यं पिपर्तीति सत्यपरः । अतएव न क्रमते अयोध्यां परित्यज्य न कुत्रचिच्छतीत्यक्रमः स एव स इति कर्मधारयः । आरामः सर्वलोकाभिरामदाता रामः भरद्वाजाश्रमं गत्वा प्राप्य भरतस्यान्तिके समीपे हनुमन्तं व्यसर्जयत् । स्वागमनबोधनाय प्रेषयामासेत्यर्थः । ध्वंसाप्रतियोगिपराक्रमविशिष्ट इत्यनेन सङ्कीर्तितस्वागमनावधिदिनमेव भरद्वाजाश्रमगमनदिनमिति ध्वनितम् । अयोध्यायां नित्यं स्थित एव सर्वलोकाभिरामदातेत्यनेन परिच्छिन्नमूर्त्तेरपरिच्छिन्नत्वमपि व्यक्तम् । तेनाऽघटितघटनापटीयश्शक्तिमत्त्वं रघुनाथस्य व्यञ्जितम् । भरतस्यान्तिक इत्यनेन भरतविषयकरघुनाथप्रीतेराधिक्यं ध्वनितम् । रघुनाथमूर्त्तेः परिच्छिन्नापरिच्छिन्नत्वे प्रमाणम् । 'य एव विग्रहो व्यापी परिच्छिन्नः सएव हि । अयोध्यायां निवसते ततः पादं न गच्छति' इति सदाशिवसंहितावचनम् ॥ ८७ ॥

गो० टी०–भरद्वाजेति । सत्यपराक्रमः सत्यविषयपराक्रमवान् । राम इति क्रियाभेदाद्विरुक्तिः । भरद्वाजाश्रमं गत्वा भरतस्यान्तिकं समीपं प्रति हनुमन्तं व्यसर्जयत् व्यसृजत् । हनशब्द ऊकारान्तोऽप्यस्ति । भरद्वाजेनात्र स्थातव्यमिति प्रार्थिते तद्विवसेन चतुर्दशवर्षपूर्त्तेः 'पूर्णे चतुर्दशे वर्षे आगमिष्यामि ' इति भरतं प्रत्युक्तेः । सत्यत्वरक्षणाय हनुमन्तं प्रेरितवानिति भावः ॥ ८७ ॥

८८] ति० टी०–पुनरिति । पुष्पकादवतीर्णत्वात्पुनस्तत्पुष्पकं समारुह्य । आख्यायिकां पूर्ववृत्तविषयां कथाम । भरद्वाजाश्रमारोहात्पूर्वमिव जल्पन्कथयन् । सुग्रीवेति विभीषणादेरुपलक्षणम् ॥ ८८ ॥

रा० टी०–पुनरिति । तदा भरद्वाजाश्रमान्निर्गमनसमये सुग्रीवसहितो रघुनाथस्तत्प्रसिद्धं पुष्पकं पुनः समारुह्य । सावधानतया तत्र स्थित्वेत्यर्थः । आख्यायिकां भरतवृत्तप्रबन्धं जल्पन्कथयन् तदा तस्मिन्नेव दिने नन्दिग्रामं भरतावधिष्ठितायोध्यैकदेशं ययौ प्राप । समारुह्येत्यनेन रघुनाथस्य हर्षातिशयः सूचितः । सर्वं वाक्यं सावधारणं भवतीति न्यायेनैवकारलाभः ॥ ८८ ॥

गो० टी०–पुनरिति । रामस्तत्पुष्पकं समारुह्य सुग्रीवसहितः सन् तदा गमनकाले आख्यायिकां पूर्ववृत्तकथाम् । 'आख्यायिकोपलब्धार्था ' इत्यमरः । पुनः पुनः जल्पन् कथयन् अर्थात् भरतविषयाख्यायिकां सुग्रीवेण जल्पन्निति गम्यते । नन्दिग्रामं भरतस्थानं तदा तस्मिन्नेव काले शीघ्रमित्यर्थः । ययौ प्राप ॥ ८८ ॥

८९]ति० टी०–नन्दिग्राम इति । नन्दिग्रामे भ्रातृभिः सह स्वस्यापि व्रतप्रयुक्तां जटां हित्वा त्यक्त्वा रामः सीतामनुप्राप्य

प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः । निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ९० ॥
न पुत्रमरणं केचिद्द्रक्ष्यन्ति पुरुषाः क्वचित् । नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥ ९१ ॥

मुनिवेषत्यागेन सीतारूपं रूपं प्राप्य । यद्वा मुनिवेषत्यागेन हृष्टां सीतां प्राप्य प्राप्तविसृष्टं राज्यं पुनरवाप्तवान् ॥ ८९ ॥

रा० टी०–नन्दिग्रामइति । अनघः दूरीकृतदेवव्यसनः हितः सर्वलोकप्रियः भ्रातृभिर्भरतादिभिः प्रार्थितः स रामः नन्दिग्रामे भरतनिवासस्थाने जटां हित्वा संशोध्य सीतामनुप्राप्य संश्लिष्य राज्यं पित्राज्ञया विसृष्टं पुनरवाप्तवान् प्राप्तः । जटाशब्दो भावप्रधानः । तत्त्यागस्य संशोधनमन्तरेणासम्भवेन संशोध्येत्यर्थः फलितः । जटाव्यक्तिं त्यक्त्वेत्यर्थस्तु न युक्तः । सच्चिदानन्दात्मको भगवान्सच्चिदानन्दात्मिकास्य व्यक्तिः " आनन्दरूपममृतं यद्विभाति तदाऽऽप्रणखादानन्दमेव"इत्यादिश्रुतिप्रामाण्येन रघुनाथकेशादीनामानन्दरूपत्वेन स्वरूपानतिरेकत्वात्त्यागायोगात् । सीतां संश्लिष्येत्यनेन यावद्वनवासं सीतारामयोरेवं संश्लेषो न जात इति ध्वनितम् । तेन धैर्यातिशयो ध्वनितः ॥८९॥

गो० टी०–नन्दिग्राम इति । अनघः सम्यगनुष्ठितपितृवचनः । यद्वा 'शिरसा याचतस्तस्य वचनं न कृतं मया' इत्युक्तपापरहित इत्यर्थः । यद्वा निरस्तसमस्तव्यसनः । 'दुःखैनोव्यसनेष्वघम्' इति वैजयन्ती । रामः भ्रातृभिः सहितः । 'कदान्वहं समेष्यामि भरतेन महात्मना । शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन' इत्युक्तमनोरथपूर्ण इत्यर्थः । नन्दिग्रामे जटां हित्वा शोधयित्वा। उपलक्षणमेतत् । 'विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः । महार्हवसनो रामस्तस्थौ तत्र श्रिया ज्वलन्' इत्युक्तरूपः सीतामनुप्राप्य समीपे प्राप्य 'रामं रत्नमये पीठे सहसीतं न्यवेशयत्' इत्याद्युक्तरीत्या दिव्यसिंहासने सीतयाभिषेकं प्राप्येत्यर्थः । राज्यं पुनरवाप्तवान् । पितुर्वचनात्पूर्वं प्राप्तं विश्लिष्य पुनरत्र प्राप्त इत्यर्थः ॥ ८९ ॥

९०] ति० टी०–एतदन्तं चरितं वृत्तत्वेनोपदिश्य देवर्षिरतःपरमुत्तरकाण्डविषयं भविष्यत्वेनोपदिशति–**प्रहृष्टेति** । अनेन च रावणवधानन्तरं रामे राज्यं प्रशासति सति वाल्मीकेर्नारदं प्रति प्रश्न इति ज्ञायते । प्रहृष्टः प्रातिस्विकपुत्रपश्वादिसंपत्त्या मुदितः क्षोभराहित्येन मुदितान्तःकरणः । लोकः सर्वप्रजाः । तुष्टो बहुप्रदाद्भगवतः सांसारिकपारमार्थिकार्थलाभात्तुष्टः । अतएव पुष्टो दारिद्र्यकार्श्यरहितः । आमयो मनःपीडा । रोगो देहजो व्याधिः । दुर्भिक्षेण चोरादिभयेन च रहितः । भविष्यतीति शेषः । यद्वा रामविरहेण दुःखितो राममेलनेन तुष्टः । तथा तद्विरहेण कृशस्तन्मेलनादेव पुष्टः ॥ ९० ॥

रा० टी०–प्रवृत्ते रामराज्ये प्रजावृत्तान्तमाह–**प्रहृष्टेत्यादिभिः** । लोकः रामानुशासनकालिकजनः प्रहृष्टो मुदितः । आसीदिति शेषः । प्रहृष्टः रोमाञ्चवत्त्वं प्राप्तः मुदितः तत्कारणीभूतसर्वाभिलषितप्राप्तिजनितप्रमोदविशिष्टः स एव स इति कर्मधारयः । अतएव तुष्टः परमसन्तोषं प्राप्तः । अतएव पुष्टः परिपूर्णशरीरसामर्थ्यविशिष्टः । अतएव सुधार्मिकः धर्मं चरतीति धार्मिकः । " धर्मं चरति " इति ठक् । शोभनश्चासौ धार्मिकश्च सुधार्मिकः । धार्मिकत्वे शोभनत्वं तु सकलधर्मफलभूतरघुनाथसेवनाश्रितत्वेन । अतएव निरामयः मानसव्यथारहितः । अतएव अरोगः शरीररोगवर्जितः । अतएव दुर्भिक्षभयवर्जितः दुर्भिक्षहेतुकभीतिरहितः । दुर्भिक्षजनकासन्तोषादेरभावात्कथं तच्छङ्काहेतुकभीतिः स्यादिति भावः । हिर्हेतौ । चो नित्यार्थकः । तन्मंबन्धः सर्वत्र बोध्यः ॥ ९० ॥

गो० टी०–रामस्य राज्यप्राप्तिकृतं लोकस्यानिशयं दर्शयति–**प्रहृष्टेति** । लोकः जनः प्रहृष्टमुदितः । तदानीमासीदिति शेषः । एवमुत्तरत्रापि प्रहृष्टः सञ्जातरोमाञ्चः " हृषेर्लोमसु " इति अनिट्त्वविधानात् । मुदित इति तन्मूलसन्तुष्टान्तःकरणत्वमुच्यते । तुष्टः समस्तकामलाभजनितप्रीतियुक्तः । यद्वा ' इच्छामो हि महाबाहुं रघुवीरं महाबलम् । गजेन महता यान्तं रामं छत्रावृताननम् ' इत्यभिलषितलाभ उच्यते । पुष्टः ' विषये ते महाराज रामव्यसनकर्शिताः । अपि शुष्काः परिम्लानाः सपुष्पाङ्कुरकोरकाः ' इत्युक्तरामविरहजकार्श्यत्यागात् पुष्टः । सुधार्मिकः सुधर्मः रामभक्तिपूर्वकं कर्म तच्चरतीति सुधार्मिकः । " धर्मं चरति " इति ठक् । ' स्त्रियो वृद्धास्तरुण्यश्च ' इत्युक्तः । धर्मफलभागित्यर्थः । निरामयः शारीररोगरहितः । अरोगः मानसव्याधिरहितः । दुर्भिक्षभयवर्जितः । भिक्षाणां वृद्धिः दुर्भिक्षम् । व्यृद्धावव्ययीभावः । दुर्भिक्षात् भयं दुर्भिक्षभयं तेन वर्जितः । अनेन पूर्वं सीताविशिष्टरामवियोगे प्रजानामामयादिकमासीत् । तदिदानीं निवृत्तमित्युच्यते । प्रहृष्टेत्यादिरामाभिषेकदर्शनसन्तोषो न वर्णयितुं शक्य इत्याह कविः ' प्रहृष्टमुदितो लोकस्तुष्टः पुष्ट ' इति । अथ प्रीतिकारितकैङ्कर्यसिद्धिं दर्शयति–सुधार्मिक इति । शोभनो धर्मो विशिष्टविषयकैङ्कर्यमेव । अथ कैङ्कर्यविरोधिनिवृत्तिमाह । निरामयो ह्यरोगश्चेति । कैङ्कर्योपकरणसमृद्धिमाह–दुर्भिक्षेति ॥ ९० ॥

९१] ति० टी०–**नेति** । स्वपितृषु स्वेषु च जीवत्स्विति शेषः । अविधवाः भर्तृनुगमनाढ्यवांशपुत्रसद्भावाद्धेति शेषः ॥९१॥

रा० टी०–प्रमोदप्रतिबन्धकाभावं विशदयन्नुत्तरकाण्डवृत्तमाह–**न पुत्रेत्यादिभिः** । रामराज्ये केचिदपि पुरुषाः क्वचित्स्वप्रादावपि पुत्रमरणं प्रीतिविषयीभूतसुतादिवियोगं न द्रक्ष्यन्ति । ब्राह्मणपुत्रस्य पुनः प्राणसंबन्धान्न तस्य वास्तवं मरणमिति न विरोध इति बोध्यम् । नार्यः स्त्रियः अविधवाः वैधव्यरहिताः नित्यं पतिव्रताः सर्वकालं स्वस्वपत्यनुकूलवर्त्तिन्यो भविष्यन्ति । लृङुपात्ताद्यतनत्वस्याविवक्षा । कौशल्यादिविषये

१ इदं पूर्वटीकाद्वयविरुद्धम् ।

न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः । न वातजं भयं किंचिन्नापि ज्वरकृतं तथा ॥ ९२ ॥
न चापि क्षुद्भयं तत्र न तस्करभयं तथा । नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९३ ॥
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा । अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ९४ ॥
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् । असङ्ख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ९५ ॥

तु न शङ्कावकाशः । तत्पतिवियोगाभासस्य रामराज्यप्राक्कालिकत्वात् । यथा नैतासां वास्तवः पतिवियोगस्तथा वनयात्रावर्णनसमये वक्ष्यामः । पुत्रशब्देन तदादिलाभ उपलक्षणविधया ॥९१॥

गो० टी०–अथ वर्णाश्रमधर्मपरिपालनप्रधानामुत्तरकाण्डकथां संगृह्णाति–**नपुत्रेत्यादि** । केचिदपि पुरुषाः क्वचित् कुत्रापि देशे किंचित्कादाचित्कमपि पुत्रमरणं न द्रक्ष्यन्ति । न द्रक्ष्यन्तीत्यनेन ब्राह्मणपुत्र इव कदाचित्प्राप्तमपि परिहरिष्यतीति भावः । नार्यश्चाविधवाः नित्यं पतिव्रताश्च भविष्यन्तीति । यद्वा विविधा धवा यासां ताः विधवा न विधवा अविधवा अव्यभिचारिण्यः । अव्यभिचारित्वेऽपि पत्न्यावप्यननुरागः कासांचित्स्यात्स नेत्याह–पतिव्रताइति । कौसल्यादयस्तु पुत्रवत्तया वृद्धनया च न विधवा इति भावः ॥ ९१ ॥

९२] **ति० टी०–न चाग्निजमिति** । पादत्रयेणाधिदैविकदुःखनिवृत्तिरुच्यते । चतुर्थेनाध्यात्मिकनिवृत्तिः ॥ ९२ ॥

रा० टी०–न चेति । अग्निजभग्निहेतुकं किञ्चित् पाकादिसमये अङ्गुल्यादिदाहजनितमपि भयं नाभवत् । चोप्यर्थे । जन्तवः अप्सु न मज्जन्ति । इदमुपलक्षणम् । अकालमृत्युं न प्राप्नुवन्तीत्यर्थः । वातजं वातहेतुकं किञ्चित् शोकादिजनितमपि भयं नाभवत् । तथा ज्वरकृतं देहपीडादि च नाभवत् ॥ ९२ ॥

गो० टी०–तत्र राज्ये तापत्रयगन्धोऽपि न भविष्यतीत्याह–**नचेत्यार्धत्रयम्** । अग्निजं भयं न किंचित् । भविष्यतीत्यर्थः । जन्तवः नाप्सु मज्जन्ति । मङ्त्वा न मरिष्यन्तीत्यर्थः । एवमाधिदैविकनिवृत्तिरुक्ता । अथाध्यात्मिकादिनिवृत्तिमाह । नापि ज्वरकृतं तथा । न चापि क्षुद्भयमिति । न तस्करभयमित्याधिभौतिकोपलक्षणम् ॥ ९२ ॥

९३] **ति० टी०**–भौतिकदुःखाभावमाह–**न चापीति** । क्षुद्भयं क्षुदुपशमोपायाभावजं न च नैव भविष्यतीत्यनुषङ्गः ९३

रा० टी०–न चेति। क्षुद्भयमपि तत्र न । तथा तस्करभयमपि न । एतेन सर्वनियन्तृत्वं रघुनाथस्य सूचितम् । नगराणि पुराणि राष्ट्राणि ग्रामादीनि च धनधान्ययुतानि सर्वसमृद्धिमन्त्येव भविष्यन्ति । एकश्चकारोऽप्यर्थे द्वितीय एवार्थे ॥ ९३ ॥

गो० टी०–तत्र रामराज्ये अनिष्टनिवृत्तिमुक्त्वेष्टसिद्धिमाह–**नगरेति** । नगराणि राष्ट्राणि धनयुतानि धान्ययुतानि च भविष्यन्ति । अतएव सर्वे नागरिका जानपदाश्च यथा कृतयुगे तथात्र त्रेतायामपि नित्यं प्रमुदिता भविष्यन्ति । " गत्यर्थाकर्मक " इत्यादिना कर्तरि क्तः ॥ ९३ ॥

९४–९५] **ति० टी०–नित्यमिति** । कृतयुगे स्वाभाविकादधर्मासंबन्धान्नित्यं प्रजामोदः, त्रेतायामधर्मस्य पादांशेन संबन्धेऽपि रामपालनवैभवात्तदनाक्रमेण नित्यप्रमोदत्वम् । अथ रामस्य भाविवृत्तान्तरमाह–**अश्वेति** । शतशब्दोऽनन्तवाची । इष्ट्वा दत्त्वेत्यादिस्वरूपकथनम् । न तु तेषां रामस्य स्वलोकप्राप्तिं प्रति हेतुतेति बोध्यम् । यत्तु कतकृताश्वमेधायनुष्ठानस्य मानुषोपाधिप्रयुक्तावर्ज्याघशमनद्वारा ब्रह्मलोकप्राप्तौ हेतुत्वमित्युक्तम्, तत्र । भगवदवताराणां पुण्यपापसंबन्धस्य सर्वतन्त्रविरुद्धत्वात् । अश्वमेधायनुष्ठानं तु लीलामात्रं लोकोपदेशायेत्यन्यत्र विस्तरः९५

रा० टी०–उपसंहरन्नाह–**नित्यमिति** । अतएव सर्वे तात्कालिका जनाः नित्यं यथावत्प्रमुदिताः । कृतयुगे प्रथमयुगेपि अतथा तात्कालिकजनास्तथा प्रमोदं न प्राप्ता इत्यर्थः । एतेन कौशल्यादीनामप्रकटसाकेतस्थत्वेन दशरथसंयोगसत्त्वान्न वास्तवपतिवियोग इति ध्वनितम् । किञ्च कौशल्यादीनां तात्कालिकवात्सल्यरसमग्नतयाश्वङ्कारादिरसविस्मृतिरिति ध्वनितम । अर्द्धं पृथक् । **अश्वमेधेति** । महायशाः समाधिकरहितकीर्तिविशिष्टो राघवः अश्वमेधशतैः शतत्रयसङ्ख्याविशिष्टाश्वमेधनामकयागैः तथा बहुसुवर्णकैः तन्नामकयागैः इष्ट्वा । गवां कोट्ययुतम् । दशसहस्राधिककोटिसङ्ख्यासङ्ख्येयगवीरित्यर्थः । विद्वद्भ्यः ब्रह्मविद्भ्यः विधिपूर्वकं यथाशास्त्रं दत्त्वा । असङ्ख्येयमित्यागरहितं धनं ब्राह्मणेभ्यः गोदानसम्प्रदानीभूतातिरिक्तविप्रेभ्यो दत्त्वा । किञ्च विद्वद्भ्यो ब्राह्मणेभ्यो विधिपूर्वकं यथाविधि गवां कोट्ययुतं दत्त्वा असङ्ख्येयं धनं च दत्त्वा यथाविधि प्रदाय यागविशेषस्य बहुसुवर्णनामकत्वं 'सुवर्हूनि सुवर्णानि यत्रोपकरणं वृताः । विन्दन्ति स क्रतुः सद्भिः स्मृतो बहुसुवर्णकः' इत्यादिना प्रसिद्धम् । बहुवचनान्तशतशब्देन शतत्रयलाभः कपिञ्जलाधिकरणन्यायेन बोध्यः । सङ्ख्यापरत्वे एकशतार्थकत्वेऽपि न क्षतिः । गोदानसम्प्रदानीभूतातिरिक्तविप्रेभ्यो धनं दत्त्वेत्यनेन तेषां गोदानग्रहणानपेक्षा व्यञ्जिता । तेन तेषां पूर्वप्राप्तगवीपूर्णत्वं व्यक्तम् । तेन रघुनाथराज्यकालिकब्राह्मणानां सन्तोषातिशयः सूचितः ॥ ९४ ॥ ९५ ॥

गो० टी०–एवं क्षत्रियासाधारणं प्रजापालनरूपं धर्ममुक्त्वा द्विजातिधर्मानाह–**अश्वमेधेति** । अर्द्धत्रयमेकान्वयम् । महायशाः प्रजापालनलब्धमहाकीर्तिः । अनेन द्रव्यशुद्धिरुक्ता । अश्वमेधशतैः अनेकाश्वमेधैः । ' दशवर्षसहस्राणि वाजिमेधमुपाकरोत् ' इति वक्ष्यमाणत्वात् । तथा बहुसुवर्णकैः बहुसुवर्णकाख्यक्रतुविशेषैश्च । ' सुवर्हूनि सुवर्णानि यत्रोपकरणत्वतः । विन्दते स क्रतुप्रदर्शनेन पूर्वकृतवोऽग्निष्टोमादयोऽपि ह्यनुष्ठिता इति सिद्धम् । गवां कोट्ययुतं दत्त्वा दशसहस्रकोटिपरिमिताः गाः ब्राह्मणेभ्यो

राजवंशाञ्छतगुणान्स्थापयिष्यति राघवः । चातुर्वर्ण्यं च लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति ॥९६ ॥
दशवर्षसहस्राणि दशवर्षशतानि च । रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥ ९७ ॥
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् । यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ ९८ ॥

कतुः सद्भिः स्मृतो बहुसुवर्णकः' इति वचनात् । एवमुत्तरकत्वनुदत्त्वा ब्रह्मलोकं ब्रह्मणः स्वस्य लोकं अप्राकृतस्थानं परमपदं प्रयास्यति । अत्र महायशा इत्यनेन यत्किञ्चिदपवादश्रवणमात्रेण सीतात्यागः सूचितः । दशवर्षसहस्राणि अश्वमेधानुष्ठानकाले इत्युक्त्या सीतां विनैव कत्वनुष्ठानस्य वक्ष्यमाणत्वाच्चाऽभिषेकात्परं स्वल्प एव वर्षसहस्रकाले सीतावियोग इत्यवसीयते । अश्वमेधारम्भश्च रावणवधरूपपापनिबर्हणार्थतया प्रसक्त इत्यविलम्बितः । ततः पूर्वमेव सीतावियोगः प्रथमाश्वमेधे सीताप्रतिरूपकरणात् । प्रतिकृत्यापि यज्ञानुष्ठानस्य प्रामाणिकत्वं वक्ष्यति दर्भशयनप्रकरणादौ ॥ ९४ ॥ ९५ ॥

९६] ति० टी०–**राजवंशानिति** । कामरूपकान्यकुब्जादितत्तद्राज्यपदस्थान्राजवंशाञ्शतगुणाननेकगुणवृद्धिर्यथा भवति तथा स्थापयिष्यति । शाश्वततत्तद्राज्यप्रदानेनेति शेषः । चातुर्वर्ण्यं चत्वारो वर्णाः । स्वार्थे ष्यञ् । नियोक्ष्यति । शङ्कितस्वधर्मभ्रंशमपीति शेषः ॥ ९६ ॥

रा० टी०–राजवंशान् राजोद्भवान् राज्ञो राजभिन्नाश्च शतगुणान् पूर्वापेक्षया अधिकसम्पत्तिमतः कृत्वा स्थापयिष्यति । अस्मिन् लोके चातुर्वर्ण्यं ब्राह्मणक्षत्रियविट्शूद्रान् स्वेस्वे धर्मे तत्तदुद्देश्यकवेदबोधिते कर्मणि नियोक्ष्यति । चातुर्वर्ण्यमित्यत्र स्वार्थे ष्यञ् । सार्द्धश्लोकद्वयमेकान्वयि ॥ ९६ ॥

गो० टी०–एवं धर्मानुष्ठातृत्वमुक्त्वा धर्मप्रवर्तकत्वमाह–**राजेति** । अस्मिन् लोके राघवः राजवंशान् क्षत्रियवंशान् शतगुणान् शतगुणितान् स्थापयिष्यति । शतगुणं विद्वद्वान् । राजवंशान् प्रत्येकं राज्यप्रदानेन पालयिष्यतीत्यर्थः । चत्वारो वर्णाश्चातुर्वर्ण्यम् । स्वार्थे ष्यञ् । स्वेस्वे स्वस्ववर्णाश्रमोचिते धर्मे । पूर्वादित्वात्सर्वनामत्वविकल्पः । नियोक्ष्यति प्रवर्त्तयिष्यति ॥९६ ॥

९७] ति० टी०–अवतारत्यागकालमाह–**दशेति** । उपासित्वा नित्यवदनुष्ठायेत्यर्थः । ब्रह्मलोकं मायिकं वैकुण्ठादिलोकम् । अनेन निजनित्यकर्मयोगोपेतस्यैव साक्षात्परम्परया ब्रह्मलोकप्राप्तिरिति ध्वनिः ॥ ९७ ॥

रा० टी०–**दशेति** । दशवर्षसहस्राणि दशसङ्ख्यायागुणितानि वर्षसहस्राणि त्रिसहस्रसङ्ख्यासङ्ख्यातवर्षाणि त्रिंशत्सहस्रवर्षाणीत्यर्थः । दशवर्षशतानि च दशसङ्ख्यागुणितानि वर्षशतानि शतत्रयवर्षाणि सहस्रत्रयवर्षाणीत्यर्थः । एवं च त्रयस्त्रिंशत्सहस्रवर्षाणि राज्यं रामो नित्यरमणशीलः उपासित्वा कृत्वेत्यर्थः । ल्यबभावआर्षः । आब्रह्मलोकम् अः विष्णुः आः प्रजापतिः ब्रह्म शिवः तैर्लोक्यते हृदि नित्यं स्मर्यते तत् । किञ्च ब्रह्माभिन्नं लोकमानन्दघनं प्रकटायोध्यापुरं प्रयास्यति प्राप्स्यति । अप्रकटतया तत्रैव स्थास्यतीत्यर्थः । अत्र प्रशब्दोपादानेन तत्परिकराणामपि तादृक्स्थितिरिति व्यञ्जितम् । बहुवचनान्तसहस्रशब्देन बहुवचनान्तशतशब्देन च सहस्रत्रयशतत्रयलाभः कपिञ्जलाधिकरणन्यायेनावगन्तव्यः । एकसहस्रैकशतार्थकत्वं तु तत्र नोपपद्यते तयोर्बहुवचनान्तत्वात् 'विंशत्याद्याः सदैकत्वे' इत्यनुशासनेनैकशेषमन्तरावाबहुवचनान्तत्वस्य दुर्लभत्वात् । अतएव 'त्रयोदशाब्दसाहस्रं ब्रह्मचर्यमखण्डितम्' इति भागवतं सानुकूलम् । भागवतस्य वास्तवोपपत्तिस्तूत्तरकाण्डे वक्ष्यते । शतानि सहस्राणीत्यादौ द्वितीया "कालाध्वनोः" इति सूत्रविहिता । 'राज्यं दशसहस्राणि प्राप्य वर्षाणि राघवः । दशवर्षसहस्राणि रामो राज्यमकारयत्' इति वक्ष्यमाणयुद्धकाण्डपद्यघटकीभूतदशसहस्रशब्दार्थः । दशगुणितानि वर्षसहस्राणि त्रिसहस्राणि वर्षाणि येषु तानि । त्रयस्त्रिंशत्सहस्रवर्षाणीत्यर्थः । उपलक्षणमेतत् दशवर्षशतानि चेत्यस्येति वा । यागकालातिरिक्तकालबोधकत्वे तु न काप्यनुपपत्तिरिति दिक् । अतो न विरोधः । एतेन 'दशवर्षसहस्राणि दशवर्षशतानि च' इत्यत्रैकादशसहस्रवर्षाणीति भूषणादौ व्याख्यातोऽर्थश्चिन्त्यः । तदुपपत्तेर्दुरुपपादत्वादिति दिक् ॥९७॥

गो० टी०–धर्मसंस्थापनातिशयप्रदर्शनाय राज्यपरिपालनकालबहुत्वं दर्शयति–**दशेति** । 'दशवर्षसहस्राणि दशवर्षशतानि च' एकादशसहस्रसंवत्सरानित्यर्थः । उपासित्वा उपास्य । वाछन्दसीति वक्तव्ये क्त्वापि छन्दसीति प्रयोगादनित्यो ल्यबादेशः । सान्त्वपूर्वं जनानुवर्त्तनेन परिपाल्येत्यर्थः । अत्यन्तसंयोगे द्वितीया । राज्यपालने व्यासङ्गाभावो दर्शितः ब्रह्मलोकं वैकुण्ठं गमिष्यति ९७

९८] ति० टी०–अथ नारदः स्वोपदिष्टसंक्षेपरामायणपाठफलमुपदिशति–**इदमिति** । पवित्रं चित्तशोधनम् । पुण्यं सकलपुण्यसाधनम् । वेदैः संमितं सकलरहस्यवेदार्थप्रतिपादकत्वाद्वेदतुल्यम् ॥ ९८ ॥

रा० टी०–**इदमिति** । वेदैः सम्मितं समाधिकरहितवस्तुबोधकत्वेनाप्रमाणशङ्कारहितत्वादिना च चतुर्वेदसदृशम् । अतएव पुण्यं विपुलसत्कर्मलभ्यम् । अतएव पापघ्नं निखिलदुरितनिवर्त्तकम् । अतएव पवित्रं पवित्रद्भ्यत्रायते शत्रुनिवर्त्तकत्वेन रक्षति तदिदं सर्वश्रुतिप्रसिद्धं रामचरितं प्रकटीभूतरघुनाथाचरितबोधकं यः पठेत्सः सर्वपापैः सर्वाणि पापानि भवन्ति येभ्यः तानि दारिद्र्यकामक्रोधादीनि सर्वाणि निखिलानि पापानि गुरुद्रोहादिजन्यानि तानि च तानि चेत्येकशेषः । तैः प्रमुच्यते । सर्वकाल सकारणपापसंसर्गशून्यो भवतीत्यर्थः । वेदैः सम्मितमित्यनेन वेदश्रवणाद्यधिकार्येवैतच्छ्रवणाद्यधिकारीति ध्वनितम् । पवित्रमिति लुप्तोपमया यथा वज्रधारीन्द्रादरयो बिभ्यति तथैतच्चरितधारिजनादरयो बिभ्यतीत्युपमालङ्कारः सूचितः । तेन श्रेयोर्थिभिरिदमेव सेव्यमित्यादेयं वस्तु व्यक्तम् । अत्रार्थे श्रुतिरपि

एतदाख्यानमायुष्यं पठन्रामायणं नरः । सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ ९९ ॥
पठन्द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयाज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥ १०० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे प्रथमः सर्गः ॥ १ ॥

" ब्रह्महत्यासहस्राणि वीरहत्याशतानि च । स्वर्णस्तेयी सुरापी च गुरुतल्पायुतानि च ॥ कोटिकोटिसहस्राणि उपपातकजान्यपि । सर्वाण्यपि प्रणश्यन्ति रामचन्द्रस्य कीर्तनात्" इत्यादिगोविन्दाचार्युदाहृतरामोपनिषदि । ' यथा विधिनिषेधौ हि मुक्तं नैवोपसर्पतः । तथा न स्पृशतो रामोपासकं विधिपूर्वकम् ' इति स्मृत्यन्तरम् । तत्र विधिपूर्वकमित्यस्य रामचरितश्रवणपूर्वकमित्यर्थस्य शिष्टैर्व्याख्यातत्वात् । ' चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम्' इत्याद्यपि ॥ ९८ ॥

गो० टी०—अथैतत्पाठस्य मोक्षसाधनत्वमाह—**इदमिति** । पूयतेऽनेनेति पवित्रम् । "कर्त्तरिचर्षिदेवतयोः" इति करणे इत्रप्रत्ययः । परिशुद्धिसाधनमित्यर्थः । न केवलं शुद्ध्यापादकं किन्तु पापघ्नम् । "अमनुष्यकर्तृकेच" इति टक्प्रत्ययः । पुण्यं लाङ्गलजीवनमितिवत् पुण्यसाधनम् । अनेन प्रायश्चित्तव्यावृत्तिरुक्ता । तद्धि पापमेव निवर्त्तयति । उक्तार्थत्वे हेतुमाह—वेदैश्चसंमितमिति । सर्ववेदसदृशमित्यर्थः । इदं रामचरित्रं संक्षेपरूपं यः पठेत् वेदवत् सनियमं प्रतिदिनं पठेत् स सर्वपापैः पूर्वोत्तरापैः प्रमुच्यते । तदुक्तं रामोपनिषदि " ब्रह्महत्यासहस्राणि वीरहत्याशतानि च । स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च ॥ कोटिकोटिसहस्राणि उपपातकाजान्यपि । सर्वाण्यपि प्रणश्यन्ति रामचन्द्रस्य कीर्त्तनात् " इति ॥ ९८ ॥

९९] **ति० टी०**—सर्वपापमोक्षद्वारा मोक्षफलकत्वमुपपादितम् । पुण्यस्यापि त्रिगुणात्मकत्वेन पापतुल्यतया हेयत्वादिति मुमुक्षुफलमुद्दिश्य मुमुक्षूणामपि प्रवृत्तय आह—**एतदिति** । आयुष्यमायुष्करणम् । आख्यानमाख्यायिका । रामोऽयनं प्रतिपाद्यो यस्य तद्रामायणम् । संज्ञात्वाप्रणत्वम् । गणो दासीदासादयस्तैः सह । इहैहिकान्भोगान्भुक्त्वा प्रेत्य मृत्वा स्वर्गे महीयते स्वर्गिभिः सत्कृतो मोदत इत्यर्थः । पठन्निति हेतौ शता ९९

रा० टी०—पठनफलमुक्त्वा पाठनफलमाह—**एतदित्यादिना** । रामायणं रामप्रतिपादकं रामप्रापकं वा । अतएवायुष्यं ध्वंसाप्रतियोग्यायुर्बलहेतुभूतम् । किञ्च आयुष्यं रसिकजनसंसेव्यमेतदाख्यानं प्रबन्धं पठन्नध्यापयन् । अन्तर्भावितणिजर्थः । सपुत्रपौत्रः पुत्रपौत्रसहितः सगणः मित्रमन्त्रिदासादिसहितो नरः प्रेत्य इह लोकात्प्रस्थाय स्वर्गे स्वः स्वर्गे गीयते नित्यं प्रशस्यते इति स्वर्गः साकेतलोकस्तत्र महीयते । तत्रत्यैः प्रशस्यते इत्यर्थः । किञ्च महादेवादिकृतपूजाविशिष्टः स्वर्गे साकेतलोके ईयते तत्रत्यैर्जनैः प्राप्यते । अत्रार्थे श्रुतिरपि " पञ्चशतान्यप्सरोगणाः प्रधावन्ति शतं माल्यहस्ताः शतमञ्जनहस्ताः" इत्यादिकौषीतकीब्राह्मणादौ ॥ ९९ ॥

गो० टी०—एवं रामचरितपाठस्य मोक्षं फलमुक्त्वाऽनुषङ्गिकफलोक्तिपूर्वकं तस्य संबन्धि संबन्धपर्यन्ततामाह—**एतदिति**। आयुःप्रयोजनमस्यायुष्यम् । ' स्वर्गादिभ्योयद्वक्तव्य' इति यत्प्रत्ययः । आख्यानमाख्यायिकारूपमेतद्रामायणं बालरामायणं रामस्यायनं रामायणम् । अयगताविति धातोर्भावे ल्युट् । रामचरितमित्यर्थः । रामः अय्यते प्राप्यते अनेन इति वा रामायणम् । राम. अयनं प्रतिपाद्यो यस्येति वा रामायणम् । पठन्नरः वर्णाश्रमादिनियमं विना योऽपि कोऽपि सपुत्रपौत्रः दशपूर्वापरसहित इत्यर्थः । सगणः सभृत्यबन्धुः प्रेत्य आत्यन्तिकशरीरनाशं प्राप्य स्वर्गे परमपदे । " तस्याश्हिरण्मयः कोशः स्वर्गो लोको ज्योतिषाऽवृतः" इति । तस्मिन्स्वर्गशब्दप्रयोगात् । विमुक्तसर्वपापं प्रति स्वर्गमात्रस्याफलत्वाच्च । महीयते पूज्यते । "तं पञ्चशतान्यप्सरसां प्रतिधावन्ति शतं मालाहस्ताः शतं चूर्णहस्ताः " इति श्रुतेः ॥ ९९ ॥

१००] **ति० टी०**—**पठन्निति** । द्विजो मुख्यद्विजो ब्राह्मण. पठन्वागृषभत्वं शब्दब्रह्मपारगत्वं प्राप्नुयात् । स्यादिति यत्यर्थे । यदि क्षत्रियस्तदा रामायणं पठन्भूपतित्वमाप्नुयात् । पण्यैः क्रयद्रव्यैः साध्यं मूलाद्गुणत्रिगुणवृद्ध्यादिरूपं फलं यस्य तत्त्वं प्राप्नुयात् । धनसमृद्धिं प्राप्नुयादिति फलितोऽर्थः । शूद्रोऽपि जनस्त्वैवर्णिकदासः । अत्र शृण्वन्नित्यध्याहारः । महत्त्वं द्विजेतरसर्वप्रजाभ्यः श्रैष्ठ्यं महत्त्वं देहान्ते स्वोपरितनवर्णप्राप्तिलक्षणं च महत्त्वं प्राप्नुयात् । अस्य गायत्र्यर्थप्रतिपादकत्वध्वननाय गायत्र्यादिमाक्षरेणोपक्रम्य यादिति गायत्र्यन्तिमाक्षरेण समापितवान् ॥ १०० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०—एतत्पाठस्यैहिकयोग्यफलदातृत्वमप्यस्तीति बोधयन्नाह—**पठन्नित्यादिना** । द्विजो ब्राह्मणः एतद्रामायणं पठन् सन् वागृषभत्वं वाणीश्रेष्ठत्वमीयात् । शब्दब्रह्मपारगत्वं प्राप्नुयादित्यर्थः । क्षत्रियः पठन् भूमिपतित्वं पृथिवीश्वरत्वमीयात् । वणिग्जनः वैश्यजातिः पठन् पण्यफलत्वं धनधान्यवृद्धिमीयात् । शूद्रोऽपि पठन्महत्त्वं सर्वजनादरणीयत्वमीयात् । जनः प्रतिबन्धहेतुकब्राह्मणत्वाभाववान् पठन्सन् द्विजः स्यात् । भ्रष्टं स्वद्विजत्वं पुनः प्राप्नुयादित्यर्थः । जनः प्रतिबन्धहेतुकक्षत्रियत्वाभाववान् पठन्क्षत्रियः स्यात् । भ्रष्टं स्वक्षत्रियत्वं पुनः प्राप्नुयादित्यर्थः । जनः प्रतिबन्धहेतुकवैश्यत्वाभाववान् पठन् वणिग्जनः स्यात् । भ्रष्टं स्ववैश्यत्वं पुनः प्राप्नुयादित्यर्थः । जनः प्रतिबन्धहेतुकशूद्रत्वाभाववान् पठन् शूद्रः स्यात् । भ्रष्टं स्वशूद्रत्वं पुनः प्राप्नुयादित्यर्थः । जनशब्दएवावृत्त्या द्विजादीनां विधेयत्वं प्रकल्पयति अतएवैतस्य

द्वितीयः सर्गः ॥ २ ॥

वाल्मीकिकृतनारदपूजनम् । तत्र दृष्टक्रौञ्चमिथुनाक्रौञ्चस्य व्याधकृतहननं दृष्ट्वाऽऽदिकवेश्छन्दोमय्या वाचः प्रवृत्तिः । ततआदिकवेः स्वशिष्येण भरद्वाजेन सहाश्रमं प्रत्यागमनम् । ततो ब्रह्मणआगमनं रामचरितवर्णने उपदेशकरणं च ।

नारदस्य तु तद्वाक्यं श्रुत्वा वाक्यविशारदः । पूजयामास धर्मात्मा सहशिष्यो महामुनिम् ॥ १ ॥

सार्थक्यम् । यद्यप्यस्य वेदसम्मितत्वेन शूद्रकर्तृकपाठो न युज्यते तथापि निपादस्थपत्यधिकरणरीत्या ऋषिवचनप्रामाण्येन शूद्रस्यापि पाठाधिकारसम्भवात् युज्यत एव । तथाहि "निषादस्थपतिं याजयेत् " इत्यत्र निषादश्चासौ स्थपतिश्चेति कर्मधारयो वा निषादानां स्थपतिर्निषादस्थपतिरिति षष्ठीतत्पुरुषो वा निषादः स्थपतिर्यस्येति बहुव्रीहिर्वेति त्रिविधा विकल्प्य बहुव्रीहिषष्ठीतत्पुरुषत्वं गुरुत्वेन परित्यज्य कर्मधारयः स्वीकृतः । तत्र यद्यपि निषादानां वेदानधिकारित्वेन याजनाप्राप्तिस्तथापि वचनप्रामाण्येन निषादाभिन्नस्थपतियाजनं स्वीकृतम् । तथाऽत्रापि परमप्रमाणभूतऋषिवचनप्रामाण्येन शूद्रस्यापि रामायणपाठाधिकारः स्वीक्रियते । अत एव " वर्षासु रथकारोऽग्रीनादधीत " इति श्रुत्या जातिविशेषस्याग्न्याधानं स्वीकृतं मीमांसकैः । यदि तु ' शूद्रः पठन् ' इत्यत्र ब्राह्मणद्वारा पठन्नित्यर्थः स्वीक्रियते तदा नात्र शङ्कासमाधानावसर इति दिक् ॥ १०० ॥

श्रीमद्रामायणव्याख्या रामायणशिरोमणौ ।
समाप्तः प्रथमः सर्गो रामपादप्रसादतः ॥ १ ॥

इत्यार्षे श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे प्रथमः सर्गः ॥ १ ॥

गो० टी०–अथ चातुर्वर्ण्यव्यतिरिक्तस्य नाधिकार इति सूचयन् वर्णविशेषनियतानि फलानि दर्शयति–**पठन्निति**। स्यादित्येतदव्ययं यद्यर्थे । इदं बालरामायणं पठन् द्विजो यदि वागृषभत्वं वाचि श्रैष्ठ्यं वेदवेदाङ्गपारगत्वमीयात् प्राप्नुयात् । ईगतावित्यस्माद्धातोर्लिङ् । पठन् क्षत्रियो यदि भूमिपतित्वं चक्रवर्तित्वमीयात् । पठन् वणिग्जनो यदि पण्यफलत्वमीयात् पणं मूल्यं तदर्हतीति पण्यं क्रयविक्रयार्हं वस्तु तदेव फलं लाभो यस्य स पण्यफलः तस्य भावः पण्यफलत्वम् । 'पणो द्यूतादिपूस्तृष्टे भूतौ मूल्ये धनेऽपि च' इत्यमरः । पणशब्दादर्हार्थे यत्प्रत्ययः । " अवद्यपण्य " इत्यादिना पणतेर्यत्प्रत्ययान्तो निपातो वा । पठन् शूद्रोऽपि जनो यदि महत्त्वं स्वजातिश्रेष्ठत्वमीयात् । यद्वा स्यादित्येतदल्पार्थेऽव्ययम् । स्यात्क्षत्रियः अल्पनृपतिः भूमिपतित्वमखण्डभूमण्डलेश्वरत्वमीयात् । एवमल्पब्राह्मण इत्यादि ज्ञेयम् । यद्वा स्याच्छब्दः कथंचिदर्थे निपातः । स्यादस्ति स्यान्नास्तीत्यादिसप्तभङ्गीव्याख्याने तथोक्तत्वात् । तथा च कथंचित्पठन् शास्त्रोक्तनियमं विनापि पठन्नित्यर्थः । एकदेशं पठन्निति वा । अथवा वागृषभत्वादिकमीयात् । 'स्याच्च सत्तां लभेत च' इति सर्वसाधारणं सत्तालाभरूपं फलम् । "अस्ति ब्रह्मेतिचेद्वेद । सन्तमेनं ततो विदुः" इति श्रुतेः । कश्चित् 'स्यात्प्रबन्धेचिरातीते' इतिवचनात् स्याच्छब्दः प्रबन्धपर इत्याह तदज्ञानविजृम्भितम् । ' स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा ' इतिवाक्यशेषात् । पुराशब्दस्य नानार्थत्वं हि तत्रोच्यत इति । यद्यपि 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ' इति शूद्रस्येतिहासपुराणयोः श्रवणमात्रं स्मृतिभिरनुज्ञातं न तु पठनं तथापि पठन्नित्यादिऋषिवचनप्रामाण्यात् । वचनाद्यधिकारस्येतिन्यायेनास्मिन् सङ्क्षेपपाठमात्रेऽधिकारोऽस्तीति सिद्धम् । तथा सहस्रनामाध्यायान्ते च दृश्यते 'य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्' इत्यारभ्य 'वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् । वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ' इति । यद्वा वेदोपबृंहणे शूद्रस्य सर्वथानधिकाराच्छूद्र इत्यत्र पठन्निति नानुषज्यते । किंतु शृण्वन्नित्यध्याह्रियते । 'शृण्वन् रामायणं भक्त्या' इति श्रवणस्यापि महाफलत्ववचनात् । अत्र सङ्क्षेपे तकारेणोपक्रम्य यादिति समापनाद्रायत्रीरूपत्वमस्य गम्यते । अत्र श्लोके उपजातिवृत्तम् । ' स्यादिन्द्रवज्रा ततजास्ततो गावुपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजः पादा यदीया उपजातयस्ताः' इतिलक्षणात् १००

प्रथमसर्गमुपसंहरति–इ॰ति । ऋषिणा प्रोक्तमार्षम् । " तेन प्रोक्तम् " इत्यण् । श्रीरामायणे श्रीरामायणाख्ये आदिकाव्ये प्रथमकाव्ये बालकाण्डे सङ्क्षेपो नाम प्रथमः सर्गः समाप्त इति शेषः । काव्यलक्षणं सर्गलक्षणं चोक्तं दण्डिना काव्यादर्शे– ' नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः । विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः । मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि । अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम् । सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः । सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् । काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति ' इति ॥

इतिकौशिकगोविन्दराजकृते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सङ्क्षेपरामायणं नाम प्रथमः सर्गः ॥१॥

१] **ति० टी०**–**नारदस्येति** । विशारदो विशिष्टा व्याकरणसंस्कारादिविशेषवती विचित्रार्था च शारदा वाणी यस्य सः । सहशिष्य इत्यत्र "वोपसर्जनस्य" इति वैकल्पिकत्वात्सस्वाभावः । प्रश्नानुरूपं वाक्यगुणसमूहवत्तोत्तरं सम्यग्दत्तमिति पूजयामासातिविचित्रं भगवद्वचनमित्यादिशब्दैः ॥ १ ॥

रा० टी०–नारदोपदेशश्रवणोत्तरकालिकं वाल्मीकिवृत्तमाह–**नारदस्येत्यादिना** । वाक्यविशारदः वाक्ये वक्तव्ये विविधा विशिष्टा वा शारदा वाणी यस्य सः । धर्मात्मा धर्मे आत्मा यत्नो

यथावत्पूजितस्तेन देवर्षिर्नारदस्तथा । आपृच्छ्यैवाभ्यनुज्ञातः स जगाम विहायसम् ॥ २ ॥
स मुहूर्तं गते तस्मिन्देवलोकं मुनिस्तदा । जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥ ३ ॥
स तु तीरं समासाद्य तमसाया मुनिस्तदा । शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ ४ ॥

यस्य । परमधर्मोपदेष्टेत्यर्थः । सहशिष्यः शिष्यसहितः महामुनिः सर्वमुनिश्रेष्ठः वाल्मीकिर्नारदस्य तद्वाङ्मानसागोचरेश्वरबोधकं वाक्यं श्रुत्वैव पूजयामास । अहो एतद्बुद्धिवैभवमिति प्रशंसेत्यर्थः । महामुनिमिति पाठे तु महाः मुनिं पूजयामासेत्यर्थः । तुशब्द एवार्थे ॥ १ ॥

गो० टी०–'श्रीमच्छठारिगुरुणा गुरुणोपदिष्टं रामायणस्य हृदयं सरसं गृहीत्वा। श्रीकौशिकान्वयकुलेन्दुरशेषबन्धुर्गोविन्दराजविबुधो विशदीकरोति॥ ' अथ परमकारुणिको वाल्मीकिः 'इष्टं हि विदुषां लोके समासव्यासधारणम् ' इत्युक्तरीत्या संक्षेपेणोक्तं रामचरित्रं पुनर्विस्तरेण प्रतिपिपादयिषुस्तत्र प्रेक्षावत्प्रवृत्त्यर्थं वक्तृवैलक्षण्यं प्रबन्धवैलक्षण्यं प्रतिपाद्यवैलक्षण्यं चेति वैलक्षण्यत्रयं निदिदर्शयिषुर्वक्तृवैलक्षण्यं तावदादौ दर्शयति–**नारदस्येत्यादिना** द्वितीयसर्गेण । वक्तृवैलक्षण्यं तु परमाप्तत्वम् । आप्तत्वं च यथार्थदर्शित्वे सति यथार्थवादित्वम्।तस्य परमत्वं तु पितामहवरप्रसादलब्धत्वम्।तदेतदुपदर्शयितुमुपोद्घातत्वेनाह–**नारदस्येत्यादि**। तुशब्दो वैलक्षण्यपरः।'तु स्याद्वेदेऽवधारणे' इत्यमरः। स च काकाक्षिन्यायेनोभयत्रान्वेति । त्रिलोकज्ञतयेतरविलक्षणस्य नारदस्य शब्दतोर्थतश्चेतरवाक्यविलक्षणोत्कर्ष तत्पूर्वं संक्षेपरूपेणोक्तं वाक्यं संपूर्णार्थप्रतिपादकपदसमूहं प्रश्नानुरूपोत्तरं श्रुत्वा निशम्य वाक्ये विशारदो विद्वान् ' विद्वत्सुप्रगल्भौ विशारदौ ' इत्यमरः। वाक्यविशेषज्ञ इत्यर्थः । धर्मे आत्मा बुद्धिर्यस्यासौ धर्मात्मा धर्मस्वभावो वा । अत्र प्रकरणाद्वर्तनवर्तनधर्मज्ञइत्यर्थः । महामुनिः वेदान्तार्थनिर्णयसंपत्त्या सर्वोत्कृष्टमुनिर्वाल्मीकिः सहशिष्यः शिष्यसहितः सन् । " वोपसर्जनस्य " इति पक्षे सहशब्दस्य सभावाभावः । पूजयामास अहो वाक्यवैखरीति तद्वाक्यं श्लाघामासेति वाक्यविशारदत्वोक्तिर्भङ्ग्याऽवगम्यते । महामुनिमिति पाठे वाल्मीकिपदाध्याहारः । तमिति प्रयोक्तव्ये अन्यप्रतीतिकरमहामुनिपदप्रयोगास्वारस्यम् ॥ १ ॥

२] ति० टी०–**यथावदिति** । आपृच्छ्यैव साधु यामीत्युक्त्वैव । अभ्यनुज्ञातो यथासुखं विहरतामिति वाल्मीकिनानुगमनपूर्वमभ्यनुज्ञातः । अनेन गुरुशिष्ययोः स्नेहभक्तिप्रकाशनम् । विहायसमिति पुँल्लिङ्गम् ॥ २ ॥

रा० टी०–**यथावदिति** । तदा तस्मिन्काले तेन वाल्मीकिना यथावत्पूजितः स देवर्षिर्नारद आपृष्टो[१] अहं यामीत्युक्त्वैव अभ्यनुज्ञातः सुखं याहीति तत्सम्मति प्राप्तो विहायसमाकाशं जगाम । आकाशमार्गेण स्वलोकं प्रापेत्यर्थः । एतेन गुरुशिष्ययोरभीष्टार्थसिद्धिर्जातेति द्योतितम् ॥ २ ॥

गो० टी०–**यथावदिति**। देवश्चासौ ऋषिश्च देवर्षिर्नारदः। 'नारदाद्याः सुरर्षयः' इत्युक्तेः । तेन वाल्मीकिना यथावत् यथार्हम् । पूजितः प्रदक्षिणनमस्कारादिभिरर्चितः सन् । तदा पूजावसाने आपृष्ट्वा आपृच्छ्य " क्त्वापि छन्दसि " इति ल्यबभावः । अभ्यनुज्ञातः गच्छ त्वमिति वाल्मीकिना कृताभ्यनुज्ञानः विहायसमाकाशं जगाम ॥ २ ॥

३] ति० टी०–**स इति** । स वाल्मीकिस्तस्मिन्नारदे देवलोकं गते सति मुहूर्तं स्वाश्रमे स्थित्वा पश्चान्माध्याह्निकार्थं जाह्नव्या अविदूरतः समीपे वर्तमानं तमसातीरं जगाम । यत्तु मुहूर्तमात्रेण देवलोकं गत इत्यन्वय इति, तत्र । छान्दसत्वकल्पने मानाभावात् । अव्ययत्वकल्पनस्याप्यगतिकगतिकत्वाच्च । ' मुहूर्तात् ' इति पाठस्तु कल्पितः ॥ ३ ॥ ४ ॥

रा० टी०–नारदगमनोत्तरकालिकं वृत्तमाह–**स इत्यादिना** । तस्मिन्नारदे देवलोकं देवकर्तृकदर्शनयोग्यम्।स्वलोकमित्यर्थः । गते तन्निष्ठसंयोगानुकूल्यव्यापारवति सति स मुनिर्वाल्मीकिर्मुहूर्तं घटिकाद्वयं स्थित्वा जाह्नव्या गङ्गाया अविदूरतः समीपे एव वियमानं तमसातीरं जगाम। मुहूर्तं स्थित्वेत्यनेन वाल्मीकेर्नारदविषयकप्रेमातिशयः सूचितः । समीपे वियमानां जाह्नवीं न गतस्तमसातीरमेव गत इत्यनेन तमसायां तत्प्रीत्यतिशयः सूचितः । तेन तत्स्थलस्य रघुनाथसञ्चारत्वं ध्वनितम् । तुशब्द एवार्थे ॥ ३ ॥

गो० टी०–**स इति** । तस्मिन्नारदे मुहूर्तमल्पकालम्। ' मुहूर्तमल्पकाले स्यात् ' इति निघण्टुः। अत्यन्तसंयोगे द्वितीया । देवलोकं ब्रह्मलोकं गते वाल्मीके रामभक्तिं ब्रह्मणे कथयितुं प्राप्ते सति स मुनिर्वाल्मीकिस्तदा नारदगमनोत्तरकाले जाह्नव्या गङ्गाया अविदूरतः समीपे । सप्तम्यर्थे तसिः । स्थितमिति शेषः। तु गङ्गातोऽपि विलक्षणं तमसातीरं जगाम माध्याह्निकाभिषेकाय प्राप्तः ॥ ३ ॥

४]रा० टी०–**स त्विति**। तदा तस्मिन्काले स मुनिः वाल्मीकिस्तमसायास्तीरं समासाद्य सम्यक् प्राप्य अकर्दमं पङ्करहितं तीर्थम् ऋषिसेविततमसाजलं दृष्ट्वैव पार्श्वे स्थितं शिष्यं भरद्वाजमाह। तुशब्द एवार्थे। 'तीर्थं शास्त्राध्वरे क्षेत्रे मन्त्रोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भस्स्त्रीरजस्सु च विश्रुतम् ' इति विश्वकोशात्तीर्थशब्दस्य ऋषिजुष्टाम्भःपरत्वम् ॥ ४ ॥

गो० टी०–**स त्विति**। स मुनिस्तमसाया विलक्षणं तीरमासाद्य तदा आसादनकाले अकर्दममपङ्कं तीर्थं जलावतरणम्। 'तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्बुनि पावने । पात्रोपायावतारेषु ' इति वैजयन्ती । दृष्ट्वा पार्श्वे स्थितं शिष्यमाह ॥ ४ ॥

१ अस्य मतेनापृष्टेति पाठः । एवं गोविन्दराजीयेऽपि ।

अकर्दममिदं तीर्थं भरद्वाज निशामय । रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥ ५ ॥
न्यस्यतां कलशस्तात दीयतां वल्कलं मम । इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ ६ ॥
एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना । प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥ ७ ॥
स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः । विचचार ह पश्यंस्तत्सर्वतो विपुलं वनम् ॥ ८ ॥
तस्याभ्याशे तु मिथुनं चरन्तमनपायिनम् । ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुनिःस्वनम् ॥ ९ ॥

५] ति० टी०–अकर्दममिति । अवतरणप्रदेशस्य पङ्करहित्यमनेनोच्यते । तीर्थमृषिजुष्टजलं निशामय पश्य । अत एव 'शमो दर्शने' इति मित्त्वाभावादह्रस्वत्वम् । रमणीयत्वे हेतुः–प्रसन्नाम्बिति । सन्मनुष्यचित्तस्य कामादिदोषराहित्येन नित्यप्रसन्नत्वात्सादृश्यम् ॥ ५ ॥

रा० टी०–अकर्दममिति । अकर्दमं पङ्करहितान्तर्बहिस्थलकम् । अत एव सन्मनुष्यमनो यथा सन्मनुष्यमनस्सदृशम् । अत एव रमणीयमतिरम्यम् । अत एव तीर्थम् । ऋषिभिर्जुष्टम् । इदं प्रसन्नाम्बु स्वच्छजलम् । हे भरद्वाज ! निशामय पश्य । 'शमो दर्शने' इति दर्शने मित्त्वनिषेधाद्ध्रस्वविरहः ॥ ५ ॥

गो० टी०–अकर्दममिति । भरद्वाज इति वाल्मीकेः प्रथानशिष्यस्य नाम । हे भरद्वाज ! अकर्दममपङ्कम् । अधःप्रदेशे पङ्करहितमित्यर्थः । अन्यत्र पापरहितं प्रसन्नाम्बु प्रसन्नसलिलं लोके किंचिदयः पङ्करहितत्वेऽपि जलं कलुषमेव भवति किञ्चित्रिर्मलोदकत्वेऽप्यधः सपङ्कमेव दृश्यते । न तथेदमितिभावः । अन्यत्राम्बुवत्प्रसन्नम् अत एव रमणीयं सन्मनुष्यमनो यथा सत्पुरुषहृदयसदृशमिदं तीर्थं निशामय पश्य । 'शमो दर्शने' इति मित्त्वाभावाद्दर्शनार्थोयं शब्दः । सन्मनुष्यमनोवत्प्रसन्नाम्बिति वा योजना ॥ ५ ॥

६] ति० टी०–न्यस्यतामिति । 'वल्कला' इति पाठे छान्दसं स्त्रीत्वम् । 'वल्कलमस्त्रियाम्' इति निघण्टुः । इदमेवात्यासन्नमपि गङ्गातीर्थम् । मध्याह्नकालातिक्रमादगत्वेति शेषः ॥ ६ ॥

रा० टी०–न्यस्यतामिति । हे तात ! कलशमुदपात्रं न्यस्यताम् अत्रैव धियतामित्यर्थः । मम वल्कलं शरीराच्छादनहेतुभूतकदलीत्वक् दीयताम् । उत्तमं तमसातीर्थमृषिसेविततमसाजलमिदमेवावगाहिष्ये अत्रैव स्नास्यामीत्यर्थः । स्नानात्पूर्वमेव वल्कलादियाचनेन त्वमपि स्नानं कुर्विति गुर्वाज्ञापनं ध्वनितम् ॥ ६ ॥

गो० टी०–न्यस्यतामिति । हे तात वत्स ! कलशमुदपात्रं न्यस्यतां भूमौ स्थाप्यताम् । मम वल्कलं स्नानशात्यर्थां वृक्षत्वक् दीयताम् । किमर्थमित्यत्राह–इदमेवेति । उत्तममकर्दमत्वादि गुणयोगेन जाह्नवीतीर्थाच्छ्रेष्ठमिदमेव तमसातीर्थमवगाहिष्ये । अत्रैव स्नास्यामि त्वमप्यत्र स्नाहीत्यर्थः ॥ ६ ॥

७] ति० टी०–एवमिति । वाल्मीकेनेति । "तस्येदम्" इत्यण् । प्रायच्छतेति छान्दसम् । नियतः सेवापरः ॥ ७ ॥

रा० टी०–एवमिति । नियतः स्नानकार्ये गुरुणा नियोजितः महात्मना परमपूज्येन वाल्मीकेन वल्मीकात्प्रादुर्भूतेन एवमनेन प्रकारेणोक्तो भरद्वाजः मुनेः नारदोपदिष्टवस्तुविषयकविचारशलिस्य गुरोस्तस्य वाल्मीकस्य वल्कलं प्रायच्छत प्रादात् । सञ्ज्ञापूर्वकविधेरनित्यत्वात्प्रायच्छतेति आत्मनेपदम् ॥ ७ ॥

गो० टी०–एवमिति । महात्मना महामनसा वाल्मीकेन वाल्मीकिना । तस्येदमिति संबन्धमात्रेऽण् । सम्बन्धश्चात्र पुत्रत्वम् । एवं पूर्वोक्तरीत्योक्तः गुरोर्नियतः परतन्त्रः भरद्वाजः मुनेस्तस्य वाल्मीकेर्वल्कलं प्रायच्छत प्रादात् । यच्छादेशः । छन्दसि बहुलग्रहणादात्मनेपदम् । सम्बन्धसामान्ये षष्ठी । तस्मा इत्यर्थः ॥ ७ ॥

८] ति० टी०–स इति । नियतेन्द्रियो जितेन्द्रियः । विचचार । अनुष्ठानयोग्यैकान्तदेशनिरीक्षणायेति शेषः ॥ ८ ॥

रा० टी०–वल्कलदानौत्तरकालिकं वृत्तमाह–स इत्यादिना । नियतेन्द्रियः संयतेन्द्रियग्रामः स वाल्मीकिः शिष्यस्य भरद्वाजस्य हस्ताद्वल्कलमादाय गृहीत्वा विपुलं विस्तीर्णं तद्वनं तमसातीरारण्यं सर्वतः पश्यन् विचचार । ह इति हर्षे । एतेन तद्वनस्य मनोहरत्वं व्यक्तम् । तेन तत्र तिष्ठासा व्यञ्जिता ॥ ८ ॥

गो० टी०–स इति । नियतेन्द्रियः निगृहीतेन्द्रियोऽपि स वाल्मीकिः शिष्यहस्ताद्वल्कलमादाय विपुलं विशालं वनं सर्वतः पश्यन् सन् विचचार । हेति विस्मये । निगृहीतेन्द्रियस्य विपुलवनावलोकनं दैवकृतत्वाद्विस्मयनीयमित्यर्थः ॥ ८ ॥

९] ति० टी०–तस्येति । तस्य वनस्याभ्याशे समीपे चरन्भगवांस्तद्वनाभ्याश एव चरन्तमनपायिनमाधिव्याधिरहितमत एव चारुनिःस्वनं क्रौञ्चयोर्मिथुनं ददर्श । चरन्तमनपायिनमित्यार्षम् ॥ ९ ॥

रा० टी०–तस्येति । तत्र तस्मिन्वने तस्य तमसातीर्थस्य अभ्यासे समीपे एव चरन्तं विहरन्तमनपायिनं वियोगशून्यं चारुनिस्वनं मनोहरशब्दयुक्तं क्रौञ्चयोः पक्षिविशेषयोः मिथुनं युग्मं भगवान् वाल्मीकिः ददर्श । तुशब्द एवार्थे । चरन्तमित्यादिपुंस्त्वमार्षम् ॥ ९ ॥

गो० टी०–तस्येति । भगवान् माहात्म्यवान् 'भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु' इत्यमरः । शापानुग्रहसमर्थ इत्यर्थः । वाल्मीकिस्तत्र वने तस्य तीर्थस्याभ्याशे समीपे चरन्तं वर्तमानमनपायिनमविनाभूतम् । क्षणविरहासहिष्णुं क्रौञ्च-

तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः । जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ १० ॥
तं शोणितपरीताङ्गं चेष्टमानं महीतले । भार्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥ ११ ॥
वियुक्ता पतिना तेन द्विजेन सहचारिणा । ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै ॥ १२ ॥
तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम् । ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ १३ ॥
ततः करुणवेदित्वादधर्मोऽयमिति द्विजः । निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥ १४ ॥

मिथुनमिति प्रसिद्धम् । चारुनिःस्वनमिति रतिकालिकस्वरोक्त्या रतिर्द्योत्यते । क्रौञ्चयोर्मिथुनं द्वन्द्वं पुँल्लिङ्गत्वमार्षम् । ददर्श ॥९॥

१०] ति० टी०–तस्मादिति । मिथुनाद्विभक्तमेकं पुमांसं पापनिश्चयस्तद्धननरूपपापनिश्चयः । अत एव वैरनिलयो निजानपकारिष्वपि प्राणिष्वकारणवैराश्रयः स इव निषादस्तस्य पश्यतस्तं पश्यन्तमनादृत्य जघान । पश्यत इति षष्ठी चानादरे१०

रा० टी०–तस्मादिति। वैरनिलयः अकारणद्रोहाश्रयः अत एव पापनिश्चयः तद्धत्योद्योगयुक्तः निषादः तस्य मुनेः पश्यत एव पश्यन्तमनादृत्यैव तस्मात् क्रौञ्चमिथुनात् वियुक्तमेकं केवलं पुमांसं जघान । तुशब्द एवार्थे। "षष्ठीचानादरे" इति सूत्रविहिता षष्ठी ॥ १० ॥

गो० टी०–तस्मादिति । पापनिश्चयः रतिसमयेऽपि हननकरणात् । क्रूरनिश्चयः वैरनिलयः सर्वजन्तुविषयसहजशात्रवयुक्तो निषादस्तस्मान्मिथुनात्तन्मिथुनमासाद्य । ल्यब्लोपे पञ्चमी । पुमांसमेकमवयवं तस्य पश्यतः तं पश्यन्तं मुनिमनादृत्य " षष्ठी चानादरे " इत्यनादरे षष्ठी । जघान हतवान् ॥ १० ॥

११] ति० टी०–तमिति । चेष्टमानं लुठन्तम् । निहतं दृष्ट्वा निषादेनेति शेषः । करुणां गिरं दीनं शब्दम् । रुराव अकरोदित्यर्थः । पाठान्तरे ' खेपरिभ्रमा ' । ख आकाशे परिभ्रमणं करोति सेत्यर्थः ॥ ११ ॥

रा० टी०–तमिति । शोणितपरीताङ्गं रुधिरव्याप्तशरीरं महीतले चेष्टमानं लुण्ठन्तं निहतं निषादेन हिंसितं क्रौञ्चं भार्या तत्स्त्री दृष्ट्वा तु अवलोक्यैव करुणां श्रवणमात्रेण कारुण्यनिष्पादिकां गिरं रुराव उच्चारयामास । तुशब्द एवार्थे ॥ ११ ॥

गो० टी०–तमिति । भार्या क्रौञ्ची निहतं व्याधहतमत एव महीतले भूतले चेष्टमानं घूर्णमानं शोणितपरीताङ्गं रुधिरव्याप्तशरीरं तं क्रौञ्चं दृष्ट्वा करुणां श्रोतुः कारुण्यावहां गिरं रुराव करुणशब्दमकरोत् । ओदनपाकं पचतीतिवत् । अरोदीत् ॥ ११ ॥

१२] ति० टी०–वियुक्तेति । सहचारिणा । अहोरात्रमिति शेषः । ताम्रशीर्षेण कुक्कुटादिवत्ताम्रवर्णशीर्षगतचूडायुक्तेन । मत्तेन कामसम्भोगवशादिति शेषः । अत एव पत्रिणा सम्भोगकालत्वाद्विततपक्षवता । सहितेन स्वसङ्गतेन तेनापूर्णरतित्वादत्यन्तं शोकः । इत्थंभूतेन पतिना वियुक्ता रुरावेति पूर्वेणान्वयः १२

रा० टी०–वियुक्तेति । मत्तेन सम्भोगहेतुभूतमदविशिष्टेन । अत एव पत्रिणा सम्भोगार्थं विस्तारितपक्षवता । अत एव सहचारिणा स्वस्त्रिया सहैव गच्छता । अत एव सहितेन स्वसदृशगमनविशिष्टेन ताम्रशीर्षेण अरुणचूडेन द्विजेन पक्षिविशेषेण तेन हतेन पतिना स्वपतिना वियुक्ता रुरावैवेति पूर्वेणान्वयः । नान्यत्किञ्चित् शुश्रावेत्यर्थः । एतेन तच्छोकस्य पराकाष्ठा सूचिता । विनापि प्रत्ययं पूर्वोत्तरपदयोश्चेति स्वशब्दलोपः । अत एव नाभावेनार्षकल्पना । वैशब्द एवार्थे । सहितेनेत्यत्र हितशब्दः गमनार्थकहिंधातुप्रकृतिकभावनिष्ठान्तः ॥ १२ ॥

गो० टी०–वियुक्तेति । पतिना पत्या । नाभाव आर्षः । सहचारिणा सहचारशीलेन । ताच्छील्ये णिनिः । सहितेनेत्यनेन मनस्सङ्गतिरुच्यते इति न तेन पुनरुक्तिः । ताम्रशीर्षेण रक्तशिरसा । ' उत्तमाङ्गं शिरः शीर्षम् ' इत्यमरः । मत्तेन रतिपरवशेनेत्यर्थः । पत्रिणा प्रशस्तपक्षेण तेन द्विजेन पक्षिणा ' दन्तविप्राण्डजा द्विजाः ' इत्यमरः । भार्या वियुक्ता विरहिता सती करुणां गिरं रुरावेति पूर्वेणान्वयः । वैइति पादपूरणे । ' तु हि च स्म ह वै पादपूरणे ' इत्यमरः । अत्र विशेषणानि भार्यायाः शोकातिरेकहेतुत्वेन निर्दिष्टानि ॥ १२ ॥

१३] ति० टी०–तथाविधमिति । तथाविधं कामभोगवशम् । धर्मात्मनो दयादाक्षिण्याहिंसादिधर्मप्रवणचित्तस्य । कारुण्यं दया । समपद्यत समजायत ॥ १३ ॥

रा० टी०–तथेति । तथाविधं सम्भोगोद्योगविशिष्टं द्विजं क्रौञ्चं निषादेन निपातितं पृथिव्यां लुण्ठितं दृष्ट्वा धर्मात्मनः परमधर्मज्ञस्य ऋषेस्तस्य वाल्मीकेः कारुण्यमनुकम्पा समपद्यत सम्यक् प्राप्नोत् ॥ १३ ॥

गो० टी०–तथेति । तथा शोणितपरीताङ्गमित्यायुक्तरीत्या निषादेन निपातितं हिंसितमित्यर्थः । तं द्विजं दृष्ट्वा स्थितस्य धर्मात्मनः धर्मस्वभावस्य ऋषेर्वाल्मीकेः करुणैव कारुण्यम् । स्वार्थे ष्यञ् । दया समपद्यत आसीत् ॥ १३ ॥

१४] ति० टी०–तत इति । करुणवेदित्वात्सञ्जातकरुणत्वात् । ह्रस्वश्छान्दसः । विदेः सत्तार्थाल्लाभार्थाद्वा णिनिः । रुदतीं क्रौञ्चीं निशाम्य दृष्ट्वा । अयं काममोहितपक्षिवधरूपोऽधर्म एवेति निश्चित्य क्रौञ्चीविषयकरुणावत्त्वेन, अर्थात्पापकारिणि निषादे आविर्भूतरोषतयेदं वक्ष्यमाणं वचनमब्रवीत् ॥१४॥

रा० टी०–निपातितक्रौञ्चदर्शनहेतुककारुण्यप्राप्त्यनन्तरकालिकं वृत्तमाह–तत इत्यादि । रुदतीं क्रौञ्चीं निशाम्य दृष्ट्वा । ततः क्रौञ्चीरोदनश्रवणहेतोः करुणवेदित्वात् घृणाविशिष्टत्वाद्धेतोः-

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः । यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ १५ ॥

'अयं पक्षिवधोऽधर्मः धर्मविरुद्धः' इदं वचनं द्विजः वाल्मीकिरब्रवीत् ॥ १४ ॥

गो० टी०–तत इति । ततः क्रौञ्चीविषयकारुण्यसम्पत्त्यनन्तरम् । द्विजः सहजकारुण्यस्वभावो मुनिः रुदतीं क्रौञ्चीं निशाम्य दृष्ट्वा । करुणवेदित्वात् कारुण्यभाक्त्वात् विद्लु लाभे इत्यस्माण्णिनिः । अयं रतिकाले हिंसनमधर्म इति मत्वा इदं वक्ष्यमाणं वचनमब्रवीत् ॥ १४ ॥

१५] ति० टी०–मा निषादेति। क्रौञ्चहन्तृप्रत्यक्षदृश्यमाननिषादशापरूपोऽर्थस्तु स्पष्ट एव । किञ्च मा लक्ष्मीर्निषीदत्यस्मिंस्तत्संबोधनं मानिषाद ! यस्माद्धेतोः क्रौञ्चमिथुनान्मन्दोदरीरावणरूपादेकं काममोहितं रावणमवधीर्हतवानसि तस्मात्त्वं शाश्वतीः समा अनेकान्संवत्सरानद्वितीयां प्रतिष्ठामखण्डैश्वर्यानन्दावाप्तिमगमः प्राप्नुहि । तेन 'अर्थतः शब्दतो वापि मनाक्काव्यार्थसूचनम्' इत्युक्तेः श्रीरामकृतरावणवधरूपकाव्यार्थः काव्यादाववश्यकर्तव्याशीर्वादश्च सूचित इति तीर्थः ॥

कतककृत्तु–प्रत्यक्षसंहन्तृनिषादशापरूपोऽर्थस्तु स्पष्ट एव । किञ्च नितरां सदेवर्षिगणं त्रैलोक्यं सादयति पीडयतीति निषादस्तस्य संबुद्धिर्हे निषाद रावण ! यस्मात्क्रौञ्चमिथुनात् अल्पीभावार्थकुञ्चेः पचाद्यच् कुञ्चम् ततः स्वार्थिकोऽण् कौञ्चम् । राज्यक्षयवनवासादिदुःखेनात्यल्पीभूतं परमकार्श्यं गतं यन्मिथुनं सीतारामरूपं तस्मादेकं सीतारूपं यस्मादवधीर्वंधाभ्यधिकपीडां प्रापितवानसि तस्मात्त्वं प्रतिष्ठां या लङ्कापुरे पुत्रपौत्रभृत्यगणवैशिष्ट्येन ब्रह्मणा प्रतिष्ठा दत्ता तामतः परं मा गम इति काव्यार्थसूचनम् । त्रैलोक्यस्य परममङ्गलरूपं चेदं सत्यसरस्वत्या पुरस्तादाविर्भावितमित्याह । अत्रेदमवधेयम्–रावणवधे जातेऽयोध्याराज्यप्राप्त्यनन्तरं नारदं प्रति प्रश्न इति स्वयमेव व्याख्यातत्वादुत्तरकालिकैतच्छ्लोकस्यैव विधिघटितस्योक्तार्थस्य कतकमते कथं संगतिः । कथं वा सर्वज्ञा सत्यसरस्वती भूतमर्थमाशास्यत्वेन निर्दिशेदिति । तीर्थव्याख्यानेऽपीदं काव्यार्थसूचनं कविना कार्यमिति तदुक्तसम्मतिश्लोकार्थाद्गम्यते । तत्र वाल्मीकेस्तथा तात्पर्ये 'किमिदं व्याहृतं मया' इत्युक्तेरसङ्गतेः । न च किमिदमित्यस्य पद्यं गद्यं वेत्यर्थः । "तदप्येषः श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे" इत्यादि बहुशः श्रुतिषूपलम्भेनेदृशाक्षरसन्निवेशस्य श्लोकत्वेन मुनेरज्ञानमित्यस्यात्यन्तमनुचितत्वात् । प्राक्तननारदकृपिसंवादस्यापि श्लोकरूपतया तत्रैव सन्देहकरणौचित्याच्च । तत्प्रश्नोत्तरं सर्वं केवलसंस्कृतैरेव । एतच्छ्लोकोत्तरमेव श्लोकैस्तस्यापि निबन्धनमिति कल्पना तु न युक्ता मानाभावात् अन्यथोपपत्तेश्च । अधर्मत्वबुद्धिपूर्वं कथितवचनस्येदृशेऽर्थे तात्पर्यसम्भवस्याप्यभावाच्च । माङो योगाभावेऽगम इत्येतावन्मात्रेण लुङा भूतत्वस्यैव प्रतीत्याशिषो अप्रतीतेश्च । एतच्छ्लोकनिर्गमकाले कवेः काव्यं करिष्यामीति बुद्धेरप्यभावाच्च । ब्रह्मोपदेशानन्तरमेव हि तथा बुद्धिर्वाल्मीकेः ॥

मम तु प्रतिभाति–नारदात्स्वगुणश्रवणानन्तरं मुनेः स्ववर्णनेच्छां ज्ञात्वा स्वचरित्रस्य च करुणारसमयत्वेन तत्प्रधानकाव्येऽतिकरुणचित्तस्यैवाधिकाराद्दृषेः करुणचित्तत्वजिज्ञासयेव पूर्वभृगुदत्तशापस्य पुनरुक्तत्वकरणेन दार्ढ्यसम्पादनाय मुनेरीक्षणाय च भगवान्राम एव निषादरूपेण पश्यतो मुनेः पुरतस्तमनादृत्य क्रौञ्चं रक्षोविशेषरूपं जघान । ततस्तद्दिच्छावशादन्तर्यामितया तथा प्रेरणाच्च महानधर्मोऽयमनेन कृत इति रुषा 'पापमते निषाद ! यत्त्वं काममोहितं क्रौञ्चमिथुनान्मिथुनीभूतात्क्रौञ्चयुगाद्विभक्तमेकमवधीस्तत्त्वमपि शाश्वतीः समा आयुःशेषभूतानि बहूनि वर्षाणि प्रतिष्ठां स्वस्त्रीसाहित्येन स्थितिमिह लोके मा गमो मा प्राप्नुहि । किन्त्वत्यल्पकालमेव तथा वास एकमिथुनीभावपर्यन्तमितियावत्' इति शप्तवान्मुनिः । 'एकमवधीः' इत्युक्तेर्यथा स त्वया स्त्रीविरहितः कृतः, सा च नायकहीना कृता, तथा त्वमपि प्रियया स्वभार्यया हीनो भव । सा च त्वया हीना भवत्विति पर्यवसानम् । अगम इत्यडागमस्तु माङ्योगेऽप्यार्षत्वात् । तस्य रक्षोरूपत्वं त्वेतदुत्तरं ब्रह्मणः सकाशात्सकलरामवृत्तान्तज्ञानवरलाभोत्तरकालकृते ' तस्मात्तु मिथुनादेकम् ' इति श्लोके वैरनिलय इति विशेषणेन सूचितम् । रक्षःस्वेव तस्य लोकदृष्ट्या वैरनिलयत्वप्रसिद्धेः । निषादस्यापि प्राणिषु न वैरं किन्त्वाहारार्थमेव तद्धननमिति प्रसिद्धेश्च । अत एवारण्यकाण्डे मृगयाव्यसनमुपक्रम्य ' विना वैरं च रौद्रः ' इति, 'तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम् । निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितम् ॥ ' इति च वक्ष्यति । ' त्रीण्येव व्यसनान्यत्र कामजानि भवन्तु ते ' इति चोपक्रमे उक्तम् । नन्वीदृशोऽर्थस्त्वया केन मानेन निर्णीत इति चेच्छृणु । ऋष्यक्षरस्त्वारस्यात् । तच्चाग्रे स्फुटम् । तत्र सन्देहश्चेन्त्वान्तर्योमिणं पृच्छ । तदुक्तं पाद्मे शिवशिवासंवादे रामवैभववर्णने चतुर्विंशेऽध्याये–' ततो जानपदः कश्चित्पामरः काष्ठविक्रयी । स्ववधूगर्हणद्वारा रावणस्य गृहोपिताम् ॥ गर्हयामास वैदेहीं दुर्वृत्तं लोकनिन्दकः । तच्छ्रुत्वा देवि चारेभ्यो भीतो लोकापवादतः ॥ आहूय लक्ष्मणं प्राह रामो राजीवलोचनः । शृणु मे वचनं गुह्यं सीतासन्त्यागकारणम् ॥ वाल्मीकिनाऽथ भृगुणा शप्तोऽस्मि किल लक्ष्मण । तस्मादेनां त्यजाम्यद्य जनो नैवात्र कारणम् ॥ ' इति । तथा स्कान्दे पातालखण्डेऽयोध्यामाहात्म्ये तत्रत्यतीर्थाश्रमवर्णनप्रस्तावे–' शापोक्त्या हृदि सन्तप्तं प्राचेतसमकल्मषम् । प्रोवाच वचनं ब्रह्मा तत्रागत्य सुसत्कृतः ॥ न निषादः स वै रामो मृगयां चर्तुमागतः । तस्य संवर्णनेनैव श्लोक्यस्त्वं भविष्यसि ॥ इत्युक्त्वा तु जगामाशु ब्रह्मलोकं सनातनः । ततः संवर्णयामास राघवं ग्रन्थकोटिभिः ॥' कोटिभिः शतकोटिभिः । ' चरितं रघुनाथस्य शतकोटिप्रविस्तरम्' इत्यन्यत्रोक्तेः । तच्च संपूर्णं ब्रह्मलोक इत्यैतिह्यम् । इह तु कुशलवोपदिष्टा चतुर्विंशतिसहस्रीत्यलम् । योगवासिष्ठे तु शापान्तराण्यप्युक्तानि । तथाहि–'सनत्कुमारो निष्काम अवस-

द्ब्रह्मसद्मनि । वैकुण्ठादागतो विष्णुस्त्रैलोक्याधिपतिः प्रभुः ॥ ब्रह्मणा पूजितस्तत्र सत्यलोकनिवासिभिः । विना कुमारं तं दृष्ट्वा ह्युवाच प्रभुरीश्वरः ॥ सनत्कुमार स्तब्धोऽसि निष्कामो गर्वचेष्टया । अतस्त्वं भव कामार्तः शरजन्मेति नामतः ॥ तेनापि शापितो विष्णुः सर्वज्ञत्वं तवास्ति यत् । किञ्चित्कालं हि तत्यक्त्वा त्वमज्ञानी भविष्यसि ॥' शापितः शप्तः । किंचित्कालमवतारान्तरेऽल्पकालम् । तत्यक्त्वा तद्रूपं त्यक्त्वा । अज्ञानी स इव । तथा–'भृगुर्भार्या हतां दृष्ट्वा प्रोवाच क्रोधमूर्छितः । विष्णो तवापि भार्याया वियोगो हि भविष्यति ॥' तथा–'वृन्दया शापितो विष्णुश्छलनं यत्त्वया कृतम् । अतस्त्वं स्त्रीवियोगं हि वचनान्मम यास्यसि ॥' शापितः शप्तः । छलनं पतिवेषेण सम्भोगरूपम् । तथा–'भार्या हि देवदत्तस्य पयोष्णीतीरसंस्थिता । नृसिंहवेषधृग्विष्णुं दृष्ट्वा पञ्चत्वमागता ॥ तेन शप्तो हि नृहरिर्दुःखार्तः स्त्रीवियोगतः । तवापि भार्यया सार्धं वियोगो हि भविष्यति ॥' इति । दुःखार्तः तृतीयार्थे आर्षी प्रथमा । दुःखार्तेनेत्यर्थः । ताराशापोऽपि किष्किन्धाकाण्डे तत्रैव वक्ष्यत इत्यलं विस्तरेण । 'प्राचेतसेन मुनिना रामो राजीवलोचनः । तमसोपवने शप्तो वेषधृग्जानकीपतिः ॥ श्रीरामः प्राकृतां लीलां स्त्रीयां वर्णयितुं तदा । मन्दोदर्याः पतिः क्रूरः क्रौञ्चवद्विनिपातितः ॥ अण्डजं निहतं दृष्ट्वा मुनिः शापमथाददौ । चिरं प्रतिष्ठा मा भूत्ते निषाद भुवि हिंसक ॥ शापं श्रुत्वैव सर्वात्मा तत्रैवान्तरधीयत । शोकाक्रान्तस्तु वाल्मीकिर्ब्रह्मणाऽऽशु सुबोधितः ॥' इति । 'त्यक्त्वा जीर्णदुकूलवद्वसुमतीं बद्धोऽम्बुधिर्बिन्दुवद्ब्राणाग्रेण जरत्कपोतक इव व्यापादितो रावणः । लङ्का कापि विभीषणाय सहसा मुद्रेव हस्तेऽर्पिता श्रुत्वैवं रघुनायकस्य चरितं को वा नरो नाद्रियते ॥' ॥ १९ ॥

रा० टी०–तत्रत्यहिंसानिवृत्तिफलकयत्नसूचनपूर्वकहिंसावलोकनजन्यशोकनिवर्तकप्रतिपिपादयिषितकाण्डसमाप्तार्थसूचकं पद्यमाह–**मा निषादेत्यादिना** । हे निषाद ! यद्यस्मात्काममोहितं कामासक्तं क्रौञ्चमिथुनादेकं पुमांसं पृथक्कृत्य त्वमवधीस्तस्मात् शाश्वतीः निरन्तराः समाः संवत्सरान् प्रतिष्ठामिह वने क्वचित्स्थानं त्वं मा गमः न प्राप्नुहि । पुनरिह वने तवागमनं न स्यादित्यर्थः । "आशंसायां भूतवच्च" इतिभविष्यत्काले लुङ् । अननुबन्धकमाशब्दप्रयोगान्नाङ्घ्रिरहप्रसक्तिः । समा इत्यत्र द्वितीया "कालाध्वनोः" इति सूत्रविहिता । 'प्रतिष्ठा स्थितिमाहात्म्यम्' इति वैजयन्तीकोशात्प्रतिष्ठाशब्दः स्थानपरः । किञ्च त्वमेतिनिपादविशेषणम् । त्वेन आत्मभिन्नेन रागादिना मः बन्धनं यस्य । अनात्मभूतरागादिवश इत्यर्थः । 'मा च मातरि मो माने बन्धने च प्रकीर्तितः' इत्येकाक्षरकोशान्मशब्दस्य बन्धनवाचकत्वम् । त्वशब्दस्यान्यपरत्वं तु सर्वादिगणे प्रसिद्धम् । अत्र पक्षे सानुबन्धकमाङ्शब्दप्रयोगात् । अङ्घ्रिरहभविष्यत्कालबोधकलुङौ सिद्धाविति बोध्यम् । अर्थस्तु पूर्ववत् । एतेन तत्रत्यहिंसाभाव एव सम्पादितः । न निषादप्राणवियोगः शापेनेति फलितम् । तेन ऋषेः क्रोधो न जात इति ध्वनितम् । तेन ऋषेः परमदयालुत्वं व्यक्तम् ॥

तत्रत्यहिंसानिवृत्तिफलकयत्नरूपार्थमुक्त्वा हिंसावलोकजन्यशोकनिवर्त्तकप्रतिपिपादयिषितकाण्डसमाप्तकस्वाभिप्रेतसंक्षिप्तार्थं उच्यते । हे मानिषाद ! मानिनां गर्वविशिष्टानां षः श्रेष्ठः परशुरामस्तमासमन्ताद्भावेन यति खण्डयति वैष्णवधनुःसज्जीकरणादिना तद्गर्वं निवर्तयतीति मानिषादः तत्संबोधने हेमानिषाद परशुरामाभिमाननिवर्त्तक ! त्वं शाश्वतीः समाः प्रतिष्ठामगमः प्राप्स्यसि । यद्यस्मात्क्रौञ्चवन्मिथुनीभूतात् क्रौञ्चमिथुनाः जनकधनुर्यागसमागता अविवेकिनो भूपास्तेषु अतति व्याप्नोतीति क्रौञ्चमिथुनात् त्वमेकं केवलं काममोहितमविवेकिभूयकाममोहितत्वम् । अवधीः न्यवर्त्तयः । 'षः कीर्तितो बुधैः श्रेष्ठे तथा गम्भीरलोचने' इत्येकाक्षरकोशात्षशब्दः श्रेष्ठपरः "आशंसायां भूतवच्च" इति सूत्रविहितोऽत्र लुङ् । काममोहितमिति भावनिष्ठान्तम् । इति बालकाण्डकथा सूचिता ॥

यद्वा मं बन्धनं सत्यवचनात्याज्यत्वादेव वरप्रदानसंशयाविष्टत्वम् । आसमन्तान्निषादयति दूरीकरोतीति तत्संबोधने हे मानिषाद महाराजाधिराजदशरथसंशयनिवर्त्तक ! तद्विशेषणं क्रौञ्चमिथुनादिति । क्रौञ्चवन्निरन्तरवनवासेन पक्षितुल्यानि मिथुनानि अनसूयाऽऽदियुग्मोपलक्षितानि तानि आसमन्तादतति स्वदर्शनजनितानन्ददानतत्वेन प्राप्नोतीति क्रौञ्चमिथुनात् वन्यमुन्यानन्ददातः रघुनाथ ! यद्यस्मादेकमल्पमापाततः प्रतिभासमानं काममोहितं दशरथकाममोहितत्वम् । किञ्च कामेन रघुनाथेच्छया मोहितत्वं प्रकटस्ववियोगजनितदशरथौदासीन्यमवधीः स्वाप्रकटस्वस्वरूपसंयोगबोधनद्वारा न्यवर्त्तयः । तस्मात् त्वं शाश्वतीः समाः प्रतिष्ठामगमः । इत्ययोध्याकाण्डकथासूचनम् ॥

यद्वा हे मानिष ! मानः देवकर्तृकपूजा अस्ति येषां ते मानिनः ब्रह्मविष्णुमहेश्वराः तेभ्योऽपि षः श्रेष्ठः तेषां षं येनेति वा । तत्संबोधनं हे मानिष ! अन्ते ब्रह्मादिश्रैष्ठ्यहेतुभूतेत्यर्थः । अत्र पक्षे षशब्दः भावप्रधाननिर्दिष्टो बोध्यः । तद्विशेषणं शेति । मङ्गलप्रदेत्यर्थः । काममोहितमत्यन्तमोहं प्राप्नं यत् रक्षःकुलं समाः सर्वत्र समदृष्ट्यो ये दण्डकारण्यवासिऋषयस्तानाद भक्षयामास । तत् रक्षःकुलं क्रौञ्चमिथुनात् क्रौञ्चं वनगमनप्रतीयमानाल्पत्वं प्राप्नं यन्मिथुनं मिथुनत्वम् । मिथुनधर्मो विलासवचनादिस्तमतति प्राप्नोतीति क्रौञ्चमिथुनात्त्वमाशु शीघ्रमेकमल्पमश्रममिति यावत् । यथा स्यात्तथाऽवधीः । अतः प्रतिष्ठां मुनिकृतपूजामगमः । प्रायः अत एवातीः । अत्येति सर्वानतिवर्त्तसे इति अतीः । सर्वश्रेष्ठोसीत्यर्थः । इत्यारण्यकथामूचनम् ॥

यद्वा हे मानिष ! मस्य ऋष्यमूकपर्वतादन्यत्र सुग्रीवगमनप्रतिबन्धरूपबन्धनस्य आनिषः अत्यन्तध्वंसो यस्मात्तत्संबोधनम् । तद्विशेषणं क्रौञ्चेति वनवासहेतुकप्रतीयमानकृशत्वविशिष्टेत्यर्थः । यद्यस्मान्मिथुनात्तारावालियुग्माद्विभक्तमेकं काम-

मोहितं वालिनं त्वमवधीः । तस्मात् आदप्रतिष्ठाम् आदस्य स्वीकारकर्तुर्या प्रतिष्ठा स्वीकृतनिर्वहणजन्यप्रतिष्ठितत्वं शाश्वतीः समाः अगमः प्राप्स्यसि । आनिप इति आङ्निपूर्वकध्वंसार्थकषोधातुप्रकृतिकभावार्थककप्रत्ययेन सिद्धम् । आदेत्यत्र आङ्पूर्वकदाधातोः कः । इति किप्किन्धाकाण्डकथासूचनम् ॥

यद्वा हे कौञ्च ! प्रतीयमानसीताविरहहेतुकप्रतीयमानकृशताविशिष्ट ! यस्मान्मिथुनात्तारासुग्रीवमाज्ञाप्य मया लक्ष्म्या सह निषीदति नित्यं तिष्ठतीति मानिषादो विष्णुस्तद्वत्सङ्ग्रामे प्रतितिष्ठतीति मानिषादप्रतिष्ठः हनुमान् तं त्वमगमः सीतान्वेषणार्थं लङ्कां तारासुग्रीवद्वारा प्रैषयः । तस्मात् शाश्वतीः समाः बहुकालं रक्षसामेकं मुख्यं काममोहितं काममोहितत्वम् अवधीः न्यवर्तयः । मिथुनादित्यत्र ल्यब्लोपे पञ्चमी । प्रतिष्ठेत्यत्र विच्प्रत्ययः । अगम इत्यत्र गमिरन्तर्भावितणिजर्थः । इति सुन्दरकाण्डकथासूचनम् ॥

यद्वा हे पाद ! पं परोक्षत्वं इन्द्रियागोचरत्वम् आसमन्तात् यति खण्डयतीति पादः तत्संबोधनं पादेति । स्वावाङ्मनसगोचरत्वं परित्यज्य मम दृष्टिपथं गतेत्यर्थः । किञ्च पः श्रेष्ठः आदौ ग्रहणकर्त्ता स एव स इति कर्मधारयः । तत्संबोधने हे पाद ग्रहणकर्तृश्रेष्ठ ! स्वीकृतापरित्यागधर्मविशिष्टेत्यर्थः । यस्मात् कौञ्चं सीताहरणहेतोः परस्परं कुटिलतां प्राप्तं यन्मिथुनं मन्दोदरीरावणयुग्मं तस्माद्विभज्य एकं रक्षःप्रधानम् । काममोहितं कामेन रघुनाथेच्छया मोहितम् । अयं मम स्वामीति विवेकराहित्यविशिष्टं रावणं त्वमवधीः । तस्माद्धेतोः । मा देवसंपत्तिः त्वया आनि आजीवि । पुनः प्रापीत्यर्थः । अत एव शाश्वतीः समाः प्रतिष्ठामिह लोकेऽपि महाराजत्वरूपं परममाहात्म्यमगमः प्राप्स्यसि । ' उपसर्गे परोक्षे च पकारः परिकीर्त्तितः । पः कीर्तितो बुधैः श्रेष्ठे ' इति कोशौ । इति युद्धकाण्डकथासूचनम् ॥

यद्वा हे श सकलायोध्यावासिनित्यमङ्गलप्रद ! कौञ्चमिथुनात् तदुपलक्षितपक्षिण आरभ्य समाः साम्यविशिष्टपरमहंसपर्यन्ताः । सकलायोध्यावासिप्रजाइत्यर्थः । एकं मुख्यम् । अत एव कामं सर्वेच्छाविषयीभूतम् । अत एव ओहितं तं प्राप्स्यामि न वेति अतिशयतर्कविषयीभूतम् । मो महाशम्भुः अः महाविष्णुः आः महाब्रह्मा । तेषामानिषादः परमा स्थितिर्यत्र स मानिषादः स एव प्रतिष्ठाः सर्वोत्कृष्टमाहात्म्यविशिष्टः अप्रकटसाकेतपदार्थस्तम् । आशु शीघ्रमगमः प्रापयः अतस्त्वमतीः सर्वानतिवर्त्तसे । मकारस्य शिववाचकत्वे प्रमाणम् । 'मः शिवे मा रमायां च मा निषेधेऽव्ययं मतम्' इति विश्वः । इत्युत्तरकाण्डकथासूचनम् ॥१९॥

गो० टी०—तदेव वचनमाह—**मानिषादेति**। हे निषाद ! त्वं शश्वदेव शाश्वत्यः स्वार्थेऽण् । ततो ङीप् । ताः अनारता इत्यर्थः । समाः संवत्सरान् । ' संवत्सरो वत्सरोऽब्दो हायनो स्त्री शरत्समाः ' इत्यमरः । अत्यन्तसंयोगे द्वितीया । प्रतिष्ठां क्वचित्स्थानम् । 'प्रतिष्ठा स्थितिमाहात्म्ये' इति वैजयन्ती । मागमः मा प्राप्नुहि । " आशंसायां भूतवच्च " इति लुङतिदेशात् । लृदित्वादङ् । नायं माङ् अपितु माशब्द इति काशिकाकारः । तेनाडागमेऽपि न विरोधः । दुर्घटवृत्तिकारस्तु अमेति पदच्छेदः । हे अम ! हे अलक्ष्मीक ! इति निषादविशेषणम् । ततो "न माङयोगे " इत्यडभाव इत्याह । एवं पूर्वार्द्धेन शाप उक्तः । तत्र हेतुरुत्तरार्द्धेनोच्यते । यस्मात्कारणात् कौञ्चमिथुनात् कौञ्चमिथुनमासाद्य ल्यब्लोपे पञ्चमी । एकं काममोहितं कामेन मोहं प्रापितम् रतिक्रीडाविवशमित्यर्थः । एकमवयवमवधीः हिंसितवानसि । तस्मात्तद्वदेव प्रतिष्ठां मागम इति योजना ॥

चतुर्मुखप्रसादेन वाल्मीकिमुखात् प्रथमोदितोऽयं श्लोकः केवलं शापपरो न भवितुमर्हतीति भगवन्मङ्गलाशासनपरतया मङ्गलाचरणपरोऽयं प्राथमिकः श्लोक इति पूर्वाचार्या वर्णयन्ति । तथाहि निषीदन्त्यस्मिन्निति निषादो निवासः । अधिकरणे घञ् । मा लक्ष्मीः तस्या निषादो मानिषादः श्रीनिवासस्तत्र सम्बुद्धिर्हे श्रीनिवास ! त्वं शाश्वतीः समाः सर्वकालं प्रतिष्ठां माहात्म्यमगमः गच्छ । लकारव्यत्ययः । यस्मात् कौञ्चमिथुनात् राक्षसमिथुनाद्रावणमन्दोदरीरूपात् कामेन मन्मथेन मोहितं सीतापहर्तारमेकं रावणमवधीः । रावणं हत्वा कृतत्रैलोक्यत्राणस्त्वं यावत्कालं विजयी भवेत्यर्थः । वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । एवमनेन श्लोकेनेष्टदेवतास्मरणरूपं मङ्गलमाचरितम् ॥

' काव्यार्थसूचनं कैश्चिन्नान्यामेव निरूप्यते ' इतिवचनादस्मिनेव श्लोके वक्ष्यमाणकाव्यार्थः सङ्क्षेपेण दर्शितः । तथाहि । मानिषादेत्यनेन सीतापरिणयपर्यवसायिनी बालकाण्डकथोद्बोधिता । प्रतिष्ठां त्वमगम इत्यनेन पितृवचनपरिपालनप्रतिष्ठाभिधायिन्ययोध्याकाण्डकथा वेदिता । शाश्वतीः समा इत्यनेन ऋषिगणविषयप्रतिज्ञानिर्वहणेन रामस्य प्रतिष्ठानुद्वृत्तिमभिदधत्यारण्यकाण्डकथा सूचिता । कुञ्च गतिकौटिल्यालपीभावयोरित्यस्माद्धातोर्क्तेल्विगित्यादिना क्तिन्प्रत्यये । नलोपः संयोगान्तलोपश्च न भवति । कुञ्चेव कौञ्चः स्वार्थेऽण् । तथा च कौञ्चयोः कुटिलयोस्तिरश्चोस्तारावालिनोर्मिथुनादेकं काममोहितं सुग्रीवभार्यापहर्तारं वालिनमवधीरिति किष्किन्धाकाण्डकथाभिहिता । कौञ्चौ अल्पीभूतौ कृशाविति यावत् । तयोरन्योन्यविरहक्लेशक्रशीयसोः सीतारामयोरेकमवयवं सीतारूपमवधीः भृशं पीडितवानसीति सीताविरहदुःखातिशयवर्णनपरा सुन्दरकाण्डकथा बोधिता । कौञ्चौ कुटिलौ राक्षसौ तन्मिथुनादेकं काममोहितं रावणमवधीरिति युद्धकाण्डकथा सूचिता । दण्डकारण्यवासिऋषिपत्नीदर्शनाभिलाषमोहितसीतापीडाभिधानेनोत्तरकाण्डार्थोऽपि सङ्क्षिप्तः ॥

ननु मृगपक्ष्यादिवधस्य व्याकुलधर्मत्वात् कथमनपराधिनमेनं मुनिः शप्तुमर्हति । वक्ष्यति राम एव वालिवधप्रस्तावे । ' प्रमत्तान्प्रमत्तान्वा नरा मांसार्थिनो भृशम् । वध्यन्ति विमुखांश्चापि न च दोषोऽत्र विद्यते' इति सत्यम् । तथापि रतिपरवशतादशायां तद्वधो दोष एवेति मुनेराशयः सूचयति हि

तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः । शोकार्तेनास्य शकुनेः किमिदं व्याहृतं मया ॥ १६ ॥
चिन्तयन्स महाप्राज्ञश्चकार मतिमान्मतिम् । शिष्यं चैवाब्रवीद्वाक्यमिदं स मुनिपुङ्गवः ॥ १७ ॥
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः । शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥ १८ ॥

रतिपरवशतां काममोहितमिति पदेन । अत एव भारते पाण्डुं प्रति मुनिः । 'अस्वर्ग्यमयशस्यं त्वमनुतिष्ठसि भारत । को हि विद्वान्मृगं हन्याच्चरन्तं मैथुनं वने ' इति । नन्विदं मलयं गच्छतो मन्दरपथोपवर्णनं यदयमात्मनो वैलक्षण्यं परमाप्तत्वं वक्तुमारभ्य स्वचरित्रवर्णनं करोति । ब्रह्मागमनवरप्रदानादेरेव तदर्थं वक्तव्यत्वात् । उच्यते श्रूयतामवधानेन । ' अर्थतः शब्दतो वापि मनाक्काव्यार्थसूचनम् ' इति दर्शितरीत्या काव्यार्थसूचनमियता ग्रन्थसन्दर्भेण क्रियते । तथाहि अकर्दममित्यादिना पावनं समुद्रसेतुस्थलमुच्यते । तस्याभ्याश इत्यादिना तत्तीरे मन्दोदर्या सह चरन्तं भोगान् भुञ्जानमनपायिनं चतुर्मुखवरप्रदानेन लब्धचिरायुषं चारुनिस्वनं रम्यवीणादिविनोदं कौञ्चयोराक्षसयोर्मिथुनं ददर्श धर्मबलेनालोकितवान् । तस्मादित्यादिना पापनिश्चयो निश्चितरावणपापः वैरनिलयः हिरण्यकशिपुरावणशिशुपालरूपजन्मत्रयानुसारित्वात्सहजशात्रवः निपीदन्त्यत्र सर्वाणि जगन्तीति निषादो विष्णुः । पुमांसं रावणं जघानेत्युच्यते । भार्यात्वित्यादिना मन्दोदरीप्रलापः । द्विजेन पुलस्त्यवंशत्वात् ब्राह्मणेन ताम्रशीर्षेण रत्नमुकुटधारित्वात् पत्रिणा वाहनपरिच्छदादिमता सहितेन कुम्भकर्णेन्द्रजिदादिसहायसंपन्नेन कारुण्यं जुगुप्सा 'जुगुप्सा करुणा घृणा' इत्यमरः । अधर्मोयमिति रावणकृतोयमधर्म इति । एतत्सर्वं रावणवधवृत्तान्तमवलोक्य पौलस्त्यवधाभिधानं तद्विषयप्रबन्धं निरमिमीतेति मानिपादेत्यस्य रामायणार्थसंग्रहपरत्वं चोक्तम् । अथवा अकर्दममित्यादिना गोदावरीतीर्थमुच्यते । तत्तीरे पञ्चवट्यां रामस्य सीतयासह वर्तनं तयोरेकस्याः सीताया रावणेन दुरात्मना हिंसनं पीडनमित्येतत्सर्वं साक्षात्कृत्य विधिचोदितो मुनिः सीतायाश्चरितमिति तद्विषयं प्रबन्धमकरोदित्यर्थः । तस्मिन् पक्षे अनपायिनमाद्यन्तशून्यं चारुनिःस्वनं सर्ववेदान्तप्रवर्तकं कौञ्चयोः कृशयोस्तपस्विनोः सीतारामयोः पापनिश्चयो वैरनिलयो निषादो लोकहिंसको रावणः सीतामपजहार सा च रुरोद । द्विजेन क्षत्रियेण । ताम्रशीर्षेण रत्नमुकुटारुणेन । पत्रिणा शरेणोपलक्षितेन । सहितेन लोकहितपरेण । अन्यत्सर्वं समानम् । मानिपादेत्याद्यर्थः शापार्थेन दर्शितः ॥ १५ ॥

१६] ति० टी०–तस्येति । मया मुनिना शान्तेन तपस्विना शकुनिशोकपीडितेनेदमीदृशं क्रूरं तपोनाशकरं किं व्याहृतमिति वीक्षतोऽन्तर्यामिप्रेरणया निषादे सर्वतो महत्त्वसम्भावनया दृश्यमानक्रौञ्चे तद्वैपरीत्यसम्भावनयातिनिन्द्यमयशस्करं महापातकेभ्योऽप्यधिकं पापं वृत्तमिति चिन्ता बभूव । यद्यप्येतत्सर्वं वाल्मीकिकृतमेव तथापि कुशलवगेयतयाऽस्य काव्यस्य करणात्तदुक्तिर्यैवमुक्तिः । अन्यथा स्वचिन्तायाः स्वापरोक्षत्वाद्बभूवेति लिटसङ्गतिः स्यात् । यद्वा सर्गचतुष्टयमाद्यमुपोद्घातरूपं कस्यचिच्छिष्यस्य । वाल्मीकीयोपोद्घातत्वाच्च वाल्मीकीयोक्तिः । पारोक्ष्यभारोप्य स्वयमपि तथोक्तिरुपोद्घातत्वद्योतनायेत्यन्ये ॥ १६ ॥

रा० टी०–तस्येति । एवं राजोचितब्राह्मणानुचितव्याधनिवर्तकत्वप्रकारेणापि बोधकं पद्यं ब्रुवतः कथयतः वीक्षतः परधर्माचरणमयुक्तमिति विजानतः तस्य मुनेः हृदि चिन्ता बभूव । चिन्तास्वरूपमाह–अस्य शकुनेः क्रौञ्चस्य शोकार्तेन एतत् क्रौञ्चविषयकशोकविशिष्टेन मया किमिदं व्याहृतम् । कुत्सितमेतदुच्चारितम् । कुत्सितत्वं च ब्राह्मणानुचितव्याधनिस्सारणमूचकत्वेनेति बोध्यम् ॥ १६ ॥

गो० टी०–तस्येति । वीक्षतः तन्मिथुनं वीक्षमाणस्य संज्ञापूर्वको विधिरनित्य इति वा चक्षिङोऽनुदात्तस्य ङित्करणज्ञापितानित्यत्वेन वा परस्मैपदम् । एवं मानिपादेत्येवं ब्रुवतः । कौञ्चीं दृष्ट्वा मानिपादेत्येवं वदत इत्यर्थः । तस्य वाल्मीकेर्हृदि अस्य शकुनेरेतत्पक्षिनिमित्तं शोकार्तेन मया व्याहृतमिदं वाक्यं किं किंरूपमिति चिन्ता बभूव ॥ १६ ॥

१७] ति० टी०–चिन्तयन्निति । महदयशस्करमिदं कर्म वृत्तमिति चिन्तयन्सत्यसङ्कल्पतयेत्थं मतिं सङ्कल्पं चकार । तदभिलापकं वाक्यं शिष्यमत्रवीदिति सम्बन्धः ॥ १७ ॥

रा० टी०–चिन्तयन्निति । महाप्राज्ञः महान्तो भरद्वाजादयः प्राज्ञाः रघुनाथविषयकज्ञाननिष्ठाः यस्मात् । तत्र हेतुः मतिमान् तत्त्वविषयकज्ञाननिष्ठः मतिं चिन्तानिवर्तकनिश्चयं चकार प्रापेत्यर्थः । तत्स्वरूपं तु रघुनाथचिन्तनप्रतिबन्धकीभूतनिवर्तनं धर्मान्तरेणापि सम्पादनीयमिति । तत्र प्रमाणम्

मन्निमित्तं कृतं पापं स वै पुण्याय कल्पते । मद्विरोधी च यो धर्मः स वै पापाय कल्पते ' अत एव मुनिपुङ्गवः मुनिश्रेष्ठः स वाल्मीकिः शिष्यं भरद्वाजमिदं वक्ष्यमाणं वाक्यं वचोऽब्रवीत् । चो हेतौ ॥ १७ ॥

गो० टी०–चिन्तयन्निति । प्रकर्षेण जानातीति प्रज्ञः ऊहापोहसमर्थः । प्रज्ञ एव प्राज्ञः "प्रज्ञादिभ्यश्च" इति स्वार्थेऽण् । यद्वा प्रज्ञा धीः ' धीः प्रज्ञा शेमुषी मतिः ' इत्यमरः । साऽस्याऽस्तीति प्राज्ञः " प्रज्ञाश्रद्धार्चावृत्तिभ्योऽण् " इति मत्वर्थीयोऽण् । महांश्चासौ प्राज्ञश्चेति महाप्राज्ञः मतिमान् शास्त्रज्ञानवान् स वाल्मीकिर्मतिमुत्तरश्लोके वक्ष्यमाणं निश्चयं चकार । स मुनिपुङ्गवः शिष्यमिदं वाक्यमब्रवीच्च । ब्रुविशासीत्यादिना द्विकर्मकत्वम् । अयोगव्यवच्छेदे एवकारः ॥ १७ ॥

१८] ति० टी०–पादेति । अष्टाक्षरानुष्टुप्पादैर्बद्धः । अक्षरसमश्छन्दःशास्त्रोक्तगुरुलघ्वक्षरवैषम्यरहितः । तथा तन्त्री-

शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम् । प्रतिजग्राह संतुष्टस्तस्य तुष्टोऽभवन्मुनिः ॥ १९ ॥
सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन्यथाविधि । तमेव चिन्तयन्नर्थमुपावर्तत वै मुनिः ॥ २० ॥
भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान्गुरोः । कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥ २१ ॥

वीणा, लयस्तालमृदङ्गवेणुहस्ताभिनयानां समकालं विरामः, ताभ्यां युक्तः । तन्त्र्यामारोप्य वाद्यैः सह गातुं योग्य इति यावत् अतः शोकार्तस्य शापरूपतयानौचित्येन प्रवृत्तोऽपि मे मम श्लोको यशोरूपो भवतु अन्यथाऽयशोरूपो मा भूदित्यर्थः । अत्र ' भवतु ' इति पाठ एव बहुपुस्तकसम्मतस्तीर्थसम्मतश्च । ' श्लोको यशसि पद्ये च ' इति निघण्टुः ॥ १८ ॥

रा० टी०–पादेति । पादबद्धः पादैः अष्टाक्षरचतुर्भिरंशैर्बद्धः संयुक्तः अक्षरसमः । चतुर्ष्वपि पादेषु छन्दश्शास्त्रोक्तपथोचितगुरुलघ्वक्षरविशिष्टः। तन्त्रीलयसमन्वितः तन्त्र्यादिसूचितगानलालित्यसम्पादकलयविशिष्टः । शोकार्तस्य शकुनिविषयकशोकविशिष्टस्य मे प्रवृत्तः । अयं श्लोकः अन्यथा कथंचिदप्यन्यपरः न भवतु न प्रत्येतु रघुनाथकथाप्रतिबन्धकीभूतव्याधनिवर्तनमचकमापि रघुनाथकथासूचकमेवेदं पद्यं भवत्विति फलितोऽर्थः । यद्वा ' तन्त्रीलयसमन्वितः तन्त्रिणां शास्त्राभिज्ञानामिलं प्रतिष्ठां तत्कृतमहत्त्वं तस्य यः प्राप्तिः तेन समन्वितः युक्तः पादबद्धोक्षरसमः पादे बद्धो यः उक्षरः उक्षा वृषभश्चासौ रक्षेति वृषभश्रेष्ठ इत्यर्थः तत्समः तत्सदृशः शोकार्तस्य मे प्रवृत्तः श्लोकः अन्यथा अन्यपरकः न भवतु यथा बद्धो वृषभः स्वस्थानादन्यत्र गन्तुं न शक्नोति तथाऽयं श्लोकस्तात्पर्यविषयीभूतरघुनाथादन्यत्र न गच्छत्विति फलितोऽर्थः । 'रश्च भूपे प्रकीर्तितः' इति कोशात् रशब्दः श्रेष्ठपरः ॥१८॥

गो० टी०–पादेति । शोकार्तस्य क्रौञ्चीशोकेनार्तस्य मे प्रवृत्तः मत्तः प्रवृत्तोयं संदर्भ इत्यर्थः । पादबद्धश्चतुर्भिः पादैर्युक्तः । अक्षरसमः प्रतिपादं समाक्षरः । तन्त्री वीणागुणः लयः तौर्यत्रिकस्यैककालविरामः । ' नाशे संश्लेषणे तौर्यत्रिकसाम्ये भवेल्लयः' इति रत्नमाला । ताभ्यां समन्वितः । तन्त्र्यामारोप्य वाद्यैः सह गातुं शक्य इत्यर्थः । श्लोको भवतु श्लोकलक्षणलक्षितत्वात् । श्लोकशब्दवाच्यो भवतु नान्यथा श्लोकादन्यः केवलपदसंदर्भो न भवतु इति मतिं चकारेति पूर्वेणान्वयः ॥ १८ ॥

१९] ति० टी०–शिष्य इति । एवं ब्रुवतस्तस्यर्षेर्वाक्यं यशो भवित्येवंरूपम् हृष्टः सन् तथैवेदं यशोरूपमेवेदमित्यनुमोदनेन प्रतिजग्राहाङ्गीचकार । अयशोरूपेऽपि यशस्त्वानुमोदनेन गुरुस्तस्य तुष्टोऽभवदित्यर्थः ॥ १९ ॥

रा० टी०–शिष्यस्त्विति । ब्रुवतः कथयतः तस्य प्रसिद्धस्य मुनेः अनुत्तमं न उत्तममन्यस्मात्सर्वोत्तममित्यर्थः । वाक्यं रघुनाथवर्णनपर एव मा निषादेति श्लोकः नान्यपर इत्येतद्वचनम् । सन्तुष्टः परमसन्तोषं प्राप्तः । शिष्यो भरद्वाजः प्रतिजग्राह । निश्शेषतो ज्ञातवानित्यर्थः । तेन हेतुना गुरुः वाल्मीकिः तस्य शिष्यस्योपरि तुष्टोऽभवत् । एतेन तद्वस्तुनो दुर्ज्ञेयत्वं सूचितम् । तेन भरद्वाजस्य बुद्धिमत्तातिशयो व्यञ्जितः । तु शब्दो हेत्वर्थे । अनुत्तमं वाक्यमित्यस्यार्थिकस्सम्बन्धो ब्रुवत इत्यत्रास्तीति बोध्यम् ॥ १९ ॥

गो० टी०–शिष्यस्त्विति । शिष्यः भरद्वाजः तस्य मुनेर्ब्रुवतः । तस्मिन्मुनौ ब्रुवति सति । " यस्य च भावेन भावलक्षणम् " इत्यस्मिन्नर्थे षष्ठी । अनुत्तमं सर्वरामायणार्थसंग्रहरूपत्वेन स्वापेक्षयोत्तमान्तररहितं वाक्यं मा निषादेत्यादिकं सम्प्रहृष्टः सन् प्रतिजग्राह वाग्विधेयं चकारेत्यर्थः । गुरुर्वाल्मीकिस्तस्य तुष्टोऽभवत् । स्वश्लोकधारणात्तस्मिन् प्रीतोऽभवदित्यर्थः१९

२०] ति० टी०–स इति । अभिषेकमिति मध्याह्नकर्तव्यानुष्ठानोपलक्षणम् । तमेवार्थमवशतः शापार्थश्लोकोत्पत्तिरूपम् । उपावर्तत न्यवर्तत ॥ २० ॥

रा० टी०–स इति । ततः सन्तोषप्राप्त्यनन्तरम् तस्मिन् वर्णितकर्दमरहितत्वादिधर्मविशिष्टे तीर्थे पावनहेतुभूततमसाजले एव स मुनिः यथाविधि विधिमनतिक्रम्य अभिषेकं स्नानं कृत्वा तं मा निषादेत्यनेन प्रतिपादितमर्थं काण्डसप्तकसङ्क्षिप्तकथां चिन्तयन् विचारयन्नेव उपावर्तत स्वाश्रममागच्छत् । एतेन तदर्थस्य मनोहरत्वं व्यक्तम् । वैशब्द एवार्थे ॥ २० ॥

गो० टी०–स इति । ततः शिष्यविषयसंतोषानन्तरं स मुनिः तस्मिन् तीर्थे ' अकर्दममिदं तीर्थम् ' इत्यादिना वर्णिते तीर्थे यथाविधि विधिमनतिक्रम्याभिषेकं माध्याह्निकस्नानं कृत्वा तमेवार्थमवशात् श्लोकोत्पत्तिरूपमेवार्थं चिन्तयन्सन्तुपावर्तत आश्रममागच्छत् । अभिषेकविधिस्तु व्यासस्मृतौ विशेषतो दर्शितः । ' ततो मध्याह्नसमये स्नानार्थं मृदमाहरेत् । पुण्याक्षतान्कुशतिलान् गोमयं गन्धमेव च ॥ नदीषु देवखातेषु तटाकेषु सरस्सु च । स्नानं समाचरेन्नित्यं नदीप्रस्रवणेषु च ॥ मृदैकया शिरः क्षाल्य द्वाभ्यां नाभेस्तथोपरि । अधश्चतसृभिः क्षाल्यं पादौ षड्भिस्तथैव च ॥ मृत्तिका च समादिष्टा त्वार्द्रामलकमात्रतः । गोमयस्य प्रमाणं तत्तेनाङ्गं लेपयेत्ततः ॥ लेपयेदथ तीरस्थस्तल्लिङ्गैर्नैव मन्त्रतः । प्रक्षाल्याचम्य विधिवत्ततः स्नायात्समाहितः ॥ अभिमन्त्र्य जलं मन्त्रैरब्लिङ्गैर्वारुणैः शुभैः । आपो. नारायणोद्भूतास्ता एवास्यायनं पुनः ॥ तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः । प्रेक्ष्य सोङ्कारमादित्यं त्रिर्निमज्जेज्जलाशये ॥ अथोपतिष्ठेदादित्यमूर्ध्वं पुष्पं जलान्वितम् । प्रक्षिप्यालोकयेद्देवमृग्यजुःसामरूपिणम् ॥ ' इत्यादि ॥ २० ॥

२१] ति० टी०–श्रुतवान्बहुश्रुतः पृष्ठतः पृष्ठभागेन प्रसा-

१ इदमसङ्गतम् तेन सूत्रेण सप्तमीपिधानात् षष्ठीचानादरे इत्यपिनानादराभावात् ।

स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् । उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः ॥ २२
आजगाम ततो ब्रह्मा लोककर्ता स्वयंप्रभुः । चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुङ्गवम् ॥ २३ ॥
वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः । प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः ॥ २४ ॥
पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः । प्रणम्य विधिवच्चैनं पृष्ट्वा चैव निरामयम् ॥ २५ ॥
अथोपविश्य भगवानासने परमार्चिते । वाल्मीकये च ऋषये सन्दिदेशासनं ततः ॥ २६ ॥

रितकरः परिपूर्णं कलशमादायानु पश्चाज्जगामेत्यन्वयः ॥ २१ ॥

रा० टी०–भरद्वाज इति। ततः गुरोरुपावर्तनानन्तरम्। विनीतः विनयसम्पन्नः श्रुतवान् यथावदुरूक्ततत्त्वं ग्रहीता। मा निषादेत्येतच्छ्लोकगृहार्थं परिज्ञातेत्यर्थः। अत एव मुनिः तदर्थमननशीलः शिष्यो भरद्वाजः पूर्णं जलपूरितं कलशमादाय गृहीत्वा पृष्ठतः गुरोः पश्चादनुजगाम। अन्तररहितगमनं चकारेत्यर्थः। ह इति हर्षे ॥ २१ ॥

गो० टी०–भरद्वाज इति । ततः मुनेः उपावर्तनानन्तरं विनीतः विनयसम्पन्नः श्रुतवान् शास्त्रवान् अवधृतवान् वा। 'श्रुतं शास्त्रावधृतयोः' इत्यमरः। धृतगुरुश्लोक इत्यर्थः। मुनिर्मननवान् भरद्वाजो भरद्वाजाख्यः शिष्यः पूर्णं जलपूर्णं कलशमादाय पृष्ठतः पश्चादनुजगाम अनुगमनोक्तौ पृष्ठत इत्युक्तिरव्यवधानसूचनार्था ॥ २१ ॥

२२] ति० टी०–स इति। मुखतोऽन्याः कथाश्चकार, मनसा तु शापार्थकश्लोकविषयं ध्यानमास्थितः। यत्तु ध्यानमम्बाया गायत्र्याश्चतुर्मुखरुद्रप्राधान्येन ध्यानमास्थित इत्यर्थ इति, तन्न। तदा स्थितोऽन्याः कथाश्चकारेत्यस्यासङ्गतेरित्यलं ध्यानपदार्थानभिज्ञदूषणाभिनिवेशेन ॥ २२ ॥

रा० टी०–स इति । अश्रमपदं श्रमनिवर्तकस्वाश्रमं शिष्येण भरद्वाजेन सहैव प्रविश्य उपविष्टः सुखासननिविष्टः धर्मवित् परमधर्मं वेदिता। अत एव ध्यानमास्थितः रघुनाथस्मरणपरायणः स मुनिः। अन्याः रघुनाथसम्बन्धशून्याः कथाः उक्तीः चकार तत्याज। अत एव ध्यानेन सह अन्याः कथाश्चकारेत्यस्य न विरोधः। विक्षेपार्थककृधातोः रूपम्। चशब्द एवार्थे ॥ २२ ॥

गो० टी०–स इति । स वाल्मीकिः शिष्येण सहाश्रमपदमाश्रमस्थानं प्रविश्य। धर्मवित् कृतदेवपूजादिधर्मः। उपविष्टः कृतसुखासनः सन् ध्यानमवशोत्पन्नश्लोकविषयचिन्तामास्थितः प्राप्त एव सन् अन्याः कथाः पुराणपारायणानि चकार ॥ २२ ॥

२३] ति० टी०–अथ तच्चिन्तां निवर्तयितुं ब्रह्मागमनमाह–आजगामेति। स्वयं प्रभुरन्यसुखनिरीक्षकतया सर्वलोकसृष्ट्युपयोगिज्ञानैश्वर्यादिशक्तिमान् अत एव भूरादिलोकनिर्माता॥ तं शापवाक्योच्चारणवशादतिचिन्ताक्रान्तम् ॥ २३ ॥

रा० टी०–आजगामेति। ततः ध्यानस्थित्यनन्तरम्। लोककर्ता भुवनस्य निर्माता प्रभुः समर्थः चतुर्मुखः चत्वारि चतुर्वेदप्रादुर्भावहेतुभूतानि मुखानि यस्य। अत एव महातेजाः परमतेजस्वी ब्रह्मा तं नारदोपदिष्टं मुनिपुङ्गवं द्रष्टुं स्वयमाजगाम। एतेन नारदोपदिष्टार्थस्य मनोहरत्वं व्यञ्जितम् ॥ २३ ॥

गो० टी०–आजगामेति । लोकस्रष्टा प्रभुः स्वामी चतुर्मुखः वेदचतुष्टयोच्चारणोपयोगिमुखचतुष्कः। महातेजाः महाप्रभावो ब्रह्मा मुनिपुङ्गवं नारदोक्तवैभवं वाल्मीकिं द्रष्टुं कुतूहलात्स्वयमाजगाम स्वस्थानस्थित एव रामायणप्रवर्तनसमर्थोऽप्यादरातिशयेन स्वयमेवाजगामेत्यर्थः ॥ २३ ॥

२४] ति० टी०–वाग्यतोऽतिसम्भ्रमवशाच्चतवाक्। प्रयतोऽतिनम्रः ॥ २४ ॥

रा० टी०–वाल्मीकिरिति । अथ ब्रह्मागमनानन्तरम्। वाग्यतः रघुनाथस्मरणपरायणत्वान्निवर्तितवचनान्तरः अत एव प्रयतः यतचित्तः वाल्मीकिः तं ब्रह्माणं दृष्ट्वा परमविस्मितः सन् सहसा त्वरया उत्थाय प्राञ्जलिः बद्धकरो भूत्वा तस्थौ। परमविस्मित इत्यनेन तात्कालिकब्रह्मागमनहेतुर्न ज्ञात इति हेतुर्ध्वनितः ॥ २४ ॥

गो० टी०–वाल्मीकिरिति। अथ ब्रह्मागमनानन्तरं तं ब्रह्माणं दृष्ट्वा सहसा उत्थाय। 'ऊर्ध्वं प्राणा ह्युत्क्रमन्ते यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते' इति वचनात्। स्वप्राणा उत्क्रामेयुरिति सहसोत्थायेत्यर्थः। परमविस्मितः सन् वाग्यतः यतवाक्। आहितान्यादित्वात्परनिपातः। प्रयतः नियतमनस्कः। प्रकृष्टः अञ्जलिर्यस्यासौ प्राञ्जलिः। स च भूत्वा तस्थौ स्थितवान् ॥ २४ ॥

२५–२६] ति० टी०–पूजयामासेति। वन्दनं स्तुतिः। प्रणम्येति पृथगुक्तेः। एनमित्यायुत्तरान्वयि ॥ २६ ॥ एनं मुनिम्। ब्रह्मा। अनामयमामयः पीडा तद्रहितम्। व्ययहीनमितियावत्। तप इति शेषः। तत्पृष्ट्वाऽनन्तरं स्वयमासन उपविश्य ऋषय आसनं दिदेश। आसन उपवेष्टुमनुमेन इत्यर्थः। 'वाल्मीकये च ऋषये' इति पाठः। एतेन 'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम्' इत्युक्तेर्ब्राह्मणं प्रत्ययं प्रभः स्मार्ताचारविरुद्धः तं देवमित्यनेनैव सिद्धे एनमित्यस्य वैयर्थ्यापत्तिश्चेत्यपास्तम् ॥ २६ ॥

रा० टी०–पूजयामासेति । तं पुरस्थितं देवं ब्रह्माणं

१ पृष्ट्वानामयमव्ययमितिपाठः क. ख. । २ महर्षये इति पाठः क. ख. ।

ब्रह्मणा समनुज्ञातः सोऽप्युपाविशदासने । उपविष्टे तदा तस्मिन्साक्षाल्लोकपितामहे ॥ २७ ॥
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः । पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ॥ २८ ॥
यत्तादृशं चारुरवं क्रौञ्चं हन्यादकारणात् । शोचन्नेव पुनः क्रौञ्चीमुपश्लोकमिमं जगौ ॥ २९ ॥
पुनरन्तर्गतमना भूत्वा शोकपरायणः । तमुवाच ततो ब्रह्मा प्रहसन्मुनिपुङ्गवम् ॥ ३० ॥

प्रणम्य नमस्कृत्य पाद्यार्घ्यासनवन्दनैः पाद्यार्घ्यजलसमर्पणासनस्थापनस्तुतिभिर्विधिवत् यथाविधि पूजयामास । अथ वाल्मीकिकृतपूजाप्राप्त्यनन्तरम् । एनं वाल्मीकिमध्ययं निरवच्छिन्नम् अनामयं रोगादिरहित्यं पृष्ट्वा परमार्चिते अतिपूजिते आसने उपविश्य भगवान् षड्ऐश्वर्यसम्पन्नः अत एव ततः स्वतेजसा व्याप्तो ब्रह्मा ऋषये परममन्त्रद्रष्टे वाल्मीकये आसनं सन्दिदेश आसने स्थातुमाज्ञापयामासेत्यर्थः । ब्रह्मकर्तृकासनाज्ञापनेनायमृषिः सर्वश्रेष्ठ इति हेतुर्ध्वनितः । तेन रघुनाथचिन्तनस्य अतिपूज्यत्वसम्पादकत्वं ध्वनितम् । द्वयोरेकत्रान्वयः ॥ २५ ॥ २६ ॥

गो० टी०–पूजयामासेति । मुनिः तं देवं ब्रह्माणं पाद्यार्घ्यासनवन्दनैः पाद्यं पादोदकप्रदानम् अर्घ्यमर्घजलसमर्पणम् वन्दनं स्तुतिः एतैरुपचारैः पूजयामास । एनं ब्रह्माणम् । अन्वादेशे इदमएनादेशः । विधिवत् शास्त्रोक्तरीत्या प्रणम्य । अव्ययमविच्छिन्नमनामयं कुशलं पृष्ट्वा च पूजयामासेति योजना । प्रणामशास्त्रं तु ' मनो बुद्ध्यभिमानेन सह न्यस्य धरातले । कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥ प्रदक्षिणसमेतेन स्तोत्रं रूपेण सर्वदा । अष्टाङ्गेन नमस्कृत्वा भुपविश्यायतः प्रभोः ' इति । यद्वा तमेनं देवं विधिवत्प्रणम्यानामयं पृष्ट्वा च पाद्यार्घ्यासनवन्दनैः पूजयामास । वदि अभिवादनस्तुत्योरिति धातुः ॥ २५ ॥ **अथेति** । सार्धश्लोक एकः । अथ पूजानन्तरं भगवान् ब्रह्मा परमार्चिते परमं यथा भवति तथा वाल्मीकिनार्चिते । ब्रह्मोपवेशार्थं पूजिते आसने विष्टरे उपविश्य स्थित्वा महर्षये वाल्मीकये आसनमुपवेशनं संदिदेश आज्ञापयामास २६

२७] **ति० टी०**–लोकपितामह उपविष्टे सति तदनुज्ञया स्वयमुपाविशदिति सम्बन्धः॥ २७ ॥

रा० टी०–**ब्रह्मणेति**। तदा तस्मिन्काले ब्रह्मणा समनुज्ञातः आसने उपवेष्टुं ब्रह्माज्ञां सम्प्राप्तः । स वाल्मीकिरपि आसने उपाविशत् तस्थौ । लोकपितामहे सर्वोत्पत्तिहेतुभूते तस्मिन्ब्रह्मणि साक्षात् प्रत्यक्षतया उपविष्टे आसने उपवेशिते सति तद्गतेन रघुनाथचरितावेशेनैव मनसा वाल्मीकिः ध्यानं स्वकृतमानिषादेतिश्लोकस्मरणमास्थितः प्राप्तः । आसीदिति शेषः । उपविष्ट इत्यत्र अन्तर्भावितण्यर्थः । सार्द्धश्लोक एकान्वयी ॥ २७ ॥

गो० टी०–सोपि ब्रह्मणा समनुज्ञातः सन् आसने उचितनीचासने उपाविशत् । आसनानुज्ञानं लोकहितार्थमनेन काव्यं कारयितुं वाल्मीकये महर्षय इत्यत्रायुजिपादे पथ्यावक्त्रस्य गणनियमाभावात्तथोक्तम् । नन्वर्धत्रयकरणमीदृशैः करवाण्यहमित्यनेन विरुध्यते । मैवं लेखकदोषेणार्धान्तरपतनसंभवात् । **उपविष्ट इति** । लोकपितामहे तस्मिन्साक्षात्प्रत्यक्षतया उपविष्टेऽपि तदा तद्गतेन क्रौञ्चहननगतेन मनसा ध्यानमास्थितः । तद्विषयचिन्तामकरोत् ॥ २७ ॥

२८] **ति० टी०**–तद्गतेन क्रौञ्चगतेन । वैरं गृह्णाति सा चासौ बुद्धिस्तद्वता कर्तरि ल्युट् बाहुलकात् । निषादेनेति शेषः । कष्टं कृतं क्रौञ्चवधरूपं तपोनाशसम्पादकशापनिःसारणेन कष्टं कृतम् । मयेति शेषः ॥ २८ ॥

रा० टी०–व्याधनिवर्तनकाण्डसप्तकप्रतिपिपादयिषितरघुनाथचरितसङ्क्लिप्तवर्णनोभयमूचकमानिषादेतिश्लोकस्य शोभनत्वं निश्चेतुं ब्रह्माणं प्रति पूर्ववृत्तमाह–**पापेत्यादिना** । पापात्मना पापान्वेषणमनस्केन अत एव वैरग्रहणबुद्धिना वैरग्रहणे वैरकर्मैकसम्पादने बुद्धिर्यस्य तेन मया कष्टं कठिनम् । अकर्तव्यमित्यर्थः । कृतं सम्पादितम् ॥ २८ ॥

गो० टी०–**पापात्मनेति** । वैरग्रहणबुद्धिना वैरेण क्रौञ्चग्रहणबुद्धिना पापात्मना पापस्वरूपेण व्याधेन कष्टं कुत्सितं कर्म कृतम् । कथमित्यत्राह–**यइति** । यो व्याधः । तादृशं रतिलालसमित्यत्राग्राह्यत्वोक्तिः । चारुरवं रम्यरतिकूजितं क्रौञ्चमकारणान्निष्कारणम् ' निमित्तकारणहेतूनां प्रयोगे सर्वासां प्रायदर्शनम् ' इत्युक्तेः पञ्चमी । हन्याद्धन्तुं शक्नुयात् । शकिलिङ् ॥ २८ ॥

२९] **ति० टी०**–कष्टमेवाह—**यदिति** । हन्याद्धतवानित्यर्थे छान्दसम् । अकारणादृश्यमानकारणं विना । उप समीपे । ब्रह्मणः समीपे ॥ २९ ॥

रा० टी०–किंतदित्याह–**य इत्यादिना** । यः व्याधः चारुरवं मनोहरशब्दं तादृशं पूर्वोक्तविशेषणविशिष्टं क्रौञ्चमकारणाद्धन्यात् अहन् तस्य उप समीपे क्रौञ्चीं शोचन्नेव अहमिमं द्वयर्थकं मानिषादेतिश्लोकं जगौ अवदम् । ' बहु जगद पुरस्तात्तस्य मत्ता किलाहम् ' इति वक्ष्टिप्रयोगः ॥ २९ ॥

गो० टी०–**शोचन्निति** । शोकपरायणः क्रौञ्चवधदर्शनेन दुःखपरवशः । पुनः क्रौञ्चीं गतमना भूत्वा क्रौञ्चीं विचिन्त्येत्यर्थः । मुहुः शोचन्नेव वाल्मीकिरिमं मा निषादेत्यादिश्लोकं अन्तर्मनसि उपजगावित्यन्वयः । व्यवहिताश्चेत्युपसर्गस्य व्यवहितप्रयोगः ॥ २९ ॥

३०] **ति० टी०**–शोकपरायणः क्रौञ्चवधकृतक्रौञ्चीदुःखदर्शनजेन स्वस्य 'सुखतस्तपोहानिकरशापार्थकश्लोककरणावशतो

श्लोक एवास्त्वयं बद्धो नात्र कार्या विचारणा । मच्छन्दादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती ॥ ३१ ॥
रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम । धर्मात्मनो भगवतो लोके रामस्य धीमतः ॥ ३२ ॥

निःसरणजेन च शोकेन व्याप्तः । अत एवान्तर्गतमना अन्तर्गते श्लोकार्थ एव दत्तचित्तः श्लोकं जगाविति सम्बन्धः । तं तथा शोकग्रस्तम् । प्रहसन्नदिच्छयावतीर्णां सरस्वतीं न जानातीति हासं कुर्वन् ॥ ३० ॥

रा० टी०–पुनरिति । पुनस्तदनन्तरम् । अन्तर्गतमनाः अन्तः अन्तरङ्गार्थे गतं निविष्टं मनो यस्य तादृक् शोकपरायणः शोकात्परः सकारणशोकसम्बन्धवश्यः नारदोपदिष्टरघुनाथः तस्मिन्नयनं स्थितिर्यस्य स आसीदिति शेषः । ततः वाल्मीक्युक्तिश्रवणानन्तरं मुनिपुङ्गवं मुनिश्रेष्ठं तं वाल्मीकिं ब्रह्मा प्रहसन्नुवाच । प्रहसन्नित्यनेन मा निषादेतिश्लोको रघुनाथपर एवेति ब्रह्मणाज्ञातमित्यभिप्रायः सूचितः । तेन रघुनाथस्मरणप्रतिबन्धकनिवर्तनमपि रघुनाथकथैवेति हेतुर्ध्वनितः ॥ ३० ॥

गो० टी०–तमिति । ततः मनसि श्लोकपाठश्रवणानन्तरं मुनिपुङ्गवं प्रहसन् मन्नियोगेन स्वजिह्वाग्रेऽवतीर्णां सरस्वतीमयं न जानातीति प्रहसन्नुवाच । मा निषादेत्यस्य श्लोकत्वनिश्चयं द्रढयति–**श्लोक इति** । त्वया बद्धो मा निषादेत्यादिः श्लोक एव । अत्र श्लोकविषये विचारणा चिन्ता न कार्या ॥ ३० ॥

३१] ति० टी०–तद्वचनमेवाह–श्लोक एवास्त्वयमिति । अयं त्वया बद्धः श्लोको यशोरूप एवास्तु । श्लोकशब्दस्य पद्यपरतया योजने ' अस्तु ' इति पाठस्यासङ्गत्यापत्तेः । अस्तोत्युक्तेरेवे ब्रह्मण औचित्यात् । मम त्वयशोरूपस्य यशोरूपताशीर्दानमिति नासङ्गतिः । ' श्लोक एव त्वया ' इति पाठेऽपि यशोरूप एवायं त्वया बद्धः । अत्र तव विचारः सन्देहो मास्तु । मद्वचनात्त्वत्सङ्कल्पाच्चास्य तथा भावप्राप्तेरित्याशयः । ननु भवतु त्वदाशिषा तथात्वमस्याः, परन्तु शान्तस्वभावस्यर्षेर्ममेदृशि वागत्यन्तमनुचितेत्यापे मा विषादं कुर्वित्याह–**मच्छन्दादिति** । मत्सङ्कल्पादित्यर्थः । विष्णोरवतारभूतस्य रामस्य सङ्कल्पोऽपि स्वसङ्कल्पत्वेनोक्तः । ' एका मूर्तिस्त्रयो देवा रुद्रविष्णुपितामहाः ' इति हरिवंशोक्तेः । नन्वीदृशसङ्कल्पो ब्रह्मणोऽपि किमर्थमिति चेच्छृणु । येषां परस्य दारवियोगादिजनकं कर्म स्वस्य दारवियोगादिकं जनयितुं नालम्, तेषामपि ब्रह्मशापस्तज्जननेऽलमिति लोके ब्राह्मणमाहात्म्यं सूचयितुम् । एवं राज्यादिसत्त्वेऽपि कामजय एवोत्तमः, न तु तद्भोगचापलम्, इति च स्वव्यवहारेण शिक्षयितुम्, तत्प्रायश्चित्तविधया स्वकीर्तिवर्णनेन मुनेर्यशोवृद्ध्यर्थं भगवद्विषयमहापापप्रायश्चित्तत्वात्कैमुतिकन्यायेनेतरजनानां सर्वपापप्रायश्चित्तं रामायणश्रवणादीत्यर्थतत्त्वं बोधयितुं चेति गृहाण एतदृष्यक्षरस्वारस्यबलेन मया योजितम् अतो निरीर्ष्यं सहृदया विचारयन्तु ॥३१॥

रा० टी०–तद्वचनाकारमाह–श्लोक इति । हे ब्रह्मन् वेदतत्त्वार्थवेत्तः ! मच्छन्दात् मह्यं मत्कल्याणार्थं छन्दः प्रादुर्भावे सङ्कल्पो यस्य स रामः तस्मात् छन्दश्शब्दस्य सङ्कल्पपरत्वं नागोजीभट्टैरपि व्याख्यातम् । किञ्च मता स्वविषयकज्ञानेन शं परं कल्याणं ददातीति मच्छन्दो रघुनाथस्तस्मात्तदिच्छात एवेत्यर्थः । ते तव इयं संक्षिप्तकाण्डसप्तकार्थप्रतिपादिका सरस्वती प्रवृत्ता अतः श्लोकः परमयशःकारणभूतरघुनाथप्रतिपादक एवायं त्वया बद्धः श्लोकरूपेण सम्पादितोऽस्ति अतोऽत्र विषये विचारणा अन्यपरोप्ययं श्लोकः सम्भवति न वेति विचारो न कार्यः । 'एवास्त्वयं बद्ध' इति भट्टसम्मतः पाठः ॥३१॥

गो० टी०–अकारणकार्योत्पत्तिकृतविस्मयं वारयति–**मदिति** । हे ब्रह्मन्! ते इयं सरस्वती मा निषादेत्यादिरूपा मच्छन्ददेव मदभिप्रायादेव ननु कारणान्तरात् प्रवृत्ता।प्रवर्तनप्रयोजनमाह–**रामस्येति**। हे ऋषिसत्तम ! 'नाऽनृषिः कुरुते काव्यम्' इत्युक्तरीत्या प्रतिलब्धकाव्यनिर्माणशक्तिक! सर्वं रामस्य चरितं रामचरितविषयप्रबन्धं कुरु ईदृशैः श्लोकैरिति शेषः । ' ईदृशैः करवाण्यहम् ' इत्यनुवादात् ॥ ३१ ॥

३२] ति० टी०–एवं परवशप्रवृत्तस्यापि शापस्य भगवद्विषयतयेतरसकलमन्वाद्युक्तप्रायश्चित्तानिवर्त्यस्य यं प्रत्यसौ शापस्तच्चरितवर्णनरूपं प्रायश्चित्तमुपदिशति–**रामस्य चरितमिति** । लोके रामस्य । रमते इति रामः । बाहुलकात्कर्तरि घञ् । तेन लोकाधिष्ठातुर्लोकान्तर्यामिणश्चेत्यर्थः । कुरु वर्णयस्व । धर्मात्मन इत्यनेन रावणादिवधवत्कौञ्चवधोऽपि धर्मफलक एव लोकव्यवहारेण लोकहितत्वात्त्वद्रक्षकत्वाच्चेति सूचितम् ॥ ३२ ॥

रा० टी०–रामस्येति । हे ऋषिसत्तम ! अतः कृत्स्नं यावत्स्वबुद्धिविषयीभूतं रामस्य चरितं त्वं कुरु वर्णय । अर्द्धं पृथगन्वयि । तदेव विशदयन्नाह–**धर्मेत्यादिना** । धर्मात्मनः धर्मयोः पित्राज्ञापितविश्वामित्रसेवनादिवनगमनादिरूपयोः आत्मा यत्नो यस्य इत्यनेन बालायोध्याकाण्डसङ्क्षिप्तार्थसूचनम् । गुणवतः मुनिमोहकरूपादिविशिष्टस्य अनेनारण्यकाण्डार्थसङ्क्षिप्तसूचनम् । धीमतः सुग्रीवसख्यकरणकृतोपकृतिको हनुमान् मत्प्राणसम एवेत्यादिविषयकनिश्चयविशिष्टस्य अनेन किष्किन्धासुन्दरकाण्डकथासङ्क्षिप्तसूचनम् ॥ ३२ ॥

गो० टी०–एवं सामान्येन रामचरितविषयप्रबन्धनिर्माणमनुज्ञाय सङ्क्षेपकरणमादिशति–**धर्मात्मन इति** । अत्र विशेषणैः प्रबन्धनायकस्य रामस्य नायकगुणा दर्शिताः । नायकगुणवर्णनेन हि काव्यं प्रथते । उक्तं हि भोजेन ' कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसति । नायको यदि वर्ण्येत लोकेतरगुणोत्तरः '

---

१ एवत्वयेति पाठः क. ख. ।

वृत्तं कथय धीरस्य यथा ते नारदाच्छ्रुतम् । रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ॥ ३३ ॥
रामस्य सहसौमित्रे राक्षसानां च सर्वशः । वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः ॥ ३४ ॥
तच्चाप्यविदितं सर्वं विदितं ते भविष्यति । न ते वागनृता काव्ये काचिदत्र भविष्यति ॥ ३५ ॥
कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् । यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ॥ ३६ ॥
तावद्रामायणकथा लोकेषु प्रचरिष्यति । यावद्रामस्य च कथा त्वत्कृता प्रचरिष्यति ॥ ३७ ॥

इति । नायकगुणास्तु 'महाकुलीनतौज्ज्वल्यं महाभाग्यमुदारता । तेजस्विता विदग्धत्वं धार्मिकत्वादयोऽपि च' इत्युक्ताः । तत्र धर्मात्मनइत्यनेन धार्मिकत्वमुक्तम् । लोके लोकमध्ये । गुणवतः बहुगुणकस्य अनेन उदारतोक्ता । रामस्येत्यनेन तेजस्वित्वमौज्ज्वल्यं च । धीमत इत्यनेन पण्डितत्वम् । धीरस्येत्यनेन वक्तृधुरन्धरत्वरूपं महाभाग्यम् । अन्यद्गुणशब्देन ज्ञेयम् । एवम्भूतस्य रामस्य वृत्तं चरित्रम् 'वृत्तं पद्ये चरित्रे च' इत्यमरः । यथा येन प्रकारेण नारदात्ते त्वया श्रुतं तेन प्रकारेण कथय सङ्क्षेपेण कथयेत्यर्थः ॥ ३२ ॥

३३] ति० टी०–वृत्तमिति । अस्य नारदोक्तविशेषणत्वादपौनरुक्त्यम् । धियमीरयतीति धीरः तेन बुद्धिप्रेरकस्येत्यर्थः तेन गायत्र्यर्थभूतस्येत्युक्तम् ॥ ३३ ॥

रा० टी०–वीरस्य शत्रुनिर्बर्हणराज्यकरणाश्वमेधादिकसामर्थ्यविशिष्टस्य रामस्य अनेन युद्धोत्तरकाण्डकथासङ्गिप्रसूचनम् । लोके वृत्तमाचरितं यथा येन प्रकारेण नारदात्ते तव श्रुतं तेन प्रकारेण कथय वर्णय । धीरस्येति पाठे तु धियः रावणादीनामयोध्याप्रजानां च ब्रह्मादीनां च बुद्धीः ईरयति प्रेरयतीति धीरस्तस्येत्यर्थः अनेनापि काण्डद्वयार्थसङ्ग्रहः स्पष्ट एव ॥ ३३ ॥ काव्यकरणहेतुभूतवर्णनीयपदार्थवेदितृत्वं ते मत्प्रसादादपि भविष्यतीत्याह—रहस्यञ्चेत्यादिश्लोकद्वयेन । धीमतः मत्प्रार्थनास्वीकारविषयकनिश्चयविशिष्टस्य सहसौमित्रेः सौमित्रानित्यपुत्रलक्ष्मणसहितस्य तस्य अवाङ्मनसगोचरस्य रामस्य रहस्यं तदितराविदितं प्रकाशं जनान्तरप्रसिद्धं च यद्वृत्तमाचरितं राक्षसानां रावणादीनां च सर्वशः सर्वं विदितावितं यद्वृत्तं वैदेह्याः विदेहप्रादुर्भूतसीतायाश्च प्रकाशं रहो वा यदि यद्वृत्तं तत्सर्वं ते अविदितं त्वन्निष्ठज्ञानाविषयीभूतमपि विदितं त्वन्निष्ठज्ञानविषयीभूतमेव भविष्यति । चकारेणायोध्यायाः विदितावितत्वविश्वामित्रादिचेष्टितत्वादि जनकयागगतराजादीनां चेष्टितत्वादि अन्येषामपि वर्णनीयानां चेष्टितत्वादिकं ते विदितं भविष्यतीत्यर्थः । श्लोकद्वयमेकान्वयि ॥ ३४ ॥

गो० टी०–ननु पुनर्विस्तरेण रामचरित्रवर्णनं नियोक्ष्यमाणस्तद्विषयज्ञानलाभमनुगृह्णाति–रहस्यमित्यादिना । श्लोकद्वयमेकवाक्यम् । धीमत इति रहस्यवृत्तसम्भवहेतुतयोक्तम् । सुमित्राया अपत्यं पुमान्सौमित्रिः बाह्वादित्वादिञ् सहसौमित्रेः सौमित्रिसहितस्य धीमतस्तस्य रामस्य रहस्यमनितरविदितं च । प्रकाशं सर्वविदितं च यद्वृत्तं राक्षसानां रावणादीनां च सर्वशः सर्वप्रकारं रहस्यप्रकाशरूपं यद्वृत्तं तत् वैदेह्याः सीतायाश्च अपिशब्दाद्भरतादीनां च प्रकाशं यदि वा रहो रहस्यं वा यद्वृत्तं तच्च सर्वमविदितमपि नारदमुखेनाज्ञातमपि ते विदितं भविष्यतीति योजना॥ ३३ ॥ ३४ ॥

३४] ति० टी०–रामलक्ष्मणयो राक्षसानां सीतायाश्च यत्प्रकाशं तदीयानां प्रकाशं तवाविदितम् । यदि वा यदपि तदीयानामपि रहोऽविदितम्, तव तु सुतरामविदितम्, तदपि सर्वं ते विदितं भविष्यतिं । अनेन तत्करणयोग्यतादानम् । यच्च 'मा निषाद' इतिवदपर्यालोच्यापि वाक्त्वत्तो निःसरिष्यति साऽपि नान्यथा भविष्यति, तेनास्या अपि सत्यत्वं भावीति ध्वनितम् ॥ ३४ ॥ ३५ ॥

रा० टी०–काव्यकरणप्रवृत्त्यर्थमृषिं प्रोत्साहयन्नाह—नतइत्यादिना । अत्र चिकीर्षिते काव्ये काचिदपि ते वाक् तवोक्तिः अनृता असम्भावितार्था न भविष्यति । अतः मनोरमामन्तःकरणाकर्षिकां श्लोकबद्धां पद्यरूपां दिव्यां प्राकृतभिन्नां रामकथां कुरु प्रकटय । अत्र वाल्मीकिप्रार्थनामन्तरेणैव एतद्ग्रन्थोक्त्या रामकथाप्रियत्वं ब्रह्मणो व्यक्तम् ॥ ३५ ॥

गो० टी०–एवं यथार्थदर्शित्वमनुगृह्य यथार्थवादित्वमनुगृह्णाति–नत इति। अत्र करिष्यमाणे काव्ये ते वाक्काचिदपि किञ्चिदपि वाक्यमित्यर्थः अनृता बाधितार्था न भविष्यति । यद्वा वाक्पदं कदाचिदपि अनृता दुष्टा न भविष्यति तेन काव्यदोषत्वेनोक्तानां पदवाक्यतदर्थदोषशून्यत्वमुक्तम् अतः रामकथां रामविषयप्रबन्धकल्पनां कुरु । काव्यनिर्माणप्रयोजनमाह–पुण्यां पापहराम् प्रयोजनान्तरमाह–मनोरमां शब्दश्रवणसमनन्तरमेव विगलितवेद्यान्तरमानन्दं जनयन्तीमित्यर्थः। श्लोकबद्धामित्यनेन गद्यप्रबन्धेभ्यो हर्षचरितजातीयेभ्यो मिश्रप्रबन्धेभ्यो नाटकादिभ्यश्च व्यावृत्तिरुक्ता ॥ ३५ ॥

३६] ति० टी०–एवं सामर्थ्यं दत्त्वोपसंहरति–कुर्विति । यावदित्यायुत्तरान्वयि ॥ ३६ ॥ ३७ ॥

रा० टी०–यावदिति । महीतले यावत्कालं गिरयः पर्वताः सरितो नद्यश्च स्थास्यन्ति तावत्कालं रामायणकथा लोकेषु चतुर्दशसु भुवनेषु प्रचरिष्यति प्रचारं प्राप्स्यति । अत्र सरि-

१ नित्यसुमित्रापुत्रेतियुक्तम् ।

तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि । इत्युक्त्वा भगवान्ब्रह्मा तत्रैवान्तरधीयत ॥
ततः सशिष्यो भगवान्मुनिर्विस्मयमाययौ । ॥ ३८ ॥
तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः । मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः ॥ ३९ ॥
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा । सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः॥ ४० ॥

द्रिरिरहितमहीतलोपलम्भकावस्थायाः अनुपलम्भात् । ' यावत्स्थास्यन्ति गिरयः ' इत्यायुक्तिर्महाप्रलयपर्यन्तकालोपलक्षिका । यद्वा अलोकेषु प्राकृतलोकविलक्षणेषु वैकुण्ठादिषु गीयमाना रामायणकथा यावत्कालं गिरयः पर्वताः सरितो नद्यश्च स्थास्यन्ति तावत्कालं महीतले प्रचरिष्यति त्वन्नाम्ना प्रचारं प्राप्स्यति अत एव महीतले इत्यस्य न वैयर्थ्यम् ॥ ३६ ॥

गो० टी०–यशोऽपि काव्यनिर्माणप्रयोजनमित्याह–**यावदिति** । गिरयः सरितश्च महीतले भूतले यावत्स्थास्यन्ति तावद्रामायणकथा रामायणरूपा कथा लोकेषु सप्तसु प्रचरिष्यति । यावत्त्वत्प्रबन्धप्रचारस्तावत्तव यशो भविष्यतीति हृदयम् ॥३६॥

३७]**रा० टी०**–**यावदिति**।त्वत्कृता त्वया सम्पादिता रामायणकथा रामपर्यवसानकप्रबन्धो यावत्कालं प्रचरिष्यति तावत्कालं ऊर्ध्वगतिः सर्वत्राप्रतिहतगमनस्त्वं मल्लोकेषु मम लोको दर्शनं येषु तेषु स्थानेषु निवत्स्यसि स्वसमीपे एव त्वां निवासयिष्यामीत्यर्थः । एतेन वाल्मीकिमुखनिस्सृतरामायणकथातिश्रुश्रूषा ब्रह्मणोऽस्तीति ध्वनितम । चशब्दात्सर्वत्र लाभः ॥३७॥

गो० टी०–यशसः स्वतः पुरुषार्थत्वात्तत्फलमाह–**यावद्रामेति** । किञ्च त्वत्कृता रामस्य कथा यावत्प्रचरिष्यति तावन्मल्लोकेषु मध्ये यावच्छरीरपातमधः भूमौ तदुपरि ऊर्ध्वं च निवत्स्यसि ॥ ३७ ॥

३८] **ति० टी०**–**तावदिति** । यावत्त्वत्कृतकथाप्रचारस्तावदधश्च त्वं दयापूर्वमप्यतिमहति क्रोधकरणादधोगमनयोग्योऽपि त्वमूर्ध्वं सर्वोर्ध्वं वर्तमानेषु मल्लोकेषु निवासं प्राप्स्यसि । ततो मया सह मोक्ष्यस इत्यर्थः । लोकेष्विति तदवयवाभिप्रायं बहुवचनम् । ऊर्ध्वमधश्च विद्यमानेषु मल्लोकेषु मन्निर्मितलोकेषु निवत्स्यसि सर्वत्राप्रतिहतगतिः सञ्चरिष्यसि ततःपरं मुक्तिं प्राप्स्यसीति तीर्थः । तत्र मल्लोकेष्वित्यस्य चारितार्थ्यं चिन्त्यम् । **इतीति** । तत्रैवान्तर्धानेनास्याप्यन्तर्यामिरूपतोक्ता । **तत इति** । विस्मयमाश्चर्यम् ॥ ३८ ॥

रा० टी०–**इतीति** । भगवान्षडैश्वर्यसम्पन्नो ब्रह्मा इति इदमुक्त्वा तत्रैव वाल्मीकिस्थाने एव अन्तरधीयत तिरोदधौ । तत्रैवान्तरधीयत इत्यनेन रघुनाथकथास्थानत्यागासहिष्णुत्वं तस्य ध्वनितम् । तेन रामकथाविषयकप्रेमातिशयस्तस्य सूचितः । ततः ब्रह्मान्तर्धानानन्तरम् । सशिष्यः भरद्वाजादिसहितः मुनिः ब्रह्मोक्तिमननशीलः वाल्मीकिः विस्मयं ब्रह्मलोकं विहाय इहैव तिरोधानतया किमर्थं स्थित इत्याश्चर्यमाययौ प्राप ॥३८॥

गो० टी०–**इत्युक्त्वेति** । तत्रैव आसन एव ॥ ३८ ॥

३९] **ति० टी०**–**तस्येति** । प्रीयमाणा आश्चर्यमिदमस्मदुरोः पद्यं यद्ब्रह्मणाप्यनुमोदितम् । प्राहुश्च वक्ष्यमाणमित्यर्थः ॥ ३९ ॥

रा० टी०–**तस्येति**। ततः मुनिविस्मयप्राप्त्यनन्तरम्। तस्य वाल्मीकस्य सर्वे भरद्वाजादयःशिष्याः मुहुर्मुहुः प्रीयमाणाः गुरुप्रीतिविषयतां प्राप्नुवन्तः सन्तः इमं मा निषादेति श्लोकं पुनर्जगुः भृशविस्मिता अत्यन्तविस्मयं प्राप्ताश्च प्राहुः इदमत्यद्भुतमित्युच्चारणं चक्रुरित्यर्थः । एतेन तेषामानन्दातिशयः सूचितः ॥ ३९ ॥

गो० टी०–**तस्येति**। ततः मुनिविस्मयानन्तरम्। सर्वे तस्य वाल्मीकेः शिष्या मुहुर्मुहुः प्रीयमाणाः सन्त इमं मा निषादेति श्लोकं पुनर्जगुः । भृशं विस्मिताः अत्यन्तविस्मिताः सन्तः । अव्ययमात्रस्य समासे तु लोप इति मलोपः । प्राहुश्च अन्योऽन्यमिदमद्भुतमिति प्राहुश्चेत्यर्थः । आश्रम एव स्थिताभ्यां कुशलवाभ्यां भरद्वाजेन चात्र बहुवचनम् ॥ ३९ ॥

४०] **ति० टी०**–**तदेवाह–समेति** । साम्यं गुरुलघ्वक्षरराहित्यम् । यो ऋषिणा गीतः सः । अन्वतिशयितशोकोत्पत्त्यनन्तरं व्याहरणाद्भूयः शोको विपुलः शोक एव श्लोकत्वं प्राप्त इति वयं मन्यामह इति प्राहुरिति सम्बन्धः । उत्प्रेक्षा चेयम् । तेनास्य श्लोकस्य करुणरसमयत्वं ध्वनितम्। अत्र नष्टक्रौञ्चालम्बनकः क्रौञ्चीविरावानुदीपितो निषादविषयकोपव्यभिचारिको ' मा निषाद ' इत्यादिवाक्यानुभावकः करुणो रस इति बोध्यम् । यत्तु पूर्वश्लोके प्राहुरित्यस्य पठन्तीत्यर्थकरणम्, पुनः पुनः पाठेनानन्दवन्तोऽभूवन्निति फलितार्थकथनम्, अत्र च श्लोके भूयोऽनुव्याहरणान्मुहुर्मुहुः शिष्यैः पुनः पाठाल्लोके शोकः श्लोकत्वेन प्रतिबद्धोऽभवच्छ्लोकत्वं प्राप्त इति तीर्थादिव्याख्यानं तदतिनिःसारमिति स्पष्टमेव ॥ ४० ॥

रा० टी०–श्लोकमहत्त्वं द्योतयन्नाह–**समेत्यादिना**। समानि न्यूनाधिकरहितानि अक्षराणि येषु तैश्चतुर्भिः पादैः यः श्लोको महर्षिणा वाल्मीकिना गीतः सः श्लोकः अनुव्याहरणात् शिष्यकर्तृकनिरन्तरपठनाद्भूयो महच्छ्लोकत्वं यशःसमपादकत्वादिश्लोकधर्ममागतः प्राप्तः । शोक इति पाठे तु शोकः निमित्तत्वेनास्याऽऽसीति । अर्शआद्यजन्तः शोकापनोदहेतुकः श्लोक इत्यर्थः । अन्यत्समानम् ॥ ४० ॥

१ श्लोक इतिपाठः क. ख.।

तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः । कृत्स्नं रामायणं काव्यमीदृशैः करवाण्यहम् ॥ ४१ ॥
उदारवृत्तार्थपदैर्मनोरमैस्तदास्य रामस्य चकार कीर्तिमान् ।
समाक्षरैः श्लोकशतैर्यशस्विनो यशस्करं काव्यमुदारदर्शनः ॥ ४२ ॥

गो० टी०–समेति । यः समाक्षरैरिति विषमवृत्तव्यावृत्तिः । चतुर्भिरित्यर्धसमवृत्तव्यावृत्तिः पादैश्चतुर्थांशैः । महर्षिणा गीत उक्तः स श्लोकः । अनुव्याहरणात् शिष्यैः पुनःपुनर्व्यवहियमाणत्वात् । भृयः श्लोकत्वमागत इति पूर्वं श्लोकलक्षणलक्षितत्वात् श्लोकत्वं गतः । सम्प्रति श्लोक्यमानत्वात् । पुनः श्लोकत्वं गत इत्यर्थः । 'शोकः श्लोकत्वमागतः' इति पाठे शोककृतश्लोक एव शोक इत्युच्यत इति ज्ञेयम् । यः श्लोकः महर्षिणा समाक्षरैश्चतुर्भिः पादैर्बद्धः श्लोकः कौञ्चीविषयः तादृशश्लोकत्वमागतः स शोकवेगादुत्पन्न इत्यर्थः । कथमवगम्यते अनुव्याहरणात् । अनु पश्चात् शोकानन्तरमुच्चारणात् । शोके सति जातत्वादित्यर्थः ॥४०॥

४१] ति० टी०–तस्येति । ईदृशैः 'मा निषाद' इतिवत्करुणारसप्रधानैरित्यर्थः । अनेनान्ये रसा अत्र गुणीभूता इति ध्वनितम् ॥ ४१ ॥

रा० टी०–तस्येति । भावितात्मनः भावितः परिशीलितः आत्मा सर्वनियन्ता रघुनाथो येन तस्य वाल्मीकेरियं बुद्धिर्निश्चयः जाता तत्स्वरूपमाह–ईदृशैः मा निषादेति वद्भानयोग्यैः पद्यैः काव्यं सद्यःपरनिर्वृत्यादिसम्पादकं रामायणं राममात्रपर्यवसानकं कृत्स्नं सम्पूर्णमहं करवाणि । परनिर्वृत्यादयश्च 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे' इति काव्यप्रकाशपद्यतोऽवगन्तव्याः ॥ ४१ ॥

गो० टी०–अथ मुनेः कृतिप्रणयनविषयसङ्कल्पमाह–तस्येति । भावितात्मनश्चिन्तितपरमात्मनः । अनेनारम्भकर्तव्यं विघ्नविघातकं मङ्गलं मुनिना आचरितमित्युक्तम् । तस्य वाल्मीकेः इयं बुद्धिर्जाता । इदंशब्दार्थमाह–कृत्स्नमित्यादि । सर्वं रामायणाख्यं काव्यमीदृशैर्मा निषादेति श्लोकप्रकारैः श्लोकैः । करवाणि इति इयं बुद्धिरित्यन्वयः । इदृशैरिति प्रायिकाभिप्रायमेतद्वृत्तान्तराणामपि तत्रतत्र प्रयोगात् ॥ ४१ ॥

४२] ति० टी०–उदारेति । उदारस्य यद्वृत्तं चरितम् उदारं वा यच्चरितं तदर्थाय बोधकैः पदैः मनोरमैः श्रुतिकटुत्वादिदोषरहितैः । अस्य यशस्विनो रामस्य दाशरथे रामस्य नारदोपबृंहितस्य । श्लोकशतैरिति शतशब्दोऽनन्तवाची ॥ ४२ ॥

रा० टी०–उदारेति । तदा ब्रह्मान्तर्धानोत्तरकाले । उदारधीः उदारा दुर्ज्ञेयपदार्थप्रतिपादकत्वेन महती धीरस्येति सः । अत एव कीर्तिमान्प्रशस्ता कीर्तिरस्येति सः । मुनिर्वाल्मीकिः । समाक्षरैः समानि तुल्यानि चतुर्ष्वपि पादेषु अक्षराणि येषु तैः । उदारवृत्तार्थपदैः उदाराः अभीष्टार्थदातारो वृत्तार्था रघुनाथाचरितरूपार्थाः येषु तान्येव पदानि तैः । अत एव मनोरमैः मनोहरैः श्लोकशतैः वक्ष्यमाणानुरोधेन चतुर्विंशतिसहस्रसङ्ख्यासङ्ख्यातश्लोकैर्यशस्विनो न्यूनाधिकरहितकीर्तिविशिष्टस्यास्य रामस्य यशस्करं कीर्तिसम्पादकं काव्यं दोषरहितालङ्कारसहितशब्दार्थकप्रबन्धं चकार रचयामास । 'उदारो दातृमहतोः' इतिकोशादुदारशब्दस्य उभयपरत्वम् ॥ ४२ ॥

गो० टी०–अथ यथासङ्कल्पं काव्यरचनामाह–उदारेति । कीर्तिरस्यातीति कीर्तिमान् । अनेन 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे' इत्यालङ्कारिकोक्तकाव्यप्रयोजनेष्वस्य यश एव प्रधानं प्रयोजनमिति दर्शितम् । काव्यनिर्माणानन्तरं भाविनो यशसः पूर्वभावोक्त्यातिशयोक्तिरुक्ता । उदारा महती धीर्यस्यासौ उदारधीः । 'उदारो दातृमहतोः' इत्यमरः । तेन कवित्वबीजभूता निपुणतोक्ता । तदुक्तं काव्यप्रकाशे 'शक्तिर्निपुणता लोके काव्यशास्त्राद्यवेक्षणात् । 'काव्यज्ञशिक्षयाभ्यास' इति 'हेतुस्तदुद्भव' इति । मुनिः मननशीलः । अनेन विविक्तसेवित्वमरोचकित्वं चोक्तम् । तदुक्तं वामनेन 'द्वये हि कवयः अरोचकिनः सतृणाऽभ्यवहारिणश्च' इत्यादि । तदा ब्रह्मवरप्रदानानन्तरकाले । अनेन कवित्वहेतुभूता शक्तिरुक्ता । यशस्विनोऽपि रामस्य यशस्करम् । तदुक्तं दण्डिना 'आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् । तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति' इति इतरकीर्त्यपेक्षया काव्यनायकत्वकृता कीर्तिरनुपमेत्यर्थः । काव्यं कवेर्लोकोत्तरवर्णननिपुणकवेः कर्म काव्यं शब्दार्थयुगलम् । तथोक्तम् । 'सगुणौ सालङ्कारौ शब्दार्थौ दोषवर्जितौ काव्यम्' इति । अत्र काव्यशब्देन काव्यसन्दर्भरूपं महाकाव्यमुच्यते । तल्लक्षणमुक्तं काव्यादर्शे । 'सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् । आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम् ॥ इतिहासकथोद्भूतमितरद्वारसंश्रयम् । चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ॥ नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः । उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥ विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः । मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि ॥ अलङ्कृतमसङ्क्षिप्तं रसभावनिरन्तरम् । सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः ॥ सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जनम् । काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति ॥' इति । एवम्भूतं काव्यं श्लोकशतैरवयवैश्चकार । श्लोकशब्देन गद्यपद्यमिश्रप्रबन्धेषु स्वग्रन्थस्य पद्यरूपता दर्शिता । शतैरित्यनेन शतकादिक्षुद्रप्रबन्धव्यावृत्तिरुक्ता । बहुवचनार्थं च स्वयमेव विवरिष्यति चतुर्विंशतिसहस्राणीति । कीदृशैः श्लोकशतैः उदारवृत्तार्थपदानि येषां तैः वृत्तानि पथ्यावक्त्रोपजातिवंशस्थवसन्ततिलकादीनि तेषामु-

१ काव्यमुदारधीर्मुनिरितिपाठः क. ख. ।

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वितीयः सर्गः ॥ २ ॥

दारत्वं नाम तत्तद्रसाभिव्यञ्जकत्वम् । अर्था वाच्यलक्ष्यव्यङ्ग्याः तेषामुदारत्वं द्राक्षापाकनारिकेलपाकरसालपाकेषु द्राक्षापाकत्वम् । एतल्लक्षणमुक्तं रुद्रटेन ' द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रसः' इति । पदानि वाचकलक्षकव्यञ्जकानि तेषामुदारत्वम् 'या पदानां परान्योन्यं मैत्री शय्येति कथ्यते ' इत्युक्तलक्षणशय्यावत्त्वम् । पुनः कीदृशैः मनोरमैरमणीयैः । अनेन वैदर्भीगौडीपाञ्चाली चेत्युक्तासु रीतिषु वैदर्भीरीतिमत्त्वमुक्तम् । तल्लक्षणं चोक्तम् 'बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता । नातिदीर्घसमासा च वैदर्भी रीतिरिष्यते ' इति । समाक्षरैः प्रतिपादं समानाक्षरैः । अनेन विषमवृत्तादिरूपता व्यावृत्ता ॥ ४२ ॥

४३] ति० टी०–एवं काव्यनिर्माणमुक्त्वा तत्र श्रोतृनभिमुखीकरोति–तदिति । समासस्तत्पुरुषादिः, सन्धिरेकादेशादिजः, योगः प्रकृतिप्रत्ययययोः, एते उपगता यथाव्याकरणालङ्कारशास्त्रमर्यादं यस्मिन्काव्ये तादृशं काव्यं रघुवरचरितं तद्वर्णनरूपम् । समः पतत्प्रकर्षादिदोषरहितः, मधुरः करुणारसयुक्तत्वेन माधुर्यगुणप्रधानः, उपनतः प्रसन्नतयोपलभ्यमानो योऽर्थस्तद्बोधकवाक्यैर्निबद्धम् उपनतत्वेन प्रसादगुणवत्ता दर्शिता । समुदायेन वैदर्भीरीतिमत्त्वं ध्वनितम् । रघेर्गत्यर्थान्निष्पन्नरघुवरशब्देन तस्य सर्वान्तर्यामित्वं ध्वनितम् । ईदृशस्यापि मिथ्यार्थकत्वेऽनुपादेयत्वं स्यादत आह–मुनिप्रणीतं ब्रह्मानुग्रहप्राप्तसत्यवागृषिप्रणीतम् । पुरुषार्थस्वर्गमोक्षादिसाधनत्वं तु रघुवरचरितमित्यनेनोक्तप्रायमेव । दशशिरसश्च वधमित्यनेन वनान्तमिदं श्रोतव्यमिति सूचितम् तेनैव सूचितफललाभात् । उत्तरकाण्डं त्वस्य खिलम् भारतस्य हरिवंशवत् । अत एवाग्निसर्गे वनसञ्चरणपर्यन्तवृत्तान्वेषणमेव समाधिना ऋषिर्वक्ष्यतीति प्राञ्चः । परे तु दशशिरसो वधं चेत्यन्वयः । तेन सीतात्यागादिरूपोत्तरकाण्डीयवृत्तान्तसङ्ग्रह इत्याहुः॥४३॥

इति श्रीरामाभिरामे श्रीरामीय रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०–सावधानसम्पर्त्यर्थं शिष्यानाह–तदित्यादिना । उपगतसमाससन्धियोगम् उपगता यथाशास्त्रं स्थापिताः समासास्तत्पुरुषादयः सन्धयो यणादयः योगाः प्रकृतिप्रत्ययसंबन्धाः यस्मिन् तत् । सममधुरोपनतार्थवाक्यबद्धं समम् एतत्प्रकर्षादिदोषरहितं मधुरं प्रधानीभूतशृङ्गारादिरससहितं तयोः समाहारः सममधुरम्, उपनतः सहृदयैः प्रसन्नतयोपलभ्यमानोऽर्थो यस्य तदेव तदिति कर्मधारयः. तेन बद्धं संयुक्तम् । मुनिना वाल्मीकिना प्रणीतं तत्प्रसिद्धं रघुवरचरितं काण्डसप्तात्मकं दशशिरसो रावणस्य वधं च निशामयध्वं शृणुत । गोबलीवर्दन्यायेन पुना रावणवधोपादानम् । किञ्च दशशिरसो वधं वधविशिष्टं रघुवरचरितं शृणुतेत्यर्थः । नित्यसापेक्षत्वादेकदेशेऽन्वयः । एतेन दशशिरसो वधं वधपर्यन्तमित्यर्थः प्रयुक्तः गमकमन्तरेण लक्षणाया अयुक्तत्वात् ॥ ४३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
बालकाण्डे द्वितीयः सर्गः ॥ २ ॥

गो० टी०–एवं प्रबन्धनिर्माणमभिधाय कुशलवादिभ्यस्तत्प्रतिपादनं सङ्ग्रहेण दर्शयति–तदिति । स्वग्रन्थस्योत्तमकाव्यत्वप्रदर्शनाय निर्दोषत्वमाह–उपगतसमाससन्धियोगमिति समासास्तत्पुरुषादयः, सन्धयः संहिताः, योगः पदव्युत्पत्तिः, उपगताः शास्त्रानुरूपेण प्राप्ताः समाससन्धियोगा यस्मिन् तत्तथोक्तम् । अनेन समासदोषसन्धिदोषपददोषशून्यत्वमुक्तम् । प्रधानमहन्निबर्हणन्यायेनैतत्सर्वदोषराहित्यस्योपलक्षणम् । अथ काव्यगुणान् प्राधान्येन दर्शयति–समेति । समैर्मधुरैरुपनतार्थैर्वाक्यैर्बद्धं रचितम् । तत्र समतालक्षणमुक्तं दण्डिना 'समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः ' इति । माधुर्यलक्षणं च तेनैवोक्तम् 'मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः । येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ' इति । उपनतार्थत्वमर्थव्यक्तिः । तत्स्वरूपं च तेनैवोक्तम् ' अर्थव्यक्तिरमेयत्वमर्थस्य ' इति । रघुवंश्यारघवस्तेषु वरो रामस्तच्चरितं तच्चरितविषयकं मुनिना वाल्मीकिना मया प्रणीतं मुनिना नारदेन वा प्रणीतं दशशिरसो रावणस्य वधमधिकृत्य कृतं ग्रन्थम् "अधिकृत्य कृते ग्रन्थे" इति विहितस्याणो लुक् । निशामयध्वमिति निशामयेत्यर्थः " क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः " इति तध्वमोर्हिस्वादेशस्य वैकल्पिकत्वात्तध्वमः पाक्षिकः स्वादेशाभावः " मितां ह्रस्वः" इति विहितस्य ह्रस्वस्य "घटादयो मितः इति" 'संज्ञापूर्वको विधिरनित्य' इति अनित्यत्वाद्ह्रस्वाभावः । किंतु णिचि दीर्घ एव आश्रावयदित्यर्थः । शिष्यानिति शेषः । "णिचश्च" इत्यात्मनेपदम् । यद्वा मुनिः रघुवरचरितं चकार तन्निशामयध्वमिति शिष्यान्प्रति परोक्षतयोच्यते । श्रवणेऽपि चरितस्य दर्शनसमतया भानान्निशामयध्वमित्युच्यते । निर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितमिति हि वक्ष्यते पूर्वश्लोके । वंशस्थवृत्तं ' जतौ तु वंशस्थमुदीरितं जरौ ' इति लक्षणात् । अत्र पुष्पितायावृत्तम् 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पितायाः' इति लक्षणात् ॥ ४३ ॥

इति श्रीगोविन्दराजकृतौ श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

१ समेति युक्तम् २ निशामयेति युक्तम् ।

तृतीयः सर्गः ॥ ३ ॥

वाल्मीकिना रामायणनिबद्धविषयाणां संक्षेपत उपाख्यानम् ।

श्रुत्वा वस्तु समग्रं तद्धर्मार्थसहितं हितम् । व्यक्तमन्वेषते भूयो यद्वृत्तं तस्य धीमतः ॥ १ ॥
उपस्पृश्योदकं सम्यङ्मुनिः स्थित्वा कृताञ्जलिः । प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते गतिम् ॥ २ ॥
रामलक्ष्मणसीताभी राज्ञा दशरथेन च । सभार्येण सराष्ट्रेण यत्प्राप्तं तत्र तत्त्वतः ॥ ३ ॥
हसितं भाषितं चैव गतिर्यावच्च चेष्टितम् । तत्सर्वं धर्मवीर्येण यथावत्सम्प्रपश्यति ॥ ४ ॥

१] ति० टी०–श्रुत्वेति । नारदात्काव्यविषयं रामचरितरूपं वस्तु श्रुत्वा समग्रं प्रकाशरहस्यसहितं कुर्विति च ब्रह्ममुखाच्छ्रुत्वा तस्य धीमतो रामस्य यद्वृत्तं चरितं सरहःप्रकाशं तद्भूयः पुनर्व्यक्तं साक्षात्कारविषयो यथा भवति तथा कर्तुमन्वेषते उषुङ्क्षे स्मेति शेषः । धर्मार्थेति त्रिवर्गोपलक्षणं फलत्वेन तत्सहितम् । हितं मोक्षफलकम् ॥ १ ॥

रा० टी०–मुनिवृत्तमाह–श्रुत्वेत्यादि । धर्मार्थसहितं धर्मो रघुनाथाश्रयणमेवार्थः परमपुरुषार्थस्तेन सहितम् अत एव हितं सर्वोपकारकं समग्रं सम्पूर्णं वस्तु श्रुत्वा नारदब्रह्मणोरुपदेशादवगत्य धीमतः समाधिकरहितबुद्धिविशिष्टस्य तस्य श्रुतितात्पर्ये विषयीभूतस्य रघुनाथस्य व्यक्तमिह लोकेऽपि प्रकटीभूतं यद्भूयो विस्तृतमाचरितं तदन्वेषते व्यचारयत् । ' वर्तमानसामीप्ये भूते भविष्यति च वर्तमानवद्वा ' इति लट्प्रयोगः । एतेन तद्वस्तुनो दुर्बोधत्वं सूचितम् । ' धर्मात्मा धर्मसंहितम' इति पाठे तु धर्मात्मेति मुनिविशेषणम् । धर्मसंहितमिति वस्तुविशेषणम् । रघुनाथाऽऽचरितरूपधर्मविशिष्टमित्यर्थः । " समो वा हिततत्तयोः " इत्यत्र वाशब्दसत्वान्मकारस्थानिकानुस्वारः श्रुतिः ॥ १ ॥

गो० टी०–पूर्वस्मिन्सर्गे स्वग्रन्थस्यात्यन्तादरणीयत्वद्योतनाय परमात्मतत्त्वरूपं वस्तुवैलक्षण्यं प्राधान्येनोक्तं संप्रति तदर्थमेव विषयवैलक्षण्यं दर्शयति विषयस्य वैलक्षण्यं नाम सम्यक्ज्ञानावधृतत्वं लोकोत्तरनायकगुणपरिष्कृतत्वं च । तत्र प्रथमं सम्यक्ज्ञानावधृतत्वं विवक्षुस्तद्वस्त्वन्वेषणमाह–श्रुत्वेति। धर्मे आत्मा स्वभावो यस्यासौ धर्मात्मा इत्यन्वेषणहेतूक्तिः। धर्मसंहितं धर्मसहितम् " समो वा हिततत्तयोः " इति विकल्पितत्वान्मकारलोपाभावः। समग्रं कृत्स्नं तत्तु नारदोक्तं वस्तु कथाशरीरं श्रुत्वा भूयस्ततोधिकं धीमतो रामस्य यद्वृत्तं चरित्रमस्ति तद्व्यक्तं यथा भवति तथान्वेषते पर्यालोचयति स्म " वर्तमानसामीप्ये वर्तमानवद्वा " इति लट् ॥ १ ॥

२] ति० टी०–उद्योगमेवाह–उपेति । आचम्येत्यर्थः । सम्यक्स्मृत्युक्ताचमनरीत्या इदमन्येषामपि प्रायत्यसम्पादकानामुपलक्षणम् । प्रागग्रेषु दर्भेषु स्थित्वा धर्मेण योगजेन ब्रह्मप्रसादरूपेण च गतिं रामादीनां चरितरूपामन्वेषतेऽतियत्नेन पश्यति स्म ॥ २

रा० टी०–उपेति । मुनिः नारदोपदिष्टतत्त्वमननशीलो वाल्मीकिः सम्यग्यथाविधि । उदकमुपस्पृश्य आचम्य प्राचीनाग्रेषु दर्भेषु स्थित्वा कृताञ्जलिः प्रार्थनासूचकबद्धयुगलकरः सन् धर्मेण वेदबोधितकर्मणोपलक्षितामित्यध्याहारः। गतिं सीतारामाचरितमन्वेषते व्यचारयत् ॥ २ ॥

गो० टी०–धर्मात्मेत्यनेन सूचितमन्वेषणप्रकारमाह–उपस्पृश्येति । मुनिः सम्यग्यथाशास्त्रमुदकमुपस्पृश्य आचम्येत्यर्थः । ' उपस्पर्शस्त्वाचमनम् ' इत्यमरः । प्राचीनाग्रेषु दर्भेषु स्थित्वा निजगुरुमुद्दिश्य कृताञ्जलिः सन् धर्मेण ब्रह्मप्रसादरूपश्रेयःसाधनेन गतिं रामादिवृत्तमन्वेषते ॥ २ ॥

३–४] ति० टी०–रामेत्यादि । श्लोकद्वयमेकं वाक्यम् । भार्याकौसल्याद्यास्तत्सहितेन दशरथेन रामादिभिश्च यत्प्राप्तं सम्बद्धं चरितं राज्यपालनादिरूपं हसितादिरूपं च तत्सर्वं तत्र समाधौ तत्त्वतो धर्मवीर्येण योगजबलेन पश्यति स्म ॥ ३ ॥४॥

रा० टी०–विचारोत्तरकाले विचारविषयीभूतवस्तुसाक्षात्कारो जात इत्याह–रामेत्यादि श्लोकद्वयेन । रामलक्ष्मणसीताभिस्तत्रायोध्यायां प्राप्तं प्रकटितं यद्धसितं हसनं भाषितं वचनरचना गतिः गमनम् अन्यच्च यावच्चेष्टितं दातृत्वादि तत्सर्वं धर्मवीर्येण रघुनाथस्मरणरूपबलेन यथावद्यथाकामं तत्त्वतः मायाराहित्येन सम्पश्यति सम्यगजानात्। सराष्ट्रेण राज्यसहितेन सभार्येण कौशल्यादिसहितेन दशरथेन राज्ञा च यत्प्रकटतः प्राप्तं हसितत्वादि भाषितं यथावत्सम्प्रपश्यति पश्यतीत्युक्त्या पुनर्न तद्विस्मृतिरिति ध्वनितम् ॥ ३ ॥ ४ ॥

गो० टी०–गतिशब्दार्थं विवृण्वन्धर्मेण अन्वेषणफलमाह–रामेति । रामादिभिर्यत्प्राप्तं तत्र विषये तत्त्वतः तत्त्वेन सम्प्रपश्यति समन्तात्प्रकर्षेण पश्यति तत्सर्वं विशदतरं पश्यतीत्युपज्यते ॥ ३ ॥ किं प्राप्तं तत्राह–हसितमिति । पूर्वोक्तरामादीनां यद्धसितं हासः यच्च भाषितं भाषणम् भावे क्तः । या च गतिर्गमनं यच्च चेष्टितं चेष्टा युद्धादिकमिति यावत् तत्सर्वं धर्मवीर्येण ब्रह्मवरप्रसादशक्त्या यथा वृत्तं तत्त्वेन सम्प्रपश्यति।

१ धर्मात्मा धर्मसंहितमितिपाठः क. ख.। २ यद्वृत्तमितिपाठ. क. ख.। ३ इदं तु न सूत्र तद्वृत्तिरेव । ४ विसर्गोऽयुच्चः ।

स्त्रीतृतीयेन च तथा यत्प्राप्तं चरता वने । सत्यसन्धेन रामेण तत्सर्वं चान्ववेक्षत ॥ ५ ॥
ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः । पुरा यत्तत्र निर्वृत्तं पाणावामलकं यथा ॥ ६ ॥
तत्सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महामतिः । अभिरामस्य रामस्य तत्सर्वं कर्तुमुद्यतः ॥ ७ ॥
कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् । समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ ८ ॥
स यथाकथितं पूर्वं नारदेन महात्मना । रघुवंशस्य चरितं चकार भगवान्मुनिः ॥ ९ ॥

अत्र योगजधर्मस्थानीयत्वात् ब्रह्मप्रसादो धर्मशब्देनोच्यते स च साक्षात्कारहेतुश्चक्षुरादिवदिति प्रमाणतोऽध्यवसीयते ॥ ४ ॥

५] ति० टी०–अयोध्यावासकालिकं वृत्तं निरीक्ष्य तदनन्तरं वनकालिकं च निरीक्षितमित्याह–स्त्रीतृतीयेनेति । द्वितीयो लक्ष्मणः । तत्सर्वं चेति चस्य तदुत्तरकालिकमुत्तरकाण्डस्थं चेत्यर्थ इत्यपरे ॥ ५ ॥

रा० टी०–अयोध्यावृत्तसाक्षात्कारानन्तरं वनवृत्तविचारमाह–स्त्रीतृतीयेनेति । स्त्री सीता तृतीया यस्य सीतालक्ष्मणसहितेनेत्यर्थः । सत्या सन्धा प्रतिज्ञा यस्य तेन । वने चरता वनगमनशीलेन रामेण यत्प्राप्तं प्रकटीकृतं चरितं तत्सर्वं तथैव अन्ववेक्षितं वाल्मीकिना विचारितमित्यर्थः चशब्द एवार्थे ॥ ५ ॥

गो० टी०–नगरनिवासकालीनचरितावलोकनमभिधाय वनवासकालीनवृत्तान्तनिरीक्षणमाचष्टे स्त्रीति । स्त्री तृतीया यस्य तेन सीतालक्ष्मणसहितेनेत्यर्थः । वने दण्डकारण्ये चरता सत्यसन्धेन सत्यप्रतिज्ञेन रामेण यत्प्राप्तं तत्सर्वं चान्ववेक्षितं साक्षात्कृतम् वाल्मीकेनेति शेषः । धर्मवार्योगेति सिद्धम् ॥ ५ ॥

६] ति० टी०–नेदं दर्शनं स्वप्नवदित्याह–तत इति । पूर्वाचरितयोगाभ्यासादित्यर्थः । योगं समाधिम् । तत्र समाधौ पुरा पश्यति अपश्यदित्यर्थः । यत्निर्वृत्तं जातम् इदमुपलक्षणम् । यच्च भावि तच्चरित्रं पश्यति स्मेति यावत् ॥ ६ ॥

रा० टी०–विचारोत्तरकाले तत्साक्षात्कारो जात इत्याह–तत इत्यादिना । ततः विचारानन्तरं धर्मात्मा धर्मे रघुनाथोपासने आत्मा मनो यस्य । अत एव योगमुपासनोपायमास्थितः प्राप्तः मुनिः तत्र अयोध्यादौ यन्निर्वृत्तं लक्ष्मणसीतारामाचरितं तत्सर्वं पाणावामलकं यथा पाणिगतधात्रीफलमिव पुरा पूर्वं पश्यति तत्त्वतोऽजानादित्यर्थः ॥ ६ ॥

गो० टी०–एवं रामादिवृत्तान्तदर्शनस्य विशदतमत्वमाह–तत इति । ततः अवेक्षणानन्तरं धर्मात्मा वाल्मीकिः योगं ब्रह्मप्रसादरूपोपायमास्थितः सन् ' योगः सत्यहनोपायध्यानसङ्गतियुक्तिषु ' इत्यमरः । तत्र रामादौ पुरा यन्निर्वृत्तं निष्पन्नं तत्सर्वं वृत्तं पाणौ आमलकमिव पश्यति स्म ॥ ६ ॥

७] ति० टी०–तदिति । धर्मेण योगजेन अत एव महामतिः । तत्सर्वमतीतमनागतं च तद्विषयं काव्यम् । अभिरामस्येयत्नेन तादृशकाव्यकरणस्य रागप्राप्ततोक्ता ॥ ७ ॥

रा० टी०–रघुनाथवर्णनीयसर्ववृत्तसाक्षात्कारोत्तरकालिकं वृत्तमाह–तदित्यादिना । महाद्युतिः अतिप्रकाशयुक्तः स वाल्मीकिः अभिरामस्य सर्वाभिरामहेतोः रामस्य धर्मेण वेदबोधितकर्मत्वेन उपलक्षितमिति शेषः । तत्प्रसिद्धं सर्वं निर्वर्णयिष्यमाणनिखिलरघुनाथचरितं तत्त्वतो मायारहितेन दृष्ट्वा ज्ञात्वा कर्तुं चरितं वर्णयितुमुद्युक्तः उद्योगवानासीदित्यर्थः । महाद्युतिरित्युक्त्या रघुनाथसाक्षात्कारस्य प्रभावातिशयः सूचितः।महामतिरिति पाठे तु महती समाधिकशून्या मतिर्यस्येत्यर्थः ॥ ७ ॥

गो० टी०–अथ दर्शनफलग्रन्थनिर्माणोद्योगमाह–तदित्यादि । श्लोकद्वयमेकान्वयम् । महाद्युतिः रामगुणानुभवजनितहर्षप्रकर्षकृतद्युतियुक्तः स वाल्मीकिस्तत्सर्वं रामदृत्तान्तं तत्त्वतो धर्मेण पूर्वोक्तेन दृष्ट्वा अभिरामस्य निरवधिकभोग्यस्य चरित्रं चरितविषयप्रबन्धं कर्तुमुद्यतः उद्युक्तोऽभूत् ॥ ७ ॥

८–९] ति० टी०–कामेति । कामरूपो योऽर्थः पुरुषार्थस्तद्रूपेण गुणेन फलेन युक्तम् धर्मार्थरूपपुरुषार्थफलेन विस्तरवत् विस्तरेण तदुभयप्रतिपादकं तदातृ चेत्यर्थः । रत्नैः काव्यगुणालङ्कारव्यङ्ग्यरत्नैराढ्यं पूर्णम् । सर्वश्रुतीनां मनोभूताः सारभूता उपनिषदस्तासां हरं तदर्थप्रतिपादकम् तेन मोक्षफलकत्वम् । व्याख्यानान्तरं त्वचमत्कारीत्युपेक्षितम् ॥ ८ ॥ स इति । रघुवंशस्य तद्वंशावतीर्णरामस्य नारदकथनक्रमेणैव तच्चरितं तत्प्रतिपादकं काव्यं चकारेत्यर्थः ॥ ९ ॥

रा० टी०–कामेति । रत्नाढ्यं रत्नपरिपूर्णं समुद्रमिव । रत्नपरिपूर्णसमुद्रसदृशमित्यर्थः । कामार्थगुणसंयुक्तं कामार्थगुणैः कामश्च अर्थश्च गुणशब्देन कामार्थगुणवत्तासम्पादकोधर्म उच्यते स च ते कामार्थगुणाः तैः संयुक्तं यथाकामम् । कामार्थधर्मदायकमित्यर्थः । धर्मार्थगुणविस्तरं धर्मार्थयोर्गुणत्वसम्पादको मोक्ष इत्यर्थः । तं विस्तृणाति परिपूरयति तत् । सर्वश्रुति सर्वाः श्रुतयस्तात्पर्यवृत्त्या प्रतिपादकत्वेन यस्मिन् तत् अत एव मनोहरं सदयहृदयापकर्षकं रघुवंशस्य चरितं महर्षिणा नारदेन यथा येन प्रकारेण पूर्वं कथितं तेन कारेण ऋषिर्वेदतत्त्वज्ञः अत एव भगवान् रघुनाथज्ञानरूपैश्वर्यविशिष्टः स वाल्मीकिश्चकार वर्णयामासेत्यर्थः द्वयोरेकत्रान्वयः । समुद्रमिव रत्नाढ्यमित्युपमालङ्कारेण यथा समुद्रे रत्नानि सुकृतमहायत्नलभ्यानि तथा वेदे रघुनाथचरित्रान्यपि सुकृतमहायत्नल-

१ चरितमितिपाठः क. ख. । २ वाल्मीकिनेतियुक्तम् ।

जन्म रामस्य सुमहद्वीर्यं सर्वानुकूलताम् । लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलताम् ॥१०॥
नाना चित्राः कथाश्चान्या विश्वामित्रसहायने । जानक्याश्च विवाहं च धनुषश्च विभेदनम् ॥ ११ ॥
रामरामविवादं च गुणान्दाशरथेस्तथा । तथाभिषेकं रामस्य कैकेय्या दुष्टभावताम् ॥ १२ ॥

भ्यानीत्युपमालङ्कारो ध्वनितः तेन रघुनाथाचरितं सद्गुरुकृपयैव लभ्यमिति सद्गुरुराश्रयणीय इति वस्तु व्यक्तम् ॥८॥ ९ ॥

गो० टी०–कीदृशं चरित्रमित्यत्राह–**कामार्थेति** । कामश्चार्थश्च कामार्थौ गुणशब्देनाप्राधान्यमुच्यते अप्रधानाभ्यामर्थकामाभ्यां संयुक्तं त्याज्यतात्प्रदर्शनार्थं तत्रतत्रार्थकामप्रतिपादकमित्यर्थः । धर्मार्थयोर्धर्ममोक्षयोर्गुणोतिशयस्तं विस्तृणातीति धर्मार्थगुणविस्तरम् पचाद्यच् प्राधान्येन धर्मापवर्गप्रतिपादकमित्यर्थः । ' अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने ' इति वैजयन्ती । अत एव रत्नाढ्यं समुद्रमिव स्थितम् समुद्रो यथा शङ्खशुक्त्यादियुक्तोपि प्राधान्येन रत्नानि वहति तथा स्थितमित्यर्थः । सर्वेषां जनानां श्रुतिमनसी श्रोत्रहृदये हरतीति सर्वश्रुतिमनोहरम् शब्दमाधुर्याच्छोत्राकर्षकं अर्थसौष्ठवाच्चित्ताकर्षकमित्यर्थः ॥ ८ ॥ यथोद्योगं प्रबन्धनिर्माणमाह–**स इति** । भगवान्स ऋषिः रघुवंशस्य रघुवंशोद्भवस्य रामस्य चरित्रं पूर्वं नारदेन महर्षिणा यथा कथितं येन प्रकारेणोक्तं तथा चकार ॥९॥

१०] **ति० टी०**–विस्तरेण वर्णनीयानर्थान् ' इष्टं हि विदुषां लोके समासव्यासधारणम् ' इत्युक्तेः समासेन सङ्क्षेपेणाह–**जन्मेत्यादिना** । वीर्यं स्वयमक्षतस्य पराभिभवसामर्थ्यम् । सर्वानुकूलतां सर्वेषामनुवर्तनरूपां प्रियतां विश्लेषासहत्वपर्यवसायिनी वस्तुसौन्दर्यबलाद्विषयलाभेऽप्यनिवर्त्यावियमानानामपि दोषाणामदर्शनकरी, व्यसनसहस्रसम्पातेऽप्यनिवर्त्या या अनुपस्कृतवस्तुमात्रालम्बिनीच्छा प्रेमपदवाच्या तद्विषयताम् । एवं भगवति रामे मायाशबले जातं प्रेम चित्तशुद्धिद्वारा शुद्धविषयं प्रेमोत्पाद्य निदिध्यासनद्वारा मुक्तिजनकज्ञानपर्यवसायीति बोध्यम् । क्षान्तिम् 'उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते' इत्युक्तरूपाम् । सौम्यतामकूरदर्शनताम् ॥ १० ॥

रा० टी०–रघुनाथचरितमेव सङ्क्षेपेणाह–**जन्मेत्यादिभिरासर्गम्** । रामस्य साकेताधीशरघुनाथस्य जन्म ब्रह्मप्रार्थनाहेतुकं प्रादुर्भावं सुमहत्सुमहत्त्वम् ईश्वरेश्वरत्वमित्यर्थः । वीर्यं समातिशयशून्यपराक्रमं सर्वानुकूलतां सर्वहितकारकत्वं लोकस्य प्रियतां लोकनिष्ठप्रीतिविषयत्वं क्षान्तिं जनकृतापराधादर्शकत्वं सौम्यतां सर्वप्रियदर्शकत्वं सत्यशीलतां सत्यस्वभावत्वं वाल्मीकिश्चकार वर्णयामासेत्यर्थः एकोनत्रिंशत्तमेनान्वयः । सुमहदिति भावप्रधानो निर्देशः ॥ १० ॥

गो० टी०–अथ विस्तरेण ब्रह्मोपदिष्टरीत्या रामचरितनिर्माणं दर्शयति–**जन्मेत्यादिना** । सर्गशेषेण द्वितीयान्तानां तत्प्रतिपादकपरत्वं बोध्यम् । वाल्मीकिर्भगवान् ऋषिश्चकारेति वक्ष्यमाणे कर्तृक्रिये अनुषञ्जनीये । जन्मेति जन्मनः सुमहत्त्वं दशरथमहातपोबललभ्यत्वं विष्णोरवतारत्वं च । वीर्यं ताटकाताटकेयादिहननक्षमं बलं सर्वानुकूलतां सर्वानुवर्तित्वमार्जवमिति यावत् । लोकस्य प्रियतां प्रेमास्पदत्वम । क्षान्तिं अपराधसहिष्णुतां सौम्यतां रम्यतामनुग्रतां वा । ' सौम्यः पुमान् बुधे विप्रे त्रिषु स्यात्सोमदैवते । रम्ये अनुग्रे च ' इति रत्नमाला । सत्यशीलतां सत्यस्वभावताम 'शीलं स्वभावे सद्वृत्ते' इत्यमरः१०

११] **ति० टी०**–**नानेति** । विश्वामित्रसहायने विश्वामित्रेण सह गमने तदुपस्थितिकाले सभायां मार्गे गमनकाले च चित्राः नाना कथाः अन्याश्च कथा योगवासिष्ठोक्ता ब्रह्मप्रतिपादिकाः कथा अत्र ग्रन्थे उक्ता गङ्गादिकथाश्चेत्यर्थः । एतेना श्लोके नानेत्यन्या इति च व्यर्थमित्यपास्तम् । जानक्याश्चेति चेनोर्मिलादिसङ्ग्रहः ॥ ११ ॥

रा० टी०–**नानेति** । विश्वामित्रसमागमे विश्वामित्रेण साकं महाराजाधिराजदशरथादिसमागमे सति अन्याः रामजन्मादिभिन्नाः नानाचित्रकथाः नाना बहुविधानि चित्राणि आश्चर्याणि यासु ता एव कथा इति कर्मधारयः । महाराजदशरथचेष्टाविश्वामित्रयज्ञपदशाहल्यादिस्वरूपप्रापणादिका इत्यर्थः । जानक्या जनकप्रादुर्भूतसीतायाः चकारेणोर्मिलादीनां विवाहं च धनुषः तत्र स्थापितशिवचापस्य विभेदनं विवाहहेतुकधनुर्भङ्गं च । नाना चित्राः कथा इति 'व्यस्तः सहायने' इति च भट्टसम्मतः पाठः । अर्थे तु न वैलक्षण्यम् ॥ ११ ॥

गो० टी०–**नानेति** । विश्वामित्रसमागमे विश्वामित्रेण रामलक्ष्मणयोः संयोगे सति अन्या रामचरितादन्या नानाप्रकारचित्रकथा आश्चर्यावहाः कथाश्च जानक्याश्चेति चकारेणोर्मिलादयः समुच्चीयन्ते धनुषो हरचापस्य विभेदनं भङ्गं च ॥ ११ ॥

१२] **ति० टी०**–**रामेति** । द्वितीयः परशुरामः । गुणान्विनयजयरूपान् ॥ १२ ॥

रा० टी०–**रामेति** । रामेण दाशरथिरघुनाथेन सह रामविवादं परशुरामविवादं च तृतीयेति योगविभागात्सम्बन्धसामान्ये षष्ठीं प्रकल्प्य षष्ठीति सूत्रेण वा समासः । दाशरथेः रामस्य गुणान् विनयविजयादिरूपांश्चेत्यर्थः । तथेति चार्थे । एवमुत्तरत्रापि । रामस्याभिषेकम् । अभिषेकोद्योगमित्यर्थः । कैकेय्या दुष्टभावतां प्रातिभासिकदुष्टस्वभावत्वम् ॥ १२ ॥

गो० टी०–**रामेति** । रामेण परशुरामेण रामस्य राघवस्य विवादम रामेण रामविवादमित्यत्र तृतीयेतियोगविभा-

१ कैकेय्याइति युक्तम् ।

विघातं चाभिषेकस्य रामस्य च विवासनम् । राज्ञः शोकं विलापं च परलोकस्य चाश्रयम् ॥ १३ ॥
प्रकृतीनां विषादं च प्रकृतीनां विसर्जनम् । निषादाधिपसंवादं सूतोपावर्तनं तथा ॥ १४ ॥
गङ्गायाश्चापि सन्तारं भरद्वाजस्य दर्शनम् । भरद्वाजाभ्यनुज्ञानाच्चित्रकूटस्य दर्शनम् ॥ १५ ॥
वास्तुकर्मनिवेशं च भरतागमनं तथा । प्रसादनं च रामस्य पितुश्च सलिलक्रियाम् ॥ १६ ॥
पादुकाभ्याभिषेकं च नन्दिग्रामनिवासनम् । दण्डकारण्यगमनं विराधस्य वधं तथा ॥ १७ ॥
दर्शनं शरभङ्गस्य सुतीक्ष्णेन समागमम् । अनसूयासमास्यां च अङ्गरागस्य चार्पणम् ॥ १८ ॥

गात्समासः अतो नैकशेषप्रसक्तिः । दाशरथेर्गुणान् अयोध्याकाण्डादौ वक्ष्यमाणान् । तथेति समुच्चयार्थः सर्वत्र द्रष्टव्यः । रामस्याभिषेकोद्योगं कैकेय्या दुष्टभावतां दुष्टहृदयत्वं च ॥ १२ ॥

१३] ति० टी०–विघातं चेति । विवासनं वनं प्रति प्रस्थापनम् । परलोकस्य चाश्रयं परलोकगमनम् मरणमिति यावत् ॥ १३ ॥

रा० टी०–विघातं चेति । अभिषेकस्य रामाभिषेकोद्योगस्य विघातं केकयीकृतविघ्नम् । रामविवासनं वनप्रेषणं च राज्ञो महाराजदशरथस्य शोकं प्रकटीभूतरामवियोगजनितशोचनं च विलापं तच्छोकजनितहारामेत्यायुच्चारणं च परलोकस्य अप्रकटायोध्यापुरस्य आश्रयं स्थितिं च ॥ १३ ॥

गो० टी०–विघातमिति । अभिषेकस्य रामाभिषेकस्य विघातं कैकेयीदुष्टहृदयत्वकृतं विघ्नं च रामस्य विवासनं च राज्ञो दशरथस्य शोकेन विलापं प्रविलापं च राज्ञः परलोकस्य स्वर्गस्याश्रयमाश्रयणं च ॥ १३ ॥

१४] ति० टी०–प्रकृतीनामिति । प्रकृतीनां वञ्चनापूर्वकविसर्जनमयोध्यां प्रति परावर्तनम् । निषादाधिपो गुहः । सूतः सुमन्त्रः ॥ १४ ॥

रा० टी०–प्रकृतीनामिति । प्रकृतीनां प्रजानां विषादं रामवियोगजनितदुःखं प्रकृतीनां विसर्जनमयोध्यां प्रति परावर्तनं च निषादाधिपसंवादं गुहेन सम्भाषणं च सूतोपावर्तनमयोध्यां प्रति सूतपरावर्तनं च । तथेति समुच्चये ॥ १४

गो० टी०–प्रकृतीनामिति । प्रकृतीनां प्रजानां विषादं दुःखं प्रकृतीनां विसर्जनं वञ्चनेन निर्यापणं च । निषादाधिपसंवादं गुहेन सह सम्भाषणम् । सूतस्योपावर्तनं पुनरागमनं च १४

१५] ति० टी०–गङ्गाया इति । अभ्यनुज्ञानं सम्मतिः १५

रा० टी०–गङ्गायाश्चेति । गङ्गायाः सन्तारं सन्तरणं च भरद्वाजस्य दर्शनं भरद्वाजकर्मकावलोकनं च । एवश्चार्थे । अपीति पाठे सोपि तत्रैव भरद्वाजाभ्यनुज्ञानाद्भरद्वाजाज्ञातः चित्रकूटस्य दर्शनमवलोकनं च ॥ १५ ॥

गो० टी०–गङ्गायाश्चेति । स्पष्टम् ॥ १५ ॥

१६] ति० टी०–वास्त्विति । वास्तुकर्म चित्रकूटे गृहनिर्माणम् । निवेशं तत्र गृहेऽवस्थानम् । प्रसादनं भरतकर्तृकम् १६

रा० टी०–वास्त्विति । वास्तुकर्म चित्रकूटे पर्णमयगृहरचनां निवेशं तत्र प्रवेशं च भरतागमनं भरतकर्तृकचित्रकूटप्राप्तिं च । तथेति चार्थे । रामस्य प्रसादनं रामकर्मकभरतकर्तृकप्रसादनं च पितुः महाराजाधिराजदशरथस्य सलिलक्रियां सलिलदानं च ॥ १६ ॥

गो० टी०–वास्त्विति । वास्तुकर्म शास्त्रोक्तप्रकारेण यथोचितमन्दिरनिर्माणम् । विवेशं शास्त्रोक्तवास्तुपूजादिपूर्वकं गृहे प्रविश्यावस्थानं रामस्य प्रसादनं भरतेनेति शेषः । सलिलक्रियां सलिलदानम् ॥ १६ ॥

१७] ति० टी०–पादुकेति । श्रेष्ठपादुकयोर्भरतकृतमभिषेकम् । नन्दिग्रामस्य नितरामतिशयेन वासनम् भरते तत्र गते सर्वप्रजास्तत्रैव वासं कृतवत्य इत्यर्थः ॥ १७ ॥

रा० टी०–पादुकेति । पादुकयोः प्राक्चेतनत्वनित्यत्वाभ्यां सर्वपादुकाश्रेष्ठयोः अभिषेकं राज्यनियन्तृत्वेन स्थापनं च नन्दिग्रामनिवासनं भरतकर्तृकनन्दिग्रामनिवासं च स्वार्थे णिच् प्रयोजकाविवक्षा वा । दण्डकारण्यगमनं रामकर्तृकदण्डकारण्यप्रवेशं च विराधस्य वधं च रामेणेति शेषः तथाशब्दश्चार्थे ॥ १७ ॥

गो० टी०–पादुकेति । पादुकाद्वयोः पादुकाश्रेष्ठयोः । श्रैष्ठ्यं धृतत्वात् । अभिषेकं राज्यनियन्तृतया स्थापनं नन्दिग्रामे निवासनं निवसनम् स्वार्थेऽण् पादुकयोः स्थापनं वा ॥ १७ ॥

१८] ति० टी०–दर्शनमिति । अनसूयासमास्यामनसूयया सह सीतायाः समास्या सहासनम् । यद्यप्येतद्विराधवधात्पूर्वमेव तथापि क्रमे तात्पर्याभावाद्व्यत्ययेनाभिधानम् । अङ्गरागश्चन्दनादिः ॥ १८ ॥

रा० टी०–दर्शनमिति । शरभङ्गस्य ऋषेः दर्शनं शरभङ्गऋषिकर्मकावलोकनं सुतीक्ष्णेन ऋषिणाभिसङ्गमं सम्मेलनं च क्वचित्सुतीक्ष्णेन समागममिति पाठः । अर्थे तु न विशेषः । अनसूयासहास्यामनसूयया अत्रिपत्न्या सहास्यां सीतायाः सहस्थितिमङ्गरागस्य चन्दनस्य अर्पणमनसूयाकर्तृकसीतोद्देश्यकसमर्पणं च । समास्यामिति भट्टसम्मतपाठे तु अनसूयया सह सम्यगासनमित्यर्थः अत्र क्रमो न विवक्षितः अत एव विराधवधात्पूर्ववृत्तमनसूयावृत्तमुत्तरत्रोक्तम् ' आस्या त्वासनमासीने ' इत्यमरः ॥ १८ ॥

गो० टी०–दर्शनमिति । अनसूयया अत्रिपत्न्या सहास्यां

दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा । शूर्पणख्याश्च संवादं विरूपकरणं तथा ॥ १९ ॥
वधं खरत्रिशिरसोरुत्थानं रावणस्य च । मारीचस्य वधं चैव वैदेह्या हरणं तथा ॥ २० ॥
राघवस्य विलापं च गृध्रराजनिबर्हणम् । कबन्धदर्शनं चैव पम्पायाश्चापि दर्शनम् ॥ २१ ॥
शबरीदर्शनं चैव फलमूलाशनं तथा । प्रलापं चैव पम्पायां हनूमद्दर्शनं तथा ॥ २२ ॥
ऋष्यमूकस्य गमनं सुग्रीवेण समागमम् । प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ २३ ॥
वालिप्रमथनं चैव सुग्रीवप्रतिपादनम् । तारादिलापं समयं वर्षरात्रनिवासनम् ॥ २४ ॥

सहासनम् सीताया इति शेषः । ' आस्या त्वासनमासीना ' इत्यमरः । अत्र सर्वत्र क्रमो न विवक्षितः । रामायणप्रतिपाद्यसङ्ख्यामात्रे तात्पर्यात् । अङ्गरागस्य चन्दनस्य ॥ १८ ॥

१९] ति० टी०–दर्शनमिति । अगस्त्यसकाशाद्धनुषो ग्रहणम् ॥ १९ ॥

रा० टी०–दर्शनमिति । अगस्त्यस्य कुम्भोद्भवमुनेः दर्शनमवलोकनं च अपिना तत्पूजनादिकं च । धनुषः अगस्त्यसमर्पितवैष्णवचापस्य ग्रहणं रामकर्तृकस्वीकारं च । शूर्पणख्याः शूर्पणखायाः संवादं बहुविधकथनं च । विरूपकरणं शूर्पणखायाः कर्णनासिकाच्छेदनं च अत्र नखमुखेति निषेधेऽपि ङीप् आर्षः । तथाशब्दौ चार्थकौ ॥ १९ ॥

गो० टी०–अगस्त्येति । शूर्पणख्या इति ङीबत्रार्षः ॥१९॥

२०-२२] ति० टी०–वधमिति । उत्थानं जानकीहरणाद्योगम् ॥ २० ॥ २१ ॥ २२ ॥

रा० टी०–वधमिति । खरत्रिशिरसोः तदुपलक्षितखरत्रिशिरोदूषणादीनां वधं रामकर्तृकहननं च रावणस्योत्थानं शूर्पणखावाक्यात् । मारीचसहितरावणकर्तृकरामाश्रमकर्मकगमनं च । मारीचस्य वधं रामकर्तृकहननं च । वैदेह्या हरणं रावणकर्तृकानयनं च । एवतथाशब्दौ चार्थौ ॥ २० ॥

गो० टी०–खरत्रिशिरसोरिति दूषणादीनामुपलक्षणम् । उत्थानं निर्गमनम् ॥ २० ॥

२१] रा० टी०–राघवश्चेति । राघवस्य रामस्य विलापं सम्भोगपोषकसीतावियोगहेतुकरामकर्तृकविलापं च गृध्रराजनिबर्हणं गृध्रराजस्य जटायुषः निबर्हणं रावणकर्तृकहिंसनम् । अपिना तत्प्रमीतक्रियां च कबन्धदर्शनं कबन्धकर्मकावलोकनं च । पम्पायाः तन्नामकसरसः दर्शनमवलोकनं च । एवश्चार्थे॥२१॥

गो० टी०–मारीचस्येति । एवकारः पादपूरणार्थः । एवमुत्तरत्र सर्वत्र द्रष्टव्यम् ॥ २१ ॥

२२]रा० टी०–शबर्येति । शबर्याः तन्नामकश्रमण्या दर्शनं च एतेन तत्समर्पितफलाशनं हनुमद्दर्शनं च । तथाशब्दश्चार्थे । महात्मनः मन्यते रमादिभिः पूज्यते इति महा सीता तत्रात्मा मनो यस्य तस्य राघवस्य पम्पायां पम्पासमीपे प्रलापं च एतेन लक्ष्मणकृतप्रलापशामकोक्तिं च ॥ २२ ॥

गो० टी०–कबन्धेति । चापीत्येकनिपातः समुच्चयार्थः २२

२३] ति० टी०–ऋष्येति । प्रत्ययोत्पादनं शालभेदादिभिः सुग्रीवस्य विश्वासजननम् । विग्रहं युद्धम् ॥ २३ ॥

रा० टी०–ऋष्येति । ऋष्यमूकस्य सुग्रीवाधिष्ठिततन्नामकपर्वतस्य गमनं प्राप्तिं च सुग्रीवेण समागमं तत्र सुग्रीवरामसम्मेलनं च प्रत्ययोत्पादनं रामसुग्रीवपरस्परविश्वासजननं च सख्यं तयोः परस्परं मित्रभावं च वालिसुग्रीवविग्रहं च सुग्रीवकर्तृकविग्रहहेतुकथनमित्यर्थः ॥ २३ ॥

गो० टी०–ऋष्येति । ऋष्यमूकस्येति कर्मणि षष्ठी । प्रत्ययोत्पादनं सालभेदनादिभिः सुग्रीवस्य विश्वासजननम् । वालिसुग्रीवविग्रहं वालिसुग्रीवयुद्धं वालिसुग्रीवयोर्वैरानुकथनं वा॥२३॥

२४] ति० टी०–वालीति । सुग्रीवप्रतिपादनं सुग्रीवस्य राज्ये स्थापनम् । समयं शरदि यात्रा कर्तव्येति रामसुग्रीवयोः सङ्केतम् । वर्षेति वर्षाकालिकवासाङ्गीकरणम् ॥ २४ ॥

रा० टी०–वालीति । वालिप्रमथनं वालिकर्मकवधं च सुग्रीवप्रतिपादनं सुग्रीवस्य प्रतिपादनं रामकर्तृकराज्यस्थापनं च तारादिलापं वालिवधहेतुकशोकजनिततारातर्कृकप्रलापं च समयं वर्षर्त्वपाये सीतान्वेषणीयेति रामसुग्रीवकृतसङ्केतं वर्षरात्रनिवासनं वर्षो वृष्टियुक्तः कालः चातुर्मास्यमित्यर्थः तस्य रात्रयः तेषु निवासनं निवासं च । एवश्चार्थे सचावृत्त्या चहीनेष्वप्यन्वेति । वर्षरात्रेत्यत्राजिति योगविभागादच्प्रत्ययः । रात्राह्नेति पुंस्त्वम् । तारादिलापसमयमिति समस्तपाठे समाहारद्वन्द्वेनैकवद्भावो बोध्यः ॥ २४ ॥

गो० टी०–वालीति । वालिप्रमथनं वालिवधम् । सुग्रीवप्रतिपादनं सुग्रीवाय राज्यप्रदानमित्यर्थः । तारादिलापं तारा-प्रलापम् । समयं शरदि सीतान्वेषष्टव्येति रामसुग्रीवयोः सङ्केतम् ' समयः कालसिद्धान्तप्रतिज्ञाशपथेषु च । सङ्केताचारयोश्च ' इति रत्नमाला । तारादिलापसमयमितिपाठे ' सर्वो द्वन्द्वो विभाषयैकवद्भवति ' इत्येकवद्भावः । वर्षरात्रनिवासनं वर्षं वृष्टिस्तयुक्ता रात्रयो वर्षरात्राः " रात्राह्नाहाः पुंसि" इति पुंल्लिङ्त्वम् तेषु निवासनं निवसनम् स्वार्थेऽण् वर्षदिनेष्वित्यर्थः रात्रिशब्दस्य दिवसपरत्वं रात्रिरात्रादौ दृष्टम् ॥ २४ ॥

१ अगस्त्यदर्शनं चैव जटायोरभिसंगमम् । पञ्चवट्याश्च गमनं शूर्पणख्याश्च दर्शनमिति वा पाठः ।

कोपं राघवसिंहस्य बलानामुपसंग्रहम् । दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनम् ॥ २५ ॥
अङ्गुलीयकदानं च ऋक्षस्य बिलदर्शनम् । प्रायोपवेशनं चैव सम्पातेश्चापि दर्शनम् ॥ २६ ॥
पर्वतारोहणं चैव सागरस्यापि लङ्घनम् । समुद्रवचनाच्चैव मैनाकस्य च दर्शनम् ॥ २७ ॥
राक्षसीतर्जनं चैव च्छायाग्राहस्य दर्शनम् । सिंहिकायाश्च निधनं लङ्कामलयदर्शनम् ॥ २८ ॥
रात्रौ लङ्कापवेशं च एकस्यापि विचिन्तनम् । आपानभूमिगमनमवरोधस्य दर्शनम् ॥ २९ ॥
दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम् । अशोकवनिकायानं सीतायाश्चापि दर्शनम् ॥ ३० ॥
अभिज्ञानप्रदानं च सीतायाश्चापि भाषणम् । राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम् ॥ ३१ ॥
मणिप्रदानं सीताया वृक्षभङ्गं तथैव च । राक्षसीविद्रवं चैव किङ्कराणां निबर्हणम् ॥ ३२ ॥

२५] ति० टी०–कोपमिति । उपसङ्ग्रहं वानराणां मेलनम् । पृथिव्याश्च निवेदनं सुग्रीवेण वानरान्प्रति पृथ्वीसंस्थानकथनम् ॥ २५ ॥

रा० टी०–कोपमिति । राघवसिंहस्य राघवश्रेष्ठरामस्य कोपं सुग्रीवानवधानतानिवर्तकक्रोधाभासं बलानां सैन्यानामुपसङ्ग्रहं सुग्रीवकर्तृकसम्मेलनं च दिशः प्रस्थापनं सर्वदिक्कर्मकवानरप्रेषणं च पृथिव्या द्वीपसमुद्रादिरूपायाः निवेदनं अवयवशः सुग्रीववर्णनं च एवश्रार्थे ॥ २५ ॥

गो० टी०–कोपमिति । राघवसिंहस्य राघवाणां श्रेष्ठस्य कोपं सुग्रीवविषयक्रोधम् । बलानां सेनानामुपसंग्रहं सम्मेलनम् । दिशः प्रति वानराणां प्रस्थापनम् । पृथिव्याश्च निवेदनं पृथिव्याः द्वीपसमुद्रादिसन्निवेशकथनम् ॥ २५ ॥

२६–२८] ति० टी०–अङ्गुलीयकदानं रामकर्तृकं हनुमाति । प्रायोपवेशनं प्रायेणानशनेन वानराणामुपवेशनं समुद्रसमीपे वासः ॥ २६ ॥ २७ ॥ २८ ॥

रा० टी०–अङ्गुलीयकेति । अङ्गुलीयकदानं हनुमत्सम्प्रदानकराभकर्तृकसीताप्रतीतिसम्पादकाङ्गुलीयकदानं च ऋक्षस्य बिलदर्शनं ऋक्षस्य बिलं स्वयंप्रभाबिलं तस्य दर्शनं च प्रायोपवेशनं प्रायाय प्राणत्यागाय उपवेशनमनशनतया स्थितिं च । सम्पातेः जटायुषो ज्येष्ठभ्रातुः दर्शनं च । अपिना तेन सह सम्भाषणम् । एवेति पाठे सोप्यर्थको बोध्यः ॥ २६ ॥

गो० टी०–अङ्गुलीयकेति । हनुमत इति शेषः । ऋक्षस्य बिलं स्वयंप्रभाबिलं तस्य तथा संज्ञा । प्रायोपवेशनं प्रायाय मरणाय उपवेशनं शयनम् । सम्पातेर्जटाय्वग्रजस्य॥२६॥

२७] रा० टी०–पर्वतेति। पर्वतारोहणं च एवेन हनुमत्कृतदेवप्रार्थनां सागरस्य लङ्घनं च समुद्रवचनादेव उत्थितस्य मैनाकस्य दर्शनं च चकारेण हनुमन्मैनाकसंवादम् । उत्थितस्येति शेषः । क्वचित्सागरस्यापीति पाठः ॥ २७ ॥

गो० टी०–पर्वतेति । समुद्रलङ्घनाय महेन्द्रपर्वतारोहणम् । समुद्रवचनाचेति चकारेण देवानुज्ञा समुच्चीयते मैनाकस्य हिमवत्पुत्रस्य गिरेः ॥ २७ ॥

२८] रा० टी०–राक्षसीतर्जनमिति। राक्षस्योः राक्षसीरूपधारिरक्षःकुलोत्पन्नसुरसालङ्किन्योः तर्जनं हनुमत्कर्मकभर्त्सनं च छायाग्राहस्य सिंहिकायाः दर्शनं निधनं च लङ्कामलयदर्शनं लङ्कामलयस्य लङ्काधिकरणीभूतपर्वतैकदेशस्य दर्शनं च एवश्रार्थे२८

गो० टी०–सिंहिकाया इति। सिंहिकाया असुरस्त्रियाः । लङ्कामलयस्य लङ्काधारपर्वतैकदेशस्य मलयः ' पर्वतान्तरे । पर्वतांशे प्रियोद्यान ' इति रत्नमाला । एकस्य हनुमतः ॥ २८ ॥

२९] ति० टी०–एकस्यापि विचिन्तनमसहायस्य कर्तव्यार्थविचारं चेत्यर्थः । अवरोधोऽन्तःपुरम् ॥ २९ ॥

रा० टी०–रात्राविति। रात्रौ लङ्काप्रवेशं च एकस्य वानरप्रधानीभूतहनुमतः विचिन्तनमापानभूमिगमनं राक्षसकर्तृकमद्यपानस्थलकर्मकहनुमत्कर्तृकप्राप्तिं च अवरोधस्यान्तःपुरस्य दर्शनं च । एकस्यापीति पाठे अपिश्चार्थे ॥ २९ ॥

गो० टी०–आपानेति । आपानभूमिः मद्यपानभूमिः । अवरोधस्यान्तःपुरस्य ॥ २९ ॥

३०] ति० टी०–यानं गमनम् ॥ ३० ॥

रा० टी०–दर्शनमिति । रावणस्य दर्शनं च पुष्पकस्य दर्शनं च अशोकवनिकायानं हनुमत्कर्तृकाशोकवनिकाप्राप्तिं च सीतायाः दर्शनं च । अपी चार्थौ । क्वचित्सीतायाश्च प्रदर्शनमिति पाठः ॥ ३० ॥

गो० टी०–अशोकेति । अशोकवनिकायानं हनुमतोऽशोकवनिकागमनम् । अभिज्ञानप्रदानं सीतायै अङ्गुलीयकदानम् ॥३०॥

३१–३२] ति० टी०–अभिज्ञानं रामदत्ताङ्गुलीयकम् ३२

रा० टी०–अभिज्ञानेति । अभिज्ञानप्रदानं सीतासम्प्रदानकमुद्रिकाप्रदानं च सीतायाः भाषणं च अपिना हनुमतो भाषणं राक्षसीतर्जनं राक्षसीकर्तृकसीताकर्मकभर्त्सनं च त्रिजटा विभीषणसुता तस्याः स्वप्नदर्शनं रामशुभसूचकस्वप्नावलोकनं च एवश्रार्थे ॥ ३१ ॥

१ इदं तृत्तरश्लोकटीकायामपेक्षितम् ।

ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनम् । प्रतिप्लवनमेवाथ मधूनां हरणं तथा ॥ ३३ ॥
राघवाश्वासनं चैव मणिनिर्यातनं तथा । सङ्गमं च समुद्रेण नलसेतोश्च बन्धनम् ॥ ३४ ॥
प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनम् । विभीषणेन संसर्गं वधोपायनिवेदनम् ॥ ३५ ॥
कुम्भकर्णस्य निधनं मेघनादनिबर्हणम् । रावणस्य विनाशं च सीतावाप्तिमरेः पुरे ॥ ३६ ॥
विभीषणाभिषेकं च पुष्पकस्य च दर्शनम् । अयोध्यायाश्च गमनं भरद्वाजसमागमम् ॥ ३७ ॥
प्रेषणं वायुपुत्रस्य भरतेन समागमम् । रामाभिषेकाभ्युदयं सर्वसन्यविसर्जनम् ॥
स्वराष्ट्ररञ्जनं चैव वैदेह्याश्च विसर्जनम् । ॥ ३८ ॥

गो० टी०–राक्षसीति। राक्षसीनां तर्जनं सीतां प्रतीति शेषः। त्रिजटा विभीषणपुत्री तस्याः स्वप्नदर्शनं रामश्रेयोविषयस्वप्नदर्शनम्। मणिप्रदानं हनुमते चूडामणिप्रदानम्। वृक्षभङ्गमशोकवनिकावृक्षभङ्गम् ॥ ३१ ॥

३२] रा० टी०–मणिप्रदानमिति। सीतायाः मणिप्रदानं हनुमद्द्वारा सीताकर्तृकरघुनाथोद्देश्यकचूडामणिसमर्पणं च वृक्षभङ्गं सीताश्रयीभूतशिंशपातिरिक्ताशोकवनिकोत्पाटनं च राक्षसीविद्रवं राक्षसीपलायनं च तथाशब्देन राक्षसीकर्तृकहनुमद्वृत्तकथनं किङ्कराणां रावणभृत्यभटानां निबर्हणं नाशनं च एवौ चार्थौ ॥ ३२ ॥

गो० टी०–राक्षसीविद्रवमिति । एकाक्ष्येककर्णीप्रभृतिराक्षसीनां पलायनं हनुमद्भयादिति शेषः। किङ्कराणां रावणभटानाम्। वायुसूनोर्हनुमतः ग्रहणमिन्द्रजितेति शेषः। लङ्कादाहेनाभिगर्जनं राक्षसानामित्यर्थः ॥ ३२ ॥

३३] ति० टी०–ग्रहणमिति। लङ्काया दाहेन तत्रत्यानामाक्रन्दनं लङ्कादाहे हनुमद्गर्जनमित्यर्थो वा। 'अभिमर्दनम्' इति पाठे लङ्काया दाहेनाभितो मर्दनमित्यर्थः। प्रतिप्लवनं पुनः सागरोत्तरणम् ॥ ३३ ॥

रा० टी०–ग्रहणमिति। वायुसूनोः हनुमतो ग्रहणं रावणसभानयनं च लङ्कादाहाभिगर्जनं लङ्कादाहे हनुमदभिगर्जनं च लङ्कादाहश्च अभिगर्जनं चेति समाहारद्वन्द्वो वा। अभिमर्दनमिति पाठे तु दाहेन राक्षसानां हिंसनं चेत्यर्थः। अथानन्तरं प्रतिप्लवनं पुनः समुद्रसन्तरणं मधूनां मधुवनोद्भवक्षौद्राणां हरणं वानरकर्तृकादानं च एवतथाशब्दौ चार्थौ ॥ ३३ ॥

गो० टी०–प्रतीति। प्रतिप्लवनं पुनः समुद्रलङ्घनम्। मधूनां मधुवनस्थमधूनां ग्रहणं वानरैरिति शेषः। मणिनिर्यातनं रामाय चूडामणिप्रदानम् ॥ ३३ ॥

३४] ति० टी०–मणिनिर्यातनं सीतया दत्तस्य स्वशिरोरत्नस्य राघवे दानम्। नलसेतोर्नलनिर्मितसेतोः ॥ ३४ ॥

रा० टी०–राघवेति। राघवाश्वासनं 'दृष्ट्वा सीतेति तत्त्वतः' इत्यादिना रामसमवधानीकरणं च मणिनिर्यातनं सीतासमर्पितचूडामणिसमर्पणं च तथाशब्देन ससैन्यसुग्रीवरामागमनम् समुद्रेण सङ्गमं रघुनाथकर्तृकसमुद्रसमागमं च नलसेतोः नलैकसाध्यसेतोर्बन्धनं च ॥ ३४ ॥

गो० टी०–सङ्गमं चेति। नलसेतोः नलेन बन्धनीयसेतोः प्रतारं प्रतरणम् ॥ ३४ ॥

३५] ति० टी०–प्रतारम्। सेनाया इति शेषः ॥ ३५ ॥

रा० टी०–प्रतारमिति। समुद्रस्य प्रतारं सेतुनौत्तरणं च रात्रौ लङ्कावरोधनं च विभीषणेन संसर्गमाभाषणपूर्वकमम्बन्धं च वधोपायनिवेदनं विभीषणकर्तृकरावणादिवधयत्नकथनं च। आवृत्या चकारः चहीनेष्वप्यन्वेति ॥ ३५ ॥

गो० टी०–विभीषणेनेति। वधोपायनिवेदनं इन्द्रजिदादिवधोपायदर्शनम् ॥ ३५ ॥

३६] ति० टी०–निबर्हणं मारणम्। अरे रावणस्य ३६

रा० टी०–कुम्भकर्णस्येति। कुम्भकर्णस्य निधनं वधं च मेघनादनिबर्हणं हिंसनं च रावणस्य विनाशं च सीतावाप्तिं च अरेः पुरे लङ्कायां विभीषणाभिषेकं च पुष्पकस्य रावणाहृतकुबेरविमानस्य दर्शनं च ॥ ३६ ॥

गो० टी०–अरेः पुर इति शौर्यातिशयोक्तिः। उत्तरत्र चान्वयः।

३७] ति० टी०–अयोध्यायाश्च गमनं तदुद्देश्यकं गमनम्॥३७॥

रा० टी०–अयोध्याया इति। अयोध्यायाश्च गमनं रामकर्तृकप्रस्थानं च भरद्वाजसमागमं च वायुपुत्रस्य हनुमतः प्रेषणं च रघुनाथेन भरतं प्रतीति शेषः। भरतेन समागमं हनुमद्द्वारा साक्षाच्च भरतसम्मेलनं च ॥ ३७ ॥

गो० टी०–अयोध्यायाश्चेति। रामाभिषेकाभ्युदयं रामाभिषेकमहोत्सवम्। स्वराष्ट्रेत्यर्धमधिकम्। वैदेह्याश्च विसर्जनमित्यन्तं चकार भगवान् ऋषिरिति पूर्वेण संबन्धनीयम् ॥३७॥

३८] ति० टी०–रामाभिषेकाभ्युदयं रामाभिषेकोत्सवम्। सर्वत्र चकारेत्यनुकृष्यते ॥ ३८ ॥

रा० टी०–रामेति। रामाभिषेकाभ्युदयं रामराज्याभिषेकोत्सवम्। सर्वसैन्यविसर्जनं स्वस्वस्थानं प्रति सुग्रीवादिप्रेषणं च स्वराष्ट्ररञ्जनं प्रजाप्रमोदनं च वैदेह्याः प्रकटरूपायाः विसर्जनं च एवश्चार्थे ॥ ३८ ॥

अनागतं च यत्किञ्चिद्रामस्य वसुधातले । तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवानृषिः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

रामस्य राज्यप्राप्त्यनन्तरं पुत्रमुखादेव स्वचरितश्रवणमित्येतावदुपोद्घातरूपेण वर्णनम् ।

प्राप्तराजस्य रामस्य वाल्मीकिर्भगवानृषिः । चकार चरितं कृत्स्नं विचित्रपदमर्थवत् ॥ १ ॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवानृषिः । तथा सर्गशतान्पञ्च षट् काण्डानि तथोत्तरम् ॥

गो० टी०–सीताभूप्रवेशप्रभृत्युत्तरकाण्डकथामाह–अनागतं चेति । वाल्मीकिनामा भगवान् ऋषिः रामस्य वसुधातले-अनागतं भावि यत्किञ्चिच्चरितमस्ति ब्राह्मणपुत्रजीवनाश्वमेधादिकं तदुत्तरे काव्ये उत्तरकाण्डे चकार प्रतिपादितवान्। यत्किञ्चिदित्यनेन सीताविसर्जनात्पूर्वकालस्य भूयस्त्वमनन्तरकालस्याल्पत्वं च द्योत्यते इत्याहुः । एतदुत्तरकाण्डे विचारयिष्यते ॥ ३८॥

इति श्रीमद्रामायणे बालकाण्डे भूषणे मणिमञ्जीराख्याने तृतीयः सर्गः ॥ ३ ॥

३९] ति० टी०–अनागतं चेति । यत्किञ्चिदित्यनेन सीताविसर्जनात्पूर्वकालिकस्य भूयस्त्वमनन्तरकालस्याल्पता द्योत्यते तत्सर्वमुत्तरे सर्वतो विशिष्टे काव्ये चकार निबबन्धेत्यर्थः ॥ ३९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीये आदिकाव्ये बालकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०–अनागतमिति । वसुधातले रामस्य यत्किञ्चिच्चरितमनागतमप्रकटितं भविष्यत्कालिकमित्यर्थः । तदेव उत्तरे काव्ये उत्तरे काण्डे भगवान्परममाहात्म्यवान् ऋषिः त्रिकालज्ञः चकार वर्णयामास । भूतवर्तमानकालिकरामचरितानि षट्सु काण्डेषु वर्णितानि भविष्यत्कालिकरामचरितानि उत्तरकाण्डे वर्णितानीत्यर्थः चशब्द एवार्थे ॥ ३९ ॥

इत्यार्षे श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०–प्राप्तेति । अनेन रावणवधोत्तरमेतत्काव्यकरणमिति सूचितम् । वाल्मीकिस्तद्विषयवासी ऋषिरित्यर्थादवगन्तव्यम् । चरितं तत्प्रतिपादकं काव्यम् अर्थवद्धन्यलङ्कारादिप्रशस्तार्थम् । 'आत्मवान्' इति पाठेऽवहितान्तःकरणः । प्राशस्त्ये मतुप् आत्मशब्दश्चान्तःकरणवाची ॥ १ ॥

रा० टी०–पूर्वसर्गे रामचरितं सङ्क्षेपतो वर्णयामास इदानीं विस्तरतोपि रामचरितं वर्णयति–प्राप्तेत्यादिभिः । ऋषिः सर्वज्ञः अत एव आत्मवान् रामचरितवर्णनविषयकयत्नवान् अत एव भगवान् परममाहात्म्यवान् वाल्मीकिः प्राप्तराज्यस्य प्रकटीकृतस्वकीयनित्यमहाराजत्वस्य रामस्य कृत्स्नं स्वबुद्धिविषयीभूतं चरितं विचित्रपदं विचित्राणि दोषरहितत्वालङ्कारव्यञ्जकत्वसहितत्वादिना आश्चर्याणि पदानि प्रतिपादकत्वेन यस्मिन् तच्चकार रचयामास । पदमर्थवदिति पाठे तु विचित्राणि दोषरहितत्वानुप्रासादिना आश्चर्याणि पदानि यस्मिन् तदर्थवत् दोषरहितत्वालङ्कारादिना प्रशस्तार्थविशिष्टं कृत्स्नं चरितं तत्प्रतिपादककाव्यं चकार चकारेति परस्मैपदेन लोकोपकारार्थं कृतवानित्यर्थः सम्पन्नः तेन स्वस्य रामचरितश्रवणमात्रेण कृतार्थत्वं बोधितम् ॥ १ ॥

गो० टी०–पूर्वस्मिन् सर्गे प्रतिपाद्यवैलक्षण्यमुक्तं सम्प्रति प्रबन्धवैलक्षण्यं कथ्यते प्रबन्धस्य वैलक्षण्यं नाम परमाप्तप्रणीतत्वं पुण्यश्लोकविषयत्वं महाजनपरिगृहीतत्वं प्रबन्धनायकश्लाघितत्वमित्यादि । **प्राप्तेति** । परमाप्तप्रणीतत्वं पुण्यश्लोकविषयत्वं चानेनोच्यते । प्राप्तराज्यस्य स्वीकृतराजभावस्य पुरोहितादित्वाद्यक्प्रत्ययः लोकरक्षणाय रघुकुलेऽवतीर्णस्येत्यर्थः। रामस्य सकलगुणाभिरामस्य अनेन प्रतिपाद्यमहिम्ना काव्यस्य आदरणीयतातिशय उक्तः । तदुक्तं वामनेन ' उपश्लोक्यस्य माहात्म्यादुज्ज्वलाः काव्यसम्पदः ' इति । विचित्रपदमाश्चर्यपदसन्निवेशम् । अनेन काव्यस्यात्मभूता रीतिरुक्ता । तदुक्तं वामनेन ' रीतिरात्मा काव्यस्य विशिष्टपदरचना रीतिः । समग्रैरोजःप्रसादप्रभृतिभिर्गुणैरुदिता वैदर्भीनाम रीतिः' इत्यादिना । यद्वा विविधानां विचित्राणां शब्दार्थालङ्काराणां पदं स्थानं कृत्स्नं चरितं प्रतिपादकग्रन्थसन्दर्भम् । अनेन विज्ञानाद्यनेकफलसुपुरुषचरित्रत्वमुक्तम् । तथोक्तम्'परिवड्ढइविण्णानं संभाविज्जइ जसो विसप्पंति गुणा। सुव्वइसु पुरिसचरिअं किं तंजेणण हरंति व्वालावा। परिवर्द्धते विज्ञानं सम्भाव्यते यशो विसर्पन्ति गुणाः। श्रूयते सुपुरुषचरितं किं तद्येन न हरन्ति काव्यालापाः ' इति। भगवान् ब्रह्मप्रसादलब्धदिव्यज्ञानवान् आत्मवान् प्रबन्धरचनानुकूलयत्नवान् ऋषिः 'नानृषिः कुरुते काव्यम्' इत्युक्तरीत्या काव्यनिर्माणपटुः वाल्मीकिः चकार परोपकाराय कृतवान् । उदारधीरिति पूर्वमुक्तं प्राप्तराज्यस्येत्यनेन रामराज्यकरणकाले रामायणकरणामिति गम्यते । एतज्ज्ञापनायैव पुनरारम्भः ॥ १ ॥

२] ति० टी०–चतुर्विंशदिति । चतुर्विंशतिरित्यर्थक-

श्छान्दसः शतानिति पुंल्लिङ्गोऽप्येवम् । तत्र पञ्चशतरूपसर्गसङ्ख्या षट्काण्डानामेव । श्लोकसङ्ख्या तु सोत्तराणामित्याहुः । कतककृतस्तु—उक्तसङ्ख्यापेक्षया षट्त्रिंशत्सर्गसङ्ख्याधिक्यदर्शनात् चतुर्विंशत्सहस्रापेक्षया श्लोकसङ्ख्याया अप्याधिक्यदर्शनाच्च उत्तरकाण्डीयसर्गसङ्ख्यानुक्तेश्च प्रक्षिप्तोऽयं श्लोको न त्वार्ष इत्याहुः ॥ २ ॥

रा० टी०—क्रममूलकप्रक्षेपनिस्सारणाभावाय चिकीर्षितग्रन्थसङ्ख्यामाह—**चतुर्विंशदिति** । ऋषिः सर्वज्ञो वाल्मीकिः श्लोकानां ' तपस्स्वाध्याय ' इत्यादि 'तद्ब्रह्माप्यन्वमन्यत' इत्यन्तानां चतुर्विंशत्सहस्राणि चतुर्विंशतिसहस्रसङ्ख्याः उक्तवान् । चतुर्विंशत्सहस्रशब्दः सङ्ख्यापरः । अत एव ' सङ्ख्यायां द्विबहुत्वे स्तः ' इत्यनुशासनाद्बहुवचनम् । अन्यथा ' विंशत्याद्याः सदैकत्वे ' इति कोशात्तदनुपपत्तिः स्यात् । अत एव श्लोकानामिति षष्ठ्युपपत्तिः सङ्ख्याया उक्तेः सङ्ख्येयोक्तिमन्तराऽसम्भवेन सङ्ख्येयोक्तिद्वारा सङ्ख्या उक्तवानिति फलितोर्थः । चतुर्विंशत्सहस्रशब्दे इकारलोप आर्षः । पञ्च पञ्च सङ्ख्यायुणितान्सर्गशतान् सर्गाणां शतांश्च उक्तवान् । षट्काण्डानि षट्सङ्ख्यासङ्ख्यातानि काण्डानि च उक्तवान् । पूर्वस्तथाशब्दश्चार्थे स एव सर्वत्रान्वेति । शतशब्दस्य पुँस्त्वं तु "शतायुतप्रयुताः पुंसि च" इतिलिङ्गानुशासनादवगन्तव्यम् । क्वचिच्छतमिति पाठः । तस्यैकत्वं तु ' विंशत्याद्याः सदैकत्वे ' इति कोशात्सिद्धम् तस्य साधुत्वं तु " पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् " इति सूत्रेण निष्पन्नम् । तथोत्तरम् । तथाशब्दः दशाधिकशतसङ्ख्यासङ्ख्येयपरः । एवञ्च तथा दशाधिकशतसर्गसहितमुत्तरं सप्तमकाण्डमुक्तवानित्यर्थः । तथाहि ' त व्योम शून्यम् ' इत्यायुक्तेः तशब्दस्य व्योमपरत्वं तस्य च शून्यबोधकत्वं ज्योतिश्शास्त्रादौ स्पष्टमेव । 'शिलोच्चये थकारः स्यात्' इति कोशात् थशब्दस्य पर्वतपरत्वं सोऽस्ति अस्या इति अर्श आद्यच थाशब्दः पृथिवीपरः तेनाप्येकत्वबोधकत्वं तत्रैव स्पष्टम् । ' अकारो वासुदेवे स्यात् ' इति कोशात् । अशब्दः परमात्मपरः तेन "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुत्या एकत्वं बोध्यते एवञ्च ' अङ्कानां वामतो गतिः ' इति न्यायात्तथाशब्देन दशाधिकशतबोधः उत्तरकाण्डस्य पृथगुक्तिस्तु भविष्यत्कालिकरघुनाथचरितविषयत्वेन भूतवर्तमानकालिकरघुनाथचरितविषयीभूतकाण्डान्तरेभ्यो वैलक्षण्यं द्योतयितुम् एतेन उक्तसङ्ख्यापेक्षया षट्त्रिंपत्सर्गसङ्ख्याधिक्यदर्शनात् चतुर्विंशतिसहस्रापेक्षया श्लोकसङ्ख्याया अपि आधिक्यदर्शनाच्च उत्तरकाण्डीयसर्गसङ्ख्यानुक्तेश्च प्रक्षिप्तोयं श्लोको न त्वार्ष इति भट्टोदाहृतकतककृतको दुस्तर्क इति बोध्यम् । एतल्लोकोक्तसङ्ख्यासङ्ख्यातातिरिक्तत्वेन भासमानानां सर्गश्लोकानां समूलां गतिं वक्ष्यामः । ' काण्डानि षट् कृतानीह सोत्तराणि महात्मना'इत्युत्तरकाण्डचतुर्नवतितमसर्गघटकपद्यघटकसोत्तराणीति अस्यार्थस्तु सशब्देनाकाश उच्यते तस्य वायोरयं जनक इति व्युत्पत्तेः तेन शून्यलाभः । ओ वासुदेव । तेनैकत्वलाभः पुनरो वासुदेवः तेनाप्येकत्वलाभः । स च स च स चेति द्वन्द्वः । एवं चाङ्कानां वामतो गतिरिति न्यायेन दशाधिकशतलाभः । तैस्तत्सङ्ख्याकसर्गैर्विशिष्टमुत्तरं काण्डं येषु तानि दशाधिकशतसङ्ख्याकसर्गविशिष्टोत्तरकाण्डविशिष्टानीत्यर्थः । सशब्दस्य वायुपरत्वं तु 'सो वायुः परदेशदूरगमनम् ' इत्यादिना । वायोः सदैवतत्वेनाभेदाध्यवसायात्सिद्धमिति दिक् ॥ २ ॥

गो० टी०—अथ प्रक्षेपधंशसम्भावनापरिहाराय नातिसङ्कोचविस्तरश्लोकसर्गकाण्डवत्तयात्यन्तादरणीयत्वाय चाह—**चतुर्विंशदिति** । ऋषिर्वाल्मीकिः ' तपःस्वाध्याय ' इत्यारभ्य 'तद्ब्रह्माप्यन्वमन्यत' इत्यन्तेन चिकीर्षिते रामायणाख्ये प्रबन्धे श्लोकानां चतुर्विंशत्सहस्राण्युक्तवान् इकारलोपश्छान्दसः "पङ्क्तिविंशति " इतिसूत्रे विंशतीत्येव निपातनात् आदशतः सङ्ख्याः सङ्ख्येये वर्तन्ते ततः परं सङ्ख्याने सङ्ख्येये च वर्तन्त इति नियमात् सहस्रशब्दोऽत्र सङ्ख्यापरः चतुर्विंशतिसहस्रसङ्ख्याकश्लोकांश्चकारेत्यर्थः । तथेति समुच्चये पञ्चसर्गशतांश्च कृतवान् " शतायुतप्रयुताः पुंसि च " इतिलिङ्गानुशासनवचनात् पुँल्लिङ्गत्वम् । सर्गशतं पञ्चेतिपाठे शतमित्येतत् " पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् " इतिसूत्रे शतमिति बहुत्वे निपातनात्साधु । षट्काण्डानि उत्तरं च पदभ्य उत्तरं सप्तमकाण्डं च कृतवान् । परत्वमोक्षप्रदत्वादीनां व्यक्ततया प्रतिपादनेन सर्वोत्तरत्वादुत्तरमिति पृथगुक्तिः । यद्यप्याधुनिके पाठे श्लोकानां सर्गाणां च विपर्यासो दृश्यते तथापि बहुचतुर्युगान्तरितत्वेन विप्लवो युक्तः । यद्वा सङ्कल्पमात्रपरोऽयं श्लोकः कृतवान् कर्तुमुद्युक्त इत्यर्थः ग्रन्थसमाप्तिदशायां कापि वृद्धिरुपजातेति न कोऽपि विरोधः यद्वा अन्यूनाभिप्रायमिदं वचनं पञ्चशतसर्गेषु चतुर्विंशतिसहस्रश्लोकेषु च न न्यूनतेत्यर्थः यद्वाल्पीयसीमधिकसङ्ख्यामनादृत्य प्रकृष्टसङ्ख्यया व्यपदेशोऽयम् । यथा ' मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ' इत्यमरः । ' चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ' इत्युक्तब्रह्मदिनस्य चतुर्दशमन्वनुसारेण चतुर्दशधा विभागे मन्वन्तरस्यैकसप्तत्याधिक्यात् । वर्तमानसङ्ख्या तु ' बालकाण्डे तु सर्गाणां सप्तसप्ततिरीरिता । अयोध्याकाण्डगाः सर्गाश्शतं चैकोनविंशतिः ॥ आरण्यकाण्डे सर्गाणां पञ्चसप्ततिरीरिता । किष्किन्धाकाण्डगाः सर्गाः सप्तषष्टिरुदीरिताः ॥ सर्गाणां सुन्दरे काण्डे त्वष्टषष्टिरुदीरिता । एकत्रिंशच्छतं सर्गा दृश्यन्ते युद्धकाण्डगाः ॥ दशोत्तरशतं सर्गा उत्तरे काण्ड ईरिताः ' अत्र-सर्गशतान् पञ्चेत्येतत्षट्काण्डानामेव नतु सोत्तराणां षट्काण्डानीत्येतत्प्रत्यासत्तेः । चतुर्विंशतिसहस्रश्लोकात्मकता तु सप्तकाण्डापेक्षयेत्याहुः । ' बालकाण्डगताः श्लोकाश्चमरारिप्रकीर्तिताः (२२५६) । अयोध्याकाण्डगाः श्लोकाश्शुकभावाः प्रभाषिताः (४४१६) ॥ आरण्यकाण्डगाः श्लोकाः खगसाराः प्रदर्शिताः (२७३२) । किष्किन्धाकाण्डगाः श्लोका नीरचाराः प्रकीर्तिताः (२६२०) ॥ श्लोकास्तु सुन्दरे काण्डे तानागाः प्रभाषिताः (३००६) । युद्धकाण्डगता,

कृत्वा तु तन्महाप्राज्ञः [1]सभविष्यसहोत्तरम् । चिन्तयामास को न्वेतत्प्रयुञ्जीयादिति प्रभुः ॥ ३ ॥
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः । [2]अगृहीतां ततः पादौ मुनिवेषौ कुशीलवौ ॥ ४ ॥
कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ । भ्रातरौ स्वरसंपन्नौ ददर्शाश्रमवासिनौ ॥ ५ ॥

श्लोका निधिधीशाः प्रवेदिताः (६९९०)॥ श्लोकाः स्युरुत्तरे काण्डे वलरागाः प्रभाषिताः (३२३४)॥' श्लोकाः (२४२५३) तत्रैवमवधातव्यं बालकाण्डे त्रिंशे सर्गे ' स तेन परमास्त्रेण मानवेन समाहतः ' इत्यतः पूर्वमेकं सहस्रम् । त्रिषष्टितमे ' विश्वामित्रो महातेजा भूयस्तेपे महत्तपः' इत्यतः पूर्वं द्वे सहस्रे । अयोध्याकाण्डे चतुर्दशे ' चतुरश्वो रथः श्रीमान् निस्त्रिंशो धनुरुत्तमम् ' इत्यतः पूर्वं त्रीणि सहस्राणि । चतुश्चत्वारिंशे ' वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्य सदानघ ' इत्यतः पूर्वं चत्वारि सहस्राणि । एकसप्ततितमे ' द्वारेण वैजयन्तेन प्राविशच्छान्तवाहनः ' इत्यतः पूर्वं पञ्च सहस्राणि । एकोनशततमे ' उटजे राममासीनं जटामण्डलधारिणम् ' इत्यतः पूर्वं षट् सहस्राणि । आरण्यकाण्डे द्वादशे ' ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् ' इत्यतः पूर्वं सप्त सहस्राणि । सप्तचत्वारिंशे ' मम भर्ता महातेजा वयसा पञ्चविंशकः ' इत्यतः पूर्वं चाष्टौ सहस्राणि । किष्किन्धाकाण्डे चतुर्थे ' ततः परमसंहृष्टो हनुमान्प्लवगर्षभः ' इत्यतः पूर्वं नव सहस्राणि । एकत्रिंशे ' नरेन्द्रसूनुर्नरदेवपुत्रं रामानुजः पूर्वजमित्युवाच ' इत्यतः पूर्वं दश सहस्राणि । किष्किन्धाकाण्डसमाप्तावेकादश सहस्राणि । सुन्दरकाण्डे सप्तविंशे ' ततस्तस्य नगस्याग्रे ' इत्यतः पूर्वं द्वादश सहस्राणि । षट्चत्वारिंशे ' नावमान्यो भवद्भिश्च हरिवीरपराक्रमः ' इत्यतः पूर्वं त्रयोदश सहस्राणि । सुन्दरकाण्डसमाप्तौ चतुर्दश सहस्राणि । युद्धकाण्डे अष्टाविंशे ' रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः ' इत्यतः प्राक् पञ्चदश सहस्राणि । पञ्चाशे ' प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणं तयोः ' इत्यतः प्राक् षोडश सहस्राणि । उत्तरभागारम्भे ' कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना ' इत्यतः प्राक् सप्तदश सहस्राणि । अशीत्यन्तेन अष्टादश सहस्राणि । द्वादशशततमे ' मरणान्तानि वैराणि ' इत्यतः प्राक् एकोनविंशतिस्सहस्राणि । युद्धकाण्डसमाप्तौ विंशतिस्सहस्राणि । उत्तरकाण्डे द्वाविंशे ' ततः प्राचोदयत्सूतस्तान् हयान्सुचिरप्रभान् ' इत्यतः पूर्वं एकविंशतिस्सहस्राणि । चत्वारिंशत्समाप्त्या द्वाविंशतिस्सहस्राणि । षट्सप्ततितमे ' ब्राह्मणस्य च धर्मेण त्वया वै रक्षितस्सुतः ' इत्यतः पूर्वं त्रयोविंशतिस्सहस्राणि । ततः प्रबन्धसमाप्त्या चतुर्विंशतिस्सहस्राणीत्याहुः ॥ २ ॥

३] ति० टी०—कृत्वा त्विति । सहशब्दः सहितपरः भविष्येण सह सहितं विशिष्टं यदुत्तरं तेन सहितमिदं काव्यं ब्रह्मनियोगात्तत्प्रसादाच्च कृत्वा को नु प्रभुः समर्थ एतत्प्रयुञ्जीयात्सभासु पठञ्छ्रावयेत्सभ्यानिति तु चिन्तयामास । सहोत्तरमित्यत्रोत्तरपदार्थस्य सभविष्यमिति सविशेषणत्वेऽप्यर्थः समासः । भविष्यं च सीताविसर्जनं[3]मारभ्येत्येके तस्या भूप्रवेशोत्तरकालिकमिति परे प्रयुञ्जीयादिति च्छान्दसम् ॥ ३ ॥

रा० टी०—कृत्वेति । महाप्राज्ञः महती पूजनीया प्रज्ञा यस्य स वाल्मीकिः । सहोत्तरम् उत्तरकाण्डसहितं तत्काण्डषट्कं रामायणं कृत्वा सभविष्यं सभेषु सभावत्पुरुषेषु विष्यं रामायणव्यापकत्वं यथा स्यात्तथा को नु प्रभुः एतद्धारणसमर्थः एतद्रामायणं प्रयुञ्जीयात् सभासदान् श्रावयेदित्यर्थ इति चिन्तयामास एतेन रामचरितपु ऋषेः परमानुरागः सूचितः । विष्यशब्दस्तु व्याप्त्यर्थकविषधातोर्ण्यति सञ्ज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावेन सिद्धः । सभशब्दोऽर्शआद्यजन्तः । प्रयुञ्जीयादित्यार्षम् ॥ ३ ॥

गो० टी०—अथास्य काव्यस्य महाजनपरिग्रहं वक्तुं पीठिकामारचयति—कृत्वेति । महाप्राज्ञः प्रकर्षेण जानातीति प्रज्ञः प्रज्ञ एव प्राज्ञः " प्रज्ञादिभ्यश्च " इति स्वार्थेऽण्प्रत्ययः । यद्वा प्रज्ञा धीः ' धीः प्रज्ञा शेमुषी मतिः ' इत्यमरः । भाम्यास्तीति प्राज्ञः " प्रज्ञाश्रद्धार्चाभ्यो णः " इति मत्वर्थीयो णप्रत्ययः । महांश्चासौ प्राज्ञश्चेति महाप्राज्ञः निरतिशयज्ञानसंयुतो वाल्मीकिः सहोत्तरं रामाभिषेकादुत्तरेण वृत्तान्तेन सहितं विकल्पात् सहशब्दस्य सभावाभावः । सभविष्यमश्वमेधोत्तरभाविवृत्तान्तसहितम् अश्वमेधपूर्वकाले अस्य काव्यस्य प्रवृत्तत्वात् । तत्काव्यं कृत्वापि एतत्काव्यं प्रभुः समर्थः । ' प्रभुः शक्ताधिपौ ' इति भास्करः । कः पुरुषः प्रयुञ्जीयात् वाग्विषेयं कुर्यात् इति चिन्तयामास । प्रयुञ्जीयादित्यत्रात्मनेपदाभावोऽनित्यत्वात् । सभविष्यमित्यत्र औणादिकेस्यप्रत्यये इण्निमित्तं षत्वम् ॥ ३ ॥

४-५] ति० टी०—तस्येति । भावितात्मनो रामचरितबन्धनेन शुद्धचित्तस्य । अगृहीतामिति च्छान्दसम् आवां गातारावित्युक्त्वा पादग्रहणं कृतवन्तौ । मुनिवेषौ राजकुमारावप्याश्रमस्थितिवशात्तथाभूतौ कुशीलवौ कुशलवौ कुशशब्दस्य कुशीभावः पृषोदरादित्वात् । ददर्श काव्यग्रहणे योग्यतयापश्यदित्यर्थः ॥ ४ ॥ ५ ॥

रा० टी०—तस्येति । भावितात्मनः भावितः परिशीलितः आत्मा सर्वनियन्तृरघुनाथो येन अत एव चिन्तयमानस्य रामचरितप्रबन्धप्रयोगं विचारयतस्तस्य प्रसिद्धस्य महर्षेः वाल्मीकेः पादौ मुनिवेषौ मुन्यनुवर्तित्वात्तद्वेषधरौ कुशीलवौ अगृहीताम् ।

१ सभविष्यमिति पाठः । २ अगृहीतामिति पाठः क. ख. । ३ विसर्जनादारभ्येति युक्तम् । ४ स्वार्थिकेणि ङीवभाव इति भावः ।

स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ । वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ ६ ॥
काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् । पौलस्त्यवधमित्येवं चकार चरितव्रतः ॥ ७ ॥

रामायणग्रहणार्थं तत्पादस्पर्शमकुरुतामित्यर्थः एतेन तयोरन्तर्वेदित्वं सूचितम् तेनोत्तमशिष्यत्वं द्योतितम तदुक्तम् ' उत्तमश्लिन्तितं कुर्यात् ' इत्यादिना । भट्टास्तु अगृहीतामिति पाठमुक्त्वा छान्दसमिदमित्याहुः ॥ ४ ॥

गो० टी०–तस्येति । ततः वाल्मीकिचिन्तानन्तरं मुनिवेषौ वस्तुतो राजकुमारौ कुशीलवौ कुशलवौ इकारश्छान्दसः । चिन्तयमानस्य भावितात्मनश्चिन्तितपरमात्मनः तदनुकूलशिष्यलाभाय कृतपरमात्मनमस्कारस्येत्यर्थः तस्य महर्षेः पादौ अगृह्णीतां रामायणग्रहणार्थमन्ववर्तेतामित्यर्थः ॥ ४ ॥

५] रा० टी०–पादग्रहणानन्तरकालिकं वृत्तमाह–कुशीलवाविति। धर्मज्ञौ गुरुशुश्रूषणाभिज्ञौ अत एव यशस्विनौ कीर्तिमन्तौ स्वरसम्पन्नौ स्वरोपलक्षितगानविद्यानिपुणौ आश्रमवासिनौ स्वाश्रमवसनशीलौ भ्रातरौ सोदर्यौ राजपुत्रौ राजनिष्ठनित्यजनकतानिरूपितजन्यताविशिष्टौ कुशीलवौ ददर्श एव न तदानीं किञ्चिदुवाचेत्यर्थः तुशब्द एवार्थे न किञ्चिदुवाचेत्यनेन ऋषेः कुशलवविषयकप्रीत्यतिशयः सूचितः ॥ ५ ॥

गो० टी०–कुशीलवाविति । धर्मज्ञौ गुरुशुश्रूषाधर्मज्ञौ राजपुत्रौ आत्मसम्भवैः वीर्यवन्तौ यशस्विनौ विद्यान्तराभ्यासजकीर्तियुक्तौ भ्रातरौ तुल्यस्वरौ स्वरसंपन्नौ शारीरवन्तौ आश्रमवासिनौ स्वाश्रमवासित्वेन स्नेहविषयभूतौ कुशीलवौ कुशलवौ ददर्श उपदेशयोग्यावाकलयाञ्चकारेत्यर्थः अनेन रामाभिषेकानन्तरकाले रामायणकरणं प्राप्तराज्यस्य रामस्येति सर्गादावुक्तम् अनन्तरं कुशलवोत्पत्तिरिति सूचितम् एतज्ज्ञात्वैव वाल्मीक्याश्रमे सीता त्यक्ता रामेण ॥ ५ ॥

६] ति० टी०–स त्विति । धीर्धारणावती मेधा । परिनिष्ठितौ जातवेदाध्ययनौ । उपबृंहणं वेदस्य तत्तदर्थे तात्पर्यग्रहणं तदूपायार्थाय प्रयोजनाय अनेन श्रुतितात्पर्यविषयीभूतार्थप्रतिपादकतया प्रामाण्यमस्योपादेयत्वं च सूचितम् ॥ ६ ॥

रा० टी०–स इति । प्रभुः दुर्बोधवस्तुबोधनसमर्थः स वाल्मीकिः मेधाविनौ परमबुद्धिमन्तौ अत एव वेदेषु ऋग्यजुस्सामाथर्वसु परिनिष्ठितौ तदध्ययनसम्पन्नौ तौ कुशलवौ वेदोपबृंहणार्थाय वेदानामुपबृंहणं तात्पर्यबोधनं तदेव अर्थः प्रयोजनं तस्मै अग्राहयत अपाठयत ॥ ६ ॥

गो० टी०–स त्विति । वेदेषु ऋग्यजुःसामाथर्वणलक्षणेषु चतुर्षु विषये मेधाविनौ मेधा धारणक्षमा बुद्धिः ' मेधा धीर्धारणाक्षमा ' इति यादवः । तद्वन्तौ " अस्मायामेधास्रजो विनिः " इति मत्वर्थीयो विनिप्रत्ययः अनेनाक्षरराशिग्रहणफलमध्ययनमुक्तम् । परितो निष्ठा परिनिष्ठा साङ्गाध्ययनं साऽनयोः सञ्जातेति परिनिष्ठितौ तारकादित्वादितच् अनेन विशेषणद्वयेनाधीतसाङ्गवेदत्वादापातप्रतिपन्नवेदार्थत्वाच्च तदुपबृंहणापेक्षित्वमुक्तम् । तौ कुशलवौ प्रभुः स्वतन्त्रो वाल्मीकिः वेदोपबृंहणार्थाय वेदोपबृंहणरूपप्रयोजनाय वेदोपबृंहणरूपस्वग्रन्थपठनायेत्यर्थः उपबृंहणं नाम नानाशाखानुसारेण निर्णीतवेदार्थप्रतिपादको ग्रन्थः । अग्राहयतागृह्णात् स्वार्थे णिच् ॥ ६ ॥

७] ति० टी०–काव्यमिति । रामस्यायनं चरितं तत्प्रतिपादकं च महत्काव्यं पौलस्त्यवधमित्येवंनामकं चकार तत्तावदग्राहयतेति पूर्वेण सम्बन्धः यथा कृष्णचरितवर्णनरूपमाघकाव्यस्य शिशुपालवध इति नाम ॥ ७ ॥

रा० टी०–किमपाठयतेत्यत आह–काव्यमिति । चरितव्रतः चरितमाचरितं व्रतं रघुनाथोपासनं येन स मुनिः वाल्मीकिः पौलस्त्यवधं रावणादिवधप्रतिपादकं रामायणं रामचरितप्रतिपादकं सीतायाश्चरितं सीतासम्बन्धिचरितविशिष्टमत एव महत् सर्वश्रेष्ठमत एव कृत्स्नं संपूर्णं एतज्जातीयकादन्यत्सर्वं न्यूनमित्यर्थः एतेन एतल्लाभान्न किञ्चिदुर्लभमिति ध्वनितम् । किञ्च कृतां सुकृतिनां स्नः स्नानं सादरावलोकनादि यस्मिन् सुकृद्भिरादृतमित्यर्थः । तत्काव्यं चकार इति तदेव अग्राहयदित्यर्थः। एवेन पाठान्तरव्यवच्छेदः तेन रामचरितविषयकप्रेमाधिक्य सूचितम् । इत्येवमिति भाट्टपाठः ॥ ७ ॥

गो० टी०–काव्यमिति । चरितव्रतश्चरितव्रतत्वेन निरतिशयज्ञानो वाल्मीकिः काव्यं कवेः कर्म कवयते वर्णयतीति कविः कविवर्णन इत्यस्माद्धातोरौणादिक इप्रत्ययः लोकोत्तरवर्णननिपुण इत्यर्थः यद्यपि " इगन्ताच्च लघुपूर्वात् " इति अण भवितव्यं तथापि " ब्राह्मणादित्वात् ष्यञ् " इति काशिकाकारः यद्वा तस्मादेव धातोः " ऋहलोर्ण्यत् " इति ण्यत्प्रत्यये आदिवृद्धौ च काव्यमिति रूपदोषपर्वार्जितं गुणालङ्कारसहितं शब्दार्थयुगलमित्यर्थः । तदुक्तं काव्यप्रकाशे ' तददोषौ शब्दार्थौ सगुणौ सालङ्कृती पुनः क्वापि ' इति । वेदोपबृंहणत्वेऽपि कान्तासंमितत्वादस्य काव्यत्वव्यपदेशः । तथाहि त्रिविधः संदर्भः प्रभुसंमितः सुहृत्संमितः कान्तासंमितश्चेति । शब्दप्रधानो वेदः प्रभुसंमितः । अर्थप्रधान इतिहासादिः सुहृत्संमितः । व्यङ्ग्यप्रधानं काव्यं कान्तासंमितम्। महदितिकाव्यविशेषणं तस्य महत्त्वमुत्तमकाव्यत्वम् । तदप्युक्तं तत्रैव 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्धनिर्बुधैः कथितः ' इति । यद्वा महत्काव्यं महाकाव्यम् । तल्लक्षणमुक्तं दण्डिना ' सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ' इत्यादिना । ननु काव्यं नारम्भणीयम् ' काव्यालापांश्च वर्जयेत् ' इतिनिषेधादित्याशङ्क्याह–रामायणमिति रमयतीति रामः ' रामो रमयतां वरः ' इत्यार्षनिर्वचनात् । यद्वा रमन्तेऽस्मिन् सर्वे जना इति रामः । " अकर्तरि च कारके संज्ञायाम् " इति घञ् । सः अय्यते प्रतिपाद्यतेऽनेनेति रामायणम् । अयगताविति धातोः कर्मणि ल्युट् " पूर्वपदात् संज्ञायामगः "

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् । जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम् ॥ ८ ॥
रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः । वीरादिभी रसैर्युक्तं काव्यमेतदगायताम् ॥ ९ ॥
तौ तु गान्धर्वतत्त्वज्ञौ स्थानमूर्छनकोविदौ । भ्रातरौ स्वरसंपन्नौ गन्धर्वाविव रूपिणौ ॥ १० ॥
रूपलक्षणसंपन्नौ मधुरस्वरभाषिणौ । विम्बादिवोत्थितौ विम्बौ रामदेहात्तथापरौ ॥ ११ ॥

इति णत्वम् । समस्तगुणसंपन्नरामविषयत्वान्नास्य निषिद्धत्वं किंतूपादेयत्वमेवेत्यर्थः। तदुक्तं भामहेन 'उपश्लोक्यस्य माहात्म्यादुत्तमाः काव्यसंपदः' इति । प्रतिपादितं चोद्भटेन 'गुणालङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलम्। काव्यमाश्रयसंपत्त्यामरणेवामरद्रुमः' इति। रुद्रटेनाप्युक्तम् 'उदारचरितनिबन्धनात् प्रबन्धप्रतिष्ठा' इति। निषेधस्त्वसत्काव्यविषय इति भावः। इदं च रामचरितप्रतिपादनमप्राधान्येन प्राधान्येन तु सीताचरितमेव प्रतिपाद्यत इत्याह—कृत्स्नं सीतायाश्चरितमिति कृत्स्नं रामायणं सीताचरितपरम्। अत एवोक्तं श्रीगुणरत्नकोशे 'श्रीमद्रामायणमपि परं प्राणिति त्वच्चरित्रे' इति । आभाणकश्च ' प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रसङ्गतः। रात्रौ चोरप्रसङ्गेन कालो गच्छति धीमताम् ' इति । उपायपुरुषकारयोर्मध्ये उपायस्वरूपं भारते दर्शितं पुरुषकारस्वरूपं श्रीरामायण इति रहस्यपदवी । अत एव ' कृपावानविकत्थनः ' इत्यायुक्तलक्षणधीरोदात्तरूपो रामः कुशलवाभ्यां रामायणं श्रुतवान् । रामायणस्य रामैकपरत्वे स्वेनैव सदसि श्रवणं न सङ्गच्छते सीतापरत्वे तु सङ्गच्छते विरहिणः कामिनीकथाचरितश्रवणस्य स्वाभाव्यात् । एवं व्यञ्जनावृत्त्या सीतारामयोः प्रतिपादनमुक्त्वा शब्दवृत्त्या सिद्धमितिवृत्तमाह—**पौलस्त्येति** । पुलस्त्यस्य गोत्रापत्यं पौलस्त्यः गर्गादित्वाद्यञ् तस्य वधः वधस्य फलत्वात्तेन व्यपदेशः पौलस्त्यवधमधिकृत्य कृतो ग्रन्थः पौलस्त्यवधः " अधिकृत्य कृते ग्रन्थे " इत्यण् " लुबाख्यायिकाभ्यः प्रत्ययस्य बहुलम् " इति तस्य लुप् यङ्लुगणि पुनरादिवृद्धौ तदेव रूपम् । वधप्रधानत्वादितिवृत्तस्य फलेन व्यपदेशः । तथाहि पञ्चकाव्यप्रतिपाद्यानि । तदुक्तम् 'बीजबिन्दुपताकाख्याः प्रकरी कार्यमित्यपि। अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः' इति । ' आरम्भयत्नप्राप्त्याशा नियताप्तिः फलागमः' इति पञ्चावस्थाः । तत्र 'स्वल्पोद्दिष्टः कार्यहेतुर्बीजं विस्तार्यते तथा ' तच्च बालकाण्डोक्तं विष्ण्ववतरणसीतापरिणयादि । ' वस्तुनः सति विच्छेदे बिन्दुरुच्छेदकारणम्' इति । यथायोध्याकाण्डे आभिषेकवृत्तान्तेन रावणवधरूपकार्यविच्छेदे प्राप्ते वनवासकरणमच्छेदकारणम् । 'यदन्तरानुवृत्तं स्यात्सा पताकेति कीर्त्यते ' यथा सुग्रीववृत्तान्तः । कथान्तरप्रसङ्गेन प्रकरी स्यात् । प्रदेशभाक् यथा विभीषणादिवृत्तान्तः । ' समग्रफलसम्पत्तिः फलयोगो यथोचितः' यथा रावणवधः । एवंफलत्वात्पौलस्त्यवधमिति निर्देशः । इत्येवेत्यस्यायमर्थः पौलस्त्यवधव्याजेनाप्रधानरामचरितं प्रधानसीताचरितं कृतवानिति यच्चकार तद्रापयामासेति योजना । उत्तरश्लोकैर्गायतामित्यनुवादात् ॥ ७ ॥

८–११] **ति० टी०–पाठ्य इति** । इतः श्लोकचतुष्टयमेकान्वयम् । पाठ्यगेययोर्भावे ण्यन्यतौ तेन पाठे गाने चेत्यर्थः । गानं तन्त्रीनाडीसमुत्थश्रुतिभेदोपेतम् उभयत्रापि मधुरं श्रोतृसुखजनकम् । प्रमाणानि द्रुतमध्यविलम्बितानि। सप्तजातयः षड्जादयः सप्तस्वराः सप्तस्वरविशिष्टगानानुरोधीति यावत्॥८॥ **रसैरिति** । वीरादीत्यादिना बीभत्साद्भुतशान्तसङ्ग्रहः शृङ्गारादिरसैश्च युक्तम् नवरसयोगीति यावत् । ईदृशं काव्यं तावगायताम् ॥ ९ ॥ तौ विशेषयति—**तौ त्विति** । गान्धर्वस्य समग्रनाट्यस्य तत्त्वज्ञौ स्थानं च मूर्छना च तयोः समाहारः स्थानमूर्छनं तत्र कोविदौ तत्तत्त्वज्ञौ । ' यदूर्ध्वं हृदयग्रन्थेः कपोलफलकादयः । प्राणसञ्चारणस्थानं स्थानमित्यभिधीयते ॥ उरः कण्ठः शिरश्चेति तत्पुनस्त्रिविधं भवेत् । मन्द्रं मध्यं च तारं च ' इति शाण्डिल्यः । तथा–' यत्रैव स्युः स्वराः पूर्णा मूर्छना सेत्युदाहृता ' इति च । यत्र गीतविशेष इत्यर्थः । रूपिणौ प्रशस्तरूपवन्तौ ॥ १० ॥ **रूपेति** । अत्र रूपमवयवसंस्थानम् । उक्तस्य स्वरसम्पन्नत्वस्यैव विवरणं मधुरस्वरेति। बिम्बात्सूर्यादेरुत्थितौ बिम्बाविव प्रतिबिम्बाविव तथा रामदेहादुत्थितौ परौ रामदेहाविवार्थः ॥ ११ ॥

रा० टी०–ग्रहणानन्तरं तत्काव्यं कुशलवाभ्यां गीतमित्याह—**पाठ्य इत्यादिभिः** । पाठ्ये पाठे गेये गाने च मधुरं मनोहरम् लोके किञ्चित्पाठे एव मनोहरं किञ्चिद्गाने एव मनोहरम् इदं तु उभयत्रापि मनोहरमित्यर्थः । शृङ्गारादिपञ्चभिः रौद्रादिभिः रौद्रबीभत्साद्भुतशान्तैश्चतुर्भिश्च रसैः संयुक्तमेतत्काव्यं त्रिभिः त्रित्वसंख्याविशिष्टैः प्रमाणैः द्रुतमध्यमविलम्बितैरन्वितं यथा स्यात्तथा सप्तभिः सप्तत्वसङ्ख्याविशिष्टैः जातिभिः[1]'सर्वगीतसमाधारो जातिरित्यभिधीयते । खार्जी चैवाथ नैषादी धैवती पञ्चमी तथा ॥ माध्यमी चैव गान्धारी सप्तमी त्वार्षभी मता' इति शाण्डिल्योक्त्या सर्वगीतसमाधारभूतखार्ज्यादिभिः सप्तभिः वर्द्धं यथा स्यात्तथा तन्त्रीलयसमन्वितं तन्त्रीशब्दो लक्षणया तन्त्रीयुक्तवीणाशब्दपरः लयशब्दस्तालवेणुमृदङ्गादीनां समानकालिकविरामपरः ताभ्यां युक्तं यथा स्यात्तथा गान्धर्वतत्त्वज्ञौ ' गान्धर्वं गीतशास्त्रम्' इति वैजयन्तीकोशाद्गान्धर्वस्य गीतशास्त्रस्य तत्त्वज्ञौ तात्पर्यवेदितारौ अत एव मूर्छनास्थानकोविदौ मूर्छना च स्थानं च मूर्छनास्थाने तयोः कोविदौ नि-

१ तत्त्वज्ञावित्येव युक्तम् ।

पुणौ मूर्छनाशब्देन वीणादिवादनमुच्यते ' वादने मूर्छना प्रोक्ता ' इति वैजयन्तीकोशात् स्थानशब्देन मन्द्रमध्यमतार-रूपस्वरत्रयोत्पत्तिस्थानमुच्यते । तदुक्तं शाण्डिल्येन ' यदूर्ध्वं हृदयग्रन्थेः कपोलफलकादधः । प्राणसञ्चारणस्थानं स्थानमित्य-भिधीयते ॥ उरः कण्ठः शिरश्चेति तत्पुनस्त्रिविधं भवेत् । मन्द्रं मध्यं च तारं च'इति।'स्थानमूर्छनकोविदौ'इति भट्टसम्मतः पाठः। तत्र मूर्छनाशब्देन ' यत्रैव स्युः स्वराः पूर्णा मूर्छना सेत्युदाहृता' इति प्रामाण्येन मूर्छनाशब्दः स्वरपूर्णस्थानपर इति व्याख्यातम्। भ्रातरौ सोदर्यौ स्वरसम्पन्नौ खर्जादिस्वरविज्ञौ अत एव रू-पिणौ मनुष्यरूपधारिणौ गन्धर्वाविव मनुष्यरूपधारिगन्धर्वस-दृशौ रूपलक्षणसंपन्नौ नाटकलक्षणविज्ञौ ' रूपं स्वभावे शुक्रादौ सौन्दर्ये नाटकेऽप्यसौ ' इति भास्करः । मधुरस्वरभाषिणौ मनो-हरस्वरभाषणशीलौ रामदेहाद्विम्बादुत्थितौ बिम्बौ प्रतिविम्बा-विव रामदेहरूपबिम्बोत्थितप्रतिविम्बसदृशाविव्यर्थः अत एव अपरौ तथा रामप्रतियोगिकभेदाभाववन्ताविव तत्त्वेन प्रतीय-मानाविव्यर्थः । तौ कुशलवौ अगायतामिति चतुर्णामेकत्रान्वयः । तथाशब्द इवार्थे ॥ ८–११ ॥

गो० टी०–उत्तरश्लोके अगायतामित्यनुवादात् यथोपदेश-मगायतामित्याह–**पाठ्येत्यादि**श्लोकद्वयेन । पाठ्यं पाठः भावे ण्यत् । केवलोच्चारणविशेषः । तदुक्तं भरतेन ' षड्जङ्गारसंयुक्तं कलाकालसमन्वितम् । यत्पठ्यते नाटकादौ तत्पाठ्यमभिधीयते' इति । गेयं गानं भावे यत् तत्रोभयत्र मधुरं श्राव्यं लोके कानि-चित् पद्यानि पाठदशायां मधुराणि न गानदशायाम् अपराणि पुनर्गानदशायामेव न पाठदशायाम् इदं तूभयत्रापीत्यर्थः इतः परं त्रीणि क्रियाविशेषणानि त्रिभिः प्रमाणैर्गानध्वनिपरिच्छेदकैः व्यश्रचतुरश्रमिश्रसंज्ञकैः द्रुतमध्यविलम्बितैर्वान्वितं विशिष्टम् । सप्तभिर्जातिभिर्बद्धं शुद्धविकृतसंकीर्णाद्यिष्वष्टादशसु जातिषु प्र-धानभूताभिः सप्तभिर्बद्धम् । तदुक्तम् शाण्डिल्येन ' सर्वगीतस-माधारो जातिरित्यभिधीयते । षाड्जी चैवाथ नैषादी धैवती पाञ्चमी तथा ॥ माध्यमी चैव गान्धारी सप्तमी त्वार्षभी मता' इति । तन्त्रीलयसमन्वितं तन्त्रीशब्देन तन्त्रीयुक्तवीणा लक्ष्यते लयशब्देन तालवेणुमृदङ्गादीनामेककालविराम उच्यते ताभ्यां समन्वितम् ॥ ८ ॥ पुनः काव्यविशेषमाह 'रसैः शृङ्गारकारुण्य-हास्यवीरभयानकैः । रौद्रादिभिश्च संयुक्तं काव्यमेतदगायताम् ' इति। आदिशब्देन बीभत्साद्भुतशान्ता गृह्यन्ते। रसो नाम स्थायी-भावरूपचित्तवृत्त्यभिव्यक्तिः स्थायीभावश्च नवविधः । तदुक्तम् ' रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्साविस्मय-शमाः स्थायीभावाः प्रकीर्तिताः ' इति । तदभिव्यक्तिश्च विभावा-दिभिः। तदुक्तम् 'विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः। आ-नीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः ' इति । विभावा-दिस्वरूपं सङ्ग्रहेणोक्तम्'कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥ विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः । व्यक्तः शतैर्विभावाद्यैः स्था-यीभावो रसः स्मृतः ' इति । तत्र शृङ्गारो द्विविधः । संभोगो विप्रलम्भश्चेति 'संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः ' इ-त्युक्तेः अस्य शृङ्गारादिसर्वरससंयुक्तत्वं प्रदर्श्यते । तत्र ' रा-मस्तु सीतया सार्द्धम् ' इत्यारभ्य सीतापहरणवृत्तान्तपर्यन्तेन संभोगो दर्शितः । ततः परेण विप्रलम्भः । विकृताचारवाक्या-ङ्गविकारवेषैर्धूर्तप्रलापैश्च हास्यरसो व्यज्यते। स च शूर्पणखादि-वृत्तान्तेन सुगमः । इष्टवियोगादनिष्टसंबन्धाद्वा करुणः । स च दशरथादिवृत्तान्तेन । व्यवसायाऽविषादाऽसंमोहादिभिर्वीरः यथा लक्ष्मणादिवृत्तान्ते । पाटनताडनादिभी रौद्रः । यथा रावणादि-वृत्तान्ते । विकृतक्रूरदर्शनादिभिर्भयानकः यथा मारीचवृत्तान्ते । कुत्सितदर्शनादिभिर्बीभत्सः यथा विराधकबन्धादिवृत्तान्ते । विचित्रशिल्पवाक्यादिभिरद्भुतः यथा रामरावणयुद्धादिषु । शा-न्तरसः श्रमणादिवृत्तान्तादौ। अलं विस्तरेण। अत्र केचिन् ' शोकः श्लोकत्वमागतः ' इत्युक्त्याऽस्मिन्प्रबन्धे शोकरस एव प्राधा-न्येनोच्यते अन्ये तदङ्गतयेत्याहुः । अन्ये तु वीर एव प्रधानभूतः पौलस्त्यवध इति काव्यनामकरणात् इत्याहुः । वयं तु शृङ्गार एव प्रधानरसः । 'सीतायाश्चरितं महत्' इत्युक्तेः । तथोक्तम् ' एको रसो भवेदङ्गी वीरश्रृङ्गारयोर्द्वयोः। अङ्गान्यन्ये रसाः सर्वे तस्य निर्वहणोद्यताः' इति ॥ ९ ॥ अथ कुशलवयोर्गानसामर्थ्यमाह–**तौ त्वित्यादि**श्लोकद्वयेन।अस्यागायतामिति पूर्वेण संबन्धः।गान्यर्वं गानशास्त्रम् । 'गान्धर्वं गानशासनम्' इति वैजयन्ती । तस्य त-त्त्वं तात्पर्यार्थः । तज्ज्ञानीत इति गान्धर्वतत्त्वज्ञौ। मूर्छना वीणादि-वादनम्। 'वादने मूर्छना स्त्रिया' इति वैजयन्ती । स्थानानि मन्द्र-मध्यतारस्वरत्रयोत्पत्तिस्थानानि।यथोक्तं शाण्डिल्येन ' यदू-र्ध्वं हृदयग्रन्थेः कपालफलकादधः । प्राणसञ्चरणस्थानं स्थान-मित्यभिधीयते ॥ उरः कण्ठश्शिरश्चेति तत्स्वरास्त्रिविधाः स्मृताः' इति । तेषु कोविदौ तद्विषयसमीचीनज्ञानयुक्तौ। एतेन गानशास्त्र-ज्ञानतदनुगुणवीणादिवादनतदनुगुणोच्चारणनिपुणाविति दर्शितम्। भ्रातरावित्यनेन श्राव्यतोहेतुसमस्वरत्वमुक्तम् । स्वरसम्पन्नौ शारीरयुक्तौ अत एव रूपिणौ मनुष्यवेषधारिणौ गन्धर्वाविव स्थितौ रूपलक्षणसंपन्नौ नाटकलक्षणज्ञौ । गत्यर्था ज्ञानार्थाः । ' रूपं स्वभावे शुक्रादौ सौन्दर्ये नाटके पशौ ' इति भास्करः । गानकालिकाभिनयप्रकारज्ञाविव्यर्थः । मधुरस्वरं यथा भवति तथा भाषितुं शीलमनयोरिति मधुरस्वरभाषिणौ ताच्छील्ये णिनिः केवलभाषणकालेऽपि मधुरस्वरौ किमुत गानकाले इति भावः। उक्तसकलगुणसम्पत्तिमूलं रामपुत्रत्वमाह–**बिम्बादिति**। रामदेहरूपाद्बिम्बात्तथा उत्थितौ उद्भूतौ बिम्बौ प्रतिबिम्बाविव स्थितौ।यथा प्रतिमानिर्माणार्थं चातुर्वर्ण्येन निर्मिता प्रतिकृतिर्बिम्बः रामदेहाख्यात्तस्मात्तथा उत्थितौ उत्कीर्णौ अपरौ बिम्बाविव स्थि-तौ 'प्रतिबिम्बे तत्कृतौ चं प्रतिकृत्यां च मण्डले । लाञ्छनेऽपि च बिम्बोऽस्त्री' इति भास्करः। एवंभूतौ कुशलवावतत्काव्यमगाय-तामिति संबन्धः ॥ १० ॥ ११ ॥

तौ राजपुत्रौ कात्स्न्र्येन धर्म्यमाख्यानमुत्तमम् । वाचोविधेयं तत्सर्वं कृत्वा काव्यमनिन्दितौ ॥ १२ ॥
ऋषीणां च द्विजातीनां साधूनां च समागमे । यथोपदेशं तत्त्वज्ञौ जगतुः सुसमाहितौ ॥ १३ ॥
महात्मानौ महाभागौ सर्वलक्षणलक्षितौ । तौ कदाचित्समेतानामृषीणां भावितात्मनाम् ॥ १४ ॥
मध्येसभं समीपस्थाविदं काव्यमगायताम् । तच्छ्रुत्वा मुनयः सर्वे वाष्पपर्याकुलेक्षणाः ॥ १५ ॥
साधु साध्विति तावूचुः परं विस्मयमागताः । ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥ १६ ॥

१२-१३] ति० टी०-ताविति । धर्म्यं धर्मादनपेतम् । वाचोविधेयं विनापि पुस्तकं पाठयोग्यम् ॥ १२ ॥ ऋषीणां द्विजातीनामिति गोबलीवर्दन्यायेन । साधूनां द्विजेतराणामपि यथोपदेशं जगतुः । तत्त्वज्ञौ काव्यस्य गानादेश्च तत्त्वज्ञौ । सुसमाहितौ सुतरां स्थिरचित्तौ ॥ १३ ॥

रा० टी०-तदेव विशदयन्नाह-तावित्यादि सार्द्धश्लोकद्वयेन । सर्वलक्षणलक्षितौ सर्वाणि निखिलानि लक्षणानि सामुद्रिकोक्तसच्चिह्नानि तैर्लक्षितौ युक्तौ अत एव महाभागौ नित्यपरमभाग्यवन्तौ अत एव महात्मानौ पूजितस्वरूपौ अत एव समाहितौ एकाग्रचित्तौ अत एव तत्त्वज्ञौ वेदशास्त्रतात्पर्यवेदितारौ अत एवानिन्दितौ निन्दारहितौ तौ अमृतवदास्वादनीयगानविशिष्टौ राजपुत्रौ तौ कुशीलवौ धर्म्यं धर्मादनपेतम् जनकर्त्तव्यबोधकमित्यर्थः । आख्यानं रामचरितप्रतिपादकम् अत एव उत्तमं सर्वश्रेष्ठं तत् रामायणं काव्यमादिकविवाल्मीकिनिष्पादितं सर्वं वाचोभिधेयं पुस्तकावलोकनाद्यन्तरापि वचनार्हं कृत्वा अभ्यासतः सम्पाद्य ऋषीणां मन्त्रद्रष्टृणां द्विजातीनां सामान्यब्राह्मणक्षत्रियविशां च साधूनां जात्याद्यभिमानरहितपरमहंसानां च समागमे सम्मेलने यथोपदेशं गुरूपदेशमनतिक्रम्य जगतुः गानं चक्रतुः । क्वचिल्लक्ष्यलक्षणलक्षितावितिं पाठः अर्थः स्पष्ट एव। ' तश्चौरामृतपुच्छेषु क्रोडेऽश्लेऽक्षे च कुत्रचित् ' इति मेदिनीकोशात्तशब्दोऽमृतपरः । सार्द्धश्लोकद्वयमेकान्वयि १२।१३

गो० टी०-न केवलं तस्याध्ययनं धारणं प्रकाशनं च कृतमित्याह-तावित्यादि । सार्द्धश्लोकद्वयमेकान्वयम् क्रियाभेदात्तच्छब्दावृत्तिः । यद्वा राजपुत्रौ सन्तौ तौ मुनिपुत्रौ मुनिपुत्रवेषधरावित्यर्थः । अनिन्दितौ यथोपदेशं गानेन निन्दानर्हौ यथोपदेशं गुरूपदेशमनतिक्रम्य तत्त्वज्ञौ पाठगृद्धिज्ञौ समाहितौ सावधानौ कुत्राप्यंशे विस्मृतिरहितावित्यर्थः । महात्मानौ महाबुद्धी महाभागौ एतादृशगुणहेतुभूतमहाभाग्यौ ' भागा भाग्यांशतुल्यांशौ ' इति वैजयन्ती । सर्वलक्षणलक्षितौ लक्षितसर्वलक्षणौ । ज्ञातसर्वशब्दलक्षणावित्यर्थः। तौ कुशलवौ कात्स्न्र्येन धर्म्यं धर्मादनपेतमुत्तममाख्यानं पुरावृत्तकथनरूपं तद्रामायणाख्यं सर्वं काव्यं वाचो विधेयमावृत्तिबाहुल्येन वाग्वशवर्तिं कृत्वा ऋषीणां च साधूनां द्विजातीनां च समागमे सदसि जगतुः १२।१३

१४] ति० टी०-'लक्ष्यलक्षण-' इति पाठे सामुद्रिकवेद्रिर्लक्ष्यं परीक्ष्यं लक्षणं सुलक्षणं तेन लक्षितौ युतौ अत एव महात्मानौ महाभागौ च भागो भाग्यमत्र। ' गीयतामिदमाख्यानं भवद्भ्यामृषिसंसदि । राजर्षीणां पुण्यकृतां साधूनां च समागमे ॥ गुरुणैवमनुज्ञातौ प्रकृत्या मधुरस्वरौ ' इति क्वचित्पठ्यते तदनन्वयीति स्पष्टमेव । भावितात्मनां शुद्धचित्तानाम् ॥ १४ ॥

रा० टी०-गानस्थलं निर्दिशन्नाह-ताविति । कदाचित्कस्मिंश्चित्समये समेतानामेकत्र समागतानां भावितात्मनां परिशीलितपरमात्मनाम ऋषीणां समीपस्थौ कुशलवौ मध्येसभं सभामध्ये इदं रामायणं काव्यमगायताम् मध्येसभमित्यस्य स्थाने आसीनानामिति पाठे आसीनानां मध्ये इत्यर्थः ॥ १४ ॥

गो० टी०-अथ तस्य काव्यस्य महाजनपरिगृहीतत्वं दर्शयितुमाह-तावित्यादि । तौ कुशीलवौ कदाचित् रामाश्वमेधकाले भावितात्मनां निश्चितधियां समेतानामश्वमेधे संमिलितानामासीनानां क्रियाकलापावसाने सुखमासीनानामृषीणां समीपस्थौ सन्तौ इदं काव्यमगायताम् ॥ १४ ॥

१५-१६] ति० टी०-मध्येसभमित्यव्ययीभावः । समीपस्थौ सहितावित्यर्थः । तद्गानम् ॥ १५ ॥ १६ ॥

रा० टी०-गेयप्रशंसां कुर्वन्नाह-तदिति । तद्गीयमानरामायणं श्रुत्वा परं विस्मयं केन सुकृतेन इदमस्माभिः प्राप्तमित्याश्चर्यमागताः प्राप्ताः अत एव वाष्पपर्याकुलेक्षणाः सर्वे तत्रागतास्ते मुनयः साधुसाध्विति इदमित्यूचुः । हर्षे वीप्सा । अपिशब्द इत्यर्थे ॥ १५ ॥

गो० टी०-सामान्यतः काव्यप्रशंसामाह-तदिति । तत्काव्यं श्रुत्वा परं विस्मयमागताः वाष्पपर्याकुलेक्षणाः सर्वे मुनयस्तौ साधु साध्विति ऊचुः प्रशशंसुरित्यर्थः ॥ १५ ॥

१६]रा० टी०-गेयप्रशंसामुक्त्वा गातृप्रशंसामाह-ते इति। धर्मवत्सलाः धर्माः धर्मस्वरूपाः वत्सलाः वात्सल्यरसवन्तः ते एव ते इति कर्मधारयः । अत एव प्रीतमनसः प्रसन्नचित्ताः ते सर्वे मुनयः गायमानौ अद्भुतगानं कुर्वन्तौ अत एव प्रशस्तव्यौ प्रशंसनीयौ कुशीलवौ प्रशशंसुः प्रशस्तव्यावित्यत्र आगमशास्त्रस्यानित्यत्वादिडभावः नलोपश्छान्दसः । धर्मबाहुल्यात् धर्मवतां धर्मत्वेन व्यपदेशः ॥ १६ ॥

१ निर्मत्सरा इत्यर्थं इति भूषणटीकायाम् । २ द्विजेतरेषामिति युक्तम् । ३ विशदयन्निति भाति । ४ विद्भिरिति युक्तम् ।

प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ । अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ॥ १७ ॥
चिरनिर्वृत्तमप्येतत्प्रत्यक्षमिव दर्शितम् । प्रविश्य तावुभौ सुष्ठु तथा भावमगायताम् ॥ १८ ॥
सहितौ मधुरं रक्तं संपन्नं स्वरसंपदा । एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः ॥ १९ ॥
संरक्ततरमत्यर्थं मधुरं तावगायताम् । प्रीतः कश्चिन्मुनिस्ताभ्यां संस्थितः कलशं ददौ ॥ २० ॥
प्रसन्नो वल्कलं कश्चिद्ददौ ताभ्यां महायशाः । अन्यः कृष्णाजिनमदाद्यज्ञसूत्रं तथापरः ॥ २१ ॥

गो० टी०–गातृप्रशंसामाह–त इति । धर्मवत्सलाः निर्मत्सरा इत्यर्थः ते सर्वे मुनयः प्रीतमनसः सन्तः गायमानौ अत एव प्रशस्तव्यौ प्रशंसितुमर्हौ कुशलवौ प्रशशंसुः ॥ १६ ॥

१७] ति० टी०–प्रशस्तव्याविति डभावनलोपौ छान्दसौ । अहो आश्चर्यम् ॥ १७ ॥

रा० टी०–प्रशंसास्वरूपमाह–अहो इति । गीतस्य गानस्य माधुर्यं विशेषतः अन्यगानाद्विलक्षणमत एव श्लोकानां च माधुर्यं विशेषतः श्लोकान्तरेभ्यः विलक्षणमित्यहो आश्चर्यम् एतेनैतादृग्गानं कर्तुं न पूर्वमनुभूतिरिति हेतुर्ध्वनितः । विलक्षणत्वमेवाह–चिरेति । चिरनिर्वृत्तं बहुकालिकरामव्यापारसंपन्नमेतच्चरितमल्पकालतः प्रत्यक्षमिव दर्शितम् । अद्भुतगानविशिष्टप्रबन्धेन साक्षादिवकृतमित्यर्थः । अपिशब्दादल्पकाललाभः ॥ १७ ॥

गो० टी०–काव्यप्रशंसाप्रकारमाह–अहो इति । गीतस्य गानस्य माधुर्यमहो आश्चर्यं श्लोकानां तु माधुर्यं विशेषतः अहो आश्चर्यं गानतोऽपि श्लोकमाधुर्यं अतिशयितमित्यर्थः। तमेव विशेषमाह–चिरेति । एतत्काव्यप्रतिपाद्यं कथाशरीरं चिरनिर्वृत्तमपि बहुकालाविष्पन्नमपि प्रत्यक्षमिव प्रत्यक्षतयाऽनुभूयमानमिव दर्शितम् अनेन काव्येन बोधितं पाकविशेषात्सद्यः सर्वार्थं विशदतरमवगमयतीदं काव्यमित्यर्थः ॥ १७ ॥

१८] ति० टी०–चिरेति । एतद्रावणवधान्तचरितम् । एवमृषिप्रशंसोत्तरं पुनस्तयोर्गानमाह–भावं काव्याभिप्रायं तत्तद्रसरूपं प्रविश्य तन्मयीभूय सुष्ठु यथा श्रोतृणां रसाविर्भावो भवति तथागायतामित्यर्थः ॥ १८ ॥

रा० टी०–गानगेयविलक्षणत्वमुक्त्वा गातृविलक्षणत्वं बोधयँस्तत्प्रशंसास्वरूपमाह–प्रविश्येति । सहितौ समलयादिविशिष्टौ तावुभौ कुशलवौ मधुरं माधुर्यविशिष्टं रक्तं श्रोत्रानुरागविषयीभूतं स्वरसम्पदा खर्जादिसम्पन्नं यथा भवति तथा भावं रतिहासादिरूपं सुष्ठु प्रविश्य तत्तन्मयीभूय अगायतां श्रोतृतत्तद्रसनिष्पादजनकीभूतं गानं चक्रतुरित्यर्थः ॥ १८ ॥

गो० टी०–गातृप्रशंसाप्रकारमाह–प्रविश्येति । सहितौ समलयादियुक्तावित्यर्थः तावुभौ कुशीलवौ तदा मुनिजनश्रवणकाले भावं सुष्ठु प्रविश्य रतिहासादिभावो यथा प्रकाशितो भवति तथावगाह्येत्यर्थः स्वरसंपदा षड्जादिस्वरसंपदा संपन्नमत एव मधुरं रमणीयं रक्तं रागयुक्तं च यथा भवति तथा अगायताम् ॥ १८ ॥

१९] ति० टी०–सहितावितिं । मधुरं पाठतो गानतश्च । रक्तमुचैः स्वरसम्पदा षड्जादिस्वरसम्पदा सम्पन्नं यथा भवति तथागायतामिति पूर्वेण सम्बन्धः। एवम् 'अहो गीतस्य' इत्यायुक्तरीत्या ॥ १९ ॥

रा० टी०–एवमिति । तपःश्लाघ्यैः ज्ञानजनितप्रशंसाविशिष्टैः अतएव महात्मभिः पूजितस्वरूपैर्मुनिभिः एवं प्रशस्यमानौ तौ अमृतवदास्वादनीयगानविशिष्टौ तौ प्रसिद्धौ कुशलवौ अत्यर्थं विलक्षणार्थविशिष्टं मधुरं माधुर्यगुणप्रधानकं रामायणं संरक्ततरं श्रोतृणामत्यनुरागविषयीभूतं यथा भवति तथा अगायताम् 'तश्चौरामृतपुच्छेषु क्रोडेऽम्लेऽक्षे च कुत्रचित्' इति मेदिनीकोशात्तच्छब्दोऽमृतपरः ॥ १९ ॥

गो० टी०–प्रशंसाजनितोत्साहौ पुनरतिशयेनागायतामित्याह–एवमिति । तपःश्लाघ्यैः श्लाघ्यतपस्कैः अनसूयकैरिति यावत् महात्मभिः महाबुद्धिभिः विशेषज्ञैरिति भावः तादृशैरेवमुक्तरीत्या प्रशस्यमानौ श्लाघ्यमानौ तौ संरक्ततरमतिशयेन समीचीनरागयुक्तमत्यर्थं भृशं मधुरं च यथा भवति तथा तावगायताम् क्रियाभेदात्तच्छब्दावृत्तिः ॥ १९ ॥

२०] ति० टी०–संरक्ततरमत्युच्चतरं तथाप्यत्यर्थं मधुरम्। ततो रामायणगानश्रवणानन्दपरवशानां मुनीनां चेष्टा आह–प्रीत इति । संस्थितः सभायामिति शेषः ॥ २० ॥ २१ ॥

रा० टी०–प्रीत इति । प्रीतः गानश्रवणजनितप्रीतिविशिष्टः । अत एव संस्थितः उत्थितः किञ्च दानकालयोग्यसम्यक्स्थितिविशिष्टः कश्चिन्मुनिः ताभ्यां कुशलवाभ्यां कलशं जलाहरणपात्रं ददौ प्रसन्नः महायशाः गानाभिज्ञत्वजनितकीर्तिविशिष्टः कश्चिदपरो मुनिः ताभ्यां वल्कलमाच्छादनादियोग्यत्वक्षविशेषत्वचं ददौ ॥ २० ॥

गो० टी०–अथ प्रीतिकारितयथोचितपारितोषिकप्रदानमाह–प्रीत इति । संस्थितः उत्थितः 'संस्था स्थितौ व्यवस्थायाम्'इति भास्करः।कलशं जलाहरणपात्रं प्रीत्यतिशयेनोत्थाय ददावित्यर्थः। महायशाः गानशास्त्रविषयकीर्तिमान् गीतितारतम्यज्ञ इत्यर्थः॥ २० ॥

---

१ प्रीतः कीश्चेदतस्मादारभ्य मुनयः सत्यवादिन इत्यन्तो ग्रन्थः प्रक्षिप्तः कपुस्तके ।

कश्चित्कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः । बृसीमन्यस्तदा प्रादात्कौपीनमपरो मुनिः ॥ २२ ॥
ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः । काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥ २३ ॥
जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदान्वितः । यज्ञभाण्डमृषिः कश्चित्काष्ठभारं तथापरः ॥ २४ ॥
औदुम्बरीं बृसीमन्यः स्वस्ति केचित्तदावदन् । आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ॥ २५ ॥
ददुश्चैवं वरान्सर्वे मुनयः सत्यवादिनः । आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितम् ॥ २६ ॥
परं कवीनामाधारं समाप्तं च यथाक्रमम् । अभिगीतमिदं गीतं सर्वगीतिषु कोविदौ ॥ २७ ॥

२१] रा० टी०–अन्य इति। अन्यः मुनिः कृष्णाजिनमदात् । तथाऽपरः यज्ञसूत्रमदात् । कश्चित्कमण्डलुं प्रादात् । अन्यो महामुनिः मौञ्जीं प्रादात् ॥ २१ ॥

गो० टी०–एवं मुनिजनप्रशंसामुक्त्वा तदितरसकलजनप्रशंसामाह–आश्चर्यमित्यादिना । श्लोकत्रयमेकं वाक्यम् । आख्यानं प्रबन्धविशेषः । 'कथा त्वाख्यायिकाऽऽख्यानम्' इतियादवः इतिहास इत्यर्थः । मुनिना वाल्मीकिना संप्रकीर्तितं सम्यक् लक्षणवत्तया प्रकर्षेण विस्तरेण कीर्तितं कथितम् । कवीनां परमाधारं काव्ये काव्यस्य लक्षणमित्युक्तरीत्या कवीनां काव्यनिर्माणमूलमित्यर्थः । यथाक्रमं क्रममनतिक्रम्य समाप्तं मध्येऽविच्छिन्नमित्यर्थः । यथाकृतामिति पाठे यथाकर्तुमारब्धं तथा समाप्तमित्यर्थः । इदमाश्चर्यमाश्चर्यावहमित्यर्थः ॥ २१ ॥

२२] ति० टी०–बृसी ऋषीणामासनम् ॥ २२–२४ ॥

रा० टी०–बृसीमिति । तदा तस्मिन्काले अन्यः बृसीम् ऋषियोग्यमासनं प्रादात् । अपरो मुनिः कौपीनं प्रादात् । तदा अपरः हृष्टः मुनिः कुठारं ददौ ॥ २२ ॥

गो० टी०–प्रबन्धं प्रशस्य गातारौ प्रशंसति–अभिगीतमिति । हे सर्वगीतिषु कोविदौ समर्थौ ! युवाभ्यामायुष्यमायुर्वर्द्धकं पुष्टिजनकं सत्यपि आयुषि काश्यें तस्याकिञ्चित्करत्वात् पुष्टिकरं सर्वाभिः श्रुतिभिः स्वरारम्भकावयवैर्मनोहरम् । तदुक्तम् ' प्रथमश्रवणाच्छब्दः श्रूयते यः स्वमात्रतः । सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा ' इति । इदं गीतमभिगीतं शोभनं गीतम् अभिः पूजायाम् यद्वा इदं गीतं सर्वगीतिषु अभिगीतमित्यन्वयः ॥ २२ ॥

२३] रा० टी०–काषायमिति। अपरः मुनिः काषायं ब्रह्मचारिणार्थकुसुम्भरक्तं वस्त्रं ददौ । अन्यो मुनिः चीरं खण्डपटं ददौ । अन्यस्तु जटाबन्धनं जटाबन्धनयोग्यं काष्ठरज्जुं पालाशादिमूलनिर्मितरशनां मुदान्वितः सन् ददौ ॥ २३ ॥

गो० टी०–प्रशस्यमानाविति। अस्यादावितिशब्दोऽध्याहार्यः । तत्र यज्ञवाटे रथ्यासु राजमार्गेषु च सर्वत्रेत्थं प्रशस्यमानौ तौ कदाचिद्भरताग्रजो रामो ददर्श भरतमुखेन दर्शयेत्यर्थः ॥२३॥

२४]रा० टी०–यज्ञेति। कश्चिदृषिः यज्ञभाण्डं तथाऽपरः काष्ठभारम् अन्यः औदुम्बरीमुदुम्बरनिर्मितां बृसीं पीठं ददाविति पूर्वेणान्वयः । तदा केचिदगृहीतवल्कादिकाः स्वस्ति अवदन्२४

गो० टी०–स्वेति । ततो दर्शनानन्तरं शत्रुनिबर्हणो रामः पूजार्हौ स्वप्रबन्धगातृत्वेन श्लाघार्हौ भ्रातरौ कुशीलवौ तुल्यवयोरूपादिमत्त्वेनाश्चर्यकरौ । स्ववेश्म स्वशालागृहमानीय । नयतिर्द्विकर्मकः । पूजयामास श्लाघयामास ॥ २४ ॥

२५] ति० टी०– स्वस्तीत्याद्याशीः ॥ २५ ॥ आश्चर्यमित्यादि मनोहरमित्यन्तमेकं वाक्यम् ॥ २६ ॥

रा० टी०–आयुष्यमिति । तदा तस्मिन्काले मुदा हर्षेण अपरे महर्षयः आयुष्यं प्राहुः एवमनेन प्रकारेण सत्यवादिनः सर्वे अन्येपि मुनयः वरान् स्वस्वयोग्यान्ददुः एतेन तदृषीणां परमानन्दः सूचितः तेनैतत्प्राप्तिरेव परो लाभ इति तेषां निश्चयः सूचितः । अत्र अन्यः कृष्णाजिनमदादित्यादि ददुश्चैवं वरान्सर्वे इत्येतत्पर्यन्ताः पञ्चश्लोकाः भूषणाङ्किततपुस्तकेषु न दृश्यन्ते तत्र हतुर्लेखकप्रमादो बोध्यः सर्वपुस्तकान्तरेष्वेषां प्रसिद्धेः सन्दर्भानुकूलत्वाच्च॥२५॥आश्चर्यमिति। आश्चर्यं वाङ्मनसगोचरातीतवस्तुबोधकत्वेन स्वभावसिद्धमाधुर्यप्रधानत्वेन च सर्वतन्त्रविलक्षणमाख्यानं प्रबन्धरूपमत एव कवीनां सहृदयाभिज्ञानां परमुत्कृष्टमाधारं सहृदयहृदयाभिहारकमित्यर्थः।मुनिना रघुनाथाचरितमननशीलवाल्मीकिना संप्रकीर्तितमिदं रामायणं यथाक्रमं क्रममनतिक्रम्य समाप्तं कुशलवकर्तृकसमाप्तिमगमदित्यर्थः ॥२६॥

गो० टी०–अथास्य प्रबन्धस्य प्रबन्धनायकभूतमहापुरुषपरिग्रहमाह–आसीन इत्यादिना। द्वयोरेकान्वयः । प्रभुः स्वामी तदनुरूपतया काञ्चने सौवर्णे दिव्ये स्वर्गादशरथेनानीते सिंहासने आसीनः सचिवैर्मन्त्रिभिर्भ्रातृभिश्च उपोपविष्टः परिवृत इत्यर्थः । "प्रसमुपोदः पादपूरणे"इति द्विरुक्तिः। परं शत्रुं तापयतीति परन्तपः "द्विषत्परयोस्तापेः" इति खच् "खचि ह्रस्वः" इत्युपधाह्रस्वः "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः । अनेन व्यासङ्गरहितत्वं सूचितम् । नियतः अश्वमेधे दीक्षितः स रामः रूपसंपन्नौ भ्रातरौ दृष्ट्वा लक्ष्मणादीनुवाच ॥ २५ ॥ २६ ॥

२७] ति० टी०–परमिति । कवीनामाधारं वर्णनीयार्थस्य प्रकारभेदलाभद्वारा । हे सर्वगीतिषु कोविदौ कुशीलवौ, इदं गीतं गायनयोग्यं वस्त्वभिगीतं सुष्ठु गीतं यथाक्रमं समाप्तं समापितं च । ' अविगीतम् ' इति पाठेऽनवद्यम् । यथा तथा गीतमित्यर्थः ॥ २७ ॥

रा० टी०–अथेति । सर्वगीतिषु कोविदौ हे सर्वगीताभि-

आयुष्यं पुष्टिजननं सर्वश्रुतिमनोहरम् । प्रशस्यमानौ सर्वत्र कदाचित्तत्र गायकौ ॥ २८ ॥
रथ्यासु राजमार्गेषु ददर्श भरताग्रजः । स्ववेश्म चानीय ततो भ्रातरौ स कुशीलवौ ॥ २९ ॥
पूजयामास पूजार्हौ रामः शत्रुनिबर्हणः । आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ॥ ३० ॥
उपोपविष्टैः सचिवैर्भ्रातृभिश्च समन्वितः । दृष्ट्वा तु रूपसंपन्नौ विनीतौ भ्रातरावुभौ ॥ ३१ ॥
उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा । श्रूयतामेतदाख्यानमनयोर्देववर्चसोः ॥ ३२ ॥
विचित्रार्थपदं सम्यग्गायकौ समचोदयत् । तौ चापि मधुरं रक्तं स्वचित्तायतनिःस्वनम् ॥ ३३ ॥

शकुशलवौ आयुष्यमायुर्वर्द्धकं पुष्टिजननं पुष्टिजनकं सर्वश्रुतिसर्वाश्रुतयः तात्पर्यवृत्त्या यस्मिन् मनोहरं सहृदयहृदयापकर्षकमिदं गीतं गानयोग्यरामचरितमभिगीतं भवद्भ्यां मनोहरगानविषयीभूतं कृतमित्यर्थः एतेन ऋषीणां परमानन्दो जात इति ध्वनितम् । सर्वगीतिषु इति पाठः भट्टटीकायुक्तपुस्तकेषु दृश्यते अर्थे तु न वैलक्षण्यम् ॥ २७ ॥ * §

२८] ति० टी०–आयुष्यमायुर्जनकम् । पुष्टिरभ्युदयः। सर्वश्रुतिमनोहरं सर्वश्रुतीनां मनांस्युपनिपदस्तदर्थहरमित्यनेन मोक्षदं गीतमित्येवं सर्वत्र प्रशस्यमानौ । तत्रायोध्यायाम् ॥२८॥

रा० टी०–प्रशस्यमानाविति । रथ्यासु अल्पवीथिषु राजमार्गेषु च सर्वत्र मुन्याश्रमादिषु प्रशस्यमानौ गायकौ गानकर्तारौ कुशलवौ कदाचित्कस्मिँश्चित्समये भरताग्रजो रामो ददर्श ॥ २८ ॥

२९] ति० टी०–रथ्यासु स्वल्पवीथिषु राजमार्गेषु च गायमानौ तौ कदाचिद्भरताग्रजो रामो ददर्शेत्यन्वयः ॥ २९ ॥

रा० टी०–स्ववेश्मेति । ततः कुशलवकर्मकदर्शनानन्तरं शत्रुनिबर्हणः स्वाश्रितारिदोषनिवर्तकः रामः पूजार्हौ पूजायोग्यौ भ्रातरौ कुशीलवौ स्ववेश्म स्वगृहमानीय चकारेण स्वदत्तासने स्थापयित्वा पूजयामास च प्रशशंसैव एवेन कृत्यान्तरव्यवच्छेदः तेन रामस्य प्रेमाधिक्यं सूचितम् । द्वितीयश्चकार एवार्थः ॥ २९ ॥

३०–३२] ति० टी०–॥ ३० ॥ 'उपोपविष्टसचिवैः' इति पाठे उप समीप उपविष्टाः सचिवा यस्येत्यर्थः । 'उपोपविष्टैः सचिवैः' इति पाठे समीपस्थैर्मन्त्रिभिर्भ्रातृभिश्च समन्वित इत्यर्थः । ' आत्मरूपसंपन्नौ ' इति पाठे आत्मसदृशावित्यर्थः । ' दृष्ट्वा तु रूपसंपन्नौ ' इति प्रचुरः पाठः ॥ ३१ ॥ अनयोः सकाशादेतदाख्यानं श्रूयतामिति लक्ष्मणादीनुवाच ॥ ३२ ॥

रा० टी०–आसीन इति । तदा तस्मिन्काले प्रभुः महाराजाधिराजः अत एव काञ्चने स्वर्णमये दिव्ये प्राकृतविलक्षणे सिंहासने आसीनः अत एव परन्तपः आश्रितारिनिवर्तकः सचिवैर्मन्त्रिभिः भ्रातृभिश्च उपोपविष्टः परिवृतः चकारान्तरेण छत्रचामरादिमहाराजाधिराजोपस्करविशिष्टः नियतः स रामः रूपसम्पन्नौ उभौ तौ कुशलवौ दृष्ट्वा अवलोक्य देववर्चसोः अनयोर्बालयोः संबन्धि विचित्रार्थपदं विलक्षणवाच्यवाचकविशिष्टमाख्यानं सम्यक् श्रूयताम् इदं लक्ष्मणं शत्रुघ्नं भरतं च उवाच तथा तेन प्रकारेण गायकौ समचोदयत् गीयतामिदमिति प्रेरयामास त्रयाणामेकत्रान्वयः तृश्चार्थे ॥ ३०–३२ ॥

गो० टी०–श्रूयतामिति । देववर्चसोः देवतुल्यतेजसोः । रूपसंपत्तिरपि गीतिरस्यैतासामग्रीति भावः । अनयोः कुशीलवयोः संबन्धि विचित्रार्थपदं इदमाख्यानं श्रूयतामित्युपस्कार्यं सम्यग्गायिनौ तावचोदयत् गायनाय प्रेरयामासेत्यर्थः ॥ ३२ ॥

३३] ति० टी०–विचित्रार्थपदमिति पूर्वान्वयी । ततो गायकौ गातुं प्रैरयत् । स्वचित्तायतनिःस्वनं स्वस्य श्रोतृचित्तस्य चानुरूप आयतस्तारो निःस्वनो नादो यत्र तथा । स्वबलानुरूपं श्रोतृचित्ताह्लादकं च यथा भवति तावदुच्चस्वरमिति फलितम् ॥ ३३ ॥

रा० टी०–प्रेरणानन्तरकालिकवृत्तमाह–**ताविति** । अत्यर्थं गूढतात्पर्यार्थकं विश्रुतार्थं विश्रुतः श्रुतिप्रसिद्धः अर्थो यस्य तन्मधुरं स्वाभाविकमाधुर्यविशिष्टमत एव रक्तं श्रोत्रानुरागविषयीभूतं रामायणं सञ्चितायतनिस्वनं सञ्चितः सम्यक् संपादितः आयतो दीर्घो निस्वनः आलापो यस्मिंस्तत् तन्त्रीलयवत्तन्त्र्युपलक्षिततन्त्रीमृदङ्गतालादीनां समानकालिकविश्रामः अस्ति अस्मिन्निति तन्त्रीलयवत् यथा स्यात्तथा तौ प्रसिद्धौ वीरौ कुशलवौ अगायताम् ' तौ चापि मधुरं रक्तं स्वचित्तायतनिःस्वनम्' इति भट्टपाठः। स्वस्य श्रोतृचित्तस्य च अनुरूप आयतः तारो निःस्वनो नादो यत्रेत्यर्थस्तैर्व्याख्यातः ॥ ३३ ॥

गो० टी०–ताविति । सर्वाणि क्रियाविशेषणानि मधुरं पाठतो गानतश्च मनोहरं रक्तं रागवत् स्वञ्चितः सुतरां पूजितः आयतो दीर्घः निःस्वन आलापो यस्मिन् । तन्त्रीलयवत् तन्त्र्यारोपलयाभ्यां युक्तमत्यर्थं भृशं विश्रुतार्थं विस्पष्टार्थम् ॥ ३३ ॥

---

* शिरोमणिभूषणकाराभ्यां त्रयोदशश्लोकः षट्चरणः स्वीकृतस्तेन तदारभ्य त्रयस्त्रिंशदधिकास्तट्टीकाङ्का अर्धाधिक्येन विज्ञेयाः
§ २१।२२।२३।२४।२५।२६ स्थानेषु पतिता गो०द्वी० २६।२७।२८।२९।३०।३१ स्थानेषु क्रमतो विज्ञेया ।
१ गीतिरस्मेति भाति ।

तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायताम् । ह्लादयत्सर्वगात्राणि मनांसि हृदयानि च ॥
श्रोत्राश्रयसुखं गेयं तद्बभौ जनसंसदि । ॥ ३४ ॥
इमौ मुनी पार्थिवलक्षणान्वितौ कुशीलवौ चैव महातपस्विनौ ।
ममापि तद्भूतिकरं प्रचक्षते महानुभावं चरितं निबोधत ॥ ३५ ॥

३४] ति० टी०–तन्त्रीलयवत्तन्त्रीशब्दसदृशम् । विश्रुतार्थं विशेषतः श्रुतमात्रेणार्थबोधजनकं यथा भवति तथातिशयेनागायतामित्यन्वयः । सर्वगात्राणि श्रोतृणां सर्वगात्राणि ह्लादयद्रोमाञ्चादिप्रादुर्भावेणानन्दानुभावनसमर्थानि कुर्वत् । मनस आह्लादो नाम निद्रायामिव विस्मृतान्यव्यापारता । हृदयानि । हृदयमित्युपनिषत्प्रसिद्धं हृदयं प्रत्यगात्मा । उपाधिभेदाद्बहुवचनम् । तस्य ह्लादो नाम तत्सुखभोगः । श्रोत्रं कर्णशष्कुली तदाश्रयं श्रोत्रेन्द्रियं तस्य सुखम् ॥ ३४ ॥

रा० टी०–ह्लादयदिति । श्रोत्राश्रयसुखं श्रोत्रं कर्णशष्कुली आश्रयो यस्य तच्छ्रोत्राश्रयं श्रोत्रेन्द्रियं तस्य सुखं यस्मात्तत् । सर्वगात्राणि निखिलावयवान् मनांसि हृदयानि हृत् हृदयमयं स्थानं येषां तानि सान्तर्यामिजीवजातानि च ह्लादयत् गेयं गानं जनसंसदि जनाकुलसभायां बभौ शुशुभे जनाकुलसभायामित्युक्त्या तद्वानस्यातिप्रख्यातिर्ध्वनिता तेन तस्यालौकिकचमत्कारकारित्वं व्यक्तम् ॥ ३४ ॥

गो० टी०–ह्लादयदिति । सर्वगात्राणि सर्वावयवान् हृदयानि गात्रान्तरवर्तीनि मनोधिष्ठानानि मनांसि च ह्लादयत् सुखयत् श्रोत्राश्रयसुखं श्रोत्रं कर्णशष्कुली तदाश्रयं श्रोत्रेन्द्रियं तत्सुखं तत्सुखकरं तत्कुशलवकृतं गेयं गानम् भावे यत् । जनसंसदि सभायाम् । जनशब्दो मण्डपव्यावृत्त्यर्थः । बभौ प्रचकाशे अजृम्भतेत्यर्थः ॥ ३४ ॥

३५] ति० टी०–अथाख्यानस्य श्रवणे प्रयोजनमुपदिशन्पुनरपि लक्ष्मणादीनत्यादरेण श्रवणार्थं प्रेरयति–इमाविति । तत्तस्मात् महातपस्विनावाश्रमवासात्तपोयुक्तौ स्वरूपतस्त्वाजातुत्वादिपार्थिवलक्षणान्वितौ मुनिशिष्यत्वाच्च मुनी इमौ प्रबन्धस्य गायकौ । चरितं गेयं काव्यं च महानुभावं शब्दार्थालङ्कारललितसंदर्भत्वादिवैभवेन सार्वभौमविषयत्वेन च महावैभवम् अतो निबोधतादरेण शृणुत । किंच । यतस्तत्काव्यं तच्छ्रवणं च ममापि भूतिकरमिहामुत्राभ्युदयकरं प्रचक्षतेऽनेककल्पजीविनो वृद्धाः पूर्वपूर्वरामायणस्य तत्तत्कलत्वोक्त्या अस्यापि तत्फलकत्वमिति भाव इति प्राञ्चः । वस्तुतो मम चरितं मत्संबन्धि तच्चरितं मच्चरितार्थप्रतिपादकं तल्लोकोत्तरं काव्यं निबोधत । यतस्तच्छ्रोतृणां भूतिकरमपि भुक्तिमुक्तिदमपि प्रचक्षते पूर्ववत् । श्रवणमात्रेण सर्वगात्राह्लादाद्यपि शब्दग्राह्यम् अत एव महानुभावं महाप्रभावम् । अस्य श्लोकस्य लक्ष्मणादीनामेतच्छ्रवणप्रवर्तकार्थकत्वेनैवमेवास्य व्याख्योचितेति द्रष्टव्यम् ॥

रा० टी०–बहुजनसंकुलत्वेन विपुलशब्दप्रभवशङ्क्या सावधानीकुर्वन्नाह–इमाविति । महातपस्विनौ ज्ञानविषयकपरमज्ञानवन्तौ मुनी मननशीलौ इमौ कुशीलवौ पार्थिवलक्षणान्वितौ स्त इति शेषः । महानुभावं हृदयापकर्षत्वरूपपरमप्रभावविशिष्टं यच्चरितं प्रवक्ष्यते आभ्यां गास्यते तन्ममापि भूतिकरं मत्कर्मकनित्यप्राप्तिसम्पादकमेव अतो निबोधत सावधानतयो यूयं शृणुत । पार्थिवलक्षणान्वितावित्यनेन स्वातिप्रीतिविषयत्वं तयोस्सूचितम् । चो हेतौ । अपिशब्दो नित्यार्थकः । भूतिरित्यत्र प्राप्त्यर्थकभूधातोः क्तिः । किञ्च महानुभावं भूतिकरं श्रोतृनित्यप्रभूतिकरमेव मम चरितमाभ्यां प्रवक्ष्यत इत्यर्थः अतो निबोधत अन्यत्समानम् । प्रचक्षते इति भट्टसम्मतः पाठः तत्र महान्तो भूतिकरं प्रचक्षते इत्यर्थः । अन्यत्समानम् । निबो-

तेन तेषु रघुनाथकृपातिशयः सूचितः । एतेनात्मयशो न श्राव्यमित्याशङ्क्य सीताचरितत्वाद्रघुनाथेन श्रुतमिति समाहितमिति भूषणकारोक्तशङ्कासमाधानमापाततो रमणीयम् आत्मयशो न श्राव्यमित्यादिनिषेधानां गर्वनिवारणतात्पर्यकाणां सम्भावितगर्ववत्प्राकृतजनपरत्वेनात्र निषेधशङ्कानवसरत्वात् सीताचरितपरत्वेन समाधानमप्ययुक्तम् तच्चरितस्य रामचरितानतिरेकित्वेन शङ्कायास्तादवस्थ्यात् अत एव ' चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । शृण्वन्रामकथानादम् । यः पिबन्सततं रामचरितामृतसागरम् ' इत्यादौ रघुनाथचरितेनैव सीतादिचरितानामुक्तिः अत एव काव्यं रामायणं कृत्स्नमित्यादौ काव्यं रामायणत्वेन विशेषितम् ' सीतायाश्चरितं महत् ' इति सीताचरितस्य महत्त्वोक्त्या सीताचरितस्य प्राधान्यमिति तु न भ्रमितव्यम् तस्य तत्रत्यमहच्छब्दः काव्यान्वयीति तत्रैव निर्णीतत्वात् अत एव ' रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्रभो ' इत्यादि सङ्गच्छते इति दिक् ॥ ३५ ॥

गो० टी०–उक्तमेवार्थं वृत्तान्तरेण सर्गान्ते संगृह्णाति–इमावित्यादिश्लोकद्वयेन । इमौ मुनिवेषावपि पार्थिवलक्षणान्वितौ कुशीलवावपि गायकावपि महातपस्विनौ महान्तौ तपस्विनौ भवतः तत्तस्मान्ममापि प्रियाविरहकृशस्यापि भूतिकरं श्रेयस्करं धारकामित्यर्थः । महाननुभावो यस्य तन्महानुभावं चरितं सीताचरित्रमित्यर्थः । प्रवक्ष्यते आभ्यां व्यक्तं पठिष्यते तं निबोधत तच्छृणुतेत्यर्थः । अत्र पौराणिकाः वक्तारौ महात्मानौ वक्ष्यमाणं च महच्चरितं महानुभावम् अतस्तन्निबोधतेत्याहुः एवं ह्यात्मप्रशंसा स्यात्सा च न युक्ता अयं हि रामो धीरोदात्तः तस्य

ततस्तु तौ रामवचःप्रचोदितावगायतां मार्गविधानसंपदा ।
स चापि रामः परिषद्गतः शनैर्बुभूषयासक्तमना बभूव ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ।

मनुनिर्मितकोशलजनपदान्तर्वर्त्ययोध्याया वर्णनम् ।

सर्वापूर्वमियं येषामासीत्कृत्स्ना वसुंधरा । प्रजापतिमुपादाय नृपाणां जयशालिनाम् ॥ १ ॥

च ' अविकत्थनः' इति लक्षणम् तस्य च स्वविषयबन्धश्रवणं महानुभावत्वोक्तिश्च न कथमप्युपपन्नं लोके हि क्षुद्रोऽपि कश्चित्स्वविषयप्रबन्धश्रवणे लज्जते अतोन्यथा योजयन्त्याचार्याः नायं प्रबन्धो रामचरित्रपरः किंतु सीताचरित्रपरः 'सीतायाश्चरितं महत्' इति पूर्वमुक्तत्वात् 'श्रीमद्रामायणमपि परं प्राणिति स्वचरित्रे ' इत्यभियुक्तवचनात् स्त्रीप्रसङ्ग इत्याभाणकश्च तद्विषयस्तु प्रबन्धो रामेण श्राव्य एव विरहिणो हि कान्ताचरित्रगाथाः शृण्वन्ति श्रावयन्ति च अत एव ममापि भूतिकरमित्युक्तम् विरहिणोऽपि मे सत्ताप्रदमित्यर्थः यद्वा ' अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इत्युक्तरीत्या ममाप्यतिशयावहमित्यर्थः । महानुभावमित्यस्य च प्रणयिन्यसन्निधानदशायामपि धारकमित्यर्थः । यद्वा महानुभावम् ' लघुतरारामस्य गोष्ठीकृता ' इत्युक्तरीत्या स्वविषये निरवधिकापराधकारिरक्षसीरक्षणेन स्वस्मादप्यतिशयितवैभवमित्यर्थः । यद्वा ' दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम् ' इति मयोक्तम् अनया तु न कश्चिन्नापराध्यतीति अतो मत्तोप्युत्कृष्टचरितमित्यर्थः । यद्वा स्वचरणे निगडं बद्धा देवस्त्रीचरणनिगडविच्छेदकारितया मत्तोप्याश्रितरक्षणेऽतिशयितत्वरायुक्तमित्यर्थः । यद्वा पितृत्वप्रयुक्तहितपरतया मयि सापराधविषये कलुषधियि मातृत्वप्रयुक्तवात्सल्येन मामपि क्षमापयत्याश्रितत्वेन महानुभावमित्यर्थः ॥ ३६ ॥

३६] ति० टी०–तत इति । रामवचःप्रेरितौ तौ मार्गविधानसंपदा । गानं द्विविधम् मार्गो देशी चेति तत्र प्राकृतावलम्बि गानं देशी संस्कृतावलम्बि तु गानं मार्गः तयोर्मध्ये मार्गाख्यगानमार्गावलम्बनसामग्र्या अगायताम् । परिषद्गतः सभागतः स रामोऽपि बुभूषया स्वचरितस्य चिरकालं स्थितीच्छया प्रबन्धस्य गीतश्रवणे आसक्तमना बभूव । शनैःपदेनोत्तमपुरुषत्वात्स्वप्रशंसार्थकेऽत्र काव्ये शनैः प्रवृत्तिरिति ध्वन्यते स्वयं श्रवणे चोत्तरोत्तरं श्लोकानामुपादेयत्वबुद्ध्या श्रवणे प्रवृत्तौ तस्य स्थिरत्वं भवतीति तदाशयः । स्वप्रवर्तितकविकृतत्वाच्चैवमिच्छा भगवत इति बोध्यम् । इहामुत्र स्वाभ्युदयेच्छयात व्याख्यानं त्वयुक्तम् भगवतः स्वाभ्युदयेच्छाया बाधात् एतेन राज्ञां कविकृतस्वकाव्यश्रवणमावश्यकमिति सूचितम् ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीये
आदिकाव्ये बालकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०–तत इति । ततः समाधानकरणानन्तरं रामवचःप्रचोदितौ रामप्रेरितौ कुशीलवौ मार्गविधानसंपदा मार्गो देशी चेति गानं द्विविधं तत्र प्राकृतावलम्बिनो देशिसंज्ञा संस्कृतावलम्बिनो मार्गसंज्ञेति सङ्गीतशास्त्रे प्रसिद्धम् । तथा च मार्गस्य संस्कृतावलम्बिगानस्य यद्विधानं सामग्री तस्य सम्पत्तिः परिपूर्णता तया शनैः अगायतामगायेतामेव । परिषद्गतः सभासद्भिरुपविष्टः स रामोऽपि बुभूषया तादृग्गायकभवनेच्छया आसक्तमना बभूव । तुशब्द एवार्थे तेन कृत्यान्तरव्यवच्छेदः तेन चित्तैकाग्र्यं ध्वनितम् किञ्च तुना प्रतिश्लोकगानं प्रशंसां चकारेत्यर्थः ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुर्थः सर्गः ॥ ४ ॥

गो० टी०–तत इति । ततः श्रोतृप्रोत्साहनानन्तरं रामस्य वचसा प्रचोदितौ ननु चेष्टयेत्यादरातिशयोक्तिः तौ कुशीलवौ मार्गविधानसंपदा देशी मार्गश्चेति द्वौ गानप्रकारौ तत्र मार्गः सार्वत्रिकः देशी क्वाचित्क तयोर्मध्ये मार्गनिर्वाहसामग्र्या अगायतां स रामोऽपि शनैः परिषद्गतः झटित्युत्थाय गमने परिषदोप्युत्थानाद्रसभङ्गो भविष्यतीति मन्दंमन्दं सिंहासनादवतीर्य परिषदं प्राप्तः एकः स्वादु न भुञ्जीतेति न्यायादुन्नतसिंहासनावस्थानेन स्वात्मानमेकाकिनं मन्यमानः सभामध्यगतः बुभूषया अनुबुभूषया श्रोत्रसुखानुभवेच्छयेत्यर्थः यद्वा बुभूषया भवितुमिच्छया कान्ताकथाश्रवणेन स्वसत्तालाभेच्छयेत्यर्थः सक्तमनाः गानश्रवणासक्तचित्तः बभूव ह स्वशिष्योक्तप्रबन्धश्रवणे रामः स्वयमेव सादरं प्रसक्त इति मुनिस्तुष्यति । अत्र श्लोकद्वये वंशस्थवृत्तम् । 'जतौ तु वंशस्थमुदीरितं जरौ ' इति लक्षणात् ॥ ३६ ॥

इति श्रीमद्बालकाण्डे गोविन्दराजविरचिते श्रीरामायणभूषणे
मणिमञ्जीराख्याने चतुर्थः सर्गः ॥ ४ ॥

१] ति० टी०–एवं सर्गचतुष्टयेनोपोद्घातं कृत्वा वस्तु निर्दिशति–सर्वेति । कृत्स्नेयं वसुन्धरा प्रजापतिं वैवस्वतं मनुमुपादायोपक्रम्य जयशालिनां जयेन शोभावतां नृपाणां सर्वापूर्वमैहिकामुष्मिकसर्वापूर्वसाधनं यथा भवति तथासीत् सर्वापूर्वशब्दो ह्युपादेयपरो नियतनपुंसकलिङ्ग इति केचित् ॥ १ ॥

रा० टी०–सर्गचतुष्टयेन सप्रसङ्गं संक्षिप्तरामायणं वारत्रयं प्रदर्श्य विस्तीर्णरामायणमुपक्रमते–सर्वेत्यादिभिः । प्रजा-

पातिं वैवस्वतमनुमुपादाय आरभ्य जयशालिनां विजययुक्तानां येषां नृपाणामियं कृत्स्ना निखिला वसुन्धरा पृथ्वी सर्वापूर्वं सर्वेषां जनानामपूर्वं फलं यथा भवति तथा आसीत् किञ्च वसुन्धरा सर्वमेवापूर्वं फलं येषां राज्ञामासीत् प्रापयत्। गत्यर्थकासधातुप्रयोगः। किञ्च सर्वमपूर्वं यस्य तमिति प्रजापतिविशेषणम् ॥ १ ॥

गो० टी०–इदं च तपःस्वाध्यायेत्यारभ्य सर्गचतुष्टयं महत्परिग्रहसिद्धये उक्तवैलक्षण्यत्रयप्रतिपादनपरत्वेन प्रबन्धोपोद्घातत्वात् श्रीरामायणान्तर्गतकथाशरीरानुप्रविष्टप्रस्तावनाग्रन्थवत्। ननु रामायणनिर्माणानन्तरभाविनः कथाशरीरस्यास्य कथं तत्पूर्वभाव इति चेन्न अनन्तरभावित्वेऽपि त्रिकालज्ञेन महर्षिणा प्रथमं तन्निर्माणसंभवात्। नन्वात्मप्रशंसापरमिदं सर्गत्रयं कथमृषिः स्वयमेव वक्तुमर्हतीति चेन्न अन्यापरिज्ञातस्यैतस्य वृत्तान्तस्य प्रेक्षावत्प्रवृत्त्यर्थमादाववश्यं वक्तव्यत्वात्। यद्वा सर्गत्रयमिदं केनचित् वाल्मीकिशिष्येण रामायणनिर्वृत्त्यनन्तरं निर्माय वैभवप्रकटनाय सङ्गमितं यथा याज्ञवल्क्यस्मृत्यादौ तथैव तत्र विज्ञानेश्वरेण व्याकृतम्। नन्वेतस्य सर्गत्रयस्य रामायणादित्वे कुशलवाभ्यामेतद्गाने प्रथमं क्रियमाणे तौ रामेणादावेव स्वपुत्राविति परिज्ञातौ स्यातां तथा च तदैव सीतानयनापत्तिः 'विम्बादिवोत्थितौ विम्बौ रामदेहात्तथापरौ। तौ राजपुत्रौ' इत्यादिना हि रामपुत्रत्वमनयोः सच्यते तस्मादिदमसङ्गतमिति चेन्न सीतापुत्रत्वादेरत्राकथनात् रामसादृश्यमात्रस्य राजपुत्रान्तरेष्वपि संभवात्। अयं च प्रबन्धो वेदोपबृंहणरूपो वेदान्तार्थमुपबृंहयति। 'प्रायेण पूर्वभागार्थो धर्मशास्त्रेण कथ्यते। इतिहासपुराणाभ्यां वेदान्तार्थः प्रकाश्यते' इति वचनात्। तत्र "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति" श्रुतम् तत्किं जगज्जन्मादिकारणं ब्रह्मविष्णुरुत ब्रह्मरुद्रादिष्वन्यतम इत्यपेक्षायां रामत्वेनावतीर्णो विष्णुरेव वेदान्तवेद्यं परब्रह्मेत्युच्यते 'उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये'इत्युक्तषड्विधतात्पर्यलिङ्गसंभवात्। तथाहि उपक्रमे तावत् 'को न्वस्मिन्' इत्यादिना वेदान्तोदितसकलगुणसंपन्नः किं विष्णुरुतान्यो ब्रह्मादिष्वन्यतम इति वाल्मीकिना पृष्टे 'इक्ष्वाकुवंशप्रभवो रामः' इत्यादिना रामत्वेनावतीर्णो विष्णुरेवेति नारदेनोक्तम्। उपसंहारे च चतुर्मुखः प्राह 'तवाहं पूर्वके भावे पुत्रः परपुरञ्जय। संक्षिप्य च पुरा लोकान्मायया स्वयमेव हि ॥ महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः। पद्मे दिव्यैकसंकाशे नाभ्यामुत्पाद्य मामपि ॥ प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितम्' इत्यादिना सर्वजगत्कारणप्रजापतिजनकत्वेन सकलजगत्कारणं ब्रह्म विष्णुरेवेत्युक्तम्। अभ्यासश्च तस्यैव दृश्यते बालकाण्डे 'एतस्मिन्नन्तरे विष्णुरुपजातो महाद्युतिः। शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः' इति जगत्कारणत्वमुक्तम्। तत उत्तरत्र देवा- 'त्वं गतिः परमा देव सर्वेषां नः परन्तप' इत्याहुः। तेन परत्वासाधारणं सर्वशरण्यत्वमुक्तम्। तत उत्तरत्र 'ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः। स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम्' इति सर्वस्तुत्यत्वमुक्तम्। ततो विश्वामित्रः 'अहं वेद्मि महात्मानं रामं सत्यपराक्रमम्। वसिष्ठश्च महातेजा ये चान्ये तपसि स्थिताः' इति। "वेदाहमेतं पुरुषं महान्तम्। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति श्रुत्युक्तरीत्या महापुरुषत्वं तपोबलं विना तस्य दुर्ज्ञेयत्वं चाह। सीताविवाहे वसिष्ठोपि 'अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः। तस्मान्मरीचिः संजज्ञे मरीचेः काश्यपः सुतः' इति सर्वमूलकारणत्वं प्राचीकशत्। परशुरामोऽपि 'अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तदा' इति सर्वाधिकत्वं निदर्शितवान्। अयोध्याकाण्डे 'स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः। अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः' इति सनातनत्वमुक्तम्। उत्तरत्र 'आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः' इत्याकाशशब्देन स्वयंप्रकाशत्वं व्यापकत्वं चाह। आरण्यकाण्डे मारीचेन 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इति परिच्छेदातीतमहिमत्वमुक्तम्। किष्किन्धाकाण्डे तारावचनम् 'त्वमप्रमेयश्च दुरासदश्च जितेन्द्रियश्चोत्तमधार्मिकश्च। अक्षय्यकीर्तिश्च विचक्षणश्च क्षितिक्षमावान् क्षतजोपमाक्षः'। उत्तरत्र 'निवासवृक्षः साधूनामापन्नानां परा गतिः। आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् ॥ ज्ञानविज्ञानसंपन्नो निदेशे निरतः पितुः। धातूनामिव शैलेन्द्रो गुणानामाकरो महान्' इति। अनेन च ज्ञानानन्दादिसमस्तकल्याणगुणाकरत्वमुक्तम्। सुन्दरकाण्डे 'ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा। इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम्' इति सर्वसंहर्तृत्वं द्योतितम्। उत्तरत्र 'किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः। अनन्तमव्यक्तमचिन्त्यरूपं स्वमायया सांप्रतमागतं वा' द्वितीयो वाकारोऽवधारणार्थः। अनेनानन्तरूपत्वमुक्तम्। युद्धकाण्डे विष्णुरेव कथं जगत्कारणं अन्येषामपि "हिरण्यगर्भस्समवर्तताग्रे यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिना तत्त्वश्रवणादित्याशङ्क्य तेभ्यः सर्वेभ्यः श्रेष्ठत्वप्रतिपादनाद्धिरण्यगर्भशिवेन्द्रादिशब्दाः सद्ब्रह्मात्मशब्दवद्विष्णुपरा एवेत्याशयेनोच्यते। 'व्यक्तमेष महायोगी परमात्मा सनातनः। अनादिमध्यनिधनो महतः परमो महान् ॥ तमसः परमो धाता शङ्खचक्रगदाधरः। श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः' इति। अनेन च परमात्मत्वश्रियः पतित्वादिकमुक्तम्। उत्तरत्र ब्रह्मा 'भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः। एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित्' इत्यादि। अनेन तस्य नारायणशब्दवाच्यत्वमुक्तम्। अपू-

१ स्वयमेवेति भाति। २ कश्यप इति भाति

वंता च प्रमाणान्तराप्राप्तिः। न हि परतत्त्वस्य विष्णुत्वं प्रमाणान्तरादवगन्तुं शक्यम्। फलं च भगवत्सालोक्यादिकामित्यन्ते सुव्यक्तम्। अर्थवादोपपत्ती च बालकाण्डे दर्शिते। 'इमे द्वे धनुषी श्रेष्ठे' इत्यादिनार्थवादमुक्त्वा 'जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः। अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तदा' इत्यादिना ब्रह्मप्रमुखैस्सर्षिगणैर्देवैर्मीमांसापूर्वकं विष्णुरुद्रयोर्मध्ये विष्णोराधिक्यनिर्णयोक्तेरुपपत्तिरुक्ता। नच वाच्यं मेनिरे इति वचनात् 'महाशरत्तरस्तथा' इति वरदानकृतामिदमाधिक्यमिति तथात्वे तस्य रोषानुपपत्तेः 'धनु रुद्रस्य संकुद्धः' इति ह्युक्तम्। किञ्चागस्त्याश्रमे 'स तत्र ब्रह्मणः स्थानं विष्णोः स्थानं तथैव च। अग्नेः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः॥ सोमस्थानं भगस्थानं स्थानं कौबेरमेव च' इत्यादिना ब्रह्मादीनामगस्त्योपास्यत्वमुक्त्वा रुद्रस्य तदकथनादपूज्यत्वमुच्यते। नचेमान्यगस्त्यपूजकब्रह्मादिस्थानानीति वाच्यम् असंभवात्। 'अत्र देवाः सगन्धर्वास्सिद्धाश्च परमर्षयः। अगस्त्यं नियताहारं सततं पर्युपासते' इति वचनं ब्रह्मादिव्यतिरिक्तकेवलदेवविषयम्। किञ्च यथा गृहस्थस्य गृहे देवगृहसत्त्वे गृहस्थस्यैव पूजकत्वं स्वरसतः प्रतीयते एवमेवात्रापि नापलापावकाशः। किञ्च दक्षयज्ञवधे 'यस्माद्भागार्थिनो भागः कल्पितो नैव मे सुराः। वराङ्गानि महार्हाणि धनुषा शातयामि वः' इति रुद्रस्य यज्ञभागाकल्पनादपूज्यत्वादत्र तस्य स्थानानिर्देशः॥ ननु यदि विष्णुः परा देवता कथं तर्हि तस्य रामत्वेन जन्मेति चेन्न "अजायमानो बहुधा विजायते" इत्युक्तरीत्या लोकानुजिघृक्षाकृतं तदिति चोद्यानवकाशात्। मोक्षप्रदत्वं च परदेवतासाधारणम्। अत्रोच्यते 'या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः। अपरावर्तिनां या च या च भूमिप्रदायिनाम्॥ मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान्' इति अत्रापरावर्तित्वं पुनरावृत्तिशून्यत्वं मुक्तिरिति यावत् "न स पुनरावर्तते" इति श्रुतेः नच रणादपलायनमुच्यत इति वक्तुं शक्यते तस्य स्वतः सिद्धत्वेन तत्फलस्यानुग्राह्यत्वात् तथा च यज्ञादिफलावधिभूतां मुक्तिं प्रामुहीत्यर्थः अत एव नृसिंहपुराणे 'मत्कृते निधनं यस्मात्त्वया प्राप्तं द्विजोत्तम तस्मात्त्वं मत्प्रसादेन विष्णुलोकमवाप्स्यसि' इति। एवमुपक्रमादिषड्विधतात्पर्यलिङ्गैर्वेदान्तवेद्यं परतत्त्वं विष्णुरेवेति श्रीरामायणेनोपबृंह्यते। एवमेवान्ते ब्रह्माप्याह 'अस्याः परिषदो मध्ये यद्ब्रवीमि निबोध तत्। एतदेव हि काव्यं ते काव्यानामुत्तमं श्रुतम्॥ सर्वं विस्तरतो राजन् व्याख्यास्यति न संशयः। आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम्॥ न ह्यन्योर्हति काव्यानां यशोभाग्राघवादृते' इति एवं स्थिते यत्केनचिन्नवीनेन जल्पितं व्यञ्जनावृत्त्या शिवपरं रामायणमिति तदपहास्यमेव न ह्यन्योर्हतीति प्रतिषिद्धरुद्रस्य प्रतिपाद्यकोव्यन्तर्भाववचनस्य केवलबालिशप्रलपितत्वात्। यच्च रामेणादित्योपस्थानादिकं कृतं तत्सर्वं विभ्रामित्राद्युपासनवन्मनुष्यभावनानुसारेणेति विज्ञेयम्। विशेषतश्च तत्र वक्ष्यामः।

'श्रीविष्णोः प्रथमे काण्डे जगज्जननहेतुता। द्वितीये स्थितिहेतुत्वं तृतीये मोक्षदायिता॥ चतुर्थे गुणसंपत्तिः पञ्चमे सर्वहन्तृता। षष्ठे वेदान्तवेद्यत्वं सप्तमे स्रष्टृहेतुता॥ एवं विष्णुः परं तत्त्वं रामात्मेति सुनिश्चितम्॥ श्रीशैलपूर्णायतिशेखरेण श्रुतान् पुराष्टादशधा प्रभिन्नान्। रामायणार्थान्क्रमशः करोमि व्यक्ताव्यक्तोठाराति गुरूपदिष्टान्' गत एकोर्थः। द्वितीयस्तु। एवंभूतं परतत्त्वं केन प्राप्यते इत्याकाङ्क्षायां तत्प्राप्त्युपायभूतां शरणागतिम् "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रसादं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति श्रुतिमुपबृंहयन् वाल्मीकिर्ब्रह्मस्मिन् रामायणे उपक्रमप्रभृत्युपसंहारान्तमनेकाधिकारिफलविशेषादिप्रदर्शनमुखेनाखिलफलसाधनतया प्रतिपादयति। तथा हि उपक्रमे तावत् 'एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः। शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः' इति सर्वशेषी सर्वेश्वरो रक्षापेक्षाप्रतीक्षो रक्षणसमयो लब्ध इति समुद्भूतौज्ज्वल्यो रक्षणोपकरणैः सह सन्नद्धोभ्येत्य तस्थौ तदा 'देवगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः' इति रावणवधरूपफलार्थं ब्रह्मरुद्रादिदेवगणशरणागतिरुक्ता। ततस्त्रिशङ्कुगुनःशेफादिवृत्तान्तेषु विभ्रामित्रादिव्यापारविशेषानुदीर्य शरणागतरक्षणं परमो धर्मः समर्थकारुणिकविषया शरणागतिः फलावेनाभूतेति प्रदर्शितम्। ततश्च 'स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः। सीतामुवाचातियशा राघवं च महाव्रतम्' इति पुरुषकारपुरस्करणपुरःसरा शरणागतिः कार्येत्युदीरितम्। ततो भरतः 'शेष्ये पुरस्ताच्छालायां यावन्मे न प्रसीदति' इति रामाभिषेकफलाय शरणवरणमकरोत्। अत्र रावणवधाय कृतदेवगणप्रपत्तिफलदानाय निर्गमनात् तदानीं रामः स्वप्रतिनिधिभूतपादुकाप्रदानेन तत्सफलं कृत्वा पश्चात् देवगणमनोरथपूरणान्तरमात्मानमभ्यषिञ्चत् अतो न शरणागतिवैफल्यं चोद्यम्। अथ दण्डकारण्यवासिभिर्विरोधिनिरसनाय शरणागतिरनुष्ठिता 'ते वयं भवता रक्ष्या भवद्विषयवासिनः। नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वर' इति। अत्र कोसलजनपदवासिनामिव भगवद्विषयवास एव शरणागतिः। तदनन्तरम् 'स पित्रा च परित्यक्तः सुरैश्च स महर्षिभिः। त्रींल्लोकान् संपरिक्रम्य तमेव शरणं गतः॥ स तं निपतितं भूमौ शरण्यः शरणागतम्। वधार्हमपि काकुत्स्थः कृपया पर्यपालयत्' इति काकवृत्तान्तेनाग्रतः पतनमेव शरणागतिरित्यदर्श। तदनु सुग्रीववृत्तान्तेन 'कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम्। अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात्' इति शरणागतिरञ्जलिरूपोक्ता। अथ सीतावचनेन 'मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता। वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः॥ विदितः स हि धर्मज्ञः शरणागतवत्सलः। तेन मैत्री भवतु ते यदि जीवितुमिच्छसि' इत्यनेनानुकूल्यमेव शरणागतिरित्यबोधि। उपरि 'सोहं परुषितस्तेन दासवच्चावमानितः। त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः' इति विभीष-

णशरणागत्या विरोधिपरित्यागपूर्वकत्वमुक्तम् । ' ततः सागरवेलायां दर्भानास्तीर्य राघवः । अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः ' इति रामशरणागत्या योग्यस्य नायोग्यताऽन्वेष्टव्या अयोग्यस्य च न योग्यतेत्युक्तम् । अशुचिभूतलङ्कानिर्गतमात्र एव हि विभीषणश्शरणमवृणोत् । रामशरणागतेः फलाभावः समर्थकारुणिकविषयत्वाभावादित्याहुः । उत्तरत्र ' अभियाचाम वैदेहीमेतद्धि मम रोचते । राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ' इति त्रिजटावचनानुमतिमात्रेण हनुमद्वयात् सर्वासां रक्षितत्वकथनादन्यविषयेऽन्येनापि कृता शरणागतिः फलवतीति निदर्शितम् । विभीषणशरणागत्यैव तत्सचिवानां रक्षणात् शरणागतसंबन्धिनोऽपि भगवत्कटाक्षपात्रभूता एवेति निरणायि । एवमन्यत्रापि द्रष्टव्यम् । एवमुपक्रमप्रभृत्योपसंहारात् प्रतिपादिता शरणागतिरेव सर्वफलप्रदा सैव मुक्तेरपि हेतुरित्युक्तम् । विशेषस्तु तत्र प्रकरणे प्रपञ्चयिष्यते । अस्य चोपायस्य प्राप्यं भगवत्प्राप्तिपूर्वकं तत्कैङ्कर्यमेवेति रामायणेन प्रतिपाद्यते । तथा हि उपक्रमे देवजातीयशरणागते रामकैङ्कर्य प्रधानफलमित्युच्यते अप्सरःप्रभृतिष्ववतीर्य तैस्तदनुवर्तनोपदेशात् रावणवधस्त्वानुषङ्किकः । लक्ष्मणोऽपि प्रपद्याह ' अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते । भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ' इति तेन सर्वदेशसर्वकालसर्वावस्थोचितसर्वकैङ्कर्यफलमिति व्यञ्जितम् । भरतोऽपि रामकैङ्कर्यायैव तदभिषेकं प्रार्थ्य पादुकाविषयकैङ्कर्यक्रमेण मनीषितमलभत । दण्डकारण्यवासिनां शरणागतेरपि वाचिकादिरूपमेव कैङ्कर्य फलमित्यवगम्यते । ' ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः । मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः' इत्युक्तेः सुग्रीवविभीषणादिप्रवृत्तेरपि मुख्यं फलं कैङ्कर्यमन्यदानुषङ्किकमिति स्पष्टम् । ' अथ हरिवरनाथः प्राप्य संग्रामकीर्तिं निशिचरपतिमाजौ योजयित्वा श्रमेण । गगनमतिविशालं लङ्घयित्वार्कमुनुर्हरिवरगणमध्ये रामपार्श्वं जगाम ॥ परित्यक्ता मया लङ्का मित्राणि च धनानि च । भवद्गतं मे राज्यं च जीवितं च सुखानि च ' इत्यादिना । एवं प्राणार्थिनः काकस्य प्राणप्रदानेन तत्प्रपत्तिः सफला । असत्प्रकृतेरस्य पुनरप्येवं दुरितप्रवृत्तिर्मा भूदिति शिक्षणरूपानुग्रहायैकाक्षिनिरसनेनास्त्रं निवर्तयामास । यथा परशुरामं प्रति प्रत्युक्तमस्त्रं तस्मिन् प्राप्तिकूल्यान्निवृत्ते तन्मनीषितविरोधिसकृतेषु प्रायुङ्क्त । यथा च समुद्रं प्रत्युपात्तमस्त्रम् तस्मिन् सानुतापे शरणागते द्विषत्सु आश्रितानां पापकृत्याप्रवेशनन्यायेन तद्विरोध्यसुरेषु प्रयुयुजे रामप्रपत्तिस्त्वाकिंचन्यानन्यगतित्वरूपाधिकाररहितेन कृतत्वादल्पशक्तिकविषयत्वाच्च विफलेति ध्येयम् ।'समुद्रं राघवो राजा शरणं गन्तुमर्हति'इति विभीषणोक्तिस्तु स्वप्रपत्तेः फलदर्शनकृता । तस्मादनेन प्रकारेण शरणागतेर्देशकालाधिकारिफलनियमाभावेऽपि विषयनियमोऽस्तीत्युक्तम् । इयं च प्रपत्तिरस्मिन्प्रबन्धे प्रधानतया प्रतिपाद्यते । अत एव श्रीरामायणं दीर्घशरणागतिरित्याभाणकः । तदुपयुक्तयेतरेषामर्थानां प्रतिपादनम् । तथाहि समर्थकारुणिकसुशीलविषयिणी शरणागतिः फलदायिनी । तत्र रौद्रधनुर्भङ्गपरशुरामजयसालभेदनसमुद्रबन्धनादिभिरुक्तपरत्वप्रतिपादनैश्च सामर्थ्यं सर्वज्ञत्वादिकं चोक्तम् । सीतावियोगकालिकवृत्तान्तविशेषैः परमकारुणिकत्वम् । गुहशबरीसुग्रीवादिभिर्नीरन्ध्रसंश्लेषेण सौशील्यम् । विश्वामित्राध्वरत्राणदण्डकारण्यवासिमुनिजनरक्षणरावणबाधितेन्द्रादिसकलदेवगणपरिपालनैः निजजनपदजनानामात्मसौन्दर्यशीलादिभिः प्रीतिमुत्पाद्य स्वपदप्राप्तिरूपसाक्षादवतारप्रयोजनभूतमोक्षप्रदानैश्च सर्वरक्षकत्वम् । अतः समर्थपरमकारुणिकसुशीलभगवत्प्रपत्तेः सकलफलसाधनत्वेऽपि अधिकारिविशेषानुष्ठितायास्तस्या भगवत्प्राप्तिपूर्वकतत्कैङ्कर्यरूपमोक्ष एव मुख्यं फलम् आनुषङ्किकं फलान्तरमिति सुस्पष्टम् एवं सर्वत्र द्रष्टव्यम् इयं च प्रपत्तिः पुरुषकारेण विना न फलाय भवतीत्यर्थोऽस्मिन्प्रबन्धे प्रधानतया प्रतिपाद्यते ।'सीतायाश्चरितं महत्' इति युक्तं तस्याश्च विश्लेषत्रयेण कृपापारतन्त्र्यानन्यार्हत्वरूपपुरुषकारधर्मप्रतिपादनात् । तत्संनिधानेन काकः शिरो लेभे तदभावान्न रावणः । विभीषणोऽपि ' निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् ' इति षट्कसुखेनैव रामं शरणमवृणुत । रामोऽपि ' आनयैनं हरिश्रेष्ठ ' इति षट्कसुखेनैव विभीषणं विषयीचकार । एवं सुग्रीवोऽपि रामभक्तहनुमन्मुखेन रामं शरणं ययौ इत्येवं ज्ञातव्यम् । एवंभूतोपायाधिकारिस्वरूपं शेषत्वं पारतन्त्र्यं च तत्र शेषत्वं लक्ष्मणाचारेण प्राचीकशत् ' अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः । कुरुष्व मामनुचरं वैयर्थ्यं नेह विद्यते ॥ कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्पते ' इत्यादिना भरतमुखेन पारतन्त्र्यं प्रकटीकृतम् ' विललाप सभामध्ये जगर्हे च पुरोहितम् । राज्यं चाहं च रामस्य धर्म वक्तुमिहार्हसि ' इत्यादिना ' सर्वात्मना पर्यनुनीयमाना यदा न सौमित्रिरुपैति योगम् । नियुज्यमानो भुवि यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ' इत्यन्तेन श्रीशत्रुघ्नव्यापारेण भागवतपारतन्त्र्यं प्राचीकशत् ' गच्छता मातुलकुलं भरतेन तदानघः । शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ' इत्यादिना ॥ अस्य चाधिकारिणो ज्ञातव्यमर्थपञ्चकमत्रोच्यते । तथोक्तम् ' प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः । प्राप्त्युपायं फलं प्राप्तेस्तथा प्राप्तिविरोधि च ॥ वदन्ति सकला वेदाः सेतिहासपुराणकाः । मुनयश्च महात्मानो वेदवेदाङ्गपारगाः ' इति तत्र रामप्रस्तावेन परस्वरूपं लक्ष्मणादिवृत्तान्तेन प्रत्यगात्मस्वरूपं शरणागतिवर्णनेनोपायस्वरूपं विभीषणादिकथया फलस्वरूपं भगवत्कैङ्कर्यरूपं रावणादिवृत्तान्तेन विरोधिस्वरूपं चोक्तमिति ज्ञेयम् ॥ अस्याधिकारिण आकिंचन्यमनन्यगतित्वं चापेक्षितमिति वक्तुं ब्रह्मरुद्रादिदत्तवरस्य रावणस्य वधेन ब्रह्मरुद्रादिदेवतान्तराणां दशरथचरितेन पितुः काकादिवृत्तान्तेन मात्रादेः विभीषणमेघनादादिवृत्तान्तेन भ्रातृपुत्रादेश्चारक्षकत्वोक्तिः॥ अस्य च भगवज्ज्ञा-

येषां स सगरो नाम सागरो येन खानितः । षष्टिपुत्रसहस्राणि यं यान्तं पर्यवारयन् ॥ २ ॥
इक्ष्वाकूणामिदं तेषां राज्ञां वंशे महात्मनाम् । महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ॥ ३ ॥

नलाभ आचार्यमूल इति हनुमच्चरितेन दर्शितं तदेव सुन्दरकाण्डे-वक्ष्यामः ॥ अनेन चाधिकारिणा 'कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्' इत्युक्तरीत्या शरीरपातावधिकालः प्रतीक्षणीय इति सीताध्यवसायेनोच्यते । ' शरैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः । मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ' इति ह्युक्तम् । लङ्का नाम शरीरं रावणकुम्भकर्णावहङ्कारममकारौ इन्द्रजिदादयः कामक्रोधादयः विभीषणो विवेकः । तत्र रुद्धा-सीता चेतनः तस्य च भगवज्ज्ञानं हनुमताऽऽचार्येण तादृ-शशरीरध्वंसपूर्वकं तदन्तर्निरुद्धचेतनोद्धरणं भगवतैवेति विस्तरो भविष्यति ॥ अस्य च यावच्छरीरं कर्तव्यविषये रामा-दिवद्वर्तितव्यं न रावणादिवदित्युपदेशश्च यथायोगं क्रियते ॥ अस्य च वासयोग्यो देशो भगवत्संनिधिमान्देश एवेति कोसल-जनपदस्थजनवृत्तान्तेनोक्तम् ॥ अस्य च कालक्षेपोपि रामायणे-नैव द्वयविवरणरूपत्वात् । अत एव रामायणं दीर्घशरणाग-तिरित्यभियुक्तैरुक्तम् । द्वयमर्थानुसंधानेन सः सदैवं वक्तेति च भाष्यकारः । तत्र बालकाण्डेन श्रीमच्छब्दार्थ उक्तः । अयो-ध्याकाण्डेन नारायणशब्दार्थः । कल्याणगुणानामुपवर्णनात् । आरण्यकाण्डेन ' ते तं सोममिवोद्यन्तम्' इत्यादिना दिव्यमङ्ग-लविग्रहवर्णनाच्चरणशब्दार्थः । किष्किन्धाकाण्डसुन्दरकाण्डा-भ्यां शरणशब्दार्थः । युद्धकाण्डेन प्रपद्य इत्यस्यार्थः । उत्तर-काण्डेन मुक्तिफलकीर्तनादुत्तरखण्डार्थः ॥ अस्य चाधिकारिणः सदा जप्यं रामायणमेवेति दर्शयितुं गायत्र्यर्थोऽत्र प्रतिपाद्यते । तथाहि बालकाण्डे वेदप्रसिद्धजगत्प्रसूतिहेतुभूतभगवत्स्वरूपव-र्णनात् तत्सवितृशब्दार्थः । अयोध्याकाण्डकिष्किन्धाकाण्डयो-र्गुणगणवर्णनाद्वरेण्यशब्दार्थः । आरण्यकाण्डे तेजोमयशरीरवर्ण-नात् भर्गश्शब्दार्थः । सुन्दरकाण्डे दिव्यमङ्गलविग्रहलक्षणवर्ण-नाद्देवशब्दार्थः । युद्धकाण्डे धीमहिशब्दार्थः । शरणागत्युक्तेः उत्तरकाण्डे मुक्तिफलकीर्तनात्तृतीयपादार्थ इति ॥ एतेन चाधि-कारिणा चार्वाकबौद्धादिदर्शनाद्यसच्छास्त्रस्पर्शोऽपि न कार्य इति जाबालिलक्ष्मणवचनतत्प्रत्यादेशादिना निर्णीयते ॥ महतामपि व्यसनं भवति अतः संसारे जिहासा कार्येति वैराग्यसंपत्तये नागपाशब्रह्मास्त्रबन्धसीतापहरणराज्यभ्रंशादिना व्यक्तमुक्तं वि-स्तरस्तु तत्रतत्र प्रदर्शयिष्यते दिङ्मात्रमत्र प्रदर्शितम् ॥ लोक-व्यवहाराय चतुःषष्टिकलार्थोऽपि संग्रहेणात्र प्रतिपाद्यते 'यदि-हास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' इति न्यायात् । तथाहि प्रतिपादितया दिशा वेदार्थो दर्शितः । हनुमद्वचनश्लाघायाम् 'अन-या चित्रया वाचा त्रिस्थानव्यञ्जनस्थया' इत्यादौ शिक्षार्थः । अश्व-मेधादिप्रकरणे कल्पसूत्रार्थः । ' नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ' इत्यादौ व्याकरणार्थः । एवमन्यत्सर्वमत्र सूक्ष्म-बुद्ध्या ज्ञातव्यम् ॥ एवमेतेष्टादशार्था आचार्योपदिष्टाः । तत्र प्रथमं रावणनिबर्हणफलां गीर्वाणगणशरणागतिं दर्शयितुं पीठि-कामारचयति वाजिमेधपर्यन्तवृत्तान्तेन । अग्निपुरुषोत्थानमा-रभ्य रावणवधपर्यन्तो वृत्तान्तस्तत्फलम् उत्तरकाण्डे स्वाव-तारप्रयोजनं धर्मस्थापनं मुक्तिप्रदानं च वक्तव्यमन्यत्तात्पर्यं त-त्रतत्र अभिधीयते । ' सन्तोऽत्युक्तमनुक्तं च समाधातुमिहार्हथ । नमः शठारिगुरवे नमो वल्मीकजन्मने ॥ नमो नारायणायेदं नमो रामाय विष्णवे ' इत्थं संक्षेपेण " आचार्यवान् पुरुषो वेद । आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत् " इतिश्रु-त्युक्तरीत्याऽऽचार्यादेव विद्या प्राप्तव्येत्यसमर्थमाभिव्यञ्जयन् स्वेन नारदाद्विदितमर्थं प्राचीकशत् । अथ सर्गत्रयेणाचार्यप्रसादकार्यं सर्ववस्तुसाक्षात्कारस्तद्विषयप्रबन्धनिर्माणचातुर्यं चाभिहितम् । अथ परमकारुणिको भगवान्वाल्मीकिः रामायणाख्यं काव्यमार-भमाणः प्रारीप्सितप्रबन्धस्य निर्विघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थं च ' आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् ' इत्युक्तरीत्या काव्यमुखत्वेनादौ कर्तव्यं वस्तुनिर्देशं कुर्वन् अर्थाद्विषयप्रयोजने च दर्शयन् कर्तव्यं प्रतिजानानः सत्परिग्रहमर्थयते-**सर्वापूर्व-मित्यादिश्लोकचतुष्टयेन** । सर्वेति कृत्स्ना सप्तद्वीपात्मिका इयं वसुन्धरा भूमिः जयेन शालन्ते भासन्त इति जयशालिनः तेषां शपथोरभेदेन व्यवहारः । येषां नृपाणां प्रजापतिं मनुम् 'मनुः प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ' इति वक्ष्यमाणत्वात् । उपादाय आरभ्य सर्वापूर्व सर्वेषामितरेषां राज्ञामपूर्व दुर्लभं यथा भवति तथा आसीत्स्वमासीदित्यर्थः ॥ १ ॥

२-३] ति० टी०-किं च येषां वंशे स सगरो नामाभूत् सागर इत्यादिना समुद्रे सागरशब्दप्रवृत्तिस्तदधीनेति सूचितम् षष्टिगुणितानि पुत्रसहस्राणि षष्टिपुत्रसहस्राणि कृचित्तु 'षष्टिः' इति पृथक्पदपाठः अनेन तदुद्धारार्थं तद्वंश्येन जगत्पवित्रीकरणसमर्था गङ्गा यद्वंशेऽवतारितेति व्यज्यते तेन चातिशयितं तद्वंशमाहात्म्यं सूचितम् तद्वंशस्य गङ्गापरनामकभगवदवतारयोग्यता च तेन सूचिता ॥ २ ॥ तेषामिक्ष्वाकूणां वंशे वंशविषये रामायणमिति नाम्ना प्रसिद्धं महदाख्यानमुत्पन्नमिति योजना इक्ष्वाकुपत्ये-ष्विक्ष्वाकुत्वारोपादिक्ष्वाकूणामित्युक्तिः ॥ ३ ॥

रा० टी०-येषामिति । यान्तं भोजनार्थं गच्छन्तं यं षष्टिः पुत्रसहस्राणि पर्यवारयन् सहैवागच्छन् येन सागरः समु-द्रजननयोग्या भूमिः खानितः षष्टिसहस्रसङ्ख्याकपुत्रैरवदारितः सः प्रसिद्धः सगरो नाम नृपो येषामभवदिति शेषः । सगरो नामे-त्यनेन नृपतिलाभः शब्दार्थयोस्तादात्म्यात् किञ्च नामेति प्र-सिद्धार्थकम् । क्वचित् षष्टिरिति व्यस्तः पाठ इति भट्टैरुक्तं स च सूपपन्नः ॥ २ ॥ इक्ष्वाकूणामिति । तेषामिक्ष्वाकूणामिक्ष्वाकु-वंशप्रभवाणां महात्मनां राज्ञां वंशे महत्सर्वपूजनीयमिदं रामा-णयं रामपर्यवसानकमाख्यानमुत्पन्नं प्रकटीभूतमिति श्रुतम्

तदिदं वर्तयिष्यावः सर्वं निखिलमादितः । धर्मकामार्थसहितं श्रोतव्यमनसूयता ॥ ४ ॥
कोशलो नाम मुदितः स्फीतो जनपदो महान् । निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥ ५ ॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता । मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ ६ ॥

नारदब्रह्मोक्त्या निश्चितम् इक्ष्वाकूणां वंशे रामायणमुत्पन्नमित्यनेन रामरामायणयोस्तादात्म्यं सूचितम् प्रसिद्धं च प्रतिपाद्यप्रतिपादकयोस्तादात्म्यम् ' रामेति द्व्यक्षरं नाम ' इत्यादौ । श्लोकत्रयमेकान्वयि ॥ ३ ॥

गो० टी०—जयशालित्वं कुत्रचिदुदाहृत्य दर्शयति—येषामिति । येषां नृपाणां मध्ये सः प्रसिद्धः सगरः प्रसिद्धिमेवाह सागरः समुद्रः स्वनामाङ्कितः येन सगरेण खनितः षष्ट्या पुत्रसहस्रैरवदारितः नाम प्रसिद्धौ किञ्च यान्तं दण्डयात्रया गच्छन्तं यं षष्टिः पुत्रसहस्राणि पर्यवारयन् परितोऽगच्छन् इक्ष्वाकुप्रभृतिषु विद्यमानेषु सगरमात्रकीर्तनं तेनाखिलाया भूमेः पुनरुद्धृतत्वात् । षष्टिरिति षष्ठिसूत्रे निपातितः अत एकवचनस्यापि बहुवचनविशेषणत्वम् ॥ २ ॥ इक्ष्वाकूणामिति । महात्मनां महाप्रभावानाम् इक्ष्वाकूणामिक्ष्वाकुवंश्यानाम् " तद्राजस्य बहुषु तेनैवास्त्रियाम् " इति तद्राजप्रत्ययस्य बह्वर्थत्वाल्लुक् । तेषां राज्ञां वंशे वंश्ये रामे विषये रामायणमिति श्रुतं प्रसिद्धं महत् पूजनीयमिदमाख्यानं कथाप्रबन्ध उत्पन्नम् । ब्रह्मणः प्रसादादिति शेषः तत्र निमित्तमात्रमहमिति विनयोक्तिः । अत्र वर्णनीयस्य नायकस्य सर्वापूर्वमित्यनेन महाभाग्यत्वं नाम गुण उक्तः । येषामित्यादिश्लोकद्वयेन महाकुलीनत्वम् ॥ ३ ॥

४] **ति० टी०**—तदिदं बुद्धिस्थम् आदित आदिमारभ्य निखिलमुत्तरकाण्डान्तम् सर्वम् सर्वशब्दोऽवयवकात्स्न्यें सर्वावयवकम् वर्णपदच्युतिरहितमिति यावत् । धर्मकामार्थाः सहिता यस्मात्तत् सहिता इत्यत्र केनेत्याकाङ्क्षायां मोक्षेणेति गम्यते तेन पुरुषार्थचतुष्टयसाधनमिति फलितम् वर्तयिष्यावो गास्यावः तदनसूयतामसूयामकुर्वता श्रोतव्यम् अनेनासूयाराहित्यमेवैतच्छ्रवणाधिकारिविशेषणमित्युक्तम् सर्वपुरुषार्थसाधनत्वाच्च श्रवणेऽत्यादरः सूचितः ॥ ४ ॥

रा० टी०—तदिति । धर्मकामार्थसहितं धर्मश्च कामश्च अर्थश्च तेन वासनात्यागेन सहितः सहो मोक्षः त्यागार्थकहाधातोः घञर्थे कः । किञ्च समस्तकर्म तदुपलक्षितजन्ममरणादि जहाति हापयति स एव स च ते ते जाता अस्मात् तारकादित्वादितच् धर्मकामार्थमोक्षप्रदमित्यर्थः । किञ्च धर्मकामार्थाः सन्ति अस्मिन्निति हितेन मोक्षेण सहितं तदेव तदिति कर्मधारयः किञ्चार्थशब्देन लौकिकार्थपुरुषार्थौ गृह्येते पुरुषार्थश्च मोक्ष एवेति सर्वत्र प्रसिद्धम् तथा च धर्मश्च कामश्च अर्थौ च तैः सहितं तत्प्रसिद्धमिदं बुद्धिविषयीभूतं सर्वं विस्तीर्णरामायणमादितः वर्तयिष्यामि प्रकटयिष्यामि अतः अनसूयया असूयारहितबुद्ध्या निखिलं श्रोतव्यं धर्मकामार्थमोक्षार्थिभिः ग्रहीतव्यम् । अनसूयता इति भट्टसंमतः पाठः ॥ ४ ॥

गो० टी०—ब्रह्मप्रसादादेवोत्पन्नत्वे तव किं कृत्यं तत्राह—तदिति । तद्ब्रह्मप्रसादोत्पन्नमिदं रामायणं वर्तयिष्यामि प्रवर्तयिष्यामि धर्मकामार्थसहितं तत्प्रतिपादकं तत्फलकं वा सर्वं रामायणमादितः तदवतारदेशात्प्रभृति निखिलमन्यूनं यथा भवति तथा अनसूयया असूयाभिन्नया श्रद्धयेत्यर्थः श्रोतव्यं न तु स्वयं लिखितपाठेन निरीक्षितव्यम् ब्रह्मण एवोत्पन्नमिदं मम तु तत्प्रवर्तन एवाधिकारः अतः प्रेक्षावद्भिरत्रामया न कर्तव्या किंतु भक्त्यैव श्रोतव्यमिति भावः । अत्र तेषां वंश इत्यनेन विषय उक्तः । धर्मकामार्थसहितमित्यनेन प्रयोजनमुक्तम् । अनसूययेत्यनेन अनसूयवोऽधिकारिणः कार्यकारणभावः संबन्ध इत्यादि बोध्यम् । अत्र मोक्षस्यापि प्रयोजनत्वं सिद्धम् 'सर्वपापैः प्रमुच्यते' इत्युक्तत्वात् ॥ ४ ॥

५] **ति० टी०**—कोशल इति । मुदितः राजभिर्धर्मतः परिपालनात् स्फीत उत्तरोत्तरं वृद्धिं प्राप्तः सरयूतीरे तदुपलक्षितदेशे निविष्टः स्थितः जनपदः अस्तीति शेषः ॥ ५ ॥

रा० टी०—प्रतिज्ञातमाह—कोशल इति । मुदितः नित्यानन्दविशिष्टः स्फीतः समृद्धः महान्सर्वोत्कृष्टः सरयूतीरे निविष्टः सरयूभयतीरसमीपवर्ती प्रभूतधनधान्यवान् उद्भूतधनधान्यविशिष्टः कोशलो नाम प्रसिद्धः जनपदो देश अस्तीति शेषः कोशलस्य मुदितत्वोक्त्या तद्देशस्य चेतनत्वं सूचितम् तेन तस्याप्राकृतत्वं ध्वनितम् ॥ ५ ॥

गो० टी०—अथ रामचरित्रं प्रतिज्ञातं वक्तुं तदवतरणयोग्यदेशवैभवं दर्शयति—कोसल इति । मुदितः संतुष्टजनः मन्यन्ते क्रोशन्तीतिवत्लक्षणा स्फीतः समृद्धः "स्फायः स्फी निष्ठायाम्" इति स्फीभावः । प्रभूतानि बहूनि च तानि धनधान्यानि च तद्वान् कर्मधारयादपि मत्वर्थीयो दृष्टः यथा ' कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने' इत्यादि प्रभूतधनश्चासौ धान्यवांश्चेति कर्मधारयो वा । अत्र धनधान्यसमृद्धेरुक्तत्वात् स्फीत इति जनसमृद्धिरुच्यते । कोसलो नाम कोसल इति प्रसिद्धः महान् विस्तीर्णः जनपदो देशः ' नीवृज्जनपदो देशविषयौ ' इत्यमरः । सरयूतीरे सरयूनामकनद्या उभयतीरे निविष्टः स्थितः ॥ ५ ॥

६] **ति० टी०**—अयोध्येति । तत्र कोशलजनपदेऽयोध्या नाम लोकविश्रुता नगर्यस्ति या मानवेन्द्रेण मनुना स्वयं निर्मितासीत् पुरी सप्तपुर्यन्तर्गता ॥ ६ ॥

रा० टी०—अयोध्येति । तत्र तस्मिन्कोशलदेशे लोकविश्रुता स्वर्गादिलोकप्रसिद्धा या अयोध्या नाम नगरी स्वयमासी-

आयता दश च द्वे च योजनानि महापुरी । श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥ ७ ॥
राजमार्गेण महता सुविभक्तेन शोभिता । मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ ८ ॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः । पुरीमावासयामास दिवं[1] देवपतिर्यथा ॥ ९ ॥
कपाटतोरणवतीं सुविभक्तान्तरापणाम् । सर्वयन्त्रायुधवतीमुषितां[2] सर्वशिल्पिभिः ॥ १० ॥

त्स्वेच्छया प्रकटीभूता सा मानवेन्द्रेण मानवस्वामिना मनुना पुरी स्वराजधानी निर्मिता कृता । एतेनायोध्याया रामाभिन्नत्वनित्यत्वचेतनात्वानि व्यञ्जितानि ॥ ६ ॥

गो० टी०–तत्रावतारयोग्यनगरं वर्णयति–**अयोध्येति** । श्लोकत्रयमेकं वाक्यम् । अयोध्येति नगरी तत्र कोसले आसीत् अस्ति लकारव्यत्ययः । लोके विश्रुता प्रसिद्धा या पुरी मानवानां मनुष्याणामिन्द्रेण स्वामिना मनुना स्वयं स्वसंकल्पेन निर्मिता नाम ॥ ६ ॥

७–८] ति० टी०–**आयतेति** । सरयूतीरोपस्पर्शेन द्वादशयोजनदीर्घा त्रीणि योजनानीति शेषः विस्तीर्णा तिर्यग्विस्तारवती महापथो बहिर्मार्गः ॥ ७ ॥ **राजेति** । राजमार्गः सर्वपण्यशोभितो राजद्वारात्पुरः प्रवृत्तः मुक्तपुष्पाणि विकसितपुष्पाणि ॥ ८ ॥

रा० टी०–प्रकटितायोध्याप्रमाणमाह–**आयतेति** । श्रीमती निखिलैश्वर्यशोभाविशिष्टा सुविभक्ता यथोचितगृहादिविन्यस्ता महापथा तत्तद्दृगमनोचितप्रशंसनीयमार्गा तयोः कर्मधारयः । किञ्च सुविभक्तेभ्यः यथोचितविन्यस्तगृहेभ्यः महापथो यस्यां सा । दश च द्वे च योजनानि आयता द्वादशयोजनदीर्घा त्रीणि योजनानि विस्तीर्णा तिर्यग्विस्तारयुक्ता ॥ ७ ॥ **राजेति** । महता विपुलदीर्घविस्तारवता सुविभक्तेन असंमिलितेन नित्यशो मुक्तपुष्पावकीर्णेन विमानगतदेवाङ्गनादित्याजितपुष्पविशिष्टेन नित्यशो जलसिक्तेन जलसेकविशिष्टेन राजमार्गेण राजगमनोचिताध्वना शोभिता महापुरी अयोध्या आसीदिति शेषः द्वयोरेकत्रान्वयः ॥ ८ ॥

गो० टी०–**आयतेति**। दश च द्वे च योजनानि द्वादश-योजनानि अत्यन्तसंयोगे द्वितीया । आयता दीर्घा मण्डलप्रमाणमिदम् महापुरी मूलनगरम् उपनगरसाहित्ये त्वनेकयोजनाऽस्तीति भावः । श्रीमती कान्तिमती त्रीणि योजनानि विस्तीर्णा योजनत्रयवैपुल्यवती सुष्ठु विभक्ताः उभयपार्श्वतश्चावलीमत्तया कृप्ताः महापथाः नानाजनपदगामिमार्गाः यस्यास्सा ॥७॥ **राजमार्गेणेति** । महता आनगरान्तेन सुविभक्तेन ऋजुतया कृप्तेन मुक्तपुष्पावकीर्णेन मुक्तैः अस्तग्रथितैः पुष्पैरवकीर्णेन नित्यशः सर्वकालेऽपि सप्तम्यर्थे शस्प्रत्ययः जलसिक्तेन वर्षासु स्वत एव अन्यदा मनुष्यै राजमार्गेण राजगृहद्वारात्प्रवृत्तेन मार्गेण शोभिता ॥ ८ ॥

९] ति० टी०–**तां त्विति** । दिवि देवपतिरिन्द्रः पुरीममरावतीं यथावासयामास एवं राजा दशरथस्तां पुरीमावासयामास पूर्वाधिकलोकवसतिमतीं चकार धर्मन्यायबलेन पोषणान्महतो राष्ट्रस्य विशेषेण वर्धनकर्ता ॥ ९ ॥

रा० टी०–**तामिति** । महाराष्ट्रविवर्द्धनः राष्ट्राणि देशान् विवर्द्धयतीति राष्ट्रविवर्द्धनः महानेव स इति कर्मधारयः राजा महाराजाधिराजो दशरथोऽपि तां देवलोकादिप्रसिद्धां पुरीमयोध्यां दिवं स्वर्गं देवपतिर्यथा इन्द्र इव आवासयामास तुशब्दोऽप्यर्थे । दिवीति भाट्टपाठः ॥ ९ ॥

गो० टी०–अथ नगर्या महाराजाधिष्ठितत्वरूपं गुणमाह–**तामिति** । महच्च तद्राष्ट्रं च महाराष्ट्रम् "आन्महतः" इत्यात्वम् तद्विवर्द्धयति धर्मेण पालयतीति महाराष्ट्रविवर्द्धनः कर्तरि ल्युट् महांश्चासौ राष्ट्रविवर्द्धनश्चेति वा पूर्वराजेभ्योधिक इत्यर्थः दशरथाख्यो राजा दिवं स्वर्गं अमरावतीं देवपतिर्यथा इन्द्र इव तां पुरीं तु पूर्वनृपवैलक्षण्येन आवासयामास स्थापयामास " हेतुमति च " इति णिच् ॥ ९ ॥

१०] ति० टी०–**कपाटेति** । तोरणं बहिर्द्वारालंकारदारुबन्धः सुविभक्तमन्तरं येषां तादृशा आपणा यस्यां सा सर्वयन्त्रायुधवतीम् प्राकारोपरीति शेषः उषितां कृतवासाम् ॥ १० ॥

रा० टी०–तामेव वर्णयति–**कपाटेत्यादि** यावत्सर्गसमाप्ति । कपाटतोरणवतीं प्रशस्तकपाटतोरणसंयुक्ताम् तोरणो बहिर्द्वारप्रदेशालङ्कारदारुबन्धः सुविभक्तान्तरापणां सुविभक्तानि परस्परमसंमिलितानि अन्तराणि मध्यानि येषां ते आपणाः निषद्याः यस्यां सा ताम् सर्वयन्त्रायुधवतीं सर्वाणि लोकप्रसिद्धानि यन्त्राणि शिलाक्षेपणीप्रभृतीनि आयुधानि बाणादयः यथोचितस्थाने सन्ति यस्यां सा ताम् सर्वशिल्पिभिः कृत्स्नचित्रकारप्रभृतिभिः उषितां युक्ताम् 'आपणस्तु निषद्यायाम्' इत्यमरः। उषितामिति भट्टसम्मतः पाठः ॥ १० ॥

गो० टी०–वैलक्षण्यमेव दर्शयन्नयोध्यां वर्णयति सर्गशेषेण–**कवाटेति** । तोरणो बहिर्द्वारालङ्कारदारुबन्धः प्रशस्तकवाटतोरणयुक्ताम् प्रशंसायां मतुप् । सुविभक्तं परस्परासंश्लिष्टमन्तरं मध्यप्रदेशो येषां तादृशा आपणाः निषद्या यस्यां सा ताम् 'आपणस्तु निषद्यायाम्' इत्यमरः । सर्वाणि सर्वविधानि यन्त्राणि शिलाक्षेपणीप्रभृतीनि आयुधानि बाणादयः लोके यानि यानि यन्त्रायुधानि सन्ति तद्वतीमित्यर्थः शिल्पिभिश्चित्रकारप्रभृतिभिरुपेतां युक्ताम् ॥ १० ॥

१ दिव. रा. गो. पाठः । २ कवाटतो. गो. पाठः । ३ सुपेता. रा. गो. पाठ. ।

सूतमागधसंबाधां श्रीमतीमतुलप्रभाम् । उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलाम् ॥ ११ ॥
वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीम् । उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥ १२ ॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम् । वाजिवारणसंपूर्णां गोभिरुष्ट्रैः खरैस्तथा ॥ १३ ॥
सामन्तराजसंघैश्च बलिकर्मभिरावृताम् । नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥ १४ ॥
प्रासादै रत्नविकृतैः पर्वतैरिव शोभिताम् । कूटागारैश्च संपूर्णामिन्द्रस्येवामरावतीम् ॥ १५ ॥

११] ति० टी०–सूतेति । सूताः स्तुतिपाठकाः मागधा वंशावलिकथकाः अट्टाला उपरिगृहाः शतघ्न्यो नाम प्राकारसंरक्षणार्थमयोभारनिर्मिताः प्राकारोपरिस्थापिता आयुधविशेषाः ॥ ११ ॥

रा० टी०–सूतेति । सूतमागधसम्बाधां सूताः पौराणिकाः मागधाः वंशशंसकाः तैः सम्बाधां व्याप्तां श्रीमतीं धनधान्यसमृद्धामतुलप्रभां तुलारहितकान्तिविशिष्टाम् उच्चाट्टालध्वजवतीमुन्नताट्टध्वजविशिष्टां शतघ्नीशतसङ्कुलां शतघ्नीशतैः प्राकारस्थयन्त्रविशेषानन्तैः सङ्कुलां विन्यस्ताम् 'शतघ्नी तु चतुस्ताला लोहकण्टकसञ्चिता' इति यादवः। शतशब्दोऽनन्तवाची ११

गो० टी०–सूतेति । सूताः वन्दिनः 'सूतो ना तक्षिणि सारथौ' । क्षत्राद्विप्रासुते व्यासशिष्ये पारदवन्दिनोः' इति भास्करः मागधाः राजप्रबोधकाः 'मागधः स्याद्वाग्मी राजप्रबोधकः' इति यादवः तैः संबाधां निरन्तरां श्रीमतीं धनधान्यसमृद्धिमतीमतुलप्रभां निरुपमकान्तिदृग् आट्टालशब्दौ पर्यायौ 'स्यादट्टः क्षौममस्त्रियाम्' इत्यमरः मण्डपोपरि निर्मितगृहाणीत्यर्थः उन्नतैरट्टालध्वजैर्युताम्। शतघ्नी प्राकारस्थयन्त्रविशेषः 'शतघ्नी तु चतुस्ताला लोहकण्टकसंचिता' इति यादवः। शतशब्दोऽनन्तवचनः 'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्' इत्युक्तेः अनेकशतघ्नीसंवृताम् ॥ ११ ॥

१२] ति० टी०–वधूनाटकसङ्घैः स्त्रीनर्तकसमूहैः संयुक्ता सर्वतः चतुर्दिक्षु पुरीं वाराणस्यादयो यस्यां सा ताम् तथा च स्मृतिः 'साकेतपश्चिमद्वारि वृन्दावनमदूरतः' इत्यादि समासान्तविधेरनित्यत्वात्कबभावः उद्यानाम्रवणोपेताम् आम्रवनरूपोद्यानविशिष्टाम् आहिताग्न्यादित्वात्परनिपातः। महतीं समाधिकरहितां शालमेखलां शालः प्राकारः शालवनं वा मेखला आवरणं यस्यास्ताम् 'प्राकारो वरणः शालः' इत्यमरः ॥ १२ ॥

गो० टी०–वधूनाटकसङ्घैरिति । सर्वतः पुरीमिति "उभसर्वतसोः" इति द्वितीया । सर्वत्र पुरीं वधूनां ये नाटकाः नर्तयितारस्तत्सङ्घैः संयुक्तामाम्राणां चूतानां वनमाम्रवणम् " प्रनिरन्तः " इत्यादिना णत्वम् । आहिताग्न्यादित्वात्परनिपातः । आम्रवणरूपोद्यानोपेताम् सालः प्राकारो मेखला मेखलावदावरणभूता यस्यास्ताम् 'प्राकारो वरणः सालः' इत्यमरः महतीमिति सालद्वारा नगरविशेषणम् ॥ १२ ॥

१३] ति० टी०–दुर्गेति । जलदुर्गेण गम्भीरागाधा परिखा यस्यां ताम् अत एव दुर्गां मित्रैरपि दुःखगम्याम् अन्यैः शत्रुभिर्दुरासदामशक्यसमीपगमनामपि वारणा गजाः ॥ १३ ॥

रा० टी०–दुर्गेति । दुर्गगम्भीरपरिखां दुर्गां दुर्गमा गम्भीरा अगाधा परिखा यस्यास्ताम् अत एव दुर्गां गमनानर्हामत एव अन्यैः शत्रुभिः दुरासदामशक्यपराभवां वाजिवारणसंपूर्णामश्वहस्तिसमृद्धां गोभिरुष्ट्रैः खरैश्च तथा संपूर्णाम् ॥ १३ ॥

गो० टी०–दुर्गेति । अत्र दुर्गशब्देन विशालतोच्यते विशालागाधपरिखां दुर्गां स्थलदुर्गभूताम् अत एवान्यैः शत्रुभिर्दुरासदां दुराक्रमां वाजिभिर्वारणैश्च संपन्नां समृद्धां गोभिरुष्ट्रैः खरैः खरविशेषैश्च तथा संपन्नामित्यर्थः ॥ १३ ॥

१४] ति० टी०–सामन्तेति । समन्ताद्वै राजसमूहैः बलिः करस्तद्दानरूपं कर्म येषां तादृशैः ॥ १४ ॥

रा० टी०–सामन्तेति । बलिः करनियमनं कर्म येषां तैः बलिकर्मभिः सामन्तराजसङ्घैः समन्ताद्वाः सामन्ताः 'अव्ययानां भमात्रे टिलोपः' इत्यनेन आतो लोपः ते एव राजानः खण्डमण्डलेश्वरास्तेषां सङ्घाः समूहास्तैरावृतां नानादेशनिवासैः वणिग्भिश्च उपशोभिताम् । चकारेण मित्रीभूतखण्डमण्डलेश्वरैश्चावृताम् 'भागधेयः करो बलिः' इत्यमरः ॥ १४ ॥

गो० टी०–सामन्तराजसङ्घैरिति । समन्ताद्वाः सामन्ताः 'सामन्ता राज्यसंधिस्थाः' इति वैजयन्ती तादृशराजसङ्घैः कीदृशैः बलिकर्मभिः बलिः करः 'भागधेयः करो बलिः' इत्यमरः । बलिशब्देन बलिप्रदानमुच्यते तत्कर्म येषां तैः नानादेशनिवासैः क्रयविक्रयार्थमागतैः वणिग्भिश्च उपशोभिताम् ॥ १४ ॥

१५] ति० टी०–रत्नविकृतै रत्ननिर्मितैः पर्वतसदृशैः प्रासादैः शोभिताम् कूटाख्यैरगारैर्गृहैः जनानां क्रीडागृहैरिति यावत् कूटाः शालाः अगारं गृहमित्यन्ये ॥ १५ ॥

१ पर्वतैरुपशो. रा. गो. पाठः ।

चित्रामष्टापदाकारां वरनारीगणायुताम् । सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥ १६ ॥
गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् । शालितण्डुलसंपूर्णामिक्षुकाण्डरसोदकाम् ॥ १७ ॥
दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा । नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम् ॥ १८ ॥

रा० टी०–प्रासादैरिति । रत्नविकृतैः रत्नैर्विकृतैर्विशेषतो रचितैः प्रासादैः राजगृहैः पर्वतैः क्रीडोपयुक्तगिरिभिश्च उपशोभिताम् किञ्च रत्नानां वयः पक्षिणः कृताः निर्मिताः येषु तैरित्यर्थः कूटागारैः वलभीभिश्च संपूर्णामत एव इन्द्रस्य अमरावतीमिव इन्द्ररक्षिततत्पुरीसदृशीत्वेन प्रतीयमानामित्यर्थः । पर्वतैरिव शोभितामिति भट्टसम्मतः पाठः तत्र पर्वतसदृशैः प्रासादैरित्यर्थः ॥ १५ ॥

गो० टी०–प्रासादैरिति । रत्नविकृतैः रत्नैः विकृतैः विशेषेण कृतैः प्रासादैः राजगृहैः पर्वतैः क्रीडापर्वतैः कूटागारैः वलभिभिः ' कूटागारं तु वलभिः ' इत्यमरः । संपूर्णाम् अत एव इन्द्रस्येवामरावतीम् इन्द्रपालिताममरावतीमिव स्थितामित्यर्थः ॥ १५ ॥

१६] ति० टी०–चित्रामिति । अष्टापदं सुवर्णं तज्जलेन कृत आकारोऽलंकारो यस्या इत्येके घृतफलकाकारामित्यन्ये विमानगृहं सप्तभूमिगृहम् ' विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ' इति निघण्टुः ॥ १६ ॥

रा० टी०–चित्रामिति । चित्रां नानावर्णविशिष्टाम् अष्टापदाकारां शारिफलाकृतिम् ' अष्टापदं शारिफलम् ' इत्यमरः । किञ्च अष्टापदस्य सुवर्णस्याकारः आकृतिर्यस्याः अप्राकृतस्वर्णमयीमित्यर्थः किञ्च अष्टापदस्य सुवर्णस्य आकारः जनग्रहणार्थं प्रतिदिनं राजमार्गे राजकर्तृकप्रक्षेपो यस्यां तां विक्षेपणार्थककृधातोः प्रयोगः । किञ्च अष्टानां व्यापकानां ब्रह्मविष्णुमहेश्वराणामापस्य व्यापकत्वसदृशव्यापकत्वस्य दः दानं यस्याम् आश्रितजनेभ्यः ब्रह्मादिव्यापकत्वादिसदृशव्यापकत्वादिप्रदात्रीमित्यर्थः अष्टशब्दो व्याप्त्यर्थकः अशधातुप्रकृतिककर्तृनिष्ठान्तः न कारः उत्पत्तिर्यस्याः नित्यामित्यर्थः । सा एव सेति कर्मधारयः तां वरनारीगणायुतां वरनारीगणैरायुतां व्याप्तां सर्वरत्नसमाकीर्णाम् अनेकजातीयरत्नसंपूर्णां विमानगृहशोभितां विमानगृहैः सप्तभूमिकवेश्मभिः शोभिताम् 'विमानोऽस्त्री देवयाने सप्तभूमौ च' इति निघण्टुः किञ्च विमानगृहैः अपरिमितागारैः शोभिताम् ॥ १६ ॥

गो० टी०–चित्रामिति । चित्रां नानाराजगृहवतीम् अष्टौ पदानि स्थानानि यस्य तदष्टापदम् "अष्टनः संज्ञायाम्"इति दीर्घः। 'अष्टापदं शारिफलम्' इत्यमरः। तदाकारां तत्सदृशसंस्थानामित्यर्थः मध्ये राजगृहं चतुर्दिक्षु राजवीथयः तन्मध्येष्ववकाशाश्चेत्येवंविधसंस्थानामित्यर्थः वरनारीगणैः सुन्दरस्त्रीगणैः युतां युक्ताम् सर्वरत्नैः समाकीर्णां व्याप्ताम् तानि तु ' गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः । शोणरत्नं रोहितकं पद्मरागोऽरुणोपलः ॥ विद्रुमो ना प्रवालोऽस्त्री वज्रोऽस्त्री हीरकः पुमान् । इन्द्रनीलं महानीलं वैडूर्यं वालवायजम् ॥ कुरुविन्दास्तु कल्माषा रत्नभेदास्तु मौक्तिकम् । माणिक्यं पौष्पकं शङ्खः ' इत्यादिनिघण्टुपर्यायोक्तानि । विमानाख्यगृहैः शोभिताम् ' विमानोऽस्त्री देवयाने सार्वभौमिकसद्मनि ' इति भास्करः ॥ १६ ॥

१७] ति० टी०–गृहेति । गृहैः पौरकुटुम्बिगृहैर्गाढां निबिडाम् अत एवाविच्छिद्राम् इक्षुकाण्डरससमानस्वादूदकवतीम् ॥ १७ ॥

रा० टी०–गृहेति । गृहगाढां कुटुम्बिगृहनिबिडाममामपरिमितप्रभावाम् विच्छिद्रां दोषरहिताम् ज्योतिश्शास्त्रानुकूलामित्यर्थः त्रयाणां कर्मधारयः ' छिद्रं रन्ध्रे दूषणेऽपि ' इति भास्करः । समभूमौ समा वैषम्यरहिता कान्तिविशिष्टा वा या भूमिः तस्यां निवेशितां प्रकटिताम् शालितण्डुलसम्पूर्णाम् ' शालयः श्वेततण्डुलाः ' इति वैजयन्ती इक्षुकाण्डरसोदकामिक्षुकाण्डरससदृशोदकविशिष्टाम् किञ्च उदकसदृशव्ययीक्षुदण्डरसविशिष्टाम् ॥ १७ ॥

गो० टी०–गृहगाढामिति । गृहैः कुटुम्बिगृहैः गाढां निबिडाम् अविच्छिद्रां निर्दूषणाम् 'छिद्रं रन्ध्रे दूषणेऽपि' इति भास्करः। समभूमौ अनिम्नोन्नतप्रदेशे निवेशितां निर्मिताम्। शालयः श्वेततण्डुला व्रीहयः'शालयः श्वेततण्डुलाः'इतिवैजयन्ती।तेषां तण्डुलैःसंपूर्णाम् इक्षुकाण्डस्य इक्षुदण्डस्य यो रसस्ततुल्यमुदकं यस्यां ताम्१७॥

१८] ति० टी०–भृशं नादितां पृथिव्यामत्यर्थमत्यन्तम् । अनुत्तमामिति बहुव्रीहिः ॥ १८ ॥

रा० टी०–दुन्दुभीभिरिति । दुन्दुभीभिः भेरीभिः मृदङ्गैः वीणाभिश्च पणवैः मर्दलैः भृशं नादितां पृथिव्यां तथा पृथिव्यामपि अत्यर्थमनुत्तमां ताम् किञ्च पृथिव्याः अ न अन्तः परिच्छेदो यस्याः सा तांमपृथिव्यांतां सर्वलोकादूर्ध्वमपि विद्यमानामित्यर्थः अत एव अत्यर्थमनुत्तमामतिश्रेष्ठां दुन्दुभीत्यत्र दीर्घ आर्षः ॥ १८ ॥

गो० टी०–दुन्दुभीभिरिति । दुन्दुभीभिर्भेरीभिः ईकारान्तत्वमार्षम् मृदङ्गैः मृत् अङ्गं येषां तैः पणवैः मर्दलैः तथेति समुच्चये । भृशं नादितां पृथिव्यामत्यर्थमनुत्तमां श्रेष्ठां तां प्रसिद्धाम् ॥ १८ ॥

१ गणैर्यु. गो. रा. पाठः ।

विमानमिव सिद्धानां तपसाधिगतं दिवि । सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम् ॥ १९ ॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरम् । शब्दवेध्यं च विततं लघुहस्ता विशारदाः ॥ २० ॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने । हन्तारो निशितैः शस्त्रैर्बलाद्बाहुबलैरपि ॥ २१ ॥
तादृशानां सहस्रैस्तामभिपूर्णां महारथैः । पुरीमावासयामास राजा दशरथस्तदा ॥ २२ ॥
तामग्निमद्भिर्गुणवद्भिरावृतां द्विजोत्तमैर्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभिर्महर्षिकल्पैर्ऋषिभिश्च केवलैः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चमः सर्गः ॥ ९ ॥

१९] ति० टी०–तपसा प्राप्तं दिवि सिद्धाना विमानमिव पृथिव्यामनुत्तमामिति संबन्धः सुष्ठु निवेशितो वेश्मनामग्रबाह्यप्रदेशो यस्यां ताम् ॥ १९ ॥

रा० टी०–विमानमिति । तपसा अधिगतं प्राप्तं दिवि सिद्धानां विमानमिव सकलाभीष्टदात्रीत्वात्तादृशविमानसदृशीत्वेन प्रतीयमानामित्यर्थः । सुनिवेशितवेश्मान्ताम् सुनिवेशिताः वेश्मान्ताः गृहप्रान्ताः यस्यां ताम् नरोत्तमसमावृतां नरोत्तमैः परमविद्वद्भिः समावृताम् अत एव राजसङ्घैरावृतामित्यनेन[3] पौनरुक्त्यम् ॥ १९ ॥

गो० टी०–विमानमिति । सिद्धानां तपःसिद्धानां पुरुषाणां दिवि स्वर्गे तपसाधिगतं लब्धं विमानमिव देवयानसमूहमिव स्थिताम् जातावेकवचनम् सुनिवेशिताः सुष्ठु निर्मिताः वेश्मान्ताः गृहप्रान्ता यस्यां सा सर्वतः सम्यङ्निर्मितगृहामित्यर्थः नरोत्तमैः विद्वद्भिः समावृताम् ॥ १९ ॥

२०] ति० टी०–ये चेति । विविक्तं स्वसमूहाद्भ्रष्टं सहायरहितम् अपरापरं परे पित्रादयः, अपरे पुत्रादयः, तैर्हीनम् वंशस्यैकतन्तुमित्येके परकीयस्वकीयभिन्नं केवलप्रेक्षकमित्यन्ये तथा शब्दमात्रानुमितसत्तया वेधयोग्यम् प्रच्छन्नमिति यावत् तथा विततं च विरुध्य युद्धं कृत्वा पश्चात्ततं पलायितम् ईदृशाञ्शक्यवेधानपि ये बाणैर्न विध्यन्ति ये च लघुहस्ताः शीघ्रवेधिनः विशारदा अस्त्रशस्त्रप्रयोगसमर्थाः तेषां सहस्रैः पूर्णामित्युत्तरेण संबन्धः ॥ २० ॥

रा० टी०–ये चेति । लघुहस्ताः शिक्षादिना प्राप्तहस्तलाघवीकाः शीघ्रवेधिन इति यावत् अत एव विशारदाः अस्त्रशस्त्रप्रयोगनिपुणाः अपि ये विविक्तं स्वसङ्घाच्युतमपरापरं न परे पित्रादयः अपरे पुत्रादयः यस्य तं स्ववंशतन्तुमित्यर्थः । शब्दवेध्यं शब्दमात्रलक्षणजनितहननयोग्यं प्रच्छन्नमित्यर्थः । विततं विगतः ततः युद्धविस्तारो यस्य नष्टसामर्थ्यादिना अष्टयुद्धकामित्यर्थः तं च न विध्यन्ति ॥ २० ॥

गो० टी०–ये चेति । श्लोकत्रयमेकान्वयम् । लघुहस्ताः शिक्षिताश्च ' लघुहस्तः सुहस्तश्च कृतास्त्रः कृतपुङ्खकः ' इति वैजयन्ती । विशारदाः समर्थाः उपायज्ञा इति यावत् तथाभूता अपि ये राजानः विविक्तं विजनमसहायमिति यावत् ' विविक्तौ पूतविजनौ ' इत्यमरः । अपरापरं अविद्यमानपरापरं परे पित्रादयः अपरे पुत्रादयः तैर्हीनं वंशस्यैकतन्तुमिति यावत् शब्दवेध्यं शब्देन लक्ष्येण वेध्यम् एतेन प्रच्छन्नवेधनमुपलक्ष्यते विततं पलायितं च बाणैश्च न विध्यन्ति न प्रहरन्ति किं पुनर्यन्त्रादिभिरिति भावः ॥ २० ॥

२१] ति० टी०–सिंहेति । बाहुबलैरपि मल्लपुढैरपि[2]१

रा० टी०–ये च मत्तानां मदविशिष्टानामत एव वने नदतां नादयुक्तानां सिंहव्याघ्रवराहाणां बलाद्बलप्रयुक्तैः निशितैस्तीक्ष्णैः शस्त्रैः बाहुबलैः शस्त्रादिरहितबाहुभिश्चेत्यर्थः हन्तारः ॥ २१ ॥

गो०टी०–सिंहेति । मत्तानां वने स्वदेशे नर्दतां गर्वेण गर्जतां सिंहव्याघ्रवराहाणां बलान्मनोबलेन बाहुबलैरपि सहकारिभिः निशितैस्तीक्ष्णैः शस्त्रैरायुधैः करणैर्हन्तारः ' शस्त्रमायुधलोहयोः ' इत्यमरः ॥ २१ ॥

२२] ति० टी०–महारथैः । ' आत्मानं सारथिं चाश्वान्रक्षन्युध्येत यो नरः स महारथसंज्ञः स्यात् ' एको दशसहस्रयोद्धा च आवासयामास तेषामावासेन तैः पूर्णां चकारेत्यर्थः ॥ २२ ॥

रा० टी०–तादृशानां सहस्रैः महारथैः अभिपूर्णां तां पुरीमयोध्यां राजा महाराजाधिराजः तथा पित्राद्यावासनप्रकारेणावासयामास संस्थापयामास पालयामासेत्यर्थः ॥ २२ ॥

गो० टी० तादृशानामिति । महारथैः 'आत्मानं सारथिं चाश्वान् रक्षन् युद्धयेत यो नरः । स महारथसंज्ञः स्यात् ' इत्युक्तलक्षणैः तादृशानां तेषां सहस्रैः अभिपूर्णां तां तथात्वेन प्रसिद्धां पुरीमावासयामास ॥ २२ ॥

२३] ति० टी०–तामिति । अग्निमद्भिरहिताग्निभिर्गुणाः शमदमादयः । वेदानां षडङ्गानां च पारगैः । महर्षिकल्पैर्महर्षिसदृशैः केवलैर्मुख्यैर्ऋषिभिर्मन्त्रद्रष्टृभिश्चावृतां व्याप्ताम्[2]३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चमः सर्गः ॥ ५ ॥

---

१ नर्दतां गो. पाठः । २ स्तथा. रा. पाठः । ३ मित्येनेन न पौनरुक्त्यमिति भाति ।

षष्ठः सर्गः ॥ ६ ॥

अयोध्यां दशरथे शासति तत्कालीनाखिलजनवर्तनकथनम् ।

तस्यां पुर्यामयोध्यायां वेदवित्सर्वसंग्रहः । दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥
इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी । महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः ॥ २ ॥

रा० टी०–**तामिति** । अग्निमद्भिः अग्निहोत्रिभिः गुणवद्भिः शमदमादिगुणसंपन्नैः वेदषडङ्गपारगैः अधीताध्यापितसाङ्गसर्ववेदैः सहस्रदैः बहुप्रदैः सत्यरतैः मिथ्यासम्बन्धशून्यैः महात्मभिः पूजितस्वरूपैः द्विजोत्तमैः ब्राह्मणैः महर्षिकल्पैः वसिष्ठसदृशैः केवलैः अविद्यासम्बन्धशून्यैः ऋषिभिश्चावृतां तां पुरीमावासयामासेति पूर्वेणान्वयः ॥ २३ ॥

इत्यार्षे श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चमः सर्गः ॥ ५ ॥

गो० टी०–**तामिति** । अग्निमद्भिः आहिताग्निभिः गुणवद्भिः शमदमादिगुणवद्भिः वेदानां षडङ्गानां च पारमन्तमध्ययनेन गच्छन्तीति तथा " अन्तात्यन्ता०" इत्यादिना डप्रत्ययः सहस्रदैः बहुप्रदैः सत्ये सत्यवचने रतैः निरतैः महात्मभिः महामतिभिः केवलैः ऋषिभिरपि महर्षिकल्पैः वसिष्ठादिमहर्षितुल्यैः ईषदसमाप्तौ कल्पप्प्रत्ययः द्विजोत्तमैः आवृतां तामावासयामासेत्यनुषज्यते । अत्र वंशस्थवृत्ते प्रथमचरणे जगणाभावेनोपजातिवृत्तमिति बोध्यम । आचार्याः प्राहुः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन"इतिश्रुतिरनेनोपबृंहते । द्विजोत्तमैः " अष्टवर्षं ब्राह्मणमुपनयीत"इत्युक्तरीत्या कृतोपनयनैः वेदषडङ्गपारगैः अधीतसाङ्गसशिरस्कवेदैः अग्निमद्भिरनुष्ठितयज्ञैः सहस्रदैः यथाशक्ति ब्राह्मणसात्कृतद्रव्यैर्महात्मभिः महायत्नैः कृततपस्कैरित्यर्थः । गुणवद्भिः शमदमाद्युपेतैः स्यात् " शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा " इत्युक्तशमादिमद्भिः सत्यरतैः सत्यस्य सत्यमित्युक्ते ब्रह्मणि भक्तिरूपापन्नज्ञानवद्भिः केवलैः "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् " इत्युक्तरीत्यानाविष्कृतस्वरूपैः ऋषिभिः बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरित्युक्तस्वरूपैः महर्षिकल्पैः यत्रर्षयः प्रथमजा ये पुराणा इत्युक्तरीत्या सदृशदृशैः आवृतां अवतरिष्यति भगवानत्रेति समागम्य संसेवितां तामावासयामास । यद्वा हे केवल परिशुद्धचित्त त्वमपि वासाय गच्छेति कविराह तदुपगतेतिवत् ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते रामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

१] ति० टी०–**तस्यामिति** । वेदवित् त्रैवर्णिकमात्रस्याऽयं गुणः सर्वसंग्रहः सर्वेषामपरिमितचतुरङ्गबलराष्ट्रदुर्गादीनां संग्राहकः एवं सामादिप्रयोग एवं फलं भविष्यतीत्यादिदीर्घदर्शनशीलः तेजः प्रतापः ॥ १ ॥

रा० टी०–पूर्वसर्गे पुरीं संवर्ण्य राजानं वर्णयन् तद्वासिनो वर्णयति–**तस्यामित्यादिभिः** । वेदवित् वेदज्ञः सर्वेषां दुर्गादीनां सङ्ग्रहः सङ्ग्राहकः दीर्घदर्शी चिरम्बकालभाविफलदर्शनशीलः महातेजाः परमवर्चस्वी अत एव पौरजानपदप्रियः पुरे भवाः पौराः जनपदे देशे भवाः जानपदास्तेषां प्रियः ॥१॥

गो० टी०–एवं भगवदवतारयोग्यदेशो दर्शितः । अथ तद्योग्यं पुरुषं दर्शयति सर्गे षष्ठे । तस्यामित्यादि श्लोकचतुष्टयमेकान्वयम् । दशरथः तस्यां वसन् सन् जगत् अपालयत् । स कीदृशः वेदं वेदार्थं वेत्तीति वेदवित् संगृह्णाति धनप्रदानादिना स्वीकरोतीति संग्रहः पचाद्यच् सर्वेषां शरणां विदुषां च संग्रहः सर्वसंग्रहः दीर्घदर्शी दीर्घ चिरकालभाविपदार्थं द्रष्टुं शीलमस्यास्तीति तथा ताच्छील्ये णिनिः । महातेजाः महाप्रतापः ' तेजः पराक्रमे प्राणे वर्चस्यर्चिषि रेतसि ' इति रत्नमाला । पुरे भवा जनाः पौराः जनपदे भवा जानपदाः ते प्रियायस्य स तथा ॥ १ ॥

२] ति० टी०–अतिरथो दशसहस्रमहारथैर्योद्धा वशी स्वाधीनः ॥ २ ॥

रा०टी०–अतिरथः दशसहस्रमहारथैरसाहाय्येन युद्धकर्ता यज्वा यथाविधि यागकारी इक्ष्वाकूणां धर्मरतः[1] इक्ष्वाकूचितसत्यप्रतिज्ञत्वादिधर्मविशिष्टः नित्यसापेक्षत्वात्समासः वशी स्वतन्त्रः महर्षीन् कल्पयति सामग्रीसम्पादकत्वविघ्नध्वंसकत्वादिना यागादिसमर्थान्करोतीति महर्षिकल्पः राजर्षिः राजाचासौ ऋषिश्चेति कर्मधारयः अत एव त्रिषु कृत्स्नोर्ध्वकृत्स्नमध्यकृत्स्नाधोरूपेषु लोकेषु विश्रुतः ख्यातः ॥ २ ॥

गो टी०–**इक्ष्वाकूणामिति** । इक्ष्वाकूणां मध्ये अतिरथ बहुभिर्महारथैरेको योद्धा रथी यज्वा विधिनेष्टवान् धर्मेषु तटाकखननारामप्रवर्तनादिषु रतः वशी स्वाधीनसर्वजनः ' त्रिष्वधीने वशो वाच्छाप्रभुत्वाधीनतासु ना ' इति भास्करः । महर्षिकल्पः महर्षितुल्यः राजर्षिः राजरूपऋषिः त्रिषु लोकेषु भूर्भुवःस्वर्लोकेषु विश्रुतः प्रतिद्धः ॥ २ ॥

---

१ धर्मरतो गो. रा. पाठः ।

स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः । दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥ १३ ॥
नास्तिको[1] नानृती वापि न कश्चिदबहुश्रुतः[2] । नासूयको न चाशक्तो नाविद्वान्विद्यते क्वचित् ॥ १४ ॥
नाषडङ्गविदत्रास्ति नाव्रतो नासहस्रदः । न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥ १५ ॥
कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् । द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥ १६ ॥
वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः । कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥ १७ ॥
दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः । सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥ १८ ॥

रा० टी०–नेति । अनाहिताग्निः निरवच्छिन्नाग्निहोत्ररहितः कश्चित् द्विजः अयोध्यायां नासीत् अयज्वा सोमयागरहितः तथ न क्षुद्रः अल्पविद्यादिकश्च न तस्करश्चोरश्च न निर्वृत्तसङ्कुरः निर्वृत्तः सम्पादितः सङ्कुरः परक्षेत्रे बीजाधानादिना साङ्कुर्यं येन स च न सङ्कुर इति भावप्रधानो निर्देशः वाशब्दश्चार्थे न चावृत्तो न सङ्कुर इति भट्टाभिप्रेतः पाठः तत्राऽवृत्तः सदाचाररहितो नेत्यर्थः ॥ १२ ॥

गो० टी०–नेति । आहिताग्निः अजस्राग्निहोत्री यज्वापि हि कश्चिद्विच्छिन्नाग्निर्भवति अयज्वा सोमयागरहितः क्षुद्रः अल्पविद्यैश्वर्यवान् तिरस्कारार्ह इति यावत् । निर्वृत्तः अनुष्ठितः सङ्कुरः परक्षेत्रे बीजावापादिर्येन सः ॥ १२ ॥

१३] ति० टी०–स्वेति । दानं नित्यप्राप्तम् यथाशक्ति विधिना परदत्तस्य स्वीकारः प्रतिग्रहस्तत्र संयताः संकुचिताः निषिद्धप्रतिग्रहरहिता इत्यर्थः ॥ १३ ॥

रा० टी०–अयोध्यानित्यनिवासिवृत्तमुक्त्वा नैमित्तिकनिवासिद्विजवृत्तमाह–स्वेत्यादिभिः । नित्यं स्वकर्मनिरताः अत एव विजितेन्द्रियाः अत एव दानाध्ययनशीलाः प्रतिग्रहे च संयताः नियमिताः निषिद्धप्रतिग्रहरहिता इत्यर्थः आसन्निति शेषः ॥ १३ ॥

गो० टी०–स्वकर्मेति । अध्ययनं जपरूपाध्ययनं संयताः संकुचिताः ॥ १३ ॥

१४] ति० टी०–नास्तिको नास्ति परलोक इति बुद्धिमान् । अनृत्यसत्यवचनः । ' अनृतः ' इति पाठेऽपि अर्शआद्यच् स एवार्थः । अशक्तः स्त्रीयैहिकामुष्मिकार्थसाधनासमर्थः ॥ १४ ॥

रा० टी०–नेति । नास्तिकः परलोकाभावविषयकनिश्चयविशिष्टः कश्चित्र विद्यते अनृतकः अनृतमसत्यं कायति वदतीति किञ्च न ऋतं सत्यं यस्य स च न अबहुश्रुतः बहुश्रुतभिन्नो न असूयकः गुणेषु दोषाविष्कर्ता न अशक्तः सामर्थ्यरहितो न अविद्वान् विद्वत्तारहितश्च न तथाशब्दश्चार्थे। नास्तिको नानृती वापीति भट्टसम्मतः पाठः तत्रानृत इति पाठे अर्शआद्यच् स एवार्थ इति व्याख्यातम् । तत्पाठद्वये नञावृत्तिर्बोध्या ॥ १४ ॥

गो० टी०–नेति । अनृतमसत्यं कायति वर्क्तात्यनृतकः कैशब्द इत्यस्मादात्वे " आतोनुपसर्गे कः " इति कप्रत्ययः श्रुतं श्रवणं भावे निष्ठा बहुप्रकारशास्त्रश्रवणरहित इत्यर्थः । असूयतीत्यसूयकः । " कण्ड्वादिभ्यो यक् " इति यक् । धातुसंज्ञायां वुञ् अशक्तः ऐहिकामुष्मिकार्थसाधनाशक्तः तदा दशरथराज्यपालनकाले अनेनायं श्लोकोजानपदविषय इति गम्यते तेनात्र न पौनरुक्त्याशङ्का ॥ १४ ॥

१५] ति० टी०–नेति । व्रतमेकादश्यादिव्रतम् क्षिप्तचित्त इति उन्मादादिनेति शेषः व्यथित आधिव्याधिपीडितः ॥ १५ ॥

रा० टी०–नेति । अषडङ्गवित् वेदाङ्गशिक्षाकल्पादिवेदितृभिन्नः अत्रायोध्यायां कश्चन नासीत् अव्रत एकादश्यादिव्रतशून्यो न असहस्रदः सहस्रदातृभिन्नः अल्पदाता च नेत्यर्थः। दीनः दुर्बलशरीरो न क्षिप्तचित्तः अनवस्थितमनस्कश्च न व्यथितः व्याधिपीडितश्च न वाशब्दद्वयमपिश्च चार्थे ॥ १५ ॥

गो० टी०–नेति । षडङ्गानि ' शिक्षा कल्पो व्याकरणं निरुक्तिश्छन्दोविचितिर्ज्योतिषामयनं च ' । अव्रतः चान्द्रायणादिव्रततरहितः असहस्रदः अबहुप्रदः दानाध्ययनेत्यत्र विद्यादानमुक्तम् अत्र हिरण्यादिदानं क्षिप्तचित्तः व्याकुलमनस्कः व्यथितः व्याध्यादिना पीडितः ॥ १५ ॥

१६] ति० टी०–कश्चिदिति । नार्यां नाश्रीमतीत्यादृश्यम् । श्रीः शोभा कान्तिः । रूपं गौरत्वादि । राजा दशरथस्तस्मिन्भक्तिः स्नेहस्तद्भाववान् नाभूत् ॥ १६ ॥

रा० टी०–कश्चिदिति । कश्चिन्नरः नारी च अश्रीमान् सम्पत्तिरहितः अयोध्यायां द्रष्टुं न शक्यम् अरूपवान् सौन्दर्यविशिष्टभिन्नश्च न राजनि महाराजाधिराजे अभक्तिमांश्च न अपि वौ च चार्थौ ॥ १६ ॥

गो० टी०–कश्चिदिति । अश्रीमान् कान्तिरहितः सौन्दर्यरहितः नारीपक्षे अश्रीमती अरूपवती अभक्तिमती चेत्यृश्यं राजनि दशरथे अभक्तिमान् भक्तिरहितः भक्तिरधिकमान्यविषयस्नेहः ॥ १६ ॥

१७-१८] ति० टी०–प्रथमं राजानं स्तुत्वा 'तस्मिन्पुरवरे' इत्यादिभिर्ब्राह्मणप्रशंसा कृता इदानीं क्षत्रियादिसाधारण्येन

---

१ न नास्तिको नानृतको. गो. रा. पाठः । २ तथा. रा. तदा. गो. पाठः ।

क्षत्रं ब्रह्ममुखं चासीद्वैश्याः क्षत्रमनुव्रताः । शूद्राः स्वकर्ममनिरतास्त्रीन्वर्णानुपचारिणः ॥ १९ ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता । यथा पुरस्तान्मनुना मानवेन्द्रेण धीमता ॥ २० ॥
योधानामग्निकल्पानां पेशलानाममर्षिणाम् । संपूर्णा कृतविद्यानां गुहा केसरिणामिव ॥ २१ ॥
काम्बोजविषये जातैर्वाह्लीकैश्च हयोत्तमैः । वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥ २२ ॥

वर्णाः प्रशस्यन्ते–वर्णेष्विति त्रिभिः। अद्यचतुर्थेष्वद्यो ब्राह्मणः स चतुर्थो येषां तेषु सर्वे वर्णा इति शेषः। 'वदान्यो दानशौण्डः स्यात्' इति विश्वः सर्वत्रासन्निति शेषः ॥ १७ ॥ १८ ॥

रा० टी०–वर्णचतुष्टयसाधारणवृत्तमाह–वर्णेष्वित्यादित्रिभिः श्लोकैः। अद्यचतुर्थेषु अद्यः ब्राह्मणः चतुर्थो येषां तदुणसंविज्ञानो बहुव्रीहिः तेषु वर्णेषु ब्राह्मणादिषु द्रष्टा जनाः देवतातिथिपूजकाः कृतज्ञाः कृतोपकारविस्मृत्यभाववन्तश्च वदान्याः दाननिपुणाश्च शूराः शौर्यविशिष्टाश्च विक्रमसंयुताः पराक्रमवन्तश्च आसन्निति शेषः 'वदान्यो दानशौण्डः स्यात्' इति विश्वः ॥१७॥

गो० टी०–वर्णेष्विति । अद्ये भवोऽद्यः "अद्याश्वत्" इति यत्प्रत्ययः । ब्राह्मणः स चतुर्थो येषां तेषु वर्तमानाः नराः देवतातिथिपूजकाः शूद्राणां देवतापूजा तान्त्रिकमन्त्रेण अतिथिपूजनं हिरण्यादिदानेन कृतज्ञाः उपकारज्ञाः वदान्याः दानशौण्डाः 'वदान्यो दानशौण्डः स्यात्' इति विश्वः । शूराः ब्राह्मणेष्वध्ययनशूरत्वं विक्रमसंयुताः पराक्रमसंयुताः ब्राह्मणानां पराक्रमो वादकथासु आसन्निति शेषः ॥ १७ ॥

१८] रा० टी०–दीर्घेति । दीर्घायुषः धर्मं रघुनाथोपासनं सत्यं च संश्रिताः पुत्रपौत्रैः स्त्रीभिश्च नित्यं सहिताः पुरोत्तमे अयोध्यानगरे सर्वे नराः आसन्निति शेषः ॥ १८ ॥

गो० टी०–दीर्घेति । तस्मिन् पुरोत्तमे सर्वे नराः धर्मं सत्यं च संश्रिताः अत एव हेतोः दीर्घायुषः स्त्रीभिः पुत्रपौत्रैश्च संयुताः आसन् ॥ १८ ॥

१९–२०] ति० टी०–ब्रह्ममुखं ब्राह्मणप्रधानम् तदाज्ञावर्तीत्यर्थः । शूद्राणां स्वकर्माह–त्रीनिति । उपचारः सेवा ॥ १९ ॥ २० ॥

रा० टी०–क्षत्रमिति । क्षत्रं क्षत्रियकुलं ब्रह्ममुखं ब्राह्मणप्रधानकमासीत् वैश्याश्च क्षत्रमनुव्रताः आसन् शूद्राः त्रीन्ब्रह्मक्षत्रियवैश्यानुपचारिणः सेवका इत्यर्थः अत एव स्वधर्मनिरताः उपचारः सेवा ॥ १९ ॥

गो० टी०–क्षत्रमिति । क्षत्रं क्षत्रियजातिः ब्रह्ममुखं ब्राह्मणप्रधानमासीत् तदाज्ञानुवर्तीति यावत् 'मुखं निःसरणे वक्त्रे द्वारोपायप्रधानयोः' इति यादवः । वैश्याः क्षत्रमनुव्रताः क्षत्रस्यानुवर्तिनः शूद्रास्त्रीन् वर्णानुपचारिणः त्रयाणां वर्णानामुपचारशीलाः सन्तः स्वधर्मनिरता आसन् ॥ १९ ॥

२०] रा० टी०–सेति । पुरस्तात्पूर्वं धीमता मेधाविना मानवेन्द्रेण मानवस्वामिना मनुना वैवस्वतेन यथा सा पुरी सुपरिरक्षिता तथा इक्ष्वाकुनाथेन तेन महाराजाधिराजदशरथेन सुपरिरक्षिता आसीदिति शेषः ॥ २० ॥

गो० टी०–एतत्सर्वं दशरथपालनकृतमित्याह–सेति॥२०॥

२१] ति० टी०–योधानामिति । शौर्यातिशयादग्नितुल्यानाम् । पेशलानामकुटिलानाम् । अमर्षिणां कृताभिभवासहिष्णूनाम् कृतविद्यानामभ्यस्तास्त्रशस्त्रादिविद्यानाम् योधानां सङ्घैः संपूर्णेति योजना ॥ २१ ॥

रा० टी०–योधानामिति । अग्निकल्पानां तेजसाग्निसदृशानामत एव पेशलानां सुन्दराणाममर्षिणां परकृतिकीर्षितपराभवासहनशीलानां कृतविद्यानां शिक्षितशस्त्रास्त्रादिविद्यानां योधानां संपूर्णा तैर्व्याप्ता आसीदिति शेषः तत्र दृष्टान्तः केसरिणां सिंहानां संपूर्णा गुहा कन्दरेव ॥ २१ ॥

गो टी०–योधानामिति । अग्निकल्पानां शौर्यातिशयादग्नितुल्यानां पेशलानामकुटिलानाममर्षिणां पराभिभवासहिष्णूनां कृतविद्यानां शिक्षितशस्त्रास्त्रादिविद्यानां योधानां भटानाम् "पूरणगुण०"इत्यादिना षष्ठी(?)। सा पुरी योधैः संपूर्णा गुहा केसरिभिः सिंहैरिव । तथा दुर्धर्षाभूदित्यर्थः ॥ २१ ॥

२२] ति० टी०–काम्बोजविषये काम्बोजदेशे वाह्लीकैस्तद्देशजैः । 'वाह्लीजैः' इति क्वचित्पाठः । वनायुर्देशविशेषः । हरिरिन्द्रस्तस्य हय उच्चैःश्रवास्तद्वदुत्तमैः नदीजैः सिन्धुनदसमीपोद्भवैः ॥ २२ ॥

रा० टी०–काम्बोजेति। काम्बोजविषये काम्बोजनामकदेशे जातैः वाह्लीकैः वाह्लीकदेशोद्भवैश्च वनायुजैः वनायुनामकदेशे जातैश्च नदीजैः सिन्धुनदीसमीपदेशोद्भवैश्च हरिहयोत्तमैः हरिरिन्द्रस्तस्य हय उच्चैश्रवास्तद्वदुत्तमैः हयोत्तमैः हयश्रेष्ठैः पूर्णा आसीदिति शेषः आवृत्त्या चः सर्वत्रान्वेति रूपवान्गीलरूपवानितिवत् हरिहयोत्तमैः हयोत्तमैरिति प्रयोगः वाह्लीजैरिति क्वचित्पाठ इति भट्टः ॥ २२ ॥

गो० टी०–एवं चतुरङ्गसंपत्तिषु पदातिसंपत्तिमुक्त्वा तुरङ्गसंपत्तिमाह–काम्बोजेति । काम्बोजविषये काम्बोजाख्यदेशे जातैः वाह्लीकैः वाह्लीकदेशभवैः "तत्र भवः" इत्यण् । वनायुजैः वनायुदेशजातैः नदीजैः सिन्धुदेशोद्भवैः हरेरिन्द्रस्य हयो हरिहयः उच्चैश्रवास्तद्वदुत्तमैः हरिहयोत्तमैरश्वश्रेष्ठैः सा पूर्णाऽभवत् ॥ २२ ॥

१ धर्मनिरताः गो. रा. पाठ.

विन्ध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि । मदान्वितैरतिबलैर्मातङ्गैः पर्वतोपमैः ॥ २३ ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा । अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥ २४ ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा । भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥ २५ ॥
नित्यमत्तैः सदा पूर्णा नागैरचलसंनिभैः । सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥
[यस्यां दशरथो राजावसज्जगदपालयत् ।] ॥ २६ ॥

२३] ति० टी०–हैमवतैर्हिमवत्पर्वतजातैः मातङ्गैर्गजैः २३

रा० टी०–विन्ध्येति । पर्वतोपमैः पर्वताकारैः मदान्वितैः मदविशिष्टैः अत एव मत्तैः उन्मादविशिष्टैः अत एवातिबलैः महाबलवद्भिः विन्ध्यपर्वतजैः विन्ध्यपर्वतजातैः हैमवतैः हिमवत्पर्वतोद्भवैश्च मातङ्गैः गजैः पूर्णा व्याप्ता आसीदिति शेषः २३

गो० टी०–गजसंपत्तिमाह–विन्ध्येत्यादिना । श्लोकद्वयमेकान्वयम् । मत्तैर्विन्ध्यपर्वतजैर्मातङ्गैः हैमवतैः हिमवतिजातैः "तत्र जातः" इति शैषिकोऽण् । मदान्वितैः अतिबलैर्मातङ्गैर्गजैरपि पर्वतोपमैः ॥ २३ ॥

२४] ति० टी०–ऐरावतादयो दिग्गजाः ॥ २४ ॥

रा० टी०–ऐरावतेति । ऐरावतकुलीनैः ऐरावतनामकेन्द्रदिग्गजकुलोद्भवैः महापद्मकुलैः महापद्मः पुण्डरीकापरनामकोऽग्निदिग्गजः स एव कुलं येषां तैश्च महापद्मोद्भवैरित्यर्थः वामनात् तदुपलक्षितयमनैर्ऋत्यादिग्गजादपि निष्पन्नैश्च अञ्जनात् तदुपलक्षितवरुणवायुदिग्गजादपि निष्पन्नैश्च अपिना कुबेरेशानदिग्गजान्निष्पन्नैश्च द्विपैः गजैः पूर्णेति पूर्वेणान्वयः तथाशब्दार्थे तथा चामरसिंहः ' ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः' ॥ २४ ॥

गो० टी०–ऐरावतकुलीनैरैरावतकुलोद्भवैः " कुलात्खः " इतिखप्रत्ययः द्विपैश्च महापद्मः पुण्डरीकाख्यो दिग्गजः तस्य कुलं येषां तैः द्विपैश्च अञ्जनाद्वरुणदिग्गजान्निष्पन्नैर्द्विपैरपि वामनाद्यमदिग्गजान्निष्पन्नैः द्विपैरापि सा पूर्णासीत् ॥ २४ ॥

२५] ति० टी०–भद्रैरिति । ' भद्रा मन्द्रा मृगाश्चेति विज्ञेयास्त्रिविधा गजाः । क्रमेण हिमवद्विन्ध्यसह्यजाः ' भद्रभावाः ॥ २५ ॥

रा० टी०–भद्रैरिति । अचलसन्निभैः पर्वतसदृशैः भद्रैः हिमवत्पर्वतोद्भवजातिविशेषैः मन्द्रैः विन्ध्यपर्वतोद्भवजातिविशेषैश्च मृगैः सह्यपर्वतोद्भवजातिविशेषैश्च भद्रमन्द्रमृगैः परस्परत्वित्वसाङ्कर्यविशिष्टैश्च भद्रमन्द्रैः भद्रमन्द्रनिरूपितद्वित्वसाङ्कर्यविशिष्टैः भद्रमृगैः भद्रमृगनिरूपितद्वित्वसाङ्कर्यविशिष्टैश्च मृगमन्द्रैः मृगमन्द्रनिरूपितद्वित्वसाङ्कर्यविशिष्टैश्च नित्यमत्तैः नागैः हस्तिभिः सा पुरी अयोध्या सदा पूर्णा आसीदिति शेषः सार्द्धश्लोक एकान्वयी आवृत्त्या चशब्दः स्वहीनेष्वप्यन्वेति तल्लक्षणमुक्तं वैजयन्त्याम् अङ्गप्रत्यङ्गभद्रत्वसंक्षिप्तं भद्रलक्षणम् पृथुत्वस्थूलता स्थौल्यं सङ्क्षिप्तं मन्द्रलक्षणम् ॥ तनुप्रत्यङ्गदीर्घोच्चप्रायो मृगगुणो मतः । भद्रमन्द्रो भद्रमृगो भद्रमन्द्रमृगोऽपि च ॥ मन्द्रभद्रादयोप्येवमिति सङ्करजातयः ' इति ॥ २५ ॥

गो० टी०–भद्रैरित्यादि । सार्धश्लोक एकान्वयः । भद्रा-मन्द्रा मृगाश्चेति गजजातित्रयं ' भद्रो मन्द्रो मृगश्चेति विज्ञेयास्त्रिविधा गजाः ' इतिहलायुधः । भद्रमन्द्रो भद्रमृगो मृगमंद्रश्चेति द्विप्रकृतिकाः संकीर्णजातयस्तिस्रः । भद्रमंद्रमृगास्त्रिप्रकृतिकाः संकीर्णगजाः तल्लक्षणमुक्तं वैजयन्त्याम् ' अङ्गप्रत्यङ्गभद्रत्वं संक्षिप्तं भद्रलक्षणम् । तनुप्रत्यङ्गदीर्घश्च प्रायो मन्द्रगुणो मतः । भद्रमन्द्रो भद्रमृगो भद्रमन्द्रमृगोऽपि च । मृगमन्द्रादयोप्येवमिति संकरजातयः ' इति । एवंभूतैर्नित्यमत्तैरचलसंनिभैः नागैः सा सदा पूर्णाऽभवत् ॥ २५ ॥

२६] ति० टी०–नित्येति । द्वियोजने द्वयोर्योजनयोः अत्यन्तसंयोगे द्वितीया । भूयोऽभ्यधिकं सत्यनामा योद्धुमशक्येत्यन्वर्थनामा । राज्ञो मूलधाम एतावत् ॥ २६ ॥

रा० टी०–सेति । सत्यनामा सत्यं न कैश्चिद्योधितुं शक्या किञ्च अयोभिः विष्णुब्रह्मशिवैः ध्यायते नित्यं स्मर्यते या सेत्यादि तात्त्विकार्थविशिष्टं नाम यस्याः सा अन्वर्थनामेति यावत् अयोध्या पुरी द्वे योजने गुप्तहरेरारभ्यबिल्वहरिपर्यन्तं भूमयः नगरवर्तिदेशान्तरापेक्षया अत्यन्तं नित्यं प्रकाशते शब्दान्नित्यलाभः किञ्च सत्यं सत्यपदघटितम् अयोध्यापरपर्यायभूतसत्येति नाम यस्याः सेत्यर्थः उक्तं च कौपीतकीब्राह्मणादौ " अयोध्या सत्यानामत्वेन " ' अकारो वासुदेवः स्याद्यकारस्तु प्रजापतिः उकारो रुद्ररूपस्तु तां ध्यायन्ति मुनीश्वराः ' इति पद्मपुराणम् ॥ २६ ॥

गो० टी०–अतिरथमहारथादिशब्दैः रथसंपत्तिरपि सूचिता एवं चतुरङ्गबलसंपत्त्या न नगरमात्रमप्रधृष्यं किंत्वभितो द्वे योजने दुर्गमे इत्याह–सेति । सा नगरी भूयः नगराद्बहिरपि द्वे योजने द्वयोर्योजनयोः ' अत्यन्तसंयोगे द्वितीया । सत्यनामा यथार्थनामा अयोध्यानामा " डाबुभाभ्यामन्यतरस्याम् " इति डाप् अत्र हेतुमाह–यस्यामिति । योजनत्रयविस्तारवत्यां तस्यां मध्ये योजनद्वयमत्यन्तंयोद्धुमशक्येत्यर्थ इत्यप्याहुः ॥२६॥

१ निष्पन्नै. रा. गो. पाठः । २ रा. गो. पाठेऽधिकम् ।

तां पुरीं स महातेजा राजा दशरथो महान्। शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥ २७ ॥
तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवाम्।
पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षष्ठः सर्गः ॥ ६ ॥

* सप्तमः सर्गः

दशरथस्याष्टामात्यानामन्येषां च नीतिवर्तनम्।

तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मनः। मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥ १ ॥
अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः। शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥ २ ॥

२७] ति० टी०–तामिति। शमिता नाशिता अमित्रा येन। नक्षत्राणि नक्षत्रलोकान् ॥ २७ ॥

रा० टी०–पालनमेव भङ्ग्यन्तरेणाह–तामिति। महान् सर्वोत्कृष्टः अत एव शमितामित्रः दमितशत्रुकः महातेजाः परमवर्चस्को राजा महाराजाधिराजो दशरथः नक्षत्राणि चन्द्रमा इव तां सत्यनामां पुरीं शशास ॥ २७

गो० टी०–पालनं चाह्लादनपूर्वकमित्याशयेनाह–तामिति।

२८] ति० टी०– तामिति। अर्गलं नाम कपाटावष्टम्भकतिर्यक्स्थापितदारुविशेषः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षष्ठः सर्गः ॥ ६ ॥

रा० टी०–पुनरपि भङ्ग्यन्तरेणाह–तामिति। दृढतोरणार्गलां दृढस्तोरणार्गलो बहिर्द्वारिवर्तिकपाटनिश्चलतासम्पादकतिर्यक्निबद्धकाष्ठविशेषो यस्याम् विचित्रैर्गृहैरुपशोभिताम् शिवां परमकल्याणप्रदाम् नृपसिंहसंकुलां नृपसिंहैः खण्डमण्डलेश्वरश्रेष्ठैः संकुलां व्याप्ताम् सत्यनामां तां पुरीमयोध्यामेव शक्रसमः महीपतिः महाराजाधिराजः नित्यं शशास पुरीं नित्यं शशासेत्यनेन देशस्य निःशेषोपद्रवराहित्यं सूचितम्। वैशब्दो नित्यार्थे सत्यनामामित्यत्र "डाबुभाभ्यां०" इति डाप् ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०–सर्गोक्तमर्थं संक्षेपेण सर्गान्ते पुनर्दर्शयति–तामिति। अर्गलं नाम कवाटनिश्चलत्वाय तिर्यङ्निबद्धो दारुविशेषः 'तद्विष्कम्भोऽर्गलं न ना' इत्यमरः। शिवां मङ्गलवतीं वंशस्थोपजातिवृत्तम् ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति० टी०–अथ तस्य मन्त्रिसंपदुच्यते–तस्येति। गुणैरमात्यापेक्षितैर्गुणैर्युक्ताः इक्ष्वाकोस्तद्वंशजस्य दशरथस्य। गुणानाह—मन्त्रज्ञा इति। मन्त्रः कार्यविचारः इङ्गितं पराभिप्रायम्। प्रियस्य राज्ञो हिततत्पराः ॥ १ ॥

रा० टी०–मन्त्रिसम्पत्तिमाह–तस्येत्यादिभिः। महात्मनः सर्वपूज्यस्वरूपकस्य गुणैः इक्ष्वाकोस्तु इक्ष्वाकुसदृशस्य तस्य महाराजाधिराजदशरथस्य अमात्याः मन्त्रज्ञाः मन्त्रः कार्याकार्यविचारः तं जानन्तीति इङ्गितज्ञाः पराभिप्रायवेदितारश्च प्रियस्य स्वामिनो हिते नित्यं रताश्चासन् तुशब्द इवार्थे। किंच इक्ष्वाकोरेवामात्यास्तस्य दशरथस्यामात्या आसन्नित्यन्वयः अत्रार्थे तुरेवार्थे अत एव तस्यास्तां तस्य पौर्वका इत्येतद्घटनाभ्यां दशरथग्रहणं न विरूपम् ॥ १ ॥

गो० टी०–अथोक्तगुणसंपन्नस्य दशरथस्य धर्मानुष्ठानसहायसाधिष्ठसचिवसंपत्तिं दर्शयति सप्तमे–तस्येत्यादिना। महात्मनः महामतेः तस्य इक्ष्वाकोः दशरथस्य तद्वंशजत्वात्तच्छब्दः मन्त्रज्ञाः कार्यविचारज्ञाः इङ्गितं पराभिप्रायः तं मुखविकाशसंकोचव्यङ्ग्यवचनादिभिर्जानन्तीति इङ्गितज्ञाः अमात्याः अमात्यराज्ञः सर्वराज्यव्यापारेषु सह भवन्तीत्यमात्याः "अव्ययात्यप्" इति त्यप्प्रत्ययः गुणैः वक्ष्यमाणमन्त्रिगुणैः उपेता आसन् ॥ १ ॥

२] ति० टी०–अष्टाविति। शुचयोऽसत्यस्वामिद्रोहादिरूपवाङ्मनसाशुचित्वरहिताः नित्यश आत्मप्रयोजनसमयेऽपि राजकृत्येषु तदनुष्ठानेष्वनुरक्तास्तत्पराः ॥ २ ॥

रा० टी०–धर्मशास्त्रोक्तसङ्ख्याका मन्त्रिणः सन्तीति बोधयन्नाह–अष्टाविति। शुचयः स्वामिकार्ये कापट्यसंसर्गरहिता अत एव राजकृत्येषु एव नित्यशोऽनुरक्ताः अत एव यशस्विनः कीर्तिमन्तः वीरस्य तस्य महाराजाधिराजस्यामात्याः अष्टौ

* अस्माभिस्तिलकटीकानुरोधेनेतरयोर्विनिवेशनस्यादृततया यत्र गोविंदराजेन रामायणशिरोमणिकृता च तिलककृद्व्याख्यातानां श्लोकानां पाठो न धृतः, अन्यथा वा विभागोङ्गीकृतोऽधिको वा पाठो धृतस्तत्र तत्तदंगीकृतविभागभंगो मा भूदिति तत्तदभिमतसंख्यैव तत्तट्टीकायां प्रदर्शिता। किंतु तिलकटीकाया अधस्तात् तत्रव्याख्यातश्लोकस्य तदेकदेशघटितस्य वा यथासभवं टीकाद्वयं निवेशितम्।

१ नृपसिंहसंकुलम् रा. पाठः। २ कोस्तु. गो. पाठ.।

धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः । अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥ ३ ॥
ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ । वसिष्ठो वामदेवश्च मन्त्रिणश्च तथापरे ॥ ४ ॥
सुयज्ञोऽथ जाबालिः काश्यपोऽथ गौतमः । मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ॥ ५ ॥
एतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्वकाः । विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः ॥ ६ ॥
श्रीमन्तश्च महात्मानः शस्त्रज्ञा दृढविक्रमाः । कीर्तिमन्तः प्रणिहिता यथावचनकारिणः ॥ ७ ॥

एव बभूवुः ' मन्त्रिणः सप्त वाष्टौ वा प्रकुर्वीत परीक्षितान् ' इति मनुः । चशब्दौ एवार्थौ ॥ २॥

गो० टी०–'मन्त्रिणः सप्त वाष्टौ वा प्रकुर्वीत परीक्षितान् ' इति मनुनोक्तरीत्याह–अष्टाविति । शुचयः सर्वात्मना स्वामिद्रोहचिन्तारहिताः नित्यशः राजकृत्येषु तदनुष्ठानेषु अनुरक्तास्तत्पराः अष्टावमात्या बभूवुः ॥ २ ॥

३] ति० टी०–तान्नामत आह–धृष्टिरित्यादि ॥ ३ ॥

रा० टी०–तत्तन्नामान्याह–धृष्टिरिति । धृष्टिः प्रथमः जयन्तश्च द्वितीयः विजयश्च तृतीयः सिद्धार्थश्च चतुर्थः अर्थसाधकश्च पञ्चमः अशोकश्च षष्ठः मन्त्रपालश्च सप्तमः सुमन्त्रश्च अष्टमोऽभवत् हिश्चार्थः सचान्यत्राप्यन्वेति । सुराष्ट्रो राष्ट्रवर्द्धनः 'अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित्' इति भट्टटीकाङ्कितपुस्तकेषु पाठः तत्र तेषां नामान्तराणि बोध्यानि ॥ ३ ॥

गो० टी०–तेषां नामानि दर्शयति–धृष्टिरिति । धृष्टिः प्रथमोऽभवत् जयन्तोद्वितीयोऽभूत् इति क्रमेण योजयित्वा सुमन्त्रोऽष्टमोऽभवदिति योज्यम् ॥ ३ ॥

४] ति० टी०–अभिमतौ ऋत्विजौ मुख्यर्त्विजौ । अपरे उक्ताष्टप्रधानमन्त्रिव्यतिरिक्ता इत्येके परे मन्त्रिण इत्युक्त्या वसिष्ठवामदेवयोर्मन्त्रित्वमपि सूच्यत इति तीर्थः । तत्र 'मन्त्रिणश्च तथा' इति पाठे परेषामृत्विक्त्वलाभेऽपि वसिष्ठवामदेवयोर्मन्त्रित्वस्य शब्दमर्यादया व्यङ्गमर्यादया चालाभात् वस्तुतः 'तथापरे' इत्यस्य ऋत्विज इत्यर्थः मन्त्रिणश्चेत्यस्य वसिष्ठाद्या इति शेषः अमात्या देशादिकार्यनिर्वाहकाः मन्त्रिणो व्यवहारद्रष्टार इति भेदः ॥ ४ ॥

रा० टी०–ऋत्विजो गणयन्नाह–ऋत्विजावित्यादि श्लोकद्वयेन । तस्य महाराजाधिराजदशरथस्य अभिमतौ सकलज्ञानविशिष्टौ अत एव ऋषिसत्तमौ सर्वऋषिश्रेष्ठौ वसिष्ठो वामदेवश्चेत्येतौ द्वौ अथ मङ्गलप्रदौ ऋत्विजौ नित्यमास्तामभवताम् तथाशब्दो नित्यार्थकः ॥ ४ ॥

गो० टी०–ऋत्विजाविति । वसिष्ठः वामदेवश्च द्वौ ऋषिसत्तमौ ऋत्विजौ पुरोहितौ अभिमतौ प्रधानौ आस्ताम् तथा अभिमताः अपरे मन्त्रिणः ऋत्विजः जाबालिप्रभृतयश्चासन् ॥

५] ति० टी०–परानेवाह–सुयज्ञ इत्यादि सुयज्ञ ऋषिविशेषः ॥ ५ ॥

रा० टी०–अथापरे ताभ्यां भिन्नाः मन्त्रिणः वेदमन्त्रद्रष्टारः सुयज्ञः जाबालिश्च काश्यपश्च गौतमश्च दीर्घायुर्मार्कण्डेयश्च द्विजः अनेकद्विजाविशेषः कात्यायनश्च ऋत्विजोऽभवन्निति शेषः द्विजशब्दस्यावृत्त्या प्रत्येकमन्वये तु नार्शआद्यजन्तत्वकल्पना अपिद्वयं तथानुशब्दौ चार्थौ अथशब्दो मङ्गलार्थकः श्लोकद्वयमेकान्वयि ॥ ५ ॥

६] ति० टी०–'एतैर्ब्रह्मर्षिभिर्नित्यं सहितास्तस्य ऋत्विजः।' इत्यनेन सर्वथा कर्मसाकृण्यं दर्शितम् । पौर्वकाः परम्परागता इत्यर्थकममात्यर्त्विजां विशेषणम् । विद्येति । विद्यया सह विनीताः विद्याविनयोभयसंपन्ना इत्यर्थः यथायोगं वक्ष्यमाणानि विशेषणान्यमात्येषु मन्त्रिषु च योज नीयानि ॥६॥

रा० टी०–एतैरिति । तस्य महाराजाधिराजदशरथस्य पौर्वकाः पित्रादयः एतैः प्रसिद्धैः ब्रह्मर्षिभिः वसिष्ठादिभिर्नित्यं ऋत्विजः यागकर्तारः आसन् पौर्वकगुणान्वर्णयन्नाह–विद्येत्यादिभिः विद्याविनीताः प्राप्तसकलविद्यया विनीताः सरलाः किञ्च विद्यासु विनीताः शिक्षिताः अत एव ह्रीमन्तः जनापवादविपर्यीभूतकर्मवैगुण्यालज्जावन्तः अत एव कुशला सर्वसत्कर्मनिपुणाः अत एव नियतेन्द्रियाः नियमितान्तर्बहिरुभयकरणाः ६

गो० टी०–अथ मन्त्रिगुणान् प्रपञ्चयति सर्गशेषेण विद्येति । विद्यासु आन्वीक्षिकीप्रभृतिषु विनीताः शिक्षिताः ह्रीमन्तः अकृत्यकरणेषु लज्जावन्तः कुशलाः नीतौ समर्थाः नियतेन्द्रियाः अविहितविषयेभ्यो निवृत्ताः श्रीमन्तः लक्ष्मीसमृद्धाः महात्मानः महाबुद्धयः शास्त्रज्ञाः नीतिशास्त्रज्ञाः दृढविक्रमाः अप्रतिहतपराक्रमाः ॥ ५ ॥

७] ति० टी०–शस्त्रज्ञाः शस्त्रप्रतिपादकधनुर्वेदविदः प्रणिहिताः सर्वराजकार्येषु सावधानाः यथावचनकारिणः राज्ञ इति शेषः ॥ ७ ॥

रा० टी०–श्रीमन्त इति । श्रीमन्तः लक्ष्मीविशिष्टाः महात्मानः पूज्यस्वरूपाः शस्त्रज्ञाः धनुर्वेदप्रतिपादितशस्त्रविषयकज्ञानवन्तः दृढविक्रमाः अचलपराक्रमविशिष्टाः शास्त्रज्ञा इति पाठे शस्त्रप्रतिपादकशास्त्रनिपुणा इत्यर्थः कीर्तिमन्तः प्रशस्तयशोयुक्ताः प्रणिहिताः निखिलकर्मस्वनवधानतारहिताः किञ्च प्रणः सद्धर्मप्रतिज्ञा अस्ति येषां ते प्रणिनः तेषां हितास्तद्धर्मसाधका इत्यर्थः प्रणशब्दस्य प्रतिज्ञावाचकत्वं कोशे प्रसि-

---

१ सिद्धार्थोह्यर्थ साधकः रा. गो. पाठः । २ अशोको मन्त्रपालश्च. रा. गो. पाठः । ३ऽभवत् रा. गो. पाठः । ४ इतआरभ्यार्धत्रयं गोविंदराजेन न धृतम् । ५ शास्त्रज्ञाः गो. पाठः ।

तेजःक्षमायशःप्राप्ताः स्मितपूर्वाभिभाषिणः । क्रोधात्कामार्थहेतोर्वा न ब्रूयुरनृतं वचः ॥ ८ ॥
तेषामविदितं किंचित्स्वेषु नास्ति परेषु वा । क्रियमाणं कृतं वापि चारेणापि चिकीर्षितम् ॥ ९ ॥
कुशला व्यवहारेषु सौहृदेषु परीक्षिताः । प्राप्तकालं यथा दण्डं धारयेयुः सुतेष्वपि ॥ १० ॥
कोशसंग्रहणे युक्ता बलस्य च परिग्रहे । अहितं चापि पुरुषं न हिंस्युरविदूषकम् ॥ ११ ॥
वीराश्च नियतोत्साहा राजशास्त्रमनुष्ठिताः । शुचीनां रक्षितारश्च नित्यं विषयवासिनाम् ॥ १२ ॥
ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन् । सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम् ॥ १३ ॥

ढम् यथावचनकारिणः यथावचनं वचनमनतिक्रम्य कुर्वन्ति तच्छीलाः सत्यप्रतिज्ञा इत्यर्थः ॥ ७ ॥

गो० टी०–कीर्तिमन्त इति । प्रणिहिताः राजकृत्येष्वप्रमत्ताः यथावचनकारिणः यथोक्तवन्तस्तथैव कुर्वन्ति ननु 'मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यत्' इतिन्यायत इति भावः । तेजःक्षमायशांसि प्राप्ताः "द्वितीयाश्रिता" इत्यादिना समासः । अत्र यशः प्रतापक्षमाजन्या प्रथा कीर्तिमन्त इत्यत्र कीर्तिस्तु मन्त्रज्ञताकृता प्रथा स्मितपूर्वाभिभाषिण इत्यनेन निर्मत्सरत्वमुच्यते । आसन् मन्त्रिण इति श्लोकद्वयशेषः । क्रोधादित्यर्द्धमेकान्वयम् क्रोधाद्वा कामहेतोरर्थहेतोर्वा अनृतमसत्यं वचो न ब्रूयुः ॥ ६ ॥

८] ति० टी०–कामार्थहेतोरिति द्वन्द्वगर्भः कर्मधारयः ८

रा० टी०–तेज इति । तेजःक्षमायशःप्राप्ताः तेजश्च क्षमा च यशश्च तानि प्राप्ताः "द्वितीयाश्रिता०" इत्यादिना समासः । अत्रत्ययशःशब्दः नित्यप्रवृद्धयशःपरः पूर्वत्र कीर्तिशब्दः प्रतापपरो वा अतो न पौनरुक्त्यम् । स्मितपूर्वाभिभाषिणः स्मितं पूर्वं यस्मिँस्तदभिभाषन्ते तच्छीलाः क्रोधात् क्रोधहेतोः कामार्थहेतोः कामरूपार्थरूपहेतोर्वाऽनृतं सत्यभिन्नं वचो न ब्रूयुः ॥ ८ ॥

९] ति० टी०–स्वेषु मित्रेषु परेषु शत्रुषु चारेण करणेन कृतं क्रियमाणमपि वा अपि चिकीर्षितं च तेषां न किंचिदविदितमभूदिति शेषः ॥ ९ ॥

रा० टी०–तेषामिति । तेषां पौर्वकानां स्वेषु आत्मीयेषु परेषु ततो भिन्नेषु च क्रियमाणं वर्तमानकालिकवृत्तं कृतं भूतकालिकवृत्तं च यच्चिकीर्षितं भविष्यत्कालिकवृत्तं तच्च चारेण करणभूतेन अविदितं विदितभिन्नं नास्ति शरैः शातितपत्र इतिवदेकदेशान्वयः वाप्यथाः चार्थे ॥ ९ ॥

गो० टी०– तेषामिति । तेषां मन्त्रिणां स्वेषु स्वराष्ट्रीयवृत्तान्तेषु परेषु परराष्ट्रीयवृत्तान्तेषु च कृतं क्रियमाणं चिकीर्षितं कर्तुमिष्टं करिष्यमाणमिति यावत् यत्किंचिदपि वा वृत्तं चारेण चारमुखेन अविदितं नास्ति सर्वोपि स्वराष्ट्रपरराष्ट्रवृत्तान्तभेदस्तैर्ज्ञात इत्यर्थः ॥ ७ ॥

१०] ति० टी०–सौहृदं विषयविशेषगतदोषान्दोषत्वेनागृह्णंश्चित्तवृत्तिविशेषस्तत्र परीक्षिताः राज्ञेति शेषः । प्राप्तः सापराधत्वलक्षणः कालो यस्य तं धारयेयुः कुर्युरित्यर्थः ॥१०॥

रा० टी०–कुशला इति । व्यवहारेषु कुशलाः निपुणा सौहृदेषु परीक्षिताः मित्रवर्गैरिति शेषः पौर्वकाः प्राप्तकालं प्राप्तः कालो यस्य तं दण्डं सुतेषु अपि यथावत् धारयेयुः॥१०॥

गो० टी०–कुशला इति । व्यवहारेषु निश्चितार्थप्रतिपादनेषु कुशलाः समर्थाः सौहृदेषु विषयेषु परीक्षिता राज्ञा बहुधा परीक्षितास्ते मन्त्रिणः सुतेष्वपि प्राप्तकालं प्राप्तसापराधत्वलक्षणकालं दण्डं धारयेयुः प्रवर्तयेयुः ॥ ८ ॥

११] ति० टी०–कोशसंग्रहणं चतुरङ्गबलपरिग्रहे हेतुः अहितं स्वहिताचरणरहितं शत्रुमप्यविदूषकमनपराधिनं न हिंस्युः ॥ ११ ॥

रा० टी०–कोशेति । कोशसंग्रहणे कोशस्य अर्थसमूहस्य संग्रहणे अर्जने युक्ताः बलस्य चतुरङ्गसैन्यस्य परिग्रहे परिज्ञाने तत्तद्गुणपरीक्षणे चेत्यर्थः युक्ताः उद्युक्ताः पौर्वकाः अदूषकं दोषरहितमहितमपि पुरुषं न विहिंस्युः पीडयेयुः ॥ ११ ॥

गो० टी०–कोशेति । कोशस्य अर्थनिचयस्य संग्रहणे संपादने बलस्य चतुर्विधसैन्यस्य परिग्रहे अर्थप्रदानेन संरक्षणे च युक्ता अवहिताः सन्तः अहितं शत्रुमपि अदूषकमनपराधिनं न विहिंस्युर्न पीडयेयुः शकिलिङ् ॥ ९ ॥

१२] ति० टी०–राजशास्त्रं नीतिशास्त्रम् अनुष्ठिता अनुसारिणः शुचीनामिति स्तेयानृतरहिताः शुचयः विषयो देशः ॥ १२ ॥

रा० टी०–वीरा इति । वीराः शूरतावन्तः अत एव नियतोत्साहाः तात्त्विकयुद्धोत्साहविशिष्टाः राजशास्त्रं राजनीतिमनुष्ठिताः तदनुष्ठानवन्तः शुचीनां शुद्धान्तःकरणानां विषयवासिनां देशवासिनां चकारेण पुरवासिनां नित्यं रक्षितारश्चासन्निति शेषः ॥ १२ ॥

गो० टी०–वीराश्चेति । वीराः शत्रुनिवारणक्षमाः नियतोत्साहाः शत्रुजये नित्योत्साहाः राजशास्त्रं नीतिशास्त्रमनुष्ठिताः अनुष्ठितवन्तः अत एव विषयवासिनां स्वराज्यवासिनां शुचीनां साधूनां नित्यं रक्षितारः अशुचीनां तु निहन्तार इति च सिद्धं ते आसन्नित्यनुषज्यते ॥ १० ॥

१३] ति० टी०–ब्रह्मेति । 'अभिपूरयन्' इति पाठेऽभाव आर्षः । सुतीक्ष्णेति । बलाबलमपराधतारतम्यम् पुरुषस्येत्युपलक्षणम् देशादीनां च बलाबलं संप्रेक्ष्येत्यर्थः

---

१ णाथ रा. पाठः । २ तु ते दण्डं. गो. ३ न विहिंस्युरदूषकम् रा. गो. पाठः ।

शुचीनामेकबुद्धीनां सर्वेषां संप्रजानताम् । नासीत्पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् ॥ १४ ॥
कश्चिन्न दुष्टस्तत्रासीत्परदाररतिर्नरः । प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरं च तत् ॥ १५ ॥
सुवाससः सुवेषाश्च ते च सर्वे शुचिव्रताः । हितार्थाश्च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥ १६ ॥
गुरौ गुणगृहीताश्च प्रख्याताश्च पराक्रमैः । विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चयाः ॥ १७ ॥

'देशकालवयःशक्तीः संचिन्त्या दण्डकर्मणि' इति वचनात् । अयं कोशपूरणहेतुः ॥ १३ ॥

रा० टी०–ब्रह्मेति । पुरुषस्यापराधिजनस्य बलाबलमपराधतारतम्यं संप्रेक्ष्य सुविचार्य ब्रह्मक्षत्रं ब्रह्मणो वेदस्य क्षत् अप्रामाण्यप्रतिपादकत्वेन हिंसनं येषां ते नास्तिकास्तेभ्यस्त्रायन्ते वेदाप्रामाण्यवादानिवर्तनपूर्वकवेदप्रामाण्यव्यवस्थापकत्वेन जनान् रक्षतीति ब्रह्मक्षत्रं ब्राह्मणकुलमित्यर्थः तत् अहिंसन्तः अपीडयन्तस्सुतीक्ष्णदण्डाः सन्तस्ते तत्पौर्वकाः कोशं समपूरयन् दानाधिक्यादिना कोशव्ययेऽपि पुनः पुनरपूरयन्नित्यर्थः । अभिपूरयन्निति पाठे अडभाव आर्ष इति भट्टः ॥ १३ ॥

गो० टी०–ब्रह्मेति । ब्रह्म ब्राह्मणान् क्षत्रं क्षत्रियांश्च अहिंसन्तः विनापराधं तत्स्वमनपहरन्तः सत्यप्यपराधे पुरुषस्यापराधिनः बलाबलं अपराधतारतम्यं शक्तितारतम्यं वा संप्रेक्ष्य अपराधगुरुत्वे सुतीक्ष्णदण्डाः अपराधाल्पत्वे मृदुदण्डाश्च शक्तत्वे सुतीक्ष्णदण्डाः अशक्तत्वे मृदुदण्डाश्च कोशं समपूरयन् ॥ ११ ॥

१४] ति० टी०–एकबुद्धीनां परस्परमेकबुद्धीनाम् । संप्रजानतां पुरराष्ट्रवृत्तान्तं विचारयताम् तेषां विचारविषये पुरादौ मृषावादित्वगुणविशिष्टः कोऽपि नासीत् ॥ १४ ॥

रा० टी०–शुचीनामिति । शुचीनां शुद्धानामेकबुद्धीनां मन्त्रिसमानबुद्धीनां संप्रजानतां प्रजापालनविषयकसम्यग्विचारवतां सर्वेषां तत्पौर्वकाणां पुरे राष्ट्रे च क्वचित्कदाचिदपि मृषावादी नरो जनः नासीत् एको वाशब्दोऽप्यर्थे अपरश्चार्थे १४

गो० टी०–अथ मन्त्रिगुणसंपत्तिफलं दर्शयति–शुचीनामित्यादिश्लोकद्वयेन । शुचीनां एकरूपकरणत्रयवतां एकबुद्धीनां एककण्ठानां सर्वेषां मन्त्रिणां संप्रजानतां राज्यतन्त्रं विचारयतां भावलक्षणसप्तम्यर्थे षष्ठी "चानादरे" इत्यत्र योगविभागेन सर्वेषु मन्त्रिषु राज्यतन्त्रं विचारयत्स्वित्यर्थः पुरे वा राष्ट्रे वा क्वचित्कोणेऽपि मृषावादी असत्यवादी नरो नासीत् ॥ १२ ॥

१५] ति० टी०–प्रेति । मन्त्रिणां नीत्या सर्वं प्रशान्तं निर्बाधमासीदित्यर्थः ॥ १५ ॥

रा० टी०–कश्चिदिति । तत्र पौर्वकराज्ये दुष्टो धर्मद्वेषकः अत एव परदाररतिः कश्चिन्नरो नासीत् अत एव राष्ट्रं पुरवरं च यत् तत्सर्वं प्रशान्तं समूलसर्वोपद्रवरहितमेवासीत्॥१५॥

गो० टी०–कश्चिदिति । किंच तत्र पुरराष्ट्रेषु कश्चिन्नरो दुष्टः कुटिलः परदाररतश्च नासीत् प्रत्युत यद्राष्ट्रं पुरवरं च तत्सर्वं प्रशान्तमेव आसीत् नगरजनपदवासिनः सर्वेऽप्यन्यायाधर्मरहिता एवासन्नित्यर्थः ॥ १३ ॥

१६] ति० टी०–नरेन्द्रस्य हितार्था हितप्रयोजनाः सर्वेऽसन्निति शेषः ॥ १६ ॥

रा० टी०–सुवाससेति । नरेन्द्रस्य पूर्वप्रवृत्तराज्यस्य हितार्थाः हितप्रयोजनकाः सुवाससः शोभनवस्त्राः सुवेषा समीचीनालङ्कारकाश्च सुशीलिनः समीचीनस्वभावास्ते प्रसिद्धाः सर्वे मन्त्रिणश्च नयचक्षुषा नीतिनेत्रेण जाग्रत आसन् इति शेषः। नरेन्द्रस्येत्यत्रैकत्वं जात्यभिप्रायेण ॥ १६ ॥

गो० टी०–पुनस्तान्विशेषयति–सुवाससेत्यादिना सार्द्धश्लोकत्रयेण । सुवाससः शुभ्रवाससः सुवेषाः शोभनालंकाराः सुशीलिनः सुसद्वृत्ताः नरेन्द्रस्य स्वामिनः हितार्थं नयचक्षुषा जाग्रतः जागरूकाः सर्वदा नीतिषु दत्तावधाना इत्यर्थः ॥ १४ ॥

१७] ति० टी०–गुरोः संबन्धसामान्ये षष्ठी । गुरुणा स्वस्वाचार्येण राज्ञा च अर्शआद्यजन्तगुणशब्देन गुणवत्तया गृहीता इत्यर्थः तेन गुर्वनुग्रहप्राप्तसर्वैश्वर्यत्वं च सूचितम् । 'गुणागुणगृहीताः' इति पाठे गुणदोषग्रहीतार इत्यर्थः । बहुव्रीहिः आहिताग्न्यादित्वात्परनिपातो निष्ठान्तस्य विदेशेष्वपि सर्वतो विज्ञातत्वे हेतुः बुद्धिनिश्चया बुद्धिसंपन्नाः ॥ १७ ॥

रा० टी०–गुराविति । गुरौ महात्मनि गुणगृहीताः गुणमात्रदर्शिनः गुरुदोषादर्शका इत्यर्थः। पराक्रमे विषये विदेशेष्वपि प्रख्याताः सर्वतो विज्ञाताः सर्वविषयकज्ञानवन्तः तत्र हेतुः बुद्धिनिश्चयाः बुद्ध्या बुद्धिपूर्वकविचारेण निश्चयः गुरुशास्त्रवाक्यादौ विश्वासो येषां ते मन्त्रिण आसन्निति शेषः। गुरोर्गुणगृहीताश्चेति भट्टसंमतः पाठः तत्र गुरुणा गुणवत्तया गृहीता इत्यर्थः गुरोरिति संबन्धसामान्ये षष्ठी गुण इति अर्शआद्यजन्तः गुणागुणगृहीता इति पाठे गुणदोषग्रहीतार इत्यर्थ इति तैर्ण्याख्यातम् ॥ १७ ॥

गो० टी०–गुराविति । गुरौ गुरुषु जात्येकवचनम् गुणगृहीताः गृहीतगुणाः गुणमात्रग्राहिणो दोषमपश्यन्त इत्यर्थः पराक्रमे विषये प्रख्याताः विदेशेषु देशान्तरेष्वपि सर्वतः सर्वत्रातीतानागतविषयेषु बुद्धिनिश्चयात् निश्चयरूपबुद्धेर्हेतोः विज्ञाताः विख्याताः ॥ १५ ॥

१ कश्चिन्न. रा. गो. पाठः । २ रतो गो. पाठः । ३ यत् रा. पाठः । ४ सुशीलिनः रा. गो. पाठः । ५ हितार्थ. गो. पाठः । ६ गुरौ. रा. गो. पाठः । ७ पराक्रमे रा. गो. पाठः । ८ निश्चयात्. गो. पाठः । ९ शक्तिरिति भाति ।

अभितो गुणवन्तश्च न चासन्गुणवर्जिताः । संधिविग्रहतत्त्वज्ञाः प्रकृत्या संपदान्विताः ॥ १८ ॥
मन्त्रसंवरणे शक्ताः शक्ताः सूक्ष्मासु बुद्धिषु । नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः ॥ १९ ॥
ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः । उपपन्नो गुणोपेतैरन्वशासद्वसुंधराम् ॥ २० ॥
अवेक्षमाणश्चारेण प्रजा धर्मेण रक्षयन् । प्रजानां पालनं कुर्वन्नधर्मं परिवर्जयन् ॥ २१ ॥
विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसङ्गरः । स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमाम् ॥ २२ ॥

१८] ति० टी०–अभितो गुणवन्तः सर्वदेशे सर्वकाले च गुणवन्तः । संधीति । संध्यादिविषयकशास्त्रतत्त्वज्ञाः प्रकृत्या त्रिगुणया संपदान्विताः । तत्र सात्त्विक्या संपदा शिष्टपालने, तामस्या संपदा दुष्टनिग्रहकाले, भोगकाले राजस्या संपदा धनधान्यदासीदासशिविकाश्वगजादिरूपया ॥ १८ ॥

रा० टी०–अभित इति । अभितः सर्वकालं गुणवन्तः । किञ्च अभितश्चतुर्दिक्षु ये गुणास्तद्वन्तः आसन् अत एव गुणवर्जिताः न अत एव सन्धिविग्रहतत्त्वज्ञाः सन्धिर्मेलनं विग्रहः कलहः तयोस्तत्त्वं जानन्तीति प्रकृत्या च स्वभावेनैव दुस्त्यजया सम्पदा सम्पत्त्या अन्विता युक्ताः चशब्द इवार्थे ॥ १८ ॥

गो० टी०–सन्धीति । सन्धिः सामन्तैः समाधानं विग्रहः तैः कलहः तयोस्तत्त्वं देशकालाद्युचितत्वं तज्जानन्तीति तथा । उक्तं च मनुना 'यदा त्वेवाल्पिका पीडा तदा सन्धिं समाश्रयेत्। अभ्युच्छ्रयो यदात्मानं तदा मन्येत विग्रहम्' इति । प्रकृत्या स्वभावेन संपदा ऐश्वर्येण अन्विताः संपदभावे तच्चापले नान्यथा कुर्युरिति भावः। मन्त्रो राष्ट्रकार्यचिन्ता तस्य संवरणे बहिरप्रकटने शक्ताः संपत्कार्यमिदं सूक्ष्मासु बुद्धिषु सूक्ष्मार्थविशेषविचारेषु श्लक्ष्णाः अपरुषाः सद्यःप्रतिभावन्त इत्यर्थः ॥ १६ ॥

१९] ति० टी०–संवरणं रक्षणम् । बुद्धिषु विचारेषु १९

रा० टी०–मन्त्रेति । मन्त्रसंग्रहणे मन्त्रस्य देशस्वास्थ्यसम्पादकविचारस्य यत्संग्रहणं मन्त्र्यतिरिक्तैर्वाचानुद्घाटनं तत्र शक्ताः संवरणे इति पाठेपि स एवार्थः सूक्ष्मासु दुर्लक्ष्यासु अपि बुद्धिषु विचारेषु श्लक्ष्णाः पारुष्यस्वभावरहिताः नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः ते आसन्निति शेषः।शक्ताः सूक्ष्मासु इति पाठकपाठः ॥ १९ ॥

गो० टी०–नीतिशास्त्रेति । नीतिशास्त्रविशेषज्ञाः नीत्या शास्त्रविशेषज्ञाः ग्रन्थशासनयोः शास्त्रम् ' इति भास्करः । सततं राज्ञः प्रियवादिनः हितवचनस्यैव राज्ञः प्रियत्वात् आसन्निति पूरणीयम् ॥ १७ ॥

२०] ति० टी०–ईदृशैः प्रागुक्तरूपैरमात्यैश्च चातृत्विङ्मन्त्रिभिः अत एव गुणोपेतैरुपपन्न इति योजना ॥ २० ॥

रा० टी०–ईदृशैरिति । ईदृशैः विद्याविनीतत्वादिना वर्णितपौर्वकसदृशैः गुणोपेतैः निखिलमन्त्रिगुणयुक्तैः तैः पूर्ववर्णिताष्टभिः अमात्यैः उपपन्नः युक्तः चकारेण ऋत्विग्भिरुपपन्नः अनघः स्वाश्रितावनिवर्तकः राजा महाराजाधिराजो दशरथः वसुन्धरामन्वशासत् ॥ २० ॥

गो० टी०–ईदृशैरिति । ईदृशैः उक्तगुणविशिष्टैः गुणोपेतैः उक्तगुणातिरिक्तगुणोपेतैस्तैः अमात्यैः उपपन्नः अनघः व्यसनरहितः । उक्तं मनुना 'दश कामसमुत्थानि तथाष्टौ क्रोधजानि च व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्' इति । व्यसनस्वरूपं चोक्तम् 'मृगयाक्षो दिवास्वापः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणे । वाग्दण्डजं च पारुष्यं क्रोधजोपि गणोऽष्टकः' इति। दशरथो राजा वसुन्धरां भूमिम् अन्वशासदिति लुङ् "सर्तिशास्त्यर्तिभ्यश्च " इत्यङ् ॥ १८ ॥

२१] ति० टी०–चारेण स्वपरदेशवृत्तान्तम् । प्रजा धर्मेण युक्ता यथा भवन्ति तथा पुरुषैः रक्षयन् सर्वत्र हेतौ शता ॥२१॥

रा० टी०–अवेक्षमाण इति । चारेण चारचक्षुषा अवेक्षमाणः निखिललोकवृत्तान्तं विजानन् धर्मेण धर्माचरणेन प्रजा रञ्जयन् प्रजानुरागमुत्पादयन् प्रजानां पालनं कुर्वन् अधर्मं परिवर्जयन्धर्मविरुद्धप्रवृत्तिं निवारयन् ॥ २१ ॥

गो० टी०–अवेक्षमाण इति। श्लोकद्वयमेकान्वयम्। चारेण चक्षुःस्थानीयेन अवेक्षमाणः स्वपरराष्ट्रवृत्तान्तान् पश्यन् जात्येकवचनमिदम् अनेकचारैर्जैत्यत्ववचनात्। यथाह मनुः 'वने वनचराः कार्याः श्रमणाटविकादयः । परप्रवृत्तिज्ञानार्थं शीघ्राश्वारपरम्पराः ' इति । धर्मेण दण्ड्यदण्डनादिना प्रजा रञ्जयन् आह्लादयन् पालनमनिष्टनिवृत्तिपूर्वकेष्टप्रापणम् अधर्मम् अदण्ड्यदण्डनादि विश्रुतः दानविक्रमादिभिः प्रसिद्धः वदान्यः दानशीलः सत्यसङ्गरः सत्यप्रतिज्ञः ' सङ्गरो ना क्रियाकाले प्रतिज्ञाविपदोर्युधि' इति यादवः । सः पुरुषव्याघ्रः पुरुषश्रेष्ठः तत्र अयोध्यायां वसन्निति शेषः ॥ १९ ॥ २० ॥

२२] ति० टी०–अतो हेतोर्विश्रुतः सत्यसंगरो रणे सत्यप्रतिज्ञः तत्रायोध्यायाम् ॥ २२ ॥

रा० टी०–अत एव त्रिषु लोकेषु विश्रुतः ख्यातः वदान्यः सयुक्तिकवदनशीलः सत्यसङ्गरः कापट्यरहितसंग्रामकर्ता पुरुषव्याघ्रः पुरुषसिंहः स प्रसिद्धो महाराजाधिराजदशरथः तत्र तस्यामयोध्यायां वसन्निति शेषः इमां पृथिवीं शशास पालयामास द्वयोरेकत्रान्वयः ॥ २२ ॥

१ इदमर्धम् गो० न धृतम्। २ मन्त्रसंग्रहणे. रा० पाठः। ३ श्लक्ष्णा रा० गो० पाठः। ४ रञ्जयन् रा० गो० पाठः।

नाध्यगच्छद्विशिष्टं वा तुल्यं वा शत्रुमात्मनः । मित्रवान्नतसामन्तः प्रतापहतकण्टकः ॥ ॥
स शशास जगद्राजा दिवं[1] देवपतिर्यथा ॥ ॥ २३ ॥

तैर्मन्त्रिभिर्मन्त्रहिते नि[2]विष्टैस्तोऽनुरक्तैः कुशलैः समर्थैः ।
स पार्थिवो दीप्तिमवाप युक्तस्तेजोमयैर्गोभिरिवो[3]दितोऽर्कः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

तस्यापुत्रत्वादश्वमेधकरणे सुमन्त्रेण सह संवादः, तत्र संमिलितानाममात्याना समर्पेऽश्वमेधप्रश्नः, तत्करणे वसिष्ठादीनामनुमतिः, अश्वमोचनम्, सरयूत्तरतीरे यज्ञभूमिविधानम्, गृहागतराजानं दाराणां पुत्रप्राप्त्यर्थं दीक्षाविषयकः प्रश्नश्च ।

तस्य [4]चैवंप्रभावस्य धर्मज्ञस्य महात्मनः । सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥ १ ॥
चिन्तयानस्य तस्यैवं बुद्धिरासीन्महात्मनः । सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम् ॥ २ ॥

२३] ति० टी०–अधिगमः प्राप्तिः नताः सामन्ता यस्य कण्टकाः शत्रवः चोराश्च ॥ २३ ॥

रा० टी०–नेति । विशिष्टं तुल्यं वा आत्मनः शत्रुं नाध्यगच्छन्मित्रवान्परस्परैकमत्यापन्नबहुमित्रविशिष्टः अत एव नतसामन्तः नताः सामन्ता राजानो यस्य अतएव प्रतापहतकण्टकः प्रतापेन हताः कण्टकाः कण्टकतुल्याः शत्रवो यस्य स राजा जगच्छशास तत्र दृष्टान्तः देवपतिर्यथेति ॥ २३ ॥

गो० टी०–नाध्यगच्छदिति । विशिष्टमधिकं तुल्यं वा आत्मनः शत्रुं नाध्यगच्छत् न ज्ञातवान् । तत्र हेतुमाह–मित्रवान् नतसामन्तः पादानतसपानसीमाधिपतिकः प्रतापेन हताः कण्टकाः शत्रवो यस्य स तथा ' वेणौ द्रुमाङ्गे रोमाञ्चे क्षुद्रशत्रौ च कण्टकः' इति यादवः । स इति शेषः। उक्तमर्थं सदृष्टान्तमाह–स इति । अर्द्धमेकम् ॥ २१ ॥

२४] ति० टी०–तैरिति । मन्त्रो विचारस्तत्साध्यं हितम् । उभयत्र निविष्टैः कुशलैः सूक्ष्मार्थदर्शननिपुणैः समर्थैस्तत्साधनशक्तैः तेजोमयैः प्रचुरतेजोवद्भिः तेजः पराभिभवसामर्थ्यम् । गोभिः किरणैर्युक्त उदितोऽर्क इव । गवामपि तेजोमयैरित्यत्यन्तस्वार्थिकमयडन्तं विशेषणमित्येके तदपुष्टम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीयेआदिकाव्ये बालकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा टी०–उपसंहरन्नाह–तैरिति । मन्त्रहिते मन्त्रस्य कार्याकार्यविषयकविचारजन्यनिश्चयस्य हिते प्राप्तये निविष्टैः स्थापितैः अनुरक्तैः राजविषयकानुरागविशिष्टैः कुशलैः निपुणैः समर्थैः राजकार्यविषयकसामर्थ्यविशिष्टैः तैः पूर्वोक्तमन्त्रिभिर्दृतः सः प्रसिद्धः पार्थिवो महाराजाधिराजदशरथः तेजोमयैर्गोभिः किरणैरुदितः अर्क इव दीप्तिमवाप ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तमः सर्गः ॥ ७ ॥

गो० टी०–सर्गार्थं संग्रहेण दर्शयति–तैरिति । मन्त्रहिते मन्त्रे हिते च नियुक्तैः कुशलैः बुद्धिकुशलैः समर्थैः कार्यकरणसमर्थैः मन्त्रिभिर्दृतः नृपः तेजोमयैः स्वार्थे मयट् गोभिः किरणैर्युक्तः उदितोर्कः बालसूर्य इव दीप्तिमवाप त्रिष्टुबुपजातिश्लोकम् ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

१] ति०टी०–एवं समग्रगुणस्याप्यपुत्रत्वेनाजितापितृलोकत्वात्पुत्रार्थमश्वमेधप्रस्तावः–तस्येति । तप्यमानस्यतपःकुर्वतः

रा० टी०–महाराजाधिराजदशरथस्य नित्यैश्वर्यादिविशिष्टत्वमुक्त्वा वाङ्मनसगोचरातीतसर्वेश्वरेश्वररघुनाथप्रादुर्भावमुपक्रमते–तस्येत्यादिभिः । एवं वर्णितः प्रभावो यस्य धर्मज्ञस्य सकलधर्मवेदितुः महात्मनः सर्वपूज्यस्वरूपस्य सुतार्थं नित्यस्वपुत्रीभूतरामप्रकटनार्थोद्योगमेव तप्यमानस्य विचारयतः किञ्च तपिनो विचारशीलस्य अत एव अमानस्य प्रश्नादि प्रतिबन्धकीभूतगर्वरहितस्य द्वयोः कर्मधारयः तुशब्द एवार्थे तस्य महाराजाधिराजदशरथस्य वंशकरः स्ववंशप्रवृत्तिहेतुः सुतः नित्यस्वपुत्रः नासीत् वात्सल्यरसप्रभूतये षष्टिसहस्रवर्षपर्यन्तं न प्रादुर्बभूवेत्यर्थः ॥ १ ॥

गो० टी०–एवं धार्मिकत्वेन दशरथस्य भगवदवतारयोग्यत्वमुक्त्वा अथ तदुपयुक्ततदाराधनोपक्रमं दर्शयत्यष्टमे–तस्येति । उत्तरश्लोकवक्ष्यमाणचिन्ता युक्तेति सूचयितुं राज्ञो विशेषणानि तप्यमानस्य तपश्चरतः यद्वा पुत्रोत्पादनानुगुणदृष्टसामग्रीसत्त्वेऽपि पुत्राभावात्परितप्यमानस्य॥१॥

२] ति० टी०–चिन्तयानस्य । सुगभावश्छान्दसः तपसाप्यसाध्यपुत्रोत्पत्त्युपायं मार्गमाणस्य । एवं वक्ष्यमाण२

रा० टी०–चिन्तयानस्येति । एवमुक्तविशेषणविशिष्टस्य महात्मनः सुतार्थं नित्यस्वपुत्रप्रकटनोद्योगं चिन्तयानस्य

---

१ दिवं. गो० पाठः । २ नियुक्तै गो० पाठः । ३ वोदितार्कः रा० पाठः । ४ त्वेवं रा० गो० पाठः । ५ सुतार्थी. गो० पाठः । ६ मार्गयमाणस्येति भाति ।

स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान् । मन्त्रिभिः सह धर्मात्मा सर्वैरपि कृतात्मभिः ॥ ३ ॥
ततोऽब्रवीन्महातेजाः सुमन्त्रं मन्त्रिसत्तमं । शीघ्रमानय मे सर्वान्गुरूंस्तान्सपुरोहितान् ॥ ४ ॥
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः । समानयत्स तान्सर्वान्समस्तान्वेदपारगान ॥ ५ ॥
सुयज्ञं वामदेवं च जावालिमथ काश्यपम् । पुरोहितं वसिष्ठं च ये चाप्यन्ये द्विजोत्तमाः ॥ ६ ॥
तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा । इदं धर्मार्थसहितं श्लक्ष्णं वचनमब्रवीत् ॥ ७ ॥
मम लालप्यमानस्य सुतार्थं नास्ति वै सुखम् । तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥ ८ ॥
तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा । कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचिन्त्यताम् ॥ ९ ॥

विचारयतः तस्य महाराजाधिराजदशरथस्य सुतार्थं वाजिमेधेन तन्नामकयागेन किमर्थमहं न यजामि इष्टदेवं पूजयामि इति बुद्धिरासीत् विनिगमनाविरहात्सुतार्थमित्युभयान्वयि आगमशास्त्रस्यानित्यत्वान्मुगभावः "वर्तमानसामीप्ये" इति भूते लट् ॥२॥

गो० टी०–चिन्तयानस्येति । चिन्तयानस्य पुत्रोत्पत्त्युपायं मार्गमाणस्य मुगभाव आर्षः । एवं वक्ष्यमाणरीत्या न यजामि नायाक्षिषम् ॥ २ ॥

३–४] ति० टी०–स इति । यष्टव्यमिति मन्त्रिभिः सह निश्चितां मतिं कृत्वेत्यन्वयः । सुमन्त्रमानयामासेति शेषः ३–४

रा० टी०–स इति । ततो यागनिश्चयानन्तरं बुद्धिमान् परमबुद्धिविशिष्टः धर्मात्मा वेदोक्तकर्मप्रवृत्तिविषयकयत्नवान् महाराजाधिराजो दशरथः कृतात्मभिः सकलकर्मफलीभूतरघुनाथविषयकबुद्धिभिः मन्त्रिभिः सर्वैः सहैव यष्टव्यमिति निश्चितां मतिं कृत्वा ' क्रीवे कृतं युगेपि स्यात्कलपर्याप्तयोरपि ' इति भास्करः।तत इति।राजा महाराजाधिराजो दशरथः मन्त्रिसत्तमं मन्त्रिश्रेष्ठं सुमन्त्रं मे सपुरोहितान् मे पुरोहितवसिष्ठसहितान्प्रसिद्धान् सर्वान्गुरूनृषिश्रेष्ठाञ्छीघ्रमानय इदं वचनमब्रवीत् पुरोहितशब्दस्य वृत्तिघटकीभूतत्वेऽपि नित्यसापेक्षत्वात् तत्र मेशब्दान्वयः श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–स इत्यादि । श्लोकद्वयमेकान्वयम् । कृतात्मभिः पर्याप्तबुद्धिभिः ' क्रीवे कृतं युगेऽपि स्यात्कलपर्याप्तयोरपि ' इतिभास्करः ॥ ३ ॥ तान् प्रसिद्धान् ॥ ४ ॥

५] ति० टी०–तत इति । विक्रमो गमनम् सर्वांस्तान्गुरून् समस्तान्वेदपारगानगुरूंश्च ॥ ५ ॥

रा० टी०–तत इति । ततः राजाज्ञापनानन्तरं त्वरितविक्रमः शीघ्रगमनशीलः सः मन्त्रिसत्तमः सुमन्त्रः वेदपारगान् कृतसमस्तवेदाध्ययनाध्यापनांस्तान् राजबोधितान्समस्तान्संमिलितान् त्वरितं गत्वा समानयत् सादरमानयनमकरोत् ॥५॥

गो० टी०–तत इति । त्वरितं तत्क्षण एव त्वरितविक्रमः त्वरितगमनः समस्तान्संमिलितान्समानयत् राजगृहमिति शेषः॥

६] ति० टी०–सुयज्ञादयो विद्यागुरवः वसिष्ठस्यैव पुरोहितत्वेनोपनेतृतयोपनेतुरेवाध्यापकतया गुरुत्वेऽपि स्वसमशिष्याणां स्वतपोव्याक्षेपभिया तेनैवाध्यापने नियोगात्तेषामपि विद्यागुरुत्वमक्षतम्।अन्येऽप्यमेधार्त्विज्यायुपयुक्ताः ॥ ६ ॥

रा० टी०–तानेवाह–सुयज्ञमिति । सुयज्ञं वामदेवं च जाबालिं च काश्यपं च पुरोहितं वशिष्ठं च अन्ये ये द्विजसत्तमास्तांश्च समानयदित्यनुकृष्यते अथशब्दश्चार्थे एकत्र विनापि चं समुच्चयः । येचाप्यन्ये द्विजोत्तमा इति पाठे त्वपिरपि चार्थे ॥६॥

गो० टी०–गुरूनेवाह–सुयज्ञमिति । समानयदिति पूर्वेणान्वयः । सुयज्ञादीनां गुरुत्वमार्त्विज्यकरणात् ॥ ६ ॥

७] ति० टी०–धर्मेणार्थेन च सहितं श्लक्ष्णं मधुरम् ॥ ७॥

रा० टी०–तानिति । धर्मात्मा धर्ममनस्कः राजा महाराजाधिराजो दशरथः तदा तस्मिन्काले तानागतानृषीन्पूजयित्वा धर्मार्थसहितम् अत एव श्लक्ष्णमिदं वक्ष्यमाणं वचनमब्रवीत् ॥७॥

गो० टी०–तानिति।अथ गुर्वागमनानन्तरं श्लक्ष्णं मधुरम्॥७

८] ति० टी०–ममेति । सुतार्थं सुतमुद्दिश्य लालप्यमानस्य पुनः पुनर्भृशं च विलपतो राज्यादिनापि सुखं न भवति । 'तातप्यमानस्य' इति पाठे पुनःपुनर्भृशं च तपः कुर्वत इत्यर्थः । अयमेव पाठो युक्तः । पूर्वं सुतार्थं तप्यमानस्येत्युक्तेः अतस्तदर्थं पुत्रार्थं मतिरध्यवसायः ॥ ८ ॥

रा० टी०–ममेति । पुत्रार्थं पुत्रः मत्सुतः अर्थो यस्य तं रामशब्दं लालप्यमानस्य भृशमभिलपतोऽपि मम सुखं नास्ति तत्प्रकटप्राप्तिं विना सुखं न भवतीत्यर्थः तदर्थं स्वपुत्रप्राकट्यार्थं हयमेधेन यक्ष्यामीति मम मतिरजायतेति शेषः वैशब्दोप्यर्थे॥८॥

गो० टी०–ममेति । लालप्यमानस्य भृशं विलपतः लोपेर्यङन्ताच्छानच् ॥ ८ ॥

८] ति० टी०–तदिति । शास्त्रप्रोक्तेन कर्मणा विधिना केन प्रकारेणाचरणेनाहं कामं पुत्ररूपं प्राप्स्यामीत्यत्र बुद्धिरुपायविषया विचार्यतां क्रियताम् ॥ ९ ॥

रा० टी०–तदिति । बुद्धिरतः विचाररतांत्रायते निश्चितवस्तूपदेशेन रक्षतीति तत्संबोधनं हे वशिष्टेत्यर्थः तद्वाङ्मनसगोचरातीतं वस्तु यष्टुं प्रत्यक्षतः मेलितुमिच्छामि तच्छास्त्रदृष्टेन वेदबोधितेन कर्मणा अहं कथं किं प्राप्स्यामि वाङ्मनसगोचरातीतं वस्तु प्रत्यक्षतः किं लब्धास्मीत्यर्थः इति कामं नितरां

---

१ श्रीरीदिदं राजा. रा. गो. पाठः । २ सत्तमं. रा. गो. पाठः । ३ चान्ये द्विजसत्तमा. रा. गो. पाठः । ४ वाक्यं श्लक्ष्णमथाब्रवीत्. गो. पाठः । ५ पुत्रार्थ. रा. गो. पाठः । ६ विनार्यताम्. रा. गो. पाठः । ७ नायाक्षं किंना न यक्ष्यामीति युक्तमिति भाति । ८ लपेरिति युक्तमिति भाति ।

ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन् । वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखेरितम् ॥ १० ॥
ऊचुश्च परमप्रीताः सर्वे दशरथं वचः । संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥ ११ ॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् । सर्वथा प्राप्स्यसे पुत्रानभिप्रेतांश्च पार्थिव ॥ १२ ॥
यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता । ततस्तुष्टोऽभवद्राजा श्रुत्वैतद्द्विजभाषितम् ॥ १३ ॥
अमात्यानब्रवीद्राजा हर्षव्याकुललोचनः । संभाराः संभ्रियन्तां मे गुरूणां वचनादिह ॥ १४ ॥
समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् । सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ १५ ॥

विचार्यताम् । एतेन "न कर्मणा न प्रजया धनेन" इति श्रुत्या कर्मणां तत्प्रापकत्वाभावनिश्चयात् वाङ्मनसगोचरातीतवस्तुनः प्रत्यक्षत्वे सर्वप्रमाणविरुद्धत्वाच्च तत्प्राप्तिर्दुर्घटेति प्रश्नकर्तुराशयो ध्वनितः कथमिति प्रश्ने ॥ ९ ॥

गो० टी०–तदिति । तत्पुत्रेच्छुत्वात् यष्टुं दीक्षितुं शास्त्रदृष्टेन कर्मणा विधिना प्रकारेणेति यावत् कर्मणा क्रियाकलापेनेति वा कामं काम्यमानं यज्ञं कथं प्राप्स्यामि विघ्नभूयस्त्वादिति भावः अत्र निर्विघ्नयागकरणे बुद्धिः उपायःविचार्यताम् ॥ ९ ॥

१०] **ति० टी०**–तत इति । प्रतिपूजा स्तुतिः । पार्थिवस्य मुखेरितं साक्षाद्राज्ञा स्वयमेवोक्तम् ॥ १० ॥

रा० टी०–तत इति । ततः गृहराजप्रश्नश्रवणानन्तरं वसिष्ठप्रमुखाः सर्वे ब्राह्मणाः पार्थिवस्य राज्ञः मुखाच्च्युतं तद्वदं प्रश्नवाक्यं साधु सयुक्तिकमुक्तमिति प्रत्यपूजयन् प्रशशंसुःपार्थिवस्य मुखेरितमिति भट्टसंमतः पाठः ॥ १० ॥

गो० टी०–तत इति । प्रत्यपूजयन् तुष्टुवुः पार्थिवस्य मुखाच्च्युतं साक्षाद्राज्ञोक्तमित्यर्थः । ऊचुरित्यर्द्धमेकं दशरथं वचः ऊचुः ब्रूशासीत्यादिना द्विकर्मकत्वम् ॥ १० ॥

११] **ति० टी०**–संभारा अश्वमेधप्रसिद्धा एकविंशतियूपादिरूपाः संभ्रियन्तां संपाद्यन्ताम् ॥ ११ ॥

रा० टी०–ऊचुरिति । परमप्रीताः राजकृतगूढप्रश्नस्य सूत्तरप्रस्फूर्त्या परमहर्षं प्राप्ता एव सर्वे वशिष्ठप्रमुखाः दशरथं वचः सूत्तरवचनमूचुःएतेन प्राकृतवाङ्मनसगोचरातीतत्वं तस्य भवन्तस्त्वप्राकृतकरणा इति भवत्करणविषयत्वं तस्य सिद्धमेव एतावत्कालं भवत्करणविषयत्वं तु वात्सल्यरसप्रभूतये "न कर्मणा न प्रजया धनेन" इत्यादीनि प्राकृतजनपराणि तत्रापि काम्यकर्मजनिततल्लाभाभावप्रतिपादकानीति काम्यनिषिद्धवर्जितानि कर्माण्यनुष्ठेयान्येवेत्युतरं सचितम् अतः संभाराः अश्वमेधयागसामग्र्यः ते प्रसिद्धाः संभ्रियन्तां संपाद्यन्ताम् तुरगः तदुपयोग्यश्च विमुच्यतां पूर्वश्चशब्द एवार्थे ॥ ११ ॥

गो० टी०–संभारा इति । ते प्रसिद्धाः संभाराः यज्ञोपकरणानि यूपपात्रादीनि संभ्रियन्तां संपाद्यन्तां तुरगः अश्वमेधीयोऽश्वः ॥ ११ ॥

१२] **ति० टी०**–सरय्वा इति । चौ त्वर्थे । अभिप्रेतान्मनोभिप्रेतगुणयुक्तान् ॥ १२ ॥

रा० टी०–सरय्वा इति । सरय्वा उत्तरे तीरे यज्ञभूमिः यागयोग्यस्थलं विधीयतां यतः हे पार्थिव यस्य ते तव पुत्रार्थमियं धार्मिकी बुद्धिः आगता प्राप्ता स त्वमभिप्रेतान्परमप्रीतिविषयीभूतान्पुत्रान् स्वनित्यसुतान् सर्वथा प्रकटतोऽपि प्राप्स्यसे एव चशब्द एवार्थे अपरः हेत्वर्थे सार्द्धश्लोक एकान्वयी ॥ १२ ॥

गो० टी०–सर्वथेति । एकपुत्रस्यापुत्रप्रायत्वात् 'एष्टव्या बहवः पुत्राः' इति वचनाच्च पुत्रानिति बहुवचनं प्राप्स्यस इति कर्मकर्तर्यात्मनेपदम् । धार्मिकी "धर्म चरति" इति ठक् धर्माचरणविषयिणीत्यर्थः ॥ १२ ॥

१३] **ति० टी०**–धार्मिकी धर्मप्रयोजना । सर्वथा प्राप्स्यस इति प्रतिज्ञानात्संतोषः ॥ १३ ॥

रा० टी०–तत इति । राजा एतद्द्विजभाषितं श्रुत्वा तुष्टः अभवत् ॥ १३ ॥

गो० टी०–तत इति । हर्षेण हर्षाश्रुणा पर्याकुले व्याप्ते ईक्षणे यस्य सः हर्षेण व्याकुलदृष्टिमान् क्रियाभेदाद्राजपदद्वयमिति न विरोधः ॥ १३ ॥

१४] **ति० टी०**–हर्षजनितानन्दाश्रुपारिप्लवनेत्रः ॥ १४ ॥

रा० टी०–ततोऽनन्तरं हर्षपर्याकुलेक्षणः आनन्दाश्रुपूरितनेत्रः राजा मे गुरूणां वचनादिह अस्मिन्काले संभाराः यागसामग्र्यः संभ्रियन्तामिति अमात्यानब्रवीत् । सार्द्धः श्लोक एकान्वयी । हर्षव्याकुललोचन इति भट्टसंमतः पाठः ॥ १४ ॥

गो० टी०–संभारा इति । मे गुरूणामित्यन्वयः इह इदानीं समर्थैः "चतुःशता रक्षन्ति यज्ञस्याघाताय" इत्युक्तरीत्या रक्षणसमर्थैरधिष्ठितः रक्षितः सोपाध्यायः अध्वर्युप्रभृतिऋत्विक्सहितः ॥ १४ ॥

१५] **ति० टी०**–समर्थेति । 'चतुःशता रक्षन्ति' इति श्रुते रक्षणसमर्थैश्चतुःशतराजपुत्रै रक्षितः सोपाध्यायः उपाध्यायपदेन प्रधानर्त्विजः । अश्वस्य मेध्यस्य पदे पदे जुहोतीत्युक्तहोमनिर्वाहाय तत्साहित्यम् ॥ १५ ॥

रा० टी०–समर्थेति । समर्थैः अश्वनिग्रहणादिविषयकसामर्थ्यविशिष्टजनैः अधिष्ठितः सहितः सोपाध्यायः मुख्यऋत्विक्सहितश्चाश्वः विमुच्यताम् अश्वरक्षणपुरुषनियोगे श्रुतिः"चतुःशता रक्षन्ति इति"।उपाध्यायप्रयोजनं"अश्वस्य मेध्यस्य पदे पदे जुहोति" इति श्रुतिबोधितकर्मनिर्वहणम् यज्ञभूमिः यागशाला सरय्वा उत्तरे तीर एव विधीयताम् चशब्द एवार्थे ॥ १५ ॥

१ मुखाच्युतम् रा. गो. पाठः । २ प्रीतो गो. पाठः । ३ पर्याकुलेक्षणः रा. गो. पाठः । ४ इदं तु न रुचिरं आर्षमात्मनेपदमिति भावः ।

शान्तयश्चापि वर्धन्तां यथाकल्पं यथाविधि । शक्यः प्राप्तुमयं यज्ञः सर्वेणापि महीक्षिता ॥ १६ ॥
नापराधो भवेत्कष्टो यद्यस्मिन्क्रतुसत्तमे । छिद्रं हि मृगयन्ते[2] स्म विद्वांसो ब्रह्मराक्षसाः ॥ १७ ॥
विधिहीनस्य[3] यज्ञस्य सद्यः कर्ता विनश्यति । तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते ॥ १८ ॥
तथा विधानं क्रियतां समर्थाः साधनेष्विति । तथेति चाब्रुवन्सर्वे मन्त्रिणः प्रतिपूजिताः[5] ॥ १९ ॥
पार्थिवेन्द्रस्य तद्वाक्यं यथापूर्वं निशम्य ते । तथा द्विजास्ते धर्मज्ञा वर्धयन्तो नृपोत्तमम् ॥ २० ॥

गो० टी०–सरय्वा इति । अनेन सरयूदक्षिणतीरे अयोध्येति गम्यते शान्तय विघ्ननिवारकाणि कर्माणि अभिवर्द्धन्ताम् अभिवर्द्धयन्ताम् अन्तर्भावितण्यन्तोयं शब्दः । यथाकल्पं यथाक्रमम् 'क्रमस्तु कथ्यते कल्पे' इति भागुरिः यथाविधि यथाशास्त्रम् ॥ १५ ॥

१६] **ति० टी०**–शान्तयो विघ्ननिवारककर्माणि वर्धन्ताम् छान्दसो णिलोपः । यथाकल्पं यथाक्रमम् 'क्रमस्तु कथ्यते कल्पः' इति भागुरिः । यथाविधि शास्त्रोक्तविध्यनतिक्रमेण शक्य इति काकुस्थ सर्वेण सर्वगुणयुक्तेनापि राज्ञायं यज्ञः प्राप्तुं शक्यः अपि तु नेत्यर्थः ॥ १६ ॥

रा० टी०–शान्तय इति । शान्तयः अश्वमेधोचितविघ्ननिवारककर्माणि यथाकल्पं क्रममनतिक्रम्य यथाविधि शास्त्रोक्तमनतिक्रम्य अवश्यमभिवर्द्धन्तामभिवर्द्धयन्ताम् अन्तर्भावितण्यर्थः । 'क्रमस्तु कथ्यते कल्पः' इति भागुरिः । विघ्नस्यावश्यं भावित्वेन शान्तिरवश्यं कार्येति बोधयन्नाह–**शक्य इति** । यदि क्रतुसत्तमे क्रतुश्रेष्ठे अस्मिन्नश्वमेधे कष्टः परमकष्टसंपादकः अपराधो विधिहीनत्वं न भवेत्तर्हि सर्वेणापि महीक्षिता राज्ञा अयं यज्ञः कर्तुं शक्यः[4]एतेन दुर्निवारापराधभिया एतत्क्रतुकरणे क्षुद्रराजा न प्रवर्तन्ते इति हेतुर्ध्वनितः । सार्द्धश्लोक एकान्वयी चकारोऽवश्यमर्थे ॥ १६ ॥

गो० टी०–शक्य इति । अयं यज्ञः अश्वमेधः सर्वेणापि राजमात्रेणापि महीं क्षयतीति महीक्षित् क्षि निवासगत्योरित्यस्मात्क्विप् तेन प्राप्तुं शक्यः कष्टः क्लेशकरः अनर्थकरो वा अपराधः अपचारः यदि न भवेत्प्रमादे सत्यनर्थः सिद्ध एवेति भीत्या क्षुद्रा राजानो न कुर्वन्तीत्यर्थः ॥ १६ ॥

१७] **ति० टी०**–तदेवाह—**नेति** । यत्र यज्ञे कष्टो महाप्रायश्चित्तनाश्योऽपराधो विध्यपराधः क्रियालोपादिरूपो न स्यात्, स्यादप्यन्यः प्राप्यः स त्ववातियत्नसाध्यः, अतो न सर्वसुलभः हि यतो यज्ञादिषु मन्त्रक्रियालोपादिना राक्षसत्वं प्राप्ता ब्राह्मणा ब्रह्मराक्षसा विद्वांसो यज्ञतन्त्रज्ञाश्छिद्रमपचारं मृगयन्ते ते चेषदपचारं दृष्ट्वा स्वयं तेषु प्रविश्यापचारधारां संपादयन्ते अतो न सर्वप्राप्यः ॥ १७ ॥

रा० टी०–ननु किं विधिहीनत्वेनेत्यत आह-छिद्रमिति।विद्वांसः यागप्रकारविदः ब्रह्मराक्षसाः अयाज्ययाजनाप्रतिग्राह्यप्रतिग्रहीतृत्वादिना राक्षसत्वं प्राप्ताः ते एव ब्रह्मणो ब्राह्मणाः कर्मधारयः।अत्र यागे क्षुद्रमपराधं मृगयन्ते। एतेन जातापराधयागभागस्य देवानर्हत्वेन ब्रह्मराक्षसा एव गृह्णन्तीत्यन्वेषणे हेतुर्ध्वनितः । 'छिदं रन्ध्रापराधयोः' इति वैजयन्ती।ननु किं तेनेत्यात आह विधिहीनस्य यज्ञस्य कर्ता सद्यो विनश्यत्येव हिशब्दएवार्थे॥१७॥

गो० टी०–छिद्रमिति । विद्वांसः अश्वमेधस्वरूपाभिज्ञाः ब्रह्मराक्षसाः अकृतप्रायश्चित्ताप्रतिग्राह्यप्रतिग्रहाद्याज्ययाजनादिदिपापैः राक्षसत्वं प्राप्ताः ब्राह्मणाः यज्ञस्वरूपतदपराधज्ञत्वादत्राऽश्वमेधे छिद्रमपराधं मृगयन्ते अन्वेषयन्ते मृग अन्वेषणे इति धातुः । ' छिदं रन्ध्रापराधयोः' इति वैजयन्ती । अपराधदर्शने यज्ञमात्मसात्कृत्य नाशयन्तीति भावः किं तत इत्यतआह–**निहतस्य चेति** ॥ १७ ॥

१८-१९] **ति० टी०**–किंच विधिहीनस्य यज्ञस्य कर्ता यजमान ऋत्विक्संघश्च सद्यो विनश्यति तत्ततो हेतोर्यथा म एष यज्ञो विधिपूर्व शास्त्रोक्तप्रकारेण, नतु तदपचारेण, यथा समाप्यते तथा विधानं यत्नः क्रियताम् । नन्वेवं चेदशक्यमेतत्तत्राह–यूयं तथा करणेषु समर्थाः शक्ता इति । इत्येवंप्रकारोत्साहनानि राजा चक्र इत्यर्थः । ते प्रतिपूजिता मन्त्रिणस्तथेत्यवदन् । ' प्रत्यपूजयन् ' इति पाठे चेति शेषः ॥ १८ ॥ १९ ॥

रा० टी०–तदिति। तत्तस्माद्धेतोः यथा येन प्रकारेण एष मे क्रतुः विधिपूर्वमपराधशून्यपूर्वकं सत् समाप्यते तथा तेन प्रकारेण विधानं यत्नः क्रियतां भवद्भिः संपाद्यताम् तत्र हेतुमाह–यत इह करणेषु निर्विघ्नयागसमापनकार्येषु भवन्तः समर्थाः ॥ **तथेतीति** पार्थिवेन्द्रस्य महाराजाधिराजदशरथस्य आज्ञप्तं तत्प्रसिद्धं वाक्यं ते सर्वे मन्त्रिणः यथा यथावत् निशम्य श्रुत्वा तथेति अब्रुवन्प्रत्यपूजयन् उत्कृष्टो भवतां निश्चय इति प्राशंसंश्च। मन्त्रिणः प्रतिपूजिता इति भट्टसंमतः पाठः ॥ १८ ॥ १९ ॥

गो० टी०–फलितमाह–तदिति । विधिपूर्वं अनपराधं यथा भवति तथा यथा समाप्यते तथा विधानं यत्नः क्रियताम् इह करणेषु यज्ञानुष्ठानेषु समर्थाः यूयमिति शेषः यूयं समर्थाः खल्विति स्तुतिः॥ **तथेतीते** सर्वे मन्त्रिणः पार्थिवेन्द्रस्य तद्वाक्यं निशम्य यथा आज्ञप्तम् आज्ञापितम् "वा दान्त०" इत्यादिना वैकल्पिक इड्भावो निपातितः तथा कुर्म इत्यब्रुवन् समीचीनो महाराजस्याध्यवसाय इति प्रत्यपूजयंश्च ॥१८॥१९॥

२०-२१] **ति० टी०**–पार्थिवेत्यर्धं पूर्वान्वयि । वर्धयन्त इत्यस्याशीर्भिरिति शेषः ॥ २० ॥ २१ ॥

---

१ कर्तुमयं रा. पाठः । २ तेत्र. रा. गो. पाठः । ३ निहतस्य च गो. पाठः । ४ करणेष्विह रा. गो. पाठः । ५ प्रत्यपूजयन् रा. गो. पाठः । ६ यथाज्ञप्तं. रा. गो. पाठः । ७ व्यर्थं इतीभाति ।

अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् । विसर्जयित्वा तान्विप्रान्सचिवानिदमब्रवीत् ॥ २१ ॥
ऋत्विग्भिरुपसंदिष्टो यथावत्क्रतुराप्यताम् । इत्युक्त्वा नृपशार्दूलः सचिवान्समुपस्थितान्॥ २२ ॥
विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः । ततः स गत्वा ताः पत्नीर्नरेन्द्रो हृदयंगमाः ॥ २३ ॥
उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् । तासां तेनातिकान्तेन वचनेन सुवर्चसाम् ॥
मुखपद्मान्यशोभन्त पद्मानीव हिमात्यये । ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

राजसूतयोः संवादः ।

एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् । श्रूयतां तत्पुरावृत्तं पुराणे च मया श्रुतम् ॥ १ ॥

रा० टी०–तथेति । तथा तेन प्रकारेण धर्मज्ञास्ते सपुरोहितर्त्विजो द्विजाः नृपोत्तमं वर्द्धयन्तः तथेति अब्रुवन् प्रत्यपूजयंश्चेति पूर्वेणान्वयः । ततः प्रोत्साहनानन्तरमनुज्ञाताः राजानुज्ञां प्राप्ताः सर्वे सपुरोहितऋत्विजो यथागतमागतमनतिक्रम्य पुनर्जग्मुः ॥ २० ॥

गो० टी०–तथेति । वर्द्धयन्तः आशीर्भिरिति शेषः द्विजाः ऋत्विजः भाविन्यां चैत्रपौर्णमास्यां तथैव करिष्याम इत्युक्त्वा जग्मुरित्यर्थः ॥ २० ॥

रा० टी०–विसर्जयित्वेति । तान् सपुरोहितऋत्विजो विप्रान् विसर्जयित्वा विसर्ज्य ऋत्विग्भिः उपसंदिष्टोऽयं क्रतुः यथावदाप्यताम् इदं वचनं सचिवान्मन्त्रिणः अब्रवीत् ॥ २१ ॥

गो० टी०–विसर्जयित्वेति । क्रतुः क्रतुसंभारः आप्यतां संपाद्यताम् ॥ २१ ॥

२२] ति० टी०–उपसंदिष्ट इति त्रिपदम् । समित्यस्याप्यतामित्येनेनान्वयः । व्यवहितप्रयोग आर्षः ॥ २२ ॥

रा० टी०–इत्युक्त्वेति । महाद्युतिः परमप्रकाशः नृपशार्दूलः राजसिंहः इत्युक्त्वा समुपस्थितान्समागतान्सचिवान् विसर्जयित्वा स्वं वेश्म प्रविवेश ॥ २२ ॥

गो० टी०–इतीति । महाद्युतिरिति प्रीत्यतिशयद्योतनम् २२

२३] ति० टी०–ताः पत्नीर्यज्ञार्हाः ॥ २३ ॥

रा० टी०–तत इति । ततः स्ववेश्मप्रवेशानन्तरं स नरेन्द्रः हृदयंगमाः प्रियास्ताः प्रसिद्धाः पत्नीः गत्वा प्राप्य अहं सुतकारणाद्यक्ष्ये अतो यूयं दीक्षां विशत इति उवाच ॥ २३ ॥

गो० टी०–तत इति । ताः प्रसिद्धाः कौसल्याद्याः पत्नीः यज्ञार्हाः " पत्युर्नो यज्ञसंयोगे " इति पतिशब्दस्य यज्ञफलभोक्तृत्वरूपयज्ञसंयोगे नकारादेशविधानात् । दीक्षां दीक्षाध्यवसायं विशत गच्छतेत्यर्थः । सुतकारणात् सुतार्थम् 'निमित्तकारणहेतूनां प्रयोगे सर्वासामिष्टिः' इति पञ्चमी ॥ २३ ॥

२४] ति० टी०–दीक्षां दीक्षाविषयदृढनिश्चयं विशत कुरुत वर्चः कान्तिः मुखपद्मानीति रूपकम् वसन्तकालावच्छिन्नपद्मोपमा च ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टमः सर्गः ॥ ८ ॥

रा० टी०–तासामिति। सुवर्चसा मतितेजस्विनीनां तासां पत्नीनां मुखपद्मानि अतिकान्तेन अतिरमणीयेन तेन पूर्वोक्तेन राजवचनेन हिमात्यये हिमध्वंसे पद्मानीव अशोभन्त॥२४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे अष्टमः सर्गः ॥ ८ ॥

गो० टी०–तासामिति । अतिकान्तेन अत्यन्तमिष्टेन सुखपद्मानि सुन्दराणि मुखानीत्यर्थः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेऽष्टमः सर्गः ॥ ८ ॥

१] ति० टी०–एतदिति । हयमेधं सुतार्थं करिष्यामीति राजवाक्यम् सूतः सुमन्त्रः स हि राज्ञ उभयधर्मा सूतो मन्त्री च पुरावृत्तमितिहासः य इतिहासः पुराणे च । चेन ऋषिकथ्यमानकथासंग्रहः मया श्रुतः स श्रूयताम् ॥ १ ॥

रा० टी०–पत्न्याज्ञापनौत्तरकालिकं वृत्तमाह—एतदित्यादिभिः । सूतः सुमन्त्रः रहः अन्तःपुरं प्राप्येति शेषः । एतत्पुत्रोद्देश्यकयागारम्भकवचनं श्रुत्वा इदं वक्ष्यमाणं वचनं राजानमब्रवीत् । तदेवाह ऋत्विग्भिर्वसिष्ठादिप्रमुखैरुपदिष्टः यः अयं पुत्रोपायभूतो यागः सः पुरा पूर्वं वृत्तः राजभिः संपादितः मया श्रुतः इतिहासपुराणादिश्रवणद्वारा निश्चितः सुमन्त्रस्य मन्त्रित्वसूतत्वोभयोक्त्या तदुभयधर्माक्रान्तत्वं बोध्यम् । अब्रवीदित्यस्यानन्तरं 'श्रूयतां यत्पुरावृतं पुराणे च मया श्रुतम्' इत्यर्द्धश्लोकोपि भट्टसंमतः ॥ १ ॥

गो० टी०–अथ भगवदवतारासाधारणकारणं पुत्रेष्टिसुपक्षिपति सर्गत्रयेण–एतच्छ्रुत्वेत्यादि । सूतः सारथित्वेन

---

१ महाद्युतिः रा. गो. पाठः । २ हृदयप्रियाः गो. पाठः । ३ इदमर्धं गो. रा. पुस्तकयोर्नदृश्यते ।

ऋत्विग्भिरुपदिष्टोऽयं पुरावृत्तो मया श्रुतः । सनत्कुमारो भगवान्पूर्वं कथितवान्कथाम् ॥ २ ॥
ऋषीणां संनिधौ राजंस्तव पुत्रागमं प्रति । काश्यपस्य च पुत्रोऽस्ति विभाण्डक[1] इति श्रुतः ॥ ३ ॥
ऋष्यशृङ्ग[2] इति ख्यातस्तस्य पुत्रो भविष्यति । स वने नित्यसंवृद्धो मुनिर्वनचरः सदा ॥ ४ ॥
नान्यं जानाति विप्रेन्द्रो नित्यं पित्रनुवर्तनात् । द्वैविध्यं ब्रह्मचर्यस्य भविष्यति महात्मनः ॥ ५ ॥
लोकेषु प्रथितं राजन्विप्रैश्च कथितं सदा । तस्यैवं वर्तमानस्य कालः समभिवर्तत ॥ ६ ॥
अग्निं शुश्रूषमाणस्य पितरं च यशस्विनम् । एतस्मिन्नेव काले तु रोमपादः प्रतापवान् ॥ ७ ॥

मन्त्रित्वेन च स्थितः सुमन्त्रः रहः एकान्ते इदमब्रवीत् । अन्तः पुरमागत्योक्तवानित्यर्थः । अयं अश्वमेधप्रवृत्तिरूपः पुत्रार्थोपायः । ऋत्विग्भिर्वसिष्ठादिभिः उपदिष्टःमया तु पुरावृत्तः इतिहासरूपः यः श्रुतः ॥ १ ॥

२-३] ति० टी०-ऋत्विगिति । ऋत्विग्भिरयमश्वमेधरूपः पुत्रोपाय उपदिष्टः मया त्वितिहासविषयः किंचिद्विशेषविशिष्टः श्रुत इत्यर्थः । तमाह-सनदित्यादिना । कथां सर्वज्ञत्वाद्भविष्यद्विषयाम् ॥ २ ॥ ३ ॥

रा० टी०- स्वश्रुतं विशदयन्नाह-सनत्कुमार इति । हे राजन् । ऋषीणां सन्निधौ समीपे तव पुत्रागमं प्रति पुत्रप्राप्तिसंबन्धिनीं कथां भगवान् त्रैकालिकज्ञानरूपैश्वर्यविशिष्टः सनत्कुमारः पूर्व कथितवान् ॥ २ ॥

गो० टी०-कथमित्यत्राह-सनत्कुमार इत्यादि । भगवान् भविष्यज्ज्ञानवत्त्वरूपमाहात्म्यवान् । कथां भविष्यद्विषयिणीम् ॥ २ ॥

रा० टी०-तामेवाह-कश्यपस्येति । विभाण्डक इति नाम्ना श्रुतः कश्यपस्य पुत्रोऽस्ति । ऋष्यशृङ्ग इति नाम्ना ख्यातः प्रसिद्धः तस्य विभाण्डकस्यापि पुत्रो भविष्यति । तु शब्दोऽप्यर्थे ॥ ३ ॥

गो० टी०-कश्यपस्येति । ख्यातो भविष्यतीत्यत्र "धातुसंबन्धे प्रत्ययाः" इति भूतभविष्यतोः साधुत्वम् ॥ ३ ॥

४] ति० टी०-ख्यातो भविष्यतीति ऋष्यशृङ्ग इति ख्यास्यमानः 'धातुसंबन्धे' इति साधुत्वम् । नित्यसंवृद्धः पित्रा वने नित्यं वर्धित इत्यर्थः । सर्वथा पौरादिव्यवहारानभिज्ञत्वं नित्यपदेन सूचितम् अत एव पितुर्न क्वापि त्वया गन्तव्यमित्याज्ञानुवर्तनाद्वनचरत्वम् ॥ ४ ॥

रा० टी०-स इति । वनचरैः सह वने नित्यं संवृद्धः विप्रेन्द्रो विप्रश्रेष्ठः स मुनिः नित्यं पित्रनुवर्तनात् पितृपरिचर्यातः अन्यत्किञ्चित्र जानाति ॥ ४ ॥

गो० टी०-स इति । अन्यं ग्रामग्रामीणादिकं न जानाति न ज्ञास्यति ॥ ४ ॥

५] ति० टी०-नान्यमिति । जानातीति भविष्यति वर्तमानसामीप्यात् । पित्रनुवर्तनात्पित्रा सहवासात् । ब्रह्मचर्यस्य द्वैविध्यम् मेखलाजिनादिधारणरूपं मुख्यं ब्रह्मचर्यम्, दारेषु ऋतुगमनरूपं परं गौणम् तत्प्रकारद्वयमप्यस्य भविष्यति । द्विविधशब्दाद्बहुर्वीहेः प्यञ् ॥ ५ ॥

रा० टी०-द्वैविध्यमिति । हे राजन् ! ब्रह्माणि वेदे चर्या स्थितिर्यस्य अतएव महात्मनः पूज्यस्वरूपस्य ऋष्यशृङ्गस्य विप्रैः सदा कथितं वर्णितम् । अतएव लोकेषु प्रथितं प्रसिद्धं द्वैविध्यं द्वौ सीतारामौ विशेषेण ध्यायति तस्य भावः । निरन्तरसीतारामध्यानमित्यर्थः । भविष्यति । एतेन तत्पितुरपि सीतारामोपासकत्वं व्यक्तं चो हेतौ ॥ ५ ॥

गो० टी०-द्वैविध्यमिति । द्वैविध्यं द्वैधीभावः स्त्रीसङ्गकृतो भङ्ग इत्यर्थः । लोकेषु प्रथितमित्यत्र ब्रह्मचर्यमित्यनुषङ्गः । यद्वा मेखलाजिनदण्डादिना लोकेषु प्रथितं विप्रैः स्मर्तृभिः कथितमनुगमनलक्षणं च ब्रह्मचर्यस्य द्वैविध्यं भविष्यति । आह-याज्ञवल्क्यः 'षोडशर्तुर्निशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् ॥ ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्' इति ॥ ५ ॥

६-७] ति० टी०-लोकेष्वित्यर्थं पूर्वान्वयि । एवं पित्रग्न्यादिसेवया । समभिवर्ततेति भविष्यति लङ्, अडभावश्चार्षः ॥ ६ ॥ ७ ॥

रा० टी०-तस्येति । अग्निं यशस्विनं पितरं च शुश्रूषमाणस्य सेवमानस्य एवं सीतारामध्यानप्रकारेण वर्तमानस्य तस्य ऋष्यशृङ्गस्य कालः विवाहादिहेतुभूतसमयः समभिवर्तत सम्प्राप्स्यति । भविष्यति लङ् । आगमशास्त्रस्यानित्यत्वादड्विरहः ॥ ६ ॥

गो० टी०-तथाविधस्य द्वितीयब्रह्मचर्यस्य प्रसक्तिं दर्शयति-तस्येत्यादिना । तस्य अग्निं यशस्विनं पितरं चाद्भुतं च शुश्रूषमाणस्य प्रथमे ब्रह्मचर्ये वर्तमानस्येत्यर्थः । कालः कतिपयकालः समभिवर्तत भविष्यदर्थे लङ् । "छन्दसि लुङ्लङ्लिटः" इति सर्वलकारापवादत्वेन लङोपि विधानात् अडभावश्चार्षः ॥ ६ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन् विवाहादिहेतुभूते काले एव प्रतापवान्महाबलश्च रोमपादो राजा अङ्गेषु अङ्गदेशेषु प्रथितः ख्यातो भविष्यति । तुश्चार्थे ॥ ७ ॥

गो० टी०-एतस्मिन्निति । एतस्मिन् काले तस्य ब्रह्मचर्यदशायाम् । अङ्गेषु अङ्गदेशेषु ॥ ७ ॥

१ कश्यपस्येति गो. रा. पाठः । २ विभंडकइति गो. पाठः । ३ ऋश्येति गो. पाठः ।

अङ्गेषु प्रथितो राजा भविष्यति महाबलः । तस्य व्यतिक्रमाद्राज्ञो भविष्यति सुदारुणा ॥ ८ ॥
अनावृष्टिः सुघोरा वै सर्वलोकभयावहा । अनावृष्ट्यां तु वृत्तायां राजा दुःखसमन्वितः ॥ ९ ॥
ब्राह्मणाञ्छ्रुतसंवृद्धान्समानीय प्रवक्ष्यति । भवन्तः श्रुतकर्मणो लोकचारित्रवेदिनः ॥ १० ॥
समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत् । इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः ॥ ११ ॥
वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः । विभाण्डकसुतं राजन्सर्वोपायैरिहानय ॥ १२ ॥
आनाय्य तु महीपाल ऋष्यशृङ्गं सुसत्कृतम् । विभाण्डकसुतं राजन्ब्राह्मणं वेदपारगम् ॥
प्रयच्छ कन्यां शान्तां वै विधिना सुसमाहितः ॥ ॥ १३ ॥
तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते । केनोपायेन वै शक्यमिहानेतुं स वीर्यवान् ॥ १४ ॥

८] ति० टी०–व्यतिक्रमाद्राजोचितधर्मविलोपनात् । दारुणत्वं बहुकालव्यापित्वात् ॥ ८ ॥

रा० टी०–तस्येति । तस्य राज्ञो व्यतिक्रमाद्विरुद्धधर्माचरणात्सुदारुणा बहुकालिकात्वेन कठिना सुघोरा सर्वतदेशव्यापिनीत्वेन दुःसहा अतएव सर्वभूतभयावहा च अनावृष्टिः वृष्टयभावो भविष्यति । वैशब्दश्चार्थे ॥ ८ ॥

गो० टी०–तस्येति । व्यतिक्रमाद्धर्मातिक्रमात् सदारुणा बहुकालव्यापिनी । सुघोरा तदीयसर्वराष्ट्रव्यापिनी अत एव सर्वभूतभयावहा ॥ ८ ॥

९] ति० टी०–घोरत्वं सर्वराष्ट्रव्यापनात्।वृत्तायां जातायाम्९

रा० टी०–अनावृष्ट्यामिति । अनावृष्ट्यां वृष्टयभावे वृत्तायां प्रवृत्तायां दुःखसमन्वित एव राजा रोमपादः श्रुतवृद्धान् श्रुतेन अनेकलौकिकवैदिकवृत्तश्रवणेन वृद्धान्सम्पन्नान्ब्राह्मणान् चकारेण अन्यानपि बहुश्रुतक्षत्रियादीन्समानीय प्रवक्ष्यति । तुशब्द एवार्थे श्रुतसंवृद्धानिति भट्टसंमतः पाठः ॥ ९ ॥

गो० टी०–अनावृष्ट्यामिति । श्रुतेन वृद्धाः श्रुतवृद्धाः बहुभ्यो बहुधा श्रुतशास्त्रा इत्यर्थः । प्रवक्ष्यति चेत्यन्वयः ॥ ९ ॥

१०] ति० टी०–श्रुतेन वेदाध्ययनेन संवृद्धान् । श्रुतकर्मणोऽनावृष्टिकरश्रुतमत्कर्मणः यतो भवन्तो लोकव्यवहारज्ञाः

रा० टी०–राजोक्तिमेवाह–भवन्त इति । श्रुतधर्माणः श्रुता धर्मा अनेकलौकिकवैदिकवृत्तानि अतएव लोकचारित्रवेदिनः लोककर्त्तव्यविषयकनिश्चयवन्तः भवन्तः प्रायश्चित्तं मत्कृतपापशोधनं यथा भवेत्तथा नियमं कर्त्तव्यनियमनं समादिशन्तु सम्यग्बोधयन्तु ' प्रायः पापमिति प्रोक्तं चित्तं तच्छोधनं स्मृतम् ' इति स्मृतिः ॥ १० ॥

गो० टी०–भवन्त इति । श्रुतधर्माणः " धर्मादनिच् केवलात् " इत्यनिच् । लोकचारित्रवेदिनः लोकाचारज्ञाः अतः अनावृष्टिमूलस्य मत्पापस्य प्रायश्चित्तं यथा भवेत् तादृशं नियममनुष्ठेयधर्ममादिशन्तु ॥ १० ॥

११-१२] ति० टी०–समेति। तस्य मत्पापस्य प्रायश्चितं यथा भवति तथा नियममनुष्ठेयांशं समादिशन्त्वित्यन्वयः।उक्ताः पृष्टाः ते च शुद्धब्रह्मचारिणे कन्यादानं प्राय-श्चित्तमूचुरित्याह–वक्ष्यन्तीति ॥ १२ ॥

रा० टी०–वक्ष्यन्त इति वेदपारगाः ते पृष्टाः ब्राह्मणाः महीपालं वक्ष्यन्ते कथयिष्यन्ति तत्कथनमेवाह हे राजन् । विभाण्डकसुतं ऋष्यशृङ्गं सर्वोपायैः निःशेषयत्नैरिह आनय । प्रायश्चित्तं यथाभवेदित्यस्यानन्तरम् 'इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः ' इति श्लोकार्द्धमपि भट्टसंमतम् ॥ ११ ॥

गो० टी०–शुद्धब्रह्मचारिणे कन्याप्रदानमेव परमं प्रायश्चित्तमेव वक्ष्यन्तीत्याह–वक्ष्यन्तीत्यादिना । सर्वोपायैःनानाविधोपायैः ॥ ११ ॥

१३] ति० टी०–' आनाय्य तु' इति पाठः । महीपाल ऋष्येति प्रकृतिभावः ॥ १३ ॥

रा० टी०–आनयनानन्तरकालिककर्त्तव्यमाह–आनाय्येति । हे महीपाल ऋष्यशृङ्गं सुसत्कृतं यथा भवति तथा आनाय्य स्वपुरं प्रापय्यैव सुसमाहितः एकाग्रचित्तस्त्वं शान्तां कन्यां विधिना वेदोक्तविधानेनैव प्रयच्छ तस्मै एव देहीत्यर्थः । तुवैशब्दौ एवार्थौ महीपालेत्यत्र संहिताकार्यविरहः ' ऋत्यक ' इति प्रकृतिभावात् । पादान्तस्थत्वेन संहिताया अभावाच्च १२

गो० टी०–आनाय्येति । ऋष्यशृङ्गमित्यत्र " ऋत्यकः " इति प्रकृतिभावः।आनाय्येति आङुपसृष्टाण्णीञ् प्रापण इत्यस्माद्धेतुमण्ण्यन्तात्ल्यप्।प्रयच्छ देहि ऋष्यशृङ्गायेति शेषः। सुसत्कृतमित्यानयनाक्रियाविशेषणम्। सुसमाहितः निर्विचार-इति यावत्१२

१४-१५] ति० टी०–राज्ञश्चिन्तामभिनयति–केनेति । वीर्यं जितेन्द्रियत्वं विद्यावृत्ततपोवीर्यं च ॥ १४ ॥ १५ ॥

रा० टी०–तेषामिति । तेषामुपदेष्टृणां वचनं श्रुत्वैव राजा चिन्तां विचारं प्रपत्स्यते प्राप्नोत् तत्स्वरूपमाह–वीर्यवान् तपोजनितपरमबलविशिष्टः सः ऋष्यशृङ्गः इह एवानेतुं केन उपायेन शक्यम् तुवैशब्दौ एवार्थौ शक्यमिति सामान्ये नपुंसकम्

गो० टी०–तेषामिति । चिन्ताप्रकारमाह–केनेति । वीर्यवान् नियतब्रह्मचर्यः ॥ १३ ॥

१ सर्वभूतेति गो. रा. पाठः । २ श्रुतवृद्धाश्चेति गो. रा. पाठः । ३ श्रुतधर्माण इति गो. रा. पाठः । ४ इदमर्धं गो. रा. पुस्तकयोर्नास्ति । ५ वक्ष्यन्ते इति रा. पाठः । ६ विभण्डक इति गो. पाठः । ७ आनाय्यचेति गो. पाठः । ८ ऋश्येति गो. पाठः । ९ इहमर्धं गो. रा. पुस्तकयोर्नास्ति ।

ततो राजा विनिश्चित्य सह मन्त्रिभिरात्मवान् । पुरोहितममात्यांश्च प्रेषयिष्यति सत्कृतान् ॥ १५ ॥
ते तु राज्ञो वचः श्रुत्वा व्यथिता वनताननाः । न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं नृपम् ॥ १६ ॥
वक्ष्यन्ति चिन्तयित्वा ते तस्योपायांश्च तान्क्षमान् । आनेष्यामो वयं विप्रं न च दोषो भविष्यति ॥ १७ ॥
एवमङ्गाधिपेनैव गणिकाभिर्ऋषेः सुतः । आनीतोऽवर्षयद्देवः शान्ता चास्मै प्रदीयते ॥ १८ ॥
ऋष्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति । सनत्कुमारकथितमेतावद्व्याहृतं मया ॥ १९ ॥

रा० टी०–तत इति । ततः विचारानन्तरमात्मवान् प्रशस्तबुद्धिविशिष्टः धर्मविद्राजा मन्त्रिभिःसह विनिश्चित्य आनयनोपायनिश्चयं कृत्वा पुरोहितममात्यांश्च ततः स्वदेशात्प्रेष्यति प्रेषयिष्यति अन्तर्भावितण्यर्थः ॥ १४ ॥

गो० टी०–तत इति । विनिश्चित्य ब्राह्मणं ब्राह्मणा एवानेष्यन्तीति निश्चित्य । ततः तस्मादेशात् प्रेष्यति प्रेषयिष्यति । भविष्यदर्थे लट् । 'कालसामान्ये लड्वक्तव्यः' इतिवचनात्॥१४॥

१६] ति० टी०–ते त्विति । व्यथिता अशक्यार्थनियोगतः खिन्नाः वनतानना नम्रमुखाः अवस्यादेर्लोपः । ऋषेर्विभाण्डकाद्भीता न गच्छेमेत्युक्त्वाशक्यार्थत्वादेतन्नियोगाकरणं क्षन्तव्यमित्यनुनेष्यन्ति ॥ १६ ॥

रा० टी०–ते त्विति । ते पुरोहितादयः राज्ञो वचः श्रुत्वैव ऋषेर्भीताः अतएव व्यथिताः व्यथां प्राप्ताः अतएव विनताननाः अवनतमुखाः ते पुरोहितादयः वयं न गच्छेमेति निश्चित्येति शेषः । तं नृपमनुनेष्यन्ति उपायान्तरकथनेन सन्तोषयिष्यन्ति । तुशब्द एवार्थे । वनतानना इति भट्टसम्मतः पाठः। अवस्यादेर्लोप इति तद्व्याख्या ॥ १६ ॥

गो० टी०–ते त्विति । व्यथिताः खिन्नाः अत एव विनताननाः नम्रमुखाः ऋषेर्विभाण्डकाद्भीता इत्यनन्तरमितिकरणं बोध्यम्। अनुनेष्यन्ति न वयं गन्तुं शक्ताः किंतु तदानयन उपायं विचिन्त्य वक्ष्याम इति सान्त्वयिष्यन्ति ॥१६॥

१७] ति० टी०–एवमनुनीयाथ क्षमानुचितान्गणिकाप्रेषणादिरूपानुपायान्विचार्य राजानं वक्ष्यन्ति । यद्यस्मदुक्तं श्रोष्यसि तदा तमानेष्यामः दोषोऽस्माकं शापादिरूपस्तस्य तपोवैकल्यादिरूपो वा सर्वथा न भविष्यति ॥ १७ ॥

रा० टी०–वक्ष्यन्तीति । ते पुरोहितादयः तस्य ऋष्यानयनस्य क्षमान् योग्यांस्तान्वक्ष्यमाणानुपायान् चिन्तयित्वा विचारेण निश्चित्यैव वक्ष्यन्ति राज्ञे निवेदयिष्यन्ति। तदेवाह वयं विप्रमानेष्यामः उपायान्तरेण प्रापयिष्यामः यतः दोषः अपराधो न भविष्यति।एकः चशब्दः एवार्थे । अपरो यतइत्यर्थे१६

गो० टी०–वक्ष्यन्तीति । तत्क्षमान् ऋष्यशृङ्गानयनोचितान् उपायांश्चिन्तयित्वा तान् तस्य राज्ञो वक्ष्यन्ति । एतैरुपायैर्वयं विप्रमानेष्यामः । नच दोषो भविष्यति । ऋष्यशृङ्गस्य ब्रह्मचर्यवैकल्यदोषश्च न भविष्यति । तत्र भवता न शङ्कनीयं यथा गणिकासंपर्को न भवेत् तथाऽऽनेष्याम इत्यर्थः ऋषिशापादोषो न भविष्यतीति वार्थः । अनावृष्टिदोषो न भविष्यतीति वा । इति वक्ष्यन्तीति पूर्वेणान्वयः ॥ १६ ॥

१८] ति० टी०–एवममात्यपुरोहितवचनाद्गणिकाभिस्तद्वारा ऋषिसुत आनीतः देव इन्द्रः पर्जन्यमवर्षयत्तद्देशे शान्ता चास्मै प्रदीयते प्रदत्ता वर्तमानसामीप्ये लट् । यद्यपि सनत्कुमारोक्त्यनुवादेन भविष्यन्निर्देश उचितः, तथापि राज्ञः संतोषाधिक्याय स्वप्रोच्यमानकाले वृत्तमेव तदिति बोधयितुं भूतनिर्देशः ॥ १८ ॥

रा० टी०–एवमिति । एवं पुरोहितादिबोधितोपायप्रकारेण गणिकाभिः करणभूतैः अङ्गाधिपेन कर्त्रा ऋषेः सुतः आनीतः आनेष्यति । अतः देवः अवर्षयत् वर्षयिष्यति । अतः अस्मै शान्ता प्रदीयते प्रदास्यति। क्त्वाप्रत्ययभूतादेरविवक्षा। चशब्दो हेत्वर्थे ॥ १७ ॥

गो० टी०–सनत्कुमारोक्तं समाप्य स्वयमाह–एवमिति । यथा आनेष्याम इत्युक्तमेवमानीतः । देवः पर्जन्यश्चावर्षयत् । शान्ता रोमपादकन्या च अस्मै ऋष्यशृङ्गाय प्रदीयते प्रादीयत। कालसामान्ये लट् ॥ १७ ॥

१९] ति० टी०–ऋष्यशृङ्गेति । अङ्गराजमित्रत्वस्य राज्ञि वक्ष्यमाणत्वेन मित्रजामाता स्वस्यापि जामातैवेत्यतो जामातेत्युक्तिः बीजान्तरमप्यग्रे वक्ष्यत एतदुक्तेः । एवं सनत्कुमारकथितं पुत्रोत्पत्त्युपायरूपं वस्तु मया तुभ्यं व्याहृतम् । अग्रे देवः प्रमाणमिति शेषः ॥ १९ ॥

रा० टी०–ऋष्येति । तव जामाता ऋष्यशृङ्गः पुत्रानपि विधास्यति त्वया पुत्रान्विशेषेण प्रकटीकार्य धारयिष्यति । एतावद्वचनं सनत्कुमारकथितं मया व्याहृतं तवाग्रे कथितम् तुशब्दोऽप्यर्थे । विधास्यतीत्यन्तर्भावितण्यर्थः । ऋष्यशृङ्गस्य राजाधिराजजामातृत्वोक्तिः रोमपादमित्रत्वमूलिका ॥ १८ ॥

गो० टी०–ऋष्यशृङ्ग इति। जामाता रोमपादस्य दशरथस्यापि वा । दशरथस्यौरसी शान्ता दत्ता रोमपादस्य सनत्कुमारकथितमेतावत् । एवमङ्गाधिपेनेत्यादि तु मया व्याहृतमित्यर्थः । यद्वा सर्वं सनत्कुमारवचनमेव । अवर्षयत् वर्षयिष्यति । प्रदीयते प्रदास्यते ॥ १८ ॥

२०] ति० टी०–अथेति । हृष्टो नियतपुत्रप्राप्त्युपायलाभात्तस्य संनिहितत्वश्रवणाच्च तुष्टः । ये तु पूर्वोत्तरश्लोक आनयनादि सर्वं भाविष्यत्त्वेनैव व्याचक्षते तेषां कथमानीत इति

१ ततः प्रेष्यतीति गो. रा. पाठः । २ विनतेति गो. रा. पाठ. । ३ ऋष्येति गो. पाठः ।

अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत । यथर्ष्यशृङ्गस्त्वानीतो येनोपायेन सोच्यताम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

सनत्कुमारप्रतिपादितऋष्यशृङ्गकथावर्णनम्, दशरथप्रोत्साहितसूतकृततत्कथाकथनं च ।

सुमन्त्रश्चोदितो राज्ञा प्रोवाचेदं वचस्तदा । यथर्ष्यशृङ्गस्त्वानीतो येनोपायेन मन्त्रिभिः ॥
तन्मे निगदितं सर्वं शृणु मे मन्त्रिभिः सह ॥ १
रोमपादमुवाचेदं सहामात्यः पुरोहितः । उपायो निरपायोऽयमस्माभिरभिचिन्तितः ॥ २ ॥
ऋष्यशृङ्गो वनचरस्तपःस्वाध्यायसंयुतः । अनभिज्ञस्तु नारीणां विषयाणां सुखस्य च ॥ ३ ॥
इन्द्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः । पुरमानाययिष्यामः क्षिप्रं चाध्यवसीयताम् ॥ ४ ॥

राजप्रश्नानुपपत्तिरित्याहुः । सोच्यताम् स उच्यतामित्यर्थः सन्धिरार्षः । यद्वा सा तद्विषया कथोच्यतामित्यर्थः ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय-आदिकाव्ये बालकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०–अथेति । अथ सुमंत्रोक्तिश्रवणानन्तरं हृष्टो दशरथः सुमंत्रं प्रत्यभाषत । भाषणाकारमाह यथा येन प्रकारेण ऋष्यशृङ्गः आनीतः स प्रकारस्त्वया विस्तरेणैवोच्यताम् । तु शब्दएवार्थे । येनोपायेन सोच्यतामिति भट्टसम्मतः पाठः सोच्यतामित्यत्र सन्धिरार्षः अध्याहृतकथाविशेषणं वेति तैर्व्याख्यातम् ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे नवमःसर्गः ॥ ९ ॥

गो० टी०–अथेति । उत्तरशेषः श्लोकः अत्र सर्गविच्छेदो लेखकदोषकृत इति प्रतिभाति ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

१] ति० टी०–सुमन्त्र इति । चोदितस्तादृशतपस्विनो गणिकाभिरानयनमत्याश्चर्यमिति विस्तरेण कथनाय प्रेरितः । मन्त्रिभिः सह संमन्त्र्य रोमपादेन यथर्ष्यशृङ्ग आनीतो येन चोपायेनानीतस्तन्मया निगदितं सर्वं प्रकारं मे मत्तो मन्त्रिभिः सह शृण्विति योजना ॥ १ ॥

रा० टी०–सुमन्त्र इति । राज्ञा चोदितः प्रेरितः सुमन्त्रः तदा तस्मिन्काले इदं वचः प्रोवाच । वचनप्रकारमाह–यथा येन प्रकारेण ऋष्यशृङ्गः मन्त्रिभिः रोमपादसचिवादिभिः आनीतः रोमपादपुरं प्रापितस्तं प्रकारं सः विशेषप्रश्नकर्ता त्वं मे मत्तः शृणु हेति हर्षे ॥ १ ॥

गो०टी०–सुमन्त्रइत्यादि । मे मत्तः सह ऋष्यशृङ्गः यथा मन्त्रिभिरानीतः तथा शृणु । हेति प्रसिद्धौ ॥ १ ॥

२] ति० टी०–रोमेति । सहामात्यःपुरोहितस्तमुवाच । निरपायोऽव्यभिचारिफलः ॥ २ ॥

रा० टी०–रोमेति । सहामात्यः अमात्यसहितः पुरोहितः रोमपाद इदं वचः उवाच । तद्वचनमेवाह–निरपायः अवश्यंभाविफलविशिष्टः अयमुपायः अस्माभिः अभिचिन्तितः विचारितः ॥ २ ॥

गो० टी०–रोमपादमिति । निरपायः अव्यभिचारिफलः ॥ २ ॥

३] ति० टी०–नारीणां नारीसंबन्धिविषयाणां शब्दादीनां तत्संबन्धिविषयाणां शब्दादीनां तत्संबन्धिसुखस्य चेत्यर्थः॥३॥

रा० टी०–आनयनोपायमाह–ऋष्येति । यः तपःस्वाध्यायतत्परः तपःस्वाध्याययोः निरतः वनचरः वनमात्रवासी स ऋष्यशृङ्गः नारीणां स्त्रीणां विषयाणामिन्द्रियग्राह्यरूपरसादीनां च सुखस्य इन्द्रियविषयसंयोगजन्यानन्दतस्य च अनभिज्ञः अनभिज्ञाताऽस्ति ॥ ३ ॥

गो० टी०–ऋष्यशृङ्ग इति । तपःस्वाध्यायने तपःस्वाध्याययोः " सर्वो द्वन्द्वो विभाषयैकवद्भवति " इत्येकवद्भावः । " अन्येषामपि दृश्यते " इति दीर्घः । तेन पुराणेतिहासादिसुखेनापि न स्त्रीस्वरूपं जानातीति भावः । नारीणामनभिज्ञ इति कर्मणि षष्ठी । विषयाणां शब्दस्पर्शरूपरसगन्धानां संबन्धिनः सुखस्य चानभिज्ञश्च भवति ॥ ३ ॥

४] ति० टी०–अभिमतैः । प्राणिमात्रस्येति शेषः । इन्द्रियार्थैस्तद्विषयैर्दिव्यगीत्यादिभिः । अध्यवसीयतामस्मदुक्तकरणाय यत्यताम् ॥ ४ ॥

रा० टी०–अभिमतैः प्रीतिविषयभूतैः अतएव नर-

१ यथर्ष्येति गा. पाठः । २ विस्तरेण त्वयोच्यतामिति गो. रा. पाठः । ३ तथेति गो. पाठः । ४ यथर्ष्यशृङ्ग इति गा. पाठः । ५ तृतीयार्धप्रथमचरणं द्वितीयार्धद्वितीयचरणं च गो. रा पु. न स्तः । ६ सहामात्यपुरो गो. पाठः । ७ ऋश्येति गो. पाठः । ८ स्वाध्यायने रत इति गो. पाठः; स्वाध्यायतत्पर इति रा. पाठः । ९ नन्दितमिति भाति ।

गणिकास्तत्र गच्छन्तु रूपवत्यः स्वलंकृताः । प्रलोभ्य विविधोपायैरानेष्यन्तीह सत्कृताः ॥ ५ ॥
श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितम् । पुरोहितो मन्त्रिणश्च तदा चक्रुश्च ते तथा ॥ ६ ॥
वारमुख्यास्तु तच्छ्रुत्वा वनं प्रविविशुर्महत् । आश्रमस्याविदूरेऽस्मिन्यत्नं कुर्वन्ति दर्शने ॥ ७ ॥
ऋषेः पुत्रस्य धीरस्य नित्यमाश्रमवासिनः । पितुः स नित्यसंतुष्टो नातिचक्राम चाश्रमात् ॥ ८ ॥
न तेन जन्मप्रभृति दृष्टपूर्वं तपस्विना । स्त्री वा पुमान्वा यच्चान्यत्सत्त्वं नगरराष्ट्रजम् ॥ ९ ॥
ततः कदाचित्तं देशमाजगाम यदृच्छया । विभाण्डकसुतस्तत्र ताश्चापश्यद्वराङ्गनाः ॥ १० ॥

चित्तप्रमाथिभिः जनहृदयापकर्षकैः इन्द्रियार्थैः इन्द्रियविषयभूतपदार्थैः क्षिप्रं शीघ्रं पुरमानाययिष्यामः इति अध्यवसीयतां निश्चीयताम् । चशब्द इत्यर्थे ॥ ४ ॥

गो० टी०–इन्द्रियार्थैरिति । नरचित्तप्रमाथिभिः नरचित्ताकर्षकैः। तमिति शेषः । क्षिप्रं शीघ्रमानाययिष्यामः । अध्यवसीयतां निश्चीयताम् अस्मदुक्तप्रकार इति शेषः ॥ ४ ॥

५] **ति० टी०**–तदाह–गणिका इति । सत्कृता विचित्राम्बराभरणान्नपानादिभिः ॥ ५ ॥

रा० टी०–गणिका इति । रूपवत्यः स्वलंकृताः गणिका वेश्यास्तत्र ऋषिसमीपे गच्छन्तु सत्कृता मुनिना आदृतास्ताः विविधोपायैः प्रलोभ्य इह आनेष्यन्ति ॥ ५ ॥

गो० टी०–के इन्द्रियार्थाः कथं तैरानयनं तत्राह–गणिका इति । गणिका वेश्याः प्रलोभ्य वञ्चयित्वा सत्कृताअस्माभिः कृतबहुमानाः ऋष्यशृङ्गेण वा ॥ ५ ॥

६] **ति० टी०**–श्रुत्वेति । राजा पुरोहितं तथेति स्वयैव तथा कर्तव्यमिति प्रत्युवाच । अत्यल्पविषयत्वाद्राज्ञ एवं वादः । अथ पुरोहितस्य विप्रत्वाद्गणिकाभिः संवादोऽनुचित इति सोऽपि मन्त्रिणः प्रत्युवाच । मन्त्रिणश्च ते तथा चक्रुः साक्षाद्गणिकाः प्रैरयन् ॥ ६ ॥

रा० टी०–श्रुत्वेति । राजा रोमपादः श्रुत्वा स्वमन्त्रिपुरोहितोक्तिं ज्ञात्वैव तथा स्वोक्तप्रकारेण कुरुष्वेति पुरोहितं प्रत्युवाच तदा राजाज्ञापनकाले ते पुरोहितो मन्त्रिणश्च तथा राजाज्ञया स्वोक्तप्रकारेण चक्रुः ऋष्यानयनाय वनप्रवेशं प्रति गणिकाः आज्ञापयामासुरित्यर्थः । चशब्द एवार्थे ॥ ६ ॥

गो० टी०–श्रुत्वेति । राजा पुरोहितं तथेति प्रत्युवाच पुरोहितोऽपि मन्त्रिणस्तथेति प्रत्युवाच । ते च मन्त्रिणस्तथा चक्रुः । तेषामेवाधिकारात् वारमुख्याः प्रेषयामासुरित्यर्थः। वारेति अर्द्धमेकं वारशब्देन वारस्त्रिय उच्यन्ते नामैकदेशे नामग्रहणात् ॥ ६ ॥

७] **ति० टी०**–वारेति । तन्मन्त्रिवचः । अस्मिन्वने युष्मज्जनपदप्रान्तवर्तिनि शृङ्गवेरपुरवने। आश्रमस्य विभाण्डकाश्रमस्याविदूरे निकटे स्थित्वा ऋषिपुत्रस्य धीरत्वादिगुणविशिष्टस्य दर्शने यत्नं कुर्वन्ति स्म चक्रुः ॥ ७ ॥

रा० टी०–वारमुख्या इति । वारमुख्याः गणिकाः तद्वनप्रवेशाज्ञापनं श्रुत्वैव महद्वनं प्रविविशुः । अस्मिन्मुनिवनत्वेन प्रसिद्धवने आश्रमस्य विभाण्डकमुनिपर्णशालायाः अविदूरे निकटे स्थित्वेति शेषः । धीरस्य अत एव नित्यमाश्रमवासिनः ऋषिपुत्रस्य ऋष्यशृङ्गस्य दर्शने अवलोकने यत्नं प्रयत्नं कुर्वन्ति। एतेन मुनिसमीपगमनं नैतासां साध्यमिति ध्वनितम् तेन मुनेः परमतेजस्वित्वं सूचितम् । सार्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–आश्रमस्येति । अस्मिन्वने आश्रमस्याविदूरे दर्शने ऋष्यशृङ्गदर्शने यत्नमवधानं कुर्वन्ति अकुर्वन् ऋषिपुत्रस्येत्यादिविशेषणत्रयं यत्नस्य कर्तव्यत्वे हेतुः ॥ ७ ॥

८] **ति० टी०**–पितुरुपलालनादिभिर्नित्यसंतुष्टः स आश्रमान्नातिचक्रामाश्रमाद्दूरं न निरगात् ॥ ८ ॥

रा० टी०–पितुरिति । पितुः पितृसेवया पितृकृतलालनादिना वा नित्यसंतुष्टः स ऋष्यशृङ्गः आश्रमान्नातिचक्राम ॥

गो० टी०–उक्तहेतुं विद्वणोति–पितुरित्यर्धेन । पितुः सकाशान्नित्यसन्तुष्टो पितृशुश्रूषणैकरत इत्यर्थः ॥ ८ ॥

९] **ति० टी०**–नेति । रूपादिकं जन्मप्रभृति दृष्टपूर्वं न भवति यथा तथा व्यवहियत इति शेषः । नगरजं सत्त्वमश्वगजादि । राष्ट्रजं सूकरकुक्कुटादि ॥ ९ ॥

रा० टी०–नेति । तेन प्रसिद्धेन तपस्विना ऋष्यशृङ्गेण जन्मप्रभृति जन्मनः आरभ्य नगरराष्ट्रजं नगरराष्ट्रोद्भवं स्त्री पुमाँश्च अन्यत्तद्भिन्नं च नपुंसकमित्यर्थः सत्त्वं नगरराष्ट्रसंबन्धिप्राणिधर्मश्च दृष्टमिति यावत् । एतत्सर्वं दृष्टपूर्वं न अतो न ज्ञायत इति शेषः । दृष्टपूर्वं नगरराष्ट्रजमेतद्वयमाद्रष्ट्या लिङ्गविपरिणामेन च सर्वत्रान्वेति । "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इति नपुंसकशेषे समुदायान्वयेनावयवान्वये पर्यवसानं वा बोध्यम् । वाशब्दौ चार्थौ ॥ ९ ॥

गो० टी०–हेत्वन्तरमाह–न तेनेति । जन्मप्रभृति जन्मारभ्य नगरजमश्वादि राष्ट्रजं कुक्कुटादि ॥ ९ ॥

१०–११] **ति० टी०**–तत इति। तं देशं वारस्त्रीसंचारदेशम् । यदृच्छया दैववशात् ॥ १० ॥ ११ ॥

रा० टी०–तत इति । ततः स्वाश्रमात्कदाचित्कस्मिँश्चित्समये तं गणिकाधिष्ठितं देशं वनप्रदेशं यदृच्छया परमात्मेच्छया विभाण्डकसुतः ऋष्यशृङ्ग आजगाम तत्र तस्मिन्वनप्रदेशे ता वञ्चनार्थमागताः वराङ्गनाः गणिकाः अपश्यच्च ॥ १० ॥

१ रानयिष्यन्तीति गो. पाठः । २तथेति रा.गो.पाठः।३तदेति गो.रा.पाठः।४ऋषिपुत्रस्येति गो.रा.पाठः ।५ सर्वमिति गो. पाठः ।६ विभण्डक इति गो.पाठः।

ताश्चित्रवेषाः प्रमदा गायन्त्यो मधुरस्वरम् । ऋषिपुत्रमुपागम्य सर्वा वचनमब्रुवन् ॥ ११ ॥
कस्त्वं किं वर्तसे ब्रह्मञ्ज्ञातुमिच्छामहे वयम् । एकस्त्वं विजने दूरे वने चरसि शंस नः ॥ १२ ॥
अदृष्टरूपास्तास्तेन काम्यरूपा वने स्त्रियः । हार्दात्तस्य मतिर्जाता आख्यातुं पितरं स्वकम् ॥ १३ ॥
पिता विभाण्डकोऽस्माकं तस्याहं सुत औरसः । ऋष्यशृङ्ग इति ख्यातं नाम कर्म च मे भुवि ॥१४॥

गो० टी०–तत इति । यदृच्छया दैववशात् ॥ १० ॥

रा० टी०–ता इति । चित्रवेषाः विचित्रवेषधराः मधुरस्वनैः गायन्त्यः ताः आनयनार्थमागताः सर्वाः प्रमदाः ऋषिपुत्रमुपागम्य संप्राप्य वचनमब्रुवन् ॥ ११ ॥

गो० टी०–ता इति । चित्रवेषाः नानालङ्काराः ॥ ११ ॥

१२] ति० टी०–क इति । कस्त्वं किंजातिः कस्य पुत्र इति च किंनामा च किं वर्तसे किंकर्मासि। अपि चैकः संस्त्वं विजने दूरे जनवासरूपग्रामादिभ्यो दूरे वने किमर्थं चरसीति प्रश्नत्रयम् ॥ १२ ॥

रा० टी०–वचनमेवाह । क इति । हे ब्रह्मन् त्वं कः कस्य पुत्रः किन्नामा चासीत्यर्थः । किं वर्तसे किं कर्म वर्तसे प्रवर्तयसि करोषीत्यर्थः अन्तर्भावितणिजर्थः । विजने जनान्तररहिते अत एव घोरे भयङ्करे वने एकस्त्वं किं किमर्थं चरसि इति वयं ज्ञातुमिच्छामहे इच्छामः अतस्त्वं नः अस्मभ्यं शंस । किमित्याद्दत्या चरसीत्यत्राप्यन्वेति । विजने दूरे इति भट्टसंमतः पाठः तत्र ग्रामादिभ्यो दूरे इत्यर्थः ॥ १२ ॥

गो० टी०–कस्त्वमिति । कस्त्वं किंजातिः कस्य पुत्र इत्यर्थः । किं किमर्थं वर्तसे। इच्छामहे इत्यात्मनेपदमार्षम् । भवान् किंजातिः किंनामधेयः कस्य पुत्रः त्वं घोरेऽस्मिन्वने किमर्थं वर्तसे । किमर्थमेकश्चरसीति योजना ॥ १२ ॥

१३] ति० टी०–अदृष्टेति । स्त्रिय इत्यस्य दृष्टा इति शेषः । अनेन हार्दमूलभूता 'चलस्य चेतसो या स्यादुदासीनेषु वस्तुषु। अवारणीया वृत्तिः सा दृष्टिशब्देन कथ्यते ॥ ' इत्युक्तलक्षणा दृष्टिरुक्ता । ततः सर्वांशेऽनुपेक्षात्मकज्ञानरूपः परिचयोऽपि मध्ये ज्ञेयः । अतस्तासु हार्दादर्शनजस्नेहात् ' दोषानालोकिनी प्रीत्याख्यचित्तवृत्तिर्हार्दम् ' इत्युक्तेः । स्वकं स्वीयम् । अदृष्टरूपाः प्रागदृष्टैवंरूपाः । काम्यरूपाः कमनीयरूपाः । एतद्वयं च स्नेहकारणम् ॥ १३ ॥

रा० टी०–अदृष्टेति । तेन ऋष्यशृङ्गेण अदृष्टरूपाः न दृष्टानि रूपाणि यासां ताः काम्यरूपाः सर्वेच्छाविषयीभूतरूपविशिष्टाः परमसुन्दरीरित्यर्थः । वने विद्यमानाः स्त्रियः हार्दादवलोकनमात्रेण जातस्नेहात्स्वकं पितरमुपलक्षणेन तत्पृष्टं सर्वमित्यर्थः । आख्यातुं मतिर्जाता । ख्याधातोर्द्विकर्मकत्वात् कर्मद्वयम् ॥ १३ ॥

गो० टी०–अदृष्टेति । यस्मात्कारणात् काम्यरूपाः काम्यमानरूपाः ता स्त्रियो वने तेनादृष्टरूपाः । तस्माद्धार्दात् दर्शनजस्नेहात् स्वकं पितरं पित्रादिकमाख्यातुं मतिर्जाता ॥ १३ ॥

१४] ति० टी०–पितेति । नामेत्यन्तमाद्यप्रश्नोत्तरम् । द्वितीयप्रश्नोत्तरमाह–कर्म च मदीयं भुवि प्रसिद्धम् । तपोरूपमित्यर्थः ॥ १४ ॥

रा० टी०–तदाख्यानमेवाह–पितेति । अस्माकं पिता विभाण्डकः विभाण्डकनामा " अस्मदो द्वयोश्च " इत्यनुशासनाद्बहुत्वम् । स्वस्मिन्नौपचारिकपुत्रत्वं वारयन्नाह–ऋष्यशृङ्ग इति । ऋष्यशृङ्गनामकः तस्य विभाण्डकस्याहमौरसः मुख्यः सुतः मे कर्म मत्कर्तृकोच्चारणक्रियानिष्पाद्यं भुवि वैकुण्ठादिभूमौ ख्यातं प्रसिद्धं नाम रामनामेत्यर्थः । ऋष्यशृङ्गनामार्थस्तु ऋष्यस्य मृगजातिविशेषस्य शृङ्गमिव शृङ्गं यस्येत्यर्थः। अत्र पौराणिकी प्रसिद्धिः कस्मिंश्चित्सरसि विहरन्तीमुर्वशीमवलोक्य स्खलितं विभाण्डकस्य रेतः जले मृग्या पीतं तज्जातत्वाच्छृङ्गित्वमेतस्येति एतेन कर्मनाम्नोः ख्यातपदं योजयित्वा व्याख्यानं निरस्तम् । ख्यातत्वस्य पितर्यपि तुल्यत्वेन तन्नामकथनवैयर्थ्यापत्तेः । ननु ' संस्कृतायां तु भार्यायां स्वयमुत्पादयेत्तु यम् । तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम् ' इत्युक्त्याऽस्मिन्नौरसत्वव्यवहारोऽनुपपन्न इति वाच्यम् । स्वनिरूपितक्षेत्रजादिभिन्नत्वे सति स्वजन्यत्वमौरसत्वमिति स्वीकारेणादोषात् स्मृतिस्त्वेकदेशानुवादिका । दृष्टश्चैकदेशानुवादो 'वाक्ये तु सा विवक्षामपेक्षते ' इत्यादाविति दिक् । केचित्तु पुराणप्रसिद्धमृष्यन्तरमिति वर्णयन्ति।अस्य मृगीसुतत्वेन व्यवहारस्तु मृगनयनीत्वादिना तन्मातुर्मृगीत्वेन व्यवहारात्।अस्मिन्पक्षे ऋष्यशृङ्गा र्थस्तु ऋष्याणां मृगाणां शृङ्गाणि विहारशिखराणि यस्य पर्वतशिखरविचरणशील इत्यर्थः। अत्रौरस इत्युक्तिरेव मानम्। अत्रारुचिबीजं तु हनुमदादीनामौरसत्वव्यवहाराभावापत्तिरिति । कर्मणः प्रसिद्धत्वमात्रोक्तौ ऋषेः स्वौद्धत्यवर्णनं प्रसज्येत तेन तस्य गर्वित्वं प्रसज्येत इति दिक् । स्मृतिनिषिद्धस्य आत्मनामादिग्रहणस्य प्रश्नाख्यानयोरदोषकत्वं स्मृतिसिद्धान्तादौ निरुक्तम् । वक्ष्यते चैतत् रघुनाथस्य स्वनामोच्चारणादिप्रघट्टके ॥ १४ ॥

गो० टी०–पितेति । अस्माकमिति मृगाद्यपेक्षया बहुवचनम् । किं तद्बहुनैणः पुत्रोसि नेत्याह–औरस इति । पुरा किल महाभूततटाकाख्ये सरसि उपस्पृशतो विभण्डकस्य उर्वशीं दृष्ट्वा रेतोऽस्खलत् । तन्मृगी जलेन सह पीत्वा गर्भिण्यासीत् । तस्यां जातः ऋष्यमृगतुल्यशृङ्गत्वादृष्यशृङ्गाख्योऽभूदिति पौराणिकी कथा । मे ऋष्यशृङ्गेति नामाख्यातम् । मे तपोरूपं कर्म च भुवि वनभुवि ख्यातम् ॥ १४

१ घोरे इति गो. रा. पाठः । २ ह्याख्यातुमिति गो. पाठः । ३ विभंडक इति गो. पाठः । ४ ऋश्येति गा. पाठः ।

इहाश्रमपदोऽस्माकं समीपे शुभदर्शनाः । करिष्ये वोऽत्र पूजां वै सर्वेषां विधिपूर्वकम्॥१५॥
ऋषिपुत्रवचःश्रुत्वा सर्वासां मतिरास वै । तदाश्रमपदं द्रष्टुं जग्मुः सर्वास्ततोऽङ्गनाः ॥ १६ ॥
गतानां तु ततः पूजामृषिपुत्रश्चकार ह । इदमर्घ्यमिदं पाद्यमिदं मूलं फलं च नः ॥ १७ ॥
प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः । ऋषेर्भीतांश्च शीघ्रं तु गमनाय मतिं दधुः ॥ १८ ॥
अस्माकमपि मुख्यानि फलानीमानि हे द्विज । गृहाण विप्र भद्रं ते भक्षयस्व च मा चिरम्॥ १९ ॥
ततस्तास्तं समालिङ्ग्य सर्वा हर्षसमन्विताः । मोदकान्प्रददुस्तस्मै भक्ष्यांश्च विविधाञ्शुभान्॥२० ॥
तानि चास्वाद्य तेजस्वी फलानीति स्म मन्यते । अनास्वादितपूर्वाणि वने नित्यनिवासिनाम् ॥२१॥

१५] ति० टी०–तृतीयप्रश्नोत्तरमाह–इहेति । इह वने आश्रमपदः । आर्ष पुंस्त्वम् । वर्तत इति शेषः । सर्वेषामिति निर्देशो वस्तुमात्राभिप्रायेण।अनेन स्त्रीस्वरूपापरिज्ञानं सूचितम्॥

रा टी०–इहेति । हे शुभदर्शनाः इह अस्मिन्वने समीपे भवन्निकटे एव अश्रमपदः श्रमनिवर्तकस्थानमस्ति अतः अत्रास्मिन्स्वाश्रमे सर्वेषां वः युष्माकं पूजां विधिपूर्वकं करिष्ये एतेन मदाश्रमे भवद्भिर्गन्तव्यमिति बोधितम् । तेन तस्यातिथिपूजने श्रद्धातिशयः सूचितः । अश्रमपद इति पुँस्त्वमार्षम् । सर्वेषामिति पुँलिङ्गत्वेन निर्देशः स्त्रीपरिज्ञानराहित्यमूलकः । वैशब्द एवार्थे ॥ १५ ॥

गो० टी०–इहेति । इह वनसमीपे प्रदेशेऽस्माकमाश्रमपदः पुंस्त्वमार्षम् । अत्र वः पूजां करिष्ये आगन्तव्यमिति भावः । सर्वेषामिति पुंलिङ्गनिर्देशः । स्त्रीस्वरूपाऽपरिज्ञानकृतः ॥ १५ ॥

१६] ति० टी०–ऋषीति । आसेत्यार्षम् । बभूवेत्यर्थः । तद्द्रष्टुं मतिर्बभूवेत्यन्वयः ॥ १६ ॥

रा० टी०–ऋषीति । ऋषिपुत्रवचः श्रुत्वैव आश्रमपदं द्रष्टुं सर्वासां मतिर्निश्चयः आस । अतस्तेन ऋष्यशृङ्गेण सह सर्वाः गणिकास्तदा तस्मिन्काले आश्रमपदं जग्मुः । वैशब्द एवार्थे चो हेतौ । अस्तेर्भूभावाभाव आर्षः दीर्घ्यर्थकासो रूपं वा॥ १६ ॥

गो० टी०–ऋषीति । द्रष्टुं मतिरास अभूत् अस्तेर्भूभावाभाव आर्षः । तेन सह तदाश्रमपदं जग्मुश्च ॥ १६ ॥

१७] ति० टी०–नोऽस्माकम् । भक्ष्यमिति शेषः ॥ १७ ॥

रा० टी०–गतानामिति । ततोऽनन्तरमेव ऋषिपुत्रः गतानां स्वाश्रमे प्राप्तानां स्त्रीजनानां पूजां चकार । ह इति प्रसिद्धौ।पूजनस्वरूपमाह–इदमर्घ्यादिकं नः अस्माकं दत्तं प्रतिगृह्णन्तु इति शेषः । तुशब्द एवार्थे ॥ १७ ॥

गो० टी०–आगतानामिति । आगतानामाश्रमपदम् । आगतानामन्ते इतिकरणं द्रष्टव्यम् ॥ १७ ॥

१८] ति० टी०–प्रतीति । समुत्सुका ऋष्यशृङ्गस्य तदाश्रमतो नयने । ऋषेर्विभाण्डकात् ॥ १८ ॥

रा० टी०–प्रतीति । समुत्सुकाः परमहर्षविशिष्टाः सर्वा गणिकास्तां मुनिदत्तां पूजां प्रतिगृह्यैव तुना शनैः किञ्चित्संभाष्य ऋषेर्विभाण्डकाद्भीता एव सत्यः गमनायैव शीघ्रेण शीघ्रं मतिं दधुः । द्वितीयस्तुशब्द एवार्थे एतेन तस्मिन्काले ऋषिराश्रमादन्यत्र गत इति ध्वनितम् ॥ १८ ॥

गो० टी०–प्रतिगृह्येति । समुत्सुकाः तत्संलापसाभिलाषाः ताः सर्वास्तां पूजां ऋषिपुत्रदत्तां पूजाम् । प्रतिगृह्य ऋषेर्विभण्डकाद्भीताः सत्यः शीघ्रं गमनाय मतिं दधुः ॥ १८ ॥

१९] ति० टी०–मुख्यानि प्रशस्तास्वादवन्ति । प्रतारणार्थं मोदका एवमुच्यन्ते । प्रतिगृहाण । ते भद्रं कल्याणम् । भक्षयस्व च फलानीति शेषः । मा चिरम् ऋषेरागमनात्पूर्वमेव भक्षणीयमित्याशयः ॥ १९ ॥

रा० टी०–अस्माकमपीति । द्विज हे ब्राह्मण इमानि मुख्यानि श्रेष्ठानि अस्माकमपि फलानि प्रतिगृहाण भक्षयस्व च चिरं विलम्बं मा नैव कुरु ते भद्रं भक्षणेन कल्याणं स्यादित्यर्थः वैशब्द एवार्थे छन्दसि परे इत्यनुशासनात्प्रतिशब्दः परत्र प्रयुक्तः॥ १९ ॥

गो० टी०–अस्माकमिति । प्रतिगृहाणेत्यन्वयः । "छन्दसि परेपि" इति प्रतीत्यस्योपसर्गस्य धातोरुपरिष्टात्प्रयोगः । छन्दोवत्पुराणानि भवन्तीतिन्यायात् । मा चिरम् विलम्बं मा कुरु ॥ १९ ॥

२०] ति० टी०–तत इति । समालिङ्ग्य स्पर्शेनापि वशीकर्तुमालिङ्गनम् । हर्षसमन्विताः । बालब्रह्मचारितो गाढतरालिङ्गनप्राप्त्या स्वकार्यानुकूलस्पर्शप्राप्त्या च ॥ २० ॥

रा० टी०–तत इति । ततः स्वोक्त्यनन्तरं हर्षसमन्विता सर्वास्ता गणिकाः तं मुनिं समालिङ्ग्य तस्मै मुनये विविधाननेकप्रकाराञ्छुभान्रमणीयान् भक्ष्यान् भक्षयितुं योग्यान्मोदकान्प्रददुः चो हेतौ एतेन कार्यसिद्धौ न विलम्ब इति हर्षे हेतुर्ध्वनितः२०

गो० टी०–तत इति । अत्रादौ इत्युक्त्वेत्युपस्कार्यं स्नेहिजनवत् वशीकारार्थमालिङ्ग्य ॥ २० ॥

२१] ति० टी०–तानीति । ताभिः प्रीत्या दत्तानि । तेजस्वी वारवनितास्पर्शेऽप्यूर्ध्वरेतस्त्वाद्ब्रह्मज्ञत्वाच्चाहीनतेजा मन्यते । यो मन्यते स इव व्यवहरतीत्यर्थः । पूर्वमनास्वादितान्यनास्वादितपूर्वाणि । नित्यनिवासिनामिति कर्तरि शेषे षष्ठी॥

१ सर्वाश्च तेन ताः इति गो. सर्वाश्च तेन वै इति रा. पाठः । २ आगतानामिति गो. पाठः । ३ इदं फलमिति गो. पाठः ।४ भीतास्त्विति गो. रा. पाठः । ५ शीघ्रं ता इति गो. शीघ्रेण गमनायेति रा. पाठः । ६ प्रति भद्रमिति गो. रा. पाठः ।

आपृच्छ्य च तदा विप्रं व्रतचर्यां निवेद्य च । गच्छन्ति स्मापदेशात्ता भीतास्तस्य पितुः स्त्रियः२२
गतासु तासु सर्वासु काश्यपस्यात्मजो द्विजः । अस्वस्थहृदयश्चासीद्दुःखाच्चैव परिवर्तते ॥ २३ ॥
ततोऽपरेद्युस्तं देशमाजगाम स वीर्यवान् । विभाण्डकसुतः श्रीमान्मनसाचिन्तयन्मुहुः ॥ २४ ॥
मनोज्ञा यत्र ता दृष्ट्वा वारमुख्याः स्वलंकृताः । दृष्ट्वैव च ततो विप्रमायान्तं हृष्टमानसाः ॥ २५ ॥
उपसृत्य ततः सर्वास्तास्तमूचुरिदं वचः । एह्याश्रमपदं सौम्य अस्माकमिति चाब्रुवन्॥ २६ ॥
चित्राण्यत्र बहूनि स्युर्मूलानि च फलानि च । तत्राप्येष विशेषेण विधिर्हि भविता ध्रुवम्॥ २७ ॥

रा० टी०–तानीति । तेजस्वी मुनिः वने नित्यनिवासिनामनास्वादितपूर्वाणि पूर्वभक्षणकर्मत्वरहितानि तानि मोदकजातानि आस्वाद्य भक्षयित्वा तानि फलान्येव इति मन्यते स्म । चशब्द एवार्थे ॥ २१ ॥

गो० टी०– तानीति । वने नित्यनिवासिनामनास्वादितपूर्वाणि तैः पूर्वमनास्वादितानि फलानीमानीति मन्यते स्म अपूर्वरसत्वात् "पूरणगुण०" इतिसमासप्रतिषेधादेव ज्ञापकात्तृतीयार्थे षष्ठी ॥ २१ ॥

२२] ति० टी०–व्रतचर्यां मिथ्यैव किंचिद्व्रतमनुष्ठेयमस्माकमिति निवेद्य ज्ञापयित्वा । तस्मादपदेशाद्व्याजात् । तस्य पितुर्विभाण्डकाद्भीताः स्त्रियो गच्छन्ति स्म गताः ॥२२॥

रा० टी०–आपृच्छ्येति । अपदानामाश्रयरहितानामीशात्स्वामिनः रक्षकादित्यर्थः तस्य मुनेः पितुः भीता एव स्त्रियः व्रतचर्यां गमनहेतुकव्याजरूपव्रतकर्तव्यतां निवेद्य उक्त्वा आपृच्छ्य आज्ञां गृहीत्वा च गच्छन्ति स्वस्थानं यान्ति स्म । तुशब्द एवार्थे ॥ २२ ॥

गो० टी०–आपृच्छ्येति । व्रतचर्यां निवेद्य अस्माभिः किंचिद्व्रतमनुष्ठेयमस्तीति व्रतानुष्ठानं निवेद्य तस्मादपदेशाद्व्याजात् तस्य पितुर्भीताः सत्यो गच्छन्ति स्म ॥ २२ ॥

२३] ति० टी०–अस्वस्थहृदयोऽप्रसन्नचित्त आसीत् । दुःखात्तादृशचाक्षुषादिविषयसुखविश्लेषजात् । परिवर्तनमेकदेशानवस्थितिः ॥ २३ ॥

रा० टी०–गतास्विति । सर्वासु तासु गणिकासु गतासु काश्यपस्य कश्यपपुत्रविभाण्डकस्य आत्मजो द्विजो ब्राह्मणः ऋष्यशृङ्ग अस्वस्थहृदयः चलितचित्तः एवासीत् अत एव दुःखं यथा स्यात्तथा परिवर्तते स्म नैकत्रातिष्ठदित्यर्थः चशब्द एवार्थे दुःखाच्च परिवर्तते इतिभट्टसम्मतः पाठः । एतेन ऋषेस्तन्मनस्कत्वं व्यक्तम् ॥ २३ ॥

गो० टी०–गतास्विति । काश्यपस्य कश्यपपुत्रस्य विभण्डकस्य अस्वस्थहृदयः कर्षितचित्तः दुःखं यथा भवति तथा परिवर्तते स्म संचरति स्म ॥ २३ ॥

२४] ति० टी०–तत इति । उक्ताद्धेतोः । मनसाचिन्तयन् तासां दर्शनस्पर्शनगमनादिप्रकारान्स्मरन्नित्यर्थः । तत्र गमनमेतद्वारकमवश्यं भावीति चिन्तयन्नित्यर्थश्च ॥ २४ ॥

रा० टी०–तत इति । स्वलंकृताः शोभनालङ्कारालंकृता अत एव मनोज्ञाः मनोहराः ताः वारमुख्याः गणिकाः यत्र यस्मिन्देशे दृष्टाः ऋषिपुत्रेणावलोकिताः तं देशं वीर्यवांस्तपोबलविशिष्टः स ऋष्यशृङ्गः ततः स्वाश्रमात्परेद्युः आजगाम । स वीर्यवानित्येतस्मादुत्तरम् ' विभाण्डकसुतः श्रीमान्मनसा चिन्तयन्मुहुः ' इति श्लोकार्द्धं भट्टसंमतम् ॥ २४ ॥

गो० टी०–तत इति । ततः अस्वस्थचित्तत्वाद्धेतोः॥२४॥

२५] ति० टी०–तं कं तत्राह–मनोज्ञा इति ॥ २५ ॥

रा० टी०–दृष्ट्वैवेति । तदा ऋष्यागमनसमये एव आयान्तं तं विप्रम् ऋष्यशृङ्गं दृष्ट्वैव सर्वास्ताः गणिकाः ततः स्वासनादुपसृत्य प्रत्युद्गम्य इदं वचः ऊचुः ॥ २५ ॥

गो० टी०–दृष्ट्वेति । स्पष्टम् ॥ २५ ॥

२६] ति० टी०–उपसृत्य प्रत्युद्गम्य ॥ २६ ॥

२७] ति टी०–चित्राणीति । यथैव चित्राणि मूलानि फलानि च भवेयुः । संभावनायां लिङ् । अतस्तत्र गमनं व्यर्थमिति चेत्तत्राप्येष विधिः। विचित्रफलमूलभक्षणविधिर्विशेषेणेतोऽप्याधिक्येन भविष्यति ॥ २७ ॥

रा० टी०–तद्वचनमेवाहः–एहीति । हे सौम्य अस्माकमपि आश्रमपदमा समन्ताच्छ्रमानिवर्तकं स्थानमेहि आगच्छ तत्र तस्मिन्नस्मदाश्रमपदेपि श्रीमान्सर्वसम्पत्तिसमृद्धः एषः फलादिनिचयविशिष्टः विधिः सत्कारविधानं विशेषेण भविष्यतीति अब्रुवन् चशब्द इत्यर्थे अब्रुवन्नित्यस्यानन्तरं 'चित्राण्यत्र बहूनि स्युर्मूलानि च फलानि च ' इति श्लोकार्द्धं भट्टसंमतम् ॥ २६ ॥

गो० टी०–एहीति । अस्माकमाश्रमपदमेहीति पूर्वेणान्वयः । तत्रापि श्रीमान् समृद्धिमान् एष विधिः सत्कारः स्वदेशत्वाद्विशेषेण भविष्यति इति चाब्रुवन्निति योजना ॥ २६ ॥

२८] ति० टी०–श्रुत्वा त्विति । गङ्गायां पूर्वस्थापितां नावमारोप्य प्रवाहेणैवाङ्गदेशं निन्युरिति महाभारते ॥ २८ ॥

रा० टी०–श्रुत्वेति सर्वासां हृदयङ्गमं मनोहरं वचनं श्रुत्वैव गमनाय मतिं निश्चयं चक्रे तदा तद्गमननिश्चयकाले एव तं ऋषिं स्त्रियः निन्युः तुचशब्दौ एवार्थौ अत्र भारतानुरोधान्नयनं नावमारोप्य गङ्गाप्रवाहेण बोध्यम् ॥ २७ ॥

गो टी०–श्रुत्वेति । हृदयंगमं मनोज्ञं खशप्रकरणे " गमेः

१ आपृच्छ्य तु इति गो. रा. पाठः । २ दुःखं स्म इति गो. रा. पाठः । ३ इदमर्धं गो. रा. पुस्तकयोर्न दृश्यते । ४ ह्यस्माकमितीति गो. पाठः अस्माकमिति रा. पाठः । ५ इदमर्धं गो. रा. पुस्तकयोर्न दृश्यते । ६ तत्राप्येष विधिः श्रीमान्विशेषेण भविष्यतीति गो. रा. पाठः ।

श्रुत्वा तु वचनं तासां सर्वासां हृदयंगमम् । गमनाय मतिं चक्रे तं च निन्युस्तथा स्त्रियः ॥ २८ ॥
तत्र चानीयमाने तु विप्रे तस्मिन्महात्मनि । ववर्ष सहसा देवो जगत्प्रह्लादयंस्तदा ॥ २९ ॥
वर्षेणैवागतं विप्रं तापसं स नराधिपः । प्रत्युद्गम्य मुनिं प्रह्वः शिरसा च महीं गतः ॥ ३० ॥
अर्घ्यं च प्रददौ तस्मै न्यायतः सुसमाहितः । वत्रे प्रसादं विप्रेन्द्रान्मा विप्रं मन्युराविशेत् ॥ ३१ ॥
अन्तःपुरं प्रवेश्यास्मै कन्यां दत्त्वा यथाविधि । शान्तां शान्तेन मनसा राजा हर्षमवाप सः॥ ३२ ॥
एवं स न्यवसत्तत्र सर्वकामैः सुपूजितः । ऋष्यशृङ्गो महातेजाः शान्तया सह भार्यया ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे दशमः सर्गः ॥ १० ॥

सुप्युपसंख्यानम्" इति खश् । निन्युः नावमारोप्य गङ्गाप्रवाहेणेति शेषः । तथैव भारते प्रतिपादनात् ॥ २७ ॥

२९] ति० टी०–तत्रेति । अङ्गदेशे ॥ २९ ॥

रा० टी०–तत्रेति । तदा आनयनकाले तत्र रोमपादस्वामिकाङ्गदेशे महात्मनि तस्मिन्विप्रे आनीयमाने एव जगत्प्रह्लादयन्नानन्दयन्नेव देवः सहसा त्वरितं ववर्ष तुचशब्दौ एवार्थौ ॥ २८ ॥

गो० टी०–तत्रेति । तत्र अङ्गदेश इत्यर्थः ॥ २८ ॥

३०] ति० टी०–वर्षेणेति । वर्षेण सहैव विषयं स्वदेशमागतं विप्रं प्रत्युद्गम्य प्रह्वोऽञ्जल्यादिपूर्वं नम्रः । जात इति शेषः । शिरसा महीं गतश्च । साष्टाङ्गनमस्कारं च कृतवानित्यर्थः ॥ ३० ॥

रा० टी०–वर्षेणेति। स प्रसिद्धो नराधिपो रोमपादः वर्षेण दृष्ट्या सहैव विषयं स्वदेशमागतं मुनिं विप्रं प्रत्युद्गम्य प्रत्युद्गमनं कृत्वा प्रह्वः नतिं कुर्वन्नेव शिरसा महींगतः प्राप्तः साष्टाङ्गं प्रणामं कृतवानित्यर्थः चशब्दएवार्थे ॥ २९ ॥

गो० टी०–हर्षेणेति । स्वं विषयं स्वदेशं प्रह्वः विनीतः २९

३१] ति० टी०–अर्घ्यं चेति । अर्घ्यादिपूजिताद्विप्रेन्द्रादृष्यशृङ्गात्प्रसादं मयि सापराधेऽपि भवान्नित्यप्रसन्नोऽस्त्वित्येवं सौम्यरूपं वत्रे । किमर्थमित्यत आह–मेति । अतिजुगुप्सितं गणिकाभिः स्वानयनं व्यवहारकाले ज्ञात्वा तं विप्रमृष्यशृङ्गं तत्पितरं विभाण्डकं च मन्युः क्रोध आविशेत् स मा प्रविशत्वित्यर्थमिति भावः ॥ ३१ ॥

रा० टी०–अर्घ्यमिति । सुसमाहितः एकाग्रचित्तो राजा अर्घ्यं पूजार्थमुदकं तस्मै ऋष्यशृङ्गाय न्यायतो यथाविधि प्रददौ विप्रं ऋष्यशृङ्गं तत्पितरं च मन्युः प्रलोभ्यानयनजनितः पुत्रवियोगजनितश्च कोपः मा आविशेत् इति हेतोः विप्रेन्द्रात् प्रसादं स्वापराधक्षमापनपूर्वकतत्प्रसन्नतां वत्रे ययाचे चशब्दो हेत्वर्थे विप्रमन्युशब्दौ विनिगमनाविरहेणार्थद्वयबोधकौ ॥३०॥

गो० टी०–अर्घ्यं चेति । अर्घः पूजा तदर्थमुदकमर्घ्यं "पादार्घाभ्यां च" इति यत्प्रत्ययः न्यायतः शास्त्रक्रमेण विप्रेन्द्रादृष्यशृङ्गात्प्रसादं गणिकाभिः प्रलोभ्यानयनकृतकोपनिवृत्तिवत्रे । कथं वत्रे विप्रं त्वां मन्युः कोपो मा विशेदिति मा विशत्वित्यर्थः । लकारव्यत्ययः । यद्वा विप्रं विभण्डकं मन्युः पुत्रविश्लेषणकृतः कोपः मा विशेदिति एवं प्रसादनादेव विभण्डको न चुकोप पुत्रप्रसादवरणादेव पिता त्रिलोकज्ञस्तुष्यतीति पूर्वमेव मंत्रिभिर्निर्णीतं चेति बोध्यम् । कथमन्यथा उपायं चिन्तयन्तः प्राज्ञाः अपायमपि न चिन्तयेयुः ॥.३०॥

३२] ति० टी०–अन्तरिति । प्रसन्नत्वादेव तदनुज्ञयान्तःपुरं प्रवेश्य हर्षं वृष्टिजमृषिसंबन्धजं च ॥ ३२ ॥

रा० टी०–अन्त इति । स राजा अन्तःपुरं प्रविश्य ऋषिणा सह अन्तःपुरं गत्वेत्यर्थः। अस्मै ऋष्यशृङ्गाय शान्तां तन्नामिकां कन्यां शान्तेन मनसा दत्त्वा आहर्षं दृष्टिजनितऋषिसंबन्धजनितत्वेन प्रवृद्धप्रमोदमवाप ॥ ३१ ॥

गो० टी०–अन्तःपुरमिति । प्रविश्य तेन सहेति सिद्धम्। शान्तेन निर्दुःखेन मनसोपलक्षितः प्रसादकार्योपदर्शनात् प्रसन्नत्वं सिद्धम् ॥ ३१ ॥

३३] ति० टी०–एवमिति । ननु गणिकास्पर्शतत्स्पृष्टफलभक्षणादिभिरस्य तपोहानौ कथं तद्गमनमात्रेण दृष्टिः न च स्त्रीत्वाद्यज्ञानात्र तपोहानिः ईषद्दोषस्तु तपसैव दग्ध इति वाच्यम् । निर्मलब्रह्मचर्येण विदितनिखिलवेदशास्त्रतत्त्वस्य शास्त्रतः स्त्रीस्वरूपज्ञानस्य ब्रह्मचर्ये तत्परिहारज्ञानस्य च दुर्निवारत्वात्, वने वनचरस्त्रीणामनुभवाच्च । सर्वथाज्ञत्वेऽनुग्रहशक्त्यभावापत्तेश्चेति चेन्न । निर्मलब्रह्मचर्येण ब्रह्मज्ञतया सर्वत्र ब्रह्मदृष्ट्या च दोषलेशस्याप्यस्पर्शात्। प्रारब्धवशात्क्षत्रियस्त्रीसंबन्धं भाविनं तद्वारकं जानन्नेव गणिकाभिस्तथा व्यवजहे तासां भयानुत्पत्तये अत एव 'न तेन' इति नवमश्लोके तथा व्यवहियत इति शेषः पूरितोऽस्माभिः प्राक् । एतत्सर्वं जानन्पितापि तमनुयाय न शशाक । राजानमित्येवात्र तत्त्वम् । अनेन तत्त्वज्ञस्य सर्वदोषासंबन्धो ध्वनितः । ब्रह्मज्ञे दानसंकल्पमात्रेण फलसिद्धिरित्यादि च सूचितम् । यत्तु क्वचिद्विभाण्डकस्य पुत्रान्वेषणं क्रोधेन ततो मार्गे ऋष्यशृङ्गाय शान्तादानादिवृत्तान्तलाभेन पुनराश्रमं परावृत्यागमनवर्णनं तदपि तत्त्वज्ञत्व एवोपपद्यते। अन्यथा स्वपु-

१ तदेति गो. रा. पाठः । २ हर्षेणेति गो. पाठः । ३ विषयमिति गो. रा. पाठः । ४ विशदिति गो. पाठः । ५ प्रविश्येति गो. रा. पाठः । ६ ऋश्येति गो. पाठः ।

एकादशः सर्गः ।

सनत्कुमारोक्तकथाया एव वर्णनम् ।

भूय एव हि राजेन्द्र शृणु मे वचनं हितम् । यथा स देवप्रवरः कथयामास बुद्धिमान् ॥ १ ॥
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः । नाम्ना दशरथो राजा श्रीमान्सत्यप्रतिश्रवः॥ २ ॥
अङ्गराजेन सख्यं च तस्य राज्ञो भविष्यति । कन्या चास्य महाभागा शान्ता नाम भविष्यति॥ ३ ॥
पुत्रस्त्वङ्गस्य राज्ञस्तु रोमपाद इति श्रुतः । तं स राजा दशरथो गमिष्यति महायशाः ॥ ४ ॥
अनपत्योऽस्मि धर्मात्मन्शान्ताभर्ता मम क्रतुम् । आहरेत त्वयाज्ञप्तः संतानार्थं कुलस्य च ॥ ५ ॥

त्रस्य गणिकाद्वारकत्रह्मचर्यविलोपकृतो रोषोऽस्य तस्य केनाप्युपायेन वारयितुमशक्य इत्यलम् ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीये आदिकाव्ये बालकाण्डे दशमः सर्गः ॥ १० ॥

रा० टी०–एवमिति । एवमुक्तप्रकारेण सर्वकामैः सर्वैरिच्छाविषयीभूतपदार्थैस्तु पूजितः अत्यन्तं सत्कृतः महातेजाः परमतेजस्वी ऋष्यशृङ्गः शान्तया भार्यया सह तत्र रोमपादपुरे संन्यवसत् । सुखपूर्वकं निवासं चकारेत्यर्थः । अत्र महातेजा इत्युक्त्या ऋषेः गणिकास्पर्शजन्यदोषासंसर्गत्वं ध्वनितम् । तेन रामोपासनायाः प्रभावातिशयः सूचितः । अत्रार्थे ' यथा विधिनिषेधौ हि युक्तं नैवोपसर्पतः। तथा न स्पर्शतो रामोपासकं विधिपूर्वकम् ' इत्यादिवचनं सानुकूलम् ॥ ३२ ॥

इतिश्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०–एवमिति । एवं सर्वकामैः सुपूजितः तत्र रोमपादान्तःपुरे ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने दशमः सर्गः॥ १० ॥

१] ति० टी०–एवं सनत्कुमारोक्तकथां तत्प्रसङ्गे ऋष्यशृङ्गानयनकथां च सांप्रतिकीमुक्त्वा तदानयनार्थं महाराजेनैव गन्तव्यमिति बोधयितुमनेकयुगवृद्धः सुमन्त्रः पुनरपि तदर्थगर्भां सनत्कुमारोक्तां कथामाह–**भूय एवेति**। देवप्रवरः सनत्कुमारः। यथेति यदित्यर्थे ॥ १ ॥

रा० टी०–ऋष्यशृङ्गो भवद्भिरवश्यमानेतव्य इति बोधयितु सुमन्त्रः स्वपूर्वश्रुतमाह–**भूय इत्यादिभिः** । हे राजेन्द्र देवप्रवरः देवश्रेष्ठः स सनत्कुमारः कथायां नानेतिहासवर्णनावसरे एव हितं हितकारकं वचनं यथा येन प्रकारेणाब्रवीत् एवं तेन प्रकारेणैव मे मत्तः शृणु ॥ १ ॥

गो० टी०–एवं दशरथप्रश्नस्योत्तरमुक्त्वा कथाशेषं सुमन्त्रः ग्रस्तौति–**भूय इत्यादि**। देवप्रवरः सनत्कुमारः कथायां कथाप्रसङ्गे एवं वक्ष्यमाणरीत्या यथा उक्तवान् तथा शृणु ॥ १ ॥

२] ति० टी०–सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ २ ॥

रा० टी०–वचनस्वरूपमाह–इक्ष्वाकूणामिति । सुधार्मिकः परमधर्माचरणशीलः इक्ष्वाकूणां कुले जातः प्रकटितश्रीमान्सर्वसंपत्तिविशिष्टः सत्यप्रतिश्रवाः सत्यप्रतिज्ञः राजाः महाराजाधिराजो नाम्ना दशरथः दशरथनामा भविष्यति ॥२॥

गो० टी०–इक्ष्वाकूणामिति । धार्मिको भविष्यतीत्यन्वयः । सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ २ ॥

३] ति० टी०–अङ्गेति । अङ्गराजो रोमपादः । तस्य दशरथस्य । अस्य रोमपादस्य ॥ ३ ॥

रा० टी०–अङ्गेति । तस्य प्रसिद्धस्य राज्ञो दशरथस्य रोमपादेन साकं सख्यं भविष्यति अङ्गं स्वपितरं राजयति तद्वत् राजते वा तेन अङ्गराजेन अस्य राज्ञो दशरथस्य शान्तानाम कन्या भविष्यति चकारेण कन्याद्वारा वंशप्ररोहणाय दशरथदत्तशान्ता कन्यात्वेन रोमपादेन गृहीता इति तस्यापि कन्या शान्ता भविष्यति । चकारान्तरं सहार्थे। यत्तु अस्येत्यनेनाङ्गराजपरामर्शः तत्सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वमिति नियमविरोधात् प्रत्यासत्तिन्यायविरोधाच्च 'रोमपाद इति ख्यातस्तस्मै दशरथः सखा । शान्तां स्वकन्यां प्रायच्छद् ऋष्यशृङ्ग उवाह ताम् ' इति भागवतविरोधाच्च हेयम् ॥ ३ ॥

गो० टी०–अङ्गेति । अस्य अङ्गराजस्य ॥ ३ ॥

४] ति० टी०–कोऽसावङ्गराज इत्यत्राह–**पुत्र इति**। अङ्गस्याङ्गनामकस्य । तं रोमपादं गमिष्यति । ऋष्यशृङ्गानयनार्थमिति शेषः । तमित्यस्य प्रतीति शेषः ॥ ४ ॥

रा० टी०–रोमपादः कस्य वंश इत्याकाङ्क्षायामाह–**पुत्र इति** । अङ्गस्य अङ्गसंज्ञस्य राज्ञः पुत्रः रोमपाद इति श्रुतः ख्यातः। महायशाः दशरथः तं अङ्गराजं रोमपादं गमिष्यत्येव। तेन अङ्गराजेन पूजितश्च भविष्यति । एकस्तुशब्दः एवार्थः॥४॥

गो० टी०–पुत्र इति । अङ्गस्य राज्ञः अङ्गराजस्य ॥४ ॥

५] ति० टी०–गमनप्रयोजनमाह–**अनपत्य इति** । आहरेत निर्वहेत् । चकारेण धर्मार्थं च ॥ ५ ॥

रा० टी०–तत्रागतदशरथोक्तिमाह–**अनपत्य इति** । हे धर्मात्मन् अनपत्यः अप्रादुर्भूतस्वनित्यपुत्रकः अहमस्मि अतः कुलस्य मम वंशस्य सन्तानार्थं प्रवृद्ध्यर्थं त्वया आज्ञप्तः त्वदाज्ञां प्राप्तः शान्ताभर्ता शान्तापतिः ऋष्यशृङ्गः मम क्रतुं मदीप्सितयागमाहरेत् कारयेत् । चो हतौ ॥ ५ ॥

---

१ कथायामेवमब्रवीदिति गो. रा. पाठः । २ राजा दशरथो नामेति गो. पाठः । ३ अंगराजमिति गो. पाठः ।

RESEARCH INSTITUTE

श्रुत्वा राज्ञोऽथ तद्वाक्यं मनसा च विचिन्त्य च । प्रदास्यते पुत्रवन्तं शान्ताभर्तारमात्मवान् ॥ ६ ॥
प्रतिगृह्य च तं विप्रं स राजा विगतज्वरः । आहरिष्यति तं यज्ञं प्रहृष्टेनान्तरात्मना ॥ ७ ॥
तं च राजा दशरथो यशस्कामः कृताञ्जलिः । ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ॥ ८ ॥
यज्ञार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः । लभते च स तं कामं द्विजमुख्यांद्विशांपतिः ॥ ९ ॥
पुत्राश्चास्य भविष्यन्ति चत्वारोऽमितविक्रमाः । वंशप्रतिष्ठानकराः सर्वभूतेषु विश्रुताः ॥ १० ॥
एवं स देवप्रवरः पूर्वं कथितवान्कथाम् । सनत्कुमारो भगवान्पुरा देवयुगे प्रभुः ॥ ११ ॥

गो० टी०–अनपत्य इति । अहमनपत्योऽस्मि तस्मान्मम कुलस्य सन्तानार्थमविच्छेदार्थं शान्ताभर्ता क्रतुमाहरेत अनुतिष्ठतु इति वक्ष्यतीति शेषः ॥ ५ ॥

६] ति० टी०–श्रुत्वेति । अस्य राज्ञो दशरथस्यैतद्वाक्यं श्रुत्वा मनसा च तस्यावश्यकर्तव्यतां विचिन्त्य निश्चित्य पुत्रवन्तं शान्ताभर्तारं प्रदास्यत इत्यन्वयः । पुत्रवन्तमित्यनेन 'जातपुत्रः कृष्णकेशोऽग्रीनादधीत' इति विधियुक्तमग्न्याधानादिकारित्वं सूचितम् । तेनाहिताग्नित्वेनार्त्विज्याधिकारस्तस्योक्तः । शान्तासहितं भर्तारमित्यर्थकेन शान्ताभर्तारमित्यनेन शान्तासाहित्यमपि सूचितम् ॥ ६ ॥

रा० टी०–श्रुत्वेति । राज्ञः दशरथस्य अथ मङ्गलस्वरूपं तत्प्रसिद्धं वाक्यं श्रुत्वा मनसा विचिन्त्य युक्तमेव याचते इति विचार्य चकारेण अतो दास्यामीति निश्चित्य पुत्रवन्तं जातपुत्रकम् । किञ्च पुत्रो दशरथनित्यसुतो रामः तद्वन्तं तत्परायणमित्यर्थः । शान्ताभर्तारमात्मवान् परमबुद्धिमान् प्रदास्यते । पुत्रवन्तमित्यनेन 'जातपुत्रः कृष्णकेशोऽग्रीनादधीत' इति विधिबोधिताधिकारवत्ता सूचिता । रामपरायणमित्यनेन तत्प्राकल्यस्यावश्यम्भावित्वं ध्वनितम् । शान्ताभर्तारमित्यनेन दाने तत्साहित्यं सूचितम् ॥ ६ ॥

गो० टी०–श्रुत्वेति । स रोमपादः मनसा विचिन्त्य ननु मन्त्रिभिः। पुत्रवन्तं पुत्रप्रदानसमर्थं पुत्रयुक्तं वा ॥ ६ ॥

७] ति० टी०–तं यज्ञं पुत्रकामेष्टिरूपम् ॥ ७ ॥

रा० टी०–प्रतीति । तं रोमपादसमर्पितं विप्रं प्रतिगृह्यैव विगतज्वरः एतद्मनेनावश्यं पुत्रप्राकट्यं भवितेति निश्चयेन विगतो निवृत्तः ज्वरः पुत्रवियोगजनितसन्तापो यस्य स प्रसिद्धो राजा दशरथः प्रहृष्टेन हर्षविशिष्टेन अन्तरात्मना मनसा तमीप्सितं यज्ञमाहरिष्यति ऋषिणा साधयिष्यति । चशब्द एवार्थे ॥ ७ ॥

गो टी०–प्रतिगृह्येति । आहरिष्यति करिष्यतीत्यर्थः । अन्तरात्मना मनसा उपलक्षितः ॥ ७ ॥

८] ति० टी०–वरयिष्यति वरणं करिष्यति । तत्करोतीति णिच् ॥ ८ ॥

रा० टी०–तमिति । यशस्कामः ईश्वरोस्य पुत्रोस्ति इति इह लोकेपि प्रख्यात्यभिलाषी अत एव कृताञ्जलिः बद्धयुगलकरः जनेश्वरः जननियन्ता धर्मवित्सकलधर्मस्य वेदिता राजा दशरथः तं शान्तापतिं द्विजश्रेष्ठमृष्यशृङ्गं यज्ञार्थं पुत्रेष्टिनिर्वृत्यर्थं प्रसवार्थमिष्टिफलीभूतस्वनित्यपुत्रप्राकट्यार्थं स्वर्गार्थं रावणोपद्रुतस्वर्गादिस्वास्थ्यार्थं च वरयिष्यति ऋत्विकूत्वेन स्वीकरिष्यति। तात्स्थ्यात्ताच्छब्द्यम् । चशब्दो हेत्वर्थे । सार्द्धश्लोक एकान्वयी ॥ ८ ॥

गो० टी०–तस्मिन् यज्ञे तमेव ऋत्विजं करिष्यतीत्याह–तं चेति । श्लोकद्वयमेकवाक्यम्। यष्टुं कामो यस्य स यष्टुकामः " लुप्येवदृश्यमः कृत्ये तुंकाममनसोरपि " इति मकारलोपः । एवंभूतो राजा तं वरयिष्यति वरो वरणं तत्करोतीति णिच् । अल्लोपस्य स्थानिवत्वाद्वृद्धयभावः ॥ ८ ॥

९] ति० टी०–वरणविषयमाह–यज्ञेति । यज्ञः प्रसवकारणम् । प्रसवः स्वर्गकारणमिति बोध्यम् । लभते लप्स्यते । तं कामं प्रार्थितं काम्ययज्ञम् ॥ ९ ॥

रा० टी०–लभत इति । स प्रसिद्धः विशांपतिः राजा दशरथः विप्रमुख्याद् ऋष्यशृङ्गात्तं स्वेप्सितं कामं लभते च प्राप्स्यत्येव । चशब्द एवार्थे ॥ ९ ॥

गो० टी०–किमर्थं यज्ञार्थं पुत्रकामेष्ट्यर्थं तद्वारा प्रसवार्थं पुत्रार्थं तद्वारा स्वर्गार्थं " नापुत्रस्य लोकोऽस्ति " इतिश्रुतेः । कामं काम्यकृतुम् ॥ ९ ॥

१०] ति० टी०–पुत्रा इति । वंशप्रतिष्ठानं वंशाविच्छेदस्तत्करोः ॥ १० ॥

रा० टी०–ईप्सितं प्रकटयन्नाह–पुत्रा इति । अस्य महाराजाधिराजदशरथस्य अमितविक्रमाः अप्रमेयपराक्रमाः अत एव वंशप्रतिष्ठानकराः मनुवंशप्रतिष्ठासंपादकाः अत एव सर्वलोकेषु विश्रुताः ख्याताः चत्वारः पुत्रा भविष्यन्त्येव ॥ १० ॥

गो० टी०–पुत्राश्चेति।अमितविक्रमाः अपरिछिन्नपराक्रमाः

११] ति० टी०–एवमिति । पूर्वं पूर्वस्मिन्काले । कस्मिन्पूर्वकाले तत्राह–पुरा देवयुगे । एतच्चतुर्युगीप्राक्तनचतुर्युग्यावे। सत्ययुग इत्यर्थः ॥ ११ ॥

रा० टी०–एवमिति । हे देव ! देवप्रवरः देवश्रेष्ठः भगवान् सकलविद्याविज्ञाता प्रभुः तत्त्वबोधनसमर्थः सः प्रसिद्धः सनत्कुमारः पुरायुगे सत्ययुगे पूर्वं युगप्रारम्भे एवमनेन प्रकारेण कथामुक्तवान् ॥ ११ ॥

---

१ मनसा स इति गो.पाठः ।२ यष्टुकाम इति गो. पाठः । ३ जनेश्वर इति गो.पाठः । ४ विप्रमुख्यादिति गो.रा. पाठः । ५ सर्वलोकेष्विति गा. पाठः

स त्वं पुरुषशार्दूल समानय[1] सुसत्कृतम् । स्वयमेव[2] महाराज गत्वा सबलवाहनः ॥ १२ ॥
सुमन्त्रस्य[3] वचः श्रुत्वा हृष्टो दशरथोऽभवत् । अनुमान्य वसिष्ठं च सूतवाक्यं निशाम्य च ॥ १३ ॥
[वसिष्ठेनाभ्यनुज्ञातो राजा संपूर्णमानसः ।]
सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः । वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ १४ ॥
अभिचक्राम तं देशं यत्र वै मुनिपुंगवः । आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगम् ॥ १५ ॥
ऋषिपुत्रं ददर्शाथो[4] दीप्यमानमिवानलम्[5] । ततो राजा यथायोग्यं पूजां चक्रे विशेषतः ॥ १६ ॥
सखित्वात्तस्य वै राज्ञः प्रहृष्टेनान्तरात्मना । रोमपादेन चाख्यातमृषिपुत्राय धीमते ॥ १७ ॥

गो० टी०–एवमिति । पूर्वं पूर्वकाले विभक्तिप्रतिरूपकमव्ययं पुरा पुराणः देवयुगे कृतयुगे यद्वा हे देव पुरा युगे कृतयुग इत्यर्थः ॥ ११ ॥

१२] ति० टी०–एतत्कथाकथनस्य विवक्षितमर्थमाह–स इति । स्वयमेवेति । न तु पुरोहितादिद्वारा ॥ १२ ॥

रा० टी०–स त्वमिति । हे पुरुषशार्दूल पुरुषसिंह राजेन्द्र सबलवाहनः राजपरिकरसहितः सः प्रसिद्धस्त्वं स्वयमेव गत्वा सुसत्कृतं तम् ऋष्यशृङ्गमानयैव । चशब्द एवार्थे ॥ १२ ॥

गो० टी०–स इति । स त्वं पुत्रार्थी त्वं सुसत्कृतं सुसत्कारार्हं स्वयमेव ननु पुरोहितादिद्वारा ॥ १२ ॥

१३] ति० टी०–अनुमान्य कृतानुमतिकं कृत्वा । अन्यथा मयि पुरोहिते स्थिते यज्ञार्थं कथमन्यानयनमिति तस्य क्रोधः स्यात् । अनुमतौ हेतुः सूतवाक्यं निशाम्येति । श्रावयित्वेत्यर्थः ॥ १३ ॥

रा० टी०–अन्विति । सान्तःपुरः अन्तःपुरसहितः सहामात्यः अमात्यसहितः दशरथः सूतवाक्यं निशम्य श्रुत्वा वसिष्ठमनुमान्य च वसिष्ठसंमतिं लब्ध्वा चेत्यर्थः । यत्र यस्मिन्पुरे स द्विजः ऋष्यशृङ्गः तत्रैव प्रययौ एकश्चकार एवार्थे । सान्तःपुर इत्युक्त्या औत्सुक्याधिक्यं सूचितम् । वसिष्ठमनुमान्येत्यनेन राज्ञो मर्यादापालकत्वं व्यक्तम् । वसिष्ठस्य संमतिदानेन त्रिकालज्ञत्वं व्यक्तम् ॥ १३ ॥

गो० टी०–अनुमान्येति । अनुमान्य कृतानुमतिकं कृत्वा अन्यथा मयि स्थिते कथमयमन्यमाह्वयतीति वसिष्ठः कुप्येत् अतः सुमन्त्रोक्तकथोक्तिपूर्वकमनुमान्येत्यर्थः । अनुमान्य वसिष्ठं च सूतवाक्यं निशम्य चेति वचनभंग्या पुनर्वसिष्ठसन्निधौ सा कथा प्रस्तावितेति सुमन्त्रमुखेनैवेति गम्यते । अतो वसिष्ठेनानुमतिः कृतेति मन्तव्यं सान्तःपुरतया गमनं जामातृपलालनरीत्या शान्तया सहानयनार्थं । यत्र रोमपादनगरे ॥ १३ ॥

१४] ति० टी०–यत्र रोमपादराष्ट्रे ॥ १४ ॥

रा० टी०–वनानीति । वनानि सरितश्च शनैःशनैः व्यतिक्रम्य पारं प्राप्य यत्र मुनिपुङ्गवः ऋष्यशृङ्गोस्ति तं देशमभिचक्राम । वैशब्दः यथायोग्यावान्तरदेशनिवाससूचकः ॥ १४ ॥

गो० टी०–वनानीति । वनादिविलोकनकुतुकित्वं शनैः शनैरित्यनेन द्योत्यते ॥ १४ ॥

१५–१७] ति० टी०–अभिचक्राम जगाम । तं देशमासाद्य प्राप्य । अथो अनन्तरम् । रोमपादसमीपे द्विजश्रेष्ठं ऋषिपुत्रं ददर्श । ततस्तदागमनानन्तरं राजा रोमपादस्तस्य राज्ञो दशरथस्य यथान्यायं यथाविधि विशेषतः अत्यादरेण पूजां चक्र इत्यन्वयः । आदरे हेतुः सखित्वम् ॥ १५–१७ ॥

रा० टी०–आसाद्येति । तमृष्यधिष्ठितदेशमासाद्य प्राप्य रोमपादसमीपगमनलमिव दीप्यमानं द्विजश्रेष्ठमृषिपुत्रमादौ रोमपाददर्शनात्पूर्वं ददर्श । ददर्शाथो इति भट्टसम्मतः पाठः । आदौ ऋषिपुत्रं ददर्शेत्यनेन तदर्शनानन्तरं रोमपादं ददर्शेति ध्वनितम् । तेन तस्य तेजोधिकत्वं व्यक्तम् ॥ १५ ॥

गो० टी०–आसाद्येति । तं देशमासाद्य तमृषिपुत्रमादौ रोमपाददर्शनात्पूर्वं ददर्श । तस्मिन् भक्त्यतिशयद्योतनार्थम् १५

रा० टी०–तत इति । ततः तदर्शनानन्तरं राजा रोमपादः सखित्वात्सखित्वरूपहेतोः प्रहृष्टेन अतिहर्ष प्राप्तेन अन्तरात्मना मनसा तस्य प्रसिद्धस्य राज्ञो दशरथस्य वैशब्देन तदन्तःपुरादिपरिकरस्य यथान्यायं यथाक्रमं विशेषतः पूजां चक्रे १६

गो० टी०–तत इति । राजा रोमपादः राज्ञो दशरथस्य १६

रा० टी०–रोमपादेनेति । धीमते परमबुद्धिविशिष्टाय ऋषिपुत्राय ऋषिपुत्रं बोधयितुं सख्यम् आत्मदशरथमैत्रीं संबन्धकं शान्ताजनकत्वेन तच्छ्वशुरत्वं च रोमपादेन आख्यातं वर्णितम् । चकारेण पुत्रीकरणार्थमनपत्याय याचते मह्यं दशरथेन स्वपुत्री शान्ता दत्तेत्यपि वर्णितम् तदा तस्मिन्काले एव तं दशरथं प्रत्यपूजयत् । ऋष्यशृङ्ग इति शेषः । ऋषिपुत्रायेत्यत्र चतुर्थी "क्रियार्थोपपदस्य०" इति सूत्रविहिता । 'अनेन मेऽनपत्याय दत्तेयं वरवर्णिनी । याचते पुत्रतुल्यैषा शान्ता प्रियतरात्मजा । सोयं ते श्वशुरो ब्रह्मन् यथैवाहं तथा नृप' इति पौराणिकी गाथा ॥ १७ ॥

गो० टी०–रोमपादेनेति । संबन्धकं शान्तायां जनकपितृत्वरूपं संबन्धं प्रत्यपूजयत् ऋष्यशृङ्ग इति शेषः ॥ १७ ॥

१ तमानयेति गो. रा. पाठः । २ स्वयमेव च राजेन्द्रेति गो. पाठः । ३ इदमर्धं गो. रा. पुस्तकयोर्नदृश्यते । ४ एतदर्धं गो. पुस्तकेऽधिकं दृश्यते । ५ ददर्शादाविति गो. रा. पाठः ।

सख्यं संबन्धकं चैव तदा तं प्रत्यपूजयत् । एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ॥ १८ ॥
सप्ताष्टदिवसान्राजा राजानमिदमब्रवीत् । शान्ता तव सुता राजन्सह भर्त्रा विशांपते ॥ १९ ॥
मदीयं नगरं यातु कार्यं हि महदुद्यतम् । तथेति राजा संश्रुत्य गमनं तस्य धीमतः ॥ २० ॥
उवाच वचनं विप्रं गच्छ त्वं सह भार्यया । ऋषिपुत्रः प्रतिश्रुत्य तथेत्याह नृपं तदा ॥ २१ ॥
स नृपेणाभ्यनुज्ञातः प्रययौ सह भार्यया । तावन्योन्याञ्जलिं कृत्वा स्नेहात्संश्लिष्य चोरसा २२॥
ननन्दतुर्दशरथो रोमपादश्च वीर्यवान् । ततः सुहृदमापृच्छ्य प्रस्थितो रघुनन्दनः ॥ २३ ॥
पौरेषु[1] प्रेषयामास दूतान्वै शीघ्रगामिनः । क्रियतां नगरं सर्वं क्षिप्रमेव स्वलंकृतम् ॥ २४ ॥
धूपितं सिक्तसंमृष्टं पताकाभिरलंकृतम् । ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतम् ॥ २५ ॥

१८-१९] ति० टी०-सख्यमिति । सख्यं स्वमैत्री संबन्धकं यौनादिसंबन्धः । ऋषिपुत्राय रोमपादेनाख्यातं कथितम् । तदा तच्छ्रवणानन्तरकाले तं दशरथं प्रत्यपूजयत् ऋष्यशृङ्गः इति शेषः । तेन सह रोमपादेन सह संबन्धश्चायं तादृशो येन दशरथस्यापि जामातृत्वव्यवहारयोग्य ऋष्यशृङ्गः एतदेवाभिप्रेत्योक्तं प्राक्तव जामातेति । क्वचिच्चैवं पठ्यतेऽपि-' अनेन मेऽनपत्याय दत्तेयं वरवर्णिनी । याचते पुत्रतुल्यैषा शान्ता प्रियतरात्मजा ॥ सोऽयं ते श्वशुरो ब्रह्मन्यथैवाहं तथा नृपः ' इति । अत्र याचत इति चतुर्थ्यन्तम् अत एव प्राक्सान्तःपुरस्याङ्गदेशे गमनमुक्तम् कन्यालेहाद्धि तासां गमनमिति भाति ॥१८-१९॥

रा० टी०-एवमिति । एवमनेन प्रकारेण सुसत्कृतः सत्कारं प्राप्तः नरर्षभः राजा दशरथः तेन रोमपादेन सह सप्ताष्टदिवसान् पञ्चदशदिनानि उषित्वा राजानं रोमपादमिदं वक्ष्यमाणं वचः अब्रवीत् सप्ताष्टदिवसानित्यत्र द्वितीया "कालाध्वनोः०" इति सूत्रविहिता ॥ १८ ॥

गो० टी०-एवमिति । तेन रोमपादेन । सप्ताष्टेतिलोकवचनपरिपाटी सङ्ख्यानियमोपेक्षाकृता ॥ १८ ॥

रा० टी०-तद्वचनमेवाह-शान्तेति । हे राजन् ! मद्भिषयकानुरागविशिष्ट विशाम्पते प्रजाधीश भर्त्रा स्वामिना सह तव सुता शान्ता मदीयं नगरं यातु प्राप्नोतु उद्यतम् उत् उत्कृष्टः यतः प्रयत्नो यस्मिंस्तन्महत् उत्कृष्टं यागरूपं वस्तु कार्यम् । अनेन निष्पाद्यं हि अस्ति ॥ १९ ॥

गो० टी०-शान्तेति । उद्यतमुद्युक्तम् ॥ १९ ॥

२०] ति० टी०-उद्यतमुपक्रान्तम् । संश्रुत्य प्रतिज्ञाय२०

रा० टी०-तथेति । राजा रोमपादः धीमतः तस्य ऋष्यश्रृङ्गस्य गमनं तथेति संश्रुत्य अयमवश्यं यास्यतीति प्रतिज्ञाय त्वं सह भार्यया गच्छेति वचनं विप्रमुवाच ॥ २० ॥

गो० टी०-तथेति । तस्य ऋष्यश्रृङ्गस्य गमनं संश्रुत्य प्रतिज्ञाय ॥ २० ॥

२१] ति० टी०-प्रतिश्रुत्याकर्ण्य ॥ २१ ॥

रा० टी०-ऋषीति । ऋषिपुत्रः ऋष्यश्रृंगः तदा तस्मिन्काले प्रतिश्रुत्य रोमपादोक्तिमाकर्ण्य नृपं रोमपादं तथा इत्याह । अत एव नृपेणाभ्यनुज्ञातः स ऋषिपुत्रः भार्यया सह प्रययौ ॥ २१ ॥

गो० टी०-ऋषीति।प्रतिश्रुत्य आकर्ण्य नृपं रोमपादम् २२

२२] ति० टी०-स ऋष्यशृङ्गः । तौ रोमपाददशरथौ२२

रा० टी०-ताविति । वीर्यवान् दशरथो रोमपादश्च तौ प्रसिद्धौ द्वौ स्नेहात्प्रेमाधिक्यात् अन्योन्याञ्जलिं कृत्वा परस्परं करेण करं गृहीत्वा उरसा संश्लिष्य च ननन्दतुः परमानन्दं प्रापतुः ॥ २२ ॥

गो० टी०-ताविति । अन्योन्यमञ्जलिमेत्यर्थः ॥ २२ ॥

२३-२४] ति० टी०-सुहृदं रोमपादम् ॥ २३ ॥ २४ ॥

रा० टी०-तत इति । ततः प्रमोदप्राप्त्यनन्तरं सुहृदं रोमपादमापृच्छ्य तदनुमतिं संगृह्य प्रस्थितः कृतगमनारम्भः रघुनन्दनो रघुवंशवर्द्धनो दशरथः शीघ्रगामिन एव दूतान् पौरेभ्य अयोध्यापुरोद्भवान् बोधयितुं प्रेषयामास। वैशब्दः एवार्थे ॥२३॥

गो० टी०-तत इति । सुहृदं रोमपादम् ॥ २३ ॥

रा० टी०-दूतद्वारा यद्बोधितं तदाह-क्रियतामिति । स्वलंकृतं शोभनालङ्कारविशिष्टं धूपितं सिक्तसंमृष्टं पूर्वं सिक्तं पश्चात्संमृष्टं पूर्वकालैकेत्यनेन समासः। पताकाभिः अलंकृतं क्षिप्रं शीघ्रमेव सर्वं नगरं क्रियताम् ॥ २४ ॥

गो० टी०-क्रियतामिति । सिक्तं च संमृष्टं सिक्तसंमृष्टम् "पूर्वकालः" इत्यादिना समासः ॥ स्वलंकृतं पुष्पकदलीकाण्डादिभिः ॥ २४ ॥

२५] ति० टी०-स्वलंकृतत्वप्रकारमाह-धूपितमित्यादि । आदौ सिक्तं तोयैः पश्चात्संमृष्टम् ॥ २५ ॥

रा० टी०-तत इति । ततः दूतोक्तिश्रवणानन्तरमागतमागतप्रायं राजानं श्रुत्वा प्रहृष्टा अतिहर्षं प्राप्तास्ते पौरा यत् यदर्थं राज्ञा प्रेषितं तत्तथा तेन प्रकारेण तदैव प्रतिचक्रुः । चशब्द एवार्थे ॥ २५ ॥

गो० टी०-तत इति । आगतं आगतप्रायं राज्ञा यथाप्रेषितं तत्तथा तदा श्रवणकाल एव चक्रुः ॥ २५ ॥

१ पौरेभ्य इति गो. रा. पाठः ।

तथा चक्रुश्च तत्सर्वं राज्ञा यत्प्रेषितं तदा । ततः स्वलंकृतं राजा नगरं प्रविवेश ह ॥ २६ ॥
शङ्खदुन्दुभिनिर्घोषैः पुरस्कृत्य द्विजर्षभम् । ततः प्रमुदिताः सर्वे दृष्ट्वा वै नागरा द्विजम् ॥ २७ ॥
प्रवेश्यमानं सत्कृत्य नरेन्द्रेणेन्द्रकर्मणा । यथा दिवि सुरेन्द्रेण सहस्राक्षेण काश्यपम् ॥ २८ ॥
अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा च शास्त्रतः । कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् ॥ २९ ॥
अन्तःपुराणि सर्वाणि शान्तां दृष्ट्वा तथागताम् । सह भर्त्रा विशालाक्षीं प्रीत्यानन्दमुपागमन् ॥ ३० ॥
पूज्यमाना तु ताभिः सा राज्ञा चैव विशेषतः । उवास तत्र सुखिता कंचित्कालं सहद्विजा ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ।

पुत्रप्राप्त्यर्थमश्वमेधकरणे राज्ञोऽनुमतिः ।

ततः काले बहुतिथे कस्मिंश्चित्सुमनोहरे । वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत् ॥ १ ॥

२६] ति० टी०–प्रेषितमित्यस्योक्तत्वेत्यादिः ॥ २६ ॥

रा० टी०–तत इति । ततः अयाध्योनिकटप्राप्त्यनन्तरं राजा दशरथः स्वलंकृतं नगरं शङ्खादिघोषैः द्विजर्षभमृष्यश्रृङ्गं पुरस्कृत्य प्रविवेश । ह इति हर्षे ॥ २६ ॥

गो० टी०–तत इति । द्विजर्षभं पुरस्कृत्य शङ्खदुन्दुभिनिर्घोषैः सह प्रविवेश ॥ २६ ॥

२७] ति० टी०–द्विजमृष्यशृङ्गम् ॥ २७ ॥

रा० टी०–तत इति । ततः नगरप्रवेशानन्तरं सर्वे पौराः इन्द्रकर्मणा इन्द्रसाहाय्यकर्त्रा नरेन्द्रेण राज्ञा दशरथेन सत्कृत्य अन्तःपुरं प्रवेश्यमानं तं द्विजमृष्यश्रृङ्गं दृष्ट्वा प्रहृष्टाः आसन्निति शेषः । अन्तःपुरमिति उत्तरश्लोकादपकृष्य सम्बध्यते इन्द्रकर्मणा इत्यस्यानन्तरं यथा दिवि सुरेन्द्रेण सहस्राक्षेण काश्यपमिति श्लोकार्धं भट्टसम्मतम् ॥ २७ ॥

गो० टी०–तत इति । नागराः नगरवासिनः नरेन्द्रेण दशरथेन सत्कृत्य नगरालङ्कारादिभिः संमान्य प्रवेश्यमानं तं द्विजं दृष्ट्वा प्रमुदिताः संतुष्टा आसन् इन्द्रस्येव कर्म पराक्रमादिकं यस्य सः इन्द्रकर्मा तेन ॥ २७ ॥

२८] ति० टी०–इन्द्रकर्मणेन्द्रसहायार्थं कर्म यस्य तादृशेन राज्ञा सत्कृत्य प्रवेश्यमानं द्विजं दृष्ट्वा देवेन्द्रेण स्वनगरं प्रवेश्यमानं काश्यपं वामनं दृष्ट्वा यथा स्वर्गवासिनो मुदितास्तथात्र नागरा मुदिता इति पूर्वेणान्वयः । इन्द्रकर्मणेत्यनेन राज्ञः समग्रो महिमातिशयो ध्वनितः ॥ २८ ॥

२९] ति० टी०–उपवाहनात्स्वसमीपानयनात् ॥ २९ ॥

रा० टी०–अन्तरिति । तदा तस्मिन्काले एनमृष्यश्रृङ्गमंतःपुरं प्रवेश्य विधानतः पूजां कृत्वा तस्य ऋषेरुपवाहनात् स्वसमीपप्रापणादात्मानं कृतकृत्यं कृतार्थं मेने । राजेति शेषः २८

गो० टी०–अन्तःपुरमिति । उपवाहनात् आनयनात् २८।

३०] ति० टी०–तथागतमनमेव व्याचष्टे–सह भर्त्रेति । प्रीत्या शान्तायां प्रीत्या । बहुकालविश्लेषोत्तरं मिलितत्वाच्चानन्दातिरेकः पुरस्य ॥ ३० ॥

रा० टी०–अन्तरिति । विशालाक्षीमायतनेत्रां भर्त्रा सह तथा तेन प्रकारेण आगतां शान्तां प्रीत्या दृष्ट्वा सर्वाणि अन्तःपुराणि आनन्दमुपागमन् प्रापुः ॥ २९ ॥

गो० टी०–अन्तरिति । भर्त्रा सहागताम् अनेन पूर्वं कन्यात्वदशायामपि कदाचिदागमनं व्यज्यते ॥ २९ ॥

३१] ति० टी०–सहद्विजा सपुत्रभर्तृकेति यावत् ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकादशः सर्गः ॥ ११ ॥

रा० टी०–पूज्यमानेति । ताभिः राजपत्नीभिः राज्ञा च विशेषतः पूज्यमानैव सह द्विजा पतिसहिता अतः सुखिता परमसुखं प्राप्ता सा शान्ता तत्रान्तःपुरे कंचित्कालमुवास । सहद्विजा इत्यनेन पितृगृहे स्त्रियाः प्राधान्यं भवतीति व्यवहारः सूचितः ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकादशः सर्गः ॥ ११ ॥

गो० टी०–पूज्यमानेति । विशेषतः जनकत्वसंबन्धात् ऋत्विजा ऋष्यश्रृङ्गेण पितृगृहत्वात् शान्तायाः प्राधान्यम् ॥३०॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

१] ति० टी०–एवं निश्चितमवगतं पुत्रदातृत्वं यस्य तादृश ऋष्यशृङ्ग आनीते सकलपापक्षयकारितया पूर्वसंकल्पितत्वेन

१ प्रचक्रुरिति गो. पाठः । २ निर्घोषैरिति गो. पाठः । ३ पुरस्कृत्येति गो.रा. पाठः । ४ दृष्ट्वातामिति गो. पाठः । ५ इदमर्धं गो. रा. पुस्तकयोर्न लभ्यते । ६ विधानत इति गो. रा. पाठः । ७ अन्तःपुरस्त्रियः सर्वा इति गो. पाठः । ८ च ताभिरिति गो. पाठः । ९ सहस्त्रिजेति गो. पाठः ।

ततः प्रणम्य शिरसा तं विप्रं देववर्णिनम् । यज्ञाय वरयामास संतानार्थं कुलस्य च ॥ २ ॥
तथेति च स राजानमुवाच वसुधाधिपम् । संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥ ३ ॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् । तंतोऽब्रवीन्नृपो वाक्यं ब्राह्मणान्वेदपारगान् ॥ ४ ॥
सुमन्त्रावाहय क्षिप्रमृत्विजो ब्रह्मवादिनः । सुयज्ञं वामदेवं च जाबालिमथ काश्यपम् ॥ ५ ॥
पुरोहितं वसिष्ठं च ये चान्ये द्विजसत्तमाः । ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ ६ ॥
समानयत्स तान्सर्वान्समस्तान्वेदपारगान् । तान्पूजयित्वा धर्मात्मा राजा दशरथस्तदा ॥ ७ ॥
धर्मार्थसहितं युक्तं श्लक्ष्णं वचनमब्रवीत् । मम तातप्यमानस्य पुत्रार्थे नास्ति वै सुखम् ॥ ८ ॥

चाश्वमेधं प्रस्तौति–तत इति । बहुतिथेऽनल्पे काले । गत इति शेषः । सुमनोहरे शास्त्रोक्तदोषरहिते मनोऽभवत्प्रावर्तत ॥ १ ॥

रा० टी०–अश्वमेधोपक्रममाह—तत इत्यादिभिः । ततः ऋष्यशृङ्गस्य पुरप्राप्त्यनन्तरं बहुतिथे अल्पभिन्ने काले गते सतीति शेषः । सुमनोहरे दोषोपदृवादिराहित्येन समुचितत्वादिप्राप्तत्वेन रमणीये कस्मिंश्चिद्विलक्षणे वसन्ते समनुप्राप्ते सति राज्ञो दशरथस्य मनो यष्टुं यागं कर्तुमभवत् प्रावर्तत ॥१॥

गो० टी०–एवं दशरथः सर्वकामसमृद्धोऽपि पुत्रालाभसंतप्तस्तन्मूलानि पापानि स्वाधिकारानुरूपेणाश्वमेधेन विना न विनश्यन्तीति मन्वानः "सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति श्रुत्या 'राजा सार्वभौमोऽश्वमेधेन यजेत' इतिस्मृत्या च विहितमश्वमेधं यष्टुं संकल्प्य तदानीमुद्भूदसंस्कारेण सुमन्त्रेणोदीरितवचनाजामातृपलालनव्याजेन शान्तया सह ऋष्यशृङ्गमानीय प्राप्तकाले पूर्वं संकल्पितमश्वमेधं कर्तुं आरभतेत्याह–ततः काल इत्यादि । ततः ऋष्यशृङ्गानयनानन्तरं बहुतिथे अनल्पे काले गते संख्यासंज्ञाद्बहुशब्दात्पूरणार्थे डटि "बहुपूगगणसंघस्य तिथुक्" इति तिथुगागमः कस्मिंश्चित् मलिम्लुचत्वादिदोषरहिततया विलक्षणे सुमनोहरे पौर्णमास्याः कालत्वेनातिमनोज्ञे वसंते समनुप्राप्ते प्रारब्धे चैत्र्यां पौर्णमास्यामित्यर्थः । राज्ञो दशरथस्य यष्टुं सांग्रहणीमिष्टिं कर्तुं मनः मनोरथः अभूत् चैत्र्यां पौर्णमास्यां प्रातरश्वमेधेन यक्ष्ये इतिसंकल्प्य 'सांग्रहण्येष्ट्या यजते' इतिस्मरणात् ॥ १ ॥

२–४] ति० टी०–तत इति । देववर्णिनं देववर्चसम् । कुलस्य संतानार्थं कुलाविच्छेदरूपप्रयोजनमुद्दिश्य तेन स्वर्गार्थं च । यज्ञाय यज्ञार्थम् । विप्रमृष्यशृङ्गम् ॥ २–४ ॥

रा० टी०–तत इति । ततः यागानुकूलमनस्कत्वानन्तरं देववर्णिनं दिव्यतेजसं तं विप्रं ऋष्यशृङ्गं शिरसा प्रणम्य कुलस्य सन्तानार्थमेव यज्ञाय यज्ञं प्रवर्तयितुं वरयामास ब्रह्मत्वेन स्वीचकार चशब्द एवार्थे ॥ २ ॥

गो० टी०–अथ सांग्रहणीमिष्टिं कर्तुमृत्विग्वरणे प्राप्ते प्रथममृष्यशृङ्गं ब्रह्मत्वेन वृतवानित्याह–ततः प्रसाद्येति । देववर्णिनं देववर्चसम् ॥ २ ॥

रा० टी०–तथेति । स ऋष्यशृङ्गः वसुधाधिपं सार्वभौमं राजानं दशरथं तथा यागानुकूलमिति वक्ष्यमाणं वचः उवाच । वचनमेवाह–सम्भाराः सम्भ्रियन्तामित्यादि अर्थस्तुपूर्ववत् ॥३॥

गो० टी०–तथेति । स च ऋष्यशृङ्गश्च ॥ ३ ॥

रा० टी०–तत इति । ततः ऋष्याज्ञापनानन्तरं राजा दशरथो मन्त्रिसत्तमं सुमंत्रं वाक्यमब्रवीत् । वाक्यमेवाह–हे सुमन्त्र ! ब्रह्मवादिनो वेदज्ञान् ऋत्विजः क्षिप्रं शीघ्रमावाहय मत्समीपं प्रापय ॥ ४ ॥

गो० टी०–अथ "अपदातीनृत्विजः समावहन्त्यासुब्रह्मण्याया" इति विहितमध्वर्युप्रभृतिवरणमाह-ततो राजेत्यादिना।अस्याः श्रुतेरयमर्थः–तस्यतस्य गृहे गत्वा सोमप्रवाकवृतानध्वर्युब्रह्महोतृनाग्नीध्रं च हस्त्यश्वादिकमारोप्य राजगृहमानयन्ति राजपुरुषाः । अनन्तरायाममावास्यायां पूर्ववृता एव ते संज्ञानेष्टयर्थं पुनर्वियन्ते अथ वैशाख्यां पौर्णमास्यां प्राजापत्यपर्वपश्वर्थं पूर्ववत्सोमप्रवाकवृतौ मैत्रावरुणप्रतिप्रस्थातारौ हस्त्यादिकमारोप्यानयंति राजपुरुषाः । अनंतरायाममावास्यायां तथैव वृतमुद्गातारं हस्त्यादिभिरानयन्ति अथागामिनि वसन्ते पञ्चदश्यां हस्त्यादिभिः प्रस्तोतारमानयन्ति त्रैधातवीयार्थं यत्र दीक्षारंभस्तद्दिवसादूर्ध्वं तृतीयादिग्वहस्त्वन्वहमितरानष्टावृत्विजो हस्त्यादिकमारोप्यानयन्ति ब्राह्मणाच्छंसिनमच्छावाकं नेष्टारं प्रतिहर्तारं ग्रावस्तुतं पोतारमुन्नेतारं सुब्रह्मण्यमिति सोमार्थमेवमासुब्रह्मण्याह्वानादपदातीनृत्विज आवहन्तीति एवं क्रमेण कर्तव्यानि ऋत्विग्वरणानि कार्यकरत्वात्संग्रहेण दर्शयति–सुमन्त्रावाहयेति । आवाहय आनय क्रतौ यजन्तीति ऋत्विजः । ब्रह्मवादिनः वेदपाठकान् ॥ ४ ॥

५] ति० टी०–आवाहय मत्समीपं प्रापय ॥ ५ ॥

रा० टी०–सुयज्ञमिति । एतदारभ्य हयमेधेन कर्मणेत्येतत्पर्यन्तं श्लोकसार्द्धचतुष्टयं पूर्वमपीत्थं पठितमिति तद्व्याख्यानमेवैतद्व्याख्यानं बोध्यम् ॥ ५—९ ॥

गो० टी०–ऋत्विजः परिगणयति–सुयज्ञमिति ॥ ५ ॥

६–८] ति० टी०–तत इत्यादि व्याख्यातप्रायम् ॥६–८॥

गो० टी०–तत इति । त्वरितविक्रमः त्वरितपदन्यासः॥६॥

१ प्रसाद्येति गो. पाठः । २ कुलायचेति गो. रा. पाठः । ३ सुसत्कृत इति गो. पाठः । ४ इदमर्धं गो. पुस्तकेनास्ति । ५ ततोराजाब्रवीद्वाक्यं सुमन्त्रं मंत्रिसत्तममिति गो. रा. संमतः पाठः । ६ येचाप्यन्ये द्विजातय इति गो. पाठः । ७ समर्थानिति गो पाठः । ८ लालप्यमानस्येति गो. पाठः ।

पुत्रार्थं हयमेधेन यक्ष्यामीति मतिर्मम । तदहं यष्टुमिच्छामि हयमेधेन कर्मणा ॥ ९ ॥
ऋषिपुत्रप्रभावेण कामान्प्राप्स्यामि चाप्यहम् । ततः साध्विति तद्वाक्यं ब्राह्मणाः प्रत्यपूजयन्॥ १० ॥
वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्च्युतम् । ऋष्यशृङ्गपुरोगाश्च प्रत्यूचुर्नृपतिं तदा ॥ ११ ॥
संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् । सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ १२ ॥
सर्वथा प्राप्स्यसे पुत्रांश्चतुरोऽमितविक्रमान् । यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥ १३ ॥
ततः प्रीतोऽभवद्राजा श्रुत्वा तु द्विजभाषितम् । अमात्यानब्रवीद्राजा हर्षेणेदं शुभाक्षरम् ॥ १४ ॥
गुरूणां वचनाच्छीघ्रं संभाराः संभ्रियन्तु मे । समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् १५ ॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् । शान्तयश्चाभिवर्धन्तां यथाकल्पं यथाविधि ॥ १६ ॥
शक्यः कर्तुमयं यज्ञः सर्वेणापि महीक्षिता । नापराधो भवेत्कष्टो यत्रस्थिन्क्रतुसत्तमे ॥ १७ ॥
छिद्रं हि मृगयन्त्येते विद्वांसो ब्रह्मराक्षसाः । विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति ॥ १८ ॥
तद्यथा विधिपूर्वं मे क्रतुरेष समाप्यते । तथा विधानं क्रियतां समर्थाः करणेष्विह ॥ १९ ॥
तथेति च ततः सर्वे मन्त्रिणः प्रत्यपूजयन् । पार्थिवेन्द्रस्य तद्वाक्यं यथाज्ञप्तमकुर्वत ॥ २० ॥

गो०टी०–तानिति । धर्मार्थसहितं धर्मार्थरूपप्रयोजनयुक्तं श्लक्ष्णं मधुरम् ॥ ७ ॥

गो० टी०–ममेति । व्याख्यातम् ॥ ८ ॥

९] ति० टी०–पुत्रार्थं हयमेधेन कर्मणा तदाख्येन कर्मणा । अनुष्ठानारम्भाय च पुनरुपन्यासः ॥ ९ ॥

गो० टी०–तदिति। यष्टुमिच्छामि प्रतिबन्धकदुरितशान्त्यर्थं ऋषिपुत्रप्रभावेन ऋष्यशृङ्गकृतयज्ञप्रभावेन पश्चात्कामान् पुत्रानवाप्स्यामि च ॥ ९ ॥

१०–१२] ति० टी०–ऋषिपुत्रो ऋष्यशृङ्गः॥१०–१२॥

रा० टी०–ऋषीति । ऋषिपुत्रस्य ऋष्यशृङ्गस्य प्रभावेण रामसाक्षात्कारजनिततेजसा अहं कामान्प्राप्स्याम्येव । अपिना देवकार्यसिद्धिश्च भविष्यति चशब्द एवार्थे। तत इति। ततः राजवाक्यश्रवणानन्तरं पार्थिवस्य राज्ञः मुखाच्च्युतं तत्प्रसिद्धं वाक्यं वसिष्ठप्रमुखाः सर्वे ब्राह्मणाः साधु शोभनमिति प्रत्यपूजयन् ॥ १० ॥

गो० टी०–तत इति । ऋष्यशृङ्गस्याधागर्भत्वाद्वसिष्ठप्रमुखा इत्युक्तम् ॥ १० ॥

रा० टी०–ऋष्येति । तदा तस्मिन्काले ऋष्यशृङ्गपुरोगा ऋष्यशृङ्गप्रभृतयः नृपतिं राजानं प्रत्यूचुः। तद्वचनमेवाह–सम्भारा इत्यादिभिः ॥ ११–१३ ॥

गो० टी०–ऋष्यशृङ्गेत्यादि व्याख्यातप्रायम् ॥ ११ ॥

१३–१४] ति० टी०–धार्मिकी प्रजासंरक्षणरूपधर्मप्रयोजना ॥ १३ ॥ १४ ॥

गो० टी०–सर्वथेति । सनत्कुमारवचःश्रवणाच्चतुर इत्युक्तम् ॥ १२ ॥

गो० टी०–तत इति । क्रियाभेदान्न राजपदपुनरुक्तिः॥१३॥

रा० टी०–तत इति । द्विजभाषितं श्रुतवान् द्विजभाषितश्रवणविशिष्टो राजा प्रीतोऽभवत् । ततः प्रीतिप्राप्त्यनन्तरं राजा शुभाक्षरं मधुराक्षरविशिष्टमिदं वचनं हर्षेण अमात्यान् अब्रवीत् । व्याख्यातार्था इतःप्रभृति षट् श्लोकाः ॥१४–२०॥

१५–२१] ति० टी०–सांभ्रियन्तु संपाद्यन्ताम् । गुरूणामित्यादयो व्याख्यातप्रायाः ॥ १५–२१ ॥

गो० टी०–गुरूणामिति । संभ्रियन्तु संभ्रियन्तां आर्षं परस्मैपदं अत्र संभाराः यज्ञीयाश्वमोचनोपकरणानि " द्वादशारत्नी रशना भवति" इत्युक्त्या द्वादशारत्निपरिमिता मुञ्जाख्यतृणविशेषनिर्मिता रशना " चतुष्टय्य आपो भवन्ति"इत्यनुवाकोक्ताः आतपतिवर्ष्याः कूप्याः स्थावरा वहन्त्यश्वेति चतुर्विधा आप इत्यादीनि "समर्थैः चतुःशता रक्षन्ति" इतिश्रूयमाणैः राजपुत्रायैः अधिष्ठितः रक्षितः सोपाध्यायः उपाध्यायैश्चतुर्भिः ऋत्विग्भिः सहितः अश्वो विमुच्यतां " चत्वार ऋत्विजः समुक्षन्ति" इत्यारभ्य " शतेन राजपुत्रैः सह अध्वर्युः शतेनाराजभिरग्रैः सह ब्रह्मा शतेन सूतग्रामणीभिः सह होता शतेन क्षत्रसंग्रहीतृभिः सहोद्गाता" इतिश्रुतेः । संगृहीतं च भट्टभास्करैः'सन्नाहवन्तः क्षितिपालपुत्राःसन्नद्धसूतः शतमस्य तल्प्याः। गोपायितारः शतमेवमुग्राः सन्नाहिनस्तादृशसूनुयुक्ताः ॥ वैश्याः शतं प्रान्तचराः पथि स्युर्वरूथिनस्तैः शतमेव शद्राः' इति ॥१४॥

गो० टी०–अथ पुण्यनामदेवयजनमध्यवस्यतीत्युक्तरीत्या यागार्हपुण्यस्थलपरिग्रहं दर्शयति–सरय्वा इति । उत्तरं विविक्तमिति तत्परिग्रहः शान्तयः शान्तिकर्माणि अभिवर्द्धन्तां प्रवर्तन्तां यथाकल्पं यथाक्रमं यथाविधि यथाशास्त्रम् ॥ १६ ॥

१ तदर्थमिति गो. पाठः । २ शास्त्रदृष्टेनेति गो.पाठः । ३ प्रभावेनेति गो. पाठः । ४ ऋदयेति गो. पाठः । ५ इदमर्ध गो. पुस्तके नास्ति । ६ त्यांश्चाब्रवीदिति गो. पाठः । ७ मृगयन्तेऽत्रेति गो. पाठः । ८ विघ्नितस्येति गो. पाठः ।

ततो द्विजास्ते धर्मज्ञमस्तुवन्पार्थिवर्षभम् । अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् ॥ २१ ॥
गतानां तेषु विप्रेषु मन्त्रिणस्तान्नराधिपः । विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।

राजाज्ञयाऽन्यमाण्डलिकानां राज्ञामाह्वानम्, अश्वशालादिकरणे तदनुशासनं च ।

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् । प्रसवार्थं ततो यष्टुं हयमेधेन वीर्यवान् ॥ १ ॥
अभिवाद्य वसिष्ठं च न्यायतः प्रतिपूज्य च । अब्रवीत्प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम् ॥ २ ॥

गो० टी०–शक्य इति । कष्टः क्लेशकरः ॥ १६ ॥

गो० टी०–छिद्रमिति । छिद्रं अपराधमित्यर्थः ॥ १७ ॥

गो० टी०–तादिति । यथेति छेदः ॥ १८॥

गो० टी०–तथेति । अकुर्वत सांग्रहणेष्टिप्रभृत्यश्वोविमोचनान्तमकुर्वन्नित्यर्थः ॥ १९ ॥

रा० टी०–तत इति । धर्मज्ञं पार्थिवर्षभं राजराजं ते तत्रागताः द्विजाः ततः अतिपुण्यसम्पादकधर्माचरणादस्तुवन् प्रशंसन् ततः प्रशंसाकरणानन्तरमनुज्ञाताः राजाज्ञां प्राप्ताः सर्वे द्विजाः यथागतं पुनर्जग्मुः । स्वस्वाश्रममिति शेषः ॥ २१ ॥

गो० टी०– ततो द्विजा इति । अनुज्ञाताः तेनेतिशेषः२०

२२] ति० टी०–गतानामिति । गतेषु द्विजादिष्वित्यर्थः । सप्तम्यर्थे षष्ठी । विसर्जयित्वा । संवत्सरान्ते यागार्थमिति शेषः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्वादशः सर्गः ॥ १२ ॥

रा० टी०–गतानामिति । द्विजातीनां गतानां द्विजातिषु गतेषु सत्सु तानागतान् मन्त्रिणः विसर्जयित्वा संप्रेष्यल्यबभाव आर्षः । महामतिः नराधिपः स्वं वेश्म अन्तःपुरं प्रविवेश सप्तम्यर्थे षष्ठी ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बलकाण्डे द्वादशः सर्गः ॥ १२ ॥

गो० टी०– गतेष्विति। स्वं वेश्म अग्निगृहादन्तःपुरमित्यर्थः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

१] ति० टी०–अथ ' संवत्सरान्ते दीक्षेत ' इति सूत्रात्पूर्ववसन्तविसृष्टाश्वस्य पुनः संवत्सरान्ते वसन्ते प्राप्ते दीक्षाप्रवृत्तिरुपदिश्यते–पुनरिति । प्रसवरूपफलं हयमेधेन भावयितुम् । गतो वसिष्ठान्तिकमिति शेषः ॥ १ ॥

रा० टी०–" संवत्सरान्ते दीक्षेत् " इति सूत्रोक्तविधिना पूर्ववसन्तेश्वमेधीयोऽश्वो विसृष्ट इत्युक्तम् । पुनर्वसन्तप्राप्तौ यागप्रवृत्तिरित्याह–पुनरित्यादिभिः । यस्मिन्वसन्ते पुनः प्राप्ते सति संवत्सरः पूर्णोऽभवत् । तस्मिन्नश्वोत्सर्जनकालिकवसन्तादुत्तरकालिकवसन्ते प्राप्ते सतीत्यर्थः वीर्यवान् महापराक्रमविशिष्टः राजा दशरथः प्रसवार्थ स्वनित्यपुत्रप्राकट्यार्थ हयमेधेन यष्टुं अश्वमेधयागं कर्तु गतः वसिष्ठसमीपं प्राप्तः । तुशब्दो यस्मिन्नित्यर्थे तद्भलात्तस्मिन्नित्यध्याहियते ॥१॥

गो० टी०–एवं प्रथमवसन्ते चैत्रपौर्णमास्यां सांग्रहणेष्टिं विधाय द्वितीयेऽह्नि ब्रह्मौदनमेध्याश्वबन्धनस्नापनप्रोक्षणविमोचनादिकं चत्वार ऋत्विजः समुक्षन्तीत्युक्तरीत्या कृत्वा सावित्रमष्टाकपालं प्रातर्निर्वपतीत्युक्तरीत्या प्रतिदिनं सावित्रादिषु कर्मस्वनुष्ठीयमानेषु संवत्सरे पूर्णे देवयजनं प्रति प्रस्थानं दर्शयति त्रयोदशे–पुनः प्राप्त इत्यादि । पुनर्वसन्ते द्वितीयवसन्ते प्राप्ते संवत्सरः पूर्णोऽभवत् अमावास्या प्राप्तेत्यर्थः। अत्र भाविन्यां पौर्णमास्यां प्रसवार्थ हयमेधेन यष्टुं हयमेधाख्यं यज्ञं कर्तु गतः देवयजनमितिशेषः । प्रथमसंवत्सरान्तिमावास्यायां मुखासंभरणत्रैधातवीयदीक्षणीयादिकं देवयजन एव हि कर्तव्यं यथोक्तं भास्करैः 'संवत्सरस्यास्य तु याऽन्तिमामावास्या विधेयामिह दीक्षणीयाम् । त्रैधातवीयां प्रवदन्ति सा: दिनानि दीक्षाहुतयस्तथाष्टौ" इति ॥ २ ॥

२] ति० टी०–वसिष्ठं च । चादरुन्धतीम् । प्रश्रितं विनययुक्तम् ॥ २ ॥

रा० टी०–अभीति । वशिष्ठमभिवाद्य नमस्कृत्यैव न्यायतः प्रतिपूज्य च प्रसवार्थ स्वपुत्रप्राकट्यप्रयोजनकं प्रश्रितं प्रणयविशिष्टं वाक्यं द्विजोत्तमं वसिष्ठमब्रवीत् ॥ २ ॥

गो० टी०–एवमेतत्सर्गप्रतिपाद्यं देवयजनगमनं संग्रहेणोक्त्वा पुनस्तद्विस्तरेण वक्तुमुपक्रमते सर्गशेषेण । तत्र ब्रह्मौदनमारभ्य यावदश्वमेधसमाप्ति यजमानस्य स्वातन्त्र्यप्रतिषेधेन स्वयं यज्ञोपकरणसंपादनाद्ययोगादध्वर्युणैव तस्य सर्वस्य कर्तव्यत्वादध्वर्युत्वेन वृतं वसिष्ठं प्रति प्रार्थयते–अभिवाद्येत्यादिना । तदुक्तं भट्टभास्करैः 'रशनां जनतः पश्चादध्वर्युः परिवीयते। राज्याय स च राजा स्याद्यावत् संतिष्ठते क्रतुः'इति । येयं द्वादशारत्नी-रशना भवति मौञ्जी भवतीत्यश्वबन्धनरज्जुर्विहिता तस्याः

१ गतेष्वथ द्विजाग्रेष्विति गो. पाठः । २ महाद्युतिरिति गो. पाठः । ३ गत इति गो. रा. पाठः ।

यज्ञो मे क्रियतां ब्रह्मन्यथोक्तं मुनिपुंगव । यथा न विघ्नाः क्रियन्ते यज्ञाङ्गेषु विधीयताम् ॥ ३ ॥
भवान्स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान् । वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः ॥ ४ ॥
तथेति च स राजानमब्रवीद्द्विजसत्तमः । करिष्ये सर्वमेवैतद्भवता यत्समर्थितम् ॥ ५ ॥
ततोऽब्रवीद्द्विजान्वृद्धान्यज्ञकर्मसु निष्ठितान् । स्थापत्ये निष्ठितांश्चैव वृद्धान्परमधार्मिकान् ॥ ६ ॥
कर्मान्तिकाञ्शिल्पकारान्वर्धकीन्खनकानपि । गणकाञ्शिल्पिनश्चैव तथैव नटनर्तकान् ॥ ७ ॥
तथा शुचीञ्शास्त्रविदः पुरुषान्सुबहुश्रुतान् । यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ॥ ८ ॥

यज्ञाज्यमुच्छिष्यते तस्मिन् रशनान्युनक्तीति यद्ब्रह्मौदनशिष्टाज्येनाभ्यञ्जनं विहितं ततः पश्चादित्यर्थः । अर्द्धत्रयमेकान्वयं वसिष्ठमभिवाद्य च न्यायतः शास्त्रतः प्रतिपूज्य च प्रश्रितं विनययुक्तं वाक्यमब्रवीत् कथं प्रसवार्थं पुत्रार्थमारब्धो मे यज्ञः यथोक्तं शास्त्रोक्तमनतिक्रम्य क्रियताम् ॥ २ ॥

३] ति० टी०–यथोक्तं शास्त्रोक्तप्रकारानतिक्रमेण । यज्ञाङ्गेष्वश्वादिषु । यथा ब्रह्मराक्षसादिभिर्विघ्ना न क्रियन्ते तथा विधीयताम् । क्रियतामित्यर्थः ॥ ३ ॥

रा० टी०–तद्वाक्यमेवाह–यज्ञ इति । हे मुनिपुङ्गव विप्र यथोक्तं यथाशास्त्रं मम ईप्सितो यज्ञः क्रियताम् निष्पाद्यताम् यथा येन प्रकारेण यज्ञाङ्गेषु विघ्नो न क्रियते इन्द्राद्यैरिति शेषः तथा विधीयताम् ॥ ३ ॥

गो० टी०–यथेति । यज्ञाङ्गेषु द्रव्यदेवताकर्मादिरूपेषु यथा विघ्नो न क्रियते राक्षसैरिति शेषः तथा क्रियतामित्यर्थः ॥ ३ ॥

४] ति० टी०–भवानिति । सुहृदः स्निग्धत्वाव्यभिचारादतिशयप्रतिपत्तये पुनः स्निग्धेति विशेषणम् । मह्यमिति षष्ठ्यर्थे । परमो महानित्यपि स्निग्धपदवत् । विसृष्टपुनःप्राप्ताश्वत्वादुद्यतः । आरब्धो यज्ञसंबन्ध्यङ्गानुष्ठानरूपो भारो भवतैव सर्ववेदशास्त्रज्ञेन वोढव्यो वोढुमर्हः ॥ ४ ॥

रा० टी०–भवानिति । स्निग्धः स्नेहविशिष्टः अत एव सुहृत् मह्यं मम परम उत्कृष्टो गुरुः अत एव महान्सर्वपूज्यो भवानेव अतः यज्ञस्य उद्यतः प्राप्तो भारो भवतैव वोढव्यः चशब्द एवार्थे । अपरो चकारो हेत्वर्थे ॥ ४ ॥

गो० टी०–भवानिति । भवान् मह्यं स्निग्धः अविच्छिन्नस्नेहः सुहृत् परमः वामदेवादिभ्य उत्कृष्टः महान् वस्तुतो निरुपमो गुरुः अतः उद्यतः उपकान्तः यज्ञस्य भारो भवतैव वोढव्यः चकारेणार्त्विज्यं च कर्तव्यमित्युच्यते ॥ ४ ॥

५] ति० टी०–समर्थितं सम्यक्प्रार्थितम् ॥ ५ ॥

रा० टी०–तथेति । भवता यत् एतत्समर्थितं प्रार्थितं तत्सर्वं तथैव करिष्ये एव इति राजानं स द्विजसत्तमो वसिष्ठोऽब्रवीत् चशब्द एवार्थे ॥ ५ ॥

गो० टी०–तथेति । समर्थितं सम्यक्प्रार्थितम् ॥ ५ ॥

६] ति० टी०–ततोऽब्रवीदिति । वसिष्ठोऽत्र कर्ता । स्थापत्यं स्थपते स्थकारस्य कर्म तत्र निष्ठितान्प्रवीणान् ॥ ६ ॥

रा० टी०–तत इति । ततः यज्ञभारनिर्वहणस्वीकारानन्तरं यज्ञकर्मसु निष्ठितान् यज्ञप्रयोगनिपुणान्वृद्धान्बहुज्ञान्द्विजान् परमधार्मिकान्परमधर्मानुष्ठानकर्तॄन् स्थापत्ये यागविषयकशिल्पकर्मणि निष्ठितान् निपुणान्वृद्धान्बहुद्रष्टॄन् च द्विजानब्रवीत् वसिष्ठ इति शेषः द्विजानित्युभयान्वयि ॥ ६ ॥

गो० टी०–तत इति सार्द्धश्लोकत्रयमेकान्वयम् । यज्ञकर्मसु यज्ञप्रयोगेषु स्थापत्ये तद्द्रव्यानयनस्वाम्ये निष्ठितान् पूर्वं राज्ञा नियुक्तान् ॥ ६ ॥

७] ति० टी०–कर्मान्तिकानासमाप्तिकर्मनिर्वाहकान्भृत्यान् । शिल्पकारान् । शिल्पं चित्रादि । वर्धकींस्तक्षणः । खनकाः कूपवापीनिर्मातारः । गणकाञ्ज्योतिर्विदः । शिल्पिनश्चर्मकाराद्याः । नटाः सूत्रधाराः । नर्तका नृत्यकारिणः ॥ ७ ॥

रा० टी०–कर्मेति । कर्मान्तिकान्कर्मणामन्तिकाः समाप्तिकर्तारः समाप्तिपर्यन्तं कर्मनिर्वाहका भृत्या इत्यर्थः ताल्लिपकरान् इष्टकादिनिर्माणकर्तॄन् च वर्द्धकान् गृहादिनिर्माणकर्तृतक्षणश्च खनकान्यागोपयोगिकुण्डादिखननकर्तृश्च गणकान् ज्योतिश्शास्त्रनिपुणान् च शिल्पिनः चित्रादिनिर्मातॄन् च नटनर्तकान्नटा रसाभिनयकर्तारः नर्तकाः भावाभिनयकर्तारः ते च ते चेति द्वन्द्वः तान् च ॥ ७ ॥

गो० टी०–कर्मान्तिकानिति । कर्मणामन्तः समाप्तिः सः एषामस्तीति कर्मान्तिकाः " अत इनिठनौ" इति ठन् भृतकानित्यर्थः । शिल्पकरान् इष्टकादिनिर्मातॄन् वर्द्धकीन् तक्षणः सूक्ष्मसूत्रसंग्रहगृहपादिनिर्मातॄन् खनकान् वापीकूपादिकृतः गणकान् लेखकान् शिल्पिनः चित्रादिकरान् नटाः रसाभिनयकृतः नर्तकाः भावाभिनयकृतः शास्त्रविदः प्रयोगशास्त्रविदः ॥ ७ ॥

८] ति० टी०–समीहन्तां कर्म कुर्वन्वित्यब्रवीदिति पूर्वेणान्वयः । यज्ञकर्मेत्यस्य निर्वर्तयितुमिति शेषः ॥ ८ ॥

रा० टी०–शुचीञ्शुद्धान् शास्त्रविदः यागप्रतिपादकशास्त्रेष्वतिनिपुणांश्च सुबहुश्रुतान्पुरुषाँश्चाब्रवीदिति पूर्वेणैवान्वयः अत्राव्ययानि चार्थानि तद्धीनेष्वप्याटत्याऽन्वेतव्यानि ॥ ८ ॥

गो० टी०–अथाज्ञापनप्रकारमाह अष्टभिः–यज्ञकर्मेत्यादि

१ विप्रेति गो. रा. पाठः । २ विघ्नः क्रियते इति गो. रा. पाठः

इष्टका बहुसाहस्री शीघ्रमानीयतामिति । उपकार्याः क्रियन्तां च राज्ञो बहुगुणान्विताः॥ ९ ॥
ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः । भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ॥ १० ॥
तथा पौरजनस्यापि कर्तव्याश्च सुविस्तराः । आगतानां सुदूराच्च पार्थिवानां पृथक्पृथक् ॥ ११ ॥
वाजिवारणशालाश्च तथा शय्यागृहाणि च । भटानां महदावासा वैदेशिकनिवासिनाम् ॥ १२ ॥
आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः । तथा पौरजनस्यापि जनस्य बहुशोभनम् ॥ १३ ॥
दातव्यमन्नं विधिवत्सत्कृत्य न तु लीलया । सर्वे वर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ॥ १४ ॥
न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि । यज्ञकर्मसु ये व्यग्राः पुरुषाः शिल्पिनस्तथा ॥ १५ ॥
तेषामपि विशेषेण पूजा कार्या यथाक्रमम् । ये स्युः संपूजिताः सर्वे वसुभिर्भोजनेन च ॥ १६ ॥

ऋत्विजः प्रत्याह यज्ञकर्मेति समीहन्तां व्याप्रियन्ताम्।शिल्पकरान् प्रत्याह-इष्टकेति।जात्येकवचनम्। इत्यत्रवीदिति पूर्वेणान्वयः ८

९] ति० टी०–इष्टका इति । बहुसाहस्री । बहुसहस्रसंख्येया इत्यर्थः । जातावेकवचनम् । राज्ञो योग्या उपकार्या राजसद्मानि।गुणा अन्नपानाद्युपकरणानि सर्वत्राव्रवीदित्यनुकर्षः९

रा० टी०–वसिष्ठोक्तिमेवाह–यज्ञेति । भवन्तः सर्वे राजशासनात् राजाज्ञातः यज्ञकर्म समीहन्ताम् यागोपयोगिस्वस्वक्रियानिष्पाद्यं कर्म कुर्वन्तु इत्यर्थः तदेव विशिष्याह बहुसाहस्री बहुसहस्रसंख्या इष्टिका शीघ्रमानीयतामित्याह एकत्वं जात्यभ्युपगमात् ॥ ९ ॥

गो० टी०–औपकार्या इति सप्तश्लोकी एकान्वया । औपकार्या राजसदनानि स्वार्थे ष्यञ् ' राजसदनमुपकार्योपकारिका ' इत्यमरः । बहुगुणान्विताः औन्नत्यविशालत्वादिबहुगुणान्विताः ब्राह्मणावसथा इति आर्षो लिङ्गव्यत्ययः ॥ ९ ॥

१०] ति० टी०–सुनिष्ठिता महावर्षवातादिनिवारणक्षमाः१०

रा० टी०–औपकार्या इति । राज्ञां निवासायेति शेषः बहुगुणान्विताः अनेकविधान्नपानादियुक्ता एव औपकार्या राजसद्मानि क्रियन्ताम् शुभा रमणीयाः भक्ष्या इति बहुभिः भक्ष्यान्नपानैः समुपेताः सयुक्ताः सुनिष्ठिताः वातवर्षादिभिरभिभवितुमशक्याः शतशो ब्राह्मणावसथाः ब्राह्मणगृहाणि च कर्तव्याः चकारेण तत्र तत्र कूपादिनिर्माणं च क्रियतामित्यर्थः ' राजसदनमुपकार्योपकारिका ' इत्यमरः । प्रज्ञादिभ्यश्चेत्यनेनाण् आवसथाश्चेति पुंस्त्वमार्षम्। सार्द्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०–कठिनं फलादि भक्ष्यम् । सुनिष्ठिताः वातवर्षादिभिरप्रकम्प्याः ॥ १० ॥

११] ति० टी०–कर्तव्या इत्यस्यावासा इति शेषः । पार्थिवानामल्पमाण्डलिकानाम् ॥ ११ ॥

रा० टी०–तथेति । बहुविस्तराः बहुविस्तारयुक्ताः बहुभक्ष्याः भक्षणीयफलादिपूर्णाः सर्वकामैः ईप्सितनिखिलपदार्थैः उपस्थिताः संयुक्ताः पौरजनस्याप्यावासाः कर्तव्या एव तथाशब्देनात्रापि कूपादिनिर्माणं कार्यमित्यर्थः वैशब्द एवार्थे ॥ ११॥

१२] ति० टी०–वैदेशिकनिवासिनाम् । वैदेशिकानां स्वदेशनिवासिनां चेत्यर्थः । महदावासा इत्यत्रात्वाभाव आर्षः १२

१३] ति० टी०–सर्वकामैरुपस्थिताः काम्यमानैः सर्वपदार्थैर्युक्ताः । जनस्येतरक्षुद्रजनस्यापि बहुशोभनं यथा भवति तथावासाः कार्या इत्यर्थः ॥ १३ ॥

रा० टी०–पौरेति । बहुशोभनमतिस्वाद्वन्नं सत्कृत्य पौरजानपदस्य जनस्य पौरजानपदजनेभ्यो विधिवद्दातव्यम् अपिशब्दः तत्रागतजनान्तरसंग्राहकः लीलया विलासबुद्ध्या नतु नैवदातव्यम् यथा येन प्रकारेण सर्ववर्णाश्रमाः सुसत्कृताः सन्तः पूजां प्राप्नुवन्ति तथा तेन प्रकारेण कार्यमिति शेषः। षष्ठी सम्बन्धसामान्यविवक्षया ॥ १२ ॥

गो० टी०–सर्वकामैः स्रक्चंदनादिभिः उपस्थिताः संयुक्ताः बहु अधिकं विधिवत् यथाविधि सत्कृत्य गन्धादिभिरभ्यर्च्य लीलया अनादरेणेत्यर्थः ॥ ११ ॥

१४-१५] ति० टी०–दातव्यमिति।सत्कृत्य परलोकप्रयोजनबुद्ध्या शास्त्रोक्तसत्कारपूर्वकं देयमित्यर्थः न तु लीलयोत्सवमात्रबुद्ध्यनादरेण । यथा पूजां प्राप्नुवन्ति पूजां मन्यन्ते तथा सुसत्कृताः । कार्या इत्यर्थः ॥ १४ ॥ १५ ॥

रा० टी०–न चेति । कामक्रोधवशात् अपिना विलासात् अवज्ञा अनादरः न प्रयोक्तव्या नैव कर्तव्या ये यज्ञकर्मसु यागोपयोगिक्रियासु व्यग्राः तदेकचित्ता. पुरुषाः शिल्पिनः चित्रादिनिर्मातारश्च तथाशब्दार्थौ ॥ १३ ॥

गो० टी०–यथा पूजां प्राप्नुवन्ति तथा कर्तव्यमित्यर्थः।कामक्रोधवशात् स्नेहद्वेषवशात् अपिशब्दने लीला समुच्चीयते१२--१३

१६] ति० टी०–तेषामपीति । अपिस्त्वर्थे । यथाक्रमं ज्येष्ठानुक्रमेण । तत्रोपपत्तिमाह–ये वसुभिर्धनैर्भोजनादिभिश्च पूजिताः सेवकास्तेषां सर्वं कार्यं सुहितं भवति । किंचिदपि कार्यं न परिहीयते न हीनं भवति । तस्मान्मयि प्रीतियुक्तेन चित्तेन भवन्तस्तथा कुर्वन्तु यथा सर्वे सुहृदस्ते च शिल्पादयश्च वस्त्रादिभिः पूजिताः स्युरिति ॥ १६ ॥

रा० टी०–तेषामिति । तेषां यथाक्रमं विशेषेण पूजा

१ औपकार्या इति गो. रा पाठः । २ बहुविस्तरा इति गो. रा. पाठः । ३ इतआरभ्यसार्धश्लोको गो. रा. पुस्तकयोर्न दृश्यते । ४ जानपदस्यापि इति गो. पौरजानपदस्यापीति रा. पुस्तके पाठः । ५ सर्ववर्णा इति गो. रा. पाठः । ६ कर्मणीति गो. पाठः ।

यथा सर्वं सुविहितं न किंचित्परिहीयते । तथा भवन्तः कुर्वन्तु प्रीतियुक्तेन चेतसा ॥ १७ ॥
ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् । यथेष्टं तत्सुविहितं न किंचित्परिहीयते ॥ १८ ॥
यथोक्तं तत्करिष्यामो न किंचित्परिहास्यते । ततः सुमन्त्रमाहूय वसिष्ठो वाक्यमब्रवीत् ॥ १९ ॥
निमन्त्रयस्व नृपतीन्पृथिव्यां ये च धार्मिकाः । ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्चैव सहस्रशः ॥ २० ॥
समानयस्व सत्कृत्य सर्वदेशेषु मानवान् । मिथिलाधिपतिं शूरं जनकं सत्यवादिनम् ॥ २१ ॥
[निष्ठितं सर्वशास्त्रेषु तथा वेदेषु निष्ठितम् ।]
तमानय महाभागं स्वयमेव सुसत्कृतम् । पूर्वं संबन्धिनं ज्ञात्वा ततः पूर्वं ब्रवीमि ते ॥ २२ ॥
तथा काशिपतिं स्निग्धं सततं प्रियवादिनम् । सद्वृत्तं देवसंकाशं स्वयमेवानयस्व ह ॥ २३ ॥

कार्या अपिशब्देनातिथ्यभ्यागतादिसंग्रहः वसुभिर्धनैर्भोजनेन च सम्भृतास्ते स्युः चकारान्तरेण सक्तिसंग्रहः । ये स्युः सम्पूजिताः सर्वे इति भट्टसंमतः पाठः ॥ १४ ॥

गो० टी०–विशेषेण अत्यादरेणेत्यर्थः । यथाक्रमं यथावृद्धं ते चेत्यत्र चशब्दो भिन्नक्रमः ते भोजनेन वसुभिः धनैश्चः संभृतास्तृप्ताश्च स्युः ॥ १४ ॥

१७]रा० टी०–यथेति।यथा येन प्रकारेण सर्वं कृत्यं सुविहितं सुष्ठु साधितं स्यात् किंचित्कृत्यं न परिहीयते विधिना न परित्यज्यते न्यूनतां न प्राप्नोति तथा तेन प्रकारेण प्रीतिस्निग्धेन स्नेहार्द्रेण चेतसोपलक्षिता भवंतः कुर्वन्तु प्रीतियुक्तेनेति भट्टसंमतः पाठः ॥ १६ ॥

गो० टी०–सर्वमपि यथा सुविहितं सुष्ठु अनुष्ठितं स्यात् किंचिदपि न परिहीयते न त्यक्ष्यते प्रीतिस्निग्धेन स्नेहार्द्रेण ॥ १६ ॥

१८]रा० टी०–तत इति। ततः वशिष्ठाज्ञापनश्रवणानन्तरं सर्वे वसिष्ठाज्ञप्ताः समागम्य वशिष्ठमिदं वचनमब्रुवन् । तदुक्तिमेवाह तत्प्रसिद्धं यथा यथावत् उक्तं भवद्वचनं सुविहितं वेदबोधितं अतः किंचिद्भवदुक्तं न परिहीयते विधिना न परित्यज्यते न्यूनतां न प्राप्नोतीत्यर्थः ॥ १६ ॥

गो० टी०–यथोक्तप्रवृत्तिं दर्शयति–तत इति । तत्पूर्वोक्तकार्यजातम् एवमुपकरणनिष्पत्यनन्तरं राजाह्वानमाज्ञापयति–तत इत्यादिना ॥ १६ ॥ १७ ॥

१९–२०] ति० टी०–यथोक्तमिति । यत्त्वयोक्तं तत्त्वयोक्तं त्वदुक्तानतिक्रमेण सुविहितम् । न किंचित्तत्र लुप्यत इति शेषः। किंचोक्तम् भावे क्तः वचनं यथा कथयिष्यसि तच्च तथैव करिष्यामः । तत्रापि न किंचिद्धीनं भविष्यति । ततो नियोजनानन्तरम् ॥ १९ ॥ २० ॥

रा० टी०–यथेति । तदुक्तं भवदाज्ञापितं तत्कृत्यं यथा यथावत्करिष्यामः यतः किञ्चिदपि कृत्यं परिहीयते विधिना न परित्यज्यते ॥ १७ ॥

रा० टी०–तत इति । ततः अङ्गीकारवचनश्रवणानन्तरं सुमन्त्रमानीय वसिष्ठः वाक्यमब्रवीत् तद्वाक्यमेवाह ये पृथिव्यां धार्मिकाः नृपतयः तान्नृपतीन् निमन्त्रयस्व चकारेणान्यानपि निमन्त्रयस्व ॥ १८ ॥

गो० टी०–निमन्त्रयस्व आह्वय ॥ १८ ॥

रा० टी०–तानेवाह–ब्राह्मणानित्यादिभिः । सर्वदेशेषु वियमानान् सहस्रशो ब्राह्मणादीन्मानवान् वर्णब्राह्यानपि सुसत्कृत्य समानयस्व ॥ १९ ॥

गो० टी०–ब्राह्मणानिति। सर्वदेशेषु स्थितानिति शेषः१९

२१] ति टी०–मानवाश्चतुर्वर्णातिरिक्ताः संकरादयः।२१।

रा० टी०–मिथिलेति । शूरं शौर्य्यविशिष्टं सत्यविक्रमं कापट्यरहितविक्रमविशिष्टं सर्वशास्त्रे सुनिष्ठितम् निपुणं तथा तेन प्रकारेण वेदेषु निष्ठितं महाभागं परमभाग्यवन्तं पूर्वसम्बन्धिनं दशरथनिरूपितनित्यसम्बन्धविशिष्टं तं प्रसिद्धं मिथिलाधिपतिं जनकं सुसत्कृतं यथा भवति तथा स्वयमेव ततो मिथिलातः पूर्वं प्रथममानय इति ज्ञात्वा विचार्याहं ते तुभ्यं ब्रवीमि ज्ञात्वा ब्रवीमीत्यनेन वसिष्ठस्य रघुनाथनित्यपरिकरस्थत्वं व्यक्तम् पूर्वसंबन्धिनमित्यनेन जनकस्यापि तत्वं व्यक्तम् ॥ २० ॥ २१ ॥

गो० टी०–मिथिलेति श्लोकद्वयम् । तं प्रसिद्धं स्वयमेव नतु दूतमुखेन पूर्वसंबंधिनं चिरन्तनसुहृदं ततः पूर्वोक्तेभ्यो नृपतिभ्यः ॥ २० ॥ २१ ॥

२२–२३] ति० टी०–तमिति । मिथिलाधिपं स्वयमेव । आनयेति संबन्धः । न तु दूतमात्रप्रेषणेन । कुत एवं विशेषः कुतश्च तदानयनस्य प्रथममुपदेशस्तत्राह–पूर्वं संबन्धिनं पूर्वस्मिन्नेव काले भाविनं संबन्धिनम् । समस्तपाठे मयूरव्यंसकादित्वात्समासः । तं योगबलेन ज्ञात्वा । ततो हेतोर्भाविसंबन्धित्वाद्धेतोः सर्वेभ्यः पूर्वं पूर्वकाले तदानयनं ब्रवीमीत्यर्थः २१

रा० टी०–तथेति ॥ २२ ॥

गो० टी०–तथेति । स्वयमेव गमनहेतवो विशेषणानि २२

रा० टी०–तथेति । केकयराजानमित्यत्र समासान्तविधेरनित्यत्वाट्टजभावः । राजसिंहस्य दशरथस्य ॥ २३ ॥

---

१ तेचस्युः संभृता इति गो. रा. पाठः । २ रिनग्धेनेति गो. रा. पाठः । ३ यथोक्तमिति गो. रा. पाठः । ४ हीयत इति रा. पाठाः । ५ मानीयेति गो. रा. पाठः । ६ सत्यविक्रममिति गो. रा. पाठः ।७ इत्यर्थमधिकं गो. रा. पुस्तकयोर्दृश्यते ।

तथा केकयराजानं वृद्धं परमधार्मिकम् । श्वशुरं राजसिंहस्य सपुत्रं तमिहानय ॥ २४ ॥
अङ्गेश्वरं महेष्वासं रोमपादं सुसत्कृतम् । वयस्यं राजसिंहस्य सपुत्रं तमिहानय ॥ २५ ॥
तथा कोसलराजानं भानुमन्तं सुसत्कृतम् । मगधाधिपतिं शूरं सर्वशास्त्रविशारदम् ॥ २६ ॥
प्राप्तिज्ञं परमोदारं सत्कृतं पुरुषर्षभम् । राज्ञः शासनमादाय चोदयस्व नृपर्षभान् ॥
प्राचीनान्सिन्धुसौवीरान्सौराष्ट्र्यांश्च पार्थिवान् ॥ ॥ २७ ॥
दाक्षिणात्यान्नरेन्द्रांश्च समस्तानानयस्व ह । सन्ति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले ॥२८॥
तानानय यथा क्षिप्रं सानुगान्सहबान्धवान् । एतान्दूतैर्महाभागैरानयस्व नृपाज्ञया ॥ २९ ॥
वसिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्त्वरितं तदा । व्यादिशत्पुरुषांस्तत्र राज्ञामानयने शुभान् ॥ ३० ॥
स्वयमेव हि धर्मात्मा प्रयातो मुनिशासनात् । सुमन्त्रस्त्वरितो भूत्वा समानेतुं महामतिः ॥ ३१ ॥
ते च कर्मान्तिकाः सर्वे वसिष्ठाय महर्षये । सर्वं निवेदयन्ति स्म यज्ञे यदुपकल्पितम् ॥ ३२ ॥
ततः प्रीतो द्विजश्रेष्ठस्तान्सर्वान्मुनिरब्रवीत् । अवज्ञया न दातव्यं कस्यचिल्लीलयापि वा ॥ ३३ ॥

२४-२६] ति० टी०-केकयराजानमित्यनित्यत्वात्समासान्ताभावः ॥ २४-२६ ॥

गो० टी०-तथेति । केकयराजानमिति समासान्तविधेरनित्यत्वाद्टजभावः ॥ २३ ॥

रा० टी०-अङ्ग इति ॥ २४ ॥

गो० टी०-अङ्गेति । समानय त्वमेवेति शेषः ॥ २४ ॥

२७-२८] ति० टी०-सत्कृतं यथा भवति तथा । आनयस्वेति शेषः । प्राचीनान्प्राग्देशवर्तिनः । सौराष्ट्रे भवानित्यर्थे ढगाषेः ॥ २७ ॥ २८ ॥

रा० टी०-प्राचीनानिति । प्राचीनान्प्राग्देशसंभवान् २५

गो० टी०-प्राचीनानिति । प्राचीनान् प्राग्देशवर्तिनः सिन्धुदेशे सौवीरदेशे च भवाः सिन्धुसौवीराः सौराष्ट्र्यान् सुराष्ट्रदेशभवान् दाक्षिणात्यान् दक्षिणदेशभवान् आनयस्व दूतमुखेनेति शेषः ॥ २५ ॥

रा० टी०-सन्तीति । स्निग्धाः स्नेहयुक्ताः ॥ २६ ॥

गो० टी०-सन्तीति । यथाक्षिप्रं शैघ्र्यमनतिक्रम्य ॥२६॥

२९-३०] ति० टी०-यथा यथायोग्यदूतप्रेषणेन २९।३०

रा० टी०-वशिष्ठेति । तदा वसिष्ठाज्ञापनकाले तत्प्रसिद्धं वसिष्ठवाक्यं श्रुत्वा त्वरितः त्वरां प्राप्तः सुमन्त्रः तत्र वसिष्ठाज्ञापिते राज्ञामानयने शुभान्निपुणान्पुरुषान् व्यादिशत् ॥ २७ ॥

गो० टी०-वसिष्ठेति । शुभान् अन्तरङ्गान् ॥ २७

३१] ति० टी०-स्वयमेवेति । वसिष्ठेन विशिष्योक्तामिति शेषः ॥ ३१ ॥

रा० टी०-सामान्यराजानानेतुं पुरुषान्नियुज्य वसिष्ठोपदिष्टविशेषराजानानेतुं सुमन्त्रः स्वयं जगामेत्याह-स्वयमिति । धर्मात्मा परमधर्मज्ञः सुमन्त्रः मुनिशासनाद्वसिष्ठाज्ञापनात् त्वरितो भूत्वा महीक्षितः वसिष्ठोपदिष्टराजविशेषान् समानेतुं प्रयातः ॥ २८ ॥

गो० टी०-स्वयमिति । महीक्षितः वसिष्ठेन विशिष्योक्तान् ॥ २८ ॥

३२] ति० टी०-ते चेति । पूर्वनियुक्ता इत्यर्थः । 'वसिष्ठाय महर्षये' इति पाठः ॥ ३२ ॥

रा० टी०-ते चेति । पूर्वं वसिष्ठाज्ञापिताः सर्वे कर्मान्तिका आसमाप्तिकर्मनिर्वर्तकाः महर्षये वसिष्ठाय यत् यज्ञे-उपकल्पितं संपादितं तत्सर्वं निवेदयन्ति स्म चकारेणान्येऽपि तदाज्ञापिताः संपादितं स्वस्वकार्यं निवेदयन्ति स्म ॥ २९ ॥

गो० टी०-ते चेति । उपलक्षणमेतत् शिल्पकरादीनां यज्ञे यज्ञनिमित्तं यदुपकल्पितं निर्मितं तत्सर्वं निवेदयन्ति स्म अवश्यं शिक्षणीयांशं पुनः शिक्षयति ततः प्रीत इति । अर्धमेकान्वयम् ॥ २९ ॥

३३] ति० टी०-अवज्ञयानादरेण । लीलयाश्रद्धया । आवश्यकत्वादेतत्पुनः शिक्षितम् ॥ ३३ ॥

रा० टी०-तत इति । ततः सम्पादितसर्ववस्तुश्रवणात्प्रीतः प्रसन्नो द्विजश्रेष्ठो वसिष्ठः तान् स्वस्वकृत्यनिवेदयितॄन्सर्वान् पुनरब्रवीत् तदुक्तिमेवाह अवज्ञयाऽनादरेण लीलया विलासबुद्ध्या वा कस्यचिन् कस्मैचिन् नैव दातव्यम् अपिरेवार्थे अवज्ञया दाने दोषमाह अवज्ञया अनादरेण कृतं दानं दातारं हन्यात् अत्र संशयः संदेहो न कार्यः एतेन वसिष्ठस्य वेदमर्यादापालकत्वं ध्वनितम् ॥ ३० ॥

गो० टी०-अवज्ञयेति । लीलया विनोदेन ॥ ३० ॥

---

१ महाभामिति गो. रा. पाठः । २ समानय यशस्विनमिति गो. रा. पाठः । ३ इदं श्लोकद्वयं गो. रा. पुस्तकयोर्नास्ति । ४ इदमर्धं गो. रा. पुस्तकयोर्नास्ति । ५ प्रययाविति गो. पाठः । ६ महीक्षित इति गो. रा. पाठः । ७ धीमते इति गो. पाठः । ८ पुनरिति गो. रा. पाठः ।

अवज्ञया कृतं हन्याद्दातारं नात्र संशयः । ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ॥ ३४ ॥
बहूनि रत्नान्यादाय राज्ञो दशरथस्य हे । ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ॥ ३५ ॥
उपयाता नरव्याघ्र राजानस्तव शासनात् । मयापि सत्कृताः सर्वे यथार्हं राजसत्तम ॥ ३६ ॥
यज्ञियं च कृतं सर्वं पुरुषैः सुसमाहितैः । निर्यातु च भवान्यष्टुं यज्ञायतनमन्तिकात् ॥ ३७ ॥
सर्वकामैरुपहृतैरुपेतं वै समन्ततः । द्रष्टुमर्हसि राजेन्द्र मनसेव विनिर्मितम् ॥ ३८ ॥
तथा वसिष्ठवचनाद्दृष्यशृङ्गस्य चोभयोः । दिवसे शुभनक्षत्रे निर्यातो जगतीपतिः ॥ ३९ ॥
ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः । ऋष्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥ ४० ॥
यज्ञवाटं गताः सर्वे यथाशास्त्रं यथाविधि । श्रीमांश्च सह पत्नीभी राजा दीक्षामुपाविशत् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

३४] ति० टी०–तदेवाह—अवज्ञयेति ॥ ३४ ॥

रा० टी०–तत इति । ततः सुमन्त्रादिगमनानन्तरं कैश्चिदहोरात्रैः कतिपयदिवसैः बहूनि रत्नान्यादाय उपायनं गृहीत्वैव राज्ञो दशरथस्य समीपे महीक्षितः राजान उपयाताः प्राप्ताः॥३१॥

गो० टी०–तत इति । ततः दशरथनिर्गमनानन्तरं रत्नानि श्रेष्ठवस्तूनि मणिमुक्ताप्रवालवस्त्राभरणचन्दनादीनि ॥ ३२ ॥

३५–३६] ति० टी०–रत्नान्युत्तमवस्तूनि ॥ ३६ ॥

रा० टी०–तत इति । ततः राजागमनानन्तरं सुप्रीतो अतिप्रसन्नचित्तः वसिष्ठः राजानं दशरथं हे नरव्याघ्र पुरुषसिंह तव शासनात् आज्ञापनात् राजान उपयाताः प्राप्ताः इति अब्रवीत् अकथयत् ॥ ३२ ॥

गो० टी०–तत इति । स्पष्टम् ॥ ३२ ॥

रा० टी०–मयेति । हे राजन् सर्वे आगता राजसत्तमा मया ये सत्कृताः चकारेणान्येऽपि यथार्ह समागतास्ते सत्कृता इत्यर्थः सुसमाहितैः सावधानैः पुरुषैर्यज्ञियं यज्ञोपयोगि वस्तु कृतं संपादितं वस्तुजातमित्यर्थः ॥ ३३ ॥

गो० टी०–मयेति । यज्ञमर्हति इति यज्ञियम् "यज्ञर्त्विग्भ्यां घखञौ" इति घः यज्ञाय यत्संपाद्यं तत्सर्वं संपादितमित्यर्थः३३

३७] ति० टी०–यज्ञियं यज्ञोपयोगि स्रुक्स्रुवादिसंभाररूपम् । अन्तिकात् । समीपे वर्तमानमित्यर्थः ॥ ३७ ॥

रा० टी०–निरिति । उपहृतैर्जनैरानीतैः सर्वकामैः समन्ततः उपेतं युक्तं यज्ञायतनं यज्ञशालां यष्टुं भवान् निर्यातु हे राजेन्द्र मनसा इव विनिर्मितं शीघ्रं संपादितं अन्तिकादेव द्रष्टुमर्हसि । सार्द्धश्लोक एकान्वयी एवशब्द इवार्थे वैशब्द एवार्थे३४

गो० टी०–निर्यात्विति । अन्तिकात्समीपे "दूरातिकार्थेभ्यो द्वितीया च" इति चकारेण पञ्चमी । समीपे उपहृतैः सर्वकामैः सर्वोपकरणैरुपेतम् ॥ ३४ ॥

३८] ति० टी०–मनसेवेति । क्षिप्रसिद्धत्वोपकरणसौष्ठवज्ञापनायोत्प्रेक्षेयम् ॥ ३८ ॥

गो० टी०–द्रष्टुमित्यर्धमेकान्वयम् । मनसेवेति क्षिप्रसिद्धत्वे दृष्टान्तः ॥ ३५ ॥

३९] ति० टी०–वसिष्ठवचनादित्यत्र वसिष्ठेति लुप्तविभक्तिकं पृथक्पदम् । वसिष्ठस्य ऋष्यशृङ्गस्य च प्रत्येकमुभयोश्च मिलितयोर्वचनात् ॥ ३९ ॥

रा० टी०–तथेति । वसिष्ठस्य ऋष्यशृङ्गस्य च उभयोर्वचनादेव शुभे ज्योतिश्शास्त्रसंमते दिवसनक्षत्रे जगतीपतिः राजा निर्यातः यागशालां प्राप्तः तथाशब्द एवार्थे ॥ ३५ ॥

गो० टी०–तथेति । वसिष्ठेत्यविभक्तिको निर्देशः वसिष्ठस्य ऋष्यशृङ्गस्य चोभयोरित्यर्थः । ऋष्यशृङ्गस्य ब्रह्मत्वेन श्रुतत्वात्तद्वचनमप्यपेक्षितम् । शुभे दिवसे सोमसौम्यवारादौ शुभे नक्षत्रे रोहिण्यादौ निर्यातः गृहात् यज्ञशालां प्रति इत्यर्थसिद्धम् । अत्राहुः शङ्खदुन्दुभिमृदङ्गवादनैर्मङ्गलैः पटहकाहलादिभिः । स्वस्तिवादमुखरैर्मखक्षितिं ब्राह्मणैश्च सह संप्रपद्यत इति ॥३६॥

४०] ति० टी०–आरभन्तितिच्छान्दसम् ॥ ४० ॥

४१] ति० टी०–यज्ञवाटमित्यर्धं पूर्वान्वयि । शास्त्रं कल्पसूत्रादि विधिस्तदुक्तप्रकारः ॥ ४१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय-
आदिकाव्ये बालकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०–तत इति । ततः राजागमनानन्तरं वसिष्ठप्रमुखाः वसिष्ठादयः सर्वे द्विजोत्तमाः तदा राजागमनकाले ऋष्यशृङ्गं पुरस्कृत्यैव यज्ञवाटं यज्ञशालां गताः प्राप्ताः सन्तः यथाशास्त्रं शास्त्रमनतिक्रम्य यथाविधि यथाक्रमं यज्ञकर्म आरभन् आरभन्त ॥ ३६ ॥ ३७ ॥

इतिश्रीमद्रामायणव्याख्याने रामायणशिरोमणौ
बालकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०–तत इति । सार्द्धश्लोकः । आरभन्तिति छान्दसः यज्ञवाटगताः सर्वे यजमानर्त्विगादयः यथाविधि यथाक्रमं यथाशास्त्रं सर्वे यज्ञकर्मारभन् स्वस्वकर्मारभन्तेत्यर्थः ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जी-
राख्याने बालकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

१ ह्रीति गो. रा. पाठः । २ मया चेति गो. रा. पाठः । ३ सत्तमा इति गो. रा. पाठः । ४ राजन्निति गो. रा. पाठः । ५ ऋश्येति गो. पाठः । ६ शुभे दिवसनक्षत्र इति गो. रा. पाठः । ७ ऋश्यति गो. पाठः । ८ वाटगता इति गो. पाठः । ९ इधमर्ध गो. रा. पुस्तकयोर्नैव दृश्यते ।

चतुर्दशः सर्गः ।

दशरथस्य हयमेधस्य वर्णनम्, ऋष्यशृङ्गाच्चतुःसुतभवनवरप्राप्तिः ।

अथ संवत्सरे पूर्णे तस्मिन्प्राप्ते तुरङ्गमे । सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत ॥ १ ॥
ऋष्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः । अश्वमेधे महायज्ञे राज्ञोऽस्य सुमहात्मनः ॥ २ ॥
कर्म कुर्वन्ति विधिवद्याजका वेदपारगाः । यथाविधि यथान्यायं परिक्रामन्ति शास्त्रतः ॥ ३ ॥
प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः । चक्रुश्च विधिवत्सर्वमधिकं कर्म शास्त्रतः ॥ ४ ॥
अभिपूज्य तदा हृष्टाः सर्वे चक्रुर्यथाविधि । प्रातःसवनपूर्वाणि कर्माणि मुनिपुंगवाः ॥ ५ ॥

१] ति० टी०–अथेति । अश्वोत्सर्गानन्तरम् । वर्षे-पूर्णे तस्मिन्नश्वे सदः प्राप्ते सति कर्म प्रावर्ततेत्यर्थः । अत्र त्रिंशद्दिनात्मकश्रावनमासपरिच्छिन्नो वत्सरः ॥ १ ॥

रा० टी०–अथेति । अथ तुरङ्गोत्सर्जनानन्तरं पूर्णे संवत्सरे तस्मिन्नुत्सृष्टे तुरङ्गमे प्राप्ते क्रमेण यज्ञशालामागते सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत उपाक्रामत् ॥ १ ॥

गो० टी०–पूर्वसर्गान्ते शालाप्रवेशानन्तरमश्वमेधारम्भः संग्रहेण दर्शितः। तदनुष्ठानं विस्तरेण दर्शयिष्यन् तस्याभागमनपूर्वकत्वात्तदनुवादपूर्वकं यज्ञानुष्ठानं दर्शयति चतुर्दशे–अथेत्यादि। अथ अश्वविमोचनानन्तरं तुरङ्गमे प्राप्ते क्रमेण प्राप्ते तस्मिन्संवत्सरे पूर्णे राज्ञो यज्ञः अभ्यवर्तत प्रावर्तत अश्वागमनक्रमस्तु विमुक्तमश्वं स्वैरं चरन्तं राजपुत्रा राजोग्रसूतग्रामणिक्षत्रसंग्रहिनारश्चतुःशताः परिपालयन्तो नावर्तयन्तोऽनुचरन्ति ब्रह्माध्वर्युहोत्रुद्गातारश्चत्वार ऋत्विजस्तं रथकारगृहे समानीय बद्धा तस्य चतुर्षु पदेषु इह धृतिस्वाहेत्याद्याहुतिचतुष्टयं जुह्वति । तथाहुः ' रथकारगृहेऽश्वस्य वसतः सायमस्य तु । चतुर्षु पत्सु होतव्याश्चत्रो घृतयः क्रमात् ' इति अथैकादशमासादूर्ध्वं तं सदस्याः समानीय आश्वत्थे व्रजे बध्नन्ति तथाह आपस्तम्बः " ऊर्ध्वमेकादशान्मासादाश्वत्थे व्रजेऽश्वं बध्नीयात् " इति ततो द्वादशे मासे शालानिर्माणादिसकलसंभारान्संभृत्य फाल्गुनामावास्यायामृत्विग्भिः शालां प्रविश्य प्रतिपदमारभ्याश्वमेधं प्रारभन्ते ॥ १ ॥

२] ति० टी०–ऋष्यशृङ्गमिति । अनेन प्रधानार्त्विज्यं ब्रह्मत्वं तस्य गम्यत इति कतकः । अग्रे पुत्रेष्टाविष्टिं तेऽहं करिष्यामीति ऋष्यशृङ्गोक्तेः ' जुहावाग्नौ च तेजस्वी ' इति ऋष्यशृङ्गं प्रकम्य वाल्मीकिनोक्तेश्चाध्वर्यवमस्येति युक्तम् ॥ २ ॥

रा० टी०–ऋष्येति । सुमहात्मनः अतिप्रयत्नविशिष्टस्यास्य त्रिलोक्यां प्रसिद्धस्य राज्ञो दशरथस्य महायज्ञेऽश्वमेधे द्विजर्षभाः ब्राह्मणाः ऋष्यशृङ्गं पुरस्कृत्य कर्म स्वस्वोचितकृत्यं चक्रुः ऋष्यशृङ्गंपुरस्कृत्येत्यनेन तस्य प्रधानऋत्विक्त्वं ध्वनितम् २

गो० टी०–ऋष्यशृङ्गमिति । अनेन प्रधानार्त्विज्यं ब्रह्मत्वं तस्येति गम्यते ॥ २ ॥

३] ति० टी०–कर्मेति । वेदपारगा अधीतस्य वेदस्य पारं फलवदर्थावबोधं गच्छन्ति प्राप्नुवन्ति ते याजका ऋत्विजः । यथाविधि कल्पसूत्रार्थकश्रुत्यनतिक्रमेण । न्यायोऽत्र तन्निर्वाहिका पूर्वमीमांसा । तं चानतिक्रम्य परिक्रामन्ति शास्त्रोक्तस्वस्वक्रियाक्रमकालमविस्मृत्य प्रवर्तन्ते ॥ ३ ॥

रा० टी०–कर्मेति । वेदपारगाः निखिलवेदतत्त्वावगन्तारो याजका ऋत्विजः कर्म यागोचितस्वस्वकृत्यं विधिवत्कुर्वन्ति यथाविधि विधिमनतिक्रम्य यथान्यायं मीमांसकोक्तक्रममनतिक्रम्य शास्त्रतः शिक्षयायुक्ताः शिक्षां कुर्वन्त इत्यर्थः ॥ ३ ॥

गो० टी०–प्रतिपदमारभ्य सप्तसु दिनेषु कर्तव्यान् " त्रीणि त्रीणि वैश्वदेवानि जुहोति " इति विहितानेक विंशतिहोमान् " पूर्णाहुतिमुत्तमां जुहोति " इति विहितं कर्मविशेषं च अभिप्रेत्याह–कर्म कुर्वन्तीति । याजकाः ऋत्विजः वेदपारं तदर्थावबोधः तद्गच्छन्तीति वेदपारगाः कर्म पूर्वोक्तं विधिवत्कुर्वन्ति स्म यथाविधि यथावेदोक्तं यथान्यायं यथामीमांसं शास्त्रतः कल्पसूत्रानुसारेण परिक्रामन्ति प्रचरन्ति नासंस्थिते सोमेऽध्वर्युः प्रत्यङ्सदोतीयादित्याद्युक्तक्रममतिलङ्घ्य ऋत्विजो–न विहरन्तीत्यर्थः ॥ ३ ॥

४] ति० टी०–प्रवर्ग्यमारादुपकारकं कर्मविशेषम् । उपसदमिष्टिविशेषम् । अधिकं प्रकृत्युपदिष्टाङ्गातिदेशात्तद्विकृत्यपेक्षितो विशेषोऽधिकं कर्म ॥ ४ ॥

रा० टी०– परिक्रामन्ति प्रवर्तन्ते । प्रवर्ग्यमिति द्विजा ब्राह्मणाः प्रवर्ग्य अश्वमेधाङ्गभूतकर्मविशेषं उपसदमिष्टिविशेषं च शास्त्रतः मीमांसान्यायानुसारेणैव कृत्वा शास्त्रतः साक्षादुपदिष्टात् अधिकमतिदिष्टं सर्वं कर्म च विधिवच्चक्रुः सम्पादयामासुः तथाशब्दश्चार्थे ॥ ४ ॥

गो० टी०–अथ सोमक्रयानन्तरं सोमराजाप्यायनकर्मविशेषान् दर्शयति–प्रवर्ग्यमिति । द्विजा ऋत्विजः प्रवर्ग्यं " देवा वै सत्रमासत " इत्यादिप्रवर्ग्यब्राह्मणोक्तं कर्मविशेषं शास्त्रतः विधिमीमांसाकल्पसूत्रानुसारेण कृत्वा उपसदं इष्टिविशेषं तथैव शास्त्रत एव कृत्वा शास्त्रतः उपदेशशास्त्रात् अधिकमतिदेशतः प्राप्तं सर्वं कर्म च चक्रुः तिस्र एव साहस्योपसदो द्वादशाहीनस्येति प्राप्ता द्वादशप्रवर्ग्योपसदश्चकुरित्यर्थः ॥ ४ ॥

५] ति० टी०–अभिपूज्येति । तत्तत्कर्माङ्गदेवता-

१ ततो हृष्टा इति गो. रा. पाठः ।

ऐन्द्रश्च विधिवद्दत्तो राजा चाभिषुतोऽनघः । माध्यंदिनं च सवनं प्रावर्तत यथाक्रमम् ॥ ६ ॥
तृतीयसवने चैव राज्ञोऽस्य सुमहात्मनः । चक्रुस्ते शास्त्रतो दृष्ट्वा यथा ब्राह्मणपुंगवाः ॥ ७ ॥
आह्वयांचक्रिरे तत्र शक्रादीन्विबुधोत्तमान् । ऋष्यशृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः ॥ ८ ॥
गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः । होतारो ददुरावाह्य हविर्भागान्दिवौकसाम् ॥ ९ ॥
न चाहुतमभूत्तत्र स्खलितं वा न किंचन । दृश्यते ब्रह्मवत्सर्वं क्षेमयुक्तं हि चक्रिरे ॥ १० ॥

मिति शेषः । यथा यथाविधि । प्रातःसवनादि कर्मविशेषः ॥५॥

रा० टी०–अभीति । अभिपूज्य तत्तद्देवतापूजनं विधाय ततः पूजनात् हृष्टाः सर्वे मुनिपुङ्गवाः प्रातःसवनपूर्वाणि प्रातःसवनप्रभृतीनि कर्मविशेषाणि यथाविधि चक्रुः ॥ ५ ॥

गो० टी०–अथ सोमप्रयोगं दर्शयति–अभिपूज्येति । बर्हिष्पवमानादिभिस्तत्तत्कर्मदेवता अभिपूज्य ततः प्रवर्ग्योपसदनावसाने प्रातःसवनपूर्वाणि प्रातःसवनमाध्यन्दिनसवनतृतीयसवनानि कर्माणि चक्रुः ॥ ५ ॥

६] ति० टी०–ऐन्द्र इन्द्रदेवताको हविर्भागो दत्तः । राजा सोमलता चाभिषुतो ग्रावभिः संक्षुण्य निःसारितसारः॥६॥

रा० टी०–ऐन्द्र इति । ऐन्द्रः इन्द्रदेवताको हविर्विशेषो विधिवद्दत्तः अनघः पापनिवर्तकः राजा सोमवल्ली अभिष्टुतः मन्त्रैर्यथाविधि प्रशंसितः अभिषुत इत्यपि पाठः अश्ममिरभिहत्य निःसारितसारोऽभवदित्यर्थः माध्यन्दिनं सवनं च यथाक्रमं प्रावर्त्तत । अत्रार्थे सूत्रं सोमं राजानं दृषदि निधाय दक्षिणतो ब्रह्मा पश्चादध्वर्युः उत्तरतो होता प्रागुद्गाता स्थित्वा दृषद्भिर्हन्यात्॥६॥

गो० टी०–ऐन्द्र इति । ऐन्द्रः इन्द्रग्रहनिष्टः सोमांशः स विधिवदिन्द्राय दत्तः अनघः पापनिवर्तकः राजा सोमराजः अभिष्टुतः स्तोत्रशस्त्रैः स्तुतः । यद्वा ऐन्द्रः इन्द्रदेवताको हविर्भागः धानाः करम्भः परिवापः पुरोडाशः पयस्येति प्रातःसवनहवींषि इन्द्राय हरिवते धानाः इन्द्रायपूषण्वते करम्भः सरस्वते परिवापः इन्द्राय पुरोडाशः मित्रावरुणाभ्यां पयस्येति होतव्यानीन्द्रमुद्दिश्यैव । " अथ कस्मादेतेषां हविषामिन्द्रमेव यजन्ति " इत्यादिश्रुतेः माध्यन्दिनसायंतनसवनयोः पयस्यावर्जमन्यत्सर्वं समानम् । अभिषुत इति पाठे चतसृषु दिक्षु चतुर्भिः ऋत्विग्भिः पाषाणैरभिहत्य निःसारितसारा सोमलताऽभूदित्यर्थः । तथाहि सूत्रम् "सोमं राजानं दृषदि निधाय दक्षिणतो ब्रह्मा पश्चादध्वर्युरुत्तरतो होता प्रागुद्गाता स्थित्वा दृषद्भिरभिहन्यात् " इति । अनघः अंशुस्कन्दनरहितः ॥ ६ ॥

७] ति० टी०–तृतीयेति । यथेत्यस्य यथाविधीत्यर्थः ७

रा० टी०–तृतीयेति । सुमहात्मानोऽस्य राज्ञो दशरथस्य तृतीयसवनं च ते ब्राह्मणपुङ्गवाः ब्राह्मणश्रेष्ठाः शास्त्रतो दृष्ट्वा ज्ञात्वा तथैव पूर्वोक्तप्रकारेणैव चक्रुः ॥ ७ ॥

गो० टी०–तृतीयेति । तथा शास्त्रप्रकारेण प्रातःसवनपूर्वाणीत्युक्तस्यैवायं प्रपञ्चः ॥ ७ ॥

८] ति० टी०–शिक्षाक्षरसमन्वितैः शिक्षाभ्यासकालस्तत्र गृहीतान्यक्षराणि शिक्षाक्षराणि तत्समन्वितैः । स्वरतो वर्णतश्चाहीनैरिति यावत् । ऋष्यशृङ्गादय इत्यत्रादिशब्दः प्रधानवाची ' भीष्मादिश्च सुयोधनः ' इतिवत् ॥ ८ ॥

रा० टी०–आह्वयामिति । शिक्षाणि शिक्षितानि पाठनकाले गुरुणा बोधितानि एव अक्षराणि तैः समन्वितैः यथावत् स्वरवर्णविशिष्टैरित्यर्थः मन्त्रैः ऋष्यशृङ्गादयो विबुधोत्तमान् सुरश्रेष्ठान् शक्रादीन् तत्र यागे आह्वयाञ्चक्रिरे ॥ ८ ॥

९] ति० टी०–गीतिभिः सामभिः ॥ ९ ॥

रा० टी०–गीतिभिरिति । गीतिभिः यथोचितगानविशिष्टैर्मधुरैस्वरविशिष्टैः स्निग्धैर्मनोरमैः मंत्राह्वानैः आह्वानमन्त्रैर्होतार आवाह्य दिवौकसामर्हतो योग्यान्हविर्भागान्ददुस्तेभ्यः समर्पयामासुः ॥ ९ ॥

१०] ति० टी०–न चेति । अहुतमन्यथा हुतम् । स्खलितमज्ञानतो न किमपि कर्म त्यक्तम् । ब्रह्मवत् मन्त्रवत् क्षेमयुक्तं क्षेमो विघ्नपरिहारहित्यम् । यद्वा क्षेमो विघ्नराहित्यम् ॥ १० ॥

रा० टी०–नेति । तत्र तस्मिन्यागे अहुतं यथोक्तहुतविरुद्धं नाभूत् स्खलितं च्युतं च किंचन कर्म नाभूत् तत्र हेतुः सर्वं कर्म ब्रह्मवन्मन्त्रयुक्तं दृश्यते हि यतः क्षेमयुक्तमेव यथा स्यात्तथा चक्रिरे ॥ १० ॥

गो० टी०–न चेति । अहुतं स्खलितमन्यथा हुतं वा किंचन नाभूत् सर्वं होमादिकं ब्रह्मवत् मन्त्रवत् दृश्यते स्म हि यस्मात् क्षेमयुक्तं निर्विघ्नं चक्रिरे अत्रान्नहोमादिकमश्वमेधीयं सूचितम् तेषां बहुत्वेन स्खलित्यादिसंभावनया तत्परिहारस्य वक्तव्यत्वात् । तथाहुर्याज्ञिकाः ' पत्नीसंयजनान्तेऽहन्यग्निष्टोमे तु संस्थिते । प्रजापतिसमे गीते वीणागणिकिभिर्नृपे ॥ अस्तंगते सहस्रांशावारुह्याश्वत्थनिर्मिताः । षट्त्रिंशतमथासंदीस्तावन्तोध्वर्यवो दृताः ॥ अप्राकृतैः स्रुवैर्दीर्घदण्डैः खदिरसंभवैः । सर्वा तां रात्रिमन्नानि दशाज्यादीनि जुह्वति ॥ संख्याहुतीस्ताः सकृदेव हुत्वा परार्द्धपर्यन्तमथ क्रमेण । हुत्वाश्वनामप्रभृतीनिरात्रेश्शेषोक्थ्यसंख्याहुतिभिः समाप्यः ' इति ॥ ८ ॥

१ भिष्टुत इति गो. रा. पाठः । २ तथेति गो. रा. पाठः । ३ इत आरभ्यं पद्यद्वय गो. पुस्तके नास्ति । ४ वापि इति गो. नापीति रा. पुस्तके पाठः ।

न तेष्वहःसु श्रान्तो वा क्षुधितो वा[1] न दृश्यते । नाविद्वान्ब्राह्मणः कश्चिन्नाशतानुचरस्तथा ॥ ११ ॥
ब्राह्मणा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते । तापसा भुञ्जते चापि श्रमणाश्चैव[2] भुञ्जते ॥ १२ ॥
वृद्धाश्च व्याधिताश्चैव स्त्रीबालाश्च[3] तथैव च । अनिशं भुञ्जमानानां[4] न तृप्तिरुपलभ्यते ॥ १३ ॥
दीयतां दीयतामन्नं वासांसि विविधानि च । इति संचोदितास्तत्र तथा चक्रुरनेकशः ॥ १४ ॥
अन्नकूटाश्च दृश्यन्ते बहवः पर्वतोपमाः । दिवसे दिवसे तत्र सिद्धस्य विधिवत्तदा ॥ १५ ॥
नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा । अन्नपानैः सुविहितास्तस्मिन्यज्ञे महात्मनः ॥ १६ ॥
अन्नं हि विधिवत्स्वादु प्रशंसन्ति द्विजर्षभाः । अहो तृप्ताः स्म भद्रं ते इति शुश्राव राघवः ॥ १७ ॥

११] ति० टी०–नेति । श्रान्तः स्वस्वार्त्विज्याशक्तः । अशतानुचरः शतसेवकरहितः ॥ ११ ॥

रा० टी०–नेति । तेषु अहस्सु भोजनाद्यनर्हयागदिवसेषु श्रान्तः पिपासितः क्षुधितो वा नैव दृश्यते तत्र तस्मिन्यागे अविद्वान् ब्राह्मणो न सर्वे विद्वांस एव समागता इत्यर्थः अशतानुचरः शतसंख्याकानुचररहितश्च न तथाशब्दश्चार्थे एको वाशब्द एवार्थे ॥ ११ ॥

गो० टी०–अथ तत्रान्नदानसमृद्धिं दर्शयत्यष्टभिः–**न तेष्वित्यादि** । यद्यपि क्रीते सोमे यज्ञान्नं न भोज्यं तथापि सर्वद्रव्यस्य वसिष्ठसात्कृतत्वेन न दोषः तेष्वहस्सु यज्ञियदिनेषु श्रान्तः पिपासितः क्षुधितः बुभुक्षितः न दृश्यते नादृश्यत अशतानुचरः शतशिष्यरहितः ॥ ९ ॥

१२] ति० टी०–**ब्राह्मणा इति** । त्रैवर्णिकोपलक्षणं द्विजत्वात् । नाथवन्तो दासाः । शूद्रा इति यावत् । तापसा अदासाः शैवादिमार्गमाश्रिताः शूद्राः श्रमणा बौद्धसंन्यासिनः । यद्वा श्रमणपदं संन्यास्युपलक्षणम् ॥ १२ ॥

रा० टी०–ब्राह्मणा इति । ब्राह्मणा नित्यं यथेच्छं भुञ्जते नाथवन्तः ब्राह्मणस्वामिकाः क्षत्रियविट्शूद्राश्च यथेच्छं भुञ्जते तापसा ब्रह्मचारिप्रभृतयः भुञ्जते तथा श्रमणाः संन्यासिनोपि भुञ्जते वाशब्देन वर्णाश्रमबहिर्भूतपरिग्रहः तुशब्देन यथेच्छलाभः १२

गो० टी०–ब्राह्मणा इति । नाथवन्तः दासाः शूद्रादय इति यावत् श्रमणाः दिगम्बराः ' श्रमणा वातवसना ' इतिनिघण्टुः । यद्वा ' चतुर्थमाश्रमं प्राप्ताः श्रमणा नाम ते स्मृताः ' इति स्मृतिः ॥ १० ॥

१३–१४] ति० टी०–न तृप्तिरुपलभ्यते । भोज्यसौष्ठवात् । उदरपूर्तावपि रसातिशयलोभेन मानसी तृप्तिर्नोपलभ्यत इत्यर्थः । यद्वा अनिशं भुञ्जानेष्वपि जनेषु यजमानस्य तृप्तिरलंबुद्धिर्नासीदित्यर्थः ॥ १३ ॥ १४ ॥

रा० टी०–वृद्धा इति । वृद्धाः वृद्धतां प्राप्ताः व्याधिता व्याधिग्रस्ताश्च स्त्रीबालाः कन्याश्च चकारेण पुंबालाश्च तथैव भुञ्जते इति पूर्वेणान्वयः । अनिशं निरन्तरं भुज्यमानानां भोज्यमानानां जनानां तृप्तिर्नोपलभ्यते एतेन भोज्यानामतिस्वादुत्वं ध्वनितम् । किञ्च अमानानां गर्वरहितानां भोजनदातृणामनिशं निरन्तरं भुजि भोजनायां भोजनदाने इत्यर्थः अन्तर्भावितण्यर्थकभुजेर्भावे क्विप् । तृप्तिर्नैव लभ्यते ॥ १३ ॥

गो० टी०–वृद्धा इति । व्याधिताः संजातव्याधयः अनिशं भुञ्जमानानां भुञ्जानेष्वपि यजमानस्य तृप्तिः अलंबुद्धिर्नासीदित्यर्थः । यद्वा रस्यतातिशयात् भुक्त्यनन्तरमपि भोजनेच्छा जायत इत्यर्थः ॥ ११ ॥

रा० टी०–अतृप्तिचिह्नमाह–**दीयतामिति** । अन्नं विविधानि वासांसि च दीयतां दीयतामित्यनेन प्रकारेण संचोदिताः अधिकारिभिः प्रेरिता अनेकशः जनास्तत्र यागे तथा चक्रुर्ददुरित्यर्थः ॥ १४ ॥

गो० टी०–**दीयतामिति** । तथा चक्रुः ददुरित्यर्थः ॥ १२ ॥

१५] ति० टी०–अन्नेति लुप्तषष्ठीकं पृथक्पदम् । तस्य सिद्धस्येति पक्वस्येत्यर्थकं विशेषणम् । विधिवत्स्मृशास्त्रोक्तप्रकारेण सिद्धस्येत्यन्वयः ॥ १५ ॥

रा० टी०–अन्नेति । पर्वतोपमाः पर्वततुल्याः अन्नकूटा आमान्नसमूहाः बहवस्तत्र दृश्यन्ते दिवसे दिवसे विधिवत्सिद्धस्यान्नस्य पर्वतोपमसमूहश्च दृश्यते इत्यध्याहृतम् ॥ १५ ॥

गो० टी०–अन्नेति । विधिवत्पाकविधुक्तक्रमेण सिद्धस्य पक्वस्य अन्नेति लुप्तषष्ठीविभक्तिकं पदम् अन्नस्य खाद्यभक्ष्यलेह्यचोष्यभेदभिन्नस्य कूटा राशयः ॥ १३ ॥

१६] ति० टी०–सुविहिताः सुविहितनृप्तिकाः ॥ १६ ॥

रा० टी०–नानेति । नानादेशादनेकविधदेशादनुप्राप्ताः समागताः पुरुषास्तथा स्त्रीगणाः स्त्रीसमूहाश्च महात्मनो राज्ञः तस्मिन्प्रसिद्धे यज्ञे अन्नपानैः सुविहिताः सुतर्पिता आसन्निति शेषः । उपसर्गवशादेतदर्थलाभः किञ्च तृप्तिमत्यन्तं प्राप्ताः प्राप्त्यर्थकहिधातोः कर्तरि निष्ठा किञ्चान्नपानकर्तृकात्यन्तप्राप्तिकर्मीभूता इत्यर्थः । अस्मिन्पक्षे कर्मणि निष्ठा ॥ १६

गो० टी०–नानेति । सुविहिताः सुतर्पिताः ॥ १४ ॥

१७] ति० टी०–अन्नमिति । स्वाद्वन्नम् । भुक्त्वेति शेषः । प्रशंसाकारमाह—' अहो तृप्ताः स्म भद्रं ते ' इति प्र-

१ वापीति गो. रा. पाठः । २ ब्राह्मणस्तत्रेति गो. रा. पाठः । ३ भुंजते तथेति गो. रा. पाठः । ४ स्त्रियो बाला इति गो. पाठः । ५ भुज्य इति रा. पाठः

स्वलंकृताश्च पुरुषा ब्राह्मणान्पर्यवेषयन् । उपासन्ते[1] च तानन्ये सुमृष्टमणिकुण्डलाः ॥ १८ ॥
कर्मान्तरे तदा विप्रा हेतुवादान्बहूनपि । प्राहुः[2] सुवाग्मिनो धीराः परस्परजिगीषया ॥ १९ ॥
दिवसे दिवसे तत्र संस्तरे कुशला द्विजाः । सर्वकर्माणि चक्रुस्ते यथाशास्त्रं प्रचोदिताः ॥ २० ॥
नाषडङ्गविदत्रासीन्नाव्रतो नावहुश्रुतः । सदस्यास्तस्य[3] वै राज्ञो नावादकुशलो[4] द्विजः ॥ २१ ॥
प्राप्ते यूपोच्छ्रये तस्मिन्षड्बैल्वाः खादिरास्तथा । तावन्तो बिल्वसहिताः पर्णिनश्च तथा परे ॥ २२ ॥

शंसां राघवः शुश्रावेत्यन्वयः । यद्वा विधिवत्स्वादु इत्यपि प्रशंसाकारः ॥ १७ ॥

रा० टी०–अन्नमिति । विधिवत् पाकशास्त्रोक्तविधिनिर्मितमतः स्वादु अतिस्वादु अहो विचित्रमन्नमतस्तृप्ताः स्म अति. तृप्तिप्राप्ता वयम् अतस्ते तव भद्रं कल्याणमस्तु इति द्विजर्षभा ब्राह्मणाः प्रशंसन्तीति राघवो महाराजाधिराजो दशरथः शुश्राव इतिरुभयान्वयी हिहेतौ ॥ १७ ॥

गो० टी०–अन्नमिति । अन्नं विधिवत् उपचारवत् स्वादु च अनेन तृप्ताः स्म । अहो इदं वर्णितुं न शक्यमिति द्विजर्षभाः प्रशंसन्ति प्राशंसन् तद्राघवः शुश्राव न तेष्वहःस्वित्यारभ्य प्रशंसाप्रकारो न तु कविवाक्यम् । अनेन ब्राह्मणौ वीणागाथिनौ गायत इत्यारभ्य इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेदित्युक्तस्तुतिश्रवणमुक्तम् ॥ १७ ॥

१८] ति० टी०–स्वलंकृता इति । अनेन राजकृतो यज्ञपरिचारकसत्कारो ध्वनितः । तान्परिवेषयितॄन् । अन्ये तत्सहायभूताः भोक्तृबाहुल्येन परिवेषणस्यल्पसाध्यत्वात् पाकशालातोऽन्नप्रापकास्तत्सहायाः । अत एव तस्य श्रमसाध्यत्वात्पुरुषकर्तृकत्वम् ॥ १८ ॥

रा० टी०–स्वलंकृता इति । स्वलंकृताः शोभनालंकारविशिष्टा एव पुरुषाः ब्राह्मणान्पर्यवेषयन्परिवेषणं चक्रुरित्यर्थः। सुमृष्टमणिकुण्डलाःशोधितमणियुक्तकुण्डलविशिष्टा एव अन्ये परिवेषणकर्तृभ्यो भिन्नाः पुरुषाः तान्परिवेषणकर्तॄनुपासते साहाय्यार्थं तैः सहैव गच्छन्तीत्यर्थः । चशब्दावेवार्थौ ॥ १८ ॥

गो० टी०–स्वलंकृता इति । ब्राह्मणान् ब्राह्मणेभ्यः पर्यवेषयन् भक्ष्यान्नपानादीनिति शेषः । सुमृष्टमणिकुण्डलाः उत्तेजितरत्नकुण्डलाः अन्ये पुरुषाः साहाय्यार्थं तानसेवन्तेत्यर्थः ॥ १६ ॥

१९] ति० टी०–कर्मान्तर इति । एकसवनं समाप्य पुनः सवनान्तरारम्भकालागमात्पूर्वस्मिन्नन्तरालकाले । हेतुवादान्हेतूपन्यासपूर्वकान्वादांश्चक्रुः ॥ १९ ॥

रा० टी०–कर्मेति । तदा यागकाले कर्मान्तरे सवनयोर्मध्ये विश्रान्तिकाले इत्यर्थः।सुवाग्मिनः सुपटुवचनाः धीराः सावधानाः विप्राः परस्परजिगीषया परस्परं स्वस्वविजयकाङ्क्षया बहून् भिन्नभिन्नशास्त्रप्रतिपादितानपि हेतुवादान् जगत्कारणविषयकविवादान्प्राहुः। अपिना यागादिविषयकविवादसंग्रहः॥१९॥

गो० टी०–कर्मान्तर इति । कर्मान्तरे सवनयोरन्तरालकाले धीराः धीमन्तः वाग्मिनः पटुवाचः विप्रा ऋत्विजः परस्परजिगीषया बहून् हेतुवादान् प्राहुः स्म । अनेन ब्रह्मोद्यमुक्तं यथा " किंस्विदासीत्पूर्वचित्तिः " इत्यादि होतृब्रह्मणोः प्रश्नप्रतिवचनानि ॥ १७ ॥

२०] ति० टी०–संस्तरे यज्ञे । प्रचोदिताः । शास्त्रीयैर्ब्रूहिप्रेष्यादिशब्दैः प्रेरिता इत्यर्थः ॥ २० ॥

रा० टी०–दिवसे इति । तत्र तस्मिन्संस्तरे यज्ञे कुशलाः निपुणाः प्रचोदिताः प्रेष्यब्रूहीत्यादिवैदिकशब्दैः प्रेरितास्ते प्रसिद्धाः द्विजा ब्राह्मणाः यथाशास्त्रं सर्वकर्माणि दिवसे दिवसे चक्रुः ' संस्तरप्रस्तराध्वराः ' इत्यमरः ॥ २० ॥

गो० टी०–अथ ऊर्ध्वकाव्यादिदैवत्यानि "द्विनाराशंसनं प्रातः सवनं द्विनाराशंसनं माध्यंदिनं सवनं सकृन्नाराशंसनं तृतीयसवनम्"इति विहितानि त्रिकालकर्माणि दर्शयति दिवसेदिवस इति । दिवसेदिवसे अश्वमेधादेषु प्रत्यहं संस्तरे आस्तीर्णबर्हिषि ' संस्तरौ प्रस्तराध्वरौ ' इत्यमरः । सर्वकर्माणि ऊमादिदैवत्यकर्माणि यथाशास्त्रं दृष्टैः प्रचोदिताः सन्तः चक्रुः । ' ऊमा ऊर्व्याश्च काव्याश्च पितरः सवनत्रये ' नाराशंसनं नाम सकृद्गवि ताप्यायितासादितचमसम् ॥ १८ ॥

२१] ति० टी०–सदस्या विधिदर्शिनः ॥ २१ ॥

रा० टी०–नेति । तस्य प्रसिद्धस्य राज्ञः अत्र यागे सदस्यः द्विजः अषडङ्गवित्नैवासीत् ॥ २१ ॥

गो० टी०–नेति । अत्र यज्ञे अषडङ्गवित्कश्चिन्नासीत् अव्रतश्च कश्चिन्नासीत् अबहुश्रुतश्च कश्चिन्नासीत् तस्य राज्ञः सदस्याः सदसि समवेता द्विजाः अवादकुशला नासन् ॥ १९ ॥

२२] ति० टी०–यूपोच्छ्रये यूपोत्क्षेपणप्रेषकाले । तथा खादिराः । तावन्तः षट्संख्याकाः । बिल्वसहिताः एकैकबिल्वयूपसमीपे स्थिताः । परेऽन्ये पर्णिनः पालाशा यूपाः । तेऽपि पडिति तथाशब्दार्थः ॥ २२ ॥

रा० टी०–प्राप्ते इति । तस्मिन्नश्वमेधे यूपोच्छ्रये यूपानां यज्ञस्तम्भानां उच्छ्रय उद्धृत्य स्थापनं तस्मिन्काले इत्यर्थः। षट् षट्संख्याकाः बैल्वाः बिल्वविकारयूपाः उद्धृत्य स्थापिता इति शेषः। बिल्वसहिताः बिल्वयूपसमीपवर्तिनस्तावन्तः षट्संख्याकाः खादिराः खादिराः खादिरविकारयूपाश्च उद्धृत्य स्थापितास्तथा षट्संख्याकाः परे बैल्वखादिरसाहित्यरहिताः पर्णिनः पलाश-

१ उपासत इति गो. रा. पाठः । २ प्राहुः स्मेति गो. पाठः । ३ सदस्यस्तस्येति रा. पाठः । ४ नावादकुशला द्विजा इति गो.पाठः ।

श्लेष्मातकमयो दिष्टो देवदारुमयस्तथा । द्वावेव तत्र विहितौ बाहुव्यस्तपरिग्रहौ ॥ २३ ॥
कारिताः सर्व एवैते शास्त्रज्ञैर्यज्ञकोविदैः । शोभार्थं तस्य यज्ञस्य काञ्चनालङ्कृता भवन् ॥ २४ ॥
एकविंशतियूपास्ते एकविंशत्यरत्नयः । वासोभिरेकविंशद्भिरेकैकं समलङ्कृताः ॥ २५ ॥

विकारयूपाश्च उद्धृत्य स्थापिताः ' पलाशे किंशुकः पर्णो ' इत्यमरः । पूर्वस्तथाशब्दश्चार्थे ॥ २२ ॥

गो० टी०–अथोपवसथ्यदिनकृत्यं पश्वालम्भं वक्तुं यूपोच्छ्रयणप्रकारमाह–**प्राप्त** इति । श्लोकद्वयमेकान्वयम् । तस्मिन् अश्वमेधे यूपानामुच्छ्रयो यूपोच्छ्रयः उच्छ्रयः उत्क्षेपणमुद्धृत्य स्थापनमिति यावत्।तत्कालोक्त लक्ष्यते'यूपायोच्छ्रीयमाणायानुब्रूहि'इति प्रैषे प्राप्त इत्यर्थः । बिल्वस्य विकारा बैल्वाः "बिल्वादिभ्योऽण् " इत्यण् । बैल्वा यूपाः षट् उच्छ्रिता इति शेषः । खदिरस्य विकाराः खादिराः तथेति समुच्चये खादिरा यूपाश्च तावन्तः षडेव बिल्वसहिता इति खादिराणां बिल्वसमीपवर्तित्वं नतु पर्णिसमीपवर्तित्वमित्युच्यते । षट् खादिरा यथा बिल्वसहिता भवन्ति तथोच्छ्रिता इत्यर्थः । अपरे उक्तेभ्योऽन्ये पर्णिनः पर्णी पलाशः 'पलाशे किंशुकः पर्णी ' इत्यमरः । तत्प्रकृतिकाः पर्णिन इत्युच्यन्ते पर्णिनो यूपाः तथा षट् उच्छ्रिता इत्यर्थः ॥ २० ॥

२३] ति० टी०–श्लेष्मातको रज्जुदालस्तन्मय एको यूपोऽश्वमेधे । दिष्टः उपदिष्ट इत्यर्थः । श्लेष्मातकमयोऽग्रिष्टः इति पाठेऽग्रिष्ठोऽग्र्यभिमुखः।तथा देवदारुमयोऽप्यस्ति यूपः। स च नैकः नापि षट् । किंतु द्वौ । तौ च व्यस्तबाहुभ्यां प्रसारितभुजाभ्यां तावदायामेन परिग्रहः स्वीकारो ययोस्तौ । एवं चैकविंशतिरश्वमेधे यूपा इत्युक्तम् । ते च तत्सूत्रश्रुत्योः प्रसिद्धा इत्यन्यत्र विस्तरः ॥ २३ ॥

रा० टी०–**श्लेष्मातकमय** इति । अग्रिष्टः अग्रिसंमुखवर्ती श्लेष्मातकमयः रज्जुदालविकारयूपः उद्धृत्य स्थापितः एकत्वस्यात्र विवक्षितत्वादयं यूप एक एव देवदारुमयः देवदारुविकारयूपश्च उद्धृत्य स्थापितः अत्रैकत्वस्याविवक्षया तत्संख्याया अनियमे प्राप्ते तां नियमयन्नाह तत्र तस्मिन्यागे देवदारुमयौ द्वावेव विहितौ । तत्परिमाणमाह बाहुव्यस्तपरिग्रहौ बाहुव्यस्ताभ्यां प्रसारितभुजाभ्यां परिग्रहः परिग्रहणं ययोस्तौ दिष्ट इतिपाठे दिष्ट अश्वमेधे उपदिष्ट इत्यर्थः । एवं संकलनया एकविंशतिर्यूपाः संपन्नाः प्रसिद्धाश्चाश्वमेधीयसूत्रश्रुत्योरिति दिक् ॥ २३ ॥

गो० टी०–**श्लेष्मातकमय** इति। राज्जुदालविकार एको यूप उच्छ्रितः देवदारुमयस्तथा देवदारुविकारश्च यूप उच्छ्रितः अत्रैकत्वमविवक्षितं द्वयोः श्रुत्या चोदितत्वात् " राज्जुदालमग्रिष्ठं मिनोति पौतुद्रवाभितो भवतः " इति श्रुतिः । राज्जुदालः श्लेष्मातकः पोतुद्रवौ देवदारू अयमत्र विन्यासक्रमः राज्जुदालोग्रिष्टः अग्रौ तिष्ठतीत्यग्रिष्टः अग्निशब्देनाग्रिस्थानवेदिरुच्यते " अर्द्धमन्तर्वेदि मिनुयादर्धं बहिर्वेदि" इति श्रुतेः । सोऽग्रिष्टः प्रथमयूपः "तानग्रिष्टप्रथमान मन्त्रेण छिनत्तीति" सूत्रात् । तस्य दक्षिणोत्तरपार्श्वयोर्देवदारुयूपौ तेषां त्रयाणां दक्षिणतस्त्रयो बैल्वा उत्तरतस्त्रयः तेषां नवानां दक्षिणतस्त्रयः खादिरा उत्तरतस्त्रयः तेषां पञ्चदशानां दक्षिणतस्त्रयः पालाशाः उत्तरतस्त्रयः प्रथमं पालाशषट्कमन्ते बिल्वषट्कं वा सर्वथा खादिरा एव बिल्वसहिताः न पुनः पालाशाः तमिममर्थं ग्रन्थकारो बिल्वसहिता इत्यमुच्चयत्। आपस्तम्बश्चाम्रत्रयत् " राज्जुदालमेकविंशत्यरत्निं संमिनोति पौतुद्रवाबभितस्त्रयो बैल्वा दक्षिणतस्त्रय उत्तरतस्त्रयः खादिरा दक्षिणतस्त्रय उत्तरतस्त्रयः पालाशा दक्षिणतस्त्रय उत्तरतः" इति । एवं यूपानामुच्छ्रयणकममुक्त्वा तेषामन्तरालप्रदेशविस्तारं दर्शयति–**द्वाविति** । तत्र यूपेषु द्वौद्वौ बाहुव्यस्तपरिग्रहौ विहितौ कृतौ व्यस्तौ बाहू बाहुव्यस्तौ ताभ्यां परिग्रहः स्पर्शो ययोस्तौ द्वौ द्वौ यूपौ व्यस्तबाहुस्पृश्यौ विहितौ व्यायमात्रान्तरप्रदेशाविति्यर्थः । तथाह धर्मनिर्णयकारः ' पण्णवत्यङ्गुलं बाहुदण्डमष्टोत्तरं तु वा । यूपान्तरालं तन्मात्रमश्वमेधे महाक्रतौ"इति॥२१॥

२४] ति० टी०–काञ्चनालंकृता भवन्नित्यत्र अट्-आव-इलान्दसः । शास्त्रं शिल्पशास्त्रं शुल्बशास्त्रं च ॥ २४ ॥

रा० टी०–**कारिता** इति । शास्त्रज्ञैः शास्त्रनिपुणैः यज्ञकोविदैः यागप्रयोगनिपुणैः एते पूर्वोक्ताः सर्वे एकविंशतिर्यूपाः कारिताः यथाशास्त्रं पूर्वं निर्मापितास्ते च तस्य प्रसिद्धस्य यज्ञस्य शोभार्थं काञ्चनालंकृता भवन् आगमशास्त्रस्यानित्यत्वादृविरहः ॥ २४ ॥

गो० टी०–यूपनिर्माणमाह–**कारिता** इति। एते सर्वे यूपाः शास्त्रज्ञैः यज्ञशास्त्रज्ञैः यज्ञकोविदैः यज्ञप्रयोगकुशलैः कारिताः काञ्चनैः काञ्चनपट्टैश्चालंकृताः भवन् " बहुलं छन्दस्यमाङ्योगेऽपि" इत्यडभावः । अलंकारोऽपि किंशास्त्रीयः नेत्याह तस्य यज्ञस्य शोभार्थमिति । यज्ञभूमेः शोभार्थमित्यर्थः ॥ २४ ॥

२५] ति० टी०–' महोच्छ्रायपर्णाहो यूपोऽन्यः सर्वकाञ्चनः । यज्ञे समभवत्तत्र शोभार्थमुपकल्पितः ' इति क्वचित्पाठः । एकेति । अरत्निर्नाम चतुर्विंशत्यङ्गुलयः ॥ २५ ॥

रा० टी०–**एकेति** । एकविंशत्यरत्नयः एकविंशत्यरत्निपरिमितोन्नताः एकविंशतियूपाः एकविंशद्भिः एकविंशत्या वासोभिः एकैकं समलंकृताः एकेन वाससा एकः समलंकृतः अपरेणैकेन वाससा अपरः समलंकृतः एवं क्रमेण सर्वे समलंकृता इत्यर्थः । अरत्निश्चतुर्विंशतिरङ्गुलयः "तथाहि एकविंशत्यरत्नीर-

१ मयस्त्वेक इति गो. मयोग्रिष्ठ इति रा. पाठः । २ एतच्छ्लोकद्वयं गो. पुस्तकेनास्ति ।

विन्यस्ता विधिवत्सर्वे शिल्पिभिः सुकृता दृढाः । अष्टास्रयः सर्व एव श्लक्ष्णरूपसमन्विताः ॥ २६ ॥
आच्छादितास्ते वासोभिः पुष्पैर्गन्धैश्च पूजिताः । सप्तर्षयो दीप्तिमन्तो विराजन्ते यथा दिवि ॥ २७ ॥
इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः । चितोऽग्निर्ब्राह्मणैस्तत्र कुशलैः शिल्पकर्मणि ॥ २८ ॥
स चित्यो राजसिंहस्य संचितः कुशलैर्द्विजैः । गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ॥ २९ ॥

श्वमेधस्य" इति श्रुतिः "चतुर्विंशत्यङ्गुल्योऽरत्निः" इति सूत्रम्। एकविंशतीत्यत्र सुलोप आर्षः। एकैकमिति सामान्ये नपुंसकम् । एकविंशद्विरित्यत्र बहुत्वेकारलोपावार्षौ ॥ २५ ॥

गो० टी०–तेषां संख्याप्रमाणे दर्शयति–एकविंशतीति । ते यूपाः एकविंशति । " सुपांसुलुक् " इत्यादिना सुलोपः । एकविंशत्यरत्नयश्च एकविंशत्यरत्न्युन्नता इत्यर्थः । "एकविंशत्यरत्निरश्वमेधस्य " इतिश्रुतेः । " चतुर्विंशत्यङ्गुल्योरत्निः " इतिसूत्रम् एकविंशद्विरितीकारलोपबहुवचने आर्षे । एकैकमिति सामान्ये नपुंसकम् । एको यूप एकेन वाससेति क्रमेण सर्वेपि वासोभिरलंकृता इत्यर्थः ॥ २३ ॥

२६] ति० टी०–अष्टास्रयः । अस्रिः कोणः । तक्षणविशेषेण श्लक्ष्णस्पर्शवता स्वरूपेण युक्ताः ॥ २६ ॥

रा० टी०–विन्यस्ता इति । शिल्पशास्त्रक्रियाभिज्ञैः विधिवत् यथाविधि विन्यस्ताः संनिवेशिताः सुकृताः शोभनं कृतं क्रिया येषु ते अत एव दृढाः अदार्ढ्यशङ्कारहिताः अष्टास्रयः अष्टकोणयुक्ताः अत एव श्लक्ष्णरूपसमन्विताः एवं सर्वे एकविंशतिः यूपाः ॥ २६ ॥

गो० टी०–यूपस्थापनविशेषमुक्तानुवादपूर्वमाह–विन्यस्ता इति। शिल्पिभिः सुकृताः सुष्ठु कृताः अन्यूनातिरिक्ततया कृता दृढाः सुपरादिदोषरहिताः अष्टाश्रयः अष्टकोटयः ' स्त्रियः पात्यश्रिकोटयः' इत्यमरः । श्लक्ष्णरूपसमन्विताः यूपाभ्यञ्जनेन स्निग्धरूपयुक्ताः सर्व एव विन्यस्ताः स्थापिताः यद्वा प्राप्ते यूपोच्छ्रय इत्यादिश्लोकत्रयमेकान्वयम् । शास्त्रज्ञैः कारिता वैल्वादयः सर्वे एते काञ्चनालंकृताःभवन्तिति यूपनिर्माणमुक्तम् । एकविंशतीत्यनेन संख्याप्रमाणे दर्शिते विन्यस्ता इत्यनेन स्थापनमुच्यते ॥ २४ ॥

२७] ति० टी०–यथा सप्तर्षयो विराजन्ते । तथा यूपा व्यराजन्तेत्यर्थः ॥ २७ ॥

रा० टी०–वासोभिः आच्छादिताः पुष्पैर्गन्धैश्च पूजिताः दीप्तिमन्तः ते प्रसिद्धाः सर्वे दिवि सप्तर्षयो यथा सप्तर्षय इव विराजन्ते शोभन्ते । श्लोकद्वयमेकान्वयि ॥ २७ ॥

गो० टी०–यूपान् वर्णयति–आच्छादिता इति । दिवि सप्तर्षय इव ते यूपा विराजन्ते स्म । दीप्तिमात्रे दृष्टान्तः । सप्तानां सप्तानां वा ॥ २५ ॥

२८] ति० टी०–इष्टका इति । यथान्यायं यथासूत्रमर्धेष्टकामण्डलेष्टकादयश्च कारिताः । शुल्ववद्भिरिति शेषः । अग्निरन्याधारभूतो देशः । स ब्राह्मणैरिष्टकाभिश्चितः । बद्ध इत्यर्थः । 'शुल्वकर्मणि' इति पाठे शुल्वमूत्रोक्तकर्मणीत्यर्थः । केचित्तु तत्रेष्टकाबद्धे देशेऽग्निश्चितः स्थापित इत्यर्थ इत्याहुः ॥ २८ ॥

रा० टी०–इष्टका इति । तत्र प्रसिद्धे शुल्वकर्मणि यज्ञकर्मणि कुशलैः निपुणैः ब्राह्मणैः यथान्यायं यथोक्तं प्रमाणतः शास्त्रोक्तपरिमाणतः इष्टकाः कारिताः अग्निः अग्निस्थापनयोग्यो देशश्च चितो निर्मितः ' शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसंनिधौ ' इति वैजयन्ती । क्वचिद्यज्ञकर्मणीति पाठः ॥ २८ ॥

गो० टी०–यूपोच्छ्रयपूर्वभाविचयनमाह–इष्टका इति । शुल्वकर्मणि यज्ञकर्मणि 'शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ' इति वैजयन्ती । प्रकृते चयनं विवक्षितम्। शुल्वमेकसरा रज्जुः। शुल्वसाध्यं कर्म शुल्वं चयनम् अत एवाह रुद्रदत्तः 'रज्जूनां विहरणसाधनत्वादेतत्कर्म शुल्वमाचष्ट आचार्यः ' इति । तत्र कुशलैर्ब्राह्मणैर्यथान्यायं यथाशास्त्रं प्रमाणतः प्रमाणेन विशिष्टा इष्टकाः कारिताः । अत्र सूत्रम् " पादमात्रोर्द्धमात्रोणुकमात्रक्रुरे खादक्षिणावृता सव्याष्टतारुव्यालिखिताश्च " इति अग्निः अग्न्याधारखेदिः चितः ताभिरिष्टकाभिः कृतचयनः अभूत् ॥ २६ ॥

२९] ति० टी०–स चित्योऽग्निः सं चितः स्थापितः। कथं संचित इत्यत्राह—गरुडो गरुडसंस्थानः । रुक्मपक्षः । "सहस्रं हिरण्यशल्कैः प्रतिदिशमग्निं प्रोक्षति" इति सूत्राद्रुक्मपक्षत्वमिति केचित् । अत्र पक्षे 'त्रिगुणोऽष्टादशात्मकः ' इत्यस्य असामञ्जस्यं मत्वा चितदेशविशेषणानीमानि । स्वर्णेष्टकाभिः पक्षनिर्माणाद्रुक्मपक्षत्वमित्यन्ये । त्रिगुणः प्रस्तारः । तदेवाह–अष्टादशात्मक इति । षट् चितयो भवन्तीति प्रकृतौ उक्तेरिति भावः ॥ २९ ॥

रा० टी०–स चित्य इति । कुशलैर्द्विजैः राजसिंहस्य निखिलराजशिरोमणेर्दशरथस्य स चित्यः चयननिष्पादितोग्निः संचितः यथाशास्त्रं स्थापितः संचयनप्रकारं बोधयंस्तद्विशेषणान्याह गरुडः गरुडाकृतिः प्रसारितोभयपक्षपुच्छत्वेन अधोवीक्षमाणत्वेन प्राङ्मुखस्थित्या गरुडाकृतित्वं रुक्मपक्षः सुवर्णमयपक्षविशिष्टः तत्त्वञ्च सुवर्णेष्टकाभिः पक्षयोर्निर्माणात् त्रिगुणः त्रिगुणितप्रस्तारविशिष्टः प्रकृतौ षट्प्रस्तारा अत्राष्टादश प्रस्तारा इत्यर्थः अत एवाष्टादशात्मकः वैशब्दः प्रसिद्धियोतकः रुक्मपक्षत्वे सूत्रमपि " सहस्रं हिरण्यशकलैः प्रतिदिशमाग्निं चिनोति " इति गरुडाकृतित्वे श्रुतिः "श्येनचित्तं चिन्वीत" इति तत्र सुपर्णोसि गरुत्मानिति मन्त्रात् श्येनशब्दो गरुडार्थकः ॥ २९ ॥

१ अष्टाश्रय इति गो. पाठः । २ शुल्वेति गो. रा. पाठः ।

नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम् । उरगाः पक्षिणश्चैव यथाशास्त्रं प्रचोदिताः ॥ ३० ॥
शामित्रे तु हयस्तत्र तथा जलचराश्च ये । ऋषिभिः[1] सर्वमेवैतन्नियुक्तं शास्त्रतस्तदा ॥ ३१ ॥
पशूनां त्रिशतं तत्र यूपेषु नियतं तदा । अश्वरत्नोत्तमं तत्र राज्ञो दशरथस्य ह[2] ॥ ३२ ॥
कौसल्या तं हयं तत्र परिचर्य समन्ततः । कृपाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ ३३ ॥

गो० टी०–चयनसंस्थानमाह–**स चित्य इति** । सः चित्यः चयननिर्वर्त्योऽग्निः राजसिंहस्य राजश्रेष्ठस्य अनेन पूर्वमनेकधानुष्ठितकनुत्वं सूच्यते। कुशलैः रीतिभेदं विना चयननिर्माणसमर्थैः द्विजैः ब्राह्मणैः ऋत्विग्भिः संचितः सम्यग्यथाशास्त्रं चितः । कथं चित इत्यत्राह–**गरुड इति** । गरुडः गरुडाकारः पक्षौ पुच्छं च प्रसार्यार्धो वीक्षमाणः प्राङ्मुखं तिष्ठन् गरुड इव स्थितः । "श्येनचितिं चिन्वीत" इतिश्रुतौ श्येनशब्दो गरुडपर एव "सुपर्णोसि गरुत्मान्" इति मन्त्रलिङ्गात् । यद्वा गरुडः गरुडप्रतिकृतिः "जीविकार्थे चापण्ये" इति वासुदेवादिवत्प्रतिकृतौ विहितस्य कनो लुप् । रुक्मपक्षः स्वर्णगर्भपक्षः । "सहस्रं हिरण्यशकलैः प्रतिदिशमग्निं प्रोक्षति" इति सूत्रात् त्रिगुणः त्रिगुणप्रस्तारः प्रकृतौ षट्प्रस्तारात्मकस्य चित्याग्नेरश्वमेधे त्रैगुण्यविधानात् । "षट् चितयो भवन्ति" इतिश्रुतेः । "त्रिस्तावोग्निर्भवतीत्यश्वमेधे विज्ञायते"इति सूत्राच्च । अत एवाष्टादशात्मकः अष्टादशप्रस्तारात्मकः । ननु षट्प्रस्तारात्मकस्य चित्यस्य त्रैगुण्यविधानेनैव अष्टादशप्रस्तारात्मकत्वं सिद्धं किं पुनस्तदुपदेशेन।उच्यते। त्रिगुण इत्युक्ते पञ्चदशात्मकत्वं प्रतीयते तैत्तिरीयके "पञ्च चितयो भवन्ति" इति विधानात् । तदिदं वाजसनेयकपञ्चावलम्बनं द्योतयितुमष्टादशात्मकत्वोक्तिः एवंभूतश्चित इत्यन्वयः ॥ २७ ॥

३०] **ति० टी०**–यथाशास्त्रम् 'इन्द्राय राज्ञे' इत्याद्यनुवाकैः प्रतिपादिताः ॥ ३० ॥

रा० टी०–नियुक्ता इति । तत्तद्दैवतं यथोक्तेन्द्रादिदैवतमुद्दिश्य तत्र तेषु यूपेषु प्रचोदिताः शास्त्रविहिताः पशवः उरगाः सर्पाश्च पक्षिणश्च यथाशास्त्रं यथाशिक्षं नियुक्ता निबद्धाः । एवश्चार्थे ॥३०॥

गो० टी०–अथ पूर्वोक्तेषु यूपेषु पशुनियोजनमाह–**नियुक्ता इति** । यथाशास्त्रं शास्त्रमनतिक्रम्य प्रचोदिता विहिताः पशव उरगाः पक्षिणश्च तत्तद्दैवतमिन्द्रादिदेवतामुद्दिश्य तत्र यूपेषु नियुक्ता बद्धाः । यूपेष्वित्यारोकाणामुपलक्षणम् "यूपेषु ग्राम्यान्पशूंस्त्रियुञ्जन्ति । आरोकेष्वारण्यान् धारयन्ति" इतिश्रुतेः । अत्राशक्यानामुरगादीनां नियोजनं पञ्जरद्वारा एते च पशवस्तत्तद्देवताश्च "इन्द्राय राज्ञे सूकरः" इत्याद्यनुवाकेषु प्रतिपाद्यन्ते२८

३१] **ति० टी०**–शामित्रे मारणविशसनादिकर्मणि॥३१॥

रा० टी०–शामित्र इति । तत्र तस्मिन्शामित्रे विहितहिंसाविशसनादिकर्मणि हयोऽश्वः शास्त्रतः शास्त्रोक्तत्वेनैवानयनयोग्या ये जलचराः कूर्मादयस्ते सर्वे आनीता एव सन्तीति शेषः । तदा तस्मिन् काले एव एतत्सर्वमानीतहयादि शास्त्रतः शास्त्रविधानत एव ऋत्विग्भिः नियुक्तं यूपेषु निबद्धम् । तुचतथाशब्दा एवार्थकाः । शास्त्रत इत्युभयान्वयि ॥ ३१ ॥

गो० टी०–तत्र "पर्यग्निकृतानारण्यानुत्सृजन्त्यहिंसायै" इतिश्रुतेरारण्यान्पशून् पर्यग्निकृतानुत्सृज्य ग्राम्याणां पशूनां शामित्रे नियोजनमाह–**शामित्रे त्विति** । तुशब्देनारण्येभ्यो वैलक्षण्यमुच्यते हयः अश्वमेधीयः ये जलचराः कूर्मादयः ते च तदन्यत्सर्वं च ग्राम्यपशुजातं तत्र यज्ञे तदा विशसनकाले ऋत्विग्भिः शामित्रे विशसनकर्मणि शास्त्रतो नियुक्तम् ॥ २९ ॥

३२] **ति० टी०**–नियतं बद्धम् । अश्वरत्नेषूत्तमं श्रेष्ठम् । नियतमित्यनुकर्षः ॥ ३२ ॥

रा० टी०–नियोजितपशुसंख्यामाह–**पशूनामिति** । तदा तस्मिन्काले तत्र तेषु यूपेषु पशूनां त्रिशतं नियतं बद्धम् । राज्ञः राजराजस्य दशरथस्य अश्वरत्नोत्तमं च तत्र नियतं बद्धम्।अश्वरत्नोत्तरमित्यपि क्वचित्पठ्यते अत्र त्रिशतमित्युक्तिः प्रधानपश्वपेक्षया अत एव पञ्चशतैकोनविंशतिप्रतिपादकभास्करग्रन्थेन न विरोधः ॥ ३२ ॥

गो० टी०–यूपनियुक्तानां पशूनां संख्यामाह–**पशूनामिति**। तत्र यूपेषु पशूनां त्रिशतं नियतं बद्धं तदा राज्ञो दशरथस्य अश्वरत्नोत्तममश्वश्रेष्ठोनमं च नियतं त्रिशतमिति प्रधानापेक्षया अधिकानामपि श्रवणात् । तथाह भास्करः ' अश्वमेधपशुसंख्या तु पञ्चशतमेकोनविंशतिश्च ' इति । अश्वरत्नोत्तर इति पाठे रत्नोत्तरो रत्नप्रधानोश्व इति परनिपातेन योजना । तथाह भास्करः ' सौवर्णान् महिषी मणीन् दशशतानस्यावयत्यावहाद्भावाता वयते मर्णान् दशशतान् प्रत्यग्वहाद्राजतान् । प्रत्यक्श्रोणिसहस्रमेव परिवृत्यस्यावयेन्मौक्तिकान् सख्यः शङ्खमणीनथैषु समुपग्रथ्नन्त्यविस्रस्तयः' इति । आवयति ऊतान्करोति ॥ ३० ॥

३३] **ति० टी०**–कौसल्येति । परिचर्य प्रोक्षणादिना संस्कृत्य । त्रिभिः कृपाणैरसिभिरेनमश्वं विशशासास्य विशसनं कृतवती । "महिष्यश्वास्यासिना कल्पयन्ति" इति सूत्रात् ॥३३॥

रा० टी०–कौशल्येति । कौशल्या महिषी तत्र शामित्रकर्मणि तं नियतमेनं हयं समन्ततः परिचर्य प्रोक्षणादिना संस्कृत्य परमया मुदा परमहर्षेण त्रिभिः कृपाणैः असिभिः विशशास कौशल्येति परन्यन्तरस्याप्युपलक्षकम् । तथाच सूत्रम् "महिष्यश्वास्यासिना कल्पयन्ति" इति ॥ ३३ ॥

---

१ ऋत्विग्भिरिति गो. रा. पाठः । २ रथस्य चेति गो. रा. पाठः ।

पतत्रिणा तदा सार्धं सुस्थितेन च चेतसा । अवसद्रजनीमेकां कौसल्या धर्मकाम्यया ॥ ३४ ॥
होताध्वर्युस्तथोद्गाता हयेन समयोजयन् । महिष्या परिवृत्त्यार्थं वावातामपरां तथा ॥ ३५ ॥
पतत्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः । ऋत्विक्परमसंपन्नः श्रपयामास शास्त्रतः ॥ ३६ ॥

गो० टी०–मृताश्वोपचारमाह–**कौसल्येति** । कौसल्या महिषी तत्र शामित्रप्रदेशे तं मृतं हयं समन्ततः परिचर्य प्रदक्षिणाप्रदक्षिणं संचार्य अत्र सूत्रम् " दक्षिणान् केशपक्षानुद्गृह्य सव्यान् प्रगृह्य दक्षिणानरूनाघ्राना इदं मध्विदं माध्विति जपन्त्यः स्त्रियो महिष्यश्चाश्वतूवरगोमृगाणां परिक्रम्य सव्यानुद्गृह्य दक्षिणान् प्रगृह्य सव्यानरूनाघ्राना सक्थ्यारवधून्वन्त्यस्त्वप्रदक्षिणं परिक्रम्य प्रदक्षिणमन्त्रतो यथापुरस्तान्नवकृत्वः संपादयन्ति ' इति कृपाणैस्त्रिभिः सौवर्णीभिः सूचीभिः एनं परमया मुदा निरन्तरमधिकश्रद्धया विशशास असिपथान् कल्पयामास कौसल्येति इतरासामुपलक्षणम् । सौवर्णीभिः सूचीभिः " पत्न्योश्चस्यापि पथान् कल्पयन्ति प्राक्कोडात् प्रत्यञ्चीभिः" इति सूत्रात् क्रोडं वक्षः ॥ ३१ ॥

३४] **ति० टी०–पतत्रिणेति**। पुराश्वानां पक्षाः सन्तीति प्रसिद्धयैवं वादः । पतत्रिणा गरुडवेगेनेत्यर्थ इत्यन्ये । सुस्थितेन स्थिरेण चेतसोपलक्षिता सती कौसल्या धर्मेच्छयैकां रजनीमश्वेन सहावसत् ॥ ३४ ॥

रा० टी०–पत्न्याः कर्तव्यान्तरमाह–**पतत्रिणेति** । तदा विशसनानन्तरकाले सुस्थितेन चेतसा युक्ता कौशल्या पतत्रिणा पक्षविशिष्टेनाश्वेन सार्द्धं धर्मकाम्यया एकां रजनीमवसत् पतत्रिणा गरुडसदृशवेगविशिष्टेनेति केचित् ' पतत्रीपक्षितुरगौ ' इत्यमरः ॥ ३४ ॥

गो० टी०–महिष्याः कर्तव्यान्तरमाह–**पतत्रिणेति**। तदा विशसनोत्तरकाले कौसल्या धर्मकाम्यया धर्मसिद्धीच्छया काम्यजन्तादकारप्रत्यये टाप्। सुस्थितेन सुस्थिरेण चेतसा उपलक्षिता सती शवस्पर्शकुत्सारहिता सतीत्यर्थः । पतत्रिणा अश्वेन सार्द्धा मेकां रजनीमवसत् । अत्र सूत्रम् 'अम्बे अम्बाल्यम्बिके' इति जपन्ती महिष्यश्वमुपसंगम्य " गणानां त्वा गणपतिं हवामहे " इत्यभिमन्त्र्य "उत्सक्थ्योर्गुदं धेहि" इति प्रजनने प्रजननं संनिधायोपविशति "सुभगे कांपीलवासिनि" इति क्षौमेन वाससाध्वर्युर्महिषीमधं च प्रच्छाद्य " वृषावां रेतोधा रेतो दधातु " इति जपत्याग्नीध्र एतां रात्रिमृत्विजो यजमानं जागरयन्तीति ३२

३५] **ति० टी०**–अथ होत्रादयो महिष्या कृताभिषेकया परिवृत्त्या राज्ञो भोगाद्बहिष्कृतया दास्या च सह वावातां राज्ञो वल्लभां भुजिष्यामश्वेन समयोजयन्निति संबन्ध इति केचित् । अपरे तु वावाताशब्दो राज्ञो मध्यमजातीयद्वितीयभार्यावाची। तदुक्तमैतरेयब्राह्मणभाष्ये तृतीयपञ्चिकास्थद्वाविंशतिखण्डस्थवावातेतिप्रतीकव्याख्यानावसरे–'राज्ञां हि त्रिविधाः स्त्रियः, उत्तममध्यमाधमजातीयाः। तासां मध्य उत्तमजातेः क्षत्रियाया महिषीति नाम, मध्यमजातेर्वैश्याया वावातेति, अधमजातेः शूद्राया: परिवृत्तिरिति' । अत एवाश्वलायनसूत्रे दशमाध्यायेऽष्टमखण्डस्थवावातेतिप्रतीकं गृहीत्वा द्वितीया भार्येति व्याख्यातं नारायणवृत्तिकृता ॥ ३५ ॥

रा० टी०–रात्रिवासौत्तरकालिकं होत्रादिकृत्यमाह–**होतेति**। होत्रादयस्त्रयः तथाशब्देन ब्रह्मा च महिष्या कृताभिषेकया परिवृत्त्या उपेक्षितया च सहितां वावातां भोगिनीम् अपरां पालाकलीं च हयेन अश्वेन समयोजयन् अश्वाङ्गसंयोजनरूपविधिं कारयामासुरित्यर्थः। तथाशब्दश्चार्थे।एतेन "महिषीं ब्रह्मणे ददाति वावातां होत्रे परिवृत्तिमुद्गात्रे पालाकलीमध्वर्यवे " इति सूत्रापण्यस्य पत्नीदानपरत्वेन व्याख्यानं प्रत्युक्तम् दानस्यात्रानुक्तेः अध्याहारे गौरवाच्च। हस्तेन समयोजयन्निति पाठे तु हयहस्तेनेत्यर्थः पशूनामग्रिमपादयोर्हस्तत्वात् अत एव हयेन समयोजयन्निति पाठेऽपि न विरोधः ' कृताभिषेका महिषी परिवृत्तिरुपेक्षिता । वावाता भोगिनी पात्रप्रदा पालाकली मता ' इति वैजयन्ती ॥ ३५

गो० टी०–तादात्विकदक्षिणामाह–**होतेति**। तथेत्यनुक्तसमुच्चयार्थः।ब्रह्मा चेत्यर्थः । एते ब्रह्मादयश्चत्वारः प्रधाना ऋत्विजो महिषीपरिवृत्तिभ्यां सह वावातामपरां पालाकलीं च राज्ञो दक्षिणार्थं परिगृह्य हस्तेन समयोजयन् रमणवद्धस्तेनागृह्णन्नित्यर्थः । अत्र श्रुतिः "अम्बे अम्बाल्यम्बिके"इति "पत्नीमुदानयति" इत्यादि उदानयति हस्तेन गृह्णातीत्यर्थ इति भास्करः। सूत्रं च "महिषीं ब्रह्मणे ददाति वावातां होत्रे परिवृत्तिमुद्गात्रे पालाकलीमध्वर्यवे " इति । पश्चात्प्रतिनिधिद्रव्यदानेन निवर्त्येरन् 'कृताभिषेका महिषी परिवृत्तिरुपेक्षिता। वावाता भोगिनी पात्रप्रदा पालाकली मता' इति वैजयन्ती ॥ ३३ ॥

३६] **ति० टी०**–वपां चन्द्राख्यं मेदः । चन्द्रं नाम मेदोऽस्ति । 'तदुद्धरति नास्य वपा विद्यते ' इति सूत्रात् । परमेण श्रौतप्रयोगचातुर्येण संपन्नो युक्तः॥ ३६ ॥

रा० टी०–**पतत्रिण इति** । नियतेन्द्रियः यतचित्तः परमसंपन्नः श्रौतप्रयोगादिनिपुणः ऋत्विक् तस्य विधिना हिंसितस्य पतत्रिणोऽश्वस्य वपां चन्द्रापरनामकं मेदः उद्धृत्य निस्सार्य शास्त्रतः यथाशास्त्रं श्रपयामास पपाच ॥ ३६ ॥

गो० टी०–**पतत्रिण इति** । तस्य पतत्रिणः अश्वस्य 'पतत्री पक्षितुरगौ ' इत्यमरः । वपां वपास्थानीयां तेजनीम् । " नाश्वस्य वपा विद्यते " इतिसूत्रात् " नान्येषां पशूनां तेजन्या अवद्यन्त्यवद्यन्त्यश्वस्य " इतिश्रुतेश्च उद्धृत्य आदाय नियतेन्द्रियः एकाग्रः परमसंपन्नः परमेण प्रयोगचातुर्येण संपन्न

१ हस्तेनेति गो. पाठः । २ वृत्त्या चेति गो. रा. पाठः ।

धूमगन्धं वपायास्तु जिघ्रति स्म नराधिपः । यथाकालं यथान्यायं निर्णुदन्पापमात्मनः ॥ ३७ ॥
हयस्य यानि चाङ्गानि तानि सर्वाणि ब्राह्मणाः । अग्नौ प्रास्यन्ति विधिवत्समस्ताः षोडशर्त्विजः ॥ ३८ ॥
प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः । अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते ॥ ३९ ॥
त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः । चतुष्टोममहस्तस्य प्रथमं परिकल्पितम् ॥ ४० ॥
उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरम् । कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥ ४१ ॥

ऋत्विक् अध्वर्युः शास्त्रतः श्रपयामास पपाच । श्रा पाके शास्त्रं च स्वयमेव वक्ष्यति प्लक्षेति ॥ ३४ ॥

३७] ति० टी०–नराधिपो दशरथः ॥ ३७ ॥

रा० टी०–वपाहोमं व्यञ्जयन्नाह–धूमेति । नराधिपो दशरथः वपायाः धूमगन्धं यथाकालं विहितकालमनतिक्रम्यै यथान्यायं यथाविधि आत्मनः पापं प्रकटपुत्रवियोगहेतुत्वेन प्रतीयमानाविघ्नाविशेषं निर्णुदन् दूरीकुर्वन् जिघ्रति स्म। तु शब्दः एवार्थे ॥ ३७ ॥

गो० टी०–अथ वपाहोमं सूचयन्नाह–धूमेति । नराधिपः दशरथः यथाकालं होमकालमनतिक्रम्य यथान्यायं यथाशास्त्रमात्मनः पापं निर्णुदन् निवर्तयन् सन् वपाया धूमगन्धं जिघ्रति स्म ॥ ३६ ॥

३८] ति० टी०–हयस्येति । सर्वाणि ब्राह्मणा इत्यत्र गुरोरपि लघूच्चारणतया लघुकार्यकरत्वस्य च्छन्दःशास्त्र उक्तत्वात्र च्छन्दोभङ्गः ॥ ३८ ॥

रा० टी०–वपाहवनकृत्यं बोधयित्वाङ्गहवनमाह–हयस्येति । हयस्य यानि अङ्गानि तानि सर्वाणि समस्ताः संमिलिताः षोडशर्त्विजः ब्राह्मणाः अग्नौ विधिवत्प्रास्यन्ति ॥ ३८ ॥

गो० टी०–वपाहोममुक्त्वा अङ्गहोममाह–हयस्येति । ब्राह्मणा इत्यत्र गुर्वक्षरमार्षम् । सर्वाणीत्यनेन सर्वस्य हुतत्वेन शेषभक्षणं नास्तीत्युक्तम् । अङ्गहोमफलं श्रूयते " अङ्गे अङ्गे वै पुरुषस्य पाप्मोपश्लिष्टः अङ्गादङ्गादेवैनं पाप्मनस्तेन मुञ्चति " इति यजमानस्य सर्वं पापं निवर्तत इत्यर्थः ॥ ३६ ॥

३९] ति० टी०–प्लक्षेति । अन्येषामश्वमेधातिरिक्तयज्ञानां पाशुकं हविः प्लक्षशाखासु निधायावदीयते । अश्वमेधे प्रधानस्य पशोरश्वस्य हविर्भागो वैतसे कटे निधायावदातव्य इष्यते ॥ ३९ ॥

रा० टी०–अवदाने शाखानियममाह–प्लक्षेति । अन्येषामश्वमेधभिन्नानां यज्ञानां हविः देवतोद्देश्यकपशुविशेषः प्लक्षशाखासु क्रियते धृत्वा अवदीयते अश्वमेधस्य यज्ञस्य भागः, देवतोद्देश्यकपशुविशेषः वैतसे वेतसशाखावस्तुनि क्रियते धृत्वा अवदीयते इष्यते । इत्याचार्यैर्वाख्यत इत्यर्थः । अत्रार्थे श्रुतिः " प्लक्षशाखायामन्येषां पशूनामवयन्ति वैतसशाखायामश्वस्य " इति । एतेन वैतसे कटे इत्यर्थो निर्मूलः ॥ ३९ ॥

गो० टी०–पूर्वं शास्त्रतः श्रपयामासेत्युक्तं तदवदानमाह–प्लक्षेति । अन्येषां यज्ञानां संबन्धि हविर्वपा प्लक्षशाखासु क्रियते अवदीयते अश्वमेधस्य यज्ञस्य भागः हविर्भागः वैतसः वैतसे कटे अवदातव्यो भवति शैषिकोण् । अत्र यज्ञशब्देन पशवो लक्ष्यन्ते तथा च श्रुतिः "प्लक्षशाखायामन्येषां पशूनामवयन्ति वेतसशाखायामश्वस्य" इति । अत्र वेतसशाखाशब्दो वैतसकटपरः यद्वा वेतसस्य शाखा वैतसी वैतस्यां संस्कृतो वैतसः "यस्येति च" इतीकारलोपः । वैतसकटस्तु पश्चात्सादनार्थः " वैतसः कटो भवति अप्सु योनिर्वा अश्वः अप्सुजो वेतसः स्व एवैनं योनौ प्रतिष्ठापयति" इतिश्रुतेः । " वैतसकटेऽश्वं प्राञ्चमासादयति" इति सूत्राच्च अतो वैतसकटे वपावदानमिति व्याख्यानं चिन्त्यम् ३७

४०] ति० टी०–त्र्यह इति । "अश्वमेधस्य त्रीणि सवनीयान्यहानि" इति कल्पसूत्रेण तन्मूलब्राह्मणैश्चाश्वमेधस्त्र्यहःसंख्यात उक्तः । सवनीयाह्नां प्राधान्यात् । तानि त्र्यहोक्तत्राणि गणयति । चतुष्टोमशब्देनाग्निष्टोमः ॥ ४० ॥

रा० टी०–अश्वमेधसाधकदिनसंख्यामाह–त्र्यह इति । कल्पसूत्रेण ब्राह्मणैस्तत्कारणभूतब्राह्मणवाक्यैश्च अश्वमेधः त्र्यह संख्यातः । अत्राहःशब्देन यथोक्ताहःसाध्यसवनानि उच्यन्ते । एवं च त्रीणि यथोक्ताहस्साध्यसवनानि यस्मिन् "अच्प्रत्यन्वव०" इत्यत्राजिति योगविभागादच् । तान्यहान्येव पृथक्कृत्याह तस्य सवनत्रयात्मकयागस्य प्रथममहः तत्साध्यसवनं चतुष्टोमं परिकल्पितं कथितम् द्वितीयमहस्साध्यसवनमुक्थ्यं संख्यातं कथितम् । उत्तरं ततीयमतिरात्रं तथा संख्यातम् ॥ ४० ॥

गो० टी०–अत्र सवनीयदिनानि कतीत्याकाङ्क्षायामाह–त्र्यह इति।"अश्वमेधस्य त्रीणि सवनीयान्यहानि"इतिकल्पसूत्रेण ब्राह्मणैस्तन्मूलभूतब्राह्मणवाक्यैश्च अश्वमेधः त्र्यहः संख्यातः अश्वमेधस्यानेकाहसाध्यत्वेऽपि सवनीयाहानां प्राधान्यात्तद्वहः त्रीणि अहानि यस्य स त्र्यहः"अच्प्रत्यन्वव०"इत्यत्र योगविभागादच् । इदमर्द्धमेकं वाक्यम् । तान्यहानि परिगणयति–चतुष्टोममिति । त्रिवृत्पञ्चदशः सप्तदश एकविंश इति स्तोमचतुष्टययुक्तत्वादग्निष्टोमश्चतुष्टोम इत्युच्यते । तदनुष्ठानयुक्तत्वात्तद्व्यपदेशः " एकविंशोक्थ्ययुक्तत्वादुक्थ्यम् " इतिज्योतिष्टोमस्य द्वितीया संस्था तद्युक्तं द्वितीयमहः सर्वस्तोमोऽतिरात्रः तद्युक्तमुत्तरमहः द्वितीयादुत्तरं तृतीयमह इत्यर्थः ॥ ३८ ॥

४१] ति० टी०–उत्तरं तृतीयशास्त्रदर्शनाद्विहिता बहवः प्रधानाः क्रतवस्तत्र कारिताः ॥ ४१ ॥

१ समन्त्रा इति गो. पाठः ।

ज्योतिष्टोमायुषी चैवमतिरात्रौ च निर्मितौ । अभिजिद्विश्वजिच्चैवमाप्तोर्यामौ महाक्रतुः ॥ ४२ ॥
प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः । अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम्॥४३॥
उद्गात्रे तु तथोदीचीं दक्षिणैषा विनिर्मिता । अश्वमेधे महायज्ञे स्वयंभूविहिते पुरा ॥ ४४ ॥
क्रतुं समाप्य तु तदा न्यायतः पुरुषर्षभः । ऋत्विग्भ्यो हि ददौ राजा धरां तां कुलवर्धनः ॥४५॥
एवं दत्त्वा प्रहृष्टोऽभूच्छ्रीमानिक्ष्वाकुनन्दनः । ऋत्विजस्त्वब्रुवन्सर्वे राजानं गतकिल्बिषम् ॥४६॥
भवानेव महीं कृत्स्नामेको रक्षितुमर्हति । न भूम्या कार्यमस्माकं न हि शक्ताः स्म पालने॥४७॥

रा० टी०–यागान्तराण्यपि कृतवानिति वर्णयन्नाह–कारिता इति । तत्र अश्वमेधसमाप्युत्तरकाले शास्त्रदर्शनात् शास्त्रावलोकनमाश्रित्य विहिताः कर्तव्यत्वेन बोधिता बहवः अन्येपि यज्ञाः कारिता महाराजेन संपादिताः ॥ ४१ ॥

गो० टी०–एवमश्वमेधस्य व्यहत्वेन त्रयाणां कर्तव्यत्वेपि प्रकृतेऽश्वमेधे शास्त्रान्तरदर्शनात् विहिता अन्येपि बहवः क्रतवो राज्ञा कारिता इत्याह–कारिता इत्यर्धेन ॥ ३९ ॥

४२] ति० टी०–तानाह–ज्योतिरित्यादि । आयुरायुष्टोमः । अतिरात्राविति द्विवचनादतिरात्रस्य द्विःप्रयोगः । तथा आप्तोर्यामाविति । महाक्रतुरिति जातावेकवचनम् । एते महाक्रतव इत्यर्थः ॥ ४२ ॥

रा० टी०–तानेव गणयन्नाह–ज्योतिष्टोमेति । ज्योतिष्टोमायुषी अग्निष्टोमायुष्टोमौ प्रथमद्वितीयौ अतिरात्राविति द्विवचनान्तेनातिरात्रद्वयलाभः तृतीयचतुर्थौ चेत्यर्थः । निर्मितौ विधिना संपादितौ पञ्चमोऽभिजिच्च षष्ठो विश्वजिच्च आप्तोर्यामौ सप्तमाष्टमौ च महाक्रतुः एते महाक्रतव इत्यर्थः ॥ ४२ ॥

गो० टी०–के ते क्रतव इत्यपेक्षायामाह–ज्योतिष्टोमेति । अतिरात्राविति द्विवचनेन तस्यावृत्तिरुच्यते विनिर्मितौ अनुष्ठितौ अन्यत्रापि विभक्तिविपरिणामेनायं शब्द अनुषज्यताम् । उक्तदिनत्रयादुत्तरेष्वहस्सु ज्योतिष्टोमादयः षट् क्रतवः कारिता इत्यर्थः । शास्त्रान्तरे ज्योतिष्टोमादीनामपि विहितत्वेन षोडशीग्रहणवत्तेषामप्युपाने महानभ्युदय इति मन्वानेन राज्ञा तेऽपि कारिता इत्यर्थः । अत्र चयनपशुपोळ्यपशुनियोजनवपाहोमचतुष्टोमसवनानि क्रमेण वक्तव्यानीति तत्क्रमेण श्लोकाः पठितव्याः । व्युत्क्रमपाठो लेखकप्रमादकृतः ऋषिरेव वा क्रममविवक्षन् प्रणिनाय ॥ ४० ॥

४३] ति० टी०–प्राचीमिति ॥ ४३ ॥

रा० टी०–दक्षिणाप्रकारमाह–प्राचीमित्यादिभिः । पुरा पूर्वं स्वयंभूविहिते ब्रह्मणा प्रकटीकृते महायज्ञे यागश्रेष्ठे हयमेधेऽश्वमेधे स्वकुलवर्द्धनो राजा प्राचीं दिशं होत्रे ददौ प्रतीचीं पश्चिमां च दिशं अध्वर्यवे ददौ दक्षिणां दिशं ब्रह्मणे ददौ उदीचीमुत्तरां च दिशमुद्गात्रे तथा ददौ एषा सर्वदिग्दानरूपा दक्षिणा विनिर्मिता सूत्रे उक्ता द्वयोरेकत्रान्वयः । तथा च सूत्रम् 'प्रतिदिशं ददाति प्राची दिक् होतुः दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुः' इति। यागस्य पूर्वं ब्रह्मनिष्पाद्यत्वे श्रुतिः " प्रजापतिरश्वमेधमसृजत " इति ॥ ४३ ॥ ४४ ॥

गो० टी०–अथ दक्षिणादानमाह–प्राचीमिति । द्वयमेकं स्वकुलस्य इक्ष्वाकुकुलस्य वर्द्धनः बहुदक्षिणादानं श्रुचितमिक्ष्वाकुकुलस्येति भावः ॥ ४१ ॥

४४] ति० टी०–विनिर्मिता कल्पेषु विहिता । स्वयंभूविहिते । "प्रजापतिरश्वमेधमसृजत" इति श्रुतेः ॥ ४४ ॥

गो० टी०–एतावद्दक्षिणादाने किं प्रमाणं तत्राह–उद्गात्र इति । एषा दक्षिणा विनिर्मिता विहिता " प्रतिदिशं दक्षिणां ददाति प्राची दिग्होतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुः " इत्यादिसूत्रेणेति शेषः । स्वयंभुविहिते ब्रह्मनिर्मिते " प्रजापतिरश्वमेधमसृजत " इतिश्रुतेः ॥ ४२ ॥

४५-४६] ति० टी०–क्रतुमिति । धरां चतुर्दिगवच्छिन्नाम् ॥ ४५–४६ ॥

रा० टी०–दानानन्तरकालिकब्राह्मणोक्तिमाह (?)–क्रतुमिति । यदा कुलवर्द्धनः पुरुषर्षभः पुरुषश्रेष्ठो राजा न्यायतः यथा विधि क्रतुं समाप्य ऋत्विग्भ्यस्तां पूर्वोक्तां धरां पृथ्वीं हर्षतो ददौ । तुशब्द एवार्थे हिर्हर्षद्योतकः ॥ ४५ ॥

रा० टी०–तदैव सर्वे ऋत्विजः गतकल्मषं स्वाश्रितकल्मषनिवर्तकं राजानं सर्वे ऋत्विजोऽब्रुवन् । सार्धश्लोक एकान्वयी । तदुक्तिमेवाह श्लोकत्रयेण एकः अखण्डमण्डलेश्वरो भवानेव कृत्स्नां महीं रक्षितुमर्हति । तुशब्दस्तदार्थे ॥ ४६ ॥

गो० टी०–क्रतुमित्यादि। श्लोकद्वयमेकान्वयम्। न्यायतः शास्त्रतः हि यस्माद्राजा ददौ तस्माद्वृत्विजोऽब्रुवन्नित्यन्वयः । यद्यपि महापृथिवी न देयेति इदं निषिद्धं तथाप्यत्र प्रदेशविशेष एव दत्त इति ज्ञेयम् । प्रतिषेधवदत्र विधेरपि दर्शनात् केसरिदानवद्विकल्पो वा ॥ ४३ ॥ ४४ ॥

४७] ति० टी०–भवानिति । भोगैकप्रयोजनत्वाद्भूमेस्तयास्माकं न किंचित्प्रयोजनम्, नापि चोरादिभ्यो रक्षणे वयं शक्ताः ॥ ४७ ॥

रा० टी०–नेति । हे भूमिप भूम्याऽस्माकं न कार्यं न प्रयोजनम् हि यतः पालने वयं न शक्तास्तत्रापि हेतुः हि यतः स्वाध्यायकरणे वेदाध्यापनादौ वयं नित्यं रताः ॥ ४७ ॥

१ विनिर्मिताविति गो. पाठः । २ आप्तोर्याम इति गो. पाठः । ३ उद्गात्रे वै इति गो. रा. पाठः । ४ हयमेध इति गो. रा. पाठः । ५ तथेति गो. पाठः । ६ क्रतुवर्धन इति गो. पाठः । ७ इदमर्ध गो. रा. पुस्तकयोर्नास्ति । ८ ऋत्विजश्चेति गो. पाठः ।

रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप । निष्क्रयं किंचिदेतेह प्रयच्छतु भवानिति ॥ ४८ ॥
मणिरत्नं सुवर्णं वा गावो यद्वा समुद्यतम् । तत्प्रयच्छ नृपश्रेष्ठ[1] धरण्या न प्रयोजनम् ॥ ४९ ॥
एवमुक्तो नरपतिर्ब्राह्मणैर्वेदपारगैः । गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ॥ ५० ॥
दशकोटिं[2] सुवर्णस्य रजतस्य चतुर्गुणम् । ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु ॥ ५१ ॥
ऋष्यशृङ्गाय[3] मुनये वसिष्ठाय च धीमते । ततस्ते न्यायतः कृत्वा प्रविभागं द्विजोत्तमाः ॥ ५२ ॥
सुप्रीतमनसः सर्वे प्रत्यूचुर्मुदिता भृशम् । ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः ॥ ५३ ॥
जाम्बूनदं कोटिसंख्यं ब्राह्मणेभ्यो ददौ तदा । दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम् ॥ ५४ ॥

४८] ति० टी०–तत्र हेतुमाह–रता इति । स्वाध्यायो वेदाध्ययनम् । तेन दण्डादावस्माकमधिकारोऽपि नेति ध्वनितम् । भूमिपेत्यनेन तवैवैषा योग्येति त्वमेव निष्क्रयेण पुनरिमां गृहाणेति सूचितम् । तदाह–निष्क्रयमिति । मूल्यमित्यर्थः । ननु भुवो मूल्यं दातुमशक्यम् । अतः किंचिदेवेति ॥ ४८ ॥

रा० टी०–निष्क्रयमिति । इति अतः इह अस्मिन्नेव समये किंचित् यथाकामं निष्क्रयं दत्तपृथ्वीमूल्यं भवान् प्रयच्छतु । तदेवाह मणिरत्नं मणिश्रेष्ठं सुवर्णं च गावश्च यत् अन्यत्समुद्यतं अस्मदर्थमुपस्थापितं च ॥ ४८ ॥

गो० टी०–न भूम्येति सार्द्धश्लोक एकान्वयी । अशक्तो हेतुः–रता इति । स्वाध्यायकरणे स्वाध्यायाध्ययने ॥ ४९ ॥

गो० टी०–कथं दत्तस्य पुनरुपहारस्तत्राह–निष्क्रयमिति । निष्क्रयं मूल्यम् । कृत्स्नपृथिव्या मूल्यं कुतो लभ्यते तत्राह–किंचिदिति । यथोपपन्नमित्यर्थः ॥ ४६ ॥

४९] ति० टी०–किंचित्पदार्थानाह—मणिरत्नमनर्घ्यरत्नम् । तस्यापि राजार्हत्वादाह–सुवर्णमिति । यद्वा समुद्यतमुपस्थितम् । यत्किंचिदेव भवच्छक्यमित्यर्थः ॥ ४९ ॥

५०] ति० टी०–शतसहस्राणि । दशलक्षमिति यावत् ५०

रा० टी०–तदेवोपसंहरन्नाह–तदिति । हे नृपश्रेष्ठ तदस्माच्चितं प्रयच्छ देहि धरण्या पृथिव्या न प्रयोजनं नास्मत्कार्यसिद्धिः एतेन तत्रस्थब्राह्मणानां संतोषातिशयः सूचितः । एवमनेन प्रकारेण वेदपारगैर्ब्राह्मणैरुक्तोऽनरपतिः न नरपतिः राजा यस्य चक्रवर्तीत्यर्थः । नृपो दशरथः ॥ ४९ ॥ गवां दश दशगुणितानि शतसहस्राणि दशलक्षगवीरित्यर्थः । सुवर्णस्य सुवर्णमुद्रायाः दशकोटीः । रजतस्य रजतमुद्रायाः चतुर्गुणं चत्वारिंशत्कोटिमित्यर्थः तेभ्यः ऋत्विग्भ्यो ददौ ॥ ५० ॥

गो० टी०–किंचिदित्यस्य प्रपञ्चः–मणीति । मणिरत्नं मणिश्रेष्ठं समुद्यतं समुपस्थितम् । एवमिति । नरपतिरेवमुक्तः सन् दशशतसहस्राणि दशलक्षमिति यावत् ददौ ॥ ४७ ॥

५१] ति० टी०–सुवर्णं षोडशमाषकम् । चतुर्गुणं चत्वारिंशत्कोटिम् । ततः सर्वे ऋत्विजः सहिता दक्षिणाप्राप्तं सर्वं वसु धनमङ्गीकृत्य विभागाय ऋष्यशृङ्गवसिष्ठाभ्यां प्रददुस्तस्य पुरो न्यस्तवन्तः ॥ ५१ ॥

रा० टी०–ऋत्विज इति । ततः राजदत्तदक्षिणास्वीकारानन्तरमेव सहिताः मिलिताः सर्वे ऋत्विजः मुनये राममननशीलाय धीमते प्रशस्तबुद्धियुक्ताय ऋष्यशृङ्गाय वसिष्ठाय च वसु सर्वं प्राप्तं धनं प्रददुः तयोरग्रे स्थापयामासुः । तुशब्द एवार्थे ॥ ५१ ॥

गो० टी०–दशेति । अर्द्धमेकं वाक्यम् । नृप इत्यस्य पूर्वश्लोकस्थस्यात्रान्वयः । चतुर्गुणं चतुर्दशकोटीरित्यर्थः । अत्र रजतानि प्रतिनिधित्वेन दत्तानि ननु दक्षिणात्वेन अतः " तस्माद्रजतं हिरण्यमदक्षिण्यम् " इतिश्रुत्या न विरोधः ॥ ४८ ॥

गो० टी०–ऋत्विज इति । सर्वे ऋत्विजः सहिताः सन्त वसु दक्षिणाप्राप्तं धनमंशीकृत्य दानाय ऋष्यशृङ्गाय वसिष्ठाय च ददुः ॥ ४९ ॥

५२] ति० टी०–तदाह–ऋष्येति । प्रविभागं कृत्वा । वसिष्ठादिद्वारा विभज्य गृहीत्वेत्यर्थः ॥ ५२ ॥

रा० टी०–तत इति । ततः द्रव्यस्थापनानन्तरं सर्वे द्विजोत्तमाः ब्राह्मणा मुनयो न्यायतः यथाशास्त्रं प्रविभागं कृत्वा ऋष्यशृङ्गवसिष्ठाभ्यांकारयित्वा भृशं सुप्रीतमनसः सन्तः प्रत्यूचुः कृत्वेत्यत्र अन्तर्भावितण्यर्थः ॥ ५२ ॥

गो० टी०–तत इति । न्यायतः शास्त्रतः यावदध्वर्यवे ददातितदर्द्धं प्रतिप्रस्थात्रे तृतीयं नेष्ट्रे चतुर्थं नेत्रे एतेनेतरेषां दानमुक्तं भवतीत्युक्तक्रमेण ततः ऋष्यशृङ्गवसिष्ठमुखेन विभागं कृत्वा प्रीतमनसः प्रत्यूचुः । प्रीतमनस इति विशेषणेन सर्वे वयं प्रीताः स्म इति प्रतिवचनप्रकारोऽवगम्यते ॥ ५० ॥

५३] ति० टी०–सुप्रीतेति । संतुष्टाः सन्तोऽत्यन्तं मुदिताः स्मेत्यूचुः । राजानमिति शेषः । प्रसर्पकेभ्योऽभ्यागतेभ्यः ॥ ५३ ॥

रा० टी०–तत इति । ततः ऋत्विग्दक्षिणादानानन्तरं तदा तत्प्रसादकाले सुसमाहितः एकाग्रचित्तो राजा प्रसर्पकेभ्यो यज्ञदर्शनार्थमागतेभ्यो ब्राह्मणेभ्यः कोटिसंख्यं जाम्बूनदं जम्बूनदीसंभवं हिरण्यं सुवर्णं ददौ विभज्य यथाकामं समर्पयामास । तुशब्देन अन्येभ्योऽपि यथाकामं ददौ । कोटिशब्दोऽनन्तवाची ॥ ५३ ॥

५४] ति० टी०–जाम्बूनदं जम्बूनदीप्रभवं सुवर्णम् । कोटिशब्दोऽनन्तवाची । अथ सर्वदक्षिणादानानन्तरं याचमानाय दरिद्राय कस्मैचिदातव्यवस्त्वन्तराभावाद्धस्ताभरणमेव ददौ ५४

१ नरश्रेष्ठेति गो. पाठः । २ दशकोटीरिति गो. रा. पाठः । ३ ऋश्येति गो. पाठः ।

कस्मैचिद्याचमानाय ददौ राघवनन्दनः । ततः प्रीतेषु विधिवद्विप्रेषु द्विजवत्सलः ॥ ५५ ॥
प्रणाममकरोत्तेषां हर्षव्याकुलितेन्द्रियः । तस्याशिषोऽथ विविधा ब्राह्मणैः समुदाहृताः ॥५६॥
उदारस्य नृवीरस्य धरण्यां पतितस्य च । ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ॥ ५७ ॥
पापापहं स्वर्नयनं दुस्तरं पार्थिवर्षभैः । ततोऽब्रवीदृष्यशृङ्गं राजा दशरथस्तदा ॥ ५८ ॥
कुलस्य वर्धनं तत्तु कर्तुमर्हसि सुव्रत । तथेति च स राजानमुवाच द्विजसत्तमः ॥
भविष्यन्ति सुता राजंश्चत्वारस्ते कुलोद्वहाः ॥ ॥ ५९ ॥
स तस्य वाक्यं मधुरं निशम्य प्रणम्य तस्मै प्रयतो नृपेन्द्रः ।
जगाम हर्षं परमं महात्मा तमृष्यशृङ्गं पुनरप्युवाच ॥ ॥ ६० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

रा० टी०–दरिद्रायेति । अथ सर्वसंतोषप्रापणानन्तरम् उत्तमं हस्ताभरणं याचमानाय कस्मैचिद्विप्राय राघवनन्दनः रघुकुलवर्धनो दशरथो ददौ ॥ ५४ ॥

गो० टी०–तत इति । प्रसर्पकेभ्यः यज्ञदर्शनार्थमागतेभ्यः " यावन्तो वै सदस्यास्ते सर्वे दक्षिण्या" इति श्रुतेः । जाम्बूनदं जम्बूनदीप्रभवमिति हिरण्यविशेषणम् ॥ ५१ ॥

गो० टी०–दरिद्रायेति । हस्ताभरणं याचमानाय कस्मैचित् दरिद्राय तदेव ददावित्यर्थः ॥ ५२ ॥

५५] ति० टी०–ततः । तेन हस्ताभरणदानेनेत्यर्थः ॥५५॥

रा० टी०–तत इति । ततः हस्ताभरणदानानन्तरं द्विजेषु विधिवत्प्रीतेषु प्रसादितेषु द्विजवत्सलो हर्षपर्याकुलेक्षणो राजा तेषां द्विजानां प्रणाममकरोत् ॥ ५६ ॥

गो० टी०–तत इति । ततः यथेष्टदक्षिणादानेनेत्यर्थः ५३

५६-५७] ति० टी०–विविधा आशिषः 'आब्रह्मन्नायुष्मन्त' इत्याद्याः ॥ ५६–५७ ॥

रा० टी०–तस्येति । उदारस्य अदेयवस्त्वभावतः धरण्यां प्रणतस्य विप्रोद्देश्यकसाष्टाङ्गप्रणामं कुर्वतः नृवीरस्य वीरपुरुषस्य तस्य प्रसिद्धस्य राज्ञः विविधा अनेकप्रकारा अथाशिषः परममङ्गलाशीर्वादाः ब्राह्मणैः समुदाहृताः सम्यगुच्चारिताः अशोभन्तेति शेषः ॥ ५६ ॥

गो० टी०–तस्येति । तस्य तस्मै ॥ ५४ ॥

रा० टी०–तत इति । अनुत्तमं न उत्तमं यस्मात् सर्वोत्तममित्यर्थः । पापापहं स्वनित्यपुत्रवियोगहेतुभूतविघ्नध्वंसकम् स्वर्नयनं प्राकृतजनानां स्वर्गप्रापकम् पार्थिवर्षभैः खण्डमण्डलेश्वरश्रेष्ठैर्दुस्तरं दुष्प्रापं यज्ञं प्राप्य राजा ततः ब्राह्मणाशीर्वादश्रवणात् प्रीतमनाः अतिप्रसन्नचित्तो बभूवेति शेषः ५७

गो० टी०–तत इति । पापं पुत्रोत्पत्तिप्रतिबन्धकदुरितमपहन्तीति पापापहम् । "अपे क्लेशतमसोः" इति हन्तेर्डप्रत्ययः । तमःपर्यायोत्र पापशब्दः । स्वर्नयनं पुत्रप्रापणद्वारा स्वर्गप्रापकम् इतरैः पार्थिवर्षभैः दुष्करं न विद्यते उत्तममस्मादित्युत्तमं सर्वोत्तमं यज्ञमश्वमेधं प्राप्य प्रीतमनाः बभूवेति शेषः ॥ ५६ ॥

५८] ति० टी०–स्वर्नयनं स्वर्गप्रापकम । दुस्तरं प्राकृतै राजभिरप्राप्तसमाप्तिकम् ॥ ५८ ॥

रा० टी०–अश्वमेधसमाप्युत्तरकालिकं वृत्तमाह–तत इति । तदा साङ्गाश्वमेधसमाप्यनन्तरकाले ततः सुमन्त्रवचनस्मरणात् राजा दशरथः ऋष्यशृङ्गमब्रवीत् । तद्वचनमेवाह हे सुव्रत शोभनो व्रतः संकल्पो यस्मात् ईप्सितपूर्तिसंपादकेत्यर्थः । कुलस्य वर्द्धनं यत् तत्कर्म कर्तुं त्वमर्हस्येव । तुशब्द एवार्थे ॥ ५८ ॥

५९] ति० टी०–कुलस्य वर्धनं तादृशं कर्म ॥ ५९ ॥

रा० टी०–तथेति । द्विजसत्तमो द्विजश्रेष्ठः स प्रसिद्धः ऋष्यशृङ्ग हे राजन् तथा तत्कर्माहं करिष्यामि येन कर्मणा कुलोद्वहाः चत्वारस्ते सुताः भविष्यन्ति इति राजानमुवाच । च शब्दो येनेत्यर्थे ॥ ५९ ॥

गो० टी०–एवं पुत्रोत्पत्तिप्रतिबन्धकसकलदुरितनिवारणक्षमे भगवदङ्गभूतब्रह्मादिदेवताराधनरूपेऽश्वमेधे निर्वृत्ते साक्षाद्भगवदाराधनं पुत्रप्राप्तिकारणं कर्तुं सुमन्त्रोक्तं मनसि निधाय ऋष्यशृङ्गमर्थयते–तत इति । कुलस्य वर्द्धनं पुत्रोत्पत्तिहेतुभूतं कर्मेत्यर्थः । त्वं तु कर्तुमर्हसीत्यन्ते इतिरध्याहार्यः ॥ ५६ ॥

गो० टी०–तथेति । पुत्रीयं कर्म करिष्ये सुताश्च भविष्यन्तीत्युवाचेत्यन्वयः ॥ ५७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

६०] ति० टी०–पुनरप्युवाच । पुत्रजनककर्मणे पुनरपि प्रेरयामासेत्यर्थः । यद्यपि पुत्रकामेष्ट्यैव पुत्रावाप्तिः संभवति, तथापि तपोरतस्य वैश्यस्य श्रावणस्य वधे तद्वियोगानुरूपतपारततन्मातापितृमरणेन च ब्रह्मवधसमपापोत्पत्त्या तत्प्रायश्चित्तत्वेनाश्वमेधानुष्ठानं बोध्यम् ॥ ६० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

१ नृपतिरिति गो. पाठः । २ पर्यायकुलेक्षण इति गो. रा. पाठः । ३ विधिवदिति गो. पाठः । ४ ऋश्येति गो. पाठः । ५ इदं पद्यं गो. पुस्तके नास्ति

पञ्चदशः सर्गः ।

ऋष्यशृङ्गेण दशरथस्य पुत्रेष्टिविधानम् । देवैः रावणवधार्थं ब्रह्मप्रार्थना । ब्रह्मणा दशरथगृहेऽवतीर्य रावणं जहीति विष्णुप्रार्थना । विष्णुना रावणवधप्रतिज्ञानम् ।

मेधावी तु ततो ध्यात्वा स किंचिदिदमुत्तरम् । लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥ १ ॥
इष्टिं तेऽहं करिष्यामि पुत्रीयां पुत्रकारणात् । अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः ॥ २ ॥
ततः प्राक्रमदिष्टिं तां पुत्रीयां पुत्रकारणात् । जुहावाग्नौ च तेजस्वी मन्त्रदृष्टेन कर्मणा ॥ ३ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । भागैरप्रतिग्रहार्थं वै समवेता यथाविधि ॥ ४ ॥
ताः समेत्य यथान्यायं तस्मिन्सदसि देवताः । अब्रुवँल्लोककर्तारं ब्रह्माणं वचनं तदा ॥ ५ ॥

रा० टी०–स इति । महात्मा स प्रसिद्धो नृपेन्द्रो राजराजो दशरथः तस्य ऋष्यशृङ्गस्य मधुरं वाक्यं निशम्य श्रुत्वा परममतुलं हर्षं जगाम प्राप । तस्मै तमनुकूलयितुं प्रणम्य नमस्कृत्य प्रयत मत्पुत्रप्राकट्यार्थं प्रयत्नं कुरु इति तमृष्यशृङ्गं पुनःपुनरुवाच । उरित्यर्थे (?) अपिः पुनरर्थे ॥ ६० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

१] ति० टी०–मेधावीति । मेधाव्यशेषवेदशाखाधारणयोग्यबुद्धिमान् । वेदज्ञः स्वरूपतोऽर्थतश्च वेदतत्त्ववित्स ऋष्यशृङ्गः प्रतिश्रुतार्थनिर्वाहाय किं कर्तव्यमिति निश्चेतुं किंचित्कालं ध्यात्वा समाधिं कृत्वेदमुत्तरमिदमिहोत्तरानुष्ठेयकृत्यमिति निश्चित्य पश्चाल्लब्धसंज्ञः समाध्युत्थितस्तं नृपमब्रवीत् ॥ १ ॥

रा० टी०–मेधावीति । ततः राजवचनश्रवणानन्तरमेव मेधावी परमबुद्धिमान् वेदज्ञः निखिलवेदशब्दार्थतत्त्वज्ञाता अत एव लब्धसंज्ञः लब्धा विचारेण प्राप्ता संज्ञा रघुनाथसम्यग्ज्ञानं येन अत एव ततः सकलयागविस्तारकर्ता स ऋष्यशृङ्गः उत्तरं रामप्राकट्यहेतुभूतकरिष्यमाणकृत्यं किंचित्कालं ध्यात्वा विचार्य इदं वचनं नृपमब्रवीत् तुशब्द एवार्थे ॥१॥

गो० टी०–अथ दशरथाराधनव्याजेन साधुलोकरक्षणाय भूमाववतितीर्षुर्भगवानात्मनिकदुष्कृद्विनाशाय देवैरभ्यर्थ्यते षड्भिश्च–मेधावीत्यादि । ततः प्रतिज्ञानन्तरं मेधावी मेधा धारणक्षमा धीः तद्वान् " अस्मायामेधास्रजो विनिः " इति विनिप्रत्ययः । वेदज्ञः अथर्वणवेदज्ञः स ऋष्यशृङ्गः किंचिद्ध्यात्वा किं कर्म कर्तुमत्रोचितमिति क्षणं विचिन्त्य मेधावितया ततः तदुत्तरक्षण एव लब्धसंज्ञः प्राप्तस्मृतिः सन् तं नृपमिदमुत्तरमब्रवीत् । द्विकर्मको ब्रुविः ॥ १ ॥

२] ति० टी०–किमब्रवीत्तदाह—इष्टिमिति । पुत्रीयां पुत्रप्राप्तिकारणभूताम् । पुत्रकारणात्पुत्रप्राप्तिहेतोः । अथर्ववेदप्रोक्तैर्मन्त्रैर्विधानतः कल्पसूत्रतः सिद्धां नियतफलत्वेन प्रसिद्धामिष्टिं करिष्यामि । इत्युक्त्वेति शेषः ॥ २ ॥

रा० टी०–तदुक्तिमेवाह–इष्टिमिति । तं पुत्रकारणान्नित्यपुत्रप्रकटनार्थं पुत्रीयां पुत्रप्राकट्यहेतुभूतां अथर्वशिरसि अथर्ववेदे प्रोक्तैः पुत्रेष्टिसाधकत्वेन निर्णीतैर्मन्त्रैः सिद्धां निष्पाद्यामिष्टिं विधानतः यथाविधि अहं करिष्यामि ॥ २ ॥

गो० टी०–इष्टिमिति । पुत्रीयां पुत्रोत्पत्तिनिमित्तभूताम् " पुत्राच्छ च" इति छप्रत्ययः । इष्टिं यागविशेषं ते पुत्रकारणात् पुत्रनिमित्तं ' निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् ' इति पञ्चमी । करिष्यामीत्युक्तवान् । मन्त्रदृष्टेन वेदावगतेन कर्मणाग्नौ जुहाव च शास्त्रदृष्टक्रमेण एकामाहुतिमकरोदित्यर्थः ॥ २ ॥ ३ ॥

३] ति० टी०–तत इति । मन्त्रदृष्टेन मन्त्रपूर्वकतया कल्पसूत्रे दृष्टेन ॥ ३ ॥

रा० टी०–तत इति । ततः इष्टिं करिष्यामीत्युत्तरानन्तरं पुत्रकारणात् पुत्रीयामिष्टिं प्रारब्धवान् तेजस्वी ऋष्यशृङ्गः अतएव मन्त्रदृष्टेन वेदबोधितेन कर्मणा विधिनैव जुहाव । ततः प्राक्रमदिष्टिं तामित्यपि क्वचित्पठ्यते ॥ ३ ॥

४] ति० टी०–तत इति । तत्रेत्यर्थः ॥ ४ ॥

रा० टी०–ततःस्वांशभूतसत्यलोकादिस्थब्रह्मादिद्वारा जगत्सृष्ट्यादिविस्तारकर्तारः साकेतस्थब्रह्मविष्णुमहेश्वराः सगन्धर्वाः गन्धर्वसहिता देवाश्च सिद्धा सिद्धगणाश्च परमर्षयश्च भागप्रतिग्रहार्थं यथाविधि समवेताः प्रकटीभूय यागे स्थिताः । वैशब्दश्चार्थे स च हीनेपि अन्वेति इमे सर्वे साकेतस्था एवेत्यत्र बीजं त्वां नियोक्ष्यामहे इत्यादौ वक्ष्यामः ॥ ४ ॥

गो० टी०–एतच्छेषं ततो वै यजमानस्येत्यादिना वक्ष्यति मध्ये भगवदवतरणस्य निमित्तान्तरं देवताभ्यर्थनं दर्शयति–तत इत्यादिना । ततः तत्राश्रमेधे देवादयः यथाविधि यथाक्रमं भागप्रतिग्रहार्थं स्वस्वहविर्भागस्वीकारार्थं समवेताः संमिलिताः यज्ञसदसीति शेषः । अनुक्तसमुच्चयार्थेन चकारेण ब्रह्मापि समुचीयते ॥ ४ ॥

५–६] ति० टी०–ता इति । समेत्य । अन्तर्धानशक्त्येतरानवलोकामिति शेषः ॥ ५॥६ ॥

रा० टी०–ता इति । तस्मिन्प्रसिद्धे सदसि यागसभायां ता आगता देवताः यथान्यायं समेत्य ब्रह्मसमीपं प्राप्य लोककर्तारं स्वांशभूतसत्यलोकस्थब्रह्मद्वारा लोकानां कर्तारं किंच लोकनं लोको दृष्टिः तत्कर्तारं यज्ञदृष्ट्वेनाहूतं साकेतस्थब्रह्माणमित्यर्थः । महत्सर्वप्रशंसनीयं वचनमब्रुवन् ॥ ५ ॥

१ प्रारब्धवानिष्टिमिति गो. रा. पाठः । २ जुहाव चाग्नाविति गो. पाठः । ३ भागेति गो. रा. पाठः । ४ महदिति गो. रा. पाठः ।

भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः । सर्वान्नो बाधते वीर्योच्छ्रासितुं तं न शक्नुमः ॥ ६ ॥
त्वया तस्मै वरो दत्तः प्रीतेन भगवंस्तदा । मानयन्तश्च तं नित्यं सर्वे तस्य क्षमामहे ॥ ७ ॥
उद्वेजयति लोकांस्त्रीनुच्छ्रितान्द्वेष्टि दुर्मतिः । शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति ॥ ८ ॥
ऋषीन्यक्षान्सगन्धर्वान्ब्राह्मणानसुरांस्तदा । अतिक्रामति दुर्धर्षो वरदानेन मोहितः ॥ ९ ॥
नैनं सूर्यः प्रतपति पार्श्वे वाति न मारुतः । चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कम्पते ॥ १० ॥
तन्महन्नो भयं तस्माद्राक्षसाद्घोरदर्शनात् । वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि ॥ ११ ॥
एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत् । हन्तायं विदितस्तस्य वधोपायो दुरात्मनः ॥ १२ ॥

गो० टी०–ता इति । ताः देवताः तस्मिन् प्रकृते सदसि अश्वमेधसदसि यथान्यायं यथाक्रमं समेत्य लोककर्तारं स्वस्वामिनं ब्रह्माणं महत् फलद्वारा गुरुतरं वचनमब्रुवन् ॥ ५ ॥

रा० टी०–तदाकारमाह–भगवन्निति । हे भगवन् त्वत्प्रसादेन त्वत्कृपया प्राप्तं यद्वार्यं साकेताधीशातिरिक्तसर्वावध्यत्वं तस्माद्वीर्यात् नोऽस्माकं विहारास्पदीभूताः ये सर्वलोकास्तान् रावणो नाम राक्षसो बाधते तं रघुनाथेच्छया साकेतादवतीर्णं रावणं शासितुं स्वांशभूतदेवादिद्वारा साक्षाद्वा न शक्नुमः । एतेन साकेतपुरवासिनां यथाकामं सर्वत्र गमनमिति व्यज्यते । यथा च साकेताद्रावणावतारः तथा तज्जन्मप्रतिपादंचु ग्रन्थे वक्ष्यामः ॥ ६ ॥

गो० टी०–भगवन्निति । त्वत्प्रसादेन जनिताद्वीर्यादित्यन्वयः ॥ ६ ॥

७] ति० टी०–कुतस्तस्य युष्मद्बाधनक्षमवीर्यलाभ इत्यत आह—त्वयेति । मानयन्तः । सर्वदेवतावध्यत्वरूपत्वदत्तवरं परिपालयन्त इत्यर्थः ॥ ७ ॥

रा० टी०–तदेव विशदयन्नाह–त्वयेति । हे भगवन् प्रीतेन त्वया पुरा पूर्वं अस्मै वरो दत्तः अतस्तं वरं नित्यंमानयन्तो वयं तस्य क्षमामहे । तस्येति संबन्धसामान्ये षष्ठी । अपराधमिति शेषो वा चो हेतौ ॥ ७ ॥

गो० टी०–को मत्प्रसादः कथं भवतां तत्प्रतीकाराशक्तिस्तत्राहुः–त्वयेति । वरः अस्माभिरवध्यत्वरूपः तं वरं मानयन्तः पूजयन्तः सर्वं पीडनम् ॥ ७ ॥

८] ति० टी०–उच्छ्रितान्संपत्त्यादिभिरधिकान् । त्रिदशराजानमिति समासान्तोऽनित्यत्वान्न कृतः । प्रधर्षयितुमिच्छतीत्युक्तेरेतदुत्तरकालमिन्द्रजित्कृत इन्द्रबन्ध इति ज्ञायते ॥ ८ ॥

रा० टी०–उद्वेजयतीति । उच्छ्रितान्समृद्धान् त्रीन् लोकान् दुर्मतिः द्वेष्टि अत एव उद्वेजयति चालयति त्रिदशराजानमस्मदंशभूतं शक्रमपि प्रधर्षयितुं पराभावयितुमिच्छति । समासान्तविधेरनित्यत्वाद्टजभावः ॥ ८ ॥

गो० टी०–बाधनमेवोपपादयन्ति–उद्वेजयतीत्यादिना । उद्वेजयति भीषयते उच्छ्रितान् उन्नतान् लोकपालान् त्रिदशराजानं समासान्तस्य अनित्यत्वाद्टजभावः । प्रधर्षयितुं तिरस्कर्तुं स्थानात्प्रच्यावयितुमित्यर्थः ॥ ८ ॥

९] ति० टी०–असुरान् राहुप्रमुखान् ॥ ९ ॥

रा० टी०–ऋषीनिति । दुर्मेधा दुष्टस्वभावः अत एव वरदानेन मोहितः रावणः ऋष्यादीनतिक्रामतीत्यतिक्रामति बाधते । तथाशब्दश्चार्थे ॥ ९ ॥

गो० टी०–ऋषीनिति । असुरान् राहुप्रभृतीन् अतिक्रामति पीडयतीति यावत् ॥ ९ ॥

१० [ति० टी०–प्रतपति । प्रतापयतीत्यर्थः । क्रौर्यातिशयद्योतकमेतज्जातीयं न वाति नाधिकं वाति । चञ्चलोर्मिमालास्वभावोऽपि न कम्पत इति विरोधालंकारः ॥ १० ॥

रा० टी०–नैनमिति । एनं रावणं सूर्यो न प्रतपति न संतापयति एतद्भिया एतत्संचारादिसमये मन्दकिरणो भवतीत्यर्थः । पार्श्वेऽस्य समीपे मारुतो वायुर्न वाति शनैर्वातीत्यर्थः । चलोर्मिमाली स्वाभाविकचञ्चलतरङ्गसमूहविशिष्टोऽपि समुद्रस्तं दृष्ट्वा न कम्पते स्थिरतरङ्गो भवतीत्यर्थः ॥ १० ॥

गो० टी०–नैनमिति । एनं रावणं प्रति न प्रतपति मन्दकिरणो भवति क्रीडापर्वतसंचारादिदशायामिति भावः । पार्श्वे अस्येति शेषः । न वाति पुष्पवाटिकादिषु पुष्पपतनादिभयादिति भावः । चलोर्मिमाली सदा चञ्चलस्वभावतरङ्गपङ्क्तिमान् न कम्पते गर्वितोयमुल्बलतीति शोषणभयादिति भावः ॥ १० ॥

११ [ति० टी०–तत्तस्मात्कारणात् । तस्मादुक्तगुणविशिष्टात् ॥ ११ ॥

रा० टी०–तदिति । घोरदर्शनाद्राक्षसात्प्राप्तरक्षःस्वभावाद्रावणाद्यन्महद्भयमस्मदंशानां भीतिः तदस्माकमेव भयं तस्माद्धेतोः हे भगवन् तस्य रावणस्य वधार्थमुपायं यत्नं कर्तुं त्वमर्हसि योग्योसीत्यर्थः ॥ ११ ॥

गो० टी०–तदिति । भयादिति भावः भयमुत्पन्नमिति शेषः । कर्तुं चिन्तयितुम् ॥ ११ ॥

१२] ति० टी०–एवमिति । भगवान्ब्रह्मेति शेषः । हन्तेत्यनुकम्पायाम् ॥ १२ ॥

रा० टी०–एवमिति । सर्वैः सुरैरेवमनेन प्रकारेण उक्तो

१ पुरेति गो. रा. पाठः । २ असुरान्ब्राह्मणांस्तथेति गो. असुरांस्तथेति रा. पाठः ।

तेन गन्धर्वयक्षाणां देवतानां च रक्षसाम् । अवध्योऽस्मीति वागुक्ता तथेत्युक्तं च तन्मया॥ १३ ॥
नाकीर्तयदवज्ञानात्तद्रक्षो मानुषांस्तदा । तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योऽस्य विद्यते॥ १४ ॥
एतच्छ्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतम् । देवाः महर्षयः सर्वे प्रहृष्टास्तेऽभवंस्तदा ॥ १५ ॥
एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः । शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ॥ १६ ॥

ब्रह्मा ततो देवोत्कृत्यनन्तरं चिन्तयित्वा पूर्ववृत्तमनुस्मृत्य अब्रवीत् । तद्वचनमेवाह दुरात्मनः प्राप्तरक्षस्त्वभावेन दुष्टमनसस्तस्य रावणस्य अयं वक्ष्यमाणः वधोपायो विहितः परमात्मनैव विनिर्मितः। हन्त इति हर्षे ॥ १२ ॥

गो० टी०–एवमिति । उक्तः ब्रह्मेति शेषः । चिन्तयित्वा उपायमिति शेषः । हन्तेत्युपायस्मरणजहर्षे ॥ १२ ॥

ति० टी०–तेनेति । तत्तथास्त्वित्युक्तमिति योजना ॥ १३ ॥

रा० टी०–उपायं वक्तुमुपक्रमते–तेनेति । गन्धर्वयक्षाणां देवदानवरक्षसां च अवध्यः अहमस्मि स्यामिति वाक् तेन रावणेन उक्ता प्रार्थिता तत् तदा तथा इति मया उक्तम् चकारेणान्येभ्योपि स्वज्ञानविषयीभूतेभ्योऽभयं प्रार्थितं तदपि तथेति मया उक्तम् ॥ १३ ॥

गो० टी०–अयंशब्दार्थमाह–तेनेति। तत्तथोक्तमित्यन्वयः॥

१४-१५] ति० टी०–नेति । तदा वरणसमये । मृत्युर्मृत्युजनकः ॥ १४ ॥ १५ ॥

रा० टी०–नाकीर्तयदिति । अवात् ईश्वरस्यापि रक्षकात् रामात् प्राप्तं यज्ज्ञानं नियोगः आज्ञा इतःप्रभृति प्राप्तरक्षःशरीरे मां न ज्ञास्यसीति संकुचितबोधो वा इतःप्रभृति मदतिरिक्तमेव ज्ञास्यसीति वा तस्मात्तद्रक्षो रावणस्तदा वरयाचनसमये मानुषान्परमात्मा नराकृतिरित्यागमगम्यं साकेताधीशं नित्यद्विभुजं नाकीर्तयत् तस्माद्धेतोः स मानुषात् नराकृतिपरमात्मनो रामात् वध्यः अन्यः तस्मात् भिन्नः अस्य मृत्युर्विघातको न विद्यते बहुत्वमादरार्थम् तेन साकेताधीशरघुनाथस्य विष्ण्वादिवैलक्षण्यमीश्वरेश्वरत्वं च व्यक्तम्। एतेन नाकीर्तयदवज्ञानादित्यस्य अवज्ञानात् अनादरात् मानुषान्नाकीर्तयदित्यर्थः प्रत्युक्तः दशरथमहत्पादीनां देवसाहाय्यकर्तृत्वस्य प्रसिद्धत्वान्मानुषानादरस्यासंभवात् । किंच रावणस्य सुराद्यवध्यत्वे वरदानमेव कारणं वा रावणबलवत्त्वं वा उभयं वा । न प्रथमं तात्कालिकमानुषैरेव तस्य वध्यत्वे सिद्धे तद्वधार्थं परमात्मप्रार्थना व्यर्था स्यात् न द्वितीयं बाल्यादिभिः कृततत्पराभवस्यासंभवापत्तेः अत एव न तृतीयम् किंच विष्ण्ववध्यत्वं स्वस्य रावणेन प्रार्थितं वा न वा । न प्रथमं त्वन्मते रामस्यापि विष्ण्वभिन्नत्वेन तेनाप्यवध्यत्वापत्तेः । नान्त्यं मानुषानादरोक्तेर्निष्प्रयोजनत्वापत्तेरित्यतोऽस्मदुक्त एवार्थो ग्रन्थकृद्दभिमतः। अत एव विष्णुप्रहृतचक्रेण न रावणमृतिः वक्ष्यति च चक्रव्रणवत्त्वं रावणस्येति इति दिक् । रघुनाथाज्ञया रावणावतारे प्रमाणम् ' प्रतापी राघवसखी भात्रा वै सह रावणः ' इत्यादि ॥ १४ ॥

गो० टी०–नाकीर्तयदिति । तदा अवध्यत्ववरणावसरे । अवज्ञानादवमानात् मानुषान्मानुषेण मृत्युः मारकः॥१४॥

रा० टी०–एतदिति । तदा तस्मिन्काले ब्रह्मणा समुदीरितं सम्यक् कथितं प्रियं सर्वहितमेतत् वाक्यं ते तत्रागताः सर्वे महर्षयः सर्वे देवाश्च श्रुत्वा प्रहृष्टा अभवन् ॥ १५ ॥

गो० टी०–एतदिति । प्रहृष्टाः यथाकथंचिद्वधोपायसंभावनयेति भावः ॥ १५ ॥

१६] ति० टी०–एतस्मिन्नन्तरे सर्वदेवतासंतोषकाले । विष्णुः सदा भूभारोद्धारादिकर्ता ॥ १६ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे देवब्रह्मसंवादानन्तरकाले महाद्युतिः समधिकरहितप्रकाशविशिष्टः शङ्खचक्रगदापाणि शङ्खचक्रगदादिभिः पाति लोकमिति शङ्खचक्रगदापो विष्णुस्तेन अण्यते प्रार्थनावचनमुच्चार्यते असौ सः। किंच शङ्खचक्रसहिता गदा यस्य स शङ्खचक्रगदो विष्णुस्तेनासमंतात्पाप्यते स्तूयते इति पाणिः किंच शङ्खादयो रेखारूपेण पाणावस्य सः पीतवासाः पीतवस्त्रधारी जगत्पतिः सर्वलोकस्वामी अविष्णुः अस्य वासुदेवस्य विष्णुर्व्यापकः विष्णोर्विष्णुरित्यर्थः। किंच विष्णुः ब्रह्मविष्णुमहेशव्यापकः राम इत्यर्थः । किंच आसमन्तादेति सर्वं व्याप्नोतीति एः विष्णुः तस्य विष्णुर्व्यापकः अन्तर अन्तः बन्धकः प्रापक इत्यर्थः । र रकाराक्षरो यस्य स राम इत्यर्थः । किंच अन्तःप्रापकः रः रकाराक्षरो यस्य स अन्तरः आसमन्तादेति सर्वं व्याप्नोति एविंष्णुः तस्य विष्णुर्व्यापकः स एव स इति कर्मधारयः उपयातः प्राप्तः अन्तर इत्यादिपक्षद्वये एतस्मिन्देवब्रह्मसंवादानन्तरकाले इत्यर्थो बोध्य अस्मिन् प्रकरणे विष्णुशब्दः ब्रह्मादित्रिदेवव्यापकपर एव नतु चतुर्भुजे रूढः अत एव ततो नारायणो विष्णुरिति वक्ष्यमाणपक्षे न नारायणपदवैयर्थ्यम् अन्यथा द्वयोस्तत्रैव रूढत्वेनान्यतरवैयर्थ्यं दुर्निवारं स्यात् अत एव प्रभोः प्रभुरिति वक्ष्यमाणं सानुकूलम् ॥ १६ ॥

गो० टी०–अथ परमकारुणिको भगवान् ' परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ' इत्युक्तरीत्या धर्मसंस्थापनादित्रयकृते स्वाराधकदशरथमनोरथपरिपूरणाय चावतितीर्षुराजगामेत्याह–एतस्मिन्निति । एतस्मिन्नन्तरे रक्षापेक्षासमये अनेन चिरमस्यावसरप्रतीक्षत्वं गम्यते ' सर्वज्ञोपि हि देवेशः सदा कारुणिकोऽपि सन् । संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते ' इति श्रुतम् । विष्णुः सर्वान्तर्यामितया व्याप्य वर्तमानः भोगाद्यभ्यासेधनमेव

१ देवदानवरक्षसामिति गो. रा. पाठः । २ सर्वे महर्षयो देवा इति गो. रा. पाठः

समारुह्य भास्करस्तोयदं यथा । तप्तहाटककेयूरो वन्द्यमानः सुरोत्तमैः ॥ १७ ॥
ब्रह्मणा च समागत्य तत्र तस्थौ समाहितः । तमब्रुवन्सुराः सर्वे समभिष्टूय संनताः ॥ १८ ॥
त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया । राज्ञो दशरथस्य त्वमयोध्याधिपतेर्विभो ॥ १९ ॥
धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः । अस्यै भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च ॥ २० ॥
विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम् । तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ॥ २१ ॥

वरमिति स्थित इत्यर्थः । त्वं मेऽहं म इत्यादि (?) महाद्युतिः रक्षणावकाशलाभसमुदितहर्षप्रकर्षकृतकान्तिविशेषयुक्तः अनेनेतःपूर्वं संसारिजनदुर्दशावलोकनेन दृयमानमानसत्वमुक्तम् । "स एकाकी न रमते" इतिश्रुतेःशङ्खचक्रगदापाणिः आश्रितानां रक्षणापेक्षायां रक्षणोपकरणग्रहणाय विलम्बो माभूदिति सर्वदा तैरुपेतः । 'पातु प्रणतरक्षायां विलम्बमसहन्निव । सदा पञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः' इत्यभियुक्तोक्तम् । पीतवासाः आश्रितरक्षणत्वरया बद्धकक्षः जगत्पतिः उक्तसकलविशेषहेतुभूतस्वस्वामिभावसंबन्धवान् उपयातः वैकुण्ठात् दशरथयज्ञवाटमाजगाम ॥१६॥

१७] ति० टी०–वैनतेयो गरुडः । केयूरं बाहुभूषणम् १७॥

१८] ति० टी०–ब्रह्मणा चेति । वन्द्यमान इत्यनुकृष्यते । समागत्येति । स ब्रह्मभिर्देवैर्मिलित्वा समाहितो देवकार्यतत्परः । समभिष्टूय सम्यक्स्तुत्वा । संनताः प्रणताः ॥ १८ ॥

रा० टी०–ब्रह्मणेति । समाहितः ब्रह्मादिष्वपि स्वतेजसा परिपूर्णो रघुनाथस्तत्र यागे तस्थौ तं रामं ब्रह्मणा सह संनता एव सर्वे सुराः समागम्य रघुनाथसमीपं प्राप्य समभिष्टूय सम्यक् स्तुत्वाऽब्रुवन् प्रार्थयाञ्चक्रुः । समाहित इत्यत्र वृद्ध्यर्थकहिधातोर्निष्ठा । चशब्द एवार्थे ॥ १७ ॥

गो० टी०–ब्रह्मणेति । तत्र सदसि ब्रह्मणा समागम्य समाहितः करिष्यमाणरक्षणकृत्ये एकाग्रः तस्थौ तमाश्रितरक्षणसंनद्धं सर्वे सुराः ब्रह्मादयः पितामहपुरोगमानित्युपसंहारात् । समभिष्टूय सम्यक् स्तुत्वा संनताः सम्यङ्नताः प्रणताः सन्तः अब्रुवन् ॥ १७ ॥

१९] ति० टी०–त्वामिति । अस्मदुःखहरणस्य त्वदेकसाध्यत्वादवतर्तुं नियोक्ष्यामहे । तदेवाह–राज्ञ इत्यादिना॥१९॥

२०] ति० टी०–धर्मज्ञस्येत्यादिराजविशेषणानि । ह्रीश्रीत्यादि राजपत्नीविशेषणं चावतारयोग्यताध्वननाय ॥ २० ॥

रा० टी०–प्रार्थनाकारमाह–त्वामिति । हे अविष्णो विष्णुविष्णो किंच हे विष्णो ब्रह्मादित्रिदेवव्यापक विभो सर्वसामर्थ्यविशिष्ट लोकानां जनानां हितकाम्यया त्वां नियोक्ष्यामहे । नियोजनमेवाह श्लोकद्वयेन अयोध्याधिपतेः प्रकटीभूतायोध्यास्वामिनः धर्मज्ञस्य सकलधर्मवेदितुः अत एव वदान्यस्य धर्मोपदेशकर्तुः अत एव महर्षिसमतेजसो राज्ञः महाराजाधिराजस्य तस्य प्रकटीभूतस्य दशरथस्य ह्रीश्रीकीर्त्युपमासु तिसृषु भार्यासु चतुर्विधं चतुरः अर्थधर्मकाममोक्षान् विशेषेण दधाति दानार्थं गृह्णाति तमात्मानं कृत्वा प्रकटय्य पुत्रत्वं स्वनिष्ठदशरथनिरूपितनित्यसुतत्वं आगच्छ लोकान्बोधय किंच आत्मानं साक्षात्स्वांशद्वारा च चतुर्विधं भरतादिसहितं कृत्वा प्रकटय्येत्यर्थः । अत्र प्रार्थयामहे इति वक्तव्ये नियोक्ष्यामहे इत्युक्त्या साकेतरघुनाथविहारस्थत्वं तेषां सूचितं तेन साकेताधीशोद्देश्यकोयं याग इति ध्वनितम् तेन यागकारककृपेः यागागतदेवादीनां च साकेतस्थत्वं ध्वनितम् ॥ १८ ॥ १९ ॥

गो० टी०–त्वामिति । अर्द्धमेकं वाक्यम् । हे विष्णो लोकानां हितकाम्यया हितेच्छया त्वां नियोक्ष्यामहे उत्साहयिष्यामहे 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । स्मारये त्वां न शिक्षये इतिवत् । केवलं त्वां प्रोत्साहयिष्यामः । स्वयमेव स्वकीयरक्षणे प्रवृत्तत्वादिति भावः । यदि नियोजनमेवार्थः स्यात् तदा पूर्वश्लोकोक्तमभिष्टूय संनता इत्येतद्विरुद्धयेत किंच नियोजनमत्र प्रार्थनमेव एवमुत्तरत्र भगीरथवचने हरस्तत्र नियुज्यतामिति वक्ष्यति ॥ १८ ॥

गो० टी०–किं नियोज्यमित्यत्राह द्वाभ्याम्–राज्ञ इत्यादि। पितृभावयोग्यत्वपराणि विशेषणानि । तस्येति यजमानो हस्तेन निर्दिश्यते ह्रीश्रीकीर्तयो दक्षकन्याः ता उपमा यासां तास्तथा चातुर्विध्यविधानं रावणरावणिलवणगन्धर्वविनाशाय॥१९॥२०॥

२१] ति० टी०–आत्मानं सोपकरणमात्मानम् । 'अन्येद्युः पाञ्चजन्यात्मा कैकेय्यां भरतोऽभवत् । तदन्येद्युः सुमित्रायामनन्तात्मा च लक्ष्मणः । सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत्प्रिये' इति पाद्मोक्तेः । अत्रात्मानमित्युक्त्या शङ्खचक्रानन्तानामपि भगवद्रूपता सूचिता । हुंकारेण भवानिव पाञ्चजन्यः शब्दमात्रेण सकलभुवनक्षोभकत्वाद्विष्णुतुल्य एवेति बोध्यम् । चतुर्विधमिति । चातुर्विध्यविधानं रावणेन्द्रजिल्लवणगन्धर्ववधादीनां प्रत्येकं देवकार्यरूपाणां सद्भावात् ॥ २१ ॥

रा० टी०–तत्रेति । हे विष्णो रः रेफस्य वाच्यो विष्णुः ब्रह्मादिष्वपि परिपूर्णो राम इत्यर्थः तत्संबोधनं किंच हे विष्णो ब्रह्मादित्रिदेवव्यापक मानुषो नराकृतिर्नित्यद्विभुजः परमात्मा त्वं तत्र तासु भार्यासु भूत्वा साक्षात् स्वांशद्वारा च प्रकटीभूय प्रवृद्धं लोककण्टकं दैवतैः देवतानां इमे अधीशाः दैवताः ब्रह्मविष्णुमहेश्वराः दैवतानि देवाः ते च तानि चेत्येकशेषः तैरवध्यं रावणं समरे त्वं जहि ॥ २० ॥

---

१ इदं पद्यं गो. रा. पुस्तकयोर्न दृश्यते । २ तस्येति गो. रा. पाठः ।

अवध्यं दैवतैर्विष्णो समरे जहि रावणम् । स हि देवान्सगन्धर्वान्सिद्धांश्च ऋषिसत्तमान् ॥ २२ ॥
राक्षसो रावणो मूर्खो वीर्योद्रेकेण बाधते । ऋषयश्च ततस्तेन गन्धर्वाप्सरसस्तथा ॥ २३ ॥
क्रीडन्तो नन्दनवने रौद्रेण विनिपातिताः । वधार्थं वयमायातास्तस्य वै मुनिभिः सह ॥ २४ ॥
सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः । त्वं गतिः परमा देव सर्वेषां नः परंतप ॥ २५ ॥
वधाय देवशत्रूणां नृणां लोके मनः कुरु । एवं स्तुतस्तु देवेशो विष्णुस्त्रिदशपुङ्गवः ॥ २६ ॥
पितामहपुरोगांस्तान्सर्वलोकनमस्कृतः । अब्रवीत्त्रिदशान्सर्वान्समेतान्धर्मसंहितान् ॥ २७ ॥
भयं त्यजत भद्रं वो हितार्थं युधि रावणम् । सपुत्रपौत्रं सामात्यं समन्त्रिज्ञातिबान्धवम् ॥ २८ ॥
हत्वा क्रूरं दुराधर्षं देवर्षीणां भयावहम् । दशवर्षसहस्राणि दशवर्षशतानि च ॥ २९ ॥
वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम् । एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ॥ ३० ॥

गो० टी०–मम पुत्रभावेन भवतां किं प्रयोजनं तत्राहुः–तत्रेति । तत्र दशरथभार्यासु प्रवृद्धं वरबलभुजबलैरभिवृद्धम् । मानुषभावः किमर्थं भजनीयस्तत्राह–अवध्यं दैवतैरिति । " कृत्यानां कर्तरि वा " इति पक्षे तृतीया ॥ २१ ॥

२२—२३] ति० टी०–कुतो ममैव नियोगस्तत्राह–अवध्यमिति ॥ २२ ॥ २३ ॥

रा० टी०–स इति । राक्षसः रघुनाथेच्छया प्राप्तराक्षःस्वभावः अत एव मूर्खः कार्याकार्यविचाररहितः स प्रसिद्धो रावणः वीर्योत्सेकेन वीर्यहेतुकगर्वविशिष्टेनैव देवादीन्बाधते हिशब्द एवार्थे २१

गो० टी०–स किमर्थं हन्तव्यस्तत्राह–स हीति । वीर्योत्सेकेन वीर्यकृतगर्वेण ॥ २२ ॥

रा० टी०–ऋषय इति । ततः प्राप्तराक्षस्स्वभावत्वात् ऋषयः नन्दनवने क्रीडन्तो गन्धर्वाप्सरसश्च रौद्रेण भयंकरेण तेन रावणेनैव किल प्रसिद्धौ हिंसिताः तुशब्दश्चार्थे तथाशब्द एवार्थे २२

गो० टी०–ऋषय इति । ततः वीर्योत्सेकात् । क्रूरेण तेन रावणेन ऋषयो हिंसिताः । क्रीडन्तः क्रीडन्त्यः लिङ्गविपर्ययं आर्षः । मिथुनतया चरतां हिंसनात् क्रूरेणेत्युक्तम् । किलेत्यैतिह्ये ॥ २३ ॥

२४–२५] ति० टी०–रौद्रेण कृत्याकृत्यविचारशून्येन । वधार्थं वधप्रार्थनार्थम् ॥ २४ ॥ २५ ॥

रा० टी०–वधार्थमिति । तस्य रावणस्य वधार्थं वधरूपप्रयोजनमुद्दिश्य वयं मुनिभिः सह सिद्धगन्धर्वयक्षाश्च आयाताः संमिलिताः ततो वै तस्मादेव हेतोः शरणं रक्षकं त्वां गताः प्राप्ताः ॥ २३ ॥

गो० टी०–वधार्थमिति । तस्य वधार्थं वयं मुनिभिः सहायाताः त्वत्समीपमिति शेषः । सिद्धादयश्चायाताः ततः रावणवधार्थं त्वां शरणमुपायं गताः ॥ २४ ॥

रा० टी०–त्वमिति । हे देव नित्यं क्रीडाविशिष्ट हे परंतप आश्रितशत्रुसूदन सर्वेषां नोऽस्माकं परमा उत्कृष्टा गतिः अतः नृणां लोके विद्यमानानां देवशत्रूणां वधाय त्वं मनःकुरु ॥

गो० टी०–रुद्रादिषु विद्यमानेष्वहमेव किमर्थमर्थ्य इत्याह–त्वमिति । हे देव त्वं नः परमा गतिः उपायः नान्ये । परान् शत्रून् तापयतीति परंतपः " द्विषत्परयोस्तापेः " इति खच् । अनेन शत्रुवधसामर्थ्यमुक्तम् । मनः कुरु अवतरितुमिति शेषः । देवशत्रूणामिति बहुवचनेन रावणरावणिलवणगन्धर्वादीनामपि वधोऽर्थितः । अनेनाभिप्रायेण पूर्वं कृत्वात्मानं चतुर्विधमित्युक्तम् ॥ २५ ॥

२६] ति० टी०–वधायेति । नृणां लोक इत्यस्यावतरितुमिति शेषः ॥ २६ ॥

रा० टी०–एवमिति । देवेशः देवे नित्यं क्रीडने ईशः समर्थः त्रिदशां ब्रह्मादयः पुङ्क्त्वा नसि प्रोता वृषभा इव यस्य सोऽविष्णुः विष्णुव्यापकः अत एव सर्वलोकनमस्कृतो रघुनाथः पितामहपुरोगान् ब्रह्मप्रभृतीन् धर्मसंहितान् रामोपासनरूपधर्मप्राप्तान् समेतान् मिलितान् सर्वान् त्रिदशानब्रवीत् । धर्मसंहितमितिपाठ इति भट्टाः ॥ २५ ॥

गो० टी०–एवमित्यादि । सार्द्धश्लोक एकान्वयः । पितामहपुरोगान् ब्रह्मप्रधानान् धर्मसंहितान् शरणागतिरूपधर्मसंयुतान् ॥ २६ ॥

२७–२८] ति० टी०–धर्मसंहितान् धर्मसहितानित्यर्थः । 'धर्मसंहितम्' इति वा पाठः ॥ २७ ॥ २८ ॥

रा० टी०–तद्वचनमेवाह–भयमित्यादि सार्द्धश्लोकद्वयेन । भयं त्यजत वो युष्माकं भद्रं कल्याणं भवितेति शेषः । कल्याणहेतुमाह देवर्षीणां भयावहं भयप्रदं दुरात्मानं दुर्व्यसनं क्रूरं क्रूरकर्माणं सपुत्रपौत्रं पुत्रपौत्रसहितं सामात्यं अमात्यसहितं समन्त्रिज्ञातिबान्धवं मन्त्रिज्ञातिबान्धवसहितं रावणं वो हितार्थं युधि हत्वा क्रूरकर्महेतुभूतशरीरं संत्यज्य दशवर्षसहस्राणि दशगुणितत्रिसहस्रवर्षाणि त्रिंशत्सहस्रवर्षाणीत्यर्थः दशवर्षशतानि दशगुणितत्रिशतवर्षाणि च त्रिसहस्रवर्षाणीत्यर्थः । संकलनया त्रयस्त्रिंशत्सहस्रवर्षाणि इमां पृथिवीं पालयन्साक्षादश्नन्मानुषे लोके मनुष्यदृष्टिपथे वत्स्यामि अत्र यद्वक्तव्यं

१ वीर्योत्सेकेनेति गो. रा. पाठः । २ ऋषयस्त्विति गो. रा. पाठः । ३ क्रूरेणेति गो. पाठः । ४ किल हिंसिता इति गो. रा. पाठः । ५ एवमुक्तइति गो. पाठः । ६ दुरात्मानमिति गो. रा. पाठः ।

मानुष्ये चिन्तयामास जन्मभूमिमथात्मनः । ततः पद्मपलाशाक्षः कृत्वात्मानं चतुर्विधम् ॥ ३१ ॥
पितरं रोचयामास तदा दशरथं नृपम् । ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः ॥
स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम् ॥ ॥ ३२ ॥

तमुद्धतं रावणमुग्रतेजसं प्रवृद्धदर्पं त्रिदशेश्वरद्विषम् ।
विरावणं साधु तपस्विकण्टकं तपस्विनामुद्धर तं भयावहम् ॥ ॥ ३३ ॥

तत् दशवर्षसहस्राणि दशवर्षशतानि च रामोराज्यमुपासित्वेत्यत्र प्रथमसर्गे उक्तम् । सार्धं श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०–भयमित्यादि । सार्द्धश्लोकद्वयमेकान्वयम् । भयं त्यजत वः युष्माकं भद्रमस्तु यस्मादहं सर्वेषां हितार्थं रावणं हत्वा धर्मसंस्थापनाय दशवर्षसहस्राणि वत्स्यामीति योजना । शङ्खचक्रगदापाणिरुपयात इति हि पूर्वमुक्तम् ॥२७॥२८॥

२९–३०] ति० टी०–हत्वेति । हत्वा वत्स्यामीति योजना ॥ २९ ॥ ३० ॥

रा० टी०–एवमिति । आत्मवान् आत्मानो नियम्यत्वेन सन्ति अस्येति आत्मवान् विष्णुः ब्रह्मादित्रिदेवव्यापकः एवमनेन प्रकारेण देवानां देवेभ्यो वरं दत्त्वा मानुषे लोके प्रकटीभूतामथ सकलमङ्गलरूपामात्मनो जन्मभूमिमयोध्यां चिन्तयामास सस्मार ॥ २८ ॥

गो० टी०–एवमिति । आत्मवान् सर्वात्मशेषी । मानुषे मनुष्येषु जात्येकवचनम् । चिन्तयामास यथा देवैराज्ञप्तं तथेति शेषः । जन्मभूमिं जन्मस्थानम् ॥ २९ ॥

३१] ति० टी०–मानुष्य इति । मनुष्यलोके यथा देवैराज्ञप्तं तथात्मनो जन्मभूमिं चिन्तयामास योग्यत्वेन विचारयामास । ततो विचारानन्तरम् ॥ ३१ ॥

रा० टी०–तत इति । ततः देवप्रार्थितस्वीकाराढेतोः तदा अयोध्यास्मृत्यनन्तरकाले पद्मपलाशाक्षः पद्मपत्रायतनेत्रो रामः चतुर्विधं साक्षात्स्वांशद्वारा च चतुर्मूर्तिमात्मानं कृत्वा पितृमनसि प्रापय्य नृपं राजराजं पितरं नित्यपितरं दशरथं रोचयामास प्रकाशयामास विनापि प्रत्ययमित्यनेन नित्यपदलोपः ॥ २९ ॥

गो० टी०–तत इति । ततः चिन्तानन्तरं पद्मपलाशाक्षः दशरथगुणस्मरणकृतनयनविकासोक्तिः । यद्वा पद्मपलाशाक्षः सर्वैः स्पृहणीयनयनयुगलः तथा च सर्वस्पृहणीयः स्वयमन्यं स्पृहयामास । यद्वा तस्य "यथाकप्यासं पुण्डरीकमेवमक्षिणी" इत्युक्तरीत्या परत्वचिह्नपुण्डरीकाक्षत्वयुक्तः । एवं च सर्वस्मात्परोऽपि जन्मरोचयामास यथा जनिमतो जन्महानिरभिलषिता तथा जनिरहितस्यापि जनिरभिलषितेत्यर्थः । दुर्लभं ह्यभिलषितं भवति कृत्वात्मानं चतुर्विधं जन्माभिलाषेऽपि दशरथगुणातिरेकेण चतुर्विधशरीरपरिग्रहमभिलषितवान् । आत्मानं स्वशरीरं चतुर्विधं पायसविभागक्रमेण पितरं "पिता पुत्रेण पितृमान् योनियोनौ" इत्युक्तरीत्या सर्वपिता स्वपुत्रं कंचित्पितरमभिलाष रोचयामास ऐच्छत् तदा रक्षणोद्योगसमये दशरथं नृपं गुणैर्दशरथोपममित्युक्तरीत्या जनित्वार्जितैः स्वाभाविकैश्च गुणैः स्वसदृशं देवोक्तं दशरथमेव स्वजन्मभूमित्वेन निश्चितवानित्यर्थः ॥ ३० ॥

३२] ति० टी०–रोचयामासैच्छत् । स्तुतिभिस्तुष्टुवुः ३२॥

रा० टी०–तत इति । ततः प्रार्थितस्वीकारानन्तरं सरुद्राः ब्रह्मरुद्रविष्णुसहिताः साप्सरोगणा अप्सरोगणसहिताः देवर्षिगन्धर्वा दिव्यरूपाभिः दिव्यं प्राकृतविलक्षणं रूपमस्ति वर्णनीयत्वेन यासु ताभिः गुणबोधनवाक्यैः मधुसूदनं तुष्टुवुः । मधुसूदनशब्दार्थस्तु मधुं दैत्यं नारायणद्वारा सूदयति हिंसयतीति मधुसूदनः । यद्वा मधौ चैत्रे सः प्रादुर्भावो यस्य स मधुसूः ईश्वरावुत्कर्षेणानिति पालयतीति उदनः मधुसूश्चासौ उदनश्च मधुसूदनः । यद्वा उना शंभुना उद्यते अहर्निशमुच्यते इति ऊत् रामतारकमन्त्रः तेनानिति संसारमृत्युवारणेन शरणागतान् पालयतीति ऊदनः मधुसूश्चासौ ऊदनश्च मधुसूदनस्तम् ॥ ३० ॥

गो० टी०–तत इति । ततः भगवदिच्छानन्तरं सरुद्रा इत्यनुवादात् पूर्वं रुद्रोपि शरणागत इति सिद्धम् । दिव्यरूपाभिः दिव्यात्मस्वरूपविषयिणीभिः स्तुतिभिः स्तुतिरूपप्रबन्धैः तुष्टुवुः श्लाघयामासुः । मधुसूदनमिति मधुवदयमपि निरसनीय इत्याशये नोक्तम् ॥ ३१ ॥

३३] ति० टी०–स्तुत्वा च यदूचुस्तदाह–तमिति । रावणमुद्धर समूलमुन्मूल्य विरावणं विशेषेण त्रिलोकीक्रन्दनं तपस्विनां भयावहमित्यन्वयः । रावणस्मरणेनातिभीतचित्तानां देवानामुक्तौ तमित्यस्य पुनरुक्तिर्न दोषाय । अत्रेन्द्रादिदेवानां सपितामहानां नियोजकत्वं विभोश्च नियोज्यत्वं न दोषो लीलावत्त्वादित्यन्यत्र विस्तरः ॥ ३३ ॥

रा० टी०–स्तुत्यनन्तरं पुनः प्रार्थितं तदाह–तमिति । उद्धतं प्रसिद्धमुग्रतेजसमुत्कटप्रतापं प्रवृद्धदर्पं प्रभूतगर्वविशिष्टं त्रिदशेश्वरद्विषमिन्द्रद्रोहिणं अत एव विरावणं सर्वसज्जनदुःखप्रदं तपस्विकण्टकं तपस्विनां परमात्मविचारशीलानां कण्टकं शत्रुं विचारविघातकमित्यर्थः । तपस्विनां व्रतपरायणानां भयावहं भयप्रदं तं रावणं साधु यथा स्यात्तथा उद्धर विनाशय 'क्षुद्रे शत्रौ च कण्टकम्' इति वैजयन्ती ॥ ३१ ॥

१ मानुष इति गो. रा. पाठः ।

तमेव हत्वा सबलं सबान्धवं विरावणं रावणमुग्रपौरुषम् ।
स्वलोंकमागच्छ गतज्वरश्चिरं सुरेन्द्रगुप्तं गतदोषकल्मषम् ॥ ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।

विष्णुसुराणां रावणविषयकः संवादः, ब्रह्मणः सकाशाद्रावणवरप्राप्तिनिवेदनम्, विष्वक्तर्धानानन्तरं दशरथयज्ञभूमावग्रितः प्रादुर्भूतप्राजापत्यनरेण दशरथाय पायसदानम्, दशरथस्य भाविपुत्रप्राप्त्यर्थं पायसस्य स्वदारान्प्रति यथाक्रमं विभागश्च ।

ततो नारायणो विष्णुर्नियुक्तः सुरसत्तमैः । जानन्नपि सुरानेवं श्लक्ष्णं वचनमब्रवीत् ॥ १ ॥

गो० टी०–उक्तमर्थं सर्गान्ते पुनः संगृह्णाति–तमिति । उद्धतं जन्मत एवोद्धतं तं प्रसिद्धम् उग्रतेजसमुग्रप्रतापं वरदानेन प्रवृद्धदर्पम् । लोकान् विरावयतीति विरावणं सर्वलोकानामाक्रन्दयितारं तपस्विनां कण्टकं शत्रुम् 'क्षुद्रे शत्रौ च कण्टकः' इति वैजयन्ती । अत एव तपस्विनां भयावहं तं रावणं साधु निःशेषमुद्धर उन्मूलय ॥ ३२ ॥

३४] ति० टी०–तमिति । तं हत्वैवेत्यन्वयः । सबान्धवमित्यनेन लवणादिवधसूचनम् । हे सुरेन्द्र उपेन्द्र । गुप्तम् अर्थात्त्वयेति शेषः । गतदोषकल्मषं दोषा रागादयस्तद्रूपकल्मषहीनं स्वर्लोकं वैकुण्ठाख्यम् । गतज्वरः स्वभावतो निवृत्ताशेषतापः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०–तमेवेति । सबलं ससैन्यं सबान्धवं राक्षसधर्मैकत्वेन बन्धुतां प्राप्तं विरावणं सर्वसज्जनदुःखप्रदमुग्रपौरुषमतिबलवन्तं तं रावणं हत्वैव हे सुरेन्द्र सुष्ठु रा दानं येषां तेषामिन्द्रः तत्संबोधनं दानिश्रेष्ठेत्यर्थः । गतदोषकल्मषं गतं नित्यं निवृत्तं दोषकल्मषं रागद्वेषादिरूपं मलं यस्मात् गुप्तं वाङ्मनसगोचरातीतं स्वःपरलोके गोलोके लोक्यते दृश्यते इति स्वर्लोकं साकेतं गतज्वरः निवर्तितसुरसंतापस्त्वमागच्छ प्राप्नुहि अत्र । गच्छेति वक्तव्ये आगच्छेत्युक्त्या तेषां देवानां साकेतनिवासित्वं व्यक्तम् ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो० टी०–तमेवेति । एवकारेण विभीषणव्यवच्छेदः स्वर्लोकं वैकुण्ठम् । क्वचित्स्वलोकमिति पाठः । चिरं चिरकालस्थायी अनेन ब्रह्मलोकादिव्यावृत्तिः सुरेन्द्रेति संबोधनं गुप्तमस्मदादिभिः दुरधिगमम् 'अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मनः । स्वयैव प्रभया राजन् दुष्प्रेक्ष्यं देवदानवैः' इतिमहाभारतोक्तेः । गतदोषकल्मषं दोषा रागद्वेषादयः गतानि तद्रूपकल्मषाणि यस्मात्तत्तथा अनेनेन्द्रलोकादिव्यावृत्तिः । गतज्वरः आश्रितसंरक्षणेन गतव्यथः अनेन पुनःप्राप्तिपर्यन्तं संसारिविषये कदैते निस्तरिष्यन्तीति चिन्ताकुलत्वमुक्तम् । आगच्छेत्यनेन वैकुण्ठादवतीर्णत्वं गम्यते । अत्र स्वर्लोकपदस्येन्द्रलोकपरत्वे गुप्तत्वगतदोषकल्मषत्वादिविरोधः । अन्तरिक्षादुपरितनलोकमात्रस्य स्वर्गपदवाच्यत्वात् । अत एव हि क्वचिद्ब्रह्मलोकादावपि स्वर्गपदप्रयोगः । ब्रह्मलोकं प्रयास्यतीत्यत्रापि ब्रह्मणः स्वस्य लोकमप्राकृतस्थानं परमपदमिति व्याख्यातम् । स्वलोकमिति सम्यक् पाठः । सुरेन्द्रः विष्वक्सेनः ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

१] ति० टी०–तत इति । नियुक्तः प्रार्थितः यद्वाञ्छम इत्यर्थः । अत एव जानन्नपि वधोपायमज्ञ इव तेषामविनीतत्वलज्जापरिहाराय तान्पप्रच्छेत्यर्थः । जानन् वधोपायमिति शेषः ॥ १ ॥

रा० टी०–तत इति । ततः देवस्तवनानन्तरं सुरसत्तमैः सुरश्रेष्ठैः साकेतस्थैरित्यर्थः । नियुक्तः प्रार्थितः नारायणो विष्णुः नारायणश्च आः ब्रह्मा च उः शिवश्च नारायणावस्तेषव्यापको रघुनाथः जानन् वधोपायं विज्ञातापि एवं वक्ष्यमाणप्रकारेण श्लक्ष्णं मनोहरं वचनमब्रवीत् । अत एव पर्यायीभूतोत्तरितविष्णुनारायणान्यतरस्य न वैयर्थ्यम् पूर्वोत्तरग्रन्थश्चाविरुद्धः ॥ १ ॥

गो० टी०–एवं मनुष्यलोके दशरथपुत्रत्वेनावतीर्य रावणवधः कर्तव्य इत्युक्तं तत्र किं मया उपेन्द्रादिवत् स्वस्वरूपेण स्थातव्यम् उत प्रकारान्तरेणेति भगवान् बहुमानार्थं पृच्छतितत इत्यादि । न रिष्यन्ति न नश्यन्तीति नराः नित्यवस्तूनि "अन्येभ्योऽपि दृश्यते" इति डप्रत्ययः । सुप्सुपेति नगनैकादिवत् समासः । नराणां समूहो नारम् "तस्य समूहः" इत्यण् नारमयनं वासस्थानं यस्यासौ नारायणः । "पूर्वपदात्संज्ञायामगः" इति णत्वम् सर्वान्तर्यामीत्यर्थः । यद्वा नाराणामयनं नारायणः इध्मप्रव्रश्चनः पलाशशातन इत्यादिवल्लयुडन्तस्यापि पुल्लिङ्गत्वम् एवं सर्वस्मात् परोपि सुरसत्तमैः नियुक्त इत्याश्रितपारतन्त्र्यमुच्यते । तादृशो विष्णुः जानन्नपि उत्तरनिश्चयज्ञोऽपि सन्मानार्थं श्लक्ष्णं मधुरं वचनमब्रवीत् ॥ १ ॥

उपायः को वधे तस्य राक्षसाधिपतेः सुराः । यमहं तं समास्थाय निहन्यामृषिकण्टकम् ॥ २ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययम् । मानुषं रूपमास्थाय रावणं जहि संयुगे ॥ ३ ॥
स हि तेपे तपस्तीव्रं दीर्घकालमरिंदमः । येन तुष्टोऽभवद्ब्रह्मा लोककृल्लोकपूर्वजः ॥ ४ ॥
संतुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः । नानाविधेभ्यो भूतेभ्यो भयं नान्यत्र मानुषात् ॥ ५ ॥
अवज्ञाताः पुरा तेन वरदाने हि मानवाः । एवं पितामहात्तस्माद्वरदानेन गर्वितः ॥ ६ ॥
उत्सादयति लोकांस्त्रीन्स्त्रियश्चाप्युपकर्षति । तस्मात्तस्य वधो दृष्टो मानुषेभ्यः परंतप ॥ ७ ॥
इत्येतद्वचनं श्रुत्वा सुराणां विष्णुरात्मवान् । पितरं रोचयामास तदा दशरथं नृपम् ॥ ८ ॥
स चाप्यपुत्रो नृपतिस्तस्मिन्काले महाद्युतिः । अयजत्पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ॥ ९ ॥

२-३] ति० टी०-उपाय इति । यमुपायमास्थाय तमहं निहन्यां स तस्य वध उपायः क इत्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०-तद्वचनमेवाह-उपाय इति । हे सुराः तस्य राक्षसाधिपतेः रावणस्य वधे उपायः कः यमुपायं आस्थाय संप्राप्य ऋषिकण्टकं तं रावणमहं हन्याम् ॥ २ ॥

गो० टी०-उपाय इति । आस्थाय स्वीकृत्य यमुपायमास्थाय तं निहन्यां स उपायः क इत्यन्वयः ॥ २ ॥

रा० टी०-एवमिति । एवमनेन प्रकारेण उक्ताः रघुनाथेन पृष्टाः सर्वे सुराः अव्ययं प्राकृतदेशकालवस्तुपरिच्छेदशून्यं विष्णुं ब्रह्मादित्रिदेवव्यापकं रामं प्रत्यूचुः । तदुक्तिमेवाह-मानुषीमिति । मानुषीं नित्यद्विभुजनराकृतिं स्वविग्रहं आस्थाय प्रकटायोध्यायां प्रकटय्य संयुगे संग्रामे रावणं जहि॥३॥

गो० टी०-एवमिति । मानुषीं न तु दैवीम् ॥ ३ ॥

४] ति० टी०-स हीति । लोकपूर्वजः सर्वलोकसमष्टित्वात् " हिरण्यगर्भः समवर्तताग्रे " इति श्रुतेश्च । यद्वा ब्रह्मा चतुर्मुखः लोकपूर्वजत्वं च हिरण्यगर्भतादात्म्याध्यासेन ॥ ४ ॥

रा० टी०-रावणस्यान्यावध्यत्वे हेतुमाह-स इति सार्धश्लोकद्वयेन । हे अरिन्दम आश्रितारिनिवर्तक स रावणः दीर्घकालं तीव्रं तपस्तेपे हि प्रसिद्धमेतत् येन तपसा लोककृत्साक्षात् स्वांशद्वारा च लोककर्ता अतएव लोकपूर्वजः लोके सत्यलोके पूर्वजः स्वांशद्वारा पूर्वं प्रादुर्भूतो ब्रह्मा तुष्टोऽभवत्॥४॥

गो० टी०-तत्र हेतुमाह-सहीति । लोककृत्वे हेतुर्लोकपूर्वज इति । लोकशब्दोऽत्र देवादिजनपरः ॥ ४ ॥

५-६] ति० टी०-संतुष्ट इति । मानुषभिन्नेभ्यः प्राणिमात्रेभ्यो भयं न भवेदिति वरं ददावित्यन्वयः ॥ ५ ॥ ६ ॥

रा० टी०-संतुष्ट इति । संतुष्टः तत्तीव्रतपसा संतोषं प्राप्तः प्रभुः समर्थः साकेतस्थो ब्रह्मा तस्मै संकेतादवतीर्णाय राक्षसाय रघुनाथेच्छया प्राप्तरक्षस्स्वभावाय रावणाय वरं प्रददौ। वरमेवाह-मानुषात् नराकृतिपरमात्मनोऽन्यत्र भूतेभ्यः तत्स्मृतिविषयेभ्यः नानाविधेभ्यः प्राकृतमनुष्यादिभ्यः देवादिभ्यः ब्रह्मादिभ्यश्च भयं न भवेदिति शेषः ॥ ५ ॥

गो० टी०-संतुष्टइति । मानुषादन्यत्र मानुषं विना नानाविधेभ्यो भूतेभ्यो भयं नेति वरं प्रददावित्यन्वयः ॥ ५ ॥

रा० टी०-ननु नराकृतिपरमात्मनोऽपि भयाभावः कुतो न याचितः इत्यत आह-अवेति । हे अव अस्मद्रक्षक पुरा पौर्वकालिके वरदाने वरदापने वरयाचनसमय इत्यर्थः।ते अवाङ्मनसगोचराः मानवाः मनुवंशत्वेन प्रसिद्धाः नराकृतिनित्यद्विभुजपरमात्मानो भवन्तो नैव ज्ञाताः हिशब्द एवार्थे । वरदानेन मानवा इति पाठे तेन रावणेन मानवा न ज्ञाता इत्यर्थः । अन्तर्भावितण्यिर्थकोऽत्र दाधातुः ॥ ६ ॥

गो० टी०-अभयं कुतो न दत्तं मानुषेभ्य इत्यत्राह-अवज्ञाता इति ॥ ६ ॥

७-८] ति० टी०-दृष्टो निश्चितः ॥ ७ ॥ ८ ॥

रा० टी०-एवमिति । एवमनेन प्रकारेण तस्मात्पितामहाद्ब्रह्मणः वरं प्राप्यैव दर्पितः प्राप्तगर्वः सः त्रीन् लोकानुत्सादयति पीडयति स्त्रियश्चापकर्षति हरति । उपसंहरन्नाह-तस्मादिति । हे परंतप तस्मादुक्तहेतोः तस्य रावणस्य वधः मानुषेभ्यः मनुवंशविशेषाद्भवतः दृष्टः ज्ञातः बहुत्वमादरार्थम् एतेन प्रकटीभूय तद्वधं कुरु इति प्रार्थना सूचिता ॥ ७ ॥

गो० टी०-एवमिति । दर्पितः संजातदर्पः ॥ ७ ॥

रा० टी०-इतीति । आत्मवान् आत्मानो नियम्याः सन्ति अस्येति विष्णुः ब्रह्मादित्रिदेवव्यापको रामः इति अनेन प्रकारेण सुराणामेतद्वचनं श्रुत्वा नृपं राजराजं पितरं नित्यपितरं दशरथं रोचयामास ॥ ८ ॥

गो० टी०-प्रकृतमुपसंहरति-तस्मादिति । इतीति पितरमिति । मनुष्यरूपेणावतरितुमिति शेषः ॥ ८ ॥

९] ति० टी०-स चापीति । दशरथोऽपीत्यर्थः । तस्मिन्काले भगवदवतितीर्षाकाले । पुत्रियामिति ह्रस्वश्छान्दसः ॥९॥

रा० टी०-स इति । अपुत्रः पुत्रप्राकट्यरहितः महाद्युतिः पूर्वतोऽप्यतिदीप्तिमान् अरिसूदनः शत्रुनाशनः पुत्रेप्सुः पुत्रप्राकट्यकामः स प्रसिद्धो दशरथः पुत्रियां पुत्रप्राकट्यहेतुभूतामिष्टिं तस्मिन्काले अयजदकरोत् ॥ ९ ॥

१ मानुषीं तनुमिति गो. रा. पाठः। २ वरं प्राप्येति गो. रा. पाठः। ३ व्यवकर्षतीति गो. व्यपकर्षतीति रा. पाठः।४नृपं दशरथं भूशमिति गो. रा. पाठः।

स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम् । अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः ॥ १० ॥
ततो वै यजमानस्य पावकादतुलप्रभम् । प्रादुर्भूतं महाद्भूतं महावीर्यं महाबलम् ॥ ११ ॥
कृष्णं रक्ताम्बरधरं रक्तास्यं दुन्दुभिस्वनम् । स्निग्धहर्यक्षतनुजश्मश्रुप्रवरमूर्धजम् ॥ १२ ॥
शुभलक्षणसंपन्नं दिव्याभरणभूषितम् । शैलशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमम् ॥ १३ ॥
दिवाकरसमाकारं दीप्तानलशिखोपमम् । तप्तजाम्बूनदमयीं राजतान्तपरिच्छदाम् ॥ १४ ॥
दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियाम् । प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ॥ १५ ॥

गो० टी०–स चापीति । तस्मिन् काले भगवदवतितीर्षाकाले पुत्रियामित्यत्र ह्रस्व आर्षः ॥ ९ ॥

१०] ति० टी०–स इति । निश्चयमवतारविषयम् आमन्त्र्य साधयामीत्युक्त्वेत्यर्थः । अन्तर्धानं गत इति तस्मादेव समाजादिति शेषः ॥ १० ॥

रा० टी०–स इति । विष्णुः ब्रह्मादित्रिदेवव्यापकः स रघुनाथः निश्चयं स्वप्रादुर्भावदार्ढ्यं कृत्वा पितामहं साकेतस्थब्रह्माणमामन्त्र्यसंभाष्य च महर्षिभिः कृतसाक्षात्कारपरमात्मभिः ऋष्यशृङ्गादिभिः देवैः साकेतस्थब्रह्मादिभिश्च पूज्यमानः सन्नन्तर्धानं अन्तःवृन्दावनमहावैकुण्ठमहाशंभुलोकचित्रकूटमध्ये धीयते रघुनाथेन नित्यं पाल्यते यत् तत् अप्रकटसाकेतपुरं गतः प्राप्तः । किंच अन्तर्धानं सर्वाप्रत्यक्षतां गतः अप्रकटायोध्यायां स्थित इत्यर्थः । चकार आदृत्यान्यत्राप्यन्वेति ॥ १० ॥

गो० टी०–स इति । निश्चयं मनुष्यभूत एव वावतरिष्यामीति निश्चयमामन्त्र्य साधयामीत्युक्त्वा ॥ १० ॥

११] ति० टी०–तत इति । अन्तर्धानानन्तरमित्यर्थः । अन्तर्धाय भगवानेव स्वतेजःसंभृतपायसमादाय हुताग्नेः सकाशात्प्रादुर्भवति स्म । नह्यन्यस्य भगवत्तेजोधारणे शक्तिरस्ति । तदेवाह—महद्भूतमिति । 'एको विष्णुर्महद्भूतम्' इत्युक्तेः । अतुलप्रभं विद्युदादिवदृष्टिप्रतिघातकतेजोवत् । भूतं प्राणी ॥ ११ ॥

रा० टी०–रघुनाथोपदिष्टब्रह्मणा रघुनाथप्रादुर्भावसूचकं तेजोमयपापसंप्रेषितमिति वर्णयन्नाह–तत इत्यादि पञ्चभिः श्लोकैः । ततः रघुनाथोपदिष्टब्रह्मप्रेरणातः यजमानस्य पावकात्प्रादुर्भूतमतुलप्रभम् अतुला तोलयितुमशक्या प्रभा यस्य अत एव महत् सर्वपूज्यं अत एव भूतं चिन्तनीयं महावीर्यं अघटितघटनापटीयो देहबलविशिष्टं महाबलं तादृशेन्द्रियबलविशिष्टम् । वैशब्दो हेत्वर्थे ॥ ११ ॥

गो० टी०–अथ पुत्रकामेष्टिफलं भगवतश्चतुर्धावतारं सूचयन् प्रजापतिप्रेरितपुरुषेण पायसप्रदानं दर्शयति–ततो वा इति । श्लोकपञ्चकमेकान्वयम् । ततः विष्णोरन्तर्द्धानानन्तरम् । यजमानस्येति वर्तमाननिर्देशेन द्रव्यत्यागकाल एव प्रादुर्भावः सूचितः । पावकात् आहवनीयात् भूतं पुरुषविशेषः ॥ ११ ॥

१२] ति० टी०–कृष्णं कृष्णवर्णम् । स्निग्धाश्चिक्कणा हर्यक्षस्य सिंहस्येव तनुजा लोमानि श्मश्रुप्रवरा मूर्धजाः केशाश्च यस्य तत् । मुखस्थरोमाणि श्मश्रुप्रवरो मुखस्थं व्याप्तं रोम[1]२

रा० टी०–कृष्णं कृष्णवर्णं रक्ताम्बरधरं अरुणवस्त्रयुक्तं रक्ताक्षं अरुणनेत्रं दुन्दुभिस्वनं दुन्दुभिसदृशगम्भीरनादविशिष्टं स्निग्धाः दर्शनमात्रेण स्नेहोत्पादकाः हर्यक्षस्य सिंहस्येव तनुजाः लोमसमूहाश्च श्मनि मुखे श्रयते इति श्मश्रु च प्रवराः दीर्घाः मूर्धजाः केशाश्च यस्य तत् ॥ १२ ॥

गो० टी०–स्निग्धाः चिक्कणाः हर्यक्षस्येव तनुजाः लोमानि श्मश्रुप्रवरा मूर्द्धजाः केशाश्च यस्य तत्तथा समुत्सेधः उन्नतिः दृप्तशार्दूलविक्रमं तद्वद्भयंकरम् ॥ १२ ॥ १३ ॥

१३] ति० टी०–समुत्सेध उच्छ्रायः । दृप्तशार्दूलवद्विक्रमः पादविन्यासो यस्य तत् ॥ १३ ॥

रा० टी०–शुभेति । शुभलक्षणसंपन्नं सामुद्रिकोक्तसल्लक्षणसंयुक्तं दिव्याभरणभूषितं प्राकृतविलक्षणभूषणभूषितम् शैलस्य पर्वतस्य शृङ्गवत्समुत्सेधमुन्नतं दृप्तो यः शार्दूलो व्याघ्रस्तद्विक्रम इव विक्रमः पादन्यासो यस्य तत् ॥ १३ ॥

१४] ति० टी०–दिवाकरेति । तद्वत्प्रभामण्डलवत्त्वात् । तैक्ष्ण्ये दृष्टान्तो दीप्तानलेत्यादि । तप्तेति । राजतो रजतविकारः अन्तपरिच्छदः पिधानपात्रं यस्यास्ताम् ॥ १४ ॥

रा० टी०–दिवाकरेति । दिवाकरसमाकारं दिवाकरस्य सूर्यस्य समः तुल्य आकार आकृतिर्यस्य तेजोविशेषेण अलक्ष्यमाणावयवविभागक इत्यर्थः । सएव दीप्तानलशिखोपमं तप्तजाम्बूनदमयीं तप्तं सद्यः प्रतप्तमिव यज्जाम्बूनदं सुवर्णं तन्मयीम् राजतो रजतविकारोऽन्तः उपरिभागवर्ती परिच्छद आच्छादनं यस्यास्ताम् ॥ १४ ॥

गो० टी०–प्रभामण्डलवत्तया दिवाकरसमाकारं तैक्ष्ण्यातिशयेन दीप्तानलशिखोपमं तप्तजाम्बूनदमयीं द्रुतकनकमयीं राजतः रजतविकारः अन्ते उपरि परिच्छदः पिधानपात्रं यस्यास्ताम् ॥ १४ ॥

१५] ति० टी०–पात्रीति । लिङ्गसामान्यादुत्प्रेक्षते पत्नीमिवेति । प्रगृह्येति । स्वयं दोर्भ्यां प्रगृह्य प्रादुर्भूतमित्यन्वयः । मायामयीमिव । इवशब्द एवार्थे भगवतो मायैवेत्यर्थः ॥ १५ ॥

रा० टी०–दिव्येति । दिव्यपायससंपूर्णां प्राकृतविलक्षणपायसपूरिताम् प्रियां प्रीतिविषयीभूतां पत्नीमिव पत्नीसदृशीं

---

१ कृष्णरक्ताम्बरधरमिति गो. पाठः ।

समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपम् । प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ॥ १६ ॥
ततः परं तदा राजा प्रत्युवाच कृताञ्जलिः । भगवन्स्वागतं तेऽस्तु किमहं करवाणि ते ॥ १७ ॥
अथो पुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत् । राजन्नर्चयता देवानद्य प्राप्तमिदं त्वया ॥ १८ ॥
इदं तु नृपशार्दूल पायसं देवनिर्मितम् । प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनम् ॥ १९ ॥
भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै । तासु त्वं लप्स्यसे पुत्रान्यदर्थं यजसे नृप ॥ २० ॥
तथेति नृपतिः प्रीतः शिरसा प्रतिगृह्य ताम् । पात्रीं देवान्नसंपूर्णां देवदत्तां हिरण्मयीम् ॥ २१ ॥
अभिवाद्य च तद्भूतमद्भुतं प्रियदर्शनम् । मुदा परमया युक्तश्चकाराभिप्रदक्षिणम् ॥ २२ ॥

विपुलां बृहतीं हस्तमात्रेण ग्रहीतुमशक्यामित्यर्थः । मायामयीं अद्भुतत्वेन मायारचितामिव सत्यामित्यर्थः ॥ १५ ॥

गो० टी०–पात्र्याः स्त्रीलिङ्गत्वेन पत्नीसाम्यम् मायामयीमिव असंभावितत्वेनाश्चर्यावहामित्यर्थः । स्वयं प्रगृह्य प्रादुर्भूतमित्यन्वयः । विपुलतरत्वेन हस्तमात्रेण ग्रहीतुमशक्यत्वात् बाहुभ्यामित्युक्तम् ॥ १५ ॥

१६] ति० टी०–दशरथं समवेक्ष्येत्यन्वयः । प्राजापत्यं प्रजापतिना प्रेषितं प्रजापतेः प्रजापालकाद्विष्णोः संभूतम् तद्रूपमित्यर्थः ॥ १६ ॥

रा० टी०–पात्रीं दोर्भ्यां स्वयं प्रगृह्य समवेक्ष्य नृपं दर्शयित्वा नृपं दशरथमिदं वाक्यमब्रवीत् । तद्वाक्यमेवाह–हे नृप प्राजापत्यं प्रजापतिप्रेषितमिह भवत्समीपे अभ्यागतं प्राप्तं नरं पुरुषविशेषं मां विद्धि जानीहि ॥ १६ ॥

गो० टी०–समवेक्ष्येति । दशरथं समवेक्ष्येदमब्रवीत् कथमिहागतं मां प्राजापत्यं प्रजापते रागतम् " दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति प्राग्दीव्यतीयो ण्यप्रत्ययः नरं विद्धि ॥१६॥

१७] ति० टी०–ततः परं प्राजापत्यं मां विद्धीति तदुक्त्यनन्तरम् पूर्वं कृत्यात इव भीत एव तद्वचनश्रवणोत्तरं निर्भय उवाचेत्यर्थः ॥ १७ ॥

रा० टी०–अत इति । तदा नरवचनश्रवणानन्तरकाले कृताञ्जलिर्बद्धयुगलकरो राजा अतः तदुक्तिश्रवणाद्धेतोः परं तृप्तिकरं वचः प्रत्युवाच सम्यगूचे । तदेवाह–ते तवागतमागमनं स्तु अस्मत्प्रेरकमस्तु आज्ञापयेत्यर्थः । प्रेरणार्थक धृधातोर्निष्पन्नं स्तु इति हे भगवन् अघटितघटनापटीयस्ते तव अहं किं करवाणि ॥ १७ ॥

गो० टी०–ततः परमिति । ततःपरं तदनन्तरमिति यावत् । प्राजापत्यं च मां विद्धीत्युक्त्यनन्तरमित्यर्थः । तदा तदैव ॥ १७ ॥

१८] ति० टी०–देवानर्चयता हयमेधेनेति शेषः ॥ १८ ॥

रा० टी०–अथो इति । अथो महाराजवचनानन्तरं प्राजापत्यो नरः इदं वक्ष्यमाणं वाक्यं पुनः अब्रवीत् । तदेवाह–हे राजन् देवान् नित्यं क्रीडापरान् साकेतनिवासिनः अर्चयता पूजनं कारयता त्वया इदं स्वाभिलषितसूचकं सद्यः प्राप्तम् ॥ १८ ॥

गो० टी०–अथो इति । अथो अथेति पर्यायौ अर्चयता अश्वमेधपुत्रकामेष्टिभ्यामिति शेषः ॥ १८ ॥

१९] ति० टी०–देवनिर्मितं देवेन प्रजापतिना निर्मितं धन्यं प्रशस्तम् ॥ १९ ॥

रा० टी०–इदमिति । देवनिर्मितं देवैः साकेतनिवासिसुरैः निर्मितं रचितं प्रजाकरं पुत्रप्राकट्यनिमित्तं धन्यं धनहेतुम् अरोगस्य भाव आरोग्यं तस्य वर्द्धनम् इदं पायसं हे नरशार्दूल पुरुषश्रेष्ठ त्वं गृहाण । तुना एतदभिवाद्य ॥ १९ ॥

गो० टी०–इदंशब्दार्थमाह–इदं त्विति । देवनिर्मितं देवेन विष्णुना निर्मितं धन्यं धनकरं स्वर्गादित्वाद्यत् ॥ १९ ॥

२०] ति० टी०–भार्याणाम् । संबन्धसामान्ये षष्ठी । भार्याभ्य इत्यर्थः । आनुरूप्यं महिषीत्वयशःशीलगुणादिना॥२०॥

रा० टी०–पायसग्रहणानन्तरं यत्कर्तव्यं तदाह–भार्याणामिति । अभीत यूयं भक्षयत इत्युक्त्वा अनुरूपाणां दिव्यपायसभक्षणयोग्यानां समानकुलोद्भवानामेवेत्यर्थः । भार्याणां प्रयच्छ भार्याणामिति संबन्धसामान्ये षष्ठी ताश्च पायसभक्षिकाश्च पुत्रान् त्वं लप्स्यसे एव यदर्थं यत्प्राकट्यार्थं यजसे । वैशब्द एवार्थे ॥ २० ॥

गो० टी०–भार्याणामिति । अनुरूपाणां सवर्णानामित्यर्थः । चतुर्थ्यर्थे षष्ठी ॥ २० ॥

२१] ति० टी०–हिरण्मयीं हिरण्यविकाराम् ॥ २१ ॥

रा० टी०–तथेति । प्रीतः सर्वप्रीतिविषयीभूतो नृपतिः देवान्नसंपूर्णां दिव्यपायसपूरितां देवदत्तां साकेतनिवासिप्राजापत्यनरदत्तां हिरण्मयीं तां विपुलां पात्रीं तथेत्युक्त्वा प्रतिगृह्य शिरसाऽभिवाद्य च अद्भुतं प्राकृतविलक्षणं प्रियदर्शनं मनोहररूपं भूतं प्राप्तं तत् प्राजापत्यनररूपं तेजश्च शिरसाभिवाद्य परमया मुदा युक्तः सन् अभिप्रदक्षिणं चकार । द्वयोरेकत्रान्वयः ॥ २१ ॥

गो० टी०–तथेति । देवान्नं देवनिर्मितान्नं देवदत्तां देवप्रेरिताम् ॥ २१ ॥

२२] ति० टी०–मुदेति । अभिप्रदक्षिणं पुनःपुनः प्रदक्षिणम् ॥ २२ ॥

गो० टी०–अभिवाद्येति । अभितः प्रदक्षिणमभिप्रदक्षिणम् ॥ २२ ॥

---

१ नरशार्दूलेति गो. पाठः ।

ततो दशरथः प्राप्य पायसं देवनिर्मितम् । बभूव परमप्रीतः प्राप्य वित्तमिवाधनः ॥ २३ ॥
ततस्तदद्भुतप्रख्यं भूतं परमभास्वरम् । संवर्तयित्वा तत्कर्म तत्रैवान्तरधीयत ॥ २४ ॥
हर्षरश्मिभिरुद्द्योतं तस्यान्तःपुरमाबभौ । शारदस्याभिरामस्य चन्द्रस्येव नभोऽंशुभिः ॥ २५ ॥
सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् । पायसं प्रतिगृह्णीष्व पुत्रीयं त्विदमात्मनः ॥ २६ ॥
कौसल्यायै नरपतिः पायसार्धं ददौ तदा । अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥ २७ ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् । प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥ २८ ॥

२३] ति० टी०–वित्तं धनम् ॥ २३ ॥

रा० टी०–तत इति । देवनिर्मितं पायसं ततः प्राजापत्यनराद्दशरथः प्राप्य वित्तं प्राप्याऽधन इव परमप्रीतो बभूव ॥२३॥

गो० टी०–तत इति । प्राप्य लब्ध्वा ॥ २३ ॥

२४] ति० टी०–अद्भुतप्रख्यमद्भुताकारं संवर्तयित्वा समाप्य कर्म पायसदानरूपं तत्रैवाग्निकुण्ड एव ॥ २४ ॥

रा० टी०–तत इति । अद्भुतप्रख्यं अद्भुताकारविशिष्टं ततः पावकात् भूतं प्राप्तं परमभास्वरं तत् प्राजापत्यनररूपतेजः तत् पुत्रेष्टिरूपं कर्म संवर्तयित्वा समाप्य फलं प्रापय्येत्यर्थः तत्रैव पावके एवान्तरधीयत ॥ २४ ॥

गो० टी०–तत इति । अद्भुतप्रख्यमद्भुताकारं संवर्तयित्वा समाप्य तत्कर्म पायसप्रदानरूपं कर्म तत्र अग्नौ ॥ २४ ॥

२५–२६] ति० टी०–हर्षरश्मिभिर्हर्षोद्भूतमुखकान्तिभिरित्यर्थः द्योतं द्योतमानमन्तःपुरं तद्वर्ति स्त्रीजातं शारदचन्द्रस्यांशुभिर्नभ इवेत्यन्वयः ॥ २५ ॥ २६ ॥

रा० टी०–हर्षरश्मिभिरिति । तस्य राज्ञः हर्षरश्मिभिः हर्षवर्धिताङ्गकान्तिभिरित्यर्थः द्योतमतिप्रकाशितम् अन्तःपुरम् अभिरामस्य परमानन्ददातुः पूर्णस्येत्यर्थः शारदस्य शरत्संबन्धिनः चन्द्रस्य अंशुभिः उद्द्योतं नभ इव आबभौ ॥ २५ ॥

गो० टी०–हर्षेति । हर्षरश्मिभिः हर्षकृतकान्तिभिः । उद्द्योतमुद्भूतप्रकाशमन्तःपुरमन्तःपुरस्त्रियः शारदस्य शरदि भवस्य अभिरामस्य निष्कलङ्कस्य अयं हर्षः पायसप्रदानकृतः ॥ २५ ॥

रा० टी०–स इति । स राजाऽन्तःपुरं प्रविश्य कौशल्यामिदं वक्ष्यमाणमब्रवीत् तदेवाह आत्मनः पुत्रीयं पुत्रप्राकट्यहेतुभूतमिदं पायसं प्रतिगृहीष्व तुशब्देन नमस्कारादिकं कुर्वित्यर्थः एवोऽनुक्तसमुच्चयार्थः तेन अन्या राज्ञीः अपि यथोचितमब्रवीदित्यर्थः ॥ २६ ॥

गो० टी०–स इति । पुत्रीयं पुत्रोत्पत्तिनिमित्तम् ॥ २६ ॥

२७] ति० टी०–कौसल्याया इति । अर्धशब्दोऽत्र समप्रविभागवाची अर्धादर्धं तुरीयांशमित्यर्थः ॥ २७ ॥

रा० टी०–कौशल्यायै इति । तदा पायसप्राप्तिकाले नरपतिः अमृतोपमं पायसार्धं पायासस्यार्धमंशम् महाभागमिति वक्ष्यमाणरामविशेषणात् ज्येष्ठपत्नीत्वाच्च किंचिदधिकमंशं पुत्रार्थकारणात् कौशल्यायै ददौ ततोऽचिन्त्य अप्रकटितसाकेते एकः सुमित्रापुत्रः कौसल्यापुत्रानुयायी द्वितीयः सुमित्रापुत्रः केकयीपुत्रानुयायीति विचार्यैव अर्थात् कौशल्याभागतोऽर्धं किंचिन्न्यूनमंशं नराधिपः सुमित्रायै ददौ कौशल्यया दापयामासेत्यर्थः अन्तर्भावितण्यर्थः कौशल्याभागादवशिष्टभागं अर्धं कृत्वा सुमित्रायै ददावित्यर्थस्तु न युक्तः अत्रावशिष्टपदाभावात् उत्तरत्रावशिष्टपदस्य विद्यमानत्वाच्च युक्तितो रामानुयायित्वानुपपत्तेश्च ततोऽवशिष्टार्धम् अवशिष्टमर्धं कौशल्याभागतः किंचिन्न्यूनांशं कैकेय्यै महीपतिः ददौ दापयामासेत्यर्थः । पुनरेव पुनरपि एवोऽप्यर्थे अवशिष्टार्धं अवशिष्टस्य दत्तकैकयीभागस्यार्धमंशं सुमित्रायै प्रददौ कैकेय्या प्रदापयामासेत्यर्थः । अयं भावः पायसेऽष्टौ अंशाः कृताः तत्र पञ्चांशान् कौशल्यायै दत्तवान् कौशल्याभागतः सार्द्धमेकमंशं सुमित्रायै दापयामास कौशल्याभागत उर्वरितत्रीनंशान् कैकेय्यै दापयामास कैकेयीभागात् सार्धमेकमंशं सुमित्रायै दापयामासेति सार्धत्रीन्त्वांशानेकीकृत्य कौशल्या बुभुजे तदेव रामप्रादुर्भावे निमित्तीभूतम् सार्धमेकं स्वांशमेकीकृत्य ककयी बुभुजे तदेव भरतप्रादुर्भावे निमित्तीभूतम् कौशल्यादत्तं सार्धमंशमेकीकृत्य सुमित्रा पूर्वं बुभुजे तदेव लक्ष्मणप्रादुर्भावे निमित्तीभूतम् ततः कैकेयीदत्तं सार्धमंशं बुभुजे तदेव शत्रुघ्नप्रादुर्भावे निमित्तीभूतम् भरतलक्ष्मणप्रादुर्भावनिमित्तीभूतपायसयोः समत्वेऽपि रामोद्देश्यकभागांशप्रभावाल्लक्ष्मणेऽधिकप्रभावप्रतीतिः अनुचिन्त्येत्युक्तेमहाराजाधिराजदशरथस्य सर्वज्ञत्वं सूचितम् । तदेव उपसंहरन्नाह–एवमनेन प्रकारेण भार्याणां पायसं पृथक्पृथक् विभज्य राजा ददौ कौशल्यायै इत्यारभ्य श्लोकत्रयमेकान्वयि अपिशब्दः एवार्थे चशब्दो अनन्तरार्थकौ ॥ २७–२९ ॥

गो० टी०–अथ राज्ञः पत्नीभ्यो विभज्य पायसप्रदानमाह त्रिभिः–कौसल्याया इत्यादि । पायसस्यार्धं पायसार्धम् अर्धशब्दोत्र समांशवचनः ' अर्धं समंशके ' इत्यमरः ददौ-ज्येष्ठपत्नीत्वादिति भावः अर्थात् पृथक्कृत्य अर्धं सुमित्रायै द्वितीयमहिष्यै ददौ चतुर्थांशमित्यर्थः अवशिष्टस्य पायसस्यार्धमवशिष्टार्धम् अष्टमांशमित्यर्थः कैकेय्यै तृतीयमहिष्यै ददौ पुत्रार्थकारणात् पुत्ररूपप्रयोजननिमित्तात् इदं त्रिष्वपि दानेष्वन्वेति ॥ २७ ॥

२८] ति० टी०–अवशिष्टार्धमवशिष्टस्य चतुर्थांशस्यार्धम् अष्टमांशमित्यर्थः पुनरवशिष्टार्धमष्टमांशम् ॥ २८ ॥

अनुचिन्त्य सुमित्रायै पुनरेव महामतिः । एवं तासां ददौ राजा भार्याणां पायसं पृथक्॥२९॥
तौश्चैवं पायसं प्राप्य नरेन्द्रस्योत्तमस्त्रियः । संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥ ३० ॥
ततस्तु ताः प्राश्य तमुत्तमस्त्रियो महीपतेरुत्तमपायसं पृथक् ।
हुताशनादित्यसमानतेजसोऽचिरेण गर्भान्प्रतिपेदिरे तदा ॥ ॥ ३१ ॥

गो० टी०–प्रददाविति । अनुचिन्त्य कैकेय्यपेक्षया सुमित्रायाः अधिकांशभाक्त्वं भवेदिति विचार्येत्यर्थः तस्यापि हि कैकेय्या दाने कैकेयीसुमित्रयोः समांशता स्यात् तन्न युक्तम् अन्यथा ज्येष्ठाकनिष्ठावैषम्यं न स्यात् कैकेयी हि कनिष्ठा ' न तेम्बा मध्यमा तात गर्हितव्या कथंचन ' इत्यत्रेतरपत्न्यपेक्षया मध्यमात्वमुक्तम् । वल्लभायामपि कैकेय्यां संभोगविषये पक्षपातः नतु धर्म्यविभागे अतो बहुमानाय ज्यैष्ठ्यक्रमात् भागतारतम्यं कृतम् अत एव संमानं मेनिर इति वक्ष्यति ततोऽनेन भागेन रामो विष्णोरर्धांशः लक्ष्मणः पादांशः भरतशत्रुघ्नौ पादस्यार्द्धांशौ नन्वेवं सति कथमुत्तरत्र भरतः साक्षाद्विष्णोश्चतुर्भागः लक्ष्मणशत्रुघ्नौ विष्णोरर्द्धसमन्वितावित्युच्यते सत्यं साक्षाद्विष्णोश्चतुर्भाग इत्यत्र साक्षाद्विष्णोः विष्णोरर्धस्य रामांशस्य चतुर्थो भाग इत्यर्थः यद्वा चतुर्थस्य भागश्चतुर्भागः अष्टमांश इत्यर्थः अर्धसमन्विताविति त्राप्यर्धशब्द एकदेशवाची ' भित्त्वं शकलखण्डे वा पुंस्यर्धोर्धं समेंऽशके ' इत्येकदेशेऽपि पुंलिङ्गार्धशब्दस्यानुशासनात् अत्र प्राशनादिकमवशात् भरतस्य लक्ष्मणशत्रुघ्नाभ्यां ज्यैष्ठ्यम् ननु लक्ष्मणस्य भरतात् ज्यैष्ठ्यमंशाधिक्यात् प्रथमप्राशनाच्च अत एव वक्ष्यति 'ततो लक्ष्मणमासाद्य वैदेही च परंतपः । अभ्यवादयत प्रीतो भरतो नाम चाब्रवीत्' इति मैवं कैकेय्या एव प्रथमप्राशनं सुमित्राया द्वितीयांशग्रहणविलम्बेन प्राशनविलम्बात् उत्पत्तिक्रमे तथोक्तेः न संख्ये भरतानुज इत्युक्तत्वात् अभिवादनं तु सीतायामेवान्वेति लक्ष्मणमासाद्य आलिङ्ग्येत्यर्थः रामानुजत्वव्यवहार आसक्त्याधिक्यात् एवं सति क्वचित् भरतस्य लक्ष्मणानुजत्वोक्तिः बहुव्रीहिसमासेन समाधेया भरतानुज इति लक्ष्मणस्याभिधानात् सर्वप्राशनानन्तरमेव सुमित्रया भुक्तमिति पुराणान्तरविरोधः कल्पभेदेन परिहार्यः रामादिमूर्तयश्च पायसपरिणामाः नतु शुक्रशोणितपरिणामाः तत्प्राशनानन्तरंगर्भधारणवचनात् ' न तस्य प्राकृता मूर्तिः '' न भूतसंघसंस्थानो देहोऽस्य परमात्मनः ' इत्यादिस्मरणात् पायसं च भगवतः पाञ्चभौतिकविग्रह एव तद्वृद्ध्यै नान्नपानादिकृता किंत्विच्छाकृतेत्यादिकं सर्वमवसेयम् ॥ २८ ॥

२९] ति० टी०–अनुचिन्त्येति । कैकेय्यपेक्षया ज्येष्ठत्वं कौसल्यापेक्षया कनिष्ठत्वं च सुमित्राया विचार्य पादोनांशार्धदानम् तस्यै कनिष्ठत्वाच्च कैकेय्यै अष्टमांशदानम् वल्लभायां संभोगकर्मणि पक्षपातः, न धर्म्यविभागकर्मणि । एवं च भरतशत्रुघ्नौ पादस्यार्धमर्धमित्याहुः । अपरे तु रामभरतौ प्रत्येकं त्र्यंशौ लक्ष्मणशत्रुघ्नौ चाष्टमांशौ तथाहि—कौसल्यायै दत्तार्धस्यार्धादर्धं चतुर्थांशरूपं सुमित्रायै दत्तवान् कौसल्यया दापितवानित्यर्थः एवं कैकेय्यै कौसल्यादत्तार्धावशिष्टमर्धं ददौ ततः कौसल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्धं तदर्धं विचार्य पुनरपि सुमित्रायै ददौ तया दापयामासेत्यर्थः अत्रार्धपदाद्वृत्तिर्बोध्या तदुक्तं कालिदासेन—'स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम् । द्यावापृथिव्योः प्रत्ययमहर्पतिरिवातपम् ॥ अर्चिता तस्य कौसल्या प्रिया कैकयवंशजा । अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥ ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः । चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥ सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि ' इति । अर्धार्धभागाभ्यामित्यस्य स्वस्वलब्धांशसंबन्ध्यर्धार्धभागाभ्यामित्यर्थः पृथगिति विभज्येति शेषः कतकस्याप्येवं रीतिरेव संमतेत्याहुः । क्वचित्तु—'इत्युक्त्वा प्रददौ तस्यै हविषोऽर्धं नराधिपः । स्वयमेव समं कृत्वा भागं भागवतां वरः ॥ अर्धादर्धं ददौ चापि कैकेय्यै स नराधिपः । चतुर्भागं द्विधा कृत्वा सुमित्रायै ददौ तदा ॥ ' इति दृश्यमानः पाठः स त्वसांप्रदायिक एव तत्तद्दत्तभागजन्यस्य तत्तत्पुत्रैकवाक्यतौचित्येन । अपरे तु व्याख्यैवात्र ज्यायसी पाठान्तरे व्याख्यान्तरे च लक्ष्मणरामयोरेव भरतशत्रुघ्नयोरेवैकवाक्यतायां बीजालाभः उक्तं च पाद्मे—'युगं बभूवतुस्तत्र सुस्निग्धौ रामलक्ष्मणौ । तथा भरतशत्रुघ्नौ पायसांशवशात्स्वतः ' इतीति दिक् ॥ २९ ॥

गो० टी०–उपसंहरति–एवमिति ॥ २९ ॥

३०] ति० टी०–ताश्चेति । प्राप्य प्रहर्षेणोदितं विकसितं चेतो यासां ताः स्त्रियो नरेन्द्रस्य संमानमपक्षपातेन यथोचितव्यवहारं मेनिर इत्यन्वयः ॥ ३० ॥

रा० टी०–ता इति । नरेन्द्रस्य राजाधिराजस्य ताः रामादिप्रादुर्भावकर्त्र्यः उत्तमाः सर्वाः कौसल्यादयः स्त्रियः एवं रामादिप्रादुर्भावहेतुभूतं पायसं प्राप्यैव प्रहर्षोदितचेतसः प्रहर्षितचित्ताः सत्यः संमानं राजकृतपरमसत्कृतिं मेनिरे चशब्द एवार्थे ॥३०॥

गो० टी०–ता इति । संमानं राजकृतपायसप्रदानक्रमरूप बहुमानं मेनिरे अनुमेनिरे प्रहर्षोदितचेतसः उदितप्रहर्षमनसः तारतम्येन दानं पौर्वापर्यं च ज्येष्ठानुक्रमकृतत्वेन सर्वासां संमतमेवमासीदिति भावः ॥ ३० ॥

३१] ति० टी०–तत इति । महीपतेः स्त्रिय इत्यन्वयः । उत्तमपायसम् उत्तमत्वं च तस्य विष्णुतेजःसंभृत-

१ महीपतिरिति गो. पाठः । २ तास्त्वेतदिति गो. पाठः । ३ तदुत्तमेति गो. तदुत्तमाः स्त्रिय इति रा. पाठः । ४ तेजसश्चिरेणेति गो. पाठः ।

ततस्तु राजा प्रतिवीक्ष्य ताः स्त्रियः प्ररूढगर्भाः प्रतिलब्धमानसः ।
बभूव हृष्टस्त्रिदिवे यथा हरिः सुरेन्द्रसिद्धर्षिगणाभिपूजितः ॥ ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ।

भगवतो ब्रह्मणो देवैः सह संवादः ।

पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः । उवाच देवताः सर्वाः स्वयंभूर्भगवानिदम् ॥ १ ॥
सत्यसन्धस्य वीरस्य सर्वेषां नो हितैषिणः । विष्णोः सहायान्बलिनः सृजध्वं कामरूपिणः ॥२॥
मायाविदश्च शूरांश्च वायुवेगसमाञ्जवे । नयज्ञान्बुद्धिसंपन्नान्विष्णुतुल्यपराक्रमान् ॥ ३ ॥

त्वात् । हुनाशनादित्यसमानतेजसः इति गर्भाणां स्त्रीणां च तन्त्रेण विशेषणम् ॥ ३१ ॥

रा० टी०–तत इति । तदा पायसप्राश्यनन्तरकाले एव ततः पायसमाहात्म्यश्रवणात् हुताशनादित्यसमानतेजसः महीपतेरुत्तमाः स्त्रियः पृथक् यथोचितविभक्तं तत् राजदत्तमुत्तमं पायसं प्राश्य अचिरेण अदीर्घकालेन गर्भान्गर्भगतत्वेन प्रतीयमानान्स्वस्वनित्यपुत्रान् प्रतिपेदिरे प्रकटतः प्राप्तप्रायान् मेनिरे तुशब्द एवार्थे ॥ ३१ ॥

गो० टी०–वक्तव्येऽपि यज्ञदत्तान्तशेषे प्रसङ्गात् सौकर्याय नगरप्रवेशानन्तरभाविकथाशेषं संग्रहेण दर्शयति–तत इति । तत्पायसमित्यन्वयः हुताशनादित्यशब्दौ तत्तेजःपरौ ॥ ३१ ॥

३२] ति० टी०–प्रतिलब्धमानसः प्रतिलब्धशब्दः प्रतिलब्धस्वास्थ्यपरः तादृशं मानसं यस्येत्यर्थः यद्वा पूर्णमनोरथ इत्यर्थः यथाशब्दश्चार्थे त्रिदिवे हरिरिन्द्रश्च हृष्ट इत्यर्थः । सुरेन्द्रेत्यादि राजविशेषणम् भगवदंशगर्भसंभवेन तैः पूजितो मनसा स्तुतः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०–तत इति । ततो गर्भधारणानन्तरमेव सुरेन्द्र इन्द्रः सिद्धर्षीणां गणाश्च तैरभिपूजितः प्रकटीभूतरघुनाथपितृत्वात् नित्यं सेवितः राजा महाराजाधिराजदशरथः प्ररूढगर्भाः प्रादुर्भावप्राप्तरामादितेजस्काः अत एव प्रतिलब्धमानसाः प्राप्तमनोरथाः ताः साकेतात्प्रादुर्भूताः स्त्रियः वीक्ष्य त्रिदिवे हरिरिन्द्रो यथा इव हृष्टोऽत्यन्तहर्षं प्राप्तो बभूव तुशब्द एवार्थे ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षोडशः सर्गः ॥ १६ ॥

गो० टी०–तत इति । प्रतिलब्धमानसः स्वस्थचित्तः ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

१] ति० टी०–पुत्रत्वमिति । गते गन्तुमुपक्रान्ते ॥ १ ॥

रा० टी०–पुत्रत्वमिति । अविष्णौ[2] विष्णुव्यापके रामे महात्मनः सर्वपूज्यस्वरूपस्य तस्य प्रसिद्धस्य राज्ञो दशरथस्य पुत्रत्वं प्रकटपुत्रधर्मं गते प्राप्ते सत्येव भगवान् नियोजनसमर्थः स्वयंभूः साकेतस्थब्रह्मा सर्वाः देवता इदं वक्ष्यमाणं वचः उवाच ॥ १ ॥

गो० टी०–विष्णोरन्तर्धानानन्तरं कार्यद्वयं प्रदत्तं पायसहस्तस्याग्निपुरुषस्योत्थानं देवान् प्रति ब्रह्मनियोगश्च तत्र वाचः क्रमवर्तित्वेन प्रथमोपस्थितमग्निपुरुषोत्थानं तत्प्रसक्तं च सर्वमुक्त्वा अथ ब्रह्मनियोगतत्फले दर्शयति सप्तदशे–पुत्रत्वमित्यादि । गते गन्तुं प्रवृत्ते भगवान् भाविकार्यज्ञः ॥ १ ॥

२] ति० टी०–सहायान्सहायकरणसमर्थान् । ननु कदाचिद्भगवान्प्रतिज्ञायापि नावतरेदत उक्तम्—सत्यसंधस्येति । सत्यप्रतिज्ञस्येत्यर्थः ॥ २ ॥

रा० टी०–तद्वचनमेवाह–सत्येति । सत्यसन्धस्य सत्यप्रतिज्ञस्य वीरस्य समाधिकरहितवीरत्वविशिष्टस्य नोऽस्माकं सर्वेषां हितैषिणः विष्णोः ब्रह्मादित्रिदेवव्यापकस्य रामस्य सहायान् प्राकट्यावस्थायां तेन सह यन्ति गच्छन्तीति तान् बलिनः अतिबलवतः कामरूपिणः ईप्सितरूपधारणसमर्थान् सृजध्वं स्वान् स्वानंशान् प्रकटयध्वमित्यर्थः ॥ २ ॥

गो० टी०–सत्येति । सह अप्राधान्येन अयन्त इति सहायाः किंकरास्तान् कामरूपिणः कपटराक्षसयुद्धक्षमशरीरिणः ॥ २ ॥

३] ति० टी०–मायाविदोऽसुरादिमायासंहारसमर्थदेवमायाशक्तिमतः जवे वेगविषये ॥ ३ ॥

रा० टी०–तदेव विशदयन्नाह–मायेत्यादिचतुर्भिः । मायाविदः राक्षसादिनिर्मितदम्भवेदितॄन् शूरान् युद्धोत्साहविशिष्टान् जवे वायुवेगसमाँश्च नयज्ञान् नीतिविज्ञान् बुद्धिसंपन्नान् परमबुद्धिमतः विष्णुतुल्यपराक्रमान् ॥ ३ ॥

गो० टी०–उक्तसहायान् विशेषयति त्रिभिः–मायेत्यादि । माया आश्चर्यशक्तिः तद्विदः जवे वेगे विषये नयज्ञान्नीतिज्ञान् असंहार्यान् परैरिति शेषः उपायज्ञान् अनागतावधानज्ञान् यद्वा नयज्ञान् युक्तिशालिनः उपायज्ञान् सामादुपायज्ञान् सिंह-

१ मानसा इति रा० पाठः इति भाति । २ अविष्णौ इति रा० पाठः ।

असंहार्यानुपायज्ञान्दिव्यसंहननान्वितान् । सर्वास्त्रगुणसंपन्नानमृतप्राशनानिव ॥ ४ ॥
अप्सरःसु च मुख्यासु गन्धर्वीणां तनूषु च । यक्षपन्नगकन्यासु ऋक्षविद्याधरीषु च ॥ ५ ॥
किन्नरीणां च गात्रेषु वानरीणां तनूषु च । सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ॥ ६ ॥
पूर्वमेव मया सृष्टो जाम्बवानृक्षपुङ्गवः । जृम्भमाणस्य सहसा मम वक्त्रादजायत ॥ ७ ॥
ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनम् । जनयामासुरेवं ते पुत्रान्वानररूपिणः ॥ ८ ॥
ऋषयश्च महात्मानः सिद्धविद्याधरोरगाः । चारणाश्च सुतान्वीरान्ससृजुर्वनचारिणः ॥ ९ ॥
वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् । सुग्रीवं जनयामास तपनस्तपतां वरः ॥ १० ॥

संहननान्वितान् सिंहतुल्यसंस्थानैर्युक्तान् सर्वास्त्राणां यो गुणः शक्तिस्तेन संपन्नान् अमृतं प्राश्नन्तीत्यमृतप्राशनाः कर्तरि ल्युट् पीतामृतानिव मृत्युरहितानित्यर्थः हरिरूपेण वानररूपेणोपलक्षितान् प्रायिकाभिप्रायमिदं तुल्यपराक्रमान् आत्मसदृशपराक्रमान् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

४] ति० टी०–असंहार्यानिति । परैरिति शेषः । संहननं शरीरम् सर्वास्त्रगुणसंपन्नान्सर्वास्त्रनिवारणसामर्थ्यरूपगुणयुक्तान् यद्वा प्रयोगोपसंहारादयस्तद्गुणाः । अमृतप्राशना देवाः ॥ ४ ॥

रा० टी०–असंहार्यानिति । असंहार्यान् शत्रुभिर्विनाशयितुमशक्यान् उपायज्ञान् शमादियत्नाभिज्ञान् सिंहसंहननान्वितान् सिंहसदृशावयवविशिष्टान् सर्वास्त्रगुणसंपन्नान् सर्वैरस्त्रगुणैः प्रयोगोपसंहारादिभिर्युक्तान् अमृतप्राशनान् देवान् एव इवशब्द एवार्थे ॥ ४ ॥

५] ति० टी०–गन्धर्व्यो गन्धर्वपत्न्यः ॥ ५ ॥

रा० टी०–अप्सरस्स्विति । मुख्यासु अप्सरस्सु गन्धर्वीणां तनूषु च यक्षपन्नगकन्यासु च ऋक्षविद्याधरीषु च ॥ ५ ॥

६] ति० टी०–वानरीणां तनूषु वानरीशरीरसदृशशरीरासु अप्सरःप्रभृतिष्वित्यर्थः हरिरूपेणेति ' तस्मान्मद्रूपसंयुक्ता मद्वीर्यसमतेजसः । उत्पत्स्यन्ति वधार्थं तु कुलस्य तव वानराः ' इति रावणविषये नन्दिकेश्वरशापादेवमुक्तम् । तुल्यपराक्रमान् स्वस्वतुल्यपराक्रमानित्यर्थः ॥ ६ ॥

रा० टी०–किन्नरीणामिति । किन्नरीणां गात्रेषु च वानरीणां तनूषु च हरिरूपेण उपलक्षितान् तुल्यपराक्रमान् स्वस्वपितृसदृशानित्यर्थः किंच तुल्यपरान् तुल्यबलविशिष्टशत्रून् अपि आक्रमन्ते पराभावयन्तीति ते तान् । किंच स्वस्वप्रादुर्भावकालेन तुल्यः पराक्रमो येषां तान् पुत्रान् तत्तत्पुत्रत्वेन प्रतीयमानान् सृजध्वं प्रकटयध्वम् ॥ ६ ॥

७] ति० टी०–ननु त्वयापि स्वांशः स्रष्टव्य इति चेत्तत्राह–पूर्वमेवेति । पूर्वयुग इत्यर्थः । तदुत्पत्तिप्रकारमाह–जृम्भमाणस्येति सहसा तत्क्षणे ॥ ७ ॥

रा० टी०–पूर्वमिति । ऋक्षपुङ्गवः ऋक्षश्रेष्ठः जाम्बवान् मया सृष्टः प्रादुर्भावितः प्रादुर्भावप्रकारमाह–जृम्भमाणस्य मम वक्त्रात्सहसा शीघ्रम् अजायत प्रादुरभवत् ॥ ७ ॥

गो० टी०–देवत्वाविशेषात् भवतापि पुत्रोत्पादनं कार्यमिति मा वोचध्वमित्याह–पूर्वमिति । सृष्टः भाविरामसहायवृद्धयेति शेषः । सृष्टिप्रकारमाह–जृम्भमाणस्येति । स इति शेषः । अत्र पार्वतीशापेन स्वक्षेत्रे पुत्रोत्पादनासंभवादप्सरःप्रभृतयः क्षेत्रतयोक्ताः गुणवत्पुत्रलाभाय मुख्यास्त्वियुक्तम् अयोनिजत्वेन सद्यः प्रवृद्धत्वसिद्धये तनूषित्युक्तम् नन्दिकेश्वरशापानुसारेण हरिरूपेणेत्युक्तम् वक्ष्यति हि दिग्विजये रावणं प्रति नन्दी ' तस्मान्मद्रूपसंयुक्ता मद्वीर्यसमतेजसः । उत्पत्स्यन्ति वधार्थं हि कुलस्य तव वानराः ' इति ॥ ७ ॥

८–९] ति० टी०–एवं वक्ष्यमाणप्रकारेण ॥ ८ ॥ ९ ॥

रा० टी०–त इति । भगवता साकेतनिवासिब्रह्मणा तथा तेन प्रकारेण उक्ताः ते साकेतनिवासिसुराः तत् ब्रह्मोक्तं शासनं शिक्षां प्रतिश्रुत्याङ्गीकृत्य एवं वक्ष्यमाणप्रकारेण वानररूपिणः पुत्रान् तत्तत्पुत्रत्वेन प्रतीयमानान् जनयामासुः प्रादुर्भावयांचक्रुः ८

गो० टी०–ते तथेति । प्रतिश्रुत्य अङ्गीकृत्य एवं वक्ष्यमाणरीत्या ॥ ८ ॥

रा० टी०–ऋषय इति । ऋष्यादयः वनचारिणः वीरान्सुतान् ससृजुः ॥ ९ ॥

गो० टी०–ऋषय इति । वनचारिणः वानरान् ॥ ९ ॥

१०] ति० टी०–वानरेन्द्रमिति । ननु राघवसहायार्थं तत्तत्स्वावतारकरणप्रेरणाद्वालिनोऽवतारस्य तदसहायत्वात्किमर्थोऽयमवतार इति चेत् दुन्दुभ्यादिवधार्थं तदवतारस्यावश्यकत्वात् पुत्रद्वारा तस्यापि राघवसहायत्वाच्च दुन्दुभ्यादिवधेनापि तत्साहाय्यकरणाच्च अस्यापि भगवदवतारात्पूर्वमुत्पत्तिर्ज्ञेया । तपनः सूर्यः ॥ १० ॥ ११ ॥ १२ ॥

रा० टी०–तदेव विशदयन्नाह–वानरेन्द्रमिति । महेन्द्राभं महेन्द्रः पर्वतविशेषः शक्रो वा तदाभं वानरेन्द्रं वालिनमिन्द्रो जनयामास तपतां वरः परमतेजस्वी तपनः सूर्यः सुग्रीवं जनयामास न च विष्णोः सहायान् सृजध्वमिति ब्रह्मोक्त्या तदसहायभूतस्य वालिनः सर्जनं विरुद्धं निरर्थकं चेति वाच्यम। साक्षात्तस्य तत्सहचारित्वाभावेपि सुग्रीवविषत्तिसंपादनद्वारा सर्ववानरतत्सहचारित्वसंपादनहेतुत्वेन पुत्रादिद्वारा च एतस्यापि तत्सहचारित्वाक्षतेः ॥ १० ॥

१ सिंहसंहननेति गो. रा. पाठः । २ ऋक्षी इति गो. पाठः ।

बृहस्पतिस्त्वजनयत्तारं नाम महाकपिम् । सर्ववानरमुख्यानां बुद्धिमन्तमनुत्तमम् ॥ ११ ॥
धनदस्य सुतः श्रीमान्वानरो गन्धमादनः । विश्वकर्मा त्वजनयन्नलं नाम महाकपिम् ॥ १२ ॥
पावकस्य सुतः श्रीमान्नीलोऽग्निसदृशप्रभः । तेजसा यशसा वीर्यादत्यरिच्यत वीर्यवान् ॥ १३ ॥
रूपद्रविणसंपन्नावश्विनौ रूपसंमतौ । मैन्दं च द्विविदं चैव जनयामासतुः स्वयम् ॥ १४ ॥
वरुणो जनयामास सुषेणं नाम वानरम् । शरभं जनयामास पर्जन्यस्तु महाबलः ॥ १५ ॥
मारुतस्यौरसः श्रीमान्हनूमान्नाम वानरः । वज्रसंहननोपेतो वैनतेयसमो जवे ॥ १६ ॥
सर्ववानरमुख्येषु बुद्धिमान्बलवानपि । ते सृष्टा बहुसाहस्रा दशग्रीववधोद्यताः ॥ १७ ॥

गो० टी०–वानरेन्द्रमिति । महेन्द्राभं महेन्द्रपर्वताभं ननु वालिनः कथं रामसहायार्थत्वं रामवध्यत्वात्, उच्यते अङ्गदोत्पादनद्वारा तस्य साहाय्यकरणात् किंच यदि वाली नोत्पद्येत तदा सर्वेषां वानराणां सहायत्वं न स्यात् सति च वालिनि सुग्रीवविरोधिनि सुग्रीवमैत्र्या वानरसहायसिद्धिः वालिमैत्र्यां तु रावणः क्षणादेव सीतां दद्यात् अतः सुग्रीवसख्यनिमित्तत्वाद्वालिनो रामसहायत्वमिति तपनः सूर्यः ॥ १० ॥

रा० टी०–बृहस्पतिरिति । बृहस्पतिस्तु सर्ववानरमुख्यानां बुद्धिमन्तमत एव अनुत्तमं सर्वोत्कृष्टं तारं नाम महाकपिमजनयत् प्रादुरभावयत् ॥ ११ ॥

गो० टी०–बृहस्पतिरिति । सर्ववानरमुख्यानामिति निर्धारणे षष्ठी बृहस्पतिपुत्रत्वादनुत्तमं बुद्धिमन्तम ॥ ११ ॥

रा० टी०–धनदस्येति । श्रीमान्परमैश्वर्यविशिष्टः गन्धमादनो गन्धमादनाख्यो वानरः धनदस्य कुबेरस्य सुतः प्रादुरभूदिति शेषः विश्वकर्मा तु नलं नाम महाहरिं महाकपिमजनयत् ॥ १२ ॥

गो० टी०–धनदस्येति । कुबेरपुत्रत्वात् श्रीमानित्युक्तं महाहरिं सर्वकार्यनिर्माणदक्षम् ॥ १२ ॥

१३] **ति० टी०–पावकस्याग्नेः** अत्यरिच्यत ततोऽधिकोऽभवदित्यर्थः ॥ १३ ॥

रा० टी०–पावकस्येति । श्रीमान् नित्यश्रीविशिष्टः अग्निसदृशी प्रभा यस्य सः पावकस्य सुतो नीलः तेज आदिभ्यः अत्यरिच्यत विलक्षणं बभावित्यर्थः ॥ १३ ॥

गो० टी०–पावकस्येति । अत्यरिच्यत अतिशयितोऽभूत् ॥ १३ ॥

१४] **ति० टी०–रूपेति** । रूपलक्षणेन द्रविणेन युक्तौ रूपसंमतौ रूपवत्त्वेन सर्वलोकसंमतावित्यर्थः ॥ १४ ॥

रा० टी०–रूपेति । रूपद्रविणसंपन्नौ अश्विनौ रूपसंमतौ रूपयति प्रतिष्ठां प्रापयतीति रूपोऽर्थः रूपं सौन्दर्यं च तयोरेकशेषः ताभ्यां संमतौ युक्तौ एवं मैन्दं द्विविदं च स्वयमेव जनयामासतुः । एवेन मात्रादिव्यवच्छेदः तेन मानसत्वं तयोर्व्यक्तम् । एकश्च एवार्थकः ॥ १४ ॥

गो० टी०–रूपेति । रूपमेव द्रविणं धनं तेन संपन्नौ अत एव रूपसंमतौ रूपेण प्रख्यातौ स्वयमित्यनेन मानसमृष्टिर्द्योत्यते ॥ १४ ॥

१५] **ति० टी०–पर्जन्यस्तदभिमानिनी** देवता धर्मपुत्रोऽपरः सुषेण इति युद्धकाण्डे वक्ष्यति अत्र तु वरुणपुत्र उक्तः १५

रा० टी०–वरुण इति । सुषेणं नाम वानरं वरुणो जनयामास । पर्जन्यः तदभिमानिदेवस्तु शरभं जनयामास ॥ १५ ॥

गो० टी०–वरुण इति । पर्जन्यो वर्षाभिमानिदेवता॥१५॥

१६] **ति० टी०–वज्रसंहननं** वज्रवदभेद्यं शरीरं तेनोपेतो युक्तः ॥ १६ ॥

रा० टी०–मारुतस्येति । श्रीमानित्यैश्वर्यविशिष्टः वज्रसंहननोपेतः वज्रमपि स्पर्शमात्रेण संहन्ति इति वज्रसंहननो देहः तेनोपेतः नित्यं युक्तः जवे वेगे वैनतेयः समो यस्य सः सर्ववानरमुख्येषु बुद्धिमानतिशयबुद्धिविशिष्टः बलवानतिशयबलविशिष्टश्च अपिशब्दार्थे हनुमान्नाम वानरो मारुतस्य पवनस्यौरसः पुत्रोऽभवदिति शेषः । यथा चास्यौरसत्वं तथा ऋष्यशृङ्गस्य विभाण्डकौरसवर्णनावसरे निरूपितम् ॥ १६ ॥

गो० टी०–मारुतस्येति । वज्रसंहननोपेतः वज्रवदभेद्यशरीरयुक्तः ॥ १६ ॥

१७] **ति० टी०–दशग्रीववधोद्यता** इत्यस्य ये भविष्यन्तीति शेषः ॥ १७ ॥

रा० टी०–त इति । अप्रमेयं बलं येषां ते वीराः शौर्यविशिष्टाः विक्रान्ताः विशिष्टाः क्रान्ताः पादविक्षेपा येषां ते कामरूपिणः ईप्सितरूपधारणसमर्थाः दशग्रीववधे रताः दशग्रीवोपलक्षितरावणादिराक्षसहनने उद्युक्ताः बहुसाहस्राः अनेकसहस्रसंख्यातास्ते प्रसिद्धा वानराः सृष्टाः ॥ १७ ॥

गो० टी०–रुद्रो ब्रह्मणा नियुक्तोऽपि रक्षःपक्षपातित्वान्न कंचन सृष्टवान् एवं प्रधानवानरसृष्टिमुक्त्वा क्षुद्रवानरसृष्टिं संग्रहेणाह–**ते इति** । रता आसक्ताः ॥ १७ ॥

१ महा हरिमिति गो. रा. पाठः । २ वानरानिति गो. पाठः । ३ महाबलमिति गो. पाठः । ४ मारुतस्यात्मज इति गो. पाठः । ५ वधे रता इति गो. रा. पाठः ।

अप्रमेयबला वीरा विक्रान्ताः कामरूपिणः । ते गजाचलसंकाशा वपुष्मन्तो महाबलाः ॥ १८ ॥
ऋक्षवानरगोपुच्छाः क्षिप्रमेवाभिजज्ञिरे । यस्य देवस्य यद्रूपं वेषो यश्च पराक्रमः ॥ १९ ॥
अजायत सैमं तेन तस्य तस्य पृथक्पृथक् । गोलाङ्गूलेषु चोत्पन्नाः किंचिदुन्नतविक्रमाः ॥ २० ॥
ऋक्षीषुं च तथा जाता वानराः किन्नरीषु च । देवा महर्षिगन्धर्वास्तार्क्ष्ययक्षा यशस्विनः ॥ २१ ॥
नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः । बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥ २२ ॥
चारणाश्च सुतान्वीरान्सस्रृजुर्वनचारिणः । वानरान्सुमहाकायान्सर्वान्वै वनचारिणः ॥ २३ ॥
अप्सरःसु च मुख्यासु तथा विद्याधरीषु च । नागकन्यासु च तदा गन्धर्वीणां तनूषु च ॥
कामरूपबलोपेता यथाकामविचारिणः । ॥ २४ ॥
सिंहशार्दूलसदृशा दर्पेण च बलेन च । शिलाप्रहरणाः सर्वे सर्वे पर्वतयोधिनः ॥ २५ ॥

१८] ति० टी०–गजाचलसंकाशा गजसदृशाः पर्वतसदृशाश्चेत्यर्थः ॥ १८ ॥

रा० टी०–मेरुवेति । मेरुमन्दरसंकाशाः मेरुमन्दरवद्भासमानाः तत्र हेतुः वपुष्मन्तः अतिवृहच्छरीरयुक्ताः महाबलाः अतिशयबलविशीष्टाः ऋक्षवानरगोपुच्छाः क्षिप्रं त्वरितमेव अभिजज्ञिरे प्रादुर्बभूवुः तत्र ऋक्षाः भल्लुका गोपुच्छाः गोपुच्छसदृशपुच्छविशिष्टवानरजातिविशेषः । ते गजाचलसंकाशा इति भट्टसंमतः पाठः ॥ १८ ॥

गो० टी०–एवं वानरसृष्टिमुक्त्वा ऋक्षादिसृष्टिं प्राधान्येनाह–मेरुवेति । वपुष्मन्तः दृढवपुष्काः अत एव मेरुमन्दरसंकाशाः। ऋक्षा भल्लुकाः गोपुच्छाः गोलाङ्गूलाः अभिजज्ञिरे जाताः क्षिप्रमित्यनेन मानससृष्टिरुच्यते ॥ १८ ॥

१९] ति० टी०–गोपुच्छा वानरविशेषाः क्षिप्रमेव तत्तद्योनौ देवानां रत्यव्यवहितोत्तरकालमेव । रूपं वर्णः वेषः संस्थानविशेषः ॥ १९ ॥

रा० टी०–यस्येति । यस्य यस्य देवस्य यद्रूपं सौदर्यं यो यो वेषः अवयवसन्निवेशः यो यश्च पराक्रमो बलं तेन तेन रूपादिना समः तुल्यः तस्य तस्य सुतः पृथक् परस्परं विलक्षणोऽजायत तस्य तस्येत्येतदनुरोधेन यस्येत्यादय आवर्तन्ते ॥१९॥

गो० टी०–यस्येति । रूपं सौन्दर्यं वेषः संस्थानविशेषः तस्य तस्य देवस्य तेन रूपादिना समः सुतः पृथक् अन्योन्यविलक्षणः अजायत मुखमात्रे वानराकारत्वेऽपि संस्थानादौ सर्वे पितृतुल्या एवासन्नित्यर्थः ॥ १९ ॥

२०] ति० टी०–तस्य तत्पुत्रस्य । तेन तदीयरूपवेषादिकं पृथक्पृथगसांकर्येणाजायत । किंचिदुन्नतविक्रमा देवावस्थातोऽपि किंचिदधिकपराक्रमा इत्यर्थः ॥ २० ॥

रा० टी०–तेषामुत्पत्तिक्षेत्राणि बोधयन्नाह–गोलाङ्गूलेष्विति । संमतविक्रमाः सम्यक् पूजनीयपराक्रमा एव केचित् गोलाङ्गूलेषु तज्जातिषु उत्पन्नाः तथा तादृशपराक्रमविशिष्टाः केचिद्वानरा ऋक्षेषु च किन्नरेषु च उत्पन्नाः । प्रादुर्भूताः ऋक्षीषु च किन्नरीषु चेति भट्टसंमतः पाठः ॥ २० ॥

गो० टी०–विजातीयास्वपि वानरोत्पत्तिमाह–गोलाङ्गूलीष्विति । संमतविक्रमाः प्रसिद्धविक्रमाः केचिद्वानरा गोलाङ्गूलीषूत्पन्ना केचिद्वानराः ऋक्षीषूत्पन्नाः केचिद्वानराः किंनरीषु चोत्पन्ना इति योजना ॥ २० ॥

२१] ति० टी०–ऋक्षीषु ऋक्षशरीरासु चस्त्वर्थे किन्नरीषु त्वित्यर्थः । एवमग्रेऽपि । तार्क्ष्यास्तार्क्ष्यवंशजाः ॥ २१ ॥ २२ ॥

रा० टी०–एतदेव विशदयन्नाह–देवा इत्यादिभिरेकादशभिः श्लोकैः ॥ २१ ॥ २२ ॥

गो० टी०–उत्पादकक्षेत्रवैविध्यमाह–देवा इत्यादि । श्लोकत्रयमेकान्वयम् । तार्क्ष्याः गरुडादयः नागा दिग्गजाः उरगाः वासुक्यादयः तत्र विष्ण्ववतारकाले ॥ २१ ॥ २२ ॥ २३ ॥

२२] ति० टी०–नागाः सर्पाः ॥ २२ ॥

२३–२५] ति० टी०–चारणा देवनन्दिनः वनचारिणो वनवासिन इत्येकत्र परत्र वनस्थफलभक्षकानित्यर्थः ॥२३–२५॥

रा० टी०–चारणा इति । वनचारिणः प्रमोदवनविहारिणः कामरूपबलोपेताश्चारणाः वनचारिणो यथाकामं विचारिणः यथेच्छं सर्वत्र विचरणशीलान् वानरान् ससृजुः एतेनैतेषां रघुनाथनित्यपरिकरस्थत्वं व्यक्तम् ॥ २३ ॥ २४ ॥ सृष्टानां प्रभावमाह–सिंहेत्यादिभिः । सर्वास्त्रकोविदा इत्यनेन प्रादुर्भावपौर्वकालिकवस्तुस्मृतिध्वंसाभावः सूचितः ॥ २५ ॥

गो० टी०–तेषां प्रभावमाह पञ्चभिः–कामेति । सर्वत्र सर्वे इत्यनुषञ्जनीयं सर्वे कामरूपबलोपेता अभवन्नित्येवं योजनीयं सर्वास्त्रकोविदाः देवांशत्वेन स्वयं प्रतिभातास्त्रप्रहारपरिहारोपायाः नत्वस्त्रप्रयोक्तारः शिलाप्रहरणा इत्युक्तेः । विचालयेयुरित्यादिषु "शकि लिङ् च" इतिलिङ् कर्मणे चलिरिति मित्वेऽपि ह्रस्वाभावश्छान्दसः । आप्लवेयुः संतरेयुः प्लवजतः वेगेन गच्छतः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

---

१ मेरुमन्दरसंकाशा इति गो. रा. पाठः । २ समस्तेनेति गो. रा. पाठः । ३ पृथक्सुत इति गो. रा. पाठः । ४ गोलांगूलीषु इति गो. पाठः । ५ संमतविक्रमा इति गो. रा. पाठः । ६ ऋक्षेष्विति रा. पाठः । ७ किन्नरेष्विति रा. पाठः । ८ तार्क्ष्या यक्षा इति गो. पाठः । ९ पादपयोधिनः इति गो. पाठः ।

नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः । विचालयेयुः शैलेन्द्रान्भेदयेयुः स्थिरान्द्रुमान् ॥२६॥
क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिम् । दारयेयुः क्षितिं पद्भ्यामाप्लवेयुर्महार्णवान् ॥ २७ ॥
नभस्तलं विशेयुश्च गृह्णीयुरपि तोयदान् । गृह्णीयुरपि मातङ्गान्मत्तान्मत्रजतो वने ॥ २८ ॥
नर्दमानांश्च नादेन पातयेयुर्विहङ्गमान् । ईदृशानां प्रसूतानि हरीणां कामरूपिणाम् ॥ २९ ॥
शतं शतसहस्राणि यूथपानां महात्मनाम् । ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ॥ ३० ॥
बभूवुर्यूथपश्रेष्ठान्वीरांश्चाजनयन्हरीन् । अन्ये ऋक्षवतः प्रस्थानुपतस्थुः सहस्रशः ॥ ३१ ॥
अन्ये नानाविधाञ्छैलान्काननानि च भेजिरे । सूर्यपुत्रं च सुग्रीवं शक्रपुत्रं च वालिनम् ॥ ३२ ॥
भ्रातरावुपतस्थुस्ते सर्वे च हरियूथपाः । नलं नीलं हनूमन्तमन्यांश्च हरियूथपान् ॥ ३३ ॥
ते तार्क्ष्यबलसंपन्नाः सर्वे युद्धविशारदाः । विचरन्तोऽर्दयन्सर्वान्सिंहव्याघ्रमहोरगान् ॥ ३४ ॥

२६] ति० टी०–सर्वास्त्रकोविदा इति स्वयंप्रतिभातसर्वास्त्रपरिहारोपाया इत्यर्थः । शिलाप्रहरणा इत्यायुक्तेस्तेषामस्त्रप्रयोक्तृत्वाभावात् । विचालयेयुरित्यादौ शक्यार्थे लिङ् विचालनशक्ता इत्यर्थः ॥ २६ ॥

रा० टी०–विचालयेयुरिति। "शकिलिङ् च"इति शक्यार्थे लिङ् तत्तच्चालनादिसामर्थ्यविशिष्टा इत्यर्थः । कम्पनेचलिरिति मित्त्वेपि सर्वेषां मितां वैकल्पिकत्वाच्चालयेयुरिति दूरप्रक्षेपार्थकत्वे तु न शङ्कावसरः ॥ २६ ॥

२७] ति० टी०–आप्लवेयुः संतरेयुः ॥ २७ ॥

रा० टी०–दारयेयुरिति। पद्भ्यां क्षितिं दारयेयुः महार्णवं समुद्रमाप्लवेयुः उत्तरेयुः नभस्तलं विशेयुः । तोयदानपि गृह्णीयुश्च ॥ २७ ॥

२८] ति० टी०–प्रव्रजतः स्वच्छन्दगतीन् ॥ २८ ॥

रा० टी०–गृह्णीयुरिति । वने प्रव्रजतो मत्तानपि मातङ्गान् गृह्णीयुः नादेन नर्दमानान् विहङ्गमांश्च पातयेयुः ॥२८॥

२९] ति० टी०–नादेनेत्यस्य पातयेयुरित्यनेनान्वयः २९

रा० टी०–सर्ववानराणामसंख्येयत्वात् यूथपसंख्या बोधयन्नाह–ईदृशानामिति। वातरंहसां पवनसदृशवेगवतां यूथपानां यूथस्वामिनां महात्मनामातिप्रयत्नवतामीदृशानामुक्तसुग्रीवादिसदृशानां प्रसूतप्रादुर्भूतानां हरीणां वानराणां शतसहस्राणि लक्षाणीत्यर्थः शतं कोटिरित्यर्थः बभूवुरिति हरीणां प्रधानेषु मुख्येषु यूथेषु ये हरियूथपाः सुग्रीवादयो बभूवुस्तेऽपि यूथपश्रेष्ठान् वीरान् हरीन् अजनयन् चशब्दोऽप्यर्थे ॥ २९ ॥ ३० ॥

गो० टी०–अन्येषामपरिच्छेद्यत्वायूथपसंख्यानमाह–ईदृशानामिति। शतं शतसहस्राणि शतलक्षाणीत्यर्थः ॥ २९ ॥

३०] ति० टी०–शतसहस्राणि कोटिरित्यर्थः ॥ ३० ॥

गो० टी०–प्रधानप्रधानानाह–त इति । ते प्रागुक्ताः सुग्रीवादिसुषेणान्ता यूथपाः प्रधानेषु हरीणां यूथेषु समूहेषु यूथपश्रेष्ठा बभूवुः वीरान् हरीनजनयंश्च ॥ २९ ॥

३१-३२] ति० टी०–ते प्रागुक्ता हरीणां प्रधानेषु यूथेषु मध्ये हरियूथपा बभूवुः यूथपश्रेष्ठान्वीरांश्च हरीनजनयन्नित्यर्थः । ऋक्षवतः पर्वतविशेषस्य प्रस्थान्सानूनुपतस्थुरासेवन्ते स्म ॥ ३१ ॥ ३२ ॥

रा० टी०–अन्ये इति । अन्ये प्राकृतविलक्षणाः सहस्रशो वानराः ऋक्षवतः पर्वतविशेषस्य प्रस्थान् शिखराणि उपतस्थुः स्थिता बभूवुः । अन्ये ततो विलक्षणाः नानाविधान् अनेकप्रकारान् शैलान् पर्वतान् काननानि वनानि च भेजिरे सिषेविरे ॥ ३१ ॥

गो० टी०–तेषां स्थानमाह–अन्य इति । ऋक्षवतः पर्वतविशेषस्य प्रस्थान् सानूनि ॥ ३१ ॥

३३] ति० टी०–भ्रातरौ सुग्रीववालिनौ । सर्वे च सर्वेऽप्युपतस्थुः । केचित्साक्षात्केचित्तलादिद्वारेत्याह—नलमित्यादि ॥ ३३ ॥

रा० टी०–सूर्यपुत्रमिति। सर्वे ते हरियूथपाः वानरश्रेष्ठा सूर्यपुत्रं सुग्रीवं शक्रपुत्रं वालिनं च भ्रातरौ एव उपतस्थुः सिषेविरे अत एव नलं नीलं हनूमन्तमन्यांश्च हरियूथपान् वालिसुग्रीवान्तरङ्गानुपतस्थुः वालिसुग्रीवप्रसन्नार्थं सेवयामासुरित्यर्थः । चोहेतौ अपरश्चशब्द एवार्थे ॥ ३२ ॥

गो० टी०–राजयुवराजमन्त्रिणो दर्शयति–सूर्येत्यादिसार्धश्लोकेन । सुग्रीवं युवराजं वालिनं राजानं नलादीन्मन्त्रिणः ॥ ३२ ॥

३४] ति० टी०–अर्दयन् आर्दयन्नित्यर्थः अडभाव आर्षः ३४

रा० टी०–ते इति । तार्क्ष्यबलसंपन्नाः गरुडतुल्यवेगवन्तः युद्धविशारदाः युद्धनिपुणाः विचरन्तो वनादिषु विहरन्तस्ते सर्वे वानराः दर्पात् दर्पमालक्ष्य सिंहव्याघ्रमहोरगान् अर्दयन् आर्दयन् तत्तद्वर्वं दूरीचकुरित्यर्थः ॥ ३३ ॥

गो० टी०–तेषां दुःशासनत्वमाह–त इति । तार्क्ष्यो गरुडः ॥ ३३ ॥

---

१ महार्णवमिति गो. पाठः । २ गर्दमानाश्चेति गो.रा.पाठः । ३ श्रेष्ठा इति गो. पाठः । ४ सर्व एव हरीश्वराः इति गो. रा. पाठः । ५ दर्पादिति गो.रा.पाठः।

महाबलो महाबाहुर्बाली विपुलविक्रमः । जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान् ॥ ३५ ॥
तैरियं पृथिवी शूरैः सपर्वतवनार्णवा । कीर्णा विविधसंस्थानैर्नानाव्यञ्जनलक्षणैः ॥ ३६ ॥
तैर्मेघपृन्दाचलकूटसंनिभैर्महाबलैर्वानरयूथपाधिपैः ।
बभूव भूर्भीमशरीररूपैः समावृता रामसहायहेतोः ॥ ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

३५] ति० टी०–वाली जुगोपेत्यन्वयः । देवराजावतारत्वादिति भावः ॥ ३५

रा० टी०–तानिति । महान्तौ दीर्घौ बाहू यस्य सः विपुलविक्रमः महापराक्रमविशिष्टः वाली भुजवीर्येण तान् पूर्वोक्तान् सर्वान् निखिलान् ऋक्षगोपुच्छवानरान् जुगोप ररक्ष चकारेण यथोचितं तैः स्वं सेवयामास ॥ ३४ ॥

गो० टी०–सर्वेषां शासितारमाह–तांश्चेति ॥ ३४ ॥

३६] ति० टी०–विविधसंस्थानैर्नानाप्रकारसंनिवेशैः । नानाव्यञ्जनलक्षणैः परस्परभेदव्यञ्जकतत्तल्लक्षणयुतैः ॥ ३६ ॥

रा० टी०–तैरिति । शूरैः युद्धोत्साहविशिष्टैः विविधसंस्थानैः विलक्षणावयवविशिष्टैः नानाव्यञ्जनलक्षणैः परस्परं भेदबोधकलक्षणविशिष्टैः तैर्वानरैः सपर्वतवनार्णवा पर्वतवनार्णवसहिता इयं प्रसिद्धा पृथिवी कीर्णा व्याप्ता ॥ ३६ ॥

गो० टी०–साहाय्यसंपत्तिपौष्कल्यं दर्शयति–तैरिति । अर्णवः अर्णववद्भिः विविधसंस्थानैः स्थूलसूक्ष्महस्वदीर्घादिविविधदेहसंस्थानवद्भिः नानाव्यञ्जनलक्षणैः नानात्वाभिव्यञ्जकासाधारणधर्मवद्भिः ॥ ३६ ॥

३७] ति० टी०–अचलकूटः पर्वतशृङ्गम् । यूथपाधिपैः यूथपानामाधिपैरित्यर्थः भीमशरीररूपैर्भयजनकशरीराकृतिभिः॥३७॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

रा० टी०–उक्तमर्थमुपसंहरन्नाह–तैरिति । मेघवृन्दाचलकूटकल्पैः मेघसमूहः अचलकूटः पर्वतशृङ्गं तत्कल्पैस्तत्सदृशैरित्यर्थः । महाबलैः अतिपराक्रमविशिष्टैः भीमशरीररूपैः भयोत्पादकशरीररूपविशिष्टैः वानरयूथपैः रामसहायहेतोः रामेण सह अयः गमनं तदर्थं तत्सेवार्थमित्यर्थः । समावृता व्याप्ता भूः भूमिर्बभूव नचास्मिन्सर्गे 'धनदस्य सुतः श्रीमान् वानरो गन्धमादनः। वरुणो जनयामास सुषेणं नाम वानरम्॥ शरभं जनयामास पर्जन्यस्तु महाबलम्' इत्युक्तम्। युद्धकाण्डे तु रावणं प्रति शार्दूलवचनम् ' सुषेणश्चात्र धर्मात्मा पुत्रो धर्मस्य वीर्यवान् । पुत्रा वैवस्वतस्याथ पञ्च कालान्तकोपमाः ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः ' इति परस्परं विरुद्धमिति वाच्यम् शार्दूलवचनस्य भ्रान्तिप्रयुक्तत्वेनादोषात् अभ्रान्तप्रयुक्तविरुद्धवचनयोरेव दोषावहत्वात् प्रसिद्धा च शार्दूलभ्रान्तिः 'रुधिरासक्तसर्वाङ्गो विह्वलश्चलितेन्द्रियः' इति तत्रत्योक्तेः किञ्च धर्मस्य अतिधर्मवतः वरुणस्येत्यर्थः सुषेणद्वयस्वीकारो वा ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

गो० टी०–उक्तमेवार्थं पुनः सर्गान्ते संगृह्य दर्शयति–तैरिति । भीमशरीररूपैः भयंकरशरीरवैः रामसहायहेतोः रामसाहाय्यार्थं भावप्रधानो निर्देशः ॥३५॥ नन्वस्मिन्सर्गे 'धनदस्य सुतः श्रीमान् वानरोगन्धमादनः । वरुणो जनयामास सुषेणं नाम वानरम् ॥ शरभं जनयामास पर्जन्यस्तु महाबलम्' इत्युच्यते । युद्धकाण्डे तु रावणं प्रति शार्दूलवाक्ये 'सुषेणश्चात्र धर्मात्मा पुत्रो धर्मस्य वीर्यवान् । पुत्रा वैवस्वतस्याथ पञ्च कालान्तकोपमाः ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः' इति । कथमिदं संगच्छते उच्यते अत्र वाल्मीकिनोक्तमेव तथ्यम् 'न ते वागनृता काव्ये काचिदत्र भविष्यति' इति ब्रह्मवरप्रसादात् शार्दूलस्तु भ्रान्त्योक्तवान् 'रुधिरासिक्तसर्वाङ्गो विह्वलश्चलितेन्द्रियः' इति तत्रैवोक्तेः अत्रेदं शङ्क्यते ऋष्यश्रृङ्गेण पुत्रेष्टयुपक्रमानन्तरं देवादिसंमेलनं ततो विष्णोरवतीर्णा 'पुत्रत्वं तु गते विष्णौ वानरोत्पत्तिः' इत्युक्तं तद्विरुध्यते वालिसुग्रीवयो रावणदिग्विजयकालिकत्वात् वक्ष्यत्युत्तरकाण्डे ' अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः ' इत्यारभ्य 'ततः कदाचित्किष्किन्धां नगरीं वालिपालिताम् । गत्वाऽह्वयति युद्धाय वालिनं हेममालिनम् ' इत्यादिना तथा च कार्तवीर्यार्जुनकालिको वाली कथं रामसमवयस्कः स्यात् किंच ' भगवन्राक्षसः क्रूरो यदाप्रभृति मेदिनीम् । पर्यटन् किं तदा लोकाः शून्या आसन् द्विजोत्तम ॥ राजा वा राजमात्रो वा किं तदा नात्र कश्चन । धर्षणां येन न प्राप्तो रावणो राक्षसेश्वरः ' इति दिग्विजयवृत्तान्ते रामेण पृष्टे अगस्त्येनार्जुनवालिभ्यां परिभव उच्यमानोऽर्जुनवालिनोरेककालत्वमवगमयति । अपिच मयो रावणाय मन्दोदरीप्रदानकाले ' द्वौ सुतौ तु मम त्वस्यां भार्यायां संबभूवतुः । मायावी प्रथमस्तावत् दुन्दुभिस्तदनन्तरः ' इत्युक्तवान् । तत्र दुन्दुभिर्यौवनमदाद्वरदानाच्च मत्तो वालिना हत इत्युच्यते अतो वालिनो रावणदिग्विजयकालिकत्वं व्यज्यते सुग्रीवश्च वालिभयात् परिभ्रमन् दुन्दुभिकलेवरप्रक्षेपकृतमतङ्गशापानन्तरमृश्यमूके प्रत्यतिष्ठत् अतः सुग्रीवस्यापि वालितुल्यकालत्वं गम्यते एवं मैन्दद्विविदादयोपि चिरकालस्थायिनोऽवगम्यन्ते वक्ष्यति रावणं प्रति शार्दूलः ' मैन्दश्च

१ ताश्चसर्वानिति गो. रा. पाठः । २कल्पैरिति गो. रा. पाठः । ३ यूथपैश्चेति रा. यूथपालैरिति गो. पाठः ।

अष्टादशः सर्गः ।

कृत्वनुष्ठानाद्वादशे मासि श्रीरामावतारो लक्ष्मणादीना चोत्पत्तिः । दिव्ययोध्यायां चोत्सवः, सर्वेषां संस्करणं, विश्वामित्रागमन च ।

निर्वृत्ते तु क्रतौ तस्मिन्हयमेधे महात्मनः । प्रतिगृह्यामरा भागान्प्रतिजग्मुर्यथागतम् ॥ १ ॥
समाप्तदीक्षानियमः पत्नीगणसमन्वितः । प्रविवेश पुरीं राजा सभृत्यबलवाहनः ॥ २ ॥

द्विविदश्चौभौ ताभ्यां नास्ति समो युधि । ब्रह्मणा समनुज्ञातावमृतप्राशनावुभौ ' इति । तेन तयोरमृतमथनकालवर्तित्वं प्रतीयते । सारणवाक्ये च 'एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मनः । तदा दैवासुरे युद्धे साहाय्यार्थं दिवौकसाम् ' इति क्रोधनस्य देवासुरयुद्धे व्यापारकथनात् चिरन्तनत्वं तत्प्रायपठितानामन्येषामपि वालिसुग्रीवमन्त्रिप्रभृतीनां सिद्धं चिरकालत्वम् । एवमन्यत्रापि वानरयूथपानामतिचिरस्थायित्वं व्यञ्जनावृत्त्यावगम्यते अतः कथमेषां रामावतारकालिकत्वमत्रोच्यते इति अत्रास्मदुरुचरणाः यद्यपि पूर्वसर्गान्ते विष्णोर्गर्भप्रवेशमुक्त्वा पुत्रत्वं तु गते विष्णावित्यारभ्य ब्रह्मानुशासनं कथितं तथापि उवाच देवताः सर्वाः स्वयंभूर्भगवानिदमित्यादिना सामान्येन देवता उद्दिश्य ब्रह्मा संदिष्टवान् ' ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनम् । जनयामासुरेवं ते पुत्रान्वानररूपिणः ' इति सामान्येन देवैर्वानरसृष्टिश्रोक्ता । अथ ब्रह्मणो जाम्बवत्सृष्टिवत् पूर्वसिद्धामिन्द्रादिभ्यो वाल्यादिसृष्टिमनुवदति ' वानरेन्द्रं महेन्द्राभमिन्दो वालिनमूर्जितम् ' इत्यादिना । अत एव हि वालिनं जनयामासेत्युक्तम् ननु तदा जनयामासेति अन्यत्र तु ' बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ' इति तत्कालवाची तत्रशब्दः प्रयुक्तः इन्द्रादयः खल्वेवममन्यन्त ब्रह्मनियोगानन्तरं किमपूर्वसर्गेण पूर्वमन्यार्थमुत्पन्ना एव साहाय्यं करिष्यन्तीति यैस्तु पूर्व पुत्रा नोत्पादितास्ते पुनस्तदा जनयामासुः अत एव ' एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मनः । तदा दैवासुरे युद्धे सहायार्थं दिवौकसाम् ' इत्यादिना क्रोधनादीनामन्यार्थं सृष्टिरुच्यते तस्मान्न कोऽपि विरोध इत्याहुः । यद्वा रामावतारकाल एव वाल्यादिजन्म वालिजयश्च नार्जुनजयाव्यवहितोत्तरकालिकः ततःशब्दस्यानन्तर्यमात्रपरत्वात् अत एव ततः कदाचिदित्युक्तम् अगस्त्येनार्जुनवालिविजययोर्युगपत्कथनं रावणजयत्वेन कृष्णः कंसशिशुपालौ जघानेतिवत् । दुन्दुभिश्च वरदानेन सदा युवा मत्तश्च ततश्च तस्य बहुकालानन्तरमपि वालिना युद्धं संभवत्येव एवमन्यदप्यूह्यम् । सर्वथोपक्रमावगतः क्रमो न बाधितव्यः दैवासुरे युद्धे साहाय्यार्थमित्यत्रापि साहाय्यसमर्थ इत्यर्थो बोध्यः । अमृतप्राशिनौ अमृतप्राशितुल्यावित्यर्थः यद्वा अयं ब्रह्मानुशासनप्रकारः प्राचीन एव प्रसङ्गादय कविनोपवर्ण्यते पुत्रत्वं तु गते विष्णौ गन्तुं व्यवसित इत्यर्थः व्यवसायश्च विष्णोर्ब्रह्मणा विविक्ते प्रार्थनात् अत एव पूर्वसर्गे, इन्तायं विदितस्तस्य वधोपायो दुरात्मनः ' इत्युक्तम् । अत एवामुं वृत्तान्तं सनत्कुमारो विदित्वा सुमन्त्रायोवाचेति बोध्यम् । ब्रह्मप्रार्थनं च रावणस्य मानुषादन्यत्र भयं नास्ति त्वं ऋष्यशृङ्गेण यक्ष्यमाणस्य दशरथस्य पुत्रो भवेति अत एव कृतसंकेततया विष्णुरुपयात इत्युक्तम् यद्वा ततो देवाः सगंधर्वाः इत्यादिकात् पूर्वसर्गात्प्रभृति ब्रह्मलोकवृत्तान्तः तस्मिन्सदसि ब्रह्मसदसीत्यर्थः । अत एव स्वलोकमागच्छेत्युक्तं ननु गच्छेति तथा चैवं संगतिः पुत्रकामेष्टिपर्यन्तमुक्त्वा तत्राग्निपुरुषाविर्भावोपोद्घातत्वेन चिरंतनवृत्तान्तमुपक्षिपति ततो देवा इत्यादि तत इति प्रस्तावान्तरारम्भार्थः । अथ 'पितरं रोचयामास तदा दशरथं नृपम्' इत्यन्ते विष्णुवृत्तान्तेऽभिहिते पुत्रत्वं तु गते अभ्युपगते इति पुत्रत्वाङ्गीकारानन्तरं देवांशवानरोत्पत्तेर्वक्तव्यत्वेऽपि तं वृत्तान्तं तत्रावस्थाप्य ' स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम् । अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः' इत्यादिना विष्णुवृत्तान्तमेवानुक्रम्य गर्भप्रवेशपर्यन्तमुक्त्वा प्रागवस्थापितं देववृत्तान्तमेव पुत्रत्वं तु गत इत्यादिना पुनः प्रतिपादयति एतावद्वृत्तान्तकालस्य देवमानेनाल्पत्वेऽपि मनुष्यमानेन बहुवर्षा गताः रेवतीवरप्रार्थनावत् अतो भागग्रहार्थं समवेत्य ब्रह्मसदसि गत्वा कार्यं विज्ञाप्य ततो ऽश्वमेधभागान् गृहीत्वा गता देवा इति सर्वं समञ्जसम् ॥१६॥

इति श्रीगो० बालकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

१] ति० टी०–प्रासङ्गिकदेवतावतारमुक्त्वा प्रकृतः प्रस्तावावतार उच्यत–**निर्वृत्ते इत्यादि** । निर्वृत्ते समाप्ते ' पुत्रोत्पत्तिं विचिन्तयन् ' इत्यन्तो वृत्तानुवादः । हयमेध इत्यस्य पुत्रेष्टियुत इति शेषः ॥ १ ॥

रा० टी०–सर्वेश्वरेश्वररघुनाथप्राकट्यमुपक्रममाणः आह–**निर्वृत्ते** इत्यादिभिः । महात्मनः सर्वपूज्यस्य दशरथस्य तस्मिन्प्रसिद्धे हयमेधे क्रतौ निवृत्ते सिद्धे समाप्ते सतीत्यर्थः तेन पुत्रेष्टौ समाप्तायां सत्यां सुराः स्वर्गादिसाकेतोभयनिवास्यङ्गाङ्गिदेवाः भागान् स्वस्वसंप्रदानकांशान्प्रतिगृह्य यथागतं आगतक्रममनतिक्रम्य प्रतिजग्मुः स्वस्वस्थानं प्रापुः ॥ १ ॥

गो० टी०–श्रीरामावतारघट्टः ' कोसलो नाम मुदितः स्फीतो जनपदो महान्' इत्यारभ्य भगवतोऽवतारनिमित्तान्युक्तानि अथावतारं दर्शयत्यष्टादशे–**निर्वृत्ते त्वित्यादि** । अत्र पुत्रोत्पत्तिं विचिन्तयन् इत्येवमन्तो ग्रन्थः 'हुताशनादित्यसमानतेजसश्चिरेण गर्भान् प्रतिपेदिरे तदा ' इत्येतच्छेषोऽनुवर्तते । निर्वृत्ते समाप्ते हयमेधे पुत्रेष्टिसहित इति शेषः ॥ १ ॥

२] ति० टी०–प्रविवेश प्रवेशाभिमुखो बभूव ॥ २ ॥

रा० टी०–**समाप्तेति** । समाप्तो दीक्षानियमो यस्य सः

१ निवृत्त इति रा. पाठ इति भाति परं स न हृद्यः, तिलकगोविन्दयोरैक्यात् ' सिद्धे ' इत्यर्थस्यानानुगुण्याच्च ।

यथार्हं पूजितास्तेन राज्ञा च पृथिवीश्वराः । मुदिताः प्रययुर्देशान्प्रणम्य मुनिपुङ्गवम् ॥ ३ ॥
श्रीमतां गच्छतां तेषां स्वगृहाणि पुरात्ततः । बलानि राज्ञां शुभ्राणि प्रहृष्टानि चकाशिरे ॥ ४ ॥
गतेषु पृथिवीशेषु राजा दशरथः पुनः[1] । प्रविवेश पुरीं श्रीमान्पुरस्कृत्य द्विजोत्तमान् ॥ ५ ॥
शान्तया प्रययौ सार्धमृष्यशृङ्गः[2] सुपूजितः । अनुगम्यमानो राज्ञा च सानुयात्रेण धीमता ॥ ६ ॥
एवं विसृज्य तान्सर्वान्राजा संपूर्णमानसः । उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन् ॥ ७ ॥
ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः । ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥ ८ ॥
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु । ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥ ९ ॥
प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् । कौसल्याजनयद्रामं दिव्यलक्षणसंयुतम् ॥ १० ॥
विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकुनन्दनम्[4] । लोहिताक्षं महाबाहुं रक्तोष्ठं दुन्दुभिस्वनम् ॥ ११ ॥

पत्नीगणसमन्वितः पत्नीनां गणैः समन्वितो युक्त सभृत्यबलवाहनः भृत्यबलवाहनसहितः राजा पुरीं प्रविवेश ॥ २ ॥

गो० टी०–समाप्तेति । दीक्षार्थो नियमो दीक्षानियमः प्रविवेश प्रवेष्टुमुपचक्रमे आदिकर्मण्योतकः प्रशब्दः ॥ २ ॥

३] ति० टी०–मुनिपुङ्गवं वसिष्ठम् ऋष्यशृङ्गं च ॥ ३ ॥

रा० टी०–यथार्हमिति । तेन कृतयागेन राज्ञा राजराजदशरथेन यथार्हं यथायोग्यं पूजिताः प्राप्तसत्काराः अत एव मुदिताः प्रमोदं प्राप्ताः पृथिवीश्वराः राजानः मुनिपुङ्गवं वशिष्ठऋष्यशृङ्गवामदेवान् एकवचनं जात्यभिप्रायेण वैशब्देनान्यानपि प्रणम्य देशान् स्वान् स्वान् विषयान् प्रययुः ॥ ३ ॥

गो० टी०–यथेति । मुनिपुङ्गवं वसिष्ठम् ॥ ३ ॥

४] ति० टी०–शुभ्राणि दशरथदत्तवस्त्राभरणादिनात्युज्ज्वलानि अतएव प्रहृष्टानि ॥ ४ ॥

रा० टी०–श्रीमतामिति । ततः तस्मात् पुरात् अयोध्यातः स्वपुराणि गच्छतां तेषां श्रीमतां परमैश्वर्ययुक्तानां राज्ञां शुभ्राणि स्वच्छानि प्रहृष्टानि प्राप्तप्रमोदानि बलानि सैन्यानि चकाशिरे ॥ ४ ॥

गो० टी०–श्रीमतामिति । शुभ्राणि दशरथदत्तवस्त्रादिभिः ॥ ४ ॥

५] ति० टी०–द्विजोत्तमान्वसिष्ठादीन् ॥ ५ ॥

रा० टी०–गतेष्विति । पृथिवीशेषु राजसु गतेषु श्रीमान्राजा दशरथः द्विजोत्तमान्ब्राह्मणान्पुरस्कृत्याग्रे कृत्वा पुरीं पुनः प्रविवेश पुनः प्रवेशोक्त्या पूर्वं पुरीं प्रविश्य राजप्रस्थापनार्थं बहिर्निर्गत इति ध्वनितम् ॥ ५ ॥

गो० टी०–गतेष्विति । द्विजोत्तमान् वसिष्ठादीन् ॥ ५ ॥

६] ति० टी०–सानुयात्रेण सभृत्येन राज्ञा दशरथेनानुगम्यमान ऋष्यशृङ्गः प्रययौ स्वस्थानमिति शेषः ॥ ६ ॥

रा० टी०–शान्तयेति । अथ पुरप्रवेशानन्तरं धीमता परमबुद्धिविशिष्टेन सानुयात्रेण भृत्यवर्गसहितेन राज्ञा दशरथेन शान्तया सार्धं सुपूजितः प्राप्तातिसत्कारः अन्वीयमानः अनुगम्यमानश्च ऋष्यशृङ्गः प्रययौ स्वं स्थानं प्राप ॥ ६ ॥

गो० टी०–शान्तयेति । अथ नगरप्रवेशानन्तरं सानुयात्रेण सभृत्येन राज्ञा रोमपादेन अन्वीयमानः अनुगम्यमानः ॥ ६ ॥

७] ति० टी०–सर्वान्वसिष्ठादीनपि तत्र पुरे ॥ ७ ॥

रा० टी०–एवमिति । एवमुक्तप्रकारेण तान्सर्वान्पूर्वोक्तान्विसृज्य संपूर्णमानसः प्राप्तमनोरथः अत एव सुखितः प्राप्तसुखः राजा पुत्रोत्पत्तिं स्वनित्यपुत्रप्रादुर्भावं विचिन्तयन् सन् तत्रायोध्यानगरे उवास ॥ ७ ॥

गो० टी०–एवमिति । एवमृष्यशृङ्गवत् तान् द्विजोत्तमान् संपूर्णमानसः संपूर्णमनोरथः । तत इत्यर्धमेकम् ॥ ७ ॥

८–११] ति० टी०–ऋतूनामिति प्रथमार्थे षष्ठी । समत्ययुः समतीताः । नावमिके नवम्यां तिथौ स्वार्थे ठक् ॥ ८ ॥ अदितिदैवत्ये पुनर्वसौ पञ्चसु रविभौमशनिगुरुशुक्रेषूच्चसंस्थेषु मेषमकरतुलाकर्कमीनस्थेषुसच्चन्द्रगुरौ कर्कटे लग्ने स्थिते सति ॥ ९ ॥ प्रोद्यमाने तत्र लग्ने उदयं गच्छति सतीत्यर्थः । सर्वलोकनमस्कृतम् अस्य सर्वलोकरूपश्चासौ नमस्कृतश्च तमित्यप्यर्थः । तेनादौ प्रादुर्भावसमये मात्रा विराड्रूपस्य दर्शनम्, ततस्तद्रूपदर्शनविस्मयान्तया नमस्कृतः सन्मायया बालभावं दधाविति सूचितम् ॥ १० ॥ विष्णोः शङ्खचक्रानन्तविशिष्टस्य विष्णोरित्यर्थः । अर्धम् किंचिन्न्यूनमर्धमित्यर्थः । शङ्खचक्रादेरभावादिति भावः ॥ ११ ॥

रा० टी०–तत इति । ततः तस्मिन्यज्ञे पुत्रेष्टियागे समाप्ते सति ऋतूनां षट् षड्ऋतवः समत्ययुः व्यतीता अभवन् । ततस्तेषु षट्सु ऋतुषु मध्ये द्वादशे चैत्रे मासे नावमिके नवम एव नावमिकतस्मिन्तिथौ विनयादित्वात्स्वार्थिकष्ठक् तिथिर्द्वयोरित्यनुशासनात्तिथिशब्दस्य पुंस्त्वम् ऋतूनामित्यत्र षष्ठी राहोरिशर इतिवत् बोध्या चैत्रशब्दार्थस्तु चित्रया युक्ता पौर्णमासी चैत्री "नक्षत्रेण युक्तः कालः" इत्यण् सास्त्यस्मिन्निति चैत्रः "सास्मिन्पौर्णमासीति" इत्यण् ॥ ८ ॥ नक्षत्र इति । अदितिदैवत्ये

१ तदेति गो. पाठः । २ ऋश्येति गो. पाठः । ३ अन्वीयमान इति गो. रा. पाठः । ४ ऐक्ष्वाकवर्धनमिति गो. ऐक्ष्वाककुलवर्धनमिति रा. पाठः । ५ इदमर्धं गो. रा. पुस्तकयोर्नास्ति ।

अदितिः देवताऽस्य " दित्यदित्या " इति ण्यः तस्मिन्नक्षत्रे पुनर्वसुसंज्ञके इत्यर्थः ॥ ९ ॥ पञ्चसु ग्रहेषु रविमङ्गलगुरुशुक्रशनिषु स्वोच्चसंस्थेषु मेषमकरकर्कमीनतुलास्थेषु ' अजतृपभमृगाङ्गनाकुलीराश्वपवणिजौ च दिवाकरादितुङ्गाः ' इत्युच्चलक्षणं वराहमिहिरेणोक्तम्।कर्कटे कर्कलग्ने वाक्पतौ बृहस्पतौ इन्दुना सह प्रोद्यमाने उदयं प्राप्ते लग्ने सति जगत्त्राणं ब्रह्मविष्णुमहेश्वरद्वारा सर्वलोक नियन्तारमत एव सर्वलोकनमस्कृतं निखिलं ब्रह्माण्डवर्तिजीवेश्वरादिनमस्कारकर्मीभूतं दिव्यलक्षणसंयुतं दिव्यानि सामुद्रिकादिशास्त्रसूचितप्राकृतविलक्षणानि लक्षणानि तैः संयुतं च ॥ १० ॥ विष्णोः जगन्नियन्तुः चतुर्भुजस्य अर्धम् अवतारग्रहणद्वारा तद्यशःप्रख्यापकत्वेन प्रवृद्धवामनादिरूपनियामकत्वेन च वर्धकम् अत एव सूर्यस्यापि भवेत्सूर्यः इत्यादिना न विरोधः महाभागं महान् इतरभागापेक्षयाधिकः भागः प्रादुर्भावनिमित्तीभूतपायसरूपांशो यस्य स तं किंच महान् भागो भाग्यं यस्मात्स तं किंच महतीं लोकदर्शनयोग्यां भां दीप्तिं गच्छति प्राप्नोतीति स तं किंच महान्तो ब्रह्मादयो भागाः प्राप्तप्रकाशाः यस्मात्स तं किंच महा सर्वपूज्या या आभा तां गच्छति प्राप्नोतीति स तं किंच महतीमाभां परमप्रकाशमागमयति आश्रितान्प्रापयति स तं किंच महती आभा यस्य स महाभः स अगो मणिपर्वतो विहाराधारत्वेन यस्य स तं किंच महानां सर्वपूज्यानां ब्रह्मादीनां कर्तृभूतानामाभागः अतिशयसेवा यस्मिन्स तम् ऐक्ष्वाककुलवर्द्धनम् ऐक्ष्वाकः इक्ष्वाकुकुलप्रादुर्भूतः दशरथस्तस्य कुलं वर्धयतीति स तं रामं सर्वाभिरामदातारं कौशल्याजनयत् प्रादुरभावयत् विष्णोरर्धमित्यनेन यो हि विष्णोर्वर्धकः स तत्तुल्यानामन्येषां च वर्धक इति किंवक्तव्यमिति काव्यार्थापत्तिरलङ्कारो ध्वनितः तेन रघुनाथस्याऽघटितघटनापटीयस्त्वं व्यक्तम् । सर्वाभिरामदातारमित्यनेन राम एव सर्वहितत्वमिति परिसङ्ख्यालङ्कारो ध्वनितः तेन यः सर्वहितः सस्वाश्रितहित इति किंवक्तव्यमिति काव्यार्थापत्तिरलङ्कारो ध्वनितः तेन रघुनाथस्य परमदयालुतातिशयः सूचितः तेन सर्वाधीशत्वं व्यक्तम् एतेन विष्णोरर्धं विष्णुमयस्य पायसस्यार्धं अर्धांशपरिणामभूतमिति भूषणोक्तार्थः आपाततो रमणीयः वाक्यार्थस्य लाक्षणिकत्वापत्तेः सर्वेश्वरेश्वरस्य लीलार्थं स्वयं प्रादुर्भूतस्य ब्रह्मादिप्रार्थितस्य सर्वोत्पत्त्यादिकारणीभूतेच्छावतः उपादानासंभवाच्च ईश्वरेश्वराणां सोपादानकत्वेऽनवस्थापत्तेश्च कार्यत्वापत्त्याऽनित्यत्वापत्तेश्च यत्तु भट्टाः विष्णोः शङ्खचक्रानन्तविशिष्टस्य अर्धं किंचिन्न्यूनं शङ्खचक्रादेरभावादिति भावः तदपि न शोभनम् तादृशेर्थे विष्णुशब्दस्य सङ्केताभावात् । एतदभिप्रायेणैव इममर्थमनद्य वस्तुतस्त्विवत्यादिना पाठकैरर्थान्तरं वर्णितम् यत्त्वत्र पाठकाः "प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम्" इत्यादिश्रुतिभ्यो 'गिरामस्म्येकमक्षरम्' इत्यादिस्मृतिभ्यश्च वाच्यवाचकयोरभेदाच्चात्र विष्णुशब्देन प्रणव उच्यते तस्यार्धं अर्धमात्रा तदात्मकं राममित्यर्थः । तथाचाथर्वणश्रुतिः " अकाराक्षरसंभूतः सौमित्रिर्विश्वभावनः । उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः । प्राज्ञात्मकस्तु भरतो मकाराक्षरसंभवः । अर्धमात्रात्मको रामः सच्चिदानन्दविग्रहः " इति। तदपि न सम्यक् वाक्यार्थस्य लाक्षणिकत्वापत्तेः नहि शक्यार्थेनेष्टसिद्धौ लक्षणां कश्चिदभ्युपैति । किंच यत्प्रणवावयवभूतस्य मात्रार्धस्य रामपरत्वं न तत् प्रणवस्येश्वरवाचकत्वं यस्य चाखण्डप्रणवस्येश्वरवाचकत्वं न तदवयवीभूतस्य मात्रार्धस्य रामपरत्वमिति लक्षणास्वीकारेऽपि तदभीष्टार्थस्य दुरूपपादत्वात् । एतेन विष्णोश्चतुर्भुजस्य अर्धं द्विभुजमित्यर्थं वदन्तोऽपि प्रत्युक्ताः लाक्षणिकत्वापत्तेस्तुल्यत्वात् चतुर्भुजमात्रे विष्णुशब्दस्य संकेताभावाच्च अत एव भृगुदक्षयज्ञादिप्रादुर्भूतानामष्टभुजादीनां विष्णुत्वेन व्यवहारः संगच्छते तावन्मात्रार्थकत्वे द्विभुजंतं महाभागमित्यपहाय विष्णोरर्धमित्युक्त्या तदभिप्रेतार्धस्य रूप्यभिप्रायविरुद्धत्वाच्च अर्धशब्दस्य वर्धकपरत्वं न दृष्टमिति तु न भ्रमितव्यम् अर्धयति वर्धयतीति अर्धं इतिव्युत्पत्त्या यौगिकस्वीकारेण वर्धकपरत्वस्य सर्वतन्त्रसिद्धत्वात् अत एव बृहदारण्यके पञ्चमेऽध्याये नवमब्राह्मणे " कतमोऽर्धर्च " इतिप्रश्ने " योऽयं पवत " इत्युत्तरम् । " कथमध्यर्च " इतिप्रश्ने " यदस्मिन्निदं सर्वमध्यार्ध्नोत् " इत्यादिश्रुतौ अर्धशब्दस्य वर्धकपरत्वमिति दिक् । अत्राधिकव्याख्यानदर्शनकाङ्क्षिभिर्विष्णुना सदृशो वीर्ये इत्यत्र द्रष्टव्यम् ॥ ११ ॥

गो० टी०–अथ भगवतः प्रादुर्भावं दर्शयति त्रिभिः–ततश्चेत्यादि । ततः अश्वमेधसमाप्त्यपेक्षया पायसोपयोगाद्वा स च वैशाखादौ भवेत् द्वादशे " तस्यपूरणे डट् " इति डटा चैत्री पौर्णमास्यस्मिन्निति चैत्रः " सास्मिन् पौर्णमासीति" संज्ञायामण् चकारो वारसमुच्चयार्थः । नावमिके नवम्यां विनयादित्वात्स्वार्थे ठक् । ' तिथयोद्वयोः ' इति तिथिशब्दस्य पुँल्लिङ्गस्यापि संभवात् ङीत्वभावः । अदितिर्देवता यस्य तददितिदैवतं तस्मात् देवतान्तात्तादर्थ्ये यक् छान्दसः । नक्षत्रे पुनर्वस्वोरित्यर्थः । " पुनर्वस्वनक्षत्रमदितिर्देवता " इतिश्रुतेः । पंचसु ग्रहेषु स्वोच्चसंस्थेषु सूर्यगुरुशुक्राङ्गारकशनिषु स्वोच्चस्थानस्थितेषु सत्सु उच्चस्थानलक्षणमुक्तं वराहमिहिरेण ' अजतृपभमृगाङ्गनाकुलीराश्वपवणिजौ च दिवाकरादितुङ्गाः' इति । कर्कटे कर्कटाख्ये लग्ने राश्युदये ' राशीनामुदयो लग्नम् ' इत्यमरः वाक्पतौ बृहस्पतौ इन्दुना सह प्रोद्यमाने उदयति सति आर्षमात्मनेपदम् । अत्र प्रोद्यमान इत्युक्तत्वात्पुनर्वसुनक्षत्रस्य कर्कटराशित्वाच्च तत्रेन्दुः स्थित इत्यवगम्यते कर्कटकस्तु गुरोरुच्चस्थानम् । इन्दुना वर्तमानो गुरुस्तत्र वर्तत इति गुरुरुच्चस्थः चैत्रमासे सूर्यस्य मेषप्रवेशात् सूर्योप्युच्चगत एव बुधः सदा रविसंनिहितो न तदोच्चस्थानस्थः चन्द्रश्च कर्कटगो नोच्चस्थः तथाच परिशेषान्मन्दाङ्गारकशुक्रास्तुलामकरमीनसंस्था इति पञ्चानामुच्चस्थत्वं नामकीर्तनं विना पञ्चोच्चस्थत्वकीर्तनं तत्फलविशेषप्रतिपादनाय यथाहुः ' एकग्रहोच्चजातस्य सर्वारिष्टविनाशनम् । द्विग्रहोच्चे तु सामन्तस्त्रिग्रहोच्चे महीपतिः । चतुर्ग्रहोच्चे सम्राट् स्यात् पञ्चोच्चे लोकनायकः ' इति । प्रत्येकोच्चफलं चाहुः ' सूर्ये स्वोच्चगते

कौसल्या शुशुभे तेन पुत्रेणामिततेजसा । यथा वरेण देवानामदितिर्वज्रपाणिना ॥ १२ ॥

जातः सेनापत्यमवाप्नुयात् । भौमे स्वोच्चगते जातो वने राजा भविष्यति ॥ गुरौ स्वोच्चगते जातो धनी राज्याधिपो भवेत् । शुक्रे स्वोच्चगते जातो राज्यश्रियमवाप्नुयात् । शनौ स्वोच्चगते जातो राजाधिपसमो भवेत् ' इति । गुरुचन्द्रयोगफलमुक्तं मिहिरेण ' बृहत्सौहृदो विनीतः स्वबन्धुसंमानकृद्धनेशश्च । शशिगुरुवीर्यगुणशीलः सुरद्विजेभ्यो रतो भवेत्पुरुषः ' इति । रविबुधयोगफलं च तेनैवोक्तम् ' वेदान्तविस्थिरधनो रविजयोः प्रायशो यशोर्थी स्यात् । आर्यक्षितिपतिदयितः सतां च बलरूपविद्यावान् । चैत्रयासजन्मफलम् ' चैत्रे मधुरभाषी स्यादहंकारसुखान्वितः । नवमीजन्मफलम् ' दीर्घवैरी भुवि ख्यातो वश्यः शूरश्च पण्डितः ' । निर्भयः सर्वभूतेभ्यो नवम्यां जायते नरः । पुनर्वसुनक्षत्रफलम् ' सहिष्णुर्गुप्तवृत्तिश्च श्लेष्मलो नाट्यकोविदः । अगुप्तुरल्पसंतुष्टः शीघ्रगोऽदितिर्विधिष्ण्यजः । चतुर्थपादजन्मफलम् ' कान्तप्रियवपुः श्लक्ष्णः सज्जनः प्रियदर्शनः । लक्ष्मीवान् प्रियवादी च आदित्यान्ते प्रजायते । उच्चस्थेन बृहस्पतिना समं चन्द्रस्य स्थितिः कर्कट क इति पुनर्वसूच्चतुर्थपादत्वं सिद्धम् । चैत्रपुनर्वसू शुक्लपक्ष एवेति सिद्धम् । कर्कटकलग्नजन्मफलम् । कर्कटे लग्नके चन्द्रयुक्ते दृष्टे च भोगवान् । गुरुणा वीक्षिते युक्ते धनाढ्यो बहुभोगवान् ' तानिमानि फलविशेषान् सूचयितुं मासतिथ्यादिकीर्तनम् । नथैवाह जगन्नाथमित्यादिना । जगन्नाथमित्यनेन पद्मोद्भवे लोकनायक इत्युक्तं फलं दर्शितम् । लग्नस्य गुरुयोगफलमाह–सर्वलोकनमस्कृतमिति । यथा होराप्रदीपे ' कविः सुगीतः प्रियदर्शनः सुखी दाता च भोक्ता नृपपूजितः शुचिः । देवद्विजाराधनतत्परोऽथ भवेन्नरो देवगुरौ तनुस्थिते ' रामं पश्चाद्रामाख्यं यद्वा रामं श्यामवर्णम् अथो रामो सावित्रावित्यत्राथ श्यामाविति व्याख्यानात् । अनेन कर्कटे कन्यांशे जात इति व्यज्यते । कन्याया बुधांशत्वात् बुधस्य च श्यामत्वात् शुक्रांशत्वाद्वा यथाह मिहिरः ' रक्तश्यामो भास्करो गौर इन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्रः । दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः ' इति । सर्वलक्षणसंयुतं सर्वलक्षणैः सामुद्रिकोक्तैः पूर्णमिदं लग्नचन्द्रफलम् ' पूर्णे शीतकरे लग्ने तेजस्वी नित्यगर्वितः ' इति होराशास्त्रात् विष्णोरयं विष्णुमयस्य पायसस्यार्धागपरिणामभूतं पुत्रं पुंनाम्नो नरकात्त्रायत इति पुत्रः तं पुनस्तं विशेषयति ऐक्ष्वाकवर्धनमिति ऐक्ष्वाकस्य दशरथस्य वर्द्धनम् अनेन लग्नस्य सौम्यग्रहयोगफलं दर्शितम् । यथा नराश्चिरायुर्नृपपूजितः सुखी लग्ने भवेत्सौम्ययुतं यथा तथा । लग्ने तथा स्वामिनिरीक्षिते धनी कुशाग्रबुद्धिः कुलकीर्तिवर्धनः ॥ ' महाभागं महाभाग्ययुक्तम् अनेन लग्नचन्द्रकृतोऽपि दोषो गुरुयोगात्परिह्रियते इति सूच्यते । यथाहुः होराप्रदीपे ' जन्मकालिकलग्नांशे चन्द्रः केन्द्रगतो यदि । जातस्य विनयो वित्तं ज्ञानं बुद्धिश्च नैपुणम् ॥ हीनं पणफरस्थेऽस्मिन्मध्यान्येतानि तस्य च । आपोक्लिमस्थचन्द्रश्चेदुत्कृष्टानि भवन्ति हि ॥ स्वांशेऽधिमित्रस्य नवांशके वा चन्द्रे तु वाचस्पतिना च दृष्टे । एवंविधे शीतकरे च रात्रौ शुक्रेण दृष्टे धनवान् सुखी स्यात्॥ ' एवं केमद्रुमयोगोऽपि नास्तीत्युच्यते । केमद्रुमो नाम चन्द्रलग्नस्योभयपार्श्वे ग्रहाभावः । नक्षत्र मिथुने सिंहे वा कश्चिद्ग्रहोस्ति तथाह गार्ग्यः ' व्ययार्थोभयगश्चन्द्राद्विना भानुं न चेद्ग्रहः । योगः केमद्रुमो नाम जातः स्यादतगर्हितः ॥ सन्तानबन्धुजनवस्त्रसुहृद्विहीनो दारिद्र्यदैन्यगददुःखमलैरुपेतः । प्रेष्यः खलः सकललोकविरुद्धवृत्तिः केमद्रुमे भवति पार्थिववंशजोपि ॥ ' एतत्सर्वमात्मानुभावेनपरिहियत इत्युच्यते महाभागशब्देन यथाह मणित्थ. ' लग्नात्केन्द्रगते चन्द्रे ग्रहैरेकादिभिर्युते । केमद्रुमफलं न स्यात्केचित्केन्द्रनवांशके ॥ ' एवं दोषान्तरपरिहारोऽपि यथा ' अष्टमेशे कलत्रस्थे सुतेशे वा कलत्रगे ॥ मङ्गले वा कलत्रस्थे भार्यानाशं प्रकुर्वते इति ॥ ८ ॥ ९ ॥ १० ॥

१२] ति० टी०–देवानां वरेण देवश्रेष्ठेन ॥ १२ ॥

रा० टी०–कौशल्येति । अमिततेजसा इयत्तारहिततेजोविशिष्टेन तेन प्रादुर्भूतेन पुत्रेण दशरथकौशल्यानिरूपितनित्यपुत्रत्वविशिष्टेन कौशल्या आशुशुभे अप्रमेयशोभां प्राप तत्र दृष्टान्तः वज्रपाणिना वज्रहस्तेन देवानां वरेण इन्द्रेण अदितिस्तन्माता यथा ईश्वरप्रकाशिनि परमात्मनि रामे इन्द्रायुपमेयत्वं दुर्लक्ष्यतद्वस्तुबोधनाय इषुवत्सविता गच्छतीत्यादिवद्बोध्यम् ॥ १२ ॥

गो० टी०–कौसल्येति । रामावतारो न केवलं यज्ञकृतः किंतु कौसल्यातपःकृत इत्याह । कौसल्या तेन शुशुभे कुतः पुत्रेण पुत्रत्वेनावतीर्णेन पुत्रत्वेनावतीर्य स्वमनोरथपूरणादिति-भावः । अमिततेजसा " स उ श्रेयान् भवति जायमान " इत्युक्तरीत्या जन्मलब्धनिरवधिकतेजसा यथा अदितिः वज्रपाणिना परत्वचिह्नभूतरेखामयवज्रयुक्तपाणितलेन देवानां वरेण उपेन्द्रेण शुशुभे तथा यथापूर्वजन्मन्यदितिरनुष्ठितव्रतविशेषैर्विष्णुं पुत्रं लब्धवती तथेयमपीत्यर्थः । यद्वा अमिततेजसा जगत्प्रकाशकादित्यस्य कुलस्यापि प्रकाशकेन सूर्यस्यापि भवेत्सूर्य इतिवत् । ' ततोऽखिलजगत्पद्मबोधायाच्युतभानुना । देवकीपूर्वसन्ध्यायामाविर्भूतं महात्मना ' इत्युक्ताच्युतभानोरप्यतिशयिततेजसा देवानां वरेण इन्द्रेण वज्रपाणिनेत्युभयविशेषणम् । वज्रहस्तेन वज्ररेखायुक्तहस्तेन च अनेनैव साधारणधर्मेणोपमानोपमेयभावः । यद्वा लौकिकानामिन्द्रे श्रेष्ठत्वबुद्ध्या तदनुसारेणोपमा इषुवद्गच्छति सवितेतिवत् । यद्वा दृष्टिदोषपरिहाराय हीनोपमापि क्रियते । यद्वा अयं श्लोकः पूर्वशेषतया मात्ररिष्टभङ्गेन तदतिशयावहत्वद्योतनाय तथाहि मातृकारकश्चन्द्रः स च वर्धिष्णुर्गुरुणा युक्तो मातरमभिवर्धयति ॥ ११ ॥

भरतो नाम कैकेय्यां[1] जज्ञे सत्यपराक्रमः । साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥१३॥
अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत्सुतौ । वीरौ सर्वास्त्रकुशलौ[2] विष्णोरर्धसमन्वितौ ॥ १४ ॥
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः । सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥ १५ ॥
राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् । गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ १६ ॥

१३] ति० टी०–चतुर्भागः चतुर्न्यूनो भागश्चतुर्भागः पायसार्धस्य चतुर्थांशन्यूनो भागः अतएव साक्षाद्विष्णोः समुदितो युक्तः अस्य पाञ्चजन्यावतारतया स्वधारकस्य विष्णोः साक्षाद्विष्णुत्वमुक्तम् अनेन पाञ्चजन्यस्यापि विष्णुत्वमेवेति सूचितम् तदीयसर्वगुणवत्तामचनेनास्यापि रामतुल्यत्वं रामपायसांशसमपायसांशजन्यत्वं च सूचितम् ॥ १३ ॥

रा० टी०–भरत इति । सत्यपराक्रमः सत्यायोध्याराज्यान्यस्येति सत्यः रामः तस्येव पराक्रमो यस्य तस्मादेव पराक्रमो यस्येति वा स एव पराक्रमो यस्येति वा रघुनाथाज्ञाकारीत्यर्थः किंच सत्यः कापट्यरहितः पराक्रमो यस्य सः साक्षाद्विष्णोर्वैकुण्ठेशस्य चतुर्भागः चत्वारो भागा यस्मिन् सर्वांश इत्यर्थः अत एव विष्णोस्तदवस्थापन्नस्य सर्वैर्गुणैः समुदितः यदि च विष्णोरित्यत्र षष्ठी राहोः शिर इतिवत्तर्हि सर्वैर्गुणैः समुदितः चतुर्भागः साक्षाद्विष्णुरेवेत्यर्थः विष्णोरित्युभयान्वयि अत्रार्थे प्रमाणम् ' वैकुण्ठेशस्तु भरतः क्षीराब्धीशश्च लक्ष्मणः । शत्रुघ्नस्तु स्वयं भूमा रामसेवार्थमागताः' इति नारदपञ्चरात्रवचनम् निरूपितञ्चैतत्प्रथमसर्गे विरोधोद्धारप्रकरणे इदं त्वयि न वक्तव्यं शत्रुघ्ने भरतेऽपि वेत्युत्तरकाण्डघटकश्लोकव्याख्यावसरे भरते न वक्तव्यमिति निषेधतात्पर्यवर्णनेन निरूपयिष्यामश्चोत्तरकाण्डे विशेषतः भरतो नामेति प्रसिद्धौ कैकेय्यां जज्ञे प्रादुर्बभूव ॥ १३ ॥

गो० टी०–अथ पायसोपयोगक्रमेण कौसल्यानन्तरकैकेयीप्रसवमाह–भरत इति । साक्षाद्विष्णोः प्रत्यक्षविष्णोः रामस्य चतुर्भागश्चतुर्थांशः रामस्य विष्ण्वर्धत्वात् तस्य चतुर्थांशः विष्णोरष्टमांश इत्यर्थः । यद्वा साक्षाद्विष्णोर्वैकुण्ठवासिनश्चतुर्थांशश्चतुर्थस्यांशः अष्टमभाग इत्यर्थः । यद्वा साक्षात्प्रत्यक्षभूत इति सौलभ्यमुच्यते । यद्वा साक्षादव्यवधानेन जज्ञे रामादनन्तरं जज्ञ इत्यर्थः । सर्वैः रामसंबन्धितयोक्तैः गुणैः समुदितः युक्तः ॥ १२ ॥

१४] ति० टी०–विष्णोरर्धेति । विष्णो रामस्य । अर्धशब्दोऽत्र भागवाची न समांशवाची तेन पायसाष्टमांशौ लक्ष्मणशत्रुघ्नाविति बोध्यम् ॥ १४ ॥

रा० टी०–अथेति । अथ भरतप्रादुर्भावानन्तरं सर्वास्त्रकुशलौ निखिलास्त्राणां विज्ञातारौ विष्णोर्नारायणस्यार्धो वर्धको यो रामस्तत्र समन्वितौ तदनुयायिनाविति यावत्, वीरौ विना गरुडेन ईरो गतिर्ययोस्तौ गरुडगामिभूमक्षीराब्धीशौ लक्ष्मणशत्रुघ्नौ सुतौ सुमित्राऽजनयत् एतेन शत्रुघ्नस्य भरतानुयायित्वं रामाज्ञयैवेति ध्वनितम् ॥ १४ ॥

गो० टी०–अथेति । अथ भरतजननानन्तरं द्विवचनेन यमलत्वमुच्यते अर्धसमन्वितौ समन्विताधौ परनिपातः अर्धशब्दोंशमात्रवाची समन्वितचतुर्थभागाष्टमभागरूपो ' भित्तं शकलखण्डे वा पुंस्यर्धोर्धं समेंशके ' इत्यमरः अन्यथा पायसप्रदानक्रमविरोधः समन्वितशब्देन युगपदुपयुक्तत्वमुच्यते॥१३॥

१५] ति० टी०–सार्प आश्लेषा कुलीरः कर्कटः अभ्युदित इत्यस्य उच्चस्थ इत्यर्थः । सौमित्री इति द्विवचनेन तयोर्यमजत्वं सूच्यते ॥ १५ ॥

रा० टी०–भरतादीनां जन्मनक्षत्रादि बोधयन् आह–पुष्ये इति । प्रसन्नधीर्भरतः पुष्ये पुष्यनक्षत्रयुक्ते तिथौ मीनलग्ने भरतो जातः प्रादुर्भूतः सौमित्री सुमित्राया नित्यसुतौ लक्ष्मणशत्रुघ्नौ तु सार्पे आश्लेषानक्षत्रयुक्ते तिथौ कुलीरे कर्कटे लग्ने रवौ अभ्युदिते प्रवृद्धे मध्याह्नकाले इत्यर्थः सौमित्री जातौ प्रादुर्भूतौ पुष्ये सार्पे इत्यत्र "नक्षत्रेण युक्तः कालः" इत्यण् " लुबविशेषे " इतिलुप् सौमित्रीत्यत्र बाह्वादित्वादिञ् ॥ १५ ॥

गो० टी०–त्रयाणां जन्मकालमाह–पुष्य इति । पुष्ये पुष्ययुक्ते तिथौ " नक्षत्रेण युक्तः कालः " इति विहितस्याण्प्रत्ययस्य लुबविशेष इति लुप् । मीनस्य गुरुक्षेत्रत्वात्तज्जन्मफलमाह–प्रसन्नधीरिति । सार्पे सर्पदेवताके नक्षत्रे " आश्लेषानक्षत्रं सर्पा देवता " इति श्रुतिः । सुमित्रायाः पुत्रौ सौमित्री बाह्वादित्वादिञ् कुलीरे कर्कटके रवौ अभ्युदिते भरतजननस्योदयात्पूर्वत्वज्ञापनायात्रोदित इत्युक्तम् अन्यथा चैत्रकर्कटकस्य मध्याह्नकालिकत्वेन विरोधात् । यद्वा उदिते प्रवृद्धे मध्याह्नकाल इत्यर्थः । पञ्चोच्चत्वं गुरुचन्द्रयोग इत्यादि सर्वत्रसमानं रामस्य पुनर्वसूनक्षत्रं तिथिर्नवमी भरतस्य पुष्यनक्षत्रं दशमी सौमित्र्योश्च दशमी आश्लेषा तारेति विशेषः ॥ १४ ॥

१६] ति० टी०–राज्ञ इति । पृथग्गुणवन्तः प्रत्येकमनन्यसाधारणगुणवन्तः अनुरूपा ज्येष्ठकनिष्ठत्वादियोग्यव्यवहारवन्तः रुच्या कान्त्या प्रोष्ठपदा इति पूर्वाभाद्रपदोत्तराभाद्रपदयोर्नाम तयोश्च प्रत्येकं द्वे द्वे तारे इति ज्योतिःशास्त्रप्रसिद्धम् । तैत्तिरीयश्रुतिरपि " चत्वार एकमभिकर्म देवाः प्रोष्ठपदास इति यान्वदन्ति " इति । तदुपमा इत्यर्थः ॥ १६ ॥

रा० टी०–चतुर्णां प्रादुर्भावमुपसंहरन्नाह–राज्ञ इति । महात्मानः ईश्वरादिपूजनीयस्वरूपाः अत एव पृथग्ज्ञानविषयेभ्यो विलक्षणाः अत एव गुणवन्तः प्राकृतविलक्षणदिव्यगुण-

१ केकय्यामिति रा. पाठः । २ सर्वास्त्र कुशलौ वीराविति गो. रा. पाठः ।

जगुः कलं च गन्धर्वा ननृतुश्चाप्सरोगणाः । देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खात्पतत् ॥ १७ ॥
उत्सवश्च महानासीदयोध्यायां जनाकुलः । रथ्याश्च जनसंबाधा नटनर्तकसंकुलाः ॥ १८ ॥
गायनैश्च विराविण्यो वादनैश्च तथापरैः । विरेजुर्[1]विपुलास्तत्र सर्वरत्नसमन्विताः ॥ १९ ॥
प्रदेयांश्च ददौ राजा सूतमागधबन्दिनाम् । ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥२०॥
अतीत्यैकादशाहं तु नामकर्म तथाकरोत् । ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम् ॥ २१ ॥
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा । वसिष्ठः परमप्रीतो नामानि कुरुते[3] तदा ॥ २२ ॥

विशिष्टाः सुरूपाः शोभनानि रूपाणि येषां ते किंच शोभनो रूपो वेदेषु निरूपणं येषां ते रूच्या कान्त्या परमशोभया युक्ताः ये चत्वारो राज्ञः पुत्रा जज्ञिरे ते प्रोष्ठपदोपमाः प्रोष्ठो गौस्तस्य पदे खुरौ उपमा येषांते द्वौ द्वौ मिलित्वा स्थिता बभुवुरित्यर्थः ॥ १६ ॥

गो० टी०–राज्ञ इति । एकत्वेऽपि पृथग्वर्तमानाः एकस्य चतुर्धावस्थाने उपमानमाह–प्रोष्ठेति । प्रोष्ठो गौः तस्येव पादा यासां ताः प्रोष्ठपदाः " सुप्रात " इत्यादिसूत्रे अच्प्रत्ययान्तो निपातितः रुच्या कान्त्या प्रोष्ठपदोपमाः राज्ञोऽनुरूपाश्चत्वारः पुत्रा जज्ञिरे यज्ञफलं निर्वृत्तमिति भावः पृथग्गुणवन्त इति वा प्रत्येकमनन्यसाधारणगुणवन्त इत्यर्थः । रामस्य सामान्यधर्मरुचिः लक्ष्मणस्य शेषत्वज्ञानं भरतस्य भगवत्पारतन्त्र्यधीः शत्रुघ्नस्य भागवतपारतन्त्र्यमिति परस्परविलक्षणगुणवन्त इत्यर्थः ॥ १६ ॥

१७–१८] **ति० टी०**–**जगुरिति** । रामाद्युत्पत्तिकाल इति शेषः । पतदित्यत्राडभावश्छान्दसः ॥ १७ ॥ १८ ॥

रा० टी०–प्रादुर्भावकालिकसर्वहर्षं बोधयन् तत्तत्कृत्यमाह–**जगुरिति** । गन्धर्वपतयो जगुः अप्सरोगणाश्च ननृतुः देवदुन्दुभयः नेदुः खादाकाशात्पुष्पवृष्टिश्च च्युता एतेन अचेतनानामपि तस्मिन्काले चेतनत्वं व्यक्तम् तेन तात्कालिकहर्षस्य पराकाष्ठा बोधिता खात्पतदितिभट्टसंमतः पाठः तत्राड भावश्छान्दस इति तैरुक्तम् ॥ १७ ॥

गो० टी०–जननकालिकशुभनिमित्तानि दर्शयति–**जगुरिति** । कलमव्यक्तमधुरं यथा भवति तथा जगुः खात् आकाशात् ॥ १६

रा० टी०–**उत्सव इति** । जनाकुलः जनैराकुलो व्याप्तः महानतिशय एव उत्सवोऽयोध्यायामासीत् चशब्द एवार्थे अर्थ पृथग्वचयि रथ्या इति नटनर्तकसंकुलाः नटादिव्याप्ताः अत एव जनसंबाधाः जनानां संबाधाः परस्परमङ्गसंमर्दो यास ॥ १८ ॥

गो० टी०–अथ जातकर्मोत्सवमाह–**उत्सवश्चेति** । अयोध्यायामित्यनेन प्रतिगृहमुत्सवोऽभूदित्युच्यते जनाकुलः आकुलजनः इदमर्धमेकम् ॥ १७ ॥

१९] **ति० टी०**–गायनैर्गायकैः वादनैर्वादकैः विराविण्यः सशब्दाः रथ्या इति विशेष्यम् सर्वरत्नसमन्विता नटाद्युद्देशेन क्षिप्तै रत्नैर्युक्ताः ॥ १९ ॥

रा० टी०–विपुलाः विस्तीर्णाः सर्वरत्नसमन्विताः जनग्रहणार्थं प्रक्षिप्तसकलरत्नसंपूर्णाः गायकैर्गानकर्तृभिः वादकैर्वादनकर्तृभिश्च परैः वेदपाठकर्तृभिश्च विराविण्यः शब्दवत्यः सत्य एव रथ्या मार्गास्तत्र महोत्सवसमये विरेजुः शुशुभिरे सार्थश्लोक एकान्वयी चकारान्तरेण राजद्वारादिसंग्रहः तथाशब्द एवार्थे ॥ १९ ॥

गो० टी०–रथ्याश्चेति । गायनैः गायकैः वादनैः वाद्यशिल्पैः अपरैः सूतमागधबन्दिभिश्च विराविण्यः शब्दवत्यः रथ्या आसन् ॥ १८ ॥

२०] **ति० टी०**–प्रदेयान्पारितोषिकान् सूताः पौराणिकाः मागधा वंशावलीकीर्तकाः बन्दिनः स्तुतिपाठकाः संबन्धसामान्ये षष्ठी सूतादिसंबन्धि यद्देयं पारितोषिकं तत्तेभ्यो ददावित्यन्वयः ॥ २० ॥

रा० टी०–**प्रदेयानिति** । राजा दशरथः सूतमागधबन्दिनां प्रदेयान् प्रदातुं योग्यान्पदार्थान्ददौ तत्र सूताः पौराणिकाः मागधाः वंशप्रशंसाकर्तारः बन्दिनः स्तुतिपाठकाः संबन्धसामान्ये षष्ठी ब्राह्मणेभ्यः वित्तं धनं सहस्रशो गोधनानि च ददौ ॥ २० ॥

गो० टी०–अथ दानसमृद्धिमाह–**प्रदेयानिति** । प्रदेयान् पारितोषिकान् सूतमागधबन्दिनामिति शेषे षष्ठी सूताः पौराणिकाः मागधाः वंशावलिकीर्तकाः बन्दिनः स्तुतिपाठकाः सूतादीनां प्रदेयान् ददावित्यन्वयः गोधनानि गोरूपधनानि सहस्रशः सहस्राणि ॥ १९ ॥

२१–२२] **ति० टी०**–**अतीत्येति** । एकादशाहशब्दः सूतकान्तोपलक्षणम् अन्यथा ' क्षत्रियस्य द्वादशाहं सूतकम् ' इति स्मृतिविरोधः स्यात् तथा च रामजन्मतस्त्रयोदशे दिने नामकरणमकरोदित्यर्थः अस्य निरुक्तिः पूर्वं दर्शिता । ' श्रियः कमलवासिन्या रमणोऽयं यतो हरिः । तस्माच्छ्रीराम इत्यस्य नाम सिद्धं पुरातनम् ॥ सहस्रनामसदृशं स्मरणान्मुक्तिदं नृणाम् ' । इति पाद्म उक्तम् ॥ २१ ॥ नामानि कुरुते नामकरणमकारयदि-

१ खाच्च्युतेति गो. रा. पाठः । २ इदमर्धं गो. पुस्तके नास्ति । ३ कृतवांस्तदेति गो. पाठः ।

36955

ब्राह्मणान्भोजयामास पौरजानपदानपि । अददद्ब्राह्मणानां च रत्नौघममलं बहु ॥ २३ ॥
तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत् । तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ॥ २४ ॥
बभूव भूयो भूतानां स्वयम्भूरिव संमतः । सर्वे वेदविदः शूराः सर्वे लोकहिते रताः ॥ २५ ॥
सर्वे ज्ञानोपसंपन्नाः सर्वे समुदिता गुणैः । तेषामपि महातेजा रामः सत्यपराक्रमः ॥ २६ ॥
इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः । गजस्कन्धेऽश्वपृष्ठे च रथचर्यासु संमतः ॥ २७ ॥

त्यर्थः । वर्तमानसामीप्ये लट् अन्तर्भावितण्यर्थता च यत्नु कतकेन राज्ञो नामकरणादावनधिकार इत्युक्तम् अकरोदित्यत्र च पुरोहितद्वारेति शेषपूरणं कृतम् तत्र मानं चिन्त्यम् ॥२२॥

रा० टी०–अतीत्येति । एकादश अहानि यस्मिन् दिनसमूहे स तं किंच एकश्च एकश्च एकौ तौ च दश एकादशतेषां संख्यापूरकं एकादशं तदेव अहः द्वादशदिनानीत्यर्थः अतीत्य अतिक्रम्य त्रयोदशे दिने इत्यर्थः नामकर्म अकरोत् तदेव विस्पष्टयति महात्मानं ईश्वरादिपूजनीयस्वरूपं ज्येष्ठं कौसल्यातः पूर्वं प्रादुर्भूतं रामं नाम अकरोत् प्रादुरभावयत् केकयीतः प्रादुर्भूतं भरतं नाम च अकरोत् सौमित्रिं सुमित्रातः प्रादुर्भूतं ज्येष्ठमित्यर्थः लक्ष्मणं नाम च अकरोत् अपरं तत्कनिष्ठं सौमित्रिं शत्रुघ्नं नाम च अकरोत् राजेति शेषः किंच अकरोत् वशिष्ठो राज्ञा अकारयदित्यर्थः अन्तर्भावितणिजर्थः । तदा राजकर्तृकरामादिनामकरणसमये परमप्रीतो वशिष्ठः नामानि तथा इति कुरुते योग्यानीमानि नामानीत्यवददित्यर्थः। एकादशाहमित्यत्र प्रथमपक्षे अच्प्रत्यन्ववेत्यत्र अजिति योगविभागादच् तुशब्दः एकस्तथाशब्दश्च चार्थे सचाढत्या च हीनेष्यन्वेति । अत एव क्षत्रियस्य द्वादशाहं सूतकं त्रयोदशे राज्ञो नामकरणमित्यादिस्मृतयः सानुकूलाः राजेतिशेषादेव द्वादशेऽहनि जातस्य पिता नाम कुर्यादित्यादिस्मृत्या न विरोधः क्षत्रियस्य नामकरणेऽनधिकार इत्युक्तौ तु मूलं मृग्यम् कुरुते तथा इति पाठे तु तथाशब्दस्तदार्थकः द्वयोरेकत्रान्वयः ॥ २१ ॥ २२ ॥

गो० टी०–अतीत्येति । अर्धमेकम् लक्ष्मणजन्मदिनापेक्षया एकादशाहत्वं रामजन्मदिनापेक्षया द्वादशदिनं तत् तदत्यये प्रथमसूतकेनैव निवृत्तेन सर्वसूतकनिवृत्तेर्द्वादशाहे नामकरणवचनमुपपन्नमेव अन्यथा " क्षत्रियस्य द्वादशाहं सूतकम् " इतिश्रुतिः । ' त्रयोदशे राज्ञां नामकरणम् ' इति स्मृतिश्च विरुध्येत नामकर्म नामकरणं तथा जातकर्मवदित्युत्सवातिशयोक्तिदिश्यते ॥२०॥ कस्य किंनामाकरोदित्यत्राह–ज्येष्ठमिति । रामं रामनामानं रमन्ते सर्वे जनाः गुणैरस्मिन्निति व्युत्पत्त्येति भावः महात्मानं महास्वभावं निरवधिकगुणमिति यावत् अनेन रामपदप्रवृत्तिनिमित्तमुक्तम् राजा ज्येष्ठपुत्रं रामनामानमकरोत् कैकयीसुतं भरतनामानमकरोत् भरत इति राज्यस्य भरणादिति सदृक्षानीकोक्तरीत्या राजनि मृते रामे च वनं गते अराजकराज्यभरणादिति भावः एवं सौमित्रिं सुमित्रापुत्रं लक्ष्मण इति नामयुक्तमकरोत् रामकैङ्कर्यलक्षणसंपयुक्तत्वाल्लक्ष्मणः । लक्ष्म्या अच " इति पामादिपाठादिकारस्याकारः मत्वर्थीयो नः । अत एव लक्ष्मणो लक्ष्मिसंपन्न इति वक्ष्यति अपरं सौमित्रिं शत्रुघ्नं शत्रुघ्नमानमकरोत् शत्रून् हन्तीति शत्रुघ्नः ॥ २१ ॥ ननु क्षत्रियस्य नामकरणेऽनधिकारात् पुरोहितकर्तृकत्वस्मरणात् कथं दशरथस्य नामकर्मकर्तृत्वमित्याशङ्क्य पुरोहितद्वारा कर्तृत्वमित्यभिप्रेत्याह–वसिष्ठ इति । तदा द्वादशेऽह्नि अत एवाकारयदिति वक्ष्यति ॥ २२ ॥

२३] ति० टी०–ब्राह्मणान्भोजयामासेति । राजाज्ञयेति शेषः बहु बहुमानपूर्वकमित्यर्थः ॥ २३ ॥

रा० टी०–ब्राह्मणानिति । पौरजानपदान् पुरदेशप्रभवान्ब्राह्मणान्भोजयामास अमितमपरिमितं बहुप्रकारं रत्नौघं रत्नसमूहं ब्राह्मणानामददात् चकारेण वस्त्रालङ्कारादिसंग्रहः संबन्धसामान्यविवक्षया षष्ठी ॥ २३ ॥

गो० टी०–नामादिनान्दीकरणमिति नियमात् नामकर्मणि नान्दीकरणमाह–ब्राह्मणानिति । पौरेत्यादिब्राह्मणविशेषणं राज्ञेति शेषः ब्राह्मणानामिति संबन्धसामान्ये षष्ठी अमितमसंख्येयं बहु बहुप्रकारम् ॥ २३ ॥

२४] ति० टी०–जन्मक्रियादीनि तदाशुपनयनान्तानीत्यर्थः अकारयत् वसिष्ठो राज्ञेति शेषः। केतुर्विरुद्ध्वजः स यथात्रदानादिकीर्तिं ख्यापयत्येवमिक्ष्वाकुकुलवैभवप्रकाशकः। रतिः प्रीतिः२४

रा० टी०–तदेवोपसंहरत्राह–तेषामित्यर्धेन । तेषां रामादीनां जन्मक्रियादीनि जातकर्मप्रभृतीनि सर्वकर्माणि उपनयनान्तनिखिलकर्तव्यानि अकारयत् वशिष्ठ इति शेषः तेषामिति तेषां चतुर्णां मध्ये श्रेष्ठः पितः रतिकरः पितृप्रमोदवर्धकः केतुरिव ध्वजसदृशप्रकाशकः रामो भूयो भूतानां राजवर्धितजनानां स्वयंभूरिव स्वयंभूसदृशः संमतः पूजितो बभूव॥२४॥

गो० टी०–उक्तानुवादपूर्वकमितरसंस्कारकरणं दर्शयति तेषामित्यर्धम् आदिशब्देनात्रप्राशनचौलोपनयनादीनि गृह्यन्ते ॥ २४ ॥ उक्तं रामस्य महात्मत्वमुपपादयति–तेषामिति तेषां सुतानां मध्ये वयसा ज्येष्ठः केतुरिव ध्वजइव निजकुलप्रकाशकः पितुर्भूयो रतिकरः संतोषकरः भूतानां स्वयम्भूरिव संमतः नित्यप्रेमास्पदं बभूव ॥ २५ ॥

२५-२७] ति० टी०–स्वयम्भूर्हिरण्यगर्भः स इव सर्वशक्तित्वेन संमतः ॥ २५ ॥ ज्ञानोपसंपन्नाः तत्त्वज्ञानयुक्ता इति

१ अमितमिति गौ. रा. पाठः । २ ज्ञानोपपन्नाश्चेति गो. रा. पाठः । ३ सुधांशुरिवेति गो. पाठः ।

धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः । बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः॥२८॥
रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः । सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ॥ २९ ॥
लक्ष्मणो लक्ष्मिसंपन्नो बहिः प्राण इवापरः । न च तेन विना निद्रां लभते पुरुषोत्तमः ॥ ३० ॥

केचित् गुणैः साधारणैः क्षत्रासाधारणैश्च सद्गुणैरित्यर्थः तेषामिति निर्धारणे षष्ठी रामः सर्वसद्गुण इति शेषः ॥ २६ ॥ इष्टः सर्वस्येत्यादि। गुणकथने पौनरुक्त्यं दार्ढ्याय। रथचर्यासु रणोचितरथप्रचारेषु ॥ २७ ॥

रा० टी०–सर्व इति । ज्ञानोपपन्नाः सर्वविषयकनित्यज्ञानवन्तोपि सर्वे चत्वारो भ्रातरः वेदविदः गुरूपदेशात्प्राप्तसकलवेदाः बभूवुरितिशेषः अत एव सर्वे शूराः अत एव सर्वे पौरहिते रताः अत एव सर्व गुणैर्निखिलक्षात्रधर्मैः समुदिताः संप्रकाशिताः बभूवुः गुरूपदेशात्प्राप्तवेदा इत्यनेन गुरूपदेशादेव वेदोऽवगन्तव्य इति लोकोपदेशः सूचितः चशब्दोऽप्यर्थे सर्वे ज्ञानोपसंपन्नाः इति भट्टसंमतः तत्राक्षरस्वारस्यादपिशब्दोध्याहियते ॥२५॥ सिंहावलोकनन्यायेन रामं वर्णयन्नाह–तेषामिति । महातेजाः समाधिकरहिततेजोविशिष्टः सत्यपराक्रमः कापट्यसंसर्गरहितपराक्रमविशिष्टः सुधांशुः शरत्पूर्णचन्द्र इव सर्वस्य लोकस्य इष्टः ईप्सितः अपिशब्देन त्रयाणामपि ईप्सितः निर्मलः आश्रितमलनिवर्तनहेतुः किंच निर्गतो यो मः परिमाणं तल्लाति गृह्णाति इयत्तारहितप्रभावविशिष्ट इत्यर्थः । गजस्कन्धे गजस्कन्धारोहे अश्वपृष्ठे अश्वपृष्ठारोहे च रथचर्यासु रथसंचोरेषु च संमतः सर्वजनप्रशंसास्पदीभूतः धनुर्वेदे अस्त्रशस्त्रादिज्ञाने निरतः परिनिष्ठितः पितुः शुश्रूषणे पित्रादिसेवायां रतः नितरां प्रवृत्तः तेषां चतर्णां मध्ये राम आसीदिति शेषः द्वयोरेकत्रान्वयः ॥ २६ ॥ २७ ॥

गो० टी०–उपनीतानां तेषां वेदाध्ययनादिकमाह–सर्वे इति । वेदविदः अधीतवेदाः विद्लृ लाभे इत्यस्मात् क्विप् शूरा इत्यनेनार्थातधनुर्वेदेत्वमुच्यते लोकहिते रता इत्यनेन धनुर्वेदाभ्यासकार्यपरत्वं वेदार्थज्ञानसिद्धिमाह–ज्ञानेति । ज्ञानकार्यगुणसंपत्तिमाह–समुदिता गुणैरिति । गुणैर्दयादिभिः आसन्निति शेषः ॥ २६ ॥ अथ प्रत्येकमसाधारणान् गुणान्वक्तुमादौ रामगुणानाह–तेषामिति । अपिशब्देनान्येषां रघुवंश्यानामपि मध्य इत्यर्थः। महातेजा महाप्रतापः सत्यपराक्रमः अमोघवीर्यः निर्मलश्शशाङ्क इव सर्वलोकस्य इष्टः सर्वदा दर्शनीयः अभवदिति शेषः ॥२७॥ गज इति । अत्र राम इत्यनुषज्यते गजस्कन्धे स्थित्वा तत्प्रेरणे संमतः राम इव गजस्कन्धारोहणादौ न कोपि समर्थ इति गजसादिभिः श्लाघित इत्यर्थः एवमुत्तरत्रापि योज्यम् ॥ २८ ॥

२८] ति० टी०–लक्ष्मिवर्धन इति ह्रस्व आर्षः ॥ २८ ॥

रा० टी०–रामाचरणमुक्त्वा लक्ष्मणाचरणमाह–बाल्यादिति । लक्ष्मिवर्धनः आश्रितसंपत्तिवर्धकः लक्ष्मणः लोकरामस्य लोकाभिरामदातुः ज्येष्ठस्य पूर्वं प्रादुर्भूतस्य भ्रातुः नित्यभ्रातृत्वविशिष्टस्य रामस्य बाल्यात्प्रभृति नित्यशः सुस्निग्धः अतिप्रीतिविशिष्ट आसीदिति शेषः। लक्ष्मिवर्धन इत्यत्र ह्रस्व आर्षः२८

गो० टी०–अथ लक्ष्मणगुणविशेषानाह–बाल्यादित्यादिभिश्चतुर्भिः । लक्ष्मीं वर्द्धयतीति लक्ष्मिवर्द्धनः "ज्वापोः संज्ञाछन्दसोर्बहुलम् " इति ह्रस्वः कैङ्कर्यसंपद्वर्द्धकः लक्ष्मणः रामस्य बाल्यात्प्रभृति बाल्यमारभ्य प्रभृतियोगेपि पञ्चमी प्रयुज्यते सुस्निग्धः सुतरां स्निग्धः अङ्कुरात् प्रभृति परिमलेनैवोत्पन्नस्तुलसीकाण्ड इव जन्मनः प्रभृति निरवधिकभक्तिसंपन्नः। यद्वा सुस्निग्धः रामपर्यङ्केण स्वपर्यङ्कायोजने बाल्येऽपि न निद्रातीत्यर्थः अनेन स्वरूपप्रयुक्तत्वं दास्यस्योक्तम् । अथ गुणकृतत्वमाह–लोकरामस्य लोकान् रमयतीति लोकरामः ण्यन्तात्कर्मण्यण् गुणैर्दास्यमुपागत इत्यन्यत्रोक्तम् तस्य भ्रातुः ज्येष्ठस्येत्यनेन जन्मकृतदास्यमुक्तं नित्यशः नित्यं सुस्निग्ध इत्यन्वयः ॥ २९ ॥

२९] ति० टी०–रामस्य सुस्निग्ध इति प्राक्तनेनान्वयः स्वशरीरादपि तस्य स्वात्मभूतस्य रामस्य प्रियकरः ॥ २९ ॥

रा० टी०–सर्वेति । तस्य रामस्य बहिःस्थितः अपरः द्वितीयः प्राण इव प्राणसदृशः लक्ष्मिसंपन्नः नित्यं सर्वसंपत्तिविशिष्टः लक्ष्मणः तस्य रामस्य शरीरतोऽपिना मनआदिभिः सर्वप्रियकरः निखिलप्रियकारक आसीदिति शेषः । बहिः प्राणइवापर इत्यभूतोपमालङ्कारेण लक्ष्मणसदृशो रामस्य प्रियः लक्ष्मण एवेत्यनन्वयालङ्कारो ध्वनितः तेन रामप्रसादाकाङ्क्षिभिर्लक्ष्मणोऽवश्यमाश्रयणीय इति वस्तु व्यक्तम् ॥ २९ ॥

गो टी०–सर्वेति । शरीरत इत्युपलक्षणं त्रिविधकरणैरपि रामस्य सर्वप्रियकरः यद्वा स्वशरीरादपि रामस्य प्रियकरः स्वशरीरमुपेक्ष्यापि प्रियकर इत्यर्थः यद्वा शरीरतो बहिः स्थितः अपरः प्राण इव स्थितः यद्वा शरीरतः रामशरीरस्य सार्वविभक्तिकस्तासिरित्युक्तेः । लक्ष्मणस्य दक्षिणबाहुत्वाद्रामसर्वावयवानां सर्वप्रियकर इत्यर्थः । ' रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ' इति वक्ष्यमाणत्वात् अस्मिन् पक्षे अपिशब्देन रामस्य स्वविषयप्रियकरत्वं समुच्चीयते लक्ष्मिसंपन्न इत्यनेन लक्ष्मणशब्दार्थ उक्तः ॥ ३० ॥

३०] ति० टी०–रामस्यापरो बहिःसंचरन्प्राण इव लक्ष्मणः प्रियः तदेवाह–न चेति ॥ ३० ॥

रा० टी०–रामस्य लक्ष्मणविषयकप्रीतिं वर्णयन्नाह–नेति। पुरुषोत्तमः समाधिकरहितपुरुषत्वविशिष्टो रामः तेन लक्ष्मणेन विना निद्रां नैव लभते चशब्द एवार्थे उपानीतं कौशल्यायुपहृतं मृष्टमन्नं तं लक्ष्मणं विना नैवाभाति हिशब्द एवार्थे ॥ ३० ॥

गो० टी०–रामस्य लक्ष्मणेऽनुरागं दर्शयति–न चेति । तेन विना "पृथग्विनानाभिस्तृतीयान्यतरस्याम्" इति तृतीया निद्रां न लभते प्राणं विना कथं निद्रां लभेतेत्यर्थः । किंच

मृष्टमन्नमुपानीतमश्नाति नहि तं विना । यदा हि हयमारूढो मृगयां याति राघवः ॥ ३१ ॥
अथैनं पृष्ठतोऽभ्येति सधनुः परिपालयन् । भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ॥ ३२ ॥
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः । स चतुर्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ॥ ३३ ॥
बभूव परमप्रीतो देवैरिव पितामहः । ते यदा ज्ञानसंपन्नाः सर्वे समुदिता गुणैः ॥ ३४ ॥
ह्रीमन्तः कीर्तिमन्तश्च सर्वज्ञा दीर्घदर्शिनः । तेषामेवंप्रभावाणां सर्वेषां दीप्ततेजसाम् ॥ ३५ ॥
पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा । ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः ॥ ३६ ॥

कौसल्ययानीतं मृष्टान्नं तं विना नाश्नाति दक्षिणबाहुं विना कथमश्नातीति भावः पुरुषोत्तमः प्रेमशालिविषये सर्वात्मना विश्लेषासह इत्यर्थः क्षणेऽपि ते यद्विरहोत्तिदुःसह इति श्रुतम् ॥ ३१ ॥

३१] ति० टी०–मृगयाम् आखेटमुद्दिश्येत्यर्थः ॥ ३१ ॥

रा० टी०–लक्ष्मणाचरणमाह–यदेति । राघवो रामः यदा यस्मिन्काले हयमश्वमारूढः मृगयामाखेटं याति तदा एनं रामं परिपालयन् सर्वतो रक्षन् सधनुः धनुस्सहितः लक्ष्मणः पृष्ठतोऽभ्येति सर्मापतो गच्छति ॥ ३१ ॥

गो० टी०–यदा हीति । राघवो रामः यदा हयमारूढः सन् मृगयामाखेटमुद्दिश्य याति तदा तदानीमेव एनं रामं सधनुः सन् पालयन् अस्थाने भयशङ्कितया पृष्ठतः वेगवद्वयसमीप एवाभ्येति हिः प्रसिद्धौ ॥ ३२ ॥

३२] ति० टी०–परिपालयन् रामशरीरामिति शेषः । अनेन लक्ष्मणस्य भक्त्यतिशय उक्तः हि यतः शत्रुघ्नो लक्ष्मणावरजः अतो रामावरजस्य भरतस्य प्रिय इति शेषः रामलक्ष्मणाविव भरतशत्रुघ्नौ परस्परप्रियावित्यर्थः ॥ ३२ ॥

रा० टी०–भरतशत्रुघ्नयोः परस्परं प्रीतिं वर्णयन्नाह–भरतस्येति । लक्ष्मणावरजः लक्ष्मणानुजभ्राता शत्रुघ्नः भरतस्य प्राणैश्च प्राणैरपि नित्यं प्रियतरः अतिप्रीतिकारी आसीत् तस्य शत्रुघ्नस्यापि तथा प्राणैरपि आप्रियः प्रियतरः स भरतः नित्यमेवासीत् हिशब्द एवार्थे ॥ ३२ ॥

गो० टी०–अथ भरतशत्रुघ्नयोः परस्परानुरागं दर्शयति–भरतस्यापीति । हि यस्मात् स शत्रुघ्नो लक्ष्मणावरजस्तस्मात्तत्तुल्यप्रकृतिकत्वात् भरतस्यापि प्राणैः प्राणेभ्योऽपि प्रियतर आसीत्तस्य शत्रुघ्नस्य च भरतः तथा प्रिय आसीत् ॥ ३३ ॥

३३] ति० टी०–तस्य शत्रुघ्नस्य स भरत इति शेषः । तथा तस्य भरतस्य शत्रुघ्नः प्रिय आसीत् ॥ ३३ ॥

रा० टी०–महाराजाधिराजदशरथस्य मोदं वर्णयन्नाह–स इति त्रिभिः । महाभागैः प्रशंसनीयातिशयभाग्यविशिष्टैः प्रियैः सर्वप्रीतिविषयभूतैः चतुर्भिः पुत्रैः करणभूतैः स दशरथः देवैः पितामहो ब्रह्मा इव परमप्रीतः परमानन्दविशिष्टो बभूव ॥ ३३ ॥

गो० टी०–दशरथस्य स्वाराधकस्य मनोरथपरिपूरणमेतदवतारस्य प्रथमप्रयोजनं तन्निर्दिशन्नाह–स चतुर्भिरिति । देवैश्चतुर्भिर्दिक्पालैः ॥ ३४ ॥

३४] ति० टी०–देवैश्चतुर्भिर्दिक्पालैः यद्वा वसुरुद्रादित्यविश्वेदेवैस्ते सर्वे रामादयो गुणैः समुदिता युक्ता आसन्निति शेषः ॥ ३४ ॥

३५] ति० टी०–एवंप्रभावाणां प्रागुक्तप्रभाववताम् तापेनेति शेषः । पिता हृष्ट इत्यन्वयः ॥ ३५ ॥

रा० टी०–ते इति । ह्रीमन्तः लोकापवादाल्लज्जावन्तः अत एव कीर्तिमन्तः परममर्यादापालकास्ते इति यशोविशिष्टाः सर्वज्ञाः निखिलविषयकनित्यज्ञानवन्तः अत एव दीर्घदर्शिनः अनागतार्तातद्द्रष्टारः ते अत्राऽज्ञानमगोचरा रामादयः यदा ज्ञानसंपन्नाः ज्ञानसंभवकावस्थाविशिष्टाः तदा गुणैः नित्यराजधर्मैः समुदिताः संप्रकाशिताः बभूवुरिति शेषः ज्ञानसंपन्नशब्दः ज्ञानं संपन्नं भवति यस्यां सावस्थास्ति एषामिति अर्शआद्यजन्तः ॥ ३४ ॥

रा० टी०–तेषामिति । दीप्ततेजसामेवंप्रभावाणामुक्तप्रकारेण प्रभावविशिष्टानां सर्वेषां रामादीनां पिता नित्यपितृत्वविशिष्टो दशरथः लोकाधिपो लोकनियन्ता ब्रह्मा यथा इव हृष्टो बभूवेति शेषः ॥ ३५ ॥

गो० टी०–पूर्वं लाभकृतप्रीतिरुक्ता । अथ तेषां ज्ञानादिसंपत्तिकृतप्रीतिविशेषमाह–त इति । श्लोकद्वयमेकान्वयम् । यदा यस्मिन्वयसि ज्ञानं शास्त्रज्ञानं ह्रीमन्तः प्रमादात्प्राप्ताकृत्यचिन्तासु लज्जावन्तः कीर्तिमन्तः ज्ञानकृतप्रथावन्तः सर्वज्ञाः सकललौकिकप्रज्ञावन्तः दीर्घदर्शिनः नित्यभाविज्ञानवन्तः आसन्निति शेषः । तदा तेषां पिता हृष्टो बभूव ॥ ३५ ॥ ३६ ॥

३६] ति० टी०–वैदिकाध्ययने वेदसंबन्ध्यध्ययने ॥३६॥

रा० टी०–ते इति । वैदिकाध्ययने वेदसंबन्धिसाङ्गशब्दार्थतदुपबृंहणभूतस्मृतीतिहासादीनां पठने रताः पितृशुश्रूषणरताः पित्रुपलक्षितगुर्वादिसेवानिरताश्च धनुर्वेदे अस्त्रशस्त्रादिज्ञाने निष्ठिता निपुणाश्च अपिना मात्रादिलालिताः मनुजव्याघ्राः पुरुषसिंहाः ते रामादयः आसन्निति शेषः । एतेन परममर्यादापालकत्वं तेषां व्यक्तम् ॥ ३६ ॥

१ तदैनमिति गो. रा. पाठः ।

पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः । अथ राजा दशरथस्तेषां दारक्रियां प्रति ॥ ३७ ॥
चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः । तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ॥ ३८ ॥
अभ्यागच्छन्महातेजा विश्वामित्रो महामुनिः । स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षानुवाच ह ॥ ३९ ॥
शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः सुतम् । तच्छ्रुत्वा वचनं तस्य राज्ञो वेश्म प्रदुद्रुवुः ॥ ४० ॥
संभ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः । ते गत्वा राजभवनं विश्वामित्रमृषिं तदा ॥ ४१ ॥
प्राप्तमावेदयामासुर्नृपायेक्ष्वाकवे तदा । तेषां तद्वचनं श्रुत्वा सपुरोधाः समाहितः ॥ ४२ ॥

गो० टी०–पितृप्रीतिं दृष्ट्वा पुनरपि विचारयंस्ते आसन्नित्याह–ते चापीति । ते चापि पितृपलालिता अपि वैदिकानां वेदसंबन्धिनां स्मृतीतिहासपुराणन्यायादीनामध्ययने रता निरताः ॥ ३७ ॥

३७] **ति० टी०**–दारक्रिया विवाहः । ' कुमारस्य विशालाक्षं पाण्डुतां मुखमाददे । कपोलतलसंलीनपाणिः पद्मासनस्थितः ' इत्यादियोगवासिष्ठोक्त्या संसारासारत्वदर्शनेन जातानां सुखपाण्डुतादीनां कामकृतत्वसंभावनया विवाहक्रियाचिन्तनमिति बोध्यम् ॥ ३७ ॥

रा० टी०–तेषां समावर्तनकालमालक्ष्य राजचिन्तनं वर्णयन्नाह–अथेति । सोपाध्यायः उपाध्यायवशिष्ठवामदेवसहितः सबान्धवः रोमपादादिसहितः धर्मात्मा धर्ममनाः राजा महाराजाधिराजदशरथः अथ मङ्गलरूपां तेषां दारक्रियां दारप्राप्तिविषयिणीं क्रियां विवाहं प्रति चिन्तयामास विचारयामास ॥ ३७ ॥

गो० टी०–अथैषां समावर्तनोचितकालप्राप्तिं दर्शयति–अथेति । दारविषयिणी क्रिया दारक्रिया विवाह इत्यर्थः । चिन्तयामास तुल्यशीलवयोवृत्ताभिजनलक्षणकन्यान्वेषणं कृतवान् अयमर्थो धर्मात्मेत्यनेनावगम्यते ॥ ३८ ॥

३८–३९] **ति० टी०**–सोपाध्यायः सपुरोहितः ३८॥३९

रा० टी०–तस्येति । मन्त्रिमध्ये चिन्तयमानस्य तेषां विवाहं विचारयतः महात्मनः परमोदारचित्तस्य तस्य दशरथस्य द्वारमिति शेषः । महातेजाः परमतेजस्वी महामुनिः मुनिश्रेष्ठः विश्वामित्रः अभ्यागच्छत् ॥ ३८ ॥

गो० टी०–इयता प्रबन्धेन भगवदवतारो दर्शितः । अथ भगवदवतारप्रयोजनानि साधुपरित्राणदुष्कृद्विनाशनधर्मस्थापनानि दर्शयत्याशास्त्रसमाप्तेः । तत्र साधुपरित्राणं प्रधानं कर्षकस्य सस्यवृद्धिरिव दुष्कृद्विनाशस्त्वानुषङ्गिकः सस्यप्रतिबन्धकतृणोन्मूलनवत् । अतो दुष्कृद्विनाशनान्तरीयकं साधुपरित्राणं वक्तुमुपक्रमते विश्वामित्रवृत्तान्तेन अर्थाद्धर्मसंस्थापनमपि सिध्यतीति बोध्यम् । तस्येति । चिन्तयमानस्य चिन्तयमाने स्वयं तत्कार्यसमर्थोऽपि रामवैभवप्रकटनाय तदागमनमिति सूचयति महातेजा इति ॥ ३९ ॥

रा० टी०–स इति । राज्ञः दशरथस्य दर्शनाकाङ्क्षी स विश्वामित्रः द्वाराध्यक्षान् द्वारपालकान् उवाच । तद्वचनमाह–कौशिकं कुशिकगोत्रोत्पन्नं गाधिनन्दनं[1] गाधिपुत्रमिह प्राप्तं मां यूयं शीघ्रमाख्यात कथयत । ह इति इहार्थे ॥ ३९ ॥

गो० टी०–स इति । कौशिकं कुशिकगोत्रजम् ॥ ४० ॥

४०] **ति० टी०**–कौशिकः कुशिकगोत्रापत्यम् । विलम्बे शापत्रासाद्द्वाराध्यक्षा राजवेश्म त्वरया प्रविविशुः तदागमननिवेदनायेति शेषः ॥ ४० ॥

रा० टी०–तदिति । तस्य विश्वामित्रस्य तत् शीघ्रमाख्यात इति वचनं श्रुत्वा तेन विश्वामित्रोक्तेन वाक्येन चोदिताः प्रेरिताः अत एव संभ्रान्तमनसः अत्यादरयुक्तमनोयुक्ताः सर्वे द्वारपालाः राज्ञो वेश्म प्रदुद्रुवुः शीघ्रं जग्मुः । प्रदुद्रुवुरित्यनेन तेषां हर्षातिशयो ध्वनितः तेन विश्वामित्रस्य राजपरमप्रीतिविषयत्वं व्यक्तम् ' संभ्रमत्रयमिच्छन्ति भयमुद्वेगमादरम् ' इत्यनुशासनम् । त्रासाद्राजवेश्मेतिपाठः क्वचित् त्रासाद्राजभयादित्यर्थः ॥ ४० ॥

गो० टी०–तदिति । तेन वाक्येन चोदितास्तच्छ्रुत्वा वेश्म प्रति प्रदुद्रुवुः ॥ ४१ ॥

४१] **ति० टी०**–संभ्रान्तमनसः क्षुभितचित्ताः । तेन तदीयेन विश्वामित्रसंबन्धिना ॥ ४१ ॥

रा० टी०–त इति । तदा विश्वामित्राज्ञापनकाले ते द्वारपालाः राजभवनं गत्वा प्राप्तमृषिं विश्वामित्रं तथा विश्वामित्रोक्तप्रकारेण इक्ष्वाकवे इक्ष्वाकुवंशप्रभवाय नृपाय दशरथाय आवेदयामासुः ॥ ४१ ॥

गो० टी०–त इति । ऐक्ष्वाकवे इक्ष्वाकुवंश्याय क्रियाग्रहणं कर्तव्यमिति संप्रदानत्वम् । अभ्यागतविलम्बासहिष्णव इति भावः ॥ ४२ ॥

४२] **ति० टी०**–इक्ष्वाकवे तद्वंशजत्वात्तच्छब्दम् । समाहित एकाग्रचित्तः ॥ ४२ ॥

रा० टी०–तेषामिति । तेषां द्वारपालानां तत् विश्वामित्रप्राप्तिबोधकं वचनं श्रुत्वा सपुरोधाः वशिष्ठसहितः समाहितः एकाग्रचित्तः संहृष्टः परमानन्दं प्राप्तः दशरथः ब्रह्माणं बृहस्पतिं चतुर्मुखं वा वासव इन्द्र इव प्रत्युज्जगाम । श्रुतिश्च 'बृहस्पतिर्दै-

१ गाधिनन्दनमिति गो. रा. पाठः ।

प्रत्युज्जगाम संहृष्टो ब्रह्माणमिव वासवः । स दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम् ॥४३॥
प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत् । स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ॥ ४४ ॥
कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम् । पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च ॥ ४५ ॥
कुशलं कौशिको राज्ञः पर्यपृच्छत्सुधार्मिकः । अपि ते संनताः सर्वे सामन्तरिपवो जिताः ॥ ४६ ॥
दैवं च मानुषं चैव कर्म ते साध्वनुष्ठितम् । वसिष्ठं च समागम्य कुशलं मुनिपुङ्गवः ॥ ४७ ॥
ऋषींश्च तान्यथान्यायं महाभाग उवाच ह । ते सर्वे हृष्टमनसस्तस्य राज्ञो निवेशनम् ॥ ४८ ॥

वानां ब्रह्मा" इति । संहृष्ट इत्यनेन सदा महात्मजनदर्शनाकाङ्क्षीति ध्वनितम् ॥ ४२॥

गो० टी०–तेषामिति । सपुरोधाः पुरोहितसहितः ब्रह्माणं चतुर्मुखम् ॥ ४३ ॥

४३] ति० टी०–ब्रह्माणं बृहस्पतिम् "बृहस्पतिर्देवानां ब्रह्म" इति श्रुतेः । संशितव्रतं तीक्ष्णनियमम् ॥ ४३ ॥

रा० टी०–तमिति । ततः प्रत्युद्गमनानन्तरं दीप्त्या तपोजनितपरमप्रकाशेन ज्वलितं प्रकाशितं संशितव्रतमत्युग्रनियमकर्तारं तापसं तं विश्वामित्रं दृष्ट्वा प्रहृष्टवदनो राजा अर्घ्यमुपहारयत् अददात् रामो राज्यमचीकरदितिवत् णिच्प्रयोगः आगमशास्त्रस्यानित्यत्वादङ्विरहः ॥ ४३ ॥

गो० टी०–तमिति । ज्वलितम् अकर्मकत्वात् " गत्यर्थाकर्मक–" इति कर्तरि क्तः । संशितव्रतं तीक्ष्णनियमम् अर्घ्यं पूजार्थोदकम् उपहारयत् वसिष्ठेनेति शेषः । अडभाव आर्षः॥४४॥

४४] ति० टी०–उपहारयदिति । वसिष्ठेनेति शेषः । अडभाव आर्षः । राज्ञोऽर्घ्यं राजप्रेरणया वसिष्ठानीतम् ॥४४॥

रा० टी०–स इति । शास्त्रदृष्टेन विधिबोधितेनैव कर्मणा राज्ञः अर्घ्यं राजसमर्पितार्घोदकं चकारेण पाद्याचमनीयादीन् प्रतिगृह्य स्वीकृत्य स विश्वामित्रः अव्ययं विनाशरहितं नित्यमपि कुशलं नराधिपं पर्यपृच्छत् चकारान्तरमप्यर्थकम् नित्यमपि कुशलं पर्यपृच्छदित्यनेन विश्वामित्रस्य प्रेमाधिक्यं सूचितम् ॥ ४४ ॥

गो० टी०–स इति । शास्त्रदृष्टेन कर्मणा समर्पितमिति शेषः । कुशलमपूर्वार्थप्राप्तिम् अव्ययं तस्याक्षयम् ॥ ४५ ॥

४५] ति० टी०–कुशलपदमनामयोपलक्षणम् 'क्षत्रबन्धुमनामयम्' इति स्मृतेः । अव्ययं वृद्धिम् ॥ ४५ ॥

रा० टी०–तदेव विशदयन्नाह–पुरे इति द्वाभ्याम् । सुधार्मिकः परमधर्मविशिष्टः कौशिकः विश्वामित्रः राज्ञः दशरथस्य पुरे कोशे च जनपदे देशे च बान्धवेषु च सुहृत्सु च कुशलं पर्यपृच्छत् ॥ ४५ ॥

गो० टी०–पुर इति । कुशलमनुपद्रवम् ॥ ४६

४६] ति० टी०–पुनर्विशिष्य पृच्छति–कुशलमिति । विशेषप्रकारमाह–अपि त इति । अपिः प्रश्ने एवमग्रेऽपि । सामन्ताः संनता नम्रा अपि रिपवो जिताः ॥ ४६ ॥

रा० टी०–अपीति । ते तव रिपवः सामन्ताः खण्डमण्डलेश्वराः जिताः त्वया पराजिताः सन्तः सन्नताः त्वां शरणं प्राप्ताः अपि किं दैवं देवोद्देश्यकयागादिकं मानुषमतिथ्यभ्यागतोद्देश्यकभोजनादिकं च कर्म ते तव साध्वनुष्ठितं संपादितं च । किंचापी किमर्थकौ ॥ ४६ ॥

गो० टी०–अपीति । दैवं यजादिकं मानुषमतिथिसत्कारादिकम् ॥ ४७ ॥

४७] ति० टी०–अपि दैवं कर्म होमदेवतार्चनादिकम् मानुषं कर्म सामभेदादिकम् । राज्ञः प्रेरितार्घ्यदातृत्वेन प्रथमतो राज्ञेऽनामयादि पृष्ट्वा ततो वसिष्ठेन समागम्यालिङ्गनादि कृत्वा कुशलमित्यस्य पप्रच्छेति शेषः । अनेन राजपुरोहितत्वकृतः पूर्वस्पर्धयेषदपमानो वसिष्ठस्य विश्वामित्रकृतः सूचितः । 'वसिष्ठश्च समागम्य प्रहसन्मुनिपुङ्गवः । यथार्हं पूजयित्वैनं पप्रच्छ कुशलं तदा ' इति क्वचित्पाठः तत्र पूर्वं मां स्पर्धमानोऽपि मद्राजसंनिधावागत इति हासः ॥ ४७ ॥

रा० टी०–वसिष्ठमिति । मुनिपुङ्गवो मुनिश्रेष्ठो विश्वामित्रः वसिष्ठं महाभागान् अति भाग्यवतः तान् तत्र प्राप्तान् ऋषीन् वामदेवप्रभृतींश्च यथान्यायं यथोचितं समागम्य समालिङ्ग्य चकारेण यथोचितं प्रणामादिकं च कृत्वा कुशलमुवाच कुशलप्रश्नं कृतवान् इत्यर्थः । हेति हर्षद्योतकम् ॥ ४७ ॥

गो० टी०–वसिष्ठं चेति । समागम्य समीपं गत्वा ऋषीन् वामदेवादीन् यथान्यायं यथाक्रमम् ॥ ४८ ॥

४८] ति० टी०–ऋषीन्वामदेवादीन्यथान्यायं संगत्य कुशलं चोवाच । अत्र वामदेवादिभिः स्वस्थानस्थैरेव समागम्य स्वकार्यसिद्धये तान्गृहीत्वैव ते स्वयं च राजसदनं विविशुरित्यन्वयः ॥ ४८ ॥

रा० टी०–त इति । यथार्हतो यथायोग्यं पूजिताः परस्परं सत्कृताः अत एव हृष्टमनसः प्रमुदितान्तःकरणास्ते सर्वे वसिष्ठविश्वामित्रप्रभृतयः तस्य राज्ञो निवेशनं सभां विविशुः तत्र निषेदुश्च ॥ ४८ ॥

गो० टी०–त इति । निवेशनं सभां पूजिताः विश्वामित्रणेति शेषः । यथार्हतः यथान्यायं प्रथमार्थं तसिः ॥ ४९ ॥

---

१ तमिति गो. रा. पाठः । २ सामन्ता इति गो. रा. पाठः । ३ महाभागानिति गो. रा. पाठः

विविशुः पूजितास्तेन निषेदुश्च यथार्हतः । अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ॥ ४९ ॥
उवाच परमोदारो हृष्टस्तमभिपूजयन् । यथामृतस्य संप्राप्तिर्यथा वर्षमनूदके ॥ ५० ॥
यथा सदृशदारेषु पुत्रजन्माप्रजस्य वै । प्रनष्टस्य यथा लाभो यथा हर्षो महोदयः ॥ ५१ ॥
तथैवागमनं मन्ये स्वागतं ते महामुने । किं च ते परमं कामं करोमि किमु हर्षितः ॥ ५२ ॥
पात्रभूतोऽसि मे ब्रह्मन्दिष्ट्या प्राप्तोऽसि मानद । अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ ५३ ॥
यस्माद्विप्रेन्द्रमद्राक्षं सुप्रभाता निशा मम । पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ॥ ५४ ॥
ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि बहुधा मया । तदद्भुतमभूद्विप्र पवित्रं परमं मम ॥ ५५ ॥

४९] ति० टी०–पूजिता इत्यस्य राज्ञेति शेषः ॥ ४९ ॥

रा० टी०–सभाप्रवेशनानन्तरं राजकर्तृकसत्कृतिवचनं वर्णयन्नाह–अथेत्यादि आसर्गसमाप्ति । अथ सभास्थित्यनन्तरं हृष्टमना हृष्टान्यतिसत्कारादिना हर्षितानि सर्वेषां मनांसि येन परमोदारः दातृशिरोमणिः अत एव हृष्टः हर्षं प्राप्तः राजा महाराजो दशरथः तमागतं महामुनिं विश्वामित्रमभिपूजयन् उवाच ॥ ४९ ॥

गो० टी०–अथेति । हृष्टः पुलकितः " हृषेर्लोमसु " इतीडभावः । परमोदारः परमदाता अभिपूजयन् स्तुवन् ॥ ५० ॥

५०] ति० टी०–परमोदारः परमदाता हृष्टः पुलकितः । अनूदके इत्यार्षं दीर्घत्वम् ॥ ५० ॥

रा० टी०–तदुक्तिमाह–यथेति । अमृतस्य सुधायाः संप्राप्तिः यथा प्रशस्यते अनूदके दुर्योगादुदकहीने श्रावणादौ वर्षं दृष्टिं यथा सदृशदारेषु समानकुलशीलादिविशिष्टाङ्गनासु पुत्रजन्म यथा । अनूदके इत्यत्र दीर्घः " अन्येषामपि " इतिविहितः ॥ ५० ॥

गो० टी०–यथेत्यादि । श्लोकद्वयमेकान्वयम् । अमृतस्य सुधायाः अनूदके अनुदके "अन्येषामपि दृश्यत" इति दीर्घः अप्रजस्य अपुत्रस्य प्रनष्टस्य निध्यादेः महः पुत्रविवाहाद्युत्सवः ' महा उद्भव उत्सवः' इत्यमरः । तस्योदये स्वागतमचिन्तितोपनतं ते आगमनं तथा मन्ये ॥ ५१ ॥ ५२ ॥

५१–५२] ति० टी०–सदृशदारेषु जातिवयोरूपगुणतुल्येषु । प्रनष्टस्य निध्यादेरिति शेषः । महः पुत्रजन्माद्युत्सवस्तस्मादुदयो यस्य स हर्षो यथा तथा त आगमनं मन्ये । अत्र स्वकार्यहर्षसादृश्यस्यागमन उक्त्या तवागमनजहर्षस्यानिर्वाच्यत्वं व्यज्यते स्वागतं त इति भिन्नं वाक्यम् च परं कं कामं किमु केन प्रकारेण करोमि कुर्यामित्यर्थः वर्तमानसामीप्ये लट् ॥ ५१ ॥ ५२ ॥

रा० टी०–प्रनष्टस्येति । प्रनष्टस्य तिरोहितस्य मण्यादेर्लाभो यथा महोदये पुत्रविवाहाद्युत्सवे हर्षो यथा ' महः उद्भव उत्सवः ' इत्यमरः । तथा ते तवागमनं प्राप्तिमहं मन्ये अतः हे मुने स्वागतमतिशोभनमागमनमेतत् । एवो हेत्वर्थे ॥ ५१ ॥

रा० टी०–किमिति । ते तव परममावश्यकं किं किं कार्यमस्तीति शेषः । तत्तत् हर्षितः सन्नहं करोमि कर्तास्मि एव उएतद्वितर्कयामि । चशब्द एवार्थे । हे ब्रह्मन् पात्रभूतोऽसि सर्वप्रकारसेवायोग्यस्त्वमसि अतः मे दिष्ट्या भाग्येन धार्मिकस्त्वं प्राप्तोसि । कं च ते परमं कामम् इति पूर्वार्धे प्राप्तोऽसि मानद इत्युत्तरार्धे च क्वचित्पाठः अर्थः स्पष्ट एव ॥ ५२ ॥

गो० टी०–कं चेति । काममभीष्टं किमु केन प्रकारेण करोमि करवाणि पात्रभूतः दानयोग्यः दिष्ट्या शुभादृष्टवशेन दृष्टयेत्यानन्दद्योतकमव्ययमित्यप्याहुः ॥ ५३ ॥

५३] ति० टी०–पात्रभूतः सर्वसेवायोग्यः । दिष्ट्या शुभादृष्टेन । सुजीवितम् अथैव तत्फललाभादिति भावः ॥ ५३ ॥

रा० टी०–अद्येति । अद्य भवत्कर्मकदर्शनसमये मे मम जन्म सफलं मे जीवितं जीवनं च सुजीवितं तत्र हेतुमाह यस्माद्विप्रेन्द्रं विप्रश्रेष्ठं भवन्तमद्राक्षम् अत एव मम निशा मत्संबन्धिनीयं व्यतीता रात्रिः सुप्रभाता सुष्ठु शुभकार्योत्पादिका पूर्वमङ्गलविशिष्टः प्रभातो यस्याः सा ॥ ५३ ॥

गो० टी०–अद्येत्यर्धमेकम् ॥ ५४ ॥

५४] ति० टी०–पूर्वमिति । राजर्षिशब्दसाधकेन तपसा पूर्वमतिशयितकान्तिमान् ॥ ५४ ॥

रा० टी०–पूर्वमिति । द्योतितप्रभस्त्वं पूर्वं राजर्षिशब्देन बोधितः अनु पश्चात् तपसा ब्रह्मर्षित्वं प्राप्तः अतः मया बहुधा बहुप्रकारेण त्वं पूज्योऽसि ॥ ५४ ॥

गो० टी०–पूर्वमिति । राजर्षिशब्दनोपलक्षितः राजर्षिशब्दवाच्य इत्यर्थः अनु पश्चात् तपसा द्योतितप्रभः सन् ब्रह्मर्षित्वं प्राप्तोऽसि अतः बहुधा राजर्षित्वेन ब्रह्मर्षित्वेन च पूज्योऽसि ॥ ५५ ॥

५५] ति० टी०–अनु पश्चाद्ब्रह्मर्षित्वसाधकेन तपसा ब्रह्मर्षित्वं प्राप्तोऽतो मया बहुधा बहुप्रकारेण राजर्षिब्रह्मर्षिप्रकारेण पूज्योऽसीत्यन्वयः । तदिति । परमं पवित्रमिदं त्वदागमनं यन्मम पुरोऽभूत्तदद्भुतमत्याश्चर्यमित्यर्थः ॥ ५५ ॥

रा० टी०–तदिति । हे विप्र हे प्रभो तत्तस्माद्धेतोः अद्भुतमिदं भवद्दर्शनं मम परमं पवित्रमतिपवित्रतोत्पादकं तत्र

१ प्रशस्यते इति रा. पाठः । २ महोदये इति गो. रा. पाठः । ३ किंचेति रा. पाठः । ४ धार्मिक इति गो. रा. पाठः ।

... INSTITUTE

शुभक्षेत्रगतश्चाहं तव संदर्शनात्प्रभो । ब्रूहि यत्प्रार्थितं तुभ्यं कार्यमागमनं प्रति ॥ ५६ ॥
इच्छाम्यनुगृहीतोऽहं त्वदर्थं परिवृद्धये । कार्यस्य न विमर्शं च गन्तुमर्हसि सुव्रत ॥ ५७ ॥
कर्ता चाहमशेषेण दैवतं हि भवान्मम । मम चायमनुप्राप्तो महानभ्युदयो द्विज ॥
तवागमनजः कृत्स्नो धर्मश्चानुत्तमो द्विजै ॥ ॥ ५८ ॥

इति हृदयसुखं निशम्य वाक्यं श्रुतिसुखमात्मवता विनीतमुक्तम् ।
प्रथितगुणयशा गुणैर्विशिष्टः परमऋषिः परमं जगाम हर्षम् ॥ ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

हेतुः यतः तव संदर्शनात् अहं शुभक्षेत्रगतः शुभानि यानि क्षेत्राणि तानि सर्वाणि गतः प्राप्तः सर्वशुभक्षेत्रयात्राफलं प्राप्तोऽहमित्यर्थः ॥ ५५ ॥

गो० टी०—तदिति । हे ब्रह्मन् तदिदमागमनं मम परमं पवित्रं परममद्भुतं च हे प्रभो तव संदर्शनादहं शुभक्षेत्रगतः पुण्यक्षेत्रगतः त्वद्दर्शनादिदं मत्क्षेत्रं तीर्थभूतं जातमित्यर्थः ॥ ५६ ॥

५६] **ति० टी०**—हे प्रभो तव संदर्शनाच्छुभक्षेत्रं सकलपापाभावविशिष्टसकलशुभसाधनपुण्यवद्देहं गतः प्राप्तवान् । तेन सफलजन्मता निष्पापता च ध्वनिता । 'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते' इति भगवद्गीतोक्तेः । ब्रूहीति । तुभ्यमिति षष्ठ्यर्थे चतुर्थी । ते यत्कार्यं प्रति यत्कार्यार्थमागमनं तन्मया प्रार्थितः सन्ब्रूहि कथय ॥ ५६ ॥

रा० टी०—ब्रूहीति । यद्यस्मात् मया तुभ्यं प्रार्थितं तवावश्यकं किं किं कार्यमस्ति तत्तदहं कर्तास्मीत्येवं प्रार्थना कृता तस्मादागमनं प्रति भवदागमने यत्कार्यं प्रयोजनं तत्त्वं ब्रूहि त्वदर्थपरिवृढये भवत्प्रयोजनवृद्धिं कर्तुमनुगृहीतः त्वदनुग्रहपात्रीभूतोहमिच्छामि " क्रियार्थोपपदस्य " इति चतुर्थी ॥ ५६ ॥

गो० टी०—ब्रूहीति । तुभ्यमिति तृतीयार्थे चतुर्थी । आगमनं प्रति त्वया यत्कार्यं यत्फलं प्रार्थितं तद्ब्रूहि अहं त्वयाऽनुगृहीतः सन् त्वदर्थपरिवृढये इच्छामि त्वदर्थपरिवृद्धिं कर्तुमिच्छामीत्यर्थः । " रुच्यर्थानां प्रीयमाणः" इति चतुर्थी ॥ ५७ ॥

५७] **ति० टी०**—स्वाभिमतकार्ययोगेनानुगृहीतोऽहं त्वत्प्रयोजनपरिवृद्धिं निष्पत्तिं कर्तुमिच्छामि । विमर्शं करिष्यति न वेति संदेहम् ॥ ५७ ॥

रा० टी०—कार्यस्येति । हे सुव्रत कार्यस्य विमर्शं सेत्स्यति नवेति संशयं गन्तुं प्राप्तुं त्वं नैवार्हसि तत्र हेतुः यतः अहमशेषेण कर्ता भवत्कार्य निःशेषतः साधयितास्मीत्यर्थः तत्र हेतुः यतो भवान् मम दैवतं इष्टदेवः । हिचौ हेत्वर्थौ ॥ ५७ ॥

गो० टी०—कार्यस्येति । कार्यस्य विमर्शं कार्यविषयं संशयम् ॥ ५८ ॥

५८] **ति० टी०**—तत्र हेतुमाह—दैवतं हीति । इतश्च न संदेह इत्याह—मम चेति । तवागमनजः कृत्स्नो धर्मो मम महानभ्युदयः प्राप्तः। हर्षातिशयाद्विजेति पुनरुक्तिर्न दोषाय॥५८॥

रा० टी०—ममेति । हे द्विज तवागमनजः त्वदागमनजन्यः मम चकारेणास्मदीयानां महानेवाभ्युदयः अभ्युदये हेतुः अनुत्तमः सर्वोत्तम एव कृत्स्नः संपूर्णोऽयं धर्मः पुण्यमनुप्राप्तः चकारावेवार्थकौ ॥ ५८ ॥

गो० टी०—ममेति । अयं त्वदागमनरूपः ॥ ५९ ॥

५९] **ति० टी०**—इतीति । यतो हृदयसुखमत एव श्रुतिसुखम् आत्मवता स्वार्थीनेन विनीतं विनययुक्तम् प्रथितैर्गुणैस्त्रिशङ्कुस्वर्गारोहणादिभिर्यशो यस्य गुणैः शमदमादिभिः परमऋषिः "ऋत्यकः" इति प्रकृतिभावः ॥ ५९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीये
आदिकाव्ये बालकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०—इतीति । आत्मवता परमबुद्धिमता उक्तं हृदयसुखं ईप्सितसिद्धिमूचकत्वादन्तःकरणसुखकारकम् अत एव श्रुतिसुखं विनीतम् उच्चारयितुर्नम्रतावोधकमितीदं वाक्यं निशम्य श्रुत्वा धर्मैर्विशिष्टः अत एव प्रथितगुणयशाः प्रथितं विस्तृतं गुणसंबन्धि यशो यस्य परमऋषिः ऋषिश्रेष्ठो विश्वामित्रः परमतुलं हर्षं जगाम प्राप ॥ ५९ ॥

इति श्रीमद्रामायणबालकाण्डे व्याख्याने रामायण-
शिरोमणौ अष्टादशः सर्गः ॥ १८ ॥

गो० टी०—इतीति । हृदयसुखमर्थसौष्ठवाद्धृदयसुखकरं श्रुतिसुखं शब्दमार्दवाच्छ्रुतिसुखम् आत्मवता बुद्धिमता विनीतं विनयवत्यथा भवति तथा उक्तं वाक्यं निशम्य प्रथितगुणयशाः पृथुतरगुणविषयकीर्तिः न केवलं कीर्तिमात्रं गुणैर्विशिष्टः परमऋषिरित्यत्र " ऋत्यकः " इति प्रकृतिभावः पुष्पितायां वृत्तम् ॥ ६० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीरा-
ख्याने बालकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

---

१ काममिति रा. पाठः । २ कौशिकेति गो. पाठः । ३ ममेति गो. रा. पाठः ।

एकोनविंशः सर्गः ।

विश्वामित्रदशरथयोः संवादः, विश्वामित्रकृतविघ्नकरमारीचसुबाह्वोर्वर्णनम्, तन्निवारणाय रामं देहीति याचनम्, ऋषिकृतरामप्रतापवर्णनं च ।

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् । हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सदृशं राजशार्दूल तवैवै भुवि नान्यतः । महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः ॥ २ ॥
यत्तु मे हृदृतं वाक्यं तस्य कार्यस्य निश्चयम् । कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवैः ॥ ३ ॥
अहं नियममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ । तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥ ४ ॥
व्रते तु बहुशश्रीर्णे समाप्त्यां राक्षसाविमौ । मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥ ५ ॥
तौ मांसरुधिरौघेण वेदिं तामभ्यवर्षताम् । अवधूते तथाभूते तस्मिन्नियमनिश्चये ॥ ६ ॥

१] ति० टी०–तदिति । अद्भुतविस्तरं दैवतं हि भवान्ममेत्याद्युक्तिरूपमाश्चर्यप्रपञ्चम् ॥ १ ॥

रा० टी०–राजा वचनश्रवणानन्तरं विश्वामित्रोक्तिं वर्णयन्नाह–तदित्यादिभिः । अद्भुतत्वसमानाधिकरणविस्तरत्वविशिष्टमित्यर्थः राजसिंहस्य महाराजाधिराजदशरथस्य तत्प्रसिद्धं वाक्यं श्रुत्वा हृष्टं रोम यस्य हृष्टरोमा महातेजाः परमतेजस्वी विश्वामित्रोऽभ्यभाषत ॥ १ ॥

गो० टी०–अथ विश्वामित्राभ्यर्थनमेकोनविंशे–तच्छ्रुत्वेत्यादि । अद्भुतस्य विस्तरो यस्मिन् तदद्भुतविस्तरं हृष्टरोमा पुलकितरोमा ॥ १ ॥

२] ति० टी०–एतत्तवैव सदृशं नान्यतो नान्यस्य तत्र हेतुगर्भं विशेषणम्–महावंशेत्यादि वसिष्ठव्यपदेशिनो वसिष्ठनियोगवर्तिनः ॥ २ ॥

रा० टी०–तद्भाषणाकारमाह–सदृशमिति । हे राजशार्दूल तवैतद्वचः भुवि पृथिव्यां महाकुलप्रसूतस्य प्रशस्तकुलप्रादुर्भूतस्य वशिष्ठव्यपदेशिनः वशिष्ठकृतोपदेशविशिष्टस्य तव सदृशं त्वदनुरूपं न अन्यथा अननुरूपं न ॥ २ ॥

गो० टी०–सदृशमिति। नान्यथा न मिथ्योच्यत इत्यर्थः वसिष्ठेन व्यपदेशः कीर्तिः उपदेशो वा तृतीयेति योगविभागात्समासः सोऽस्यास्तीति तथा ॥ २ ॥

३] ति० टी०–यच्चिति । तस्य तत्प्रतिपाद्यस्य कार्यस्य निश्चयं कर्तव्यत्वनिश्चयं सर्वथा करिष्यामीत्यङ्गीकारं कुरुष्व कृत्वा च सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव ॥ ३ ॥

रा० टी०–यदिति । हे राजशार्दूल राजश्रेष्ठ वाक्यं वक्तव्यं वाचा ज्ञाप्यं कार्यं यन्मे हृदृतं तस्य कार्यस्य निश्चयमवश्यमहं करिष्यामीत्यध्यवसायं कुरुष्व तस्मात्सत्यप्रतिश्रवः सत्यप्रतिज्ञस्त्वं भव ॥ ३ ॥

गो० टी०–यत्त्विति । मे हृदृतं यत्कार्यं वाक्यं वक्तव्यं तस्य निश्चयं करणाध्यवसायं कुरुष्व सत्यप्रतिश्रवाः सत्यप्रतिज्ञः ॥ ३ ॥

४] ति० टी०–अहमिति । सिद्ध्यर्थं यागार्थं नियमं दीक्षामातिष्ठ आस्थितोऽस्मि तस्य यज्ञस्य ॥ ४ ॥

रा० टी०–कार्यं बोधयन्नाह–अहमिति । हे पुरुषर्षभ सिद्ध्यर्थं स्वाभीष्टसिद्धये अहं नियमं यागदीक्षामातिष्ठे तस्य नियमस्य विघ्नकरौ कामरूपिणौ द्वौ राक्षसौ स्तः तुशब्दस्तदन्यायिराक्षससंग्रहार्थः विघ्नार्थमिति भट्टपादः ॥ ४ ॥

गो० टी०–हृदृतं कार्यमाह–अहमित्यादिना । सिद्ध्यर्थं फलार्थं नियमं यज्ञदीक्षामातिष्ठे आस्थितोऽस्मि तस्येति । तस्य नियमस्य विघ्नकरौ कामरूपिणौ द्वौ राक्षसौ स्त इति शेषः ॥ ४ ॥

५] ति० टी०–व्रते त्विति । बहुशश्रीर्णे समाप्तिकल्पे समाप्त्यां समाप्तिसमये ॥ ५ ॥

रा० टी०–विघ्नकरणप्रकारमाह–व्रते इति सार्धश्लोकद्वयेन । व्रते यागनिश्चये बहुशश्रीर्णे प्रवृत्ते सति समाप्त्यां तु यागसमाप्तिकाले वा वीर्यवन्तौ अतिशयपराक्रमविशिष्टौ सुशिक्षितौ अतिशिक्षाविशिष्टौ तौ तस्करप्रायौ इमौ प्रसिद्धौ मारीचः सुबाहुश्च राक्षसौ तां यागसंबन्धिनीं वेदीं मांसरुधिरौघेण मांसरुधिरसमूहेन अभ्यवर्षताम् चकारान्तरं मूत्रादिसंग्राहकम् ॥ ५ ॥

गो० टी०–व्रत इति । व्रते दीक्षारूपे चीर्णे अनुष्ठिते विघ्नकरणप्रकारमाह–मारीच इति । समांसरुधिरौघेण मांसयुक्तरक्तप्रवाहेण तां वेदिं यज्ञवेदिमभ्यवर्षतामभ्यषिञ्चताम् ॥५॥

६] ति० टी०–नियमनिश्चये व्रतसंकल्पे अवधूते नाशिते तस्मिंस्तत्संकल्पविषये यज्ञे च तथाभूते नाशिते सति ॥ ६ ॥

रा० टी०–अवधूते इति । तस्मिन्यागे अवधूते राक्षसाभ्यां विनाशिते सति अत एव नियमनिश्चये व्रतसंकल्पे तथाभूते विनाशिते सति कृतः श्रमो येन श्रममात्रफलक इत्यर्थः अत एव निरुत्साहः उत्साहरहितोऽहं तस्माद् देशादपाक्रमे इहागतोऽस्मि ॥ ६ ॥

गो० टी०–अवधूत इति। तथाभूते बहुशश्रीर्णे नियमनिश्चये व्रतसंकल्पे अवधूते विघ्निते अपाक्रमे आगतोऽस्मि ॥६॥

१ तवैतदिति गो. रा. पाठः । २ कुलेति गो. रा.पाठः । ३ श्रवाइति गो. पाठः । ४ मे इति गो.पाठः । ५ स मांसेति गो. पाठः । ६ वेदीमिति रा. पाठः ।

कृतश्रमो निरुत्साहस्तस्मादेशादपाक्रमे । न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ॥ ७ ॥
तथाभूता हि सा चर्या न शापस्तत्र मुच्यते । स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम् ॥ ८ ॥
काकपक्षधरं वीरं ज्येष्ठं मे दातुमर्हसि । शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ॥ ९ ॥
राक्षसा ये विकर्तारस्तेषामपि विनाशने । श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः ॥ १० ॥

७] ति० टी०–कृतश्रमः कृतवृथाप्रयासः अत एव निरुत्साहः तस्मादेशादपाक्रमे निर्गतोऽस्मि । ननु भवद्भिः शापेनैव कुतस्तौ न नाशितौ तत्राह—**न चेति** । क्रोधमुत्स्रष्टुं शप्तुम् ॥ ७ ॥

रा० टी०–ननु समर्थैर्भवद्भिः शापेन कुतो न प्रध्वंसितावित्यत आह–**न चेति**। हे पार्थिव क्रोधं क्रोधहेतुकं शापमुत्स्रष्टुं दातुं बुद्धिर्न भवति । तत्र हेतुः सा प्रसिद्धा चर्या तपश्चरणं तथाभूता शापदानानर्हा अतः तत्र मारीचसुबाह्वोः शापो न मुच्यते अमुच्यत " वर्तमानसामीप्ये " इति सूत्रविहितोऽत्र लट्। किंच क्रोधमुत्स्रष्टुं कर्तुं बुद्धिर्न भवति तत्र हेतुः सा चर्या तथाभूता क्रोधानर्हा अत एव शापस्तत्र न मुच्यते शापहेतुभूतस्य क्रोधस्याभावात्ताभ्यां शापो न दत्तः अन्यत्समानम्। हिहेतौ ॥ ७ ॥

गो० टी०–तर्हि कुतो न तौ शप्तौ तत्राह–**न चेति**। तत्र हेतुमाह–**तथेति**। सा चर्या यज्ञाचारः तथाभूता हि शापानर्हकाला हि अतः तत्र मारीचसुबाह्वोः शापो न मुच्यते ॥ ७ ॥

८] ति० टी०–तत्र हेतुमाह–**तथाभूतेति** । शापादिप्रवृत्त्यनर्हेत्यर्थः । अतः स्वपुत्रमित्यादि ॥ ८ ॥

रा० टी०–ननु कथं तयोः शान्तिरित्यत आह–**स्वपुत्रमिति**। हे राजशार्दूल सत्यपराक्रमं कापट्यसंसर्गरहितपराक्रमविशिष्टं काकपक्षधरं बालानां कपोलसमीपवर्तिशिखा काकपक्षः तं धरति स तं शूरं शौर्यविशिष्टं ज्येष्ठं स्वपुत्रं रामं मे मह्यं दातुमर्हसि त्वं योग्योऽसि एतेनानेनैव तच्छान्तिर्भविष्यतीति ध्वनितम् ॥ ८ ॥

गो० टी०–तत्र मया किं कर्तव्यं तत्राह–**स्वपुत्रमिति** । काकपक्षः बालस्य शिखा काकपक्षधरमपीत्यर्थः ॥ ८ ॥

९] ति० टी०–बालानां कपोलसमीपशिखा काकपक्षः । नन्वनेन बालेन किं करिष्यसीत्यत्राह–**शक्त इत्यादि** । मया पितृस्थानीयेनेति शेषः । दिव्यं तेजो वैष्णवं तेन युक्त इति शेषः ॥ ९ ॥

रा० टी०–नन्वयं बालत्वात् तच्छान्तिं कथं विधास्यतीत्यत आह–**शक्त इति**। दिव्येन प्राकृतविलक्षणेन स्वेन स्वकीयेन तेजसा विशिष्टः मयापि गुप्तः तत्तेजःस्मारकत्वेन रक्षितः एषः रामः ये विकर्तारो विघ्नकर्तारो राक्षसाः तेषां विनाशने शक्तः समर्थ एव । एतेम यदि सर्वराक्षसविनाशने समर्थस्तर्हि एतयोर्विनाशने समर्थ इति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः ॥ ९ ॥

गो० टी०–बालोऽयं कथं नौ नाशयिष्यति तत्राह–**शक्त इति**। मया कर्त्रा तेजसा करणेन विकर्तारः विघ्नकर्तारः तेषां न केवलं तयोरिति भावः ॥ ९ ॥

१०] ति० टी०–विकर्तारो विघ्नकर्तारस्तेषां विनाशनेऽपि शक्तः किं पुनर्मद्यज्ञरक्षणे मारीचसुबाहुसेनाभिप्रायेण तेषामिति बहुवचनम् राज्ञो दानप्ररोचनायाह–**श्रेयश्चेति**। बहुरूपमखदानविवाहादिरूपम् किंच मुखपाण्डित्यादिनिवर्तकं बहुरूपं विपुलतरं परमार्थरूपं च श्रेय आत्मस्वरूपं प्रदास्यामि वसिष्ठद्वारा दापयिष्यामि बोधयिष्यामीत्यर्थः रामस्य शुद्धमुक्तस्वभावत्वेऽपि लोकानां तत्त्वबोधनमेव रामबोधनस्य फलम्। सनत्कुमारशापवशात्तिरोहितस्य ज्ञानस्य प्रादुर्भूतिश्च फलमिति बोध्यम्। तदुक्तमादित्यपुराणे–'विज्ञानमेतदखिलं विश्वाकारमद्वयः। पश्यन्ति ज्ञानिनस्त्वेकमात्मरूपमिदं जगत् ॥ दुर्विज्ञेयं वसिष्ठेन रामाय कथितं पुरा।' इति स्कन्दं प्रति शिवोक्तेः। योगवासिष्ठे स्फुटतरमेतत्। मुख्यश्रेयश्च विष्णुपुराणे द्वितीयांशे-'तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज। तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान् ॥ ' इति राजप्रश्ने पुत्रस्वर्गादीनामापेक्षिकश्रेयस्त्वेऽपि न परमार्थरूपं श्रेयस्त्वमित्युक्त्वा 'एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः। जन्मवृद्धयादिरहित आत्मा सर्वगतोऽव्ययः ॥ परं ज्ञानमयो सद्भिर्नामजात्यादिभिर्विभुः। न योगवान्न युक्तोऽभूत्रैव पार्थिव योक्ष्यते ॥ तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत्। विज्ञानं परमार्थोऽसौ' इति जडभरतोक्त्यात्मस्वरूपमेव परमार्थश्रेयस्त्वेन दर्शितम्। तथात्रैव 'आत्मा ध्येयः सदा भूप योगयुक्तैस्तथापरम्। श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मना ॥' इत्युक्तं प्रघट्टकान्तरे तथा जीवपरमात्मनोर्यः संयोग उपाधिनिर्गमरूपः स परं श्रेय इति तदर्थः। 'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥' इति प्रघट्टकान्तरोक्ते-'परमात्मात्मनोर्योगः परमार्थ इतीर्यते' इति तेनैवोक्त्वाच्चेत्यलम् ॥ १० ॥

रा० टी०–तवापि यशो भविष्यतीति बोधयन्नाह–**श्रेय इति**। अस्मै रामाय बहुरूपमनेकविधं श्रेयः कल्याणसाधनं प्रदास्यामि येन कल्याणसाधनेन त्रयाणां लोकानां ख्यातिं ग-

१ शूरमिति गो. रा. पाठः ।

तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः । इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ॥ १९ ॥
विरराम महातेजा विश्वामित्रो महामुनिः । स तन्निशम्य राजेन्द्रो विश्वामित्रवचः शुभम्॥ २० ॥
शोकेन महताविष्टश्चचाल च मुमोह च । लब्धसंज्ञस्ततोत्थाय व्यषीदत भयान्वितः ॥ २१ ॥
इति हृदयमनोविदारणं मुनिवचनं तदतीव शुश्रुवान् ।
नरपतिरभवन्महान्महात्मा व्यथितमनाः प्रचचाल चासनात् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः

बालोऽयं रामोऽतो नेतुं नार्हसीति दशरथस्य विश्वामित्रं प्रति विज्ञप्तिः, दुष्टराक्षसादीनां बलकथनम्, दशरथस्य रामं मा नयेति सर्वथा निषेधमुखेन प्रवृत्तिः, विश्वामित्रस्य क्रोधप्राप्तिश्च ।

तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् । मुहूर्तमिव निःसंज्ञः संज्ञावानिदमब्रवीत् ॥ १ ॥
ऊनषोडशवर्षो मे रामो राजीवलोचनः । न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥

गो० टी०–नात्येतीति । ममायं यज्ञस्य कालो यथा नात्येति तथा कुरुष्वेत्यन्वयः ॥ १८ ॥

१९–२०] ति० टी०–तथेति । अत्रापि पूर्वश्लोकान्त्यार्धमात्रत्या संबध्यते । हे राघव ममायं यज्ञस्य कालो नात्येति नातिपतेत्तथा कुरुष्वेत्यन्वयः । धर्मार्थसहितम् अर्थो रामस्यास्त्रादिलाभरूपः ॥ १९ ॥ २० ॥

रा० टी०–इतीति । धर्मात्मा वेदबोधितकर्मप्रवर्तनाविषयकयत्नवान् महातेजाः महामुनिः अतितपश्चर्यावत्त्वेन सर्वमुनिश्रेष्ठो विश्वामित्रः धर्मार्थसहितमितीदं वचः एवमनेन प्रकारेण उक्त्वा विरराम निवृत्तः ॥ १९ ॥

गो० टी०–इतीति । धर्मार्थसहितं धर्मार्थपरम् ॥ १९ ॥

रा० टी०–स इति । राजेन्द्रो महाराजाधिराजः स प्रसिद्धो दशरथः शुभं मङ्गलप्रदं तद्विश्वामित्रवचो निशम्य श्रुत्वा तीव्रं दुःसहं शोकमभ्यागमत्प्राप । भयान्वितः पुत्रदानाभावे तच्छापहेतुकभीतिविशिष्टः सन् व्यषीदत च विनापि चं समुच्चयः । 'शोकेन महता विष्टश्चचाल च मुमोह च' इत्यपि पाठान्तरम् २०

गो० टी०–स इति । शोकं दुःखं व्यषीदत दुःखितोऽभूत् विषण्णमुखोऽभूदित्यर्थः ॥ २० ॥

२१] ति० टी०–चलनं कम्पः । ततोत्थायेतिच्छान्दसम् व्यषीदतेत्यप्येवम् । भयान्वितो रक्षोनिमित्तपुत्रवियोगभयान्वितः ॥ २१ ॥

२२] ति० टी०–इतीति । अतीवात्यर्थं हृदयस्य हृदयपुण्डरीकवर्त्यात्मनो मनसोऽन्तःकरणस्य च विदारणं पीडाजनकम् शुश्रुवाञ्छ्रुत्वान् । महान्नरपतिः सार्वभौम इति यावत् महात्मा महाबुद्धिः व्यथितमना मूर्च्छितचित्तः अभवदवस्थानुमशक्त आसनात्प्रचचाल च निःसंज्ञः पपातेत्यर्थः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–इतीति । *सहृदयमनोविदारणं हृदयसहितमनश्चालकं तन्मुनिवचनमतीव अत्यन्तं शुश्रुवान् महान् सर्वपूज्यो महात्मा अतिधैर्यविशिष्टो नरपतिः राजा व्यथितमना अभवत् आसनात्प्रचचाल च मूर्च्छितोऽभवदित्यर्थः एतेन राजनिष्ठप्रीतेरतिशयो ध्वनितः ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

गो० टी०–इतीति । हृदयं मनोऽधिष्ठानम् अतीव अत्यर्थं व्यथितमनाः महान् कुलेन महान् विचचाल मुमूर्च्छेत्यर्थः महदिति पाठे महदत्यर्थं व्यथितमनाः अतीव विदारणमिति संबन्धः । वृत्तमुपजातिभेदः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

१] ति० टी०– तदिति । निःसंज्ञ इव निष्प्राण इव रामे प्राकृतत्वबुद्ध्या राक्षसेभ्यो भयसंभावनया दानप्रतिज्ञया च व्याकुलत्वान्मूर्च्छित इत्यर्थः । ततः संज्ञावान्गतमूर्च्छं इदं वक्ष्यमाणमब्रवीत् ॥ १ ॥

रा० टी०–तदिति । विश्वामित्रस्य तत् प्रसिद्धं भाषितं श्रुत्वा मुहूर्तं निस्संज्ञः संज्ञानरहित एव राजशार्दूलः राजश्रेष्ठः । दशरथः संज्ञावान् प्राप्तपुनःसंज्ञानः सन् इदं वक्ष्यमाणं वचनमब्रवीत् इवशब्द एवार्थे ॥ १ ॥

गो० टी०–कौशिकवचनश्रवणादशरथविषादो विंशे–तच्छ्रुत्वेत्याद्यि । निःसंज्ञ इव चेतनारहित इव मूर्च्छित इत्यर्थः १

२] ति० टी०–ऊनेति । किंचिदूनानि षोडशवर्षाणि यस्य सः इदं च युद्धायोग्यत्वं प्रतिपादितम् षोडशवर्षः क्षत्रियकुमार एव कवचधरो युद्धार्ह इति शास्त्रादिति कतककृतः ।

---

१ मुनिरिति रा.रा.पाठः।२ शोकमभ्यागमत्तीव्रं व्यषीदत भयान्वितःइति गो.रा.पाठः।३इदमर्धं गो.रा. पुस्तकयोर्न दृश्यते। *सहृदयमति रा.पाठ इति भाति।

अन्ये तु ऊनषोडशवर्षशब्दस्य द्वादशवर्ष इत्यर्थः । कौशिकयागरक्षणार्थमागतस्य रामस्य वयोविशेषमुद्दिश्य 'बालो द्वादशवर्षोऽयमकृतास्त्रश्च राघवः' इत्यरण्यकाण्डे रावणं प्रति मारीचोक्तेरित्याहुः । अरण्ये 'बालः षोडशवर्षोऽयम्' इत्येव पाठो रावणस्य भयातिशयार्थं वा मारीचस्यार्षोक्तिः सेति कनकाशयः ॥ २ ॥

रा० टी०–तद्वचनमेवाह-उनेत्यादिभिः । राजीवलोचनः कमलायतनयनः मे रामः ऊनषोडशवर्षः ऊनः अभावप्रतियोगी षोडशः षोडशानां सङ्ख्यापूरको वर्षो यस्य पञ्चदशवार्षिक इत्यर्थः । किंच ऊनयति स्वाधिकवयस्कमपि न्यूनयति स एव स इति कर्मधारयः । किंच ऊनयति स्वतपसा सर्वान् न्यूनीकरोतीत्यूनो विश्वामित्रः तत्संबोधनम् अत्रान्तिमपक्षद्वये षोडशशब्दः प्रारम्भविषयीभूतषोडशसङ्ख्यापूरकवर्षपरः अपूर्णषोडशवर्षक इत्यर्थः अतः अस्य बालस्य राक्षसैः सह युद्धयोग्यतां न पश्यामि अत्र ऊनषोडशवर्षो मे इत्युक्त्या विश्वामित्रसहगमनसमये रामस्य षोडशो वर्षः प्रविष्ट इति फलितं तस्मिन्नेव वर्षे रामसीताविवाहस्य प्रसिद्धत्वेन षोडशवार्षिकस्य रामस्य विवाह इति सिद्धम् ।'समा द्वादश तत्राहं राघवस्य निवेशने' इति रावणं प्रति वक्ष्यमाणसीतावचनाद्विवाहानन्तरं द्वादशवर्षपर्यन्तं राघवनिकेते सीतानिवासः ततो वनप्रस्थानमिति वनगमनसमयेऽष्टाविंशतिवर्षको राम इति निष्पन्नम् । एतदनुरोधेन 'दश सप्त च वर्षाणि जातस्य तव पुत्रक' इतिकौशल्योक्तिः पथघटकीभूतदशशब्दस्यैकशेषेण विंशतिरर्थः चशब्दस्य चन्द्रवाचकत्वेनैकत्वलाभः तथाच दश सप्त च युक्तान्येव वर्षाणीत्यष्टाविंशतिलाभः 'चश्चण्डीशे पुमानुक्तः कच्छपे चन्द्रचौरयोः' इति मेदिनी 'मम भर्ता महातेजा वयसा पञ्चविंशकः' इत्यपि न विरुद्धम् । पञ्चविंशयुक्ताः कान्नयो यस्येति तदर्थात् कशब्दस्य वह्निवाचकत्वेन त्रित्वलाभः कशब्दस्य वह्निवाचकत्वं तु 'क. प्रजापतिरुद्दिष्टः कोऽर्कवाय्वनलेष्वपि' कोशादवगन्तव्यम् 'ऊनद्वादशवर्षोयमकृतास्त्रश्च राघवः' इति मारीचपथघटकद्विशब्देनैकशेषात् पङ्लाभस्तेनोनषोडशवार्षिक इत्यर्थः संपन्नः। अत एव ऊनषोडशवर्षोयमिति भट्टोक्तपाठान्तरेण न विरोधः किंच 'मम भर्ता महातेजा वयसा पञ्चविंशकः' इतिश्रुतानुरोधात् 'ऊनषोडशवर्षो मे' इत्येतद्घटकीभूतोनशब्देन पादोनं गृह्यते तेन तस्मिन्समये रामस्य द्वादशवार्षिकत्वं फलितम् ततश्चयोदशे वर्षे विवाहः अत एव मारीचवचनं सानुकूलम् । एवं चोक्तदिशा वनप्रवेशसमये रामस्य पञ्चविंशतिवार्षिकत्वं सिद्धम् दशसप्तचवर्षाणीत्यत्र सप्तशब्दस्यैवैकशेषेण चतुर्दशलाभ इति न विरोधः उपनयनादिप्रभृतिवर्षव्यवस्थापनया भूषणादिव्याख्यानं तु चिन्त्यमेव लोके अप्रसिद्धेः क्वचिज्जन्मप्रभृतिवर्षपरिगणनम् क्वचिदुपनयनात् परिगणनमित्यत्र विनिगमनाविरहाच्चेति दिक् । न चेह कस्मान्न भवति एकश्च एकश्च द्वावित्यर्थः । द्वौ च द्वौ च चत्वार इत्यर्थ इति प्रभे " सङ्ख्याया अर्थासंप्रत्ययात् अन्यपदार्थत्वाच्च नैकशेषः " इति सरूपसूत्रस्थभाष्यं विरुध्येतेति वाच्यम् । यत्तावदुच्यत " सङ्ख्याया अर्थासंप्रत्ययात् " इति । अर्थासंप्रत्ययेऽपि हि सति एकशेषो भवति तद्यथा गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ न चोच्यते वृद्धयुवानाविति भवति चैकशेषः यदप्युच्यते अन्यपदार्थत्वाच्चेति अन्यपदार्थेप्येकशेषो भवति तद्यथा " विंशतिश्च विंशतिश्च विंशती चत्वारिंशदित्यर्थः " इति भाष्येण हेतोर्बाधितत्वात् नहि हेतोर्बाधितत्वे साध्यसिद्धिः क्वचिदृष्टा अत एव ह्रदो वह्निमान् धूमादित्यादावनुमितिर्नोत्पद्यते धूमादेर्बाधितत्वात् नहि विंशती एकौ इत्यनयोर्वैलक्षण्यमुपलभ्यते 'एकादिदशान्तसङ्ख्यावाचिनामेकशेषद्वन्द्वावनभिधानात्र भवतः' इति शेखरग्रन्थस्तु प्रचुरतरप्रयोगदर्शनाभावमूलकः अत एव एकद्वित्रिमात्राणां क्रमेण प्रश्लेषनिर्देशो व्याख्यानादित्यादौ न क्लेशकल्पनेति दिक् ॥ २ ॥

गो० टी०–' यज्ञविघ्नकरं हन्याम्' इत्युक्तरीत्या निजयज्ञविघ्ननिवर्तकोऽयं भविष्यतीति मत्वा आगत्य प्रार्थयमाने विश्वामित्रे वत्सलो दशरथः प्रेमान्धतया कलुषितहृदयः अहं वेद्मीति तदुक्तमपि मनस्यकुर्वन् रामस्य बाल्यमेव पुरस्कुर्वन्नाह–ऊनेति । ऊनाः असपूर्णाः षोडशवर्षा यस्य स तथोक्तः द्वादशवर्ष इति यावत् 'बालो द्वादशवर्षोऽयमकृतास्त्रश्च राघवः' इति विशिष्य वक्ष्यमाणत्वात् । परिपूर्णषोडशवर्षो हि युद्धक्षमो भवति द्वादशवर्षो बालः कथं युद्धाय प्रभवतीति भावः । एवं वयःस्वरूपे विचार्यमाणे नास्य युद्धयोग्यतेत्युक्तम् । राक्षसैस्तु सुतरां नेत्याह–राजीवलोचन इति पद्मतुल्यनयनः पद्मं हि रात्रौ मुकुलीभवति तत्तुल्यतोक्तौ रात्रौ निद्रालसो रामो रात्रिचरैः कथं योद्धुं शक्नोतीति भावः । मे रामः सदा मदुत्सङ्गपरिवर्तितया मद्विरहासहिष्णुरित्यर्थः यद्वा पुत्रालाभेन षष्टिवर्षसहस्राणि लालप्यमानस्यातिक्लेशेनोत्पन्नो रामः 'रामो रतिकरः पितुः' इति रतिकरः सर्वस्वभूतः अस्य काकपक्षधरत्वादिवेषयुतो विद्याभ्यासादपि क्रीडनकस्वीकारकुतूहलीति हस्तेन निर्दिशति युद्धयोग्यता न पश्यामि किंतु क्रीडनकस्वीकारयोग्यतामेव पश्यामीत्यर्थः । युद्धयोग्यतां राक्षसशब्दश्रवणमात्रेणैव विभ्यतां कथं युद्धयोग्यता सह राक्षसैः मनुष्येणापि युद्धव्यापारमजानत कथं राक्षसैर्युद्धम् एकेनापि राक्षसेन न योग्यता कुतो बहुभिः अत्र शङ्क्यते अत्र दशरथेन पित्रा ऊनषोडशवर्ष इत्युक्तम् ऊनत्वं च मासेन मासत्रयेण षण्मासैर्वा स्यात् नत्वेकवर्षद्विवर्षादिभिः तस्मिन्नेव वर्षे सीताविवाहः तदनु द्वादशवर्षाण्ययोध्यावासः 'समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥' इति सीतया वक्ष्यमाणत्वात् तथा च वनप्रवेशकाले रामस्याष्टाविंशतिवर्षाणीति प्रतिभाति । तदनुपपन्नं 'मम भर्ता महातेजा वयसा पञ्चविंशकः । अष्टादश हि वर्षाणि मम जन्मनि गण्यते' इति सीतावचनात् कौसल्यया च वनप्रवेशसमये प्रोच्यते 'दशसप्त च वर्षाणि जातस्य तव पुत्रकाआसितानि प्रकाङ्क्षन्त्या मया दुःखपरिक्षयम' इति तस्मादष्टाविंशतेः पञ्चविंशतेः सप्तदशानां च कथमविरोध इति। अत्र केचित्। कौसल्यावाक्ये जातस्येति द्वि-

इयमक्षौहिणी सेना यस्याहं पतिरीश्वरः । अनया सहितो गत्वा योद्धाहं तैर्निशाचरैः ॥ ३ ॥
इमे शूराश्च विक्रान्ता भृत्या मेऽस्त्रविशारदाः । योग्या रक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ॥ ४ ॥
अहमेव धनुष्पाणिर्गोप्ता समरमूर्धनि । यावत्प्राणान्धरिष्यामि तावद्योत्स्ये निशाचरैः ॥ ५ ॥
निर्विघ्ना व्रतचर्या सा भविष्यति सुरक्षिता । अहं तत्र गमिष्यामि न रामं नेतुमर्हसि ॥ ६ ॥

तीयं जन्मोच्यते क्षत्रियस्यापि द्विजत्वात् द्वितीयं जन्म च उपनयनं तच्च वृद्धेन दशरथेन काम्यपक्षमाश्रित्य गर्भाष्टम एव कृतं तथा च द्वितीयजन्मापेक्षया सप्तदशत्वम् उपनयनात्पूर्वं सप्तवर्षाणीति वयसा पञ्चविंशक इति सीतावचनमप्युपपन्नम् ऊनषोडशवर्ष इत्यत्र पादोनत्वं द्वादशवर्ष इत्यन्यत्रोक्तत्वात् अतः सर्वथा वनप्रवेशकाले पञ्चविंशतिवर्ष एव राम इत्याहुः । अन्ये बहुक्लेशं सहमाना एवं व्याचख्युः अष्टाविंशतिवर्ष एव वनप्रवेशे रामः ऊनषोडशवर्ष इति यत्किंचिन्मासोनषोडशवर्षवयस्क इत्यर्थः ' बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम् ' इति दशरथवचने बाल्ययौवनसंधौ बाल इति व्यवहर्तुं शक्यत्वात् ' बाल आषोडशाद्वर्षात्पौगण्डश्चेति कीर्त्यते ' इति वचनात् 'बालो द्वादशवर्षोऽयमकृतास्त्रश्चराघवः । अजातव्यञ्जनः श्रीमान् पद्मपत्रनिभेक्षणः' इति मारीचवचनं तु युद्धभीरुतया भ्रान्तिकृतं रावणविभीषिकयोक्तं वा अत एव स्वयं वायव्यास्त्रभग्नोप्यकृतास्त्र इत्याह अजातव्यञ्जनत्वं च निरुदरा कन्येतिवदल्पश्मश्रुत्वम् ' एकवस्त्रधरो धन्वी शिखी कनकमालया ' इत्यपि दृढपरिहितोत्तरीयतया सन्नद्धत्वमाह वयसा पंचविंशक इति तु पञ्चविंशतुल्यत्वमाह इवार्थे कनो विधानात् । तेन नित्ययौवनत्वं ज्ञापयति देवा हि सदा पञ्चविंशतिवार्षिका इत्युच्यन्ते कौमल्यावाक्यमपि गर्भैकादशेषु राजन्यमिति विहितोपनयनापेक्षया तस्मान्न किंचिदनुपपन्नमिति वस्तुतो वयसा पञ्चविंशक इति सीतायाः शापभीतायाः सन्यासिनं प्रति वचनमेव यथार्थं दश सप्त च वर्षाणीति कौमल्यावाक्ये तु चकारेण सप्तवर्षाणि समुच्चीयन्ते तेन जन्मापेक्षयैव पञ्चविंशतित्वसिद्धिः । ननु विवाहानन्तरमेव संभोगः श्रूयते 'रामस्तु सीतया सार्द्धं विजहार बहूनृतून्' इति । स कथं द्वादशवर्षस्य बालस्य संभवति संभवत्येव सौकुमार्यातिशयेन प्रौढशरीरतया अत एव हि दिव्याश्च षड्वर्षे एव यौवनारम्भः 'अष्टादश हि वर्षाणि मम जन्मनि गण्यते ' इति वनप्रवेशेऽष्टादशत्वं विवाहकाले सीतायाः षड्वर्षत्वमवगमयतीति सर्वं सुस्थम् ॥ २ ॥

३-४] ति० टी०-इयमिति । ' एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ पत्तिं तु त्रिगुणामेकं विदुः सेनामुखं बुधाः । त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः । स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥ चमूस्तु पृतनास्तिस्रश्चम्वस्तिस्रस्त्वनीकिनी । अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥' इति । यस्याहमिति संबिरार्षः । पतिः पालकः ईश्वरः स्वामी योद्धेत्यस्य अस्मीति शेषः ॥ ३ ॥ ४ ॥

रा० टी०-इयमिति । यस्य यस्याः सेनायाः अहं पतिः पालकः ईश्वरो नियन्ता सा इयमक्षौहिणी सेना अस्तीति शेषः अनया सेनया सहितः युक्तोऽहं गत्वा तैर्भवद्यज्ञविघ्नकारकैर्निशाचरैः सह योद्धा युद्धं कर्तास्मीति शेषः एतेन रामगमनस्य न प्रयोजनमिति ध्वनितम् तेन रामो भवता न नेतव्य इति राजप्रार्थना सूचिता । यस्येति ' सामान्ये नपुंसकम् ' अत एव संहितायां नार्षकल्पना अक्षौहिणीस्वरूपं तु ' एको रथो गजश्चैको नराः पञ्च पदातयः । त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ पत्तिं तु त्रिगुणामेकं विदुः सेनामुखं बुधाः त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः । स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥ चमूस्तु पृतनास्तिस्रश्चम्वस्तिस्रस्त्वनीकिनी । अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ' इति । यस्याहं पतिरिति संबिरार्षः पतिः पालयिता पातेर्डतिः ईश्वरः नियन्ता योद्धा योत्स्ये लुट् तैर्यज्ञविघ्नकरैः ॥ ३ ॥

रा० टी०-इमे इति । शूराः शौर्यविशिष्टाः विक्रान्ताः पराक्रमवन्तः अस्त्रविशारदाः अस्त्रोपलक्षितास्त्रशस्त्रनिपुणाः इमे भवन्निकटे स्थिता मे भृत्या एव रक्षोगणैः योद्धुं योग्याः सुकुमारत्वात् न राम इत्यर्थः अतो रामं नेतुं त्वं नार्हसि चशब्द एवार्थे ॥ ४ ॥

गो० टी०-इम इति । विक्रान्ताः अक्षतविक्रमाः ॥ ४ ॥

५] ति० टी०-गोप्तेति । यज्ञस्येति शेषः । प्राणान्धरिष्यामि जीविष्यामीत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०-अहमिति । यावत्कालं प्राणान्धरिष्यामि तावत्कालं धनुष्पाणिरहमेव गोप्ता ते यज्ञस्य स्यामिति शेषः कथं गोप्तासीत्यत आह समरमूर्धनि निशाचरैः विघ्नकारकराक्षसैः सह योत्स्ये यदा यदा राक्षसभीतिः भवन्तं प्राप्स्यति तदा तदा तत्र गत्वा निशाचरान्हत्वा यज्ञं रक्षितास्मीत्यर्थः ॥ ५ ॥

बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम् । न चास्त्रबलसंयुक्तो न च युद्धविशारदः ॥ ७ ॥
न चासौ रक्षसां योग्यः कूटयुद्धा हि राक्षसाः । विप्रयुक्तो हि रामेण मुहूर्तमपि नोत्सहे ॥ ८ ॥
जीवितुं मुनिशार्दूल न रामं नेतुमर्हसि । यदि वा राघवं ब्रह्मन्नेतुमिच्छसि सुव्रत ॥ ९ ॥
चतुरङ्गसमायुक्तं मया सह च तं नय । षष्टिर्वर्षसहस्राणि जातस्य मम कौशिक ॥ १० ॥
कृच्छ्रेणोत्पादितश्चायं न रामं नेतुमर्हसि । चतुर्णामात्मजानां हि प्रीतिः परमिका मम ॥ ११ ॥
ज्येष्ठे धर्मप्रधाने च न रामं नेतुमर्हसि । किंवीर्या राक्षसास्ते च कस्य पुत्राश्च के च ते ॥ १२ ॥

गो० टी०–अहमिति । गोप्ता यज्ञस्येति शेषः सेनानां वा॥५॥

रा० टी०–निर्विघ्नेति । सुरक्षिता मयात्यन्तं पालिता अत एव निर्विघ्ना सा भवत्कर्तृका व्रतचर्या भविष्यति अतः तत्र भवद्यागनिकटे अहं गमिष्यामि अतः रामं नेतुं नार्हसि ॥६॥

गो० टी०–निर्विघ्नेति । अहं गमिष्यामि तेन सुरक्षिता भविष्यतीति योजना ॥ ६ ॥

७] ति० टी०–रामगमनेऽनुपपत्तिमाह–बाल इत्यादि । ऊनषोडशवर्षत्वादेव बालत्वव्यवहारः स्नेहातिशयेन च तेनैवाकृतविद्यत्वव्यवहारः अन्यथा 'सर्वे वेदविदः शराः', 'सर्वे ज्ञानोपसंपन्नाः ' इति पूर्वोक्त्या विरोधः स्यात् ॥ ७ ॥

रा० टी०–रामगमनायोग्यत्वं विशदयन्नाह–बाल इत्यादिभिः । बालः ऊनषोडशवार्षिकः अत एव अकृतविद्यः न कृता गुरूपदेशप्राप्त्या प्रकटिता विद्या येन अतएव न अस्त्रविद्यासंयुक्तः अस्त्रोपलक्षितगुरूपदिष्टास्त्रशस्त्रादिज्ञानविशिष्टो न अत एव न युद्धविशारदः गुरूपदिष्टयुद्धनैपुण्यविशिष्टश्च न अत एव बलाबलं न वेत्ति गणयति । हिश्चयं च हेतौ एतेन रामनयनमयुक्तमिति ध्वनितम् अत एव ' सर्वे वेदविदः शराः,' सर्वे ज्ञानोपसम्पन्नाः ' इति पूर्वोक्तो न विरोधः ॥ ७ ॥

गो० टी०–बाल इति । बालः ऊनषोडशवर्षः अत एव अकृतविद्यः अशिक्षितधनुर्विद्यः बलाबलं शत्रूणामिति शेषः । " येषां च विरोधः शाश्वतिकः " इति एकवद्भावः ॥ ७ ॥

८] ति० टी०–न चेति । रक्षसामित्यस्य रण इति शेषः । कूटं कपटम् । रामनयने बाधकमप्याह–विप्रेत्यादि ॥८॥

रा० टी०–ननु शिक्षयित्वा यागशालां नेष्यामि इत्यत आह–नचेति । असौ रामः रक्षसां योग्यो न च राक्षसैर्योद्धुं नैवार्हतीत्यर्थः तत्र हेतुः हि यतः राक्षसाः कूटयुद्धाः कपटयुद्धकर्त्तारः रामो न नेतव्य इत्यत्र हेत्वन्तरमाह–हे मुनिशार्दूल मुनिश्रेष्ठ रामेण विप्रयुक्तो विश्लिष्टः अहं जीवितुं मुहूर्तमपि नोत्सहे न समर्थोऽस्मि तस्माद्रामं नेतुं त्वं नार्हसि एतेन स्वगमनेच्छाऽपि रामेण सहैवेति सूचितम् सार्धश्लोक एकान्वयी चशब्द एवार्थे ॥ ८ ॥

गो० टी०–नचेति । रक्षसां युद्ध इति शेषः कूटयुद्धाः कपटयुद्धाः इदमर्द्धम् ॥ ८ ॥

गो० टी०–तिष्ठतु रामस्वभावः मत्स्वभावश्चैवमित्याह–विप्रयुक्त इति । विप्रयुक्तः विश्लिष्टः ॥ ९ ॥

९] ति० टी०–उक्तानुपपत्तिपरिहारायाह–यदि वेति ९

रा० टी०–तदेव स्पष्टमाह–यदीति । हे ब्रह्मन् हे सुव्रत यदि राघवं रामं नेतुमिच्छस्येव तर्हि चतुरङ्गसमायुक्तं साङ्गसेनायुक्तं मया च सहितं रामं नय स्वाश्रमं प्रापय वाशब्द एवार्थे ॥ ९ ॥

गो० टी०–यदीति । चत्वारि अङ्गानि चतुरङ्गानि " दिक्संख्ये संज्ञायाम् " इति समासः ॥ १० ॥

१०] ति० टी०–इतोऽपि रामनयनमयुक्तमित्याह–षष्टिरिति । अतीतानीति शेषः ॥ १० ॥

रा० टी०–रामविश्लेषासहिष्णुत्वे कारणं बोधयन्नाह–षष्टिरिति । हे कौशिक ! जातस्य इह प्रादुर्भूतस्य मम वर्षसहस्राणि षष्टिर्व्यतीतानि अनन्तरं दुःखेन दुःखसाध्ययत्नेन अयं राम उत्पादितः प्रादुर्भावितस्तस्माद्रामं नेतुं त्वं नार्हसि चोऽनन्तरार्थे कृच्छ्रेणोत्पादित इति भट्टसंमतः पाठः ॥१०॥

गो० टी०–षष्टिरिति । वर्षसहस्राणि अतीतानीति शेषः । तदनन्तरं दुःखेन उपवासदीक्षादिक्लेशेन उत्पादितः ॥ ११ ॥

११ ति० टी०–कृच्छ्रेण दुःखेन क्वचित् ' दुःखेन ' इत्येव पाठः । यज्ञदीक्षादिलक्षणेन । परमिकातिशयिता स्वार्थे कः । चतुर्णामिति निर्धारणे षष्ठी । तेषां मध्येऽस्मिन्मम प्रीतिरधिकेत्यर्थः ॥ ११ ॥

रा० टी०–चतुर्णामिति । चतुर्णामात्मजानां मध्ये ज्येष्ठे इति शेषः । मे मम प्रीतिः परमिका अत्यधिका अतः ज्येष्ठं प्रथमं प्रादुर्भूतं धर्मप्रधानं धर्मरक्षकं रामं नेतुं त्वं नैवार्हसि चशब्द एवार्थे हिशब्दो हेत्वर्थे । ' ज्येष्ठे धर्मप्रधाने च ' इति भट्टसंमतः पाठः ॥ ११ ॥

गो० टी०–चतुर्णामिति । चतुर्णां पुत्राणां मध्ये रामे परमिका प्रीतिः स्वार्थे कप्रत्ययः " प्रत्ययस्थात् " इतीत् यस्माज्ज्येष्ठत्वादेश्च नेतुमर्हसीति योजना ॥ १२ ॥

१२] ति० टी०–प्रीत्याधिक्ये कारणमाह–ज्येष्ठ इति । अनेन राज्ययोग्यता ध्वनिता । धर्मप्रधाने त्रिषु पुरुषार्थेषु धर्माधीनप्रवृत्तिके राक्षसैर्युद्धे हि पार्श्विकनाशसंभावनया राज्यविच्छेद एव भवेत् धर्मेण प्रजापालनं च नान्यतो निर्वहेत् अतो रामो नेतुमयोग्यः । अथ रामनयनस्य सर्वथायोग्यत्वं प्रति-

१ इदमर्धं रामायणशिरोमणौ नास्ति । २ च सहितमिति गो. रा. पाठः । ३ दुःखेनेति गो. रा. पाठः । ४ ज्येष्ठं धर्मप्रधानमिति गो. रा. पाठः

कथंप्रमाणाः के चैतान्रक्षन्ति मुनिपुङ्गव । कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसाम् ॥ १३ ॥
मामकैर्वा बलैर्ब्रह्मन्मया वा कूटयोधिनाम् । सर्वं मे शंस भगवन्कथं तेषां मया रणे ॥ १४ ॥
स्थातव्यं दुष्टभावानां वीर्योत्सिक्ता हि राक्षसाः । तस्य तद्वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ॥ १५ ॥
पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः । स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ १६ ॥
महाबलो महावीर्यो राक्षसैर्बहुभिर्वृतः । श्रूयते चै महाराज रावणो राक्षसाधिपः ॥ १७ ॥
साक्षाद्वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः । यदा न खलु यज्ञस्य विघ्नकर्ता महाबलः ॥ १८ ॥
तेन संचोदितौ तौ तु राक्षसौ चै महाबलौ । मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ १९ ॥
इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा । नहि शक्तोऽस्मि सङ्ग्रामे स्थातुं तस्य दुरात्मनः ॥२०॥

पादयितुं रक्षःस्वरूपं पृच्छति—किंवीर्या इति । के च ते किंनामानः ॥ १२ ॥

रा० टी०–वस्तुतस्तु धर्मयुद्धकर्तृभिरस्माभिः कपटयुद्धकर्तारो राक्षसाः निवारयितुमशक्या इति तत्रास्मद्गमनं निरर्थकमिति मनसि निश्चित्य तदेव मुनिवचनेन द्रढयितुं योद्धव्यस्वरूपं पृच्छति–किंवीर्या इत्यादिभिः । हे मुनिपुङ्गव । ते भवद्यज्ञविघ्नकर्तारो राक्षसाः किंवीर्याः कीदृक्वीर्यविशिष्टा इत्यर्थः । कस्य पुत्राश्च ते के च किंनामान इत्यर्थः कथंप्रमाणाः कीदृक्प्रमाणविशिष्टाश्च एतान् राक्षसान् के रक्षन्ति च ॥ १२ ॥

गो० टी०–अथ सर्वथा रामनयनमयुक्तमिति वक्तुं योद्धव्यस्वरूपं पृच्छति–किमिति । के च किंनामधेयाः कथंप्रमाणाः कीदृशाकारा इत्यर्थः । के रक्षन्ति के तेषां प्रधाना इत्यर्थः ॥ १३ ॥

१३] ति० टी०–कथंप्रमाणाः कीदृक्शरीरप्रमाणाः रक्षन्ति स्वामित्वेनेति शेषः । प्रतिकर्तव्यं प्रतिविधेयम् । संहारः कथं कर्तव्य इत्यर्थः ॥ १३ ॥

रा० टी०–कथमिति । हे ब्रह्मन् कूटयोधिनां तेषां रक्षसां रामेण वा मामकैः बलैः सैन्यैर्वा मया वा कथं प्रतिकर्तव्यं शान्तिविधेया इत्यर्थः वार्थश्चकारः ॥ १३ ॥

गो० टी०–कथं चेति । प्रतिकर्तव्यं प्रतिविधेयम् ॥ १४ ॥

१४] ति० टी०–मया रणे इत्यत्र प्रतिकर्तव्यमित्यनुषङ्गः १४

रा० टी०–सर्वमिति । हे भगवन् वीर्योत्सिक्ताः ये राक्षसाः तेषां दुष्टभावानां निषिद्धविचारशीलानां रणे मया कथं केन प्रकारेण स्थातव्यम् इति सर्वं मे मह्यं शंस कथय एतेन तस्य युद्धोत्साहराहित्यं सूचितं तेन तस्य वात्सल्यरसमग्नत्वं व्यक्तम् तेन वीररसाद्वात्सल्यरसस्याधिक्यं सूचितम १४

गो० टी०–सर्वमिति । तेषां रणे कथं मया स्थातव्यमिति व्यद्रप्रकारप्रश्नः ॥ १५ ॥

१५-१६] ति० टी०–स्थातव्यमिति । दुष्टभावानां तेषां संबन्धिनि रणे कथं स्थातव्यमिति च शंसेति संबन्धः तत्र हेतुः वीर्येत्यादि ॥ १५ ॥ १६ ॥

रा० टी०–तस्येति । तस्य राज्ञः तत्प्रसिद्धं वचनं श्रुत्वा विश्वामित्रः अभ्यभाषत तदुक्तिमेवाह पौलस्त्यवंशप्रभवः रावणो नाम राक्षसोऽस्तीति शेषः ॥ १५ ॥

गो० टी०–तस्येति ॥ १६ ॥

रा० टी०–स इति । महाबलः महासैन्यस्वामी महावीर्यः महापराक्रमः अत एव बहुभिः राक्षसैर्वृतः ब्रह्मणा दत्तः वरः यस्मै स रावणः त्रैलोक्यं भृशं बाधते एतेन त्रैलोक्यान्तःपातित्वात्स्वयज्ञस्यापि विघ्नकर्ता रावण इति ध्वनितम् ॥ १६ ॥

गो० टी०–पौलस्त्येति राक्षसोऽस्तीति शेषः ॥ १७ ॥

गो० टी०–किंवीर्या इत्यस्योत्तरमाह–स इति ॥ १८ ॥

१७] ति० टी०–प्रसिद्धश्चायं रावण इत्याह–श्रूयत इत्यादि ॥ १७ ॥

रा० टी०–श्रूयते इति । महावीर्यः साक्षाद्वैश्रवसः विश्रवसः मुनेः हि यतः पुत्रः अत एव वैश्रवणभ्राता यः रावणो नाम राक्षसः श्रूयते स महाबलः महासेनावान् यदा यज्ञस्य साक्षान्नैव विघ्नकर्ता तदैव तेनैव रावणेन संचोदितौ महाबलौ तौ प्रसिद्धौ मारीचः सुबाहुश्च राक्षसौ एव यज्ञविघ्नं करिष्यतः कुरुतः खलुशब्दः साक्षादर्थे वैतुचशब्दाः एवार्थकाः सार्द्धश्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–प्रसिद्धश्चायमित्याह–श्रूयत इति ॥ १९ ॥

१८] ति० टी०–यतो महाबलस्ततो यदानादरात्स्वयं यज्ञस्य विघ्नकर्ता न स्यात्तदानादरात्स्वयं विघ्नाय नागच्छति तदा १८

गो० टी०–यदेति । अर्धत्रयमेकान्वयम् । यदा यज्ञस्य स्वयं न विघ्नकर्ता अलक्ष्यत्वादिनेति शेषः ॥ २० ॥

१९] ति० टी०–तेन रावणेन प्रेरितौ मारीचसुबाहू यज्ञविघ्नं करिष्यत इति संबन्धः ॥ १९ ॥

२०] ति० टी०–अथ रावणनाम श्रुत्वा स्वयमेव निवृत्तप्रतीकारप्रत्याशो राजाह–इत्युक्त इति ॥ २० ॥

रा० टी०–इतीति । तेन प्रसिद्धेन मुनिना रामनयनयत्नशीलेन विश्वामित्रेण इति अनेन प्रकारेण उक्तः राजा महाराजाधिराजस्तदा तस्मिन्काले एव मुनिमुवाच तदुक्तिमाह–दुरा-

१ हि महावीर्य इति गो. रा. पाठः । २ नाम राक्षस इति रा. पाठः । ३ वै इति गो. रा. पाठः ।

स त्वं प्रसादं धर्मज्ञ कुरुष्व मम पुत्रके । मम चैवाल्पभाग्यस्य दैवतं हि भवान्गुरुः ॥ २१ ॥
देवदानवगन्धर्वा यक्षाः पतगपन्नगाः । न शक्ता रावणं सोढुं किं पुनर्मानवा युधि ॥ २२ ॥
स तु वीर्यवतां वीर्यमादत्ते युधि रावणः । तेन चाहं न शक्तोऽस्मि संयोद्धुं तस्य वा बलैः ॥ २३ ॥
सबलो वा मुनिश्रेष्ठ सहितो वा ममात्मजैः । कथमप्यमरप्रख्यं संग्रामाणामकोविदम् ॥ २४ ॥
बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकम् । अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः ॥ २५ ॥
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम् । मारीचश्च सुबाहुश्च वीर्यवन्तौ सुशिक्षितौ ॥ २६ ॥

त्मनः दुष्टस्वभावस्य दुर्जेयप्रयत्नस्य वा तस्य राक्षसस्य संग्रामे स्थातुं नैव शक्तः अस्मि । एतेन वीररसस्य वात्सल्यरसविरोधित्वं सूचितम् तेन तत्सदृशवात्सल्यरसवान्स एवेत्यनन्वयालङ्कारः सूचितः ॥ १९ ॥

गो० टी०–इतीति । तस्य रावणस्य ॥ २१ ॥

२१–२२] ति० टी०–अल्पभाग्यस्य स्वस्त्रियोगाकरणादिति शेषः प्रसादयितुमाह–दैवतमित्यादि ॥ २१ ॥ २२ ॥

रा० टी०–स इति । हे धर्मज्ञ अल्पभाग्यस्य अल्पात् अल्पकालतः प्राप्तं भाग्यं प्रगटपुत्रप्राप्तिरूपं यस्य तस्य मम दैवतं देवता गुरुश्च यतो भवान् अतः सः प्रसिद्धस्त्वं मम पुत्रके प्रसादं कुरुष्वैव हिहेतौ ॥ २० ॥

गो० टी०–स इति । अल्पभाग्यस्येति स्वस्त्रियोगाकरणेमेति शेषः । प्रसादकरणे हेतुः दैवतमिति ॥ २२ ॥

रा० टी०–स्वाशक्तत्वे हेतुमाह–देवेति । युधि युद्धे रावणं सोढुं यदि देवादयो न शक्तास्तर्हि मानवा न शक्ताः इति किं वक्तव्यम् पुनरिति यत्पदं तत्पदार्थे एतेन काव्यार्थापत्त्यलङ्कारेण सामान्याभावे विशेषाभावस्य निश्चितत्वेन यदि सर्वे न शक्तास्तर्हि अहं न शक्त इति किंवक्तव्यमिति काव्यार्थापत्त्यलङ्कारो ध्वनितः तेन ब्रह्मणा दत्तवर इति विश्वामित्रसामान्योक्त्या सर्वावध्यत्वं रावणस्येति राज्ञा निश्चितमिति वस्तु व्यक्तम् ॥२१॥

गो० टी०–देवेति । रावणसंग्रामवैमुख्यं न दोषाय सर्वाशक्यत्वादित्याशयः ॥ २३ ॥

२३] ति० टी०– स त्विति । वीर्यमादत्ते नाशयतीत्यर्थः अतस्तत्संग्रामाद्वैमुख्यमपि न दोषायेति भावः तस्य बलैर्मारीचादिभिः ॥ २३ ॥

रा० टी०–तदेव विशदयन्नाह–स इति । हे मुनिश्रेष्ठ हे ब्रह्मन् राक्षसः प्राप्तराक्षसस्वभावः स प्रसिद्धो रावणः युधि वीर्यवतां वीर्यमादत्ते गृह्णाति एव अतस्तेन रावणेन तस्य बलैः सैन्यैर्वा संयोद्धुं ममात्मजैः स्वभावजनितैः अयोद्धव्ययोधनादिक्षात्रधर्मैरुपलक्षितोऽहमेकाकी वा सबलः ससैन्यो वा अहं कथमपि न शक्तोस्मि एतेन स्वगमनानर्हत्वं सूचितम् । अतः अमरप्रख्यं देवविशेषवत्प्रतीयमानं सङ्ग्रामाणामकोविदं गुरूपदिष्टसंग्रामविषयकज्ञानाभाववन्तम् अत एव बालमतनयमतमयोध्याविशेषशोभावलोकनार्थं मत्सततगमनं नयति प्रापयति तम् अत एव पुत्रकमित्यनेन न गतार्थता पुत्रकमनुकम्पितसुतं नैव दास्यामि सार्धश्लोकद्वयमेकान्वयि चशब्दो हेत्वर्थे हिशब्द एवार्थे सत्वितिभट्टपाठः सबल इत्यत्रापि अहमित्यनुकृष्यते एतेन मारीचसुबाहुपराभवं श्रुत्वा रावणो ध्रुवं तत्रागन्तेति तस्याप्यस्मदादिकर्तृकवधे ब्रह्मानादरः स्यादिति राज्ञो विचारः सूचितः तेन तस्य मर्यादापालकत्वे सूचितम् ॥ २२ ॥ २३ ॥

गो० टी०–स हीति । अर्धत्रयम् । वीर्यमादत्ते स्वीकरोति नाशयतीत्यर्थः तस्य बलैः मारीचादिभिः ॥ २४ ॥

२४] ति० टी०–हे मुनिश्रेष्ठ सबलः ससैन्यः मम पुत्रैः सहितो वा भवानपि तेन योद्धुं न शक्त इत्यनुषङ्गः अस्तु वा कथंचिद्भवतस्तथा सामर्थ्यम् पुत्रं तु सर्वथा न दास्यामीत्याह–कथमपीत्यादि । अमरप्रख्यममरतुल्यरूपमेव न त्वमरमिति तात्पर्यम् नैव दास्यामीत्यन्वयः ॥ २४ ॥

गो० टी०–कथमिति । कथमिति प्रश्ने राक्षसाद् प्रतीति शेषः ॥ २५ ॥

२५–२६] ति० टी०–अतिदुःखितोक्तित्वात्तस्य पुत्रकशब्दयोः पौनरुक्त्यं न दोषः पुत्रकमित्यनुकम्पायां कन् अदाने हेत्वन्तरमप्याह–अथेत्यादि । यतः सुन्दोपसुन्दपुत्रौ कालोपमौ यमतुल्यौ मारीचसुबाहू दैत्यकुलजसुन्दोपसुन्दाभ्यां यक्षकन्यायां जातत्वेनागस्त्यशापेन चातिक्रूरतमौ राक्षसत्वं प्राप्तौ यतस्तौ यज्ञविघ्नकरौ अतः सुतं नैव दास्यामीत्यन्वयः ॥२५॥२६॥

रा० टी०–तदेवोपसंहरन्नाह–अथेति । युद्धे कालोपमौ कालसदृशौ सुन्दोपसुन्दयोः सुतौ तौ मारीचसुबाहू यतस्ते यज्ञविघ्नकरौ अतः ते तुभ्यं सुतमहं नैव दास्यामि । अथशब्दो हेत्वर्थे। एतेन ' विवादश्च विवादश्च समयोरेव शस्यते ' इति न्यायादतिकठोराङ्गकातिक्रूरचेष्टितराक्षसाभ्यां साकमतिकोमलाङ्गसकारणक्रूरतासंसर्गशून्यमत्सुतस्य युद्धमन्याय्यमिति राज्ञो विचारः सूचितः ॥ २४ ॥

गो० टी०–अथेति । अथ शत्रुस्वरूपज्ञानानन्तरं सुन्दोपसुन्दयोः सुतौ मारीचसुबाहू सुन्दपुत्रः मारीचः । उपसुन्दपुत्रः सुबाहुः । पुत्रकम् अनुकम्पायां कन् अतो न दास्यामीत्युपस्कार्यम् ॥ २६ ॥

रा० टी०–ताविति । दैत्यकुलोद्भवौ अत एव वीर्यवन्तौ

१ राक्षस इति गो. रा. पाठः । २ संयोक्तुमिति रा. पाठः । ३ दास्याम्यहं सुतमिति गो. रा. पाठः । ४ इत्यस्मात्पूर्वं तौ हि यक्षस्य कन्याया जातौ दैत्यकुलोद्भवौ गो. रा. अधिकम् ।

तयोरन्यतरं योद्धुं यास्यामि ससुहृद्गणः । अन्यथा त्वनुनेष्यामि भवन्तं सहबान्धवः ॥ २७ ॥
इति नरपतिजल्पनाद्द्विजेन्द्रं कुशिकसुतं सुमहान्विवेश मन्युः ।
सुहुत इव मखेऽग्निराज्यसिक्तः समभवदुज्ज्वलितो महर्षिवह्निः ॥ ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ।

विश्वामित्रदशरथसंवादः, दशरथस्य वसिष्ठकृतोपदेशश्च ।

तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् । समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥ १ ॥
पूर्वमर्थं प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि । राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः ॥ २ ॥

सुशिक्षितौ शोभनशिक्षायुक्तौ तौ प्रसिद्धौ यक्षस्य कन्यायां जातौ चकारेणागस्त्यशापेन राक्षसत्वं प्राप्तौ यौ मारीचः सुबाहुश्च तयोः संबन्धिनमन्यतरमन्यो भिन्नः तरः पराभूतिकारी च स एव स इति कर्मधारयस्तं संभावितभवदरिमित्यर्थः योद्धुं ससुहृद्गणः सुहृद्गणसहितः अहं यास्यामि एतेन मारीचसुबाहू योद्धुं न यास्यामीति व्यञ्जितम् राक्षसत्वं प्राप्तावित्यनेन ब्रह्मप्राप्तवररावणसंबन्धः सूचितस्तेन तत्र गमनाभावे हेतुर्व्यक्तः यक्षस्य कन्यायां जातावित्यनेन तयोर्यक्षत्वं फलितम् । तेन 'यक्षा न हन्तव्या' इति ध्रुवं प्रति मनुक्तेः स्मरणं राज्ञो जातमिति ध्वनितम् । तेनापि तयोर्हननेमन्वनादरः स्यादिति गमनाभावे हेतुर्बोधितः अन्यथा ताभ्यां युद्धमन्तरापि अस्मदादिगमनस्यावश्यकत्वे सहबान्धवः बान्धवसहितः अहं भवन्तमनुनेष्याम्येव भवद्भिः सह गमिष्याम्येवेत्यर्थः ॥ २५ ॥ २६ ॥

गो० टी०–मारीच इति । स्पष्टम् ॥ २७ ॥

२७] ति० टी०–अन्यथा भवता ममानयने अनुनेष्यामि रामागमनायेति शेषः ॥ २७ ॥

२८] ति० टी०–इतीति । सुहुतः प्रथमं शुष्कसमिद्भिर्हुतः पश्चादाज्यसिक्तोऽग्निरिवेति योजना । उज्ज्वलितो रोषजज्वालाख्यचित्तवृत्तियुक्तः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे विंशः सर्गः ॥ २० ॥

रा० टी०–इतीति । द्विजेन्द्रं द्विजश्रेष्ठं कुशिकसुतं विश्वामित्रमित्यनेन प्रकारेण नरपतिजल्पनात् राजभाषणात् सुमहानतिप्रवृद्धः मन्युः कोपः विवेश अतः समिद्भिः[1] सुहुत आज्यसिक्तः अत एव उज्ज्वलितः प्रदीप्तो वह्निरिव महर्षिवह्निः समभवत् वह्निरित्यध्याहृतम् ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे विंशः सर्गः ॥ २० ॥

गो० टी०–उत्तरसर्गार्थमन्ते संगृह्णाति–इतीति । जल्पनादसंगतोक्तेः कोपाविष्टत्वे दृष्टान्तमाह–सुहुत इति । आदौ समिद्भिः सुहुतः तत आज्यसिक्तो वह्निरिव महर्षिवह्निर्महर्षिश्रेष्ठः उज्ज्वलितः समभवत् संजातज्वालो बभूव मुनिपक्षे कोपवह्निः । पुष्पिताग्राटत्तम् 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इतिलक्षणात् ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

१] ति० टी०–तदिति । स्नेहेन पुत्रस्नेहेन पर्याकुलानि गद्गदान्यक्षराणि यस्मिंस्तत्तस्य वचनं श्रुत्वेत्यन्वयः ॥ १ ॥

रा० टी०–राजवचनश्रवणानन्तरकालिकं वृत्तमाह–तदिति । स्नेहपर्याकुलाक्षरम् परमप्रीतिहेतुकसंकलिताक्षरविशिष्टं तस्य दशरथस्य तद्गमगमनाभावप्रतिपादकं वचनं श्रुत्वा समन्युः क्रोधविशिष्टः कौशिकः महीपतिं दशरथं प्रत्युवाच ॥ १ ॥

गो० टी०–एवं रामप्रेषणवृत्तान्तव्याकुलं राजानं वसिष्ठः प्रतिबोधयति एकविंशे–तच्छ्रुत्वेति । स्नेहेन पुत्रस्नेहेन पर्याकुलानि स्खलन्ति अक्षराणि यस्मिन् ॥ १ ॥

२] ति० टी०–अयं विपर्ययः प्रतिज्ञाहानिरूपो राघवाणामयुक्तः यतोऽयमस्य कुलस्य विपर्ययो नाशः विपर्ययपदावृत्तिर्बोध्या ॥ २ ॥

रा० टी०–तदुक्तिमाह–पूर्वमित्यादिभिः । पूर्वमर्थं याचितं प्रतिश्रुत्य दास्यामीति प्रतिज्ञाय प्रतिज्ञां हातुं त्यक्तुं त्वमिच्छसि अयं प्रतिज्ञात्यागः राघवाणां कुलस्य राघवकुलोद्भवस्य अयुक्तः अनुचितः तत्र हेतुः यतः प्रतिज्ञात्यागादस्य तव विपर्ययः मिथ्यावादित्वं स्यात् एतेन सत्यवादिकुलेऽयं मिथ्यावादी उत्पन्नः इति तवाकीर्तिर्भवितेति सूचितम् तेन 'संभावितस्य चाकीर्तिर्मरणादतिरिच्यते' इत्यादिन्यायेनातिदुःखं भवितेति बोधितम् ॥ २ ॥

गो० टी०–पूर्वमिति । अर्थं प्रार्थितार्थमयं विपर्ययः प्रतिज्ञाहानिः राघवाणामस्य कुलस्यायुक्तः ॥ २ ॥

---

१ समिद्भिरिति गो. रा. पाठः ।

यदीदं ते क्षमं राजन्गमिष्यामि यथागतम् । मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सुहृद्वृतः ॥ ३ ॥
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः । चचाल वसुधा कृत्स्ना देवानां च भयं महत् ॥ ४ ॥
त्रस्तरूपं तु विज्ञाय जगत्सर्वं महानृषिः । नृपतिं सुव्रतो धीमान् वसिष्ठो वाक्यमब्रवीत् ॥ ५ ॥
इक्ष्वाकूणां कुले जातः साक्षाद्धर्म इवापरः । धृतिमान्सुव्रतः श्रीमान्न धर्मं हातुमर्हसि ॥ ६ ॥
त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघवः । स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि ॥ ७ ॥
प्रतिश्रुत्य करिष्येति उक्तं वाक्यमकुर्वतः । इष्टापूर्तवधो भूयात्तस्माद्रामं विसर्जय ॥ ८ ॥
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः । गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ॥ ९ ॥

३] ति० टी०–यदीदं प्रतिज्ञाहानिरूपं क्षमं युक्तम् । इदं तत्फलं च यदि क्षमं सह्यं तदा यथागतं गमिष्यामि मिथ्यावादी त्वं सुहृद्वृतः सुखी भवेति विपरीतलक्षणयोक्तिः ॥ ३ ॥

रा० टी०–यदीति । हे राजन् ! यदीदमकीर्त्तिजनितं दुःखं ते तव क्षमं सह्यं तर्हि यथागतमागतमनतिक्रम्य गमिष्यामि राममगृहीत्वैव स्वाश्रमं यास्यामीत्यर्थः हे काकुत्स्थ ! मिथ्याप्रतिज्ञः सबान्धवः बान्धवसहितः सुखी भव एतेन सत्यप्रतिज्ञत्वत्यागे ते दुःखमेव भविष्यतीति ध्वनितम् तेन रामं दहीति बोधितम् ॥ ३ ॥

गो० टी०–यदीदमिति । इदं प्रतिज्ञातान्यथाकरणं सुखी भवेति व्यङ्ग्योक्तिः ॥ ३ ॥

४] ति० टी०–धीमत इत्यत्र रोष इति शेषः । जगदन्यथाकरणसमर्थोऽयमस्य कुतः किं करिष्यतीति देवानां भयम् ॥ ४ ॥

रा० टी०–तस्येति । रोषपरीतस्य क्रोधयुक्तस्य धीमतः धैर्यविशिष्टस्य विश्वामित्रस्य कृत्स्ना निखिला वसुधा पृथिवी चचाल चकम्पे अतएव सुरान्भयं विवेश एतेन विश्वामित्रस्य प्रभावातिशयः सूचितः तेनास्मिन्मित्रीभूतदशरथोपरि कोपेऽस्मदुपरि अपि विश्वामित्रकोपो भविष्यतीति देवभये हेतुः सूचितः। चशब्दो हेत्वर्थे पृथिव्याः कम्पनं पृथिव्यभिमानिदेवभियेति बोध्यम् धीमतइत्यनेन राज्ञे भयदानार्थमेव कोपवत्ताप्रतीतिः ननु वास्तवः कोप इति ध्वनितम् ॥ ४ ॥

गो० टी०–तस्येति । रोषपरीतस्येति षष्ठी सप्तम्यर्थे भयं पूर्वं कोपेनान्यथाकृतजगदयमय किं करिष्यतीति भयम्॥४॥

५] ति० टी०–त्रस्तरूपमतिशयेन त्रस्तम् जगत्त्रैलोक्यम्५

रा० टी०–त्रस्तेति । महान् ईश्वरेश्वरपूज्यः ऋषिः सर्वज्ञः सुव्रतः ईश्वरेश्वररामोपदेशरूपव्रतविशिष्टः धीरः निश्चलचित्तः स वसिष्ठः सर्वं जगत् त्रस्तरूपं विज्ञाय वाक्यमब्रवीत् ॥ ५ ॥

गो० टी०–त्रस्तेति । त्रस्तरूपमतिशयेन त्रस्तं प्रशंसायां रूपप् धीरः धीमान् ॥ ५ ॥

६] ति० टी०–साक्षाद्धर्म इव इवशब्द एवार्थे दृढार्थे रूपकमिदम् ॥ ६ ॥

रा० टी०–तद्वाक्यमेवाह–इक्ष्वाकूणामित्यादिभिः । इक्ष्वाकूणां कुले जातः प्रादुर्भूतः अतएव अपरः सर्वश्रेष्ठः साक्षात् प्रत्यक्षो धर्म इव धृतिमान् धैर्यविशिष्टः अतएव सुव्रतः अत्यक्तध्यसंकल्पविशिष्टः सत्यप्रतिज्ञ इत्यर्थः अतएव श्रीमान् सर्वसंपत्तिविशिष्टः त्वं धर्मं नित्यसत्यप्रतिज्ञत्वरूपं स्वस्वभावं हातुं त्यक्तुं नार्हसि योग्योसि धर्माधिक्यं बोधयितुं तत्त्या निर्देशः ॥ ६ ॥

गो० टी०–इक्ष्वाकूणामिति । त्वमिति शेषः ॥ ६ ॥

७] ति० टी०–स्वधर्मं सत्यप्रतिज्ञत्वम् ॥ ७ ॥

रा० टी०–निषेधमुखेन धर्मः स्वीकर्त्तव्य इत्युक्त्वा एव तदत्र विधिमुखेनाह–त्रिष्विति । त्रिषु ऊर्ध्वाधोमध्येषु लोकेषु धर्मात्मा इति विख्यातः राघवः रघुकुलप्रादुर्भूतः स्वधर्मं नित्यसत्यप्रतिज्ञत्वरूपं स्वस्वभावं प्रतिपद्यस्व संस्मर अतः अधर्मं नित्यसत्यप्रतिज्ञत्वरूपस्वस्वभावविरोधिस्वभावं वोढुमङ्गीकर्तुं नार्हसि ॥ ७ ॥

गो० टी०–त्रिष्विति । धर्मात्मा इतीत्यत्र वाक्ये संहितानित्या स्वधर्म प्रतिश्रुतनिर्वाहरूपम् ॥ ७ ॥

८] ति० टी०–इष्टमश्वमेधान्तयागः आपूर्तं वापीकूपादिनिर्माणम् तद्ध्वस्तत्फलनाशः भूयाद्भवेत् भविष्यतीति यावत् करिष्ये इति प्रतिश्रुत्य प्रतिज्ञाय संधिरार्षः उक्तं वाक्यमकुर्वतोऽनुतिष्ठतः ॥ ८ ॥

रा० टी०–संश्रुत्येति । हे राघव ! रघुकुलप्रादुर्भूत दशरथ ! एवं करिष्यामीति संश्रुत्य प्रतिज्ञाय अकुर्वाणस्य प्रतिज्ञातार्थमकुर्वतस्तव इष्टापूर्तवधः इष्टमश्वमेधपर्यन्तयागः आपूर्तं वापीकूपतडागादिनिर्माणं तयोर्वधः निष्फलत्वं भूयात्स्यात् तस्मात्निष्फलत्वभयाद्रामं विसर्जय प्रेषय प्रतिश्रुत्य करिष्येति ' उक्तं वाक्यमकुर्वतः' इतिभट्टसंमतः पाठः। करिष्येति सन्धिरार्ष इति तैरुक्तम् ॥ ८ ॥

गो० टी०–संश्रुत्येति । एवं करिष्यामीति संश्रुत्य तथाऽकुर्वाणस्येत्यर्थः । इष्टमश्वमेधान्तो यागः पूर्तं वाप्यादिनिर्माणं तदुक्तं 'वापीकूपतडागादिप्रतिष्ठासेतुबन्धनम्। अन्नप्रदानमारामः पूर्तमित्यभिधीयते ' इति । तयोर्वधः निष्फलत्वम् ॥ ८ ॥

९] ति० टी०– कृतास्त्रं शिक्षितास्त्रम् । शक्ष्यन्ति सहि-

१ सबान्धव इति गो. रा. पाठः । २ विवेश च भयं सुरान् इति गो. रा. पाठः । ३ संश्रुत्यैवं करिष्यामीत्यकुर्वाणस्य राघव इति गो. रा. पाठः ।

एष विग्रहवान्धर्म एष वीर्यवतां वरः । एष विद्याधिको लोके तपसश्च परायणम् ॥ १० ॥
एषोऽस्त्रान्विविधान्वेत्ति त्रैलोक्ये सचराचरे । नैनमन्यः पुमान्वेत्ति न च वेत्स्यन्ति केचन ॥ ११ ॥
न देवा नर्षयः केचिन्नामरा न च राक्षसाः । गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ १२ ॥
सर्वास्त्राणि कृशाश्वस्य पुत्राः परमधार्मिकाः । कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति ॥ १३ ॥
तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसुतासुताः । नैकरूपा महावीर्या दीप्तिमन्तो जयावहाः ॥ १४ ॥
जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे । [2]ते सूतेऽस्त्राणि शस्त्राणि शतं परमभास्वरम्॥ १५ ॥

प्यन्ते प्रधर्षयितुमिति शेषो वा अग्निना रक्षितममृतमिवेत्युपमा अनेन पुत्रविपत्तिभीत्यपनयः ॥ ९ ॥

रा० टी०–रामदानावश्यकत्वमुक्त्वा रामो राक्षसान् जेतेति बोधयन्नाह–**कृतास्त्रमिति** । कृतास्त्रं शिक्षितास्त्रोपलक्षितास्त्रशस्त्रमकृतास्त्रं वा कुशिकपुत्रेण विश्वामित्रेण गुप्तं रक्षितमेनं रामं स्ववशीकर्तुमिति शेषः राक्षसाः न शक्ष्यन्ति तत्र दृष्टान्तः ज्वलनेनाग्निचक्रेण गुप्तममृतं यथा अमृतस्य अग्निचक्ररक्षितत्वं भारते व्यक्तम् कृतास्त्रमकृतास्त्रं वेत्यनेन रामस्य नित्यकृतास्त्रत्वं ध्वनितम् ॥ ९ ॥

गो० टी०–**कृतेति** । कृतास्त्रं शिक्षितास्त्रं न शक्ष्यन्ति धर्षितुमिति शेषः ज्वलनेन अग्निचक्रेण अमृतमग्निचक्रेण सुरक्षितामिति भारते व्यक्तम् ॥ ९ ॥

१०] ति० टी०–न केवलं विश्वामित्रकृतसंरक्षणेनैव रामस्य दुर्धर्षत्वम्, किंतु स्वनैर्पात्याह रामविश्वामित्रयोः श्लिष्टवर्णनेन–**एष इति** । एष रामो विश्वामित्रश्च रामपक्षे विद्याधिकः सहजज्ञानशक्तिः तपसो मननादेः परायणं प्राप्यः विश्वामित्रपक्षे तपस आश्रयः ॥ १० ॥

रा० टी०–विश्वामित्रकोपाभासनिवृत्तये तन्माहात्म्यं बोधयन्नाह–**एष इत्यादिभिः** । एषः विश्वामित्रः विग्रहवान् शरीरधारी धर्मः एषः वीर्यवतां वरः श्रेष्ठः एषः विद्याधिकः तपसः परायणं च एतेन सर्वर्क्षिभ्यः अयं विशेषर्क्षिरिति व्यतिरेकालङ्कारो व्यक्तः ॥ १० ॥

गो० टी०–राज्ञो भयनिवृत्तये विश्वामित्रमाहात्म्यमाह–**एष इति** । परायणं परमस्थानम् एतत्सदृशः कोपि तपस्वी नास्तीत्यर्थः ॥ १० ॥

११–१२] ति० टी०–रामपक्षेऽन्यः पुमान् अविद्यावृतः पुमानित्यर्थः विश्वामित्रपक्षे एनमस्त्रगणम् ॥ ११ ॥ १२ ॥

रा० टी०–**एष इति** । सचराचरे चराचरसहिते त्रैलोक्ये विविधानस्त्रान् एषः विश्वामित्रो वेत्ति अन्य. मदतिरिक्तः पुमान् एवं वर्णितगुणविशिष्टं न वेत्ति अतएव न केचन वेत्स्यन्ति आगमशास्त्रस्यानित्यत्वादिदमभावः चो हेतौ अस्त्रानिति लिङ्गव्यत्यय आर्षः । किंच एनं विश्वामित्रज्ञानविपर्यीभूतास्त्रशस्त्रसमूहमन्यो विश्वामित्रभिन्नः पुमान् न वेत्ति अन्यत्समानम् ॥११॥

गो० टी०–**एष इति** । अस्त्रानिति पुंस्त्विङ्गत्वमार्षं सचराचर इत्यनेन सामस्त्यं गम्यते एनमेतदवगतमस्त्रसमूहम् ॥११॥

रा० टी०–वेदनकर्तृत्वाभाववतः विशिष्य बोधयन्नाह–**नेति** । देवादयोन विदन्तीत्यर्थः नर्षयइति पाठान्तरम् ॥ १२ ॥

गो० टी०–केचनेत्युक्तं प्रपञ्चयति–**न देवा इति** ॥ १२ ॥

१३] ति० टी०–ननु देवायनवगतसर्वास्त्रप्राप्तिर्ऋषेः कथमित्यत आह–**सर्वेति** । कृशाश्वः प्रजापतिष्वेकः । 'परमधार्मिकाः' इति पाठे परमधार्मिकप्रतिष्ठावन्तः इत्यर्थः एतेनापि दुर्लभत्वं ध्वनितम् । दत्ताः शिवेनेति शेषः प्रशासति प्रशास्ति स्मेत्यर्थः शबार्षः ॥ १३ ॥

रा० टी०–विश्वामित्रस्य देवाद्यवेद्यशस्त्रादिवेदित्वे कारणं बोधयन्नाह–**सर्वास्त्राणीति** । सर्वास्त्राणि परमधार्मिकाः अधर्मसंसर्गशून्याः कृशाश्वस्य प्रजापतेः पुत्राः पुत्रत्वं प्राप्तास्ते सर्वे यदायं विश्वामित्रो राज्यं प्रशासति तदा कौशिकाय विश्वामित्राय पुरा पूर्वं प्रथममित्यर्थः दत्ताः शिवेनेति शेषः प्रथमं विश्वामित्राय दत्ता इत्यनेन तत्काले तदेवाद्यविद्यमानत्वं ध्वनितम् तेन ऋषेः परममहत्वं व्यक्तम् । गणकार्यस्यानित्यत्वात् शपो लुगभावः ॥ १३ ॥

गो० टी०–सर्वाविदितं कथमयं वेत्तीत्यत्राह–**सर्वेति** । कृशाश्वः प्रजापतिष्वेकः परमधार्मिका. परमधर्मनिष्ठाः पापिनमस्पृशन्त इत्यर्थः । दत्ताः कृशाश्वेन प्रशासति प्रशास्ति अयमिति शेषः ॥ १३ ॥

१४] ति० टी०–अस्त्राणां मातृप्राशस्त्यमप्याह–**तेऽपीति** प्रजापतिसुते दक्षकन्ये तयोः सुताः नैकरूपा अनेकरूपाः ॥१४॥

रा० टी०–ऋषिमहत्त्वद्योतनाय तदस्त्राणां महत्वं द्योतयन्नाह–**तेऽपीति** । नैकरूपाः विलक्षणानेकरूपविशिष्टाः महावीर्याः परमपराक्रमवन्तः दीप्तिमन्तः अतिप्रकाशविशिष्टाः अतएव जयावहाः विजयप्रापकाः प्रजापतिसुतासुताः प्रजापतेर्दक्षस्य ये सुते कन्ये तयोः सुताः प्रादुर्भूताः शस्त्रास्त्रसमूहाः कृशाश्वस्य प्रजापतेः पुत्राः आसन्निति शेषः अर्षिहेतौ ॥ १४ ॥

गो० टी०–पितृप्राशस्त्यमुक्त्वा मातृप्राशस्त्यमाह–**तेऽपीति** । प्रजापतिः दक्षः तस्य सुतयोः कन्ययोः सुताः ॥ १४ ॥

१५] ति० टी०–ते सूते सुवाते इत्यर्थः शस्त्राणि परविशसनकर्तृणि ॥ १५

रा० टी०–अस्त्रसङ्ख्यां तन्मातृनाम च बोधयन्नाह–**जयेति** । सुमध्यमे दक्षकन्ये जया च सुप्रभा च परमभास्वरमतिप्र-

१ नासुता इति गो. रा. पाठः । २ सुवाते इति गो. रा. पाठः ।

पञ्चाशतं सुताँल्लेभे जया लेब्धवरा वरान् । वधायासुरसैन्यानामप्रमेयानरूपिणः ॥ १६ ॥
सुप्रभाजनयच्चापि पुत्रान्पञ्चाशतं पुनः । संहारान्नाम दुर्धर्षान्दुराक्रामान्बलीयसः ॥ १७ ॥
तानि चास्त्राणि वेत्त्येष यथावत्कुशिकात्मजः । अपूर्वाणां च जनने शक्तो भूयश्च धर्मवित् ॥ १८ ॥
तेनास्य मुनिमुख्यस्य धर्मज्ञस्य महात्मनः । न किंचिदस्त्यविदितं भूतं भव्यं च राघव ॥ १९ ॥
एवंवीर्यो महातेजा विश्वामित्रो महायशाः । न रामगमने राजन्संशयं गन्तुमर्हसि ॥ २० ॥
तेषां निग्रहणे शक्तः स्वयं च कुशिकात्मजः । तव पुत्रहितार्थाय त्वामुपेत्याभियाचते ॥ २१ ॥
इति मुनिवचनात्प्रसन्नचित्तो रघुवृषभश्च मुमोद पार्थिवाग्र्यः ।
गमनमभिरुरोच राघवस्य प्रथितयशाः कुशिकात्मजाय बुद्ध्या ॥ ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकविंशः सर्गः ॥ २१ ॥

काशविशिष्टशतमस्त्राणि शस्त्राणि च सुवाते वर्त्तमानसामीप्ये इति भूते लट् परमभास्वरमित्येकवचनं शतापेक्षया ॥ १५ ॥

गो० टी०–के प्रजापतिसुते तत्राह–जया चेति । सुवाते असुवातां शस्त्राणि विशसनकर्तृणि परमभास्वरमिति शताभिप्रायेणैकवचनम् ॥ १५ ॥

१६] ति० टी०–वरान्श्रेष्ठान् । अप्रमेयान्गुणेयत्तयाऽपरिच्छेद्यान् अरूपिणोऽदृश्यमानरूपान् ॥ १६ ॥

रा० टी०–विभज्य तत्तत्सुतान्प्रदर्शयन्नाह–पञ्चाशतमिति द्वाभ्याम् । असुरसैन्यानां वधाय वरान् श्रेष्ठानमेयानपरिमेयप्रभावान् कामरूपिणः अभीप्सितरूपधारणसमर्थान् पञ्चाशतं सुतान् जयानाम दक्षकन्या पुरा पूर्वं लेभे अप्रमेयानरूपिणः इतिभट्टसंमतः पाठः ॥ १६ ॥

गो० टी०–का कत्यसूयतेत्यत्राह–पञ्चाशतमिति । अमेयान् अपरिच्छेद्यवैभवान् ॥ १६ ॥

१७] ति० टी०–संहारानन्वर्थसंहारनामकान् दुर्धर्षान्परैः सोढुमशक्यान् दुराक्रामान् दीर्घआपः दुराक्रमानमोघान् ॥ १७ ॥

रा० टी०–सुप्रभेति । दुर्धर्षानतिप्रगल्भान्दुराक्रमान् शत्रुभिः पराभवितुमशक्यान्बलीयसः अतिबलविशिष्टान् संहारान्नाम पञ्चाशतं सुतान् पुनः अनन्तरमेव सुप्रभापि दक्षसुता अजनयत। अपिशब्द एवार्थे संहारानिति अन्वर्थसंज्ञया असुरसंहारार्थमेतेषामपि जन्मेति ध्वनितम् ॥ १७ ॥

गो० टी०–सुप्रभेति । संहारान् अन्वर्थसंहारसंज्ञान् दुर्द्धर्षान् परैरभिभवितुमशक्यान् दुराक्रामान् अमोघानित्यर्थः १७

१८] ति० टी०–अपूर्वाणाम् । अस्त्रविद्याविशेषाणामिति शेषः ॥ १८ ॥ १९ ॥ २० ॥

रा० टी०–तानिति । धर्मविदेषः कुशिकात्मजः विश्वामित्रः तानि शतमस्त्राणि यथावद्वेत्ति एव चकारेण अन्यान्यपि दिव्यान्यस्त्राणि वेत्ति अपूर्वाणां विलक्षणास्त्राणां जनने उत्पादने भूयोत्यन्तं शक्तः समर्थश्च ॥ १८ ॥

गो० टी०–तानीति । यथावत् कात्स्न्र्येन अपूर्वाणामस्त्राणां सः विदितसकलास्त्रः ॥ १८ ॥

रा० टी०–तत्प्रभाववर्णनमुपसंहरन्नाह–तेनेति । हे राघव ! मुनिमुख्यस्य सर्वज्ञस्य अतएव महात्मनः सर्वपूज्यस्वरूपस्यास्य विश्वामित्रस्य तेन हेतुना भूतं *भूतकालकं भव्यं *भविष्यत्कालकं च किंचिदविदितं नैव अपिरत्रार्थे क्रियाविशेषणं वा ॥ १९ ॥

रा० टी०–एवमिति । हे राजन् । महायशाः महातेजाः विश्वामित्रः यतः एवंवीर्यः वर्णितप्रभावविशिष्टः ततः रामगमने रामप्रेषणे संशयं गन्तुं प्राप्तुं त्वं नार्हसि ॥ २० ॥

गो० टी०–एवमिति । श्लोकद्वयं स्पष्टम् ॥ १९ ॥ २० ॥

२१] ति० टी०–वस्तुतो रक्षोनिग्रहे शक्तोऽपि विश्वामित्रस्त्वत्पुत्रानुग्रहार्थमेव तं च याचत इत्याह–तेषामिति । हितमिति. रहस्यानन्यदुर्लभानेकविद्याप्रदानादिरूपम् ॥ २१ ॥

रा० टी०–इदानीं त्वदनुग्रहार्थमेव एतदागमनमिति बोधयन्नाह–तेषामिति । कुशिकात्मजः विश्वामित्रः यद्यपि तेषां राक्षसानां निग्रहणे स्वयं शक्तः समर्थस्तथापि तव पुत्रहितार्थाय त्वामुपेत्य प्राप्य अभियाचते चशब्दो यद्यपीत्यर्थे पुत्रहितार्थायेत्युक्त्या सकलां स्वविद्यामस्मै समर्पयितेति ध्वनितम् ॥ २१ ॥

२२] ति० टी०–मुमोदेति परस्मैपदमार्षम् चस्त्वर्थे प्रसन्नचित्त इत्युत्तरं योज्यः राघवस्य रामस्य कुशिकात्मजायः रामं दातुं बुद्ध्या अचिन्तयादिति शेषः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्ड एकविंशः सर्गः ॥ २१ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेण मुनिवचनाद्धसिष्ठोक्त्या प्रसन्नचित्तः अतएव भास्वरः अतिप्रभाविशिष्टः प्रथितयशा अतियशस्वी रघुवृषभः रघुकुलश्रेष्ठः मुमोद मुमुदे अतएव

१ नामवरान्पुरति गो. रा. पाठः । २ अमेयान्कामरूपिण इति गो. रा. पाठः । ३ सुतानिति गो. रा. पाठः । ४ अयं श्लोको गोवि. न धृतः । ५ सर्वज्ञस्येति गो. रा. पाठः । ६ । भास्वर इति रा. भास्वराङ्ग इति गो. पाठः । * कालिकमिति भाति ।

द्वाविंशः सर्गः ।

वसिष्ठोपदेशाद्रामदाने दशरथस्यौद्युक्तत्वम्, स्वस्त्ययनपूर्वकं रामलक्ष्मणयोर्निष्क्रमणम्, विश्वामित्रात्तयोर्बलातिबलाप्राप्तिश्च ।

तथा वसिष्ठे ब्रुवति राजा दशरथः स्वयम् । प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम् ॥ १ ॥
कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च । पुरोधसा वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥ २ ॥
स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथस्तदा । ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना ॥ ३ ॥
ततो वायुः सुखस्पर्शो नीरजस्को ववौ तदा । विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम् ॥ ४ ॥
पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिःस्वनैः । शङ्खदुन्दुनिर्घोषः प्रयाते तु महात्मनि ॥ ५ ॥
विश्वामित्रो ययावग्रे ततो रामो महायशाः । काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात् ॥ ६ ॥
कलापिनौ धनुष्पाणी शोभयानौ दिशो दश । विश्वामित्रं महात्मानं त्रिशीर्षाविव पन्नगौ ॥ ७ ॥

कुशिकात्मजाय कुशिकात्मजं प्रसादयितुं राघवस्य रामस्य गमनं बुद्ध्या अभिरुरोच स्वीचकार ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ एकविंशः सर्गः ॥ २१ ॥

गो० टी०–इतीति । भास्वराङ्गः भासनशीलः प्रसन्नमुखइति यावत् । सुमोद सुमुदे व्यत्ययात्परस्मैपदम् राघवस्य गमनमभिरुरोच राघवं कुशिकात्मजाय दातुं बुद्ध्याऽचिन्तयदिति उपस्कार्यं पूर्ववत्पुष्पिताग्राव्रत्तम् ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

१] **ति० टी०**–तथेति । सलक्ष्मणं राममाजुहाव तयोरविनाभावज्ञानादिति शेषः ॥ १ ॥

रा० टी०–तथेति । तथा तेन प्रकारेण वसिष्ठे ब्रुवति सति प्रहृष्टवदनः प्रसन्नमुखः राजा दशरथः सलक्ष्मणं लक्ष्मणसहितं रामं सुतमाजुहाव एतेन गुरुवाक्ये राजः श्रद्धातिशयः सूचितः ॥ १ ॥

गो० टी०–अथ प्रसन्नहृदयेन राजा रामविसर्जनं द्वाविंशे–तथेत्यादि । सलक्ष्मणं राममिति तयोरविनाभावज्ञानादिति भावः ॥ १ ॥

२–३] **ति० टी०**–कृतस्वस्त्ययनं कृतमङ्गलाचरणम् मङ्गलैर्मङ्गलमूचकैर्मन्त्रैः किं च तत्त्वज्ञानप्रतिपादकवाक्यैः अभिमन्त्रितम् वेधितमित्यर्थः तद्बोधनं च योगवासिष्ठे प्रसिद्धम् राजापि तद्वाक्यश्रवणेन सुप्रीतमनाः सन्रामं ददौ ॥ २ ॥ ३ ॥

रा० टी०–कृतेति । मात्रा तज्जनन्या दशरथेन पित्रा च कृतस्वस्त्ययनं कृतमाङ्गलिकद्रव्यभोजनालङ्कारादिसमर्पणम् वसिष्ठेन पुरोधसा पुरोहितेन मङ्गलैर्मङ्गलजनकवेदवाक्यैरभिमन्त्रितम् ॥ २ ॥ प्रियं परमप्रीतिविपर्ययभूतं पुत्रं मूर्ध्नि उपाघ्राय स राजा दशरथः सुप्रीतेनान्तरात्मना मनसा कुशिकपुत्राय विश्वामित्राय ददौ द्वयोरेकत्रान्वयः ॥ ३ ॥

गो० टी०–कृतेत्यादिश्लोकद्वयमेकान्वयम् । पित्रा दशरथेन स्वेनेति शेषः कृतस्वस्त्ययनं कृतमङ्गलानुष्ठानं मङ्गलैर्मङ्गलमूचकैः "स्वस्तिनोमिमीताम्" इत्यादिभिः ॥ २ ॥ ३ ॥

४] **ति० टी०**–यात्रायां शकुनमाह–तत इति । ववाविन्त्यस्य पृष्ठत इति शेषः विश्वामित्रगतं तत्संबद्धम् राजीवं पद्मम् ॥ ४ ॥

रा० टी०–मङ्गलसूचकं शकुनमाह–तत इति त्रिभिः । तदा गमनसमये राजीवलोचनं विश्वामित्रसहितं रामं दृष्ट्वा ततः सर्वत्र परिपूर्णः सुखस्पर्शः सुखप्रदस्पर्शविशिष्टः विरजस्कः रजोरहितो वायुर्ववौ ॥ ४ ॥

गो० टी०–अथ यात्रायां शुभनिमित्तसंपत्तिं दर्शयति–तत इत्यादि । गतमनुगतम् ॥ ४ ॥

५] **ति० टी०**–प्रयाते प्रयाणोन्मुखे स्वप्रयोजनोपक्रमादेवानां दुन्दुभिस्वनसहिता पुष्पवृष्टिः, शङ्खादिर्घोषस्तु स्वनगरजः ॥ ५ ॥

रा० टी०–पुष्पेति । महात्मनि मुनौ रामे च प्रयाते सति देवदुन्दुभिनिस्वनैः सह महती पुष्पवृष्टिः शङ्खदुन्दुभिनिर्घोषः शङ्खादिनिस्वनश्चासीत् तुशब्दश्चार्थे ॥ ५ ॥

गो० टी०–पुष्पेति । प्रयाते प्रयानुमुपक्रान्ते देवदुन्दुभिनिस्वनश्च अवतारप्रयोजनोपक्रमत्वात् शङ्खदुन्दुभिनिर्घोषो दशरथीयः ॥ ५ ॥

६] **ति० टी०**–धन्वी धनुर्विद्याकृताश्रमः ॥ ६ ॥

रा० टी०–गमनप्रकारं वर्णयन्नाह–विश्वामित्र इत्यादिभिः । अग्रे विश्वामित्रो ययौ ततस्तदपश्चान्महायशाः सर्वत्र परिपूर्णकीर्तिः काकपक्षधरः धन्वी धनुर्धारी रामश्च ययौ । सौमित्रिर्लक्ष्मणस्तं राममन्वगात् अन्वगच्छत् ॥ ६ ॥

गो० टी०–विश्वामित्र इति । धन्वी धनुष्मान् व्रीह्यादित्वादिनिः ॥ ६ ॥

७] **ति० टी०**–कलापिनौ सतूणीरौ शोभयानौ प्रकाशयन्तौ शस्त्रतेजसा मृगभाव आर्षः त्रिशीर्षाविव पन्नगौ

---

१ सुतमिति गो. रा. पाठः । २प्रियमिति गो. रा. पाठः । ३ विरजस्क इति गो. रा. पाठः ।

अनुजग्मतुरक्षुद्रौ पितामहमिवाश्विनौ । अनुयातौ श्रिया दीप्तौ शोभयन्तावनिन्दितौ ॥ ८ ॥
तदा कुशिकपुत्रं तु धनुष्पाणी स्वलंकृतौ । बद्धगोधाङ्गुलित्राणौ खड्गवन्तौ महाद्युती ॥ ९ ॥
कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ । अनुयातौ श्रिया दीप्तौ शोभयेतामनिन्दितौ ॥ १० ॥
स्थाणुं देवमिवाचिन्त्यं कुमाराविव पावकी । अभ्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ॥ ११ ॥
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत । गृहाण वत्स सलिलं माभूत्कालस्य पर्ययः ॥ १२ ॥

स्कन्धस्थितधनुषा पृष्ठबद्धतूणीरेण मस्तकेन च त्रिशीर्षत्वम् यद्वा प्रत्येकं तूणीरद्वयधारणात्त्रिशीर्षत्वम् धनुषः पाणावुक्तत्वात् अत्रेदं तूणीरादि वैष्णवं गरुडेन दत्तं रामाय ताटकावधानुद्भवाय मारीचस्य समुद्रे पातनाय च. नहि प्राकृतशस्त्रसाध्यमेतत् । तदुक्तं पाद्मे ' पक्षी तार्क्ष्यः समागम्य त्रीणि चास्त्राणि कार्मुकम् । सर्वभूतैरदृश्यः सन्दत्त्वा ताभ्यां पुनर्ययौ ॥' इति अस्त्राणि शस्त्राणि खड्गचर्मतूणीररूपाणि ॥ ७ ॥

रा० टी०–तदेव विशदयन्नाह–कलापिनावित्यादिभिः । कलापिनौ तूणीरधरौ धनुष्पाणी धनुर्युक्तपाणिविशिष्टौ दशदिशः शोभयानौ प्रकाशयन्तौ त्रिशीर्षौ पन्नगौ इव शिरस्त्रयविशिष्टपन्नगसदृशौ अक्षुद्रौ दर्शनमात्रेण क्षुद्रतानिवर्तकौ पितामहमश्विनाविव अनुजग्मतुः त्रिशीर्षत्वं च स्कन्धद्वयस्थिततूणीरद्वयेन शिरसा च पञ्चशीर्षाविवोरगाविति पाठे तत्वंतु उन्नतस्कन्धद्वयेन शिरसा चेति बोध्यम् सार्द्धश्लोक एकान्वयी आगमशास्त्रस्यानित्यत्वान्नुगभावः ' कलापो भूषणे बर्हे तूणीरे संहतावपि ' इत्यमरः ॥ ७ ॥

गो० टी०–कलापिनावित्यादिसार्धश्लोक एकान्वयः कलापिनौ तूणीरधारिणौ 'कलापो भूषणे बर्हे तूणीरे संहतावपि' इत्यमरः। शोभयानौ प्रकाशयन्तौ आर्षेनुगभावश्छान्दसः विश्वस्य मित्रं विश्वामित्रः "मित्रे चर्षौ" इतिविश्वशब्दस्य दीर्घः श्रुतिश्च "तस्योविश्वं मित्रमासीद्यदिदं किंच तस्माद्विश्वामित्र इत्याचक्षत" इति । प्रत्येकं तूणीरद्वयधारणाच्छिरोभ्यां च त्रिशीर्षाविवेत्युपमानं धनुस्तूणीरशरधरत्वाद्वा अक्षुद्रौ अनल्परूपवीर्यादिवैभवौ ॥ ७ ॥

८–१०] ति० टी०–अक्षुद्रावनल्परूपवीर्यादिमन्तौ शोभयन्तौ विश्वामित्रमिति शेषः ॥ ८ ॥ बद्धं गोधाचर्मकृतमङ्गुलित्राणं ययोस्तौ गोधा हस्तत्राणमिति कश्चित् अङ्गुलित्राणस्य पौनरुक्त्यापत्तेस्तच्चिन्त्यम् ॥ ९ ॥ शोभयेतामित्यडभावश्छान्दसः ॥ १० ॥

रा० टी०–इदानीं ताभ्यां मुनेः परमा शोभा जातेति बोधयन्नाह–तदेतिसार्धश्लोकद्वयेन । तदागमनकाले धनुष्पाणी धनुर्युक्तपाणिविशिष्टौ स्वलङ्कृतौ अप्राकृतालङ्कारविशिष्टौ बद्धं गोधाङ्गुलित्राणं गोधाचर्मनिर्मिताङ्गुलित्राणं याभ्याम्, खड्गवन्तौ खड्गविशिष्टौ महाद्युती परमप्रकाशशिष्टौ चारुवपुषौ अतिसुन्दरशरीरौ अनुयातौ विश्वामित्रानुगन्तारौ श्रिया परस्परशरीरकान्त्या दीप्तौ प्रकाशितौ अनिन्दितौ निन्दाकर्तृत्वाभावयन्तौ पावकी कुमाराविव पावकप्रादुर्भूतस्कन्धविशाखसदृशौ कुमारौ भ्रातरौ रामलक्ष्मणौ अचिन्त्यं चिन्तयितुमशक्यं स्थाणुं देवमिव देवशम्भुसदृशं कुशिकपुत्रं विश्वामित्रं शोभयेताम् अशोभयेताम् अङ्गिरहः आगमशास्त्रस्यानित्यत्वात् ॥ ८ ॥ ९ ॥ १० ॥

गो० टी०–तदेत्यादिसार्द्धश्लोकद्वयमेकान्वयम् । बद्धं गोधाचर्मकृताङ्गुलित्राणं ययोस्तौ तथा गोधा हस्तत्राणमित्येके श्रुतिः सामान्यशोभा श्रीः विशेषशोभा शोभयेनां व्यत्ययेन लङर्थे लोट् विश्वामित्रमनुयातौ रामलक्ष्मणौ स्थाणुमनुयातौ कुमाराविवाशोभेतामित्यर्थः । स्थाणुं रुद्रं पावकी पावकात्प्रादुर्भूतौ स्कन्दविशाखौ ' ततोभवच्चतुर्मूर्तिः क्षणेन भगवान्प्रभुः । स्कन्दो विशाखः शाकश्च नैगमेषश्च पृष्ठतः' इति भारतोक्तेः । अचिन्त्यम् अचिन्त्यवैभवम् ॥ ८ ॥ ९ ॥

११] ति० टी०–स्थाणुं रुद्रम् । पावकी स्कन्दविशाखौ अध्यर्धयोजनमर्धाधिकयोजनम्, षट्क्रोशमिति यावत् ॥ ११ ॥

रा० टी०–अध्यर्द्धेति । विश्वामित्रः सरय्वा दक्षिणे तटे अध्यर्धयोजनं सार्द्धयोजनं गत्वा रामेति मधुरां वाणीमभ्यभाषत ॥ ११ ॥

गो० टी०–अध्यर्द्धेति । अधिकमर्द्धं यस्मिन् तदध्यर्द्धं अध्यर्द्धं च तत् योजनं च अध्यर्द्धयोजनं सार्द्धं योजनमिति यावत् । तावद्दूरगमनेन बालयोः क्षुत्तृट्पीडा मा भूदिति तन्निवर्तकविद्याद्वयोपदेशायाह्वयते–रामेति । मधुरां भक्तिपूर्वकोच्चारणाद्रामनाम्नः श्रवणानन्दकरत्वाच्च ॥ १० ॥

१२] ति० टी०–तावद्दूरगमनेन बालकयोः क्षुत्तृट्पीडाप्रादुर्भावस्यावश्यकत्वान्महर्षिर्विनाप्यन्नं परमतृप्तये दिव्ये विद्ये उपदेष्टुमाह–वत्स रामेत्यादि । सलिलं गृहाण शुद्धाचमनं कुरु कालस्यान्नभोजनकालस्य पर्ययोऽतिक्रमः ॥ १२ ॥

रा० टी०–तद्भाषणमेवाह–गृहाणेति । हे वत्स ! सलिलं त्वं गृहाण आचमनं कुर्वित्यर्थः तत्र हेतुः कालविपर्ययः अवश्यकर्तव्यकालातिक्रमः माभूत् तथा अनन्तरं मन्त्रग्रामं बलां बलाख्यामतिबलामतिबलाख्यां विद्यां गृहाण तथाशब्द आनन्तर्ये ॥ १२ ॥

गो० टी०– गृहाणेति । सलिलं गृहाण शुद्धाचमनं कुर्वित्यर्थः विपर्ययोऽतिक्रमः विलम्ब इति यावत् मन्त्रग्रामं मन्त्रसमष्टिरूपमिदं बलातिबलयोः प्रत्येकं विशेषणम् ॥ ११ ॥

---

१ इदमर्धं रा. गो. पुस्तकयोर्नास्ति ।

मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा । न श्रमो न ज्वरो वा ते न रूपस्य विपर्ययः ॥ १३ ॥
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः । न वाह्वोः सदृशो वीर्ये पृथिव्यामस्ति कश्चन ॥ १४ ॥
त्रिषु लोकेषु वा राम नै भवेत्सदृशस्तव । वैलामतिबलां चैव पठतस्तँात राघव ॥ १५ ॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये । नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ ॥ १६ ॥
एतद्विद्याद्वये लब्धे नै भवेत्सदृशस्तव । बला चातिबला चैव सर्वज्ञानस्य मातरौ ॥ १७ ॥
क्षुत्पिपासे न ते राम भविष्येते नरोत्तम । बलामतिबलां चैव पठतस्तँात राघव ॥ १८ ॥
[गृँहाण सर्वलोकस्य गुप्तये रघुनन्दन]
विद्याद्वयमधीयाने यशश्चाथ भवेद्भुवि । पितामहसुते ह्येते विद्ये तेजःसमन्विते ॥ १९ ॥

१३] ति० टी०–मन्त्रग्रामं बलाविद्यासंज्ञकं मन्त्रसमूहम् तथातिबलासंज्ञकं च। अन्ये तु–प्रागुक्तदिव्यास्त्रशतरूपं मन्त्रसमूहं तथा प्रकृतोपयोगिन्यौ बलातिबलाख्ये च विद्ये इत्यर्थः परन्त्वत्र बलातिबलयोरेव दानम् अन्येषां तु दानमग्रे भविष्यतीत्याहुः। गृहाण त्वमित्युपलक्षणं लक्ष्मणस्यापि क्षुत्पिपासाक्षान्तिरूपफलस्योभयोरपि दर्शनादपेक्षणाच्च श्रमो बहुदूरगमनादौ तन्मूलको ज्वरोऽपि न विपर्ययोऽन्यथाभावः तद्विद्याजपेन भविष्यतीति शेषः ॥ १३ ॥

रा० टी०–बलाऽतिबलाविद्याप्रभावं वर्णयन्नाह–**न श्रम** इत्यादिभिः । तवानघ तवानां सर्पीषं प्राप्तानां न अघं यस्मात्तत्संबोधनं हे तवानघ आश्रितपापनिवर्तक राम ! अते विद्ययोः प्राप्तौ सत्यां श्रमो न श्रमश्च न रूपस्य विपर्ययश्च न नैर्ऋताः राक्षसाः सुप्तं प्रमत्तमनवधानं वा न धर्षयिष्यन्ति पराभवितुं प्रगल्भा भविष्यन्ति लृङ्पात्तकालाविवक्षा " कर्तुरीप्सिततमम् " इत्यादाविव एको वाशब्दश्चार्थे ॥ १३ ॥

गो० टी०–तद्ग्रहणफलमाह–**न श्रम** इत्यादि । विपर्ययः अन्यथाभावः भविष्यतीति शेषः सुप्तं त्वामिति शेषः ॥ १२ ॥

१४] ति० टी०–प्रमत्तमकृताचमनादिकम्, धर्षणमभिभवः अस्तीति वर्तमानसामीप्ये भविष्यति लट् सर्वत्र तद्विद्याबलाभो हेतुः ॥ १४ ॥

रा० टी०–**न बाह्वोरिति** । बाह्वोः विद्याधारिजनभुजयोर्वीर्ये सदृशः त्रिषु लोकेषु पृथिव्यां त्रिलोकीस्थाने कश्चन जातो नास्ति न च भविष्यति अभवदित्यस्याप्युपलक्षणमेतत्। श्लोकद्वयमेकान्वयि वाशब्दश्चार्थे ॥ १४ ॥

गो० टी–**न बाह्वोरिति**। बलामतिबलां च पठतस्तवेति शेषः अस्ति स्यादित्यर्थः । त्रिष्वित्यत्र सर्वगुणैः निःसीमत्वमुच्यते ॥ १३ ॥

१५] ति० टी०–न केवलं पृथिव्यामेवेत्याह—त्रिष्वित्यादि ॥ १५ ॥

रा० टी०–तदेव विशदयन्नाह–**बलामिति** । हे राघव ! हे अनघ ! यद्यपि लोके प्राकृताप्राकृतजनेषु सौभाग्ये तव समो नास्ति न च भविता दाक्षिण्ये सामर्थ्यातिशये च समो न जाने ज्ञापने समो न बुद्धिनिश्चये बुद्धिजन्ये निश्चये समो न ॥१५॥

१६] ति० टी०–ज्ञानं तत्त्वज्ञानम् बुद्धिनिश्चय ऐहिकविषयः वादिनं प्रतिवक्तव्ये उत्तर इत्यर्थः ॥ १६ ॥

रा० टी०–प्रतिवक्तव्ये उत्तरे समो न तथापि ते तव बलामतिबलां च लब्धे मदुपदेशादपि प्राप्ते एतद्विद्याद्वये तः अमृतहेतुभूतस्त्वं पथि मार्गे पठ एतेन स्वमर्यादापालकत्वं स्मरेति प्रार्थना सूचिता । तेन ऋषेः परमधार्मिकत्वं व्यक्तम् । कथमनयोरेतादृशः प्रभाव इत्यत आह यतः बला अतिबला च विद्ये सर्वज्ञानस्य मातरौ हेतू एवोऽनुक्तसमुच्चयार्थस्तेन सकलातिशयैश्वर्यहेतुत्वसङ्ग्रहः 'एतद्विद्याद्वये लब्धे न भवेत्सदृशस्तव' इति भट्टपाठः ॥ १६ ॥

गो० टी०–नेति । सौभाग्ये सौन्दर्ये दाक्षिण्ये सामर्थ्ये बुद्धिनिश्चये बुद्ध्या कार्यनिश्चये समः भवतीति शेषः ॥ १४ ॥

१७–१८] ति० टी०–तव सदृशो न केनापि गुणेनेति शेषः सर्वज्ञानस्य मातराविति अप्रतिभामूलक्षुधादिनिवृत्तिसामर्थ्यवत्त्वात्सर्वज्ञानजनके इत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०–पथि पाठस्य फलमाह–**क्षुदिति** । हे राघव नरोत्तमराम पथि बलामतिबलां च पठतः पुरुषस्य ते प्रसिद्धे क्षुत्पिपासे नैव भविष्येते अत्र प्रकरणे प्रातिभासिकोऽर्थो न युज्यते " आनन्दरूपममृतं यद्विभाति " ' यो वेत्ति भौतिकं देहं रामस्य परमात्मनः। स सर्वस्माद्बहिः कार्यः श्रौतस्मार्तविधानतः ' इत्यादिश्रुतिस्मृतिभिः प्रतिपिद्धभौतिकत्वस्यापत्तेः १७

गो० टी०–सामान्येनोपसंहरति–**एतदिति** । ते समः नास्ति न भविता चेत्यर्थः मातरौ कारणभूते ॥ १५ ॥

गो० टी०–**क्षुदिति** । ते भविष्येते भविष्यतः ॥ १६ ॥

१९] ति० टी०–विद्याद्वयमधीयाने त्वयीति शेषः ' यशश्चाप्यतुलं भुवि ' इति पाठे भविष्यतीत्यपि शेषः । तयोर्विद्ययोस्तादृशसामर्थ्ये कारणमाह–**पितामहेत्यादि** । तन्निर्मितत्वात्तत्सुते ॥ १९ ॥

१ श्रमोनेति गो. रा. पाठः । २ भविष्यति तवानघेति रा. पाठः । ३ इदमर्धं गो. पुस्तके नास्ति । ४ पथीति रा. पाठः । ५ भविता नास्ति ते सम इति गो. रा. पाठः । ६ पथीति गो. रा. पाठः । ७ इदमधिकं गो. रा. पु स्तकयोः ।

प्रदातुं तव काकुत्स्थ सदृशस्त्वं हि पार्थिव । कामं बहुगुणाः सर्वे त्वय्येते नात्र संशयः ॥ २० ॥
तपसा संभृते चैते बहुरूपे भविष्यतः । ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ॥ २१ ॥
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः । विद्यासमुदितो रामः शुशुभे भीमविक्रमः ॥ २२ ॥
सहस्ररश्मिर्भगवाञ्शरदीव दिवाकरः । गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजः॥२३॥
ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं त्रयः ॥
दशरथनृपसूनुसत्तमाभ्यां तृणशयनेऽनुचिते तदोपिताभ्याम् ।
कुशिकसुतवचोनुलालिताभ्यां सुखमिव सा विबभौ विभावरी च ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०–विद्याग्रहणे लोकोपकृतिरस्तीत्याह–गृहाणेति । हे रघुनन्दन सर्वलोकस्य गुप्तये रक्षायै विद्याद्वयं गृहाण तत्र हेतुः यतः त्वयि विद्याद्वयमधीयाने सति भुवि सर्वलोके अतुलं यशः चकारेण प्रतापश्च भविष्यत्येव अपिरेवार्थे सर्वलोकस्य गुप्तये इत्यनेन स्वतःसिद्धनित्यसकलपरमकल्याणगुणकस्य सर्वेश्वरेश्वरस्य सर्वविद्यानियन्तुर्विद्यया न प्रयोजनमिति ध्वनितम् ॥ १८ ॥

रा० टी०–सिंहावलोकनन्यायेन विद्ययोः सर्वविद्याहेतुत्वे कारणं वदन्नाह–पितामहेति । हे काकुत्स्थ ! हे धार्मिक ! तेजस्समन्विते परमतेजोविशिष्टे एते द्वे विद्ये पितामहसुते ब्रह्मणः पूर्वं प्रादुर्भूते अतः सदृशः अनयोर्विद्ययोर्योग्यस्त्वमतस्तव तुभ्यं दातुं समर्पयितुं मे मनोऽस्तीति शेषः हिर्हेतौ ॥१९॥

गो० टी०–विद्येति । अधीयाने त्वयि भवेदिति शेषः तेजःसमन्विते प्रभावसमन्विते ॥ १७ ॥

२०] ति० टी०–प्रदातुं मम बुद्धिरिति शेषः सदृशः तदानयोग्य इत्यर्थः एते एतद्विद्याप्रदानयोग्याः बह्वीति लुप्तविभक्तिकम् बहव इत्यर्थः विपुला इति यावत् ॥ २० ॥

रा० टी०–काममिति । एते विद्याद्वयकार्यत्वेनोक्ता बहुगुणाः वीरे त्वयि कामं यद्यपि सन्ति अत्र संशयो न तथापि तपसा संभृते मया तपोबलेन अर्जिते एते द्वे विद्ये बहुरूपे त्वदुपदेशाद्विस्तृते भविष्यतः अतः इमे विद्ये त्वया ग्रहीतव्ये इत्यर्थः चकारो यद्यपीत्यर्थे ॥ २० ॥

गो० टी०–प्रदातुमिति । तव प्रदातुं त्वमेव सदृशो नान्य इति योजना ॥ १८ ॥

गो० टी०–एतदुपपादयति–काममिति । एते पूर्वोक्ताः सौभाग्यादयः कामं प्रकामं त्वयि सन्ति यद्यपि तथापि तपसा संभृते लब्धे एते विद्ये त्वदुपदेशात् बहुरूपे लोके बहुधा विस्तृते भविष्यतः ॥ १९ ॥

२१] ति० टी०–तपसा मदीयेन संभृते पूर्णे बहुरूपे शास्त्रोक्तफलादप्यधिकफलप्रदे यद्वा तपसा सर्वतपःप्राप्यस्त्वेन तपोरूपेण भवता संभृते धृते इत्यर्थः जलं स्पृष्ट्वाचम्य ॥२१॥

रा० टी०–विश्वामित्राज्ञापनानन्तरकालिकं रामवृत्तमाह–तत इति । ततः विश्वामित्राज्ञापनानन्तरं प्रहृष्टवदनः प्रसन्नमुखः शुचिः सर्वपवित्रत्वहेतुः रामः जलं स्पृष्ट्वा आचम्येत्यर्थः भावितात्मनः भावितः परिशीलितः आत्मा ईश्वरनियन्ता येन तस्मात् महर्षेस्ते बलाऽतिबले विद्ये जग्राह ॥ २१ ॥

गो० टी०–तत इति । जलं स्पृष्ट्वा आचम्येत्यर्थः भावितात्मनः ध्यातात्मस्वरूपात् ॥ २० ॥

२२] ति० टी०–विद्यासमुदितो विद्यासंबद्धः ततो विक्रमवानपि विद्यासंबन्धादधिकविक्रम इत्यर्थः ॥ २२ ॥

रा० टी०–विद्येति । विद्यासमुदितो विश्वामित्रोपदिष्टविद्यासंयुक्तः अतएव भूरिविक्रमः विद्याप्रभावं प्रकटयितुं प्रकटीकृतस्वीयबहुप्रतापः रामः शरदि शरत्काले सहस्ररश्मिर्भगवान् दिवाकर इव शुशुभे ॥ २२ ॥

गो० टी०–विद्येति । विद्यासमुदितः समुदितविद्यः लब्धविद्य इति यावत् ॥ २१ ॥

२३] ति० टी०–सहस्रेत्यादि पूर्वान्वयि । कुशिकात्मजो विश्वामित्रः । गुरुकार्याणि गुरुविषयाणि कार्याणि पूर्वोत्थायी पश्चात्संनिवेशीत्यादीनि तानि सर्वाणि वियुज्य उपदिश्येत्यर्थः सप्तम्यन्तपाठे गुरुकार्याणि पादोपसंग्रहणादीनि कुशिकात्मजे नियुज्य कृत्वेत्यर्थः । सरय्वां तत्तीरे ॥ २३ ॥

रा० टी०–गुर्विति । गुरुकार्याणि गुरौ विधेयानि सर्वाणि पादपीडनादीनि कुशिकात्मजे विश्वामित्रे नियुज्य तां रजनीं तत्र सरय्वां सरयूतीरे त्रयः रामप्रभृतयः ससुखं यथास्यात्तथा ऊषुः ॥ २३ ॥

गो० टी०–गुर्विति । गुरुकार्याणि गुरौ कर्तव्यानि पादसंवाहनादीनि कुशिकात्मजे नियुज्य कृत्वा त्रयः स्वयं तौ चेति त्रयः तत्र सरय्वां सरयूतीरे सुसुखमूषुः यद्वा एतदर्थस्य पूर्वेणान्वयः कुशिकात्मजे गुरुकार्याणि नियुज्य विद्यासमुदितो रामशुशुभ इति ॥ २२ ॥

२४] ति० टी०–दशरथेत्यादि षष्ठ्यर्थे चतुर्थ्यः । तृणाद्य-

१ धार्मिकेति गो. रा. पाठः । २ भूरिविक्रम इति गो. रा. पाठः । ३ कुशिकात्मजे इति गो. रा. पाठः । ४ सुसुखं गो. रा.पाठः ॥

त्रयोविंशः सर्गः ।

विश्वामित्रस्य रामलक्ष्मणाभ्यां संवादः, कामाश्रमकथनम्, नानाविधकथालापश्च ।

प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः । अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे ॥ १ ॥
कौसल्या सुप्रजा राम पूर्वा संध्या प्रवर्तते । उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ २ ॥

उचितशयनोपेतयोरपि रात्रेः सुखव्युष्टत्वे हेतुः कुशिकसुतवचोनुलालितत्वं विबभौ व्युष्टेति यावत् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०–तत्कालस्यापि शोभनत्वं वर्णयन्नाह–**दशरथेति** । अनुचिते गुरुशुश्रूषणमर्यादापालकानां परमोचिते तृणशयने उषिताभ्यां कुशिकसुतवचोनुलालिताभ्यां दशरथनृपसूनुसत्तमाभ्यां रामलक्ष्मणाभ्यां सुखं यथास्यात्तथैव सा विभावरी रात्रिरपि तदा शयनकाले बभौ शुशुभे इव शब्द एवार्थे ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०–**दशरथेति** । चतुर्थ्यर्थे "बहुलं छन्दसि" इति षष्ठ्यर्थे चतुर्थी दशरथपुत्रयोर्विभावरी सुखमिव विबभौ प्रभातेत्यर्थः इवशब्दो वाक्यालंकारे अत्र रामाय विद्यादानं लक्ष्मणस्याप्युपलक्षणं पश्चाद्रामो वा लक्ष्मणायोपदिदेशेति पूर्ववत्पुष्पितायाग्रहत्तम् ॥ २३ ॥

इति श्रीगोविंदराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१] ति० टी०–प्रभातायामिति । पर्णसंस्तरे मृदुपर्णादिपरिकल्पिते शयनीये । पूर्वश्लोके तृणशयन इत्युपलक्षणं बोध्यम् ॥ १ ॥

रा० टी०–रात्रिव्यतीतानन्तरकालिकं वृत्तमाह–**प्रभातायामिति** । शर्वर्यां रात्रौ प्रभातायां प्रभातत्वं प्राप्तायां महामुनिः विश्वामित्रः पर्णसंस्तरे तृणमिश्रपर्णकल्पितासने शयानं काकुत्स्थमभ्यभाषत संस्तरस्य तृणपर्णोभयनिर्मितत्वेन तृणशयने इति पूर्वोक्त्या न विरोधः ॥ १ ॥

गो० टी०–अथैषामङ्गदेशप्राप्तिं पूर्ववृत्तकथनव्याजेन व्यञ्जयति त्रयोविंशे–**प्रभातायामित्यादि** । पर्णसंस्तरे पर्णमयास्तरणे पूर्वसर्गान्ते तृणशयनस्योक्तत्वादत्र तृणमिश्रपर्णशयन इति बोध्यम् ॥ १ ॥

२] ति० टी०–**कौसल्येति** । हे राम त्वया पुत्रेण कौसल्या सुपुत्रा शोभनपुत्रवती अतस्तादृशस्य सुपुत्रस्य तवास्मिन्समये निद्रानुचिता यतः पूर्वा संध्या प्रवर्तते प्रातःसंध्या प्रवर्तते अत उत्तिष्ठ दैवं देवताध्यानम् आह्निकं शौचादिक्रिया ॥ २ ॥

रा० टी०–तद्भाषणमेवाह–**कौशल्येति** । कौशल्यासुप्रजराम कौशल्यायाः सुप्रजासु प्रादुर्भूतः स एव राम इति कर्मधारयः तत्संबोधनम् हे नरशार्दूल पुरुषश्रेष्ठ ! पूर्वा सन्ध्या प्रातःसंध्या प्रवर्तते अतः त्वमुत्तिष्ठ दैवं देवसंबन्धि आह्निकमहःसन्ध्यानिर्वर्त्यं स्वशक्तिस्मरणादि त्वया कर्तव्यम् ॥ २ ॥

गो० टी०–उभयप्रबोधनार्थमागतो विश्वामित्रो रामस्य 'समया बोधितः श्रीमान् सुखसुप्तः परंतपः' इत्युक्तरीत्या निद्राकालिकश्रियमवलोक्य तदासक्तः सन् स्वागमनकार्यं विस्मृत्य इमं प्रसूतवती कौसल्या किं वा तपस्तप्तवतीति विस्मयते । कौसल्या सुप्रजाः बोधनकाले विस्मितमुखो मुनिरासीत् शोभना प्रजा पुत्रो यस्याः सा सुप्रजाः " नित्यमसिच् प्रजामेधयोः" इत्यसिच् त्वज्जननी कौसल्या सुपुत्रा यद्वा स्वगतवचनम् एतज्जननी कौसल्या सुप्रजाः 'कौसल्या शुशुभे तेन पुत्रेणामिततेजसा'। इतिवत् । यद्वा कौसल्यायाः सुप्रजा इति संबोधनं कर्मधारयेऽप्यापोऽसिच् "ह्रस्वेपे पूर्वस्य दीर्घोऽणः" इतिदीर्घः " सुपां सुलुक् " इत्यादिना पूर्वसवर्णदीर्घो वा परशुरामव्यावृत्त्यर्थं विशेषणम् । कौसल्यादशरथयोरुभयोरपि तपःफलत्वेनावतीर्णत्वेऽपि कथं कौसल्या सुप्रजा इत्युक्तिः । उच्यते ' माता पुत्रस्य भूयांसि कर्माण्यारभते' इत्युक्तरीत्या " मातृदेवो भव । पितृदेवो भव " इतिवन्मातृप्राधान्योक्तेः 'पितुः शतगुणं माता'इतिस्मृतेश्च । यद्वा कौसल्यादशरथयोर्महदन्तरमस्ति दशरथो हि ' अहं वेद्मि महात्मानम्' इति परत्वेन निश्चयमानेऽपि तदकिंचित्कृत्य दुःखेनोत्पादितश्चायं न रामं नेतुमर्हसीति रामे केवलं पुत्रत्वं मन्वानो वसिष्ठसंबुधितहृदयो रामं प्रेषितवान् कौसल्या तु केवलवात्सल्यपराऽपि द्रुतं सादरं प्रेषितवती तदिदं तारतम्यमवलोक्य मुदितहृदयो मुनिराह–**कौसल्या सुप्रजा इति** । मातृवाक्यं पितृवाक्यं च पालनीयमित्यमुं धर्मं लोके प्रवर्तयितुं स्वयं तदनुष्ठातृत्वेन सुप्रजा इत्युक्तम् । अथ क्रमेण गुणान्तरावगाहान्निस्तीर्य प्रबोधयति रामेत्यादि रामेत्यनेन स्वापकालिकसौन्दर्यमुच्यते पूर्वा सन्ध्या प्रवर्तते पूर्वा संन्ध्या दिवाकरमिव रामदिवाकरं त्वां कौसल्या जनितवतीति भावः । यद्वा मातृवत्पूर्वसंन्ध्यामप्युपलालयेति। यद्वा पूर्वा सन्ध्या प्रवर्तते आदित्यस्येव भवतोऽयं विरोधिनिरसनारम्भसमय इति । यद्वा पूर्वा संन्ध्या प्रवर्तते अज्ञानान्धकारो गतः भगवत्साक्षात्कारो मे जातः अद्य मे सुप्रभातमिति । यद्वा जगतः सर्वस्य भगवदवतारात्सत्वोद्रेककालो जातः अद्य मे सफलं जन्म सुप्रभाता च मे निशा।

१ काकुत्स्थं शयानमिति गो. रा. पाठः ।

तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ । स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ ३ ॥
कृताह्निकौ महावीर्यौ विश्वामित्रं तपोधनम् । अभिवाद्यातिसंहृष्टौ गमनायाभितस्थतुः ॥ ४ ॥
तौ प्रयान्तौ महावीर्यौ दिव्यां त्रिपथगां नदीम् । ददृशाते ततस्तत्र सरय्वाः संगमे शुभे ॥ ५ ॥
तत्राश्रमपदं पुण्यमृषीणां भावितात्मनाम् । बहुवर्षसहस्राणि तप्यतां परमं तपः ॥ ६ ॥
तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमम् । ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥ ७ ॥
कस्यायमाश्रमः पुण्यः को न्वस्मिन्वसते पुमान् । भगवञ्छ्रोतुमिच्छावः परं कौतूहलं हि नौ ॥ ८ ॥
तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुंगवः । अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ॥ ९ ॥

यदुत्तिष्ठाब्जपत्राक्ष विष्णोर्देक्ष्याम्यहं मुखम् ' उत्तिष्ठ निद्राश्रीरवलोकिता प्रबोधश्रियमप्यवलोकितुमिच्छामि नरशार्दूल नरश्रेष्ठ नरश्रेष्ठतया भवता भवतापि सन्ध्योपास्या ' यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ' इत्युक्तेः । उत्तिष्ठ नरशार्दूल आश्रितविरोधिनिरसनशीलस्य किं निद्रावकाशोऽप्यस्ति नरशार्दूल मयज्ञनिर्वाहक । उत्थानप्रयोजनमाह-कर्तव्यं दैवमाह्निकं देवेन सर्वेश्वरेण विहितं नित्यकर्म कर्तव्यम् यद्वा देवशब्दो भवदर्थकः भवदीयमाह्निकं भवदाज्ञारूपं कर्म मया कर्तव्यं तत्स्वीकुर्वित्यर्थः । यद्वा देवं देवाराधनभूतमाह्निकमह्ना निर्वर्त्यमेकस्तुत्यात्मकं कर्म यज्ञात्मकं कर्तव्यमित्यर्थः ॥ २ ॥

३] ति० टी०-स्नात्वा कृतोदकौ कृतार्घ्यदानौ इदं तावत्पर्यन्तकर्तव्यक्रियामात्रोपलक्षणम् । परमं जपं सावित्रीम् ॥३॥

रा० टी०-तस्येति । तस्य प्रसिद्धस्य ऋषेः विश्वामित्रस्य परमोदारं वचो वचनं श्रुत्वा स्नात्वा कृतोदकौ कृतमुदकमुदकसंबन्ध्यर्घप्रदानादिकं याभ्यां तौ वीरौ नरोत्तमौ रामलक्ष्मणौ परमं सर्वश्रेष्ठं जपं जपनीयं गायत्र्यादि जेपतुः ॥ ३ ॥

गो० टी०-तस्येति । परमोदारं परमगम्भीरमित्यर्थः कृतोदकौ कृतार्घ्यप्रक्षेपौ यद्वा कृतदेवर्षितर्पणौ जप्यत इति जपः गायत्रीमिति यावत् । तस्या एव परमत्वात् 'न सावित्र्याः परं जप्यम्' इति वचनात् ॥ ३ ॥

४] ति० टी०-अभितस्थतुः संमुखौ स्थितावित्यर्थः ॥४॥

रा० टी०-कृताह्निकाविति । कृताह्निकौ संपादितपूर्वसंध्याकर्माणौ महावीर्यौ समातिशयरहितवीर्यविशिष्टौ अभिसंहृष्टौ नित्यानन्दविशिष्टौ रामलक्ष्मणौ तपोधनं विश्वामित्रमभिवाद्य प्रणम्य गमनाय गमनं कर्तुमुपतस्थतुः गुरोराज्ञां प्राप्य जग्मतुरित्यर्थः ॥ ४ ॥

गो० टी०-कृतेति । अह्नि भवमाह्निकम् "कालाट्ठञ्" कृतप्रातःकृत्याविति यर्थः सन्ध्योपासनब्रह्मयज्ञसमिदाधानादि प्रातःकृत्यानि अभितस्थतुः अभिमुखं स्थितौ ॥ ४ ॥

५] ति० टी०-प्रयान्तौ गच्छन्तौ ॥ ५ ॥

रा० टी०-ताविति । तदा तस्मिन्काले प्रयातौ तस्मात्स्थानादुरुणा सह प्रचलितौ महावीर्यौ रामलक्ष्मणौ तत्र प्रसिद्धे शुभे सकलमङ्गलमूले सरय्वाः संगमे सरयूगङ्गासंगमप्रदेशसमीपे दिव्यां प्राकृतविलक्षणां त्रिपथगां नदीं ददृशाते ॥५॥

गो० टी०-ताविति । ततस्तस्मादेशात् प्रयातौ तत्र प्रसिद्धे सरय्वाः संगमे त्रिपथगां गङ्गानदीं ददृशाते ॥ ५ ॥

६] ति० टी०-तत्र गङ्गासरयूसंगमप्रदेशे तप्यतां तपताम् यक्छान्दसः ऋषीणामाश्रमपदं ददृशाते इत्यनुकर्षः ॥ ६ ॥

रा० टी०-तत्रेति । बहुवर्षसहस्राणि परमं तपस्तप्यतां तपतामत एव उग्रतेजसामृषीणामाश्रमपदं श्रमनिवर्तकस्थानं तत्र गङ्गासरयूसंगमसमीपे ददृशाते इत्यनुकृष्यते संज्ञापूर्वकविधेरनित्यत्वात्र परस्मैपदम् ॥ ६ ॥

गो० टी०-तत्रेति । तत्र गङ्गासरय्वोः संगमे ददृशाते इत्यनुपज्यते तप्यतां तपतां कर्तरि यक्छान्दसः ॥ ६ ॥

७] ति टी०-तं परमरमणीयम् ॥ ७ ॥

रा० टी०-तमिति । पुण्यं तमाश्रमं स्थानं दृष्ट्वा परमप्रीतौ राघवौ रामलक्ष्मणौ महात्मानं तं विश्वामित्रमिदं वक्ष्यमाणं वचः ऊचतुः ॥ ७ ॥

गो० टी०-तमिति । स्पष्टम् ॥ ७ ॥

८] ति० टी०-वसते वसति तङ् छान्दसः ॥ ८ ॥

रा० टी०-तद्वचनमेवाह-कस्येति । हे भगवन् पुण्यः निर्मलः अयमाश्रमः कस्य अस्मिन्नाश्रमे कः पुमान्वसते वसति इति श्रोतुमावामिच्छावः तत्र हेतुः नौ आवयोः परं कौतूहलमाश्चर्यं भातीति शेषः । हुरित्यर्थे हेर्हेतौ ॥ ८ ॥

गो० टी०-कस्येति । वसते वसति ॥ ८ ॥

९] ति० टी०-प्रहस्य बालकवचनश्रवणजसंतोषाढ्यासः सर्वज्ञोऽप्येवं नाट्यतीति वा यस्य पूर्वो यस्य पूर्वकालाधिष्ठेयोऽभूत्स श्रूयतामित्यन्वयः ॥ ९ ॥

रा० टी०-तयोरिति । तयोः रामलक्ष्मणयोः तत्प्रश्नरूपं वचनं श्रुत्वा प्रहस्य मुनिपुंगवो विश्वामित्रः अब्रवीत् तद्वचनमेवाह-हे राम ! यस्यायं पूर्व आश्रमः सः श्रूयताम् ॥ ९ ॥

गो० टी०-तयोरिति । प्रश्नमाधुर्यात् प्रहासः यद्वा मानुषभावनटनात् यस्यायमाश्रमः स श्रूयतामिति योजना रामेति संबोधनं प्राधान्यात् ॥ ९ ॥

१ प्रयाताविति गो. रा. पाठः । २ उग्रतेजसामिति गो. रा. पाठः ।

कन्दर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः । तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ॥ १० ॥
कृतोद्वाहं तु देवेशं गच्छन्तं समरुद्गणम् । धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥ ११ ॥
अवध्यातश्च रुद्रेण चक्षुषा रघुनन्दन । व्यशीर्यन्त शरीरात्स्वात्सर्वगात्राणि दुर्मतेः ॥ १२ ॥
तत्र गात्रं हतं तस्य निर्दग्धस्य महात्मनः । अशरीरः कृतः कामः कोधादेवेश्वरेण ह ॥ १३ ॥
अनङ्ग इति विख्यातस्तदाप्रभृति राघव । स चाङ्गविषयः श्रीमान्यत्राङ्गं स मुमोच ह ॥ १४ ॥
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा । शिष्या धर्मपरा वीर तेषां पापं न विद्यते ॥ १५ ॥

१०] ति० टी०—मूर्तिमान्छरीरधरः समाहितं समाहितचित्तं स्थाणुं रुद्रम् ॥ १० ॥

११] ति० टी०—कृतोद्वाहं समाधेः कृतव्युत्थानं काकोचितविलासदेशं गच्छन्तं देवेशं दुर्मेधाः कामो धर्षयामास चित्तविकारोत्पादनेनाभिभूतवान् ततो महात्मना रुद्रेण ज्ञातापराधेन हुंकृतः चक्षुषावध्यातो दृष्टश्चेत्युत्तरेणान्वयः ॥ ११ ॥

रा० टी०—कन्दर्प इति । बुधैः यः काम इत्युच्यते स कन्दर्पः मूर्तिमानासीत् यद्वा यः कामः कन्दर्पः परमसुखहेतुगर्वविशिष्टो मूर्तिमानासीदिति बुधैरुच्यते सः दुर्मेधा इहाश्रमे तपस्यन्तं तप आचरन्तं समरुद्गणं तपःकुर्वत्पार्वतीविवाहप्रार्थनामनस्कमरुद्गणसहितं कृतोद्वाहं कृतः उदि नराकृतिद्विधुजपरमात्मरघुनाथविचारे वाहः प्रयत्नो येन अत एव देवेशं ब्रह्मादित्रिदेवनियन्तारमप्रकटितमवन्तं गच्छन्तं स्वाश्रितेभ्यो बोधयन्तमत एव नियमेन समाहितं नियमपूर्वकसम्यक्स्थितिविशिष्टं स्थाणुं महेश्वरं धर्षयामास चित्तविकारोत्पादनद्वारा धर्षणं चकार ततो महात्मना महेश्वरेण स हुंकृतः द्वयोरेकत्रान्वयः चकारस्तत इत्यर्थे । किंच दर्पशब्दो दृप्ताथैकः कमिति सुखार्थकं स्थाणुविशेषणम् अन्यत्समानम् हुंकृतश्च महात्मना इत्येतदपे 'अवध्यातश्च रुद्रेण चक्षुषा रघुनन्दन' इत्यर्धश्लोको भट्टसंमतः । उत्शब्दस्य परमात्मवाचकत्वमुपनिषत्सु प्रसिद्धम् तदर्थस्तु उद्यते तात्पर्यरूप्या वेदैः प्रतिपाद्यते असाविति प्रयत्नार्थकवाहधातोर्भावे घञ् । गमो बोधनार्थकत्वं तु गमिरबोधने इत्यादिव्याख्याने स्पष्टम् ॥ १० ॥ ११ ॥

गो० टी०—कन्दर्प इत्यर्धम् । यः काम इत्युच्यते स कन्दर्पः पुरा मूर्तिमानासीत् ॥ १० ॥

गो० टी०—तपस्यन्तमिति सार्धश्लोकः । तपस्यन्तं तपश्चरन्तम् "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति क्यङ् । इहाश्रमे तपस्यन्तं नियमेन अविच्छेदेन समाहितं समाधिमन्तं कृतोद्वाहं कृतपार्वतीपरिणयं गच्छन्तं शुश्रूषणार्थं पार्वतीं प्राप्नुवन्तं देवेशं स्थाणुं रुद्रं दुर्मेधाः कामो धर्षयामास कृतोद्वाहमिति क्रियाविशेषणम् यदा अयं कृतोद्वाहो भवति तदा तं पार्वत्यां साभिलाषचित्तमकरोदित्यर्थः समरुद्गणमित्यपि क्रियाविशेषणं तदनुमतिपूर्वकमित्यर्थः महात्मना हुंकृतश्चासीत् ॥ ११ ॥

१२] ति० टी०—व्यशीर्यन्त विशीर्णानि सर्वेऽवयवाः ॥ १२ ॥

रा० टी०—अथेति । हे रघुनन्दन अथ हुंकारानन्तरं रुद्रेण चक्षुषा दग्धः काम इति शेषः अत एव दुर्मतेः कामस्य स्वात्स्वकीयाच्छरीरादवयवसमूहात्सर्वगात्राणि व्यशीर्यन्त गात्रशब्दोऽवयवपरः किंच शरे शिवतपोनिष्टत्तये ईरः कम्पनानुकूलो व्यापारः तस्माद्धेतोः रुद्रेण दग्धः शेषं पूर्ववत् ॥ १२ ॥

गो० टी०—अवदग्धस्येति । व्यशीर्यन्त विशीर्णानि शृहिंसायां कर्तरि श्यन् ॥ १२ ॥

१३] ति० टी०—तत्र प्रसिद्धतरेऽस्मिन्नाश्रमे हतं नष्टम् । हशब्दः प्रसिद्धौ ॥ १३ ॥

रा० टी०—तत्रेति । तत्र तदा महात्मना महेश्वरेण निर्दग्धस्य तस्य कामस्य गात्रं हतं विनष्टं निर्दग्धम् । ह अनेन प्रकारेण देवेश्वरेण क्रोधात्कामः अशरीरः शरीररहितः कृतः ॥ १३ ॥

गो० टी०—तस्येति । तत्र तदा महात्मना निर्दग्धस्य शरीरं हतमतः कामोऽशरीरः कृतः ॥ १३ ॥

१४] ति० टी०—ततो भयात्पलायमानो यत्र देशे स कामोऽङ्गं मुमोच सोऽङ्गविषयोऽङ्गदेश इति विख्यात इति शेषः ॥ १४ ॥

रा० टी०—अनङ्गेति । हे राघव तदाप्रभृति कामदेहपातादारभ्य कामः अनङ्ग इति विख्यातः अनङ्ग इति नाम्ना प्रसिद्धः स कामः यत्राङ्गं मुमोच स श्रीमान् संपत्तिविशिष्टअङ्गविषयः अङ्गदेश इतिविख्यातः हशब्दः इतिविख्यात इत्यनुकर्षणार्थः ॥ १४ ॥

गो० टी०—अनङ्गइति । कामस्तदाप्रभृति अनङ्ग इति विख्यातः सोऽङ्गविषयः अङ्गदेशश्च विख्यातः तत्र हेतुमाह—यत्रेति । यस्मात्कारणादत्र कामोऽङ्गं मुमोच तस्मादयं देशोऽङ्ग इयुच्यत इत्यर्थः ॥ १४ ॥

१५] ति० टी०—तस्य स्थाणोः इमे मुनय इदानीमिह तपस्यन्तः तस्य रुद्रस्य पुरा पूर्वकालसन्तानपरंपरया शिष्याः अत एव धर्मपराः अत एव तेषां पापं न विद्यते ॥ १५ ॥

रा० टी०—तस्येति । हे वीर तस्य महेश्वरस्य पुण्यः पुण्यजनकः अयमाश्रमः पुरा पूर्वकालतो विद्यमानाः इमे मुनयः तस्य महेश्वरस्य शिष्याः अत एव धर्मपराः अत एव तेषां मुनीनां पापं न विद्यते ॥ १५ ॥

१ अवदग्धस्य रौद्रेणेति गो. अथ दग्धस्तु रुद्रेणेति रा. पाठः ।

इहाद्य रजनीं राम वसेम शुभदर्शन । पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥ १६ ॥
अभिगच्छामहे सर्वे शुचयः पुण्यमाश्रमम् । इह वासः परोऽस्माकं सुखं वत्स्यामहे निशाम्॥ १७ ॥
स्नाताश्च कृतजप्याश्च हुतहव्या नरोत्तम । तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ॥ १७ ॥
विज्ञाय परमप्रीता मुनयो हर्षमागमन् । अर्घ्यं पाद्यं तथातिथ्यं निवेद्य कुशिकात्मजे ॥ १९ ॥
रामलक्ष्मणयोः पश्चादकुर्वन्नतिथिक्रियाम् । सत्कारं समनुप्राप्य कथाभिरभिरञ्जयन् ॥ २० ॥
यथार्हमजपन्सन्ध्यामृषयस्ते समाहिताः । तत्र वासिभिरानीता मुनिभिः सुव्रतैः सह ॥ २१ ॥

गो० टी०– तस्येति । तस्य कामस्य स्थाणोर्वा अयमाश्रमः इमे मुनयः तस्य पुरा पूर्वकालमारभ्य सन्तानपरंपरया शिष्याः अत एव धर्मपराः अत एव च तेषां पापं न विद्यते पूर्वं रुद्रशिष्या अपि संप्रति तच्छिष्यत्वकृतपापं न विद्यते इत्यर्थः एतेन प्रश्नद्वयस्याप्युत्तरमुक्तम् । हिमवति तपस्यन्तं कामोऽधर्षयदित्युक्तिः पुराणान्तरे कल्पान्तरमपेक्ष्य ॥ १५ ॥

१६] ति० टी०–सरितोर्गङ्गासरय्वोः ॥ १६ ॥

रा० टी०–इहेति । हे शुभदर्शन हे राम पुण्ययोः सरितोः सरयूगङ्गयोर्मध्ये इह शिवाश्रमे अद्य रजनीं वयं वत्स्यामः श्वस्तरिष्यामहे तरिष्यामः गङ्गामिति शेषः अनद्यतनत्वस्याविवक्षायां लृट्प्रयोगः ॥ १६ ॥

गो० टी०–इहेति । इह अङ्गविषये तरिष्यामहे गङ्गामिति शेषः ॥ १६ ॥

१७] ति० टी०–स्नानादिना शुचयो भूत्वा पुण्यमाश्रममभिगच्छामहे व्यत्ययात्तङ् हे इति पृथक्पदं वा परो युक्ततरः ॥ १७ ॥

रा० टी०–स्नानादिकं कृत्वा निवासार्थमाश्रमो गन्तव्य इत्याह–अभीति । शुचयः कृतस्नानादिक्रियाः सर्वे वयं पुण्यमाश्रममभिगच्छामहे अभिगच्छामः इहाश्रमेऽस्माकं वासः परः अत्युत्कृष्टः अतः हे नरोत्तम स्नाताः कृतजप्याः हुतहव्याश्च वयं निशां सुखमेव वत्स्यामहे वत्स्याम । अभिगच्छामहे इत्यत्र वर्तमानसामीप्ये भविष्यति काले लट् ॥ १७ ॥

गो० टी०–अभीति । स्नाताः अत एव शुचयो भूत्वा पुण्यमाश्रममभिगच्छामहे व्यत्ययात्तङ् ॥ १७ ॥

१८] ति० टी०–स्नाता इत्यादीनि तदाश्रममुनिविशेषणानि तेषां संवदतां तेषु संवदत्सु तानदृष्ट्वापि तपोमहिमजातदीर्घत्ववताऽत एव विप्रकृष्टार्थग्राहिणा चक्षुषा रामाद्यागमनं विज्ञायेत्युत्तरेणान्वयः ॥ १८ ॥

रा० टी०–विश्वामित्रदर्शनेन तेषां हर्षो जात इत्याह–तेषामिति । तत्र संवदतां तेषां विश्वामित्रादीनां तपोदीर्घेण चक्षुषा तपःप्राप्तविप्रकृष्टवस्तुदर्शननेत्रेण विज्ञाय परमप्रीताः रामादिविषयकपरमप्रीतिविशिष्टा मुनयो हर्षं परमानन्दमागमन् प्रापुः संवदतामित्यत्र षष्ठी कर्मणः शेषत्वविवक्षया ॥ १८ ॥

गो० टी०–तेषामिति । तेषां संवदतां तेषु संवदत्सु तपसा दीर्घेण विप्रकृष्टार्थग्रहणसमर्थेन चक्षुषा ज्ञानेन विज्ञाय दृष्ट्वा तेषामागमनं तादृक्कादिनिरासनिमित्तं तपोजन्यज्ञानेन विदित्वेत्यर्थः । हर्षं हर्षपुलकम् ॥ १८ ॥

१९] ति० टी०–आतिथ्यमतिथ्यर्हं भोजनादि ॥ १९ ॥

रा० टी०–ततो रामादीनां समीपे प्राप्त ऋषीणां कृत्यमाह–अर्घ्यमिति । कुशिकात्मजे विश्वामित्रे अर्घ्यादिकं निवेद्य पश्चात् रामलक्ष्मणयोः अतिथिक्रियामकुर्वन् ॥ १९ ॥

गो० टी०–अर्घ्यमिति । अर्घं पूजार्थमुदकं पाद्यं पादार्थं मुदकम् " पादार्घाभ्यां च " इति यत् प्रत्ययः । आतिथ्यमाचमनीयपूर्वकं भोज्यप्रदानम् अतिथिक्रियामतिथिपूजाम् ॥ १९ ॥

२०] ति० टी०–पश्चाद्भगवतोऽपि मनुष्यरूपधारित्वेन विश्वामित्रे गुरुत्वनाटनेन चादौ विश्वामित्रेऽर्घ्यादि दत्त्वा पश्चाद्रामे ददुः अभ्यरञ्जयन् अडभाव आर्षः तदाश्रमस्थाऋषीनिति शेषः यद्वा सत्कारं समनुप्राप्य तं प्राप्य्य विश्वामित्रादींस्तदाश्रमस्था ऋषयोऽभ्यरञ्जयन्नित्यर्थः ॥ २० ॥

रा० टी०–सत्कारमिति । समाहिताः एकाग्रचित्तास्ते परस्परसंमिलिताः मुनयो विश्वामित्रस्तत्रत्याश्च कृतसत्कारं परस्परकृतसत्कृतिं समनुप्राप्य सम्यग् लब्ध्वा कथाभिः रामस्वभावादिवर्णनैः अभिरञ्जयन् परस्परमनुरागमुदपादयन् आगमशास्त्रस्यानित्यत्वादड्विरहः अनन्तरं ते सर्वे मुनयः यथार्हं यथायोग्यं संध्यामजपन् संध्यासंबन्धिजपादिकमकुर्वन् उपलक्षणविधया रामलक्ष्मणयोरपि सांध्यप्रवृत्तिर्बोध्या ॥ २० ॥

गो० टी०–सत्कारमिति । सत्कारं कुशलप्रश्नादिकं विश्वामित्रात्समनुप्राप्य अभिरञ्जयन् अभ्यरञ्जयन् अतिथिभूतानिति शेषः क्रमेण सायं संध्यागमे सति ते तद्वासिनो विश्वामित्रादयश्च छत्रिन्यायेन ऋषय इत्युक्तम् समाहिताः अनन्यपराः संध्यामहोरात्रयोः सन्धिम् अत्यन्तसंयोगे द्वितीया यथार्हं यथायोग्यं यथाशक्तीति यावत् 'सहस्रपरमां देवीं शतमध्यां दशावराम्' इति वचनात् अजपन् गायत्रीमिति शेषः ॥२०॥

२१] ति० टी०–अजपन्नदीतीरे ते विश्वामित्राद्या ऋषयश्च तद्वासिभिर्मुनिभिः सह स्वसंहितेनानीताः संवेशनाय स्वाश्रमं प्रापिताः ॥ २१ ॥

रा० टी०–तत्रेति । तदा तस्मिन्काले तत्र वासिभिः

१ वत्स्याम इति रा. पाठः ।

न्यवसत्स सुखं तत्र कामाश्रमपदे तथा । कथाभिरभिरामाभिरभिरामौ नृपात्मजौ ॥
रमयामास धर्मात्मा कौशिको मुनिपुंगवः ॥ ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ।

विश्वामित्रकृतसरयूवर्णनम्, ताटकावृत्तनिवेदनम्, तद्वधसूचनं च ।

ततः प्रभाते विमले कृताह्निकमरिन्दमौ । विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ ॥ १ ॥
ते चै सर्वे महात्मानो मुनयः संशितव्रताः । उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन् ॥ २ ॥
आरोहतु भवान्नावं राजपुत्रपुरस्कृतः । अरिष्टं गच्छ पन्थानं मा भूत्कालस्य पर्ययः ॥ ३ ॥
विश्वामित्रस्तथेत्युक्त्वा तानृषीन्प्रतिपूज्य च । ततार सहितस्ताभ्यां सरितं सागरंगमाम् ॥ ४ ॥

सुव्रतैः शोभनव्रतशीलैः मुनिभिः आनीताः विश्वामित्रादयः तत्र तस्मिन् कामाश्रमपदे सुसुखं यथा स्यात्तथा सह न्यवसन् ॥२१॥

गो० टी०–तत्रेति । आनीताः निद्रायै स्वाश्रमं प्रापिताः कामाश्रमपदे कामदाहात्कामाश्रमनामकस्य पदे स्थाने ॥ २१ ॥

२२] ति० टी०–कामाश्रमपदे सर्वकामपरिपूरके भगाश्रमे ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०–कथाभिरिति । धर्मात्मा धर्मशीलः मुनिपुंगवः कौशिको विश्वामित्रः अभिरामौ परमानन्ददातारौ नृपात्मजौ रामलक्ष्मणौ अभिरामाभिः कथाभिः पुण्यश्लोकचरितप्रतिपादकप्रबन्धैः रमयामास ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ त्रयोविंशः सर्गः ॥ २३ ॥

गो० टी०–कथाभिरिति । कथाभिः तदाश्रमवैभवपराभिः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

१] ति० टी०–तत इति । नद्या गङ्गायाः ॥ १ ॥

रा० टी०–निवासानन्तरकालिकं वृत्तमाह–तत इति । प्रभाते प्रातःकाले विमले समूलमलनिवर्तकगङ्गाजले कृताह्निकं येन तं विश्वामित्रं पुरस्कृत्य अरिंदमौ रामलक्ष्मणौ ततः मदेश्वराश्रमात् नद्याः गङ्गायाः तीरमुपागतौ प्राप्तौ पूर्वमाश्रमसमीपघट्टे स्नानादिक्रियाः निर्वर्त्य तरणार्थं तरणघट्टे समायाता इत्यर्थः ॥ १ ॥

गो० टी०–एवं कामाश्रमपदं रामचरणनलिनविन्यासेन कृतार्थीकृत्य ताटकावनमपि निष्कलमपीकर्तुं रामं प्रापयति मुनिश्चतुर्विंशे–तत इत्यादि । विमले सूर्योदये इत्यर्थः । नद्याः गङ्गायाः ॥ १ ॥

२] ति० टी०–उपस्थाप्यानाय्य ॥ २ ॥

रा० टी०–ते इति । अथानन्तरमेव महात्मानः पूजनीयस्वरूपाः संशितव्रताः ते उग्राश्रमनिवासिनः सर्वे मुनयः शुभां दृढां नावमुपस्थाप्य तत्संमुखं प्रापय्य विश्वामित्रमब्रुवन् तुशब्द एवार्थे ॥ २ ॥

गो० टी०–ते चेति । उपस्थाप्य आनाय्य ॥ २ ॥

३] ति० टी०–राजपुत्रपुरस्कृत इति तृतीयातत्पुरुषः तीर्त्वेति शेषः अरिष्टं शुभं यथा भवति तथा रिषेर्हिंसार्थत्वात् ॥ ३ ॥

रा० टी०–तदुक्तिमाह–आरोहत्विति । राजपुत्रपुरस्कृतः राजपुत्राग्रेसरः भवान् शुभां नावमारोहतु अरिष्टं निर्विघ्नं यथा भवति तथा पन्थानं त्वं गच्छ कालविपर्ययः कालविलम्बो माभूत् ॥ ३ ॥

गो० टी०–आरोहत्विति । राजपुत्राभ्यां पुरस्कृतः पूजितः । ताटकावधाभिप्रायेणाहुः–अरिष्टमिति । अरिष्टं शुभं यथा भवति तथा 'अरिष्टं पापशुभयोः' इति हलायुधः कालविपर्ययः कालविलम्ब इति यावत् ॥ ३ ॥

४] ति० टी०–ततार तर्तुमुपक्रान्तः सरितं गङ्गाम् सागरं गच्छति जलपूर्णत्वरूपस्वरूपं प्रापयति ताम् अन्तर्भावितण्यर्थः अगस्त्यशोषितस्य समुद्रस्य गङ्गया पूरणं कृतमिति प्रसिद्धेः ॥ ४ ॥

रा० टी०–विश्वामित्र इति । ताभ्यां रामलक्ष्मणाभ्यां सहितो विश्वामित्रः तथा इत्युक्त्वा तान् ऋषीन् अभिपूज्य सत्कृत्य च सागरंगमां सरितं गङ्गां ततार तरितुमारेभे ॥ ४ ॥

गो० टी०–विश्वामित्र इति । ततार तरितुं प्रवृत्तः सरितं गङ्गां सागरं गच्छतीति सागरंगमां खश्प्रकरणे "गमेः सुप्युपसंख्यानम्" इति खश् ॥ ४ ॥

१ ते तु सर्वे इति रा. पाठः । २ शुभां नावमिति गो. रा. पाठः । ३ कालविपर्यय इति गो. रा. पाठः । ४ नभिपूज्येति गो. रा. पाठः ।

तत्र शुश्राव वै शब्दं तोयसंरम्भवर्धितम् । मध्यमागम्य तोयस्य तस्य शब्दस्य निश्चयम् ॥ ५ ॥
ज्ञातुकामो महातेजाः सह रामः कनीयसा । अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुंगवम् ॥ ६ ॥
वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिः । राघवस्य वचः श्रुत्वा कौतूहलसमन्वितम् ॥ ७ ॥
कथयामास धर्मात्मा तस्य शब्दस्य निश्चयम् । कैलासपर्वते राम मनसा निर्मितं परम् ॥ ८ ॥
ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः । तस्मात्सुस्राव सरसः सायोध्यामुपगूहते ॥ ९ ॥
सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता । तस्यायमतुलः शब्दो जाह्नवीमभिवर्तते ॥ १० ॥

५] ति० टी०–तोयसंरम्भेण परस्परं तरङ्गसंघट्टक्षोभेण वर्धितमतिप्रवृद्धम् । निश्चयं सहज औपाधिको वेत्येतदन्यतरनिश्चयम् ॥ ५ ॥

रा० टी०–तत इति । अतिसंरम्भवर्धितमतिसंरम्भेण परस्परसंघट्टजनितक्षोभेण वर्धितं तोयस्य शब्दं मध्ये आगम्य कनीयसा लक्ष्मणेन सह महातेजा रामः शुश्राव ततः श्रवणानन्तरमेव तस्य शब्दस्य निश्चयमेतत्कारणकोयं शब्द इति ज्ञातुकामो मुनिपुंगवमृषिश्रेष्ठमथ पप्रच्छ मङ्गलप्रश्नं चकार श्लोकद्वयमेकान्वयि वैशब्द एवार्थे ॥ ५ ॥ ६ ॥

गो० टी०–तत इति । अतिसंरम्भेण तरङ्गपरम्परसंघट्टजक्षोभेण वर्धितमतिप्रवृद्धम् ॥ ५ ॥

६] ति० टी०–ज्ञातुकाम इत्यस्य जात इति शेषः ॥ ६ ॥

गो० टी०–अथेति । भिद्यमानस्य परस्परं मिलितस्य वारिणः तुमुलः निबिडोऽयं ध्वनिः किं वारिसंभेदकृतः उतान्यकृतः इति प्रश्नः ॥ ६ ॥

७] ति० टी०–भिद्यमानस्य परस्परसंघट्टमानस्य ॥ ७ ॥

रा० टी०–तत्प्रश्नमेवाह–वारिण इति । भिद्यमानस्य वारिणः अयं तुमुलः ध्वनिः किं किन्निमित्तक इत्यर्थः किमिति सामान्ये नपुंसकम् राघवस्येति कौतूहलसमन्वितं राघवस्य वचो वचनं धर्मात्मा विश्वामित्रः श्रुत्वा तस्य शब्दस्य निश्चयं निश्चयकारणं कथयामास ॥ ७ ॥

गो० टी०–राघवस्येति । निश्चयं कारणनिश्चयम् ॥ ७ ॥

८] ति० टी०–निश्चयं निश्चयजनकहेतुम् ॥ ८ ॥

रा० टी०–तत्कथनमेवाह–कैलासेति । हे नरशार्दूल हे राम । कैलासपर्वते ब्रह्मणा मनसा सरो निर्मितं तेन हेतुना इदं सरः मानसमित्युच्यते ॥ ८ ॥

गो० टी०–अस्य ध्वनेः कारणं वारिसंभेद एवेति वक्ष्यन्कस्या वारिण इति प्रक्ष्यतीति मत्वा सरय्वा इति वक्तुं सरयूवैभवमाह–कैलासेति । कैलासपर्वते कुबेरभवने ब्रह्मणा मनसा निर्मितं सरोऽस्ति तेन मनसा निर्मितत्वेन इदं सरः मानसमित्युच्यते ॥ ८ ॥

९] ति० टी०–तेन मनोनिर्मितत्वेन तस्मात्सरसो या सुस्राव सेत्यन्वयः ॥ ९ ॥

रा० टी०–तस्मादिति । ब्रह्मसरश्च्युता ब्रह्म ब्रह्मावयवस्तत्तेत्रं तदेव सरस्तस्माच्युता अत एव पुण्या परमपवित्रा सरःप्रवृत्ता सरसि ब्रह्मणा मनसा निर्मितसरोवरे प्रवृत्त प्रवर्तनं स्थितिरिति यावत् यस्याः सा अत एव सरयूः एतन्नाम्ना प्रसिद्धा तस्मान्मानससरसः सुस्राव सा सरयूः अयोध्यामुपगूहते तामालिङ्ग्य वहतीत्यर्थः । पूर्वं परमात्मनेत्रात्संभूतानन्तरं ब्रह्मणा स्वमानससरसि स्थापिता अनन्तरं तस्मात्सरसः पृथिव्यां समागतेति सरसि याति प्राप्नोति सरसो याति निर्गच्छति वेति सरयूरिति व्युत्पत्त्या सरयूशब्दवाच्यत्वं तस्याः। स्पष्टं चेदं पद्मपुराणादौ। ब्रह्मशब्देन ब्रह्मावयवग्रहणं तु पटावयवस्य रक्तत्वे पटो रक्त इत्यादिव्यवहारवदवगन्तव्यम्॥९॥

गो० टी०–तस्मादिति । उपगूहते आवृत्य प्रवहते अयोध्यायाः पश्चिमभागमारभ्य उत्तरदिग्भागेन पूर्वभागमागत्याङ्गदेशे गङ्गया सह युज्यते सरयूः तयोः नद्योः संभेदे स्थाप्वाश्रमः तस्मात् सरयूयुक्तगङ्गातरणदशायां सरयूजलमुन्नतात् भागीरथ्यां पततीति तस्य ध्वनिरिति ज्ञेयम् सरयूशब्दं निर्वक्ति–सर इति । सरसो यौतीति सरयूः (पाठान्तरं सरसो यातीति सरयूः) सकारस्य शकन्ध्वादित्वात्पररूपम् "ऊङुतः" इति स्त्रीप्रत्यय ऊकारः । कस्मात्सरसः प्रवृत्तेत्यत आह–ब्रह्मसरश्च्युतेति ॥ ९ ॥

१०] ति० टी०–सरसो यौति प्रवर्तत इति सरयूः सरःप्रवृत्तेति तद्योगनिर्वचनम् पुण्यत्वे हेतुर्ब्रह्मसरश्च्युतत्वम् तस्या अयम् सन्धिरार्षः या जाह्नवीमभिवर्तते तया सह संगच्छते तस्या अयं शब्द इत्यर्थः ॥ १० ॥

रा० टी०–तस्येति । तस्य सरय्वाः वारिसंक्षोभजः अतुलः तोलयितुमशक्यः अयं शब्दः जाह्नवीमभिवर्तते तच्छब्देन सह प्रवर्धते इत्यर्थः । अतः हे राम नियतः एकाग्रचित्तस्त्वं प्रणामं कुरु तस्येति सामान्ये नपुंसकम् ॥ १० ॥

गो० टी०–तस्येति । या गङ्गामभिवर्तते गङ्गया संयुज्यते अयमतुलः शब्दः तस्याः वारिसंक्षोभजः सन्धिरार्षः नियतः नियतमनस्कः सन् ताभ्यां नदीभ्यां प्रणामं कुरु कोऽयं ध्वनिरिति रामेण पृष्टे सरयूवारिसंघट्ट इति वक्तव्ये तदुत्पत्तिकथनं नन्तव्यत्वाय ॥ १० ॥

१ तत इति गो. रा. पाठः । २ अतिसंरंभेति गो. रा. पाठः । ३ एतस्मादारभ्य चरणद्वयं गो. नास्ति । ४ समन्वित इति गो. पाठः । ५ सर- इति गो. रा. पाठः ।

वारिसंक्षोभजो राम प्रणामं नियतः कुरु । ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्मिकौ॥ ११ ॥
तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ । स वनं घोरसंकाशं दृष्ट्वा नरवरात्मजः ॥ १२ ॥
अविप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुंगवम् । अहो वनमिदं दुर्गं झिल्लिकागणसंयुतम् ॥ १३ ॥
भैरवैः श्वापदैः कीर्णं शकुन्तैर्दारुणारवैः । नानाप्रकारैः शकुनैर्वाश्यद्भिर्भैरवस्वनैः ॥ १४ ॥
सिंहव्याघ्रवराहैश्च वारणैश्चापि शोभितम् । धवाश्वकर्णककुभैर्बिल्वतिन्दुकपाटलैः ॥ १५ ॥
संकीर्णं बदरीभिश्च किं न्विदं दारुणं वनम् । तमुवाच महातेजा विश्वामित्रो महामुनिः ॥ १६ ॥
श्रूयतां वत्स काकुत्स्थ यस्यैतद्दारुणं वनम् । एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम ॥ १७ ॥
मलदाश्च करूषाश्च देवनिर्माणनिर्मितौ । पुरा वृत्रवधे राम मलेन समभिप्लुतम् ॥ १८ ॥

११] ति० टी०–ताभ्यां सरयूगङ्गाभ्याम् ॥ ११ ॥

रा० टी०–ताभ्यामिति । अतिधार्मिकौ उभौ द्वौ तौ रामलक्ष्मणौ ताभ्यां गङ्गासरयूभ्यां प्रणामं कृत्वैव दक्षिणतीरमासाद्य प्राप्य लघुविक्रमौ शीघ्रपादविक्षेपौ सन्तौ जग्मतुः विश्वामित्रेण सह चक्रमतुः तुशब्द एवार्थे ॥ ११ ॥

गो० टी०– ताभ्यामिति । तीरं दक्षिणमिति नदीसंभेदे रात्रिमुषित्वा प्रातर्दक्षिणाभिमुखा गङ्गां तेरुः ततो गङ्गादक्षिणतीरे ताटकावनमिति ज्ञेयम् ॥ ११ ॥

१२] ति० टी०–विक्रमः पादविक्षेपः घोरसंकाशं भयंकरदर्शनम् ॥ १२ ॥

रा० टी०–स इति । ऐक्ष्वाकः इक्ष्वाकुकुलोद्भवः नरवरात्मजः राजपुत्रः स रामः घोरसंकाशं घोररूपमत एव अविप्रहतं संचाररहितत्वेन अक्षुण्णं वनं दृष्ट्वा मुनिपुंगवं विश्वामित्रं पप्रच्छ ॥ १२ ॥

गो० टी०–स इति । संकाशत इति संकाशः घोरसंकाशं घोररूपमिति यावत् अविप्रहतमक्षुण्णं जनसंचाररहितमित्यर्थः ॥ १२ ॥

१३] ति० टी०–अविप्रहतं सार्थगमागमाभावादक्षुण्णम् झिल्लिका कीटविशेषः ॥ १३ ॥

रा० टी०–तत्प्रश्नमेव वर्णयन्नाह–अहो इत्यादिभिः । झिल्लिकागणनादितं झिल्लिकानामन्तरिक्षस्थकीटविशेषाणां गणैः समूहैः नादितं भैरवैः भयंकरैः श्वापदैः कुटिलमृगैः पूर्णं दारुणैः कुटिलशब्दैः शकुन्तैः भाससंज्ञकजन्तुविशेषैः ‘ शकुन्तौ भाससपक्षिणौ. इत्यमरः पूर्णमत एव दुर्गमनवगाह्यमिदं वनमहो आश्चर्यम् ॥ १३ ॥

गो० टी०–अहो इत्यादिश्लोकत्रयम् । झिल्लिका भूतलान्तरितकीटविशेषः भैरवैः भयंकरैः श्वापदैः क्रूरमृगैः शकुन्तैः भासैः ‘शकुन्तौ भासपक्षिणौ’ इत्यमरः शकुनैः पक्षिभिःवाश्यद्भिः कुत्सितं शब्दायमानैः धवः अश्वकर्णः ककुभः मरुतिन्दुकः पाटलः इदं वनमेतादृशम् अहो इदं वनं दारुणं किं नु किंनामकमित्यन्वयः ॥ १३ ॥ १४ ॥ १५ ॥

१४] ति० टी०–भैरवैर्भयंकरैः । श्वापदानि दुष्टमृगाः दारुणारवैर्दारुणशब्दैः शकुन्तैर्भासैः शकुनैः सर्वपक्षिभिः भैरवस्वनैर्वाश्यद्भिरतिभैरवं शब्दं कुर्वद्भिः ॥ १४ ॥

रा० टी०–नानेति । भैरवैः स्वनैः वाश्यद्भिः नानाप्रकारैः अनेकजात्याकृतिविशिष्टैः शकुनैः पक्षिभिः सिंहादिभिश्चोपशोभितम् ॥ १४ ॥

१५] ति० टी०–शोभितं युक्तम् । धवादयो वृक्षविशेषाः१५

रा० टी०–धवेति । धवाश्वकर्णककुभैर्धवैः अश्वकर्णैः ककुभैश्च बिल्वकिंशुकैः पाटलैः बदरीभिश्च संकीर्णमेतदारुणं वनं किम् किंनामकं किंस्वामिकं चेत्यर्थः तुशब्दार्थे ॥ १५ ॥

१६] ति० टी०–किं नु कुतो नु ॥ १६ ॥

रा० टी०–तमिति । महातेजा महामुनिः विश्वामित्रः तं प्रश्नकर्तारं राममुवाच । तद्वचनमेवाह–हे वत्स हे काकुत्स्थ! यस्य एतद्दारुणं वनं स श्रूयताम् ॥ १६ ॥

गो० टी०–तमिति । एतद्दारुणं वनं यस्य प्राणिनः स श्रूयतामिति योजना ॥ १६ ॥

१७] ति० टी०–यस्य प्राणिनः स श्रूयतामित्यन्वयः । स्फीतौ समृद्धौ ॥ १७ ॥

रा० टी०–एताविति । हे नरोत्तम । स्फीतौ स्वच्छौ देवनिर्माणनिर्मितौ देवानां निर्माणं प्रयत्नस्तेन निर्मितौ एतौ प्रसिद्धौ मलदाः करूषाश्च जनपदौ पूर्वमेवास्ताम् मलदकरूषशब्दयोर्बहुत्वं दारशब्दादेरिव स्वभावसिद्धम् ॥ १७ ॥

गो० टी०–एताविति । स्फीतौ प्रवृद्धधनधान्यौ मलदाश्च करूशाश्च मलदकरूशनामधेयौ अवयवबहुत्वाद्बहुवचनं मत्स्याः पाञ्चाला इतिवत् देवनिर्माणेन देवनिर्माणतुल्यनिर्माणेन निर्मितौ देवलोकसमसंस्थानावित्यर्थः ॥ १७ ॥

१८] ति० टी०–मलदाः करूषा इति बहुवचनं शब्दस्वभावकृतम् । देवनिर्माणेन देवयत्नेन निर्मितौ मलेनाशुच्याचारेण ॥ १८ ॥

रा० टी०–पुरेति । हे राम ! वृत्रवधे जाते पुरा पूर्वं मलेन पापेन क्षुधा च समभिप्लुतं व्याप्तं सहस्राक्षमिन्द्रं ब्रह्म-

१ झिल्लिकेति रा. पाठः । २ नादितमिति गो. रा. पाठः । ३ पूर्णमिति गो. रा. पाठः । ४ दारुणैस्तैरिति रा. दारुणारुतरिति गो. पाठः । ५ किंशुकेति गो. रा. पाठः । ६ किंन्वेतदिति गो. किं त्वतादति रा. पाठः ।

क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत् । तमिन्द्रं मलिनं देवा ऋषयश्च तपोधनाः ॥ १९ ॥
कलशैः स्नापयामासुर्मलं चास्य प्रमोचयन् । इह भूम्यां मलं दत्त्वा देवैः कारूषमेव च ॥ २० ॥
शरीरजं महेन्द्रस्य ततो हर्षं प्रपेदिरे । निर्मला निष्करूषश्च शुद्ध इन्द्रो यथाभवत् ॥ २१ ॥
तेतो देशस्य सुप्रीतो वरं प्रादादनुत्तमम् । इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः॥ २२ ॥
मलदाश्च करूषाश्च ममाङ्गमलधारिणौ । साधुसाध्विति तं देवाः पाकशासनमब्रुवन्॥ २३ ॥
देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता । एतौ जनपदौ स्फीतौ दीर्घकालमरिन्दम ॥ २४ ॥
मलदाश्च करूषाश्च मुदिता धनधान्यतः । कस्यचित्त्वथ कालस्य यँक्षिणी कामरूपिणी॥ २५ ॥

हत्या समाविशत् । पूर्वं ब्रह्महत्याचिह्नं मलं क्षुधा च इन्द्रं प्राप पश्चात् स्वयं ब्रह्महत्या प्रत्यक्षतोऽदृश्यतेत्यर्थः ॥ १८ ॥

गो० टी०–मलदकरूशसंज्ञानिमित्तमाह–पुरेत्यादि । वृत्रवधे कृते सति मलेन अशुचित्वेन क्षुधा बुभुक्षया च समभिप्लुत व्याप्तमिन्द्रं ब्रह्महत्या समाविशत् ब्रह्महत्यावशेन मलक्षुधाविन्द्रस्याभूतामित्यर्थः ॥ १८ ॥

१९] ति० टी०–क्षुधा बुभुक्षया समभिप्लुतमित्यनुकृष्यते ब्रह्महत्या वृत्रस्य ब्रह्मसन्तानत्वात् देवा वस्वादयः ॥ १९ ॥

रा० टी०–तमिति । देवास्तपोधना ऋषयश्च अस्य इन्द्रस्य मलं तदुपलक्षितकरूषं च स्नापयन् निवर्तयितुं कलशैः प्रार्थितगङ्गाजलविशिष्टघटैः तं मलादिमन्तमिन्द्रं स्नापयामासुः । इहास्यां भूम्यां महेन्द्रस्य शरीरजं मलं कारूष्यं क्षुधं च दत्त्वा महेन्द्रस्य मलं मलिनता कारूष्यं च प्रमोचयन् प्रामोचयन् पूर्वस्नातेर्निवर्तनमर्थः । "लक्षणहेत्वोः क्रियायाः" इति शता व्यत्ययेनैकत्वम् ततोनन्तरं हर्षं प्रपेदिरे प्रापुः द्वयोरेकत्रान्वयः 'तमिन्द्रं मलिनं देवा' इति भट्टसंमतः पाठः दत्त्वा देवा इति च कारूष्यशब्दः स्वार्थष्यञन्तः ॥ १९ ॥ २० ॥

गो० टी०–तमिति । स्नापयन् गङ्गादितीर्थेषु स्नापयन् पुनर्मन्त्रपूतैः कलशैः कलशोदकैः स्नापयामासुः तेन स्नापनेनास्येन्द्रस्य मलं चकारात् कारूशं प्रमोचयन् प्रामोचयन्॥१९॥

२०] ति० टी०–कलशैर्गङ्गाजलपूर्णघटैः प्रमोचयन्प्रामोचयन् कारूषं क्षुत् दत्त्वा त्यक्त्वेत्यर्थः ॥ २० ॥

गो० टी०–इहेति । करूशमेव कारूशं स्थानप्रमाणात् क्षुधमित्यर्थः ॥ २० ॥

२१] ति० टी०–शरीरजमिति पूर्वान्वयि । प्रपेदिरे देवा इति शेषः ॥ २१ ॥

रा० टी०–निर्मल इति । निर्मलः निवृत्तमलिनताकः निष्करूषः निर्गतक्षुत्कः अत एव शुचिः ब्रह्महत्यादोषरहितश्च इन्द्रो यदाऽभवत्तदा सुप्रीतः प्रसन्नचित्तः प्रभुः समर्थः इन्द्रः देशस्य अनुत्तमं परमोत्कृष्टं वरं ददौ देशस्यैकत्वं जात्यभिप्रायेण ॥ २१ ॥

गो० टी०–निर्मल इति । शुचिः ब्रह्महत्यातः पूतः ॥२१॥

२२] ति० टी०–ततः तदेत्यर्थः ॥ २२ ॥

रा० टी०–तद्वरप्रदानमेवाह–इमाविति । ममाङ्गमलधारिणौ इमौ जनपदौ स्फीतौ प्रवृद्धौ सन्तौ लोके मलदाः करूपाश्चेति ख्यातिं गमिष्यत एव चशब्द एवार्थे ॥ २२ ॥

गो० टी०–वरमेवाह—इमाविति । मलं यति खण्डयतीति मलदः "अन्येभ्योऽपि दृश्यते" इति खच् । करूशमस्यास्तीति करूशः अङ्गमलधारिणौ करूशस्याप्युपलक्षणमिदम् एतौ ममाङ्गमलकरूशधारणान्मलदाः करूशाश्चेति ख्यातिं गमिष्यत इत्यर्थः ॥ २२ ॥

२३] ति० टी०–तस्मान्ममाङ्गमलधारिणौ तस्मात्ख्यातिं गमिष्यत इति पूर्वेणान्वयः ॥ २३ ॥

रा० टी०–साध्विति । धीमता शक्रेण इन्द्रेण कृतां तां प्रसिद्धां देशस्य पूजां वरप्रदानेन सत्कृतिं दृष्ट्वा ज्ञात्वा देवास्तं पाकशासनमिन्द्रं साधुसाध्वित्यब्रुवन् हर्षे वीप्सा देवा इति ऋषीणामप्युपलक्षकम् ॥ २३ ॥

गो० टी०–साध्विति । स्पष्टम् ॥ २३ ॥

२४] ति० टी०–शक्रेण कृता देशस्य पूजां दृष्ट्वा पाकशासनं साध्वित्यब्रुवन्निति पूर्वेणान्वयः ॥ २४ ॥

रा० टी०–एताविति । हे अरिंदम आश्रितारिनिवर्तक राम । स्फीतौ मलदाः करुषाश्चेतौ जनपदौ ततः प्रभृति दीर्घकालं धनधान्यतो मुदिता आसन्निति शेषः एकश्चकारः ततःप्रभृतीत्यर्थे ॥ २४ ॥

गो० टी०–एताविति । अत इत्यादावध्याहार्यम् ॥ २४ ॥

२५] ति० टी०–कस्यचित्कियतः कालस्य अपगम इति शेषः ॥ २५ ॥

रा० टी०–कस्यचिदिति । अथ इन्द्रवरप्रदानानन्तरं कस्यचित्कालस्यापगमे सतीति शेषः । कामरूपिणी ईप्सितरूपधारणसमर्था नागसहस्रस्य सहस्रसंख्यातगजस्य बलं धारयन्ती धीमतः सुन्दस्य भार्या यक्षी यक्षजाता शक्रपराक्रमः मारीचो राक्षसः यस्याः पुत्रः सा ताटका नाम अभूत् ते तुभ्यं भद्रं कल्याणमेव तदैव अस्मभ्यमपि भद्रं भवतु इति शेषः ।

१ स्नापयन्निति गो. रा. पाठः । २ दत्त्वा कारूष्यमिति रा. पाठः । ३ कारूशमिति गो. पाठः । ४ शुचिरिन्द्रो यदेति गो. रा. पाठः । ५ ददाविति गो. रा. पाठः । ६ प्रभुरिति गो. रा. पाठः । ७ यक्षी वै इति गो. रा. पाठः ।

बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत् । ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः॥ २६ ॥
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः । वृत्तबाहुर्महाशीर्षो विपुलास्यतनुर्महान् ॥ २७ ॥
राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः । इमौ जनपदौ नित्यं विनाशयति राघव ॥ २८ ॥
मलदांश्च करूषांश्च ताटका दुष्टचारिणी । सेयं पन्थानमावृत्य वसत्यर्ध्यर्धयोजने ॥ २९ ॥
अत एव च गन्तव्यं ताटकाया वनं यतः । स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ॥ ३० ॥
मन्त्रियोगादिमं देशं कुरु निष्कण्टकं पुनः । नहि कश्चिदिमं देशं शक्तो ह्यागन्तुमीदृशम्॥ ३१ ॥
यक्षिण्या घोरया राम उत्सादितमसह्यया । एतत्ते सर्वमाख्यातं यथैतदारुणं वनम् ॥
यक्ष्या चोत्सादितं सर्वमद्यापि न निवर्तते । ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

तस्याः भीतिस्ते माभूदित्यर्थः श्लोकद्वयमेकान्वयि वैशब्द एवार्थे हिः प्रसिद्धार्थः ॥ २५ ॥ २६ ॥

गो० टी०–एवं पालनीयत्वाय देशस्य पुण्यत्वमुक्त्वा तस्य दारुणत्वहेतुमाह–कस्यचिदिति अर्धत्रयम् । कस्मिंश्चित्काले गते सति तदा जन्मकाल एव नागसहस्रस्य गजसहस्रस्य बलं धारयन्ती ताटका नाम यक्षी अभूत् ते तुभ्यं भद्रमस्तु ताटकातो भयं माभूदित्यर्थः ॥ २५ ॥

२६–२८] ति० टी०–भद्रं त इति विश्वामित्रस्याशीर्वचनं बालकत्वेन तादृशयक्षिणीनामश्रवणेन त्रासो मा भूदिति यद्वा ताटका नाम ते भद्रं प्रथमशौर्यस्थानत्वेन शौर्यप्रसिद्धिकरत्वरूपं भद्रत्वमस्या इति बोध्यम् ॥ २६–२८ ॥

रा० टी०–वृत्तेति । वृत्तबाहुः वृत्तौ बाहू यस्य महाशीर्षः बृहच्छिरोविशिष्टः विपुलास्यतनुः विपुलास्ययुक्ता तनुर्यस्य महान् अत्युन्नतः भैरवाकारः भयंकराकारविशिष्टः भैरवसदृशो वा राक्षसो मारीचः प्रजाः नित्यं त्रासयते ॥ २७ ॥

रा० टी०–पुत्रकृतमुपद्रवं निवेद्य मातृकृतोपद्रवमाह–इमाविति । हे राघव ! दुष्टचारिणी ताटका इमौ प्रसिद्धौ मलदान् करूषाँश्च जनपदौ नित्यमेव विनाशयति एकश्चशब्द एवार्थे२८॥

गो० टी०–मारीच इत्यर्धम् ॥ २६ ॥

गो० टी०–वृत्तेति । अत्र य इति शेषः यः प्रजाः नित्यं त्रासयते स मारीचो यस्याः पुत्रः सा यक्षी अभूदिति पूर्वेणान्वयः ॥ २७ ॥

गो० टी०–अस्तु ताटका किं ततस्तत्राह–इमाविति२८

२९] ति० टी०–सेयं या विनाशयति सेत्यर्थः आवृत्य निरुध्य अर्धमतिक्रान्तमत्यर्धं तादृशे योजने ॥ २९ ॥

रा० टी०–सेयमिति । सा इयं ताटका पन्थानमावृत्य निरुध्यैव यतः अध्यर्धयोजने वसति अतस्ताटकायाः वनं गन्तव्यमेव ॥ २९ ॥

गो० टी०–सेयमिति । आवार्य आवृत्य यतः यस्मिन्मार्गे ताटकायाः वनम् अत एव मार्गेण गन्तव्यम् ॥ २९ ॥

३०] ति० टी०–यतश्चेदं ताटकावनमस्माभिर्गन्तव्यमत एव च हेतोर्हे राम स्वबाहुबलमाश्रित्येमां जहि ॥ ३० ॥

रा० टी०–तत्र गत्वा किं कर्तव्यमित्यत आह–स्वबाहुमिति । स्वबाहुबलमाश्रित्य संस्मृत्य मन्त्रियोगान्मदाज्ञातः दुष्टचारिणीमिमां ताटकां त्वं जहि ताडय तत्फलमाह इमं देशं पुनः निष्कण्टकं पीडारहितं कुरु मन्त्रियोगादित्युक्त्या स्त्रियं न हनिष्यामीति प्रत्युत्तरं त्वया न वक्तव्यमिति हेतुध्वेनितः ॥ ३०॥

गो० टी०–स्वेति । निष्कण्टकं निरुपद्रवम् ॥ ३० ॥

३१] ति० टी०–नन्वस्त्री कथं हन्तव्या तत्राह–मन्त्रियोगादिति । मदाज्ञया स्त्रीवधशङ्कां त्यज ईदृशं ताटकाऽऽक्रान्तम् ॥ ३१ ॥

रा० टी०–नहीति । ईदृशं रमणीयमिमं देशमागन्तुं कश्चित्पुरुषो नैव शक्नोति । तत्र हेतुः हे ! राम घोरया भयावहया असह्यया अन्यैः पराभवितुमशक्यया यक्षिण्या ताटकया उत्सादितं सर्वं पीडितम् । हिशब्द एवार्थे ॥ ३१ ॥

गो० टी०–नहीति। ईदृशमतीवपुण्यमसह्यया इतरैरजेयया॥

३२] ति० टी०–अद्यापि न निवर्तते अत्र पूर्वस्थितो जन इति शेषः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

रा० टी०–तदेवोपसंहरन्नाह–एतदिति । यथा येन प्रकारेण एतद्वनं दारुणमेतत्ते तुभ्यं सर्वं कथितम् तदेवाह यया यक्ष्या एतत्सर्वमुत्सादितं सा यक्षी अद्यापि न निवर्तते चकारेण पीडयति च या सेत्यध्याहृतम् ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

गो० टी०–एतदिति । यथा येन प्रकारेण दारुणं यथा च उत्सादितं निर्जनीकृतं यथा चोत्सादनान्न निवर्तते तदेतत्सर्वमाख्यातमिति योजना ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुर्विंशः सर्गः॥ २४॥

१ अध्यर्धेति गो. रा. पाठः । २ शक्तोत्यागन्तुमिति गो. रा. पाठः । ३ कथितं सर्वमिति रा. पाठः । ४ यदेतदिति रा. पाठः ।

पञ्चविंशः सर्गः ।

विश्वामित्ररामसंवादः, ताटकोत्पत्तिः, सुन्दाय ताटकादानम्, ताभ्यां मारीचोत्पत्तिः, मारीचं प्रत्यगस्त्यशापश्च, ताटकावधार्थं रामाय विश्वामित्रकृत प्रोत्साहनं च ।

अथ तस्याप्रमेयस्य मुनेर्वचनमुत्तमम् । श्रुत्वा पुरुषशार्दूलः प्रत्युवाच शुभां गिरम् ॥ १ ॥
अल्पवीर्या यदा यक्षी श्रूयते मुनिपुङ्गव । कथं नागसहस्रस्य धारयत्यबला बलम् ॥ २ ॥
इत्युक्तं वचनं श्रुत्वा राघवस्यामितौजसः । हर्षयञ्श्लक्ष्णया वाचा सलक्ष्मणमरिन्दमम् ॥ ३ ॥
विश्वामित्रोऽब्रवीद्वाक्यं शृणु येन बलोत्कटा । वरदानकृतं वीर्यं धारयत्यबला बलम् ॥ ४ ॥
पूर्वमासीन्महायक्षः सुकेतुर्नाम वीर्यवान् । अनपत्यः शुभाचारः स च तेपे महत्तपः ॥ ५ ॥
पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा । कन्यारत्नं ददौ राम ताटकां नाम नामतः ॥ ६ ॥
ददौ नागसहस्रस्य बलं चास्याः पितामहः । नत्वेव पुत्रं यक्षाय ददौ चासौ महायशाः ॥ ७ ॥
तां तु बालां विवर्धन्तीं रूपयौवनशालिनीम् । जम्भपुत्राय सुन्दाय ददौ भार्यां यशस्विनीम् ॥ ८ ॥

१] ति० टी०–अथेति । अप्रमेयस्याप्रमेयप्रभावस्य । शार्दूलः श्रेष्ठः ॥ १ ॥

रा० टी०–मुनिवचनश्रवणानन्तरकालिकं वृत्तमाह–अथेति । पुरुषशार्दूलः महापुरुषः अप्रमेयस्य इयत्तारहितप्रभावस्य तस्य मुनेः विश्वामित्रस्य अथ मङ्गलमूलमुत्तमं वचनं श्रुत्वा शुभां गिरं प्रत्युवाच ॥ १ ॥

गो० टी०–स्त्रियोपि सर्वलोकविनाशिन्या वधे न दोष इत्याह पञ्चविंशे–अथेत्यादि । अप्रमेयस्य अप्रमेयप्रभावस्य॥१॥

२–३] ति० टी०–यदा यतः यक्षी यक्षजातिः श्रूयते पुराणादाविति शेषः । अबलेति साभिप्रायम् ॥ २ ॥ ३ ॥

रा० टी०–तदुक्तिमेवाह–अल्पवीर्येति । हे मुनिपुंगव ! यदा यतः यक्षी ताटका अबला श्रूयते भवदुक्त्या ज्ञायते अतः अल्पवीर्या भवितुमर्हतीति शेषः । अतः नागसहस्रस्य बलं कथं धारयति ॥ २ ॥

रा० टी०–इतीति । अमितौजसः इयत्तारहितबलविशिष्टस्य राघवस्य इति अनेन प्रकारेण उक्तं वचनं श्रुत्वा येन हेतुना बलोत्कटा तं हेतुं त्वं शृणु इति वाक्यं विश्वामित्रोऽब्रवीत् । अमितौजस इत्यस्याग्रे ' हर्षयन् श्लक्ष्णया वाचा सलक्ष्मणमरिन्दमम् ' इत्यपि श्लोकार्धं क्वचिदृश्यते ॥ ३ ॥

गो० टी०–अल्पेति । यदा यस्मात् यदायत्रादयो हेतावपि मुनिभिः प्रयुज्यन्ते यस्माच्छ्रूयन्ते तस्मात् अबला स्त्री कथं नागसहस्रस्य बलं धारयति ॥ २ ॥

४] ति० टी०–वीर्यं शौर्यादि बलमात्रप्रभे वीर्याभिधानं शौर्यादयोऽन्येऽपि गुणास्तस्यां सन्तीति ज्ञापनार्थम् ॥४॥

रा० टी०–विश्वामित्रवाक्यमेवाह–वरेति । अबला ताटका वरदानकृतं बलं वीर्यं शौर्यं च धारयति । तद्वरप्रदानकारणमुपन्यस्यन्नाह–वीर्यवान् अतिवीर्यविशिष्टः अनपत्यः अपत्यरहितः शुभाचारः यथोक्ताचारविशिष्टः महायशः यः सुकेतुर्नाम पूर्वमेवासीत् सः महत्तपस्तेपे । चशब्द एवार्थे । अनपत्यस्तेपे इत्यनेन अपत्यार्थमेव तस्य तप इति ध्वनितम् ॥ ४ ॥

गो० टी०–विश्वामित्र इति । येन हेतुना बलोत्तरा भवति तं शृणु–तस्या वरदानकृतं वीर्यं बलमस्ति अतोऽबलापि बलं धारयति ॥ ३ ॥

५] ति० टी०–वरप्राप्तिमूलमाह–पूर्वमिति । तेपे पुत्रार्थम् पितामहमुद्दिश्येति शेषः ॥ ५ ॥

गो० टी०–वरदानप्रकारमाह–पूर्वमित्यादि ॥ ४ ॥

६] ति० टी०–कन्यारत्नं दिव्यरूपवतीं कन्याम् ॥ ६ ॥

रा० टी०–पिताम इति । हे राम ! तदा तपश्चरणसमये एव संप्रीतः पितामहस्ताटकां नाम कन्यारत्नं तस्य तपोनिरतस्य यक्षपतेः सुकेतोर्ददौ नामतः प्रसिद्धमेतत् । प्रथमान्तात्तसिः । तुशब्द एवार्थे । यक्षपतेरित्यत्र संबन्धसामान्ये षष्ठी ॥ ५ ॥

गो० टी०–पितामह इति । नाम प्रसिद्धौ ॥ ५ ॥

७] ति० टी०–तदभिसंहितगुणवता पुत्रेणात्यन्तं जनपीडा भवेदिति विचार्य पुत्रं न ददौ ॥ ७ ॥

रा० टी०–ददाविति । पितामहो ब्रह्मा अस्याः ताटकाया एव नागसहस्रस्य सहस्रसंख्याकगजस्य बलमिव बलं ददौ महायशाः ब्रह्मा यक्षाय सुकेतवे पुत्रं नैव ददौ । पुत्रं नैव ददावित्यनेनास्य पुत्रो यदि स्यात्तर्हि महान्तं लोकोपद्रवं करिष्यतीति हेतुः सूचितः । चशब्द इवार्थकः तुशब्द एवार्थकः ॥ ६ ॥

गो० टी०–ददाविति । यक्षाय सुकेतवे ॥ ६ ॥

८] ति० टी०–विवर्धन्तीं वर्धमानाम् । जम्भपुत्रायेत्यत्र ' खञ्जपुत्राय ' इति पाठे खञ्जोः पुत्रः खञ्जपुत्रः असुरयक्षयोर्देवयोनित्वेनोचितः संबन्धः ॥ ८ ॥

१ यक्षा इति गो. पाठः । २ अयं श्लोको गो. पुस्तके, उत्तरार्धं च रा. पुस्तके नास्ति । ३ बलोत्तरेति रा. पाठः । ४ संप्रीत इति गो. रा. पाठः । ५ ब्रह्मेति गो. रा. पाठः । ६ जातामिति गो. रा. पाठः । *स्त्रिया अपीति युक्तम् ।

कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्यजायत[1] । मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत् ॥ ९ ॥
सुन्दे तु निहते राम अगस्त्यमृषिसत्तमम्[2] । ताटका सहपुत्रेण प्रधर्षयितुमिच्छति[3] ॥ १० ॥
भक्षार्थं जातसंरम्भा गर्जन्ती साभ्यधावत । आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः॥ ११ ॥
राक्षसत्वं भजस्वेति मारीचं व्याजहार सः । अगस्त्यः परमामर्षस्ताटकामपि शप्तवान्[4] ॥ १२ ॥
पुरुषादी महायक्षी विरूपा[5] विकृतानना । इदं रूपं विहायाशु[6] दारुणं रूपमस्तु ते ॥ १३ ॥
सैषा शापकृतामर्षा ताटका क्रोधमूर्च्छिता । देशमुत्सादयत्येनमगस्त्याचरितं शुभम्[7] ॥ १४ ॥
एनां राघव दुर्वृत्तां यक्षीं परमदारुणाम् । गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम् ॥ १५ ॥

रा० टी०–तामिति । जातां सुकेतोरुत्पन्नां विवर्धन्तीं विवर्धमानां रूपयौवनशालिनीं यशस्विनीं ताटकां भार्यां पाणिगृहीतीं जम्भपुत्राय सुन्दाय ददौ तुशब्द एवार्थे शाटकं वयेतिवत् भार्यां ददाविति प्रयोगः क्वचित्तु 'तां तु बालां विवर्धन्तीम्' इति पाठः । जम्भपुत्रायेत्यत्र खञ्जपुत्रायेति पाठे खञ्जोः पुत्रः खञ्जपुत्रः असुरयक्षयोर्देवयोनित्वेनोचितः संबन्ध इति नागोजिभट्टाः । अत्र पाठे खञ्जरिति जम्भस्यैव नामान्तरं बोध्यम् ॥ ७ ॥

गो० टी०–तामिति । विवर्धन्तीं विवर्धमानां भार्यां ददौ भार्यात्वेन ददौ ॥ ७ ॥

९] ति० टी०–व्यजायत प्रासोष्टासत ॥ ९ ॥

रा० टी०–कस्यचिदिति । कस्यचित्कालस्य अपगमे सतीति शेषः । यक्षी यक्षकुलोत्पन्ना ताटका यः शापादेव राक्षसोऽभवत् तंदुर्धर्षं धर्षयितुमशक्यं मारीचं नाम पुत्रं व्यजायत अजनयत् तुशब्द एवार्थे ॥ ८ ॥

गो० टी०–कस्यचिदिति । कस्मिंश्चित्काले गते सति अजायत अजनयत् ॥ ८ ॥

१०] ति० टी०–शापं दर्शयति–सुन्दे त्विति । निहते अगस्त्येन शापं दत्त्वेति शेषः इच्छतीच्छति स्म ॥ १० ॥

रा० टी०–शापकारणं वदन्नाह–सुन्द इति । हे राम! सुन्दे ताटकापतौ निहते अगस्त्यशापेन मृते सत्येव पुत्रेण सह सहिता सा ताटका मुनिपुंगवमगस्त्यं प्रधर्षयितुं हिंसितुमिच्छति "वर्तमानसामीप्ये" इति भूते लट् तुशब्द एवार्थे ॥९॥

गो० टी०–शापप्रकारमाह–सुन्दे त्विति । निहते अगस्त्येनेति शेषः प्रधर्षयितुं हन्तुमिच्छति ऐच्छत् ॥ ९ ॥

११-१२] ति० टी०–जातसंरम्भा स्वभर्तृवधजकोपवती भजस्व शुद्धदेवयोनिस्वरूपं मुक्त्वेति शेषः शप्तवान्राक्षसत्वं भजस्वेति ॥ ११ ॥ १२ ॥

रा० टी०–प्रधर्षणप्रकारं वदन्नाह–भक्षार्थमिति । जातसंरम्भा स्वपतिवधजनितकोपविशिष्टा अत एव गर्जन्ती सा ताटका भक्षार्थमगस्त्यभक्षणाय अभ्यधावत तुना मारीचोप्यभ्यधावत भगवान्समर्थः ऋषिः सर्वज्ञः अगस्त्यः आपतन्तीं तांतदुपलक्षितमापतन्तं मारीचं च दृष्ट्वा राक्षसत्वं भजस्व प्राप्नुहीति मारीचं व्याजहार सः मारीचशापदाता परमकुद्धः अगस्त्यः ताटकामपि शप्तवान् । ताटकायाः सुन्दवच्छापेन प्राणवियोगाकरणं तु स्त्रीत्वेनानर्हत्वान्मारीचस्य तथात्वं तु बालत्वेन ज्ञातत्वात् ॥ १० ॥ ११ ॥

गो० टी०–भक्षेति । जातसंरम्भा स्वभर्तृवधजनितकोपा अत एव भक्षार्थमभ्यधावत । अर्थम् ॥ १० ॥

गो० टी०–आपतन्तीमिति । स्पष्टम् ॥ ११॥

गो० टी०–अगस्त्य इत्यर्थम् ॥ १२ ॥

१३] ति० टी०–तदेव विस्तरेणाह–पुरुषादीति । भवेति शेषः । तदेवोपपादयति–इदमिति । इदं रूपं यक्षिणीरूपं विहाय त्यजयित्वा दारुणं रूपं राक्षसीरूपमस्तु भवतु एतदेवाभिप्रेत्य पाद्मे उक्तम् 'तौ रामलक्ष्मणौ वीरावायान्तीं पथि राक्षसीम् । ताटकां नाम घोरां तां सुन्दभार्यां सुकेतुजाम्' इति ॥ १३ ॥

रा० टी०–शापस्वरूपमाह–पुरुषादीति । महायक्षी त्वमिदं रूपं यक्षीस्वरूपं विहाय त्यक्त्वा विरूपा कुत्सितस्वरूपा विकृतानना विकारविशिष्टाननाविशिष्टा पुरुषादी पुरुषभक्षणशीला राक्षसी भवेति शेषः अथ अतः दारुणं क्रूरं रूपं स्वरूपं तेऽस्तु १२

गो० टी०–पुरुषादीति । पुरुषादी मनुष्यभक्षिणी त्वमिदं रूपं विहाय पुरुषादीत्यादिविशेषणयुक्ता भव अथ ते दारुणं क्रूरं रूपं शरीरमस्तु ॥ १३ ॥

१४] ति० टी०–अमर्षादसहनात् देशोत्सादने हेतुगर्भं विशेषणम् अगस्त्याचरितमिति अगस्त्यतपःस्थानमित्यर्थः १४॥

रा० टी०–सेति । शापकृतामर्षा शापेन कृतः उत्पादितः अमर्षो यस्यामत एव क्रोधमूर्छिता सा प्राप्तशापा एषा ताटका शुभं मङ्गलमगस्त्यचरितमगस्त्येनाचरितमगस्त्यकर्तृकाचरणविशिष्टं पौर्वकालिकागस्त्याश्रमवन्तमित्यर्थः एनं देशमुत्सादयति पीडयति । अत्र शापानन्तरमगस्त्यभक्षणान्निष्टया तदा तयोर्भीत्यतिशयः सूचितः ॥ १३ ॥

गो० टी०–सैषेति। अगस्त्यचरितं तदानीमिति शेष ॥१४॥

१५] ति० टी०–गोब्राह्मणहितार्थायेति स्त्रीवधशङ्का-

१ पुत्रमजायतेति गो. पाठः । २ सागस्त्यं मुनिपुंगवमिति गो. रा. पाठः । ३ परमः क्रुद्ध इति गो. रा. पाठः । ४ विरूपेति गो. रा. पाठः । ५ विहायाथेति गो. रा. पाठः । ६ अगस्त्यचरितमिति गो. रा. पाठः । ७ दुर्धर्षामिति रा. पाठः ।

नह्येनां शापसंसृष्टां कश्चिदुत्सहते पुमान् । निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन ॥ १६ ॥
नहि ते स्त्रीवधकृते घृणा कार्या नरोत्तम । चातुर्वर्ण्यहितार्थं हि कर्तव्यं राजसूनुना ॥ १७ ॥
नृशंसमनृशंसं वा प्रजारक्षणकारणात् । पातकं वा सदोषं वा कर्तव्यं रक्षता सदा ॥ १८ ॥
राज्यभारनियुक्तानामेष धर्मः सनातनः । अधर्म्यां जहि काकुत्स्थ धर्मो ह्यस्यां न विद्यते ॥ १९ ॥
श्रूयते हि पुरा शक्रो विरोचनसुतां नृप । पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् ॥ २० ॥
विष्णुना च पुरा राम भृगुपत्नी पतिव्रता । अनिद्रं लोकमिच्छन्ती काव्यमाता निषूदिता ॥ २१ ॥

निरासाय तद्धिताय क्रियमाणं पापवदाभासमानमपि धर्मायेति भावः ॥ १५ ॥

रा० टी०—एषा देशपीडानिवृत्तिः त्वया कर्तव्येति बोधयन्नाह—एनामिति । हे राघव ! दुर्धर्षामन्यकर्तृकधर्षणानर्हां परमदारुणामतिक्रूरां दुष्टपराक्रमां दुष्टः गोब्राह्मणादिहिंसाहेतुत्वेन दोषविशिष्टः पराक्रमो यस्याः तामेनां यक्षीं ताटकां गोब्राह्मणहितार्थाय गोब्राह्मणहितार्थं साधयितुं जहि मालाहत इव द्विप इत्यादाविव ताडनार्थोऽत्र हन्तिः किंच अत्र शिखी नष्ट इत्यादाविव विशेषणीभूतदुष्टपराक्रममात्रनिवर्तने तात्पर्यमत एव परमधर्मज्ञरामस्य 'वचनं कौशिकस्येति कर्तव्यमविशङ्कया' इति प्रतिज्ञानान्तरं 'नह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम्' इत्युक्तिः संगच्छते अत एव 'रामो द्विर्नाभिभाषते' इत्याद्युक्तिः सानुकूला । तथा च मीमांसा 'सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे' ॥ १४ ॥

गो० टी०—एनामिति । जहि नाशय ॥ १५ ॥

१६] ति० टी०—शापसंसृष्टामगस्त्यशापव्याप्ताम् ॥ १६ ॥

रा० टी०—त्वदन्यः कश्चिन्नास्याः नियन्तेति बोधयन्नाह—नेति । हे रघुनन्दन ! शापसंसृष्टां शापयुक्तामेनां ताटकां निहन्तुं त्वामृते विना त्रिषु लोकेषु कश्चित्पुमान्नैवोत्सहते । हिशब्द एवार्थे । शापसंसृष्टामिति भट्टपाठः ॥ १६ ॥

गो० टी०—नहीति । शापसंसृष्टां शापयुक्ताम् ॥ १६ ॥

१७] ति० टी०—हे नरोत्तम ! ते स्त्रीवधनिमित्ता घृणा न कार्या अत्र नरोत्तमेत्यनेन पुरुषोत्तमेश्वररूपत्वात्तव पापसंबन्धाभाव इति ध्वनितम् चातुर्वर्ण्यहितार्थं तद्धिताय । कर्तव्यमित्यस्य नृशंसमित्याद्युत्तरेणान्वयः ॥ १७ ॥

रा० टी०—नन्वेवं स्त्रीनिष्ठदुष्टपराक्रमनाशोऽपि कथं मया कार्य इत्यत आह—नहीति । हे नरोत्तम ! स्त्रीवधकृते स्त्रीकर्तृकहिंसानिवृत्तये ते तव घृणा स्त्रीनिष्ठदुष्टपराक्रमविघातविषयकदयालुता नैव कार्या । तत्र हेतुः राजसूनुना राजपुत्रेण चातुर्वर्ण्यहितार्थं कर्तव्यमेव स्त्रीवधादिकमपीति शेषः हिशब्दावेवार्थौ १६॥

गो० टी०—नहीति । ते त्वया घृणा जुगुप्सा कर्तव्यं कर्मेति शेषः ॥ १७ ॥

१८] ति० टी०—वाशब्द इवार्थे । अनृशंसमिव नृशंसं क्रूरमपि कार्यमित्यर्थः प्रजारक्षणकारणात्प्रजारक्षणाढ्येतोः रक्षता सदेति रक्षाधर्मसमृद्धिशेषत्वेनेति भावः । पातकं वा मुख्यपातकं वा सदोषं वा यज्ञादिवत्सदोषमीषत्पापयुतं धर्मं वा सदोषवधरूपमिति यावत् ॥ १८ ॥

रा० टी०—तदेव विशदयन्नाह—नृशंसमिति । प्रजारक्षणकारणात्प्रजारक्षणहेतोरेव पातकमन्येषां पातकावहं नृशंसं क्रूरं कर्म असदोषं सदोषरहितमनृशंसमक्रूरकर्म वा रक्षता प्रजापालनकर्त्रा सदेव कर्तव्यम् वाशब्दावेवार्थौ ॥ १७ ॥

गो० टी०—नृशंसमिति । नृशंसं क्रूरकर्म सदोषं सापवादं कर्म रक्षता राजपुत्रेण प्रजारक्षणकारणात्कर्तव्यम् ॥ १८ ॥

१९] ति० टी०—एष धर्म इति । एष धर्ममूलकत्वादिति भावः अतोऽस्या वधो न्याय्य इत्याह—अधर्म्यामिति । धर्मादपेताम् तदेवोपपादयति—धर्मो हीति ॥ १९ ॥

रा० टी०—राज्येति । हे काकुत्स्थ ! एषः अन्येषां दोषावहः राज्यभारनियुक्तानां राज्ञां सनातनः नित्यो धर्मः अतः हेतोः यतः अस्याः ताटकायाः धर्मो न विद्यते अतः अधर्म्यां धर्मादपेतां ताटकां जहि तदुष्टतां निवर्तयेत्यर्थः हिर्हेतौ ॥ १८ ॥

गो० टी०—राज्येति । सनातनः नित्यः अधर्म्यामधर्मादनपेताम् । एतदेवाह—धर्म इति ॥ १९ ॥

२०] ति० टी०—अधर्म्यः स्त्रीवधोऽपि धर्म एवेत्यर्थं संमतिभिरुपपादयति—श्रूयते इति । पृथिवीं तदधिष्ठात्रीं देवताम् यद्वा तस्याः प्रजा इत्यर्थः ॥ २० ॥

रा० टी०—स्त्र्यादिवधे शिष्टाचारं प्रमाणयन्नाह—श्रूयते इत्यादिश्लोकद्वयेन नृप हे राजन् ! शक्रः इन्द्रः पृथिवीं हन्तुमिच्छन्तीं विरोचनसुतां मन्थरां मन्थराख्यामभ्यसूदयत् इति श्रूयते हिशब्द इत्यर्थे ॥ १९ ॥

गो० टी०—स्त्रीवधस्य कर्तव्यत्वे इतिहासद्वयमाह—श्रूयत इत्यादिना मन्थरां मन्थराभिधानाम् ॥ २० ॥

२१] ति० टी०—अनिद्रं निद्रासुखरहितम् । 'अनिन्द्रम्' इति पाठे इन्द्ररहितम् । काव्यः शुक्रः ॥ २१ ॥

रा० टी०—विष्णुनेति । हे राम ! दृढव्रता अप्रच्युतसंकल्पा अनिद्रं निद्रानन्दरहितं लोकमिच्छन्ती काव्यमाता शुक्राचार्यजननी भृगुपत्नी पुरा विष्णुना निषूदिता इत्यपि श्रूयते इत्य-

१ संस्पृष्टामिति गो. रा. पाठः । २ हितार्थायेति गो. पाठः । ३ सतेति गो. पाठः । ४ ह्यस्या इति गो. रा. पाठः । ५ दृढव्रतेति गो. रा. पाठः । ६ अनिन्द्रमित्यपि पाठस्तिलककृत्संमतः ।

एतैश्चान्यैश्च बहुभी राजपुत्रैर्महात्मभिः । अधर्मसहिता नार्यो हताः पुरुषसत्तमैः ॥
तस्मादेनां घृणां त्यक्त्वा जहि मच्छासनान्नृप ॥ ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ।

विश्वामित्ररामयोः संवादः, विश्वामित्रवचसि रामविश्वासः, रामकृतज्याघोषः, तेन ताटकाक्रोधमूर्च्छनम्, रामलक्ष्मणसंवादः, स्त्रीत्वात्ताटकायाः कर्णनासाग्रच्छेदने रामाभिप्रायः, ताटकायाः कुवर्तनम्, रामकृततालकाभुजच्छेदनम्, लक्ष्मणकृतकर्णनासाग्रच्छेदनम्, विश्वामित्ररामयोः संवादः, रामसायकैस्ताटकाप्राणोत्क्रमणम्, देवानां सुरपतेश्चात्यन्तसन्तोषः, विश्वामित्ररामलक्ष्मणानां ताटकावने वासश्च ।

मुनेर्वचनमक्लीवं श्रुत्वा नरवरात्मजः । राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १ ॥
पितुर्वचननिर्देशात्पितुर्वचनगौरवात् । वचनं कौशिकस्येति कर्तव्यमविशङ्कया ॥ २ ॥
अनुशिष्टोऽस्म्ययोध्यायां गुरुमध्ये महात्मना । पित्रा दशरथेनाहं नावज्ञेयं [3]हि तद्वचः ॥ ३ ॥

नुकृष्यते एतेन यदि विशिष्टहतिः दृढव्यवहारसिद्धा तर्हि विशेषणमात्रहतिरिति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः चकार इत्यपीत्यर्थे अनिन्द्रमिति पाठे इन्द्ररहितमिति भट्टाः । शुक्रे तपश्चरणार्थं गते सति देवपीडितदैत्यप्रार्थितां देवहननोद्योगवतीं शुक्रमातरं भृगुपत्नीमिन्द्रप्रार्थितो विष्णुर्जघानेति मत्स्यपुराणे प्रसिद्धम् ॥ २० ॥

गो० टी०–विष्णुनेति । काव्यमाता शुक्रमाता इयं कथा मत्स्यपुराणे दर्शिता स्वपुत्रे शुक्रे देवाशिक्षार्थं रुद्रसमीपे तपस्यति सति देवपीडिता असुराः शुक्रमातरं भृगुपत्नीं शरणमगच्छन् सा चासुररक्षणार्थं देवान् हन्तुमुद्युक्ता तां चेन्द्रप्रार्थितो विष्णुरासाद्य तस्याः शिरश्चिच्छेदेति ॥ २१ ॥

२२] ति० टी०–एतैरेतादृशैः यद्वा आर्षे बहुत्वम् एताभ्यां शक्राविष्णुभ्यामित्यर्थः मच्छासनादिति यथा परशुरामस्य जमदग्नेर्गुरोराज्ञया मातृवधेऽपि न दोषस्तथा बलादिदातृत्वेन गुरोर्ममाज्ञया स्त्रीवधे तव न दोष इति भावः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०–तदेवोपसंहरन्नाह–एतैरिति । एतैः शक्रादिभिः अन्यैः महात्मभिः बहुभिः पुरुषसत्तमैः राजपुत्रैः 'अधर्मसहिता नार्यो हता एव महात्मभिः' इत्यादिविशेषणैस्तेषां परमात्मत्वं ध्वनितम् तेन विशेषणमात्रनिवर्तेन संशयो न कार्य इति ध्वनितम् एकशब्द एवार्थे ॥ २१ ॥

रा० टी०–प्रकृतमाह–तस्मादिति । हे नृप! तस्मात् आप्तैराचारतत्त्वात् घृणामबला न हन्तव्येत्याकारिकां करुणां त्यक्त्वा मच्छासनात्समुचितमदाङ्क्षीः एनां ताटकां जहि ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

गो० टी०–एतैरिति । एतैः एतादृशैरित्यर्थः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

१] ति० टी०–मुनेरिति । अक्लीवं धृष्टम् ॥ १ ॥

२] ति० टी०–पितुरिति । कौशिकस्य वचनमविशङ्कया कर्तव्यं त्वयेत्येवंरूपान्निर्देशान्नियोगात् पितुर्वचनगौरवात्परमाप्तवाक्यत्वेनातिप्रमाणत्वात् त्वद्वचनमवश्यं कर्तव्यत्वेन निश्चितमिति शेषः ॥ २ ॥

रा० टी०–मुनेरिति । अक्लीवं क्लीवतानिवर्तकं मुनेर्वचनं दृढव्रतः अप्रच्युतसंकल्पः नरवरात्मजः महाराजपुत्रो राघवः श्रुत्वा प्राञ्जलिर्भूत्वा पितुर्जनकस्य वचनगौरवाद्वचनस्य आज्ञापनस्य गौरवादुरुत्वेनात्याज्यत्वादित्यर्थः पितुर्वचननिर्देशाद्वचनेन साक्षादुक्त्या यो निर्देशः कौशिकवचनमवश्यं कर्तव्यमित्याज्ञापनं तस्मात्कौशिकस्य विश्वामित्रस्य वचनमाविशङ्क्या कर्तव्यमिति निश्चित्य प्रत्युवाचेति द्वयोरेकत्रान्वयः निश्चित्येत्यध्याहारलभ्यम् ॥ १ ॥ २ ॥

गो० टी०–अथ ताटकावधः षड्विंशे–मुनेरित्यादि । अक्लीवं धृष्टम् ॥१॥ पितुरिति । पितुर्वचननिर्देशान्नियोगात् कौशिकवचनं त्वया कर्तव्यमित्यवंरूपात् पितृवचनगौरवात् बहुमानाच्च इति उक्तप्रकारं कौशिकस्य वचनं कर्तव्यमिति मानसव्यापारः ॥ २ ॥

३] ति० टी०–कैर्न नियोगः कृत इत्यत्राह–अनिन्द्रेति । गुरवो वसिष्ठवामदेवाद्याः अनवज्ञानहेतुरुक्त एव तद्वचो विश्वामित्रवच इत्यनुशिष्ट इत्यन्वयः ॥ ३ ॥

रा० टी०–विश्वामित्रं प्रति रामोक्तिमेवाह–अनुशिष्ट इत्यादिश्लोकत्रयेण । अयोध्यायां गुरुमध्ये वसिष्ठवामदेवादि-

---

१ राजपुत्रैरिति गो. पाठः । २ इदमर्धं गो. नास्ति । ३ चेति गो. रा. पाठः ।

सोऽहं पितुर्वचः श्रुत्वा शासनाद्ब्रह्मवादिनः । करिष्यामि न संदेहस्ताटकावधमुत्तमम् ॥ ४ ॥
गोब्राह्मणहितार्थाय देशस्य च हिताय च । तव चैवाप्रमेयस्य वचनं कर्तुमुद्यतः ॥ ५ ॥
एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिन्दमः । ज्याघोषमकरोत्तीव्रं दिशः शब्देन नादयन् ॥ ६ ॥
तेन शब्देन वित्रस्तास्ताटकावनवासिनः । ताटका च सुसंक्रुद्धा तेन शब्देन मोहिता ॥ ७ ॥
तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्च्छिता । श्रुत्वा चाभ्यद्रवत्क्रुद्धा यत्र शब्दो विनिःसृतः॥ ८ ॥
तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम् । प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाषत ॥ ९ ॥
पश्य लक्ष्मण यक्षिण्या भैरवं दारुणं वपुः । भित्त्वेरन्दर्शनादस्या भीरूणां हृदयानि च ॥ १० ॥
एतां पश्य दुराधर्षां मायाबलसमन्विताम् । विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम् ॥ ११ ॥

सन्निधौ महात्मना दशरथेन पित्रा तद्वचो विश्वामित्रवचनं त्वया नावज्ञेयमित्यहमनुशिष्टः शिक्षितोऽस्मि चशब्द इत्यर्थे ॥ ३ ॥

गो० टी०–मुनिं प्रत्याह–अनुशिष्ट इति ॥ ३ ॥

४] ति० टी०–सोऽहमिति । ब्रह्मवादिनस्तस्यापापस्पर्शेन तत्संकल्पादन्यस्यापि पापमपापं पुण्यं चेत्याह–उत्तममिति । उत्कृष्टधर्ममित्यर्थः ॥ ४ ॥

रा० टी०–स इति । पितुर्वचो वचनं श्रुत्वा आगतः सः भवद्वचनविषयकश्रद्धावानहं ब्रह्मवादिनो भवतः शासनात् आज्ञातः उत्तमं ताटकावधं करिष्यामि संदेहो नास्मिन् कृत्ये संशयो न कार्य इत्यर्थः ॥ ४ ॥

गो० टी०–सोऽहमिति।श्रुत्वा स्थितः सोहमित्यन्वयः॥४॥

५] ति० टी०–पुण्यत्वमेवोपपादयति–गोब्राह्मणेति । अप्रमेयस्य तव च हिताय अस्य हितं स्वाज्ञापरिपालनेन संतोषरूपम् इदमावर्तते तव वचनं कर्तुमुद्यतो विचिकित्सारहितोऽहं ताटकावधं करिष्यामीति पूर्वेणान्वयः ॥ ५ ॥

रा० टी०–गोब्राह्मणेति । गोब्राह्मणहितार्थाय गोब्राह्मणहितरूपप्रयोजनाय लोकस्य अस्मद्दृष्टिपथस्य अस्य देशस्य हिताय चकारेण यशःप्राप्तिरूपत्वद्धिताय चकारान्तरेण स्वनिष्ठभवच्छिष्यत्वप्रकटनाय अप्रमेयस्य इयत्तारहितप्रभावस्य तव वचनमुक्तिं कर्तुं साधयितुमुद्यत एवाहमस्मीति शेषः ॥ ५ ॥

गो० टी०–गोब्राह्मणेति । उद्यतः अहमिति शेषः ॥ ५ ॥

६] ति० टी–तीव्रं परुषश्रवणम् ॥ ६ ॥

रा० टी०–एवमिति। अरिंदमः स्वाश्रितारिनिवर्तकः रामः एवमनेन प्रकारेण उक्त्वा धनुर्मध्ये मुष्टिं बद्ध्वा शब्देन दिशः पूरयन्सन् तीव्रं ज्याघोषमकरोत् ॥ ६ ॥

गो० टी०–एवमिति । स्पष्टम् ॥ ६ ॥

७] ति० टी०–वित्रस्ता भीताः मोहिता व्याकुलचित्ता जाता ॥ ७ ॥

रा० टी०–तेनेति । तेन रामधनुर्ज्याजनितेन शब्देन ताटकावनवासिनः ताटकानुयायिन इत्यर्थः वित्रस्ताः अत्युद्विग्नचित्ता आसन्निति शेषः मोहिता दुष्टचित्ता ताटका तु तेन शब्देन सुसंक्रुद्धा आसीदिति शेषः चस्त्वर्थे ॥ ७ ॥

गो० टी०–तेनेति । सुसंक्रुद्धा प्रकृत्या अतिकोपना मोहिता किं कर्तव्यमिति संभ्रान्ता आसीत् ॥ ७ ॥

८] ति० टी०–तं शब्दं श्रुत्वा च क्रुद्धा स शब्दो यत्र यतो विनिःसृतस्तमभिनिध्याय शब्दनिःसरणावधिदेशं लक्षीकृत्याभ्यद्रवदिति योजना ॥ ८ ॥

रा० टी०–ताटकाकृत्यमाह–तमिति । तं ज्याजनितं शब्दं श्रुत्वा क्रोधमूर्छिता राक्षसी ताटका अभिनिध्याय शब्ददेशं निश्चित्य क्रुद्धा यतः क्रुद्धस्य क्रोधस्य आयतो विस्तारो यस्मात् सशब्दो यतो विनिःसृतस्तं देशमभ्यद्रवत् अत एव क्रोधमूर्छिता इत्यनेन क्रुद्धेत्यस्य न पौनरुक्त्यम् चशब्दो यत इत्यर्थे ॥ ८ ॥

गो० टी०–तमिति । अभिनिध्याय आकर्ण्य क्रोधमूर्च्छिता आसीत् श्रुत्वा क्रुद्धा साभ्यद्रवच्च ॥ ८ ॥

९] ति० टी०–प्रमाणेन शरीरप्रमाणेन ॥ ९ ॥

रा० टी०–तामिति। विकृतां विकृतस्वरूपामत एव विकृताननां प्रमाणेन शरीरेयत्तया अतिवृत्तामतिक्रान्तामतिप्रौढशरीरामित्यर्थः तां ताटकां स राघवः दृष्ट्वैव लक्ष्मणमभ्यभाषत ॥ ९ ॥

गो० टी०–तामिति । प्रमाणेन औन्नत्येन ॥ ९ ॥

१०] ति० टी०–भैरवं भयंकरम् दारुणं घोरम् अस्य वपुषः । चोऽप्यर्थः । अभीरूणामपीत्यर्थः ॥ १० ॥

रा० टी०–तद्भाषणमेवाह–पश्येत्यादिश्लोकत्रयेण । हे लक्ष्मण ! यक्षिण्यास्ताटकाया भैरवं भयावहं दारुणमत्युत्कटं वपुः शरीरं पश्य अस्या दर्शनादेव भीरूणां हृदयानि भित्त्वेरन्। त्वशब्द एवार्थे ॥ १० ॥

गो० टी०–पश्येति। भैरवं भयंकरं दारुणं विकृतम् ॥१०॥

११] ति० टी०–एतामिति । विनिवृत्तामस्मत्संमुखागमनात्पराङ्मुखीं पलायितामिति यावत् ॥ ११ ॥

रा० टी०–एनामिति । दुराधर्षामस्मदन्यैर्धर्षयितुमशक्यां मायाबलसमन्वितां मायाबलमन्तर्धानादिक्रियासामर्थ्यं तेन समन्वितां युक्तामेनां ताटकां त्वं पश्य एनां हृतकर्णाग्रनासिकां हृतं मया छिन्नं कर्णाग्रनासिकं यस्यास्तामत एव वि-

१ लोकस्येति गो. रा. पाठः । २ वेगादति गो. पाठः । ३ यत इति गो. रा. पाठः । ४ क्रुद्ध इति रा. पाठः । ५ वृत्तामिति रा. पाठः । ६ एनामिति गो. रा. पाठः । ७ एनामिति रा. पाठः ।

नह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम् । वीर्यं चास्या गतिं चैव हन्यामिति हि मे मतिः॥१२॥
एवं ब्रुवाणे रामे तु ताटका क्रोधमूर्च्छिता । उद्यम्य बाहुं गर्जन्ती राममेवाभ्यधावत ॥ १३ ॥
विश्वामित्रस्तु ब्रह्मर्षिर्हुंकारेणाभिभर्त्स्य ताम् । स्वस्ति राघवयोरस्तु जयं चेत्यभ्यभाषत ॥ १४ ॥
उद्धुन्वाना रजो घोरं ताटका राघवावुभौ । रजोमेघेन महता मुहूर्तं सा व्यमोहयत् ॥ १५ ॥
ततो मायां समास्थाय शिलावर्षेण राघवौ । अवाकिरत्सुमहता ततश्चुक्रोध राघवः ॥ १६ ॥
शिलावर्षं महत्तस्याः शरवर्षेण राघवः । प्रतिवार्योपधावन्त्याः करौ चिच्छेद पत्रिभिः ॥१७॥
ततश्छिन्नभुजां श्रान्तामभ्याशे परिगर्जतीम् । सौमित्रिरकरोत्क्रोधाद्धृतकर्णाग्रनासिकाम् ॥ १८ ॥
काम्रूपधरा सा तु कृत्वा रूपाण्यनेकशः । अन्तर्धानं गता यक्षी मोहयन्ती स्वमायया ॥ १९ ॥

निवृत्तां पराङ्मुखीमहं करोमीति त्वं पश्य एतेनकर्णच्छेदादिना तस्या दुष्टपराक्रमध्वंसो भविष्यत्येवेति सूचितम् ॥ ११ ॥

गो० टी०–एनामिति । मायाबलमन्तर्धानबलं विनिवृत्तां पराङ्मुखीमेतावतैव गुरुवचनानुष्ठानसिद्धेरिति भावः ॥ ११ ॥

१२] ति० टी०–कर्णादिहरणमात्रे हेतुमाह–नहीति । वीर्यं परपराभवशक्तिं गतिमाकाशादिगतिं पाणिपादच्छेदेनेति शेषः तावतैव देशहितस्य गुरुवचनानुष्ठानस्य च सिद्ध्या शरविगर्हितः स्त्रीवधोऽनुचित इति भावः ॥ १२ ॥

रा० टी०–नन्वस्याः साक्षाद्वधः कुतो न क्रियत इत्यत आह–नहीति । स्त्रीस्वभावेन स्त्री स्त्रीत्वं स्वभावः स्वस्यां भावोऽतिबलप्राप्तिश्चानयोः समाहारः तेन रक्षितां स्त्रीत्वात्वीरशरकर्तृकवधानर्हत्वेन अतिबलवतीत्वादितरैर्हन्तुमशक्यत्वेन च पालितामेनां हन्तुमहं नैवोत्सहे अतः अस्याः वीर्यं गतिं च हनिष्यामीत्येव मे मतिः निश्चयः हिर्हेतौ एकश्चशब्दोऽपिश्चैवार्थे एतेन शरधर्मसंरक्षणं गुरोः संतोषश्च भविष्यतीति ध्वनितम् ॥ १२ ॥

गो० टी०–नहीति । वीर्यगतिहननं हस्तपादभञ्जनेन ॥१२॥

१३] ति० टी०–राममेव विश्वामित्रस्य दुर्धर्षत्वेन तं विसृज्य मानुषबुद्ध्या राममेवेत्यर्थः ॥ १३ ॥

रा० टी०–एवमिति । रामे एवं ब्रुवाणे सत्येव क्रोधमूर्छिता ताटका बाहू उद्यम्य गर्जन्ती सती एव राममभ्यधावत् तुशब्द एवार्थे ॥ १३ ॥

गो० टी०–एवमिति । स्पष्टम् ॥ १३ ॥

१४] ति० टी०–तां रामसंमुखमभिधावन्तीम् जयं च जयविषयकाशिषं च ॥ १४ ॥

रा० टी०–विश्वामित्र इति । ब्रह्मर्षिर्विश्वामित्रः हुंकारेणैव तां ताटकामभिभर्त्स्य राघवयोः रामलक्ष्मणयोः स्वस्ति अस्तु इत्यभ्यभाषत जयं जयशब्दं चाभ्यभाषत चशब्द इत्यर्थे ॥१४॥

गो० टी०–विश्वामित्र इति । अस्त्वित्यत्र इतिशब्दोऽध्याहार्यः अतिमानुषशक्तिं जानन्नपि ताटकायाः क्रौर्यातिशयं दृष्ट्वातिशङ्क्या महर्षिर्मङ्गलमाशास्ते ॥ १४ ॥

१५] ति० टी०–घोरं रज उद्धुन्वानेत्यन्वयः । रजोमेघेन रजोऽन्धकारेण ॥ १५ ॥

रा० टी०–उद्धुन्वानेति । घोरमुत्कटं रजः धुन्वाना उत्किरन्ती ताटका महता रजोमेघेन मेघसदृशरजसा एव उभौ राघवौ रामलक्ष्मणौ मुहूर्तममोहयत् मोहनानुकूलव्यापारं चकारेत्यर्थः तुशब्द एवार्थे ॥ १५ ॥

गो० टी०–उद्धून्वानेति । उद्धून्वाना उत्किरन्ती ॥१५॥

१६] ति० टी०–मायां समास्थाय अन्तर्धानं गत्वेति यावत् चुक्रोध स्त्रीत्वप्रयुक्तदाक्षिण्यं विसृज्येति शेषः ॥ १६ ॥

रा० टी०–तत इति । ततः रजोवर्षणानन्तरं मायामन्तर्धानं समास्थाय स्वीकृत्य सुमहता शिलावर्षेण राघवौ रामलक्ष्मणौ अवाकिरत् ततः तस्माच्छिलावर्षणाद्राघवो रामः चुक्रोध तदपकारनिवर्तनहेतुभूतक्रोधं चकारेत्यर्थः ॥ १६ ॥

गो० टी०–तत इति । मायामन्तर्धानशक्तिम् ॥ १६ ॥

१७] ति० टी०–पत्रिभिरिति । एकैकस्य बहुधा खण्डनाभिप्रायेण ॥ १७ ॥

रा० टी०–शिलेति । तस्याः ताटकायाः महच्छिलावर्षं शरवर्षेण राघवो रामः प्रतिहत्य विनाश्य उपधावन्त्या तस्याः करौ पत्रिभिर्बाणैः चिच्छेद ॥ १७ ॥

गो० टी०–शिलेति । प्रतिहत्य भङ्क्त्वा करौ चिच्छेद शिलावर्षहेतुत्वात्पात्रिभिः शरैः ॥ १७ ॥

१८] ति० टी०–हते कर्णाग्रे नासिका च यस्यास्ताम् १८

रा० टी०–तत इति । ततः भुजच्छेदनानन्तरं छिन्नभुजां छिन्नौ भुजौ यस्याः तामत एव श्रान्तामभ्यासे समीपे परिगर्जन्तीं ताटकां सौमित्रिः लक्ष्मणः क्रोधोद्धृतकर्णाग्रनासिकामकरोत् १८

गो० टी०–तत इति । अभ्याशे समीपे गर्जतीं गर्जन्तीं उमभाव आर्षः ॥ १८ ॥

१९] ति० टी०–अनेकशो रूपाणि कृत्वान्तर्धानं गता सती स्वमायया राघवौ मोहयन्ती ॥ १९ ॥

रा० टी०–कामेति । कामरूपधरा ईप्सितस्वरूपधारण-

१ चापीति गो. रा. पाठः । २ हनिष्यामीति गो. रा. पाठः । ३ चाप्यभ्येति रा. पाठः । ४ उद्धून्वानेति गो. पाठः । ५ त्वमोहयदिति रा. पाठः । ६ हत्येति गो. रा. पाठः । ७ सद्य इति गो. रा. पाठः ।

अश्मवर्षं विमुञ्चन्ती भैरवं विचचार सा । ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः ॥ २० ॥
दृष्ट्वा गाधिसुतः श्रीमानिदं वचनमब्रवीत् । अलं ते घृणया रामे पापैषा दुष्टचारिणी ॥ २१ ॥
यज्ञविघ्नकरी यक्षी पुरा वर्धेत मायया । वध्यतां तावदेवैषा पुरा संध्या प्रवर्तते ॥ २२ ॥
रक्षांसि संध्याकाले तु दुर्धर्षाणि भवन्ति हि । इत्युक्तः सै तु तां यक्षीमश्मवृष्ट्याभिवर्षिणीम्॥२३॥
दर्शयञ्छब्दवेधित्वं तां रुरोध ससायकैः । सा रुद्धा बाणजालेन मायाबलसमन्विता ॥ २४ ॥
अभिदुद्राव काकुत्स्थं लक्ष्मणं च विनेदुषी । तामापतन्तीं वेगेन विक्रान्तामशनीमिव ॥ २५ ॥

समर्था अत एव सद्यः शीघ्रमनेकशो रूपाणि कृत्वा अन्तर्धानं गता प्राप्ता यक्षी ताटका स्वमायया मोहयन्ती मोहनाद्यकुलव्यापारं कुर्वती भैरवं भयंकरमश्मवर्षं प्रसिद्धं विमुञ्चन्ती विचचार। सार्धश्लोक एकान्वयी हशब्दः प्रसिद्धौ ॥ १९ ॥ २० ॥

गो० टी०–कामेति । कामरूपधरा कामरूपधरणशक्ता अत एवानेकशो रूपाणि कृत्वा मायया अन्तर्धानं गता सती भैरवमश्मवर्षं विमुञ्चन्ती मोहयन्तीव विचचार । अर्धत्रयम्॥१९॥

२०] ति० टी०–भैरवमश्मवर्षमित्यन्वयः ॥ २० ॥

रा० टी०–तत इति । ततः राक्षसीकृताश्मवर्षणानन्तरं समन्ततः चतुर्दिक्षु अश्मवर्षेण कीर्यमाणौ तौ रामलक्ष्मणौ श्रीमान् तपःसंपत्तिविशिष्टः गाधिसुतो विश्वामित्रः दृष्ट्वा इदं वक्ष्यमाणं वचनमब्रवीत् ॥ २१ ॥

गो० टी०–तत इति। श्रीमान्स्वत एव ताटकावधहेतुप्राप्तिकृतहर्षेण कान्तिमान् ॥ २० ॥

२१] ति० टी०–घृणयालं स्त्री इति घृणा मास्त्वित्यर्थः दुष्टचारिणी मायाशक्त्यान्तर्धानेन पापाणादिदृष्टिकर्त्री अतो घृणानुचिता ॥ २१ ॥

रा० टी०–तद्वचनमेवाह–अलमिति । हे वीर ! ते तव घृणया कृपया अलं विशेषणमात्रत्याजनेपि घृणां न कुरु इत्यर्थः । दुष्टचारिणी दोषविशिष्टाचरणशीला अत एव यज्ञविघ्नकरी यक्षी ताटका पुरा रामः पूर्वसंध्यायां मायया वर्धेत अतो यावत्पुरा संध्या प्रवर्तते प्रवर्तिष्यते तावदेवैषा ताटका वध्यताम् तत्र हेतुः संध्याकालेषु रक्षांसि दुर्धर्षाण्येव भवन्ति वैशब्द एवार्थे " यावत्पुरानिपातयोः " इति विहितः प्रवर्तत इत्यत्र लट् द्वयोरेकत्रान्वयः ॥ २२ ॥ २३ ॥

गो० टी०–अलमिति । दुष्टचारिणी दुष्टं यथा तथा आचरणशीला अन्तर्धानशक्त्या अश्मवर्षशीलेत्यर्थः एतेन ऐहिकनाशकत्वमुक्तं पारलौकिकनाशकत्वमप्याह–यज्ञविघ्नकरीति । पुरा वर्धति वर्धिष्यते "यावत्पुरानिपातयोर्लट्" ॥ २१ ॥

२२] ति० टी०–घृणा नोचितेत्यत्र हेत्वन्तरमाह–यज्ञविघ्नकरीति । मायया पुरा यावद्वर्धेत तावत्तत्कालात्पुरैव पूर्वमेवैषा वध्यताम् सायंसंध्या पुरा प्रवर्तते प्रवर्तयिष्यत इत्यर्थः२२

गो० टी०–वध्यतामिति । संध्या पुरा प्रवर्तते प्रवर्तिष्यते तावत् पूर्वमेव वध्यताम् । संध्याप्रवृत्तौ का हानिस्तत्राह–रक्षांसीति ॥ २२ ॥

२३] ति० टी०–किं तत्रेत्याह–रक्षांसीति । अश्मवृष्ट्येति करणे तृतीया ॥ २३ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण उक्तः स रामः शब्दवेधित्वं श्रूयमाणः शब्दो यस्मादुत्पन्नः तद्वेधित्वं गुणं दर्शयन्सन् अश्मवृष्ट्या तथा अभिवर्षंतीमभिवर्षन्तीं तां यक्षीं ताटकां सायकैः बाणैः रुरोध वृष्टिप्रतिबन्धं चकारेत्यर्थः॥२४॥

गो० टी०–इतीति । अभिवर्षंतीमभिवर्षन्तीं शब्दवेधित्वं श्रुतः शब्दो यस्मादुत्पन्नः तद्वेधित्वम् ॥ २३ ॥

२४] ति० टी०–शब्दमात्रेण लक्ष्यं सम्यङ्निश्चित्य वेधकर्तृत्वसामर्थ्यं दर्शयन्नित्यर्थः ॥ २४ ॥

रा० टी०–सेति । शरजालेन बाणसमूहेन रुद्धा मायाबलसमन्विता अन्तर्धानादिक्रियानिपुणा सा ताटका विनेदुषी अतिनादं कुर्वती सती काकुत्स्थं रामं लक्ष्मणं च अभिदुद्राव अन्तर्धानं हित्वा रामसंमुखं द्रुतं जगामेत्यर्थः॥ २५ ॥

गो० टी०–सेति । अभिदुद्राव अप्रयोजकमन्तर्धानं विहायेत्यर्थः विनेदुषी नादं कुर्वन्ती ॥ २४ ॥

२५] ति० टी०–अभिदुद्रावेति । अन्तर्धानं हित्वेति शेषः ॥ २५ ॥

रा० टी०–तामिति । विक्रान्तां प्रक्षिप्तामशनीं वज्रमिव वेगेनापतन्तीं तां ताटकां शरेण उरसि विव्याध *ततोड अतः सा ताटका ममार मं शिवसन्निधिमार जगाम पपात च तदेशं प्राप्य शिवसंनिधावपतदित्यर्थः । किंच अपपातमम् अपगतः पातः पुनराट्टर्त्तिर्यस्मात्स एव मः शिवस्तं कैलासाद्रिमित्यर्थः आर प्राप बाणवेगेन तत्र प्रक्षिप्तेत्यर्थः एतेन स्त्रीत्वादेव त्वं न हतास्यतस्तत्र पुनर्न गन्तव्यमिति शिव उपदेक्ष्यतीति हेतुर्व्यक्तः । अत एव 'नह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम् ' इतिप्रतिज्ञया न विरोधः अत एव 'रामो द्विर्नाभिभाषते, इति सानुकूलमत एव ' सुन्दस्त्रीदमनप्रमोदमुदितादास्थाय विद्योदयं रामः सत्यवतीसुतादथ गतस्तस्याश्रमं लीलया । क्रुप्से कौशिकनन्दनेन च मखे तत्रागतान्राक्षसान्हत्वाऽमूमुचदाशुभाविविदसौ मारीचमुग्राकृतिम् ' इतिहनुमन्नाटकपद्यघटकीभूतसुन्दस्त्रीदमन-

---

१ हेति रा. गो. पाठः । २ वीरेति गो. रा. पाठः । ३ वर्धतीति गो. पाठः । ४ कालेष्विति गो. रा. पाठः । ५ वै इति गो. रा. पाठः । ६ तु तदेति गो. तथेति रा. पाठः । ७ वर्धतामिति गो. रा. पाठः । ८ शरेति गो. रा. पाठः । * ताड्यामासेति युक्तम् ।

शरेणोरसि विव्याध सा पपात ममार च । तां हतां भीमसंकाशां दृष्ट्वा सुरपतिस्तदा ॥ २६ ॥
साधु साध्विति काकुत्स्थं सुराश्चाप्यभिपूजयन् । उवाच परमप्रीतः सहस्राक्षः पुरन्दरः ॥ २७ ॥
सुराश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन् । मुने कौशिक भद्रं ते सेन्द्राः सर्वे मरुद्गणाः ॥ २८ ॥
तोषिताः कर्मणानेन स्नेहं दर्शय राघवे । प्रजापतेः कृशाश्वस्य पुत्रान्सत्यपराक्रमान् ॥ २९ ॥
तपोबलभृतो ब्रह्मन्राघवाय निवेदय । पात्रभूतश्च ते ब्रह्मंस्तवानुगमने रतैः ॥ ३० ॥
कर्तव्यं सुमहत्कर्म सुराणां राजसूनुना । एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा विहायसम् ॥ ३१ ॥
विश्वामित्रं पूजयन्तस्ततः संध्या प्रवर्तते । ततो मुनिवरः प्रीतस्ताटकावधतोषितः ॥ ३२ ॥
मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् । इहाद्य रजनीं राम वसाम शुभदर्शन ॥ ३३ ॥
श्वः प्रभाते गमिष्यामस्तदाश्रमपदं मम । विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः ॥ ३४ ॥

प्रमोदमुदितादिति पथ्यष्टकदमनप्रयोगः संगच्छते अन्यथा सुन्दस्त्रीहननप्रमोदमुदितादिति वदेदिति दिक् । 'मो यमे समयेऽपि स्याद्विषे च मधुसूदने । मा स्त्री पद्मालयायां स्यात्पुंल्लिङ्गश्चन्द्रशेखरे' इति मेदनी । अस्मिन्नर्थे चेवं । अशनीमित्यत्र " कृदिकारादक्तिनः " इति ङीप् ॥ २६ ॥

गो० टी०–तामिति । अशनीम् "सर्वतोऽक्तिन्नर्थादित्येके" इति ङीप् ॥ २६ ॥

२६] ति० टी०–भीमसंकाशां भीमरूपाम् ॥ २६ ॥

रा० टी०–तामिति । तदा पतनकाले भीमसंकाशां भयंकररूपा हतां तां ताटकां दृष्ट्वा सुरपतिरिन्द्रः सुराश्च काकुत्स्थं रामं साधु साध्विति समपूजयन् प्रशशंसुः चाप्यभिपूजयन्निति भाट्टपाठः अडभाव आर्ष इति तद्व्याख्या ॥ २७ ॥

गो० टी०–तामिति । भीमसंकाशां भीमरूपां सुरपतिः सुराश्च समपूजयन् ॥ २६ ॥

२७] ति० टी०–अभिपूजयन् अडभाव आर्षः । सहस्राक्षो विश्वामित्रमुवाचेत्यन्वयः ॥ २७ ॥

रा० टी०–उवाचेति । परमप्रीतः अतिप्रसन्नः सहस्राक्षः सहस्रनेत्रविशिष्टः पुरंदर इन्द्रः विश्वामित्रमुवाच अथानन्तरं संहृष्टाः सर्वे सुराः देवाश्च अब्रुवन् । एकस्य यौगिकत्वस्वीकारेण न पौनरुक्त्यम् ॥ २८ ॥

गो० टी०–उवाचेति । स्पष्टम् ॥ २७ ॥

२८] ति० टी०–किमुक्तवन्तस्तदाह–मुने इति ॥ २८ ॥

रा० टी०–तदुक्तिमेवाह–मुने इति । हे मुने कौशिक ! भद्रं कल्याणं तेऽस्तु यतः सेन्द्रा इन्द्रसहिताः सर्वे मरुद्गणा वयमनेन ताटकाघातनेन कर्मणा तोषिताः त्वयेति शेषः । अतः राघवे रामे स्नेहं एतादृशः प्रियः विश्वामित्रस्य कश्चिन्नास्तीत्येतद्रूपकव्यापारविशेषं दर्शय प्रकटय ॥ २९ ॥

गो० टी०–मुने इति । सर्वे वयमिति शेषः स्नेहं दर्शय स्नेहकार्यं प्रवर्तय ॥ २८ ॥

२९] ति० टी०–तोषिताः वयमिति शेषः । अनेन कर्मणा त्वत्प्रवर्तिततादकावधरूपेण स्नेहं दर्शय मदीयोऽयमात्मनः शिष्य इति स्नेहमूलं व्यापारं प्रवर्तय । तमेव व्यापारमाह–प्रजापतेरिति ॥ २९ ॥

रा० टी०–तं व्यापारं बोधयन्त आहुः–प्रजेति । हे ब्रह्मन् ! सत्यपराक्रमान् कापट्यरहितपराक्रमविशिष्टान् तपोबलभृतः तपोबलेन पोषकान् प्रजापतेः कृशाश्वस्य पुत्रान्राघवाय निवेदय ॥ ३० ॥

गो० टी०–एतदेवाह–प्रजापतेरिति ॥ २९ ॥

३०–३१] ति० टी०–तपसा ज्ञानेन बलेन च भृतः पूर्णः ते तव दानस्य पात्रभूतश्च राघवः अतस्तस्मै कृशाश्वपुत्रान्निवेदय तथा लब्धानामेवास्त्राणां कार्यक्षमत्वमिति भावः अनुगमने शुश्रूषणे दृढनिश्चयः ॥ ३० ॥ ३१ ॥

रा० टी०–कृशाश्वपुत्राः समर्पणीया इत्यत्र हेतुमाहुः–पात्रेति । हे ब्रह्मन् ! तवानुगमने कृतः अनुगमनविषयकवृत्तिविशिष्टः रामः ते तव पात्रभूतः त्वत्कर्तृकदानसंप्रदानत्वयोग्यः राजसूनुना सुराणां महत्कार्यं कर्तव्यमेव अतोऽस्मै निवेदयेति पूर्वेणान्वयः एकश्चकार एवार्थे अपरो हेत्वर्थे ॥ ३१ ॥

गो० टी०–पात्रेति । अयमिति शेषः । अनुगमने शुश्रूषणे कृतः स्थिरधीः ॥ ३० ॥

रा० टी०–एवमिति । हृष्टाः सर्वे सुरा एवमनेन प्रकारेण विश्वामित्रमुक्त्वा पूजयन्तः प्रशंसां कुर्वन्तः सन्तः विहायसं जग्मुः ततोऽनन्तरं संध्या प्रवर्तते प्रावर्तत । "वर्तमानसामीप्ये " इति लट् ॥ ३२ ॥

गो० टी०–एवमिति । पुरस्कृत्य पूजयित्वा जग्मुः संध्या सायंसंध्या प्रवर्तते स्म ॥ ३१ ॥

३२–३४] ति० टी०–पूजयन्तः स्तुवन्तो जग्मुरित्यन्वयः प्रवर्तत इत्यस्य स्मेति शेषः ॥ ३२ ॥ ३३ ॥ ३४ ॥

रा० टी०–तत इति । ततो देवगमनानन्तरं ताटकावध-

१ च, समेति गो. रा. पाठः । २ भृत इति गो. वृत इति रा. पाठः । ३ च महत्कार्यमिति गो. रा. पाठः । ४ अथागतमिति गो. रा. पाठः । ५ पुरस्कृत्येति गो. पाठः । ६ अवन्नायेति रा. पाठः ।

उवास रजनीं तत्र ताटकाया वने सुखम् । मुक्तशापं वनं तच्च तस्मिन्नेव तदाहनि ॥
रमणीयं विबभ्राज[1] यथा चैत्ररथं वनम् ॥ ॥ ३५ ॥
निहत्य तां यक्षसुतां स रामः प्रशस्यमानः सुरसिद्धसंघैः[3] ।
उवास तस्मिन्मुनिना सहैव प्रभातवेलां प्रतिबोध्यमानः ॥ ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ।

रामाय ताटकावधसंतुष्टविश्वामित्रकृतास्त्रदानम्, तत्तदस्त्राधिपतिदैवतस्य रामायानुग्रहप्रार्थना, विश्वामित्ररामयोः संवादश्च ।

अथ तां रजनीमुष्य विश्वामित्रो महायशाः । प्रहस्य राघवं वाक्यमुवाच मधुरस्वरम्[4] ॥ १ ॥
परितुष्टोऽस्मि भद्रं ते राजपुत्र महायशः । प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः ॥ २ ॥

तोषितः स्वप्रेरितरामकर्तृकताटकाताडनेन तोषिताः सुरा येन स प्रीतो मुनिवरो विश्वामित्रो रामं मूर्ध्नि अवघ्राय इदं वचनमब्रवीत् ॥ ३३ ॥

गो० टी०–तत इति । स्पष्टम् ॥ ३२ ॥

रा० टी०–तद्वचनमेवाह–इहेति । हे शुभदर्शन राम ! अद्य रजनीमिह वसाम श्वोऽनागतेह्नि प्रभाते प्रातःकाले तत्प्रसिद्धं मम आश्रमपदमत्यन्तश्रमनिवर्तकं स्थानं गमिष्यामः अनयतनत्वाविवक्षया लट् ॥ ३४ ॥

गो० टी०–इहेति । तत् पूर्वोक्तम् ॥ ३३ ॥

रा० टी०–विश्वामित्रेति । विश्वामित्रवचः श्रुत्वा हृष्टो हर्षं प्राप्तो दशरथात्मजो रामः तत्र प्रसिद्धे ताटकाया वने रजनीं सुखं यथा स्यात्तथा उवास ॥ ३५ ॥

गो० टी०–विश्वामित्रेति । स्पष्टम् ॥ ३४ ॥

३५] ति० टी०–मुक्तशापमपगतोपद्रवं यद्वा लब्धशापया ताटकया मुक्तम् ॥ ३५ ॥

रा० टी०–मुक्तेति । मुक्तशापं रहितोपद्रवम् किंच मुक्ता रामबाणस्पर्शेन स्वस्वरूपं प्राप्ता शापा शापविशिष्टा ताटका यस्मिन् तत्प्रसिद्धं वनं तस्मिन् ताटकाहननाधारभूते अहनि दिने तदा ताटकाहननकाले एव रमणीयं चैत्ररथं वनं यथा इव सुबभ्राज । तस्मिन्नेव तदहनीत्येतदग्रे ' चम्पकाशोकपुन्नागमल्लिकाभिः सुशोभितम् । चूतैश्च पनसैः पूगैर्नारिकेरैश्च शोभितम् ॥ वापीकूपतटाकैश्च दीर्घिकाभिरलंकृतम् । मल्लिकाहेमकूटैश्च मण्डपैरुपशोभितम् ॥ ' इतिश्लोकद्वयं तीर्थभट्टटीकाङ्कितपुस्तके दृश्यते टीका तु नैतयोरिति दिक् ॥ ३६ ॥

गो० टी०–मुक्तशापमिति । मुक्तशापं मुक्तोपद्रवं तस्मिन्नहनि तदैव तत्क्षणे एव चैत्ररथं कुबेरोद्यानम् ॥ ३५ ॥

३६] ति० टी०–प्रभातवेलां प्रतिबोध्यमान इति विश्वामित्रेणेत्यादिः जजागारेति शेषः ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय-
आदिकाव्ये बालकाण्डे षड्विंशः सर्गः ॥ २६ ॥

रा० टी०–निहत्येति । तां प्रसिद्धां यक्षसुतां ताटकां पराक्रमात् परेषां महात्मनां य आक्रमः पीडनं तस्मात्तन्निवृत्तये इत्यर्थः निहत्य सुरसिद्धसंघैः प्रशस्यमानः स रामः मुनिना सहैव तस्मिन्वने उवास ततः प्रभातवेलां प्रति प्रातःकाले बोध्यमानो मुनिना आसीदिति शेषः ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
बालकाण्डे षड्विंशः सर्गः ॥ २६ ॥

गो० टी०–निहत्येति । प्रतिबोध्यमानः मुनिनेति शेषः 'कौसल्या सुप्रजा राम ' इत्येवं प्रबोधितोऽभूदित्यर्थः उपजातिवृत्तम् ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीरा-
ख्याने बालकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

१] ति० टी०–अथेति । उष्येत्यार्षम् प्रहस्य विजयशालिरामदर्शनजसंतोषजो हासः ॥ १

रा० टी०–अथेति । महायशाः विश्वामित्रः तां रजनीमथोष्य समङ्गलं निवासं कृत्वा प्रहस्य मधुराक्षरं मधुराक्षरयुक्तं वाक्यं राघवमुवाच अथशब्दो मङ्गलार्थः ल्यबार्षः ॥ १ ॥

गो० टी०–अस्त्रगणलाभः सप्तविंशे–अथेत्यादि । उष्य उषित्वा प्रहस्य प्रहर्षेण मन्दहासं कृत्वा ॥ १ ॥

२] ति० टी०–सर्वशः सर्वाणि ॥ २ ॥

रा० टी०–तद्वचनमेवाह–परीत्यादिभिः । हे महायशः राजपुत्र ! अहं परितुष्टः प्रसन्नोऽस्मि अतस्ते भद्रं कल्याणमस्तु

---

१ सुबभ्राजेति रा. पाठः । २ पराक्रमादिति रा. पाठः । ३ रुद्रैरिति रा. पाठः । ४ मधुराक्षरमिति गो. रा. पाठः ।

देवासुरगणान्वापि सगन्धर्वोरगान्भुवि । यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ॥ ३ ॥
तानि दिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः । दण्डचक्रं महद्दिव्यं तव दास्यामि राघव ॥ ४ ॥
धर्मचक्रं ततो वीर कालचक्रं तथैव च । विष्णुचक्रं तथात्युग्रमैन्द्रं चक्रं तथैव च ॥ ५ ॥
वज्रमस्त्रं नरश्रेष्ठ शैवं शूलवरं तथा । अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ॥ ६ ॥
ददामि ते महाबाहो ब्राह्ममस्त्रमनुत्तमम् । गदे द्वे चैव काकुत्स्थ मोदकीशिखरी शुभे ॥ ७ ॥
प्रदीप्ते नरशार्दूल प्रयच्छामि नृपात्मज । धर्मपाशमहं राम कालपाशं तथैव च ॥ ८ ॥
वारुणं पाशमस्त्रं च ददाम्यहमनुत्तमम् । अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनन्दन ॥ ९ ॥
ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा । आग्नेयमस्त्रं दयितं शिखरं नाम नामतः ॥ १० ॥
वायव्यं प्रथमं नाम ददामि तव चानघ । अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ॥ ११ ॥
शक्तिद्वयं च काकुत्स्थ ददामि तव राघव । कङ्कालं मुसलं घोरं कापालमथ किङ्किणीम् ॥ १२ ॥

अत एव परमया अत्युत्कृष्टया प्रीत्या त्वद्विषयकप्रेम्णा युक्तोऽहं सर्वशः निखिलान्यस्त्राणि ते ददामि ते इत्युभयान्वयि ॥ २ ॥

गो० टी०–परीति । महायश इति संबुद्धित्वात्र दीर्घः प्रीत्या परमया युक्त इति परितुष्टोस्मीत्यस्यानुवादः सर्वशः सर्वाणि ॥ २ ॥

३] ति० टी०–देवासुरगणान्वापि वाशब्दश्चार्थे गन्धर्वोरगसहितदेवासुरगणरूपशत्रूनपि प्रसह्य बलेन जयिष्यसि जेष्यसि यदि वधे दया तदा वशीकृत्य संमोहनास्त्रादिना जेष्यसि अन्येषां तु का गणनेति भावः ॥ ३ ॥

रा० टी०–अस्त्रग्रहणे प्रयोजनं बोधयन्नाह–देवेत्यादि । यैः अस्त्रैः सगन्धर्वोरगान्गन्धर्वोरगसहितान्देवासुरगणान् अपिना मनुष्यादीनपि अमित्रान्शत्रून् आजौ संग्रामे प्रसह्य हठात् वशीकृत्य जयिष्यसि जेष्यस्येव तानि सर्वशो निखिलानि दिव्यानि अस्त्राणि ते तुभ्यं ददामि अतस्ते भद्रं कल्याणमेवास्तु सार्धश्लोक एकान्वयी वाशब्द एकोऽपिशब्दश्च एवार्थे ॥ ३ ॥

गो० टी०–देवेति । आजौ युद्धे जयिष्यसि स्वार्थे णिच् ॥ ३ ॥

४–५] ति० टी०–दण्डचक्रादयोऽस्त्रभेदाः ॥ ४ ॥ ५ ॥

रा० टी०–नामतोऽस्त्राणि बोधयन्नाह–दण्डचक्रमित्यादिभिः । दण्डचक्रादयस्तत्तन्नामकास्त्रभेदाः शूलवरं शूलश्रेष्ठम् शूलवतमिति भट्टसंमतः पाठः शूलवतनामकमित्यर्थः ॥ ४ ॥ ५ ॥

गो० टी०–तानीति । दण्डचक्रादयश्चक्रभेदाः ॥ ४ ॥

गो० टी०–धर्मेति । सार्धश्लोकद्वयमेकान्वयम् शूलवरं शूलश्रेष्ठं ब्रह्मशिरः ब्रह्मास्त्रादन्यत् ॥ ५ ॥ ६ ॥

६] ति० टी०–शूलवतं शूलवतनामकम् क्वचित्तु 'शूलवरम्' इति पाठः ब्रह्मशिरोऽस्त्रं ब्रह्मास्त्रादन्यत् ॥ ६ ॥

रा० टी०–अस्त्रमिति । ब्रह्मशिरोरूपमस्त्रमित्यर्थः । इदं च ब्रह्मास्त्रादन्यदिति वक्ष्यमाणेन न पौनरुक्त्यम् ॥ ६ ॥

७–८] ति० टी०–गदे द्वे मोदकीशिखरीसंज्ञे द्वे गदे गदासंज्ञके अस्त्रे ॥ ७ ॥ ८ ॥

रा० टी०–गदे इति । मोदकीशिखरीनामके इत्यर्थः ॥ ७ ॥

गो० टी०–गदे इति । मोदकीशिखरीसंज्ञे द्वे गदे स्तः ते उभे दास्यामीति संबन्धः ॥ ७ ॥

रा० टी०–धर्मेति । अनुत्तममतिश्रेष्ठम् ॥ ८ ॥

गो० टी०–धर्मेति । वारुणमित्यस्य काकाक्षिन्यायेनोभयत्रान्वयः ॥ ८ ॥

९] ति० टी०–अस्त्रं च वारुणास्त्रं चेत्यर्थः शुष्कार्द्रसंज्ञके द्वे अशनी अशनीसंज्ञके अस्त्रे ॥ ९ ॥

रा० टी०–अशनी इति ॥ ९ ॥

गो० टी०–अशनी इति । शुष्काशनिरार्द्राशनिरित्यन्वयः पिनाकिन इदं पैनाकम् ॥ ९ ॥

१०] ति० टी०–पिनाकिन इदं पैनाकम् । दयितमग्नेरिति शेषः । शिखरं नाम शिखरमितिप्रसिद्धम् ॥ १० ॥

रा० टी०–आग्नेयमिति । तदेवताकमित्यर्थः ॥ १० ॥

गो० टी०–आग्नेयमिति । आग्नेयमग्निदेवताकं दयितम् अग्नेरिति शेषः ॥ १० ॥

११] ति० टी०–प्रथमं मुख्यम् ॥ ११ ॥

रा० टी०–अस्त्रमिति । शक्तिद्वयं विष्णोः रुद्रस्य चेत्यर्थः ॥ ११ ॥

गो० टी०–अस्त्रमिति । शक्तिद्वयं विष्णुशक्तिः रुद्रशक्तिश्चेति ॥ ११ ॥

१२] ति० टी०–कङ्कालादीन्यसुरधार्यास्त्राणि ॥ १२ ॥

रा० टी०–कङ्कालमिति । एतन्नामकादीनि ददामि ॥ १२ ॥

गो० टी०–कङ्कालमिति । स्पष्टम् ॥ १२ ॥

---

१ अपीति गो. रा. पाठः । २ इदमर्धं रा. न दृश्यते । ३ ऐन्द्रमस्त्रमिति गो. पाठः । ४ शूलवरमिति गो. रा. पाठः । ५ उभे इति गो. रा. पाठः । ६ अयमिति रा. पाठः । ७ कङ्कणमिति गो. पाठः ।

वधार्थं रक्षसां यानि ददाम्येतानि सर्वशः । वैद्याधरं महास्त्रं च नन्दनं नाम नामतः ॥ १३ ॥
असिरत्नं महाबाहो ददामि नृवरात्मज । गान्धर्वमस्त्रं दयितं मोहनं[3] नाम नामतः ॥ १४ ॥
प्रस्वापनं प्रशमनं दम्भि सौम्यं[4] च राघव । वर्षणं शोषणं चैव संतापनविलापने ॥ १५ ॥
मादनं चैव दुर्धर्ष कन्दर्पदयितं तथा । गान्धर्वमस्त्रं दयितं मानवं नाम नामतः ॥ १६ ॥
पैशाचमस्त्रं दयितं मोहनं नाम नामतः । प्रतीच्छ नरशार्दूल राजपुत्र महायशः ॥ १७ ॥
तामसं नरशार्दूल सौमनं च महाबलम् । संवर्तं चैव दुर्धर्षं मौसलं चै नृपात्मज ॥ १८ ॥
सत्यमस्त्रं महाबाहो तथा मायामयं परम् । सौरं तेजःप्रभं नाम परतेजोपकर्षणम् ॥ १९ ॥
सोमास्त्रं शिशिरं नाम त्वाष्ट्रमस्त्रं सुदारुणम् । दारुणं च भगस्यापि शीतेषुमथ मानवम् ॥ २० ॥
एतान्राम महाबाहो कामरूपान्महाबलान् । गृहाण परमोदारान्क्षिप्रमेव नृपात्मज ॥ २१ ॥
स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा । ददौ रामाय सुप्रीतो मन्त्रग्राममनुत्तमम् ॥ २२ ॥
सर्वसंग्रहणं येषां दैवतैरपि दुर्लभम् । तान्यस्त्राणि तदा विप्रो राघवाय न्यवेदयत् ॥ २३ ॥

१३-१४] ति० टी०-यानि रक्षसां वधार्थं समर्थानि एतानि ददामीत्यन्वयः वैद्याधरं विद्याधरसंबन्धि नन्दनं नामासिरत्नमित्यन्वयः यतोऽस्त्रादसीनां प्रादुर्भाव इति भावः १३-१४

रा० टी०-वैद्याधरमिति । विद्याधरसंबन्धि महास्त्रं नन्दनं नामासिरत्नमिति संबन्धः ॥ १३ ॥

गो० टी०-वैद्याधरमिति । वैद्याधरं नन्दनं नामासिरत्नं महास्त्रमित्यर्थः असिर्हि विद्याधरास्त्रम् ॥ १३ ॥

रा० टी०-गान्धर्वमिति ॥ १४ ॥

गो० टी०-गान्धर्वमिति । प्रस्वापनप्रशमने च गान्धर्वे १४

१५] ति० टी०-दम्भीत्यार्षम् प्रशमनं रिपूणां क्रोधशामकमस्त्रम् विलापनं परिदेवनकारकम् ॥ १५ ॥

रा० टी०-धर्षणमिति । विलापनं रोदनकारकम् ॥१५॥

गो० टी०-दर्पणमिति । विलापयति परिदेवयतीति विलापनम् । मदयतीति मदनम् ॥ १५ ॥

१६] ति० टी०-मादनं शत्रूणां मदजनकं दुर्धर्षमित्यादयस्य विशेषणम् ॥ १६ ॥

१७] ति० टी०-प्रतीच्छ गृहाण ॥ १७ ॥

रा० टी०-पैशाचमिति । प्रतीच्छ गृहाण ॥ १६ ॥

गो० टी०-पैशाचमिति । प्रतीच्छ गृहाण ॥ १६ ॥

१८-२१] ति०टी०-मौसलमास्त्रमुसलादन्यत् ॥१८-२१॥

रा० टी०-तामसमिति । मौशलं मुशलाद्भिन्नमस्त्रविशेषः १७

गो० टी०-तामसमिति । मुसलान्मौसलमन्यत् ॥ १७॥

रा० टी०-सत्यमिति ॥ १८ ॥

गो० टी०-सत्यमिति । स्पष्टम् ॥ १८ ॥

रा० टी०-सौम्येति । शीतेषुं शीतेषुसंज्ञकम् ॥ १९ ॥

गो० टी०-सौम्येति । शीतेषुं शीतेषुनामकम् ॥ १९ ॥

रा० टी०-एतानिति । हे महाबाहो नृपात्मज राम ! कामरूपान् ईप्सितरूपधारणसमर्थान्महाबलानतिबलिनः परमोदारानीप्सितदातॄनेतानस्त्रग्रामान् क्षिप्रं शीघ्रमेव त्वं गृहाण ॥२०॥

गो० टी०-एतानिति । कामरूपान् ऐच्छिकशरीरान् २०

२२] ति० टी०-मन्त्रग्राममस्त्राणां मन्त्रमूर्तित्वात् । नन्वबलातिबलादानप्रसङ्गेऽपि मन्त्रग्रामं गृहाणेत्युक्तमिति पुनरत्र दानं विफलमिति चेन्न गृहाणेत्येव तत्रोक्तत्वात् न तु ददाविति । तेन तत्कालोपयोगिबलातिबलयोरेव तत्र दानमितरेषां त्वत्रेति विवेक इति कतककृतः वस्तुतो बलातिबले मन्त्रसमूहात्मके इति तद्रूपं मन्त्रग्राममिति तत्रार्थ इति न दोष इति परे ॥ २२ ॥

रा० टी०-स्थित इति । तदा तस्मिन्काले शुचिः कृतस्नानादिक्रियः सुप्रीतः रामविषयकप्रीतिविशिष्टः प्राङ्मुखो भूत्वा स्थितः मुनिवरः विश्वामित्रः मन्त्रग्रामं मन्त्रसमूहमनुस्मरन् तत्तदस्त्रनियोजकत्वेन अनुस्मारयन् रामाय ददौ तुना लक्ष्मणाय च ददौ स्मरन्निति अन्तर्भावितणिजर्थः तेन रामज्ञानविषयीभूता एव ते मन्त्राः इति बोधितम् तेन मन्त्रग्रहणं मर्यादापालनायैवेति ध्वनितम् ॥ २१ ॥

गो० टी०-स्थित इति । मन्त्रग्राममित्यनेन पूर्वोक्तास्त्रप्रदानं नाम तत्तन्मन्त्रप्रदानमित्युक्तं भवति तेषां कृशाश्वजन्यत्वमधिष्ठातृदेवताद्वारा ॥ २१ ॥

२३] ति० टी०-सर्वेति । येषामुक्तदिव्यास्त्राणां सर्वसंग्रहणं सर्वधारणं कर्तुं दैवतैरपि दुर्लभं दुष्करं देवा अपि

---

१ धारयन्त्यसुरा इति गो. रा. पाठः । २ अस्त्राणीति रा. पाठः । ३ मानवमिति गो. पाठः । ४ सौरमिति गो. पाठः । ५ दर्पणमिति गो. घर्षणमिति रा. पाठः । ६ मदनमिति गो. रा. पाठः । ७ इदमर्धं गो. रा. नास्ति । ८ महाबलेति गो. पाठः । ९ नाम नामतः इति गो. रा. पाठः । १० ततो मायां परंतपेति रा. पाठः । ११ धरमिति गो. पाठः । १२ घोरमिति गो. घोरतेजःप्रदमिति रा. पाठः । १३ सौम्यास्त्रमिति गो. रा. पाठः । १४ शीतलमिति रा. पाठः । १५ सुकामदमिति गो. पाठः । १६ गभस्त्यस्त्रमिति रा. पाठः । १७ अतीति रा. पाठः । १८ अनुस्मरन्निति रा. पाठः ।

जपतस्तु मुनेस्तस्य विश्वामित्रस्य धीमतः । उपतस्थुर्महार्हाणि सर्वाण्यस्त्राणि राघवम् ॥ २४ ॥
ऊचुश्च मुदिता रामं सर्वे प्राञ्जलयस्तदा । इमे[1] वै परमोदारे[2] किंकरास्तव राघव ॥ २५ ॥
यैद्यदिच्छसि भद्रं ते तत्सर्वं करवाम वै[3] । ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबलैः॥ २६ ॥
प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना । मानसा मे भविष्यध्वमिति तान्यभ्यचोदयत्॥ २७ ॥
ततः प्रीतमना रामो विश्वामित्रं महामुनिम् । अभिवाद्य महातेजा गमनायोपचक्रमे ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।

विश्वामित्रं प्रत्यस्त्रसंहारविषयको रामस्य प्रश्नः, विश्वामित्रस्य रामं प्रति संहारोपदेशनं रक्षणीययज्ञस्य वध्यराक्षसानां विषये रामस्य विश्वामित्र प्रति प्रार्थना च ।

प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनः शुचिः । गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत्॥ १ ॥

यत्किंचिदस्त्रमेव जानन्तीति भावः तानि सर्वाण्यस्त्राणि राघवाय रामाय विश्वामित्रो न्यवेदयदत्तवान् राघवाय रामाय लक्ष्मणाय चेत्यपि बोध्यम् युगपदेवोभयोरुपदेश इति बोध्यम् ॥ २३ ॥

रा० टी०–सर्वेति । येषामस्त्राणां यैरस्त्रैः सर्वसंग्रहणं निखिलविषयकज्ञानमत एव दैवतैरपि दुर्लभं दुष्प्रापं दुर्ज्ञेयमिति यावत् तानि सर्वाण्यस्त्राणि तदास्त्रमन्त्रदानोत्तरकाले विप्रो विश्वामित्रो राघवाय रामलक्ष्मणाय न्यवेदयत् ॥ २२ ॥

गो० टी०–सर्वेति । सर्वसंग्रहणं कात्स्न्येन संग्रहणम् ॥२२॥

२४] ति० टी०–जपतः रामाय दातुं तेषां वीर्यवत्तासंपादनाय तान्यस्त्राणि जपत इत्यर्थः उपतस्थुर्गृहीतभामण्डलवपूंष्युपतस्थुरुपस्थितानि विश्वामित्रनियोगेन रामं चोपतस्थुः ॥२४॥

रा० टी०–अस्त्रप्रदानकालेऽस्त्रवृत्तं बोधयन्नाह–जपत इत्यादिसार्धश्लोकद्वयेन । जपतस्तत्तदस्त्रतत्तन्मन्त्रानुच्चारयतः धीमतः प्रशस्तबुद्धिविशिष्टस्य मुनेः राममननशीलस्य तस्य प्रसिद्धस्य विश्वामित्रस्य महार्हाणि अतिपूज्यानि सर्वाणि निखिलान्यस्त्राणि राघवं रामलक्ष्मणमुपतस्थुः सशरीराणि प्रायुः तुना नेमुश्च ॥ २३ ॥

गो० टी०–जपत इति । अस्त्रमन्त्रान् दत्त्वा मन्त्रदेवता अपि रामाज्ञानुवर्तिनीः कारयितुं ताः स्मृत्वा जपतो विश्वामित्रस्याज्ञया राघवमुपतस्थुः सिषेविरे ॥ २३ ॥

२५–२६] ति० टी०–सर्वेऽस्त्रदेवा मुदिताः स्वाधिदैवतरामसंबन्धेन तुष्टाः किंकरा अङ्गीकृतदासत्वाः ॥ २५ ॥ २६ ॥

रा० टी०–ऊचुरिति । मुदिताः रामदर्शनजनितप्रमोदं प्राप्ताः अत एव प्राञ्जलयः सर्वे अस्त्रसमूहाः तदा उपस्थितिकाले एव ऊचुः तद्वचनमेवाह–हे परमोदार राघव राम ! इमे वयं तव किंकरा भृत्याः अतः यद्यदिच्छसि तत्सर्वं वयं करवामैव ते भद्रं कल्याणमस्तु सार्धश्लोक एकान्वयी चनैशब्दो एवार्थौ स्मशब्दो हेत्वर्थे ॥ २४ ॥ २५ ॥

रा० टी०–तत इति । ततः अस्त्रप्रार्थनानन्तरमेव महाबलैः अतिबलविशिष्टैः तैः अस्त्रैः इत्यनेन प्रकारेण उक्तः प्रार्थितः स प्रसन्नात्मा प्रसन्नचित्तः काकुत्स्थः रामः प्रतिगृह्य मदीया भवन्तः इति स्वीकृत्य पाणिना समालभ्य संस्पृश्य च मे मानसाः मनोधीनत्वम् यूयं भविष्यध्वं प्राप्नुत इति तानस्त्रग्रामानभ्यचोदयदाज्ञापयत् । मानसशब्दो भावप्रधानः भूः प्राप्त्यर्थकः अत एव आत्मनेपदसिद्धिः सार्धश्लोक एकान्वयी । एकश्चकार एवार्थे ॥ २६ ॥

गो० टी०–ऊचुरिति । राघवेत्यनन्तरमितिकरणं बोध्यम् ॥ २४ ॥

२७–२८] ति० टी०–समालभ्योपस्पृश्य । मानसाः सदा मनसि स्थिताः । यद्यपि भगवतो रामस्य सर्वं विदितमेव तथापि विद्या गुरूपदेशगृहीतैव फलदा नान्यथेति लोकान्बोधयितुं विश्वामित्रोपदेशग्रहणमिति बोध्यम् ॥ २७ ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०–तत इति । ततः अस्त्रस्वीकारानन्तरं प्रीतमनाः महातेजाः समाधिकरहितप्रतापविशिष्टः रामः महामुनिं विश्वामित्रमभिवाद्य प्रणम्य गमनाय गमनं कर्तुमुपचक्रमे प्रारभत २७॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो० टी०–प्रतिगृह्येति । प्रतिगृह्य अस्त्रसेवामङ्गीकृत्य समालभ्य संस्पृश्य ' आलम्भस्पर्शहिंसयोः' इत्यमरः मानसाः मनोनुसारिणः चिन्तामात्रे उपस्थिता इति यावत् भविष्यध्वं भवत मानसाः सन्तो मां प्राप्नुतेति वार्थः भूप्राप्ताविति धातुः ॥ २५ ॥

गो० टी०–तत इति । गमनाय गन्तुम् " तुमर्थाच्च भाववचनात् " इति चतुर्थी ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

१] ति० टी०–गच्छन्नगमिष्यन् ॥ १ ॥

---

१ स्म इति गो. रा. पाठः । २ परमोदारा इति गो. पाठः । ३ अयं श्लोको गो. नास्ति

गृहीतास्त्रोऽस्मि भगवन्दुराधर्षः सुरैरपि[1] । अस्त्राणां त्वेहमिच्छामि संहारान्मुनिपुंगव[2] ॥ २ ॥
एवं ब्रुवति काकुत्स्थे विश्वामित्रो महातपाः[3] । संहारान्व्याजहाराथ धृतिमान्सुव्रतः शुचिः[4] ॥ ३ ॥
सत्यवन्तं सत्यकीर्तिं धृष्टं रभसमेव च[5] । प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम्[6] ॥ ४ ॥
लक्ष्यालक्ष्यावि[7]मौ चैव दृढनाभसुनाभकौ[8] । दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ[9] ॥ ५ ॥
पद्मनाभमहानाभौ दुन्दुनाभस्वनाभकौ[10] । ज्योतिषं शकुनं चैव नैरास्यविमलावुभौ[11] ॥ ६ ॥
यौगंधरैविनिद्रौ[12] च दैत्यप्रमथनौ तथा[13] । शुचिबाहुर्महाबाहुर्निष्कलिर्विरुचस्तथा[14] ॥
सार्चिर्माली[15] धृतिर्मौली[16] वृत्तिमान्रुचिरस्तथा[17] ॥ ७ ॥
पित्र्यैः[18] सौमनसश्चैव विधूतमकरावुभौ[19] । परवीरं[20] रतिं चैव धनधान्यौ[21] च राघव ॥ ८ ॥
कामरूपं कामरुचिं मोहमावरणं तथा[22] । जृम्भकं सर्पनाथं च पन्थानवरुणौ[23] तथा ॥ ९ ॥
कृशाश्वतनयान्राम भास्वरान्कामरूपिणः[24] । प्रतीच्छ मम भद्रं ते पात्रभूतोऽसि राघव ॥ १० ॥
बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना[25] । दिव्यभास्वरदेहाश्च मूर्तिमन्तः सुखप्रदाः ॥ ११ ॥

रा० टी०–गमिष्यतो रामस्य वृत्तमाह–प्रतीतिश्लोकद्वयेन । प्रहृष्टवदनः शुचिः काकुत्स्थो रामः अस्त्राणि प्रतिगृह्य ततः ताटकावनाद्गच्छन् गमिष्यन्नेव विश्वामित्रमथ समङ्गलमब्रवीत् माङ्गलिकं वचनमुच्चारयामासेत्यर्थः गच्छन्नित्यत्र वर्तमानसामीप्ये भविष्यति लट् ॥ १ ॥

गो० टी०–अस्त्रसंहारकप्रतिग्रहोऽष्टाविंशे–प्रतिगृह्येत्यादि। गच्छन् गमिष्यन् "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट्॥१॥

२] ति० टी०–संहारान् ज्ञातुमिति शेषः उपसंहारापरिज्ञाने पुनः प्रयोगानर्हतयाप्राप्तप्रायत्वात्तज्ज्ञानेच्छा संहारो नाम प्रयुक्तस्यास्त्रस्य मन्त्रविशेषेण पुनः स्वात्मनि स्थापनम् ॥ २ ॥

रा० टी०–तदाकारमाह–गृहीतेति । हे भगवन् सकलसामर्थ्यविशिष्ट हे मुनिपुंगव ! गृहीतास्त्रः गृहीतमस्त्रं येन सोहमस्मि अत एव सुरासुरैः दुराधर्षः अहमस्त्राणां संहारं ज्ञातुमिच्छामि । ज्ञातुमित्यध्याहृतम् ॥ २ ॥

गो० टी०–गृहीतेति । संहारमवगतप्रयोगानामस्त्राणां पुनरुपसंहारं तत्तदस्त्रमूलमन्त्रवर्ति तत्तदस्त्रोपसंहारमन्त्रजातमित्यर्थः । जात्येकवचनम् ॥ २ ॥

३] ति० टी०–एवमिति । उक्तास्त्राणां संहारमार्गमुपदिश्य अथानन्तरं तत्प्रभसंतुष्टः परमऋषिरन्यान्यप्यस्त्राण्युपदिशति स्म ॥ ३ ॥

रा० टी०–एवमिति । महायशाः धृतिमान् प्रशस्तधैर्यविशिष्टः सुव्रतः सत्यसंकल्पः शुचिः नित्यं पूतो विश्वामित्रः काकुत्स्थे रामे एवमनेन प्रकारेण ब्रुवति कथयति सति संहारमथ मङ्गलं यथा स्यात्तथा व्याजहार उवाच ॥ ३ ॥

गो० टी०–एवमिति । धृतिमान् प्रीतिमान् ॥ ३ ॥

४–६] ति० टी०–तदाह—सत्यवन्तमित्यादि । ददामीति सर्वत्र शेषः ॥ ४—६ ॥

रा० टी०–अस्त्रसंहारान्रामतो गणयन्नाह—सत्यवन्तमित्यादिनवभिः श्लोकैः । सत्यवन्तं सत्यवत्संज्ञकं संप्रतीच्छेत्यपकृष्यते एवमन्यद्वितीयान्तेष्वपि बोध्यम् अत्र यत्र प्रथमान्तं तत्र योऽस्ति तमित्यध्याहार्यम् ॥ ४ ॥

गो० टी०–सत्यवन्तमित्यादिसप्तश्लोक्येकान्वया । सत्यवदादीनि उपसंहाराणां नामानि सार्चिर्मालीत्यादिषु प्रथमा द्वितीयार्थे मम मत्तः ॥ ४—१० ॥

रा० टी०–लक्ष्येति ॥ ५ ॥

रा० टी०–पद्मनाभेति ॥ ६ ॥

७–९] ति० टी०–सार्चिमाल्यादयोऽन्ये तांश्च ददामीत्यर्थः ॥ ७–९ ॥

रा० टी०–योगंधरेति ॥ ७ ॥

रा० टी०–पित्र्य इति ॥ ८ ॥

रा० टी०–कामरूपमिति ॥ ९ ॥

१०] ति० टी०–भास्वरांस्तेजोमयान् प्रतीच्छ गृहाण पात्रभूतः अस्त्रदानस्येति शेषः । मम मत्तः ॥ १० ॥

रा० टी०–नामतः उपसंहारानुपदिश्य रामं प्रत्याह–कृशाश्वेति । हे राघव रघुकुलप्रादुर्भूत राम ! कामरूपिणः ईप्सितरूपधारणसमर्थान्भास्वरान्प्रकाशमानान्कृशाश्वतनयान् त्वं प्रतीच्छ गृहाण ते भद्रमस्तु तत्र हेतुः यतः मम दानस्य पात्रभूतस्त्वमसि ॥ १० ॥

११] ति० टी०–बाढमित्यङ्गीकारे । प्रहृष्टेनान्तरात्मना प्रत्यग्रहीदिति शेषः मूर्तिमन्तः स्वस्वदेवतारूपेण ॥ ११ ॥

रा० टी०–बाढमिति । काकुत्स्थो रामः प्रहृष्टेनान्तरा-

---

१ सुरासुरैरिति गो. रा. पाठः । २ अस्त्राणामहमिच्छामीति रा. पाठः । ३ संहारमिति गो. रा. पाठः । ४ महायशा इति गो. रा. पाठः । ५ संहारमिति गो. रा. पाठः । ६ हृष्टमिति रा. पाठः । ७ लक्षाक्षविषमाविति गो. पाठः । ८ सुनाभकाविति गो. रा. पाठः । ९ कुशनमिति गो. पाठः । १० योगंधरहरिद्राविति गो. पाठः । ११ इदमर्धं गो. रा. नास्ति । १२ धृतिर्मालीति गो. पाठः । १३ पितृसौमनसमिति गो. पाठः । १४ करवीरकरमिति गो. करवीरानिरमिति रा. पाठः । १५ धनधान्ये इति गो. पाठः । १६ सर्वनाथमिति गो. रा. पाठः । १७ संतानवरुणाविति गो. रा. पाठः । १८ एतदग्रे जग्राह मन्त्रग्रामं तेऽप्युपतस्थुश्च राघवेत्यधिको गो. पाठः । तत्रापि राघवमिति युक्तम् । स च प्रक्षिप्त इति भाति 'जग्राहेति शेषः' इतिटीकाकृतोक्तत्वात् ।

केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा । चन्द्रार्कसदृशाः केचित्प्रह्वाञ्जलिपुटास्तथा ॥ १२ ॥
रामं प्राञ्जलयो भूत्वाब्रुवन्मधुरभाषिणः । इमे स्म नरशार्दूल शाधि किं करवाम ते ॥ १३ ॥
गम्यतामिति तानाह यथेष्टं रघुनन्दनः । मानसाः कार्यकालेषु साहाय्यं मे करिष्यथ ॥ १४ ॥
अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम् । एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतम् ॥ १५ ॥
स च तान्राघवो ज्ञात्वा विश्वामित्रं महामुनिम् । गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् ॥ १६ ॥
किमेतन्मेघसंकाशं पर्वतस्याविदूरतः । वृक्षखण्डमितो भाति परं कौतूहलं हि मे ॥ १७ ॥

त्मना मनसा बाढमिति कृत्वैव जग्राहेति शेषः उपसंहारा अपि मूर्तिमन्तः सन्तीति वर्णयंस्तत्प्रार्थनामाह–दिव्येतिसार्धश्लोकद्वयेन दिव्यभास्वरदेहाः दिव्याः प्राकृतविलक्षणाः भास्वरा प्रकाशवन्तो देहाः येषां ते मूर्तिमन्तः काठिन्यविशिष्टशरीराः सुखप्रदाः दर्शनमात्रेणाश्रितानां सुखप्रदातारः प्रह्वाञ्जलिपुटाः प्रह्वाः प्रणतिसूचकाः देवादीनामञ्जलिपुटा येषु ते मधुरभाषिणः मधुरभाषणशीला एव सन्तीति शेषः च एवार्थे तत्र केचिदङ्गारसदृशाः अङ्गारप्रतियोगिकसादृश्यविशिष्टाः प्रतीयन्ते केचिद्धूमोपमाः धूमप्रतियोगिकसादृश्यविशिष्टाः प्रतीयन्ते केचिच्चन्द्रार्कसदृशाः चन्द्रार्कप्रतियोगिकसादृश्यविशिष्टाः प्रतीयन्ते ते सर्वे प्राञ्जलयो बद्धयुगलकरा भूत्वैव राममब्रुवन् तद्भाषणमेवाह–ह नरशार्दूल ! इमे वयं ते तव स्मः अतः किं करवाम इति त्वं शाधि शिक्षय आज्ञापयेत्यर्थः सार्धश्लोकद्वयमेकान्वयि तत्र ते सर्वे प्रतीयन्ते इत्यध्याहृतम् स्मेत्यार्षम् ॥ ११—१३ ॥

गो० टी०–बाढमिति अर्धम् । बाढमित्यङ्गीकारे प्रहृष्टेनान्तरात्मना प्रतिजग्राहेति शेषः ॥ ११ ॥

गो० टी०–मन्त्रस्वीकारानन्तरं मन्त्रदेवतासाक्षात्कारं दर्शयति–दिव्येत्यादिश्लोकद्वयेन दिव्याः श्लाघ्याः भास्वराश्च देहा येषां ते तथा मूर्तिमन्तः शरीरकाठिन्यवन्तः ' मूर्तिः काठिन्यकाययोः ' इत्यमरः सुखप्रदाः आह्लादकाः प्रह्वाः नम्राः अञ्जलिपुटाः अञ्जलिपुटयुक्ताः अर्शआदित्वादच् प्राञ्जलयः कृताञ्जलयः मधुरभाषिणः मधुरभाषणशीलाः केचित्पुरुषाः राममब्रुवन् ॥ १२ ॥ १३ ॥

१२] ति० टी०–प्रह्वाञ्जलिपुटाः प्रह्वा नम्रास्ते च तेऽञ्जलेः पुटं संश्लेषो येषां तादृशाः ॥ १२ ॥

१३] ति० टी०–इमे स्म संनिहिता वयमिति शेषः शाध्याज्ञापय ॥ १३ ॥

गो० टी०–इम इति । अर्धम् । स्मेत्यार्षः सलोपः शाधि आज्ञापय " शा हौ " इति शास्तेः शादेशः ॥ १४ ॥

१४] ति० टी०–गम्यताम् इदानीमिति शेषः कार्यकालेषु मानसा मनसि संनिहिता भूत्वा साहाय्यं करिष्यथ॥१४॥

रा० टी०–प्रार्थनोत्तरकाले रघुनाथवचनमाह–मानसा इति । मम मानसाः सन्तः कार्यकालेषु साहाय्यं करिष्यथ इति हेतोः यथेष्टं यथेच्छं गम्यतामिति रघुनन्दनस्तानुपसंहरन्नाह१४

गो० टी०–मानसा इति । यथेष्टं गम्यतामित्यन्वयः॥१५॥

१५] ति० टी०–प्रदक्षिणं सकलस्वदेवताधिदैवतरूपत्वाद्रामस्य प्रदक्षिणकरणम् ॥ १५ ॥

रा० टी०–अथेति । ते सर्वे उपसंहाराः तं काकुत्स्थं राममेवमस्तु इत्युक्त्वा आमन्त्र्य गमनाय तदाज्ञां गृहीत्वा प्रदक्षिणं च कृत्वा यथागतमथ जग्मुः ॥ १५ ॥

गो० टी०–अथेति । ते पुरुषाः ॥ १६ ॥

१६] ति० टी०–एतदुत्तरम्–'ततस्तु रामः काकुत्स्थः शासनाद्ब्रह्मवादिनः । लक्ष्मणाय च तान्सर्वान्स चान्यान्रघुनन्दनः ॥ ससंहारान्ससंहृष्टः श्रीमांस्तस्मै न्यवेदयत् ' इत्यधिकं दृश्यते तत्प्रक्षिप्तम् । बलातिबलयोरिवास्त्राणामापि युगपदुभयोर्विश्वामित्रेणैवोपदेशदानसंभवात् । स तानुपदिष्टानस्त्रान्राघवो रामो ज्ञात्वा मन्त्रतो मूर्तितः प्रयोगतश्चेति शेषः ॥ १६ ॥

रा० टी०–स इति । स राघवो रामः तान् उपसंहारमन्त्रान् ज्ञात्वा गच्छन्नेव महामुनिं विश्वामित्रमथ सकलमङ्गलमूलं मधुरं माधुर्यविशिष्टं श्लक्ष्णं श्रवणमात्रेण सुखप्रदं वचनमब्रवीत् ॥ १६ ॥

गो० टी०–सचेति । तान् उपसंहारमन्त्रान् श्लक्ष्णं व्यक्तम् ॥ १७ ॥

१७] ति० टी०–मेघसंकाशं काष्ण्यनैबिड्याच्च । वृक्षखण्डं वृक्षसमूहम् किं वनसंबन्धि उत आश्रमसंबन्धीति प्रश्नः ॥ १७ ॥

रा० टी०–तद्वचनमेवाह–किंत्विति । मेघसंकाशं मेघसदृशं परमुत्कृष्टं मे कौतूहलमुत्साहोत्पादकं दर्शनीयमृगाकीर्णं दर्शनीया दर्शनयोग्याः ये मृगाः तैः आकीर्णं व्याप्तं वल्गुभाषैः मनोहरवचनैः नानाप्रकारैः अनेकविधैः शकुनैः पक्षिभिश्च अलंकृतमत एवातीव मनोहरम् दर्शनीयमिति पाठे तु वनविशेषणम् वृक्षखण्डं वृक्षसमूहः पर्वतस्याविदूरतः निकटे एव विद्यमानमतः अस्मात्स्थानाद्भाति प्रकाशते एतत् किं स्वत एव भाति देवप्रसादाद्वेति प्रश्ने बीजम् । तुशब्दएवार्थे हिर्हेतौ श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–किंन्विति । श्लोकद्वयम् । इतः अस्मिन् प्रदेशे कौतूहलं श्रोतुमिति शेषः ॥ १८ ॥ १९ ॥

---

१ किंन्वेतदिति गो. किंत्वेतदिति रा. पाठः ।

दर्शनीयं[1] मृगाकीर्णं[2] मनोहरमतीव च । नानाप्रकारैः शकुनैर्वल्गुभाषैरलंकृतम् ॥ १८ ॥
निःसृताः स्मो मुनिश्रेष्ठ कान्ताराद्रोमहर्षणात्[3] । अनया त्ववगच्छामि देशस्य सुखवत्तया ॥ १९ ॥
सर्वं मे शंस भगवन्कस्याश्रमपदं त्विदम्[4] । संप्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः ॥ २० ॥
तव यज्ञस्य विघ्नाय दुरात्मानो महामुने[5] । भगवंस्तस्य को देशः सा यत्र तव याज्ञिकी ॥ २१ ॥
रक्षितव्या क्रिया ब्रह्मन्मम[6] या वध्याश्च राक्षसाः । एतत्सर्वं मुनिश्रेष्ठ श्रोतुमिच्छाम्यहं प्रभो[7] ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।

विष्णोः सिद्धाश्रमदर्शनम्, तत्संबन्धीयकथोपाख्यानं च ।

अथ तस्याप्रमेयस्य वैचनं[8] परिपृच्छतः । विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥ १ ॥
इह राम महाबाहो विष्णुर्देवनमस्कृतः[9] । वर्षाणि सुबहूनीह[10] तथा युगशतानि च ॥ २ ॥

१८] ति० टी०–वल्गुभाषैर्मधुरभाषैः ॥ १८ ॥

१९] ति० टी०–रोमहर्षणात्ताटकया निर्जनीकरणात्तस्य भयानकत्वेन रोमहर्षणत्वम् अनया देशस्य सुखवत्तयेदमाश्रमपदं त्ववगच्छामि ॥ १९ ॥

रा० टी०–निःसृता इति। हे मुनिश्रेष्ठ! रोमहर्षणाद् रोमोद्गमकारणभयप्रापकादित्यर्थः कान्तारात्ताटकावनाद् वयं निःसृताः स्मः अनन्तरमनया देशस्य सुखवत्तया देशनिष्ठसुखकारणतयैवावगच्छामि अतः इदमश्रमपदं श्रमनिवर्तकं स्थानं कस्येति सर्वं मे हे भगवन्! त्वं शंस कथय श्लोकद्वयमेकान्वयि एकस्तुशब्दः अनन्तरार्थकः द्वितीयस्तुशब्दः एवार्थकः ॥ २० ॥

गो० टी०–निःसृता इति । कान्तारात्ताटकावनात् रोमहर्षणात् रोमाञ्चकरात् भयंकरादिति यावत् अर्थमेकम् ॥२०॥

गो० टी०–अनयेति । अनया देशस्य सुखवत्तया इदमाश्रमपदमित्यवगच्छामि कस्येति न जानामि तत्सर्वं शंस आदितः प्रभृति वदेत्यर्थः ॥ २१ ॥

२०] ति० टी०–आश्रमपदं निर्णीय तत्कस्येति शंसेति पृच्छति–सर्वमिति । सर्वं च शंस सर्वशब्दविवक्षितं जिज्ञासान्तरं स्वयमेवाह–संप्राप्ता इति ते ब्रह्मघ्नास्तव यज्ञस्य विघ्नाय यत्र संप्राप्ताः स देशः कः ॥ २० ॥

रा० टी०–संप्राप्ता इति । हे महामते! पापाः पापमयाः अतो ब्रह्मघ्नाः वेदमार्गध्वंसकाः अत एव दुष्टचारिणः दुष्टाचरणशीलाः अत एव दुरात्मानः दुष्टप्रयत्नकाः ते राक्षसाः तव यज्ञस्य विघ्नाय यत्र यस्मिन्काले संप्राप्ता भवन्तीति शेषः तस्य कालस्य संबन्धी देशः कः ननु देशप्रश्ने किमित्यत आह–हे भगवन् हे ब्रह्मन्! रक्षितव्या मम रक्षणीया तव याज्ञिकी क्रिया यत्रास्ति तत्रैव मम वध्या राक्षसा भविष्यन्ति अतो हे मुनिश्रेष्ठ हे प्रभो! एतत्सर्वमहं श्रोतुमिच्छामि अतस्त्वं शंसेत्यर्थः। सार्धश्लोकद्वयमेकान्वयि चशब्द एवार्थे ॥ २१–२२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०–संप्राप्ता इत्यादि । श्लोकद्वयम् । ते पूर्वोक्ताः तव यज्ञस्य विघ्नाय यत्राश्रमपदे संप्राप्ताः सा च तव याज्ञिकी क्रिया यत्र रक्षितव्या राक्षसाश्च वध्याः तस्याश्रमस्यको देशः ॥ २२ ॥ २३ ॥

२१–२२] ति० टी०–यत्र च तव याज्ञिकी क्रिया मया रक्षितव्या यत्र च राक्षसा वध्याः भगवन् तस्य त्वदाश्रमस्यको देशः प्रदेश इत्यन्वयः ॥ २१ ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०–एतदित्यर्धम् ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

१] ति० टी०– तस्य रामस्य परिपृच्छतो वचनं श्रुत्वेति शेषः व्याख्यातुं पृष्टोत्तरमिति शेषः ॥ १ ॥

रा० टी०–अथेति । अथ रामप्रश्नानन्तरमप्रमेयस्य इयत्तारहितप्रभावादिमतः तत् पर्वतनिकटवर्ति वनं परिपृच्छतो रामस्य महातेजा विश्वामित्रो व्याख्यातुमुपचक्रमे प्रारेभे संबन्धसामान्यविवक्षया षष्ठी संमुख इत्यध्याहारो वा अप्रमेयस्येत्युक्त्या लीलार्थमेव प्रश्नादिक्रिया रामस्येति ध्वनितम् ॥१॥

गो० टी०–अथ सिद्धाश्रमस्य नित्यं भगवत्संनिधिमत्त्वेन दिव्यदेशत्वं तत्संनिधाने पूर्वेषां सिद्धतपस्करत्वं भगवद्देशस्यैव वस्तव्यत्वमित्येतत्प्रतिपादनमुखेन स्थाण्वाश्रमाद्वैलक्षण्यं दर्शयत्येकोनत्रिंशे–अथ तस्येत्यादि । अप्रमेयस्य अचिन्त्यवैभवस्य मानुषभावनया पूर्ववृत्तमज्ञातमिव पृच्छत इत्यर्थः चतुर्थ्यर्थे षष्ठी ॥ १ ॥

२] ति० टी०–इह वने इह प्रदेशे ॥ २ ॥

रा० टी०–तद्वचनमेवाह–इहेतित्रयोविंशत्या श्लोकैः ।

१ दर्शनीयमृगाकीर्णमिति रा. पाठः । २ नादैरिति गो. पाठः । ३ महामते इति गो. रा. पाठः । ४ ममेति गो. रा. पाठः । ५ तद्वनमिति गो. रा. पाठः । ६ वरप्रभ इति रा. वरः प्रभुरिति गो. पाठः । ७ एवेति गो. रा. पाठः ।

तपश्चरणयोगार्थमुवास सुमहातपाः । एष पूर्वाश्रमो राम वामनस्य महात्मनः ॥ ३ ॥
सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः । एतस्मिन्नेव काले तु राजा वैरोचनिर्बलिः ॥ ४ ॥
निर्जित्य दैवतगणान्सेन्द्रान्सहमरुद्गणान । कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ॥ ५ ॥
यज्ञं चकार सुमहानसुरेन्द्रो महाबलः । बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ॥
समागम्य स्वयं चैव विष्णुमूचुरिहाश्रमे ॥ ॥ ६ ॥
बलिर्वैरोचनिर्विष्णो यजते यज्ञमुत्तमम् । असमाप्तव्रते तस्मिन्स्वकार्यमभिपद्यताम् ॥ ७ ॥

हे महाबाहो हे राम ! देववरप्रभः देववरस्येन्द्रस्य प्रभा यस्मात् सः सुमहातपाः विष्णुः इहास्मिन् वने युगशतानि तथा सुबहूनि वर्षाणि अन्यान्यपि तपश्चरणयोगार्थं तपश्चरणानां तपस्विनां यो योगस्त्वयि चित्तवृत्तिनिरोधस्तदर्थमुवास चशब्दोप्यर्थे एतेन विष्णो रामोपासकशिरोमणित्वं ध्वनितम् तेन विष्णोरयं पूर्वाश्रम इति ध्वनितम् ॥ २ ॥

गो० टी०–इहेति । सार्धश्लोकः तपश्चरणयोगार्थं तपश्चरणफलसिद्ध्यर्थं यद्वा तपश्चरणं च योगश्च तदुभयार्थं केचिदिह इहशब्दद्वयं पठन्ति तदा इह वने तत्रापि इह प्रदेशे इत्यर्थः ॥ २ ॥

३] ति० टी०–तपश्चरणयोगार्थं स्वाचारेण लोकप्रवर्तनाय स्वतपश्चरणम् वामनस्य करिष्यमाणवामनावतारस्य विष्णोः पूर्वाश्रमो वामनावतारात्पूर्वकाले तपोयोगार्थं परिगृहीत आश्रमः ॥ ३ ॥

रा० टी०–विष्ण्ववतारभूतवामनस्यापीह स्थितिरिति बोधयन्नाह–एष इति । हे राम ! महात्मनः सर्वत्र परिपूर्णस्य वामनस्यापि सिद्धाश्रम इति ख्यातः प्रसिद्धः एषः पूर्वाश्रमः पौर्वकालिकं स्थानमासेति शेषः सिद्धाश्रम इति ख्यातौ हेतुमाह–यतः महातपाः विष्णुः वामनस्थितिपूर्वकाले अत्र सिद्धः तपश्चरणानां चित्तैकाग्र्यं स्वस्मिन् रामोपासकाचार्यत्वं साधितवान् सिद्ध इति अन्तर्भावितणिजर्थः किंच सिद्धः सकलसिद्ध्याश्रयोऽपि विष्णुः अत्र महातपाः अतिविचारशील आस स्वस्मिन् रामोपासकत्वाभिधानार्थमिति शेषः अतः सिद्धाश्रम इत्यर्थः अस्मिन्पक्षे सिद्धानां रामोपासनपरिपक्कानां विष्ण्वादीनामाश्रमः स्थानमिति व्युत्पत्तिरिति भावः विष्णो रामोपासकत्वे प्रमाणम् 'ब्रह्मविष्णुमहेशाद्या यस्यांशा लोकसाधकाः। तं रामं सच्चिदानन्दं नित्यं रासेश्वरं भजे ' इति हनुमत्संहिता-वचनादि अत एव " अव्यक्तात्पुरुषः परः " इत्यादिश्रुति संगच्छते ॥ ३ ॥

गो० टी०–एष इति । वामनस्य वामनरूपेणावतरिष्यतः पूर्वं विष्णुत्वेन रूपेणेह तपश्चचार पश्चाद्वामनरूपेणापीति तस्याश्रमस्यातिशयो दर्शितः विष्णोरत्र तपश्चरणं लोके तपसः प्रवर्तनाय बदरिकाश्रम इव नारायणस्य सिद्धाश्रमत्वं निर्वक्ति–सिद्ध इति महातपाः काश्यपः अत्र हि यस्मात् सिद्धः तपःफलं प्राप्तः तस्मादेष सिद्धाश्रमो नाम ॥ ३ ॥

४] ति० टी०–सिद्धाश्रमत्वव्यवहारे बीजमाह–हि यस्मात् अत्र महातपा विष्णुस्तपःसिद्धो जात इति एतस्मिन्काले विष्णोस्तपःकाले ॥ ४ ॥

रा० टी०–वामनावतारस्य प्रयोजनं वदन्नाह–एतस्मिन्निति । एतस्मिन् विष्णोस्तपश्चरणसंबन्धिनि काले एव वैरोचनिः विरोचनसुतो राजा बलिः सेन्द्रान् इन्द्रसहितान् समरुद्गणान् मरुद्गणसहितान् दैवतगणान् निर्जित्य त्रिषु लोकेषु विश्रुतः सन् तद्राज्यं इन्द्रराज्यं कारयामास चकार कारयामासेति रामो राज्यमचीकरदितिवत्प्रयोगः ॥ ४ ॥

गो० टी०–एतस्मिन्निति । सार्धश्लोकः । एतस्मिन्काले विष्णोस्तपश्चरणकाले विरोचनः प्रह्लादसुतः तस्यापत्यं वैरोचनिः समरुद्गणान् सवायुगणान् कारयामास मन्त्रिभिरिति शेषः । तद्राज्यं इन्द्रराज्यम् ॥ ४ ॥

५] ति० टी०–मरुद्गणानावहादिवायुगणान् कारयामास स्वार्थे णिच् चकारेत्यर्थः यद्वा इन्द्रादिराज्यं स्वीयैः कैश्चिदेव कारयामासेत्यन्वयः ॥ ५ ॥

६] ति० टी०–बलेर्यजमानस्य व्यवहारं दृष्ट्वेति शेषः साग्निपुरोगमेनाग्निना सहिता इत्यर्थः अग्निमुखत्वाच्च देवानां तस्मिन्पुरोगमत्वं स्वयमेवागम्य न तु दूतमुखेन ॥ ६ ॥

रा० टी०–यज्ञमिति । मतिमान् प्रशस्तमतिविशिष्टः महाबली अतिवीर्यवान् असुरेन्द्रो बलिर्यज्ञं चकार ॥ ५ ॥

गो० टी०–बलेरिति । भावलक्षणे षष्ठी बलौ यजमाने यागं कुर्वाणे साग्निपुरोगमाः पुरोगमेनाग्निना सहिताः अग्निमुखत्वादेवानां स्वयमेव समागम्य इहाश्रमे तपश्चरन्तं विष्णुमूचुः ॥ ५ ॥

७] ति० टी०–यजते कर्त्रभिप्रायत्वादात्मनेपदम् नन्वसुरस्य बलेर्देवद्विषो यागाद्यनुपपत्तिः यागतर्पणीयदेवताभावात् इन्द्रादीनां तद्वैष्यत्वात् न च शब्दमात्रं देवतेति युक्तम् अर्थवादप्रामाण्येन देवताया विग्रहवत्त्वस्योत्तरमीमांसायां सिद्धान्तितत्वादिति चेन्न कर्मदेवाजानदेवभेदेन देवानां द्वैविध्यात् तत्र ये कर्मणा देवत्वं प्राप्तास्ते कर्मदेवाः आजानदेवास्तु यज्ञ-

१ प्यनेति गो. रा. पाठः । २ सेन्द्रांश्चे समरुद्गणानिति गो. रा. पाठः । ३ मतिमानिति गो. रा. पाठः । ४ महाबलीति गो. महाबलिरिति रा. पाठः । ५ असमाप्ते क्रताविति गो. रा. पाठः ।

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

ये चैनमभिवर्तन्ते याचितार इतस्ततः । यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ॥ ८ ॥
स त्वं सुरहितार्थाय मायायोगमुपाश्रितः । वामनत्वं गतो विष्णो कुरु कल्याणमुत्तमम् ॥ ९ ॥
एतस्मिन्नन्तरे राम कश्यपोऽग्निसमप्रभः । अदित्या सहितो राम दीप्यमान इवौजसा ॥ १० ॥

मन्त्रार्थभूता मन्त्रेण नित्यसंबद्धाः कर्मदेवेभ्यः प्राचीना एव तत्कर्मदेवानां द्वेष्यत्वेऽप्याजानदेवानां यज्ञे तर्प्यत्वेन न दोषः विघ्नकर्तारोऽप्यत्र कर्मदेवा एव यज्ञाद्यधिकाराभावोऽप्याजानदेवानामेव स्वयष्टव्यदेवतान्तराभावात् कर्मदेवानां त्वस्त्येव अत एवेन्द्रादीनां यज्ञादिश्रवणं नानुपपन्नमित्यन्यत्र विस्तरः असमाप्नुवतेऽसमाप्तयज्ञे स्वकार्यमात्मीयानां देवानां कार्यं अभिपद्यतां संपाद्यताम् ॥ ७ ॥

रा० टी०–**बलेरिति** । साग्निपुरोगमाः पुरस्कृताग्निसहिताः यजमानस्य बलेः देवाः स्वयमेव समागम्य प्राप्य इहाश्रमे एव विद्यमानं विष्णुमूचुः तुचशब्दावेवार्थे ॥ ६ ॥

रा० टी०–तद्वचनमेवाह–**बलिरिति** । हे विष्णो ! वैरोचनिः विरोचनपुत्रो बलिः उत्तमं यज्ञं यजते करोति तस्मिन् क्रतौ यज्ञे असमाप्ते समाप्तेः पूर्वकाले स्वकार्यमभिपद्यतां प्राप्यताम् स्वकार्यमभिपद्यतामित्यनेन अस्मत्कार्यार्थमेवायमिह स्थित इति देवानां ज्ञानमस्तीति व्यक्तम् किंच स्वेषामात्मीयानामस्माकं कार्यं प्रयोजनमभिपद्यतां साध्यतामित्यर्थः ॥ ७ ॥

गो० टी०–**बलिरिति** । यज्ञं यजते यज्ञं करोतीत्यर्थः ओदनपाकं पचतीतिवत् **असमाप्त** इति समाप्तश्चेत् न स जेतुं शक्य इत्यर्थः । स्वकार्यदेवकार्यमाश्रितकार्यस्य स्वकार्यत्वात्तथोच्यते अभिपद्यतामभितः कात्स्न्येन संपाद्यताम् ॥६॥

८] ति० टी०–असमाप्नुवत इत्युक्तेः प्रयोजनं दर्शनं दर्शयन्तस्तत्संपादन उपायमपि स्वयमेव वदन्ति—**ये चेति** ' अभिवर्तन्ते प्राप्नुवन्ति इतस्ततो नानादेशेभ्यः यत्र गोभूहिरण्यादिविषये यच्च वस्तु याचन्ते तेभ्यस्तत्सर्वं यथावद्यज्ञसाद्गुण्यायावमानादिरहितं सत्कारपूर्वं प्रयच्छति चौ एवार्थे ॥ ८ ॥

रा० टी०–**य इति**। यत्रान्नवस्त्रद्रव्यवाहनादिषु यद्याचितारो ये इतोऽस्मादेशात्ततो देशान्तराच्च एनं बलिमभिवर्तन्ते प्राप्नुवन्ति तत्सर्वं तेभ्यो याचकेभ्यः यथावत् संप्रयच्छति सम्यक् ददात्येव चशब्द एवार्थे एकेन चकारेण याचितादधिकमपि ददातीत्यर्थः संपन्नः याचितार इति तृन्नन्तः अत एव यदित्यत्र न षष्ठी सर्वं प्रयच्छतीत्यनेन त्वमपि अस्मदुपकारार्थमस्मद्राज्यं याचयेति बोधितम् तेन अस्मद्राज्यप्राप्तौ उपायान्तरं नास्तीति व्यञ्जितं तेन बलेः परमबलवत्ता सूचिता ॥ ८ ॥

गो० टी०–ननु कथमसुरस्य यज्ञानुष्ठानम् " यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन् साक्षादेव तद्देवतां प्रीणाति " इतिश्रुतेः तत्तद्देवध्यानपूर्वकं तन्मन्त्रेण तत्तद्देशेन तत्तद्धविःप्रदानस्य यागत्वात्तस्य च देवशत्रोरयोगात् नच चतुर्थ्यन्तः शब्दो देवतेति वाच्यम् अचेतनप्रीणनासंभवात् तत्प्रीतिमूलफलासिद्धेश्च अत एव केवला क्रियैव फलदेति प्रत्युक्तम् अतोर्थवादानुरोधेन शब्दक्रियातिरिक्ता सचेतना वज्रहस्तत्वादिविशिष्टविग्रहवती देवता नच विग्रहवत्त्वे युगपदनेकयागसंनिधानासंभवः दिव्यशक्तिमत्त्वेन नानाशरीरपरिग्रहसंभवेन तेषां सर्वयागसांनिध्यस्य सुलभत्वात् तस्मात्र देवतावैरिणो यागसंभव इत्युच्यते । नायं बलिना क्रियमाणो याग इन्द्रादिदेवताराध्यकः येनोक्तदोषः स्यात् किंतु भगवदाराधनभूतः कश्चिद्यागविशेषः तस्य विष्णुभक्तत्वेन प्रसिद्धत्वात् तर्हि भक्तयज्ञविघ्नं विष्णुः कथं कुर्यात् स्वभक्तस्यापि स्वभक्तविरोधित्वं भगवतोऽसह्यं ततः पुत्रान्तरविरोधिपुत्रशिक्षणवत् स्वाश्रितदेवविरोधिशिक्षणं युक्तमेव अत एवोक्तम् ' मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत्' इति । तर्हि तस्य धार्मिकस्य कथं निग्रहः स्यात्तत्राह–**ये चेत्यादिश्लोकद्वयेन** । ये यत्र वस्तुवाहनादिषु यद्वस्तुयाचितारः याच्ञ्यमाणाः सन्तः इतस्ततः देशात् एनमभिवर्तन्ते ॥ ७ ॥

९] ति० टी०–माया स्वतस्त्वाच्छादनेन प्राकृतमर्त्यादिभावप्रकाशिका शक्तिस्तस्या योगः संबन्धस्तमाश्रितः वामनत्वप्राप्तावयं हेतुः–वामनरूपस्यात्याश्चर्यत्वेन तत्प्रार्थनाविषयस्यावश्यं यजमानकर्तव्यतया तद्रूपप्रार्थनम् ॥ ९ ॥

रा० टी०–ननु भवतः पक्षपातिनं मां ज्ञात्वा कथं दास्यतीत्याह–**स त्वमिति** । हे विष्णो ! मायायोगं मायायाः अस्मद्विविषयककृपाया योगं संबन्धमुपागतः नित्यं प्राप्तस्त्वं सुरकार्यहितार्थाय वामनत्वं स्वकीयं नित्यवामनरूपं गतः प्रकटत्वेन प्राप्तः सन् उत्तममाश्रितपालकत्वेन श्रेष्ठं कल्याणं कुरु प्रकटय ॥ ९ ॥

गो० टी०–तत्सर्वं तेभ्यः यथावत्सत्कारपूर्वकं प्रयच्छति–**स इति** । माया विष्णुत्वाच्छादिका शक्तिस्तस्या योगं संबन्धमुपागतः वामनत्वं वामनरूपत्वं गतः कल्याणमस्मत्कार्यं कुरु तस्मिन्नौदार्याख्यो महागुणो वर्तते तेन त्वं वामनवेषो भूत्वा याच्ञापदेशेन तद्राज्यमपहृत्य देहीति भावः ॥ ८ ॥

१०] ति० टी०–एतस्मिन्नन्तरे देवैर्वामनावतारप्रार्थनसमये रामेति द्विः संबोधनं स्वाश्रमसंनिधानेन रामपृष्टतन्महत्त्वकथनेन हर्षातिशयाच्च बोध्यम् ॥ १० ॥

रा० टी०–**एतस्मिन्निति** । हे राम ! एतस्मिन्नन्तरे इन्द्रादिप्रार्थनासमये रामो दीप्यमानः रामनाम्ना प्रकाशमानः देवीसहायः देवी पार्वती सहायो यस्य स भगवान्शंभुरिव अग्निसमप्रभः अग्निप्रभाविशिष्टः ओजसा इव ओजस्तुल्यया

१ उपागत इति गो. रा. पाठः ।

देवीसहायो भगवान्दिव्यं वर्षसहस्रकम् । व्रतं समाप्य वरदं तुष्टाव मधुसूदनम् ॥ ११ ॥
तपोमयं तपोराशिं तपोमूर्तिं तपात्मकम् । तपसा त्वां सुतप्तेन[1] पश्यामि पुरुषोपमम्[2] ॥ १२ ॥
शरीरे तव पश्यामि जगत्सर्वमिदं प्रभो । त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः ॥ १३ ॥
तमुवाच हरिः प्रीतः कश्यपं धूतकल्मषम् । वरं वरय भद्रं ते वरार्होऽसि मतो मम ॥ १४ ॥
तच्छ्रुत्वा वचनं तस्य मारीचः कश्यपोऽब्रवीत् । अदित्या देवतानां च मम चैवानुयाचितम्[3] ॥ १५ ॥

अदित्या स्वपत्न्या सहितः कश्यपः दिव्यं वर्षसहस्रकं दिव्यसहस्रसाध्यं व्रतं समाप्य वरदमभीष्टस्य प्रदातारं मधुसूदनं मधुनामकदैत्यनिहन्तारं विष्णुं तुष्टाव इव उभयान्वयी श्लोकद्वयमेकान्वयि ॥ १० ॥

गो० टी०–एतस्मिन्निति । श्लोकद्वयम् । एतस्मिन्नन्तरे देवप्रार्थनावसरे कश्यपः अदित्या सहितो व्रतं समाप्य विष्णुदेशेन कृतं व्रतं समाप्य वरदं वरदानाय सन्निहितं विष्णुं देवीसहायः सन् तुष्टाव अत्र रामपदद्वयं रूढ्या योगेन च निर्वाह्यं व्रतानुष्ठानकाले वरकाले च देवीसाहित्यद्योतनाय द्विःप्रयोगो देव्याः अयमत्र क्रमः " सोऽकामयत बहु स्यां प्रजायेयेति स तपो तप्यत " इत्युक्तरीत्या विष्णुर्जगद्रक्षणचिन्तापरोऽत्र देशे चिरमदृश्य उवास तद्विदित्वा तमेव पुत्रं लब्धुकामः कश्यपो देव्या सह दिव्यवर्षसहस्रनिर्वर्त्यं विष्ण्वाराधनरूपं किंचिद्व्रतमनुष्ठाय तदन्ते वरदानाय दृश्यमानं विष्णुं तुष्टाव तस्मिन्नेवावसरे देवाश्चागताः प्रार्थितवन्त इति ॥ ९ ॥ १० ॥

११] ति ०टी०–अदित्या सहितो व्रतं समाप्य देवीसहायस्तुष्टावेत्यन्वयः देव्यदितिरेव यद्वा देवी सरस्वती वरदं विष्णुरूपपुत्रप्राप्त्युद्देशेन कृतव्रतान्ते वरदानोन्मुखम् ॥ ११ ॥

१२] ति० टी०–स्तोत्रप्रकारमाह–तपोमयमित्यादि । अत्रमयो यज्ञ इतिवत्प्रचुरतपोयुक्तमित्यर्थः । तावतेतरेषां किमत आह–तपोराशिं द्रष्टॄणां सकलतपोजन्यफलप्राप्त्या भगवत्तस्तपोराशित्वम् नन्वेवं तपसोऽन्यत्वेऽद्वैतश्रुतिबाधोऽत आह–तपोमूर्तिमिति एवं च तपसस्तदनन्यत्वेन नाद्वैतहानिः । तपात्मकमिति घञर्थे कविधानमिति कप्रत्यये तपनं तपो ज्ञानम् ' तप आलोचने ' इति धात्वनुसारात् तदात्मकं ज्ञानस्वरूपमित्यर्थः अत एवातप्ततपसा द्रष्टुमशक्य इत्यतस्तपसा त्वामिति ॥ १२ ॥

रा० टी०–तत्स्तवनमेवाह–तप इति । हे प्रभो ! तपोमयं तपसा वेदबोधिताभिलाषरहितकृच्छ्रचान्द्रायणादिना मयते अन्तःकरणशुद्धिपूर्वकज्ञानोत्पत्तिद्वारा प्राप्नोति तमत एव तपोराशिं तपसां राशिः समूहो यस्मै यत्प्राप्तिफलकमेव तपआद्याचरणं तमत एव तपोमूर्तिं तपोयुक्ता मूर्तिर्विग्रहो यस्य तं लोकशिक्षणार्थं तपश्चरन्तमित्यर्थः । तपात्मकं तपोज्ञानमात्मा यस्य तं पुरुषोत्तमं पुरुषः उत्तमो ध्येयत्वेन यस्मिन् तं त्वां सुतप्तेन तपसा पश्यामि तव शरीरे इदं सर्वं जगत्पश्यामि सार्धश्लोक एकान्वयी ॥ ११ ॥ १२ ॥

गो० टी०–तपोमयमिति । तपोमयं तपःप्रचुरं प्राचुर्यं चाराध्यत्वेन तपसाराध्यमित्यर्थः तपोराशिं तपोराशिस्वरूपं तपःफलदमिति यावत् तपोमूर्तिं ज्ञानस्वरूपं तप आलोचन इति धातोरसुन्प्रत्ययः तपात्मकं तपःस्वभावं ज्ञानगुणकमित्यर्थः उक्ताद्धातोः " घञर्थे कविधानम् " इति कः पुरुषोत्तमं बद्धमुक्तोभयावस्थाजीवाद्विलक्षणं त्वां सुतप्तेन अनन्यप्रयोजनतयानुष्ठितेन तपसा आराधनेन पश्यामि साक्षात्करोमि सर्वकर्मसमाराध्यं सर्वकर्मफलप्रदं ज्ञानस्वरूपत्वेन समस्तहेयप्रत्यनीकज्ञानानन्दाद्यपरिमितगुणवत्त्वेन च सर्वस्माद्विलक्षणं त्वां साक्षात्करोमि एतदेव मे परमप्रयोजनमित्यर्थः ॥ ११ ॥

१३] ति० टी०–दृश्यमानं च वैराजं रूपमित्याह–शरीर इत्यादि । अनिर्देश्योऽशक्यपरिच्छेदः ॥ १३ ॥

रा० टी०–त्वमिति । यस्त्वमनादिः आदिरहितः सर्वकारणमित्यर्थः अनिर्देश्यः साकल्येन निर्देष्टुमनर्हः तं शरणं सर्वरक्षितारं त्वामहं गतः प्राप्तः विष्णूक्तिं वर्णयन्नाह–तमिति । प्रीतः कश्यपोक्त्या संतुष्टः हरिः शरणागतपापहारकः विष्णुः धूतकल्मषमघरहितं तं कश्यपमुवाच ॥ १३ ॥

गो० टी०–शरीर इति । इदं चेतनाचेतनात्मकं सर्वं जगत् तव शरीरेऽस्मिन् पश्यामि। एवं गीतम् ' पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान् । ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ' इति । यद्वा जगत्सर्वं शरीरमित्युक्तत्वात् शरीरतया पश्यामीत्यर्थः त्वमनादिः उत्पत्तिरहितः अनिर्देश्यः एतावानिति परिच्छेत्तुमशक्य इत्यर्थः अतस्त्वामहं शरणं रक्षितारं गतः ॥ १२ ॥

१४] ति० टी०–वरमभीष्टम् । वराहों दिव्यवर्षसहस्रतपसा वरदानयोग्यः ॥ १४ ॥

रा० टी०–तद्वचनमेवाह–वरमिति । यतस्त्वं वराहः ईप्सितप्राप्तियोग्यः अत एव मम मतोऽभिमतोऽसि अतः वरं स्वेप्सितं वरय याचस्व ते भद्रं कल्याणमस्तु तस्य विष्णोस्तद्वचनं श्रुत्वा मारीचः मरीचेः सुतः कश्यपोऽब्रवीत् ॥ १४ ॥

गो० टी०–तमिति । स्पष्टम् ॥ १३ ॥

१५] ति० टी०–मारीचो मरीचिपुत्रः । अदित्या इत्यादेर्याचमानाया इत्यादिः शेषः ॥ १५ ॥

रा० टी०–तद्वचनमेवाह–अदित्येति । अनुयाचतः प्रार्थयतो मम अनुयाचमानानां देवतानां च अनुयाचमानाया अदि-

१ सुतप्तेनेति रा. पाठः । २ पुरुषोत्तममिति गो. रा. पाठः । ३ याचतः इति रा. पाठः ।

वरं वरद सुप्रीतो दातुमर्हसि सुव्रत । पुत्रत्वं गच्छ भगवन्नदित्या मम चानघ ॥ १६ ॥
भ्राता भव यवीयांस्त्वं शक्रस्यासुरसूदन । शोकार्तानां तु देवानां साहाय्यं कर्तुमर्हसि ॥ १७ ॥
अयं सिद्धाश्रमो नाम प्रसादात्ते भविष्यति । सिद्धे कर्मणि देवेश उत्तिष्ठ भगवन्नितः ॥ १८ ॥
अथ विष्णुर्महातेजा अदित्यां समजायत । वामनं रूपमास्थाय वैरोचनिमुपागमत् ॥ १९ ॥
त्रीन्पदानथ भिक्षित्वा प्रतिगृह्य च मेदिनीम् । आक्रम्य लोकाँल्लोकार्थी सर्वलोकहिते रतः ॥ २० ॥
महेन्द्राय पुनः प्रादान्नियम्य बलिमोजसा । त्रैलोक्यं स महातेजाश्चक्रे शक्रवशं पुनः ॥ २१ ॥
तेनैव पूर्वमाक्रान्त आश्रमः श्रमनाशनः । मयापि भक्त्या तस्यैव वामनस्योपभुज्यते ॥ २२ ॥

त्याश्च वरमीप्सितं हे वरद हे सुव्रत ! सुप्रीतस्त्वं दातुमर्हसि ॥ १६ ॥

गो० टी०–तच्छ्रुत्वेत्यर्धम् । मारीचः मरीचिपुत्रः ॥ १४ ॥

गो० टी०–अदित्या इति । अदित्या याचमानायाः । देवतानां याचमानानामित्यूह्यम् ॥ १५ ॥

१६] ति० टी०–याच्यमानवरमाह–पुत्रत्वमित्यादि॥१६॥

रा० टी०–ननु किं भवदीप्सितमित्यत आह–**पुत्रत्वमिति** । हे अनघ स्वाश्रितपापनिवर्तक हे भगवन् सर्वसामर्थ्यविशिष्ट हे असुरसूदन ! अदित्याः मम च पुत्रत्वं गच्छ प्राप्नुहि अतः शक्रस्य इन्द्रस्य यवीयान् कनिष्ठः भ्राता त्वं भव इन्द्रस्य भ्राता भवेत्यनेन इन्द्रेप्सितकार्यकारित्वं स्वस्मिन्ननुसंधेयामिति प्रार्थना सूचिता असूरसूदनेत्यनेन सनातनोऽसुरद्वेषः त्वय्यस्तीति बोधितं तेनासुरा निरसनीया भवता इति द्योतितम् ॥ १६ ॥

गो० टी०–पुत्रत्वमित्यादि । सार्धश्लोक एकान्वयः॥१६॥

१७] ति० टी०–यवीयान्कनिष्ठः । साहाय्यं बलिच्छलरूपम् ॥ १७ ॥

रा० टी०–तदेव वाच्यवृत्त्या बोधयन्नाह–**शोकार्तानामिति** । हे भगवन् ! शोकार्तानां राज्यापहरणेन शोकसंतप्तानां देवानां साहाय्यं कर्तुं त्वमर्हस्येव ते प्रसादात् त्वदत्यन्तवात्सादृश्यं सिद्धाश्रमो नाम भविष्यति अतः देवेशः इन्द्रस्य कर्मणि कार्ये सिद्धे इन्द्रकार्यसिद्ध्यर्थमित्यर्थः इतः अस्मात् स्थानात् उत्तिष्ठ मम गृहे प्रादुर्भवेत्यर्थः तुशब्द एवार्थे ॥ १७ ॥

१८] ति० टी०–अयमिति । यत्राश्रमे तपोमयस्त्वं मया देवैश्च अनुभूयस इत्यर्थः सिद्ध एतदाश्रमस्थितिसाध्ये तपःकर्मणि सिद्धे सति निष्पन्ने सति प्रयोजनाभावादित उत्तिष्ठ देवकार्यायेति शेषः ॥ १८ ॥

गो० टी०–देशेऽप्यनुग्रहः कियतामित्याह–**अयमिति** । ते प्रसादात्कर्मणि मत्तपसि सिद्धे सति त्वयि मे पुत्रत्वं प्राप्त इत्यर्थः अयं सिद्धाश्रमो नाम भविष्यति तस्मादित आश्रमादुत्तिष्ठ अवतारायेति शेषः ॥ १७ ॥

१९] ति० टी०–अथ देवकार्यनियोगानन्तरम् ॥ १९ ॥

रा० टी०–विष्णुवृत्तमाह–**अथेत्यादिभिः** । अथ कश्यपप्रार्थनानन्तरं महातेजाः विष्णुः वामनं रूपमास्थाय प्रकटय्य अदित्यां समजायत प्रादुरभवत् अथ अनन्तरं वैरोचनिं विरोचनसुतं बलिमुपागमत् प्राप्नोत् ॥ १८ ॥

गो० टी०–अथेति । स्पष्टम् ॥ १८ ॥

२०] ति० टी०–आक्रम्य त्रिभिः पदैरिति शेषः । लोकार्थी त्रैलोक्याक्रमणार्थी ॥ २० ॥

रा० टी०–त्रीनिति । अथ बलिसमीपप्राप्त्यनन्तरं त्रीन् पदान् पादत्रयपरिमितभूमिं भिक्षित्वा संयाच्य त्रींल्लोकानाक्रम्य त्रिभिः पादैः परिच्छिद्य प्रतिगृह्य सर्वाल्लोकान् गृहीत्वा च ओजसा बलिं नियम्य मानदः स्वाश्रितप्रतिष्ठाप्रदाता लोकार्थी त्रिलोकीग्रहणप्रयोजनकः किंच लोकोऽवलोकनमर्थोऽस्यास्मिन्निति साक्षीत्यर्थः अत एव सर्वलोकहिते रतः वामनः त्रैलोक्य महेन्द्राय पुनः प्रादात् अनेन प्रकारेण महातेजाः स वामनः त्रैलोक्यं शक्रवशमिन्द्राधीनं पुनश्चक्रे श्लोकद्वयमेकान्वयि त्रीन् इत्याद्यृत्या उभयत्रान्वेति ॥ १९ ॥ २० ॥

गो० टी०–त्रीनिति । श्लोकद्वयमेकान्वयम् । क्रमान् पदविक्षेपान् भिक्षित्वा याचित्वा प्रतिगृह्य मानं यति खण्डयतीति मानदः निरभिमानो भिक्षित्वेत्यर्थः लोकाक्रमणे हेतुर्लोकात्मेति वामनरूपेण याचित्वा सर्वलोकव्यापिशरीरेण क्रान्त्वेत्यर्थः नियम्य बद्धा त्रैलोक्यस्यापि पदद्वयकान्तत्वेन तृतीयपदालाभात्तदर्थं बद्धेत्यर्थः ॥ १९ ॥ २० ॥

२१] ति० टी०–नियम्य बद्धा ॥ २१ ॥

२२] ति० टी०–तेनैव वामनावतारकर्त्रा । मया विश्वामित्रेण ॥ २२ ॥

रा० टी०–तेनेति । श्रमनाशनः अयमाश्रमः तेन वामनरूपविष्णुना पूर्वमेवाक्रान्तः तस्य वामनरूपविष्णोरयमाश्रमः मयापि भक्त्या त्वद्विषयकप्रीत्यैव निषेव्यते यद्वा तेन वामनेन श्रमनाशनोऽयमाश्रमः भक्त्या त्वद्विषयकप्रीत्या पूर्वमेव आक्रान्तः सेवितः मयापि त्वद्विषयकप्रीत्यैव तस्य वामनस्यायमाश्रमः निषेव्यते एतेन रामस्याखेटखेलने वनं तदिति ध्वनितम् तेनाप्रकटरूपेण सदैव तत्र रामस्य स्थितिरिति व्यञ्जितं तेन रामप्रश्नः विश्वामित्रज्ञानपरीक्षार्थमेवेति व्यक्तम् ॥ २१ ॥

गो० टी०–प्रकृतमुपसंहरति–**तेनेति** । तेन वामनेन श्रम-

१ क्रमानिति गो. पादानिति रा. पाठः । २ मानद इति गो. रा. पाठः । ३ लोकात्मेति गो. पाठः । ४ निषेव्यते इति रा. पाठः ।

एनमाश्रममायान्ति राक्षसा विघ्नकारिणः । [1]अत्र ते[3] पुरुषव्याघ्र हन्तव्या दुष्टचारिणः ॥ २३ ॥
अद्य गच्छामहे राम सिद्धाश्रममनुत्तमम् । तदाश्रमपदं तात तवाप्येतद्यथा मम ॥ २४ ॥
[2]इत्युक्त्वा परमप्रीतो गृह्य रामं सलक्ष्मणम् । प्रविशन्नाश्रमपदं व्यरोचत महामुनिः ॥
शशीव गतनीहारः पुनर्वसुसमन्वितः ॥ ॥ २५ ॥
तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः । उत्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् ॥ २६ ॥
यथार्हं चक्रिरे पूजां विश्वामित्राय धीमते । तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियाम् ॥ २७ ॥
मुहूर्तमथ विश्रान्तौ राजपुत्रावरिंदमौ । प्राञ्जली मुनिशार्दूलमूचतू रघुनन्दनौ ॥ २८ ॥
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुंगव । सिद्धाश्रमोऽयं सिद्धः स्यात्सत्यमस्तु वचस्तव॥२९॥

नाशनः संसाराश्रमनिवर्तकः । संनिहितं स्थाप्याश्रमं विहाय भवान् किमर्थमत्र स्थित इत्याह–मया त्विति। मया तु देवतान्तरेषु परत्वबुद्धिरहितेन भक्त्या विष्णुभक्त्या तस्य वामनस्य एष आश्रमः उपभुज्यते आश्रीयते वामनस्येयं भूमिरिति केवलं तामेवाजिघृक्षवः इत्यर्थः ॥ २१ ॥

२३] ति० टी०–पूर्वसर्गान्तकृतद्वितीयप्रश्नोत्तरमाह–एनमिति ॥ २३ ॥

रा० टी०–एतमिति । हे पुरुषव्याघ्र ! विघ्नकारिणः यज्ञविनाशनशीलाः राक्षसाः एतमाश्रममायान्ति अतः दुष्टचारिणो राक्षसाः अत्र अस्मिन्काले ते तव हन्तव्याः त्वत्कर्तृकहननयोग्याः ॥ २३ ॥

गो० टी०–एतमिति । स्पष्टम् ॥ २३ ॥

२४] ति० टी०–अनुत्तमं सर्वोत्तमम् । हे तात तदेतदाश्रमं यथा मम स्वभूतं तथा तवापि विष्ववतारत्वादिति गूढोऽभिसन्धिः ॥ २४ ॥

रा० टी०–अथेति। हे राम तात हे प्रिय! आश्रमपदमत्यन्तश्रमनिवर्तकस्थानमत एव अनुत्तममतिश्रेष्ठं एतन्मम सिद्धाश्रमं सिद्धाश्रमसंज्ञकं तवैव तत्तस्माद्धेतोः अद्य वयं यथा यथावद्गच्छाम हे । अपिशब्द एवार्थे ॥ २३ ॥ २४ ॥

गो० टी०–अद्येति । गच्छामहे गच्छामः तातेत्युपलालने तदेतदाश्रमपदं यथा मम तथा तव स्वमिति शेषः॥ २३ ।

२५] ति० टी०–पुनर्वसू द्वे तारे ॥ २५ ॥

रा० टी०–प्रविशन्निति । रामलक्ष्मणाभ्यां सहित इति शेषः महामुनिः विश्वामित्रः आश्रमपदं प्रविशन् सन् व्यरोचत् तत्र दृष्टान्तः गतनीहारस्त्यक्तहिमः पुनर्वसुसमन्वितः पुनर्वसू द्वे तारे ताभ्यां समन्वितो युक्तः शशी चन्द्र इव ॥ २५ ॥

गो० टी०–प्रविशन्निति। गतनीहारः गतहिमः पुनर्वसुभ्यां समन्वित इति रामलक्ष्मणसाम्यापेक्षया ॥ २४ ॥

२६–२८] ति० टी०–उत्पत्योत्पत्य संतोषातिशयादिति शेषः ॥ २६–२८ ॥

रा० टी०–तमिति । सिद्धाश्रमनिवासिनः सर्वे मुनयः तं रामलक्ष्मणसहितं विश्वामित्रं दृष्ट्वा सहसा उत्पत्योत्पत्य तत्तत्समीपं प्राप्य प्राप्य अपूजयन् ॥ २६ ॥

गो० टी०–तमिति । उत्पत्योत्पत्येति प्रीत्यतिशयोक्तिः आगत्यागत्येत्यर्थः अनेन निरन्तरं तदागमनोक्त्या मुनिबहुत्वमुच्यते ॥ २६ ॥

रा० टी०–पूजामेव विशदयन्नाह–यथेति । धीमते विश्वामित्राय विश्वामित्रं प्रसादयितुं यथार्हं यथायोग्यं पूजां क्रियां चक्रिरे तथैव राजपुत्राभ्यां रामलक्ष्मणाभ्यामतिथिक्रियामकुर्वन् ॥ २७ ॥

गो० टी०–यथार्हमिति । यथार्हं मुनियोग्यतामनतिक्रम्य ॥ २६ ॥

रा० टी०–मुहूर्तमिति । मुहूर्तमेव विश्रान्तौ मुहूर्तमात्रेण निवर्तिताध्वश्रमौ अरिंदमौ स्वाश्रितारिनिवर्तकौ रघुनन्दनौ रघुकुलवर्धकौ प्राञ्जली प्रणतिसूचकबद्धयुगलकरौ रामलक्ष्मणौ मुनिशार्दूलं मुनिश्रेष्ठं विश्वामित्रमूचतुः इवशब्द एवार्थे ॥ २८ ॥

गो० टी०–मुहूर्तमिति । मुहूर्तमल्पकालं विश्रान्ताविवेति मनुष्यभावेनोच्यते ॥ २७ ॥

२९] ति० टी०–अद्यैव प्रवेशदिन एव । कालविलम्बे फलाभावात् सिद्धस्त्वयज्ञसिद्ध्यान्वर्थसिद्धसंज्ञः तव वचोऽत्रैव पुरुषव्याघ्रहन्तव्या दुष्टचारिण इति यत्तत्सत्यमस्तु । राक्षसान्सर्वथा हनिष्य इति भावः ॥ २९ ॥

रा० टी०–तद्वचनमेवाह–अद्येति । हे मुनिपुंगव ! त्वमद्यैव दीक्षां प्रविश ते भद्रं कल्याणमस्तु अयं सिद्धाश्रमः सिद्धः साधितयागक्रियः स्यात् तव वचः ‘ अत्रैव पुरुषव्याघ्र हन्तव्या दुष्टचारिणः’ इत्याकारकं वचनं सत्यमस्तु एतेन रामे अतीव गुरूत्साहो व्यक्तः ॥ २९ ॥

गो० टी०–अद्यैवेति । अद्यैव प्रवेशदिन एव अयं सिद्धाश्रमः सिद्धः स्यात् त्वयज्ञसिद्ध्या अन्वर्थसिद्धसंज्ञोऽस्तु सत्यमस्तु वचस्तव ‘अत्रैव पुरुषव्याघ्र हन्तव्या दुष्टचारिणः’ इति वच इत्यर्थः राक्षसान्सर्वथा हनिष्य इति भावः ॥ २८ ॥

---

१ एतमिति गो. रा. पाठः । २ अर्धमिदं रा. पुस्तके नास्ति । ३ एवेति गो. पाठः । ४ अर्धमिदं गो. रा. पुस्तकयोर्नास्ति । ५ इवेति गो. रा. पाठः ।

एवमुक्तो महातेजा विश्वामित्रो महानृषिः । प्रविवेश तदा दीक्षां नियतो नियतेन्द्रियः ॥ ३० ॥
कुमाराविव तां रात्रिमुषित्वा सुसमाहितौ । प्रभातकाले चोत्थाय पूर्वां संध्यामुपास्य च ॥ ३१ ॥
प्रशुची परमं जाप्यं समाप्य नियमेन च । हुताग्निहोत्रमासीनं विश्वामित्रमवन्दताम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ।

तपोवनस्य षड्रात्ररक्षणे काकुत्स्थयोः मुन्युक्तिः, षष्ठेऽहनि सपरिवारमारीचसुबाह्वोरागमनम्, मानवास्त्रेण रामकृतं तन्निवारणम् । काकुत्स्थं प्रति विश्वामित्रोक्तिश्च ।

अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ । देशे काले च वाक्यज्ञावब्रूतां कौशिकं वचः ॥ १ ॥
भगवञ्छ्रोतुमिच्छावो यस्मिन्काले निशाचरीः । संरक्षणीयौ तौ ब्रूहि नातिवर्तेत तत्क्षणम् ॥ २ ॥
एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया । सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ॥ ३ ॥

३०] ति० टी०–नियतो गृहीतान्तःकरणः ॥ ३० ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्तः रामेण प्रार्थितः महातेजाः अतिप्रभावविशिष्टः नियतः अतिप्रयत्नशीलः नियतेन्द्रियः नियमितान्तर्बहिरुभयकरणः महामुनिः विश्वामित्रः ततो रामप्रार्थनानन्तरं दीक्षां प्रविवेश ॥ ३० ॥

गो० टी०–एवमिति । नियतः निगृहीतान्तःकरणः॥२९॥

३१] ति० टी०–कुमाराविव स्कन्दविशाखाविव ॥ ३१ ॥

३२] ति० टी०–प्रशुची अवतारत्वादशुचित्वसंभावनाराहित्येन प्रकर्षतः शुची नियमेन कर्तव्यं जाप्यं समाप्येत्यन्वयः 'दीक्षामध्ये नाग्निहोत्रम्' इति निषेधादग्निहोत्रपदमौपासनहोमपरमिति केचित् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीये आदिकाव्ये बालकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

रा० टी०–मुनेर्दीक्षाप्रवेशानन्तरं रामकृत्यमाह–कुमाराविति । सुसमाहितौ नित्यैकाग्रचित्तौ कुमारौ रामलक्ष्मणावपि तां रात्रीमुषित्वा प्रभातकाले उत्थाय च स्पृष्टोदकौ शुची सन्तौ पूर्वां संध्यामुपास्य च नियमेन जप्यं समाप्य च हुताग्निहोत्रं दीक्षाग्रहणात्पूर्वं हुताग्निहोत्रकमासीनं दीक्षाग्रहणादूर्ध्वं स्वस्थतया तिष्ठन्तं विश्वामित्रमवदेतां 'दीक्षामध्येनाग्निहोत्रम्' इति अग्निहोत्रस्य निषेधात् दीक्षापूर्वकाले इत्यध्याहृतम्।श्लोकद्वयमेकान्वयि इव शब्दोऽप्यर्थे ॥ ३१ ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

गो० टी०–कुमाराविति । श्लोकद्वयम् । स्पृष्टोदकौ दत्ताघ्यौ नियमेन जप्यं समाप्य अग्नेर्होत्रं होमः औपासनहोमः "दीक्षामध्ये नाग्निहोत्रम् न दर्शपूर्णमासाभ्यां यजते" इत्यग्निहोत्रस्य निषिद्धत्वात् मानसमग्निहोत्रमित्येके ॥ ३० ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणव्याख्याने मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

१] ति० टी०–अथेति । कौशिकं वचोऽब्रूतामित्यन्वयः१

रा० टी०–रामकर्तृकविश्वामित्रकर्मकवन्दनोत्तरकालिकरामोक्तिमाह–अथेत्यादिश्लोकद्वयेन । अथ प्रणामानन्तरं देशकालज्ञौ देशकालोचितकर्तव्यतायां वेदितारौ अरिन्दमौ स्वाश्रितारिनिवर्तकौ देशकालेषु वाक्यज्ञौ देशेषु कालेषु च यद्वाक्यं वक्तव्यं तस्य ज्ञातारौ राजपुत्रौ रामलक्ष्मणौ कौशिकं विश्वामित्रमब्रूताम् ॥१॥

गो० टी०–सुबाहुमारीचप्रभृतिदुष्टनिग्रहस्त्रिंशे–अथ तावित्यादि । देशकालज्ञाविति हेतुगर्भं देशकालज्ञत्वादुचितं देशे उचिते काले चाब्रूताम् ॥ १ ॥

२–३] ति० टी०–तौ निशाचरौ संरक्षणीयौ यज्ञसंरक्षणाय निवारणीयौ गृहादित्वाच्छः तत्क्षणं स क्षणो यथा नातिवर्तेत नातिक्रमेत तथा ब्रूहीत्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–भगवन्निति । हे भगवन् हे ब्रह्मन्! यस्मिन्काले तौ प्रसिद्धौ निशाचरौ सुबाहुमारीचौ संरक्षणीयौ संरक्ष्यते याग आभ्यामिति अपादाने अनीयर् किंच संरक्षणीयौ दुष्टकर्महेतुकनरकपातादितो निवर्तनीयौ तं कालं श्रोतुमिच्छावः यतः तत्क्षणो नातिवर्तेत नातिक्रमेत् ॥ २ ॥

गो० टी०–भगवन्निति । संरक्षणीयौ निवारणीयौ धातूनामनेकार्थत्वात् विपरीतलक्षणा वा यद्वा इष्टप्राप्तिरनिष्टनिवृत्तिश्च रक्षणम् अत्र अनिष्टनिवृत्तिः तत्क्षणं स कालः नातिवर्तेत अज्ञातो नातिक्रामेत् ॥ २ ॥

रा० टी०–एवमिति । एवमुक्तप्रकारेण ब्रुवाणौ कथयन्तौ युयुत्सया त्वरमाणौ वेगवन्तौ नृपात्मजौ दशरथसूनू काकुत्स्थौ रामलक्ष्मणौ प्रीतास्ते सर्वे मुनयः प्रशशंसुः ॥ ३ ॥

गो० टी०–एवमिति । युयुत्सया योद्धुमिच्छया प्रशशंसुः प्रोचुः ॥ ३ ॥

१ महामुनिरिति गो. रा. पाठः । २ तत इति गो. रा. पाठः । ३ अपीति गो. रा. पाठः । ४ स्पृष्टोदकौ शुची जप्यमिति गो. रा. पाठः । ५ त्विति रा. पाठः । ६ ब्रह्मन्निति गो. रा. पाठः ।

अद्यप्रभृति षड्रात्रं रक्षतां राघवौ युवाम् । दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ॥ ४ ॥
तौ तु तद्वचनं श्रुत्वा राजपुत्रौ यशस्विनौ । अनिद्रं षडहोरात्रं तपोवनमरक्षताम् ॥ ५ ॥
उपासांचक्रतुर्वीरौ यत्तौ परमधन्विनौ । रक्षतुर्मुनिवरं विश्वामित्रमरिंदमम् ॥ ६ ॥
अथ काले गते तस्मिन्षष्ठेऽहनि तेथागते । सौमित्रिमब्रवीद्रामो यत्तो भव समाहितः ॥ ७ ॥
रामस्यैवं ब्रुवाणस्य त्वरितस्य युयुत्सया । प्रजज्वाल ततो वेदिः सोपाध्यायपुरोहिता ॥ ८ ॥
सदर्भचमससुक्का ससमित्कुसुमोच्चया । विश्वामित्रेण साहिता वेदिर्जज्वाल सर्त्विजा ॥ ९ ॥
मन्त्रवच्च यथान्यायं यज्ञोऽसौ संप्रवर्तते । आकाशे च महाञ्छब्दः प्रादुरासीद्भयानकः ॥ १० ॥

४-५] ति० टी०-एवं विश्वामित्रे पृष्टे दीक्षया तस्य मौनित्वादृषय ऊचुः—अद्येति । मौनित्वं च गमिष्यति अद्यापि दीक्षितत्वान्मौन्येवातः परमपि षड्रात्रपर्यन्तं मौनित्वं प्राप्स्यतीत्यर्थः ॥ ४ ॥ ५ ॥

रा० टी०-अद्येति । हे राघवौ ! अद्यप्रभृति एतद्दिवसमारभ्य षड्रात्रं रात्रिषट्कपर्यन्तं युवां रक्षताम् तत्र हेतुः यतः दीक्षां गतः प्राप्तः एषः मुनिर्विश्वामित्रः अद्यप्रभृति षड्रात्रं मौनत्वं गमिष्यति प्राप्स्यति अद्यप्रभृति षड्रात्रमित्यावृत्या उभयत्रान्वेति । चशब्दो हेत्वर्थे ॥ ४ ॥

गो० टी०-अद्येति । रक्षतमिति लोण्मध्यमपुरुषद्विवचनम् एतद्दिनमारभ्य षड्रात्रपर्यन्तं मुनिर्मौनित्वं गमिष्यति अतो वयं वदाम इत्यर्थः ॥ ४ ॥

रा० टी०-ताविति । तन्मुनिभिरुक्तं वचनं श्रुत्वैव यशस्विनौ अतियशोविशिष्टौ तौ मुनिप्रार्थितौ राजपुत्रौ रामलक्ष्मणौ अनितौ निद्रारहितौ सन्तौ षडहोरात्रमहोरात्रषट्कपर्यन्तं तपोवनमरक्षताम् । चशब्द एवार्थे ॥ ५ ॥

गो० टी०-ताविति । षडहोरात्रं षण्णामहोरात्राणां समाहारः षडहोरात्रं तत् ॥ ५ ॥

६] ति० टी०-यत्तौ संनद्धौ परमधन्विनावित्यार्षम् विश्वामित्रं तद्यज्ञम् ॥ ६ ॥

रा० टी०-रक्षणमेव विशदयन्नाह-उपेति । वीरौ वीर्यविशिष्टौ अत एव यत्तौ धृतकवचौ परमधन्विनौ समातिशयरहितधनुर्विशिष्टौ अरिंदमौ स्वाश्रितारिनिवर्तकौ रामलक्ष्मणौ उपासां मुनिसमीपस्थितिं चक्रतुः मुनिवरं विश्वामित्रं ररक्षतुश्च विनापि चं समुच्चयः परमधन्विनावित्यत्र व्रीह्यादित्वादिनिः ॥ ६ ॥

गो० टी०-उपासाञ्चक्रतुरिति। उपासाञ्चक्रतुः ऊपतुः यत्तौ सन्नद्धौ परमं धनुर्ययोस्तौ परमधन्विनौ व्रीह्यादित्वादिनिः ॥६॥

७] ति० टी०-काले पञ्चाहोरात्रलक्षणे षष्ठेऽहन्यागत इतिच्छेदः प्राप्त इत्यर्थः यद्वा षष्ठेऽहनि गते रात्रावित्यर्थः यत्तः सज्जः समाहित एकाग्रचित्तः ॥ ७ ॥

रा० टी०-अथेति । काले पञ्चदिनात्मके गते व्यतीते सति तस्मिन्सुत्यादिनत्वेन प्रसिद्धे षष्ठे अहनि समागते प्राप्ते सति रामः सौमित्रिं लक्ष्मणमथ मङ्गलमब्रवीत् तद्वचनमेवाह—यत्तः प्रयत्नवान् त्वं समाहितो भव ॥ ७ ॥

गो० टी०-अथेति । काले पञ्चदिनात्मके गते तस्मिन् प्रधाने अहनि सुत्यादिने समाहितः एकाग्रचित्तः अत्राद्यप्रभृति षड्रात्रमित्युक्त्या पूर्वसर्गे तत्पूर्वदिने दीक्षाप्रवेशोक्त्या च सप्तरात्रनिर्वर्त्यः सत्रविशेषोऽयमिति गम्यते ॥ ७ ॥

८] ति० टी०-उपाध्यायो ब्रह्मा पुरोहित उपद्रष्टा इदमृत्विगन्तराणामप्युपलक्षणम् इदं ज्वलनं राक्षसागमनसूचक उत्पात इत्याहुः ॥ ८ ॥

रा० टी०-रामस्येति । ततः रामोक्त्यनन्तरं युयुत्सया युद्धेच्छया त्वरितस्य प्रकटीकृतवेगस्य एवमनेन प्रकारेण ब्रुवाणस्य रामस्य समीपे सोपाध्यायपुरोहिता उपाध्यायो विश्वामित्रः पुरोहिता ऋत्विजः तत्सहिता वेदिः प्रजज्वाल राक्षसागमसूचकोत्पातविशेषप्रज्वलनविशिष्टा बभूव ॥ ८ ॥

गो० टी०-रामस्येति । वेदिप्रज्वलनमुत्पातो राक्षसागमसूचकः उपाध्यायः विश्वामित्रः पुरोहिता ऋत्विजः ॥ ८ ॥

९] ति० टी०-दर्भसहितचमससुग्वती समित्कुसुमोच्चयैश्च सहिता इदं वेदीज्वलनं यज्ञोद्देश्यकम् ॥ ९ ॥

रा० टी०-तदेव विशदयन्नाह-सदर्भेति । सदर्भचमससुक्का दर्भचमससुक्सहिता ससमित्कुसुमोच्चया समित्कुसुमोच्चयसहिता विश्वामित्रेण सहिता सर्त्विजा ऋत्विक्सहिता वेदिः जज्वाल हलन्ताट्टाप् ॥ ९ ॥

गो० टी०-एतद्विवृणोति-सदर्भेति । चमसं नाम पानपात्रं सुक् होमपात्रम् उच्चयः समूहः कुसुमोच्चयोऽलंकारार्थः ॥ ९ ॥

१०] ति० टी०-संप्रवर्तते स्म आकाशे महाञ्छब्दः प्रादुरासीच्च ॥ १० ॥

रा० टी०-मन्त्रवदिति । मन्त्र उच्यते अस्मिन्निति किंच मन्त्रेण वन्यते रच्यते इति मन्त्रवत् अयं षष्ठदिनसाध्यो यज्ञः यथान्यायमेव संप्रवर्तते संप्रावर्तत तदा भयानको भयावहः आकाशे महान् शब्दः प्रादुरासीत् । चशब्द एवार्थे द्वितीयस्तदार्थे ॥ १० ॥

---

१ मौनत्वमिति रा. पाठः । २ चेति गो. रा. पाठः । ३ अनिद्राविति गो. रा. पाठः । ४ अरिंदमौ इति गो. रा. पाठः । ५ समागते इति गो. रा. पाठः । ६ यज्ञोऽयमिति रा. पाठः ।

आवार्य गगनं मेघो यथा प्रावृषि दृश्यते । तथा मायां विकुर्वाणौ राक्षसावभ्यधावताम्॥ ११ ॥
मारीचश्च सुबाहुश्च तयोरनुचरास्तथा । आगम्य भीमसंकाशा रुधिरौघानवासृजन् ॥ १२ ॥
तां तेन रुधिरौघेण वेदीं वीक्ष्य समुक्षिताम् । सहसाभिद्रुतो रामस्तानपश्यत्ततो दिवि ॥ १३ ॥
तावापतन्तौ सहसा दृष्ट्वा राजीवलोचनः । लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत् ॥ १४ ॥
पश्य लक्ष्मण दुर्वृत्तान्राक्षसान्पिशिताशनान् । मानवास्त्रसमाधूतानिलेन यथा घनान् ॥ १५ ॥
करिष्यामि न संदेहो नोत्सहे हन्तुमीदृशान् । इत्युक्त्वा वचनं रामश्चापे संधाय वेगवान् ॥ १६ ॥
मानवं परमोदारमस्त्रं परमभास्वरम् । चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ १७ ॥
स तेन परमास्त्रेण मानवेन समाहतः । संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १८ ॥

गो० टी०–मन्त्रवदिति । ननु रक्षोघ्नमन्त्रजपे क्रियमाणे कथं राक्षसागमनप्रसक्तिः न कथंचित् किंतु दूरत एवाकाशे मेघवदुधिरं ववर्षुः तदिदमाह–आकाश इति भयानकः भयंकरः ॥ १० ॥

११] ति० टी०–यथा प्रावृषि गगनमावार्य गगनमावृत्य महाशनिमहागर्जमहावर्षादिविचित्रकारी दृश्यते तथा मायां प्रकटीकुर्वाणौ राक्षसावभ्यधावताम् ॥ ११ ॥

रा० टी०–आवार्येति । प्रावृषि वर्षायां गगनमावार्य प्रावृत्य मेघो यथा निर्गतः तथा मायां विकुर्वाणौ राक्षसौ मारीचसुबाहू अभ्यधावताम् 'प्रावृषि दृश्यते' इति भट्टसंमतः पाठः ॥ ११ ॥

गो० टी०–आवार्येति । प्रावृषि वर्षाकाले निर्गतो मेघो यथा तथाभ्यधावताम् ॥ ११ ॥

१२] ति० टी०–कौ तौ का च सा मायेत्यत्राह–मारीच इत्यादि । अवासृजन्ववृषुः ॥ १२ ॥

रा० टी०–मारीच इति । मारीचः सुबाहुश्च मेघसंकाशाः तयोरनुचराश्च आगम्य समीपं प्राप्य रुधिरौघान् रुधिरसमूहान् अवासृजन् ववृषुः तथाशब्दो मांसपूयादिसंग्राहकः॥ १२ ॥

गो० टी०–मारीच इति । भीमसंकाशाः भयंकराः॥१२॥

१३] ति० टी०–समुक्षिताम् अभ्याश इति शेषः अभिद्रुतोऽभितः शालां प्रधावंस्तत्रादृष्ट्वा ततो दिवि तानपश्यत्॥१३॥

रा० टी०–सेति । तेन मारीचसुबाहुवर्षितेन रुधिरौघेण मण्डिता वेदिः जज्वाल ततोऽनन्तरं सहसा अभिद्रुतः रुधिरवर्षकान् द्रष्टुं संप्रचलितो रामः तान् रुधिरवर्षकान् दिवि आकाशे अपश्यत् ॥ १३ ॥

गो० टी०–सेति । अभिद्रुतः अभिमुखं धावन् ॥ १३ ॥

१४] ति० टी०–आपतन्तौ स्वसंमुखमागच्छन्तौ ॥१४॥

रा० टी०–ताविति । सहसा आपतन्तौ तौ मारीचसुबाहू दृष्ट्वैव राजीवलोचनो रामः लक्ष्मणमभिसंप्रेक्ष्य वचनमब्रवीत् तुशब्द एवार्थे ॥ १४ ॥

गो० टी०–ताविति । स्पष्टम् ॥ १४ ॥

१५] ति० टी०–मानवास्त्रसमाधूतान्करिष्यामि पश्येति योजना ॥ १५ ॥

रा० टी०–तद्वचनमेवाह–पश्येति । हे लक्ष्मण ! दुर्वृत्तान् दुष्टाचारान् पिशिताशनान् मांसभक्षणशीलान्राक्षसान् अनिलेन घनानिव मानवास्त्रसमाधूतान् मनुवंशप्रादुर्भूतमदस्त्रप्रक्षिप्तान् करिष्यामि अत्र संदेहो न इति त्वं पश्य मानवेति तं बोधनं वा ननु हन्तव्या एव ते इत्यत आह–ईदृशान् उपद्रवकर्तॄन् हन्तुं नोत्सहे ॥ १५ ॥

गो० टी०–पश्येति । पिशिताशनान् मांसभक्षकान् एतद्विघ्ननार्थं मानवास्त्रं प्रयोक्ष्य इति भावः ॥ १५ ॥

१६] ति० टी०–ईदृशान्स्थितायुःशेषान्दुर्बलान्वा ॥१६॥

१७] ति० टी०–परमोदारं परमश्रेष्ठम् ॥ १७ ॥

रा० टी०–इतीति । वेगवान् प्रशस्तहस्तलाघवी विशिष्टोद्युक्तुद्यः राघवो रामः इति उक्तप्रकारेण परं लक्ष्मणतोषकं वचनमुक्त्वा परमोदारमतिश्रेष्ठं किंच परम एव उत् परमात्मा रामः तमासमन्ताद्भावेन राति ददातीति तत् स्वहतेभ्यो रामप्रापकमित्यर्थः परमभास्वरमस्त्रं मारीचोरसि चिक्षेप उच्छब्दस्य परमात्मवाचकत्वमुपनिषत्सु प्रसिद्धम् सार्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

गो० टी०–मानवमिति । अत्रादावित्युक्त्वेत्युपस्कार्यम् ननु सर्वराक्षसेष्वस्त्रप्रयोगं प्रतिज्ञाय मारीचोरसि तत्प्रयोगः कथमिति चेन्न पूर्वश्लोके राक्षसशब्दस्य मारीचमात्रपरत्वात् ॥ १६ ॥

१८] ति० टी०–स तेनेति । स मारीचः । सागरसंप्लवे समुद्रमध्ये ॥ १८ ॥

रा० टी०–स इति । तेन मानवेन परमास्त्रेण समाहतः सताडितः स मारीचः सागरसंप्लवे समुद्रमध्ये संपूर्णं यथा स्यात्तथा योजनशतं क्षिप्तः अत्र श्लोके प्रथमः सकारो गायत्रीद्वितीयवर्ण इति वदन्ति ॥ १८ ॥

गो० टी०–स इति । सागरसंप्लवे समुद्रपूरे अत्र गायत्रीद्वितीयाक्षरं सः ॥ १७ ॥

---

१ निर्गत इति गो. रा. पाठः । २ च ये इति गो. पाठः । ३ मेघेति रा. पाठः । ४ सेति गो. रा. पाठः । ५ वेदिर्जज्वाल मण्डितेति गो. रा. पाठः । ६ नास्त्ययं गो. पुस्तको ७ समाहित इति गो. पाठः ।

विचेतनं विघूर्णन्तं शीतेषुबलपीडितम् । निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥ १९ ॥
पश्य लक्ष्मण शीतेषुं मानवं मनुसंहितम् । मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते ॥ २० ॥
इमानपि वधिष्यामि निर्घृणान्दुष्टचारिणः । राक्षसान्पापकर्मस्थान्यज्ञघ्नान्रुधिराशनान् ॥ २१ ॥
इत्युक्त्वा लक्ष्मणं चाशु लाघवं दर्शयन्निव । विगृह्य सुमहच्चापमाग्नेयं रघुनन्दनः ॥ २२ ॥
सुबाहूरसि चिक्षेप स विद्धः प्रापतद्भुवि । शेषान्वायव्यमादाय निजघान महायशाः ॥
राघवः परमोदारो मुनीनां मुदमावहन् ॥ ॥ २३ ॥
स हत्वा राक्षसान्सर्वान्यज्ञघ्नान्रघुनन्दनः । ऋषिभिः पूजितस्तत्र यथेन्द्रो विजये पुरा ॥ २४ ॥
अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः । निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥२५॥
कृतार्थोऽस्मि महाबाहो कृतं गुरुवचस्त्वया । सिद्धाश्रममिदं सत्यं कृतं वीरेण महायशः ॥
स हि रामं प्रशस्यैवं ताभ्यां संध्यामुपागमत् ॥ ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिंशः सर्गः ॥ ३० ॥

१९] ति० टी०–विचेतनं चैतन्यरहितमत एव विघूर्णमानम् शीतेषुरिति मानवास्त्रनामान्तरम् दृश्य दृष्ट्वा ॥ १९ ॥

रा० टी०–विचेतनमिति। विचेतनं चैतन्यरहितं विघूर्णन्तं भ्रमणविशिष्टं तत्र हेतुः शीतेषुबलताडितम् शीतेषुरिति मानवास्त्रस्य संज्ञा तद्बलेन ताडितमत एव निरस्तं मारीचं दृश्य दृष्ट्वा रामः लक्ष्मणमब्रवीत् ॥ १९ ॥

गो० टी०–विचेतनमिति। शीतेषुशब्दोऽवयववृत्त्या मानवास्त्रे वर्तते दृश्य दृष्ट्वा मारीचस्य प्राणरक्षणं भाविकार्यान्तरसाधनाय ॥ १८ ॥

२०] ति० टी०–शीतेषुं शीतेष्वित्यपरनामकं मानवास्त्रम् मनुसंहितं मनुप्रयुक्तम् वियुज्यते वियोजयतीति यावत् ॥ २० ॥ २१ ॥ २२ ॥

रा० टी०–तद्वचनमेवाह–पश्येति। हे लक्ष्मण! धर्मसंहितं धर्मात्मानं मानवं मनुसंबन्धिनं शीतेषुनामकमस्त्रं त्वं पश्य तत्र हेतुं वदन्नाह–एनं मारीचं मोहयित्वैव नयति शीतेषुरिति शेषः अतः प्राणैः न वियुज्यते प्राणकर्तृकत्यागाश्रयो मारीचो न भवतीत्यर्थः। च शब्द एवार्थे ॥ २० ॥

रा० टी०–इमानिति। निर्घृणान् दयारहितानत एव दुष्टचारिणः दोषविशिष्टाचरणशीलानत एव पापकर्मस्थान्पापकर्मसु स्थः प्रतिक्षणं स्थितिः चिन्तनमिति यावत् येषाम् किंच पापकर्मसु तिष्ठन्ति तानत एव यज्ञघ्नान्यज्ञविध्वंसकर्तॄनिमानपि राक्षसानहं वधिष्यामि ताडयिष्यामि दुष्टचारित्वं निवारयिष्यामीति वा दूरदेशं प्रक्षेपयिष्यामीत्यर्थः अत एव नोत्सहे हन्तुमीदृशानस्त्रसमापातान्करिष्यामीत्यत्र बहुवचनं संगच्छते ॥२१॥

गो० टी०–इमानिति । वधप्रयोजकानि निर्घृणत्वादीनि ॥ १९ ॥

रा० टी०–प्रतिज्ञातमाह–संगृह्येति । सुमहदतिश्रेष्ठमाग्नेयमस्त्रं रघुनन्दनः सुबाहूरसि चिक्षेप तदा विद्धः बाणताडितः स सुबाहुः भुवि ताटकापतनभूमौ प्रापतत् चशब्दस्तदार्थे ॥ २२॥

गो० टी०–संगृह्येति । अद्भुत यथा तथा चिक्षेप ॥२०॥

२३–२४] ति० टी०–निजघान दूरोत्सरणपूर्वकं नाशनं वायव्यास्त्रफलं बोध्यम् ॥ २३ ॥ २४ ॥

रा० टी०–शेषानिति । महायशाः समाधिकरहितयशोविशिष्टः परमोदारो राघवः मुनीनां सुदं प्रमोदमावहन् प्रापयन्सन् वायव्यं वायुदेवताकमस्त्रमादाय गृहीत्वा शेषानुर्वरितान्राक्षसान्निजघान ततोऽदूरदेशं प्रचिक्षेपेत्यर्थः ॥ २३ ॥

गो० टी०–शेषानिति । निजघान हिंसितवान् ॥ २१ ॥

रा० टी०–स इति । यज्ञघ्नान्सर्वान्राक्षसान् हत्वा संताड्य वर्तमानः स रघुनन्दनः तत्र तस्मिन्वने ऋषिभिः पूजित आर्सात् इति शेषः तत्र दृष्टान्तः पुराविजये असुरपराभवमृलकदेवकर्तृकविजयप्राप्तौ इन्द्रो यथा ॥ २४ ॥

गो० टी०–स इति । पुरा विजये असुरविजये ॥ २२ ॥

२५] ति० टी०–निरीतिका निराबाधाः ॥ २५ ॥

रा० टी०–अथेति । अथ असुरहननानन्तरमेव यज्ञे समाप्ते सति महामुनिर्विश्वामित्रः निरीतिकाः बाधारहिताः दिशो दृष्ट्वा काकुत्स्थं रामामिदं वचनमब्रवीत् तुशब्द एवार्थे ॥ २५ ॥

गो० टी०–अथेति । निरीतिकाः निर्बाधाः ॥ २३ ॥

२६] ति० टी०–सत्यं कृतम् अन्वर्थनामकं कृतमित्यर्थः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०–तद्वचनमेवाह–कृतार्थ इति। हे महाबाहो! य-

१ ताडितमिति गो. रा. पाठः । २ क्षेपकोयं गो. पुस्तके । ३ धर्मसंहितमिति गो. रा. पाठः । ४ व्ययुज्यतेति गो. पाठः । ५ अर्धमिदं गो. रा. पुस्तकयोर्नास्ति । ६ संगृह्येति गो. रा. पाठः । ७ रोमेति गो. रा. पाठः । ८ अर्धमिदं गो. रा. पुस्तकयोर्नास्ति ।

एकत्रिंशः सर्गः ।

किं शासनं विधेयमिति रामलक्ष्मणयोः विश्वामित्रं प्रति प्रश्नः, विश्वामित्रं पुरस्कृत्य जनकराज्ये गन्तुमद्भुतधनूरत्नदर्शनार्थमत्याग्रहपूर्वकं महर्षीणां रामाय निवेदनम्, सर्षिसंघविश्वामित्रस्योत्तरदिशि प्रस्थानम् शोणातीरे निवासःरामस्य तद्देशकथाविषयको विश्वामित्रं प्रति प्रश्नश्च ।

अथ तां रजनीं तत्र कृतार्थौ रामलक्ष्मणौ । ऊषतुर्मुदितौ वीरौ प्रहृष्टेनान्तरात्मना ॥ १ ॥
प्रभातायां तु शर्वर्यां कृतपौर्वाह्णिकक्रियौ । विश्वामित्रमृषींश्चान्यान्सहितावभिजग्मतुः ॥ २ ॥
अभिवाद्य मुनिश्रेष्ठं ज्वलन्तमिव पावकम् । ऊचतुः परमोदारं वाक्यं मधुरभाषिणौ ॥ ३ ॥
इमौ स्म मुनिशार्दूल किंकरौ समुपागतौ । आज्ञापय मुनिश्रेष्ठ शासनं करवाव किम् ॥ ४ ॥
एवमुक्ते तयोर्वाक्ये सर्व एव महर्षयः । विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ॥ ५ ॥

तस्त्वया गुरुवचः कृतम् अतः अहं कृतार्थोऽस्मि हे महायशः राम ! इदं सिद्धाश्रमं सत्यं सार्थकम् किंच राक्षसोपद्रवरहितं वनं सत्यलोकवत् कृतं संपादितं त्वयेत्यत्राप्याकृष्यते ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे त्रिंशः सर्गः ॥ ३० ॥

गो० टी०–कृतार्थ इति । गुरुवचः पितृवचः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमञ्जीराख्याने बालकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

१] **ति० टी०**–एवं स्वयज्ञविघ्नविनाशफलकं सर्वास्त्रसंबन्धानुग्रहं कृत्वा भगवान्विश्वामित्रः सहजलक्ष्मीशक्तिसंबन्धानुग्रहाय प्रवर्तत इत्याह–**अथेति** । तत्र यज्ञशालायाम् ॥ १ ॥

रा० टी०–विश्वामित्रवचनानन्तरकालिकं वृत्तमाह–**अथेति** । अथ विश्वामित्रोक्त्यनन्तरं कृतार्थौ साधितमुनिप्रयोजनौ मुदितौ प्रमोदस्य दातारौ प्रहृष्टेन अन्तरात्मनोपलक्षितौ वीरौ रामलक्ष्मणौ तत्र सिद्धाश्रमे ऊषतुः मुदितावित्यत्रान्तर्भावितणिजर्थः कर्मणोऽविवक्षया कर्तरि निष्ठा ॥ १ ॥

गो० टी०–एवं कृतार्थो विश्वामित्रो जनकसुतात्वेनावतीर्णया श्रिया रामं योजयितुं व्याजेन मिथिलाप्रस्थानं प्रस्तौत्येकत्रिंशे–**अथेत्यादि** । कृतार्थौ कृतविश्वामित्रप्रयोजनौ प्रहृष्टेन संतुष्टेन अन्तरात्मना अन्तःकरणेन उपलक्षितौ ॥ १ ॥

२] **ति० टी०**–कृता पौर्वाह्णिकी क्रिया याभ्यां तावभिजग्मतुः अभिवादार्थमिति शेषः तदुक्तं पूर्वसर्गान्ते–' संध्यामुपागमत् ' इति सह गतो विश्वामित्रो होमार्थं त्वरया शालामागत इति बोध्यम् ॥ २ ॥

रा० टी०–प्रभातायामिति । शर्वर्यां रात्रौ प्रभातायां प्रभातत्वं प्राप्तायामेव कृतपौर्वाह्णिकक्रियौ निर्वर्तितप्रातःक्रियाकलापौ सहितौ रामलक्ष्मणौ विश्वामित्रमन्यांश्च मुनीनभिजग्मतुः तत्संमुखं प्रापतुः ॥ २ ॥

गो० टी०–प्रभातायामिति । सहितौ अविनाभूतौ ॥२॥

३] **ति० टी०**–मुनिश्रेष्ठं विश्वामित्रम् ॥ ३ ॥

रा० टी०–अभिवाद्येति । ज्वलन्तं पावकमिव मुनिश्रेष्ठं विश्वामित्रप्रभृतिमभिवाद्य प्रणम्य मधुरोदारं मधुरत्वसमानाधिकरणोदारत्वविशिष्टं वाक्यं मधुरभाषिणौ नित्यं मधुरभाषणशीलौ रामलक्ष्मणौ ऊचतुः ॥ ३ ॥

गो० टी०–अभिवाद्येति । मधुरोदारोक्तौ हेतुर्मधुरभाषिणाविति ॥ ३ ॥

४] **ति० टी०**–स्मेत्यव्ययम् ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–इमाविति हे मुनिशार्दूल ! समुपस्थितौ त्वां प्राप्तौ इमौ आवां द्वौ किंकरौ त्वं यथेष्टं यथेच्छमेव किमपि आज्ञापय तव शासनमावां करवाव स्मशब्द एवार्थे वैशब्दोऽप्यर्थे ॥ ४ ॥

गो० टी०–इमाविति । स्मेति भूतार्थसूचकमव्ययम् इमौ स्म आज्ञापितं सर्वमनुष्ठितवन्तावित्यर्थः मुनिशार्दूल ब्रह्मध्यायिषु श्रेष्ठ ! अनेन निरवधिकभक्तिमत्त्वं सूचितम् किंकरौ ' भक्तिकीतो जनार्दनः ' इत्युक्तरीत्या त्वया क्रीतौ समुपस्थितौ भक्तं त्वा विना क्षणमपि स्थातुमक्षमौ ' शरतल्पगतो भीष्मः शास्त्यन्त्रिव हुताशनः ॥ मां ध्यातं पुरुषव्याघ्रस्ततो मे तद्गतं मनः' इतिवत् आज्ञापय यथेष्टं क्षामकाले अल्पद्रव्याय क्रीतो राजपुत्रः पुनर्निवर्तयितुं नार्हः किल शासनं करवाव किंकर्तव्ये न संकोचः कार्य इत्यर्थः अनेन स्वभक्ताय स्वान्यं न ददाति आहूय न ददाति स्वयं गत्वैव ददाति स्वात्मानमिष्टविनियोगार्हं करोतीत्युक्तम् ॥ ४ ॥

५] **ति० टी०**–तयोरिति ताभ्यामित्यर्थे विश्वामित्रं पुरस्कृत्य कृतविश्वामित्रानुमतिका इति यावत् ॥ ५ ॥

रा० टी०–रामप्रार्थनोत्तरकालिकं वृत्तमाह–एवमिति । तयोः रामलक्ष्मणयोः एवमनेन प्रकारेण वाक्ये उक्ते सति सर्वे महर्षयः विश्वामित्रं पुरस्कृत्यैव रामं वचनमब्रुवन् संबन्धसामान्यविवक्षया षष्ठी ॥ ५ ॥

गो० टी०–एवमिति । अत्र विश्वामित्रेण प्रतिवक्तव्ये

---

१ मुनीनिति गो. रा. पाठः । २ मधुरोदारमिति गो. रा. पाठः । ३ यथेष्टं वै इति गो. रा. पाठः । ४ मुक्तास्ततस्ताभ्यामिति गो. पाठः ।

मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति । यज्ञः परमधर्मिष्ठस्तत्र यास्यामहे वयम् ॥ ६ ॥
त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि । अद्भुतं च धनूरत्नं तत्र त्वं द्रष्टुमर्हसि ॥ ७ ॥
तद्धि पूर्वं नरश्रेष्ठ दत्तं सदसि दैवतैः । अप्रमेयबलं घोरं मखे परमभास्वरम् ॥ ८ ॥
नास्य देवा न गन्धर्वा नासुरा न च राक्षसाः । कर्तुमारोपणं शक्ता न कथंचन मानुषाः ॥ ९ ॥
धनुषस्तस्य वीर्यं हि जिज्ञासन्तो महीक्षितः । न शेकुरारोपयितुं राजपुत्रा महाबलाः ॥ १० ॥
तद्धनुर्नरशार्दूल मैथिलस्य महात्मनः । तत्र द्रक्ष्यसि काकुत्स्थ यज्ञं चैव परमाद्भुतम् ॥ ११ ॥
तद्धि यज्ञफलं तेन मैथिलेनोत्तमं धनुः । याचितं नरशार्दूल सुनाभं सर्वदैवतैः ॥ १२ ॥

ऋषिभिर्नियोजनं रामभक्त्यतिरेकेण पुरस्कृत्य तदनुज्ञां लब्ध्वेत्यर्थः यद्वा विश्वामित्रप्रमुखा मुनय इत्यर्थः ॥ ५ ॥

६] ति० टी०–मैथिलस्य मैथिलाधिपतेः । परमधर्मिष्ठ उत्कटातिशयितधर्मवान् परमेति पृथक्पदं वा परा मा यस्मिन्नित्यर्थकं रामसंबोधनम् ॥ ६ ॥ ७ ॥

रा० टी०–तद्वचनमेवाह–मैथिलस्येत्यादिभिः । नरश्रेष्ठ हे राम ! मैथिलस्य मिथिलाधिपतेः जनकस्य परमधर्मिष्ठः अतिशयधर्मोत्पादक इत्यर्थः यज्ञः भविष्यति तत्र वयं यास्यामहे यास्यामः ॥ ६ ॥

गो० टी०–मैथिलस्येति । मिथिलाया ईश्वरो मैथिलः " तस्येदम् " इत्यण् परमधर्मिष्ठः अतिशयेन धर्मवान् भगवत्कैङ्कर्यरूपत्वेन काम्यनित्याभ्युत्कृष्ट इत्यर्थः तस्य तस्य कृते ॥ ६ ॥

रा० टी०–अतः हे नरशार्दूल । अस्माभिः सह त्वमपि तत्र गमिष्यसि तत्र हेतुः तत्र यागे अद्भुतं विलक्षणं तत्प्रसिद्धं धनूरत्नं त्वं द्रष्टुमर्हसि चशब्दो हेतौ एवोऽप्यर्थे ॥ ७ ॥

गो० टी०–त्वमिति । गमिष्यसि यदीति शेषः धनुरत्नं धनुःश्रेष्ठं दीर्घाभाव आर्षः चकाराद्यज्ञं चेत्यर्थः तत्प्रसिद्धम् ॥ ७ ॥

८] ति० टी०–पूर्वं पूर्वस्मिन्काले । देवरातारव्यप्राचीनजनकस्य यज्ञे सदसि दैवतैर्दक्षयज्ञवधे प्रसादिताच्छिवाल्लब्धं यज्ञप्रसादितैः शिवसहितैर्देवैर्दत्तम् अतस्तत्र तिष्ठतीति शेषः ८ ॥

रा० टी०–धनुषोऽद्भुतत्वं दर्शयन्नाह–तदिति । हे नरश्रेष्ठ अप्रमेयबलमियत्तारहितबलविशिष्टमतिगुर्वित्यर्थः परमभास्वरमतिदीप्तियुक्तमत एव घोरं भयंकरं तत्प्रसिद्धं धनुः मखे सदसि देवरातनामकजनकमखसभायां दैवतैः दक्षप्रजापतियागध्वंसे प्रसादितशिवाल्लब्धधनुष्कदेवैः किंच देवतैः देवतास्वामिशिवेन बहुत्वमादरार्थं पूर्वं दत्तं देवरातनामकपूर्वजनकायेति शेषः ॥ ९ ॥

गो० टी०–तस्य धनूरत्नं कुतः समायातं तत्राह–तद्धीति । मखे सदसि दैवतैर्दत्तमित्यन्वयः ॥ ८ ॥

९–१०] ति० टी०–तस्याद्भुतत्वमाह—नास्येति । आरोपणं शरप्रक्षेपयोग्यज्यासंबन्धः न कथंचन न कथमपीत्यर्थः ॥ ९ ॥ १० ॥

रा० टी०–नास्येति । अस्य धनुषः आरोपणं बाणप्रक्षेपयोग्यज्यासंयोगं कर्तुं देवाः कथंचन न शक्ताः गन्धर्वाः कथंचन न शक्ताः असुराः कथंचन न शक्ताः राक्षसाः कथंचन न शक्ताः मानुषाश्च कथंचन न शक्ताः मनुष्येष्वपि नहुषादिषु अधिकपराक्रमश्रुतेः न पतत्प्रकर्षदोषाशङ्का ॥ ९ ॥

गो० टी०–नास्येति । आरोपणं ज्यारोपणम् ॥ ९ ॥

रा० टी०–धनुष इति । तस्य देवैर्दत्तस्य धनुषः वीर्यं जिज्ञासन्तः महाबला महीक्षितो राजानः राजपुत्राश्च आरोपयितुं बाणप्रक्षेपयोग्यज्यासंयोगं कर्तुं न शेकुः हिशब्दश्चार्थे ॥ १० ॥

गो० टी०–धनुष इति । जिज्ञासन्तः जिज्ञासमानाः ॥ १० ॥

११] ति० टी०–तत्र मिथिलायाम् । यज्ञं चेति यज्ञं द्रक्ष्यसि चेत्यन्वयः । चकारेण जानकीस्वीकारसमुच्चयः ॥ ११ ॥

रा० टी०–उपसंहरन्नाह–तदिति । हे नरशार्दूल हे काकुत्स्थ ! अद्भुतदर्शनं तत्प्रसिद्धं मैथिलस्य धनुर्यज्ञं च तत्र मिथिलायां द्रक्ष्यसि ॥ ११ ॥

गो० टी०–तदिति । यज्ञं द्रक्ष्यसि तत्र तद्धनुश्च द्रक्ष्यसीत्यन्वयः ॥ ११ ॥

१२] ति० टी०–कुतस्तादृशधनुषस्तत्र स्थितिस्तत्राह–तद्धीति । उत्तमं तद्धनुर्मैथिलेन निजयज्ञप्रीतदेवेभ्यो यज्ञफलत्वेन याचितं युद्धे रिपूणां जयाय सर्वदैवतैः शिवसहितैः सर्वदैवतैर्दत्तम् अतस्तत्र तिष्ठतीत्यर्थः तदुक्तं पाद्मे 'चापं शंभोर्ददावुग्रं दत्तम्' इति । कौर्मेऽपि 'प्रीतश्च भगवानीशश्चिक्षेप नीललोहितः । प्रददौ शत्रुनाशार्थं जनकायाद्भुतं धनुः ॥' इति । सुनाभं शोभनसृष्टिबन्धस्थानम् ॥ १२ ॥

रा० टी०–ननु तद्धनुः कथं प्राप्तमित्यत आह–तदिति । हे नरशार्दूल ! सुनाभं रमणीयसृष्टिबन्धनस्थानकमिदमेव यज्ञफलमिति मैथिलेन मिथिलाधिपतिना याचितमुत्तमं श्रेष्ठं तत्प्रसिद्धं धनुः सर्वदैवतैः सर्वदेवदेवैः शिवेन दत्तमिति शेषः । च-

१ तस्येति गो. पाठः । २ तदिति गो. पाठः । ३ धनुरत्नमिति गो. पाठः । ४ तदिति गो. पाठः । ५ त्विति गो. पाठः । ६ चाद्भुतदर्शनमिति गो. रा. पाठः । ७ चेतीति रा. पाठः ।

आयागभूतं नृपतेस्तस्य वेश्मनि राघव । अर्चितं विविधैर्गन्धैर्धूपैश्चागुरुगन्धिभिः ॥ १३ ॥
एवमुक्त्वा मुनिवरः प्रस्थानमकरोत्तदा । सर्षिसंघः सकाकुत्स्थ आमन्त्र्य वनदेवताः॥ १४ ॥
स्वस्ति वोऽस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहम् । उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयम् ॥ १५ ॥
इत्युक्त्वा मुनिशार्दूलः कौशिकः स तपोधनः । उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥ १६ ॥
तं व्रजन्तं मुनिवरमन्वगादनुसारिणाम् । शकटीशतमात्रं तु प्रयाणे ब्रह्मवादिनाम् ॥ १७ ॥
मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः । अनुजग्मुर्महात्मानो विश्वामित्रं तपोधनम् ॥ १८ ॥
निवर्तयामास ततः सर्षिसंघः स पक्षिणः । ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ॥ १९ ॥

शब्द इदमित्यर्थे हिशब्द एवार्थे अत एव 'चापं शंभोर्ददावत्तम्' इति पाद्मवचनं 'प्रीतश्च भगवानीशस्त्रिशूली नीललोहितः। प्रददौ शत्रुनाशार्थं जनकायाद्भुतं धनुः' इति कौर्मवचनं च संगच्छते ॥ १२ ॥

गो० टी०–मखे किमर्थं दत्तं तत्राह–तद्धीति। सुनाभं शोभनमुष्टिबन्धनस्थानं दैवतैः दैवतेभ्यः याचितं दत्तं चेत्यर्थः॥ १२॥

१३] ति० टी०–आयागभूतं यजनीयदेवताभूतमित्यर्थः। वेश्मनीत्यस्य तिष्ठतीति शेषः। अतएवाह—अर्चितमित्यादि। 'न्यासभूतं नरपतेः' इति क्वचित्पाठः तत्रापि न्यस्यते ऽस्मिन्देवतेति व्युत्पत्त्या स एवार्थः देवतान्यासश्च यागार्थ एव प्रतिमादौ ॥ १३ ॥

रा० टी०–आयागेति। हे राघव! तस्य प्रसिद्धस्य नृपतेर्जनकस्य वेश्मनि विविधैः अनेकप्रकारैः गन्धैश्चन्दनैः माल्यैः पुष्पैः अगरुगन्धिभिश्च अर्चितं पूजितमायागभूतमासमन्तात् यागो यजनं यत्र तत्र भूतं प्राप्तं धनुरस्तीति शेषः ॥ १३ ॥

गो० टी०–आयागेति। आयागभूतं धनुरुत्सवे प्राधान्येनार्चितं धनुरायाग उच्यते अत्र विश्वामित्रेणैवानुक्तिः सर्वसंमतत्वद्योतनाय ॥ १३ ॥

१४] ति० टी०–एवमुक्त्वेति । महर्षिगणद्वारेति शेषः मुनिवरो विश्वामित्रः वनदेवता वनदुर्गाद्याः ॥ १४ ॥

रा० टी०–एवमिति। सर्षिसंघः ऋषिसंघसहितः सकाकुत्स्थः काकुत्स्थो रामस्तत्सहितः मुनिवरो विश्वामित्रः एवमनेन प्रकारेणोक्त्वा तदैव वनदेवता आमन्त्र्य च प्रस्थानमकरोत् विनापि चं समुच्चयः सर्वं वाक्यं सावधारणं भवतीति न्यायेनैवकारलाभः ॥ १४ ॥

गो० टी०–एवमिति। पूर्वं विश्वामित्रं पुरस्कृत्येत्युक्त्या प्राधान्यात् विश्वामित्र उक्तवानित्यनद्यते ॥ १४ ॥

१५-१६] ति० टी०–सिद्धः निर्विघ्नयज्ञसिद्धेति भावः क्वगमिष्यसीत्यत्राह–उत्तर इति ॥ १५ ॥ १६ ॥

रा० टी०–आमन्त्रणप्रकारं वदन्नाह–स्वस्तीति। सिद्धः धितयागादिक्रियोऽहमुत्तरे जाह्नवीतीरे भियमानं शिलोच्चयं हिमवन्तं सिद्धाश्रमाद्गमिष्यामि वो युष्मभ्यं स्वस्त्यस्तु ॥ १५॥

गो० टी०–स्वस्तीति। जाह्नवीतीरे स्थितं हिमवन्तं गमिष्यामीत्यन्वयः। शिलोचयं पर्वतं सिद्धाश्रमाद्धिमवद्गमनं मिथिलामार्गेणेति ज्ञेयम् ॥ १५ ॥

रा० टी०–प्रदक्षिणमिति। ततः वनदेवतामन्त्रणानन्तरमनुत्तमं परमोत्कृष्टं सिद्धाश्रमं प्रदक्षिणं कृत्वा उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥ १६ ॥

गो० टी०–प्रदक्षिणमिति । ततः वनदेवतामन्त्रणानन्तरम् ॥ १६ ॥

१७–१८] ति० टी०–अनुसारिणामनुक्तदिगनुसारिणां पश्चाद्गामिनामिति वा शकटीशतमात्रं शतपरिच्छिन्नशकट्यारोपिताग्निहोत्रसंभारादिमद्ब्रह्मवादिनां यूथमन्वगादिति संबन्धः ॥ १७ ॥ १८ ॥

रा० टी०–तमिति। व्रजन्तं तं प्रसिद्धं मुनिवरमनुसारिणां ब्रह्मवादिनां प्रयाणे एव शकटीशतमात्रं शकटीशतेन शतसंख्याकशकटीभिः मीयते परिच्छिद्यते तत् यागोपस्करणं यागसामग्रीपूरितशकटीशतमित्यर्थः अन्वयात् अभ्यगच्छत् चशब्द एवार्थे ॥ १७ ॥

गो० टी०–तमिति । अनुसारिणमुत्तरदिगनुसारिणं तं प्रायेण बाहुल्येन ब्रह्मवादिनां शकटीशतमात्रं शकट्यः शकटानि तेषां शतमात्रं शतप्रमाणं अन्वयात् अन्वगात् यद्वा शतमात्रमन्वयात् इतरत्सर्वं सिद्धाश्रम एव स्थितमित्यर्थः अत्र शकटीशब्देन शकट्यारोपिताग्निहोत्रसंभारादिकमुच्यते ॥ १७॥

रा० टी०–मृगेति । सिद्धाश्रमनिवासिनो मृगपक्षिगणा अपि महात्मानं पूज्यस्वरूपं महामुनिं विश्वामित्रमेवानुजग्मुः चकारोऽप्यर्थकः ॥ १८ ॥

गो० टी०–मृगेति । तद्भक्त्येति भावः ॥ १८ ॥

१९] ति० टी०–पक्षिणो निवर्तयामासेत्यनेन ऋषीणामनिवर्तनमुक्तम् तदेवाह–ते गत्वेति ॥ १९ ॥

रा० टी०–निवर्तयामासेति । ततः मृगाद्यनुगमनानन्तरं बहून् पक्षिसंघान् अपिशब्देन मृगसंघान् बहूनिवर्तयामास ॥ १९ ॥

वासं चक्रुर्मुनिगणाः शोणाकूले समाहिताः । तेऽस्तं गते दिनकरे स्नात्वा हुतहुताशनाः ॥ २० ॥
विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः । रामोऽपि सहसौमित्रिर्मुनींस्तानभिपूज्य च ॥२१॥
अग्रतो निषसादाथ विश्वामित्रस्य धीमतः । अथ रामो महातेजा विश्वामित्रं तपोधनम् ॥ २२ ॥
पप्रच्छ मुनिशार्दूलं कौतूहलसमन्वितम् । भगवन्कोऽन्वयं देशः समृद्धवनशोभितः ॥ २३ ॥
श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्त्वतः । नोदितो रामवाक्येन कथयामास सुव्रतः ॥
तस्य देशस्य निखिलमृषिमध्ये महातपाः ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ।

ब्रह्मयोनेः कुशस्य चतुःसप्तमध्ये कुशनाभादृताच्यां कन्याशतोत्पत्तिवर्णनम्, ताभिः सह ' अहं वः कामये ' इत्यादिर्वायो संवादः, स्वयंवरकरणे तासामनोत्सुक्याद्वायोः प्रभावात्तासां कुब्जात्वम्, स्वसद्मनि पितृसमीपे आगमनं च ।

ब्रह्मयोनिर्महानासीत्कुशो नाम महातपाः । अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः ॥ १ ॥

रा० टी०–ते इति । समागता मुनिवरा दूरमध्वानं गत्वा दिवाकरे लम्बमाने अस्तं प्राप्ते सति शोणकूले वासं चक्रुः ॥२०॥

गो० टी०–निवर्तयामासेत्यर्थम् । अत्र पक्ष्यादिनिवर्तनेन मुनीनां गमनं द्योतितम् ॥ १९ ॥

गो० टी०–त इति । शोणः पुंनदः स एव शोणेत्यपि व्यपदिश्यते ॥ २० ॥

२०–२२] ति० टी०–शोणनदस्यैव ' शोणा ' इत्यपि नामेत्याहुः वस्तुतः ' शोणा ' इति गिरिव्रजसमीपस्थो नदीविशेष इत्येतदुत्तरसर्गे स्पष्टम् अस्तं गते अस्तं जिगमिषतीत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥

रा० टी०–तदेव विशदयन्नाह–ते इति । हुतहुताशना अमितौजसस्ते मुनयः दिनकरे सूर्येऽस्तं गते सति विश्वामित्रं पुरस्कृत्य निषेदुः ॥ २१ ॥

गो० टी०–त इति । शोणे स्नात्वा दिनकरेऽस्तं गते सति हुतहुताशना इत्यन्वयः ॥ २१ ॥

रा० टी०–राम इति । अथ मुनिनिषादानन्तरं सहसौमित्रिः सौमित्रिसहितः रामोऽपि तान्समागतान्मुनीनभिपूज्य चकारेण प्रणामादिकं विधाय धीमतो विश्वामित्रस्याग्रतो निषसाद २२॥

गो० टी०–राम इति । अभिपूज्य अभिवाद्य ॥ २२ ॥

रा० टी०–अथेति । अथ सर्वनिषादानन्तरं महातेजाः नरशार्दूलो रामः कौतूहलसमन्वितः सन् महामुनिं विश्वामित्रं पप्रच्छ

गो० टी०–अथेति । स्पष्टम् ॥ २३ ॥

२३] ति० टी०–अयं देशः शोणाकूलस्थः ॥ २३ ॥

रा० टी०–प्रश्नमेवाह–भगवन्निति । हे भगवन् सकलसामर्थ्यविशिष्ट समृद्धवनशोभितः अयं देशः कस्य इति अहं श्रोतुमिच्छामि अतस्त्वं तत्त्वतो वक्तुमर्हसि ते तुभ्यं भद्रमस्तु ॥ २४ ॥

गो० टी०–भगवन्निति । अयं शोणकूलस्थः ॥ २४ ॥

२४] ति० टी०–निखिलम् वैभवमिति शेषः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्ड एकत्रिंशः सर्गः ॥ ३१ ॥

रा० टी०–चोदित इति । रामवाक्येन चोदितः प्रेरितः सुव्रतः महातपाः विश्वामित्रः तस्य देशस्य निखिलं संपूर्णं वृत्तान्तमृषिमध्ये कथयामास ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–चोदित इति । निखिलं वृत्तान्तमित्यर्थः ॥२५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

१] ति० टी०–शोणाकूलदेशवैभवप्रश्ने मद्वंश्यानामयं देश इत्युत्तरमाह–ब्रह्मयोनिरिति । ब्रह्मपुत्र इत्यर्थः आक्लिष्टव्रतश्चासौ धर्मज्ञश्चेति विग्रहः ॥ १ ॥

रा० टी०–विश्वामित्रकथनमेवाह–ब्रह्मयोनिरिति । ब्रह्मा हिरण्यगर्भः योनिः उत्पत्तिकारणं यस्य सः ब्रह्मपुत्र इत्यर्थः । अत एव महायशाः उत्तमयशोविशिष्टः अक्लिष्टव्रतधर्मज्ञः अक्लिष्टं बाधारहितं व्रतं संकल्पो यस्य स सत्यसंकल्प इत्यर्थः धर्मं जानाति धर्मज्ञः स एव स इति कर्मधारयः अत एव सज्जनप्रतिपूजकः महात्मप्रतिपूजनस्य कर्ता अत एव महान्सर्वश्रेष्ठः कुशो नामासीत् ॥ १ ॥

गो० टी०–एवं शोणकूलदेशवैभवे पृष्टे अयं मद्वंश्यानां देश इति विवक्षन् स्वान्वयं प्रदर्शयति द्वात्रिंशे–ब्रह्मयोनिरित्यादि । ब्रह्मा योनिः कारणं यस्य सः ब्रह्मयोनिः अयोनिजो ब्रह्मपुत्रः महान् ज्ञानशौर्यादिभिरितरब्रह्मपुत्रविलक्षणः कौ भूमौ

१ वरा इति गो. रा. पाठः । २ शोणकूले इति रा. पाठः । ३ समागता इति गो. रा. पाठः । ४ ह्यीति गो. रा. पाठः । ५ महामुनिमिति गो. रा. पाठः । ६ नरशार्दूला इति गो. रा. पाठः । ७ समन्वित इति गो. रा. पाठः । ८ कस्य देशोयऽमिति गो. रा. पाठः । ९ चोदित गो. रा. पाठः । १० महायशा इति रा. पाठः ।

स महात्मा कुलीनायां युक्तायां सुमहाबलान् । वैदर्भ्यां जनयामास चतुरः सदृशान्सुतान् ॥ २ ॥
कुशाम्बं कुशनाभं च असूर्तरजसं वसुम् । दीप्तियुक्तान्महोत्साहान्क्षत्रधर्मचिकीर्षया ॥ ३ ॥
तानुवाच कुशः पुत्रान्धर्मिष्ठान्सत्यवादिनः । क्रियतां पालनं पुत्रा धर्म प्राप्स्यथ पुष्कलम् ॥ ४ ॥
कुशस्य वचनं श्रुत्वा चत्वारो लोकसत्तमाः । निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा ॥ ५ ॥
कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीम् । कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयम् ॥ ६ ॥
असूर्तरजसो नाम धर्मारण्यं महामतिः । चक्रे पुरवरं राजा वसुर्नाम गिरिव्रजम् ॥ ७ ॥
एषा वसुमती नाम वसोस्तस्य महात्मनः । एते शैलवराः पञ्च प्रकाशन्ते समन्ततः ॥ ८ ॥
सुमागधी नदी रम्या मागधान्विश्रुता ययौ । पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते ॥ ९ ॥
सैषा हि मागधी रामं वसोस्तस्य महात्मनः । पूर्वाभिचरिता रौमं सुक्षेत्रा सस्यमालिनी ॥ १० ॥

शेत इति कुशः नारदादिवत् ब्रह्मलोकेऽनवस्थाय प्रजापालने दत्तादरतया भूमाववस्थानात् कुश इत्यस्य नाम अत एव क्षत्रियव्यापारात् क्षत्रियोऽयम् अक्लिष्टं निर्बाधं व्रतं यस्य सोऽक्लिष्टव्रतः अक्लिष्टव्रतश्चासौ धर्मज्ञश्चेति कर्मधारयः ॥ १ ॥

२] ति० टी०–युक्तायाम् अशेषस्त्रीगुणयुक्तायामित्यर्थः॥२॥

रा० टी०–स इति । महात्मा स कुशनामा कुलीनायामुत्कृष्टकुलविशिष्टायां युक्तायामात्मसदृशार्यां वैदर्भ्यां सुमहाबलान् अत्यन्तबलविशिष्टान् कुशाम्बं कुशनाभं च अमूर्तिरजसं च वसुं च चतुरः सदृशान्सुतान् जनयामास एक एव चः स्वहीनयोरप्यन्वेति ॥ २ ॥

गो० टी०–स इति । सार्धश्लोकः । युक्तायामनुरूपायाम्॥२॥

३] ति० टी०–अमूर्तरजसं न विद्यते सूर्तं प्रसूतं रजो यस्य तम् अजिति योगविभागादच् क्षत्रधर्मचिकीर्षया तद्धर्मवृद्धिकरणेच्छया ॥ ३ ॥

रा० टी०–दीप्तियुक्तानिति । दीप्तियुक्ततिप्रकाशविशिष्टान् धर्मिष्ठान् अतिशयधर्मविशिष्टान्सत्यवादिनः सत्यवचनांस्तान् चतुरः पुत्रान् क्षत्रधर्मचिकीर्षया क्षत्रियधर्मप्रवृत्तीच्छया उवाच ॥ ३ ॥

गो०टी–दीप्तीति । क्षत्रधर्मः प्रजापालनम् ॥ ३ ॥

४] ति० टी०–पालनं प्रजापालनम् ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–क्रियतामित्यर्धेन । हे पुत्राः पालनं प्रजारक्षणं क्रियतां तेन पुष्कलं संपूर्णं धर्मं प्राप्स्यथ तदा तस्मिन् काले लोकसंमताः नृवराः नरश्रेष्ठाः सर्वे ते चत्वारःपुत्राःपितुर्वचनं श्रुत्वा पुराणां निवेशं निर्माणं चक्रिरे॥४॥

गो० टी०–क्रियतामिति । सार्धश्लोकः । पुष्कलं समग्रं ऋषेः कुशस्य निवेशं संनिवेशम् ॥ ४ ॥

५] ति० टी०–निवेशं संनिवेशम् ॥ ५ ॥

६–७] ति० टी०–महोदयं महोदयनामकम् ॥ ६ ॥ ७ ॥

रा० टी०–तत्प्रकारमाह–कुशाम्ब इति । महातेजाः कुशाम्बस्तु कौशाम्बीं पुरीमकरोत् धर्मात्मा कुशनाभस्तु महोदयं नाम पुरं चक्रे ॥ ६ ॥

रा० टी०–असूर्तिरजस इति । हे राम ! महीपतिः असूर्तिरजसः धर्मारण्यं पुरवरं चक्रे राजा वसुः गिरिव्रजं पुरवरं चक्रे पुरवरमित्युभयान्वयि ॥ ६ ॥

गो० टी०–कुशाम्ब इत्यादिश्लोकद्वयम् ॥ ६ ॥ ७ ॥

८] ति० टी०–एषा गिरिव्रजापरपर्याया ॥ ८ ॥

रा० टी०–एषेति । हे राम ! महात्मनः तस्य वसोः एषा वसुमती पृथ्वी समन्ततः एते पञ्च शैलवराश्च प्रकाशन्ते। विनापि चं समुच्चयः ॥ ७ ॥

गो० टी०–एषेति । एषा शोणकूलस्था शैलवराः गिरिव्रजसंज्ञामूलाः ॥ ७ ॥

९] ति० टी०–सुमागधी तत्संज्ञा आययाविति पदच्छेदः ॥ ९ ॥

रा० टी०–सुमागधीति । पञ्चानां शैलमुख्यानां मध्ये माला इव या शोभते सा विश्रुता प्रसिद्धा रम्या रमणीया सुमागधी नदी मगधान् ययौ येति सेति चाध्याहृतम् ॥ ८ ॥

गो० टी०–सुमागधीति । मगधदेशादागता मागधीति शोण एवोच्यते आययाविति च्छेदः ॥ ८ ॥

१०] ति० टी०–सा मागधी मगधादागततया मागधीत्वेन प्रसिद्धा सैषा शोणा तस्य मद्वंश्यस्य वसोर्भवति पूर्वाभिचरिता पूर्वदिग्गामिनी सुक्षेत्रा पार्श्वद्वयेऽपीति शेषः॥१०॥

रा० टी०–सेति । हे वीर ! पूर्वाभिचरिता पूर्वदिग्वाहिनी सुक्षेत्रा शोभनानि क्षेत्राणि उभयकूलवर्तीनि यस्या अत एव सस्यमालिनी सस्याभिन्नमालास्ति अस्या " व्रीह्यादिभ्यश्च " इतीनिः एषा मागधीनाम नदी अपि महात्मनस्तस्य वसोः सम्बन्धिनी हिशब्दोऽप्यर्थे ॥ ९ ॥

गो० टी०–सैषेति । पूर्वाभिचरिता पूर्वदेशात् प्रत्यङ्मुखवाहिनी सुक्षेत्रा उभयपार्श्वत इति शेषः ॥ ९ ॥

---

१ गुणोल्वणानिति गो. पाठः । २ अमूर्तिरजसामिति रा. आधूर्तरजसामति गो. पाठः । ३ पितुस्ते इति रा. ऋषेस्तु इति गो. पाठः । ४ लोकसंमता इति गो. रा. पाठः । ५ अमूर्तीति रा. आधूर्तेति गो. पाठः । ६ महीपतिरिति गो. रा. पाठः । ७ चक्रे इति गो. रा. पाठः । ८ मगधानिति गो. रा. पाठः । ९ नामेति रा. पाठः । १० वीरेति रा. पाठः

कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमम् । जनयामास धर्मात्मा घृताच्यां रघुनन्दन ॥ ११ ॥
तास्तु यौवनशालिन्यो रूपवत्यः स्वलंकृताः । उद्यानभूमिमागम्य प्रावृषीव शतह्रदाः ॥ १२ ॥
गायन्त्यो नृत्यमानाश्च वादयन्त्यस्तु राघव । आमोदं परमं जग्मुर्वराभरणभूषिताः ॥ १३ ॥
अथ ताश्चारुसर्वाङ्ग्यो रूपेणाप्रतिमा भुवि । उद्यानभूमिमागम्य तारा इव घनान्तरे ॥ १४ ॥
ताः सर्वा गुणसंपन्ना रूपयौवनसंयुताः । दृष्ट्वा सर्वात्मको वायुरिदं वचनमब्रवीत् ॥ १५ ॥
अहं वः कामये सर्वा भार्या मम भविष्यथ । मानुषस्त्यज्यतां भावो दीर्घमायुरवाप्स्यथ ॥ १६ ॥
चलं हि यौवनं नित्यं मानुषेषु विशेषतः । अक्षयं यौवनं प्राप्ता अमर्यश्च भविष्यथ ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा वायोरक्लिष्टकर्मणः । अपहास्य ततो वाक्यं कन्याशतमथाब्रवीत् ॥ १८ ॥
अन्तश्चरसि भूतानां सर्वेषां सुरसत्तम । प्रभावज्ञाश्च ते सर्वाः किमर्थमवमन्यसे ॥ १९ ॥

११] ति० टी०–घृताच्यां तन्नामिकाप्सरसि ॥ ११ ॥

रा० टी०–कुशनाभ इति । हे रघुनन्दन ! धर्मात्मा धर्मस्वभावः राजर्षिः कुशनाभस्तु अनुत्तमं सर्वश्रेष्ठं कन्याशतं शतसंख्याककन्याः घृताच्यामप्सरस्सु जनयामास ॥ १० ॥

गो० टी०–कुशनाभ इत्यादि । घृतवत्पुरुषं दृष्ट्वा द्रवती सत्यञ्चतीति घृताची कुशनाभभार्या घृतवत्पुरुषं कृत्वाञ्चतीति वा अप्सरसः ॥ १० ॥

१२] ति० टी०–ताः शतं कन्याः ॥ १२ ॥

रा० टी०–ता इति । यौवनशालिन्यः प्राप्तयौवनावस्था अत एव रूपवत्यः प्रशस्तरूपविशिष्टाः स्वलङ्कृताः शोभनकुङ्कुमकस्तूर्यादिभिः प्राप्तालङ्काराः उद्यानभूमिमागम्य प्रावृषि ऋतौ शतह्रदा इव शतह्रदसदृश्यः वराभरणभूषिताः वराभरणैः नूपुरादिभिः भूषिताः शतं कन्याः गायन्त्यः नृत्यमानाश्च वादयन्त्यश्च सत्यः परमामोदं जग्मुः श्लोकद्वयमेकान्वयि तुर्हेतौ ॥ ११ ॥ १२ ॥

गो० टी०–तास्त्विति श्लोकद्वयम् । उद्यानभूमिमागम्य शतह्रदा इव स्थिताः शतह्रदाः विद्युतः नृत्यमानाः नृत्यन्त्यः वादयन्त्यः वीणा इति शेषः आमोदं संतोषं स्वलंकृताः कुसुमचन्दनतिलकादिभिः ॥ ११ ॥ १२ ॥

१३–१५] ति० टी०–आमोदं संतोषम् ॥ १३ ॥ घनान्तरे मेघमध्ये तारा इव रेजुरिति शेषः ॥ १४ ॥ १५ ॥

रा० टी०–अथेति । चारुसर्वाङ्ग्यः भुवि रूपेण अप्रतिमाः न प्रतिमाः प्रतिनिधयो यासामनुपमरूपविशिष्टा इत्यर्थः । अथ मङ्गलदर्शनाः ताः शतकन्याः उद्यानभूमिमागम्य घनान्तरे तारा इव शुशुभिरे इति शेषः ॥ १३ ॥

गो० टी०–अथेति । तारा इव बभुरिति शेषः ॥ १३ ॥

रा० टी०–ता इति । सर्वगुणसंपन्नाः रूपयौवनसंयुताः ताः शतं कन्याः सर्वात्मको वायुर्दृष्ट्वा इदं वचनमब्रवीत् ॥ १४ ॥

गो० टी०–ता इति । सर्वगुणसंपन्नाः सर्वालंकारसंपन्नाः सर्वत्र आत्मा स्वरूपं यस्य सः सर्वात्मकः सर्वत्र संचारीत्यर्थः १४

१६] ति० टी०–मत्कामनापूरणे मम देवस्य मानुष्योऽपि भार्या भविष्यथेत्यादिर्वंशीकरणायार्थवादः नन्वु मानुषीणां देवसंबन्धोऽनुचितस्तत्राह–मानुषस्त्यज्यतां भाव इति मदङ्गीकारमात्रेण विलक्षणशक्त्याविर्भावान्मानुषभावत्यागे स्वत एव भवतीनां सामर्थ्यं भविष्यति तत्फलमाह–दीर्घमिति ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–अहमिति । वः युष्मान्सर्वा अहं कामये अतो मम भार्या यूयं भविष्यथ अतः मानुषः मनुष्यविषयको भावोऽनुरागः त्यज्यतामत एव दीर्घमायुर्यूयमवाप्स्यथ । मम भार्या भविष्यथेत्यनेन मम कामनावैफल्यं न भवतीति हेतुर्ध्वनितः । मानुषशब्दोऽर्शआद्यजन्तः " तस्येदम् " इत्यणन्तो वा ॥ १५ ॥

गो० टी०–अहमिति । वः भवतीः मानुषे भवो मानुषः भावः अनुरागः त्यज्यतां तथा सति दीर्घमायुरवाप्स्यथ ॥ १५ ॥

१७] ति० टी०–मानुषेषु हि यतो विशेषेण नित्यमनुक्षणं यौवनं चलं चञ्चलं क्षीयमाणमिति यावत् अतो मत्संबन्धेनाक्षयं यौवनमित्याशयवयः ॥ १७ ॥

रा० टी०–मत्स्वीकारोऽवश्यं भवतीभिः कर्तव्य इति बोधयन्नाह–चलमिति । मानुषेषु यौवनं विशेषतो नित्यं चलं हि यदि यूयममरीः अमरीत्वं भविष्यथ प्राप्स्यथ तर्हि अक्षयं क्षयरहितं यौवनं प्राप्ता भविष्यथ अमरीशब्दो भावप्रधानः अमर्य इति पाठे तु भावप्रधाननिर्देशकल्पना नेति बोध्यम् ॥ १६ ॥

गो० टी०–चलमिति । नित्यं सर्वदा अक्षय्यमिति मद्भार्यात्व इति शेषः ॥ १६ ॥

१८] ति० टी०–अपहास्य हासपूर्वकमपमान्य ॥ १८ ॥

रा० टी०–तस्येति । अथ वायुवचनकथनानन्तरमक्लिष्टकर्मणः अबाधितक्रियस्य ततः मोहकवचनविस्तारकर्तुः तस्य प्रसिद्धस्य वायोः तन्मोहकं वचनं श्रुत्वा अपहस्य संस्मित्य कन्याशतं वाक्यमब्रवीत् ॥ १७ ॥

गो० टी०–तस्येति । अक्लिष्टकर्मणः अप्रतिहतकर्मणः ततः तद्वाक्यश्रवणेन अपहास्य अथाऽब्रवीत् ॥ १७ ॥

१९] ति० टी०–अन्तश्चरसीति पूर्वार्धेन स्वभावज्ञता

१ च सर्वश इति गो. पाठः । २ सर्वगुणसंपन्ना इति गो. रा. पाठः । ३ अक्षय्यमिति गो. पाठः । ४ अमरीरिति रा. पाठः । ५ अपहस्येति रा. पाठः । ६ त्वं सुरोत्तमेति गो. रा. पाठः । ७ स्मेति गो. पाठः । ८ किमस्मानवमन्यसे इति गो. रा. पाठः ।

कुशनाभसुता देवैं समस्ताः सुरसत्तम । स्थानाच्यावयितुं देवं रक्षामस्तु तपो वयम् ॥ २० ॥
मा भूत्स कालो दुर्मेधः पितरं सत्यवादिनम् । अवमंन्य स्वधर्मेण स्वयंवरमुपास्महे ॥ २१ ॥
पिता हि प्रभुरस्माकं दैवतं परमं चैं सः । यस्य नो दास्यति पिता स नो भर्ता भविष्यति । २२ ।
तासां तुं वचनं श्रुत्वा हरिः परमकोपनः । प्रविश्य सर्वगात्राणि बभञ्ज भगवान्प्रभुः ॥ २३ ॥
[अरत्निमात्राकृतयो भग्नगात्रा भयार्दिताः]
ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहम् । प्रैविश्य च सुसंभ्रान्ताः सलज्जाः सार्स्रलोचनाः ॥

वायोः सूचिता ननु युष्मत्प्रभावापेक्षया मत्प्रभावोऽधिक इति चेत्तत्राह–प्रभावज्ञाश्च ते सर्वाः तथा भवं माकार्षीरिति भावः तस्मादेवमनुचितप्रार्थनयास्मदवमाननमनुचितमित्याह–किमर्थमित्यादि ॥ १९ ॥

रा० टी०–तद्वाक्यमेवाह–अन्तरिति । हे सुरोत्तम वायो! सर्वेषां भूतानामन्तर्मध्ये त्वं चरसि एतेन यः सर्वान्तश्चारी स सर्वान्तर्ज्ञातापीति सूचितम् तेनास्मदन्तर्ज्ञातृत्वमपि त्वय्यप्यस्तीति ध्वनितम् तेन एतासां मय्यनुरागो नास्तीति मदनुचितीकिं न करिष्यन्तीति ज्ञात्वाप्यनुचिताज्ञापनं तव नोचितमिति व्यञ्जितम् अतः ते तव प्रभावज्ञाः सर्वा अस्मान् किमवन्यसे किमर्थमवमानयसि अवमन्यसे इत्यत्र अन्तर्भावितण्यर्थः ॥ १८ ॥

गो० टी०–अन्तरिति । अन्तश्चरसि प्राणरूपेण भूतानां प्राणिनां प्रभावज्ञाः एवंविधप्रभावज्ञाः अस्मान् ज्ञातभवत्प्रभावान् ॥ १८ ॥

२०] ति० टी०–स्वप्रभावं दर्शयन्ति–कुशनाभेत्यादि। स्थानाद्वायुपदात् देवमपि त्वां च्यावयितुं समर्था इति शेषः रक्षामस्त्विति शापेन तथाकरणे हि तत्क्षयः स्यादिति भावः२०

रा० टी०–ननु ज्ञातप्रभावान्मत्तः कुतो न बिभियेत्यत आहुः–कुशनाभेति । हे सुरोत्तम ! सधर्माः धर्मसहिताः सर्वाः कुशनाभसुताः वयं देवं भवन्तं स्थानात् प्राप्ताधिकारात् च्यावयितुं पातयितुं समर्थाः स्मः ननु अनुचितवचनं श्रुत्वा कुतो न मां पातयथ इत्यत आहुः वयं तपः स्वार्जितधर्ममेव रक्षामः शापेन स्थानात् च्यावने तपो विनष्टं स्यादिति शापो न दीयत इति भावः तुशब्द एवार्थे समर्था इत्यध्याहृतम् सुता देव समस्ताः सुरसत्तम इत्यपि पाठः क्वचित् ॥ १९ ॥

गो० टी०–कुशेति। स्थानात् अधिकारात् देवंभवन्तम्॥१९॥

२१] ति० टी०–हे दुर्मेधः दुर्बुद्धे ! यत्र काले पितरमवमन्यापमानविषयं कृत्वा स्वधर्मेण कामेन स्वयंवरमुपास्महे आत्मना स्वातन्त्र्येण वयं वरमङ्गीकुर्मः स कालः कदाचिदपि मा भूदित्यन्वयः नावमन्य इति पाठस्तु क्वाचित्कोऽपपाठः । तथा पाठे नः इतिच्छेदः छान्दसं दीर्घत्वम् । नोऽस्माकं स कालो मा भूदित्यन्वयः । क्वचित्तु नोऽवमन्यस्व इति पाठः। अत एव ' मा भूत्स कालो यद्वा नो पितरं सत्यवादिनम् । कामतः समतिक्रम्य वरयेम स्वयंवरम् ॥ ' इत्येतदर्थविवरणश्लोको दृश्यते क्वचित् ॥ २१ ॥

रा० टी०–मेति । हे दुर्मेधः दुष्टबुद्धिकारक ! यस्मिन्काले सत्यवादिनं पितरमवमन्यानादृत्य स्वधर्मेण शोभनो अतिशयितो योऽधर्मः पितरि सति स्वातन्त्र्याचरणं तेन वरं स्वयमुपास्महे स्वीकुर्मः सकालो मा भूत् नावमन्यस्वेति पाठे तु यं सत्यवादिनमत एव वरं सर्वश्रेष्ठं पितरं स्वधर्मेण वयमुपास्महे सेवामहे तं पितरं स्वयं त्वं नावमन्यस्व यतः स पिता कालः शापादिना त्वद्विघातको मा भूत् एतेन नावमन्यस्वेति पाठोऽपपाठ इति भट्टोक्तिश्चिन्त्या ॥ २० ॥

गो० टी०–मा भूदिति । सः नः पिता ते कालः मृत्युः माभूत् ये दुर्मेधः दुर्बुद्धे ! पितरं नावमन्यस्व धर्मेण पितृप्रदानरूपेण वरं स्वयमुपास्महे प्रतीक्षामहे पिता स्वयं यस्मै दास्यति तं प्रतीक्षामह इत्यर्थः ॥ २० ॥

२२] ति० टी०–तत्र बीजमाह–पिता हीति ॥ २२ ॥

रा० टी०–पिता नावमन्तव्य इत्यत्र हेतुं वदन्त्य आहुः–पितेति । अस्माकं प्रभुः नियन्ता परमं दैवतं देवता च सः प्रसिद्धः पितैव अतो नः पिता नोऽस्मान् यस्य यस्मै दास्यति स नोऽस्माकं भर्ता भविष्यति हिशब्द एवार्थे यस्येति संबन्धसमान्ये षष्ठी ॥ २१ ॥

गो० टी०–उक्तं विवृणोति–पितेति ॥ २१ ॥

२३] ति० टी०–हरिर्वायुः । क्वचित्तु वायुः इत्येव पाठः॥

रा० टी०–तासामिति । तासां कन्यानां तत्स्वास्वीकारबोधकं वचनं श्रुत्वा परमकोपनो भगवान् माहात्म्यविशिष्टः प्रभुः समर्थो हरिः सर्वव्यापको वायुः प्रविश्य तच्छरीरान्तः प्राप्य सर्वगात्राणि बभञ्ज 'भगं श्रीकाममाहात्म्य–' इति कोशः क्वचिद्वायुरिति पाठः तत्रान्ते हरिरिति ॥ २२ ॥

गो० टी०–तासामिति । बभञ्ज कुब्जीचकार ॥ २२ ॥

२४] ति० टी०–सलज्जा अन्याप्यपतिप्रसङ्गतः सलज्जाः ।

रा० टी०–ता इति । वायुना भग्ना अत एव संभ्रान्ताः उद्विग्नाः सलज्जाः लज्जासहिताः साश्रुलोचनाः अश्रुयुक्तलोचनविशिष्टास्ताः कन्याः नृपतेर्गृहं विविशुः भुवि प्रापतंश्च विनापि चं समुच्चयः ॥ २३ ॥

---

१ सर्वाः सधर्माः स्म सुरोत्तमेति रा. सर्वाः समर्थास्त्वां सुरोत्तमेति गो. पाठः । २ नावमन्येति गो. पाठः । ३ हि न इति गो. रा. पाठः । ४ तदिति गो. रा. पाठः । ५ वायुरिति गो. पाठः । ६ इत्यर्धमधिकं गो. पुस्तके । ७ प्रापतन्भुविसंभ्रान्ता इति गो. रा. पाठः । ८ साश्रु इति गो. रा. पाठः ।

स च ता दयिता भग्नाः कन्याः परमशोभनाः । दृष्ट्वा दीनास्तदा राजा संभ्रान्त इदमब्रवीत् ॥ २५ ॥
किमिदं कथ्यतां पुत्र्यः को धर्ममवमन्यते । कुब्जाः केन कृताः सर्वाश्चेष्टन्त्यो नाभिभाषथ ॥
एवं राजा विनिःश्वस्य समाधिं संदधे ततः ॥ ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ।

कन्याभिर्वाग्व्याचरणकथनम्, कुशनाभस्य मन्त्रिभिः सह कन्याप्रदानविषयको विचारः, तत्काले चूलिनाम्नो महर्षेरागमनम्, गन्धर्व्यूर्मिलातनयासोमदायास्तत्पर्युपासनम्, तत्सेवासंतुष्टचूलिनो वरदान उद्युक्तत्वम्, सोमदायाः पुत्रप्राप्तिः, तत्पुत्रस्य ब्रह्मदत्त इति नामकरणम्, ब्रह्मदत्तस्य काम्पिल्यां निवासः, तस्मै कुशनाभकृतकन्याशतदानम्, तद्दर्शनात्सोमदाया आनन्दवृत्तिकथनं च ।

तस्य तद्वचनं श्रुत्वा कुशनाभस्य धीमतः । शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाशत ॥ १ ॥
वायुः सर्वात्मको राजन्प्रधर्षयितुमिच्छति । अशुभं मार्गमास्थाय न धर्मं प्रत्यवेक्षते ॥ २ ॥
पितृमत्यः स्म भद्रं ते स्वच्छन्दे न वयं स्थिताः । पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ॥ ३ ॥

गो० टी०–ता इति। सलज्जाः शरीरवैरूप्यादिति भावः॥२३॥

२५] ति० टी०–भग्ना भग्राङ्गाः ॥ २५ ॥

रा० टी०–स इति । तदा कन्याप्रवेशनसमये भग्नाः वायुकृतशरीरकुटिलतां प्राप्ताः अत एव दीनाः परमशोभनाः अतिकान्तिमतीः दर्पिताः प्रियाः ताः कन्याः दृष्ट्वैव संभ्रान्तः उद्विग्नचित्तः स राजा इदमब्रवीत् चशब्द एवार्थे ॥ २४ ॥

गो० टी०–स चेति । संभ्रान्तः पर्याकुलचित्तः ॥ २४ ॥

२६] ति० टी०–धर्ममवमन्यते बलात्कारं करोतीति यावत् रोदनादिना चेष्टन्त्यः किं नाभिभाषथेत्यन्वयः । एवं पृष्ट्वेति शेषः समाधिं संदध इति तद्वचःश्रवणैकाग्रचित्तोऽभूदित्यर्थः

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

रा० टी०–तद्वचनमेवाह–किमिति । हे पुत्र्यः धर्मं को ऽवमन्यते तिरोऽकरोत् ननु कोऽपि नावमन्यते इत्यत आह–कुब्जाः केन हेतुना यूयं कृताः चेष्टन्त्यः सर्वा यूयं किं किमर्थं नाभिभाषथ इदं कथ्यताम् को धर्ममवमन्यते इत्यनेन केनचिदिमाः अवश्यमवमानिताः इति चेष्टादिना ज्ञातमिति ध्वनितम् अवमन्यते इत्यत्र वर्तमानसामीप्य इति भूते लट् ॥२५॥

गो० टी०–किमिति । को धर्ममवमन्यते बलात्कारं करोतीत्यर्थः । कुब्जाः वक्रशरीराः ॥ २५ ॥

रा० टी०–एवमिति । राजा एवमनेन प्रकारेण पृष्ट्वा ततः तद्विकलताहेतोः विनिःश्वस्य शोकसूचकोर्ध्वश्वासं प्राप्य समाधिं चित्तैकाग्र्यं संदधे विचारतः कारयामासेत्यर्थः ॥२६॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

गो० टी०–एवमिति। पृष्ट्वेति शेषः। विनिःश्वस्य व्यथित्वा समाधिं किं वक्ष्यन्तीति तद्वचनश्रवणावधानम् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

१] ति० टी०–तस्येति । चरणौ स्पृष्ट्वा नमस्कृत्य ॥१॥

रा० टी०–तस्येति । धीमतः तस्य कुशनाभस्य तद्वचनं श्रुत्वा शिरोभिश्चरणौ स्पृष्ट्वा पितृपादाभिवन्दनं विधायेत्यर्थः कन्याशतमभाषत ॥ १ ॥

गो० टी०–अथ कुशनाभस्य कन्यावचनं श्रुत्वतः क्षमाविशेष उच्यते त्रयस्त्रिंशे–तस्येत्यादि । शिरोभिश्चरणौ स्पृष्ट्वा पादयोः प्रणम्येत्यर्थः ॥ १ ॥

२] ति० टी०–प्रधर्षयितुमभिभवितुमिच्छति स्म अशुभं बलात्काररूपमवेक्षते स्म ॥ २ ॥

रा० टी०–तद्वापणमेवाह–वायुरिति । हे राजन्! सर्वात्मको वायुः अशुभमनुचितत्वेन शुभविघातकं मार्गमास्थाय प्रधर्षयितुमस्मान् अभिभवितुमिच्छति ऐच्छत् धर्ममस्मदुक्तसन्मार्गं न प्रत्यवेक्षते व्यचारयत उभयत्रापि वर्तमानसामीप्य इति भूते लट् एतेन बलात्कारेण अस्मान् ग्रहीतुमैच्छदिति सूचितम् ॥ २ ॥

गो० टी०–वायुरिति । प्रधर्षयितुमभिभवितुमिच्छति वर्तमानसामीप्याल्लट् अशुभं बलात्काररूपम् ॥ २ ॥

३] ति० टी०–पितृमत्यः पित्रधीनाः स्वच्छन्देन पतिस्वीकारविषये स्वातन्त्र्येण स्थिता न वर्तामहे यतः अतो नः पितरं वृणीष्व त्वं यदि नोऽस्मांस्तुभ्यं स दास्यति तदा तव त्वदीया भविष्यामः ते तव भद्रमस्त्विति योजना ॥ ३ ॥

रा० टी०–स्वोक्तिमेवाहुः–पितृमत्य इति । यतो वयं पितृमत्यः अतः स्वच्छन्दे स्वाधीनत्वे नैव स्थिताः अतः नोऽस्माकं पितरं त्वं वृणीष्व यदि नो अस्मान् पिता दास्यते तदा तव वयं भविष्याम इति शेषः। ते तुभ्यं भद्रमस्तु। स्मशब्द एवार्थे ३

गो० टी०–पितृमत्य इति । पितृमत्यः स्म अतः स्वच्छन्दे स्वातन्त्र्ये किंचित्पतिस्वीकारविषये वयं न स्थिताः अतो नः पितरमेव वृणीष्व स यदि नः अस्मान् तुभ्यं दास्यति तदा तव भविष्यामः ते भद्रमस्तु ॥ ३ ॥

36955

तेन पापानुबन्धेन वचनं न प्रतीच्छता । एवं ब्रुवन्त्यः सर्वाः स्म वायुनाभिहता भृशम् ॥ ४ ॥
तासां तु वचनं श्रुत्वा राजा परमधार्मिकः । प्रत्युवाच महातेजाः कन्याशतमनुत्तमम् ॥ ५ ॥
क्षान्तं क्षमावतां पुत्र्यः कर्तव्यं सुमहत्कृतम् । ऐकमत्यमुपागम्य कुलं चावेक्षितं मम ॥ ६ ॥
अलंकारो हि नारीणां क्षमा तु पुरुषस्य वा । दुष्करं तच्च वै क्षान्तं त्रिदशेषु विशेषतः ॥ ७ ॥
यादृशी वः क्षमा पुत्र्यः सर्वासामविशेषतः । क्षमा दानं क्षमा सत्यं क्षमा यज्ञाश्च पुत्रिकाः ॥ ८ ॥
क्षमा यशः क्षमा धर्मः क्षमायां विष्ठितं जगत् । विसृज्य कन्याः काकुत्स्थ राजा त्रिदशविक्रमः ॥ ९ ॥

४-५] ति० टी०—एवं ब्रुवन्तीनां नो वचनं न प्रतीच्छतानङ्गीकुर्वता पापानुबन्धेनाधर्मबद्धचित्तेनैवं धर्मं ब्रुवन्त्यः सर्वा वायुनाभिहताः स्मेति योजना ॥ ४ ॥ ५ ॥

रा० टी०—तेनेति । पापानुबन्धेन पापमतिना अत एव वचनं अस्माकमुक्तीः न प्रतीच्छता अस्मदुक्तिविचारहीनेनेत्यर्थः वायुना एवमेव ब्रुवत्यः सर्वाः वयं भृशमत्यन्तं निहताः स्मशब्द एवार्थे ॥ ४ ॥

गो० टी०—तेनेति । एवं ब्रुवन्त्यो वयमस्माकं वचनं न प्रतीच्छता अनङ्गीकुर्वता पापानुबन्धेन पापानुसारिणा तेन वायुना निहताः ॥ ४ ॥

रा० टी०—तासामिति । परमधार्मिकः महातेजा राजा तासां कन्यानां वचनं श्रुत्वैवानुत्तममत्युत्कृष्टं कन्याशतं प्रत्युवाच तुशब्द एवार्थे ॥ ५ ॥

गो० टी०—तासामिति । अनुत्तमं क्षमावत्त्वात् ॥ ५ ॥

६] ति० टी०—हे पुत्र्यः! क्षमावतां क्षमावद्भिः कर्तुमर्हं यत्क्षान्तं क्षमा तत्सुमहत्कृतं महती क्षमा कृतेति यावत् गात्रभङ्गोत्थक्रोधवेगसहनमतिदुष्करमिति भावः यच्च कुलमवेक्षितं कामवेगसहनं कृतं तदपि सुमहत् ॥ ६ ॥

रा० टी०—तद्वचनमेवाह—क्षान्तमिति । हे पुत्र्यः! क्षमावतां कर्तव्यं क्षान्तं क्षान्तिः ऐकमत्यमुपागम्य प्राप्य भवतीभिर्यत् कृतं तत्सुमहदति प्रशंसनीयं मम कुलं कुलोचितमवेक्षितं विचारितं तच्च महदतिप्रशंसनीयं कामक्रोधयोर्जयो दुष्कर इति भावः ॥ ६ ॥

गो० टी०—क्षान्तमिति । हे पुत्र्यः! क्षमावतां कर्तव्यं कर्तुमर्हम "कृत्यानां कर्तरि वा" इति षष्ठी क्षान्तं क्षमा भावे निष्ठा कृतमिदं सुमहत्कर्म देवे प्रार्थयमानेऽप्यविकृतचित्तत्वं शरीरं भञ्जयति सति निष्क्रोधत्वं च दुष्करमिति भावः । कुलं चावेक्षितं कुलानुरूपं कृत्यं कृतमित्यर्थः ॥ ६ ॥

७] ति० टी०—पुरुषस्य वेति अविशेषेणेति शेषः तत्तु दुष्करं यत्त्रिदशविषये क्षान्तं कामवेगसहनं कृतं तदतिदुष्करं तेषामभिरूपादिकमनीययुणबाहुल्यात् ॥ ७ ॥

रा० टी०—तदेव विशदयन्नाह—अलमित्यादि सार्धश्लोकद्वयेन । हे पुत्र्यः! नारीणां पुरुषस्य च क्षमैव विशेषतोऽलंकारः। ननु सर्वैः कुतो न क्रियतेऽत आह सर्वासां वो युष्माकमविशेषतो विशेषराहित्येन एकरूपेणेत्यर्थः यादृशी क्षमा तत्तादृशं क्षान्तं क्षमा विशेषतः त्रिदशेषु विशिष्टदेवेष्वपि दुष्करमेव वासनात्यागस्य दुष्करत्वाद्देवविशेषैरपि कर्तुमशक्यमित्यर्थः । हितुशब्दौ एवार्थे वैशब्दोऽप्यर्थे वाशब्दार्थे सार्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०—उक्तमर्थं विवृणोति—अलङ्कार इति अर्धम्। क्षमा अपराधसहिष्णुत्वम् ॥ ७ ॥

८-९] ति० टी०—स्वकन्यानां क्षमां श्लाघयंस्तादृशीं क्षमां स्वकुले प्रार्थयते—यादृशीति । भो पुत्र्यः ! यादृशी युष्माकं क्षमा तादृश्यस्मत्कुले सर्वासाम् अस्त्विति शेषः अथवा विशेषतः सकलस्त्रीपुरुषाविशेषेणेत्यर्थः क्षमायाः प्रार्थनीयत्वे निमित्तमाह—क्षमेत्यादि । दानसत्यवचनयज्ञसमाधिजसकलधर्मफला क्षमा सकलजगदाधारभूता च क्षमा अतः सोपादेयेत्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०—क्षमाप्रशंसामाह—क्षमेति । हे पुत्रिकाः ! क्षमैव दानं क्षमैव सत्यं क्षमैव यज्ञः क्षमैव यशः क्षमैव धर्मः अतः क्षमायां जगन्निष्ठितं यद्यवच्छेदकावच्छेदेन क्षमा विनश्येत्तर्हि जगदपि विनश्येदिति तात्पर्यम् एतेन क्षमा न त्याज्येति उपदेशः सूचितः राजोक्तिं समाप्य राजवृत्तमाह—विसृज्येति । हे काकुत्स्थ राम ! त्रिदशविक्रमः त्रिदशविक्रमसदृशविक्रमविशिष्टः मन्त्रज्ञः राजा कुशनाभः मन्त्रिभिः सह प्रदानं कन्याप्रदानस्य देशकालौ कन्याप्रदानोचितं देशं कालं च सदृशे कन्यादानोचितकुले प्रतिपादनं वरवृत्यर्थं ब्राह्मणादिप्रेषणं मन्त्रयामास कन्यावश्यं देयेति सा च यस्मिन्देशे यस्मिन्काले देया तं देशं कालं यस्मिन्कुले देया तत्कुलं वरवृत्यर्थं यः प्रेषणीयस्तं च विचारयामासेत्यर्थः । 'देशे काले च कर्तव्यं' इति भट्टसंमतः पाठः ॥ ८ ॥ ९ ॥ १० ॥

गो० टी०—दुष्करमिति । वः तत्क्षान्तं क्षमा दुष्करं त्रिदशेषु रूपैश्वर्यसंपन्नेषु विशेषतो दुष्करं यादृशीति सर्वासामविशेषतः या क्षमा सापि दुष्करेत्यन्वयः । क्षमैव दुष्करा ततस्त्रिदशेषु दुष्करा ततोऽपि सर्वासामविशेषेण क्षमा दुष्करेवेत्यर्थः ॥ ८ ॥

गो० टी०—क्षमां प्रशंसति—क्षमेति । क्षमादानं दानेन

१ ब्रुवत्य इति रा. पाठः । २ निहता इति गो. रा. पाठः । ३ तदिति गो. पाठः । ४ तद्धि व इति गो. पाठः । ५ यज्ञश्चेति गो. रा. पाठः । ६ क्षमयेति गो. पाठः । ७ निष्ठितमिति रा. पाठः ।

मन्त्रज्ञो मन्त्रयामास प्रदानं सह मन्त्रिभिः । देशे[1] काले च कर्तव्यं सदृशे प्रतिपादनम् ॥ १० ॥
एतस्मिन्नेव काले तु चूली नाम महाद्युतिः । ऊर्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत् ॥ ११ ॥
तपस्यन्तमृषिं[2] तत्र गन्धर्वी पर्युपासते[3] । सोमदा नाम भद्रं ते ऊर्मिलातनया तदा ॥ १२ ॥
सा च तं प्रणता भूत्वा शुश्रूषणपरायणा । उवास काले धर्मिष्ठा[4] तस्यास्तुष्टोऽभवद्गुरुः ॥ १३ ॥
स च तां कालयोगेन प्रोवाच रघुनन्दन । परितुष्टोऽस्मि भद्रं ते किं करोमि तव प्रियम् ॥ १४ ॥
परितुष्टं मुनिं ज्ञात्वा गन्धर्वी मधुरस्वरम्[5] । उवाच परमप्रीता वाक्यज्ञा वाक्यकोविदम् ॥ १५ ॥
लक्ष्म्या समुदितो ब्राह्म्या ब्रह्मभूतो महातपाः । ब्राह्मेण तपसा युक्तं पुत्रमिच्छामि धार्मिकम्॥ १६ ॥

यत्फलं प्राप्नोति तत् क्षमया प्राप्नोतीत्यर्थः एवमुत्तरत्रापि योज्यं धर्मः तटाकारामनिर्माणादिः क्षमया भूमिसंबन्धिन्या जगच्चराचरं विधितं स्थितं भवति ॥ ९ ॥

१०] ति० टी०–प्रदानं कन्याप्रदानम् उचिते देशे काले सदृशे स्वकुलादिसदृशे पात्रे प्रदानं कर्तव्यमिति मन्त्रणप्रक्रमः ॥ १० ॥

गो० टी०–विसृज्येति अर्धत्रयम्। प्रदानं कन्याप्रदानम् चिन्ताप्रकारमाह–देश इति। प्रदानस्य कन्याप्रदानस्य उचितौ देशकालौ सदृशे स्वकुलस्य सदृशे पात्रे प्रतिपादनं च मन्त्रयामासेत्यर्थः ॥ १० ॥

११] ति० टी०–ऊर्ध्वरेता ब्रह्मचारी ब्राह्मं तपो ब्रह्म विषयं चित्तैकाग्र्यम् 'मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः' इति स्मृतिः ॥ ११ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्काले कुशनाभविचारसमये एव ऊर्ध्वरेता अच्युतरेतस्कः शुभाचारः शोभनाचरणयुक्तः चूलीनाम चूलिसंज्ञकः महामुनिः ब्राह्मं वेदविहितमेव तप उपागमत् प्राप्नोत् तुशब्द एवार्थे ॥ ११ ॥

गो० टी०–एतस्मिन्निति । एतस्मिन्नेव काले कुशनाभीयकाले उत्तरत्रान्वयः ऊर्ध्वरेताः अस्खलितरेताः ब्राह्मं तपः वैदिकं तपः ब्रह्मोद्देश्यकं वा ॥ ११ ॥

१२] ति० टी०–यदा चूली तपश्चरति तदा ऊर्मिलातनया सोमदानाम गन्धर्वी तं पर्युपास्ते स्म मय्यनुग्रहं कुर्विति प्रार्थनया सेवते स्म पर्युपासत इति शबलुगार्षः ॥ १२ ॥

रा० टी०–तपस्यन्तमिति । तदा ऋषितपश्चरणसमये तत्र ऋष्यधिष्ठितदेशे ऊर्मिलातनया ऊर्मिलायाः कन्या सोमदा नाम गन्धर्वी ते भद्रमस्तु इत्युक्त्वा तपस्यन्तमृषिं चूलिनं पर्युपासते पर्युपास्ते असेवत तपश्चरणसमये इत्युक्त्या शयनादिसमये तत्समीपे तस्यागमनाभावः सूचितस्तेन तस्याः सावधानत्वं व्यक्तम् वर्तमानसामीप्य इति भूते लट् गणकार्यस्यानित्यत्वात् शब्लुग्विरहः ॥ १२ ॥

गो० टी०–तप्यन्तमिति । तत्र तस्मिन्देशे तदा तत्काले तप्यन्तं दाहार्थेऽपि व्यत्ययाच्छयन् गन्धर्वी जातिवाचित्वात् पर्युपासते अशुश्रूषत मध्ये मध्ये भद्रमस्त्विति प्रयोगः शुभोत्तरत्वाय ॥ १२ ॥

१३] ति० टी०–तमिति प्रतियोगे द्वितीया तत्समीपे आसेत्यर्थः ॥ १३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेण वर्णयन्नाह–सेति । काले यथोचितसमये प्रणता भूत्वा शुश्रूषणपरायणा सा गन्धर्वी उवास तेन हेतुना गुरुर्मुनिस्तस्यास्तुष्टोऽभवत् चशब्दो हेत्वर्थे ॥ १३ ॥

गो० टी०–सा चेति । काले कियति काले तुष्टोऽभवत् ब्रह्मर्षित्वाद्गुरुरित्युक्तिः ॥ १३ ॥

१४–१५] ति० टी०–कालयोगेन शुश्रूषाजनितधर्मपरिपाकार्हकालसंबन्धेन अनेन दिव्ययोगिनीयोगिनोरकल्मषतपःप्रवृत्तिः सूचिता ॥ १४ ॥ १५ ॥

रा० टी०–तुष्टेन यदुक्तं तद्बोधयन्नाह–स इति । हे रघुनन्दन ! सः चूलिः मुनिः कालयोगेन शुभकालप्राप्तां तां गन्धर्वीं प्रोवाच तद्वचनमेवाह अहं परितुष्टोऽस्मि अतः किं तव प्रियं करोमि तद्वदेत्यर्थः ॥ १४ ॥

गो० टी०–स चेति । कालयोगेन शुश्रूषापरिपाककालसंबन्धेन करोमि कुर्याम् ॥ १४ ॥

रा० टी०–परीति । परमप्रीता अतिप्रसन्नचित्ता वाक्यज्ञा वचनतात्पर्यस्य ज्ञात्री गन्धर्वी वाक्यकोविदं मुनिं परितुष्टं ज्ञात्वा मधुरस्वरं यथा स्यात्तथा उवाच ॥ १५ ॥

गो० टी०–परितुष्टमिति । वाक्यकोविदं वाक्ये वचने कोविदं समर्थम् ॥ १५ ॥

१६] ति० टी०–ब्राह्म्या लक्ष्म्या ब्रह्मवर्चसेन ब्रह्मभूतो ब्रह्मात्मभावनया अत एव महातपाः यतस्त्वमीदृशोऽतो ब्राह्मेण तपसा युक्तं पुत्रमिच्छामि ब्राह्मं तपो ब्रह्मविषयमैकाग्र्यम् यद्वा ब्राह्मं तपः स्वाध्यायः ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–लक्ष्म्येति । यतस्त्वं महातपाः अत एव ब्राह्म्या लक्ष्म्या ब्रह्मसंपत्त्या समुदितः अत एव ब्रह्मभूतः ब्रह्मत्वं प्राप्तः अतः ब्राह्मेण वेदबोधितेन तपसा युक्तं धार्मिकं पुत्रमिच्छामि भवत इति शेषः धार्मिकं पुत्रमिच्छा-

१ देशकालौ प्रदानस्येति गो. रा. पाठः । २ महामुनिरिति गो. रा. पाठः । ३ तप्यन्तं तमिति गो. पाठः । ४ धर्मिष्ठ इति रा. पाठः । ५ स्वरेति गो. पाठः ।

अपतिश्चास्मि भद्रं ते भार्या चास्मि न कस्यचित् । ब्राह्मेणोपगतायाश्च दातुमर्हसि मे सुतम् ॥ १७ ॥
तस्याः प्रसन्नो ब्रह्मर्षिर्ददौ ब्राह्ममनुत्तमम् । ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतम् ॥ १८ ॥
स राजा ब्रह्मदत्तस्तु पुरीमध्यवसत्तदा । काम्पिल्यां परया लक्ष्म्या देवराजो यथा दिवम् १९
स बुद्धिं कृतवान्राजा कुशनाभः सुधार्मिकः । ब्रह्मदत्ताय काकुत्स्थ दातुं कन्याशतं तदा॥ २० ॥
तमाहूय महातेजा ब्रह्मदत्तं महीपतिः । ददौ कन्याशतं राजा सुप्रीतेनान्तरात्मना ॥ २१ ॥
यथाक्रमं तदा पाणिं जग्राह रघुनन्दन । ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा ॥ २२ ॥

मीत्यनेन तत्संगमस्तया न प्रार्थित इति व्यक्तं तेन तस्याः परमधैर्यं धर्मात्मत्वं च व्यक्तम् ब्रह्मभूत इत्यनेन यथा ब्रह्म सकलमभिधातुं समर्थं तथा त्वमपीत्युपमालङ्कारो ध्वनितः ॥ १६ ॥

गो० टी०–लक्ष्म्येति । बाह्या लक्ष्म्या ब्रह्मवर्चसेन समुदितः श्रेष्ठः अत एव ब्रह्मभूतः ब्रह्मतुल्यः महातपा असि तस्मात्त्वत्तः पुत्रमिच्छामि 'दीप्यसे परया लक्ष्म्या' इति कोशान्तरे ॥ १६ ॥

१७] **ति० टी०**–ननु पुत्रप्रार्थना पत्यावुचिता तत्राह–अपतिश्चास्मीति । इतःपरमप्यस्मि अहं न कस्यचिद्भार्या भविष्यामीति शेषः अनेन नैष्ठिकब्रह्मचारिणीत्वं सूचितम् अथापि यथा पुत्रावाप्तिर्भवति तथा ते भद्रमनुग्रहोऽस्तु नन्वेवं नैष्ठिकब्रह्मचर्ये कथं पुत्रलाभः संभाव्येतात आह–ब्राह्मेणेति । उपगतायाः किंकरत्वं प्राप्तायाः ब्राह्मेण ब्रह्मसंबन्धिनोपायेन मे सुतं दातुमर्हसि सनकादय इव मानसपुत्रो देय इति भावः ॥ १७ ॥

रा० टी०–ननु पुत्रप्रार्थना पत्युरुचिता मत्तः कथं प्रार्थ्यते इत्यत आह–अपतिरिति । अपतिः पतिरहितैव अहमस्मि अतः कथं पत्युः प्रार्थना स्यादिति भावः ननु पतिलाभार्थं यतितव्यं ततः पुत्रो भविष्यत्येवेत्यत आह–अहं कस्यचिद्भार्या नास्मि नैव भविष्यामि ननु पतिमन्तरा कथं पुत्रलाभ इत्यत आह–ब्राह्मण हे ब्रह्मवेत्तः ! उपगतायाः त्वां सेवमानाया मे सुतं दातुमर्हस्येव त्वत्सेवामाहात्म्यात्पतिमन्तरापि पुत्रो भवत्विति भावः । पतिरहितैवेत्यत्र एवकारः पतिसंसर्गाभावसूचकः तेन वैधव्यशङ्कानिरासः भार्या चास्मीत्यत्र भविष्यत्कालाविवक्षया लट्प्रयोगः । चकारत्रयमेवार्थम् । 'ब्राह्येणोपगतायाश्च' इति भट्टसंमतः पाठः तत्र ब्राह्येण ब्रह्मसंबन्धिना उपायेनेत्यर्थः ॥ १७ ॥

गो० टी०–अपतिरिति । विधवाप्यपतिर्भवति तत्राह–भार्येति । उपगतायाः शरणं गतायाः मे ब्राह्मेण तपोमहिम्ना ॥ १७ ॥

१८] **ति० टी०**–तस्याः सोमदायाः प्रसन्नश्चूलिनामा ब्रह्मर्षिर्ब्राह्मं ब्रह्मतपसा युक्तं ब्राह्मणदत्तत्वाद्ब्रह्मदत्त इति ख्यातं मानसं सुतं ददावित्यन्वयः । फली फलिन इतिवच्चूली चूलिन इति ऋषेर्नामद्वयं साधु ॥ १८ ॥

रा० टी०–तस्या इति । प्रसन्नः ब्रह्मर्षिश्चूली मानससंकल्पमात्रेण सिद्धमत एव अनुत्तमं सर्वश्रेष्ठं पुत्रं तस्यास्तस्यै गन्धर्व्यै ददौ इति हेतोः ख्यातं ब्रह्मदत्तं चूलिनः सुतं वदन्तीति शेषः ॥ १८ ॥

गो० टी०–तस्या इति । ब्रह्मणा तपोयोगेन दत्तो ब्रह्मदत्तः चूलिनः स्वस्य मानसं मनःसंकल्पजं सुतं ददौ ॥ १८ ॥

१९–२१] **ति० टी०**–राजा गन्धर्व्याः सोमदायाः क्षत्रियत्वात् काम्पिल्यां कम्पिलेन निर्मिताम् ॥ १९–२१ ॥

रा० टी०–स इति । ब्रह्मदत्तोऽपि स राजा सन् काम्पिलीं कम्पिल्यनिर्मितां पुरीं परया लक्ष्म्या दिवं देवराज इन्द्र इव अध्यवसत् " उपान्वध्याङ्वसः " इति कर्मत्वं तस्य ब्राह्मणदत्तत्वात् ब्राह्मणत्वेऽपि क्षत्रियात्वेन प्रसिद्धायाः गन्धर्व्यासुतत्वात्क्षत्रियत्वमपि ब्रह्मदत्त इत्यन्वर्थं नाम तुशब्दोऽप्यर्थे १९॥

गो० टी०–स इति । राजा क्षत्रियः क्षत्रजत्वात् लक्ष्म्या संपदा युक्तः एतस्मिन्नन्तरे पुरीमध्यावसदिति संबन्धः ॥ १९ ॥

रा० टी०–ब्रह्मदत्तकृत्तं समाप्य यदर्थं तद्वृत्तप्रक्रमः तदाह–सुबुद्धिमित्यादिना । हे काकुत्स्थ राम ! तदा ब्रह्मदत्तराज्यसमये सुधार्मिकः अत्यन्तधर्मशीलः राजा कुशनाभः कन्याशतं ब्रह्मदत्ताय दातुं सुबुद्धिं शोभननिश्चयं कृतवान् ॥ २० ॥

गो० टी०–स बुद्धिमिति । तदा ब्रह्मदत्तस्य काम्पिल्याख्यायां पुर्यामावासकाले ॥ २० ॥

रा० टी०–तमिति । महातेजा राजा कुशनाभः महीपतिं तं ब्रह्मदत्तमाहूय सुप्रीतेनातिप्रसन्नेन अन्तरात्मना मनसा कन्याशतं ददौ ॥ २१ ॥

गो० टी०–तमिति । राजा रञ्जकः ॥ २१ ॥

२२] **ति० टी०**–देवपतिर्यथा इन्द्रसदृशो महीपाल इत्यर्थः ॥ २२ ॥

रा० टी०–यथेति । हे रघुनन्दन ! तदा कन्यादानसमये तासां कन्यानां पाणीन् देवपतिरिव महीपालो ब्रह्मदत्तः यथाक्रमं ज्येष्ठादिक्रममनतिक्रम्य जग्राह ॥ २२ ॥

गो० टी०–यथेति । तासां पाणीन् जग्राह देवपतिर्यथा देवपतिसदृशः तत्तुल्यविभव इत्यर्थः ॥ २२ ॥

---

१ ब्राह्मणोपगतायाश्चेति रा. पाठः । २ पुत्रमिति गो. रा. पाठः । ३ दत्तमितीति रा. पाठः । ४ सौमदेयस्तु पुरीमध्यावसदिति गो. पाठः ५ काम्पिलीमिति रा. पाठः । ६ सुबुद्धिमिति रा. पाठः । ७ तत इति गो. पाठः । ८ पाणीनिति गो. रा. पाठः ।

स्पृष्टमात्रे तदा पाणौ विकुब्जा विगतज्वराः । युक्तं परमया लक्ष्म्या बभौ कन्याशतं तदा ॥ २३ ॥
स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः । बभूव परमप्रीतो हर्षं लेभे पुनः पुनः ॥ २४ ॥
कृतोद्वाहं तु राजानं ब्रह्मदत्तं महीपतिम् । सदारं प्रेषयामास सोपाध्यायगणं तदा ॥ २५ ॥
सोमदापि सुतं दृष्ट्वा पुत्रस्य सदृशीं क्रियाम् । यथान्यायं च गन्धर्वी स्नुषास्ताः प्रत्यनन्दत ॥
स्पृष्ट्वा स्पृष्ट्वा च ताः कन्याः कुशनाभं प्रशस्य च ॥ ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ।

कुशनाभस्य पौत्रैष्टिवर्णनम्, ब्रह्मपुत्रकुशस्य कुशनाभप्रति गाधिनामानं पुत्रमाप्स्यसीत्याशीः, तस्य ब्रह्मलोके गमनम्, गाधेरुत्पत्तिः, विश्वामित्रभगिन्याः सत्यवत्या वर्णनं च ।

कृतोद्वाहे गते तस्मिन्ब्रह्मदत्ते च राघव । अपुत्रः पुत्रलाभाय पौत्रीमिष्टिमकल्पयत् ॥ १ ॥

२३] ति० टी०–तदा तेन राज्ञा पाणौ स्पृष्टमात्रे ताः कन्या विकुब्जाः कुब्जत्वरहिताः आसन्निति शेषः ब्राह्मतपोयुक्तत्वादेवं सामर्थ्यं राज्ञः एवं च सति तत्कन्याशतं परमया लक्ष्म्या बभावित्यन्वयः ॥ २३ ॥

रा० टी०–स्पृष्टेति । तदा पाणिग्रहणसमये पाणौ कन्याकरे स्पृष्टमात्रे सति विकुब्जाः कुब्जात्वरहिताः अत एव विगतज्वरास्ताः कन्या आसन्निति शेषः तदा विगतज्वरसमये परमया लक्ष्म्या संपत्त्या युक्तं कन्याशतं बभौ पाणावित्यत्र जात्यभिप्रायेणैकवचनं कुब्जाशब्दो भावप्रधानः ॥ २३ ॥

गो० टी०–स्पृष्टेति । ततश्चूलिसूनुना पाणाविति जात्येकवचनम् । विकुब्जाः विगतकुब्जभावाः शतं कन्या बभुः विसर्गलोप आर्षः 'बभुः कन्याशतम्' इति पाठः ॥ २३ ॥

२४] ति० टी०–स राजा वायुना मुक्ता दृष्ट्वेत्यन्वयः भग्नाः इति पाठस्तु चिन्त्यः केचित्तु तत्पाठे पूर्वं भग्ना इति व्याचख्युः ॥ २४ ॥

रा० टी०–स इति । स महीपतिः कुशनाभः वायुना वायुकृतदोषेण मुक्तास्त्यक्ताः कन्या दृष्ट्वा परमप्रीतो ब्रह्मदत्तविषयकातिप्रीतिविशिष्टो बभूव अतः पुनः पुनः प्रतिक्षणं नवं नवं हर्षं लेभे ॥ २४ ॥

गो० टी०–स इति । वायुना मुक्ताः कन्या इति शेषः परमप्रीतः अनुकूलवरलाभेन परमप्रीतः हर्षं विकुब्जत्वकृतम् ॥ २४ ॥

२५] ति० टी०–प्रेषयामास काम्पिल्यं प्रतीति शेषः॥२५॥

रा० टी०–कृतोद्वाहमिति । महीपतिः कुशनाभः कृतोद्वाहं सदारं दारसहितं सोपाध्यायगणसुपाध्यायगणसहितं ब्रह्मदत्तं राजानं तदा तु साङ्गविवाहोत्तरकाले एव प्रेषयामास तत्पुरं प्रापयामास । तुशब्द एवार्थे ॥ २५ ॥

गो० टी०–कृतेति । प्रेषयामास काम्पिल्यामिति शेषः२५

२६] ति० टी०–सदृशीं क्रियाम् दारक्रियामित्यर्थः । प्रतिनन्दनप्रकारमाह–स्पृष्ट्वेत्यादि । प्रशस्य च गतेत्यर्थः । आश्चर्यमासां धैर्यं यदेवश्रेष्ठस्याप्यनादरः धन्योऽयं राजा यस्य कन्या ईदृश्यः अहो मे भाग्यं यस्या मे ईदृश्यः स्नुषाः इत्येवं प्रतिनन्दनम् अनेन स्त्रीमाहात्म्यं तपोमाहात्म्यं च दर्शितम्॥२६॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०–सोमदेति । सोमदा गन्धर्वी पुत्रस्य ब्रह्मदत्तस्य सदृशक्रियां पुत्रोचितवैवाहिकं कर्म दृष्ट्वा माङ्गलिकस्त्रीसहितपुत्रदर्शनेन निश्चित्य यथान्यायं ज्येष्ठादिक्रमेण कन्याः कुशनाभसुतास्ताः स्वपुत्रेणोद्वाहिताः अत एव स्नुषाः स्वपुत्रवधूश्च स्पृष्ट्वा स्पृष्ट्वा कुशनाभं च प्रशस्य प्रत्यनन्दत परमहर्षं प्राप्नोत् । अपिस्त्वर्थे एकश्चकारो हेत्वर्थे ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

गो० टी०–सोमदेति सार्धश्लोकः । सोमदा चूलिपुत्रमाता पुत्रसदृशीं क्रियां दारक्रियां दृष्ट्वेति शेषः यथान्यायं यथाक्रमं स्नुषाः कन्याः कुशनाभपुत्रीः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः॥३३॥

१] ति० टी०–ब्रह्मदत्ते चेति । चस्त्वर्थः कन्याशतसमुच्चयार्थो वा पुत्रलाभाय पुत्रप्राप्तये ॥ १ ॥

रा० टी०–ब्रह्मदत्तविवाहानन्तरकालिकं वृत्तमाह–कृत इति । हे राघव ! कृतोद्वाहे तस्मिन् ब्रह्मदत्ते गते स्वपुरं प्राप्ते सत्येव अपुत्रः पुत्ररहितः कुशनाभः पुत्रलाभाय पौत्रीं पुत्रप्रदामिष्टिमकल्पयत् । च शब्द एवार्थे ॥ १ ॥

गो० टी०–एवं प्रासङ्गिकं परिसमाप्य प्रकृतकथाशेषमाह चतुस्त्रिंशे–कृतोद्वाह इत्यादि । अपुत्रः कुशनाभः पुत्रायेयं पौत्री ताम् ॥ १ ॥

१ तत इति गो. पाठः । २ बभुरिति गो. पाठः । ३ महीपतिरिति गो. रा. पाठः । ४ सुसंहृष्टामिति गो. पाठः । ५ सदृशक्रियामिति रा. पाठः ।

इष्ट्यां तु वर्तमानायां कुशनाभं महीपतिम् । उवाच परमोदारः कुशो ब्रह्मसुतस्तदा ॥ २ ॥
पुत्रस्ते सदृशः पुत्र भविष्यति सुधार्मिकः । गाधिं प्राप्स्यसि तेन त्वं कीर्तिं लोके च शाश्वतीम्[१] ३
एवमुक्त्वा कुशो राम कुशनाभं महीपतिम् । जगामाकाशमाविश्य ब्रह्मलोकं सनातनम् ॥ ४ ॥
कस्यचित्त्वथ[२] कालस्य कुशनाभस्य धीमतः । जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ॥ ५ ॥
स पिता मम काकुत्स्थ गाधिः परमधार्मिकः । कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन ॥ ६ ॥
पूर्वजा भगिनी चापि मम राघव सुव्रता । नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥ ७ ॥
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी । कौशिकी परमोदारा प्रवृत्ता च महानदी ॥ ८ ॥

२] ति० टी०–कुशः कुशनाभपिता ॥ २ ॥

रा० टी०–इष्ट्यामिति । तदा ब्रह्मदत्तप्रेषणानन्तरकाले एव इष्ट्यां वर्तमानायां सत्यांमहीपतिं कुशनाभं परमोदारः ब्रह्मसुतः कुशः कुशनाभपिता उवाच चशब्द एवार्थे ॥ २ ॥

गो० टी०–इष्ट्यामिति । कुशः कुशनाभपिता ॥ २ ॥

३] ति० टी०–कुशवाक्यमाह–पुत्र इत्यादि । सदृशस्त्वत्सदृशः कोऽसौ तत्राह–गाधिं गाधिनामानं प्राप्स्यसि तेन लोके शाश्वतीं कीर्तिं च प्राप्स्यसि ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–पुत्र इति । हे पुत्र सुधार्मिकः ! अत्यन्तधर्मशीलः अत एव ते सदृशः पुत्रः भविष्यति ननु किंनामकः पुत्रो भविष्यतीत्यत आह गाधिं गाधिनामकं पुत्रं त्वं प्राप्स्यसि तेन पुत्रेण शाश्वतीं लोके कीर्तिं प्राप्स्यसि चो हेतौ ॥ ३ ॥

गो० टी०–पुत्रेति । सदृशः गुणैरिति शेषः स पुत्रः किंनामकः तत्राह–गाधिमिति । गाधिनामानं पुत्रं प्राप्स्यसे तेन गाधिना शश्वद्भवा शाश्वती भवार्थे अण् बहिषष्टिलोपवचनादव्ययानां भमात्रे टिलोपः क्वाचित्कः अत्र न ततो ङीप् ताम् ॥ ३ ॥

४] ति० टी०–' कुशो नाम ' इति पाठे एतत्कुशवृत्तं नाम प्रसिद्धमित्यर्थः आकाशमाविश्याकाशरूपो भूत्वा अनेन तस्य मुक्तत्वं सूचितं तेन स्ववंशस्य माहात्म्यातिशयः सूचितः ॥ ४ ॥

रा० टी०–एवमिति । हे राम ! महीपतिं कुशनाभमेवमनेन प्रकारेण कुश उक्त्वा आकाशमाविश्य सनातनं ब्रह्मलोकं जगाम अनेन कुशस्य कामचारगतिमत्वं व्यक्तम् ॥ ४ ॥

गो० टी०–एवमिति । अनेन सदा ब्रह्मलोकवासी कुशः पुत्रानुग्रहार्थं भुवमागत इत्यवगम्यते सनातनं नित्यम् ॥ ४ ॥

५] ति० टी०–कस्यचित्त्वथ कालस्य कस्यचित्कालस्यानन्तरमित्यर्थः ॥ ५ ॥

रा० टी०–कस्यचिदिति । कस्यचित्कालस्याथ अनन्तरमेव धीमतः कुशनाभस्य भार्यायामिति शेषः परमधर्मिष्ठः अत्यन्तधर्मशीलः गाधिरिति नाम्ना विश्रुतः ख्यातः जज्ञे यदि तु कालस्येत्यस्यानन्तरमपगम इति शेषः, तदा मङ्गलरूपोऽथशब्दार्थो जज्ञ इत्येतदन्वयी ॥ ५ ॥

गो० टी०–कस्यचिदिति । कस्यचित्कालस्य कस्मिंश्चित्काले गते सति गाधिरित्येव यथा पित्रोक्तं तथैवेत्यर्थः जज्ञे घृताच्यां भार्यायाम् ॥ ५ ॥

६] ति० टी०–मम विश्वामित्रस्य । कुशवंशप्रसूतत्वादहं कौशिकः ॥ ६ ॥

रा० टी०–स इति । हे काकुत्स्थ हे रघुनन्दन ! परमधार्मिकः स गाधिः मम पिता यतः कुशवंशप्रसूतोऽहमस्मि अतः कौशिकः ख्यातो जनैरिति शेषः ॥ ६ ॥

गो० टी०–स इति । यतः कुशवंशप्रसूतोऽस्मि अतः कौशिकसंज्ञोऽस्मि कुशशब्दात् गोत्रापत्ये ठक् ॥ ६ ॥

७] ति० टी०–न केवलमहमेव गाधेः पुत्रः मम पूर्वजा ज्येष्ठा नाम्ना सत्यवतीति प्रसिद्धा ऋचीके प्रतिपादिता ऋचीकाय दत्ता इति नाम प्रसिद्धम् ॥ ७ ॥

रा० टी०–पूर्वजेति । हे राघव ! सुव्रता शोभनव्रतशीला नाम्ना सत्यवती सत्यवतीति नाम्नैव प्रसिद्धा मम पूर्वजा ज्येष्ठा भगिनी ऋचीके ऋचीकनामकमुनौ प्रतिपादिता दत्ता चशब्द इत्यर्थे अपिशब्द एवार्थे ॥ ७ ॥

गो० टी०–पूर्वजेति । पूर्वजा ज्येष्ठा ऋचीके ऋचीकाख्यमुनय इत्यर्थः ॥ ७ ॥

८] ति० टी०–सशरीरस्वर्गगतौ हेतुर्भर्तारमनुवर्तिनीति सहगमनं कृतवतीत्यर्थः अपि च अन्यदापि तस्याश्चरितम् कौशिकी नाम्नी महानदी तद्रूपा प्रवृत्ता च जाता ॥ ८ ॥

रा० टी०–ननु सा क्वास्तीत्यत आह–सेति । भर्तारमनुवर्तिनी पत्यनुवर्तनशीला मम भगिनी सशरीरा शरीरसहिता स्वर्गं गता प्राप्ता । अथ पृथक् कौशिकीति परमोदारा दिव्या मनुष्यलोकविलक्षणा प्रवृत्ता प्रकृष्टमुत्तमं वृत्तं वृन्तातो यस्याः सा मम भगिनी लोकस्य हितकामार्थं पुण्योदका पुण्यसंपादकजला रम्या रमणीया सती हिमवन्तमुपाश्रिता हिमवत्पार्श्ववर्तिनी सती कौशिकीति नाम्ना महानदी प्रवृत्ता महानदीत्वं प्राप्तेत्यर्थः सार्धश्लोक एकान्वयी चकार इत्यर्थे ॥ ८ ॥ ९ ॥

गो० टी०–सशरीरेति । भर्तारमनुवर्तिनी भर्त्रनुवर्तनधर्म-

१ चेति गो. रा. पाठः । २ कस्यचिदथेति रा. पाठः । ३ विश्रुत इति रा. पाठः ।

दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता । लोकस्य हितकार्यार्थं प्रवृत्ता भगिनी मम ॥ ९ ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम् । भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन ॥१०॥
सा तु सत्यवती पुण्या सत्ये धर्मे प्रतिष्ठिता । पतिव्रता महाभागा कौशिकी सरितां वरा ॥ ११ ॥
अहं हि नियमाद्राम हित्वा तां समुपागतः । सिद्धाश्रममनुप्राप्तः सिद्धोऽस्मि तव तेजसा ॥१२॥
एषा राम ममोत्पत्तिः स्वस्य वंशस्य कीर्तिता । देशस्य हि महाबाहो यन्मां त्वं परिपृच्छसि॥१३॥
गतोऽर्धरात्रः काकुत्स्थ कथाः कथयतो मम । निद्रामभ्येहि भद्रं ते मा भूद्विघ्नोऽध्वनीह नः ॥१४॥

प्रभावादिति भावः न केवलं स्वर्गगमनमस्याः महानदीत्वं च जातमित्याह–कौशिकीति ॥ ८ ॥

९] ति० टी०–हितकार्यार्थम् । 'हितकामार्थम्' इति पाठे हितमामुष्मिकं काम ऐहिकं तदुभयदानार्थम् ॥ ९ ॥

गो० टी०–दिव्येति। दिव्या श्लाघ्या हितमामुष्मिकं कामः ऐहिकं तदुभयार्थं प्रवृत्ता नदीरूपेण स्वर्गाद्धिमवन्तमुपाश्रितेत्यर्थः ॥ ९ ॥

१०] ति० टी०–यतो भगिन्यां स्नेहसंयुक्तोऽतो हिमवत्पार्श्वे कौशिक्यां नियतो नित्यं सुखं वसामीत्यन्वयः ॥ १० ॥

रा० टी०–तत इति । हे रघुनन्दन! यतः कौशिक्यां भगिन्यामहं स्नेहसंयुक्तः ततः हेतोः हिमवत्पार्श्वे नियतः निर्गतं प्राप्तं यतं नित्यतिर्यस्य सोऽन्यत्र गमनरहित इत्यर्थः किंच नितरां यतस्तत्र स्थितौ प्रयत्नो यस्य सोऽहं सुखं यथा स्यात्तथा वसामि ॥ १० ॥

गो० टी०–तत इति । यतो हिमवन्तमाश्रिता तत इत्यर्थः ॥ १० ॥

११] ति० टी०–इतश्च तस्यां वास इत्याह–सा त्विति। सत्ये धर्मे प्रतिष्ठिता तज्जलपानादिना सत्यान्मनो न निवर्तत इति भावः ॥ ११ ॥

रा० टी०–नदीस्वरूपेऽपि तस्याः पूर्ववद्ब्रह्मचरणमिति बोधयन्नाह–सेति । सत्यवती मृषासंसर्गशून्या अत एव पुण्या अतिपुण्यहेतुः सत्यधर्मे प्रतिष्ठिता पतिव्रता महाभागा कौशिकी सा मम भगिनी सरितां सर्वनदीनां वरा श्रेष्ठा अस्तीति शेषः तु शब्दो हेत्वर्थे ॥ ११ ॥

गो० टी०–सत्यवतीनामनिमित्तमाह–सा त्विति॥ ११ ॥

१२] ति० टी०–नन्वेवं कथं सिद्धाश्रमे स्थितिरत आह–अहं हीति । नियमाद्व्रयापिण्डदानवत्सिद्धाश्रमैकसाध्ययागजन्यसिद्धिहेतोः आगमनकार्यं च त्वदनुग्रहात्सिद्धमित्याह–सिद्धाश्रममित्यादि ॥ १२ ॥

रा० टी०–ननु तां त्यक्त्वा किमर्थमिहागत इत्यत आह–अहमिति । हे राम ! नियमाद्व्रतप्रादुर्भावनिश्चयमवगत्य तां स्वभगिनीं हित्वा सिद्धाश्रमं समुपागतोऽहं तेजसा समाधिकरहितप्रतापेन युक्तं तव त्वामनुप्राप्यैव सिद्धोऽस्मि हि-शब्द एवार्थे कर्मणः शेषत्वविवक्षया षष्ठी एतेन विश्वामित्रस्य रामोपासकत्वं व्यक्तम् ॥ १२ ॥

गो० टी०–एवंभूतस्य सिद्धाश्रमागमननिमित्तमाह–अहं हीति । नियमात् यागनियमाद्धेतोः समुपागतः सिद्धाश्रममिति शेषः ॥ १२ ॥

३१] ति० टी०–उपसंहरति–एषेति । मम गाधेः सकाशादुत्पत्तिः कीर्तिता, स्वस्य वंशस्योत्पत्तिर्ब्रह्मपुत्रात्कुशात्कीर्तिता देशस्य शोणाकूलीयगिरित्रजदेशस्य पृच्छसि पर्यपृच्छः तत्सर्वमुक्तमिति शेषः ॥ १३ ॥

रा० टी०–एषेति । हे राम ! एषा स्वस्य वंशस्य उत्पत्तिः प्राकट्यं देशस्य च उत्पत्तिः ख्यातिः मम मया कीर्तिता यत् यस्माद्धेतोः मां त्वं परिपृच्छसि पर्यपृच्छः वर्तमानसामीप्ये इति भूते लट् । हिशब्दश्चार्थे उत्पत्तिशब्द उभयान्वयी शब्दाधिकारश्च ममेति कर्तुः शेषत्वेन विवक्षया षष्ठी ॥ १३ ॥

गो० टी०–एषेति । मम स्वस्य वंशस्य चोत्पत्तिः प्रसङ्गात्कीर्तिता यत्त्वया पृष्टं तत् देशस्य गिरित्रजदेशस्य वैभवं चोक्तम् ॥ १३ ॥

१४] ति० टी०–अतः परं न प्रष्टव्यमित्याह–गत इति। विघ्नो गन्तव्याध्वनि निद्राभावप्रयुक्तजाड्यमूलः ॥ १४ ॥

रा० टी०–गत इति । काकुत्स्थ हे राम! कथां कथयतो मम मयि कथां कथयति सति अर्धरात्रो रात्रेरर्धं गतो व्यतीतः अतः हेतोः निद्रामभ्येहि प्राप्नुहि ते भद्रं कल्याणमस्तु तत्र हेतुः यतः नोऽस्माकमिहाध्वनि विघ्नः एतदध्वचलनप्रतिबन्धकीभूता दिननिद्रा मा भूत् "अर्धं नपुंसकम्" इति समासः " रात्राह्नाहाः पुंसि " इति पुंस्त्वम् एतेन तद्घटकीभूतार्धशब्दः खण्डवाचक इति स्वीकृत्यार्धः समास इति भूषणकारोक्तिश्चिन्त्या समांशवाचकत्वे बाधकाभावात् खण्डवाचकत्वे प्रमाणाभावाच्च खण्डवाचकत्वस्वीकारेणार्धशब्दस्य प्रदोषवाचकत्वं स्वीकृत्य व्याख्यानमप्ययुक्तम् ' उपास्य रात्रिशेषं तु ' इति वक्ष्यमाणेन विरोधात् ॥ १४ ॥

गो० टी०–इतः परं न प्रष्टव्यमित्याशयेनाह–गत इति । अर्धो रात्रेरर्धरात्रः अनपुंसकत्वेऽपि "अर्धं नपुंसकम्" इत्यार्धः समासः "अहःसर्व–" इत्यादिना समासान्तोऽच् "रात्राह्न–" इति पुँल्लिङ्गता अत्रार्धशब्दांशवाची उक्तं हि ' भित्तं शकलखण्डे वा

१ कामार्थमिति गो. रा. पाठः । २ निरत इति गो. पाठः । ३ भगिन्या इति रा. पाठः । ४ सत्यधर्मे इति रा. पाठः । ५ प्राप्येति गो. रा. पाठः । ६ चेति गो. रा. पाठः । ७ कथामिति रा. पाठः ।

निष्पन्दास्तरवः सर्वे निलीना मृगपक्षिणः । नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ॥ १५ ॥
शनैर्विसृज्यते सन्ध्या नभो नेत्रैरिवावृतम् । नक्षत्रतारागहनं ज्योतिर्भिरवभासते ॥ १६ ॥
उत्तिष्ठते च शीतांशुः शशी लोकतमोनुदः । ह्लादयन्प्राणिनां लोके मनांसि प्रभया स्वया॥१७॥
नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः । यक्षराक्षससंघाश्च रौद्राश्च पिशिताशनाः ॥ १८ ॥
एवमुक्त्वा महातेजा विरराम महामुनिः । साधुसाध्विति ते सर्वे मुनयो ह्यभ्यपूजयन् ॥१९॥
कुशिकानामयं वंशो महान्धर्मपरः सदा । ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः ॥ २० ॥
विशेषेण भवानेव विश्वामित्र महायशः । कौशिकी सरितां श्रेष्ठा कुलोद्द्योतकरी तव ॥२१॥

पुंस्यर्थोऽर्धं समेशके ' इति यावति रात्रिभागे निद्रा निषिद्धा तावान् गत इत्यर्थः जागरणे को दोष इत्यत्राह–मा भूदिति । श्रोतव्याध्वनि निद्राभावप्रयुक्तालस्यकृतविघ्नो मा भूदित्यर्थः । मम कथाः कथयतः मयि कथां कथयति ॥ १४ ॥

१५] ति० टी०–अर्धरात्रचिह्नान्याह–निष्पन्दा इति । पक्षिचलनाभावादिति भावः । तदाह–निलीना इति ॥ १५ ॥

रा० टी०–अर्धरात्रलक्षणानि वदन्नाह–निस्पन्दा इत्यादिभिः । हे रघुनन्दन ! सर्वे तरवो वृक्षा निस्पन्दा स्पन्दनव्यापारशून्या अत एव सर्वे मृगपक्षिणो निलीनाः शयनं प्राप्ताः । तत्र हेतुः यतः नैशेन निशासंबन्धिना तमसा अन्धकारेण दिशः अव्याप्ता अल्पव्याप्तित्रिशिष्टाः अर्धरात्रे पूर्वरात्रापेक्षया किंचित्प्रकाशाधिक्यस्यानुभवसिद्धत्वामिति तात्पर्यम् । च-शब्दो हेत्वर्थे ॥ १५ ॥

गो० टी०–अथ निशामुखं वर्णयति चतुर्भिः–निष्पन्दा इत्यादि । निष्पन्दाः पक्षिसंचाराभावादिति भावः निलीनाः निद्रां प्राप्ता इत्यर्थः नैशेन सन्ध्यातिरिक्तकालिकेन सन्ध्या वियुज्यते वियुक्ता वर्तमानसामीप्ये लट् नक्षत्रैः अश्विन्यादिभिस्ताराभिः केवलनक्षत्रैश्च गहनं व्याप्तं नभः ज्योतिर्भिः ज्योतिष्मद्भिर्नेत्रैरावृततमिवावभासते उत्तिष्ठतीति "उदोऽनूर्ध्वकर्मणि" इति परस्मैपदम् तमो नुदतीति तमोनुदः इगुपधलक्षणः कः निशायां प्रभवन्ति नैशानि "प्रभवति" इत्यण् भूतानि उलूकादयः ततस्ततः तत्र तत्र पौर्णमास्यां यज्ञं समाप्य द्वितीयायां प्रस्थानमिति चतुर्घटिकानन्तरं चन्द्रोदय इति सर्वथार्धरात्रशब्दः प्रदोषपर एव ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

१६] ति० टी०–शनैर्विसृज्यते व्यत्युङ्क्ते इत्यर्थः वर्तमानसामीप्ये भूते लट् सन्ध्याशब्देन तदुपासनयोग्यगौणकालरात्रिहित्येन सार्धयामरूपः नक्षत्रतारागहनं नभः सहस्राक्षवन्नेत्रैरावृतमिव तज्ज्योतिर्भिस्तद्राश्मिभिरवभासते ॥ १६ ॥

रा० टी०–अर्धरात्रोऽपि व्यतीतो भवतीति बोधयन्नाह–शनैरिति । संध्या सम्यक् एकाग्रतां प्राप्नुवन्ति धियश्चित्तवृत्तयो यस्यां तया पूर्वरात्रोत्तररात्रमध्यभक्त्येत्यर्थः । शनैर्वियुज्यते व्यतीयते । आवृतं अ न आवृतमावरणं यस्य तन्महदित्यर्थः नक्षत्रतारागहनं नक्षत्रगणतारागणनिबिडं यत् नभः तत् नेत्रैरिव नेत्रसदृशैः ज्योतिर्भिः नक्षत्रतारागणैः अवभासते प्रकाशते 'विसृज्यते' इति भट्टपाठः ॥ १६ ॥

१७] ति० टी०–उत्तिष्ठते "उदोऽनूर्ध्वकर्मणि" इति तङ्॥१७॥

रा० टी०–उत्तिष्ठतीति । शीतांशुः शीतकिरणः लोकतमोनुदः शशी स्वया प्रभया लोके प्राणिनां मनांसि ह्लादयन् उत्तिष्ठति उदयते " उदोऽनूर्ध्वकर्मणि " इत्यत्रानूर्ध्वकर्मणीति निषेधान्न तङ् एतेन तदानीं कृष्णनवमीति व्यक्तम् ॥ १७ ॥

१८] ति० टी०–नैशानि निशाप्रभवाणि । तान्येवाह–यक्षेत्यादि ॥ १८ ॥

रा० टी०–नैशानीति । नैशानि निशायामेव संचरणशीलानि सर्वभूतानि ततस्ततः स्वस्वप्रचरणयोग्ये देश एव प्रचरन्ति । ननु कानि तानीत्यत आह–रौद्राः भयानकाः पिशिताशनाः रुधिरभोजनाः यक्षराक्षससंघाः चकारेण सर्पादयः एकश्च शब्द एवार्थे । यद्वा नैशानि सर्वभूतानि सर्वस्य शिवस्य भूतानि पिशाचादयः विशेषेण विशिष्टा यक्षादयश्च प्रचरन्ति दन्त्यादिरपि शिववाचक इति प्रसिद्धम् ॥ १८ ॥

१९] ति० टी०–अभ्यपूजयन्नस्तुवन् ॥ १९ ॥

रा० टी०–एवमिति । महातेजाः महामुनिः विश्वामित्रः एवमुक्त्वैव विरराम सर्वे ऋषयः तं विश्वामित्रं साधु साधु इति अभ्यपूजयन् । हिशब्द एवार्थे ॥ १९ ॥

गो० टी०–एवमिति । अभ्यपूजयन् अस्तुवन् ॥ १९ ॥

२०] ति० टी०–स्तुतिप्रकारमाह–कुशिकानामित्यादि । ब्रह्मोपमा ब्रह्मर्षितुल्याः ॥ २० ॥

रा० टी०–पूजामेव विशदयन्नाह–कुशिकानामिति । कुशिकानामयं वंशः सदा महाधर्मपरः अत एव कुशवंश्याः कुशवंशप्रभवाः महात्मानः नरोत्तमा राजानः ब्रह्मोपमाः ब्रह्मर्षिसदृशाः आसन्निति शेषः ॥ २० ॥

गो० टी०–कुशिकानामिति । गाधेः कुशिक इति नामान्तरं कुशिकानां तद्गोत्रजानां ब्रह्मोपमाः चतुर्मुखोपमाः॥२०॥

२१] ति० टी०–हे महायशः विश्वामित्र! भवानेव विशेषेण महात्मेति शेषः यस्तपसा ब्राह्मणत्वं प्राप्त इति भावः । किं च

---

१ निस्पन्दा इति रा. पाठः । २ वियुज्यते इति गो. रा. पाठः । ३ उत्तिष्ठतीति गो. रा. पाठः । ४ विभो इति गो. पाठः । ५ तमिति गो. रा. पाठः । ६ ऋषय इति गो. रा. पाठः । ७ महाधर्मपर इति रा. पाठः । ८ विश्वामित्रो महायशा इति गो. पाठः । ९ च सरिदिति गो. रा. पाठः ।

मुदितैर्मुनिशार्दूलैः प्रशस्तः कौशिकात्मजः । निद्रामुपागमच्छ्रीमानस्तंगत इवांशुमान् ॥ २२ ॥
रामोऽपि सहसौमित्रिः किंचिदागतविस्मयः । प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ।

विश्वामित्ररामसंवादः, रामस्य गङ्गामूलोत्पत्तिश्रवणेच्छा, विश्वामित्रकृतगङ्गोत्पत्तिवर्णनं च ।

उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः । निशायां सुप्रभातायां विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सुप्रभाता निशा राम पूर्वा सन्ध्या प्रवर्तते । उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय ॥ २ ॥
तच्छ्रुत्वा वचनं तस्य कृतपूर्वाह्णिकक्रियः । गमनं रोचयामास वाक्यं चेदमुवाच ह ॥ ३ ॥

यस्य तव भागिनी तव कुलस्य उद्द्योतकर्युद्धारकर्त्री सरितां श्रेष्ठा अनेन सकलजगदुद्धारकत्वं सूचितम् ॥ २१ ॥

रा० टी०–कुशवंश्यानां श्रैष्ठ्यं प्रतिपाद्य तत्रापि विश्वामित्रस्यातिश्रैष्ठ्यं प्रतिपादयन्नाह–**विशेषेणेति** । हे विश्वामित्र हे महायशः! तस्मिन् कुले भवान् विशेषेण ब्रह्मोपमः ब्रह्मर्षिरेवेत्यर्थः सरिच्छ्रेष्ठा कौशिकी च विशेषेण ब्रह्मोपमा अत एव तव कुलोद्द्योतकरी त्वत्कुलप्रकाशिका । एवशब्दः तस्मिन्नित्यर्थे ब्रह्मोपमशब्दो अध्याहृतौ ॥ २१ ॥

गो० टी०–**विशेषेणेति** । विश्वामित्रः विश्वामित्रसंज्ञः भवानेव महात्मेत्यनुषङ्गः कौशिकी च तव कुलोऽद्द्योतकरी कुलप्रकाशकरी ॥ २१ ॥

२३] ति० टी०–प्रशस्तः स्तुतः । 'अस्तंगत इवांशुमान्' इति पाठः ॥ २२

रा० टी०–**इतीति** । इति अनेन प्रकारेण तैः प्रसिद्धैः मुनिशार्दूलैः प्रशस्तः संस्तुतः श्रीमान् कुशिकात्मजो विश्वामित्रः अस्तं गतः अंशुमान् सूर्य इव निद्रामुपागमत् ॥ २२ ॥

गो० टी०–**इतीति** । प्रशस्तः स्तुतः शंसु स्तुतौ " यस्य विभाषा " इति नेट् " अनिदितां–" इति नलोपः श्रीमान् प्रशंसाकृतहर्षजनितश्रीमान् अस्तं गतोंऽशुमानिव तद्वत्परप्रबोधाजनक इत्यर्थः ॥ २२ ॥

२३] ति० टी०–सेवते सेवते स्म ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०–**राम इति** । सहसौमित्रिः सौमित्रिसहितः किंचिदागतविस्मयः विश्वामित्रप्रभावश्रवणेन प्राप्तकिंचिद्विस्मयो रामः मुनिशार्दूलं विश्वामित्रं प्रशस्यैव निद्रामुपसेवते प्राप्नोत् "वर्तमानसामीप्य " इति भूते लट् । किंच आगतविस्मयः आसमन्ताद्भावेन गतो निवृत्तो विस्मयो यस्य किंच अ न आगतः प्राप्तो विस्मयो यस्मिन् किंच आगतः प्राप्तः विशिष्टः स्मयः ईषद्धासो यस्य सः । अत्र पक्षेषु किंचिदिति प्रशस्यान्वयि ॥२३॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०–**रामोऽपीति** । किंचिदागतविस्मयः निद्रापारवश्यादिति भावः सम्युपसेवते अध्वश्रमवशात् सम्यक् प्राप्तः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

१] ति० टी०–रात्रिशेषमुपास्य निद्रयातिवाह्य ॥ १ ॥

रा० टी०–**उपास्येति** । महर्षिभिः सह विश्वामित्रः शोणकूले एव रात्रिशेषमुपास्य उपविश्य शयित्वेत्यर्थः सुप्रभातायां निशायामभ्यभाषत । तुशब्द एवार्थे । द्वितीया " कालाध्वनोः–" इति विहिता ॥ १ ॥

गो० टी०–अथ स्वपादोद्भवगङ्गावैभवं लोके प्रवर्तयितुं पृच्छति पञ्चत्रिंशे–**उपास्येत्यादि** । उपास्य स्थित्वा शयित्वेति यावत् रात्रिशेषमिति अत्यन्तसंयोगे द्वितीया सुप्रभातायां निवृत्तायामिति यावत् अत्र रात्रिशेषमित्यनुवादात् पूर्वसर्गे गतोऽर्धरात्र इत्यत्र निशीथपरत्वं स्वरसमिति गम्यते । यद्वा रात्रिशेषं ब्राह्मे मुहूर्ते उपास्य परमात्मानमिति शेषः । 'ब्राह्मे मुहूर्ते उत्थाय चिन्तयेदात्मनो हितम्' इति स्मृतेः ॥१॥

२–३] ति० टी०–गमनाय गमनं कर्तुम् ॥ २ ॥ ३ ॥

रा० टी०–**तद्भाषणमेवाह–सुप्रभातेति** । हे राम ! निशा सुप्रभाता सुप्रभातत्वं प्राप्ता अत एव पूर्वा संध्या उपलक्षणया तत्संबन्धि कर्म प्रवर्तते प्रवर्तयति उत्थातुं प्रेरयतीत्यर्थः । अतः उत्तिष्ठोत्तिष्ठ ते तुभ्यं भद्रं कल्याणमस्तु गमनाय सांध्यकर्मसमाप्तिपूर्वकगमनं कर्तुमभिरोचय इच्छ ॥ २ ॥

गो० टी०–**सुप्रभातेति** । गमनाय गन्तुम् " क्रियार्थोपपदस्य–" इति चतुर्थी ॥ २ ॥

रा० टी०–**तदिति** । तस्य विश्वामित्रस्य तद्वचनं श्रुत्वा पूर्वाह्णिकीं पूर्वाह्णसम्बन्धिनीं क्रियां संध्योपासनादिरूपां कृत्वा गमनं रोचयामास इयेष इदं वाक्यं च उवाच । इशब्दो हर्षद्योतकः ॥ ३ ॥

गो० टी०–**तच्छ्रुत्वेति** । पूर्वाह्णे भवा पौर्वाह्णिकी ताम् ॥३॥

१ इति तैरिति गो. रा. पाठः । २ कौशिकात्मज इति रा. पाठः । ३ कृत्वा पौर्वाह्णिकीं क्रियामिति गो. रा. पाठः

अयं शोणः शुभजलोऽगाधः पुलिनमण्डितः । कतरेण पथा ब्रह्मन्संतरिष्यामहे वयम् ॥ ४ ॥
एवमुक्तस्तु रामेण विश्वामित्रोऽब्रवीदिदम् । एष पन्था मयोद्दिष्टो येन यान्ति महर्षयः ॥ ५ ॥
[एवमुक्ता महर्षयो विश्वामित्रेण धीमता । पश्यन्तस्ते प्रयाता वै वनानि विविधानि च]
ते गत्वा दूरमध्वानं गतेऽर्धदिवसे तदा । जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेविताम् ॥ ६ ॥
तां दृष्ट्वा पुण्यसलिलां हंससारससेविताम् । बभूवुर्मुनयः सर्वे मुदिताः सहराघवाः ॥ ७ ॥
तस्यास्तीरे तदा सर्वे चक्रुर्वासपरिग्रहम् । ततः स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ॥ ८ ॥
हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः । विविशुर्जाह्नवीतीरे शुभा मुदितमानसाः ॥ ९ ॥
विश्वामित्रं महात्मानं परिवार्य समन्ततः । [1]विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः ॥
सँप्रहृष्टमना रामो विश्वामित्रमथाब्रवीत् ॥ ॥ १० ॥

४] ति० टी०–अयं शोण इति । शोणैव शोण इति व्यपदिष्टः कतरेण पथा संतरिष्यामह इत्यन्वयः प्रश्नबीजमगाध इति अतलस्पर्श इत्यर्थः ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–अयमिति । हे ब्रह्मन् ! शुभजलः शोभनजलविशिष्टः गाधः अल्पजलः अत एव पुलिनमण्डितः पुलिनैः सिकताभिः मण्डितः शोभितः यः अयं शोणोऽस्ति तं कतरेण पथा मार्गेण वयं संतरिष्यामहे कतरेणेत्युक्त्या तत्र मार्गद्वयेन मनुष्यसंतरणमिति ध्वनितम् । एतेन अगाध इति पदच्छेदो न रमणीय इति बोध्यम् ॥ ४ ॥

गो० टी०–अयमिति । गाधः स्वल्पजलः अत एव पुलिनमण्डितः सैकतालंकृतः तथा च नावं विना गन्तुं शक्यते कतरेण पथा सन्तरिष्यामहे ॥ ४ ॥

५–६] ति० टी०–उद्दिष्टो गन्तव्यत्वेन निश्चितः ॥५॥६॥

रा० टी०–एवमिति । एवमनेन प्रकारेण रामेणोक्तो विश्वामित्रः इदं वचनमब्रवीत् । तद्वचनमेवाह येन पथा महर्षयो यान्ति स पन्था मयैव उद्दिष्टः बोधितः तेनानेनैव मार्गेण गन्तव्यमिति ध्वनितम् । तुशब्द एवार्थे ॥ ५ ॥

गो० टी०–एवमिति । उद्दिष्टः गन्तव्यत्वेन निश्चितः ॥५॥

गो० टी०–एवमिति । स्पष्टम् ॥ ६ ॥

रा० टी०–ते इति । तदा विश्वामित्रोक्तोत्तरणोत्तरकाले ते विश्वामित्रोक्तमार्गेणोत्तीर्णनदाः दूरमध्वानं गत्वा अर्धदिवसे मध्याह्नसमये गते व्यतीते सति सरितां सर्वनदीनां मध्ये श्रेष्ठामत एव मुनिसेवितां जाह्नवीं जह्नुप्रादुर्भूतां गङ्गां ददृशुः ॥ ६ ॥

गो० टी०–त इति । जाह्नवीं गङ्गाम् ॥ ७ ॥

७] ति० टी०–सारसः पक्षिविशेषः ॥ ७ ॥

रा० टी०–तामिति । पुण्य सलिलां पुण्योत्पादकसलिलविशिष्टां हंससारससेवितां तां सर्वलोकप्रसिद्धां जाह्नवीं दृष्ट्वा सहराघवाः राघवसहिताः सर्वे मुनयः मुदिताः प्रमोदं प्राप्ता बभूवुः ७॥

गो० टी०–ता मिति । सारसो हंसविशेषः ॥ ८ ॥

८] ति० टी०–वासपरिग्रहं संमार्जनादिनावासस्थानं चक्रुरित्यर्थः ॥ ८ ॥

रा० टी०–तस्या इति । तदा जाह्नवीदर्शनसमये तस्या जाह्नव्यास्तीरे वासपरिग्रहं वासस्य वासस्थानस्य परिग्रहं स्वीकारं मुदितमानसाः सर्वे चक्रुः ततः वासस्थानस्वीकारानन्तरं यथान्यायं यथाशास्त्रं स्नात्वा पितृदेवताः संतर्प्य च अग्निहोत्राणि हुत्वा च अमृतवद्धविः प्राश्य च महात्मानं विश्वामित्रं समन्ततः परिवार्य शुचौ जाह्नवीतीरे विविशुः स्वस्वस्वीकृतवासस्थाने प्रवेशं चक्रुः । सार्धश्लोकद्वयमेकान्वयि । परिवार्यसमन्ततः इत्यस्मादुत्तरत्र ' विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः ' इत्यर्धश्लोकः भट्टसंमतः तत्र विष्ठिता इत्यस्य विशेषेण स्थिता इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥

गो० टी०–तस्या इति अर्धम् । आवासाय परिगृह्यत इत्यावासपरिग्रहः तं संमार्जनादिना वासस्थानं चक्रुरित्यर्थः॥९॥

गो० टी०–तत इत्यादि । श्लोकद्वयम् । यथान्यायं यथाशास्त्रं अघमर्षणसूक्तादिजपपूर्वकमित्यर्थः पितृदेवता इति ऋषीणामप्युपलक्षणम् अग्निहोत्राणि अग्नौ होतव्यानि पञ्चमहायज्ञादीनि अमृतवत् अमृततुल्यं हविः यज्ञशिष्टमन्नम् 'यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्' इति स्मृतेः शुचौ दृष्टदोषरहिते भोजनस्थानादन्यत्र ॥ १० ॥ ११ ॥

९] ति० टी०–अमृतवदमृततुल्यं पञ्चयज्ञावशिष्टमन्नम् यद्वामृतवत्तत्सदृशं गङ्गाजलं हविश्च प्रागुक्तं प्राश्येत्यर्थः ॥ ९ ॥

१०] ति० टी०–विष्ठिता विशेषेण स्थिताः यथार्हतः यथावस्थानमर्हतस्तथा स्थितावित्यर्थः ॥ १० ॥

रा० टी०–समिति । अथ उपवेशानन्तरं स हृष्टमनाः रामो विश्वामित्रमब्रवीत् । तद्वचनमेवाह–भगवन् हे सकलसामर्थ्यविशिष्ट ! त्रिपथगां नदीं गङ्गां श्रोतुमिच्छामि ॥ ११ ॥

गो० टी०–अथेति । अथ उपवेशानन्तरं तत्र देशे तदा तस्मिन्नेव काले द्वितीयोऽथशब्दः प्रश्ने ' मङ्गलानन्तरारम्भप्रश्नकात्स्न्येष्वथो अथ' इत्यमरः । गङ्गां गङ्गाहृत्तान्तम् ॥ १२ ॥

१ अयं श्लोको गो. पुस्तकेऽधिकः । २ ततश्चक्रुस्त आवासेति गो. पाठः । ३ शुचाविति गो. रा. पाठः । ४ इदमध गो. रा. पु. नास्ति । ५ अथ तत्र तदा राम इति गो. पाठः ।

भगवञ्छ्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम् । त्रैलोक्यं कथमाक्रम्य गता नदनदीपतिम् ॥ ११ ॥
चोदितो रामवाक्येन विश्वामित्रो महामुनिः । वृद्धिं जन्म च गङ्गाया वक्तुमेवोपचक्रमे ॥ १२ ॥
शैलेन्द्रो हिमवान्नाम धातूनामाकरो महान् । तस्य कन्याद्वयं राम रूपेणाप्रतिमं भुवि ॥ १३ ॥
या मेरुदुहिता राम तयोर्माता सुमध्यमा । नाम्ना मेनाँ मनोज्ञा वै पत्नी हिमवतः प्रिया ॥ १४ ॥
तस्यां गङ्गेयमभवज्ज्येष्ठा हिमवतः सुता । उमा नाम द्वितीयाभूत्कन्याँ तस्यैव राघव ॥ १५ ॥
अथ ज्येष्ठां सुराः सर्वे देवँकार्यचिकीर्षया । शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीम् ॥ १६ ॥
ददौ धर्मेण हिमवांस्तनयां लोकपावनीम् । स्वच्छन्दपथगां गङ्गां त्रैलोक्यहितकाम्यया ॥ १७ ॥
प्रतिगृह्य त्रिलोकार्थं त्रिलोकहितकाँङ्क्षिणः । गङ्गामादाय तेऽगच्छन्कृतार्थेनान्तरात्मना ॥ १८ ॥

११] ति० टी०–गङ्गां श्रोतुम् गङ्गाविषयकं किंचिच्छ्रोतुमित्यर्थः । श्रोतव्यं विषयमाह–त्रैलोक्यामित्यादि ॥ ११ ॥

रा० टी०–श्रवणप्रकारमाह–त्रैलोक्यमिति । त्रैलोक्यमाक्रम्य नदनदीपतिं समुद्रं कथं केन प्रकारेण गता प्राप्ता ॥१२॥

गो० टी०–त्रैलोक्यमिति । त्रैलोक्यमित्यर्थम् ॥ १३ ॥

१२] ति० टी०–वृद्धिं त्रैलोक्यव्याप्तिरूपाम् ॥ १२ ॥

रा० टी०–चोदित इति । रामवाक्येन चोदितः प्रेरितो महामुनिर्विश्वामित्रः गङ्गायाः वृद्धिं जलरूपेण त्रिलोकपूरणत्वं जन्मप्रादुर्भावं च वक्तुमेव उपचक्रमे । एवो वार्तान्तरव्यवच्छेदकः ॥ १२ ॥

गो० टी०–चोदित इति । वृद्धिं त्रैलोक्यमित्यनेनोक्तां जन्म गङ्गां श्रोतुमित्युक्तम् ॥ १४ ॥

१३] ति० टी०–धातूनां स्वर्णादीनाम् ॥ १३ ॥

रा० टी०–तत्र पूर्वं प्रादुर्भावप्रकारमाह–शैलेन्द्र इत्यादिभिः । हे राम ! धातूनामाकरः महानतिविस्तीर्णः शैलेन्द्रः शैलाधिपतिः यो हिमवान्नाम तस्य भुवि त्रिलोक्यां रूपेणाप्रतिममुपमारहितं कन्याद्वयमासीदिति शेषः ॥ १४ ॥

गो० टी०–शैलेन्द्र इति । धातूनामयस्ताम्रादीनाम् अस्तीति शेषः कन्याद्वयमासीदिति शेषः ॥ १५ ॥

१४] ति० टी०–या मेरुदुहिता मेना नाम सा तयोः कन्ययोर्मातेत्यन्वयः ॥ १४ ॥

रा० टी०–येति । हे राम ! या मेरुदुहिता मेरुकन्या सुमध्यमा शोभनकटिमती नाम्ना मेनका मेनकानाम्नी हिमवतः प्रिया नाम प्रसिद्धा पत्नी सैव तयोः हिमवत्कन्ययोर्माता । चशब्दः एवार्थे । ' नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया ' इति भट्टसंमतः पाठः । नाम्नेति तृतीया " प्रकृत्यादिभ्यश्च " इति विहिता ॥ १५ ॥

गो० टी०–येति । या मेरुदुहिता हिमवतः प्रिया पत्नी मनोरमा नाम प्रसिद्धा सा तयोर्मातेत्यन्वयः ॥ १६ ॥

१५] ति० टी०–तस्यां मेनायां या ज्येष्ठा हिमवतः सुता कुटिलानाम सेयं गङ्गाभवदित्यर्थः । तस्यैव हिमवतः ॥ १५ ॥

रा० टी०–तस्यामिति । हे राघव ! तस्य प्रसिद्धस्य हिमवनः भार्यायां तस्यां प्रसिद्धायां मेनायां ज्येष्ठा सुता इयं गङ्गाऽभवत् हिमवत एव उमा नाम द्वितीया कन्याऽभूत् ॥१६॥

गो० टी०–कन्याद्वयस्य नामनी दर्शयति–तस्यामिति॥१७॥

१६] ति० टी०–देवकार्यं वक्ष्यमाणं भवदीर्यधारणम् त्रिपथगां स्वर्गभूपातालमार्गगाम् इदं वर्तमानापदेशेन वरणं चास्याः शिवभार्यात्वाय ॥ १६ ॥

रा० टी०–अथेति । अथ गङ्गाप्रादुर्भावानन्तरं देवतार्थचिकीर्षया देवतानामर्थं स्नानशिवतेजोधारणादि प्रयोजनं तस्य चिकीर्षया संपादनेच्छया सर्वे सुराः त्रिपथगां नदीं गङ्गां शैलेन्द्रं हिमवन्तं वरयामासुः ययाचे " अकथितं च " इति शैलेन्द्रस्य कर्मत्वम् । ' देवकार्यचिकीर्षया ' इति भट्टसंमतः पाठः ॥ १७ ॥

गो० टी०–अथेति । देवतार्थचिकीर्षया देवतार्थसंपादनेच्छया प्रयोजनं च स्नानपानादि वक्ष्यमाणसेनापतिजननं वा परदेवतार्चनार्थं वा अत एव स्वपदेनाक्तिः ॥ १८ ॥

१७] ति० टी०–धर्मेण कन्यादानधर्मेण स्वच्छन्दपथगामित्यपि वर्तमानापदेशेन स्वेच्छामात्रेण प्रवहादिवायुमार्गगमनशीलाम् ॥ १७ ॥

रा० टी०–ददाविति । हिमवान् लोकपावनीं लोकपावनकर्त्रीं स्वच्छन्दपथगां स्वेच्छाविषयीभूतपथगमनकर्त्रीं गङ्गां तनयां त्रैलोक्यहितकाम्यया धर्मेण ददौ ॥ १८ ॥

गो० टी०–ददाविति । धर्मेण याचका न प्रत्याख्येया इति धर्मेण । जलप्रवाहरूपाया नद्याः कथमाकाशे गमनं तत्राह–स्वच्छन्दपथगामिति । स्वच्छन्दः स्वेच्छा तदायत्तः पन्थाः स्वच्छन्दपथः " ऋक्पूरब्धूः–" इत्यादिना अप्रत्ययः समासान्तः तं गच्छतीति तथा मेघजलवद्वारगतिविशेषेणाकाशेऽपि गतिः संभवतीति भावः ॥ १९ ॥

१८] ति० टी०–त्रिलोकार्थं तारकतो भीतत्रिलोकरक्षकपुत्रोत्पत्त्यर्थमगच्छन् ब्रह्मलोकम् ' तत्र ब्रह्मशापवशाज्जलरूपतापाप्तिरिति' इत्यादिवामनपुराणोक्तदिशा मध्ये ऊह्यम् वामनपुराणकृत्तान्तस्य प्रायेणात्र प्रत्यभिज्ञानात् एवं हि तत्राख्यायिका–

१ नामेति रा. पाठः । २ च मेनका नामेति रा. मनोरमा नामेति गो. पाठः । ३ नाम्नेति गो. पाठः । ४ देवतार्थेति गो. रा. पाठः । ५ कारिण इति गो. रा. पाठः ।

या चान्या शैलदुहिता कन्यासीद्रघुनन्दन । उग्रं सुव्रतमास्थाय तपस्तेपे तपोधना ॥ १९ ॥
उग्रेण तपसा युक्तां ददौ शैलवरः सुताम् । रुद्रायाप्रतिरूपाय उमां लोकनमस्कृताम् ॥ २० ॥
एते ते शैलराजस्य सुते लोकनमस्कृते । गङ्गा च सरितां श्रेष्ठा उमादेवी च राघव ॥ २१ ॥
एतत्ते सर्वमाख्यातं यथा त्रिपथगामिनी । खं गता प्रथमं तात गतिं गतिमतां वर ॥
सैषा सुरनदी रम्या शैलेन्द्रतनया तदा । सुरलोकं समारूढा त्रिपथा जलवाहिनी ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

'उमाज्येष्ठा कुटिलानाम हिमवत्कन्या देवैः शिववीर्यधारणाय हिमवन्तं प्रार्थिता तेन दत्तया तया सह देवा ब्रह्मलोकं गत्वा ब्रह्मणे निवेदितवन्तः ब्रह्मणा च 'असमर्थेयं तद्धारणे' इत्युक्ता 'अवश्यं धारयामि' इति कथितवाक्यावज्ञानेन ब्रह्मणा 'जलरूपा भव' इति शप्ता तत्रैव ब्रह्माण्डोर्ध्वकटाहे जलरूपेण लग्ना स्थिता तस्यामेवाग्निना शिववीर्यं क्षिप्तमिति। 'विष्वङ्घ्रिणा प्रसरता कटाहे भेदितेऽम्बरात् । कुटिला विष्णुपादान्तात्पपाताकुलिता ततः ॥ तस्माद्विष्णुपदी ख्याता' इति वामनपुराणोक्तेरेव ब्रह्माण्डोर्ध्वकटाहे लग्नेति ज्ञायते पतनसमये च ब्रह्माण्डबाह्यजलेन सहैव पतितं तज्जलं ब्रह्मणा कमण्डलुधृतं बाह्यजलं च शिवानन्दबाष्पजातं नारायणात्मकमिति कामिकासंहितादौ स्पष्टम् ततो भगवता पदारोपणे तेनैव कमण्डलुजलेन तत्पादप्रक्षालनं कृत्वा तज्जलं कमण्डलावेव क्षिप्तम् । शंकरसंहितोक्तरीत्या गौरीविवाहोत्तरं लीलया गौर्या पाणिभ्यां शिवनयनाच्छादने कृते शिवेन ललाटनेत्रं प्रकाशितम् ततो भयाद्गौरीपाणिस्वेदजलं स्रुतं तदपि ब्रह्मणा कमण्डलौ स्थापितमित्यप्यत्रोह्यम् गौरीविवाहकथनेन सूचितं च । भगीरथप्रार्थनया च ब्रह्मरूपः सर्वपवित्रजलसमूहस्तस्मै दत्तः सर्वमुक्तजलमुपक्रम्य पुराणेषु भगीरथसंबन्धश्रवणात् । विस्तरस्त्वस्मत्कृतगङ्गामाहात्म्यप्रकाशे द्रष्टव्यः ॥ १८ ॥

रा० टी०–प्रतीति । त्रैलोक्यहितकारिणः ते देवाः गङ्गां त्रिलोकार्थं त्रिलोकीप्रयोजनसाधनसमर्थां प्रतिगृह्य आदाय स्वीकृत्य कृतार्थेन अन्तरात्मना मनसा अगच्छन् । त्रिलोकार्थमिति सामान्ये नपुंसकं त्रिलोकार्थं प्रतिगृह्य उद्दिश्येत्यर्थो वा ॥ १९ ॥

गो० टी०–प्रतिगृह्येति । त्रिलोकहितकारिणः देवा इति शेषः । प्रतिगृह्य स्वीकृत्य आदाय स्वेष्वन्तर्भाव्य ॥ २० ॥

१९–२१] ति० टी०–कन्या अहतपतिः अग्रे शिववीर्यस्खलनादि वक्तुं चैतद्वर्णनम् उग्रं सुव्रतं पर्णभोजनस्यापि त्यागसंकल्परूपम् तपः शिवध्यानरूपम् ॥ १९ ॥ २० ॥ २१ ॥

रा० टी०–प्रसङ्गात् हिमवत्कनिष्ठकन्यावृत्तमाह–येति । हे रघुनन्दन ! अन्या कनिष्ठा या शैलदुहिता कन्या अस्वीकृतपतिः आसीत् सा सुव्रतमच्युतसंकल्पमुग्रं शिवमेव आस्थाय स्वपतित्वेन निश्चित्य तपोधना सती तपस्तेपे । चशब्द एवार्थे ॥ २० ॥

गो० टी०–गङ्गावृत्तान्तप्रसङ्गेन तदनुजावृत्तान्तमप्याह—या चेति । कन्या अलब्धभर्तृका ॥ २१ ॥

रा० टी०–उग्रेणेति । शैलवरः शैलश्रेष्ठः हिमवान् उग्रेण अत्युत्कटेन तपसा युक्तां लोकनमस्कृतामुमां सुतामप्रतिरूपाय सादृश्यानुयोगित्वानाक्रान्ताय उग्राय शिवाय ददौ ॥ २१ ॥

गो० टी०–उग्रेणेति । अप्रतिरूपाय अनुकूलाय रुद्रार्थं तपस्यन्तीमुमां प्रसन्नाय तस्मै ददावित्यर्थः ॥ २२ ॥

रा० टी०–उपसंहरन्नाह–एते इत्यादिभिः । हे राघव ! सरितां श्रेष्ठा गङ्गा देवी उमा च एते ते प्रसिद्धे एव शैलराजस्य सुते लोकनमस्कृते स्तः इति शेषः । चकारान्तरमेवार्थे ॥ २२ ॥

गो० टी०–उपसंहरति—एते इति ॥ २३ ॥

२२] ति० टी०–यथा त्रिपथगामिनी गङ्गा तथा प्रतिपादयामीति शेषः तदेव विवृणोति–खमित्यादि । प्रथमं खं गताकाशमार्गं गता पश्चात्सुरलोकं समारूढाभवत् जलवाहिनी तत्स्वभावा जाता विपापा सकलपापहन्त्री ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०–एतदिति । हे राम वर हे सर्वश्रेष्ठ ! त्रिपथगा गङ्गा नदी गतिमतां गतिं खमाकाशं प्रथमं गता एतत्सर्वं ते तुभ्यमाख्यातं कथितम् ॥ २३ ॥

रा० टी०–सैवेति । सुरनदी रम्या अतिरमणीया सा प्रसिद्धा एषा शैलेन्द्रस्य सुता यदा सुरलोकं समारूढा प्राप्ता तदा जलवाहिनी सती विपापा स्नानादिकर्तृसकललोकपापविगतकर्त्री आसीदिति शेषः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

गो० टी०–एवं गङ्गोत्पत्तिप्रकारं प्रथमप्रश्नोत्तरमुक्त्वा द्वितीयप्रश्नोत्तरं त्रिपथगामित्वमुच्यत इत्याह–एतदिति । प्रथमं तावत् खं खात्मिकां गतिं गता गतिमतां सुन्दरगतिमताम् ॥ २४ ॥

१ सा व्रतमिति गो. पाठः । २ उग्रायेति गो. रा. पाठः । ३ गङ्गेति गो. रा. पाठः । ४ नदीति गो. रा. पाठः । ५ रामेति गो. रा. पाठः ६ अर्धमिदमधिकं गो. रा. पाठयोः । ७ शैलेन्द्रस्य सुता तदेति गो. पाठः ।

षट्त्रिंशः सर्गः ।

विश्वामित्रकृतं शिवपार्वतीसुरतवर्णनम्, तत्सुरतस्य कालातीतत्वे देवानां याचनम्, तेन संक्रुद्धोमाया देवानां धरण्याश्च शापः सेनापतिमभीप्सतां देवानां पितामहसमीपे याचनं च ।

उक्तवाक्ये मुनौ तस्मिन्नुभौ राघवलक्ष्मणौ । प्रीतिनन्द्य कथां वीरावूचतुर्मुनिपुङ्गवम् ॥ १ ॥
धर्मयुक्तमिदं ब्रह्मन्कथितं परमं त्वया । दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि ॥
विस्तरं विस्तरज्ञोऽसि दिव्यमानुषसंभवम् ॥ ॥ २ ॥
त्रीन्पथो हेतुना केन प्लावयेल्लोकपावनी । कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा ॥ ३ ॥
त्रिषु लोकेषु धर्मज्ञ कर्मभिः कैः समन्विता । तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः ॥ ४ ॥
निखिलेन कथां सर्वामृषिमध्ये न्यवेदयत् । पुरा राम कृतोद्वाहः शितिकण्ठो महातपाः ॥ ५ ॥

गो० टी०–अथ सुरलोकं च समारूढेत्याह–सैषेति॥२५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

१] ति० टी०–उक्तवाक्ये इति । उपरते इत्यर्थः ॥१॥

रा० टी०–सामान्यतो गङ्गाकथाश्रवणानन्तरं विशेषं जिज्ञासोः रामस्य प्रश्नं पुनर्वर्णयन्नाह–उक्तेति । तस्मिन् प्रसिद्धे मुनौ उक्तवाक्ये सति वीरौ अतिपराक्रमविशिष्टौ उभौ राघवलक्ष्मणौ कथां हिमवत्कन्यावृत्तान्तमभिनन्द्य प्रशस्य मुनिपुंगवं विश्वामित्रमूचतुः ॥ १ ॥

गो० टी०–'भगवन् श्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम्' इति गङ्गायास्त्रिपथगात्वप्रकारे पृष्टे अन्तरिक्षस्वर्गगमनयोः प्रत्युक्तत्वात्तत्र तृतीयपथगमनं कथमित्याशयेन पुनः पृच्छन्तं श्रीरामं प्रत्याह षट्त्रिंशे—उक्तवाक्य इत्यादि । मुनौ उक्तवाक्ये उक्तोत्तरे सति अत्रोभावित्युक्तेः पूर्वसर्गे रामपदं लक्ष्मणस्याप्युपलक्षणं वेदितव्यं कथां पूर्वोक्ताम् ॥ १ ॥

२] ति० टी०–वक्तुमर्हसीत्यस्य विस्तरमित्यनेनान्वयः । दिव्यमानुषसंभवं दिव्यलोकनिबन्धनं च ॥ २ ॥

रा० टी०–तद्वचनमेवाह–धर्मेति । ब्रह्मन् हे मुने ! धर्मयुक्तं धर्मनिष्पादकमत एव परममतिश्रेष्ठमिदं शैलसुताचरितं त्वया कथितम् । शैलराजस्य ज्येष्ठायाः पूर्वजायाः दुहितुः कन्याया दिव्यमानुषसंभवं दिव्यलोकमानुषलोकसंबन्धं विस्तरं विस्तारसहितं यतो विस्तरज्ञोऽसि अतस्त्वं वक्तुमर्हसि सार्धश्लोकएकान्वयी । संभवशब्दः संपूर्वकप्राप्त्यर्थकभूधातुप्रकृतिकावन्तः ॥ २ ॥

गो० टी०–धर्मेति अर्धत्रयम् । धर्मयुक्तं धर्मफलकश्रवणमित्यर्थः इदं वृत्तं ज्येष्ठाया दुहितुः वृत्तं त्वया कथितं तस्या दिव्यमानुषसंभवं दिव्यलोके मानुषलोके च संभवं विस्तरं वक्तुमर्हसि ॥ २ ॥

३] ति० टी०–श्रुश्रूषितं विस्तरमाह–त्रीनित्यादि । भूर्भुवःस्वर्मार्गानित्यर्थः प्लावयेद्वयामुयात् इत्येको विस्तरः द्वितीयमाह–कथमिति । त्रिपथगेति प्रसिद्धिः किं निबन्धनेति द्वितीयः ॥ ३ ॥

रा० टी०–प्रश्नस्य विशेषाकारमाह–त्रीनिति । लोकपावनी गङ्गा त्रीन् पथः केन हेतुना प्लावयेत् अप्लावयत् ॥ ३ ॥

गो० टी०–त्रीनिति । त्रीन् पथः भूर्भुवःस्वर्मार्गान् केन हेतुना प्लावयेत् प्लुता 'भावयेत्' इत्यपि पाठः उकारव्यत्ययः इतरयोः पूर्वसर्ग एवोक्तत्वात्केन हेतुना तृतीयपथं गतेति द्वितीयप्रश्नार्थः ॥ ३ ॥

रा० टी०–कथमिति । हे धर्मज्ञ ! त्रिपथगा गङ्गा त्रिषु लोकेषु सरिदुत्तमा कथं विश्रुता ख्याता कैः कर्मभिः समन्विता युक्ता आसीदिति शेषः ॥ ४ ॥

गो० टी०–तृतीयप्रश्नमाह–कथमिति । त्रिपथगा गङ्गा कथं विश्रुता कैः कर्मभिः व्यापारैः सरित् उत्तमा आसीत् ॥४॥

४] ति० टी०–कर्मभिश्चरितैः समन्वितेति तृतीयः । द्वयोर्हिमवत्कन्ययोः प्रस्तावेऽपि स्ववंशोद्धारकत्वाद्गङ्गाविषयक एव भगवतः प्रश्न इत्यूह्यम् ॥ ४ ॥

रा० टी०–तथेति । काकुत्स्थे रामे तथा तेन प्रकारेण ब्रुवति पृच्छति सति तपोधनो विश्वामित्रः निखिलेन कात्स्न्र्येन विस्तरेणेत्यर्थः सर्वां कथां ऋषिमध्ये न्यवेदयत् अवर्णयत् ॥ ५ ॥

गो० टी०–प्रथमप्रश्नोत्तरमाहेत्याह—तथेति । काकुत्स्थ इति लक्ष्मणस्याप्युपलक्षणं निखिलेन विस्तरेण सर्वां दिव्यसंभवां मानुषसंभवां च ॥ ५ ॥

५] ति० टी०–निखिलेन कात्स्न्र्येन विस्तरेणेति यावत् । उद्वाहो विवाहः ॥ ५ ॥

१ अभिनन्द्येति गो. पाठः । २ नीलकण्ठ इति गो. पाठः

दृष्ट्वा च भगवान्देवीं मैथुनायोपचक्रमे । तस्य संक्रीडमानस्य महादेवस्य धीमतः ॥
शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् ॥ ॥ ६ ॥
न चापि तनयो राम तस्यामासीत्परंतप । सैर्वे देवाः समुद्युक्ताः पितामहपुरोगमाः ॥ ७ ॥
यदिहोत्पद्यते भूतं कस्तत्प्रतिसहिष्यति । अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन् ॥ ८ ॥
देवदेव महादेव लोकस्यास्य हिते रत । सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि ॥ ९ ॥
न लोका धारयिष्यन्ति तव तेजः सुरोत्तम । ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर ॥ १० ॥
त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय । रक्ष सर्वानिमाँल्लोकान्नालोकं कर्तुमर्हसि ॥ ११ ॥
देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः । बाढमित्यब्रवीत्सर्वान्पुनश्चेदमुवाच ह ॥ १२ ॥

रा० टी०–तद्वर्णनमेवाह—पुरेत्यादिभिः । हे राम ! कृतोद्वाहः महातपाः अतिविचारशीलः शितिकण्ठो महादेवः स्पृहया मैथुनेच्छया देवीं दृष्ट्वैव मैथुनाय मैथुनं कर्तुमुपचक्रमे प्रारेभे ॥ ६ ॥

गो० टी०–निखिलेनेत्युक्तं गार्ङ्ग्यसंभवमाह–पुरेति । कृतोद्वाह इति परपरिग्रहव्यावृत्तिः दृष्ट्वा स्पृहया महातपोनिष्ठत्वेऽपि कामबाणवशात् तस्यामभिलाषेण मैथुनाय मिथुनकर्म कर्तुमुपचक्रमे ॥ ६ ॥

६] ति० टी०–गतम् क्रीडयेति शेषः ॥ ६ ॥

रा० टी०–तस्येति । शितिः कृष्णत्वं कण्ठे यस्य देवस्य दीप्तिमतः धीमतः परमधैर्यविशिष्टस्य तस्य सर्वलोकप्रसिद्धस्य संक्रीडमानस्य महादेवस्य दिव्यं वर्षशतं गतं व्यतीतम् ॥ ७ ॥

गो० टी०–शितीति । दिव्यं वर्षशतं गतं मैथुनेनैवेति शेषः तनयः तनयप्रापकरेतोविसर्गः ॥ ७ ॥

७] ति० टी०–समुद्युक्ताः सेनानीप्राप्त्यर्थं परमयत्नेन रुद्रोमयोः संयोजनं कृत्वापि तस्यां रौद्रतेजसो मोचनं वारयितुं समुद्युक्ता बभूवुरित्यर्थः । ‘ समुद्विग्राः’ इति पाठस्तु सुगम एव ॥ ७ ॥

रा० टी०–न चेति । हे राम परन्तप ! तस्यां देव्यां तनयः चकारेण तनयापि नासीत् ततः दिव्यवर्षशतक्रीडयापि तनयाभावानन्तरमभूतं दिव्यवर्षशतेऽपि अप्रादुर्भूतं तेजो यदि उत्पद्यते तर्हि तत्तेजः कः प्रसहिष्यते इति विचाररूपहेतोः पितामहपुरोगमाः देवाः समुद्युक्ताः उद्योगं चक्रुः हशब्द इत्यर्थे ॥ ८ ॥

गो० टी०–तत इति । पितामहपुरोगमाः देवाः समुद्विग्रा भीताः पाठान्तरे ‘समुद्युक्ताः’ उद्योगं चक्रुः किमर्थामिह पार्वत्यां यद्भूतं पुत्रः उत्पद्यते उत्पत्स्यते वर्तमानसामीप्ये वर्तमानवत्प्रयोगः तत् कः प्रतिसहिष्यत इति विचार्य तन्निवर्तनाय समुद्युक्ता इत्यर्थः ॥ ८ ॥

८–९] ति० टी०–पुत्रार्थं संयोजनोद्योगवतां तन्निवारणोद्योगोऽनुचितस्तत्राह–यदिहेति । इहोमायाम् उत्पद्यते उत्पत्स्यते अब्रुवन् इति विचार्येत्यादि ॥ ८ ॥ ९ ॥

रा० टी०–तदुद्योगमेवाह–अभिगम्येति । सर्वे सुराः अभिगम्य महादेवसंमुखं प्राप्य प्रणिपत्य नमस्कृत्य इदं वचनमब्रुवन् । तद्वचनमेवाह–हे देवदेव सर्वदेवनियन्तः । अत एव महादेव यतस्त्वमस्य लोकस्य हिते रतः अतः सुराणां प्रणिपातेन सुरकर्तृकप्रणामेन प्रसादं सुरविषयकप्रसन्नतां कर्तुं निष्पादयितुमर्हसि योग्योऽसि ॥ ९ ॥

गो० टी०–तमेवोद्योगमाह–अभिगम्येति । महादेवमिति शेषः ॥ ९ ॥

गो० टी०–देवदेवेति । देवदेवेत्यनेन महादेवशब्दार्थ उक्तः प्रणिपातेन पादमूलपतनेन ॥ १० ॥

१०] ति० टी०–प्रसादविषयमाह–न लोका इति । भूरादिलोकाः तत्स्थप्रजाश्चेत्यर्थः । ब्राह्मेण तपसा ब्रह्मानन्यतालक्षणेन तपसेत्यर्थः ॥ १० ॥

रा० टी०–नेति । हे सुरोत्तम ! तव तेजः त्वत्तेजोजनितसुतं लोका न धारयिष्यन्ति धारयितुं समर्था न भविष्यन्ति अतः ब्राह्मेण वेदबोधितेन तपसा युक्तस्त्वं देव्यासह तपश्चर कुरु क्रीडातो निवर्तस्वेति भावः ॥ १० ॥

गो० टी०–नेति । तेजः तेजःसमुद्भूतपुत्रं न धारयिष्यन्ति न सहिष्यन्ते अतो ब्राह्मेण वेदावगतेन तपसा योगेन युक्तः सन् तदङ्गतया देव्या सह तपश्चर न तेजः पार्वत्यां मोक्तुमर्हसीति भावः ॥ ११ ॥

११–१२] ति० टी०–तेजो रेतः तेजस्यात्मनि मत्तेजसि मया धृते को लाभस्तत्राह–रक्ष सर्वानिति । धृत्वेति शेषः । ननु रुद्रेण स्वतेजोधारणे कथं लोकरक्षेति चेच्छृणु । “ यदेतत्पुरुषे रेतो भवति आदित्यस्य तद्रूपम् ’ इति श्रुतेस्तद्रेतोरूपं तेज एवादित्यमण्डलं तद्धृतौ सकलं जगद्रक्षितं भवति, विपर्यये विपर्यय इत्याहुः । तदेवाह–नालोकमिति । आदित्यविनाशे हि सर्वलोकविनाशप्रसङ्ग इति भावः ॥ ११ ॥ १२ ॥

रा० टी०–नन्वत्तेजसैव मत्सुतः स्थास्यति युष्माकं किमकार्यमित्यत आहुः–त्रैलोक्येति । त्रैलोक्यहितकामार्थं लोकत्रयहितेच्छया तेजः अतितेजस्विसुतजनकीभूतं रेतः तेजसि तेजोमयस्वशरीरे धारय सुतं नोत्पादयेत्यर्थः । एनेन तादृशसुतोत्पत्तौ तत्तेजसा सर्वलोकदाहः स्यात् इति वारणे हेतु-

स्पृहयेति गो. रा. पाठः । २ तत इति गो. रा. पाठः । ३ समुद्विग्रा इति गो. पाठः । ४ सहिष्यते इति गो. रा. पाठः ।

धारयिष्याम्यहं तेजस्तेजसैव सहोमया । त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु ॥ १३ ॥
यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम् । धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ॥ १४ ॥
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् । यत्तेजः क्षुभितं ह्यद्य तद्धरा धारयिष्यति ॥ १५ ॥
एवमुक्तः सुरपतिः प्रमुमोच महाबलः । तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥ १६ ॥
ततो देवाः पुनरिदमूचुश्चापि हुताशनम् । आविश त्वं महातेजो रौद्रं वायुसमन्वितः ॥ १७ ॥
तदग्निना पुनर्व्याप्तं संजातं श्वेतपर्वतम् । दिव्यं शरवणं चैव पावकादित्यसंनिभम् ॥ १८ ॥

ध्वनितः अतः इमान्सर्वांल्लोकान् रक्ष पुत्रोत्पत्तिनिरोधनद्वारा पालय तत्र हेतुः अलोकं लोकाभावं कर्तुं नार्हसि ॥ ११ ॥

गो० टी०–त्रैलोक्येति । त्रैलोक्यहितमेव कामः काम्यमानः पुरुषार्थः तदर्थं तेजः रेतः तेजसि तेजोमयनिजशरीरे धारय न मुञ्चेत्यर्थः ॥ १२ ॥

रा० टी०–देवतानामिति । सर्वलोकमहेश्वरो महादेवः देवतानां वचः प्रार्थनां श्रुत्वा बाढं भवत्प्रार्थितमङ्गीकृतमित्यब्रवीत् पुनश्च पुनरपि सर्वान्सुरानिदमुदवाच । ह प्रसिद्धमेतत् ॥ १२ ॥

गो० टी०–देवतानामिति । रुर्वलोकमहेश्वरः सर्वलोकानां परमनियन्ता 'सर्वलोकपितामहः' इति पाठान्तरम् ॥ १३ ॥

१३] ति० टी०–धारयिष्यामीति । सहोमयोमापि स्वरजोरूपं तेजोग्निं स्वस्वरूपेण तेजसा धारयिष्यति " यदेतत्स्त्रियां लोहितं भवति अग्नेस्तद्रूपम् " इति श्रुतेः । भो त्रिदशाः अनेन तेजोधारणेन पृथिवी चकारात्सर्वो लोकः निर्वाणं सुखं प्राप्नोतु । अन्यथैश्वरतेजोजन्यस्य दुर्धार्यत्वेन दुर्दर्शत्वेन च पृथिव्या लोकस्य च पीडा स्यादिति भावः ॥ १३ ॥

रा० टी०–धारयिष्यामीति । हे त्रिदशाः ! तेजः अक्षुभितवीर्यं तेजसि तेजोरूपशरीरे एव उमया सहैव अहं धारयिष्यामि । अतः पृथिवी तदुपलक्षितसर्वलोकः निर्वाणं भयस्यागजनितसुखमधिगच्छतु प्राप्नोतु । चशब्दो हेत्वर्थे सहोमयेत्युक्त्या अक्षुभितवीर्यनिरोधकरणं शिवस्य अक्षुभितशोणितनिरोधकरणमुमाया इति सूचितम् ॥ १३ ॥

गो० टी०–बाढमित्यङ्गीकृतांशमाह–धारयिष्यामीति । तेजःअक्षुभितांशम् उमया उमाप्यक्षुभितं शोणितरूपं तेजो धारयत्वित्यर्थः पृथिवीशब्देन लोका उच्यन्ते निर्वाणं सुखम् ॥१४॥

१४] ति० टी०–दिव्यवर्षशतभोगवशात्स्थानतश्च्युतस्य शुक्रांशस्य धारणासंभवेन तद्धारणसमर्थं मोक्षस्थानं निरूपयन्त्वित्याह–यदिदमिति । स्थानाद्धृदयपुण्डरीकलक्षणात् क्षुभितं चिरकालभोगवशात्स्खलितम् अनुत्तमं देवकार्यार्हसुनसमर्थत्वेन सर्वोत्तमं भवत्प्रार्थनयोमागर्भानर्हं को धारयिष्यति ॥ १४ ॥

रा० टी०–यदिति । हे सुरसत्तमाः ! अनुत्तमं भवत्कार्यसाधकत्वेनात्युत्तमं स्थानात् क्षुभितं यत् इदं मम तेजस्तत्कः धारयिष्यति इति मे मह्यं ब्रुवन्तु । हिशब्दो इत्यर्थे भवन्त इति शेषः ॥ १४ ॥

गो० टी०–पुनश्चेदमुवाच हेत्युक्तमंशं दर्शयति–यदिदमिति । स्थानात् रेतःस्थानहृदयसंपुटात् अनुत्तमं दुर्भरं मे मह्यं ब्रुवन्तु ॥ १४ ॥

१५–१६] ति० टी०–उत्तरमाहुः–एवमिति । धरा धारयिष्यतीति तस्या अशेषधारणशक्तिमत्त्वादिति भावः ॥१५॥१६॥

रा० टी०–एवमिति । ततः शिवोक्त्यनन्तरमेवमनेन प्रकारेण उक्ताः कथिताः देवाः वृषभध्वजं शिवं प्रत्यूचुः तद्वचनमेवाह यत्तेजः अद्य अस्मिन्काले क्षुभितं तत्तेजः धरा धारयिष्यति अद्येत्युक्त्या इतःप्रभृति अधिकं वीर्यं च्युतं चेत् तद्धारणे न कश्चन समर्थो भवितेति ध्वनितम् ॥ १५ ॥

गो० टी०–एवमिति । धरा सर्वधारणशक्तिमती अनेन धरा तद्धारणार्थं देवैः प्रार्थितेति सिद्धम् ॥ १६ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्तः देवैः प्रार्थितो महाबलः सुरपतिः शिवः प्रमुमोच क्षुभितं तेजः तत्याज येन त्यक्तेन तेजसा सगिरिकानना गिरिकाननसहिता पृथिवी व्याप्ता ॥ १६ ॥

गो० टी०–एवमिति । सुरपतिः रुद्रः प्रमुमोच तेज इति सिद्धं येन तेजसा पृथिवी व्याप्ता तत्प्रमुमोच ॥ १७ ॥

१७] ति० टी०–पृथिव्यां मुक्तस्य तेजसो धारणार्थमग्नेः पृथिव्यधिपतित्वेन पृथिव्यभिमानित्वात्तं नियुञ्जते–तत इति । पुनःशब्दो वाक्यालङ्कारे हुताशनं देवीक्लेदांशरूपम् अन्यादृशाग्नेरौद्रतेजःप्रवेशासंभवात् वायुसमन्वित इत्यनेन चालनलक्षणः प्रवेशोपाय उक्तः ॥ १७ ॥

रा० टी०–तत इति । ततः पृथिव्यां तेजोव्याप्त्यनन्तरं देवाः हुताशनमग्निमपीदं पुनरूचुः तद्वचनमेवाह–रौद्रं शिवोद्भूतं महातेजः वायुसमन्वित एव त्वं प्रविश आत्मनि प्रवेशय अन्तर्भावितणिजर्थः । चशब्द एवार्थकः ॥ १७ ॥

गो० टी०–तत इति । ततः पृथिव्यां व्याप्तत्वादेव हेतोः पृथिवी भग्ना भविष्यतीति हुताशनमूचुः पुनरूचुरित्यनेनाग्नेः प्रवेशभीतत्वं गम्यते अग्निचारणहेतुतया वायुसमन्वित इत्युक्तम् ॥ १८ ॥

१८] ति० टी०–तदग्निनेति । उक्ताग्निना चालनपूर्वकप्रवेशात्तत्तेजोबद्धं सत्केवलश्वेतपर्वतरूपं जातम् तद्रूपं तेजः प्रवेशप्रदेशे तन्महिम्ना दिव्यं पावकादित्यसंनिभं शरवणं चाभूत् ॥१८॥

१ तेजस्येवेति गो. रा. पाठः । २ तेऽप्येति रा. श्वेतदिति गो. पाठः । ३ महीतले इति गो. पाठः । ४ प्रविशेति गो. पाठः । ५ संजातः श्वेतपर्वत इति गो. रा. पाठः ।

यत्र जातो महातेजाः कार्तिकेयोऽग्निसंभवः । अथोमां च शिवं चैव देवाः सर्षिगणास्तथा ॥ १९ ॥
पूजयामासुरत्यर्थं सुप्रीतमनसस्तदा । अथ शैलसुता राम त्रिदशानिदमब्रवीत् ॥ २० ॥
समन्युरशपत्सर्वान्क्रोधसंरक्तलोचना । यस्मान्निवारिता चाहं संगता पुत्रकाम्यया ॥ २१ ॥
अपत्यं स्वेषु दारेषु नोत्पादयितुमर्हथ । अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥
[पत्न्यो न जनयिष्यन्ति अद्यप्रभृतिचात्मजान् ।] ॥ २२ ॥
एवमुक्त्वा सुरान्सर्वान्शशाप पृथिवीमपि । अवने नैकरूपा त्वं बहुभार्या भविष्यसि ॥ २३ ॥

रा० टी०–तदिति । पुनरग्निना व्याप्तं पावकादित्यसन्निभं पावकस्थितादित्यसदृशं तत्तेजः श्वेतपर्वतः संजातः दिव्यं विलक्षणं शरवणं च संजातम् यत्र यस्मिन् शरवणे तदेव तेजः महातेजाः परमतेजस्वी कार्तिकेयो जातः अत एव अग्निसंभव उच्यते इति शेषः कृत्तिकया धृतत्वात्तदपत्यत्वेन कार्तिकेय इति व्यवहारो बोध्यः पावकादित्यसन्निभमित्यनेन यदि आदित्यः पावके स्थितः स्यात् तर्हि तेन सहोपमीयेत इति पर्यवसन्नाभूतोपमालंकारेण तस्यानुपमत्वं ध्वनितम् । सार्धश्लोक एकान्वयी ॥ १८ ॥

गो० टी०–तदिति । अर्धत्रयम् । तत्तेजः अग्निना व्याप्तं सत् श्वेतपर्वतः संजातः ततः कालपरिपाकेन शरवणं च संजातं शराणां वनं शरवणम् "प्रनिरन्तःशर–" इति णत्वम् । शरवणं विशेषयति–यत्रेति । कृत्तिकानामपत्यं पुमान् कार्तिकेयः "स्त्रीभ्यो ढक्" स्तन्यदानात्कृत्तिकापुत्रत्वम् अग्निना धृत्वा मुक्तत्वादग्निसंभवः ॥ १९ ॥

१९] ति० टी०–यत्रेति । किंचित्कालं धृतत्वात्कार्तिकेयस्त्ववदेवाग्निसंभवत्वं बोध्यम् ॥ १९ ॥

रा० टी०–अथेति । तदा स्वप्रार्थितसिद्धिकाले सुप्रीतमनसः सर्षिगणाः ऋषिगणसहिताः देवाः उमां देवीम् अथ मङ्गलं यथा स्यात्तथा अत्यर्थं पूजयामासुः तथैव शिवं च पूजयामासुः । पूर्वमुमां पूजयामासुरित्यनेन उमातः सुरा भीता इति ध्वनितम् तेन देव्याः कोपचेष्टा जातेति व्यक्तम् ॥ १९ ॥

गो० टी०–अथेति । पूजयामासुः मैथुनविघ्नकृतकोपशान्त्यर्थमित्यर्थः ॥ २० ॥

२०] ति० टी०–सुप्रीतमनसो लोकानुग्रहाय मूलतेजसो धृतत्वादेवकार्याय स्कन्नतेजसश्च दत्तत्वात्संतोषः । क्रियमाणामपि पूजामुमादेवी नाङ्गीकरोति स्म, प्रत्युत कुद्धैवाभूदित्याह–अथ शैलेति ॥ २० ॥

रा० टी०–अथेति । हे राम ! अथ देवकृतपूजानन्तरं समन्युः मन्युसहिता अत एव संरक्तलोचना शैलसुता सर्वान् त्रिदशानिदमब्रवीत् किमब्रवीदित्यत आह–अशपत् शापमददात् ॥ २० ॥

गो० टी०–अथेति । अब्रवीदित्येतद्विशिष्योच्यते–अशपदिति ॥ २१ ॥

२१] ति० टी०–किमब्रवीत्तदाह–अशपदिति । शापरूपं वचोऽब्रवीदित्यर्थः । मन्युकारणमाह–यस्मादिति ॥ २१ ॥

रा० टी०–शापस्वरूपं वर्णयन्नाह–यस्मादिति । पुत्रकाम्यया संगतिः सम्यक् गतिः पतिसंयोगो यस्याः सा अहं यस्मात् हेतोर्निवारिता भवद्भिः त्याजितपत्यत्यन्तसंयोगा तस्मात् अद्यप्रभृति इतः कालादारभ्य स्वेषु दारेषु अपत्यमुत्पादयितुं यूयं नार्हथ अत एव युष्माकं पत्नयः पत्न्यः अप्रजाः सन्तु । शापेन औरसपुत्रोत्पत्तिं संनिवार्य क्षेत्रजपुत्रोत्पत्तिं निवारयन्ती आह–अद्यप्रभृति युष्माकं पत्न्यः आत्मजान् पुत्रानेव जनयिष्यन्ति पत्यन्तरादपि नोत्पादयिष्यन्ती त्यर्थः । चशब्द एवार्थे । द्वयोरेकत्रान्वयः । पत्न्यो न जनयिष्यन्तीति श्लोकार्धं भट्टटीकाङ्कितपुस्तकेषु न दृश्यते तत्र हेतुर्लेखकप्रमादो बोध्यः । अत्र शापेन देवपुत्रनिवारणमेव कृतमित्यनेन पुत्रोत्पादनार्थमेव पार्वत्या रतिः न तु सुखार्थमिति ध्वनितम् तेन तस्याः परमानन्दस्वरूपता व्यक्ता ॥ २१ ॥ २२ ॥

गो० टी०–यस्मादिति । पुत्रकाम्यया मया संगतिः भर्तृसंयोगो मैथुनरूपः सा यस्मान्निवारिता तस्माद्यूयमपि स्वेषु दारेषु अपत्यं पुत्रं नोत्पादयिष्यथ ॥ २२ ॥

२२] ति० टी०–शापस्वरूपमाह–अपत्यमित्यादि॥२२॥

गो० टी०–अद्येति । पूर्वार्धेन पूर्वश्लोकपठितमुच्यते पत्नय इत्यार्ष ह्रस्वत्वम् ॥ २३ ॥

२३] ति० टी०–एवमुक्त्वा शपथरूपं वच इति शेषः । हे अवने पृथिवि ! नैकरूपा एकत्रैव क्षेत्रेऽनेकबीजफलजनकत्वात् बहुभार्याऽनेकभूपतिभोग्या ॥ २३ ॥

रा० टी०–रतिनिवारणसाक्षात्कारणभूतान्सुरान् शप्त्वा वीर्यधारणस्वीकारकर्तृत्वेन कारणीभूतां पृथ्वीमपि शशापेति वर्णयन्नाह–एवमिति । एवमनेन प्रकारेण सर्वान् सुरान् उक्त्वा शप्त्वेत्यर्थः पृथिवीमपि शशाप । तत् शापस्वरूपं वर्णयन्नाह–हे अवने ! बहुभार्या अनेकवीरभोग्या त्वं भविष्यसि नैकरूपा ऊषरादयनेकरूपवती च भविष्यसि । विनापि चं समुच्चयः ॥ २३ ॥

गो० टी०–अवन इति । सार्धश्लोकः । नैकरूपा ऊषरत्वादिरूपेण नानाविधा बहुभार्या बहूनां राज्ञां भार्या मम पुत्रम-

---

१ तदेति गो. पाठः । २ तत इति गो. पाठः । ३ चैवेति गो. पाठः । ४ संगतिरिति गो. रा. पाठः । ५ तस्मान्नोत्पादयिष्यथेति गो. पाठः । ६ अधिकमेतदर्धं रा. पाठे ।

न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता । प्राप्स्यसे त्वं सुदुर्मेधो[1] मम पुत्रमनिच्छती ॥ २४ ॥
तान्सर्वान्[2]पीडितान्दृष्ट्वा सुरान्सुरपतिस्तदा । गमनायोपचक्राम दिशं वरुणपालिताम् ॥ २५ ॥
स गत्वा तप आतिष्ठत्पार्श्वे तस्योत्तरे गिरेः । हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः ॥ २६ ॥
एष ते विस्तरो राम शैलपुत्र्या निवेदितः । गङ्गायाः प्रभवं चैव शृणु मे सहलक्ष्मण ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

सप्तत्रिंशः सर्गः ।

विस्तरेण कार्तिकेयोत्पत्तिवर्णनम् ।

तप्यमाने तदा देवे सेन्द्राः साग्निपुरोगमाः । सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥ १ ॥

निच्छती अनिच्छन्ती त्वं मत्क्रोधेन शापरूपेण कलुषीकृता विपर्यस्तप्रकृतिः सती पुत्रकृतां प्रीतिं न प्राप्स्यसीति भावः ॥२४॥

२४] ति० टी०–न च पुत्रकृतां प्रीतिम् वराहादुत्पन्नस्यापि नरकासुरस्य भौमस्य कृष्णावतारे तेनैव हननात् । सुदुर्मेध इति " नित्यमसिच्प्रजामेधयोः" इत्यसिच् । सुतरां दुष्टा मेधा यस्यास्तत्संबोधनं सुदुर्मेधः ! मम पुत्रमनिच्छती तेजोधारणानुमत्या यथेषा तत्तेजोधारणं नानुमन्येत तर्हि स पुत्रो ममैव स्यादित्याशयः ॥ २४ ॥

रा० टी०–शापान्तरमाह–न चेति । हे सुदुर्मेधे ! मम पुत्रमनिच्छती अत एव मत्क्रोधकलुषीकृता त्वं पुत्रकृतां प्रीतिं नैव प्राप्स्यसि । चशब्द एवार्थे ॥ २४ ॥

२५] ति० टी०–पीडितान्देवीशापदुःखितान् । उपचक्राम पादन्यासं कृतवान् ॥ २५ ॥

रा० टी०–तानिति । तदा शापोत्तरकाले सुरपतिः शिवः व्यथितान् शापेन दुःखितान् तान् सर्वान्सुरान्दृष्ट्वा वरुणपालितां दिशं पश्चिमां गमनाय गमनं कर्तुमुपचक्राम ॥२५॥

गो० टी०–तानिति । सुरपतिः रुद्रः तान्सुरान् स्वकीयशापेन व्रीडितान् लज्जितान् दृष्ट्वा प्रियाशापस्य दुष्परिहरत्वात् स्वीयशापदुःखस्य द्रष्टुमशक्यत्वाच्च वरुणपालितां दिशं हिमवतः प्रतीचीं प्रति गमनायोपचक्राम परस्मैपदमार्षम् ॥२५॥

२६] ति० टी०–तस्य गिरेर्हिमालयस्योत्तरपार्श्वे हिमवत्प्रभवाख्ये शृङ्गे ॥ २६ ॥

रा० टी०–स इति । स महेश्वरः महादेवः तस्य हिमालयस्य गिरेः उत्तरे पार्श्वे हिमवत्प्रभवे हिमवत्प्रभवाख्यशृङ्गे देव्या सह गत्वा तपः आतिष्ठत ॥ २६ ॥

गो० टी०–स इति । हिमवत्प्रभवे तस्य हिमवतो गिरेरुत्तरपार्श्वभूते शृङ्गे देव्या सह तप आतिष्ठत् सदा तपोव्रतमेसंकल्पयदित्यर्थः ॥ २६ ॥

२७] ति० टी०–उपसंहरति–एष इति । त्रिषु लोकेषु धर्मज्ञकर्मभिः कैः समन्वितेति प्रश्नोत्तरतया वक्तव्यस्य धारणरूपगङ्गाचरितस्य शेषतया शैलपुत्र्या विस्तारो निवेदितः । प्रकृतं प्रश्नोत्तरं वक्तुं प्रतिजानीते–गङ्गाया इति । प्रभवमिति च्छान्दसो ह्रस्वः । ऐशतेजोधारणरूपं प्रभावमित्यर्थः ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०–एष इति । शैलपुत्र्याः कनिष्ठाया एष विस्तरः ते तुभ्यं मया निवेदितः गङ्गाया अपि प्रभवं मे मत्त एव शृणु। चशब्दोऽप्यर्थे ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

गो० टी०–नन्वु दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि इति पार्वतीवृत्तान्तमुपेक्ष्य गङ्गावैभव एव मया पृष्टे तद्विहायोपेक्षितमेव पार्वतीवृत्तान्तं किमर्थं कथितवानसीति रामस्य शङ्कां परिहरति–एष इति । शैलपुत्र्याः पार्वत्याः संबन्धी कथाविस्तरो निवेदितः वक्ष्यमाणगङ्गावैभवकथनोपयोगित्वेनोक्तः गङ्गायाः प्रभवं प्रभावं त्वं शृणु । चः प्राधान्ये ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

१] ति० टी०–देवे शिवे । सेन्द्राः देवा इति शेषः साग्निपुरोगमाः अग्निना पुरोगमेन सहिता इत्यर्थः । ' सेन्द्राः सर्षिगणाः पुरा ' इति क्वचित्पाठः ॥ १ ॥

रा० टी०–तपःप्रारम्भानन्तरकालिकं वृत्तमाह–तप्यमान इति । तदा शापोत्तरकाले देवे महादेवे तप्यमाने सेनापतिमभीप्सन्तः वाञ्छन्तः सेन्द्रा इन्द्रसहिता अग्निपुरोगमाः पुरोगमाग्निसहिताः सर्वे देवाः पितामहं ब्रह्माणमुपागमन् तत्समीपं प्राप्तुः ॥ १ ॥

गो० टी०–अथ प्रतिज्ञातं स्कन्दोत्पादकत्वरूपं तदिष्यसंभववैभवमाह सप्तत्रिंशे–तप्यमान इत्यादि । तप्यमाने तपःकर्मकत्वादात्मनेपदकर्मवद्भावौ देवसेनापतित्वं विहाय केवलतपःप्रवण इत्यर्थः ॥ १ ॥

---

१ मेधे इति गो. रा. पाठः । २ व्रीडितानिति गो. व्यथितानिति रा. पाठः । ३ तपो देवे देवाः सर्षिगणाः पुरा इति गो. पाठः । ४ समकल्पयदिति युक्तम् ।

ततोऽब्रुवन्सुराः सर्वे भगवन्तं पितामहम् । प्रणिपत्य सुरा राम सेन्द्राः साग्निपुरोगमाः ॥ २ ॥
येन[1] सेनापतिर्देवदत्तो भगवता पुरा । स तपः परमास्थाय तप्यते स्म सहोमया ॥ ३ ॥
यदत्रानन्तरं कार्यं लोकानां हितकाम्यया । संविधत्स्व विधानज्ञ त्वं हि नः परमा गतिः ॥ ४ ॥
देवैतानां वचः श्रुत्वा सर्वलोकपितामहः । सान्त्वयन्मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत् ॥ ५ ॥
शैलपुत्र्या यदुक्तं तन्न प्रजाः स्वासु पत्निषु । तस्या वचनमक्लिष्टं सत्यमेवं न संशयः ॥ ६ ॥
इयमाकाशगङ्गा च यस्यां पुत्रं हुताशनः । जनयिष्यति देवानां सेनापतिमरिन्दमम् ॥ ७ ॥
ज्येष्ठा शैलेन्द्रदुहिता मानयिष्यति तं सुतम् । उमायास्तद्धहुमतं भविष्यति न संशयः ॥ ८ ॥

२] ति० टी०–अत्र ' सुराः सर्वे' इति पुनरुक्तमतः पाठान्तरमन्वेषणीयम् । द्वितीयार्धे ' सुराराम' इति पाठः रामसंबोधनं चैतत् ॥ २ ॥

रा० टी०–तत इति । सर्वे सर्वेषां मुनीनामीरीप्सितप्राप्तिः यस्मात् तत्संबोधनं हे सर्वे । किञ्च सर्वान् एति स्वप्रकाशब्रह्मद्वारा व्याप्नोति तत्संबोधनम् । सुराः परमदातर्हे राम ! ततः ब्रह्मसमीपप्राप्त्यनन्तरं सेन्द्राः साग्निपुरोगमाः सर्वे सुराः भगवन्तमतिसामर्थ्यविशिष्टं पितामहमब्रुवन् । एतेनात्र सुराः सर्वे इति पुनरुक्तमतः पाठान्तरमन्वेषणीयम् इति भट्टोक्तिश्चिन्त्या उक्तरीत्या पौनरुक्त्यस्पर्शाभावात् यत्तु क्रियाभेदात्र पौनरुक्त्यमिति भूषणकृद्भिरुक्तं तदपि चिन्त्यम् समानकर्तृके क्त्वोर्नुशासनेन पौनरुक्त्यतादवस्थ्यात् ॥ २ ॥

गो० टी०–तत इति । अग्निना पुरोगमेन सहिताः साग्निपुरोगमाः सुराः सर्वे प्रणिपत्य सुराः सर्वे अब्रुवन्निति क्रियाभेदात्र पुनरुक्तिः ॥ २ ॥

३] ति० टी०–येन रुद्रेण सेनापतिर्बीजात्मना दत्तः स परमास्थाय परं मौनमङ्गीकृत्य तपस्तप्यतेऽनुतिष्ठति ॥ ३ ॥

रा० टी०–तदुक्तिमेवाह–य इति । देव हे ब्रह्मन् ! नोऽस्मभ्यं यः सेनापतिः भगवता त्वया पुरा पूर्वं दत्तः स उमया पार्वत्या सह परं तपः आस्थाय निश्चित्य तप्यतेस्म ॥ ३ ॥

गो० टी०–यो न इति । भगवता भवता यः सेनापतिरस्मभ्यमादिकाले दत्तः स इदानीमुमया सह तप्यते स्मेति प्रसिद्धौ ॥ ३ ॥

४] ति० टी०–अनन्तरं बीजदातुरुपरमानन्तरं यत्कार्यं पुत्राकारसंपत्तये विधेयं तत्संविधत्स्व ॥ ४ ॥

रा० टी०–यदिति । अत्र सेनापतिनियोगविषये लोकानां हितकाम्यया यत् कार्यं कर्तव्यं तत् अनन्तरं शीघ्रं त्वं संविधत्स्व कुरु । तत्र हेतुः हे विधानज्ञ ! नोऽस्माकं परमा गतिः त्वमेव हिशब्द एवार्थे ॥ ४ ॥

गो० टी०–यदिति । अनन्तरं सेनापतावन्यपरे सति अत्र सेनापतिविषये यत्कार्यं तत्संविधत्स्व आलोचय तमेवाहूय सैनापत्ये निवेशय अन्यं वोत्पादयेत्यर्थः ॥ ४ ॥

५] ति० टी०–सान्त्वयन् इष्टकार्यालाभखिन्नानिति शेषः॥५॥

रा० टी०–देवानामिति । सर्वलोकपितामहो ब्रह्मा देवानां वचनं श्रुत्वा मधुरैः वाक्यैः त्रिदशान्देवान् सान्त्वयन् इदं वचनमब्रवीत् ॥ ५ ॥

गो० टी०–देवानामिति । सान्त्वयन् उग्रे तपसि वर्तमानस्य तस्य रुद्रस्य निवर्तनमशक्यं तत्र नाभिनिवेशः कार्य इति समाधान इत्यर्थः ॥ ५ ॥

६] ति० टी०–यद्यस्माच्छैलपुत्र्या ' अप्रजा भविष्यथः इत्युक्तं तत्तस्मात्युष्माकं स्वासु पत्नीषु न प्रजाः सन्तीति शेष' पत्निष्विति ह्रस्वत्वं छान्दसम यतस्तस्या वचनमक्लिष्टममोघम् । एवं च ' प्रजास्वथ' इति पाठकल्पना छान्दसत्वकल्पना च विफलैव ॥ ६ ॥

रा० टी०–तद्वचनमेवाह–शैलपुत्र्येति । स्वासु पत्नीषु प्रजाः न उत्पादयितुमर्हेयेति शेषः इति शैलपुत्र्या यदुक्तं तस्यास्तद्वचनमक्लिष्टं बाधारहितमत एव सत्यमेव न संशयः अत्र संशयो न कार्य इत्यर्थः एतेन वयं कंचन तेजस्विनं पुत्रमुत्पाद्य सेनापतिं करिष्याम इत्याशा न कर्तव्येति ध्वनितम् पत्निष्विति ह्रस्वश्छान्दसः ॥ ६ ॥

गो० टी०–अन्यं वोत्पादयेत्यत्र प्रतिवक्ति–शैलेति । शैलपुत्र्या पार्वत्या देवानां पत्निषु प्रजा न सन्तीति यदुक्तं तद्वचनमक्लिष्टममोघं मया सत्यमेवोच्यते अत्र संशयो भवद्भिर्न कर्तव्यः ॥ ६ ॥

७] ति० टी०–तर्हि का गतिस्तत्राह–इयमिति । यस्यां हुताशनः पुत्रं जनयिष्यति सेयमाकाशगङ्गा आस्ते इति शेषः ॥ ७ ॥

रा० टी०–नन्वु तर्हि कः सेनापतिः भविष्यतीत्यत आह–इयमिति । हुताशनो वह्निः यस्यामरिन्दमं देवशत्रूणां नाशकं सेनापतिं पुत्रं जनयिष्यति सा इयमेव आकाशगङ्गा एतेन इयं भवद्भिः पूजनीयेति ध्वनितम् । चशब्द एवार्थे ॥ ७ ॥

गो० टी०–तर्हि का गतिरित्यत्राह–इयमिति । इयं बुद्धिस्था अस्तीति शेषः ॥ ७ ॥

८–९] ति० टी०–ज्येष्ठोमा स्वकनिष्ठापत्यत्वात्स्वापत्यवन्मानयिष्यतीत्यर्थ इति कतकः, तत्र पूर्वं गङ्गाया एव ज्येष्ठत्वोक्त्या तेन विरोधात् तस्माज्ज्येष्ठा गङ्गा स्वकनिष्ठोमापत्य-

१ सर्वे इति गो. रा. पाठः । २ यो न इति गो. रा. पाठः । ३ देवानां वचनमिति रा. पाठः । ४ एतदिति गो. पाठः । ५ आकाशगा गङ्गेति गो. पाठः ।

तच्छ्रुत्वा वचनं तस्य कृतार्था रघुनन्दन । प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥ ९ ॥
ते गत्वा परमं राम कैलासं धातुमण्डितम् । अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः ॥ १० ॥
देवकार्यमिदं देव समाधत्स्व हुताशन । शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज ॥ ११ ॥
देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः । गर्भं धारय वै देवि देवतानामिदं प्रियम् ॥ १२ ॥
इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत् । स तस्या महिमां दृष्ट्वा समन्तादवशीर्यत ॥ १३ ॥
समन्ततस्तदा देवीमभ्यषिञ्चत पावकः । सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन ॥ १४ ॥

त्वान्मानयिष्यतीत्यर्थः उमाशिवसंयोगेन च्युतरेतोरजोभ्यामुत्पत्तेरुमापत्यत्वमत एवाह–उमाया इति । तत्स्वापत्यसंमाननम् ॥ ८ ॥ ९ ॥

रा० टी०–तस्मिन् शैलसुतोभयपुत्रत्वमिति बोधयन्नाह–ज्येष्ठेति । ज्येष्ठा पूर्वं प्रादुर्भूता शैलेन्द्रदुहिता गङ्गा तं सेनापतिं सुतं मानयिष्यति स्वजलात् उत्पन्नत्वादिति भावः तत् गङ्गामानविषयीभूतसुमायाः बहुमतं शिवसंसर्गजनितस्वरजोहेतुकजनिमत्त्वेनात्यन्तप्रेमविषयीभूतं भविष्यति न संशयः अस्मिन्विषये संशयो न कार्यः एतेन तत्सेनापतेरजेयत्वं सूचितम् ॥ ८ ॥

गो० टी०–कथमिदं गङ्गा संमन्यते कुतो वोमा न कुप्येत्तत्राह–ज्येष्ठेति । तत्सुतमग्नेः सुतं मानयिष्यति बहुमतिपूर्वं जनयिष्यतीत्यर्थः । तदुमाया बहुमतं स्वज्येष्ठायाः प्रीत्यर्थत्वादिति भावः ॥ ८ ॥

रा० टी०–तदिति । हे रघुनन्दन ! तस्य पितामहस्य तद्वचनं श्रुत्वा कृतार्थाः सर्वे सुराः पितामहं प्रणिपत्य अपूजयन् ॥ ९ ॥

गो० टी०–तदिति । कृतार्थाः कृतार्थप्रायाः ॥ ९ ॥

१०] ति० टी०–कैलासपर्वतं गत्वेत्यन्वयः ॥ १० ॥

रा० टी०–ते इति । हे राम ! सर्वदेवताः सर्वः शिवो विष्णुर्वा देवता येषां ते सर्वदेवाः धातुमण्डितं कैलासपर्वतं गत्वा पुत्रार्थं कर्तव्यसेनापतिसुतप्रसवार्थमग्निं नियोजयामासुः । दन्त्यादिरपि सर्वशब्दः शिववाचकोऽस्तीति कोशादौ प्रसिद्धं विष्णुपरता तु सूनमस्मिन्निखिलमिति व्युत्पत्त्या लब्धा अत एव 'सर्वः शर्व' इति सहस्रनामोक्तिः संगच्छते एतेन देवताशब्दः पुँल्लिङ्गोऽप्यस्ति 'पुंसि वा देवतास्त्रियाम्' इत्यनुशासनादिति भूषणोक्तिश्चिन्त्या पुंसिवेत्यस्य पूर्वान्वयित्वात् ॥ १० ॥

गो० टी०–त इति । दैवतशब्दः पुँल्लिङ्गोऽप्यस्ति 'दैवतानि पुंसि वा' इत्यनुशासनात् । दग्धरुद्रतेजसोऽग्नेः स्थानं कैलासः पुत्रार्थं पुत्रोत्पादनार्थमग्निमूर्त्यन्तरं दग्धरुद्रतेजःस्थम् ॥ १० ॥

११] ति० टी०–समाधत्स्व कुरु महातेज इति संबुद्धिः शैलपुत्र्यां गङ्गायामीशं तेज उत्सृजेत्यन्वयः ॥ ११ ॥

रा० टी०– तन्नियोजनमेवाह–देवकार्यमिति । हे महातेजः देव हुताशन ! इदं देवकार्यं समाधत्स्व त्वं साधय । किंतत् कार्यमित्यत आह–शैलपुत्र्यां गङ्गायां तेजः स्वेन गृहीतं शिवरेतः उत्सृज ॥ ११ ॥

गो० टी०–देवेति । संविधत्स्व संपादय अस्य विवरणमुत्तरार्धं प्रथमं सामान्येनोक्तिरग्निहृदयज्ञानाय महातेज इति संबोधनं तेजः रेतः ॥ ११ ॥

१२] ति० टी०–प्रतिज्ञाय तथा करोमीति प्रतिज्ञाय इदं गर्भधारणं देवतानां प्रियमित्यन्वयः ॥ १२ ॥

रा० टी०–देवतानामिति । पावकः देवतानामग्ने प्रतिज्ञाय भवदुक्तमवश्यं करिष्यामीति प्रतिज्ञां कृत्वा गङ्गामभ्येत्य प्राप्य हे देवि ! गर्भं गर्भकारणीभूतं मया धृतं शिवरेतः धारय स्वस्मिन्संस्थापय तत्र हेतुः देवतानामिदमेव प्रियमिति प्रार्थयामासेति शेषः । वैशब्द एवार्थे ॥ १२ ॥

गो० टी०–देवतानामिति । देवताभ्यस्तथेति प्रतिज्ञायाकाशगङ्गां गत्वा हे देवि ! गर्भं धारय इत्युवाचेति शेषः । किमर्थमित्यत आह–देवतानामिदं प्रियमिति ॥ १२ ॥

१३] ति० टी०–दिव्यं रूपमधारयत् स्रोतोरूपं मुक्त्वेति शेषः । तस्या महिमां दिव्यरूपं वैभवम् स ऐश्वरतेजोराशिः पारदोऽवशीर्यत शीर्णः उत्तमस्त्रीदर्शने रसेश्वरस्य तद्ग्रहणायोच्छलनं द्वियोजनपर्यन्तामिति सुप्रसिद्धम् । यद्वा सोऽग्निरवशीर्यत ऐश्वरं तेजस्त्यक्तवानित्यर्थः ॥ १३ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण एतत् वह्निप्रार्थितं वचनं गङ्गा श्रुत्वा दिव्यरूपं प्राकृतविलक्षणमात्मीयस्वरूपमधारयत् प्रकटयामासेत्यर्थः । सः वह्निः तस्याः गङ्गायाः महिमां रूपमहत्त्वं दृष्ट्वा समन्तात् अवकीर्यत स्वेन धारितं शिवतेजः प्राक्षिपत् श्यन्नड्विरहश्चार्षः 'अवशीर्यत' इति भट्टसंमतः पाठः ॥ १३ ॥

गो० टी०–तस्येति । दिव्यरूपं दिव्यस्त्रीवेषं सोऽग्निस्तस्या महिमानं सौन्दर्यातिशयं दृष्ट्वा समन्तात्सर्वावयवेभ्यः अवकीर्यत अवाकिरत् आर्षः श्यन्प्रत्ययः हृतवीर्योऽभूत् 'अङ्गारसदृशी नारी घृतकुम्भसमः पुमान्' इतिन्यायात् ॥ १३ ॥

१४] ति० टी०–अभ्यषिञ्चतेति रसेश्वरेणेति शेषः स्रोतांसि नाड्यः ॥ १४ ॥

रा० टी०–समन्तत इति । हे रघुनन्दन ! पावकः यत् शिवतेजः समन्ततः देवीमभ्यषिञ्चत् तेन शिवतेजसा गङ्गाया

१ पर्वतमिति गो. रा. पाठः । २ तस्य तदिति गो. पाठः । ३ दृष्ट्वा तन्महिमानं स इति गो. पाठः ।

तमुवाच ततो गङ्गा सर्वदेवपुरोगमम् । अशक्ता धारणे देव तेजस्तव समुद्धतम् ॥ १५ ॥
दह्यमानाग्निना तेन संप्रव्यथितचेतना । अथाब्रवीदिदं गङ्गां सर्वदेवहुताशनः ॥ १६ ॥
इह हैमवते पार्श्वे गर्भोऽयं संनिवेश्यताम् । श्रुत्वा त्वग्निवचो गङ्गा तं गर्भमतिभास्वरम् ॥ १७ ॥
उत्ससर्ज महातेजाः स्रोतोभ्यो हि तदानघ । यदस्या निर्गतं तस्मात्तप्तजाम्बूनदप्रभम् ॥ १८ ॥
काञ्चनं धरणीं प्राप्तं हिरण्यमतुलप्रभम् । ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभिजायत ॥ १९ ॥
मलं तस्याभवत्तत्र त्रपु सीसकमेव च । तदेतद्धरणीं प्राप्य नानाधातुरवर्धत ॥ २० ॥

सर्वस्रोतांसि पूर्णानि आसन्निति शेषः । अत्र दिव्यस्त्रीरूपस्य रेतस्सिक्तत्वेपि सर्वस्रोतांसि पूर्णानीत्युक्त्या प्रवाहतद्रूपयोरभेदः सूचितः ॥ १४ ॥

गो० टी०–समन्तत इति । समन्ततः सर्वावयवेषु अभ्यषिञ्चत रेतः सर्वावयवेषु यथा व्याप्तं भवति तथा सिक्तवानित्यर्थः तेन सर्वस्रोतांसि सर्वावयवाः पूर्णानि व्याप्तानि ॥ १४ ॥

१५] ति० टी०–पुरोगमः पुरोयायी हितकरश्च । तवाग्नेयेन तेजसा संबन्धात् समुद्धतमत्युग्रं तेजः शैवं यतोऽतस्तस्य धारणेऽहमशक्तेत्यन्वयः ॥ १५ ॥

रा० टी०–तमिति । ततः स्रोतसां रेतोव्याप्तत्वानन्तरं सर्वदेवपुरोहितं तमग्निं तेन प्रक्षिप्तेन अग्निना शिवरेतस्तेजसा दह्यमाना अत एव संप्रव्यथितचेतना गङ्गा हे देव ! समुद्धतं प्रवृद्धं यत्तव तेजस्त्वत्प्रक्षिप्तं शिवरेतस्तस्य धारणे अहमशक्तेत्युवाच सार्धश्लोक एकान्वयी । अग्नेः सर्वदेवपुरोहितत्वम् ' अग्निमीळे पुरोहितम् ' इत्यादिश्रुत्या प्रसिद्धम् ' सर्वदेवपुरोगमम् ' इति भट्टसंमतः पाठः ॥ १५ ॥

गो० टी०–तमित्यर्धत्रयम् । तेनाग्निना अग्नितेजसा दह्यमाना अत एव संप्रव्यथितचेतना अतिदुःखितचित्ता गङ्गा सर्वदेवानां पुरोहितम् "अग्निमीळे पुरोहितम्" इति श्रुतेः तमग्निमुवाच । कथं हे देव ! तव तेजः समुद्धतमभिवृद्धं भवति अस्य धारणे अशक्तास्मीति ॥ १५ ॥

१६] ति० टी०–संप्रव्यथितचेतना अस्मीति शेषः । सर्वदेवहुताशनः सर्वदेवोद्देशेन हुतस्य भक्षकः ॥ १६ ॥

रा० टी०–अथेति । अथ गङ्गावचनश्रवणानन्तरं सर्वदेवहुताशनः गङ्गामिदमब्रवीत् । तद्वचनमेवाह–इह अस्मिन् हैमवते पादे पादसदृशे स्थापनयोग्ये तदवयवे इत्यर्थः अयं गर्भः सन्निवेश्यताम् । 'हिमवत्पार्श्वे' इति भट्टसंमतः पाठः ॥ १६ ॥

गो० टी०–अथेति । सर्वदेवानां यद्धुतं तदभातीति सर्वदेवहुताशनः । पादे प्रत्यन्तपर्वते अग्निदग्धश्वेतपर्वतीकृतरुद्रतेजोराशावित्यर्थः ॥ १६ ॥

१७] ति० टी०–संनिवेश्यतां स्थाप्यताम् ॥ १७ ॥

रा० टी०–श्रुत्वेति । हे अनघ ! स्वाश्रिताघनिवर्तक हे महातेजः ! समाधिकरहिततेजोविशिष्ट ! तदा अग्निकथनसमये अग्निवचः श्रुत्वैव अतिभास्वरमतिप्रकाशमानं तं प्रसिद्धं गर्भं स्रोतोभ्यः उत्थाप्य उत्ससर्ज यथोचितदेशे तत्याज तुशब्द एवार्थे ॥ १७ ॥

गो० टी०–श्रुत्वेति । महातेज इति संबोधनं स्रोतोभ्य उत्कृष्येति शेषः ॥ १७ ॥

१८] ति० टी०–स्रोतोभ्य उत्कृष्य तत्तेजो हिमवत्पार्श्वे उत्ससर्जेत्यन्वयः । यद्यस्मादस्या निर्गतं तत्तस्माद्गङ्गागर्भतो निर्गमात्तत्तेजो जाम्बूनदाकारसुमेरुकन्यापत्यत्वाद्गङ्गायास्तप्तं जाम्बूनदं सुवर्णं तेन समप्रभम् आसीदिति शेषः ॥ १८ ॥

रा० टी०–यदिति । अस्याः गङ्गायाः निर्गतं गङ्गया त्यक्तं यत्तेजः तत् तप्तजाम्बूनदप्रभं द्रुतसुवर्णकान्तिकमभिजायत अभ्यजायत तस्मात्तेजसो विभज्य यत् धरणीं प्राप्तं तदपि अमलं काञ्चनं सुवर्णं शुभं हिरण्यं रजतं चाभिजायत तैक्ष्णात् तैक्ष्णस्य अत् प्राप्तिर्यस्मिन् तत् वस्तुजातं ताम्रकार्ष्णायसं चाभिजायत तत्र तस्मिन्समये तस्य तेजस्तैक्ष्णसंबद्धवस्तुजातस्य यन्मलं तत् त्रपु रङ्गं सीसकं च अभवत् द्वयोरेकत्रान्वयः । एकः एवशब्दोऽप्यर्थकः द्वितीयस्त्वर्थकः । अभिजायत इति पाठे तु आगमशास्त्रस्यानित्यत्वाददृविरहः ॥ १८ ॥ १९ ॥

गो० टी०–यदिति । अस्याः गङ्गातः निर्गतं यत् शोणितादि धरणीं गतं तस्मात्तप्तजाम्बूनदप्रभं द्रुतस्वर्णविशेषकान्ति काञ्चनममलं शुभं हिरण्यं रजतं च अभवदिति वक्ष्यमाणमनुषज्यते अमलमिति निर्गतविशेषणं वा ॥ १८ ॥

१९] ति० टी०–अत एव धरणीं प्राप्तं साक्षात्त्वसंबद्धधरणीस्थं वस्तु काञ्चनमकरोत् तत्समीपवर्ति भूसंस्थमतुलप्रभं हिरण्यं रजतमकरोत् । तत्तेजःसंबन्धितैक्ष्ण्यादेव तद्व्यवहितभूस्थं वस्तुजातं ताम्रं कार्ष्णायसं लोहमभिजायत अडभाव आर्षः ॥ १९ ॥

गो० टी०–ताम्रमिति । गङ्गातो निर्गतात् तैक्ष्ण्यात् क्षारात् ताम्रं काष्णायसं चाभ्यजायत तस्या गङ्गातः अभवत् निर्गच्छति स्म मलं तत्र भूमौ त्रपुसीसकं चाभ्यजायत कृष्णायसमेव कार्ष्णायसम् ॥ १९ ॥

२०] ति० टी०–तत्तस्य गर्भस्य मलं त्रपु सीसं चाभवत् । अयं भावः–तैक्ष्ण्यमलगन्धयुक्तेन शुद्धेन स्पर्शतो विद्धं स्वर्णम्, गन्धयुक्तेन विद्धं रजतम्, तैक्ष्ण्ययुक्तेन विद्धं ताम्रं लोहं च, मलयुक्तेन विद्धं त्रपुसीसे इति नानाधातुस्तद्रूपम् ॥ २० ॥

---

१ पुरोहितमिति गो. रा. पाठः । २ पादे इति गो. रा. पाठः । ३ अमलं शुभमिति गो. रा. पाठः । ४ ताम्रकार्ष्णायसमिति रा. पाठः ५ तैक्ष्णादिति रा. पाठः । ६ अभ्यजायत इति गो. पाठः ।

निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम् । सर्वं पर्वतसंनद्धं सौवर्णमभवद्वनम् ॥ २१ ॥
जातरूपमिति ख्यातं तदाप्रभृति राघव । सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभम् ॥
[तृणवृक्षलतागुल्मं सर्वं भवति काञ्चनम् ॥] ॥ २२ ॥
तं कुमारं ततो जातं सेन्द्राः सह मरुद्गणाः । क्षीरसंभावनार्थाय कृत्तिकाः समयोजयन्[1]॥ २३ ॥
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमम् । ददुः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः २४ ॥
ततस्तु देवताः सर्वाः कार्तिकेय इति ब्रुवन् । पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ॥ २५ ॥
तेषां तद्वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे । स्नापयन्परया लक्ष्म्या दीप्यमानं यथानलम्॥ २६ ॥

रा० टी०–उपसंहरन्नाह–तदिति । तत्प्रसिद्धमेतद्गर्भिणतं तेजः धरणीं प्राप्य नाना धातुः सन् अवर्धत ॥ २० ॥

गो० टी०–उपसंहरति–तदिति । तदेतत् गङ्गातो निर्गतम् ॥ २० ॥

२१] ति० टी०–न च स्पर्शवेधित्वमेव तस्य अपि तु रूपवेधित्वमपीत्याह–निक्षिप्तेत्यादि । संनद्धं संवद्धम् ॥२१॥

रा० टी०–तेजोराशिविभक्तस्य धरण्यां पतितस्य तेजसः सृष्टिं संवर्ण्य तेजोमयस्य गर्भस्य संबन्धेन यत्सर्जनं तद्वर्णयन्नाह–निक्षिप्तमात्रे इति । गर्भे निक्षिप्तमात्रे सति तेजोभिः गर्भप्रकाशैः अभिरञ्जितं प्रकाशितं पर्वतसंनद्धं पर्वतावयवः सर्वं वनं च सौवर्णमभवत् ॥ २१ ॥

गो० टी०–एवं गर्भोत्सर्जनकाले गङ्गातो निर्गतानां शोणितादीनां सौवर्णादिभावमुक्त्वा गर्भतेजारञ्जनात् केषांचित्स्रवणभावमाह–निक्षिप्तेति । गर्भे गङ्गया निक्षिप्तमात्रे तस्य तेजोभिरभिरञ्जितं व्याप्तं पर्वतसन्नद्धं पूर्वोक्तश्वेतपर्वतसहितं सर्वं तद्वनं शरवणं सौवर्णं स्वर्णमयमभवत् ॥ २१ ॥

२२] ति० टी०–जातरूपम् रूपेण जातमित्यर्थः ॥२२॥

रा० टी०–जातरूपमिति । हे राघव पुरुषव्याघ्र ! हुताशनसमप्रभं सुवर्णं तदाप्रभृति वनादीनां सुवर्णत्वप्राप्तिकालादारभ्य जातरूपमिति नाम्ना ख्यातं प्रसिद्धं जातं प्रकटीभूतं रूपमपूर्वस्वरूपं यस्येति व्युत्पत्त्येति भावः ॥ २२ ॥

रा० टी०–उपसंहरन्नाह–तृणेत्यर्धेन । सर्वं तृणवृक्षलतागुल्मं काञ्चनं भवति अभवदित्यर्थः पर्वतस्याप्युपलक्षणमिदम् वर्तमानसामीप्येनेति भूते लट् । इदमर्धं भट्टटीकाङ्कितपुस्तकेषु न दृश्यते ॥ २२ ॥

गो० टी०–जातेति । यदा सुवर्णं जातं तदाप्रभृति हुताशनसमप्रभं सुवर्णं जातं रूपं यस्येति व्युत्पत्त्या जातरूपमिति विख्यातमभूत् ॥ २२ ॥

गो० टी०–उपसंहरति–तृणेति ॥ २२

२३] ति० टी०–तं कुमारमिति । ततो रुद्रतेजसो जातं क्रमेण साकारतां प्राप्तम् क्षीरसंभावनार्थाय क्षीरपानप्रयोजनसिद्धये । कृत्तिकाः कृत्तिकाभिः यद्वा समयोजयन्नित्यस्य प्रैरयन्नित्यर्थः ॥ २३ ॥

रा० टी०–तमिति । ततः गर्भत्यागानन्तरं जातमुत्पन्नं तं प्रसिद्धं कुमारं सेन्द्रा इन्द्रसहिता मरुद्गणा देवाः क्षीरसंभावनार्थाय क्षीरस्य संभावना सम्यक् प्राप्तिः सैव अर्थः प्रयोजनं तस्मै कृत्तिकाः षट्तारकाः सह एककालावच्छेदेन समपूजयन् सत्कारेण क्षीरपायने न्ययोजयन्नित्यर्थः ॥ २३ ॥

गो० टी०–एवं गङ्गयोत्सृष्टस्य गर्भस्य पोषणप्रकारमाह–तमिति । ततः गङ्गोत्सर्जनानन्तरं जातं तं कुमारं मरुद्गणा देवगणाः सह युगपत् क्षीरसंभावनार्थाय क्षीरेण वर्धनप्रयोजनाय कृत्तिकाः समयोजयन् ण्यन्तत्वाद्विकर्मकत्वम् ॥ २३ ॥

२४] ति० टी०– अथ ताः कृत्तिका अस्माकं सर्वासां पुत्रो भवत्वित्युत्तमं समयं कृत्वा निश्चितास्तद्विषयकनिश्चयवत्यो जातमात्रस्य तस्य क्षीरं ददुरित्यन्वयः ॥ २४ ॥

रा० टी०–ता इति । ताः स्तन्यपायने नियोजिता अत एव अयमस्माकं सर्वासां पुत्रो भवितेति शेषः इति निश्चिताः षट् कृत्तिकाः उत्तमं सर्वेप्सितत्वेन श्रेष्ठं समयमेककालावच्छेदेन सर्वा वयं पाययिष्याम इति संकेतं कृत्वा जातमात्रस्य क्षीरं ददुः एतेन तस्य षडाननानि जातानीति व्यक्तम् ॥ २५ ॥

गो० टी०–ता इति । कृत्तिकाः अयमस्माकं सर्वासां पुत्रो भवत्विति देवैः सह समयं संकेतं कृत्वा निश्चिताः कृतनिश्चयाः सत्यः जातमात्रस्य तस्य क्षीरं ददुः दातुमुद्युक्ताः ॥ २५ ॥

२५] ति० टी०–ततः सर्वदेवता युष्माकमयं पुत्रः कार्तिकेय इति त्रैलोक्यविख्यातो भविष्यति अत्र संदेहो नेति ब्रुवन् अब्रुवन्नित्यर्थः अडभाव आर्षः ॥ २५ ॥

रा० टी०–तत इति । ततः कृतनिश्चयाद्धेतोः सर्वा देवताः कार्तिकेय इति त्रैलोक्यविख्यातः पुत्रः अयं सुतः भविष्यति संशयः अस्मिन् विषये संदेहो न इति ब्रुवन् आगमशास्त्रस्य अनित्यत्वादङ्विरहः । इतिशब्दः आदृत्या उभयत्रान्वेति ॥२६॥

गो० टी०–तत इति । उक्तविशेषणः पुत्रः कार्तिकेयः कृत्तिकापुत्रो भविष्यति इति ब्रुवन् अब्रुवन् ॥ २६ ॥

२६] ति० टी०–तेषां देवानां तत्स्वेष्टानुकूलं वचनं श्रुत्वा स्कन्नमादावीश्वरयोः सकाशात्स्कन्नं पश्चाद्गङ्गाया गर्भात्परिस्रवे सति परया लक्ष्म्या दीप्यमानमनलमिव दुःस्पर्शं दुःस्पर्शतानिवृत्तिप्रयोजनकशैत्यसिद्धये ताः स्नापयन् अस्नापयन्नित्यर्थः ॥ २६ ॥

रा० टी०–तेषामिति । तेषां देवानां तत् स्वेष्टसिद्धिसूचकं वचनं श्रुत्वा गर्भपरिस्रवे गर्भश्च परिस्रवो गङ्गाप्रवाहश्चा-

१ अर्धमेतदाधिकं गो. रा. पाठे । २ समपूजयन्निति गो. रा. पाठः

स्कन्द इत्यब्रुवन्देवाः स्कन्नं गर्भपरिस्रवे । कार्तिकेयं महाबाहुं काकुत्स्थ ज्वलनोपमम्॥ २७ ॥
प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमम् । षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः ॥ २८ ॥
गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा । अजयत्स्वेन वीर्येण दैत्यसैन्यगणान्विभुः ॥ २९ ॥
सुरसेनागणपतिमभ्यषिञ्चन्महाद्युतिम् । ततस्तममराः सर्वे समेत्याग्निपुरोगमाः ॥ ३० ॥
एष ते राम गङ्गाया विस्तरोऽभिहितो मया । कुमारसंभवश्चैव धन्यः पुण्यस्तथैव च ॥ ३१ ॥
भक्तश्च यः कार्तिकेये काकुत्स्थ भुवि मानवः । अयुष्मान्पुत्रपौत्रैश्च स्कन्दसालोक्यतां व्रजेत् ॥३२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

नयोः समाहारः । किंच गर्भोऽन्यायुदर एव स्रवः प्रवाहस्तस्मिन् स्कन्नं प्राप्तमत एव परया उत्कृष्टया लक्ष्म्या शोभयाऽनलमिव दीप्यमानं बालं स्नापयन् षट् कृत्तिका इति शेषः । आगमशास्त्रस्य अनित्यत्वाददूषितरहः ॥ २७ ॥

गो० टी०–तेषामिति । कृत्तिकाः गर्भपरिस्रवे गर्भोदके स्कन्नं पतितं स्नापयन् अस्नापयन् गर्भस्रवनिवृत्त्यर्थम् ॥ २७ ॥

२७] ति० टी०–ततः स्कन्नपरिस्रुतत्वहेतोः पूर्वं कार्तिकेयत्वेनोक्तं स्कन्द इत्यन्वर्थनाम्नाब्रुवन्नित्यन्वयः स्कन्नपरिस्रुत इत्यर्थे स्कन्द इति पृषोदरादित्वात्साधुः ॥ २७ ॥

रा० टी०–स्कन्द इति । काकुत्स्थ हे राम ! महाभागं ज्वलनोपममग्निसदृशं कार्तिकेयं गर्भपरिस्रवे बहुगर्भे स्कन्नं प्राप्तं बालं स्कन्द इति देवाः अब्रुवन् स्कन्दति बहुगर्भं प्राप्नोति इति व्युत्पत्त्या स्कन्दं प्राहुरित्यर्थः ॥ २८ ॥

गो० टी०–स्कन्द इति । स्कन्नत्वात् स्कन्द इत्यन्वर्थनाम चक्रुरित्यर्थः ॥ २८ ॥

२८] ति० टी०–ततः कृत्तिकानां क्षीरं प्रादुर्भूतम् आसीदिति शेषः ततः षण्णामपि स्तनजं पयः क्षुधातिशयेन षडाननो भूत्वा जग्राह ॥ २८

रा० टी०–प्रादुरिति । षण्णां कृत्तिकानामनुत्तममतिश्रेष्ठं क्षीरं प्रादुर्भूतं ततः क्षीरप्रादुर्भावानन्तरं स्तनजं पयः षडाननो भूत्वा जग्राह कार्तिकेय इति शेषः ॥ २९ ॥

गो० टी०–प्रादुर्भूतमिति । ततः स्नापनानन्तरं षण्णां कृत्तिकानां क्षीरं प्रादुर्भूतं तच्च स्तनजं पयः षडाननो भूत्वा जग्राह ॥ २९ ॥

२९] ति० टी०–एवं तदा षड्भिर्मुखैर्यावदपेक्षितं क्षीरं गृहीत्वैकाह्नैकदिनेनैव सुकुमारवपुरपि स्वतेजसैव दैत्यसैन्यगणानजयत् ॥ २९ ॥

रा० टी०–गृहीत्वेति । सुकुमारवपुः विभुः समर्थः कार्तिकेयस्तदा क्षीरग्रहणकाले एकाह्ना एकदिनेन क्षीरं गृहीत्वा स्वेन वीर्येण दैत्यसैन्यगणान् अजयत् ॥ ३० ॥

गो० टी०–गृहीत्वेति । एकाह्नेति टजभावः समासान्तस्यानित्यत्वात् एकदिनेन स्तन्यं पीत्वा क्रमेण सुकुमारवपुरपि दैत्यगणानजयत् ॥ ३० ॥

३०] ति० टी०–ततः सकलासुरजयाद्धेतोः सर्वेऽग्निपुरोगमा देवाः समेत्य सुरसेनागणपतिं तमभ्यषिञ्चन्नित्यन्वयः॥३०॥

रा० टी०–सुरेति । ततः असुरजयानन्तरमतुलद्युतिमतुपमप्रकाशं कार्तिकेयमग्निपुरोगमाः अग्निः पुरोगमो येषां ते सुरगणाः समेत्य तत्समीपं प्राप्य सुरसेनागणपतिमभ्यषिञ्चन् सेनापतित्वेनाभिषेकं चक्रुरित्यर्थः ॥ ३१ ॥

गो० टी०–सुरेति । सुरसेनागणपतित्वेनाभ्यषिञ्चन्नित्यर्थः प्रथममभिषेकस्ततो जय इत्यर्थक्रमः ॥ ३१ ॥

३१] ति० टी०–उपसंहरति–एष इत्यादिना ॥ ३१ ॥

रा० टी०–एष इति । हे राम ! धन्यः धन्यत्वहेतुः पुण्यः पुण्यत्वहेतुश्च एषः एव गङ्गायाः विस्तरः ते तुभ्यं मया अभिहितः कथितः तथैव धन्यत्वपुण्यत्वहेतुत्वेन तत्सदृश एव कुमारसंभवश्च अभिहितः ॥ ३२ ॥

गो० टी०–एष इति । विस्तरः दिव्यसंभवः । तमेवाह–कुमारेति । एवमेतदाख्यानश्रवणफलमुक्तं धन्य इत्यादिना॥३२॥

३२] ति० टी०–धन्यत्वपुण्यत्वे विवृणोति–भक्तश्चेति । ऐहलौकिकफलेन धन्यत्वम् आमुष्मिकेन पुण्यत्वम् पुत्रपौत्रैश्चेत्यस्य युक्तः सन् देहत्याग इति शेषः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीये आदिकाव्ये बालकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०–भक्त इति । हे काकुत्स्थ ! भुवि यः कार्तिकेये भक्तः स पुरुषः पुत्रपौत्रैः युक्त एव आयुष्मान् सन् स्कन्दसालोक्यतां व्रजेत् चकारेण यः एतत् शृणुयात् पठेत् वा सोऽपि तत्फलं प्राप्नोतीत्यर्थः चकारान्तरमेवार्थक्रम ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

गो० टी०–अथ प्रसङ्गात्तद्भक्तिफलमाह–भक्तश्चेति । सलोक एव सालोक्यं स्वार्थे ष्यञ् तस्य भावः सालोक्यता स्कन्दसमानलोकत्वमित्यर्थः ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

१ परिस्रवादिति गो. पाठः । २ महाभागमिति गो. पाठः । ३ ततस्तमतुलद्युतिम् । अभ्यषिञ्चन्सुरगणा इति गो. रा. पाठः ।

अष्टात्रिंशः सर्गः ।

विश्वामित्रस्य रामं प्रत्युक्तिः, पौर्वकायोध्यापतिसगरस्योपाख्यानम् ।

तां कथां कौशिको रामे निवेद्य मधुराक्षराम् । पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥ १ ॥
अयोध्याधिपतिर्वीरः पूर्वमासीन्नराधिपः । सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः ॥ २ ॥
वैदर्भदुहिता राम केशिनी नाम नामतः । ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥ ३ ॥
अरिष्टनेमेर्दुहिता सुपर्णभगिनी तु सा । द्वितीया सगरस्यासीत्पत्नी सुमतिसंज्ञिता ॥ ४ ॥
ताभ्यां सह महाराजः पत्नीभ्यां तप्तवांस्तपः । हिमवन्तं समासाद्य भृगुप्रस्रवणे गिरौ ॥ ५ ॥
अथ वर्षशते पूर्णे तपसाराधितो मुनिः । सगराय वरं प्रादाद्भृगुः सत्यवतां वरः ॥ ६ ॥
अपत्यलाभः सुमहान्भविष्यति तवानघ । कीर्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ॥ ७ ॥
एका जनयिता तात पुत्रं वंशकरं तव । षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ॥ ८ ॥

१] ति० टी०–अथ त्रीन्पथो हेतुना केनेत्यादिप्रश्नस्योत्तरं वक्तुमाह–तां कथामिति । अपरं वाक्यं वक्ष्यमाणं प्रश्नोत्तरम् ॥ १ ॥

रा० टी०–गङ्गायास्त्रिपथगामित्वं वर्णयितुं कथान्तरमुपाक्रमतेत्याह–तामिति । कौशिकः विश्वामित्रः रामे तां वर्णितां कथां निवेद्य मधुराक्षरं मनोरमाक्षरविशिष्टमपरमन्यत् इदं वाक्यं काकुत्स्थं रामं पुनरप्यब्रवीत् । एवोऽप्यर्थे ॥१॥

गो० टी०–एवं दिव्यसंभवं विस्तरं प्रतिपाद्य मानुषलोकसंभवविस्तरं वक्तुमुपक्रमतेऽष्टत्रिंशे–तामित्यादि । रामे रामाय कौशिकशब्दार्थमाह–कुशिकात्मज इति ॥ १ ॥

२–३] ति० टी०–यस्मादप्रजस्तस्मात्प्रजाकामोऽभूदित्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–अयोध्येति । वीर हे राम ! धर्मात्मा धर्मबुद्धिः अप्रजः अनपत्यः प्रजाकामः अपत्यविषयकेच्छाविशिष्टः अयोध्याधिपतिः अयोध्याराजधानीकः स प्रसिद्धः सगरो नाम नराधिपो राजा पूर्वमेवासीत् नामतः प्रसिद्धमेतत् । चशब्द एवार्थे । रामेति ब्यक्षरं नाम मानभङ्गः पिनाकिन इत्यादाविव शब्दार्थयोस्तादात्म्यान्नामसगरशब्दार्थयोरभेदान्वयः ॥ २ ॥

गो० टी०–अयोध्येति । अप्रजः अत एव प्रजाकामः ॥२॥

रा० टी०–वैदर्भेति । हे राम ! धर्मिष्ठा सत्यवादिनी सा प्रसिद्धा केशिनी नाम वैदर्भराजदुहिता विदर्भराजकन्या ज्येष्ठा सगरपत्नी आसीदिति शेषः नामतः प्रसिद्धमेतत् ॥ ३ ॥

गो० टी०–वैदर्भेति । या वैदर्भदुहिता सा ज्येष्ठपत्न्यासीत् ॥ ३ ॥

४] ति० टी०–अरिष्टनेमिः कश्यपः अस्यां सुपर्णभगिनीत्यनुपदप्रयोगात् ॥ ४ ॥

रा० टी०–अरिष्टनेमेरिति । अरिष्टनेमेः कश्यपस्य दुहिता सा प्रसिद्धा सुपर्णभगिनी सुमतिसंज्ञिता द्वितीयापि सगरस्य पत्नी आसीत् तुशब्दोऽप्यर्थे ॥ ४ ॥

गो० टी०–अरिष्टेति । अरिष्टनेमिः काश्यपः ॥ ४ ॥

५–७] ति० टी०–भृगुप्रस्रवणे भृग्वधिष्ठितं प्रस्रवणं प्रवाहो यस्मिन् गिरौ हिमवत्पादपर्वते ॥ ५ ॥ ६ ॥ ७ ॥

रा० टी०–ताभ्यामिति । हिमवन्तं समासाद्य प्राप्य भृगौ भृगुशरीरे प्रस्रवणं प्रकृष्टं स्रवणं जलप्रवाहो यस्मात् किंच भृगोः प्रस्रवणमतिप्रचारो यस्मिन् तस्मिन् गिरौ हिमवत्पार्श्ववर्तिभृगुप्रस्रवणसंज्ञकपर्वते इत्यर्थः ताभ्यां पूर्वोक्ताभ्यां पत्नीभ्यां सह महाराजः सगरस्तपस्तप्तवान् ॥ ५ ॥

गो० टी०–ताभ्यामिति । भृग्वधिष्ठितं प्रस्रवणं वारिप्रवाहो यस्मिंस्तथा गिरौ पर्यन्तपर्वते ॥ ५ ॥

रा० टी०–अथेति । अथ तपःप्रारम्भानन्तरं वर्षशते पूर्णे सति तपसा सगरतपश्चर्यया आराधितस्तोषितः सत्यवतां वरो मुनिर्भृगुः सगराय वरं प्रादात् ॥ ६ ॥

गो० टी०–अथेति । वर्षशते पूर्णे तपस्यत इति शेषः ॥६॥

रा० टी०–वरप्रदानमेवाह–अपत्येति । हे अनघ ! सुमहान् अतिप्रसंशनीयोऽपत्यलाभः तव भविष्यति हेपुरुषर्षभ ! लोके अप्रतिमां तुलारहितां कीर्तिं च प्राप्स्यसे ॥ ७ ॥

गो० टी०–अपत्येति । सुबह्वपत्यविषयत्वात्सुमहत्वम् । कीर्तिमिति । तेनेति शेषः ॥ ७ ॥

८] ति० टी०–तातेत्युपलालने जनयिता जनयिष्यति षष्टिमिति नित्यैकवचनान्तत्वात्सहस्राणीत्यनेन सामानाधिकरण्यम् ॥ ८ ॥

रा० टी०–अपत्यसंख्यां बोधयन्नाह–एकेति । हे तात प्रिय ! एका पत्नी तव वंशकरं पुत्रं एकमित्यर्थः जनयिता अपरा द्वितीया पत्नी षष्टिं पुत्रसहस्राणिजनयिष्यति ॥ ८ ॥

गो० टी०–एकेति । जनयितेति लुट् तातेत्युपलालने ॥८॥

---

१ मधुराक्षरमिति रा. कुशिकात्मज इति गो. पाठः । २ शूर इति गो. रा. पाठः । ३ नेमिदुहितेति गो. पाठः । ४ तथा राजेति गो. पाठः ।

भाषमाणं नरव्याघ्रं राजपुत्र्यौ प्रसाद्य तम् । ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ॥ ९ ॥
एकः कस्याः सुतो ब्रह्मन्का वहूञ्जनयिष्यति । श्रोतुमिच्छावहे ब्रह्मन्सत्यमस्तु वचस्तव ॥ १० ॥
तयोस्तद्वचनं श्रुत्वा भृगुः परमधार्मिकः । उवाच परमां वाणीं स्वच्छन्दोऽत्र विधीयताम् ॥११॥
एको वंशकरो वास्तु बहवो वा महाबलाः । कीर्तिमन्तो महोत्साहाः का वा कं वरमिच्छति ॥१२॥
मुनेस्तु वचनं श्रुत्वा केशिनी रघुनन्दन । पुत्रं वंशकरं राम जग्राह नृपसंनिधौ ॥ १३ ॥
षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तदा । महोत्साहान्कीर्तिमतो जग्राह सुमतिः सुतान् ॥ १४ ॥
प्रदक्षिणमृषिं कृत्वा शिरसाभिप्रणम्य तम् । जगाम स्वपुरं राजा सभार्यो रघुनन्दन ॥ १५ ॥
अथ काले गते तस्यै ज्येष्ठा पुत्रं व्यजायत । असमञ्ज इति ख्यातं केशिनी सगरात्मजम् ॥ १६ ॥
सुमतिस्तु नरव्याघ्र गर्भतुम्बं व्यजायत । षष्टिः पुत्रसहस्राणि तुम्बभेदाद्विनिःसृता ॥ १७ ॥
घृतपूर्णेषु कुम्भेषु धात्र्यस्तान्समवर्धयन् । कालेन महता सर्वे यौवनं प्रतिपेदिरे ॥ १८ ॥

९] ति० टी०–राजपुत्र्यावित्यत्रच्छत्रिन्यायेन प्रयोगः॥९॥

रा० टी०–भाषमाणमिति । तदा वरप्रदानसमये भाषमाणं वरं ददतं महात्मानं तं प्रसिद्धं भृगुं कृताञ्जलिपुटे प्रणतिसूचकबद्धयुगलकरे परमप्रीते राजपुत्र्यौ क्षत्रियराजवैदर्भद्विजराजकन्ययपयोः पुत्र्यौ ऊचतुः राजशब्देनोभयोर्ग्रहणं विनिगमनाविरहात् योग्यत्वाच्च ॥ ९ ॥

गो० टी०–भाषमाणमिति । राजपुत्र्याविति छत्रिन्याया दुक्तं सुमतेः काश्यपपुत्रीत्वात् ॥ ९ ॥

१०] ति० टी०–इच्छावहे इच्छावः ॥ १० ॥

रा० टी०–तद्वचनमेवाह–एक इति । हे ब्रह्मन्! तव वचः सत्यमस्तु यस्याः यः पुत्रः तवाभिमतः तस्याः स एव भवत्वित्यर्थः परन्तु कस्या राजपुत्र्या एकः सुतो भविष्यतीति शेषः का राजपुत्री बहून् पुत्रान् जनयिष्यति इति श्रोतुमिच्छावहे आवामिच्छावः ॥ १० ॥

गो० टी०–एक इति । तव वचः सत्यमस्तु यस्या एकमिच्छसि तस्या एकः यस्या बहूनिच्छसि तस्या बहवः सन्त्वित्यर्थः ॥ १० ॥

११] ति० टी०–स्वच्छन्दः स्वेच्छा विधीयतां ज्ञाप्यताम् स्वेच्छयैवैकपुत्रता बहुपुत्रता वा त्रियतामिति तात्पर्यम् ॥११॥

रा० टी०–तयोरिति । तयो राजपुत्र्योस्तद्वचनं श्रुत्वा परमधार्मिको भृगुः परमां रमणीयां वाणीमुवाच । अत्र पुत्रोत्पत्तिविभागविषये स्वच्छन्दः स्वेच्छाचारः विधीयतां क्रियतां यथेच्छं त्रियतामित्यर्थः ॥ ११ ॥

गो० टी०–तयोरिति । अत्र पुत्रविषये स्वच्छन्दः स्वेच्छा विधीयतां ज्ञाप्यताम् ॥ ११ ॥

१२] ति० टी०–तदेवाह–एको वंशकरो वेति । वंशकरो वंशवृद्धिहेतुः ॥ १२ ॥

रा० टी०–स्वच्छन्दतां विवृण्वन्नाह–एक इति । वंशकरः एक एव अस्तु महाबला महोत्साहा बहवः कीर्तिमन्त एव वा सन्तु । का वा क्षत्री राजकन्या द्विजराजकन्या वा कं वा वंशकरमेकं पुत्रं कीर्तिमतो बहून् वा पुत्रान् इच्छति इच्छतु । एतेन यस्या यत्पुत्रविषयिणीच्छा तस्यास्तत्पुत्रप्राप्तिर्भविष्यतीति ध्वनितं तेन भृगोर्दयालुत्वातिशयः सूचितः एकस्मिन्नेव वंशकरत्वोक्त्या बहूनां वंशकरत्वाभावो ध्वनितः सर्वं वाक्यं सावधारणं भवतीति न्यायेनोभयत्रैवकारलाभः ॥ १२ ॥

गो० टी०–तदेव विवृणोति–एक इति ॥ १२ ॥

१३] ति० टी०–नृपसंनिधावित्यनेन तस्यापि साक्षित्वमात्रं न तु वरणनियमकर्तृतेति सूचितम् ॥ १३ ॥

रा० टी०–मुनेरिति । हे रघुनन्दन राम! मुनेस्तद्वचनं श्रुत्वा वंशकरमेकं पुत्रं नृपसन्निधौ केशिनी वैदर्भदुहिता जग्राह स्वीचकार ॥ १३ ॥

गो० टी०–मुनेरिति । जग्राह वरयामास ॥ १३ ॥

१४–१५] ति० टी०–सुपर्णो गरुडः ॥ १४ ॥ १५ ॥

रा० टी०–षष्टिमिति । महोत्साहान् कीर्तिमतः षष्टिं पुत्रसहस्राणि सुतान् सुपर्णभगिनी सुमतिः काश्यपसुता तथा तेन प्रकारेण जग्राह ॥ १४ ॥

गो० टी०–षष्टिमिति । सुपर्णभगिनी गरुडभगिनी॥१४॥

रा० टी०–प्रदक्षिणमिति । हे रघुनन्दन! ऋषिं भृगुं प्रदक्षिणं कृत्वा शिरसा अभिप्रणम्य च सभार्यः भार्याभ्यां सहितः राजा सगरः स्वपुरं जगाम ॥ १५ ॥

गो० टी०–प्रदक्षिणमिति । ऋषिं भृगुम् ॥ १५ ॥

१६] ति० टी०–व्यजायत प्रसूतवती ॥ १६ ॥

रा० टी०–अथेति । अथ स्वपुरप्राप्त्यनन्तरं तस्मिन्प्रसिद्धे काले प्रसूतिसमये गते प्राप्ते सति ज्येष्ठा केशिनी सगरात्मजमसमञ्ज इति ख्यातं पुत्रं व्यजायत प्रासूत असमञ्जस इत्यानुपूर्विकोऽप्येतद्वाचकोऽस्तीति भागवतात् असमञ्जसवीर्यवानिति वक्ष्यमाणाच्च न विरोधः ॥ १६ ॥

गो० टी०–अथेति । व्यजायत प्रसूतवती ॥ १६ ॥

१७–१८] ति० टी०–गर्भतुम्बं तुम्बफलाकारगर्भपि-

१ महात्मानमिति गो. रा. पाठः । २ तथेति रा. पाठः । ३ चेति गो. रा. पाठः । ४ तस्मिन्निति गो. रा. पाठः ।

अथ दीर्घेण कालेन रूपयौवनशालिनः । षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा ॥ १९ ॥
स च ज्येष्ठो नरश्रेष्ठैः सगरस्यात्मसंभवः । बालान्गृहीत्वा तु जले सरय्वा रघुनन्दन ॥ २० ॥
प्रक्षिप्य प्राहसन्नित्यं मज्जतस्तान्निरीक्ष्य वै । एवं पापसमाचारः सज्जनप्रतिबाधकः ॥ २१ ॥
पौराणामहिते युक्तः पित्रा निर्वासितः पुरात् । तस्य पुत्रोंऽशुमान्नाम असमञ्जस्य वीर्यवान्॥ २२ ॥
संमतः सर्वलोकस्य सर्वस्यापि प्रियंवदः । ततः कालेन महता मतिः समभिजायत ॥ २३ ॥
सगरस्य नरश्रेष्ठ यजेयमिति निश्चिता । स कृत्वा निश्चयं राजा सोपाध्यायगणस्तदा ॥
यज्ञकर्मणि वेदज्ञो यष्टुं समुपचक्रमे ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

षंडं व्यजायत प्रसूतवती । कथं ततः पुत्रोदय इत्यत आह–षष्टिरित्यादि ॥ १७ ॥ १८ ॥

रा० टी०–सुमतिरिति । हे नरव्याघ्र ! सुमतिः सुमतिनामा कनिष्ठा गर्भतुम्बं तुम्बाकारगर्भं व्यजायत । तुम्बभेदात् तुम्बाकारगर्भस्य भेदनात् षष्टिः पुत्रसहस्राणि विनिःसृताः विनिःसृतानि ॥ १७ ॥

गो० टी०–सुमतिरिति । गर्भतुम्बं वृत्ताकारं गर्भपिण्डम्। कथं ततः पुत्रोदय इत्यत आह–षष्टिरिति । तुम्बभेदात् न तु गान्धार्या इव पश्चाद्विभजनीय इत्यर्थः ॥ १७ ॥

रा० टी०–घृतेति । तान् षष्टिसहस्रसंख्यातसुतान् घृतपूर्णेषु कुम्भेषु धात्र्यः समवर्धयन् । सर्वे पुत्राः महता कालेन यौवनं प्रतिपेदिरे प्राप्तुः ॥ १८ ॥

गो० टी०–घृतेति । धात्र्या उपमातरः तान्विभक्तुम्बान् ॥ १८ ॥

१९] ति० टी०–दीर्घेण कालेन यौवनशालित्वे हेतुत्वात्तृतीया ॥ १९ ॥

रा० टी०–अथेति । तदा रूपयौवनप्राप्तिकाले दीर्घेण कालेन रूपयौवनशालिनः प्राप्तरूपयौवनाः अथाभवन् माङ्गलिकस्थितिं प्रापुरित्यर्थः ॥ १९ ॥

गो० टी०–अथेति । दीर्घेण कालेनेति यौवनशालित्वे हेतुत्वात्तृतीया यौवनशालिन इति पुँल्लिङ्गत्वमार्षम् ॥ १९ ॥

२०–२१] ति० टी०–ज्येष्ठोऽसमञ्जः बालान्गृहीत्वा जले प्रक्षिप्य मज्जतस्तान्समीक्ष्य नित्यं प्राहसत् 'प्रहसन्' इति पाठे स्थितो भवतीति शेषः । सज्जनप्रतिबाधकः सज्जनपीडकः ॥ २० ॥ २१ ॥

रा० टी०–ज्येष्ठपुत्रवृत्तमाह–स चेति । हे नरश्रेष्ठ रघुनन्दन हे राम ! सगरस्यात्मसंभवः ज्येष्ठः सोऽसमञ्जसः बालान् गृहीत्वा सरय्वाः सलिले नित्यं प्रक्षिप्य प्रहसन् सन् निमज्जतस्तान्निरीक्षते ॥ २० ॥

गो० टी०–स चेति । अर्धत्रयम् । ज्येष्ठः असमञ्जः प्रहसन् स्थित इति शेषः ॥ २० ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण पापसमाचारः पापाचरणयुक्तः अत एव सज्जनप्रतिबाधकः अत एव पौराणां पुरवासिनामहिते युक्तोऽसमञ्जसः पुरात् पित्रा निर्वासितः निःसारितः ॥ २१ ॥

गो० टी०–एवमिति । निर्वासितः विवास्यते स्म ॥२१॥

२२] ति० टी०–निर्वासितो निष्कासितः । तस्यासमञ्जस्य एतद्वाची असमञ्जशब्दोऽन्तः सान्तश्चेति बोध्यम्॥२२॥

रा० टी०–तस्येति । असमञ्जसवीर्यवान् असमञ्जसवीर्यसदृशवीर्यविशिष्टः सर्वलोकप्रियंवदः अत एव सर्वलोकस्य संमतः अंशुमान्नाम तस्य असमञ्जसस्य पुत्र आसीदिति शेषः २२॥

गो० टी०–तस्येति । अंशुमान्नाम आसीदिति शेषः॥२२॥

२३] ति० टी०–समभिजायत अडभाव आर्षः ॥ २३ ॥

रा० टी०–तत इति । हे नरश्रेष्ठ ! ततः अंशुमदुत्पत्यनन्तरं महता कालेन अहं यजेयमिति निश्चिता मतिः सगरस्य समभिजायत आगमशास्त्रस्यानित्यत्वादङ्गिरहः ॥ २३ ॥

गो० टी०–तत इति । यजेयमिति निश्चिता मतिः समभिजायत समभ्यजायत ॥ २३ ॥

२४] ति० टी०–यज्ञकर्मणीत्यस्य निश्चयं कृत्वेति प्राक्तनेनान्वयः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०–स इति । सोपाध्यायगणसहितः वेदज्ञः निखिलवेदस्य ज्ञाता स प्रसिद्धो राजा सगरः यज्ञकर्मणि निश्चयं कृत्वा तदा यागोचितकाले यष्टुं यागं कर्तुं समुपचक्रमे उपक्रमं चकार ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०–स इति । यज्ञकर्मणि निश्चयं कृत्वा यष्टुं समुपचक्रमे ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने
बालकाण्डव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

---

१ श्रेष्ठ इति रा. पाठः । २ प्रहसन्निति गो. रा. पाठः । ३ समीक्ष्येति गो. रा. पाठः ।

एकोनचत्वारिंशः सर्गः ।

सगरयज्ञवर्णनम् । इन्द्रेण मायया यज्ञियाश्वापहरणम् । सगराज्ञया तत्पुत्रैः षष्टिसहस्रैर्धरणीविभेदनम् । ततो देवानां प्रजाक्षोभसंभ्रान्तमनसां ब्रह्मणे तन्निवेदनम् ।

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः । उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ १ ॥
श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम् । पूर्वजो मे कथं ब्रह्मन्यज्ञं वै समुपाहरत् ॥ २ ॥
तस्य तद्वचनं श्रुत्वा कौतूहलसमन्वितः । विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव ॥ ३ ॥
श्रूयतां विस्तरो राम सगरस्य महात्मनः । शंकरश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ ४ ॥
विन्ध्यपर्वतमासाद्य निरीक्षेते परस्परम् । तयोर्मध्ये समभवद्यज्ञः स पुरुषोत्तमं ॥ ५ ॥
स हि देशो नरव्याघ्र प्रशस्तो यज्ञकर्मणि । तस्याश्चर्यां काकुत्स्थ दृढधन्वा महारथः ॥ ६ ॥

१] ति० टी०–कथान्ते यज्ञोपक्रमकथान्त इत्यर्थः ॥ १ ॥

रा० टी०–रामप्रश्नान्तरं वर्णयन्नाह–विश्वामित्रेत्यादिश्लोकद्वयेन । विश्वामित्रवचः श्रुत्वा कथान्ते कथासिद्धान्तं ज्ञातुं परमप्रीतो रघुनन्दनो दीप्तमनलमिव मुनिमुवाच अन्तति वादं प्रतिबध्नाति स सिद्धान्त इत्यर्थः बन्धनार्थकातिधातोः कर्तरि क्विप् " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति चतुर्थी । किंच कथान्ते कथावसानकाले विद्यमानं मुनिमित्यन्वयः । श्रुत्वेत्यनेन पुनरुक्तिवारणायैष यत्नः अन्यथा तु पौनरुक्त्यं दुर्वारम् १॥

गो० टी०–अथ रामेण स्वपूर्वकथावृत्तान्तप्रस्तावेन कुतूहलात्पृष्टे सति विश्वामित्रेण तदुत्तरकथनमेकोनचत्वारिंशे–विश्वामित्रेत्यादि । कथान्ते यज्ञोपक्रमकथनानन्तरम् ॥ १ ॥

२] ति० टी०–इमां यज्ञसंबन्धिनीम् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–श्रोतुमिति । हे ब्रह्मन् ! मे पूर्वजः सगरः यज्ञं कथं केन प्रकारेण समुपाहरत् इमां कथां विस्तरेणैव श्रोतुमिच्छामि ते भद्रं कल्याणमस्तु । वैशब्द एवार्थे । एतेन तां कथयेति सूचितम् ॥ २ ॥

गो० टी०–श्रोतुमिति । इमां यज्ञकथां पूर्वजः मद्वंशकूटस्थः समुपाहरत् कृतवान् ॥ २ ॥

३] ति० टी०–प्रहसन्निव विकसितवदनः स्वपूर्वजवृत्तान्ततया श्रवणकौतुकेन रामभद्रस्यायं प्रभः अत एव मुनेर्हासः स्ववंश्य इति रामस्यापि लोकवत्स्नेहः संपन्न इति ॥ ३ ॥

रा० टी०–तस्येति । तस्य रघुनाथस्य तत्प्रसिद्धं वचनं प्रभवाक्यं श्रुत्वैव कौतूहलसमन्वितो विश्वामित्रः काकुत्स्थं प्रहसन् सन्नेव उवाच । तद्वचनमेवाह–हे राम ! महात्मनः सगरस्य सगरयागस्य विस्तरः श्रूयताम् । इवशब्दावेवार्थे ॥ ३ ॥

गो० टी०–विश्वामित्र इति । प्रहसन्निव प्रसन्नवदन इत्यर्थः । स्वविवक्षितस्यैव पृष्टत्वात् प्रहासः अजानन्निव पृष्टवानिति वा, विस्तर इति यज्ञस्येति शेषः ॥ ३ ॥

४] ति० टी०–सगरस्य सगरयज्ञस्येत्यर्थः ॥ ४ ॥

रा० टी०–शंकरेति । अचलोत्तमः शंकरश्वशुरः हिमवान् नाम विन्ध्यपर्वतमासाद्य प्राप्तीच्छामिव कृत्वा उन्नतत्वेन समत्वं प्राप्येति वा विन्ध्यपर्वतश्च हिमवन्तमासाद्य परस्परं निरीक्षेते । एतेन तयोर्मध्ये तन्निरोधकपर्वतान्तराभावः सूचितः । परस्परशब्दशक्त्या विन्ध्यपर्वतश्चेत्याद्यध्याहृतम् ॥ ४ ॥

गो० टी०–शंकरेति । विन्ध्यपर्वतमासाद्य मध्ये महागिरिनिरोधाभावात् प्राप्य तथा विन्ध्योऽपि हिमवन्तमित्येवं परस्परमासाद्य वीक्षाविरोधाभावात् निरीक्षेते परस्परं निरीक्षमाणाविव स्थितावित्यर्थः ॥ ४ ॥

५] ति० टी०–मध्ये महापर्वतविरोधाभावाद्विन्ध्यपर्वतं हिमवांस्तथा विन्ध्योऽपि हिमवन्तमित्येवं परस्परमासाद्योच्चत्वेन साम्यं प्राप्य औन्नत्यातिशयेन वीक्षानिरोधकाभावात् परस्परं निरीक्षेते पश्यत इत्यर्थः । तयोर्मध्य आर्यावर्तभूमौ ' आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः ' इति वचनात् ॥ ५ ॥

रा० टी०–तयोरिति । हे नरव्याघ्र ! तयोः विन्ध्यहिमालययोर्मध्ये आर्यावर्त इत्यर्थः पुरुषोत्तमः पुरुषो नराकृतिः परमात्मा उत्तमः पूज्यत्वेन यस्मिन्स यज्ञः प्रवृत्तोऽभूत् हि यतः स देशः यज्ञकर्मणि प्रशस्तः । एतदर्थबोधकं 'आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः' इत्यादिवचनान्तरमपि ॥ ६ ॥

गो० टी०–अस्त्वेवं ततः किमित्यत्राह–तयोरिति । हि यस्मात् स देशः यज्ञकर्मणि प्रशस्तः ' आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः' इतिवचनात् अतस्तयोर्मध्ये यज्ञः प्रवृत्तोऽभूत् ५

६] ति० टी०–प्रशस्तः प्रशस्तत्वेन प्रसिद्धः । उक्तवचनादश्चर्यारक्षार्थमश्वानुगमनम् ॥ ६ ॥

रा० टी०–तस्येति । हे काकुत्स्थ तात हे राम ! तस्य यज्ञस्य अश्वचर्यां रक्षार्थमश्वसमीपेऽनुगमनं दृढं धनुर्यस्य स महारथः सगरस्य मते संमतौ स्थितोऽश्वमानकरोत् ॥ ६ ॥

गो० टी०–तस्येति । अश्वचर्यामश्वानुचरणं मते आज्ञायाम् ॥ ६ ॥

---

१ पूर्वको इति गो. रा. पाठः । २ अर्धमिदं गो. नास्ति । ३ नाम हिमवानचलोत्तम इति गो. रा. पाठः । ४ प्रवृत्तोऽभूच्च इति गो. रा. पाठः । ५ पुरुषोत्तमः इति रा. पाठः ।

अंशुमानकरोत्तात सगरस्य मते स्थितः । तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ॥ ७ ॥
राक्षसीं तनुमास्थाय यज्ञियाश्वमपाहरत् । ह्रियमाणे तु काकुत्स्थ तस्मिन्नश्वे महात्मनः ॥ ८ ॥
उपाध्यायगणाः सर्वे यजमानमथाब्रुवन् । अयं पर्वणि वेगेन यज्ञियाश्वोऽपनीयते ॥ ९ ॥
हर्तारं जहि काकुत्स्थ हयश्चैवोपनीयताम् । यज्ञच्छिद्रं भवत्येतत्सर्वेषामशिवाय नः ॥ १० ॥
तत्तथा क्रियतां राजन्यज्ञोऽच्छिद्रः कृतो भवेत् । सोपाध्यायवचः श्रुत्वा तस्मिन्सदसि पार्थिवः ॥ ११ ॥
षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह । गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ॥ १२ ॥
मन्त्रपूतैर्महाभागैरास्थितोऽपि महाक्रतुः । तद्गच्छथ विचिन्वध्वं पुत्रका भद्रमस्तु वः ॥ १३ ॥

७] ति० टी०–मते शासने पर्वण्युक्थ्याहे अश्वमेधे उक्थ्यसंस्थात्रयम् तत्र द्वितीयेऽहोरात्रमनदिवसेऽश्वविशसनात्प्राक् तं यज्ञम् विहन्तुमिति शेषः ॥ ७ ॥

रा० टी०–तस्येति । पर्वणि तं यज्ञं यजमानस्य कुर्वतस्तस्य सगरस्य यज्ञियाश्वं राक्षसीं तनुमास्थाय गृहीत्वा वासव इन्द्रोऽपाहरत् ॥ ७ ॥

गो० टी०–तस्येति । तं यज्ञं यजमानस्य तस्य सगरस्य यज्ञियाश्वं यज्ञार्हाश्वं राक्षसीं मायामयीं तनुमास्थाय पर्वणि उक्थ्याहे 'तिथिभेदे क्षणे पर्व' इति निघण्टुः । अपाहरत् अपहृतवान् ॥ ७ ॥

८] ति० टी०–यज्ञियाश्वं यज्ञार्हमश्वम् ॥ ८ ॥

रा० टी०–ह्रियमाणे इति । हे काकुत्स्थ हे राम ! महात्मनः सगरस्य तस्मिन् अश्वमेधीये अश्वे ह्रियमाणे सत्येव सर्वे उपाध्यायगणाः यजमानं सगरमथाब्रुवन् माङ्गलिकं वचनमुच्चारयामासुः । अथशब्दोऽनन्तर्यो वा । तुशब्द एवार्थे । उपाध्यायगणा अब्रुवन्नित्यनेन अंशुमताश्वहरणं न ज्ञातमिति ध्वनितं तेनेन्द्रस्य चुराभिज्ञत्वं व्यक्तम् ॥ ८ ॥

गो० टी०–ह्रियमाण इति । उपाध्यायगणाः ऋत्विग्गणाः ८

९] ति० टी०–अयं यज्ञियोऽश्वः पर्वणि वेगेनापनीयतेऽपहियते ॥ ९ ॥

रा० टी०–तद्वचनमेवाह–अयमिति । अयं यज्ञियाश्वः पर्वणि वेगेनैवापनीयते ह्रियते अतो हर्तारमश्वस्य हारकं हे काकुत्स्थ ! जहि ताडय हयः उपनीयतां समीपं प्राप्यतां च । अत्र चोरनामानुक्त्या ऋषीणां सौशील्यातिशयः सूचितः ॥ ९ ॥

गो० टी०–अयमिति । अपनीयते "वर्तमानसामीप्ये वर्तमानवद्वा" इति लट् ॥ ९ ॥

१०] ति० टी०–अतो हर्तारमश्वहर्तारं जहि अश्वश्च शीघ्रमुपनीयताम् । यज्ञच्छिद्रं यज्ञस्य विघ्नः ॥ १० ॥

रा० टी०–अश्वावश्यकग्रहणार्थमश्वहरणे दोषं दर्शयन्त आहुः–यज्ञेति । सर्वेषां यज्ञकर्तॄणां नोऽस्माकमशिवाय अशिवं कर्तुमेतत् यज्ञच्छिद्रं यज्ञविघ्नो भवति । हे राजन् ! तत्तस्मात्कारणात् यथा येन प्रकारेण क्रतुर्यज्ञः अच्छिद्रो विघ्नरहितो भवेत्तथा क्रियतां विधीयतामश्वो गृह्यतामिति भावः ॥ १० ॥

गो० टी०–यज्ञेति । एतद्यज्ञच्छिद्रं यज्ञापराधः 'छिद्रं रन्ध्रापराधयोः' इति वैजयन्ती । सर्वेषां नः अशिवाय भवति तस्मात् क्रतुर्यथा अच्छिद्रो भवेत्तथैव क्रियताम् ॥ १० ॥

११] ति० टी०–अच्छिद्र इतिच्छेदः । यथा यज्ञोऽच्छिद्रो भवेदित्यन्वयः । सोपाध्यायवच उपाध्यायसहितर्त्विग्गणवचः ॥ ११ ॥

रा० टी०–सोपाध्यायेति । तस्मिन्प्रसिद्धे सदसि यागसभायां पार्थिवः सगरः सोपाध्यायवचः उपाध्यायसहितऋत्विग्गणवचनं श्रुत्वैव षष्टिं पुत्रसहस्राणि एतत् वाक्यमुवाच । हशब्द एवार्थे ॥ ११ ॥

गो० टी०–उपाध्यायेति । पार्थिवः सगरः ॥ ११ ॥

१२-१३] ति० टी०–भो पुरुषर्षभाः पुत्रकाः ! मन्त्रपूतैर्महाभागैर्यद्यपि महाक्रतुरास्थितोऽधिष्ठितः तथापि रक्षसां मायया यदिच्छिद्रं स्यात्तदात्मनो गतिं न पश्यामि । तस्माद्गच्छथ विचिन्वध्वमन्वेषयतेत्यर्थ इति कोचित् । परे तु 'आस्थितो हि' इति पाठः हि यस्मादीदृशैर्महाभागैरास्थितोऽयं क्रतुः अतोऽत्र क्रतौ रक्षसां गतिं न पश्यामि तत्तस्मात्केनापि देवेन हृत इति तमन्वेषयतेत्यर्थ इत्याहुः ॥ १२ ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–गतिमिति । हे पुरुषर्षभाः पुत्राः हि यतः मन्त्रपूतैर्महाभागैर्महाक्रतुरास्थितः अतो रक्षसां गतिं गमनं न पश्यामि यागसंलग्नचित्तत्वादश्वं हृत्वा कः क्व गत इति न जानामीत्यर्थः । यद्वा यतो मन्त्रपूतैर्महाक्रतुरास्थितोऽतो रक्षसां गतिमत्रागमनसामर्थ्यं न पश्यामि एतेन यागागमनाधिकारिणा केनाचिदश्वोपहृत इति सूचितम् ॥ १२ ॥

गो० टी०–गतिमिति । हे पुत्राः ! हि यस्मान्महाक्रतुः मन्त्रपूतैर्महाभागैरास्थितः अनुष्ठितः तस्माद्रक्षसां गतिमागमनं न पश्यामि प्रसक्त्यभावादिति भावः ॥ १२ ॥

रा० टी०–तदिति । हे पुत्राकाः तत्तस्माद्धेतोः गच्छत इतो यात विचिन्वध्वमश्वान्वेषणं कुरुत । वो भद्रमस्तु । क्व गच्छामेत्यत आह–सर्वां समुद्रमालिनीं पृथिवीमनुगच्छत ॥ १३ ॥

गो० टी०–अतः केन प्रकारेण गतोऽश्व इति विचिनुध्वमित्याह—तदिति । यद्वा अहं कर्मव्यग्रः स्थितः अश्वापहर्तॄणां रक्षसां गतिं गन्तव्यदेशं न पश्यामि । विचिनुध्वमित्याह–

१ अयमिह रा. नास्ति । २ यथाच्छिद्रः क्रतुर्भवेदिति गो. रा. पाठः । ३ उपाध्यायेति गो. पाठः । ४ गच्छतेति गो. रा. पाठः ।

समुद्रमालिनीं सर्वां पृथिवीमनुगच्छथ । एकैकं योजनं पुत्रा विस्तारमभिगच्छत ॥ १४ ॥
यावत्तुरगसंदर्शस्तावत्खनत मेदिनीम् । तमेव हयहर्तारं मार्गमाणा ममाज्ञया ॥ १५ ॥
दीक्षितः पौत्रसहितः सोपाध्यायगणैस्त्वहम् । इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥ १६ ॥
ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः । जग्मुर्महीतलं राम पितुर्वचनयन्त्रिताः ॥ १७ ॥
[गत्वा तु पृथिवीं सर्वामदृष्ट्वा तं महाबलाः]
योजनायामविस्तारमेकैको धरणीतलम् । विभिदुः पुरुषव्याघ्रा वज्रस्पर्शसमैर्भुजैः ॥ १८ ॥
शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः । भिद्यमाना वसुमती ननाद रघुनन्दन ॥ १९ ॥
नागानां वध्यमानानामसुराणां च राघव । राक्षसानां दुराधर्षं सत्त्वानां निनदोऽभवत् ॥ २० ॥
योजनानां सहस्राणि षष्टिं तु रघुनन्दन । विभिदुर्धरणीं राम रसातलमनुत्तमम् ॥ २१ ॥
एवं पर्वतसंबाधं जम्बूद्वीपं नृपात्मजाः । खनन्तो नृपशार्दूल सर्वतः परिचक्रमुः ॥ २२ ॥
ततो देवाः सगन्धर्वाः सासुराः सहपन्नगाः । संभ्रान्तमनसः सर्वे पितामहमुपागमन् ॥ २३ ॥
ते प्रसाद्य महात्मानं विषण्णवदनास्तदा । ऊचुः परमसंत्रस्ताः पितामहमिदं वचः ॥ २४ ॥

तदिति । समुद्र एव माला आवरणमस्या इति समुद्रमालिनी तामनुगच्छत अन्वेषध्वम् ॥ १३ ॥

१४] ति० टी०–अनुगच्छथान्वेषयत । थस्य तादेशाभाव आर्षत्वात् ॥ १४ ॥

गो० टी०–एकेति । अर्धमेकम् । प्रथममेकं योजनं विचित्य पश्चाद्योजनान्तरमिति क्रमेण विचिनुध्वमित्यर्थः । यद्वा एकएकं योजनमिति क्रमेण विचिनुध्वमित्यर्थः ॥ १४ ॥

१५] ति० टी०–यदि भूमौ न लभ्यते तदाह–यावत्तुरगेत्यादि ॥ १५ ॥

रा० टी०–यदि अश्वो न मिलेत्तदा तत्र गत्वा किं कर्तव्यमित्यत आह–यावदिति । ममाज्ञया तमृषिभिर्बोधितं हयहर्तारं मार्गमाणा एव यूयं यावत्कालं तुरगसंदर्शस्तावत्कालं मेदिनीं खनत ॥ १४ ॥

गो० टी०–यदि भूतले न दृश्यते तदा कर्तव्यमाह–यावदिति ॥ १५ ॥

१६] ति० टी०–स्वस्य तुरगानुगमनमयुक्तमित्याह–दीक्षित इत्यादि । तस्य प्रवासनिषेधात्पौत्रस्य बालकत्वाच्चेति भावः ॥ १६ ॥

रा० टी०–दीक्षित इति । पौत्रसहितः सोपाध्यायगणः अहं यावत्तुरगदर्शनमिहैव स्थास्यामि वो भद्रमस्तु । हिशब्द एवार्थे ॥ १६ ॥

गो० टी०–मम तु गमनं न युक्तमित्याह–दीक्षित इति १६ ॥

१७] ति० टी०–यन्त्रिता नियुक्ताः ॥ १७ ॥

रा० टी०–ते इति । हे राम ! हृष्टमनसः महाबलाः सर्वे ते राजपुत्राः पितुर्वचनयन्त्रिताः सन्तः महीतलं जग्मुः ॥ १६ ॥

रा० टी०–गत्वेति । हे रघुनन्दन ! महाबलाः पुरुषव्याघ्राः पुरुषश्रेष्ठाः सगरपुत्राः सर्वां पृथ्वीं गत्वा तमश्वमदृष्ट्वैव योजनायामविस्तारं योजने आयामविस्तारौ दैर्घ्यविशाले यस्मिन् तद्धरणीतलमेकैको विभज्य वज्रस्पर्शसमैर्वज्रस्पर्शसदृशस्पर्शैर्भुजैः अशनिकल्पैः शूलैश्च सुदारुणैर्हलैश्च विभिदुस्तेन हेतुना भिद्यमाना वसुमती ननाद । सार्धश्लोकद्वयमेकान्वयि । तुशब्द एवार्थे पिशब्दो हेत्वर्थे ॥ १७ ॥ १८ ॥

गो० टी०–इतीति । यन्त्रिताः नियुक्ताः ॥ १७ ॥

१८] ति० टी०–आयामो दैर्घ्यम्, विस्तारो विशालता तयुक्तम् धरणीतलमेकैकोऽन्वेषयामासेत्यर्थः विभिदुरिति पृथिव्यामनुषज्यते शेषः ॥ १८ ॥

गो० टी०–योजनेति । आयामः दैर्घ्यं विस्तारः विशालता वज्रस्पर्शसमैः वज्रस्पर्शसमस्पर्शैरित्यर्थः ॥ १८ ॥

१९–२०] ति० टी०–भिद्यमाना सर्वत इति शेषः ॥ १९ ॥ २० ॥

रा० टी०–नागानामिति । हे राघव ! वध्यमानानां पृथिवीखनने हन्यमानानां नागानामसुराणां च राक्षसानां च ससत्त्वानां दुर्धर्षः निनदः शब्दोऽभवत् ॥ १९ ॥

गो० टी०–शूलैरिति । अशनिकल्पैः वज्रतुल्यैः ॥ १९ ॥

गो० टी०–नागानामिति । नागानां सर्पाणाम् असुरराक्षसाः पातालवासिनः ॥ २० ॥

२१] ति० टी०–अनुत्तमं रसातलं विचेतुमिव धरणीं योजनानां षष्टिसहस्राणि विभिदुरित्यन्वयः ॥ २१ ॥

रा० टी०–योजनानामिति । हे रघुनन्दन ! योजनानां षष्टिं सहस्राणि अनुत्तमं प्रसिद्धरसातलान्मध्यमयुत्तमं वा रसातलं कर्तुमिव वीराः धरणीं विभिदुः । तुशब्द इवार्थे ॥ २० ॥

गो० टी०–योजनानामिति । रसातलं पातालं यथा भवति तथा धरणीं विभिदुः ॥ २१ ॥

२२–२४] ति० टी०–पर्वतसंबाधं पर्वतनिबिडम् ॥ २२–२४ ॥

रा० टी०–एवमिति । नरशार्दूल हे राम ! पर्वतसंबाधं

---

१ गच्छतेति गो. रा. पाठः । २ अर्धमिदं रा. नास्ति । ३ गणो ह्यहमिति गो. पाठः । ४ अर्धमिदमधिकं गो. रा. पाठयोः । ५ नखैरिति गो. पाठः । ६ च दुर्धर्षं इति गो. रा. पाठः । ७ वीरा. इति गो. रा. पाठः । ८ संभ्रान्ता इति रा. पाठः ।

भगवन्पृथिवी सर्वा खन्यते सगरात्मजैः । बहवश्च महात्मानो वध्यन्ते जलचारिणः ॥ २५ ॥
अयं यज्ञहरोऽस्माकमनेनाश्वोऽपनीयते । इति ते सर्वभूतानि हिंसन्ति सगरात्मजाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।

ब्रह्मणा कपिलकोपेन सगरपुत्रा नङ्क्ष्यन्तीति देवानामाश्वासनम् । प्राच्यदिक्क्रमेण भूमिं खनद्भिः सगरपुत्रैरैशान्यां भूमेरधस्ताद्भगवतः कपिलस्यान्तिके चरन्तमश्वमालोक्य कपिलवधाय संरम्भकरणम् । कपिलकोपेन तेषां भस्मीभावः ।

देवतानां वचः श्रुत्वा भगवान्वै पितामहः । प्रत्युवाच सुसंत्रस्तान्कृतान्तबलमोहितान् ॥ १ ॥
यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः । महिषी माधवस्यैषा स एव भगवान्प्रभुः ॥ २ ॥
कापिलं रूपमास्थाय धारयत्यनिशं धराम् । तस्य कोपाग्निना दग्धा भविष्यन्ति नृपात्मजाः ॥३॥
पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः । सगरस्य च पुत्राणां विनाशो दीर्घदर्शिनाम्॥ ४ ॥

पर्वतसंकुलं जम्बूद्वीपमेवमनेन प्रकारेण सर्वतः खनन्तो नृपात्मजाः परिचक्रमुः बभ्रमुः ॥ २१ ॥

गो० टी०-एवमिति । संबाधं निबिडम् ॥ २२ ॥

रा० टी०-तत इति । ततः सर्वेषां पीडितत्वाद्धेतोः संभ्रान्तमनसः सगन्धर्वाः गन्धर्वसहिताः सासुराः असुरसहिताः सहपन्नगाः पन्नगसहिताः सर्वे देवाः पितामहं ब्रह्माणमुपागमन् प्रापुः ॥ २२ ॥

गो० टी०-तत इति । स्पष्टम् ॥ २३ ॥

रा० टी०-ते इति । महात्मानं पितामहं परमसन्तप्ता अत एव विषण्णवदनाः प्राप्तवैवर्ण्यमुखास्ते उक्तविशेषणविशिष्टाः देवाः तदा स्वप्राप्तिकाले प्रसाद्य इदं वच ऊचुः ॥ २३ ॥

गो० टी०-त इति । प्रसाद्य स्तुत्वा ॥ २४ ॥

२५] ति० टी०-महात्मानः सिद्धगन्धर्वादयः ॥ २५ ॥

रा० टी०-तद्वचनमेवाह-भगवन्निति । हे भगवन् ! सगरात्मजैः सर्वा पृथिवी खन्यते अतो बहवो महात्मानः जलचारिणश्च वध्यन्ते पीड्यन्ते ॥ २४ ॥

गो० टी०-भगवन्निति । तलवासिनः रसातलवासिनः२५

२६] ति० टी०-'यज्ञहनः' इति पाठे हन्तीति हनः अपनीयतेऽपनीयते स्म । सर्वभूतानि तत्प्रसङ्गरहितान्यपि ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्ड एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रा० टी०-ननु किमर्थं तैः सर्वे पीड्यन्ते इत्यत आहुः-अयमिति । अयं भूतसमूहः अस्माकं यज्ञहनः । तत्र हेतुः यतोऽनेनाश्वोऽपनीयते इति हेतोः सर्वभूतानि सगरात्मजाः हिंसन्ति । अपनीयन्ते इत्यत्र वर्तमानसामीप्ये इति भूते लट् ॥२५॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

गो० टी०-अयमिति । यज्ञहरः यज्ञहन्ता 'यज्ञहन' इति पाठे हन्तीति हनः पचाद्यच् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

१] ति० टी०-कृतान्तबलमोहितान्कृतः सर्वलोकस्यान्तो नाशो यैस्तादृशानि यानि बलानि सगरसुतबलानि तैर्मोहितान्मूर्च्छितचित्तान् ॥ १ ॥

रा० टी०-देवतानामिति । भगवान् पितामहो ब्रह्मा देवतानां वचः श्रुत्वैव कृतान्तबलमोहितान् कृतोऽन्तो बहुलोकविनाशो यैस्ते सगरात्मजास्तेषां बलेन अनन्तमेयपराक्रमेण मोहितान् विवेकरहितान् अत एव सुसंत्रस्तान् देवादीन् प्रत्युवाच ॥ १ ॥

गो० टी०-देवतानामित्यादि । कृतः अन्तो जननाशो यैस्ते कृतान्ताः सगरपुत्राः ॥ १ ॥

२] ति० टी०-एषा वसुधा ॥ २ ॥

३] ति० टी०-धारयति योगबलेनेति शेषः ॥ ३ ॥

रा० टी०-तद्वचनमेवाह-यस्येति । यस्य माधवस्य रमापतेः धीमतः सर्वबुद्धिप्रवर्तकस्य वासुदेवस्य इयं कृत्स्ना वसुधा यद्वासुदेवनिष्ठस्वामितानिरूपितस्वतादिविशिष्टा सकलवसुधेत्यर्थः। तस्य वासुदेवस्य एषा वसुधा महिषी सः एषः भगवान् अघटितघटनापटीयःसामर्थ्यविशिष्टः प्रभुः वासुदेवः कापिलं रूपमास्थाय प्रकटय्य अनिशं धरां धारयति तस्य कोपाग्निना नृपात्मजाः दग्धा भविष्यन्ति । द्वयोरेकत्रान्वयः ॥ २ ॥ ३ ॥

गो० टी०-यस्येति । सार्धश्लोकः । आस्थाय य इति शेषः ॥ २ ॥

४] ति० टी०-पृथिव्या विभेदश्च सनातनः प्रतिकल्पभवश्यं भाव्यः श्रौतस्मार्तसागरादिशब्दैर्दृष्ट एव अतस्तत्र न शोकः कार्य इति भावः । एवं दीर्घदर्शिनां दीर्घदर्शिभिः सगरपुत्रविनाशो-

१ हन इति रा. पाठः । २ निघ्नन्तीति गो. पाठः । ३ अर्धमिदं गो. नास्ति । ४ दीर्घजीविनामिति गो. रा. पाठः ।

पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदमाः । देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतम् ॥ ५ ॥
सगरस्य च पुत्राणां प्रादुरासीन्महास्वनः । पृथिव्यां भिद्यमानायां निर्घातसमनिःस्वनः ॥ ६ ॥
ततो भित्त्वा महीं सर्वां कृत्वा चापि प्रदक्षिणम् । साहिताः सागराः सर्वे पितरं वाक्यमब्रुवन् ॥ ७ ॥
परिक्रान्ता मही सर्वा सत्त्ववन्तश्च सूदिताः । देवदानवरक्षांसि पिशाचोरगपन्नगाः ॥ ८ ॥
न च पश्यामहेऽश्वं ते अश्वहर्तारमेव च । किं करिष्याम भद्रं ते बुद्धिरत्र विचार्यताम् ॥ ९ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां राजसत्तमः । समन्युरब्रवीद्वाक्यं सगरो रघुनन्दन ॥ १० ॥
भूयः खनत भद्रं वो विभेद्य वसुधातलम् । अश्वहर्तारमासाद्य कृतार्थाश्च निवर्तत ॥ ११ ॥
पितुर्वचनमासाद्य सगरस्य महात्मनः । षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ १२ ॥

र्यं दृष्ट एव अतस्तत्रापि शोकोऽनुचितः । शेषे पश्वी । यद्वा अदीर्घदर्शिनामितिच्छेदः ॥ ४ ॥

रा० टी०–देवविश्वासार्थमियं सनातनी रीतिरिति बोधयन्नाह–पृथिव्या इति । सनातनः सर्वसत्ययुगोद्भवः पृथिव्या निर्भेदो भेदनं चकारेण देवगन्धर्वादीनां क्लेशोऽपि दृष्ट एव' अदीर्घजीविनां सगरस्य पुत्राणां सनातनो विनाशश्च दृष्ट एव कपिलकोपद्वारेति शेषः एतेन अवश्यं सगरपुत्राणां विनाशो भविष्यतीति ध्वनितम् । अपिरेवार्थे ॥ ४ ॥

गो० टी०–पृथिव्या इति । सनातनः प्रतिकल्पमवश्यंभावी दृष्टः निश्चितः अतो न तत्रापि शोकः कार्य इति भावः । अदीर्घजीविनामितिच्छेदः विनाशः दृष्ट इत्यनुषङ्गः ॥ ३ ॥

५] ति० टी०–त्रयस्त्रिंशत् अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः अश्विनौ च ॥ ५ ॥

रा० टी०–पितामहेति । अरिंदमाः शत्रुमर्दनाः परमसंतुष्टाः त्रयस्त्रिंशद्देवाः यथागतमागतमनतिक्रम्य पुनर्जग्मुः येन प्रकारेण आगताः तेन प्रकारेण पुनः स्वस्वलोकं प्रापुरित्यर्थः । देवानां त्रयस्त्रिंशत्त्वं तु वस्नामष्टत्वेन रुद्राणामेकादशत्वेन आदित्यानां द्वादशत्वेन अश्विनोर्द्वित्वेन च बोध्यम् ॥ ५ ॥

गो० टी०–पितामहेति । त्रयस्त्रिंशद्देवाः अष्टौ वसव एकादश रुद्रा द्वादशादित्या अश्विनौ च इदमुपलक्षणं गन्धर्वादेर्गमनस्यापि ॥ ४ ॥

६] ति० टी०–निर्घातसमनिःस्वनः निर्घातनिःस्वनसदृश इत्यर्थः ॥ ६ ॥

रा० टी०–सगरस्येति । पृथिव्यां भिद्यमानायां सत्यां महात्मनां सगरस्य पुत्राणामग्रे एव निर्घातसमनिस्वनः निर्घातशब्दसदृशशब्दो महास्वनः प्रादुरासीत् नीलो घटो घट इतिवच्छाब्दबोधः । किञ्च महान्स्वनः स्वनत्वं यस्मिन् सः निर्घातसमनिस्वनः प्रादुरासीत् । अपिशब्द एवार्थे । निर्घातः अशुभसूचकः शब्दविशेषः ॥ ६ ॥

गो० टी०–सगरस्येति । निर्घातः उत्पातविशेषः ॥ ६ ॥

७] ति० टी०–' ततो भित्त्वा ' इति पाठः ॥ ७ ॥

रा० टी०–तत इति । ततः अशुभसूचकशब्दश्रवणानन्तरं सर्वां महीमभिप्रदक्षिणं कृत्वा भित्त्वा अश्वापहारकस्यानन्तर्निलीनत्वशङ्कया पृथिव्यवयवविशेषं विदार्य च पितरं प्राप्ताः सहिता मिलिताः सर्वे सागराः सगरपुत्राः वाक्यमब्रुवन् । प्राप्ता इत्यध्याहृतम् ॥ ७ ॥

गो० टी०–तत इति । सर्वे महीं प्रदक्षिणं कृत्वा पितरं गत्वा सर्वे पितरमब्रुवन् ॥ ६ ॥

८] ति० टी०–सत्त्ववन्तो बलवन्तः ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–परीति । सर्वा मही परिक्रान्ता प्रदक्षिणीकृता चकारेण अश्वापहारकस्यानन्तर्निलीनत्वशङ्कया पृथिव्यवयवविशेषो विदारितश्च अत एव सत्त्ववन्तो देवदानवरक्षांसि पिशाचोरगकिन्नराश्च सूदिताः ॥ ८ ॥

गो०टी०–परिक्रान्तेति । श्लोकद्वयम् । सत्त्ववन्तो बलवन्तः करिष्यामेति विसर्गलोपश्छान्दसः ॥ ७ ॥ ८ ॥

९–१०] ति० टी०–तेऽस्माक परमनुग्रहबुद्धिरस्तु वयं किं करिष्याम । सलोपश्छान्दसः बुद्धिरुपायः ॥ ९ ॥ १० ॥

रा० टी०–न चेति । ते अश्वमश्वहर्तारं च नैव पश्यामहे अतः किं करिष्यामः । अत्र अस्मत्कर्तव्यतायां विषये बुद्धिः निश्चयः विचार्यतां क्रियतामेव ते भद्रमस्तु । अत्र दृशधातोरात्मनेपदं करिष्याम इत्यत्र विसर्गलोपश्चार्षः । चशब्द एवार्थे । बुद्धिरत्रेति सगरसंबोधनं वा तदर्थस्तु बुद्धिरतो बुद्धिमतस्त्रायते तत्संबोधनम् किं करिष्याम इति विचार्यतामित्यर्थः । चशब्द इत्यर्थकः ॥ ९ ॥

रा० टी०–तेषामिति । हे रघुनन्दन ! तेषां पुत्राणां तद्वचनं श्रुत्वा समन्युः मन्युसहितः राजसत्तमः सगरः वाक्यमब्रवीत् ॥ १० ॥

गो० टी०–तेषामिति । समन्युः अश्वालाभकृतक्रोधवान् ॥ ९ ॥

११–१२] ति० टी०–भूयो विभेद्येत्यन्वयः । कृतार्थाश्च कृतार्थाश्चेत्तदा निवर्तत निवर्तध्वमित्यर्थे आर्षमेतत् अन्यथा न निष्टत्तिरित्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–तद्वचनमेवाह–भूय इति । वसुधातलं निर्भिद्य

---

१ अरिंदमेति गो. पाठः । २ महात्मनामिति गो. पाठः । ३ चाभीति रा. पाठः । ४ किन्नरा इति गो. रा. पाठः । ५ चाश्वामिति रा. पाठः ६ सत्तमेति गो. पाठः । ७ निर्भिद्येति गो. रा. पाठः । ८ निवर्तध्वेति गो. पाठः ।

खन्यमाने ततस्तस्मिन्ददृशुः पर्वतोपमम् । दिशागजं विरूपाक्षं धारयन्तं महीतलम् ॥ १३ ॥
सपर्वतवनां कृत्स्नां पृथिवीं रघुनन्दन । धारयामास शिरसा विरूपाक्षो महागजः ॥ १४ ॥
यदा पर्वणि काकुत्स्थ विश्रमार्थं महागजः । खेदाच्चालयते शीर्षं[1] भूमिकम्पस्तदा भवेत् ॥ १५ ॥
ते[2] तं प्रदक्षिणं कृत्वा दिशापालं महागजम् । मानयन्तो हि ते राम जग्मुर्भित्त्वा रसातलम् ॥ १६ ॥
ततः पूर्वां दिशं भित्त्वा[3] दक्षिणां बिभिदुः पुनः । दक्षिणस्यामपि दिशि ददृशुस्ते महागजम् ॥ १७ ॥
महापद्मं महात्मानं सुमहत्पर्वतोपमम् । शिरसा धारयन्तं[4] गां विस्मयं जग्मुरुत्तमम् ॥ १८ ॥
ते[5] तं प्रदक्षिणं कृत्वा सगरस्य महात्मनः । षष्टिः पुत्रसहस्राणि पश्चिमां बिभिदुर्दिशम् ॥ १९ ॥
पश्चिमायामपि दिशि महान्तमचलोपमम् । दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ २० ॥
ते[2] तं प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयम् । खनन्तः समुपाक्रान्ता दिशं सोमवतीं[6] तदा[7] ॥ २१ ॥

भूयः खनत अश्वहर्तारमासाद्य प्राप्यैव कृतार्थाः साधितप्रयोजनाः सन्तो यूयं निवर्तत वो भद्रमस्तु । चशब्द एवार्थे । सुखं व्यादाय स्वपितीतिवत्प्रयोगः । निर्भिद्य निर्भेत्तव्यमेव वसुधातलमिति कर्मधारयो वा संज्ञापूर्वकविधेरनित्यत्वात् ष्ण्यत्वेपि गुणाभावः ॥ ११ ॥

गो० टी०–भूय इति । भूयो निर्भिद्य खनतेत्यन्वयः निवर्तत निवर्तध्वम् ॥ १० ॥

रा० टी०–पितुरिति । महात्मनः पितुः सगरस्य वचनमासाद्य स्वीकृत्य षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् खनन्तोऽगच्छन् आगमशास्त्रस्यानित्यत्वादद्विरहः ॥ १२ ॥

गो० टी०–पितुरिति । अभिद्रवन् अभ्यद्रवन् ॥ ११ ॥

१३] ति० टी०–खन्यमान इति । षष्टियोजनसहस्रपरमर्षीति शेषः । दिशा इत्याबन्तम् ॥ १३ ॥

रा० टी०–खन्यमान इति । तस्मिन्महीतले खन्यमाने सति ततस्तस्मात्खननान्महीतलं धारयन्तं पर्वतोपमं विरूपाक्षं दिशो गजं ददृशुः । खननविस्तरस्य कर्तार इत्यर्थकं कर्तृपदं वा तत इति ॥ १३ ॥

गो० टी०–खन्यमान इति । दिशागजम् 'वष्टिभागुरि–'इत्याप् विरूपाक्षं विरूपाक्षाख्यम् ॥ १३ ॥

१४] ति० टी०–कृत्स्नाम् तदेकप्रदेशाच्छिन्नामिति शेषः१४

रा० टी०–प्रसङ्गाद्गजवृत्तमाह–सपर्वतेति। हे रघुनन्दन ! सपर्वतवनां पर्वतवनसहितां कृत्स्नां पृथिवीं विरूपाक्षो महागजः शिरसा धारयामास ॥ १४ ॥

गो० टी०–उक्तं विवृणोति–सेति ॥ १३ ॥

१५] ति० टी०–यदा पर्वणि यस्मिन्काले यस्मिन्क्षणे। 'तिथिभेदे क्षणे पर्वे' इत्यमरः ॥ १५ ॥

रा० टी०–यदेति। हे काकुत्स्थ राम ! महागजः विरूपाक्षः यदा यस्मिन्पर्वणि काले खेदात्खेदं प्राप्य विश्रामार्थं शीघ्रं चालयते करेण भूमिं संगृह्य किंचिच्चलतीत्यर्थः तदा भूमिकम्पः भवेत् ॥ १५ ॥

गो० टी०–यदेति । पर्वणि काले खेदाढेतोर्विश्रमार्थं श्रमशान्त्यर्थं चालयते चालयति ॥ १४ ॥

१६–१८] ति० टी०–मानयन्तः दिग्गजमिति शेषः । हित्स्वर्थे ॥ १६ ॥ १७ ॥ १८ ॥

रा० टी०–प्रासङ्गिकगजवर्णनं समाप्य प्रकृतसगरपुत्रवृत्तमाह–तमिति। हे राम ! हि ते अश्वप्राप्तये रसातलं भित्त्वा दिशः पालं तं महागजं मानयन्तः पूजयन्तस्ते सगरपुत्राः प्रदक्षिणं कृत्वा पूर्वां दिशं हित्वा त्यक्त्वा दक्षिणां दिशं जग्मुः । ततस्तस्यां दिशि पुनर्बिभिदुः दक्षिणस्यां दिश्यपि महात्मानं पूज्यस्वरूपं सुमहापर्वतोपममन्यन्तबृहत्पर्वतसदृशं शिरसा गां पृथिवीं धारयन्तं महापद्मं महापद्मसंज्ञकं महागजं ते सगरपुत्राः ददृशुः उत्तमं परमं विस्मयं च जग्मुः प्रापुः अद्भुतरूपदर्शनादितिभावः विनापि चं समुच्चयः। त्रयाणामेकत्रान्वयः १६–१८

गो० टी०–तमिति । मानयन्तः पूजयन्तः ॥ १६ ॥ तत इति । तत इत्यस्य विवरणं पूर्वां दिशं भित्त्वेति ॥ १६ ॥ महागजं विशेषयति–महेति । सुमहदित्यार्षम् ॥ १७ ॥

१९–२०] ति० टी०–प्रदक्षिणं कृत्वा दिग्गजमिति शेषः ॥ १९ ॥ २० ॥

रा० टी०–तत इति । ततो महागजदर्शनानन्तरं प्रदक्षिणं कृत्वा महापद्ममिति शेषः । महात्मनः सगरस्य षष्टिः पुत्रसहस्राणि पश्चिमां दिशं तद्दिग्भूमिं बिभिदुः ॥ १९ ॥

गो० टी०–तत इति । दिक्शब्देन देश उच्यते ॥ १८ ॥

रा० टी०–पश्चिमायामिति । महाबलास्ते सगरपुत्रा पश्चिमायां दिश्यपि अचलोपमं पर्वतसदृशमत एव महान्तं सौमनसं सौमनससंज्ञकं दिग्गजं ददृशुः ॥ २० ॥

गो० टी०–पश्चिमायामिति। सौमनसं सौमनसाख्यम्१९

२१] ति० टी०–निरामयं कुशलम् । सोमवतीमुदीचीम् ॥ २१ ॥

---

१ शीघ्रमिति रा. पाठः । २ तं ते इति गो. रा. पाठः । ३ हित्वेति रा. पाठः । ४ धारयन्तं ते इति गो. रा. पाठः । ५ तत इति गो. रा. पाठः । ६ हैमवतीति गो. रा. पाठः । ७ तत इति गो. पाठः ।

उत्तरस्यां रघुश्रेष्ठ ददृशुर्हिमपाण्डुरम् । भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ २२ ॥
समालभ्य ततः सर्वे कृत्वा चैनं प्रदक्षिणम् । षष्टिः पुत्रसहस्राणि विभिदुर्वसुधातलम् ॥ २३ ॥
ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशम् । रोषादभ्यखनन्सर्वे पृथिवीं सगरात्मजाः ॥ २४ ॥
ते तु सर्वे महात्मानो भीमवेगा महाबलाः । ददृशुः कपिलं तत्र वासुदेवं सनातनम् ॥ २५ ॥
हयं च तस्य देवस्य चरन्तमविदूरतः । प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन ॥ २६ ॥
ते तं यज्ञहनं ज्ञात्वा क्रोधपर्याकुलेक्षणाः । खनित्रलाङ्गलधरा नानावृक्षशिलाधराः ॥ २७ ॥
अभ्यधावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् । अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि ॥ २८ ॥
दुर्मेधस्त्वं हि संप्राप्तान्विद्धि नः सगरात्मजान् । श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ॥ २९ ॥
रोषेण महताविष्टो हुंकारमकरोत्तदा । ततस्तेनाप्रमेयेण कापिलेन महात्मना ॥
भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः ॥ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–तमिति । खनन्तस्ते सर्वे षष्टिः पुत्रसहस्राणि सागराः सगरपुत्रास्तं सौमनसं गजं प्रदक्षिणं कृत्वा निरामयं कुशलं च पृष्ट्वा हैमवतीं हिमवत्संबन्धिनीमुत्तरां दिशं समुपाक्रान्ताः प्राप्ताः सन्तः तथा तेन प्रकारेण वसुधातलं विभिदुः । हे रघुश्रेष्ठ ! उत्तरस्यां दिशि हिमपाण्डुरं हिमसदृशश्वेतं भद्रेण कल्याणयुक्तेन वपुषा इमां महीं धारयन्तं भद्रं भद्राख्यगजं ददृशुः ततः दर्शनानन्तरमेनं भद्रं समालभ्य स्पृष्ट्वा प्रदक्षिणं च कृत्वा ततः उत्तरदिशातः प्रागुत्तरामैशानीं प्रथितां प्रसिद्धां दिशं गत्वा रोषात्क्रोधात्सर्वे सगरात्मजाः पृथिवीमभ्यखनन् । चतुर्णां संमिलितानां वयः 'सोमवतीमिति भट्टसंमतः पाठः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

गो० टी०–तमिति । निरामयं कुशलं समुपक्रान्ताः गताः वैभवतीं हिमवत्संबन्धिनीम् ॥ २० ॥

२२] ति० टी०–भद्रं भद्राख्यम् ॥ २२ ॥

गो० टी०–उत्तरस्यामिति।भद्रं भद्राख्यं भद्रेण शोभनेन

२३] ति० टी०–समालभ्य स्पृष्ट्वा ॥ २३ ॥

गो० टी०–समालभ्येति । समालभ्य स्पृष्ट्वा 'आलम्भः स्पर्शहिंसयोः' इत्यमरः ॥ २२ ॥

२४] ति० टी०–प्रागुत्तरामैशानीम् प्रथितां सर्वकर्माहंत्वेन प्रसिद्धाम् ॥ २४ ॥

गो० टी०–तत इति । प्रागुत्तरामैशानीं दिशं प्रथितामश्वगमनयोग्यतावतीं गमनखननक्रियाभेदात्सागरसगरात्मजपदप्रयोगः ॥ २३ ॥

२५] ति० टी०–कपिलं कपिलरूपधारिणम् ॥ २५ ॥

रा० टी०–ते इति । महात्मानः अतिप्रयत्नाः भीमवेगाः अतिवेगविशिष्टाः महाबलाः सर्वे ते सगरपुत्राः तत्र ऐशान्यां दिशि एव सनातनं नित्यसिद्धं कपिलं कपिलरूपवन्तं वासुदेवं ददृशुः । तुशब्द एवार्थे ॥ २५ ॥

गो० टी०–ते त्विति । महात्मानः महाकायाः कपिलं कपिलावतारम् ॥ २४ ॥

२६] ति० टी०–तस्य कपिलस्य ॥ २६ ॥

रा० टी०–हयमिति । हे रघुनन्दन ! तस्य देवस्य कपिलस्य अविदूरतः समीपे चरन्तं हयं च ददृशुः तेन हेतुना ते सर्वे अतुलमनुपमं प्रहर्षं प्राप्ताः ददृशुरित्यनुकृष्यते । चौ हेतौ ॥ २६ ॥

गो० टी०–हयं चेति । चरन्तं तृणानि भक्षयन्तम्॥२५॥

२७–३०] ति० टी०–तं कपिलम् । हन्तीति हनः पचाद्यच् । अविचारतस्तमेवाश्वापहारद्वारा यज्ञहन्तारं ज्ञात्वेत्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–ते तमिति । तं कपिलं यज्ञहनमश्वापहरणेन यज्ञविघ्नकर्तारं ज्ञात्वा संक्रुद्धाः अतिक्रोधं प्राप्ताः अत एव क्रोधपर्याकुलेक्षणाः अत एव खनित्रलाङ्गलधराः नानावृक्षशिलाधराः ते सगरात्मजाः अभ्यधावन्त तिष्ठ तिष्ठ इति च अब्रुवन् स्वस्थतया स्थिते एकाकिन्यपि तस्मिन् दृष्टे सर्वेषां वृक्षशिलादिग्रहणेन तिष्ठ तिष्ठेत्युक्त्या च तेषां श्रमः सूचितः तेन कपिलस्य तेजोतिशयः सूचितः ॥ २७ ॥

गो० टी०–ते तमिति।सार्धश्लोकः। तं कपिलम् ॥२६॥

रा० टी०–अस्माकमिति । हे दुर्मेधः दुष्टबुद्धे ! हि यतोऽस्माकं यज्ञियं तुरगमश्वं त्वं हृतवानसि हि अतः संप्राप्तान् सगरात्मजान्नोऽस्मान् त्वं विद्धि एतेनापराधतुल्यदण्डमवश्यं त्वं प्राप्स्यसीति ध्वनितम् ॥ २८ ॥

गो० टी०–अस्माकमिति । दुर्मेध इति संबोधनम् ॥२७॥

रा० टी०–श्रुत्वेति । हे रघुनन्दन ! तदा तत्कथनसमये

१ प्रमेयेनेति गो. रा. पाठः ।

एकचत्वारिंशः सर्गः ।

सगरनप्तुरसमञ्जसुतस्यांशुमतो स्वपितृमार्गेणार्थं पितृकृतान्तभौममार्गेण प्रक्रमणम्, तस्य भस्मराशित्वमापन्नानां पितॄणां समीपेऽश्वं दृष्ट्वा तत्रैव विरामः । स शोकाकुलो यावत्पश्यति तावद्वैनतेयेन कपिलहुंकारदग्धानां सलिलक्रियाकरणनिषेधः, गङ्गायां सलिलक्रियाकरणोपदेशश्च अंशुमतोऽश्वग्रहणपूर्वकराजासादनं पितृव्यवृत्तनिवेदनं च, सगरस्य यज्ञपरिसमाप्तिः, सगरस्य त्रिंशद्वर्षसहस्रं राज्यकरणं पश्चात्स्वर्गगमनं च ।

पुत्रांश्चिरगतान्ज्ञात्वा सगरो रघुनन्दन । नप्तारमब्रवीद्राजा दीप्यमानं स्वतेजसा ॥ १ ॥
शूरश्च कृतविद्यश्च पूर्वैस्तुल्योऽसि तेजसा । पितॄणां गतिमन्विच्छ येन चाश्वोपवाहितः ॥ २ ॥
अन्तर्भौमानि सत्त्वानि वीर्यवन्ति महान्ति च । तेषां तु प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकम् ॥ ३ ॥
अभिवाद्याभिवाद्यांस्त्वं हत्वा विघ्नकरानपि । सिद्धार्थः सन्निवर्तस्व मम यज्ञस्य पारगः ॥ ४ ॥
एवमुक्तोंऽशुमान्सम्यक्सगरेण महात्मना । धनुरादाय खड्गं च जगाम लघुविक्रमः ॥ ५ ॥
स खातं पितृभिर्मार्गमन्तर्भौमं महात्मभिः । प्रापद्यत नरश्रेष्ठ तेन राज्ञाभिचोदितः ॥ ६ ॥
देवदानवरक्षोभिः पिशाचपतगोरगैः । पूज्यमानं महातेजा दिशागजमपश्यत ॥ ७ ॥

तेषां सगरात्मजानां तद्वचनं श्रुत्वा महता रोषेणाविष्टः कपिलः हुंकारमकरोत् ॥ २९ ॥

गो० टी०–श्रुत्वेति । स्पष्टम् ॥ २८ ॥

रा० टी०–कपिलहुंकारोत्तरकालिकं वृत्तमाह–**तत** इति । हे काकुत्स्थनाम ! ततो हुंकारानन्तरमप्रमेयेन अनियतप्रभावेण महात्मना कपिलेन सर्वे सगरात्मजाः भस्मराशीकृताः भस्मसमूहतां प्रापिताः ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

गो० टी०–**तत** इति । अप्रमेयेन अप्रमेयवैभवेन ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

१] **ति० टी०**–चिरगतान् अप्रत्यागच्छत इति शेषः । नप्तारं पौत्रम् ॥ १ ॥

रा० टी०–भस्मराशीकरणान्तरकालिकं वृत्तमाह–**पुत्रा**–**निति** । हे रघुनन्दन चिरगतान् अश्वान्वेषणार्थं बहुकालतो देशान्तरं प्राप्तान् पुत्रान् ज्ञात्वा स्मृत्वा स्वतेजसा दीप्यमानं नप्तारमंशुमन्तं राजा सगरोऽब्रवीत् ॥ १ ॥

गो० टी०–**पुत्रानित्यादि** । नप्तारं पौत्रम् ॥ १ ॥

२] **ति० टी०**–पूर्वैः पितृभिः गतिं वृत्तान्तम् । येन चाश्वोऽपवाहितो देशान्तरं प्रापितस्तद्गतिं चान्विच्छान्वेषय ॥२॥

रा० टी०–**शूर** इति । तेजसा पूर्वैस्तुल्यः शूरः कृतविद्यः संपादितास्त्राविद्यश्चास्त्रमसि अतो हेतोः पितॄणां गतिमन्विच्छ अन्वेषणं कुरु येन अश्वोऽपहारितोऽपहृतस्तं चान्विच्छ एकश्चकारो हेत्वर्थकः ॥ २ ॥

गो० टी०–**शूर** इति । पूर्वैः पितृभिः पितॄणां कनिष्ठ-

पितॄणां गतिं मार्गं अन्विच्छ अन्वेषय अश्वो येनापवाहितस्तस्य च गतिमन्विच्छ ॥ २ ॥

३] **ति० टी०**–अन्तर्भौमानि भूमेरन्तर्जातानि सत्त्वानि प्राणिनः ॥ ३ ॥

रा० टी०–अन्वेषणरीतिमुपदिशन्नाह–**अन्तरिति** । अन्तर्भौमानि भूम्यन्तर्वर्तीनि सत्त्वानि वक्ष्यदृष्टप्राणिनः वीर्यवन्ति अतिवीर्ययुक्तानि महान्ति बृहच्छरीराणि च सन्ति अतस्तेषां सत्त्वानां प्रतिघातार्थं सासिमसिसहितं कार्मुकं धनुस्त्वं गृह्णीष्व ३॥

गो० टी०–**अन्तरिति** । अन्तर्भौमानि भूमेरन्तर्जातानि भूबिलमाश्रितानीत्यर्थः । यानीति शेषः ॥ ३ ॥

४–५] **ति० टी०**–अभिवाद्यान्नमस्कारार्हान् । मम यज्ञस्य पारगः पारप्रापकश्च भवेत्यर्थः ॥ ४ ॥ ५ ॥

रा० टी०–**अभिवाद्येति** । अभिवाद्यान् तत्र मिलिताभिवादनयोग्यान् अभिवाद्य प्रणम्य विघ्नकरांश्च हत्वा सिद्धार्थो निष्पादितप्रयोजनः प्राप्ताश्चक इत्यर्थः अत एव मम यज्ञस्य पारगस्त्वं संनिवर्तस्व अश्वं गृहीत्वा गृहमागच्छेत्यर्थः ॥ ४ ॥

गो० टी०–**अभिवाद्येति** । पारगः समाप्तिकरः ॥ ४ ॥

रा० टी०–**एवमिति**। महात्मना सगरेण एवमनेन प्रकारेण सम्यगुक्तः सम्यगुपदिष्टः लघुविक्रमः लघुना कालेन विक्रमो बहुगमनं यस्य सोंऽशुमान् धनुः खड्गं चादाय गृहीत्वा जगाम ॥५॥

गो० टी०–**एवमिति** । लघुविक्रमः शीघ्रगमनः ॥ ५ ॥

६–७] **ति० टी०**–पितृभिः खातं भूमेरन्तर्विथमानं मार्गं पितृवृत्तान्तपरिज्ञानाय प्रापद्यत प्राप्तः ॥ ६ ॥ ७ ॥ .

रा० टी०–**स** इति । नरश्रेष्ठ हे राम । तेन प्रसिद्धेन राज्ञा सगरेण अभिचोदितः प्रेरितः सोंऽशुमान् पितृखातं पितॄणां खननेन निर्मितमन्तर्भौमंभूम्यन्तर्विथमानं मार्गं महात्मभिरतिप्रयत्नैः प्रापद्यत । महात्मभिरिति पित्रन्वयि वा ॥६॥

---

१ हारित इति रा. पाठः । २ त्वमिति गो. रा. पाठः ।

THE KUPPUSWAMI CASTRI

स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयम् । पितॄन्स परिपप्रच्छ वाजिहर्तारमेव च ॥ ८ ॥
दिशागजस्तु तच्छ्रुत्वा प्रत्युवाच महामतिः । आसमञ्ज कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा सर्वानेव दिशागजान् । यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
तैश्च सर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः । पूजितः सहयश्चैवागन्तासीत्यभिचोदितः ॥ ११ ॥
तेषां तद्वचनं श्रुत्वा जगाम लघुविक्रमः । भस्मराशीकृता यत्र पितरस्तस्य सागराः ॥ १२ ॥
स दुःखवशमापन्नस्त्वसमञ्जसुतस्तदा । चुक्रोश परमार्तस्तु वधात्तेषां सुदुःखितः ॥ १३ ॥
यैर्ज्ञियं च हयं तत्र चरन्तमविदूरतः । ददर्श पुरुषव्याघ्रो दुःखशोकसमन्वितः ॥ १४ ॥
स तेषां राजपुत्राणां कर्तुकामो जलक्रियाम् । सैं जलार्थी महातेजा न चापश्यज्जलाशयम् ॥ १५ ॥

गो० टी०–स इति । खातं कूपमित्यर्थः ॥ ६ ॥

रा० टी०–दैत्येति । महातेजा अंशुमान् दैत्यादिभिः पूज्यमानं दिशागजमपश्यत ॥ ७ ॥

गो० टी०–दैत्येति । अपश्यत अपश्यत् ॥ ७ ॥

८] ति० टी०–निरामयं कुशलम् ॥ ८ ॥

रा० टी०–स इति । हे स! अरिनिवर्तक राम सांशुमान् तं गजं प्रदक्षिणं कृत्वैव निरामयं कुशलं च पृष्ट्वैव पितॄन् वाजिहर्तारं च पप्रच्छ ॥ ८ ॥

गो० टी०–स इति । परिपप्रच्छ कास्त इति शेषः ॥ ८ ॥

९–१०] ति० टी०–आसमञ्ज असमञ्जपुत्र इति संबोधनम् । इत्रभाव आर्षः ॥ ९ ॥ १० ॥

रा० टी०–दिशेति । दिशागजांशुमतस्तद्वचः श्रुत्वैव प्रत्याह तत्प्रतिवचनमेवाह हे आसमञ्ज! कृतार्थः दृष्टाश्वः अतएव सहाश्वः अश्वसहितः त्वं शीघ्रमेष्यसि स्वपितामहसमीपं प्राप्स्यसि एतेन गजानां (गजस्य) परमाभिज्ञत्वं सूचितम् विशेषवृत्तानुक्त्या तेषां (तस्य) दयालुत्वं सूचितम् । आसमञ्जशब्दःशिवाशयन्तः ॥ ९ ॥

गो० टी०–दिशेतिआसमञ्ज असमञ्जपुत्र!इत्रभावआर्षः९

रा० टी०–तस्येति । तस्य पूर्वदिग्गजस्य तद्वचनं श्रुत्वैव सर्वान् दिशो गजान् यथाक्रमं क्रममनतिक्रम्य यथान्यायं यथोचितं प्रष्टुं समुपचक्रमे ॥ १० ॥

गो०टी०–तस्येतिासमुपचक्रम इति सविनयत्वप्रकटनम्१०

११] ति० टी०–वाक्यं वक्तुमर्हम् कालदेशोचितवक्तव्यतत्त्वज्ञैः तदुचितवचनसमर्थैश्चेत्यर्थः द्वितीयवाक्ये कृत्यः । सहय आगन्तासीत्यभिचोदितश्च बोधितश्च ॥ ११ ॥

रा० टी०–तैरिति । वाक्यज्ञैः परवचनश्रवणमात्रेणाशयाभिज्ञैः वाक्यकोविदैः वचननिपुणैर्दिशां पालैः सर्वैरेव तैर्गजैः पूजितः सहय एव त्वं गन्तासीत्यभिचोदितश्च एवांशुमानासीदिति शेषः । विशेषवृत्तं तैरपि नोक्तमित्यर्थः । तेन तेषामपि तत्त्वं व्यञ्जितम् । एकश्चशब्द एवार्थे ॥ ११ ॥

गो० टी०–तैश्चेति । वक्तुमर्ह वाक्यम् "ऋहलोर्ण्यत् । चजोः कुघिण्यतोः" इतिकुत्वं वाक्यकोविदैः कालदेशोचितवक्तव्यार्थज्ञैः यद्वा परवाक्याशयज्ञैः स्वयं वाक्यप्रयोगकुशलैश्चेत्यर्थः सहयः पितामहसमीपं गन्तासीत्याभचोदितोऽभूत् ॥ ११ ॥

१२] ति० टी०–यत्र पितरः सागरा भस्मराशीकृतास्तत्र देशे जगामेत्यन्वयः ॥ १२ ॥

रा० टी०–तेषामिति । तेषां गजानां तद्वचनं श्रुत्वा लघुविक्रमांशुमान् यत्र तस्यांशुमतः पितरः सागरा भस्मराशीकृतास्तत्र जगाम ॥ १२ ॥

गो० टी०–तेषामिति । तस्यांशुमतः पितरो यत्र भस्मराशीकृतास्तं देशं जगाम ॥ १२ ॥

१३–१५] ति० टी०–चुक्रोश भस्मीभूतपितॄनिति शेषः ॥ १३ ॥ १४ ॥ १५ ॥

रा० टी०–स इति । तदा प्राप्तिसमये एव असमञ्जसुतः सांशुमान् दुःखवशमापन्नः कुशकुनदर्शनादिना किंचिदुःखं प्राप्त इत्यर्थः । पश्चात्तेषां पितॄणां वधाद्वधमवगत्य सुदुःखितः अत्यन्तदुःखं प्राप्तः अत एव परमार्तः पृथिव्यां लुण्ठितः चुक्रोश रुरोद । एकस्तुशब्द एवार्थे द्वितीयः पश्चादर्थकः ॥ १३ ॥

गो० टी०–स इति । पूर्वमदर्शनाद्दुःखवशमापन्नस्तेषां वधात् वधदर्शनात् सुदुःखितः परमार्तः भृशं तप्तः चुक्रोश रुरोद ॥ १३ ॥

रा० टी०–यज्ञियमिति । तत्र तस्मिन्समये दुःखशोकसमन्वितः पुरुषव्याघ्रोंऽशुमान् अविदूरत एव चरन्तं यज्ञियं हयं ददर्श । चशब्द एवार्थे ॥ १४ ॥

गो० टी०–यज्ञीयमिति । शोकः विलापः ॥ १४ ॥

रा० टी०–स इति । तेषां दग्धानां राजपुत्राणां जलक्रियां कर्तुकामः अत एव सलिलार्थी सलिलप्रयोजनवान् महातेजाः सांशुमान् जलाशयं नैवापश्यत् । चशब्द एवार्थे१५

गो० टी०–स इति । जलक्रिया तर्पणम् ॥ १५ ॥

१ प्रत्याहांशुमतो वचः इति गो. रा. पाठः । २ दिशो गजानिति रा. पाठः । ३ चैव गन्तासीति गो. रा. पाठः । ४ यज्ञीयमिति गो. पाठः । ५ सलिलार्थीति गो. रा. पाठः । ६ दैत्यदानवेति गो. रा. पुस्तकयोर्मूले पाठो बोध्यः ।

विसार्य निपुणा दृष्टिं ततोऽपश्यत्खगाधिपम् । पितॄणां मातुलं राम सुपर्णमनिलोपमम् ॥ १६ ॥
स चैनमब्रवीद्वाक्यं वैनतेयो महाबलः । मा शुचः पुरुषव्याघ्र वधोऽयं लोकसंमतः ॥ १७ ॥
कपिलेनाप्रमेयेण दग्धा ह्यमे महाबलाः । सलिलं नार्हसि प्राज्ञ दातुमेषां हि लौकिकम् ॥ १८ ॥
गङ्गा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ । तस्यां कुरु महाबाहो पितॄणां सलिलक्रियाम् ॥ १९ ॥
भस्मराशीकृतानेतान्प्लावयेल्लोकपावनी । तया क्लिन्नमिदं भस्म गङ्गया लोककान्तया
षष्टिं पुत्र सहस्राणि स्वर्गलोकं गमिष्यति ॥ ॥ २० ॥
निर्गच्छाश्वं महाभाग संगृह्य पुरुषर्षभ । यज्ञं पैतामहं वीर निर्वर्तयितुमर्हसि ॥ २१ ॥
सुपर्णवचनं श्रुत्वा सोंऽशुमानतिवीर्यवान् । त्वरितं हयमादाय पुनरायान्महातपाः ॥ २२ ॥

१६] ति० टी०–विसार्य समन्तात्प्रसार्येत्यर्थः । निपुणा दूरविवेचनसमर्थाम् पितॄणां मातुलम् सुपर्णभगिनी सुमतिरिति प्रागुक्तत्वात् अनिलोपमं वेगेन वायूपमम् ॥ १६ ॥

रा० टी०–विसार्येति । हे राम ! निपुणां दूरदर्शनक्षमां दृष्टिं विसार्य सर्वतः प्रसार्य पितॄणां मातुलमनिलोपमं वायुसदृशं खगाधिपं सुपर्णं गरुडं तत्र तस्मिन्समये अपश्यत् अंशुमानिति शेषः ॥ १६ ॥

गो० टी०–विसार्येति । विसार्य समंतात्प्रसार्य निपुणां दूरवीक्षणक्षमाम् अनिलोपमं वेगेनेति शेषः ॥ १६ ॥

१७] ति० टी०–लोकसंमतो लोकहित एतन्मूलकतया सर्वलोकहितगङ्गाया भूलोकेऽवतारणात् ॥ १७ ॥

रा० टी०–स इति । महाबलः सोंऽशुमता दृष्टो वैनतेयो गरुड एनमंशुमन्तं वाक्यमब्रवीत् । तद्वाक्यमेवाह–हे पुरुषव्याघ्र ! अयं वधः लोकसंमतः लोकानामूर्ध्वाधोमध्यवर्तिभुवनानां संमतः अतो मा शुचः शोकं न कुरु । चशब्दो हेत्वर्थो॥१७॥

गो० टी०–स चेति । लोकसंमतः लोकहितः ॥ १७ ॥

१८–१९] ति० टी०–हि यस्मात्कपिलेन दग्धाः यतश्च महाबला महाबलत्वेन प्रायश्चित्तमर्यादातिक्रान्तपापवन्तः अतो लौकिकं सलिलं दातुं नार्हसि । ‘ चण्डालादुदकात्सपार्द्वेयुताद्ब्राह्मणादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥ उदकं पिण्डदानं च न तेषां तु विधीयते ’ इति स्मृतेः । प्रकृते ब्राह्मणाद्बधो महापापित्वं च ॥ १८ ॥ १९ ॥

रा० टी०–कपिलेनेति । हे प्राज्ञ ! अप्रमेयेण इयत्तारहितप्रभावविशिष्टेन कपिलेन इमे महाबला हताः अतो लौकिकं सलिलमेषां दातुं नैवार्हसि । हिशब्द एवार्थे द्वितीयो हेत्वर्थे ॥ १८ ॥

गो० टी०–कपिलेनेति । हि यस्मात्कपिलेन हताः लौकिकं लोकतः प्राप्तं सलिलं दातुं नार्हसि । ‘चण्डालादुदकात्सपार्द्वेयुताद्ब्राह्मणादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥ उदकं पिण्डदानं च एतेभ्यो यद्विधीयते । नोपातेष्ठति तत्सर्वमन्तरिक्षे विनश्यति’ इति स्मृतेः । कपिलो ब्राह्मणः॥१८॥

रा० टी०–नन्वस्ति किमलौकिकजलमस्ति यद्दातव्यमित्यत आह–गङ्गेति । हे पुरुषर्षभ पुरुषश्रेष्ठ महाबाहो ! हिमवतो ज्येष्ठा दुहिता या गङ्गा तस्यां पितॄणां सलिलक्रियां कुरु ॥१९॥

गो० टी०–गङ्गेति । गङ्गा अस्तीति शेषः ॥ १९ ॥

२०] ति० टी०–तर्हि देवलोकं गत्वा गङ्गोदकेन क्रिया कार्या । नेत्याह–भस्मेति । यदा प्लावयेत्तदा गङ्गया क्लिन्नं सिक्तमिदं भस्म हे पुत्र षष्टिं सहस्राणि सागरान्स्वर्गलोकं गमिष्यति प्रापयिष्यतीत्यर्थः । ‘ नयिष्यति’ इति पाठे नेष्यतीत्यर्थः । अनेन सगरपुत्राणां मन्वाद्युक्तप्रायश्चित्ताविषयत्वं सूचितम् । तत्प्रायश्चित्तविषयाणामपि पापिनां पुत्रलस्य गङ्गाजलस्पर्शः सर्वपापप्रायश्चित्तमिति सूचितम् । अकृतप्रायश्चित्तानामपि महापातकिनामौर्ध्वदेहिकायोग्यानां गङ्गाजलस्पृष्टपुत्रलानां विनापि प्रायश्चित्तान्तरं तत्काल एव सकलौर्ध्वदेहिकक्रियायोग्यत्वं च सूचितम् ॥ २० ॥

रा० टी०–अलौकिकजलेन सलिलक्रियाकरणे हेतुमाह–भस्मेति । लोकपावनी गङ्गा एतान् भस्मराशीकृतान् प्लावयेत् । ननु तया भस्मप्लावने किं फलमित्यत आह–लोककान्तया ज्ञानोत्पादनद्वारा लोकप्रकाशिकया तया प्रसिद्धया गङ्गया इदं क्लिन्नं प्लावितं भस्म षष्टिं पुत्रसहस्राणि स्वर्गलोकं नयिष्यति नेष्यति एतेन अवश्यं गङ्गानयने यत्नः कर्तव्य इति ध्वनितम् ॥ २० ॥

गो० टी०–न केवलं तत्र जलक्रिया तया सेचनीयं चेत्याह–भस्मेति । सार्धश्लोकः । यदि प्लावयेत्सेचयेत् तदा तया क्लिन्नं सिक्तं भस्म नयिष्यति नेष्यति ॥ २० ॥

२१–२२] ति० टी०–अश्वं गृहीत्वा निर्गच्छ । निर्वर्तयितुं समापयितुम् ॥ २१ ॥ २२ ॥

रा० टी०–तात्कालिककर्तव्यमाह–गच्छेति । हे महाभाग हे पुरुषर्षभ ! अश्वं संगृह्य त्वं गच्छ तेन पैतामहं यज्ञं संवर्तयितुं संसाधयितुमर्हस्येव चशब्द एवार्थे ॥ २१ ॥

गो० टी०–गच्छेति । संवर्तयितुं समापयितुम् ॥ २१ ॥

---

१ तत्रेति रा. पाठः । २ हता इति रा. पाठः । ३ तु जलक्रियामिति गो. पाठः । ४ नयिष्यतीति गो. रा. पाठः । ५ गच्छ चाश्वमिति गो. रा. पाठः । ६ संवर्तयितुमिति गो. रा. पाठः । ७ महायशा इति गो. रा. पाठः ।

ततो राजानमासाद्य दीक्षितं रघुनन्दन । न्यवेदयद्यथा वृत्तं सुपर्णवचनं तथा ॥ २३ ॥
तच्छ्रुत्वा घोरसंकाशं वाक्यमंशुमतो नृपः । यज्ञं निर्वर्तयामास यथाकल्पं यथाविधि ॥ २४ ॥
स्वपुरं त्वागमच्छ्रीमानिष्टयज्ञो महीपतिः । गङ्गायाश्चागमे राजा निश्चयं नाध्यगच्छत ॥ २५ ॥
अगत्वा निश्चयं राजा कालेन महता महान् । त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ।

अंशुमतो राज्यप्राप्तिः, तस्य पुत्राय दिलीपाय राज्यप्रदानपूर्वकं हिमवच्छिखरे गमनं तपोनुष्ठानेन स्वर्गगमनं च, दिलीपस्य यज्ञकरणं स्वात्मजभगीरथाय राज्यदानं स्वर्गगमनं च, मन्त्रिषु राज्यमाधाय तीव्रं तपश्चरतो भगीरथस्य प्रसन्नाद्ब्रह्मणो वरलाभः, गङ्गापतनधारणक्षमः शिव एवेति कथनं च ।

कालधर्मं गते राम सगरे प्रकृतीजनाः । राजानं रोचयामासुरंशुमन्तं सुधार्मिकम् ॥ १ ॥
स राजा सुमहानासीदंशुमान्रघुनन्दन । तस्य पुत्रो महानासीद्दिलीप इति विश्रुतः ॥ २ ॥

रा० टी०–सुपर्णेति । अतिवीर्यवान् महायशाः सः प्रसिद्धः अंशुमान् सुपर्णवचनं श्रुत्वा हयमादाय त्वरितं पुनः आयात् ॥ २२ ॥

गो० टी०–सुपर्णेति । आयात् आगच्छत् ॥ २२ ॥

२३–२४] ति० टी०–वृत्तं पितृव्यवृत्तं तथा सुपर्णवचनं च यथा तथा न्यवेदयत् ॥ २३ ॥ २४ ॥

रा० टी०–तत इति । हे रघुनन्दन ! ततः कपिलाश्रमात् दीक्षितं राजानमासाद्य प्राप्य वृत्तं पितॄणां वृत्तान्तं यथा यथावन्न्यवेदयत् तथा तेन प्रकारेण सुपर्णवचनं च न्यवेदयत् ॥ २३ ॥

गो० टी०–तत इति । वृत्तं पितृवृत्तान्तं सुपर्णवचनं च यथा तथा न्यवेदयदित्यन्वयः ॥ २३ ॥

रा० टी०–तदिति । घोरसंकाशं घोरत्वेन प्रकाशमानं अंशुमतस्तद्वाक्यं श्रुत्वा नृपः सगरः यथाकल्पं यथासामर्थ्यं यथाविधि विधिमनतिक्रम्य यज्ञं निर्वर्तयामास समापयाञ्चकार ॥ २४ ॥

गो० टी०–तच्छ्रुत्वेति । यथाकल्पं यथाक्रमम् ॥ २४ ॥

२५–२६] ति० टी०–इष्टयज्ञ इति बहुव्रीहिः । आगमे[1] भूमावागमे निश्चयमुपायविषयं नाध्यगच्छतेति तदार्षः ॥ २५ ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०–स्वेति । श्रीमान् इष्टयज्ञः महीपतिः सगरः स्वपुरं शीघ्रमेवागमत् । राजा सगरः गङ्गायाः आगमे निश्चयं नैवाध्यगच्छत् । तुचशब्दो एवार्थौ ॥ २५ ॥

गो० टी०–स्वेति । निश्चयमुपायम् ॥ २५ ॥

रा० टी०–अगत्वेति । महान् राजा सगरः निश्चयं गङ्गानयने यत्नविशेषं महता कालेनापि अगत्वा अप्राप्य त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०–अकृत्वेति[2] । महता कालेन दिवं गत इत्यन्वयः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

१–२] ति० टी०–कालधर्मो मृत्युः प्रकृतीजना अमात्यवर्गाः दीर्घश्छान्दसः । रोचयामासुर्न्यायप्राप्तत्वादैच्छन् ॥१॥२॥

रा० टी०–सगरकर्तृकस्वर्गगमनानन्तरकालिकं वृत्तमाह–कालेति । हे राम ! सगरे कालधर्मं गते सति प्रकृतीजनाः सर्वाः प्रजाः सुधार्मिकमंशुमन्तं राजानं रोचयामासुः राजत्वेनेयुः । प्रकृतिशब्दो दीर्घकारान्तोऽपि "कृदिकारादक्तिनः" इति ङीप्रवृत्तेः । क्तिन्नन्तत्वात्र तत्प्रवृत्तिरिति तु न भ्रमितव्यम् संज्ञावाचकत्वेन क्तिजन्तत्वात् । संज्ञात्वे प्रमाणम् 'प्रकृतिः सहजे योनावमात्ये परमात्मनि' इति वैजयन्ती । एतेन छान्दसो दीर्घ इति भूषणाद्युक्तिर्नादर्तव्या ॥ १ ॥

गो० टी०–अथ गङ्गायाश्चिरपथगमनहेतुप्रश्नस्य पूर्वप्रकृतस्य साक्षादुत्तरमाह–कालधर्ममिमित्यादि । जातमात्रस्य कालेनावश्यं प्राप्तव्यो धर्मः कालधर्मः मरणमिति यावत् । प्रकृतीजना इत्यत्र दीर्घश्छान्दसः । अमात्यवर्गाः 'प्रकृतिः सहजे योनावमात्ये परमात्मनि' इति वैजयन्ती । रोचयामासुः न्यायप्राप्तत्वादैच्छन् ॥ १ ॥

रा० टी०–स इति । हे रघुनन्दन ! सः प्रजाभिः राजत्वेन इष्टः अंशुमान् सुमहान् राजा आसीत् । तस्यांशुमतः पुत्रः महान् सर्वपूज्यः दिलीप इति विश्रुतः ख्यातः आसीत् ॥ २ ॥

१ चागमदिति गो. पाठः । २ अकृत्वेति गो. पाठः ।

तस्मै राज्यं समादिश्य दिलीपे रघुनन्दन । हिमवच्छिखरे रम्ये तपस्तेपे सुदारुणम् ॥ ३ ॥
द्वात्रिंशच्छतसाहस्रं वर्षाणि सुमहायशाः । तपोवनगतो राजाँ स्वर्गं लेभे तपोधनः ॥ ४ ॥
दिलीपस्तु महातेजाः श्रुत्वा पैतामहं वधम् । दुःखोपहतया बुद्ध्या निश्चयं नाध्यगच्छत ॥ ५ ॥
कथं गङ्गावतरणं कथं तेषां जलक्रिया । तारयेयं कथं चैतानिति चिन्तापरोऽभवत् ॥ ६ ॥
तस्य चिन्तयतो नित्यं धर्मेण विदितात्मनः । पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ॥ ७ ॥
दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् । त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ॥ ८ ॥
अगत्वा निश्चयं राजा तेषामुद्धरणं प्रति । व्याधिना नरशार्दूल कालधर्ममुपेयिवान् ॥ ९ ॥
इन्द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा । राज्ये भगीरथं पुत्रमभिषिच्य नरर्षभः ॥ १० ॥
भगीरथस्तु राजर्षिर्धार्मिको रघुनन्दन । अनपत्यो महाराजः प्रजाकामः स चै प्रजाः ॥ ११ ॥

गो० टी०–स इति । सः सुमहान् राजासीदित्यन्वयः॥२॥

३–४] ति० टी०–दिलीपे दिलीपाय । तपस्तेपे पितृगतये गङ्गाया भूलोकावतारणायेति शेषः ॥ ३ ॥ ४ ॥

रा० टी०–तस्मिन्निति । हे रघुनन्दन ! तस्मिन् दिलीपे राज्यं समावेश्य रम्ये हिमवच्छिखरे सुदारुणं तपस्तेपे गङ्गानयनकामनया अंशुमानिति शेषः ॥ ३ ॥

गो० टी०–तस्मिन्निति । तेपे गङ्गावतरणायेति शेषः॥३॥

रा० टी०–द्वात्रिंशच्चेति । द्वात्रिंशत्सहस्राणि वर्षाणि तपोवनगतस्तपोवनं प्राप्तः अत एव तपोधनः राजांशुमान् स्वर्गमेव लेभे । एवेन गङ्गालाभव्यवच्छेदः । चशब्द एवार्थे ॥४॥

गो० टी०–द्वात्रिंशादिति । स्वर्गं लेभे नतु गङ्गाम् ॥४॥

५] ति० टी०–पैतामहं वधं पितामहानां सागराणामपमृत्युम् ॥ ५ ॥

रा० टी०–दिलीप इति । महातेजाः दिलीपः पैतामहं पितामहसंबन्धिनं वधं मृत्युं श्रुत्वैव दुःखोपहतया दुःखाभिभूतयाबुद्ध्या निश्चयं गङ्गानयनोपायविषयकबुद्धिं नाध्यगच्छत न प्राप्नोत् । एतेन चिन्तापरतयैव बहूनि दिनानि व्यतीतानीति ध्वनितम् ॥ ५ ॥

गो० टी०–दिलीप इति । वधमपमृत्युं दुःखोपहतया पित्रा दुश्चरे तपसि कृतेऽपि तेषां गतिर्नाभूदित्येवंरूपया नाध्यगच्छत नाध्यगच्छत् ॥ ५ ॥

६]ति० टी०–निश्चयानधिगमनमभिनयति–कथमिति॥६॥

रा० टी०–चिन्तास्वरूपमेवाह–कथमिति । गङ्गावतरणं गङ्गाया आगमनं कथं स्यात् । नतु मास्त्वागमनमत आह–तेषामपमृत्युप्राप्तानां पितॄणां जलक्रिया कथं स्यात् । नतु जलान्तरेण जलक्रियास्त्वित्यत आह–कथमेतान् पितॄन् तारयेयम् एतेन जलान्तरेण जलक्रियया एषां तरणं न भविष्यतीति सूचितम इति एवंप्रकारेण चिन्तापर एवाभवत् दिलीप इति शेषः । चशब्द एवार्थे ॥ ६ ॥

गो० टी०–निश्चयानधिगममेवाह–कथमित्यादिना ॥ ६ ॥

७] ति० टी०–धर्मेण विदितेति धर्मेण प्रसिद्ध इत्यर्थः ॥ ७ ॥

रा० टी०–तस्येति । नित्यं चिन्तयतः धर्मेण धर्माचरणेन विदितः प्रख्यातः आत्मा स्वरूपं यस्य तस्य दिलीपस्य परमधार्मिकः भगीरथो नाम पुत्रः जज्ञे ॥ ७ ॥

गो० टी०–तस्येति । धर्मेण प्रयोजकेन चिन्तयतः ॥ ७ ॥

८] ति० टी०–अकारयत्कृतवान् ॥ ८ ॥

रा० टी०–दिलीप इति । महातेजाः दिलीपस्तु बहुभिः यज्ञैः इष्टवान् । तद्राज्यकरणसंख्यामाह–त्रिंशद्वर्षसहस्राणि राजा दिलीपः राज्यमकारयत् । रामो राज्यमचीकरदित्यादाविव णिच्प्रयोगः ॥ ८ ॥

गो० टी०–दिलीप इति । अकारयत् अकरोत् ॥ ८ ॥

९–१०] ति० टी०–व्याधिना पितॄणामुद्धरणालाभजन्यदुःखजेन । तद्दिलीपवंशजो रघुपुत्रको दिलीपः कालिदासोक्तोऽन्य एवेति बोध्यम् ॥ ९ ॥ १० ॥

रा० टी०–अगत्वेति । हे नरशार्दूल ! राजा दिलीपस्तेषामपमृत्युं प्राप्तानां पितॄणामुद्धरणं प्रति निश्चयमगत्वा अप्राप्य व्याधिना कालधर्ममुपेयिवान् प्राप ॥ ९ ॥

गो० टी०–अगत्वेति । उपेयिवान् ययौ ॥ ९ ॥

रा० टी०–कालधर्मप्राप्तिप्रकारं वर्णयन्नाह–इन्द्रेति । राज्ये पुत्रं भगीरथमभिषिच्य स्वार्जितेन कर्मणैव राजा दिलीपः इन्द्रलोकं गतः ॥ १० ॥

गो० टी०–इन्द्रेति । अभिषिच्य इन्द्रलोकं गतः ॥ १० ॥

११] ति० टी०–स च प्रजा इत्यस्य मन्त्रिष्वाधायेत्युत्तरेणान्वयः ॥ ११ ॥

रा० टी०–भगीरथ इति । हे रघुनन्दन ! राजर्षिः धार्मिकः धर्मनिरतः भगीरथस्तु अनपत्यः अपत्यरहित आसीदिति शेषः । हे रघुनन्दन ! अप्रजाः अपत्यरहितः अत एव प्रजाकामः अपत्यविषयकेच्छावान् स भगीरथः मन्त्रिषु तद्राज्यमाधाय नियुज्य गङ्गावतरणे गङ्गानयने रतः अत एव गोकर्णे

१ तस्मिन्निति गो. रा. पाठः । २ च सहस्राणीति गो. पाठः । ३ रामेति गो. रा. पाठः । ४ चाप्रजाः इति गो. रा. पाठः ।

मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः । तेपो दीर्घं समातिष्ठद्गोकर्णे रघुनन्दन ॥ १२ ॥
ऊर्ध्ववाहुः पञ्चतपा मासाहारो जितेन्द्रियः । तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ॥ १३ ॥
अतीतानि महाबाहो तस्य राज्ञो महात्मनः । सुप्रीतो भगवान्ब्रह्मा प्रजानां प्रभुरीश्वरः ॥ १४ ॥
ततः सुरगणैः सार्धमुपागम्य पितामहः । भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ १५ ॥
भगीरथ महाराज प्रीतस्तेऽहं जनाधिप । तपसा चैव सुतप्तेन वरं वरय सुव्रत ॥ १६ ॥
तमुवाच महातेजाः सर्वलोकपितामहम् । भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः ॥ १७ ॥
यदि मे भगवान्प्रीतो यद्यस्ति तपसः फलम् । सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥ १८ ॥
गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् । स्वर्गं गच्छेयुरत्यन्तं सर्वे च प्रपितामहाः ॥ १९ ॥

गोकर्णाभिधमहादेवसमीपे ऊर्ध्ववाहुः पञ्चतपाः पञ्चानां पार्श्वचतुष्टयवर्तिवह्न्यूर्ध्ववर्तिसूर्याणां मध्ये तपो यस्य उक्तैः पञ्चभिस्तपो यस्येति वा मासाहारः मासे मासान्ते आहारो भोजनं यस्य जितेन्द्रियः सन् दीर्घं तपः समातिष्ठत् अकरोत्। चशब्दो हेत्वर्थे सार्धश्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–भगीरथ इति । अनपत्यः अत एव प्रजाकामोऽभूत् स चाप्रजा इत्युत्तरशेषः ॥ ११ ॥

१२] ति० टी०–प्रजास्तद्राज्यं च मन्त्रिष्वाधाय गङ्गावतरणेच्छुस्तप आतिष्ठत् । गोकर्णो हिमवत्पादविशेषः दक्षिणदिक्स्थतीर्थविशेषो वा ॥ १२ ॥

गो० टी०–स इति। गोकर्णे हिमवत्पादविशेषे पञ्चाग्रयः चतुर्षु पार्श्वेष्वग्रय उपरि सूर्यश्च तेषां मध्ये तपो यस्य सः पञ्चतपाः मासस्य सकृदाहारो यस्य स मासाहारः उभयत्र मध्यमपदलोपी समासः पृषोदरादित्वात्साधुत्वम् ॥ १२ ॥ १३ ॥

१३] ति० टी०–पञ्चतपाः पञ्चाग्निमध्ये तपो तस्य । मासाहारो मासे गते आहारो यस्य । वर्षसहस्राण्यतीतानीत्यन्वयः ॥ १३ ॥

रा० टी०–तस्येति । हे महाबाहो ! घोरे तपसि तिष्ठतस्तस्य भगीरथस्य वर्षसहस्राणि अतीतानि व्यतीतानि अत एव महात्मनस्तस्य राज्ञो भगीरथस्य उपरि भगवान् सकलैश्वर्यविशिष्टः प्रजानां पतिः स्वामी अत एव ईश्वरो नियन्ता ब्रह्मा सुप्रीतोऽभवदिति शेषः । सार्धश्लोकः संमिलितान्वयी ॥ १३ ॥

गो० टी०–तस्येति । तस्य राज्ञो महात्मन इत्युत्तरशेषः ॥ १४ ॥

१४–१५] ति० टी०–तस्य राज्ञः सुप्रीत इत्यन्वयः । १४ ॥ १५ ॥

गो० टी०–सुप्रीत इत्यर्थम् ॥ १५ ॥

रा० टी०–तत इति । ततः सुप्रसादानन्तरं पितामहो ब्रह्मा सुरगणैः सार्धमुपागम्य प्राप्य महात्मानमतिप्रयत्नवन्तं तप्यमानं भगीरथमथ मङ्गलवचनमब्रवीत् । तद्वचनमेवाह–हे सुव्रत हे महातेजः हे भगीरथ हे जनाधिप ! ते सुतप्तेन तपसा अहं प्रीतः अतः वरं वरय । चशब्दो हेत्वर्थे ॥१४॥१५॥

गो० टी०–तत इति। अथ उपगमनानन्तरम् ॥ १६ ॥

१६–१७] ति० टी०–तपसा चेति । चस्त्वर्थे ॥ १६ ॥ १७ ॥

गो० टी०–भगीरथेति । ते तपसा प्रीतः ॥ १७ ॥

रा० टी०–तमिति । महातेजाः महाभागः परमभाग्यविशिष्टः कृताञ्जलिः प्रणतिसूचकबद्धयुगलकरः उपस्थितः समीपं प्राप्तो भगीरथस्तं प्रसन्नं सर्वलोकपितामहं ब्रह्माणमुवाच ॥१६॥

गो० टी०–तमिति । महातेजाः तपःकृतनिरवधिकतेजाः ॥ १८ ॥

१८] ति० टी०–यद्यस्तीत्याद्यसंदिग्धे संदिग्धवचनं वेदाश्चेत्प्रमाणं स्युरितिवत् । सलिलं स्पर्शमात्रेण स्वर्गतिसाधनं सलिलम् ॥ १८ ॥

रा० टी०–तद्वचनमेवाह–यदीति । भगवन् हे ब्रह्मन् ! यदि भवान् मे प्रीतः अस्ति तपसः फलं चास्ति तर्हि सर्वे सगरस्यात्मजाः सलिलं गङ्गाजलं मत्त आप्नुयुः प्राप्नुयुः ॥ १७ ॥

गो० टी०–यदीति मे तपस इत्यन्वयः ॥ १९ ॥

१९] ति० टी०–अभीष्टोक्तगुणकसलिलप्राप्तिं दर्शयति–गङ्गाया इति। एषां भस्मनि गङ्गायाः सलिलेन क्लिन्ने सति एतेऽत्यन्तमक्षय्यं यथा भवति तथा स्वर्गं गच्छेयुः नान्यथेत्यर्थः ॥ १९ ॥

रा० टी०–गङ्गाया इति । एषां महात्मनां भस्मनि गङ्गायाः सलिलक्लिन्ने सति अत्यन्तम् अन्तं ध्वंसमतिक्रान्तमक्षय्यमित्यर्थः स्वर्गं सर्वे मे प्रपितामहाः गच्छेयुः प्राप्नुयुः ॥१८॥

गो० टी०–न केवलं सलिलाग्निरन्यच्चेत्याह–गङ्गाया इति। अत्यन्तमक्षय्यम् ॥ २० ॥

१ स तपो दीर्घमातिष्ठदिति गो. रा. पाठः । २ पतिरिति गो. रा. पाठः । ३ महातेजः इति रा. महाभाग इति गो. पाठः । ४ जनेश्वरेति गो. पाठः । ५ ते इति गो. रा. पाठः । ६ महाभाग इति गो. रा. पाठः । ७ भगवन्निति गो. रा. पाठः । ८ मे इति गो. रा. पाठः ।

देवैं याचे ह संतत्यै नावसीदेत्कुलं च नः । इक्ष्वाकूणां कुले देव एष मेऽस्तु वरः परः ॥ २० ॥
उक्तवाक्यं तु राजानं सर्वलोकपितामहः । प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम् ॥ २१ ॥
मनोरथो महानेष भगीरथ महारथ । एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्धन ॥ २२ ॥
इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता । तां वै धारयितुं राजन्हरस्तत्र नियुज्यताम् ॥ २३ ॥
गङ्गायाः पतनं राजन्पृथिवी न सहिष्यते । तां वै धारयितुं राजन्नान्यं पश्यामि शूलिनः ॥२४॥
तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत् । जगाम त्रिदिवं देवैः सर्वैः सह मरुद्गणैः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

२०-२१] ति० टी०-इक्ष्वाकूणां कुले जातस्य मम सन्ततिर्देया यथा नः कुलं नावसीदेत् । सन्तत्यै इति चतुर्थी प्रथमार्थे एष परो वरः द्वितीयवर इत्यर्थः । परे तु सन्तत्यै तदर्थं नः कुलं नावसीदेदिति च याचे मत्कुलेऽसंततिः कोऽपि मा भूदित्यर्थः । उपसंहरति-इक्ष्वाकूणामिति । तत्कुले जातस्यैष एव वरोऽस्तु नातोऽधिकं तृतीयं वरान्तरं याचे इत्यर्थः । एतेन पूर्वपरोपकारिता भगीरथस्य दर्शितेत्याहुः ॥ २०॥२१ ॥

रा० टी०-वरान्तरं प्रार्थयते-देयेति । हे देव ! सन्ततिः पुत्रश्च मे मह्यं देया यतो नोऽस्माकं कुलं नावसीदेत् इक्ष्वाकूणां कुले जातस्य मे एषः परो द्वितीयो देवः प्रमोदकारकः वरोऽस्तु ॥ १९ ॥

गो० टी०-देया चेति । इक्ष्वाकूणां कुले जातस्य मे संततिर्देया यया नः कुलं नावसीदेदेष वरः परः द्वितीयो वरोऽस्त्विन्वयः । तपसे निर्गमदशायामपि हि प्रजाकाम इत्युक्तम् ॥२१॥

रा० टी०-उक्तेति । उक्तवाक्यमुच्चारितप्रार्थनावचनं राजानं भगीरथं सर्वलोकपितामहो ब्रह्मा शुभां शुभहेतुभूतामेव मधुरां मनोहरां मधुराक्षरां मनोहराक्षरविशिष्टां वाणीं प्रत्युवाच । तुशब्द एवार्थे ॥ २० ॥

गो० टी०-उक्तेति । शुभां शुभहेतुं मधुरामर्थतो मनोज्ञाम् ॥ २२ ॥

२२] ति० टी०-मनोरथः तावक इति शेषः ॥ २२ ॥

रा० टी०-तत्प्रतिवचनमेवाह-मनोरथ इति । हे महारथ हे भगीरथ हे इक्ष्वाकुकुलवर्धन ! एष ते महान् मनोरथः एवं सिद्धो भवतु ते भद्रं कल्याणमस्तु ॥ २१ ॥

गो० टी०-मनोरथ इति । मनोरथः तावक इति शेषः २३॥

२३] ति० टी०-स्वसमीपे स्थितत्वादियमिति निर्देशः २३॥

रा० टी०-इयमिति । हैमवती हिमवत्समीपवर्तिनी हिमवतो ज्येष्ठा सुता या इयं प्रसिद्धा गङ्गा तां तत्र गङ्गागमनसमये धारयितुं हरः एव नियुज्यतां प्रार्थ्यताम् । वैशब्द एवार्थे तेन तद्धारणसामर्थ्यं शिवातिरिक्तस्य नास्तीति बोधितम्॥२२॥

गो० टी०-इयमिति । इयं संनिहिता हैमवती हिमवत्संनिहिता धारयितुं शक्तः हरः तत्र धारणे नियुज्यतां प्रार्थ्यताम्॥

२४] ति० टी०-हरनियोगहेतुमाह-गङ्गाया इति । तां गङ्गाम् ॥ २४ ॥

रा० टी०-नन्वियं पृथिव्येव धारयिष्यतीत्यत आह-गङ्गाया इति । हे राजन् ! गङ्गायाः पतनं पृथिवी न सहिष्यते अतो हे राजन् ! तां गङ्गां धारयितुं शूलिनः शिवादन्यं न पश्यामि । वैशब्दः शीघ्रार्थकः ॥ २३ ॥

गो० टी०-गङ्गाया इति । धारयितुं शक्तमिति शेषः॥२५॥

२५] ति० टी०-गङ्गामाभाष्य राजानं यथाकालमनुगृहाणेत्युक्त्वा देवैराजानजैः मरुद्गणैः कर्मदेवैः ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रा० टी०-तमिति । लोककृद्ब्रह्मा राजानं तं भगीरथमेवमुक्त्वा गङ्गां चाभाष्य एतद्भगीरथप्रार्थनासिद्धिस्त्वया कर्तव्येत्युक्त्वा सर्वैर्देवैः सर्वैर्मरुद्गणैः सह त्रिदिवं स्वं लोकं जगाम पुनर्मरुद्गणोपादानं ब्राह्मणवशिष्ठन्यायेनेति बोध्यम् ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

गो० टी०-तमिति । आभाष्य वत्से राजानं यथाकालमनुगृहाणेत्युक्त्वेति यावत् । मरुद्गणैर्वायुगणैः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१ देया व संततिर्देवेति गो. रा. पाठः । २ सहिष्यतीति गो. रा. पाठः । ३ वैरिति गो. पाठः । ४ दैवैः सह देवैरिति गो. रा. पाठः ।

त्रिचत्वारिंशः सर्गः ।

भगीरथतपश्चरणसंतुष्टहराशिरसि गङ्गापतनम्, हरजटायां लोपभवनम्, भगीरथकृतशिवस्तुत्या गङ्गाया निर्गमनम्, सप्तस्रोतसामुत्पत्तिः, गङ्गाकृतयज्ञवाटप्लावनसंजातक्रोधेन जह्नुना गङ्गाप्राशनम् पुनर्भगीरथप्रार्थनया श्रोत्राभ्यां तद्विसर्जनं, गङ्गाया भगीरथेन सह रसातलगमनेन तत्पितामहपवित्रीकरणम्, तेषां स्वर्गप्राप्तिश्च ।

देवदेवे गते तस्मिन्सोऽङ्गुष्ठाग्रनिपीडिताम् । कृत्वा वसुमतीं राम वत्सरं समुपासत ॥ १ ॥
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः । उमापतिः पशुपती राजानमिदमब्रवीत् ॥ २ ॥
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम् । शिरसा धारयिष्यामि शैलराजसुतामहम् ॥ ३ ॥
ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता । तदा सातिमहद्रूपं कृत्वा वेगं च दुःसहम् ॥ ४ ॥
आकाशादपतद्रामं शिवे शिवशिरस्युत । अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ॥ ५ ॥
विशाम्यहं हि पातालं स्रोतसा गृह्य शंकरम् । तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान्हरः ॥ ६ ॥
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा । सा तस्मिन्पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि ॥ ७ ॥

१-२-३] ति० टी०-देवदेवे आजानजानामपि देवानां देवे पूज्ये अङ्गुष्ठाग्रेण निपीडिताम् । समुपासतेत्यार्षं बहुवचनम् समुपास्तेत्यर्थः । उमापतिमिति शेषः ॥ १ ॥ २ ॥ ३ ॥

रा० टी०-ब्रह्मगमनोत्तरकालिकं भगीरथवृत्तमाह-देवदेवेति । देवदेवे देवपूज्ये तस्मिन् ब्रह्मणि गते सति हे राम ! स भगीरथः अङ्गुष्ठाग्रनिपीडितां वामपादाङ्गुष्ठाग्रमात्राश्रितां वसुमतीं पृथिवीं कृत्वा संवत्सरमुपासत । गणकार्यस्यानेयत्वात् शप्श्रुतिः ॥ १ ॥

गो० टी०-अथ गङ्गाप्लवनेन सागराणां स्वर्गगतिस्त्रिचत्वारिंशे-देवदेव इत्यादि । उपासत उपास्त शिवमिति शेषः ॥१॥

रा० टी०-अथेति । अथ उपासनानन्तरं संवत्सरे पूर्णे सति सर्वलोकनमस्कृतः उमापतिः पशुपतिः शिवो राजानं भगीरथमिदमब्रवीत् उमापतिः पशुपतिरित्युक्त्या उमानन्दीश्वरयोः साहित्यं शिवस्य सूचितम् ॥ २ ॥

गो० टी०-अथेति । उमापतिरित्यनेनोमया सहागत त्युच्यते ॥ २ ॥

रा० टी०-तद्वचनमेवाह-प्रीत इति । हे नरश्रेष्ठ !अहं ते प्रीतः त्वद्विषयकप्रीतिमानतस्तव प्रियमीप्सितं करिष्यामि । प्रेयमेव निर्दिशन्नाह-शैलज्येष्ठसुतां गङ्गामहं शिरसा धारयिष्यामि ॥ ३ ॥

गो० टी०-प्रीत इति । प्रियं करिष्यामीत्येतद्विष्टणोति-शेरसेति ॥ ३ ॥

४] ति० टी०-तदा सेति । ईश्वरेण धारणाङ्गीकारे कृते सतीत्यर्थः ॥ ४ ॥

रा० टी०-तत इति । तदा धारणप्रतिज्ञानन्तरकाले सलोकनमस्कृता ज्येष्ठा हैमवती हिमवत्कन्या सा प्रसिद्धा गङ्गा सातिमहद्रूपं दुःसहं *महद्वेगं च कृत्वा ततः गङ्गाभवनत्वेन प्रसिद्धादाकाशात् शिवे सकलकल्याणमूलभूतशिवशिरसि उत वितर्केणापतत् । सार्धश्लोक एकान्वयी ॥ ४ ॥

गो० टी०-तत इति । अर्धत्रयमेकान्वयम् । हैमवती हिमवत्कन्या शिवे शुद्धे । उतेति प्रसिद्धौ ॥ ४ ॥

५] ति० टी०-शिवे शोभने । तादृशरूपकरणे हेतुमाह-अचिन्तयदित्यादि ॥ ५ ॥

रा० टी०-तद्विततर्कमेव निर्दिशन्नाह-अचिन्तयदिति । स्रोतसा शंकरमागृह्यैव पातालमहं विशामीति परमदुर्धरा सा देवी गङ्गा अचिन्तयत् । चकार इत्यर्थकः हिरेवार्थकः । एतेन गङ्गायाः शिवे प्रीत्यतिशयः खेलनेच्छा च सूचिता ॥ ५ ॥

गो० टी०-महारूपदुःसहवेगकरणे निमित्तमाह-अचिन्तयदिति । दुर्धरा धर्तुमशक्या गृह्य गृहीत्वा ॥ ५ ॥

६] ति० टी०-तस्यावलेपनमिति संधिरार्षः अवलेपनं स्वस्यापि स्रोतसोभिभवनचिन्तारूपं गर्वम् ॥ ६ ॥

रा० टी०-तस्या इति । तदा गङ्गाविचारसमये एव तस्याः गङ्गायाः लेपनं खेलनेच्छावृद्धिं ज्ञात्वा क्रुद्धो व क्रुद्ध इव भगवान् अतिसामर्थ्यविशिष्टस्त्रिनयनो हरः तिरोभावयितुं स्वशिरसि गङ्गां गोपयितुं बुद्धिं निश्चयं चक्रे एतेन शिवस्यापि खेलनेच्छा सूचिता । तुशब्द एवार्थे वशब्द इवार्थे अत एव संधौ नार्षकल्पना ॥ ६ ॥

गो० टी०-तस्या इति । वलेपनं गर्वं "वष्टिभागुरिः" इत्यलोपः तिरोभावयितुं तिरोहितां कर्तुम् ॥ ६ ॥

७] ति० टी०-तिरोभावयितुं जटामण्डले तिरोधानेनाभिभूतां कर्तुम् ॥ ७ ॥

रा० टी०-सेति । हे राम ! पुण्या परमपवित्रत्वहेतुभूता सा गङ्गा पुण्ये अतिपवित्रत्वहेतुभूते हिमवत्प्रतिमे हिमवान्

१ संवत्सरमुपासतेति गो. रा. पाठः । २ अस्मात्प्राक् ऊर्ध्वबाहुर्निरालम्बो वायुभक्षो निराश्रयः । अचलः स्थाणुवत्तिष्ठन् रामिदमिदमेत्यधिकं गो. स्तके. । ३ ज्येष्ठसुतामहमिति रा. पाठः । ४ गङ्गेति रा. पाठः । * महावेगमिति युक्तम् ।

हिमवत्प्रतिमे राम जटामण्डलगह्वरे । सा कथंचिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता ॥ ८ ॥
नैव सा निर्गमं लेभे जटामण्डलमन्ततः । तत्रैवाबभ्रमद्देवी संवत्सरगणान्बहून् ॥ ९ ॥
तामपश्यत्पुनस्तत्र तपः परममास्थितः । स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ॥ १० ॥
विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति । तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ॥ ११ ॥
ह्लादिनी पावनी चैव नलिनी च तथैव च । तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाःशुभाः ॥ १२ ॥
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी । तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु दिशं शुभाः ॥ १३ ॥
सप्तमी चान्वगात्तासां भगीरथरथं तदा । भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ १४ ॥

प्रतिमा सदृशो यस्य तस्मिन् जटामण्डलगह्वरे तस्मिन्प्रसिद्धे रुद्रस्य शिवस्य मूर्धनि पतिता ॥ ७ ॥

गो० टी०–सेति।जटामण्डलमेव गह्वरं गुहा यस्मिंस्तत्तथा७

८] ति० टी०–जटामण्डलेन गह्वरे दुष्प्रवेशे निर्गमे य त्नमास्थितापि महीं गन्तुं नाशक्नोदित्यन्वयः ॥ ८ ॥

रा० टी०–सेति । यत्नमास्थिता सा गङ्गा महीं गन्तुं क थंचिन्नाशक्नोत् । तत्र हेतुः यतः जटामण्डलमोहिता सा गङ्गा निर्गमं मार्गं नैव लेभे ॥ ८ ॥

गो० टी०–सेति । निर्गमनं जटामण्डलान्निःसरणमात्रमपि जटामण्डले मोहिता संजातमोहा ॥ ८ ॥

९] ति० टी०–नैवेति । जटामण्डलं भ्रान्त्वा प्रान्तमागताप्यन्ततस्तत्प्रान्तभागतोऽपि निर्गमं न लेभे प्रान्तभागेऽपि तन्मध्यत्वभ्रमस्य मायया भगवतोत्पादनात् । यद्यपि ब्रह्मैव माययागङ्गाजलरूपामिति पुराणेतिहासादिषु प्रसिद्धम् तस्य चाहं ममेत्यभिमानहीनस्यायमहंकारः शिवस्य च तादृशस्यतत्परामाहंकारोऽत्यन्तमनुचितस्तथा तादृश्या गङ्गयाः प्रान्तभागे मध्यत्वभ्रमोऽप्यत्यन्तमनुचितः अत एवोक्तमन्यत्र ' परमात्मा शिवो ह्यन्यस्तस्मादन्या च जाह्नवी । इति यः सवते गङ्गां न स मोक्षस्य भाजनम् ॥' इति तथापि लीलामात्रत्वाददोषः । शिवविष्णवोः परस्परमुपास्योपासकभाववदिति बोध्यम् । तर्हि किं कृतवती तत्राह–तत्रैवेति । अबभ्रमत् आर्षत्वात्सन्वदित्वं न९

रा० टी०–तत्रेति । देवी गङ्गा बहून्संवत्सरगणान् तत्र शिवस्यूर्ध्वन्येव अबभ्रमत् अबाभ्रमत् आगमशास्त्रस्यानित्यत्वा दङ्विरहः तां देवीं तत्र शिवशिरस्येव अपश्यत् अत एव परमं तपः पुनः आस्थितः ॥ ९ ॥

गो० टी०–तत्रेति । अबभ्रमत् पुनः पुनरभ्रमत् । यङ्लुगन्ताल्लङ् । आस्थितः राजेति शेषः ॥ ९ ॥

१०] ति० टी०–अथ तां जटाटवीतिरोहितां गङ्गां भगीरथोऽपश्यत् । पुनश्च तत्र तत्प्राप्तिविषये हरमुद्दिश्य परमं तप आस्थितः स हरः । तेन तपसा ॥ १० ॥

रा० टी०–अनेनेति । हे रघुनन्दन। अनेन भगीरथतपसा हरः अत्यर्थमत्यन्तं तोषितः आसीत् अत एव ततः स्वजटातः बिन्दुसरः ब्रह्मनिर्मितहिमवदेकदेशवर्ति सरोविशेषं प्रति गङ्गां विससर्ज ॥ १० ॥

गो० टी०–अनेनेति । अनेन तपसा तोषितश्चासीत् विससर्ज च बिन्दुसरोनाम हिमवति ब्रह्मनिर्मितसरोविशेषः ॥१०॥

११–१३] ति० टी०–ततस्तुष्टः सन्हरो बिन्दुसरः प्रति हिमवत्स्थितब्रह्मनिर्मितसरोविशेषं प्रति गङ्गां विससर्जेत्यन्वयः ॥ ११ ॥ १२ ॥ १३ ॥

रा० टी०–तस्यामिति । तस्यां गङ्गायां विसृज्यमाणायां सत्यां सप्तस्रोतांसि जज्ञिरे तेषां स्रोतसां नामानि निर्दिशन् वृत्तमाह–ह्लादिनीनामा तथैव पावनीनामा च तथैव नलिनीनामा च आसीदिति शेषः । गङ्गा शिवजलाः गङ्गैव शिवानि जलानि यासु ताः अत एव शुभाः सकलशुभहेतुभूताः तिस्रः ह्लादिन्यादयः प्राचीं दिशं जग्मुः ॥ ११ ॥

गो० टी०–तस्यामित्यर्धम् । स्रोतांसि प्रवाहाः ॥ ११ ॥

गो० टी०–स्रोतसां नामनिर्देशपूर्वकं गतिभेदमाह–ह्लादिनीति । शुभाः शोभमानाः ॥ १२ ॥

रा० टी०–सुचक्षुरिति । प्रसिद्धा सुचक्षुः प्रसिद्धा सीता च प्रसिद्धा सिन्धुश्च महानदी आसीदिति शेषः । एताः प्रसिद्धाः शुभोदकास्तिस्रोऽपि प्रतीचीं दिशमेव जग्मुः । तुश्चैवशब्दाः प्रसिद्ध्यर्थाः । एकस्तुशब्दोऽप्यर्थकः ॥ १२ ॥

गो० टी०–सुचक्षुरिति । महानदीति सर्वविशेषणम् १३॥

१४] ति० टी०–एतेन भगीरथतपोहेतुकं त्रिपथगमनमुक्तम् । अथ चरितप्रश्नोत्तरमाह–भगीरथोऽपीति ॥ १४ ॥

रा० टी०–सप्तमीति । अथोऽनन्तरं तासां सप्तानां स्रोतोव्यक्तीनां मध्ये सप्तमी तु भगीरथं नृपमन्वगात् । दिव्यं स्यन्दनमास्थितो महातेजाः राजर्षिः भगीरथोऽपि अग्रे गङ्गायाः पुरतः प्रायात् गङ्गा तं रथस्थमपि अनुव्रजत् आगमशास्त्रस्यानित्यत्वादङ्विरहः । सार्धश्लोक एकान्वयी । एकश्चस्त्वर्थे द्वितीयश्चकारोऽप्यर्थकः ॥ १३ ॥

गो० टी०–सप्तमीत्यर्धम् । तासां मध्ये ॥ १४ ॥

---

१ निर्गमनमिति गो. पाठः । २ मोहितेति गो. रा. पाठः । ३ बम्भ्रमदिति गो. पाठः । ४ अपश्यन्निति गो. पाठः । ५ अनेनेति गो. रा. पाठः । ६ अभूदिति गो. पाठः । ७ अत्यर्थमिति गो. रा. पाठः । ८ शुभा नदीति रा. पाठः । ९ स्त्वेता इति गो. पाठः । १० शुभोदका इति गो. रा. पाठः । ११ अथो नृपमिति गो. रा. पाठः ।

प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत् । गगनाच्छंकरशिरस्ततो धरणिमागता ॥ १५ ॥
असर्पत[1] जलं तत्र तीव्रशब्दपुरस्कृतम् । मत्स्यकच्छपसंघैश्च शिंशुमारगणैस्तथा ॥ १६ ॥
पतद्भिः पतितैश्चैव[2] व्यरोचत वसुंधरा । ततो देवर्षिगन्धर्वा यक्षसिद्धगणास्तथा[3] ॥ १७ ॥
व्यलोकयन्त ते तत्र गगनाद्गां गतां तदा[4] । विमानैर्नगराकारैर्हयैर्गजवरैस्तदा[5] ॥ १८ ॥
पारिप्लवगताश्चापि देवतास्तत्र विष्ठिताः[6] । तदद्भुतमिमं लोके गङ्गावतरमुत्तमम् ॥ १९ ॥
दिदृक्षवो देवगणाः समीयुरमितौजसः[7] । संपतद्भिः सुरगणैस्तेषां चाभरणौजसा[8] ॥ २० ॥
शतादित्यमिवाभाति गगनं गततोयदम्[9] । शिंशुमारोरगगणैर्मीनैरपि च चञ्चलैः ॥ २१ ॥
विद्युद्भिरिव विक्षिप्तैराकाशमभवत्तदा[10] । पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा ॥ २२ ॥

गो० टी०–भगीरथोऽपीति । स्यन्दनं रथमनुव्रजदन्वव्रजत् । अत्र स्वर्गाकाशभूमिगमनात् त्रिपथगात्वमित्येके दिक्क्रयगमनादित्यपरे ॥ १५ ॥

१५] ति० टी०–अनुव्रजदित्यडभाव आर्षः ॥ १५ ॥

रा० टी०–गङ्गागमनप्रकारं वर्णयन्नाह–गगनादिति । गगनात् शंकरशिर आगता ततः शंकरशिरसो धरणिं पृथिवीमागता तत्र धरण्यां तीव्रशब्दपुरस्कृतं तीव्रोत्युग्रः शब्दः पुरस्कृतः अग्रे गतो यस्य तत् जलं गङ्गातोयं व्यसर्पत विशेषतोऽचलत् ॥ १४ ॥

गो० टी०–एवं त्रीन्पथः केन हेतुनेत्यस्योत्तरमभिधाय कर्मभिः कैः समन्वितेत्यस्य चरितभेदप्रश्नस्योत्तरमाह–गगनादिति । तीव्रशब्दे हेतुरयम् ॥ १६ ॥

१६–१७] ति० टी०–तीव्रशब्दपुरस्कृतमित्यत्र हेतुर्गगनादित्यादिनोक्तः । शिंशुमारः कप्याकारो जलचरविशेषः॥१६॥१७॥

रा० टी०–मत्स्येति । पतद्भिः वर्तमानकालिकपतनाश्रयैः पतितैर्भूतकालिकपतनाश्रयैश्च मत्स्यादिसंघैः शिंशुमारगणैः शिंशुमारोऽम्बुकरी तत्समूहैश्च तथान्यैरनेकविधैर्जलचरैर्वसुंधरा पृथ्वी व्यरोचत ' शिंशुमारोऽम्बुकरी ' इति वैजयन्ती ॥ १६ ॥

गो० टी०–मत्स्येति । शिंशुमारः अम्बुकरी ' शिंशुमारस्त्वम्बुकरी ' इति वैजयन्ती । अन्यैः जलजन्तुविशेषैः॥ १७ ॥

रा० टी०–तत इति । तदा गङ्गागमनकाले ततः गङ्गालोकत्वेन प्रसिद्धात् गगनात् गां पृथ्वीं गतां प्राप्तां गङ्गां तत्र गगने स्थितास्ते देवादयस्तथा यक्षसिद्धगणाः व्यलोकयन्त॥१६॥

गो० टी०–तत इति । गगनाद् रुद्रजटागगनात् गां भूमिम् ॥ १८ ॥

१८] ति० टी०–गगनाद्गां गताम् रुद्रजटाकाशाद्भुवमित्यर्थः । विमानैरित्यादेश्चरन्त इति शेषः ॥ १८ ॥

रा० टी०–विमानैरिति । पारिप्लवगतैः पारिप्लवः संभ्रमः स गतः प्राप्तो येभ्यः गगनाकारैः विपुलत्वेन गगनसदृशैर्विमानैस्तथा हयैः गजवरैरपि तत्र आकाशे एव विष्ठिताः गङ्गादर्शनकामनया संस्थिताः । चशब्द एवार्थे ॥ १७ ॥

गो० टी०–विमानैरिति । नगराकारैः नगरवद्विपुलैः पारिप्लवगतैः पारिप्लवं संभ्रमं गतैरिति विमानादिविशेषणम् । तत्र गङ्गापतनप्रदेशे विष्ठिताः विशेषेण स्थिताः ॥ १९ ॥

१९] ति० टी०–पारिप्लवगताः संभ्रमं गताः संभ्रमं प्राप्ता इत्यर्थ इत्येके । पारिप्लवो यानभेदः शिविकादिरूपः शिविकादियानस्था इत्यर्थ इत्यन्ये ॥ १९ ॥

रा० टी०–तदिति । अद्भुततममत्यन्तविलक्षणमत एव उत्तमं सर्वश्रेष्ठं किंच उत्तमश्लुत्कर्षेण दर्शनाकाङ्क्षोत्पादकं तत् प्रसिद्धं लोके गङ्गापतनं दिदृक्षवः अमितौजसः अपरिमेयपराक्रमाः देवगणाः समीयुः स्वस्ववाहनेभ्यः उत्तीर्य गङ्गासमीपं प्रापुः ॥ १८ ॥

गो० टी०–तदिति । लोके भूलोके अमितौजस इत्यनेन प्रधानदेवा उच्यन्ते ॥ २० ॥

२०] ति० टी०–देवगणा वस्वादयः । संपतद्भिरागच्छद्भिः ॥ २० ॥

रा० टी०–संपतद्भिरिति । संपतद्भिः द्रुतमागच्छद्भिः सुरगणैस्तेषामाभरणौजसा च गततोयदं अभ्ररहितं गगनं शतादित्यं शतमादित्या यस्मिन् तदिव आभाति अशोभत "वर्तमानसामीप्ये–" इतिभूते लट् ॥ १९ ॥

गो० टी०–संपतद्भिरिति । सुरगणैः अमिततेजोभिरिति सिद्धम् आभाति अभात् ॥ २१ ॥

२१] ति० टी०–तन्मूलिकामुपमामाह—शतादित्यमिवेति ॥ २१ ॥

रा० टी०–शिंशुमारेति । तदा तस्मिन् काले एव विद्युद्भिरिव शिंशुमारोरगगणैः अम्बुकरिसर्पसमूहैः चञ्चलैः मीनैरपि विक्षिप्तं व्याप्तमाकाशमभवत् । चशब्द एवार्थे ॥२०॥

गो० टी०–शिंशुमारेति । आकाशं चञ्चलैः शिंशुमारादिभिः विद्युद्भिरिव विक्षिप्तं व्याप्तमभवत् ॥ २२ ॥

२२] ति० टी०–विक्षिप्तैर्निःसृतैः विद्युच्छब्दः पुल्लिङ्गोऽप्येतत्प्रामाण्यात् । सलिलोत्पीडैः फेनैः सहस्रधा करणं वाच्वा-द्यपाधित आकाशमभवत् व्याप्तमिति शेषः ॥ २२ ॥

---

१ व्यसर्पतेति गो. रा. पाठः । २ चान्यैरिति गो. रा. पाठः । ३ यक्षाः सिद्धेति गो. पाठः । ४ गगनाकारैरिति रा. पाठः। ५ तथेति रा. पाठः । ६ गतैरिति गो. रा. पाठः । ७ तममिति गो. रा. पाठः । ८ पतनमिति गो. रा. पाठः । ९ विक्षिप्तमिति गो. रा. पाठः ।

शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः । क्वचिद्ददृततरं याति कुटिलं क्वचिदायतम् ॥ २३ ॥
विनीतं[1] क्वचिदुद्धूतं क्वचिद्याति शनैः शनैः । सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥ २४ ॥
मुहुरूर्ध्वपथं[2] गत्वा पपात वसुधां पुनः । तच्छंकरशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ॥ २५ ॥
व्यरोचत तदा तोयं निर्मलं गतकल्मषम् । तत्रर्षिगणगन्धर्वा वसुधातलवासिनः[3] ॥ २६ ॥

रा० टी०–पाण्डुरैरिति । शारदाभ्रैरिव शरत्सदृशैः हंससंप्लवैरिव प्लवमानहंससदृशैश्च पाण्डुरैः श्वेतैः सहस्रधा वायुवेगादिनानेकप्रकारं कीर्यमाणैः सलिलोत्पीडैः फेनैः आकीर्णं व्याप्तं गगनमभवदित्यनुकृष्यते । इवशब्द आवृत्त्या उभयत्रान्वेति विनापि चं समुच्चयः ॥ २१ ॥

गो० टी०–पाण्डुरैरिति । वेगवशेन सहस्रधा कीर्यमाणैः सलिलोत्पीडैः फेनैर्हससंप्लवैः हंससंकुलैः शारदाभ्रैरिव गगनमाकीर्णमित्यन्वयः ॥ २३ ॥

२३] ति० टी०–शारदाभ्रैरिव हंससंप्लवैर्हससमूहैः संकीर्णं गगनमभवदिति पूर्वेणान्वयः । आयतं विस्तृतप्रवाहम् ॥ २३ ॥

रा० टी०–गङ्गासंबन्धेनाकाशं संवर्ण्य गङ्गागमनप्रकारमाह–क्वचिदिति । क्वचित्कदाचिद्ददृततरं यथा भवति तथा याति गच्छति क्वचित्कुटिलं याति क्वचित् आयतं विस्तृतं याति क्वचित् विनीतं अगाधताप्राप्त्या संकुचितं याति क्वचिदुद्धूतं पाषाणस्खलनादिना ऊर्ध्वमुखं याति क्वचिच्छनैः शनैः याति ॥ २२ ॥

गो० टी०–क्वचिदिति । अत्र गङ्गेत्यनुषज्यते ददृततरमित्यादिक्रियाविशेषणम् आयतमृजुविनतं निम्नेन संकुचितमुद्धूतं पाषाणस्खलनादिना ऊर्ध्वमुखम् । सर्वत्र व्यत्ययेन भूते लट् ॥ २४ ॥

२४] ति० टी०–विनतमगाधदेशं संकुचितम् । उद्धूतं पाषाणादियोगात् ॥ २४ ॥

रा० टी०–सलिलेनेति । क्वचित्कदाचित्सलिलेनैव अभ्याहतं सलिलमूर्ध्वगतिं गत्वा वसुधातलं पुनः पपात ॥२३॥

गो० टी०–सलिलेनेति । अभ्याहतं वातव्यावर्तितं तरङ्गसलिलेनाभिमुखमाहतमित्यर्थः ॥ २५ ॥

२५] ति० टी०–मुहुरिति । ऊर्ध्वपथगमने सलिलयोरभ्याघातो निमित्तम् । शंकरशिरसि भ्रष्टम् ॥ २५ ॥

रा० टी०–पातकालिकशोभां वर्णयन्नाह–तदिति । निर्मलं शिलासु पातेन पङ्कादिरूपमलरहितं किंच निर्गतो यो मः परिमाणं यत्रर्थे कविधानमिति माधातोः कः तं लाति गृह्णातीति निर्मलं इयत्तारहितप्रभाववदित्यर्थः । गतकल्मषं गतानि निवृत्तानि कल्मषानि आश्रितानां पापानि यस्मात् तत् क्तप्रत्ययोपस्थितकालस्यात्राविवक्षा कर्तुरीप्सिततममिति सूत्रघटकीभूतक्तप्रत्ययोपात्तवर्तमानत्वस्यैव आश्रिता चाविवक्षा 'गन्ता विदेशं पथिकः प्रियो मे त्वद्वाक्यमात्राधिरेव यात्रा । अतोऽतिमौनं कुरु ताम्रचूड त्वां स्वर्णचूडाख्यमहं वदिष्ये ' ' रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः । इत्थं विचिन्तयति कोशगते द्विरेफे हा हन्त हन्त नलिनीं गज उज्जहार' इत्यादौ तेन यदैव गङ्गादर्शनादि तदैव तत्कर्तृणां पापक्षय इति फलितं तेन यदि दर्शनादिकर्तृणां न पातकसंबन्धस्तर्हि तत्र नेति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः । शंकरशिरोभ्रष्टं शंकरशिरश्च्युतं पुनरनन्तरं भूमितलं भ्रष्टं तत् गङ्गाजलं तदा पतनादिकाले व्यरोचत लोकविलक्षणमशोभत तेन गङ्गाया ईश्वरत्वं बोधितम् ॥ २४ ॥

गो० टी०–तदिति । शंकरशिरसि भ्रष्टं पतितमपि ततः भूमितले पतितमपि निर्मलं गतं कल्मषं येन तद्गतकल्मषं पापापहमित्यर्थः ॥ २६ ॥

२६] ति० टी०–निर्मलम् नैर्मल्ये प्रागुक्तधंशद्वयं हेतुः । गतकल्मषं स्वजलस्पर्शवतां प्राणिनां नाशितपापम् ॥ २६ ॥

रा० टी०–तत्रेति । तत्र गङ्गापतनकाले ऋषिगणगन्धर्वाः वसुधातलवासिनश्च भवाङ्गपतितं भवाङ्गात् पतितमित्यतः पवित्रमतिशुद्धं तोयं पस्पृशुरेव । सर्वं वाक्यं सावधारणं भवतीति न्यायेनैवकारलाभः । अत्र पस्पृशुरेवेत्युक्त्या न सस्नुरिति फलितं तेन अवगाहानर्हवेगवत्त्वं तज्जलस्य सूचितम् । पञ्चमीतियोग विभागेन संबन्धसामान्यषष्ठ्या वा समासः । पूर्वविधावनल्विधावित्यादाविव । अतिपवित्रमित्यनेन स्वतः पवित्रत्वे सिद्धेऽपि भवाङ्गस्पर्शद्वारा लोकानपि पावयिष्यतीति हेतुर्ध्वनितः । एतेनानुशासनविरहात् पञ्चमीसमासानुपपत्तिरिति प्रत्युक्तम् यत्तु सामान्योक्त्या शिवस्यापि पवित्रत्वकारकमिति भूषणकृद्भिरुक्तं तच्चिन्त्यं हरस्येश्वरत्वेन तत्र मलसंबन्धस्यासंभवेन तत्पावित्र्यकारकस्य दुर्वचत्वात् यदि ईश्वरेऽपि मलसंबन्धः स्वीक्रियते तर्हि हर्यनुक्तेर्न्यूनता तेषां स्यात् किंच हरिहरभक्तानां तीर्थपावनसामर्थ्यमस्तीति स्मृत्यादिसिद्धमत एव 'साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः । हरन्त्यघं तेऽङ्गसङ्गात्तेष्वास्ते ह्यघभिद्धरिः' इति गङ्गागमनसमये गङ्गां प्रति भगीरथवचनं 'भवद्विधा भागवतास्तीर्थभूताः स्वयं प्रभो । तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता ' इत्यादिविदुरं प्रति युधिष्ठिरवचनं संगच्छते । एतेन गङ्गाजलसंबन्धाद्धरः शुद्धः हराङ्गसंबन्धाच्च गङ्गामतिपवित्रता तत्याजेति वचनं श्रेयस्कामैर्दूरतः परिवर्जनीयम् आदरणीयं चेदं हरगात्रस्पर्शादतिपवित्रत्वं प्राप्ता गङ्गेति अत एव हरस्य गात्रसंस्पर्शात्पवित्रत्वमुपागतेत्यादीनि संगच्छन्ते संगच्छते च विष्णुपादोद्भवां दिव्यामित्यादिपवित्रत्वमुपागतेत्यत्र पवित्रशब्दोऽतिपवित्रपरः।'यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन

१ विनीतमिति रा. पाठः । २ मुखमिति गो. गतिमिति रा. पाठः । ३ वसुधातलमिति गो. रा. पाठः ।

भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः । शापात्प्रपतिता ये च गगनाद्वसुधातलम् ॥ २७ ॥
कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः । धूतपापाः पुनस्तेन तोयेनाथ शुभान्विताः ॥ २८ ॥
पुनराकाशमाविश्य स्वाँल्लोकान्प्रतिपेदिरे । मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ॥ २९ ॥
कृताभिषेको गङ्गायां बभूव गतकल्मषः । भगीरथो हि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥३०॥
प्रायादग्रे महाराजस्तं गङ्गा पृष्ठतोऽन्वगात् । देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥ ३१ ॥

मूर्ध्न्यधिकृतेन शिवः शिवोभूत्'इतिभागवतस्य तु अयमर्थः शिवः स्वतः सिद्धकल्याणस्वरूपः शिवः लोकानां कल्याणप्रदोऽभूदिति अयं भावः यदि शिवो गङ्गां न धारयेत् तर्हि गङ्गा पृथिव्यां नोपलभ्येत तथा च लोककल्याणं न स्यात् धारणे तु सर्वं सिद्धमिति अत 'एव तदम्बु पतितं स्पृष्ट्वा दधार शिरसा हरः । पावनार्थं जटामध्ये गतोऽस्मीत्यवधारणात् ' इतिभारतपद्मे पूप्रकृतिकणिजन्तप्रकृतिकल्युडन्तप्रयोगः लोकानां पावनार्थमित्यर्थः। अन्यथा ' तदम्बु पतितं स्पृष्ट्वा दधार शिरसा हरः । पूतोऽभूत्स जटामध्ये गतोऽस्मीत्यवधारणात् ' इत्येव वदेत्। हरस्येश्वरत्वे प्रमाणं तु 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तै' रित्यादि। 'धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् । यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु । अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ' इत्यादिभागवतादिवचनमिति दिक् ॥ २६ ॥

गो० टी०–तत्रेति । पवित्रं पावनम्। तत्र ज्ञापकहेतुमाह–भवाङ्गपतितमिति । भवेन रुद्रेण शिरसा धृतत्वात्पवित्रमिति ज्ञात्वा पस्पृशुरित्यर्थः । पवित्रमिति सामान्योक्त्या भवस्यान्येषां च पवित्रमित्युक्तमत एव हरस्य गात्रसंस्पर्शात् पवित्रत्वमुपागतेत्यत्रापि हरस्य शुद्धिप्रदत्वमुपागतेत्यर्थः । अन्येऽप्यृषय ऊचुः श्रीमद्भागवते ' यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्नि विधृतेन शिवः शिवोऽभूत् ' इति । भारते–' तदम्बु पतितं दृष्ट्वा दधार शिरसा हरः । पावनार्थं जटामध्ये योग्योऽस्मीत्यवधारणात् ' इति । अत्राप्ययोध्याकाण्डे वक्ष्यति विष्णुपादोद्भवां दिव्यामिति । गङ्गाया विष्णुपादोद्भवत्वेन पवित्रत्वरूपं दिव्यत्वं भवाङ्गात्पतितमिति वार्थः । "द्वितीयाश्रितातीतपतित" इति द्वितीयासमासविधानात् पञ्चमीसमासानुपपत्तेश्च भवेन धृतत्वात् अस्माभिरपि धार्यमिति पस्पृशुरित्येवार्थः । यद्वा भवाङ्गपतितत्वात् पवित्रं न तु पूर्ववदतिपवित्रमत एव पस्पृशुः न तु सस्नुः। यद्वा यद्यपि भवाङ्गात्पतितं तथापि विष्णुपादोद्भूतत्वात्पवित्रमिति वा ' नदी वेगेन शुध्यति ' इतिन्यायात् । भवसंपर्कविगमे पवित्रमिति वा पस्पृशुः ॥ २७ ॥

२७] ति० टी०–भवाङ्गं शिवमूर्धा पस्पृशुः सस्नुः । न केवलं पापसंहारमात्रं गङ्गायाः कृत्यम्, अपि तु पुण्यलोकप्रापणमपीत्याह–शापादित्यादि । गगनादुच्चस्थानात् ॥ २७ ॥

रा० टी०–गङ्गाप्रभावं वर्णयन्वृत्तान्तरमाह–शापादिति । चशब्द एवार्थे । ये देवादयः गगनाद्वसुधातलं शापात्प्रपतितास्ते तत्र गङ्गायामभिषेकं कृत्वैव गतकल्मषाः शापादिहेतुकल्मषरहिता बभूवुः ॥ २६ ॥

गो० टी०–शापादिति । शापाद्धेतोः ॥ २८ ॥

२८] ति० टी०–गतकल्मषा मुक्तशापाः अनेन ब्रह्मशापपरिहारोऽपि गङ्गास्नानफलमिति कृतपापानां तज्जलस्पर्शे तत्पापनाशपूर्वकं स्वर्गप्राप्तिः केसुतिकन्यायेनैव सिद्धेति बोध्यम् ॥ २८ ॥

रा० टी०–पापापगमानन्तरकालिकं वृत्तमाह–धूतेति । ततः अभिषेकानन्तरं सुभास्वता अत्यन्तप्रकाशमानेन तेन पृथिवीं प्राप्तेन तोयेन अभिषिक्तगङ्गाजलेनैव धूतपापाः विगतकल्मषास्ते शापवशेन पृथिवीं प्राप्ताः देवादयः आकाशं पुनः आविश्य प्रविश्य आकाशमार्गेण गत्वेत्यर्थः स्वान् लोकान् पुनः प्रतिपेदिरे प्रापुः ॥ २७ ॥

गो० टी०–धूतेति । आकाशमाविश्य आकाशमार्गेणेत्यर्थः ॥ २९ ॥

२९–३१] ति० टी०–मुदितो दर्शनमात्रेण मुमुदे स्नानपानादिना ॥ २९ ॥ ३० ॥ ३१ ॥

रा० टी०–मुमुदे इति । मुदितः गङ्गागमनश्रवणेन प्रमोदं प्राप्तः लोकः तात्कालिकतद्देशसंबन्धिजनः भास्वता प्रकाशमानेन तेन शापादिदोषनिवर्तकत्वेन दृष्टेन गङ्गायां विद्यमानेन तोयेन कृताभिषेकः सन् विगतक्रमः विगतो निवृत्तः क्रमः कल्मषादिहेतुकग्लानिर्यस्य स बभूव अत एव मुमुदे परमं प्रमोदं प्राप ॥ २८ ॥

गो० टी०–मुमुद इति । मुदितो मुमुदे पुनः पुनर्जहर्षेत्यर्थः ॥ ३० ॥

रा० टी०–प्रसङ्गतः गङ्गाप्रभावं संवर्ण्य प्रकृतभगीरथवृत्तमाह–भगीरथ इति । दिव्यं स्यन्दनमास्थितः राजर्षिः महातेजाः भगीरथः अग्रे प्रायात् तं भगीरथं गङ्गापि पृष्ठत अन्वगात् ॥ २९ ॥

गो० टी०–भगीरथ इति । स्पष्टम् ॥ ३१ ॥

रा० टी०–देवा इति। हे राम!प्रीताः सर्षिगणाः ऋषिगणसहिताः सर्वे देवाः दैत्यदानवराक्षसाश्च सकिन्नरमहोरगाः किन्नरमहोरगैःसहिताः गन्धर्वयक्षप्रवराश्च सर्वा अप्सरसश्च सर्वे ये जलचरास्ते च भगीरथरथानुगाः सन्तः गङ्गाम् अन्वगमन् अगच्छन् । द्वयोरेकत्रान्वयः ॥ ३० ॥

१ ततस्तेनेति रा. पाठः। २ तोयेन च सुभास्वतेति गो. रा. पाठः।३ विगतक्रम इति गो. रा.पाठः।४ अपीति गो.रा. पाठः।५ तेजास्तमिति गो.रा. पाठः।

गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः । सर्पाश्चाप्सरसो राम भगीरथरथानुगाः ॥ ३२ ॥
गङ्गामन्वगमन्प्रीताः सर्वे जलचराश्च ये । यतो भगीरथो राजा ततो गङ्गा यशस्विनी ॥ ३३ ॥
जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी । ततो हि यजमानस्य जह्नोरद्भुतकर्मणः ॥ ३४ ॥
गङ्गा संप्लावयामास यज्ञवाटं महात्मनः । तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव ॥ ३५ ॥
अपिबत्तुं जलं सर्वं गङ्गायाः परमाद्भुतम् । ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः ॥ ३६ ॥
पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम् । गङ्गां चापि नयन्ति स्म दुहितृत्वे महात्मनः ॥ ३७ ॥
ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत्प्रभुः । तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च ॥ ३८ ॥
जगाम च पुनर्गङ्गा भगीरथरथानुगा । सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ॥ ३९ ॥

गो० टी०–देवा इति । श्लोकद्वयम् । भगीरथरथानुगां गङ्गामन्वगमन् ॥ ३२ ॥ ३३ ॥

३२] ति० टी०–भगीरथरथानुगाः सन्तो गङ्गामन्वगमन्नित्यन्वयः ॥ ३२ ॥

३३] ति० टी०–यतो येन मार्गेण ॥ ३३ ॥

रा० टी०–यत इति । राजा महाराजाधिराजो भगीरथः यतः येन पथा गच्छतीति शेषः ततः तेन पथा यशस्विनी समाधिकरहितयशोविशिष्टा सर्वपापविनाशिनी स्वाश्रितसमूलदोषनिवर्तनशीला सरितां श्रेष्ठा गङ्गा गच्छति तृतीयान्तात्तसिः ॥३३॥

गो० टी०–यत इति । यतः यत्र ततस्तत्र ॥ ३४ ॥

३४] ति० टी–अद्भुतकर्मणः वक्ष्यमाणगङ्गोपसंहाराभिप्रायमेतत् ॥ ३४ ॥

रा० टी०–तत इति । ततः उक्तक्रियादिविशिष्टत्वाद्धेतोः अद्भुतकर्मणः महात्मनः यजमानस्य जह्नोः यज्ञवाटं यज्ञशालां गङ्गा संप्लावयामास हि विद्वत्समाजे प्रसिद्धमेतत् । अत्र प्रार्थनां विनैव गङ्गा यज्ञशालां प्राप्तेत्यनेन जह्नोर्गङ्गोपासकत्वं सूचितम् ॥ ३२ ॥

गो० टी०–ततो हीति । अद्भुतकर्मण इति वक्ष्यमाणगङ्गापानाभिप्रायं यज्ञवाटं यज्ञक्षेत्रम् ॥ ३५ ॥

३५] ति० टी०–तस्यावलेपनं तस्या अवलेपनं गर्वमित्यर्थः ॥ ३५ ॥

रा० टी०–तस्या इति । हे राघव ! तस्याः गङ्गाया वले यागशालाया आच्छादने प्लावने इत्यर्थः । पनमहोभाग्यमेतस्य यस्य यज्ञशालां गङ्गा प्राप्तेति स्वकीयां स्तुतिमेव ज्ञात्वा अत एव अक्रुद्धः क्रोधरहित एव जह्नुः परमाद्भुतं लौकिकविलक्षणं सर्वं गङ्गाया जलमपिबत् तेन जह्नोर्गङ्गाविषयकप्रीत्यतिशयः सूचितः। तुशब्दौ एवार्थौ। यत्तु क्रुद्ध इति छित्त्वा गङ्गासंप्रदानककोपं वर्णयन्ति तच्चिन्त्यम् गङ्गाया भगीरथानुगमनशीलत्वेन कोपाविषयत्वात् भगीरथसंप्रदानककोपावर्णनाच्च ॥ ३३ ॥

गो० टी०–तस्या इति । वलेपनं गर्वं परमाद्भुतमिति क्रियाविशेषणम् ॥ ३६ ॥

३६] ति० टी०–अपिबत् अगस्त्यः समुद्रजलमिव योगशक्त्येति भावः। परमाद्भुतं तदभवत् लोकस्येति शेषः॥३६॥

रा० टी०–तत इति । सगन्धर्वाः देवाः ऋषयश्च सुविस्मिताः सन्तः महात्मानं पुरुषसत्तमं जह्नुं पूजयन्ति अपूजयन् । " वर्तमानसामीप्ये " इति भूते लट् । महात्मनः जह्नोः दुहितृत्वे जह्नुनिरूपितकन्यात्वे गङ्गां च नयन्ति स्म यदि भवच्छरीरात् गङ्गा निस्सरिष्यति तर्हि भवत्कन्या भविष्यतीत्यूचुरित्यर्थः । अपिशब्दः प्रसिद्ध्यर्थकः इदं प्रसिद्धमित्यर्थः ॥ ३४ ॥

गो० टी०–तत इति सार्धश्लोकः । दुहितृत्वे नयन्ति स्म दुहितरमकुर्वन्नित्यर्थः ॥ ३७ ॥

३७] ति० टी०–पूजयन्ति स्तोत्रादिनेति शेषः । 'अनुनयन्ति ' इति पाठे शैलराजदुहितुः कथमन्यदुहितृत्वमिति विमतिवारणाय गङ्गानुनयः॥ ३७ ॥

३८] ति० टी०–तुष्टो गङ्गायाः स्वदुहितृत्वप्रापणात् । तस्मात्यतः पीतां पुनरसृजत्तस्मादित्यर्थः ॥ ३८ ॥

रा० टी०–तत इति । ततः दुहितृत्वप्रापणानन्तरं तुष्टो महातेजा जह्नुः श्रोत्राभ्यां पुनरसृजत् गङ्गा प्रादुश्चकारेत्यर्थः । तस्मात् जह्नुश्रोत्रप्रादुर्भावात् गङ्गां जह्नुसुता जाह्नवी इति च प्रोच्यते तुष्ट इत्यनेन गङ्गारूपसुतार्थमेवैतस्य यागे प्रवृत्तिरिति ध्वनितम् ॥ ३५ ॥

गो० टी०–तत इति । ततः दुहितृत्वप्रापणात् श्रोत्राभ्यां नरावयवेषु श्रोत्रस्यातिपावनत्वादिति भावः ॥ ३८ ॥

३९] ति० टी०–सागरं सगरखातखातं संप्राप्ता तत्पूरणायेति शेषः । क्षारत्वं तु तस्यागस्त्येन पानोत्तरमित्यन्यत्र स्फुटम् ॥ ३९ ॥

रा० टी०–जगामेति । गङ्गा भगीरथरथानुगा सती पुनर्जगाम अनन्तरं सा सरित्प्रवरा गङ्गा सागरं संप्राप्ता तदा सागरप्राप्त्युत्तरकाले एव तस्य भगीरथप्रार्थितस्य कर्मणस्तत्पितृतारणकार्यस्य सिद्ध्यर्थं रसातलमप्युपागच्छत्। एकश्चशब्द एवार्थकः अपरोऽनन्तरार्थकः ॥ ३६ ॥

गो० टी०–जगामेत्यर्धत्रयम् । तस्य कर्मणः भगीरथयत्नस्य ॥ ३९ ॥

---

१ सर्वाश्चाप्स इति गो. रा. पाठः । २ अनुगामिति गो. पाठः । ३ विनाशिनीति गो. रा. पाठः । ४ यज्वा खिति गो. पाठः । ५ चेति गो. पाठः । ६ पुनः इति गो. रा. पाठः ।

रसातलमुपागच्छत्सिद्ध्यर्थं तस्य कर्मणः । भगीरथोऽपि राजर्षिर्गङ्गामादाय यत्नतः ॥ ४० ॥
पितामहान्भस्मकृतानपश्यद्दीनचेतनः । अथ तद्भस्मनां राशिं गङ्गासलिलमुत्तमम् ॥
प्लावयत्पूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम ॥ ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ।

गङ्गासलिलेन सगरपुत्रभस्मन्याप्लुते ब्रह्मा तेषां देवलोकस्थितिमुक्त्वा राजानं च प्रशस्य सलिलक्रियां चादिश्य स्वलोकमगमत् । राजनि तदनुष्ठाय स्वराष्ट्रं गते प्रजानां परमः प्रमोदः ।

स गत्वा सागरं राजा गङ्गयानुगतस्तदा । प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः ॥ १ ॥
भस्मन्यथाप्लुते राम गङ्गायाः सलिलेन वै । सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥ २ ॥
तारिता नरशार्दूल दिवं याताश्च देववत् । षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥ ३ ॥
सागरस्य जलं लोके यावत्स्थास्यति पार्थिव । सगरस्यात्मजाः सर्वे दिवि स्थास्यन्ति देववत् ॥ ४ ॥
इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति । त्वत्कृतेन च नाम्नार्थं लोके स्थास्यति विश्रुता ॥ ५ ॥

४०] ति० टी०–तस्य कर्मणः सिद्ध्यर्थं भगीरथस्य स्वर्गोद्धारकर्मणः । यत्नतः प्रागुक्तयत्नैः ॥ ४० ॥

रा० टी०–भगीरथ इति । राजर्षिर्भगीरथोऽपि यत्नतः गङ्गामादाय भस्मकृतान् पितामहान् दीनचेतनः सन् अपश्यत् ॥ ३७ ॥

गो० टी०–भगीरथ इति । भस्मकृतान् भस्मत्वेन कृतान् ॥ ४० ॥

४१] ति० टी०–भस्मसात्कृतान्कपिलकोपाग्निना भस्मभावं प्राप्तान् प्लावयत्सेचयति स्म अत एव पूतपाप्मानः ॥४१॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०–अथेति । हे रघूत्तम! उत्तमं तत् गङ्गासलिलं भस्मनां राशिं प्लावयत् अप्लावयत् । अथानेन हेतुना पूतपाप्मानः सागराः स्वर्गं प्राप्ताः । आगमशास्त्रस्यानित्यत्वादड्विरहः । 'प्लावयेत्' इति भूषणपाठः । आप्लावयदिति तद्व्याख्या ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डेऽत्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०–अथेति । तत्सलिलं प्लावयत् अप्लावयत् प्राप्ताः सगरपुत्रा इति शेषः ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

१–२] ति० टी०–उक्तमेव विस्तरेणाह–स गत्वेति । भस्मसात्कृताः कात्स्न्र्येन भस्मकृताः । भूमेस्तलं पातालम् ॥ १ ॥ २ ॥

रा० टी०–ब्रह्मसंवादं वर्णयितुं पुनस्तदेव वर्णयन्नाह–स इति । तदा गङ्गाया जह्नुसुतात्वप्राप्युत्तरकाले गङ्गयानुगतः स राजा भगीरथः सागरं गत्वा प्राप्य यत्र ते सगरसुता भस्मसात् कृतास्तद्भूमेस्तलं प्रविवेश भस्मसमीपं प्रापेत्यर्थः । गङ्गयानुगत इत्युक्त्या गङ्गापि तत्तत्स्थलं प्रापेति फलितार्थः ॥ १ ॥

गो० टी०–पूर्वसर्गान्ते संग्रहेणोक्तं विस्तृणीते चतुश्चत्वारिंशे–स गत्वेत्यादि । भूमेस्तलं पातालं भस्मसात्कृताः सर्वात्मना भस्मस्वभावापत्तये संपादिताः "विभाषा साति कात्स्न्र्ये" इति सातिः ॥ १ ॥

रा० टी०–भस्मनीति । अथ भस्मसमीपप्राप्त्यनन्तरं हे राम ! गङ्गायाः सलिलेन भस्मनि आप्लुते सत्येव सर्वलोकप्रभुर्ब्रह्मा राजानं भगीरथमिदमब्रवीत् । वैशब्द एवार्थे ॥ २ ॥

गो० टी०–भस्मनीति । स्पष्टम् ॥ २ ॥

३] ति० टी०–तारिताः प्रेतत्वात् देववत्स्वर्गं प्राप्ताश्च । अनेन प्रेतत्वविमुक्तिस्वर्गप्राप्ती भस्मनोऽपि गङ्गास्पर्शस्य फलं किमुतास्थिपुद्गलादेरित्युक्तम् ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–तारिता इति । हे नरशार्दूल भगीरथ ! महात्मनः सगरस्य षष्टिः पुत्रसहस्राणि तारिताः कपिलापराधजनितशोकसागरान्निःसारिताः अत एव देववत् दिवं स्वर्गं याताः प्राप्ताः ॥ ३ ॥

गो० टी०–तारिता इति । तारिताः प्रेतभावान्मोचिताः ॥ ३ ॥

४–५] ति० टी०–यावत्सागरस्य जलं स्थास्यति तावद्दिवि स्थास्यन्तीत्यर्थः । तन्निमित्तमपि तया गङ्गया तत्खातस्य सागरस्य पूरणमिति भावः ॥ ४ ॥ ५ ॥

१ दीनचेतन इति गो. रा. पाठः । २ ह्रीति गो. रा. पाठः । ३ वै इति रा. पाठः ।

गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च । त्रीन्पथो भावयन्तीति तस्मात्त्रिपथगा स्मृता ॥ ६ ॥
पितामहानां सर्वेषां त्वमत्र मनुजाधिप । कुरुष्व सलिलं राजन्प्रतिज्ञामपवर्जय ॥ ७ ॥
पूर्वकेण हि ते राजंस्तेनातियशसा तदा । धर्मिणां प्रवरेणाथ नैष प्राप्तो मनोरथः ॥ ८ ॥
तथैवांशुमता वत्स लोकेऽप्रतिमतेजसा । गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ॥ ९ ॥
राजर्षिणा गुणवता महर्षिसमतेजसा । मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च ॥ १० ॥
दिलीपेन महाभाग तव पित्रातितेजसा । पुनर्न शंकिता नेतुं गङ्गां प्रार्थयतानघ ॥ ११ ॥
सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ । प्राप्तोऽसि परमं लोके यशः परमसंमतम् ॥ १२ ॥

रा० टी०–सागरस्येति । हे पार्थिव ! सागरस्य जलं यावल्लोके स्थास्यति तावत् सर्वे सगरस्यात्मजा देववत् स्वर्गे स्थास्यन्ति ॥ ४ ॥

गो० टी०–स्वर्गप्राप्तेर्विशेषं चाह–सागरस्येति ॥ ४ ॥

रा० टी०–तवाप्यतिकीर्तिर्भविष्यतीति बोधयन्नाह–इयमिति । इयं गङ्गा तवापि ज्येष्ठा दुहिता भविष्यत्येव त्वत्कृतेन तव कृतं ज्ञानविषयीभूतप्रयत्नो यस्मात् तेन नाम्नैव विश्रुता ख्याता सती लोके स्थास्यति । हिशब्दोऽप्यर्थे चैवशब्दावेवार्थे ॥ ५ ॥

गो० टी०–इयं चेति । त्वत्कृतेन नाम्ना लोके विश्रुता ॥५॥

६] ति० टी०–तत्कृतनामादिविश्रुतत्वमेव दर्शयति–गङ्गेत्यादि । त्रिपथगेति नाम्नोऽन्वर्थत्वं दर्शयति–त्रीनित्यादि । अनेन कथं गङ्गा त्रिपथगेत्यस्योत्तरं संघत्तम् ॥ ६ ॥

रा० टी०–तन्नाम बोधयन्नाह–गङ्गेति । त्रिपथगा नाम भागीरथीतिनाम च दिव्येति नाम च गङ्गा भविष्यतीति शेषः । 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इत्यादाविव शब्दार्थयोस्तादात्म्यान्नामगङ्गार्थयोरभेदः । तत्र त्रिपथगानामार्थं वर्णयन्नाह–ततो विस्तृतान् त्रीन् लोकत्रयवर्तिनः पथो मार्गान् भावयन्ती भगीरथेन सह गच्छन्ती भगीरथं स्वाग्रे गमयन्तीवेति त्रिपथगा स्मृता । द्वितीयपक्षे अन्तर्भावितण्यर्थः । त्रिपथगाघटकीभूतो गमिः हेतुमतिचेति सूत्रविहितणिच्संनियोगात्र भूप्राप्तावात्मनेपदीति नियमप्रसक्तिः ॥ ६ ॥

गो० टी०–तदेव नामद्वयं दर्शयन् त्रिपथगाशब्दं व्युत्पादयति–गङ्गेति ॥ ६ ॥

७] ति० टी०–कुरुष्वेति । गङ्गाजलसेकतो जातप्रायश्चित्तत्वात्सलिलदानयोग्यतासंपत्तेः । प्रतिज्ञां गङ्गासलिलप्रदानेन सागरांस्तारये इत्येवंरूपां गरुत्मदुपदिष्टाम् अपवर्जय समाप्तां कुर्वित्यर्थः ॥ ७ ॥

रा० टी०–पितामहानामिति । हे मनुजाधिप हे राजन् लोकरञ्जक ! सर्वेषां पितामहानामत्रास्मिन् जले सलिलं सलिलक्रियां त्वं कुरुष्व तेन प्रतिज्ञां गङ्गाजलप्रदानेन सगरपुत्रांस्तर्पयिष्ये इति स्वपूर्वजादिकृतप्रतिश्रुतिमपवर्जय समापय ॥७॥

गो० टी०–पितामहानामिति । प्रतिज्ञां गङ्गासलिलप्रदानेन सागरांस्तारयिष्यामीति प्रतिज्ञाम् अपवर्जय समापय ॥७॥

८] ति० टी०–पूर्वकेण सगरेण एष गङ्गालाभरूपः । पूर्वकेणेति कप्रत्ययेनैषेव कुत्सा द्योत्यते ॥ ८ ॥

रा० टी०–दुष्प्रापं त्वया प्राप्तमिति बोधयन्नाह–पूर्वकेणेतिषड्भिः । राजन् हे भगीरथ ! अतियशसा यशस्विश्रेष्ठेन तथैव धर्मिणां प्रवरेण श्रेष्ठेन तेन प्रसिद्धेन ते पूर्वकेण सगरेण मनोरथः ईप्सितगङ्गा नैव प्राप्ता । हिशब्द एवार्थे स च तथोत्तरत्र द्रष्टव्यः ॥ ८ ॥

गो० टी०–पूर्वकेणेति । पूर्वकेण सगरेण ॥ ८ ॥

९] ति० टी०–गङ्गां नेतुं भूलोकं प्रापयितुं प्रार्थयता प्रतिज्ञा नापवर्जिता न फलपर्यवसायिनी कृता ॥ ९ ॥

रा० टी०–तथेति । वत्स ! हे प्रिय लोकेऽप्रतिमतेजसा तथैव त्वया इव गङ्गामानेतुं प्रार्थयतांशुमता प्रतिज्ञा नापवर्जिता न समापिता ॥ ९ ॥

गो० टी०–तथेति । नापवर्जिता न समापिता ॥ ९ ॥

१०] ति० टी०–मत्तुल्येति । ब्रह्मतुल्येत्यर्थः ॥ १०

रा० टी०–राजर्षिणेति । हे महाभाग हे अनघ राजर्षिणा राजश्रेष्ठेन गुणवता प्रशस्तगुणविशिष्टेन महर्षिसमतेजसा वशिष्ठतुल्यप्रतापेन मत्तुल्यतपसा मत्सदृशतपोविशिष्टेन क्षत्रधर्मस्थितेन अतितेजसा अत्यन्तकान्तिमता गङ्गामानेतुमेव पुनः पुनः प्रार्थयता तव पित्रा दिलीपेनापि आनेतुं गङ्गा न शकिता । आनेतुं विभक्तिविपरिणामेन गङ्गेति चोभयान्वयि श्लोकद्वयमेकान्वयि एकश्चकारः पुनरर्थः अपरोऽप्यर्थकः ॥ १० ॥ ११ ॥

गो० टी०–राजर्षिणेतिश्लोकद्वयम् । गङ्गां प्रार्थयतापि सा पुनर्नेतुं न शङ्किता न विचारितेत्यर्थः ॥ १० ॥ ११ ॥

११] ति० टी०–गङ्गां नेतुं प्रार्थयता सा गङ्गा नेतुं न शकितेत्यर्थः । यत्तु गङ्गामानेतुं न शङ्किता न विचारिता प्रतिज्ञेति शेषः । चिन्ताविषयमपि न प्रापितेत्यर्थ इति, तत्प्रार्थयतेति पदस्वरसविरोधाच्चिन्त्यम् ॥ ११ ॥

१२] ति० टी०–समतिक्रान्ता निस्तीर्णा । परमसंमतं परममुत्कृष्टं च तत्संमतम् सर्वलोकसंमतमित्यर्थः ॥ १२ ॥

१ राजन्निति गो. रा. पाठः । २ तत इति गो. रा. पाठः । ३ नापीति गो. रा. पाठः । ४ तातेति गो. रा. पाठः । ५ शङ्कितेति गो. पाठः । ६ चितेति गो. पाठः ।

तैच्च गङ्गावतरणं त्वया कृतमरिंदम । अनेन च भवान्प्राप्तो धर्मस्यायतनं महत् ॥ १३ ॥
प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते । सलिले पुरुषश्रेष्ठ शुचिः पुण्यफलो भव ॥ १४ ॥
पितामहानां सर्वेषां कुरुष्व सलिलक्रियाम् । स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप १५॥
इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः । यथागतं तथागच्छद्देवलोकं महायशाः ॥ १६ ॥
भगीरथस्तु राजर्षिः कृत्वा सलिलमुत्तमम् । यथाक्रमं यथान्यायं सागराणां महायशाः ॥ १७ ॥
कृतोदकः शुची राजा स्वपुरं प्रविवेश ह । समृद्धार्थो नरश्रेष्ठ स्वराज्यं प्रशशास ह ॥ १८ ॥
प्रमुमोद च लोकस्तं नृपमासाद्य राघव । नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥ १९ ॥

रा० टी०–सेति । हे पुरुषर्षभ सा अन्यासमतिक्रमणीया प्रतिज्ञा त्वया समतिक्रान्ता परिपालिता अतः परमसंमतं परमाणामुत्कृष्टजनानां संमतमत्यन्तेच्छाविपर्यीभूतमत एव परमसुत्कृष्टं यशः लोके त्वं प्राप्तोऽसि ॥ १२ ॥

गो० टी०–सेति । समतिक्रान्ता निस्तीर्णा ॥ १२ ॥

१३] ति० टी०–धर्मस्यायतनं धर्मप्राप्यस्थानम् महद्ब्रह्मलोकरूपम् ॥ १३ ॥

रा० टी०–यशःप्राप्तिकारणं स्पष्टं कथयन्नाह–**यच्चेति** । अरिंदम हे शत्रुसूदन यद् गङ्गावतरणं त्वया कृतं तेनानेन प्रसिद्धेनावतरणेनैव धर्मस्य महत् उत्कृष्टमायतनं गृहमेव भवान् प्राप्तः । एतेन पुरुषार्थसिद्धिस्तव जातेति ध्वनितम् । चद्वयमेवार्थकम् ॥ १३ ॥

गो० टी०–यच्चेति । आयतनं प्रतिष्ठाम् ॥ १३ ॥

१४] ति० टी०–यथास्या ब्रह्मलोकप्रापकत्वं तदाह–**प्लावयस्वेति** । आत्मानं स्वदेहम् । सदोचिते सिंहकर्कटमध्येऽपि स्नानादिव्यवहारोचिते भूप्रवहनदीनामेव तत्काले भौमत्वमूलरजःसंबन्धात्स्नानाद्यनर्हत्वम् । पुण्यफल इति मत्वर्थीयाजन्तो बहुव्रीहिर्वा । अनेन स्नानमात्रेण गङ्गा ब्रह्मलोकप्राप्तिकरीति सूचितम् ॥ १४ ॥

रा० टी०–लोकशिक्षार्थं कर्तव्यमुपदिशन्नाह–**प्लावयस्वेति** । नरोत्तम पुरुषश्रेष्ठ शुचिरपि त्वमुचिते सदा स्नानादियोग्ये सलिले आत्मानं स्वदेहं सदा प्लावयस्व तेन पुण्यफलः लोकानां पुण्यनिष्पादकस्त्वं भव ॥ १४ ॥

गो० टी०–**प्लावयस्वेति** । प्लावयस्व स्नानं कुर्वित्यर्थः । सदोचिते सदा स्नानयोग्ये अन्यासामेव हि नदीनां रजोदोष इति भावः ॥ १४ ॥

१५] ति० टी०–सागराणां जातप्रायश्चित्तत्वसंदेहापनुत्तये गङ्गाजलसंबन्धस्य सर्वपापप्रायश्चित्तत्वबोधनाय च पुनस्तेषां सलिलं कार्यमित्याह–पितामहानामित्यादि । स्वं लोकं ब्रह्मलोकम् । गम्यताम् कृतोदककृत्येन स्वपुरमिति शेषः । अयं नियोगो राजधर्मपरिपालनाय ॥ १५ ॥

रा० टी०–उपसंहरन्नाह–**पितामहानामिति** । हे नृप सर्वेषां पितामहानां सलिलक्रियां त्वं कुरुष्व ते स्वस्ति अस्तु अहं स्वं लोकं गमिष्यामि त्वयापि गम्यताम् ॥ १५ ॥

गो० टी०–**पितामहानामिति** । गम्यतां त्वयापीति शेषः ॥ १५ ॥

१६] ति० टी०–यथा आगतमितिच्छेदः । देवलोकं ब्रह्मलोकम् ॥ १६ ॥

रा० टी०–इतीति । देवेशः देवनियन्ता महायशाः सर्वलोकपितामहः ब्रह्मा वचः एवमनेन प्रकारेण उक्त्वैव यथा येन प्रकारेण आगतं तथा तेन प्रकारेण देवलोकमगच्छत्॥१६॥

गो० टी०–इतीति। यथागतं तथागच्छत् एक एवेत्यर्थः१६

१७] ति० टी०–यथाक्रमं ज्येष्ठक्रमेण । यथान्यायं स्मृत्युक्तक्रमेण । उत्तमसुत्तमलोकप्रापकम् ॥ १७ ॥

रा० टी०–ब्रह्मगमनौत्तरकालिकं भगीरथवृत्तमाह–**भगीरथ** इति । राजर्षिः महायशाः भगीरथस्तु सागराणां यथाक्रमं ज्येष्ठादिक्रममनतिक्रम्य यथान्यायं यथाशास्त्रमुत्तमं सलिलं सलिलक्रियां कृत्वा स्वपुरं प्रविवेश ॥ १७ ॥

गो० टी०–**भगीरथ** इति श्लोकद्वयम् । यथाक्रमं कृतोदकः अन्येषामपीति शेषः । प्रशशास ह प्रशशास चेत्यर्थः ॥ १७ ॥ १८ ॥

१८] ति० टी०–**कृतोदक** इति । अन्येषामपीति शेषः १८

रा० टी०–ह अनन्तरं कृतमुदकमुदककिया येन सः अत एव शुचिः अत एव समृद्धार्थः समृद्धः संपन्नः अर्थः प्रयोजनं यस्य सः अत एव नरश्रेष्ठः उत्तमपुरुषः राजा भगीरथः स्वे राज्यं प्रशशास । प्रथमो हकारः हेत्वर्थः सचाद्यर्थया उक्तेष्वन्वेति श्लोकद्वयं संमिलितान्वयि ॥ १८ ॥

१९] ति० टी०–नष्टशोको नष्टतद्वियोगजशोकः विगतज्वरः कथमस्मत्पालनं भविष्यतीति विगतचिन्तः ॥ १९ ॥

रा० टी०–भगीरथप्रजावृत्तमाह–**प्रेति** । हे राघव ! तं भगीरथं नृपमासाद्य प्राप्यैव समृद्धार्थः संप्राप्तैश्वर्यः अत एव विगतज्वरः विगतशरीरसंतापः अत एव नष्टशोकः लोको जनः प्रमुमोद । चशब्दो हेत्वर्थे ॥ १९ ॥

गो० टी०–**प्रमुमोदेति**। विगतज्वरः निरामय इत्यर्थः१९

१ यच्चेति गो. रा. पाठः । २ व्याप्तेति गो. पाठः । ३ अपीति गो. पाठः ।

एष ते राम गङ्गाया विस्तरोऽभिहितो मया । स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोऽतिवर्तते ॥ २० ॥
धन्यं यशस्यमायुष्यं पुत्र्यं स्वर्ग्यमथापि च । यः श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च ॥ २१ ॥
प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च । इदमाख्यानमायुष्यं गङ्गावतरणं शुभम् ॥ २२ ॥
यः शृणोति च काकुत्स्थ सर्वान्कामानवाप्नुयात् । सर्वे पापाः प्रणश्यन्ति आयुः कीर्तिश्च वर्धते ॥२३॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ।

प्रातः कृताह्निकानां विश्वामित्रादीनां गङ्गामुत्तीर्य विशालानगरीं प्रति गमनम्, विशालाधिष्ठितराजवंशवृत्तान्तं पृच्छते रामाय विश्वामित्रस्य तदुपोद्घाततया क्षीरोदधिमथनवर्णनम् ।

विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः । विस्मयं परमं गत्वा विश्वामित्रमथाब्रवीत् ॥ १ ॥
अत्यद्भुतमिदं ब्रह्मन्कथितं परमं त्वया । गङ्गावतरणं पुण्यं सागरस्यापि पूरणम् ॥ २ ॥
क्षणभूतेव नौ रात्रिः संवृत्तेयं परंतप । इमां चिन्तयतः सर्वां निखिलेन कथां तव ॥ ३ ॥

२०] ति० टी०–उपसंहरति–एष इति । स्वस्तिभद्रयोः तत्प्रीत्यादरसूचनार्थं ग्रहणम् ॥ २० ॥

रा० टी०–उपसंहरन्नाह–एष इति । हे राम ! एष गङ्गायाः विस्तरः ते मयाभिहितः कथितः अतः ते भद्रं कल्याणं संध्याकालः अतिवर्तते अत्यन्तं प्राप्नोति अतः त्वं स्वस्ति मङ्गलमूलं संध्योपासनादि प्राप्नुहि कुरु । एतेन अहमपि संध्योपासनादि करिष्यामीति ध्वनितम् ॥ २० ॥

गो० टी०–उपसंहरति–एष इति । भद्रं तेऽस्त्विति वचनपरिपाटी संध्याकालोऽतिवर्तते इतः परं न प्रष्टव्यमिति भावः ॥ २० ॥

२१–२३] ति० टी०–आख्यानश्रवणफलमाह–धन्यमित्यादि ॥ २१–२३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रा० टी०–गङ्गाविस्तरश्रावणादिफलमाह–धन्यमित्यादिश्लोकत्रयेण । धन्यं धन्यतासंपादकं यशस्यं यशःप्रदमायुष्यं आयुषः प्रदं पुत्र्यं पुत्रप्रदमिदमाख्यानमव्ययः एकाग्रचित्तः यः पुरुषः विप्रेषु विप्रसभासु अथापि क्षत्रियेषु अथापि इतरेषु वैश्येषु चकारेण शूद्रसभासु श्रावयति तस्य पितरः प्रीयन्ते दैवतानि च प्रीयन्ते चकारान्तरेण परमात्मापि प्रीयते । द्वयोरेकत्रान्वयः अथापीत्यावर्तते ॥ २१ ॥ २२ ॥

गो० टी०–अथ गङ्गावतारश्रावणफलमाह–धन्यमिति । धनादिप्रदमित्यर्थः । सर्वत्र साधुत्वार्थे यत्प्रत्ययः इदमाख्यानमित्यनुपज्यते । अर्धत्रयम् ॥ २१ ॥

रा० टी०–श्रावणफलमुक्त्वा श्रवणफलमाह–य इति । काकुत्स्थ हे राम ! इदमाख्यानं यः शृणोति स सर्वान्कामानवाप्नुयात् तस्य सर्वपापानि नश्यन्ति आयुः कीर्तिश्च वर्धते किंच यो विप्रादिषु श्रावयति यश्च शृणोति स सर्वान् कामानवाप्नुयात् तस्य पित्रादयः प्रीयन्ते आयुरादिश्च वर्द्धते । त्रयाणामेकत्रान्वयः ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

गो० टी०–इदमिति । श्रावयितुः फलमुक्तं संप्रति श्रोतुः फलमुच्यते–गङ्गावतरणं गङ्गावतरणाख्यम् । अर्धत्रयम् ॥२२॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

१] ति० टी०–अब्रवीत् राज्यन्त इति शेषः ॥ १ ॥

रा० टी०–विश्वामित्रवचनश्रवणानन्तरकालिकं वृत्तमाह–विश्वामित्रेति । अथ विश्वामित्रोक्त्यनन्तरं सहलक्ष्मणो राघवो रामः विश्वामित्रवचः श्रुत्वा परमं विस्मयं गत्वा विश्वामित्रमब्रवीत् ॥ १ ॥

गो० टी०–एवं दशभिः सर्गैः गङ्गागाङ्गेयसंभववर्णनव्याजेन धातुमोक्षणगङ्गापूतत्वनिमित्तकं देवतान्तरावरत्वं दर्शितं, अथ त्रिभिः सर्गैः महेन्द्रस्यावरत्वमुपपाद्यते–विश्वामित्रेत्यादि॥१॥

२] ति० टी०–पूरणम् गङ्गयेति शेषः ॥ २ ॥

रा० टी०–तद्वचनमेवाह–अतीति । हे ब्रह्मन् ! अत्यद्भुतं परमं मनोहरं पुण्यं पवित्रत्वहेतुभूतमिदं गङ्गावतरणं सागरस्य पूरणं गङ्गया पूर्तिरपि त्वया कथितम् ॥ २ ॥

गो० टी०–अत्यद्भुतमिति । पूरणं खननेनाभिवर्धनम् ॥२॥

३] ति० टी०–इमां तव कथां त्वदुक्तां कथां चिन्तयतो मम रामस्य रात्रिः क्षणभूतेव संवृत्तातीता एवमाश्चर्यभूता त्वदुक्ता गङ्गाकथेति भावः ॥ ३ ॥

रा० टी०–संतुष्टमिति । अत एव हे ब्रह्मन् ! मे मनः संतुष्टं इत्युक्त्वा विरराम । हकारः हेत्वर्थः । तस्येति सह सौमित्रिणा सह

१ इवेति गो. पाठः । २ अन्यत्र इति गो. रा. पाठः । ३ सर्वपापानि नश्यन्तीति गो. रा.पाठः । ४ महातपः इति गो. रा. पाठः । ५ चिन्तयतोः पुण्यामिति रा. पाठः ।

तस्य सा शर्वरी सर्वा मम सौमित्रिणा सह । जगाम चिन्तयानस्य विश्वामित्र कथां शुभाम्॥ ४ ॥
ततः प्रभाते विमले विश्वामित्रं तपोधनम् । उवाच राघवो वाक्यं कृताह्निकमरिंदम ॥ ५ ॥
गता भगवती रात्रिः श्रोतव्यं परमाद्भुतम् । तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम् ॥ ६ ॥
नौरेषा हि सुखास्तीर्णा ऋषीणां पुण्यकर्मणाम् । भगवन्तमिह प्राप्तं ज्ञात्वा त्वरितमागता ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः । संतारं कारयामास सर्षिसंघस्य कौशिकः ॥ ८ ॥
उत्तरं तीरमासाद्य संपूज्यर्षिगणं ततः । गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीम् ॥ ९ ॥
ततो मुनिवरस्तूर्णं जगाम सहराघवः । विशालां नगरीं रम्यां दिव्यां स्वर्गोपमां तदा ॥१०॥
अथ रामो महाप्राज्ञो विश्वामित्रं महामुनिम् । पप्रच्छ प्राञ्जलिर्भूत्वा विशालामुत्तमां पुरीम् ॥११॥
कर्तमो राजवंशोऽयं विशालायां महामुने । श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥१२॥

ते निद्रादिवेगं क्षमते इति सहः स एव सौमित्रिरिति कर्मधारयः तेन सह शुभां विश्वामित्रकथां चिन्तयानस्य तस्य रामस्य सर्वा सा शर्वरी रात्रिर्जगाम एतेन गङ्गाचरितस्य सहृदयहृदयापहारकत्वं व्यक्तम् ॥ ३ ॥

गो० टी०–क्षणभूतेव नौ रात्रिरिति श्लोको गता भगवतीत्यर्धात्परमनुसन्धेयः ॥ ३ ॥

४–५] ति० टी०–विश्वामित्रेति संबोधनम् । उक्तस्यैवार्थस्यादरातिशयबोधनाय पुनरुपादानम् ॥ ४ ॥ ५ ॥

रा० टी०–तत इति । ततः विश्वामित्रोक्तिचिन्तनानन्तरं कृताह्निकं कृतमाह्निकं संध्योपासनादि येन तं महामुनिं विश्वामित्रमरिंदमो राघवः विमले प्रभातेऽत्यन्तप्रभातसमये वाक्यमुवाच ॥ ४ ॥

गो० टी०–तस्येति । क्षणभूतेव जगामेत्यर्थः ॥ ४ ॥

गो० टी०–तत इति । विमले प्रभाते सम्यक् प्रभात इत्यर्थः ॥ ५ ॥

६] ति० टी०–भगवती गङ्गाकथाश्रवणात्पूज्या ॥ ६ ॥

रा० टी०–तद्वाक्यमेवाह–गतेति । यतः श्रोतव्यं श्रवणार्हं परममत्युत्कृष्टमावाभ्यां श्रुतमतः गता व्यतीता रात्रिः भगवती अत्यैश्वर्यप्रापिका अभवदिति शेषः । अतो हे महातपः पुण्यामिमां तव कथां त्वदुक्तगङ्गागाथां निखिलेन निःशेषतः चिन्तयतोः नौ आवयोः इयं रात्रिः क्षणभूता इव संवृत्ता जाता अतः सरितां श्रेष्ठां पुण्यां पवित्रत्वहेतुभूतां त्रिपथगां नदीं गङ्गां तराम । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–गतेत्यर्धत्रयम् । भगवती सत्कथायुक्तत्वात्पूज्या ॥ ६ ॥

गो० टी०–तरामेति अर्धत्रयम् । ऋषीणां नौः ऋषितरणार्हा नौः ॥ ७ ॥

७] ति० टी०–सुखास्तीर्णा सुखं शुभमास्तीर्णं यस्यां सा त्वरितमागता सर्षेस्तव सेवार्थमित्याशयः ॥ ७ ॥

रा० टी०–तरणस्यावश्यकत्वं बोधयन्नाह–नौरिति । सुखास्तीर्णा सुखमास्तीर्णमास्तरणं यस्यां सा पुण्यकर्मणामृषीणामेषां नौः भगवन्तं त्वामिह प्राप्तं ज्ञात्वैव त्वरितमागता एतेन द्रुतं तरणीयमिति ध्वनितम् । हिशब्द एवार्थे ॥ ७ ॥

८] ति० टी०–कारयामास नाविकैरिति शेषः ॥ ८ ॥

रा० टी०–तस्येति । महात्मनः तस्य राघवस्य तत्तरणबोधक वचनं श्रुत्वा सर्षिसंघः ऋषिसंघसहितः सराघवः राघवसहितः विश्वामित्रः संतारं गङ्गासंतरणं कारयामास चकार । स्वार्थे णिच् प्रयोजकाविवक्षा वा ॥ ८ ॥

गो० टी०–तस्येति । सराघवः सर्षिसंघः कारयामास अकरोत् स्वार्थे णिच् ॥ ८ ॥

९] ति० टी०–संपूज्यर्षिगणम् तत्तीरस्थमिति शेषः ॥९॥

रा० टी०–उत्तरमिति । ततः गङ्गासंतरणानन्तरमुत्तरमग्निं कूलमासाद्य प्राप्य ऋषिगणं तत्रत्यऋषिसमूहं संपूज्य गङ्गाकूले निविष्टाः कंचित्कालं स्थितास्ते विश्वामित्ररामलक्ष्मणाः विशालां पुरीं ददृशुः ॥ ९ ॥

गो० टी०–उत्तरमिति । ऋषिगणं नौतारणार्थमागतं संपूज्य पूजापूर्वकं निवर्त्य निविष्टाः क्षणं स्थिताः ॥ ९ ॥

१०] ति० टी०–विशालां जगाम पूर्वदृष्टामिति शेषः॥१०॥

रा० टी०–तत इति । तदा पुरीदर्शनानन्तरकाले सहराघवः राघवसहितः मुनिवरो विश्वामित्रः दिव्यां प्राकृतविलक्षणां रम्यां रमणीयां स्वर्गोपमां स्वर्गसदृशीं विशालां नगरीं तूर्णं शीघ्रं ततो गङ्गाकूलात् जगाम ॥ १० ॥

गो० टी०–तत इति । विशालां प्रतीति शेषः ॥ १० ॥

११] ति० टी०–विशालां परिपप्रच्छ विशालाविषये प्रश्नं कृतवानित्यर्थः ॥ ११ ॥

रा० टी०–अथेति । अथ गमनानन्तरं महाप्राज्ञं महामुनिं विश्वामित्रं प्राञ्जलिर्भूत्वा रामः उत्तमां विशालां पुरीं पप्रच्छ किमस्या महत्त्वमिति प्रश्नं कृतवानित्यर्थः ॥ ११ ॥

गो० टी०–अथेति । विशालां विशालामाहात्म्यम् ॥११॥

१२] ति० टी०–विशालायाम् संप्रति वर्तत इति शेषः॥१२॥

१ एतदादिसार्धश्लोकद्वयं रा. नास्ति । २ तदेति गो. पाठः । ३ महामुनिमिति गो. पाठः । ४ परमं श्रुतमिति गो. पाठः । ५ सर्षिसंघः सराघवः इति गो. रा. पाठः । ६ कूलमिति रा. पाठः । ७ तदेति गो. पाठः । ८ कतर इति गो. रा. पाठः ।

तस्य तद्वचनं श्रुत्वा रामस्य मुनिपुंगवः । आख्यातुं तत्समारेभे विशालायाः पुरातनम् ॥१३॥
श्रूयतां राम शक्रस्य कथां कथयतः शुभाम्[2] । अस्मिन्देशे[3] हि यद्वृत्तं शृणु तत्त्वेन राघव ॥ १४ ॥
पूर्वं कृतयुगे राम दितेः पुत्रा महाबलाः । अदितेश्च महाभागा वीर्यवन्तः सुधार्मिकाः[5] ॥ १५ ॥
ततस्तेषां नरव्याघ्र बुद्धिरासीन्महात्मनाम्[6] । अमरा विजराश्चैव[7] कथं स्यामो निरामयाः[8] ॥ १६ ॥
तेषां चिन्तयतां तत्र बुद्धिरासीद्विपश्चितां[9] । क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥ १७ ॥
ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम्[10] । मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥ १८ ॥
अथ[11] वर्षसहस्रेण योक्त्रसर्पशिरांसि च । वमन्तोऽतिविषं तत्र ददंशुर्दशनैः शिलाः ॥ १९ ॥

रा० टी०–द्वितीयं प्रश्नमाह–कतर इति । हे महामुने! विशालायामयं प्रसिद्धः कतरः कः राजवंशोऽस्तीति श्रोतुमिच्छामि मे परं कौतूहलमस्ति ते भद्रं एतेन प्रश्नद्वयोत्तरं वदेति ध्वनितम् । हिशब्द इत्यर्थे ॥ १२ ॥

गो० टी०–विशालायां वर्तमानो राजवंशः कतर इति द्वितीयः प्रश्नः ॥ १२ ॥

१३] ति० टी०–'विशालायाः पुरातनम्' इति पाठः । पुरातनं तत्पुरीनिर्मितेः प्राक्तनं वृत्तान्तम् । 'विशालस्य' इति पाठे तन्नगरीनिर्माता राजा विशालो नाम यद्वा विशालस्य विशालानगर्याधिष्ठानदेशस्येत्यर्थः ॥ १३ ॥

रा० टी०–तस्येति । तस्य रामस्य तद्वचनं श्रुत्वा मुनिपुंगवो विश्वामित्रः विशालस्य विशालाभिधनगरस्य तत् प्रसिद्धं पुरातनं पूर्वप्रश्नमाख्यातुमुत्तरत्वेन कथयितुं समारेभे ॥ १३ ॥

गो० टी०–तस्येति । विशालस्य विशालाख्यनगरस्य पुरातनं कर्म प्रथमपृष्टं वैभवमाख्यातुं समारेभे ॥ १३ ॥

१४] ति० टी०–शक्रस्य कथां विशालवैभवप्रतिपादिकां कथां कथयतः सकाशान्मया श्रुताम् अस्मिन्देशे विशालानगर्याधिष्ठानदेशे यद्वृत्तं पुरातनं तद्विषयां तत्त्वेन शृण्विति योजना १४

रा० टी०–तत्समारम्भमेवाह–श्रूयतामिति । हे राघव हे राम! शक्रस्य इन्द्रस्य शुभां कथां कथयतः प्रसङ्गसंगत्या वदतो मत्तः श्रूयतामेतेनेन्द्रकथा विशालाकथोपयोगिनीति सूचितम् अत एवास्मिन् देशे यद्वृत्तं तदपि तत्त्वेन शृणु अहं कथयामीत्यर्थः ॥ १४ ॥

गो० टी०–श्रूयतामिति । अस्मिन्देशे यद्वृत्तं तच्छृणु तच्छेषतया शक्रस्य कथां कथयतो मत्तः सा श्रूयताम् ॥१४॥

१५] ति० टी०–सुधार्मिका इत्यदितिपुत्रविशेषणम् । आसन्निति शेषः ॥ १५ ॥

रा० टी०–प्रतिज्ञातमाह–पूर्वमिति । हे राम! कृतयुगे पूर्वं महाबलाः दितेः पुत्रा आसन्निति शेषः । ततः महाभागाः वीर्यवन्तः सुधार्मिकाः अदितेः पुत्रा आसन् । तुशब्दोऽनन्तरार्थकः पुत्रा इत्युभयान्वयि ॥ १५ ॥

गो० टी०–पूर्वमिति । पूर्वं कृतयुगे दितेः पुत्रा महाबला आसन् अदितेः पुत्रा वीर्यवन्तो धार्मिकाश्चासन् ॥ १५ ॥

१६] ति० टी०–अमरा मरणरहिताः विजरा जरारहिताः निरामया रोगरहिताः ॥ १६ ॥

रा० टी०–तत इति । ततः उत्पत्त्यनन्तरं हे नरव्याघ्र! महात्मनां तेषां देवासुराणाममराः मरणरहिताः विजराः जरारहिताश्च निरामयाः रोगरहिताश्च वयं कथं स्याम इति बुद्धिः चिन्ता आसीत् । एवश्चार्थकः । इतीत्यध्याहृतम् । 'स्यामो' इति पाठो यदि प्रामाणिकस्तर्हि उरित्यर्थकः ॥ १६ ॥

गो० टी०–तत इति । म्रियन्त इति मराः पचाद्यच् अमराः मरणरहिताः अजराः जरारहिताः तेषां देवासुराणाम्॥१६॥

१७] ति० टी०–रसममृतरूपं रसायनम् ॥ १७ ॥

रा० टी०–तेषामिति । हे राम! चिन्तयतां विपश्चितां पण्डितानां तेषां देवासुराणां क्षीरोदमथनं कृत्वा रसममरत्वादिहेतुभूतममृतं प्राप्स्याम प्राप्स्यामः इति बुद्धिः निश्चयस्तत्र तस्मिन्समये आसीत् । वैशब्द इत्यर्थे ॥ १७ ॥

गो० टी०–तेषामिति । रसममृतं तत्र क्षीरोदे ॥ १७ ॥

१८] ति० टी०–योक्त्रं मन्थनरज्जुम् ॥ १८ ॥

रा० टी०–तत इति । ततः प्रयत्नविस्तारकर्तारः अमितौजसः देवासुराः मथनं निश्चित्य वासुकिं योक्त्रं मथनरज्जुं कृत्वा मन्दरं मन्थानं च कृत्वा ममन्थुः ॥ १८ ॥

गो० टी०–तत इति । योक्त्रं मथनरज्जुं मन्थानं मथनदण्डम् ॥ १८ ॥

१९] ति० टी०–योक्त्रसर्पो मन्थनरज्जुभूतः सर्पः । वमन्त इति पुंस्त्वमार्षम् । अति अतिशयितं विषम् ॥ १९ ॥

रा० टी०–अथेति । अथ मन्थनप्रारम्भानन्तरं वर्षसहस्रेण अतिविषं वमन्त एव योक्त्रसर्पशिरांसि दशनैर्दंष्ट्राभिस्तत्र विषमानाः शिला ददंशुः वमन्त इति पुंस्त्वमार्षम् । चशब्द एवार्थे१९

गो० टी०–अथेति । धन्वन्तरिरुत्पपात अप्सराश्च उत्पेतुरिति शेषः । आकारान्तत्वमार्षम् ॥ १९ ॥

१ विशालस्येति गो. रा. पाठः । २ शुभामिति गो. रा. पाठः । ३ त्विति गो. रा. पाठः । ४ तदपि शृण्विति गो. पाठः । ५ स्त्विति गो. पाठः । ६ श्रेष्ठेति गो. पाठः । ७ अजरा इति गो. पाठः । ८ स्यामेति गो. रा.पाठः । ९ रामेति गो. रा. पाठः । १० महात्मनामिति गो. पाठः । ११ एतस्मादारभ्य सार्धद्वादशश्लोकाः गो. न वर्तन्ते ।

उत्पपाताग्निसंकाशं हालाहलमहाविषम् । तेन दग्धं जगत्सर्वं सदेवासुरमानुषम् ॥ २० ॥
अथ देवा महादेवं शंकरं शरणार्थिनः । जग्मुः पशुपतिं रुद्रं त्राहि त्राहीति तुष्टुवुः ॥ २१ ॥
एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः । प्रादुरासीत्ततोऽत्रैव शङ्खचक्रधरो हरिः ॥ २२ ॥
उवाचैनं स्मितं कृत्वा रुद्रं शूलधरं हरिः । दैवतैर्मथ्यमाने तु यत्पूर्वं समुपस्थितम् ॥ २३ ॥
तत्त्वदीयं सुरश्रेष्ठ सुराणामग्रतो हि यत् । अग्रपूजामिह स्थित्वा गृहाणेदं विषं प्रभो ॥ २४ ॥
इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवान्तरधीयत । देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ॥ २५ ॥
हालाहलं विषं घोरं संजग्राहामृतोपमम् । देवान्विसृज्य देवेशो जगाम भगवान्हरः ॥ २६ ॥
ततो देवासुराः सर्वे ममन्थू रघुनन्दन । प्रविवेशाथ पातालं मन्थानः पर्वतोत्तमः ॥ २७ ॥
ततो देवाः सगन्धर्वास्तुष्टुवुर्मधुसूदनम् । त्वं गतिः सर्वभूतानां विशेषेण दिवौकसाम् ॥ २८ ॥
पालयास्मान्महाबाहो गिरिमुद्धर्तुमर्हसि । इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ॥ २९ ॥
पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः । पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ॥ ३० ॥

२०–२१] ति० टी०–उत्पपातेति तत इत्यादिः शिलादशनादित्यर्थः । दष्टशिलाखण्डा एव महाविषरूपं भूत्वोत्पपात ॥ २० ॥ २१ ॥

रा० टी०–विषप्रभावं वर्णयन्नाह–उत्पपातेति । अग्निसंकाशमग्न्यनुयोगिकसादृश्यप्रतियोगि हालाहलमहाविषं हालाहलजातिकविषोत्तमसमुत्पपात समुद्रादूर्ध्वमगच्छत् तेन हालाहलमहाविषेण सदेवासुरमानुषं देवासुरमानुषसहितं सर्वं जगत् दग्धं दग्धुमारेभे । आदिकर्मणि निष्ठा ॥ २० ॥

रा० टी०–अथेति । अथ विषकर्तृकदाहप्रारम्भानन्तरं शरणार्थिनः रक्षणप्रयोजनवन्तः देवाः शंकरं कल्याणकर्तारं पशुपतिं नन्दीश्वररक्षाशीलं रुद्रं सर्वरुद्रनियन्तारं महादेवं जग्मुः मनसेति शेषः त्राहि त्राहीति कृत्वा तुष्टुवुश्च । विनापि चं समुच्चयः ॥ २१ ॥

२२] ति० टी०–प्रभुर्महादेवः । ततो महादेवप्रादुर्भावानन्तरम् ॥ २२ ॥

रा० टी०–एवमिति । ततः त्राहि त्राहीति वचनश्रवणानन्तरमवमनन प्रकारेण देवैरुक्तः देवदेवेश्वरः प्रभुः शिवः प्रादुरासीत् । ततः शिवप्रादुर्भावानन्तरं शङ्खचक्रधरो हरिः अत्रैव प्रादुरासीत् ॥ २२ ॥

२३] ति० टी०–स्मितं कृत्वा । छलेन विषदानात्स्मितम्

२४] ति० टी०–यद्यतो भवान्सुराणामग्रतः तेषां मध्ये श्रेष्ठ इत्यर्थः ॥ २४ ॥

रा० टी०–उवाचेति । हरिर्विष्णुः स्मितं कृत्वा शूलभृतमेनं रुद्रमुवाच । तद्वचनमेवाह–दैवतैर्मथ्यमाने समुद्रे यत्पूर्वं समुपस्थितं निःसृतं तत् त्वदीयमेव तत्र हेतुः हे सुरश्रेष्ठ ! यद्यस्मात् त्वं सुराणामग्रतः अग्र्यः श्रेष्ठः अग्रत इत्यत्र प्रथमान्तात्तसिः अतः हे विभो ! सकलसामर्थ्यविशिष्ट इहैव स्थित्वा इदं विषं गृहाण । श्लोकद्वयमेकान्वयि । तुहिशब्दौ एवार्थौ ॥ २३ ॥ २४ ॥

२५] ति० टी०–सुरश्रेष्ठो विष्णुः ॥ २५ ॥

२६] ति० टी०–अमृतोपमं यथा भवति तथा संजग्राहेत्यन्वयः । पूर्वं देवेषु मन्थनसहायतया स्थितोऽपि विषपानानन्तरं तत्पीडया तांस्त्यक्त्वा जगाम अमृतकुण्डमिति शेषः ॥२६॥

रा० टी०–इतीति । सुरश्रेष्ठो विष्णुः इति अनेन प्रकारेण उक्त्वा तत्रैव अन्तरधीयत । देवेशः भगवान् सकलसामर्थ्यविशिष्टः हरः देवतानां भयं दृष्ट्वा शार्ङ्गिणः विष्णोः वाक्यं च श्रुत्वा घोरं हालाहलविषममृतोपमं यथा स्यात्तथा संजग्राह कण्ठे दधार देवान्विसृज्य जगाम च । श्लोकद्वयमेकान्वयि तुशब्दश्चार्थे ॥ २५ ॥ २६ ॥

२७–२८] ति० टी०–मन्थानः पर्वतोत्तमो मन्दरः २७॥२८

रा० टी०–तत इति । हे रघुनन्दन ! ततः रुद्रगमनानन्तरं सर्वे देवासुराः ममन्थुः । अथ अनन्तरं मन्थानः पर्वतोत्तमो मन्दरः पातालं प्रविवेश । बहुत्वमार्षम् ॥ २७ ॥

रा० टी०–तत इति । ततः पर्वतस्य पातालगमनानन्तरं सगन्धर्वा देवाः मधुसूदनं तुष्टुवुः । स्तुतिमेवाह–सर्वभूतानां दिवौकसां च विशेषेण गतिस्त्वमेव विनापि चं समुच्चयः । सर्वं वाक्यं सावधारणं भवतीति न्यायेन एवकारलाभः ॥ २८ ॥

२९] ति० टी०–कामठं काच्छपम् ॥ २९ ॥

रा० टी०–पालयेति । हे महाबाहो ! अस्मॉंस्त्वं पाल्य । पालनमेवाह–गिरिमुद्धर्तुं त्वमर्हसि । हृषीकेशः विष्णुः इति देववचः श्रुत्वा कामठं कमठरूपसदृशं रूपमास्थितः प्रकटितवान् ॥ २९ ॥

३०] ति० टी०–शिश्ये स्थितवान् । जलेशय इत्यादौ स्थित्यर्थस्य शेतेर्दर्शनात् ॥ ३० ॥

रा० टी०–कमठरूपप्रकटनप्रयोजनं वदन्नाह–पर्वतामिति । हरिः कमठरूपधारी विष्णुः तत्र मथ्यमाने उदधौ पर्वतं पृष्ठतः पृष्ठे कृत्वा शिश्ये । अनन्तरं लोकात्मा केशवः पुरुषोत्तमः पर्वताग्रं हस्तेनाक्रम्य देवानां मध्यतः स्थित्वा ममन्थ । सार्धश्लोक एकान्वयी ॥ ३० ॥

देवानां मध्यतः स्थित्वा ममन्थ पुरुषोत्तमः । अथ वर्षसहस्रेण आयुर्वेदमयः पुमान् ॥ ३१ ॥
उदतिष्ठत्सुधर्मात्मा सदण्डः सकमण्डलुः । अथ धन्वन्तरिर्नाम अप्सराश्च सुवर्चसः ॥ ३२ ॥
अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः । उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ॥ ३३ ॥
षष्टिः कोट्योऽभवंस्तासामप्सराणां सुवर्चसाम् । असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः ३४
न ताः स्म प्रतिगृह्णन्ति सर्वे ते देवदानवाः । अप्रतिग्रहणादेव तौ वै साधारणाः स्मृताः ॥ ३५ ॥
वरुणस्य ततः कन्या वारुणी रघुनन्दन । उत्पपात महाभागा मार्गमाणा परिग्रहम् ॥ ३६ ॥
दितेः पुत्रा न तां राम जगृहुर्वरुणात्मजाम् । अदितेस्तु सुता वीरैं जगृहुस्तामनिन्दिताम्॥ ३७ ॥
असुरास्तेन दैतेयाः सुरास्तेनादितेः सुताः । हृष्टाः प्रमुदिताश्चासन्वारुणीग्रहणात्सुराः ॥ ३८ ॥
उच्चैःश्रवा हयश्रेष्ठो मणिरत्नं च कौस्तुभम् । उदतिष्ठन्नरश्रेष्ठ तथैवामृतमुत्तमम् ॥ ३९ ॥

३१] ति० टी०–ममन्थ पुरुषोत्तमः । अनेन शक्तिवैचित्र्यं प्रकटीकृतम् ॥ ३१ ॥

३२] ति० टी०–धन्वन्तरिरुदतिष्ठदित्यन्वयः । अप्सरा इत्यार्षम् । उदतिष्ठन्नित्यनुकर्षः ॥ ३२ ॥

रा० टी०–अथेति । अथानन्तरं वर्षसहस्रेण आयुर्वेदमयः धर्मात्मा सदण्डः दण्डसहितः सकमण्डलुः कमण्डलुसहितः स धन्वन्तरिर्नाम पुमान् उदतिष्ठत् । पूर्वमिति–पूर्वं धन्वन्तरिः अनन्तरं सुवर्चसः अप्सरा अप्सरसश्च उदतिष्ठन् । अर्थमेकान्वयि चोऽनन्तरार्थकः ॥ ३१ ॥ ३२ ॥

३३] ति० टी०–अप्सु क्षीररूपासु । तस्मात् क्षीरोदसारभूतादित्यर्थः ॥ ३३ ॥

रा० टी०–अप्सरश्शब्दार्थं विवृण्वन्नाह–अप्स्विति । अप्सु तस्मात्प्रसिद्धात् निर्मथनादेव जातात् रसाद्वरस्त्रियः उत्पेतुः तस्माद्धेतोः हे मनुजश्रेष्ठ ! अप्सरसोऽप्सरस्संज्ञा अभवन् ता इति शेषः ॥ ३३ ॥

गो० टी०–अप्स्वियति । अप्सरःशब्दं निर्वक्ति–अत्राप्शब्देन तद्विकारभूतं क्षीरमुपलक्ष्यते अप्सु यन्निर्मथनं तस्माद्यो रसस्तस्मादप्सास्यत उत्पेतुस्तस्मादप्सरसोऽभवन् पृषोदरादित्वात्साधुः ॥ २० ॥

३४] ति० टी०–षष्टिः कोट्यः षष्टिकोटिसंख्याः प्रधाना अप्सरसामभवन् अपरिमितपरिचारिकोपेताः षष्टिकोट्यप्सरसो जाता इत्यर्थः ॥ ३४ ॥

रा० टी०–अप्सरसां संख्यां कुर्वन्नाह–षष्टिरिति । सुवर्चसां तासामप्सराणामप्सरसां षष्टिः कोट्यः अभवन् यास्तासां परिचारिकास्तास्तु हे काकुत्स्थ ! असंख्येयाः अभवन् । षष्टिः कोट्यः इत्यनयोः संख्येयत्वे अप्सरसामित्यत्र षष्ठी राहोः शिर इत्यादाविव बोध्या ॥ ३४ ॥

गो० टी०–षष्टिरिति । तासां प्रधानभूतानाम् ॥ २१ ॥

३५] ति० टी०–ता उक्ताप्सरसो न प्रतिगृह्णन्ति ममैवेमा नान्यस्येति नाङ्गीकुर्वन्ति सर्वे देवा दानवाश्चेत्यर्थः । तासां विशिष्यपत्यनिच्छयैव संसृग्याकारतया स्थितत्वात्तासां विशिष्यप्रतिग्रहाभावः अत एव तासां साधारण्यम् ॥ ३५ ॥

रा० टी०–नेति । ते तत्र वर्तमानाः सर्वे देवदानवास्ताः परिचारिकासहिताः अप्सरसः न प्रतिगृह्णन्ति स्म तेन देवासुरसमूहेन तासामप्रतिग्रहणादेव ताः साङ्गाः अप्सरसः साधारणाः स्मृताः । ता इत्युभयान्वयि ॥ ३५ ॥

गो० टी०–न ताः स्मेति। न ताः स्म प्रतिगृह्णन्ति नासाधारण्येन प्रतिगृह्णन्ति स्मेत्यर्थः । कुतः अप्रतिग्रहणात् को वा मम पतिरिति मार्गणाकरणादित्यर्थः । तेनासाधारण्येन परिग्रहाकरणेन ॥ २२ ॥

३६] ति० टी०–वारुणी सुराधिदेवता । परिग्रहं केनचिदसाधारण्येनाङ्गीकारम् ॥ ३६ ॥

रा० टी०–वरुणस्येति । हे रघुनन्दन ! महाभागा परिग्रहं स्वस्वीकर्तारं मार्गमाणा वारुणी सुराभिमानिनी देवता वरुणस्य कन्या ततः समुद्रादुत्पपात निस्ससार ॥ ३६ ॥

गो० टी०–वरुणस्येति । वरुणस्य समुद्राधिदेवतायाः वारुणी सुराधिदेवता परिग्रहं ममेयमिति परिग्रहस्य कर्तारम् ॥ २३ ॥

३७] ति० टी०–अदितिसुताङ्गीकारे हेतुरनिन्दितामिति । निषेधशास्त्रं तु मानुषविषयम् शास्त्रे देवतानामनधिकारात् ॥ ३७ ॥

रा० टी०–दितेरिति । हे राम ! तां वरुणात्मजां दितेः पुत्रा न जगृहुः हे राम ! अदितेः सुतास्तु अनिन्दितां तां जगृहुः ॥ ३७ ॥

गो० टी०–दितेरिति । स्पष्टम् ॥ २४ ॥

३८–३९] ति० टी०–असुराः सुरापरिग्रहरहित्यात् । सुराः सुरापरिग्रहसत्त्वात् ॥ ३८ ॥ ३९ ॥

रा० टी०–असुरा इति । तेन सुराधिष्ठातृदेवतावरुणकन्याग्रहणाभावेन दैतेया असुरनामानोऽभवन्निति शेषः। तेन सुराधिष्ठातृदेवताग्रहणेन अदितेः सुताः सुराः अभवन् । तत्र असुर-

---

१ स धर्मात्मेति रा. पाठः । २ पूर्वं धन्वन्तरी रामेति रा. पाठः । ३ तेनेति रा. पाठः । ४ रामेति रा. पाठः । ५ हरिश्रेष्ठ इति रा. पाठः ।

अथ तस्य कृते राम महानासीत्कुलक्षयः । अदितेस्तु ततः पुत्रा दितिपुत्रानयोधयन् ॥ ४० ॥
ऐकतामगमन्सर्वे असुरा राक्षसैः सह । युद्धमासीन्महाघोरं वीरत्रैलोक्यमोहनम् ॥ ४१ ॥
यदा क्षयं गैतं सर्वं तदा विष्णुर्महाबलः । अमृतं सोऽहरत्तूर्णं मायामास्थाय मोहिनीम् ॥ ४२ ॥
ये गताभिमुखं विष्णुमक्षरं पुरुषोत्तमम् । संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना॥ ४३ ॥
अदितेरात्मजा वीरा दितेः पुत्रान्निजघ्निरे । अस्मिन्घोरे महायुद्धे दैतेयादित्ययोर्भृशम् ॥ ४४ ॥

शब्दे बहुव्रीहिः । सुरशब्दोऽर्शआद्यजन्तः । एतदनुरोधेन ' अथासीद्वारुणी देवी कन्या कमललोचना । असुरा जगृहुस्तां वै हरेरनुमते न ते' इति भागवतस्य त्वयमर्थः । हरेरनुमते स्थिता असुरास्तां वारुणीं कन्यां न जगृहुः सुरा एव जगृहुरित्यर्थः । किंच असुराः जगृहुः सुरैर्ग्राह्यामासुरिति सुराः अदितिसुताः वारुणीग्रहणाद्धेतोः हृष्टाः आनन्दविशिष्टाः अत एव प्रमुदिताः पुलकिताश्चासन् ॥ २८ ॥

गो० टी०–प्रसङ्गात्सुरासुरशब्दौ निर्वक्ति–असुरा इति । तेन सुरायाः परिग्रहेण सुराः अर्शआदित्वादजन्तः पिष्टादिविकृतिरेव सुरा निन्द्या हृष्टाः पुलकिताः ॥ २९ ॥

रा० टी०–उच्चैरिति । हे नरश्रेष्ठ ! हरिश्रेष्ठः अश्ववरः उच्चैश्रवा उदतिष्ठत् । मणिरत्नं मणिश्रेष्ठं कौस्तुभं च उदतिष्ठत् तथैव उत्तममृतमुदतिष्ठत् ॥ २९ ॥

गो० टी०–उच्चैःश्रवा इति । उत्तमं पूर्वोत्पन्नेभ्यः श्रेष्ठम्२६

४०] ति० टी०–तस्यामृतस्य कृते ग्रहणनिमित्तम् ॥४०॥

रा० टी०–अथेति । हे राम ! अथ अमृतोत्थानानन्तरं तस्य अमृतस्य कृते प्राप्तिप्रयत्ने महान्कुलक्षयः देवासुरकुलध्वंसः आसीत् ततः बहुदेवासुरध्वंसानन्तरमदितेः पुत्राः दितेः पुत्रान् असूदयन् । अमृतस्यार्थे कुलक्षयो जात इयत्नेन उच्चैश्रवःकौस्तुभयोः उभयसंमत्यैव यथायोग्यं विभागो जात इति ध्वनितम् । योग्यता च पूर्वं सुराणां वारुणीग्रहणादसुराणामेव उच्चैःश्रवोग्रहणं युक्तं कौस्तुभस्य चोर्वरितत्वाद्विष्णुग्रहणं युक्तमिति ॥ ४० ॥

गो० टी०–अथेति । तस्य कृते अमृतस्य ग्रहणार्थमित्यर्थः। कुलक्षयः उभयपक्षेऽपि संघातविनाशः । तदेवोपपादयति अदितेरित्यादिना ॥ २७ ॥

४१] ति० टी०–कलहप्रवृत्त्यनन्तरमसुरा राक्षसैः सहैकतामगमन् बलसिद्ध्यर्थमिति शेषः । वीरेति संबुद्धिः । ' परम् ' इति क्वचित्पाठः ॥ ४१ ॥

रा० टी०–दितिसुतसूदनप्रकारं वर्णयन्नाह–एकत इति । राक्षसैः सह सर्वे असुराः एकतः एकस्मिन्देशे एव अभ्यगमन् प्रापुः । हिशब्द एवार्थे तेन सुरा एव एकत्र इति ध्वनितम् । हे वीर महाघोरमतिभयंकरमत एव त्रैलोक्यमोहनं युद्धमासीत् ॥ ४१ ॥

गो० टी०–एकत इति । अनन्तरमसुरा एकतः एकताभ्यागमन् बलद्वय इति भावः ॥ २८ ।

४२] ति० टी०–सर्वं परस्परप्रहारेण देवासुरात्मकम् । क्षयं गतं क्षयप्रायं गतम् । तदा दैत्या राक्षसैरेकत्वेन बलवत्त्वान्माहरन्त्विति बुद्ध्या मोहिनीं कामोहजननीं मायां मायातनुमास्थाय तूर्णं शीघ्रममृतमहरत् ॥ ४२ ॥

रा० टी०–यदेति । यदा यस्मिन्काले सर्वे देवासुराः क्षयं क्षीणबलतां गताः प्राप्तास्तदा महाबलः सः विष्णुः मोहिनीं मायां तूर्णमास्थाय स्वमोहिनीरूपं प्रकटय्येत्यर्थः । अमृतमहरत्॥४२॥

गो० टी०–यदेति । मोहिनीं काममोहजननीं मायामाश्रयशक्तिमास्थायावलोक्य स्वमायया द्भुतयोषिदाकृतिं परिगृह्य तदूपेण तान् वञ्चयित्वा तेभ्योऽमृतमहरदित्यर्थः । यद्वा सर्वमोहकरीमन्तर्धानशक्तिमास्थायामृतमाहरदित्यर्थः । पुराणान्तरवृत्तान्तः कल्पभेदेनेति बोध्यम् ॥ २९ ॥

४३] ति० टी०–गताभिमुखमिति संधिरार्षः । ये सुरा असुरा वा मायामूर्त्या गृहीतामृतं विष्णुममृतजिघृक्षयाभिमुखं गताः प्राप्तास्ते सर्वे मूर्त्यन्तरास्थानेन प्रभविष्णुना विष्णुना युद्धे संपिष्टाः ॥ ४३ ॥

रा० टी०–य इति । अक्षयं विनाशरहितं पुरुषोत्तमं विष्णुं युद्धे येऽभिमुखं गताः बलादमृतजिघृक्षया प्राप्तास्ते तदागमनसमये प्रभविष्णुना स्वसामर्थ्यप्रकटनेच्छावता विष्णुना संपिष्टाः संचूर्णिताः। संदिष्टा इति पाठे तु ये मित्रभावादिनाभिमुखं गताः ते संदिष्टाः अमृतपानाय आदिष्टा तेभ्योऽमृतं दत्त्वानित्यर्थः । अस्मिन् पाठे पूर्वोक्तपाठार्थो व्यङ्ग्यमर्यादया लभ्यते। पूर्वोक्तपाठे एतत्पाठार्थस्तथा लभ्यत इति बोध्यम् ॥ ४३ ॥

गो० टी०–य इति । अत्र संधिरार्षः । ये असुराः अक्षयम् अस्ति जायते परिणमते विवर्धते अपक्षीयते विनश्यतीत्युक्तषड्भावविकारैः शून्यं पुरुषोत्तमं सर्वपुरुषेषूत्तमं विष्णुमभिमुखं गताः अभिमुखतया प्रातिकूल्येन गतास्ते विष्णुना संपिष्टाश्चूर्णिताः 'संविष्टा' इतिपाठे ये असुमभिमुखं गताः शरणागताः देवास्ते युद्धे संविष्टाःआविष्टाःआप्यायितबला आसन्नित्यर्थः॥३०॥

४४] ति० टी०–दितेः पुत्रान्निजघ्निरे धार्मिकत्वाद्विष्वक्सेनग्रहाच्च । दैतेयादित्ययोः सुरासुरवर्गयोः ॥ ४४ ॥

रा० टी०–अदितेरिति । हे वीर अदितेरात्मजा दितेः पुत्रान् दैतेयादित्ययोः महाघोरे तस्मिन् युद्धे भृशं निजघ्निरे॥४४॥

गो० टी०–अदितेरिति । दितेः पुत्रान् अवशिष्टानिति शेषः । यद्वा अदितेरात्मजा आप्यायितबलाः सन्तः तस्मिन् दैतेयादित्ययोर्देवासुरयोर्युद्धेऽसुरान्निजघ्निरे ॥ ३१ ॥

---

१ दितेः पुत्रानसूदयन्निति गो. रा. पाठः । २ एकतोऽभ्यगमन्सर्वे ह्यसुरा इति गो. रा. पाठः । ३ गताः सर्वे इति गो. रा. पाठः।४ अक्षयमिति गो. रा. पाठः । ५ तस्मिन्घोरे इति गो. रा. पाठः ।

निहत्य दितिपुत्रांस्तु राज्यं प्राप्य पुरंदरः । शशास मुदितो लोकान्सर्षिसंघान्सचारणान् ॥ ४५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।

अमृतनिमित्तके दैवासुरयुद्धे हतस्वपुत्रश्रवणेन निर्विण्णया दित्या भर्तारं काश्यपं प्रति शक्रहन्तृपुत्रप्रार्थना । भर्तुस्तत्प्रतिश्रुत्य सहस्रसंवत्सरसाध्यव्रतचर्याचोदनम् । इन्द्रस्य व्रतं चरन्त्या दितेः परिचरणम् । कदाचिच्छिरः स्थाने पादौ कृत्वा शायानां तामशुचिं ज्ञात्वा शक्रस्य तदुदरं प्रविश्य गर्भस्य सप्तधा भेदनं दितिक्षमापनं च ।

हतेषु तेषु पुत्रेषु दितिः परमदुःखिता । मारीचं कश्यपं नाम भर्तारमिदमब्रवीत् ॥ १ ॥
हतपुत्रास्मि भगवंस्तव पुत्रैर्महात्मभिः । शक्रहन्तारमिच्छामि पुत्रं दीर्घतपोर्जितम् ॥ २ ॥
साहं तपश्चरिष्यामि गर्भं मे दातुमर्हसि । ईश्वरं शक्रहन्तारं त्वमनुज्ञातुमर्हसि ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा मारीचः कश्यपस्तदा । प्रत्युवाच महातेजा दितिं परमदुःखिताम् ॥ ४ ॥

४५] ति० टी०–तुश्चार्थे राज्यमित्यनन्तरं योज्यः । राज्यममृतं च प्राप्येत्यर्थः ॥ ४५ ॥

अत्र 'ममन्थुरमितौजसः' इति श्लोकानन्तरम् 'अथ वर्ष–' इत्यादि 'आयुर्वेदमयः पुमान्' इत्यन्तत्रयोदशश्लोकाः प्रक्षिप्ता इति बहवः । अमृतदानराहुशिरश्छेदाद्यवर्णनवद्बालाहलोत्पत्त्याद्यवर्णनमिति तदाशयः ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०–निहत्येति । पुरंदरः इन्द्रः दितिपुत्रान्निहत्य राज्यं प्राप्य च मुदितः सन् सर्षिसंघान् ऋषिसंघसहितान् सचारणान् चारणसहितांल्लोकान् शशास । अत्रास्मिन्सर्गे द्वात्रिंशत् श्लोकाः अन्ये कल्पिताः इति भूषणकृद्भिरुक्तं तत्रान्यकल्पितत्वं मूलयुक्तेरभावात् श्लोकार्थानामबाधकत्वाच्च भारतादिप्रसिद्धविषयबोधकत्वाच्च सर्वपुस्तकेषूपलम्भाच्च तदप्रमाणमिति प्रमाणिकाः अत एव ममन्थुरमितौजस इति श्लोकानन्तरं अथ वर्षेत्यादिआयुर्वेदमयः पुमानित्यन्तं त्रयोदशश्लोकाः प्रक्षिप्ता इत्यादिनात्र त्रयोदशानामेव प्रक्षिप्तत्वं भट्टैरुक्तं तन्मतेऽपि एकोनविंशतेः श्लोकानां कल्पितत्वाभाववत्त्वं सिद्धमेवोक्तत्रयोदशश्लोककल्पितत्वेऽपि प्रमाणमलब्ध्वा बहव इत्युक्तम् एतेन तन्मतेऽपि सर्वेषां कल्पितत्वाभाववत्त्वमर्थतः फलितमत एव तीर्थादिव्याख्यास्तु कल्पितत्वप्रसङ्गानुत्थानमिति दिक् ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

गो० टी०–निहत्येति । चकारादमृतमपीत्यर्थः । अस्मिन्सर्गे द्वात्रिंशच्छ्लोकाः अन्ये कल्पिताः यद्यप्यत्र कालकूटाद्युत्पत्तिरपेक्षिता तथाप्युत्तरकथाशेषत्वेन सर्वासुरक्षय एव प्रधानतयोपात्त इति बोध्यम् ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

१] ति० टी०–किं तत इत्यत्राह—हतेष्वित्यादि । मारीचं मरीचेरपत्यम् ॥ १ ॥

रा० टी०–पुत्रनाशानन्तरकालिकं दितिवृत्तमाह–हतेष्विति । तेषु पूर्वजेषु पुत्रेषु हतेषु सत्सु परमदुःखिता दितिः मारीचं मरीचपुत्रं कश्यपं नाम भर्तारमिदमब्रवीत् ॥ १ ॥

गो० टी०–विष्णुपक्षविरोधे महानपि यत्नो विफलः स्यादित्याह षट्चत्वारिंशे–हतेष्वित्यादि । मारीचं मरीचिपुत्रम् ॥ १ ॥

२] ति० टी०–दीर्घेण तपसार्जितम् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–हतेति । हे भगवन् ! महाबलैः तव पुत्रैः अहं हतपुत्रास्मि अतः दीर्घतपोर्जितं दीर्घतपेन राज्यविषयकात्यन्तज्ञानेन ऊर्जितं प्रवृद्धं शक्रहन्तारं पुत्रमिच्छामि । आलोचनार्थकतपधातोः अच् ॥ २ ॥

गो० टी०–हतेति । तपोर्जितं तपसा ऊर्जितं दृढम् आर्षः संधिः ॥ २ ॥

३–४] ति० टी०–ईश्वरं त्रैलोक्यनाथम् । 'ईदृशम्' इति पाठान्तरम् तत्रेदृशमित्यस्यैव विवरणं शक्रहन्तारमिति ॥ ३ ॥ ४ ॥

रा० टी०–सेति । सा शक्रहन्तृपुत्रविषयकेच्छावती अहं तपश्चरिष्यामि अतस्त्वमनुज्ञातुमाज्ञापयितुमर्हसि । ईश्वरं समर्थं शक्रहन्तारं गर्भं पुत्रं दातुं च त्वमर्हसि । 'ईदृशं शक्रहन्तारम्' इति पाठान्तरम् । विनापि चं समुच्चयः ॥ ३ ॥

गो० टी०–साहमिति । गर्भं पुत्रम् ईश्वरं त्रैलोक्यनियन्तारम् 'ईदृशम्' इति पाठेऽप्ययमर्थो विवक्षितः अनुज्ञातुं तप इति शेषः । भर्त्रनुज्ञां विना तपसि स्त्रिया अस्वातन्त्र्यादिति भावः ॥ ३ ॥

रा० टी०–तस्या इति । तदा दितिप्रार्थनासमये तस्याः दितेस्तत्तादृशपुत्रविषयकं वचनं श्रुत्वा महातेजाः मारीचः कश्यपः परमदुःखितां दितिं प्रत्युवाच ॥ ४ ॥

गो० टी०–तस्या इति ॥ ४ ॥

---

* महाबलैरिति गो. रा. पाठः ।

एवं भवतु भद्रं ते शुचिर्भव तपोधने । जनयिष्यसि पुत्रं त्वं शक्रहन्तारमाहवे ॥ ५ ॥
पूर्णे वर्षसहस्रे तु शुचिर्यदि भविष्यसि । पुत्रं त्रैलोक्यहन्तारं मत्तस्त्वं जनयिष्यसि ॥ ६ ॥
एवमुक्त्वा महातेजाः पाणिना संममार्ज ताम् । तामालभ्य ततः स्वस्ति इत्युक्त्वा तपसे ययौ॥ ७ ॥
गते तस्मिन्नरश्रेष्ठ दितिः परमहर्षिता । कुशप्लवं समासाद्य तपस्तेपे सुदारुणम् ॥ ८ ॥
तपस्तस्यां हि कुर्वत्यां परिचर्यां चकार ह । सहस्राक्षो नरश्रेष्ठ परया गुणसंपदा ॥ ९ ॥
अग्निं कुशान्काष्ठमपः फलं मूलं तथैव च । न्यवेदयत्सहस्राक्षो यच्चान्यदपि काङ्क्षितम् ॥ १० ॥
गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा । शक्रः सर्वेषु कालेषु दितिं परिचचार ह ॥ ११ ॥
पूर्णे वर्षसहस्रे सा दशोने रघुनन्दन । दितिः परमसंहृष्टा सहस्राक्षमथाब्रवीत् ॥ १२ ॥
तपश्चरन्त्या वर्षाणि दश वीर्यवतां वर । अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः ॥ १३ ॥

५] ति० टी०–शुचिर्भव पुत्रोत्पत्तिं यावदिति शेषः ॥ ५ ॥

रा० टी०–तत्प्रतिवचनमेवाह–एवमिति । हे तपोधने ! एवमनेन प्रकारेण प्रार्थितं भवतु सिध्यतु ते भद्रं कल्याणं त्वं शुचिः भव तेन आहवे संग्रामे शक्रहन्तारं पुत्रं जनयिष्यसि ॥५॥

गो० टी०–एवमिति । शुचिर्भव यावत्पुत्रोत्पत्तिमिति शेषः५

६] ति० टी०–पूर्णे वर्षसहस्रे त्विति जनयिष्यसीत्यनेनान्वयः । शुचिर्यदि भविष्यसीति वत्सरसहस्रमपीति शेषः । त्रैलोक्यहन्तारं तदधिपशक्रहन्तारम् ॥ ६ ॥

रा० टी०–तदेव विशदयन्नाह–पूर्णे इति । यदि त्वं शुचिर्भविष्यसि तर्हि वर्षसहस्रे पूर्णे सति त्रैलोक्यहन्तारं त्रिलोकीहननसमर्थं पुत्रं मत्तस्त्वं जनयिष्यसि । त्रैलोक्यहन्तारमित्यनेन यदि त्रिलोकहननयोग्यः सः तर्हि इन्द्रहननयोग्य इति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः । किंच त्रैलोक्यं नियम्यत्वेनास्यातीति त्रैलोक्य इन्द्रः किंच त्रिलोक्या अयं स्वामी त्रैलोक्यः तस्येदमित्यण् यस्येति लोपाभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ ६ ॥

गो० टी०–पूर्ण इति । मत्तः मदनुग्रहादित्यर्थः ॥ ६ ॥

७] ति० टी०–पाणिना संममार्ज तादृशपुत्रप्रतिबन्धहेतुपापक्षयार्थमिति शेषः । अथ तामालभ्य स्पृष्ट्वा ' स्वस्ति गर्भ भद्रं तवास्तु ' इत्युक्त्वा स कश्यपस्तपसे ययावित्यन्वयः ॥७॥

रा० टी०–एवमिति । महातेजाः स कश्यपः एवमनेन प्रकारेण उक्त्वा तां दितिं संममार्ज पुत्रोत्पत्तिप्रतिबन्धकीभूतदुरितध्वंसार्थं मार्जनं चकारेत्यर्थः । संमार्जनानन्तरं पाणिना समालभ्य स्पृष्ट्वा स्वस्ति शुभं ते स्यादित्युक्त्वा तपसे ययौ एतेन कश्यपस्य सुशीलतातिशयः सूचितः । 'तामालभ्य' इति भाट्टपाठः ॥ ७ ॥

गो० टी०–एवमिति । ममार्जेत्याश्वासनप्रकारः ततः मार्जनानन्तरमुदरं समालभ्य स्वस्ति पुत्रोत्पत्तिरूपं शुभं भवत्विस्युक्त्वानुगृह्य स काश्यपस्तपसे ययौ ॥ ७

८] ति० टी०–कुशप्लवं विशालाख्यं पूर्वदेशस्थतपोवनम् ८

रा० टी०–गते इति । हे नरश्रेष्ठ ! तस्मिन् कश्यपे गते सति परमहर्षिता दितिः कुशप्लवनं विशालाभिधपूर्वदेशट्टत्तितपोवनमासाद्य प्राप्य सुदारुणं तपस्तेपे । ' कुशप्लवं समासाद्य ' इति भाट्टपाठः ॥ ८ ॥

गो० टी०–गत इति । कुशप्लवनं विशालायाः पूर्वस्थानम् ८

९] ति० टी०–गुणसंपदा शुश्रूषोपयोगिगुणसंपदा ॥९॥

रा० टी०–तप इति । हे नरश्रेष्ठ । तस्यां दितौ तप एव कुर्वत्यां सत्यां सहस्राक्षः इन्द्रः परया गुणसंपदा विनयादिसंपत्त्यैव परिचर्यां चकार । हिहशब्दौ एवार्थे ॥ ९ ॥

गो० टी०–तप इति । गुणसंपदा विनयादिसमृद्ध्या ॥९॥

१०] ति० टी०–तामेव गुणसंपदमाह–अग्निमित्यादि१०

रा० टी०–परिचर्यास्वरूपं वर्णयन्नाह–अग्निमिति द्वाभ्याम् । सहस्राक्षः अग्न्यादीन्यवेदयत् अन्यदपि यत्काङ्क्षितं तदपि न्यवेदयत् ॥ १० ॥

गो० टी०–अग्निमिति । परिचर्याप्रकारः ॥ १० ॥

११] ति० टी०–पुत्रत्वाद्गात्रसंवाहनादि सर्वेषु कालेषु तस्या अशुचित्वप्रतीक्षयेति भावः । ननु तद्धन्तृपुत्रप्रेप्सोर्दितेः कथं तत्परिचर्याङ्गीकार इति चेदेवमाययैवेति गृहाण ॥ ११ ॥

रा० टी०–गात्रेति । गात्रसंवाहनैः गात्ररक्षणप्रयत्नैः चक्षुरादिग्रहणैरित्यर्थः । तथा श्रमापनयनैः । श्रमनिवर्तकपादपीडनादिभिश्च सर्वेष्वपि कालेषु शक्रः दितिमेव परिचचार । ह प्रसिद्धमेतत् । एवोऽप्यर्थे ॥ ११ ॥

गो० टी०–गात्रेति । मातृत्वात् गात्रसंवहनानि श्रमापनयनैः व्यजनवीजनादिभिरिति शेषः ॥ ११ ॥

१२–१३] ति० टी०–दशोने दशभिर्न्यूने ॥ १२ ॥ ११ ॥

रा० टी०–पूर्णे इति । हे रघुनन्दन ! दशोने दशवर्षहीने वर्षसहस्रे पूर्णे सति परमसंहृष्टा दितिः अथ इदं सहस्राक्षमब्रवीत् । अथशब्द इत्यर्थे ॥ १२ ॥

१ भर्तारमिति गो. पाठः । २ समालभ्येति गो. समालम्ब्येति रा. पाठः । ३ कुशप्लवनमासाद्येति गो. रा. पाठः । ४ अथेति गो. पाठः ५ त्विति । गो. पाठः । ६ संप्रीतेति गो. पाठः । ७ रामायणशिरोमणिकृता गोविन्दराजेन च ' याचितेन ' इति पञ्चदशः श्लोकः ' तपश्चरन्त्या ' इति त्रयोदशात्राग्व्याख्यातः । तथापि तिलकानुरोधेनास्माभिरत्र व्याख्या परिवर्तिता ।

यमहं त्वत्कृते पुत्र तमाधास्ये जयोत्सुकम् । त्रैलोक्यविजयं पुत्र सह भोक्ष्यसि विज्वरः ॥ १४ ॥
याचितेन सुरश्रेष्ठ पित्रा तव महात्मना । वरो वर्षसहस्रान्ते मम दत्तः सुतं प्रति ॥ १५ ॥
इत्युक्त्वा च दितिस्तत्र प्राप्ते मध्यं दिनेश्वरे । निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः ॥ १६ ॥
दृष्ट्वा तामशुचिं शक्रः पादयोः कृतमूर्धजाम् । शिरःस्थाने कृतौ पादौ जहास च मुमोद च ॥ १७ ॥
तस्याः शरीरविवरं प्रविवेश पुरंदरः । गर्भं च सप्तधा राम चिच्छेद परमात्मवान् ॥ १८ ॥

गो० टी०–अथेति । दशोने दशवर्षोने ॥ १२ ॥

रा० टी०–**तप इति** । वीर्यवतां वर ! हे इन्द्र तपश्चरन्त्या मम दशवर्षाणि अवशिष्टानि ततः दशवर्षानन्तरं भ्रातरं द्रक्ष्यसे ते भद्रम् ॥ १४ ॥

गो० टी०–**तप इति** । ततः दशवर्षान्ते ॥ १४ ॥

१४–१५] **ति० टी०**–हे पुत्र ! यं पुत्रमहं त्वत्कृते त्वन्नाशार्थं याचितवती तं तव जयोत्सुकमाधास्ये विगतवैरं भ्रातृस्नेहवन्तमेव करिष्य इत्यन्वयः । त्रैलोक्यविजयं भ्रातृकृतम् । सह तेन भ्रात्रा सह ॥ १४ ॥ १५ ॥

रा० टी०–**यमिति** । हे पुत्र ! जयोत्सुकं स्वविजयाकाङ्क्षिणं त्रैलोक्यविजयं त्रैलोक्यविजयकर्तारं यं पुत्रं त्वत्कृते त्वन्नाशाय अहं समाधास्ये तेन पुत्रेण सह विज्वरः विगतसंतापस्त्वं भोक्ष्यसि पायिष्यसि एतेन दितेः कारुण्यं जातमिति सूचितम् । तेन वक्ष्यमाणाशुचित्वहेतुभूतानवधानता दितिज्ञानपूर्विकेति व्यक्तम् ॥ १५ ॥

गो० टी०–**तमिति** । समाधास्ये विगतवैरं भ्रातृस्नेहवन्तमेव करिष्यामीत्यर्थः । त्रैलोक्यविजयं त्वद्भ्रातृकृतमिति शेषः । अमोघभर्त्रनुग्रहेणाप्रतिबन्धसुतोत्पत्तिं मन्वाना ऋतुतया शुश्रूषाफलमुक्तवती ॥ १५ ॥

रा० टी०–**तद्वचनमेवाह–याचितेनेति** । हे सुरश्रेष्ठ ! याचितेन मया प्रार्थितेन महात्मना तव पित्रा वर्षसहस्रान्ते वर्षसहस्रतपश्चरणानन्तरकाले मम सुतं प्रति वरो दत्तः ॥ १३ ॥

गो० टी०–**याचितेनेति** । शुश्रूषाकृतप्रीत्यतिशयाद्वैरं विस्मृतवतीति भावः ॥ १३ ॥

१६] **ति० टी०**–दिनेश्वरे सूर्ये मध्यं प्राप्ते सति शय्यायां शीर्षस्थाने पादौ कृत्वा दितिर्निद्रयापहृता गृहीतेत्यर्थः । अनेन दिवास्वापरूपपापेन शय्यापादस्थाने मस्तककरणेन चाशुचित्वं सूचितम् । केचित्तु—उपविष्टाया एव प्रह्वतया पादपर्यन्तं शिरःसंबन्धेन शीर्षे पादसंबन्धः तेन ब्राह्मणस्य शूद्रस्पर्श इव शिरसः पादस्पर्शेऽशुचित्वं सूचितम् । तपसि स्थितायाः शय्यासंबन्धाभावेन पूर्वव्याख्याया अयुक्तत्वादित्याहुः । परे तु भूशयनेऽपि दक्षिणपूर्वदिशोः शिरःस्थापनयोग्यतायाः स्मृतिपृक्तेस्तद्वैपरीत्येन शयनस्याशुचित्वसूचकत्वमस्त्येवेत्याहुः ॥ १६ ॥

रा० टी०–**एवमिति** । तत्र तस्मिन्संवादे दिवाकरे मध्यं प्राप्ते सति देवी दितिः एवमनेन प्रकारेण उक्त्वा पादौ शीर्षतः शिरस्थापनोचितदेशे दक्षिणे पूर्वे वा कृत्वा निद्रया अपहृता अपहृतबुद्धिरासीदिति शेषः । अथशब्देन पादयोर्मूर्धजांश्च कृत्वेत्यर्थः । तेन पादयोः पूर्वदक्षिणस्थापनं मूर्धजानां पादस्पर्शनं चेत्येतद्वयमपि अशुचिहेतुभूतं संजातमिति फलितम् ॥ १६ ॥

गो० टी०–**एवमिति** । मध्यं गगनमध्यं शीर्षतः शिरसि पादौ कृत्वा स्थितेति शेषः । मध्याह्नशयनपरिग्रहप्रसङ्गाभावेनासन एवोपविशन्त्यास्तस्या निद्रापारवश्येन नम्रं शिरः पादयोः संसक्तमभवदित्यर्थः ॥ १६ ॥

१७] **ति० टी०**–पादयोस्तत्स्थापनदेशे कृतमूर्धजाम् मूर्धजसंबन्धे मूर्धसंबन्धोऽपि जात एव, अत एवाशुचिम् । तथा शिरःस्थाने तया पादौ कृतावतस्तामशुचिं दृष्ट्वेत्यर्थः । अत्रैकैनैवोभयलाभ उभयोपादानं स्पष्टार्थम् । वस्तुतो वक्रग्रीवतया वक्रपादतया वा शयने परस्परस्थानव्यत्ययाभावेन तथा अशुचित्वमित्यत्यन्ताशुचित्वप्रतिपादनायोभयोपादानमिति बोध्यम् । मुमोद प्राप्तच्छिद्रत्वादिति भावः । मोदवशादेव जहास च ॥ १७ ॥

रा० टी०–**दृष्ट्वेति** । यया शिरःस्थाने पादौ कृतौ तां पादयोः कृतमूर्धजामत एव अशुचिं तां दितिं शक्रो दृष्ट्वा जहास मुमोद च । जहासेत्यनेन एतावन्तं श्रमं कृत्वापि सह भोक्ष्यसि विज्वर इति आशीर्वादो मात्रा दत्त इति स्मृतिर्व्यञ्जिता । एकश्चकार एवार्थकः । पादयोः मूर्धजस्पर्शस्य पूर्वदक्षिणयोः पादस्थापनस्य चाशुचिकारणत्वं धर्मशास्त्रादौ प्रसिद्धम् ॥ १७ ॥

गो० टी०–**दृष्टेति** । पादतः कृतमूर्द्धजां पादौ कृत्वाथ शीर्षत इत्यस्य विवरणमत एव अशुचिं तां दृष्ट्वा शिरःस्थाने कृतौ पादौ शिरःस्पृष्टौ पादाविति मुमोद तेन जहास च यद्वा प्राप्ते मध्यं दिवाकर इत्यनेन दिवास्वापरूपपापौचं दर्शितं शीर्षतः शिरःस्थाने शिरःस्थान इत्यनुवादात् । पादतः पादस्थाने शयनपरिग्रहाभावेऽपि कृष्णाजिनाद्यास्तरणे पादस्थाने शिरः शिरःस्थाने च पादौ कृत्वा सुप्तवतीत्यर्थः । पादोपधाने शीर्षं शीर्षोपधाने पादौ च कृत्वेत्यर्थः । रन्ध्रान्वेषणफलं जातमिति मोदः वृथागर्वितेयमिति हासः ॥ १७ ॥

१८] **ति० टी०**–शरीरविवरं योनिविवरम् । आत्मवान्सावधानः ॥ १८ ॥

रा० टी०–**तस्या इति** । हे राम ! परमात्मवानतिप्रयत्नशीलः पुरन्दरस्तस्या दितेः शरीरविवरं योनिप्रदेशं प्रविवेश गर्भं च सप्तधा विभेद अनेकधाभवनानुकूलव्यापारं चकार १८

१ तमिति गो. पाठः । २ एवमुक्त्वा दितिः (तत्र) शक्रे प्राप्ते मध्यं दिवाकरे इति गो. रा. पाठः । ३ पादत इति गो. पाठः । ४ बिभेदेति गो. रा. पाठः ।

36955

भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा । रुरोद सुस्वरं राम ततो दितिरबुध्यत ॥ १९ ॥
मा रुदो मा रुदश्चेति गर्भं शक्रोऽभ्यभाषत । बिभेद च महातेजा रुदन्तमपि वासवः ॥ २० ॥
न हन्तव्यं न हन्तव्यमित्येव दितिरब्रवीत् । निष्पपात ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥
प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत । अशुचिर्देवि सुप्तासि पादयोः कृतमूर्धजा ॥ २२ ॥
तदन्तरमहं लब्ध्वा शक्रहन्तारमाहवे । अभिन्दं सप्तधा देवि तन्मे त्वं क्षन्तुमर्हसि ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।

दितिवचनादिन्द्रेण सप्तगर्भखण्डानां वायुस्कन्धसप्तकपालकत्वकल्पनम्, इत्युपोद्घातपूर्वमस्मिन्नेव दितितपश्चरणदेशे इक्ष्वाकुसूनुविशालो नाम विशालां पुरी निर्ममे तद्वंश्य एवायमद्यतनः सुमतिरिति सुमतेः प्रशसनम्, सुमतिना सादरमुपगम्य विश्वामित्रपूजनं च ।

सप्तधा तु कृते गर्भे दितिः परमदुःखिता । सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत् ॥ १ ॥
ममापराधाद्गर्भोऽयं सप्तधा शकलीकृतः । नापराधो हि देवेश तवात्र बलसूदन ॥ २ ॥

गो० टी०–तस्या इति । शरीरविवरं योनिविवरम् आत्मवान् धैर्यवान् ॥ १८ ॥

१९–२०] **ति० टी०**–शतपर्वणा शतकोटिना । अबुध्यत भिद्यमानगर्भस्य रोदनशब्देनेत्यर्थः ॥ १९ ॥ २० ॥

रा० टी०–भिद्यमान इति । हे राम ! ततः इन्द्रकृतभेदानुकूलव्यापारानन्तरं शतपर्वणा शतकोटियुक्तेन वज्रेण भिद्यमानः गर्भः सुस्वरं यथा स्यात्तथा रुरोद ततस्तस्मात् रोदनात् दितिः अबुद्धयत ॥ १९ ॥

गो० टी०–भिद्यमान इति । शतपर्वणा शतकोटिना॥१९॥

रा० टी०–मेति । शक्रः मा रुदो मा रुद इति गर्भं पुनः पुनर्व्यभाषत महातेजा वासवः रुदन्तमपि गर्भं बिभेदैव । एकश्चकारः पुनःपुनरर्थकः ॥ २० ॥

गो० टी०–मा रुद इति । रुदिर् अश्रुविमोचन इत्यस्माल्लुङ् माङ्योगादडभावः ॥ २० ॥

२१–२२] **ति० टी०**–न हन्तव्यमिति विभागेऽपि प्राणवियोजनं मा कुर्वित्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०–नेति । न हन्तव्यः न हन्तव्यः इत्येव वचनं दितिः अब्रवीत् ततः दितिवचनश्रवणानन्तरं मातुः वचनगौरवाद्धेतोः शक्रः निष्पपात दितेः उदरात् निःससार ॥ २१ ॥

गो० टी०–न हन्तव्य इति । न हन्तव्यः भेदने कृतेऽपि प्राणवियोजनं मा कुर्वित्यर्थः ॥ २१ ॥

रा० टी०–प्राञ्जलिरिति । प्राञ्जलिः प्रणयसूचकबद्धयुगलकरः शक्रः दितिमभ्यभाषत । अभिभाषणमेवाह–हे देवि ! पादयोः कृतमूर्धजा अत एव अशुचिस्त्वं सुप्तासि तदन्तरं छिद्रं लब्ध्वा आहवे संग्रामे शक्रहन्तारं त्वद्गर्भमहं सप्तधा अभिदं तन्मे अपराधं क्षन्तुमर्हसि ॥ २२ ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०–प्राञ्जलिरिति ॥ २२

२३] **ति० टी०**–तदन्तरं छिद्रम् । आहवे शक्रस्य मम हन्तारमङ्कुरच्छेदनन्यायेनाभिन्दम् । तन्मेऽपराधकर्म त्वं क्षन्तुमर्हसि पूर्ववतनीं सेवां स्मृत्वेति शेषः ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०–तदिति । अन्तरमवकाशम् । क्षन्तुमर्हसि स्वहिंसापरां गामपि हिंस्यादितिन्यायेन युक्तत्वादिति भावः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

१] **ति० टी०**–सप्तधा त्विति । दुराधर्षं न्यायोपायेन जेतुत्वादित्याशयः ॥ १ ॥

रा० टी०–दितेर्वचनमाह–सप्तधेति । गर्भे सप्तधा कृते सति एव परमदुःखिता अत एव सानुनया विनम्रतःसहिता दितिः दुराधर्षं जेतुमशक्यं सहस्राक्षं वाक्यमब्रवीत् । तुशब्द एवार्थे ॥ १ ॥

गो० टी०–सप्तधेत्यादि । दुराधर्षं दुर्जयम् ॥ १ ॥

२] **ति० टी०**–ममापराधादशुचित्वरूपात् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–ममेति । हे देवेश ! हे बलसूदन ! ममापराधात् मत्कृतविरुद्धशयनादिजन्यदोषात् अयं गर्भः सप्तधा विफलीकृतः शकलतां प्रापितः अतः अत्र गर्भविफलीकरणे तवापराधो नास्ति ॥ २ ॥

गो० टी०–ममेति । अपराधात्प्रमादात् विफलीकृतः शकलीकृतः ॥ २ ॥

१ हन्तव्य इति गो. रा. पाठः । २ अभिदमिति गो. रा. पाठः ।३ विफलीकृत इति गो. रा. पाठः ।

प्रियं त्वत्कृतमिच्छामि मम गर्भविपर्यये । मरुतां सप्त सप्तानां स्थानपाला भवन्तु ते ॥ ३ ॥
वातस्कन्धा इमे सप्त चरन्तु दिवि पुत्रक । मारुता इति विख्याता दिव्यरूपा ममात्मजाः ॥ ४ ॥
ब्रह्मलोकं चरत्वेक इन्द्रलोकं तथापरः । दिव्यवायुरिति ख्यातस्तृतीयोऽपि महायशाः ॥ ५ ॥
चत्वारस्तु सुरश्रेष्ठ दिशो वै तव शासनात् । संचरिष्यन्ति भद्रं ते कौलेन हि ममात्मजाः ॥ ६ ॥
त्वत्कृतेनैव नाम्ना वै मारुता इति विश्रुताः । तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरंदरः ॥ ७ ॥
उवाच प्राञ्जलिर्वाक्यमिदं बलसूदनः । सर्वमेतद्यथोक्तं ते भविष्यति न संशयः ॥ ८ ॥

३] ति० टी०–गर्भविपर्यये गर्भविपत्तौ यत्त्वया कृतं कर्म तत्तव च मम च यथा प्रियं भवति तथेच्छामि । तत्प्रकारमाह–मरुतामिति । सप्तानां मरुतां वा तत्स्थानविशेषाणां सप्त इमे ते त्वदधीनाः स्थानपाला लोकरक्षिणो भवन्त्वित्यन्वयः ॥ ३ ॥

रा० टी०–प्रियमिति । मम गर्भविपर्यये गर्भच्छेदे सत्यपि कृत्तं छिन्नं गर्भं प्रियमावयोः प्रियकर्तारमिच्छामि किंच कृतं त्वत्कर्तृकछेदनं प्रियमेतत्कर्तृकप्रीतिविषयीभूतं यथा स्यात्तथा इच्छामि । प्रियकरणोपायमाह–सप्तसप्तानामेकोनपञ्चाशत्संख्यानां महतां देवान्तर्गतवायुविशेषाणां स्थानपालाः स्थानस्वामिनः इमे भवन्तु । स्थानपाला भवन्त्वित्यनेन पूर्वमरुतां देवासुरसंग्रामे प्रलयो जात इति ध्वनितम् । तेन ते एव दितिगर्भेऽवतीर्णा इति व्यञ्जितम् । तुशब्दोऽप्यर्थे । प्रियमित्यत्र प्रीधातोः इगुपधेति कर्तरि कः । कृतमित्यत्र छेदनार्थककृतीधातोः कर्मणि कः । द्वितीयपक्षे कृतमिति भावकान्तं प्रियमिति कर्मकान्तम् ॥ ३ ॥

गो० टी०–प्रियं त्विति । गर्भविपर्यये उपहतगर्भविपये प्रियं श्रेय कर्तुमिच्छामि । तदेव श्रेयः आह–मरुतामिति । सप्तानां मरुतां वातस्कन्धानामिमे सप्त भागाः स्थानपालाः लोकपालाः भवन्तु । सप्तमरुतश्चोक्ताः–'गगनस्पर्शनो वायुरनिलश्च तथापरः । प्राणः प्राणेश्वरो जीव इत्येते सप्त मारुताः ' इति । विष्णुपुराणे तु–'आवहप्रवहसंवहोद्वहविवहपरिवहपरावहाः सप्त मारुताः ' इत्युक्तम् ॥ ३ ॥

४] ति० टी०–तदर्थमेव हे पुत्रक ! मारुता इति नाम्ना प्रसिद्धा दिव्यरूपा मम पुत्रा य इमे वातस्कन्धा इति सप्त प्रसिद्धास्तेषु चरन्त्वित्यन्वयः ॥ ४ ॥

रा० टी०–वातेति । हे पुत्रक ! मारुता इति विख्याताः दिव्यरूपा देवतारूपं प्राप्ताः वातस्कन्धा वातभेदाः सप्तसप्तावयवकसप्तगणाः इमे ममात्मजा दिवि पृथिव्या ऊर्ध्वं किंच दिवि व्यवहारसिद्ध्यर्थं चरन्तु विहरन्तु । चरमपक्षे दिवधातोर्विच् वलोपाभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ ४ ॥

गो० टी०–वातेति । वातस्कन्धाः वातस्कन्धाभिमानिदेवताः मरुदभिमानिदेवतात्वान्मारुता इति विख्याताः त्वत्कृतेन मा रुद इत्युच्चारणेन मारुता इति विख्याताः पृषोदरादित्वाद्वर्णव्यत्यय इत्याहुः ॥ ४ ॥

५] ति० टी०–एक इति । एको गण इत्यर्थः । प्रथमं सप्तधा विभज्य पुनरेकशः सप्तधा करणमित्यस्यार्थस्य पुराणान्तरे स्पष्टमुक्तत्वात्, इहापि विभेद च महातेजा रुदन्तमपि इत्यादिना ध्वनितत्वाच्चेति बोध्यम् । एवमपर इत्यार्थपि व्याख्येयम् । इन्द्रलोकमिति । 'रुद्रलोकम्' इति प्रचुरः पाठः । दिव्यवायुः दिव्यन्तरिक्षे भव इत्यर्थः ॥ ५ ॥

रा० टी०–सप्तानां गणानां स्थानविशेषं निर्दिशन्नाह–ब्रह्मेत्यादिश्लोकद्वयेन । एकः विभक्तगणान्तर्गतसप्तावयवकः प्रथमो गणः ब्रह्मलोकं चरतु अपरो द्वितीयो गणः इन्द्रलोकं तथा चरतु महायशा दिव्यवायुरिति ख्यातस्तृतीयोऽपि गण इन्द्रलोकं चरतु ॥ ५ ॥

गो० टी०–सप्त मरुतः कुत्र वर्तन्ते तेषां स्थानपालनं च कथमित्यत्राह–ब्रह्मेति । दिवि अन्तरिक्षे विष्णुपदाख्ये विष्णुलोके चरत्वित्यनुषङ्गः ॥ ५ ॥

६] ति० टी०–दिशः पूर्वादिमहादिशः ॥ ६ ॥

रा० टी०–चत्वार इति । हे सुरश्रेष्ठ ! देवरूपा एव ममात्मजाः चत्वारः चतुर्थपञ्चमषष्ठसप्तमगणास्तु त्वत्कृतेन तव कृतं मा रुदः मा रुद इति *प्रयन्तो बोधकत्वेन यस्मिन् तेन मारुता इति नाम्नैव विश्रुताः ख्याताः सन्तः तव शासनादेव दिशः पूर्वादिक्रमेण चतस्रः ककुभः संचरिष्यन्ति ते भद्रमस्तु । वैशब्द एवार्थे सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०–चत्वार इति । सार्धश्लोकः ॥ ६ ॥

७] ति० टी०–त्वत्कृतेन मा रुदो मा रुद इति वचनमूलेन ॥ ७ ॥

रा० टी०–तस्या इति । तस्याः दितेस्तद्वचनं श्रुत्वा बलनिषूदनः प्राञ्जलिः प्रणयसूचकबद्धयुगलकरः सहस्राक्षः पुरंदरः दितिं वाक्यमुवाच । द्विकर्मकोऽयम् ॥ ७ ॥

गो० टी०–तस्या इति । दितिगर्भखण्डनेन सहस्राक्षत्वादीनि सिद्धानीति भावः ॥ ७ ॥

८] ति० टी०–यथोक्तं ब्रह्मादिस्थानपालकत्वम् ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–सर्वमिति । एतत्सर्वं यथा

१ तु कर्तुमिति गो. रा. पाठः । २ भवन्त्विमे इति गो. रा. पाठः । ३ पुत्रका इति रा. पाठः । ४ देवभूता इति गो. देवरूपा इति रा. पाठः । ५ दितिं बलनिषूदन इति गो. रा. पाठः । * प्रयन्तो इति भाति ।

विचरिष्यन्ति भद्रं ते देवरूपास्तवात्मजाः । एवं तौ निश्चयं कृत्वा मातापुत्रौ तपोवने ॥ ९ ॥
जग्मतुस्त्रिदिवं राम कृतार्थाविति नः श्रुतम् । एष देशः स काकुत्स्थ महेन्द्राध्युषितः पुरा ॥ १० ॥
दितिं यत्र तपःसिद्धामेवं परिचचार सः । इक्ष्वाकोस्तु नरव्याघ्र पुत्रः परमधार्मिकः ॥ ११ ॥
अलम्बुषायामुत्पन्नो विशाल इति विश्रुतः । तेन चासीदिह स्थाने विशालेति पुरी कृता ॥ १२ ॥
विशालस्य सुतो राम हेमचन्द्रो महाबलः । सुचन्द्र इति विख्यातो हेमचन्द्रादनन्तरः ॥ १३ ॥
सुचन्द्रतनयो राम धूम्राश्व इति विश्रुतः । धूम्राश्वतनयश्चापि सृञ्जयः समपद्यत ॥ १४ ॥
सृञ्जयस्य सुतः श्रीमान्सहदेवः प्रतापवान् । कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः ॥ १५ ॥
कुशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् । सोमदत्तस्य पुत्रस्तु काकुत्स्थ इति विश्रुतः ॥ १६ ॥
तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमाम् । आवसत्परमप्रख्यः सुमतिर्नाम दुर्जयः ॥ १७ ॥
इक्ष्वाकोस्तु प्रसादेन सर्वे वैशालिका नृपाः । दीर्घायुषो महात्मानो वीर्यवन्तः सुधार्मिकाः ॥ १८ ॥

येन प्रकारेण ते उक्तं तथा भविष्यति संशयः अस्मिन् विषये संदेहो न। तदेव स्पष्टमाह–देवरूपाः तवात्मजा विचरिष्यन्ति॥८॥

गो० टी०–सर्वमिति । यथोक्तमित्यस्य विवरणं विचरिष्यन्तीति ॥ ८ ॥

९] ति० टी०–मातापुत्रौ दितीन्द्रौ ॥ ९ ॥

रा० टी०–एवमिति । हे राम ! कृतार्थौ साधितप्रयोजनौ तौ मातापुत्रौ दितीन्द्रौ तपोवने एवं वर्णितप्रकारेण निश्चयं कृत्वा त्रिदिवं जग्मतुः इति नः श्रुतम् ॥ ९ ॥

गो० टी०–एवमिति । नः अस्माभिरित्यर्थः "कस्य च वर्तमाने " इति षष्ठी ॥ ९ ॥

१०] ति० टी०–वर्णितेन्द्रचरितस्य प्रकृतशेषत्वमाह–एष इति । स एष इत्यन्वयः ॥ १० ॥

रा० टी०–प्रथमप्रश्नोत्तरमुपसंहरन्नाह–एष इति । काकुत्स्थ हे राम ! एष देशः पुरैव महेन्द्राध्युषितः यत्र यस्मिन्देशे तपःसिद्धां दितिं स इन्द्रः एवं वर्णितप्रकारेण परिचचार । तुशब्द एवार्थे ॥ १० ॥

गो० टी०–प्रकृतमुपसंहरति–एष इति । स एष इत्यन्वयः । सः इन्द्रः ॥ १० ॥

११] ति० टी०–एवं प्रागुक्तरीत्या । एवंभूते देशे । विशालोत्पत्तिप्रकारमाह–इक्ष्वाकोस्त्विति ॥ ११ ॥

रा० टी०–अथ कतरो राजवंश इति द्वितीयप्रश्नोत्तरं वर्णयन्नाह–इक्ष्वाकोरित्यादिभिः । हे नरव्याघ्र ! अलम्बुसायामलम्बुसानामभार्यायामेव उत्पन्नः विशाल इति नाम्ना विश्रुतः ख्यातः परमधार्मिकः इक्ष्वाकोः पुत्र आसीदिति शेषः । तुशब्द एवार्थे ॥ ११ ॥

गो० टी०–अथ कतरो राजवंश इति द्वितीयप्रश्नस्योत्तरमाह–इक्ष्वाकोरित्यादिना ॥ ११ ॥

१२] ति० टी०–विशालेति कृता आसीदित्यन्वयः ॥१२॥

रा० टी०–तेनेति । तेन विशालेन कृता निर्मिता विशालेति पुरी इह स्थाने एव आसीत् । चशब्द एवार्थे । हे राम ! महाबलः हेमचन्द्रः हेमचन्द्रनामा विशालस्य सुत आसीत् ॥१२॥

गो० टी०–तेनेति ॥ १२ ॥

१३–१६] ति० टी०–कतरोऽत्र वंश इति प्रश्नस्योत्तरमाह–विशालस्येत्यादि ॥ १३—१६ ॥

रा० टी०–सुचन्द्र इति । हेमचन्द्रादनन्तरः हेमचन्द्रौत्तरकालिकः सुचन्द्र इति विख्यात आसीदिति शेषः । हे राम ! धूम्राश्व इति विश्रुतः सुचन्द्रतनयः आसीत् ॥ १३ ॥

गो० टी०–सुचन्द्र इति ॥ १३ ॥

रा० टी०–धूम्रेति । सृञ्जयनामा धूम्राश्वतनयश्च समपद्यत श्रीमान् प्रतापवान् सहदेवः सृञ्जयस्यापि सुतः समपद्यत ॥१४॥

गो० टी०–धूम्रेति । सृञ्जयः समपद्यत सृञ्जयनामाऽऽसीत्१४

रा० टी०–कुशाश्व इति । परमधार्मिकः कुशाश्वः कुशाश्वनामा सहदेवस्य पुत्रः आसीत् महातेजाः प्रतापवान् सोमदत्तः सोमदत्तनामा कुशाश्वस्य पुत्रः आसीत् ॥ १५ ॥

गो० टी०–कुशाश्व इति ॥ १५ ॥

१७] ति० टी०–इमां पुरी संप्रत्यावसदित्यन्वयः ॥ १७ ॥

रा० टी०–सोमदत्तस्येति । सोमदत्तस्य पुत्रस्तु काकुत्स्थ इति नाम्ना विश्रुतः आसीत् । अर्धं पृथक् । महातेजाः अमरप्रख्यः अमरसदृशः दुर्जयः जेतुमशक्यः सुमतिर्नाम सुमतिनामा तस्य काकुत्स्थस्य एषः पुत्रः संप्रति इमां विशालां पुरीमावसति ॥ १६ ॥

गो० टी०–सोमदत्तस्येति । अर्धमेकम् ॥ १६ ॥

गो० टी०–तस्येति । " उपान्वध्याङ्वसः " इत्याधारस्य कर्मत्वम् ॥ १७ ॥

१८] ति० टी०–वैशालिका विशालायां निवासो येषां त इत्यर्थः । अनेन त्वत्समानवंश्योऽयमिति सूचितम् ॥ १८ ॥

रा० टी०–एतावद्बृहत्कालपर्यन्तं एतैः एव कथं भुक्तेति शङ्कां परिहरन्नाह–इक्ष्वाकोरिति । इक्ष्वाकोः प्रसादेनैव दीर्घा-

१ त्रिति रा. पाठः । २ बुसायामिति गो. रा. पाठः । ३ आवसत्यमरप्रख्य इति गो. रा. पाठः ।

इहाद्य रजनीमेकां सुखं स्वप्स्यामहे वयम् । श्वः प्रभाते नरश्रेष्ठ जनकं द्रष्टुमर्हसि ॥ १९ ॥
सुमतिस्तु महातेजा विश्वामित्रमुपागतम् । श्रुत्वा नरवरश्रेष्ठः प्रत्युद्गच्छन्महायशाः ॥ २० ॥
पूजां च परमां कृत्वा सोपाध्यायः सबान्धवः । प्राञ्जलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत् ॥ २१ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे विषयं मुनेः । संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मम ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ।

सुमतिकृतसत्कारं स्वीकृत्य तस्मै रामलक्ष्मणवृत्तनिवेदनपूर्वकं विश्वामित्रस्य तत्र निवासः, रामादिभिः सहापरेऽह्नि गौतमाश्रमं प्रति गमनम्, तत्राहल्यावृत्तं निवेद्येन्द्राहल्ययोर्गौतमशापप्राप्तिकथनम् ।

पृष्ट्वा तु कुशलं तत्र परस्परसमागमे । कथान्ते सुमतिर्वाक्यं व्याजहार महामुनिम् ॥ १ ॥
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ । गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ २ ॥

युषः महात्मानः अतिप्रयत्नवन्तः वीर्यवन्तः अतिपराक्रमविशिष्टाः सुधार्मिकाः वैशालिकाः विशाला निवासो येषां ते कुमुदादित्वाट्ठक् सर्वे नृपाः आसन्निति शेषः । तुशब्द एवार्थे ॥ १७ ॥

गो० टी०–कथं कतिपयैरेव पुरुषैरिदानीमिक्ष्वाकुवंश इत्याह–इक्ष्वाकोरिति । विशाला निवास एषां ते वैशालिकाः कुमुदादित्वात् ठक् । विशालप्रार्थनमिक्ष्वाकुप्रसादनिमित्तम् १८॥

१९–२१] ति० टी०–अत एवाह–इहाद्येति ॥१९–२१॥

रा० टी०–इहेति । हे राम हे नरश्रेष्ठ ! अद्य रजनीं वयमिह सुखं वत्स्यामहे श्वः आगामिनि प्रभाते जनकं द्रष्टुमर्हसि ॥१८॥

गो० टी०–इहेति । वत्स्यामहे आर्षमात्मनेपदम् ॥ १९ ॥

रा० टी०–सुमतिरिति । नरश्रेष्ठः महातेजाः महायशाः सुमतिः उपगतं विश्वामित्रं श्रुत्वैव प्रत्यागच्छत् । तुशब्द एवार्थे१९॥

गो० टी०–सुमतिरिति । प्रत्युद्गच्छत्प्रत्युदगच्छत् ॥२०॥

रा० टी०–पूजामिति । अथ प्रत्यागमनानन्तरं सोपाध्यायः सबान्धवः प्राञ्जलिः प्रणयसूचकबद्धयुगलकरः सुमतिः परमां पूजां कृत्वा कुशलं च पृष्ट्वा अब्रवीत् ॥ २० ॥

गो० टी०–पूजां चेति ॥ २१ ॥

२२] ति० टी०–मम मत्त इत्यर्थः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०–तद्वचनमेवाह–धन्येति । यस्य मे विषयं देशं गतः भवान्प्राप्तः सः अहं धन्यः अस्मि अनुगृहीतश्चास्मि यतः दर्शनं संप्राप्तोऽस्मि अतः मम मत्तः धन्यतरः अन्यो नास्त्येव । अन्य इत्यध्याहृतम् मम इति पञ्चम्यर्थे षष्ठी ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

गो० टी०–धन्य इति । विषयं स्थानं दर्शनं च प्राप्त इत्यनुषङ्गः । मया सदृश इति शेषः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१] ति० टी०–पृष्ट्वेति । सुमतिर्नाम *विशालाराजा महामुनिं विश्वामित्रम् कथान्ते मिश्वामित्रेण कथ्यमानकथान्ते ॥ १ ॥

रा० टी०–कुशलप्रश्नानन्तरकालिकं वृत्तमाह–पृष्ट्वेति । तत्र विशालायां कुशलं पृष्ट्वा परस्परसमागमे याः कथा उक्तिप्रत्युक्तयस्तासामन्ते अवसाने एव सुमतिः विशालाधिपतिः महामुनिं विश्वामित्रं वाक्यं व्याजहार । तुशब्द एवार्थे ॥ १ ॥

गो० टी०–अथ रामस्य परमपावनत्वं दर्शयत्यष्टचत्वारिंशेपृष्ट्वा त्वित्यादि । परस्परेत्यविभक्तिकनिर्देशः परस्परं कुशलं पृष्ट्वा कथान्ते तदुत्तरान्ते इति योजना ॥ १ ॥

२] ति० टी०–गजसिंहगती गजवद्धीरमन्दगती सिंहवदप्रतिहतगती । यद्वा प्रभुत्वाद्गजगती रामोऽन्यगतिर्लक्ष्मणः तथा शार्दूलाकृती रामो वृषभाकृतिर्लक्ष्मणः ॥ २ ॥

रा० टी०–तद्व्याहरणमेवाह–इमावित्यादिपञ्चभिः श्लोकैः । हे मुने ! देवतुल्यपराक्रमौ देवतुल्यपराक्रमवत्तया लक्ष्यमाणौ किंच देवौ क्रीडाशीलौ तुल्यपराक्रमौ परस्परं सदृशपराक्रमवत्तया प्रतीयमानौ तावेव तावितिं कर्मधारयः गजसिंहगती गजसिंहनिष्ठमन्दाप्रतिहतगमनसदृशगमनदत्तया प्रतीयमानौ शार्दूलवृषभोपमौ शार्दूलवृषभनिष्ठदुर्धर्षत्वोन्नतस्कन्धत्वसदृशदुर्धर्षत्वोन्नतस्कन्धत्ववत्तया प्रतीयमानौ ॥ २ ॥

गो० टी०–इमावित्यादिपञ्चश्लोकी । इमौ कुमारौ कोऽयं कुमारभाव इति विस्मयते । दृष्टिदोषो मा भूदित्याह–भद्रं ते

---

१ रामेति गो. रा. पाठः । २ वत्स्यामह इति गो. रा. पाठः । ३ प्रत्युद्गच्छदिति गो. पाठः । ४ मुनिरिति गो. गत इति रा. पाठः । ५ मयेति रा. पाठः । * राज इति युक्तं भाति ।

पद्मपत्रविशालाक्षौ खड्गतूणधनुर्धरौ । अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ ३ ॥
यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ । कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ ४ ॥
भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरम् । परस्परेण सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ ५ ॥
किमर्थं च नरश्रेष्ठौ संप्राप्तौ दुर्गमे पथि । वरायुधधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा यथावृत्तं न्यवेदयत् । [सिद्धाश्रमनिवासं च राक्षसानां वधं यथा]
विश्वामित्रवचः श्रुत्वा राजा परमविस्मितः ॥ ॥ ७ ॥

इति । देवतुल्यपराक्रमौ संस्थानविशेषदर्शनेन नूनमेतौ विष्णुतुल्यपराक्रमाविति मन्यामहे । गजसिंहगती वीरौ शार्दूलवृषभोपमौ । चतुर्गतित्वमुच्यते गाम्भीर्यगमने गजतुल्यौ पराभिभवनार्हगमने सिंहतुल्यौ भयंकरगमने शार्दूलतुल्यौ समौ सगर्वगमने वृषभसदृशाविति यावत् । विशेषेण रावयतः शत्रूनिति वीरौ अनुभवितॄणां विरोधिनिवर्तकाविति यावत् । पद्मपत्रविशालाक्षौ द्रष्टॄणामाकर्षकावयवविशेषौ नयनसौन्दर्यं हि लावण्यपरमकाष्ठा । खड्गतूणीधनुर्धराविति आभरणकोटौ आयुधकोटौ च एषामन्तर्भावः । अश्विनाविव रूपेण रूपवत्सु अश्विनौ प्रसिद्धौ रूपेणासाधारणधर्मेण ताविव स्थितौ समुपस्थितयौवनौ रूपानुरूपं प्रादुर्भवद्यौवनौ यदृच्छयैव भाग्यवशादेव देवलोकाद्गां भुवं प्राप्तौ अमरौ कौचिद्देवविशेषाविव स्थितौ तेजसा देवकुमारतुल्याविति यावत्। एततेजोविशेषविलोकनेनैनौ मर्त्यावपि अमर्त्याविति प्रतिभातीति भावः । कथं पद्भ्यां इह प्राप्तौ अतीवकोमलाभ्यां पद्भ्यामिह दुर्गमे पथि कथं प्राप्ताविति यावत् । दरं परिस्पृशति किमर्थं एतद्रूपदर्शनेनैवाप्तसमस्तकामाविति निश्चिनुमः कस्य वा पुत्राविति यावत् । यद्वा कस्य पुरुषस्य कृतमप्रयोजनाय इह प्राप्ताविति यावत् । मुने सर्वज्ञो भवान् इममर्थं जानात्येवेति यावत् । चन्द्रसूर्यावम्बरमिव इमं देशं भूषयन्तौ शैत्यप्रतापाभ्यामुभावपि चन्द्रसूर्यतुल्यौ अयं लोको विष्णुपदमासीदिति भावः । भूषयन्तौ निजतेजसेति भावः । प्रमाणं शरीरौन्नत्यादि इङ्गितमन्तर्गतभावसूचकस्मितादि चेष्टितं गमनभाषणविलोकनादि एतैः परस्परसदृशौ तुल्यपुरुषान्तराभावात् । नरश्रेष्ठावपि दुर्गमे पथि किमर्थं संप्राप्तौ पूर्वं पद्भ्यां कथं प्राप्ताविति यावत्किं संप्रति दुर्गमं वनं किमर्थं प्राप्ताविति यावत्उच्यते वरायुधधरौ आयुधश्रेष्ठधनुरादिधरौ पूर्वमाभरणान्वयेन खड्गादिकमुक्तमिदानीं तान्येवायुधतयोच्यन्ते यद्वा पूर्वोक्तानां वरायुधत्वमुच्यते । वीरौ वीर्ययुक्तौ पूर्वं वीरशब्दोऽन्यथा व्याख्यातः । श्रोतुमिच्छामि तत्त्वतः यद्यपि राजपुत्रौ कस्यचिद्विघ्नस्य शान्तये आगताविति सामान्यतो जानामि तथापि विशेषतो ज्ञातुमिच्छामीत्यर्थः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

३] ति० टी०–पद्मपत्रविशालाक्षावित्यनेन भाग्यसंपत्सूचिता । वीरधर्मसूचकं खड्गेत्यादि ॥ ३ ॥

रा० टी०–पद्मपत्रविशालाक्षौ पद्मपत्रवद्विशाले अक्षिणी ययोस्तौ खड्गतूणीधनुर्धरौ खड्गतूणीधनंषि धरतस्तौ कर्मणः शेषत्वविवक्षया कर्मण्यणितिशास्त्राविषयतया गदाधरवत् पचाद्यच् रूपेण अश्विनाविव अश्विनिष्ठरूपप्रतियोगिकसादृश्यविशिष्टरूपवत्तया प्रतीयमानाविति यावत् । समुपस्थितयौवनौ संप्राप्तयौवनावस्थाकौ ॥ ३ ॥

४] ति० टी०–यदृच्छया दैववशसंपन्ननिमित्तविशेषेण यया कयाचित्स्वेच्छयेत्यर्थो वा । देवलोकाद्गां भुवं प्राप्तावतीर्णौ अमरौ इव स्थितौ । किमर्थं किं वा प्रयोजनमुद्दिश्य । कथमतिसुकुमारचरणत्वात्केन प्रकारेण पद्भ्यामिह प्राप्तौ कस्य वा सुताविति शेषः ॥ ४ ॥

रा० टी०–यदृच्छया स्वेच्छयैव देवलोकात्संप्राप्तौ अमरौ इव देवलोकात् यदृच्छासंप्राप्तामरप्रतियोगिकसादृश्यविशिष्टौ इमौ वीरौ कुमारौ इह पद्भ्यां कथं प्राप्तौ किमर्थं कमर्थमुद्दिश्य च प्राप्तौ कस्य किंनिरूपितसंबन्धवन्तौ ते भद्रं कल्याणम् । एतेन मत्पृष्टं द्रुतं ब्रूहीति व्यञ्जितम् । त्रयाणामेकवान्वयः । वाशब्दार्थौ४

५] ति० टी०–भूषयन्तौ स्वतेजसेति शेषः । प्रमाणं शरीरौन्नत्यादि, इङ्गितमान्तराशयबोधकम्, चेष्टितं वचनगमनादि, तैस्तादृशपुरुषान्तराभावात्परस्परसदृशौ ॥ ५ ॥

रा० टी०–उत्तरविलम्बं ज्ञात्वातियुशूषया भङ्ग्यन्तरेण वर्णयन् पुनस्तदेव पृच्छति–भूषयन्तावित्यादिश्लोकद्वयेन । चन्द्रसूर्यावम्बरमिव इमं देशं भूषयन्तौ प्रमाणेङ्गितचेष्टितैः प्रमाणं शरीरेयत्ता इङ्गितमन्तर्व्यापारः चेष्टितं बहिरिन्द्रियव्यापारः एतैः परस्परस्य सदृशौ एतेन वास्तवोपमानान्तराभावः सूचितः॥५॥

६] ति० टी०–आदरातिशयात्पुनः पृच्छति–किमर्थं चेत्यादि । दुर्गमे कान्तारसंबन्धात् ॥ ६ ॥

रा० टी०–किमर्थमिति । नरश्रेष्ठौ नरवरौ वरायुधधरौ वीरौ दुर्गमे पथि किमर्थं संप्राप्ताविति तत्त्वतः श्रोतुमिच्छामि । द्वयोरेकत्रान्वयः । एतेन स्वभाग्यातिशयोऽनुमित इति व्यक्तम् । चशब्द इत्यर्थे ॥ ६ ॥

७] ति० टी०–यथावृत्तं न्यवेदयत् दशरथकुमारावस्मद्यज्ञविघ्ननिवारणाय मदाकारणान्मदुपलालनात्सिद्धाश्रमं प्राप्य तत्र विघ्नकर्तॄराक्षसादीन्हत्वा पथि ताटकां च हत्वा जनकदिदृक्षयैतद्देशमागताविति न्यवेदयत् ॥ ७ ॥

रा० टी०–तस्येति । तस्य विशालाधिपतेः सुमतेस्तद्व-

१ यदृच्छयैव संप्राप्ताविति गो. रा. पाठः । २ परस्परस्येति गो. रा. पाठः । ३ अर्धमेतदधिकं गो. रा. पाठे । ४ च तद्वधमिति रा. पाठः । ५ हार्षित इति गो. रा. पाठः ।

अतिथी परमं प्राप्तौ पुत्रौ दशरथस्य तौ । पूजयामास विधिवत्सत्कारार्हौ महाबलौ ॥ ८ ॥
ततः परमसत्कारं सुमतेः प्राप्य राघवौ । उष्य तत्र निशामेकां जग्मतुर्मिथिलां ततः ॥ ९ ॥
तां दृष्ट्वा मुनयः सर्वे जनकस्य पुरीं शुभाम् । साधु साध्विति शंसन्तो मिथिलां समपूजयन् ॥ १० ॥
मिथिलोपवने तत्र आश्रमं दृश्य राघवः । पुराणं निर्जनं रम्यं पप्रच्छ मुनिपुङ्गवम् ॥ ११ ॥
ईदमाश्रमसंकाशं किं न्विदं मुनिवर्जितम् । श्रोतुमिच्छामि भगवन्कस्यायं पूर्व आश्रमः ॥ १२ ॥
तच्छ्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः । प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ॥ १३ ॥
हन्त ते कथयिष्यामि शृणु तत्त्वेन राघव । यस्यैतदाश्रमपदं शप्तं कोपान्महात्मनः ॥ १४ ॥
गौतमस्य नरश्रेष्ठ पूर्वमासीन्महात्मनः । आश्रमो दिव्यसंकाशः सुरैरपि सुपूजितः ॥ १५ ॥

चनं श्रुत्वा सिद्धाश्रमनिवासं राक्षसानां तद्वधं च यथावृत्तमेव न्यवेदयत् विश्वामित्र इति शेषः । एकश्चकार एवार्थे ॥ ७ ॥

गो० टी०–तस्येति । स्वस्य सिद्धाश्रमनिवासं तत्र स्वयज्ञविघ्नकरराक्षसानामेताभ्यां वधं चकारादिमौ दशरथकुमारौ हरधनुर्दर्शनाय मिथिलां गच्छत इत्येतत्समुचीयते । एतत्सर्वं यथावृत्तमब्रवीदिति योजना ॥ ७ ॥

रा० टी०–विश्वामित्रेति । विश्वामित्रवचः श्रुत्वा परमहर्षितः परमहर्षं प्राप्तो राजा विशालाधिपतिः सुमतिः परमौ उत्तमौ सत्काराहौं सत्कृतियोग्यौ महाबलौ प्राप्तौ समीपमागतौ दशरथस्य पुत्रौ तौ रामलक्ष्मणौ अतिथी विधिवत्पूजयामास । सार्धश्लोक एकान्वयी ॥ ८ ॥ ९ ॥

गो० टी०–विश्वामित्रेति । सार्धश्लोकः ॥ ८ ॥

८–९] ति० टी०–परमत्यन्तमादरणीयौ प्राप्तावतिथी तौ पूजयामासेत्यन्वयः ॥ ८ ॥ सुमतेरिति पञ्चमी । उष्योषित्वा आर्षमेतत् ॥ ९ ॥

रा० टी०–तत इति । ततः सुमतिकृतपूजानन्तरं सुमतेः परमसत्कारं प्राप्य तत्र एकां निशामुष्य उषित्वा राघवौ रामलक्ष्मणौ ततः विशालातः मिथिलां जग्मतुः । आर्षो ल्यप् ॥ १० ॥

गो० टी०–तत इति । उष्य उषित्वा ततः प्रातःकाले मिथिलां प्रति इति शेषः ॥ ९ ॥

१०] ति० टी०–पूजाप्रकारः साधुसाध्विति शंसनम् ॥ १० ॥

रा० टी०–तामिति । जनकस्य शुभां पुरीं तां मिथिलां दृष्ट्वा साधु साधु इति शंसन्तः सर्वे मुनयः समपूजयन् प्राशंसन् ॥ ११ ॥

गो० टी०–तानिति । तान् मिथिलां प्रति प्रस्थितान् रामादीन् पूजाप्रकारः साधु साध्विति ॥ १० ॥

११] ति० टी०–मिथिलोपवने मिथिलासमीपवने दृश्य दृष्ट्वा । पुराणमित्यादित्रयमाश्रमविशेषणम् ॥ ११ ॥

रा० टी०–मिथिलोपवन इति । तत्र तस्मिन्समये पुराणं निर्जनं जनरहितं रम्यमाश्रमं मिथिलोपवने मिथिलासमीपवर्तिवनप्रदेशे दृश्य दृष्ट्वा राघवो रामः मुनिपुंगवं विश्वामित्रं पप्रच्छ ॥ १२ ॥

गो० टी०–मिथिलेति । मिथिलाया उप समीपे वर्तमानं वनं मिथिलोपवनं तस्मिन् शून्यमुटजसंस्थानरहितं दृश्य दृष्ट्वा ॥ ११ ॥

१२–१३] ति० टी०–मुनिरहित्यादाश्रमवदस्याशक्यत्वम्, अत एवाश्रमसंकाशमाश्रमवदवभासमानम् । अत इदं किं नु तस्यैव विवरणम् । कस्यायं पूर्वः पूर्वस्वभूतः ॥ १२ ॥ १३ ॥

रा० टी०–तत्प्रश्नमेवाह–श्रीमदिति । श्रीमत् शोभाविशिष्टमाश्रमसंकाशं मुनिनिवासवत्प्रतिभासमानं मुनिवर्जितमिदं किं नु आश्रमः आश्रमभिन्नो वेति भावः । आर्षं निश्चित्य पृच्छति हे भगवन् ! पूर्वं पूर्वस्मिन्काले अयमाश्रमः कस्येति श्रोतुमहमिच्छामि तद्वदेत्यर्थः ॥ १३ ॥

गो० टी०–श्रीमदिति । आश्रमसंकाशमाश्रमवद्भासमानं किंन्विदमित्यस्य विवरणं कस्यायमिति ॥ १२ ॥

रा० टी०–तदिति । राघवेणोक्तं तद्वाक्यं वाक्यविशारदः महातेजाः महामुनिः विश्वामित्रः श्रुत्वा प्रत्युवाच ॥ १४ ॥

गो० टी०–तदिति ॥ १३ ॥

१४] ति० टी०–अहल्यानुग्रहे तु कालस्मृतिजसंतोषे हन्तेति । यस्यैतदाश्रमपदं भवति । महात्मनः कोपाद्यथा शप्तं प्राप्तशापं तत्ते कथयिष्यामीत्यन्वयः ॥ १४ ॥

रा० टी०–तत्प्रतिवचनमेवाह–हन्तेत्यादिभिः । हे राघव ! कोपात् शप्तं महात्मनो यस्यैतत् आश्रमपदं आसमन्ताद्भावेन श्रमो यस्मात् व्यवस्थाश्रवणमात्रेण अतिखेदप्रापकमित्यर्थः तदेव पदं स्थानं तमहं तत्त्वेन ते कथयिष्यामि हन्त अतः शृणु ॥ १५ ॥

गो० टी०–हन्तेति । अहल्यानुग्रहहेतुकालस्मृतिजसंतोषे हन्तेति । महात्मना कोपाच्छप्तं प्राप्तशापमिदमाश्रमपदं यस्य भवति तं कथयिष्यामि तत्त्वेन शृणु ॥ १४ ॥

१५] ति० टी०–दिव्यसंकाशो शुभत्वाश्रमतुल्यः ॥ १५ ॥

रा० टी०–प्रतिज्ञातमाह–गौतमेत्यादिभिः । हे नरश्रेष्ठ ! दिव्यसंकाशः दिव्यत्वेन प्रतिभासमानः अत एव सुरैरपि सुपूजितः अयमाश्रमः महात्मनः गौतमस्य पूर्वमासीत् ॥ १६ ॥

---

१ परमाविति गो. रा. पाठः । २ तानिति गो. पाठः । ३ श्रीमदिति गो. रा. पाठः ।

स चात्र तप आतिष्ठदहल्यासहितः पुरा । वर्षपूगान्यनेकानि राजपुत्र महायशः ॥ १६ ॥
तस्यान्तरं विदित्वा च सहस्राक्षः शचीपतिः । मुनिवेषधरो भूत्वा अहल्यामिदमब्रवीत् ॥ १७ ॥
ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते । संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ॥ १८ ॥
मुनिवेषं सहस्राक्षं विज्ञाय रघुनन्दन । मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥ १९ ॥
अथाब्रवीत्सुरश्रेष्ठं कृतार्थेनान्तरात्मना । कृतार्थास्मि सुरश्रेष्ठ गच्छ शीघ्रमितः प्रभो ॥ २० ॥
आत्मानं मां च देवेश सर्वथा रक्ष गौतमात् । इन्द्रस्तु प्रहसन्वाक्यमहल्यामिदमब्रवीत् ॥ २१ ॥
सुश्रोणि परितुष्टोऽस्मि गमिष्यामि यथागतम् । एवं संगम्य तु तदा निश्चक्रामोटजात्ततः ॥ २२ ॥

गो० टी०–गौतमस्येतिदिव्यसंकाशः दिव्यत्वेन भासमानः१६

१६] ति० टी०–अनेकानि वर्षपूगान्यनेकवर्षसमूहान् १६

रा० टी०–तदेव विशदयन्नाह–स चेति । हे राजपुत्र ! हे महायशः ! हे राम ! अहल्यासहितः स गौतमः इह मिथिलोपवने एव अनेकानि वर्षपूगानि वर्षसमूहान् पुरा पूर्वं तपः आतिष्ठत् । चशब्द एवार्थे ॥ १७ ॥

गो० टी०–स चेति । वर्षपूगान् वर्षसमूहान् ॥ १६ ॥

१७] ति० टी०–तस्याश्रमस्य । अन्तरं मुनिसंनिधानरहितं कालम् । शचीपतिरित्यनेन शचीतोऽपि सौन्दर्यमहल्यायाः ध्वनितम् । मुनिवेषधरो गौतमवेषधरः मम रूपं समास्थायेति वक्ष्यमाणत्वात् ॥ १७ ॥

रा० टी०–तस्येति । तस्य गौतमस्य अन्तरं स्नानादिगमनेन व्यवधानं विदित्वा ज्ञात्वैव मुनिवेषधरः शचीपतिः सहस्राक्षः इन्द्रः अहल्यामिदं वचनमब्रवीत् । अथशब्द एवार्थे एकस्य यौगिकत्वस्वीकारात्र पौनरुक्त्यम् ॥ १८ ॥

गो० टी०–तस्येति । अन्तरं मुनिरहितकालं मुनिवेषधरः गौतमवेषधरः ॥ १७ ॥

१८] ति० टी–ऋतुकालं शास्त्रोक्तरतिकालम् । अर्थिनो रत्यर्थिनः । सुसमाहिते संगमोचितरूपप्रसाधनवति, अतिसुन्दरीति वा । तेन स्वाभिलष्यदिव्यस्त्रीत्वं सूचितम् ॥ १८ ॥

रा० टी०–तद्वचनमेवाह–ऋतुकालमिति । हे सुसमाहिते एकाग्रचित्ते अर्थिनः रतिकामा जनाः ऋतुकालं शास्त्रोक्तरतिविहितसमयं न प्रतीक्षन्ते अतः हे सुमध्यमे त्वया सह संगमं रतिमहमिच्छामि । एतेन तदानीं तस्याः रतिनिषिद्धकालः संस्थित इति ध्वनितं तेन रतिकालो नास्तीति पूर्वमहल्यया निवारितमिति व्यक्तम् । तुशब्दो हेत्वर्थे ॥ १९ ॥

गो० टी०–ऋत्विति । ऋतुकालम् 'षोडशर्तुर्निशाः स्त्रीणाम् ' इत्युक्तकालम् अर्थिनः कामाद्रोगार्थिन अनृतुकालत्वान्नायमवसर इत्यहल्यया प्रतिषिद्धमित्यवगम्यते । सुसमाहिते सम्यक् ब्रह्मणा निर्मिते अतिसुन्दरीत्यर्थः ॥ १८ ॥

१९] ति० टी०–सहस्राक्षं विज्ञाय । ' ऋतुकालं प्रतीक्षन्ते नार्थिनः ' इति वचनात्तपसा चाश्रमवर्तिसर्वप्राणिजातस्य शङ्काभावाय गौतमवेषोऽयमिन्द्र इति ज्ञात्वेत्यर्थः । देवराजकुतूहलात्स मामभिलषतीति कौतुकात् दिव्यरतिकौतुकाच्चेत्यर्थः । दुर्मेधा अहल्या तेन सह रत्यर्थं मां चकारेत्यन्वयः ॥ १९ ॥

रा० टी०–मुनिवेष इति । हे रघुनन्दन ! मुनिवेषं गौतमवेषधारिणं सहस्राक्षमिन्द्रं विज्ञाय दुर्मेधा अहल्या देवराजकुतूहलात् स मां वाञ्छतीति जातोत्साहात् देवराजाभिलाषातिशयाद्वा मतिं रतिविषयकनिश्चयं चकार ॥ २० ॥

गो० टी०–मुनीति । सहस्राक्षं विज्ञाय कदाचिदपि मुनिनैवमर्थनाभावादन्यस्यात्र प्रवेष्टुमशक्तेरिन्द्रस्यैवात्मनि बहुकालमभिलाषश्रवणाच्चेति भावः ॥ १९ ॥

२०] ति० टी०–कृतार्था तादृशदिव्यपुरुषलाभात्प्राप्ततपःफला ॥ २० ॥

रा० टी०–अथेति । अथ रत्यनन्तरं कृतार्थेनान्तरात्मना मनसा सुरश्रेष्ठमिन्द्रमब्रवीत् । तद्वचनमेवाह–हे सुरश्रेष्ठ ! हे प्रभो ! अहं कृतार्थास्मि अतः इतः स्थानात् शीघ्रं गच्छ ॥२१॥

गो० टी०–अथेति । कृतार्थेन संतुष्टेनेत्यर्थः । अन्तरात्मना मनसा उपलक्षिता ॥ २०

२१] ति० टी०–शीघ्रगमने हेतुर्मामहल्यायाः आत्मन इन्द्रस्य च शापतो रक्षणम् । तदाह–आत्मानमित्यादि । प्रहसन्निति विशिष्टस्त्रीचरितेन प्रहासो रक्षणस्य दुर्लभत्वाद्वा । गौतमतपोभङ्गस्य स्वेष्टस्य करणेनाग्निमशापादिभयमल्पमिति वा ॥ २१ ॥

रा० टी०–शीघ्रगमने प्रयोजनं वदन्तीं आह–आत्मानमिति । हे देवेश ! आत्मानं मां च सर्वथा सर्वप्रकारेण रक्ष गौतमादिति शेषः । एतेन गौतमदृष्टिपथगश्चेत्त्वं भविष्यसि तर्हि तच्छापेन मम तव च विध्वंसो भविष्यतीति ध्वनितम् । तद्वाक्यश्रवणानन्तरं प्रहसन्सन् इन्द्रः इदं वचनमहल्यामब्रवीत् । तुशब्दोऽनन्तरार्थकः । प्रहसन्नित्यनेन अहल्यावाञ्छितशापाभावस्य दुर्लभत्वं द्योतितम् ॥ २२ ॥

गो० टी०–आत्मानमितिरक्ष अप्रकाशगमनादितिभावः २१

२२] ति० टी०–संगम्य अहल्यया सहेति शेषः ॥ २२ ॥

रा० टी०–इन्द्रवाक्यमेवाह–सुश्रोणीति । हे सुश्रोणि !

१ चेहेति गो. रा. पाठः । २ वर्षपूगाननकांश्चेति गो. पाठः । ३ त्विति गो. अथेति रा. पाठः । ४ ऽहल्यामिदं वचनमिति गो. रा. पाठः । ५ मानेदति गो. रा. पाठः । ६ तयेति गो. रा. पाठः ।

स संभ्रमात्त्वरन्राम शङ्कितो गौतमं प्रति । गौतमं स ददर्शाथ प्रविशन्तं महामुनिम् ॥ २३ ॥
देवदानवदुर्धर्षं तपोबलसमन्वितम् । तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलम् ॥ २४ ॥
गृहीतसमिधं तत्र सकुशं मुनिपुंगवम् । दृष्ट्वा सुरपतिस्त्रस्तो विषण्णवदनोऽभवत् ॥ २५ ॥
अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः । दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् ॥ २६ ॥
मम रूपं समास्थाय कृतवानसि दुर्मते । अकर्तव्यमिदं यस्माद्विफलस्त्वं भविष्यसि ॥ २७ ॥
गौतमेनैवमुक्तस्य सुरोषेण महात्मना । पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ॥ २८ ॥
तथा शप्त्वा च वै शक्रं भार्यामपि च शप्तवान् । इह वर्षसहस्राणि बहूनि निवसिष्यसि ॥ २९ ॥
वातभक्षा निराहारा तप्यन्ती भस्मशायिनी । अदृश्या सर्वभूतानामाश्रमेऽस्मिन्वसिष्यसि ॥ ३० ॥

अहं परितुष्टोऽस्मि त्वत्कर्तृकमदवकूलानुवर्तनेन प्राप्तसंतोषोऽस्मि अतः यथागतमागतमनतिक्रम्य गमिष्यामि एवमनेन प्रकारेण तया अहल्यया संगम्य ततस्तस्मादुटजात्पर्णशालातः निश्चक्राम ॥ २३ ॥

गो० टी०–सुश्रोणीत्यर्धम् ॥ २२ ॥

गो० टी०–एवमिति । सः इन्द्रः संभ्रमात् भयात् 'संभ्रमो ह्यादरे भये' इति निघण्टुः । शङ्कितः शङ्कावान् ॥ २३ ॥

२३–२६] ति० टी०–स इन्द्रः संभ्रमाद्गौतमभयात्त्वरन्निश्चक्रामेत्यन्वयः । निर्गमसभये गौतमं प्रति तदागमनं प्रति शङ्कितश्च आसीदिति शेषः । अथ निष्क्रमणसमयानन्तरमेव २३–२६

गो० टी०–स इति । हे राम ! अथ उटजान्निःसरणानन्तरं संभ्रमात् गौतमशापभयात् गौतमं प्रति शङ्कितः गौतमागमनविषयकशङ्काविशिष्टः अत एव त्वरन् शीघ्रगमनं कुर्वन् स इन्द्रः प्रविशन्तं स्वगृहे प्रवेशं कुर्वन्त देवदानवदुर्धर्षं तत्र हेतुः तपोबलसमन्वितं महामुनिं गौतमं संददर्श । सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०–गौतममिति श्लोकद्वयम् । अथ उटजान्निष्क्रमणकाल एव परिक्लिन्नं स्नात्वागतमित्यर्थः । तत्र आश्रमे॥२४॥२५॥

रा० टी०–तीर्थेति । तीर्थोदकपरिक्लिन्नमनलमिव दीप्यमानं गृहीतसमिधं सकुशं कुशसहितं मुनिपुंगवं मुनिश्रेष्ठं गौतमं तत्र गौतमाश्रमे सुरपतिरिन्द्रो दृष्ट्वा त्रस्तः अत एव विषण्णवदनः उदासीनमुखोऽभवत् ॥ २५ ॥ २६ ॥ २७ ॥

गो० टी०–दृष्ट्वेत्यर्धम् । विवर्णवदनः शुष्कमुखः ॥२६॥

रा० टी०–अथेति । अथ इन्द्रोदासीनमुखभवनानन्तरं मुनिवेषधरं दुर्वृत्तं निपिढवृत्तिमन्तं सहस्राक्षं वृत्तसंपन्नः मुनिः गौतमो रोषाद्वचनमब्रवीत् ॥ २८ ॥

गो० टी०–अथेति । मुनिवेषधरं स्ववेषधरम् ॥ २७ ॥

२७–२९] ति० टी०–मम गौतमस्य । कृतवानसि मद्भार्याभोगरूपमकार्यम् । तस्माद्विफलो विगतवृषणः ॥ २७–२९ ॥

रा० टी०–तद्वचनमेवाह–ममेति । हे दुर्मते ! मम रूपं समास्थाय आश्रित्य यस्मादकर्तव्यमिदं त्वं कृतवानसि अतः विफलः वृषणरहितस्त्वं भविष्यसि ॥ २९ ॥

गो० टी०–ममेति । स्वभार्यासंगमस्य दुःशीलत्वेनावाच्यत्वादिदमित्याह विफलः विगतवृषणः 'लाभनिष्पत्तिभोगेषु बीजे फाले धने फलम्' इति निघण्टुः ॥ २८ ॥

रा० टी०–गौतमेनेति । सरोषेण रोषसहितेन महात्मना गौतमेन एवमुक्तप्रकारेण उक्तस्य सहस्राक्षस्य वृषणौ तत्क्षणात् भूमौ पेततुः । एतेन तस्य पुंस्त्वं विनष्टमिति सूचितम् ॥ ३० ॥

गो० टी०–गौतमेति ॥ २९ ॥

रा० टी०–तथेति । शक्रमेवं शप्त्वा तथा तेन प्रकारेणैव सापराधां भार्यामपि शप्तवान् । शापस्वरूपमाह–इह अस्मिन् मिथिलोपवने एव बहूनि वर्षसहस्राणि त्वं निवत्स्यसि । च शब्दावेवार्थौ वैशब्द *एवमर्थकः॥ ३१ ॥

गो० टी०–तथेति ॥ ३० ॥

३०] ति० टी०–शापस्वरूपम्–वातभक्षेत्यादि । तप्यन्ती स्वकृताकार्यस्मरणेन पीडिता । पुराणादिप्रसिद्धशिलारूपप्राप्तिशापस्तु कल्पान्तरीण इति न विरोधः । अत्र शिलारूपत्वे तात्पर्यकल्पने वातभक्षेत्यनेन विरोधः स्पष्ट एवेति केचित् वस्तुतस्तु अदृश्येत्यस्य स्वरूपेणादृश्या शिलाप्रतिमारूपेण सर्वैदृश्येत्यर्थः । न च तावता चैतन्यहानिरिति क्षुधादिपीडा स्यादेवेत्यतो वातभक्षा तदतिरिक्ताहाराभावाच्च निराहारा तप्यन्ती स्वकर्मणेति शेषः । तादृश्यपि भस्मशायिनी न तु स्थिता इति न कश्चिद्विरोधः । इन्द्रशापोऽप्युपलक्षणमत्रानन्तभगवतः शापस्य । तदुक्तं पाद्मे—'शापदग्धा पुरा भर्त्रा राम शक्रापराधतः । अहल्याख्या शिला जज्ञे शतलिङ्गः कृतः स्वराट् ॥' इति । शिला तत्प्रतिमाकारा । शतशब्दोऽनन्तवाची । लिङ्गशब्देन भगाकारं चिह्नम् । स्वराडिन्द्रः ॥ ३० ॥

रा० टी०–सप्रकारं निवसनमेवाह–वायुभक्षेति । वायुमेव भक्षयति सा अत एव निराहारा वाय्वाहारातिरिक्ताहारविवर्जिता तप्यन्ती स्वापराधजनितसंतापमनुभवन्ती भस्मशा-

१ विवर्णेति गो. पाठः । २ सरोषेणेति गो. रा. पाठः । ३ अहल्यामपीति गो. पाठः । ४ त्वं निवत्स्यसीति गो.रा. पाठः । ५ वायुभक्षेति गो. रा. पाठः ! ६ निवत्स्यपीति गो. पाठः । * एवार्थक इति भाति ।

यदा त्वेतद्वनं घोरं रामो दशरथात्मजः । आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ ३१ ॥
तस्यातिथ्येन दुर्वृत्ते लोभमोहविवर्जिता । मत्सकाशं मुदा युक्ता स्वं वपुर्धारयिष्यसि ॥ ३२ ॥
एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीम् । इममाश्रममुत्सृज्य सिद्धचारणसेविते ॥
हिमवच्छिखरे रम्ये तपस्तेपे महातपाः ॥ ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ।

निर्वृषणत्वापेक्षस्तेनेन्द्रेण प्रेरितैर्देवैः प्रार्थितेषु पितृदेवेष्वग्नेर्वचसा देवैरिन्द्रे मेषवृषणसंयोजनम्, विश्वामित्रप्रेरणयाऽऽश्रमप्रवेशिनो रामस्य दर्शनात्प्राप्तदिव्यरूपाया अहल्याया रामलक्ष्मणकृतपादाभिवन्दनं गौतमाहल्याभ्यां कृतं रामाराधनं देवैश्चाहल्याया साधुसाध्विति प्रशंसनम् ।

अफलस्तु ततः शक्रो देवानग्निपुरोगमान् । अब्रवीत्रस्तनयनः सिद्धगन्धर्वचारणान् ॥ १ ॥

यिनी भस्मशयनशीला सर्वभूतानामदृश्या अस्मिन् आश्रमे त्वं वसिष्यसि वत्स्यसि ॥ ३२ ॥

गो० टी०–कथं निवासमात्रस्य शापत्वमिति तद्विवृणोति–**वायुभक्षेति** । निराहारा अन्नपानादिरहिता तप्यन्ती तप्यमाना भस्मशायिनी भस्मशयना अत्र बुद्धिपूर्वकव्यभिचारस्य विधीयमानं प्रायश्चित्तं शापापदेशेनोच्यते एवं व्यक्ततया वाल्मीकिवचने स्थिते शैली भवेति शापो रामपादस्पर्शात् शिलात्वमुक्तिरिति पुराणकथा कल्पान्तरवृत्तमनुसृत्येति बोध्यम् ॥ ३१ ॥

३१] **ति० टी०**–शापान्तमाह–**यदेति** । घोरमित्यनेन मुनिराहित्यसूचनम् । रामो यदागमिष्यति तदागमनकाले जायमानचरणविन्यासेनानायासतस्तत्पादस्पर्शात्पूता व्यभिचारकृतपापनाशेन पवित्रा भविष्यसि पावित्र्येण च तपस्विनां दृश्या भविष्यसि ॥ ३१ ॥

रा० टी०–शापावधिं कुर्वन्नाह–**यदेति** । दुर्धर्षः दशरथात्मजः घोरमेतद्वनं यदा आगमिष्यति तदैव त्वं पूता भविष्यसि । चशब्द एवार्थे ॥ ३३ ॥

गो० टी०–**यदेति** । पूता भविष्यसि तत्पादपरागस्पर्शादिति भावः । एतेन बहुवर्षप्रायश्चित्तकरणमपि भगवत्पादरेणुस्पर्शस्य कलां नार्हतीत्युक्तम् ॥ ३२ ॥

३२–३३] **ति० टी०**–ततो मत्सकाशं मत्सांनिध्यं प्राप्ता स्वं वपुः पूर्ववत्सर्वदृश्यं भस्मनानावृतं धारयिष्यसि प्राप्स्यसीत्यर्थः । इतरत्स्पष्टम् । कतककारस्तु–'यदा तु' इत्यादिशापान्तप्रतिपादकं 'स्वं वपुर्धारयिष्यसि' इत्यन्तं श्लोकद्वयं प्रक्षिप्तमित्याह । 'एवमुक्त्वा' इत्यादिसार्धश्लोकस्तु प्रामाणिक एव । एवं च द्वात्रिंशच्छ्लोका एवात्रेत्याहुः ॥ ३२–३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८

रा० टी०–तस्येति । हे दुर्वृत्ते ! तस्य रामस्य आतिथ्येन लोभमोहविवर्जिता मुदा युक्ता सती त्वं मत्सकाशं मम सकाशः सामीप्यं यस्मात् मत्समीपगमनयोग्यमित्यर्थः । स्वं वपुर्धारयिष्यसि । अत्र प्रार्थनामन्तरेणानुग्रहवचनोक्त्या मुनेर्दयालुत्वं व्यक्तम् ॥ ३४ ॥

गो० टी०–पूतत्वेऽपि पूर्वरूपप्राप्तिस्तत्पादपूजां विना न संभवतीत्याह–**तस्येति** । मत्सकाशे मत्समीपे स्थितेति शेषः । स्वं वपुः दृश्यं वपुः । केचिदिदं श्लोकद्वयं प्रक्षिप्तमित्याहुः तत्र स्मरन्ती गौतमवच इत्यायुत्तरसर्गवचनविरोधात् ॥ ३३ ॥

रा० टी०–एवमिति । महातेजा महातपा गौतमः दुष्टचारिणीमहल्यामेवमुक्त्वा इममाश्रममुत्सृज्य त्यक्त्वा सिद्धचारणसेविते रम्ये हिमवच्छिखरे तपस्तेपे । सार्धश्लोक एकान्वयी॥३५॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
बालकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

गो० टी०–एवमिति । सार्धश्लोकः । तपस्तेपे तच्छापकृतपापप्रायश्चितार्थम् ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने
बालकाण्डव्याख्यानेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१] **ति० टी०**–धर्मधुरंधरस्यापि शक्रस्याधर्मे प्रवृत्तौ बीजं दर्शयितुमाह–**अफल इति** । अवृषण इत्यर्थः । त्रस्तेति त्रासेन स्वकारणं दैन्यं व्यज्यते ॥ १ ॥

रा० टी०–प्राप्तशापौत्तरकालिकमिन्द्रवृत्तमाह–**अफल इत्यादिभिः** । ततः प्राप्तगौतमशापानन्तरमेव अफलः शापेन वृषणरहितः त्रस्तवदनः शक्रः अग्निपुरोधसः अग्निः पुरोधाः अग्रे गन्ता येषां तान् सर्षिसंघान् ऋषिसंघसहितान् सचारणान् चारणसहितान् देवान् अब्रवीत् । तुशब्द एवार्थे ॥ १ ॥

१ चैतद्वनमिति गो. च तद्वनमिति रा. पाठः । २ सकाशे इति गो. पाठः । ३ पुरोधस इति गो. रा. पाठः । ४ वदनः सर्षिसंघान्सचारणानिति गो. रा. पाठः ।

कुर्वता तपसो विघ्नं गौतमस्य महात्मनः । क्रोधमुत्पाद्य हि मया सुरकार्यमिदं कृतम् ॥ २ ॥
अफलोऽस्मि कृतस्तेन क्रोधात्सा च निराकृता । शापमोक्षेण महता तपोऽस्यापहृतं मया ॥ ३ ॥
तन्मां[1] सुरवराः सर्वे सर्षिसंघाः सचारणाः । सुरकार्यकरं[2] यूयं सफलं कर्तुमर्हथ ॥ ४ ॥
शतक्रतोर्वचः श्रुत्वा देवाः साग्निपुरोगमाः । पितृदेवानुपेत्याहुः सर्वे सह मरुद्गणैः ॥ ५ ॥
अयं मेषः सवृषणः शक्रो ह्यवृषणः कृतः । मेषस्य वृषणौ गृह्य शक्रायाशु प्रयच्छत ॥ ६ ॥
अफलस्तु कृतो मेषः परां तुष्टिं प्रदास्यति । भवतां हर्षणार्थं[3] च ये च दास्यन्ति मानवाः ॥
अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलम् ॥ ॥ ७ ॥

गो० टी०–अनयोर्द्वयोः शापयोरेकः पूर्वमेव मुक्तः अपरस्त्वया मोचनीय इत्याशयेनाह एकोनपञ्चाशे–**अफल इत्यादि** । अग्निपुरोधसः अग्निपुरोगमान् । त्रस्तवदनः त्रस्तशब्देन तत्कार्य दैन्यमुच्यते ॥ १ ॥

२] **ति० टी०**–सुरकार्यमिति अन्यथा ह्युग्रतपसा सकलदेवस्थानापहारस्तेन कृतः स्यादिति भावः ॥ २ ॥

रा० टी०–तद्वचनमेवाह–**कुर्वतेति** । महात्मनः गौतमस्य तपसो विघ्नं कुर्वता मया गौतमस्य क्रोधमुत्पाद्य इदं तपोध्वंसनरूपं सुरकार्यं कृतम् । एतेन यदि तपोध्वंसो न स्यात्तर्हि तपोबलेन देवलोकं गौतमो गृह्णीयादिति निश्चयो ध्वनितः ॥ २ ॥

गो० टी०–**कुर्वतेति** । महात्मनः गौतमस्य तपसः अस्मत्पदच्यवनकारणस्य विघ्नं क्रोधमुत्पाद्य तस्य क्रोधजननमुखेन कुर्वता मया इदं गौतमतपोभङ्गरूपं सुरकार्यं कृतं सर्वदेवपदच्यवनार्हं तपो गौतमेन कृतं तस्य तपोनाशकमहाक्रोधोत्पादनाय तद्भार्यया तु मया व्यभिचारः कृत इत्यर्थः ॥ २ ॥

३] **ति० टी०**–साहल्या दुष्टचारित्रेति निराकृतोक्तशापपूर्वं त्यक्ता । एवमपि सुरकार्यनिष्पत्तिः कथं तत्राह–**शापेति** । स्वस्मिन्गौतमकर्तृकशापमोक्षणेनास्य तपो मया हृतम् । महतः शापेन विना न तपोव्यय इति भावः । तपोव्ययसंपादकक्रोधोत्पादनमेव कार्यं मया कृतमिति तात्पर्यम् ॥ ३ ॥

रा० टी०–क्रोधोत्पत्त्या किं कृतमित्यत आह–**अफल इति** । तेन मुनिना क्रोधान्महता शापमोक्षेणाहमफलः वृषणरहितः कृतोऽस्मि सा अहल्या च निराकृता अतः अस्य मुनेस्तपो मयाऽपहृतं क्रोधोत्पादनद्वारा तत्तपो ध्वंसितमित्यर्थः । क्रोधादयस्तपोनाशकत्वेन स्मृत्यादौ प्रसिद्धाः ॥ ३ ॥

गो० टी०–**अफल इति** । तेन गौतमेन सा अहल्या निराकृता शापमोक्षपूर्वकं त्यक्ता शापमोक्षेण मयि अहल्यायां च शापदानेन ॥ ३ ॥

४] **ति० टी०**–सफलं मां सवृषणम् । सर्वे इत्यस्य वारद्वयपाठे हे सर्वे सुरवराः सर्वे यूयमित्यन्वयो ज्ञेयः परत्र 'यूयम्' इत्येव पाठः प्रायेण ॥ ४ ॥

रा० टी०–**तस्मादिति** । हे सुरवराः ! तस्मात् भवत्साहाय्यकारित्वाद्धेतोः सर्षिसंघाः ऋषिसंघसहिताः सचारणाः चारणसहिताः सर्वे यूयं सुरसाह्यकरं सुरसाहाय्यकर्तारं मां सफलं वृषणसहितं कर्तुमर्हथ । क्वचित् 'सुरकार्यकरं यूयम्' इति पाठः ॥४॥

गो० टी०–**तस्मादिति** । हे सर्वे सुरवराः ! इतिसंबोधनम् द्वितीयसर्वशब्दस्य सर्वे यूयमिति संबधः । साह्यं साहाय्यं सफलं मामिति शेषः ॥ ४ ॥

५] **ति० टी०**–पितृदेवाः कव्यवाहनादयस्तानुपेत्य हव्यवाहनाग्निमुखेनाहुः ' अग्नेस्तु वचनं श्रुत्वा ' इति वक्ष्यमाणत्वात् ॥ ५ ॥

रा० टी०–**शतक्रतोरिति** । साग्निपुरोगमाः अग्निपुरोगमसहिताः मरुद्गणैः सह सर्वे देवाः शतक्रतोः इन्द्रस्य वचः श्रुत्वा पितृदेवान्कव्यवाहनादीन् उपेत्य प्राप्य आहुः ॥ ५ ॥

गो० टी०–**शतक्रतोरिति** । पितृदेवान् अग्निकव्यवाहनादीन् ॥ ५ ॥

६] **ति० टी०**–अयं मेषो यो भवतां हविष्ट्वेन कल्पितः । गृह्य गृहीत्वा ॥ ६ ॥

रा० टी०–तद्वचनमेवाह–**अयमिति** । शक्रः इन्द्रः अवृषणः कृतः शापेनेति शेषः । अयं युष्मदीयः मेषस्तु सवृषणोऽस्ति अतः अस्य मेषस्य वृषणौ गृह्य गृहीत्वा शक्राय आशु शीघ्रं प्रयच्छत । एतेनैतद्वृषणाभ्यामेवायं वृषणवान्भविष्यतीति ध्वनितम् ॥६॥

गो० टी०–**अयमिति** । अयमिदानीं यज्ञे युष्मभ्यं नियुज्यमानो मेषः । गृह्य गृहीत्वा ॥ ६ ॥

७] **ति० टी०**–**अफलस्त्विति** । नन्विदमयुक्तम् नहि मेषा अवृषणा दृश्यन्त इति चेन्न, भवदुद्देशेन कृतो हविष्ट्वेन कल्पितो योऽफलः पण्ढो मेषः । यद्वा वृषणभिन्नो यो मेषो मेषावयवो भवद्भविष्ट्वेन कल्पितः स भवतां परां तुष्टिं दास्यतीत्यन्वयात् । ये वाफलं मेषं भवतां हर्षणार्थं तोषाय भवद्भ्यो दास्यन्ति तेषामक्षयं फलं यूयं दास्यथेत्यन्वयः ॥ ७ ॥

रा० टी०–ननु वृषणदाने अस्मत्तुष्टिर्वैकल्पं स्यादित्यत आहुः–**अफल इति** । अफल एव कृतः संपादितो मेषः परां तुष्टिं प्रदास्यति एव भवद्भ्य इति शेषः । अतः ये मानवाः भवतां हर्षणार्थमफलमेषं दास्यन्ति तेषामेव अक्षयं विनाशरहितं पुष्कलं फलं यूयं दास्यथ । तुशब्दः चशब्दौ एवार्थौ हिर्हेतौ ॥७॥

१ तस्मादिति गो. रा. पाठः । २ साह्यकरमिति गो. रा. पाठः । ३ हर्षणार्थे इति गो. पाठः । ४ इदमर्धं गो. नास्ति ।

अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः । उत्पाट्य मेषवृषणौ सहस्राक्षे न्यवेशयन् ॥ ८ ॥
तदाप्रभृति काकुत्स्थ पितृदेवाः समागताः । अफलान्भुञ्जते मेषान्फलैस्तेषामयोजयन् ॥ ९ ॥
इन्द्रस्तु मेषवृषणस्तदाप्रभृति राघव । गौतमस्य प्रभावेण तपसा च महात्मनः ॥ १० ॥
तदागच्छ महातेज आश्रमं पुण्यकर्मणः । तारयैनां महाभागामहल्यां देवरूपिणीम् ॥ ११ ॥
विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः । विश्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश ह ॥ १२ ॥
ददर्श च महाभागां तपसा द्योतितप्रभाम् । लोकैरपि समागम्य दुर्निरीक्ष्यां सुरासुरैः ॥ १३ ॥
प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव । धूमेनाभिपरीताङ्गीं दीप्तामग्निशिखामिव ॥ १४ ॥

गो० टी०–तदानेऽस्मत्तुष्टिवैकल्यं स्यादित्यत्राह–अफल इत्यर्धम् । प्रदास्यतीत्यनुगृह्णन्ति ॥ ७ ॥ दातृणामपि फलन्यूनता न भवत्वित्यनुगृह्णन्ति भवतामिति । दास्यन्ति अवृषणमिति शेषः ॥ ८ ॥

८] ति० टी०–समागता मिलिताः ॥ ८ ॥

रा० टी०–अग्नेरिति । अग्नेर्वचनं श्रुत्वैव समागता कृतसंमतयः पितृदेवाः मेषवृषणौ उत्पाट्य सहस्राक्षे न्यवेशयन् उचितदेशे नियोजयामासुः ॥ ८ ॥

गो० टी०–अग्नेरिति । अग्निपुरःसराणामित्यर्थः । मेषस्य तदा यूपे नियुक्तस्य मेषस्य वृषणौ ॥ ९ ॥

९] ति० टी०–अफलान्पण्डांस्तदंशरहितान्वा यतस्तेषां फलैः फलाभ्यां वृषणाभ्यामिन्द्रमयोजयन् ॥ ९ ॥

रा० टी०–तदेति । हे काकुत्स्थ ! तदाप्रभृति मेषवृषणदानकालादारभ्य समागताः पितृदेवाः अफलान्वृषणरहितान् मेषान् भुञ्जते तेषां वृषणरहितमेषदातॄणां फलैः सवृषणमेषदानोचितपुण्यैः अयोजयन् योजयन्ते लङ्पात्तभूतत्वस्याविवक्षा ॥९॥

गो० टी०–तदेति । तदाप्रभृति वृषणदानात्प्रभृति दत्तसजातीयत्वाद्वृषणौ विना मेषान् भुञ्जते तेषां सवृषणानां फलैः सवृषणमेषदानफलैरित्यर्थः अयोजयन् दातृनिति शेषः ॥१०॥

१०] ति० टी०–तदाप्रभृति ततो हेतोरिन्द्रो मेषवृषण इत्यन्वयः । तपसा प्रभावेण तपःकृतप्रभावेण च स्वापचारेण च ॥ १० ॥

रा० टी०–इन्द्र इति । हे राघव ! तदाप्रभृति महात्मनः तापसस्य गौतमस्य प्रभावेण इन्द्रस्तु मेषवृषण आसीदिति शेषः । ' तपसा च ' इति भाट्टपाठः ॥ १० ॥

गो० टी०–इन्द्रस्त्विति । गौतमस्य तपसः प्रभावेण वृषणहान्या मेषवृषणोऽभूदित्यर्थः ॥ ११ ॥

११–१२] ति० टी०–महातेज इति रामसंबोधनम् । पुण्यकर्मणो गौतमस्य । ननु ताटकयेव घोररूपयाहल्ययावष्टब्धमाश्रमं कथं गच्छेयमत आह–देवरूपिणीमिति । शापस्यैतदवधिकत्वात् अथ त्वत्पादस्पर्शनान्मुक्तशापतया देवरूपिणीमित्यर्थः । एनां तारय भर्तृप्रत्यापत्तिफलकमातिथ्यं गृहीत्वा भर्तृप्रापणेनैनामनुगृहाण ॥ ११ ॥ १२ ॥

रा० टी०–शापवृत्तान्तं संवर्ण्य प्रकृतमाह–तदिति । यस्माद्भवतो गमनमेव अहल्यायाः कल्याणहेतुस्तत्तस्मात् हे महातेजः ! पुण्यकर्मणः गौतमस्य आश्रममागच्छ महाभागां देवरूपिणीमेनामहल्यां तारय ॥ ११ ॥

गो० टी०–तदिति । तत् त्वदागमनावधित्वादहल्याशापस्येत्यर्थः ॥ १२ ॥

रा० टी०–विश्वामित्रेति । सहलक्ष्मणः लक्ष्मणसहितः राघवः विश्वामित्रवचः श्रुत्वैव विश्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश । हशब्द एवार्थे ॥ १२ ॥

गो० टी०–विश्वामित्रेति ॥ १३ ॥

१३] ति० टी०–ददर्शेति । आश्रमप्रवेशकालेऽनायासतः स्वचरणस्पर्शाद्व्यभिचारकृतपापनाशेन शापनिवृत्त्या शापवशात्सुरासुरैः समागम्य मिलित्वापि सर्वलोकैर्दुर्निरीक्ष्यां विश्वामित्रो यथावद्देवरूपिणीमिति तथा ददर्शेत्यर्थः । तदुक्तम्–तपसा द्योतितप्रभामिति । एवं दर्शनं तत्समये रामलक्ष्मणविश्वामित्राणामेव । सर्वदृश्यत्वं तु भगवदातिथ्यकार्यमिति बोध्यम् १३॥

रा० टी०–ददर्शेति । महाभागां रामागमनेनानुमितात्यन्तभागविशिष्टां तपसैव द्योतितप्रभां लोकैः इहलोकस्थजनैः सुरासुरैरपि दुर्निरीक्षां शापवशेन द्रष्टुमशक्याम् । चशब्द एवार्थे॥१३॥

गो० टी०–रामसंनिधानमात्रेणाहल्या मुक्तशापा स्वरूपं प्राप्तेत्याह–ददर्श चेति । सार्धश्लोकद्वयम् । तपसा वाग्व्यवहारत्वादितपसा द्योतितप्रभामतिशयितप्रभामत एव लोकैर्मानुषैः सुरासुरैरपि समागम्य समीपमागत्य दुर्निरीक्षां दिव्यामतिमानुषरूपां मायामयीमिव मायानिर्मितामिव स्थितां दृश्यलताकुसुमान्तर्वर्तित्वेन सतुषारावरणां साभ्रां चन्द्रप्रभामिव स्थिताम् । आवृतशब्द आवरणार्थकः भावे निष्ठा स इति भिन्नं पदं वा मध्य इति अक्रौर्यदुर्निरीक्षत्वाभ्यां प्रतिबिम्बसूर्यप्रभातुल्याम् ॥ १४ ॥ १५ ॥

१४] ति० टी०–प्रयत्नादित्यादिना दिव्यरूपत्वमुक्तम् । रामादेरपि दर्शनं नात्यन्तस्पष्टतया किंत्वेवंरूपेण । भर्तृसंतोषक-

१ तापसस्येति रा. पाठः । २ दुर्निरीक्षामिति गो. रा. पाठः । ३ सतुषारावृतां साभ्रांपूर्णचन्द्रप्रभामिवेति गो. पाठः ।

सतुषारावृतां साभ्रां पूर्णचन्द्रप्रभामिव । मध्येऽम्भसो दुराधर्षां दीप्तां सूर्यप्रभामिव ॥ १५ ॥
सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह । त्रयाणामपि लोकानां यावद्रामस्य दर्शनम् ॥
शापस्यान्तमुपागम्य तेषां दर्शनमागता ॥ ॥ १६ ॥
राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा । स्मरन्ती गौतमवचः प्रतिजग्राह सा हि तौ ॥ १७ ॥
पाद्यमर्घ्यं तथातिथ्यं चकार सुसमाहिता । प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥ १८ ॥
पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिःस्वनैः । गन्धर्वाप्सरसां चैव महानासीत्समुत्सवः ॥ १९ ॥

रस्य भर्तृसांनिध्यस्य शापान्तकरणस्याभावादित्याह–धूमेनेति। धूमेनाभिपरीतानि व्याप्तान्यङ्गानि यस्याः सा ॥ १४ ॥

रा० टी०–धात्रा ब्रह्मणा प्रयत्नात् अतिप्रयत्नतः निर्मितां दिव्यामेतल्लोकविलक्षणामत एव मायामयीमिव मायामयीसदृशीं धूमेनाभिपरीताङ्गीं धूमावृतशरीरां दीप्तां प्रज्वलितामग्निशिखामिव अग्निशिखासदृशीं सतुषारावृतां तुषारावरणसहितां साभ्रामभ्रसहितां पूर्णचन्द्रप्रभामिव पूर्णचन्द्रप्रभासदृशीमम्भसो जलस्य मध्ये दीप्तां दुराधर्षां सूर्यप्रभामिव सूर्यप्रभासदृशीमहल्यां ददर्श। श्लोकत्रयमेकान्वयि। आवृत्तशब्दो भावनिष्ठान्तः१४–१५

१५] ति० टी०–उपमात्रयं भस्माद्यतत्वेन । अम्भसो लक्षणया तद्युक्तमेवस्य मध्यस्थां रविप्रभामिव ददर्श । दुराधर्षां स्पष्टुमशक्याम् ॥ १५ ॥

१६] ति० टी०–तथादर्शने हेतुमाह–सा हीति। त्रयाणामपि लोकानां दुर्निरीक्ष्यत्वशापवशाद्रामादीनामप्येवं दर्शनविषया जाता अन्येषां त्वदृश्यैव रामादीनां तु दुःखदृश्येत्यर्थः । शापस्यान्तं तदन्तस्यावधिकालं प्राप्य तेषां रामादीनां दर्शनं पूर्वोक्तप्रकारेण दर्शनविषयत्वं प्राप्तेत्यर्थः। तथा च पाद्मे–'गच्छतस्तस्य रामस्य पादस्पर्शान्महाशिला । काचिद्योषाभवत्सोऽपि विस्मितो मुनिरब्रवीत् ॥' शिला तत्प्रतिमाकारा सोऽपि रामः । विस्मितः स एवासीत् । तथाभूतं तं दृष्ट्वा मुनिरवददित्यर्थः । ' शापदग्धा पुरा भर्त्रा राम शक्रापराधतः । अहल्याख्या शिला जज्ञे शतलिङ्गः कृतः स्वराट् ॥ त्वदङ्घ्रिस्पर्शनात्तस्यै शापान्तं प्राह गौतमः । तस्मादियं ते पादाब्जस्पर्शाच्छुद्धाभवत्प्रभो ॥' इति । यदुद्धाराथं त्वं मयेहानीतः सैषैवेति शेषः । एवं मदुक्तरीत्या सर्वेषामविरोधे संभवति कल्पान्तरपरत्वेनाविरोधवर्णनं कतकाद्युक्तं चिन्त्यम् । यदपि ' तेन धूमेन ' इत्यादिसार्धश्लोके तामेव दुर्निरीक्ष्यामिति शेषं पूरयित्वा दुर्निरीक्ष्यत्वे हेतुमाह–सा हीति । तेषां दर्शनमित्यत्र तेषां त्रयाणां लोकानामिति व्याख्यातं तदपि क्लिष्टम् ॥ १६ ॥

रा० टी०–सेति । या अहल्या गौतमवाक्येन गौतमशापेनैव त्रयाणां लोकानां रामस्य दर्शनात् यावत् पूर्वं दुर्निरीक्ष्या बभूव सा अहल्या शापस्यान्तमवसानमुपागम्यैव तेषां त्रयाणां लोकानां दर्शनं दृष्टिपथमागता प्राप्ता ह प्रसिद्धमेतत् । अपिशब्दावेवार्थौ । सार्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०–अदृश्या सा कथमिदानीं दृश्यासीदित्यत्राह सार्धेन–सा हीत्यादि ॥ १६ ॥

१७] ति० टी०–तदा स्वपदस्पर्शमात्रेण शिलारूपतापरित्यागे गौतमवचः स्मरन्ती मदाश्रमप्राप्तराघवपूजया पुनर्मत्संबन्ध इत्येवं तद्वचः स्मरन्तीत्यर्थः । स्वशिलारूपतापरित्यागमात्रेण तु तस्मिन्रामत्वनिश्चयोऽस्याः तौ रामपादौ प्रतिजग्राह स्पृष्ट्वा प्रणनाम । यत्तु तौ रामलक्ष्मणौ प्रतिजग्राह पूज्यत्वद्विमकरोदिति तत्र अग्रे काकुत्स्थ इत्येकवचनप्रयोगात्॥१७॥

रा० टी०–राघवाविति । अतिथी अतिथित्वरूपेण प्राप्तौ राघवौ रामलक्ष्मणौ तस्याः गौतमपत्न्याः पादौ जगृहतुः । तदा तु रामकर्तृकपादग्रहणसमये एव गौतमवचस्तस्यातिथ्येन दुर्मेधे इत्यादिगौतमोक्तं स्मरन्ती सती अहल्या तौ रामलक्ष्मणौ प्रतिजग्राह अतिथ्युचितपूजनीयत्वेन स्वीचकार । तुहिशब्दौ एवार्थे ॥ १७ ॥

गो० टी०–राघवौ त्विति । तस्याः वृद्धमुनिपत्न्याः गौतमवचः 'तस्यातिथ्येन दुर्वृत्ते' इत्यादिकं प्रतिजग्राह पूजनीयत्वेनेति शेषः ॥ १७ ॥

१८] ति० टी०–सुसमाहिताऽप्रमत्ता । काकुत्स्थो रामः तस्यैव मुख्यतया पूजनात् ॥ १८ ॥

रा० टी०–अहल्याकर्तृकपूजनप्रकारं वर्णयन्नाह–पाद्यमिति । सुसमाहिता अत्येकाग्रचिता अहल्या पाद्यमर्घ्यं तथा अन्यदपि आतिथ्यमतिथिहितं विधिदृष्टेन वेदबोधितेन कर्मणा चकार । काकुत्स्थः लक्ष्मणसहितरामः प्रतिजग्राह समर्पितं पाद्यादिकं स्वीचकार ॥ १८ ॥

गो० टी०–पाद्यमिति । विधिदृष्टेन शास्त्रदृष्टेन कर्मणा प्रकारेण पाद्यादिकं चकारेत्यन्वयः ॥ १८ ॥

१९] ति० टी०–देवदुन्दुभिनिःस्वनैः सह पुष्पवृष्टिरासीत् । रामस्याहल्यायाश्चेत्यर्थः ॥ १९ ॥

रा० टी०–पुष्पेति । देवदुन्दुभिनिस्वनैः देवबादितदुन्दुभिशब्दैः साकमेव महती पुष्पवृष्टिरासीत् गन्धर्वाप्सरसां महान् गीतनृत्यादिनोत्कर्षतां प्राप्तः समागमश्च आसीत् । अपिशब्द एवार्थे ॥ १९ ॥

गो० टी०–पुष्पेति । रामस्येति शेषः । सम्यगागमः समागमः नृत्यगीतादिकमिति यावत् ॥ १९ ॥

१ सार्धेति रा. पाठः । २ दर्शनादिति रा. पाठः । ३ त्वतिथी इति गो. रा. पाठः । ४ तदेति गो. रा. पाठः । ५ चेति गो. पाठः । ६ चापीति गो. रा. पाठः । ७ समागम इति गो. रा. पाठः ।

साधु साध्विति देवास्तामहल्यां समपूजयन् । तपोबलविशुद्धाङ्गीं गौतमस्य वशानुगाम् ॥ २० ॥
गौतमोऽपि[1] महातेजा अहल्यासहितः सुखी । रामं संपूज्य विधिवत्तपस्तेपे महातपाः ॥ २१ ॥
रामोऽपि परमां पूजां गौतमस्य महामुनेः । सकाशाद्विधिवत्प्राप्य जगाम मिथिलां ततः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ।

रामलक्ष्मणसहितस्य विश्वामित्रस्यागमनं श्रुत्वा जनकस्य शतानन्दं पुरस्कृत्य प्रत्युद्गमनमातिथिसत्कारेण विश्वामित्रपूजनं, जनकं प्रति रामवृत्तान्तकथनपूर्वकं विश्वामित्रस्य धनुर्दिदृक्षाकथनं च ।

ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह । विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥ १ ॥
रामस्तु मुनिशार्दूलमुवाच सहलक्ष्मणः । साध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादेशनिवासिनाम् । ब्राह्मणानां महाभाग वेदाध्ययनशालिनाम् ॥ ३ ॥
ऋषिवाटाश्च दृश्यन्ते शकटीशतसंकुलाः । देशो विधीयतां ब्रह्मन्यत्र वत्स्यामहे वयम् ॥ ४ ॥

२०] ति० टी०–रामपूजया निष्पापत्वादहल्यायाः पूजा । तपोबलविशुद्धाङ्गीं तद्भललब्धरामस्पर्शेन शुद्धाङ्गीमत एव गौतमस्य वशां तदुक्तचित्तामत एव पूर्वं परत्र काले शरीरेणापि तदनुगाम् ॥ २० ॥

रा० टी०–साध्विति । तपोबलविशुद्धाङ्गीमत एव गौतमस्य वशानुगां गौतमस्य वशः अनुगः अनुगमनं यस्यास्तां गौतमानुगमनशीलामित्यर्थः । तां रामं पूजयन्तीमहल्यां देवाः साधु साधु इति समपूजयन् प्राशंसन् । गौतमस्य वशानुगामित्यनेन गौतमोऽपि तदानीं तत्र समागत इति ध्वनितमेतेन गौतमस्य रामविषयप्रीत्यतिशयः सूचितः ॥ २० ॥

गो० टी०–साध्विति । गौतमस्य वशानुगामित्यनेन गौतमस्तदा रामागमनं विदित्वा समागत इत्यवगम्यते ॥२०॥

२१–२२] ति० टी०–अहल्यासहितः सुखीत्यनेन योगबलाद्रामागमनं ज्ञात्वा तद्भलादेव झटिति तदाश्रमप्राप्तिर्गौतमस्येति बोध्यम् ॥ २१ ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०–गौतम इति । महातेजाः सुखी महायशाः गौतमः अहल्यासहितः सन्नेव रामं विधिवत्संपूज्य तपस्तेपे । हि-शब्द एवार्थे ॥ २१ ॥

गो० टी०–गौतम इति । तेपे तत्रैवाश्रम इति शेषः॥ २१ ॥

रा० टी०–राम इति । महात्मनः गौतमस्य सकाशात् समीपात् विधिवत् परमां पूजां प्राप्य रामोऽपि ततः मिथिलोपवनान्मिथिलां जगाम ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

गो० टी०–रामोऽपीति । ततः तस्मादेशात् ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१–२] ति० टी०–प्रागुत्तरामैशानीम् । ततो गौतमाश्रमात् ॥ १ ॥ २ ॥

रा० टी०–मिथिलोपवनाद्गमनानन्तरकालिकं वृत्तमाह–तत इत्यादिभिः । ततः गौतमाश्रमात् प्रागुत्तरामैशानीं दिशं गत्वा सौमित्रिणा सह रामः विश्वामित्रं पुरस्कृत्य यज्ञवाटं जनकयज्ञशालामुपागमत् ॥ १ ॥

गो० टी०–एवं रामस्य परमपावनत्वमुक्तम् । अथ तस्य सीताविवाहवृत्तान्तं प्रस्तौति श्रियः पतित्वं प्रतिपादयितुं पञ्चाशे–ततः प्रागित्यादि । प्राच्या उत्तरस्याश्च दिशोऽन्तराल यत्सा प्रागुत्तरा तामैशानीं दिशमित्यर्थः । ततः तस्मादाश्रमाद् यज्ञवाटं जनकस्येति शेषः ॥ १ ॥

रा० टी०–राम इति । सहलक्ष्मणो रामः मुनिशार्दुलं विश्वामित्रमुवाच तुशब्देनान्येऽपि तत्पार्श्ववर्तिनः मुनय ऊचुः । तद्वचनमेवाह–महात्मनः जनकस्य इय यज्ञसमृद्धिः साध्वी । हि शब्दः इयमित्यर्थे ॥ २ ॥

गो० टी०–रामस्त्विति । यज्ञसमृद्धिः यज्ञसंभारसामग्री २

३] ति० टी०–बहूनीति । दृश्यन्त इति शेषः ॥ ३ ॥

रा० टी०–साध्वीत्यमेव बोधयन्नाह–बहूनीति । हे महाभाग ! वेदाध्ययनशालिनां नानादेशनिवासिनां ब्राह्मणानां बहूनि सहस्राणि शकटीशतसंकुलाः बहुशकटीव्याप्ताः ऋषिवाटाः ऋषिनिवासस्थानानि चेह दृश्यन्ते अतः हे ब्रह्मन् यत्र वयं वत्स्यामहे स देशः विधीयतां बोध्यताम् । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–तामेवाह–बहूनीति । ब्राह्मणानां सहस्राणीत्यन्वयः । दृश्यन्त इति वक्ष्यमाणमनुषज्यते ॥ ३ ॥

४] ति० टी०–शकटीशतमग्निहोत्रसंभारवाहकम् । ऋषिवाटा यज्ञार्थमागतानां साग्निहोत्रऋषीणां निवासाः । एवं नैवि-

---

१ ह्रीति गो. रा. पाठः । २ महायशा इति रा. पाठः । ३ महात्मन इति रा. पाठः ।

रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः । निवासमकरोद्देशे विविक्ते सलिलान्विते ॥ ५ ॥
विश्वामित्रमनुप्राप्तं श्रुत्वा नृपवरस्तदा । शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितः ॥ ६ ॥
ऋत्विजोऽपि महात्मानस्त्वर्घ्यमादाय सत्वरम् । प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ ७ ॥
विश्वामित्राय धर्मेण ददौ धर्मपुरस्कृतम् । प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ॥ ८ ॥
पप्रच्छ कुशलं राज्ञो यज्ञस्य च निरामयम् । स तांश्चार्थं मुनीन्पृष्ट्वा सोपाध्यायपुरोधसः ॥ ९ ॥
यथार्हमृषिभिः सर्वैः समागच्छत्प्रहृष्टवत् । अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ॥ १० ॥
आसने भगवानास्तां सहैभिर्मुनिपुङ्गवैः । जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥ ११ ॥
पुरोधा ऋत्विजश्चैव राजा च सहमन्त्रिभिः । आसनेषु यथान्यायमुपविष्टाः समन्ततः ॥ १२ ॥

ध्यात्स्वावासदेशविचारः। देश इत्यादि देशो निवासस्थानम्। विधीयतां विचार्यताम् ॥ ४ ॥

गो० टी०–ऋषीति । ऋषिवाटाः ऋषिनिवासाः विधीयतां कल्प्यतां बहुसंकुलत्वेनैवमुक्तम् ॥ ४ ॥

५-६] **ति० टी०**–विविक्ते सलिलान्वित इत्यनेनानुष्ठानसौकर्यम् ॥ ५ ॥ ६ ॥

रा० टी०–**रामस्येति**। महामुनिर्विश्वामित्रः रामस्य वचनं श्रुत्वा विविक्ते जनरहिते सलिलान्विते जलसमीपे देशे निवासमकरोत् ॥ ५ ॥

गो० टी०–**रामस्येति**। विविक्ते विजने पूते वा 'विविक्तौ पूतविजनौ' इत्यमरः । आयुते युक्ते यौतेर्मिश्रणार्थात् क्तः ॥ ५ ॥

रा० टी०–**विश्वामित्रमिति** । तदा विविक्तदेशनिवासोत्तरकाले अनुप्राप्तं विश्वामित्रं श्रुत्वा विनयेन समन्वितः स नृपतिर्जनकः अनिन्दितं पुरोहितं शतानन्दं पुरस्कृत्य सहसा प्रत्युज्जगाम । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०–**विश्वामित्रमिति** सार्धश्लोकः । प्रत्युज्जगाम दीक्षितविमितप्रदेशसीमनामनतिलङ्घयन्नित्यर्थः ॥ ६ ॥

७] ति० टी०–ऋत्विजोऽपीत्यत्र पुरस्कृत्येत्यनुकर्षः॥७॥

रा० टी०–**ऋत्विज इति** । सत्वराः त्वरायुक्ता महात्मानः ऋत्विजः धर्मेण धर्मोत्पादकविधिना मन्त्रपुरस्कृतमर्घ्यमादाय ग्राहयित्वा ददुर्जनकेन दापयामासुः । किंच ऋत्विजः अपिशब्देन जनकः अर्घ्यं गृहीत्वा ददुः ॥ ७ ॥

गो० टी०–**ऋत्विज इति** । अर्घ्यमित्यातिथ्यस्योपलक्षणं मन्त्रपुरस्कृतमित्यनेन मधुपर्ककरणमुच्यते ॥ ७ ॥

८] ति० टी०–धर्मेण शास्त्रमार्गेण ददौ अर्घ्यमिति शेषः । धर्मपुरस्कृतमित्यर्घ्यविशेषणम् ' महाजं वा महोक्षं वा श्रोत्रियायोपकल्पयेत् ' इति शास्त्रोक्तेन धर्मसाधनेन पुरस्कृतम् तत्सहितमिति यावत् ॥ ८ ॥

रा० टी०–**प्रतीति** । महात्मनः जनकस्य तां पूजां प्रतिगृह्य तुशब्देन ऋत्विजां पूजां प्रतिगृह्य राज्ञः कुशलं राष्ट्राद्युपद्रवराहित्यं यज्ञस्य निरामयं विघ्नराहित्यं च पप्रच्छ ॥ ८ ॥

गो० टी०–**प्रतिगृह्येति** । निरामयं निरुपप्लवत्वम् ॥ ८ ॥

९] ति० टी०–राज्ञः कुशलं निरामयं यज्ञस्य निरामयं कुशलं निर्विघ्नत्वमविकलत्वं वा । स विश्वामित्रस्तानर्घ्यदातॄन्पृष्ट्वा कुशलमिति शेषः ॥ ९ ॥

रा० टी०–**स इति** । अथ राजकुशलप्रश्नानन्तरं स विश्वामित्रः सोपाध्यायपुरोधसः तान्मुनीन् पृष्ट्वा कुशलमिति शेषः । प्रहृष्टवत् यथा स्यात्तथा सर्वैः ऋषिभिः सार्धं यथार्हं यथायोग्यं समागच्छत् आलिङ्गनमकरोत् ॥ ९ ॥

गो० टी०–**स इति** । तान् अर्घ्यदातॄन् सोपाध्यायपुरोधसः उपाध्याया ऋत्विजः पुरोधाः शतानन्दः तत्सहितांस्तान् कुशलं पृष्ट्वेत्यर्थः । सर्वैर्जनैः शतानन्दऋत्विगादिभिः प्रहृष्टवत् सहर्षमित्यर्थः । भावे निष्ठा यथान्यायं यथाक्रमं पृष्ट्वेत्यर्थः ॥ ९ ॥

१०-१२] ति० टी०–यथार्हं यथान्यायम् । प्रहृष्टवत्प्रहर्षवत् तोषसहितं यथा भवति तथेत्यर्थः । समागच्छत्संतोषसहितमालिङ्गनं यथा भवति तथा सर्वैः संगतो बभूवेत्यर्थः ॥ १०-१२ ॥

रा० टी०–**अथेति** । अथ कुशलप्रश्नानन्तरं मुनिश्रेष्ठं विश्वामित्रं कृताञ्जलिः प्रणयसूचकबद्धयुगलकरः राजा जनकः अभाषत । तद्भाषणमेवाह–हे भगवन् ! एभिः मुनिसत्तमैः सह आसने आस्ताम् ॥ १० ॥

गो० टी०–**अथेति** ॥ १० ॥

रा० टी०–**जनकस्येति** । महामुनिः विश्वामित्रः जनकस्य वचः श्रुत्वा निषसाद आसने इति शेषः । अर्धमेकान्वयि । पुरोधाः शतानन्दः ऋत्विजश्च मन्त्रिभिः सह राजा जनकश्च यथान्यायं समंततः विश्वामित्रस्य चतुर्दिक्षु एव आसनेषु उपविष्टाः अभवन्निति शेषः । नृपतिः स राजा जनकः तत्र तस्मिन् समाजे विश्वामित्रं दृष्ट्वा अब्रवीत् ॥ ११ ॥ १२ ॥

गो० टी०–**जनकस्येति** । राजा चेति विश्वामित्रवचनादित्यर्थसिद्धम् ॥ ११ ॥

१ निवेशमिति गो. पाठः । २ सलिलायुते इति गो. पाठः । ३ स नृपतिरिति गो. रा. पाठः । ४ अनिन्दितमिति गो. रा. पाठः । ५ अस्य पूर्वार्धपरार्धयोर्व्यत्यासः गो.रा. पुस्तकयोः । ६ सत्वरा इति रा. पाठः । ७ ददुर्मन्त्रपुरस्कृतमिति रा. पाठः । ८ अपीति गो. पाठः । ९ यथान्यायं तत इति गो. पाठः । १० सत्तमैरिति गो. रा. पाठः । ११ उपविष्टानिति गो. पाठः ।

दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् । अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥ १३ ॥
अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्मया । धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगवः ॥ १४ ॥
यज्ञोपसदनं ब्रह्मन्प्राप्तोऽसि मुनिभिः सह । द्वादशाहं तु ब्रह्मर्षे दीक्षामाहुर्मनीषिणः ॥ १५ ॥
ततो भागार्थिनो देवान्द्रष्टुमर्हसि कौशिक । इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा ॥ १६ ॥
पुनस्तं परिपप्रच्छ प्राञ्जलिः प्रयतो नृपः । इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ १७ ॥
गजतुल्यगती वीरौ शार्दूलवृषभोपमौ । [पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ॥]
अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ ॥ १८ ॥
यदृच्छयेव गां प्राप्तौ देवलोकादिवामरौ । कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ॥ १९ ॥
वरायुधधरौ वीरौ कस्य पुत्रौ महामुने । भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरम् ॥ २० ॥
परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः । काकपक्षधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः ॥ २१ ॥
तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः । न्यवेदयदमेयात्मा पुत्रौ दशरथस्य तौ ॥ २२ ॥

गो० टी०–आसनेष्विति । उपविष्टान् तानिति शेषः ॥१२॥

१३–१४] ति० टी०–यज्ञसमृद्धिरङ्गवैकल्यराहित्यं साङ्गत्यं च । अत एव सफला कृता इष्टिरिति शेषः ॥१३॥१४॥

रा० टी०–तद्वचनमेवाह–अद्येत्यादिश्लोकत्रयेण । मे मम यज्ञसमृद्धिः दैवतैः सफला फलसहिता अद्य कृता । ननु तत्फलं कदा प्राप्स्यसीत्यत आह–मया अद्यैव भगवद्दर्शनात् यज्ञफलं प्राप्तं सर्वं वाक्यं सावधारणं भवतीतिन्यायेन एवकारलाभः एतेन स्वेप्सितयज्ञफलप्राप्तेरतिसांनिध्यं बोधितम् तेन तत्फलप्रापकशकुनविशेषो जात इति ध्वनितम् ॥ १३ ॥

गो० टी०–अद्येति । यज्ञसमृद्धिः समग्रता जातेति शेषः । सा दैवतैः सफला कृता च । तिष्ठतु यज्ञः भवद्दर्शनमेव यज्ञफलमित्याह–अद्य यज्ञफलमिति ॥ १३ ॥

रा० टी०–धन्य इति । हे मुनिपुंगव हे ब्रह्मन् ! यस्य मे यज्ञोपसदनं यज्ञशालासमीपं मुनिभिः सह त्वं प्राप्तोऽसि सोऽहं धन्योऽस्मि । तत्र हेतुः यतः अनुगृहीतोऽस्मि अनुग्रहमन्तरा अत्रागमनं न स्यादिति भावः ॥ १४ ॥

गो० टी०–धन्य इति ॥ १४ ॥

१५] ति० टी०–तत्र हेतुमाह–यज्ञोपसदनमिति । यज्ञस्थानम् । द्वादशाहं द्वादशदिनानि । दीक्षां कर्तव्यत्वेनाहुः । दीक्षायास्तावन्ति दिनान्यवशिष्टानि ऋत्विज आहुः ॥ १५ ॥

रा० टी०–द्वादशाहमिति । हे ब्रह्मर्षे ! मनीषिणः ऋत्विजः यज्ञस्य द्वादशाहं द्वादशदिनानि एव शेषमाहुस्ततस्तस्माद्धेतोः हे कौशिक ! भागार्थिनो देवान् द्रष्टुं त्वमर्हसि । तुशब्द एवार्थे ॥ १५ ॥

गो० टी०–द्वादशेति । द्वादश अहानि समाहृतानि द्वादशाहं "राजाहःसखिभ्यष्टच्" इति टच् "न संख्यादेः–" इत्यह्नादेशाभावः । द्वादश दिनान्यवशिष्टानि यज्ञस्येति मनीषिणो ऋत्विज आहुः ततः भागार्थिनो देवानिति द्वादशदिनान्ते सुत्याहोमो भविष्यतीत्यर्थः ॥ १५ ॥

१६] ति० टी०–विश्वामित्रस्य योगेन सर्वसामर्थ्यादाह–देवान्द्रष्टुमर्हसीति ॥ १६ ॥

रा० टी०–इतीति । प्रहृष्टवदनः प्राञ्जलिः प्रयतः नृपो जनकस्तदा स्थितिकाले मुनिशार्दूलं तं विश्वामित्रमिति वचनमुक्त्वा पुनः परिपप्रच्छ ॥ १६ ॥

गो० टी०–इतीति । प्रहृष्टेति कुतूहलविशेषः सूच्यते ॥१६॥

१७–१८] ति० टी०–इमौ कुमारावित्यादि व्याख्यातप्रायम् ॥ १७ ॥ १८ ॥

रा० टी०–तत्प्रश्नमेवाह–इमावित्यादिश्लोकचतुष्टयेन । एवमानुपूर्वीका इमे चत्वारः श्लोकाः अष्टचत्वारिंशे सर्गे सुमतिप्रश्ने पूर्वमप्युक्तास्ते तत्रैव व्याख्याता अतो अत्र न व्याख्यायन्ते–इमाविति ॥ १७ ॥

गो० टी०–इमावित्यादिश्लोकपञ्चकं व्याख्यातम् ॥ १७ ॥ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

१९–२१] ति० टी०–पद्भ्यां वाहनरहिताभ्याम् । पद्मपत्रकोमलत्वात्कथमेतदूरं प्राप्ताविति विस्मयः किमर्थमिति प्रयोजनप्रश्नः । कस्य वेति पुत्राविति शेषः । उत्तरश्लोको यदि प्रमाणं तर्ह्यस्यैव विवरणं बोध्यम् । केचित्तु कस्येत्यस्य पुरुषस्य कार्यं साधयितुमिति शेषमाहुः, तत्प्रयोजनप्रश्नेनैव गतार्थम् ॥ १९–२१ ॥

रा० टी०–यदृच्छयेति ॥ १८ ॥

रा० टी०–वरेति ॥ १९ ॥

रा० टी०–परस्परेति ॥ २० ॥

२२] ति० टी०–'निवेदयत्' इति पाठेऽडभाव आर्षः ॥२२॥

रा० टी०–तस्येति । महात्मनस्तस्य जनकस्य तत् राम-

१ शेषमाहुरिति गो. रा. पाठः । २ वदन इति गो. रा. पाठः । ३ अर्धमिदं रा. नास्ति । ४ सिंहगती इति गो. पाठः । ५ इत्यर्धमधिकं गो. पाठे । ६ एवेति गो. रा. पाठः । ७ महात्मानाविति गो. रा. पाठः ।

सिद्धाश्रमनिवासं च राक्षसानां वधं तथा । तत्रागमनमव्यग्रं विशालायाश्च दर्शनम् ॥ २३ ॥
अहल्यादर्शनं चैव गौतमेन समागमम् । महाधनुषि जिज्ञासां कर्तुमागमनं तथा ॥ २४ ॥
एतत्सर्वं महातेजा जनकाय महात्मने । निवेद्य विरराम अथ विश्वामित्रो महामुनिः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चाशः सर्गः ॥ ९० ॥

एकपञ्चाशः सर्गः ।

शतानन्देन पृष्टे सति विश्वामित्रोऽहल्योद्धारं तस्याश्च गौतमेन समागमं ताभ्यां च कृतं रामपूजनाद्यकथयत्, शतानन्दो रामं प्रति विश्वामित्रचरितं वर्णयितुमारभते, तत्प्रस्तावे कदाचिद्विश्वामित्रस्य वसिष्ठाश्रमं प्रत्यभिगमनवर्णनम् ।

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः । हृष्टरोमा महातेजाः शतनन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः । रामसंदर्शनादेव परं विस्मयमागतः ॥ २ ॥
एतौ निषण्णौ संप्रेक्ष्य शतानन्दो नृपात्मजौ । सुखासीनौ मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥ ३ ॥
अपि ते मुनिशार्दूल मम माता यशस्विनी । दर्शिता राजपुत्राय तपोदीर्घमुपागता ॥ ४ ॥

लक्ष्मणप्रश्नविषयकं वचनं श्रुत्वा महात्मानौ ईश्वरैरपि पूजितस्वरूपौ तौ प्रकटितौ दशरथस्य पुत्रौ न्यवेदयत् ॥ २१ ॥

गो० टी०–तस्येति । तौ दशरथस्य पुत्राविति न्यवेदयदित्यर्थः ॥ २२ ॥

२३–२५] **ति० टी०**–तत्राव्ययमागमनं रक्षःसमाक्रान्तेऽपि मार्गे भयरहितमागमनम् महाधनुषि जिज्ञासां तद्विषयां रामस्य दिदृक्षाम् ज्ञानमिह दर्शनरूपम् यद्वा धनुर्निष्ठसारजिज्ञासाम् । तथादृष्टस्य तस्य सज्जीकरणादिकं च कर्तुमागमनमित्येतत्सर्वं निवेद्य । 'विरराम तदा' इति पाठेऽर्थश्चिन्त्यः॥२३–२५॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०–सिद्धेति । आगमनमयोध्यातः सिद्धाश्रमप्राप्तिं सिद्धाश्रमनिवासं च तथा तत्र राक्षसानां वधमव्ययं यथा स्यात्तथा विशालायाः दर्शनं च ॥ २२ ॥ अहल्यादर्शनं गौतमेन समागमं च महाधनुषि जिज्ञासां तत्त्वनिश्चयं कर्तुमागमनं च न्यवेदयत् इत्यनुकर्षः । एवतथाशब्दौ चार्थौ । श्लोकद्वयमेकान्वयि ॥२३॥ उपसंहरन्नाह–एतदिति । महातेजाः महामुनिः विश्वामित्रः महात्मने जनकाय अथ मङ्गलं यथा स्यात्तथा एतत्सर्वं निवेद्य विरराम ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

गो० टी०–सिद्धेत्यादित्रयः । अव्ययं रक्षःसहस्राढ्ते मार्गे निर्भयागमनं जिज्ञासां सारासारपरीक्षाम् ॥ २३–२५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

१] **ति० टी०**–तस्येति । हृष्टरोमा स्वमातुः शापोद्धारश्रवणजसंतोषेण जातरोमाञ्चः ॥ १ ॥

२] **ति० टी०**–परं विस्मयमिति भगवद्दर्शनस्यान्यासुलभत्वात् ॥ २ ॥

रा० टी०–विश्वामित्रवचनश्रवणानन्तरकालिकं वृत्तमाह–तस्येति । धीमतस्तस्य प्रसिद्धस्य विश्वामित्रस्य तन्मातृशापोद्धारविषयकं वचनं श्रुत्वा हृष्टरोमा पुलकिताङ्गः महातेजाः अतिप्रतापः महातपाः अत एव तपसा द्योतितप्रभः तपःकरणकोद्भूतप्रभाविशिष्टः गौतमस्य ज्येष्ठः सुतः रामसंदर्शनादेव परं विस्मयमागतः प्राप्तः आसीदिति शेषः । एतेन रघुनाथशरीरशोभादेः लौकिकविलक्षणत्वं ध्वनितम् । द्वयोरेकत्रान्वयः ॥ १ ॥ २ ॥

गो० टी०–अथाचार्यवैभवस्य ज्ञेयत्वाभिप्रायेण विश्वामित्रचरित्रं प्रस्तौति–तस्य तद्वचनमित्यादिभिः पञ्चदशभिः सर्गैः। तस्येत्यादिद्वौ । हृष्टरोमा संजातरोमाञ्चः विस्मयमागतः अहो महिमा रामस्य यन्मे माता कृतार्थीकृतेति विस्मयं प्राप्तोऽभूदित्यर्थः ॥ १ ॥ २ ॥

३] **ति० टी०**–निषण्णावासने ॥ ३ ॥

रा० टी०–स इति । अथ विस्मयप्राप्त्यनन्तरं स शतानन्दः निषण्णौ आसने उपविष्टौ अत एव सुखासीनौ सुखं स्थितौ नृपात्मजौ तौ रामलक्ष्मणौ संप्रेक्ष्य मुनिश्रेष्ठं विश्वामित्रमब्रवीत् ॥ ३ ॥

गो० टी०–स इति । निषण्णावित्यस्य विवरणं सुखासीनाविति ॥ ३ ॥

४] **ति० टी०**–उक्तमप्यर्थमुत्कण्ठातिशयेन पुनः पृच्छति दार्ढ्याय–अपि ते इति । अपिः प्रश्ने ते त्वया ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–अपीति । हे मुनिशार्दूल! दीर्घं तपः उपागता यशस्विनी प्रशस्तयशोविशिष्टा मम माता ते तव राजपुत्राय दर्शिता । अपि ते इति संबन्धसामान्ये षष्ठी । अपिः प्रश्ने । यशस्विनी इत्यनेन पतिवेषोऽपि नानादरणीयः

---

१ तच्चागमनमिति गो. पाठः । २ स ताविति गो. रा. पाठः ।

अपि रामे महातेजा मम माता यशस्विनी । वन्यैरुपाहरत्पूजां पूजार्हे सर्वदेहिनाम् ॥ ५ ॥
अपि रामाय कथितं यद्वृत्तं तत्पुरातनम् । मम मातुर्महातेजो देवेन दुरनुष्ठितम् ॥ ६ ॥
अपि कौशिक भद्रं ते गुरुणा मम संगता । मम माता मुनिश्रेष्ठ रामसंदर्शनादितः ॥ ७ ॥
अपि मे गुरुणा रामः पूजितः कुशिकात्मज । इहागतो महातेजाः पूजां प्राप्य महात्मनः ॥ ८ ॥
अपि शान्तेन मनसा गुरुर्मे कुशिकात्मज । इहागतेन रामेण पूजितेनाभिवादितः ॥ ९ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रो महामुनिः । प्रत्युवाच शतानन्दं वाक्यज्ञो वाक्यकोविदम् ॥ १० ॥
नातिक्रान्तं मुनिश्रेष्ठ यत्कर्तव्यं कृतं मया । संगता मुनिना पत्नी भार्गवेणेव रेणुका ॥ ११ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः । शतानन्दो महातेजा रामं वचनमब्रवीत् ॥ १२ ॥

इति बुद्धैयेव इन्द्रस्वीकारः कृतः इति ध्वनितं तेन तस्याः पतिव्रताग्रणीत्वं व्यक्तम् ॥ ४ ॥

गो० टी०–स्वमातरि रामकृतानुग्रहस्य श्रुतस्य विस्मयावहतया पुनः पृच्छति–अपीत्यादि । अपिः प्रश्ने ते त्वया दीर्घं तप उपागता पूर्वोक्तभस्मशायित्वादिलक्षणं तपः प्राप्ता अनेन पापाणीभूय स्थितेति पक्षो न वाल्मीकेः ॥ ४ ॥

५] **ति०टी०**–रामे रामविषयेपूजार्हे इति रामविशेषणम् ५॥

रा० टी०–अपीति । हे महातेजः । यशस्विनी मम माता सर्वदेहिनां पूजार्हे रामे वन्यैः वनोद्भवैः पुष्पफलाद्यैः पूजामुपाहरदपि ॥ ५ ॥

गो० टी०–अपीति । रामे रामविषये वन्यैः कन्दमूलफलादिभिः अनेन पूर्वमपि वन्यैरेतस्या जीवनमिति गम्यते सर्वदेहिनां पूजार्हे इत्यनेन परत्वं व्यञ्जितम् ॥ ५ ॥

६] **ति० टी०**–देवेनेन्द्रेण दुरनुष्ठितं गौतमवेषधारणपूर्वकं तत्कर्तृकदुरनुष्ठानरूपं मातुर्यद्वृत्तं चरितं पुरातनं तद्रामाय कथितमित्यन्वयः । महातेज इति विश्वामित्रसंबोधनम् ॥ ६ ॥

रा० टी०–अपि रामायेति । हे महातेजः ! देवेन इन्द्रेण मम मातुः यद्वृत्तमनायनुष्ठितं कृतं तत्पुरातनं वृत्तं रामाय यथावत्कथितमपि ॥ ६ ॥

गो० टी०–अपीति । हे महातेजः विश्वामित्र ! मम मातुर्विषये देवेन इन्द्रेण विधिना वा दुरनुष्ठितं दुरनुष्ठानरूपं पुरातनं वृत्तं चरितं यथा यथावत् कथितं चापि कथितं किम्॥६॥

७] **ति० टी०**–मम गुरुणा मम मातेत्यन्वयः । अत्र वारद्वयं ममेति प्रयोगो हर्षातिशयात् । रामसंदर्शनादित इतस्य गतशापेति शेषः । आदिना पूजापादस्पर्शौ ॥ ७ ॥

रा० टी०–अपि कौशिकेति । हे कौशिक हे मुनिश्रेष्ठ ! इतः अस्मात् रामसंदर्शनात् मम माता मम गुरुणा पित्रा सह संगता अपि ते भद्रं वृत्तं त्वं शीघ्रमेव ब्रूहीति भावः ॥ ७ ॥

गो० टी०–अपीति । गुरुणा पित्रा इतः अस्मादुपस्थितादामसंदर्शनात् यद्वा रामसंदर्शनादितः रामसंदर्शनादिना तृतीयार्थे तसिः पूजा अपिशब्दार्थः ॥ ७ ॥

८] **ति० टी०**–महातेजा रामो मदुरोः सकाशात्पूजां प्राप्येह यज्ञभूमावागत इति पृष्टस्यैवार्थस्य भङ्ग्यन्तरेण प्रश्नः॥८॥

रा० टी०–अपि मे इति । हे कुशिकात्मज विश्वामित्र ! महात्मनः रामस्य पूजां रामकर्तृकाहल्यालाभरूपसत्कृतिं प्राप्य मे गुरुणा पित्रा इह मिथिलोपवने आगतो महातेजाः रामः पूजितोऽपि ॥ ८ ॥

गो० टी०–अपीति । इहास्मदाश्रमे आगतः महातेजा गुरुः महात्मनः रामात् पूजामहल्यालाभरूपामपि प्राप्तः ॥ ८ ॥

९–१०] **ति० टी०**–शान्तेन मनसोपलक्षितो मे गुरुरिहागतेन गौतमाश्रम आगतेन गौतमपूजितेन रामेणाभिवादितः । न तु मन्मातृदोषात्तिरस्कृत इति प्रभान्तरम् । पूजाङ्गीकारवन्दने अतिरस्कारचिह्नमिति भावः ॥ ९ ॥ १० ॥

रा० टी०–अपि शान्तेनेति । हे कुशिकात्मज ! इह मिथिलोपवने आगतेन प्रयतेन यतचित्तेन रामेण शान्तेन मनसा उपलक्षितो मे गुरुः पिता अभिवादितोऽपि । 'पूजितेनाभिवादितम्' इति भाट्टपाठः ॥ ९ ॥

गो० टी०–अपीति । शान्तेन कोपरहितेन मनसोपलक्षितो गुरुः इहास्मदाश्रमे आगतेन प्रयतेन मनःसत्किरूपयत्नवता रामेण अभिवादितः किम् ॥ ९ ॥

रा० टी०–तदिति । तस्य शतानन्दस्य तत् प्रश्नरूपं वचनं श्रुत्वा वाक्यज्ञः महामुनिः विश्वामित्रः वाक्यकोविदं शतानन्द प्रत्युवाच ॥ १० ॥

गो० टी०–तच्छ्रुत्वेति ॥ १० ॥

११–१२] **ति० टी०**–यत्कर्तव्यं तन्नातिक्रान्तं न विस्मृतम् किंतु मया कृतमेवेत्यर्थः । भार्गवो जमदग्निस्तत्कोपहता रेणुका परशुराममाता यथा जमदग्निना संगता तद्वदित्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–विश्वामित्रप्रतिवचनमेवाह–नेति । हे मुनिश्रेष्ठ शतानन्द ! यत् कर्तव्यं भवन्मातृविषयकशापनिवारणादौ यत् करणीयं तत् मया कृतं अतिक्रान्तं विस्मृतं न एतेन सर्वस्य शतानन्दपृष्टस्योत्तरं दत्तमिति ध्वनितम् । तत्र किंचित् स्पष्टत आह भार्गवेण जमदग्निना रेणुका परशुरामेणेव मुनिना गौतमेन पत्नी तद्भार्या स्वन्माता संगता मिलिता ॥ ११ ॥

१ यथावृत्तमिति गो. रा. पाठः । २ प्राप्त इति गो. पाठः । ३ प्रयतेनेति गो. रा. पाठः ।

स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव । विश्वामित्रं पुरस्कृत्य महर्षिमपराजितम् ॥ १३ ॥
अचिन्त्यकर्मा तपसा ब्रह्मर्षिरमितप्रभः । विश्वामित्रो महातेजा वेद्यैनं परमां गतिम् ॥ १४ ॥
नास्ति धन्यतरो राम त्वत्तोऽन्यो भुवि कश्चन । गोप्ता कुशिकपुत्रस्ते येन तप्तं महत्तपः ॥ १५ ॥
श्रूयतां[3] चाभिधास्यामि कौशिकस्य महात्मनः । यथावलं यथातत्त्वं[4] तन्मे निगदतः शृणु ॥ १६ ॥
राजासीदेष धर्मात्मा दीर्घकालमरिंदमः । धर्मज्ञः कृतविद्यश्च प्रजानां च हिते रतः ॥ १७ ॥
प्रजापतिसुतस्त्वासीत्कुशो नाम महीपतिः । कुशस्य पुत्रो बलवान्कुशनाभः सुधार्मिकः ॥ १८ ॥
कुशनाभसुतस्त्वासीद्गाधिरित्येव विश्रुतः । गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
विश्वामित्रो महातेजाः पालयामास मेदिनीम् । बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ २० ॥

गो० टी०–नेति । नातिक्रान्तं मया समयातिक्रमो न कृतः समये यत्कर्तव्यं तत्कृतम् । तदेवाह–संगतेति । नातिक्रान्तमित्यस्य विवरणं यत्कर्तव्यमिति तस्य विवरणं संगतेति भार्गवेण जमदग्निना रेणुका परशुराममातेवेति भावः ॥ ११ ॥

रा० टी०–विश्वामित्रवचःश्रवणानन्तरकालिकं वृत्तमाह–तदिति । धीमतस्तस्य प्रसिद्धस्य विश्वामित्रस्य तत् मातृवृत्तसंबन्धि वचनं श्रुत्वा महातेजाः शतानन्दः रामं वचनमब्रवीत्[1] २

गो० टी०–तदिति ॥ १२ ॥

१३] ति० टी०–दिष्ट्या भाग्येन ॥ १३ ॥

रा० टी०–शतानन्दवचनमेवाह–स्वागतमिति । हे नरश्रेष्ठ ! हे राघव ! अपराजितं पराजेतुमशक्यं महर्षिं विश्वामित्रं पुरस्कृत्य त्वं प्राप्तोऽसि तत् ते तव स्वागतमतिशोभनमागमनं तदित्यध्याहृतम् ॥ १३ ॥

गो० टी०–स्वागतमिति । दिष्ट्या दैवयोगेन ॥ १३ ॥

१४] ति० टी०–विश्वामित्रयत्नत एव तेन सह प्राप्तिस्तत एव च मातुः शापोद्धार इति तं स्तौति–अचिन्त्येत्यादिना । मनसाप्यन्येनाशक्यचिन्तनप्रतिसृष्ट्यादिकर्ता । परमां गतिं जगतः परमहितप्रदम् । अन्ये तव मम चेत्याहुः ॥ १४ ॥

रा० टी०–विश्वामित्रं प्रशंसन् आह–अचिन्त्येत्यादिभिः । अचिन्त्यकर्मा अतर्क्यकर्मकारी तपसा ब्रह्मर्षिस्तपःप्राप्तब्रह्मर्षित्वविशिष्टः अत एव अतुलप्रभः तुलारहितप्रभाविशिष्टः महातेजाः अतिप्रतापः यः अयं विश्वामित्रः तमेनं परमामतिशोभनां गतिं भवदागमनहेतुमहं वेद्मि ॥ १४ ॥

गो० टी०–विश्वामित्रं स्तौति–अचिन्त्येत्यादि । तपसा–ब्रह्मर्षिस्तपसा प्राप्तब्रह्मर्षिभावः परमां गतिं तव परमहितप्रदं वेत्सीत्यत्र काकुरनुसंधेया ॥ १४ ॥

१५] ति० टी०–गोप्ताऽस्त्रदानादिना ॥ १५ ॥

रा० टी०–नेति । हे राम ! येन महत्तपस्तप्तं स कुशिकपुत्रः यस्य ते तव गोप्ता रक्षकः तस्मात्त्वत्तः अन्यो धन्यतरः भुवि त्रिलोक्यां कश्चन नास्तीति श्रूयतामित्युत्तरेणान्वयः ॥ १५ ॥

गो० टी०–एतदेवाह–नास्तीति । धन्यत्वे हेतुः गोप्तेति येन कुशिकपुत्रेण ॥ १५ ॥

१६–१७] ति० टी०–बलं तपोबलम् यथा यादृशम् । तत्त्वं ब्रह्मर्षित्वं च यथा तच्छृण्वित्यर्थः । 'वृत्तम्' इति क्वचित्पाठः । वृत्तं चरितम् ॥ १६ ॥ १७ ॥

रा० टी०–ननु कुतः एवं महत्त्वं विश्वामित्रस्येत्यत आह–महात्मनः कौशिकस्य बलं तपोबलं यथावृत्तं प्रवृत्तं तथा अहमभिधास्यामि त्वं निगदतः मे यथावच्छृणु ॥ १६ ॥

गो० टी०–श्रूयतामिति । बलं तपोबलं यथा यादृशं वृत्तं चरित्रं च यथा यादृशं तथा तत्सर्वं मे मत्तः शृणु ॥ १६ ॥

रा० टी०–तदुक्तिमेवाह–राजेति । धर्मात्मा विहितधर्माचरणशीलः अरिन्दमः शत्रुसूदनः धर्मज्ञः निखिलधर्मविज्ञाता । तत्र हेतुः कृतविद्यः कृता उपार्जिता विद्या येन अत एव प्रजानां हिते एव रतः एष विश्वामित्रः दीर्घकालं राजाभूत् । चशब्द एवार्थे द्वितीयश्चशब्दः हेत्वर्थे ॥ १७ ॥

गो० टी०–राजेति ॥ १७ ॥

१८–१९] ति० टी०–स राजा कस्य पुत्रस्तत्राह–प्रजापतीत्यादि ॥ १८ ॥ १९ ॥

रा० टी०–तत्प्राशस्त्यं बोधयितुं तत्पूर्वजान् क्रमशो निर्दिशन्नाह–प्रजेति । कुशो नाम महीपतिः प्रजापतिसुत आसीत् अनन्तरं बलवान् सुधार्मिकः कुशस्य पुत्रः कुशनाभ आसीत् । तुशब्दोऽनन्तरार्थकः ॥ १८ ॥

गो० टी०–कस्य राज्ञः पुत्र इत्यत्राह–प्रजापतीत्यादिश्लोकत्रयम् । पालयामासेत्यस्य विवरणं बह्विति ॥ १८–२० ॥

रा० टी०–कुशेति । गाधिरित्येव नाम्ना विश्रुतः प्रख्यातः कुशनाभसुत आसीत् अनन्तरं महातेजा महामुनिर्गाधिपुत्रः विश्वामित्र आसीत् तुशब्दोऽनन्तरार्थकः ॥ १९ ॥

२०] ति० टी०–अकारयत् स्वार्थेणिः ॥ २० ॥

रा० टी०–विश्वामित्र इति । महातेजाः विश्वामित्रः मेदिनीं पालयामास युवराजावस्थायामेवेत्यर्थः । युवराजावस्था-

१ अतुलेति गो. रा. पाठः । २ वेत्सीति गो. पाठः । ३ श्रूयतामभिधास्यामीति गो.रा. पाठः । ४ यथावृत्तमिति गो. रा. पाठः । ५ अभूदिति गो. रा. पाठः ।

कदाचित्तु महातेजा योजयित्वा वरूथिनीम् । अक्षौहिणीपरिवृतः परिचक्राम मेदिनीम् ॥ २१ ॥
नगराणि च राष्ट्राणि सरितश्च महागिरीन् । आश्रमान्क्रमशो राजा विचरन्नाजगाम ह ॥ २२ ॥
वसिष्ठस्याश्रमपदं नानापुष्पलतादुमम् । नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥ २३ ॥
देवदानवगन्धर्वैः किन्नरैरुपशोभितम् । प्रशान्तहरिणाकीर्णं द्विजसंघनिषेवितम् ॥ २४ ॥
ब्रह्मर्षिगणसंकीर्णं देवर्षिगणसेवितम् । तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ॥ २५ ॥
सेवितं संकुलं श्रीमद्ब्रह्मकल्पैर्महात्मभिः । अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ॥ २६ ॥
फलमूलाशनैर्दान्तैर्जितदोषैर्जितेन्द्रियैः । ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः ॥ २७ ॥
अन्यैर्वैखानसैश्चैव समन्तादुपशोभितम् । वसिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरम् ॥
ददर्श जयतां श्रेष्ठो विश्वामित्रो महाबलः ॥ ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

नन्तरकालिकवृत्तमाह–राजा सन् बहुवर्षसहस्राणि राज्यमकारयत् । स्वार्थे णिच् प्रयोजकाविवक्षा वा ॥ २० ॥

२१–२३] ति० टी०–वरूथिनीं चतुरङ्गबलम् । योजयित्वा समुपस्थाय तदुपार्क्षौहिणीसंख्यसेनापरिवृतो भूत्वा ॥२१–२३॥

रा० टी०–कदाचिदिति । महातेजाः अक्षौहिणीपरिवृतः विश्वामित्रः वरूथिनीमक्षौहिण्यतिरिक्तसेनां योजयित्वा पुररक्षायां नियुज्यैव कदाचित्कस्मिंश्चित्काले मेदिनीं पृथिवीं परिचक्राम । तुशब्द एवार्थे ॥ २१ ॥

गो० टी०–कदाचिदित्याद्यष्टौ श्लोकाः । वरूथिनी चतुरङ्गबलं योजयित्वा उपस्थाप्य प्रशान्तत्वविशेषणाय पुनर्हरिणोपादानम् । अब्भक्षैः अम्मात्रभक्षैः दान्तैर्नियतमनस्कैः वालखिल्याः ब्रह्मणो बालजा ऋषयः वैखानसास्तन्नखजाः " ये नखास्ते वैखानसाः ये वालास्ते वालखिल्याः " इति श्रुतेः । वसिष्ठाश्रमवैभववर्णनं एवंभूतेनापि समानितो विश्वामित्र इति तस्य वैभवकथनार्थम् ॥ २१–२८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

रा० टी०–मेदिनीपरिक्रमणमवाह–नगराणीति । राजा विश्वामित्रः नगरादीनि क्रमशो विचरन् वसिष्ठस्य अश्रमपदं श्रमनिवर्तकस्थानमाजगाम । स्थानमेव वर्णयन्नाह–नानापुष्पलतादुमं नानापुष्पलतायुता द्रुमाः यस्मिन् नानामृगगणाकीर्णं नानामृगगणैराकीर्णं व्याप्तं सिद्धचारणसेवितम् ॥ २२ ॥ २३॥

२४] ति० टी०–तपोतिशयात्प्रशान्तहरिणत्वम् ॥ २४ ॥

रा० टी०–देवादिभिः किन्नरैश्चोपशोभितं विनापि चं समुच्चयः । प्रशान्तहरिणाकीर्णं प्रशान्तहरिणैराकीर्णं व्याप्तं द्विजसंघनिषेवितं द्विजसंघैः पक्षिसमूहैः निषेवितम् ॥ २४ ॥

२५] ति० टी०–ज्ञानमात्राधिकृता नारदाद्या देवलोकसंचारिणो देवर्षयः । ज्ञानकर्मोभयाधिकृता ब्रह्मर्षयो भूप्रतिष्ठाः अग्नितुल्यैर्ऋषिभिः संकुलं व्याप्तमित्यन्वयः ॥ २५ ॥

रा० टी०–ब्रह्मर्षिगणसंकीर्णं ब्रह्मर्षिगणैः संकीर्णं व्याप्तं देवाषिगणसावत तपश्चरणससिद्धैः महात्माभिः अग्निकल्पैः अग्निं कल्पयन्ति प्रदिदिनं विधिना स्थापयन्ति ते अग्निहोत्रिण इति व्याप्तं श्रीमद्ब्रह्मकल्पैः श्रीमन्तो ये ब्रह्म वेदं कल्पयन्ति वेदशाखाविभागकर्तार इति यावत् तैः महात्मभिः सततं संकुलं अब्भक्षः जलमात्रभक्षणकर्तृभिः वायुभक्षैः वायुमात्रभक्षणकर्तृभिश्च शीर्णपर्णाशनैः पतितपत्रमात्रभोजनकर्तृभिश्च । तथाशब्दश्चार्थे ॥ २५ ॥ २६ ॥

२६] ति० टी०–तथा ब्रह्मकल्पैश्चतुर्मुखतुल्यैः । तस्यैव सहजतपोवैभवात् । अब्भक्षैस्तन्मात्रभक्षैः संकुलम् ॥ २६ ॥

२७] ति० टी०–ब्रह्मरोमनखजा वालखिल्या वैखानसाश्च । ' ये नखास्ते वैखानसाः ये वालास्ते वालखिल्याः ' दात श्रुतारात कतकः ॥ २७ ॥

रा० टी०–फलेति । फलमूलाशनैः दान्तैः नियमितबहिरिन्द्रियैः जितरोषैः जितक्रोधैः जितेन्द्रियैः नियमितान्तःकरणैः ऋषिभिरुपशोभितं जपहोमपरायणैः वालखिल्यैः ब्रह्मरोमजातैरन्यैर्वालखिल्यविलक्षणैः वैखानसैः ब्रह्मनखज तैश्च समन्तादुपशोभितम् अरं ब्रह्मलोकमिव वशिष्ठस्य अश्रमपदं श्रमनिवर्तकं स्थानं जयतां शत्रुपराभवं कुर्वतां श्रेष्ठः महाबलो विश्वामित्रः ददर्श च पण्णामकत्रान्वयः । वैखानसवालखिल्यनिर्वचनकर्त्री श्रुतिः " ये नखास्ते वैखानसा ये वालास्ते वालखिल्याः " इति ॥ २७ ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

२८] ति० टी०–परमकल्याणस्वभावाद्ब्रह्मलोकोपमाश्रमस्य । जयतां शूराणाम् ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

१ तथेति गो. रा. पाठः । २ रामेति गो. पाठः । ३ वृक्षसमाकुलमिति गो. पाठः । ४ अर्धमिदं गो. नास्ति । ५ अर्धमिदं रा. नास्ति ।

द्विपञ्चाशः सर्गः ।

विश्वामित्रातिथ्यसंपादनार्थं वसिष्ठेन स्वकामधेन्वाः शबलायाः सोपस्कारान्नसर्जने नियोजनम् ।

तं[1] दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः । प्रणतो विनयाद्धीरो वसिष्ठं जपतां वरम् ॥ १ ॥
स्वागतं तव चेत्युक्तो वसिष्ठेन महात्मना । आसनं चास्य भगवान्वसिष्ठो व्यादिदेश ह ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते । यथान्यायं मुनिवरः फलमूलमुपाहरत् ॥ ३ ॥
प्रतिगृह्य तु[2] तां पूजां वसिष्ठाद्राजसत्तमः । तपोऽग्निहोत्रशिष्येषु कुशलं पर्यपृच्छत ॥ ४ ॥
विश्वामित्रो महातेजा वनस्पतिगणे तदा[3] । सर्वत्र कुशलं प्राह[4] वसिष्ठो राजसत्तमम् ॥ ५ ॥
सुखोपविष्टं राजानं विश्वामित्रं महातपाः । पप्रच्छ जपतां श्रेष्ठो वसिष्ठो ब्रह्मणः सुतः ॥ ६ ॥
कच्चित्ते कुशलं राजन्कच्चिद्धर्मेण रञ्जयन् । प्रजाः पालयसे राजन्राजवृत्तेन धार्मिक ॥ ७ ॥
कच्चिते संभृता भृत्याः कच्चित्तिष्ठन्ति शासने । कच्चित्ते विजिताः सर्वे रिपवो रिपुसूदन ॥ ८ ॥

१] ति० टी०–वसिष्ठं प्रणतो वसिष्ठेन स्वागतमित्युक्तश्चेति योजना ॥ १ ॥

रा० टी०–तमिति । जपतां वरं श्रेष्ठं तं वसिष्ठं दृष्ट्वा परमप्रीतः अतिप्रीतिविशिष्टः महाबलः विनयात् विनम्रतातः प्रणतः प्रणामं कर्ता वीरः विश्वामित्रः महात्मना वसिष्ठेन स्वागतं तवेत्युक्त आसीदिति शेषः । अत एव भगवान् सकलसामर्थ्यविशिष्टो वसिष्ठः अस्य विश्वामित्रस्य चकारेण तत्सहचरेभ्यश्च आसनं व्यादिदेश यथायोग्यं ददौ ह प्रसिद्धमेतत् । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–विश्वामित्रसंमानं द्विपञ्चाशे–स दृष्ट्वेत्यादि । वसिष्ठं दृष्ट्वा प्रणतः प्रणनाम ॥ १ ॥

२] ति० टी०–व्यादिदेशादापयत् ॥ २ ॥

गो० टी०–स्वागतमिति । उक्तः ऊचे व्यादिदेश दापयामासेत्यर्थः ॥ २ ॥

३–४] ति०टी०–फलमूलमिति जातित्वादेकवत्त्वम् ॥३॥४॥

रा० टी०–उपेति । तदा आसनदानोत्तरकाले उपविष्टाय आसने निविष्टाय धीमते विश्वामित्राय चशब्देन तत्सहचरेभ्यः यथान्यायं मुनिवरः वशिष्ठः फलमूलमुपाहरत् प्रापयत् ॥ ३ ॥

गो० टी०–उपविष्टायेत्यादिचत्वारः । फलमूलमिति "जातिरप्राणिनाम्" इत्येकवत्त्वं राजसत्तमं प्रतीति शेषः ॥ ३–६ ॥

रा० टी०–प्रतीति । राजसत्तमो महातेजा विश्वामित्रः वसिष्ठात् तां वसिष्ठकर्तृकां पूजां प्रतिगृह्य तपआदिषु त्रिषु तथा वनस्पतिगणे कुशलं पर्यपृच्छत् अत एव वसिष्ठः सर्वत्र विश्वामित्रपृष्टेषु कुशलं राजसत्तमं विश्वामित्रमाह । चशब्दो हेतौ । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

५] ति० टी०–वनस्पतिशब्देन वृक्षमात्रं न तु विनापुष्पं फलवन्त एव तद्विषयेऽपि कुशलं पर्यपृच्छत । सर्वत्र तत्पृष्टसर्वविषये ॥ ५ ॥

६] ति० टी०–जपतां तपस्विनाम् ॥ ६ ॥

रा० टी०–सुखेति । महातपाः अतितपोविशिष्टः जपतां श्रेष्ठः ब्रह्मणः सुतः वसिष्ठः सुखोपविष्टं सुखस्थितिमन्तं राजानं विश्वामित्रं पप्रच्छ ॥ ६ ॥

७] ति० टी०–कच्चिदिति प्रश्ने । हे धार्मिक, धर्मेण तदनुष्ठानेन प्रजा रञ्जयन् राजवृत्तेन 'न्यायेनार्जनमर्थस्य वर्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम्।' इत्युक्तेन राजवृत्तेन पालयामास इत्यन्वयः ॥ ७ ॥

रा० टी०–तत्प्रश्नमेवाह–कच्चिदिति । हे राजन् ! हे धार्मिक धर्माचरणकर्तः ! ते तव कुशलं कच्चिदस्ति । हे राजन् ! राजवृत्तेन चतुर्विधेन प्रजाः रञ्जयन्सन् कच्चित्पालयसे कच्चिदिति इष्टप्रश्ने । राजवृत्तस्य चतुर्विधत्वं तु 'न्यायेनार्जनमर्थस्य वर्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम्' इत्यादिनोक्तम् ॥ ७ ॥

गो० टी०–कच्चिदित्यादित्रयः । कच्चिदिति कामप्रवेदनेऽव्ययं 'कच्चित्कामप्रवेदने' इत्यमरः । तव कुशलं ममेप्सितमित्यमुमर्थं द्योतयति राजवृत्तेन चतुर्विधेन उपलक्षितः यथाहुः 'न्यायेनार्जनमर्थस्य वर्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम्' इति ॥ संभृताः पोषिताः तिष्ठन्तीति शेषः । बले चतुरङ्गबले कोशे अर्थसमूहे पुत्रपौत्र इति गवाश्वप्रभृतित्वादेकवत्त्वम् ॥ ७ ॥ ८ ॥ ९ ॥

८] ति० टी०–संभता वेतनदानादिना ॥ ८ ॥

रा० टी०–कच्चिदिति । हे रिपुसूदन विश्वामित्र ! ते तव सुभृताः सुपोषिताः भृत्याः कच्चित्सन्तीति शेषः । भृत्यास्ते तव शासने त्वत्कर्तृकशिक्षायां कच्चित्तिष्ठन्ति । ते भृत्या इत्युभयान्वयि । सर्वे रिपवः कच्चित्ते तव विजिताः । ते इति संबन्धसमान्ये षष्ठी ॥ ८ ॥

---

१ स इति गो. पाठः । २ चेति गो. रा. पाठः । ३ तथेति गो. रा. पाठः । ४ चाहेति गो. रा. पाठः । ५ सुभृता इति रा. पाठः

कच्चिद्बलेषु कोशेषु मित्रेषु च परन्तप । कुशलं ते नरव्याघ्र पुत्रपौत्रे तथानघ ॥ ९ ॥
सर्वत्र कुशलं राजा वसिष्ठं प्रत्युदाहरत् । विश्वामित्रो महातेजा वसिष्ठं विनयान्वितम् ॥ १० ॥
कृत्वा तौ सुचिरं कालं धर्मिष्ठौ ताः कथास्तदा । मुदा परमया युक्तौ प्रीयेतां तौ परस्परम् ॥ ११ ॥
ततो वसिष्ठो भगवान्कथान्ते रघुनन्दन । विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल । तव चैवाप्रमेयस्य यथार्हं संप्रतीच्छ मे ॥ १३ ॥
सत्क्रियां हि भवानेतां प्रतीच्छतु मया कृताम् । राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥ १४ ॥
एवमुक्तो वसिष्ठेन विश्वामित्रो महामुनिः । कृतमित्यब्रवीद्राजा पूजावाक्येन मे त्वया ॥ १५ ॥
फलमूलेन भगवन्विद्यते यत्तवाश्रमे । पाद्येनाचमनीयेन भगवद्दर्शनेन च ॥ १६ ॥

९] ति० टी०–बलेषु चतुरङ्गेषु कोशेष्वर्थसमूहेषु । पुत्रपौत्रे गवाश्वप्रभृतित्वादेकवत्त्वम् ॥ ९ ॥

रा० टी०–कच्चिद्बलेष्विति । हे परंतप ! हे नरव्याघ्र ! हे अनघ ! ते तव बलेषु सैन्येषु कोशेषु मित्रेषु च तथा पुत्रपौत्रे कच्चित् कुशलमस्ति ॥ ९ ॥

१०] ति० टी०–एको वसिष्ठशब्दो वरिष्ठवाची ॥ १० ॥

रा० टी०–सर्वत्रेति । महातेजाः अतिशयतेजोविशिष्टः राजा विश्वामित्रः सर्वत्र वसिष्ठकर्तृकप्रश्नविषयीभूतबलादिषु कुशलं वसिष्ठं श्रेष्ठं किंच आ वशिष्ठमतिक्रान्तिमन्तं विनयान्वितं विनयो विश्वामित्रकर्तृकविनम्रता अन्वितः प्राप्तः यस्मै तम् कथयत् । आवशिष्ठशब्द आङ्पूर्वककान्त्यर्थकवशधातुप्रकृतिकौणादिकथन्प्रत्ययान्तः ॥ १० ॥

गो० टी०–सर्वत्रेति । सर्वत्र वसिष्ठपृष्टसर्वविषय इत्यर्थः वसिष्ठं धनिकम् ॥ १० ॥

११] ति० टी०–तावुक्तविशेषणकौ वसिष्ठविश्वामित्रौ । ताः कथा अन्योन्यकुशलप्रश्नोत्तरादिरूपाः । प्रीयेताम् अडभाव आर्षो लङि ॥ ११ ॥

रा० टी०–कृत्वेति । तदा समागमकाले धर्मिष्ठौ वेदविहितानुष्ठाननिष्ठौ परमया मुदा हर्षेण युक्तौ तौ प्रसिद्धावुभौ वशिष्ठविश्वामित्रौ ताः परस्परं कुशलप्रश्नोत्तररूपाः कथाः सुचिरं कालं बहुकालपर्यन्तं कृत्वा निष्पाद्य कथयित्वेत्यर्थः परस्परं प्रीयेताम् ॥ ११ ॥

गो० टी०–कृत्वेति । ताः कथाः अन्योन्यकुशलप्रश्नोत्तररूपाः प्रीयेतामप्रीणयताम् ॥ ११ ॥

१२] ति० टी०–प्रहसन्निवोत्तमातिथिलाभजहर्षेण ॥ १२ ॥

रा० टी०–तत इति । हे रघुनन्दन ! ततः परस्परकुशलप्रश्नानन्तरं कथान्ते उभयोक्तवृत्तावसाने भगवान् अतिशयसामर्थ्यविशिष्टो वशिष्ठः प्रहसन् सन्नेव इदं वाक्यमुवाच । इवशब्द एवार्थे ॥ १२ ॥

गो० टी०–तत इत्यादित्रयः । प्रहसन्निव प्रसन्नमुख इत्यर्थः संप्रतीच्छ प्रतिगृहाण उद्यतां चिकीर्षिताम् ॥ १२ ॥ ॥ १३ ॥ १४ ॥

१३] ति० टी०–संप्रतीच्छ मे मत्कृतमातिथ्यमङ्गीकुरु १३

रा० टी०–तद्वाक्यमेवाह–आतिथ्यमिति । हे महाबल ! अप्रमेयस्य इयत्तारहितप्रभावस्य तवास्य प्रसिद्धस्य बलस्य सैन्यस्य यथार्हमेव आतिथ्यं कर्तुमिच्छामि अतो मे मम आतिथ्यं संप्रतीच्छ स्वीकुरु । चो हेतौ आतिथ्यमित्युभयान्वयि ॥ १३ ॥

१४] ति० टी०–हेतुगर्भं विशेषणमितिथिश्रेष्ठ इति ॥ १४ ॥

रा० टी०–मदातिथ्यमवश्यं स्वीकर्तव्यमित्यत्र हेतुं वदन्नाह–सदिति । मया कृतां संपादितामेतां सत्क्रियां भवान् प्रतीच्छतु हि यतः हे राजन् ! त्वमतिथिश्रेष्ठः अतो मया प्रयत्नतः पूजनीयः अतिथित्वेन सत्करणीयः ॥ १४ ॥

१५] ति० टी०–पूजावाक्येनातिथ्यं करिष्यामीत्येवंरूपेणैव मम पूजनं कृतमिति राजाब्रवीत् ॥ १५ ॥

रा० टी०–एवमिति । वशिष्ठेन एवमनेन प्रकारेण उक्तो महामतिर्विश्वामित्रो राजा प्रियवाक्येन मे आतिथ्यं त्वया कृतं भवदुक्तवचनेनैवास्मत्संतोषो जात इत्यर्थः इत्यब्रवीत् ॥ १५ ॥

गो० टी०–एवमिति त्रयः । प्रियवाक्येन आतिथ्यं करिष्यामीत्यनेन वचनेन आतिथ्यं कृतं तवाश्रमे यद्विद्यते तेन फलमूलेन सुपूजित इत्यन्वयः पूजार्हेण त्वयेति शेषः । मैत्रेण स्नेहयुक्तेन मत्वर्थीयाजन्तः ॥ १५–१७ ॥

१६] ति० टी०–विद्यते यत्तवाश्रमे फलमूलं तेन पूजित इत्यनेन राजभोज्याभावादनेनैव वयं संतुष्टा इति ध्वनिः ॥ १६ ॥

रा० टी०–तदेव विशदयन्नाह–फलेति । हे भगवन् ! हे महाप्राज्ञ ! पूजार्हेण पूजायोग्येन यत्तवाश्रमे विद्यते तेन फलमूलेन पाद्येन आचमनीयेन च भगवद्दर्शनेन भगवतस्तव दर्शनेन च सर्वथा सर्वप्रकारेण पूजितोऽहं गमिष्यामि अतस्ते तुभ्यं नमः अस्तु मैत्रेण चक्षुषा त्वमीक्षस्व मां पश्य । द्वयोरेकत्रान्वयः ॥ १६ ॥ १७ ॥

---

१ तवानघेति गो. पाठः । २ उभाविति गो. रा. पाठः । ३ शुभा इति गो. पाठः । ४ भवाँस्त्वेतानिति रा. पाठः । ५ उद्यतामिति गो. पाठः । ६ राजा इति गो. पाठः । ७ महामतिरिति गो. रा. पाठः । ८ प्रियवाक्येनेति गो. रा. पाठः ।

सर्वथा[1] च महाप्राज्ञ पूजार्हेण सुपूजितः । नमस्तेऽस्तु गमिष्यामि मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वसिष्ठः पुनरेव हि । न्यमन्त्रयत धर्मात्मा पुनःपुनरुदारधीः ॥ १८ ॥
बाढमित्येव गाधेयो वसिष्ठं प्रत्युवाच ह । यथाप्रियं भगवतस्तथास्तु मुनिपुङ्गव ॥ १९ ॥
एवमुक्तस्तथा[2] तेन वसिष्ठो जपतां वरः । आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषाम्[3] ॥ २० ॥
एह्येहि शबले क्षिप्रं शृणु चापि वचो मम[4] । सबलस्यास्य राजर्षेः कर्तुं व्यवसितोऽस्म्यहम्[5] ॥
भोजनेन महार्हेण सत्कारं संविधत्स्व मे[6] ॥ २१ ॥
यस्य यस्य यथाकामं षड्सेष्वभिपूजितम्[7] । तत्सर्वं कामधुग्दिव्ये अभिवर्ष कृते मम[8] ॥ २२ ॥
रसेनान्नेन पानेन लेह्यचोष्येण संयुतम्[9] । अन्नानां निचयं सर्वं सृजस्व शबले त्वरं ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

१७] ति० टी०–पूजार्हेण त्वयेति शेषः । मैत्रेण स्नेहयुक्तेन । मत्वर्थीयाजन्तम् ॥ १७ ॥

१८] ति० टी०–निमन्त्रणं भोजनाङ्गीकाराय प्रार्थनम्१८

रा० टी०–एवमिति । एवमनेन प्रकारेण पुनःपुनर्ब्रुवन्तमेव राजानं विश्वामित्रमुदारधीः धर्मात्मा वशिष्ठः पुनरपि न्यमन्त्रयत । हिशब्दोऽप्यर्थे ॥ १८ ॥

गो० टी०–एवं ब्रुवन्तमिति द्वौ । पुनः न्यमन्त्रयत भोजनार्थं प्रार्थनमकरोत् पुनः पुनरित्यत्र न्यमन्त्रयतेत्यनुषज्यते बहुशः प्रत्युत्तरेऽपि पुनः पुनर्न्यमन्त्रयतेत्यर्थः । गाधेयः गाधिपुत्रः बाढमित्यस्यैव विवरणं यथेति ॥ १८ ॥ १९ ॥

१९] ति० टी०–बाढमित्यस्य विवरणम् यथाप्रियमित्यादि ॥ १९ ॥

रा० टी०–बाढमिति । गाधेयो विश्वामित्रः बाढं स्वीकृतमेवेति वशिष्ठं प्रति उवाच । स्वीकारप्रकारमाह–हे मुनिसत्तम ! भगवतस्तव यथाप्रियं तथैवास्तु । हशब्द एवार्थे ॥१९॥

२०] ति० टी०–तेन विश्वामित्रेण कल्माषीं चित्रवर्णां होमधेनुम् ॥ २० ॥

रा० टी०–एवमिति । ततः आतिथ्यस्वीकारानन्तरमेवमुक्तः महातेजाः अतिशयतेजोविशिष्टः जपतां वरः प्रीतो वशिष्ठः धूतकल्मषां प्रक्षालितपङ्कादिकां कल्माषीं चित्रवर्णविशिष्टां स्वधेनुमाजुहाव ॥ २० ॥

गो० टी०–एवमिति । कल्माषीं चित्रवर्णां शबलामिति यावत् ' चित्रं किर्मीरकल्माष–' इत्यमरः ॥ २० ॥

२१] ति० टी०–शबले तन्नामे, अस्य राजर्षेर्महार्हेण भोजनेन सत्कारं कर्तुं व्यवसितोऽस्म्युद्युक्तोऽस्मि । तं मे व्यवसायं संविधत्स्व संपादय तदुपयोगिपदार्थदानेनेति शेषः ॥ २१ ॥

रा० टी०–तत्प्रकारमाह–एहीति । हे शबले शबलाभिधे ! क्षिप्रं शीघ्रं त्वमेहि एहि मम वचोऽपि शृणु सबलस्य सैन्यसहितस्य अस्य राजर्षेर्विश्वामित्रस्य महार्हेणैव भोजनेन सत्कारं कर्तुमहं व्यवसितः उद्युक्तोऽस्मि अतः मे सत्कारं संविधत्स्व संसाधय । सार्धश्लोक एकान्वयी । चशब्द एवार्थे हिर्हेतौ सत्कारमित्युभयान्वयि ॥ २१ ॥

गो० टी०–एहीतिसार्धश्लोकः । सबलस्यास्य राजर्षेः सत्कारं कर्तुं व्यवसितोऽस्मि संविधत्स्व तदुपयोगिवस्तुजातं संपादय ॥ २१ ॥

२२] ति० टी०–षड्सेषु मधुरादिषु यस्य यस्य यदभिपूजितमभीष्टम्, तत्सर्वं यथाकामं तत्प्रीत्यनतिक्रमेण मम कृते मत्तोषार्थम् ॥ २२ ॥

रा० टी०–तदेव विशदयन्नाह–यस्येति । हे कामधुक् ! हे दिव्ये ! यस्य यस्य राजसंबन्धिनः षड्सेषु यत् यत् अभिपूजितं भोजनेच्छाविषयीभूतं तस्य तस्य तत् सर्वं यथाकामं यथेच्छं मम कृते मत्संतोषार्थमभिवर्ष ॥ २२ ॥

गो० टी०–यस्येति । षड्सेषु यद्यस्य यस्य अभिपूजितमभिमतम् तत्सर्वं यथाकामं ममकृते अभिवर्षेत्यन्वयः ' अर्थे कृते च तादर्थ्ये निपातद्वयमव्ययम् ' इति निघण्टुः ॥ २२ ॥

२३] ति० टी०–रसेनान्नेन रसयुतान्नेन भक्ष्यशष्कुल्यादिना । रसेनेति सर्वान्वयि । पानेन पानकरसादिना । लेह्यं जिह्वाग्राह्यं क्षौद्रादि चोष्यमधरपुटग्राह्यमाम्रफलादि अन्नानां शाल्यन्नादीनां निचयं राशिम् ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०–इच्छाविषयीभूतं नामतः परिगणयन्नाह–रसेनेति । हे शबले ! रसेन रसयुक्तेन अनेन अपूपादिना पानेन पानयोग्येन पानकरसादिना लेह्यचूष्येण लेह्येन जिह्वास्वादनीयक्षौद्रादिना चूष्येण आम्रफलादिना संयुतं सर्वमन्नाद्यनिचयमोदनादिसमूहमिहास्मिन्काले एव सृजस्व उत्पादय।तुशब्द एवार्थे ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

---

१ सर्वथेति गो. पाठः । २ मुनिसत्तमेति गो. रा. पाठः । ३ एवमुक्तो महातेजा इति गो. रा. पाठः । ४ धूतकल्मष इति गो. पाठः । ५ ह्यहमिति रा. पाठः । ६ क्षिप्रमिति गो. पाठः । ७ चूष्येणेति रा पाठः । ८ अन्नाद्यानिचयमिति रा. पाठः । ९ त्विहेति रा. पाठः ।

त्रिपञ्चाशः सर्गः ।

तत्कल्पितविविधस्वादुन्नादिना सपारिजनेन प्राप्तपरितोषेण विश्वामित्रेणानेकधेन्वादिप्रतिनिधिनापि याच्यमानायाः शबलाया वसिष्ठेन विसर्जनानङ्गीकरणम् ।

एवमुक्ता वसिष्ठेन शबला शत्रुसूदन । विदधे कामधुक्कामान्यस्य यस्येप्सितं यथा ॥ १ ॥
इक्षून्मधूंस्तथा लाजान्मैरेयांश्च वरासवान् । पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि ॥ २ ॥
उष्णाढ्यस्यौदनस्यात्र राशयः पर्वतोपमाः । मृष्टान्नानि सूपांश्च दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानां च खाण्डवानां तथैव च । भोजनानि सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥
सर्वमासीत्सुसंतुष्टं हृष्टपुष्टजनायुतम् । विश्वामित्रबलं राम वसिष्ठेन सुतर्पितम् ॥ ५ ॥

गो० टी०–रसेनेति । रसेन रसायनभेदेन अन्नेन भक्ष्येण शुष्कुलीलाजादिना पानेन पेयेन पानकरसादिना लेह्यचोष्येण लेह्येन जिह्वास्वाद्येन क्षौद्रादिना चोष्येण अधरपुटग्राह्येण दध्यादिना च समन्वितं सर्वो द्वन्द्वो विभाषयैकद्भवतीत्येकवद्भावः । अन्नानां शाल्यन्नादीनां निचयं राशिं अनेन भक्ष्यभोज्यलेह्यचोष्यपेयखाद्यरूपषड्विधाभ्यवहारा दर्शिताः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

१] ति० टी०–यस्य यस्य यथा यथेप्सितम् तथा तथा सर्वान्कामान्विदधे इत्यर्थः ॥ १ ॥

रा० टी०–एवमिति । हे शत्रुसूदन ! एवमनेन प्रकारेण वशिष्ठेन उक्ता कामधुक् शबला वशिष्ठधेनुः यस्य यस्य यथा ईप्सितं तस्य तस्य कामान् तथा विदधे उत्पादयामास ॥ १ ॥

गो० टी०–कामधेनुप्रार्थनं त्रिपञ्चाशे–एवमुक्तेत्यादि । यस्य यस्य यथेप्सितं तथा कामान् काङ्क्षितान् विदधे ॥ १ ॥

२] ति० टी०–तदेव प्रपञ्चयति–इक्षूनिति । सविकारानिक्षून् मधून्क्षौद्राणि मैरेयं च धात्रीधातकीगुडवारिभिः कृतं मद्यं भक्ष्यानपूपादीन् उच्चावचाननेकविधान् ॥ २ ॥

रा० टी०–उत्पादितपदार्थान्नामशो निर्दिशन्नाह–इक्षूनित्यादित्रिभिः । इक्षून् मधून् क्षौद्रादीन् च पुंस्त्वमार्षम् । लाजांश्च मैरेयान् मैरेयाभिधधातकीपुष्पगुडधानावारिकृतमद्यविशेषांश्च वरासवान् अपक्केक्षुरसकृतोत्तममद्यविशेषान् तथा हि 'सीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् । मैरेयं धातकीपुष्पगुडधानाम्बुसंहतम् ' इति माधवः । महार्हाणि बहुमूल्यकानि पानानि पानकरसादीनि च उच्चावचान् अनेकविधान् भक्ष्यांश्च विदधे इति पूर्वेणान्वयः । तथाशब्दौ चार्थे ' उच्चावचं नैकविधम् ' इत्यमरः ॥ २ ॥

गो० टी०–उक्तमेव प्रपञ्चयति–इक्षूनित्यादि । मधूनिति पुल्लिङ्गत्वमार्षम् । मैरेयाः मद्यविशेषाः मैरेयाख्यानित्यर्थः 'मैरेयमासवोधात्रीधातकीगुडवारिभिः' इति वैजयन्ती । अत्र कृतमिति शेषः । पानानि पानकादीनि भक्ष्यान् अपूपविशेषान् उच्चावचान्नानाप्रकारान् 'उच्चावचं नैकभेदम् ' इत्यमरः । विदध इत्युपपद्यते ॥ २ ॥

३] ति० टी०–उष्णाढ्यस्योष्णत्वगुणयुक्तस्य राशयः आसन्निति शेषः । मृष्टान्नानि पायसभेदाः । दधिकुल्या इत्युपलक्षणं दुग्धादेरपि ॥ ३ ॥

रा० टी०–उष्णेति । उष्णाढ्यस्य उष्णत्वगुणविशिष्टस्य ओदनस्य पर्वतोपमाः पर्वतसदृशाः राशयः अत्र अस्मिन्विश्वामित्रातिथ्ये आसन्निति शेषः । तथा तेन प्रकारेण मृष्टान्नानि पायसविशेषाश्च सूपाः परिपक्वादकीद्विदलादयश्च दधिकुल्याश्चासन् । एवोक्तसमुच्चयार्थः तेन घृतकुल्यापयःकुल्यादेः संग्रहः ॥ ३ ॥

गो० टी०–उष्णेति । आसन्निति शेषः मृष्टान्नानि इष्टान्नानि पायसभेदा इति यावत् ॥ ३ ॥

४] ति० टी०–अनेकविधस्वादुरसयुतानां खाण्डवानां भक्ष्यविशेषाणाम् शेषे षष्ठी तैः पूर्णानि भोजनानि भोजनपात्राणि गौडानि राजतानि आसन्निति शेषः । ' रजते गुडः ' इत्यभिधानमिति कतककृत् ॥ ४ ॥

रा० टी०–नानेति । नानास्वादुरसानामनेकविधस्वादुविशिष्टपुष्पादिरसविशेषाणां तथा तेन प्रकारेण खाण्डवानां भक्ष्यविशेषाणां च संबन्धीनि भोजनानि भोजनपात्राणि गौडानि गुडनिर्मितभक्ष्यविशेषपात्राणि च सहस्रशोऽपि सुपूर्णान्येवासन्निति शेषः एकशब्दोऽप्यर्थे । किंच नानास्वादुरसानां तथैव खाण्डवानां च गौडानि रजतनिर्मितानि सहस्रश एव भोजनानि भोजनपात्राणि सुपूर्णान्येवासन्निति शेषः । चतुर्थमेवार्थे ' रजते गुड ' इत्यभिधानमिति कतककृदिति भट्टाः ॥४॥

गो० टी०–नानेति । नानाविधाः स्वादवो रुच्याः रसा माधुर्यादयो येषां तेषां षाडवाः षड्रसविकृताः भक्ष्यविशेषाः शैषिकोऽण् तेषां पूर्णानि तैः पूर्णानीत्यर्थः पूरणगुणेत्यादिना तृतीयार्थे षष्ठी । गौडानि गुडविकाराः अत्राप्यासन्निति शेषः ॥ ४ ॥

५] ति० टी०–हर्षश्चित्तसंतोषः पुष्टिर्देहपुष्टिस्तद्युक्तजनैरासमन्ताद्युक्तम् ॥ ५ ॥

रा० टी०–सर्वमिति । हे राम ! सुसंतुष्टं विश्वामित्रसत्कारहेतुकात्यन्तसंतोषविशिष्टं हृष्टपुष्टजनायुतं हृष्टपुष्टजनैरायुतं व्याप्तं सर्वं विश्वामित्रबलं वशिष्ठेन सुतर्पितमासीत् ॥ ५ ॥

१ तथेति गो. रा. पाठः । २ मृष्टान्नानिनेति गो. रा. पाठः । ३ सूपाश्चेति रा. पाठः । ४ खाण्डवानामिति गो. पाठः । ५ भाजनानीति गो. पाठः ।

विश्वामित्रो हि[1] राजर्षिर्हृष्टपुष्टस्तदाभवत् । सान्तःपुरवरो राजा सब्राह्मणपुरोहितः ॥ ६ ॥
सामात्यो मन्त्रिसहितः सभृत्यः पूजितस्तदा । युक्तः परमहर्षेण वसिष्ठमिदमब्रवीत् ॥ ७ ॥
पूजितोऽहं त्वया ब्रह्मन्पूजार्हेण सुसत्कृतः । श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ॥ ८ ॥
गवां शतसहस्रेण दीयतां शबला मम । रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः ॥ ९ ॥
तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज । एवमुक्तस्तु भगवान्वसिष्ठो मुनिपुङ्गवः ॥ १० ॥
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् । नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ॥ ११ ॥
राजन्दास्यामि शबलां राशिभी रजतस्य वा । न परित्यागमर्हेयं मत्सकाशादरिंदम ॥ १२ ॥

गो० टी०–सर्वमिति । पूर्वमेव हृष्टपुष्टजनायुतं विश्वामित्रबलं सर्वं सुसंतुष्टमासीदित्यन्वयः ॥ ५ ॥

६] ति० टी०–अन्तःपुरश्रेष्ठैः सहितः ॥ ६ ॥

रा० टी०–विश्वामित्र इति ! तदा आतिथ्यकाले सान्तःपुरवरः वरान्तःपुरसहितः सब्राह्मणपुरोहितः ब्राह्मणपुरोहिताभ्यां सहितः सामात्यः अमात्यसहितः मन्त्रिसहितः मन्त्रियुक्तः सभृत्यः भृत्यसहितः हृष्टपुष्टः हृष्टेन स्वाभाविकहर्षेण पुष्टः प्रवृद्धो राजर्षिर्विश्वामित्रः पूजितोऽतिसत्कृतोऽभवत् अत एव परमहर्षेण युक्तो विश्वामित्रः तदा वशिष्ठमिदमब्रवीत् । श्लोकद्वयमेकान्वयि विश्वामित्र इत्याद्यृत्या उभयत्रान्वेति । अपिर्हेतौ अमात्यः कर्मसाहाय्यकर्ता मन्त्री मन्त्रप्रद इति भेदः ॥६॥७॥

गो० टी०–विश्वामित्र इति । हृष्ट आदरेण पुष्टः भोजनादिना ॥ ६ ॥

७] ति० टी०–अमात्याः कर्मसचिवाः मन्त्रिणो मन्त्रस्य सचिवाः पूजित आतिथ्येन सत्कृतः ॥ ७ ॥

गो० टी०–सामात्य इति । अमात्याः कर्मणि सहायाः मन्त्रिणः मन्त्रसहायाः ॥ ७ ॥

८] ति० टी०–पूजार्हेण मादृशपूजाकरणयोग्येन । पूजित इत्यस्यैव विवरणमादरातिशयद्योतनाय सुसत्कृत इति । हर्षाद्वा पुनरुक्तिरदोषः ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–पूजित इतिसार्धश्लोकद्वयेन । हे ब्रह्मन् ! हे वाक्यविशारद ! पूजार्हेण अस्मत्कर्तृकपूजायोग्येन त्वया पूजितः भोजनादिना तोषितः अत एव सुसत्कृतः भवत्कर्तृकात्यन्तसत्कारविशिष्टोऽहं अभिधास्यामि कथयिष्यामि अतः वाक्यं मद्वचनं त्वया श्रूयताम् त्वयेत्युभयान्वयि ॥ ८ ॥

गो० टी०–पूजित इति । पूजार्हेण अस्मदादिभिरिति शेषः । पूजितः बहुकृतः सुसत्कृतः आतिथ्येन सत्कृतः ॥ ८ ॥

९] ति० टी०–शतसहस्रेण निष्क्रयभूतेनेति शेषः ॥ ९ ॥

रा० टी०–गवामिति । गवां शतसहस्रेण निष्क्रयीभूतशतसहस्रसङ्ख्याकगवीभिः मम योग्या इयं शबला दीयताम् । तत्र हेतुः हे भगवन् ! हि यतः एतत् शबला गौः रत्नं रत्नहारी रत्नग्रहणशीलः पार्थिव एव चशब्द एवार्थे । उपसंहरन्नाह–हे द्विज ! तस्मात् उक्तहेतोः मे मह्यं शबलां देहि यतः धर्मतः न्यायतः एषा शबला ममैव सर्वं वाक्यं सावधारणं भवतीतिन्यायादेवकारलाभः । सर्वनाम्नामुद्देश्यविधेयान्यतरलिङ्गतेति सिद्धान्तादेतच्छब्दस्य नपुंसकत्वम् ॥ ९ ॥

गो० टी०–गवामिति । शतसहस्रेण निष्क्रयभूतेन । अर्धम् ॥ ९ ॥

गो० टी०–रत्नं हीति । हि यस्मादेतद्रत्नं स्वजातिश्रेष्ठम् ' रत्नं स्वजातिश्रेष्ठेऽपि ' इत्यमरः । यतः पार्थिवो रत्नहारी तस्माद्धर्मतः न्यायतः ममैषा मे देहीत्यन्वयः ॥ १० ॥

१०–१२] ति० टी०–धर्मतो न्यायतः पार्थिवस्य रत्नस्वामित्वाद्रत्नहरत्वाच्च ममैषा योग्येति शेषः ॥ १०–१२ ॥

रा० टी०–एवमिति । भगवान् अतिशयसामर्थ्यविशिष्टः विश्वामित्रेण एवमनेन प्रकारेणोक्तः धर्मात्मा मुनिसत्तमो वशिष्ठः महीपतिं विश्वामित्रं प्रत्युवाच ॥ १० ॥

गो० टी०–एवमित्यादिषट् । परित्यागं विश्लेषं प्राप्तुं नार्हा । आत्मवतः मनस्विनः कीर्तिरिव मह्यं मम शबला शाश्वती नित्यसंबन्धा हव्यं देवार्थं कव्यं पित्रर्थं प्राणयात्रा प्राणाग्निहोत्रं अग्निहोत्रं सायंप्रातःकर्तव्यो होमविशेषः बलिः भूतबलिः होमः दर्शपूर्णमासादिः एतत्सर्वमस्यामायत्तमेतदधीनं स्वाहाकारः स्वाहेतिमन्त्रः वषट्कारो वषडिति मन्त्रः विविधा विद्याः वेदाश्च अस्यामायत्ताः एतत्पयआदिप्राशनेन चित्तशुद्धेः प्राणतृप्तेर्देहबलादेश्च साध्यत्वात्तदेकमूलत्वम् अत्रार्थे न संशयः सत्येन वदामीत्यर्थः । कारणैरुक्तैरनुक्तैश्च ॥ ११–१६ ॥

रा० टी०–तत्प्रतिवचनमेवाह–नेति । हे राजन् ! गवां शतसहस्रेण शतसहस्रसंख्याकगवीभिः गवां कोटिशतैः कोटिशतसंख्याकगवीभिर्वा रजतस्य राशीभिर्वा अहं शबलां न दास्यामि । अपिशब्दो वार्थे ॥ ११ ॥

रा० टी०–दानाभावे हेतुं वदन्नाह–न परीति । हे अरिंदम ! आत्मवतो मनस्विनः शाश्वती नित्या कीर्तिरिव मह्यं प्रिया इयं शबला मत्सकाशात्परित्यागं वियोगं प्राप्तुं नार्हा । प्रिया प्राप्तुमिति चाध्याहृतम् ॥ १२ ॥

१ अपीति गो. रा. पाठः । २ मुनिसत्तमः इति गो. रा. पाठः ।

शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा । अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ॥ १३ ॥
आयत्तमग्निहोत्रं च बलिर्होमस्तथैव च । स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ॥ १४ ॥
आयत्तमत्र राजर्षे सर्वमेतन्न संशयः । सर्वस्वमेतत्सत्येन मम तुष्टिकरी तथा ॥ १५ ॥
कारणैर्बहुभी राजन्न दास्ये शबलां तव । वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत्तदा ॥ १६ ॥
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः । हैरण्यकक्षग्रैवेयान्सुवर्णाङ्कुशभूषितान् ॥ १७ ॥
ददामि कुञ्जराणां ते सहस्राणि चतुर्दश । हैरण्यानां रथानां च श्वेताश्वानां चतुर्युजाम् ॥ १८ ॥
ददामि ते शतान्यष्टौ किङ्किणीकविभूषितान् । हयानां देशजातानां कुलजानां महौजसाम् ॥ १९ ॥

१३] ति० टी०–कुत इयं परित्यागं नार्हेत्यत्राह—शाश्वतीति । यथात्मवतो राजयोगवतो विश्वादिजा कीर्तिः शाश्वती नित्यसंबद्धा एवं मह्यं ब्रह्मदत्ता शबला नित्यं मत्संबद्धा । एवमादरे बीजमाह—हव्यं दैवं कव्यं पित्र्यं प्राणयात्रा जीवनम् ॥ १३ ॥

रा० टी०–एतत्त्यागे मम निर्वाहो नैव भविष्यतीति बोधयन्नाह–अस्यामित्यादिश्लोकत्रयेण । हव्यं देवतोद्देश्यकं कव्यं पित्रुद्देश्यकं च प्राणयात्रा शरीरनिर्वाहश्च तथा अग्निहोत्रं च तथाबलिर्भूतबलिश्च तथा होमश्च अस्यां शबलायामेवायत्तम् शबलाधीनमेवेत्यर्थः । एक एवशब्दस्तथार्थे ॥ १३ ॥

१४] ति० टी०–आयत्तमधीनम् बलिर्भूतबलिः होमो वैश्वदेवादिः आयत्त इत्यस्य सर्वत्रानुकर्षः स्वाहाकारवषट्कारौ तत्साध्ययज्ञौ विद्या इति एतत्पयःप्राशनेन चित्तशुद्धेः प्राणतृप्तेर्देहपाटवाच्च तत्साध्यविद्यानामेतदायत्तत्वम् ॥ १४ ॥

रा० टी०–स्वाहेति । हे राजर्षे ! स्वाहाकारवषट्कारौ मन्त्रावशेषौ तथा विविधा अनेकप्रकारा विद्याश्च एतत्सर्वं अत्र अस्यां गवि आयत्तं मन्त्रग्रहणमूलभूतानां प्राणतृप्तिबलादीनामेतज्जनितपयस्साध्यत्वेन सर्वमेतदधीनमित्यर्थः । अत्र अस्मिन्विषये संशयो न अत्रेत्युभयान्वयि ॥ १४ ॥

१५] ति० टी०–एतत्सर्वमातिथ्यादि । एतच्छबलारूपमेव मे सर्वस्वम् । सत्येन शपे इति शेषः । तथा दर्शनादिना मम तुष्टिकरी च ॥ १५ ॥

रा० टी०–तदेवोपसंहरन्नाह–सर्वस्वमिति । हे राजन् ! एतच्छबलारूपं वस्तु मम सर्वस्वं सत्येन ब्रवीमीति शेषः । तत्र हेतुः यतः सदा मम तुष्टिकरी अतो बहुभिरनेकविधैः कारणैः अहं शबलां तव न दास्ये । संबन्धसामान्यविवक्षया षष्ठी ॥ १५ ॥

१६] ति० टी०–कारणैरुक्तैः साभिप्रायं चैतद्बोध्यम् १६

रा० टी०–वसिष्ठेनेति । एवमनेन प्रकारेणैव वशिष्ठेन उक्तः वाक्यविशारदः वाक्यार्थज्ञाने निपुणः विश्वामित्रः तदा वसिष्ठोक्त्यनन्तरसमये एव संरब्धतरमत्यन्ताभिनिवेशसूचकं अत्यर्थं उत्कृष्टार्थकं वाक्यमब्रवीत् । तुशब्द एवार्थे ॥ १६ ॥

गो०टी०–वसिष्ठेनेति। संरब्धतरमत्यन्ताभिनिवेशयुक्तम् १७

१७] ति० टी०–संरब्धतरमत्याग्रहयुक्तम् । हैरण्या हिरण्यविकाराः कक्षा घण्टोपेतमध्यबन्धनार्थशृङ्खलाः ग्रैवेयं ग्रीवालंकारशृङ्खलादि ॥ १७ ॥

रा० टी०–तद्वचनमेवाह–हैरण्येत्यादिपञ्चभिः । हैरण्यकक्षाग्रैवेयान् हैरण्यानि हिरण्यनिर्मितानि कक्षाग्रैवेयानि मध्यबन्धनग्रीवाबन्धनरज्जवो येषां तान् सुवर्णाङ्कुशभूषितान् सुवर्णनिर्मिताङ्कुशसहितान् कुञ्जराणां सहस्राणि चतुर्दश चतुर्दशसहस्रसंख्यातकुञ्जरान् ते तुभ्यमहं दास्यामि ‘ कक्षा प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने’ इत्यमरः । ग्रैवेयानित्यादौ पुँस्त्वमार्षम् १७

गो० टी०–हैरण्येति । हैरण्यानि हिरण्मयानि कक्ष्या ग्रैवेयाणि येषां ते कक्ष्या मध्यबन्धनार्था रज्जुः ‘ कक्ष्या प्रकोष्टे हर्म्यादेः कांच्यां मध्येभबन्धने ’ इत्यमरः । ग्रैवेयाणि ग्रीवाबन्धनरज्जवः “ ग्रीवाभ्योऽण् च ” इति चाञ्प्रत्ययः । सहस्राणीत्यस्य पुँल्लिङ्गविशेषणमार्षम् ॥ १८ ॥

१८] ति० टी०–श्वेताश्वानां चतुर्युजाम् चतुःसंख्याकश्वेताश्वयुतानामित्यर्थः । आर्षः समासः । ‘रथानां च’ इति पाठः १८

रा० टी०–हैरण्यानामिति । हैरण्यानां हिरण्यनिर्मितानां श्वेताश्वानां चतुर्भिश्चतुर्भिर्युक् योगो येषु तेषां किङ्किणीकविभूषितान् किङ्किणीकैर्विभूषितानां रथानामष्टौ शतान् ते तुभ्यं दास्याम्येव चतुर्युजामित्येतद्घटकीभूतचतुःशब्दस्य नित्यसापेक्षत्वेऽपि चैत्रस्य गुरुकुलमित्यादिवत्समासः । किङ्किणीकविभूषितानित्यत्र षष्ठ्यर्थे द्वितीया । चशब्द एवार्थे ॥ १८ ॥

गो० टी०–हैरण्यानामिति । चतुर्युजां चतुर्भिरश्वैर्युक्तानां गमकत्वात्समासः संख्यानियमपरत्वान्न पुनरुक्तिः । किंकिणीकैर्विभूषितान् ॥ १९ ॥

१९] ति० टी०–किंकिणीकविभूषितानिति षष्ठ्यर्थे द्वितीया रथानां विशेषणमेतत् । देशो वाह्लीकादिः । कुलमुच्चैःश्रवआदीनां गन्धर्वकुलं वा ‘ गन्धर्वकुलजातस्त्वम् ’ इति पुराणवचनात् ॥ १९ ॥

रा० टी०–हयानामिति । हे सुव्रत ! देशजातानां काम्बोजबाह्लीकादिदेशोत्पन्नानां कुलजातानां गन्धर्वकुलप्रसूतानामत एव महौजसां हयानामेकं सहस्रं दश च दास्यामि तव तुभ्यम् ॥ १९ ॥

---

१ संदति गो. रा. पाठः । २ तत इति गो. पाठः । ३ कक्ष्येति गो. पाठः । ४ दास्यामीति रा. पाठः । ५ ते इति गो. पाठः । ६ दास्यामीति रा. पाठः ।

सहस्रमेकं दश च ददामि तव सुव्रत । नानावर्णविभक्तानां वयःस्थानां तथैव च ॥
ददाम्येकां गवां कोटिं शबला दीयतां मम ॥ ॥ २० ॥
यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम । तावद्ददामि ते[3] सर्वं दीयतां शबला मम ॥ २१ ॥
एवमुक्तस्तु भगवान्विश्वामित्रेण धीमता । न दास्यामीति शबलां प्राह राजन्कथंचन ॥ २२ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनम् । एतदेव हि सर्वस्वमेतदेव हि जीवितम् ॥ २३ ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः । एतदेव हि मे राजन्विधिश्च क्रियास्तदा ॥ २४ ॥
अतोमूलाः[4] क्रियाः सर्वा मम राजन्न संशयः । बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ।

कौशिकभटैर्हठान्नीयमानत्वाच्छबलाया वसिष्ठं प्रति किं मां त्यजसीति प्रश्नः, वसिष्ठप्रेरितशबलासृष्टसैनिकैर्विश्वामित्रसेनाविद्रावणं, संक्रुद्धविश्वामित्रेण च स्वप्रक्षेपेण तत्सेनाया दूरोत्सारणम् ।

कामधेनुं वसिष्ठोऽपि यदा न त्यजते मुनिः । तदास्य शबलां राम विश्वामित्रोऽन्वकर्षत ॥ १ ॥
नीयमाना तु शबला राम राज्ञा महात्मना । दुःखिता चिन्तयामास रुदन्ती शोककर्शिता ॥ २ ॥

गो० टी०–हयानामिति । देशाः काम्भोजबाह्लीकादयः कुलजानां गन्धर्वकुलजातानां गन्धर्वकुलजातस्त्वमिति पुराणवचनात् ॥ २० ॥

२०] ति० टी०–अनेकवर्णैर्विभक्तानां प्राप्तभेदानाम् । वयःस्थानां तरुणीनाम् ' वयःस्थस्तरुणो युवा ' इति कोशात् । एकां कोटिमित्यन्वयः ॥ २० ॥

रा० टी०–नानेति । नानावर्णविभक्तानां नानावर्णैर्विभक्तानां परस्परं भेदविशिष्टानां वयःस्थानां तरुणीनां गवामेकं कोटिं ददाम्येव अतः शबला ममैव दीयताम् । तथाशब्दो हेतौ । चशब्दः एवार्थे । ' वयस्थस्तरुणो युवा ' इति कोशः ॥ २० ॥

गो० टी०–नानेति । नानावर्णैः विभक्तानामन्योन्यविलक्षणानाम् ॥ २१ ॥

२१–२२] ति० टी०–यावदिति । इतोऽप्यधिकं वा यावदिच्छसीत्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०–उपसंहरन्नाह–यावदिति । हे द्विजोत्तम ! यावद्रत्नं हिरण्यं वेच्छसि तावत्सर्वं ददामि तत् तस्मात् शबला ममैव दीयताम् । एको वाशब्द एवार्थे ॥ २१ ॥

गो० टी०–यावदिति । यावत्प्रमाणमिच्छसि तावत्प्रमाणं सर्वं ददामि ॥ २२ ॥

रा० टी०–एवमिति । धीमता विश्वामित्रेण एवमनेन प्रकारेणोक्तः भगवान्वशिष्टः हे राजन् ! अहं शबलां कथंचनापि न दास्यामीति प्राह । तुशब्दोऽप्यर्थे ॥ २२ ॥

गो० टी०–एवमितिहे राजन्!शबलां न दास्यामीत्यन्वयः२३

२३] ति० टी०–एतच्छबलारूपं वस्तु ॥ २३ ॥

रा० टी०–दानाभावे हेतुं वदन्नाह–एतदित्यारभ्यासर्गम् । हे राजन् !एतच्छबलैव मे रत्नं मण्यादि एतदेव मे धनं स्वर्णरजतादि एतदेव मे सर्वस्वं अन्नादि अत एव एतदेव मे जीवनम् । हिशब्दाः स्वस्वान्वयिनां प्रसिद्धिं द्योतयन्ति ॥ २३ ॥

गो० टी०–एतदित्यादित्रयम् । अदोमूलाः एतन्मूलाः प्रलापेन भवत इति शेषः । कामान् दोग्धुं शीलमस्यस्या इति कामदोहिनीं "सुप्यजातौ–" इति णिनिः ॥ २४–२६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

२४] ति० टी०–आप्तदक्षिणा इत्यनन हव्यादिवद्दक्षिणाप्येतदधीनेति सूचितम् एतदेव क्रिया इत्यस्यैव विवरणम् ॥२४॥

रा० टी०–दर्श इति । दर्शादयः विविधाः अनेकप्रकाराक्रियाश्च तथा तेन प्रकारेण एतच्छबलैव । श्लोकद्वयं संमिलितान्वयि । एतदिति सामान्ये नपुंसकम् ॥ २४ ॥

२५] ति० टी०–अतोमूलाः एतन्मूला इत्यर्थः । सर्वथा दानाभावे हेतुगर्भं विशेषणम् । कामदोहिनीमिच्छाविषयदोहनशीलाम् । काव्यलिङ्गमलंकारः ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय-आदिकाव्ये बालकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रा० टी०–उपसंहरन्नाह–अद इति । हे राजन् ! अदः शबला मूलं यासां ताः मम सर्वाः क्रियाः अत्र संशयो न अतः कामदोहिनीं शबलामहं न दास्ये बहुना प्रलापेन किं एतेन अस्याः प्राप्तौ वाञ्छां त्यजेति ध्वनितम्, तेन पुनर्न याचेति व्यञ्जितम् ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१–२] ति० टी०–अथ दण्डोपायप्रवृत्तिमाह–कामेधनुमिति। न त्यजते नात्यजत् । अन्वकर्षत बलादिति शेषः ॥ १ ॥ २ ॥

---

१ दास्यामीति रा. पाठः । २ रत्नं वेति गो. रा. पाठः । ३ तत्सर्वमिति गो. रा. पाठः । ४ अदोमूला इति गो. रा. पाठः ।

परित्यक्ता वसिष्ठेन किमहं सुमहात्मना । याहं राजभृतैर्दीना ह्रियेय[1] भृशदुःखिता ॥ ३ ॥
किं मयापकृतं तस्य महर्षेर्भावितात्मनः । यन्मामनागसं दृष्ट्वा[2] भक्तां त्यजति धार्मिकः ॥ ४ ॥
इति[3] संचिन्तयित्वा तु निःश्वस्य च पुनःपुनः । जगाम वेगेन तदा वसिष्ठं परमौजसम् ॥ ५ ॥
निर्धूय तांस्तदा भृत्याञ्छतशः शत्रुसूदन । जगामानिलवेगेन पादमूलं महात्मनः ॥ ६ ॥
शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् । वसिष्ठस्याग्रतः स्थित्वा रुदन्ती[5] मेघनिःस्वना[6] ॥ ७ ॥
भगवन्किं परित्यक्ता त्वयाहं ब्रह्मणः सुत । यस्माद्राजभृता मां हि नयन्ते त्वत्सकाशतः[7] ॥ ८ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् । शोकसंतप्तहृदयां स्वसारमिव दुःखिताम् ॥ ९ ॥
न त्वां त्यजामि शबले नापि मेऽपकृतं त्वया । एष त्वां नयते राजा बलान्मत्तो महाबलः ॥ १० ॥

रा० टी०–कामधेनुमिति । हे राम ! मुनिः वशिष्ठः यदा कामधेनुं न त्यजते नात्यजत् तदापि विश्वामित्रः अस्य वशिष्ठस्य शबलामन्वकर्षत हठादनयत् ॥ १ ॥

गो० टी०–अथ बलात्कारकुपितवसिष्ठप्रहितकामधेनोर्बलसृष्टिश्चतुःपञ्चाशे । कामधेनुमित्यादि दशकम् ॥ १ ॥ २ ॥

रा० टी०–नीयमानेति । हे राम ! महात्मना राज्ञा विश्वामित्रेण नीयमाना बलादाकृष्यमाणा अत एव दुःखिता अत एव रुदन्ती शोककर्षिता शोकव्याकुलचित्ता शबला तु चिन्तयामास ॥ २ ॥

३] ति० टी०–राजभृतै राजसेवकैः । 'भटैः' इति क्वचित्पाठः । ह्रियेय कर्मणि लिङ् । भृशदुःखिता भृशेनातिशयेन दुःखिता अस्मीति शेषः । भृशशब्दो बहुपर्यायो वा ॥ ३ ॥

रा० टी०–तच्चिन्तामेवाह–परीति । या अहं राजभृतैः विश्वामित्रभृत्यैः ह्रियेय सा दीना भृशं दुःखिता अहं सुमहात्मना वशिष्ठेन किं किमर्थं परित्यक्ता ॥ ३ ॥

गो० टी०–ह्रियेयं कर्मणि संप्रश्ने लिङ् कथमपि ह्रियेयमित्यर्थः । भृशदुःखिता भृशं दुःखिता क्तिविषये मकारलोपो भृशमादिमान्ताव्ययस्येष्यते ॥ ३–५ ॥

४–५] ति० टी०–अपकृतमपराधं दृष्ट्वा ज्ञात्वापि भक्तां सेवापराम् ॥ ४ ॥ ५ ॥

रा० टी०–किमिति । भावितात्मनः चिन्तनीयस्वरूपस्य महर्षेः वशिष्ठस्य मया किंमपकृतं यत् येनापकारेण अनागसं मज्ज्ञानविषयीभूतापराधरहितां भक्तां तत्सेवापरामत एव इष्टां तदिच्छाविषयीभूतां मां धार्मिकः धर्मनिरतो वशिष्ठः त्यजति ॥४॥

रा० टी०–इतीति । तदा स्वापकर्षणकाले इति अनेन प्रकारेण चिन्तयित्वा पुनः पुनः निश्वस्य च सा शबला वायुवेगेनैव परमौजसं वशिष्ठं जगाम । तुशब्द एवार्थे ॥ ५ ॥

६] ति० टी०–शतशो भृत्यान्स्वकर्षकान् । पादमूलं पादसमीपम् । महात्मनो वसिष्ठस्य ॥ ६ ॥

रा० टी०–गमनप्रकारं वर्णयन्नाह–निरिति । हे शत्रुसूदन! तदा स्वापकर्षणकाले शतशस्तान् भृत्यान् निर्धूय निपात्य महात्मनो वशिष्ठस्य पादमूलं चरणसमीपं अनिलवेगेन जगाम शबलेति शेषः ॥ ६ ॥

७] ति० टी०–रोदनमश्रुपातः । क्रोशनमार्तशब्दः । रुदन्त्या एव ऋषिसमीपगमनं रुदन्त्यैव च कथनमित्येतदर्थं द्वौ रुदन्तीति ॥ ७ ॥

रा० टी०–शबलेति । रुदन्ती रोदनं कुर्वती क्रोशन्ती हे ऋषे ! इत्याह्वानं कुर्वती रुदन्ती स्वरोदनहेतुककरुणोत्पादनेन अन्यानपि रोदयन्ती च मेघनिःस्वना गम्भीरनादा सा शबला वशिष्ठस्याग्रत एव स्थित्वा इदमब्रवीत् । एकश्चशब्द एवार्थे ॥ ७ ॥

गो० टी०–क्रोशन्ती आर्तस्वरं *कुर्वन्ती ॥ ६ ॥

८] ति० टी०–सकाशः समीपम् ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–भगवन्निति । हे भगवन् ब्रह्मणः सुत ! त्वयाऽहं किं किमर्थं परित्यक्ता यस्मात्परित्यागाद्धेतोः राजभृताः राजभटाः त्वत्सकाशतो मां नयन्ति ॥ ८ ॥

गो० टी०–राजभृताः राजभटाः त्वत्सकाशतस्त्वत्समीपतः ॥ ७ ॥ ८

९] ति० टी०–स्वसा भगिनी ॥ ९ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्तः शबलया प्रार्थित एव ब्रह्मर्षिः वशिष्ठः शोकसंतप्तहृदयां दुःखितां स्वसारमिव भगिनीसदृशीं शबलामिदं वचनमब्रवीत् । तुशब्द एवार्थे ॥९॥

१०] ति० टी०–बलात्प्रत्राव् । मत्तोऽविवेकी ॥ १० ॥

रा० टी०–तद्वचनमेवाह–नेति । हे शबले ! त्वया मे नापकृतमतस्त्वामहं न त्यजामि महाबलः मत्तः उन्मत्त एषः राजा बलात् हठात् त्वां नयते । अपिर्हेतौ ॥ १० ॥

गो० टी०–मत्तः मत्सकाशत् । मद्यं मम तर्हि तपोबलेन किमिति न दण्ड्यते तत्राह–राजा त्वद्यविशेषत इति । राजा तपोबलेन न दण्ड्य इत्यर्थः ॥ ९–१० ॥

१ भटैरिति गो. पाठः । २ ह्रियेयमिति गो. पाठः । ३ भक्तामिष्टामिति गो. रा. पाठः । ४ श्लोकोऽयं गो. नास्ति । ५ सेति रा. पाठः । ६ मेघदुन्दुभिराविणीति गो. पाठः । ७ त्वेति रा. पाठः । * कुर्वतीतियुक्तं भाति ।

नहि तुल्यं बलं मह्यं राजा त्वद्य विशेषतः । बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११ ॥
इयमक्षौहिणी पूर्णा गजवाजिरथाकुला । हस्तिध्वजसमाकीर्णा तेनासौ बलवत्तरः ॥ १२ ॥
एवमुक्ता वसिष्ठेन प्रत्युवाच विनीतवत् । वचनं वचनज्ञा सा ब्रह्मर्षिमतुलप्रभम् ॥ १३ ॥
न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तरः । ब्रह्मन्ब्रह्मबलं दिव्यं क्षात्राच्च बलवत्तरम् ॥ १४ ॥
अप्रमेयं बलं तुभ्यं न त्वया बलवत्तरः । विश्वामित्रो महावीर्यस्तेजस्तव दुरासदम् ॥ १५ ॥
नियुङ्क्ष्व मां महातेजस्त्वं ब्रह्मबलसंभृताम् । तस्य दर्पं बलं चैतन्नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु तया राम वसिष्ठस्तु महायशाः । सृजस्वेति तदोवाच बलं परबलार्दनम् ॥ १७ ॥

११] ति० टी०–मह्यं मम । नहि तद्बलेन तुल्यमित्यर्थः । तपोबलेन तर्हि दण्ड्यताम् तत्राह–राजा त्वित्यादि । राजत्वात्तपोबलेन न दण्ड्य इति भावः । तद्वक्ष्यति किञ्चिन्न्यायाम्–'दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च । राजानो वानरश्रेष्ठ प्रदातारो न संशयः ॥ तान्न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् । देवा मानुषरूपेण चरन्त्येते महीतले ॥' इति । अथ विशेषतः अवध्य इति शेषः । अथ कृतातिथ्यके दिने तेनातिथित्वाद्विशेषतोऽवध्य इति भावः । बली राजेत्यनेन युद्धाजेयत्वमुक्तम् । पृथिवीपतिक्षत्रियत्वेन तद्वधस्य महापातकसमता बोधिता ॥ ११ ॥

रा० टी०–नहीति । विशेषतो बलं बलवदपि मह्यं पूजनीयं ब्राह्मणकुलमय विवादसमये राजा राज्ञा तुल्यं नैव ब्राह्मणकुलस्य शान्तिगुणविशिष्टत्वेन युद्धानर्हत्वादिति भावः । अतो राजा प्रजाविषयकानुरागविशिष्टः पृथिव्याः पतिः क्षत्रिय एवास्मिन् विवादसमये बली । हिशब्दोऽप्यर्थे तुशब्द एवार्थे एकश्चशब्दो हेत्वर्थे द्वितीयश्चशब्दोऽस्मित्यर्थे पूर्वो राजा क्विबन्तप्रकृतिकस्तृतीयान्तः संज्ञापूर्वकविधेरनित्यत्वान्मह्यमित्यत्र वृद्धिविरहः ॥ ११ ॥

१२] ति० टी०–बलित्वमेवोपपादयति–इयमिति । हस्तिस्थैर्ध्वजैः समाकीर्णा ॥ १२ ॥

रा० टी०–तस्य सहेतुकं बलवत्तरत्वमाह–इयमिति । सवाजिरथसंकुला वाजिसहितरथैः संकुला व्याप्ता हस्तिध्वजसमाकीर्णा हस्तिश्रेष्ठैः समाकीर्णा पूर्णा इयं विश्वामित्राक्षौहिणी अस्तीति शेषः । तेन हेतुनाऽसौ विश्वामित्रो बलवत्तरः अतिबली अस्ति ॥ १२ ॥

गो० टी०–इयमित्यादिपञ्च । सवाजिरथसंकुला वाजिसहितरथैः संकुला तुभ्यं तव त्वया त्वत्तः त्वद्ब्रह्मबलेन त्वन्मन्त्रबलन संभृतां संवार्धतप्रभावाम् ॥ ११–१५ ॥

१३] ति० टी०–विनीतवद्विनयोपेतम् ॥ १३ ॥

रा० टी०–एवमिति । एवं वर्णितप्रकारेण वशिष्ठेन उक्ता वचनज्ञा वचनतात्पर्यज्ञात्री सा शबला विनीतवत् विनम्रतायुक्तं वचनमतुलप्रभं ब्रह्मर्षिं वशिष्ठं प्रत्युवाच ॥ १३ ॥

१४] ति० टी०–न बलमल्पबलम् । बलवत्तराः क्षत्रियादिभ्यः । क्षात्रात्क्षत्रियबलादपि बलवत्तरमधिकम् ॥ १४ ॥

रा० टी०–तद्वचनमेवाह–नेति । क्षत्रियस्य न बलं ब्राह्मणबलापेक्षया अल्पबलमाहुः तत्वज्ञा इति शेषः । अतो ब्राह्मणाः बलवत्तराः एतेन शान्तिगुणविशिष्टत्वेऽपि क्षत्रियादिकृतब्राह्मणापकृतिजनितदुरितध्वंसः स्वनिष्ठकरुणया ब्राह्मणैः कर्तव्य एवेति ध्वनितम् । सहेतुकं ब्राह्मणबलस्य बलवत्तरत्वं वदन्नाह–हे ब्रह्मन् ! ब्रह्मबलं ब्राह्मणस्य तव बलं दिव्यं प्राकृतविलक्षणमतः क्षत्रात् क्षत्रियबलात् बलवत्तरमस्तीति शेषः । ब्रह्मबलमित्युभयान्वयि । तुशब्दो हेत्वर्थे अल्पार्थको नञ् ॥१४॥

१५] ति० टी०–तुभ्यं तव । न त्वया सदृशोऽपीति शेषः । बलवत्तर इति दूरे इति शेषः । महावीर्यो महावीर्योऽपि । तत्र हेतुस्तेजस्तवेत्यादि ॥ १५ ॥

रा० टी०–ननु सैन्यबलेन तस्य बलवत्तरत्वमक्षतमेवेत्यत आह–अप्रमेयमिति । दुरासदं निवर्तयितुमशक्यं तव तेज तपोजनितप्रभाव एवमप्रमेयमियत्तारहितं तुभ्यं तव बलं सैन्यमस्तीति शेषः । अतः महावीर्यः सैन्यादिवीर्यविशिष्टः विश्वामित्रस्त्वया त्वत्तो बलवत्तरो न ॥ १५ ॥

१६–१७] ति० टी०–ननु त्वमेव तस्य बलं नाशय तत्राह–नियुङ्क्ष्वेति । कामधेनुत्वान्नियोगापेक्षापरकाम्यार्थसृष्टावेव तस्याः सामर्थ्यात् । ब्रह्मबलसंभृतां तादृशकार्यसमर्थत्वेन मां ध्यायस्वेत्यर्थः ॥ १६ ॥ १७ ॥

रा० टी०–राजपराभवोपायं वदन्ती आह–नियुङ्क्ष्वेति हे महातेजः त्वद्ब्रह्मबलसंभृतां तव मन्त्रबलेन संपोषितां मां नियुङ्क्ष्व तद्बलनाशने नियोजय तेन दुरात्मनः दुष्टस्वभावस्य तस्य विश्वामित्रस्य यदर्पं बलं च तत् नाशयामि । विनापि चं समुच्चयः ॥ १६ ॥

रा० टी०–इतीति । हे राम ! तया शबलया इति अनेन प्रकारेण उक्त एव महायशाः वशिष्ठः परबलार्दनं शत्रुसैन्यनाशकं बलं सैन्यं सृजस्व इति तदा धेनुप्रार्थनोत्तरसमये एवमुवाच धेनुमिति शेषः । तुशब्दो एवार्थौ ॥ १७

गो० टी०–इत्युक्त इत्याद्यष्टौ । आरुजति हिनस्तीत्यारुजं बलं सैन्यम् ॥ १६ ॥ १७ ॥

१ सवाजिरथसंकुलेति गो. रा. पाठ । २ ब्राह्मणा बलवत्तर इति गा. पाठः । ३ क्षत्रात्त्विति गो. रा. पाठः । ४ त्वद्ब्रह्मति गो. रा. पाठः । यत्तदिति गो. रा. पाठः । ६ बलारुजमिति गो. पाठः ।

तस्य तद्वचनं श्रुत्वा सुरभिः सासृजत्तदा । तस्या हुंभारवोत्सृष्टाः पह्लवाः शतशो नृप ॥ १८ ॥
नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः । स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः ॥ १९ ॥
पैह्लवान्नाशयामास शस्त्रैरुच्चावचैरपि । विश्वामित्रार्दितान्दृष्ट्वा पैह्लवाञ्शतशस्तदा ॥ २० ॥
भूय एवासृजद्घोराञ्छकान्यवनमिश्रितान् । तैरासीत्संवृता भूमिः शकैर्यवनमिश्रितैः ॥ २१ ॥
प्रभावद्भिर्महावीर्यैर्हेमकिंजल्कसंनिभैः । तीक्ष्णासिपट्टिशधरैर्हेमवर्णाम्बरावृतैः ॥ २२ ॥
निर्दग्धं तद्बलं सर्वं प्रदीप्तैरिव पावकैः । ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोचह ॥
तैस्ते यवनकाम्बोजा बर्बराश्चाकुलीकृताः ॥ ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ।

वसिष्ठप्रेरितशबला निजावयवसृष्टबलेन विश्वामित्रसेनां निःशेषं बभञ्ज जिघांसयाऽऽपतद्विश्वामित्रशतशतं वसिष्ठो हुंकारेणैव भस्मतां निनाय आलोच्येदं विश्वामित्रोऽवांशष्ठमेकं पुत्रं राज्ये नियोज्य तपस्तप्तुं हिमवन्तं ययौ, ततो मृडात्प्राप्तसकलास्त्रत्वेन दृप्तः संप्राप्याश्रममस्त्रतेजसा मुनिजनान्समक्षोभयद्वसिष्ठोऽपि दण्डमुद्यम्याग्रे तस्थौ ।

ततस्तानाकुलान्दृष्ट्वा विश्वामित्रास्त्रमोहितान् । वसिष्ठश्चोदयामास कामधुक्सृज योगतः ॥ १ ॥
तस्या हुंकारतो जाताः काम्बोजा रविसंनिभाः । ऊधसश्चार्थं संभूता बर्बराः शस्त्रपाणयः ॥ २ ॥

१८] ति० टी०–हुम्भानाम गवां शब्दाः । पह्लवशकयवनकाम्बोजबर्बरा म्लेच्छजातिविशेषाः ॥ १८ ॥

रा० टी०–तस्येति । तदा वशिष्ठोक्तिसमये तस्य वशिष्ठस्य तद्वचनं श्रुत्वा सा सुरभिः असृजत् राजबलविघातकानिति शेषः । सर्जनप्रकारं वर्णयन्नाह–हे नृप ! तस्याः धेनोः हुम्भारवोत्सृष्टाः हुंकारशब्दोत्पन्नाः शतशः पह्लवाः यवनविशेषाः तदुपलक्षितपह्लवकाम्बोजबर्बराः विश्वामित्रस्य सर्वं बलं सैन्यं विश्वामित्रस्य पश्यतः पश्यन्तं विश्वामित्रमनादृत्य नाशयन्ति अनाशयन्त वर्तमानसामीप्य इति भूते लट् । सार्धश्लोक एकान्वयी । पह्लवशकयवनकाम्बोजबर्बराणा म्लेच्छविशेषा इति प्रसिद्धम् ॥ १८ ॥

गो० टी०–हुम्भारवः पशूनां हुम्भाशब्दः।उत्सृष्टाः निर्मिताः। पह्लवशकयवनादिशब्दाः म्लेच्छजातिविशेषवचनाः पश्यत इत्यनादरे षष्ठी ॥ १८ ॥

१९] ति०टी०-पश्यत इत्यनादरे षष्ठीविस्फारितं विवृतम् १९॥

रा० टी०–स इति । परमक्रुद्धः अतिक्रोधविशिष्टः अत एव क्रोधविस्फारितेक्षणः क्रोधेन विस्फारिते ईक्षणे नेत्रे येन स राजा विश्वामित्रः ॥ १९ ॥

गो० टी०–विस्फारितं विवृतम् ॥ १९ ॥

२०–२१] ति० टी०–अर्दिताः पीडिताः ॥ २० ॥ २१ ॥

रा० टी०–उच्चावचैः न्यूनाधिकभावतामापन्नैः शस्त्रास्त्रैः अपिना तर्जनादिभिः पह्लवान् नाशयामास तदा विश्वामित्रप्रहरणकाले शतशः पह्लवान् विश्वामित्रार्दितान्दृष्ट्वा अवलोक्य ॥ २० ॥

गो० टी०–अर्दितान् हिंसितान् ॥ २० ॥

रा० टी०–घोरान् भयंकरान् यवनमिश्रितान् यवनसजातीयान् शकान् भूयोऽपि असृजत् शबलेति शेषः । तैः शबलासृष्टैः यवनमिश्रितैः शकैः संवृता भूमिः आसीत् ॥ २१ ॥

२२–२३] ति० टी०–प्रभा दुर्निरीक्ष्यं तेजः । हेम्नः किंजल्कस्य च सदृशैः । हेमवर्णाम्बरं पीताम्बरम् ॥२२॥२३॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

रा० टी०–प्रभावद्भिरिति । प्रभावद्भिः अतिप्रभाविशिष्टैः महावीर्यैः अतिपराक्रमवद्भिः हेमकिञ्जल्कसन्निभैः चम्पककेशरतुल्यैः दीर्घासिपट्टिशधरैः बृहदस्यादिविशिष्टैः हेमवर्णाम्बरावृतैः हेमवर्णसदृशवर्णविशिष्टवस्त्रयुक्तैः पावकैरिव प्रदीप्तैः यवनमिश्रितैः शकैः सर्वं तद्बलं विश्वामित्रसैन्यं निर्दग्धं ततः स्वसैन्यनिर्दाहानन्तरमेव महातेजाः विश्वामित्रः अस्त्राणि मुमोच। हशब्द एवार्थे ॥ २२ ॥ २३ ॥

गो०टी०–हेमकिञ्जल्कसन्निभैः हेमशब्दश्चम्पकपरः तस्य कनकाह्वयत्वात् तत्केसरतुल्यैरित्यर्थः।पट्टिशः असिविशेषः २१–२३

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

रा० टी०–तैर्विश्वामित्रास्त्रैः ते प्रसिद्धाः यवनकाम्बोजाः पह्लवाश्च आकुलीकृताः व्याकुलतां प्रापिताः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्यायां रामायणशिरोमणौ बालकाण्डे चतुःपञ्चाशत्तमः सर्गः ॥ ५४ ॥

१–२] ति० टी०–आकुलान्पलायमानान् । कामधुगिति संबोधनम् योगतो योगमहिम्ना ॥ १ ॥ २ ॥

---

१ पह्लवा इति गो. पाठः । २ पह्लवानिति गो. पाठः । ३ पह्लवानिति गो. पाठः । ४ दीर्घेति गो. रा. पाठः । ५ पह्लवा इति गो. पह्लवा इति रा. पाठः । ६ हुम्भारवादिति गो. रा. पाठः । ७ एवेति रा. त्वथेति गो. पाठः । ८ पह्लना इति गो. पह्लवा इति रा. पाठः ।

योनिदेशाच्च यवना शकृद्देशाच्छकाः स्मृताः । रोमकूपेषु म्लेच्छाश्च हारीताः किरातकाः ॥ ३ ॥
तैस्तन्निषूदितं सर्वं विश्वामित्रस्य तत्क्षणात् । सपदातिगजं साश्वं सरथं रघुनन्दन ॥ ४ ॥
दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना । विश्वामित्रसुतानां तु शतं नानाविधायुधम् ॥ ५ ॥
अभ्यधावत्सुसंक्रुद्धं वसिष्ठं जपतां वरम् । हुंकारेणैव तान्सर्वान्निर्ददाह महानृषिः ॥ ६ ॥
ते साश्वरथपादाता वसिष्ठेन महात्मना । भस्मीकृता मुहूर्तेन विश्वामित्रसुतास्तथा ॥ ७ ॥
दृष्ट्वा विनाशितान्सर्वान्बलं च सुमहायशाः । सव्रीडं चिन्तयाविष्टो विश्वामित्रोऽभवत्तदा ॥ ८ ॥
समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः । उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ९ ॥

रा० टी०–तत इति । ततः आकुलीभवनानन्तरं विश्वामित्रास्त्रमोहितान् अत एव आकुलान् व्याकुलचित्तान् तान् यवनादीन् दृष्ट्वा वशिष्ठश्चोदयामास धेनुमिति शेषः । तच्चोदनमेवाह–हे कामधुक् ! योगतः योगप्रभावात् त्वं सृज अन्यानर्पयेति शेषः ॥ १ ॥

गो० टी०–अथ पुनर्दिव्यास्त्रलाभपूर्वं विश्वामित्रेण वसिष्ठाश्रमसंरोधः पञ्चपञ्चाशे–ततस्तानित्यादि । हे कामधुक् ! योगतः योगमहिम्ना तिरश्चोऽपि ब्रह्मप्रसादाद्योगशक्तिरस्तीति ज्ञेयम् ॥ १ ॥

रा० टी०–तस्या इति । तस्याः धेनोः हुम्भारवाद्धुंकारशब्दात् रविसंनिभाः सूर्यसदृशाः काम्बोजाः जाताः तस्याः ऊधसः स्तनदेशात्तु शस्त्रपाणयः एव पह्लवाः पुनः संभूताः। तुशब्दः पुनरर्थे ॥ २ ॥

गो० टी०–तस्या *इत्यादिचत्वारः। ऊधसः स्तनात्। हारीताः किरातजातिविशेषाः ॥ २ ॥ ३ ॥ ४ ॥

३] ति० टी०–रोमकूपेषु रोमकूपेभ्यः । म्लेच्छहारीतकिराता जातिविशेषाः ॥ ३ ॥

रा० टी०–योनीति । तस्याः योनिदेशात् यवनाः पुनर्जाताः तथा तेन प्रकारेण शकृद्देशात् गोमयनिःसरणस्थानात् शकाः यवनजातिविशेषाः जाताः । म्लेच्छाः यवनजातिविशेषाः हारिकाः किरातजातिविशेषाश्च किरातकाश्च तस्याः रोमकूपेषु जाताः । श्लोकद्वयमेकान्वयि तुशब्दार्थे ॥ ३ ॥

४] ति० टी०–विश्वामित्रस्य तत्सैन्यम् ॥ ४ ॥

रा० टी०–तैरिति । तैः धेनूत्पादितकाम्बोजादिभिः सपदातिगजं पदातिगजसहितं साश्वमश्वसहितं सरथं रथसहितं विश्वामित्रस्य तत्सर्वं सैन्यं हे रघुनन्दन ! क्षणान्निषूदितं विनाशितम् ॥ ४ ॥

५] ति० टी०–विश्वामित्रसुतानां शतमृषिरेव धेनोर्बलम्, अतोऽयमेव नाशनीय इत्याशयेन वसिष्ठमभ्यधावत् ॥ ५ ॥

रा० टी०–दृष्ट्वेति । महात्मना वशिष्ठेन सैन्यं विश्वामित्रसेनां निषूदितं दृष्ट्वा नानाविधायुधं अनेकप्रकारायुधविशिष्टं सुसंक्रुद्धं मतिक्रोधविशिष्टं विश्वामित्रसुतानां शतं शतसङ्ख्याकविश्वामित्र पुत्रा इत्यर्थः । जपतां मध्ये वरं श्रेष्ठं वशिष्ठमभ्यधावत् । सार्धश्लोक एकान्वयी ॥ ५ ॥

गो० टी०–दृष्ट्वेत्यादिषट् । वसिष्ठमभ्यधावत् तस्य सर्वविनाशमूलत्वादिति भावः । जपतांवरमिति हुंकारेण निरासे हेतुः ॥ ५ ॥ ६ ॥

६] ति० टी०–हुंकारेण तपोबलसंभृतेन । क्षत्रियत्वेऽपि पृथिवीपतित्वाभावात्तद्वधेऽल्पप्रायश्चित्तम् आततायित्वाच्चेति भावः ॥ ६

रा० टी०–महान् ऋषिः वशिष्ठः सर्वान् तान् विश्वामित्रसुतान् हुंकारेणैव निर्ददाह ॥ ६ ॥

७] ति० टी०–मुहूर्तेन भस्मीकृता इत्यपवर्गे तृतीया मासेनानुवाकोऽधीत इतिवत् ॥ ७ ॥

रा० टी०–दाहमेव विशदयन्नाह–ते इति । तदा धावनसमये साश्वरथपादाताः अश्वरथपदातिसहिताः ते विश्वामित्रसुताः महात्मना वशिष्ठेन मुहूर्तेन भस्मीकृताः भस्मतां प्रापिताः ॥ ७ ॥

गो० टी०–मुहूर्तेनेति । मासेनानुवाकोऽधीत इतिवदपवर्गे तृतीया ॥ ७ ॥ ८ ॥

८] ति० टी०–सर्वान्पुत्रान् । सव्रीडमिति क्रियाविशेषणम् ॥ ८ ॥

रा० टी०–दृष्ट्वेति । सुमहायशाः पूजनीयातियशोविशिष्टः। विश्वामित्रस्तदा पुत्रादिहननकाले सर्वान् पुत्रान् बलं सैन्यं च विनाशितान् दृष्ट्वा सव्रीडं यथा स्यात्तथा चिन्तया आविष्टः युक्तः अभवत् ॥ ८ ॥

९] ति० टी०–निर्वेगत्वे समुद्रोपमा निष्प्रभत्वे इतरे उपमे । उपरक्तो राहुग्रस्तः ॥ ९ ॥

रा० टी०–चिन्तास्वरूपं वर्णयन्नाह–समुद्र इति । निर्वेगः समुद्र इव भग्नदंष्ट्रः उरगः सर्प इव उपरक्तः राहुणा ग्रस्तः आदित्यः सूर्य इव सद्यः शीघ्रं निष्प्रभतां प्रभाराहित्यं गतः प्राप्तो विश्वामित्र आसीदिति शेषः ॥ ९ ॥

गो० टी०–निर्वेगः युद्धप्रवृत्तिरहितः उरग इव निःशक्तिरिति शेषः । उपरक्तः राहुग्रस्तः ॥ ९ ॥

१ तथेति गो. रा. पाठः । २ त्विति रा. पाठः । ३ हारिकास्तु किरातका इति रा. पाठः । ४ ददाह भगवानृषिरिति गो. पाठः । ५ तदेति गो. रा. पाठः । ६ पुत्रानिति गो. रा. पाठः । ७ सव्रीडश्चिन्तयेति गो. पाठः । * त्रय एवोपलभ्यन्ते ।

हतपुत्रबलो दीनो लूनपक्ष इव द्विजः । हतसर्वबलोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय पालयेति नियुज्य च । पृथिवीं क्षत्रधर्मेण वनमेवाभ्यपद्यत ॥ ११ ॥
स गत्वा हिमवत्पार्श्वे किन्नरोरगसेवितम् । महादेवप्रसादार्थं तपस्तेपे महातपाः ॥ १२ ॥
केनचित्त्वथ कालेन देवेशो वृषभध्वजः । दर्शयामास वरदो विश्वामित्रं महामुनिम् ॥ १३ ॥
किमर्थं तप्यसे राजन्ब्रूहि यत्ते विवक्षितम् । वरदोऽस्मि वरो यस्ते काङ्क्षितः सोऽभिधीयताम्॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो महातपाः । प्रणिपत्य महादेवं विश्वामित्रोऽब्रवीदिदम् ॥ १५ ॥
यदि तुष्टो महादेव धनुर्वेदो ममानघ । साङ्गोपाङ्गोपनिषदः सरहस्यः प्रदीयताम् ॥ १६ ॥
यानि देवेषु चास्त्राणि दानवेषु महर्षिषु । गन्धर्वयक्षरक्षःसु प्रतिभान्तु ममानघ ॥ १७ ॥
तव प्रसादाद्भवतु देवदेव ममेप्सितम् । एवमस्त्विति देवेशो वाक्यमुक्त्वा गतस्तदा ॥ १८ ॥
प्राप्य चास्त्राणि देवेशाद्विश्वामित्रो महाबलः । दर्पेण महता युक्तो दर्पपूर्णोऽभवत्तदा ॥ १९ ॥
विवर्धमानो वीर्येण समुद्र इव पर्वणि । हतं मेने तदा राम वसिष्ठमृषिसत्तमम् ॥ २० ॥

१०] ति० टी०–हतसर्वबलोत्साहः सर्वाणि बलानि शारीरबौद्धास्त्रादीनि तज्जन्योत्साहहीनः । निर्वेदं सर्वत्र निष्फलत्वबुद्धिजं चित्तखेदम् ॥ १० ॥

रा० टी०–हतेति । हतपुत्रबलः हताः पुत्रा बलानि च यस्य अत एव लूनः शातितः पक्षो यस्य स द्विजः पक्षी इव दीनः अत एव हतदर्पः विगतगर्वः अत एव हतोत्साहः विश्वामित्रः निर्वेदं अत्यन्तखेदं समपद्यत प्राप्नोत् ॥ १० ॥

गो० टी०–निर्वेदं दुःखम् ॥ १० ॥

११–१२] ति० टी०–एकम् अवशिष्टमिति शेषः । राज्याय राज्यं रक्षितुम् । पृथिवीं क्षत्रधर्मेण पालयेति नियुज्येत्यन्वयः ॥ ११ ॥ १२ ॥

रा० टी०–स इति । स विश्वामित्रः राज्याय राज्यं पालयितुं क्षत्रधर्मेणैव त्वं पृथिवीं पालयेति एकं पुत्रं नियुज्य वनमेव अभ्यपद्यत चशब्द एवार्थे ॥ ११ ॥

गो० टी०–स इत्यादिचत्वारः । एकमवशिष्टमिति शेषः । राज्याय राज्यं कर्तुं पृथिवीं क्षत्रधर्मेण पालयेत्यन्वयः११॥१२॥

रा० टी०–स इति । महातपाः स विश्वामित्रः किन्नरोरगसेवितं हिमवत्पार्श्वं गत्वा महादेवप्रसादार्थं तपस्तेपे ॥१२॥

१३–१५] ति० टी०–दर्शयामास आत्मानमिति शेषः ॥ १३–१५ ॥

रा० टी०–केनेति । अथ विश्वामित्रतपःप्रारम्भानन्तरमेव केनचित्कालेन वरदः निखिलाभीष्टदानसमर्थः देवेशः सकलदेवनियन्ता वृषभध्वजो महादेवः महाबलं विश्वामित्रं दर्शयामास स्वात्मानमिति शेषः । तुशब्द एवार्थे ॥ १३ ॥

गो० टी०–दर्शयामास आत्मानमिति शेषः ॥ १३ ॥ १४ ॥

रा० टी०–शिवोक्तिमाह–किमिति । हे राजन् ! किमर्थं त्वं तप्यसे यत्ते विवक्षितं वक्तुमिष्टं तद्ब्रूहि नन्वं त्वं कोसि इत्यत आह–वरदः अभीष्टदातास्मि अहमिति शेषः । अतः यः वरस्ते काङ्क्षितः इच्छाविषयीभूतः सः अभिधीयतां प्रोच्यताम्१४

रा० टी०–एवमिति । महातपाः विश्वामित्रः देवेन महादेवेन एवमनेन प्रकारेण उक्त आसीदिति शेषः । अनन्तरं महादेवं प्रणिपत्य विश्वामित्रः इदं वचनमब्रवीत् ॥ १५ ॥

गो० टी०–एवमित्यादिचत्वारः ॥ १५ ॥

१६–१७] ति० टी०–साक्षादुपकारकाण्यङ्गानि, आरादुपकारकाण्युपाङ्गानि, मन्त्रा उपनिषदः । समाहारद्वन्द्वे " द्वन्द्वाच्चुदु–"इति टच् । तेन सहितो धनुर्वेद इत्यर्थः । रहस्यमाचार्यमुखैकगम्यं विद्याजातम् ॥ १६ ॥ १७ ॥

रा० टी०–तद्वचनमेवाह–यदीति । हे महादेव ! हे अनघ ! यदि त्वं तुष्टः तर्हि साङ्गोपाङ्गोपनिषदः अङ्गोपाङ्गोपनिषदसहितः सरहस्यः रहस्यसहितः धनुर्वेदः मम प्रदीयतां " द्वन्द्वाच्चुदषहान्तात्समाहारे " इति टच् । उपनिषदशब्दोऽन्तोवा रहस्यशब्दः आचार्योपदेशैकगम्यविद्याविशेषप्रतिपादकः एतेनोपनिषदशब्दे अदन्तत्वमार्षमिति भूषणोक्तिश्चिन्त्या ॥१६॥

गो० टी०–साङ्गोपाङ्गोपनिषद इत्यकारान्तत्वमार्षम् । अङ्गं सन्निपत्योपकारकमुपाङ्गमारादुपकारकम् उपनिषत् रहस्यमन्त्रः सरहस्यः उपदेशगम्यार्थसहितः प्रतिभान्तु तानीति शेषः । ममेप्सितमन्यदपीति शेषः ॥ १६ ॥ १७ ॥ १८ ॥

रा० टी०–यानीति । हे अनघ ! देवादिषु यानि अस्त्राणि चकारेण शस्त्राणि तानि मम प्रतिभान्तु ॥ १७ ॥

१८] ति० टी०–प्रसादात् न तूपदेशापेक्षेति भावः॥१८॥

रा० टी०–तवेति । हे देवदेव ! तव प्रसादात् मम ईप्सितं भवतु वाञ्छितं प्राप्नुयामित्यर्थः । विश्वामित्रप्रार्थनोत्तरकालिकवृत्तमाह–तदा विश्वामित्रप्रार्थनोत्तरकाले देवेशो महादेवः एवमस्तु इति वाक्यमुक्त्वा गतः स्वधामेति शेषः ॥ १८ ॥

१९–२०] ति० टी०–क्षत्रियत्वात्सहज एव दर्पस्तस्य पूर्तिरस्त्रलाभात् ॥ १९ ॥ २० ॥

१ हतदर्प इति गो. रा. पाठः । २ अन्वपद्येति गो. पाठः । ३ बलमिति गो. रा. पाठः । ४ इदं वचनमब्रवीदिति गो. पाठः । ५ राजर्षिरिति गो. रा. पाठः । ६ एवेति गो. रा. पाठः ।

ततो गत्वाश्रमपदं मुमोचास्त्राणि पार्थिवः । यैस्तत्तपोवनं नाम निर्दग्धं चास्त्रतेजसा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद्विश्वामित्रस्य धीमतः । दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥ २२ ॥
वसिष्ठस्य च ये शिष्या ये[2] च वै मृगपक्षिणः । विद्रवन्ति भयाद्भीता नानादिग्भ्यः सहस्रशः ॥ २३ ॥
वसिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः । मुहूर्तमिव निःशब्दमासीदीरिणसंनिभम्[3] ॥ २४ ॥
वदतो वै वसिष्ठस्य मा भैरिति मुहुर्मुहुः । नाशयाम्यद्य गाधेयं नीहारमिव भास्करः ॥ २५ ॥
एवमुक्त्वा महातेजा वसिष्ठो जपतां वरः । विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥
आश्रमं चिरसंवृद्धं यद्विनाशितवानसि । दुराचारो हि यन्मूढस्तस्मात्त्वं न भविष्यसि ॥ २७ ॥

रा० टी०–प्राप्येति । महता दर्पेण अयुक्तः पुत्रादिविधंसहेतुकमहादर्पकर्तृकयोगाभाववान् महाबलो राजर्षिर्विश्वामित्रस्तदा वरप्राप्तिसमये अस्त्राणि चक्रारेण शस्त्राणि प्राप्य दर्पपूर्णः अभवत् ॥ १९ ॥

गो० टी०–प्राप्येत्यादिसप्त । दर्पपूर्ण इति । क्षत्रियत्वादिदर्पयुक्तः विशेषास्त्रलाभादिदानीं दर्पपूर्णोऽभूदित्यर्थः ॥१९॥२०॥

रा० टी०–विवर्धमान इति । तदा दर्पपूर्णतासमये वीर्येण पर्वणि समुद्र इव विवर्धमानो विश्वामित्रः ऋषिसत्तमं वशिष्ठं हतमिव मेने । एवशब्द इवार्थे ॥ २० ॥

२१] ति० टी०–यैरस्त्रैरस्त्रतेजसा स्वीयतेजसा तपोवनं निर्दग्धं भवेत्तान्यस्त्राणि मुमुचे इत्यन्वयः ॥ २१ ॥

रा० टी०–तत इति । अस्त्रतेजसा युक्तः पार्थिवो विश्वामित्रः अश्रमपदं श्रमनिवर्तकवशिष्ठस्थानं ततः स्वतपस्स्थानात् गत्वा यैः सर्वं तपोवनं निर्दग्धं स्यात् तानि अस्त्राणि चक्रारेण शस्त्राणि मुमोच ॥ २१ ॥

गो० टी०–यैरस्त्रैः अस्त्रतेजसा ॥ २१ ॥

२२] ति० टी०–विश्वामित्रस्य शेषे षष्ठी । तेनोदीर्यमाणं विसृज्यमानम् ॥ २२ ॥

रा० टी०–उदीर्यमाणमिति । धीमतः विश्वामित्रस्य उदीर्यमाणं तदस्त्रं दृष्ट्वा भीताः शतशो मुनयः दिशः पूर्वप्रभृतीः विप्रद्रुताः पलायिताः आसन्निति शेषः ॥ २२ ॥

गो० टी०–स्वतेजसा उदीर्यमाणं प्रयुज्यमानं भयात् भयदादस्त्रात् नानादिग्भ्य इति व्यत्ययेन द्वितीयार्थे चतुर्थी नानादिग्भ्यः स्वस्वस्थानेभ्य इति वा आश्रमपदं वनं शून्यं निस्तृणगुल्ममीरिणमूषरम् । वसिष्ठे रक्षके वियमाने कुतो विद्रवन्तीत्यत्राह–वदत इति भावलक्षणे षष्ठी अनादरे वा । गाधेयं नाशयामि माभैरिति वदतो वसिष्ठस्य वचनमनादृत्य विद्रवन्तीति पूर्वेणान्वयः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

२३] ति० टी०–भयाद्भयहेतोरस्त्रजालात् । नानादिग्भ्यः व्यत्ययेन द्वितीयार्थे चतुर्थी पञ्चमी वा ॥ २३ ॥

रा० टी०–वशिष्ठस्येति । ये वशिष्ठस्य सहस्रशः शिष्यास्तेऽपि तथा अन्यमुनय इव मृगपक्षिणश्च भयात् भयहेतुभूतास्त्रादेः भीताः सन्तः नानादिग्भ्यः प्राच्यादिभ्यः विद्रवन्ति अधावन् वर्तमानसामीप्य इति भूते लट् । एवोप्यर्थे नानादिग्भ्य इत्यत्र गत्यर्थानां द्वितीयाचतुर्थ्यावित्यनुशासनविहिता चतुर्थी । एतेन नानादिग्भ्य इति व्यत्ययेन द्वितीयार्थे चतुर्थी-पञ्चमी वेति भट्टादिव्याख्यानं चिन्त्यम् ॥ २३ ॥

२४] ति० टी०–शून्यं सर्वप्राणिपलायनात् । अत एव निःशब्दमिव । ईरिणमूषरम् निर्वृक्षनिर्मानुषकान्तारसदृशमिति यावत् ॥ २४ ॥

रा० टी०– वसिष्ठस्येति । अत एव महात्मनः वशिष्ठस्य अश्रमपदं शून्यमासीत् अत एव मुहूर्तं निःशब्दं शब्दरहितमत एव ईरिणसन्निभमूषरभूमिसदृशं तत्स्थानमासीत् । इवशब्दो हेत्वर्थे ॥ २४ ॥

२५] ति० टी०–वदतो वै वदतोऽपीत्यर्थः । तादृशस्यापि वसिष्ठस्य वचनमनादृत्य दुद्रुवुरित्यर्थः ॥ २५ ॥

रा० टी०–ननु वशिष्ठस्य तत्र सत्त्वे कथं तच्छिष्याः प्रदुद्रुवुरित्यत आह–वदत इति । नीहारं भास्कर इव सूर्य इव अद्य गाधेयमहं नाशयामि अतः मा भैरिति मुहुर्मुहुर्वदतो वशिष्ठस्य वदन्तमपि वसिष्ठमनादृत्य प्रदुद्रुवुरिति शेषः । " षष्ठी-चानादरे " इत्यनुशासनविहितात्र षष्ठी । वैशब्दोऽप्यर्थे ॥ २५ ॥

२६] ति० टी०–एवमुक्त्वा पलायमानप्राणिजातं प्रतीति शेषः । इदं वक्ष्यमाणम् ॥ २६ ॥

रा० टी०–एवमिति । तदा विश्वामित्रास्त्रप्रयोगकाले महातेजाः जपतां वरो वशिष्ठः एवमुक्त्वा पलायनपरानिति शेषः। सरोषं रोषसहितमिदं वाक्यं विश्वामित्रमब्रवीत् ॥ २६ ॥

गो० टी०–एवमित्यादित्रयः । उक्त्वा स्वानिति शेषः२६

२७] ति० टी०–यद्यस्मान्म आश्रमं विनाशितवानसि, यद्यस्माच्च हि प्रसिद्धम् दुराचारो मूढस्त्वम्, तस्मान्न भविष्यसि नङ्क्ष्यसीत्यर्थः ॥ २७ ॥

रा० टी०–तद्वचनमेवाह–आश्रममिति । हे मूढ ! यद्यस्मात् चिरसंवृद्धमाश्रमं त्वं विनाशितवानसि यद्यस्मात् दुराचारः परवस्त्वपहरणरूपनिषिद्धाचरणमनाश्रासि तस्मात्त्वं न भविष्यसि नङ्क्ष्यसीत्यर्थः । हिशब्दश्चार्थे । किंच यन्मूढ ! यतः क्रोधादिनिवृत्तेः मूः बन्धनं प्रतिबन्धकत्वमिति यावत् वहति प्राप्नोति तत्संबोधनम् निवृत्तिप्रतिबन्धकेत्यर्थः । दुराचारस्त्वम् यद्यस्माद्धेतोः चिरसंवृद्धमाश्रमं विनाशितवानसि तस्मात्त्वं नैव भविष्यसि । हिशब्द एवार्थे ॥ २७ ॥

१ सर्वमिति गो. रा. पाठः । २ तथेवेति गो. रा. पाठः । ३ इरिणेति गो. पाठः ।

इत्युक्त्वा परमक्रुद्धो दण्डमुद्यम्य सत्वरः । विधूम इव कालाग्निर्यमदण्डमिवापरम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ।

वसिष्ठब्रह्मदण्डेन विश्वामित्रास्त्रे निर्गीर्णे सति क्षत्रबलं विगर्ह्य विश्वामित्रेण ब्राह्मण्याधिगमाय तपश्चरणस्य निर्धारणम् ।

एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः । आग्नेयमस्त्रमुद्दिश्य तिष्ठ तिष्ठेति चाब्रवीत् ॥ १ ॥
ब्रह्मदण्डं समुद्यम्य कालदण्डमिवापरम् । वसिष्ठो भगवान्क्रोधादिदं वचनमब्रवीत् ॥ २ ॥
क्षत्रबन्धो स्थितोऽस्म्येष यद्बलं तद्विदर्शय । नाशयाम्यद्य ते दर्पं शस्त्रस्य तव गाधिज ॥ ३ ॥
क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् । पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ॥ ४ ॥
तस्यास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुत्तमम् । ब्रह्मदण्डेन तच्छान्तमग्नेर्वेग इवाम्भसा ॥ ५ ॥
वारुणं चैव रौद्रं च ऐन्द्रं पाशुपतं तथा । ऐषीकं चापि चिक्षेप कुपितो गाधिनन्दनः ॥ ६ ॥
मानवं मोहनं चैव गान्धर्वं स्वापनं तथा । जृम्भणं मोहनं चैव संतापनविलापने ॥ ७ ॥
शोषणं दारणं चैव वज्रमस्त्रं सुदुर्जयम् । ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ॥ ८ ॥

गो० टी०– न भविष्यसि नशिष्यसीति यावत् । उद्यम्य तस्थाविति शेषः ॥ २७ ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

२८] ति० टी०–विधूमः कालाग्निरिव क्रोधाद्वसिष्ठोऽपरं यमदण्डमिव दण्डमुद्यम्य तस्थाविति शेषः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीयआदिकाव्ये बालकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण उक्त्वा परमक्रुद्धः अत एव सत्वरः अत एव विधूमः धूमरहितः कालाग्निरिव वसिष्ठः अपरं यमदण्डमिव दण्डमुद्यम्य आस्ते इति शेषः ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१–२] ति० टी०–एवमुक्तो न भविष्यसीत्युक्तः ॥१॥२॥

रा० टी०–वशिष्ठवचनश्रवणानन्तरकालिकं वृत्तमाह–एवमिति । वशिष्ठेन एवं न भविष्यसीत्युक्तप्रकारेण उक्तः महाबलो विश्वामित्रः आग्नेयमग्निदेवताकमस्त्रमुत्क्षिप्य तिष्ठ तिष्ठेत्येवाब्रवीत् । चशब्द एवार्थे ॥ १ ॥

गो० टी०–अथ सर्वास्त्रबलसंपूर्णक्षत्रवीर्यादपि ब्रह्मबलं बलीय इत्याह षट्पञ्चाशे–एवमुक्त इत्यादि । तिष्ठ तिष्ठेति भयजननार्थोक्तिः ॥ १ ॥

रा० टी०–विश्वामित्रोक्त्यनन्तरकालिकां वशिष्ठोक्तिमाह–ब्रह्मेति । भगवान् अतिसामर्थ्यविशिष्टो वसिष्ठः अपरं कालदण्डमिव ब्रह्मदण्डं समुद्यम्य क्रोधादिदं वचनमब्रवीत् ॥ २ ॥

गो० टी०–ब्रह्मदण्डमित्यादित्रयोविंशतिः । ब्रह्मदण्डमिति । ब्रह्मदण्डं ब्राह्मणासाधारणं दण्डम् ॥ २ ॥

३–४] ति० टी०–तिष्ठ तिष्ठेति [a]भीषयन्तं प्रति स्वभीत्यभावमाह–स्थितोऽस्म्येष इति । तव शस्त्रस्य दर्पं त्वया लब्धं यदस्त्ररूपं शस्त्रं तत्प्राप्तिजं ते तव दर्पम् ॥ ३ ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–क्षत्रेति द्वाभ्याम् । हे क्षत्रबन्धो हे गाधिज ! एषः अहं स्थितोऽस्मि यत्ते बलं त्वत्पराक्रमस्तदर्शय तव शस्त्रस्य दर्पं गर्वमद्यैवाहं नाशयामि । हिशब्द एवार्थे ॥ ३ ॥

गो० टी०–क्षत्रबन्धो क्षत्रियाधम ! ते दर्पं तव शस्त्रस्य दर्पं च नाशयामीत्यन्वयः । क्षत्रियपांसनेत्यनन्तरं वसिष्ठोऽब्रवीदिति अनुकृष्यते ॥ ३–१२ ॥

रा० टी०–क्व चेति । हे क्षत्रियपांसन क्षत्रियाधम ! ते तव क्षत्रियबलं क्व मम ब्रह्मबलं क्व द्वयोर्महानन्तराल इत्यर्थः । अतः महत्सर्वोत्कृष्टमेव दिव्यं प्राकृतविलक्षणं मम ब्रह्मबलं त्वं पश्य । एकश्चशब्द एवार्थे द्वितीयो हेत्वर्थे ॥ ४ ॥

५–८] ति० टी०–क्षत्रियपांसनेत्युक्त्वा स्थितस्य तस्य वसिष्ठस्य ब्रह्मदण्डेन गाधिपुत्रस्याग्नेयं शान्तमासीत् ॥५–८॥

रा० टी०–विश्वामित्रप्रयुक्ताग्नेयास्त्रपराभवं वर्णयन्नाह–तस्येति । घोरं शत्रुभयप्रदं गाधिपुत्रस्य तस्य प्रसिद्धस्य विश्वामित्रस्य तदाग्नेयमस्त्रमम्भसा अग्नेर्वेग इव ब्रह्मदण्डेन शान्तमासीदिति शेषः ॥ ५ ॥

---

१ कालाग्निमिति गो. पाठः । २ उत्क्षिप्येति गो. रा. पाठः । ३ समुत्क्षिप्योति गो. पाठः । ४ उद्यतमिति गो. पाठः । ५ रुषित इति रा. पाठः । ६ एतस्मात्पूर्वं दण्डास्त्रमित्यर्धपिकं रा. पाठे । ७ मादनमिति गो. पाठः । [a] भीषयमाणमिति युक्तमिति भाति ।

पिनाकमस्त्रं दयितं शुष्कार्द्रे अशनी तथा । दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च ॥ ९ ॥
धर्मचक्रं कालचक्रं विष्णुचक्रं तथैव च । वायव्यं मथनं चैव अस्त्रं हयशिरस्तथा ॥ १० ॥
शक्तिद्वयं च चिक्षेप कङ्कालं मुसलं तथा । वैद्याधरं महास्त्रं च कालास्त्रमथ दारुणम् ॥ ११ ॥
त्रिशूलमस्त्रं घोरं च कापालमथ कङ्कणम् । एतान्यस्त्राणि चिक्षेप सर्वाणि रघुनन्दन ॥ १२ ॥
वसिष्ठे जपतां श्रेष्ठे तदद्भुतमिवाभवत् । तानि सर्वाणि दण्डेन ग्रसते ब्रह्मणः सुतः ॥ १३ ॥
तेषु शान्तेषु ब्रह्मास्त्रं क्षिप्तवान्गाधिनन्दनः । तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ॥ १४ ॥
देवर्षयश्च संभ्रान्ता गन्धर्वाः समहोरगाः । त्रैलोक्यमासीत्संत्रस्तं ब्रह्मास्त्रे समुदीरिते ॥ १५ ॥
तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा । वसिष्ठो ग्रसते सर्वं ब्रह्मदण्डेन राघव ॥ १६ ॥
ब्रह्मास्त्रं ग्रसमानस्य वसिष्ठस्य महात्मनः । त्रैलोक्यमोहनं रौद्रं रूपमासीत्सुदारुणम् ॥ १७ ॥
रोमकूपेषु सर्वेषु वसिष्ठस्य महात्मनः । मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ॥ १८ ॥

रा० टी०–वारुणमिति । रुषितो हिंसितप्रायः गाधिनन्दनो विश्वामित्रः वारुणादीन्यस्त्राणि चिक्षेप ॥ ६ ॥

रा० टी०–मानवमिति । मानवादीनि चिक्षेपेति पूर्वेणान्वयः ॥ ७ ॥

रा० टी०–जृम्भणमिति ॥ ८ ॥

रा० टी०–ब्रह्मेति ॥ ९ ॥

९–१२] ति० टी०–दयितम् शिवस्येति शेषः ॥ ९ ॥ ॥ १० ॥ ११ ॥ १२ ॥

रा० टी०–धर्मेति ॥ १० ॥

रा० टी०–शक्तीति ॥ ११ ॥

रा० टी०–उपसंहरन्नाह–एतानीति । हे रघुनन्दन ! जपतां श्रेष्ठे वसिष्ठे एतानि सर्वाण्यस्त्राणि चिक्षेप तत् प्रक्षिप्तास्त्रमद्भुतं लक्ष्यस्पर्शाभाववत्त्वेनाश्चर्यसंपादकमेवाभवत् । अस्त्राणीति शस्त्राणामप्युपलक्षकम् । इवशब्द एवार्थे ॥ १२ ॥

१३] ति० टी०–ग्रसते स्म ॥ १३ ॥

रा० टी०–लक्ष्यास्पर्शित्वे हेतुं वदन्नाह–तानीति । ब्रह्मणः सुतो वशिष्ठः तानि विश्वामित्र *प्रत्युक्तानि सर्वाणि शस्त्रास्त्राणि दण्डेन ब्रह्मदण्डेन ग्रसते अग्रसत् । वर्तमानसामीप्य इति भूते लट् । अर्धं पृथगन्वयि ॥ १३ ॥

गो० टी०–वसिष्ठे जपतां श्रेष्ठ इत्यनेन जपवैभवमिदं ग्रसनमिति द्योतितं तत् अस्त्रक्षेपणमद्भुतमिवाभवत् कार्यलेशस्याप्यदर्शनादिति भावः ॥ १३ ॥

गो०टी०–अद्भुतमेवाह–तानीति । ग्रसते अग्रसत् ॥ १४–१५ ॥

१४] ति० टी०–अग्निपुरोगमो वायुस्तत्सहिताः अग्निसहितो वायुः पुरोगमो येषां युद्ध इति वा ॥ १४ ॥

रा० टी०–सर्वशस्त्रप्रध्वंसनोत्तरकालिकं विश्वामित्रवृत्तमाह–तेष्विति । गाधिनन्दनो विश्वामित्रः तेषु स्वप्रयुक्तशस्त्रास्त्रेषु शान्तेषु ब्रह्मदण्डेन विध्वंसितेषु ब्रह्मास्त्रं क्षिप्तवान् साग्निपुरोगमाः अग्निपुरोगमसहिताः समहोरगाः महोरगसहिताः देवाः देवर्षयश्च गन्धर्वाश्च उद्यतमुत्थितं तदस्त्रं दृष्ट्वा संभ्रान्ताः आसन्निति शेषः । अत एव ब्रह्मास्त्रे समुदीरिते सति त्रैलोक्यं संत्रस्तमासीत् ॥ १४ ॥ १५ ॥

१५] ति० टी०–समुदीरिते प्रयुक्ते ॥ १५ ॥

गो० टी०–संभ्रान्ता आसन्निति शेषः ॥ १६ ॥ समुदीरिते प्रयुक्ते ॥ १७ ॥

१६] ति० टी०–ब्राह्मेण तेजसा ब्रह्मविद्याभ्यासजेन तेजसा युक्तेन ब्रह्मदण्डेन करधृतेन ग्रसते स्मेत्यन्वयः । ब्राह्मेणैव तेजसा ब्राह्मतेजःशमनस्य साध्यत्वादिति भावः ॥ १६ ॥

रा० टी०–तदिति । हे राघव ! महाघोरं शत्रुभयप्रदं तत्प्रसिद्धं बाह्यमस्त्रमपि सर्वं सावयवं ब्राह्मेण ब्रह्मविद्याजनिततेजसा विशिष्टो वशिष्ठो ब्रह्मदण्डेन ग्रसते अग्रसत् ॥ १६ ॥

गो० टी०–ब्राह्मेण तेजसा ब्रह्मविद्याभ्यासजनिततेजसा उपबृंहितेन ब्रह्मदण्डेनेत्यर्थः । अत्र ग्रासक्रियायां न दण्डस्यान्वयः पुत्रैर्गर्दभी भारं वहतीतिवत् अतो न वक्ष्यमाणेन विरोधः ॥ १८ ॥

१७] ति० टी०–त्रैलोक्यमोहनं भयात्त्रिलोकीचित्तमूर्च्छाकरं रौद्रं स्मरणेऽपि भयदं सुदारुणं दुर्दर्शं नृसिंहवीरभद्रादिवत् । ' घोरम् ' इति पाठान्तरं तुल्योऽर्थः ॥ १७ ॥

रा० टी०–ब्रह्मेति । ब्रह्मास्त्रं ग्रसमानस्य महात्मनो वशिष्ठस्य त्रैलोक्यमोहनं त्रिलोकीविचित्तताजनकं तत्र हेतुः रौद्रं भयंकरमत एव सुदारुणं दर्शनानर्हं रूपमासीत् ॥ १७ ॥

गो० टी०–त्रैलोक्यस्य मोहनं भयान्मूर्छाजनकं रौद्रं स्मरणेऽपि भयंकरं सुदारुणं दुर्दर्शम् ॥ १९ ॥

१८] ति० टी०–रौद्रदारुणत्वे उपपादयति–रोमेत्यादि । रोमकूपेषु रोमकूपेभ्यः मरीच्यो विस्फुलिङ्गाः । ऋषेर्विश्वामित्रब्रह्मास्त्राकुलत्वाद्धूमाकुलार्चिर्ध्वमग्नेर्विशेषणम् ॥ १८ ॥

रा० टी०–रौद्रत्वमुपपादयन्नाह–रामेति । महात्मना व-

१ पैनाकास्त्रं चेति गो. पाठः । २ किंकिणीमिति रा.पाठः । *"प्रयुक्तानीति भाति अग्रे चतुर्दशश्लोकव्याख्यायां तेषु स्वप्रयुक्तशस्त्रास्त्रेष्विति तेनैव तथा प्रयुक्तत्वात्।

प्राज्वलद्ब्रह्मदण्डश्च वसिष्ठस्य करोद्यतः । विधूम इव कालाग्निर्यमदण्ड इवापरः ॥ १९ ॥
ततोऽस्तुवन्मुनिगणा वसिष्ठं जपतां वरम् । अमोघं ते बलं ब्रह्मँस्तेजो धारय तेजसा ॥ २० ॥
निगृहीतस्त्वया ब्रह्मन्विश्वामित्रो महाबलः । अमोघं ते बलं श्रेष्ठ लोकाः सन्तु गतव्यथाः ॥ २१ ॥
एवमुक्तो महातेजाः शमं चक्रे महाबलः । विश्वामित्रो विनिकृतो विनिःश्वस्येदमब्रवीत् ॥२२॥
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् । एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥ २३ ॥
तदेतत्प्रसमीक्ष्याहं प्रसन्नेन्द्रियमानसः । तपो महत्समास्थास्ये यद्धि ब्रह्मत्वकारणम् ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

शिष्टस्य सर्वेषु रोमकूपेषु सर्वेभ्यः रोमकूपेभ्यः धूमाकुलार्चिषः धूमव्याप्ततेजसः अग्नेः मरीच्यो विस्फुलिङ्गा इव निष्पेतुः॥१८॥

गो० टी०–एतदेवाह–रोमेति । अग्नेरिव मरीच्यो विस्फुलिङ्गा निष्पेतुरिति योजना ॥ २० ॥

१९] ति० टी०–विधूमः कालाग्निरिव ब्रह्मदण्डश्च प्राज्वलत् तत्समर्पितब्रह्मतेजसेति भावः ॥ १९ ॥

रा० टी०–प्राज्वलदिति । वशिष्ठस्य करोद्यतः ब्रह्मदण्डः विधूमः धूमरहितः कालाग्निरिव अपरो यमदण्ड इव च प्राज्वलत् ॥ १९ ॥

गो० टी०–दण्डश्च प्राज्वलत् पूर्वास्त्रग्रासेनेति शेषः ॥ २१ ॥

२०] ति० टी०–ततोऽस्तुवन्साधु साध्वित्युपश्लोकितवन्तः । हे ब्रह्मन् ! ते बलममोघमस्तु अरातावविसर्जनेनाक्षीणमस्तु प्रतिब्रह्मास्त्रं मा प्रयुङ्क्ष्वेति यावत् । पारक्यं तेजः स्वतेजसा सहजेन धारय विलाप्यैकीकुरु ॥ २० ॥

रा० टी०–तत इति । ततः भयंकररूपविशिष्टदण्डदर्शनानन्तरं मुनिगणाः जपतां वरं वशिष्ठमस्तुवन् । स्तवनप्रकारमाह–हे ब्रह्मन् ! ते बलममोघं मिथ्यासंसर्गशून्यमतः तेजसा स्वशक्त्या तेजः ब्रह्मदण्डोज्ज्वलनं धारय उपशमय ॥ २० ॥

गो० टी०–तेजः ब्रह्मास्त्रतेजः तेजसा महिम्ना धारय उपशमय ॥ २२ ॥ २३ ॥

२१] ति० टी०–नन्वरौ स्थिते कथमप्रतियोगोऽत आह–निगृहीत इति । ब्रह्मास्त्रग्रासेन नष्टसामर्थ्यः स्वत एव मृतप्रायो जात इत्यर्थः ॥ २१ ॥

रा० टी०–निगृहीत इति । हे ब्रह्मन् ! महातपाः विश्वामित्रस्त्वया निगृहीतः अतः जपतां श्रेष्ठ हे वशिष्ठ ! त्वं प्रसीद लोकाः गतव्यथाः सन्तु तेज उपसंहरेत्यर्थः ॥ २१ ॥

२२] ति० टी०–शमं चक्रे प्रतियोगतोऽरातिनाशनादुपरत इत्यर्थः । विनिकृतो निरस्तसर्वशक्तिः ॥ २२ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्तः प्रार्थितः महातेजा महातपाः वशिष्ठः सामं तेजःशान्तिं चक्रे । निकृतः पराभूतः विश्वामित्रोऽपि विनिःश्वस्य इदमब्रवीत् । 'विनिकृत' इति भट्टसंमतः पाठः निरस्तसर्वशक्तिरिति तदर्थस्तैर्वर्णितः ॥ २२ ॥

गो० टी०–शमं कोपशान्तिम् ॥ २४ ॥

गो० टी०–निकृतः अपकृतः तिरस्कृत इति यावत् ॥२५॥

२३] ति० टी०–क्षत्रियबलं धिक् केवलं निन्द्यं बलमित्यर्थः ब्रह्मतेजोबलं प्रशस्तं बलम् ॥ २३ ॥

रा० टी०–तद्वचनमेवाह–धिगिति । क्षत्रियबलं बलं धिक् ब्रह्मतेजोबलमेव बलम् । तत्र कारणमाह एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि घटो नीलघट इतिवत् बलं क्षत्रियबलमिति प्रयोगः । सर्वं वाक्यं सावधारणं भवतीति एवकारलाभः॥२३॥

गो० टी०–धिगिति । क्षत्रियबलं बलं धिक् निन्द्यं बलमित्यर्थः । धिगुपर्यादिष्विति द्वितीया । ब्रह्मतेजसः ब्राह्मण्यरूपतेजसः बलं बलं तदेव प्रशस्तमिति यावत् सर्वास्त्राणि ब्रह्मास्त्राभिन्नानि ॥ २६ ॥

२४] ति० टी०–प्रसन्नेन्द्रियमानसः परित्यक्तक्षत्रस्वभाव इति यावत् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०–तदिति । तत्प्रसिद्धमेतद्ब्रह्मतेजःप्राबल्यं समवेक्ष्य दृष्ट्वा प्रसन्नेन्द्रियमानसः त्यक्तशोकवत्तया प्रसन्नोऽहं यद्ब्रह्मत्वकारणं महत्तपस्तदेव समास्थास्ये । वैशब्द एवार्थे ॥ २४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ५६ ॥

गो० टी०–ब्रह्मत्वकारणं ब्राह्मण्यापादकम् । प्रसन्नेन्द्रियमानसः परित्यक्तक्षत्ररोष इत्यर्थः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

१ महातपा इति गो. रा. पाठः । २ प्रसीद जपतां श्रेष्ठेति गो. रा. पाठः । ३ साममिति रा. पाठः । ४ ऽपि निकृत इति रा. पाठः ।

सप्तपञ्चाशः सर्गः ।

विश्वामित्रे ब्राह्मण्यार्थं दक्षिणस्यां दिशि तपस्यति ब्रह्मा तत्रागत्य तस्मै राजर्षित्वमदात्तथाप्यतुष्टमनसो विश्वामित्रस्य पुनस्तपश्चरणम् । अत्रान्तरे सशरीरं स्वर्गं जिगमिषोस्त्रिशंकुनामराजस्य तत्साधकयज्ञकरणार्थं वसिष्ठप्रार्थना तस्माच्च प्राप्ताधिक्षेपस्य तस्य वसिष्ठपुत्रसन्निधौ गत्वा तेषामपि तत्प्रार्थनम् ।

ततः संतप्तहृदयः स्मरन्निग्रहमात्मनः । विनिःश्वस्य विनिःश्वस्य कृतवैरो महात्मना ॥ १ ॥
स दक्षिणां दिशं गत्वा महिष्या सह राघव । ततापं परमं घोरं विश्वामित्रो महातपाः ॥ २ ॥
फलमूलाशनो दान्तश्चचार परमं तपः । अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ॥ ३ ॥
हविष्पन्दो मधुष्पन्दो दृढनेत्रो महारथः । पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ॥ ४ ॥
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् । जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ॥ ५ ॥
अनेन तपसा त्वां हि राजर्षिरिति विद्महे । एवमुक्त्वा महातेजा जगाम सह दैवतैः ॥ ६ ॥
त्रिविष्टपं ब्रह्मलोकं लोकानां परमेश्वरः । विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किंचिदवाङ्मुखः॥ ७ ॥
दुःखेन महताविष्टः समन्युरिदमब्रवीत् । तपश्च सुमहत्तप्तं राजर्षिरिति मां विदुः ॥ ८ ॥
देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलम् । एवं निश्चित्य मनसा भूय एव महातपाः ॥ ९ ॥

१] ति० टी०–तत इति । कृतवैर इति इदमेव तपोनाशकमस्य ॥ १ ॥

रा० टी०–तत इति । ततः करणनिश्चयानन्तरं हे राघव ! आत्मनः स्वस्य निग्रहं वशिष्टकर्तृकपराभवं स्मरन् सन्संतप्तहृदयः महात्मना वशिष्ठेन कृतवैरः महातपाः स विश्वामित्रः विनिःश्वस्य विनिःश्वस्य महिष्या कृताभिषेकया पत्न्या सह दक्षिणां दिशं गत्वा परममत्युत्कृष्टं घोरं शत्रुभयंकरं तपस्तताप द्वयोरेकवान्वयः ॥ १ ॥ २ ॥

गो० टी०–एवं पशुपतिवितीर्णसरहस्यसर्वास्त्रवैधव्यदर्शनेन रुद्रस्यापरत्वमुपपादितं, अथ पूर्वप्रस्तुतब्राह्मण्यस्यात्यन्तदुर्लभत्वं दर्शयति नवभिः सर्गैः । तत्र त्रिशङ्कुशरणागत्यनुगुणशक्तिमत्वं दर्शयति सप्तपञ्चाशे । ततः संतप्तहृदयः इत्यादिश्लोकद्वयमेकान्वयम् । महात्मना वसिष्ठेन कृतवैरः अनेनास्य तपोनाशमूलं दर्शितं ब्रह्मविदपचारो हि सर्वश्रेयोविनाशकः दक्षिणां शरावत्यपेक्षया महिष्येत्यनेन भावियाजकत्वानुगुणगार्हस्थ्यं दर्शितम् महत्तपः परमं यथा तथा ततापेत्यन्वयः ॥ १ ॥ २ ॥

२] ति० टी०–ततापं तपश्चकारेत्यर्थः ॥ २ ॥

३] ति० टी०–तपसो घोरत्वं दर्शयति–फलेत्यादि । दान्तो जितेन्द्रियः । पुत्रा हविष्पन्दादयः ॥ ३ ॥

रा० टी०–फलेति । फलमूलाशनः फलमूलमात्रभोक्ता अत एव दान्तः नियमितोभयकरणः विश्वामित्रः परमं तपश्चकार। अथ तपःप्रारम्भानन्तरमस्य विश्वामित्रस्य सत्यधर्मपरायणाः हविष्पन्दादयः पुत्राः जज्ञिरे सार्धश्लोक एकान्वयी॥३॥

गो० टी०–कामक्रोधाद्यनुवृत्तिं दर्शयति–अथेति ॥ ३ ॥

४–६] ति० टी०–ब्रह्मर्षित्वाय ब्रह्मविद्यया तपःकरणात्तदधिदैवतत्वाद्ब्रह्माब्रवीत् ॥ ४–६ ॥

रा०टी०–पूर्ण इति । वर्षसहस्रे पूर्णे सत्येव लोकपितामहो ब्रह्मा तपोधनं विश्वामित्रं मधुरं वाक्यमब्रवीत्।तुशब्द एवार्थे॥४॥

गो० टी०–अत एव तपसो मन्दफलत्वं दर्शयति–पूर्ण इति ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–जिता इति । हे कुशिकात्मज ! ते तव तपसा राजर्षिलोका जिताः अतः अनेन राजर्षिलोकसंपादकेन तपसा त्वां राजर्षिरिति विद्महे ॥ ५ ॥

गो० टी०–जिता इति । विद्महे आर्षमात्मनेपदम् ॥ ५ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्त्वा महातेजा लोकानां परमेश्वरः ब्रह्मा दैवतैः सह त्रिविष्टपं सुरलोकं ब्रह्मलोकं स्वलोकं च जगाम । विनापि चं समुच्चयः । अत्र त्रिविष्टपं जगामेत्युक्त्या तत्र इन्द्रं संस्थापयामास इति ध्वनितम् । तेनेन्द्रस्य विश्वामित्रतपोभीतत्वं व्यञ्जितम् । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०–एवमित्यादिचत्वारः । ब्रह्मा ब्रह्मलोकं जगाम त्रिविष्टपं देवा जग्मुरित्यर्थः ॥ ६ ॥

७] ति० टी०–दैवैः सह त्रिविष्टपं स्वर्गं गत्वा तदनु स्वलोकं गतः । लोकानां भूरादीनाम् ॥ ७ ॥

रा० टी०–विश्वामित्र इति । तद्ब्रह्मवचनं श्रुत्वा ह्रिया लज्जया किंचिदवाङ्मुखः महता दुःखेन आविष्टः समन्युः क्रोधसहित इव विश्वामित्रः इदं वचनमब्रवीत् । अपिरिवार्थे ॥७॥

८–९] ति० टी०–समन्युः सदैन्यः स्वं प्रत्येवेदं वचः क्षमहति तपसि कृतेऽपि सर्षिगणा देवा मां राजर्षिरित्येव विदुरवगच्छन्ति तस्मादस्य तपसस्तद्ब्राह्मणत्वं फलं नास्ति न भवतीति मन्ये ॥ ८ ॥ ९ ॥

---

१ इदमर्धं गो. पुस्तके नास्ति । २ चकारेति रा. पाठः ।

तपश्चचार धर्मात्मा काकुत्स्थ परमात्मवान् । एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ॥ १० ॥
त्रिशङ्कुरिति विख्यात इक्ष्वाकुकुलवर्धनः । तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ॥ ११ ॥
गच्छेयं स्वशरीरेण देवतानां परां गतिम् । वसिष्ठं स समाहूय कथयामास चिन्तितम् ॥ १२ ॥
अशक्यमिति चाप्युक्तो वसिष्ठेन महात्मना । प्रत्याख्यातो वसिष्ठेन स ययौ दक्षिणां दिशम् ॥१३॥
ततस्तत्कर्मसिद्ध्यर्थं पुत्रांस्तस्य गतो नृपः । वासिष्ठा दीर्घतपसस्तपो यत्र हि तेपिरे ॥ १४ ॥
त्रिशङ्कुस्तु महातेजाः शतं परमभास्वरम् । वसिष्ठपुत्रान्ददृशे तप्यमानान्मनस्विनः ॥ १५ ॥

रा० टी०–तद्वचनमेवाह–तप इति । सर्षिगणाः ऋषिगणसहिताः सर्वे ब्रह्मप्रभृतयः देवाः येन मया समहत् अत्युत्कृष्टं तपस्तप्तं तं मां राजर्षिरिति विदुः अतस्तपःफलं मे नास्तीत्यहं मन्ये ॥ ८ ॥

गो० टी०–समन्युः सदैन्यः 'मन्युर्दैन्ये क्रतौ कृपि' इत्यमरः ॥ ७ ॥

रा० टी०–एवमिति । हे काकुत्स्थ ! महातपाः परमात्मवान् अतिप्रयत्नविशिष्टः विश्वामित्रः एवमनेन प्रकारेण मनसा निश्चित्य विचारपूर्वकनिश्चयमवगत्य भूयोऽपि परमं तपश्चकार । एवोऽप्यर्थे ॥ १० ॥

गो० टी०–नास्ति मन्ये तपःफलमेतन्मात्रं मत्तपःफलं न भवति ब्राह्मण्यस्यैव मदभिमतत्वादिति भावः ॥ ८ ॥

१०–११] ति० टी०–परमात्मवान्परमात्मध्यानवान्परमधीरश्च ॥ १० ॥ ११ ॥

रा० टी०–एतस्मिन्निति । हे राघव ! एतस्मिन्काले विश्वामित्रतपश्चरणसमय एव सत्यवादी जितेन्द्रियः नियमितोभयकरणः इक्ष्वाकुकुलवर्धनः यस्त्रिशङ्कुरिति विख्यात आसीत् तस्य बुद्धिः अहं यजेयं तेन स्वशरीरेणैव देवानां परमां गतिं स्वर्गमित्यर्थः गच्छेयमिति बुद्धिर्निश्चयः समुत्पन्ना । तुशब्द एवार्थे । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–परमं तपः पूर्वकृततपसोऽप्यतिशयितं तपः परमात्मवान् अतिशयितयत्नवान् ॥ ९ ॥

गो० टी०–एतस्मिन्निति । विख्यातः अभूदिति शेषः॥१०॥

गो० टी०–तस्येति । सशरीरेण आत्मनेति शेषः । परमां गतिं स्वर्गमिति यावत् ॥ ११ ॥

१२] ति० टी०–गच्छेयम् यज्ञबलेनेति शेषः । देवतानां परा गतिः स्वर्गः ॥ १२ ॥

रा० टी०–वसिष्ठमिति । स त्रिशङ्कुः वशिष्ठं समाहूय चिन्तितं स्वविचारितं कथयामास । अनन्तरं महात्मना वशिष्ठेनाशक्यमिदमिति त्रिशङ्कुरुक्तः । चशब्दोऽनन्तरार्थे अपिरिदमर्थे ॥ १३ ॥

गो० टी०–स इति । चिन्तितं सशरीरस्वर्गसाधनयज्ञमित्यर्थः । अशक्यं सशरीरं स्वर्गसाधनयज्ञकरणमिति शेषः । अशक्यत्वं च न ऋषेरसामर्थ्यात्तापि तादृशकर्मविधानाभावात् "सशरीर एव स्वर्गं लोकमेति" इति श्रुतेः । किंतु त्रिशङ्कोस्तादृशस्वर्गप्राप्तिर्नास्तीति पूर्वकल्पवृत्ततज्ज्ञानादिति मन्तव्यम् उक्तः अभूदिति शेषः ॥ १२ ॥

१३] ति० टी०–अशक्यत्वकथनपूर्वकं प्रत्याख्यानबीजं च प्रसिद्धं त्रिशङ्कुत्वमेवेति पुराणेषु स्पष्टम् ॥ १३ ॥

रा० टी०–प्रत्याख्यात इति । वसिष्ठेन प्रत्याख्यातः स नृपः त्रिशङ्कुः दक्षिणां दिशं ययौ । ततः दक्षिणदिग्गमनानन्तरं तत्कर्मसिद्ध्यर्थं तस्य चिकीर्षितस्य कर्मणः सशरीरस्वर्गप्रापकयागस्य सिद्ध्यर्थं तस्य वशिष्ठस्य पुत्रान् गतः प्राप्तः ॥ १४ ॥

गो० टी०–प्रत्याख्यात इति । तत्कर्मसिद्ध्यर्थं सशरीरस्वर्गसाधनकर्मसिद्ध्यर्थम् ॥ १३ ॥

१४] ति० टी०–तत्कर्म सशरीरस्वर्गप्रापकयज्ञकर्म । तस्य वसिष्ठस्य पुत्रा यत्र तेपिरे तत्र गत्वेति शेषः । तस्य पुत्रान्गतः प्राप्तः ॥ १४ ॥

रा० टी०–तत्स्थानं बोधयन्नाह–वाशिष्ठा इति । दीर्घतपसः शतं वाशिष्ठाः यत्र परमभास्वरं तपस्तेपिरे तस्मिन् स्थाने महातेजाः स त्रिशङ्कुर्गत इति पूर्वेणान्वयः ॥ १५ ॥

गो० टी०–वासिष्ठा इति सार्धः । यत्र तेपिरे तत्र गत्वेति शेषः । शतं वासिष्ठानिति 'बह्वर्थे शतम्' इति निपातनात् सामानाधिकरण्यम् ॥ १४ ॥

१५] ति० टी०–शतशब्दे न स्ववयवगतबहुत्वेन बहुवचनम् अनभिधानात् शतशब्दः संख्यावाची संख्येयवाची च विंशत्यादिवत् । अत्र तु संख्येयवाची शतं वसिष्ठपुत्रान् शतसंख्याकानित्यर्थः । अत्रावयवप्राधान्येन तद्बहुत्वेन बहुवचनं प्राप्तं तदनभिधानात्र भवति एकवचनमेव भवति यथा विंशतिर्ब्राह्मणाः । संख्यावाचिनोऽप्येकवचनं ब्राह्मणानां शतमिति यथा । अतो वसिष्ठपुत्रानित्यनेन शतमित्यनेन च सामानाधिकरण्यम् ॥ १५ ॥

रा० टी०–वाशिष्टानिति । अथ वसिष्ठपुत्रतपस्थानगमनानन्तरं तप्यमानान्यशस्विनः वाशिष्ठान्स त्रिशङ्कुः ददर्श महात्मनः सर्वान् गुरोः सुतान् स त्रिशङ्करभिगम्य प्राप्यैव ववन्द इति शेषः ॥ १६ ॥

---

१ चकारेति गो. रा. पाठः । २ स्विति गो. स इति रा. पाठः । ३ यशस्विन इति गो. रा. पाठः ।

सोऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान् । अभिवाद्यानुपूर्वेण ह्रिया किंचिदवाङ्मुखः ॥ १६ ॥
अब्रवीत्स महात्मानः सर्वानेव कृताञ्जलिः । शरणं वः प्रपन्नोऽहं शरण्यान्शरणं गतः ॥ १७ ॥
प्रत्याख्यातो हि भद्रं वो वसिष्ठेन महात्मना । यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ १८ ॥
गुरुपुत्रानहं सर्वान्नमस्कृत्य प्रसादये । शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ॥१९॥
ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः । सशरीरो यथाहं वै देवलोकमवाप्नुयाम् ॥ २० ॥
प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः । गुरुपुत्रानृते सर्वान्नाहं पश्यामि कांचन ॥ २१ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः । तस्मादनन्तरं सर्वे भवन्तो दैवतं मम ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१६] ति० टी०–ह्रिया तत्पितृकृतप्रत्याख्यानजया । महात्मन इति द्वितीयार्थे महात्मान इत्यार्षम् ॥ १६ ॥

रा० टी०–अभिवाद्येति । ह्रिया किंचिदवाङ्मुखः कृताञ्जलिः स त्रिशङ्कुः महात्मानः महात्मनः सर्वान् गुरोः सुतान् आनुपूर्वेण ज्येष्ठादिक्रमेणाभिवाद्याब्रवीत् । महात्मान इत्यत्र प्रथमा आर्षा किंच महात्मनः आनयन्ते सत्कारादिना जीवयन्ते तानिति द्वितीयान्तमेव ॥ १७ ॥

गो० टी०–स इति सार्धः । ह्रिया वसिष्ठप्रत्याख्यानकृतया महात्मानः सुमहाभागानिति व्यत्ययेन प्रथमा ॥ १६ ॥

१७–१८] ति० टी०–शरण्यान्रक्षणसमर्थान् । शरणं गतोऽन्येषां रक्ष्याणां शरणं गतोऽपि शरणत्वं प्राप्नोत्पीत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०–तद्वचनमेवाह–शरणमिति । वो युष्माकं शरणं रक्षकत्वं गतो ज्ञातवानहं शरणं रक्षा यथा स्यात्तथा शरण्यान् शरणहितान् वो युष्मान् प्रपद्ये प्राप्तोस्मि । एकः शरणशब्दः भावप्रधानः । गत्यर्थानां ज्ञानार्थकत्वं गमिरबोधन इत्यादिव्याख्याने स्पष्टमेव व इत्युभयान्वयि शब्दाधिकारश्च । यद्वा शरणं स्वेप्सितप्रध्वंसेन वधप्रायं गतः प्राप्तोऽहं शरणं जीवनालम्बो यथा स्यात्तथा वो युष्मान्प्रपद्ये । 'शरणं गृहरक्षित्रोर्वधरक्षणयोरपि' इति मेदिनी ॥ १८ ॥

गो० टी०–शरणमिति । शरणं रक्षितारम् आगतः 'शरणं गृहरक्षित्रोः' इतिवचनात् रक्षित्रपेक्षया आगतोऽहं शरण्यान् शरणसमर्थान् शरणं प्रपद्ये रक्षितॄन् प्राप्नोमीत्यर्थः । यद्वा शरणागतः प्रत्याख्यात इत्युत्तरेणान्वयः तर्ह्याचार्य एव गन्तव्य इत्यत्राह–प्रत्याख्यात इति ॥ १६ ॥

रा० टी०–यष्टुकाम इति । महायज्ञं सशरीरस्वर्गप्राप्तिफलकयागं यष्टुकामः कर्तुमिच्छुरहमस्मीति शेषः। तत्तस्माद्धेतोः सर्वान् गुरुपुत्रानहं नमस्कृत्य प्रसादये अतः यूयम् आज्ञातुमर्हथ ॥ १९ ॥

गो० टी०–किमर्थं शरणागतिस्तत्राह–यष्टुकाम इति । तत् यज्ञानुष्ठानम् ॥ १७ ॥

१९] ति० टी०–ब्राह्मणानन्वर्थब्राह्मणान् ॥ १९ ॥

रा० टी०–शिरसेति । तपसि स्थितान् ब्राह्मणान् शिरसा प्रणतः अहं याचे प्रार्थये । ते मत्प्रार्थिताः भवन्तः समाहिताः सन्तः सशरीरोऽहं यथावत् देवलोकमवाप्नुयामिति सिद्ध्यर्थं मां याजयन्तु । हिरेवार्थे ॥ २० ॥

गो० टी०–शिरसेति सार्धः । ब्राह्मणान् ब्रह्मविदः समाहिताः अवहिताः ॥ १८ ॥

२०] ति० टी०–सिद्ध्यर्थं सशरीरस्वर्गगमनसिद्ध्यर्थम्॥२०॥

२१] ति० टी०–गुरुपुत्रानृते तान्विनान्यां कांचन गतिमहं न पश्यामीत्यन्वयः ॥ २१ ॥

रा० टी०–ननु सर्वयाजकशिरोमणिं गुरुं विहाय इह किमागतोऽसीत्यत आह–हे तपोधनाः ! अहं वशिष्ठेन प्रत्याख्यातः अतः सर्वान् गुरुपुत्रान् ऋते अन्यां काञ्चन गतिं न पश्यामि तत्र हेतुः सर्वेषा मिक्ष्वाकूणां पुरोधा वशिष्ठ एव परमा गतिः । हिशब्द एवार्थे ॥ २१ ॥ २२ ॥

गो० टी०–प्रत्याख्यात इति । गुरुपुत्रानृते अन्यां कांचन गतिं यजनोपायं न पश्यामीत्यन्वयः ॥ १९ ॥

२२] ति० टी०–अयं श्लोकः प्रक्षिप्त इति कतकस्वरसः । तस्मादिक्ष्वाकूणां परमगतिरूपात्पुरोधसो वसिष्ठादनन्तरमित्यर्थः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०–वशिष्ठस्य परमगतित्वे हेतुं वदन्नाह–पुरोहिता इति । विद्वांसः पुरोहिता एव सदा नृपान् तारयन्ति । तुरेवार्थे । तस्मात् वशिष्ठानन्तरं भवन्त एव सर्वे मम दैवतम् ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

गो०टी०–इक्ष्वाकूणामिति । पुरोधाः पुरोहितः वसिष्ठः॥२०॥

गो० टी०–तस्मादित्यर्थम् । तस्मात् वसिष्ठात् अनन्तरं पश्चात् तस्यारक्षकत्वे भवन्त एव रक्षका इति भावः॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१ प्रपद्ये इति गो. रा. पाठः । २ ऽस्मीति गो. रा. पाठः । ३ मामिति गो. रा. पाठः ।

अष्टपञ्चाशः सर्गः ।

पित्रतिक्रामित्वाद्वासिष्ठैस्त्रिशंकुयाजने प्रत्याख्याते गच्छामि तर्हि याजकान्तरमित्युक्तवति तस्मिन्नेवं त्रैलोक्ययाजकस्याप्यवमन्तास्यतो चाण्डाल्यं व्रजेति शप्तस्य त्रिशङ्कोश्चाण्डाल्यं संप्राप्य विश्वामित्रसमीपगमनं तद्वृत्तनिवेदनं तादृग्याजनप्रार्थना च ।

ततस्त्रिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितम् । ऋषिपुत्रशतं राम राजानमिदमब्रवीत् ॥ १ ॥
प्रत्याख्यातोऽसि दुर्मेधो गुरुणा सत्यवादिना । तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् ॥ २ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः । न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥ ३ ॥
अशक्यमिति सोवोच वसिष्ठो भगवानृषिः । तं वयं वै समाहर्तुं क्रतुं शक्ताः कथंचन ॥ ४ ॥
बालिशस्त्वं नरश्रेष्ठ गम्यतां स्वपुरं पुनः । याजने भगवान्शक्तस्त्रैलोक्यस्यापि पार्थिव ॥ ५ ॥
अवमानं कथं कर्तुं तस्य शक्ष्यामहे वयम् । तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरम् ॥ ६ ॥
स राजा पुनरेवैतानिदं वचनमब्रवीत् । प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि ॥ ७ ॥
अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः । ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम् ॥ ८ ॥

१] ति० टी०–क्रोधसमन्वितमिति ऋषिपुत्रशतविशेषणम् ॥ १ ॥

रा० टी०–त्रिशङ्कुप्रार्थनानन्तरकालिकं वृत्तमाह–तत इति । ततः त्रिशङ्कुप्रार्थनानन्तरं हे राम! त्रिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितं क्रोधाविष्टमृषिपुत्रशतं राजानमिदमब्रवीत् ॥ १ ॥

गो० टी०–गुरुत्यागिनां फलं दर्शयन्यष्टपञ्चाशे–ततस्त्रिशङ्कोरित्यादि । क्रोधसमन्वितमिति शतविशेषणम् ॥ १ ॥

२] ति० टी०–दुर्मेधः दुर्बुद्धे ! शाखान्तरं याजनादिना रक्षकान्तरम् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–प्रत्याख्यात इति । हे दुर्बुद्धे! सत्यवादिना मृषासंसर्गशून्येन गुरुणा प्रत्याख्यातस्त्वं तं गुरुमतिक्रम्य शाखान्तरमाश्रयान्तरं कथमुपेयिवान् प्राप्तोऽसि ॥ २ ॥

गो० टी०–प्रत्याख्यात इति । शाखान्तरम् आश्रयान्तरम् ॥ २ ॥

३] ति० टी०–न चातिक्रमितुं शक्यम् इक्ष्वाकुभिरिति शेषः ॥ ३ ॥

रा० टी०–तदतिक्रमस्यानौचित्यं बोधयन्नाह–इक्ष्वाकूणामिति । सर्वेषामिक्ष्वाकूणां पुरोधा एव परमो गुरुः अतः सत्यवादिनः पुरोधसः वचनमतिक्रमितुमुल्लङ्घितुं न शक्यम् । चशब्द एवार्थे ॥ ३ ॥

गो० टी०–इक्ष्वाकूणामिति । न शक्यं त्वयेक्ष्वाकुणेति शेषः । सत्यवादिनः तस्येति शेषः ॥ ३ ॥

४] ति० टी०–सोवाचेति सोऽचि लोपे चेदिति साधु । तं क्रतुम् यमशक्यमित्युवाच तं यज्ञमित्यर्थः । कथं च कथमपि न शक्ता इत्यर्थः ॥ ४ ॥

रा० टी०–तन्निवारितकार्यस्याशक्यत्वं बोधयन्त आहुः–अशक्यमिति । भगवान् सकलसामर्थ्यविशिष्टः ऋषिः सर्वज्ञः यमशक्यमेव उवाच तमेव तव क्रतुं समाहर्तुं कारयितुं वयं कथं समर्थाः । इतिशब्देनान्येऽपि कथं समर्थाः न कथंचिदित्यर्थः । चवैशब्दावेवार्थौ । एतेन तत्प्रत्याख्यातकार्यं प्रत्याशा न कर्तव्येति ध्वनितम् ॥ ४ ॥

गो० टी०–अशक्यमिति । यं क्रतुमिति शेषः ॥ ४ ॥

५] ति० टी०–बालिशोज्ञः । त्रैलोक्यस्यापि सिद्धयर्थं याजने इत्यर्थः । भगवान्वसिष्ठः ॥ ५ ॥

रा० टी०–तदेवोपसंहरन्नाह–बालिश इति । हे नरश्रेष्ठ! त्वं बालिशः समीचीनविचारयोग्यमत्यभाववानसि अतस्त्वया पुनः स्वपुरमेव गम्यताम् । एतेन वयं न याजयिष्याम इति ध्वनितम् । तत्र हेतुमाह–हे पार्थिव ! भगवान् परममाहात्म्यविशिष्टस्त्रैलोक्यस्यापि याजने शक्तः समर्थः यो वशिष्ठस्तस्यावमानं वयं कथं शक्ष्यामहे ॥ ५ ॥

गो० टी०–बालिश इति । बालिशः मूर्खः 'मूर्खवैधेयबालिशाः' इत्यमरः ॥ ५ ॥

६] ति० टी०–अवमानं तेनासाध्यतयोक्तार्थस्य साधनरूपम् ॥ ६ ॥

रा० टी०–तेषामिति । तेषां वशिष्ठपुत्राणां क्रोधपर्याकुलाक्षरं तद्वचनं श्रुत्वा स राजा त्रिशङ्कुः एतान् गुरुपुत्रान् पुनरपि इदं वचनमब्रवीत् । एवोऽप्यर्थे ॥ ६ ॥

गो० टी०–अवमानमित्यर्धम् । तत् असाध्यार्थसाधनरूपम् ॥ तेषामिति द्वौ । अन्यां गतिं याजकान्तरम् ॥ ६–८ ॥

७] ति० टी०–एतान्वासिष्ठान् ॥ ७ ॥

रा० टी०–तद्वचनमेवाह–प्रत्याख्यात इति । हे तपोधनाः! भगवता गुरुणा तथा गुरुपुत्रैर्भवद्भिश्च प्रत्याख्यात एवाहमन्यां गतिमाश्रयं गमिष्यामि वो युष्मभ्यं स्वस्त्यस्तु ॥ ७ ॥

८] ति० टी०–अन्यां गतिं याजकान्तरम् । घोराभिसंहितं घोराभिप्रायसंयुक्तम् । कुलगुर्वतिक्रमेणान्याश्रयस्य कुलनाशहेतुतया तदभिप्रायस्य घोरत्वम् ॥ ८ ॥

१ दुर्बुद्धे इति गो. रा. पाठः । २ परमो गुरुरिति गो. रा. पाठः । ३ चेति गो. रा. पाठः । ४ तवति गो. रा. पाठः । ५ चेति गो. रा. पाठः ।

शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि । इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमम् ॥९॥
अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः । नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ॥ १० ॥
चित्यमाल्यानुलेपश्च आयसाभरणोऽभवत् । तं दृष्ट्वा मन्त्रिणः सर्वे त्यक्त्वा चण्डालरूपिणम् ॥ ११ ॥
प्राद्रवन्सहिता राम पौरा येऽस्यानुगामिनः । एको हि राजा काकुत्स्थ जगाम परमात्मवान् ॥ १२ ॥
दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम् । विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम् ॥ १३ ॥
चण्डालरूपिणं राम मुनिः कारुण्यमागतः । कारुण्यात्स महातेजा वाक्यं परमधार्मिकः ॥ १४ ॥
इदं जगाद भद्रं ते राजानं घोरदर्शनम् । किमागमनकार्यं ते राजपुत्र महाबल ॥ १५ ॥
अयोध्याधिपते वीर शापाच्चण्डालतां गतः । अथ तद्वाक्यमाकर्ण्य राजा चण्डालतां गतः ॥ १६ ॥
अब्रवीत्प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम् । प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ॥ १७ ॥

रा० टी०—ऋषीति । घोराभिसंहितं श्रुतिकटुताविशेषं तद्वाक्यं श्रुत्वैव परमसंक्रुद्धा ऋषिपुत्राः त्वं चण्डालत्वं गमिष्यसि प्राप्स्यसीति शेपुः । तुशब्द एवार्थे ॥ ८ ॥

गो० टी०—ऋषीति । घोराभिसंहितं साक्षात्कुलगुरुं ब्रह्मपुत्रं वसिष्ठमतिक्रम्य पुरोहितान्तराश्रयणरूपघोराभिप्राययुक्तमित्यर्थः । गमिष्यसीत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ९ ॥

९] ति० टी०—चण्डालत्वं गमिष्यसीति शेपुरिति योजना । तादृशपापिष्ठदर्शनस्य पापजनकत्वात्स्वस्वाश्रमप्रवेशस्तेषाम् ॥ ९ ॥

रा० टी०—इतीति । महात्मानस्ते वशिष्ठपुत्रा इत्युक्त्वा स्वमाश्रमं विविशुः । अथ रात्र्यां निशायां व्यतीतायां राजा त्रिशङ्कुः चण्डालतां गतः प्राप्तः स्वं चाण्डालरूपमपश्यदित्यर्थः ॥९॥

गो० टी०—एवमित्यर्धम् ॥ १० ॥

१०] ति० टी०—परुषो रूक्षाङ्गः । ध्वस्तमूर्धजः खर्वकेशः १०॥

रा० टी०—चाण्डालतारूपमेव बोधयन्नाह—नीलेति । नीलवस्त्रधरः नीलः नीलदेहः पुरुषः रूक्षत्वविशिष्टः ध्वस्तमूर्धजः अदीर्घकेशः चित्यमाल्यानुलेपः चितिः श्मशानं तत्र भवं चित्यं भस्म तेन कृतः माल्यानुलेपः पुष्पाकारानुलेपो येन । किंच तेन युक्तौ माल्यानुलेपौ यस्य सः आयसाभरणः लोहभूषणयुक्तश्चाभवत् इति शेषः ॥ १० ॥

गो० टी०—अत्र चण्डालत्वं न तत्सादृश्यमात्रं किंतु क्षत्रियत्वप्रहाणेन चण्डालत्वजातिप्राप्तिः ब्राह्मणत्वादिजातेः कर्ममूलत्वेन तदपाये तदपायादित्याह—अथेत्यादिसार्धः । चण्डालतां गतः वक्षःस्थं यज्ञोपवीतमेव वर्ध्यासीदित्यर्थः । नीलवस्त्रधरः कटिस्थपीताम्बरमेव चण्डालार्हनीलवस्त्रं जातमित्यर्थः । नीलः पूर्वस्थितराजतेज एव नीलवर्णोऽभवदित्यर्थः । एवमुत्तरत्रापि योज्यम् परुषः रूक्षाङ्गः ध्वस्तमूर्धजः ह्रस्वकेशः चित्यमाल्यानुलेपः चिता श्मशानं तत्र भवं चित्यं तादृशं माल्यमनुलेपः चिताभस्मरूपोऽङ्गरागश्च यस्य स तथा आयसाभरणः अयोविकाराभरणः ॥ ११ ॥

११] ति० टी०—चिता श्मशानं तत्र भवं पुष्पभस्मादि माल्याङ्गरागो यस्य । अयोविकार आयसं तदाभरणः । त्यज्य त्यक्त्वा ॥ ११ ॥

रा० टी०—तमिति । हे राम ! चाण्डालरूपिणं तं राजानं सर्वे मन्त्रिणः ये अस्यानुगामिनस्ते सर्वे पौराश्च सहिताः सहैवेत्यर्थः । दृष्ट्वा त्यज्य त्यक्त्वा च प्राद्रवन् ततो भीताः द्रुतं देशान्तरमगच्छन् । विनापि चं समुच्चयः ॥ ११ ॥

गो० टी०—तमिति । स्पष्टम् ॥ १२ ॥

१२] ति० टी०—अनुगामिनः सहगताः । प्राद्रवंस्तं त्यक्त्वा गताः । परमात्मवान्धीरः ॥ १२ ॥

रा० टी०—एक इति । हे काकुत्स्थ ! दिवारात्रं दह्यमानः शोकव्याकुलचित्तः परमात्मवान् अतिधैर्यः राजा त्रिशङ्कुस्तपोधनं विश्वामित्रमेक एव जगाम । हिशब्द एवार्थे ॥ १२ ॥

गो० टी०—एक इति । परमात्मवान् परमधृतिमान् भूत्वा दह्यमानः दुःखेनेति शेषः । विश्वामित्रं वसिष्ठवैरिणं जगाम ॥१३॥

१३-१४] ति० टी०—दह्यमान इत्यस्य दुःखेनेत्यादि । विश्वामित्रं जगामेति पूर्वेणान्वयः । वसिष्ठवैरित्याद्विफलीकृतं वसिष्ठतत्पुत्रैर्विनाशितैहिकामुष्मिकार्थम् ॥ १३ ॥ १४ ॥

रा० टी०—विश्वामित्र इति । हे राम ! विफलीकृतं यागप्रत्याख्यानशापाभ्यां विध्वंसितोभयलोकसुखं चण्डालरूपिणं तं राजानं त्रिशङ्कुं दृष्ट्वैव मुनिर्विश्वामित्रः कारुण्यमागतः प्राप्तः । तुशब्द एवार्थे ॥ १३ ॥

गो० टी०—विश्वामित्र इति । विफलीकृतं वासिष्ठविनाशितैहिकामुष्मिकसाधनमित्यर्थः ॥ १४ ॥

रा० टी०—कारुण्यादिति । महातेजाः परमधार्मिकः स विश्वामित्रः घोरदर्शनं राजानं त्रिशङ्कुं ते भद्रं कल्याणमस्तु इदं वाक्यं कारुण्यात् जगाद ॥ १४ ॥

गो० टी०—कारुण्यादिति । स्ववंशावमानप्रकटनेन रामस्य कोपो भविष्यतीति सान्वयति—भद्रं त इति ॥ १५ ॥

१५-१७] ति० टी०—यस्त्वं शापाच्चण्डालतां गतस्तस्य त इहागमनकार्यं किमित्यन्वयः ॥ १५-१७ ॥

---

१ एवमिति गो. पाठः । २ ते इति गो. पाठः । ३ पुरुष इति रा. पाठः । ४ माल्यानुलेपश्चेति गो. रा. पाठः । ५ आभरणान्वित इति रा. पाठः । ६ रूपिणमिति गो. पाठः ।

अनवाप्यैव तं कामं मया प्राप्तो विपर्ययः । सशरीरो दिवं यायामिति मे सौम्यदर्शन ॥ १८ ॥
मया चेष्टं क्रतुशतं तच्च नावाप्यते फलम् । अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ १९ ॥
कृच्छ्रेष्वपि गतः सौम्य क्षत्रधर्मेण ते शपे । यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ॥ २० ॥
गुरवश्च महात्मानः शीलवृत्तेन तोषिताः । धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः ॥ २१ ॥
परितोषं न गच्छन्ति गुरवो मुनिपुंगव । दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ॥ २२ ॥

रा० टी०–तद्वचनमेवाह–किमिति । हे राजपुत्र हे महाबल अयोध्याधिपते वीर ! यस्त्वं शापाच्चण्डालतां गतस्तस्य ते तवागमनकार्यमिहागमने प्रयोजनं किं तद्वदेति भावः। एतेन त्रिशङ्कुशापः पूर्वमेव विश्वामित्रेण श्रुत इति ध्वनितम् ॥१५॥

गो० टी०–किमिति। चण्डालतां गतः केन हेतुनेति शेषः १६॥

रा० टी०–अथेति । अथ विश्वामित्रोक्त्यनन्तरं तद्वाक्यं विश्वामित्रवचनमाकर्ण्य चण्डालतां गतः प्राञ्जलिः वाक्यज्ञः राजा त्रिशङ्कुः वाक्यकोविदं विश्वामित्रमब्रवीत् ॥ १६ ॥

गो० टी०–अथेति । आज्ञाय श्रुत्वेत्यर्थः ॥ १७ ॥

रा० टी०–तद्वचनमेवाह–प्रत्याख्यात इति । गुरुणा तथा गुरुपुत्रैश्चाहं प्रत्याख्यातोऽस्मि अतस्तं कामं स्वेच्छाविषयीभूतप्रयोजनमनवाप्यैव विपर्ययः इच्छाविषयीभूताद्विरुद्धोऽर्थो मया प्राप्तः । एक एवो हेतौ ॥ १७ ॥

गो० टी०–प्रत्याख्यात इति । तं कामं यमुद्दिश्य गुर्वाद्युपासनं कृतमित्यर्थः । विपर्ययः विपरीतप्रयोजनो हेतुविशेषः ॥ १८ ॥

१८] ति० टी०–यं काममुद्दिश्य गतस्तं काममनवाप्य नैतावदेव, अपि तु विपर्ययो जातिभ्रंश एवंवेषरूपः । काममाह–सशरीर इत्यादि । इतीत्यस्य काम इति शेषः । सौम्यदर्शनेति संबोधनम् ॥ १८ ॥

रा० टी०–ननु कस्ते कामो यं न प्राप्तोऽसि इत्यत आह–मेति । हे सौम्यदर्शन ! सशरीरोऽहं दिवं यायामिति हेतोः क्रतुशतं मे इष्टं मदिच्छाविषयीभूतं तत्क्रतुशतं मया नावाप्यते गुर्वादिभिः प्रत्याख्यातत्वान्न कृतमित्यर्थः । अत एव फलं सशरीरस्वर्गगमनं च नावाप्यते न प्राप्तमित्यर्थः । एकश्चशब्दो हेत्वर्थे नावाप्यत इत्युभयान्वयि ॥ १८ ॥

गो० टी०–कस्ते काम इत्यत्राह–सशरीर इति । सौम्येति संबुद्धिः दर्शनं बुद्धिः तच्च फलं क्रतुशतफलं सशरीरस्वर्गः ॥१९॥

१९] ति० टी०–तच्च तथापि । तत्फलं सशरीरस्वर्गप्राप्तिरूपं नावाप्यत इत्यन्वयः । क्रतुशतं न कृतं त्वयेति चेत्तत्राह–अनृतमिति ॥ १९ ॥

रा० टी०–गुरोर्गुरुपुत्राणां वाऽपराधान्तरं मया न कृतमिति बोधयितुमाह–अनृतमिति । मे मया अनृतं मिथ्या नोक्तपूर्वम् अत एव हे सौम्य कृच्छ्रेषु अपि गतः प्राप्तः क्षत्रधर्मेण स्थितोऽहं कदाचनानृतं न वक्ष्ये अत्र विश्वासार्थं ते तुभ्यमहं शपे । चौ हेतौ ॥ १९ ॥

गो० टी०–वसिष्ठप्रत्याख्यानमूलं पापं मयि नास्तीत्याशयेनाह–अनृतमिति । यद्वा 'यज्ञोऽनृतेन क्षरति' इतिवचनात् क्रतुनाशकत्वेनावगतमनृतमपि मयि नास्तीत्याह–मे मया क्षत्रधर्मेण तत्साक्षितयेत्यर्थः । कृच्छ्रेष्वपि गतः आपद्गतोऽपि ते पुरत इति शेषः ॥ २० ॥

२०] ति० टी०–कृच्छ्रेष्वपि गतोऽनृतं न वक्ष्य इत्यन्वयः क्षत्रधर्मेण तत्साक्षितया ॥ २० ॥

रा० टी०–सर्वकालं सद्वृत्तत्वात्पापान्तरस्यापि मयि संभावना न कर्तव्येति बोधयितुमाह–यज्ञैरिति । बहुविधैरनेकप्रकारैर्यज्ञैः राजोचितयागैर्मया इष्टं धर्मेण प्रजाः पालिताः महात्मानः पूज्यस्वरूपा गुरवश्च शीलयुक्तेन शीलवदाचरणेन तोषिताः ॥ २० ॥

गो० टी०–यज्ञैरिति । पूर्वं सशरीरत्वसाधनक्रतुशतमुक्तमत्र नित्यकर्मेति भिदा यद्वा पूर्वं क्रतुशतमिष्टं यष्टुमुपक्रान्तमित्यर्थः । तच्च नावाप्यते तादृशक्रत्वनुष्ठानमनोरथो नावाप्यत इत्यर्थः। शीलवृत्तेन शीलयुक्तवृत्तेन शीलं सद्गुणः वृत्तमाचारः२१॥

२१] ति० टी०–शीलं सद्गुणः वृत्तमाचारः । इच्छत ममेति शेषः ॥ २१ ॥

रा० टी०–यदर्थं गुरवः पश्चादपरितुष्टास्तत्र हेतुं न विद्म इति बोधयितुं पूर्ववृत्तमाह–धर्मे इति। हे मुनिपुंगव ! धर्मे प्रयतमानस्य स्वधर्माचरणनिरतस्य यज्ञं सशरीरस्वर्गप्राप्तिफलकशतसंख्याकयागमाहर्तुं कर्तुं इच्छतो ममोपरि गुरवः परितोषं नैव गच्छन्ति अगच्छन् । एतेनापरितोषे हेतुरन्वेषणीय इति ध्वनितम् । चशब्द एवार्थे ॥ २१ ॥

गो० टी०–धर्म इति । प्रयतमानस्येति सप्तम्यर्थे षष्ठी ममेति शेषः ॥ २२ ॥

२२] ति० टी०–न गच्छन्ति न गच्छन्ति स्म । यदेवमतो दैवमेव प्रारब्धफलमदृष्टमेव परं श्रेष्ठं हिताहितप्रापणे पौरुषमिदानींतनधर्मानुष्ठानं निरर्थकम् प्रारब्धतिरस्कारे दुर्बलमित्यर्थः॥ २२ ॥

रा० टी०–स्वनिश्चितहेतुं वदन्नाह–दैवमिति । अहं दैवं भाग्यमेव परं हेतुं मन्येऽत एव पौरुषं निरर्थकमर्थाप्रापकं मन्ये-तत्र हेतुः यतः सर्वं दैवेनाक्रम्यते क्रियतेऽत एव परमा गतिर्दैवमेव । तुशब्दो हेत्वर्थे हिशब्द एवार्थे ॥ २२ ॥

गो० टी०–दैवमिति । अत इत्युपस्कार्यं दैवमत्र प्रारब्धफलमदृष्टं परं श्रेष्ठं पुरुषहिताहितप्रापकमित्यर्थः । पौरुष-

दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः । तस्य मे परमार्तस्य प्रसादमभिकाङ्क्षतः ॥
कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ ॥ २३ ॥
नान्यां गतिं गमिष्यामि नान्यच्छरणमस्ति मे । दैवं पुरुषकारेण निवर्तयितुमर्हसि ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ।

त्रिशङ्कुप्रार्थनामङ्गीकृत्य तस्मै सशरीरस्वर्गप्रापणं प्रतिज्ञाय विश्वामित्रः स्वशिष्यान्मुनिगणानयनार्थं प्राहिणोत् । वासिष्ठमहोदयवर्जं सर्वे ऋषयः समागच्छन् । शिष्यैर्विश्वामित्राय तत्कृतोपालम्भकथनं तच्छ्रवणप्राप्तक्रोधो विश्वामित्रो भस्मीभवतेति वासिष्ठानिषादो भवेति च महोदयमशपत् ।

उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः । अब्रवीन्मधुरं वाक्यं साक्षाच्चण्डालतां गतम् ॥ १ ॥
इक्ष्वाको स्वागतं वत्स जानामि त्वां सुधार्मिकम् । शरणं ते प्रदास्यामि मा भैषीर्नृपपुंगव ॥ २ ॥
अहमामन्त्रये सर्वान्महर्षीन्पुण्यकर्मणः । यज्ञसाह्यकरान्राजंस्ततो यक्ष्यसि निर्वृतः ॥ ३ ॥

मिदानींतनधर्मानुष्ठानं निरर्थकं प्रारब्धकर्मतिरस्कारानर्हमित्यर्थः । आक्रम्यते अभिभूयते परमा गतिः इतरतिरस्कारेणैहिकसुखदुःखादिप्रापकमित्यर्थः ॥ २३ ॥

२३-२४] ति० टी०-दैवमुक्तम् । आक्रम्यतेऽभिभूयते । परमा गतिः साक्षादितरतिरस्कारेणैहिकसुखदुःखदम् । प्रसादं दैवानुकूल्यसमर्थं त्वदीयं प्रसादमिच्छतो मे प्रसादं कर्तुमर्हसि । दैवेनोपहतं तिरस्कृतमिहानुष्ठीयमानं कर्म यस्य ॥ २३ ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०-इदानीं तत्कर्तव्यमाह-तस्येति । परमार्तस्यात्यन्तदुःखं प्राप्तस्य प्रसादं स्वचित्तप्रसन्नतामभिकाङ्क्षतस्तस्य गुरुपुत्रैः शप्तस्य मे मम प्रसादं कर्तुमर्हसि ते भद्रमस्तु । प्रसादस्यान्वयः एकत्र शाब्दः अपरत्रार्थः ॥ २३ ॥

गो० टी०-तस्येति । प्रसादं दैवानुकूल्यम् ॥ २४ ॥

रा० टी०-भवन्तमन्तरा गत्यन्तरं मे नास्तीति बोधयन्नाह-नेति । यतः मे शरणं रक्षकः अन्यः त्वद्भिन्नो नास्ति अतः अन्यां त्वद्भिन्नां गतिं रक्षकं न गमिष्यामि प्राप्स्यामि अतः पुरुषकारेण स्वपौरुषेण दैवं मम दुर्भाग्यं निवर्तयितुं त्वमर्हसि ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

गो० टी०-नेति । गतिं शरणं वसिष्ठेन स्वयमाहूतश्चेत्किं करिष्यसीत्यत्राह-नान्यः शरणमस्तीति । पुरुषकारेण त्वत्प्रसादरूपानुकूल्यकरणेन ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

१-२] ति० टी०-उक्तेति ॥ १ ॥ २ ॥

रा० टी०-त्रिशङ्कुप्रार्थनोत्तरकालिकं वृत्तमाह-उक्तेति । उक्तवाक्यं कथितस्ववृत्तं चाण्डालरूपिणं राजानं त्रिशङ्कुं कुशिकात्मजो विश्वामित्रः कृपया मधुरं वाक्यं साक्षादेवाब्रवीत् । साक्षादब्रवीदित्यनेन चाण्डालः साक्षादभिभाषणानर्ह इति निषेधस्यानर्हः स इति ध्वनितम् । तेनकर्मणा जात्या च स न चाण्डाल इति व्यञ्जितम् । अत एव चाण्डालरूपिणमिति विशेषणम् । तुशब्द एवार्थे ॥ १ ॥

गो० टी०-जातिचण्डालस्य कदाचित्तद्भावनिवृत्तिरस्ति नतु कर्मचण्डालस्येत्याह एकोनषष्टितमे-उक्तवाक्यमित्यादि । साक्षाच्चण्डालरूपिणं चण्डालचिह्नधारित्वान्न शास्त्रगम्यचण्डालभाव इत्यर्थः ॥ १ ॥

रा० टी०-तद्वचनमेवाह-इक्ष्वाको इति । इक्ष्वाको हे इक्ष्वाकुकुलोद्भव वत्स नृपपुंगव ! त्वां सुधार्मिकमहं जानाम्यतः स्वागतं समीचीनं तवागमनमतस्ते शरणं रक्षकोऽहं भविष्याम्यतो मा भैषीः भयं न प्राप्नुहि ॥ २ ॥

गो० टी०-ऐक्ष्वाकेत्यादिचत्वारः । यज्ञसाह्यकरान् यज्ञसाहाय्यकरान् गमिष्यसि स्वर्गमिति शेषः । अनेनेत्यनेन ऋषिशापकृतरूपस्य ब्रह्मणाप्यवार्यत्वेन जातिचण्डालताभावेन मत्तपोमहिमोपबृंहितयज्ञेन सशरीरः स्वर्गं गमिष्यसीति भावः । हस्तप्राप्तम् अनायासेन सशोलब्धं तत्र हेतुः यस्त्वमिति ॥२-६॥

३] ति० टी०-यज्ञसाह्यं यज्ञसाहाय्यम् ॥ ३ ॥

रा० टी०-अहमिति । हे राजन् ! पुण्यकर्मणः यज्ञसाह्यकरान् त्वच्चिकीर्षितयज्ञसाहाय्यकर्तॄन् सर्वान् महर्षीनहमामन्त्रये ततो निर्वृतः प्राप्तानन्दस्त्वं यक्ष्यसि ॥ ३ ॥

१ चण्डालरूपिणमिति गो. रा. पाठः । २ ऐक्ष्वाकेति गो. पाठः ।

36955

गुरुशापकृतं रूपं यदिदं त्वयि वर्तते । अनेन सह रूपेण सशरीरो गमिष्यसि ॥ ४ ॥
हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप । यस्त्वं कौशिकमागम्य शरण्यं शरणागतः ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रान्परमधार्मिकान् । व्यादिदेश महाप्राज्ञान्यज्ञसंभारकारणात् ॥ ६ ॥
सर्वाञ्शिष्यान्समाहूय वाक्यमेतदुवाच ह । सर्वानृषीन्सवासिष्ठानानयध्वं ममाज्ञया ॥ ७ ॥
सशिष्यान्सुहृदश्चैव सर्त्विजः सुबहुश्रुतान् । यदन्यो वचनं ब्रूयान्मद्वाक्यबलचोदितः ॥ ८ ॥
तत्सर्वमखिलेनोक्तं ममाख्येयमनादृतम् । तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ॥ ९ ॥
आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः । ते च शिष्याः समागम्य मुनिं ज्वलिततेजसम् ॥ १० ॥
ऊचुश्च वचनं सर्वे सर्वेषां ब्रह्मवादिनाम् । श्रुत्वा ते वचनं सर्वे समायान्ति द्विजातयः ॥ ११ ॥
सर्वदेशेषु चागच्छन्वर्जयित्वा महोदयम् । वासिष्ठं यैश्छतं सर्वं क्रोधपर्याकुलाक्षरम् ॥ १२ ॥
यैर्थाह वचनं सर्वं शृणु त्वं मुनिपुंगव । क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ॥ १३ ॥

४] ति० टी०—अनेन रूपेण गुरुपुत्रशापकृतेन चण्डालरूपेण ऋषिशापस्यान्यथाकर्तुमशक्यत्वात् । गमिष्यसि स्वर्गमिति शेषः । जातिचाण्डालत्वाभावाच्च यज्ञप्रवृत्तिः ॥ ४ ॥

रा० टी०—गुर्विति । गुरुशापकृतं यदिदं रूपं त्वयि वर्ततेऽनेन रूपेण सह सशरीरः शरीरसहितस्त्वं गमिष्यसि स्वर्गमिति शेषः । अनेन रूपेणेत्युक्त्या गुरुशापनिवारणे स्वाशक्यत्वं सूचितम् ॥ ४ ॥

५] ति० टी०—हस्तप्राप्तमनायासलभ्यम् । तत्र हेतुः—यस्त्वमित्यादि ॥ ५ ॥

रा० टी०—नन्वनेन रूपेण स्वर्गप्राप्तिर्दुर्लभेत्यत आह—हस्तेति । हे नराधिप ! यस्त्वं शरण्यं शरणहितं कौशिकमागम्य ज्ञात्वा शरणं रक्षा यथा स्यात्तथा गतः प्राप्तस्तस्य तव स्वर्गं हस्तप्राप्तमहं मन्ये निश्चिनोमि ॥ ५ ॥

६] ति० टी०—यज्ञसंभारकारणायज्ञसामग्रीसंपादनार्थम्॥६॥

रा० टी०—एवमिति । महातेजाः अतिशयतेजोविशिष्टो विश्वामित्रः एवमुक्त्वा त्रिशङ्कुमाभाष्य महाप्राज्ञान् पुत्रान् स्वात्मजान् यज्ञसंभारकारणात् यागसंपादकसामग्रीसंपादनहेतोः व्यादिदेश आज्ञापयामास ॥ ६ ॥

गो० टी०—एवमिति सार्धः । शिष्यान् भृत्यान् ॥ ६ ॥

७] ति० टी०—शिष्याणामृष्यानयन आज्ञा ॥ ७ ॥

रा० टी०—सर्वानिति । सर्वान्निखिलान् शिष्यान् समाहूयैतद्वाक्यमुवाच । तद्वचनमेवाह—सवासिष्ठान् वाशिष्ठसहितान् सशिष्यान् शिष्यसहितान् सर्वान् ऋषीन् सर्त्विजः ऋत्विक्सहितान् सुबहुश्रुतान् वेदशास्त्रसंपन्नान् सुहृदश्च ममाज्ञयैवानयध्वम् । सार्धश्लोक एकान्वयी । हशब्द एवार्थे ॥ ७ ॥ ८ ॥

गो० टी०—सर्वानिति । सुहृदः मत्सुहृदः शोभनहृदयान्वा ७

८–१०] ति० टी०—सुहृदः स्वस्य । स्वस्वऋत्विक्सहितान् तद्विशेषणम्—सुबहुश्रुतानिति । यदिति । आहूतोऽन्यो वा अनादृतमुपेक्षारूपं चण्डालयाजनरूपं निन्दात्मकं वा यद्वाक्यं ब्रूयात्तत्सर्वमुक्तमखिलेन ममाख्येयम् ॥ ८–१० ॥

रा० टी०—यदिति । मद्वाक्यबलचोदितः मद्वाक्यरूपबलप्रेरितः मदाहूत इति यावत् । अन्यः अनाहूतो वा अनादृत उदासीनं निन्दाफलकं वा वचनं ब्रूयात् अखिलेनोक्तं तत्सर्वं ममाख्येयं सर्वैर्भवद्भिरागत्य ममाग्रे यथाहूतं वक्तव्यमित्यर्थः ॥९॥

गो० टी०—यदन्य इति । मद्वाक्यबलेन चोदितः आहूतः यः कश्चनान्यः अनादृतमुपेक्षारूपं चण्डालं याजयतीति निन्दारूपं वा यद्वाक्यं ब्रूयात् तेनोक्तं तत्सर्वमखिलेन ममाख्येयम् ॥८॥

रा० टी०—तस्येति । तस्य विश्वामित्रस्य तत् आह्वानार्थकं वचनं श्रुत्वा तदाज्ञया विश्वामित्राज्ञापनेन दिशो जग्मुः । अथ विश्वामित्रप्रेषिततच्छिष्यवचनश्रवणानन्तरं सर्वेभ्यो देशेभ्यो ब्रह्मवादिन आजग्मुः ॥ १० ॥

गो० टी०—तस्येति द्वौ । ब्रह्मवादिनः शिष्याः ब्रह्मवादिनां वचनमित्यन्वयः ॥ ९ ॥ १० ॥

रा० टी०—ते प्रेषिताः सर्वे शिष्यास्तु समागम्य आहूतमुन्यागमनात्पूर्वं विश्वामित्रसमीपं प्राप्यैव ज्वलिततेजसं मुनिं विश्वामित्रं सर्वेषां ब्रह्मवादिनां वचनमुक्तिमूचुः यथोक्तं कथयामासुरित्यर्थः । एकश्चकार एवार्थे द्वितीयस्त्वर्थे । श्लोकद्वयमेकान्वयि ॥ ११ ॥

११] ति० टी०—ते तव ॥ ११ ॥

रा० टी०—तद्वचनमेवाह—श्रुत्वेति । सर्वदेशेषु भवदाज्ञप्तेषु अगच्छन् अस्मदादय इति शेषः । ते वचनं अस्मदाद्युक्तत्वत्संदेशं श्रुत्वा महोदयं महोदयनामानमृषिं वर्जयित्वा सर्वे आहूताः द्विजातयः चकारेण सुहृदादयश्च समायान्ति । महोदयं वर्जयित्वेत्यनेन तस्य वशिष्ठपुत्रानुयायित्वं ध्वनितम् ॥ १२ ॥

गो० टी०—यदनादरवचनं मुनीनां तदपि वक्तव्यमित्युक्त्वात्तदपि वदन्ति—श्रुत्वेत्यादिषट् । सर्वदेशेषु स्थिता इति शेषः । महोदयमिति तदाख्यं ऋषिमित्यर्थः । वासिष्ठशतं च वर्जयित्वेति द्रष्टव्यम् ॥ ११ ॥

१२–१३] ति० टी०—सर्वदेशेष्वित्यस्य स्थिता इति शेषः । आगच्छन्नित्यस्य केचिदिति शेषः । महोदयं तन्नामान-

१ तदिति गो. रा. पाठः । २ यदाहेति गो. रा. पाठः ।

कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ।ब्राह्मणा वा महात्मानो भुक्त्वा चाण्डालभोजनम्॥१४॥
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः । एतद्वचननैष्ठुर्यमूचुः संरक्तलोचनाः ॥ १५ ॥
वासिष्ठा मुनिशार्दूल सर्वे सहमहोदयाः । तेषां तद्वचनं श्रुत्वा सर्वेषां मुनिपुंगवः ॥ १६ ॥
क्रोधसंरक्तनयनः सरोषमिदमब्रवीत् । यैर्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम् ॥ १७ ॥
भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः । अद्य ते कालपाशेन नीता वैवस्वतक्षयम् ॥ १८ ॥
सप्तजातिशतान्येव मृतपाः संभवन्तु ते । श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः ॥ १९ ॥

मृषिम् वासिष्ठं यच्छतं सर्वं तच्च वर्जयित्वेति योजना । तद्वासिष्ठशतं क्रोधपर्याकुलाक्षरं यथा येन प्रकारेण वचनमाह तत्सर्वं शृण्वित्यर्थः । क्षत्रिय इत्यादि । ब्राह्मणस्यैव याजनाधिकारात् चण्डालस्य यज्ञेऽनधिकाराच्च ॥ १२ ॥ १३ ॥

रा० टी०–वासिष्ठमिति । हे मुनिपुंगव ! शतं शतसंख्याकं सर्वं वासिष्ठं वशिष्ठापत्यं यत् क्रोधपर्याकुलाक्षरं क्रोधव्याप्ताक्षरविशिष्टं वचनमाह तत् सर्वं त्वं शृणु ॥ १३ ॥

गो० टी०–वासिष्ठं यदाहेत्यत्र महोदयश्चेत्यपि बोध्यमुपसंहारे तथा दर्शनात् ॥ १२ ॥

रा० टी०–वाशिष्ठवचनमेवाह–क्षत्रिय इति । यस्य चाण्डालस्य विशेषतः प्राधान्यात् क्षत्रियो याजकः तस्य सदसि यागशालायां सुरर्षयः सुराश्च ऋषयश्च हविर्भोक्तारः कथं न भोक्तार इत्यर्थः ॥ १४ ॥

गो० टी०–क्षत्रियो याजको यस्येति । विप्रस्यैव याजनाधिकारात् चण्डालस्य याज्यत्वानधिकारात् तस्य सदसि देवताः कथं हविर्भोक्तारः लुट् ऋषयश्च कथमिष्टशिष्टभोक्तार इति भावः ॥ १३

१४] ति० टी०–सुराणां देवतात्वेन भोक्तृत्वम् ऋषीणामृत्विक्त्वेन यज्ञशिष्टभोक्तृत्वम् ॥ १४ ॥

रा० टी०–पूर्वमनधिकारियाजकप्रयुक्ताशुद्धिं हविष उक्त्वा इदानीमनधिकारियाज्यप्रयुक्ताशुद्धिंहविषो बोधयन्नाह–ब्राह्मणा इति । महात्मानो विश्वामित्रेण पालिता अपि ब्राह्मणाः चाण्डालभोजनं चाण्डालस्वामिकमन्नं भुक्त्वा स्वर्गं सुखविशेषं कथं गमिष्यन्ति प्राप्स्यन्ति न प्राप्स्यन्तीत्यर्थः । एतेन इयं यागप्रवृत्तिः अत्यनर्थहेतुरिति ध्वनितम् । वाशब्दोऽप्यर्थे ॥१५॥

१५] ति० टी०–पालिता इति व्यङ्ग्योक्तिः । वचननैष्ठुर्यम् अर्शआद्यजन्तम् नैष्ठुर्यवद्वचनमित्यर्थः ॥ १५ ॥

रा० टी०–उपसंहरन्नाह–एतदिति । हे मुनिशार्दूल ! संरक्तलोचनाः सहमहोदयाः महोदयसहिताः सर्वे वासिष्ठाः एतद्वर्णितं वचननैष्ठुर्यं निष्ठुरवचनमूचुः नैष्ठुर्यशब्दः स्वार्थेष्यञन्तः ॥ १६ ॥

गो० टी०–पालिता इति क्षेपोक्तिः । अयाज्ययाजयितारः ऋषयः कथं स्वर्गं गमिष्यन्तीति भावः ॥ १४–१६ ॥

१६] ति० टी०–वासिष्ठा इत्यार्धं पूर्वान्वयि । सहमहोदया महोदयेन सहिताः ॥ १६ ॥

रा० टी०–तेषामिति । तेषां प्रसिद्धानां सर्वेषां समहोदयवाशिष्ठानां तद्वचनं श्रुत्वा स्वशिष्यमुखादवगत्य क्रोधसंरक्तनयनः मुनिपुंगवो विश्वामित्रः सरोषं रोषसहितमिदं वचनमब्रवीत् ॥ १७ ॥

१७] ति० टी०–अदुष्टत्वे हेतुः—तप उग्रमिति । तपस्तेजसा क्षत्रियस्य चण्डालयाजनमपि न दोषायेति ज्ञात्वापि यद्दूषयन्ति स्म ॥ १७ ॥

रा० टी०–तदुक्तिमेवाह–यैरिति । उग्रं तपः समास्थितं कुर्वन्तमत एव अदुष्टं दोषस्पर्शानर्हं मां दुरात्मानः समहोदयवासिष्ठाः यत् यस्मात्दूषयन्ति तस्मात् भस्मीभूताः भविष्यन्ति अत्र संशयो न ॥ १८ ॥

गो० टी०–य इति । तेषां तेजोविशेषेण प्रत्यवायो न विद्यत इतिन्यायेन चण्डालयाजनमपि जीर्यतीत्यविज्ञाय ये दूषयन्ति ते भस्मीभूता भविष्यन्तीत्यर्थः ॥ १७ ॥

१८] ति० टी०–तस्माद्भस्मीभूता इत्यादि ॥ १८ ॥

रा० टी०–अद्येति । अथ भस्मीभवनोत्तरकाले वैवस्वतक्षयं यमराजगृहं कालपाशेनैव नीतास्ते वासिष्ठा भविष्यन्तीत्यनुकृष्यते । वैवस्वतभवनगमनोत्तरकालिकं वृत्तमाह–सप्त जातिशतानि सप्तगुणितजन्मशतम् सर्वशो वासिष्ठाः मृतपाः श्वपाकाः सन्तु ॥ १९ ॥

गो० टी०–अद्येत्यादिपञ्च । क्षयं गृहं सप्तजातिशतानि सप्तजन्मशतानि मृतपाः शवभक्षकाः मुष्टिकाः हीनजातिविशेषाः विकृताः विकृतवचनव्यापारादयः विरूपाः विकृतवेषाः ॥ १८ ॥ १९ ॥

१९] ति० टी०–सप्तजातिशतानि सप्तजन्मशतानि । मृतपाः शववस्त्रादिहारिणः मुष्टिका नाम तन्नामानः इदानीम् 'डोंबा' इति प्रसिद्धाः ॥ १९ ॥

रा० टी०–तदेव विशदयन्नाह–श्वमांसेति । श्वमांसनियताहाराः अत एव निर्घृणाः अत एव विकृताः विरुद्धप्रयत्नकाः विरूपाः विकृतरूपाः मुष्टिका चाण्डालजातिविशेषाः सन्तः इमान् लोकान् नाम प्रसिद्धमनुचरन्तु । चकारद्वयं हेत्वर्थकम् ॥ २० ॥

१ चण्डालेति गो. पाठः । २ ते समहोदया इति गो. रा. पाठः । ३ ये दूषयन्तीति गो. पाठः । ४ सन्तु सर्वश इति गो. रा. पाठः ।

विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान् । महोदयश्च दुर्बुद्धिर्मामदूष्यं ह्यदूषयत् ॥ २० ॥
दूषितः सर्वलोकेषु निषादत्वं गमिष्यति । प्राणातिपातनिरतो निरनुक्रोशतां गतः ॥ २१ ॥
दीर्घकालं मम क्रोधादुर्गतिं वर्तयिष्यति । एतावदुक्त्वा वचनं विश्वामित्रो महातपाः ॥
विरराम महातेजा ऋषिमध्ये महामुनिः ॥ ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ।

तेभ्यः स्वाभिप्रायं निवेद्य विश्वामित्रो मुनिगणैः समं यज्ञं समारेभे । तत्र भागार्थमाहूतेऽपि देवगणेऽनायाते स्वतपोबलेनैव त्रिशङ्कुं स्वर्गं प्राहिणोत् । सत्विन्द्रादिभिः कृतप्रतिबन्धो ऋषिं चुक्रोश । तं तत्रैव संस्तभ्य तत्रैव स्वर्गं स्रष्टुमारब्धवन्तं देवा विश्वामित्रं सान्त्वयित्वा तत्कृतं चानुमत्य स्वर्गं जग्मुः ।

तपोबलहतान्ज्ञात्वा वासिष्ठान्समहोदयान् । ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः । धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥ २ ॥
स्वेनानेन शरीरेण देवलोकजिगीषया । यथायं स्वशरीरेण देवलोकं गमिष्यति ॥ ३ ॥

२०] ति० टी०–विकृता विकृतव्यापाराः विरूपा विकृताकाराः । अदूष्यं ह्यदूषयदिति प्राग्वत् ॥ २० ॥

रा० टी०–महोदय इति । दुर्बुद्धिर्महोदयोऽपि अदूष्यं मां यददूषयत् तस्मात्सर्वलोकेषु दूषितः सन् निषादत्वं गमिष्यति प्राप्स्यति चोऽप्यर्थे ॥ २१ ॥

गो० टी०–अदूष्यमुक्तन्यायेनेति भावः ॥ २० ॥

गो० टी०–महोदयश्चेत्यनेन पूर्वं शप्ता वसिष्ठपुत्रा एवेति गम्यते । प्राणातिपातः बलात्प्राणनाशनं निरनुक्रोशतां निर्घृणतां वर्तयिष्यति प्राप्स्यति । ननग्रतपस्वित्वेऽपि क्षत्रियस्य चण्डालयाजनं सर्वथा अन्याय्यमेवेति कथं यथार्थवादिषु शापप्रवृत्तिरिति चेदत्रोत्तरं वसिष्ठवैरनिर्यातनकामस्य विश्वामित्रस्य तपःफलमिदमिति ॥ २१ ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

२१] ति० टी०–प्राणातिपातनिरतः प्राणिनां प्राणनाशोद्यतः । अनुक्रोशो दया ॥ २१ ॥

रा० टी०–निषादत्वमेव प्रकटयन्नाह–प्राणेति । प्राणातिपातनिरतः प्राणानां प्राणिनां योऽतिपातो हिंसा तत्र निरतः अत एव निरनुक्रोशतां निर्दयत्वं गतः प्राप्तो महोदयः दुर्गतिं मम क्रोधात् दीर्घकालं बहुकालपर्यन्तं वर्तयिष्यति प्राप्स्यति ॥ २२ ॥

२२] ति० टी०–वर्तयिष्यति प्राप्स्यति । अत्रेदं बोध्यम्–क्षत्रियत्वेऽपि याजने प्रवृत्तिः, तत्रापि शापदूषितचण्डालयाजने प्रवृत्तिः, ब्राह्मणेषु वासिष्ठेषु वधादिकृत्याप्रवृत्तिः, एतत्सर्वं ब्राह्मणत्वेच्छया प्रवर्तमानतपसो विनाशाय दैवकृतमिति बोध्यम् २२॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

रा० टी०–एतावदिति । महातपाः अत एव महातेजाः महास्त्रनिर्विश्वामित्रः एतावद्वचनमृषिमध्ये उक्त्वा विरराम॥२३॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

१] ति० टी०–ज्ञात्वा योगबलेन ॥ १ ॥

रा० टी०–विरामौत्तरकालिकं वृत्तमाह–तप इति । महातेजाः स विश्वामित्रः समहोदयान् महोदयसहितान् वाशिष्ठान् वशिष्ठपुत्रान् तपोबलहतान् स्वतपःप्रभावप्रनष्टान् ज्ञात्वा ऋषिमध्येऽभ्यभाषत ॥ १ ॥

गो० टी०–अथ सशरीरस्य त्रिशङ्कोः स्वर्गप्रापणं षष्टितमे–तप इत्यादि ॥ १ ॥

२] ति० टी०–इक्ष्वाकुदायादस्तद्वंश्यः एवमादिगुणैर्यागाधिकारित्वं सूचितम् ॥ २ ॥

रा० टी०–तद्भाषणमेवाह–अयमिति । धर्मिष्ठः अत एव वदान्यः त्रिशङ्कुरिति विश्रुतः प्रख्यातः अयमिक्ष्वाकुदायादस्वेन स्वकीयेन अनेन चाण्डालरूपेण शरीरेणैव देवलोकजिगीषया देवलोकप्राप्तीच्छयेत्यर्थः शरणं रक्षकं मां गतः प्राप्तोऽतः स्वशरीरेणैव स्वर्गलोकं यथा येन प्रकारेणायं त्रिशङ्कुर्गमिष्यति तथा तेन प्रकारेणैव मया सह भवद्भिर्यज्ञः प्रवर्त्यताम् । सार्धश्लोकद्वयमेकान्वयि चकारद्वयमेवार्थकं तृतीयो हेत्वर्थकः ॥ २ ॥ ३ ॥

गो० टी०–अयमिति सार्धः । दायमर्हतीति दायादः पुत्रपौत्रादिः पचाद्यच् वंश इति यावत् । तेन पूर्वं क्षत्रियरूपेण अनेन इदानीं चण्डालरूपेण शरीरेण देवलोकजिगीषया स्वर्गं स्ववशीकर्तुमिच्छया मां शरणं गतः ॥ २ ॥

३] ति० टी०–स्वं प्रति शरणमागमने हेतुमाह–स्वेनेत्यादि ॥ ३ ॥

---

१ स्वर्गलोकमिति गो. रा. पाठः ।

तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह । विश्वामित्रवचः श्रुत्वा सर्वे एव महर्षयः ॥ ४ ॥
ऊचुः समेता सहसा धर्मज्ञा धर्मसंहितम् । अयं कुशिकदायादो मुनिः परमकोपनः ॥ ५ ॥
यदाह वचनं सम्यगेतत्कार्यं न संशयः । अग्निकल्पो हि भगवान्शापं दास्यति रोषतः ॥ ६ ॥
तस्मात्प्रवर्त्यतां यज्ञः सशरीरो यथा [2]दिवि । गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ ७ ॥
[3]ततः प्रवर्त्यतां यज्ञः सर्वे समधितिष्ठत । एवमुक्त्वा महर्षयः [4]संजह्रुस्ताः क्रियास्तदा ॥ ८ ॥
याजकश्च महातेजा विश्वामित्रोऽभवत्क्रतौ । ऋत्विजश्चानुपूर्व्येण [5]मन्त्रवन्मन्त्रकोविदाः ॥ ९ ॥
चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि । ततः कालेन महता विश्वामित्रो महातपाः ॥ १० ॥
चकारावाहनं तत्र भागार्थं सर्वदेवताः । नाभ्यागमंस्तदा [6]तत्र भागार्थं सर्वदेवताः ॥ ११ ॥
ततः कोपसमाविष्टो विश्वामित्रो महामुनिः । [7]स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत् ॥ १२ ॥

गो० टी०–यथेति पञ्च ॥ ३ ॥

४] ति० टी०–प्रवर्त्यतामारभ्यताम् ॥ ४ ॥

रा० टी०–विश्वामित्रेति । विश्वामित्रवचो वचनं श्रुत्वा सहसा शीघ्रमेव समेताः धर्मज्ञाः सर्वे महर्षयः धर्मसंहितं धर्मसहितं वचनमूचुः परस्परं कथयामासुः । पूर्वोत्तरार्धोत्तरपूर्वार्धयोरेकत्रान्वयः ॥ ४ ॥

५] ति० टी०–धर्मसंहितमिति क्रियाविशेषणम् । ऊचुरित्यस्यान्योन्यमिति शेषः । यदूचुस्तदाह–अयमित्यादि ॥५॥

रा० टी०–तद्वचनमेवाह–अयमिति।कुशिकदायादः कुशिकभागभोक्ता परमकोपनोऽयं मुनिः यद्वचनमाह तदेतत्सम्यक् कार्यमत्र संशयो न। अन्यथाकरणे दोषमाह–अग्निकल्पः अग्निसदृशः भगवान् सकलसामर्थ्यविशिष्टो विश्वामित्रः रोषतः अस्मदन्यथाचरितजनितक्रोधात् शापं दास्यत्येव । हिरेवार्थे ॥ ५ ॥ ६ ॥

गो० टी०–ऊचुः अन्योन्यमिति शेषः ॥ ४ ॥

६–७] ति० टी०–अग्निकल्पः अजितकामक्रोधत्वाच्छापं दास्यति यतस्तस्मादिति ॥ ६ ॥ ७ ॥

रा० टी०–तस्मादिति । तस्मात् विश्वामित्रकोपभयादिक्ष्वाकुदायादः त्रिशङ्कुः विश्वामित्रस्य तेजसा यथा येन प्रकारेण सशरीरो दिवं गच्छेत्तथा यज्ञः प्रवर्त्यताम् ॥ ७ ॥

गो० टी०–सम्यक्कार्यमित्यन्वयः । समधिष्ठत स्वस्वार्त्विज्यमिति शेषः ॥ ६–७ ॥

८] ति० टी०–ततः सशरीरस्य स्वर्गगमनाय यज्ञः प्रवर्त्यताम् सर्वे भवन्तः स्वस्वकृत्यमधितिष्ठत प्रारभध्वम् । ताः क्रियाः स्वस्वार्त्विज्यकर्माणि ॥ ८ ॥

रा० टी०–सर्वऋषीणां यागसंमतिं ज्ञात्वा विश्वामित्र आह–तत इति । ततः जातसंमतित्वाद्धेतोः सर्वे यूयं समधितिष्ठत यज्ञः प्रवर्त्यताम् भवद्भिरिति शेषः । एवमनेन प्रकारेण उक्ता विश्वामित्रेणाज्ञप्ता महर्षयस्ताः यागप्रसिद्धाः क्रियाः संचक्रुः । तदा तस्मिन्काले क्रतौ यागे महातेजा विश्वामित्र एव याजकोऽध्वर्युरभवत् । चशब्द एवार्थे । अध्वर्युत्वादेव अध्वर्युः स्रुवमुद्यम्येति वक्ष्यमाणं संगच्छते । अर्धत्रयमेकान्वयि ॥ ८ ॥

गो० टी०–एवमिति । तास्ताः क्रियाः स्वस्वार्त्विज्यकर्माणि याजकः अध्वर्युः स्रुवमुद्यम्येति वक्ष्यमाणत्वात् ॥ ८ ॥

९] ति० टी०–याजकः अध्वर्युरिति यावत् अत एव वक्ष्यति–स्रुवमुद्यम्येति ॥ ९ ॥

रा० टी०–ऋत्विज इति । मन्त्रवन्तः परस्परं कृतसंमतयस्ते एव मन्त्रकोविदा मन्त्रोपलक्षितयागनिपुणाः ऋत्विजः यथाकल्पं कल्पशास्त्रमनतिक्रम्य यथाविधि सर्वाणि कर्माणि आनुपूर्वेण क्रमश एव चक्रुः । चशब्द एवार्थे ॥ ९ ॥

गो० टी०–ऋत्विज इति । मन्त्रवदिति क्रियाविशेषणम्। यथाकल्पं कल्पसूत्रमनतिक्रम्य यथाविधि यथाशास्त्रम् ॥ ९ ॥

१०] ति० टी०–यथाकल्पं शास्त्रानुसारेण । यथाविधि यथासंप्रदायानुष्ठानम् । कल्पशास्त्रे नानापक्षोपन्यासस्थलेऽनुष्ठेयांशे संप्रदायस्यैव शरणत्वात् । महता कालेनाधिककालसाध्ययत्नपूर्वकमन्त्रपाठेन ॥ १० ॥

रा० टी०–तत इति । ततः यागप्रवृत्त्यनन्तरं महातपाः विश्वामित्रः तत्र तस्मिन् यागे भागार्थं तत्तद्भागं दातुं सर्वदेवताः निखिलदेवतायाः आवाहनं महता कालेन चकार । सर्वदेवता इति षष्ठ्येकवचनमागमशास्त्रस्यानित्यत्वाद्याडभावः । महता कालेनेत्यनेन तत्यागदेवानां बाहुल्यं द्योतितम् ॥ १० ॥

गो० टी०–तत इति । महता कालेन द्विस्त्रिर्मन्त्रावृत्त्या सर्वदेवताः प्रतीति शेषः ॥ १० ॥

११] ति० टी०–सर्वदेवताः प्रतीति शेषः । तदा तथाप्यनधिकारिणा याजनाद्यजनाच्च ॥ ११ ॥

रा० टी०–नेति । ततः विश्वामित्रावाहनानन्तरं तत्र तस्मिन् यागे सर्वदेवता भागार्थं नाभ्यागमन् । इदमर्धमेव ॥११॥

गो० टी०–नेत्यर्धम्। नाभ्यागमन् अनधिकारिणा अन्यायेन च कृतमकृतमिति न्यायादिति भावः ॥ ११ ॥

१२] ति० टी०–उद्यम्योर्ध्वं क्रोधेन प्रक्षिप्य कोपस्यैवाधिक्यावस्था क्रोधः ॥ १२ ॥

---

१ रोषित इति गो. पाठः । २ दिवमिति गो. रा. पाठः । ३ तथेति गो. पाठः । ४ चक्रुस्तास्ता इति गो. संचक्रुस्ता इति रा. पाठः । ५ चानुपूर्वेणेति रा. पाठः । ६ आहूता इति गो. पाठः । ७ क्रोधेति गो. रा. पाठः ।

पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर । एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥ १३ ॥
दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर । स्वार्जितं किंचिदप्यस्ति मया हि तपसः फलम्॥ १४ ॥
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज । उक्तवाक्ये मुनौ तस्मिन्सशरीरो नरेश्वरः ॥ १५ ॥
दिवं जगाम काकुत्स्थ मुनीनां पश्यतां तदा । स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः ॥ १६ ॥
सह सर्वैः सुरगणैरिदं वचनमब्रवीत् । त्रिशङ्को गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ॥ १७ ॥
गुरुशापहतो मूढ पत भूमिमवाक्शिराः । एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत्पुनः ॥ १८ ॥
विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम् । तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ॥ १९ ॥
रोषमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् । ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः ॥ २० ॥

रा० टी०–तत इति । ततः आहूतदेवागमनाभावहेतोः क्रोधसमाविष्टः महामुनिः अतिमननशीलः सक्रः अतिक्रियासहितः अथः क्रोपान्तर्धारणासमर्थः विश्वामित्रः सुवमुच्यस्य त्रिशङ्कुमिदमब्रवीत्। क्रः इत्यत्र कृधातोर्घञर्थे कविधानमिति कः। नञ्पूर्वकधारणार्थकधाधातुप्रकृतिककप्रत्ययान्तोऽध इति अत एव क्रोधसमाविष्ट इत्यनेन न पौनरुक्त्यम् ॥ १२ ॥

गो० टी०–तत इति। सुवोद्यमनं कोपजचेष्टाविशेषः॥१२॥

१३] ति० टी०–पश्य मे इति । भागार्थं देवानामनागमनेनासाध्यत्वेऽपि स्वतपोव्ययेन त्वामभीष्टं स्वर्गं नयामीति भावः ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–पश्येति । हे नरेश्वर ! स्वार्जितस्य मे तपसो वीर्यं पश्य । तद्वीर्यमेवाह–एषः अहमोजसा स्वतपःप्रभावेण स्वशरीरेण गुरुपुत्रशप्तात्मीयशरीरेण त्वां स्वर्गं नयामि ॥ १३ ॥

गो० टी०–पश्येति सार्धः । त्वदभिमतयागस्त्वास्तामिति भावः । एष इत्यव्यवधाने ओजसा तपोवीर्येण दुष्प्रापमन्यैरिति शेषः ॥ १३ ॥

१४] ति० टी०–स्वशरीरेण दुष्प्रापमित्यन्वयः । हि यदि मया स्वार्जितं यत्किंचिदपि तपसः फलं सुकृतमस्ति ॥ १४ ॥

रा० टी०–दुरिति । हे नराधिप ! दुष्प्रायं त्वद्भिन्नैर्दुर्गमं स्वर्गं स्वशरीरेण गच्छ। साधनमन्तरा कथं गच्छामीत्यत आह–हे राजन्! मया स्वार्जितं स्वस्मै अर्जितं तपसः फलं किंचिदपि यद्यस्ति तर्हि तस्य तपसस्तेजसा प्रभावेण सशरीरस्त्वं दिवं व्रज । हिशब्दो यद्यर्थे । सार्धश्लोक एकान्वयी ॥ १४ ॥

गो० टी०–स्वेति । स्वार्जितं सुष्ठ्वार्जितं स्वतेजसा स्वासाधारणप्रभावेन ॥ १४ ॥

१५] ति० टी०–तदाह–हे राजन्! त्वं तस्य तेजसा वैभवेन सशरीरो दिवं गच्छ । कुद्धत्वात्पुनरुक्त्यादि न दोषः ॥१५॥

रा० टी०–उक्तेति । हे काकुत्स्थ ! तदा देवागमनाभावकाले तस्मिन्मुनौ विश्वामित्रे उक्तवाक्ये सति मुनीनां पश्यतां सतां नरेश्वरः त्रिशङ्कुः सशरीरो दिवं जगाम ॥ १५ ॥

गो० टी०–उक्तेति । मुनीनां पश्यतां मुनिषु पश्यत्सु सत्सु ॥ १५ ॥

१६] ति० टी०–मुनीनां पश्यतां मुनिषु पश्यत्सु ॥१६॥

रा० टी०–देवेति । सर्वैः सुरगणैः सह पाकशासनः इन्द्रः देवलोकं गतं त्रिशङ्कुं दृष्ट्वा इदं वचनमब्रवीत् ॥ १६ ॥

गो० टी०–देवेति । चत्वारः ॥ १६ ॥

१७] ति० टी०–स्वर्गकृतालयः स्वर्गे निजपुण्यकर्मणा कृत आलयो यस्य तादृशः स्वर्गवासार्हो नासीत्यर्थः ॥ १७ ॥

रा० टी०–तद्वचनमेवाह–त्रिशङ्को इति । हे त्रिशङ्को ! त्वं भूयः पुनर्गच्छ पृथिवीमिति शेषः । सहेतुं गमनप्रकारं बोधयन्नाह–हे मूढ ! यतस्त्वं गुरुशापहतोऽतः स्वर्गे कृतः पुण्येन संपादितः आलयो गृहं येन स त्वं नासि अतो अवाक्शिराः त्वं भूमिं पत ॥ १७ ॥

गो० टी०–स्वर्गकृतालयः स्वर्गालयार्हः ॥ १७ ॥ १८ ॥

१८–१९] ति० टी०–तत्र हेतुः–गुरुशापेत्यादि१८-१९

रा० टी०–एवमिति । महेन्द्रेण एवमुक्तस्त्रिशङ्कुस्तपोधनं विश्वामित्रं त्राहीति विक्रोशमानः सन् पुनरपतत् ॥ १८ ॥

रा० टी०–तदिति । क्रोशमानस्य तस्य त्रिशङ्कोः तदाह्वानमूचकं वचनं श्रुत्वा तीव्रक्रोधमाहारयदकरोत् देवेशोपरीति शेषः । तिष्ठ तिष्ठेति अब्रवीच्च ॥ १९ ॥

गो० टी०–आहारयत् अकरोत् ॥ १९ ॥

२०] ति० टी०–आहारयदकरोत् ॥ २० ॥

रा० टी०–क्रोधमूलकत्रिशङ्कुभोग्यस्वर्गान्तरनिर्माणाय विश्वामित्रकर्तृकसप्तऋष्यादिसर्जनमाह–ऋषीत्यादिना । ऋषिमध्ये स्थितः तेजस्वी अतिशयतेजोविशिष्टः क्रोधमूर्च्छितः अपरः प्रजापतिरिव स विश्वामित्रः दक्षिणमार्गस्थानं अपरान् सप्तर्षीन् सृजन् सन् अपरां नक्षत्रमालां नक्षत्रपङ्क्तिं पुनः असृजत्। सार्धश्लोक एकान्वयी ॥ २० ॥

गो० टी०–ऋषीति । सृजन् अभूदिति शेषः असृजदित्यर्थः ॥ २० ॥

१ दिवं गच्छ नराधिपेति गो. रा. पाठः । २ स्वेति गो. पाठः । ३ देवलोकमिति गो. रा. पाठः । ४ क्रोधमिति गो. रा. पाठः ।

सृजन्दक्षिणमार्गस्थान्सप्तर्षीनपरान्पुनः । नक्षत्रवंशमपरमसृजत्क्रोधमूर्च्छितः ॥ २१ ॥
दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः । सृष्ट्वा नक्षत्रवंशं च क्रोधेन कलुषीकृतः ॥ २२ ॥
अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः । दैवतान्यपि सै क्रोधात्स्रष्टुं समुपचक्रमे ॥ २३ ॥
ततः परमसंभ्रान्ताः सर्षिसंघाः सुरासुराः । विश्वामित्रं महात्मानमूचुः सानुनयं वचः ॥ २४ ॥
अयं राजा महाभाग गुरुशापपरिक्षतः । सशरीरो दिवं यातुं नार्हत्येव तपोधन ॥ २५ ॥
तेषां तद्वचनं श्रुत्वा देवानां मुनिपुंगवः । अब्रवीत्सुमहद्वाक्यं कौशिकः सर्वदेवताः ॥ २६ ॥
सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः । आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे ॥ २७ ॥
स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः । नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥ २८ ॥

२१] ति० टी०–सृजन्निति । यथोत्तरतो ध्रुवोऽचलस्तिष्ठति, एवं त्रिशंकुस्तिष्ठतु । तस्य [1]परितो यथा सप्तर्षिमण्डलं तथास्यापि भवत्वित्याशयः । सृजन्निति हेतौ शतृप्रत्ययः सृष्टिं कुर्वस्तद्धेतोर्दक्षिणमार्गस्थानपरानसृजत् पुनः सप्तविंशतिनक्षत्रमालामसृजत् ॥ २१ ॥

गो० टी०–नक्षत्रेति । मुनिमध्ये स्थित एव दक्षिणां दिशमास्थाय तामधिकरणं कृत्वा नक्षत्रमालां सप्तविंशतिनक्षत्रमालां यथोत्तरतो ध्रुवोऽचलस्तिष्ठति एवं त्रिशङ्कुस्तिष्ठतु तं परितो यथा सप्तर्षिमण्डलं तद्वदत्रापि भवतु तत्र यथा नक्षत्राणि तद्वदत्रापीत्यर्थः ॥ २१ ॥

२२] ति० टी०–नक्षत्रवंशं क्षुद्रनक्षत्रगणम् ॥ २२ ॥

रा० टी०–दक्षिणामिति । महायशाः क्रोधेन कलुषीकृतः क्रोधव्याप्तचित्तः सकः अतिव्यापारसहितः अधः क्रोधान्तर्नियमनरहितः मुनिमध्ये स्थितः विश्वामित्रः दक्षिणां दिशमास्थाय नक्षत्रवंशं नक्षत्रपङ्क्तिं सृष्ट्वा अन्यमिन्द्रमहं करिष्यामि रचयिष्यामि वा सति प्रबलप्रतिबन्धे लोकः मद्रचितः स्वर्गः अनिन्द्रकः इन्द्ररहित एव स्यात् इति संकल्प्य दैवतान्यपि स्रष्टुं समुपचक्रमे । चशब्द एवार्थे द्वयोरेकत्रान्वयः ॥ २१ ॥ २२ ॥

गो० टी०–सृष्ट्वेति । सार्धः । नक्षत्रवंशं क्षुद्रनक्षत्रगणं द्वितीयार्धान्ते इति संकल्प्येत्युपस्कार्यम् । अन्यमिन्द्रं करिष्यामि विद्यमानलोकस्यान्येन्द्रं करिष्यामि अनिन्द्रको लोको वा स्यात् इन्द्ररहितं लोकान्तरं वा करिष्यामीत्यर्थः । अत एवाहुराचार्याः– ' अन्येन्द्रकं भुवनमन्यदनिन्द्रकं वा कर्तुं क्षमे कविरभूदयमन्ववायः ' इति । अस्मिन्नर्थे इन्द्रं नाशयिष्यामीत्यर्थः स्यात् सोऽनुचितः सृष्ट्यन्तरोपक्रमविरोधात् ' दैवतान्यपि स क्रोधात्स्रष्टुं समुपचक्रमे ' इत्यनन्तराविरोधाच्च अत एवायमर्थो भवितुमर्हति । मया सृज्यमानस्य स्वर्गस्यान्यमिन्द्रं करिष्यामि अथवा मया सृज्यः स्वर्गलोकोऽनिन्द्रको वास्तु तत्र त्रिशङ्कुरेवेन्द्रो भवतु तत्परिवारान् सृजेयमिति तादृशदेवान् स्रष्टुमुपचक्रम इत्यर्थः ॥ २२ ॥

२३] ति० टी०–अन्यमिन्द्रम् स्वसृज्यमानस्वर्गस्येति शेषः । अथवा मया सृज्यमानः स्वर्गोऽनिन्द्र एवास्तु त्रिशंकुरेव तत्रेन्द्रो भवत्वित्याशयः । एवमिन्द्रस्थाने त्रिशङ्कुं प्रतिष्ठाप्य तस्य परिवारभूतदैवतानि स्रष्टुमुपचक्रमे ॥ २३ ॥

२४] ति० टी०–तत इति । देवप्रतिस्वर्गवत्स्वस्यापि प्रतिस्वर्गं कुर्यादिति हेतोः सुरा असुराश्च संभ्रान्ताः पर्याकुलचित्ता इत्यर्थः ॥ २४ ॥

रा० टी०–तत इति । ततः सप्तऋष्यादिसर्जनात् परमसंभ्रान्ताः अत्युद्वेगं प्राप्ताः सर्षिसंघा ऋषिसंघसहिताः सुरासुराः देवदानवाः महात्मानं विश्वामित्रं सानुनयमनुनयसहितं वचः ऊचुः ॥ २३ ॥

गो० टी०–तत इति । परमसंभ्रान्ताः स्वप्रतिसृष्टेरतिदुःसहत्वादिति भावः । सानुनयं ससान्त्वम् ॥ २३ ॥

२५–२६] ति० टी०–अनुनयप्रकारमाह–अयं राजेत्यादि । गुरुशापेन परिक्षतश्चण्डालत्वं प्राप्तः । दिवं ब्रह्मसृष्टं त्वत्सृष्टं वा स्वर्गम् ॥ २५ ॥ २६ ॥

रा० टी०–तद्वचनमेवाह–अयमिति ॥ हे महाभाग ! हे तपोधन अयं राजा त्रिशङ्कुः यतः गुरुशापपरिक्षतः गुरुशापकरणकपरिक्षयं प्राप्तः इति अतः सशरीरः दिवं यातुं नार्हति ॥२४॥

गो० टी०–अनुनयमेवाह–अयमित्यादि । नार्हति अदुष्टत्रैवर्णिकलभ्यत्वात्स्वर्गस्येति भावः ॥ २४ ॥

रा० टी०–तेषामिति । तेषामृष्यादिसहितानां देवानां तत् शान्तिकारकं वचनं श्रुत्वा मुनिपुंगवः कौशिकः सर्वदेवताश्च तद्वाक्यमब्रवीत् ॥ २५ ॥

गो० टी०–तेषामिति । चत्वारः ॥ २५ ॥

२७] ति० टी०–भद्रं व इत्यनेनानुनयः ॥ २७ ॥

रा० टी०–तद्वचनमेवाह–सशरीरस्येति । वो युष्मभ्यं भद्रं शान्तिवक्तृत्वाद्भवद्भिरुक्तं तथैवास्त्विति भावः । सशरीरस्य भूपतेरस्य त्रिशङ्कोः प्रतिज्ञातमारोहणं स्वर्गप्राप्तिमनृतं मिथ्या कर्तुं न उत्सहे एतेन मदुक्तमपि तथैवास्त्विति सूचितम् ॥२६॥

गो० टी०–भद्रं व इति प्रतिसान्त्वम् ॥ २६ ॥

२८] ति० टी०–स्वर्गोऽस्तु स्वर्गपदवाच्यसुखविशेषानुभवोऽस्तु ॥ २८ ॥

---

१ मालामपरामिति गो. रा. पाठः । २ मुनिमध्ये इति गो. रा. पाठः । ३ सक्रोध इति गो. रा. पाठः । ४ इतीति गो. रा. पाठः । ५ एष इति रा. पाठः । [1] तं परित इति युक्तमिति भाति ।

यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः । यैस्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २९ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुंगवम् । एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ॥ ३० ॥
गगने तान्यनेकानि वैश्वानरपथाद्बहिः । नक्षत्राणि मुनिश्रेष्ठ तेषु ज्योतिःषु जाज्वलन् ॥ ३१ ॥
अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसंनिभः । अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम् ॥ ३२ ॥
कृतार्थं कीर्तिमन्तं च स्वर्गलोकगतं यथा । विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ॥ ३३ ॥
ऋषिमध्ये महातेजा वाढमित्येवं देवताः । ततो देवा महात्मानो ऋषयश्च तपोधनाः ॥
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ॥ ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०–विरुद्धं धर्मद्वयमेकस्मिन्नेककालावच्छेदेन कथं स्यादित्यत आह–स्वर्ग इति । सशरीरस्य त्रिशङ्कोः एष मत्कल्पितः शाश्वतश्चिरकालस्थायी स्वर्गोऽस्तु । अथ अतः मामकानि मद्रचितानि सर्वाणि नक्षत्राणि ध्रुवाणि बहुकालस्थायीन्येव सन्तु एतेनास्मत्प्रतिज्ञातं भवदुक्तं च सेत्स्यतीति बोधितम् । चशब्द एवार्थे ॥ २७ ॥

गो० टी०–स्वर्गोऽस्तु अयं त्रिशङ्कुस्थितिदेश एवेति शेषः । मत्कृतानि मत्सृष्टानि अत एव मामकानि लोकाः भूरादयः यावद्धरिष्यन्ति स्थास्यन्ति सर्वशः सर्वप्रकारेण ध्रुवाणि भवन्तु प्रार्थनायां लोट् । तत्पूर्वोक्तमनुज्ञातुमङ्गीकर्तुम् ॥ २७ ॥ २८ ॥

२९–३०] ति० टी०–लोका भूरादिसत्यान्ताः ॥२९-३०॥

रा० टी०–तदेवोपसंहरन्नाह–यावदिति । लोकाः ब्रह्मरचितभुवनानि यावत्कालं धरिष्यन्ति प्रजा इति शेषः तावत्कालमेतानि सर्वशः कृत्स्नानि मत्कृतानि तिष्ठन्तु । सर्वे सुराः ! तन्मत्प्रार्थितमनुज्ञातुं यूयमर्हथ ॥ २८ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेणोक्ताः सर्वे ऋष्यादिसहिताः सुराः मुनिपुंगवं विश्वामित्रं प्रत्यूचुः । तद्वचनमेवाह–ते भद्रं भवतु तानि प्रसिद्धानि अनेकानि एतानि भवत्कल्पितानि सर्वशः सकलानि नक्षत्राणि वैश्वानरपथात् ज्योतिःशास्त्रादिप्रतिपादितज्योतिश्चक्राध्वनो बहिरेवमेव गगने तिष्ठन्तु । हे मुनिश्रेष्ठ ! अवाक्शिराः अमरसन्निभः त्रिशङ्कुस्तु जाज्वलन् सन् तेषु भवत्कल्पितेषु ज्योतिष्षु तिष्ठतु । एतानि भवत्कल्पितानि ज्योतींषि कृतार्थं कृतो निष्पादितः अर्थः स्वर्गसुखप्राप्तिर्येन तमत एव कीर्तिमन्तं नृपसत्तमं त्रिशङ्कुं स्वर्गलोकगतं यथा ब्रह्मनिर्मितस्वर्गलोकं प्राप्तमिवानुयास्यन्ति । एकश्चस्त्वर्थे द्वितीय एवार्थे । सार्धश्लोकत्रयमेकान्वयि ॥२९॥३०॥३१॥

गो० टी०–एवमुक्ता इत्यादिसार्धाः पञ्च । सर्वशः सर्वाणि वैश्वानरपथात् वैश्वानरः ज्योतिस्तत्पथात्प्रसिद्धानादिज्योतिश्चक्रमार्गात् तेषु त्वत्सृष्टेषु जाज्वलन् अतिशयेन प्रकाशमानः अवाक्शिराः गुर्वपचारफलप्रकटनायाधोमुखः अमरसन्निभस्तेजसा अमरतुल्यः तिष्ठतु ध्रुव इवेति भावः । अनुयास्यन्ति स्वर्गनक्षत्राणि ध्रुवमिवेति भावः । स्वर्गलोकगतं यथा स्वर्गलोकगतमिव कृतार्थमित्यन्वयः ॥ २९–३२ ॥

३१] ति० टी०–वैश्वानरपथाज्ज्योतिःशास्त्रप्रसिद्धानादिज्योतिश्चक्रमार्गाद्बहिर्बहिर्देश एतानि तानि नक्षत्राणि तिष्ठन्त्विति पूर्वेणान्वयः । तेषु त्वदीयेषु ज्योतिःषु नक्षत्रेषु जाज्वलन्भृशं ज्वलन् ॥ ३१ ॥

३२] ति० टी०–अवाक्शिरा अस्मदुक्तावाक्शिरस्त्ववानेव त्रिशङ्कुर्देवतुल्यसुखवांस्तिष्ठतु । एतानि तव ज्योतींषि तमनुयास्यन्ति च ॥ ३२ ॥

३३] ति० टी०–स्वर्गलोकगतं यथा स्वर्गलोकगतमिवेत्यन्तं पूर्वान्वयि ॥ ३३ ॥

रा० टी०–विश्वामित्र इति । धर्मात्मा सर्वदेवैरभिष्टुतः ऋषिभिः सह स्थितः महातेजाः विश्वामित्रस्तु सर्वदेवताः वाढमित्येवावदिति शेषः । ऋषिभिरिति स्तुत्यन्वयि वा ॥३२॥३३॥

३४] ति० टी०–वाढमित्येव आहेति शेषः । दुराग्रहस्यानर्थहेतुतां प्रतिसंधाय देवतावचनमङ्गीचकार ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०–तत इति । हे नरोत्तम राम ! ततः विश्वामित्रदेवतासंवादानन्तरं सर्वे देवाः महात्मानः तपोधनाः मुनयश्च यथागतं यज्ञस्य विश्वामित्रसमापितयागस्यान्ते जग्मुः ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षष्टितमः सर्गः ॥ ६० ॥

गो० टी०–वाढमित्यङ्गीकारद्योतकं वचनं यज्ञस्यान्त इत्यनेन विश्वामित्रेण यजमानप्रतिनिधिं कृत्वा यज्ञः समापितः देवैर्भागश्च गृहीत इति गम्यते ॥ ३३ ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१ मत्कृतानीति गो. रा. पाठः । २ तथेति गो. पाठः । ३ ऋषिभिश्चेति गो. रा. पाठः । ४ आहेति गो. पाठः । ५ मुनय इति गो. रा. पाठः ।

एकषष्टितमः सर्गः ।

अम्बरीषयजने गूढरूपेनेन्द्रेण पशावपहृते पुरोधास्तं प्रत्यनुकल्पतया नरपश्वानयनेऽचोदयत्। तदर्थंपर्यटन्नम्बरीषो भृगुतुङ्गे गोशतसहस्रनिष्क्रयेण स्वसुतं विक्रेतुमृचीकं प्रार्थयत । ततः पितृभ्यां ज्येष्ठकनिष्ठयोर्विक्रयनिषेध उक्ते मध्यमः शुनःशेफो नाम स्वविक्रयं स्वयमेवानुमेने तेन सहाम्बरीषश्च प्रतिष्ठत ।

विश्वामित्रो महातेजाः प्रस्थितान्वीक्ष्य तानृपीन् । अब्रवीन्नरशार्दूल सर्वांस्तान्वनवासिनः ॥ १ ॥
महाविघ्नः प्रवृत्तोऽयं दक्षिणामास्थितो दिशम् । दिशमन्यां प्रपत्स्यामस्तत्र तप्स्यामहे तपः ॥ २ ॥
पश्चिमायां विशालायां पुष्करेषु महात्मनः । सुखं तपश्चरिष्यामः सुखं तद्धि तपोवनम् ॥ ३ ॥
एवमुक्त्वा महातेजाः पुष्करेषु महामुनिः । तप उग्रं दुराधर्षं तेपे मूलफलाशनः ॥ ४ ॥
एतस्मिन्नेव काले तु अयोध्याधिपतिर्महान् । अम्बरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ ५ ॥
तस्य वै यजमानस्य पशुमिन्द्रो जहार ह । प्रनष्टे तु पशौ विप्रो राजानमिदमब्रवीत् ॥ ६ ॥
पशुरभ्याहृतो राजन्प्रनष्टस्तव दुर्नयात् । अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर ॥ ७ ॥

१] ति० टी०–वनवासिनस्तपोवनवासिनस्तान्स्वाज्ञया यज्ञार्थमागतान्प्रस्थितान्वीक्ष्य सर्वांस्तानब्रवीदित्यन्वयः । वनवासिन इत्यस्य स्थाने 'विनयान्वितान्' इति पाठान्तरम् ॥ १ ॥

रा० टी०–देवादिप्रस्थानोत्तरकालिकं वृत्तमाह–विश्वामित्र इत्यादिना । नरशार्दूल हे राम! अथ प्रस्थानानन्तरं महात्मा विश्वामित्रस्तान् यज्ञार्थं समागतान् तान् चिरञ्जीविनः वनवासिनः सर्वानृपीन् प्रस्थितान् वीक्ष्य अब्रवीत् ॥ १ ॥

गो० टी०–अथ शरणागतशुनःशेपरक्षणोचितशक्तिं वक्तुं तपोऽन्तरमाहैकषष्टितमे–विश्वामित्र इत्यादि। तान् स्वाज्ञया समागतान् वनवासिनः स्वतपोवनवासिनः ॥ १ ॥

२] ति० टी०–दक्षिणां दिशमासमन्ताद्भ्याप्यास्थितोऽयं त्रिशङ्करूपो महाविघ्नोऽस्माकं तपोनाशकत्वात्प्रवृत्तस्तच्छायाक्रान्तत्वाच्चायं देशोऽतःपरं तपोऽयोग्य इति भावः ॥ २ ॥

रा० टी०–तद्वचनमेवाह–महानिति । प्रवृत्तः प्रकृष्टं वृत्तं वृत्तान्तो यस्मिन्सोऽयं त्रिशङ्कुर्याजनमूलकक्रोधावेशः महान्विघ्नः दक्षिणां दिशं आस्थितः प्राप्तः अतः अन्यां दिशं प्रवत्स्यामः तत्र तस्यां दिशि तपस्तप्स्यामहे ॥ २ ॥

गो० टी०–महानिति । योऽहं दक्षिणां दिशमास्थितः तस्य मे महान् विघ्नः प्रवृत्त इत्यर्थः ॥ २ ॥

३–५] ति०टी०–विशालायां विशालतपोवनवत्यां पश्चिमायां वर्तमानेषु पुष्करेषु तत्तीरे तपोवनेष्वित्यर्थः । महात्मन इति महात्मान इत्यर्थकमृषिसंबोधनम् । दीर्घत्वमार्षम् ॥ ३–५ ॥

रा० टी०–कां दिशं गमिष्यसीत्यत आह–पश्चिमायामिति। विशालायां विशालतपोभूमिमत्यां पश्चिमायां दिशि वर्तमानेषु पुष्करेषु तीर्थविशेषे महात्मनः अतिप्रयत्नशीलमुनीनां यद्वरं श्रेष्ठं तपोवनं तत्तस्मिंस्तपोवने एव सुखं यथा स्यात्तथा तपश्चरिष्यामः। पुष्करेष्विति बहुवचनमादरार्थं महात्मन इत्येकवचनं जात्यभिप्रायेण । हिरेवार्थे ॥ ३ ॥

गो० टी०–पश्चिमायामिति । विशालायां विशालतपोवनवत्यां पश्चिमायां दिशि वर्तमानेषु पुष्करेषु पुष्करतीर्थेषु तत्तीरेष्वित्यर्थः । महात्मनः हे महात्मानः ! ॥ ३ ॥

रा० टी०–एवमिति । महातेजाः महामुनिः विश्वामित्रः एवमनेन प्रकारेणोक्त्वा मूलफलाशनः सन्नुग्रमत्युत्कटं दुराधर्षं पराभवितुमशक्यं तपस्तेपे ॥ ४ ॥

गो० टी०–एवमित्यादि ॥ ४ ॥ ५ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्काले विश्वामित्रतपश्चरणसमये एव अम्बरीष इति ख्यातो महान् सर्वराजपूज्यः अयोध्याधिपतिस्तु यष्टुं यागं कर्तुं समुपचक्रमे ॥ ५ ॥

६] ति० टी०–विप्रः पुरोहितः ॥ ६ ॥

रा० टी०–तस्येति । यजमानस्य यागं कुर्वत एव तस्याम्बरीषस्य पशुमिन्द्रो जहार ह प्रसिद्धमेतत् । पशौ यागार्हे प्रनष्टे अदृश्यतां गते सत्येव विप्रस्तत्पुरोहितः राजानमम्बरीषमिदमब्रवीत् । वैतुशब्दो एवार्थौ ॥ ६ ॥

गो० टी०–विप्रः पुरोहित इति यावत् ॥ ६ ॥

७] ति० टी०–अभ्याहृत इदानीमस्माभिरानीतः पशुस्तव दुर्नयात्त्वत्पापवशात्तावकरक्षिणां प्रमादाच्च प्रनष्ट इत्यन्वयः । राजपापमाह–अरक्षितारं प्रजानामिति शेषः ॥ ७ ॥

रा० टी०–तद्वचनमेवाह–पशुरिति । हे राजन् ! तव दुर्नयात् त्वदनवधानात् पशुः अद्य हृतः केनचिदिति शेषः । अत एव प्रनष्टः अदृश्यतां प्राप्तः । ननु पश्यन्तरमानेष्यामीत्यत आह हे नरेश्वर ! अरक्षितारं सावधानतया यागपशुरक्षारहितं राजानं दोषाः रक्षानवधानताजनितपापानि घ्नन्ति 'पशुरभ्याहृतः' इति भट्टसंमतः पाठः । अरक्षितारमित्यत्र अल्पार्थको नञ् ॥ ७ ॥

गो० टी०–पशुरिति । दुर्नयात् अनवधानादित्यर्थः । हृतः केनापीति शेषः । *प्रणष्टः अदृष्टः णश अदर्शन इतिधातोर्निष्ठा । दोषाः पशुनाशादयः ॥ ७ ॥

१ महात्मानेति गो. रा. पाठः । २ वरमिति गो. रा. पाठः । ३ नृप इति गो. पाठः । ४ अथेति गो. रा. पाठः । *प्रनष्ट इति युक्तं भाति ।

प्रायश्चित्तं महद्ध्येतन्नरं वा पुरुषर्षभ । आनयस्व पशुं शीघ्रं यावत्कर्म प्रवर्तते ॥ ८ ॥
उपाध्यायवचः श्रुत्वा स राजा पुरुषर्षभः । अन्वियेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥ ९ ॥
देशाञ्जनपदांस्तांस्तान्नगराणि वनानि च । आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥ १० ॥
स पुत्रसहितं तात सभार्यं रघुनन्दन । भृगुतुङ्गे समासीनमृचीकं संददर्श ह ॥ ११ ॥
तमुवाच महातेजाः प्रणम्याभिप्रसाद्य च । महर्षिं तपसा दीप्तं राजर्षिरमितप्रभः ॥ १२ ॥
पृष्ट्वा सर्वत्र कुशलमृचीकं तमिदं वचः । गवां शतसहस्रेण विक्रीणीषे सुतं यदि ॥ १३ ॥
पशोरर्थे महाभाग कृतकृत्योऽस्मि भार्गव । सर्वे परिगता देशा यज्ञियं न लभे पशुम् ॥ १४ ॥
दातुमर्हसि मूल्येन सुतमेकमितो मम । एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद्वचः ॥ १५ ॥

८] ति० टी०–एतत्पशुनाशरूपं महत्प्रायश्चित्तं महतः प्रायश्चित्तस्य कारणम् । प्रक्रान्तं कर्म यावत्प्रवर्तते प्रवर्तिष्यते तावत्ततः प्रागेव नष्टं पशुमन्विष्यानय तत्प्रतिनिधित्वेन क्रीत्वा नरं वा पशुमानयेत्यर्थः ॥ ८ ॥

रा० टी०–ननु तदुरितशान्तिः कथं स्यादित्यत आह–प्राय इति । हे पुरुषर्षभ ! यावत्कर्म प्रवर्तते तावदेव नरं पुरुषं पशुं शीघ्रं त्वरितं आनयस्व एतदेवास्यावविशिष्टपुरुषस्य प्रायश्चित्तमनवधानताजनितपापशोधनम् 'प्रायः पापमितिप्रोक्तं चित्तं तच्छोधनं स्मृतम्' इत्यनुशासनम् । एतेनोपायान्तरं नास्तीति सूचितम् । हिंवेशब्दौ एवार्थौ ॥ ८ ॥

गो० टी०–प्रायश्चित्तमिति । प्रायश्चित्तम् एतत् पशुनाशनिमित्तकं नरं वा आनयस्व गोभिः क्रीत्वा पशुप्रतिनिधित्वेनेति शेषः। यावत्प्रवर्तते प्रवर्तिष्यते " यावत्पुरानिपातयोः–" इति लट् तावत् ततःपूर्वमेव अश्वमेधे पशुविसर्जनानन्तरं कर्मकालस्य व्यवहितत्वादिति भावः । वाकारेण पशुं वान्विष्यानयस्वेति लभ्यते ॥ ८ ॥

९–१०] ति० टी०–सहस्रशो गोभिः निष्क्रयभूताभिरित्यर्थः ॥ ९ ॥ १० ॥

रा० टी०–उपेति । पुरुषर्षभ हे राम ! महाबुद्धिः स राजा अम्बरीषः उपाध्यायवचः श्रुत्वा सहस्रशः गोभिः कर्तव्ययागपशुप्रतिनिधिभूतं क्रेतव्यपुरुषमूल्यरूपं सहस्रशः संख्याकगवीभिः सह सहितः सन् पशुं पशुत्वेन प्रकल्पनीयं पुरुषमन्विषेष ॥ ९ ॥

गो० टी०–उपाध्यायेति । सहस्रशः सहस्रसंख्याभिः मूल्यभूताभिरिति शेषः ॥ ९ ॥

रा० टी०–देशानिति । हे तात हे रघुनन्दन ! देशादीन् मार्गमाणः स महीपतिरम्बरीषः पुत्रसहितं सभार्यं भार्यासहितं भृगुतुङ्गे भृगुसंबन्धिस्थलविशेषे समासीनमृचीकं मुनिं संददर्श ह प्रसिद्धमेतत् । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०–देशानित्यादि। देशानिति जनपदादिसर्वविशेषणं स इति छेदः भृगुतुन्दे भृगोर्गिरितटस्य तुन्दे अभ्यन्तरे भृग्वाख्यऋषिवासस्थानप्रदेशे वा ॥ १० ॥ ११ ॥

११–१२] ति० टी०–स पुत्रेति । स इति पृथक्पदम्। सोऽम्बरीषः । भृगुतुङ्गे पर्वतशृङ्गविशेषः ॥ ११ ॥ १२ ॥

रा० टी०–तमिति । महातेजाः महत्तेजो यस्मात्सः स्वानुगृहीतपुरुषतेजःसंपादक इत्यर्थः । अत एवामितप्रभः अमिता परिमातुमशक्या प्रभा यस्य स राजर्षिरम्बरीषः तपसा दीप्तं ब्रह्मर्षिं तं प्रसिद्धमृचीकं प्रणम्य अभिप्रसाद्य च सर्वत्र तपआदिषु कुशलं पृष्ट्वा चेदं वचः उवाच । सार्धश्लोक एकान्वयी । चकार उभयान्वयी ॥ १२ ॥ १३ ॥

गो० टी०–तमिति । सार्धं एकान्वयः । तं मुनिं इदं वक्ष्यमाणं वच उवाच । ब्रुवतिर्द्विकर्मकः ॥ १२ ॥

१३–१४] ति० टी०–तं प्रसिद्धतपसमृचीकमिदं वक्ष्यमाणं वचः अब्रवीदिति शेषः । यदि विक्रीणीषे तदा कृतकृत्योऽस्मि भवेयम्, यतो यज्ञियं यज्ञे पूर्वं परिकल्पितं पशुं क्वापि न लभे ॥ १३ ॥ १४ ॥

रा० टी०–तद्वचनमेवाह–गवामिति । हे महाभाग हे भार्गव ! पशोरर्थे यागपशुकरणाय गवां शतसहस्रेण शतसहस्रसंख्याकगवीभिः सुतं स्वपुत्रं यदि विक्रीणीषे त्वमिति शेषः । तर्हि अहं कृतकृत्यः अस्मि भविष्यामि ॥ १४ ॥

गो० टी०–गवामिति । पशोः अर्थे प्रयोजनाय पशुप्रतिनिध्यर्थमित्यर्थः । यदि विक्रीणीषे विक्रीणीथाः तदा कृतकृत्योऽस्मि कृतार्थः स्याम् ॥ १३ ॥

रा० टी०–नन्वपहृतः पशुरेव कुतो नान्विष्यते इत्यत आह–सर्वे इति । सर्वे देशाः मया परिप्लुताः यज्ञपश्वन्वेषणाय परिगताः तेषु देशेषु यज्ञियं पशुं न लभे इतो हेतोः मूल्येन एकं सुतं मम मह्यं दातुमर्हसि ॥ १५ ॥

गो० टी०–सर्वे इति । परिसृताः संचरिताः याज्ञीयं यज्ञाय हितं "तस्मै हितम्" इति छः ठद्धिरार्षी । इतः एतेषु सुतेषु सार्वविभक्तिकस्तसिः ॥ १४ ॥

१५] ति० टी०–इत एतेषु । सार्वविभक्तिकस्तसिः॥१५॥

रा० टी०–एवमिति । एवमनेन प्रकारेणोक्तः अम्बरीषेण प्रार्थितः महातेजा ऋचीकः वचः अब्रवीत् । तद्वचनमेवाह–

१ अघस्यैतदिति रा. पाठः । २ पुरुषर्षभेति गो. रा. पाठः । ३ भृगुतुन्दे इति गो. पाठः । ४ ब्रह्मर्षिमिति गो. रा. पाठः । ५ परिसृता इति गो. परिप्लुता इति रा. पाठः । ६ याज्ञीयमिति गो. पाठः ।

नाहं ज्येष्ठं नरश्रेष्ठ विक्रीणीयां कथंचन । ऋचीकस्य वचः श्रुत्वा तेषां माता महात्मनाम्॥ १६ ॥
उवाच नरशार्दूलमम्बरीषमिदं वचः । अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ॥ १७ ॥
ममापि दयितं विद्धि कनिष्ठं शुनकं प्रभो । तस्मात्कनीयसं पुत्रं न दास्ये तव पार्थिव ॥ १८ ॥
प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः । मातॄणां च कनीयांसस्तस्माद्रक्ष्ये कनीयसम् ॥ १९ ॥
उक्तवाक्ये मुनौ तस्मिन्मुनिपत्न्यां तथैव च । शुनःशेपः स्वयं राम मध्यमो वाक्यमब्रवीत् ॥ २० ॥
पिता ज्येष्ठमविक्रेयं माता चाह कनीयसम् । विक्रेयं मध्यमं मन्ये राजपुत्र नयस्व माम् ॥ २१ ॥
अथ राजा महाबाहो वाक्यान्ते ब्रह्मवादिनः । हिरण्यस्य सुवर्णस्य कोटिभी रत्नराशिभिः ॥ २२ ॥
गवां शतसहस्रेण शुनःशेपं नरेश्वरः । गृहीत्वा परमप्रीतो जगाम रघुनन्दन ॥ २३ ॥
अम्बरीषस्तु राजर्षी रथमारोप्य सत्वरः । शुनःशेपं महातेजा जगामाशु महायशाः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

हे नरश्रेष्ठ ! ज्येष्ठं सुतमहं कथंचन न विक्रीणीयामेतेन ज्येष्ठे तस्य परमानुरागः सूचितः । तुशब्द एवार्थे ॥ १६ ॥

गो० टी०–एवमिति । कथंचन बहुमूल्येनापि इतरयोरप्रतिषेधादनुमतिर्गम्यते 'अप्रतिषिद्धमनुमतं भवति' इति न्यायात् ॥ १६ ॥

१६–१७] ति० टी०–कथंचन बहुनापि मूल्येन । अनेनेतरयोरनुमतिः सूचिता अप्रतिषिद्धमनुमतमिति न्यायात् ॥ १६–१७ ॥

रा० टी०–ऋचीकस्येति । तेषां महात्मनामृचीकपुत्राणां माता ऋचीकस्य वचः श्रुत्वा नरशार्दूलं नरश्रेष्ठमम्बरीषमिदं वचः उवाच ॥ १७ ॥

गो० टी०–ऋचीकस्येत्यादि ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–अविक्रेयमिति । भगवान् अतिसामर्थ्यविशिष्टः भार्गवः ज्येष्ठं सुतमविक्रेयमाह शुनकं शुनकनामानं कनिष्ठं सुतं ममापि दयितं प्रियं त्वं विद्धि जानीहि तस्मात्कारणात् हे प्रभो हे पार्थिव ! कनीयसं पुत्रमहं तव तुभ्यं न दास्ये । सार्धश्लोक एकान्वयी ॥ १८ ॥

१८] ति० टी०–शुनक इति कनिष्ठपुत्रनाम ॥ १८ ॥

गो० टी०–शास्त्रेणापत्यदानविक्रययोर्निषेधेऽपि मूलावसादे धर्मायापत्यदानवद्यज्ञायापत्यविक्रयो न दोषायेति भावः । कनीयसमित्यकारान्तत्वमार्षम् ॥ १७–२२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

१९] ति० टी०–पितृषु पितॄणाम् । रक्षिष्यामीत्यर्थे रक्ष्ये इत्यार्षम् ॥ १९ ॥

रा० टी०–कापत्यभ्रमवारणाय तादृशानुरागे सदाचारं प्रमाणयन्ती आह–प्रायेणेति । हे नरश्रेष्ठ ! ज्येष्ठाः प्रायेण पितृषु वल्लभाः पितृनिष्ठानुरागविषयीभूताः भवन्तीति शेषः । मातॄणां च कनीयांसः वल्लभास्तस्मात् कनीयसं कनीयांसमेव अहं रक्षे न दास्ये इत्यर्थः ॥ १९ ॥

२०] ति० टी०–रामेति संबुद्धिः ॥ २० ॥

रा० टी०–उक्तेति । हे राम ! तस्मिन्मुनौ ऋचीके उक्तवाक्ये सति तथा तेन प्रकारेण मुनिपत्न्यां च उक्तवाक्यायां सत्यां मध्यमः शुनःशेफः स्वयमेव वाक्यमब्रवीत् ॥ २० ॥

२१] ति० टी०–मध्यमं मध्यमपुत्रं विक्रेयं मातापित्रोर्विक्रेयत्वेन संमतं मन्ये अर्थादिति शेषः ॥ २१ ॥

रा० टी०–तद्वचनमेवाह–पितेति । ज्येष्ठं सुतमविक्रेयं पिता आह कनीयसमविक्रेयं माता चाह अतः मध्यममात्मानं विक्रीतमहं मन्ये । अतः हे राजपुत्र ! मां नयस्व ॥ २१ ॥

२२] ति० टी०–ब्रह्मवादिनो मध्यमपुत्रस्य ॥ २२ ॥

२३] ति० टी०–गृहीत्वा क्रीत्वा । यद्यप्यपत्यस्य दानक्रयौ शास्त्रनिषिद्धौ तथाप्यनेन कुलहानौ धर्मार्थमपत्यदानमिव यज्ञायापत्यक्रयो न विगीत इति सूचितम् । पुत्रस्य चैवं पित्रधीनतोचितेति च बोधितम् ॥ २३ ॥

रा० टी०–गवामिति । हे रघुनन्दन ! परमप्रीतो नरेश्वरोऽम्बरीषः शुनःशेफं गवां शतसहस्रेण गृहीत्वा जगाम ॥ २२ ॥

२४] ति० टी०–शुनःशेपं रथमारोप्येत्यन्वयः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

रा० टी०–गमनप्रकारं वर्णयन्नाह–अम्बरीष इति । राजर्षिः महातेजाः सत्वरोऽम्बरीषः शुनःशेफमाशु रथमारोप्य जगाम स्वालयमिति शेषः । परमप्रमाणभूतमुनिकर्तृकानापत्कालिकपुत्रविक्रयणेन यज्ञार्थं पुत्रविक्रयणे पुण्याधिक्यं भवतीति ध्वनितम् ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

१ तपस्विनीति गो. पाठः । २ अर्धमिदं नास्ति रा. पाठे । ३ रक्षे इति रा. गो. पाठः । ४ शुनःशेफ इति रा. पाठः । ५ विक्रीतमिति गो. रा. पाठः । ६ नास्त्वयं श्लोको गो. रा. पाठयोः । ७ शुनःशेफमिति रा. पाठः ।

द्विषष्टितमः सर्गः ।

अम्बरीषोः पुष्करक्षेत्रमेत्य विश्राम्यति विश्वामित्रं प्राप्य राज्ञोऽविरोधेन स्वरक्षामनुयाचन्तं शुनःशेपं विश्वामित्रो गाथाद्वयमुपादिश्य ताभ्यामिन्द्राविष्णू स्तोतुमुपदिदेश ततः प्राप्ताश्वासेन शुनःशेपेन कृतत्वगोऽम्बरीषो दीक्षां विवेश पशुकृतः शुनःशेपो गाथे संगाय पाशव्यान्मोचनं लेभे तुष्टश्चेन्द्रोऽम्बरीषं यज्ञफलेन समयोजयत् ।

शुनःशेपं नरश्रेष्ठ गृहीत्वा तु महायशाः । व्यश्रमत्पुष्करे राजा मध्याह्ने रघुनन्दन ॥ १ ॥
तस्य विश्रममाणस्य शुनःशेपो महायशाः । पुष्करं ज्येष्ठमागम्य विश्वामित्रं ददर्श ह ॥ ॥ २ ॥
तप्यन्तमृषिभिः सार्धं मातुलं परमातुरः । विषण्णवदनो दीनस्तृष्णया च श्रमेण च ॥ ३ ॥
पपाताङ्के मुने राम वाक्यं चेदमुवाच ह । न मेऽस्ति माता न पिता ज्ञातयो वान्धवाः कुतः ॥ ४ ॥
त्रातुमर्हसि मां सौम्य धर्मेण मुनिपुंगव । त्राता त्वं हि नरश्रेष्ठ सर्वेषां त्वं हि भावनः ॥ ५ ॥
राजा च कृतकार्यः स्यादहं दीर्घायुरव्ययः । स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमम् ॥ ६ ॥

१] ति० टी०–व्यश्रमत् । 'व्यश्राम्यत्' इति पाठान्तरम् ॥ १ ॥

रा० टी०–शुनःशेफानयनानन्तरकालिकं वृत्तमाह–**शुनःशेफमिति** । हे नरश्रेष्ठ हे रघुनन्दन ! महायशाः राजा अम्बरीषः शुनःशेफं गृहीत्वा ग्रहणपूर्वकमागमनं कृत्वैव मध्याह्ने काले पुष्करे तीर्थे व्यश्राम्यत् । तुशब्द एवार्थे 'व्यश्रमत्' इति भट्टसंमतः पाठः ॥ १ ॥

गो० टी०–अथ शुनःशेपस्य शरणागतिरुच्यते द्विषष्टितमे–**शुनःशेपमित्यादि** ॥ १ ॥

२] ति० टी०–विश्रममाणस्येति †विश्रामत इत्यर्थे आर्षम् ॥ २ ॥

रा० टी०–**तस्येति** । विश्रममाणस्य तस्य विश्राम्यमाणं तमम्बरीषमनादृत्य महायशाः शुनःशेफः श्रेष्ठं तीर्थवरं पुष्करमागम्य प्राप्य ऋषिभिः सार्धमेव तप्यन्तं मातुलं विश्वामित्रं ददर्श दर्शनानन्तरं परमातुरः अत्यन्तातुरताविशिष्टः विषण्णवदनः उदासीनमुखः तृष्णया श्रमेण च दीनः शुनःशेफः मुनेर्विश्वामित्रस्याङ्के पपात हे राम ! इदं वाक्यं च उवाच ह प्रसिद्धमेतत् । सार्धश्लोकद्वयमेकान्वयि । पूर्वो हकारोनन्तरार्थकः । एकश्चकार एवार्थकः । " षष्ठी चानादरे " इत्यनुशासनविहिता षष्ठी ॥ २ ॥ ३ ॥

गो० टी०–तस्य विश्रममाणस्य तस्मिन्विश्राम्यति सति । आगम्येत्यत्र "वा ल्यपि" इत्यनुनासिकलोपाभावः पक्षे । मातुलं ऋचीकाय कौशिकी प्रतिपादितेत्युक्तत्वात् ॥ २ ॥

३] ति० टी०–तृष्णया पिपासया जिजीविषया च श्रमेण चेति विषण्णवदनत्वे दीनत्वे परमातुरत्वे च हेतुः ॥३॥

गो० टी०–**विवर्णेति** । तृष्णया पिपासया प्राणपरित्राणलोभेन वा श्रमेण अध्वश्रमेण मातुलत्वादङ्कपतनम् ॥ ३ ॥

४] ति० टी०–अङ्के उत्सङ्गे मातुलत्वात्तत्र पातः । बान्धवाः कुतः दूरादेव सर्वथा न सन्त्येवेत्यर्थः ॥ ४ ॥

रा० टी०–तद्वाक्यमेवाह–**नेति** । मे माता नास्ति पिता च नास्ति तर्हि ज्ञातयो बान्धवाश्च कुतः स्युः मन्निरूपितमुख्यमातृत्वाद्यभावेन तन्मूलकज्ञात्यादीनामसंभव एवेति भावः ॥ ४ ॥

गो० टी०–नेति । नास्ति अरक्षकत्वादसत्प्राया इत्यर्थः । धर्मेण धर्मरूपप्रयोजनोद्देशेन ॥ ४ ॥

५] ति० टी०–धर्मेण स्वार्जितेन । सर्वेषां शरणागतानां भावनः सर्वेष्टसाधनम् । एको हिस्त्वर्थे ॥ ५ ॥

रा० टी०–त्रातुमिति । हे सौम्य ! हे मुनिपुंगव ! हे नरश्रेष्ठ ! हि यतः सर्वेषामापन्नानां त्राता त्वमसि अत एव सर्वेषां भावनः आपत्काले सर्वस्मृतिविषयीभूतस्त्वमसि । एतेन सर्वं स्वविक्रयादिदत्तं कथितवान् इति व्यक्तम् ॥ ५ ॥

गो० टी०–त्रातेत्यर्धम् । भावनः हितप्रापकः ॥ ५ ॥

६] ति० टी०–यथा च राजा कृतकार्यः स्यात्, अहं चाव्ययो धर्मलोपाभाववान्दीर्घायुस्तपस्तप्त्वा स्वर्गं प्राप्नुयाम् तथा कुर्विति शेषः ॥ ६ ॥

रा० टी०–राजकार्यसिद्धिमन्तरा स्वरक्षामहं न वाञ्छामीति बोधयितुं स्वेप्सितं §प्रार्थयन्नाह–**राजेति** । राजा अम्बरीषः कृतकार्यः संपादितयागसिद्धिकः यथा स्यात् अहं तु दीर्घायुः अव्ययः विकाररहितः सन् तपस्तप्त्वा अनुत्तमं सर्वोत्कृष्टं स्वर्गलोकमुपाश्नीयां पालयेयं स्वर्गपतिर्भवेयमित्यर्थः । तथा साधयेति शेषः । भुज पालनाभ्यवहारयोरित्यनुशासनेन अश भोजने इत्येतद्घटकीभूतभोजनशब्देन पालनस्यापि ग्रहणात् अश्नीयामित्यस्य पालयेयमित्यर्थलाभः । चस्त्वर्थे हिर्यथार्थे ॥ ६ ॥

गो० टी०–**राजेति** । यथा च राजा कृतकार्यः स्यात् अहं च अव्ययः अविनाशः दीर्घायुः अनुत्तमं तपस्तप्त्वा स्वर्गलोकमुपाश्नीयां तथा कुरुष्वेति शेषः ॥ ६ ॥

१ शुनःशेफमिति रा. पाठः । २ व्यश्राम्यदिति गो. रा. पाठः । ३ तीर्थे इति रा. पाठः । ४ क्षेत्रमिति गो. रा. पाठः । ५ विवर्णेति गो. पाठः ।
† विश्राम्यत इति भाति । § प्रार्थयमान इति युक्तं भाति ।

सं मे नाथो ह्यनाथस्य भव भव्येन चेतसा । पितेव पुत्रं धर्मात्मंस्त्रातुमर्हसि किल्बिषात् ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः । सान्त्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥
यत्कृते पितरः पुत्राञ्जनयन्ति शुभार्थिनः । परलोकहितार्थाय तस्य कालोऽयमागतः ॥ ९ ॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति । अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥
सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः । पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत ॥ ११ ॥
नाथवांश्चै शुनःशेपो यज्ञश्चाविघ्नतो भवेत् । देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः ॥ १२ ॥
मुनेस्तद्वचनं श्रुत्वा मधुच्छन्दादयः सुताः । साभिमानं नरश्रेष्ठ सलीलमिदमब्रवन् ॥ १३ ॥
कथमात्मसुतान्हित्वा त्रायसेऽन्यसुतं विभो । अकार्यमिव पश्यामः श्वमांसमिव भोजने ॥ १४ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां मुनिपुंगवः । क्रोधसंरक्तनयनो व्याहर्तुमुपचक्रमे ॥ १५ ॥

७-८] ति० टी०-किल्बिषाज्जीवविपत्तिरूपात् । भव्येन प्रसन्नेन । पुत्रं ज्येष्ठम् ॥ ७ ॥ ८ ॥

रा० टी०-स इति । अनाथस्य नाथरहितस्य मे मम नाथः भव्येन मङ्गलप्रदेनैव तेजसा स्वप्रभावेण त्वं भव । तदेव मङ्गयन्तरेण बोधयन्नाह-हे धर्मात्मन् किल्बिषात् पापविशेषजनितविपत्तेः पितापुत्रमिव त्रातुं मां त्वमर्हसि । हिशब्द एवार्थे॥७॥

गो० टी०-त्वमिति । भव्येन शुभेन किल्बिषात् तन्मूलकविपत्तेरित्यर्थः ॥ ७ ॥

रा० टी०-तस्येति । महातपाः विश्वामित्रः तस्य शुनःशेफस्य तद्वचनं प्रार्थनावाक्यं श्रुत्वैव बहुविधमनेकप्रकारं शान्तयित्वा शुनःशेफमिति शेषः । पुत्रान् स्वसुतान् इदमुवाच । हशब्द एवार्थे ॥ ८ ॥

गो० टी०-तस्येति । स्पष्टम् ॥ ८ ॥

९] ति० टी०-यत्कृते यत्प्रयोजनाय । तदेव प्रयोजनमाह—परलोकहिताथाय परलोकहितरूपप्रयोजनाय तस्य प्रयोजनस्य ॥ ९ ॥

रा० टी०-तद्वचनमेवाह-यदिति । हे परलोकहितार्थाः परलोकहितं परलोकप्राप्तिः अर्थः प्रयोजनं येषां ते हे परलोकप्रापकपुत्राः ! शुभार्थिनः पितरः यत्कृते यत्प्रयत्नार्थं पुत्रान् जनयन्ति तस्य प्रयत्नस्यायं कालः आगतः प्राप्तः ॥ ९ ॥

गो० टी०-यदिति । यस्य प्रयोजनस्य कृते यत्प्रयोजनाय तादर्थ्येऽव्ययम् । पुत्रान् जनयन्ति मम युष्माकं च परलोकहितार्थाय धर्माय तस्य वाक्यकरणस्य अयं काल आगतः 'जीवतोर्वाक्यकारणात्' इतिस्मृतेः ॥ ९ ॥

१०] ति० टी०-परलोकहितं प्रयोजनमाह-अयमिति । शरणं रक्षणम् । जीवितमात्रेण जीवितप्रदानमात्रेण । प्रियमित्यस्य मम स्वस्य 'जीवतो वाक्यकरणात्' इति स्मृतेः । शुनकवत्परलोकसाधनत्वेन प्रियमित्यर्थः ॥ १० ॥

रा० टी०-तत्प्रयतनीयमाज्ञापयन्नाह-अयमिति । हे पुत्रकाः ! मुनिसुतः ऋचीकपुत्रः बालः अल्पवयस्कोऽयं शुनःशेफः मत्तः शरणं आत्मरक्षामिच्छति अतः जीवितमात्रेण जीवनप्रदानमात्रेणास्य बालस्य प्रियं कुरुत यूयमिति शेषः॥१०॥

गो० टी०-अयमिति । शरणं रक्षणं जीवितमात्रेण जीवनप्रदानमात्रेण ॥ १० ॥

११] ति० टी०-तत्र प्रवृत्त्यर्थं स्तौति-सर्वे इति । पशुभूता अस्य राज्ञा पशुत्वेन ग्रहणादेतत्प्रतिनिधित्वेन पशुभूता नरेन्द्रस्य यज्ञेऽग्नेस्तृप्तिं प्रयच्छतेत्यर्थः ॥ ११ ॥

रा० टी०-रक्षणप्रकारं वर्णयन्नाह-सर्वे इत्यादिश्लोकद्वयेन । सुकृतकर्माणः सुकृतानि सुसाधितानि कर्माणि यैस्ते अत एव सर्वे धर्मपरायणाः सर्वेषां कर्मणाम् ईः पर्यवसानं यस्मिन् स एव धर्मः परमपुरुषाराधनरूपः तत्र परायणाः निरताः सर्वे यूयं नरेन्द्रस्याम्बरीषस्य पशुभूताः यागपशुत्वं प्राप्ताः सन्तः अग्नेस्तृप्तिं प्रयच्छत प्रापयतेत्यर्थः ॥ ११ ॥

गो० टी०-स्वनियोगकरणार्थमुपश्लोकयति-सर्वे इति । प्रयच्छतेति बहुवचनेन युष्मासु यः कश्चन भवत्विति सूच्यते॥११॥

१२] ति० टी०-नाथवान्मया रक्षकवान् । मम युष्मत्पितुर्जीवितो वाक्यकरणाद्वचः कृतं भवति ॥ १२ ॥

रा० टी०-नाथवानिति । अनाथः स शुनःशेफो नाथवान्भवेत् अविघ्नतः विघ्नराहित्यात् यज्ञश्च भवेत् देवतास्तर्पितास्तृप्तिं प्रापिताश्च स्युः मम वचो वचनं च कृतं सिद्धं भवेत् । स्यात् । अपिर्हेतौ ॥ १२ ॥

गो० टी०-नाथवानिति । मया रक्षितो नाथवान् भवतु कृतं स्यादिति शेषः ॥ १२ ॥

१३] ति० टी०-साभिमानं साहंकारम् । सलीलं सपरिहासम् ॥ १३

रा० टी०-विश्वामित्राज्ञापनोत्तरकालिकं वृत्तमाह-मुनेरिति । हे नरश्रेष्ठ! मुनेर्विश्वामित्रस्य वचनं श्रुत्वैव मधुस्यन्दादयः सुताः विश्वामित्रपुत्राः साभिमानमभिमानसहितं सलीलं लीलासहितमिदं वचनमब्रुवन् । तुशब्द एवार्थे ॥ १३ ॥

गो० टी०-मुनेरिति । साभिमानं सगर्वं सलीलं सपरिहासम् ॥ १३ ॥

१४-१५] ति० टी०-लोकतः शास्त्रतश्चानुष्ठातृत्वे दृष्टान्तमाह-श्वमांसमिवेति ॥ १४ ॥ १५ ॥

१ त्वमिति गो.पाठः । २ तेजसेति रा.पाठः । ३ शान्तयित्वेति रा.पाठः । ४ स इति रा.पाठः । ५ तु वचनमिति गो.रा.पाठः । ६ ष्यन्देति गो. स्येन्दति रा.पाठः ।

निःसाध्वसमिदं प्रोक्तं धर्मादपि विगर्हितम् । अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणम् ॥ १६ ॥
श्वमांसभोजिनः सर्वे वासिष्ठा इव जातिषु । पूर्णं वर्षसहस्रं तु पृथिव्यामनुवत्स्यथ ॥ १७ ॥
कृत्वा शापसमायुक्तान्पुत्रान्मुनिवरस्तदा । शुनःशेपमुवाचार्तं कृत्वा रक्षां निरामयाम् ॥ १८ ॥
पवित्रपाशैराबद्धो रक्तमाल्यानुलेपनः । वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥ १९ ॥
इमे चै३ गाथे द्वे दिव्ये गायेथा मुनिपुत्रक । अम्बरीषस्य यज्ञेऽस्मिंस्ततः सिद्धिमवाप्स्यसि ॥ २० ॥
शुनःशेपो गृहीत्वा ते द्वे गाथे सुसमाहितः । त्वरया राजसिंहं तमम्बरीषमुवाच ह ॥ २१ ॥

रा० टी०–तद्वचनमेवाह–कथमिति । विभो हे सकलसामर्थ्यविशिष्ट ! आत्मसुतान् हित्वा मरणत्वप्रापणेन त्यक्त्वा मृत्युं प्रापय्येति वा अन्यसुतं कथं त्रायसे अत्र हेतुं वदेत्यर्थः । ननु स्वयमेव विचार्य हेतुरुच्यतामित्यत आहुः–भोजने प्राप्तपायसादिभोज्ये पतितं श्वमांसमिव अकार्यं कार्यध्वंसमेव पश्यामः । यथा अग्निहोत्रिणां भोज्ये पायसादौ पतितम् श्वमांसं भोजनरूपकार्यमात्रध्वंसकं तथा रक्षणीयस्वसुतरक्षासमये प्राप्तेपान्यसुतरक्षा अवश्यकार्यस्वसुतरक्षामात्रविघातिकेत्यर्थः । एक इवशब्द एवार्थे । किंच भोजने यज्ञपायसादौ प्राप्ते सति श्वमांसं श्वमांसभोजनं यथा अकार्यं वैदिकैर्न कर्तव्यं तथा प्राप्तस्वसुतरक्षणे तद्विरोध्यन्यसुतरक्षणमकार्यं न कर्तव्यमिति वयं पश्यामः निश्चिनुमः । एतेनाविवेकत एवास्य रक्षायां भवत्प्रवृत्तिरिति स्वनिश्चयः सूचितः । एक इवशब्द इत्यर्थकः ॥ १४ ॥

गो० टी०–कथमिति । भोजने भोज्ये प्राप्ते तत्परित्यागेन श्वमांसभक्षणमिवाकार्यमित्यर्थः । द्वितीय इवशब्दो वाक्यालंकारे ॥ १४ ॥

रा० टी०–तेषामिति । तेषां पुत्राणां तद्वचनं साभिमानसविलासवाक्यं श्रुत्वा क्रोधसंरक्तनयनः मुनिपुंगवो विश्वामित्रः व्याहर्तुं वक्तुमुपचक्रमे ॥ १५ ॥

गो० टी०–तेषामित्यादि ॥ १५ ॥

१६] ति० टी०–साध्वसं भयम् । पितृत्वप्रयुक्तभीतिरहितम् । जीवतो वाक्याकरणाद्धर्मादपि विगर्हितं भ्रष्टम्, एवं मद्वाक्यमतिक्रम्य यतो दारुणं परुषं रोमहर्षणं रोमाञ्चरूपविकारजनकमुक्तं तस्मादिति शेषः ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–निरिति द्वाभ्याम् ! निःसाध्वसं पितृभीतिरहितं यतो मद्वाक्यमतिक्रम्य प्रोक्तमुच्चारितमत एव धर्मादपि विगर्हितं प्रच्युतमत एव दारुणमतिपरुषं श्रोतुमनर्हमित्यर्थः । अत एव रोमहर्षणमिदं युष्मद्वचनमस्तीति शेषः । तुर्हेतौ ॥ १६ ॥

गो० टी०–निःसाध्वसं पितृप्रतिवचनभयरहितं धर्मात् जीवतोर्वाक्यकरणरूपधर्मात् विगर्हितं भ्रष्टं इदमुभयं क्रियाविशेषणं दारुणं पितृभक्तिरहिततया परुषमत एव रोमहर्षणं रोमाञ्चविकारकरम् ॥ १६ ॥

१७] ति० टी०–जातिषु मुष्टिकजातिषु ॥ १७ ॥

रा० टी०–पूर्णमिति । तस्मात् श्वमांसभोजिनः सन्तो जातिषु श्वपचजातिविशेषेषु पूर्णं वर्षसहस्रं वर्षसहस्रसमाप्तिपर्यन्तं वासिष्ठा इव सर्वे यूयं पृथिव्यामनुवत्स्यथ । तुस्तस्मादित्यर्थे ॥ १७ ॥

गो० टी०–श्वमांसेत्यादि । अत्रादौ तस्मादित्युपस्कार्यं जातिषु मुष्टिकजातिषु ॥ १७ ॥

१८] ति० टी०–निरामयां सर्वदुःखनाशिकां रक्षां कृत्वा शुनःशेपमुवाच ॥ १८ ॥

रा० टी०–कृत्वेति । तदा पुत्रप्रत्युत्तरदानोत्तरकाले मुनिवरो विश्वामित्रः पुत्रान् शापसमायुक्तान् कृत्वा निरामयां विघ्नरहितां रक्षां शुनश्शेफकर्मकरक्षणं च कृत्वा आर्तं शुनश्शेफमुवाच ॥ १८ ॥

गो० टी०–कृत्वेति । निरामयं निर्भयं यथा भवति तथा रक्षां मन्त्रितभस्मधूल्यादिप्रक्षेपरूपाम् ॥ १८ ॥

१९] ति० टी०–वाक्यमाह–पवित्रेति । पवित्रपाशा दर्भरशनाः । वैष्णवं विष्णुदैवत्यम् "वैष्णवो वै देवतया यूपः" इति श्रुतेः । वाग्भिराग्नेयमन्त्रैरग्निमुदाहर स्तुहि ॥ १९ ॥

रा० टी०–तद्वचनमेवाह–पवित्रेति । हे मुनिपुत्रक ! पवित्रपाशैः विधिनिर्मितदर्भादिरज्जुभिः आबद्धः रक्तमाल्यानुलेपनस्त्वं वैष्णवं यूपमासाद्य प्राप्य वाग्भिरग्निं सुरश्रेष्ठौ तौ इन्द्राविष्णू च उदाहर स्तुहि । हे मुनिपुत्रक ! इमे प्रसिद्धे दिव्ये द्वे गाथे च गायेथाः । तुहिशब्दो चार्थौ । ततः गाथाद्वयगानादस्मिन्नम्बरीषयज्ञे सिद्धिं त्वमवाप्स्यसि प्राप्स्यसि । सार्धश्लोकद्वयं संमिलितान्वयि ॥ १९ ॥ २० ॥

गो० टी०–पवित्रेति । पाशैः दर्भरशनादिभिः आसक्तः बद्धः वैष्णवं विष्णुदेवताकं "वैष्णवो वै देवतया यूपः" इति श्रुतेः । वाग्भिः वक्ष्यमाणगाथाद्वयरूपाभिः अग्निं प्रत्युदाहर स्तुहि अग्न्यभिमुखो भूत्वा इन्द्रमिन्द्रानुजं च स्तुहीत्यर्थः ॥१९॥

२०–२१] ति० टी०–इमे मयोपदिश्यमाने इन्द्रोपेन्द्रदेवत्ये । सिद्धिं जीवितसिद्धिम् ॥ २० ॥ २१ ॥

गो० टी०–गाथे दर्शयति–इमे इति । गाथे इन्द्रोपेन्द्रविषये एका इन्द्रविषया अन्या उपेन्द्रविषया ततः गाथाभ्यां सिद्धिं जीवितसिद्धिम् ॥ २० ॥

रा० टी०–शुनःशेफ इति । सुसमाहितः अत्येकाग्र-

१ तथेति गो. पाठः । २ निरामयामिति गो. पाठः । ३ त्विति गो. रा. पाठः

राजसिंह महाबुद्धे शीघ्रं गच्छावहे वयम् । निर्वर्तयस्व राजेन्द्र दीक्षां च समुदाहर ॥ २२ ॥
तद्वाक्यमृषिपुत्रस्य श्रुत्वा हर्षसमन्वितः । जगाम नृपतिः शीघ्रं यज्ञवाटमतन्द्रितः ॥ २३ ॥
सदस्यानुमते राजा पवित्रकृतलक्षणम् । पशुं रक्ताम्बरं कृत्वा यूपे तं समबन्धयत् ॥ २४ ॥
स बद्धो वाग्भिरग्र्याभिरभितुष्टाव वै सुरौ । इन्द्रमिन्द्रानुजं चैव यथावन्मुनिपुत्रकः ॥ २५ ॥
ततः प्रीतः सहस्राक्षो रहस्यस्तुतितोषितः । दीर्घमायुस्तदा प्रादाच्छुनःशेपाय वासवः ॥ २६ ॥
स च राजा नरश्रेष्ठ यज्ञस्य च समाप्तवान् । फलं बहुगुणं राम सहस्राक्षप्रसादजम् ॥ २७ ॥
विश्वामित्रोऽपि धर्मात्मा भूयस्तेपे महातपाः । पुष्करेषु नरश्रेष्ठ दशवर्षशतानि च ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

चित्तः शुनश्शेफः ते विश्वामित्रोपदिष्टे द्वे गाथे गृहीत्वा ज्ञात्वा तं राजसिंहमम्बरीषं त्वरया वेगेनैवोवाच । हशब्द एवार्थे ॥ २१ ॥

गो० टी०-शुनःशेप इत्यादि ॥ २१ ॥

२२-२३] ति० टी०-गच्छावहे इत्यार्षस्तङ् । निर्वर्तयस्व यज्ञमिति शेषः । समुदाहर कुरु ॥ २२ ॥ २३ ॥

रा० टी०-तद्वचनमेवाह-राजेति । हे राजसिंह ! महाबुद्धे ! सदो यज्ञशालां वयं शीघ्रं गच्छामहे अतो हे राजेन्द्र ! दीक्षां निर्वर्तयस्व तत्सिद्धिं कुरु । तत्साधनमाह-मां समुपाहर पशुत्वेन प्रकल्प्य प्रापय । चो हेतौ । मामित्यध्याहृतम् ॥ २२ ॥

गो० टी०-सदः यज्ञवाटमित्यर्थः ॥ २२ ॥ २३ ॥

रा० टी०-तदिति । ऋषिपुत्रस्य तद्वाक्यं श्रुत्वा हर्षसमन्वितः अतन्द्रितः आलस्यरहितः नृपतिः यज्ञवाटं शीघ्रं जगाम ॥ २३ ॥

२४] ति० टी०-पवित्रैर्दर्भरज्जुभिः कृतपशुत्वज्ञापनं पशुं कृत्वा यज्ञपशुत्वेन संपाद्यावन्धयत् राजेति शेषः ॥ २४ ॥

रा० टी०-सदस्येति । सदस्यानुमते सदस्यसंमतौ वर्तमानो राजाम्बरीषः पवित्रकृतलक्षणं पवित्रैर्दर्भरज्जुभिः कृतं संपादितं लक्षणं यागयोग्यपशुचिह्नं यस्मिन् तं पशुं रक्ताम्बरं कृत्वा यूपे समबन्धयत् ॥ २४ ॥

गो० टी०-सदस्यानुमते सदस्यानामुपद्रष्टृप्रभृतीनामनुमते अनुमतौ स्थित इति शेषः । पवित्रैर्दर्भरज्जुभिः कृतलक्षणं कृतलाञ्छनं कृतपशुत्वज्ञापनमित्यर्थः । पशुं कृत्वा उपाकरणादिसंस्कारसंस्कृतं कृत्वा ॥ २४ ॥

२५] ति० टी०-इन्द्रानुजो विष्णुर्यूपदेवः । अत्र पूर्वमाग्नेस्तुत्वा तत एतौ उपदेशकाले तथोक्तत्वात् ॥ २५ ॥

रा० टी०-स इति । बद्ध एव स मुनिपुत्रकः इन्द्रं इन्द्रानुजं विष्णुं च सुरौ अग्र्याभिः उत्कृष्टाभिः वाग्भिः यथावदभितुष्टाव । वैशब्दोऽग्निस्तवनसमुच्चायकः ॥ २५ ॥

गो० टी०-स इति । इन्द्रं पशुभोक्तारम् इन्द्रानुजं यूपदेवं तुष्टाव इन्द्रानुजं पुरुषकारीकृत्य फलप्रदमिन्द्रं स्तुतवानित्यर्थः ॥ २५ ॥

२६] ति० टी०-सहस्राक्ष इत्युपलक्षणं विष्णोरपि । रहस्यस्तुतिर्विश्वामित्रोपदिष्टा ॥ २६ ॥

रा० टी०-तत इति । ततः शुनःशेफकृतस्तुत्यनन्तरं रहस्यस्तुतितोषितः विश्वामित्रोपदिष्टरहस्यस्तुत्या शुनःशेफेन तोषं प्रापितः अत एव प्रीतः सहस्राक्ष इन्द्रोऽभवदिति शेषः । वासव इन्द्रः ततस्तस्मै शुनःशेफाय दीर्घमायुः प्रादात् । चतुर्थ्यन्तात्तसिः ॥ २६ ॥

गो० टी०-तत इन्द्रस्यैव फलप्रदत्वमाह-तत इति । प्रीतः स्वस्तुत्या तुष्टः रहस्यस्तुतितर्पितः स्वस्वाभिभूतविष्णुरहस्यस्तुत्या तोषितः ॥ २६ ॥

२७] ति० टी०-समाप्तवान् फलं सम्यगाप्तवानित्यर्थः । यद्यपि बह्वृचब्राह्मणे, " हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजा " इत्यादिना हरिश्चन्द्रयज्ञे शुनःशेपस्याजीगर्तिसुतस्य पशुत्वं प्राजापत्यादिस्तुत्या च मोक्षः श्रूयते, तथाप्यम्बरीषविषयमप्येतत् । एतत्प्रामाण्यात्तन्मूलश्रुतिश्चान्वेष्येति बहवः । केचित्तु-हरिश्चन्द्रपदं सादृश्यादम्बरीष एव प्रयुक्तम् । अजीगर्तिपदं च ऋचीके प्रयुक्तं श्रुतावस्मादेवोपबृंहणादित्याहुः ॥ २७ ॥

रा० टी०-स इति । नरश्रेष्ठ हे राम ! स राजा अम्बरीषस्तु सहस्राक्षप्रसादजं सहस्राक्षप्रसादजनितमेव बहुविधमनेकप्रकारं यज्ञस्य फलं समाप्तवान् समीचीनप्राप्तिविशिष्ट आसीदिति शेषः । एकश्चकारस्त्वर्थकः अपर एवार्थकः ॥ २७ ॥

गो० टी०-स चेति । समाप्तवान् प्राप्तवान् । ननु " हरिश्चन्द्रो वैधस ऐक्ष्वाको राजपुत्र आस " इत्यादिबह्वृचब्राह्मणोक्तेतिहासविरुद्धोऽयं कथमुपपद्यत इति चेत् अम्बरीषस्यैव हरिश्चन्द्र इति संज्ञान्तरमित्यविरोधस्य नेयत्वात् ॥ २७ ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

२८] ति० टी०-भूयः पूर्वतपसः पुत्रेषु क्रोधेन नाशात्क्रोधं न करिष्यामीति संकल्प्य पुनस्तपोऽकरोत् ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

१ गच्छामहे इति रा. पाठः । २ सदः इति गो.रा.पाठः । ३ समुपाहरेति रा. समुपाविशेति गो.पाठः । ४ समुत्सुक इति गो. पाठः । ५ तर्पित इति गो. पाठः । ६ तत इति रा. पाठः । ७ राघवेति गो. पाठः । ८ बहुविधमिति रा. पाठः ।

त्रिषष्टितमः सर्गः।

पुष्करे तपस्यते विश्वामित्राय ब्रह्मागत्य ऋषित्वमदात्। तत्रैवागतमेनकादर्शनक्षुब्धमना गाधेयस्तया वत्सरदशकं सुखं विजहारान्ते च तत्कृतपश्चात्तापः पुनस्तप्तुं हिमवन्तमगात्तत्राप्यागत्य ब्रह्मा तस्मै महर्षित्वमदात्तथाप्यपरितुष्टमनाः स पुनस्तपस्तेपे।

पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिम्। अभ्यगच्छन्सुराः सर्वे तपःफलचिकीर्षवः ॥ १ ॥
अब्रवीत्सुमहातेजा ब्रह्मा सुरुचिरं वचः। ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २ ॥
तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात्। विश्वामित्रो महातेजा भूयस्तेपे महत्तपः ॥ ३ ॥
ततः कालेन महता मेनका परमाप्सराः। पुष्करेषु नरश्रेष्ठ स्नातुं समुपचक्रमे ॥ ४ ॥
तां ददर्श महातेजा मेनकां कुशिकात्मजः। रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५ ॥
कन्दर्पदर्पवशगो मुनिस्तामिदमब्रवीत्। अप्सरः स्वागतं तेऽस्तु वस चेह ममाश्रमे ॥ ६ ॥
अनुगृह्णीष्व भद्रं ते मदनेन विमोहितम्। इत्युक्ता सा वरारोहा तत्र वासमथाकरोत् ॥ ७ ॥

रा० टी०–विश्वामित्र इति। धर्मात्मा धर्मस्वरूपः महातपाः विश्वामित्रोऽपि हे नरश्रेष्ठ! दश वर्षशतानि सहस्रत्रयवर्षपर्यन्तं पुष्करेष्वेव भूयस्तेपे तपश्चकार ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

१] ति० टी०–व्रतस्नातं समाप्तव्रतम्। तपःफलचिकीर्षवस्तपःफलं दातुकामाः ॥ १ ॥

रा० टी०–पूर्ण इति। वर्षसहस्रे वर्षाणि सहस्राणि यस्मिन् तस्मिन् त्रिसहस्रात्मके समये पूर्णे सत्येव व्रतस्नातं व्रतान्तस्नानविशिष्टं महामुनिं विश्वामित्रं तपःफलचिकीर्षवः विश्वामित्रतपःफलदानेच्छावन्तः सर्वे ब्रह्मादयः सुराः अभ्यगच्छन् विश्वामित्रसंमुखं प्राप्तवन्। तुशब्द एवार्थे ॥ १ ॥

गो० टी०–पुत्रविषयकूरशापदानेन क्रोधनिर्जयाभावान्न ब्रह्मर्षित्वसिद्धिरित्याह त्रिषष्टितमे–पूर्ण इत्यादि। व्रतस्नातं व्रतान्ते स्नातं समाप्तपुरश्चरणमिति यावत्। तपःफलचिकीर्षवः तपःफलं दातुमिच्छवः ॥ १ ॥

२–३] ति० टी०–ऋषिस्त्वमसि अत्र राजशब्दानुपादानेन क्षत्रजातिविश्लेषः सूचितः ॥ २ ॥ ३ ॥

रा० टी०–अब्रवीदिति। सुमहातेजाः ब्रह्मा सुरुचिरमतिरमणीयं वचोऽब्रवीत्। तद्वचनमेवाह–स्वार्जितैः स्वसंपादितैः शुभैः कर्मभिः त्वमृषिः असि अतस्ते भद्रं कल्याणं पूर्वं विश्वामित्रतपसि राजर्षिरित्युक्तामिदानीं ऋषिरित्येतावन्मात्रमुच्यते तेनैतत्तपसा त्वत्क्षत्रियत्वं विच्छिन्नमिति ध्वनितम्॥२॥

गो० टी०–अब्रवीदिति। ऋषिस्त्वमसि पूर्वतपसा राजर्षिरसि इदानीमृषिरेवासि अनेन राजपदाप्रयोगेण क्षत्रियत्वविश्लेषः कियान् कृत इति गम्यते ॥ २ ॥

रा० टी०–तमिति। देवेशो ब्रह्मा तं विश्वामित्रमेवमुक्त्वा त्रिदिवं पुनरभ्यगात्। महर्षिर्विश्वामित्रस्तु भूयो महत्तपस्तेपे एतेन पूर्णा तदीप्सितसिद्धिर्न जातेति ध्वनितम् ॥ ३ ॥

गो० टी०–विश्वामित्रो महातेजा भूयस्तेपे महत्तपः इत्यत्र गायत्रीतृतीयाक्षरम् ॥ ३ ॥ ४ ॥

४] ति० टी०–परमा रूपादिभिः सर्वोत्तमा। अप्सरा इत्यर्थम् ॥ ४ ॥

रा० टी०–तत इति। हे नरश्रेष्ठ! ततः विश्वामित्रमहातपःप्रारम्भानन्तरं मेनका तदभिधा परमाप्सराः पुष्करेषु महता कालेन स्नातुं समुपचक्रमे आजगाम! अप्सरश्शब्दस्यैकत्वं स्त्वेतत्प्रायोनिर्देशादेव साधु ॥ ४ ॥

गो० टी०–अथास्य जितेन्द्रियत्वाभावख्यापनाय कथान्तरं प्रस्तौति–ततः कालेनेत्यादि। अप्सरःशब्द एकवचनान्तोऽप्यस्ति। देवप्रेषितेति सिद्धम् ॥ ५ ॥

५] ति० टी०–तत्र सरसि। जलदे विद्युतमिव ॥ ५ ॥

रा० टी०–तामिति। महातेजाः कुशिकात्मजो विश्वामित्रः रूपेणाप्रतिमामप्रतिमरूपविशिष्टां तां मेनकां तत्र पुष्करे जलदे मेघे विद्युतमिव ददर्श ॥ ५ ॥

गो० टी०–तामिति। तत्र सरसि स्नान्ती मेनका जलदमण्डलमध्यवर्तिनी विद्युदिव स्थितेति भावः॥ ६ ॥ ७॥

६] ति० टी०–कन्दर्पकृतो दर्पो मदः ॥ ६ ॥

रा० टी०–कन्दर्पेति। कन्दर्पदर्पवशगः कन्दर्पजनितमदवशं प्राप्तः मुनिर्विश्वामित्रस्तां मेनकामिदं वचनमब्रवीत्। तद्वचनमेवाह–हे अप्सरः! ते तव इदं स्वागतमस्तु अत एवेहास्मिन्ममाश्रमे एव त्वं वस। चशब्द एवार्थे ॥ ६ ॥

७] ति० टी०–अनुगृह्णीष्व भोगदानेनेति शेषः। वरारोहा श्रेष्ठजघना ॥ ७ ॥

रा० टी०–अन्विति। मदनेन विमोहितं मामनुगृह्णीष्व मदीप्सितं साधयेत्यर्थः। ते भद्रं कल्याणमित्यनेन प्रकारे-

१ महर्षिस्त्विति रा. पाठः। २ दृष्ट्वा कन्दर्पेति गो. पाठः।

तपसो हि महाविघ्नो विश्वामित्रमुपागमत् । तस्या वसन्त्यां वर्षाणि पञ्च पञ्च च राघव ॥ ८ ॥
विश्वामित्राश्रमे सौम्ये सुखेन व्यतिचक्रमुः । अथ काले गते तस्मिन्विश्वामित्रो महामुनिः ॥ ९ ॥
सव्रीड इव संवृत्तश्चिन्ताशोकपरायणः । बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ॥ १० ॥
सर्वं सुराणां कर्मैतत्तपोपहरणं महत् । अहोरात्रापदेशेन गताः संवत्सरा दश ॥ ११ ॥
काममोहाभिभूतस्य विघ्नोऽयं प्रत्युपस्थितः । स निःश्वसन्मुनिवरः पश्चात्तापेन दुःखितः ॥ १२ ॥
भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थिताम् । मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ॥ १३ ॥
उत्तरं पर्वतं राम विश्वामित्रो जगाम ह । स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः ॥ १४ ॥
कौशिकीतीरमासाद्य तपस्तेपे दुरासदम् । तस्य वर्षसहस्राणि घोरं तप उपासतः ॥ १५ ॥
उत्तरे पर्वते राम देवतानामभूद्भयम् । आमन्त्रयन्समागम्य सर्वे सर्षिगणाः सुराः ॥ १६ ॥

णोक्ता विश्वामित्रेण प्रार्थिता सा वरारोहा मेनका तत्र विश्वामित्राश्रमे एव वासमकरोत् । अथशब्द एवार्थे ॥ ७ ॥

गो० टी०–अनुगृह्णीष्व मत्कामतापं शमयेत्यर्थः ॥ ८ ॥ ९ ॥

८–९] ति० टी०–पञ्च पञ्च दशवर्षाणि ॥ ८ ॥ ९ ॥

रा० टी०–तपस इति । हे राघव ! हि अयं मेनकासमागमः तपसः विश्वामित्रतपश्चरणस्य महाविघ्नो विश्वामित्रमुपागमत् प्राप्नोत् अत एव हे राम ! विश्वामित्राश्रमे तस्यां मेनकायां वसन्त्यां सत्यां पञ्च पञ्च दशेति यावत् वर्षाणि सुखेन व्यतिचक्रमुः । सार्धश्लोक एकान्वयी ॥ ८ ॥

गो० टी०–तस्यामिति । पञ्च पञ्च चेति दशेत्यर्थः । सुखेन वसन्त्यामित्यन्वयः ॥ १० ॥

रा० टी०–अथेति । तस्मिन्दशवर्षात्मके काले गते सत्येव संवृत्तः सम्यक् वृत्तं वर्तनं यस्य स महामुनिर्विश्वामित्रः सव्रीडः अप्सरःसङ्गहेतुकव्रीडासहितः अत एव चिन्ताशोकपरायण आसेति शेषः । इवशब्द एवार्थे । हे रघुनन्दन ! अथानन्तरं मुनेर्विश्वामित्रस्य सामर्षा अमर्षसहिता बुद्धिः समुत्पन्ना । सार्धश्लोक एकान्वयी ॥ ९ ॥ १० ॥

गो० टी०–अथेति । सव्रीड इवेत्यत्र इवशब्दो वाक्यालंकारे ॥ ११ ॥

१०] ति० टी०–सामर्षा देवेषु, विघ्नस्य तत्कृतत्वज्ञानात् ॥ १० ॥

गो० टी०–बुद्धिरित्यादिद्विकम् । अहोरात्रापदेशेन अहोरात्रतुल्यतया अन्ते इतिकरणमध्याहार्यम् इति बुद्धिरुत्पन्नेत्यन्वयः ॥ १२ ॥ १३ ॥

११–१२] ति० टी०–तदाह–सर्वमिति । अहोरात्रापदेशेनैकाहोरात्रतुल्यतया ॥ ११ ॥ १२ ॥

रा० टी०–अमर्षसूचकं विश्वामित्रवचनं वर्णयन्नाह–सर्वमिति । तपोपहरणं मत्तपोध्वंसकमेतत्सर्वं महत्कर्म सुराणामेव अत एव काममोहाभिभूतस्य कामजनितावविवेकाक्रान्तस्य मम दश संवत्सराः अहोरात्रापदेशेन एकाहोरात्रतुल्यतया गताः तपोध्वंसकस्त्रीसङ्गेन व्यतीताः । अयं स्त्रीसङ्गेन कालापगमः विघ्नः प्रत्युपस्थितः प्राप्तः एवं पश्चात्तापेन स निःश्वसन् मुनिवरो विश्वामित्रः दुःखित आसीदिति शेषः । श्लोकद्वयमेकान्वयि । सर्वं वाक्यं सावधारणं भवतीति न्यायादेवकारलाभः ॥ ११ ॥ १२ ॥

गो० टी०–विनिःश्वसन्नित्यादिद्विकम् । वेपन्तीं वेपमानां मधुरैस्त्वया किं कृतं कामपरतन्त्रस्य ममैवापराधोऽयमित्येवंरूपैरित्यर्थः । उत्तरं पर्वतं हिमवन्तम् ॥ १४ ॥ १५ ॥

१३] ति० टी०–वेपन्तीं वेपमानाम् । मधुरैर्मत्प्रार्थनया स्थितासीति तव न कश्चन दोष इत्यादिवाक्यैः । क्रोधस्य संकल्पपूर्वं त्यक्तत्वादत्र शापादानं तेनास्य क्रोधजयो जात इत्युक्तम् ॥ १३ ॥

रा० टी०–भीतामिति । हे राम ! भीतां संभावितमुनिशापभयविशिष्टामत एव वेपन्तीं प्रकम्पविशिष्टामत एव प्राञ्जलिं प्रणतिसूचकबद्धयुगुलकरां स्थितां मेनकामप्सरसं दृष्ट्वा मधुरैः वाक्यैः तव नापराध इत्यादिवचनैर्विसृज्य कुशिकात्मजो विश्वामित्रः उत्तरं पर्वतं जगाम ह प्रसिद्धमेतत् । सार्धश्लोक एकान्वयी ॥ १३ ॥

१४] ति० टी०–ततस्तत्र बहुविघ्नदर्शनादुत्तरगमनम् । नैष्ठिकीं कामस्याप्यकरणं संकल्प्यात्युत्कटब्रह्मचर्यविषयां बुद्धिं दृढनिश्चयम् । जेतुकामः काममिति शेषः ॥ १४ ॥

रा० टी०–स इति । जेतुकामः काममभिभवितुमिच्छुः महायशाः स विश्वामित्रः नैष्ठिकीमतिदृढां बुद्धिं कृत्वा कौशिकीतीरमासाद्य प्राप्य सुदारुणमतिदुष्करं तपस्तेपे । पूर्वोत्तरार्धोत्तरपूर्वार्धयोरेकत्रान्वयः ॥ १४ ॥

गो० टी०–स इति । नैष्ठिकीं व्रतसमापनपर्यन्तां जेतुकामः इन्द्रियाणीति शेषः ॥ १६–१९ ॥

१५] ति० टी०–कौशिकी विश्वामित्रभगिनी नदी ॥ १५ ॥

रा० टी०–तस्येति । हे राम ! उत्तरे पर्वते वर्षसहस्राणि घोरं तप उपासतस्तस्य विश्वामित्रस्य संबन्धि देवतानां देवताकर्तृकं भयमभूत् ॥ १५ ॥

१६] ति० टी०–उत्तरे पर्वते इत्येतत्पूर्वान्वयि । समागम्य ब्रह्मणेति शेषः ॥ १६ ॥

---

१ अर्धमिदं गो. नास्ति । २ रामेति गो. रा. पाठः । ३ विनिःश्वसन्निति गो. पाठः । ४ सुदारुणमिति गो. रा. पाठः ।

महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः । देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ १७ ॥
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् । महर्षे स्वागतं वत्स तपसोग्रेण तोषितः ॥ १८ ॥
महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक । ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ॥ १९ ॥
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् । [प्रत्युवाच ततो वाचं विश्वामित्रो महामुनिः ॥]
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ॥ ॥ २० ॥
यदि मे भगवान्नाह ततोऽहं विजितेन्द्रियः । तमुवाच ततो ब्रह्मा न तावत्त्वं जितेन्द्रियः ॥ २१ ॥
यतस्व मुनिशार्दूल इत्युक्त्वा त्रिदिवं गतः । विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ॥ २२ ॥
ऊर्ध्वबाहुर्निरालम्बो वायुभक्षस्तपश्चरन् । घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ॥ २३ ॥
शिशिरे सलिलेशायी रात्र्यहानि तपोधनः । एवं वर्षसहस्रं हि तपो घोरमुपागमत् ॥ २४ ॥
तस्मिन्संतप्यमाने तु विश्वामित्रे महामुनौ । संतापः सुमहानासीत्सुराणां वासवस्य च ॥ २५ ॥

रा० टी०–अत एव सर्षिगणाः ऋषिगणसहिताः सर्वे सुराः आगम्य ब्रह्मसमीपं प्राप्य आमन्त्रयन् प्रार्थयन्त ॥१६॥

१७] ति० टी०–लभताम् भगवन्निति शेषः ॥ १७ ॥

रा० टी०–तत्प्रार्थनामेवाह–महर्षीति । अयं कुशिकात्मजः महर्षिशब्दं साधु यथा स्यात्तथा लभताम् एतेन महर्षिपदलाभमन्तरा एतत्तपोनिवृत्तिर्न भविष्यतीति देवतानां निश्चयो ध्वनितः । सर्वलोकपितामहो ब्रह्मा देवतानां वचः श्रुत्वा तपोधनं विश्वामित्रं मधुरं वाक्यमब्रवीत् ॥ १७ ॥

१८] ति० टी०–देवप्रार्थनया महर्षिशब्देनैव संबोधयति महर्षे इति ॥ १८ ॥

रा० टी०–तद्वचनमेवाह–हे महर्षे ! हे वत्स ! स्वागतं तवात्रागमनं समीचीनमित्यर्थः । अत एव हे कौशिक ! तवोग्रेण तपसा हर्षितो हर्षं प्रापितोऽहं महत्त्वं यदृषिमुख्यत्वं तत्तुभ्यं ददामि । तवेत्युभयान्वयि पूर्वश्लोकोत्तरार्धोत्तरश्लोकपूर्वार्धयोरेकत्रान्वयः । एवं पूर्ववोत्तरत्रापि बोध्यम् ॥ १८ ॥

१९] ति० टी०–महत्त्वस्य विवरणमृषिमुख्यत्वमिति ॥१९॥

रा० टी०–ब्रह्मण इति । तपोधनो महायशाः विश्वामित्रः ब्रह्मणो वचः श्रुत्वा प्राञ्जलिः प्रयतो नियतचित्तश्च भूत्वा पितामहं प्रत्युवाच पितामहमिति शेषः ॥ १९ ॥

गो० टी०–महत्त्वमित्यस्य विवरणमृषिमुख्यत्वमिति २०–२२

२०–२२] ति० टी०–प्रत्युवाचेति पितामहमिति शेषः । अतुलं सर्वोत्तमं ब्रह्मर्षिशब्दं मदभीष्टं स्वार्जितैः कर्मभिः प्राप्यं यदि यतो भगवान्नाह न वदति, ततो मन्येऽहं विजितेन्द्रियः । अत्र काकुः न विजितेन्द्रिय इत्यर्थः । न तावदिति विकारहेतुसंनिधाने विकाराभावे हि तत्त्वमिति भावः । न तावदिति लोकोक्तौ ॥ २०–२२ ॥

रा० टी०–तद्वचनमेवाह–महर्षीति । स्वार्जितैः स्वसंपादितैः शुभैः कर्मभिरतुलं महर्षिशब्दं मे मह्यं यदि भगवानाह ततस्तस्माद्धेतोः अहं विजितेन्द्रियोऽस्मीति शेषः । तेन तस्येन्द्रियजयजनितो गर्वो ध्वनितः ॥ २० ॥

रा० टी०–तदूर्वनिरासहेतुकां ब्रह्मोक्तिं वर्णयन्नाह–तमिति। महातेजाः ब्रह्मा तं विश्वामित्रमुवाच । तद्वचनमेवाह–हे नरशार्दूल ! तावत्पूर्वं विषयसान्निध्यसमये त्वं जितेन्द्रियो न अतः त्वं यतस्व इत्युक्त्वा त्रिदिवं गतो ब्रह्मेति शेषः ॥ २१ ॥

गो० टी०–ततोऽहं विजितेन्द्रियः यदि महर्षित्वं भवता दत्तं ततोऽहं विजितेन्द्रियश्चास्मीत्यर्थः ॥ २३ ॥

गो०टी०–न तावत्त्वं जितेन्द्रियः विकारहेतुसंनिधानेऽपि यावन्न विकरोपि तावन्तं कालं तव जितेन्द्रियत्वं नास्तीत्यर्थः२४-२५

रा० टी०–विप्रेति । देवेषु ब्रह्मादिषु विप्रस्थितेषु सत्सु तपश्चरन् सन् ऊर्ध्वबाहुः निरालम्बः गृहाद्यालम्बरहितः वायुभक्षः वायुमात्रभक्षणकर्ता महामुनिर्विश्वामित्र आसीदिति शेषः ॥२२॥

२३–२५] ति० टी०–घर्मे ग्रीष्मे । आकाशं निरावरणदेशः ॥ २३ ॥ २४ ॥ २५ ॥

रा० टी०–तत्तप एव वर्णयन्नाह–घर्म इति । तपोधनः विश्वामित्रः घर्मे ग्रीष्मे पञ्चतपाः भूत्वा वर्षासु आकाशसंश्रयः वृक्षाद्याश्रयरहित इत्यर्थः । भूत्वा शिशिरे सलिले स्थायी च भूत्वा रात्र्यहानि निनायेति शेषः ॥ २३ ॥

गो०टी०–आकाशसंश्रयः वर्षावरणरहितदेशस्थः ॥२६–२७॥

रा० टी०–एवमिति। एवमनेन प्रकारेण वर्षसहस्राणि त्रिसहस्रवर्षपर्यन्तं घोरं तप उपागमत् अकरोत् ॥ २४ ॥

रा० टी०–तस्मिन्निति । महामुनौ तस्मिन् विश्वामित्रे तपः संतप्यमाने सति सुराणां वासवस्येन्द्रस्य च महान् सन्ताप आसीत् ॥ २५ ॥

गो० टी०–संभ्रमः किमस्मत्पदं काङ्क्षत इति अस्थाने भयशङ्का ॥ २८ ॥

१ हर्षितं इति रा. पाठः । २ स इति गो. रा. पाठः । ३ प्रयत इति गो. रा. पाठः । ४ सर्वलोकपितामहमिति गो. पाठः । ५ महायशा इति रा. पाठः । ६ अर्धमिदमधिकं गो. पोठे । ७ महर्षिशब्दमिति गो. रा. पाठः । ८ वानाहेति गो. रा. पाठः । ९ महातेजा इति रा. पाठः । १० नरेति रा. पाठः । ११ स्थायीति गो. रा. पाठः । १२ वर्षसहस्राणीति रा. पाठः । १३ संभ्रम इति गो. पाठः

रम्भामप्सरसं शक्रः सर्वैः सह मरुद्गणैः । उवाचात्महितं वाक्यमहितं कौशिकस्य च ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ।

इन्द्रेण तपोभङ्गाय प्रेषितां रम्भां नामाप्सरसं शिलामयीं विधाय विश्वामित्रः क्रोधजयेन तपश्चरणं निश्चिकाय ।

सुरकार्यमिदं रम्भे कर्तव्यं सुमहत्त्वया । लोभनं कौशिकस्येह काममोहसमन्वितम् ॥ १ ॥
तथोक्ता साप्सरा राम सहस्राक्षेण धीमता । व्रीडिता प्राञ्जलिर्वाक्यं प्रत्युवाच सुरेश्वरम् ॥ २ ॥
अयं सुरपते घोरो विश्वामित्रो महामुनिः । क्रोधमुत्स्रक्ष्यते[2] घोरं मयि देव न संशयः ॥ ३ ॥
ततो हि मे भयं देव प्रसादं कर्तुमर्हसि । एवमुक्तस्तया राम सभयं भीतया तदा ॥ ४ ॥
तामुवाच सहस्राक्षो वेपमानां कृताञ्जलिम् । मा भैषीं[3] रम्भे भद्रं ते कुरुष्व मम शासनम् ॥ ५ ॥
कोकिलो हृदयग्राही माधवे रुचिरद्रुमे । अहं कन्दर्पसहितः स्थास्यामि तव पार्श्वतः ॥ ६ ॥

२६] ति० टी०–आत्महितमात्मा इन्द्रः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०–रम्भामिति । सर्वैर्मरुद्गणैः सह शक्रः इ आत्महितं कौशिकस्य विश्वामित्रस्य अहितं हितभिन्नं वाक्यमुवाच ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–अहितं कौशिकस्य चेत्यनेन तद्विषयवैरनिर्यातनार्थं च रम्भाप्रेरणमित्यपि गम्यते ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

१] ति० टी०–लोभनं प्रतारणम् । काममोहेन कामज्वलितचित्तवैवश्येन समन्वितं युक्तम् ॥ १ ॥

रा० टी०–इन्द्रवचनमेवाह–सुरेति । हे रम्भे ! इहास्मिन् समये काममोहसमन्वितं कामजनितवैचित्त्यविशिष्टं यथा भवति तथा कौशिकस्य लोभनं वञ्चनमिदं सुमहत् सुरकार्यं त्वया कर्तव्यम् ॥ १ ॥

गो० टी०–अथ रम्भया तपोविघ्नश्चतुःषष्टितमे–सुरकार्यमित्यादि । लोभनं प्रलोभनं काममोहेन कामकृतवैचित्र्येन समन्वितं युक्तं इह अस्मिन्काले कौशिकप्रलोभनरूपं सुमहत् सुरकार्यं कर्तव्यमित्यन्वयः ॥ १ ॥

२] ति० टी०–व्रीडिता।असामर्थ्यवचननिमित्ता व्रीडा॥२॥

रा० टी०–तथेति । हे राम ! धीमता सहस्राक्षेण तथा तेन प्रकारेण उक्ता व्रीडिता अशक्यकार्यकर्मकाप्रत्याख्यातव्येन्द्राज्ञापनेन लज्जिता सा रम्भा अप्सराः अप्सरसः प्राञ्जलिर्भूत्वा सुरेश्वरं प्रत्युवाच ॥ २ ॥

गो० टी०–व्रीडिता अशक्यार्थवचननिमित्तलज्जावती ॥२॥

३] ति० टी०–'उत्सृज्यते' इति पाठेऽप्युत्स्रक्ष्यत इत्येवार्थः३

रा० टी०–तद्वचनमेवाह–अयमिति । हे सुरपते ! हे देव ! घोरः अतितीक्ष्णस्वभावोऽयं महामुनिर्विश्वामित्रः मयि घोरं क्रोधमुत्स्रक्ष्यते संशयः अस्मिन् विषये संदेहो न कार्यः। ' उत्सृजते ' इति भूषणकृत्पाठः ॥ ३ ॥

गो० टी०–उत्सृजते उत्स्रक्ष्यति ततस्तस्मात् क्रोधोत्सर्जनात् मे मम भयं भीतिः प्रसादं नियोगनिवृत्तिरूपम् ॥ ३ ॥ ४ ॥

४–५] ति० टी०–हि यतोऽतः प्रसादमेवंनियोगाभावरूपम् ॥ ३ ॥ ४ ॥ ५ ॥

रा० टी०–तत इति । हे देव ! ततस्तच्छापादेव मे भयमस्त्यतः प्रसादमकर्तव्यनियोगापनयनेन प्रसन्नतां कर्तुं त्वमर्हसि । हे राम ! भीतया तया रम्भया एवमनेन प्रकारेण सभयं यथा स्यात्तथोक्तः सहस्राक्षः इन्द्रः वेपमानां कृताञ्जलिं तां रम्भां तदा तत्प्रार्थनोत्तरसमये उवाच । सार्धः श्लोक एकान्वयी ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–मेति । हे रम्भे ! त्वं मम शासनं कुरुष्व मा भैषीः भयं न प्राप्नुहि ते भद्रम् । भयाभावे हेतुं वदन्नाह–कोकिल इति । माधवे वसन्ते रुचिरद्रुमे रमणीयतरौ हृदयग्राही चित्तापकर्षकः कोकिलः स्थास्यतीति शेषः । एतेन वसन्तर्तुरपि तदानीं स्थितः प्राप्स्यति वेति ध्वनितम् । अर्धद्वयमेकान्वयि ॥ ५ ॥

गो० टी०–मा भैषि रम्भे इत्यत्र आर्षो ह्रस्वः ॥ ५ ॥

६] ति० टी०–माधवे वसन्ते कोकिलो भूत्वाहमित्यन्वयः ॥ ६ ॥

रा० टी०–अहमिति । कन्दर्पसहितोऽहं तव पार्श्वतः त्वत्समीपे स्थास्यामि अतः बह्वगुणमनेकविधकटाक्षादिविशिष्टमत एव परमभास्वरं रूपं स्वशरीरं कृत्वा तपस्विनं तमृषिं

१ भूत्वेति गो. रा. पाठः । २ उत्सृजत इति गो. पाठः । ३ भैषि इति ह्रस्वपाठो गो. पुस्तके ।

त्वं हि रूपं बहुगुणं कृत्वा परमभास्वरम् । तमृषिं कौशिकं भद्रे भेदयस्व तपस्विनम् ॥ ७ ॥
सा श्रुत्वा वचनं तस्य कृत्वा रूपमनुत्तमम् । लोभयामास ललिता विश्वामित्रं शुचिस्मिता ॥ ८ ॥
कोकिलस्य तु शुश्राव वल्गु व्याहरतः स्वनम् । संप्रहृष्टेन मनसा सै चैनामन्ववैक्षत ॥ ९ ॥
अथ तस्य च शब्देन गीतेनाप्रतिमेन च । दर्शनेन च रम्भाया मुनिः संदेहमागतः ॥ १० ॥
सहस्राक्षस्य तत्सैर्वं विज्ञाय मुनिपुंगवः । रम्भां क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥ ११ ॥
यन्मां लोभयसे रम्भे कामक्रोधजयैषिणम् । दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे ॥ १२ ॥
ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः । उद्धरिष्यति रम्भे त्वां मत्क्रोधकलुषीकृताम् ॥ १३ ॥
एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः । अशक्नुवन्धारयितुं कोपं संतापमात्मनः ॥ १४ ॥

कौशिकं हे रम्भे त्वं भेदयस्व तच्चित्तापकर्षणं कुरुष्वेत्यर्थः । सार्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०–कोकिल इति । अहं कोकिलो भूत्वा माधवे वसन्ते सति स्थास्यामि ॥ ६ ॥

७] ति० टी०–बहुगुणं हावभावादिगुणोपेतम् । रूपं रूपपरिष्कारम् । भेदयस्व कामोत्पादनेन तपसश्चालय ॥ ७ ॥

गो० टी०–रूपं सौन्दर्यं बहुगुणं बहवः शृङ्गारचेष्टारूपा गुणा यस्य तथोक्तम् । भेदयस्व चलचित्तं कारय ॥ ७ ॥

८] ति० टी०–ललिता ललिताख्यभावयुक्ता ॥ ८ ॥

रा० टी०–सेति । तस्येन्द्रस्य वचनं श्रुत्वा अत एवानुत्तमं रूपं कृत्वा ललिता अतिसौन्दर्यविशिष्टा शुचिस्मिता सा रम्भा विश्वामित्रं लोभयामास ॥ ८ ॥

गो० टी०–सेति । ललिता सुन्दरी ॥ ८ ॥

९] ति० टी०–वल्गु मनोहरम् । कमनीयविषयलाभाच्चेतसो हर्षः ॥ ९ ॥

रा० टी०–कोकिलस्येति । व्याहरतः कूजतः कोकिलस्य वल्गुस्वनं मनोहरशब्दं स विश्वामित्रः शुश्राव । ततस्तच्छब्दश्रवणानन्तरमेनां रम्भां संप्रहृष्टेनात्यन्तहर्षविशिष्टेन मनसा उदैक्षत अपश्यत् ॥ ९ ॥

गो० टी०–वल्गु मनोहरं संप्रहृष्टेन कोकिलरवश्रवणजसंतोषवता ॥ ९ ॥

१०] ति० टी०–तस्य कोकिलस्य । गीतेन रम्भाया इति शेषः । संदेहं स्वत एवास्या यदृच्छयागमनम्, उतेन्द्रप्रेरिताया मत्तपोभङ्गार्थमित्येवंरूपम् ॥ १० ॥

रा० टी०–अथेति । अथ रम्भादर्शनानन्तरमेव तस्य कोकिलस्य शब्देन अप्रतिमेनोपमारहितेन रम्भाया गीतेन च दर्शनेन च मुनिर्विश्वामित्रः संदेहं स्वतोऽस्या आगमनं परतो वेति संशयपूर्वकविचारम् आगतः प्राप्तः । एकश्चशब्द एवार्थे॥१०॥

गो० टी०–अथेति । तस्य कोकिलस्य गीतेन रम्भाया इत्यनुषज्यते । संदेहं सहस्राक्षप्रेरिता स्वयमागता वेति ॥१०॥

११] ति० टी०–तत्सर्वं रम्भागमनं तत्कृतप्रलोभनं च सहस्राक्षप्रेरणामूलमिति युक्त्या ध्यानेन च विज्ञाय निश्चित्य रम्भां शशापेत्यन्वयः ॥ ११ ॥

रा० टी०–सहस्राक्षस्येति । सहस्राक्षस्य तत् रम्भाप्रेषणादि कर्म विज्ञाय क्रोधसमाविष्टः कुशिकात्मजः मुनिपुंगवो विश्वामित्रः रम्भां शशाप । एतेन रम्भावियोगे इन्द्रस्याऽप्यतिदुःखं भविष्यतीति हेतुर्ध्वनितः तेन रम्भाया इन्द्रप्राणप्रियात्वं व्यक्तम् ॥ ११ ॥

गो० टी०–तत् रम्भाप्रलोभनं सहस्राक्षस्य कर्मेति विज्ञाय संगीतादिप्रलोभनेन हेतुना निश्चित्य ॥ ११ ॥

१२] ति० टी०–शैली शिलाप्रतिमारूपा ॥ १२ ॥

रा० टी०–तच्छापमेवाह–यदिति । हे रम्भे ! हे दुर्भगे ! कामक्रोधजयैषिणं मां यत्त्वं लोभयसे तस्मात् दशवर्षसहस्राणि शैली शिलामूर्तिः सती त्वं स्थास्यसि ॥ १२ ॥

गो० टी०–शैली शिलाप्रतिमा दुर्भगे दुष्टप्रयत्ने ' भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु' इत्यमरः ॥ १२ ॥

१३] ति० टी०–यद्यपि स्वामिनियोगतः प्रवृत्ताया रम्भायाः शापदानमनुचितम्, इन्द्र एव तदानमुचितम्, तथापि क्रोधावेशेन युक्तायुक्तविवेकाभावः अत एव पश्चाद्विवेकं लब्ध्वा तामनुगृह्णाति–ब्राह्मण इति । वसिष्ठ इत्यर्थ इति कतकः । एतेन कामादपि क्रोधो दुर्जय इति सूचितम् ॥ १३ ॥

रा० टी०–शापदानोत्तरं शान्तिप्राप्त्या तामनुगृह्णन्नाह–तपोबलसमन्वितः अत एव महातेजाः स प्रसिद्धो ब्राह्मणो ब्रह्मपुत्रो वसिष्ठः हे रम्भे ! मत्क्रोधकलुषीकृतां मत्क्रोधाय कलुषीकृतं कलुषीकरणं पापाचरणमिति यावत् यस्यास्ताम् । किंच मत्क्रोधेन कलुषीकृतां पापाचरणफलं प्रापितां त्वामुद्धरिष्यति त्वत्स्वरूपं प्रापयिता ॥ १३ ॥

गो० टी०–स्वामिपरतन्त्रायाः किमस्याः शापेनेति पश्चात्तापेनानुगृह्णाति–ब्राह्मण इति । ब्राह्मणो ब्रह्मपुत्रो वसिष्ठ इत्याहुः ॥ १३ ॥

१४] ति० टी०–आत्मनः कोपं धारयितुमशक्नुवंस्तां शप्त्वा तपोव्ययजन्यदुःखेन संतापं पश्चात्तामनुपागत इति शेषः ॥ १४ ॥

रा० टी०–एवमिति । कोपं धारयितुं नियन्तुमशक्नुवन् महातपा विश्वामित्रः एवमुक्त्वा शप्त्वेत्यर्थः संतापं तपोध्वंसनहेतुकपश्चात्तापमागतः प्राप्तः ॥ १४ ॥

१ रम्भे इति गो. रा. पाठः । २ तत एनामुदैक्षतेति गो. रा. पाठः । ३ कर्मेति गो. रा. पाठः । ४ स इति रा. पाठः । ५ तपा इति रा. पाठः । ६ आगत इति गो. रा. पाठः ।

तस्य शापेन महता रम्भा शैली तदाभवत् । वचः श्रुत्वा च कन्दर्पो महर्षेः स च निर्गतः ॥ १५ ॥
कोपेन च महातेजास्तपोपहरणे कृते । इन्द्रियैरजितै राम न लेभे शान्तिमात्मनः ॥ १६ ॥
बभूवास्य मनश्चिन्ता तपोपहरणे कृते । [1]नैवं क्रोधं गमिष्यामि न च वक्ष्ये कथंचन ॥ १७ ॥
अथवा नोच्छ्वसिष्यामि संवत्सरशतान्यपि । अहं हि शोषयिष्यामि आत्मानं विजितेन्द्रियः॥ १८ ॥
तावद्यावद्धि मे प्राप्तं ब्राह्मण्यं तपसार्जितम् । अनुच्छ्वसन्नभुञ्जानस्तिष्ठेयं शाश्वतीः समाः ॥ १९ ॥
नहि मे तप्यमानस्य क्षयं यास्यन्ति मूर्तयः । एवं वर्षसहस्रस्य दीक्षां स मुनिपुंगवः ॥
चकाराप्रतिमां लोके प्रतिज्ञां रघुनन्दन ॥ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–संतापं शापनिमितपश्चात्तापम् ॥ १४ ॥ १५ ॥

१५] ति० टी०–महर्षेर्वचः श्रुत्वा कन्दर्पः स च इन्द्रश्च निर्गत इत्वन्वयः ॥ १५ ॥

रा० टी०–तस्येति । तस्य विश्वामित्रस्य महता शापेन रम्भा तदा शापकाले शैली अभवत् । स कन्दर्पः चकारेण इन्द्रः महर्षेर्वचः श्रुत्वैव निर्गतः तदाश्रमात् पलायितः।एकश्च एवार्थे१५

गो० टी०–वचः रम्भाशापरूपम् । स च इन्द्रश्च ॥ १६ ॥

१६] ति० टी०–कोपेन चात्कामेन च तपोपहरणे कृते सति कामक्रोधहतत्वादेवाजितैरिन्द्रियैरित्यन्वयः । आपाततो रम्भादर्शनप्रहर्त्या कामनातितपःक्षयः । आत्मनो मनसः शान्तिं दुःखोपशमम् ॥ १६ ॥

रा० टी०–कोपेनेति । हे राम ! कोपेन तपोपहरणे कृते सति महातेजा अपि विश्वामित्रः अजितैः एतत्कर्तृकातिजयरहितैः इन्द्रियैः आत्मनः शान्तिं न लेभे ॥ १६ ॥

गो०टी०–इन्द्रियैरजितैरिति । उक्तरीत्या कामक्रोधाहतत्वादिति भावः । इन्द्रियैः हेतुभिः आत्मनः मनसः शान्तिं दुःखोपशमम् ॥ १७ ॥

१७] ति० टी–न च वक्ष्ये शापादिवचनमिति शेषः ॥१७॥

रा० टी०–बभूवेति । तपोपहरणे कृते सति अस्य विश्वामित्रस्य मनश्चिन्ता विचारः बभूव । चिन्तोत्तरकालिकं स्वनिश्चयमाह–अहमेवं क्रोधं न गमिष्यामि प्राप्स्यामि अत एव कथंचनापि न वक्ष्ये दुर्वचनमिति शेषः । चोऽप्यर्थे ॥ १७ ॥

गो० टी०–बभूवेति । मनश्चिन्ता संकल्पः ॥ १८ ॥

गो० टी०–नैवेत्यादि । न च वक्ष्ये कथंचन मौनमेव करिष्यामीत्यर्थः । नोच्छ्वसिष्यामि केवलं कुम्भकं करिष्यामीत्यर्थः । उच्छ्वासेन खलु क्रोधादयो भविष्यन्तीति भावः ॥१९॥

१८] ति० टी०–आत्मानं शरीरम् ॥ १८ ॥

रा० टी०–अथेति । अथानन्तरं संवत्सरशतानि वर्षशतत्रयपर्यन्तं नैवोच्छ्वसिष्यामि अत एव विजितेन्द्रियोऽहमात्मानं क्रोधजनकस्वस्वभावं शोषयिष्याम्येव । अपिवाशब्दा एवार्थौ हिहेतौ ॥ १८ ॥

गो० टी०–अहमिति । यावत्पर्यन्तं ब्राह्मण्यं प्राप्तं भविष्यति तावत्पर्यन्तमात्मानं शरीरं शोषयिष्यामि ॥ २० ॥

१९] ति०टी०–यावद्यावता कालेन ब्राह्मण्यं प्राप्तं भवेत्तावच्छाश्वतीः समा बहून्वत्सरान् ॥ १९ ॥

रा० टी०–नन्वेवं वर्षशतत्रयपर्यन्तं तादृक्स्थित्यापि यदीप्सितसिद्धिर्न भविता तदा किं कर्तासीत्यत आह–तावदिति । यावत्कालं तपसोर्जितं मे ब्राह्मण्यं प्राप्तं स्यात्तावत्कालमनुच्छ्वसन् उच्छ्वासं निरुन्धन् अभुञ्जानोऽहं तिष्ठेयम् । नन्वेवं चिरकालं तादृक्स्थित्या देहपातः स्यात्तदा कथमीप्सितसिद्धिरित्यत आह–शाश्वतीः समास्तप्यमानस्य मे मूर्तयः देहाकृतयः क्षयं नैव यास्यन्ति एतेनास्य त्रिकालज्ञत्वं व्यक्तम् । हिरेवार्थे सार्धश्लोक एकान्वयी ॥ १९ ॥

२०] ति० टी०–मूर्तयः शरीरावयवाः । तपोर्थत्वादनुच्छ्वासाभोजनयोस्तद्बलेन स्थास्यन्त्येवेति भावः । दीक्षामनुच्छ्वासभोजने उद्दिश्य । अप्रतिमां प्रतिज्ञां सर्वथैवं करिष्य इत्यध्यवसायम् ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

रा० टी०–एवमिति । हे रघुनन्दन ! स मुनिपुंगवः एवमनेन प्रकारेण वर्षसहस्रस्य दीक्षां निर्वर्तयितुं लोके अप्रतिमामनुपमां प्रतिज्ञां चकार । शब्दाध्याहारान्न चतुर्थीप्रसक्तिः । किंच अप्रतिमां वर्षसहस्रस्य दीक्षां दीक्षाकारणीभूतां प्रतिज्ञां चकार ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुः षष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–नहीति । मूर्तयः शरीरावयवाः क्षयं न यास्यन्ति तपःप्रभावादिति भावः ॥ २१ ॥

गो० टी०–एवमिति । वर्षसहस्रस्य वर्षसहस्रसंबन्धिनीं वर्षसहस्रानुयायिनीं दीक्षामनुच्छ्वासाभोजनसंकल्पं उद्दिश्येति

---

१ गो. पाठः । २ स्वतपोर्जितमिति रा. पाठः ।

पञ्चषष्टितमः सर्गः ।

पूर्वस्यां दुश्चरं तपश्चरते विश्वामित्राय ब्रह्मणा दत्तेऽपि ब्रह्मर्षित्ववरदाने नातिसंतोषात्तपसोऽनुपरमति गाधेये देवप्रार्थनया वसिष्ठस्तद्वरदानमन्वमंस्त । एवं शतानन्दप्रस्तुतप्राशस्तिकं विश्वामित्रं संपूज्य तदनुमतो जनकः स्वावासं जगाम ।

अथ हैमवतीं राम दिशं त्यक्त्वा महामुनिः । पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणम् ॥ १ ॥
मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमम् । चकाराप्रतिमं राम तपः परमदुष्करम् ॥ २ ॥
पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिम् । विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥ ३ ॥
स कृत्वा निश्चयं राम तप आतिष्ठताव्ययम् । तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतः ॥ ४ ॥
भोक्तुमारब्धवानन्नं तस्मिन्काले रघूत्तम । इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ॥ ५ ॥
तस्मै दत्त्वा तदा सिद्धं सर्वं विप्राय निश्चितः । निःशेषितेऽन्ने भगवानभुक्त्वैव महातपाः ॥ ६ ॥
न किंचिदवदद्विप्रं [1]मौनव्रतमुपास्थितः । [2]तथैवासीत्पुनर्मौनमनुच्छ्वासं चकार ह ॥ ७ ॥

शेषः । अप्रतिमां निस्तुलां प्रतिज्ञामेवमेव सर्वदा करिष्यामीत्यध्यवसायं चकार ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥ ६४ ॥

१] ति० टी०–अथ प्रतिज्ञोत्तरम् हैमवतीमुत्तराम् ॥१॥

रा० टी०–प्रतिज्ञाकारणानन्तरकालिकं व्रतमाह–अथेति । हे राम! महामुनिः विश्वामित्रः अथ तपोनिश्चयानन्तरं हैमवतीमुत्तरां दिशं त्यक्त्वा पूर्वां दिशमनुप्राप्य सुदारुणं तपस्तेपे ॥ १ ॥

गो० टी०–अथ विश्वामित्रस्य ब्रह्मर्षित्वप्राप्तिः पञ्चषष्टितमे–अथ हैमवतीमित्यादि ॥ १ ॥

२] ति० टी०–मौनरूपं व्रतं वर्षसहस्रसंबन्धि । मौनं चात्र काष्ठमौनम् ॥ २ ॥

रा० टी०–तपःप्रकारं वर्णयन्नाह–मौनमिति । हे राम! अनुत्तमं सर्वोत्कृष्टं मौनं व्रतं वर्षसहस्रस्य सहस्रवर्षसंबन्धीत्यर्थः । मौनं व्रतं कृत्वा अप्रतिममनुपमं परमदुष्करं तपश्चकार ॥ २ ॥

गो० टी०–वर्षसहस्रस्य वर्षसहस्रसंबन्धि तत्साध्यमित्यर्थः। मौनव्रतं मौनरूपं व्रतं कृत्वा संकल्प्येत्यर्थः ॥ २ ॥

३] ति० टी०–आधूतमाकुलीकृतमप्यान्तरमन्तःकरणम् ॥ ३ ॥

रा० टी०–पूर्ण इति । हे राम! यो विश्वामित्रो निश्चयं कृत्वा अव्ययं तप आतिष्ठत तं काष्ठभूतमपराधादिसहनेन काष्ठसदृशं बहुभिर्विघ्नैराधूतमवधूतत्वेनेष्यमाणं महामुनिं विश्वामित्रं वर्षसहस्रे पूर्णे तुशब्देनापूर्णेऽपि स क्रोधः अन्तरं नाविशत् । सार्धश्लोक एकान्वयी ॥ ३ ॥ ४ ॥

गो० टी०–काष्ठभूतं काष्ठवदवस्थितं आधूतमाकुलीकृतमपि आन्तरमन्तरवन्तं दृष्टान्तःकरणवन्तमिति यावत् यद्वा तं प्रति क्रोधः अन्तरमवकाशं नाविशत् ॥ ३ ॥ ४ ॥

४] ति० टी०–निश्चयं क्रोधाकरणविषयकम् । वर्षसहस्रसंबन्धिनि व्रते पूर्णे सति ॥ ४ ॥

रा० टी०–तस्येति । हे रघूत्तम! तस्य विश्वामित्रस्य वर्षसहस्रस्य व्रते पूर्णे सति महाव्रतो विश्वामित्रोऽन्नं भोक्तुमारब्धवान् तस्मिन्काले भोजनप्रारम्भसमये द्विजातिर्भूत्वा इन्द्रस्तं विश्वामित्रं सिद्धमन्नमयाचत ॥ ५ ॥

गो० टी०–तस्य पूर्वसंकल्पितस्य वर्षसहस्रस्य संबन्धिनि व्रते पूर्णे तस्मिन् काले पारणकाले सिद्धं पक्वं याचिर्द्विकर्मकः॥५॥

५] ति० टी०–तस्मिन्काले व्रतपारणाकाले ॥ ५ ॥

६] ति० टी०–सिद्धं पक्वम् । निःशेषिते निरवशेषतो दत्ते । अभुक्त्वैव पुनः पाकाकरणादभुक्त्वैव ॥ ६ ॥

रा० टी०–तस्मै इति । तदा याचनसमये विप्राय विप्ररूपाय तस्मै याचमानाय सर्वं सिद्धमन्नं दत्त्वा अन्ने निःशेषिते सति निश्चितः निर्गतं चितं संचयो यस्यान्नान्तरसंचयरहित इत्यर्थः । किंच निश्चितः याचको न प्रत्याख्येय इति निश्चयं प्राप्तः । अत एव अभुक्त्वैव विधमानो भगवान् अतिसामर्थ्यविशिष्टः महातपाः मौनं व्रतमुपास्थितो विश्वामित्रः विप्रं न किंचिदवदत् ॥ ६ ॥ ७ ॥

गो० टी०–निश्चितस्तपःसिद्धये सर्वथैवान्नं दातव्यमिति निश्चयवानित्यर्थः । निश्चितः अशङ्कितः इति वा निःशेषित इत्यनेन सर्वमन्नमिन्द्रेण याचितमिति गम्यते । अभुक्त्वेति पुनः पाकार्हतण्डुलासंपादनादिति भावः ॥ ६ ॥ ७ ॥

७] ति० टी०–मौनं कृत्वासीदित्यन्वयः ॥ ७ ॥

रा० टी०–तथेति । मुनिपुंगवो विश्वामित्रः अनुच्छ्वासमुच्छ्वासरहितं मौनं पुनश्चकार आरेभे । अथ तादृशमौनव्रतप्रारम्भानन्तरं वर्षसहस्रं नोच्छ्वसन् उच्छ्वासरहितः सन्नेव तथैव वक्रोचारादिरहित एवासीत् । इ प्रसिद्धमेतत् । वैशब्द एवार्थे ॥ ८ ॥

---

१ मौनं व्रतमिति रा. पाठः । २ नास्तीदमर्धं गो. पुस्तके ।

अथ वर्षसहस्रं चै नोच्छ्वसन्मुनिपुंगवः । तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ॥ ८ ॥
त्रैलोक्यं येन संभ्रान्तमातापितमिवाभवत् । ततो देवर्षिगन्धर्वाः पन्नगोरगराक्षसाः ॥ ९ ॥
मोहितास्तपसा तस्य तेजसा मन्दरश्मयः । कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥ १० ॥
बहुभिः कारणैर्देव विश्वामित्रो महामुनिः । लोभितः क्रोधितश्चैव तपसा चाभिवर्धते ॥ ११ ॥
नह्यस्य तृजिनं किंचिद्दृश्यते सूक्ष्ममप्युत । न दीयते यदि त्वस्य मनसा यदभीप्सितम् ॥ १२ ॥
विनाशयति त्रैलोक्यं तपसा सचराचरम् । व्याकुलाश्च दिशः सर्वा न च किंचित्प्रकाशते ॥ १३ ॥
सागराः क्षुभिताः सर्वे विशीर्यन्ते च पर्वताः । प्रकम्पते च वसुधा वायुर्वातीर्हि संकुलः ॥ १४ ॥
ब्रह्मन्न प्रतिजानीमो नास्तिको जायते जनः । संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसम् ॥ १५ ॥

८] ति० टी०—नोच्छ्वसन् श्वासोच्छ्वासरहितः । धूम इति धूमकेतुरित्यर्थः । अग्रिरिति यावत् । अत एवाग्ने 'आतापित मिव' इति वक्ष्यति । अयं शुद्धसत्त्वगुणप्रभवोऽग्निरितरेषां रजस्तमःप्रधानानां तन्मिश्रसत्त्वप्रधानानां च देवादीनां तापजनक इति बोध्यम् ॥ ८ ॥

रा० टी०—तस्येति । अनुच्छ्वसमानस्य उच्छ्वासराहित्यं प्राप्नुवतस्तस्य विश्वामित्रस्य मूर्ध्नि धूमो व्यजायत येन धूमेन संभ्रान्तमुद्वेगं प्रापितं त्रैलोक्यमादीपितं संतापितमेवाभवत् । इवशब्द एवार्थे ॥ ९ ॥

गो० टी०—आदीपितं तापितम् ॥ ८ ॥

९] ति० टी०—येन वह्निना । यथा तापितः पुमान्संभ्रान्तो व्याकुलो भवति, तद्वत्त्रैलोक्यं संभ्रान्तमभूदित्यर्थः ॥ ९ ॥

रा० टी०—तत इति । ततः विश्वामित्रमूर्ध्वोत्थितधूमदर्शनानन्तरं तस्य विश्वामित्रस्य तपसा तपोजनितेन तेजसा मोहिताः वैचित्यं प्राप्ताः अत एव मन्दरश्मयः हीनतेजसः अत एव कश्मलोपहताः दुःखव्याप्तचित्ताः सर्वे देवर्षिगन्धर्वाः पन्नगोरगराक्षसाश्च पितामहं ब्रह्माणमब्रुवन् । अथशब्दश्चार्थे । सार्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०—तत इत्यादि । तपसा तेजसा तपोरूपाग्निना मोहिता मूर्च्छिताः कश्मलोपहताः दुःखोपहताः ॥ ९ ॥

१०] ति० टी०—तपसा तेजसा तपोरूपेण तेजसा मोहिता विषयाग्राहितचित्ताः कृताः । मन्दरश्मयः क्षीणतेजसः । कश्मलं दुःखम् ॥ १० ॥

११] ति० टी०—तत्तद्विषयैर्लोभितः क्रोधितोऽपि निर्विघ्नमेव तौ त्यक्त्वा तपसाभिवर्धत इत्यन्वयः ॥ ११ ॥

रा० टी०—बहुभिरिति । हे देव ! बहुभिः कारणैस्तपोभंसनहेतुभिः लोभितः क्रोधितश्च महामुनिर्विश्वामित्रस्तपसा स्वतपःप्रभावेणैव अभिवर्धते एव लोभादयस्तस्मिन्न याता इत्यर्थः । चशब्द एवार्थे ॥ ११ ॥

गो० टी०—लोभितः लोभकारणैः रम्भादर्शनादिभिः प्रलोभितः क्रोधितः क्रोधकारणैर्वर्षसहस्रान्तसिद्धकृत्वान्नयाचनादिभिः क्रोधितः तृजिनं पापं रागद्वेषादिलक्षणं सूक्ष्मं स्वल्पम्॥१०॥

१२] ति० टी०—सूक्ष्ममपि तृजिनमल्पमपि कामक्रोधरूपम् । यदभीप्सितं ब्रह्मर्षित्वम् ॥ १२ ॥

रा० टी०—नेति । अस्य विश्वामित्रस्य सूक्ष्ममल्पमपि किंचिद्दृजिनमस्मत्कृतविघ्नजनितदुःखं नैव दृश्यते अत एव अस्य मनसा यदभीप्सितं तद्यदि न दीयते तर्हि सचराचरं चराचरसहितं त्रैलोक्यं तपसा विनाशयति विनाशयिता । हिशब्द एवार्थे । अथशब्दो हेत्वर्थे । तुशब्दस्तर्हीत्यर्थे । सार्धश्लोक एकान्वयी ॥ १३ ॥

१३-१४] ति० टी०—अन्यथा लोकनाश इत्याह—विनाशयतीति । तेर्लघुतरपाठान्नच्छन्दोभङ्गः । नाशप्रकारमाह—व्याकुला इति ॥ १३ ॥ १४ ॥

रा० टी०—त्रैलोक्यविनाशहेतुं वर्णयन्त आहुः—व्याकुला इत्यादिभिः । सर्वाः दिशः व्याकुलाः अन्धकारादिव्याप्ताः अत एव किंचिदपि न प्रकाशते सर्वे सागराः क्षुभिताः क्षोभं प्राप्ताः सर्वे पर्वतास्तु विशीर्यन्ते स्फुटिता भवन्तीत्यर्थः । एकश्चो हेतौ द्वितीयोऽप्यर्थे तृतीयस्त्वर्थे । सर्वे इत्युभयान्वयि ॥ १४ ॥

गो० टी०—विनाशयति विनाशयेत् असाविति शेषः ॥११॥

गो० टी०—व्याकुला इत्यादि । न प्रतिजानीमः प्रतिक्रियामिति शेषः । नास्तिको जायत इति उक्तसंक्षोभवशान्नास्तिक इव कर्मानुष्ठानशून्यो जायत इत्यर्थः ॥ १२ ॥ १३ ॥

रा० टी०—प्रकम्पते इति । पृथिवी प्रकम्पते भृशाकुलः अत्यन्ताकुलताविशिष्टः वायुश्च वाति अत एव नास्तिकः नास्ति कं सुखं यस्य सः अत्यन्तव्याकुलत्वेन सुखरहित इत्यर्थः । नरः सर्वो जनो जायते अतो हे ब्रह्मन् ! न प्रतिजानीमः एतद्दुःखप्रतिक्रियां न निश्चिनुमः । चस्त्वर्थे ॥ १५ ॥

१५] ति० टी०—प्रतिजानीमः प्रतिक्रियां न जानीम इत्यर्थः । नास्तिको जायते जगत्क्षोभवशान्नास्तिक इव कर्मानुष्ठानशून्य इत्यर्थः । तदाह—संमूढमिवेति । संप्रक्षुभितमानसं व्याकुलचित्तम् ॥ १५ ॥

रा० टी०—सामिति । संप्रक्षुभितमानसमत्यन्तक्षोभविशिष्टमानसविशिष्टं त्रैलोक्यं संमूढं कर्तव्याकर्तव्यविवेकरहितमस्तीति शेषः । अतो हे देव ! हे भगवन् ! महामुनिः विश्वामि-

१ वै इति गो. रा. पाठः । २ आदीपितमिति गो. रा. पाठः । ३ देवाः सगन्धर्वा इति गो. पाठः । ४ देवताः इति रा. तेजसा तस्य तपसेति गो. पाठः । ५ अथेति गो. रा. पाठः । ६ भृशाकुल इति गो. रा. पाठः । ७ नर इति रा. पाठः ।

भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा । बुद्धिं न कुरुते यावन्नाशे देव महामुनिः ॥ १६ ॥
तावत्प्रसाद्यो भगवन्नग्निरूपो महाद्युतिः । कालाग्निना यथा पूर्वं त्रैलोक्यं दह्यतेऽखिलम् ॥ १७ ॥
देवराज्यं चिकीर्षेत दीयतामस्य यन्मनः । ततः सुरगणाः सर्वे पितामहपुरोगमाः ॥ १८ ॥
विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् । ब्रह्मर्षे स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ॥ १९ ॥
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक । दीर्घमायुश्च ते ब्रह्मन्ददामि समरुद्गणः ॥ २० ॥
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य यथासुखम् । पितामहवचः श्रुत्वा सर्वेषां त्रिदिवौकसाम् ॥ २१ ॥
कृत्वा प्रणामं मुदितो व्याजहार महामुनिः । ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ॥ २२ ॥

त्रो नाशे जगत्क्षये यावद्बुद्धिं निश्चयं न कुरुते तावदेवाग्निरूपः प्रलयाग्निसदृशरूपविशिष्टः अत एव महाद्युतिः विश्वामित्रः प्रसाद्यः प्रसादयितुं योग्यः। सार्धश्लोक एकान्वयी। इवशब्द एवार्थे। मानसमित्येतदग्रे 'भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा' इतिश्लोकार्धमपि भट्टटीकाङ्कितपुस्तकेषु दृश्यते ॥१६॥

गो० टी०–उक्तार्थानुवादपूर्वकमनुष्ठेयांश उच्यते–संमूढमिवेत्यादि ॥ १४ ॥

१६] ति० टी०–नाशे जगन्नाशे ॥ १६ ॥

गो० टी०–बुद्धिमिति । हे देव ब्रह्मन् ! अतःपरं विश्वामित्रः नाशे जगत्क्षये यावत् बुद्धिं न कुरुते तावत्प्रसाद्यः अनुग्राह्यः ॥ १६ ॥

१७] ति० टी०–पूर्वं युगान्तकाले ॥ १७ ॥

रा० टी०–प्रसादनविलम्बे दोषं वदन्त आहुः–कालेति । यथा येन प्रकारेणाखिलं त्रैलोक्यं पूर्वं कालाग्निना दह्यते तथाऽनेनापि धक्ष्यते इति शेषः । किंच अयथा यथोक्तप्रसादनाभावे कालाग्निना कालाग्निसदृशेन विश्वामित्रेण अखिलं सर्वं पूर्वं पौर्वकालिकं त्रैलोक्यं दह्यते धक्ष्यति " वर्तमानसामीप्ये " इति भविष्यति लट् ॥ १७ ॥

गो० टी०–कालाग्निनेति । पूर्वं प्रलयकाले कालाग्निना त्रैलोक्यं यथा अदह्यत तथैव त्रैलोक्यमनेन दह्यते धक्ष्यते अयं देवराज्यं चिकीर्षेतापि अतः अस्य यत् ब्रह्मर्षित्वं मतं तदीयतामित्यर्थः ॥ १६ ॥

१८] ति० टी०–यस्यौ देवराज्यमपि चिकीर्षेत तदा तदप्यस्य दीयतामित्यर्थ इति केचित् । यस्याभीष्टं न दीयते तदासौ देवराज्यं चिकीर्षेत, अतोऽस्य यन्मनस्तत्स्थं ब्रह्मर्षित्वं तदीयतामित्यर्थ इत्यन्ये ॥ १८ ॥

रा० टी०–नन्वदेयवस्त्वभिलाषश्चेदयं तददाने कथं प्रसादं प्राप्स्यतीत्यत आहुः–देवेति । यस्मिन् ब्रह्मऋषित्वेऽस्य मनोभिलाषस्तदीयतां देवराज्यं चिकीर्षेत चेत्तदपि दीयताम् । ततो देवप्रार्थनानन्तरं पितामहपुरोगमाः सर्वे सुरगणाः महात्मानं विश्वामित्रं मधुरं वाक्यमब्रुवन्। पूर्वोत्तरार्धोत्तरपूर्वार्धयोरेकत्रान्वयः ॥ १८ ॥

गो० टी०–तत इत्यादि। ततः देवविज्ञापनानन्तरम् ॥१७॥

१९] ति० टी०–स्वागतं भद्रम् । स्मेति विसर्गलोप आर्षः ॥ १९ ॥

रा० टी०–तद्वचनमेवाह–ब्रह्मर्षे इति । हे ब्रह्मर्षे ! ते तव अत्रागमनं स्वागतं शोभनमागनमस्तु लडर्थे लोट् । तत्र हेतुः यतस्तपसा त्वत्कर्तृकतपश्चरणेन वयं सुतोषिताः स्म । विसर्गाभाव आर्ष इति भट्टः। किंच स्मेत्येवार्थकमव्ययम्। तपसैव तोषिता इत्यर्थः ॥ १९ ॥

२०] ति० टी०–दीर्घायुर्दानं स्वदर्शनफलम् ॥ २० ॥

रा० टी०–ब्राह्मण्यमिति । हे कौशिक ! उग्रेण तपसा ब्राह्मण्यं स्वेप्सितब्रह्मर्षिपदं त्वं प्राप्तवानसि तव प्रार्थितं ब्रह्मर्षिपदं भवत्तपस्तोषितेन मया दत्तमित्यर्थः। अप्रार्थितमपि ददामीत्याह–हे ब्रह्मन्! समरुद्गणः मरुद्गणसहितोऽहं ते तुभ्यं दीर्घमायुश्च ददामि। समरुद्गण इत्युक्त्या यावद्वायुसंचारमीदृक् ते ख्यातिर्भविष्यतीति सूचितम् ॥ २० ॥

गो०टी०–ब्राह्मण्यमित्यादि। ब्रह्मवचनं प्राधान्येन॥१८–१९॥

२१] ति० टी०–स्वस्ति सुखम् । यथासुखम् तपस उपरत इति शेषः ॥ २१ ॥

रा० टी०–स्वस्तीति । हे सौम्य ! स्वस्ति वाञ्छितप्राप्तिजनितसुखं प्राप्नुहि ते तव भद्रं कल्याणम् । अतः यथासुखं सुखमनतिक्रम्य गच्छ स्वगृहमिति शेषः । अथ पृथक् पितामहेति पितामहवचः श्रुत्वा सर्वेषां ब्रह्मसहितानां त्रिदिवौकसां प्रणामं च कृत्वा मुदितो महामुनिर्विश्वामित्रः व्याजहार कथयामास ॥ २१ ॥

२२] ति० टी०–यदि इत्यसंदिग्धवचनं, वेदाः प्रमाणं चेदितिवत् ॥ २२ ॥

रा० टी०–तद्वचनमेवाह–ब्राह्मण्यमिति । दीर्घं चिरकालिकमायुस्तथैव ब्राह्मण्यं ब्रह्मर्षिपदं च यदि मे मया प्राप्तं भवत्प्रसादाल्लब्धमित्यर्थः । तर्हि ॐकारः ॐ प्रणवं कारयति प्रकटयति स्वनियम्यब्रह्मद्वारेति ॐकारो रघुनाथः वषट्कारः वषडुपलक्षितस्वाहादेः कारः करणमुच्चारणमिति यावत् यस्मिन्स रामोद्देश्यकसाङ्गसकलयागः वेदाः उक्तोभयसूचकसाङ्गसामादयश्च मां वरयन्तु वशिष्ठादिष्विव मयि साक्षात्कारा भवन्त्वित्यर्थः । अथशब्दश्चार्थे ॥ २२ ॥

१ नास्तीदमर्धं रा. पुस्तके । २ मतामिति गो. पाठः ।

ॐकारोऽथ वषट्कारो वेदाश्च वरयन्तु माम् । क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ॥ २३ ॥
ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः । यद्येवं परमः कामः कृतो यान्तु सुरर्षभाः ॥ २४ ॥
ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः । सख्यं चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत्॥ २५ ॥
ब्रह्मर्षिस्त्वं न संदेहः सर्वं संपद्यते तव । इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतम् ॥ २६ ॥
[3]विश्वामित्रोऽपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमम् । पूजयामास ब्रह्मर्षिं वसिष्ठं जपतां वरम् ॥ २७ ॥
कृतकामो महीं सर्वां चचार तपसि स्थितः । एवं त्वनेन ब्राह्मण्यं प्राप्तं राम महात्मना ॥ २८ ॥

२३] ति० टी०–ओमिति ब्रह्मज्ञानसाधनम् वषडिति यज्ञसाधनम् वेदाश्च तदपेक्षिताङ्गोपाङ्गादिप्रतिपादकाः वरयन्तु यथा वसिष्ठादीन्सहजब्राह्मणान्वरयन्ति तथा वरणं चाध्यापनयाजनयोरनुमतिः । ब्रह्मात्यनुग्रहेऽपि जातिब्राह्मण्याभावाद्वसिष्ठेनानङ्गीकारे व्यर्थमेव सर्वम्, अत आह–क्षत्रेत्यादि । सूर्यवंशानादिपुरोहितत्वात्तदध्यापकत्वाच्च तेषां युद्धजयादिप्रयोजनसंपत्तये क्षत्रवेदविदामुक्तप्रयोजनधनुर्वेदविदां श्रेष्ठः । ब्रह्मवेदा वेदचतुष्टयी ब्रह्मप्रतिपादकोपनिषद्भागवत्त्वात् ॥ २३ ॥

रा० टी०–भवदुक्तवरे वशिष्ठस्यापि संमतिः स्यादिति बोधयन्नाह-क्षत्रेति । हे देवताः ! क्षत्रवेदविदां धनुर्वेदादिज्ञातॄणां ब्रह्मवेदविदां ब्राह्मणैकवेद्यब्रह्मदण्डाभिधवेदाभिज्ञानामापि श्रेष्ठः ब्रह्मपुत्रो वशिष्ठः एवमनेन भवदुक्तब्राह्मण्येन रूपेण मां वदतु । एतेन परमाचार्यभूतवशिष्ठप्रसादमन्तरा रामप्रीतिर्न भवतीति ध्वनितम् । तेन रामप्रीतिकामैर्वसिष्ठोऽवश्यं प्रसादयितव्य इति व्यक्तम् । तत्र प्रमाणम् "आचार्यवान् पुरुषो वेद" इत्यादि ॥ २३ ॥

गो० टी०–वरयन्तु अध्यापनयाजनार्हा भवन्तु इत्यर्थः२०॥

गो० टी०–ब्रह्मानुग्रहेऽपि सजातीयपरिग्रहार्थमाह–क्षत्रेति । क्षत्रवेदाः क्षत्रियाणां शान्तिपुष्ट्यादिप्रयोजना आथर्वणवेदाः तद्विदां श्रेष्ठः सूर्यवंशानादिपुरोहितत्वादिति भावः । ब्रह्मवेदाः ब्रह्मप्रतिपादका वेदाः वेदान्ता इत्यर्थः । यद्वा ब्राह्मणमात्रप्रवचनार्हा वेदास्त्रयीरूपाः एवं वदतु ब्रह्मर्षिरिति वदतु । यदीति । अयं कामः वसिष्ठमुखेन ब्रह्मर्षित्ववादरूपः कामः यदि कृतस्तदैव मद्विषये कृतकृत्या यान्तु नान्यथेत्यर्थः ॥२१॥२२॥

२४] ति० टी०–अन्यदपि श्रैष्ठ्यबीजम्–ब्रह्मपुत्र इति । एवं ब्रह्मर्षे इति । एवं वसिष्ठमुखेन ब्रह्मर्षित्ववादरूपे मम परमः कामो मनोरथो यदि कृतस्तदा मद्विषये कृतकृत्याः सुरर्षभा यान्तु नान्यथेति भावः । अन्यथा पुनस्तपश्चरिष्यामीति तात्पर्यम् ॥ २४ ॥

रा० टी०–यदीति । परम उत्कृष्टः कामो मदिच्छाविषयीभूतः अयं मत्प्रार्थितो यदि कृतो भवद्भिः संपादितस्तर्हि हे सुरर्षभाः ! भवन्तो यान्तु । ततो विश्वामित्रप्रार्थनानन्तरं देवैः प्रसादितः प्रसन्नतां प्रापितः जपतां वरो ब्रह्मर्षिर्वसिष्ठः एवमस्तु इत्यब्रवीत् सख्यं च चकार विश्वामित्रेण सहेति शेषः । सार्धश्लोक एकान्वयी ॥ २४ ॥

२५] ति० टी०–ततो विश्वामित्रोक्त्यनन्तरम् । प्रसादितो विश्वामित्रस्य ब्रह्मर्षित्वानुमतये । एवं ब्रह्मर्षित्वम् । सख्यं विश्वामित्रेण ॥ २५ ॥

२६] ति० टी०–सर्वं ब्राह्मण्यप्रयोजकं ब्राह्मणाजन्म तत्संस्कारादि संपद्यते संपन्नम् । अनेन त्रिपुरुषपर्यन्तं विश्वामित्रस्य ब्राह्मण्यलाभः सूचितः एतच्च "अनृष्यानन्तर्ये" इति सूत्रे महाभाष्ये स्पष्टम् । इति वसिष्ठोक्तं देवता अप्युक्त्वा जग्मुरित्यन्वयः ॥ २६ ॥

रा० टी०–सख्यसंपरयुत्तरकालिकं देवतावचनमाह–ब्रह्मर्षिरिति । त्वं ब्रह्मर्षिः अत्र संदेहो न वशिष्ठसख्यप्राप्त्या संशयो ध्वस्त इत्यर्थः अतस्तव सर्वं कार्यं संपत्स्यते सेत्स्यति इति सर्वा देवताः पुनरुक्त्वा यथागतमेव जग्मुः । चशब्दः पुनरर्थे अपिरेवार्थे ॥ २५ ॥

२७] ति० टी०–पूजयामास सपरिवारस्य मम सत्कारकरणेन ब्रह्मर्षिताप्रापकसाधनौन्मुख्यसंपादनेन कृतार्थीकृतोऽस्मि भगवतेति पूजयामासेत्यर्थः ॥ २७ ॥

रा० टी०–धर्मात्मा विश्वामित्रोऽपि उत्तमं ब्राह्मण्यं लब्ध्वा जपतां वरं ब्रह्मर्षिं वशिष्ठं पूजयामास । तपसि स्थितः अत एव कृतकामो विश्वामित्रः सर्वां महीं चचार यथेच्छं गमनं चकारेत्यर्थः ॥ २६ ॥ २७ ॥

गो० टी०–एवमस्त्वित्यस्य विवरणम्–ब्रह्मर्षिस्त्वमिति । सर्वं ब्राह्मण्यं त्वद्भृतयाजनाध्यापनादिकं च ॥ २३ ॥

२८] ति० टी०–चचारेति विश्वामित्र इति शेषः । अथ प्रकृतशतानन्दवचनम्–एवं त्विति ॥ २८ ॥

रा० टी०–एवमिति । हे राम ! महात्मनानेन विश्वामित्रेण एवमुक्तप्रकारेणैव ब्राह्मण्यं प्राप्तमतो हे राम ! एष विश्वामित्रो मुनिश्रेष्ठः एष विग्रहवत् शरीरधारि तपश्च । तुशब्द एवार्थे ॥ २८ ॥

गो० टी०–अथ शतानन्दवचनम्–एवमित्यादि । तप इत्यकारान्तपुँल्लिङ्गस्वमार्षम् ॥ २४–२९ ॥

१ यद्यप्यमिति गो. रा. पाठः । २ संपत्स्यते इति गो. रा. पाठः । ३ साधोऽयं श्लोको गो. पुस्तके नास्ति ।

एष राम मुनिश्रेष्ठ एष विग्रहवांस्तपः[1]। एष धर्मः[2] परो नित्यं वीर्यस्यैष परायणम्[3] ॥ २९ ॥
एवमुक्त्वा महातेजा विरराम द्विजोत्तमः। शतानन्दवचः श्रुत्वा रामलक्ष्मणसंनिधौ ॥ ३० ॥
जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजम्। धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगवौ[4]॥ ३१ ॥
यज्ञं काकुत्स्थसहितः प्राप्तवानसि कौशिक[5]। पावितोऽहं त्वया ब्रह्मन्दर्शनेन महामुने ॥ ३२ ॥
गुणा बहुविधाः प्राप्तास्तव संदर्शनान्मया। विस्तरेण च वै[6] ब्रह्मन्कीर्त्यमानं महत्तपः ॥ ३३ ॥
श्रुतं मया महातेजो रामेण च महात्मना। सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ ३४ ॥
अप्रमेयं तपस्तुभ्यमप्रमेयं च ते बलम्। अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ॥ ३५ ॥
तृप्तिराश्चर्यभूतानां कथानां नास्ति मे विभो। कर्मकालो मुनिश्रेष्ठ लम्बते रविमण्डलम्[7] ॥ ३६ ॥
श्वः प्रभाते महातेजो द्रष्टुमर्हसि मां पुनः। स्वागतं जपतां श्रेष्ठ मामनुज्ञातुमर्हसि[8] ॥ ३७ ॥
एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभम्। विससर्जाशु[9] जनकं प्रीतं प्रीतमनास्तदा ॥ ३८ ॥
एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः। प्रदक्षिणं चकाराशु सोपाध्यायः सबान्धवः ॥ ३९ ॥

२९–३१] ति० टी०–नित्यमिदानीमपि। वीर्यस्य तपोवीर्यस्य ॥ २९–३१ ॥

रा० टी०–एषः नित्यं धर्मपरः एषः वीर्यस्य पराक्रमस्य परायणम् अर्धं पृथक्। शतानन्दवचःश्रवणानन्तरकालिकं वृत्तमाह–शतानन्देति रामलक्ष्मणसन्निधौ शतानन्दवचः श्रुत्वा प्राञ्जलिर्जनकः कुशिकात्मजं वाक्यमुवाच ॥ २९ ॥

रा० टी०–तद्वाक्यमेवाह–धन्य इति। हे धार्मिक! हे ब्रह्मन्! हे महामुने! यस्य मे यज्ञं काकुत्स्थसहितः यो मुनिपुंगवस्त्वं प्राप्तवानसि तेन त्वया दर्शनेन सोऽहं पावितः अस्मि अत एव अनुगृहीतोऽस्मि अत एव धन्योऽस्मि ॥ ३० ॥ ३१ ॥

३२] ति० टी०–पावितः पवित्रः कृतः ॥ ३२ ॥

३३] ति० टी०–गुणाः कर्मश्रैष्ठ्यजातिश्रैष्ठ्यलक्षणाः ॥ ३३ ॥

रा० टी०–गुणा इति। हे ब्रह्मन्! हे महातेजः! तव संदर्शनात् त्वत्कर्मकसंदर्शनतः बहुविधाः अनेकप्रकाराः गुणाः चित्तप्रसादप्रतिष्ठितत्वश्रुखादयः मया प्राप्ताः यतः सदः यागसभां प्राप्य महात्मना रामेण सदस्यैश्च सहितेन मया विस्तरेण कीर्त्यमानं शतानन्देन वर्ण्यमानं ते तव महत्तपः श्रुतं ते तव बहवोऽनेकविधा गुणाः तपोजनितप्रभावाश्च श्रुताः। एकश्चो हेतौ ॥ ३२ ॥ ३३ ॥

३४] ति० टी०–महातेज इति संबुद्धिः। मया जनकेन रामेण च सदः प्राप्य स्थितैः सदस्यैश्च ते गुणाः श्रुताः ॥ ३४ ॥

गो० टी०–सदस्यैरिति। सदः प्राप्य स्थितैः सदस्यैः ॥ ३० ॥

३५] ति० टी०–तुभ्यमिति तवेत्यर्थे अप्रमेयमियत्ताज्ञानाविषयम् ॥ ३५ ॥

रा० टी०–तत्तपआदीनां महत्वं बोधयन्नाह–अप्रमेयमित्यादित्रयेण। यद्यपि हे कुशिकात्मज! तुभ्यं तव तपः अप्रमेयं प्रमातुमशक्यमत एव ते बलं चाप्रमेयमत एव नित्यं विद्यमानास्ते गुणाश्चाप्रमेयाः अत एव हे विभो! हे मुनिश्रेष्ठ! आश्चर्यभूतानां ते कथानां शृण्वतो मे तृप्तिर्नास्ति अत एव स्वागतं तवागमनमतिमङ्गलप्रदमित्यर्थः। तथापि रविमण्डलं लम्बते अस्तं गच्छति अतः कर्मकालः संप्राप्त इति शेषः। अतः हे जपतां श्रेष्ठ! मामनुज्ञातुं गृहगमनायाज्ञापयितुं त्वमर्हसि मां तु श्वः प्रभाते द्रष्टुमर्हसि एतेन त्वमपि स्वस्थानं गच्छेति बोधितम्। एवो यद्यपीत्यर्थे। अत्र विवेकिशिरोमणिजनकस्य समस्तकर्मकाण्डफलभूतमहात्मकथाविरामप्रार्थनयाऽध्वश्रमविशिष्टरामचिरकालस्थित्यसहिष्णुत्वं सूचितं तेन रामस्य ‡सुकुमारातिशयः सूचितः। श्लोकत्रयं संमिलितान्वयि ॥ ३५ ॥ ३६ ॥

गो० टी०–अप्रमेयाः इयत्तया ज्ञातुमशक्याः ॥ ३१ ॥

३६] ति० टी०–कथानामिति। शृण्वत इति शेषः। कर्मकाल इति अतिवर्तत इति शेषः। तदेवाह–लम्बत इति ॥ ३६ ॥

गो० टी०–कथानामिति "पूरणगुण" इति तृतीयार्थे षष्ठी। तृप्तिः अलंबुद्धिः ॥ ३२ ॥

३७–३९] ति० टी०–स्वागतं भद्रम्। अनुज्ञातुम् कर्मण इति शेषः ॥ ३७–३९ ॥

गो० टी०–स्वागतमिति। त्वदागमनं शुभकृज्जातमित्यर्थः ॥ ३३–३९ ॥

रा० टी०–एवमिति। तदा जनकप्रार्थनाकाले एवमनेन प्रकारेण उक्तः मुनिवरः प्रीतमनाः विश्वामित्रः पुरुषर्षभं पुरुषश्रेष्ठं प्रीतं जनकं प्रशस्य अथ विससर्ज मङ्गलविसर्जनं चकारेत्यर्थः ॥ ३७ ॥

रा० टी०–विश्वामित्रोक्तिं संवर्ण्य जनकवृत्तमाह–एवमिति। मिथिलाधिपः सोपाध्यायः सबान्धवः वैदेहो जनकः मुनिश्रेष्ठं विश्वामित्रमेवमुक्त्वा आशु प्रदक्षिणं चकार। आशु इत्यनेन गृहं गत्वा कदा इमां कथां वर्णयिष्यामीत्यभिलाषातिशयः सूचितः ॥ ३८ ॥

१ विग्रहवत्तप इति रा. पाठः। २ धर्मपर इति गो. रा. पाठः। ३ अर्धमिदं रा. पुस्तके नास्ति। ४ पुंगवः इति रा. पाठः। ५ धार्मिकेति गो. रा. पाठः। ६ ते इति गो. रा. पाठः। ७ अथेति रा. पाठः। ‡ सुकुमारतातिशय इति युक्तम्।

विश्वामित्रोऽपि धर्मात्मा सहरामः सलक्ष्मणः । स्ववासमभिचक्राम पूज्यमानो महात्मभिः ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

परेद्युर्गाधेयो जनकं राघवयोर्धनुर्दिदृक्षामबोधयज्जनकोऽपि धनुःप्रभावं प्रस्तुत्य तत्प्राप्तिं सीताप्राप्तिं च निवेद्य तद्धनुरारोपणे रामाय सीताप्रदानं प्रतिजज्ञे ।

ततः प्रभाते विमले कृतकर्मा नराधिपः । विश्वामित्रं महात्मानमाजुहाव सराघवम् ॥ १ ॥
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा । राघवौ च महात्मानौ तदा वाक्यमुवाच ह ॥ २ ॥
भगवन्स्वागतं तेऽस्तु किं करोमि तवानघ । भवानाज्ञापयतु मामाज्ञाप्यो भवता ह्यहम् ॥ ३ ॥
एवमुक्तः स धर्मात्मा जनकेन महात्मना । प्रत्युवाच मुनिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ ४ ॥
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ । द्रष्टुकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति ॥ ५ ॥

४०] ति० टी०–स्ववासं स्वनिवेशम् । 'स्ववाटम्' इति पाठेऽप्ययमेवार्थः ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रा० टी०–विश्वामित्र इति । धर्मात्मा सरामः रामसहितः सहलक्ष्मणः लक्ष्मणसहितः महर्षिभिः सह पूज्यमानः विश्वामित्रोऽपि स्ववाटं स्ववासस्थानमभिचक्राम ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

गो० टी०–स्ववाटं स्वनिवेशम् ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

१] ति० टी०–कृतकर्मा कृतनित्यक्रियः ॥ १ ॥

रा० टी०–राजवृत्तमाह–तत इति । ततः विश्वामित्रागमनोत्तरकालिकसांध्यकर्मपूर्वकशयनानन्तरं विमले अन्धकाररहिते प्रभाते कृतकर्मा समापितसांध्यवन्दनादिक्रियः नराधिपो जनकः सराघवं राघवसहितं महात्मानं विश्वामित्रमाजुहाव आह्वानेन स्वसमीपं प्रापयामास ॥ १ ॥

गो० टी०–एवं स्वमातृशापमोचनघटकत्वकृतोपकारस्मृत्या शतानन्दप्रतिपादितेन प्रासङ्गिकेन विश्वामित्रचरित्रेण उपकारकगुरुवैभवो ज्ञेयः । कामक्रोधौ सर्वदा दुर्निरोधौ जितकामक्रोध एव ब्राह्मणोत्तमः ब्राह्मण्यं च न सुलभम् ब्रह्मविदपचारः सर्वारम्भनिरोधकः इत्यादिव्यञ्जितमिति प्रबन्धगतवस्तुना वस्तुध्वनिः । अथ स्वयमेव समस्तजनरक्षणावसरप्रतीक्षो भगवान् देवशरणागतिं व्याजीकृत्य रावणवधायावतीर्णस्तदवान्तरोपायभूतां वेदवत्यवतारे स्वतः कृतसंकल्पां लक्ष्मीं तुल्यशीलवयोवृत्ताभिजनैव कन्या वरणीयेति अनुमर्थविशेषं प्रवर्तयिष्यन् जनककुलेऽवतार्य तत्परिणयनाय प्रवृत्तस्तत्प्रीणनाय ताटकाताटकेयादिदुष्टवधं कौशिकाध्वरत्राणाहल्याशापमोक्षादिरूपं शिष्टपरिपालनं च विधाय साक्षात्सीतालाभोपायाय यतत इत्याह–ततः प्रभात इत्यादिना सर्गद्वयेन ॥ १ ॥

२] ति० टी०–कर्मणा अर्घ्यपाद्यादिलक्षणेन राघवौ च संपूज्य वाक्यमुवाच विश्वामित्रं प्रतीति शेषः ॥ २ ॥

रा० टी०–तमिति । तदा विश्वामित्रागमनकाले एव धर्मात्मा जनकः शास्त्रदृष्टेन शास्त्रबोधितेन कर्मणा क्रियया तं विश्वामित्रं महात्मानौ राघवौ चार्चयित्वा वाक्यमुवाच । ह-शब्द एवार्थे ॥ २ ॥

गो० टी०–तमिति । राघवौ चार्चयित्वेत्यन्वयः । कर्मणा अर्घ्यप्रदानादिना ॥ २ ॥ ३ ॥ ४ ॥

३–४] ति० टी०–आज्ञाप्य आज्ञापयितुं योग्यः भवतेति कृत्यानां कर्तरि षष्ठीविकल्पात्तृतीया । आगमनप्रयोजनं बोधनीय इति तात्पर्यम् ॥ ३ ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–भगवन्निति । हे भगवन् ! ते तव स्वागतमस्तु हे अनघ ! तव अहं किं करोमि मां भवान् आज्ञापयतु हि यतोऽहं भवता आज्ञाप्यः आज्ञापनार्हः ॥ ३ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेणैव महात्मना जनकेनोक्तः वाक्यविशारदो धर्मात्मा मुनिश्रेष्ठो विश्वामित्रो वाक्यं प्रत्युवाच । तुशब्द एवार्थे ॥ ४ ॥

५] ति० टी०–द्रष्टुकामौ आगताविति शेषः ॥ ५ ॥

रा० टी०–तद्वाक्यमेवाह–पुत्राविति । क्षत्रियौ नित्यं क्षत्रियत्वजातिविशिष्टौ लोकविश्रुतौ सर्वलोकविख्यातौ यदेतत् श्रेष्ठं धनुः त्वयि त्वत्सन्निधौ तिष्ठति तत् द्रष्टुकामौ इमौ दशरथस्य पुत्रौ आगच्छतामिति शेषः ॥ ५ ॥

गो० टी०–द्रष्टुकामौ भवत इति शेषः ॥ ५ ॥

---

१ स्ववाटमिति गो. रा. पाठः । २ महर्षिभिरिति गो. रा. पाठः । ३ स्थिति गो. रा. पाठः । ४ मुनिवीरामिति गो. पाठः ।

एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ । दर्शनादस्य धनुषो यथेष्टं प्रतियास्यतः ॥ ६ ॥
एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम् । श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति ॥ ७ ॥
देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः । न्यासोऽयं तस्य भगवन्हस्ते दत्तो महात्मनः ॥ ८ ॥
दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान् । विध्वंस्य त्रिदशान्रोषात्सलीलमिदमब्रवीत् ॥ ९ ॥
यस्माद्भागार्थिनो भागं नाकल्पयत मे सुराः । वराङ्गानि महार्हाणि धनुषा शातयामि वः ॥ १० ॥
ततो विमनसः सर्वे देवा वै मुनिपुंगव । प्रसादयन्त देवेशं तेषां प्रीतोऽभवद्भवः ॥ ११ ॥
प्रीतियुक्तस्तु सर्वेषां ददौ तेषां महात्मनाम् । तदेतद्देवदेवस्य धनूरत्नं महात्मनः ॥ १२ ॥

६] ति० टी०–कृतकामौ प्राप्तकामौ ॥ ६ ॥

रा० टी०–एतदिति । कृतकामौ प्रकटितधनुर्दर्शनविषयकेच्छावन्तौ नृपात्मजौ एतद्भवत्स्थापितं धनुर्दर्शय "दृशेश्च" इति कर्मत्वम् । अस्य धनुषो दर्शनात् इष्टमभीप्सितं यथा यथावत् प्रतियास्यतः प्राप्स्यतः ॥ ६ ॥

गो० टी०–अस्य दर्शनादेव कृतकामौ भूत्वा प्रतियास्यत इत्यन्वयः ॥ ६ ॥ ७ ॥

७] ति० टी०–ततो धनुर्वृत्तान्तमाह जनकः–**एवमिति**। अस्य दिदृक्षितस्य धनुषः श्रूयताम् आगमनादिवृत्तान्त इति शेषः । यदर्थं यत्प्रयोजनाय तिष्ठति तच्च श्रूयताम् ॥ ७ ॥

रा० टी०–**एवमिति** । एवमनेन प्रकारेणैवोक्तो जनकः महामुनिं विश्वामित्रं प्रत्युवाच । तत्प्रतिवचनमेवाह–यदर्थं यत्कारणात् इह तिष्ठति धनुरिति शेषः तत्कारणं तुना प्राप्तिप्रकारश्च श्रूयताम् ॥ ७ ॥

गो० टी०–श्रूयतामिति । धनुः यदर्थं यत्प्रयोजनाय इह अस्मद्गृहे तिष्ठति अस्य धनुषः तत्प्रयोजनं श्रूयतामित्यर्थः॥८॥

८] ति० टी०–निमिः कूटस्थः । तस्य ज्येष्ठः पुत्रो देवरातः । न्यासो निक्षेपः अयं धनूरूपः । अपरे तु नितरामास्ते देवता यत्रेति व्युत्पत्त्या न्यासो देवपूजास्थानम् तत्पूजार्थं शत्रुवधार्थं च दत्त इत्यर्थः। निक्षेपपरतया व्याख्याने तु निक्षेपस्य शुल्कीकरणमनुचितम् भगवता तद्भङ्गे च निक्षेपारक्षणप्रयुक्तदोषभागिता जनकस्य स्यादिति प्राहुः ॥ ८ ॥

रा० टी०–**देवरात इति** । हे भगवन् ! निमेर्निमिवंशोद्भवस्य सकेतोरित्यर्थः राज्ञो यो ज्येष्ठपुत्रः देवरात इति ख्यातो महीपतिः राजा तस्य महात्मनः हस्ते न्यासो निक्षेपभूतः अयं चापः दत्तः देवैः समर्पितः । किंच निमिपुत्रस्य मिथेरेव देवरात इति नामान्तरम् । 'निमेः षष्ठ' इति पाठे तु निमिं परित्यज्य षष्ठ इत्यर्थः अत एव देवरातस्य सप्तमत्वेपि न क्षतिः । यद्वा न्यासः नितरामासमन्ताद्भावेन अस्यन्ते रिपवो येन सः शत्रुनाशक इत्यर्थः अन्यत्पूर्ववत् । युक्तश्चायमर्थः अन्यस्वामिके वस्तुनि स्वातन्त्र्यानुपपत्तेः अत एव तद्वनुर्भञ्जनादिविषयिणी प्रवृत्तिर्नृपतेः संगच्छते ॥ ८ ॥

गो० टी०–निमेः जनककूटस्थस्य न्यासः निक्षेपरूपम् ॥९॥

९] ति० टी०–कैर्दत्तस्तत्राह–दक्षेत्यादि । दक्षयज्ञवध इति निमित्तसप्तमी । आयम्य नमनसञ्जीकरणपूर्वमाकृष्य सलीलमिति वधविषयाप्रयासो द्योत्यते ॥ ९ ॥

रा० टी०–दानमेव सकारणं प्रतिपादयन्नाह–**दक्षेत्यादिभिः** । पूर्वं पूर्वस्मिन् काले दक्षयज्ञवधे दक्षयागविध्वंसं कर्तुं वीर्यवान् रुद्रः रोषात् क्रोधात् सलीलमेव धनुः आयम्य आकृष्य त्रिदशान् देवान् इदमब्रवीत् तुशब्द एवार्थे । वधे इति हिंसार्थकवधधातुप्रकृतिकक्त्विबन्तप्रकृतिकचतुर्थ्यन्तम् सा च "क्रियार्थोपपद–" इति विहिता । सलीलमित्यनेन श्रमाभावः सूचितः ॥९॥

गो० टी०–उक्तमर्थं विवृणोति–**दक्षेत्यादिना** । आयम्य आकृष्य ॥ १० ॥

१०] ति० टी०–भागार्थिनः स्विष्टकृदादियज्ञभागार्थिनो मम भागं यतो नाकल्पयन्त सुरा अतो वराङ्गानि शिरांसि । *अकल्पयतेत्येकवचनमार्षम् । महार्हाणि महापूजायोग्यानि ॥ १० ॥

रा० टी०–तद्वचनमेवाह–**यस्मादिति**। हे सुराः! भागार्थिनो मे भागं यस्मात् नाकल्पयत अकल्पयन्त तस्मान्महार्हाण्यतिपूजनीयानि वो युष्माकं वराङ्गानि शिरांसि धनुषा शातयामि ॥ १० ॥

गो० टी०–भागार्थिनः स्विष्टकृदादिभागार्थिनः ममेत्यन्वयः। वराङ्गाणि शिरांसि अत्र तस्मादित्युपस्कार्यम् । शातयामि छिनाधि ॥ ११ ॥

११] ति० टी०–विमनसो दीनाः । भवो रुद्रः ॥ ११ ॥

रा० टी०–**तत इति** । ततः रुद्रवचनश्रवणानन्तरं हे मुनिपुंगव ! विमनसः सर्वे देवाः देवेशं प्रसादयन्त प्रासादयन्त अतस्तेषां देवानामुपरि भवः प्रीतोऽभवत् ॥ ११ ॥

गो० टी०–विमनसः दीनाः । भवः रुद्रः ॥ १२ ॥

१२] ति० टी०–ददौ संहारार्थं गृहीतं धनुरिति शेषः । देवदेवस्य रुद्रस्य । देवैर्लब्धं धनूरत्नम् ॥ १२ ॥

रा० टी०–**प्रीतीति** । महात्मनां सर्वेषां सुराणां प्रीतियुक्तः तद्विषयकप्रीतिविशिष्टः सः रुद्रः ददौ देवविध्वंसनायोत्थापितं धनुरिति शेषः । अर्धं पृथक् । **तदिति** । हे विभो ! हे

१ उपतिष्ठतीति रा. पाठः । २ षष्ठ इति गो. पाठः । ३ महात्मनेति गो. पाठः । ४ रुद्रस्त्विति गो. रा. पाठः । ५ प्रसादयन्तीति गो. पाठः । ६ स इति गो. रा. पाठः । * सुरा इति संबोधनान्तमग्रे व इत्युक्तत्वादकल्पयतेति च लडो मध्यमपुरुषबहुवचनं चेद्भाधकमार्षत्वे साधकं च न पश्यामः ।

न्यासभूतं तदा न्यस्तमस्माकं पूर्वजे विभौ । अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः ॥ १३ ॥
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता । भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ॥ १४ ॥
वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा । भूतलादुत्थितां तां तु वर्धमानां ममात्मजाम् ॥ १५ ॥
वरयामासुरागत्य राजानो मुनिपुंगव । तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षिताम् ॥ १६ ॥
वीर्यशुल्केति भगवन्न ददामि सुतामहम् । ततः सर्वे नृपतयः समेत्य मुनिपुंगव ॥ १७ ॥

विश्वामित्र ! महात्मनः देवदेवस्य महादेवस्य न्यासभूतं नितरामासः शत्रुविद्वंसानुकूलो व्यापारः तं भूतं प्राप्तं शत्रुसंहारकमित्यर्थः । तदेतद्धनूरत्नं धनुःश्रेष्ठमस्माकं पूर्वके देवराते तदा धनुःप्राप्तेरुत्तरकाले आन्यस्तमपुनर्ग्रहाय स्थापितं तस्मै शिवाज्ञापितदेवैर्दत्तमित्यर्थः । एतदनुरोधेन ' प्रीतश्च भगवानीशस्त्रिशूली नीललोहितः । प्रददौ शत्रुनाशार्थं जनकायाद्भुतं धनुः' इत्येकविंशाध्यायपठितकूर्मवचनघटकीभूतददावित्यस्य देवैर्दापयामास्रेत्यर्थः अन्तर्भावितणिजर्थः । ' चापं शम्भोर्दयादत्तं कन्याशुल्कीकृतं मया' इति पाद्मपद्यघटकीभूतदत्तमित्यस्य दापितमित्यर्थः ॥ १२ ॥ १३ ॥

गो० टी०–ददौ धनुरिति शेषः । धनूरत्नं धनुःश्रेष्ठं पूर्वके देवराते न्यासभूतं न्यस्तं देवैरिति शेषः ॥ १३ ॥

१३] ति० टी०–अस्मत्पूर्वजे देवराते । तैः शिवसहितैर्देवैर्न्यासभूतं देवपूजास्थानभूतं न्यस्तं दत्तम् । तदुक्तं कौर्म एकविंशेऽध्याये–'प्रीतश्च भगवानीशस्त्रिशूली नीललोहितः । प्रददौ शत्रुनाशार्थं जनकायाद्भुतं धनुः ॥ ' इति । पाद्मेऽपि च–'चापं शंभोर्दयादत्तं कन्याशुल्कीकृतं मया' इति । यदर्थमिह तिष्ठतीत्यस्याप्युत्तरं न्यासभूतमित्यन्तेन जातं पूजास्थानत्वेन पूजार्थमित्यर्थलाभात् । अथेति । कृषत इति । अग्निचयनार्थमिति शेषः । 'षड्वेन कृषति' इत्यादिशास्त्रात् । लाङ्गलाल्लाङ्गलपद्धतेरुत्थिता कन्येति शेषः ॥ १३ ॥

रा० टी०–धनुरागमनप्रकारं संवर्ण्य तत्स्थापनप्रयोजनं बोधयितुमाह–अथेति । क्षेत्रं कृषतः चयनार्थं क्षेत्रकर्षणं कुर्वतः मे मम लाङ्गलात् लाङ्गलावयवपद्धतिभूसंबन्धादुत्थिता प्रादुर्भूता कन्येति शेषः । अथानन्तरं क्षेत्रं शोधयता क्षेत्रतृणाद्यपसरणं कुर्वता मम मया लब्धा दर्शनमात्रतः स्वकन्यात्वेन स्वीकृतेत्यर्थः अत एव सीता इति नाम्ना विश्रुता प्रख्याता सा आसीदिति शेषः । तथाच शास्त्रम् षड्गवेन कृषति । वृषभेण कृषति ' इत्यादि । 'सीतालाङ्गलपद्धतिः' इति कोशः लाङ्गलशब्देन तदवयवपद्धतिभूसंबन्धलाभस्तु लक्षणया बोध्यः ॥ १४ ॥

गो० टी०–अथेति । अथ वृत्तान्तान्तरारम्भे क्षेत्रं यागभूमिं मे कृषतः मयि कर्षतीत्यर्थः चयनार्थमिति शेषः । ' लाङ्गलं पवीरवम्' इति 'द्वाभ्यामृषभेण कृषति' इत्यादिशास्त्रात् लाङ्गलात् लाङ्गलपद्धतेरित्यर्थः । उत्थितेति कन्येति शेषः । सा च क्षेत्रं शोधयता मया लब्धेति हेतोर्नाम्ना सीतेति विश्रुता आसीत् । 'सीता लाङ्गलपद्धतिः' सीतायां जातत्वात्सीतेत्युच्यते ॥ १४ ॥

१४] ति० टी०–यतः क्षेत्रं शोधयता सीताया लाङ्गलपद्धतेर्मया लब्धातो नाम्ना सीतेति प्रसिद्धा भूतलाद्यज्ञियात् । व्यवर्धत वृद्धिं प्राप्ता । पाद्मेऽपि–'अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे स्वतः । शुभक्षेत्रे हलोत्खाते तारे चोत्तरफाल्गुने ॥ अयोनिजा पद्मकरा बालार्कशतसंनिभा । सीतामुखे समुत्पन्ना बालभावेन सुन्दरी ॥ सीतामुखोद्भवात्सीता इत्यस्यै नाम चाकरोत् । ततोऽभूदौरसी तस्य उर्मिला नाम कन्यका ॥' इति ॥ १४ ॥

रा० टी०–भूतलादिति । भूतलादुत्थिता प्रादुर्भूता सा ममात्मजा तु व्यवर्धत विशेषेण प्राकृतविलक्षणबलसौन्दर्यादिना वृद्धिं प्राप्नोत् इति हेतोः अयोनिजेयं मे कन्या वीर्यशुल्का प्राकृतविलक्षणपराक्रममूल्या सती स्थापिता ॥ १५ ॥

गो० टी०–व्यवर्धत मत्कृतपोषणादिति शेषः अतो ममात्मजा वीर्यं धनुरारोपणं तदेव शुल्कं मूल्यं यस्याः सा वीर्यशुल्का इति हेतौ वीर्यशुल्कत्वात्स्थापिता न कस्मैचिद्दत्तेति भावः ॥ १५ ॥ १६ ॥ १७ ॥

१५–१६] ति० टी०–वीर्यशुल्का धनुःसज्जीकरणादिक्षमं वीर्यमेव शुल्कं मूल्यं यस्याः ॥ १५ ॥ १६ ॥

रा० टी०–भूतलादिति । हे मुनिपुंगव ! भूतलादेव उत्थितां प्रादुर्भूतां वर्धमानां ममात्मजां तां सीतां राजानः आगत्य मत्समीपं प्राप्य वरयामासुः । तुशब्द एवार्थे ॥ १६ ॥

रा० टी०–तेषामिति । हे भगवन् ! कन्यां वरयतां सर्वेषां तेषां पृथिवीक्षितामग्रे इयं सुता वीर्यशुल्का इति हेतोः इमां सुतां कन्यामहं न ददामि दास्यामीत्युक्तं मयेति शेषः॥

१७] ति० टी०–न ददामि न प्रादाम् ॥ १७ ॥

रा० टी०–तत इति । ततः मदुक्तिश्रवणानन्तरं हे मुनिपुंगव ! सर्वे नृपतयः समेत्यैकीभूय मिथिलामभ्युपागम्य प्राप्य वीर्यं कन्यामूल्यभूतपराक्रमं जिज्ञासवः ज्ञातुमिच्छवः आसन्निति शेषः । तदा तद्वीर्यजिज्ञासुत्वकाले वीर्ये जिज्ञासमानानां तेषां राज्ञामग्रे शैवं धनुरुपाहृतमानीय स्थापितम् एतेन उत्थाप्य धनुस्थापनमेव कन्याशुल्कमिति ध्वनितम् । तस्य धनुषो ग्रहणे उत्थाप्य धारणे तोलने धनुर्भारविज्ञानाय हस्तेन चालने वा नैव शेकुः समर्था बभूवुः नृपतय इति शेषः । अपिरेवार्थे । द्वयोः संमिलितान्वयः ॥ १८ ॥ १९ ॥

१ पूर्वके विभो इति गो. रा. पाठः । २ क्षेत्रलाङ्गलादिति रा. पाठः । ३ मयेति गो. ममेति रा. पाठः । ४ आगम्येति गो. पाठः । ५ इमामिति रा. पाठः।

मिथिलामप्युपागम्य [1]वीर्यं जिज्ञासवस्तदा । तेषां जिज्ञासमानानां [2]शैवं धनुरुपाहृतम् ॥ १८ ॥
न शेकुर्ग्रहणे तस्य धनुषस्तोलनेऽपि वा । तेषां वीर्यवतां वीर्यमल्पं ज्ञात्वा महामुने ॥ १९ ॥
प्रत्याख्याता नृपतयस्तन्निबोध तपोधन । ततः परमकोपेन राजानो मुनिपुंगव ॥ २० ॥
[3]अरुन्धन्मिथिलां सर्वे वीर्यसंदेहमागताः । आत्मानमवधूतं मे[4] विज्ञाय नृपपुंगवाः[5] ॥ २१ ॥
रोषेण महताविष्टाः पीडयन्मिथिलां पुरीम् । ततः संवत्सरे पूर्णे क्षयं यातानि सर्वशः ॥ २२ ॥
साधनानि मुनिश्रेष्ठ ततोऽहं भृशदुःखितः । ततो देवगणान्सर्वांस्तपसाहं प्रसादयम् ॥ २३ ॥
ददुश्च परमप्रीताश्चतुरङ्गबलं सुराः । ततो भग्ना नृपतयो हन्यमाना दिशो ययुः ॥ २४ ॥
अवीर्या वीर्यसंदिग्धाः सामात्याः पापकारिणः । तदेतन्मुनिशार्दूल धनुः परमभास्वरम् ॥ २५ ॥
रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत । यद्यस्य धनुषो रामः कुर्यादारोपणं मुने ॥
सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ॥ ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

१८] ति० टी०–वीर्यं धनुषः सारम् । जिज्ञासव इत्यस्याभूवन्निति शेषः । उपाहृतम् दर्शितमानीयेत्यर्थः ॥ १८ ॥

गो० टी०–वीर्यजिज्ञासवः धनुःसारजिज्ञासवः अभवन्निति शेषः ॥ १८ ॥

गो० टी०–तेषामिति । वीर्यं जिज्ञासमानानां तेषां कृते धनुः उपाहृतमानीतं ग्रहणे धारणे तोलने भारपरीक्षार्थं हस्तेन चालने ॥ १९ ॥

१९] ति० टी०–ग्रहणं धारणम् तोलनं भारपरीक्षणार्थं हस्तेन चालनम् ॥ १९ ॥

रा० टी०–तेषामिति । हे मुने ! हे तपोधन ! वीर्यवतां पराक्रमगर्ववतां तेषां नृपतीनां वीर्यमल्पं ज्ञात्वा नृपतयः प्रत्याख्याताः भवद्भ्यः कन्यां न दास्यामीत्युक्ताः । तत् मद्वर्णितं सर्वं निबोध जानीहि ॥ २० ॥

गो० टी०–तेषामिति । तन्निबोधेति तदित्यव्ययं तस्मात्कारणात् अनन्तरं यद्वृत्तं तन्निबोधेत्यर्थः ॥ २० ॥

२०] ति० टी०–प्रत्याख्याताः कन्या न दत्तेति यावत् । तदित्यव्ययम् ततोऽनन्तरं यद्वृत्तं तन्निबोध जानीहि । तत इत्युत्तरान्वयि ॥ २० ॥

रा० टी०–तत इति । हे मुनिपुंगव ! ततो मत्कर्तृकप्रत्याख्यानश्रवणानन्तरं वीर्यसंदेहं मूल्यभूतस्वस्वपराक्रमातिदृढिमागताः तद्विषयकज्ञानं प्राप्ताः सर्वे राजानः परमकोपेन मिथिलामरुन्धन् ॥ २१ ॥

२१] ति० टी०–अरुन्धनुपरुद्धवन्तः । वीर्यसंदेहं धनुरारोपणलक्षणवीर्यविषयेऽन्येषां संदेहविषयत्वं गताः । अतो बलेनैव कन्यां ग्रहीष्याम इत्यरुन्धन्नित्यर्थः । ते च सर्वे नृपा आत्मानं स्वं स्वमात्मानं मे मयावधूतं वीर्यशुल्ककरणेन तिरस्कृत विज्ञाय ॥ २१ ॥

रा० टी०–आत्मानमिति । हे मुनिपुंगव ! आत्मानमवधूतं धनुर्गौरवेण पराभूतं विज्ञाय महता रोषेण आविष्टा युक्तास्ते नृपतयः मिथिलां पुरीं पीडयन् अपीडयन् । आगमशास्त्रस्यानित्यत्वादड्विरहः।एतेन तैर्युद्धमासीदिति व्यक्तम्॥२२॥

गो० टी०–वीर्यसंदेहं वीर्यशैथिल्यम् ॥ २१ ॥

गो० टी०–मिथिलावरोधे निमित्तान्तरमाह–आत्मानमिति । ते नृपाः आत्मानं स्वात्मानं मया अवधूतं वीर्यशुल्ककरणेन तिरस्कृतं विज्ञाय पीडयन् अपीडयन् ॥ २२ ॥

२२] ति० टी०–रोषेणाविष्टा मिथिलामपीडयन् । अडभाव आर्षः । क्षयं यातानि दुर्गस्थित्या युद्धवशादिति शेषः ॥ २२ ॥

रा० टी०–तत इति । ततः तद्रोधनकालानन्तरं संवत्सरे पूर्णे सति सर्वशः साधनानि निखिलयुद्धसामग्र्यः क्षयं जातानि ततः साधनक्षयात् हे मुनिश्रेष्ठ ! भृशं दुःखितोऽहं तपसा सर्वान् देवगणान् प्रसादयं प्रासादयम् । अड्विरहोऽनित्यत्वात् । ततः प्रसादनाद्धेतोः परमप्रीताः सुराः चतुरङ्गबलं ददुः । द्वयोः संमिलितान्वयः ॥ २३ ॥ २४ ॥

२३] ति० टी०–साधनानि दुर्गरक्षणसाधनानि । प्रसादयं प्रसादितवान् । लङ्यडभाव आर्षः ॥ २३ ॥

गो० टी०–साधनानि दुर्गरक्षणसाधनानि ॥ २३ ॥

गो० टी०–प्रसादयं प्रासादयम् ॥ २४ ॥

२४] ति० टी०–सुरा ददुः जगन्मातृ रक्षणार्थं स्वकार्यसिद्ध्यर्थं चेदं बलदानम् । दिशो ययुः समूहं विसृज्येति शेषः ॥ २४ ॥

रा० टी०–तत इति । ततः तद्बलेन हन्यमाना अत एव भग्ना अवीर्या अल्पवीर्यवन्तः वीर्यसंदिग्धाः इदं वीर्यं मायाकृतं सत्यं वेति संदेहवन्तः सामात्याः अमात्यसहिताः पापकारिणः नृपतयो दिशो ययुः ॥ २५ ॥

२५-२६] ति० टी०–अवीर्या अल्पवीर्याः । वीर्यसंदि-

१ वीर्यजिज्ञासव इति गो. पाठः । २ वीर्यमिति गो. रा. पाठः । ३ न्यरुन्धन्निति गो. पाठः । ४ ते इति गो. रा. पाठः । ५ मुनिपुंगवा इति गो. मुनिपुंगवेति रा. पाठः । ६ कर्मण इति गो. पाठः ।

सप्तषष्टितमः सर्गः।

विश्वामित्रप्रेरणया जनकेन सभायां प्रापितं धनुरारोपणनिमित्तेन रामो वर्णयति विश्वामित्रानुमोदितश्च जनको विवाहमङ्गलसिद्धये दशरथमानेतुं दूतानयोध्यां प्रेषयत्।

जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः। धनुर्दर्शय रामाय इति होवाच पार्थिवम् ॥ १ ॥
ततः स राजा जनकः सचिवान्व्यादिदेश ह। धनुरानीयतां दिव्यं गन्धमाल्यानुलेपितम् ॥ २ ॥
जनकेन समादिष्टाः सचिवाः प्राविशन्पुरम्। तद्धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः ॥ ३ ॥
नृणां शतानि पञ्चाशद्व्यायतानां महात्मनाम्। मञ्जूषामष्टचक्रां तां समूहुस्ते कथंचन ॥ ४ ॥
तामादाय सुमञ्जूषामायसीं यत्र तद्धनुः। सुरोपमं ते जनकमूचुर्नृपतिमन्त्रिणः ॥ ५ ॥
इदं धनुर्वरं राजन्पूजितं सर्वराजभिः। मिथिलाधिप राजेन्द्र दर्शनीयं यदीच्छसि ॥ ६ ॥

ग्धाः संदिग्धस्ववीर्याः आहिताग्न्यादित्वान्निष्ठायाः परनिपातः। तदेतदुक्तवृत्तान्तकम् ॥ २५ ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

रा० टी०—**तदिति**। हे मुनिशार्दूल! हे सुव्रत! तदेतत्परमभास्वरं धनुः रामलक्ष्मणयोरपि दर्शयिष्याम्येव। चशब्द एवार्थे २६

रा० टी०—**दर्शने** हेतुं वदन्नाह—**यदीति**। हे मुने! अस्य धनुष आरोपणं रामः यदि कुर्यात् तर्हि अयोनिजां दाशरथेरेव योग्यां सीतां सुतामहं दाशरथये दद्याम्। दाशरथय एवेति प्रत्यासत्त्या लब्धम् षष्ठीमहिम्ना योग्यामित्यध्याहृतम् संप्रदानत्वाविवक्षया षष्ठी वा ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

गो० टी०—वीर्यसंदिग्धाः संदिग्धवीर्याः पापकर्मणः पापकर्माणः ॥ २५ ॥ २६ ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

१] ति० टी०—रामाय इति हेत्यसंधिरैच्छिकः। आरोपयिष्यति सीतां ग्रहीष्यति चेति भावः ॥ १ ॥

रा० टी०—**जनकस्येति**। महामुनिर्विश्वामित्रः जनकस्य वचः श्रुत्वा रामाय धनुर्दर्शय इति पार्थिवं जनकं हर्षतः उवाच। ह इति हर्षद्योतकम् ॥ १ ॥

गो० टी०—अथ धनुर्भङ्गादिवृत्तान्तः सप्तषष्टितमे—**जनकस्येत्यादि** ॥ १ ॥

२] ति० टी०—सचिवान्समीपे वियमानान्। अनुलेपितं युक्तम् ॥ २ ॥

रा० टी०—**तत इति**। ततः विश्वामित्राज्ञापनानन्तरं स राजा जनकः गन्धमाल्यविभूषितं दिव्यं धनुरानीयतामिति सचिवान् हर्षतो व्यादिदेश आज्ञापयामास। ह इति हर्षद्योतकम् ॥ २ ॥

गो० टी०—सामन्तान् कर्मसचिवान् ॥ २ ॥ ३ ॥

३] ति० टी०—प्राविशन्पुरम् यज्ञवाटादित्यर्थः ॥ ३ ॥

रा० टी०—**जनकेनेति**। जनकेन समादिष्टाः आज्ञप्ताः अमितौजसः सचिवाः पुरं प्राविशन्। तद्धनुः पुरतः अग्रतः कृत्वा निर्जग्मुः जनकसपीपं प्रापुः ॥ ३ ॥

४] ति० टी०—शतानि पञ्चाशत् पञ्च सहस्राणीत्यर्थः। अनेन धनुषो दुर्ग्रहत्वादि दर्शितम्। आयता दीर्घाः महात्मानो हृष्टपुष्टशरीराः। अष्टचक्रां * रथाङ्गाष्टयुक्ताम् तां दृढत्वेन प्रसिद्धाम्! कथंचन तत्संख्या अपि महता प्रयत्नेनेत्यर्थः ॥ ४ ॥

रा० टी०—**आनयनप्रकारं** वर्णयन्नाह—**नृणामिति**। व्यायतानां दीर्घशरीराणां महात्मनां प्रशंसनीयप्रयत्नकानां नृणां पञ्चाशत् शतानि पञ्चसहस्रसंख्याकाः जना इत्यर्थः। अष्टचक्रामष्टसंख्याकचक्रविशिष्टां तां धनुरधिष्ठानभूतां मञ्जूषां ते पुण्यस्थाने कथञ्चन अतिप्रयत्नतः समूहुः 'तश्चैरामृतपुच्छेषु क्रोडे म्लेच्छे च कुत्रचित्। अपुमांस्तरणे पुण्ये कथितः शब्दवेदिभिः'॥४॥

गो० टी०—**नृणामिति**। व्यायतानां दीर्घदेहानां नृणां पञ्चाशत् शतानि पञ्चसहस्राणि अष्टचक्राम् अष्टचक्रवच्चक्राकारोपितामित्यर्थः मञ्जूषां धनुष्पेटिकां समूहुः आचकर्षुः। ते च पञ्चसहस्रसंख्याविशिष्टा अपि कथंचन महता प्रयत्नेन समूहुरिति योजना। अन्ये तु अष्टचक्रामष्टाधश्चक्रचक्षावन्धवतीमूहुः हस्तैरिति शेष इत्याहुः ॥ ४ ॥

५] ति० टी०—आयसीमष्टलोहनिर्मिताम्। सुरोपममिति जनकविशेषणम् ॥ ५ ॥

रा० टी०—**तामिति**। यत्र यस्यां तन्महेश्वरं धनुरास्ति तामायसीं लोहनिर्मितां मञ्जूषामादाय ते आज्ञप्ताः नृपतिमन्त्रिणः सुरोपमं जनकमूचुः ॥ ५ ॥

गो० टी०—यत्र मञ्जूषायाम् ॥ ५ ॥

६] ति० टी०—यदि दर्शनीयमितीच्छसि तदा दर्शयेत्यर्थः ॥ ६ ॥

---

१ विलेपितमिति गो० रा० पाठः। २ पुरीमिति गो० रा० पाठः। ३ पार्थिवाज्ञयेति गो० पाठः। ४ त्विति गो० रा० पाठः। ५ यदिच्छसीति गो० पाठः।
* अष्टचक्रेत्युचितम्।

तेषां नृपो वचः श्रुत्वा कृताञ्जलिरभाषत । विश्वामित्रं महात्मानं तौ[1]भौ रामलक्ष्मणौ ॥ ७ ॥
इदं धनुर्वरं ब्रह्मञ्जनकैरभिपूजितम् । राजभिश्च महावीर्यैरशक्तैः पूरितुं तदा[2] ॥ ८ ॥
नैतत्सुरगणाः सर्वे सा[3]सुरा न च राक्षसाः । गन्धर्वयक्षप्रवराः सकिंनरमहोरगाः ॥ ९ ॥
क गतिर्मानुषाणां च धनुषोऽस्य प्रपूरणे । आरोपणे समायोगे[4] वेपने तोलने तथा ॥ १० ॥
तदेतद्धनुषां श्रेष्ठमानीतं मुनिपुंगव । दर्शयैतन्महाभाग अनयो राजपुत्रयोः ॥ ११ ॥
विश्वामित्रः सरामस्तु श्रुत्वा जनकभाषितम् । वत्स राम धनुः पश्य इति राघवमब्रवीत् ॥ १२ ॥
महर्षे[5]र्वचनाद्रामो यत्र तिष्ठति तद्धनुः । मञ्जूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत् ॥ १३ ॥
इदं धनुर्वरं दिव्यं संस्पृशामीह पाणिना । यत्नवांश्च भविष्यामि तोलने पूरणेऽपि वा ॥ १४ ॥

रा० टी०–तद्वचनमेवाह–इदमिति । हे मिथिलाधिप राजेन्द्र ! हे राजन् सर्वानुरागविषयीभूत ! यदीच्छसि तर्हि सर्वराजभिः सर्वैराजैः पूजितमिदं धनुर्वरमेनं राघवं दर्शय ॥६॥

गो० टी०–इदमिति । यद्धनुर्दर्शनीयमिच्छसि तदिदं धनुः आनीतमिति शेषः ॥ ६ ॥

७] ति० टी०–उभौ रामलक्ष्मणौ तदाश्रयं धनुःप्रदर्शनमुद्दिश्य विश्वामित्रमभाषतेति योजना ॥ ७ ॥

रा० टी०–तेषामिति । नृपो जनकः तेषां स्वमन्त्रिणां वचः श्रुत्वा कृताञ्जलिः प्रणयमूचकबद्धयुगलकरः सन् महात्मानं विश्वामित्रं तौ प्रसिद्धौ उभौ युगलौ रामलक्ष्मणौ च अभाषत ॥ ७ ॥

गो० टी०–तौ चोभाविति । उद्दिश्येति शेषः ॥ ७ ॥

८] ति० टी०–पूरितुमशक्तैस्तोलनादिवक्ष्यमाणव्यापारशक्तै राजभिस्तु जनकैर्देवरातातिरिक्तैः पूजितम् ऐश्वरत्वादीश्वरवदेव केवलं पूजितमित्यर्थः ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–इदमिति । हे ब्रह्मन् ! जनकैरभिपूजितं प्रतिदिनमर्चितमिदं धनुर्वरं महावीर्यैः पूरितुं सज्यीकर्तुं धनुश्चालनादियोग्यधैर्य वर्धयितुं वाऽशक्तैः राजभिस्तथा पूजितमेवासीत् । चशब्द एवार्थे ॥ ८ ॥

गो० टी०–राजभिः पूर्वं सीतार्थिभिः पूजितं अहो महासारमैश्वरं धनुरिति श्लाघितमित्यर्थः ॥ ८ ॥

९] ति० टी०–नैतदिति । एतद्धनुः सुरादयो न सज्यीकर्तुं शक्ता इति शेषः ॥ ९ ॥

रा० टी०–इदानीं कैमुतिकन्यायेन सर्वेषां धनुर्ग्रहणायशक्तत्वं वर्णयन्नाह–नेत्यादिश्लोकद्वयेन । एतद्धनुः सुरादयो न प्रपूरयितुं शक्ताः इति शेषः । अतोऽस्य धनुषः प्रपूरणे नम्रतां प्रापणे आरोपणे सज्यीकरणे समायोगे शरमौर्वीसंयोजने वा वेपने प्रत्यञ्चाप्रकम्पने वा तोलने धनुर्भारविज्ञानाय हस्ताभ्यां चालने वा मानुषाणां क्व गतिः । चापिशब्दौ वार्थौ ॥ ९ ॥ १० ॥

गो० टी०–नैतदित्यादि । एतद्धनुः सुरगणादयः प्रपूरणादिकं कर्तुं न शक्ता इत्यर्थसिद्धम् ॥ ९ ॥

१०] ति० टी०–गतिः शक्तिः सामर्थ्यम् । चस्त्वर्थे । प्रपूरणमाकर्णाकर्षणम् । आरोपणं सज्यीकरणम् । समायोगः शरेण योजनम् । वेपनं ज्यास्फालनम् । तोलनमुक्तम् ॥ १० ॥

गो० टी०–क्वेति । प्रपूरणे नम्रीकरणे आरोपणे मौर्व्याः संयोजने समायोगे शरेण योजने वेपने मौर्व्याकर्षणे तोलने भारपरीक्षार्थं कम्पने च मानुषाणां मध्ये क्व पुरुषे गतिः शक्तिः ॥ १० ॥

११-१२] ति० टी०–आनीतमथापि त्वदाज्ञयेत्यादिः ॥ ११ ॥ १२ ॥

रा० टी०–तदिति । हे मुनिपुंगव ! हे एतन्महाभाग ! एतेषामत्रत्यानां महान्भागो भाग्यं यस्मात्तत्संबोधनम् । धनुषां श्रेष्ठमानीतमस्मदर्थायैत्र प्रापितं तदेतत् धनुः अनयो राजपुत्रयोर्दर्शय राजपुत्रयोरित्यत्र दृशेश्चेति कर्मत्वाप्रवृत्तिस्तु संबन्धसामान्यविवक्षया । किंच राजपुत्रयोः राजपुत्रदर्शनार्थं यदानीतं तदेतत् दर्शय ॥ ११ ॥

रा० टी०–विश्वामित्र इति । धर्मात्मा स विश्वामित्रः जनकभाषितं श्रुत्वा हे वत्स हे राम ! त्वं धनुः पश्येति राघवमब्रवीत् ॥ १२ ॥

गो० टी०–तथाप्यनयोर्दर्शयेत्याह–तदेतदिति ॥११॥१२॥

१३] ति० टी०–यत्र धनुस्तिष्ठति तां मञ्जूषामपावृत्यापगतावरणां कृत्वा ॥ १३ ॥

रा० टी०–महर्षीति । महर्षिवचनात् विश्वामित्राज्ञातः रामः यत्र यस्यां तद्धनुस्तिष्ठति तां मञ्जूषामपावृत्य उद्घाट्य धनुर्दृष्ट्वा अथाब्रवीत् मङ्गलवचनमकथयत् ॥ १३ ॥

गो० टी०–अपावृत्य अपगतावरणं कृत्वा ॥ १३ ॥ १४॥

१४] ति० टी०–स्पृशामीति दर्शनोत्सुक्यस्य निवृत्तेः । वा चार्थे । यत्नवान्भविष्यामि किमित्यब्रवीत् अपृच्छदित्यर्थः ॥ १४ ॥

---

१ तौ चोभाविति गो.रा.पाठः । २ पुरेति गो. तथेति रा.पाठः । ३ नासुरा इति गो. रा. पाठः । ४ अपि वेति गो. रा. पाठः । ५ स धर्मात्मेति गो. रा. पाठः । ६ महर्षिवचनादिति रा. पाठः ।

बाढमित्यब्रवीद्राजा मुनिश्च समभाषत । लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥ १५ ॥
पश्यतां नृसहस्राणां बहूनां रघुनन्दनः । आरोपयत्स धर्मात्मा सलीलमिव तद्धनुः ॥ १६ ॥
आरोपयित्वा मौर्वी च पूरयामास तद्धनुः । तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ॥ १७ ॥
तस्य शब्दो महानासीन्निर्घातसमनिस्वनः । भूमिकम्पश्च सुमहान्पर्वतस्येव दीर्यतः ॥ १८ ॥
निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः । वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥ १९ ॥
प्रत्याश्वस्ते जने तस्मिन्राजा विगतसाध्वसः । उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुंगवम् ॥ २० ॥
भगवन्दृष्टवीर्यो मे रामो दशरथात्मजः । अत्यद्भुतमचिन्त्यं च अतर्कितमिदं मया ॥ २१ ॥
जनकानां कुले कीर्तिमाहरिष्यति मे सुता । सीता भर्तारमासाद्य रामं दशरथात्मजम् ॥ २२ ॥

रा० टी०–तद्वचनमेवाह–इदमिति । दिव्यमिदं धनुर्वरं पाणिना इहास्मिन् समये संस्पृशामि किम् । ननु संस्पर्शेन किमित्यत आह–स्पर्शानन्तरं तोलने पूरणे च यत्नवान् भविष्यामि । अपिशब्दार्थे वाशब्दः प्रश्ने ॥ १४ ॥

१५] ति० टी०–तं राजा मुनिश्च बाढमित्येव चाब्रवीत् समभाषतेति प्रत्येकमन्वयः । मध्ये मध्यप्रदेशे लीलयानायासेन जग्राह पादाङ्गुलेनोन्नतं कृत्वा करेण जग्राह । तदुक्तं पाद्मे–' रामोऽपि तद्धनुःकोटिं स्पृष्ट्वा पादाङ्गुलात्ततः । उन्नतं चापमारोप्य बभञ्ज मोहिता जनाः ॥ ' इति । अतिभारवद्वस्तुनः पादाङ्गुल्या मध्यभागपर्यन्तमुन्नमनं मध्ये गृहीत्वोद्धारश्च महाबलसाध्य इति महाबलत्वमनेन सूचितम् ॥ १५ ॥

रा० टी०–बाढमिति । राजा जनको बाढमिति अब्रवीत् मुनिश्च बाढं समभाषत मुनेर्वचनात्स रामो धनुर्मध्ये लीलया जग्राह ॥ १५ ॥

गो० टी०–बाढमित्यादि ॥ १५ ॥

गो० टी०–लीलया अप्रयत्नेन ॥ १६ ॥

१६] ति० टी०–पश्यताम् अनादरे षष्ठी ॥ १६ ॥

रा० टी०–पश्यतामिति । बहूनां नृसहस्राणां पश्यतां सतां धर्मात्मा स रघुनन्दनः तद्धनुः सलीलमेवारोपयत् । इवशब्द एवार्थे ॥ १६ ॥

१७] ति० टी०–पूरणमाकर्षणम् ॥ १७ ॥

रा० टी०–आरोपयित्वेति । महायशाः नरश्रेष्ठो रामः मौर्वीमारोपयित्वा आरोप्य तद्धनुः पूरयामास तद्धनुर्मध्ये बभञ्ज च । विनापि चं समुच्चयः ॥ १७ ॥

गो० टी०–पूरयामास आकर्णमाकृष्टवान् । ननु उक्तरीत्या महोन्नतस्य धनुषः कथं बालेनारोपणं संभवति अग्रस्पर्शाभावादिति चेत् उच्यते आश्चर्यशक्तिकस्य रामस्य करस्पर्शादेवावनतं धनुः ॥ १७ ॥

१८] ति० टी०–निर्घातोऽशनिध्वनिस्तन्निःस्वनसमः शब्द आसीत् ! दीर्यतः पर्वतस्य समीपदेशे यथा भूमिकम्पस्तथा भूकम्प आसीत् ॥ १८ ॥

रा० टी०–तस्येति । दीर्यतः विदीर्णतां प्राप्नुवतः पर्वतस्य इव तस्य धनुषः निर्घातसमानिस्वनः अशनिध्वनिसदृशप्रतिध्वनिकारकः महान् शब्द आसीत् अत एव सुमहान् भूमिकम्पश्चासीत् ॥ १८ ॥

गो० टी०–निर्घातेति तल्लक्षणमुक्तं *ज्योतिषे 'वायुनाभिहतो वायुर्गगनात्पतति क्षितौ । यदा दीप्तः खगरुतः स निर्घातोऽतिदोषकृत् ' इति पर्वतस्येव दीर्यतः पर्वते दीर्यति भिद्यति यथा भूमिकम्पः तथा भूमिकम्पश्चासीदित्यर्थः ॥ १८ ॥ १९ ॥

१९] ति० टी०–मुनिवरो विश्वामित्रः । राजा जनकः ॥ १९ ॥

रा० टी०–निपेतुरिति । अत एव मुनिवरादीन् वर्जयित्वा तेन शब्देन मोहिताः सर्वे नरा निपेतुः ॥ १९ ॥

२०] ति० टी०–विगतसाध्वसः । रामेण धनुरनारोपणे कन्याऽविवाहितैव स्थास्यतीति या भीः स्थिता सा गतेत्यर्थः ॥ २० ॥

रा० टी०–प्रत्याश्वस्त इति । तस्मिन् जने प्रत्याश्वस्ते सति विगतसाध्वसः विगतं निष्टत्तं साध्वसं धनुर्भङ्गाभावमूलकविवाहाभावजनितभयं यस्य स प्राञ्जलिर्वाक्यज्ञो राजा मुनिपुंगवं विश्वामित्रं वाक्यमुवाच ॥ २० ॥

गो० टी०–विगतसाध्वस इत्येनेन रामजामातृकृताप्रापकं धनुरारोपणमपि न भवेदिति पूर्वं भीतोऽभूदिति गम्यते ॥ २० ॥

२१] ति० टी०–अतर्कितमिदं मया एतदारोपणमित्यर्थः ॥ २१ ॥

रा० टी०–तद्वाक्यमेवाह–भगवन्निति । हे भगवन् ! दशरथात्मजो रामो मे दृष्टवीर्यः अवलोकितपराक्रमः । वीर्यमेवाह–अत्यद्भुतं प्राकृतविलक्षणमत एव अचिन्त्यं चिन्तयितुमशक्यमत एव मया अतर्कितं तर्काविषयीभूतमिदं वीर्यमस्तीति शेषः ॥ २१ ॥

गो० टी०–अत्यद्भुतमिति । अचिन्त्यमन्यत्रादर्शनात् न तर्कितं मनुष्येष्वसंभावितत्वात् अत्यद्भुतं बालेन कृतत्वात् इदं ईशधनुरारोपणम् ॥ २१ ॥

२२] ति० टी०–आहरिष्यति संपादयिष्यति ॥ २२ ॥

रा० टी०–स्वस्यातीव भाग्यवत्तां बोधयन्नाह–जनका-

१ एतादर्धं गो. नास्ति । *ज्यौतिष इति भाति ।

मम सत्या प्रतिज्ञा सा वीर्यशुल्केति कौशिक सीता प्राणैर्बहुमता देया रामाय मे सुता ॥ २३ ॥
भवतोऽनुमते ब्रह्मन्शीघ्रं गच्छन्तु मन्त्रिणः मम कौशिक भद्रं ते अयोध्यां त्वरिता रथैः ॥ २४ ॥
राजानं प्रश्रितैर्वाक्यैरानयन्तु पुरं मम प्रदानं वीर्यशुल्कायाः कथयन्तु च सर्वशः ॥ २५ ॥
मुनिगुप्तौ च काकुत्स्थौ कथयन्तु नृपाय वै प्रीतियुक्तं तु राजानमानयन्तु सुशीघ्रगाः ॥ २६ ॥
कौशिकस्तु तथेत्याह राजा चाभाष्य मन्त्रिणः अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥
यथावृत्तं समाख्यातुमानेतुं च नृपं तथा ॥ २७

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ।

जनकदूतास्त्वयोध्यां प्रविश्य रामकृतधनुर्भञ्जनादि निवेद्य विवाहोत्सवार्थं जनकसंदेशं दशरथाय न्यवेदयन्। दशरथोऽपि वसिष्ठादिभिः संमन्त्र्य सत्रिकृष्टाह एव प्रस्थानं निश्चिकाय ।

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः । त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन्पुरीम् ॥ १ ॥

नामिति । मे सुता सीता दशरथात्मजं रामं भर्तारमासाद्य प्राप्य जनकानां कुले कीर्तिमाहरिष्यति ॥ २२ ॥

गो० टी०–जनकानां कुले किर्तिमाहरिष्यति मे सुता । सीता भर्तारमासाद्य रामं दशरथात्मजम् । जनकानां 'अनन्तं वत मे वित्तं यस्य मे नास्ति किंचन । मिथिलायां प्रदीप्तायां न मे किंचित्प्रदह्यते' इति प्रोक्तनिरतिशयकीर्तिमतामापि कुले 'कुलं तारयते तात सप्त सप्त च सप्त च ' इतिवत् कीर्तिमित्येकवचनेनैकरूपत्वं व्यज्यते । आहरिष्यति सद्यः प्रापयिष्यति सिद्धस्यादानं ह्याहरणं सुता सुतश्रेत्स्वार्जितामेव कीर्तिं प्रापयिष्यति मे सुता स्वसंबन्धप्रयुक्तातिशयः सीताजन्मप्रयुक्तातिशयः भर्तारमासाद्य भर्तृसंबन्धकृतातिशयः भर्तारं भरणदक्षं 'वित्तमिच्छन्ति मातरः' इत्युक्तधनवन्तमित्यर्थः । रामम् 'रूपमिच्छति कन्यका' इत्युक्तरूपवन्तं दशरथात्मजम् 'बान्धवाः कुलमिच्छन्ति' इत्युक्तरीत्या बन्धुकाङ्क्षितम् एवं सर्वसंमतवरप्राप्त्या किर्तिमाहरिष्यतीति भावः ॥२२॥

२३] ति० टी०–मम प्रतिज्ञा सत्या जातेति शेषः । प्राणैः प्राणेभ्यः ॥ २३ ॥

रा० टी०–ममेति । हे कौशिक ! मम प्राणैः प्राणेभ्यो बहुमता अतीप्सिता मे सुता सीता वीर्यशुल्केति मम प्रतिज्ञा सत्या यथा स्यात्तथा भवतोऽनुमते सति शीघ्रं देया अतो हे ब्रह्मन् हे कौशिक ! त्वरिता वेगवन्तो मम मन्त्रिणोऽयोध्यां रथैः शीघ्रं गच्छन्तु । श्लोकद्वयं संमिलितान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–सत्या जातेति शेषः । सीता वीर्यशुल्केति प्रतिज्ञा सत्या जाता प्राणैः प्राणेभ्यः बहुमता सीता देयेति सीतापदसुभयत्रान्वेति ॥ २३ ॥

२४] ति० टी०–मम मन्त्रिण इत्यन्वयः । अनुमते अनुमतकृत्यसाधननिमित्तमित्यर्थः । भवतोऽनुमत्येति वार्थः ॥२४॥

गो० टी०–भवतोऽनुमते भवदनुमत्या गच्छन्त्वित्यर्थः॥२४॥

२५] ति० टी०–प्रश्रितैर्विनयसहितैः । सर्वशश्च सर्वमप्यत्र्यं वृत्तान्तमित्यर्थः ॥ २५ ॥

रा० टी०–मन्त्रिप्रेषणप्रयोजनमाह–राजानमिति । सर्वशो मन्त्रिणः प्रश्रितैर्नम्रैर्वाक्यैर्वीर्यशुल्कायाः मत्कन्यायाः प्रदानं विधिना दानं कथयन्तु अत एव राजानं राजराजं दशरथं मम पुरमानयन्तु । चो हेतौ ॥ २५ ॥

गो० टी०–प्रश्रितैः विनयान्वितैः सर्वशः सर्वमत्रत्यवृत्तान्तमित्यर्थः ॥ २५ ॥२६ ॥

२६] ति० टी०–गुप्तौ रक्षितौ । प्रीतियुक्तमिति क्रियाविशेषणम् ॥ २६ ॥

रा० टी०–मुनीति । काकुत्स्थौ रामलक्ष्मणौ मुनिगुप्तौ विश्वामित्ररक्षितौ इत्यपि नृपाय सुशीघ्रगा दूताः कथयन्तु अतोऽपि प्रीतियुक्तं राजानमानयन्तु । चकार इतीत्यर्थे वैशब्दः अप्यर्थे तुशब्दः अतोऽपीत्यर्थे ॥ १६ ॥

२७] ति० टी०–आभाष्याहूय । कृतशासनान्दत्तकल्याणसंदेशपत्रान् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्ये बालकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०–कौशिक इति । कौशिकस्तथेत्याह अत एव धर्मात्मा राजा जनकः यथा वृत्तं तथैव समाख्यातुं नृपं दशरथमानेतुं च कृतशासनान्मन्त्रिणः आभाष्य संबोध्य अयोध्यां प्रेषयामास । तुशब्दो हेत्वर्थे एकश्च एवार्थे । सार्धश्लोक एकान्वयी ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

गो० टी०–आभाष्य आहूय कृतशासनान् दत्तकल्याणसंदेशपत्रिकानित्यर्थः । नृपं दशरथम् ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने
बालकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

१] ति० टी०–त्रिरात्रं रात्रित्रयमुषिता मार्गे कृतवासाः

---

१ चेति गो. रा. पाठः ।

ते राजवचनाद्दूत्वा राजवेश्म प्रवेशिताः । ददृशुर्देवसंकाशं वृद्धं दशरथं नृपम् ॥ २ ॥
बद्धाञ्जलिपुटाः सर्वे दूता विगतसाध्वसाः । राजानं प्रश्रितं वाक्यमब्रुवन्मधुराक्षरम् ॥ ३ ॥
मैथिलो जनको राजा साग्निहोत्रपुरस्कृतः । मुहुर्मुहुर्मधुरया स्नेहसंरक्तया गिरा ॥ ४ ॥
कुशलं चाव्ययं चैव सोपाध्यायपुरोहितम् । जनकस्त्वां महाराजा पृच्छते सपुरःसरम् ॥ ५ ॥
पृष्ट्वा कुशलमर्य्यग्रं वैदेहो मिथिलाधिपः । कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ॥ ६ ॥
पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा । राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ७ ॥
सेयं मम सुता राजन्विश्वामित्रपुरस्कृतैः । यदृच्छयागतैर्राजन्निर्जिता तव पुत्रकैः ॥ ८ ॥

तावद्वासकरणे निमित्तं क्लान्तवाहनत्वम् । ते दूतकर्मणि नियुक्ता मन्त्रिणः तदनन्तरं तेऽयोध्यायां प्राविशन् ॥ १ ॥

रा० टी०–जनकेनेति । जनकेन समादिष्टाः अते निरन्तरगमनविशिष्टाधिकरणीभूते मार्गे त्रिरात्रमुषिताः क्लान्तवाहनाः ते दूताः अयोध्यां पुरीं प्राविशन् । अत इत्यत्र निरन्तरगमनार्थकाद्धातोरधिकरणे कः । अत एव ते इत्यनेन न पौनरुक्त्यम् ॥ १ ॥

गो० टी०–अथ जानकीविवाहाय दशरथाह्वानमष्टषष्टितमे–जनकेनेत्यादि । त्रिरात्रमिति । तिस्रो रात्रयस्त्रिरात्रं संख्यादित्वात् राज्यन्तादच् समासान्तः अत्यन्तसंयोगे द्वितीया ॥१॥

२] ति० टी०–राजवचनाज्जनकोऽस्मानिह प्रेषितवानिति स्वराजनामसंकीर्तनात् राजवेश्म दशरथवेश्म प्रवेशिताः तदीयैर्द्वारपालैरिति शेषः ॥ २ ॥

रा० टी०–ते इति । राजवचनात् राज्ञः जनकमन्त्रिणो भवत्संदर्शनार्थं समागता इति स्वदूतप्रार्थितदशरथस्य वचनात् शीघ्रं तानानयेत्याज्ञातः राजवेश्म प्रवेशिताः प्रतीहारैर्महाराजाधिराजदशरथगृहं प्रापिताः ते जनकदूताः देवसंकाशं देवसदृशं वृद्धं विलक्षणैश्वर्यवत्त्वेन परमवृद्धिं प्राप्तं दशरथं नृपं ददृशुः ॥२॥

गो० टी०–राजवचनात् जनकोऽस्मानिह प्रेषितवानिति स्वराजसंकीर्तनात् ॥ २ ॥

३] ति० टी०–विगतसाध्वसाः महाराजदूतत्वेन तद्भृत्यभयरहिताः ॥ ३ ॥

रा० टी०–बद्धाञ्जलीति । बद्धाञ्जलिपुटाः विगतसाध्वसाः अतिहर्षप्रापकजनकसंदेशस्य वक्तव्यत्वेन विगतभयाः सर्वे दूताः प्रश्रितं नम्रतासूचकं मधुराक्षरं मनोहराक्षरविशिष्टं वाक्यं जनकसंदेशं राजानं दशरथमब्रुवन् ॥ ३ ॥

गो० टी०–विगतसाध्वसाः दशरथसौजन्येन विज्ञापने निर्भयाः ॥ ३ ॥

४] ति० टी०–साग्निहोत्रपुरस्कृतः पुरस्कृताग्निहोत्रसहितः आहिताग्न्यादिः । पुरस्कृता मन्त्र्यादयः अग्निहोत्रपदेन तत्साधनऋत्विजस्तैः सहित इत्यर्थ इत्यन्ये ॥ ४ ॥

५] ति० टी०–कुशलं क्षेमम् । अव्ययमनपायम् । हे महाराज ! आपृच्छते 'आङि नु पृच्छयोः' इत्यात्मनेपदम् । पुरःसरा भृत्यास्तत्सहितम् ॥ ५ ॥

रा० टी०–तद्वचनमेवाह–मैथिल इति । हे महाराज ! साग्निहोत्रपुरस्कृतः पुरस्कृतो योऽग्निहोत्रस्तत्सहितः एव मैथिलः मिथिलोद्भवः जनकः जनानां कं सुखं यस्मात्स प्रजासुखदातेत्यर्थः । जनकः जनकाभिधो राजा सोपाध्यायपुरोहितसुपाध्यायपुरोहितसहितं सपुरःसरं पुरःसरा भृत्यास्तत्सहितं त्वां स्नेहसंसक्तया अतिस्नेहसंमिलितयैव गिरा अव्ययं ध्वंसरहितं कुशलं मुहुर्मुहुरेव आपृच्छते अस्मद्वारेति शेषः । चशब्दावेवार्थौ । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–मैथिल इत्यादि श्लोकत्रयमेकान्वयम् । मैथिलः मिथिलेश्वरः पुरस्कृताग्निहोत्रसहितः साग्निहोत्रपुरस्कृतः आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । पुरः सरन्तीति पुरःसराः भृत्याः तत्सहितम् एवंभूतं त्वां कुशलं क्षेममव्ययमनपायं योगमिति यावत् आपृच्छते मद्वचनादिति शेषः " आङि नुपृच्छ्योरुपसंख्यानम्" इति आत्मनेपदम् । अत्र द्वितीयजनकशब्दोऽपि प्रकृतजनकशब्दाविस्मरणार्थः ॥ ४ ॥ ५ ॥

६] ति० टी०–अनुमतेऽनुमतकृत्यसाधननिमित्तम् ॥ ६ ॥

रा० टी०–पृष्ट्वेति । अव्ययः व्यग्रतारहितः वैदेहः विदेहकुलोद्भवः मिथिलाधिपो जनकः कौशिकानुमते विश्वामित्रसंमतौ सत्यां भवन्तं कुशलं पृष्ट्वा इदं वाक्यमब्रवीत् ॥ ६ ॥

गो० टी०–कौशिकानुमते कौशिकानुमत्या ॥ ६ ॥

७] ति० टी०–वीर्यशुल्केति प्रतिज्ञा पूर्वं युष्माकं विदितेत्यन्वयः । विमुखीकृता इत्यपि विदितम् ॥ ७ ॥

रा० टी०–तद्वाक्यमेवाह–पूर्वमित्यादिषड्भिः । ममात्मजा वीर्यशुल्का समाधिकरहितपराक्रममूल्या इति प्रतिज्ञा मत्कर्तृकनियोगः पूर्वं विदिता अत एव कृतामर्षाः निर्वीर्याः अल्पपराक्रमाः राजानो विमुखीकृताः तत्तद्गम्यधनुर्ग्रहणादिनैव मत्कन्या लभ्येति मत्प्रतिज्ञया दूरीकृता इत्यर्थः । आसन्निति शेषः । चशब्द इत्यर्थे ॥ ७ ॥

गो० टी०–पूर्वमिति । वीर्यशुल्केति मम प्रतिज्ञा भवद्भिर्विदिता राजानश्च निर्वीर्याः धनुरारोपणासमर्थाः विमुखीकृता इत्यपि विदितमित्यन्वयः ॥ ७ ॥

८] ति० टी०–तव पुत्रकैरिति तव पुत्रेण रामेणेत्यर्थः । कप्रत्ययेनाल्पार्थेन बाल्यद्योतनम् । जामातृबुद्धया महाबलत्वेनेश्वरबुद्धया च पूज्यत्वेन बहुवचनप्रयोगः ॥ ८ ॥

१ दूता इति गो. रा. पाठः । २ प्रयता इति गो. पाठः । ३ पुरस्कृतमिति गो. पाठः । ४ अव्यय इति रा. पाठः । ५ पुरःसरैरिति गो. रा. पाठः । ६ वैरैरिति गो. पाठः ।

तच्च रत्नं धनुर्दिव्यं मध्ये भग्नं महात्मना । रामेण हि महाबाहो महत्यां जनसंसदि ॥ ९ ॥
अस्मै देया मया सीता वीर्यशुल्का महात्मने । प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ १० ॥
सोपाध्यायो महाराज पुरोहितपुरस्कृतः । शीघ्रयागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥ ११ ॥
प्रतिज्ञां मम राजेन्द्र निर्वर्तयितुमर्हसि । पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे ॥ १२ ॥
एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् । विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥ १३ ॥
दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः । वसिष्ठं वामदेवं च मन्त्रिणश्चैवमब्रवीत् ॥ १४ ॥
गुप्तः कुशिकपुत्रेण कौसल्यानन्दवर्धनः । लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥ १५ ॥
दृष्टवीर्यस्तु काकुत्स्थो जनकेन महात्मना । संप्रदानं सुतायास्तु राघवे कर्तुमिच्छति ॥ १६ ॥
यदि वो रोचते वृत्तं जनकस्य महात्मनः । पुरीं गच्छामहे शीघ्रं मा भूत्कालस्य पर्ययः ॥ १७ ॥

रा० टी०–सेति । हे राजन् मदनुरागोत्पादक ! हे राजन् अतिप्रकाशविशिष्ट ! विश्वामित्रपुरःसरैः विश्वामित्रः पुरःसरः अग्रगन्ता येषां तैः यदृच्छया अस्मत्प्रारब्धवशेन आगतैस्तव पुत्रकैः अत्यनुकम्पितत्वत्सुतैः सा समाधिकरहितपराक्रममूल्या इयं मम सुता निर्जिता । अत्र पुत्रकैरिति बहुवचनेन रामलक्ष्मणौ परमपूज्याविति जनकराजनिश्चयः सूचितः ॥ ८ ॥

गो० टी०–सेयमिति । सेयमुक्तरीत्या सर्वैः प्रार्थनीया मम सुता त्वया सह संबन्धार्हस्य मे पुत्री । स्वपुरे तदागमनप्रसक्तिं दर्शयति–विश्वामित्रपुरःसरैरिति । यदृच्छया मद्भागधेयात् पुत्रकैः पूजायां बहुवचनं जामातृत्वाध्यवसायान्महाराजकुमारत्वाद्वा पूजा अल्पार्थेन कप्रत्ययेन बाल्यं द्योतितम् ॥ ८ ॥

९] ति टी०–तच्च पूर्वं दक्षाध्वरध्वंससमये रुद्रेण यद्धनुराच्छत्रादिपुरःसरसकलसुरजयः कृतस्तच्चेत्यर्थः । रत्नं धनुरुत्तमं धनुः ॥ ९ ॥

रा० टी०–निजेयप्रकारमाह–तदिति । हे महाबाहो ! महात्मना रामेण तत् अन्यग्रहणायशक्यं रत्नमुत्तमं दिव्यं धनुर्महत्यां जनसंसदि जनसभायामेव मध्ये भग्नमाहिगन्द एवार्थे ॥ ९ ॥

गो० टी०–कथं निर्जितेत्यत्राह–तच्चेति । तच्च ऐश्वरमपि नेदमैन्द्रजालिकमित्याह–महात्मनेति । नेयं पक्षपातोक्तिरित्याह–महत्यामिति ॥ ९ ॥

१०–११] ति० टी०–प्रतिज्ञां वीर्यशुल्कतया सीतादानप्रतिज्ञां तर्तुं पूरयितुम् ॥ १० ॥ ११ ॥

रा० टी०–अस्मा इति । महात्मने अस्मै रामाय वीर्यशुल्का सीता देया अवश्यं दातुं योग्या । तत्र हेतुः प्रतिज्ञां स्वकृतनियोगमहं तर्तुमिच्छामि तस्माद्धेतोः अनुज्ञातुं त्वमर्हसि आगमशास्त्रस्यानित्यत्वादिङभावः ॥ १० ॥

रा० टी०–सेति । हे महाराज ! सोपाध्यायः उपाध्यायसहितः पुरोहितपुरस्कृतः पुरस्कृतपुरोहितस्त्वं शीघ्रं राघवौ द्रष्टुमर्हसि अतः शीघ्रमागच्छ ते भद्रम् । शीघ्रमित्युभयान्वयि ॥ ११ ॥

गो० टी०–प्रतिज्ञां प्रतिज्ञातं सीतापदानम् ॥ १०–११ ॥

१२] ति० टी०–उभयोरेवोभयोरपि पुत्रयोः न केवलं रामस्यैवेत्यर्थः । प्रीतिं विवाहजाम् एतेन लक्ष्मणायोर्मिलाप्रदानं सूचितम् ॥ १२ ॥

रा० टी०–प्रतिज्ञामिति । हे राजेन्द्र ! मम प्रतिज्ञां निर्वर्तयितुं संपालयितुं त्वमर्हसि तेनोभयोः पुत्रयोः प्रीतिं त्वमुपलप्स्यसे प्राप्स्यसि । एवो हेत्वर्थे ॥ १२ ॥

गो० टी०–प्रीतिं त्वद्दर्शनप्रीतिं सीताप्रदानप्रीतिं वा । पुत्रयोः पुत्री च पुत्रश्च तयोः एकशेषः । प्रीतिं तद्विषयप्रीतिं तदुभयकल्याणदर्शनप्रीतिमिति यावत् । मत्पुत्र्यां त्वत्पुत्रे चेत्यर्थः । यद्वा स्नुषा च पुत्रीत्येव गृह्यते । यद्वा लक्ष्मणायोर्मिलाप्रदानं सिद्धं कृत्वोच्यते–उभयोरिति ॥ १२ ॥ १३ ॥ १४ ॥

१३] ति० टी०–अभ्यनुज्ञातोऽभ्यनुज्ञातकन्याप्रदानकृत्यः

रा० टी०–एवमिति । विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः विदेहाधिपतिर्जनक एवं मधुरं वाक्यमब्रवीत् ॥ १३ ॥

१४] ति० टी०–एवं वक्ष्यमाणम् ॥ १४ ॥

रा० टी०–दूतेति । तत् दूतवाक्यं श्रुत्वा परमहर्षितः स राजा दशरथः वशिष्ठादीनब्रवीत् ॥ १४ ॥

१५–१६] ति० टी०–विदेहेषु विदेहानां निवासभूते जनपदे ॥ १५–१६ ॥

रा० टी०–तद्वचनमेवाह–गुप्त इति । कुशिकपुत्रेण गुप्तः रक्षितः कौशल्यानन्दवर्धनः असौ रामः भ्रात्रा लक्ष्मणेन सह विदेहेषु वसति ॥ १५ ॥

रा० टी०–दृष्टेति । महात्मना जनकेन दृष्टवीर्यः काकुत्स्थो रामोऽस्ति अतो राघवे एव सुतायाः संप्रदानं कर्तुमिच्छति । एकस्तुशब्दो हेतौ अपर एवार्थे ॥ १६ ॥

गो० टी०–गुप्त इत्यादि । विदेहेषु विदेहानां निवासभूते देशे "जनपदे लुप्" इति लुप् । असाविति बुद्धिसंनिकर्षेणोच्यते ॥ १५ ॥ १६ ॥

१७] ति० टी०–यदि वो रोचते तत्तम् यौनसंबन्धयोग्यमित्यर्थः । पर्ययोऽतिक्रमः ॥ १७ ॥

---

१ राजन्निति गो. पाठः । २ महाराज इति गो. पाठः । ३ प्रीतिं चेति गो. पाठः । ४ मन्त्रिणोऽन्यांश्च सोऽब्रवीदिति गो. रा. पाठः । ५ कालविपर्यय इति रा. पाठः ।

मन्त्रिणो बाढमित्याहुः सह सर्वैर्महर्षिभिः । सुप्रीतश्चाब्रवीद्राजा श्वो यात्रेति च मन्त्रिणः॥ १८ ॥
मन्त्रिणस्तु नरेन्द्रस्य रात्रिं परमसत्कृताः । ऊषुः प्रमुदिताः सर्वे गुणैः सर्वैः समन्विताः॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ।

सपरिग्रहो दशरथो मिथिलांप्राप जनकस्तं प्रत्युद्गम्याभ्यपूजयत्तयोः संलापाः प्रादुरासन्सर्वेऽपि स्वशिबिरेषु सुखमूषुः ।
ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः । राजा दशरथो हृष्टः सुमन्त्रमिदमब्रवीत् ॥ १ ॥
अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलम् । व्रजन्त्वग्रे सुविहिता नानारत्नसमन्विताः ॥ २ ॥
चतुरङ्गबलं चापि शीघ्रं निर्यातु सर्वशः । ममाज्ञासमकालं च यानं युग्यमनुत्तमम् ॥ ३ ॥
वसिष्ठो वामदेवश्च जाबालिरथ कश्यपः । मार्कण्डेयस्तु दीर्घायुर्ऋषिः कात्यायनस्तथा ॥ ४ ॥

रा० टी०-यदीति । महात्मनो जनकस्य वृत्तं यदि वो युष्मभ्यं रोचते तर्हि पुरीं मिथिलां वयं शीघ्रं गच्छामहे वृत्तान्तज्ञापनार्थमिति शेषः । तत्र हेतुः कालविपर्ययो विवाहसमयविलम्बो मा भूत् ॥ १७ ॥

गो० टी०-यदि वो रोचत इति । यौनसंबन्धयोग्यमिति शेषः । पर्ययः अतिक्रमः॥ १७ ॥

१८] ति० टी०-श्वो यात्रेति मन्त्रिणोऽब्रवीदित्यन्वयः । तदर्थं उद्यमः क्रियतामिति शेषः॥ १८ ॥

रा० टी०-मन्त्रिण इति । सर्वैर्महर्षिभिः सह मन्त्रिणो बाढमित्योभनमेतदित्याहुः । अत एव सुप्रीतो राजा दशरथः श्व इतोऽव्यवहितागामिदिवसे एव यात्रेति मन्त्रिणः अब्रवीत् । एकश्चशब्दो हेतौ द्वितीय एवार्थे ॥ १८ ॥

गो० टी०-मन्त्रिण इति । श्वो यात्रेत्यब्रवीदिति तदर्थमुद्युङ्ध्वमिति भावः॥ १८ ॥

१९] ति० टी०-मन्त्रिणो जनकमन्त्रिणः । गुणैः सत्कारातिशयैः । ' नरेन्द्रश्च ' इति पाठे स च सुदित उवासेति विपरिणामः । ' नरेन्द्रस्य ' इति पाठे जनकस्येत्यर्थः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

रा० टी०-मन्त्रिण इति । परमसत्कृताः अत एव प्रमुदिताः सर्वैर्गुणैर्मन्त्रिधर्मैः समन्विता युक्ता नरेन्द्रस्य सर्वमन्त्रिणः तां रात्रिमूषुः ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

गो० टी०-मन्त्रिणः जनकमन्त्रिणः गुणैः सत्कारातिशयैः तां रात्रिं तस्यां रात्र्यामित्यर्थः॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्यानेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

१] ति० टी०-तत इति ॥ १ ॥

रा० टी०-तत इति । ततः तस्यां रात्र्यां व्यतीतायां सत्यां सोपाध्यायः उपाध्यासहितः सबान्धवो बान्धवसहितः हृष्टो राजा दशरथः सुमन्त्रमिदमब्रवीत् ॥ १ ॥

गो० टी०-अथ दशरथस्य मिथिलागमनमेकोनसप्ततितमे-ततो रात्र्यामित्यादि ॥ १ ॥

२] ति० टी०-धनाध्यक्षाः कोशरक्षाधिकारिणः । पुष्कलं बहु श्रेष्ठं च । सुविहिताः सुरक्षिताः सुसंपादितकल्याणोचितकर्माणो वा ॥ २ ॥

रा० टी०-तद्वचनमेवाह-अद्येति । नानारत्नसमन्विताः अनेकविधरत्नयुक्ताः अत एव सुविहिताः अश्ववारादिभिः सुरक्षिताः सर्वे धनाध्यक्षाः कोशाधिकारिणः पुष्कलमधिकत्वादिना श्रेष्ठं धनमादाय गृहीत्वाग्रे व्रजन्तु 'श्रेयाञ्छ्रेष्ठश्च पुष्कलः' इत्यमरसिंहः ॥ २ ॥

गो० टी०-धनाध्यक्षाः कोशरक्षाधिकृताः पुष्कलं श्रेष्ठं 'श्रेयान् श्रेष्ठः पुष्कलः स्याद् ' इत्यमरः । सुविहिताः सुसंपादितकल्याणोचितकर्माणः ॥ २ ॥

३-४] ति० टी०-यानं शिबिकादि युग्यमश्वादि अनुत्तमानि श्रेष्ठानि यानानि युग्यानि च यान्तु वसिष्ठाद्यर्थमिति शेषः ॥ ३ ॥ ४ ॥

रा० टी०-चतुरङ्गेति । चतुरङ्गबलं रथाद्यङ्गसहितसैन्यं सर्वशः कृत्स्नमनुत्तममतिश्रेष्ठं यानयुग्यं यानं शिबिकाप्रभृति युग्यमश्वप्रभृति च ममाज्ञासमकालमेव शीघ्रं निर्यातु अपिशब्द एवार्थे । यानयुग्यमिति सेनाङ्गत्वादेकवचनान्तम् ॥ ३ ॥

गो० टी०-यानयुग्यमिति यानं शिबिकान्दोलिकादि युग्यं रथादि सेनाङ्गत्वादेकवद्भावः ॥ ३ ॥

रा० टी०-वसिष्ठ इति । वसिष्ठादय एते द्विजा अग्रे एव प्रयान्तु दृताः जनकराजमन्त्रिणः मां त्वरयन्ति अतः काला-

१ स इति गो. पाठः । २ तामिति गो. रा. पाठः । ३ ते इति गो. रा. पाठः । ४ यानयुग्यमिति गो. रा. पाठः । ५ काश्यप इति गो. रा. पाठः । ६ स्विति गो. अपीति रा. पाठः ।

एते द्विजाः प्रयान्त्वग्रे स्यन्दनं योजयस्व मे । यथा कालात्ययो न स्याद्दूता हि त्वरयन्ति माम्॥ ५ ॥
वचनाच्च नरेन्द्रस्य सेना च चतुरङ्गिणी । राजानमृषिभिः सार्धं व्रजन्तं पृष्ठतोऽन्वयात् ॥ ६ ॥
गत्वा चतुरहं मार्गं विदेहानभ्युपेयिवान् । राजा च जनकः श्रीमान्श्रुत्वा पूजामकल्पयत्॥ ७ ॥
ततो राजानमासाद्य वृद्धं दशरथं नृपम् । मुदितो जनको राजा प्रहर्षं परमं ययौ ॥ ८ ॥
उवाच वचनं श्रेष्ठो नरश्रेष्ठं मुदान्वितम् । स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव ॥ ९ ॥
पुत्रयोरुभयोः प्रीतिं लप्स्यसे वीर्यनिर्जिताम् । दिष्ट्या प्राप्तो महातेजा वसिष्ठो भगवानृषिः ॥ १० ॥
सह सर्वैर्द्विजश्रेष्ठैर्देवैरिव शतक्रतुः । दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम्॥ ११॥
राघवैः सह संबन्धाद्वीर्यश्रेष्ठैर्महाबलैः । श्वः प्रभाते नरेन्द्रैं त्वं संवर्तयितुमर्हसि ॥ १२ ॥
यज्ञस्यान्ते नरश्रेष्ठ विवाहमृषिसत्तमैः । तस्य तद्वचनं श्रुत्वा ऋषिमध्ये नराधिपः ॥ १३ ॥

त्ययो यथा न स्यात् तथैव मे स्यन्दनं योजयस्व । श्लोकद्वयमेकान्वयि । हिशब्द एवार्थे ॥ ४ ॥ ५ ॥

गो० टी०–यथा कालात्ययः कालातिक्रमः न स्यात्तथा प्रयान्त्विति योजना ॥ ४ ॥ ५ ॥ ६ ॥

५] ति० टी०–अग्रे द्विजप्रयाणं प्रयाणे कल्याणाय । प्रयान्तु उक्तयानयुग्यैरिति शेषः । दूता जनकदूताः ॥ ५ ॥

६] ति० टी०–चद्वयं चिन्त्यफलं पादपूरणमात्रार्थम् ॥६॥

रा० टी०–वचनादिति । नरेन्द्रस्य महाराजाधिराजदशरथस्य वचनादेव चतुरङ्गिणी सेना ऋषिभिः सार्धमेव व्रजन्तं राजानं पृष्ठतोऽन्वगात् । चशब्दद्वयमेवार्थकम् ॥ ६ ॥

७] ति० टी०–दूतानां त्रिदिनगम्योऽपि मार्गश्चतुरङ्गबलोपेतप्रयाणत्वाच्चतुर्दिनं वासो मध्ये । श्रुत्वा दशरथागमनम् ॥ ७ ॥

रा० टी०–गत्वेति । चतुरहं चतुर्दिनपर्यन्तं मार्गं गत्वा विदेहानभ्युपेयिवान् महाराजाधिराजदशरथ इति शेषः । श्रीमान् राजा जनकः श्रुत्वा दूतादिद्वारा तदागमनमवगत्यैव पूजां सत्कृतिसामग्रीमकल्पयत् समपादयत् । चशब्द एवार्थे॥७॥

गो० टी०–चतुरहं चतुर्व्हःसु श्रुत्वा दशरथमागतं श्रुत्वा पूजाम् उपधाम् ॥ ७ ॥

८–९] ति० टी०–राजानमासाद्य मुदितो हर्षं ययौ । मोदस्यैवाधिकावस्था हर्ष इति भेदः ॥ ८ ॥ ९ ॥

रा० टी०–तत इति । ततः सामग्रीसंपादनानन्तरमेव वृद्धं विलक्षणैश्वर्यवत्त्वादिना वृद्धिं प्राप्तं राजानं परमानुरागविशिष्टं दशरथं नृपं आसाद्य प्राप्य मुदितः आगमनश्रुतिजनितहर्षविशिष्टः राजा जनकः परममवधिरहितं प्रहर्षं दर्शनजनितविलक्षणानन्दं ययौ प्राप । चशब्द एवार्थे ॥ ८ ॥

गो० टी०–राजानमासाद्य मुदितः विवाहः शीघ्रभावीति हर्षं ययौ ॥ ८ ॥

रा० टी०–उवाचेति । नरश्रेष्ठः महाराजाधिराजजनकः मुदान्वितं नरश्रेष्ठं महाराजाधिराजदशरथमुवाच । तद्वचनमेवाह–हे महाराज ! हे राघव रघुकुलप्रादुर्भूत! दिष्ट्यास्मद्भाग्यवशेन त्वं प्राप्तोऽसि ते स्वागतमस्तु ॥ ९ ॥

गो० टी०–वीर्यनिर्जितां पुत्रयोर्वीर्येण धनुर्भङ्गादिना संभूतामित्यर्थः ॥ ९ ॥

१०] ति० टी०–वीर्यं शौर्यम् ॥ १० ॥

रा० टी०–पुत्रयोरिति । वीर्यनिर्जितां वीर्येण प्रादुर्भूतसमाधिकरहितपराक्रमेण निर्जितामत्युत्कर्षं प्राप्तामुभयोः पुत्रयोः प्रीतिं कान्तिं त्वं लप्स्यसे द्रक्ष्यसि दिष्ट्या अस्मद्भाग्योदयेन महातेजा भगवान् अतिसामर्थ्यविशिष्टः ऋषिः सर्वज्ञो वासिष्ठः देवैः सह शतक्रतुरिन्द्र इव सर्वैर्द्विजश्रेष्ठैः सह प्राप्तः इह समागतः । सार्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०–वसिष्ठस्य शतक्रतुसाम्यं पूर्णधर्मत्वेन ॥ १० ॥

११] ति० टी०–वसिष्ठे इन्द्रसादृश्यं पूर्णधर्मत्वेन । विघ्नाः कन्यादानप्रतिबन्धाः ॥ ११ ॥

रा० टी०–दिष्ट्येति । हे नरेन्द्रेन्द्र । मे विघ्नाः कन्याविवाहप्रतिबन्धकीभूतदुष्टनृपाः दिष्ट्या निर्जिताः दिष्ट्यैव वीर्यश्रेष्ठैर्महात्मभिः राघवैर्भवद्भिःसह संबन्धान्मे कुलं पूजितं भविष्यतीति शेषः । अतः श्वः आगामिनि प्रभाते हे नरश्रेष्ठ ! यज्ञस्य यागस्यान्ते ऋषिसंमतं विवाहं निर्वर्तयितुं संसाधयितुं त्वमर्हसि । अर्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

१२] ति० टी०–राघवैः सह संबन्धं प्राप्य पूजितं मे कुलम् । नरेन्द्र सर्वराजश्रेष्ठ । संवर्तयितुं निर्वर्तयितुम् विवाहमित्यधिमेणान्वयः ॥ १२ ॥

गो० टी०–विघ्नाः कन्याप्रदानप्रतिबन्धकाः पूजितत्वे हेतुमाह–राघवैरिति । यत इत्युपस्कार्यम् ॥ ११ ॥

१३] ति० टी०–यज्ञान्तेऽवभृथे ॥ १३ ॥

रा० टी०–तस्येति । नराधिपो दशरथः तस्य जनकस्य तद्वचनमृषिमध्ये श्रुत्वा वाक्यविदां श्रेष्ठं महीपतिं जनकं वाक्यं प्रत्युवाच ॥ १३ ॥ १४ ॥

गो० टी०–इक्ष्वाकुप्रथमवंशत्वेन नरेन्द्राणामिन्द्रत्वम् । यज्ञ-

---

१ स्थिति गो. पाठः । २ हर्ष चेति गो. पाठः । ३ च नरश्रेष्ठ इति गो. पाठः । ४ मुदान्वित इति गो. पाठः । ५ महाराज इति गो. रा. पाठः । ६ महात्माभिरिति गो. रा. पाठः । ७ नरेन्द्रेन्द्र निर्वर्तयितुमिति गो. रा. पाठः । ८ संमतमिति गो. रा. पाठः ।

वाक्यं वाक्यविदां श्रेष्ठः[1] प्रत्युवाच महीपतिम् । प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा ॥ १४ ॥
यथा वक्ष्यसि धर्मज्ञ तत्करिष्यामहे वयम् । तद्धर्मिष्ठं[2] यशस्यं च वचनं सत्यवादिनः ॥ १५ ॥
श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः । ततः सर्वे मुनिगणाः परस्परसमागमे ॥ १६ ॥
हर्षेण महता युक्तास्तां रात्रिमवसन्सुखम्[3] । [अथ रामो महातेजा लक्ष्मणेन समं ययौ ।
विश्वामित्रं पुरस्कृत्य पितुः पादावुपस्पृशन् ॥] राजा च राघवौ पुत्रौ निशाम्य[4] परिहर्षितः ॥ १७ ॥
उवास[5] परमप्रीतो जनकेनाभिपूजितः । जनकोऽपि महातेजाः क्रियाधर्मेण तत्त्ववित्[6] ॥
यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह ॥ ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

स्यान्त इति । त्रिचतुरदिनानन्तरभाविनीति शेषः । ऋषिसंमतं ब्राह्मं विवाहमित्यर्थः ॥ १२ ॥

१४] ति० टी०–प्रतिग्रहः कन्यागवादीनाम् दातृवशो यदि दाता ददाति तदा प्रतिग्राह्यं प्रतिग्रहीत्रेति स्थितः । एतद्वाक्यं मया श्रुतम् । क्षत्रियतया प्रतिग्रहधर्मस्याद्याप्यज्ञानमेव सांप्रतमेवानुभवो भविष्यतीति श्रुतमित्युक्तम् ॥ १४ ॥

रा० टी०–तद्वचनमेवाह–प्रतीति । प्रतिग्रहः दातृवशः एतत् मया पुरा श्रुतमतः हे धर्मज्ञ ! यथा त्वं वक्ष्यसि तत्तथा वयं करिष्यामहे ॥ १५ ॥

गो० टी०–महीपतिं जनकम् ॥ १३ ॥

गो० टी०–प्रतिग्रह इति । कन्यागवादीनां प्रतिग्रहो दातृवश एव यदा दाता ददाति तदा प्रतिगृह्यते प्रतिग्रहीत्रेति वस्तुस्थितिः एतत् युष्मदीयं वीर्यशुल्ककन्याप्रदानमपि पूर्वमेव श्रुतं अतःपरं कन्याप्रदस्त्वं यथा वक्ष्यसि तथा वयं करिष्यामः ॥१४॥

१५] ति० टी०–अतो यथा त्वं वक्ष्यसि तद्वयं करिष्यामहे ॥ १५ ॥

रा० टी०–तदिति । सत्यवादिनो दशरथस्य धर्मिष्ठं यशस्यं च तद्वचनं श्रुत्वा विदेहाधिपतिर्जनकः परं विस्मयमतितेजःप्रतापैश्वर्यादिविशिष्टस्यातिविनयोक्त्यात्याश्चर्यमागतः प्राप्तः ॥ १६ ॥

गो० टी०–विस्मयमिति । प्रतिग्रहो दातृवश इत्यादिविनयोक्तेरिति भावः ॥ १६ ॥

१६] ति० टी०–विस्मयं कन्याया वीर्येण शुल्केन जितत्वान्मदनुमत्यनपेक्षायामपि राज्ञो विनयेन तादृशवचनाद्विस्मयः ॥ १६ ॥

रा० टी०–तत इति । ततः उक्तिप्रत्युक्तिश्रवणानन्तरं परस्परसमागमे सति महता हर्षेण युक्ताः सर्वे मुनिगणास्तां निशां सुखं यथा स्यात्तथा अवसन् ॥ १७ ॥

गो० टी०–परस्परसमागमे संभूते सतीति शेषः ॥ १६ ॥

१७] ति० टी०–निशाम्य दृष्ट्वा ॥ १७ ॥

रा० टी०–अथेति । अथ महाराजद्वयसमागमानन्तरं महातेजा रामः पितुः पादौ उपस्पृशतुपस्प्रष्टुं विश्वामित्रं पुरस्कृत्य लक्ष्मणेन समं ययौ । "लक्षणहेत्वोः क्रियायाः" इति शतात्र ॥ १८ ॥

रा० टी०–राजेति । राघवौ रघुवंशभूषणौ पुत्रौ निशाम्यावलोक्यैव परिहर्षितः परितः हर्षिता हर्षं प्रापिताः पुत्रादयो येन सः जनकेनाभिपूजितः परमप्रीतो राजा दशरथः उवाच । चशब्द एवार्थे ॥ १९ ॥

गो० टी०–निशाम्य दृष्ट्वा " शमोऽदर्शने " इति मित्वनिषेधान्न ह्रस्वः ॥ १७ ॥

१८] ति० टी०–यज्ञस्यावशिष्टाः क्रियाः । सुताभ्यां दुहित्रोः कन्यादानशेषतया यत्कर्तव्यमङ्कुरारोपणादि लौकिकालौकिकं तत्सर्वं कृत्वोवास ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्ड एकोनसप्ततितमः सर्गः ॥ ६९ ॥

रा० टी०–जनक इति । महातेजास्तत्ववित् जनकोऽपि यज्ञस्य क्रियां कृत्यं सुताभ्यां दुहितृभ्यां धर्मेण सदाचारहेतुभूतेनैव कृत्वा कारयित्वैव रात्रिमुवास ह प्रसिद्धमेतत् । चावेवार्थौ ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

गो० टी०–जनकोऽपीति । यज्ञस्य क्रियामवशिष्टक्रियां सुताभ्यां पुत्र्योः क्रियामङ्कुरार्पणादिकम् ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

---

१ श्रेष्ठमिति रा. पाठः । २ धर्मिष्ठं च यशस्य चेति गो. पाठः । ३ निशामिति गो. रा. पाठः । ४ श्लोकोऽयमधिको रा. पुस्तके । ५ उवाचेति गो. रा. पाठः । ६ क्रियामिति गो. रा. पाठः ।

सप्ततितमः सर्गः ।

ततो जनकः सपरिजनमनुजं कुशध्वजं समानिनाय । मन्त्रिमुखाज्जनकाहूतो दशरथो विश्वामित्रादिभिः साकं संजवनमाजगाम राज्ञा प्रवर्तितश्च वसिष्ठो आरामभिश्वाकुवंशं प्रशशंस ।

ततः प्रभाते जनकः कृतकर्मा महर्षिभिः । उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितम् ॥ १ ॥
भ्राता मम महातेजा वीर्यवानतिधार्मिकः । कुशध्वज इति ख्यातः पुरीमध्यवसच्छुभाम् ॥ २ ॥
वार्याफलकपर्यन्तां पिबन्निक्षुमतीं नदीम् । सांकाश्यां पुण्यसंकाशां विमानमिव पुष्पकम् ॥ ३ ॥
तमहं द्रष्टुमिच्छामि यज्ञगोप्ता स मे तैतः । प्रीतिं सोऽपि महातेजा इमां भोक्ता मया सह ॥ ४ ॥
एवमुक्ते तु वचने शतानन्दस्य संनिधौ । आगताः केचिदव्यग्रा जनकस्तान्समादिशत् ॥ ५ ॥
शासनात्तु नरेन्द्रस्य प्रययुः शीघ्रवाजिभिः । समानेतुं नरव्याघ्रं विष्णुमिन्द्राज्ञया यथा ॥ ६ ॥
सांकाश्यां ते समागम्य ददृशुश्च कुशध्वजम् । न्यवेदयन्यथावृत्तं जनकस्य च चिन्तितम् ॥ ७ ॥

१] ति० टी०–अथ ब्राह्मसंबन्धसदृशे यौनसंबन्धे वध्वपेक्षितः परस्परकुलाचारः सर्गाभ्याम्–तत इति । कृतकर्मा कृतनित्यक्रियः ॥ १ ॥

रा० टी०–रात्रिव्यतीतानन्तरकालिकं वृत्तमाह–तत इति । ततः तद्रात्रिव्यतीतानन्तरं प्रभाते प्रातःकाले महर्षिभिः कृतकर्मा वाक्यज्ञो जनकः पुरोहितं शतानन्दं वाक्यमुवाच॥१॥

गो० टी०–अथ जनकेन संबन्धार्हत्वायेक्ष्वाकुसंतानकीर्तनं सप्ततितमे । ततः प्रभात इत्यादि । कृतकर्मा समाप्तयज्ञादिक्रियः॥ १ ॥

२] ति० टी०–पुरीमध्यवसत् " उपान्वध्याङ्–" इति कर्मत्वम् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–भ्रातेति । महातेजाः अतितेजस्वी वीर्यवान् अतिपराक्रमः अतिधार्मिकः कुशध्वज इति ख्यातः मम भ्राता इक्षुमतीं नदीं तज्जलं पिबन् सन् शुभां मङ्गलस्वरूपां वार्याफलकपर्यन्तां वार्यः शत्रुागमवारणयोग्यः दृढप्राकारः तत्र युक्ताः ये आफलकाः यन्त्रविशेषाः तैर्युक्तः पर्यन्तः तटो यस्यास्तां पुण्यसंकाशां पुण्यानां पुण्यजनककर्मणां सकाशः प्रकाशो यस्यां पुष्पकं विमानमिव विपुलस्थलीकामित्यर्थः । सांकाश्यां सांकाश्याभिधां पुरीमध्यवसत् । द्वयोरेकत्रान्वयः ॥ २ ॥ ३ ॥

गो० टी०–भ्रातेत्यादि । अत्रत्यविशेषणानां शतानन्दपरिज्ञातानामप्युपदेशः परंपरया दशरथादिश्रोत्रं प्रापयितुम् वार्याफलकपर्यन्तां दुर्गसंरक्षणार्थं परिखारूपेणावस्थितायामिक्षुमत्यां वारिणि आकीर्णाः निखाताः फलकाः शलानि येषु ते वार्याफलकास्तादृशाः पर्यन्तप्रदेशा यस्यास्ताम् । वार्यामलकपर्यन्तामिति पाठे वार्यामलका आमलकविशेषास्तत्पर्यन्तां पुण्यसंकाशां पुण्यतुल्यां पुण्यवत्स्ववासिनां स्वत एवाभीष्टप्रदामित्यर्थः । पुष्पकं विमानमिव स्थितां सांकाश्यां पुरीं इक्षुमतीं नदीं पिबन् तज्जलं पिबन्नित्यर्थः । अध्यवसत् अधिवसति " उपान्वध्याङ्वसः" इत्याधारस्य कर्मत्वम् ॥ २ ॥ ३ ॥

३] ति०टी०–परबलं वारयितुमर्हो वार्यः प्राकारस्तत्स्था आफलका यन्त्रफलकास्तयुक्तः पर्यन्तः परिसरो यस्याः सा तथा । इक्षुमतीं पिबंस्तज्जलं पिबन् । सांकाश्यां तदाख्यां नगरीम् । ' वार्यामलकपर्यन्ताम् ' इति पाठे वार्यामलका आमलकविशेषाः पर्यन्तेषु यस्या इत्यर्थः । पुण्यसंकाशां पुण्यशब्देन तत्फलं स्वर्गस्तत्संकाशाम् तदुपमामित्यर्थः । पुष्पकं विमानं कौबेरं प्रसिद्धम् ॥ ३ ॥

४] ति० टी०–तमुक्तपुरवासिनम् । यज्ञगोप्ता मिथिलायां क्रियमाणयज्ञस्य सांकाश्यायामेव स्थित्वास्मद्यज्ञापेक्षितसामग्रीसंपादकत्वेन रक्षिता । इमां प्रीतिं जानकीपरिणयजाम् ॥ ४ ॥

रा० टी०–तमिति । तं कुशध्वजमहं द्रष्टुमिच्छामि यतो मे यज्ञगोप्ता एतद्यागसामग्रीसंपादकत्वादिनैतद्यागस्य रक्षकः महातेजाः कुशध्वजो मतोऽभिमतः अतः सोऽपि मया सह इमां प्रत्यक्षीभूतां प्रीतिं सीतारामविवाहजनितानन्दं भोक्ता अनुभविता ॥ ४ ॥

गो० टी०–यज्ञगोप्ता सांकाश्ये स्थित्वा यज्ञसामग्रीप्रेषणादिनेति भावः । इमां विवाहकल्याणजां भोक्तेति लुट् ॥ ४ ॥

५] ति० टी०–अव्यग्राः समर्थाः । समादिशच्छतानन्देन गन्तुं प्रैरयत् ॥ ५ ॥

रा० टी०–एवमिति । शतानन्दस्य संनिधौ एवमनेन प्रकारेण वचने वाक्ये उक्ते जनकेन कथिते सत्येव अव्यग्राः कार्यसाधने व्यग्रतारहिताः केचित् प्रेषणोचितपुरुषाः आगताः तान् जनकः समादिशत् कुशध्वजानयनार्थमाज्ञापयत् । तुशब्द एवार्थे ॥ ५ ॥

६–७] ति० टी०–नरेन्द्रशासनाच्छतानन्दप्रेरिताः प्रययुः दूता इति शेषः ॥ ६ ॥ ७ ॥

रा० टी०–शासनादिति । नरेन्द्रस्य जनकस्य शासनात् एव नरव्याघ्रं कुशध्वजमानेतुं शीघ्रवाजिभिः झटितिगमनशीलाः

१ यवीयानिति गो. रा. पाठः । २ मत इति गो. रा. पाठः । ३ नास्त्ययं श्लोको गो. पुस्तके । ४ अयं सार्धश्लोको गो. नास्ति ।

तद्वृत्तं नृपतिः श्रुत्वा दूतश्रेष्ठैर्महाजवैः । आज्ञया तु नरेन्द्रस्य आजगाम कुशध्वजः ॥ ८ ॥
स ददर्श महात्मानं जनकं धर्मवत्सलम् । सोऽभिवाद्य शतानन्दं जनकं चातिधार्मिकम् ॥ ९ ॥
राजार्हं परमं दिव्यमासनं सोऽध्यरोहत । उपविष्टावुभौ तौ तु भ्रातरावमितद्युती ॥ १० ॥
प्रेषयामासतुर्वीरौ मन्त्रिश्रेष्ठं सुदामनम् । गच्छ मन्त्रिपते शीघ्रमिक्ष्वाकुममितप्रभम् ॥ ११ ॥
आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणम् । औपकार्यां स गत्वा तु रघूणां कुलवर्धनम् ॥ १२ ॥
ददर्श शिरसा चैनमभिवाद्येदमब्रवीत् । अयोध्याधिपते वीर वैदेहो मिथिलाधिपः ॥ १३ ॥
स त्वां द्रष्टुं व्यवसितः सोपाध्यायपुरोहितम् । मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तथा ॥ १४ ॥
सबन्धुरगमत्तत्र जनको यत्र वर्तते । राजा च मन्त्रिसहितः सोपाध्यायः सबान्धवः ॥ १५ ॥
वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत् । विदितं ते महाराज इक्ष्वाकुकुलदैवतम् ॥ १६ ॥
वक्ता सर्वेषु कृत्येषु वसिष्ठो भगवानृषिः । विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः ॥ १७ ॥
एष वक्ष्यति धर्मात्मा वसिष्ठो मे यथाक्रमम् । तूष्णींभूते दशरथे वसिष्ठो भगवानृषिः ॥ १८ ॥

प्रययुः तत्र दृष्टान्तः विष्णुसुपेन्द्रमानेन्तुमिन्द्राज्ञया यथा तत्पुरुषा इति शेषः । तुशब्द एवार्थे ॥ ६ ॥

गो० टी०–नरेन्द्रस्य शासनात् शतानन्दवचनद्वारकादित्यर्थः । विष्णुसुपेन्द्रम् ॥ ५ ॥ ६ ॥

रा० टी०–सांकाश्यामिति । ते जनकप्रेषिताः पुरुषाः सांकाश्यां संकाश्यनिर्मितनगरीं समागम्य संप्राप्य कुशध्वजं ददृशुः वृत्तं जनकोक्तवृतान्तं जनकस्य चिन्तितं च यथावत्यवेदयंश्च ॥७॥

८] ति० टी०–नृपतिः कुशध्वजः ॥ ८ ॥

रा० टी०–तदिति । महाबलैर्दूतश्रेष्ठैर्वर्णितं तद्वृत्तं श्रुत्वैव नृपतिः कुशध्वजः नरेन्द्रस्य जनकस्याज्ञया दूतोक्ताज्ञापनेन जगाम मिथिलामिति शेषः । तुशब्द एवार्थे ॥ ८ ॥

९] ति० टी०–पूर्वं शतानन्दमभिवाद्य ततो जनकं चाभिवाद्येत्यर्थः ॥ ९ ॥

रा० टी०–स इति । महात्मानं शतानन्दं धर्मवत्सलं जनकं च स कुशध्वजो ददर्श स कुशध्वजः शतानन्दं धार्मिकं राजानं जनकं चाभिवाद्य प्रणम्य राजार्हं राजोचितं परमसुत्कृष्टं दिव्यमासनमध्यरोहत तयोराज्ञया तत्रोपाविशदित्यर्थः । अपिश्चार्थे ॥ ९ ॥

१०] ति० टी०–अध्यरोहत । पुरोहितजनकयोरनुमत्येति शेषः ॥ १० ॥

रा० टी०–उपेति । अमितौजसौ वीरौ उपविष्टौ तावुभौ भ्रातरौ सुदामनं सुदामनाख्यं मन्त्रिश्रेष्ठं प्रेषयामासतुः । प्रेषणप्रकारमाह–गच्छेति । हे मन्त्रिपते अमितप्रभमिक्ष्वाकुं त्वं शीघ्रमेव गच्छ समन्त्रिणं मन्त्रिसहितं दुर्धर्षं दशरथमात्मजैः सहानयस्व । श्लोकद्वयमेकान्वयि । तुशब्द एवार्थे ॥१०॥११॥

गो० टी०–अध्यरोहत पुरोहितराजानुज्ञयेत्यर्थः ॥७॥८॥९॥

११] ति० टी०–सुदामनं सुदामनाख्यम् ॥ ११ ॥

१२–१५] ति० टी०–औपकार्याम् । उपकार्यांशब्दात्स्वार्थेऽण् । दशरथशिबिरसंनिवेशमित्यर्थः ॥ १२—१५ ॥

रा० टी०–औपकार्यामिति । अथ तदाज्ञापनवचनश्रवणानन्तरं स सुदामनः औपकार्यां महाराजाधिराजदशरथशिबिरसन्निवेशं गत्वा रघूणां कुलवर्धनं दशरथं ददर्श एनं दशरथं शिरसा अभिवाद्य इदं वचनमब्रवीच्च । औपकार्यांशब्दः स्वार्थेष्यञन्तः ॥ १२ ॥

गो० टी०–औपकार्यां दशरथशिबिरनिवेशम् उपकार्यांशब्दात्स्वार्थे ष्यञ् ॥ १०–१३ ॥

रा० टी०–तद्वचनमेवाह–अयोध्येति । हे अयोध्याधिपते हे वीर! सः भवत्सबन्धी मिथिलाधिपो वैदेहः सोपाध्यायपुरोहितं त्वां द्रष्टुं व्यवसितः कृतनिश्चयोऽस्तीति शेषः ॥ १३ ॥

रा० टी०–मन्त्रीति । सर्षिगणः सबन्धुः राजा मन्त्रिश्रेष्ठवचः श्रुत्वैव यत्र जनको वर्तते तत्रागमत् । तथाशब्द एवार्थे ॥ १४ ॥

रा० टी०–स इति । मन्त्रिसहितः सोपाध्यायः सबान्धवो वाक्यविदां श्रेष्ठो राजा दशरथः वैदेहं जनकमिदं वाक्यमब्रवीत् ॥ १५ ॥

१६–१८] ति० टी०–इदं वाक्यं वक्ष्यमाणम् । वसिष्ठमुखेन कन्यां वरयितुम् इक्ष्वाकुकुलदैवतं भगवान्वसिष्ठः इक्ष्वाकूणां सर्वेषु कृत्येषु वक्तेति ते विदितमित्यन्वयः अतो विश्वामित्राभ्यनुज्ञया ऋषिभिः सह कुलप्रभवधर्मक्रममनतिक्रम्य क्रमं ज्येष्ठानुक्रमं चानतिक्रम्य दशपूरुषविख्यातादिति न्यायेन यौनसंबन्धापेक्षितवंशपारंपर्यमेष वक्ष्यति ॥ १६—१८ ॥

रा० टी०–तद्वाक्यमेवाह–विदितमिति । हे महाराज जनक ! इक्ष्वाकुकुलदैवतमिक्ष्वाकुकुलदेवः समर्थः ऋषिः सर्वज्ञो वशिष्ठः सर्वेषु कृत्येषु वक्तास्तीति ते विदितम् ॥ १६ ॥

---

१ बलैरिति रा. पाठः । २ अथेति गो. पाठः । ३ राजानं चापीति गो. राजानमपीति रा. पाठः । ४ चाध्यरोहतेति गो. रा. पाठः । ५ अतितेजसाविति गो. अमितौजसाविति रा. पाठः । ६ ऐक्ष्वाकमिति गो. पाठः । ७ स्वमन्त्रिणामिति गो. पाठः । ८ स राजेति गो. रा. पाठः ।

उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम् । अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥ १९ ॥
तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः । विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः ॥ २० ॥
मनुः प्रजापतिः पूर्वमिक्ष्वाकुश्च मनोः सुतः । तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ २१ ॥
इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरित्येव विश्रुतः । कुक्षेरथात्मजः श्रीमान्विकुक्षिरुदपद्यत ॥ २२ ॥
विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् । बाणस्य तु महातेजा अनरण्यः प्रतापवान् ॥ २३ ॥
अनरण्यात्पृथुर्जज्ञे त्रिशङ्कुस्तु पृथोरपि । त्रिशङ्कोरभवत्पुत्रो धुन्धुमारो महायशाः ॥ २४ ॥
धुन्धुमारान्महातेजा युवनाश्वो महारथः । युवनाश्वसुतश्चासीन्मान्धाता पृथिवीपतिः ॥ २५ ॥
मान्धातुस्तु सुतः श्रीमान्सुसंधिरुदपद्यत । सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् ॥ २६ ॥
यजस्वी ध्रुवसंधेस्तु भरतो नाम नामतः । भरतात्तु महातेजा असितो नाम जायत ॥ २७ ॥

गो० टी०–विदितमिति । " मतिबुद्धि" इत्यादिना वर्तमाने क्तः "क्तस्य च वर्तमाने" इति षष्ठी त्वया विदितमित्यर्थः । दैवतं परमगुरुरित्यर्थः ॥ १४ ॥

रा० टी०–ततः किमित्यत आह–विश्वामित्रेति । विश्वामित्राभ्यनुज्ञातः सर्वैर्महर्षिभिः सह वियमान इति शेषः । धर्मात्मा एष वाशिष्ठः मे वंशं यथाक्रमं क्रममनतिक्रम्य वक्ष्यति वंशमिति शेषः । विश्वामित्राभ्यनुज्ञात इत्यनेन तयोरतिमैत्रीति सूचितम् ॥ १७ ॥

रा० टी०–तूष्णीमिति । दशरथे तूष्णींभूते सति वाक्यज्ञो भगवानृषिर्वशिष्ठः सपुरोहितं वैदेहं वाक्यमुवाच ॥ १८ ॥

गो० टी०–मे वक्ष्यति कुलमिति शेषः विश्वामित्रस्य कोपपरिहाराय विश्वामित्राभ्यनुज्ञात इत्युक्तम् । दशपुरुषविख्यातादितिशास्त्रेण यौनसंबन्धापेक्षितां वंशशुद्धिं वक्ष्यतीत्यर्थः ॥ १५ ॥ १६ ॥

१९–२०] ति० टी०–अव्यक्तशब्देन मायाशबलं ब्रह्म । ब्रह्मा चतुर्मुखः । शाश्वतत्वनित्यत्वाव्ययत्वान्यस्यापेक्षिकाणि द्रष्टव्यानि ॥ १९ ॥ २० ॥

रा० टी०–तद्वाक्यमेवाह–अव्यक्तेत्यादि यावत्सर्गसमाप्ति । अव्यक्तप्रभवः न व्यक्तः कैश्चिद् ज्ञातः प्रभवो जन्मकारणीभूतमात्रादिर्यस्य स स्वयंभूरित्यर्थः । किंच आद्वाखदेवाद्व्यक्तं प्राकट्यं यस्य तदव्यक्तं कमलं तस्मात्प्रभवः प्राकट्यं यस्य अयोनिज इत्यर्थः । किंच अव्यक्तं प्रधानं प्रभवति प्रकटितगुणवत्त्वेन प्रकटयति स प्रधानगुणक्षोभहेतुरित्यर्थः । किंच अव्यक्तं परमात्मतनुप्रकाशभूतं परं ब्रह्म तस्मात् प्रभवो यस्य सः प्रजासर्जनार्थं गृहीतरजोगुणकं परमात्मप्रकाशभूतं परब्रह्मेत्यर्थः । अत एव शाश्वतः स्वतः सिद्धः अत एव नित्यः ध्वंसाप्रतियोगी अत एवाव्ययः परिणामरहितः यो ब्रह्मा तस्मान्मरीचिः मरीच्यभिधप्रजापतिः संजज्ञे । मरीचेः कश्यपः सुतः संजज्ञे । 'अव्यक्तं शंकरे विष्णावव्यक्तं महदादिषु । आत्मन्यपि स्यादव्यक्तमस्फुटे त्वभिधेयवत् ' इति कोशः ॥ १९ ॥

गो० टी०–अव्यक्तं प्रत्यक्षाद्यगोचरं वस्तु प्रभवः कारणं यस्य सोऽव्यक्तप्रभवः अव्यक्तं किं नाम वक्ष्यत्ययोध्याकाण्डे–'आकाशप्रभवो ब्रह्म' इति अथ कोऽयमाकाशोऽपि तमपि वक्ष्यत्युत्तरकाण्डे–' संक्षिप्य हि पुरा लोकान्मायया स्वयमेव हि । महार्णवे शयानोऽन्धे मां त्वं पूर्वमजीजनः ॥ पद्मे दिव्येऽर्कसंकाशे नाभ्यामुत्पाद्य मामपि । प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितम्' इत्यादिना । शाश्वतः बहुकालस्थायी नित्यः द्विपरार्धकालं विनाशरहितः अव्ययः प्रवाहरूपेण प्रतिकल्पमवस्थायी अस्तीति शेषः ॥ १७ ॥

रा० टी०–विवस्वानिति । कश्यपात् विवस्वान् जज्ञे वैवस्वतः विवस्वतः सुतो मनुः स्मृतः कथितः मनुः पूर्वं प्रजापतिरभवदिति शेषः । मनोः सुतस्तु इक्ष्वाकुरभवत् ॥ २० ॥

गो० टी०–वैवस्वतः विवस्वत्पुत्रः प्रजापतिः राजा आसीदिति शेषः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

२१–२७] ति० टी०–मनोः प्रजापतित्वं प्रजासर्गाधिकारित्वेन । पूर्वकमाद्यम् ॥ २१—२७

रा० टी०–तमिति । तमिक्ष्वाकुमयोध्यायां पूर्वकं पौर्वकालिकं प्रथममित्यर्थः । राजानं त्वं विद्धि जानीहि । इक्ष्वाकोस्तु कुक्षिरित्येव विश्रुतः श्रीमान् सुत आसीत् ॥ २१ ॥

रा० टी०–कुक्षेरिति । अथ अनन्तरं विकुक्षिरितिविश्रुतः श्रीमान् कुक्षेरात्मज आसीत् । विकुक्षेस्तु महातेजाः प्रतापवान् बाणः पुत्र आसीत् ॥ २२ ॥

रा० टी०–बाणस्येति । बाणस्य तु महातेजाः प्रतापवान् अनरण्यो जज्ञे । अनरण्यात्तु पृथुर्जज्ञ । पृथोस्तु त्रिशङ्कुर्जज्ञे । अपिस्त्वर्थे ॥ २३ ॥

रा० टी०–त्रिशङ्कोरिति । महायशा धुन्धुमारः त्रिशङ्कोः पुत्रोऽभवत् । महातेजाः महारथो युवनाश्वो धुन्धुमारादभवत् ॥ २४ ॥

रा० टी०–युवनाश्वेति । पृथिवीपतिर्मांधाता तु युवनाश्वसुत आसीत् । श्रीमान् सुसंधिस्तु मान्धातुः सुत उदपद्यत अभवत् ॥ २५ ॥

---

१ पुरोहितमिति रा. पाठः । २ सुत इति गो. रा. पाठः । ३ त्विति गो. रा. पाठः । ४ इति विश्रुत इति रा. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ यौवनाश्वसुतस्त्विति गो. पाठः ।

यस्यैते प्रतिराजान उदपद्यन्त शत्रवः । हैहयास्तालजङ्घाश्च शूराश्च शैशबिन्दवः ॥ २८ ॥
तांश्च स प्रतियुध्यन्वै युद्धे राजा प्रवासितः । हिमवन्तमुपागम्य भार्याभ्यां सहितस्तदा ॥ २९ ॥
असितोऽल्पबलो राजा कालधर्ममुपेयिवान् । द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः ॥ ३० ॥
एका गर्भविनाशार्थं सपत्न्यै सगरं ददौ । ततः शैलवरे रम्ये बभूवाभिरतो मुनिः ॥ ३१ ॥
भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः । तत्र चैका महाभागा भार्गवं देववर्चसम् ॥ ३२ ॥
ववन्दे पद्मपत्राक्षी काङ्क्षन्ती सुतमुत्तमम् । तमृषिं सोऽभ्युपागम्य कालिन्दी चाभ्यवादयत् ॥३३॥
स तामभ्यवदद्विप्रः पुत्रेप्सुं पुत्रजन्मनि । तव कुक्षौ महाभागे सुपुत्रः सुमहाबलः ॥ ३४ ॥

गो० टी०–धुन्धुमारः युवनाश्वापरनामधेयः ॥ २२–२४ ॥

रा० टी०–सुसंधेरिति । सुसन्धेस्तु द्वौ पुत्रौ जातौ । तावेवाह ध्रुवसंधिरेकः प्रसेनजिद् द्वितीयः । ध्रुवसंधेस्तु यशस्वी प्रशस्तयशोविशिष्टः भरतो नाम आसीत् नामतः प्रसिद्धमेतत् । अपिस्त्वर्थे ॥ २६ ॥

रा० टी०–भरतादिति । भरतात्तु महातेजाः असितः नाम जायत अजायत । आगमशास्त्रस्यानित्यत्वादङ्किरहः । यस्य असितस्य शत्रवः शातनकर्तारः एते हैहयादिशशबिन्दन्ताः प्रतिराजानः प्रतिपक्षभूता नृपतयः उदपद्यन्त तान् हैहयादीनेव युधि संग्रामे प्रतियुद्धयन् सः असितः राजा प्रवासितः राज्यान्निःसारित एव आसीदिति शेषः । तुहिशब्दावेवार्थौ द्वयोरेकत्रान्वयः ॥ २७ ॥

गो० टी०–मध्ये असितवृत्तान्तकथनं सगरवैभवातिशयप्रकटनाय । प्रतिराजानः प्रतिपक्षाः शत्रवः शातयितारः । प्रतिराजानेव तान् विशेषयति हैहया इत्यादि ॥ २९ ॥

२८] ति० टी०–यस्यासितस्य । प्रतिराजानः शत्रुभूता राजानः ॥ २८ ॥

२९] ति० टी०–सोऽसितः प्रतियुध्यन्प्रतिपक्षतया युध्यन् । प्रवासितो राज्यान्निःसारितः ॥ २९ ॥

रा० टी०–प्रवासनोत्तरकालिकासितवृत्तमाह–हिमवन्तमित्यादिभिः । तदा प्रवासनकाले अल्पबलः अल्पसेनाविशिष्टः भार्याभ्यां सहितः राजा असितः हिमवन्तमुपागम्य प्राप्य कालधर्मं पञ्चत्वमुपेयिवान् प्राप ॥ २८ ॥

गो० टी०–प्रतियुध्यन् अभिमुखतया युद्धं कुर्वन् प्रवासितः राज्याद्भ्रंशितः ॥ २६ ॥

गो० टी०–भृगुप्रस्रवणे भृगुमहामुनिसांनिध्यवन्निर्झरोपान्तप्रदेशे इदमेव पूर्वं भृगुतुन्द इत्युक्तम् ॥ २७ ॥

३०] ति० टी०–इति श्रुतिः पुरातनकथा इत्यर्थः ॥३०॥

रा० टी०–असितवृत्तं समाप्य तत्पत्नीवृत्तमाह–द्वे इत्यादिभिः । अस्य असितस्य द्वे भार्ये गर्भिण्यौ बभूवतुः इति श्रुतिः प्रसिद्धिरित्यर्थः । तयोर्मध्ये एका पत्नी गर्भविनाशार्थमेव सपत्न्यै सगरं गरसहितं भक्षणद्रव्यं ददौ । चशब्द एवार्थे ॥२९॥

३१] ति० टी०–सगरं गरसहितं भक्ष्यम् । शैलवरे हिमवत्यभिरतो बभूव ॥ ३१ ॥

रा० टी०–तत इति । ततः सगरभक्ष्यभक्षणानन्तरमेव महाभागा परमभाग्यवती पद्मपत्राक्षी उत्तमं सुतं काङ्क्षन्ती एका भक्षितविषा सा कालिन्दी पत्नी यः आभिरतः आसमन्तात्सर्वव्यापि भं दीप्तिरस्यास्तीत्याभी रघुनाथः तत्र रतः हिमवन्तमुपाश्रितः हिमवति विद्यमान इत्यर्थः । भार्गवो भृगुवंशोद्भवश्च्यवनो नाम मुनिर्बभूव तं तत्र तस्मिन्नेव रम्ये हिमवति शैलवरे विद्यमानं देववर्चसं भार्गवमृषिमभ्युपागम्य अभ्यवादयत् प्राणमत् ॥ ३० ॥ ३१ ॥

गो० टी०–सगरं गरं विषं तत्सहितं भक्ष्यमित्यर्थः ॥२८॥

गो० टी०–तत इति । अभिरतः प्रीतः सन् हिमवन्तमुपाश्रितोऽभूत् स्वदेशवासाभिमानेन प्रीतः सन् तद्वरप्रदानाय सन्निहितोऽभूदित्यर्थः ॥ २९ ॥ ३० ॥

३२] ति० टी०–तत्र हिमवति । एका प्राशितगरा॥३२॥

३३] ति० टी०–कालिन्दी तस्या नाम । अभ्युपागम्य शरणं गत्वाभ्यवादयच्च । चेन शुश्रूषणमप्यकरोत् ॥ ३३ ॥

गो० टी०–कालिन्दीति सगरमुपयुक्तवत्या नाम । उपागम्य शरणं गत्वा अभ्यवादयत् शुश्रूषते स्म ॥ ३१ ॥

३४] ति० टी०–पुत्रजन्मनि तद्विषयेऽभ्यवददुक्तवान्॥३४॥

रा० टी०–स इति । स एव ऋषिर्विप्रः पुत्रेप्सुं तामभिवादनकर्त्रीं पुत्रजन्मनि पुत्रजन्महेतवे अभ्यवदत् अकथयत् । चशब्द एवार्थकः । श्लोकत्रयमेकान्वयि । चशब्दावेवार्थौ पाठक्रमादर्थक्रमो बलीयान् ॥ ३२ ॥

रा० टी०–तद्वचनमेवाह–तवेति । हे महाभागे ! सुमहाबलः अतिपराक्रमवान् महावीर्यः महाप्रतापः महातेजा अतितेजोयुक्तशरीरविशिष्टः श्रीमान् गरेण सहितः तव सुपुत्रः अचिरात् झटिति संजनिष्यति अतो हे कमलेक्षणे त्वं मा शुचः गर्भध्वंसकविषभक्षणहेतुकशोकं मा कुरु विषवीर्यमेव नङ्क्ष्यतीति भावः । सार्धोऽयं श्लोकः ॥ ३३ ॥

गो० टी०–सः पुत्रेप्सुमप्रतिबन्धपुत्रेप्सुम् । पुत्रजन्मनि पुत्रोत्पत्तिविषये ॥ ३२ ॥

१ शांशरिति गो. पाठः । २ तांस्त्विति गो.रा. पाठः । ३ भृगुप्रस्रवणऽवसर्दिति गो. पाठः । ४ मन्त्रिभिः सहितस्तदेति गो. पाठः । ५ गो. पाठः । ६ विनाशायेति गो. पाठः । ७ वरं रम्यमिति गो. पाठः । ८ आत्मन इति गो. पाठः । ९ चाभ्युपागम्येति रा. पाठः ।

36955

महावीर्यो महातेजा अचिरात्संजनिष्यति । गरेण सहितः श्रीमान्मा शुचः कमलेक्षणे ॥ ३५ ॥
च्यवनं चै नमस्कृत्य राजपुत्री पतिव्रता । पत्यौ विरहिता तस्मात्पुत्रं देवी व्यजायत ॥ ३६ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया । सह तेन गरेणैव संजातः सगरोऽभवत् ॥ ३७ ॥
सगरस्यासमञ्जस्तु असमञ्जादथांशुमान् । दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः ॥ ३८ ॥
भगीरथात्ककुत्स्थश्च कर्कुत्स्थाच्च रघुस्तथा । रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ ३९ ॥
कल्माषपादोऽप्यभवत्तस्माज्जातस्तु शङ्खणः । सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात् ॥ ४० ॥
शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः । मरोः प्रशुश्रुकस्त्वासीदम्बरीषः प्रशुश्रुकात् ॥ ४१ ॥
अम्बरीषस्य पुत्रोऽभून्नहुषश्च महीपतिः । नहुषस्य ययातिस्तु नाभागस्तु ययातिजः ॥ ४२ ॥
नाभागस्य बभूवाज अजादशरथोऽभवत् । अस्मादशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ॥ ४३ ॥
आदिवंशविशुद्धानां राज्ञां परमधर्मिणाम् । इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनाम् ॥ ४४ ॥
रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप । सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

३५] ति० टी०–गरेण सहितो जनिष्यतीत्यन्वयः । मा शुचः पतिमरणजं गरदानजं च शोकं त्यज पुत्रेणैव सखिनी भविष्यसीति भावः ॥ ३५ ॥

गो० टी०–गरेण सपत्नीप्रयुक्तेन मा शुचः गरप्रयोगनिमित्तं शोकं मा कुर्वित्यर्थः ॥ ३३ ॥

३६] ति० टी०–' पतिना रहिता ' इति पाठे नाभाव आर्षः । तस्माच्च्यवनप्रसादात् । व्यजायतामत ॥ ३६ ॥

रा० टी०–च्यवनवरप्रदानौत्तरकालिकं वृत्तमाह–च्यवनमिति । पतिव्रता अत एव शोकातुरा राजपुत्री देवी च्यवनं नमस्कृत्यैव तस्मात् च्यवनवरप्रदानात् पुत्रं व्यजायत अजनयत् । तुशब्द एवार्थे ' पतिना रहिता' इति पाठे नाभाव आर्ष इति भट्टाः ॥ ३४ ॥

गो० टी०–पतिशोकेति । अनेन तदनन्तरमेव दैवात्पतिर्मृत इति गम्यते । तस्मात् च्यवनानुग्रहात् ॥ ३४ ॥

३७–३८] ति० टी०–यतो गरेण सह जातोऽतः सगरो नाम्नाभवत् ॥ ३७ ॥ ३८ ॥

रा० टी०–स इति । गर्भजिघांसया यो गरः सपत्न्या तस्यै दत्तः तेनैव गरेण सह जातः अत एव सः सगरः सगरनामाऽभवत् । तुशब्दो हेत्वर्थकः ॥ ३६ ॥

गो० टी०–सपत्न्येति । अत्र य इत्यनुसंधेयं, जात इत्यनन्तरं तेनेत्यनुसंधेयम् ॥ ३६–३७ ॥

रा० टी०–सगरस्येति । सगरस्यासमञ्जः पुत्रोऽभवत् अथ अनन्तरमसमञ्जादंशुमान् अनन्तरमंशुमतो दिलीपः पुत्रः दिलीपस्य भगीरथः । तुशब्दोऽनन्तरार्थकः ॥ ३६ ॥

३९–४३] ति० टी०–प्रवृद्धस्तन्नामा पुरुषादकः वसिष्ठशापवशाद्राक्षसोऽभवत् । वसिष्ठाय प्रतिशापं दातुमुद्धृतं जलं स्वपत्न्यनुनयेन स्वपादयोर्विसृष्टवान् । ततः कल्माषवर्णपादस्तदाख्यश्चाभवत् ॥ ३९–४३ ॥

रा० टी०–भगीरथादिति । भगीरथात्ककुत्स्थः अनन्तरं ककुत्स्थात् तथा रघुः अनन्तरं रघोः पुत्रः तेजस्वी प्रवृद्धः प्रवृद्धनामाभवत् । अनन्तरं पुरुषादकः स एव वशिष्ठशापवशात् राक्षसोऽभवदित्यर्थः । तुशब्दश्चशब्दौ चानन्तरार्थकाः ॥ ३७ ॥

गो० टी०–प्रवृद्ध इति । पूर्वं प्रवृद्धाख्यः ततो वसिष्ठशापात् पुरुषादकः राक्षसभूतः ततः वसिष्ठं प्रति शापायोद्धृतजलस्य स्वभार्यानुनयात् स्वपदप्रक्षेपेण कल्माषपादाख्यः ॥ ३८ ॥ ३९ ॥

रा० टी०–स एव कल्माषपादः कल्माषपादाभिधोऽभवत् तत्र हेतुस्तु दत्तशापं वशिष्ठं प्रतिशप्तुमञ्जलौ जलं जग्राह अनन्तरं स्वपत्नीप्रार्थनया तज्जलं स्वपादे एव चिक्षेप तेन तस्य पादः कल्माषतां प्राप्त इति ग्रन्थान्तरादवगन्तव्यम् । अनन्तरं तस्मात्कल्माषपादात् शङ्खणो जातः । अनन्तरं शङ्खणस्य पुत्रः सुदर्शनो जातः सुदर्शनादग्निवर्णो जातः । हिचशब्दावनन्तरार्थकौ ॥ ३८ ॥

रा० टी०–शीघ्रग इति । अग्निवर्णस्य सुतस्तु शीघ्रगः शीघ्रगस्य सुतः मरुः मरोः सुतस्तु प्रशुश्रुकः आसीत् प्रशुश्रुकादम्बरीषः आसीत् । चशब्दस्त्वर्थकः ॥ ३९ ॥

रा० टी०–अम्बरीषस्येति । अम्बरीषस्य पुत्रः पृथिवीपतिर्नहुषोऽभूत् । नहुषस्य तु पुत्रो ययातिः ययातिजस्तु नाभागोऽभूत् । चशब्दस्त्वर्थकः ॥ ४० ॥

रा० टी०–नाभागादिति । नाभागात्तु अजो बभूव । अजादशरथोऽभवत् । अस्मादशरथात् । भ्रातरौ रामलक्ष्मणौ जातौ ॥ ४१ ॥

गो० टी०–नहुषययाती चन्द्रवंश्याभ्यामन्यौ । अत्र पुराणे क्रमवैषम्यं कल्पभेदादिति ज्ञेयम् ॥ ४० ॥ ४१ ॥

४४–४५] ति० टी०–यद्यपि वंशपरंपरा पुराणादिष्व-

---

१ त्विति गो. रा. पाठः । २ पतिशोकात्पुरेति गो. रा. पाठः । ३ जातः स इति गो. रा. पाठः । ४ ककुत्स्थस्य रघुः सुत इति गो. पाठः । ५ चेति गो. रा. पाठः । ६ पृथिवीपतिरिति गो. रा. पाठः । ७ चेति गो. रा. पाठः । ८ नाभागात्त्विति रा. पाठः ।

एकसप्ततितमः सर्गः ।

जनकः स्ववंशं प्रस्तुत्य रामलक्ष्मणाभ्यां सीतोर्मिलयोर्दानं प्रतिजज्ञे ।

एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः । श्रोतुमर्हसि भद्रं ते कुलं नः परिकीर्तितम् ॥ १ ॥
प्रदाने हि मुनिश्रेष्ठ कुलं निरवशेषतः । वक्तव्यं कुलजातेन तन्निबोध महामते ॥ २ ॥
राजाभूत्त्रिषु लोकेषु विश्रुतः स्वेन कर्मणा । निमिः परमधर्मात्मा सर्वसत्त्ववतां वरः ॥ ३ ॥
तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः । प्रथमो जनको राजा जनकादप्युदावसुः ॥ ४ ॥
उदावसोस्तु धर्मात्मा जातो वै नन्दिवर्धनः । नन्दिवर्धसुतः शूरः सुकेतुर्नाम नामतः ॥ ५ ॥
सुकेतोरपि धर्मात्मा देवरातो महाबलः । देवरातस्य राजर्षेर्बृहद्रथ इति स्मृतः ॥ ६ ॥
बृहद्रथस्य शूरोऽभून्महावीरः प्रतापवान् । महावीरस्य धृतिमान्सुधृतिः सत्यविक्रमः ॥ ७ ॥
सुधृतेरपि धर्मात्मा धृष्टकेतुः सुधार्मिकः । धृष्टकेतोश्च राजर्षेर्हर्यश्व इति विश्रुतः ॥ ८ ॥
हर्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतीन्धकः । प्रतीन्धकस्य धर्मात्मा राजा कीर्तिरथः सुतः ॥ ९ ॥
पुत्रः कीर्तिरथस्यापि देवमीढ इति स्मृतः । देवमीढस्य विबुधो विबुधस्य महीध्रकः ॥ १० ॥
महीध्रकसुतो राजा कीर्तिरातो महाबलः । कीर्तिरातस्य राजर्षेर्महारोमा व्यजायत ॥ ११ ॥
महारोम्णस्तु धर्मात्मा स्वर्णरोमा व्यजायत । स्वर्णरोम्णस्तु राजर्षेर्ह्रस्वरोमा व्यजायत ॥ १२ ॥

न्यथा दृश्यते, तथापि तत्र कल्पभेदेन विरोधपरिहारः एकस्यानेकनामकत्वाद्वा । आदीति आदितो ब्रह्माणमारभ्य वंशेन शुद्धानां वीराणां सत्यवादिनां संबन्धिनो रामलक्ष्मणयोरित्यर्थः ॥ ४४ ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

रा० टी०–वंशवर्णनप्रयोजनं वदन्नाह–आदीति । आदयः सोमवंशापेक्षया ज्येष्ठा वंशः विशुद्धो येषां ते एव ते इति कर्मधारयः तेषां परमधर्मिणामधर्मसंसर्गशून्यानामत एव सत्यवादिनामिक्ष्वाकुकुलजातानां वीराणां राज्ञां संबन्धिनोः रामलक्ष्मणयोः अर्थे नृपो दशरथस्त्वत्सुते वरयेत् अतः हे नरश्रेष्ठ ! सदृशाभ्यां रामलक्ष्मणाभ्यां सदृशे स्वसुते दातुं त्वमर्हसि । द्वयोरेकत्रान्वयः ॥ ४२ ॥ ४३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

गो० टी०–आदिवंशविशुद्धानामादित आरभ्य वंशेन विशुद्धानां राज्ञामिति संबन्धे षष्ठी । वरय इति । वरणस्य पुरोहितकृत्यत्वादिति भावः । सदृशे इति ङीबभाव आर्षः ॥४२॥४३॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

१] ति० टी०–अथ जनकः कन्यापितृत्वाज्जामातृवर्गे प्रभुताया अनौचित्येन स्ववंशं स्वयमेवाह—**एवमिति** । ब्रुवाणं वसिष्ठम् । अस्माभिः परिकीर्तितं नोऽस्माकं कुलं श्रोतुमर्हसि ॥१॥

२–३] ति० टी०–कुलजातेन सत्कुलप्रसूतेन प्रदाने कन्यादानविषये कुलं वक्तव्यमित्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०–एवमिति । कृताञ्जलिः प्रणयसूचकबद्धयुगलकरः जनकः एवं ब्रुवाणं वशिष्ठं प्रत्युवाच । तद्वचनमेवाह–हे मुनिश्रेष्ठ ! परिकीर्तितं कथ्यमानं नः अस्माकं कुलं त्वं श्रोतुमर्हसि ते भद्रम् ॥ १ ॥

गो० टी०–एवं वसिष्ठेन वरवंशकीर्तनपूर्वकं वधूवरणे कृते जनकः स्ववंशविशुद्धताज्ञापनपूर्वकं कन्याप्रदानं प्रतिजानीते एकसप्ततितमे–एवंब्रुवाणमित्यादि ॥ १ ॥ २ ॥

रा० टी०–तत्र हेतुं वदन्नाह–प्रदान इति । हे मुनिश्रेष्ठ हे महामते ! प्रदाने कन्याप्रदानसमये कुलजातेन सत्कुलोद्भवेन पुंसा कुलं निरवशेषत एव वक्तव्यं तत्तस्माद्धेतोः निबोध उद्यमानमस्मत्कुलं शृणु हिरेवार्थे ॥ २ ॥

रा० टी०–राजेति । स्वेन कर्मणा त्रिषु लोकेषु विश्रुतः परमधर्मात्मा सर्वसत्त्ववतां वरः श्रेष्ठः निमिः राजा अभूत् ॥३॥

गो० टी०–सत्त्ववतां बलवताम् ॥ ३ ॥

४] ति० टी०–तस्य निमेः । मिथिनाम्ना च मिथिलेति । प्रथमो जनकः सर्वेषामस्माकं जनकशब्दव्यवहारार्थत्वे मूलभूतः ॥ ४ ॥

रा० टी०–तस्येति । तस्य निमेः पुत्रः मिथिर्नामाभूत् । प्रथमः अस्मत्पूर्वजः जनकः अस्माच्च जनकशब्दव्यवहारप्रयोजकः मिथिपुत्रकः राजा जनकोऽभूत् । प्रशंसायां कन् । जनकादपि उदावसुः अभूत् ॥ ४ ॥

गो० टी०–प्रथम इति । मिथिमारभ्यास्माकं जनकसंज्ञेति भावः ॥ ४–६ ॥

५–१२] ति० टी०–नाम प्रसिद्धम् । नामतः सुकेतुरित्यर्थः ॥ ५–१२ ॥

---

१ आसीदिति रा. पाठः । २ मिथिला येन निर्मितेति गो. पाठः । ३ नामेति गो. पाठः । ४ त्विति गो. रा. पाठः । ५ प्रतीन्धक इति गो. पाठः ।

तस्य पुत्रद्वयं राज्ञो धर्मज्ञस्य महात्मनः । ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः ॥ १३ ॥
मां तु ज्येष्ठं पिता राज्ये सोऽभिषिच्य पिता मम । कुशध्वजं समावेश्य भारं मयि वनं गतः ॥ १४ ॥
वृद्धे पितरि स्वर्याते धर्मेण धुरमावहम् । भ्रातरं देवसंकाशं स्नेहात्पश्यन्कुशध्वजम् ॥ १५ ॥
कस्यचित्त्वथ कालस्य सांकाश्यादागतः पुरात्[3] । सुधन्वा वीर्यवान्राजा मिथिलामवरोधकः ॥ १६ ॥
स च मे प्रेषयामास शैवं धनुरनुत्तमम् । सीता च कन्या पद्माक्षी मह्यं वै दीयतामिति ॥ १७ ॥
तस्याप्रदानान्मर्हर्षे[4] युद्धमासीन्मया सह । स हतो विमुखो[5] राजा सुधन्वा तु मया रणे ॥ १८ ॥
निहत्य तं मुनिश्रेष्ठ सुधन्वानं नराधिपम्[1] । सांकाश्ये भ्रातरं शूरमभ्यषिञ्चं कुशध्वजम् ॥ १९ ॥
कनीयानेष मे भ्राता अहं ज्येष्ठो महामुने । ददामि परमप्रीतो वध्वौ ते मुनिपुंगव ॥ २० ॥

रा० टी०–उदावसोरिति । उदावसोस्तु धर्मात्मा नन्दिवर्धनो जातः । नन्दिवर्धनसुतः नन्दिवर्धनपुत्रस्तु शरः सुकेतुर्नाम जातः नामतः प्रसिद्धमेतत् । वैशब्दस्त्वर्थे ॥ ५ ॥

रा० टी०–सुकेतोरिति । सुकेतोरपि धर्मात्मा महाबलो देवरातो जातः । राजर्षेर्देवरातस्य तु बृहद्रथः स्मृतः । इतिस्त्वर्थे॥६॥

रा० टी०–बृहद्रथस्येति । शरः प्रतापवान् महावीरः महावीरनामा बृहद्रथस्य पुत्रोऽभूत् । धृतिमान् सत्यविक्रमः महावीरस्य पुत्रः सुधृतिः सुधृतिनामाभूत्॥ ७ ॥

रा० टी०–सुधृतेरिति । धर्मात्मा धर्मबुद्धिः अत एव सुधार्मिकः सुधृतेरपि पुत्रः धृष्टकेतुः राजर्षेर्धृष्टकेतोस्तु पुत्रः हर्यश्व इति विश्रुतः ॥ ८ ॥

गो० टी०–सुधृतिरित्यन्वर्थसंज्ञाज्ञापनार्थं विशेषणद्वयम् ७–१३

रा० टी०– हर्यश्वस्येति । श्रुतो विख्यातः हर्यश्वस्य पुत्रो मरुरभूत् । मरोः पुत्रः प्रतीन्धकः धर्मात्मा प्रतीन्धकस्य सुतः राजा कीर्तिरथः श्रुतः ॥ ९ ॥

रा० टी०–पुत्र इति । कीर्तिरथस्यापि पुत्रः देवमीढ इति स्मृतः देवमीढस्य विबुधः स्मृतः विबुधस्य पुत्रः महीध्रकः स्मृतः ॥१०॥

रा० टी०–महीध्रकेति । महाबलः राजा महीध्रकसुतः कीर्तिरातो व्यजायत । राजर्षेः कीर्तिरातस्य पुत्रो महारोमा व्यजायत ॥ ११ ॥

रा० टी०–महारोम्ण इति । महारोम्णस्तु स्वर्णरोमा व्यजायत । राजर्षेः स्वर्णरोम्णस्तु ह्रस्वरोमा व्यजायत ॥१२॥

१३] ति० टी०–तस्य ह्रस्वरोम्णः । ज्येष्ठोऽहम् । ममानुजः कुशध्वजः ॥ १३ ॥

रा० टी०–तस्येति । धर्मज्ञस्य महात्मनस्तस्य ह्रस्वरोम्णो राज्ञः पुत्रद्वयं जातं ज्येष्ठः तत्र पूर्वजोऽहं वीरः कुशध्वजो ममानुजो भ्राता ॥ १३ ॥

१४] ति० टी०–स मम पिता मां ज्येष्ठं तु राज्येऽभिषिच्य कुशध्वजं भारं भरणीयम्, यद्वा कुशध्वजं भारं राज्यभारं च मयि समावेश्य स्थापयित्वा वनं गत इत्यन्वयः ॥१४॥

रा० टी०–मामिति । नराधिपः पिता स ह्रस्वरोमा ज्येष्ठं मां राज्येऽभिषिच्य भारं राज्यपालनादि कुशध्वजं च मयि समावेश्य वनं गतः । तुश्चार्थे ॥ १४ ॥

गो० टी०–भारं भरणीयं पोषणीयमिति यावत् ॥ १४ ॥

१५] ति० टी०–धुरं राज्यभारम् । स्नेहात्पश्यन्पालयन् १५॥

रा० टी०–वृद्ध इति । वृद्धे पितरि स्वर्याते प्राप्ते सति देवसंकाशं भ्रातरं कुशध्वजं स्नेहात्पश्यन् सन् धर्मेण धुरं राज्यभारमहमावहम् ॥ १५ ॥

गो० टी०–धुरं राज्यभारम् ॥ १५ ॥

१६] ति० टी०–सांकाश्यमिति सुधन्वनगरनाम । अवरोधकोऽगमत् अवरोद्धमागतवानित्यर्थः ॥ १६ ॥

रा० टी०–कस्येति । अथ अनन्तरं कस्यचित्कालस्यापगमे सति वीर्यवान् राजा सुधन्वा सांकाश्यात् सांकाश्याभिधात् पुरात्स्वनगरात् अवरोधकः सन्नेव मिथिलामगमत् । तुशब्द एवार्थे ॥ १६ ॥

गो० टी०–कस्यचित्कालस्य कस्मिंश्चित्काले गते अवरोधकः अवरोद्धुमित्यर्थः । " तुमुण्वुलौ क्रियायां क्रियार्थायाम्" इति ण्वुल् ॥ १६ ॥ १७ ॥

१७] ति० टी०–शैवं धनुः सीता च कन्या मह्यं दीयतामिति दूतान्प्रेषयामास मे इत्यन्वयः ॥ १७ ॥

रा० टी०–स इति । स मत्पुरावरोधक एव सुधन्वा अनुत्तमं शैवं धनुः पद्माक्षी सीता कन्या च मह्यमेव दीयतामिति वचनं प्रेषयामास दूतद्वारा कथयामासेत्यर्थः । चवैशब्दावेवार्थौ ॥१७॥

१८] ति० टी०–तस्योक्तवस्तुद्वयस्य। विमुखो युद्धविमुखः१८

रा० टी०–तस्येति । हे भगवन्! तस्य याचितपदार्थद्वयस्य अप्रदानान्मया सह युद्धमासीत्सुधन्वन इति शेषः । विमुखः पराजितः स राजा सुधन्वा मयैव रणे हतः । तु शब्दएवार्थे ॥१८॥

गो० टी०–तस्य सुधन्वनः अप्रदानात् सीताधनुषोरप्रदानात् ॥ १८ ॥ १९ ॥

१९–२०] ति० टी०–सांकाश्ये सुधन्वनगरे ॥१९॥२०॥

रा० टी०–निहत्येति । हे मुनिश्रेष्ठ ! नराधिपं तं सुधन्वानं निहत्य सांकाश्ये सुधन्वनगरे शूरं भ्रातरं कुशध्वजमहमभ्यषिञ्चम् ॥ १९

१ नराधिप इति गो. रा. पाठः । २ अगर्मादति गो. रा. पाठः । ३ पुरेति रा. पाठः । ४ ब्रह्मर्षे इति गो. भगवन्निति रा. पाठः । ५ अभिमुख इति गो. पाठः । ६ वीरमिति गो. पाठः ।

सीतां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय वै[1] । वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमाम् ॥ २१ ॥
द्वितीयामूर्मिलां चैव त्रि[2]र्ददामि न संशयः । दै[3]दामि परमप्रीतो वध्वौ ते मुनिपुंगव ॥ २२ ॥
रामलक्ष्मणयो राजन्गोदानं कारयस्व ह । पितृकार्यं च भद्रं ते ततो वैवाहिकं कुरु ॥ २३ ॥
मघा ह्यद्य महाबाहो तृ[4]तीयदिवसे प्रभो । फल्गुन्यामुत्तरे राजंस्तस्मिन्वैवाहिकं कुरु ॥
रामलक्ष्मणयोरर्थे दानं कार्यं सुखोदयम् ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

रा० टी०–हे महामुने ! एष कुशध्वजः कनीयान् मे भ्राता अहं ज्येष्ठः । प्रासङ्गिकं समाप्य प्रकृतमाह–ददामीति । हे मुनिपुंगव ! परमप्रीतः स्वेप्सितप्राप्त्यातिप्रमोदविशिष्टोऽहं ते तुभ्यं वध्वौ स्नुषे ददामि तव समीपे वध्वौ सुते इति वा॥२०॥

गो० टी०–ते वध्वौ ददामि स्नुषात्वेन ददामि वसिष्ठेन वरणात्ते ददामीत्युक्तम् ॥ २०॥

२१] ति० टी०–ऊर्मिलां योनिजां निजपुत्रीम् ॥ २१ ॥

रा० टी०–दानकर्मीभूते विभजन्नाह–सीतामिति । सीतां रामाय ददामि ऊर्मिलां तु लक्ष्मणाय ददामि ते भद्रम् । वैत्यर्थे । अर्धं पृथक् भङ्ग्यन्तरेण पुनस्तदेव राजानं प्रत्याह–वीर्यशुल्कामिति । रघुनन्दन हे दशरथ ! वीर्यशुल्कां सुरसुतोपमां मम सुतां सीतां द्वितीयामूर्मिलां च परमप्रीतोऽहं त्रि[5]र्ददामि अत्र संशयो नैव यतः परमप्रीतोऽहं ददामि अतस्ते वध्वौ। एवशब्दो हेत्वर्थे । सार्धश्लोक एकान्वयी ॥ २१ ॥ २२ ॥

गो० टी०–वध्वावित्युक्तं व्यवस्थया दर्शयति–सीतामित्यर्धेन ॥ २१ ॥

गो० टी०–उक्तमर्थं सनिमित्तमुपपादयति–वीर्येति । वीर्यशुल्कामित्येतदूर्मिलाया अपि विशेषणं यद्यपि रामेणैव धनुर्भङ्गः कृतस्तथापि तादृशशक्तेर्लक्ष्मणेऽपि दर्शनात्तद्वीर्यमेव ऊर्मिलाया अपि शुल्कमित्यर्थः ऊर्मिला जनकस्यौरसपुत्री त्रिः त्रिवारं त्रिभिः करणैर्वा ॥ २२ ॥

२२] ति० टी०–त्रि[5]र्ददामि उक्तमपि दार्ढ्यायेत्याशयः॥२२॥

२३] ति० टी०–गोदानं समावर्तनम् । वैवाहिकं विवाहादौ कर्तव्यम् । पितृकार्यं नान्दीमुखश्राद्धम् ॥ २३ ॥

रा० टी०–विवाहोचितक्रियाप्रवृत्त्यै राजानं प्रार्थयन्नाह–रामेति । हे राजन् ! रामलक्ष्मयोर्गोदानं तदुपलक्षितसमावर्तनोचितं कर्म कारयस्व ततोऽनन्तरं वैवाहिकं विवाहोचितं पितृकार्यं च कुरु । ह अतीव हर्षः ॥ २३ ॥

गो० टी०–गोदानं नाम विवाहपूर्वसमयनियतं किंचित्कर्म गावः केशाः दोःपादमूलरोमाणि च यत्र खण्ड्यन्ते तदेतद्गोदानं नाम समावर्तनाख्यं कर्मेत्याहुः वैवाहिकं पितृकार्यं नान्दीश्राद्धम् ॥ २३ ॥

२४] ति० टी०–अथ तृतीयदिवसे तव मिथिलाप्रवेशात्तृतीयदिवसे यज्ञसमाप्तेस्तृतीयदिवसे वाद्य मघानक्षत्रम् । फल्गुन्यां पूर्वफल्गुनीनक्षत्रे । उत्तरे श्रेष्ठे । अत एव ' भगो यत्र प्रजापतिः ' इत्यनेनाविरोधः । भगो हि पूर्वफल्गुनीदेवः, उत्तरफल्गुन्यास्त्वर्यमेति बोध्यम् । वैवाहिकं विवाहम् विनयादित्वाट्ठक् । " मघानक्षत्रं पितरो देवताः, फल्गुनीनक्षत्रमर्यमा देवता, फल्गुनीनक्षत्रं भगो देवता " इति तैत्तिरीयसंहितायाम् । " अर्यम्णः पूर्वे फल्गुनी भगस्योत्तरे " इति तद्ब्राह्मणे चोक्तत्वेन यथाश्रुतमेव सम्यगिति तत्त्वम् । उत्तरे इति पुंस्त्वमार्षम् । यद्यप्युत्तराफल्गुनी सीताया जन्मर्क्षं तथापि तदृक्षे प्रथमचरणं विहाय तज्जन्मसत्त्वेन तस्याः कन्याराशित्वात्तृतीयैकादशरूपभकूटशुद्धेस्तस्य न दोषः भकूटशुद्धौ तत्र दुष्टमिति ज्योतिःशास्त्रे प्रसिद्धम् । किंच पूर्वाच्च तस्या द्वादशश्चन्द्र इति तत्र विवाहोऽनुचित एव । एकनाडीदोषेण च रामसीतयोर्विरोग इति ध्येयम् । रामलक्ष्मणयोरर्थे तदभ्युदयाय । सुखोदयं सुखोदर्कम् दानं गोभूतिलहिरण्यादेर्दानं कार्यम् त्वयेति शेषः २४॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

रा० टी०–विवाहोचितमुहूर्तं बोधयन्नाह–मघेति । हे महाबाहो हे राजन् ! अद्यास्मिन् समये मघानक्षत्रमस्ति अतः तृतीयदिवसे तस्मिन् विवाहोचिते उत्तरे फल्गुन्यामुत्तराफल्गुनीनक्षत्रे वैवाहिकं विवाहं कुरु विनयादित्वात् स्वार्थे ठक् । अत्र ' भगो यत्र प्रजापतिः ' इति वक्ष्यमाणानुरोधेन फल्गुन्यां पूर्वफल्गुनीनक्षत्रे उत्तरे श्रेष्ठे इत्यर्थो भट्टैर्व्याख्यातः तस्यात्र त्यागस्तु पूर्वफल्गुन्याः वैवाहिकत्वाभावात् ' भगो यत्र प्रजापतिः' इत्यनेन यथा न विरोधस्तथा तत्रैव वक्ष्यामः अत्र राजकर्तृकवंशकथनात् हर्षातिशयः सूचितः ॥ २४ ॥

रा० टी०–रामेति । रामलक्ष्मणयोरर्थे सुखोदयं दानं कार्यम् ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

गो० टी०–तृतीये भाविनि फल्गुन्यां फल्गुन्याख्याके उत्तरे उत्तरनक्षत्रे वैवाहिकं विवाहप्रयोजनं " तदस्य प्रयोजनम् " इति ठक् । दानं गोभूतिलहिरण्यादिदानं सुखोदयं सुखोदर्कं वधूवरयोरतिशयावहमित्यर्थः कार्यमिति सामान्योक्त्या मयापि कन्यार्थं क्रियत इति सूचितं, कन्यादाने उत्तरफल्गुन्याः

१ चेति गो. पाठः । २ ददामीति गो. रा. पाठः । ३ नैतदर्धं गो. पाठ । ४ रघुनन्दन इति रा. पाठः । ५ तृतीये इति गो. रा. पाठः ।

द्विसप्ततितमः सर्गः ।

वसिष्ठविश्वामित्रौ कुशध्वजसुते भरतशत्रुघ्नार्थं वरयामासतुः जनकस्तदनुमत्य प्राशंसद्दशरथश्च सुतानां गोदानादिकाः क्रियाश्चकार

तमुक्तवन्तं वैदेहं विश्वामित्रो महामुनिः । उवाच वचनं वीरं वसिष्ठसहितो नृपम् ॥ १ ॥
अचिन्त्यान्यप्रमेयाणि कुलानि नरपुंगव । इक्ष्वाकूणां विदेहानां नैषां तुल्योऽस्ति कश्चन ॥ २ ॥
सदृशो धर्मसंबन्धः सदृशो रूपसंपदा । रामलक्ष्मणयो राजन्सीता चोर्मिलया सह ॥ ३ ॥
वक्तव्यं च नरश्रेष्ठ श्रूयतां वचनं मम । भ्राता यवीयान्धर्मज्ञ एष राजा कुशध्वजः ॥ ४ ॥
अस्य धर्मात्मनो राजन्रूपेणाप्रतिमं भुवि । सुताद्वयं नरश्रेष्ठ पत्न्यर्थं वरयामहे ॥ ५ ॥
भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः । वैरये ते सुते राजंस्तयोरर्थे महात्मनोः ॥ ६ ॥

प्रशस्तत्वमुक्तं ज्यौतिषे ' त्रीण्युत्तराण्यपि तथार्कमघानुराधामूलान्त्यसोमकमलोद्भवभान्युहन्ति' इति ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

१] ति० टी०–वीरं जनकम् ॥ १ ॥

रा० टी०–जनककर्तृकवृत्तकथनानन्तरकालिकं वृत्तमाह–तमिति । वशिष्ठसहितो महामुनिर्विश्वामित्रः उक्तवन्तं कथितवाक्यं वीरं वैदेहं तं नृपं वचनमुवाच ॥ १ ॥

गो० टी०–अथ विश्वामित्रेण भरतशत्रुघ्नार्थे कुशध्वजसुतावरणं गोदानकरणं च द्विसप्ततितमे–तमुक्तवन्तमित्यादि । नृपं जनकम् ॥ १ ॥

२] ति० टी०–एषां तुल्यः परस्परव्यतिरेकेणापरो नास्ति २॥

रा० टी०–तद्वचनमेवाह–अचिन्त्यानीति । हे नरपुंगव ! इक्ष्वाकूणां विदेहानां च कुलानि अचिन्त्यानि अतिशुद्धत्वेन विवाहार्थं संदेहानर्हाणि अप्रमेयाणि इयत्तारहितप्रभावविशिष्टानि च अतः एषां वंशद्वयोद्भवानां तुल्यः अन्यः कश्चन नास्ति एषामेव परस्परं सादृश्यमिति तात्पर्यम् तेनावश्यमयं विवाहः कर्तव्य इति व्यञ्जितम् ॥ २ ॥

गो० टी०–अचिन्त्यानीत्यादि । अचिन्त्यानि आश्चर्यभूतानि अप्रमेयानि अपरिच्छेद्यमहिमानि एषामिक्ष्वाकुविदेहानां तुल्यः कश्चन नास्ति यतः अतः कारणादचिन्त्यत्वमप्रमेयत्वं चेति भावः ॥ २ ॥

३] ति० टी०–धर्मसंबन्धो युवयोर्विवाहसंबन्धः सदृशोऽनुरूपः । किं च ऊर्मिलया सह वर्तमाना या सीता तस्या *यथायोग्ययो रामलक्ष्मणयोर्यः संबन्धः स्वरूपसंपदा सदृशः । ' सीतयोर्मिलया ' इति पाठस्तु सुगम एव ॥ ३ ॥

रा० टी०–वंशयोः सादृश्यमुक्त्वा कन्यावरयोः सादृश्यं बोधयन्नाह–सदृश इति । हे राजन् ! या सीतास्ति तया ऊर्मिलया च रूपसंपदा रूपेण संपदा च सदृशस्तुल्ययोः रामलक्ष्मणयोः धर्मसंबन्धो धर्महेतुको विवाहः सदृशः वंशद्वयविवाहानुरूपः अत एव ह हर्षावहः ॥ ३ ॥

गो० टी०–सदृश इति । सीता ऊर्मिलया सह रामलक्ष्मणयोर्दीयते इति यत् अयं धर्मसंबन्धः धर्मेण संबन्धः यौनसंबन्धः इति यावत् सदृशः रूपसंपदा च सदृशः यद्वा अयं करिष्यमाणो धर्मसंबन्धः सदृशः उभयकुलसदृशः रूपसंपदा च सदृशः तुल्यरूपयोर्विवाह इत्यर्थः । अत्र हेतुमाह–रामेति । सीतोर्मिलया सह रामलक्ष्मणयोः यतः सदृशीत्यनुषङ्गः । यद्वा सीता ऊर्मिलया सह रामलक्ष्मणयोः चकाराद्रामलक्ष्मणौ च सीतोर्मिलयोः रूपसंपदा सदृशः शकारान्ते बहुवचनमतः सदृशो धर्मसंबन्ध इत्यर्थः ॥ ३ ॥

४–५] ति० टी०–किंचिदन्यद्वक्तव्यमस्ति तच्छ्रूयतामित्यन्वयः ॥ ४ ॥ ५ ॥

रा० टी०–वक्तव्यमिति । हे नरश्रेष्ठ जनक ! वक्तव्यं वचनार्हं मम वचनं त्वया श्रूयताम् । किंतद्वचनमित्यत आह–हे राजन् धर्मज्ञ ! एष राजा कुशध्वजो यतो यवीयान् कनिष्ठस्ते भ्राता अतो हे नरश्रेष्ठ ! भुवि रूपेण अप्रतिममसदृशं धर्मात्मनोऽस्य कुशध्वजस्य सुताद्वयं पत्न्यर्थं वरयामहे ॥ ४ ॥ ५ ॥

गो० टी०–वक्तव्यं चेति । अन्यद्वक्तव्यं किंचिदस्ति तदपि श्रूयतामित्यर्थः ॥ ४ ॥ ५ ॥

६] ति० टी०–कयोः पत्नीत्वार्थं तत्राह—भरतस्येत्यादि । आद्यार्थं पूर्वान्वयि । तथा ते सुते सीतोर्मिले तयोरर्थे रामलक्ष्मणयोरर्थे ॥ ६ ॥

रा० टी०–कस्य पत्न्यर्थमित्यत आह–भरतस्येति । हे राजन्! तयोः प्रसिद्धयोर्महात्मनोः धीमतः कुमारस्य भरतस्य शत्रुघ्नस्य च अर्थे ते सुते वरये ॥ ६ ॥

गो० टी०–पत्न्यर्थमित्युक्तं कयोरित्याकाङ्क्षायां तदुपपादयन्नाह–भरतस्येति । भरतस्य शत्रुघ्नस्य च तयोरुभयोरर्थे इत्यन्वयः ॥ ६ ॥ ७ ॥

---

१ अप्रमेयानीति गो. पाठः । २ वरयाम सुते इति गो. पाठः । * अव्ययीभावे कर्थ षष्ठी ।

पुत्रा दशरथस्येमे[1] रूपयौवनशालिनः । लोकपालसमाः सर्वे देवतुल्यपराक्रमाः ॥ ७ ॥
उभयोरपि राजेन्द्र संबन्धेनानुबध्यताम् । इक्ष्वाकुकुलमव्यग्रं भवतः पुण्यकर्मणः ॥ ८ ॥
विश्वामित्रवचः श्रुत्वा वसिष्ठस्य मते तदा । जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुंगवौ ॥ ९ ॥
कुलं धन्यमिदं मन्ये येषां तौ[2] मुनिपुंगवौ । सदृशं कुलसंबन्धं यदाज्ञापयतः[3] स्वयम्[4] ॥ १० ॥
एवं भवतु भद्रं वः कुशध्वजसुते इमे । पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ॥ ११ ॥
एकाह्ना राजपुत्रीणां चतसॄणां महामुने । पाणीन्गृह्णन्तु चत्वारो राजपुत्रा महाबलाः ॥ १२ ॥
उत्तरे दिवसे ब्रह्मन्फल्गुनीभ्यां मनीषिणः । वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥ १३ ॥

७] ति० टी०–दशरथपुत्रेषु न कस्मिन्नपि वरगुणन्यूनतेत्याह–**पुत्रा इति** ॥ ७ ॥

रा० टी०–चतुर्णामपि विवाहयोग्यतेत्याह–**पुत्रा इति** । रूपयौवनशालिनः लोकपालसमाः देवाः ब्रह्मादयः तुल्यपराक्रमा येषामत एव लोकपालाः ब्रह्मादयः समा येषां ते सर्वे एते दशरथस्य पुत्राः सन्तीति शेषः । एतेनैष्वेव भवत्सुताविवाहयोग्यतेति परिसंख्यालंकारो ध्वनितः ॥ ७ ॥ ८ ॥

८–९] ति० टी०–उभयोर्भात्रोः संबन्धेनेक्ष्वाकुकुलं संबध्यताम् तत्र च संबन्धे पुण्यकर्मणो भवतोऽव्यग्रं चित्तं भवत्विति शेषः । कथमीदृशेन महाराजेन युगपन्मया संबन्धचतुष्टयं कार्यमिति व्यग्रता मास्त्विवत्यर्थः ॥ ८ ॥ ९ ॥

गो० टी०–उभयोरिति । उभयोर्युवयोः संबन्धेन कुलद्वयमप्यनुबध्यतामित्यर्थः भवतः कुलमित्यनुकर्षः अव्यग्रं निर्दोषं अन्योन्यसंबन्धेनान्योन्यसुत्कर्षं प्राप्नुयादित्यर्थः ॥ ८ ॥

रा० टी०–**विश्वामित्रेति** । तदा विश्वामित्रोक्तिकाले वसिष्ठस्य मते विद्यमानं विश्वामित्रवचो वचनं श्रुत्वा प्राञ्जलिर्जनको मुनिपुंगवौ वसिष्ठविश्वामित्रौ वाक्यमुवाच ॥ ९ ॥

गो० टी०–वसिष्ठस्य मते वसिष्ठानुमत इत्यर्थः ॥ ९ ॥

१०] ति० टी०–स्वयम्, न तु शिष्यादिमुखतः, यस्मादाज्ञापयतस्तस्माद्दिदं कुलं धन्यं मन्ये ॥ १० ॥

रा० टी०–तद्वाक्यमेवाह–**कुलमिति** । यस्मात् येषां नोऽस्माकं कुलसंबन्धं सदृशमिक्ष्वाकुवंशानुरूपं मुनिपुंगवौ युवां स्वयमाज्ञापयतस्तस्मात् तेषां नः इदं कुलं धन्यं मन्ये ॥ १० ॥

गो० टी०–**कुलमिति** । यस्मात् मुनिपुंगवौ युवां येषां नः कुलसंबन्धमिक्ष्वाकुवंशेन यौनसंबन्धं स्वयं शिष्यमुखं विना आज्ञापयथः तस्मात्तेषां नः इदं कुलं धन्यं भाग्यशालीति मन्ये १०॥

११] ति० टी०–सहितौ नित्यसहचरौ । अत्र क्रमे न तात्पर्यम् ॥ ११ ॥

रा० टी०–**एवमिति** । इमे कुशध्वजसुते पत्न्यौ सहितौ नित्यसाहित्यविशिष्टौ उभौ शत्रुघ्नभरतौ भजेताम् एवं वो मदं भवतु ॥ ११ ॥

गो० टी०–पत्न्यौ भजेतां पत्नीत्वेन भजेतां सहितौ सदा सहचरौ ॥ ११ ॥

१२] ति० टी०–एकाह्नेति टजभावोऽनित्याः समासान्ता इति । सप्तम्यर्थे तृतीया एकदिवसे इत्यर्थः । चतसृणामिति दीर्घत्वमार्षम् ॥ १२ ॥

रा० टी०–**एकेति** । हे महामुने ! चतसृणां राजपुत्रीणाम् पाणीन् महाबलाः चत्वारो राजपुत्राः एकाह्ना एकस्मिन्नेव दिने इत्यर्थः गृह्णन्तु । समासान्तविधेरनित्यत्वाट्टजभावः न तिस्रितिनिषेधाप्रवृत्तिस्त्वत एव ज्ञापकात् ॥ १२ ॥

गो० टी०–एकाह्नेति। *एकाह्नेत्यजभाव आर्षः । सप्तम्यर्थे तृतीया। चतसृणामिति "छन्दस्युभयथा" इति पक्षे दीर्घः॥१२॥

१३] ति० टी०–फल्गुनीभ्यामुत्तरफल्गुनीभ्यामुपलक्षिते उत्तरे दिवसे द्वितीये दिवसे । प्रजापतिर्देवता । प्राशस्त्यं च विवाह [प्रयोजन] प्रजोत्पत्तिसाधनयोनिलिङ्गाधिष्ठातृभगदैवत्यत्वेनेति कतकः ॥ १३ ॥

रा० टी०–वैवाहिकदिवसनियममाह–**उत्तरे इति** । हे ब्रह्मन् ! यत्र ययोः भगः प्रजापतिर्यमा च स्थितः ताभ्यां फल्गुनीभ्यां पूर्वफल्गुन्युत्तरफल्गुनीभ्यां विशिष्टयोर्दिवसयोरुत्तरे उत्तरफल्गुनीविशिष्टे दिवसे वैवाहिकं विवाहं मनीषिणो ज्योतिःशास्त्राभिज्ञाः प्रशंसन्ति । विनापि चं समुच्चयः । विशिष्टयोर्दिवसयोरित्यध्याहृतम् ॥ १३ ॥

गो० टी०–उत्तरे फल्गुनीभ्यामुपलक्षितयोरुत्तरस्मिन् दिवसे उत्तरफल्गुन्यामित्यर्थः । यद्वा फल्गुनीभ्यामिति सप्तम्यर्थे चतुर्थी फल्गुन्यामुत्तरे फल्गुन्याख्ये उत्तरनक्षत्र इत्यर्थः । प्रशस्ततायां हेतुः–भग इति भगः प्रजापतिः प्रजोत्पत्तिस्थानयोनिलिङ्गाधिष्ठाता देवता । ननु ' एकस्मिंस्तु गृहे कुर्यादेकामेव शुभक्रियाम् । अनेकां यस्तु कुरुते स नाशमधिगच्छति' इति ज्योतिःशास्त्रे एकगृहे अनेकोत्सवनिषेधो दृश्यत इति चेत् मतान्तरे एकगृहे भ्रातृणामेकदोत्सवस्य विहितत्वात् । उक्तं हि दैवज्ञविलासे ' भिन्नोदरोदयवतामुद्वाहे कल्पयेत्पृथग्वेदिम् । एकगृहे जगुरार्या मण्डपमेकं पराशरेणोक्तम् ' इति नन्वेवमपि लक्ष्मणशत्रुघ्नयोः कथमेकदा विवाहः ' एकमातृप्रसूतानामेकस्मिन्नेव वत्सरे । विवाहं मौञ्जिबन्धं च चूडाकर्म न कारयेत् ' इति निषेधादिति चेत् सत्यं एकस्मिन् दिने तु कर्तव्य एव । उक्तं हिदैवज्ञविलासे–'भ्रातृद्वये स्वसृयुगे भ्रातृस्वसृयुगे तथा । स-

१ एते इति रा. पाठः । २ इक्ष्वाकोरिति गो.पाठः । ३ नो इतिगो.रा.पाठः । ४ ज्ञापयथ इति गो. पाठः । ५ ते इति रा. पाठः । * टजभाव इति युक्तम् ।

THE KUPPUSWAMI SASTRI RESEARCH INSTITUTE MADRAS

एवमुक्त्वा वचः सौम्यं प्रत्युत्थाय कृताञ्जलिः । उभौ मुनिवरौ राजा जनको वाक्यमब्रवीत् ॥ १४ ॥
परो धर्मः कृतो मह्यं शिष्योऽस्मि भवतोस्तथौ । इमान्यासनमुख्यानि आस्यतां[1] मुनिपुंगवौ[2] ॥ १५ ॥
यथा दशरथस्येयं तथाऽयोध्या पुरी मम । प्रभुत्वे नास्ति संदेहो यथार्हं कर्तुमर्हथ ॥ १६ ॥
तथा ब्रुवति वैदेहे जनके रघुनन्दनः । राजा दशरथो हृष्टः प्रत्युवाच महीपतिम् ॥ १७ ॥
युवामसंख्येयगुणौ भ्रातरौ मिथिलेश्वरौ । ऋषयो राजसंघाश्च भवद्भ्यामभिपूजिताः ॥ १८ ॥
स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामः[3] स्वमालयम् । श्राद्धकर्माणि[4] विधिवद्विधास्य इति चाब्रवीत् ॥ १९ ॥
तमापृष्ट्वा नरपतिं राजा दशरथस्तदा । मुनीन्द्रौ तौ पुरस्कृत्य जगामाशु महायशाः ॥ २० ॥
स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः । प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥ २१ ॥

मानाश्च क्रियाः कुर्युर्मातृभेदे तथैव च ॥ एकस्मिन् दिवसे त्वेकलग्ने भिन्नांशके तयोः । एकगर्भोदयवतोर्विवाहः शुभकृद्भवेत् ' इति एकोदरयोरप्येकगृहे विवाहकरणवचनं द्रष्टव्यम् ॥ १३ ॥

१४] ति० टी०–प्रत्युत्थायासनादुत्थाय ॥ १४ ॥

रा० टी०–एवमिति । एवं सौम्यं वच उक्त्वा कृताञ्जलिः राजा जनकः प्रत्युत्थाय उभौ मुनिवरौ वाक्यमब्रवीत् ॥१४॥

गो० टी०–प्रत्युत्थाय आदरातिशयेनेति भावः ॥ १४ ॥

१५] ति० टी०–परो धर्मः कन्यादानरूपः । अहं भवतोः शिष्योऽस्मि तथा यथा दशरथश्च युवयोः शिष्यः । स्वस्य शिष्यत्वे कनीयसः कुशध्वजस्य शिष्यत्वमर्थसिद्धम् । आसनमुख्यानि त्रयाणां त्रीणि सिंहासनानि । आस्यतामित्यार्षं परिपालयेतामित्यर्थकम् । राज्यत्रयमपि युष्मदीयमित्यर्थः ॥ १५ ॥

रा० टी०–तद्वाक्यमेवाह–पर इति । मह्यं परः अत्युत्कृष्टः धर्मः रामादिविवाहरूपः कृतः संपादित उपदिष्ट इत्यर्थः । अतः सदा इतःप्रभृति सर्वस्मिन् काले भवतोः शिष्योऽस्मि अत इमानि मत्समर्पितानि आसनमुख्यानि गुरूचितासनानि मुनिपुंगवौ युवाम् आस्येताम् । गुरुत्वादासनयोर्बहुत्वम् आसनबाहुल्याद्वा । 'आस्यताम्' इति भट्टसंमतः पाठः । एकत्वमार्षमिति तैरुक्तम् ॥ १५ ॥

गो० टी०–परो धर्मः कन्याप्रदानरूपः ॥ १५ ॥

गो० टी०–इमानीति । सार्धश्लोक एकान्वयः । मद्भ्रातुर्मम दशरथस्य च यान्यासनमुख्यानि सिंहासनानि तानि युवामासातां पुरुषव्यत्यय आर्षः विनयाय प्रथमपुरुषो वा । राज्यत्रयमपि युष्मदीयमित्यर्थः । नन्वु दशरथसिंहासनं कथं त्वया शक्यं दातुं तत्राह–यथेति । इयं मिथिला यथा दशरथस्येष्टविनियोगार्हा तथा अयोध्या च मम तथा च युवयोः प्रभुत्वे संदेहो नास्ति अतो यथार्हं यथोचितं प्रभुत्वं कर्तुमर्हथ पूजायां बहुवचनम् वयं सर्वे भवदधीनाः यूयमेवास्माक त्रयाणां हितमुपदिश्य यथोचितं प्रकृतकार्य कर्तुमर्हथेत्यर्थः ॥ १६ ॥

१६] ति० टी०–ननु दशरथसिंहासनं कथं त्वया शक्यदानमत आह–यथेति । यथेयं मिथिला दशरथस्य यथेष्टविनियोगार्हा, एवमयोध्यापुरी मम अतो युष्माकं त्रिसिंहासनप्रभुत्वे नास्ति संदेहः अतो यथायोग्यं प्रभुत्वं कर्तुमर्हथ । पूजायां बहुवचनम् वयं सर्वे भवदधीना इत्याशयः ॥ १६ ॥

रा० टी०–यथेति । यथा दशरथस्य पुरी अयोध्या तथा दशरथस्य पुरी ममेयं मिथिला अतः प्रभुत्वे पुरीद्वयनिरूपितदशरथस्वामित्वे संदेहः संशयो नास्ति अतः यथार्हं यथायोग्यं कर्तुमर्हथ यूयमिति शेषः पूजार्थं बहुवचनम् ॥ १६ ॥

१७] ति० टी०–हृष्टः एवमेक्यवादेनेति शेषः ॥ १७ ॥

रा० टी०–तथेति । वैदेहे जनके तथा ब्रुवति सति हृष्टो रघुनन्दनो राजा दशरथः महीपतिं जनकं प्रत्युवाच ॥१७॥

गो० टी०–हृष्ट इति। एवमेकवाक्यवादेनेति शेषः॥१७–२०॥

१८] ति० टी०–ऋषिरूपा भवद्दृश्या राजसंघास्ते भवद्भ्यामभिपूजिता अनेन विनयेन सर्वोत्कर्षं प्रापिताः भवद्दृशे एवैवं विनीतो नायमपूर्वोऽर्थस्त्वयीति भावः ॥ १८ ॥

रा० टी०–तत्प्रतिवचनमेवाह–युवामिति । हे मिथिलेश्वरौ ! युवां भ्रातरौ असंख्येयगुणौ अत एव ऋषयो राजसंघाश्च भवद्भ्यामभिपूजिता अतिसत्कृतिं प्राप्ताः ॥ १८ ॥

१९] ति० टी०–क्षत्रियत्वेऽपि प्रतिग्रहीतृत्वाद्दातरि जनके आशीः स्वस्तीत्यादि ॥ १९ ॥

रा० टी०–स्वस्तीति । त्वं स्वस्ति प्राप्नुहि स्वस्तादानेन मङ्गलं प्रापय अन्तर्भावितणिजर्थः । ते भद्रम् स्वमालयं निवासस्थानं गमिष्यामि । स्वालयगमने प्रयोजनमाह–श्राद्धकर्माणि विधिवदेव विधास्ये इत्यब्रवीत् दशरथ इति शेषः । चशब्द एवार्थे किंच त्वं स्वस्ति प्राप्नुहि अहं ते दत्तं स्वमालयं गमिष्यामि ॥ १९ ॥

२०] ति० टी०–आपृष्ट्वापृच्छ्य ॥ २० ॥

रा० टी०–तमिति । तदा तस्मिन् समये महायशाः राजा दशरथः तं नरपतिं जनकमापृष्ट्वा आपृच्छ्य तौ मुनीन्द्रौ वशिष्ठविश्वामित्रौ पुरस्कृत्य आशु जगाम ल्यबभाव आर्षः॥२०॥

२१] ति० टी०–प्रभात उत्थाय काल्यं प्रातःकालकर्तव्यं गोदानाख्यं कर्म चक्रे ॥ २१ ॥

रा० टी०–स इति । स राजा दशरथः निलयं गत्वा

१ तदेति गो. रा. पाठः । २ आसातामिति गो. आस्येतामिति रा. पाठः । ३ गमिष्यामीति गो. रा. पाठः । ४ सर्वाणि विधास्यामीतीति गो. पाठः ।

गवां शतसहस्रं च ब्राह्मणेभ्यो नराधिपः । एकैकशो ददौ राजा पुत्रानुद्दिश्य धर्मतः ॥ २२ ॥
सुवर्णशृङ्ग्यः संपन्नाः सवत्साः कांस्यदोहनाः । गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥ २३ ॥
वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनन्दनः । ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः ॥ २४ ॥
स सुतैः कृतगोदानैर्वृतः सँन्नृपतिस्तदा । लोकपालैरिवाभाति वृतः सौम्यः प्रजापतिः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ।

जनकः कृतमाङ्गलिकवेषैः कुमारैः सह दशरथं विवाहमण्डपं निनाय । वसिष्ठो विश्वामित्रशतानन्दौ पुरस्कृत्य वैवाहिकमुपचक्राम । धृतदानोदका रामादयः सीतादिपाणीञ्जगृहुः प्राप्तमोदाश्च देवाः नृत्यगानपुरःसरं सुरतरुकुसुमानि ववृषुः ।

यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमम् । तस्मिंस्तु दिवसे वीरो युधाजित्समुपेयिवान् ॥ १ ॥
पुत्रः केकयराजस्य साक्षाद्भरतमातुलः । दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ २ ॥
केकयाधिपती राजा स्नेहात्कुशलमब्रवीत् । येषां कुशलकामोऽसि तेषां संप्रत्यनामयम् ॥ ३ ॥

विधानतः श्राद्धं कृत्वा प्रभाते उत्थाय कार्य्यं प्रातःकालकर्तव्यमुत्तमं गोदानाभिधं कर्म चक्रे ॥ २१ ॥

गो० टी०–कार्य्यं काले कर्तव्यं गोदानं समावर्तनम् ॥ २१ ॥

२२] ति० टी०–तदङ्गत्वेन प्रसिद्धगोदानमाह–**गवामि**त्यादि । एकैकश इत्यार्षम् ॥ २२ ॥

रा० टी०–तत्कर्माङ्गीभूतं गोदानं वदन्नाह–**गवामिति** । राजा पुत्रात्यनुरागविशिष्टो नराधिपो दशरथः एकैकशः पुत्रानुद्दिश्य ब्राह्मणेभ्यो धर्मतः गवां शतसहस्राणि ददौ । एकैकश इत्यत्र उक्तार्थानामितिन्यायाप्रवृत्तिस्तु द्वौ ब्राह्मणावित्यादाविव द्विर्वेदं सुवर्दं भवतीति स्वीकारात् आर्षं इत्युक्तिस्तु तदविचारमूलका ॥ २२ ॥

गो० टी०–तदङ्गदानान्याह–**गवामित्यादि** ॥ २२ ॥

२३] ति० टी०–संपन्ना बहुदुग्धाः । ईदृश्यो या गावस्तासां गवां चत्वारि लक्षाणि ददावित्युत्तरेणान्वयः[1] ॥ २३ ॥

२४] ति० टी०–गोदानं तदाख्यं कर्मविशेषम् । 'गोदानं चौलवत्कार्यं षोडशेऽब्दे तदुच्यते । अङ्कोपवेशनं नास्ति श्मश्रूणां मुण्डनं भवेत् ॥ ज्ञात्वा च वाग्यतस्तिष्ठन्नहःशेषं नयेदथ । आदित्येऽस्तमिते वाचं विसृजेतान्तिके गुरोः ॥ अहं वरं ददामीति दयार्द्रोमिथुनं ततः ॥' इत्याश्वलायनकारिकायाम् । इदं समावर्तनपूर्वाङ्गम् 'वेदव्रतानि वा पारं नीत्वा स्नास्यन्नुभयमेव वा । गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ॥' इति याज्ञवल्क्यात् ॥ २४ ॥

रा० टी०–गोदानप्रकारं वदन्नाह–**सुवर्णेति** । पुत्रवत्सलः पुरुषर्षभो रघुनन्दनो दशरथः सुवर्णशृङ्गाः संपन्नाः सवत्साः वत्ससहिताः कांस्यदोहनाः या गावः तासां गवां चत्वारि शतसहस्राणि ददौ पुत्राणां गोदानमुद्दिश्य सुबहु वित्तमन्यच्च द्विजेभ्यो ददौ । द्वयोरेकत्रान्वयः ॥ २३ ॥ २४ ॥

गो० टी०–संपन्नाः क्षीरसंपन्नाः कांस्यदोहनाः कांस्यमयदोहनपात्राः सुबहु अन्यद्वित्तं च ॥ २३ ॥ २४ ॥

२५] ति० टी०–सौम्यः सोम इव सोम्यः सोम्य एव सौम्यः ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

रा० टी०–स इति । तदा गोदानोत्तरकाले कृतगोदानैः सुतैर्वृतः सन् स नृपतिः लोकपालैर्वृतः सौम्यः सोमः प्रजापतिरिवाभाति । सौम्यशब्दः स्वार्थष्यञन्तः ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

गो० टी०–सौम्यः सुप्रसन्नचित्तः ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

१–२] ति० टी०–समुपेयिवान् दशरथमिति शेषः ॥ १–२ ॥

रा० टी०–यस्मिन्निति । यस्मिन्दिवसे राजा दशरथः उत्तमं गोदानं चक्रे तस्मिन्नेव दिवसे समुपेयिवान् आगतः वीरः केकयराजस्य साक्षादेव पुत्रः भरतमातुलो युधाजित् राजानं दशरथं दृष्ट्वा कुशलं पृष्ट्वा चेदं वचनमब्रवीत् । श्लोकद्वयमेकान्वयि तुशब्दावेवार्थौ ॥ १ ॥ २ ॥

गो० टी०–अथ सीताविवाहत्रिसप्ततितमे–**यस्मिन्नि**त्यादि ॥ १ ॥

गो० टी०–साक्षात्पदेन भिन्नोदरमातुलोऽप्यस्तीति गम्यते ॥ २ ॥

३] ति० टी०–केकयाधिपतिर्युधाजित्पिता कुशलमब्रवीदिति युष्मान्प्रतीति शेषः । येषामस्माकं त्वं कुशलकामोऽसि तेषामस्माकं संप्रत्यनामयमिति चाब्रवीत् ॥ ३ ॥

---

१ शतसहस्राणीति गो. रा. पाठः । २ शृङ्गा इति गो. रा. पाठः । ३ त्विति गो. पाठः ।

स्वस्रीयं मम राजेन्द्र द्रष्टुकामो महीपतिः । तदर्थमुपयातोऽहमयोध्यां रघुनन्दन ॥ ४ ॥
श्रुत्वा त्वहमयोध्यायां विवाहार्थं तवात्मजान् । मिथिलामुपयातांस्तु त्वया सह महीपते ॥ ५ ॥
त्वरयाभ्युपयातोऽहं द्रष्टुकामः स्वसुः सुतम् । अथ राजा दशरथः प्रियातिथिमुपस्थितम् ॥ ६ ॥
दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् । ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः ॥ ७ ॥
प्रभाते पुनरुत्थाय कृत्वा कर्माणि तत्त्ववित्[1] । ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ॥ ८ ॥
युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः । भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ॥ ९ ॥
वसिष्ठं तु पुरस्कृत्य महर्षीनपरानपि । वसिष्ठो भगवानेत्य वैदेहमिदमब्रवीत् ॥ १० ॥
राजा दशरथो राजन्कृतकौतुकमङ्गलैः । पुत्रैर्नरवरश्रेष्ठो[2][3] दातारमभिकाङ्क्षते ॥ ११ ॥
दातृप्रतिग्रहीतृभ्यां सर्वार्थाः संभवन्ति हि । स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमम् ॥ १२ ॥

रा० टी०–तद्वचनमेवाह–केकय इति । केकयाधिपतिः राजा त्वेहात्कुशलं भवत्कुशलमहमाकाङ्क्षे इत्यादिवचनमब्रवीत् । येषां केकयानां अस्माकं त्वं कुशलकामोऽसि तेषां संप्रतीदानीमनामयं कुशलमस्ति । 'पटोलपत्रं पित्तघ्नं नाडी तस्य कफावहा' इतिवत् सर्वनाम्ना विशेषणीभूतकेकयपरामर्शः ॥ ३ ॥

गो० टी०–केकयाधिपतिः स्वपिता अनामयं कुशलं वियत इति शेषः ॥ ३ ॥

४–५] ति० टी०–आगमनप्रयोजनमाह–स्वस्रीयमिति। स्वस्रीयं भरतम् ॥ ४ ॥ ५ ॥

रा० टी०–स्वस्रीयमिति । हे रघुनन्दन ! हे राजेन्द्र ! महीपतिर्मत्पिता मम स्वस्रीयं मद्भगिनीपुत्रं भरतं द्रष्टुकामस्तदर्थं तदानयनार्थमहमयोध्यामुपयातः प्राप्तः ॥ ४ ॥

गो० टी०–स्वसुरपत्यं स्वस्रीयः ॥ ४ ॥ ५ ॥ ६ ॥

रा० टी०–श्रुत्वेति । हे महीपते ! विवाहार्थं त्वया तुशब्देन विश्वामित्रेण सह मिथिलामुपयातान्प्राप्तांस्तवात्मजानयोध्यायां श्रुत्वैव अहं न जहाति चित्तं तत्रैव सर्वदा तिष्ठतीत्यर्थः तं स्वसुः सुतं द्रष्टुकामोऽहं त्वरया अभ्युपयातः । सार्धश्लोक एकान्वयी तुशब्द एवार्थे नञ्पूर्वकजहातेः कर्तरि कः । न हीयते चित्तेन त्यज्यतेऽसावित्यर्थे तु कर्मणि को बोध्यः अत एवाहमित्यनेन न पौनरुक्त्यम् ॥ ५ ॥

६–७] ति० टी०–अयोध्यायामदृष्ट्वा भरतं द्रष्टुकामइहाभ्युपयात इत्यन्वयः ॥ ६ ॥ ७ ॥

रा० टी०–अथेति । अथ युधाजित्संभाषणानन्तरं राजा दशरथः उपस्थितं प्राप्तं पूजनार्हं प्रियातिथिं युधाजितं दृष्ट्वा परमसत्कारैरपूजयत् ॥ ६ ॥

रा० टी०–तत इति । ततः कृतयुधाजित्सत्कृत्यनन्तरं महात्मभिः पुत्रैः सह तां रात्रिमुषित आसीदिति शेषः ॥ ७ ॥

८] ति० टी०–यज्ञवाटं यज्ञशालाद्वारम् ॥ ८ ॥

रा० टी०–प्रभाते इति । तदा तस्मिन्प्रभाते काले पुनरुत्थाय कर्माणि कृत्वा ऋषीन्पुरस्कृत्य तत्त्वविद्दशरथः यज्ञवाटमुपागमत् ॥ ८ ॥

गो० टी०–यज्ञवाटं यज्ञवाटसमीपम् । अत्र यज्ञवाटशब्देनोत्सवशालोच्यते पूर्वं यज्ञस्यान्त इत्युक्तत्वेन यज्ञस्य समाप्तत्वात् उत्तरसर्गे दशरथानुयानोक्तेश्च ॥ ७ ॥

९] ति० टी०–युक्ते इत्यादि सार्धश्लोकस्योपागमदिति पूर्वेणान्वयः । युक्ते शुभलग्नादियुक्ते विजये तदाख्ये ॥ ९ ॥

रा० टी०–युक्ते इति । युक्ते विवाहयोग्ये विजये मुहूर्ते सति सर्वाभरणभूषितैः भ्रातृभिः सहितः कृतकौतुकमङ्गलः कृतं कौतुकमङ्गलं यस्य सः रामः वसिष्ठमपरान्महर्षीनपि पुरतः अग्रे कृत्वोपागमदिति पूर्वेणान्वयः ॥ ९ ॥

गो० टी०–युक्ते विवाहानुरूपे विजये विजयावहे न तु विजयाख्ये तस्यापराह्णिकत्वात् मुहूर्तशब्दस्य घटिकाद्वयपरत्वे विजयः पूर्वाह्ण एव भवति पुरतः कृत्वा उपागमदिति शेषः । कृतकौतुकमङ्गलः कृतविवाहसूत्रबन्धनरूपमङ्गलाचारः 'कौतुकं विषयाभोगे हस्तसूत्रे' इत्यमरः ॥ ८ ॥ ९ ॥

१०] ति० टी०–एत्य यज्ञवाटान्तर्वर्तिनं वैदेहम् ॥ १० ॥

रा० टी०–वशिष्ठमिति । भगवान्समर्थो वशिष्ठः वैदेहमेत्य प्राप्य इदमब्रवीत् ॥ १० ॥

११] ति० टी०–दातारं दातुस्तवाज्ञां प्रवेष्टुमाकांक्षते॥११॥

रा० टी०–तद्वचनमेवाह–राजेति । हे राजन् ! कृतकौतुकमङ्गलैः पुत्रैः सहितः नरवरश्रेष्ठो राजा दशरथः दातार कन्यादानकर्तारं भवन्तमभिकाङ्क्षते द्रष्टुमिति शेषः ॥ ११ ॥

गो० टी०–दातारमिति त्वामिति शेषः ॥ १० ॥

१२] ति० टी०–दातृप्रतिग्रहीतृभ्याम् योगे इति शेषः । सर्वार्था दानधर्माः हि यतोऽत उत्तमं वैवाह्यम् । आर्षः ष्यञ् । विवाहोपयोगिलौकिकालौकिकं कर्म कृत्वा ततः स्वधर्मं प्रवेशाज्ञादानरूपं प्रतिपद्यस्व । तावद्वार्येव तिष्ठाम इति भावः ॥१२॥

रा० टी०–अभिकाङ्क्षणे हेतुं वदन्नाह–दात्रिति । दातृप्रतिग्रहीतृभ्यामेव सर्वार्थाः दानसंतानाः संभवन्ति अतः उत्तमं वैवाह्यं विवाहं कृत्वा स्वधर्मं परमदातृत्वं प्रतिपद्यस्व प्राप्नुहि । हिशब्द एवार्थे ब्राह्मणादित्वात्स्वार्थे ष्यञ् ॥ १२ ॥

१ कर्मविदिति गो. पाठः । २ पुरतः कृत्वेति गो. रा. पाठः । ३ श्रेष्ठे इति गो. पाठः ।

इत्युक्तः परमोदारो वसिष्ठेन महात्मना । प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ १३ ॥
कः स्थितः प्रतिहारो मे कस्याज्ञां संप्रतीक्षते । स्वगृहे को विचारोऽस्ति यथा राज्यमिदं तव ॥ १४ ॥
कृतकौतुकसर्वस्वा वेदिमूलमुपागताः । मम कन्या मुनिश्रेष्ठ दीप्ता वह्नेरिवार्चिषः[1] ॥ १५ ॥
सद्योऽहं त्वत्प्रतीक्षोऽस्मि वेद्यामस्यां प्रतिष्ठितः । अविघ्नं क्रियतां सर्वं किमर्थं हि विलम्ब्यते ॥ १६ ॥
तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा । प्रवेशयामास सुतान्सर्वानृषिगणानपि ॥ १७ ॥
ततो राजा विदेहानां वसिष्ठमिदमब्रवीत् । कारयस्व ऋषे सर्वामृषिभिः सह धार्मिक ॥ १८ ॥
रामस्य लोकरामस्य क्रियां वैवाहिकीं प्रभो । तथेत्युक्त्वा तु जनकं वसिष्ठो भगवानृषिः ॥ १९ ॥

गो० टी०–दातृप्रतिग्रहीतृभ्यामिति योग इति शेषः। सर्वार्थाः दानप्रतिग्रहादयः विवाह एव वैवाह्यं कृत्वा स्वधर्म प्रतिज्ञारूपम् ॥ ११ ॥ १२ ॥

१३] ति० टी०–परमोदारः परमदाता ॥ १३ ॥

रा० टी०–इतीति । महात्मना वशिष्ठेन इति अनेन प्रकारेणोक्तः परमोदारः महातेजाः परमधर्मवित् जनकः वाक्यं प्रत्युवाच ॥ १३ ॥

१४] ति० टी०–प्रतिहारो द्वारपालः । येन राजागमनं प्रतिबध्यते इति शेषः । यथेदं मम राज्यं तथा तव तत्र स्वगृहे प्रवेशे को विचार इत्यर्थः ॥ १४ ॥

रा० टी०–तद्वाक्यमेवाह–क इति । मे मम प्रतिहारो द्वारपालः कः स्थितः यन्निवारितो नेहायातीति शेषः । न प्रतिहारः कश्चिदिति चेत् तर्हि कस्याज्ञां संप्रतीक्षते इहागमनायेति शेषः । ननु विचारमन्तरा कथमत्रागमनं स्यादित्यत आह–स्वगृहे विचारः कोऽस्ति स्वगृहागमनस्य विचारो न कर्तव्य इत्यर्थः । स्वगृहत्वं प्रतिपादयति–इदं राज्यं यथावत्तवास्ति एतेन यदि राज्यं तव तर्हि गृहं तवेति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः ॥ १४ ॥

गो० टी०–प्रतिहारः द्वारपालः किमर्थं द्रुतमागमनं परिहियत इति भावः । यथेति त्वदीयं राज्यमिव मदीयमपि राज्यं तवैव तथाच मद्गृहमात्रस्य स्वीयत्वे को विचार इत्यर्थः ॥ १३ ॥

१५] ति० टी०–अपि च कृतस्वकर्तव्येन मयैव युष्मत्प्रतीक्षा क्रियत इत्याह–कृतेति । कृतं कौतुकसर्वस्वं वैवाहिककृत्यमङ्गलानुष्ठानं यासां ताः । वेदिमूलं वेदिसमीपम् ॥ १५ ॥

रा० टी०–स्वस्यातीव विवाहापेक्षितत्वं बोधयन्नाह–कृतेति । हे मुनिश्रेष्ठ ! कृतकौतुकसर्वस्वाः कृतं कौतुकं कौतुकोपलक्षितविवाहोचितबद्धहस्तसूत्राद्येव सर्वस्वं याभिः ता वेदीमूलमुपागताः प्राप्ताः वह्नेरर्चिषा प्रकाशेनेव दीप्ता प्रकाशिता मम कन्याः सन्तीति शेषः ॥ १५ ॥

गो० टी०–कृतकौतुकसर्वस्वाः अनुष्ठितविवाहोपयोगिसर्वमङ्गलाचाराः ॥ १४ ॥

१६] ति० टी०–सद्योऽस्मिन्काले । त्वां प्रतीक्षत इति त्वत्प्रतीक्षः । अविघ्नमविलम्बं यथा तथा सर्वं विवाहकर्म भवता क्रियताम् । किमर्थं द्वार्यवस्थानेन विलम्ब्यते भवतेति शेषः ॥ १६ ॥

रा० टी०–सद्य इति । सद्योऽस्मिन् काले अस्यां वेद्यां प्रतिष्ठितः स्थितः त्वत्प्रतीक्षः त्वत्कर्मकप्रतीक्षावानहमस्मि अतः अविघ्नं यथा भवति तथा सर्वं विवाहसंबन्धि कर्म क्रियतामेव किमर्थं विलम्ब्यते भवद्भिरिति शेषः । हिशब्द एवार्थे ॥ १६ ॥

गो० टी०–अविघ्नमविलम्बम् अवलम्बते विलम्बते ॥ १६ ॥

१७] ति० टी०–श्रुत्वा वसिष्ठमुखात् ॥ १७ ॥

रा० टी०–तदिति । तदा जनकोक्त्युत्तरकाले जनकेनोक्तं तद्वाक्यं दशरथः श्रुत्वा दूतमुखादवगत्य सर्वान् सुतान् ऋषिगणानपि प्रवेशयामास जनकगृहे इति शेषः ॥ १७ ॥

गो० टी०–श्रुत्वेति वसिष्ठप्रेरितपुरुषमुखादित्यर्थः ॥ १६ ॥

१८] ति० टी०–सर्वां वैवाहिकीमित्युत्तरेणान्वयः ॥१८॥

रा० टी०–तत इति । ततः दशरथागमनानन्तरं विदेहानां राजा जनकः वशिष्ठमिदमब्रवीत् । अर्धं पृथक् । तद्वाक्यमेवाह–कारयस्वेति । हे ऋषे ! हे धार्मिक ! हे प्रभो ! लोकरामस्य रामस्य वैवाहिकीं सर्वां क्रियामृषिभिः सह त्वं कारयस्व ॥ १८ ॥

गो० टी०–तत इति । लोका रमन्तेऽस्मिन्निति लोकरामः तस्य ॥ १७ ॥ १८ ॥

१९] ति० टी०–लोकरामस्य लोकप्रियस्येति यावत् ॥१९॥

रा० टी०–तथेति । भगवान् ऋषिर्महातपा वशिष्ठः जनकं तथा इत्युक्त्वा धार्मिकं विश्वामित्रं शतानन्दं च पुरस्कृत्य प्रपामध्ये प्रपासदृशशैत्यादिविशिष्टमण्डपं तन्मध्ये एव विधिवत् वेदीं कृत्वा समन्ततः चतुर्दिक्षु गन्धपुष्पैः सुवर्णपालिकाभिश्च साङ्कुरैः छिद्रकुम्भैः करकैश्च अङ्कुराढ्यैः अङ्कुरपूर्णैः शरावैश्च सपूपकैर्भूपपात्रैश्च शङ्खपात्रैः शङ्खान्येव पात्राणि तैश्च स्रुवैः आज्यहवनसाधनभूतपात्रविशेषैश्च सुग्भिः तत्पात्रविशेषैश्च अर्घ्याभपूरितैः अर्घजलपूर्णैः लाजपूर्णैः पात्रैश्च पात्रीभिस्तत्रोपयुक्तालपपात्रैश्च संस्कृतैर्दध्यादिकृतसंस्कारविशिष्टैरक्षतैरपि तां वेदीमलंचकार । श्लोकचतुष्टयमेकान्वयि ॥ १९–२२ ॥

गो० टी०– तथेति । प्रपी पानीयशालिका अभिनव-

१ अर्चिषेति रा. पाठः । २ कुरुतां राज्ञामिति रा. राजेति गो. पाठः ।

विश्वामित्रं पुरस्कृत्य शतानन्दं च धार्मिकम् । प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥ २० ॥
अलंचकार तां [1]वेदिं गन्धपुष्पैः समन्ततः । सुवर्णपालिकाभिश्च चित्रैःकुम्भैश्च साङ्कुरैः ॥ २१ ॥
अङ्कुराढ्यैः शरावैश्च धूपपात्रैः सधूपकैः । शङ्खपात्रैः सुवैः स्रुग्भिः पात्रैरर्घ्यादिपूजितैः ॥ २२ ॥
लाजपूर्णैश्च पात्रीभिरक्षतैरपि संस्कृतैः । दर्भैः समैः समास्तीर्य विधिवन्मन्त्रपूर्वकम् ॥ २३ ॥
अग्निमाधाय [4]तं वेद्यां विधिमन्त्रपुरस्कृतम् । जुहावाग्नौ महातेजा [5]वसिष्ठो मुनिपुंगवः ॥ २४ ॥
ततः सीतां समानीय सर्वाभरणभूषिताम् । समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ॥ २५ ॥
अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् । इयं सीता मम सुता सहधर्मचरी तव ॥ २६ ॥

नालिकेरादिपत्ररचितमण्डप इत्यर्थः। सुवर्णपालिकाभिः साङ्कुराभिरितिलिङ्गविपरिणामेनानुकृष्यते छिद्रकुम्भैः करकैः शङ्खपात्रैः शङ्खरूपपात्रैः सुक्सुवावाज्यहोमसाधनपात्रविशेषौ अर्घ्याभिपूरितैः अर्घ्यार्थजलपूरितैः लाजपूर्णैः पात्रैरित्यनुषज्यते पात्रीभिः कार्यान्तरोपयुक्तपात्रान्तरैः अभिसंस्कृतैः हरिद्रालेपनादिसंस्कारवद्भिः अलंचकारेति पूर्वेणान्वयः ॥ १९–२१ ॥

२०] ति० टी०–प्रपामध्ये यज्ञशालामध्ये इति कतकः प्रपा मण्डप इत्यन्ये । तृष्णाशामकत्वेन प्रपात्वारोपः । वेदिं विवाहवेदिम् । इयं वेदिरन्यर्था ॥ २० ॥

२१] ति० टी०–सुवर्णपालिकाभिः साङ्कुराभिरित्यनुकर्षः । चित्रकुम्भैर्नानावर्णादियुतकुम्भैः 'अच्छिद्रकुम्भैः' इति पाठे स्फुटनादिदोषरहितैः स्वर्णकुम्भैरित्यर्थ इति कतकः । अच्छिद्रकुम्भैः करकैरिति तीर्थः ॥ २१ ॥

२२] ति० टी०–अर्घ्यादिपूजितैस्तयुक्तैः ॥ २२ ॥

२३] ति० टी०–लाजपूर्णैश्च पात्रीभिरित्यार्षम् । संस्कृतैर्हरिद्रालेपादिसंस्कारवद्भिः समैः समप्रमाणैः समास्तीर्य वेदिमिति शेषः ॥ २३ ॥

रा० टी०–दर्भैरिति । समैर्न्यूनाधिकरहितैः शास्त्रोक्तपरिमाणविशिष्टैरित्यर्थः । दर्भैः विधिवन्मन्त्रपूर्वकमेव समास्तीर्य वेद्यां विधिमन्त्रपुरस्कृतं यथा स्यात्तथा अग्निमाधाय महातेजा ऋषिसत्तमो वशिष्ठः अग्नौ जुहाव । तुशब्द एवार्थे ॥ २३ ॥ २४ ॥

गो० टी०–समैः समपरिमाणैः अत्र पाणिग्रहणात्पूर्वं होमः आभ्युदयिकः ॥ २२ ॥ २३ ॥

२४] ति० टी०–विधिना कल्पोक्ततन्त्रकलापेन मन्त्रैश्च पुरस्कृतम् हविरिति शेषः । विवाहहोमादीनां वरकृत्यत्वात्तत्पुरोहितो वसिष्ठो जुहाव ॥ २४ ॥

२५] ति० टी०–अग्नेः समक्षं राघवाभिमुखदेशे संस्थाप्येत्यन्वयः ॥ २५ ॥

रा० टी०–तत इति । तदा हवनानन्तरकाले सर्वाभरणभूषितां सीतां समानीय राघवाभिमुखे रामसंमुखे अग्नेः समक्षं संस्थाप्य ततः वैवाहिककर्मविस्तारकारयिता राजा जनकः कौशल्यानन्दवर्धनं राममब्रवीत् ॥ २५ ॥

२६] ति० टी०–इयं त्वद्भुजवीर्यनिर्जिता मम सुतेत्याभिजात्यमूचनम् । सहधर्मचरी अनेन यत्कर्तव्यं तदनया सहेति स्मारितम् ॥ २६ ॥

रा० टी०–तद्वचनमेवाह–इयमिति । मम सुता इयं सीता तव सहधर्मचरी सहैव धर्मं चरति सा स्यादिति शेषः । अतः एनां प्रतीच्छ स्वकीयात्वेन स्वीकुरु। स्वीकारप्रकारमाह–पाणिना स्वकरेण पाणिमस्याः करं गृह्णीष्व ते भद्रम् । चो हेतौ ॥ २६ ॥

गो० टी०–अथ सौन्दर्याभिजात्यादिना सीतायाः प्रतिग्रहार्हतां वदन् प्रतिग्रहमनुजानाति–इयमिति । इयं अपरिच्छेद्यसौन्दर्यसौकुमार्यलावण्यादिकं प्रत्यक्षेण निर्दिशति न केवलं प्रत्यक्षं सौन्दर्यादिकं प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्समानस्यायोनिजत्वेनानुमेयं चेत्याह–सीता 'सीता लाङ्गलपद्धतिः' तज्जन्यतया तथाव्यपदेशः इयं सीता या सिद्धाश्रमात्प्रभृति धनुर्भङ्गादिना कुतूहलगोचरतामासादिता सेयं सीता, यद्वा सीतादर्शनदशायां विद्युत्स्फुरणसमय इव क्वचिदप्यवयविप्रतिपत्त्यभावेन ससंभ्रमं रामं प्रत्याह–इयं सीतेति, यद्वा 'प्रासादे सा पथि पथि च सा पृष्ठतः सा पुरः सा' इत्युक्तरीत्या अनवरतभावनाप्रकर्षेण सर्वत्र सीतायाः प्रतीयमानत्वादाह–इयं सीतेति, यद्वा यथा राम आत्मानं मानुषं मन्यते एवं सीतापि अतो राघवत्वेऽभवत्सीतेत्याह–इयं सीतेति। न केवलं सौन्दर्यमस्मदपेक्षितं किंत्वाभिजात्यं चेत्यत्राह–मम सुतेति। आचारप्रधानजनककुलजातायाः किं वक्तव्यमाभिजात्यमिति भावः । यद्वा मम सुता महता तपसा राम इतिवत् तुभ्यं दातुं विरचितविविधव्रतोपवासादिकस्य मम कन्येत्यर्थः। अस्त्वियं सुन्दरी भोगार्था धर्माचरणार्थमन्यया भवितव्यमिति मन्येतेत्यत्राह–सहधर्मचरी तवेति भोगार्थेयमेव धर्माचरणार्थापीति भावः । समानो धर्मः सहधर्मः तं चरतीति सहधर्मचरी । 'दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम्' इतिवक्तुस्तवानुरूपेयम् 'न कश्चिन्नापराध्यति' इति वक्तीति भावः । एवं सौन्दर्याभिजात्यधर्माचरणशीलत्वादिमत्त्वेऽपि त्वदनुमत्यभावात्रैनां प्रतिगृह्णामीत्यत्राह–प्रतीच्छ चैनामिति । प्रतीच्छ गृहाण सीतायाः रामाविनाभूततया तस्याः प्रदानानर्हत्वात् ददामीत्यनुक्तिः । भद्रं ते स्वतः-

१ वेदीमिति रा. पाठः । २ छिद्रकुम्भैरिति गो. रा. पाठः । ३ अर्घ्याभिपूरितैरिति गो. रा. पाठः । ४ वेद्यां त्विति गो. रा. पाठः । ५ वसिष्ठ ऋषिसत्तम इति गो. पाठः ।

प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना । पतिव्रता महाभागा छायेवानुगता सदा ॥ २७ ॥
इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा । साधु साध्विति देवानामृषीणां वदतां तदा ॥ २८ ॥
देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत् । एवं दत्त्वा सुतां सीतां मन्त्रोदकपुरस्कृताम् ॥ २९ ॥
अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः । लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया ॥ ३० ॥
प्रतीच्छ पाणिं गृह्णीष्व मा भूत्कालस्य पर्ययः । तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ॥ ३१ ॥
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन । शत्रुघ्नं चापि धर्मात्मा अब्रवीन्मिथिलेश्वरः ॥ ३२ ॥
श्रुतकीर्तेर्महाबाहो पाणिं गृह्णीष्व पाणिना । सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः ॥ ३३ ॥
पत्नीभिः सन्तु काकुत्स्था मा भूत्कालस्य पर्ययः । जनकस्य वचः श्रुत्वा पाणीन्पाणिभिरस्पृशन् ॥ ३४ ॥

सिद्धायाः कस्त्वं दातुमिति रामः कुप्येदिति सान्त्वयति, यद्वा निरतिशयकन्यालक्षणशालिन्या अस्याः प्रतिग्रहे भवतः सर्वाणि मङ्गलानि भविष्यन्तीत्यर्थः । यद्वा अनुरूपवधूवरयोः संयोगे दृष्टिदोषो भविष्यतीति मङ्गलमाशास्ते भद्रं त इति । एवं मयानुज्ञाते गान्धर्वराक्षसाभ्यामुद्वहेहेदिति भीतः प्राह पाणिं गृह्णीष्वेति 'यदि कामयेत स्त्रीरेव जनयेयमित्यङ्गुलीरेव गृह्णीयात्' इत्यायुक्तकामव्यावृत्तये पाणिमित्युक्तं प्रणयधारायां पादग्रहणमस्तु संप्रति पाणिं गृह्णीष्व पाणिनेति साहित्यकृतशोभाविशेषदर्शनाभिलाषेणोक्तं ब्राह्मणस्यैव पाणिग्रहणं क्षत्रियादेः शरादिग्रहणं विहितमतः कथमिदं संगच्छत इति न शङ्कनीयं तस्यासवर्णविषयत्वात् । आह मनुः-'पाणिग्रहणसंस्कारः सवर्णासु प्रदृश्यते । असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ॥ शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया । वासोदशा शूद्रया तु [1]पाणिरुक्तस्य वेदने' इति । अतः सर्ववर्णानामपि सवर्णासु पाणिग्रहोऽस्त्येव । पतिव्रतेत्यादि भविष्यतीति शेषः । प्राक्षिपत् रामहस्त इति शेषः ॥ २४ ॥ २६ ॥

२७] ति० टी०-प्रतीच्छ प्रतिगृहाण । तदुपयोगित्वेन पाणिना पाणिं गृह्णीष्व पाणिगृहीती हि सर्वथानतिक्रमणीयेत्येवमुक्तम् । छायेवानुगता भविष्यतीत्यन्वयः ॥ २७ ॥

रा० टी०-पतिव्रतेति । पतिव्रता महाभागा तव छाया इवानुगता सदा भविष्यतीति शेषः । राजा जनकः तदा तस्मिन्काले इत्युक्त्वा मन्त्रपूतं कन्यादानमन्त्रेण पूततां प्राप्तं जलं प्राक्षिपद्रामकरे दत्तवान् ॥ २७ ॥

२८] ति० टी०-मन्त्रपूतं कन्यादानमन्त्रेण पूतं जलं प्राक्षिपत् रामहस्ते इति शेषः । वदताम् शब्द आसीदिति शेषः ॥ २८ ॥

रा० टी०-साध्विति । तदा जनककृतकन्यादानोत्तरकाले साधु साधु इति वदतां देवानामृषीणां च देवदुन्दुभिनिर्घोषैः देवसंबन्धिदुन्दुभिनिःस्वनैः सह महान् पुष्पवर्षोऽभूत् ॥ २८ ॥

गो० टी०-शुभनिमित्तमाह-साध्विति । वदतां वदत्सु पुष्पवर्षः पुष्पवर्षश्च ॥ २६ ॥ २७ ॥

२९] ति० टी०-दानीयमन्त्रोदकाभ्यां पुरस्कृताम् ॥२९॥

रा० टी०-एवमिति । मन्त्रोदकपुरस्कृतां दानकालोचितमन्त्रयुक्तोदकेन पुरस्कृतां तां सीतां सुतामेवमुक्तप्रकारेण दत्त्वा हर्षेण अभिपरिप्लुतः व्याप्तः राजा जनकः अब्रवीत् ॥ २९ ॥

३०] ति० टी०-उद्यतां दातुं कृतनिश्चयाम् ॥ ३० ॥

रा० टी०-तद्वचनमेवाह-लक्ष्मणेति । हे लक्ष्मण ! त्वमागच्छ ते भद्रं मया मत्प्रेरणया उद्यतां भवन्तं स्वीकर्तुमुद्युक्तामूर्मिलां प्रतीच्छ स्वकीयात्वेन स्वीकुरु अत एव प्राणिं गृह्णीष्व स्वीकारसूचकपाणिग्रहणं कुरु कालस्य पर्ययः विलम्बो मा भूत् ॥ ३० ॥

३१-३२] ति० टी०-प्रतीच्छेत्यादि प्राग्व्याख्यातम् । ज्येष्ठाङ्गरतात्पूर्वं लक्ष्मणपाणिग्रहस्तु भिन्नोदरत्वान्न दोषाय ॥ ३१ ॥ ३२ ॥

रा० टी०-तमिति । तं लक्ष्मणमेवमुक्त्वा जनकः भरतमप्यभ्यभाषत । तद्भाषणमेवाह-हे रघुनन्दन ! माण्डव्याः पाणिं पाणिना स्वहस्तेन गृहाण । चोऽप्यर्थे ॥ ३१ ॥

गो० टी०-पर्ययः विलम्ब इत्यर्थः । भिन्नमातृकत्वात् भरतात्पूर्वं लक्ष्मणविवाहो न दुष्यति 'पितृव्यपुत्रे सापत्ने परनारीसुतेषु वा । विवाहदानयज्ञादौ परिवेदो न दूषणम्' इति स्मरणात् ॥ २८ ॥ २९ ॥ ३० ॥

रा० टी०-शत्रुघ्नमिति । धर्मात्मा मिथिलेश्वरो जनकः शत्रुघ्नमप्यब्रवीत् । तद्वचनमेवाह-हे महाबाहो ! श्रुतकीर्त्याः पाणिं पाणिना त्वमपि गृह्णीष्व । चोऽप्यर्थे ॥ ३२ ॥

३३] ति० टी०-सुचरितं व्रतं ब्रह्मचर्यादि यैः ॥ ३३ ॥

रा० टी०-उपसंहरन्नाह-सर्व इति । हे काकुत्स्थाः ! यतः सर्वे भवन्तः सौम्याः सर्वे सुचरितव्रताश्च ततः पत्नीभिः सहिताः सन्तु कालस्य पर्ययो मा भूत् ॥ ३३ ॥

३४] ति० टी०-पत्नीभिः सहिताः सन्तु भवन्तु इत्यध्यर्यः ॥ ३४ ॥

रा० टी०-जनकस्येति । जनकस्य वचो वचनं श्रुत्वा पाणीन् स्वस्वपत्नीकरान् पाणिभिः स्वस्वकरैः अस्पृशन् लक्ष्मणादय इति शेषः । ततः पाणिस्पर्शानन्तरं सहभार्याः भार्यासहिताः महात्मानः रघूत्तमाः यथोक्तेन विधिना अग्निं

---

१ श्रुतकीर्त्या इति गो. रा. पाठः ।

[1]चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः । अग्निं प्रदक्षिणं कृत्वा [2]वेदिं राजानमेव च ॥ ३५ ॥
ऋषींश्चापि महात्मानः सहभार्या [3]रघूद्वहाः । यथोक्तेन [4]ततश्चक्रुर्विवाहं विधिपूर्वकम् ॥ ३६ ॥
पुष्पवृष्टिर्महत्यासीदन्तरिक्षात्सुभास्वरा । दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिःस्वनैः ॥ ३७ ॥
ननृतुश्चाप्सरःसंघा गन्धर्वाश्च जगुः कलम् । विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥ ३८ ॥
ईदृशे वर्तमाने तु तूर्योद्घुष्टनिनादिते । त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः ॥ ३९ ॥
अथोपकार्यं[6] जग्मुस्ते सभार्या रघुनन्दनाः । राजाप्यनुययौ पश्यन्सर्षिसंघः सबान्धवः ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

वेदीं च राजानं च ऋषींश्च प्रदक्षिणं कृत्वा विधिपूर्वकं विवाहमवशिष्टविवाहक्रियां चक्रुः । श्लोकद्वयमेकान्वयि ॥ ३४ ॥

गो० टी०–पत्नीभिः सहिता इति शेषः । अत्रोदकप्रदानमर्थसिद्धं जनकेनानुज्ञामात्रं कृतं ज्येष्ठत्वात् उदकप्रक्षेपणं तु माण्डवीश्रुतकीर्त्योः कुशध्वजेनैव । तदाह याज्ञवल्क्यः–'पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः' इति ॥ ३१ ॥ ३२ ॥

३५] ति०टी०–वेदिं विवाहवेदिम् । राजानं जनकम् ॥ ३५ ॥

गो० टी०–अग्निमिति । अत्रैकस्यां वेदिकायां एकस्मिन्नेवाग्नौ वसिष्ठो जुहाव तेनैवमेकमग्निं सर्वे स्वस्वभार्यापाणीन् गृहीत्वा प्रदक्षिणीकृत्य चक्रुरित्युत्तरत्रान्वयः । राजानं जनकं यथोक्तेन शास्त्रोक्तप्रकारेण विधिपूर्वकं कल्पसूत्रपूर्वकं विवाहं विवाहकर्म तदा तस्मिन्काले चक्रुः स्वसूत्रानुरोधेन प्रत्येकं पाणिग्रहणहोमं चक्रुरित्यर्थः । पूर्वं वसिष्ठेन होमवचनमाभ्युदयिककर्मपरं अग्निप्रतिष्ठापनपूर्वकं विवाहहोमोक्त्रोच्यते पाणिग्रहणानन्तरमग्निं ब्राह्मणान् दातारं जनकं च प्रदक्षिणीकृत्य स्वकल्पोक्तविधानेन प्रत्येकमग्निं प्रतिष्ठाप्य विवाहहोमांश्चक्रुरित्यर्थः ॥ ३३ ॥

३६–३७] ति० टी०–ऋषींश्चापि प्रदक्षिणं कृत्वेति शेषः । यथोक्तेन शास्त्रोक्तेन प्रकारेण । विवाहं तत्कृत्यशेषं होमादि ॥ ३६ ॥ ३७ ॥

रा० टी०–पुष्पेति । दिव्यदुन्दुभिनिर्घोषादिभिः सह सुभास्वरा महती पुष्पवृष्टिः अन्तरिक्षादासीत् ॥ ३५ ॥

गो० टी०–सीताप्रदानकालिकशुभनिमित्तमुक्तं अथसर्वसाधारण्येन विवाहकर्मकालिकशुभनिमित्तानि दर्शयति–पुष्पवृष्टिरिति । तत्पुष्पवृष्ट्यादिकम् ॥ ३४ ॥ ३५ ॥

३८] ति० टी०–तदद्भुतं दुन्दुभिनिर्घोषादिसहितपुष्पवृष्ट्यादि ॥ ३८ ॥

रा० टी०–ननृतुरिति । रघुमुख्यानां विवाहे अप्सरःसंघाः ननृतुः गन्धर्वाश्च कलं मनोहरं जगुः । तत्पुष्पवृष्ट्यादि सर्वमद्भुतं विलक्षणमेवाभवत् । इवशब्द एवार्थे ॥ ३६ ॥

३९] ति० टी०–तूर्याणां यदुद्घुष्टं घोषस्तन्निनादिते काले । त्रिरग्निमित्युपसंहारेण पुनर्वादः ॥ ३९ ॥

रा० टी०–विवाहविधिमुपसंहरन्नाह–ईदृश इति । तूर्योद्घुष्टनिनादिते तूर्योद्घुष्टं तूर्यशब्दः निनादितं तत्प्रतिध्वनिश्च तयोः समाहारः तस्मिन् ईदृशे वर्तमाने सत्येव अग्निं त्रिः परिक्रम्य महौजसः ते रामादयः भार्याः स्वस्वनित्यपत्नीः ऊहुः स्वस्ववामभागं निन्युः । तुशब्द एवार्थे ॥ ३७ ॥

गो० टी०–अथ लाजहोमपूर्वकं स्वस्वाग्निप्रदक्षिणात्रयं दर्शयति–ईदृश इति । ईदृशे पूर्वोक्तरूपे तूर्याणां नृत्यगीतवाद्यानां उद्घुष्टेन उद्घोषणेन निनादिते नादे प्रतिध्वनिरूपे वर्तमाने अग्निं स्वस्वाग्निं त्रिः परिक्रम्य ऊहुः विवाहं निर्वर्तयामासुः ॥ ३६ ॥

४०] ति० टी०–उपकार्यं शिबिरम् । पश्यन्वधूवरसंबन्धकल्याणम् ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

रा० टी०–अथेति । सभार्याः ते रघुनन्दनाः उपकार्यां पटरचितगृहमथ जग्मुः मङ्गलगमनं चक्रुः, सर्षिसंघः सबान्धवो राजा दशरथोऽपि[7] पश्यन् सदारपुत्रान् अवलोकमानः अनुययौ ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

गो० टी०–राजा दशरथः पश्यन् सभार्यान्पुत्रानित्यर्थः ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

---

१ अर्धमेतत् रा. नास्ति । २ वेदीमिति रा. पाठः । ३ रघूत्तमा इति गो. रा. पाठः । ४ तदेति गो. पाठः । ५ इवाभवदिति रा. पाठः । ६ उपकार्यामिति गो. रा. पाठः । ७ सदारा इति रा. पाठः ।

चतुःसप्ततितमः सर्गः ।

विश्वामित्रो जनकदशरथावापृच्छ्य स्वाश्रमं जगाम आहितपरिबर्हको दशरथोऽपि दारकैः सममयोध्यां प्रतस्थे । मार्गे जातदुःशकुनो दशरथो वसिष्ठं प्रति तत्फलं पप्रच्छ । उपस्थितमपि भयमचिरेणैवोपशममेष्यतीति वसिष्ठः आश्वासयति तावत्स्कन्धे परशुमासज्ज्य क्रोधनो जामदग्न्यः प्रादुरास वसिष्ठादयो ऋषिगणास्तमर्घ्यादिभिः समपूजयन् ।

अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः । आपृष्ट्वा तौ च राजानौ जगामोत्तरपर्वतम् ॥ १ ॥
विश्वामित्रे गते राजा वैदेहं मिथिलाधिपम् । [1]आपृष्ट्वैव जगमाशु राजा दशरथः पुरीम् ॥ २ ॥
[[2]गच्छन्तं तं तु राजानमन्वगच्छन्नराधिपः ।]
अथ राजा विदेहानां ददौ कन्याधनं बहु । गवां शतसहस्राणि बहूनि [3]मिथिलेश्वरः ॥ ३ ॥
कम्बलानां च मुख्यानां [4]क्षौमान्कोट्यम्बराणि च । हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतम् ॥ ४ ॥
ददौ कन्याशतं तासां दासीदासमनुत्तमम् । हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ॥ ५ ॥
ददौ राजा [5]सुसंहृष्टः कन्याधनमनुत्तमम् । दत्त्वा बहुविधं राजा समनुज्ञाप्य पार्थिवम् ॥ ६ ॥
प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः । राजाप्ययोध्याधिपतिः सह पुत्रैर्महात्मभिः ॥ ७ ॥

१] ति० टी०–आपृष्ट्वापृच्छ्य । तौ दशरथजनकौ । उत्तरपर्वतं कौशिकीतटावच्छिन्नम् ॥ १ ॥

रा० टी०–उपकार्यागमनानन्तरकालिकं वृत्तमाह–अथेति । अथ उपकार्यागमनानन्तरं रात्र्यां व्यतीतायां सत्यां महामुनिर्विश्वामित्रः राजानौ तौ दशरथजनकौ आपृष्ट्वा आपृच्छ्य अनुमतिं गृहीत्वैव उत्तरपर्वतं जगाम । हिरेवार्थे ॥ १ ॥

गो० टी०–अथायोध्याप्रस्थाने मध्येमार्गं जामदग्न्यागमनं चतुःसप्ततितमे–अथ रात्र्यामित्यादि । आपृष्ट्वा आपृच्छ्य उत्तरपर्वतं स्वावासं हिमवन्तम् ॥ १ ॥

२] ति० टी०–जगाम गन्तुमुद्यतोऽभूत् ॥ २ ॥

रा० टी०–विश्वामित्र इति । विश्वामित्रे गते सति राजातिदीप्त्या उपलक्षितो राजा दशरथः मिथिलाधिपं वैदेहमापृच्छ्य पुरीमयोध्यामाशु अथ जगाम मङ्गलगमनं चकार ॥ २ ॥

गो० टी०–विश्वामित्र इति । आपृष्ट्वा जगामेतिक्रियावृत्त्या राजपदाद्वृत्तिः ॥ २ ॥ ३ ॥ ४ ॥

३] ति० टी०–कन्याधनं विवाहकाले कन्यायै देयं धनं यौतकाख्यम् । तस्यैव प्रपञ्चो गवामित्यादि ॥ ३ ॥

रा० टी०–अथेति । अथ राजप्रस्थानानन्तरं बहु अत्यधिकं कन्याधनं कन्याविवाहोचितदेयद्रव्यादि विदेहानां राजा जनको ददौ । तदेव विशदयन्नाह–पृथिवीपतिर्जनकः बहूनि गवां शतसहस्राणि मुख्यानां च बहूनि शतसहस्राणि ददौ क्षौमकोट्यम्बराणि च ददौ स्वलंकृतं दिव्यरूपं बहु हस्त्यश्वरथपादातं च ददौ । वचनविपरिणामेन बहुशब्दोऽत्राप्यनुकृष्यते । श्लोकद्वमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–कन्याधनमेव विवृणोति–गवामित्यादि । कम्बलानामित्यत्रापि शतसहस्राणीत्यनुषज्यते क्षौमकोट्यम्बराणि क्षौमाश्च कोट्यम्बराणि चेति द्वन्द्वः क्षौमानामपि बहुत्वमर्थसिद्धं क्षौमरूपकोट्यम्बराणीति वा कोट्यम्बराणि उत्कृष्टवस्त्राणीति वा हस्तीत्यादि सेनाङ्गत्वादेकवद्भावः । कन्यापिता जनकः गवाश्वादित्वाद्दासीदासमित्येकवद्भावः ॥ २ ॥ ६ ॥

४] ति० टी०–मुख्यानां कम्बलानां नेपालादिभवानां कम्बलानां बहूनीति संबन्धः । क्षौमान्बहूनिति विपरिणामः । कोट्यम्बराणि कोटिसंख्यानि सामान्यवासांसि ॥ ४ ॥

५] ति० टी०–कन्याशतं सखीत्वेन । तासां राजकुमारीणाम् प्रत्येकमिति शेषः । दासीदासमिति गवाश्वादित्वादेकत्वम् । हिरण्यं रजतम् । सुवर्णं हेम । षष्ठ्यन्तानां कोटिपदाध्याहारेणान्वयः ॥ ५ ॥

रा० टी०–ददाविति । तासां ताभ्यः स्वकन्याभ्यः अनुत्तमं कन्याशतं दासीदासं च ददौ । हिरण्यादींश्च ददौ । अत्र कर्मणां संप्रदानस्य च शेषत्वविवक्षया षष्ठ्यः ॥ ५ ॥

गो० टी०–हिरण्यस्य रजतस्य शतमिति शेषः ॥ ७ ॥ ८ ॥

६–७] ति० टी०–पार्थिवं दशरथम् ॥ ६ ॥ ७ ॥

रा० टी०–ददाविति । परमसंहृष्टः जनकः अनुत्तमं परमोत्कृष्टं कन्याधनं ददौ । अथ पृथक् । दानौत्तरकालिकं मिथिलाधिपवृत्तमाह–दत्त्वेति । मिथिलेश्वरो राजा जनकः बहुविधमनेकप्रकारकं द्रव्यादि दत्त्वा पार्थिवं दशरथं समनुज्ञाप्य स्वनिलयं मिथिलाम् प्रविवेश ॥ ६ ॥

रा० टी०–राजेति । सबलानुगः बलानुगसहितः अयोध्याधिपतिः राजापि सर्वान् ऋषीन् पुरस्कृत्य महात्मभिः पुत्रैः सह जगाम स्वपुरमिति शेषः ॥ ७ ॥

---

१ ह्यात रा. पाठः । २ अपृष्ट्वार्थेति गो. अपृच्छ्यार्थेति रा. पाठः । ३ अर्धमिदमधिकं गो. पाठे । ४ पृथिवीपतिरिति रा. पाठः । ५ क्षौमकोट्यम्बराणीति गो. रा. पाठः । ६ परमसंहृष्ट इति गो. रा. पाठः ।

ऋषीन्सर्वान्पुरस्कृत्य जगाम सैबलानुगः । गच्छन्तं तु नरव्याघ्रं सर्षिसंघं सराघवम् ॥ ८ ॥
घोरास्तु पक्षिणो वाचो व्याहरन्ति समन्ततः । भौमाश्चैव मृगाः सर्वे गच्छन्ति स्म प्रदक्षिणम् ॥ ९ ॥
तान्दृष्ट्वा राजशार्दूलो वसिष्ठं पर्यपृच्छत । असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः ॥ १० ॥
किमिदं हृदयोत्कम्पि मनो मम विषीदति । राज्ञो दशरथस्यैतच्छ्रुत्वा वाक्यं महानृषिः ॥ ११ ॥
उवाच मधुरां वाणीं श्रूयतामस्य यत्फलम् । उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्च्युतम् ॥ १२ ॥
मृगाः प्रशमयन्त्येते संतापस्त्यज्यतामयम् । तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ॥ १३ ॥
कम्पयन्मेदिनीं सर्वां पातयंश्च महाद्रुमान् । तमसा संवृतः सूर्यः सर्वे नावेदिषुर्दिशः ॥ १४ ॥
भस्मना चावृतं सर्वं संमूढमिव तद्बलम् । वसिष्ठ ऋषयश्चान्ये राजा च ससुतस्तदा ॥ १५ ॥

८] ति० टी०–बलैश्चतुरङ्गैरनुगैः किंकरैश्च सहितस्तथा गच्छन्तम् । दशरथमिति शेषः ॥ ८ ॥

रा० टी०–गच्छन्तमिति । सर्षिसंघं सराघवं रामसहितं गच्छन्तं नरव्याघ्रं तं दशरथं ततस्ततः एव घोराः क्रूराः पक्षिणो वाचः घोरवचनानि व्याहरन्ति भौमाः सर्वे मृगा अपि प्रदक्षिणमेव गच्छन्ति स्म । चशब्दोऽप्यर्थे तुशब्द एवार्थे सार्धश्लोक एकान्वयी ॥ ८ ॥ ९ ॥

गो० टी०–सबलानुगः बलैश्चतुरङ्गैः अनुगैः किंकरैश्च सहितः ॥ ९ ॥

९] ति० टी०–पक्षिणः करटादयः । तत्र पक्षिणां घोरव्याहरणमादौ दुर्निमित्तं ततो मृगप्रदक्षिणगमनं सुनिमित्तम् ॥ ९ ॥

१०] ति० टी०–तान् शुभाशुभसूचकोत्पातान् । असौम्याः पक्षिणो घोराः घोरशब्दा इत्यर्थः ॥ १० ॥

रा० टी०–तानिति । राजशार्दूलो राजश्रेष्ठो दशरथः तान् घोरशब्दकर्तॄन् पक्षिणः प्रदक्षिणकर्तॄन् मृगांश्च दृष्ट्वा वशिष्ठं पर्यपृच्छत । प्रभाकारं वदन्नाह–असौम्या घोराः पक्षिणः घोराः मृगाश्च प्रदक्षिणाश्चरन्तीति शेषः । अपिरेवार्थे ॥ १० ॥

गो० टी०–नरव्याघ्रं प्रतीति शेषः। घोरा इत्यनेनाशुभसूचकत्वमुक्तम् पक्षिणः वायसादयः प्रदक्षिणमिति शुभसूचनम् । अन्तरिक्षे अशुभसूचनं भूमौ शुभसूचनमित्यर्थस्य द्योतनार्थं भौमा इतिपदम् ॥ १० ॥ ११ ॥

११] ति० टी०–इदं हृदयकम्पजनकम् किमिदं दुःखोदर्कं सुखोदर्कं वेति प्रश्नः । अनिश्चयान्मे मनो विषीदति ॥ ११ ॥

रा० टी०–किमिति । हृदयोत्कम्पि हृदयोत्कम्पनकारकमिदं सर्वं किं किमर्थमयमुत्पात इति न विद्म इत्यर्थः । अत एव मम मनो विषीदति । राज्ञ इति । राज्ञः दशरथस्यैतद्वाक्यं श्रुत्वा महानृषिर्वसिष्ठः अस्य दृष्टोत्पातस्य यत्फलं तत् श्रूयतामिति मधुरां वाणीमुवाच ॥ ११ ॥

गो० टी०–हृदयमुत्कम्पयितुं शीलमस्येति हृदयोत्कम्पि इदं किं सुखोदर्कं दुःखोदर्कं वेति मनो विषीदति शुभाशुभसूचनदर्शनेनोभयत्र निर्णयकारणाभावादिति भावः ॥ १२ ॥ १३ ॥

१२] ति० टी०–दिवि खे भवं दिव्यम् । पक्षिमुखाच्च्युतं वचनम् । घोरं भयमुपस्थितं प्राप्तम् आशु वेदयतीति शेषः ॥ १२ ॥

रा० टी०–तद्वचनमेवाह–उपेति । दिव्यं स्वप्रतुल्यं पक्षिमुखाच्च्युतं वचनमुपस्थितं समीपं प्राप्तं घोरं भयं बोधयतीति शेषः । दिव्यमिति स्वप्रार्थकदिविधातुप्रकृतिकण्यत्प्रत्ययान्तं संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः । अर्थ पृथक् ॥ १२ ॥

गो० टी०–पक्षिमुखाच्च्युतं पक्षिमुखेन सूचितमित्यर्थः । प्रशमयन्ति प्रशमं सूचयन्तीत्यर्थः ॥ १४ ॥

१३] ति० टी०–प्रशमयन्ति प्रशमं सूचयन्तीत्यर्थः । तेषां संवदतामित्यस्य पुर इति शेषः ॥ १३ ॥

रा० टी०–तद्भयमपि द्रुतं विनङ्क्ष्यतीति बोधयन्नाह–मृगा इति । एते प्रदक्षिणगमनशीलाः मृगाः प्रशमयन्ति हृदयोत्कम्पि घोरपक्षिरावसूचितभयं निवर्तयन्तीत्यर्थः । अतः अयं कुशकुनदर्शनजनितः संतापस्त्यज्यताम् भवतेति शेषः । अर्धं पृथगन्वयि–तेषामिति । तत्र मार्गे संवदतां तेषां दशरथादीनां संवदत्सु दशरथादिषु सर्वा पृथिवीं कम्पयन्महाद्रुमान् पातयँश्च वायुः प्रादुर्बभूव ह प्रसिद्धमेतत् । "षष्ठी चानादरे" इत्यनुशासनविहितात्र षष्ठी । अत एव तमसा अन्धकारेण सूर्यः संवृतः अत एव सर्वे जनाः दिशो नावेदिषुः अत एव भस्मना आवृतं सर्वं तद्बलं संमूढं कार्याकार्यविवेकरहितमेवासीदिति शेषः । चशब्दो हेत्वर्थकः श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–संवदतां संवदत्सु ॥ १५ ॥

१४–१५] ति० टी०–तमो भस्म चोभयमप्युत्पातजम् ॥ १४ ॥ १५ ॥

रा० टी०–वसिष्ठ इति । तदा प्रचण्डवायुप्रादुर्भावोत्तरकाले वशिष्ठः अन्ये ऋषयश्च ससुतो राजा च सशङ्का इव आसन् । तत्र तच्छङ्काकाले अन्यत् राजसाहित्यवद्भिन्नं सर्वं

१ स बलान्वित इत्यपि क्वचिद्दृश्यते । २ तमिति गो. रा. पाठः । ३ स्मेति गो. पाठः । ४ ततस्तत इति गो. रा. पाठः । ५ पृथिवीमिति गो. रा. पाठः । ६ द्रुमाञ्छुभानिति गो. पाठः । ७ सर्वा न प्रबभुरिति गो. पाठः ।

[1]ससंज्ञा इव तत्रासन्सर्वमन्यद्विचेतनम् । तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥ १६ ॥
ददर्श भीमसंकाशं जटामण्डलधारिणम् । भार्गवं जामदग्न्येयं राजा राजविमर्दनम् ॥ १७ ॥
कैलासमिव दुर्धर्षं कालाग्निमिव दुःसहम् । ज्वलन्तमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः ॥ १८ ॥
स्कन्धे चाऽसज्ज्य परशुं धनुर्विद्युद्गणोपमम् । प्रगृह्य शरमुग्रं च त्रिपुरघ्नं यथा शिवम् ॥ १९ ॥
तं दृष्ट्वा भीमसंकाशं ज्वलन्तमिव पावकम् । वसिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ २० ॥
संगता मुनयः सर्वे संजजल्पुरथो मिथः । कच्चित्पितृवधामर्षी क्षत्रं नोत्सादयिष्यति ॥ २१ ॥
पूर्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः । क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम्॥ २२ ॥
एवमुक्त्वार्घ्यमादाय भार्गवं भीमदर्शनम् । ऋषयो रामरामेति मैधुरं[4] वाक्यमब्रुवन् ॥ २३ ॥
प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् । रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

तत्रत्यप्रजाजातं विचेतनमास वचनविपरिणामेन आसन्नित्यस्यात्रापि संबन्धः ॥ १६ ॥

गो० टी०–भस्मना चाऽतमभूदिति शेषः ॥ १६ ॥ १७ ॥

१६] ति० टी०–ससंज्ञा इव ईषत्संज्ञा इत्यर्थः । अन्यत्तु बलं निःसंज्ञमेव । भस्मच्छन्नेव अभूदिति शेषः ॥ १६ ॥

रा० टी०–तस्मिन्निति । तस्मिन् घोरे तमस्येव भस्मच्छन्ना भस्मोपलक्षितरजोभिराच्छादिता सा चमूः सेनाजनः राजा दशरथश्च भीमसंकाशं भयंकरप्रकाशविशिष्टं जटामण्डलधारिणं राजविमर्दनं क्षत्रियध्वंसकं भार्गवं भृगुगोत्रोत्पन्नं जामदग्न्येयं जमदग्निपुत्रं परशुरामं ददर्श । तुशब्दौ इव एवार्थे सार्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

१७] ति० टी०–भीमसंकाशं भयंकरदर्शनम् ॥ १७ ॥

गो० टी०–जामदग्न्यमिति अनन्तरापत्येपि यञ् गोत्रत्वारोपात् । 'जामदग्न्येयम्' इति पाठे 'इतश्चानिञः' इति बह्वच्त्वेऽप्यार्षत्वाद्ढक्। पृथग्जनैः पामरैः विद्युद्गणोपममिति तेजस्वितायां दृष्टान्तः त्रिपुरघ्नमिति *तृन् "अमनुष्यकर्तृके च" इति हन्तेष्टक् ॥ १८ ॥ १९ ॥ २० ॥

१८] ति० टी०–कैलासमिवेत्यनेन महाकारत्वम् । दुर्धर्षमशक्यातिक्रमम् । पृथग्जनः पामरजनः ॥ १८ ॥

रा० टी०–जामदग्नेयस्वरूपं वर्णयन्नाह–कैलासमित्यादिभिः । कैलासमिव दुर्धर्षं कैलासदुर्धर्षत्वसदृशदुर्धर्षत्वविशिष्टं कालाग्निमिव दुःसहं तेजोभिरेव ज्वलन्तमत एव पृथग्जनैः तेजोवद्भिन्नप्राणिभिर्दुर्निरीक्ष्यम् । किंच जनैः तेजोभिः पृथक् दुर्निरीक्ष्यम् तेजोभ्योऽतिरिक्तत्वेन द्रष्टुमशक्यमित्यर्थः । अस्मिन्पक्षे तेजोभिरित्युभयान्वयि ॥ १८ ॥

१९] ति० टी०–प्रभातिशयेन विद्युद्गणोपमम् । धनुरुग्रं शरं च प्रगृह्य त्रिपुरघ्नं शिवमिव स्थितमित्यर्थः ॥ १९ ॥

रा० टी०–विद्युद्गणोपमं स्कन्धे परशुमासाद्य संधार्य धनुः शरमुख्यं च प्रगृह्य त्रिपुरघ्नं शिवमिवावलोक्यमानम् ॥१९॥

२०] ति० टी०–जपहोमपरायणाः आसन्निति शेषः । यद्यपि होमोऽन्यधिकरणस्तदा पथि चलनसमये बाधितस्तथाप्यपाने जुह्वति प्राणमित्यादिर्बोध्य इति केचित् । परे तु–जपहोमपरायणत्वमुपलक्षणम् । अतएवाग्रे संजजल्पुरिति संगच्छते अन्यथा तादृशहोमादिपरायणानां जल्पासंभवादित्याहुः ॥ २० ॥

रा० टी०–ज्वलन्तं पावकमिव भीमसंकाशमतिप्रकाशं तं जामदग्न्येयं जपहोमपरायणाः वशिष्ठप्रमुखाः सर्वे विप्रा मुनयः दृष्ट्वा संगताः संमिलिताः सन्तः मिथः परस्परम् अथो संजजल्पुः मङ्गलहेतुकजल्पनं चक्रुः । सार्धश्लोकत्रयमेकान्वयि ॥ २० ॥

गो० टी०–होमः मानसः ॥ २१ ॥

२१–२४] ति० टी०–ऋषीणां परस्परं जल्पमाह–कच्चिदित्यादि । श्लोकद्वयेऽपि नशब्दो ननुशब्दैकदेशो नन्वित्यर्थः वितर्के ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

रा० टी०–कच्चिदिति । यद्यपि पितृवधामर्षी क्षत्रियकृतपितृवधहेतुकामर्षविशिष्ट आसीदिति शेषः । तथापि क्षत्रं क्षत्रियवंशं नोत्सादयिष्यति नाशयिष्यति । कच्चिच्छब्दो यद्यपीत्यर्थे ॥ २१ ॥

रा० टी०–तत्र हेतुं वदन्नाह–पूर्वमिति । पूर्वं पितृवधानन्तरकाले गतमन्युर्गतज्वरोऽयमासीदिति शेषः । अतः भूयः क्षत्रस्योत्सादनमस्य न चिकीर्षितं खलु निश्चितमेतत् ॥ २२ ॥

रा० टी०–एवमिति । एवमुक्त्वा परस्परं संभाष्य अर्घ्यमादाय ऋषयो वसिष्ठप्रभृतयः राम रामेति मधुरं वाक्यं भीमदर्शनं भार्गवमब्रुवन् ॥ २३ ॥

रा० टी०–प्रतीति । ऋषिदत्तां वसिष्ठप्रभृतिसमर्पितां तां

१ सशङ्का इति गो. रा. पाठः । २ आसाद्येति गो. रा. पाठः । ३ शरमुख्यमिति गो. रा. पाठः । ४ वचो मधुरमिति गो. रा. पाठः । *अस्यात्रानुपयोगः ।

पञ्चसप्ततितमः सर्गः।

प्रार्थयमानं दशरथमनादृत्यैव भार्गवः शैववैष्णवधनुषोः पुरावृत्तं निवेद्य वीर्यपरीक्षणाय रामं वैष्णवधनुरारोपणेऽचोदयत्।

राम दाशरथे [1]वीर वीर्यं ते श्रूयतेऽद्भुतम्। धनुषो भेदनं चैव निखिलेन मया श्रुतम्॥ १॥
तदद्भुतमचिन्त्यं च भेदनं धनुषस्तथा। तच्छ्रुत्वाहमनुप्राप्तो [2]धनुर्गृह्याऽपरं शुभम्॥ २॥
तदिदं घोरसंकाशं जामदग्न्यं महद्धनुः। पूरयस्व [3]शरेणैव स्वबलं दर्शयस्व च॥ ३॥
तदहं ते बलं दृष्ट्वा धनुषोऽस्यै[4]तस्य पूरणे। द्वन्द्वयुद्धं प्रदास्यामि वीर्यश्लाघ्यमहं तव॥ ४॥
तस्य तद्वचनं श्रुत्वा राजा दशरथस्तदा। विषण्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत्॥ ५॥
क्षत्ररोषात्प्रशान्तस्त्वं ब्राह्मणश्च महातपाः। बालानां मम पुत्राणामभयं दातुमर्हसि॥ ६॥

प्रसिद्धां पूजां प्रतिगृह्यैव प्रतापवान् जामदग्न्यो रामः दाशरथिं राममभ्यभाषत। तुशब्द एवार्थे॥ २४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे चतुःसप्ततितमः सर्गः॥ ७४॥

गो० टी०–काञ्चिदिति॥ २२॥

गो० टी०–मनसो विमर्शे नोत्सादयिष्यतीत्यत्र हेतुमाह–पूर्वमिति॥ २३॥ २४॥ २५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने चतुःसप्ततितमः सर्गः॥ ७४॥

१] **ति० टी०**–किमभाषतेत्यत्राह–रामेति। निखिलेन कात्स्न्र्येन। चेन ताटकावधादिसमुच्चयः॥ १॥

रा० टी०–तद्भाषणमेवाह–रामेत्यादिभिः। हे राम! हे दाशरथे हे वीर! ते तवैव वीर्यमद्भुतमीश्वराणामप्याश्चर्योत्पादकं श्रूयते। तत्र हेतुमाह–यतः धनुषोऽभेद्येश्वरचापस्य भेदनं त्वत्कर्तृकद्वैधीकरणं निखिलेन जनेन कथितमिति शेषः। किंच निखिलेन निःशेषतो मया श्रुतम्। चशब्दो हेत्वर्थे॥ १॥

गो० टी०–पूर्वमवतारप्रस्तावे जगत्पतित्वेन विष्णोः परत्वमुक्तमहं वेद्मि महात्मानमितिविश्वामित्रवचनेन पुरुषसूक्तं तत्र मानत्वेन सूचितं, काश्यपस्तुतौ च 'शरीरे तव पश्यामि जगत्सर्वमिदं प्रभो। त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः' इति सर्वजगत्कारणत्वादिकमुक्तम् रुद्रस्य च गङ्गाधारणधातुमोक्षणादिवृत्तान्तेन कर्मवश्यत्वेन प्राकृतशरीरवर्तित्वेनाचापरत्वं सूचितं संप्रत्यल्पशक्तिकत्वेन तस्यापरत्वमाह पञ्चसप्ततितमे–रामेत्यादि। रोषातिरेकेण रामेति द्विः संबोधनम्। भेदनं चेति चकारेण ताटकावधादि समुच्चीयते॥ १॥

२] **ति० टी०**–यत्त्वया तथानायासेन धनुषो भेदनं कृतं तदद्भुतमचिन्त्यं चान्येन मनसाप्यशक्यम् अतस्तच्छ्रुत्वेत्यादि। गृह्य गृहीत्वा॥ २॥

रा० टी०–तदिति। अद्भुतं ईश्वराणामप्याश्चर्यसंपादकमत एव चिन्तयितुमशक्यं तत् प्रसिद्धं धनुषः अभेद्येश्वरचापस्य त्वया भेदनं त्वत्कर्तृकद्वैधीकरणं श्रुत्वा अपरं विदारितेश्वरधनुःप्रतियोगिकभेदविशिष्टं शुभं तत् प्रसिद्धं धनुर्गृह्य गृहीत्वा अहं अनुप्राप्तः। त्वयेत्यत्र "उभयप्राप्तौ कर्मणि" इति नियमात्यच्यभावः॥ २॥

गो० टी०–अचिन्त्यं च भवतीति शेषः तच्छ्रुत्वेत्यतः पूर्वमत इत्युपस्कार्यम्॥ २॥

३] **ति० टी०**–जामदग्न्यं जमदग्नेः स्वमपितुरागतम्। अत्रार्थे ष्यञ् आर्षः। शरेण युक्तं पूरयस्वैवाकर्षयस्व॥ ३॥

रा० टी०–अपरधनुरानयने प्रयोजनं वदन्नाह–तदिति। तत्तस्मादीश्वरधनुर्भेदनसामर्थ्यवत्त्वादेव हेतोः घोरसंकाशं भयंकरप्रकाशविशिष्टं जामदग्न्यमिदं महद्धनुः स्वशरेण पूरय तेन स्वबलं दर्शयस्व च एतेनैतत्कृतमहेश्वरधनुर्भङ्गे परशुरामस्य विश्वासाभावः सूचितः तेनैतत्कृत्यस्यासाध्यत्वं व्यञ्जितम् तेनेश्वरेश्वरेच्छायाः ईश्वरबुद्धिमोहकत्वं व्यक्तम् तेन रघुनाथस्य स्वनिष्ठेश्वरनियन्तृत्वगुणप्रकटनेच्छा व्यक्ता। च शब्दो हेत्वर्थे॥३॥

गो० टी०–जमदग्नेरागतं जामदग्न्यम् आगतार्थे यञ्आर्षः॥३॥

४] **ति० टी०**–अस्यापि धनुषः पूरणे सति। वीर्यश्लाघ्यं वीर्यवच्छ्लाघ्यं च। वीर्येण तद्वत्तया श्लाघ्यमित्यन्ये॥ ४॥

रा० टी०–तदिति। अस्य मदानीतस्य धनुषः प्रपूरणे ते तव अहं न जहाति कदाचित् त्यजति नित्यस्थायीत्यर्थः। तत्प्रसिद्धं बलं दृष्ट्वा वीर्यश्लाघ्यं वीर्यप्रशंसाहेतुभूतं द्वन्द्वयुद्धमहं तव प्रदास्यामि। पूर्वपठिताहशब्दः नञ्पूर्वकहाधातुप्रकृतिक आतोनुपसर्ग इतिविधिबोधितकप्रत्ययान्तः श्लाघ्यमिति भावण्यदन्तम्॥ ४॥

गो० टी०–तत् तदा॥ ४॥ ५॥

५] **ति० टी०**–तद्वचनं द्वन्द्वयुद्धवचनम्॥ ५॥

रा० टी०–तस्येति। तदा परशुरामसंभाषणकाले तस्य परशुरामस्य तत् व्यामोहविशिष्टं वचनं श्रुत्वा अदीनः त्रैकालिकदीनताभावविशिष्टः प्राञ्जलिः प्रणयसूचकबद्धयुगलकरः विषण्णवदनः मोहहारकेश्वरव्यामोहदर्शनेनोदासीनचित्तः राजा दशरथः वाक्यमब्रवीत्॥ ५॥

६] **ति० टी०**–क्षत्ररोषात्तज्जक्षत्रवधात्॥ ६॥

---

१ रामेति गो. पाठः। २ त्वयेति गो. रा. पाठः। ३ परमिति गो.रा. पाठः। ४ धनुषोऽस्य प्रपूरणे इति गो. रा. पाठः। ५ श्लाघ्यस्य राघवेति गो. पाठः। ६ त्वं महायशा इति गो. रा. पाठः।

भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनाम् । सहस्राक्षे प्रतिज्ञाय शस्त्रं प्रक्षिप्तवानसि ॥ ७ ॥
स त्वं धर्मपरो भूत्वा कश्यपाय वसुंधराम् । दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ ८ ॥
मम सर्वविनाशाय संप्राप्तस्त्वं महामुने । न चैकस्मिन्हते रामे सर्वे जीवामहे वयम् ॥ ९ ॥
ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान् । अनादृत्य तु तद्वाक्यं राममेवाभ्यभाषत ॥ १० ॥
इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिपूजिते । दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ ११ ॥
अर्धमृष्टं सुरैरेकं त्र्यम्बकाय युयुत्सवे । त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ १२ ॥
इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः । तदिदं वैष्णवं राम धनुः परपुरञ्जयम् ॥ १३ ॥

रा० टी०–तद्वाक्यमेवाह–क्षत्रेत्यादिभिः । क्षत्ररोषात् क्षत्रियकृतपितृवधजनितक्षत्रियविषयककोपं परित्यज्य प्रशान्तस्त्वमसीति शेषः । अतो महातपा ब्राह्मणस्त्वं बालानां मम पुत्राणामभयमेव दातुमर्हसि लीलयापि भयं दातुं नार्हसीत्यर्थः । चशब्द एवार्थे ॥ ६ ॥

गो० टी०–संप्रत्यस्थाने भयशङ्कितया दशरथो रामे प्रेमभराक्रान्तो रामवैभवं ताटकाताटकेयनिरसनादिना जानन्नपि मङ्गलाशासनमारचयति–क्षत्रेति ॥ ६ ॥

७] ति० टी०–सहस्राक्षे तत्संनिधौ प्रतिज्ञायातः परं शस्त्रं न ग्रहीष्यामीत्येवम् । प्रक्षेपस्त्यागः ॥ ७ ॥

रा० टी०–त्वत्कर्तृकभयदानं सर्वथाऽनुचितमिति बोधयन्नाह–भार्गवाणामित्यादिश्लोकत्रयेण। स्वाध्यायव्रतशालिनां भार्गवाणां कुले जातः प्रादुर्भूतस्त्वं सहस्राक्षे तत्समीपे प्रतिज्ञाय इतः प्रभृति शस्त्रग्रहणं न करिष्यामीति प्रतिज्ञां कृत्वा शस्त्रं निःक्षिप्तवानसि ॥ ७ ॥

गो० टी०–सहस्राक्षे तत्संनिधावित्यर्थः । निक्षिप्तवान् त्यक्तवानित्यर्थः ॥ ७ ॥

८] ति० टी०–तपसे महेन्द्रकृतकेतनत्वम् ॥ ८ ॥

रा० टी०–स इति । सः कृतप्रतिज्ञस्त्वं धर्मपरो भूत्वा अत एव कश्यपाय वसुंधरां दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः कृतमहेन्द्राचलनिवासः अभव इति शेषः ॥ ८ ॥

गो० टी०–महेन्द्रकृतकेतनः महेन्द्रपर्वते कृतनिवासः ॥८॥

९–१०] ति० टी०–त्वं तथा त्यक्तशस्त्रादिर्मम सर्वविनाशाय कुतः संप्राप्त इत्यन्वयः । सर्वनाशमेवोपपादयति–न चेत्यादि ॥ ९ ॥ १० ॥

रा० टी०–ननु स्वतन्त्रत्वात् स्वप्रतिज्ञामपहाय युद्धं करिष्याम्येवेत्यत आह–ममेति । हे महामुने ! मम सर्वविनाशाय मत्संबन्धिशरीरादिनिखिलध्वंसाय त्वं संप्राप्तः । ननु द्वन्द्वयुद्धे सर्वविनाशः कथमित्यत आह–रामे रामनिष्ठे एकस्मिन् अल्पेऽपि हते भवत्कर्मकप्राणवियोगानुकूलव्यापारे सति वयं सर्वे न जीवामहे प्राप्तब्रह्महत्याप्रयुक्तापकीर्त्या विनष्टा इव भविष्याम इत्यर्थः । हतशब्दः गत्यर्थाकर्मकेति भावनिष्ठान्तः अकर्मकत्वं च कर्माविवक्षया ॥ ९ ॥

रा० टी०–ब्रुवतीति । दशरथे एवं ब्रुवति सति प्रतापवान् जामदग्न्यः तद्वाक्यं दशरथवचनमनादृत्यैव राममेव अभ्यभाषत ॥ १० ॥

गो० टी०–सर्वविनाशाय संप्राप्त इत्येतदुपपादयति–न चेति ॥ ९ ॥ १० ॥

११] ति० टी०–इमे वक्ष्यमाणलक्षणे यत्त्वया भग्नं यच्च मया धृतं ते इत्यर्थः । बलवती बलवन्नाम्ये सुकृते यत्ननिर्मिते ॥ ११ ॥

रा० टी०–तद्भाषणमेवाह–इमे इति । दिव्ये देवलोकोद्भवे अत एव दृढे विनाशभयरहिते बहुबले बहुबलसाध्योत्थापने अत एव श्रेष्ठे अत एव लोकाभिपूजिते अत एव मुख्ये इमे द्वे धनुषी विश्वकर्मणा सुकृते देवार्थं निर्मिते अभवतामिति शेषः ॥ ११ ॥

गो० टी०–लोकाभिविश्रुते लोके सर्वतः प्रसिद्धे बलवती इति नपुंसकद्विवचनम् सुकृते प्रयत्नेन निर्मिते ॥ ११ ॥

१२] ति० टी०–युयुत्सवे त्रिपुरवासिभिरिति शेषः । त्रिपुरघ्नं तद्धननसाधनम् ॥ १२ ॥

रा० टी०–अतीति । युयुत्सवे त्रिपुरासुरेण योद्धुमिच्छवे त्र्यम्बकाय शिवाय यदेकं धनुः सुरैरतिसृष्टं दत्तं हे नरश्रेष्ठ ! हे काकुत्स्थ ! तत्त्रिपुरघ्नं धनुस्त्वया भग्नम् ॥ १२ ॥

गो० टी०–अतिसृष्टं दत्तं युयुत्सवे त्रिपुरवासिभिर्योद्धुमिच्छवे यत्त्वया भग्नं तत्र्यम्बकाय दत्तमिति पूर्वेणान्वयः ॥ १२ ॥

१३] ति० टी०–वैष्णवं विष्णवे दत्तम् तदिदं वैष्णवं वैष्णवत्वेन प्रसिद्धम् ॥ १३ ॥

रा० टी०–इदमिति । दुर्धर्षमिदं द्वितीयं धनुः सुरोत्तमैर्विष्णोर्विष्णवे दत्तम् संबन्धसामान्याविवक्षया षष्ठी । हे राम! वैष्णवं परपुरंजयं तद्धनुः इदं मत्करस्थम् विद्धीति शेषः ॥ १३ ॥

१ निक्षिप्तवानिति गो. रा. पाठः । २ विश्रुते इति गो. पाठः । ३ बहुबले इति रा. पाठः । ४ अतिसृष्टमिति गो. रा. पाठः । ५ अर्धमिदं गो. नास्ति । ६ परमभास्वरमिति गो. पाठः ।

समानसारं काकुत्स्थ रौद्रेण धनुषा त्विदम् । तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम्॥ १४ ॥
शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया । अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥ १५ ॥
विरोधं जनयामास तयोः सत्यवतां वरः । विरोधे तु महद्युद्धमभवद्रोमहर्षणम् ॥ १६ ॥
शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः । तदा तु जृम्भितं शैवं धनुर्भीमपराक्रमम् ॥ १७ ॥
हुंकारेण महादेवः स्तम्भितोऽथ त्रिलोचनः । देवैस्तदा समागम्य सर्षिसंघैः सचारणैः ॥ १८ ॥
याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ । जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ॥ १९ ॥

१४] ति० टी०–रौद्रेण शैवेन । शैवस्येदानीमसारत्वमाह–तदा त्विति ॥ १४ ॥

रा० टी०–समानेति । हे काकुत्स्थ ! रौद्रेण धनुषा इदं वैष्णवं धनुः समानसारं तुल्यदृढतावि शिष्टमेव । समानसारत्वे हेतुं वदन्नाह–तदा त्रिपुरविजयोत्तरसमये एव शितिकण्ठस्य नीलकण्ठशिवस्य विष्णोश्च बलाबलनिरीक्षया बलाबलयोः परीक्षया हेतुना सर्वाः देवताः पितामहं ब्रह्माणं पृच्छन्तिस्म तुशब्दावेवार्थौ सार्धश्लोक एकान्वयी ॥ १४ ॥

गो० टी०–समानसारं समानबलम् ॥ १३ ॥

गो० टी०–समानसारत्वे किमिदानीं परीक्ष्यमित्याशङ्क्य रौद्रस्य धनुषो वैकल्यादिति वक्तुं प्रस्तावान्तरमुपक्षिपति–तदेत्यादि । तदा दुष्करत्रिपुरहननानन्तरकाले बलाबलनिरीक्षया बलाबलनिरीक्षणेच्छया कोऽनयोर्बलवानित्यपृच्छन्नित्यर्थः ॥१४॥

१५] ति० टी०–विष्णोस्त्रिपुरसंहारे शरत्वेन रुद्रपरिकरान्तर्भावश्रवणात् । अयं रुद्राद्बलं उत सम इत्येवं शितिकण्ठविष्ण्वोर्बलाबलज्ञानाय देवताः पितामहं पृच्छन्ति स्म । स च पितामहस्तेषां देवानामुक्तमभिप्रायं विज्ञाय ॥ १५ ॥

रा० टी०–अभिप्रायमिति । सत्यवतां वरः पितामहो देवतानामभिप्रायं विज्ञायैव तयोर्विष्णुशिवयोर्विरोधं जनयामास । तुशब्द एवार्थे ॥ १५ ॥

गो० टी०–अभिप्रायं त्विति । पूर्वं वराहादिरूपेण भूम्युद्धरणादिकरणेन विष्णुरधिक इति स्तुवतस्त्वत्तः श्रुतं, अधुना विष्णुमुपसर्जनीकृत्य त्रिपुरहननाद्रुद्रस्याधिकबलत्वं प्रतीयत इत्यभिप्रायमित्यर्थः । सत्यवतां वर इत्यनेन बहुश उपदेशेऽपि नैषां चित्तं समाधत्ते अतः क्रिययैव बलतारतम्यं दर्शयिष्यामीत्यभिप्रेत्य विरोधं जनयामासेति गम्यते । अहं धन्विप्रधानः विष्णुस्तु ममोपसर्जन इत्युक्तं रुद्रेणेति विष्णुं प्रत्युक्त्वा शरायतया मयावस्थानान्मयैव त्रिपुरहननं कृतमिति विष्णुनोक्तमिति रुद्रं प्रत्युक्त्वा च विरोधजननमित्यवगम्यते ॥१५॥१६॥

१६] ति० टी०–सत्यवतां वरः सत्यसंकल्पः । स्वसंकल्पेन देवानां मोहं निरसितुमेकात्मनोरपि रुद्रविष्णोर्विरोधं जनयामास । तावपि तत्संकल्पसिद्ध्यर्थमेव विरोधं चक्रतुः । इदं युद्धं दक्षयज्ञवधे बोध्यमतः पूर्वेण न विरोधः ॥ १६ ॥

रा० टी०–विरोध इति । परस्परजयैषिणोः शितिकण्ठस्य विष्णोश्च विरोधे सत्येव रोमहर्षणं महद् युद्धमभवत् । तुशब्द एवार्थे ॥ १६ ॥

१७–१८] ति० टी०–तदा हुंकारेण विष्णुना शैवं धनुर्विजृम्भितं शिथिलीकृतं महादेवश्च स्तम्भितः ॥ १७ ॥ १८ ॥

रा० टी०–तदेति । तदा तयोर्युद्धसमये भीमपराक्रमं शैवंधनुः हुंकारेणैव विष्णोरिति शेषः । जृम्भितं शैथिल्यं प्राप्तम् । अथ धनुर्विजृम्भणानन्तरं त्रिलोचनो महादेवः स्तम्भितः व्यापाररहित आसीदिति शेषः । एतेन सत्त्वगुणस्य तदानीं प्राबल्यं सूचितम् ॥ १७ ॥

गो० टी०–जृम्भितमित्यत्रापि हुंकारेणेत्यनुषज्यते जृम्भितं भग्नमिति यावत् । हुंकारेण नत्वभिमन्त्रितबाणेन महादेवः महादेवशब्दो महाक्षसमाख्यायिन इति भावः । त्रिलोचन इत्यनेन तृतीयं लोचनमपि निरर्थकं कृतमिति भावः ॥ १७ ॥

रा० टी०–देवैरिति । तदा निर्व्यापारशिवस्थितिकाले सर्षिसंघैः ऋषिसंघसहितैः सचारणैः चारणसहितैः समागम्य हरिहरसमीपं प्राप्य स्थितैः देवैः प्रशमं शान्तिं याचितौ सुरोत्तमौ तौ विष्णुशिवौ तत्र शान्तियाचनसमये प्रशमं जग्मतुः । प्रशममित्युभयान्वयि । अत्र शिवस्तम्भनानन्तरं तत्प्रशान्तियाचनया तमोगुणोद्रेकसमये स्वीकृततमोगुणस्य विजयो भविष्यति पुनः सत्त्वगुणोद्रेकसमये स्वीकृतसत्त्वगुणस्य विजयो भविष्यतीत्यनवस्था स्यादिति देवाभिप्रायः सूचितः ॥ १८ ॥

गो० टी०–याचितौ प्रशमं जग्मतुः विष्णुः किमनेन बालेन अनुकम्प्यतामिति याचितस्तत्रियहात्रिवृत्तः रुद्रस्तु स्वामितः पराजयो नास्माकं दोषायेति सान्त्वितस्ततुल्यत्वाभिमानान्निवर्तित इत्यर्थः ॥ १८ ॥

१९] ति० टी०–याचिताविति । एतावत्यर्थे दृष्ट्वा प्राप्तनिश्चयैर्देवैर्युद्धादुपरतिं याचितौ देवतानुग्रहाय प्रशमं जग्मतुः१९

रा० टी०–जृम्भितमिति । विष्णुपराक्रमैः तथा जृम्भितं तच्छैवं धनुर्दृष्ट्वा सर्षिगणाः देवा विष्णुमधिकं मेनिरे स्वीकृततत्सत्त्वगुणस्य तत्काले आधिक्यं स्वीचकुरित्यर्थः । अत एव त्रिपुरविजयकाले शिवबलस्याधिक्यदर्शनेऽपि नैतेषां संशयोत्पत्तिः शिखी नष्टः स्वर्गी ध्वस्त इतिवत् सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायादाधिक्यन्यूनतयोः तद्विशेषणीभूतगुणयोरेव पर्यवसानं 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैः' इत्यायुक्त्या हरिहरयोरैक्यात् तत्तन्यूनाधिकतयोः वक्तव्यत्वस्याशक्यत्वात् अत एव एको ह वै रुद्रः । एको ह वै नारायणः" इतिश्रुत्योर्न विरोधः 'अहं

अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तथा । धनू रुद्रस्तु संक्रुद्धो विदेहेषु महायशाः ॥ २० ॥
देवरातस्य राजर्षेर्ददौ हस्ते ससायकम् । इदं च वैष्णवं राम धनुः परपुरञ्जयम् ॥ २१ ॥
ऋचीके भार्गवे प्रादाद्विष्णुः स न्यासमुत्तमम् । ऋचीकस्तु महातेजाः पुत्रस्याप्रतिकर्मणः ॥ २२ ॥
पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः । न्यस्तशस्त्रे पितरि मे तपोबलसमन्विते ॥ २३ ॥
अर्जुनो विदधे मृत्युं प्राकृतां बुद्धिमास्थितः । वधमप्रतिरूपं तु पितुः श्रुत्वा सुदारुणम् ॥
क्षत्रमुत्सादयं रोषाज्जातं जातमनेकशः ॥ ॥ २४ ॥

ब्रह्मा च शर्वश्च जगतः कारणं परम्। धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् । यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु' इत्यादिवचनं संगच्छते । एतेन तमउद्रेकेण कदाचिद्रुद्रस्य पराजयो न दोषायेति केनचिदुक्तं प्रत्युक्तमिति भूषणकारोक्तमेव प्रत्युक्तम् त्रिपुरविजयकाले विष्णोरल्पबलवत्त्वे अस्यैव यत्नस्य तैरपि वक्तव्यत्वात्समानप्रमाणश्रुत्योरेकत्रानपेक्षितत्वकल्पनायाः अन्याय्यत्वात्प्रमाणाभावाच्च ॥ १९ ॥

गो० टी०–अथ स्वाभिमतसिद्धिमाह–जृम्भितमिति। तत् विष्ण्वधिष्ठानेन पूर्वं त्रिपुरम् जृम्भितं विष्ण्वधिष्ठानाभावेन जृम्भितं दृष्ट्वा नत्वाप्तवाक्याच्छ्रुत्वा शैवं शिवाभिमानमात्रविषयभूतं विष्णुपराक्रमैः पूजायां बहुवचनं हुंकारेणेति पूर्वमुक्तेः । आधिक्यावबोधनं न पक्षपातमूलमित्याह–सर्षिगणा इति। अतीन्द्रियार्थद्रष्टार ऋषयस्तेषां गणाः वैखानसवालखिल्यादयः 'भूयसां स्याद्धलीयस्त्वम्' इति न्यायेन तज्ज्ञानं न पक्षपातमूलं न वा भ्रान्तिमूलमिति भावः। एतेन "एक एव रुद्रो न द्वितीयाय तस्थे" इत्यादिश्रुतिः'न किरिन्द्र त्वदुत्तरः' इत्यादिवदितरापेक्षया श्रेष्ठत्वाभिप्राया "एको ह वै नारायण आसीत्" इत्यादिश्रुत्युक्तो नारायणापरपर्यायो विष्णुरेव परं तत्त्वमित्यभिहितम्। एतेन तमउद्रेकेण कदाचिद्रुद्रस्य पराजयो न दोषायेति केनचिदुक्तं प्रत्युक्तं तमोभिभवस्यैवापरत्वनियामकत्वात् इन्द्रजिता रामपराजयस्तु अदृश्यो न शब्दवेधेन वध्यत इतिधर्मप्रवर्तनाय धर्मसंस्थापनाय हि तदवतार इत्युक्तम्, अत्र तु स्वरूपत एव रुद्रस्य पराजयः किंच 'रुद्रपराजयस्य तमःकृतत्वे देवानामधिकत्वबुद्धिर्न स्यादेव अयं च धनुर्भङ्गो दक्षयज्ञान्त इति बोध्यम्, अन्यथा दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवानित्यादिना दक्षयज्ञान्ते रुद्रो देवानां धनुर्ददाविस्युक्तं विरुध्येत अत्रेदमेव धनुस्त्रिपुरघ्नमित्युक्तत्वादेतद्विरुद्धं मेरुधनुष्टं पुराणान्तरोक्तमनादरणीयम् । नन्वु पूर्वं दक्षयज्ञान्ते रुद्रो देवेभ्यो धनुर्दत्तवानित्युक्तं पुनश्च देवरातायं रुद्रो दत्तवानित्युक्तं विश्वामित्राश्रमे मुनिभिर्यज्ञे जनकाय देवा ददुरित्युक्तमनसूयासमीपे सीतया जनकाय वरुणेन दत्तमित्युक्तं कथमिदं संगच्छते। श्रूयतां पूर्वं देवास्त्रिपुरवधाय विश्वकर्मणा निर्मितं धनू रुद्राय ददुः तद्दक्षयज्ञान्ते विरोधे विष्णुहुंकारेण जृम्भितं देवैः प्रार्थितो रुद्रो देवरातस्य हस्ते दत्तवान् ततः प्रभृति न्यासभावेन मैथिलेषु वर्तमानं तत्स्वत्वेन देवा वरुणेन जनकायादापयन्निति क्रमः तेन दक्षयज्ञान्ते धनुर्दानवचनं देवैर्जनकस्य यज्ञफलत्वेन दानवचनं वरुणेन दत्तत्ववचनं च समंजसं भवति ॥ १९–२२ ॥

२०] ति० टी०–विष्णुमधिकं श्रेष्ठं सेव्यत्वेन मेनिरे ज्ञातवन्तः। वस्तुतस्तु प्रकृतयुद्धे विष्णोराधिक्यदर्शनात्त्रिपुरवधे शिवस्याधिक्यदर्शनात्तयोः साम्यग्रहणमिति तात्पर्यम् । अधिकमित्यस्य स्वीयपूर्वज्ञानविषयस्वरूपापेक्षयाधिकमित्यर्थः । धनू रुद्रस्त्विति । एवं युद्धदशायां क्रुद्धः पश्चाद्देवप्रार्थनया प्रसन्नः शिवो देवेभ्यो दत्त्वा ततः सर्वैर्देवैः सह युद्धार्थं धनुरिच्छतो देवरातस्य ददौ । अत एव वरुणेन दत्तमिति वक्ष्यमाणेन रुद्रेण देवानां दत्तमित्युक्तग्रन्थेन च न विरोध इत्याहुः॥२०॥

रा० टी०–धनुरिति । संक्रुद्धः संक्रुद्धं संग्रामजनितातिकोपं जहाति संग्रामं त्यजति स महायशा रुद्रः विदेहेषु जातस्य राजर्षेर्देवरातस्य हस्ते एव ससायकं सायकसहितं धनुर्ददौ देवैर्दापयामास अन्तर्भावितणिजर्थो ददातिः। तुशब्दः एवार्थे ॥२०॥

२१] ति० टी०–एवं च शिवस्य धनुपस्तदारभ्य शिथिलत्वेन तद्भङ्गकृतं न ते वीर्याधिक्यमिति भार्गवाभिप्रायः । अथ स्वधनुप आगममाह–इदं चेत्यादि । परपुरंजयमित्यार्षमसंज्ञायाम् ॥ २१ ॥

रा० टी०–इदमिति । हे राम ! परपुरंजयमत एव संन्यासं सम्यक् न्यासः शत्रूणामैवैश्वर्यत्यागः यस्मात्तदुत्तममिदं वैष्णवं धनुस्तु भार्गवे ऋचीके विष्णुः प्रादात्।चस्त्वर्थे ॥२१॥

२२] ति० टी०–भार्गवे भृगुपुत्रे स उक्तरूपो विष्णुः न्यासं प्रादात् । अप्रतिकर्मणः स्वहन्तर्यापि शापादिप्रतिक्रियारहितस्य ॥ २२ ॥

रा० टी०–ऋचीक इति । महातेजा ऋचीकस्तु अप्रतिकर्मणः प्रतिक्रियारहितक्रियाविशिष्टस्य पुत्रस्य स्वसुतस्य मम पितुर्महात्मनो जमदग्नेर्दिव्यं धनुर्ददौ संप्रदानस्य शेषत्वविवक्षया षष्ठी ॥ २२ ॥

२३] ति० टी०–न्यस्तशस्त्रे न्यस्तं त्यक्तं विष्णुधनूरूपं शस्त्रं येन तथाभूते तपोबलयुतेऽपि पितरि प्राकृतां बुद्धिमास्थितोऽर्जुनः कार्तवीर्यो मत्पितुर्मृत्युं विदधे ॥ २३ ॥

रा० टी०–न्यस्तेति। न्यस्तशस्त्रे परित्यक्तास्त्रशस्त्रे तपोबलसमन्विते मे पितरि जमदग्नौ प्राकृतां बुद्धिमास्थितः अर्जुनः मृत्युं विदधे ॥ २३ ॥

गो० टी०–अर्जुनः कार्तवीर्यः ॥ २३ ॥

२४] ति० टी०–तमयोग्यं पितुर्वधं श्रुत्वाहं रोषात्क्षत्रमुत्सादयमुत्सादितवान् अडभाव आर्षः ॥ २४ ॥

१ उत्पाट्यन्निति रा. पाठः ।

पृथिवीं चाखिलां प्राप्य कश्यपाय महात्मने । यज्ञस्यान्तेऽददं राम दक्षिणां पुण्यकर्मणे ॥ २५ ॥
दत्त्वा महेन्द्रनिलयस्तपोबलसमन्वितः । श्रुत्वा तु धनुषो भेदं ततोऽहं द्रुतमागतः ॥ २६ ॥
तेदेवं वैष्णवं राम पितृपैतामहं महत् । क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमम् ॥ २७ ॥
योजयस्व धनुःश्रेष्ठे शरं परपुरञ्जयम् । यदि शक्तोऽसि काकुत्स्थ द्वन्द्वं दास्यामि ते ततः ॥२८॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ।

दाशरथिर्धनुषि शरमारोप्य स्वशरस्य चामोघत्वं प्रतिपाद्य ब्राह्मणत्वाद्भार्गवस्य लक्ष्यत्वमपनीय कुत्रेमं मुञ्चामीति भार्गवं पप्रच्छ कृतानुमतिश्च भार्गवस्य तपोर्जितलोकान्वभञ्ज । भार्गवोऽपि दाशरथिं विष्णुं मत्वा तत्कृतानुमतिस्तप्स्तप्तुं गहेन्द्रपर्वतं जगाम ।

श्रुत्वा तु जामदग्न्यस्य वाक्यं दाशरथिस्तदा । गौरवान्वन्त्रितकथः पितू राममथाब्रवीत् ॥ १ ॥
कृतवानसि यत्कर्म श्रुतवानस्मि भार्गव । अनुरुध्यामहे ब्रह्मन्पितुरानृण्यमास्थितः ॥ २ ॥

रा० टी०–वधमिति । हे राम ! अप्रतिरूपं वधानर्हं सदारुणं पितुर्वधं श्रुत्वा रोषात् जातं जातं क्षत्रमब्रह्मण्यक्षत्रकुलमनेकशस्निःसप्तवारमुत्पाट्यन् सन् अखिलां हततत्तत्क्षत्रियस्वामिकां पृथिवीं प्राप्य यज्ञस्य प्रारब्धवधप्रायश्चित्तरूपयागस्य अन्ते अवसाने पुण्यकर्मणे महात्मने कश्यपाय दक्षिणां दत्त्वा महेन्द्रनिलयः कृतमहेन्द्राचलनिवासः तपोबलसमन्वितः अहं धनुषो भेदं भवत्कृतधनुर्भङ्गं श्रुतवान् ततः धनुर्भङ्गश्रवणात् तदा धनुर्भङ्गोत्तरकाले द्रुतमागतोऽहमस्मीति शेषः । श्लोकत्रयमेकान्वयि ॥ २४–२६ ॥

गो० टी०–अनेकशः त्रिःसप्तकृत्वः ॥ २४–२६ ॥

२५] ति० टी०–प्राप्य स्वबलेनेति शेषः । पुण्यकर्मणे यज्ञरूपपुण्यसाद्गुण्यार्थम् ॥ २५ ॥

२६] ति० टी०–दत्त्वा भूमिमिति शेषः । महेन्द्रो महेन्द्रपर्वतः । धनुषः शैवस्य ॥ २६ ॥

२७] ति० टी०–पितृपैतामहं पितृपितामहकमादागतम् उत्तरपदवृद्धिरार्षी । क्षत्रधर्मं मद्वर्तिनं मया पूर्वमङ्गीकृतं क्षत्रधर्मम् न तु ब्राह्मणधर्ममाश्रित्य त्यजेत्यर्थः । ब्राह्मणवच्छान्तिमास्थाय नाहं शक्त इति मा ब्रूहीत्यर्थ इति कतकः ॥ २७ ॥

रा० टी०–तदिति । हे राम ! तत् वर्णितप्रभावमुत्तमम् इदं वैष्णवं धनुः महत् अतिप्रशंसनीयं पितृपैतामहं क्षत्रधर्मं पुरस्कृत्य संस्मृत्येत्यर्थः गृह्णीष्व ॥ २७ ॥

गो० टी०–तदिदमिति । उत्तममशिथिलमित्यर्थः । पितृपैतामहं पितृपितामहकमायातम् उत्तरपदवृद्धिरार्षी । क्षत्रधर्ममिति ब्राह्मणवत्न शक्त इति मा ब्रूहीत्यर्थः ॥ २७ ॥

२८] ति० टी०–शक्तोऽसि शरयोजने इति शेषः । तावतापि न त्वां त्यक्ष्यामि, अपि तु द्वन्द्वं दास्यामीत्यर्थः, अन्यथा मां शरणं व्रजेति तात्पर्यम् ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

रा० टी०–योजयस्वेति । हे काकुत्स्थ ! यदि त्वं शक्तोऽपि तर्हि धनुःश्रेष्ठे परपुरञ्जयं शत्रुपुरञ्जयकर्तारं शरं योजयस्व ततो योजनानन्तरं द्वन्द्वं द्वन्द्वयुद्धं दास्यामि एतेन युद्धमन्तरावकाशं न प्राप्स्यसीति ध्वनितम् ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

गो० टी०–यदि शक्तोऽपि तावतापि न त्वां मुञ्चामि अपि तु ततः अनन्तरं द्वन्द्वयुद्धं दास्यामि वीर्यपरीक्षणार्थमिदमिति भावः ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

१] ति० टी०–पितुर्गौरवात्पितृसंनिधिवशात् यन्त्रिता नियमिता कथोच्चैःकथनं येन सः ॥ १ ॥

रा० टी०–श्रुत्वेति । जामदग्न्यस्य परशुरामस्य तद्वाक्यं श्रुत्वा पितुर्गौरवात् पितृनिष्ठगुरुत्वात् यन्त्रिता नियमिता कथा भाषणं यस्य पितृभिया मितभाषणविशिष्ट इत्यर्थः । किंच गौरवात् स्वनिष्ठसर्वगुरुत्वं संस्मृत्य यन्त्रितकथो दाशरथिः पितुः समीपे विद्यमानं रामं परशुराममथाब्रवीत् मङ्गलवाक्यमकथयत् ॥ १ ॥

गो० टी०–अथ जामदग्न्यगर्वनिर्वापणं षट्सप्ततितमे—श्रुत्वेत्यादि । पितुर्गौरवादिति पितुः सन्निधिगौरवादित्यर्थः । यन्त्रिता नियमिता कथा उच्चैःकथनं येन स तथा ॥ १ ॥

२] ति० टी०–पितुरानृण्यं पितृहन्तृक्षत्रवधेन पितृवैरशुद्धिमास्थितः सन्, यत्कर्म त्रिःसप्तकृत्वः क्षत्रियवधरूपं कृतवानसि तदनुरुध्यामहेऽङ्गीकुर्मः शरेणावश्यं वैरशुद्धेः कर्तव्यत्वात् ॥ २ ॥

रा० टी०–तद्वाक्यमेवाह–कृतवानिति । हे भार्गव !

१ त्रिति रा. पाठः । २ काश्यपायेति गो. पाठः । ३ तदेति गो. रा. पाठः । ४ श्रुतवानिति गो. रा. पाठः । ५ तदिदमिति गो. रा. पाठः । ६ तदिति गो. रा. पाठः । ७ अनुरुन्ध्यामहे इति गो. रा. पाठः ।

नमिवाशक्तं क्षत्रधर्मेण भार्गव । अवजानासि मे तेजः पश्य मेऽद्य पराक्रमम् ॥ ३ ॥
इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य वरायुधम् । शरं च प्रतिजग्राह हस्ताल्लघुपराक्रमः ॥ ४ ॥
आरोप्य सधनू रामः शरं सज्यं चकार ह । जामदग्न्यं ततो रामं रामः क्रुद्धोऽब्रवीदिदम् ॥ ५ ॥
ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च । तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरम् ॥ ६ ॥
इमां वा त्वद्गतिं राम तपोबलसमर्जितान् । लोकानप्रतिमान्वापि हनिष्यामीति मे मतिः ॥ ७ ॥
नह्ययं वैष्णवो दिव्यः शरः परपुरंजयः । मोघः पतति वीर्येण बलदर्पविनाशनः ॥ ८ ॥

हे ब्रह्मन् ! पितुः आनृण्यम् अवश्यकर्तव्यपितृविघातिवधरूपमृणापनयनबुद्धिमास्थितस्त्वं यत्कर्म पितृविघातिवधरूपक्रियां कृतवानसि तत् अहं श्रुतवानस्मि अतः वयमनुरुन्ध्यामहे त्वत्कर्म अतिप्रशस्तत्वेन वदाम इत्यर्थः ॥ २ ॥

गो० टी०—श्रुतवानिति । पितुरानृण्यं पितृघातिक्षत्रवधेन पितृवैरशुद्धिमास्थितः सन् यत्कर्म त्रिःसप्तकृत्वः क्षत्रवधरूपं कृतवानसि तच्छ्रुतवानस्मि तदनुरुन्ध्यामहे अनुरुन्धमः अवश्यं शरेण वैरशुद्धेः कर्तव्यत्वात् कर्तरि यगार्षः ॥ २ ॥

३] ति० टी०—यन्मां क्षत्रधर्मेण युक्तं वीर्यहीनमशक्तमिव मन्यमानोऽवजानासि तन्नानुरुध्यामहे अतोऽद्य मे तेजः पराभिभवासहनं तन्मूलं मे पराक्रमं च पश्य ॥ ३ ॥

रा० टी०—वीर्येति । हे भार्गव ! क्षत्रधर्मेण स्थितमत एव अशक्तं ब्राह्मणोदेश्यकातिभाषणसंबन्धिसामर्थ्यरहितं मां त्वं वीर्यहीनमिवावजानासि अतो मे तेजः पराक्रमं चाद्य त्वं पश्य । विनापि चं समुच्चयः ॥ ३ ॥

गो० टी०—वीर्येति । वीर्यहीनमत एव क्षत्रधर्मेण प्राप्तधनुर्ग्रहणयुद्धादौ अशक्तमिव मन्यमानो यन्मामवजानासि क्षत्रधर्मं पुरस्कृत्येत्यादिना अवमानं कृतवानसि तन्नानुरुन्ध्यामहे " अस्मदो द्वयोश्च " इतिचकारादेकस्मिन् बहुवचनं अतस्तेजः परपरिभावासहनं पराक्रमं स्वशक्त्या पराभिभवनं च पश्य ॥ ३-५ ॥

४] ति० टी०—क्रुद्धः प्रागुक्तरूपावमानवचनेन क्रोधादेव तद्धस्तात्स्वयमेव धनुः, चाद्भार्गवनिष्ठां वैष्णवीं शक्तिं जग्राह । तदुक्तं पाद्मे—'इत्युक्त्वा देवि वैष्णव्या शक्त्या तद्वतया सह । जग्राह वैष्णवं चापं विनयेन च लीलया ॥' इति । अत्राप्यग्रे वक्ष्यति—'निर्वीर्यो जामदग्न्योऽसौ' इति । लघुः शीघ्रः पराक्रमो यस्य सः ॥ ४ ॥

रा० टी०—इतीति । क्रुद्धः क्रुधं स्वाश्रितकोपं जहाति हापयतीति राघवः स रामः इत्युक्त्वा भार्गवस्य हस्ताल्लघुपराक्रमः सन् वरायुधं चापं शरं च प्रतिसंगृह्य[1] गृहीत्वा धनुः आरोप्य शरं सज्यं ज्यासंयुक्तं चकार ह प्रसिद्धमेतत् । सार्धश्लोक एकान्वयी ॥ ४ ॥

५] ति० टी०—आरोप्य ज्यारोपं कृत्वा शरं सज्यं ज्यायुक्तं चकार ॥ ५ ॥

रा० टी०—जामदग्न्यमिति । ततः सज्यीकरणानन्तरं क्रुद्धः स्वाश्रितकोपनिवर्तको रामः जामदग्न्यं रामं वचोऽब्रवीत् ॥ ५ ॥

६] ति० टी०—जमदग्निपुत्रत्वेन ब्राह्मणोऽसीति विश्वामित्रभगिन्याः पौत्रोऽसीति पूज्यस्त्वं मेऽसि वधानर्होऽसि अतस्ते प्राणहरं शरं मोक्तुं न शक्तः अस्मीति शेषः ॥ ६ ॥

रा० टी०—तद्वचनमेवाह—ब्राह्मण इति । ब्राह्मणोऽसि इतिहेतुना विश्वामित्रकृतेन विश्वामित्रात् अस्मद्गुरुविश्वामित्रभगिनीपुत्रात् कृतेन जातत्वेन च हेतुना त्वं मे पूज्योऽसि तस्माद्धेतोः हे राम परशुराम ! प्राणहरं शरं ते तुभ्यं मोक्तुं न शक्तोऽस्मीति शेषः ॥ ६ ॥

गो० टी०—विश्वामित्रकृतेन विश्वामित्रकृतस्नेहेन विश्वामित्रभगिन्यां सत्यवत्यामृचीकाज्जातो जमदग्निस्तस्य पुत्रः परशुराम इति विश्वामित्रसंबन्धेनेत्यर्थः ॥ ६ ॥

७] ति० टी०—इमां प्रत्यक्षसिद्धां गतिं साधनं पादौ तच्छक्तिं चाकाशगमनादिरूपाम् । लोकांल्लोकप्राप्तिसाधनं धर्मम् । त्वत्पादकमले हन्मि ब्रूहि तेऽथावा तपम्' इति पाद्मोक्तेः । तपो धर्मः । उभयोर्मध्ये यदिच्छसि यत्तवेष्टं तद्वदेत्यर्थः ॥ ७ ॥

रा० टी०—इमामिति । राम हे परशुराम ! यत् यदि त्वमिच्छसि तर्हीमां प्रसिद्धां त्वद्गतिं त्वत्कर्तृकं कामचारगमनं तपोबलसमर्जितान् तपोबललभ्यान् अप्रतिमान् प्राकृतोपमारहितान् लोकान् त्वन्निवासान् वा हनिष्यामि अपिना उभयविनाशमिच्छसि चेत्तर्ह्युभयं हनिष्यामि एतेन ब्राह्मणानिष्टं न करोमीति स्वमर्यादा व्यञ्जिता । एको वाशब्दस्तर्हीत्यर्थे ॥७॥

गो० टी०—ते तुभ्यं पादयोर्गतिं गमनं लोकान् लोकप्राप्तिं यदिच्छसि अनयोर्मध्ये यदिच्छसि तद्वदेत्यर्थः । यदीच्छसीतिपाठे युक्तः उभयथा प्रतिबद्धः क्वचित्तिष्ठेन्न लोकं पीडयेदिति रामस्य हृदयम् ॥ ७ ॥

८] ति० टी०—कुत एवमत आह—नह्ययमिति । वीर्येण स्वशक्त्या शत्रूणां बलदर्पविनाशनो मोघो व्यर्थः ॥ ८ ॥

रा० टी०—नन्वयं विकल्पितं सर्वं नेच्छामीत्यत आह—नेति । परपुरंजयः वीर्येण बलदर्पविनाशनः दिव्योऽयं वैष्णवः शरः मोघः निष्फलः नैव पतति एतेन यत्रास्य शरस्य पातः सफलस्तद्वक्तव्यमिति सूचितम् ॥ ८ ॥

१ संगृह्येति रा. पाठः । २ वच इति गो.रा.पाठः । ३ पादगतिमिति गो.पाठः । ४ समार्जितानिति गो.पाठः । ५ ते हनिष्यामि यदिच्छसीति गो. पाठः ।

वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः । पितामहं पुरस्कृत्य समेतास्तत्र सर्वशः ॥ ९ ॥
गन्धर्वाप्सरसश्चैव सिद्धचारणकिंनराः । यक्षराक्षसनागाश्च तद्रष्टुं महदद्भुतम् ॥ १० ॥
जडीकृते तदालोके रामे वरधनुर्धरे । निर्वीर्यो जामदग्न्योऽसौ रामो राममुदैक्षत ॥ ११ ॥
तेजोभिर्गतैर्वीर्यत्वाज्जामदग्न्यो जडीकृतः । रामं कमलपत्राक्षं मन्दं मन्दमुवाच ह ॥ १२ ॥
काश्यपाय मया दत्ता यदा पूर्वं वसुंधरा । विषये मे न वस्तव्यमिति मां काश्यपोऽब्रवीत् ॥ १३ ॥
सोऽहं गुरुवचः कुर्वन्पृथिव्यां न वसे निशाम् । तदाप्रभृति काकुत्स्थ कृता मे काश्यपस्य हैं ॥ १४ ॥
तॉमिमां मद्गतिं वीर हन्तुं नार्हसि राघव । मनोजवं गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ १५ ॥
लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया । जहि ताञ्छरमुख्येन मा भूत्कालस्य पर्ययः ॥ १६ ॥

गो० टी०–वीर्येण स्वशक्त्या मोघो न पतति लक्ष्यमभित्त्वा न तूष्णीं पततीत्यर्थः ॥ ८ ॥

९] ति० टी०–वरायुधं वैष्णवं धनुः । समेता मिलिताः॥९॥

रा० टी०–रघुनाथोक्त्यनन्तरकालिकं वृत्तमाह–वरेति । वरायुधधरं सज्यीकृतवैष्णवधनुर्बाणधारिणं रामं रघुनाथं द्रष्टुं सर्षिगणाः सर्वशः सुराः पितामहं ब्रह्माणं पुरस्कृत्य तत्र रघुनाथसमीपे समेताः प्राप्ताः पितामहं पुरस्कृत्येत्युक्त्या सुराणां रामबाणभीतत्वं सूचितं तेन रामबाणस्य तेजोऽतिशयः सूचितः ॥ ९ ॥

गो० टी०–वरायुधेत्यादि । रामं तन्महदद्भुतं कर्म च द्रष्टुं समेता इत्यन्वयः ॥ ९ ॥ १० ॥

१०] ति० टी०–तद्रष्टुम् आगता इति शेषः ॥ १० ॥

रा० टी०–गन्धर्वेति । महत्पूज्यं अद्भुतमाश्चर्यं तद्रघुनाथस्य कर्म द्रष्टुं गन्धर्वादयश्च समेता इति पूर्वेणान्वयः ॥१०॥

११] ति० टी०–वरधनुर्धरे रामेऽधिकरणे तस्य भार्गवस्यालोके तेजसि संक्रान्ते सतीति शेषः । 'ततः परशुरामस्य देहान्निर्गत्य वैष्णवम् । पश्यतां सर्वदेवानां तेजो राममुपागमत् ॥' इति नृसिंहपुराणात्, पूर्वोक्तपाद्माच्च । अत एव भार्गवे जडीकृते सति निर्वीर्यः स रामो राममुदैक्षत उद्भूतविष्णुतेजस्कमपश्यदित्यर्थः ॥ ११ ॥

रा० टी०–जडीकृत इति । वरधनुर्धरे रामे दाशरथौ तदालोके परशुरामतेजसि जडीकृते आलोकनिष्ठजडीभवनाद्युत्कूलव्यापारवति सति निर्वीर्यो हतपराक्रमः असौ जामदग्न्यो रामः रामं दाशरथिमुदैक्षत तेजसो जडीभवनं विध्वंस एवेति भावः ॥ ११ ॥

गो० टी०–जडीकृत इति । लोके जने जडीकृते स्तब्धे निर्वीर्यः निर्गतवैष्णवतेजाः तथा च पुराणान्तरम् 'ततः परशुरामस्य देहान्निर्गत्य वैष्णवम् । पश्यतां सर्वदेवानां तेजो राममुपाविशत्' इति । उदैक्षत विस्मित इति शेषः ॥ ११ ॥

१२] ति० टी०–तदेव विवृणोति–तेजोभिरित्यादि । रामसंक्रान्तैस्तेजोभिर्हेतुभिर्गतवीर्यतया जडीकृतः परशुरामः उवाच शरवध्यप्रभोत्तरमिति शेषः ॥ १२ ॥

रा० टी०–तेजोभिरिति । तेजोभिः रघुनाथप्रभावैर्हेतवीर्यत्वाद्धेतोः जडीकृतो जामदग्न्यः कमलपत्राक्षं रामं मन्दं मन्दमेवोवाच । हशब्द एवार्थे ॥ १२ ॥

गो० टी०–उवाच प्रभोत्तरमिति शेषः ॥ १२ ॥

१३] ति० टी०–विषये देशे । एवमुक्तिश्च क्षत्रभीत्यादिनिवृत्तये ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–काश्यपायेति । पूर्वं काश्यपाय वसुन्धरा मया यथा यथावद्दत्ता अत एव मे विषये देशे न वस्तव्यमिति मां काश्यपोऽब्रवीत् ॥ १३ ॥

गो० टी०–काश्यपायेत्यादि । यदाब्रवीत्तदाप्रभृति न वसे इत्यन्वयः गुरुवचः काश्यपवचः कुर्वन् परिपालयन् कृत इत्याह–कृतेति । हिशब्दः प्रसिद्धौ यतः सर्वप्रसिद्धतया भूः काश्यपस्य स्वत्वेन कृता त्वद्विषये न वत्स्यामीति प्रतिज्ञा च कृता तस्मादित्यर्थः ॥ १३ ॥ १४ ॥

१४] ति० टी०–गुरुवचः काश्यपवचः । निशां रात्रिं न वसे तत्रार्षः । तदा यदा दत्ता यदा च न वस्तव्यमित्युक्तं तदाप्रभृतीति शेषः पृथिव्यां न वसे इत्यर्थः । यतो ह प्रसिद्धं काश्यपस्याग्रे प्रतिज्ञा कृता इति शेषः । पृथिव्यां रात्रौ न वसामीत्येवंरूपा प्रतिज्ञा कृता ॥ १४ ॥

रा० टी०–स इति । हे काकुत्स्थ! सः काश्यपेनोक्तोऽ गुरुवचः कुर्वन् सन् यदाप्रभृति मे मया काश्यपस्य कृता काश्यपाय समर्पितेत्यर्थः इयं पृथिवीति शेषः तदाप्रभृति अस्यां पृथिव्यां निशां न वसे वसामि ह प्रसिद्धमेतत् ॥ १४ ॥

१५] ति० टी०–यदेवमतः–तामिमामित्यादि । तां मद्गतिमाकाशगमनसाधनौ पादौ चेन्न हनिष्यसि, तदा मनोजवं पादमास्थाय काश्यपेन समुद्रेण च दत्तं महेन्द्रं गमिष्यामि अन्यथा प्रतिज्ञाहान्या महत्संकटं स्यादिति भावः ॥ १५ ॥

रा० टी०–तदिति । हे राघव ! हे राम ! तत्तस्माद्धेतो इमां कामचारां गतिं गमनं हन्तुं त्वं नार्हसि अतः पर्वतोत्तमं महेन्द्रं मनोजवं यथा स्यात्तथा गमिष्यामि ॥ १५ ॥

गो० टी०–तदिमामिति । गतिः गमनम् ॥ १५ ॥

१६] ति० टी०–तपसा यज्ञादिरूपेण निर्जिता अर्जिताः । अत्र पुण्यार्जितलोकहननाभ्यनुज्ञया स्वस्य तत्त्वज्ञत्वं

१ इतेति गो. रा. पाठः । २ येथेति गो. पाठः । ३ हीति गो. पाठः । ४ तादिमां त्वमिति गो. रा. पाठः । ५ रामेति रा. पाठः । ६ तपसा निर्जिता इति रा. पाठः ।

[1]अक्षय्यं मधुहन्तारं जानामि त्वां सुरेश्वरम् । धनुषोऽस्य परामर्शात्स्वस्ति तेऽस्तु परंतप ॥ १७ ॥
एते सुरगणाः सर्वे निरीक्षन्ते समागताः । त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ १८ ॥
न चेयं तव काकुत्स्थ व्रीडा भवितुमर्हति । त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥ १९ ॥
शरमप्रतिमं राम मोक्तुमर्हसि सुव्रत । शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ २० ॥
तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् । रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमम् ॥ २१ ॥
स हतान्दृश्य रामेण स्वाँल्लोकांस्तपसार्जितान् । जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमम् ॥ २२ ॥
ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा । सुराः सर्षिगणा रामं प्रशशंसुरुदायुधम् ॥ २३ ॥

व्यङ्ग्यम् । रामस्य लोकदानप्रतिबन्धयोः स्वातन्त्र्यदर्शनेन परेशत्वबोधनं च । पाद्मेऽपि—'शतयज्ञकृतं पुण्यं तदस्याय न्यवेदयत्' इति ॥ १६ ॥

रा० टी०—लोका इति । हे राम ! मया तपसैव निर्जिताः समर्जिता येऽप्रतिमा लोकाः तान् शरमुख्येन जहि कालस्य पर्ययो विलम्बो मा भूत् । तुशब्द एवार्थे ॥ १६ ॥

गो० टी०—लोकहननं नाम लोकदानप्रतिबन्धः मूर्तस्य वा अमूर्तस्य वा कार्यस्य प्रतिहननमेव रामशरस्यापेक्षितमिति भावः ॥ १६ ॥

१७] ति० टी०—यतः "उतामृतत्वस्येशानः" इति श्रुतिप्रसिद्धं ब्रह्मैव त्वमित्याह—अक्षय्यमिति । अक्षय्यमनाद्यन्तं केनापि पराजयं नेतुमशक्यं च । एवं निश्चये हेतुर्धनुष इत्यादि । अस्य वैष्णवस्येतरदुरारोपस्य परामर्शो ग्रहणाकर्षणादि ॥ १७ ॥

रा० टी०—त्वं मया तत्त्वतो ज्ञातोऽसीति बोधयन्नाह—अक्षयमिति । न क्षयो विनाशः आश्रितानां यस्मात् तं मधुहन्तारं मधुं दैत्यं हन्ति विष्णुना घातयति तं विष्णोर्नियन्तारमित्यर्थः । किंच मधुहं मधौ चैत्रे जिहीते प्रादुर्भावं प्राप्नोति तं तारं तारः प्रणवः अस्ति बोधकत्वेनास्येति तारः तं, किंच तारं भवसागरपारकर्तारं सुरोत्तमं ब्रह्मादित्रिदेवेभ्यः श्रेष्ठं दानिश्रेष्ठं वा त्वामहं जानामि अतो हे परंतप ! अस्य वैष्णवस्य धनुषः परामर्शात् ग्रहणसज्यीकरणाकर्षणादेः ते स्वस्त्यस्तु ॥ १७ ॥

गो० टी०—अक्षयमिति । अक्षयं निर्विकारं मधुहन्तारं विरोधिनिरसनशीलम् अनेन न ब्रह्मा सेशान इतिमहोपनिषदुपबृंहिता । परामर्शात् ग्रहणात् ॥ १७ ॥ १८ ॥

१८] ति० टी०—अप्रतिद्वन्द्वं प्रतिभटरहितम् ॥ १८ ॥

रा० टी०—एत इति । समागताः एते सर्वे सुरगणाः अप्रतिमकर्माणमुपमारहितकर्मविशिष्टमत एव आहवे अप्रतिद्वन्द्वं त्वां निरीक्षन्ते ॥ १८ ॥

१९] ति० टी०—इयं त्वद्विषयेऽशक्तिर्व्रीडा व्रीडार्हा । तत्र हेतुस्त्वयेत्यादि । विमुखीकृतः स्वशक्तेः स्वस्मिन्योजनेनाशक्तः कृतः एतेन स्वस्य भगवदंशत्वं रामस्य च पूर्णभगवदवतारत्वं सूचितम् । स्वातिरिक्तेन विमुखीकरणे हि व्रीडा न तु स्वात्मना मायया तथाकरणे इति भावः । एतद्व्यवहारप्रयोजनं च दयया दशरथादीन्प्रति स्वरूपबोधनं रामस्य पूर्णतेजोवत्त्वसंपादनं चेति भाति वैष्णवतेजसोंऽशेनान्यत्र सत्त्वे रावणवधस्य दुष्करत्वात् एतदर्थमेव रावणवधेच्छुदेवगन्धर्वादीनां द्रष्टुमागमनं पूर्वमुक्तम् ॥ १९ ॥

रा० टी०—नेति । हे काकुत्स्थ ! इयं पराभूतिः मम व्रीडा तद्धेतुर्भवितुं नार्हति यद्यस्माद्धेतोः त्रैलोक्यनाथेन सर्वस्वामिना त्वया अहं विमुखीकृतः ॥ १९ ॥

गो० टी०—इयं त्वया विमुखीकृतः व्रीडा लज्जा ॥ १९ ॥

२०-२१] ति० टी०—शरमोक्षे गमिष्यामि पापस्य तपसा दग्धस्वात्पुण्यस्य च शरमोक्षेण फलप्रतिबन्धे जीवन्मुक्तो भूत्वा गमिष्यामीत्यर्थः अनेन लोकावरोधः स्वेष्ट एवेति दर्शितम् ॥ २० ॥ २१ ॥

रा० टी०—शरमिति । हे राम हे सुव्रत ! अप्रतिममुपमारहितं शरं मोक्तुं त्वमर्हसि शरमोक्षे सति पर्वतोत्तमं महेन्द्रमहं गमिष्ये ॥ २० ॥

रा० टी०—तथेति । जामदग्न्ये रामे तथा ब्रुवति सत्येव प्रतापवान् श्रीमान् दाशरथिः रामः उत्तमं शरं चिक्षेप ॥ २१ ॥

गो० टी०—शरमोक्षे सति । अहं दृष्टशरलक्ष्यस्वार्जितलोकगतिः ॥ २० ॥ २१ ॥

२२-२३] ति० टी०—दृश्य दृष्ट्वा ॥ २२ ॥ २३ ॥

रा० टी०—स इति । जामदग्न्यः स परशुरामः रामेण हतान् तपसार्जितान् लोकान् दृश्य दृष्ट्वा पर्वतोत्तमं महेन्द्रमाशु जगाम ॥ २२ ॥

रा० टी०—तत इति । ततः परशुरामगमनानन्तरं वितिमिराः अन्धकाररहिताः सर्वाः दिशः तथोपदिशश्च आसन्निति शेषः । अत एव मुदान्विताः सर्षिगणाः सुराः रामं प्रशशंसुः ॥ २३ ॥

गो० टी०—दृश्य दृष्ट्वा लोकान् हतान् लोकप्राप्तिहेतुकर्माणि विफलीकृतानीत्यर्थः ॥ २२ ॥ २३ ॥

१ अक्षयमिति गो. रा. पाठः । २ सुरोत्तममिति गो. रा. पाठः । ३ रामेति रा. पाठः । ४ गमिष्येऽहमिति रा. पाठः । ५ मुदान्विता इति रा. पाठः ।

रामं दाशरथिं रामो जामदग्न्यः प्रपूजितः । ततः प्रदक्षिणीकृत्य जगामात्मगतिं प्रभुः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ।

गते भार्गवे रामस्तद्धनुर्वरुणहस्ते ददौ । भार्गवनिर्गमनं श्रुत्वा हृष्टो दशरथश्चतुरङ्गिणीं सेनां प्रस्थाप्य स्वयं च पौरैरनुगम्यमानोऽयोध्यां प्रविवेश सपरिजनश्च यथासुखं विजहार । ततः कतिपयैरहोभिर्मातुलो युधाजिद्भागिनेयौ भरतशत्रुघ्नौ स्वपुरं निनाय । रामस्तु पित्राज्ञानुपालनपरः पौरकार्याणि कुर्वन् सीतया सुखं रेमे ।

गते रामे प्रशान्तात्मा रामो दाशरथिर्धनुः । वरुणायाप्रमेयाय ददौ हस्ते महायशाः ॥ १ ॥
अभिवाद्य ततो रामो वसिष्ठप्रमुखानृषीन् । पितरं विकलं दृष्ट्वा प्रोवाच रघुनन्दनः ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिणी । अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ ३ ॥
रामस्य वचनं श्रुत्वा राजा दशरथः सुतम् । बाहुभ्यां संपरिष्वज्य मूर्ध्न्युपाघ्राय राघवम् ॥ ४ ॥
गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः । पुनर्जातं तदा मेने पुत्रमात्मानमेव च ॥ ५ ॥

२४] ति० टी०–रामो दाशरथिना ब्राह्मणत्वात्पूजितो नमस्कृतश्च । 'प्रशस्य ह' इति पाठान्तरम् । दाशरथिं प्रदक्षिणीकृत्य अन्तर्यामित्वेन ज्ञानात्प्रदक्षिणकरणं क्षत्रियत्वाच्च तस्य प्रणत्यकरणं कायेनेति बोध्यम् । आत्मगतिं तत्त्वज्ञानं स्वस्थानं जगामेत्यर्थः प्रभुरिति ब्रह्मत्वेन सर्वलोकप्रभुत्वम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

रा० टी०–राममिति । ततः महेन्द्राचलप्राप्त्यनन्तरं प्रभुर्जामदग्न्यो रामः दाशरथिं रामं प्रशस्य तद्दयालुत्वादिप्रशंसां कृत्वा प्रदक्षिणं प्रकृष्टा सर्वोत्तमा दक्षिणा आत्मसमर्पणरूपा यस्मिन् तत् कर्म कृत्वा आत्मगतिमात्मभः स्वस्य गतिं प्राप्य रघुनाथनियम्यत्वं जगाम प्राप ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

गो० टी०–आत्मगतिं स्वस्थानम् ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

१] ति० टी०–रामे परशुरामे प्रशान्तो गतक्रोध आत्मा चित्तं यस्य । हस्ते स्वहस्ते स्थितं धनुर्वरुणाय देवैः सह कौतुकदर्शनार्थमन्तरिक्षे स्थिताय ददौ न्यासात्मनेति शेषः । वरुणस्याप्रमेयत्वं भृगवे साक्षाद्ब्रह्मविद्याप्रदत्वात् इदं च तैत्तिरीयोपनिषदि स्पष्टम् ॥ १ ॥

रा० टी०–गते इति । रामे परशुरामे गते सति प्रशान्तात्मा महायशाः दाशरथी रामः अप्रमेयाय अन्यैरयं वरुण इति तस्मिन्काले प्रमातुमशक्याय वरुणाय हस्ते स्वकरे स्थितं धनुः वैष्णवचापं ददौ ॥ १ ॥

गो० टी०–अथ स्वपुरं प्राप्य सीतया रामः सुखमुवासेत्याह सप्तसप्ततितमे–गत इत्यादि । रामे परशुरामे वरुणाय न्यासत्वेनेति शेषः । अप्रमेयाय अदृश्यायेत्यर्थः ॥ १ ॥

२–४] ति० टी०–विकलं परशुरामभयेन । धनुर्दानतृस्तान्तस्य मायया तिरोधानमन्यान्प्रति ॥ २–४ ॥

रा० टी०–अभिवाद्येति । ततः चापदानानन्तरं रघुनन्दनो रामः वशिष्ठप्रमुखान् ऋषीन् पितरं चाभिवाद्य विकलं वीनां पक्षिणां कलं स्वस्वनीडगमनं यस्मिन् तं सायंकालं दृष्ट्वा प्रोवाच ॥ २ ॥

गो० टी०–विह्वलं परवशम् अनेन परशुरामेण कृतां परत्वसूचिकां स्तुतिं वरुणाय धनुर्दानं च दशरथो न ज्ञातवानिति गम्यते ॥ २ ॥

रा० टी०–तद्वचनमेवाह–जामदग्न्य इति । जामदग्न्यो रामो गतः अतो नाथेन त्वया पालिता चतुरङ्गिणी सेना अयोध्याभिमुखी सती प्रयातु सायंकालं दृष्टापि चतुरङ्गिणी प्रयात्वित्युक्त्या अयोध्यादर्शनाभिलाषातिशयः सूचितः ॥ ३ ॥

गो० टी०–चतुरङ्गिणीति "प्रातिपदिकान्तनु–" इत्यादिना णत्वम् ॥ ३ ॥

रा० टी०–रामस्येति । राजा दशरथः रामस्य तद्वचः श्रुत्वा राघवं सुतं बाहुभ्यां संपरिष्वज्य मूर्ध्नि आघ्राय प्रमुमुदे इति शेषः ॥ ४ ॥

गो० टी०–रामस्येत्यादि । श्लोकद्वयमेकान्वयम् । रामस्य वचनं श्रुत्वा विह्वलतया अस्पष्टं वचनं श्रुत्वा गतो राम इति श्रुत्वा क्रमेण पुनः स्पष्टं श्रुत्वेत्यर्थः हृष्टः पुलकितः ॥ ४ ॥ ५ ॥ ६ ॥

५] ति० टी०–हर्ष एवाधिकावस्थः प्रमोदः ॥ ५ ॥

रा० टी०–गत इति । तदा रामोक्तिकाले रामः परशुरामो

१ प्रशस्य चेति गो. रा. पाठः । २ ससायकमिति गो. पाठः । ३ विह्वलमिति गो. पाठः । ४ तद्वच इति गो. पाठः । ५ मूर्ध्नि चाघ्रायेति गो. रा. पाठः ।

चोदयामास तां सेनां जगामाशु ततः पुरीम् । पताकाध्वजिनीं रम्यां तूर्योद्घुष्टनिनादिताम् ॥ ६ ॥
सिक्तराजपथारम्यां प्रकीर्णकुसुमोत्कराम् । राजप्रवेशसुमुखैः पौरैर्मङ्गलपाणिभिः ॥ ७ ॥
संपूर्णां प्राविशद्राजा जनौघैः समलंकृताम् । पौरैः प्रत्युद्गतो दूरं द्विजैश्च पुरवासिभिः ॥ ८ ॥
पुत्रैरनुगतः श्रीमाञ्छ्रीमद्भिश्च महायशाः । प्रविवेश गृहं राजा हिमवत्सदृशं प्रियम् ॥ ९ ॥
ननन्द स्वजनै राजा गृहे कामैः सुपूजितः । कौसल्या च सुमित्रा च कैकेयी च सुमध्यमा ॥ १० ॥
वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः । ततः सीतां महाभागामूर्मिलां च यशस्विनीम् ॥ ११ ॥
कुशध्वजसुते चोभे जगृहुर्नृपयोषितैः । मङ्गलालापनैर्होमैः शोभिताः क्षौमवाससः ॥ १२ ॥
देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन् । अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥ १३ ॥

गतः इति श्रुत्वैव आहृष्टः परमहर्षं प्राप्तः प्रमुदितः प्रमुत् प्रकृष्टो हर्षः इता जनान् प्रापिता येन सः नृपो दशरथः पुत्रमात्मानं च पुनर्जातं मेने अत एव तां सेनां चोदयामास गन्तुं प्रेरयामास ततः प्रेरणानन्तरमेव पुरीमयोध्यामाशु जगाम॥६॥

६] ति० टी०–तां सेनाम् । प्रथमं क्षुभितां पश्चात्प्राप्ताश्वासां चेत्यर्थः । जगाम *सेनेति शेषः । पताका ध्वजपटः ध्वजो दण्डः पताकायुक्तध्वजवतीम् । पताकाः क्षुद्रध्वजाः । ध्वजा महान्त इत्यन्ये । रम्यां स्वभावतः । उद्घुष्टं घोषः ॥ ६ ॥

रा० टी०–पताकेति । पताकाध्वजिनीं पताकया ध्वजवस्त्रेण युक्तो यो ध्वजः पताकादण्डः तद्वतीं रम्यां तूर्योद्घुष्टनिनादितां तूर्यजनितशब्दपूरिताम् ॥ ६ ॥

७–८] ति० टी०–सिक्तेन राजपथेना समन्ताद्रम्याम् ॥ ७ ॥ ८ ॥

९] ति० टी०–श्रीमद्भिर्दारपरिग्रहादधिकलक्ष्मविद्भिः पुत्रैः । सुधालेपजधावल्यादौज्ज्वल्याच्च हिमवत्सादृश्यं गृहे ॥ ९ ॥

रा० टी०–सिक्तैः राजपथैः रम्यां रमणीयां प्रकीर्णकुसुमोत्करां प्रकीर्णाः विस्तृताः कुसुमोत्कराः पुष्पसमूहा यस्यां तां राजप्रवेशसुमुखैः राजप्रवेशेन शोभनानि प्रफुल्लितानि मुखानि येषां तैः मङ्गलपाणिभिः पौरैः संपूर्णां जनौघैः समलंकृतामयोध्यां राजा प्राविशत् ॥ ७ ॥

रा० टी०–पौरैरिति । पौरैः अयोध्यापुरोद्भवैः पुरवासिभिः स्वाभीष्टसिद्ध्यर्थं तत्पुरनिवसनशीलैश्च द्विजैः दूरं प्रत्युद्गतः श्रीमद्भिः पुत्रैरनुगतः युक्तः महायशाः राजा दशरथः हिमवत्सदृशं प्रियं गृहं प्रविवेश ॥ ८ ॥ ९ ॥

गो० टी०–रम्यामिति पुनरुक्तिस्तत्तद्विशेषणकृतरमणीयत्वाभिप्रायेण पताका ध्वजपटः ध्वजः दण्डः पताकान्विता ध्वजा अस्यां सन्तीति पताकाध्वजिनीं ह्रस्वदीर्घध्वजभेद इत्यप्याहुः । उद्घुष्टमिति भावे निष्ठा तूर्योद्घोषेण संजाततिनादामित्यर्थः राजप्रवेशेन सुमुखैः विकसन्मुखैः मङ्गलमाशीर्वचनं वक्तुं शीलमेषामस्तीति मङ्गलवादिभिः ॥ ७–९ ॥

१०] ति० टी०–कामैर्विषयभोगपरिकरस्रक्चन्दनादिभिः सुपूजितः प्राप्तपूजो ननन्द ॥ १० ॥

रा० टी०–ननन्देति । स्वजनैः कामैः इच्छाविषयीभूतपदार्थैः सुपूजितः राजा गृहे ननन्द ॥ १० ॥

रा० टी०–कौशल्येति । सुमध्यमा कौशल्यादिः अन्या कौशल्यादिभिन्ना या राजयोषितः ताश्च वधूप्रतिग्रहे वधूनां स्नुषाणां प्रतिग्रहः आचारपूर्वकस्वस्वगृहनयनं तत्र युक्ताः संसक्ता अभवन्निति शेषः ॥ ११ ॥

गो० टी०–जनः संबन्धिजनः गृहे स्थितैरिति शेषः । काम्यन्त इति कामाः विषयभोगपरिकरास्तैः ॥ १० ॥

११] ति० टी०–वधूनां स्नुषाणां प्रतिग्रहे मङ्गलाचरणपूर्वकं दर्शनस्पर्शने ॥ ११ ॥

रा० टी०–तत इति । ततः वधूप्रतिग्रहसंसक्त्यनन्तरं यशस्विनीं महाभागां सीतामूर्मिलां च उभे कुशध्वजसुते च नृपयोषितः कौशल्यादयः जगृहुः ॥ १२ ॥

गो० टी०–वधूनां स्नुषाणां प्रतिग्रहे उपचारे स्वस्वान्तःपुरानयने वा 'वधूर्जाया स्नुषा' इत्यमरः । युक्ता आसक्ताः आसन्निति शेषः ॥ ११ ॥

१२] ति० टी०–मङ्गलालापनैर्मङ्गलार्थमालापनैराशीर्वादैः उपलक्षिता इति शेषः । होमैर्गृहप्रवेशनीयहोमैः प्राप्तशोभनाः ॥ १२ ॥

रा० टी०–मङ्गलेति । मङ्गलालापनैः स्वस्तिवचनोच्चारणैः होमैश्च शोभिताः क्षौमवाससः पट्टवस्त्रवत्यः ताः सर्वाः देवतायतनानि प्रत्यपूजयन् ॥ १३ ॥

गो० टी०–जगृहुः अन्तःपुरं प्रावेशयन् ॥ १२ ॥

गो० टी०–मङ्गलालापनैः स्वस्तिवाचनैः शोभिताः 'मङ्गलालम्भनैः' इतिपाठे आलम्भनं चन्दनचर्चा देवतायतनानि गृहदेवतानामर्चागृहाणि प्रत्यपूजयन् गन्धपुष्पादिभिरपूजयन् आयतनपूजामात्रे स्त्रीणामधिकारादिति भावः ॥ १३ ॥

१३] ति० टी०–देवतायतनानि पुरगृहदेवतायतनानि ताः सर्वा राजसुताः स्नुषाः सर्वा राजपत्न्यः प्रत्यपूजयन्प्रणामयन्ति स्म । अभिवाद्यानभिवादनार्हानभिवाद्य नमस्कार्य ॥ १३ ॥

---

१ यद्यपि राजपथामिति गो. रा. पाठस्तथापि शिरोमणिटीकायां विरुद्धमिव दृश्यतेः । २ वादिभिरिति गो. पाठः । ३ पुनरिति गो. पाठः । ४ स्वजनो इति गो. पाठः । ५ कौशल्येति रा. पाठः । ६ उर्मिलामिति गो. पाठः । ७ पत्नय इति गो पाठः । ८ चैवेति गो. रा. पाठः । ९ तथेति रा. पाठः । *सेनयेति भाति ।

रेमिरे मुदिताः सर्वा भर्तृभिर्मुदितैः[1] रहः । [कुमाराश्च महात्मानो वीर्येणाप्रतिमा भुवि ॥]
कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः । ॥ १४ ॥
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः । कस्यचित्त्वथ कालस्य राजा दशरथः सुतम् ॥ १५ ॥
भरतं कैकयीपुत्रमब्रवीद्रघुनन्दनः । अयं केकयराजस्य पुत्रो वसति पुत्रक ॥ १६ ॥
त्वां नेतुमागतो[3] वीरो युधाजिन्मातुलस्तव । श्रुत्वा दशरथस्यैतद्भरतः कैकयीसुतः ॥ १७ ॥
गमनायाभिचक्राम शत्रुघ्नसहितस्तदा । आपृच्छ्य पितरं शूरो[5] रामं चाक्लिष्टकारिणम् ॥ १८ ॥
मातृश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ । युधाजित्प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः ॥ १९ ॥
स्वपुरं प्राविशद्वीरः पिता तस्य तुतोष ह । गते च भरते रामो लक्ष्मणश्च महाबलः ॥ २० ॥
पितरं देवसंकाशं पूजयामासतुस्तदा । पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः ॥ २१ ॥
चकार रामः सर्वाणि प्रियाणि च हितानि च । मातृभ्यो मातृकार्याणि कृत्वा परमयन्त्रितः ॥ २२ ॥

रा० टी०–अभीति । तदा पूजनकाले अभिवाद्यान् अभिवादनार्हान् अभिवाद्य भर्तृभिः सहिता एव मुदिताः सर्वा राजसुताः रहो रेमिरे। चशब्द एवार्थे ॥ १४ ॥

गो० टी०–अभिवाद्येति । सर्वा अभिवाद्य सर्वा रेमिरे इत्यन्वयः ॥ १४ ॥

१४] ति० टी०–कृतास्त्राः लब्धास्त्राः । 'कृताज्ञा' इति पाठेऽनुधितपित्रभियोगाः ॥ १४ ॥

रा० टी०–कृतेति । कृतदाराः प्राप्तभार्याः कृतास्त्राः प्राप्तमन्त्रास्त्रशस्त्राः सधना नित्यधनविशिष्टाः ससुहृज्जनाः पितरं शुश्रूषमाणाः नरर्षभाः रामादयः वर्तयन्ति वर्तन्ते णिजर्थोऽविवक्षितः ॥ १५ ॥

१५–१६] ति० टी०–वर्तयन्ति पितुर्वृत्तं कुर्वन्ति नरर्षभा रामादयः । कस्यचित्कालस्य अत्यये इति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–कस्यचिदिति । अथ अनन्तरं कस्यचित्कालस्यापगमे सतीति शेषः । रघुसत्तमो राजा दशरथः केकयीपुत्रं सुतं स्वपुत्रं भरतमब्रवीत् ॥ १६ ॥

गो० टी०–वर्तयन्ति अनुवर्तयन्ति स्म ॥ १५ ॥

गो० टी०–कस्यचित्त्वथ कालस्य कस्मिंश्चित्काले गते सति ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–अयमिति । हे पुत्रक! हे वीर! त्वा त्वामानेतुमागतः केकयराजस्य पुत्रः तव मातुलोऽयं युधाजित् वसति । अत्र गच्छेत्यनुक्त्या पुत्रवियोगासहिष्णुत्वं राज्ञः सूचितम् ॥ १७ ॥

१७] ति० टी०–मातुलस्तवेति । अतस्तन्नगरं गत्वा गच्छेति शेषः । एतद्वाक्यम् ॥ १७ ॥

रा० टी०–श्रुत्वेति । तदा राजोक्तिकाले दशरथस्य एतद्वचनं श्रुत्वा शत्रुघ्नसहितः केकयीसुतो भरतः गमनाय अभिचक्राम ॥ १८ ॥

गो० टी०–मातुलस्तवेति अतो गच्छेति व्यञ्जनाद्वृत्योक्तिः पुत्रविरहकातर्यात् ॥ १७ ॥ १८ ॥

१८–२१] ति० टी०–अक्लिष्टं कस्यापि दुःखं यथा न भवति तथा कर्तुं शीलमस्य तं रामम् ॥ १८–२१ ॥

रा० टी०–आपृच्छ्येति। वीरः नरश्रेष्ठः शत्रुघ्नसहितो भरतः पितरमक्लिष्टकारिणं रामं च मातॄश्च आपृच्छ्यैव ययौ ॥१९॥

रा० टी०–युधाजिदिति । भरतं शत्रुघ्नं च प्राप्य प्रहर्षितो वीरो युधाजित्स्वपुरं प्राविशत् तेन तस्य पिता तुतोष । ह्यो हेतौ ॥ २० ॥

रा० टी०–गत इति । भरते गते सति महाबलो रामो लक्ष्मणश्च देवसंकाशं पितरं तदोचितकाले पूजयामासतुः॥२१॥

रा० टी०–पितुरिति । पितुः आज्ञां पुरस्कृत्यैव प्रियाणि मनोहराणि हितानि उपकारकाणि सर्वशः पौरकार्याणि धर्मात्मा रामो नित्यं चकार । एकश्चकार एवार्थे एकश्चकारो नित्यार्थः ॥ २२ ॥

गो० टी०–अक्लिष्टं कस्यापि दुःखरहितं यथा भवति तथा कर्तुं शीलमस्त्यस्येति तथा ॥ १९–२१ ॥

२२] ति० टी०–प्रियाणि इहितानि । हितानि पर्यन्ते इष्टजनकानि पौराणाम् । परमत्यन्तं यन्त्रितः श्रुतिस्मृतिमर्यादाऽलङ्घी ॥ २२ ॥

रा० टी०–मातॄणाम् इति । परमयन्त्रितः शास्त्रानुरोधित्वादतिसंकुचितवृत्तिः रामः मातृकार्याणि काले काले कृत्वा गुरूणां गुरुकार्याणि महान्त्यपि कृत्यानि अन्ववैक्षत विचार्याकरोदित्यर्थः ॥ २३ ॥

गो० टी०–परमयन्त्रितः परममत्यन्तं यन्त्रितः श्रुतिस्मृतिमर्यादानतिलङ्घी गुरुकार्याणि गुरूचितशुश्रूषादिकार्याणि अन्ववैक्षत परिपालयति स्मेत्यर्थः ॥ २२ ॥

---

१ सहिता इति गो. रा. पाठः । २ अर्धमेतदधिकं गो. पाठे । ३ वीरेति गो. रा. पाठः । ४ वीर इति रा. पाठः । ५ एतदाद्यर्धद्वयं गो. नास्ति । ६ धर्मात्मेति गो. रा. पाठः ।

गुरूणां गुरुकार्याणि काले कालेऽन्ववैक्षत । एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ॥ २३ ॥
रामस्य शीलवृत्तेन सर्वे विषयवासिनः । तेषामतियशा लोके रामः सत्यपराक्रमः ॥ २४ ॥
स्वयंभूरिव भूतानां बभूव गुणवत्तरः । रामश्च सीतया सार्धं विजहार बहूनृतून् ॥ २५ ॥
मनस्वी तद्गतमनास्तस्या हृदि समर्पितः । प्रिया तु सीता रामस्य दाराः पितृकृता इति ॥ २६ ॥
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभिवर्धते । तस्याश्च भर्ता हृदये द्विगुणं परिवर्तते ॥ २७ ॥

२३] ति० टी०–गुरूणां तद्विषये परमयत्नितः । गुरुकार्याणि गुरुसंबन्धिशुश्रूषादीनि । नैगमा वणिजः ॥ २३ ॥

रा० टी०–एवमिति । रामस्य शीलवृत्तेन दशरथः प्रीतः एवं नैगमा ब्राह्मणाः प्रीताः तथा सर्वे विषयवासिनः प्रीताः ॥२४॥

गो० टी०–एवमेतादृशेन शीलवृत्तेन नैगमाः वणिजः ॥२३॥

२४] ति० टी०–विषयवासिनः प्रीता इति शेषः । तेषां चतुर्णां पुत्राणां मध्ये सत्यपराक्रमो राम एवातियशाः भूतानां मध्ये स्वयंभूरिव गुणवत्तरो बभूवेत्युत्तरेणान्वयः ॥२४॥

रा० टी०–तेषामिति । सत्यपराक्रमः स्वयं भवति प्रादुर्भूततां प्राप्नोतीति स्वयंभूः रामः लोके भूतानां प्रादुर्भावं प्राप्तानां मध्ये अतियशाः गुणवत्तरश्च बभूव । इवश्चार्थे ॥ २५ ॥

गो० टी०–न केवलं शीलवृत्तेन किंतु सर्वैरपि गुणैरित्याशयेनाह–तेषामिति । तेषां ब्राह्मणादीनां मध्ये ॥ २४ ॥

२५] ति० टी०–बहूनृतून् द्वादशवर्षाणीत्यर्थ इति बहवः ॥ २५ ॥

रा० टी०–राम इति । रामः सीतयैव साकं बहून् ऋतून् विजहार । चशब्द एवार्थे ॥ २६ ॥

गो० टी०–एवं धर्मपरतां रामस्योक्त्वा धर्माविरुद्धकामाभिरतिं दर्शयति–रामस्त्वित्यादिना श्लोकचतुष्टयेन । रामस्तु तुशब्देन पूर्वस्माद्वैलक्षण्यमुच्यते पितृशुश्रूषणधर्मप्रवर्तनदेवताराधनादिकं हि पूर्वमुक्तं स एवंकर्ता संप्रति वात्स्यायनमभ्यस्य कामतन्त्रपरोऽभूत् सीतया अयोनिजया "सह युक्तेऽप्रधाने" इति तृतीया स्वाभाविकसौन्दर्यसमृद्ध्यैवावतीर्णापि भोगस्रोतस्यप्रधानाभूदिति रामस्य प्रावण्यातिशयः प्रदर्शितः विजहार परस्मैपदेन फलापर्यवसायितोच्यते "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति विहाररूपक्रियाफलस्य कर्तुगामित्वे आत्मनेपदमेव भवेत् तथाच चिरतरविहारोऽपि भोगोपोद्घातकेलितां नातिशेत इति भावः । बहूनृतून् अत्यन्तसंयोगे द्वितीया तया भोगनैरन्तर्यं सूच्यते बहून् ऋतूनित्युक्तं नतु वत्सरानिति तेन तत्तदृतूचितभोगोपकरणैर्भोगान् स बुभुज इत्युक्तं मनोऽस्यास्तीति मनस्वी भूमार्थे मत्वर्थीयः तथाच संश्लेषदशायां सीतासंकल्पमप्यतिशय्य भोगस्रोतःप्रवर्तयितेत्यर्थः । नित्यं तद्गतः तस्यां गतः सन्नमीति योगविभागात्समासः । जातिगुणवदपृथक्सिद्धतया तदेकरसोऽभूदित्यर्थः । सर्वदा तदासक्तचित्तोऽभूदिति भावः । तस्या हृदि नित्यं समर्पितः सीतापि रामकृततत्तद्व्यापारेण वशीकृता तदायत्तचित्तासीत् नित्यं सुचिरं भोगेऽपि सद्यः संगतेव निरवधिकप्रेभारभरिताभूदित्यर्थः । नित्यं तद्गत इत्यत्र हेतुमाह–प्रियात्वेति । तुरवधारणे पितृकृता दारा इतिहेतोरेव रामस्य सीता प्रियासीत् । तर्हि सीतावैलक्षण्यमकिंचित्करं नेत्याह–गुणात् भर्तृशुश्रूषणादिगुणात् रूपस्य देहस्य गुणात् सौन्दर्यात् अपिशब्दोऽनुक्तसमुच्चयार्थः । आभिजात्यादिभिश्च प्रीतिर्भूयोभ्यवर्धत रामस्य सीतायामित्यर्थसिद्धम् अतो बहूनृतून्विजहारेत्यन्वयः ॥ २५ ॥ २६ ॥

२६] ति० टी०–मनस्व्यनुकूलमनस्कः अत एव तद्गतमना नित्यं सीतागतमनाः । तस्या हृदि समर्पितः संबन्धसामान्ये षष्ठी तयेत्यर्थः एतेन परस्परानुरागो दर्शितः । पितृकृता ब्राह्मविवाहसदृशविवाहेन पितृदत्ताः स विवाह एव सर्वथा श्लाघ्य इति भावः ॥ २६ ॥

रा० टी०–विहाराकारमाह–मनस्वीति । तस्यां सीतायामेव गतं नित्यं संलग्नं मनो यस्य अत एव मनस्वी निश्चलचित्तो रामः तस्याः तया सीतया हृदि समर्पितः संस्थापित इवेत्यर्थः । पितृकृताः पित्रा समर्पिताः प्रिया अतिप्रीतिविषयीभूता रामस्य दाराः सीतापि रामस्य रामेण इत्यनेन प्रकारेण हृदि समर्पितेति लिङ्गविपरिणामेनान्वयः । तुशब्दोऽप्यर्थे ॥२७॥

२७] ति० टी०–नैतावदेव किंतु गुणाद्धितकारित्वपातिव्रत्यादिरूपात्, रूपं सौन्दर्यं तदूपाद्गुणाच्च, भूयोऽधिकं रामस्य प्रीतिर्वर्धते स्म । तस्याश्च हृदये गुणाद्रूपगुणाच्च भर्ता द्विगुणं परिवर्तते स्म ॥ २७ ॥

रा० टी०–गुणादिति । गुणात् परस्परमतिशयसौशील्यसौन्दर्यादेः रूपगुणात् परस्परनिष्ठरूपस्वरूपगुणाच्च प्रीतिः परस्परं प्रेम भूयोऽत्यन्तमभिवर्धते अत एव भर्ता रामः तस्याः सीतायाः हृदये द्विगुणं द्वयोरुक्तगुणयोः समाहारः परिवर्तते । गुणवत्त्वेनैव रूपेण परिवर्तते चशब्देन सापि तस्य हृदि गुणवत्त्वेनैव रूपेण परिवर्तते इत्यर्थः ॥ २८ ॥

गो० टी०–अथ रामस्येव सीताया अपि रामे निरन्तरानुरागं दर्शयन् तस्या हृदि नित्यं समर्पित इत्युक्तं विवृणोति–तस्याश्चेति । तस्या भर्ता रामश्च हृदये सीताया हृदये द्विगुणं यथा भवति तथा परिवर्तते रामाद्विगुणा प्रीतिः सीताया रामेऽभूदित्यर्थः । यथा रामस्य सीतायां प्रीतिः पितृकृतदारत्वकृता सौन्दर्यकृता च एवं रामेऽपि सीतायाः प्रीति-

१ तदेति गो. पाठः । २ तद्गतस्तस्य नित्यं हृदीति गो. पाठः । ३ इवेति रा. पाठः । ४ ऽभ्यवर्धतेति गो. पाठः ।

अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा । तस्य भूयो विशेषेण मैथिली जनकात्मजा ॥
देवताभिः समा रूपे सीता श्रीरिव रूपिणी ॥ ॥ २८ ॥

तया स राजर्षिसुतोऽभिकामया समेयिवानुत्तमराजकन्यया ।
अतीव रामः शुशुभे भुदान्वितो विभुः श्रिया विष्णुरिवामरेश्वरः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

नोभयकृता किंतु भर्तृत्वमात्रकृता वक्ष्यत्यनुसूयां प्रति सीता 'यद्यप्येष भवेद्भर्ता ममार्यो वृत्तवर्जितः । अद्वेषमुपचर्तव्यस्तथाप्येष मया भवेत्' इत्यादि अनेन गुणादित्युक्तरामविषयानुरागो विवृतः । एतादृशानुरागो रामेण कथं विज्ञायत इत्यत्राह- **अन्तरिति** । अन्तर्जातं सीताहृदृतमपि हृदयगूढभावमनुरागमिति यावत् हृदा तर्केण अनुभावैरिति यावत् । व्यक्तमाख्याति जानाति चक्षिङः ख्याञादेशः सार्वधातुकेऽप्यार्षः । तस्य दर्शनार्थत्वं चख्युरित्यादौ सिद्धम् । परकीयहृदयं कथं व्यक्तीभवतीत्यपेक्षायां तत्रैव सर्वदा परिवर्तमानत्वादित्युक्तं पूर्वार्धे । रामवत् सीतापि रामहृदयं विशेषेण व्यक्तं वेत्तीत्याह- **तस्येति** । तस्य रामस्य हृदयं सीता भूयो विशेषेण रामादितिरिक्तं जानातीत्यर्थः । रामो यादृशभोगमभिलषति तदिङ्गितेन ज्ञात्वा स्वयं तदनुरूपा भवति नतु तदतिरिक्तभोगमभिलषते एवं रामोऽपीति भावः । रामादप्यतिशयेन सीतायाः कान्तेङ्गितपरिज्ञाने हेतुचतुष्टयमाह- मैथिलीत्यादि । देशस्वभावाद्वंशस्वभावाच्च सूक्ष्मज्ञा देवताभिः समेतिप्रागल्भ्यमुच्यते रूपे विषये रूपिणी सर्वैर्दृश्यमानरूपवती श्रीरिव स्थिता । अनेन सहजबुद्धिविशेषो दर्शितः ॥ २७ ॥ २८ ॥

२८] ति० टी०—तस्य रामस्यान्तर्गतं हृदयं हृदयाभिप्रायं मैथिली हृदा स्वहृदयेन भूयोऽधिकं विशेषेण मैथिली जनकात्मजा रूपिणी श्रीरिव रूपे देवताभिः समा सीताख्याति जानाति । अतो ज्ञायते भर्ता तद्धृदयस्थ इति ॥ २८ ॥

रा० टी०—**अन्तर्गतमिति** । विशेषेण विशिष्टगुणादिना विशिष्टा सीता किंच या विशेषेण लक्ष्म्यादिरोऽपि परतया विषयमाना मैथिली मिथिलोद्भवा जनकात्मजा सीता रूपे देवताभिः समा श्रीरिव रूपिणी कविभिर्वर्ण्यत इति शषः । सा हृदा बुद्ध्या अन्तर्गतं हृदये निवेशितमप्यभिप्रायं तस्य रामस्य समीपे व्यक्तं यथा भवति तथा भूयोऽत्यन्तमाख्याति कथयति । हृद् आश्रितसंतापनाशकोऽयं रामोऽपि आख्याति । सार्धश्लोक एकान्वयी ॥ २९ ॥

२९] ति० टी०—अभिकामया स्वविषयेच्छावत्या स्वेच्छाविषयया च समेयिवान्संयुक्तः विभुर्विशुत्वशक्तिमान् अमरेश्वरो विष्णुः श्रियेव । 'तत्र द्वादशवर्षाणि राघवः सह सीतया । रमयामास धर्मात्मा नारायण इव श्रिया ॥' इति पाद्म उक्तम् । एकोनषोडशवर्षस्य विश्वामित्रेण नयनात्पञ्चदशवर्षसमाप्तौ विवाह इति बोध्यम् ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये बालकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

रा०टी०—**तयेति**। अभिकामया अभितःकामो यस्यास्तयोत्तमराजकन्यया तया सीतया समेयिवान् रामोऽतीव **शुशुभे** तत्र दृष्टान्तः अतिकामया श्रिया अमरेश्वरो विभुर्विष्णुरिव॥२९॥

श्रीमन्मैथिलराजराजतनयासंसेव्यमानं विभुं
सीतापद्ममुखालिमार्यमयतामाज्यात्मजं यः स्वभाः ।
सर्वव्यापकसच्चिदात्मकमयं ब्रह्माद्वयं तं मनो
नित्यं येन तदीयनित्यचरणान् द्रक्ष्यामि मे चक्षुषा ॥१॥

वाल्मीकिरामायणबालकाण्डे टीका समाप्ता सविधे त्रिवेण्याः।
रामायणादिर्हि शिरोमणिः सा श्रीरामहर्षाय सदैव भूयात्॥२॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ बालकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

गो० टी०—एवमनवधिकमन्योन्यानुरागसुपपाद्य तदनुरूपं भोगं दर्शयति—**तयेति**। राजर्षिसुतः महाराजसुतत्वेन निरवधिकभोगोपकरणवान् उत्तमराजकन्यया ततोऽप्यधिकतदुपकरणवत्या रामः रमयिता अभिरामया ततोऽप्यतिशयेन रमयित्र्या सः अतिशयितकामःअतिकामया रामादप्यधिककामयेत्यर्थः । तया सीतया समेयिवान् सम्यगेयिवान् एकीभावेन संश्लिष्टः स्वयंग्रहाश्लेषविपर्यीभूतः सन् 'लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च । सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिश्चिन्तासंततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया' इतिवत् । विभुः प्रत्यालिङ्गनादिसमर्थः । अमरेश्वरो विष्णुः आदिविष्णुः श्रियेव मूर्तिभेदेनोपमानत्वं अतीव अतिशयेन **शुशुभे** रेजे तुल्यानुरागस्यातिशयितस्त्रीकामस्य भोगसमृद्धिहेतुत्वादिति भावः॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमञ्जीराख्याने बालकाण्डव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

वेदे शास्त्रेषु तादेऽप्यनितरसुलभां कीर्तिमाटीकमानः
काव्यालंकारनाट्यप्रभृतिषु पटुधीः कोऽपि टीकाविधाने ।
शुद्धान्तःपद्मशुद्धान्तितमधुमथनः शुद्धसत्त्वैकमूर्ति-
र्गोविन्दार्यो विचार्य व्यतनुत विमलां बालकाण्डस्य टीकाम् ॥

इति श्रीरामायणे बालकाण्डं समाप्तम् ।

१ जातमिति गो. पाठः । २ ऽभिरामयेति गो, रा. पाठः । ३ ऽतिकामयेति गो. पाठः

परिमल संस्कृत ग्रन्थमाला संख्या-११

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रा मा य ण म्

रामप्रणीतरामायणतिलक—शिवसहायप्रणीत
रामायणशिरोमणि—गोविन्दराजप्रणीत-
रामायणभूषणेति-टीकात्रयेणोपस्कृतम् ।

तच्च

कट्टी श्रीनिवासशास्त्रिभिः

संशोधितं पाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्

तथा

श्रीसातकडिमुखोपाध्यायशर्मणा

विनिर्मितया विशदभूमिकया श्लोकानुक्रमण्या च
सनाथीकृतम् ।

द्वितीयो भागः

[अयोध्याकाण्डम्]

परिमल पब्लिकेशन्स

दिल्ली — अहमदाबाद

Published by
PARIMAL PUBLICATIONS
Publishers & Booksellers
33/17 Shakti Nagar
Delhi-110 007 (India)

© Parimal Publications

1983

Price : **Rs. 240**

Printed by :
A. K. Distributors,
at Delux Offset Printers,
Delhi-110 035.

प्रकाशक :

परिमल पब्लिकेशन्स

३३/१७ शक्तिनगर
दिल्ली-११०००७
(भारत)

अधिकृत विक्रेता :

मेहरचन्द लछमनदास

प्रकाशक एवं पुस्तक-विक्रेता
१ अन्सारी रोड, दरियागंज
नई दिल्ली-११०००२ (भारत)

१९८३
मूल्य : रु० २४०

मुद्रक :

ए० के० डिस्ट्रीब्यूटर्स, द्वारा
डीलक्स आफसेट प्रिंटर्स
दिल्ली-११००३५

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

रामायणम् ।



तिलक-रामायणशिरोमणि-गोविन्दराजीये(भूषणे)ति

टीकात्रयसमलंकृतम्

अयोध्याकाण्डम् ।

प्रथमः सर्गः ।

भरते शत्रुघ्नेन सह मातुलगृहं गतेऽनेकाभिरामगुणैरावर्जितो दशरथो रामं युवराजं मेने यौवराज्याभिषेकसिद्धये च कैकयराजं विनानेकनृपपुंगवानानाय्य तैः समं सदः प्रविवेश ।

गच्छता मातुलकुलं भरतेन तदानघः । शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुरस्कृतः ॥ १ ॥

तिलकटीका ।

१] अयोध्यारूये तु गुर्वर्थे त्यक्त्वा राज्यं गिरौ वसन् ।
पादुके भरतायादात्स रामः शरणं मम ॥

अथ रामस्य राज्याभिषेकार्हगुणान्प्रतिपादयितुं राज्याभिषेकादि च प्रतिपादयितुमेतदारम्भः । मातुलकुलं मातुलगृहम् अनघः सोदरस्य लक्ष्मणस्य बलवद्रामाश्रयप्रयुक्तेर्ष्यारहितः नित्यशत्रवः कामादयस्तद्धन्ता नीतः अनेन विना मातुलगृहभुज्यमानसुखमसत्कल्पमिति धिया नीत इत्यर्थः । प्रीत्या भरतविषयस्नेहेन पुरस्कृतो युक्तः तेन भरतनिर्बन्धेन गमनशङ्का वारिता । किं च भरतेन प्रीत्या पुरस्कृतोऽग्रेसरः कृतः तेन परस्परानुरागसूचनम् ॥ १ ॥

रामायणशिरोमणिः ।

स्वस्ति श्रीरघुनाथः शर्म ददाति ।
यत्तद्भासा सकलं जगद्विभाति ॥ १ ॥
जयति जानकीजानिर्जननी या तु ।
श्रीमिथिलेशकुमारी जगतः पातु ॥ २ ॥
वेणीमाधवचरणो जयतितराम् ।
मुदं लभे यत्कृपया पातुतराम् ॥ ३ ॥
आञ्जनेयमतिवन्दे मतिं ददातु ।
श्रीरामायणतिलकं पूर्तिं यातु ॥ ४ ॥
समाप्य बालकाण्डस्य टीकां वाल्मीकिनिर्मिताम् ।
करोम्ययोध्याकाण्डस्य रामायणशिरोमणिम् ॥ ५ ॥

बालकाण्डे सप्रसङ्गं रामप्रादुर्भूतिविवाहादि निरूप्य ब्रह्मादिप्रार्थितरामप्रतिज्ञातरावणवधादि वर्णयितुं रामराज्याभिषेकसमयं निरूपयन्नाह-गच्छतेत्यादिभिः । तदा पित्राज्ञाकाले मातुलकुलं गच्छता भरतेन अनघः अघसंसर्गशून्यः नित्यशत्रुघ्नः नित्यशत्रवो रागद्वेषादयः तन्निवारकः प्रीतिपुरस्कृतः भरतातिप्रीतिविषयीभूतः शत्रुघ्नो नीतः ॥ १ ॥

भूषणटीका ।

श्रावं श्रावं शठारेः शमदमवपुषः कुम्भवक्त्रारविन्दा-
दालोच्यालोच्य वाचा प्रकृतिमधुरया प्रोच्य विद्वज्जनेभ्यः ।
गोविन्दार्यः सुधीशः कुशिककुलमणिर्गूढगाढाशयार्थं
सम्यक्साकेतकाण्डं सरसजनमुदे सादरं व्याकरोति ॥

प्रथमे काण्डेऽतस्मिन्नन्तरेविष्णुरित्यादिना "यतो वा इमानि" इत्यादिश्रुतिप्रतिपादितं जगत्कारणत्वं अहं वेधि महात्मानमित्यादिना पुरुषसूक्तोक्तमहापुरुषत्वं स्वमनादिरनिर्देश्य इत्यादिना अचिन्त्यवैभवत्वमित्यं सर्वस्मात्परत्वश्रुक्तं अधिकं मेनिरे विष्णुमित्यादिना तदितरेषामपरत्वं च संप्रति तस्य हेयप्रत्यनीककल्याणै-

स तत्र न्यवसद्भ्रात्रा सह सत्कारसत्कृतः । मातुलेनाश्वपतिना पुत्रस्नेहेन लालितः ॥ २ ॥
तत्रापि निवसन्तौ तौ तर्प्यमाणौ च कामतः । भ्रातरौ स्मरतां वीरौ वृद्धं दशरथं नृपम् ॥ ३ ॥
राजापि तौ महातेजाः सस्मार प्रोषितौ सुतौ । उभौ भरतशत्रुघ्नौ महेन्द्रवरुणोपमौ ॥ ४ ॥

कतानता प्रतिपाद्यते द्वितीयकाण्डेन । अथवा पूर्वं वक्ष्यमाणधर्मानुष्ठानोपयोगितया रामायणपुरुषाणां महाकुलप्रसूतत्वमहागुरुकृपालब्धधनुर्वेदरहस्यत्वतत्संवादभूततातकाताटकेयादिनिरासहरधनुर्भङ्गवैष्णवचापपरिग्रहप्रभृतिगुणाः सहधर्मचारिणीयोगश्च सप्रपञ्चं दर्शिताः । अथ तदनुष्ठिताः पितृवचनपरिपालनादिसामान्यधर्माः भगवच्छेषत्वपारतन्त्र्यभागवताभिमाननिष्ठारूपविशेषधर्माश्च प्रतिपाद्यन्ते । पूर्वकाण्डे लक्ष्मीयोगो दर्शितः अत्र भूमियोगः प्रदर्शित इत्यपि ब्रुवते । पूर्वं परत्वमुक्तमत्र सौलभ्यमित्याहुः । पूर्वं लक्ष्मीविशिष्टं प्राप्यस्वरूपमुक्तं प्राप्तृरूपजीवस्वरूपमत्र निरूप्यते । तत्र प्रथममतिरहस्यतयाऽवश्यविज्ञातव्यां लघूपपादनां भागवताभिमाननिष्ठां शत्रुघ्नानुष्ठानमुखेन दर्शयति—गच्छतेति । गच्छता वर्तमाननिर्देशेन शत्रुघ्नगमनस्य भरतगमनेनैककालत्वावममादिसिवसनादिवत्तस्य तदेकपारतन्त्र्यं गम्यते मातुलकुलं मातुलगृहं द्वितीयया भरतोद्देश्यस्यैव शत्रुघ्नोद्देश्यत्वावबोधनाच्छेष्युद्देश्योद्देश्यकत्वरूपं पारतन्त्र्यमुच्यते भगवत्पारतन्त्र्यरूपं भागवतत्वमाह—भरतेनेति । भरत इति राज्यस्य भरणादिति सहस्रानीकनिर्वहणात् रामे वनं गते तदनुसारिणि च लक्ष्मणे राजनि च त्रिदशसदनमुपसेदुषि केवलरामाज्ञया प्राज्यराज्यभारनिर्वाहकरणेनेत्यर्थः । तदा तद्गमनकाल एव अनेन स्वानुकूलचन्द्रतारावलाथनपेक्षणोक्त्या पारतन्त्र्यमेव विशेषितम् । अनघः अस्मिन् प्रकरणे अघशब्देन केवलरामभक्तिरुच्यते स्वशेषिभूतभरतोद्देश्यताकारेण हि शत्रुघ्नस्य रामभक्तिरुद्देश्या अत एव वक्ष्यति नाहं स्वपिमि जागर्मि तमेवार्यं विचिन्तयन्निति । जग्राह भरतो रथमीन् शत्रुघ्नश्छत्रमाददे इति च । अनिष्टावहस्य पापशब्दवाच्यत्वात् । स्वशेषिभरतोद्देश्यत्वाकारं विना रामभक्तेरनिष्टावहत्वात्तस्याघत्वं " न दुष्कृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते " इति श्रुतौ सुकृतस्य शत्रुघ्नोरनिष्टावहत्वेन पाप्मत्वव्यपदेशात् शत्रुघ्नः शत्रून् क्वणाद्वरादीन् इनिष्यत्यवमिति भाविप्रतिसंधानेन शत्रुघ्न इति वसिष्ठेन कृतनामधेयः नित्यशत्रुघ्नः नित्यशत्रवो ज्ञानेन्द्रियाणि शरीरे नित्यं संनिधाय विषयान्तरप्रावण्यरूपविपरीतकार्यकारित्वात् तान् हन्तीति नित्यशत्रुघ्नः इन्द्रियनिग्रहवानित्यर्थः । पुंसां वृद्धिश्चित्तापहारिण्यपि न मग्नेन्द्रियः रामविषयमतिः स्वाधिकारविरोधेति तन्निवर्तनमस्य कार्यमेव नीत इत्युक्तं न तु यथाविति तेनाचिद्वत्पारतन्त्र्यमुक्तं प्रीतिपुरस्कृतः किं करोमि ज्येष्ठवर्तनं कनिष्ठेन कार्यमिति विधिपरतन्त्रो न मतः अपि तु प्रीतिप्रेरितोऽगच्छदित्युक्तं तेनाचितो ज्ञानविरुद्धा प्रीतिरेव ज्ञचेतनापेक्षया चेतनस्य विशेषः भगवत्पारतन्त्र्यं तु चेतनाचेतनसाधारणमेव यत्पत्यन्तसारग्राही पुरुषः स्यात्तदा शत्रुघ्नवद्भागवतपारतन्त्र्यतया वर्तितव्यमिति व्यञ्जितं व्यञ्जनावृत्त्याभिमतार्थप्रदर्शनं द्युत्तमकाव्यकृत्यम् ॥ १ ॥

२] ति० टी०—भरतस्तत्र मातुलकुले विशिष्टवस्त्राभरणभोजनादिरूपसत्कारेण सत्कृतः पुत्रस्नेहेन पुत्रादप्यधिकस्नेहेनेत्यर्थ इत्येके ॥ २ ॥

रा० टी०—स इति । अश्वपतिना अश्वानां स्वामिना मातुलेन युधाजिता सत्कारैः सत्कार्योग्यपदार्थैः सत्कृतः पुत्रस्नेहेन पुत्रविषयकानुरागेणेव लालितः स भरतः भ्रात्रा शत्रुघ्नेन सह तत्र केकयराजगृहे न्यवसत् ॥ २ ॥

गो० टी०—रामभक्तो भरतः कथं तं विहाय मातुलकुले न्यवसदित्यपेक्षायां रामाभिमानविषयभूतशत्रुघ्नसहवासादित्याह—स इति । सः भरतः तत्र मातुलगृहे अश्वपतिना मातुलेन युधाजिता सत्कारसत्कृतः जात्यश्वप्रदानादिना पूजितोऽपि पुत्रस्नेहेन पुत्रविषयस्नेहतुल्यस्नेहेन लालितः विशिष्टभोजनाच्छादनाभरणप्रदानादिभिरुपलालितोऽपि सन् भ्रात्रा शत्रुघ्नेन सह न्यवसत् भ्रातृस्नेहेनैव तत्र स्थितः न तु मातुलोपलालनमात्रादिति भावः, यद्वा सः शत्रुघ्नः भ्रात्रा सह लालित इत्यन्वयः "सहयुक्तेऽप्रधाने" इति तृतीया । अश्वपतिः स्वस्रीयादपि शत्रुघ्नमतिशयेन लालितवानित्यर्थः । अथवा भ्रात्रा सह न्यवसत् रामेण सह न्यवसत् सदा रामचिन्तया तेन सह वर्तमान इव स्थित इत्यर्थः ॥ २ ॥

३] ति० टी०—तत्रापि तादृशसत्कारवत्यपि मातुलगृहे कामतः कामैरभिमतविषयैः सार्वविभक्तिकैस्तसिः । तर्प्यमाणौ अनेन सार्वदिकी विषयसुखानिवृत्तिर्बोधिता । वृद्धम् अनेन शुश्रूषाकालात्यये धर्मलोपभयात्पितृस्मरणमिति सूचितम् । स्मरतामस्मरताम् अडभाव आर्षः ॥ ३ ॥

रा० टी०—तत्रेति । कामतः इच्छाविषयीभूतपदार्थैस्तर्प्यमाणौ संतोष्यमाणावपि तत्र मातुलकुले निवसन्तौ वासं कुर्वन्तौ वीरौ वीरत्वविशिष्टौ भ्रातरौ तौ शत्रुघ्नभरतौ वृद्धं वयस्यधिकं दशरथं नृपं स्मरतामस्मरताम् अडभाव आर्षः ॥ ३ ॥

गो० टी०—तत्रापीति । तत्र सर्वोपलालनभूयिष्ठे मातुलगृहे निवसन्तावपि कामतः काम्यमानसर्वाभिमतवस्तुभिः तृतीयार्थे तसिः तर्प्यमाणौ च संतोष्यमाणावपि वीरौ महोत्साहौ तौ भ्रातरौ भरतशत्रुघ्नौ वृद्धं नृपं जीर्णं महीपतिं दशरथं स्मरतामस्मरताम् अनित्यमागमशासनमित्यडभावः । दशरथो वृद्धोऽभूत् राज्यभरणे सम्यक् क्षमते अपीदानीं रामं युवराजं कारयेदिति अचिन्तयतामिति भावः ॥ ३ ॥

४] ति० टी०—प्रोषितौ विदेशगतौ ॥ ४ ॥

सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः । स्वशरीराद्विनिर्वृत्ताश्चत्वार इव बाहवः ॥ ५ ॥
तेषामपि महातेजा रामो रतिकरः पितुः । स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ ६ ॥
स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः । अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥ ७ ॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा । यथा वरेण देवानामदितिर्वज्रपाणिना ॥ ८ ॥

रा० टी०–राजेति । प्रोषितौ विदेशं प्राप्तौ उभौ तौ भरतशत्रुघ्नौ राजापि सस्मार ॥ ४ ॥

गो० टी०–राजापीति । महातेजाः सत्पुत्रलाभकृतनिरवधिकतेजस्कः राजा दशरथः महेन्द्रवरुणोपमौ तद्वन्निरपायमैत्रीसंपन्नौ प्रोषितौ देशान्तरगतौ निरवधिकप्रीतिविषयभूतौ उभौ भरतशत्रुघ्नौ सुतौ सस्मार सर्वसंपत्समृद्धस्यापि मे पुत्रद्वयासन्निधानमेव न्यूनतेत्यस्मरदिति भावः । उभाविति स्मृतिविषये तारतम्याभावोक्तिः ॥ ४ ॥

५] ति० टी०–विनिर्वृत्ता विनिर्गताः अनेन राज्ञो विष्णुरूपकध्वनिः ॥ ५ ॥

रा० टी०–स्मरणे हेतुमाह–सर्व इति । स्वशरीराद्विनिर्वृताः विनिष्क्रान्ताः चत्वारो बाहव इव चत्वारः पुरुषर्षभाः पुरुषश्रेष्ठाः सर्वे रामादयः तस्य दशरथस्य इष्टाः प्रिया एव बभूवुरिति शेषः ॥ ५ ॥

गो० टी०–रामलक्ष्मणसन्निधाने कथमितरपुत्रस्मरणमित्यत्राह–सर्व इति । तुशब्द उक्तशङ्काव्यावृत्त्यर्थः । चत्वारः चतुर्धावस्थिताः पुरुषर्षभाः पुरुषोत्तमाः सर्वे अविशेषेण तस्य दशरथस्य शरीराद्विनिर्वृत्ताः निष्पन्नाः चत्वारो बाहव इव इष्टाः प्रिया एवासन् अभूतोपमा अयोगव्यवच्छेदार्थे एवकारः लोके कस्यचिच्चतुर्षु बाहुषु सत्सु यथा तस्यैकोऽपि नाप्रियो भवति एवं तेषु पुत्रेष्वेकोऽपि नानिष्टोऽभूदित्यर्थः । उपमाने स्वशरीरविनिर्वृत्तत्वोक्त्या एतेषु राज्ञः स्वशरीरविनिर्वृत्तत्वाभिमानमात्रमित्युक्तम् ॥ ५ ॥

६] ति० टी०–तत्रापि रामस्यात्यन्ताभिमतत्वमुत्कर्षं चाह–तेषामिति । तेषामपि मध्ये पितुः रामो रतिकरो बभूव भूतानां प्राणिनां मध्ये स्वयंभूश्चतुर्मुख इव गुणवत्तरश्च बभूव ॥ ६ ॥

रा० टी०–तेषामिति । तेषां चतुर्णां मध्ये पितुः रतिकरः प्रीतिनिष्पादकः रामस्तु भूतानां प्राणिनां मध्ये स्वयंभूर्ब्रह्मेव गुणवत्तरः अतिशयगुणवान्बभूव ॥ ६ ॥

गो० टी०–एवं चतुर्णां प्रियत्वाविशेषेऽपि रामे गुणातिरेककृतप्रीतिविशेषोऽस्तीत्याह–तेषामिति । तेषामिति निर्धारणे षष्ठी भूतानां प्राणिनां मध्ये स्वयंभूः ब्रह्मेव तेषां पुत्राणां मध्ये गुणवत्तरः अतिशयेन गुणवान् महातेजाः तादृग्गुणप्रकाशकनिरवधिकतेजस्कः रामः पितुः रतिकरो बभूव निरतिशयप्रीतिः रतिः ॥ ६ ॥

७] ति० टी०–गुणवत्तरत्वे हेतुः–स हीति । उदीर्णस्य दृप्तस्य । अर्थितः प्रार्थितः जज्ञे आविर्भूतः ॥ ७ ॥

रा० टी०–रामस्य गुणवत्तरत्वे हेतुमाह–स इति । उदीर्णस्य उद्भवविशिष्टस्य रावणस्य वधार्थिभिर्देवैः ब्रह्मादिभिः अर्थितः प्रार्थितः सनातनः नित्यः अविष्णुः विष्णुविष्णुः साकेताधीशः मानुषे लोके जज्ञे प्रादुर्बभूव * उदीर्ण उद्भवः इत्यमरः ॥ ७ ॥

गो० टी०–कथमितरापेक्षया गुणवत्तरत्वमित्यपेक्षायां विष्णोः प्रधानावतारत्वादित्याह–स हीति । हीति "अजायमानो बहुधा विजायते" इतिश्रुतिप्रसिद्धिं द्योतयति। देवैः नश्वरन्यप्रयोजनैरर्थितः किंतु प्रयोजनान्तरपरैः न केवलप्रयोजनान्तरपरैः अपित्वीश्वरोऽहममहं भोगात्येवं दुरभिमानिभिः मदोऽपि दीव्यतिधातोरर्थ एव नरकासुरवधे स्वकार्यनिष्पत्त्यनन्तरं पारिजातनिमित्तं कृष्णेनैव योद्धुमुपकान्तैरित्यर्थः । उदीर्णस्य उद्भटस्य * 'उदीर्ण उद्भटः' इत्यायमरः । नैसर्गिकगर्वेण सर्वं जगद्विनाशयतइत्यर्थः । वधस्यार्थित्वे हेतुरयं रावणस्य यैर्वैरो दत्तस्तानेव निलयान्निष्कासयत इत्यर्थः । वधार्थिभिः एकस्य संहारेण राज्यमखिलं सुखेन वर्तिष्यत इति प्रपन्नैः अर्थितः प्रार्थितः नोपासितः मानुषे लोके यत्र देवा अपि मनुष्यगन्धमसहमानाः छर्दनपूर्वकं कुत्सयन्तो योजनादुपरि स्थित्वा हविराददते तेऽपि यस्य मनुष्यस्थानीयाः सोऽस्मिन् मानुषे लोके जातः हन्त किमिदं सौलभ्यमिति भावः । जज्ञे न नृसिंहादिवदाविर्भूतः स जज्ञे रामो जज्ञे लोको हि दशमासान् गर्भेऽवस्थाय जायते अयं तु ततश्च द्वादशे मास इत्युक्तरीत्या ततोऽप्यधिककालं गर्भे स्थित्वा जज्ञे विष्णुः व्यापकं वस्तु व्याप्यैकदेशस्य मत्पुत्रोऽयमित्यभिमान्यमभूत्सनातनः नित्यवस्त्वेवमात्मानमन्यथा चकार ॥ ७ ॥

८] ति० टी०–देवानां वरेणेति वज्रपाणिविशेषणम् । वज्रपाणिना प्रार्थितेन देवानां वरेण वामनेनादितिरिवेत्यर्थ इत्यन्ये ॥ ८ ॥

रा० टी०–कौशल्येति । अमिततेजसा पुत्रेण तेन रामेण कौशल्या शुशुभे।तत्र दृष्टान्तः देवानां वरेण वज्रपाणिना इन्द्रेण अदितिर्यथा इषुवत्सविता गच्छतीतिवदुपमानोपमेयभावः ॥८॥

गो० टी०–न केवलं पितुरेवानन्दकरः मातुरपीत्याह–कौसल्येति । अमिततेजसा अपरिमितपराक्रमेण तेन रामेण पुत्रेण कौसल्या देवानां वरेण वज्रपाणिना इन्द्रेण अदितिर्यथा अदितिरिव शुशुभे बभौ तेन संतुष्टासीदित्यर्थः ॥ ८ ॥

१ विनिवृता इति रा. पाठः । * एक उद्भव इत्यपर उद्भट इति लिखति । अमरे तु नान्यतरदपि दृश्यते ।

स हि रूपोपपन्नश्च वीर्यवाननसूयकः । भूमावनुपमः सूनुर्गुणैर्दशरथोपमः ॥ ९ ॥
स च नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते । उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥ १० ॥
कैदाचिदुपकारेण कृतेनैकेन तुष्यति । न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ ११ ॥
शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः । कथयन्नास्त वै नित्यमस्रयोग्यान्तरेष्वपि ॥ १२ ॥

९] ति० टी०—गुणवत्तर इत्युक्तगुणानेवाह—स हीति । रूपं लावण्यं सौन्दर्यं च असूया गुणेषु दोषत्वाविष्करणं तद्रहितः । भूमावनुपमः उक्तगुणविषये सूनुः कौसल्याया इति शेषः । दशरथोपमत्वं वक्ष्यमाणगुणैर्बोध्यम् ॥ ९ ॥

रा० टी०—रामस्य गुणानेव वर्णयन्नाह—स इत्यादिभिः । रूपोपपन्नः समातिशयरहितरूपविशिष्टः वीर्यवान् समातिशयरहितप्रभावविशिष्टः अनसूयकः असूयारहितः । किंच अनिति पालयति सर्वमित्यनो विष्णुः पचाद्यच् तत्र सूः प्रेरणा यस्य सः प्रेरणार्थकषूधातोर्भावक्विबन्तः सूरिति उपलक्षणतया शिवब्रह्मविष्णुप्रेरक इत्यर्थः । उः शंभुः यः सर्वत्र प्राप्निमान् विष्णुः यावातुप्रकृतिकघञर्थकप्रत्ययान्तप्रकृतिकार्शआद्यजन्तो य इति 'यकारस्तु प्रजापतिः' इत्यभिधानात् यो ब्रह्मा च तयोरेकशेषे याविति ततः उश्च यौ च उयाः शंभुविष्णुब्रह्माणस्तेषां कं सुखं यस्मात् स उयकः । 'कं सुखेऽपि प्रकीर्तितम्' इति कोशः । शंभुविष्ण्वादिभ्योऽपि सुखदाता अनसूश्वासौ उयकश्च अनसूयकः भूमौ सर्वस्मिन् स्थले अनुपमः वास्तवोपमारहितोऽपि सूनुः दशरथनित्यसुतः स रामः गुणैः सत्यप्रतिज्ञत्वादिभिः दशरथोपमः प्रतीयत इति शेषः ॥ ९ ॥

गो० टी०—गुणवत्तर इत्युक्तं प्रपञ्चयति—स हीत्यादिना । सः रामः रूपोपपन्नः सौन्दर्ययुक्तः चकारेण रूपौदार्यगुणैरित्युक्तौदार्यादिकं समुच्चयिते वीर्यवान् मृगनाभिगन्धवत् स्वयमविकृत एव परेषां विकारकारी अनसूयकः गुणेषु दोषाविष्करणमसूया अविद्यमानासूया यस्यासावनसूयकः भूमावनुपमः सूनुः भूमावेव तत्तुल्यः पुत्रः कौसल्यातिरिक्तायाः कस्याश्चिदपि नास्तीत्यर्थः दिवित्वादितेर्वज्रपाणिरस्त्येवेति भावः । गुणैराकारेङ्गितचेष्टाभिः दशरथोपमः दीपादुत्पन्नप्रदीपवत् ॥ ९ ॥

१०] ति० टी०—मृदुपूर्वं मृदूक्तिपूर्वम् स्वजनेन परुषमुच्यमानोऽपि परुषमुत्तरं न प्रतिपद्यते न प्रयच्छति ॥ १० ॥

रा० टी०—स इति । नित्यं प्रशान्तात्मा स रामः मृदु यथा स्यात्तथा पूर्वं भाषते परुषं केनचित् हास्यादिना रूक्षमुच्यमानोऽपि परुषमुत्तरं न प्रतिपद्यते ब्रवीतीत्यर्थः ॥ १० ॥

गो० टी०—अथ दशरथादाधिक्यमाह—स इति । तुशब्देन दशरथाद्वैलक्षण्यमुच्यते सः रामः परुषं परुषवचनं केनचिदुच्यमानोऽपि उत्तरं उत्तरवचनं न प्रतिपद्यते न वदतीत्यर्थः अपिशब्देन तद्वक्तृत्वप्रसक्तिरेव नास्तीति गम्यते । उत्तराप्रतिपत्तौ हेतुः नित्यं प्रशान्तात्मेति अक्रोधनस्वभाव इत्यर्थः । न केवलमुत्तराप्रतिपत्तिः किंतु तं परुषवक्तारं प्रति मृदुपूर्वं सान्त्वपूर्वं च भाषते ॥ १० ॥

११] ति० टी०—शतमनन्तम् । आत्मवत्तया स्वाधीनान्तःकरणतया ॥ ११ ॥

रा० टी०—कथंचिदिति । कथंचित् केनापि प्रकारेण कृतेन एकेनाप्युपकारेण तुष्यति आत्मवत् स्वदिव्यदेहवत् स्वीकरोति चेति शेषः । अत एव तया स्वदेहवत्तया स्वीकृतस्येति शेषः । अपकाराणां शतमपि न स्मरति ॥ ११ ॥

गो० टी०—अथास्य कृतज्ञत्वमाह—कथंचिदिति । कथंचित्कृतेन यथातथा वापीत्युक्तरीत्या कृतेन यद्वा यादृच्छिकप्रासङ्गिकतया कृतेन यद्वा प्रयोजनान्तरपरतया कृतेन कथंचित्कृतेन अहृदयतया कृतेन कथंचित्कृतेन पत्रपुष्पाद्यन्यतमेन कृतेन यद्वा स्वस्मात् किंचित्फललाभाय कृतेन यद्वा सांकेत्यं परिहास्यं वा स्तोभं हेलनमेव वेत्येवं कृतेन उपकारेण अण्वपि महत्त्वेनाभिमन्यमानस्य भगवतोऽभिप्रायेणोपकारेणेत्युक्तं कृतेन कर्तुमीप्सितेन "आशंसायां भूतवच्च" इति क्तः । एकेन सकृत् कृतेन तुष्यति सदा प्रीतिं प्राप्नोति तोषफलस्य कदाचिदपि न क्षय इति भावः । एवम्विधोपकारेण तुष्यन्नपकारेणापि किं कुप्यति, नेत्याह—न स्मरतीति । अपकाराणां सम्यक्कृतापराधानां शतमपि असंख्येयमपि 'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्' इत्युक्तेः न स्मरति न चिन्तयति कः पुनः कोपस्यावकाश इति भावः । उभयत्र हेतुमाह—आत्मवत्तयेति वशीकृतमनस्कतयेत्यर्थः । यद्वा आत्मवत्तया ज्ञानवत्तया उदाराः सर्व एवैते न कश्चिन्नापराध्यतीत्येवमध्यवसायवत्तयेत्यर्थः ॥ ११ ॥

१२] ति० टी०—शीलं सुचरितम् । ज्ञानमात्मानात्मविवेकज्ञानं वेदतदर्थज्ञानं च । अस्रयोग्यान्तरेष्वप्यस्रश्रमपरिश्रमयोग्यकालस्य यदन्तरं मध्यं तेष्वपि सज्जनैरेव शास्त्ररहस्यं कथयन्नास्त अन्यदा तु कैश्चित्कन्यायासिद्धं सज्जनैकसंभाषणम् ॥ १२ ॥

रा० टी०—शीलेति । अस्रयोग्यान्तरेषु अस्रोपलक्षितास्त्रशस्त्राभ्यासयोग्यकालमध्येष्वपि शीलवृद्धादिविशेषणविशिष्टैः सज्जनैः सह कथयन् उचितमुच्चारयन्नेव नित्यमास्त तेनाऽन्यदैवमिति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः ॥ १२ ॥

गो० टी०—अथास्य गुणवर्धकं सत्सङ्गमाह—शीलवृद्धैरिति । शीलं सदाचारः सज्जनैरिति त्रिष्वप्यनुषज्यते शीलवृद्धैः सदाचारसंपन्नैः सज्जनैः कथयन्नास्ते तैः सह सूक्ष्मतराचारविशेषान् प्रतिपादयन्नास्तेत्यर्थः ज्ञानवृद्धैः परिपक्वमोक्षविषयिभिः 'मोक्षे धीर्ज्ञानम्' इत्यमरः । तादृशैः सज्जनैः कथयन्नास्त तैर्वेदान्तर

१ प्रशाम्यते इति गो. पाठः । २ कथंचिदिति गो. रा. पाठः ।

बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः । वीर्यवान्न च वीर्येण महता स्वेन विस्मितः ॥ १३ ॥
न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः । अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते ॥ १४ ॥
सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः । दीनानुकम्पी धर्मज्ञो नित्यं प्रग्रहवाञ्छुचिः ॥ १५ ॥

हस्यमुद्घाटयन्नास्तेत्यर्थः । वयोवृद्धैः सज्जनैः कथयन्नास्त क्रमागतसंप्रदायविशेषान् कथयन्नास्तेत्यर्थः । सज्जनैरिति सामान्योक्त्या ग्रामकुलादितारतम्यं न तेनादृतमित्युच्यते तृतीयया तेषामप्रधानत्वावगमात्स्वयमेव तेषामर्थविशेषं दर्शयतीति सूचितं नित्यमित्यनेन नेदं कादाचित्कमित्युच्यते विशेषणत्रयं तु चकारेण ज्ञानशीलवयोवृद्धैः शीलज्ञानवृद्धैः ज्ञानवयोवृद्धैः शीलवयोवृद्धैश्चेति समुच्चीयते । नेदं नित्याग्निहोत्रवत् क्वचित्समय इत्याह—अस्खेति । अस्खाणां योग्यः अभ्यासः 'योग्यो गुणनिकाभ्यासः इति वैजयन्ती । तस्यान्तरेषु अवकाशेष्वपि आपिशब्देन समयान्तरे तत्कथनं किं पुनर्न्यायसिद्धमित्युक्तं सत्संगतिं विना क्षणमपि न तिष्ठतीत्यर्थः ॥ १२ ॥

१३] ति० टी०—मधुराभाषी मधुरमाभाषितुं शीलमस्य पूर्वभाषी आगतान्प्रति प्रथमभाषणेन स्वाभिमुख्यप्रदर्शकः । मधुरं शब्दतः प्रियमर्थतः । न च विस्मितोऽप्राप्तगर्वः ॥ १३ ॥

रा० टी०—रूक्षभाषणादिसाधकसामग्रीसत्त्वेऽपि रूक्षभाषणादि न करोतीत्याह—बुद्धिमानिति । बुद्धिमान् सर्ववचनविषयकप्रशस्तबुद्धिविशिष्टः मधुराभाषी मधुरमाभाषते तच्छीलः पूर्वभाषी नीचं प्रत्यपि पूर्वभाषणशीलः प्रियंवदः प्रियमेव वदति नत्वप्रियमित्यर्थः वीर्यवान्महापराक्रमवानपि महता स्वेन स्वकीयेन वीर्येण विस्मितः गर्वितो न ॥ १३ ॥

गो० टी०—परायत्तसकलव्यापारत्वमाह—बुद्धिमानिति । बुद्धिमान् प्रशस्तबुद्धिः कथं सर्वे जनाः सुखं वसेयुरित्येवं सर्वदा लोकसंरक्षणचिन्तापर इत्यर्थः । मधुराभाषी मधुरभाषणशीलः यद्यद्वक्ति तन्मधुरमेव वदतीत्यर्थः । पूर्वभाषी अतिनीचं प्रत्यपि स्वयमेव पूर्वं भाषमाण इत्यर्थः । प्रियंवदः प्रियवाग्वचनशीलः " प्रियवशे वदः खच् " इति ताच्छील्ये खच् । " खित्यनव्ययस्य " इति ह्रस्वः " अरुर्द्विषदजन्तस्य—" इति मुमागमः । शत्रुविषयेऽपि प्रियवचनशीलः वीर्यवान् आश्रितसकलविरोधिनिरसनक्षमः पूर्वं वीर्यवानित्यविकृतत्वमुक्तमिति न पुनरुक्तिः । महता स्वेन वीर्येण न विस्मितः आश्रितसकलविरोधिनिरसने कृतेऽपि नातिस्वस्थमना यथावित्युक्तरीत्या किं कृतं मयेत्यपर्याप्त एव स्थितः । ' गर्वः स्याद्विस्मयो मदः' इत्यमरः । वर्तते इति शेषः ॥ १३ ॥

१४] ति० टी०—न चानृतकथः तेन सदा सत्यवचनायोगव्यवच्छेदो बोध्यते । अनुरक्तोऽनुरञ्जितः अन्तर्भावितण्यर्थः अनुरज्यतेऽनुरञ्जयति तेन परस्परानुरागः ॥ १४ ॥

रा० टी०—नेति । अनृतकथः अनृता मृषा कथा कथनं यस्य स न मिथ्यावादिप्रतियोगिकभेदविशिष्ट इत्यर्थः । विद्वान् निखिलविषयकज्ञानवान् वृद्धानां ज्ञानादिना वृद्धिं प्राप्तानां प्रतिपूजकः अत एव प्रजाभिरनुरक्तः प्रजानिष्ठानुरागविषयीभूतः सन्प्रजा अपि अनुरज्यते अनुरञ्जयति प्रजाविषयकानुरागवान् भवतीत्यर्थः ॥ १४ ॥

गो० टी०—न चेति । स इति शेषः । स रामः अनृतकथो न भवति कथा प्रबन्धकल्पना अनृता असत्या कथा यस्य स तथा कल्पितेतिवृत्तकासत्काव्यालापवर्जित इत्यर्थः । वेत्तीति विद्वान् "विदेः शतुर्वसुः" अनृतकथाभावश्च न तदज्ञानात् किंतु तद्वर्ज्यत्वज्ञानादित्यर्थः । वृद्धानां पूर्वोक्तत्रिविधवृद्धानां प्रतिपूजकः प्रत्युद्गम्य पूजकः 'ब्राह्मणप्रतिपूजकः' इतिपाठे बालवृद्धसाधारण्येन ब्राह्मणमात्रपूजापरः दशवर्षश्च ब्राह्मणः शतवर्षश्च क्षत्रियः पितापुत्रौ स्मृतौ विद्धीत्यापस्तम्बः प्रजाभिः पण्डितपामरविशेषेण सर्वाभिः प्रजाभिः अनुरक्तः अनुरागविषयीकृतः । तत्र हेतुमाह—प्रजाश्चाप्यनुरज्यते अनुरञ्जयतीत्यर्थः अन्तर्भावितण्यन्तोऽयं स्वयं पूर्वं प्रजा रञ्जयित्वा ततस्ताभिरनुरक्तो भवतीत्यर्थः । चादयः सर्वत्रोक्तगुणसमुच्चयार्थाः ॥ १४ ॥

१५] ति० टी०—अनुक्रोशो दया दुःखिषु तद्वान् । दीनानुकम्पी दीनानुकम्पया तदभिलषितप्रापकः अतो न पौनरुक्त्यम् । प्रग्रहो दुष्टनिग्रह इन्द्रियनिग्रहश्च ॥ १५ ॥

रा० टी०—सेति । सानुक्रः अनुक्रेण स्वीयपालनविषयकनिरन्तरयत्नेन सहितः अशः स्वतनुप्रकाशद्वारा सर्वत्र पूर्णः किंच सानुक्रोशो दयासहितः जितक्रोधः जितः क्रोधः स्वापकारिष्वपि कोपो येन सः ब्राह्मणप्रतिपूजकः ब्राह्मणसत्कारकारकः दीनानुकम्पी दीनविषयकदयावान् धर्मज्ञः निखिलधर्मबोधकः नित्यं प्रग्रहवान् अधर्मनिग्रहवान् शुचिः सकलगावनहेतुः ॥ १५ ॥

गो० टी०—सानुक्रोशेति । सानुक्रोशः सदयः 'कृपादयानुकम्पा स्यादनुक्रोशः' इत्यमरः । दया हि नामापरदुःखासहिष्णुत्वं जितक्रोधः वशीकृतकोपः नत्ववशेन क्रोध उत्पद्यत इत्यर्थः । ब्रह्म वेदः तद्विदन्तीति ब्राह्मणाः " तदधीते तद्वेद " इत्यण् । प्रत्युद्गम्य पूजकः प्रतिपूजकः ब्राह्मणानां प्रतिपूजक इति याजकादित्वात् षष्ठीसमासः । दीनानुकम्पी दीनेषु विशेषतोऽनुकम्पावान् विशेषो नाम यत्र दीनो दृष्टः तत्रैव स्थित्वा दानमानादिकरणम् । धर्मज्ञः सामान्यविशेषधर्मज्ञः प्रग्रहवान् नियमवान् अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेति वक्ष्यति । शुचिः परस्वानाकाङ्क्षी ' योऽर्थे शुचिः स हि शुचिर्न मृद्वारिशुचिः शुचिः' इति मनुस्मरणात् ॥ १५ ॥

१ रञ्जते इति गो. पाठः ।

कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते । मन्यते परया प्रीत्या महत्स्वर्गफलं ततः ॥ १६ ॥
नाश्रेयसि रतो यश्च न विरुद्धकथारुचिः । उत्तरोत्तरयुक्तीनां[1] वक्ता वाचस्पतिर्यथा ॥ १७ ॥
अरोगस्तरुणो वाग्मी वपुष्मान्देशकालवित् । लोके पुरुषसारज्ञः साधुरेको विनिर्मितः ॥ १८ ॥
स तु श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः । बहिश्चर इव प्राणो बभूव गुणतः प्रियः ॥ १९ ॥
सर्वविद्याव्रतस्नातो यथावत्साङ्गवेदवित् । इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः ॥ २० ॥

१६] ति० टी०—कुलोचितमतिः स्वकुलोचितदयादाक्षिण्यशरणागतसंरक्षणादिधर्मैकप्रवणबुद्धिः अत एव क्षात्रं धर्मं प्रजापालनादि बहु मन्यते । ततः क्षात्रधर्मात्प्रजापालनजन्यया शत्रुसंहारजन्यया च कीर्त्या महत्स्वर्गरूपं फलं साध्यं मन्यते यतोऽतः क्षात्रं धर्मं बहु मन्यत इवेत्यर्थः ॥ १६ ॥

रा० टी०—कुलेति । कुलोचिता इक्ष्वाकुकुल्योग्या मतिर्यस्य सः अत एव क्षात्रं क्षत्रियविहितं पालनमेव स्वधर्मं बहु अधिकं मन्यते । आधिक्ये हेतुमाह—ततः पालनरूपक्षात्रस्वधर्मान्महत्स्वर्गफलं साकेतप्राप्तिं परया प्रीत्या मन्यते ॥ १६ ॥

गो० टी०—कुलोचितमतिरिति । कुलोचितमतिः इक्ष्वाकुवंशोचितदयादाक्षिण्यशरणागतसंरक्षणादिधर्मैकप्रवणबुद्धिः स्वं क्षात्रं धर्मं दुष्टनिग्रहपूर्वकं प्रजापरिपालनरूपं बहुमन्यते गौरवेण जानाति 'श्रेयान् स्वधर्मः' इति श्रवणात् । परत्वापादकधर्मेभ्योऽपि जनित्वाजितं क्षत्रधर्मं गौरवेण पश्यतीत्यर्थः । बहुमाने हेतुमाह—मन्यत इति । ततः क्षत्रधर्मात् परया कीर्त्या महद् स्वर्गफलं भवतीति मन्यते जानाति स्ववर्णस्वाश्रमोचितधर्मः कीर्तिद्वारा स्वर्गसाधनमिति ज्ञात्वा क्षत्रधर्मं विशिष्यानुतिष्ठतीत्यर्थः ॥ १६ ॥

१७] ति० टी०—अश्रेयस्यश्रेयस्करे निषिद्धकर्मणीत्यर्थः । धर्मविरुद्धकथारुचिर्न । वादादिषु बृहस्पतिरिव स्वोक्तनिर्वाहकयुक्तिवक्ता ॥ १७ ॥

रा० टी०—नेति । अश्रेयसि कल्याणविरुद्धे कर्मणि यो न रतः यश्च विरुद्धकथारुचिर्न उत्तरोत्तरयुक्तौ वादादिषु स्वपक्षनिर्वाहकोत्तरोत्तरयत्ने वाचस्पतिरिव वक्ता । इष्वस्त्रविता गच्छतीतिवदुपमानोपमेयभावः ॥ १७ ॥

गो० टी०—नेति । अश्रेयसि निष्फले कर्मणि न रतः न सक्तः कादाचित्कलीलाकर्म न दुष्यतीति भावः । द्यूतादिषु न सक्त इत्यर्थः । तत्र हेतुर्विद्वानिति न विरुद्धकथारुचिः धर्मविरुद्धवाग्व्यालापादिषु रुचिरहितः उत्तरोत्तरयुक्तौ लौकिकवैदिकविषयोत्तरोत्तरयुक्तिकक्षायां वाचस्पतिर्यथा बृहस्पतिरिव वक्ता अप्रतिहतवाग्व्यवहारः ॥ १७ ॥

१८] ति० टी०—अरोग इत्यनेन सत्कर्मानुष्ठानसामर्थ्यं च वपुष्मान्विपुलांसत्वादिलक्षणवपुर्विशेषवान् देशकालविदिति तत्तत्कर्मयोग्यदेशकालज्ञाता । निग्रहानुग्रहाय पुरुषाणां धर्मिष्ठत्वाधर्मिष्ठत्वरूपसारज्ञाता स एक एव रामो लोके साधुः सर्वगुणयुक्तो ब्रह्मणा कृतः ॥ १८ ॥

रा० टी०—अरोग इति । अरोगः नित्यं सकारणरोगसंसर्गरहितः तरुणः नित्यतारुण्यविशिष्टः वाग्मी प्रशस्तवक्तृत्ववान् वपुष्मान्प्राकृतविलक्षणत्वेनातिप्रशस्तशरीरः देशकालवित् लौकिकवैदिककर्मोचितदेशकालयोर्वेदिता पुरुषसारान् महात्मनो जानातीति पुरुषसारज्ञः साधुः परकार्यसाधनशीलः विनिर्मितः विशेषेण अन्यनिर्मितविलक्षणत्वेन निर्मितं निर्मितिर्यस्य सः अघटितघटनापटीयानित्यर्थः । लोके सर्वभुवनेषु एकः परप्रतापादिनाऽद्वितीय एव ॥ १८ ॥

गो० टी०—अरोग इति । " युवा स्यात् साधु युवाध्यायक आशिष्ठो द्रविष्ठो बलिष्ठः " इत्यादिश्रुत्यर्थोऽनेन प्रतिपाद्यते अरोगः आधिव्याधिरहितः अनेन आशिष इत्युक्तमशनसामर्थ्यमाशीर्वादविषयत्वं चोक्तं तरुणः युवा वाग्मी प्रशस्तवाक् अनेन युवाध्यायक इत्युक्तमुक्तं वपुष्मान् प्रशस्तशरीरः अनेन बलिष्ठ इत्युक्तं कायबलमुक्तं देशकालवित् अध्ययनदेशकालज्ञः अनेन साधुशब्दार्थो विवृतः पुरुषसारज्ञः सकृद्दर्शनमात्रेण पुरुषहृदयसर्वस्वज्ञः 'सारो बले स्थिरांशे च' इत्यमरः । लोके एकः अद्वितीयः साधुरिति विनिर्मितः निश्चितः 'अपकारिषु यः साधुः स साधुरिति कीर्तितः' इत्युक्तसाधुविशेषत्वज्ञापनम् ॥ १८ ॥

१९] ति० टी०—एवं श्रेष्ठगुणैर्युक्तत्वोपदेशेऽपि दार्ढ्याय सत्यत्वप्रत्यापनाय च पुनरुपदिशति—स त्विति । श्रेष्ठगुणैरुक्तैर्वक्ष्यमाणैश्च प्राणसादृश्यकथनात्प्रजानां रामाधिकमिष्टं नास्तीति सूचितम् । गुणतो गुणैः ॥ १९ ॥

रा० टी०—स इति । श्रेष्ठैर्गुणैर्युक्तः पार्थिवात्मजः स रामः प्रजानां बहिश्चरः प्राण इव गुणतः गुणैः प्रियो बभूव ॥ १९ ॥

गो० टी०—स इति । श्रेष्ठैः उक्तैरन्यैश्च गुणैर्युक्तः पार्थिवात्मजः बहिश्चरः प्राण इव प्रजानां गुणतः गुणैः प्रियो बभूव ॥ १९ ॥

२०] ति० टी०—सर्वविद्येति । तत्तद्विद्यापेक्षितब्रह्मचर्यव्रतानन्तरमेव स्नातः कृतसमावर्तनः अत एव यथावदित्यादि । इष्वो मन्त्रहीनाः समस्त्रास्तेऽस्त्राणि । समाहारे द्वन्द्वः । पितुः श्रेष्ठस्तदपेक्षया श्रेष्ठः ॥ २० ॥

रा० टी०—सर्वेति । सर्वविद्याव्रतेषु विद्योपयोगिनिखिलव्रतेषु स्नातो निपुणः अत एव यथावत्साङ्गवेदवित् इष्वस्त्रे शस्त्रास्त्रविद्यायां भरताग्रजो रामः पितुः श्रेष्ठो बभूव 'सम्यग्विद्या' इति भूषणपाठः ॥ २० ॥

१ विद्वन्निति गो. पाठः । २ युक्तौ चेति गो. रा. पाठः । ३ सम्यग्विद्येति गो. पाठः ।

कल्याणाभिजनः साधुरदीनः सत्यवाग्ऋजुः । वृद्धैरभिविनीतश्च द्विजैर्धर्मार्थदर्शिभिः ॥ २१ ॥
धर्मकामार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान् । लौकिके समयाचारे कृतकल्पो विशारदः ॥ २२ ॥
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान् । अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ॥ २३ ॥
दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचः । निस्तन्द्रीरप्रमत्तश्च स्वदोषपरदोषवित् ॥ २४ ॥

गो० टी०—सम्यगिति । केचिद्विद्यामात्रेण स्नाताः केचिद्व्रतमात्रेण स्नाताः रामस्तु विद्याव्रताभ्यां स्नातः 'अधीत्य स्नायात्' इतिस्मृत्युक्तरीत्या सम्यग्वेदानधीत्य व्रतानि च कृत्वा कृतसमावर्तन इत्यर्थः । यथावत् तत्त्वतः साङ्गवेदवित् साङ्गवेदार्थज्ञः अनया पृथगुक्त्या अध्ययनमक्षरराशिग्रहणफलमित्यवगम्यते । इषवः अमन्त्रकाः शराः अस्त्राणि समन्त्रकाः सेनाङ्गत्वादेकवद्भावः इष्वस्त्रविषये पितुर्दशरथात् श्रेष्ठः दशरथादवराः खल्वितरे धन्विन इति भावः । भरताग्रजः अस्मिन्नर्थे भरतेन निरूपणीयो रामः महेष्वासे महाप्राज्ञे भरते स्वयमागत इति रामस्य वचनात् ॥ २० ॥

२१] ति० टी०—कल्याणानामभिजनो जन्मभूमिः अदीनः क्षोभहेतावप्यक्षुब्धान्तःकरणः सत्यवाक्कृच्छ्रेऽपि सत्यवक्ता अभिविनीतः शिक्षितः ॥ २१ ॥

रा० टी०—कल्याणेति । कल्याणाभिजनः कल्याणानि आश्रितानां मङ्गलानि अभिजनयति उत्पादयति सः साधुः आश्रितानां सरलस्वभावसंपादकः अदीनः सर्वकाले दैन्यरहितः सत्यवाक् सत्यप्रतिज्ञः ऋजुः सरलस्वभावः धर्मार्थदर्शिभिर्द्विजैः वृद्धैश्च अभिविनीतः शिक्षितपरनीतिमार्गैः ॥ २१ ॥

गो० टी०—कल्याणेति । अभिजनः मातृपितृवंशः कल्याणः शोभनः अभिजनो येन स तथा । तत्र हेतुः—साधुरिति । निर्दोष इत्यर्थः । अदीनः क्षोभहेतुषु सत्स्वप्यक्षोभ्यान्तःकरणः सत्यवाक् अतिकृच्छ्रेऽपि सत्यवचनाभिरतः ऋजुः स्वाराध्यः अभिविनीतः सुशिक्षितः ॥ २१ ॥

२२] ति० टी०—स्मृतिप्रतिभानयोर्भेदः संक्षेपे व्याकृतः । लौकिके कृतकल्पः संपादितसामर्थ्यः समयाचारे धर्मे विशारदः कुशलः ॥ २२ ॥

रा० टी०—धर्मेति । धर्मकामार्थानां तत्त्वं तत्स्वरूपाकारं जानाति स अर्थशब्देन परमार्थभूतमोक्षस्यापि ग्रहणान्न न्यूनता स्मृतिमान् अभावाप्रतियोगिस्मृतिविशिष्टः प्रतिभानवान् प्रतिभानं प्रतिस्तुप्रकाशनं तद्वान् अत एव लौकिके लौकिकाचरणे समये सम्यक् अयः शुभावहो विधिर्वैदिकविधिः तस्याचारे आचरणे च कृतः प्रकटितः कल्पः सामर्थ्यं येन अत एव विशारदः सर्वत्र निपुणः ॥ २२ ॥

गो० टी०—धर्मेति । धर्मकामार्थतत्त्वज्ञः 'न पूर्वाह्णमध्याह्नापराह्णानपरान् कुर्यात्' इतिस्मृत्युक्तरीत्या पूर्वाह्णादिषु कालेषु कर्तव्यधर्मार्थकामज्ञ इत्यर्थः । स्मृतिमान् ज्ञातार्थविषये विस्मरणरहितः प्रतिभानवान् 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभां विदुः' इतिप्रोक्तलक्षणप्रतिभानयुक्तः लौकिके लोकैकप्रमाणके समयाचारे सांकेतिकाचारे 'संकेतस्तु समयः' इत्यमरः । कृतकल्पः कृतसंस्थापनः विशारदः तदाचरणसमर्थः ॥ २२ ॥

२३] ति० टी०—निभृतो विनीतः संवृताकारो गूढाभिप्रायः । 'गुप्तमन्त्रः' इति पाठे फलपर्यन्तमन्याविदितमन्त्रः । 'गुप्तैर्मित्रैः' इति पाठः प्रचुरः गुप्तैर्मित्रत्वेन सर्वाज्ञातैः । तादृशा हि परराष्ट्रभेदादौ मुख्यसहायाः । त्यागो वित्तादेः सत्पात्रे दानम् संयमो न्यायेनार्जनं तत्समयज्ञः ॥ २३ ॥

रा० टी०—निभृत इति । निश्चरां भूताः सेविता मात्रादयः इत्यर्थः येन सः संवृतः प्राकृतैरज्ञात इत्यर्थः । आकारः प्राकृतविलक्षणस्वरूपं यस्य सः गुप्तमन्त्रः गुप्तः फलोत्पत्तेः पूर्वं ज्ञातुमशक्यो मन्त्रो यस्य सः सहायवान्प्रशस्तमन्त्रिविशिष्टः न मोघौ निष्फलौ क्रोधहर्षौ यस्य सः फलपर्यवसानक्रोधाभासप्रसादौ समये स्वीकरोतीत्यर्थः । त्यागसंयमयोः दानग्रहणयोः कालं वेत्ति सः ॥ २३ ॥

गो० टी०—निभृत इति । निभृतः विनीतः 'वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः' इत्यमरः । संवृताकारः हृदिस्थितकर्तव्यार्थव्यञ्जकेङ्गिताकारगोपनचतुरः संवृतत्वं गूढत्वं गुप्तमन्त्रः फलपर्यन्तमन्यैरविदितमन्त्र इत्यर्थः । सहायवान् प्रशस्तमन्त्रयुक्तः अमोघक्रोधहर्षः फलपर्यवसायिकोपसंतोषः त्यागसंयमकालवित् वस्तुत्यागतत्संग्रहणकालवित् ॥ २३ ॥

२४] ति० टी०—दृढभक्तिर्गुर्वादिषु स्थिरप्रज्ञो विस्मृतिहीनः नासद्ग्राह्यसद्वस्तुग्रहणशीलो न न दुर्वचः परोद्वेजकवचनहीनः निस्तन्द्रीर्निरालस्यः स्वीयानां दोषः स्वदोषः ॥ २४ ॥

रा० टी०—दृढेति । दृढमपरिच्युतं भक्तिः पित्रादिसेवा यस्य सः स्थिरा ध्वंसाप्रतियोगिनी प्रज्ञा यस्य सः असद्ग्राही असज्जनसंग्रहकर्ता न दुर्वचाः दुष्टं वचो यस्मिन्स न निस्तन्द्रीः आलस्यसंसर्गरहितः अप्रमत्तः अनवधानतारहितः स्वदोषपरदोषवित् न्याय्यकाले स्वदोषपरदोषयोः वित् यथावद्बोधयिता । अन्तर्भावितणिजर्थः ॥ २४ ॥

गो० टी०—दृढभक्तिरिति । दृढभक्तिः देवगुर्वादिषु निश्चलभक्तिः स्थिरप्रज्ञः भक्तिजन्याप्रकम्प्यतत्त्वज्ञानः अत एव नासद्ग्राही नासदर्थग्राही असज्जनसंग्रहणरहितो वा न दुर्वचाः न परुषभाषी निस्तन्द्रिः आलस्यरहितः सर्वदा शास्त्रपरिशीलनपर इत्यर्थः अत एवाप्रमत्तः शास्त्रार्थेष्वनवधानरहितः स्वदोषपरदोषवित् लोके कश्चित्पश्यति परदोषमात्मदोषं न पश्यति अयं

१ दुर्वचा इति गो. रा. पाठः । २ निस्तन्द्रिरिति गो. पाठः ।

शास्त्रज्ञश्च कृतज्ञश्च पुरुषान्तरकोविदः । यः प्रग्रहानुग्रहयोर्यथान्यायं विचक्षणः ॥ २५ ॥
सत्संग्रहानुग्रहणे स्थानविनिग्रहस्य च । आयकर्मण्युपायज्ञः संदृष्टव्ययकर्मवित् ॥ २६ ॥
श्रैष्ठ्यं चास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च । अर्थधर्मौ च संगृह्य सुखतन्त्रो न चालसः ॥ २७ ॥
वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित् । आरोहे विनये चैव युक्तो वारणवाजिनाम् ॥ २८ ॥

तु न तथा परदोषवत्त्वदोषं च पश्यत्येव वक्ष्यति भरतं प्रति शिरसा याचतस्तस्य वचनं न कृतं मयेति ॥ २४ ॥

२५] ति० टी०–कृतज्ञः परेणाल्पमपि कृतमुपकारं जानाति तथा पुरुषाणामन्तरं तारतम्यं तद्विवेचने कोविदः यद्वा पुरुषाणामन्तरमभिप्रायस्तज्ज्ञः प्रग्रहो निग्रहः यथान्यायं यथोचित्तं कर्तुं विचक्षणः ॥ २५ ॥

रा० टी०–शास्त्रज्ञ इति । शास्त्रं शास्त्रानुसारिणीं शिक्षां तज्जानाति बोधयति सः कृतज्ञः कृतमन्यकर्तृकस्वोपकृतिं जानाति अन्येभ्योऽपि बोधयति सः पुरुषान्तरकोविदः पुरुषदर्शनमात्रेण तदभिप्रायज्ञानसामर्थ्यवानित्यर्थः । प्रग्रहानुग्रहयोर्यथान्यायं विचक्षणो वक्ता । तत्र प्रग्रहो निग्रहः ॥ २५ ॥

गो० टी०–शास्त्रज्ञ इति । शास्त्रज्ञः साङ्गवेदातिरिक्तविद्यास्थानज्ञः कृतं कृतान्तं सिद्धान्तं जानातीति कृतज्ञः अतः कथंचिदुपकारेण कृतेनैकेन तुष्यतीत्यनेन न पुनरुक्तिः पुरुषाणामन्तरं तारतम्यं तत्र कोविदः पण्डितः पुरुषदर्शनमात्रेणायं साधुरयमसाधुरिति तत्तत्स्वरूपविशेषज्ञ इत्यर्थः यः प्रसिद्धः प्रग्रहः मित्रादिस्वीकारः अनुग्रहः स्वीकृतपरिपालनं तयोः यथान्यायं यथाशास्त्रं विचक्षणः समर्थः । शास्त्रमर्यादामनतिक्रम्य मित्रस्वीकारादिकृदित्यर्थः सुप्सुपेति समासः ॥ २५ ॥

२६] ति० टी०–उक्तमर्थमेव विवृणोति–सत्संग्रहानुग्रहणे इति । संग्रहः स्वीकारस्ततोऽनुग्रहणं सपरिवारस्य पालनम् । 'प्रग्रहणे' इति पाठेऽप्ययमेवार्थः । तत्र निग्रहस्य दुष्टनिग्रहस्य च करणे स्थानविदेशकालज्ञः आयकर्मण्युपायज्ञः पुष्पेभ्यो मधुकर इव प्रजाभ्यः करेण धनग्रहणकर्मणि चतुर इत्यर्थः । 'कश्चिदायस्य चार्धेन चतुर्भागेन वा पुनः । पादभागैस्त्रिभिर्वापि व्ययः कार्यो नृपैरिह ॥' इति शास्त्रसंदृष्टव्ययकर्मज्ञः ॥ २६ ॥

रा० टी०–सदिति । सतां महात्मनां संग्रहः स्वीकारः अनुग्रहणं तत्सेवनं तयोः समाहारः तस्मिन्नासक्त इति शेषः । निग्रहस्य दण्डदानस्य स्थानवित् देशकालयोर्वेदिता आयकर्मणि करादिग्रहक्रियायाम् उपायज्ञः यत्नज्ञानवान् सूर्यः किरणैर्जलमिव अनायासतः करादिग्रहणकर्तेत्यर्थः । संदृष्टव्ययकर्मवित् संदृष्टं शास्त्रानुसारि यत् व्ययकर्म तद्वेदिता 'कश्चिदायस्य चार्धेन चतुर्भागेन वा पुनः । पादैर्भागैस्त्रिभिर्वापि व्ययः कार्यो नृपैरिह' इतिशास्त्रम् ॥ २६ ॥

गो० टी०–सदिति । सतां संग्रहे स्वीकारे प्रग्रहणे परिपालने च विचक्षण इति शेषः । निग्रहस्य असत्निग्रहस्य च स्थानवित् अवकाशवित् 'अवकाशे स्थितौ स्थानम्' इत्यमरः । आयकर्मणि न्यायप्राप्तधनार्जनकर्मणि उपायज्ञः पुष्पेभ्यो मधु मधुकर इव अपीडनेन प्रजाभ्यो धनमादातुं चतुर इत्यर्थः । संदृष्टव्ययकर्मवित् 'कश्चिदायस्य चार्धेन चतुर्भागेन वा पुनः । पादभागैस्त्रिभिर्वापि व्ययः संचोद्यते बुधैः' इत्यादिशास्त्रावगतव्ययकर्मज्ञः ॥ २६ ॥

२७] ति० टी०–व्यामिश्रकेषु प्राकृतादिभाषामिश्रितनाटकादिषु श्रैष्ठ्यं निपुणताम् । अर्थधर्मौ संगृह्य तदविरोधेन सुखतन्त्रः कामसेवीत्यर्थः । कर्तव्येष्वालस्यरहितः ॥ २७ ॥

रा० टी०–श्रैष्ठ्यमिति । शास्त्रसमूहेषु विद्वत्समाजेषु व्यामिश्रकेषु नाटकाद्युपयुक्तसंस्कृतमिश्रप्राकृतभाषादिवक्तृषु च श्रैष्ठ्यं प्राप्तः अर्थधर्मौ संगृह्य संचिय* सुखतन्त्रः अर्थधर्माविरोधेन सुखभोगी अलसः आलस्यवान् न ॥ २७ ॥

गो० टी०–श्रैष्ठ्यमिति । शास्त्रसमूहेषु वेदवेदाङ्गेषु श्रैष्ठ्यं महातात्पर्यज्ञत्वं प्राप्तः । व्यामिश्रकेषु संस्कृतप्राकृतभाषात्मककाव्यनाटकालंकारादिषु च श्रैष्ठ्यं प्राप्त इत्यनुषङ्गः । अर्थधर्मौ संगृह्य सुखतन्त्रः सुखपरतन्त्रः अर्थधर्मसंग्रहणपूर्वकमेव सुखसेवी न तु केवलकामपरतन्त्र इत्यर्थः । न चालसः अर्थधर्मसंग्रहे निरालस्यः ॥ २७ ॥

२८] ति० टी०–वैहारिकाणां क्रीडाप्रयोजनानां शिल्पानां गीतवाद्यचित्रकर्मादीनां विज्ञाता अर्थविभागवित् 'धर्माय यशसेऽर्थाय आत्मने स्वजनाय च । पञ्चधा विभजन्वित्तमिहामुत्र च शोभते ॥' इत्युक्तरीत्या तद्विभजनज्ञः । विनयो विविधगत्यानयनं शिक्षणं वा ॥ २८ ॥

रा० टी०–वैहारिकाणामिति । वैहारिकाणां विहारप्रयोजनानां शिल्पानां गीतवाद्यचित्रकर्मादीनां विज्ञाता अभिज्ञः अर्थविभागवित् अर्थानां धनादीनां विभागं शास्त्रोक्तविभजनं वेत्ति सः । तथाच शास्त्रम् 'धर्माय यशसेऽर्थाय आत्मने स्वजनाय च । पञ्चधा विभजन् वित्तमिहामुत्र च शोभते' इति । वारणवाजिनाम् आरोहे आरोहणे विनये शिक्षणे च युक्तो निपुणः तत्र वारणो गजः ॥ २८ ॥

गो० टी०–वैहारिकाणामिति । वैहारिकाणां विहारप्रयोजनानां "तदस्य प्रयोजनम्" इति ठक् । शिल्पानां गीतवादित्राणां चित्रकर्मादीनां च विज्ञाता विशेषज्ञः अर्थविभागवित् 'धर्माय यशसेऽर्थाय आत्मने स्वजनाय च । पञ्चधा विभजन् वित्तमिहामुत्र च शोभते' इत्युक्तविभागवित् । वा...ण-

१ प्रग्रहणे इति गो. रा. पाठः । २ श्रैष्ठ्यं शास्त्रेति गो. श्रैष्ठ्यशास्त्रेति रा. पाठः । *चित्येति युक्तम् ।

धनुर्वेदविदां श्रेष्ठो लोकेऽतिरथसंमतः । अभियाता प्रहर्ता च सेनानयविशारदः ॥ २९ ॥
अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः । अनसूयो जितक्रोधो न दृप्तो न च मत्सरी ॥ ३० ॥
नावज्ञेयश्च भूतानां न च कालवशानुगः । एवं श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥ ३१ ॥
संमतस्त्रिषु लोकेषु वसुधायाः क्षमागुणैः । बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये चापि शचीपतेः ॥ ३२ ॥
तथा सर्वप्रजाकान्तैः प्रीतिसंजननैः पितुः । गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ ३३ ॥

वाजिनां गजानामश्वानां च आरोहे आरोहणे विनये आरुह्य शिक्षणे च युक्तः समर्थः ॥ २८ ॥

२९] ति० टी०–अभियाता परसेनाभिमुखं याता प्रहर्ता शत्रूणाम् सेनानयश्चक्रादिव्यूहेन सेनान्यासस्तत्र विशारदो निपुणः ॥ २९ ॥

रा० टी०–धनुरिति । धनुर्वेदविदां धनुर्वेदान् धनुरादिस्वरूपादिबोधकानि शास्त्राणि विदन्ति तेषां मध्ये श्रेष्ठः लोके सर्वभवने अतिरथसंमतोऽतिरथैः पूजितः अभियाता संग्रामाभिमुखगमनशीलः हर्ता रिपुसेनानिवर्तकश्च सेनानयविशारदः सेनानये व्यूहरचनायां विशारदः निपुणः ॥ २९ ॥

गो० टी०–धनुरित्यर्धाधिकः धनुरादिस्वरूपप्रतिपादको वेदो धनुर्वेदः उपवेदत्वाद्धनुर्वेदस्य वेदत्वं तद्विदां मध्ये श्रेष्ठः समर्मधनुर्वेदविदित्यर्थः । लोके सर्वत्र अतिरथानां अप्रतिहतरथगतीनां संमतः पूजितः " मतिबुद्धि–" इत्यादिना क्तः "क्तेन च पूजायाम् " इति समासप्रतिषेधाभाव आर्षः । अभियाता शत्रुसमागमानन्तरं न प्रहर्तुमिच्छति किंतु स्वयमेव यत्र शत्रवस्तत्र गच्छति तत्रापि न दुर्गप्रदेशावलम्बनेन याति किंत्वभियाता अभिमुखं याता प्रहर्ता च अभिगम्य न योधैर्योधयति किंतु स्वयमेव नासीरे स्थित्वा प्रथमं प्रहरति सेनानयविशारदः स्वयं प्रहरन्नपि न स्वसेनां छेदयति किंतु परदुरवगाहचक्रव्यूहादिविभागेन सेनाप्रापणसमर्थः । अप्रधृष्यश्च प्रधर्षयितुमशक्यः सर्वथा विजयीत्यर्थः संग्रामे प्रणत्या तु जेतुं शक्य इत्यर्थः । न केवलं मनुष्यैः सुरासुरैः परस्परविरोधं विहाय मिलितैरपि न चोपशान्तैः क्रुद्धैः क्रोधपरवशैः ॥ २९ ॥

३०] ति० टी०–मत्सरः परसंपद्द्वेषः ॥ ३० ॥

रा० टी०–अप्रधृष्य इति । क्रुद्धैः सुरासुरैरपि संग्रामे अप्रधृष्यः प्रधर्षयितुमशक्यः अनसूयः सर्वविषयकासूयारहितः अजितक्रः अजितः पराभवितुमशक्यः क्रः कृतिर्यस्य सः । तत्र हेतुः अधः न धो धाता यस्य सः स्वसत्ताश्रित इत्यर्थः । दृप्तः गर्ववान् न मत्सरी द्वेषवान्न 'मत्सरोऽन्यशुभद्वेषे' इत्यमरः ३०॥

गो० टी०–एवं कल्याणगुणपरिपूर्णत्वमुक्तम् अथ हेयप्रत्यनीकत्वमाह–अनसूय इति । अनसूयः असूयारहितः जितक्रोधः क्रोधपारवश्यरहितः न दृप्तः न गर्विष्ठः न च मत्सरी परसंपद्विषये द्वेषरहितः ' मत्सरोऽन्यशुभद्वेषे ' इत्यमरः न च कालवशानुगः सत्त्वरजस्तमःप्रधानकालानुगुणसत्त्वरजस्तमोगुणो न भवति केवलसत्त्वमूर्तिरित्यर्थः ॥ ३० ॥

३१] ति० टी०–भूतानां प्राणिनाम् । 'सिद्धानाम्' इति पाठे सिद्धा देवभेदा इति कतककृत् । कालवशः कालपारतन्त्र्यं प्राकृतवत्तदनुसारी न स्वायत्तसर्वपरिकर इति यावत् ॥ ३१ ॥

रा० टी०–नेति । पार्थिवात्मजो रामः क्षमागुणैर्वसुधायाः तुल्यः बुद्ध्या बृहस्पतेस्तुल्यः वीर्ये शचीपतेस्तुल्यः इषुवत्सविता गच्छतीतिवदुपमानोपमेयभावः । अत एव भूतानामवज्ञेयः अनादरणीयो न कालवशा अनुगा अनुचरा यस्य स न कालाधीनानुचरवानित्यर्थः । एवमनेन प्रकारेण श्रेष्ठैः गुणैर्युक्तः अत एव त्रिषु ऊर्ध्वाधोमध्यवर्तिषु लोकेषु विद्यमानानां प्रजानां संमतः इष्ट आसीदिति शेषः । किंच वीर्ये समाधिकरहितपराक्रमे विद्यमानो रामः क्षमागुणैः त्रिषु लोकेषु विद्यमानायाः वसुधायाः संमतः पूजितः अत एव बृहस्पतेः शचीपतेश्च बुद्ध्या अतुल्यः तोलयितुमशक्यः कर्मणि यत् संज्ञापूर्वकविधेर्नित्यत्वाद्गुणाभावः । नन्वर्थलाभस्तु वीर्यशब्दात्पूर्वमकारं छित्त्वा ॥ ३१–३२ ॥

गो० टी०–उक्तगुणोपसंहारपूर्वकं गुणान्तराण्याह–एवमिति । एवमुक्तप्रकारेण पार्थिवात्मजः रामः प्रजानां मध्ये श्रेष्ठैर्लोकोत्तरैर्गुणैर्युक्तः त्रिषु लोकेषु संमतः पूजितः । क्षमागुणैः क्षमारूपगुणैः बहुवचनं प्रकारभेदाभिप्रायेण वसुधायाः भूमेस्तुल्य इति वक्ष्यमाणमनुषज्यते ॥ ३१ ॥

३२] ति० टी०–एवं द्विवारं गुणश्रेष्ठ्यमुपपाद्य पुनरतिदार्ढ्याय तदुपपादयति–संमत इत्यादि । क्षमाप्रधानैर्गुणैर्वसुधायास्तुल्य इति परेणान्वयः ॥ ३२ ॥

३३] ति० टी०–तथेति । कान्तैरिष्टैस्तथा पितुः प्रीतिसंजननैर्गुणैः करणैर्विरुरुचे इत्यन्वयः ॥ ३३ ॥

रा० टी०–तथेति । सर्वप्रजाकान्तैर्निखिलप्रजावाञ्छितैः तथा पितुः प्रीतिसंजननैः गुणैः अंशुभिः किरणैः दीप्तः सूर्य इव रामो विरुरुचे । किंच गुणैरुपलक्षितो राम इव अंशुभिर्दीप्तः सूर्यो विरुरुचे ॥ ३३ ॥

गो० टी०–उपसंहरति–तथेति । तथा पूर्वोक्तरीत्या सर्वप्रजाकान्तैः बालयुववृद्धानां प्रियैः पितुः प्रीतिसंजननैः दृष्टास्तार्थमिदं पितुरिव सर्वेषां प्रियैरित्यर्थः । एवंभूतैर्गुणैः रामः स्वतः सुन्दरः स्वतो दीप्तः सूर्योंऽशुभिरिव विरुरुचे बभौ ॥३३॥

१ अप्रधृष्यमिति रा. पाठः । २ वीर्येणापीति गो. पाठः ।

तमेवंवृत्तसंपन्नमप्रधृष्यपराक्रमम् । लोकनाथोपमं नाथमकामयत मेदिनी ॥ ३४ ॥
एतैस्तु बहुभिर्युक्तं गुणैरनुपमैः सुतम् । दृष्ट्वा दशरथो राजा चक्रे चिन्तां परंतपः ॥ ३५ ॥
अथ राज्ञो बभूवैव वृद्धस्य चिरजीविनः । प्रीतिरेषा कथं रामो राजा स्यान्मयि जीवति ॥ ३६ ॥
एषा ह्यस्य परा प्रीतिर्हृदि संपरिवर्तते । कदा नाम सुतं द्रक्ष्याम्यभिषिक्तमहं प्रियम् ॥ ३७ ॥
वृद्धिकामो हि लोकस्य सर्वभूतानुकम्पकः । मत्तः प्रियतरो लोके पर्जन्य इव वृष्टिमान् ॥ ३८ ॥
यमशक्रसमो वीर्ये बृहस्पतिसमो मतौ । महीधरसमो धृत्यां मत्तश्च गुणवत्तरः ॥ ३९ ॥

३४–३५] ति० टी०–एवमभिषेकोपयोगिगुणश्रैष्ठ्यमुक्त्वा राज्ञोऽभिषेकेच्छां दर्शयति–तमेवमिति । मेदिनी तदेवता तद्वर्तिप्रजाश्च ॥ ३४ ॥ ३५ ॥

रा० टी–तमिति । एवं वृत्तेन वृत्तान्तेन संपन्नं संयुक्तं लोकनाथोपमं तं रामं मेदिनी पृथिवी नाथं स्वस्वामिनमकामयत ऐच्छत् ॥ ३४ ॥

गो० टी०–एवं रामगुणान् प्रदर्श्य तत्कृतं भूम्युपलक्षितसकललोकप्रावण्यं दर्शयति–तमेवमिति । एवं गुणसंपन्नत्ववत् व्रतसंपन्नं आश्रितसंरक्षणरूपव्रतसंपन्नं अप्रधृष्यपराक्रमं अकुण्ठपराक्रमं सर्वे लोकपाला उपमा यस्य तं रामं मदिनी नाथं अकामयत भूमेर्नाथत्वोचितोऽभूदित्यर्थः। अथवा एवं बालकाण्डोक्तरीत्या व्रतसंपन्नं रामस्तु सीतया सार्धमित्युक्तरीत्या क्रीडारससंपन्नं अप्रधृष्यपराक्रमं विरोधिवर्गं निवर्त्य सात्म्यभोगप्रदं लोकान् पालयतीति लोकपालः समस्तोपभोगसाधनसंपन्न इत्यर्थः। उप समीपे मा लक्ष्मीः सीतारूपा यस्य सः उपमः लोकपालश्चासावुपमश्चेति समासः तं लक्ष्म्या भोगानुभवन्तं रामं मेदिन्यपि नाथमकामयत स्वयंवरेण कण्ठे मालिकां दातुमैच्छदित्यर्थः ॥ ३३ ॥

रा० टी०–एतैरिति । एतैरुक्तैः अनुपमैः उपमारहितैः बहुभिर्गुणैर्युक्तं सुतं दृष्ट्वा परंतपो दशरथो राजा चिन्तां चिन्तनं चक्रे ॥ ३५ ॥

गो० टी०–न केवलं लोकस्तं नाथमकामयत राजापीत्याह–एतैरिति । एतैः पूर्वोक्तैः बहुभिः असंख्येयैः अनुपमैः लोके कुत्राप्येतादृशगुणादर्शनादसदृशैः गुणैः युक्तं सुतं दृष्ट्वा राजा राज्यभरणश्रान्तः परंतपः शत्रुसंहारव्यग्रः दशरथः चिन्तां मनोरथं चक्रे ॥ ३४ ॥

३६] ति० टी०–चिन्ताप्रकारमाह–अथेति । मयि जीवति रामो राजा कथं भवेत् । तादृशस्य तस्य दर्शनजा वैषात्युत्कटानिर्वचनीया प्रीतिर्मे कथं स्यादिति चिन्ता बभूवेत्यन्वयः ॥ ३६ ॥

रा० टी०–चिन्तास्वरूपमाह–अथेति । मयि जीवति पालयति सत्येव रामो राजा कथं स्यात् । अथ सकलमङ्गलमूलभूता एषा रामराजभूतिरिव प्रीतिः मत्प्रीतिविषयीभूता एवं चिन्तेति शेषः । चिरजीविनः बहुकालं पालयनः वृद्धस्य ज्ञानवयोभ्यामधिकस्य राज्ञो दशरथस्य बभूव । किंच जीवति सत्येव राजा स्यात् एषा राजभूतिरेव दशरथस्य मम प्रीतिरभिलाषः कथं स्यात् पूर्येत ॥ ३६ ॥

गो० टी०–तामेव चिन्तां स्पष्टयति अथेत्यादिना स्वर्गमवाप्नुयामित्यन्तेन–अथेति । अथ रामगुणदर्शनानन्तरं चिरजीविनः वृद्धस्य वयोवृद्धस्येति ज्ञानवृद्ध्यावृत्तिः वृद्धत्वात् प्रीतिरित्युच्यते एवं एवंप्रकारेणेत्यर्थः । मयि जीवति रामः कथं राजा स्यादित्येषा प्रीतिरभूत अत्र कथमित्युक्तिः कैकेयीवरदानकृतविघ्नशङ्काप्रतिसंधानेन ॥ ३६ ॥

३७] ति० टी०–प्रीतिरभिलाषः, अभिलाषाकारमाह–कदा नामेति । पूर्ववपे प्रीतिरानन्दः ॥ ३७ ॥

रा० टी०–एषेति । अभिषिक्तं सुतं कदाऽहं द्रक्ष्यामि एषा परा प्रीतिः अत्यभिलाषः अस्य राज्ञः हृदि संपरिवर्तते ॥ ३७ ॥

गो० टी०–प्रीतेरौत्कट्यमाह–एषेति । अत्रान्ते इतिकरणं द्रष्टव्यं द्रक्ष्यामि इत्येषा परा निरतिशया प्रीतिः अस्य दशरथस्य हृदि संपरिवर्तते सम्यक् अविच्छिन्नमनुवर्तते ॥३६॥

३८–३९] ति० टी०–पर्जन्यो मेघः ॥ ३८ ॥ ३९ ॥

रा० टी०–अभिषेकोपयोगिगुणानाह–वृद्धीति । यः सर्वभूतानुकम्पकः सर्वभूतविषयकदयावान् अत एव लोकस्य सर्वजनस्य वृद्धिकामः अत एव वृष्टिमान् पर्जन्य इव लोके मत्तोऽपि प्रियतरः वीर्ये यमशक्रसमः मतौ बुद्धौ बृहस्पतिसमः धृत्यां क्षमायां महीधरसमः मत्तोऽपि गुणवत्तरः अतिगुणवान् तमात्मजमिमां महीमधितिष्ठन्तमनेन वयसा दृष्ट्वा स्वर्गं सुखविशेषं यथा यथावत् अवाप्नुयाम् । श्लोकत्रयमेकान्वयि ॥ ३८–४० ॥

गो० टी०–अथ रामस्य राजत्वयोग्यतानुसंधानं दशरथस्य दर्शयति श्लोकत्रयेण–वृद्धिकाम इति । वृद्धिकाम इत्यनेनापूर्वैश्वर्यप्रदत्वमुक्तं सर्वभूतान्यनुकम्पयतीति सर्वभूतानुकम्पनः कर्तरि ल्युट् अनेन भक्तैश्वर्यसाधकत्वमुक्तं ममात्मज इति शेषः । दाने संतापहारित्वे च दृष्टान्तमाह–वृष्टिमान् पर्जन्य इवेति लोके विषये मत्तः प्रियतरः अतिशयेन प्रीतिमान् प्रीणातीति प्रियः पचाद्यच् ॥ ३७ ॥

गो० टी०–पूर्वं प्रियतरत्वमुक्तम् अत्र तद्धेतुगुणवत्तरत्वमुच्यते–यमशक्रसम इति । प्रत्येकं साम्यानर्हत्वाद्यमशक्रेत्युक्तम् ॥ ३८ ॥

१ लक्ष्मान इति को० पाठः ।

महीमहमिमां कृत्स्नामधितिष्ठन्तमात्मजम् । अनेन वयसा दृष्ट्वा यथा स्वर्गमवाप्नुयाम् ॥ ४० ॥
इत्येवं विविधैस्तैस्तैरन्यपार्थिवदुर्लभैः । शिष्टैरपरिमेयैश्च लोके [1]लोकोत्तमैर्गुणैः ॥ ४१ ॥
तं समीक्ष्य तदा राजा युक्तं समुदितै[2]र्गुणैः । निश्चित्य सचिवैः सार्धं [3]यौवराज्यममन्यत ॥ ४२ ॥
[4]दिव्यन्तरिक्षे भूमौ च घोरमुत्पातजं भयम् । संचचक्षेऽथ मेधावी शरीरे चात्मनो जराम् ॥ ४३ ॥
पूर्णचन्द्राननस्याथ शोकापनुदमात्मनः । लोके रामस्य बुबुधे संप्रियत्वं महात्मनः ॥ ४४ ॥
आत्मनश्च प्रजानां च श्रेयसे च प्रियेण च । प्राप्ते [5]काले स धर्मात्मा भक्त्या त्वरितवान्नृपः ॥ ४५ ॥

४०] ति० टी०–अनेन वयसा वार्धकेन तथाभूतमात्मजं दृष्ट्वा यथा स्वर्गं यथाकालं यथायोग्यं वा स्वर्गमवाप्नुयामिति चिन्तां चक्रे इत्यनुकर्षेणान्वयः ॥ ४० ॥

गो० टी०–महीमिति । यथास्वर्गं स्वसदृशं स्वसुकृताद्रूपं स्वर्गमित्यर्थः । यद्वा यथास्वर्गं यथाभूतस्वर्गं यस्त्वया सह स स्वर्ग इत्युक्तरामसौन्दर्याद्भवस्वर्गमित्यर्थः ॥ ३९ ॥

४१] ति० टी०–तैस्तैरुक्तैः । 'एतैः' इति पाठेऽप्येवमेव । शिष्टैरुक्तादन्यैश्चापरिच्छिन्नैर्लोके लोकोत्तमत्वेन प्रसिद्धैर्गुणैरुपलक्षितम् ॥ ४१ ॥

रा० टी०–इतीति । अन्यपार्थिवदुर्लभैः राजान्तरैरप्राप्यैः एवंविधैस्तैर्वर्णितैर्गुणैर्लोकोत्तमैः अपरिमेयैः इयत्तारहितैः समुदितैः नारदादिभिर्वर्णितैः शिष्टैः अवशिष्टैश्च गुणैर्युक्तं तं रामं समीक्ष्य सचिवैः सार्धं निश्चित्य यौवराज्यं रामयुवराजत्वममन्यत निरचिनोत् । 'युवराजम्' इति भूषणपाठः श्लोकद्वयमेकान्वयि ॥ ४१ ॥ ४२ ॥

गो० टी०–इतीतिश्लोकद्वयमेकान्वयम् । इति पूर्वोक्तरीत्या विविधैस्तैस्तैस्तत्तत्कार्यभेदेन प्रसिद्धैः अन्यपार्थिवदुर्लभैः सामान्यराजदुर्लभैः शिष्टैः उक्तव्यतिरिक्तसौशील्यादिभिः अपरिमेयैः असंख्येयैः कतिपयगुणाः प्रदर्शिताः शिष्टास्त्वपरिमेया इति भावः । लोके लोकोत्तरैर्लोके कुत्राप्येवं लोकोत्तरगुणा न सन्तीत्यर्थः । समुदितैः स्वाभाविकैः शुभैः कल्याणतमैः एतैर्गुणैर्युक्तं तं रामं समीक्ष्य महाराजो दशरथः सचिवैः सार्धं निश्चित्य युवराजममन्यत अयं युवराजो भवेदिति निश्चितवानित्यर्थः ॥ ४० ॥ ४१ ॥

४२] ति० टी०–तदुक्तादुक्तैः समुदितैर्गुणैर्युक्तं पुत्रं समीक्ष्य दृष्ट्वा सचिवैः सार्धं निश्चित्य तादृशगुणवत्त्वेन पुत्रस्य यौवराज्यममन्यत विचारितवान् ॥ ४२ ॥

४३] ति० टी०–दिव्युत्पाता ग्रहनक्षत्रादिवैकृतम् अन्तरिक्षे महावातदिग्दाहादयः भूम्युत्पाता भूकम्पादयः तज्जं तत्सूचितं भयमात्मनिष्ठं मन्त्रिभ्यः संचचक्ष उक्तवान् । तथा रामाभिषेककारणान्तरमात्मनः शरीरे जरां चावोचत् । अनेनोत्पातसूचितानिष्टयोग्यताध्वननम् ॥ ४३ ॥

रा० टी०–दिवीति । दिवि स्वर्गे अन्तरिक्षे तदधोदेशे भूमौ च घोरं भयंकरमुत्पातजं भयं शरीरे आत्मनो जरां च संचचक्षे मया दृश्यते इति कथयामास । तत्र दिव्युत्पातः नक्षत्रादिपातः अन्तरिक्षोत्पातो महावातादिः भूम्युत्पातो भूकम्पादिः उत्पातप्रकरणे जरां संचचक्षे इत्यनेन तद्देहे जराभावः सूचितः ॥ ४३ ॥

गो० टी०–अथ सद्योरामाभिषेककर्तव्यताहेतुं स्वविपत्तिसूचकं दुर्निमित्तमात्मनो जरां चालोचितवानित्याह–दिवीति । दिव्यन्तरिक्षे भूमौ च यान्युत्पातान तज्जं भयमित्यर्थः तानि चोक्तानि ज्योतिःशास्त्रे–'स्वर्भानुकेतुनक्षत्रग्रहतारार्कचन्द्रजम् । दिवि चोत्पद्यते यच्च तद्दिव्यमिति कीर्तितम् । वाय्वभ्रसंध्यादिग्दाहपरिवेषतमांसि च । खपुरं चन्द्रचापं च तद्विद्यादन्तरिक्षजम् ॥ भूमावुत्पद्यते यच्च स्थावरं वाथ जङ्गमम् । तदैकदेशिकं भौममुत्पातं परिचक्षते' इति । भयावहानि घोराणि दिव्यान्युत्पातानीति फलितार्थः । मेधावी सूक्ष्मदर्शी राजा संचचक्षे दृष्टवान् मन्त्रिभ्यायोक्तवानिति वा । आत्मनः शरीरे जरां च संचचक्षे ख्यात्रभाव आर्षः ॥ ४२ ॥

४४] ति० टी०–अथात्मनः शोकापनुदं शोकहर्तुपूर्णचन्द्रमुखस्य महात्मनो रामस्य संप्रियत्वं राज्याभिषेकेण सर्वानन्दकरत्वं बुबुधे ज्ञातवान् ॥ ४४ ॥

रा० टी०–पूर्णेति । पूर्णचन्द्राननस्य महात्मनो रामस्य संप्रियत्वं संप्रीतिमात्मनः स्वस्य शोकापनुदं शोकनाशकं बुबुधे ॥ ४४ ॥

गो० टी०–एवं रामाभिषेकं हेतुद्वयमुक्तं सर्वलोकप्रियत्वं च हेतुमाह–पूर्णचन्द्राननस्येति । अथ उत्पातदर्शनानन्तरं पूर्णचन्द्राननस्य तद्वत् सर्वसंतापहरस्य महात्मनः महामते रामस्य लोके विषये संप्रियत्वं कीदृशमात्मनः स्वस्य शोकापनुदमुत्पातादिभयनिवर्तकं सम्यक् प्रियत्वं बुबुधे अनुसंदधावित्यर्थः ॥ ४३ ॥

४५] ति० टी०–अत आत्मनश्च श्रेयसे प्रजानां च श्रेयसे प्रियेण च प्रजानिष्ठरामविषयप्रीतिरूपहेतुना च भक्त्या च रामपालनेन प्रजा धन्या भवन्तीति प्रजाविषयस्नेहेन च स नृपो मन्त्रिणो रामाभिषेकाय त्वरितवान् ॥ ४५ ॥

रा० टी०–आत्मन इति । काले अभिषेकसमये प्राप्ते सति भक्त्या अतिप्रीत्योपलक्षितो धर्मात्मा स दशरथः आत्मनः प्रजानां च श्रेयसे कल्याणाय प्रियेण रामविषयक-

१ लोकोत्तरैरिति गो. पाठः । २ शुभैरिति गो. पाठः । ३ युवराजमिति गो. पाठः । ४ अर्धमिदं रा. नास्ति । ५ प्राप्तकालेनेति गो. पाठः ।

नानानगरवास्तव्यान्पृथग्जानपदानपि । समानिनाय मेदिन्यां प्रधानान्पृथिवीपतिः ॥ ४६ ॥
तैर्न्वेश्म नानाभरणैर्यथार्हं प्रतिपूजितान् । ददर्शालंकृतो राजा प्रजापतिरिव प्रजाः ॥ ४७ ॥
न तु केकयराजानं जनकं वा नराधिपः । त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियम् ॥ ४८ ॥
अथोपविष्टे नृपतौ तस्मिन्परपुरार्दने । ततः प्रविविशुः शेषा राजानो लोकसंमताः ॥ ४९ ॥
अथ राजवितीर्णेषु विविधेष्वासनेषु च । राजानमेवाभिमुखा निषेदुर्नियता नृपाः ॥ ५० ॥

स लब्धमानैर्विनयान्वितैर्नृपैः पुरालयैर्जानपदैश्च मानवैः ।
उपोपविष्टैर्नृपतिर्वृतो बभौ सहस्रचक्षुर्भगवानिवामरैः ॥ ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे प्रथमः सर्गः ॥ १ ॥

प्रजानिष्ठप्रीतिहेतुना त्वरितवान् अभिषेकाय त्वरां कृतवान् ॥ ४९ ॥

गो० टी०-एवमनुसंधानप्र[illegible]नमाह-आत्मन इति । आत्मनः प्रजानां च श्रेयसे हितार्थाय प्रियेण च प्रियाय च चतुर्थ्यर्थे तसिप्रत्ययः । धर्मात्मा धर्मशीलः धर्मेण प्राणिसंरक्षकः नृपः प्राप्तकालेनोपलक्षितः सन् भक्त्या प्रीत्या त्वरितवान् प्राप्तकालत्वं स्वस्य दृढत्वं रामयौवनं वसन्तकालो वा ॥ ४४ ॥

४६] ति० टी०-त्वरयित्वा च नानानगरवासिनस्तत्राधिकृतान्भिन्नभिन्नजनपदस्वामिनश्च मन्त्रिद्वारा समानिनाय ॥४६॥

रा० टी०-नानेति । प्रधानान् नानानगरवास्तव्यान् अनेकनगरनिवासिनः पृथग्जानपदान् भिन्नभिन्नदेशाधीशांश्च मेदिन्यामयोध्याभूमौ समानिनाय ॥ ४६ ॥

गो० टी०-नानेति । नानानगरेषु वसन्तीति नानानगरवास्तव्यान् तान् "वसस्तव्यत्कर्तरि णिच" इति कर्तरि तव्यत्प्रत्ययः पृथग्जानपदान् जनपदान्तरस्थान् मेदिन्याः भुवः प्रधानान् न केवलानवान्तरनृपतीनित्यर्थः पृथक् समानिनायेति वा ४६॥

गो० टी०-नेति । श्राव्यत इत्यनन्तरमितिकरणं द्रष्टव्यम् अनानयने हेतुमाह-त्वरयेति । दूरवर्तित्वादिति भावः । केकयराजानमित्यत्र समासान्तविधिरनित्यत्वाट्टजभावः ॥ ४६ ॥

४७]ति० टी०-वेश्म नानाभरणैस्तानैः प्रजापतिर्ब्रह्मा ४७

रा० टी०-तानिति । वेश्मभिर्गृहदानैर्नानाभरणैश्च प्रतिपूजितान् तान् आनीतान् प्रजापतिर्ब्रह्मा प्रजा इव अलंकृतो राजा ददर्श ॥ ४७ ॥

गो० टी०-तान् वेश्मनानाभरणैरिति । प्रथमं वेश्मनानाभरणैः प्रतिपूज्य पश्चात्तान् ददर्शेत्यर्थः ॥ ४७ ॥

४८] ति० टी०-केकयाद्यानयने हेतुः-त्वरया चेति । क्षस्त्वर्थे अभिषेकविषयत्वरया त्वित्यर्थः । प्रियं रामाभिषेकम् अस्येति विचार्येति शेषः । अत्र भरतजनकयोरागमने विघ्नभिया देवास्तथा कृतिं राज्ञे दत्तवन्त इति तात्पर्यम् ॥ ४८ ॥

रा० टी०-नेति । त्वरया अभिषेकविषयकशीघ्रतया हेतुना तौ मिथिलाकेकयाधिपती प्रियं प्रीत्युत्पादकाभिषेकं पश्चात् श्रोष्यतः इति बुद्ध्या केकयराजानं जनकं च न आनयामास । समासान्तविधिरनित्यत्वाट्टजभावः ॥ ४८ ॥

४९]ति०टी०—शेषाः केकयजनकव्यतिरिक्ताआसन्नाः४९

रा० टी०-अथेति । नृपतौ राजनि अथोपविष्टे समङ्गलमुपवेशकर्तरि सति लोकसंमताः शेषा राजानः प्रविविशुः ॥४९॥

गो० टी०-दर्शनप्रकारमेवाह-अथेति । प्रविविशुः सभामिति शेषः । शेषाः केकयराजजनकभिन्नाः ॥ ४८ ॥

५०] ति० टी०-राजवितीर्णेषु राजदत्तेषु नियता नियतदेशाधिपत्याः, यद्वा राजमुखमात्रनिरीक्षकाः ॥ ५० ॥

रा० टी०-अथेति । राजवितीर्णेषु राज्ञा दत्तेषु विविधेषु आसनेषु नियताः नियमिताः नृपाः खण्डमण्डलेश्वराः राजानमभिमुखाः सन्तो निषेदुः ॥ ५० ॥

गो० टी०-अथेति।राजवितीर्णेषु राजदत्तेषु नियताः नियतदेशाधिपत्याः अन्तरङ्गा वा पादाप्रसारणादिनियमयुक्ता वा४९

५१] ति० टी०-मानः सत्कारः पुरालयैः राजसेवार्थं सदायोध्यास्थितैः जानपदैः स्वस्वदेशस्थैः उपोपविष्टैः सभायां स्वसमीपोपविष्टैः । सहस्रचक्षुरिन्द्रः राज्ञोऽपि चारैस्तथा तैरेव च सर्वप्रजाराजचित्तस्थज्ञानम् ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०-स इति । पुरालयैः राजसेवार्थमयोध्यायां कृतगृहैः उपोपविष्टैः नृपादिभिः वृतः स नृपतिः अमरैः सहस्रचक्षुरिव बभौ ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे प्रथमः सर्गः ॥ १ ॥

गो० टी०-स इति । लब्धमानैः प्राप्तबहुमानैः पुरालयैः नानानगरवासिभिः उपोपविष्टैः राजवचनश्रवणादरेण मन्दं मन्दं समीपं प्राप्तैः नृपैः मानवैश्च वृतो नृपतिः भगवान् माहात्म्यवान् सहस्रचक्षुः इन्द्र इव बभौ ॥ ५० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याऽयोध्याकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

---

१ पतीति गो. पाठः । २ सप्तचत्वारिंशाष्टचत्वारिंशश्लोकयोर्व्यत्यासेन गो. रा. पाठः । ३ वसर्दने इति गो. पाठः ।

द्वितीयः सर्गः।

जराजीर्णोऽहं भरक्षमे रामे राज्यभारं निवेश्य विश्राममाकाङ्क्षामि इति दशरथः स्वोद्देशं परिषत्स्थान् शशंस। ते तदनुमेनिरेऽथ तदभिप्रायजिज्ञासुर्दशरथो रामयौवराज्याङ्गीकरणकारणं पप्रच्छ तेऽप्यसंख्येयरामगुणान् संवर्ण्याङ्गीकृतं रामयौवराज्यं समर्थयाम्बभूवुस्तत्संपादने च त्वरयामासुः।

ततः परिषदं सर्वामामन्त्र्य वसुधाधिपः। हितमुद्धर्षणं चैवमुवाच प्रथितं वचः॥ १॥
दुन्दुभिस्वैरकल्पेन गम्भीरेणानुनादिना। स्वरेण महता राजा जीमूत इव नादयन्॥ २॥
राजलक्षणयुक्तेन कान्तेनानुपमेन च। उवाच रसयुक्तेन स्वरेण नृपतिर्नृपान्॥ ३॥
विदितं भवतामेतद्यथा मे राज्यमुत्तमम्। पूर्वकैर्मम राजेन्द्रैः सुतवत्परिपालितम्॥ ४॥
सोऽहमिक्ष्वाकुभिः सर्वैर्नरेन्द्रैः प्रतिपालितम्। श्रेयसा योक्तुमिच्छामि सुखाईमखिलं जगत्॥ ५॥
मयाप्याचरितं पूर्वैः पन्थानमनुगच्छता। प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः॥ ६॥

१] ति० टी०–अथ राज्याभिषेकस्य सर्वप्रजार्थत्वात्तदनुमतय आह राजेत्याह–तत इति। आमन्त्र्याभिमुखीकृत्य हितं श्रेयस्करम् अत एवोद्धर्षणमुत्कृष्टहर्षजनकम् प्रथितं सर्वजनश्राव्यं यथा भवति तथोवाच॥ १॥

रा० टी०–आहूतराजाद्यागमनौत्तरकालिकं वृत्तमाह–तत इत्यादिभिः। ततः आहूतराजाद्यागमनानन्तरं परिषदं राजादिसमूहमामन्त्र्य हितं सर्वोपकारकमत एव उद्धर्षणं सर्वहर्षजनकमेवमिदं वचः प्रथितं सर्वश्रोतव्यं यथा स्यात्तथोवाच॥१॥

गो० टी०–अथ रामाभिषेकस्य सर्वसंमतत्वं दर्शयति द्वितीये–तत इत्यादि। ततः राजादिनिवेशानन्तरं परिषदं पौरजानपदसमूहमामन्त्र्य अभिमुखीकृत्य हितं श्रेयस्करमुद्धर्षणमुत्स्फुल्लहर्षजनकं प्रथितं प्रकटार्थमेवं वक्ष्यमाणरीत्या॥ १॥

२] ति० टी०–तदेवाह–दुन्दुभीति। अनुनादः प्रतिध्वनिः नादयन् दिश इति शेषः॥ २॥

३] ति० टी०–स्वरे राजलक्षणयुक्तत्वं स्निग्धगम्भीरत्वादियुक्तत्वम्। कान्तत्वं मृदुमधुरत्वादिना रसयुक्तेनाद्भुतरसयुक्तेन॥ ३॥

रा० टी०–वचनप्रकारमेवाह–दुन्दुभीत्यादिश्लोकद्वयेन। दुन्दुभिर्भेरी तत्स्वरसदृशेन अनुनादिना प्रतिध्वनिनिष्पादनशीलेन स्वरेण स्वस्य आत्मीयराज्यस्य रः समर्पणं यस्मिन् तेन राजलक्षणयुक्तेन अत एव कान्तेन कमनीयेन अनुपमेन उपमारहितेन रसयुक्तेन आनन्दजनकेन स्वरेण अनुनादयन् सभामण्डलं पूरयन् सन् राजा सर्वानुरागनिष्पादको नृपतिश्चक्रवर्ती नृपानुवाच। द्वयोरेकत्रान्वयः॥ २॥ ३॥

गो०टी०–प्रथितमुवाचेत्युक्तं विशदयति–दुन्दुभिस्वनकल्पेनेति। दुन्दुभिस्वनकल्पेन भेरीस्वनसदृशेन ईषदसमासो कल्पप्प्रत्ययः। गम्भीरेण गम्भीरार्थेन अनुनादिना दिशः प्रतिध्वनयता स्वरेण महता स्वरेण नादयन् जीमूत इव मेघ इव स्थितः राजा उवाच। पुनः स्वरः कीदृशः राजलक्षणयुक्तेन प्रभावानुरूपेण कान्तेन मृदुना रसयुक्तेन माधुर्यवता॥२॥ ३॥

४] ति० टी०–मे राज्यं मया संप्रति पाल्यमानम् मम पूर्वैर्मन्वादिभिः पालितमिति विदितमित्यन्वयः॥ ४॥

रा० टी०–तद्वचनमेवाह–विदितमित्यादिभिः। मे एतद्राज्यं मम पूर्वकैः सुतवत् यथा यथावत्परिपालितमेतद्वत्तां विदितम्। एतदित्युभयान्वयि॥ ४॥

गो० टी०–स्वकृतराज्यपरिपालनस्य पूर्वकृतपालनादविशेषं सूचयन्नाह–विदितमिति। अन्ते इतिकरणं द्रष्टव्यम् उत्तमं विपुलं मे एतद्राज्यं मम पूर्वकैः पूर्वैः राजेन्द्रैः रघुप्रभृतिभिः सुतवत्परिपालितम् अतिप्रेम्णा सुरक्षितमित्येतद्वत्तां विदितम् "क्तस्य च वर्तमाने" इति षष्ठी भवद्भिर्विदितमित्यर्थः॥ ४॥

५] ति० टी०–ततः किं तत्राह–सोऽहमिति। श्रेयसा रामराज्याभिषेकद्वारा विशिष्टेन सुखेन यत इक्ष्वाकुभिः प्रतिपालितमत एव सुखार्हम्॥ ५॥

रा० टी०–स इति। श्रेयसा अतिकल्याणेन योक्तुं संयोजयितुम्॥ ५॥

गो० टी०–अस्तु ततः किमित्यत्राह–सोऽहमिति। सः तद्वंश्योऽहं इक्ष्वाकुभिः इक्ष्वाकुवंश्यैः सर्वैः नरेन्द्रैः परिपालितमत एव सुखार्हमखिलं जगत् राज्यं श्रेयसा सुखेन अधुनापि योक्तुं कामयत इति योक्तुकामः अस्मि 'तुं काममनसोरपि'इति मकारलोपः योक्तुमिच्छामीत्यर्थः॥ ५॥

६] ति० टी०–पूर्वैर्मन्वादिभिः पन्थानं प्रजापालनमार्गम् अनिद्रेण स्वसुखनिरपेक्षेण। यथाशक्तीति विनयप्रदर्शनम्॥६॥

रा० टी०–रामेणावश्यं प्रजाः पालनीया इत्यत्र हेतुं प्रतिपादयन्नाह–मयेत्यादिभिः। पूर्वैः मनुप्रभृतिभिराचरितं पन्थानमनुगच्छता अनुसरता मयापि प्रजाः नित्यं यथाशक्ति शक्तिमनतिक्रम्याभिरक्षिताः॥ ६॥

गो० टी०–नन्वेवं भवत्कृतं पालनमेवास्माकं श्रेय इत्यत्राह–मयापीति। पूर्वैः राजभिः आचरितं क्षुण्णं पन्थानं

१ स्वनेति गो. पाठः। २ योक्तुकामोऽस्मीति गो. पाठः।

इदं शरीरं कृत्स्नस्य लोकस्य चरता हितम् । पाण्डुरस्यातपत्रस्यच्छायायां जरितं मया ॥ ७ ॥
प्राप्य वर्षसहस्राणि बहून्यायूंषि जीवतः । जीर्णस्यास्य शरीरस्य विश्रान्तिमभिरोचये ॥ ८ ॥
राजप्रभावजुष्टां च दुर्वहामजितेन्द्रियैः । परिश्रान्तोऽस्मि लोकस्य गुर्वीं धर्मधुरं वहन् ॥ ९ ॥
सोऽहं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते । संनिकृष्टानिमान्सर्वाननुमान्य द्विजर्षभान् ॥ १० ॥
अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः । पुरंदरसमो वीर्ये रामः परपुरंजयः ॥ ११ ॥
तं चन्द्रमिव पुष्येण युक्तं धर्मभृतां वरम् । यौवराज्ये नियोक्तास्मि प्रीतः पुरुषपुंगवम् ॥ १२ ॥

मर्यादामनुगच्छता अनुसरता नित्यं अनिद्रेण जागरूकेण मया-पि प्रजाः यथाशक्त्यभिरक्षिताः यथाशक्तीति विनयोक्तिः ॥ ६ ॥

७] ति० टी०–जरितं प्रापितजरं कृतम् । न कदापि प्रजापालनविरोधेन विषयासक्तिः कृतेति भावः ॥ ७ ॥

रा० टी०–इदानीं स्वकर्तृकप्रजापालनेच्छा नास्तीत्यत्र हेतुं वदन्नाह–इदमित्यादिश्लोकचतुष्टयेन । कृत्स्नस्य लोकस्य हितं चरता मया पाण्डुरस्य श्वेतस्य आतपत्रस्य छत्रस्य छायायामिदं शरीरं जरितं प्रतीयमानजरां प्रापितम्, एतेनेदानीं राज्यश्रीभोगाकाङ्क्षा नास्तीति व्यञ्जितम् ॥ ७ ॥

गो० टी०–तर्हीदानीमपि तथैव रक्ष्यतामित्यत्राह–इदमिति । कृत्स्नस्य लोकस्य जनस्य हितं चरता कुर्वता मया इदं शरीरं भवतां प्रत्यक्षं हीति भावः । पाण्डुरस्यातपत्रस्य श्वेतस्य छत्रस्य छायायां जरितं संजातजरं कृतं जरापर्यन्तमेकच्छत्रतया पराक्रमनिधिर्भूत्वा मया नियमेन लोकहितमाचरितमित्यर्थः ॥ ७ ॥

८] ति० टी०–वर्षसहस्राणि षष्टिर्वर्षसहस्राणि बहून्यायूंषि वत्सरशतरूपानेकपुरुषायूंषि । विश्रान्तिं प्रजाचिन्तारा-हित्यरूपिणीम् ॥ ८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेण बोधयन्नाह–प्राप्येति । बहूनि षष्टिं वर्षसहस्राणि आयूंषि प्राप्य जीवतः इह लोके वर्तमानस्य अत एव जीर्णस्य प्रतीयमानजीर्णताविशिष्टस्य अस्य शरीरस्य विश्रान्तिमभिरोचये इच्छामि ॥ ८ ॥

गो० टी०–तर्हि संप्रति किं कर्तव्यमित्यत्राह–प्राप्य वर्ष-सहस्राणीति । बहूनि वर्षसहस्राणि षष्टिवर्षसहस्रपरिमितान्यायूंषि प्राप्य जीवतः क्रमेण जीर्णस्यास्य शरीरस्य विश्रान्तिं राज्यभाराद्विरतिमभिरोचये इच्छामि एतेन ययातिवद्विषयव्यापदेन न राज्याद्विरम्यत इति दर्शितम् ॥ ८ ॥

९] ति० टी०–राजप्रभावाः शौर्यादयस्तयुक्तैर्जुष्टाम् । वहन्निति हेतौ शता ॥ ९ ॥

रा० टी०–राज्ञां मदादिप्रभृतीनां ये प्रभावाः सर्वदिग्विजयकारकशौर्यादयस्तैर्जुष्टामत एवाजितेन्द्रियैर्दुर्वहां लोकस्य गुर्वीं धर्मधुरं धर्मपूर्वकरक्षणभारं वहन् सन् परिश्रान्तोऽस्मि हिहेतौ ॥ ९ ॥

गो० टी०–इतःपरं राज्यवहनाशक्तौ निमित्तमाह–राजेति । राजप्रभावैः शौर्यादिभिः जुष्टां सेवितुमशक्यां अजितेन्द्रियैः विषयपरैः दुर्वहां तादृशप्रभावरहितैर्वोढुमशक्यां गुर्वीं बहुसाधननिर्वाह्यां लोकस्य धर्मधुरं धर्मस्थापनरूपभारं वहन्नहं परिश्रान्तोऽस्मि ॥ ९ ॥

१०] ति० टी०–प्रजाहिते पुत्रं कृत्वा तं नियुज्य । अनुमान्य कृतानुमतिकान्कृत्वा ॥ १० ॥

रा० टी०–स इति । सन्निकृष्टानात्महितकारकान् ॥१०॥

गो० टी०–विवक्षितमर्थं दर्शयति–स इति । सः एवं श्रान्तोऽहं प्रजाहिते प्रजारक्षणविषये पुत्रं कृत्वा नियम्य सन्निकृष्टान् अन्तरङ्गभूतान् इमान् सर्वान् द्विजर्षभान् ब्राह्मणश्रेष्ठान् अनुमान्य कृतानुमतिकान् कृत्वा मानयतेर्ण्यन्ताल्ल्यप् विश्रमं शान्तिनिवृत्तिमिच्छामि ॥ १० ॥

११] ति० टी०–राज्यार्हत्वं पुत्रस्य दर्शयति–अनुजात-इति । मत्संबन्धि सर्वगुणविशिष्टो जात इत्यर्थः । इत्थंभूताख्यानविषयेऽनुः ' कर्मप्रवचनीय–' इति मामिति द्वितीया । स्ववृत्तिगुणाधिकगुणवत्तामप्याह–पुरंदरेति ॥ ११ ॥

रा० टी०–रामस्य राज्ययोग्यत्वं प्रतिपादयन्नाह–अन्विति । ज्येष्ठो ममात्मजः सर्वैर्गुणैर्मामनुजातः । " अनुर्लक्षणे " इतिकर्मप्रवचनीयत्वाद्वितीया । अत्राप्युपमानोपमेयभाव इषुवत्सविता गच्छतीतिवद्बोध्यः ॥ ११ ॥

गो० टी०–कस्ते पुत्रो यौवराज्ये नियोज्योऽभिमतस्तत्राह–अनुजात इति । वीर्ये विषये पुरंदरसमः इन्द्रतुल्यः । तौल्यमेवाह–परेषां शत्रूणां पुराणि जयति स्वाधीनीकरोतीति परपुरंजयः असंशायामपि जेः खजार्षः । रामः रामनामकः मम ज्येष्ठ आत्मजः सर्वैर्गुणैः शौर्यादिभिः मामनुजातः " अनुर्लक्षणे " इत्यनुः कर्मप्रवचनीयः तयोगान्मामिति द्वितीया मद्गुणान् सर्वाननुप्राप्य जात इत्यर्थः । नन्वयं मत्तश्च गुणवत्तरः अपरिमेयैश्च लोके लोकोत्तरैर्गुणैरिति पूर्वमुक्तं कथमिदानीमनुजातो हि मां सर्वैर्गुणैरित्युच्यते पुरंदरसम इति चोच्यते ' अन्या मध्यस्थचिन्ता हि विमर्दाभ्यधिकोदया ' इतिन्यायेन पौरस्त्येन रामस्य सर्वाभ्यधिकगुणतां वक्तुमेवमुक्तमिति ध्येयम् अत एव वक्ष्यति ' बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते ' इति ॥ ११ ॥

१२] ति० टी०–पुष्येण युक्तं चन्द्रमिव सर्वकार्यसिद्धिदक्षम् यौवराज्ये तत्पदे प्रतिनियोक्तास्मीति लुट् पुंगवमेवम् १२

१ इति गो. पाठः । २ प्रीत इति गो. रा. पाठः ।

अनुरूपः स वो नाथो लक्ष्मीवाँल्लक्ष्मणाग्रजः । त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम् ॥ १३ ॥
अनेन श्रेयसा सद्यः संयोक्ष्येऽहमिमां महीम् । गतक्लेशो भविष्यामि सुते तस्मिन्निवेश्य वै ॥ १४ ॥
यदिदं मेऽनुरूपार्थं मया साधु सुमन्त्रितम् । भवन्तो मेऽनुमन्यन्तां कथं वा करवाण्यहम् ॥ १५ ॥

रा० टी०–तमिति । पुष्येण युक्तं चन्द्रमिव पुष्यनक्षत्रयुक्तचन्द्रसदृशकार्यसाधकमित्यर्थः । किंच चन्द्रमिव प्रकाशमानं युक्तं निखिलशक्तिविशिष्टं पुष्येण नक्षत्रेण यौवराज्ये नियोक्तास्मीत्यर्थः ॥ १२ ॥

गो० टी०–तमिति । तं स्वगुणतुल्यगुणं धर्मभृतां धार्मिकाणां वरं पुरुषर्षभं पुष्येण नक्षत्रेण युक्तं चन्द्रमिव स्थितं तद्वदत्युज्ज्वलं, यद्वा पुष्यनक्षत्रेणाभिषेककरणात् पुष्येण चन्द्रमिवेत्युक्तं यौवराज्ये नियोक्तास्मि, यद्वा चन्द्रमिव स्थितं तं श्वः पुष्येण यौवराज्ये नियोक्तास्मीत्यर्थः ॥ १२ ॥

१३] ति० टी०–स वो युष्माकं राजानुरूपो योग्यः । येन राज्ञा न केवलं वृयमेव नाथवन्तः, अपि तु त्रैलोक्यमपि नाथवत्तरम् एवंप्रभावो राम इति भावः ॥ १३ ॥

रा० टी०–अन्विति । येन नाथेनैव त्रैलोक्यमूर्ध्वमध्याधोलोको नाथवत्तरमस्ति स एव अनुरूपः नाथत्वयोग्यो रामो वो नाथः स्यात् । अपिशब्दावेवार्थौ ॥ १३ ॥

गो० टी०–दशरथवचनं वाल्मीकिस्तत्त्वज्ञतया श्लाघते–**अनुरूप इति** । स रामः अनुरूपः अनुगुणः नाथः–लोकस्येति शेषः । अनुरूपत्वे हेतुर्लक्ष्मीवानिति अपरिच्छिन्नतेजस्क इत्यर्थः । तत्रापि हेतुर्लक्ष्मणाग्रज इति लक्ष्मणो लक्ष्मिवर्धन इत्युक्तम् । यद्वा अनुरूपत्वे हेतुर्लक्ष्मणाग्रज इति लक्ष्मण इव सर्वत्र स्वाश्रिते प्रेमशालीत्यर्थः । अथवा अनुरूप इत्यादि नित्यानपायिन्या लक्ष्म्या विशिष्टः परिजनपर्यन्तो रामः सर्वस्य निरुपाधिकः शेषी दशरथस्तु राज्यपालनोपाधिकशेषी । वैइति श्रुत्यादिप्रसिद्धिं द्योतयति 'दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः' इत्युक्तेः । तस्य निरुपाधिकशेषित्वे निमित्तमाह–**त्रैलोक्यमिति** । त्रयो लोका एव त्रैलोक्यं चतुर्वर्णादित्वात्स्वार्थे ष्यञ् । त्रैलोक्यमपि येन नाथेन नाथवत्तरम् अतिशयेन नाथवत् रामस्य रक्षकत्वावलोकने किंपुनर्मात्रं त्रैलोक्यमिति भातीत्यर्थः । अथवा अनेन श्लोकेन रामस्य परत्वमुच्यते सः रामः अनुरूपो नाथः सहजशेषी जगतः अन्ये तु कर्मादिगुणतयौपाधिकाः अनुकूलं रूपं यस्य सोऽनुरूपः समः समविभक्ताङ्गः चन्द्रकान्तानननमित्यादुक्तनिरुपमसौन्दर्यशालिदिव्यमङ्गलविग्रह इत्यर्थः । अनुकूलं स्वरूपं यस्यासावनुरूपः शतगुणितोत्तरक्रमेण निरतिशयदशाशिरस्कताऽभ्यस्यमानानन्दरूप इत्यर्थः । आनन्दो ब्रह्मेति श्रुतम् । अनुगतं रूपं यस्यासावनुरूपः सर्वव्यापीत्यर्थः । अनुरूपः अनुप्रविष्टचराचरादिकशरीरः सर्वशरीरीत्यर्थः । अनुरूपः अनुस्यूतरूपः परव्यूहविभवान्तर्याम्यर्चावतारूपेण नानावतारशालीत्यर्थः । अनुरूपः ओः रुद्रस्य रूपं शरीरं तद्विलक्षणशरीरः । 'वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु' इत्याद्युक्तरुपविलक्षणरूपः पुण्डरीकाक्षत्वादियुक्तः । उस्वरूपभिन्न इति त्रिमूर्तिसाम्यं च निरस्यते । वीनां पक्षिणां नाथो विनाथः हंसः तत्संबन्धी वैनाथः अण्यादिवृद्धिः । हंसवाहनः चतुर्मुखः तत्सहितः स वैनाथः नाभिपद्मस्थलस्थितचतुर्मुख इत्यर्थः । वैनाथो गरुडवाहनो वा नाथत्वे हेतुर्लक्ष्मीवानिति नित्ययोगे मतुप् 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा । वेदान्तास्तत्त्वचिन्तां सुरभिदुरसि यत्पादचिह्नैस्तरन्ति' पत्नीविशिष्टत्ववत् परिजनविशिष्टत्वमाह–लक्ष्मणाग्रज इति । लक्ष्मणशब्दः कैङ्कर्यपरमात्रोपलक्षणार्थः अग्रज इति तन्निरूप्यत्वोक्त्या आश्रितपारतन्त्र्यमुक्तम् । ननु कथमयमनुरूपो नाथः ब्रह्मरुद्रादयोऽपि हि सन्ति नाथा इत्यत्राह–त्रैलोक्यमपीति । कृतकमकृतकं कृतकाकृतकमित्युक्तं समस्तं जगदित्यर्थः । येन नाथेन नाथवदित्यनेनेन्द्रादिव्यावृत्तिः तरपा ब्रह्मरुद्रादिव्यावृत्तिः तन्नाथत्वस्यैतन्मूलत्वात् 'युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः । पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव' इत्यादिस्मृतयस्तत्र मानं त्रैलोक्यं नाथवत्तरं रक्ष्यापेक्षया रक्षकत्वराधिक्येत्यर्थः (?) ॥ १३ ॥

१४] ति० टी०–श्रेयसा प्रशस्ततरेण रामेण महीं संयोक्ष्ये, राज्याभिषेकद्वारेणेत्यर्थः । एवं सति तस्मिन्सुते तत्पालनभारं निवेश्य गतक्लेशो भविष्यामि ॥ १४ ॥

रा० टी०–अनेनेति । अत एव श्रेयसा सर्वमङ्गलहेतुना अनेन रामेण इमां महीं संयोक्ष्ये ॥ १४ ॥

गो० टी०–अनेनेति । इमां मया चिरकालधृतां महीं तस्मिन् ज्येष्ठे सुते निवेश्य महीपालनभारं निक्षिप्येत्यर्थः । अनेन तन्निवेशरूपेण श्रेयसा च महीमेवं सद्यः संयोज्य गतक्लेशः गतराज्यभरणक्लेशो भविष्यामि रामाभिषेकस्य द्वे फले मह्याः श्रेयो मम विश्रान्तिश्चेति भावः॥ १४ ॥

१५] ति० टी०–म इदमभिषेकरूपं कार्यं यद्यदि मया साधु सुमन्त्रितं भवतामनुरूपार्थमनुकूलप्रयोजनावहं च तदा भवन्तो मे ममानुमन्यन्तामनुमतिं प्रयच्छन्तु । हर्षयुक्तत्वाद्वृत्तस्मच्छब्दपौनरुक्त्यमदोषाय । इतोऽतिरिक्तं वा कथं केन प्रकारेण किं करवाणि तद्वदन्त्विति शेषः ॥ १५ ॥

रा० टी०–यदिति । मे मम अनुरूपः योग्यः अर्थो यस्मिन् तत् इदं रामाभिषेचनं यत् यदि मया साधु सुमन्त्रितं

१ संयोक्ष्यैवमिति गो. पाठः ।

यद्यप्येषा मम प्रीतिर्हितमन्यद्विचिन्त्यताम् । अन्या मध्यस्थचिन्ता तु विमर्दाभ्याधिकोदया ॥ १६ ॥
इति ब्रुवन्तं मुदिताः प्रत्यनन्दन्नृपा नृपम् । वृष्टिमन्तं महामेघं नर्दन्त इव बर्हिणः ॥ १७ ॥
स्निग्धोऽनुनादैः संजज्ञे ततो हर्षसमीरितः । जनौघोद्घुष्टसंनादो मेदिनीं कम्पयन्निव ॥ १८ ॥
तस्य धर्मार्थविदुषो भावमाज्ञाय सर्वशः । ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ॥ १९ ॥
समेत्य ते मन्त्रयितुं समतागतबुद्धयः । ऊचुश्च मनसा ज्ञात्वा वृद्धं दशरथं नृपम् ॥ २० ॥
अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव । स रामं युवराजानमभिषिञ्चस्व पार्थिवम् ॥ २१ ॥

तदा भवन्तः अनुमन्यन्तामनुमतिं कुर्वन्तु । कथं केन प्रकारेण अहं करवाणीत्यपि वदन्तीति शेषः । वाशब्द इत्यर्थे ॥ १५ ॥

गो० टी०—यदीति । इदं रामाभिषेकरूपं कार्यं मे राज्यभरणश्रान्तस्य वृद्धस्य मम यत्नानुरूपार्थसूचितप्रयोजनकं चेत् मया वा साधु शुभमस्ति यदि सम्यग् विचार्यारब्धं चेदित्यर्थः तदा भवन्तः मे मत्तमनुमन्यन्तामनुमतिं कुर्वन्तु इदं मे अनुकूलार्थं चेत्कथं वान्यत्करवाणि ॥ १५ ॥

१६] ति० टी०—नन्वेवदधिकः को हिताहितविचारसमर्थोऽत्र आह—यद्यपीति । एषा चिन्ता यद्यपि मम प्रीतिस्तद्विषया तथाप्यन्यद्धितं यदस्ति तदा विचिन्त्यताम् । यतो मध्यस्थानां रागद्वेषहीनानां चिन्ता तु विचारस्तु तद्वतां चिन्तापेक्षयान्या विलक्षणा । तदेवाह—विमर्देन पूर्वापरपक्षसंघर्षेणाभ्याधिकोदयाधिकार्थप्रादुर्भाववती ॥ १६ ॥

रा० टी०—यद्यपीति । यद्यपि एषा रामाभिषेकविषया मम प्रीतिरस्ति तथापि अन्यत् अतो भिन्नं हितं चेद्वद्विचिन्त्यताम् । तत्र हेतुः मध्यस्थचिन्ता मध्यस्थानां निर्णायकत्वेन स्थापितानां चिन्ता विचारः अन्या एकनिष्ठविचारतो विलक्षणा । तत्र हेतुः विमर्देन पूर्वपक्षोत्तरपक्षाभ्यां गृहीतत्वेन अभ्यधिकः उदयो यया सा । तुशब्द एवार्थे चेदित्यध्याहृतम् ॥ १६ ॥

गो० टी०—यत्ते प्रियं तत् क्रियतामित्यत्राह—यद्यपीति । एषा रामाभिषेकविषया प्रीतिर्यद्यप्यस्ति तथाप्यन्यद्धितमस्ति चेच्चिन्त्यताम् । ननु कस्त्वत्तोऽधिकदर्शीत्यत्राह—अन्येति । मध्यस्थानां रागद्वेषरहितानां चिन्ता विचारः अन्या अन्यादृशी स्वमात्रचिन्तातो विलक्षणा । तदेव वैलक्षण्यमाह—विमर्दाभ्यधिकोदयेति । विमर्देन पूर्वापरपक्षसंघर्षणेन हेतुना अभ्यधिकोदया अधिकार्थप्रादुर्भावा हि ॥ १६ ॥

१७] ति० टी०—वृष्टिमन्तं महामेघं दृष्ट्वा नर्दन्तो बर्हिण इव मुदिता नृपा नृपं प्रत्यनन्दन्प्रशंसापूर्वकमङ्गीचक्रुः ॥ १७ ॥

रा० टी०—इतीति । वृष्टिमन्तं महामेघं दृष्ट्वा बर्हिणो मयूरा इव नर्दन्तः प्रत्यनन्दन् ॥ १७ ॥

गो० टी०—इतीति । इति पूर्वोक्तप्रकारेण ब्रुवन्तं नृपं दशरथं नृपाः परिषद्गता राजानः वृष्टिमन्तं वर्षुकं महामेघं नर्दन्तः केकां कुर्वन्तः बर्हिण इव मयूरा इव मुदिताः सन्तः प्रत्यनन्दन् प्रशंसन् ॥ १७ ॥

१८] ति० टी०—अनुनादः सामन्तकृतहर्षजवाक्यप्रतिध्वनिः संजज्ञे सभायामिति शेषः । जनौघानामुद्घुष्टेन शब्देन सम्संभवन्नादः प्रतिध्वनिः पृथिवीं कम्पयन्निव संजज्ञे बर्हिणिव शेषः । 'विमानम्' इति पाठे राजस्थानमित्यर्थः ॥ १८ ॥

रा० टी०—तत्रत्यराजप्रमोदमुक्त्वा तत्रस्थजनप्रमोदं वर्णयन्नाह—स्निग्ध इति । स्निग्धः स्नेहसूचकः अनुनादः प्रतिध्वनिजनकः हर्षसमीरितः सकलहर्षहेतुः जनौघैरुद्घुष्टः उच्चारितः सन्नादः शोभनशब्दः विमानमतिपूज्यसभामण्डपं कम्पयन्निव तत्र तस्यां सभायां संजज्ञे 'मेदिनीम्' इति भट्टसंमतः पाठः ॥ १८ ॥

गो० टी०—स्निग्ध इति । तत्र सभायां स्निग्धः स्नेहाभिव्यञ्जकः अनुनादी प्रतिध्वनिकारी जनौघोद्घुष्टः जनसमूहोत्पादितः संनादः समीचीनशब्दः विमानं तदास्थानमण्डपविमानं कम्पयन्निव संजज्ञे न केवलं राजान एव सर्वेऽपि जनाः तच्छ्रुत्वा संतुष्टा इत्यर्थः ॥ १८ ॥

१९] ति० टी०—भावं धर्मविषयमभिप्रायम् बलं सेना तपोबलं वा चानृपाः ॥ १९ ॥

रा० टी०—तस्येति । जनमुख्याः नृपतयः 'बलमुख्याश्च' इति भट्टसंमतः पाठः ॥ १९ ॥

गो० टी०—तस्येत्यादिश्लोकद्वयमेकान्वयम् । ब्राह्मणाः वसिष्ठाद्याः जनमुख्याः राजानश्च पौरैर्नागरिकैः जानपदैश्च समेत्य संयुज्य मन्त्रयित्वा युक्तायुक्तं विचार्य धर्मार्थविदुषः स्वस्य वार्द्धके युवराजस्थापनं धर्मः प्रजानामर्थसाधनं चेति जानतः तस्य दशरथस्य भावं वचनमूलतात्पर्यं सर्वशः सर्वप्रकारेण देशकालेङ्गितादिभिः आज्ञाय आ समन्तात् ज्ञात्वा समतां साम्यं गताः बुद्धयो येषां ते तथोक्ताः ऐकमत्यं प्राप्ताः सन्तः मनसा च ज्ञात्वा प्रत्येकं स्वस्वहृदयेन निश्चित्य वृद्धं नृपं वक्ष्यमाणवचनार्हं दशरथमूचुः ॥ १९ ॥ २० ॥

२०] ति० टी०—समतामेकरूपतां गताः प्राप्ता बुद्धयो येषां ते मन्त्रयितुं प्रवृत्ता इति शेषः । मन्त्रणोत्तरं ज्ञात्वा पुनः पुनः पर्यालोचनेन निश्चित्य ॥ २० ॥

रा० टी०—समेत्येति । मन्त्रयित्वा कर्तव्यं निश्चित्यैव । तुशब्द एवार्थे समतामेकविषयत्वं गताः प्राप्ता बुद्धयो येषां ते वृद्धं समूहम् । 'ते मन्त्रयितुं' इति भट्टसंमतः पाठः ॥ २० ॥

२१] ति० टी०—अनेकेत्यादिपदं बहुव्रीहिः । साहस्रो

१ इति गो. पाठः । २ नादीति गो. पाठः । ३ तत्रेति गो. पाठः । ४ विमानमिति गो. रा. पाठः । ५ जनेति गो. रा. पाठः । ६ प्रशंसन्निवेति गो. —

इच्छामो हि महाबाहुं रघुवीरं महाबलम् । गजेन महता यान्तं रामं छत्रावृताननम् ॥ २२ ॥
इति तद्वचनं श्रुत्वा राजा तेषां मनःप्रियम् । अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् ॥ २३ ॥

स्वार्थिकोऽण् । युवराजानमिति समासान्तविधेरनित्यत्वाट्टजभावः ॥ २१ ॥

रा० टी०—तद्वचनमेवाह—अनेकेति । हे पार्थिव ! अनेकानि बहूनि वर्षसहस्राणि यस्य सः बहुवर्षसहस्राणि राज्यकर्तेत्यर्थः । दृढः सकलसंपत्तिविशिष्टस्त्वमसि स त्वं पार्थिवं पृथिवीपालनयोग्यं रामं युवराजानमभिषिञ्चस्व युवराजत्वेनाभिषेकं कारयेत्यर्थः । सहस्रशब्दः स्वार्थिकाण्णन्तः युवराजानमित्यत्र समासान्तविधेरनित्यत्वाट्टजभावः संज्ञापूर्वकविधेरनित्यत्वात्परस्मैपदाभावः किंच स्वेति भिन्नं पदमात्मीयेत्यर्थः । स्वश्चासौ पार्थिवश्चेति कर्मधारयो वा ॥ २१ ॥

गो० टी०—दृढं नृपमिति कविना सूचितमर्थं दर्शयति—अनेकेति । हे पार्थिव ! त्वं अनेकवर्षसाहस्रः सहस्राण्येव साहस्राणि स्वार्थे अण् अनेकानि वर्षसाहस्राणि यस्य स तथा दृढोऽसीतिविशेषणमहिम्ना अतिदृढोऽसीति गम्यते सः तादृशदृढस्त्वं पार्थिवं पृथिवीशासनार्हं युवराजानं युवराजं समासान्तस्यानित्यत्वान्न " राजाहः सखि—" इत्यादिना टच् । अभिषिञ्चस्व यथा रामो युवराजो भवति तथाभिषिञ्चेत्यर्थः ॥ २१ ॥

२२] ति० टी०—इच्छामः कृताभिषेकं द्रष्टुमिति शेषः ॥ २२ ॥

रा० टी०—इच्छाम इति । छत्रावृताननं युवराजत्वेनाभिषिक्तमित्यर्थः । द्रष्टुमिति शेषः ॥ २२ ॥

गो० टी०—नन्वत्र रक्षके मयि विद्यमाने किमर्थं रामाभिषेकोऽपेक्ष्यत इत्याशङ्क्यायां नहि वयं रक्षणार्थं तमपेक्षामहे किंतु सौन्दर्यविशेषानुभवार्थमित्याह—इच्छाम इति । इच्छाम इतिबहुवचनेन सर्वेषामिच्छावैषम्याभाव उक्तः महाबाहुमिति आयताश्च सुवृत्ताश्चेत्युक्तरीत्या सहजबाहुसौन्दर्यं तत्कालाङ्कुशाकर्षणादिव्यापारविशेषश्चोच्यते इच्छाम इत्यादि इच्छामः अभिषेकपट्टबन्धादियुक्ततया स्थितं द्रष्टुमिच्छामः इच्छामात्रमस्माकं कार्यनिर्वहणं भवदधीनम् इच्छामः अस्माकमिच्छा वर्तते श्रेयांसि बहुविघ्नानीत्येवंविधश्रेयोऽस्माकं लभ्यते किम् इच्छामः अभिषेकः सिध्यतु वा न वा इच्छा निष्प्रतिबन्धा सुन्दरवस्तुदर्शने इच्छा प्रवर्तते खलु इच्छामः सर्वप्रकारेण रक्षकत्वाद्वाचा प्रार्थयितुमशक्ता मनसा इच्छामः भवदभिप्रायज्ञानेन इदानीमिच्छाम इति वदामः केषांचिदस्ति न केषांचिदिति न किंतु सर्वे इच्छामः हि सर्वलोकप्रसिद्धं खलु जनौघोद्घुष्टसंनादो विमानं कम्पयन्निवेति सर्वजनकोलाहलेन तव गृहं विश्लिष्टबन्धं खलु अकामयत मेदिनी त्वयि निर्वाहके सत्येव भूमिः स्वयंवरं कृतवती खलु त्वयि करग्रहं कुर्वति रामकामना न युक्तेति ध्वन्यते । काम्बुकीनां न मर्यादा खलु लोकपालोपमं विष्णुसदृशमत एव दृढवती भूमिः । मेदिनी मधुकैटभवसाविस्रमन्धेनोपहृतसर्वगन्धा इति रामसौगन्ध्येन वासयितुमकामयत कर्पूरचन्दनादिकमिव स्वकोटौ कृतवती नार्थं सौगन्ध्यासौगन्ध्ययोः स्वस्यैव शेषिणो भोग्यतया तद्विप्रवासनानिवर्तनेन स्वशेषरक्षकं महाबाहुं बाहुबलस्यालक्ष्या खल्वियं शक्तत्रैलोक्यमप्येक इति न केवलं कोसलराज्यं लङ्काराज्यमपि रक्षितुं शक्तिरस्ति महाबाहुं आयताश्चेति आजानुबाहुरिति च महापुरुषलक्षणदर्शनेन न ज्ञायते किं विभूतिद्वयनिर्वाहकबाहुः खलु महाबाहुं बाहुच्छायामवष्टभ्येति छायास्पर्शेन न पर्य्याप्ता किं ररक्ष धर्मेण बलेन चैवेति धर्मबलमप्यस्तीत्याहुः रघुवीरं दीनान् दानेन राघव इति प्रसिद्धः खलु आनृशंस्यं परो धर्म इति परेषामप्युपदेशपर्यन्तं खलु रक्षणं रघुवीरं रघ्वपेक्षयास्यैव धर्मिष्ठता ज्ञायते खलु रघुं प्रति क्षुधार्तस्य मरणे तव पापं न भवतीत्युक्ते तूष्णीं स्थितवान् अयं तु अप्यहं जीवितं जह्यामिति खलूक्तवान् महाबलं मनोबलयुक्तं नहि प्रतिज्ञां संश्रुत्य न त्यजेयमेतद्व्रतं ममेति वक्ष्यति । गजेन महता यान्तं गजेन त्वया दत्तकिरीटपट्टबन्धादियुक्तः शत्रुंजयेनागच्छति चेत्तदा ज्ञायते गजेन न रथादिना मत्तमातङ्गगामिनमिति तद्गमनोपमानगतिमता महता अत्युन्नतेन शर्वभक्तिमता अयान्तं महावीथीमध्ये प्रतिग्रहाङ्गणमागतमायान्तम् एकः स्वादु न भुञ्जीतेति पुत्रकलत्रादिभिः सहानुभवरसमास्वाद्यामः रामं सौन्दर्यगुणैः सकलमनोरञ्जकं छत्रावृताननं दृष्टिदोषपरिहारायान्तरङ्गेण छत्रेणावृतमुखं दृश्यादृश्यैकदेशतया साकल्येन मुखदर्शनाभिलाषमुत्पादयन्तं । अन्तरङ्गसुहृद्विर्वातातपपरिम्लानताशङ्क्या भूचक्रच्छत्रेणाच्छादितमुखपङ्कजं छत्रावृताननं 'एकच्छत्रां महीं भुङ्क्ष्व' इतिलक्षणशास्त्रकथितसमग्रत्वविशालोत्तमाङ्गत्वव्यञ्जकेन निरङ्कुशप्रशासनवशीकृतनिखिलभूपालवलयतानिरूपकेण छत्रेण पाण्डुरेण परभागभावमापन्नेन नितरां प्रकाशितेन्दीवरसदृशमुखं विशदीकृतमुक्तं रघुवीरमिति गजस्कन्धावस्थानसूचितो वीर्यविशेष उच्यते महाबलं मत्तमातङ्गमपि तृणीकृत्य नमनसमर्थं महागजेन शत्रुंजयेनायान्तं गच्छन्तमित्यनुभवसाक्षिकः सुषमाविशेषः सूच्यते रामं स्वसौन्दर्येण गजमलंकुर्वाणमिव स्थितं छत्रावृताननं वदनप्रभामण्डलेनेव छत्रावरणेन जनितसौन्दर्यम् एतैरभिषेकामन्तरभाविभिर्विशेषणैरभिषेकः कर्तव्य इति व्यञ्जनावृत्त्या प्रार्थ्यते ॥ २२ ॥

२३] ति० टी०—अजानन्निव तदभिषेकस्य सर्वमनःप्रियत्वं जानन्नप्यजानन्निव प्रजासुखात्स्पष्टं जिज्ञासुः ॥ २३ ॥

रा० टी०—इतीति । मनःप्रियं स्वेप्सितं तद्वचनमेवाह—श्रुत्वेति । हे राजानः ! मे वचनं श्रुत्वैव श्रवणोत्तरं विचारमकृत्वैव यत् यूयं राघवं रामं पतिं राजानमिच्छथ तदिदं किं किमर्थमयं मे संशयः अतो यूयं तत्त्वतो ब्रूत हेतुं वदतेत्यर्थः ॥ २३ ॥ २४ ॥

गो० टी०—इतीति । इति पूर्वोक्तप्रकारेण तद्वचनं

श्रुत्वैतद्वचनं यन्मे राघवं पतिमिच्छथ । राजानः संशयोऽयं मे तैदिदं ब्रूत तत्त्वतः ॥ २४ ॥
कथं नु मयि धर्मेण पृथिवीमनुशासति । भवन्तो द्रष्टुमिच्छन्ति युवराजं महाबलम् ॥ २५ ॥
ते तमूचुर्महात्मानः पौरजानपदैः सह । बहवो नृप कल्याणगुणाः सन्ति सुतस्य ते ॥ २६ ॥
गुणान्गुणवतो देव देवकल्पस्य धीमतः । प्रियानानन्दनान्कृत्स्नान्प्रवक्ष्यामोऽद्य ताञ्छृणु ॥२७॥
दिव्यैर्गुणैः शक्रससो रामः सत्यपराक्रमः । इक्ष्वाकुभ्योऽपि सर्वेभ्यो ह्यतिरिक्तो विशांपते ॥२८॥

तेषां पौरादीनां वचनं श्रुत्वा तद्वचनभङ्ग्यैव तेषां मनःप्रियं मनःसंतोषं जानन्नप्यजानन्निव जिज्ञासुः तन्मुखेनैव ज्ञातुमिच्छुः इदं वक्ष्यमाणं वचनमब्रवीत् ॥ २३ ॥

२४] ति० टी०–हे राजानः ! मे वचनं श्रुत्वा तन्निर्बन्धादेव केवलं रामं पतिमिच्छथ, न वस्तुत इति संशयः ॥२४॥

गो० टी०–श्रुत्वेति । हे राजानः ! मे वचनं श्रुत्वैव न तु पूर्वापरं पर्यालोच्य राघवं रामं पतिं राजानमिच्छथेति यत् अयं मे संशयः संशयहेतुः विधेयापेक्षया पुँल्लिङ्गता । संशयप्रकारमाह–किमिदमिति । इदं राघवाभिषेकप्रार्थनं किं किंनिमित्तकमिति तत्त्वतो ब्रूत अत्र निमित्तं याथातथ्येन कथयतेत्यर्थः॥२४॥

२५] ति० टी०–संशयबीजमाह–कथं न्विति । युवराजम् तेन युवत्वात्तत्र नानाविधाधर्माणामभिसंभव इति भावः ॥ २५ ॥

रा० टी०–संशयं प्रकटयन्नाह–कथमिति । महाबलं रामं युवराजमेव भवन्तः कथमिच्छन्ति अत्र हेतुं वदन्त्वित्यर्थः॥२५॥

गो० टी०–पुनः संशयं विशिनष्टि–कथमिति । मयि धर्मेण पृथिवीमनुशासति भवन्तः ममात्मजमतिमुग्धं युवराजं द्रष्टुं कथमिच्छन्ति मयि चिरं स्वसुखनिरभिलाषतया राज्यपरिपालनजागरूके तिष्ठति ममापत्यं पतिमभिलषथ को वा मेऽपराध इति भावः ॥ २५ ॥

२६] ति० टी०–अस्मिन्नाधर्मलेशसंभावनापीत्याशयेनोत्तरयन्ति–त इति । ते नृपाः कल्याणगुणाः प्रजाकल्याणजनका गुणाः ॥ २६ ॥

रा० टी०–ते इति । हे नृपते ! तव पुत्रस्य बहवोऽसंख्येया कल्याणगुणाः सन्ति नृपोचिताः कल्याणगुणा इति वा ॥ २६ ॥

गो० टी०–न ते कश्चिदपराधः किंतु तव पुत्रस्य गुणानामपराध इत्याहुः–त इति । ते राजानः पौरजानपदैः सह पण्डितपामरविशेषेण सर्वे ऐकमत्यं प्राप्येत्यर्थः । महात्मानं महाबुद्धिं तं गुणग्राहिणं दशरथमूचुः हे नृपेति संबोधनेन तारतम्यज्ञतोक्ता ते पुत्रस्य बहवः कल्याणा गुणाः सन्ति तव तु नृपरिपालनमेको गुण इति भावः । रामप्रशंसया तस्यास्या मा भूदिति ते पुत्रस्येत्युक्तं तदतिशयः सर्वोऽपि त्वत्संबन्धकृत इति भावः । गुणा इति बहुवचनेनैव बहुत्वे सिद्धेऽपि बहव इत्युक्त्या असंख्येयगुणत्वमुक्तं पुत्रस्य गुणा इत्यनेन जन्मसिद्धत्वोक्त्या गुणानां स्वाभाविकत्वमुक्तं कल्याणाः अस्मिलेहयप्रत्यनीकाः आश्रयसंबन्धेन शुभीभूता वा गुणाः सत्यज्ञानप्रभृतय उत त्वद्वततया शुभीभूतं याता इत्यभियुक्तोक्तेः अत्र स्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगण इति यामुनाचार्यवचनमनुसंधेयम् ॥ २६ ॥

२७] ति० टी०–देवकल्पस्य देवतुल्यस्य रामस्य प्रियाञ्छत्रूणामप्यानन्दनानिष्टनिवारणपूर्वकेष्टप्रापकत्वेनानन्दजनकान् ॥ २७ ॥

रा टी०–ननु के ते गुणा इत्यत आह–गुणानिति । देव हे राजन्! गुणवतः प्राकृतविलक्षणगुणविशिष्टस्य देवकल्पस्य देवोपलक्षितसर्वसामर्थ्यदातुः धीमतः समाधिकरहितबुद्धिविशिष्टस्य रामस्य प्रियान् सर्वप्रीतिविषयीभूतान् आनन्दनान् सर्वानन्ददातॄन् कृत्स्नान् अस्मज्ज्ञानविषयीभूतनिःशेषान् गुणान् अद्य प्रवक्ष्यामः तान् त्वं शृणु ॥ २७ ॥

गो० टी०–के ते गुणा इत्याकाङ्क्षायां तान् वक्तुं प्रतिजानीते–गुणानिति । हे देव हे राजन् ! गुणवतः प्रशस्तबहुगुणकस्य देवकल्पस्य देवतुल्यस्य धीमतः रामस्य प्रियान् इष्टान् आनन्दनान् प्रीतिजनकान् तान् प्रसिद्धान् कृत्स्नान् गुणान् अद्य प्राप्तकाले शृणु प्रवक्ष्यामः गुणवतो गुणानित्यनेन गुणानामनारोपितत्वेन स्वाभाविकत्वमुक्तं देवकल्पस्येत्यनेन गुणानां संभावितत्वं धीमत इत्यनेन गुणानां मध्ये ज्ञानस्य प्राधान्यमुक्तं ब्राह्मणा आगता वसिष्ठोऽप्यागत इत्यत्र वसिष्ठस्येव प्रियानित्यनेन कल्याणत्वमानन्दनानित्यनेन निरतिशयत्वं कृत्स्नानित्यनेनासंख्येयत्वं च विवक्षितम् । एतावत्पर्यन्तं किमर्थं नोक्तमित्यपेक्षायां भवत्प्रभकाल एवास्मदुक्तेरवसर इत्यर्थेत्यनेन सूचयन्ति–प्रवक्ष्याम इति प्रवचनोक्त्या भगवद्गुणोपदेशेऽधिकारितारतम्यं नास्ति अजानता जानद्भिः श्रोतव्यमित्येवेति सूचितं शृण्वित्यनेन रामगुणश्रवणे निरतिशयानन्दमग्नो भविष्यसि कथंचिन्मनः संस्तम्य श्रोतव्यमित्युक्तम् ॥ २७ ॥

२८] ति० टी०–दिव्यैरमानुषैः इक्ष्वाकुभ्यस्तद्वंश्येभ्यः अतिरिक्तोऽधिकः ॥ २८ ॥

रा० टी०–गुणानेवाह–दिव्यैरित्यादिभिः । अत्र प्रकरणेऽप्युपमानोपमेयभावः ध्रुवत्सविता गच्छतीतिवद्बोध्यः ॥ २८ ॥

गो० टी०–दिव्यैरिति । दिव्यैः अमानुषैः गुणैः शौर्यवीर्यादिभिः शक्रसमः इन्द्रसमः सत्यपराक्रमः अमोघविक्रमः इक्ष्वाकुभ्यः इक्ष्वाकुवंश्येभ्यः सर्वेभ्योऽतिरिक्तः समधिकः ' अ-

१ किमिदमिति गो. पाठः । २ महात्मजमिति गो. पाठः ।

रामः सत्पुरुषो लोके सत्यः सत्यपरायणः । साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह ॥ २९ ॥
प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः । बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः॥ ३० ॥
धर्मज्ञः सत्यसंधश्च शीलवाननसूयकः । शान्तः सान्त्वयिता श्लक्ष्णः कृतज्ञो विजितेन्द्रियः ३१
मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः । प्रियवादी च भूतानां सत्यवादी च राघवः ॥ ३२ ॥
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता । तेनास्येहातुला कीर्तिर्यशस्तेजश्च वर्धते ॥ ३३ ॥

तिरिक्तः समधिकः' इत्यमरः। शौर्यादिभिरिति शेषः । राज्ञो मनः-प्रीणनाय संबोधयन्ति विशांपत इति विशां प्राजानां पते ॥ २८ ॥

२९] ति० टी०–साक्षाद्रामाद्विनिर्वृत्तः रामेणैव प्रतिष्ठापित इत्यर्थः श्रियार्थेन ॥ २९ ॥

रा० टी०–राम इति । लोके अतलादिभूरादिवैकुण्ठादिषु सत्पुरुषो राम एव । च शब्द एवार्थे अत एव पौरुषे चाप्रतिद्वन्द्वः शरैनमित्यादिसङ्गच्छते ॥ २९ ॥

गो० टी०–राम इति । लोके राम एव सत्पुरुषः रिपूणामपि वत्सल इत्यर्थः । सत्यधर्मावेव परायणं परमा गतिर्यस्य सः सत्यधर्मपरायणः सत्यधर्मैकनिरत इत्यर्थः । किंच धर्मः श्रिया तत्फलभूतया संपदा सह रामात्साक्षादव्यवधानेन निर्वृत्तः निष्पन्नः धर्मार्थयोरितरनिरपेक्षतया निर्वाहक इत्यर्थः२९

३०] ति० टी०–सुखत्व इत्यादेस्तुल्य इत्यनेनान्वयः । प्रत्येकगुणेष्वेकैकस्योपमानत्वदर्शनेन रामनिष्ठगुणानामन्यत्रैकत्र वासासंभवो दर्शितः ॥ ३० ॥

रा० टी०–प्रजेति । चन्द्रस्येत्यादेस्तुल्य इत्यत्रान्वयः३० ॥

गो० टी०–रामनिष्ठगुणसमुदायस्यैकत्रासंभवादेकैकगुणयोगेन चन्द्रादीन् दृष्टान्तयन्ति–प्रजेति । प्रजासुखत्वे प्रजानां सुखकरत्वे चन्द्रस्य तुल्यः क्षमागुणविषये वसुधायाः भूमेः तुल्यः बुद्ध्या बुद्ध्यसाधारणधर्मेण बृहस्पतेस्तुल्यः वीर्ये विषये शचीपतेः साक्षात्तुल्यः ' साक्षात्प्रत्यक्षतुल्ययोः ' इत्यमरः ॥ ३० ॥

३१] ति० टी०–संधा प्रतिज्ञा अनसूयकोऽन्यविषयामर्यारहितः सान्त्वयित्वा दुःखितानां दुःखशमयिता श्लक्ष्णः प्रियवचनः ॥ ३१ ॥

रा० टी०–धर्मज्ञ इति । अनसूयकः किंचिद्विषयकासूयानाश्रयः उत्तरपथघटकीभूतानसूयकपदार्थस्तु सर्वकर्तृकवास्तवासूयाया अविषय इत्यर्थः । अत एवोभयोर्न पौनरुक्त्यम् । वस्तुतस्त्वनसूयकपदार्थः बालकाण्डे प्रथमसर्गे व्याख्यातः ॥३१॥३२॥

गो० टी०–धर्मज्ञ इति । धर्मं सामान्यविशेषरूपमशेषं जानातीति धर्मज्ञः सत्या अमोघा संधा प्रतिज्ञा यस्यासौ सत्यसंधः ' संधा प्रतिज्ञा मर्यादा' इत्यमरः । शीलवान् शीलं हि नाम महतो मन्दैः सह नीरन्ध्रेण संश्लेषः तद्वान् अनसूयकः गुणेषु दोषाविष्करणमसूया तद्रहितः बहुत्रीहौ कप् । क्षान्तः क्षमावान् क्षमा अत्राश्रितापराधसहिष्णुत्वं क्षमेरूदित्वात्पक्षे नेट् न केवलं सहिष्णुरपराधिषु सान्त्वयिता कुपितान् दुःखितांश्च प्रति सान्त्ववादी श्लक्ष्णः प्रियंवदः ' समौ श्लक्ष्णप्रियंवदौ' इत्यमरः । कृतज्ञः स्वल्पमपि सकृत्कृतमुपकारं बहुतया जानन्नित्यर्थः । विजितेन्द्रियः विषयचापलरहितः ॥ ३१ ॥

३२] ति० टी० मृदुः सुकरोपासनः स्थिरचित्तत्वमतिसंकटेऽप्यङ्गीकृतापरित्यागः भव्यो दृश्यः अनसूयकोऽन्यनिष्ठासूयाया अविषयः । भूतानां प्राणिनाम् ॥ ३२ ॥

गो० टी०– मृदुरिति । मृदुत्वं समाश्रितजनविश्लेषभीरूत्वं चित्तस्थैर्यं नाम अतिसंकटेऽप्यङ्गीकृतविषयपरित्यागराहित्यं सदा भव्यः कुशलः आश्रिताधीनो वा ॥ ३२ ॥

गो० टी०–प्रियवादीति । ' सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ' इत्युक्तरीत्या प्रियवादित्वेऽपि सत्यवादीत्यर्थः । प्रियवादी च चकारोऽवधारणार्थः । प्रियवाद्येव न तु सत्यमप्यप्रियं वदतीत्यर्थः । 'न ब्रूयात्सत्यमप्रियम् ' इति स्मरणात् । भूतानां भवनमात्रोपाधिकानां सर्वेषां जनानां सत्यवादी सत्यं ब्रूयादितिविहितसत्यवचनः चकारेण प्रियमप्यसत्यं न वदतीत्यवधार्यते । यद्वा सत्यमिति परलोकहितमुच्यते सत्येन लोकान् जयतीतिप्रयोगानुसारात् प्रियवचनस्य निषिद्धसाधारणत्वाददृष्टविरोधिप्रियं न वदतीत्यर्थः । राघवः रघुराक्षससंवादादिषु प्रियसत्यवचनं प्रसिद्धमिति कुलागतो धर्म इत्यर्थः । एतादृशज्ञानवत्त्वं पुस्तकनिरीक्षणादिना पण्डितंमन्यतया वा न भवतीत्याह–बहुश्रुतानामिति । बहुभ्य आचार्येभ्यो बहुभिः शास्त्रैः बहुधा बहुप्रकारेण श्रुतमेषामस्तीति तेषां वृद्धानां शीलवयोवृद्धानां ब्राह्मणानामुक्तलक्षणेषु क्षत्रियेषु सत्स्वपि-ब्राह्मणानेव ज्ञानार्थमुपास्त इत्यर्थः । प्रियवादीत्यादि प्रियवादी ग्रीष्मधर्मसंतप्तस्थले प्रवर्षी बलाहक इव सुशीतलं वचनं वक्तीत्यर्थः । किमीदृशवचनं दिव्यान्तःपुरस्य मातापित्रादीनां वसिष्ठादीनां वा नेत्याह भूतानां सत्तायोगिसकलपदार्थानां च प्रियवादी । किं सर्वत्र प्रियमेव वदति नेत्याह सत्यवादी भूतहितादृष्टार्थवचन इत्यर्थः प्रियहितवादीति भावः । किमिदं विरुद्धं द्वयमघटितघटनासामर्थ्यादित्यपेक्षायां न तथा किंतु कुलप्रभावादित्यादि राघव इति एवंविधगुणः किं सगर्वो वर्तते नेत्याह बह्विति संभावितगुणैरहृतः सन् पुनरप्यतिशयाय ज्ञानिनां प्राङ्गणं गत्वा तिष्ठतीत्यर्थः । यत्किंचिच्छ्रवणमात्रेण तृप्तानां ज्ञानादिवृद्धानां ' सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ' इत्युक्तरीत्या बहुभ्यः सारग्रहणं कृतवानित्यर्थः । ब्राह्मणानां सा विद्या या विमुक्तय इत्युक्तब्रह्मविद्यानिष्ठानां नतु ' विद्यान्या शिल्पनैपुणम् ' इत्युक्तान्यविद्यानिष्ठानाम् उपासिता तद्गृहं गत्वातुवर्तयिता न तु स्वगृहे तानानीय श्रोता ॥ ३३ ॥

३३] ति० टी०–तेनोक्तगुणसमूहेन कीर्तिः शौर्यादिजा,यशो दानादिजा प्रसिद्धिः, तेजः शौर्यम् ॥ ३३ ॥

देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः । सम्यग्विद्याव्रतस्नातो यथावत्साङ्गवेदवित् ॥ ३४ ॥
गान्धर्वे च भुवि श्रेष्ठो बभूव भरताग्रजः । कल्याणाभिजनः साधुरदीनात्मा महामतिः ॥ ३५ ॥
द्विजैरभिविनीतश्च श्रेष्ठैर्धर्मार्थनैपुणैः । यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा ॥ ३६ ॥
गत्वा सौमित्रिसहितो नाविजित्य निवर्तते । संग्रामात्पुनरागत्य कुञ्जरेण रथेन वा ॥ ३७ ॥
पौरान्स्वजनवन्नित्यं कुशलं परिपृच्छति । पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ॥ ३८ ॥
निखिलेनानुपूर्व्या च पिता पुत्रानिवौरसान् । शुश्रूषन्ते च वः शिष्याः कच्चिद्धर्मेषु दंशिताः ॥ ३९ ॥
इति वैः पुरुषव्याघ्रः सदा रामोऽभिभाषते । व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ॥ ४० ॥

रा० टी०—बह्विति । बहुश्रुतादित्रयाणां उपासिता सत्कारकारी तेन उपासनेन ॥ ३३ ॥

गो० टी०—दृढोपासनसिद्धान् गुणानाह—तेनेति । तेन समृद्धोपासनेन कीर्तिः औदार्यादिगुणनिमित्ता प्रथा यशःपराक्रमादिनिबन्धना प्रथा यद्वा कीर्तिः प्रथा यशस्तत्कारणबलादानादिकं तेजः पराभिभवनसामर्थ्यम् ॥ ३४ ॥

३४] ति० टी०—देवाद्यैरित्यादि निर्धारणे षष्ठी ॥ ३४ ॥

रा० टी०—देवेति । देवादीनां सर्वास्त्रेषु देवादिज्ञानविषयीभूतनिखिलास्त्रोपलक्षितशस्त्रास्त्रादिषु विशारदो निपुणः ॥ ३४ ॥

गो० टी०—सम्यगिति । विद्याव्रतस्नातः ' वेदमधीत्य स्नायात् ' इतिस्मृतिप्रक्रियया निखिलवेदाध्ययनव्रताचरणानन्तरभाविस्नानकर्मयुक्तः सम्यक् गुरुकुलवासायङ्गसहिततया साङ्गवेदवित् ' शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा । कल्पश्चेति व्याङ्गतानि वेदाङ्गानि मनीषिभिः ' इत्युक्ताङ्गसहितवेदार्थज्ञः यथावत् यथासंप्रदायम् ॥ ३५ ॥

३५] ति० टी०—गान्धर्वे संगीतशास्त्रे कल्याणानामभिजनो वासस्थानम् । अदीनः क्षोभहेतावप्यक्षुभित आत्मा चित्तं यस्य ॥ ३५ ॥

रा० टी०—गान्धर्व इति । गान्धर्वे गानप्रकारबोधकसंगीतशास्त्रज्ञाने भुवि वैकुण्ठादिभूमिषु श्रेष्ठः कल्याणः अतिशयकल्याणविशिष्टः आभी अतिप्रकाशवान् जनः तत्सखादिर्यस्य स बभूव ॥ ३५ ॥

गो० टी०—गान्धर्वे च संगीतशास्त्रेऽपि सामगानोपयुक्तत्वादिति भावः कल्याणाभिजनः परिशुद्धोभयवंशः साधुस्वयं परिशुद्धः अदीनात्मा क्षोभहेतुष्वप्यक्षोभ्यान्तःकरणः ॥ ३६ ॥

३६–३८] ति० टी०—अभिविनीतः शिक्षितः धर्मेऽर्थे च नैपुणं नैपुण्यं येषां तैः । ग्रामेति कुत्सषष्ठीकं पृथक्पदम् ग्रामस्य नगरस्य वा रक्षार्थे संग्रामं यदा व्रजतीत्यर्थः ॥ ३६–३८ ॥

रा० टी०—द्विजैरिति । धर्मार्थनैपुणैः श्रेष्ठैः द्विजैः ब्राह्मणैरित्यर्थः । अभिविनीतः सर्वकार्यविषयकशिक्षां प्राप्तः सौमित्रिसहितो रामः ग्रामार्थे विवादास्पदीभूतग्रामादिप्राप्त्यर्थं यदा संग्रामं व्रजति तदैव नगरस्य विवादकारणीभूतराजपुरस्य समीपं गत्वा प्राप्य अविजित्य स्वविजयमलब्ध्वा न निवर्तते राजपुरस्य समीपं प्राप्येत्युक्त्या विवादकारणीभूतराजानां रामसंग्रामस्थितौ सामर्थ्याभावः सूचितः तेन रामस्य प्रतापातिशयः सूचितः । नैपुणशब्दः स्वार्थाण्णन्तः वाशब्द एवार्थे सार्धश्लोक एकान्वयी ॥ ३६ ॥

गो० टी०—द्विजैरिति । धर्मार्थनैपुणैः धर्मार्थप्रतिपादनकुशलैः स्वार्थे अण्प्रत्ययः श्रेष्ठैः अभिजनविद्याद्यैस्तयुक्तैः अभिविनीतः सर्वतः सुशिक्षितः ॥ ३७ ॥

गो० टी०—यदेति । ग्रामार्थ इत्यत्र ग्रामेत्यविभक्तिकनिर्देशः ग्रामस्य नगरस्य वार्थे प्रयोजने निमित्ते नाविजित्य निवर्तत इत्यभिधानात् रामस्य सुबाहुमारीचविषये जेतृत्ववदन्यत्रापि शत्रुविषये जेतृत्वमभूदित्यवगम्यते ॥ ३८ ॥

रा० टी०—संग्रामादिति । स्वजनवत् स्वसखादिवत् नित्यं परिपृच्छति ॥ ३७ ॥

गो० टी०—संग्रामादिति । स्फुटम् ॥ ३९ ॥

रा० टी०—पुत्रेष्विति । पुत्रादिषु आनुपूर्व्या ज्येष्ठादिक्रमेण निखिलेन कार्त्स्न्येन औरसान् पुत्रान् पितेव कुशलं परिपृच्छतीत्यनुकृष्यते तत्र प्रेष्याः भृत्याः ॥ ३८ ॥

गो० टी०—कुशलप्रभृप्रकारमाह—पुत्रेष्विति । प्रेष्यः भृत्यः निखिलेन कार्त्स्न्येन आनुपूर्व्यात्प्रधानक्रमेण पृच्छतीत्यनुषज्यते ॥ ४० ॥

३९] ति० टी०—पिता औरसान्पुत्रानिव पौरान्कुशलं पृच्छतीत्यन्वयः । शुश्रूषन्ते च वः शिष्या इति ब्राह्मणान्प्रति प्रभः । धर्मेषु दंशिता अवहिता भृत्या वः सेवन्त इति क्षत्रियान्प्रति प्रभः । कच्चिदिति प्रश्ने । क्वचित् ' धर्मेषु दंशिताः ' इति पाठः ॥ ३९ ॥

रा० टी०—प्रशान्तरमाह—शुश्रूषन्ते इति । धर्मेषु दंशिताः अनवधानतारहिताः वः शिष्याः वो युष्मान् कच्चित् शुश्रूषन्ते इति एवं प्रकारेण पुरुषव्याघ्रो रामः सदा यथोचितसमये अभिभाषते पृच्छतीत्यर्थः ॥ ३९ ॥

गो० टी०—शुश्रूषन्त इति । दंशिताः सन्नद्धाः 'संनद्धो वर्मितः सज्जो दंशितः' इत्यमरः ॥ ४१ ॥

४०] ति० टी०—व्यसनं दुःखम् ॥ ४० ॥

१ कर्मस्विति गो. धर्मेष्विति रा. पाठः । २ नः इति गो. पाठः ।

उत्सवेषु च सर्वेषु पितेव परितुष्यति । सत्यवादी महेष्वासो वृद्धसेवी जितेन्द्रियः ॥ ४१ ॥
स्मितपूर्वाभिभाषी च धर्मं सर्वात्मनाश्रितः । सम्यग्योक्ता श्रेयसां च न विगृह्यकथारुचिः ॥ ४२ ॥
उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथा । सुभ्रूरायतताम्राक्षः साक्षाद्विष्णुरिव स्वयम् ॥ ४३ ॥
रामो लोकाभिरामोऽयं शौर्यवीर्यपराक्रमैः । प्रजापालनसंयुक्तो न रागोपहतेन्द्रियः ॥ ४४ ॥
शक्तस्त्रैलोक्यमप्येष भोक्तुं किं नु महीमिमाम् । नास्य क्रोधः प्रसादश्च निरर्थोऽस्ति कदाचन ॥ ४५ ॥
हन्त्येष नियमाद्ध्यानवध्येषु न कुप्यति । युनक्त्यर्थैः प्रहृष्टश्च तमसौ यत्र तुष्यति ॥ ४६ ॥

रा० टी०—व्यसनेष्विति । मनुष्याणां भृत्यादिवर्गाणां व्यसनेषु प्राप्तेषु सत्सु भृशं दुःखितो भवति सर्वेषु उत्सवेषु च पितेव परितुष्यति ॥ ४० ॥

गो० टी०—सत्पुरुषसंभावितगुणानभिधाय रामस्य साधारणगुणानाह—व्यसनेष्विति । मनुष्याणां दिव्यान्तःपुरस्थितमातृप्रभृतीनां न भवति किंतु मनुष्याणां आदयदरिद्रद्विजादितारतम्यानादरेण मनुष्यजात्याक्रान्तानां व्यसनेषु अल्पानल्पविचारमन्तरेण व्यसनपदार्थेषु भृशं व्यसनवतो यादृशं तादृशं न किंतु पङ्कमग्नगज इव स्वमाहात्म्यानुगुणं यावत्सत्ताकं च दुःखितो भवति नतु दिनक्रमेण विस्मरति इदं दुःखं मत्परिपालनवैगुण्येन खल्वागतमिति नितरां दुःखितो भवति हीरेषा तु ममातुलेति वक्ष्यति उत्सवेषु पुत्रजननादिषु सर्वेषु पुत्रीजननाश्वनादरविरहेण द्वारि चूतकिसलयमालाबन्धनप्रपधीकृत्य प्रहृत्तेष्वित्यर्थः । पितेव पुत्रादीनां पुत्रायुत्सवेषु यः पितुः परितोषो जायते स द्विविधः पामराणामर्थलाभलौकिकसहायनिमित्तः पण्डितानां स्वोत्तारकत्वनिमित्तश्च, एवमुभयविधपरितोषो रामस्याप्यस्ति ' प्रनृत्यन्ति पितामहाः ' 'यथैकोऽपि गयां व्रजेत् ' इतिवत् ' मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये । बहुजन्मसहस्रान्ते दिष्ट्या यस्तु प्रपद्यते ' इतिप्रत्याशासंभवात् अत्र परिशब्दो वीप्सायां वर्तते । अत्रापि भृशमित्यनुवर्तते ॥४२॥

४१] ति० टी०—यथा पुत्रसुखेन पितानन्दवान्भवति तथा प्रजासुखेन राम इति भावः ॥ ४१ ॥

रा० टी०—सत्येति । सत्यवादी सत्यमेव वदति तच्छीलः स्मितपूर्वाभिभाषी स्मितपूर्वमभिभाषते तच्छीलः सर्वात्मना सर्वप्रयत्नेन धर्ममाश्रितः ॥ ४१ ॥

गो० टी०—सत्यवादीति । अतिसंकटावस्थायामपि सत्यवचनशीलः सर्वात्मना धर्मं श्रितः अतिदुर्घटदशायामपि धर्मं न त्यजतीत्यर्थः ॥ ४३ ॥

४२-४३] ति० टी०—न विगृह्यकथारुचिर्विग्रहो वृथाकलहस्तं कृत्वा जल्पवितण्डादिकथारुचिर्यथा प्राकृतस्तथा नेत्यर्थः । ' न विगर्ह्यकथारुचिः ' इतिपाठे निन्द्यकथारुचिर्नेत्यर्थः ॥ ४२-४३ ॥

रा० टी०—सम्यगिति । श्रेयसां कल्याणानां सम्यग्योक्ता प्रापक इत्यर्थः । विगृह्यकथारुचिः विगृह्यकथायां विरोधपूर्वकजल्पादौ रुचिर्न उत्तरोत्तरयुक्तौ वाचस्पतिः बृहस्पतिरेव वक्ता ' न विगर्ह्यकथारुचिः ' इति पाठे निन्द्यकथारुचित्यर्थ इति भट्टः ॥ ४२ ॥

गो० टी०—सम्यगिति । श्रेयसां सम्यग्योक्ता संपादकः न विगृह्य कथारुचिः ' न विग्रह्यकथां कुर्यात् ' इति निषिद्धयोर्जल्पवितण्डयोर्निवृत्तरागः । निवृत्तरागत्वं किमवलम्ब्यत्वान्नेत्याह—उत्तरेति ॥ ४४ ॥

रा० टी०—सुभ्रूरिति । शोभने भ्रुवौ यस्य सः आयतताम्राक्षः आयते विस्तृते ताम्रे अरुणे अक्षिणी यस्य सः ताम्रशब्दस्य कमलपरत्वे आयतकमलपत्रसदृशनेत्रवानित्यर्थः । अयं लोकाभिरामो राम इव शौर्यवीर्यपराक्रमैरुपलक्षितः साक्षात्स्वयं विष्णुः ॥ ४३ ॥

गो० टी०—उक्तकल्याणगुणाढ्यरूपाकारसौभाग्यमाह—सुभ्रूरिति । शूरस्य भावः शौर्यं तच्च मरणनिर्भयत्वं ' शूरो मरणनिर्भयात् ' इतिवचनात् वीर्यं स्वयमविकृतः सन् परान् विविधमीरयति विद्रावयतीति वीरः तस्य भावो वीर्यं दुष्प्रवेशचक्रव्यूहादिविशिष्टसैन्ययुक्तान् देवासुरानपि येनोत्साहेनाक्रामति स पराक्रमः ॥ ४५ ॥

४४-४५] ति० टी०—शौर्यं युद्धे निर्भयप्रवेशसामर्थ्यम् वीर्यं स्वस्याविकार एव परस्य विकारापादनम् पराक्रमो युद्धे शस्त्रसंचारः रागो विषयेच्छा ॥ ४४-४५ ॥

रा० टी०—प्रजेति । प्रजापालनसंयुक्तोऽपि रागोपहतेन्द्रियः रागेण अत्यन्तरागेण उपहतानि पराभूतानि इन्द्रियाणि यस्य स न अत एव एष रामः त्रैलोक्यं भोक्तुं पालयितुं शक्तः समर्थः इमां महीं भोक्तुं समर्थश्चेत्किमु वक्तव्यम् ॥ ४४ ॥

गो० टी०—प्रजेति । रामो राज्यमुपासित्वेत्युक्तरीत्या प्रजापालनतत्त्वज्ञः न रागोपहतेन्द्रियः इन्द्रियचापलरहित इति न समाप्तः भोक्तुं पालयितुम् ॥ ४६ ॥

रा० टी०—नेति । निरर्थः निष्प्रयोजनः अस्य रामस्य क्रोधः प्रसादश्च कदाचन नास्ति एष रामः नियमाद्ध्यान् हन्ति अवध्येषु अवध्येभ्यः न कुप्यति ' नावध्ये खलु ' इति भूषणपाठः ॥ ४५ ॥

गो० टी०—नेति । नियमात् नियमेन वध्यान् शास्त्रतो वध्यान् हन्त्येव अवध्ये शास्त्रतः अवध्ये विषये ॥ ४७ ॥

४६] ति० टी०—क्रोधप्रसादसार्थक्यमेवोपपादयति—हन्तीत्यादि । यत्र यस्मिन्विषये संतोषस्तमर्थैः पूरयतीत्यर्थः ॥ ४६ ॥

१ तत्त्वज्ञ इति गो. पाठः । २ वध्ये न चेति गो. पाठः ।

दान्तैः सर्वप्रजाकान्तैः प्रीतिसंजननैर्नृणाम् । गुणैर्विरोचते रामो दीप्तः सूर्य इवांशुभिः ॥ ४७ ॥
तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् । लोकपालोपमं नाथमकामयत मेदिनी ॥ ४८ ॥
वत्सः श्रेयसि जातस्ते दिष्ट्यासौ तव राघवः । दिष्ट्या पुत्रगुणैर्युक्तो मारीच इव कश्यपः ॥ ४९ ॥
बलमारोग्यमायुश्च रामस्य विदितात्मनः । देवासुरमनुष्येषु सगन्धर्वोरगेषु च ॥ ५० ॥
आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा । आभ्यन्तरश्च बाह्यश्च पौरजानपदो जनः ॥ ५१ ॥
स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः । सर्वा देवान्नमस्यन्ति रामस्यार्थे मनस्विनः ॥
तेषां तदाचितं देव त्वत्प्रसादात्समृद्ध्यताम् । ॥ ५२ ॥

रा०टी०–युनक्तीति । असौ रामः यत्र यस्मिन् जने तुष्यति तं जनं प्रहृष्टः सन् अर्थैस्तदीप्सितवस्तुभिर्युनक्ति संयोजयति । अथ पृथक्–दान्तैरिति । सर्वप्रजाकान्तैः निखिलजनेच्छाविषयीभूतैः अत एव नृणां प्रीतिसंजननैः प्रीत्युत्पादकैः दान्तैः यथोचितदण्डकारणीभूतैः गुणैः अंशुभिर्दीप्तः सूर्य इव रामो विरोचते शोभते 'शान्तैः' इति पाठान्तरम् ॥ ४६ ॥

गो० टी०–युनक्तीति । यत्र यस्मिन् पुरुषे तुष्यति तं तुष्टोऽसौ अर्थैरभिलषितपदार्थैः युनक्ति योजयति ॥ ४८ ॥

४७] ति० टी०–दान्तैः स्वमनोदमनैः ॥ ४७ ॥

गो० टी०–शान्तैरिति । शान्तैः शमप्रधानैः सर्वप्रजानां कान्तैः काम्यमानैः सर्वजनभोग्यैरित्यर्थः । अत एव प्रीतिसंजननैः 'दान्तः' इतिपाठे यमनियमादिरूपतपःक्लेशसहः 'तपः क्लेशसहो दान्तः' इत्यमरः । दीप्तः ग्रीष्मादिकालिकः ॥ ४९ ॥

४८] ति० टी०–मेदिनी तत्स्थो जनः ॥ ४८ ॥

रा० टी०–तमिति । एवंगुणसंपन्नं रामं मेदिनी पृथ्वी नाथं स्वपतिमकामयत ऐच्छत् ॥ ४७ ॥

गो० टी०–तमिति । मेदिनी मेदिनीस्थजनता ॥ ५० ॥

४९] ति० टी०–असौ ते वत्सो दिष्ट्यास्मद्भाग्येन श्रेयसि प्रजारक्षणरूपे समर्थो जातः । किं चासौ राघवस्तव दिष्ट्या भाग्येन मरीचिप्रजापतेः पुत्रः कश्यप इव पुत्रगुणैर्युक्तो जात इत्यर्थः ॥ ४९ ॥

रा० टी०–वत्स इति । ते वत्सः श्रेयसि सर्वकल्याणार्थं तव दिष्ट्या भाग्यवशेन जातः प्रादुर्भूतः दिष्ट्या भाग्यवशेनैव असौ राघवः मारीचः मरीचिपुत्रः कश्यप इव पुत्रगुणैर्युक्तः आसीदिति शेषः ॥ ४८ ॥

गो० टी०–वत्स इति । तव दिष्ट्या भाग्येन श्रेयसि श्रेयोनिमित्तं वत्सः पुत्रो जातः पुत्रगुणैर्युक्तः पुन्नाम्नो नरकात्त्रायत इति व्युत्पत्तिसिद्धपितृतारकगुणैर्युक्तः मारीचः मरीचेः पुत्रः काश्यपः कश्यपगोत्रः ॥ ५१ ॥

५०–५१] ति० टी०–देवासुरादिषु राष्ट्रे पुरवरे च वर्तमानः [illegible]पि जनो रामस्य बलाद्याशंसते । आभ्यन्तरः सेवक ५०–५१ ॥

रा० टी०–बलमिति । देवादिषु वियमानः सर्वो जनः विदितात्मनो रामस्य बलादि आशंसते कथयति । सार्धश्लोक एकान्वयी ॥ ४९ ॥

गो० टी०–बलमितिश्लोकद्वयमेकान्वयम् । देवासुरमनुष्येषु सर्वो जनः राष्ट्रे इतरराष्ट्रे पुरवरे इतरपुरवरे च वर्तमानो जनः आभ्यन्तरः अन्तःपुरचारी जनः पौरजानपदः स्वपुरस्वजनपदस्थो जनश्च विदितात्मनः प्रसिद्धशीलस्य रामस्य बलादिकमाशंसते प्रार्थयते । मनुष्यशब्दोऽत्र देवादिसाहचर्यादृषिवचनः ॥ ५२ ॥ ५३ ॥

रा० टी०–आभ्यन्तर इति । पौरजानपदः पुरभवो जनपदभवश्च आभ्यन्तरः सेवकः बाह्यः तद्भिन्नश्च जनवृद्धास्तरुण्यश्च स्त्रियः रामस्यार्थे सर्वान् देवान् नमस्यन्ति अतस्तेषां सेवकादीनामायाचितं प्रार्थितं त्वत्प्रसादात् त्वत्कृपया समृध्यतां संपद्यताम् अत एव हे देव हे राजोत्तम ! सर्वशत्रुनिबर्हणं रामं यौवराज्यस्थं पश्यामः दृष्टा स्मः । "वर्तमानसामीप्ये?" इति भविष्यति लट् तेषामित्यत्र "पुमान्स्त्रिया–" इत्येकशेषः । एतेन रामे सर्वेषां परमानुरागः सूचितः ॥ ५१–५३ ॥

५२] ति० टी०–रामस्यार्थे रामस्य बलादिप्रयोजनार्थे याचितमभिप्रार्थितं रामाभिषेकरूपं समृद्ध्यतां संपद्यताम् ॥ ५२ ॥

गो० टी०–स्त्रिय इति । स्त्रियः अतिगम्भीरतया स्वहृदयं व्यक्तमनाविष्कुर्वत्यः वृद्धाः करणपाटवरहिताः अत्यलसतया सर्वत्रानादरं कुर्वत्यस्तरुण्यः यौवनमदान्धतया विवेकशून्याः सायंप्रातरित्युपलक्षणं त्रिसंध्यमित्यर्थः । तेन मद्गुरुशासनकालनियमोक्तिः । समाहिताः सावधानाः अनेन रामगुणगृहीततया स्वारसिकप्रेमकत्वेन समनस्कत्वमुक्तम् सर्वान् देवानिति प्रेमकलुषिततया न्यूनाधिकविभागमन्तरेण लौकिकवैदिकविभागमन्तरेण च नमस्यन्तीति रामरक्ष्यानेव देवान् रामरक्षकान् मन्यन्त इति प्रेमान्धकाष्ठा दर्शिता । रामस्यार्थे रामस्य बलारोग्यादिप्रयोजनसिद्ध्यैव स्वप्रयोजनं नान्तरीयकमिति तस्यैव प्रयोजनमुद्दिश्य यशस्विनः देवतान्तरनमस्कारस्य रामप्रयोजनपर्यवसितत्वात् रामप्रेमपारवश्येन कृतत्वाच्च स्वरूपविरुद्धदेवतान्तरभजनरूपमयशो नास्तीत्यर्थः ॥ ५५ ॥

शान्तैरिति गो. पाठः । २ विरुरुचे इति गो. पाठः । ३ राघवेति गो. पाठः । ४ काश्यप इति गो. पाठः । ५ सर्वानिति गो. रा. पाठः ६ यशः इति गो. पाठः । ७ आयाचितमिति गो. स. पाठः ।

राममिन्दीवरश्यामं सर्वशत्रुनिबर्हणम् । पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजम् ॥ ५३ ॥
तं देवदेवोपममात्मजं ते सर्वस्य लोकस्य हिते निविष्टम् ।
हिताय नः क्षिप्रमुदारजुष्टं मुदाभिषेक्तुं वरद त्वमर्हसि ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

दशरथेन रामयौवराज्याभिषेकं प्रत्यावेदितो वसिष्ठस्तत्संभारसंपादनार्थं सुमन्त्रमादिदेश । संदिष्टसुमन्त्रेण प्रापितं रामं दशरथो यौवराज्याभिषेकनिश्चयं निवेद्य प्राप्तकालं किंचिदुपदिदेश । रामसखाः कौसल्यां रामयौवराज्यप्राप्तिं न्यवेदयन् । पित्रोपदिष्टमवधार्यान्ते पितरं प्रणम्य रामः स्वावासं जगाम ।

तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः । प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रियहितं वचः ॥ १ ॥
अहोऽस्मि परमप्रीतः प्रभावश्चातुलो मम । यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥ २ ॥
इति प्रत्यर्चितान्राजा ब्राह्मणानिदमब्रवीत् । वसिष्ठं वामदेवं च तेषामेवोपशृण्वताम् ॥ ३ ॥
चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः । यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम् ॥ ४ ॥

गो० टी०–तेषामिति । आयाचितं रामाभिषेकरूपाभिमतार्थप्रार्थनं समृद्धयतां सफलं भवतु ॥ ५५ ॥

५३] ति० टी०–राजोत्तमेति संबोधनम् ॥ ५३ ॥

गो० टी०–राममिति । इन्दीवरश्याममिति समुदायशोभोक्ता सर्वशत्रुनिबर्हणमिति स्वसौन्दर्यातिशयदर्शनमग्रचित्तत्वरूपकामादिशत्रुनिबर्हणमित्यर्थः । पश्यामः द्रक्ष्यामः " वर्तमानसामीप्ये वर्तमानवद्वा " इति भविष्यदर्थे लट् ॥ ५६ ॥

५४] ति० टी०–देवदेवो विष्णुस्तत्सदृशमत एव सर्वलोकहिते निविष्टमुदारैर्गुणैर्जुष्टं युक्तमुदारैर्महद्भिश्च परिगृहीतम् ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येअयोध्याकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०–तामिति । देवदेवोपमं देवदेवो विष्णुरुपमा उपमेयं यस्य तं सर्वस्य लोकस्य हिते निविष्टं संस्थितमुदारजुष्टं महद्भिः सेवितं ते आत्मजं रामं नोऽस्माकं हिताय क्षिप्रमभिषेक्तुं त्वमर्हसि ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्वितीयः सर्गः ॥ २ ॥

गो० टी०–तामिति । देवेति संबुद्धिः देवदेवः विष्णुः तत्सदृशमिति वा निविष्टं दत्तावधानमित्यर्थः । उदारजुष्टं औदार्ययुक्तं भावप्रधानो निर्देशः उदारैर्जुष्टं सेवितमिति वा ॥ ५७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

१–२] ति० टी०–अञ्जलिपद्मान्यञ्जलिरूपाणि पद्मानि । पद्माकारानञ्जलीनिति यावत् । प्रगृहीतानि प्रकर्षेण शिरसि बद्धानि प्रतिगृह्य वीक्षणवचनप्रत्यञ्जलिभिर्यथायोगं तासां प्रतिग्रहः ॥ १–२ ॥

रा० टी०–तेषामिति । प्रगृहीतानि प्रकर्षेण गृहीतानि बध्वा शिरोदेशे आनीतानीत्यर्थः । तेषां जनानामञ्जलिपद्मानि अञ्जलयः पद्मानीव तानि प्रतिगृह्य ज्ञात्वा तेभ्यः प्रियहितं वचो राजाऽब्रवीत् ॥ १ ॥

गो० टी०–एवं निश्चिताभिषेकस्य संभारसंभरणप्रवृत्तिस्तृतीये–तेषामिति । प्रगृहीतानि प्रकर्षेण गृहीतानि शिरसि बद्धानीत्यर्थः । अञ्जलिरूपाणि पद्मानि अञ्जलिपद्मानि अञ्जलीनां पद्मकुकुलाकारत्वादत्रत्यपद्मशब्दः पद्मकुकुलपरः प्रतिगृह्य वीक्षणवचनप्रत्यञ्जलिभिर्यथायोगमञ्जलीनां प्रतिग्रहः ॥ १ ॥

रा० टी०–तद्वचनाकारमाह–अहो इति । यत् यस्माद्धेतोः ज्येष्ठं प्रियं पुत्रं रामं यौवराज्यस्थमिच्छथ तस्माद्धेतोः मम प्रभावः अतुलः अत एव अहं परमप्रीतोऽस्मि ॥ २ ॥

गो० टी०–अहो इति । अहोस्मीति संधिरार्षः ॥ २ ॥

३–४] ति० टी०–इति प्रत्यर्चितान्पौरजानपदान्कृत्वा ब्राह्मणानिदमब्रवीत् । तेषां पौरादीनां शृण्वताम् पुर इत्यर्थः । चकारसंग्राह्यमपेक्ष्य ब्राह्मणानिति बहुवचनम् ॥ ३–४ ॥

रा० टी०–इतीति । तान् पौरजानपदान् इति अनेन प्रकारेण प्रत्यर्च्य तेषामुपशृण्वतां सतामेव वशिष्ठं वामदेवं चकारेणान्यानपि ब्राह्मणानिदमब्रवीत् । ' प्रत्यर्चितान् ' इति भट्टपाठः ॥ ३ ॥

गो० टी०–इतीति । राजा दशरथ इति पूर्वोक्तरीत्या तान् प्रार्थनापरान् ब्राह्मणान् अभ्यर्च्य मधुरवचनैः संमान्य तेषामेवोपशृण्वतां तेषु उपशृण्वत्सु सत्स्वेव वसिष्ठं वामदेवं चेदमब्रवीत् ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–चैत्र इति । पुष्पितकाननः

राज्ञस्तूपरते वाक्ये जनघोषो महानभूत् । शनैस्तस्मिन्प्रशान्ते च जनघोषे जनाधिपः ॥ ५ ॥
वसिष्ठं मुनिशार्दूलं राजा वचनमब्रवीत् । अभिषेकाय रामस्य यत्कर्म सपरिच्छदम् ॥ ६ ॥
तदद्य भगवन्सर्वमाज्ञापयितुमर्हसि । तच्छ्रुत्वा भूमिपालस्य वसिष्ठो मुनिसत्तमः ॥ ७ ॥
आदिदेशाग्रतो राज्ञः स्थितान्युक्तान्कृताञ्जलीन् । सुवर्णादीनि रत्नानि बलीन्सर्वौषधीरपि ॥ ८ ॥
शुक्लमाल्यानि लाजांश्च पृथक्च मधुसर्पिषी । अहतानि च वासांसि रथं सर्वायुधान्यपि ॥ ९ ॥
चतुरङ्गबलं चैव गजं च शुभलक्षणम् । चामरव्यजने चोभे ध्वजं छत्रं च पाण्डुरम् ॥ १० ॥
शतं च शातकुम्भानां कुम्भानामग्निवर्चसाम् । हिरण्यशृङ्गमृषभं समग्रं व्याघ्रचर्म च ॥ ११ ॥

पुष्पविशिष्टकाननविशिष्टः अत एव श्रीमान् अतिशोभाविशिष्टः पुण्यः अयं चैत्रो मासः अस्तीति शेषः अतः रामस्य यौवराज्याय सर्वं सामग्रीजातमुपकल्प्यताम् ॥ ४ ॥

गो० टी०–अभिषेकविषयनिरतिशयादरेण तदुचितकालं प्रशंसति–चैत्र इति । चैत्रः यथेतरेभ्यः प्रधानभूतो रामः तथा मासान्तरेभ्योऽयं मासः श्रीमान् यथा सर्वसुखावहत्वाद्रामः सर्वेषां राजा तथा सर्वसुखकरत्वादसौ सर्वमासानां राजा अयं मासः अभिषेकमनोरथसमय एव सन्निहितः अयं मासः अवतारहेतुरेवाभिषेकहेतुः पुण्यः रमणीयः पुण्यवर्धनो वा पुष्पितकाननः अस्मत्प्रयत्नालंकृतनगरवैलक्षण्येन स्वयमेवालंकृतवनः, यद्वा रामस्य कनककिरीटधारणसमये स्वयं कुसुममुकुटधारी वनप्रदेशो जातः ॥ ४ ॥

५] ति० टी०–जनघोषो रामाभिषेकसंभारोपकल्पनाश्रवणजः ॥ ५ ॥

रा० टी०–राज्ञ इति । राज्ञः वाक्ये उपरते निष्टत्ते सति महान् जनघोषः अभूत् । अर्धं पृथक्–शनैरिति । तस्मिन् जनघोषे शनैः प्रशान्ते सति राजा सर्वविषयकानुरागवान् जनाधिपो दशरथः ॥ ५ ॥

गो० टी०–राज्ञ इति । वसिष्ठशब्दो वामदेवस्याप्युपलक्षणपरः वसिष्ठं वामदेवमिति द्वयोः प्रस्तुतत्वात् एवं व्यादिश्य विप्रौ तावित्युपरिवक्ष्यमाणत्वाच्च प्राधान्याद्वसिष्ठस्योपादानं जनघोषः चिरप्रार्थितरामाभिषेकविषयोऽस्मन्मनोरथः फलित इत्येवंरूपः ॥ ६ ॥

६–७] ति० टी०–वसिष्ठमिति वामदेशोपलक्षणम् अग्र एवं व्यादिश्य विप्रौ त्वित्युक्तेः । परिच्छद उपकरणम् ॥६–७॥

रा० टी०–मुनिशार्दूलं मुनिश्रेष्ठं वसिष्ठमब्रवीत् । तद्वचनाकारमाह–अभिषेकायेति।रामस्य अभिषेकाय अभिषेकं सपरिच्छदमुपकरणसहितं यत् कर्म तत्सर्वमय आज्ञापयितुमर्हसि॥६॥

गो० टी०–अभिषेकायेति । सपरिच्छदं सोपकरणम्॥६॥

रा० टी०–तदिति।भूमिपालस्य तद्वाक्यं श्रुत्वा मुनिसत्तमो वसिष्ठः राज्ञः अग्रतः स्थितान् युक्तान् आज्ञापितसंपादने नियुक्तान्कृताञ्जलीन्मन्त्रिणः आदिदेश आज्ञापयामास ॥ ७ ॥

गो० टी०–तदिति । युक्तान् राजकार्यनियुक्तान् सुमन्त्रादीन् अधिकारिण इति यावत् ॥ ७ ॥

८] ति० टी०–युक्तान्सावधानान् मन्त्रिण इति शेषः । बलीन्पूजाद्रव्याणि विघ्नशामकबल्यर्थानि ॥ ८ ॥

रा० टी०–तदिति । तदाज्ञापनप्रकारमाह–सुवर्णेति । सुवर्णादिनि सुवर्णप्रभृतीनि रत्नानि बलीन्पूजनद्रव्याणि सर्वौषधीः अभिषेकोचितौषधिजातानि ॥ ८ ॥

गो० टी०–सुवर्णादीनीति । बलीन् उपहारान् ‘ करोपहारयोः पुंसि बलिः ’ इत्यमरः । ओषधयः व्रीहिमुद्गादयः शुक्लमाल्यांश्चेति लिङ्व्यत्यय आर्षः पृथक् पृथक् पात्रगृहीते मधुसर्पिषी क्षौद्रघृते अहतानि ‘ ईषद्धौतं नवं श्वेतं सदृशं यन्न धारितम् । अहतं तद्विजानीयाद्दैवे पित्र्ये च कर्मणि ’ इत्युक्तजलप्रक्षालनादिगुणयुक्तानि । चामरव्यजने चामररूपव्यजने शातकुम्भानां सौवर्णानां हिरण्यशृङ्गं हिरण्यालंकृतशृङ्गं समग्रं संपूर्णावयवमुपस्थापयत प्रापयत अग्न्यगारमग्निहोत्रगृहमन्यत्र गन्धपुष्पादिकमेष्टव्यंअपेक्षणीयम् ॥ ८–१२ ॥

९] ति० टी०–पृथक्पृथक्पात्रगृहीते अहतानि सदृशानि तदानीमेव तन्तुवाययन्त्रादुद्धृतानि ॥ ९ ॥

रा० टी०–शुक्लमाल्यानि श्वेतपुष्पाणि लाजांश्च पृथक् अमिश्रे मधुसर्पिषी अहतानि सदृशानि तत्क्षणं तन्तुवाययन्त्रादुद्धृतानीत्यर्थः । वासांसि च रथादीनि च ॥ ९ ॥

१०] ति० टी०–चामरव्यजने चमरपुच्छनिर्मिते व्यजने ॥ १० ॥

रा० टी०–चतुरङ्गबलं रथाद्यङ्गसहितसैन्यं शुभलक्षणं गजं च उभे चामरव्यजने चमरीपुच्छनिर्मितव्यजनविशेषौ किंच चामरं च व्यजनं च ते अत्र चामरस्य द्वित्वविशिष्टत्वेऽप्येकवचनं जात्याभिप्रायेण ॥ १० ॥

११] ति० टी०–शातकुम्भानां सौवर्णानाम् अग्निवर्चसामित्यनेन सुवर्णस्यात्युत्तमत्वं ध्वनितम् । समग्रं नखादिसहितमखण्डम् ॥ ११ ॥

रा० टी०–शतमिति। शातकुम्भानां सौवर्णानामग्निवर्चसां पावकतेजस्कानां कुम्भानां घटानां शतं हिरण्यशृङ्गं हिरण्यालंकृत-

---

१ द्विजेति क्वे. पाठः ।

यच्चान्यत्किंचिदेष्टव्यं तत्सर्वमुपकल्प्यताम् । उपस्थापयत प्रातरग्न्यगारे[2] महीपतेः ॥ १२ ॥
अन्तःपुरस्य द्वाराणि सर्वस्य नगरस्य च । चन्दनस्रग्भिरर्च्यन्तां धूपैश्च घ्राणहारिभिः ॥ १३ ॥
प्रशस्तमन्नं गुणवद्दधिक्षीरोपसेचनम् । द्विजानां शतसाहस्रं यत्प्रकाममलं भवेत् ॥ १४ ॥
सत्कृत्य द्विजमुख्यानां श्वः प्रभाते प्रदीयताम् । घृतं दधि च लाजाश्च दक्षिणाश्चापि पुष्कलाः[5] ॥ १५ ॥
सूर्येऽभ्युदितमात्रे श्वो भविता स्वस्तिवाचनम्[3] । ब्राह्मणाश्च निमन्त्र्यन्तां कल्प्यन्तामासनानि च ॥ १६ ॥
आबध्यन्तां पताकाश्च राजमार्गश्च सिच्यताम्[4] । सर्वे च तालचराः[1] गणिकाश्च स्वलंकृताः ॥ १७ ॥
कक्ष्यां द्वितीयामासाद्य तिष्ठन्तु नृपवेश्मनः । देवायतनचैत्येषु सान्नभक्ष्याः सदक्षिणाः ॥ १८ ॥
उपस्थापयितव्याः स्युर्माल्ययोग्याः पृथक्पृथक् । दीर्घासिबद्धगोधाश्च[5] संनद्धा मृष्टवाससः ॥ १९ ॥

श्रृङ्गविशिष्टम् ऋषभं वृषभं समग्रखण्डम् नखादिसहितमित्यर्थः । व्याघ्रचर्म च 'ऋषभः स्वरभेदे स्यादृष्टवर्गौषधे वृषे' इति विश्वः ॥ ११ ॥

१२] ति० टी०—अन्यदनुक्तमपि लोकप्रसिद्धं गन्धपुष्पादि एष्टव्यमवश्यापेक्षितं तदित्यर्थः । अग्न्यगारेऽग्निहोत्रगृहे उपस्थापयत प्रापयत ॥ १२ ॥

रा० टी०—यदिति । एष्टव्यं नेयमन्यद्यत्किंचित्प्रसिद्धं चन्दनादि तदपि उपकल्प्यतां संपाद्यताम् । तदवधिं बोधयन्नाह—महीपतेः अभ्यागारे प्रातः उपस्थापयत सामग्रीजातमिति शेषः ॥ १२ ॥

१३] ति० टी०—अन्तःपुरं राजवेश्म घ्राणहारिभिरतिसुगन्धैः ॥ १३ ॥

रा० टी०—अन्तरिति । अन्तःपुरस्य राजगृहस्य नगरस्य च द्वाराणि घ्राणहारिभिः अतिसुगन्धविशिष्टैरित्यर्थः । चन्दनस्रग्भिः चन्दनैः स्रग्भिश्च धूपैश्च अर्च्यन्ताम् ॥ १३ ॥

गो० टी०—अन्तःपुरेति । अन्तःपुरस्य राजगृहस्य सर्वस्य नगरस्य द्वाराणि सर्वाणि नगरद्वाराणीत्यर्थः । घ्राणहारिभिः घ्राणद्वारा पुरुषाकर्षकैः ॥ १३ ॥

१४–१६] ति० टी०—प्रशस्तं दृश्यं गुणवद्गुणकसंस्कारं दध्याक्षीरेण चोपसेचनं संस्कारो यस्य तत् । द्विजानां शतसाहस्रं प्रति यत्प्रकाममभिमतमलं पर्याप्तं च भवेत्तत्संपाद्य द्विजमुख्यानां तेभ्यः सत्कृत्य प्रातर्दीयताम् ॥ १४–१६ ॥

रा० टी०—प्रशस्तमिति । द्विजानां शतसाहस्रं प्रतीयते प्रकामं यथेच्छमलं पूर्णं भवेत् तत् दधिक्षीरोपसेचनं दधिक्षीराभ्यामुपसेचनं संस्कारो यस्य तत् प्रशस्तं गुणवत् आलस्याद्यपहारकमन्नं श्वः । अनागतदिवसे प्रभाते प्रातःकाले द्विजमुख्यानां द्विजमुख्येभ्यः सत्कृत्य प्रदीयतां घृतादयः पुष्कलाविपुला दक्षिणाश्च प्रदीयन्ताम् । श्लोकद्वयमेकान्वयि ॥ १४॥१५॥

गो० टी०—प्रशस्तमिति । सहस्रमेव साहस्रं शतसाहस्रशब्दोऽपरिमितवचनः विषयसप्तमी अलं पर्याप्तम् 'अलंभूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः । शतसाहस्रविषये प्रकाममत्यर्थं पर्याप्तं प्राशस्त्यादिगुणविशिष्टं यदन्नं भवेत्तत्संपाद्येत्यर्थः ॥ १४ ॥

रा० टी०—सूर्य इति । श्वः अव्यवहितागामिदिवसे सूर्ये अभ्युदितमात्रे सति स्वस्तिवाचनं भविता अतः ब्राह्मणाः निमन्त्र्यन्ताम् आसनानि च कल्प्यन्ताम् ॥ १६ ॥

गो० टी०—सत्कृत्येति । द्विजमुख्यानां द्विजमुख्येभ्यः सत्कृत्य दीयतां तदन्नमिति शेषः । पुष्कलाः संपूर्णाः ॥ १५ ॥

गो० टी०—सूर्य इत्यादि । सूर्ये अभ्युदितमात्रे सूर्योदयानन्तरमेव श्वः परेद्युः स्वस्तिवाचनं भविता तदर्थं ब्राह्मणाश्च निमन्त्र्यन्तामाहूयन्ताम् आसनानि तेषामिति शेषः आबध्यन्तां प्रतिगृह्यमिति शेषः ॥ १६ ॥

१७] ति० टी०—तालापचरास्तालजीविनः ॥ १७ ॥

रा० टी०—आबध्यन्तामिति । पताकाः आबध्यन्ताम् । अर्धं पृथक्—सर्वे इति । सर्वे तालावचराः तालैः अवचरन्ति जीवन्ति तच्छीलिनः संगीतनिपुणा इत्यर्थः । स्वलंकृताः गणिकाश्च नृपवेश्मनः द्वितीयां कक्षामासाद्य प्राप्य तिष्ठन्तु ॥ १७ ॥

गो० टी०—सर्वे इति । तालैरवचरन्ति जीवन्तीति तालावचराः नर्तकादयः कक्ष्यां द्वितीयामिति अन्तःकक्ष्यायामभिषेकप्रवृत्तेस्तत्र च ब्राह्मणैर्वस्तव्यत्वादिति भावः ॥ १७ ॥

१८] ति० टी०—कक्ष्यां द्वितीयामन्तःकक्ष्यायामभिषेकस्थाने ब्राह्मणानामेव वासादिति भावः । चैत्या वृक्षाः अन्नमोदनं भक्ष्यं च तत्सहिताः दक्षिणा तत्सहिताः ॥ १८ ॥

रा० टी०—देवेति । देवायतनचैत्येषु देवायतनेषु देवालयेषु चैत्येषु चतुष्पथेषु च माल्ययोग्याः माल्योपलक्षितपूजनार्हाः देवताः सान्नभक्ष्याः अन्नभक्ष्यसहिताः सदक्षिणा दक्षिणासहिताः कृत्वा पृथक् पृथक् उपस्थापयितव्याः स्युः । तत्रान्नमोदनं भक्ष्यमपूपादि ॥ १८ ॥

गो० टी०—देवायतनचैत्येषु देवगृहेषु चतुष्पथेषु चेत्यर्थः । अन्नैर्भक्ष्यैः सह वर्तन्त इति सान्नभक्ष्याः अन्नमोदकहस्ता इति यावत् । माल्यप्रदानयोग्याः माल्ययोग्याः मध्यमपदलोपिसमासः । माल्यार्थसाधनानि पृथक्पृथगिति देवायतनचैत्ययोरिति शेषः । ब्राह्मणैर्देवताः पूजनीया इत्यर्थः ॥ १८ ॥

१९] ति० टी०—माल्ययोग्या मालामर्हति माल्यमर्चनं

---

१ एतच्छ्लोकगतार्धयोर्व्यत्यासेन गो. रा. पाठः । २ अग्न्यागारे इति रा. पाठः । ३ तालावचरा इति गो. रा. पाठः । ४ कक्षामिति रा. पाठः । ५ बद्धा योधाश्चेति गो. रा. पाठः ।

महाराजाङ्गनं शूराः प्रविशन्तु महोदयम् । एवं व्यादिश्य विप्रौ तु क्रियास्तत्र विनिष्ठितौ ॥२०॥
चक्रतुश्चैव यच्छेषं पार्थिवाय निवेद्य च । कृतमित्येव चाब्रूतामभिगम्य जगत्पतिम् ॥ २१ ॥
यथोक्तवचनं प्रीतौ हर्षयुक्तौ [3]द्विजोत्तमौ । ततः सुमन्त्रं द्युतिमान्राजा वचनमब्रवीत् ॥ २२ ॥
रामः कृतात्मा भवता शीघ्रमानीयतामिति । स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात् ॥ २३ ॥
रामं तत्रानयांचक्रे रथेन रथिनां वरम् । अथ तत्र सहासीनास्तदा दशरथं नृपम् ॥ २४ ॥
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः। म्लेच्छाश्चार्याश्च ये चान्ये वनशैलान्तवासिनः २५॥
उपासांचक्रिरे सर्वे तं देवा वासवं यथा । तेषां मध्ये स राजर्षिर्मरुतामिव वासवः ॥ २६ ॥

तथोग्रा गन्धपुष्पादयः । देवायतनचैत्ययोः पृथक्पृथगुपस्थापयितव्याः तत्तद्देवतापूजापूर्वकं तत्र तत्र ब्राह्मणतर्पणं कार्यमिति तात्पर्यम् दीर्घा असयो येषां ते बद्धगोधाचर्माणश्चेति द्वन्द्वः । 'दीर्घासिबद्धा योधाः' इति पाठे बद्धदीर्घासयो योधा इत्यर्थः । मृष्टवाससः इत्युपलक्षणमलंकाराणाम् ॥ १९ ॥

रा० टी०–दीर्घेति । दीर्घासिबद्धाः दीर्घासयो महाखड्गास्तैर्बद्धाः संयुक्ताः संनद्धाः धृतकवचाः मृष्टवाससः स्वच्छवस्त्रयुक्ताः सर्वे योधाः महोदयं महाराजाङ्गणं प्रविशन्तु ॥ १९ ॥

गो० टी०–दीर्घासिबद्धा इति । दीर्घासिबद्धाः बद्धदीर्घासयः प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति निष्ठायाः परनिपातः महान्तुदयो रामाभिषेकरूपाभ्युदयो यस्मिन् तं महोदयम् ॥ १९ ॥

२०] ति० टी०–महोदयं महोत्सवविशिष्टमङ्गनम् विप्रौ वसिष्ठवामदेवौ व्यादिश्य अधिकारिण इति शेषः । तत्र नृपवेश्मनि स्थितौ क्रियाः पुरोहितकर्तव्याश्चक्रतुरित्युत्तरेणान्वयः ॥ २० ॥

रा० टी०–एवमिति । तत्र राजभवने सुनिष्ठितौ विप्रौ तौ वसिष्ठवामदेवौ एवं क्रियाः व्यादिश्य आज्ञाप्य शेषमाज्ञापनादुर्वीरितं त्वकर्तव्यं यत् कर्म तत् पार्थिवाय निवेद्य पृष्ट्वा चक्रतुः ॥ २० ॥

गो० टी०–एवमिति । विप्रौ वसिष्ठवामदेवौ क्रियाः पुरोहितकर्तव्याः तत्र राजगृहे व्यादिश्य आज्ञाप्यान्यच्छेषं दासीपरिजनायानयनं तदपि पार्थिवाय राज्ञे निवेद्य चक्रतुः ॥ २० ॥

२१-२२] ति० टी०–यच्चैव शेषं राजोक्तादन्यदवश्यकर्तव्यं तदपि पार्थिवाय निवेद्य चक्रतुः । ततो जगत्पतिमभिगम्य यथोक्तवचनमुक्तवचनमननतिक्रम्य सर्वं कृतं सिद्धं जातमित्यब्रूताम् । प्रीतिर्मानस आनन्दः तदुन्नायको मुखविकासादिर्हर्षः ॥ २१ ॥ २२ ॥

रा० टी०–कृतमिति । जगत्पतिं राजानमभिगम्य यथोक्तवचनं भवदुक्तवचनमननतिक्रम्य कृतं सर्वं निष्पादितमिति हर्षयुक्तौ द्विजोत्तमौ अब्रूताम् । अत्र विप्राविति द्विवचननिर्देशेन राज्ञाज्ञापनसमये वामदेवोऽपि तत्र स्थित इति सूचितम् तत्र वसिष्ठमाज्ञापनं तु तत्प्राधान्यद्योतनाय ॥ २१ ॥

गो० टी०–कृतमिति । अथ जगत्पतिं राजानमभिगम्य यथोक्तवचनमुक्तवचनमननतिक्रम्य कृतमिति प्रीतौ हर्षयुक्तौ प्रीतिर्मनोगतो हर्षः, मानसप्रीतिजन्यरोमाञ्चादिशरीरविकारो हर्षः, तद्युक्तौ पूर्वश्लोके निवेद्येत्यनेन शेषसंपादनविषयनिवेदनमुक्तं, अब्रूतामिति पूर्वोक्तसकलसिद्धिविषयमिति न पुनरुक्तिः ॥ २१ ॥

रा० टी०–तत इति । ततः वसिष्ठवामदेवोक्तिश्रवणानन्तरं द्युतिमान् राजा भवता कृतात्मा कृते सुकृते आत्मा बुद्धिर्यस्य स रामः शीघ्रमानीयतामिति वचनं सुमन्त्रमब्रवीत् ॥२२॥

गो० टी०–तत इति । कृतात्मा सुशिक्षितबुद्धिः शीघ्रागमनहेतुरयम् 'आत्मा जीवे धृतौ बुद्धौ' इत्यमरः॥ २२ ॥ २३ ॥

२३] ति० टी०–कृतात्मा धर्मे कृतबुद्धिः प्रतिज्ञायोक्त्वा२३

रा० टी०–स इति । सुमन्त्रस्तथेति प्रतिज्ञाय राजशासनात् तत्र रामं रथेन आनयाञ्चक्रे आनिनाय ॥ २३ ॥

२४] ति० टी०–तत्र प्रासादे प्रासादस्थो ददर्शेति वक्ष्यमाणत्वात् ॥ २४ ॥

रा० टी०–अथेति । तत्र दशरथाधिष्ठितदेशे समासीनाः प्राच्यादयो भूमिपाः खण्डमण्डलेश्वराः आर्या दिशाधीशत्वादिप्राप्त्या श्रेष्ठाः म्लेच्छाः ये वनशैलान्तवासिनः वनशैलसमीपे वसनशीलाः ते च सर्वे वासवमिन्द्रं देवा इव तं दशरथं नृपमुपासाञ्चक्रिरे सिषेविरे ' अन्तं स्वरूपे नाशे ना न स्त्री शेषेऽन्तिके त्रिषु ' इति मेदिनी । अर्धचतुष्टयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–अथेति । अथ सुमन्त्रनिर्गमनानन्तरं तत्र प्रासादे समासीनाः सम्यगुपविष्टाः प्राच्या इत्यादौ युग्राग्रित्यादिना यदादयः शैषिका भवार्थाः । म्लेच्छाचार्याः म्लेच्छप्रभवः अन्तशब्दः प्रदेशवाची प्राच्येत्यादिना शैलान्तवासिन इत्यन्तेन मूलभूत्यश्रेणिसङ्घद्विषदाटविकमित्यिषड्विधबलोपास्यत्वं सार्वभौमचिह्नमुक्तम् ॥ २४—२६ ॥

२५-२६] ति० टी०–आर्या मध्यदेशवासिनः ॥२५॥२६॥

रा० टी०–तेषामिति । मरुतां देवानां मध्ये प्रासादस्थो वासव इन्द्र इव तेषां प्राच्यादीनां मध्ये प्रासादस्थो राजर्षिर्दशरथः आयान्तमात्मजं रामं ददर्श ॥ २६ ॥

१ अङ्गणं सर्वे इति गो. रा. पाठः । २ ताविति गो. रा. पाठः । ३ द्विजर्षभाविति गो. पाठः । ४ इव वासवमिति गो. पाठः ।

प्रासादस्थो दशरथो ददर्शायान्तमात्मजम् । गन्धर्वराजप्रतिमं लोके विख्यातपौरुषम् ॥ २७ ॥
दीर्घबाहुं महासत्त्वं मत्तमातङ्गगामिनम् । चन्द्रकान्ताननं राममतीवप्रियदर्शनम् ॥ २८ ॥
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् । घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः ॥ २९ ॥
न ततर्प समायान्तं पश्यमानो नराधिपः । अवतार्य सुमन्त्रस्तु राघवं स्यन्दनोत्तमात् ॥ ३० ॥
पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् । स तं कैलासशृङ्गाभं प्रासादं रघुनन्दनः ॥ ३१ ॥
आरुरोह नृपं द्रष्टुं सहसा तेन राघवः । स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके ॥ ३२ ॥
नाम स्वं श्रावयन्रामो ववन्दे चरणौ पितुः । तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ॥ ३३ ॥

२७] ति० टी०—गन्धर्वराजप्रतिमत्वं सौन्दर्यवत्त्वेन च विख्यातपौरुषत्वेन वीरत्वम् ॥ २७ ॥

रा० टी०—राममेव विशेषयन्नाह—गन्धर्वेत्यादिभिः । गन्धर्वराजप्रतिमं गन्धर्वराजः प्रतिमा सौन्दर्यादिना सदृशो यस्य स तं लोके सर्वभुवने विख्यातं पौरुष यस्य तं दीर्घौ बाहू यस्य तं महत् सत्त्वं बलं यस्य तं मत्तमातङ्गगामिनं मत्तगजगमनसदृशगमनशीलं चन्द्रकान्तानन चन्द्रादप्यधिकं कान्तं मनोहरमाननं यस्य तमत एव अतीवप्रियं दर्शनं यस्य तं रूपाणि च औदार्याणि च ते एव गुणाः तैः क्रमेण दृष्टिचित्तापहारिणं घर्माभितप्ताः प्रजाः ह्लादयन्तं पर्जन्यं सजलमेघमिव समायान्तं रामं पश्यमानः पश्यन् नराधिपो राजा न ततर्प । अर्धषट्कमेकान्वयि ॥ २७–२९ ॥

गो० टी०—गन्धर्वराजेत्यादि । गन्धर्वराजप्रतिमं भोगस्रोतः प्रावण्यवेषसौन्दर्येषु गन्धर्वराजोपम्यं न केवलं भोगधारारसिकत्वेन वीररसानभिज्ञत्वमित्याह—लोके विख्यातपौरुषं, पौरुषोपयुक्तसंहननवत्त्वमाह दीर्घबाहुमिति, न केवलं शिरीषपुष्पसुकुमारबाहुत्वेनान्तःसाररहित्यमित्याह—महासत्त्वमिति । तदनुगुणगतिविशेषमाह—मत्तमातङ्गगामिनमिति, सगर्वसलीलगमनं मदालसगमनं वा विवक्षितं चन्द्रकान्तानन चन्द्राननमित्युक्तेऽप्याह्लादकत्वादिसिद्धेर्निरतिशयाह्लादकत्वं द्योतयितुं कान्तशब्दः चन्द्रात्कान्ताननमिति विग्रहः अनेनावयवशोभावत्त्वमुक्तं, रामं विग्रहगुणैः स्वरूपगुणैश्च रमयन्तं, समुदायशोभावत्त्वमाह—अतीवप्रियदर्शनमिति, निरन्तरदर्शनेऽपि प्रतिक्षणं नवनवीभूतदर्शनं रूपौदार्यगुणैः रूपं विग्रहः औदार्यं अनुभवितृभ्योऽनुभवदानम् " य आत्मदा बलदा " इतिश्रुतेः गुण्यते सदानुसंधीयत इति गुणः 'गुणस्त्वाद्यत्तिशब्दादिज्येयेद्रियाश्रुख्यतन्तुषु' इति निघण्टुः । तेन सदानुसंधीयमानं सौशील्यमुच्यते अहो महानयमस्माकृशेषु क्षुद्रेष्वप्यतिसंश्लेषेण वर्तत इति सर्वदानुसंधीयमानत्वात् पुंसामिति कठिनचित्तानामपि किमुत स्त्रीणामिति भावः। यद्वा पुंशब्देन स्त्रीपुंससाधारणमात्ममात्रमुच्यते 'पुमानेको व्यवस्थितः' इति विष्णुपुराणे प्रयोगात् तेन सुरनरतिर्यगादिभेदभिन्नानां स्त्रीपुन्नपुंसकभेदभिन्नानां सर्वेषां दृष्टिचित्तापहार उक्तः वक्ष्यति रामविरहे स्थावरजङ्गमवस्तुमात्रं परिम्लानमिति । यद्वा पुंसामपि रामं पश्यतां स्त्रीभूत्वाहमसुमनुभवेयमित्यभिलाषो भवति यथाहुः ' पाञ्चाल्याः पद्मपत्राक्ष्याः लायन्त्या जघनं घनम् । याः स्त्रियो दृष्टवत्यस्ताः पुंभावं मनसा ययुः ' इति । पश्यमान इति निर्निमेषदर्शनमुक्तं न ततर्पेति प्रतिक्षणमनुभवेऽपि नवनवप्रेमास्पदतया न तृप्तिरभूदित्यर्थः २७–२९

२८] ति० टी०—वीरानुगुणं दीर्घबाहुत्वं महासत्त्वं महाबलवत्त्वं च तदनुमापकं मत्तेत्यादि तेन सगर्वसलीलगमनमुक्तम् । चन्द्रकान्तानननमिति वाचकमात्रलुप्तोपमा अत एवातीव प्रियदर्शनं रामं जनान्तरमयन्तम् ॥ २८ ॥

२९] ति० टी०—रूपौदार्यगुणैः क्रमादृष्टिचित्तहरम् । ग्रीष्मतप्ताः प्रजा ह्लादयन्तं पर्जन्यमिव स्थितम् ॥ २९ ॥

३०–३१] ति० टी०—पश्यमान इत्यार्षम् । न ततर्पेत्यनेनानुक्षणं नवनवप्रेमास्पदत्वम् ॥ ३० ॥ ३१ ॥

रा० टी०—अवतार्येति । सुमन्त्रस्तु स्यन्दनोत्तमादवतार्य उत्तार्य पितुः समीपं गच्छन्तं रामं प्राञ्जलिः सन् पृष्ठतः अन्वगात् अन्वगच्छत् ॥ ३० ॥

रा० टी०—स इति । कैलासशृङ्गाभं तं प्रासादं नरपुंगवो राघवः स रामः नृपं द्रष्टुं तेन सुमन्त्रेण सह आरुरोह । सहेति तृतीययाध्याहृतम् ॥ ३१ ॥

गो०टी०—अवतार्येति । अवतारणं हस्तप्रदानादिना ३०-३१

३२] ति० टी०—सहसा वेगेन तेन सुमन्त्रेण सहेति शेषः । सप्राञ्जलिः साञ्जलिः अभिप्रेत्य प्राप्य प्रणतः कृतसाष्टाङ्गनमस्कारः ॥ ३२ ॥

रा० टी०—स इति । पितुः अन्तिके समीपे अभिप्रेत्य प्राप्य प्राञ्जलिः प्रणतः रामः स्वं नाम श्रावयन् सन् पितुश्चरणौ ववन्दे ॥ ३२ ॥

गो० टी०—स प्राञ्जलिरिति । अभिप्रेत्य प्राप्य प्रणतः ' दण्डवत् प्रणमेद्भूमावुपेत्य गुरुमन्वहम् ' इत्युक्तप्रक्रियया दण्डवत् प्रणत इत्यर्थः । स्वं नाम श्रावयन् ' शर्मेति ब्राह्मणस्योक्तं वर्मेति क्षत्रियस्य च ' इतिवचनाद्रामवर्माहमस्मि भो इति श्रावयन्नित्यर्थः ॥ ३२ ॥

३३] ति० टी०—स्वं नाम श्रावयन्रामवर्माहमस्मीत्येवम् । प्रणम्य पार्श्वेऽवस्थानं पुत्रधर्मः ॥ ३३ ॥

१ पुंगव इति गो. रा. पाठः । २ सह सूतेनेति गो. पाठः ।

गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजम् । तस्मै चाभ्युद्यतं सम्यङ्मणिकाञ्चनभूषितम्॥ ३४ ॥
दिदेश राजा रुचिरं रामाय परमासनम् । तथासनवरं प्राप्य व्यदीपयत राघवः ॥ ३५ ॥
स्वयैव प्रभया मेरुमुदये विमलो रविः । तेन विभ्राजिता तत्र सा सभापि व्यरोचत ॥ ३६ ॥
विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना । तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम् ॥ ३७ ॥
अलंकृतमिवात्मानमादर्शतलसंस्थितम् । स तं सुस्थितमाभाष्य पुत्रं पुत्रवतां वरः ॥ ३८ ॥
उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः । ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ॥ ३९ ॥
उत्पन्नस्त्वं गुणज्येष्ठो मम रामात्मजः प्रियः । त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः ॥ ४० ॥

रा० टी०–तमिति । नृपो दशरथः पार्श्वे स्वसमीपे प्रियमात्मजं दृष्ट्वा समाकृष्य स्वसंमुखं प्रापय्य अञ्जलौ गृह्य गृहीत्वा सस्वजे ॥ ३३ ॥

३४] ति० टी०–अञ्जलावञ्जलिप्रदेशे रामं स्वयमेव गृह्य गृहीत्वा समाकृष्य स्वसंमुखमानीय । अभ्युद्यतमुपस्थापितम् ॥ ३४ ॥

रा० टी०–तस्मै इति । सम्यगभ्युद्यतं भृत्यैः प्रापितं मणिकाञ्चनभूषितं परमरुचिरं रमणीयमासनं तस्मै रामाय राजा दिदेश ददौ उपवेष्टुमाज्ञापयामासेत्यर्थः ॥ ३४ ॥

गो० टी०–अञ्जलौ गृह्य अञ्जलिं प्रगृह्य सक्थिनि कर्णे वा गृहीत्वेतिमहाभाष्यकारवचनात् अञ्जलाविति कर्मणि सप्तमी ॥ ३३ ॥

गो० टी०–तस्मै इति । अभ्युदितमुन्नतम् ॥ ३४ ॥

३५] ति० टी०–परमुत्कृष्टं व्यदीपयताशोभयत । अत्रासनं कर्म ॥ ३५ ॥

रा० टी०–तदिति । तत् पित्रा दत्तं वरमासनं प्राप्य स्वयैव प्रभया दीप्त्या उदये विमलो रविः मेरुमिव राघवो रामः व्यदीपयत प्राकाशयत् ॥ ३५ ॥

गो० टी०–तदिति । आसनवरं प्राप्य तदासनं स्वयैव प्रभया व्यदीपयत् विमलो रविरुदयमेरुं प्राप्येव सूर्यस्य प्रधानमेरुप्राप्तेः साक्षादभावात् अत्र मेरुशब्देनास्तादिसमीपवर्ती सावर्णिमेरुरुच्यते उदयश्चोत्तरवर्षस्थितसिद्धपुरवासिजनापेक्षया । इयमुदयास्तमयव्यवस्था सूर्यसिद्धान्ते आर्यभटे च प्रसिद्धा । 'भूवृत्तपादे पूर्वस्यां यवकोटीति विश्रुता । भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा ॥ याम्यायां भारते वर्षे लङ्का तद्वन्महापुरी। पश्चिमे केतुमालाख्ये रोमकेति च कीर्तिता ॥ उदक् सिद्धपुरी-नाम कुरुवर्षे प्रतिष्ठिता । उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे । मध्याह्ने यवकोट्यां रोमकविषयेऽर्धरात्रं स्यात् । भारतादिषु वर्षेषु तद्वदेव परिभ्रमन् । मध्योदयार्धरात्रांस्तु कालान् कुर्यात्प्रदक्षिणम् ' इति ॥ ३५ ॥

३६] ति० टी०–स्वयैव प्रभयेति दीपने करणम् । उदयकाले रविर्मेरुमिव सा वसिष्ठदशरथादिभाजिता सभापि न केवलमासनमेवेत्यर्थः । व्यरोचत विशेषेण चकाशे ॥ ३६ ॥

रा० टी०–तेनेति । तत्र तस्मिन् समये तेन रामेण विभाजिता प्रकाशिता सा सभा विमलग्रहनक्षत्रा मलनिवर्तकग्रहादिसहिता इन्दुना विभ्राजिता शारदी शारत्कालिका द्यौरिव व्यरोचत ॥ ३६ ॥

गो० टी०–तेनेति । विभ्राजता प्रकाशमानेन विमलग्रहनक्षत्रेतिदृष्टान्तबलेन दशरथवसिष्ठादिभिरीषत्प्रकाशितत्वमवगम्यते ॥ ३६ ॥

३७] ति० टी०–ग्रहनक्षत्रादियुक्तमप्याकाशमिन्दुनेव ३७

रा० टी०–तमिति । आदर्शतलसंस्थितं दर्पणादौ प्रतिबिम्बितमलंकृतमात्मानमिव तं प्रियमात्मजं रामं पश्यमानः पश्यन् नृपतिस्तुतोष ॥ ३७ ॥

गो० टी०–तमिति । पश्यमानः पश्यन् आदर्शतलसंस्थितमित्यनेन रामस्य मुखनासिकाचरणादिसर्वावयवेन पितृसरूपत्वमावेदितम् ॥ ३७ ॥

३८] ति० टी०–आदर्शतलप्रतिबिम्बितमलंकृतमात्मानं पश्यन्निव तं पश्यंस्तुतोष तेन पितृसदृशावयवत्वं सूचितं रामस्य । आभाष्य रामेति संबोध्य ॥ ३८ ॥

रा० टी०–स इति । देवेन्द्रं कश्यप इव पुत्रवतां वरः श्रेष्ठः स राजा स्थितं पुत्रं तं राममाभाष्य संबोध्य इदं वच उवाच३८

गो० टी०–स इति । तस्मिन्तामिति क्रियाविशेषणं आभाष्य रामेति संबोध्य ॥ ३८ ॥

३९] ति० टी०–तदाह यदुवाच–ज्येष्ठायामिति ॥३९॥

रा० टी०–तद्वचनाकारमाह–ज्येष्ठायामिति । यतः मे ज्येष्ठायां सदृश्यां पत्न्यां गुणज्येष्ठः गुणैः श्रेष्ठः सदृशः मत्तुल्यरूपः ममात्मजः औरस इत्यर्थः । प्रियः सुतस्त्वमुत्पन्नः प्रादुर्भूतोऽसि यतश्च त्वया इमाः प्रजाः स्वगुणैः अनुरञ्जिताः तस्मात् पुण्ययोगेन पुण्यस्य योगः संबन्धो यस्मिन् तेन तस्मिन् काले इत्यर्थः । यौवराज्यमस्मदुक्तयुवराजत्वमवाप्नुहि प्राप्नुहि । तृतीया स्वराधिकरणस्य करणत्वविवक्षया । अर्धचतुर्थमेकान्वयि ॥ ३९ ॥ ४० ॥

गो० टी०–रामस्यैव राज्याभिषेकार्हतामभिप्रायेणाह–ज्येष्ठायामिति । आत्मजः सुत औरसः सुतः ॥ ३९ ॥

४०] ति० टी०–गुणैर्ज्येष्ठोऽत एव मम प्रियः यतस्त्वयेत्यन्वयः ॥ ४० ॥

१ तदेति गो. रा. पाठः । २ अभीति गो. पाठः ।

तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि । कामतस्त्वं प्रकृत्यैव निर्णीतो[1] गुणवानिति ॥ ४१ ॥
गुणवत्यपि तु स्नेहात्पुत्र वक्ष्यामि ते हितम् । भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ॥ ४२ ॥
कामक्रोधसमुत्थानि त्यजस्व व्यसनानि च । परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ॥ ४३ ॥
अमात्यप्रभृतीः सर्वाः प्रजाश्चैवानुरञ्जय । कोष्ठागारायुधागारैः कृत्वा संनिचयान्बहून् ॥ ४४ ॥
इष्टानुरक्तप्रकृतिर्यः[2] पालयति मेदिनीम् । तस्य नन्दन्ति मित्राणि लब्ध्वामृतमिवामराः[3] ॥ ४५ ॥

गो० टी०–यत इति । पुष्ययोगेनेति " प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया पुष्येण चन्द्रमसो योगः पुष्ययोगः तदुपलक्षितकाल इत्यर्थः । पुष्यनक्षत्रयुक्ते दिवस इत्यर्थः ॥४०॥

४१] ति० टी०–पुष्ययोगेन चन्द्रस्य पुष्ययोगोपलक्षितकाले । अधिकरणस्य करणत्वविवक्षया तृतीया । प्रकृत्या स्वभावेन कामतः प्रकामम् अत्यर्थमिति यावत् ॥ ४१ ॥

रा० टी०–कामत इति । प्रकृत्या स्वभावेनैव कामतः अत्यन्तं गुणवान् सर्वसद्गुणसंपन्नः इति हेतोः विनीतेः पित्रादिषु नित्यं नतस्त्वमसि । एतेन त्वं नोपदेष्टव्योऽसीति सूचितम् । नन्वु तर्हि नोपदिशेत्यत आह–गुणवतीति । गुणवति निखिलसद्गुणविशिष्टेऽपि त्वयि स्नेहात् पित्रुचिताद्दरागादेव ते हितं कर्तव्यं किंचित् वक्ष्यामि ॥ ४१ ॥

गो० टी०–कामत इति । कामतः प्रकामं गुणवति त्वयीति शेषः यद्यपि भवान् सर्वगुणसंपन्नः तथापि पुत्रस्नेहाद्भवते किंचिदुपदिशामीत्यर्थः ॥ ४१ ॥

४२] ति० टी०–गुणवति सत्यपि । स्नेहात्तु स्नेहादेव । विनीत एव सन्भूयोऽधिकं विनयमास्थाय ॥ ४२ ॥

रा० टी०–तद्वचनाकारमाह–भूय इति । भूयोऽधिकं विनयं विनीततामास्थाय जितेन्द्रियो नित्यं भव अत एव कामक्रोधसमुत्थानि व्यसनानि स्त्रीयूतादीनि त्यजस्व । तथाहि 'स्त्रीयूतमृगयामद्यवाक्पारुष्योग्रदण्डताः। अर्थसंदूषणं चेति राज्ञां व्यसनसप्तकम्' इति । वचनान्तरमपि ' मृगयाक्षो दिवास्वापः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः' इति । अन्यच्च 'पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डनं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ' इति ॥ ४२ ॥

गो० टी०–भूय इति । भूयो विनयं सातिशयविनयं कामक्रोधसमुत्थानि व्यसनानि ' स्त्रीयूतमृगयामद्यवाक्पारुष्योग्रदण्डताः । अर्थसंदूषणं चेति राज्ञां व्यसनसप्तकम् ' इत्युक्तानि व्यसनानि अर्थसंदूषणं पित्रादिसंचितार्थस्य नाशनं, यद्वा ' मृगयाक्षो दिवास्वापः परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाट्या च कामजो दशको गणः' इत्येतानि कामजानि ' पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाक्दण्डयोश्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ' इत्युक्तानि क्रोधजानि च व्यसनानि ॥ ४२ ॥

४३] ति० टी०–कामजानि स्त्रीयूतमृगयामधुसेवनादीनि । क्रोधजानि वाक्पारुष्योग्रदण्डत्वार्थदूषणानि व्यसनानि त्यजेथाः[2] । तत्रार्थदूषणं पित्रादिसंचितार्थस्य नाशनम् । परोक्षयाचारसुखतः परोक्षानुभवसिद्धया वृत्त्या स्वपरराष्ट्रवृत्तान्तविचारेण प्रत्यक्षया सदा सभायां स्थित्वा स्वप्रत्यक्षया वृत्त्या प्रजान्यायादिविचारेण युक्तो भव ॥ ४३ ॥

रा० टी०–परोक्षयेति । परोक्षया चारादिद्वारा सकलदेशवृत्तान्तविचारशीलया प्रत्यक्षया सभादौ प्रत्यक्षीभूतजनवृत्तान्तविचारशीलया च वृत्त्या कोष्ठागारायुधागारैः कोष्ठागारेषु सन्निचयान् रत्नस्वर्णरजतवस्त्राभरणादीन् बहून् अधिकान् कृत्वा अमात्यप्रभृतीः सर्वाः प्रजाः अनुरञ्जय प्रमोदय तत्र कोष्ठागाराणि धान्यगृहाणि आयुधागाराणि शस्त्रास्त्रगृहाणि । अर्धत्रयमेकान्वयि ॥ ४३ ॥ ४४ ॥

गो० टी०–परोक्षयेति । अप्रत्यक्षया वृत्त्या तक्षप्रभृतिकर्मान्तिकानां परोक्षो भूत्वाधिकृतसुखेन यत्कार्याणि संविधत्ते सा परोक्षवृत्तिः अव्यवधानेनामात्यादीन् यया वृत्त्यानुगृह्णाति सा प्रत्यक्षवृत्तिः ताभ्यां वर्तमानः सन् अमात्यप्रभृतीः सर्वाः प्रकृतीश्चानुरञ्जयेति संबन्धः, यद्वा परोक्षया चारसुखतः परोक्षानुभवसिद्धया वृत्त्या स्वपरराष्ट्रवृत्तान्तविचारेण सह वर्तमानो भव तथा प्रत्यक्षया नित्यं यथाकालमास्थानमास्थाय स्वानुभवसिद्धयथोक्तवृत्तान्तविचारो भव अमात्यप्रभृतीः सर्वाः प्रकृतीः अमात्यसेनानीपुररक्षिणः पौरजानपदाः सर्वप्रजाश्चानुरञ्जय ॥ ४३ ॥

४४] ति० टी०–तेनामात्यप्रभृतीरमात्यसेनापतिपुरराष्ट्रादिकपौरजानपदसर्वप्रजा अनुरञ्जय च । अयुतनियुतादिसंख्यखर्वादिपरिच्छिन्नधान्यग्राहीणि कोष्ठरूपाण्यगाराणि आयुधागाराणि शस्त्रगृहाणि तैः सह । सम्यङ्निचीयन्तेऽस्मिन्निति संनिचया रत्नहेमाभरणरजतवस्त्रादिकोशगृहाणि बहूनि विपुलानि कृत्वा संपूर्य प्रजा अनुरञ्जयेति पूर्वेणान्वयः ॥ ४४ ॥

गो० टी०–कोष्ठागारेत्यादिश्लोकद्वयमेकान्वयम् । कोष्ठागाराणि अयुतनियुतादिसंख्यधान्यराशिग्राहीणि कोष्ठरूपतया निर्मितान्यगाराणि आयुधागाराणि समयनिजबलापेक्षितादशविधायुधप्रतिष्ठागाराणि तैः सह सन्निचयान् निचीयन्ते एष्विति निचयाः नवरत्नहेमरजतवस्त्राभरणादिसंपूर्णास्तत्तत्कोशाः तान् । तुष्टानुरक्तप्रकृतिरिति उक्तनिचयबलादिति शेषः मित्राणि सामन्ताः आत्मानं मनः ॥ ४४ ॥ ४५ ॥

४५] ति० टी०–इष्टाः स्वस्यानुरक्ताः स्वस्मिन्प्रकृतयः प्रजा यस्य तस्य मित्राण्यमृतं लब्ध्वामरा इव तं लब्ध्वा नन्दन्ति ॥ ४५ ॥

१ विनीत इति गो. रा. पाठः । २ त्यजेथा इति गो. पाठः । ३ तुष्टेति गो. पाठः ।

तस्मात्पुत्र त्वमात्मानं नियम्यैवं समाचर । तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ॥ ४६ ॥
त्वरिताः शीघ्रमागत्य कौसल्यायै न्यवेदयन् । सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥ ४७ ॥
व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा । अथाभिवाद्य राजानं रथमारुह्य राघवः ॥
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥ ४८ ॥
ते चापि पौरा नृपतेर्वचस्तच्छ्रुत्वा तदा लाभमिवेष्टमाशु ।
नरेन्द्रमामन्त्र्य गृहाणि गत्वा देवान्समानर्चुरभिप्रहृष्टाः ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ।

दुःस्वप्नदर्शनादभिषेकभयमाशङ्कमानो दशरथस्तदैव राममानाय्य भरतागमनात्प्रागेवाभिषेकः संपाद्य इति निवेद्य सीतया सममाचरितव्यां व्रतचर्यामादिदेश । दशरथाभ्यनुज्ञातो रामः कौसल्यान्तःपुरं प्रविश्य तयाशीर्भिरभिवर्धितः सन्पूर्वं तत्रागतया सीतया समं स्वावासं प्राप ।

गतेष्वथ नृपो भूयः पौरेषु सह मन्त्रिभिः । मन्त्रयित्वा ततश्चक्रे निश्चयज्ञः स निश्चयम् ॥ १ ॥
श्व एव पुष्यो भविता श्वोऽभिषेच्यस्तु मे सुतः । रामो राजीवपत्राक्षो युवराज इति प्रभुः ॥ २ ॥

रा० टी०–प्रजानुरञ्जने प्रयोजनमाह–इष्टेति । इष्टाः स्वेप्सिताः अनुरक्ताः स्वविषयकानुरागयुक्ताः प्रकृतयः प्रजा यस्य सः यो मेदिनीं पृथ्वीं पालयति तस्य मित्राणि अमृतं लब्ध्वा अमराः देवा इव नन्दन्ति 'तुष्टानुरक्तः' इति भूषणपाठ ॥ ४६ ॥

४६-४७] ति०टी०–तदभिषेकप्रयोजनं पित्रुपदेशम् ॥ ४६-४७ ॥

रा० टी०–तस्मादिति । तस्मादुक्तहेतोः हे पुत्र ! आत्मानं मनो नियम्य एवं मदुक्तं समाचर । अर्थं पृथक्-तदिति । रामस्य प्रियकारिणः सुहृदः तत् राजवचनं श्रुत्वा त्वरिताः सन्तः आगत्य कौशल्यायै शीघ्रं न्यवेदयन् ॥ ४६ ॥

गो० टी०–तदिति । तत् रामाभिषेकप्रस्तावनम् ॥ ४६ ॥

रा० टी०–सेति । सा श्रुतरामाभिषेकवार्ता प्रमदोत्तमा कौशल्या प्रियाख्येभ्यः अभिषेकवार्ताकथयितृभ्यः हिरण्यादीनि व्यादिदेश प्रददौ ॥ ४७ ॥

गो० टी०–सेति । प्रियाख्येभ्यः प्रियं रामाभिषेकमाचक्षत इति प्रियाख्याः "वक्षिकःख्याञ्" इति ख्याञादेशः ॥ ४७ ॥

४८] ति० टी०–प्रियाख्येभ्यो रामाभिषेकरूपप्रियवक्तृभ्यः ॥ ४८ ॥

रा० टी०–अथेति । अथ राजोपदेशश्रवणानन्तरं राजानमभिवाद्य प्रणम्य रथमारुह्य जनौघैः जनसमूहैः प्रतिपूजितः राघवो रामः द्युतिमत् अतिप्रकाशयुक्तं स्वं वेश्म ययौ ॥ ४८ ॥

गो० टी०–अथेति ॥ ४८ ॥

४९] ति० टी०–इष्टं लाभमिव इष्टवस्तुप्राप्तिरूपमिव आनर्चुः रामाभिषेकनिर्विघ्नतायै ॥ ४९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०–ते इति । तदा राजोक्तिकाले आलाभमाप्तमन्ताद्भावेन लाभः रामाभिषेकप्राप्तिर्यस्मिन् तदेव इष्टमभिलषितं नृपतेः तद्वचः श्रुत्वा आशु शीघ्रं नरेन्द्रमामन्त्र्य प्रशस्य गृहाणि गत्वा अभिप्रहृष्टाः ते पौराः जनाः देवान् समानर्चुः रामाभिषेककामनया पूजयामासुः ॥ ४९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे तृतीयः सर्गः ॥ ३ ॥

गो० टी०–त इति । आनर्चुः रामाभिषेकविघ्नवारणाय ॥ ४९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०–निश्चयज्ञस्तत्कार्यार्हदेशकालनियमज्ञः निश्चयं रामाभिषेककालविषयम् ॥ १ ॥

२] ति०टी०–तदाहश्व–एवेति । युवराज इति प्रभुरिति निश्चयमिति पूर्वेणान्वयः । उभाभ्यां प्रजान्यायदर्शनदण्डादिष्वयमेवाधिकारीति सूचितम् ॥ २ ॥

रा० टी०–पौरागमनानन्तरकालिकं राजवृत्तान्तमाह–गतेष्वित्यादिभिः । पौरेषु गतेषु सत्सु निश्चयज्ञः स्वकीयनिश्चयस्य बोधकः प्रभुः स राजा मन्त्रिभिः सह भूयो मन्त्रयित्वा ततः मन्त्रणाद्धेतोः श्व एव पुष्यो भविता अतः राजीवपत्राक्षो मे सुतो रामः श्व एव युवराजोऽभिषेच्य इति निश्चयं नियोगं चक्रे । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–एवं पूर्वविचारितमपि राममाहूयोक्तमपि रामाभिषेकं पुनर्मन्त्रिभिः कालविशेषनिर्णयपूर्वकं राममाहूय सविशेषमुपदिशति चतुर्थे–गतेष्वित्यादिना । श्लोकद्वयमेकान्वयम् । अभिषेच्य इति निश्चयं चक्र इति संबन्धः ॥ १ ॥ २ ॥

१ तान्नाक्ष इति गो पाठः ।

अथान्तर्गृहमाविश्य राजा दशरथस्तदा । सूतमामन्त्रयामास रामं पुनरिहानय ॥ ३ ॥
प्रतिगृह्य तु तद्वाक्यं सूतः पुनरुपाययौ । रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥ ४ ॥
द्वाःस्थैरावेदितं तस्य रामायागमनं पुनः । श्रुत्वैव चापि रामस्तं प्राप्तं शङ्कान्वितोऽभवत् ॥ ५ ॥
प्रवेश्य चैनं त्वरितो रामो वचनमब्रवीत् । यदागमनकृत्यं ते भूयस्तद्ब्रूह्यशेषतः ॥ ६ ॥
तमुवाच ततः सूतो राजा त्वां द्रष्टुमिच्छति । श्रुत्वा प्रमाणं तत्र त्वं गमनायेतराय वा ॥ ७ ॥
इति सूतवचः श्रुत्वा रामोऽपि त्वरयान्वितः । प्रययौ राजभवनं पुनर्द्रष्टुं नरेश्वरम् ॥ ८ ॥
तं श्रुत्वा समनुप्राप्तं रामं दशरथो नृपः । प्रवेशयामास गृहं विवक्षुः प्रियमुत्तमम् ॥ ९ ॥
प्रविशन्नेव च श्रीमान्राघवो भवनं पितुः । ददर्श पितरं दूरात्प्रणिपत्य कृताञ्जलिः ॥ १० ॥
प्रणमन्तं तमुत्थाप्य संपरिष्वज्य भूमिपः । प्रदिश्य चासनं चास्मै रामं च पुनरब्रवीत् ॥ ११ ॥

३] ति० टी०—आमन्त्रयामासानयेत्याज्ञापयामास ॥ ३ ॥

रा० टी०—अथेति । अथ अभिषेककालनिश्चयानन्तरमन्तर्गृहमाविश्य राममिह पुनरानयेति सूतमामन्त्रयामास आज्ञापयामास ॥ ३ ॥

गो० टी०—अथेति । अन्तर्गृहमाविश्येत्यनेन मन्त्रिणामपि विसर्जनं सिद्धम् । आमन्त्रयामास नियोजयामासेत्यर्थः । आनयेत्यत्र इतिकरणं द्रष्टव्यम् ॥ ३ ॥

४] ति० टी०—पूर्वागमनापेक्षया पूर्वानयनापेक्षया पुनस्त्वम् ॥ ४ ॥

रा० टी०—प्रतीति । तद्वाक्यं प्रतिगृह्य श्रुत्वा सूतो राममानयितुमानेतुं रामस्य भवनं पुनरुपाययौ ॥ ४ ॥

गो० टी०—प्रतिगृह्येति । आनयितुम् आनेतुमित्यर्थः इडार्षः ॥ ४ ॥

५–६] ति० टी०—आवेदितं विज्ञापितम् प्राप्तं पुनरागतम् शङ्कान्वितो राज आपच्छङ्कान्वितः ॥ ५ ॥ ६ ॥

रा० टी०—द्वाःस्थैरिति । तस्य सूतस्य पुनरागमनं द्वाःस्थैः रामायावेदितं बोधितम् । रामस्तु तं सूतं पुनः प्राप्तं श्रुत्वा शङ्कान्वित इवाभवत् । अपिस्त्वर्थे एव इवार्थे ॥ ५ ॥

गो० टी०—द्वाःस्थैरिति । तस्य सूतस्य पुनरागमनं रामाय द्वाःस्थैरावेदितं रामश्चापि प्राप्तमागतं सूतमन्त्रं श्रुत्वैव शङ्कान्वितोऽभवत् । किमभिषेकविघ्नः कश्चिदासीत् उतान्यः कश्चिदुपद्रवोऽभूदिति शङ्का ॥ ५ ॥

रा० टी०—प्रवेश्येति । एनं सूतं प्रवेश्य स्वसमीपं प्रापय्य भूयस्ते तव आगमनकृत्यमागमनेन साध्यं यत्तदशेषतो ब्रूहि इति वचनं रामोऽब्रवीत् ॥ ६ ॥

गो० टी०—प्रवेश्येति । भूयः पुनः ते यदागमनकृत्यं तद्ब्रूहीति संबन्धः ॥ ६ ॥

७–८] ति० टी०—ततो रामोक्तिश्रवणानन्तरम् । श्रुत्वा राजोक्तार्थानुवादिनीं मदुक्तिम् । तत्र राजसंनिधौ । इतरायागमनाय असर्वनामत्वमार्षम् । प्रमाणं निर्णेता ॥ ७ ॥ ८ ॥

रा० टी०—तमिति । ततो रामवचनश्रवणानन्तरं तं रामं सूत उवाच । तद्वचनाकारमाह—राजा त्वां द्रष्टुमिच्छति श्रुत्वा मद्वचनमवधार्य तत्र राजसन्निधौ गमनाय इतराय इताय प्राप्ताय जनाय रो दानं तस्मै च प्रमाणं निश्चयं कुर्विति शेषः ॥ ७ ॥

गो० टी०—तमिति । सूतः श्रुत्वा रामवाक्यमिति शेषः । ततः रामवाक्यश्रवणानन्तरं राम उवाच कथमिति हे राम ! राजा त्वां द्रष्टुमिच्छति अत्र दशरथसमीपे गमनाय इतराय आगमनाय च त्वं प्रमाणं कर्ता शीघ्रं गच्छेत्यर्थः । इतरशब्दस्य सर्वनामकार्याभाव आर्षः ॥ ७ ॥

रा० टी०—इतीति । सूतवचः श्रुत्वा त्वरयान्वितो रामोऽपि नरेश्वरं पुनर्द्रष्टुं राजभवनं प्रययौ ॥ ८ ॥

गो० टी०—इतीति ॥ ८ ॥

९] ति० टी०—प्रियं स्वप्रियम् ॥ ९ ॥

रा० टी०—तमिति । रामं समनुप्राप्तं श्रुत्वा उत्तमं प्रियं विवक्षुः वक्तुमिच्छुः नृपः गृहं प्रवेशयामास ॥ ९ ॥

गो० टी०—तमिति ॥ ९ ॥

१०] ति० टी०—दूरात्प्रणिपातः किं वदिष्यतीतिभीत्या१० ॥

रा० टी०—प्रविशन्निति । पितुः भवनं प्रविशन्नेव दूरात् प्रणिपत्य नमस्कृत्य कृताञ्जलिः राघवः पितरं ददर्श ॥ १० ॥

गो० टी०—प्रविशन्निति । राघवः पितुर्भवनं प्रविशन्नेव दूरात्प्रणिपत्य कृताञ्जलिः सन् पितरं ददर्श दूरात्प्रणिपातो विनयातिशयात् ॥ १० ॥

११] ति० टी०—प्रणमन्तं समुत्थाप्य तं परिष्वज्येत्यन्वयः । प्रदिश्य हस्तेन दर्शयित्वा वाङ्मात्रमुक्त्वा अस्मै रामाय चास्त्रमन्त्राय रामं च रामं तु ॥ ११ ॥

रा० टी०—प्रणमन्तमिति । भूमिपो राजा प्रणमन्तं तं राममुत्थाप्य संपरिष्वज्य च अस्मै रामाय आसनं प्रदिश्य च अब्रवीत् ॥ ११ ॥

गो० टी०—प्रणमन्तमिति । समीपे पुनः प्रणमन्तमित्यर्थः ॥ ११ ॥

---

१ अत्रेति गो. पाठः । २ चास्मै रुचिरमिति गो. पाठः ।

राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा यथेप्सिताः । अन्नवद्भिः क्रतुशतैर्यथेष्टं भूरिदक्षिणैः ॥ १२ ॥
जातमिष्टमपत्यं मे त्वमद्यानुपमं भुवि । दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥ १३ ॥
अनुभूतानि चेष्टानि मया वीरसुखान्यपि । देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः ॥ १४ ॥
न किंचिन्मम कर्तव्यं तवान्यत्राभिषेचनात् । अतो यत्त्वामहं ब्रूयां तन्मे त्वं कर्तुमर्हसि ॥ १५ ॥
अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपम् । अतस्त्वां युवराजानमभिषेक्ष्यामि पुत्रक ॥ १६ ॥
अपि चाद्याशुभान्मम स्वप्नान्पश्यामि राघव । सनिर्घाता दिवोल्काश्च पतन्ति हि महास्वनाः ॥ १७ ॥

१२] ति० टी०–यथेप्सितास्तथा भुक्ताः । 'विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥' इत्युक्तेरन्नवदादिविशेषणम् । यथा यथावत् । इष्टं देवानां पूजनं कृतम् ॥ १२ ॥

रा० टी०–तद्वचनाकारमाह–रामेति । हे राम ! अहं दीर्घायुः चिरकालादिह लोके स्थितः अत एव वृद्धः वयसाधिकोऽस्मि अत एव ईप्सिताः वाञ्छाविषयीभूताः भोगाः भोग्याः यथा यथावद्भुक्ताः । अन्नवद्भिः अन्नप्रचुरैः भूरिदक्षिणैः पर्याप्तदक्षिणाविशिष्टैः क्रतुशतैः यथा यथावदिष्टं पूजितं यागपूजनीयदैवतमिति शेषः ॥ १२ ॥

गो० टी०–रामेति। वृद्धोऽस्मीत्यनन्तरं दीर्घायुरिति वृद्धत्वविवरणं, यद्वा ज्ञानवृद्धत्वव्याहृत्तये दीर्घायुरिति । 'विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्राद्धाविरहितं यज्ञं तामसं परिचक्षते' इत्यन्नादिहीनस्य यज्ञस्य निन्दनादन्नवद्भिरित्यादिविशेषणं क्रतुशतैः ज्योतिष्टोमाद्यश्वमेधपर्यन्तयागभेदैः इष्टं यजनं कृतम् ॥ १२ ॥

१३] ति० टी०–इष्टं वस्तु दत्तम् ॥ १३ ॥

रा० टी०–जातमिति । अनुपममनुपमारहितमिष्टमीप्सितं त्वमपत्यं मे जातं प्रादुर्भूतम् इष्टं देयत्वेन ईप्सितं वस्तु दत्तमधीतं च ॥ १३ ॥

गो० टी०–जातमिति । इष्टमपत्यमभिमतमपत्यं इष्टं दत्तमभिमतं वस्तु दत्तम् ॥ १३ ॥

१४] ति० टी०–यागाध्ययनपुत्रदानोपभोगैः पञ्चभिर्देवर्षिपितृविप्राणामात्मनश्चेत्येवं पञ्चानामनृणोऽस्मि । आत्मा सेन्द्रियग्रामो जीवस्तस्य तत्तत्सुखाधिकारिणस्तददाने ऋणित्वमर्थसिद्धम् तेन सर्वऋणाद्विनिर्मुक्तोऽस्मीति भावः । ऋष्यृणे विप्रर्णस्य देवर्णे जीवर्णस्यान्तर्भावं कृत्वा ऋणानि त्रीण्यपाकृत्येति स्मृतिवादः ॥ १४ ॥

रा० टी०–अन्विति । इष्टानि अभिलषितानि सुखानि अनुभूतानि साक्षादुपलब्धानि अत एव देवादीनामात्मनश्च अनृणः ऋणरहितोऽस्मि तत्र देवऋणरहितत्वं यागैः ऋषिऋणरहितत्वमध्ययनेन पितृऋणरहितत्वमपत्यप्रादुर्भावेन विप्रऋणरहितत्वं दानेन आत्मऋणरहितत्वं विहितसुखानुभवेनेति विवेकः। नच "जायमानो ब्राह्मणस्त्रिभिः ऋणैर्ऋणवाञ्जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः" इत्यादिना ऋणत्रयस्यैव वेदे प्रसिद्धत्वादधिकयोरवैदिकत्वापत्तिरिति वाच्यं तयोरपि स्मृत्यादिसिद्धत्वेन प्रसिद्धवैदिकऋणैरुपलक्षणीयत्वेनेदानीन्तनपठितातिरिक्तेषु पाठसंभवेन चादोषात् अत एव दानरहितात्मसुखसंपादनरहितयोर्निन्दोक्तिः संगच्छते ॥ १४ ॥

गो० टी०–देवर्षीति । देवानामनृणः क्रतुशतैः ऋषीणामनृणोऽध्ययनेन पितॄणामनृणोऽपत्योत्पादनेन विप्राणामनृणो दत्तेन आत्मनोऽनृणः सुखानुभवेन यद्यपि ब्रह्मचर्यादिऋणत्रयं श्रुतिसिद्धम् " जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः " इति । तथापि ऋणपञ्चकमिति मतान्तरम्, यद्वा ऋणत्रयव्यपदेशः प्राधान्यादितरयोरुपलक्षणत्वाद्वा । नन्वेवादीनां पञ्चानां कथमुत्तमर्णत्वम् अत्राहुः । देवानामिन्द्रियाधिष्ठातॄणां जितेन्द्रियताकारकत्वेनोपकारकत्वात् ऋषीणां वाग्युपकारकत्वात् पितॄणां तत्प्रकारकत्वात् विप्राणां कर्माधीनसर्वसंस्कारसाधनेनाधनाशकत्वात् आत्मनः शरीरेन्द्रियसंघातरूपस्य ज्ञानप्रकाशहेतुत्वेनोपकारकत्वाच्च तदप्रत्युपकारः पुरुषस्य ऋणमेव । अन्यत्र चोक्तम् 'अनिषिद्धसुखत्यागी पशुरेव न संशयः' इति ॥ १४ ॥

१५–१६] ति० टी०–यद्ब्रूयां तन्मे वचः कर्तुमर्हसि अविलम्बेनेति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–नन्वेतत्प्रतिपादनेनेत्यत आह–नेति । तवाभिषेचनादन्यत्रान्यस्मिन्कर्मणि न कर्तव्यं यतितव्यमभिषेचनमेव कर्तव्यमित्यर्थः अतस्त्वां यदहं ब्रूयां तत्कर्तुं समर्थयितुमर्हसि ॥ १५ ॥

गो० टी०–न किंचिदिति ॥ १५ ॥

रा० टी०–अद्येति । अस्यास्मिन्काले सर्वाः प्रकृतयः प्रजाः त्वां नराधिपमिच्छन्ति अतस्त्वां राजानं युवराजमभिषेक्ष्यामि ॥ १६ ॥

गो० टी०–अद्येति । स्पष्टम् ॥ १६ ॥

१७] ति० टी०–अविलम्बकरणे हेत्वन्तरमाह–अपि चेति । अशुभानशुभसूचकान् । सनिर्घाता अशनिपातसहिताः दिवोल्का दिव उल्काः संधिरार्षः । दिवा दिवसे इत्यन्ये उल्का ज्वालाः पतन्ति ॥ १७ ॥

रा० टी०–नन्वेवं राज्यपालनसमर्थे त्वयि सति किमर्थम-

१ मयेति गो. पाठः । २ नामेति रा. पाठः । ३ दारुणानिति गो. पाठः । ४ दिवोल्का च पततीह महास्वनेति गो. पाठः ।

अवष्टब्धं च मे राम नक्षत्रं दारुणैर्ग्रहैः । आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥ १८ ॥
प्रायेण चैं निमित्तानामीदृशानां समुद्भवे । राजा हि मृत्युमाप्नोति घोरां चापदमृच्छति ॥ १९ ॥
तद्यावदेव मे चेतो न विमुह्यति राघव । तावदेवाभिषिञ्चस्व चला हि प्राणिनां मतिः ॥ २० ॥
अद्य चन्द्रोऽभ्युपगमत्पुष्यात्पूर्वं पुनर्वसुम् । श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥ २१ ॥
तत्र पुष्येऽभिषिञ्चस्व मनस्त्वरयतीव माम् । श्वस्त्वाहमभिषेक्ष्यामि यौवराज्ये परंतप ॥ २२ ॥
तस्मात्त्वयाद्यप्रभृति निशेयं नियतात्मना । सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥ २३ ॥

भिषेकोयोग इत्यत आह–अपीति । अथास्मिन्काले अशुभान् मत्कर्तृकराज्यपालनरूपशुभनिवर्तकान् स्वप्नान् पश्यामि एतेन मत्कर्तृकपालनयोग्यः कालो नास्तीति सूचितम् । नन्वदुःस्वप्नदर्शनजनितदोषनिवारणयत्नः प्रारब्धव्य इत्यत आह–सनिर्घाताः वज्रपातसहिताः महास्वनाः दिवा दिने उल्काः अग्निज्वालविशेषाः पतन्ति एतेनैतन्निवारणे यत्नो नास्तीति सूचितम् ॥ १७ ॥

गो० टी०–अपि चेति । अशुभान् अशुभसूचकान् दारुणान् भयंकरान् नीलवर्णखीपरिष्वङ्गादीन् उल्का निर्गतज्वाला निर्घातः अमेघाशनिः ॥ १७ ॥

१८] ति० टी०–नक्षत्रं जन्मर्क्षम् अवष्टब्धमाक्रान्तम्१८

रा० टी०–अवेति । हे राम ! मे नक्षत्रं मत्प्रादुर्भावकालिकमृक्षं सूर्याङ्गारकराहुभिः अवष्टब्धं समाक्रान्तमिति दैवज्ञाः ज्योतिर्विदः आवेदयन्ति । च शब्द इत्यर्थे ॥ १८ ॥

गो० टी०–अवष्टब्धमिति । नक्षत्रं जन्मनक्षत्रमवष्टब्धमाक्रान्तम् अत्रेतिकरणं द्रष्टव्यं दैवज्ञाः ज्यौतिषिकाः 'सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि' इत्यमरः । सूर्याङ्गारकराहुभिर्ग्रहैरवष्टब्धमित्यावेदयन्तीति संबन्धः ॥ १८ ॥

१९] ति० टी०–घोरामापदमृच्छति पूर्वम् ततो मृत्युं चाप्नोतीत्यर्थः ॥ १९ ॥

रा० टी०–नन्वु किमनेनेत्यत आह–प्रायेणेति । ईदृशानां निमित्तानां समुद्भवे प्राप्ते सति प्रायेण राजा मृत्युमाप्नोति घोरामापदं वा ऋच्छति 'घोरां च' इतिपाठे पूर्वमापदमृच्छति ततो मृत्युं च प्राप्नोतीत्यर्थः । प्रायेणेत्यनेन प्राकृतविलक्षणानामेतदोषास्पर्शित्वं सूचितमत एव न च कालबाधादुग इत्यनेन न विरोधः । दोषास्पर्शित्वेऽपि पालनत्यागयोग्यकर्तृत्वेन तस्य मर्यादापालकत्वं सूचितम् ॥ १९ ॥

गो० टी०–दुर्निमित्तफलमाह–प्रायेणेति । ऋच्छति ऋच्छति वेत्यर्थः ॥ १९ ॥

२०] ति० टी०–तत्तस्मायावन्मे चेतो न विमुह्यति त्वदभिषेकविमुखं न भवति तावत्ततः पूर्वमेवाभिषिञ्चस्व कृताभिषेकमात्मानं कुरु । नन्वु ते चेतसः का मदभिषेकवैमुख्यचिन्ता तत्राह–चला हीति । त्वद्विमातृतत्पुत्रोपजापस्य संभावितत्वात्तदेव वक्ष्यति–विप्रोषितश्च भरत इत्यादिना ॥ २० ॥

रा० टी०–तदिति । तत् अभिषेकायोद्युक्तं मे चेतो यावन्न विमुह्यति कस्यचिद्विरुद्धप्रार्थनया विमोहं न प्राप्नोति तावदेव अभिषिञ्चस्व । नन्वु मद्विरुद्धाः केचनापि जना न सन्तीत्यत आह–प्राणिनां जनानां मतिर्चित्तश्चयः चला चञ्चला ॥ २० ॥

गो० टी०–तदिति । चेतः त्वामभिषेक्ष्यामीति बुद्धिः न विमुह्यति मामिति शेषः । कुतो बुद्धिविमोचनप्रसक्तिरित्यत्राह–चला हीति मात्रन्तरादिप्रार्थनादिभिरिति भावः ॥ २० ॥

२१] ति० टी०–पुष्ययोगं चन्द्रस्य नियतं शुद्धगणितनिश्चितम् अभिषेके प्रशस्तं वा, दैवचिन्तका ज्योतिर्विदो वक्ष्यन्ते वदन्तीत्यर्थे आर्षम् ॥ २१ ॥

रा० टी०–अभिषेककालं बोधयन्नाह–अद्येति । अथास्मिन्काले चन्द्रः पुष्यात्पूर्वं विद्यमानं पुनर्वसुं अभ्युपगमत् प्राप्नोत् अतः श्वोऽव्यवहितागामिदिवसे पुष्ययोगं नियतं दैवचिन्तकाः ज्योतिर्विदो वक्ष्यन्ते कथयन्ति लृडुपात्तभविष्यत्त्वस्याविवक्षा आगमशास्त्रस्यानित्यत्वादिङ्गितः ॥ २१ ॥

गो० टी०–अद्येति । पुष्ययोगं पुष्येण चन्द्रस्य योगं नियतमभिषेकनियतं प्रशस्तमित्यर्थः । दैवचिन्तकाः ग्रहचारज्ञा वक्ष्यन्ते वदन्ति ॥ २१ ॥

२२] ति० टी०–अभिषिञ्चस्वाभिषिक्तो भव । मे मनश्चित्तं मां त्वरयतीव त्वदभिषेकार्थमिति शेषः ॥ २२ ॥

रा० टी०–तत्रेति । तत्र तस्मिन्पुष्ये अभिषिञ्चस्व रामभिति शेषः । इति मनो मम मानसं त्वरयति अतस्त्वां श्वो यौवराज्येऽभिषेक्ष्यामि ॥ २२ ॥

गो० टी०–तत इति । अभिषिञ्चस्व अभिषिक्तो भव । त्वरयतीवेतीवशब्द एवकारार्थः ॥ २२ ॥

२३] ति० टी०–अथप्रभृति प्रदोषमारभ्य अनेनाद्विर्भोजनरूपः प्राग्दिननियमो दर्शितः ॥ २३ ॥

रा० टी०–तस्मादिति । तस्मात् श्वोऽभिषेकस्य निश्चयादेतोः अथप्रभृति इत आरभ्य वध्वा सह नियतात्मना दर्भप्रस्तरशायिना कुशास्तृतभूमिशयनशीलेन इयं निशा उपवस्तव्या " उपान्वध्याङ्वसः " इति कर्मणि तव्यत् ॥ २३ ॥

गो० टी०–तस्मादिति । अथप्रभृति एतदहरारभ्य निशा उपवस्तव्या "वसेरकर्मकत्वादत्र सकर्मकत्वमार्षं निशायाश्चोपवस्तव्यमित्यर्थः । दर्भप्रस्तरो दर्भास्तरणम् ॥ २३ ॥

१ दारुणैर्ग्रहैरिति गो. पाठः । २ हीति गो. पाठः । ३ विमुह्यतीति गो. पाठः । ४ पुनर्वसू इति गो. रा. पाठः ।

सुहृदश्चाप्रमत्तास्त्वां रक्षन्त्वद्य समंततः । भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥ २४ ॥
विप्रोषितश्च भरतो यावदेव पुरादितः । तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥ २५ ॥
कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः । ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेन्द्रियः ॥ २६ ॥
किं नु चित्तं मनुष्याणामनित्यमिति मे मतम् । सतां च धर्मनित्यानां कृतशोभि च राघव ॥ २७ ॥
इत्युक्तः सोऽभ्यनुज्ञातः श्वो भाविन्यभिषेचने । व्रजेति रामः पितरमभिभाष्याभ्ययाद्गृहम् ॥ २८ ॥

२४] ति० टी०—रक्षणे हेतुर्भवतीत्यादि । एवंविधानि शुभोदर्काणि । बहुविघ्नानीति बहुव्रीहिः ॥ २४ ॥

रा० टी०—सुहृद इति । अप्रमत्ताः सुहृदः समन्ततस्त्वां रक्षन्तु हि यतः एवंविधानि अत्युत्सवप्रापकानि कार्याणि बहुविघ्नानि बहवो विघ्ना निवारका येषु तानि भवन्ति ॥ २४ ॥

गो० टी०—सुहृद इति । एवंविधानि अभिषेकादिमहाश्रेयोरूपाणि ॥ २४ ॥

२५] ति० टी०—इतः पुरादस्मात्पुराधावद्विप्रोषित एव तिष्ठति तावदेव विप्रोषितस्य तस्यागमनात्पूर्वमेव प्राप्तकालो योग्यः अन्यथा भरतः प्रतिबध्नीयादिति भावः ॥ २५ ॥

रा० टी०—ननु भरतागमने सति अभिषेकेण भवितव्यमित्यत आह—विप्रोषित इति । इतः अस्मात् पुरात् यावत्कालं भरतो विप्रोषितो मातुलकुले स्थितस्तावदेव ते अभिषेकः प्राप्तकालो मम मतः संमतः एतेन भरतागमने सति अभिषेको न भविष्यतीति सूचितम् तेन केकयीविवाहसमये राज्यशुल्कं केकयराजाय प्रतिश्रुतमिति वृत्तं रामाय कथयामासेति व्यक्तम् ॥ २५ ॥

गो० टी०—केकयराजाय राज्यशुल्कं दत्त्वा कैकेयीविवाहं कृतवान् तं वृत्तान्तं हृदि कृत्वाह—विप्रोषित इति । अयं वृत्तान्तः सप्तोत्तरशततमे सर्गे 'पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् । प्रातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ' इति स्पष्टीभविष्यति प्राप्तकाल इत्यत्रेतिकरणं द्रष्टव्यम् ॥ २५ ॥

२६] ति० टी०—ननु भरते एषा शङ्का न युक्तेत्यत आह—काममिति । काममिति यद्यपीत्यर्थे ॥ २६ ॥

रा० टी०—ननु स्वप्रतिज्ञापूरीकरणाय भरत एवाहूयाभिषिच्यतामित्यत आह—काममिति । ज्येष्ठानुवर्ती ज्येष्ठानुवर्तनशीलः धर्मात्मा नित्यं धर्मसक्तः सानुक्रोशः सदयः जितेन्द्रियः वशीकृतोभयकरणः ते भ्राता भरतः सतां महात्मनां वृत्ते ज्येष्ठ एवाभिषेक्तव्य इत्याकारकवृत्तान्ते काममत्यन्तं खलु निश्चयेन स्थितः एतेन एतदभिप्रायेणैव भरतो मातुलकुले बहुदिनं स्थित इति सूचितं तेन मयि तत्र स्थिते हठाद्राज्याभिलाषिणमिव मां मत्वा पितृप्रतिज्ञाभङ्गभिया रामो नात्मानमभिषेक्ष्यिष्यतीति भरताभिप्रायः सूचितः तेन कन्यापुत्रस्य साभिलषितत्वे एव राज्यशुल्कप्रदानप्रतिज्ञेति व्यञ्जितं तेन रामाभिषेकभङ्गणमन्तरा मातुलकुलादयोध्यां नागन्तास्मीति पितुरग्रे प्रतिज्ञाय भरतो गत इति व्यञ्जितम् ॥ २६ ॥

गो० टी०—काममिति । वृत्ते आचारे ॥ २६ ॥

२७] ति० टी०—किं न्विति तथापीत्यर्थे । मनुष्याणां चित्तं स्नेहादिमदप्यनित्यं विकारनिमित्ते सति विक्रियेतैवेत्यर्थः । यतः सतां धर्मनित्यानामपि चित्तं तत्तन्निमित्तकृतेन रागद्वेषादिना शोभते युज्यते तथा न तु सर्वथा स्वतो नियतकिंचित्स्वभावमित्यर्थः ॥ २७ ॥

रा० टी०—ननु सर्वेषां जनानां खण्डमण्डलेश्वराणां च त्वदाज्ञानुवर्तित्वात् विघ्नशङ्काया अभावेन कालान्तरेऽभिषेको भवितेति किं द्रुतप्रवृत्त्येत्यत आह—किं न्विति । मनुष्याणां चित्तमनित्यं प्रतिक्षणं परिणामि अतः किं नु चित्तं कुत्सितमित्यर्थः । इति मे मतं निश्चयः धर्मनित्यानां धर्मपालकानां सतां चित्तं तु कृतशोभि कृतेन कर्तव्यकर्मणः सिद्धयैव शोभते तच्छीलम् एतेनावश्यकमङ्गलकृत्ये विलम्बो न कार्य इति व्यञ्जितम् ॥ २७ ॥

गो० टी०—अत्यन्तधर्मिष्ठानामपि चेतश्चञ्चलत्वात् मित्रभेदादि नान्यथा भवतीत्याह—किं त्विति । किंतु तथापीत्यर्थः । यद्यपि कामं खलु सतां वृत्त इत्यादियुक्तगुणविशिष्टतया स न शङ्कास्पदीभूतः तथापि मनुष्याणां मनुष्यत्वसाधारण्येन शङ्कितं चित्तमनित्यं चञ्चलमिति मे मतिः मम निश्चय इत्यर्थः । सामान्यप्रयुक्तदोषो विशेषे न संक्रमत इत्याह—सतां त्विति । तुशब्दः पक्षव्यावृत्त्यर्थः धर्मनित्यानां धर्मैकनिरतानां कृतशोभि कृतेनैव परस्परोपकारेण शोभते ननु भेदं प्राप्नोति राघवः रघुवंशोत्पन्नस्त्वं स्ववंशप्रभावं न जानासि किम्ह । अन्ये त्वेवं व्याचक्षते धर्मनित्यानां धर्मनिरतानां चित्तं कृतशोभि कृतेन परकृतमित्रभेदादिना शोभितं शीलमस्यास्तीति कृतशोभीति अपरे त्वाहुः सतां चित्तं कृतेन कार्येण शोभते नतु करिष्यमाणेन कृतं कार्यमनुमोदते नतु करिष्यमाणमिति भाव इति ॥२७॥

२८] ति० टी०—अभिषेचनेऽभिषेचनविषये । इत्युक्तो व्रजेत्यभ्यनुज्ञात इति संबन्धः । अभिभाष्यामन्त्र्य ॥ २८ ॥

रा० टी०—इतीति । शोभाविन्यभिषेचने इति अनेन प्रकारेण उक्तः सम्यक् शिक्षितः व्रज मदुपदिष्टव्रतसिद्धये स्वगृहं गच्छेत्यभ्यनुज्ञातः स रामः पितरमभिभाष्य प्रणामवाक्यमुच्चार्य गृहमयात् अगच्छत् ॥ २८ ॥

गो० टी०—इतीति । अभिषेचने विषये इत्युक्तः स रामः व्रजेत्यनुज्ञात इति संबन्धः ॥ २८ ॥

१ किं त्विति गो. पाठः । २ मतिरिति गो. पाठः । ३ त्विति गो. पाठः । ४ अभिनाद्येति गो. पाठः ।

प्रविश्य चात्मनो वेश्म राज्ञादिष्टेऽभिषेचने । तत्क्षणादेव निष्क्रम्य मातुरन्तःपुरं ययौ ॥ २९ ॥
तत्र तां प्रवणामेव मातरं क्षौमवासिनीम् । वाग्यतां देवतागारे ददर्शायाचतीं श्रियम् ॥ ३० ॥
प्रागेव चागता तत्र सुमित्रा लक्ष्मणस्तथा । सीता चानायिता श्रुत्वा प्रियं रामाभिषेचनम् ॥ ३१ ॥
तस्मिन्काले ऽपि कौसल्या तस्थावामीलितेक्षणा । सुमित्रयान्वास्यमाना सीतया लक्ष्मणेन च ॥ ३२ ॥
श्रुत्वा पुष्ये च पुत्रस्य यौवराज्येऽभिषेचनम् । प्राणायामेन पुरुषं ध्यायमाना जनार्दनम् ॥ ३३ ॥
तथा सनियमामेव सोऽभिगम्याभिवाद्य च । उवाच वचनं रामो हर्षयंस्तामिदं वरम् ॥ ३४ ॥
अम्ब पित्रा नियुक्तोऽस्मि प्रजापालनकर्मणि । भविता श्वोऽभिषेको मे यथा मे शासनं पितुः ॥ ३५ ॥
सीतयाप्युपवस्तव्या रजनीयं मया सह । एवमुक्तमुपाध्यायैः सं हि मामुक्तवान्पिता ॥ ३६ ॥

२९] ति० टी०–राज्ञादिष्टे आज्ञप्तेऽभिषेचने सीतायै तदपेक्षितराजोपदिष्टसभार्योपवासानुष्ठाननिवेदनाय स्वगृहं प्रविश्य तत्र सीतामदृष्ट्वा तत्क्षणादेव मातुरन्तःपुरं ययौ ॥ २९ ॥

रा० टी०–प्रविश्येति । अभिषेचने राज्ञा दिष्टे सति आत्मनो वेश्म गृहं प्रविश्य तत्क्षणादेव निष्क्रम्य स्वभवनाद् बहिरागत्य मातुरन्तःपुरं ययौ ॥ २९ ॥

गो० टी०–प्रविश्य चेति । राज्ञेादिष्टेऽभिषेचन इति निमित्तसप्तमी राज्ञोदिष्टमभिषेकं कथयितुमित्यर्थः ॥ २९ ॥

३०] ति० टी०–प्रवणां देवताराधनतत्पराम् । आयाचतीमिति च्छेदः । श्रियं रामाय राज्यलक्ष्मीम् ॥ ३० ॥

रा० टी०–तत्रेति । तत्र तस्मिन् समये प्रवणां देवाराधने संलग्नचित्तामत एव वाग्यतां निहतवाचं श्रियं प्रजासंपत्तिमायाचन्तीं देवेभ्यः प्रार्थयन्तीं क्षौमवासिनीं मातरं देवतागारे ददर्श ॥ ३० ॥

गो० टी०–प्रवणां स्वासाधारणदेवतासक्तचित्तां क्षौमवासिनीं व्रतोपयुक्तक्षौमवस्त्रधरां वाग्यतां यतवाचं मौनवतीमित्यर्थः । श्रियं संपदमायाचतीं प्रार्थयन्तीं रामायेति शेषः ॥ ३० ॥

३१] ति० टी०–आनायिता कौसल्येयेति शेषः ॥ ३१ ॥

रा० टी०–प्रागिति । रामाभिषेचनं श्रुत्वा सुमित्रा तत्र प्रागेवागता लक्ष्मणश्चागतः सीता च आनायिता सुमित्रालक्ष्मणाभ्यां प्रापिता ॥ ३१ ॥

गो० टी०–प्रागिति । प्राक् रामागमनात् पूर्वमेव सुमित्रा प्रियं रामाभिषेचनं श्रुत्वा आगता लक्ष्मणश्च तदा सुमित्रागमनकाले आगतः सीता तु परतन्त्रत्वात्स्वयं नागता किंतु दासीभिरानायिता ॥ ३१ ॥

३२] ति० टी०–तस्मिन्काले ऽपि रामागमनविशिष्टे काले ऽप्यामीलितेक्षणा ध्यानवशाद् अन्वास्यमानोपास्यमाना ॥ ३२ ॥

३३] ति० टी०–' पुष्येण ' इति पाठे तद्युक्तकालस्याधिकरणस्यापि करणत्वविवक्षा बोध्या ॥ ३३ ॥

रा० टी०–तस्मिन्निति । तस्मिन् रामागमनाधिकरणीभूते काले सुमित्रादिभिरन्वास्यमाना उपास्यमाना पुत्रस्य यौवराज्याभिषेचनं श्रुत्वैव प्राणायामेन जनार्दनं महाजनैः प्रार्थितं पुरुषं ध्यायमाना ध्यायन्ती अत एव आमीलितेक्षणा आमीलितनयना कौशल्या तस्थौ । श्लोकद्वयमेकान्वयि अपिरेवार्थे ॥ ३२ ॥ ३३ ॥

गो० टी०–तस्मिन्निति । तस्मिन् रामागमनकाले पुत्रस्य पुष्येण यौवराज्याभिषेचनं श्रुत्वा सुमित्रादिभिरन्वास्यमाना प्राणायामेन प्राणायामपूर्वकं पुरुषं पुरुषसूक्तप्रतिपाद्यपुरुषशब्दवाच्यं जनार्दनं नारायणं ध्यायमाना ध्यायन्ती आमीलितेक्षणा तस्थौ ॥ ३२ ॥ ३३ ॥

३४] ति० टी०–वरं श्रेष्ठम्, अत एव हर्षयन् ॥ ३४ ॥

रा० टी०–तथेति । तथा उक्तप्रकारेण सम्यक् नियमो यस्याः तां मातरमभिगम्य प्राप्य अभिवाद्य च हर्षयन् रामः इदं वरं वचनमुवाच ॥ ३४ ॥

गो० टी०–तथेति । तथा पूर्वोक्तरीत्या सनियमां समीचीननियमाम् ॥ ३४ ॥

३५] ति० टी०–यथा मे पितुः स्वसंबन्धेन राज्ञो दशरथस्यात्युत्कृष्टत्वध्वननम्, शासनमाज्ञा तथा श्वो मे ऽभिषेको भवितेति संबन्धः ॥ ३५ ॥

रा० टी०–तद्वचनाकारमाह–अम्बेति । हे अम्ब ! प्रजापालनकर्मणि पित्राहं नियुक्तोऽस्मि अत एव श्वो ऽभिषेको भविता इति मे पितुः यथा यथावदनुशासनमाज्ञास्तीति शेषः ॥ ३५ ॥

गो० टी०–अम्बेति । मे पितुः शासनं यथा तथाभिषेकः श्वो भवितेति संबन्धः ॥ ३५ ॥

३६] ति० टी०–स हीति हिरप्यर्थे । स पितापि मामेवमुक्तवानित्यर्थः ॥ ३६ ॥

रा० टी०–सीतयेति । मया सह सीतयापि इयं रजनी उपवस्तव्या एवमुपाध्यायैरुक्तं वचः स पिता मामुक्तवान् ॥ ३६ ॥

गो० टी०–सीतयेति । सीतया मयापि सह तुल्यतया इयं रजनी एतन्निशात्रिः उपवस्तव्या अस्यां रजन्यामुपवस्तव्यमित्यर्थः । किं त्वयैवोच्यते नेत्याह- एवमिति ॥ ३६ ॥

१ राज्ञादिष्टे इति गो. पाठः । २ तत्क्षणेन चेति गो. पाठः । ३ राज्याभिषेचनमिति गो. पाठः । ४ तदेति गो. पाठः । ५ ऋत्विगुपाध्यायैरिति गो. पाठः । ६ सचेति गो. पाठः ।

यानि यान्यत्र योग्यानि श्वो भाविन्यभिषेचने । तानि मे मङ्गलान्यद्य वैदेह्याश्चैव कारय ॥ ३७ ॥
एतच्छ्रुत्वा तु कौसल्या चिरकालाभिकाङ्क्षितम् । हर्षबाष्पाकुलं वाक्यमिदं राममभाषत ॥ ३८ ॥
वत्स राम चिरं जीव हतास्ते परिपन्थिनः । ज्ञातीन्मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय ॥ ३९ ॥
कल्याणे बत नक्षत्रे मया जातोऽसि पुत्रक । येन त्वया दशरथो गुणैराराधितः पिता ॥ ४० ॥
अमोघं बत मे क्षान्तं पुरुषे पुष्करेक्षणे । येयमिक्ष्वाकुराज्यश्रीः पुत्र त्वां संश्रयिष्यति ॥ ४१ ॥
इत्येवमुक्तो मात्रा तु रामो भ्रातरमब्रवीत् । प्राञ्जलिं प्रह्वमासीनमभिवीक्ष्य स्मयन्निव ॥ ४२ ॥
लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुंधराम् । द्वितीयं मेऽन्तरात्मानं त्वामियं श्रीरुपस्थिता ॥ ४३ ॥
सौमित्रे भुङ्क्ष्व भोगांस्त्वमिष्टान्राज्यफलानि च । जीवितं चापि राज्यं च त्वदर्थमभिकामये ॥ ४४ ॥

३७] ति० टी०–मङ्गलानि महार्हगन्धमाल्याभरणादिरूपाणि मङ्गलस्नानादीनि च ॥ ३७ ॥

रा० टी०–यानीति । मे वैदेह्याश्च यानि यानि मङ्गलानि अभिषेचने योग्यानि तानि तानि कारय ॥ ३७ ॥

गो० टी०–यानीति । मङ्गलानि मङ्गलकर्माणि ॥ ३७ ॥

३८] ति० टी०–चिरकालाभिकाङ्क्षितमेतदभिषेकरूपम् । हर्षजबाष्पेणाकुलमव्यक्तमधुरम् ॥ ३८ ॥

रा०टी०–एतदिति । चिरकालाभिकाङ्क्षितमेतद्वाक्यं श्रुत्वा कौशल्या हर्षबाष्पाकुलमानन्दाश्रुव्याप्तं वाक्यमभाषत ॥ ३८ ॥

गो० टी०–एतदिति । हर्षबाष्पकलं[1] वाक्यं हर्षबाष्पेण कलमव्यक्तमधुरं वाक्यमीषद्वाक्यम् ॥ ३८ ॥

३९] ति० टी०–हताः भवन्त्विति शेषः । मे मम सुमित्रायाश्च ज्ञातीन्बन्धूनभिनन्दय ॥ ३९ ॥

रा० टी०–तद्वाक्यकारमाह–वत्सेति । त्वं चिरं जीव ते परिपन्थिनः त्वद्विषयकविरुद्धबुद्धयो हताः भवन्त्विति शेषः । अतः श्रिया युक्तस्त्वं सुमित्रायाः शोभनमित्रवत्या मे ज्ञातीन्बन्धूनभिनन्दय अधिकं प्रमोदय । चो हेतौ ॥ ३९ ॥

गो० टी०–वत्सेति । हताः भवन्त्विति शेषः । ज्ञातीन् बन्धून् ॥ ३९ ॥

४०] ति० टी०–कल्याणे नक्षत्रे शुभयुक्ते काले जातो जनितः । येन शुभकालजननेन ॥ ४० ॥

रा० टी०–कल्याण इति । येन त्वया गुणैः पिता दशरथः आराधितः स त्वं कल्याणे शुभप्रदे नक्षत्रे मया जातः प्रादुर्भावितोऽसि ॥ ४० ॥

गो० टी०–कल्याण इति । कल्याणे अतिशोभने नक्षत्रे मयि जातोऽसि बतेति संतोषे 'खेदाद्यकम्पासंतोषविस्मयामन्त्रणे बत' इत्यमरः । 'मया' इतिपाठे मया हेतुनेत्यर्थः । येन येन कारणेन ॥ ४० ॥

४१] ति० टी०–पुष्करनेत्रे पुरुषे विष्णौ यन्मे क्षान्तं कार्यं परित्यज्य तत्प्रीतिमात्रफलकं व्रतोपवासादि कृतं तदमोघं सफलं जायते । बतेति हर्षे । साफल्ये हेतुर्येयमित्यादि । इदमभाषतेत्यन्वयः ॥ ४१ ॥

रा० टी०–अमोघमिति । पुष्करेक्षणे कमलनयने पुरुषे परमात्मनि तत्प्रसादार्थमित्यर्थः । यन्मे क्षान्तं तदुपलक्षिततपः कृतं तदमोघं सफलमत एव या इयमिक्ष्वाकुराज्यश्रीः सा त्वां संश्रयिष्यति ॥ ४१ ॥

गो० टी०–अमोघमिति । पुष्करेक्षणे पुण्डरीकाक्षे पुरुषे नारायणे विषये मे क्षान्तं व्रतोपवासादिक्लेशसहनममोघं सफलम् । साफल्ये हेतुमाह–येयमिति । सा संश्रयिष्यतीति शेषः ॥ ४१ ॥

४२] ति० टी०–स्मयन्निव ईषद्धसन्निवेत्यर्थः ॥ ४२ ॥

रा० टी०–इतीति । एवमुक्तो रामः प्राञ्जलिं बद्धयुगलकरं प्रह्वं प्रणतं प्राक् समासीनं भ्रातरं वीक्ष्य स्मयन्निवाब्रवीत् । इव एवार्थे ॥ ४२ ॥

गो० टी०–इतीति । स्मयन्निव समन्दस्मित इत्यर्थः । संतोषातिशयेनाब्रवीदिति भावः ॥ ४२ ॥

४३] ति० टी०–स्वनिविष्टं राज्यं सौभात्रेण साधारणं करोति–लक्ष्मणेति ॥ ४३ ॥

रा० टी०–तद्वचनाकारमाह—लक्ष्मणेति । यतः इयं श्रीः राज्यलक्ष्मीः द्वितीयं मेऽन्तरात्मानमन्तरङ्गबहिरीरं त्वामुपस्थिता प्राप्ता अतः मया सार्धं वसुंधरां प्रशाधि किंच मया सार्धं विद्यमानस्त्वं वसुंधरां मेऽन्तरात्मानं मानसं च प्रशाधि मे मनो स्वस्थं चेत् शिक्षयेत्यर्थः ॥ ४३ ॥

गो० टी०–लक्ष्मणेति । द्वितीयमन्तरात्मानं द्वितीयं प्राणम् ॥ ४३ ॥

४४] ति० टी०–राज्यफलरूपानिष्टान्मनोनुकूलान्भोगान्विषयान् यद्वा राज्यफलानि धर्मार्थौ तौ च प्राप्नुहि । स्वदर्थं न स्वप्रयोजनाय ॥ ४४ ॥

रा० टी०–सौमित्रे इति । हे सौमित्रे ! इष्टान् समभिलषितान् भोगान् भोग्यपदार्थान् भुङ्क्ष्व राज्यफलानि अतिदानादिजनितयशआदीनि च भुङ्क्ष्व प्राप्नुहीत्यर्थः । तत्र हेतुः जीवितं पालनं राज्यं राजसुखभोगं च त्वदर्थमभिकामये वाञ्छामि ॥ ४४ ॥

१ बाष्पकलमिति गो. पाठः । २ इदमिति गो. पाठः । ३ प्राक्समासीनमिति रा. पाठः । ४ च हीति गो. पाठः ।

इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च । अभ्यनुज्ञाप्य सीतां च ययौ स्वं च निवेशनम् ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ।

दशरथोक्तो वसिष्ठो रामनिवेशनं प्राप्य ससीतं रामं वेदव्रताचरणं निवेद्य दशरथान्तिकं ययौ । दशरथः सभ्याश्च वसिष्ठमभिंतस्थुः । वसिष्ठेन कृताभ्यनुज्ञो दशरथः सभाजनं विसृज्यान्तःपुरं प्रविवेश ।

संदिश्य रामं नृपतिः श्वोभाविन्यभिषेचने । पुरोहितं समाहूय वसिष्ठमिदमब्रवीत् ॥ १ ॥
गच्छोपवासं काकुत्स्थं कारयाद्य तपोधन । श्रेयैसे राज्यलाभाय वध्वा सह यतव्रत ॥ २ ॥
तथेति च स राजानमुक्त्वा वेदविदां वरः । स्वयं वसिष्ठो भगवान्ययौ रामनिवेशनम् ॥ ३ ॥
उपवासयितुं वीर मन्त्रविन्मन्त्रकोविदैम् । ब्राह्मं रथवरं युक्तमास्थाय सुधृतव्रतः ॥ ४ ॥
स रामभवनं प्राप्य पाण्डुराभ्रघनप्रभम् । तिस्रः कक्ष्यां रथेनैव विवेश मुनिसत्तमः ॥ ५ ॥
तमागतमृषिं रामस्त्वरन्निव ससंभ्रमैम् । मानयिष्यन्समानार्हं निश्चक्राम निवेशनात् ॥ ६ ॥

गो० टी०—सौमित्र इति । भोगान् भोग्यपदार्थान् इष्टान् अभिमतान् राज्यफलानि अनर्घ्यरत्नवस्त्राभरणादीनि ॥४४॥

४५] ति० टी०—सीतां च स्वं चाभ्यनुज्ञाप्य सीतायै स्वस्मै च मातृभ्यामनुज्ञां दापयित्वा निवेशनं स्वगृहं ययौ । तस्त्वर्थे ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०—इतीति । इति अनेन प्रकारेण लक्ष्मणमुक्त्वा मातरौ कौसल्यासुमित्रे अभिवाद्य प्रणम्य च सीतामभ्यनुज्ञाप्य व्रतार्थमाज्ञाप्य च स्वं निवेशनं ययौ ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुर्थः सर्गः ॥ ४ ॥

गो० टी०—इतीति । सीतां चाभ्यनुज्ञाप्य मातृभ्यामिति शेषः ॥ ४५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४

१] ति० टी०—संदिश्य राममुपवासादि कर्वित्युक्त्वा ॥१॥

रा० टी०—रामाज्ञानन्तरकालिकराजवृत्तान्तमाह—संदिश्येति । अभिषेचने अभिषेकार्थं रामं संदिश्य यथाविध्युपवासं कर्वित्याज्ञाप्य पुरोहितं वसिष्ठं समाहूय नृपतिरब्रवीत् ॥१॥

गो० टी०—अथोपवासस्य पुरोहितसंकल्पमन्त्रादिसाध्यत्वात्पुरोहितं संदिशति पञ्चमे—संदिश्येति । व्रतोपवासादिकं कर्वित्याज्ञाप्य ॥ १ ॥

२-३] ति० टी०—गच्छेति । उपवाससंकल्पादेः पुरोहितसाध्यत्वादिति भावः। श्रेयसे विघ्ननिवृत्तिरूपश्रेयोर्थम् ॥२॥३॥

४] ति० टी०—ब्राह्मं ब्राह्मणारोहणयोग्यम् । युक्तमैः यायाविति पूर्वेणान्वयः ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—गच्छेति । हे तपोधन ! गच्छ रामसमीपमिति शेषः। गमनप्रयोजनमाह—वध्वा सह यतव्रतं काकुत्स्थं रामं श्रेयसे प्रजाकल्याणजनकाय राज्यलाभाय उपावासं यथामन्त्रमुपोषणं कारय । "हृकोः—" इति कर्मत्वम् ॥२॥

गो० टी०—गच्छेति । काकुत्स्थमुपवासं कारय "हृकोरन्यतरस्याम्" इति विकल्पेन काकुत्स्थशब्दस्य कर्मसंज्ञा ॥ २ ॥

रा० टी०—तथेति । स धृतव्रतः मन्त्रविद् मन्त्रबोधननिपुण इत्यर्थः । वेदविदां वरो वंशिष्ठः तथेत्युक्त्वा युक्तं शोभनाश्वैः संयुक्तं ब्राह्मं ब्राह्मणारोहणयोग्यं रथवरमास्थाय वीरं मन्त्रकोविदं राममुपवासयितुं रामनिवेशनं ययौ । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—तथेतीति । ब्राह्मं ब्राह्मणवहनयोग्यं युक्तं वाजिभिर्युक्तमास्थाय ययाविति पूर्वेण संबन्धः ॥ ३ ॥ ४ ॥

५] ति० टी०—पाण्डुराभ्रघनविनिविडप्रभम् । कक्ष्या द्वाराणि ६ ॥

रा० टी०—स इति । स मुनिसत्तमो वसिष्ठः पाण्डुराभ्रघनप्रभं पाण्डुरमेघवत् निबिडदीप्तिविशिष्टं रामभवनं प्राप्य तिस्रः कक्षाः द्वारः रथेनैव विवेश ॥ ५ ॥

गो० टी०—स इति । पाण्डुराभ्रघनप्रभं पाण्डुराभ्रमूर्तसदृशप्रभम् 'घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे' इत्यमरः ॥ ५ ॥

६] ति० टी०—त्वरन्निव त्वरन्नेव । ससंभ्रमं सादरम् ॥६॥

रा० टी०—तमिति । ससंभ्रममादरसहितं मान्यं संमा-

१ जगाम स्वमिति गो. पाठः । २ वेदमिति गो. पाठः । ३ श्रीयशोराज्येति गो. पाठः । ४ व्रतमिति गो. रा. पाठः । ५ राममिति गो. पाठः । ६ मन्त्रवरिति गो. पाठः । ७ कोविद इति गो. पाठः । ८ दृढेति गो. पाठः । ९ कक्षेति रा. पाठः । १० संभ्रम इति गो. पाठः ।

अभ्येत्य त्वरमाणोऽथ रथाभ्याशं मनीषिणः । ततोऽवतारयामास परिगृह्य रथात्स्वयम् ॥ ७ ॥
स चैनं प्रश्रितं दृष्ट्वा संभाष्याभिप्रसाद्य च । प्रियार्हं हर्षयन्राममित्युवाच पुरोहितः ॥ ८ ॥
प्रसन्नस्ते पिता राम यैत्त्वं राज्यमवाप्स्यसि । उपवासं भवानद्य करोतु सह सीतया ॥ ९ ॥
प्रातस्त्वामभिषेक्ता हि यौवराज्ये नराधिपः । पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥ १० ॥
इत्युक्त्वा स तदा राममुपवासं यतव्रतः । मन्त्रवत्कारयामास वैदेह्या सहितं शुचिः ॥ ११ ॥
ततो यथावद्रामेण स राज्ञो गुरुरर्चितः । अभ्यनुज्ञाप्य काकुत्स्थं ययौ रामनिवेशनात्॥ १२ ॥
सुहृद्भिस्तत्र रामोऽपि सहासीनः प्रियंवदैः । सभाजितो विवेशाथताननुज्ञाप्य सर्वशः ॥ १३ ॥
हृष्टनारीनरयुतं रामवेश्म तदा बभौ । यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥ १४ ॥
स राजभवनप्रख्यात्तस्माद्रामनिवेशनात् । निर्गत्य ददृशे मार्गं वसिष्ठो जनसंवृतम् ॥ १५ ॥
वृन्दवृन्दैरयोध्यायां राजमार्गाः समन्ततः । बभूवुरभिसंबाधाः कुतूहलजनैर्वृताः ॥ १६ ॥

ननयोग्यं तमागतमृषिं वशिष्ठं मानयिष्यन् संमानं करिष्यन् त्वरन्नेव स रामः निवेशनात्स्वभवनान्निश्चक्राम ॥ ६ ॥

गो० टी०–तामिति । त्वरन्निव इवशब्दो वाक्यालंकारे मानयिष्यन् माननाहेतोः "लक्षणहेत्वोः क्रियायाः" इति हेत्वर्थे शतृप्रत्ययः ॥ ६ ॥

७] ति० टी०–परिगृह्य हस्तेन हस्ते धृत्वा ॥ ७ ॥

रा० टी०–अभीति । त्वरमाणो रामः मनीषिणो वसिष्ठस्य रथाभ्यासं रथसमीपमभ्येत्य प्राप्य ततः तस्माद्रथात्स्वयं परिगृह्य अवतारयामास ' योग्यायामैन्तिकेऽभ्यासोऽधिवासौ स्थानसन्निधये ' इति नानार्थः ॥ ७ ॥

गो० टी०–अभ्येत्येति । रथाभ्याशं रथसमीपम् ॥ ७ ॥

८–९] ति० टी०–संभाष्य वस्तेत्यादि संबोध्य । अभिप्रसाद्य स्तुतिभिरिति शेषः । प्रियार्हं प्रियोक्त्यर्हम् ॥ ८ ॥ ९ ॥

रा० टी०–स इति । स पुरोहितः प्रियार्हं प्रियोक्तियोग्यं प्रश्रितं नतभेनं रामं दृष्ट्वा हर्षयन्सन् संभाष्य यथोचितं संबोध्य अभिप्रसाद्य प्रसन्नस्य च इवाच ॥ ८ ॥

गो० टी०–स इति । प्रश्रितं विनीतम् ' विनीतप्रश्रितौ समौ ' इत्यमरः । संभाष्य कुशलप्रश्नं कृत्वा 'सभाज्य' इतिपाठे कुशलप्रश्नाधीनप्रीतिं जनयित्वेत्यर्थः । सभाजप्रीतिसेवनयोरित्यस्माद्धातोराधों ल्यप् । प्रियार्हं प्रियकथनार्हम् ॥ ८ ॥

रा० टी०–तद्वचनाकारमाह–प्रसन्न इति । हे राम ! ते पिता यस्मात्प्रसन्नोऽस्तीति शेषः । अतः त्वं राज्यमवाप्स्यसि प्राप्स्यसि अत एव सीतया सह भवान् अद्य उपवासं करोतु ॥९॥

गो० टी०–प्रसन्न इति ॥ ९–११ ॥

१०] ति० टी०–अभिषेक्ता क्तृच् ॥ १० ॥

रा० टी०–प्रातरिति । नराधिपो दशरथः प्रातर्यौवराज्ये ययातिं नहुष इव प्रीत्या त्वामभिषेक्ता ॥ १० ॥

११] ति० टी०–रामप्रवासं तत्संकल्पं कारयामासेति " हकोः–" इति द्विकर्मकत्वम् ॥ ११ ॥

रा० टी०–इतीति । वैदेह्या सहितं यतव्रतं राममित्युक्त्वा शुनिर्वशिष्ठः मन्त्रवत् यथामन्त्रमित्यर्थः उपवासं कारयामास ११

१२] ति० टी०–राज्ञो दशरथस्य ॥ १२ ॥

रा० टी०–तत इति । रामेण यथावदर्चितः राज्ञो गुरुर्वशिष्ठः काकुत्स्थं राममभ्यनुज्ञाप्य यथाविध्युपदिश्य ततः तस्माद्रामनिवेशनाद्ययौ ॥ १२ ॥

गो० टी०–तत इति । काकुत्स्थमभ्यनुज्ञाप्य अनुयान्तं रामं निवर्तस्वेत्युक्त्वा ययौ निर्ययौ ॥ १२ ॥

१३–१४] ति० टी०–प्रियंवदैः सुहृद्भिः सभाजितः पूजितः विवेश स्ववेश्म । तान्सुहृदः ॥ १३ ॥ १४ ॥

रा० टी०–सुहृद्भिरिति । प्रियंवदैः सुहृद्भिः सहासीनः सभाजितः तैः पूजितश्च रामः सर्वशस्तान् सुहृदोऽनुज्ञाप्य अथ विवेश स्वभवनमिति शेषः ॥ १३ ॥

गो० टी०–सुहृद्भिरित्यादि ॥ १३ ॥

रा० टी०–हृष्टेति । मत्तद्विजगणं मत्ता द्विजगणाः पक्षिसमूहाः यस्मिन् तत् प्रफुल्लानि नलिनानि कमलानि यस्मिन् तत् सर इव हृष्टनारीनरयुतं तद्रामवेश्म आबभौ ॥ १४ ॥

गो० टी०–हृष्टेति ॥ १४ ॥

१५] ति० टी०–राजभवनं मूलराजभवनम् । प्रख्यं सदृशम् ॥ १५ ॥

रा० टी०–रामप्रवेशमुक्त्वा गुरुवृत्तान्तमाह–स इति । राजभवनप्रख्यात् राजभवनसदृशात् रामनिवेशनान्निर्गत्य जनसंवृतं जनैः संयुक्तं मार्गं स वसिष्ठो ददृशे ॥ १५ ॥

गो० टी०–स इति ॥ १५ ॥

१६] ति० टी०–वृन्दानां वृन्दैः । अभिसंबाधाः संमर्दयुक्ताः । कुतूहलजनै रामाभिषेकदर्शनजकौतुकसंपन्नैर्जनैः ॥१६॥

रा० टी०–वृन्देति । वृन्दवृन्दैः वृन्दानां समूहानां स्थितानां वृन्दैः समूहविशिष्टैः कुतूहलजनैः अभिषेकसामग्रीदर्शनजनितौत्सुक्यविशिष्टप्राणिभिः वृताः आछादिताः समन्ततः

---

१ चेति गो.पाठः । २ यौवराज्यमिति गो.पाठः । ३ यतव्रतमिति गो.रा.पाठः । ४ मुनिरिति गो.स.पाठः । ५ मार्गं इति रा.पाठः । ६ मान्तिक इति भाति ।

जनवृन्दोर्मिसंघर्षहर्षस्वनवृतस्तदा । बभूव राजमार्गस्य सागरस्येव निःस्वनः ॥ १७ ॥
सिक्तसंमृष्टरथ्या हि तथा च वनमालिनी । आसीदयोध्या तैदहः समुच्छ्रितगृहध्वजा ॥ १८ ॥
तदा ह्ययोध्यानिलयः सस्त्रीबालाकुलो जनः । रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षन्नुदयं रवेः ॥ १९ ॥
प्रजालंकारभूतं च जनस्यानन्दवर्धनम् । उत्सुकोऽभूज्जनो द्रष्टुं तमयोध्यामहोत्सवम् ॥ २० ॥
एवं तैज्जनसंबाधं राजमार्गं पुरोहितः । व्यूहन्निव जनौघं तं शनै राजकुलं ययौ ॥ २१ ॥
सिताभ्रशिखरप्रख्यं प्रासादमधिरुह्य चै । समीयाय नरेन्द्रेण शक्रेणेव बृहस्पतिः ॥ २२ ॥
तमागतमभिप्रेक्ष्य हित्वा राजासनं नृपः । पप्रच्छ स्वैमतं तस्मै कृतमित्यभिवेदयैतं ॥ २३ ॥

चतुर्दिक्षु वियमानाः अयोध्यायां राजमार्गाः अतिसंबाधाः गन्तृणां परस्परमतिसंमर्दजनकाः बभूवुः ॥ १६ ॥

गो० टी०–वृन्दवृन्दैरिति । वृन्दानुबद्धानि वृन्दानि येषां ते वृन्दवृन्दाः तैः कुतूहलजनैः वृताः राजमार्गा अभिसंबाधा निबिडा बभूवुरिति योजना 'वृन्दवृन्दम्' इतिपाठे वृन्दवृन्दं यथा भवति तथा स्थितैरिति शेषः ॥ १६ ॥

१७] ति० टी०–जनवृन्दान्येवोर्मयस्तेषां संघर्षोऽन्योन्यसंघर्षणं तेन हर्षेण जातो यः स्वनस्तवृतः ॥ १७ ॥

रा० टी०–जनेति । जनवृन्दान्येवोर्मयस्तेषां संघर्षेण परस्परमतिसंबन्धेन जातो हर्षनिःस्वनः हर्षजनितशब्दः तद्वृतो राजमार्गस्य स्वनः सागरस्य समुद्रस्य निःस्वन इव बभूव ॥१७॥

गो० टी०–जनवृन्देति । जनवृन्दान्येव ऊर्मयः तेषां संघर्षः अन्योन्यघटनं हर्षः आनन्दोद्रेकः ताभ्यां जनितः स्वनोऽस्यास्तीति स्वनवान् तस्य एतेन सागरोपमा समर्थिता ॥१७॥

१८] ति० टी०–सिक्ताः सुगन्धिजलसिक्ताः संमृष्टाः शोधिता रथ्या यस्याम् । तदहस्तस्मिन्नहनि । तथा च तथैव । वनमालिनी तोरणमालावती । समुच्छ्रिता गृहेषु ध्वजा यस्यां सा ॥ १८ ॥

रा० टी०–सिक्तेति । सिक्ताः प्राप्तसुगन्धविशिष्टजलाधिकसेकाः संमृष्टाः अधिकं संमार्जिताः रथ्याः मार्गाः यस्यां सा वनमालिनी संरचितमालासमूहविशिष्टा समुच्छ्रिताः सम्यगुन्नताः गृहध्वजाः यस्यां सा अयोध्या तदहस्तस्मिन् दिने आसीत् १८

गो० टी०–सिक्तेति । तदहः तस्मिन्नहनि वनमालिनी अलंकारार्थं विरचितक्रमुककदल्यादिवनपङ्क्तियुक्तेति यावत् ॥ १८ ॥

१९] ति० टी०–स्त्रीबालैः सहितश्चासावाकुलः संतोषात्संभ्रान्तचित्तः । 'सस्त्रीबालाबलः' इति पाठेऽबला वृद्धाः स्त्रीबालवृद्धसहितो जन इत्यर्थः । रामाभिषेकमाकाङ्क्षन्नुद्गमिच्छन् रवेरुदयमाकाङ्क्षन् अभूदिति शेषः ॥ १९ ॥

रा० टी०–तदेति । अयोध्यानिलयः अयोध्यानिवासी सस्त्रीबालाकुलः स्त्रीसहितबालैराकुलः व्याप्तो जनः रामाभिषेकमाकाङ्क्षन्सन् रवेरुदयमाकाङ्क्षन् बभूवेति शेषः । 'सस्त्रीबालाबलः' इति पाठे अबलाः वृद्धाः स्त्रीबालवृद्धसहितो जन इत्यर्थः । इति भट्टः ॥ १९ ॥

गो० टी०–तदेति । सस्त्रीबालाबलः अबलाः बलरहिताः वृद्धा इति यावत् रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षदुदयं रवेरिति रामाभिषेकार्थं उदयमाकाङ्क्षदित्यर्थः । श्रो रामाभिषेक इति वार्ता यदा समजनि तदाप्रभृति रामाभिषेकादरातिशयेन आहारनिद्रादिव्यापारान्विहाय परदिवससूर्योदयमाकाङ्क्षदिति भावः ॥ १९ ॥

२०] ति० टी०–महोत्सवं रामाभिषेकसंभूतम् ॥ २० ॥

रा० टी०–प्रजेति । प्रजाः अलंकारभूताः अत्यलंकारं प्राप्ताः यस्मिन् तम् जनस्य सहृदयस्यानन्दवर्धनं तमयोध्यामहोत्सवं द्रष्टुं जनः देशान्तरस्थोऽपि प्राणी उत्सुकोऽत्यभिलाषी अभूत् ॥ २० ॥

गो० टी०–प्रजालंकारभूतमिति । प्रजालंकारभूतं प्रजालंकरणहेतुभूतं प्रजालंकारप्रचुरमिति वा ॥ २० ॥

२१] ति० टी०–व्यूहन्निव राजमार्गं व्याप्य स्थितानेकतः कुर्वन्निव ॥ २१ ॥

रा० टी०–एवमिति । एवं जनसंबाधं तं राजमार्गं प्राप्त इति शेषः । पुरोहितो वसिष्ठः तं राजमार्गस्थं जनौघं व्यूहन् यन्नतः व्यूहरचनया संस्थापयन्निव राजकुलं ययौ ॥ २१ ॥

गो० टी०–एवमिति । राजमार्गं पश्यन्निति शेषः । तं जनौघं व्यूहन्निव रामाभिषेकजनितानन्दनिर्भरं जनौघं तत्र तत्र समूहीकुर्वन्निव शनैः राजकुलं राजगृहं ययौ ॥ २१ ॥ २२ ॥

२२] ति० टी०–सिताभ्रसदृशहिमगिरिशिखरसदृशम् २२॥

रा० टी०–सितेति । सिताभ्रशिखरप्रख्यं सिताभ्रसदृशानि शिखराणि यस्य सः हिमगिरिरित्यर्थः तत्प्रख्यं तच्छिखरसदृशं प्रासादमधिरुह्य शक्रेण शक्रस्य समीपं बृहस्पतिरिव नरेन्द्रेण नरेन्द्रस्य समीपं समी सर्वत्र तुल्यदर्शनो वसिष्ठः इयाय प्राप ॥ २२ ॥

२३] ति० टी०–राजासनं हित्वा प्रत्युत्थायेत्यर्थः । स्वमतं स्वाद्यमतं कृत्यं पप्रच्छ स च यदाज्ञप्तं तत्कृतमिति न्यवेदयत् ॥ २३ ॥

१ वत इति गो. रा. पाठः । २ तदहरिति गो. पाठः । ३ नगरीति गो. पाठः । ४ बालाबल इति गो. पाठः । ५ आकांक्षदिति गो. पाठः । ६ तमिति गो. पाठः । ७ शुभ्राभ्रेति गो. पाठः । ८ स इति गो. पाठः । ९ स च तस्मै तदिति गो पाठः । १० अभ्यवेदयदिति गो. रा. पाठः ।

तेन चैव तदा तुल्यं सहासीनाः सभासदः । आसनेभ्यः समुत्तस्थुः पूजयन्तः पुरोहितम् ॥ २४ ॥
गुरुणा त्वभ्यनुज्ञातो मनुजौघं विसृज्य तम् । विवेशान्तःपुरं राजा सिंहो गिरिगुहामिव ॥ २५ ॥
तदग्र्यवेषप्रमदाजनाकुलं महेन्द्रवेश्मप्रतिमं निवेशनम् ।
व्यदीपयंश्चारु विवेश पार्थिवः शशीव तारागणसंकुलं नभः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ।

वसिष्ठनियोगाद्रामः सीतया समं स्नानोपासनकुशसंस्तरशयनादिनियमं जग्राह । अन्येद्युश्च प्रातः प्रबोधितः संध्योपासनादीनि न्यवर्तयद्ब्राह्मणाश्च पुण्याहवाचनं विदधुः । पौराः पुरमलंकृत्य दशरथं प्राशंसन् । रामाभिषेकदिदृक्षागतजनैरयोध्या पूर्णाभवत् ।

गते पुरोहिते रामः स्नातो नियतमानसः । सह पत्न्या विशालाक्ष्या नारायणमुपागमत् ॥ १ ॥
प्रगृह्य शिरसा पात्रीं हविषो विधिवत्ततः । महते दैवतायाज्यं जुहाव ज्वलितानले ॥ २ ॥

रा० टी०–तमिति । नृपो दशरथः तं वसिष्ठमागतमभिप्रेक्ष्य अवलोक्य राजासनं हित्वा अभ्युत्थानं कृत्वेत्यर्थः । स्वमतं स्वेप्सितं रामोपवासकरणमित्यर्थः । पप्रच्छ तस्मै प्रभं कुर्वते राज्ञे कृतं भवदुक्तं मया संपादितमित्यभ्यवेदयद् अकथयत् । वसिष्ठ इति शेषः ॥ २३ ॥

गो० टी०–तमिति । नृपो दशरथः राजासनं स्वाधिष्ठितं सिंहासनं हित्वा प्रत्युत्थायेत्यर्थः । पप्रच्छ किं रामस्योपवासः कारित इतीति शेषः । सः वसिष्ठस्तस्मै दशरथाय तत् उपवासकरणम् ॥ २३ ॥

२४] ति० टी०–तुल्यं तुल्यकालम् ॥ २४ ॥

रा० टी०–तेनेति । तेन राज्ञा सहासीनाः सभासदः तदा राज्ञोत्थानसमये तेन तुल्यं पुरोहितं वसिष्ठः पूजयन्तः सन्तः आसनेभ्यः समुत्तस्थुः ॥ २४ ॥

गो० टी०–तेनेति । तदा दशरथसमुत्थानकाले तुल्यं युगपत् ॥ २४ ॥ २५ ॥

२५] ति० टी०–अभ्यनुज्ञातः सर्वस्य कर्तव्यस्य कृतत्वाद्विश्रम्यतामित्युक्तः ॥ २५ ॥

रा० टी०–गुरुणेति । गुरुणा अभ्यनुज्ञातो राजा मनुजौघं जनसमूहं विसृज्य त्यक्त्वा गिरिगुहां सिंह इव अन्तःपुरं विवेश ॥ २५ ॥

२६] ति० टी०–अग्र्य उत्तमः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चमः सर्गः ॥ ५ ॥

रा० टी०–तदिति । अग्र्यमत्युत्तमं रूपं येषां ते एव प्रमदाजनाः तैः आकुलं व्याप्तं महेन्द्रवेश्मप्रतिममिन्द्रभवनसदृशं तत्तादृक् निवेशनं स्वभवनं तारागणसंकुलं नभं आकाशं शशीव विदीपयन् विशेषेण प्रकाशयन् सन् पार्थिवो विवेश ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणाववोध्याकाण्डे पञ्चमः सर्गः ॥ ५ ॥

गो० टी०–तदिति।विदीपयन् तेजोविशेषेण द्योतयन्२६॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

१] ति० टी०–आदरात्पुनरभिषेकसामग्रीवर्णनम् । उपागमदुपासाञ्चक्रे । नारं जीवसमूहोऽयनमन्तर्यामितया स्थानं यस्य तेनान्तर्यामिणमित्यर्थः ॥ १ ॥

रा० टी०–गत इति । पुरोहिते वसिष्ठे गते सति स्नातो नियतमानसः एकाग्रचित्तः रामः विशालाक्ष्या पत्न्या सह नारायणं स्वमर्यादापुरुषोत्तमत्वमुपागमत् अस्मरत् । नारायणशब्दार्थस्तु नारेण नीत्यैव अयते भावप्रधानो निर्देशः ॥ १ ॥

गो० टी०–अथ रामस्याभिषेकसत्राहं दर्शयति षष्ठे–गत इत्यादि । पुरोहिते गत इत्यसन्निधानकृतराजसगुणनिमित्तकनास्तिक्यव्याघातः, स्नात इति कायशुद्धिः, नियतमानस इति मनःशुद्धिः, सहपत्न्येतिश्रीरङ्गविग्रहानुभवसागरतरणस्य सहायोक्तिः " पत्युर्नो यज्ञसंयोगे " इति दीक्षानियमस्य पत्नीसहायत्वोक्तिश्च तृतीयया आराधनकाले सीताया उपकरणसमर्पणपरता व्यज्यते विशालाक्ष्येति रामविग्रहानुभवादपि श्रीरङ्गविग्रहस्य निरतिशयप्रियास्पदत्वेन निर्निमेषानुभव उक्तः विशालाक्ष्या नारायणमिति सीतानेत्रवागुरानाकृष्टतया सीताया अप्राधान्यं नारायणस्य स्वाभीप्सिततमत्वेन प्राधान्यं चोक्तम् । अत्र नारायण इति श्रीरङ्गनायक उच्यते उत्तरत्र तस्यैव विभीषणाय दानोक्तेः ॥ १ ॥

२] ति० टी०–शिरसा पात्रीं प्रगृह्य नमस्कारपूर्वमित्यर्थः महते दैवताय नारायणाय ॥ २ ॥

रा० टी०–तन्मर्यादापुरुषोत्तमत्वं प्रकटयितुं तत्कर्तृकवेदविहितकर्माचरणं बोधयन्नाह–प्रगृह्येत्यादिभिः । शिरसा तदुपलक्षितनमस्कारेण हविषः पात्रीं प्रगृह्य नमस्कारपूर्वकं

१ रूपमिति गो. रा. पाठः । २ गणाकुलमिति गो. रा. पाठः । ३ विदीपयन्निति गो. रा. पाठः । ४ तदेति गो. पाठः । ५ ज्वलिते इति गो. रा. पाठः ।

शेषं च हविषस्तस्य प्राश्याशास्यात्मनः प्रियम् । ध्यायन्नारायणं देवं स्वास्तीर्णे कुशसंस्तरे ॥ ३ ॥
वाग्यतः सह वैदेह्या भूत्वा नियतमानसः । श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ॥ ४ ॥
एकयामावशिष्टायां रात्र्यां प्रतिविबुध्य सः । अलंकारविधिं सम्यक्कारयामास वेश्मनः ॥ ५ ॥
तत्र शृण्वन्सुखा वाचः सूतमागधबन्दिनाम् । पूर्वां संध्यामुपासीनो जजाप सुसमाहितः ॥ ६ ॥
तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम् । विमलक्षौमसंवीतो वाचयामास स द्विजान् ॥ ७ ॥

हविःपात्रं गृहीत्वेत्यर्थः । ततः तस्याः पाश्याः आज्यं प्रगृह्य ज्वलितेऽनले महते यागदेवतामुरुयाय दैवताय देवतायै विधिवज्जुहाव । प्रगृह्येत्युभयान्वयि ॥ २ ॥

गो० टी०—प्रगृह्येति । शिरसा पात्रीं प्रगृह्येति " उपरि हि देवेभ्यो धारयति" इति श्रुतिरुपबृंहिता । महते दैवताय निरतिशयमहिमवते दैवताय " तं देवतानां परमं च दैवतम् " इति श्रुतेः नारायणायेत्यर्थः । नारायणमुपागमदित्युपक्रमात् ध्यायन्नारायणं देवमित्युत्तरत्रोक्तेश्च । तेन महते दैवतायेति महादेववाचित्वशान्तिर्निरस्ता नच व्यस्तस्य विभिन्नविभक्त्यन्तस्यैकपदत्वमेका वा शक्तिरस्ति महादेवशब्दस्याखण्डस्य शिवे शक्तावपि खण्डपदद्वयस्य प्रस्तुतपरदेवतावरुद्धस्याप्रस्तुतान्यदेवतावाचकत्वकल्पनमन्धतामिस्रनिपातकदुरितादृष्टं विना न शक्यते ॥ २ ॥

३] ति० टी०—आशास्य प्रार्थ्य आत्मनः प्रियं राज्याभिषेकाविघ्नरूपं वस्तुतो रावणवधफलकवनगमनरूपमाशास्य संकल्प्येत्यर्थः । वैदेह्या सहेत्यत्राप्यपकृष्टव्यम् । नहि चतुर्दशभुवनाधिपतेरेतद्यौवराज्यं प्रियं भवति । सकलतदेशमनुष्यप्रियत्वादात्मन इत्यस्य वैफल्यं चाथ व्याख्याने प्राप्नोतीति दिक् । कुशसंस्तरे कुशमये शयनीये ॥ ३ ॥

रा० टी०—शेषमिति । तस्य हुतस्य हविषः शेषमाशास्य प्रशस्य प्राश्य भुक्त्वा प्रियं स्वप्रीतिविषयीभूतमत एव देवं प्रमोदप्रापकं नारायणं स्वमर्यादापुरुषोत्तमत्वं ध्यायन् स्मरन् सन् श्रीमति सकलैश्वर्यविशिष्टे आयतने विधिनिर्मितयागगृहे विष्णोः स्वास्तीर्णे विष्णुकर्तृकशोभनाविस्तारविशिष्टे कुशसंस्तरे कुशासने नियतमानसः नरवरात्मजो रघुनाथः वैदेह्या सह वाग्यतो भूत्वा शिश्ये विष्णोः स्वास्तीर्णे इत्यनेन विष्णुपूज्यत्वं रघुनाथस्य द्योतितम् विष्णोरिति संबन्धसामान्ये षष्ठी द्वयोरेकत्रान्वयः । विष्णोरायतने शिश्ये इत्यर्थस्तु न युक्तः गर्भमन्दिरे शयनस्य निषेधात् गौणग्रहणे तु स एव दोषः ॥ ३ ॥ ४ ॥

गो टी०—शेषमिति । आत्मनः प्रियमाशास्य श्रीरङ्गार्पितहविःशेषं स्वस्यात्यन्तप्रियत्वेनानुसंधाय नारायणं श्रीरङ्गनायकं ध्यायन् कुशसंस्तरे कुशमये शयनीये 'शयनीये सप्ततन्तौ संस्तरः परिकीर्तितः' इति निघण्टुः । वैदेह्या सहेति उभयोरप्येकशय्यायां जितेन्द्रियत्वं ध्वनितम् श्रीमति विमानं प्रणवाकारमित्यायुक्तवेदत्रयसारभूतप्रणवाकारे "ऋचः सामानि यजूंषि सा-

हि श्रीरमृता सताम्" इति श्रुतेः विष्णोरायतने श्रीरङ्गधाम्नि शिश्ये शयनं कृतवान् नरवरात्मजः स्वस्य साक्षाद्भगवद्वतारत्वेऽपि श्रीरङ्गविग्रहार्चोपसर्जनभावः स्वावतारानुमतक्षत्रियधर्मानुगुणः ॥ ३ ॥ ४ ॥

४-५] ति० टी०—नियतमीश्वरमात्रविषयम् । विष्णोरायतने निजभवनवर्तिनि देवपूजालये ॥ ४ ॥ ५ ॥

रा० टी०—एकेति । एकयामावशिष्टायां ग्रामत्रयव्यतीतायामित्यर्थः । रात्र्यां प्रतिबुध्य स्वीकृतनिद्रां परित्यज्य सरघुनाथः वेश्मनः सभामण्डपस्य अलंकारविधिं यथोक्तमलंकारं सम्यगेव कारयामास दीपप्रज्वलनादि कर्तुमाज्ञापयामासेत्यर्थः । तुशब्द एवार्थे ॥ ५ ॥

गो० टी०—एकयामावशिष्टायामिति । अलंकारविधिं अलंकारविधानम् ' विधिर्विधाने दैवेऽपि ' इत्यमरः ॥ ५ ॥

६] ति० टी०—सूताः पौराणिकाः मागधा वंशावलीकीर्तकाः बन्दिनः स्तुतिपाठकाः । पूर्वां संध्यामुपासीनस्तदुपासनं कुर्वन्नजाप गायत्रीजपस्यैव तदुपासनरूपत्वात् ॥ ६ ॥

रा० टी०—तत्र इति । ततः अलंकारकरणज्ञापनानन्तरं सूतमागधबन्दिनां सूताः पौराणिकाः मागधाः वंशप्रकाशकारः बन्दिनः तथशोवकारः तेषां सुखा वाचः शृण्वन् पूर्वां संध्यामुपासीनश्च सन् यतमानसो रामः जजाप गायत्र्यादिजपं चकारेत्यर्थः । विनापि चं सप्तषयः ॥ ६ ॥

गो० टी०—तत्रेति । सूताः सूतकुलोत्पन्नाः पुण्यश्लोकदेवताकीर्तकाः मागधाः मगधदेशोत्पन्नाः वंशावलिकीर्तकाः बन्दिनः स्तुतिपाठकाः संध्यां संध्याधिदेवतां सूर्यमुपासीनः ध्यायन् यतमानसः नियतमनस्कः अनन्यचित्त इति यावत् जजाप गायत्रीमिति शेषः ॥ ६ ॥

७] ति० टी०—वाचयामास स्वस्तिवाचनं पुण्याहं च ॥ ७ ॥

रा० टी०—तुष्टावेति । विमलक्षौमसंवीतः मलसंबन्धरहितपट्टविशेषवल्कचारी शिरसा प्रणत एव स रामः द्विजान् तुष्टाव मधुसूदनं मधुसूदनशब्दं वाचयामास च द्विजैरुच्चारयामासेत्यर्थः । मधुसूदनशब्दार्थस्तु मधौ चैत्रे सः प्रादुर्भावो यस्य सः उच्यते स्वस्वकल्याणार्थं सर्वैरुच्यते इति उद् अनिति अजादीनपि पाठयति इति अनः अयाणां कर्मचारयः किंच मधुं मधुनामानं दैत्यं सूते कर्णमलद्वारोत्पादयतीति मधुसूदिन्द्वः तेन उच्यते नित्यमुच्चार्यतेऽनयेति मधुसूदः स एवानः सर्वरक्षकः

१ कृत्स्नमिति गो. पाठः । २ तत इति रा. पाठः । ३ यतमानस इति गो. रा. पाठः । ४ चेति गो. पाठः ।

तेषां पुण्याहघोषोऽथ गम्भीरमधुरस्तथा । अयोध्यां पूरयामास तूर्यघोषानुनादितः ॥ ८ ॥
कृतोपवासं तु तदा वैदेह्या सह राघवम् । अयोध्यानिलयः श्रुत्वा सर्वः प्रमुदितो जनः ॥ ९ ॥
ततः पौरजनः सर्वः श्रुत्वा रामाभिषेचनम् । प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरीम् ॥ १० ॥
सिताभ्रशिखराभेषु देवतायतनेषु च । चतुष्पथेषु रथ्यासु चैत्येष्वट्टालकेषु च ॥ ११ ॥
नानापण्यसमृद्धेषु वणिजामापणेषु च । कुटुम्बिनां समृद्धेषु श्रीमत्सु भवनेषु च ॥ १२ ॥
सभासु चैव सर्वासु वृक्षेष्वालक्षितेषु च । ध्वजाः समुच्छ्रिताः साधु पताकाश्चाभवंस्तथा ॥ १३ ॥
नटनर्तकसंघानां गायकानां च गायताम् । मनःकर्णसुखा वाचः शुश्रुवे जनता ततः ॥ १४ ॥
रामाभिषेकयुक्ताश्च कथाश्चक्रुर्मिथो जनाः । रामाभिषेके संप्राप्ते चत्वरेषु गृहेषु च ॥ १५ ॥

एतेन स्वनामोच्चारणविषयकप्रीत्यतिशयो रघुनाथस्य सूचितः । दूरान्वयीदमिति तु न भ्रमितव्यं पाठक्रमादार्थक्रमस्य बलीयस्त्वादाकाङ्क्षितत्वाच्चेति दिक् । युक्तश्चायमेवार्थः अन्यथा अभेदवादिनामप्यस्यैव मधुसूदनत्वेन स्वकर्मकस्तवनस्य निषिद्धत्वेन विरुद्धत्वापत्तिरिति दिक् ॥ ७ ॥

गो० टी०–तुष्टावेति । संध्योपासनानन्तरं मधुसूदनं मूर्धान्तर्वर्तिनं नारायणं तुष्टाव "मित्रस्य–" इत्यादिनेति शेषः । शिरसा प्रणतः दण्डवत्प्रणतः विमलक्षौमसंवीत इत्यनेन नूतनवस्त्रपरिधित्या प्रातर्गौणस्नानमुक्तं वाचयामास स्वस्तिवाचनं कारयामासेत्यर्थः ॥ ७ ॥

८–९] ति० टी०–तूर्यघोषानुनादितस्तूर्यघोषेण संजातानुनादः ॥ ८ ॥ ९ ॥

रा० टी०–तेषामिति । तदा मधुसूदनशब्दोच्चारणकाले तेषां द्विजानां तूर्यघोषानुनादितः तूर्यघोषानुनादविशिष्टः पुण्याहघोषोत्थगम्भीरमधुरः पुण्यं पवित्रत्वं न जहातीति पुण्याहः सार्वकालिकपवित्रतासंपादकधर्मविशिष्ट इत्यर्थः । स एव घोषः मधुसूदनशब्दशब्दः तेनोत्थः संजातः गम्भीरमधुरः गम्भीरेण गाम्भीर्येण सहितो मधुरो माधुर्य गाम्भीर्यमाधुर्ये इत्यर्थः । अयोध्यां पूरयामास गम्भीरमधुरशब्दौ भावप्रधानौ ॥ ८ ॥

गो० टी०–तेषामिति । तूर्यघोषानुनादितः तूर्यघोषानुबन्धिनादयुक्तः ॥ ८ ॥

रा० टी०–कृतेति । अयोध्यानिलयः अयोध्यानिवासी॥९॥

गो० टी०–कृतोपवासमिति । प्रमुदितः संतुष्टःअभूत् ॥९॥

१०] ति० टी०–शोभयितुमलंकर्तुं चक्रे बुद्धिमिति शेषः१०

रा० टी०–तत इति । पुरीमयोध्यां शोभयितुं स्वस्वबुद्ध्युत्साहेनालंकर्तुं चक्रे प्रयत्नमिति शेषः । शोभायुतामित्याचारिपाठः ॥ १० ॥

गो० टी०–तत इति । पुरीं शोभयितुं चक्रे पुरशोभोत्पादनार्थं संमार्जनालेपनवितानमालिकाबन्धनकर्मादिकमकरोदित्यर्थः ॥ १० ॥

११–१२] ति० टी०–अट्टालकाः प्राकारोपरितनयुद्धस्थानानीति केचित् ॥ ११ ॥ १२ ॥

१३] ति० टी०–आलक्षितेषु सर्वतो लक्षितेषु अत्युच्चेष्विति यावत् । ध्वजाः सचिह्नाः पताकाश्चिह्नरहिता इत्याहुः॥१३॥

रा० टी०–अलंकृतिमेव विशदयन्नाह–सितेत्यादिभिः । सिताः शुक्ला ये अभ्रा मेघाः तद्वत् यानि शिखराणि तेषामाभा येषु किंच सिताभ्रयुक्तानि यानि शिखराणि तैराभान्ति तेषु चैत्येषु चैत्यं चैतन्यमस्ति एषु अर्शआद्यजन्तः इदं देवतायतनादिविशेषणम् । एतेन रामधाम्नः चैतन्यं व्यक्तं तत्र प्रमाणम् 'यत्र शुल्मलताल्लक्षा नित्यशो भान्ति चिन्मयाः' इत्यादि चैत्येषु बौद्धालयेष्विति गोविन्दाचारिव्याख्यानं तु न नास्तिको नानृतक इत्यादिना बालकाण्डोक्तेन विरोधात् त्यक्तव्यमिति दिक्॥

रा० टी०–नानेति । पण्यं व्यवहर्तव्यं वस्तु अट्टालकेषु प्राकारोपरिकल्पितयुद्धस्थानेषु सभासिति आलक्षितेषु दूरतोऽप्यवलोकितेष्वित्यर्थः । तेन तेषामत्युन्नतत्वं व्यक्तं ध्वजाः चिह्नसहिताः पताकाः तद्रहिता इति न पौनरुक्त्यम् ॥१२॥१३॥

गो० टी०–सिताभ्रशिखराभेष्वित्यादि । चैत्येषु बौद्धालयेषु अट्टालकेषु प्राकारोपरि युद्धार्थं परिकल्पितचतुस्तम्भमण्डपेष्विति यावत् । आलक्षितेषु आसमन्ताल्लक्षितेषु सम्युन्नतत्वात् दूरादप्यक्षिगोचरेष्वित्यर्थः । ध्वजाः सचिह्नाः पताकाः चिह्नरहिताः समुच्छ्रिताः बद्धाः ॥ ११–१३ ॥

१४–१५] ति० टी०–नटाः सूत्रधाराः जनता जनसमूहः। ततस्तत्रायोध्यायाम् ॥ १४ ॥ १५ ॥

रा० टी०–नटेति । नटा आश्चर्यनानोल्लङ्घनादि कर्म कर्तारः ' नर्तका नृत्यनृत्तादिकर्मकर्तारः ' गायका गानकुशलाः तेषां वाचः जनता जनानां समूहः ततस्तत्रायोध्यायामित्यर्थः । शुश्राव सप्तम्यन्तात्तसिल् ' शुश्रुवुश्च ततस्ततः' इति गोविन्दाचारिपाठः ॥ १४ ॥

गो० टी०–नटेति । नटाः नाटकाः अभिनयकर्तारः, नर्तकाः केवलाङ्गहारकृतः मनःकर्णसुखाः ' संश्रवे मधुरं वाक्यम् ' इत्युक्तरीत्या श्रवणमात्रेण सुखकराः पश्चान्मनसश्चाह्लादका इत्यर्थः । शुश्रुवुः जना इति शेषः ॥ १४ ॥

रा० टी०–रामेति । रामाभिषेकयुक्ताः रामाभिषेकोपयोगिनीः जनाः अयोध्यानिवासिनः चत्वरेषु चतुष्पथेषु ॥ १५॥

---

१ तदेति गो.रा. पाठः । २ अट्टालकेष्विति रा. पाठः । ३ चित्रा इति गो.पाठः । ४ तदेति गो.रा. पाठः । ५ शुश्रुवुश्च ततस्तत इति गो. पाठः ।

बाला अपि क्रीडमाना गृहद्वारेषु संघशः । रामाभिषवसंयुक्ताश्चक्रुरेवं कथा मिथः ॥ १६ ॥
कृतपुष्पोपहारश्च धूपगन्धाधिवासितः । राजमार्गः कृतः श्रीमान्पौरै रामाभिषेचने ॥ १७ ॥
प्रकाशीकरणार्थं च निशागमनशङ्कया । दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः ॥ १८ ॥
अलंकारं पुरस्यैवं कृत्वा तत्पुरवासिनः । आकाङ्क्षमाणा रामस्य यौवराज्याभिषेचनम् ॥ १९ ॥
समेत्य संघशः सर्वे चत्वरेषु सभासु च । कथयन्तो मिथस्तत्र प्रशशंसुर्जनाधिपम् ॥ २० ॥
अहो महात्मा राजायमिक्ष्वाकुकुलनन्दनः । ज्ञात्वा वृद्धं स्वमात्मानं रामं राज्येऽभिषेक्ष्यति॥ २१ ॥
सर्वे ह्यनुगृहीताः स्म यन्नो रामो महीपतिः । चिराय भविता गोप्ता दृष्टलोकपरावरः ॥ २२ ॥
अनुद्धतमना विद्वान्धर्मात्मा भ्रातृवत्सलः । यथा चैव भ्रातृषु स्निग्धस्तथास्मास्वपि राघवः ॥ २३ ॥
चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः । यत्प्रसादेनाभिषिक्तं रामं द्रक्ष्यामहे वयम् ॥ २४ ॥

गो० टी०–रामेति । मिथः अन्योन्यं 'मिथोऽन्योन्यम्' इत्यमरः । चत्वरेषु अङ्गणेषु गृहेषु स्त्रीभिः बहिरङ्गणेषु जनैश्च कथाश्चक्रुरिति रामभक्तावकृत्रिमत्वमुक्तम् ॥ १५ ॥ १६ ॥

१६–१७] ति० टी०–रामाभिषवो रामाभिषेकः १६–१७

रा० टी०–अज्ञानामपि तत्कथासु रुचिरिति बोधयितुमाह–बाला इति । गृहद्वारेषु गृहाणि च द्वाराणि चेति द्वन्द्वः । एतेन तत्कथायाः सर्वमनोहरत्वं व्यक्तम् ॥ १६ ॥

रा० टी०–प्रासङ्गिकं कथाप्रचारं संवर्ण्य प्रकृतां पुरालंकृतिमाह–कृतेत्यादिद्वाभ्याम् । श्रीमान् स्वतो नित्यसंपत्तिविशिष्टो राजमार्गः पौरैः कृतपुष्पोपहारः कृतः पुष्पोपहारः पुष्पबलिर्यस्मिन् धूपगन्धाधिवासितः उपलक्षणतया धूपादिगन्धव्याप्तश्च कृतः ॥ १७ ॥

गो० टी०–कृतपुष्पोपहार इति । कृतपुष्पोपहारः कृतपुष्पबलिः ॥ १७ ॥

१८–२१] ति० टी०–अभिषेकानन्तरं गजस्कन्धाधिरूढस्य नगरालंकारदर्शनार्थनिर्गमनात्पूर्वं यदि निशा न याति तदा तदलंकारप्रदर्शनार्थं स्वयं रामं द्रष्टुं च दीपवृक्षान्वृक्षवन्नानाशाखान्दीपस्तम्भान् । अनुरथ्यासु रथ्यापार्श्वयोः ॥१८–२१॥

रा० टी०–प्रकाशेति । निशागमनशङ्कया राज्याभिषेकेऽनु इति शेषः । दीपवृक्षान् दीपस्थापनयोग्यशाखाविशिष्टतरून् अनुरथ्यासु अनुगता रथ्याः मार्गा यासु राजमार्गेष्वित्यर्थः । एतेनाभिषेकानन्तरमनेन मार्गेण रामागमनं भविष्यति तं द्रक्ष्यामीति हेतुर्व्यक्तः ॥ १८ ॥

गो० टी०–प्रकाशकरणार्थमिति । प्रकाशकरणार्थं वितानकमुककदल्यादिसमग्रताजनितातिमिरातिरोहितवस्तुप्रकाशनार्थं, यद्वा निशागमनशङ्कया प्रकाशकरणार्थं दीपवृक्षान् वृक्षाकारदीपस्तम्भान् अभिषेकानन्तरं गजस्कन्धाधिरूढतयाभिषेकालंकारप्रदर्शनार्थं निर्गमनात्पूर्वं यदि कार्यवशान्निशा स्यात्तदा रामालंकारप्रदर्शनार्थं दीपवृक्षान् अनुरथ्यासु रथ्यासु रथ्यासु विभक्तेर्लुगभाव आर्षः । निशागमनशङ्कया रामस्य प्रकाशकरणार्थमनुरथ्यासु सर्वशः सर्वप्रकारान् दीपवृक्षान् चक्रुश्च तथाशब्दश्चार्थः ॥ १८ ॥

रा० टी०–उपसंहरन्नाह–अलंकारमिति । आकाङ्क्षमाणाः प्रशशंसुरिति । द्वयोरेकवान्वयः ॥ १९ ॥ २० ॥

गो० टी०–अलंकारमित्यादिश्लोकद्वयम् ॥ १९ ॥ २० ॥

रा० टी०–प्रशंसास्वरूपं बोधयन्नाह–अहो इत्यादिभिः । अयं राजा अहो महात्मा अतिधैर्यवान् तत्र हेतुः वृद्धमैश्वर्यादिभिरतिप्रवृद्धं स्वमात्मानं स्वस्वरूपं ज्ञात्वापि राममभिषेक्ष्यति सामर्थ्यसत्त्वे अत्यन्तं प्रवृद्धैर्यादेः पुत्राधीनीकरणमपि दुर्लभमिति भावः ॥ २१ ॥

गो० टी०–प्रशंसामेवाह–अहो इत्यादि । सर्वेऽप्यनुगृहीताः स्म देवेनेति शेषः । नः अस्मान् गोप्ता भवितेति संबन्धः । दृष्टलोकपरावरः दृष्टे ये लोके परावरे उत्कृष्टापकृष्टवस्तुनी येन स तथोक्तः ॥ २१–२४ ॥

२२–२४] ति० टी०–अनुगृहीता ईश्वरेण । दृष्टलोकपरावरः भावप्रधानो निर्देशः । यथावदवगततज्जनप्राशस्त्याप्राशस्त्यः ॥ २२–२४ ॥

रा० टी०–स्वभाग्यवत्तां सूचयन्त आहुः–सर्वे इति । सर्वे वयमनुगृहीताः परमात्मानुग्रहं प्राप्ताः स्म तत्र हेतुः दृष्टलोकपरावरः दृष्टो विष्ण्वादीन् बोधितः लोकानां भुवनानां परः पालनं येन सः किं च दृष्टः उपदिष्टः लोकपरः भुवनानां पालको येन सः दृष्टलोकपरः अत एव न वरः श्रेष्ठो यस्मात् सः अवरः सर्वश्रेष्ठ इत्यर्थः । स एव स इति कर्मधारयः । किंच दृष्टा लोकाः भुवनानि परावराः उत्तमाधमा येन सः महीपतिः रामः यत्प्रसादो गोप्ता चिराय बहुकालं भविता ॥ २२ ॥

रा० टी०–राज्यार्हत्वसंपादनाय रामस्य गुणान्तरप्याह–अनुद्धतेति । अनुद्धतमनाः न उद्दीर्णवचनात् हतं निवृत्तं मनो यस्य सः भावक्विबन्ताद्धतो निष्पन्न इति ॥ २३ ॥

रा० टी०–स्वेप्सितप्राप्को राजा आशीर्भिर्योजित इत्याह–चिरमिति । अनघः आश्रिताघनिवर्तकः ॥ २४ ॥

१ सर्वश इति रा. पाठः । २ रामाभिषेकसंयुक्ता इति गो. रा. पाठः । ३ एवमिति गो. रा. पाठः । ४ प्रकाशकरणार्थमिति गो. रा. पाठः । ५ यो वृद्धमिति गो. पाठः । ६ स्वेति रा. पाठः ।

एवंविधं कथयतां पौराणां शुश्रुवुः परे । दिग्भ्यो [1]विश्रुतवृत्तान्ताः प्राप्ता जानपदा जनाः २५
ते तु दिग्भ्यः पुरीं प्राप्ता द्रष्टुं रामाभिषेचनम् । रामस्य पूरयामासुः पुरीं जानपदा जनाः ॥ २६ ॥
जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निःस्वनः । पर्वसूदीर्णवेगस्य सागरस्येव निस्वनः ॥ २७ ॥
ततस्तदिन्द्रक्षयसंनिभं पुरं दिदृक्षुभिर्जानपदैरुपाहितै[3]: ।
समन्ततः सस्वनमाकुलं बभौ समुद्रयादोभिरिवार्णवोदकम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्येऽयोध्याकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ।

यदृच्छातः प्रासादोपरिभुवमारूढा मन्थरानाम्नी कैकेय्याः कुब्जा ज्ञातिदासी तमुत्सवं ब्राह्मणेभ्यो बहुधनं वितरन्तीं कौसल्यां च प्रेक्ष्य किंनिमित्तकोऽयमारम्भ इति रामधात्रीं पप्रच्छ तया संज्ञापिता च रामाभिषेकमसहमाना कैकेयीमेत्य दशरथं विनिन्द्याभिषेकं विहन्तुं कैकेयीं प्रेरयत्तथापि रामाभिषेक एव स्वाभीष्ट इति मोदमाना कैकेयी तन्निवेदनपरितोषिकतया किंचिदाभरणं कुब्जायै ददौ ।

ज्ञातिदासी यतो जाता कैकेय्या तु सहोषिता । प्रासादं चन्द्रसंकाशमारुरोह यदृच्छया ॥ १ ॥

२५] ति० टी०—शुश्रुवुः कथा इति शेषः । विश्रुतवृत्तान्ताः श्रुतरामाभिषेकवृत्तान्ताः ॥ २५ ॥

रा० टी०—एवमिति । एवंविधमेतत्प्रकारकं वचः कथयतां पौराणां वचः विश्रुतवृत्तान्ताः विश्रुतो वृत्तान्तः राज्याभिषेकवृत्तं यैस्ते अत एव दिग्भ्यः प्राप्ता आगताः जानपदाजनास्तदा तस्मिन्काले शुश्रुवुः । वच इति विशेष्यमध्याहृतं तच्चोभयान्वयि ॥ २५ ॥

गो० टी०—एवंविधमिति । श्रुतवृत्तान्ताः श्रुतरामाभिषेकवार्ताः अत एव दिग्भ्यः प्राप्ताः जानपदाजनाः एवंविधं कथयतां पौराणां शुश्रुवुः एवंविधं वाक्यजातमित्यर्थसिद्धम् ॥ २५ ॥

२६] ति० टी०—ते जानपदाः । रामस्य पुरीमित्यन्वयः २६

रा० टी०—ते इति । ते रामस्य पुरीमयोध्यां पूरयामासुः २६

गो० टी०—ते त्विति । पूर्वदिने सकलजनसंनिधौ रामाभिषेकस्य प्रतिश्रुतत्वाद्रामस्य पुरमिति निर्दिष्टवानृषिः ॥ २६ ॥

२७] ति० टी०—विसर्पद्भिः प्रवेशार्थम् ॥ २७ ॥

रा० टी०—जनौघैरिति । तैरयोध्यां प्राप्तैः विसर्पद्भिः गच्छद्भिर्जनौघैर्जनित इति शेषः । तत्रायोध्यायासुदीर्णवेगस्य उदीर्णः प्रवृद्धो वेगो यस्य स तस्य ॥ २७ ॥

गो० टी०—जनौघैरिति । विसर्पद्भिः नानादेशेभ्य आगच्छद्भिः उत्पादित इति शेषः । उदीर्णवेगस्य उज्जृम्भितवेगस्य ॥ २७ ॥

२८] ति० टी०—इन्द्रक्षय इन्द्रनिवासोऽमरावती । आहितैः आगतैरित्यर्थः । 'हि गतौ' इत्यस्य रूपम् । सस्वनं सशब्दं समुद्रयादोभिः समुद्रजलजन्तुभिर्यादोभिरित्यर्थः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षष्ठः सर्गः ॥ ६ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—तत इति । ततः जनैः पूर्णत्वाद्धेतोः इन्द्रक्षयसन्निभमिन्द्रनिवासामरावतीसदृशम् किंच इन्द्रक्षयानुयोगिकसादृश्यप्रतियोगि किंच इन्द्रक्षयस्य अमरावत्याः संनिभः सम्यग्प्रकाशो यस्मात्तच्छ्रुतिप्रसिद्धं पुरं साकेतं दिदृक्षुभिः उपाहितैः प्राप्तैः आकुलं व्याप्तमत एव सस्वनं पुरं बभौ शुशुभे । तत्र दृष्टान्तः समुद्रयादोभिः समुद्रजलजन्तुभिः अर्णवोदकमिव पुरमित्युभयान्वयि ' निवेशः शरणं क्षयः ' इत्यमरः । उपाहितैरित्यत्र क्तान्तो गत्यर्थो हिः यादोभिर्नदीभिरित्यर्थेऽपि समुद्रोपादानवैयर्थ्यमेवेति दिक् ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०—तत इति । इन्द्रक्षयः इन्द्रगृहम् 'निवेशः शरणं क्षयः' इत्यमरः । अयोध्यापुरस्यामरावतीसादृश्ये वक्तव्ये तत्सारभूतेन्द्रभवनदृष्टान्तीकरणादयोध्याया अतिरमणीयता द्योत्यते जानपदैः समन्ततः आकुलमिति संबन्धः समुद्रयादोभिः समुद्रान्तर्वर्तितिमितिमिङ्किलादिजन्तुभिः ' यादांसि जलजन्तवः ' इत्यमरः । कर्णावर्तसादिपदवदविशेषप्रदर्शनाय समुद्रशब्दः, यद्वा समुद्रयादोभिः समुद्रगामिनीभिर्नदीभिः " यादो नपुंसकम् " इति यादःशब्दस्य नदीवाचकत्वेऽपि नपुंसकत्वं पाणिनीयलिङ्गानुशासनोक्तम् उदकशब्देन सस्वनत्वसङ्गच्छम् ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति० टी०—अथ सीताया लङ्कापुरप्रवेशं विना रावणवधस्याशक्यतया तत्सिद्धये देवैः प्रेरितायाः कृतकुब्जावेषाया मन्थराया रामाभिषेकविघ्नप्रवृत्तिं तद्वार्तिगतं कैकेयीवृत्तान्तं च वक्तुमुपक्रमते—ज्ञातीत्यादि । 'ज्ञातिदासी यतो नित्यम्' इति पाठे

---

१ तथेति गो. रा. पाठः । २ यपीति गो. पाठः । ३ गतैरिति गो. पाठः । ४ कैकेय्यास्त्विति गो. पाठः ।

सिक्तराजपथां कृत्स्नां प्रकीर्णकमलोत्पलाम् । अयोध्यां मन्थरा तस्मात्प्रासादादन्ववैक्षत ॥ २ ॥
पताकाभिर्वरार्हाभिर्ध्वजैश्च समलंकृताम् । सिक्तां चन्दनतोयैश्च शिरःस्नातजनैर्युताम् ॥ ३ ॥

यतः कैकेय्या ज्ञातेर्मातृकुलस्य दासी यतश्च कैकेय्या नित्यं सहोषिता अतो जनकोलाहलं श्रुत्वा कैकेय्यै तदर्थं निवेदयितुं यदृच्छया स्वयमेव न त्वन्यप्रेरणया प्रासादमारुरोहेत्यन्वयः । यत्तु अतः ' कुब्जा क्षिप्रममंर्षिता' इत्यनेन द्वादशश्लोकस्थपदेनान्वयः, स्वीयाभ्युदयस्य सर्वेष्टत्वाद्रामाभ्युदयजदुःखेन तद्विघटकोऽमर्ष इति कतकः तन्न, रामाभ्युदयस्याग्रे धात्रीमुखेन श्रवणस्य वक्ष्यमाणतया तस्यैव चामर्षहेतुत्वस्य च वक्ष्यमाणतयाऽत्यस्य तत्रान्वयानौचित्यात् । 'यतो जाता ' इति पाठे यतो यत्र कुत्रचिज्जाता अविज्ञातवेश्ममातापितृकेत्यर्थः । एवं च कैकेयीज्ञातिदासीत्वमपि कार्यार्थमुदरभरणव्याजेन स्वीकृतमनया इति बोध्यम् । इदं तु युक्तम्–'मन्थरा नाम कार्यार्थमप्सरा प्रेषिता सुरैः । दासी काचन कैकेय्यै दत्ता केकयभूभृता ॥ ' इति पाद्मोक्तेः । कार्यार्थं रावणवधरूपकार्यार्थं दासी स्वयमागत्य केकयराजस्य जातेति शेषः । ' नित्यम् ' इति पाठेऽपि जातेति शेषपूरणेनैव व्याख्योचिता पाद्मैकवाक्यत्वात् । चन्द्रसंकाशं सुधाधवलितत्वात् ॥ १ ॥

रा० टी०–वनप्रवेशवर्णनमुपक्रममाण आह–ज्ञातीति । अजाता आर्य विष्णवे तेन सहोद्वाहार्थमित्यर्थः जायते कुशध्वजभार्यायां प्रादुर्भवतीत्यजा प्रतिज्ञातरावणवधवेदवत्यपरावस्थाकमाण्डवीत्यर्थः । तया सह अतति सततं गच्छतीत्यजाता मन्थरेत्यर्थः । यतः कैकेय्याः ज्ञातिदासी ज्ञातिर्ज्ञानं तयुक्ता दासी अतिज्ञानवत्यतुचरी किंच ज्ञातिः क्षत्रियजातिःसैव दासी अतः सहोषिता मन्थरेत्यर्थः । चन्द्रसंकाशमुन्नतत्वस्वच्छत्वादिना चन्द्रवत्प्रकाशमानं प्रासादं यदृच्छयैवारुरोह । अजातेत्यनेन वेदवत्यभिप्रायाभिज्ञत्वं तद्धिताचरणकर्त्रीत्वं च मन्थरायाः व्यक्तम् । तुशब्द एवार्थे ॥ १ ॥

गो० टी०–अथ रावणवधकाङ्क्षिभिर्देवैराविष्टमन्थरावाक्याद्रामाभिषेकविघ्नः प्रतिपाद्यते–ज्ञातिदासीति । पूर्वसर्गे गते पुरोहित इत्यादिना तूर्यघोषानुनादित इत्यन्तेन पूर्वदिवसे अभिषेकाङ्गभूतव्रतोपवासादिकमाचरतो रामस्य वृत्तान्तमभिधाय कृतोपवासं तु तदेत्यारभ्य सर्गपर्यन्तेन रामाभिषेकश्रवणजनितानन्दनिर्भराणां पौराणां जानपदानां च जनानां रामाभिषेकदिवसप्राक्तनवृत्तान्तमभिधाय वाचः क्रमवर्तित्वादृषिः पूर्वदिवसप्रवृत्तकैकेयीवृत्तान्तं वक्तुमुपक्रमते–ज्ञातिदासीत्यादिना । कैकेय्याः ज्ञातिदासी कैकेयीबन्धुदासी ' सगोत्रबान्धवज्ञातिबन्धुत्वस्वजनाः समाः ' इत्यमरः । यतो जाता यत्र कुत्रचिज्जाता अविज्ञातदेशमातापितृकेत्यर्थः । अतः कैकेय्या ज्ञातिदासीत्वमपि स्वोदरप्रपूरणार्थं कृतमित्यवगन्तव्यम् । सहोषिता सहावस्थिता मन्थरायाः कैकेय्या सहावस्थानमपि हास्यहेतुभूतकुब्जात्वनिबन्धनम् । यदृच्छया स्वैरतया 'यदृच्छा स्वैरिता ' इत्यमरः । यद्वा यतो जाता यतः कुतश्चिज्जाता तादृशीनामयोध्यायां जननासंभवात्, यद्वा तन्नामजातिनिरूपणायोग्यतया तथा निर्देशः आचार्यास्तु देवैरेवं स्वकार्यार्थं कैकेयीं भेदयितुं प्रेषितेति देवरहस्यस्य गोप्यतया तथा निर्देश इत्याहुः ॥ १ ॥

२] ति० टी०–प्रकीर्णानि कमलान्युत्पलानि च यस्याम् । तस्मात्सर्वोत्कृष्टात्प्रासादात् प्रासादे स्थित्वेत्यर्थः ल्यब्लोपे पञ्चमी ॥ २ ॥

रा०टी०–आरोहणोत्तरकालिकं वृत्तमाह–सिक्तेति । प्रकीर्णानि कमलोत्पलानि यस्यां तामन्ववैक्षत अपश्यत् ॥ २ ॥

गो० टी०–सिक्तराजपथामिति । प्रासादादन्ववैक्षत पूर्वश्लोके आरोहणस्योक्तत्वात् प्रासादादित्यस्यान्ववैक्षतेत्यनेन संबन्धः " अधिकरणे चोपसंख्यानम् " इत्यधिकरणे ल्यब्लोपे पञ्चमी प्रासादे स्थित्वा प्रैक्षतेत्यर्थः ॥ २ ॥

३] ति० टी०–वरार्हाभिः श्रेष्ठयोग्याभिः । राजयोग्याभिरिति यावत् । एतदुत्तरम्–'कृतां छन्नपथैश्चापि स्वच्छन्दकपथैर्वृतां ' इत्यर्धं पठन्ति । छन्नपथैर्निर्ज्ञोन्नतप्रदेशमार्गैः कृतामलंकृताम् । स्वच्छन्दकपथैरुत्सवादिषु जनभूयस्त्वेन प्रवेशनिर्गमार्थं प्राकारादिभङ्गेन कृतैर्मार्गैरिति व्याचक्षते च केचित् । चन्दनयुक्ततोयैः सिक्ताम् । शिरःस्नातजनैः कृताभ्यङ्गस्नानैः ॥ ३ ॥

रा० टी०–पताकाभिरिति । वरार्हाभिः वराः सर्वश्रेष्ठाः अत एव अर्हाः अयोध्यायोग्याः कर्मधारयः किंच वरोऽर्हः पूजा यासाम् किंच वरैः सर्वश्रेष्ठब्रह्मादिभिः अर्हाः प्रशंसिता इत्यर्थः । एतेन तत्पताकानां प्राकृतविलक्षणत्वं सूचितं छन्दपथैः छन्दा निःशङ्कगमनयोग्याः पन्थानो मार्गा येषु तैः वीथीभिरित्यर्थः । शिरःस्नातजनैः मूर्धाभिषिक्तै राजभिरित्यर्थः । किंच शिरसि स्नानं विधिनाभिषेको यैः किंच छन्दः स्वाधीनः पथो गमनं येषां परमहंसैरित्यर्थः । ते एव जनाः तैः वसिष्ठादिभिरित्यर्थः । समलंकृतामित्येतदग्रे ' कृतां छन्दपथैश्चापि स्वच्छन्दकपथैर्वृताम् । सिक्तां चन्दनतोयैश्च शिरःस्नातजनैर्युताम् ' इति श्लोको भट्टसंमतः ॥ ३ ॥

गो०टी०–पताकाभिरित्यादि । वरार्हाभिः श्रेष्ठाभिरित्यर्थः छन्दपथैर्वृतां स्वच्छन्दगमनयोग्योपवीथीभिरावृतां शिरःस्नातैः शिरसा स्नातै रामोपायनार्थं माल्यमोदकहस्तैः शुक्लदेवगृहद्वारामिति शुक्लानि सुधाधवलितानि देवगृहद्वाराणि यस्यां ब्रह्मघोषाभिनादितां ब्रह्मघोषैः वेदपारायणघोषैः अभिनादिताम् ' वेदस्तत्त्वं तपो ब्रह्म ' इत्यमरः । रामाभिषेकस्य तिरश्चामप्यानन्दावहत्वात् प्रहृष्टवरहस्त्यश्वां संप्रणर्दितगोवृषामित्युक्तं गोवृषाः गोपुंगवाः प्रहृष्टस्तुदितैः प्रहृष्टाः संजातरोमाञ्चादिगात्रवि-

१ रम्यामिति गो. रा. पाठः । २ कलमोत्करामिति गो. पाठः । ३ वृतां छन्दपथैश्चापीति गो. रा. पाठः । ४ वृतामिति गो. रा पाठः ।

माल्यमोदकहस्तैश्च द्विजेन्द्रैरभिनादिताम् । शुक्लदेवगृहद्वारां सर्ववादित्रनादिताम् ॥ ४ ॥
संप्रहृष्टजनाकीर्णां ब्रह्मघोषनिनादिताम् । प्रहृष्टवरहस्त्यश्वां संप्रणर्दितगोवृषाम् ॥ ५ ॥
हृष्टप्रमुदितैः पौरैरुच्छ्रितध्वजमालिनीम् । अयोध्यां मन्थरा दृष्ट्वा परं विस्मयमागता ॥ ६ ॥
सौधे हर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीम् । अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मन्थरा ॥ ७ ॥
उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती । राममाता धनं किं नु जनेभ्यः संप्रयच्छति ॥ ८ ॥
अतिमात्रं प्रहर्षः किं जनस्यास्य च शंस मे । कारयिष्यति किं वापि संप्रहृष्टो महीपतिः ॥ ९ ॥
विदीर्यमाणा हर्षेण धात्री तु परया मुदा । आचचक्षेऽथ कुब्जायै भूयसीं राघवे श्रियम् ॥ १० ॥
श्वः पुष्येण जितक्रोधं यौवराज्येन चानघम् । राजा दशरथो राममभिषेक्ता हि राघवम् ॥ ११ ॥

कारः मुदिताः मानससंतोषयुक्ताः तैः उच्छ्रितेत्यत्र प्रकृतोत्सवकृतध्वजसंबन्ध उच्यते । ध्वजैश्च समलंकृतामित्यत्र नित्यबद्धध्वजत्वमुक्तम् ॥ ३–६ ॥

४] ति० टी०–माल्यमोदकहस्तैर्दानप्राप्तमाल्यमोदकहस्तैः, रामोपायनमाल्यमोदकरूपमङ्गलद्रव्यहस्तैरित्यर्थो वा । सुधाचन्दनादिलेपेन शुक्लानि देवगृहद्वाराणि यस्याम् ॥ ४ ॥

रा० टी०–माल्येति । माल्यमोदकहस्तैः रामोपायनयोग्यदानप्राप्तानन्तरमाल्यमोदकयुक्तकरैर्द्विजेन्द्रैरभिनादितां शुक्लदेवगृहद्वारां शुक्लानि स्फटिकमण्यादिरचितत्वेन श्वेतानि देवानां गृहद्वाराणि यस्यां तां सर्ववादित्रनिस्वनां सर्वेषां प्राकृताप्राकृतानां वादित्राणां निःस्वनः शब्दो यस्यां ताम् ॥ ४ ॥

५] ति० टी०–ब्रह्मघोषो वेदघोषः । प्रहृष्टेत्यादिना तिरश्चामपि रामाभिषेकाद्धर्ष इति सूचितम् ॥ ५ ॥

रा० टी०–समिति । ब्रह्मघोषो वेदध्वनिः प्रहृष्टं वरं प्राकृतविलक्षणत्वेन सर्वश्रेष्ठं हस्त्यश्वं यस्यां ताम् ॥ ५ ॥

६] ति० टी०–हृष्टैर्जातरोमाञ्चादिभिर्मुदितैरानन्दयुक्तैः पौरैरुपलक्षिताम् ॥ ६ ॥

रा० टी०–प्रहृष्टेति । प्रहृष्टमुदितैः पौरैः पुरोद्भवैः उच्छ्रितः रामेण सह नेतुं गृहीतः ध्वजमाली मालाविशिष्टो ध्वजो यस्यां तां मन्थरा दृष्ट्वा परं विस्मयमागता प्राप्ता ॥ ६ ॥

७] ति० टी०–अविदूरे स्वाधिरूढहर्म्यात्यासन्नहर्म्ये । धात्रीम् रामस्येति शेषः । अत एव हर्षोत्फुल्लनयनत्वादि तस्याः वक्ष्यति च हर्षेण विदीर्यमाणेत्यादि ॥ ७ ॥

रा० टी०–विस्मयप्राप्त्यौत्तरकालिकं वृत्तमाह–सेति । मन्थरा धात्रीं पप्रच्छ ॥ ७ ॥

गो० टी०–प्रहर्षोत्फुल्लनयनामिति । धात्रीमुपमातरम् 'धात्री स्यादुपमाता' इत्यमरः । प्रहर्षोत्फुल्लनयनामित्यादिविशेषणादियं रामोपमाता ॥ ७ ॥

८] ति० टी०–अर्थपरा स्वेष्टार्थपरा स्वेष्टार्थकामेवेति शेषः । किं नु कस्मात् ॥ ८ ॥

रा० टी०–प्रश्नकारमाह–उत्तमेनेति । उत्तमेन महता हर्षेण अभिसंयुक्ता अर्थपरा अर्थैर्धनैः परा पूर्णा राममाता जनेभ्यो धनं किं नु किमर्थं संप्रयच्छति ददाति ॥ ८ ॥

गो० टी०–उत्तमेनेति । अर्थपरा सती अर्थपरा सत्यपि उत्तमेन हर्षेणाभिसंयुक्ता धनं प्रयच्छति किं, यद्वा अर्थपरा उत्तरोत्तरार्थाभिवृद्धयै धनं प्रयच्छति नामग्रहणस्यासह्यत्वाद्राममातेत्युक्तिः ॥ ८ ॥

९] ति० टी०–किं कुतो जनस्य प्रहर्षः अभिषेकप्राग्दिनीयसायंकाले मन्थरायास्तदर्शनेन राजा संप्रहृष्ट इत्युक्तिः ॥९॥

रा० टी०–अतीति । अस्यायोध्यास्थस्य जनस्य अतिमात्रः परममहान् प्रहर्षः किं किंनिमित्तः महीपतिः किं कारयिष्यति शंस पृष्टं कथय ॥ ९ ॥

गो० टी०–अतिमात्रेति । जनस्यायमत्यन्तप्रहर्षश्च किं किमर्थं किंनिमित्तं वा महीपतिः किं कर्म कारयिष्यति ॥ ९ ॥

१०] ति० टी०–विदीर्यमाणान्तर्गतानन्दौत्कट्यादेहपोषसुखविकासादिना तस्या आनन्दस्य बहिःप्रसारणाद्विदीर्यमाणत्वोत्प्रेक्षा । राघवे राज्ञा न्यस्यमानां भूयसीं श्रियं राज्यलक्ष्मीम् ॥ १० ॥

रा० टी०–विदीर्येति । हर्षेण विदीर्यमाणा हर्षपूर्णेत्यर्थः । धात्री राघवे राघवनिमित्तं भूयसीमत्यधिकां श्रियं राज्याभिषेकसामग्रीमित्यर्थः । चचक्षे ॥ १० ॥

गो० टी०–विदीर्यमाणेति । हर्षेण विदीर्यमाणा अन्तर्गतहर्षौत्कट्यादेहपोषसुखविकासादिना बहिः प्रसरणात् विदीर्यमाणेवोपलक्षिता परया मुदा आचचक्षे स्वनिर्भरानन्दसंदोहपरिवाहस्य पात्रभूता काचिद्बभूवेति परमानन्दयुक्ता सती प्रतिकूलायै तस्यै अकथनीयमप्यकथयदिति भावः । राघवे श्रियं राघवे न्यस्यमानां राज्यलक्ष्मीम् ॥ १० ॥

११] ति० टी०–अनघं काप्यकारणेर्ष्यादिरहितम् ॥११॥

रा० टी०–तदाकारमाह–श्व इति । पुष्येण युक्ते श्व आगामिदिवसे अनघं स्वाश्रिताधनिवर्तकं यौवराज्येनाभिषेचयिता ॥ ११ ॥

गो० टी०–श्व इति । पुष्येण युक्ते श्वः उत्तरदिने जित-

---

१ निःस्वनामिति गो. रा. पाठः । २ अभीति गो. पाठः । ३ प्रहृष्टमुदितैरिति गो.पाठः । ४ प्रहर्षेति गो. पाठः । ५ अतिमात्रप्रहर्षोऽयं किं जनस्येति गो. अतिमात्रप्रहर्ष इति रा. पाठः । ६ राघवमिति गो. रा. पाठः । ७ अभिषेक्तयिताऽनघमिति गो. रा. पाठः ।

धात्र्यास्तु वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता । कैलासशिखराकारात्प्रासादादवरोहत ॥ १२ ॥
सा दह्यमाना क्रोधेन मन्थरा पापदर्शिनी । शयानामेव कैकेयीमिदं वचनमब्रवीत् ॥ १३ ॥
उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते । उपप्लुतमघौघेन नात्मानमवबुध्यसे ॥ १४ ॥
अनिष्टे सुभगाकारे सौभाग्येन विकत्थसे । चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे ॥ १५ ॥
एवमुक्ता तु कैकेयी रुष्टया परुषं वचः । कुब्जया पापदर्शिन्या विषादमगमत्परम् ॥ १६ ॥
कैकेयी त्वब्रवीत्कुब्जां कच्चित्क्षेमं न मन्थरे । विषण्णवदनां हि त्वां लक्षये भृशदुःखिताम् ॥ १७ ॥
मन्थरा तु वचः श्रुत्वा कैकेय्या मधुराक्षरम् । उवाच क्रोधसंयुक्ता वाक्यं वाक्यविशारदा ॥ १८ ॥
सा विषण्णतरा भूत्वा कुब्जा तस्यां हितैषिणी । विषादयन्ती प्रोवाच भेदयन्ती च राघवम् ॥ १९ ॥

क्रोधमनघमित्यभिषेकोपयुक्तगुणजातोपलक्षणं यौवराज्येनाभिषेचयिता यौवराज्यार्थमभिषेचयितेत्यर्थः ॥ ११ ॥

१२] ति० टी०—अवरोहतावारुहत् ॥ १२ ॥

रा० टी०—धात्र्या इति । कुब्जा मन्थरा अवरोहत आगमशास्त्रस्यानित्यत्वादडभावः ॥ १२ ॥

गो० टी०—धात्र्या इति । अवरोहत अवारुहत् ॥१२॥१३॥

१३] ति० टी०—क्रोधेन दह्यमाना सेव पापदर्शिनी रामाभिषेके कैकेय्यै भरतविषयपापप्रदर्शिका ॥ १३ ॥

रा० टी०—सेति । पापदर्शिनी पापकर्मण उपदेष्ट्री किंच पापं राक्षसकृतोपद्रवं पश्यति तच्छीला इदमब्रवीत् ॥ १३ ॥

१४] ति० टी०—अघौघेन दुःखसमूहेनोपप्लुतं पीडितम् । कारणकार्ययोः पौर्वापर्यविपर्ययरूपातिशयोक्तिः । 'अघं दुरितदुःखयोः' इति कोशः ॥ १४ ॥

रा० टी०—तद्वचनमेवाह—उत्तिष्ठेति । मूढे कार्याकार्यविवेकरहिते ! अघौघेन पापसमूहकर्मफलेन उपप्लुतं युक्तम् ॥१४॥

गो० टी०—उत्तिष्ठेति । उपप्लुतमुपहतम् अघौघेन अघं दुःखम् 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः । 'ओघो वृन्देऽम्भसां रये' इत्यमरः ॥ १४ ॥

१५] ति० टी०—सुभगाकारे त्वद्विषये सौभाग्यद्योतकाकारवत्याकारेणैव तव सौभाग्यदे वस्तुतोऽनिष्टेऽप्रियकर्तरि किं सौभाग्येन विकत्थसे मन्येवान्तरङ्गो मे स्वामी मदाज्ञावशंवद इत्यादिप्रकारेण वृथा श्लाघसे । उष्णगे ग्रीष्मगे रवौ सति नद्याः स्रोत इव सौभाग्यं चलं रामाभिषेकात्क्षीणप्रायमित्याशयः ॥ १५ ॥

रा० टी०—अनिष्टे इति । अनिष्टे राजेच्छाया अविषयीभूते राजप्रीत्यविषयीभूत इत्यर्थः । अत एव सुभगाकारे सुभगस्य शोभनैश्वर्यस्य आकारः प्रक्षेपो यस्याः किंच सुभगस्य नकारः राजकर्तृकनिष्पादः यस्यै तत्संबोधनम् । सौभाग्येन पुत्रमात्मानमिति शेषः । विकत्थसे वस्तुतस्तव सौभाग्यं नास्तीत्यर्थः । तदेव विशदयति उष्णगे ग्रीष्मर्तुगे सूर्ये नद्याः स्रोत इव तव सौभाग्यं चलं नाशोन्मुखमित्यर्थः ॥ १५ ॥

गो० टी०—अनिष्ट इति । वस्तुतः राज्ञोऽनिष्टे सुभगाकारे आपाततः सौभाग्यवतीव भासमाने अङ्गभगाकार इति वा छेदः सौभाग्येन हेतुना विकत्थसे ममैव सौभाग्यमस्तीत्यात्मानं श्लाघसे इयमुक्तिः पूर्वकालिकात्मश्लाघापरेत्यवगन्तव्या । इदानीं मत्सौभाग्यस्य का हानिरित्यत्राह—चलं हीति । उष्णं गच्छतीत्युष्णगः ग्रीष्मकालः तस्मिन् नद्याः स्रोत इव चलं क्षीणमित्यर्थः ॥ १५ ॥

१६] ति० टी०—पापदर्शिन्या पापं दर्शयन्त्या विषादमगमत्त्वस्मिन्राजवैरस्योद्भावनात् ॥ १६ ॥

रा० टी०—एवमिति । परं विषादमनिष्टवचनं श्रुत्वातिखेदमगमत् ॥ १६ ॥

गो० टी०—एवमिति । परुषं वच उक्ता 'अप्रधाने दुहादीनाम्' इत्यप्रधाने कर्मकारके निष्ठा ॥ १६ ॥

१७-१८] ति० टी०—कच्चित्क्षेमम् न मन्यमिति शेषः१७

रा० टी०—कैकेयीति । क्षेमं कुशलमिहास्तीति शेषः ॥१७॥

गो० टी०—कैकेयीति । कच्चित् क्षेमं मन्यमिति शेषः ॥१७॥

रा० टी०—मन्थरेति । वाक्यविशारदा वचननिपुणा ॥१८॥

गो० टी०—मन्थरेति । क्रोधसंयुक्ता रामाभिषेकाविचारणादिति भावः ॥ १८ ॥

१९] ति० टी०—विषण्णतरा भूत्वा तदाकारेव भूत्वा । अप्सरस्त्वे सर्वज्ञत्वाद्वास्तवविषादाभावात् विषादयन्ती राज्यश्रियोऽन्यगामित्वरूपानिष्टप्रकाशेन कैकेय्या विषादं जनयन्ती भेदयन्ती राघवं प्रति पुत्रत्वप्रयुक्तं तस्याः स्नेहं नाशयन्ती॥१९॥

रा० टी०—सेति । हितैषिणी प्रातिभासिकहितविषयकेच्छावती हितप्रक्षेपणशीला वा आत्मे इच्छार्थक इष द्वितीये तु गत्यर्थकः तच्छब्देन देवतापरामर्शो वा विषादयन्ती विषादमुत्पादयन्ती राघवं रघुकुलोद्भवदशरथादिनिष्ठकैकयीविषयकस्नेहं भेदयन्ती विदारयन्ती ॥ १९ ॥

गो० टी०—सेति । विषादयन्ती भेदयन्तीति शतृद्वयं हेत्वर्थं राज्यश्रियो ज्ञातिगामित्वानिष्टप्रकाशनेन विषादहेतवे सामान्यतः पुत्रत्वप्रयुक्तरामविषयस्नेहभेदनहेतवे चेत्यर्थः ॥ १९ ॥

१कोपेनेति गो.पाठः । २ घत्येति गो.पाठः । ३ किमात्मानं न बुध्यसे इति गो पाठः । ४ उक्त्वेति रा.पाठः । ५तस्या इति गो.रा.पाठः । ६ अवारोहदितियुक्तं भाति ।

अक्षयं सुमहद्देवि प्रवृत्तं त्वद्विनाशनम् । रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥ २० ॥
सास्म्यगाधे भये मग्ना दुःखशोकसमन्विता । दह्यमानानलेनेव त्वद्धितार्थमिहागता ॥ २१ ॥
तव दुःखेन कैकेयि मम दुःखं महद्भवेत् । त्वद्वृद्धौ मम वृद्धिश्च भवेदिह न संशयः ॥ २२ ॥
नराधिपकुले जाता महिषी त्वं महीपतेः । उग्रत्वं राजधर्माणां कथं देवि न बुध्यसे ॥ २३ ॥
धर्मवादी शठो भर्ता श्लक्ष्णवादी च दारुणः । शुद्धभावेन जानीषे तेनैवमतिसंधिता ॥ २४ ॥
उपस्थितः प्रयुञ्जानस्त्वयि सान्त्वमनर्थकम् । अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ॥ २५ ॥
अपवाह्य तु दुष्टात्मा भरतं तव बन्धुषु । काल्ये स्थापयिता रामं राज्ये निहतकण्टके ॥ २६ ॥

२०] ति० टी०—अक्षयम् क्षयः प्रतीकारः, अशक्यप्रतीकारमित्यर्थः । त्वद्विनाशनं त्वत्सौभाग्यनाशकारणं प्रवृत्तम् । तदेवाह—राममिति ॥ २० ॥

रा० टी०—तद्वचनमेवाह—अक्षयमिति । अक्षयं विनाशरहितं त्वद्विनाशनं त्वत्कर्मको ध्वंसः प्रवृत्तं तत्र हेतुरभिषेक्ष्यतीति ॥ २० ॥

गो० टी०—अक्षय्यमिति । अक्षय्यमशक्यप्रतीकारं त्वद्विनाशनं त्वद्विनाशः भावे ल्युट् ॥ २० ॥

२१] ति० टी०—अग्नौ राज्यलाभादुःखम् । स्वेष्टस्य तदलाभाच्छोकः शत्रुराज्यलाभ एव ततो भयम् त्वद्धितार्थं त्वद्धितबोधनार्थम् ॥ २१ ॥

रा० टी०—सेति । सा दृष्टत्वद्विनाशकरामाभिषेकहेतुभूतसामग्रीसंपादनादिः ॥ २१ ॥

गो० टी०—सेति । दुःखशोकसमन्विता अनभिमतरामाभिषेकश्रवणजनितव्यसनजं दुःखमभिमतभरताभिषेकराहित्यजः शोकः ताभ्यां समन्विता ॥ २१ ॥

२२] ति० टी०—नन्वद्यास्तव कुतो भयम्, अत आह—तवेत्यादि ॥ २२ ॥

रा० टी०—तवेति । मम दुःखं महत् त्वदुःखादधिकं भवेत् स्वदुःखात् मित्रदुःखदर्शनजनितदुःखस्याधिक्यादिति भावः ॥ २२ ॥

गो० टी०—नन्वद्य मम दुःखादिहेतौ सति कुतस्ते दुःखप्रसक्तिरित्यत्राह—तवेति ॥ २२ ॥

२३] ति० टी०—किं मे दुःखं तत्राह—नराधिपेति । एतद्विश्लेषणद्वयमग्रेऽपि राजमातृत्वाप्रच्युतये यत्नावश्यकत्वबोधनाय । नन्वद्य रामराज्येऽपि महिषीत्वं मे दुष्परिहरमित्यत आह—उग्रत्वमिति । सापत्नो हि स राज्यलाभे त्वां त्वत्पुत्रं च नाशयिष्यतीति भावः ॥ २३ ॥

रा० टी०—नराधिपेति । राजधर्माणां राजाचरितकर्मणामुग्रत्वं क्रूरत्वं त्वं कथं न बुध्यसे एतेन दशरथस्य क्रूरकर्मकर्तृत्वं बोधितम् ॥ २३ ॥

गो० टी०—नन्वद्य रामाभिषेकमात्रं कथं मे दुःखहेतुरित्यत्राह—नराधिपेति । उग्रत्वं क्रौर्यम् ॥ २३ ॥

२४] ति० टी०—नन्वद्य राज्ञो रामस्य चात्यन्तं मदनुरक्तत्वात्स मत्पुत्रस्यैव राज्यलाभोऽत आह—धर्मवादीति । वाङ्मात्रेण धार्मिकः श्लक्ष्णवादी च सस्मितमधुरभाषी अन्ततस्तु शठोऽसूयावान् अत एव दारुणः क्रूरहृदयः आन्तरक्रौर्यगोपनायैव सस्मितमृदुमधुरभाषी । एवंभूतं तं शुद्धभावेनोपलक्षितं जानीषे । सर्वथा तेनैवप्रकारीत्यातिसंधिता वञ्चिता असीति शेषः ॥ २४ ॥

रा० टी०—नन्वद्य इक्ष्वाकुवंशप्रभूतः परमधर्मात्मा मम भर्ता क्रूरकर्मा कथं स्यादित्यत आह—धर्मेति । भर्ता तव पतिः धर्मवादी सन् शठः अधर्माचरण इत्यर्थः । श्लक्ष्णवादी मृदुभाषणशीलः सन् दारुणः कठोरहृदयः एवं एतद्धर्मविशिष्टं तं त्वं शुद्धभावेन अधर्मसंसर्गशून्यधर्मविशिष्टत्वेन जानीषे तेन तस्यां विवेकाभावः सूचितः । नन्वद्य त्वया कथमेवं विज्ञातमित्यत आह तेन राज्ञा अहं अतिसंधिता वञ्चिता वञ्चनं च अधर्माचरणादि ज्ञाप्यमेवेति भावः ॥ २४ ॥

गो० टी०—नन्वद्य मत्प्रियः कथमनिष्टं करिष्यतीत्यत्राह—धर्मवादीति । धर्मवादीव भासमानः वस्तुतः शठः गूढविप्रियकृत् श्लक्ष्णवादी कण्ठादुपरि प्रियवचनशीलः दारुणः क्रूरकर्मकारी एवंभूतमेनं शुद्धस्वभावेनोपलक्षितं जानीषे तथा न मन्तव्यं यतस्तेनैवमतिसंधिता वञ्चिता ॥ २४ ॥

२५] ति० टी०—उपस्थितः कौसल्यार्थसाधने हृदयेन सावधानस्त्वत्समीपे स्थितो वा । 'उपस्थितम्' इति पाठे तत्कालोचिततसान्त्वमित्यर्थः । अनर्थकं फलरहितम् । सान्त्वं प्रियवचनं त्वयि प्रयुञ्जानः अर्थेन राज्यरूपेण कौसल्यामेव योजयिष्यतीत्यन्वयः ॥ २५ ॥

रा० टी०—उपेति । सान्त्वं शान्तिमुपस्थितः प्राप्तस्ते भर्ता त्वयि अनर्थकमर्थाभावमथ प्रयुञ्जन् सन् अर्थेन कौसल्यामेव योजयिष्यति ॥ २५ ॥

गो० टी०—शठत्वमेवाह—उपस्थितमिति । उपस्थितं तत्कालोचिततया भाषितमनर्थकं स्वदर्थनाशनं त्वयि सान्त्वमनुसरणं प्रयुञ्जानः कौसल्यामर्थेन योजयिष्यति ॥ २५ ॥

२६] ति० टी०—कौसल्यार्थप्रापणार्थमेव तेनोपायान्तरमप्यनुष्ठितमित्याह—अपवाह्येति । उद्वास्येत्यर्थः । काल्ये-

१ अक्षय्यमिति गो. पाठः । २ अत्रेति गो. पाठः । ३ उपस्थितमिति गो. पाठः । ४ अर्थेन वाथेति गो. पाठः ।

शत्रुः पतिप्रवादेन मात्रेव हितकाम्यया । आशीविष इवाङ्केन बाले परिधृतस्त्वया ॥ २७ ॥
यथा हि कुर्याच्छत्रुर्वा सर्पो वा प्रत्युपेक्षितः । राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ॥ २८ ॥
पापेनानृतसान्त्वेन बाले नित्यं सुखोचिता । रामं स्थापयता राज्ये सानुबन्धा हता ह्यसि ॥ २९ ॥
सा प्राप्तकालं कैकेयि क्षिप्रं कुरु हितं तव । त्रायस्व पुत्रमात्मानं मां च विस्मयदर्शने ॥ ३० ॥
मन्थराया वचः श्रुत्वा शर्वरीनाथसानना । उत्तस्थौ हर्षसंपूर्णा चन्द्रलेखेव शारदी ॥ ३१ ॥
अतीव सा तु संतुष्टा कैकेयी विस्मयान्विता । दिव्यमाभरणं तस्यै कुब्जायै प्रददौ शुभम् ॥ ३२ ॥
दत्त्वा त्वाभरणं तस्यै कुब्जायै प्रमदोत्तमा । कैकेयी मन्थरां हृष्टा पुनरेवाब्रवीदिदम् ॥ ३३ ॥

ऽन्यत्रोपसंक्रमणकालार्हे । 'कौल्ये' इति पाठः कुलक्रमागत इत्यर्थे आर्षः ॥ २६ ॥

रा० टी०—अनर्थमेव बोधयन्ती आह—अपेति । दुष्टो निषिद्ध आत्मा प्रयत्नो यस्य । अपवाह्य संप्रेष्य काल्ये प्रातरेव ॥ २६ ॥

गो० टी०—अतिसंधानप्रकारमाह—अपवाह्येति । अपवाह्य उद्वास्य कालमर्हतीति कालयम् अर्हार्थे यत् श्वः प्रातरित्यर्थः ॥ २६ ॥

२७] ति० टी०—आत्मनो हितेच्छया त्वया मात्रेव भोजनदानादिना पोषित आशीविष इव क्रूरः शत्रुः पतिप्रवादेन प्रतिव्यपदेशेन त्वयाङ्केन परिधृत इत्यन्वयः ॥ २७ ॥

रा० टी०—शत्रुरिति । पतिप्रवादेन पतिनाम्ना शत्रुः शातयिता विषदन्तसहित इत्यर्थः आशीविषः क्रूरसर्प इव अङ्केन स्वोत्सङ्गेन हितकाम्यया मात्रेव पोषणपरया त्वया परिहृतः स्वीकृतः पोषित इत्यर्थः । 'परिधृतः' इति पाठेऽपि स एवार्थः । एनेनास्मात्पत्युस्ते कल्याणं नास्तीति ध्वनितम् ॥ २७ ॥

गो० टी०—शत्रुरिति । हे बाले ! मुग्धे आगाम्यनर्थानभिज्ञे इतियावत् पतिप्रवादेन पतिव्यपदेशेन शत्रुः छन्नहृदयः शात्रवः पतिः त्वया ऋजुप्रकृतिकया मात्रेव सर्पशिशुं पोषयित्र्येव हितकाम्यया हितप्रापणेच्छया आशीविष इव छन्नविषः सर्प इव अङ्केन उत्सङ्गेन परिहृतः परिधृत इत्यर्थः । यद्वा अङ्केन परिहृतः अङ्कात् परिहृतः किंत्वङ्क एव धृत्वोपलालितः यथा सर्पपोषयित्री बाला सर्पस्यान्तर्विषमशत्वा केवलं हितकाम्ययाङ्के सर्पशिशुपलालयति तथा त्वमपि बाला भर्तुः कुटिलहृदयमजानती विश्वस्य तमङ्के उपलालयसीत्यर्थः । यथाङ्कोपलालित आशीविषः कदाचिद्धितपरामपि पोषयित्रीं दशेत् एवं ते भर्तापि विश्वस्तां त्वामनर्थहीनां कारयेत् अतः स आशीविष इव नाद्यसरणीयस्त्वयेति भावः ॥ २७ ॥

२८] ति० टी०— तद्धरणेन च तेऽनर्थः संपन्न इत्याह—यथेति । प्रत्युपेक्षित उपेक्षितनाशः ॥ २८ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—यथेति । शत्रुः शातयिता प्रत्युपेक्षित एव सर्पः यथा कुर्यात्तथैवाद्यैव त्वं कृता हिवाशब्दौ एवार्थौ । किंच प्रत्युपेक्षितः सर्पः शत्रुश्च यथा कुर्यात्तथैव ॥ २८ ॥

गो० टी०—एवं गम्यमर्थं विशदयति—यथेति ॥ २८ ॥

२९] ति० टी०—कथं कृतेत्यत्राह—पापेनेति । अनुबन्धः पुत्रादिपरिकरः ॥ २९ ॥

रा० टी०—पापेनेति । पापेन पापसंपादककर्मकारिणा अनृतशान्तेन अनृतं मिथ्याभूतं शान्तं शान्तिर्यस्य क्रूरहृदयेनेत्यर्थः । सानुबन्धा पुत्रादिपरिकरसहिता हता विपत्तिप्राप्त्या हिंसितेवेत्यर्थः ॥ २९ ॥

गो० टी०—पापेनेति । सानुबन्धा पुत्रमित्रादिपरिकरसहिता ॥ २९ ॥

३०] ति० टी०—सा त्वं प्राप्तकालं प्राप्तानुष्ठानकालं यत्तव हितं तत्कुरु । विस्मयदर्शनेऽप्तिदुःखजनकवार्तांश्रवणेऽपि स्वेष्टाद्भुतवार्तांश्रवणेनैव विस्मयसूचकदर्शने । एवं विस्मयं हित्वा स्वेष्टं विभावयेति तात्पर्यम् ॥ ३० ॥

रा० टी०—इदानीं कृतयत्नेन तव कल्याणं भवितेति बोधयन्त्याह—सेति । तव स्वस्य विस्मयदर्शने विगतः स्मयः रूपादिगर्वः येन तदेव दर्शनं यस्याः तत्संबोधनम् किंच विस्मयमाश्चर्यकारकमिह लोके दर्शनं यस्याः परमसुन्दरीत्यर्थः ॥ ३० ॥

गो० टी०—सेति । विस्मयदर्शने आश्रयांवहज्ञानयुक्ते तत्तत्कालोचितकर्तव्यनिरूपणचतुर इत्यर्थः । यद्वा अनेन हितकरणहेतुदशरथवशीकरणसाधनसौन्दर्यं सूच्यते ॥ ३० ॥

३१] ति० टी०—एवं मन्थरयानर्थत्वेन प्रकाशिते रामाभिषेके महाकुलप्रसूता निसर्गकल्याणगुणा सर्वथा तं स्वेष्टार्थमेव मन्यते स्मेत्याह—मन्थराया इत्यादि ॥ ३१ ॥

रा०टी०—वचनश्रवणौत्तरकालिकं कैकयीहृत्तमाह—मन्थराया इति । शारदी चन्द्रलेखेव आश्विनपूर्णिमाचन्द्रसदृशीत्यर्थः ॥ ३१ ॥

गो० टी०—एवं देवावेशवशाद्विपरीतवाक्यया मन्थरयोक्तापि कैकेयी महाकुलप्रसूततया सत्प्रकृतिः सती रामाभिषेकं हितं मन्यमानाह—मन्थराया इति ॥ ३१–३३ ॥

३२–३३] ति० टी०—विस्मयोऽत्यद्भुतस्वेष्टश्रवणाद् कौसल्यावदेवेति भावः ॥ ३२ ॥ ३३ ॥

रा० टी०—अतीवेति । एकं मुख्यमाभरणदानेन तत्कोपः

१ अङ्केनेति गो. पाठः । २ परिहृत इति गो. पाठः । ३ नित्यसुखोचिते इति गो. रा.पाठः । ४ शयानेति गो. पाठः । ५ एकमिति गो. रा. पाठः । ६ दृष्ट्वेति गो. रा. पाठः ।

इदं तु मन्थरे मह्यमाख्यातं परमं प्रियम् । एतन्मे प्रियमाख्यातं किं वा भूयः करोमि ते ॥ ३४ ॥
रामे वा भरते वाहं विशेषं नोपलक्षये । तस्मात्तुष्टास्मि यद्राजा रामं राज्येऽभिषेक्ष्यति ॥ ३५ ॥
न मे परं किंचिदितो वरं पुनः प्रियं प्रियार्हे सुवचं वचोऽमृतम् ।
तथा ह्यवोचस्त्वमतः प्रियोत्तरं वरं परं ते प्रददामि तं वृणु ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

रामस्य यौवराज्यं भरतानर्थहेतुरिति प्रतिपादयन्ती मन्थरां कैकेयी रामगुणान्प्रशशंस तदभिषेकस्यैव च स्वाभीष्टत्वं समर्थयाम्बभूव । पुनश्च मन्थरा बहून्हेतूनुपन्यस्य रामाभिषेकस्यानर्थहेतुत्वप्रतिपादनेन तद्विघाते कैकेयीं प्रैरयत् ।

मन्थरा त्वभ्यसूय्यैनामुत्सृज्याभरणं हि तत् । उवाचेदं ततो वाक्यं कोपदुःखसमन्विता ॥ १ ॥

श्राम्यतु इति हेतुर्ध्वनितः तेनाभिषेकविरोधिवचो नोद्धारयत्विति हेतुः सूचितः ॥ ३२ ॥

रा० टी०–दत्त्वेति । प्रमदोत्तमा प्राकृतप्रमदाविलक्षणा इदमब्रवीत् ॥ ३३ ॥

३४] ति० टी०–प्रियमाख्यातमित्यस्य पुनरुक्तिर्वक्त्र्या हर्षातिशयवत्त्वान्न दोषावहा । भूयोऽभ्यधिकं किं प्रीतिदानं करोमि त्वच्छ्रावितप्रियसमाभ्यधिकप्रियवस्त्वभावादित्यर्थः ॥ ३४॥

रा० टी०–तद्वचनमेवाह–इदमिति । परमं प्रियमेवाख्यातं कथितम् । तुरेवार्थे एतन्मे प्रियमाख्यातुस्ते तव किं करोमि तद्वदेत्यर्थः । एतत्प्रतिदानयोग्यं वस्तु अहं न पश्यामीति भावः । उत्तरार्धादौ 'एतन्मे प्रियमाख्यातम्' इति भट्टपाठः । प्रियमाख्यातमित्यस्य पुनरुक्तिः वक्त्र्याः हर्षातिशयद्योतकत्वान्न दोषावहेति तव्याख्या ॥ ३४ ॥

गो० टी०–इदं त्विति । एतत्प्रियमाख्यातुः आख्याव्यास्ते किं वा करोमीति संबन्धः 'एतन्मे प्रियमाख्यातम्' इतिपाठे आख्यातमेतत्प्रियमुद्दिश्य ते भूयः किंवा करोमीति संबन्धः३४

३५] ति० टी०–नन्वु सापत्नश्रेयःश्रुतिः कथं ते प्रियमित्यत्राह–रामे वेति । विशेषं पुत्रत्वप्रयुक्तस्नेहविशेषम्॥३५॥

रा० टी०–रामे इति । विशेषमैश्वर्यप्राप्तौ भेदं नोपलक्षये अभिषेक्ष्यति अभिषेक्ता विशेषकालाविवक्षयापि लृट् ॥ ३५ ॥

गो० टी०–नन्वु सपत्नीपुत्रे कथं तवैतादृशी प्रीतिरित्यत्राह–राम इति ॥ ३५ ॥

३६] ति० टी०–प्रियार्हे प्रियदानार्हे । इत उक्तारामाभिषेकाद्वरमधिकं प्रियं वचोऽमृतं परमन्यत् , न सुवचम् तादृशं हि त्वमवोचः । यतोऽधिकं प्रियं न सुवचमतः प्रियोत्तरं प्रियाख्यानोत्तरं पारितोषिकरूपं परं श्रेष्ठं वरं वृणु ते तव तं वरं प्रददामि । मया तु स्वबुद्ध्यैतत्प्रियाख्यानपारितोषिकयोग्यं वस्तु न दृश्यते, अतस्त्वं यद्वरयिष्यसे तदहमित्यर्थः ॥३६॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा० टी०–नेति । हे प्रियार्हे प्रियवस्तुप्राप्तियोग्ये ! अमृतं मधुरं किंच मृतिनिवर्तकमेतच्छ्रवणमात्रेण आसन्नमरणोऽपि हर्षातिशयप्राप्त्या जीवितो भवतीति भावः अत एव वरं सर्वश्रेष्ठमत एव प्रियं सर्वप्रीतिविषयीभूतं वचस्त्वमवोचः इतोऽस्मात्परं भिन्नं किंचित्प्रियं सुवचं न वचनविषयं वस्तु नास्तीति भावः अतोऽपि तथा मत्प्रीतिविषयीभूतवस्तुसदृशं प्रियोत्तरमतिप्रियमत एव ते परं त्वत्तृप्तिकारकं कंचिद्वरं त्वं वृणु तमहं प्रददामि कंचिदित्यध्याहृतम् । इतोऽनन्तरं त्वयेति वचःशब्दानन्तरं वरमिति च ददामीत्येतदनन्तरं ते इति च गोविन्दाचारिपाठः ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तमः सर्गः ॥ ७ ॥

गो० टी०–नेति । हे प्रियार्हे प्रियदानार्हे ! मे इतः परं रामाभिषेककथनादन्यत्किंचित् प्रियं अभिमतं परं वचस्त्वया पुनर्न सुवचं वक्तुं न शक्यं हि यस्मात् कारणात् त्वं तथा सर्वप्रियेभ्योऽधिकं प्रियं रामाभिषेकरूपमवोचः उक्तवती अतः प्रियोत्तरं प्रीतिविषयेषु श्रेष्ठम् 'उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः' इत्यमरः । परमन्यं वरं वरणीयं वस्तुविशेषं ते तुभ्यं प्रददामि तं वृणीष्वेति योजना ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

१] ति० टी०–अथ 'चलं चित्तं मनुष्याणाम् ' इति न्यायेन द्विजिह्वमन्थरया हितवदुपदेशात्कल्याणमतेरपि कैकेय्याश्चित्तं चलितमित्याह–मन्थरा त्विति । अभ्यसूय्यासूयाविषयां कृत्वा । हिताश्रवणात्कोपः एतदहितं जायते इति दुःखम् तत्सम्मन्नितेव ॥ १ ॥

रा० टी०–कैकयीवचनश्रवणौत्तरकालिकं मन्थराकृत्तमाह–मन्थरेत्यादिभिः । एनां कैकयीमभ्यसूय प्रणिन्द्य तत् कैकयीदत्तम् ॥ १ ॥

गो० टी०–अथ कुमतिजनसंसर्गवशेन महतामपि कदाचि-

१ आख्यातीति गो.पाठः । २ आख्यातुरिति गो.रा.पाठः । ३ त्वयेति गो.पाठः । ४ परमिति गो.पाठः । ५ अभ्यसूयेति गो.रा.पाठः । ६ चेति गो. पाठः ।

हर्षं किमर्थमस्थाने कृतवत्यसि बालिशे । शोकसागरमध्यस्थं नात्मानमवबुध्यसे ॥ २ ॥
मनसा प्रसहामि[1] त्वां देवि दुःखार्दिता सती । यच्छोचितव्ये हृष्टासि प्राप्य त्वं[2] व्यसनं महत् ॥ ३ ॥
शोचामि दुर्मतित्वं ते का हि प्राज्ञा प्रहर्षयेत् । अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागताम्[3] ॥ ४ ॥
भरतादेव रामस्य राज्यसाधारणाद्भयम् । तद्विचिन्त्य विषण्णास्मि भयं भीताद्धि जायते ॥ ५ ॥
लक्ष्मणो हि महाबाहू रामं सर्वात्मना गतः । शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा ॥ ६ ॥
प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि । राज्यक्रमो विसृष्टस्तु[4] तयोस्तावद्ध्रुवीयसोः[5] ॥ ७ ॥

चित्तचलनं स्यादित्यमुमर्थं द्योतयन्नाह–मन्थरेत्यादि । अभ्यसूय असूयां कृत्वा एनां प्रतीतिं शेषः । कोपदुःखसमन्वितम् हितं न शृणोतीति कोपः आगमिष्यत्यनर्थं इति दुःखम् ॥ १ ॥

२] ति० टी०–अस्थाने तदनुचितकाले बालिशे मूर्खे ! शोककाले हर्षोदयात् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–हर्षमिति । अस्थाने हर्षानुचितकाले ॥ २ ॥

गो० टी०–हर्षमिति । हे बालिशे अज्ञे ! अस्थाने अनुचितकाले हर्षं कृतवत्यसि किमिदम् अत्र कारणं न जानामि । अस्थानकृतत्वमाह–शोकेति ॥ २ ॥

३] ति० टी०–मनसेति । अत इत्यादिः । दुःखार्दिता सती तावकदुःखेन पीडिता सती प्रसहामीत्यन्वयः । व्यसनं विपदम् ॥ ३ ॥

रा० टी०–अयं हर्षस्त्वया त्याज्य इत्यत्र हेतुं बोधयन्ती आह–मनसेति । व्यसनं दुराग्रहम् ॥ ३ ॥

गो० टी०–मनसेति । इदं रामाभिषेकरूपं महद्व्यसनं प्राप्य तेनैव हेतुना शोचितव्ये विषये हृष्टासीति यत् अतोऽहं दुःखार्दिता सती त्वां मनसा प्रहसामि यथोन्मत्तप्रभुदर्शने ॥ ३ ॥

४] ति० टी०–मतेर्दुष्टत्वमनर्थकरैः प्रियताविषयत्वम् । प्रहर्षयेत्प्रहृष्येत् । अरित्वे हेतुः सपत्नीपुत्रत्वम् । मृत्योर्वृद्धिमिव तस्य वृद्धिं दृष्ट्वेति शेषः ॥ ४ ॥

रा० टी०–शोचामीति । ते दुर्मतित्वं दुष्टबुद्धित्वमहं शोचामि । ननु मदनुसारिणी भूत्वा त्वमपि मे हर्षप्रयोजिका भवेत्यत आह–मृत्योः मृत्युसदृशस्य अरेः सपत्नीपुत्रस्य वृद्धिमागतां ज्ञातवतीं त्वां का प्राज्ञा बुद्धिमती प्रहर्षयेत् संतोषयेत् न कापीत्यर्थः एतेन तस्याः भ्रान्तिमतीत्वं बोधितम् ॥४॥

गो० टी०–एवं बालिशात्वमन्वयमुखेन दर्शयित्वा व्यतिरेकमुखेनापि दर्शयति–शोचामीति । ते दुर्मतित्वं दुष्टबुद्धित्वं शोचामि । मतेर्दुष्टत्वमनर्थविषयप्रीतिजनकत्वं मृत्योरिव सपत्नीपुत्रस्यागतां वृद्धिं का हि प्राज्ञा का वा प्रशस्तबुद्धिः प्रहर्षयेत् प्रहर्षसाधनं कुर्यात् "तत्करोति–" इति णिच् हर्ष इति करणे घञ्प्रत्ययः लालयेदिति वार्थः ॥ ४ ॥

५] ति० टी०–मृत्योरिवेति व्युत्पादयति–भरतादिति । रामस्य भरतादेव भयमस्ति । तत्र हेतुः–राज्यसाधारणाद्राज्यरूपसाधारणभोग्याद्धेतोः तद्भरतहेतुकं रामभयं हि यतो भीताद्भयं जायते यो यस्माद्भीतस्तस्मात्पदस्थात्तस्य भयं भवत्येव एवं च राज्यस्य निष्कण्टकत्वाय स्वभयहेतुं भरतं राज्यं प्राप्य रामः सर्वथा नाशयिष्यतीति भावः ॥ ५ ॥

रा० टी०–भरतादिति । राज्यसाधारणात् राज्ये राज्यकरणे साधारणात् साधारणयोग्यताविशिष्टात् भरतात् रामस्य भयमेव तद्विचिन्त्य निश्चित्य अहं विषण्णाऽस्मि । ननु रामकर्तृकभये तव विषण्णात्वं कथमित्यत आह–भीताद्भयविशिष्टाद्भयं भयहेतौ भीतिर्जायत एव यो हि यस्माद्भिभेति स तस्मिन् भयोत्पत्तियुगं करोत्येवेति भावः । हिरेवार्थे ॥ ५ ॥

गो० टी०–उक्तां व्यसनमहत्तां दर्शयति–भरतादिति । राज्यं साधारणं यस्य तस्माद्भरतादेव रामस्य यद्भयं तद्विचिन्त्य विषण्णास्मि । रामस्य भयमस्तु भरतस्य किमित्यत आह–भयमिति । यः यस्माद्भीतः स तस्य भयमवश्यमुत्पादयति व्याघ्रसर्पादिविषये तथा दर्शनादिति भावः ॥ ५ ॥

६] ति० टी०–ननु भरतादेवेत्यवधारणमयुक्तमत आह–लक्ष्मणो हीति । सर्वात्मना गतो मनोवाक्कायव्यापारै रामेणैक्यं गतोऽतो न ततो भीप्रसङ्गः । शत्रुघ्नस्यापि भरतशेषतया न ततः पृथग्भीप्रसङ्गः तन्नाशेनैव तन्नाशादिति भावः ॥ ६ ॥

रा० टी०–ननु लक्ष्मणशत्रुघ्नाभ्यामपि रामभीतिं कुतो न ब्रूषे इत्यत आह–लक्ष्मण इति । लक्ष्मणः सर्वात्मना सर्वप्रयत्नेन रामं गतः अनुसृत इत्यर्थः । एतेन लक्ष्मणात्तस्य न भीतिरिति ध्वनितम् । शत्रुघ्नस्तु सर्वात्मना भरतं गतः एतेन रामस्य शत्रुघ्नहेतुकभीतिमत्वेऽपि तद्भीतेः भरतहेतुकभीतावन्तर्भावान्न न्यूनतेति सूचितम् ॥ ६ ॥

गो० टी०–यद्यपि लक्ष्मणशत्रुघ्नयोरपि राज्यं साधारणं तथापि तयोः परतन्त्रत्वान्न भयप्रसक्तिरित्याह–लक्ष्मण इति । सर्वात्मना सर्वप्रकारेण मनोवाक्कायैरित्यर्थः । अतो रामस्य न लक्ष्मणाद्भयमिति भावः । शत्रुघ्नस्य भरतपरतन्त्रत्वेन न ततः पृथग्भयमित्यर्थः ॥ ६ ॥

७] ति० टी०–भरतादेवेत्यवधारणे हेत्वन्तरमाह–प्रत्यासन्नेति । प्रत्यासन्नो यः क्रम उत्पत्तिक्रमस्तेनापि हेतुना भरतस्यैव राज्यक्रमस्तदाक्रमणं प्रसक्तम् । तयोस्तु यवीयस्त्वात्स विसृष्टो दूरत्यक्त इत्यर्थः ॥ ७ ॥

---

१ इवमिति गो. पाठः । २ प्रहसामीति गो. रा. पाठः । ३ इदमिति गो. पाठः । ४ महेच्छास इति गो. पाठः । ५ विप्रकृष्ट इति गो. पाठः । ६ कनीयसोरिति गो. पाठः ।

विदुषः क्षत्रचारित्रे प्राज्ञस्य प्राप्तकारिणः । भयात्प्रवेपे रामस्य चिन्तयन्ती तवात्मजम् ॥ ८ ॥
सुभगा किल कौसल्या यस्याः पुत्रोऽभिषेक्ष्यते । यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः ॥ ९ ॥
प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषम् । उपस्थास्यसि कौसल्यां दासीवत्त्वं कृताञ्जलिः॥ १० ॥
एवं चेत्त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि । पुत्रश्च तव रामस्य प्रेष्यत्वं हि गमिष्यति ॥ ११ ॥
हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः । अप्रहृष्टा भविष्यन्ति स्नुषास्ते भरतक्षये ॥ १२ ॥

रा० टी०—लक्ष्मणशत्रुघ्नाभ्यां भीत्यभावे हेत्वन्तरमाह—प्रत्यासन्नेति । प्रत्यासन्नस्य जन्मनो यः क्रमः तेनापि भरतस्यैव राज्यक्रमः राज्यस्याधिकारः यवीयसोः कनिष्ठयोः तयोर्लक्ष्मणशत्रुघ्नयोः राज्यक्रमस्तु विसृष्टः भरतस्य ज्येष्ठत्वात्तदधिकारेण दूरीकृतः एतेन ताभ्यां न रामभीतिरिति सूचितम् । तेन यथा भरतराज्याधिकारेण तयो राज्याधिकारो दूरीकृतः तथा रामराज्याधिकारेण भरतराज्याधिकारोऽपि दूरीकृत इत्यंशे तस्या अज्ञानं सूचितम् तेन परमात्मेच्छायाः प्राबल्यं ध्वनितम् ॥ ७ ॥

गो० टी०—भरतादेवेत्यत्र हेत्वन्तरमाह—प्रत्यासन्नेति । प्रत्यासन्नेन सन्निकृष्टेन क्रमेण पुनर्वसुपुष्यनक्षत्रजननक्रमेण भरतस्यैव राज्यं प्राप्तमिति शेषः । कनीयसोः कनिष्ठयोः राज्यक्रमः राज्यप्राप्तिक्रमस्तु विप्रकृष्टः व्यवहितः । सत्यपि पारतन्त्र्ये राज्यविषये सर्वेषामभिलाषस्तुल्यः यथा भरतस्येति शङ्कायां प्रथमं रामस्य राज्यं प्राप्तं ततो भरतस्य ततो लक्ष्मणशत्रुघ्नयोः तथा च प्रथमो द्वितीयं जिघांसति अतो रामाद्भयं भरतस्यैवेति भावः ॥ ७ ॥

८] ति० टी०—पुना रामाद्भयमुपसंहरति—विदुष इति । विदुषः सर्वशास्त्रज्ञस्य विशिष्य क्षत्रचारित्रे बलसंपाये संधिविग्रहादिप्रयोगे च प्राज्ञस्य प्राप्तकारिणः अविलम्बेन कालोचितकर्तव्यार्थकारिणो रामस्य त्वदात्मजं प्रति भाव्यनर्थं चिन्तयन्ती तन्निमित्ताद्भयात्प्रवेपे कम्पे ॥ ८ ॥

रा० टी०—ननु महात्मनां वसिष्ठादीनां वियमानत्वात् यथाधिकारमेव भविष्यतीति तव विचारेण किमित्यत आह—विदुष इति । तवात्मजं त्वत्पुत्रसाधुतां चिन्तयन्त्यहं विदुषः सर्वज्ञस्य अत एव क्षत्रचारित्रे संधिविग्रहादिप्रयोगादिषु प्राज्ञस्य विज्ञातुः अत एव प्राप्तकारिणः उपस्थितेष्टवस्तुनो झटिति करणशीलस्य रामस्य भयात् भीत्युत्पादककृतेः प्रवेपे प्रकम्पे ॥ ८ ॥

गो० टी०—एवं राज्यक्रमो भरतस्य संनिहितोऽस्तु तथापि रामे प्रथमप्राप्तिमति वियमाने का भरतस्य राज्यशङ्केत्याह—विदुष इति । विदुषः स्वत एव विवेकशालिनः विशिष्य क्षत्रचारित्रे राजनीतौ प्राज्ञस्य प्राप्तकारिणः अविलम्बेन कालोचितकर्तव्यार्थकारिणः रामस्य भयाद्भाव्यनर्थकरणभयात् तवात्मजक्रूरदौष्ट्यादिरहितं चिन्तयन्ती प्रवेपे । पक्षे चात्र संबन्धसामान्ये ॥ ८ ॥

९] ति० टी०—एवं पुत्रानर्थं प्रदर्श्य तस्या अप्यनर्थं दर्शयितुं कौसल्यार्थमाह—सुभगेति । यौवराज्येनेति हेतौ तृतीया । पुष्येण पुष्ये ॥ ९ ॥

रा० टी०—ननूक्तविशेषणान्वितेष्टरामसंनिधौ त्वया साधुतयैव वर्तितव्यमतो न भीत्यवसरो न वा राज्यप्राप्तौ दोष इत्यत आह—सुभगेति । पुष्येण युक्ते श्वः अव्यवहितागामिदिवसे महता सर्वश्रेष्ठेन यौवराज्येन युवराजत्वेन यस्याः पुत्रो द्विजोत्तमैरभिषेक्ष्यते सा कौसल्या सुभगा ॥ ९ ॥

गो० टी०—कैकेय्या ईर्ष्योत्पादनार्थं कौसल्यासौभाग्यं दर्शयति—सुभगेत्यादिना । सुभगा भाग्यशीला यौवराज्येनेति हेतौ तृतीया ॥ ९ ॥

१०] ति० टी०—वसुमतीं प्राप्तां तत्प्राप्तिनिमित्तां प्रीतिं च प्राप्ताम् । हता युष्मदादिसपत्नीरूपा विद्विड्यया तामत एव प्रतीतां प्रसिद्धाम् उपस्थास्यसि गत्वा सेविष्यसे ॥ १० ॥

रा० टी०—नन्विष्टमेवैतदित्यत आह—प्राप्तामिति । वसुमतीं प्राप्तामत एव हतविद्विषं विनष्टप्रायसपत्न्यादिरिपुमत एव प्रीतिं प्राप्तां प्रतीतां राजविश्वस्तां कौसल्यां त्वं दासीवदुपस्थास्यसि ॥ १० ॥

गो० टी०—रामतो भरतस्येव कौसल्यातोऽस्या अनर्थं दर्शयति—प्राप्तामिति । रामाभिषेकेण सुमहतीं श्रियं प्राप्तां प्रतीतां ख्याताम् ‘ प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ’ इत्यमरः । हतद्विषमधरीकृतसपत्नीकां तां कौसल्यामुपस्थास्यसि सेविष्यसे ॥ १० ॥

११] ति० टी०—अयमनर्थो ममापीत्याह—एवं चेति ११

रा० टी०—एवमिति । एवं च यदि त्वं तस्याः कौसल्यायाः प्रेष्या दासी भविष्यसि तदा तव पुत्रोऽपि अस्माभिः सह रामस्य प्रेष्यत्वं दासत्वं गमिष्यति प्राप्स्यति ॥ ११ ॥

गो० टी०—न केवलं तवैकस्या दास्यं किंतु त्ववदनुबन्धिजनस्यापीत्याह—एवमिति । तव दास्यं प्राप्तं चेदित्यर्थः ॥ ११ ॥

१२] ति० टी०—परमाः स्त्रिय इति बहुवचनेन सीतासख्यः । भरतक्षये भरतप्रभावनाशे ॥ १२ ॥

रा० टी०—हृष्टा इति । रामस्य स्त्रियः सीतायाबहुत्वमादरार्थम् । किंच स्त्रीशब्दः स्त्रीत्वजातिविशिष्टपरः ननु पाणिगृहीतीपरः तेन बहुत्वं युक्तमेव, किंच रामस्य स्त्रियः सीतायाः परमाः प्राकृतविलक्षणाः संपत्तयः प्रहृष्टा भविष्यन्ति । आगं-

१ खस्तिति गो. पाठः । २ सुमहतीमिति गो. पाठः । ३ चेदिति गो. पाठः । ४ प्रेष्यभावामिति गो. पाठः ।

तां दृष्ट्वा परमप्रीतां ब्रुवन्तीं मन्थरां ततः । रामस्यैव गुणान्देवी कैकेयी प्रशशंस ह ॥ १३ ॥
धर्मज्ञो गुणवान्दान्तः कृतज्ञः सत्यवाञ्छुचिः । रामो राजसुतो ज्येष्ठो यौवराज्यमतोऽर्हति ॥ १४ ॥

मशास्त्रस्यानित्यत्वादाङ्गिरहः । अत एव रामस्य एकपत्नीव्रतत्वं संगच्छते रामस्य भार्यान्तराभावादेव सीताविरहकालभवयागे सीताप्रतिकृतिकरणं संगच्छते अत एव तदुत्तरत्र 'न सीतायाः परां भार्यां वत्रे स रघुनन्दनः । यज्ञे यज्ञे च पत्न्यर्थं काञ्चनी जानकी भवेत्' इति संगच्छते अत एव 'मोघं हि धर्मश्चरितो मयायं तथैकपत्नीत्वमिदं निरर्थकम् । या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा ' इति सुन्दरकाण्डे अष्टाविंशतितमे सर्गे सीताविलापपद्ये एकपत्नीत्वोक्तिः संगच्छते स्वपतिनिरूपितपत्न्यन्तरसंबन्धात्यन्ताभाववत्त्वमिति तदर्थः । एतदुत्तरपद्यस्य ' पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च । स्त्रीभिश्च मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः ' इत्यस्य तु अयमर्थः यदि मां त्यक्त्वा गमिष्यसि तर्हि बहुभिः स्त्रीभिश्च ते विहारः सेत्स्यति एतेन तवैकपत्नीव्रतत्वं भज्येत इति बोधितम् तेन स्वत्यागपूर्वकगमनासंभवो ध्वनितः तेन तन्मूलकबहुस्त्रीकरणकविहारस्यासंभवः सूचितः तेन स्वविषयकरामपरप्रेम्णो विज्ञात्रीत्वं व्यञ्जितम् । एतदनुरोधेन ' भुजैः परमनारीणामभिमृष्टमनेकधा ' इत्यस्य तु अनेकधा अनेकप्रकारकाणां नारीणां सीतातिरिक्तस्त्रीणां भुजैः यत् अभिमृष्टं स्पृष्टमनतमित्यर्थः । सामान्ये नपुंसकम् । अत एव परं सर्वोत्कृष्टमत एव ' शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा ' इति वक्ष्यमाणेनावगतार्थता वक्ष्यमाणानुरोधादेवात्र नारीशब्देन सीतातिरिक्तस्त्रीग्रहणं यत्तमित्यध्याहृतम् । ' मातरश्चैव सर्वा मे कुमाराः स्त्रीगणानि च । अग्रतो भरतं कृत्वा गच्छन्त्वग्रे समाधिना ' इत्युत्तरकाण्डाश्वमेधोपक्रमपद्यघटकीभूतस्त्रीशब्दः पाणिगृहीत्यतिरिक्तपरः । मातरश्चेत्युक्तिस्तु ब्राह्मणवसिष्ठन्यायेन विशिष्टबोधनाय ॥ १२ ॥

गो० टी०—दृष्ट्वा इति । राममहिष्या एकत्वेऽपि रामस्य परमाः स्त्रिय इतिबहुवचननिर्देशः परिचारिकाभिप्रायेण भरतक्षये भरतस्य दारिद्र्यरूपक्षये सति । मन्वत्र स्त्रीशब्दो भार्यापर एव सुवासस्ते भरतक्षये इति स्तवाशब्दसाहचर्यात् अत एव सुन्दरकाण्डे सीतयोच्यते ' पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च । स्त्रीभिश्च मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थः ' इति । युद्धकाण्डे च दर्भशयनवर्णने ' भुजैः परमनारीणामभिमृष्टमनेकधा ' इत्युक्तं नहि भुजैर्भुजाभिमर्शो भार्याभ्योऽन्यत्र संभवति उत्तरकाण्डे चाश्वमेधोपक्रमे ' मातरश्चैव सर्वा मे कुमाराः स्त्रीगणानि च । अग्रतो भरतं कृत्वा गच्छन्त्वग्रे समाधिना ' इति दर्शितम् । अत्र स्त्रीगणकुमारव्यपदेशो विना सीतातिरिक्तभार्यासद्भावं न संभवति किंच श्रुतार्थापत्तिरपि रामस्य सीतातिरिक्तधर्मदारसद्भावे प्रमाणं नह्यपत्नीकस्य यज्ञानुष्ठानं संभवति भोगदारान्तरासंभवेन रामस्यैकदारव्रतत्वं भृगुशापपालनं च । सीताप्रतिकृतिकरणं तु सीता स्नेहबहुमानार्थम् । अत्रोच्यते रामस्यैकदारव्रतत्वं सर्वसिद्धं तच्च पत्न्यन्तरसंभवे न संगच्छते नच यज्ञकरणानुपपत्तिः सीताप्रतिकृतिकरणेन तदुपपत्तेः अत एवोत्तरकाण्डे वक्ष्यति ' काञ्चनीं मम पत्नीं च दीक्षार्हां यज्ञकर्मणि । अग्रतो भरतः कृत्वा गच्छत्वग्रे महामतिः' इति सीताप्रतिकृतेर्दीक्षार्हत्वं पत्नीत्वं च, पुनश्चोत्तरत्र ' न सीतायाः परां भार्यां वत्रे स रघुनन्दनः । यज्ञे यज्ञे च पत्न्यर्थं काञ्चनी जानकी भवेत् ' इति नहि वचनविरोधे न्यायः प्रवर्तते अनेन वचनेन प्रत्यक्षश्रुत्यविरुद्धेन विदूरभार्योऽननुकूलभार्यश्च भार्याप्रतिकृतिं कृत्वा श्रौतस्मार्तकर्माणि कुर्यादिति विधिरुन्नीयते स्मृतिश्च तथाविधा पठ्यते यथा हेमाद्रौ 'दूरभार्योऽननुकूलभार्यश्च दर्भपिञ्जूलैर्भार्याप्रतिनिधिं विधाय पार्वणं कुर्यात्' इति । पत्नीकर्तव्यानि कर्माण्यध्वर्युर्यजमानो वा कुर्यात् यथा तस्यामसमर्थायां पत्नीविनाशाभावान्नाग्नेर्विनाशः यत्तु येनकेनचिदुक्तं सीताप्रतिकृतिकरणं सीतास्नेहबहुमानार्थमिति तत्तुच्छं सत्यक्तभार्यायां स्नेहबहुमानकरणस्यावश्यावहत्वात् मातरश्चैव सर्वा मे कुमाराः स्त्रीगणानिच इत्यत्र मे मातरः भरतादीनां कुमाराः जियश्चेत्यर्थः । दारान्तरसंभवेऽपि तेषां धर्मार्थत्वेन प्रजार्थत्वाभावेन रामस्य कुमाराभावात्तत्सदृचरितस्त्रीगणाश्च भरतादीनामेवेति सुव्यक्तम् ।एवं च रामस्य परमाः स्त्रियः, परमनारीणां, स्त्रीभिश्च मन्ये, इत्यादिषु भोगप्रसंजनेन धर्मदारपरत्वासंभवात् साधारणादिपरिग्रहशङ्कानवकाशान्यपरत्वमवसेयं परमाः स्त्रिय इति परिचारिकान्तर्भावेन स्त्रीभिश्च मन्य इति स्वविनाशे ऽन्यन्तरसंभावनया परनारीणामित्यस्य कविवचनत्वेन श्रीभूम्यायभिमर्शविषयत्वाच्चेति दिक् ॥ १२ ॥

१३] ति० टी०—एवं द्विःकृतोपतापापि कैकेयी निसर्गपुण्यस्वभावान्न चचालेत्याह—तामित्यादि । परमप्रीतां परं रामेऽप्रीतामित्यर्थः । देवी पुण्यस्वभावा ॥ १३ ॥

रा० टी०—तामिति । ततः मन्थरोक्तिश्रवणानन्तरमपरमतृप्तिकारकं वचनं ब्रुवन्तीं मन्थरां दृष्ट्वा कैकेयी रामस्यैव गुणान् प्रशशंस गुणप्रशंसया रामे अस्याः प्रीतिरुत्पद्येतेत्यनिष्टभाषणतो निवर्तेतेत्यभिप्रायः सूचितः ॥ १३ ॥

गो० टी०—रामस्यैवंविधगुणत्वे हि त्वदुक्ता दोषाः स्युस्तदेव नास्तीति मूले कुठारं निदधाति तामित्यादिना । तामिति । अप्रीतामिति पदच्छेदः क्षोभहेतौ नितरां वियमानेऽप्यक्षोभ्यमनस्कत्वादेवीति तामृषिः श्लाघते ॥ १३ ॥

१४] ति० टी०—मन्थरोक्तयुक्तीः प्रतिक्षिपति—धर्मज्ञ इति । दान्तः शिक्षितः कृतज्ञ इत्यनेन बाल्ये स्वकृतपालनाद्युपकारस्मरणेन स्वानिष्टशङ्कानिरासः ज्येष्ठ इत्यनेन तस्यैव राज्ययोग्यतेति साधारण्यं परिहृतम् ॥ १४ ॥

१ गुरुभिरिति गो. पाठः । २ सत्यवागिति गो. पाठः । ३ राज्ञ इति गो. पाठः ।

भ्रातॄन्भृत्याश्च दीर्घायुः पितृवत्पालयिष्यति । संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनम् ॥ १५ ॥
भरतश्चापि रामस्य ध्रुवं वर्षशतात्परम् । पितृपैतामहं राज्यमवाप्स्यति नरर्षभः ॥ १६ ॥
सा त्वमभ्युदये प्राप्ते दह्यमानेव मन्थरे । भविष्यति च कल्याणे किमिदं परितप्यसे ॥ १७ ॥
यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः । कौसल्यातोऽतिरिक्तं च मम शुश्रूषते बहु ॥ १८ ॥
राज्यं यदि हि रामस्य भरतस्यापि तत्तदा । मन्यते हि यथात्मानं तथा भ्रातॄंस्तु राघवः ॥ १९ ॥
कैकेय्या वचनं श्रुत्वा मन्थरा भृशदुःखिता । दीर्घमुष्णं विनिःश्वस्य कैकेयीमिदमब्रवीत् ॥ २० ॥

रा० टी०—तदाकारमाह—धर्मज्ञ इत्यादिभिः । रामः यतो धर्मज्ञत्वादिविशिष्टः ज्येष्ठो राजसुतश्च अतो यौवराज्यमर्हति ॥ १४ ॥

गो० टी०—मन्थरोक्तराज्यसाधारण्यं निवर्तयति—धर्मज्ञ इति । दान्तः दमितः 'दान्तस्तु दमिते' इत्यमरः शिक्षित इत्यर्थः । कृतज्ञः सत्पुत्रसमाचारज्ञ इत्यर्थः ॥ १४ ॥

१५] ति० टी०—भरतानर्थोऽपि नेत्याह—भ्रातॄनिति । कथम् व्यर्थमेवेत्यर्थः ॥ १५ ॥

रा० टी०—नन्वु तत्त्वे उक्तदोषप्रसक्तिरित्यत आह—भ्रातॄनिति । दीर्घायुः रामः भ्रात्रादीन् पितृवत्पालयिष्यति अतः कथं संतप्यसे ॥ १५ ॥

गो० टी०—अथ भरतानर्थशङ्कां परिहरति—भ्रातॄनिति १५

१६] ति० टी०—पितृवद्भ्रातॄनविभागेन पालयतो रामस्य वर्षशतात्परमपि यदा विभागेच्छा तदा भरतो राज्यमवाप्स्यति । ध्रुवाप्शब्दाभ्यां लक्ष्मणशत्रुघ्नयोरपि राज्यप्राप्तिर्ध्रुवेति सूचितम् ॥ १६ ॥

रा० टी०—नन्वु भरतस्य राज्यानधिकारित्वेऽपि भ्रातृत्वात् किंचित्तेनापि प्राप्तव्यमतस्तदागमने सति रामाभिषेकेण भवितव्यमन्यथा किंचिदपि न प्राप्स्यतीत्यत आह—भरत इति । वर्षशतात् बहुखण्डैर्व्याप्तं पितृपैतामहं राज्यं नरर्षभो रामोऽवाप्स्यति भरतस्तु ध्रुवमचलं रामस्य परं तृप्तिमवाप्स्यति एतेन रामप्रीतेर्दुर्लभत्वं व्यञ्जितम् । किंच रामस्य राज्यं भरत एव प्राप्स्यति रामाभिषेकानन्तरपालनाधिकारं रामो भरतायैव दातेत्यर्थः । एतेन भरतो रामस्यातिप्रीतिविषय इति ध्वनितम् । यद्वा अप्राप्यवस्तुप्राप्त्यर्थं यत्नो न कर्तव्य इति भरतराज्यप्राप्त्यर्थं न यतितव्यमिति बोधयन्ती आह—भरत इति । रामस्य योग्यं पितृपैतामहं राज्यं नरर्षभो भरतः वर्षशतात्परमपि अ न वाप्स्यति अवाप्स्यति । भाषुरिमतेनावाकारलोपः । वर्षशतात्परमग्रे भरतः प्राप्स्यतीत्यर्थस्तु न युक्तः सर्वप्रमाणाविरुद्धत्वेनासंमतत्वादिति दिक् ॥१६॥

गो० टी०—राज्यं च भरतस्य क्रमाद्भविष्यतीत्याह—भरत इति । वर्षशतात्परं रामराज्यात्परमित्यर्थः । दशवर्षसहस्राणि रामो राज्यं पालयिष्यतीति कैकेयी न जानाति अतो लोकरीत्या वदतीति ज्ञेयम् । अवाप्नेति लुट् स्वानन्तरं भरतस्य राज्यलाभाय संप्रति तस्मै यौवराज्यं दास्यतीत्यर्थः ॥ १६ ॥

१७] ति० टी०—अभ्युदये रामाभिषेकरूप उत्सवे । कल्याणे भरताभिषेकरूपे क्रियता कालेन भविष्यति ॥ १७ ॥

रा० टी०—सेति । प्राप्ते प्रकृष्टेन आप्तं प्राप्तिर्यस्य तस्मिन् उचिते इत्यर्थः । अभ्युदये रामाभिषेकजनितोत्सवे वर्तमाने सति भविष्यति भरतागमनजनिते आगामिनि उत्सवे तदर्थमित्यर्थः । त्वं किमर्थं परितप्यसे ॥ १७ ॥

गो० टी०—सेति । प्राप्ते उचिते अभ्युदये रामाभिषेकरूपे शोभने वर्तमाने प्रत्यासन्ने सति कल्याणे भरताभिषेकरूपे भविष्यति च किमर्थं परितप्यस इति संबन्धः ॥ १७ ॥

१८] ति०—टी०—मान्यः प्रार्थनीयश्रेयस्कः तथा तद्वत् । यदा भूयोऽप्यभ्यधिकमपि । तत्र हेतुः कौसल्यात इति । अतिरिक्तमधिकम् ॥ १८ ॥

रा० टी०—रामाभिषेको ममापि हर्षप्रद इत्यत्र हेतुं वदन्ती आह—यथेति । तथा तेन प्रकारेण भूयस्ततोऽधिकमपि राघवो रामो मान्यः तत्रापि हेतुं वदन्ती आह—अतिरिक्तमधिकं रामः मामनुशुश्रूषते ॥ १८ ॥

गो० टी०—एवं पुत्रानर्थशङ्कां परिहृत्य स्वानर्थशङ्कां परिहरति—यथेति । मान्यः बहुमान्यः भूयः भृशम् । अत्र हेतुमाह—कौसल्यात इति । अतिरिक्तमभ्यधिकं यथा भवति तथा ॥१८॥

१९] ति० टी०—संप्रत्यपि भरतस्य राज्यमस्त्येवेत्याह—राज्यमिति ॥ १९ ॥

रा० टी०—रामाभिषेके विषादो न कार्य इत्यत्र हेत्वन्तरं वदन्ती आह—राज्यमिति । तत् राज्यं तत्रापि हेतुः मन्यते जानाति आत्मानं शरीरं राघवो रामः ॥ १९ ॥

गो० टी०—मा भूद्वर्षशतात्परं भरतस्य राज्यलाभस्तथापि राज्यलाभसौख्यमस्तीत्याह—राज्यमित्यादिना ॥ १९ ॥ २० ॥

२०] ति० टी०—एवं राज्यापहारं परिहृतवतीं कैकेयीं मन्थरा तृतीयपर्यायेण पुनर्भेदयति—कैकेय्या इति ॥ २० ॥

रा० टी०—कैकेय्या इति । दीर्घं चिरकालमुष्णं यथा स्यात्तथा ॥ २० ॥

१ अवाप्स्य पुरुषर्षभ इति गो. पाठः । २ वर्तमाने चेति गो. रा. पाठः । ३ किमर्थमिति गो. पाठः । ४ मे इति गो. पाठः । ५ सोऽनुशुश्रूषते हि मामिति गो. रा. पाठः । ६ तथेति गो. पाठः ।

अनर्थदर्शिनी मौर्ख्यान्नात्मानमवबुध्यसे । शोकव्यसनविस्तीर्णे मज्जन्ती दुःखसागरे ॥ २१ ॥
भविता राघवो राजा राघवस्य च[1] यः सुतः । राजवंशात्तु भरतः कैकेयि परिहास्यते ॥ २२ ॥
नहि राज्ञः सुताः सर्वे राज्ये तिष्ठन्ति भामिनि । स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ॥ २३ ॥
तस्माज्ज्येष्ठे हि कैकेयि राज्यतन्त्राणि पार्थिवाः । स्थापयन्त्यनवद्याङ्गि गुणवत्स्वितरेष्वपि ॥ २४ ॥
असावत्यन्तनिर्भग्नस्तव पुत्रो भविष्यति । अनाथवत्सुखेभ्यश्च राजवंशाच्च वत्सले ॥ २५ ॥
साहं त्वदर्थे संप्राप्ता त्वं तु मां नावबुध्यसे । सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमर्हसि ॥ २६ ॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकम् । देशान्तरं नाययिता[4] लोकान्तरमथापि वा ॥ २७ ॥

२१] ति० टी०—अनर्थदर्शिनी अर्थस्यैवानर्थत्वेन दर्शनशीला । शोक इष्टवियोगजः अनिष्टाप्तिजं दुःखं व्यसनं ताभ्यां विस्तीर्णे व्याप्ते । सकलदुःखसमष्टिर्दुःखसागरस्तत्र मज्जन्ती त्वमात्मानं नावबुद्धयस इत्यर्थः ॥ २१ ॥

रा० टी०—तद्वचनमेवाह—अनर्थेति । अनर्थदर्शिनी विरुद्धार्थदर्शनशीला अनर्थे अर्थमानिनीत्यर्थः । शोकव्यसनविस्तीर्णे शोकस्य हेतुभूतं यद्व्यसनं दुराग्रहस्तेन विस्तीर्णे दुःखसागरे मज्जन्तमात्मानं नावबुध्यसे जानासि ॥ २१ ॥

गो०टी०—अनर्थदर्शिनीति । अनर्थदर्शिनी अनर्थमेवार्थत्वेन दर्शनशीलेत्यर्थः । यद्वा अर्थादर्शिनी प्रयोजनानभिज्ञेत्यर्थः । मौर्ख्यात् अविमृश्यकारित्वात् शोकव्यसनविस्तीर्णे विलापहेतुः शोकः व्यसनं विपत् 'व्यसनं विपदि भ्रंशे' इत्यमरः । यद्वा शोकः इष्टवियोगजं दुःखं भरतस्य राज्यभ्रंशेन वनप्रापणजं दुःखमिति यावत् विपत् स्वस्य सुखाद्भ्रंशः दुःखसागरे सपत्नीसेवारूपे मज्जन्ती तथाभूतमात्मानं नावबुध्यसे ॥ २१ ॥

२२] ति० टी०—कुत एवं वारंवारं कथयसीत्याह—भवितेति । परिहास्यते हीनो भविष्यति भरततत्सुतादे राज्यहान्यैवं दुःखं कथयामीति भावः ॥ २२ ॥

रा० टी०—भरतराज्यप्राप्त्यर्थमिदानीमेव यतितव्यमिति बोधयितुमाह—भवितेति । राघवस्य रामस्य अनु पश्चात् यः सुतः स भविता अतः राजवंशात् राज्ञां परंपरातः राजपट्टिभ्य इत्यर्थः । भरतः परिहास्यते अपसार्यते राजभिः सहासनं न प्राप्स्यतीत्यर्थः ॥ २२ ॥

गो० टी०—वर्षशतात्परमित्युक्तभरतराज्यप्राप्तिं निराकरोति—भवितेति । राघवस्याद्य राघवानन्तरं तस्य यः सुतः स राजा भविष्यति परिहास्यते निर्वास्यते गत्यर्थाद्धसेर्णिजन्तात् कर्मणि लृट् ॥ २२ ॥

२३] ति० टी०—तत्र हेतुमाह—नहीति । सर्वेषां राज्यस्थितौ बाधकमाह—स्थाप्यमानेष्विति । अनयोऽन्यायः ईर्ष्यया परस्परप्रजापीडनरूपः ॥ २३ ॥

रा० टी०—रामराज्यकाले भरतोऽपि कस्यचिद्देशस्य राजा भवितेत्याशां न कर्तव्येति सूचयितुमाह—नहीति । अनयो नीतिविरोधः ॥ २३ ॥

गो० टी०—उक्तेऽर्थे हेतुमाह—नहीति । भामिनि कोपने 'कोपना त्वेव भामिनी' इत्यमरः । अनयः नीतिविरोधः ॥२३॥

२४] ति० टी०—राज्यतन्त्राणि राज्यनिर्वहणक्षमाधिकारप्राधान्यानि सर्वनिरूपितप्राधान्याश्रयत्वमेकस्यैवेति भावः । ज्येष्ठस्यागुणवत्त्वे तु गुणवत्कनीयस्यपि ॥ २४ ॥

रा० टी०—तस्मादिति । स्थापयन्ति तदायत्ततां प्रापयन्तीत्यर्थः । गुणवत्सु राजोचितगुणविशिष्टेषु इतरेषु कनिष्ठेष्वपि ज्येष्ठस्य तादृशगुणवत्त्वाभावे इति शेषः । राज्यतन्त्राणि राज्यपालनादियोग्यव्यापारान् 'तन्त्रं स्वराष्ट्रव्यापारः' इति वैजयन्ती ॥ २४ ॥

गो० टी०—तस्मादिति । राज्यतन्त्राणि राज्यपरिपालनादिव्यापारान् 'तन्त्रं स्वराष्ट्रव्यापारः' इति वैजयन्ती ॥ २४ ॥

२५] ति० टी०—यदेत्तो—असाविति । निर्भग्नो हीनसुखेभ्यो राजवंशाच्च निर्भग्नः भविष्यतीत्यन्वयः । वत्सले सर्वत्र दयाशीले ॥ २५ ॥

रा० टी०—उपसंहरन्नाह—असाविति । अत्यन्तनिर्भग्नः नितरामपसारितः ॥ २५ ॥

गो० टी०—एवं राज्यभ्रंशमुक्त्वा राज्यालाभेऽपि राज्यसुखं भरतस्यास्तीति कैकेय्योक्तं परिहरति—असाविति । अत्यन्तनिर्भग्नः सुतरां प्रच्यावितः वत्सले पुत्रवत्सले ! ॥ २५ ॥

२६] ति० टी०—त्वदर्थे त्वत्पुत्रराज्यभंशे प्राप्ते तत्परिहारकथनार्थम् । सपत्निवृद्धावित्यार्षो ह्रस्वः । प्रदेयं पारितोषिकमतो मां त्वमलुब्धा स्वहिते इति न बुद्धयसे इत्यर्थः ॥२६॥

रा० टी०—सेति । सपत्निवृद्धौ इत्यत्र ह्रस्व आर्षः । प्रदेयं पारितोषिकं मे मह्यं दातुमिच्छसि एतेन तया कैकेय्या विवेकाभावः सूचितः ॥ २६ ॥

गो० टी०—ज्येष्ठे वर्तमाने भरतस्य राज्ययोग्यताभावात् किं कुर्म इत्याह—सेति । त्वदर्थे त्वत्पुत्रराज्यभंशपरिहारकथनार्थमित्यर्थः । सपत्निवृद्धाविति । ज्यापोरिति ह्रस्वः । या त्वं सपत्निवृद्धौ प्रदेयं पारितोषिकं दातुमिच्छसि सा त्वं नावबुध्यस इत्यन्वयः ॥ २६ ॥

२७] ति० टी०—नाययिता लुट् । लोकान्तरामिति हनिष्यतीति यावत् ॥ २७ ॥

१ मज्जन्तमिति रा. पाठः । २ अन्विति गो. रा. पाठः । ३ इच्छसीति गो. रा. पाठः । ४ वा नयितेति गो. पाठः ।

बाल एव तु मातुल्यं भरतो नायितस्त्वया । संनिकर्षाच्च सौहार्दं जायते स्थावरेष्वेव ॥ २८ ॥
भैरतानुवशात्सोऽपि शत्रुघ्नस्तत्समं गतः । लक्ष्मणो हि यथा रामं तथायं भरतं गतः ॥ २९ ॥
श्रूयते हि द्रुमः कश्चिच्छेत्तव्यो वनजीवनैः । संनिकर्षादिषीकाभिर्मोचितः परमाद्भयात् ॥ ३० ॥
गोप्ता हि रामं सौमित्रिर्लक्ष्मणं चापि राघवः । अश्विनोरिव सौभ्रात्रं तयोर्लोकेषु विश्रुतम् ॥ ३१ ॥
तस्मान्न लक्ष्मणे रामः पापं किंचित्करिष्यति । रामस्तु भरते पापं कुर्यादेवं न संशयः ॥ ३२ ॥
तस्माद्राजगृहादेव वनं गच्छतु राघवः । एतद्धि रोचते मह्यं भृशं चापि हितं तव ॥ ३३ ॥

रा० टी०–ध्रुवमिति । अकण्टकं निर्विघ्नं यथा स्यात्तथा नायियता प्रापयिता लोकान्तरं मनुष्यलोकातिरिक्तलोकं हन्तेति यावत् ॥ २७ ॥

गो० टी०–असावत्यन्तनिर्भग्न इत्युक्तं विवृणोति–ध्रुवमित्यादिना ॥ २७ ॥

२८] ति० टी०–यस्तु रामे राज्ञः पक्षपातः स भरतासंनिधानतः । तच्च त्वयैव कृतमित्याह–बाल एवेति । मातुल्यं मातुलगृहम् । नन्वत्र किं तावतात आह–संनिकर्षादिति । स्थावरेषु तृणगुल्मलतावृक्षादिषु तत्र सौहार्दमन्योन्याश्लेषरूपम् । एवं च भरतस्थितौ विभज्य समं राज्यलाभः स्यादिति भावः२८

रा० टी०–बाल इति । मातुल्यं मातुलवेश्म नायितः प्रापितः सन्निकर्षात् समीपवासात् सौहार्दमन्योन्यालिङ्गनेनानुमीयमानम् । एतेन यदि भरत इह स्यात्तर्हि तस्याऽपि कस्यचिद्देशस्याधिपत्यं स्यादेवेति सूचितम् ॥ २८ ॥

गो० टी०–रामकर्तृकं भाव्यनिष्टं प्रदर्श्य कैकेयीकृतमप्यनर्थं दर्शयति–बाल इति । मातुल्यं मातुलसंबन्धिगृहमित्यर्थः नायितो हि प्रापितः खलु अनेन का हानिरित्याशङ्क्य हानिमेव दर्शयति–सन्निकर्षादिति । स्थावरेष्वपि वृक्षगुल्मादिस्थावरेष्वपि सन्निकर्षाच्च अत्यन्तसमीपावस्थानाच्च सौहार्दं जायते अन्योन्यसंश्लेषरूपः सुहृद्भावो जायते राज्ञो रामभरतादिषु किमुत, तादृग्सन्निकर्षस्त्वया विघटित इति भावः ॥ २८ ॥

२९] ति० टी०–शत्रुघ्नस्थितौ वा भरतकार्यस्य न नाशः स्यात् सोऽपि दैववशादत्र इत्याह–भरतानुवशादिति । 'शत्रुघ्नोऽपि समं गतः' इति पाठेऽनुवशाद्यदुरोधवशादित्यर्थः । आयोऽपित्रैव योज्यः । अनुवशादपि अपिना दैववशाच्चेत्यर्थः । गतः एकहृदयतयेति शेषः ॥ २९ ॥

रा० टी०–शत्रुघ्नस्यापि दुःखमेव भवितेति बोधयन्ती आह–भरतानुगत इति । सः शत्रुघ्नोऽपि भरतानुगतः भरतानुसारी सन् तत्समं रामकर्तृकद्रोहविषत्वेन भरतसाम्यं गतः प्राप्तः । समशब्दो भावप्रधानः । नन्वत्र लक्ष्मणस्य रामप्रीतिविषयत्वात् कथं तद्भ्रातुः शत्रुघ्नस्य भरतसाम्यमत आह–यथा असौ शत्रुघ्नो भरतं गतः भरतानुसारी भरतादन्यं न कंचन वेदेत्यर्थः । तथा लक्ष्मणोऽपि राममनुगतः रामादन्यं न कंचन वेदेत्यर्थः । एतेन शत्रुघ्नस्य भरतानुयायित्वेन रामद्रोहविषयत्वे लक्ष्मणद्रोहविषयत्वमपि स्यादिति व्यक्तम् ॥२९॥

गो० टी०–भरतस्यासंनिधानेऽपि शत्रुघ्नसंनिधाने भरते प्रीतिः स्यात्तदपि नास्तीत्याह–भरतस्यापीति । अनुवशः विधेयः समं भरतेन सह अनुवशत्वमुपपादयति–लक्ष्मणो हीति । हि यस्माद् रामं लक्ष्मण इवासौ शत्रुघ्नो भरतं गतःआश्रितः २९

३०] ति० टी०–कस्यचित्संनिकर्षात्कस्यचिदनर्थनिवृत्तिर्लोकदृष्टेत्यत आह–श्रूयते हीति । छेत्तव्यः प्राप्तच्छेदनकालः । इषीकाभिः कण्टकबहुलगुल्मैः संनिकर्षात्परितः परिवारणरूपात् भयाच्छेदनरूपात् । स्वस्य सदान्तःपुरवर्तित्वेन श्रूयते हीत्युक्तिः ॥ ३० ॥

रा० टी०–लक्ष्मणसाहाय्यात् भरतकर्तृकापकृतिप्रसक्तिः रामे न भवितेति बोधयितुमन्यसंनिकर्षादन्यस्यानर्थनिवृत्तिर्लोके दृष्टेत्याह–श्रूयत इति । वनजीविभिः वनावयवीभूतच्छिन्नवृक्षक्रयजीविकावद्भिः जनैः छेत्तव्यः कश्चन द्रुमः इषीकाभिः बहुकण्टकविशिष्टगुल्मैः संनिकर्षात्स्वसामीप्यात्सर्वत आवरणादित्यर्थः । परमाद्भयाद् उन्मूलनोच्छेदनरूपभीतेः मोचितः इति श्रूयते । हिशब्द इत्यर्थे ॥ ३० ॥

गो० टी०–स्थावरेष्वपीत्युक्तमुपपादयति–श्रूयते हीति । वनजीविभिः वनोद्भूतकाष्ठजीविभिः छेत्तव्यः प्राप्तच्छेदनकालः कश्चिद्द्रुमः तस्माच्छेदनरूपात्परमाद्भयादिषीकाभिः इषीकाकण्टकबहुलगुल्मैः संनिकर्षात् परितः परिवारणरूपात् मोचित इति श्रूयते हि जनपरंपरयेति शेषः । स्वयं नित्यान्तःपुरवर्तित्वेन तत्साक्षात्काराभावात् श्रूयत इत्युक्तिः ॥ ३० ॥

३१] ति० टी०–नन्वेष दोषो लक्ष्मणस्यापि समानोऽत आह–गोप्तेति ॥ ३१ ॥

रा० टी०–लौकिकदृष्टान्तेन लक्ष्मणसाहाय्याद् रामानर्थनिवृत्तिमुक्त्वा तुल्यपुत्रैकैः परस्परसाहाय्यात्परस्परार्थाप्रसक्तिर्भवितेति बोधयन्ती आह–गोप्तेति । राघवो रामः ॥३१॥

गो० टी०–गोप्तेत्यादि । पापं वधम् ॥ ३१ ॥ ३२ ॥

३२] ति० टी०–पापं वधम् ॥ ३२ ॥

रा० टी०–तस्मादिति । तस्मात्संनिकर्षादेतोः रामो भरते तु कुर्यादेव तत्संनिकर्षाभावादिति भावः ॥ ३२ ॥

३३] ति० टी०–तस्माद्वधसंभावनासत्त्वात् राजगृहाद्राजगृहाख्यान्मातुलनगरात् । एतदेव मह्यं रोचते । त्वदिष्टत्वात्

१ इति गो. रा. पाठः । २ अपीति गो. रा. पाठः । ३ भरतस्याप्यनुवशः शत्रुघ्नोऽपि समागत इति गो. भरतानुमतः सोऽपीति रा. पाठः । ४ सप्रविति गो. रा. पाठः । ५ जीविभिरिति गो. रा. पाठः । ६ इतीति गो. पाठः । ७ ते सुत इति गो. रा. पाठः ।

एवं ते ज्ञातिपक्षस्य श्रेयश्चैव भविष्यति । यदि चेद्धरतो धर्मात्पित्र्यं राज्यमवाप्स्यति ॥ ३४ ॥
स ते सुखोचितो बालो रामस्य सहजो रिपुः । समृद्धार्थस्य नष्टार्थो जीविष्यति कथं वशे ॥ ३५ ॥
अभिद्रुतमिवारण्ये सिंहेन गजयूथपम् । प्रच्छाद्यमानं रामेण भरतं त्रातुमर्हसि ॥ ३६ ॥
दर्पान्निराकृता पूर्वं त्वया सौभाग्यवत्तया । राममाता सपत्नी ते कथं वैरं न यापयेत् ॥ ३७ ॥
यदा च रामः पृथिवीमवाप्स्यते प्रभूतरत्नाकरशैलसंयुताम् ।
तदा गमिष्यस्यशुभं पराभवं सहैव दीना भरतेन भामिनि ॥ ३८ ॥
यदा हि रामः पृथिवीमवाप्स्यते ध्रुवं प्रणष्टो भरतो भविष्यति ।
अतो हि संचिन्तय राज्यमात्मजे परस्य चैवास्य विवासकारणम् ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टमःसर्गः ॥ ८ ॥

एकपुत्रायाः पुत्रमरणापेक्षया वने पुत्रजीवनं सम्यक् । तदेवाह-भृशं तव हितमेतत् 'जीवन्भद्राणि पश्यति' इति न्यायात् ॥३३॥

रा० टी०-ननु भरतभयनिवृत्त्यर्थमिदानीं किं कर्तव्यमित्यत आह-तस्मादिति । राजगृहात्केकयाधिपभवनात् अन्यथा रामस्तं घातयितेति तात्पर्यम् ॥ ३३ ॥

गो० टी०-तस्मादिति । तस्मात् पापकरणाद्धेतो राजगृहात् केकयराजगृहात् न त्विहागत्य मर्तव्यमिति भावः॥३३॥

३४] ति० टी०-एवमेवं सति मातुलगृहादेव वनगमने सति ते ज्ञातिपक्षस्यास्मदादेः श्रेयश्च भविष्यत्येव श्रेयो जीवनरूपं कल्याणम्, चात्सुखम् । भरताद्वनस्थादपि भयशङ्कयास्मदादिपीडायाः कर्तुमशक्यत्वादिति भावः । यदि चेदिति यदि वेत्यर्थः । धर्मात्पितृदीयमानत्वरूपात् तदा वा ज्ञातिपक्षस्य श्रेय इत्यर्थः । यद्वा एवमेव ते पक्षस्य श्रेयो भविष्यति । एवमेवेत्येतदुपपादयति-यदि चेति ॥ ३४ ॥

रा० टी०-एवमिति । एवं भरते वनं गते सति चेत्कस्मिंश्चित्समये यदि भरतो धर्मात् राज्यमवाप्स्यति तदा ज्ञातिपक्षस्यास्मदादेः श्रेयो भविष्यत्येव एतेन वनगमने दशरथस्य तस्मिन्नपि कृपा भवितेति हेतुर्ध्वनितः ॥ ३४ ॥

गो० टी०-एवमिति । धर्मात् पित्रनुमतिरूपात् भरतो राज्यं यद्यवाप्स्यति एवं चेत्ते ज्ञातिपक्षस्य बन्धुवर्गस्य श्रेयश्चापि भविष्यति ॥ ३४ ॥

३५] ति० टी०-अन्यथा दुःखमेवेत्याह-स ते इति । समृद्धार्थस्य रामस्य वशे स्थितो नष्टार्थः कथं जीविष्यतीत्यर्थः ॥३५॥

रा० टी०-अन्यथा दुःखमेवेत्याह-स इति । समृद्धार्थस्य प्राप्तराज्यश्रियो रामस्य सहजो भ्राता सुखोचितः राज्यानन्दयोग्यः नष्टार्थः विगतराज्यः रामस्य रिपुरयं राज्याभिलाषीति रामद्रोहविषयीभूतः रामस्य वशे स्थितः ते बालः स भरतः कथं जीविष्यति । रामस्येति योग्यतया स्थलत्रयान्वयि ॥ ३५ ॥

गो० टी०-राज्यानवाप्तावनिष्टमाह-स इति । सहजो रिपुः सपत्नीपुत्रत्वात्सहजः शत्रुः ते स बालः भरतः रामस्य वशे कथं जीविष्यति ॥ ३५ ॥

३६] ति० टी०-तस्मादरण्ये सिंहेनाभिद्रुतं गजयूथपमिव राज्याप्त्या प्रबलेन रामेण प्रच्छाद्यमानमभिभूयमानं भरतं तदभिषेकनिरोधेन त्रातुमर्हसि ॥ ३६ ॥

रा० टी०-अभीति । अभिद्रुतं पलायितं प्रच्छाद्यमानं पराभूयमानम् ॥ ३६ ॥

गो० टी०-एवमनर्थपौष्कल्ये तत्परिहाराय कर्तव्यमाह-अभिद्रुतमिति । प्रच्छाद्यमानमभिभूयमानम् ॥ ३६ ॥

३७] ति० टी०-अन्यथा तवाप्यनर्थ इत्याह-दर्पादिति । सौभाग्यवत्ता पतिवात्सल्यम् । वैरयापनं वैरशुद्धिं, त्वयि दास्यसंपादनेन कथं न कुर्यादित्यर्थः । 'पातयेत्' इतिपाठेऽप्ययमेवार्थः ॥ ३७ ॥

रा० टी०-दर्पादिति । दर्पात्पत्यतिप्रीतिहेतुकगर्वान्निराकृता अनावृता सौभाग्यवत्तया पुत्रो राज्यप्राप्त्येदानीमतिभाग्यवतीत्वेनोपलक्षिता राममाता वैरं द्रोहफलं यापयेत्प्रापयेत् । 'पातयेत्' इतिपाठेऽपि स एवार्थः ॥ ३७ ॥

गो० टी०-दर्पादिति । कथं वैरं न यातयेत् वैरयातनं वैरशुद्धिः तां त्वयि दास्यापादनेन संपादयेदित्यर्थः ॥ ३७ ॥

३८] ति० टी०-अशुभं पराभवं दास्यम् ॥ ३८ ॥

रा० टी०-इदानीन्तनाभिषेकभङ्गप्रयत्नाभावे सपुत्रायास्ते विनाशोऽवश्यं भवितेत्याह-यदेति । भरतेन सहैव अशुभं पराभवं गमिष्यसि प्राप्स्यसि ॥ ३८ ॥

गो० टी०-उपसंहरति-यदेत्यादिना ॥ ३८ ॥

३९] ति० टी०-एवं यतः सपुत्रायास्तेऽनर्थः अत एवात्मजे राज्यं राज्यप्राप्तिकारणं चिन्तय 'शत्रुश्चेो न स्याच्यः' इति न्यायेन परस्यास्य रामस्य चाल्लक्ष्मणसीतयोर्विवासकारणं च चिन्तय ॥ ३९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टमः सर्गः ॥ ८ ॥

---

१ यातयेदिति गो. पाठः । २ हीति गो. रा. पाठः । ३ अवाप्स्यतीति गो. रा. पाठः । ४ पत्तनामिति गो. रा. पाठः । ५ अवाप्स्यतीति गो. पाठः । ६ चैवाद्येति गो. चाद्येति रा. पाठः ।

नवमः सर्गः ।

मन्थरादुर्बोधनेन विकृतहृदया कैकेयी रामनिर्वासनपूर्वकं भरताभिषेचनं प्रतिज्ञाय मन्थरां प्रत्येव तत्सिद्ध्युपायं पप्रच्छ । मन्थरा दैवासुरसंग्राममुपन्यस्य तत्समये दशरथात्संपादितवरयो रामप्रवासनभरताभिमिषेचनसंसिद्धिं प्रदर्श्य तद्वरणे कैकेयीं चोदयामास । कैकेय्यपि मन्थरामभिप्रशस्याभरणान्युन्मुच्य क्रोधागारक्षितिमधिशिश्ये ।

एवमुक्ता तु कैकेयी क्रोधेन ज्वलितानना । दीर्घमुष्णं विनिःश्वस्य मन्थरामिदमब्रवीत् ॥ १ ॥
अद्य रामम्[1]तः क्षिप्रं वनं प्रस्थापयाम्यहम् । यौवराज्येन भरतं क्षिप्रमद्याभिषेचये[2] ॥ २ ॥
इदं त्विदानीं संपश्य[3] केनोपायेन साध्ये[4] । भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥ ३ ॥
एवमुक्ता तु[5] सा देव्या मन्थरा पापदर्शिनी । रामार्थमुपहिंसन्ती कैकेयीमिदमब्रवीत् ॥ ४ ॥
हन्तेदानीं प्रपश्य[6] त्वं कैकेयि श्रूयतां वचः[7] । यथा ते भरतो राज्यं पुत्रः प्राप्स्यति केवलम् ॥ ५ ॥

रा० टी०—नन्वु रामस्य मद्धेतुकभयाभावाद्रामहेतुकभीतिर्ममापि न स्यादिति कथं मम पराभवो भवितेत्याह—यदेति । भरतः ध्रुवं प्रनष्टो भविष्यति एतेन भरतपराभवमूलकस्तव पराभव इति सूचितम् । अतः आत्मजे भरते राज्यं परस्य तत्प्रतिपक्षभूतरामस्य विवासकारणं चायैव संचिन्तय ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टमः सर्गः ॥ ८ ॥

गो० टी०—कैकेय्यनर्थमुक्त्वा भरतानर्थमाह—यदा हीति । राज्यं राज्यकारणं परस्य रामस्य ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्यानेऽष्टमः सर्गः ॥ ८ ॥

१] ति० टी०—एवं त्रिवारोपदेशेन दुष्टेऽस्मिन्नेव अर्थे उपादेयत्वसत्यत्वनिश्चयात्स्वकार्याय देवैश्च क्षुभितचित्तायास्तदुपायप्रश्नमाह—एवमिति ॥ १ ॥

रा० टी०—मन्थरावचनश्रवणोत्तरकालिकं कैकयीवृत्तमाह—एवमित्यादिभिः । उष्णं यथा स्यात्तथा दीर्घं विनिःश्वस्य मन्थरया कोपेनैव एवमुक्त्वा ज्वलितानना प्रकाशितवदना प्रसन्नवदनेत्यर्थः कैकेयी मन्थरामिदमब्रवीत् । प्रसन्नवदना इत्यनेन रामोऽवश्यं देवकार्यार्थं प्रवर्त्स्यतीति तदनुकूलमेव इयं प्रार्थयते इति हेतुः सूचितः तेन ब्रह्मादिप्रार्थनया देवकार्यार्थं रामप्रादुर्भूतिरिति कैकेय्या स्मृतमिति ध्वनितम् । तुशब्द एवार्थे ॥ १ ॥

गो० टी०—अथ रामगुणज्ञापि कैकेयी कार्यपरैर्दैवैः क्षुब्धहृदया सती मन्थरावचनमनुमोदितवतीत्याह—एवमित्यादि । कोपेन दास्यप्राप्तिश्रवणजकोपेन ॥ १ ॥ २ ॥

२] ति० टी०—प्रस्थापयामि प्रस्थापनोद्यमं करोमि । एवमभिषेचये इत्यपि ॥ २ ॥

रा० टी०—तद्वचनमेवाह—अद्येति । इतोऽद्योध्यायाः क्षिप्रं शीघ्रमभिषेचये इव । एव इवार्थे ॥ २ ॥

३] ति० टी०—अथ तदुपायं पृच्छति—इदं त्विति । उत्तरार्धार्थं केनोपायेन साधये इदमिदानीं संपश्य विचारय उत्साहमात्रेण नेदं साध्यमिति भावः ॥ ३ ॥

रा० टी०—तद्बुद्धिपरीक्षार्थं तामेव पृच्छति—इदमिति । कथंचन केनापि प्रकारेण भरतो राज्यमिदानीं प्राप्नुयात् पालयेदित्यर्थः रामो नेदानीमिदमहं केनोपायेन साधये इति त्वं संपश्य मनसि निश्चित्य कथयेत्यर्थः । केनापि प्रकारेणेत्युक्त्या राज्याभिषेकं प्रत्याग्रहो न कर्तव्य इति बोधितम् तेनाभिषेकानर्हत्वं भरतस्य सूचितम् । केनोपायेन साधये इत्यनेन भरतो राज्यं न ग्रहीष्यतीति हेतुर्ध्वनितः । एकस्तुशब्द इत्यर्थे द्वितीयोऽप्यर्थे ॥ ३ ॥

गो० टी०—मन्थराया अतिकुशलबुद्धियोगं दृष्ट्वा तामेवोपायं पृच्छति—इदमिति । इदं प्रस्तुतकार्योपयोगि साधनं संपश्य संचिन्तय ॥ ३ ॥

४] ति० टी०—रामार्थं लोकदृष्ट्या रामहितमभिषेकरूपमर्थम् ॥ ४ ॥

रा० टी०—एवमिति । रामार्थं राज्याभिषेकमुपहिंसन्ती निवर्तयन्तीत्यर्थः मन्थराब्रवीत् ॥ ४ ॥

गो० टी०—एवमिति । रामार्थं रामाभिषेकरूपप्रयोजनम् ॥ ४ ॥

५] ति० टी०—त्वं प्रपश्य मत्सामर्थ्यमिति शेषः । ' प्रवक्ष्यामि ' इति पाठान्तरम् । श्रूयताम् मद्वच इति शेषः । चस्त्वर्थे । केवलं भरतो न तु राम इत्यर्थः । यद्वाहं वक्ष्याम्येवोपायं त्वमपि प्रपश्य विचारय ॥ ५ ॥

रा० टी०—हन्तेति । हन्तेति हर्षार्थकमव्ययम् । प्रवक्ष्यामि कथयिष्यामि ' प्रपश्य त्वं ' इति भट्टसंमतः मत्सामर्थ्यमिति शेष इति तव्याख्या ॥ ५ ॥

गो० टी०—हन्तेति । हन्तशब्दो हर्षे वर्तते स्वाभिमतरामविवासनपूर्वकभरताभिषेकोपायप्रभनिबन्धनोऽत्र हर्षः वरस्मरणहेतुको वा । मे मत्तः केवलं राज्यं कृत्स्नं राज्यम् ' निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः ' इत्यमरः ॥ ५ ॥

१ कोपेनेति गो. रा. पाठः । २ चेति गो. रा. पाठः । ३ एवेति गो. रा. पाठः । ४ मन्थरे इति गो. पाठः । ५ त्वेति गो. पाठः । ६ प्रवक्ष्यामीति गो. रा. पाठः । ७ च मे इति गो. पाठः ।

किं न स्मरसि कैकेयि स्मरन्ती वा निगूहसे । यदुच्यमानमात्मार्थं मत्तस्त्वं श्रोतुमिच्छसि ॥ ६ ॥
मयोच्यमानं यदि ते श्रोतुं छन्दो विलासिनि । श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम् ॥ ७ ॥
श्रुत्वैवं वचनं तस्या मन्थरायास्तु कैकयी । किंचिदुत्थाय शयनात्स्वास्तीर्णादिदमब्रवीत् ॥ ८ ॥
कथयस्वेति ममोपायं केनोपायेन मन्थरे । भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥ ९ ॥
एवमुक्ता तदा देव्या मन्थरा पापदर्शिनी । रामार्थमुपहिंसन्ती [४]कैकेयीमिदमब्रवीत् ॥ १० ॥
पुरा देवासुरे युद्धे सह राजर्षिभिः पतिः । आगच्छत्त्वामुपादाय देवराजस्य साह्यकृत् ॥ ११ ॥
दिशमास्थाय [७]कैकेयि दक्षिणां दण्डकान्प्रति । वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः ॥ १२ ॥
स शम्बर इति ख्यातः शतमायो महासुरः । ददौ शक्रस्य संग्रामं देवसंघैरनिन्दितः ॥ १३ ॥
तस्मिन्महति संग्रामे पुरुषान्क्षतविक्षतान् । रात्रौ प्रसुप्तान्घ्नन्ति स्म तरसापास्य राक्षसाः ॥ १४ ॥

६] ति० टी०–नन्वं मम न प्रतिभाति तदुपाय इति तत्राह–किं नेति । स्मृत्वा वा संमतये मन्मुखाच्छ्रवणाय निगूहसे । यद्यत आत्मार्थमात्मप्रयोजनोपायमुच्यमानम् । वर्तमानसामीप्ये लट् । त्वयानेकश उक्तमपि मत्तः श्रोतुमिच्छसि ॥६॥

रा० टी०–किमिति । आत्मार्थमात्मनः स्वस्य अर्थः प्रयोजनं यस्मात्तमुपायमित्यर्थः । त्वं किं न स्मरसि निगूहसे गोपयसि वा यत् यस्मात् इच्छसि वाञ्छसि । आत्मार्थमित्युभयान्वयि ॥ ६ ॥

गो० टी०–किमिति । हे कैकेयि ! त्वमुच्यमानं त्वया बहुशः कथ्यमानमात्मार्थमात्मप्रयोजनं मत्तः श्रोतुमिच्छसीति यत् अतस्तन्न स्मरसि किं, स्मरन्ती वा निगूहसे किमिति योजना ॥ ६ ॥

७] ति० टी०–छन्द इच्छा । विधीयतां क्रियताम् । विमृश्योक्तं चेत्क्रियताम् ॥ ७ ॥

रा० टी०–मयेति । हे विलासिनि ! यदि श्रोतुं छन्द इच्छा तदा विधीयतां क्रियतामेव । च एवार्थे ॥ ७ ॥

गो० टी०–मयेति । छन्दः अभिलाषः ' छन्दः पद्येऽभिलाषे च ' इत्यमरः ॥ ७ ॥

८–१०] ति० टी०–श्रवणेऽनुष्ठाने चोत्साहं दर्शयति–उत्थायेत्यादि ॥ ८–१० ॥

रा० टी०–श्रुत्वेति । स्वास्तीर्णाच्छयनादिकंचिदुत्थाय अब्रवीत् । किंचिदुत्थायेत्यनेन तदादरः कृत इति ध्वनितम् स्वास्तीर्णादित्यनेन शय्याया निर्दोषत्वं सूचितम् तेनोत्थाने शय्यादोषो न हेतुरिति व्यक्तम् ॥ ८ ॥

गो० टी०–श्रुत्वेति । किंचिदुत्थानमादरातिशयात् उत्थानहेतुर्न शय्यादोष इत्याशयेनाह–स्वास्तीर्णादिति ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–कथयस्वेति । कथंचनापि इदानीं राज्यं प्राप्नुयात् । त्वरिदानीमित्यर्थे ॥ ९ ॥

रा० टी०–एवमिति । अयं श्लोकः पूर्वत्रापि पठितः परंतु तत्र तु सेति अत्र तदेति भेदः ॥ १० ॥

गो० टी०–कथयेति । कथय त्वं ममोपायमित्यस्य विवरणं केनेत्यादि ॥ ९ ॥ १० ॥

११] ति० टी०–देवासुरे देवासुरसंबन्धिनि उपादाय गृहीत्वा । साह्यं सहायत्वम् ॥ ११ ॥

१२] ति० टी०–दक्षिणां दिशमास्थाय स्थितान्दण्डकाञ्जनपदान्प्रति तत्संबन्धि वैजयन्तमिति पुरं ख्यातं यत्र तिमिध्वजो नाम राजाभवत् ॥ १२ ॥

रा० टी०–तद्वचनमेवाह–तवेति । दैवासुरे देवासुरसंबन्धिनि उपादाय गृहीत्वा देवराजस्य इन्द्रस्य साह्यकृत्साहाय्यकर्ता तव पतिः दक्षिणां दिशमास्थाय आश्रित्य दण्डकान्प्रति दण्डकसंबन्धि वैजयन्तमितिख्यातं पुरमगच्छत् । यत्र यस्मिन्पुरे तिमिध्वजः शम्बर इति नामभ्यां ख्यातः देवसंघैरनिर्जितः स महासुरः शक्रस्य संग्रामं ददौ । एतेन देवगणपराभूत्यनन्तरं भाविस्वपराभूतिमालक्ष्य इन्द्रेण दशरथ आहूत इति ध्वनितम् । श्लोकत्रयमेकान्वयि ॥ ११–१३ ॥

गो० टी०–वरं स्मारयितुं पूर्वकथामाह–तवेत्यादि । श्लोकद्वयमेकान्वयम् । हे कैकेयि ! दैवासुरे देवासुरसंबन्धिनि युद्धे तव पतिः देवराजस्य साह्यकृत् साहाय्यकृत्सन् राजर्षिभिः स्वाश्रितैः सह त्वां चोपादाय दण्डकान्प्रति, दक्षिणां दिशमास्थाय प्राप्य यत्र तिमिध्वजो वर्तते तद्वैजयन्ताख्यं पुरमगच्छदिति संबन्धः ॥ ११ ॥ १२ ॥

१३] ति० टी०–स एव लोके शम्बर इति ख्यातः । देवसंघैः सहितस्य शक्रस्य ॥ १३ ॥

गो० टी०–कस्तिमिध्वजः स कीदृशः स कमपराधं कृतवानित्यत्राह–स इति । देवसंघैः अनिर्जितः देवसंघान्पराभूय शक्राय युद्धं ददावित्यर्थः ॥ १३ ॥

१४] ति० टी०–क्षतैरस्त्रशस्त्रवेधैर्विक्षतान्विशेषेण विद्धान् रात्रौ प्रसुप्तान्दिनकृतयुद्धश्रान्त्या । अपास्यास्तरणादाकृष्य १४॥

रा० टी०–तस्मिन्निति । तस्मिन् देवासुरकर्तृके क्षतविक्षतान् क्षताश्च विक्षताश्चेति द्वन्द्वः लघुव्रणविशिष्टान्बृहद्व्रणविशि-

१ चापि विमृश्यतामिति गो. पाठः । २ त्वमिति गो. पाठः । ३ तयेति गो. पाठः । ४ कुब्जा वचनमब्रवीदिति गो. पाठः । ५ तवेति गो. रा. पाठः । ६ दैवासुरे इति गो. रा. पाठः ७ वै देवीति गो. पाठः । ८ अनिर्जित इति गो. रा. पाठः । ९ ऽऽसाधेति गो. पाठः ।

तत्राकरोन्महायुद्धं राजा दशरथस्तदा । असुरैश्च महाबाहुः शस्त्रैश्च शकलीकृतः ॥ १५ ॥
अपवाह्य त्वया देवि संग्रामान्नष्टचेतनः । तत्रापि विक्षतः शस्त्रैः पतिस्ते रक्षितस्त्वया ॥ १६ ॥
तुष्टेन तेन दत्तौ ते द्वौ वरौ शुभदर्शने । स त्वयोक्तः पतिर्देवि यदिच्छेयं तदा वरम् ॥ १७ ॥
गृह्णीयां तु तदा भर्तस्तथेत्युक्तं महात्मना । अनभिज्ञा ह्यहं देवि त्वयैव कथितं पुरा ॥ १८ ॥
कथेषा तव तु स्नेहान्मनसा धार्यते मया । रामाभिषेकसंभारान्निगृह्य विनिवर्तय ॥ १९ ॥
तौ चैव याचस्व भर्तारं भरतस्याभिषेचनम् । प्रव्राजनं च रामस्य वर्षाणि च चतुर्दश ॥ २० ॥
चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् । प्रजाभावगतस्नेहः स्थिरः पुत्रो भविष्यति ॥ २१ ॥

ष्टांश्चेत्यर्थः । अपास्य तत्तदास्तरणादाकृष्य राक्षसाः राक्षसकर्मवत्त्वेन तत्त्वं प्राप्ताः असुरसायाहाय्यार्थमागताः राक्षसजातयो वा घ्नन्ति स्म ॥ १४ ॥

गो० टी०–तस्मिन्निति । क्षताः बाणशूलादिभिः संजातव्रणाः विक्षताः खड्गपरशुपट्टिशादिभिर्विविधं प्रहृताः तान् रात्रौ प्रसुप्तान् घ्नन्ति स्मेत्यभिधानात् पुरुषाणां क्षतविक्षतत्वं दिवाशुद्धकृतमित्यवगम्यते । राक्षसाः असुराः ॥ १४ ॥

१५] ति० टी०–तत्र तद्रात्र्यां शकलीकृतः सर्वाङ्गेषु विक्षतः ॥ १५ ॥

रा० टी०–तत्रेति । तदा असुरकर्तृकहननकाले तत्र संग्रामभूमौ शकलीकृतः अनेकविधशस्त्रास्त्रकरणकव्रणविशिष्टः ॥ १५ ॥

गो० टी०–तत्रेति । तत्र प्रसुप्तप्रदेशे तदा रात्रौ ॥ १५ ॥

१६] ति० टी०–त्वया सारथ्यं कुर्वाणयापवाह्य संग्रामादन्यत्र नीत्वा तत्रापि तादृशापत्कालेऽपि शस्त्रैर्विक्षतोऽत एव नष्टचेतनो मूर्च्छितस्ते पतिस्त्वया रक्षित इत्यन्वयः । केचित्तु संग्रामादपवाह्य मूर्च्छितस्ते पतिस्त्वया रक्षितः, तत्रापि दूरपातिभिरसुरीयैः शस्त्रैर्विक्षतस्ततोऽप्यन्यत्रापवाह्य रक्षितः एवं द्विःप्राणरक्षणतोषेण वरद्वयदानमित्याहुः ॥ १६ ॥

रा० टी०–अपेति । संग्रामादपवाह्य निष्कृष्य संस्थापित इति शेषः ॥ १६ ॥

गो० टी०–अपवाह्येति । हे देवि ! नष्टचेतनः मूर्च्छितः ते पतिः त्वया सारथ्यं कुर्वाणया संग्रामादपवाह्य अन्यत्र नीत्वा रक्षितः शीतोपचारैराप्यायितः तत्र यत्रापवाहितस्तस्मिन्स्थले शस्त्रैर्विक्षतः पुनर्युद्धे शस्त्रैः विक्षतः सन् त्वया रक्षितः ततोऽपवाह्य रक्षित इति योजना ॥ १६ ॥

१७] ति० टी०–तेन राज्ञा । यदहमिच्छेयं भर्तस्तदा वरं गृह्णीयां तु इत्यन्वयः ॥ १७

रा० टी०–तुष्टेनेति । ते तुभ्यं द्वौ वरौ दत्तौ गृहाणेत्युक्तमित्यर्थः । हे भर्तः यदा इच्छेयं तदा वरं गृह्णीयामिति तुरित्यर्थः । उक्तः प्रार्थितः तदा महात्मना पत्या तथा इत्युक्तम् । नन्वत्र त्वया कथं विज्ञातमित्यत आह पुरा पूर्वम् 'इति तत्तेन' इति आचारिपाठः । श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–तुष्टेनेत्यर्धमेकं वाक्यम् । द्विधा रक्षणात् द्वौ वरौ दत्ताविति भावः ॥ १७ ॥

गो० टी०–स इति । इच्छेयमित्यर्थार्थे लिङ् । तेन दशरथेन तत् वरं तथा इच्छया ददानीत्युक्तम् ॥ १८ ॥

१८] ति० टी०–तदा महात्मना राज्ञा तथेत्युक्तम् । अनभिज्ञा अस्याः कथाया इति शेषः ॥ १८ ॥

गो० टी०–कथमिदं त्वया ज्ञातमित्यत्राह–अनभिज्ञेति १९

१९] ति० टी०–निगृह्य भर्तारं वरबलेन निगृह्याभिषेकसंभारान्निवर्तय अभिषेकरूपफलादिति शेषः ॥ १९ ॥

रा० टी०–कथेति । निगृह्य स्वाधीनीकृत्य अहं दास्यामीति प्रतिज्ञां कारयित्वेत्यर्थः, पतिमिति शेषः ॥ १९ ॥

गो० टी०–रामाभिषेके इत्यादि । सार्धश्लोक एकान्वयः । निगृह्य बलात्कृत्य भर्तारमिति शेषः, रामप्रव्राजनभरताभिषेचनरूपौ तौ वरौ याचस्व ॥ २० ॥

२०] ति० टी०–निवृत्तिप्रकारमाह–ताविति । तेन च दानेऽनुमते ताभ्यां क्रमेण भरताभिषेचनरामप्रव्राजने स्तामिति शेषः ॥ २० ॥

रा० टी०–तदुपायमाह–ताविति । तौ पूर्वदत्तौ वरौ 'याचस्व भर्तारम्' इति भट्टपाठः ॥ २० ॥

२१] ति० टी०–चतुर्दशसंख्याफलमाह–चतुर्दशेति । प्रजानां भावेऽन्तःकरणे गतः प्राप्तः स्नेहो यस्य तादृशस्ते पुत्र स्थिरो राज्ये भविष्यति ॥ २१ ॥

रा० टी०–चतुर्दशवर्षपर्यन्तं प्रव्राजनं हेतुमाह–चतुर्दशेति । प्रजाभावगतस्नेहः प्रजाभावेन प्रजाकर्मकपालनान्तया गतः प्राप्तः स्नेहः प्रजाकर्तृकप्रीतिर्यम् । स्थिरः परैः चालयितुमशक्यः ॥ २१ ॥

गो० टी०–चतुर्दशसंख्या किमर्थेत्यत्राह–चतुर्दशेति । प्रजाभावगतस्नेहः प्रजानां भावमभिप्रायं गतः प्राप्तः स्नेहो यस्य स तथोक्तः स्थिरः अप्रकम्प्यः ॥ २१ ॥

---

१ महदिति गो. पाठः । २ यदेच्छेयं तदा वरमिति गो. पाठः । ३ इति तत्तेनेति गो. पाठः । ४ कथितेति गो. रा. पाठः । ५ एवंविधार्थते इति रा. पाठः । ६ चेति गो. पाठः । ७ वरौ याचेति गो. रा. पाठः । ८ त्विति गो. पाठः । ९ त्वं वर्षाणीति गो. रा. पाठः ।

क्रोधागारं प्रविशाद्य क्रुद्धेवाश्वपतेः सुते । शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ॥ २२ ॥
मा स्मैनं प्रत्युदीक्षेथा मा चैनमभिभाषथाः । रुदन्ती पार्थिवं दृष्ट्वा जगत्यां शोकलालसा ॥ २३ ॥
दयिता त्वं सदा भर्तुरत्र मे नास्ति संशयः । त्वत्कृते चैव महाराजो विशेदपि हुताशनम् ॥ २४ ॥
न त्वां क्रोधयितुं शक्तो न क्रुद्धां प्रत्युदीक्षितुम् । तव प्रियार्थं राजा तु प्राणानपि परित्यजेत् ॥ २५ ॥
न ह्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः । मन्दस्वभावे बुध्यस्व सौभाग्यबलमात्मनः ॥ २६ ॥
मणिमुक्तासुवर्णानि रत्नानि विविधानि च । दद्यादश्वपतो राजा मा स्म तेषु मनः कृथाः ॥ २७ ॥
यौ तौ देवासुरे युद्धे वरौ दशरथो ददौ । तौ स्मारय महाभागे सोऽर्थो नैत्वा क्रमेदति ॥ २८ ॥
यदा तु ते वरं दद्यात्स्वयमुत्थाप्य राघवः । व्यवस्थाप्य महाराजं त्वमिमं वृणुया वरम् ॥ २९ ॥

२२] ति० टी०—वरदानप्रवर्तनोपायमाह—क्रोधागारमिति । क्रोधवतीनां शयनस्थानं क्रोधागारम् । कुद्धेव इवशब्द एवार्थे । कुद्धैव सत्युक्तं क्रोधहेतुं शतशोऽन्यथा तत्सान्त्वनेऽप्यविस्मरन्ती । तदेव विवृणोति—शेष्वेति । अनास्तृतायां भूमौ शेष्वेत्यर्थः मलिनवासिनी मलिनवस्त्रधरा सती ॥ २२ ॥

रा० टी०—क्रोधेति । अश्वपतेः अश्वपत्यभिधराजस्य कुद्धा क्रोधविशिष्टा इव त्वं क्रोधागारं क्रोधानां प्रणयादिकोपविशिष्टानामागारं तत्स्थातव्यं गृहमनन्तर्हितायामात्मनोऽव्यवहितायामास्तरणरहितायामित्यर्थः ॥ २२ ॥

गो० टी०—एवमुपायमुपदिश्य उपायप्रवर्तनप्रकारमाह—क्रोधेति । प्रणयकलहादिना कुद्धाः स्त्रियो यत्र वसन्ति तत् क्रोधागारमनन्तर्हितायामनास्तृतायाम् ॥ २२ ॥

२३] ति० टी०—रुदन्तीत्यस्य भवेति शेषः । तं दृष्ट्वेति पूर्वार्धान्वयि ॥ २३ ॥

रा० टी०—मेति । एनं राजानम् । जगत्यां भूमौ शयानेति शेषः । प्रत्युदीक्षेथाः पश्येः शोकलालसा शोकव्याप्तेवेत्यर्थः ॥२३॥

गो० टी०—मा स्मेति । तं दृष्ट्वा रुदन्ती शोकलालसा च सती एनं मा प्रत्युदीक्षेथाः मा चैनमभिभाषथा इत्यन्वयः । जगत्यां भूमौ शयानेति शेषः ॥ २३ ॥

२४-२५] ति० टी०—एवं सति सर्वथा कार्यसिद्धिर्भवत्येवेत्याह—दयितेति । त्वत्कृते त्वत्प्रीणननिमित्तम्॥२४॥२५॥

रा० टी०—नन्वेवंकृते कदाचिद्राजा मह्यं कुप्येत् इत्यत आह—दयितेति । त्वत्कृते त्वदर्थम् ॥ २४ ॥

रा० टी०—नेति । प्रत्युदीक्षितुं द्रष्टुम् ॥ २५ ॥

गो० टी०—एवंकरणे झटिति कार्यसिद्धिर्भविष्यतीत्याह—दयितेति । अत्र दयितात्वविषये त्वत्कृते त्वत्प्रीतिनिमित्तम् ॥ २४ ॥ २५ ॥

२६] ति० टी०—ननूक्तमपि वाक्यं राजा चेन्न शृणुयात्तदा महती हानिः स्यात्तत्राह—नहीति । स्वसौभाग्यवैभवविस्मरणमूलिका ते एषा मदाशङ्केति भावः॥ २६ ॥

रा० टी०—नहीति । आत्मनः स्वस्य सौभाग्यबलम् सौभाग्यवत्ताहेतुकप्राबल्यम् मन्दः तोषकः स्वभावो यस्यातत्संबोधनम् ॥ २६ ॥

गो० टी०—नेति । मन्दस्वभावे अलसस्वभावे सौभाग्यबलं सौन्दर्यबलम् ॥ २६ ॥

२७] ति० टी०—वरदानातिरिक्तमनुनयं मा स्वीकुर्वित्याह—मणीत्यादि ॥ २७ ॥

रा० टी०—विविधान्यप्रदेयैः राजा त्वां लोभयिष्यति ते न ग्रहीतव्या इति बोधयन्ती आह—मणीति ॥ २७ ॥

गो० टी०—वरदानव्यतिरिक्तं मण्यादिकं च न स्वीकुर्वित्याह—मणीति । मणयः रत्नानि मुक्ताश्चेत्येकवद्भावः मणिमुक्तं रत्नानि श्रेष्ठवस्तूनि 'रत्नं स्वजातौ श्रेष्ठेऽपि' इत्यमरः ॥ २७ ॥

२८] ति० टी०—सर्वानुनयानङ्गीकारे तर्हि दासेन मया किं कर्तव्यमिति राजप्रश्न उत्तरमुपदिशति—यावितीति । सोऽर्थो रामविवासनभरताभिषेकरूपोऽर्थः । त्वा त्वामित्यर्थः । 'मात्वा' इति पाठे मातिक्रमेत् तमर्थं मा विस्मरेत्यर्थः । 'नातिक्रामेदति' इति पाठे सर्वथा सिद्ध्यत्येव राज्ञः सत्यप्रतिज्ञत्वादित्याशय इति कतकः ॥ २८ ॥

रा० टी०—यावितीति । यौ वरौ ते तुभ्यमददात्तौ स्मारय राज्ञे इति शेषः । सः याचितोऽर्थः त्वां मा नातिक्रमेत्प्राप्स्यत्येवेत्यर्थः ॥ २८ ॥

गो० टी०—यौ तावितीति । यत्तच्छब्दप्रयोगः प्रसिद्ध्यतिशयद्योतनार्थः तौ स्मारय दातव्यत्वेनेति शेषः । सोऽर्थः रामविवासनभरताभिषेकरूपार्थः मातिक्रमेत्सर्वथा सिद्ध्यत्येवेत्यर्थः राज्ञः सत्यप्रतिज्ञत्वादिति भावः ॥ २८ ॥

२९] ति० टी०—राघवो दशरथः उत्थाप्य त्वामिति शेषः । ते तुभ्यम् । तदा त्वं महाराजं व्यवस्थाप्य शपथैः सत्ये स्थापयित्वा ॥ २९ ॥

रा० टी०—यदेति । राघवो दशरथः व्यवस्थाप्य सत्यः प्रतिज्ञत्वादिना प्रशस्येत्यर्थः वृणुयाः याचस्व ॥ २९ ॥

गो० टी०—यदेति । राघवः दशरथः व्यवस्थाप्य सत्ये स्थापयित्वा ॥ २९ ॥ ३० ॥

१ प्रविश्येति गो. रा. पाठः । २ वै इति रा. पाठः । ३ चापि तमिति गो. पाठः । ४ स इति गो. पाठः । ५ हीति गो. पाठः । ६ मुक्तं सुवर्णानीति गो. रत्नं सुवर्णं चेति रा. पाठः । ७ ते इति रा. पाठः । ८ दैवासुरे इति गो. पाठः । ९ अददादिति गो. रा. पाठः । १० मा त्वामतिक्रमेदिति गो.रा.पाठः ।

रामप्रव्रजनं दूरं नव वर्षाणि पञ्च च । भरतः क्रियतां राजा पृथिव्यां पार्थिवर्षभ ॥ ३० ॥
चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् । रूढश्च कृतमूलश्च शेषं स्थास्यति ते सुतः ॥ ३१ ॥
रामप्रव्राजनं चैव देवि याचस्व तं वरम् । एवं सेत्स्यन्ति पुत्रस्य सर्वार्थास्तव कामिनि ॥ ३२ ॥
एवं प्रव्राजितश्चैव रामोऽरामो भविष्यति । भरतश्च गतामित्रस्तव राजा भविष्यति ॥ ३३ ॥
येन कालेन रामश्च वनात्प्रत्यागमिष्यति । अन्तर्बहिश्च पुत्रस्ते कृतमूलो भविष्यति ॥ ३४ ॥
संगृहीतमनुष्यश्च सुहृद्भिः साकमात्मवान् । प्राप्तकालं नु मन्येऽहं राजानं वीतसाध्वसा ॥ ३५ ॥
रामाभिषेकसंकल्पान्निगृह्य विनिवर्तय । अनर्थमर्थरूपेण ग्राहिता सा ततस्तया ॥ ३६ ॥
हृष्टा प्रतीता कैकेयी मन्थरामिदमब्रवीत् । सा हि वाक्येन कुब्जायाः किशोरीवोत्पथं गता ॥ ३७ ॥

३०] ति० टी०—वरमभिनयति—रामेति ॥ ३० ॥

रा० टी०—वरमेवाह—राममिति । भरतः राजा इव रक्षक इत्यर्थः पुरोहितोऽयं राजा इतिवदत्र राजशब्दप्रयोगः ॥३०॥

३१] ति० टी०—सर्वथा प्रव्राजनस्यातिघोरतया लोकविरुद्धत्वं मत्वाह—चतुर्दशेति । यथा चतुर्दशवर्षं पालितः प्ररूढशाखः कृतमूलो दृढमूलो वृक्षो दुरुन्मूलो भवति, एवं भरतस्तावता कालेन रूढो दृढराज्यः कृतमूलो वशीकृतमूलबलश्चतुर्दशोत्तरशेषायुःकालं स्थास्यत्येव न तु पुनरागतेनापि रामेण शक्योन्मूलनो भविष्यति न च रामस्य राज्यप्रत्याशेति तात्पर्यम् ॥ ३१ ॥

रा० टी०—चतुर्दशवर्षपर्यन्तं प्रव्राजने फलमाह—चतुर्दशेति । प्रव्राजिते गते सति रूढः राज्यं प्राप्तः कृतमूलः कृतं निष्पादितं मूलं राज्यकरणकारणीभूतप्रजावशत्वं येन सः शेषं चतुर्दशवर्षादूर्ध्वं स्थास्यति निश्चलतयेति शेषः ॥ ३१ ॥

गो० टी०—चतुर्दशेति । रूढः प्रसिद्धः अभिवृद्धो वा कृतमूलः स्ववशीकृतमूलबल इत्यर्थः । शेषं चतुर्दशवर्षव्यतिरिक्तं पुरुषायुषशेषम् ॥ ३१ ॥

३२] ति० टी०—तं राजानम् ॥ ३२ ॥

रा० टी०—अवश्यं वरौ ग्रहीतव्यौ इति बोधयितुमाह—रामेति ॥ ३२ ॥

गो० टी०—रामप्रव्राजनमिति । रामप्रव्राजनं चेति चकारेण भरताभिषेकः समुच्चीयते ॥ ३२ ॥

३३] ति० टी०—रामः अराम इति च्छेदः । अप्रियः प्रजानां भविष्यतीत्यर्थः ॥ ३३ ॥

रा० टी०—भाविरामवृत्तं बोधयन्ती आह—एवमिति । अरामः प्रजाभिरामदातृभिन्नः राजा इव । एकशब्द इवार्थे ॥३३॥

गो० टी०—एवमिति । रामोराम इत्यत्र अराम इति पदच्छेदः अरामो भविष्यति इदानीमेव प्रकृतिस्नेहपात्रं न भविष्यतीत्यर्थः । यद्वा रामो भविष्यति एक एव भविष्यतीत्यर्थः ॥३३॥

३४] ति० टी०—अन्तर्बहिश्च प्रकृतिनामिति शेषः । चिरसंयोगाद्धरते स्नेहानां दृढिम्नि रविप्रयोगतश्च रामे स्नेहनाश इति भावः ॥ ३४ ॥

रा० टी०—वासौत्तरकालिकं भरतवृत्तमाह—येनेति । संगृहीतमनुष्यः स्वाधीनीकृतसेनः सुहृद्भिः साकमात्मवान् जितेन्द्रियः तत्सुहृदोऽपि जितेन्द्रिया इत्यर्थः अत एव अन्तरयोध्यामध्ये बहिः राज्ये कृतमूलः कृतं निष्पादितं मूलं राज्यकारणीभूतप्रजानुरागनिष्पादकपालनादि येन पुत्रो भविष्यति अतः प्राप्तकालं प्राप्तः कालः रामोऽभिषेक्तव्यः इत्युपदेशो यं तं राजानं दशरथं रामाभिषेकसंकल्पात् निगृह्य आग्रहं कत्वा विनिवर्तय इति विगतसाध्वसा निवृत्तभया अहं मन्ये निश्चिनोमि । तुरित्यर्थे ॥ ३४ ॥ ३५ ॥

गो० टी०—येनेति । कृतमूलः रूढमूलः कृतमूल इत्यस्यैव विवरणं संगृहीतेत्यर्धं संगृहीतमनुष्यश्चेत्यत्र भविष्यतीत्यनुषज्यते संगृहीताः अनुरञ्जिताः मनुष्याः पौरजानपदाः येन स तथोक्तः तत्र हेतुरात्मवानिति ॥ ३४ ॥

३५—३६] ति० टी०—कृतमूलत्वमेव विवृणोति—संगृहीतेति । सम्यक्पालनेनानुरञ्जितमनुष्य इत्यर्थः । सुहृद्भिः साकं कृतमूलो भविष्यतीति पूर्वेणान्वयः । अभिषेकतो निवर्तनं प्राप्तकालं मन्य इत्यर्थः अभिषेकनिवर्तनस्यायमेव काल इति भावः । तस्माद्राजानं तदभिषेकान्निवर्तयेत्यन्वयः ॥ ३५ ॥ ३६ ॥

गो० टी०—प्राप्तकालमिति । प्राप्तकालमभिमतप्रार्थनोचितकालं वीतसाध्वसा विगतभया अस्मिं कालं प्राप्तकालं मन्ये तेन विनिवर्तयेति संबन्धः ॥ ३५ ॥

रा० टी०—अनर्थमिति । सा कैकयी तया मन्थरया ततः उक्तस्ववाक्यादनर्थं विरुद्धार्थमर्थरूपेण ग्राहिता बोधिता आसेति शेषः । अर्थं पृथक् ॥ ३६ ॥

गो० टी०—अनर्थमिति । अनर्थं विरुद्धार्थमर्थरूपेण अनुकूलार्थरूपेण ग्राहिता बोधिता तथैव प्रतीता ज्ञातवती अत एव हृष्टा सेति प्रतीतेत्यस्योपपादनमेतत् किशोरीवदबला उत्पथमार्गं परमदर्शना पुरेति शेषः ॥ ३६ ॥ ३७ ॥

३७] ति० टी०—प्रतीतावगीकृततदर्था कैकेयी केकयराजकन्या किशोरी बालवत्सा बबला सा यथा स्वकिशोरार्थं उत्पथं

१ रामं प्रव्राजयारण्ये इति गो. रा. पाठः । २ पृथिव्याः पार्थिवर्षभः इति गो. रा. पाठः । ३ सिध्यन्तीति गो. पाठः । ४ भामिनीति गो. पाठः । ५ हतामित्र इति गो. पाठः । ६ तेन कालेनेति गो. पाठः । ७ सार्धमिति गो. पाठः । ८ स्थिति गो. रा. पाठः । ९ ते मन्ये इति गो. पाठः । १० संसारादिति गो. पाठः । ११ आयुष्कालमिति भाति युक्तम् ।

कैकेयी विस्मयं प्राप्य परं परमदर्शना । प्रज्ञां[3] ते नावजानामि श्रेष्ठे[3] श्रेष्ठाभिधायिनि ॥ ३८ ॥
पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये । त्वमेव तु ममार्थेषु नित्ययुक्ता[5] हितैषिणी ॥ ३९ ॥
नाहं समवबुध्येयं कुब्जे राज्ञश्चिकीर्षितम् । सन्ति दुःसंस्थिताः कुब्जे[6] वक्राः परमपापिकाः ॥ ४० ॥
त्वं पद्ममिव वातेन संनता प्रियदर्शना । उरस्तेऽभिनिविष्टं वै यावत्स्कन्धात्समुन्नतम् ॥ ४१ ॥

गच्छति कशाहस्तेनारूढापि तथेयं राजाधीनापि भरतार्थं उन्मार्गं गतेत्यर्थः ॥ ३७ ॥

रा० टी०—हृष्टेति । उत्पथं विरुद्धमार्गं गता प्राप्तेनापि[1] कुब्जायाः वाक्येन हृष्टा हर्षं प्राप्ता प्रतीता रामप्रव्रजनविषयकप्रतीतिमती कैकेयीकं सुखमेव एकं कैकं कैकस्य इयः प्राप्तिर्यस्यां सा कैकेय्या सैव कैकेयी किशोरी नित्यकिशोरत्वविशिष्टा परमदर्शना अतिशयज्ञानवती । दृशिर्ज्ञानसामान्ये । सा कैकेयी केकयराजकन्या कुब्जाया वाक्येन राज्याभिषेकबोधककुब्जावचनेन विस्मयमिदं राज्याभिषेकं महाराजाधिराजो मह्यं किमर्थं न बोधितवान् इत्याश्चर्यं प्राप्य मन्थरामिदं वचो अब्रवीत् । अर्धत्रयमेकान्वयि ॥ ३७ ॥

३८] ति० टी०—परं विस्मयं प्राप्ता परमदर्शनात्यन्तविशेषदर्शनवती, यद्वा परमत्यर्थमदर्शनाविरुद्धदर्शना मन्थरामिदमब्रवीदित्यन्वयः । अत्र कैकेयी तन्नामिका । हे श्रेष्ठाभिधायिनि! हितोपदेशकुशले इति यावत् । अत एव ते प्रज्ञां नावजानामीत्यर्थः । 'कुब्जे त्वां नाभिजानामि' इति पाठे श्रेष्ठाभिधायिनीत्वादिविशिष्टां नाज्ञासिषमित्यर्थः ॥ ३८ ॥

रा० टी०—तद्वचनमेवाह—कुब्जा इति । श्रेष्ठमत्युत्तममभिदधाति वदति तच्छीला तत्संबोधनम् । श्रेष्ठां त्वामहं नाभिजानामि त्वच्छ्रेष्ठात्वं न ज्ञातमित्यर्थः ॥ ३८ ॥

गो० टी०—कुब्जा इति । नाभिजानामीति एतावत्कालमिति शेषः । पृथिव्यामिति । पृथिव्यां यावत्यः कुब्जाः सन्ति तासां सर्वासां मध्ये त्वमुत्तमा बुद्धिनिश्चये विषये अनेन कुब्जानां प्रायेण बुद्धिवैक्ष्यमस्तीति द्योतितम् ॥ ३८ ॥

३९] ति० टी०—कुब्जानां कुब्जत्वविशिष्टराजदासीनां मध्ये बुद्धिनिश्चये बुद्धिविषयकार्याकार्यनिश्चय उत्तमा इदृश्य एव दास्यो राजपत्नीनामिष्टाः सुरूपाश्च सापत्न्यस्फूर्तेः । श्रेष्ठत्वमभिधाय श्रेष्ठाभिधायिनीत्वमुपपादयति—त्वमेवेति । हितैषिणीच्छापूर्वं हितवक्त्री ॥ ३९ ॥

रा० टी०—इदानीं तज्ज्ञातमिति बोधयितुं तद्गुणमाह—पृथिव्यामिति । बुद्ध्या विचारेण यो निश्चय इदमित्थमेवेति ज्ञानं तस्मिन् कुब्जानां मध्ये उत्तमा त्वमेवासि ॥ ३९ ॥

गो० टी०—त्वमेवेति । समवबुद्धयेयमिति "शकिलिङ्" ॥ ३९ ॥

४०] ति० टी०—समवबुद्धयेयम् स्वकृतबोधनाभावे इति शेषः । चिकीर्षितं रामाभिषेकाय भरतस्य विवासनादि कैकेय्या एवं मतिकारणं क्वचित्पठ्यते—'न हि तद्बुबुधे पापं शापदोषेण मोहिता । ककेयेषु हि सा बाल्ये ब्राह्मणं रूक्षरूपिणम् ॥ असूयितवती बाला तेन शप्ता महात्मना । यस्मादसूयसे विप्रं त्वं रूपमददर्पिता ॥ तस्मादसूयां त्वमपि लोके प्राप्स्यसि कुत्सिताम् । इति शापसमाच्छन्ना मन्थरावशमागता ॥' इति । असूयामसूयाविषयताम् । अथ कुब्जां कुब्जान्तरवैलक्षण्येन स्तौति—सन्तीत्यादि । त्वद्व्यतिरिक्ता इति शेषः । दुःसंस्थिता दुःसंस्थावयवसंनिवेशाः अत एव परमपापिका परमपापदर्शनाः ॥ ४० ॥

रा० टी०—मत्तोऽपि त्वमधिकबुद्धिमतीति बोधयितुमाह—नेति । समवबुद्धयेयं जानीयां ज्ञातुं समर्था स्यामित्यर्थः । "शकि लिङ् च" इति लिङ् । तत्र हेतुः अवक्राः कौटिल्यरहिताः किं च अवे प्रजापालने कृतियेषामत एव परं केवलमपापिकाः न पापि कर्म येषां ते अपि मन्त्रिण इति शेषः । दुःसंस्थिताः अविज्ञाताभिप्रायाः सन्ति एतेन राज्ञो मन्त्र्यधीनत्वं व्यक्तं ते नास्मिन्विषये राज्ञो नापराध इति सूचितम् तेन त्वद्बोधनमन्तरा इदं मदज्ञानविषयीभूतं न स्यादिति व्यञ्जितम् । तेन त्वत्सदृशी मत्प्रिया अन्या नास्तीति बोधितम् ॥ ४० ॥

गो० टी०—सन्तीति । दुःसंस्थिताः दुःसंनिवेशाः ॥ ४० ॥

४१] ति० टी०—नैवं त्वमित्याह—त्वमिति । वातेन संनतं पद्ममिव त्वं संनतापि प्रियदर्शना ते उरो वक्षोऽभिनिविष्टं स्थगुना व्याप्तमत एव यावत्स्कन्धात्स्कन्धपर्यन्तमुन्नतमुरः । 'यावत्संस्थानमुन्नतम्' इति पाठे स्तनावधि समस्थानरूपसर्वसाधारणसंस्थानं यावत्समुन्नतम् । एतेन स्थगुमत्कुब्जत्वं प्रतिपादितम् ॥ ४१ ॥

रा० टी०—तस्याः कोपमपाकर्तुं तां वर्णयति—त्वमिति । वातेन पद्ममिव त्वं संनता प्रतीयसे एतेन तस्याः सूक्ष्माङ्गीत्वमुक्तं कुमारीत्वातिशयौ ध्वनितौ । यावत्स्कन्धात्स्कन्धपर्यन्तमुन्नतमुरः अभिनिविष्टमभिनिवेशितं ब्रह्मणेति शेषः ॥ ४१ ॥

गो० टी०—उर इति । ते उरः अभिनिविष्टमभिनिवेशवत्सत् स्कन्धाभ्यां स्पर्धमानं सत् यावत् स्कन्धात्स्कन्धपर्यन्तं समुन्नतमित्युत्प्रेक्षा अधस्तात् उरसोऽधस्तात् स्थितं सुनाभं शोभननाभि योगविभागादच् उदरं उरसः सजातीयस्य उन्नतिं दृष्ट्वा कलितमिव ज्ञातं कृशम् ॥ ४१ ॥

---

१ प्राप्तेति गो. पाठः । २ कुब्जे त्वां नाभीति गो. रा. पाठः । ३ श्रेष्ठामिति गो. रा. पाठः । ४ धायिनीमिति गो. पाठः । ५ नित्यमुक्तेति गो. पाठः । ६ कुब्जा इति गो. पाठः ।

अधस्ताच्चोदरं शान्तं सुनाभमिव लज्जितम् । प्रतिपूर्णं च जघनं सुपीनौ च पयोधरौ ॥ ४२ ॥
विमलेन्दुसमं वक्त्रमहो राजसि मन्थरे । जघनं तव [3]निर्मृष्टं रशनादामभूषितम् ॥ ४३ ॥
जङ्घे भृशमुपन्यस्ते पादौ चैं व्यायतावुभौ । त्वमायताभ्यां सक्थिभ्यां मन्थरे क्षौमवासिनि॥ ४४ ॥
अग्रतो मम गच्छन्ती राजसेऽतीव शोभने । आसन्याः शम्बरे मायाः सहस्रमसुराधिपे ॥ ४५ ॥
हृदये ते निविष्टास्ता भूयश्चान्याः सहस्रशः । तैदेव स्थगु यदीर्घं रथघोणमिवायतम् ॥ ४६ ॥
मतयः क्षत्रविद्याश्च मायाश्चात्र वसन्ति ते । अत्र [10]तेऽहं प्रमोक्ष्यामि मालां कुञ्जे हिरण्मयीम्॥४७॥
अभिषिक्ते च भरते राघवे च वनं गते । जात्येन च सुवर्णेन सुनिष्टप्तेन सुन्दरि ॥ ४८ ॥

४२] ति० टी०–अधस्ताद्वक्षसोऽधस्ताच्छोभननाभिमदुदरं लज्जितमिव शान्तम्, उरस उन्नतिं दृष्ट्वा लज्जितमिव कृशमित्यर्थः । प्रतिपूर्णं विस्तीर्णम् ॥ ४२ ॥

रा० टी०–अधस्तादिति । अधस्तादुन्नतोरस्थलादधोभागे विद्यमानं सुनाभं शोभननाभिविशिष्टमुदरं लज्जितमुरस्सुन्नतिदर्शनजनितगर्वध्वंसहेतुकलज्जाविशिष्टमिव शान्तं जघनं प्रतिपूर्णं विस्तारविशिष्टं सुपीनौ अतिस्थूलौ । 'परिपूर्णम्' इतिपाठान्तरम् ॥ ४२ ॥

गो० टी०–परिपूर्णमिति । परिपूर्णं पृथुलम् ॥ ४२ ॥

४३] ति० टी०–हर्षातिशयाद्वर्णितमपि जघनं पुनर्वर्णयति—जघनमिति । निर्मृष्टं रोमादिकश्मलहीनम् । 'निर्घुष्टम्' इति पाठे रशनास्थक्षुद्रघण्टाभिः शब्दायमानम् ॥ ४३ ॥

रा० टी०–विमलेति । विमलेन्दुना समं तापशामकत्वादिना सादृश्यविशिष्टम् । धर्मान्तरवैशिष्ट्यबोधनाय जघनं पुनर्वर्णयति निर्मृष्टमत्यन्तशुद्धं लोमादिरहितमित्यर्थः रशनायाः क्षुद्रघण्टिकायाः यद्दाम उपरि पतितं रज्जुः तेन भूषितम् । किंच रशना क्षुद्रघण्टिका, रज्जुः दाम वनमालैकदेशः, ताभ्यां भूषितम् ॥४३॥

गो० टी०–जघनमिति । उपन्यस्ते संश्लिष्टे सुसंनिवेशे वा आयतौ दीर्घौ ॥ ४३ ।

४४] ति० टी०–उपन्यस्ते जान्वोरिति शेषः । यद्वा लोकैः स्तुते सुन्दरत्वेन । सक्थिनी पृष्ठफलके इति कतकः ॥ ४४ ॥

रा० टी०–जङ्घे इति । उपन्यस्ते जानुपरिविन्यस्ते जङ्घे उभौ पादौ च व्यायतौ दीर्घौ । अधं पृथक्–त्वमिति । आयताभ्यां दीर्घाभ्यां सक्थिभ्यामूरुभ्यामतीव राजसे अर्धद्वयमेकान्वयि 'राजहंसीव राजसे' इति क्वचित्पाठ इति भट्टाः॥४४॥

गो० टी०–त्वमिति । सक्थिभ्यामूरुभ्याम् 'सक्थि क्लीबे पुमानरुः' इत्यमरः । उपलक्षणे तृतीया ॥ ४४ ॥

४५] ति० टी०–'राजहंसीव राजसे' इति क्वचित्पाठः । स्थगुं स्तोतुमुत्प्रेक्षते–आसन्निति ॥ ४५ ॥

रा० टी०–तत्स्थगुमतिवश्यत्वेनोत्प्रेक्षन्ती आह–आसन्निति । असुराधिपे शम्बरे याः सहस्रमासन् ताः अन्या शम्बरासुरराज्ञाताश्च ते हृदये निविष्टाः प्रविष्टाः तत् मायैव आयतं दीर्घं रथघोणं रथचक्रपिण्डीव दीर्घं स्थगु तदितिजात्यभिप्रायेणैकत्वं सर्वनाम्नामुद्देशविधेयान्यतरलिङ्गतेत्यनुशासनात्क्लीबत्वम् । सार्धश्लोक एकान्वयी ॥ ४५ ॥ ४६ ॥

गो० टी०–आसन्निति । अन्याः लौकिक्यः मायाः ॥४५॥

४६] ति० टी०–यास्तास्तव हृदये निविष्टा मायास्तदेवेदं यदीर्घं स्थग्वित्यन्वयः । रथघोणं रथचक्रपिण्डिका तद्वदायतं विस्तीर्णम् ॥ ४६ ॥

गो० टी०–तवेति । स्थगु उरो निसृतोन्नतविकृतावयवविशेषः । रथघोणं नासिकाकाररथावयवविशेषः । 'स्मृतिर्व्यतीतविषया मतिरागामिगोचरा । बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता' इत्युक्तविषयविभागेन मतेर्बाह्वल्यम् । क्षत्रविद्याः राजनीतयः, मायाः विचित्रकुत्सितशक्तयः । अत्र स्थगुनि ॥ ४६ ॥ ४७ ॥

४७] ति० टी०–अतोऽत्र मत्यादिकं वसति यत एवमतोऽत्र मालां प्रमोक्ष्यामि । मतयो मतिस्स्मृतिर्बुद्धयः 'स्मृतिर्व्यतीतविषया मतिरागामिगोचरा । बुद्धिस्तात्कालिकी ज्ञेया' इति । क्षत्रविद्या राजनीतिः मायाः प्रसिद्धाः अत्र स्थगुनि हृदिस्थविकृतोन्नतमांसास्थिपिण्डे ॥ ४७ ॥

रा० टी०–मतय इति । अत्र स्थगुनि यतो मतिप्रभृतयो वसन्ति अतः अत्र अस्मिन्काले मालां प्रमोक्ष्यामि प्रक्षेप्स्यामि ४७

४८] ति० टी०–जात्येनोत्तमेन सुनिष्टप्तेन संतुतेन सुवर्णेन निर्मितां हिरण्मयीं मालामिति संबन्धः ॥ ४८ ॥

रा० टी०–अभिषिक्त इति । अभिषिक्ते अभिषेकं प्राप्ते इव च इवार्थे । जात्येन जातावुत्तमजातौ भवं जात्यं तेन सुनिष्टप्तेन अत्यन्तध्मातेन द्रुतेनेत्यर्थः । ते तव स्थगु लेपयिष्यामि । सार्धश्लोक एकान्वयी ॥ ४८ ॥

गो० टी०–जात्येनेति । उत्तमस्वर्णजातौ भवं जात्यं दिगादित्वाद्यत् सुनिष्टप्तेन सुद्रुतेन सुवर्णेन लेपयिष्यामि सुवर्णकञ्चुकेनालङ्करिष्यामीत्यर्थः । यद्वा चन्दनसंघृष्टसुवर्णेन सह लेपयिष्यामीत्यर्थः । प्रतीता संतुष्टा ॥ ४८ ॥

१ शातमिति गो. पाठः । २ परिपूर्णमिति गो. पाठः । ३ निर्घुष्टमिति गो. पाठः । ४ शोभितमिति गो. पाठः । ५ चाप्यायताविति गो. पाठः । ६ वासिनी इति गो. रा. पाठः । ७ राजहंसीव राजसे इति गो. पाठः । ८ सर्वोस्त्वयीति गो. पाठः । ९ तवेदमिति गो. पाठः । १० ते प्रतिमोक्ष्यामीति गो. पाठः । ११ मन्थरे इति गो. पाठः ।

लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु । मुखे च तिलकं चित्रं जातरूपमयं शुभम् ॥ ४९ ॥
कारयिष्यामि ते कुब्जे शुभान्याभरणानि च । परिधाय शुभे वस्त्रे देवतेव चरिष्यसि ॥ ५० ॥
चन्द्राह्वयमानेन मुखेनाप्रतिमानना । गमिष्यसि गतिं मुख्यां गर्वयन्ती द्विषज्जने ॥ ५१ ॥
तवापि कुब्जाः कुब्जायाः सर्वाभरणभूषिताः । पादौ परिचरिष्यन्ति यथैव त्वं सदा मम ॥ ५२ ॥
इति प्रशस्यमाना सा कैकेयीमिदमब्रवीत् । शयानां शयने शुभ्रे वेद्यामग्निशिखामिव ॥ ५३ ॥
गतोदके सेतुबन्धो न कल्याणि विधीयते । उत्तिष्ठ कुरु कैल्याणं राजानमनुदर्शय ॥ ५४ ॥
तथा प्रोत्साहिता देवी गत्वा मन्थरया सह । क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता ॥ ५५ ॥
अनेकशतसाहस्रं मुक्ताहारं वराङ्गना । अवमुच्य वरार्हाणि शुभान्याभरणानि च ॥ ५६ ॥
तैदा हेमोपमा तत्र कुब्जावाक्यवशंगता । संविश्य भूमौ कैकेयी मन्थरामिदमब्रवीत् ॥ ५७ ॥

४९–५०] ति० टी०–लब्धार्था लब्धोक्तार्था अत एव प्रतीता संतुष्टा लेपयिष्यामि उत्तमचन्दनेनेति शेषः । यद्वा जात्याद्भुतस्वस्वर्णकृतभूषणेन ते स्थगु लेपयिष्यामि गुप्तं करिष्यामीत्यर्थः ॥ ४९ ॥ ५० ॥

रा० टी०–मुखे इति । चित्रं आश्चर्यकारकं जातरूपं सुवर्णं तन्मयं तिलकं मुखे ललाटे इत्यर्थः कारयिष्यामि अत एवाभरणानि वस्त्रे च परिधाय देवतेव चरिष्यसि । सार्धश्लोक एकान्वयी ॥ ४९ ॥ ५० ॥

गो० टी०–मुखे चेति । जातरूपमयं सुवर्णमयं चित्रं नानारत्नखचिततया नानावर्णं तिलकं तिलकाकारं भूषणम् ॥ ४९ ॥ ५० ॥

५१–५३] ति० टी०–आह्वयमानेन स्पर्धमानेन द्विषज्जने गर्वयन्ती गर्वं कुर्वन्ती मुख्यां गतिं श्रेष्ठ्यम् ॥ ५१–५३ ॥

रा० टी०–चन्द्रमिति । चन्द्राह्वयमानेन स्पर्धमानेन मुखेन अप्रतिमानना अप्रतिमं मुखसादृश्यरहितमाननं यस्याः सा, किंच अप्रतिमा सादृश्यरहिता आनना आनयति जीवयतीति ल्युः आसमन्ताद्भावेनाननं जीवनं यस्या इति ल्युट् वा द्विषज्जने स्वसपत्नीतामापन्नजन्तौ गर्वयन्ती गर्वं कुर्वती मुख्यामत्युत्तमां गतिं सर्वाग्रणीत्वं गमिष्यसि प्राप्स्यसि ॥ ५१ ॥

रा० टी०–तवेति । कुब्जाः परिचरिष्यन्ति निषेविष्यन्ते इत्यर्थः एतेन तत्र बहवो बुद्धिमत्यः कुब्जाः सन्तीति व्यक्तम् ॥ ५२ ॥

रा० टी०–इतीति । शुभ्रवेद्यां विषमाने शयने शय्यायां शयानां कैकयीमिदमब्रवीत् ॥ ५३ ॥

गो० टी०–चन्द्रमिति । आह्वयमानेन स्पर्धमानेन "स्पर्धायामाङः" इत्यात्मनेपदं मुखेन हेतुना अप्रतिमानना अप्रतिद्वन्द्वमुखी द्विषज्जनं मत्सपत्नीजनं प्रति गर्वयन्ती गर्वं कुर्वन्ती गर्वशब्दात्तत्करोतीतिण्यन्तात् शत्रादि स्वार्थे णिजित्येके। मुख्यां तृणीकृतसर्वजनां गतिं पादन्यासविशेषं गमिष्यसि करिष्यसि ओदनपाकं पचतीतिवन्निर्देशः ॥ ५१–५३ ॥

५४–५५] ति० टी०–एवं वृथावार्ताभिः कालात्ययो न कार्य इत्याह–गतेत्यादि । रामाभिषेके वृत्ते वरग्रहणादि व्यर्थमिति भावः । राजानमनुदर्शय क्रोधागारे आत्मानमिति शेषः ॥ ५४ ॥ ५५ ॥

रा० टी०–तद्वचनमेवाह–गतेति । हे कल्याणि गतोदके गतं शुष्कमुदकं यस्य तस्मिन्नद्यादौ सेतुबन्धो न विधीयते अत उत्तिष्ठ कल्याणं सज्जनानामित्यर्थः । राजानमनुदर्शय तद्दृष्टिपथं गच्छेत्यर्थः ॥ ५४ ॥

गो० टी०–गतोदक इति । हे कल्याणि ! कुरु मदुक्तप्रकारमिति शेषः । राजानमनुदर्शय क्रोधागारमिति शेषः । यद्वा अनुदर्शय प्रतीक्षस्वेत्यर्थः ॥ ५४ ॥

रा० टी०–तथेति । प्रोत्साहिता अत्युत्साहं प्रापिता देवी कैकेयी सौभाग्यस्य अहोभाग्यमस्माकं यस्या देवसंतापहारका रामादयः पुत्राः इति स्वातिशयभाग्यवत्तायां मदेन गर्विता किंच सौभाग्यैः शोभनभाग्यवद्भिर्मन्यते अतिश्रेष्ठात्वेन ज्ञायते असाविति सौभाग्यमत् सा एव अगर्विततेति कर्मधारयः मन्थरया सह विवेश मन्थरयेत्युभयान्वयि ॥ ५५ ॥

गो० टी०–तथा प्रोत्साहितेत्यादिश्लोकत्रयमेकान्वयम् । अनेकशतसाहस्रं बहुमूल्यमिति यावत् "शतमानविंशतिक–" इत्यादिना क्रीतार्थेऽण् ॥ ५५–५७ ॥

५६] ति० टी०–अनेकशतसाहस्रं तावत्स्वर्णमूल्यम् वराहार्णि बहुमूल्यानि ॥ ५६ ॥

रा० टी०–अनेकेति । अनेकशतसाहस्रमनेकशतसहस्रमुद्राल्भ्यं बहुमूल्यकमिति यावत् । अवमुच्य निस्तार्य वराहार्णि वरैः श्रेष्ठैः अर्हाणि प्रशंसनीयानि ॥ ५६ ॥

५७] ति० टी०–हेमोपमा स्वर्णवर्णा कैकेयी ॥ ५७ ॥

रा० टी०–तदेति । कुब्जावाक्यवशंगता तत्त्वविचारेण तदधीनतां प्राप्ता कैकेयी इदमब्रवीत् ॥ ५७ ॥

१ द्विषज्जनमिति गो. पाठः । २ कल्याणीति गो. पाठः । ३ तत इति गो. पाठः । ४ कुर्वतीति साध्विति भाति ।

इह वा मां मृतां कुब्जे नृपायावेदयिष्यसि । वनं तु राघवे प्राप्ते भरतः प्राप्स्यते क्षितिम् ॥ ५८ ॥
सुवर्णेन न मे ह्यर्थो न रत्नैर्न च भोजनैः । एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ ५९ ॥

अथो पुनस्तां महिषीं महीक्षितो वचोभिरत्यर्थमहापराक्रमैः ।
उवाच कुब्जा भरतस्य मातरं हितं वचो राममुपेत्य चाहितम् ॥ ६० ॥
प्रपत्स्यते राज्यमिदं हि राघवो यदि ध्रुवं त्वं सुमुता च तप्स्यसे ।
ततो हि कल्याणि यतस्व तत्तथा यथा सुतस्ते भरतोऽभिषेक्ष्यते ॥ ६१ ॥
तथातिविद्धा महिषीति कुब्जया समाहता वागिषुभिर्मुहुर्मुहुः ।
विधाय हस्तौ हृदयेऽतिविस्मिता शशंस कुब्जां कुपिता पुनः पुनः ॥ ६२ ॥
यमस्य वा मां विषयं गतामितो निशम्य कुब्जे प्रतिवेदयिष्यसि ।
वनं गते वा सुचिराय राघवे समृद्धकामो भरतो भविष्यति ॥ ६३ ॥
अहं हि नैवास्तरणानि न स्रजो न चन्दनं नाञ्जनपानभोजनम् ।
न किंचिदिच्छामि न चेह जीवनं न चेदितो गच्छति राघवो वनम् ॥ ६४ ॥

५८–५९] ति० टी०–इह कोपागारे। मदभीप्सितौ मदुपेक्षकाय राज्ञे दशरथाय मां मृतामावेदयिष्यसि । तुर्वार्थे । राघवे वनं प्राप्ते भरतः क्षितिं प्राप्स्यते वा न तु पक्षान्तरमस्तीति भावः ॥ ५८ ॥ ५९ ॥

रा० टी०–तद्वचनमेवाह–इहेति । राघवे रामे वनं प्राप्ते सति भरतः क्षितिं प्राप्स्यते इह अस्मिन्विषये वा पक्षान्तरे सति मां मृतामेव आवेदयिष्यसि इह लोकेऽहं न वत्स्यामीति भावः । तुरेवार्थे । यद्वा इह अस्मिन् कोपागारे मृतां प्राणवियोगानुकूलव्यापारवतीं मां यदि नृपायावेदयिष्यसि भरतराज्यप्राप्तिमन्तरेयं न जीविष्यतीति कथयिष्यसि चेदित्यर्थः । तदा राघवे वनं प्राप्ते सति भरतः क्षितिं प्राप्स्यते । वाशब्दो यथार्थे तुस्तदार्थे ॥ ५८ ॥

गो० टी०–इहेति । नृपाय मदुपेक्षकाय ॥ ५८ ॥ ५९ ॥

रा० टी०–अस्मिन्विषये स्वनिश्चयबोधनार्थमाह–नेति । जीवितस्य प्रकटस्थितेः अन्तोऽवसानम् ॥ ५९ ॥

६०–६१] ति० टी०–महापराक्रमैरतिकूरैः । भरतस्येत्यादृष्याऽहितान्वय्यपि । रामस्योपेत्य तं प्राप्य । अहितम् रामविषये लोकदृष्ट्याऽहितमिति यावत् ॥ ६० ॥ ६१ ॥

रा० टी०–द्विर्वचनं सुष्ठु भवतीति न्यायेन रामराज्ये तदनिष्टं बोधयन्ती पुनराह–अथो इति । महीक्षितो दशरथस्य महिषीं, अवचोभिः न वचः कस्यचित्प्रार्थना येषु तैः प्रार्थयितुमशक्यैरित्यर्थः । अत्यर्थमहापराक्रमैः अत्यर्थाय देवादिपरार्थसिद्धये ये महापराक्रमास्तैर्देवार्थसाधकत्वादाहितैरित्यर्थः युक्तम् तद्बोधकमित्यर्थः । रामस्योपेत्य अदृश्य हितमहितमिव तत्त्वेन प्रतीयमानं वच उवाच । चकम्द इवार्थे ॥ ६० ॥ ६१ ॥

गो० टी०–कैकेयीनिश्चयं द्रवयति–अथो इति । राममुपेत्य राममुद्दिश्य ॥ ६० ॥ ६१ ॥

६२] ति० टी०–कुब्जया मुहुर्मुहुरिति वागिषुभिः पूर्वोक्तैर्वचनरूपैर्बाणैः समाहता ताडितातिविद्धा चातिविस्मिता । राजा मामेवं प्रतारितवानितीति शेषः शशंसोवाच ॥ ६२ ॥

रा० टी०–तथेति । वागिषुभिः समाहता ताडिता अत एव अतिविद्धा अतिव्रणमिव प्राप्ता कुब्जां प्रति कुपिता इदमेव पुनः पुनः किमर्थं वदतीति कोपं प्राप्ता कैकेयी कुब्जां शशंस ॥ ६२ ॥

गो० टी०–तथेति । अतिविद्धा अतिदुःखिता निधाय हस्तौ हृदय इति विस्मयाभिनयः अतिविस्मिता अतिस्निग्धा कथं मदनिष्टं करिष्यतीति कुपिता रामाभिषेकप्रवर्तकं भर्तारमुद्दिश्य कुपितेत्यर्थः ॥ ६२ ॥ ६३ ॥

६३] ति० टी०–निशम्य दृष्ट्वा प्रतिवेदयिष्यसि दशरथायेति शेषः ॥ ६३ ॥

रा० टी०–तच्छंसनमेवाह–यमस्येति । विषयं देशमितोऽयोध्यातः निशम्य दृष्ट्वा प्रतिवेदयिष्यसि राज्ञे कथयिष्यसि अथ रामेऽभिषिक्ते सतीति शेषः । वाथवा भरतः परमात्मप्रकाशध्यानिरतो मुनिसमूहः समृद्धकामो भविष्यति ॥ ६३ ॥

६४] ति०टी०–नाञ्जनपानभोजनमिति समाहारद्वन्द्वः॥६४॥

रा० टी०–अहमिति । राघवो रामः इतः मद्धृदयस्थहेतोः न गच्छति न गन्ता तदा आस्तरणादीनि नैवेच्छामि ॥ ६४ ॥

गो० टी०–अहमिति । इतो गच्छतीति वर्तमानसामीप्ये लट् ॥ ६४ ॥

---

१ प्राप्स्यतीति गो. पाठः । २ भूषणैरिति गो. पाठः । ३ अत इति गो. पाठः । ४ क्षिति गो.रा. पाठः । ५ निधायेति गो. रा. पाठः । ६ निशाम्येति गो. पाठः । ७ जीवितमिति गो. पाठः ।

अथैवमुक्त्वा वचनं सुदारुणं निधाय सर्वाभरणानि भामिनी ।
असंस्कृतामास्तरणेन मेदिनीं तदाधिशिश्ये पतितेव किंनरी ॥ ६५ ॥
उदीर्णसंरम्भतमोवृतानना तदावमुक्तोत्तममाल्यभूषणा ।
नरेन्द्रपत्नी विमना बभूव सा तमोवृता द्यौरिव मग्नतारका ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

सुमन्त्रादीन्रामाभिषेकसामग्रीसंपादने नियोज्य यावत्प्रियाख्यायको दशरथः कैकेयीगृहमुपयाति तावत्तां तत्रादृष्ट्वा प्रतीहारी पप्रच्छ तया च क्रोधागारशयने सुप्तेत्यावेदितस्तत्प्राप्योत्थाप्य कैकेयीमुपलालनपूर्वकं समाश्वासयत् ।

विदर्शिता यदा देवी कुब्जया पापया भृशम् । तदा शेते स्म सा भूमौ दिग्धविद्धेव किंनरी ॥ १ ॥
निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी । मन्थरायै शनैः सर्वमाचचक्षे विचक्षणा ॥ २ ॥

६५] ति० टी०–अथ क्रोधागारप्रवेशानन्तरम् निधाय त्यक्त्वा पुण्यक्षयाद्भूमौ पतिता ॥ ६५ ॥

रा० टी०–अथेति । आस्तरणेन असंवृतां मेदिनीमधिशिश्ये 'अधिशीङ्स्थासां कर्म' इति मेदिन्याः कर्मत्वम् ॥ ६५ ॥

गो० टी०–अथेति । मेदिनीमधिशिश्ये "अधिशीङ्स्थासां कर्म" इतिसप्तम्यर्थे द्वितीया ॥ ६५ ॥

६६] ति० टी०–उदीर्ण उत्कटः संरम्भः कोप एव तमस्तेन वृतं व्याप्तमाननं यस्याः । अवमुक्तानि त्यक्तान्युत्तममाल्यभूषणानि यया सा विमना दुर्मनाः मग्नतारका अस्तमिततारका द्यौराकाशम् ॥ ६६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०–उदीर्णेति । दीर्णं नित्यं विध्वस्तं संरम्भतमः उद्वेगहेतुभूताज्ञानं यस्याः सा एव वृताननेति कर्मधारयः । अवमुक्तोत्तममाल्यभूषणा अवमुक्तानि प्रक्षिप्तानि उत्तममाल्यभूषणानि यया सा तमोवृता मेघाच्छादिता मग्नतारका द्यौरिव विमना इव बभूव । उशब्द एवार्थे ॥ ६६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे नवमः सर्गः ॥ ९ ॥

गो० टी०–उदीर्णेति । उदीर्णः उत्कटः संरम्भः कोपः य एव तमः तेन वृताननेति विमना पूर्वं विमला तमोवृता नीलावमुक्ततमोवृता मग्नतारका अस्तमिततारका ॥ ६६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

१] ति० टी०–अथोक्तवादपूर्वं राज्ञः कैकेयीदर्शनायाह–विदर्शिता विपरीतं बोधिता । दिग्धविद्धेव विषदिग्धबाणविद्धेव किंनरी कामरूपप्रधानो जातिविशेषः ॥ १ ॥

रा० टी०–उत्तरवृत्तं सप्रसङ्गं बोधयितुं पूर्ववृत्तमनुवदन्नाह–विदर्शितेति । अपापया पापिनीसदृशया कुब्जया देवी कैकेयी यदा विदर्शिता विशेषकार्यविषयकबोधं प्रापिता तदा भूमौ शेते स्म तत्र दृष्टान्तः दिग्धविद्धा दिग्धेन कार्यविशेषदृष्ट्या विद्धा व्याप्ता किंनरीव भूमिशयनमात्रसाध्यकार्यविशेषवशेन भूमिशयितकिंनरीसदृशीत्यर्थः । किंच दिग्धं वनगमनहेतुकरावणादिवधजनितरामकीर्तिवृद्धिं वेत्तीति दिग्धवित् इति कैकेयीविशेषणम् । हा इति विदर्शितान्वयि कष्टेन बोधितेत्यर्थः । किंच दिग्धविदं रामकीर्तिवृद्धिज्ञानं दधाति सा, किंच दिशः तदुपलक्षितभुवनानि दधाति स्वकार्यत्वेन मनसि स्थापयति पुष्णाति वा दिग्धो ब्रह्मा विष्णुर्वा तदन्यतरस्य यां वित् आख्यानं तत्कर्तृकप्रार्थनेत्यर्थः तां दधाति स्वीकरोतीति, किंचोक्तदिशा दिग्धशब्दस्य ब्रह्मविष्णुपरत्वेनोभयकर्तृकप्रार्थनास्वीकर्त्रीत्यर्थः । एषु पक्षेषु किंनरीति तत्सौन्दर्यधर्मबोधिकोपमा ॥ १ ॥

गो० टी०–अथ पूर्वोक्तं कैकेयीक्रोधमविचाल्यत्वसूचनायानुवदन् राज्ञः कैकेयीदर्शनानुनयौ दर्शयति–विदर्शितेति । विदर्शिता विपरीतं बोधिता दिग्धविद्धा विषलिप्तबाणेन प्रहृता 'विषाक्ते दिग्धलिप्तकौ' इत्यमरः ॥ १ ॥

२] ति० टी०–मन्थरोपदिष्टं निश्चित्य युक्तमेतदिति विधार्य यच्चयोक्तं तत्सर्वं सम्यगिति मन्थरायै आविष्टदुःखत्वाच्छनैराचचक्षे ॥ २ ॥

रा० टी०–निश्चित्येति । अकृत्यं कर्तव्यरामराज्याभिषेकस्याभावः निष्पत्तिरिति यावत् सम्यक् स्वप्रतिज्ञापालनाय अवश्यं रामो वनं गन्ता तच्छोभनमेतन्निवारणमिति निश्चित्य विचक्षणातिनिपुणा कैकयी सर्वं मन्थरोक्त्यनुकूलस्वकृत्यं शनैः आचचक्षे स्वदुष्कृतं करिष्यामीति कथयामासेत्यर्थः । शनैराचचक्षे इत्यनेन मया इयमेवं बोधितेति कस्मैचित्तया न वक्तव्य-

१ एतदिति गो. पाठः । २ असंवृतामिति गो. रा. पाठः । ३ तथेति रा. पाठः । ४ तथोते गो. पाठः । ५ विमलेति गो. पाठ. ।

सा दीना निश्चयं कृत्वा मन्थरावाक्यमोहिता । नागकन्येव निःश्वस्य दीर्घमुष्णं च भामिनी ॥ ३ ॥
मुहूर्तं चिन्तयामास मार्गमात्मसुखावहम् । सा मुहूर्त्तार्थकामा च तं निशम्य विनिश्चयम् ॥ ४ ॥
बभूव परमप्रीता सिद्धिं प्राप्येव मन्थरा । अथ सा रुषिता देवी सम्यक्कृत्वा विनिश्चयम् ॥ ५ ॥
संविवेशावला भूमौ निवेश्य भ्रुकुटिं मुखे । ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च ॥ ६ ॥
अपविद्धानि कैकेय्या तानि भूमिं प्रपेदिरे । तया तान्यपविद्धानि माल्यान्याभरणानि च ॥ ७ ॥
अशोभयन्त वसुधां नक्षत्राणि यथा नभः । क्रोधागारे चैं पतिता सा बभौ मलिनाम्बरा ॥ ८ ॥
एकवेणीं दृढां बद्ध्वा गतसत्त्वेव किंनरी । आज्ञाप्य तु महाराजो राघवस्याभिषेचनम् ॥ ९ ॥

मन्यथा लक्ष्मणस्तुभ्यं कोपिष्यतीति कैकेय्याः शिक्षा सूचिता ॥ २ ॥

गो० टी०–निश्चित्येति । सा कैकेयी कृत्यं कर्तव्यं पुरोक्तरीत्या मनसा निश्चित्य सर्वं त्वदुक्तं सम्यगिति मन्थरायै आचचक्षेति संबन्धः ॥ २ ॥

३] ति० टी०–तदेव प्रपञ्चयति–सा दीनेत्यादि ॥ ३ ॥

रा० टी०–सेति । वाक्यं कैकयीवचनम् ओहिता अस्या उक्तिः सदसद्वेति विचारवती अत एव दीना पाश्चिकानिष्टसंभावनया खिन्ना भामिनी सा मन्थरा निश्चयं लक्ष्मणोऽवश्यं कोपिष्यतीति बुद्धिं कृत्वा अत एव नागकन्येव दीर्घं बहुकालमुष्णं विनिःश्वस्य आत्मसुखावहं मार्गमुपायं मुहूर्तं चिन्तयामास । सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०–सा दीनेत्यर्धत्रयमेकं वाक्यम् । दीना अत्र स्वोद्योगः फलिष्यति न्वेतिशङ्क्या दीना मार्गमुपायम् । एतदर्धत्रयं निश्चित्येतिपूर्वश्लोकोत्तरार्धमेव निवेशनीयमर्थसंगतिस्त्वारस्यात् ॥ ३ ॥

४] ति० टी०–मार्गं मन्थरोक्तमात्मसुखावहमिति चिन्तयामास सा मन्थरा मुहूर्तकैकेय्याः तस्या एवार्थकामा च कैकेय्यास्तं निश्चयं निशम्य ज्ञात्वा ॥ ४ ॥

रा० टी०–सेति । तं कैकयीहृदयस्थं विनिश्चयं वनगमनं रामाभीप्सितमिति तदितरकोपस्यार्किंचित्करत्वमिति बुद्धिं निशम्य युक्त्या ज्ञात्वा स्वयमपि तथैव निश्चित्येत्यर्थः । सिद्धिं स्वचिकीर्षितनिष्पत्तिं प्राप्येव परमप्रीता बभूव । अर्धद्वयमेकान्वयि ॥ ४ ॥

गो० टी०–सेति । तं निश्चयं इह वा मां मृतामित्यादिना पूर्वसर्गान्तोक्तनिश्चयं निशम्य श्रुत्वा सिद्धिं निश्चयफलं प्राप्येव प्रीता ॥ ४ ॥

५] ति० टी०–सिद्धिं रसरसायनादिसिद्धिम् । 'निधिम्' इति पाठे धनं प्राप्येव परमप्रीता बभूव वस्तु यदेवकार्यार्थं स्वयं भूलोकमागता दासी च जाता तद्विषयां सिद्धिं प्राप्येवेत्यर्थः । रामागमनस्य संभावनामात्रविषयत्वादिवेति ॥ ५ ॥

रा० टी०–अथेति । अवला अः विष्णुः आः ब्रह्मा च –ोः बलं यस्या मत्कर्मकप्रार्थनाकर्त्रोर्युवयोः कार्यमहं साधयिष्यामीति ब्रह्मविष्णुबलसंपादिकेत्यर्थः । अरुषिता देवी केकयी आवि रामकर्तृकदेवादिरक्षणहेतुकवनगमने निश्चयं कृत्वा भृकुटिं मुखे संनिवेश्य एकाग्रदृष्टिं कृत्वेत्यर्थः भूमौ संविवेश अर्धत्रयमेकान्वयि । आवीत्याङ्पूर्वकगमनार्थकवाधातुप्रकृतिकभावक्तिबन्तप्रकृतिकसप्तम्येकवचनम् ॥ ५ ॥

गो० टी०–अथेति । पुनः संवेशनाभिधानं रोषसूचकभ्रुकुटीकरणमाल्यभूषणापवेधादिविशेषप्रदर्शनार्थं भ्रुकुटीं क्रोधजनिताकारविशेषम् ॥ ५ ॥

६] ति० टी०–मुखे भ्रुकुटिनिवेशः क्रोधातिशयेन ॥ ६ ॥

रा० टी०–तत इति । ततः भूमिसंवेशानन्तरं यानि माल्यादीन्यपविद्धानि परित्यक्तानि तानि भूमिं प्रपेदिरे प्रापुः ६ ॥

गो० टी०–पूर्वं त्यक्तभूषणादीनामौदासीन्येन भूमौ विक्षेपं दर्शयति–तत इति । यान्यप्यविद्धानि तानि भूमिं प्रपेदिरे नतु मञ्जूषिकां, क्रोधातिशयसूचनाय भूमावुत्सर्जनम् ॥ ६ ॥

७–८] ति० टी०–यानि कैकेय्यापविद्धान्युत्सृष्टानि तानि भूमिमित्यन्वयः । यान्यपविद्धानि तानीत्यन्वयः ॥ ७ ॥ ८ ॥

रा० टी०–तयेति । तया केकय्या नक्षत्राणि नभ इव अशोभयन्त ॥ ७ ॥

गो० टी०–व्याकीर्णत्वद्योतनाय तानि वर्णयति–तयेत्यादिना ॥ ७ ॥

रा० टी०–क्रोधेति । एकवेणीं वेण्यन्तराण्युन्मुच्येत्यर्थः । अर्धद्वयमेकान्वयि ॥ ८ ॥

गो० टी०–क्रोधागार इति । गतसत्त्वा क्षीणबला विगतासुरिति वार्थः 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः ॥ ८ ॥

९] ति० टी०–एकवेणीं पुरोभागीयवेणीद्वयमुन्मुच्य पृष्ठैकवेणीम् । गतसत्त्वा क्षीणबला । कैकेयीवृत्तान्तं प्रदोषकालिकमुपवर्ण्य राजवृत्तान्तमाह–आज्ञाप्येति ॥ ९ ॥

रा० टी०–कैकयीवृत्तं समाप्य राजवृत्तमाह–आज्ञाप्येति । अभिषेचनम् अभिषेकस्य कर्तारं वसिष्ठमित्यर्थः । आज्ञाप्य तत्र नियुज्येत्यर्थः । उपस्थानं वसिष्ठसमीपस्थितियोग्यं जनमित्यर्थः अनुज्ञाप्य वसिष्ठाज्ञापितकर्मणि नियुज्येत्यर्थः । निवेशनं स्वगृहं प्रविवेश अभिषेचनोपस्थानशब्दौ कर्तृल्यबन्तौ । अर्धद्वयमेकान्वयि ॥ ९ ॥

१ सुनिश्चयमिति गो. पाठः । २ अमर्षितेति गो. पाठः । ३ भ्रुकुटीमिति गो. पाठः । ४ निपतितेति गो. पाठः । ५ दृढमिति गो. पाठः ।

उपस्थानमनुज्ञाप्य प्रविवेश निवेशनम् । अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ॥ १० ॥
प्रियार्हां प्रियमाख्यातुं विवेशान्तःपुरं वशी । स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः ॥ ११ ॥
पाण्डुराभ्रमिवाकाशं राहुयुक्तं निशाकरः । शुकबर्हिसमायुक्तं क्रौञ्चहंसरुतायुतम् ॥ १२ ॥
वादित्रवरसंघुष्टं कुब्जावामनिकायुतम् । लतागृहैश्चित्रगृहैश्चम्पकाशोकशोभितैः ॥ १३ ॥
दान्तराजतसौवर्णवेदिकाभिः समायुतम् । नित्यपुष्पफलैर्वृक्षैर्वापीभिरुपशोभितम् ॥ १४ ॥
दान्तराजतसौवर्णैः संवृतं परमासनैः । विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ॥ १५ ॥
उपपन्नं महार्हैश्च भूषणैस्त्रिदिवोपमम् । सं प्रविश्य महाराजः स्वमन्तःपुरमृद्धिमत् ॥ १६ ॥
न ददर्श स्त्रियं राजा कैकेयीं शयनोत्तमे । स कामबलसंयुक्तो रत्यर्थी मनुजाधिपः ॥ १७ ॥

गो० टी०—आज्ञाप्येति । आज्ञाप्य सुमन्त्रादीन्नियम्य अभिषेचनमभिषेचनसाधनं प्रति उपस्थानमास्थानं सद इत्यर्थः। अनुज्ञाप्य अनुज्ञां कारयित्वा यद्वा पञ्चमसर्गे गुरुणा स्वभ्यनुज्ञात इत्युक्तत्वाद्वसिष्ठ एवोपस्थानशब्देनोच्यते ॥ ९ ॥

१०] ति० टी०—उपस्थानं कृताज्ञापनाविषयस्य मन्त्रिपुरोहितादेः स्वस्वगृहं प्रति गमनमनुज्ञाप्य स्वनिवेशनं प्रविवेश, यद्वोपस्थानं सदः सभा तामनुज्ञाप्य स्वगृहगमने तदनुज्ञां गृहीत्वा अथैव रामाभिषेकः प्रसिद्धो निश्चित इति इतः पूर्वं कैकेय्या न श्रुतिगोचर इति जज्ञिवान् ज्ञातवान् ॥ १० ॥

रा० टी०—प्रवेशप्रयोजनं बोधयन्नाह—अद्येति । जज्ञिवान् ज्ञातवान् अतः प्रियार्हां प्रियाभिः स्त्रीभिः अर्हां पूज्यां कौशल्यामित्यर्थः । आख्यातुं बोधयितुमन्तःपुरं सर्वपत्नीगृहविशिष्टगृहं विवेश ॥ १० ॥

गो० टी०—अद्येति । रामाभिषेकः अथ वै इदानीमेव प्रसिद्ध इति जज्ञिवान् । इतः पूर्वं कैकेय्याः श्रोतुमवकाशो नास्तीति ज्ञातवानित्यर्थः । सर्वमस्य वशे वर्तत इति वशी स्वतन्त्रः अतः स्वयमेव प्रियार्हां कैकेयीं प्रति प्रियमाख्यातुमन्तःपुरं विवेश ॥ १० ॥

११] ति० टी०—अतस्तत्प्रियमाख्यातुं तामन्तः पुरं प्रविवेश । वशी स्वस्त्रीव्यतिरिक्तविषये इति बोध्यम् ॥ ११ ॥

रा० टी०—स इति । श्रेष्ठं कविभिरत्यन्तं प्रशस्यमित्यर्थः। कैकेय्याः गृहं प्रविवेश एतेन कैकयीगृहं कौशल्यागृहगमनमार्गे एवेति व्यक्तम् । अर्धं पृथक् ॥ ११ ॥

गो० टी०—स इति । स्ववाचककैकेयीवचनकर्तव्यत्वाद्गृहमित्युक्तम् ॥ ११ ॥

१२] ति० टी०—अत्र गृहस्य रुतकैकेयीयुक्ततया क्षुधावलतया च राहुयुक्तपाण्डुराभाकाशसादृश्यम् । रुतायुतं रुतयुक्तम् ॥ १२ ॥

रा० टी०—भवनमेव वर्णयति—शुकेत्यादिभिः । क्रौञ्चहंसानां रुतैः शब्दैरायुतं व्याप्तं वामनिका अतिह्रस्वाः ॥ १२ ॥

गो० टी०—अथ दशरथस्य कैकेयीवचनकर्तव्यत्वाय रामाभिषेकविघ्नमियं करिष्यतीति बुद्ध्यनुत्पादाय चरतिभावोद्दीपनान्यन्तःपुरे दर्शयति—शुकेत्यादि । वादित्रवरसंघुष्टं वीणादिचतुर्विधवाद्यरवानुनादितम् 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ' इत्यमरः । कुब्जादीनां प्रियानुकूल्यहेतुत्वाद्रतिदृद्धिहेतुत्वं लतागृहैः चित्रगृहैश्चोपलक्षितम् । दान्ताः दन्तनिर्मिताः । नित्यपुष्पफलैरिति दोहदविशेषादिति ज्ञेयम् विविधैरिति भक्ष्यैः अपूपादिभिः । भूषितैः स्त्रीजनैरिति शेषः । अत एव त्रिदिवोपमम् ॥ १२–१६ ॥

१३] ति० टी०—हृष्टा वामनिकाः । कुब्जाभिर्वामनिकाभिश्च ताभिर्युतम् । सुरूपदासीनां सापत्न्यसंभावनयान्तःपुरेऽवासात् । चित्रगृहैश्चित्रयुक्तगृहैः ॥ १३ ॥

रा० टी०—लतेति । चम्पकाशोकशोभितैर्लतागृहैश्चित्रगृहैश्च शोभितमिति शेषः ॥ १३ ॥

१४–१६] ति० टी०—गजदन्तरजतसुवर्णनिर्मितवेदिकाभिः । दृष्टाणां नित्यपुष्पफलत्वं च देवराजसाहाय्यकरणेन तत्प्रसादात् ॥ १४–१६ ॥

रा० टी०—दान्तेति । दान्तादय एव वेदिकास्ताभिः समायुतम् सामान्ये नपुंसकम् ॥ १४ ॥

रा० टी०—दान्तेति । भक्ष्यैश्च संवृतम् ॥ १५ ॥

रा० टी०—उपपन्नमिति । भूषणैरुपपन्नमत एव त्रिदिवोपमं स्वमन्तःपुरं महाराजो राजा प्रविश्य शयनोत्तमे कैकेयीं न ददर्श । सार्धश्लोक एकान्वयी ॥ १६ ॥

१७] ति० टी०—कामबलसंयुक्तः कामबलं तदुद्रेकस्तत्संयुक्तः अत एव रत्यर्थी ॥ १७ ॥

रा० टी०—स इति । कामबलेन अभिषेकविषयकातीव्र्या संयुक्तः अत एव रत्यर्थी राज्ञीप्रीतिप्रयोजनो मनुजाधिपः भार्यामपश्यन् विषसाद अत एव पप्रच्छ ॥ १७ ॥

गो० टी०—स इति । कामबलसंयुक्तः उद्दीपनदर्शनादुचि-

१ बर्हिणसंघुष्टमिति गो. पाठः । २ वापिभिश्चोपशोभितमिति गो. पाठः । ३ भूषितैरिति गो. पाठः । ४ तदिति गो. पाठः । ५ प्रियामिति गो. पाठः । ६ रत्यर्थमिति गो. पाठः ।

अपश्यन्दयितां भार्यां पप्रच्छ विषसाद च । नहि तस्य पुरा देवी तां वेलामत्यवर्तत ॥ १८ ॥
न च राजा गृहं शून्यं प्रविवेश कदाचन । ततो गृहगतो राजा कैकेयीं पर्यपृच्छत ॥ १९ ॥
यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डिताम् । प्रतिहारी त्वथोवाच संत्रस्ता तु कृताञ्जलिः ॥ २० ॥
देव देवी भृशं क्रुद्धा क्रोधागारमभिद्रुता । प्रतीहार्या वचः श्रुत्वा राजा परमदुर्मनाः ॥ २१ ॥
विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रियः । तत्र तां पतितां भूमौ शयानामतथोचिताम् ॥ २२ ॥
प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः । स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् ॥ २३ ॥
अपापः पापसंकल्पां ददर्श धरणीतले । लतामिव विनिष्कृत्तां पतितां देवतामिव ॥ २४ ॥
किंनरीमिव निर्धूतां च्युतामप्सरसं यथा । मायामिव परिभ्रष्टां हरिणीमिव संयताम् ॥ २५ ॥

तकालत्वाच्चेति भावः अत एव रत्यर्थं पप्रच्छ क्व गतासीत्येवं, प्रत्युत्तराभावाद्विषसाद च ॥ १७ ॥

१८] ति० टी०–अपश्यन्रत्यर्थमन्विष्यापश्यन् । विषादहेतुमाह–नहीति । तां वेलां कामवशात्स्वशयनागमवेलां नात्यवर्तत नातिक्रान्तवती अथ च तामतिक्रान्तेति विषादः ॥ १८ ॥

रा० टी०–विषादे हेतुं वदन्नाह–नहीति । देवी केकयी तस्य राज्ञो वेलामागमनसमयं नात्यवर्तत तदागमनसमये तत्रैव अतिष्ठदित्यर्थः अत एव शून्यं केकयीरहितं गृहं कदाचन न प्रविवेश प्रवेशसमये सदैव तत्र तामपश्यदित्यर्थः ततो हेतोः पर्यपृच्छत् ॥ १८ ॥ १९ ॥

गो० टी०–विषादहेतुमाह–नहीति । तां वेलां रतिवेलाम् १८

१९] ति० टी०–शून्यं कैकेयीरहितम् ॥ १९ ॥

गो० टी०–तत इति । कैकेयीं स्वार्थे लिप्सुं स्वप्रयोजनपरामविज्ञाय यथापुरं यथापूर्वं पर्यपृच्छत प्रतिहारीमिति शेषः । पूर्वमदर्शनकाले यथा पृच्छति तथापृच्छदित्यर्थः ॥ १९ ॥ २० ॥

२०] ति० टी०–अपण्डितां कार्याकार्यविवेकरहितां स्वार्थलिप्सुं भरताभिषेकेच्छावतीमविज्ञाय यथापुरं यथापूर्वं पूर्वमदर्शनकाले यथापृच्छत तथापृच्छतेत्यन्वयः । प्रतिहारी द्वौवारिकी ॥ २० ॥

रा० टी०–यथेति । स्वार्थलिप्सुं देवकार्यनिष्पादनजनितस्वयशोरूपप्रयोजनवतीमत एव अपण्डितामतिविज्ञां केकयीं यथापुरमविज्ञाय संत्रस्ता प्रतीहारी उवाच ॥ २० ॥

२१] ति० टी०–अभिद्रुता । इत्युवाचेति संबन्धः ॥ २१ ॥

रा० टी०–तद्वचनाकारमाह–देवेति । देव हे राजन् ! क्रुद्धेव देवी केकयी क्रोधागारमभिद्रुता प्राप्ता । अर्धं पृथक् । प्रतीहार्या इति । लुलितेन केकयीचञ्चलतया स्वाभिप्रायमनुक्त्वा गमनेनेत्यर्थः व्याकुलितानीन्द्रियाणि यस्य अत एव परमदुर्मना राजा विषसाद इतस्ततश्चचाल ॥ २१ ॥

गो० टी०–प्रतिहार्या इति । भूयः अतिशयेन अदर्शनविषादादपि क्रोधागारप्रवेशश्रवणादतिशयेन विषसाद लुलितव्याकुलेन्द्रियः लुलितानि घूर्णितानि व्याकुलानि स्वस्वविषयग्रहणासमर्थानि इन्द्रियाणि यस्य स तथोक्तः ॥ २१ ॥

२२] ति० टी०–अदर्शनमात्रेण विषण्णस्य क्रोधादिश्रवणाद्भूयोऽधिको विषादः, इष्टादर्शनजविषादेन चक्षुरादेर्लुलितत्वमतिचञ्चलत्वम्, चित्तस्य किंनिमित्तः क्रोध इति शङ्कया व्याकुलत्वम् । तत्र क्रोधागारे अतथोचितां तथाशयनानुचिताम् ॥ २२ ॥

रा० टी०–तत्रेति । तत्र प्रचलनसमये भूमौ पतितां शयानां केकयीं जगतीपतिरपश्यत् ॥ २२ ॥

गो० टी०–तत्रेति । अतथोचितां भूमिशयनानर्हाम् ॥ २२ ॥

२३] ति० टी०–इवशब्द एवार्थे ॥ २३ ॥

रा० टी०–भङ्ग्यन्तरेण पुनस्तदेवाह–स इति । पापाय पापिराक्षसविनाशाय संकल्पो यस्यास्तामपापो राजा धरणीतले ददर्श ॥ २३ ॥

गो० टी०–रामाभिषेकसंरम्भे सपत्नीमातुः क्रोधस्तन्निमित्त इति कुतो राजा न ज्ञातवानित्यत्राह–स इति । अकुटिलत्वाद्व्यामोहाच्च न ज्ञातवानिति भावः ॥ २३ ॥

२४] ति० टी०–पापसंकल्पां रामाभिषेकविघातादिमनोरथाम् । विनिष्कृत्तां छिन्नाम् ॥ २४ ॥

रा० टी०–लतामिति । निर्धूतां पतितां किंनरीमिव दिग्धेन विषलिप्तबाणेन मृगयुना व्याधेन विद्धां करेणुमिव वनितां केकयीमभिसंत्रस्तचेतनः अभितः किमर्थमेवमियं पतितेति सर्वत्र विचारेण संत्रस्ता चेतना बुद्धिर्यस्य कामी रामाभिषेकविषयकेच्छावान् राजा इदमुवाच । सार्धश्लोकत्रयमेकान्वयि ॥ २४–२७ ॥

गो० टी०–तदर्शनस्य दुःसहत्वमाह–लतामिवेति । पतितां भूगतां निर्धूतां धूल्यकम्पने व्याकुलितामिति यावत् । च्युतां दिव इति शेषः ॥ २४ ॥

२५] ति० टी०–निर्धूतां पुण्यक्षये स्वलोकात्पतितां च्युतां स्वर्गात् परिभ्रष्टां परमोहनाय प्रयुक्तां मध्य एव स्थितां मायामिव स्थितां संयतां वागुरयाबद्धाम् ॥ २५ ॥

गो० टी०–मायामिति । 'वामीमिव परिभ्रष्टाम्' इत्यपि पाठः । वामीं वडवाम् 'वाम्यश्वबडवा' इत्यमरः । संयतां वागुरया बद्धां दिग्धेन विषलिप्तबाणेन 'विषाक्ते दिग्धलिप्तकौ' इत्यमरः ।

---

१ इत्येति रा. पाठः । २ प्रतीहार्या इति गो. पाठः । ३ अपृच्छदिति युक्तम् । ४ दुर्नीतोऽयमर्थः ।

करेणुमिव दिग्धेन विद्धां मृगयुना वने । महागज इवारण्ये स्नेहात्परमदुःखिताम् ॥ २६ ॥
परिमृज्य च पाणिभ्यामभिसंत्रस्तचेतनः । कामी कमलपत्राक्षीमुवाच वनितामिदम् ॥ २७ ॥
न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम् । देवि केनाभियुक्तासि केन वासि विमानिता ॥ २८ ॥
यदिदं मम दुःखाय शेषे कल्याणि पांसुषु । भूमौ शेषे किमर्थं त्वं मयि कल्याणचेतसि ॥ २९ ॥
भूतोपहतचित्तेव मम चित्तप्रमाथिनि । सन्ति मे कुशला वैद्यास्त्वभितुष्टाश्च सर्वशः ॥ ३० ॥
सुखितां त्वां करिष्यन्ति व्याधिमाचक्ष्व भामिनि । कस्य वापि प्रियं कार्यं केन वा विप्रियं कृतम् ॥ ३१ ॥
कः प्रियं लभतामद्य को वा सुमहदप्रियम् । मा रौत्सीर्मा च कार्षीस्त्वं देवि संपरिशोषणम् ॥ ३२ ॥
अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम् । दरिद्रः को भवेदाढ्यो द्रव्यवान्वाप्यकिंचनः ॥ ३३ ॥

मृगयुना व्याधेन सम्यग्भृगतत्वाश्रयार्थावहत्वदयनीयत्वशंनीयत्वविलुलितवर्णत्वनिश्चेष्टत्वसंतापवहत्वानि क्रमाल्लताद्यौपम्येन लभ्यन्ते ॥ २६ ॥

२६] ति० टी०—मृगयुना व्याधेन दिग्धेन विषलिप्तेन बाणेन विद्धां करेणुमिव स्थितां ददर्शेति पूर्वेणान्वयः । अरण्ये महागजः पूर्वोक्तां करेणुमिव स्थिताम् ॥ २६ ॥

२७] ति० टी०—पाणिभ्यां परिमृज्य पृष्ट्वा किं वक्ष्यति किं करिष्यतीति शङ्कया त्रस्तबुद्धिरुवाच ॥ २७ ॥

गो० टी०—महागज इति । अभिसंत्रस्तचेतनः अभितः सम्यक् त्रस्ता चेतना बुद्धिर्यस्य किमर्थेच्छुः उत रोगग्रस्ता उत कुद्धेति त्रासः । कमलपत्राक्षीमिति कामित्वद्योतनम् ॥२६ ॥२७॥

२८] ति० टी०—आत्मनि मयि संश्रितं ते क्रोधं क्रोधकारणं नाभिजानामि । अभियुक्ता कृतपराभवा । विमानो निन्दा ॥ २८ ॥

रा० टी०—तद्वचनमेवाह—नेति । ते आत्मनि चित्ते संश्रितं क्रोधं न अभिजानामि । क्रोधकारणं पृच्छति अभियुक्ता पराभूतिं प्राप्ता विमानिता निन्दिता ॥ २८ ॥

गो० टी०—नेति । आत्मनि त्वयि मयि वा अभिशप्ता परुषिता ॥ २८ ॥

२९] ति० टी०—यद्यत इदमेवंप्रकारेण कल्याणि ! मम दुःखाय पांसुषु शेषे । किं च कल्याणचेतसि अनपकारिणि मयि जीवति सति किमर्थं भूमौ शेषे ॥ २९ ॥

रा० टी०—यदिति । हे कल्याणि ! पांसुषु धूलिषु यत्त्वं शेषे तत् इदं शयनं मम दुःखाय भवति अतः कल्याणचेतसि मयि सति हे मम चित्तप्रमाथिनि ! भूतोपहतचित्ता इव त्वं भूमौ किमर्थं शेषे । चित्तस्य सावधानत्वे एवमाचरणं ते न स्यादिति भावः । सार्धश्लोक एकान्वयी ॥ २९ ॥

गो० टी०—यदिति । पांसुषु शेष इति यत् इदं मम दुःखायेति संबन्धः । भूतोपहतचित्तेव पिशाचग्रस्तचित्तेव ॥२९॥३०॥

३०] ति० टी०—भूतोपहतचित्तेव ग्रहाविष्टेव । कुशलाः सर्वव्याधिनिवारणकुशलाः अभितुष्टाः मत्कृतसत्कारैरिति शेषः ॥ ३० ॥

रा० टी०—भूतग्रहादिजनितरोगाणां निवृत्तिर्वैद्यप्रयत्नसाध्येति बोधयन्नाह—सन्तीति । सर्वशः सर्वप्रकारैरित्यर्थः । आचक्ष्व कथय । अर्धद्वयमेकान्वयि ॥ ३० ॥

गो० टी०—रोगपक्षं परिहरति—सन्तीत्यादि । अभितुष्टाः दानमानादिभिः ॥ ३१ ॥

३१] ति० टी०—व्याधिमाचक्ष्व व्याधिकृतं चेच्छयनमिति शेषः । प्रियं कार्यं कर्तव्यमिति मनसि वर्तते इति शेषः । विप्रियं कृतं तव कस्याप्रियं कर्तव्यत्वेन तव मनसि वर्तत इति भावः ॥ ३१ ॥

रा० टी०—आधिमाशङ्क्य तत्कारणं पृच्छति—कस्येति । कस्य केनापि जनेन प्रियं प्रीतिविषयीभूतं कर्म कार्यं कृतं किम् । वाशब्दः किमर्थकः एतेन तत्प्रत्युपकारकरणसामर्थ्याभावप्रयुक्ता मानसी व्यथा चेदुच्यतामिति स्वाभिप्रायो निवेदित इति ध्वनितम् । "कृत्यानां कर्तरि वा" इति षष्ठी विप्रियं प्रीतिविषयीभूतकर्मध्वंसकं कर्म केनापि कृतं किम् । एतेन तत्कृतकर्मफलदानासामर्थ्यमूलिका ते मानसी व्यथा चेदुच्यतामिति बोधितम् । अपिरुभयान्वयी ॥ ३१ ॥

गो० टी०—क्रोधपक्षे परिहारमाह—कस्य वेति । कस्येति तृतीयार्थे षष्ठी केन वा तेऽप्रियं कृतमित्यर्थः । प्रियाप्रियकारिणोः फलमाह—कः प्रियमिति । मा रोदीरिति मा रोदीः रोदनं मा कार्षीः । संपरिशोषणं कायक्लेशम् ॥ ३२—३४ ॥

३२] ति० टी०—पक्षद्वयनिमित्तोऽपि क्रोधो मास्त्वित्याह—कः प्रियमिति । त्वत्प्रियः दरिद्र इति शेषः । अप्रियं लभताम्, त्वद्विप्रियकारीति शेषः । मा रौत्सीः आत्मनोऽभिप्रायं रुद्धं गुप्तं मा कार्षीरित्यर्थः । संपरिशोषणम् कायस्येति शेषः ॥३२॥

रा० टी०—नन्वं किं कथनेनेत्यत आह—क इति । महत् त्वत्प्रयत्नासाध्यमिदं प्रियाप्रियोभयान्वयि मा रौत्सीः स्वाभिप्रायावरोधं मा कार्षीरित्यर्थः । हे देवि ! संपरिशोषणं स्वाभिप्रायाविष्करणाभावमूलं कौशादिसंपरिशोषणं मा कार्षीः ॥ ३२ ॥

३३] ति० टी०—तदेव प्रपञ्चयति—अवध्य इत्यादि ॥३३॥

रा० टी०—अवध्य इति । अवध्यः त्वत्कर्तृकनाशाशक्यः आढ्यो द्रव्यवान् अकिंचनो दरिद्रः ॥ ३३ ॥

अहं चे हि मदीयाश्च सर्वे तव वशानुगाः । न ते [2]कंचिदभिप्रायं व्याहन्तुमहमुत्सहे ॥ ३४ ॥
आत्मनो जीवितेनापि ब्रूहि यन्मनसि स्थितम् । बलमात्मनि जानन्ती न मां शङ्कितुमर्हसि ॥ ३५ ॥
करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे । यावदावर्तते चक्रं तावती मे वसुंधरा ॥ ३६ ॥
द्रविडाः सिन्धुसौवीराः सौराष्ट्रा दक्षिणापथाः । वङ्गाङ्गमगधा मत्स्याः समृद्धाः काशिकोसलाः॥ ३७॥
तत्र जातं बहु द्रव्यं धनधान्यमजाविकम् । ततो वृणीष्व कैकेयि यद्यत्त्वं मनसेच्छसि ॥ ३८ ॥
किमायासेन ते भीरु उत्तिष्ठोत्तिष्ठ शोभने । तत्त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतम् ॥
तत्ते व्यपनयिष्यामि नीहारमिव रश्मिवान् ॥ ॥ ३९ ॥
तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम् । परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे दशमः सर्गः ॥ १० ॥

३४-३५] ति० टी०-आत्मनो जीवितेन हेतुनापि ते कंचिदभिप्रायं तद्विषयं व्याहन्तुं नोत्सहे अतो मनसि यत्स्थितं यद्विषयेच्छास्ति तद्ब्रूहि । आत्मनि स्वस्मिन्बलं मत्प्रेमरूपं जानन्त्ययं मदुक्तं करिष्यति न वेति मां शङ्कितुं नार्हसि ॥ ३४ ॥ ३५ ॥

रा० टी०-अहमिति । वशानुगाः वशं वशतामनुगच्छन्ति प्राप्नुवन्ति ते अहं तेऽभिप्रायमीप्सितं व्याहन्तुं निवर्तयितुं जीवितेनात्मना देहेन नैवोत्सहे । अतो ब्रूहि आत्मनि तवात्मभूते मयि । श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०-अर्धेच्छापक्षं परिहरति-अहमिति । मम जीवनेनापि हेतुना त्वत्प्रियं व्याहन्तुं नोत्सहे त्वत्प्रियार्थं जीवितमपि परित्यजामीत्यर्थः । आत्मनि बलं त्वयि विषयमानं वाल्लभ्यं बलम् ॥ ३५—३७ ॥

३६] ति० टी०-सुकृतेनापि स्वपुण्येनापि ते तव शपे शपथं ददामि । यदि स्वदुक्तं न कुर्यां तर्हि सर्वं सुकृतं मे हृयेति शपथं ददामीत्यर्थः । अथात्मनि दुष्करसंपादनसामर्थ्यं दर्शयति-यावदिति । चक्रं सूर्यमण्डलमावर्तते प्रकाशयति तावती सर्वापि वसुंधरा मे मदधीना ॥ ३६ ॥

रा० टी०-करिष्यामीति । सुकृतेन शोभनं कृतं मनोव्यापारो यस्मिन् तेन कर्तृणा तव प्रीतिं प्रसादं करिष्यामि संपादयिष्यामि ते शपे अस्मिन्विषये तव शपथं करोमि । अर्धं पृथक् । संपादने स्वसामर्थ्यं बोधयन्नाह-यावदिति । चक्रं रविमण्डलं यावदावर्तते प्रकाशयति तावती वसुंधरा मे मत्संबन्धिनी अत एव द्राविडादयो देशा मे अत एव तत्र तत्तद्देशेषु बहुद्रव्यमपि मे ततो हेतोः हे कैकेयि त्वं वृणीष्व । सार्धश्लोकद्वयमेकान्वयि ॥ ३६-३८ ॥

३७] ति० टी०-द्राविडसिन्ध्वादयो देशाः सर्वे मदधीना एव ॥ ३७ ॥

गो० टी०-चक्रं सूर्यस्य रथचक्रमाशा वा । प्राचीना इत्यादि । प्राचीनादिदेशाः ये सन्तीति शेषः । तत्र तेषु देशेषु धनधान्यं यदस्तीति शेषः । ततः तत्र ॥ ३८—४० ॥

३८-३९] ति०टी०-अतः-तत्रेत्यादि । तत्र जातं द्रव्यमपि मदधीनमेव । रश्मिवान्सूर्यः ॥ ३८ ॥ ३९ ॥

रा० टी०-किमिति । आयासेन ईदृक्चेष्टाजनितप्रयासेन किम्, प्रयासस्य न प्रयोजनमित्यर्थः । तत्र हेतुः यतो यस्मात्ते भयमागतं तदहं व्यपनयिष्यामि नाशयिष्यामि इङार्थः । तत्र दृष्टान्तः नीहारं रश्मिवान् भास्कर इव । सार्धश्लोक एकान्वयी ॥ ३९ ॥

गो० टी०-किमिति । आयासेन भूशयनायासेन तव भयनिमित्तम् रश्मिवान् सूर्यः ॥ ४१ ॥ ४२ ॥

४०] ति० टी०-भूयः परिपीडयितुं निजभूशयनादिना पूर्वं पीडितमेवाप्रियवचनादिना पुनः पीडयितुमित्यर्थः ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे दशमः सर्गः ॥ १० ॥

रा० टी०-तथेति । भूयोऽत्यन्तं तथोक्ता अत एव समाश्वस्ता अत एव वक्तुकामा सा कैकयी तदप्रियं कैकेयीं राक्षसमित्यर्थः । परिपीडयितुं हिंसयितुं भर्तारं वक्तुमिति शेषः । उपचक्रमे ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०-तथेति । परिपीडयितुं प्रतिज्ञाकरणेन निर्बन्धयितुम् ॥ ४३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

---

१ चेवेति गो. रा. पाठः । २ किंचिदिति । गो. रा. पाठः । ३ मनसेच्छसीति गो. पाठः । ४ प्राचीना इति गो. पाठः । ५ अर्धमिदं रा. नास्ति । ६ जानतीति युक्तमिति भाति । ७ दुर्बोधमिदम् ।

एकादशः सर्गः ।

कैकेय्या स्वाभीष्टदाने प्रचोदितो दशरथस्तत्प्रतिजज्ञे । कैकेय्यपि च तत्र देवान्साक्षीकृत्य देवासुरसंग्रामवृत्तं संस्मार्य तत्र प्रतिज्ञातौ वरौ रामनिर्वासनभरताभिषेचनरूपेण वव्रे ।

तं मन्मथशरैर्विद्धं कामवेगवशानुगम् । उवाच पृथिवीपालं कैकेयी दारुणं वचः ॥ १ ॥
नास्मि विप्रकृता देव केनचिन्नावमानिता । अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतम् ॥ २ ॥
प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि । अथ ते[1] व्याहरिष्यामि येथाभिप्रार्थितं मया ॥ ३ ॥
तामुवाच महाराजः कैकेयीमीषदुत्स्मयः[2] । कामी हस्तेन संगृह्य मूर्धजेषु भुवि स्थिताम् ॥ ४ ॥
अवलिप्ते न जानासि त्वत्तः प्रियतरो[3] मम । मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥ ५ ॥
तेनाजय्येन मुख्येन राघवेण महात्मना । शपे ते जीवनार्हेण ब्रूहि यन्मनसेप्सितम्[4] ॥ ६ ॥

१] ति० टी०–तामिति ॥ १ ॥

रा० टी०–तमिति । मन्मथशरैः मदं संसारदैन्यं मथ्नन्ति निवर्तयन्तीति मन्मथा वशिष्ठादयः तेषां शरैः शत्रुनिवर्तकशरसदृशविद्यानिवर्तकवचनैर्विद्धं व्याप्तमत एव कामवेगवशानुगं कामवेगः वशो येषां ते अनुगा अनुचरा यस्य तं पृथिवीपालं दशरथं दारुणं दारुणवस्तुस्वीकारकं वच उवाच श्लेपनार्थकमदधातुप्रकृतिकभावक्विबन्तं मदिति शरशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । किं च मन्मथशरैर्विद्धमिति वचोविशेषणम् तथाहि मन्मथं शृणातीति मन्मथशरः शिवः उपलक्षणतया ब्रह्मविष्णुमहेश्वरा इत्यर्थः विद्धं प्रार्थितमित्यर्थः विद्धमिति विधानार्थकविधधातुप्रकृतिकनिष्ठान्तमागमशास्त्रस्यानित्यत्वादिडभावः ॥ १ ॥

गो० टी०–अथ व्यवस्थाप्य महाराजं त्वमिमं वृणुया वरमिति मन्थरयोपदिष्टमनुतिष्ठति–तमित्यादिना ॥ १ ॥

२] ति० टी०–विप्रकृता प्रियया पराभूता । अवमानः शब्देन तिरस्कारः । मे ममाभिप्रायोऽभिप्रार्थनीयोऽस्ति त्वदेकसंपाद्यस्तं त्वया कृतं संपादितमिच्छामि ॥ २ ॥

रा० टी०–तद्वचनमेवाह–नेति । अभिप्रायः इच्छाविषयीभूतस्तं त्वया कृतं संपादितमिच्छामि ॥ २ ॥

गो० टी०–नास्मीति । विप्रकृता रोगग्रस्ता नार्थकामास्मीत्यपि द्रष्टव्यम् । निग्रहाद्ग्रहपदं मनसि कृत्वाह–अभिप्रायस्त्विति । अभिप्रायः अभिप्रेतोऽर्थः अस्तीति शेषः । त्वया कृतं त्वया प्रतिश्रुतं तमिच्छामीति संबन्धः ॥ २ ॥

३] ति० टी०–यदि त्वं कर्तुमिच्छसि मदभिप्रेतं तदा तद्विषयावश्यकर्तव्यतारूपां प्रतिज्ञां प्रतिजानीष्व कुरु । अथानन्तरं मयाभिप्रेतं स्वप्रार्थितं यथा यत्प्रकारवत्तथा वक्ष्यामीत्यर्थः ॥ ३ ॥

रा० टी०–प्रतिज्ञामिति । प्रतिज्ञामवश्यमहं करिष्यामीति शब्दोच्चारणपूर्वकनिश्चयं प्रतिजानीष्व कुरु अथ अनन्तरं मयाभिप्रार्थितमीप्सितं यथा यथावद्व्याहरिष्यामि कथयिष्यामि ॥३॥

गो० टी०–प्रतिज्ञामिति । प्रतिज्ञां प्रतिजानीष्व शपथं कुर्वित्यर्थः ॥ ३ ॥

४] ति० टी०–आज्ञाकारिणि मयि शपथाकाङ्क्षा वृथेत्युत्स्मयैः । मूर्धजेषु संगृह्य शिरोऽङ्के कृत्वेति यावत् ॥ ४ ॥

रा० टी०–तामिति । ईषदुत्स्मयः ईषद्हासविशिष्टः कामी रामाभिषेकेच्छावान्, ईषदिति संगृह्यान्वयि वा ॥ ४ ॥

गो० टी०–तामिति । ईषदुत्स्मितः भवदाज्ञाकारिणि मयि किं शपथेनेति किंचिदुद्वतस्मितः, यद्वा अभिप्रेतकरणमीषत्करमित्युत्स्मितः, यद्वा शङ्कितरोगाद्यभावात् हस्तेन मूर्धजेषु संगृह्नेति शिरोऽङ्के कृत्वेति भावः । स्वाभिमुखीकरणाय वेणीमवलम्ब्येति वार्थः ॥ ४ ॥

५] ति० टी०–स्त्रीणां मध्ये त्वत्तः पुंसां मध्ये रामादन्य इति योज्यम्, यद्वा रामादन्यस्त्वत्तोऽधिकः प्रियतरो नेत्यर्थः रामेऽस्या द्वेषमजानत एवमुक्तिः ' राम एव त्वत्तोऽधिकः प्रिय इत्याशयः ॥ ५ ॥

रा० टी०–तद्वचनमेवाह–अवलिप्ते । अवलिप्ते स्वरूपादिविषयकगर्वविशिष्टे त्वत्तः प्रियतमा अन्या स्त्री न रामादन्यो मनुजः पुरुषः प्रियतमो न, प्रियतमाशब्दो लिङ्गविपरिणामेन उत्तरत्रापि संबध्यते एवमन्यशब्दस्तद्विपरिणामेन पूर्वत्र संबध्यते । 'प्रियतर' इति भट्टपाठः ॥ ५ ॥

गो० टी०–अवलिप्ते इति । अवलिप्ते सौभाग्यगर्विते! मम त्वत्तः प्रियतमा स्त्रीणां मध्ये त्वत्तः प्रियतमा नास्ति, रामादन्यो मनुजः प्रियतमो न विद्यते इति जानासीति संबन्धः ॥५॥

६] ति० टी०–तदाह–तेनेति । त्वत्तोऽपि प्रियतरेणेत्यर्थः । अत एव मुख्येन अजय्येनारीणामशक्यजयेन जीवनार्हेण मज्जीवनसाधनीभूतेन अनेन परमप्रियत्वं दर्शयति–शपे शपथेन त्वदभिप्रेतकर्तव्यताविषयं स्वाभिप्रायं ज्ञापये ते तुभ्यम् ॥ ६ ॥

रा० टी०–तेनेति । अजय्येन जेतुमशक्येन जीवनार्हेण जीवनः प्राणः तस्यापि अर्हः पूज्यः तेन प्राणेभ्योऽप्यधिकेने-

१ तदिति गो. पाठः । २ यदिति गो. पाठः । ३ महातेजा इति गो. पाठः । ४ उत्स्मित इति गो. पाठः । ५ शुचिस्मितामिति गो. पाठः । ६ प्रियतमेति गो. रा. पाठः । ७ मनसेच्छसीति गो. रा. पाठः ।

यं मुहूर्तमपश्यंस्तु न [1]जीवे तमहं ध्रुवम् । तेन रामेण [2]कैकेयि शपे ते वचनक्रियाम् ॥ ७ ॥
आत्मना चात्मजैश्चान्यैर्वृणे यं मनुजर्षभम् । तेन रामेण [3]कैकेयि शपे ते वचनक्रियाम् ॥ ८ ॥
भद्रे हृदयमप्येतदनुमृश्योद्धरस्व [4]मे । एतत्समीक्ष्य कैकेयि ब्रूहि यत्साधु मन्यसे ॥ ९ ॥
बलमात्मनि पश्यन्ती न [5]विशङ्किंतुमर्हसि । करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ १० ॥
सा तदर्थमना देवी तमभिप्रायमागतम् । निर्माध्यस्थ्याच्च हर्षाच्च बभाषे [6]दुर्वचं वचः ॥ ११ ॥
तेन वाक्येन संहृष्टा तमभिप्रायमात्मनः । व्याजहार महाघोरमभ्यागतमिवान्तकम् ॥ १२ ॥

त्यर्थः । रामेण सह अहं ते शपे रामोऽपि त्वदीप्सितमवश्यं साधयिष्यतीति भावः ॥ ६ ॥

गो० टी०–तेनेति । जीवनार्हेण जीवनादपि पूज्येन ॥ ६ ॥

७] ति० टी०–भाव्यर्थं सूचयन्परमप्रियत्वमेव दर्शयति–यमिति । अनेन तद्विषयकदुष्टप्रार्थना न कार्येति सूचयति । वचनक्रियां त्वद्वचनकरणं प्रति ॥ ७ ॥

रा० टी०–रामे स्वाधिकप्रीतिं बोधयितुं पुनःपुनः शपते–अयमिति द्वाभ्याम् । अपश्यन् विरुद्धरूपेणावलोकयन् तेन रामेण सह ते वचनक्रियां त्वद्वचनकर्तव्यतां प्रतीति शेषः ॥ ७ ॥

गो० टी०-अस्यैव विवरणम्-यमिति । ते वचनक्रियां तव वचनकरणं प्रतीति शेषः ॥ ७ ॥

८] ति० टी०–आत्मना स्वेनान्यैरात्मजैः पुत्रैरपि यं वृणेऽसमं जाने सर्वतोऽधिकं प्रियं जाने इति यावत् ॥ ८ ॥

रा० टी०–आत्मनेति । आत्मना देहेन अन्यैर्मित्रादिभिः यं वृणे सेवे इत्यर्थः । तेन सह शपे एतेन रामस्त्वयाप्यत्यन्तं सेव्य इति बोधितम् ॥ ८ ॥

गो० टी०–आत्मनेति । आत्मना स्वदेहेन आत्मजैः भरतादिभिः अन्यैश्च प्रियबन्धुभिश्च मूल्यभूतैरेतैर्यं रामं वृणे सर्वान्परित्यज्यापि राममेव परिगृह्णामीति भावः ॥ ८ ॥

९] ति० टी०–'यन्मनसा ध्यायति तद्वाचा वदति' इत्युक्तेर्वागिव हृदयमपि त्वद्वचनानुसन्धानप्रवणमनुमृश्य विचार्य स्वाभीष्टकथनेन मामस्मादुःखादुद्धर । एतद्रामस्य प्रियतमत्वं समीक्ष्य यत्साधु मन्यसे तद्ब्रूहि त्वमेव युक्तं विचार्य वद मम तु त्वद्वचनमात्रं कर्तव्यमेवेत्याशयः ॥ ९ ॥

रा० टी०–भद्र इति । हे भद्रे ! एतत् हृदयं ममाभिप्रायमनुमृश्य विचार्य मामुद्धरस्व रामानुकूलस्वाभिप्रायाविष्करणेन मत्संदेहं निवर्तयेत्यर्थः । एतद्रामाभिप्रेताविरुद्धं समीक्ष्य विचार्य यत्साधु मन्यसे तद् ब्रूहि ॥ ९ ॥

गो० टी०–भद्र इति । हे भद्रे ! मे हृदयं एतत् एतादृशमनुमृश्य शपथवचनानुसारित्वेन निर्धार्य उद्धरस्व उज्जीवय । एतत् वाङ्मनसयोरैकरूप्यं समीक्ष्य सम्यगालोच्य यत्साधु इदं मन्यसे तद्ब्रूहि त्वदभीष्टकरणमेव मज्जीवनं अन्यथा न जीवामीत्यर्थः ॥ ९ ॥

१०] ति० टी०–अत्र शङ्का न कार्येत्याह–बलमिति । बलं मत्प्रेमरूपं तथा त्वयि मे प्रेमास्ति येन त्वदुक्तं न कुर्यामित्यसंभावितम् सर्वथा तव प्रीतिं प्रीतिविषयं करिष्यामि यथान्यथेदं तदा मे धर्मो न फलदो भवेदिति भावः ॥ १० ॥

रा० टी०–बलमिति । सुकृतेन शोभनक्रियाविशिष्टकायव्यापारेणैव ॥ १० ॥

गो० टी०–बलमिति । आत्मनि बलं त्वयि विद्यमानं दृष्टिचित्तापहारिसौभाग्यबलम् ॥ १० ॥

११] ति० टी०–तदर्थमनास्तस्मिन्निजाभिमर्तेऽर्थे मनो यस्याः सा तदभिप्रायं स्वाभिमतार्थसंपादनाभिप्रायमागतं प्राप्तविषयं ज्ञात्वा निर्माध्यस्थ्यान्माध्यस्थ्याभावमवलम्ब्य ल्यब्लोपेऽव्ययीभावात्पञ्चमी स्वपुत्रपक्षपातेनेति यावत् । हर्षाद्राज्ञः स्ववशत्वदर्शनजात् । दुर्वचं शत्रुभिरपि वक्तुमशक्यम् ॥ ११ ॥

रा० टी०–सेति । तदर्थमनाः तेषां देवानामर्थे मनो यस्याः सा तं रामस्त्वया सेव्य इत्याकारकमभिप्रायमागतं निवेदितवन्तं राजानं निर्माध्यस्थ्यात् नितरां माध्यस्थ्यस्य मध्यस्थधर्मस्य अत् प्राप्तिर्यस्मिन् तदुर्वचमन्यैर्वक्तुमशक्यं वचो बभाषे । आगतमित्यत्रान्तर्भावितण्यर्थः कर्तरि निष्ठा ॥ ११ ॥

गो० टी०–सेति । तदर्थमनाः मन्थरोपदिष्टरामविनाशनपूर्वकभरताभिषेकरूपार्थमनाः अभिप्रायमागतं स्वाभिमतशपथं प्राप्तं निर्माध्यस्थ्यात् निर्गतमध्यस्थभावात् पक्षपातादित्यर्थः ११

१२] ति० टी०–तेन वाक्येन त्रिवाचा रामशपथपूर्वकस्ववचनक्रियावाक्येन । अभ्यागतमन्तकमिव घोरं राज्ञः प्राणहरं तमात्मनोऽभिप्रायं व्याजहार व्याहर्तुं निश्चितवती ॥ १२ ॥

रा० टी०–तद्वचनप्रभावं वर्णयन्नाह–तेनेति । आत्मना जीस्वभावस्य व्या आच्छादकेन अतिचातुर्यविशिष्टेनेत्यर्थः । तेन वाक्येन अभ्यागतं स्वप्रतापेन सर्वत्र पूर्णमभिप्रायं गूढाभिप्रायविशिष्टमन्तकं देवानां बन्धकं तं रावणं जहार जघानेव, कैकयीवचनभवणमात्रेण रक्षसां संतापो जात इति तात्पर्यम् । अत एव बभाषे इत्यनेन न पौनरुक्त्यम् । संवरणार्थकव्येञ्धातुप्रकृतिककर्तृकिबन्तप्रकृतिकतृतीयान्तं व्येति ॥ १२ ॥

गो० टी०–उक्तमर्थं सविशेषमाह–तेनेति । तेन वाक्येन शपथपूर्वकं त्वदभिमतं करिष्यामीत्युक्तदशरथवचनेन ॥ १२ ॥

---

१ जीवेयमिति गो. रा. पाठः । २ वै वेवीति रा. पाठः । ३ वेति गो. पाठः । ४ मामिति रा. पाठः । ५ मां विशङ्कितुमिति गो. रा. पाठः । ६ दुःसहमिति गो. पाठः । ७ मायत्तमिति गो. पाठः ।

यथाक्रमेण शपसे वरं मम ददासि च । तच्छृण्वन्तु त्रयस्त्रिंशद्देवाः सेन्द्रपुरोगमाः ॥ १३ ॥
चन्द्रादित्यौ नभश्चैव ग्रहा रात्र्यहनी दिशः । जगच्च पृथिवी चेयं सगन्धर्वाः सराक्षसाः ॥ १४ ॥
निशाचराणि भूतानि गृहेषु गृहदेवताः । यानि चान्यानि भूतानि जानीयुर्भाषितं तव ॥ १५ ॥
सत्यसंधो महातेजा धर्मज्ञः सत्यवाक्शुचिः । वरं मम ददात्येष सर्वे शृण्वन्तु दैवताः ॥ १६ ॥
इति देवी महेष्वासं परिगृह्याभिशस्य च । ततः परमुवाचेदं वरदं काममोहितम् ॥ १७ ॥
स्मर राजन्पुरा वृत्तं तस्मिन्देवासुरे रणे । तत्र त्वां च्यावयच्छत्रुस्तव जीवितमन्तरा ॥ १८ ॥
तत्र चापि मया देव यत्त्वं समभिरक्षितः । जाग्रत्या यतमानायास्ततो मे प्रददौ वरौ ॥ १९ ॥
तौ दत्तौ चै वरौ देव निक्षेपौ मृगयाम्यहम् । तवैव पृथिवीपाल सकाशे रघुनन्दन ॥ २० ॥

१३] ति० टी०—राजप्रतिज्ञाया दुष्करार्थविषयत्वेन वैपरीत्यमाशङ्क्य तां प्रतिज्ञामशेषसाक्षीकरणेन स्थिरयति—यथाक्रमेणेति । अतिप्रियपुत्रसुकृतादिक्रमेण शपसि शपथं करोषि तत्पूर्वकं वरं च मम ददासि दातुं निश्चितवानसि तत्तव वाक्यम् ॥ १३ ॥

रा० टी०—तद्वचनमेवाह—यथेत्यादिभिः । यथा येन क्रमेण शपसे शपथं करोषि वरं ददासि च तेन क्रमेण तत्तव भाषितं देवाः देवताविशेषाः चन्द्रादयश्च निशाचरादयश्च शृण्वन्तु तव भाषितं जानीयुश्च । श्लोकत्रयमेकान्वयि ॥ १३—१६ ॥

गो० टी०—दशरथवाक्यं दृढीकर्तुं नरस्य धर्माधर्मसाक्षिभूता देवताः श्रावयति—यथाक्रमेणेति । क्रमेण प्रियपुत्रसुकृतक्रमेण यथा शपसि वरं ददासि च तथा तच्छृण्वन्त्विति संबन्धः ॥ १३ ॥

१४—१५] ति० टी०—जगत्परोक्षस्वर्गादिभुवनदेवता । पृथिवी प्रत्यक्षभुवनदेवता ॥ १४ ॥ १५ ॥

गो० टी०—चन्द्रादित्याविनि । ग्रहाः नवग्रहाः जगत् लोकः ' लोको विष्टपं भुवनं जगत् ' इत्यमरः । लोकश्चात्र स्वर्ग एव ॥ १४—१६ ॥

१६] ति० टी०—सर्वे दैवता देवाः ' दैवतानि वा पुंसि ' इति कोशः ॥ १६ ॥

रा० टी०—देवान् साक्षित्वेन संस्थाप्य तदधिपतीन् संस्थापयन्ती आह—सत्येति । सत्यवाक् सत्यवक्ता अत एव सत्यसंधः सत्यप्रतिज्ञः राजा मम वरं ददाति अतः सर्वे दैवताः देवतानामिमे नियन्तारो दैवताः ब्रह्मादयः शृण्वन्तु अत एव न पौनरुक्त्यम् ॥ १६ ॥

१७] ति० टी०—परिगृह्य परिवर्तनाभिवर्त्य अभिशस्य सत्यसंध इत्यादिना स्वकार्यस्थैर्याय स्तुत्वा च ॥ १७ ॥

रा० टी०—इतीति । महेष्वासं महाचापविशिष्टं राजानमिति अनेन प्रकारेण परिगृह्य वशीकृत्य प्रशस्य च ततः परिग्रहणादिहेतोः काममत्यन्तमोहितं कृतानेकविधतर्कं वरदं राजानं परमन्यदिदमुवाच ॥ १७ ॥

गो० टी०—इतीति । परिगृह्य धर्मपाशेन संयम्य अभिशस्य सर्वा देवताः साक्षित्वेन शृण्वन्त्वित्युद्घुष्य ॥ १७ ॥

१८] ति० टी०—तद्वाक्यमाह—स्मरेत्यादि । तत्र रात्रियुद्धे शत्रुः शम्बरस्तव जीवितमन्तरा प्राणं विना त्वां च्यावयत्प्रच्युतवीर्यमकरोत् अडभाव आर्षः ॥ १८ ॥

रा० टी०—तद्वचनमेवाह—स्मरेति । तत्र रात्रौ तस्मिन्प्रसिद्धे देवासुरे रणे शत्रुः शम्बरः तव जीवितमन्तरा विना त्वां च्यायवत् वीर्यहीनमकरोत् आगमशास्त्रस्यानित्यत्वाद्दृढविरहः ॥ १८ ॥

गो० टी०—स्मरेति । पूर्ववृत्तमेवाह—तत्रेति । तत्र रात्रियुद्धे अन्तरा मध्ये तव जीवितमच्यावयदचालयत् शस्त्रप्रहारादिना मूर्च्छां प्रापितवानित्यर्थः ॥ १८ ॥

१९] ति० टी०—जाग्रत्या मया यत्नतस्त्वं समभिरक्षितस्ततः स्वजीवनाय यतमानाया मम भवान्वरौ प्रददौ ॥ १९ ॥

रा० टी०—तत्रेति । तत्र तस्यामवस्थायां जाग्रत्या मया यत् यस्माद्धेतोस्त्वं समभिरक्षितस्तस्माद्धेतोः यतमानाया मे वरौ प्रददौ भवानिति शेषः संबन्धसामान्यविवक्षया षष्ठी ॥ १९ ॥

गो० टी०—तत्रेति । यतमानायाः सारथ्ये यत्नं कुर्वाणायाः ॥ १९ ॥

२०] ति० टी०—तौ वरौ तवैव सकाशे निक्षेपभूतौ त्वय्येव स्थापिताविदानीं त्वया दत्तौ स्वीकर्तुं मृगयाम्यन्वेषयामि ॥ २० ॥

रा० टी०—ताविति । तव सकाशे त्वत्समीपे निक्षेपौ न्यासभूतत्वेन स्थापितौ तौ दत्तौ वरौ मृगयामि अन्वेषयामि वाञ्छामीत्यर्थः ॥ २० ॥

गो० टी०—तौ त्विति । हे पृथिवीपाल ! तव सकाशे एव निक्षेपौ निक्षेपत्वेन स्थापितौ तौ तु वरौ तावेव वरौ मृगयामि अन्वेषयामि इच्छामीत्यर्थः ॥ २० ॥

१ शपसीति गो. पाठः । २ साग्नीति गो. पाठः । ३ चैव सगन्धर्वा सराक्षसेति गो. पाठः । ४ सुसमाहित इति गो. पाठः । ५ तन्मे……देवता इति गो. पाठः । ६ दैवासुरे इति गो. पाठः । ७ च्याच्यावयदिति गो. पाठः । ८ प्रददा इति गो. पाठः । ९ त्विति गो. पाठः । १० सत्यसं गरोति गो. पाठः ।

तत्प्रतिश्रुत्य धर्मेण न चेदस्यसि मे वरम् । अद्यैव हि प्रहास्यामि जीवितं त्वद्विमानिता ॥ २१ ॥
वाङ्मात्रेण तदा राजा कैकेय्या स्ववशं[1] कृतः । प्रचस्कन्द विनाशाय पाशं मृग इवात्मनः ॥ २२ ॥
ततः परमुवाचेदं वरदं काममोहितम् । वरौ[2] देयौ त्वया देव तदा दत्तौ महीपते ॥ २३ ॥
तौ तावदहमद्यैव वक्ष्यामि शृणु मे वचः । अभिषेकसमारम्भो राघवस्योपकल्पितः ॥ २४ ॥
अनेनैवाभिषेकेण भरतो मेऽभिषिच्यताम्[3] । यो द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया ॥ २५ ॥
तदा देवासुरे युद्धे तस्य कालोऽयमागतः । नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ॥ २६ ॥
चीराजिनधरो धीरो रामो भवतु तापसः । भरतो भजतामद्य यौवराज्यमकण्टकम्[4] ॥ २७ ॥
एष मे परमः कामो दत्तमेवं वरं वृणे । अद्य चैव हि पश्येयं प्रयान्तं राघवं वने[5] ॥ २८ ॥

२१] ति० टी०–धर्मेण प्रतिश्रुत्य धर्मशपथपूर्वकं दानप्रतिज्ञां कृत्वा ॥ २१ ॥

रा० टी०–तदिति । प्रतिश्रुत्य दास्यामीति प्रतिज्ञाय प्रहास्यामि त्यक्ष्यामि त्वद्विमानिता त्वत्कर्तृकावमानं प्राप्ता ॥२१॥

गो० टी०–तदिति । वरमिति जात्यैकवचनम् ॥ २१ ॥

२२–२३] ति० टी०–कैकेय्या स्वसौन्दर्यनिमित्तकाममोहेन स्ववशे कृतो राजा वाङ्मात्रेण पूर्वकालिकवरदानप्रतिवचनमात्रेण स्वविनाशाय मृग इव तत्प्रतिवचनदानरूपं पाशं प्रचस्कन्द प्रगतवान् । प्रकृत्यादित्वात्प्रातिपदिकार्थेऽपि तृतीया वाङ्मात्रेणेति ॥ २२ ॥ २३ ॥

रा० टी०–वाङ्मात्रेणेति । तदा स्वोक्तिकाले वाङ्मात्रेण विना सूर्येण मृगो नित्यं मृगविशिष्टश्चन्द्र इव केकय्या स्ववशीकृतो राजा शाय देवानां मङ्गलाय आत्मानं स्वस्य पाशं पस्य प्रजापालनस्य अंशं व्याप्तिं प्रचस्कन्द जग्राह, स्नेहस्यापि त्यागेन प्रजापालनं कर्तव्यमिति बुद्धिं चकारेत्यर्थः । सूर्ये चन्द्रवशीकरणत्वं तु चन्द्रप्रकाशनिवर्तकत्वेन, किं च विना चन्द्रेण मृग इव वशीकृत इत्यर्थः प्रसिद्धं च मृगवशीकरणत्वं चन्द्रे एतेन केकय्यभिप्रायो राज्ञा ज्ञात इति ध्वनितम् तथा च मात्रिकाकोशः ' विः पक्षी गरुडः सूर्यो जलधिः सोम उच्यते ' इति ॥ २२ ॥

गो० टी०–वाङ्मात्रेणेति । वाङ्मात्रेण पूर्वदत्तवरस्मारकवचनमात्रेण कैकेय्या स्ववशे कृतः राजा वाङ्मात्रेण मृगशब्दादुकारिणा लुब्धककथितेन आत्मनो विनाशाय पाशं मृग इव वागुरां मृग इव धर्मपाशं प्रचस्कन्द गतवान् स्कन्दिर् गतिशोषणयोरिति धातुः । वरप्रदानमङ्गीचकारेत्यर्थः । यद्वा वागुरां प्राप्तो मृग इव प्रचस्कन्द शोषणं प्राप्त इत्यर्थः ॥ २२ ॥

रा० टी०–वरयोर्दुर्देयत्वेन पुनः प्रार्थयन्ती आह–तत इति । काममत्यन्तं मोहितं तर्कितवन्तं राजानमुवाच । तद्वचनमेवाह–तदा देवासुरयुद्धे त्वया दत्तौ वरौ देयौ ॥ २३ ॥

गो० टी०–तत इत्यादि ॥ २३ ॥

२४] ति० टी०–वक्ष्यामि मम दातव्यौ वराविमाविति विभज्य वक्ष्यामि । तद्वच आह–अभिषेकेति ॥ २४ ॥

रा० टी०–नन्वौ वरौ याचसे इत्यत आह–ताविति । मे वचः शृणु राघवस्य रामस्याभिषेकसमारम्भः त्वया कल्पितः अनेन अभिषेकेणाभिषेकसामग्र्या भरतोऽभिषिच्यतां रामाभिषेको निवर्त्यतामिति तात्पर्यम् इत्येको वरो बोध्यः । सार्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०–ताविति । तौ वरौ वक्ष्यामि तौ वरौ विभज्य प्रदातुं प्रकारं वक्ष्यामीत्यर्थः ॥ २४ ॥

गो० टी०–अभिषेकसमारम्भ इति । अभिषेकसमारम्भः अभिषेकसामग्री य इति शेषः । अभिषेकेण अभिषेकसामग्र्या ॥ २५ ॥ २६ ॥

२५–२७] ति० टी०–यः कल्पितोऽनेनेति योजना २५–२७

रा० टी०–य इति । तस्य द्वितीयस्यापि काल आगतः ॥२५॥

रा० टी०–द्वितीयं वरमेवाह–तवेति । रामस्तापसो भवतु अर्धद्वयमेकान्वयि ॥ २६ ॥

गो० टी०–नवेति । चीरं वल्कलम् ॥ २७ ॥

रा० टी०–उपसंहरन्ती आह–भरत इति । अकण्टकं विघ्नरहितं कामः इच्छा ॥ २७ ॥

गो० टी०–विलम्बव्याहत्यर्थमाह–भरत इत्यादिना । दत्तमेव नतु नूतनं किंचिदर्थये ॥ २८ ॥ २९ ॥

२८] ति० टी०–दत्तमेव वृणे न स्वपूर्वम् न क्षुत्तमर्णेनाधमर्णात्स्वार्थग्रहणे तस्य पीडा भवतीति न कश्चिद्दोषः । अथ चैवेत्यनेन कालविलम्बो निराकृतः ॥ २८ ॥

रा० टी०–अद्येति । प्रयान्तं गच्छन्तं राघवं रामम् । अर्धं पृथक् ॥ २८ ॥

१ स्ववशे इति गो. स्ववशीकृत इति रा. पाठः । २ यौ मे इति गो. पाठः । ३ अभिषेच्यतामिति गो. पाठः । ४ दैवासुरे इति गो. पाठः । ५ एवमिति रा. पाठः । ६ वनमिति गो. पाठः ।

स राजराजो भव सत्यसंगरः कुलं च शीलं च हि जन्म रक्ष च ।
परत्र वासे हि वदन्त्यनुत्तमं तपोधनाः सत्यवचो हितं नृणाम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्ड एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ।

दशरथस्तु रामगुणान्प्रशस्य तस्य वननिर्वासने दोषाभावं दर्शयित्वा ईदृग्वरयाचननिर्बन्धात्कैकेयीं शिथिलयितुं प्रायतत सा तु शैब्यादीन्दृष्टान्तीकृत्य तादृग्भवान्वरदानेनैव पौरुषभागिति स्वनिर्बन्धं द्विर्बबन्ध । स तु परुषोक्तिभिस्तां विगर्ह्य निर्बन्धं त्याजयितुं पादपतनेनाऽपि प्रायतत ।

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः । चिन्तामभिसमापेदे मुहूर्तं प्रतताप च ॥ १ ॥
किं नु मेऽयं[1] दिवास्वप्नश्चित्तमोहोऽपि वा मम । अनुभूतोपसर्गो वा मनसो वाप्युपद्रवः ॥ २ ॥

२९] ति० टी०—सत्यसंगरः सत्यवचाः संपूर्वाद्गिरतेः कथनार्थात्कर्मण्यप् । तेनैव हेतुना कुलादिकं रक्ष जन्मात्र भावि । तदेवाह—परत्रेति ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्ड एकादशः सर्गः ॥ ११ ॥

रा० टी०—राजानं प्रोत्साहयन्ती आह—स इति । सः रघुकुलोद्भवः सत्यसंगरः सत्यवाक् भव तेन कुलादित्रयं रक्ष । तत्र हेतुः परत्र सर्वोत्कृष्टे वासे अनुत्तमं परमोत्तमं निमित्तं सत्यवचो वदन्ति अत एव नृणां हितम् ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्ड एकादशः सर्गः ॥ ११ ॥

गो० टी०—सत्यस्यावश्यकर्तव्यत्वमाह—स इति । राजराजः स त्वं सत्यसंगरः सत्यप्रतिज्ञः भव तेन सत्यसंगरत्वेन कुलादित्रयं रक्ष । सत्यस्य रक्षकत्वमुपपादयति—परत्रेति । नृणां हितं सत्यवचः परत्रवासे स्वर्गलोकादिवासे अनुत्तमं अत्यन्तोत्तमसाधनं वदन्ति ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने श्रीमदयोध्याकाण्डव्याख्यान एकादशः सर्गः ॥ ११ ॥

१] ति० टी०—दारुणं वज्रपाततुल्यम् । श्रुतार्थस्य वास्तवत्वासंभावनया भ्रम इत्येव निश्चित्य किंदोषजोऽयं भ्रम इति चिन्तां प्रपेदे । युक्त्या भ्रमत्वज्ञानेऽपि तदधिष्ठानापरोक्ष्यं यावदहिभ्रमादेस्तत्कार्यभयादिकारिताया दृष्टत्वात्प्रतताप च ॥ १ ॥

रा० टी०—तत इति । ततः कैकेय्युक्त्यनन्तरं दारुणं रामवियोगप्रारब्धभङ्गकार्याभावोभयबोधकत्वेन श्रवणानर्हं कैकेय्या वचः श्रुत्वा चिन्तामभिसमापेदे प्राप अत एव प्रतताप । नन्वत्र संतापबोधकवचनश्राविकात्वेन कैकेय्याः पातिव्रत्यभङ्ग इति तु न भ्रमितव्यं रावणादिवधद्वारा एतद्वचःप्रत्यानहेतुभूतत्वेनास्य निम्बाद्यौषधतुल्यत्वेनादोषात् ॥ १ ॥

गो० टी०—अथ सत्यपाशबद्धस्य राज्ञः श्लोकं वर्णयति—तत इति । प्रतताप मुमूर्छेति यावत् ॥ १ ॥

२] ति० टी०—अथ भ्रमत्वनिश्चयाय त्यक्ततापो भ्रमहेतूंश्चिन्तयति । स्वप्नार्थस्य स्वक्रियाकरणासामर्थ्याद्भ्रमविषयत्वम्, स्वप्नदृष्टोऽयमर्थो मिथ्यैव न कदापि भवतीति भावः । स्वप्नोऽपि कदाचित्संवादीत्यतो दिवेति, दिवास्वप्नो न कदापि संवादीति भावः । अपि वा अथवा । मम जाग्रत्यपि दुरदृष्टजचित्तमोहो वैचित्र्यापरपर्यायो वस्तुतत्त्वज्ञानासामर्थ्यमनु पश्चाज्जातः सभास्थितिपर्यन्तमसत्त्वाद्भूतोपसर्गो वा ग्रहावेशजचित्तवैकल्यं वा । यत्त्वनुभूतोपसर्गोऽनुभूतनाशः सुषुप्तिरित्यर्थ इति तन्न, सुषुप्तौ ज्ञानाभावात् । मनस उपद्रवो वा आधिव्याधिजनितोपप्लवो वा ॥ २ ॥

रा० टी०—चिन्तास्वरूपमाह—किमिति । कैकेय्या अपि रामविषयकातिप्रीतिमतीत्वादियमुक्तिर्न संभवतीति स्वप्नोऽयमित्युक्तं तस्यापि जाग्रत्यसंभवेन चित्तमोह इत्युक्तम् । चित्तमोहो नामोष्मादिजनितचित्तभ्रमः मोहकारणीभूतस्योष्मादेरभावादुक्तम् अनुभूतोपसर्ग इति । अनुभूतानां जन्मान्तरे साक्षात्कृतानामुपसर्गः प्रारब्धवशात्स्मरणमिति तदर्थः रामनित्यपरिकरत्वेन प्रारब्धादेरभावादुक्तं मनस उपद्रव इति, स्वभावसिद्धमनसोऽप्रधावनमित्यर्थः ॥ २ ॥

गो० टी०—चिन्तां विष्टणोति—किं न्विति । किंन्विति सामान्याकारेण चिन्ता स्वदुःखावहस्य रामाभिषेकविघ्नस्य सत्स्वभावया कैकेय्या कथनासंभवादिदं पारमार्थिकं न भवति स्वप्नो यदि वा अथवेदानीं निद्राया असंभवाच्चित्तमोहः भ्रमो वा इदानीं भ्रमकारणाभावादनुभूतोपसर्गो वा जन्मान्तरानुभूतानामर्थानामुपसर्गः भावना वा स्मरणमिति यावत् जन्मान्तरेऽप्येवंविधावस्थाया असंभावितत्वादाह—मनस उपद्रवो वा रोगजविकारो वा उन्माद इति यावत् । प्रतताप चेत्येतदनुवदति—इतीति ॥ २ ॥

---

१ च इति गो. पाठः ।

इति संचिन्त्य तद्राजा नाध्यगच्छत्तदा सुखम् । प्रतिलभ्य ततः संज्ञां कैकेयीवाक्यतापितः ॥ ३ ॥
व्यथितो विक्लवश्चैव व्याघ्रीं दृष्ट्वा यथा मृगः । असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ॥ ४ ॥
मण्डले पन्नगो रुद्धो मन्त्रैरिव महाविषः । अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ॥ ५ ॥
मोहमापेदिवान्भूयः शोकोपहतचेतनः । चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः ॥ ६ ॥
कैकेयीमब्रवीत्क्रुद्धो निर्दहन्निव तेजसा । नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ॥ ७ ॥
किं कृतं तव रामेण पापे पापं मयापि वा । सदा ते जननीतुल्यां वृत्तिं वहति राघवः ॥ ८ ॥
तस्यैवं त्वमनर्थाय किंनिमित्तमिहोद्यता । त्वं मयात्मविनाशाय भवनं स्वं निवेशिता ॥ ९ ॥
अविज्ञानान्नृपसुता व्याला तीक्ष्णविषा यथा । जीवलोको यदा सर्वो रामस्याह गुणस्तवम् ॥१०॥
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् । कौसल्यां चैव सुमित्रां चैव त्यजेयमपि वा श्रियम् ॥११॥

३] ति० टी०—राजा इति संचिन्त्य तद्भ्रमकारणं नाध्यगच्छत् । अतस्तदाऽसुखं मूर्च्छाकरं महद्दुःखं चाध्यगच्छत् । ततः संज्ञां स्मृतिं लब्ध्वा कैकेयीवाक्यस्मरणतापितः ॥ ३ ॥

रा० टी०—इतीति । ततः चिन्तनात् संज्ञां तादृशानां मनसामनवस्थितत्वाभावेन तात्त्विक्येषा केकय्युक्तिरिति विचारेण वियोगनिश्चयं प्रतिलभ्य केकयीवाक्यतापितः प्राप्तमनोव्यथः अत एव व्यथितः दुःखहेतुकचालितहस्तादिः राजा उच्छ्वसन् सन् सुखं नाध्यगच्छत् प्राप्नोत् । द्वयोरेकत्रान्वयः ॥ ३ ॥ ४ ॥

गो० टी०—प्रतिलभ्येत्यादि । श्लोकत्रयमेकान्वयम् । व्यथितः दुःखितः विक्लवः विह्वलः 'विक्लवो विह्वलः' इत्यमरः । मण्डले अहितुण्डिकयन्त्रमण्डले ॥ ३–६ ॥

४] ति० टी०—अतएव व्यथितत्वादिगुणविशिष्टः विक्लवो दीनः ॥ ४ ॥

५–६] ति० टी०—मण्डले यन्त्रमण्डले मन्त्रकृते अहो धिगिति वाचमुक्त्वा भूयः पुनर्मोहमापेदिवान् ॥ ५ ॥ ६ ॥

रा० टी०—मण्डल इति । मण्डले अभिमन्त्रितदेशविशेषे पन्नगः सर्पः भूयोऽधिको यः शोकः तेन उपहता चेतना बुद्धिर्यस्य सः मोहं कर्तव्याविवेकराहित्यं आपेदिवान् प्राप । सार्धश्लोक एकान्वयी ॥ ५ ॥

रा० टी०—चिरेणेति । संज्ञां केकयीबोधनयुक्तिम् । क्रुद्धः संभावितरामवियोगहेतुककोपविशिष्टः तेजसा शरीरप्रभाविशेषेण । अर्धद्वयमेकान्वयि एवमुत्तरत्रापि ॥ ६ ॥

७] ति० टी०—तेजसा दुःखजेन निर्दहन्निव ज्वलन्निव अनेन मृगदुःखशमनस्य व्याघ्रीदण्डेनैव कैकेयीदण्डेन स्वदुःखशमनस्याशक्यता ध्वन्यते । नृशंसे क्रूरे दुष्टचारित्रे दुष्टव्यापारे ॥७॥

रा० टी०—तद्वचनाकारमाह—नृशंसे इति । नृशंसे क्रूरास्वेन प्रतीयमाने पापे पापविशिष्टक्रीकर्मसदृशकर्मकारिणि आचारक्लिन्नः अत एव अस्य मम कुलस्य विनाशिनि विनाशनशीले कुलविनाशनमभिषेकोत्साहविनाशनद्वारा बोध्यम् । किं कृतमकार्यमिति शेषः ॥ ७ ॥

गो० टी०—नृशंस इति । किं पापं कृतमित्यन्वयः । पापम् अपराधः ॥ ७ ॥

८] ति० टी०—पापमनिष्टम् । पापे पापमते ते त्वयि वृत्तिं शुश्रूषाम् वहति करोति ॥ ८ ॥

रा० टी०—यदेति । यदा यस्मिन्काले जननीतुल्यां मातृसेवासदृशीं ते वृत्तिं सेवां राघवो रामो वहति करोति तस्मिन्नेव काले तस्य रामस्य अनर्थाय त्वमुद्यता कृतप्रयत्ना इह अस्मिन्विषये किं निमित्तम् ॥ ८ ॥

गो० टी०—यदेति । वृत्तिं शुश्रूषां तस्यैव तदैवेत्यपि बोध्यं तस्यैव नतु तत्पुत्रादेः तदैव नतु कालान्तरे शुश्रूषाभावदशायाम् ॥ ८ ॥

९] ति० टी०—तस्यानर्थचिन्तानर्हस्य । एवमनर्थाय किं निमित्तं केन निमित्तेन । अयं स्वकृत एवानर्थ इत्याह—त्वमिति ॥ ९ ॥

रा० टी०—त्वमिति । आत्मविनाशाय स्वविध्वंसाय स चाभिषेकप्रतिज्ञाविध्वंसद्वारा बोध्यः । व्याली सर्पिणी ॥ ९ ॥

गो० टी०—त्वमिति । नृपसुतेत्यत्रेतिकरणं द्रष्टव्यम् ९–१३

१०] ति० टी०—अविज्ञानादिष्टसाधनत्वभ्रान्त्या यदा यतः ॥ १० ॥

रा० टी०—रामाभिषेको दुर्निवार इति बोधयन्नाह—जीवेति । इष्टं इच्छाविषयीभूतं सर्वपूज्यं वा ॥ १० ॥

११] ति० टी०—उद्दिश्य व्याजीकृत्य त्यक्ष्यामि श्रियं राज्यम् ॥ ११ ॥

रा० टी०—कौसल्यामिति । जीवितं जीवनं पितृवत्सलं पितृभक्तम् एतेन रामानुरागस्य परा काष्ठा सूचिता ॥ ११ ॥

१ अभ्यगच्छदिति गो. पाठः । २ चिरादिति गो. पाठः । ३ ताडित इति गो. पाठः । ४ प्रदहन्निति गो. पाठः । ५ चश्रमेति गो. पाठः ।

जीवितं चात्मना रामं नत्वेव पितृवत्सलम् । परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ॥ १२ ॥
अपश्यतस्तु मे रामं नष्टं भवति चेतनम् । तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ॥ १३ ॥
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् । तदलं त्यज्यतामेष निश्चयः पापनिश्चये ॥ १४ ॥
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे । किमर्थं चिन्तितं पापे त्वया परमदारुणम् ॥ १५ ॥
अथ जिज्ञाससे मां त्वं भरतस्य प्रियाप्रिये । आस्तु यत्तत्त्वया पूर्वं व्याहृतं राघवं प्रति ॥ १६ ॥
स मे ज्येष्ठसुतः श्रीमान्धर्मज्येष्ठ इतीव मे । तत्त्वया प्रियवादिन्या सेवार्थं कथितं भवेत् ॥ १७ ॥
तच्छ्रुत्वा शोकसंतप्ता संतापयसि मां भृशम् । आविष्टासि गृहे शून्ये सा त्वं परवशंगता ॥ १८ ॥

१२] ति० टी०—आत्मना स्वव्यापारेण जीवितं तत्साधनं रामं नत्वेव त्यजेयम् । परा उत्कृष्टा ॥ १२ ॥

रा० टी०—परेति । परा अत्युत्कृष्टा अग्रजं रामं राममपश्यतो मे तु चेतनं चैतन्यं नष्टं भवति ॥ १२ ॥

१३] ति० टी०—चेतनं चैतन्यम् ॥ १३ ॥

रा० टी०—तिष्ठेदिति । लोको भुवनं सस्यमारोपितशाल्यादि ॥ १३ ॥

१४] ति० टी०—यतो मद्विनाशे वैधव्यप्राप्तिस्तत्तस्मादेष निश्चयो रामविवासनरूपस्त्यज्यताम् ॥ १४ ॥

रा० टी०—तदिति । तत्तस्मात् मम जीवनहेतोः एषः रामाभिषेकनिवारणविषयको निश्चयो बुद्धिः एषः प्रणयसूचकबद्धयुगलकरः ॥ १४ ॥

गो० टी०—तदलमिति । एष निश्चयः रामविवासनरूपनिश्चयः । अपि ते चरणाविति । अपिः प्रभार्थकः ॥१४॥१५॥

१५] ति० टी०—अपि ते चरणाविति धर्मशास्त्रतोऽत्यनुचितमपि कामशास्त्रमर्यादया त्वत्प्रीत्यर्थमिति शेषः ॥ १५ ॥

रा० टी०—किमिति । परमदारुणमतिक्रूरम् । अर्धं पृथक् १५

१६] ति० टी०—अथेत्यादि । अथ भरतस्य प्रियाप्रिययविषये मां त्वं जिज्ञाससे भरतो राज्ञः प्रियो न वेति तदास्तु । राघवं भरतं प्रति यत्त्वया व्याहृतं तत्सर्वं भरतस्य, रामविवासनं त्वयोग्यमेवेति शेषः । त्वयापि पूर्वं तस्य बहुशो गुणानां कथनादित्याशयः ॥ १६ ॥

रा० टी०—पक्षान्तरं प्रकल्प्याह—अथेति । भरतस्य प्रियाप्रिये भरतकर्मकमभिष्टे प्रीत्यप्रीती भरतः राज्ञः प्रियः अप्रियो वेत्यर्थः जिज्ञाससे ज्ञातुमिच्छसि चेत्तर्हि राघवं भरतं प्रति यत् पूर्वं त्वया व्याहृतं भरतोऽभिषिच्यतामित्यनेनोक्तं तदस्तु भरत एवाभिषिच्यतामित्यर्थः एतेन रामविवासनमनुचितमनर्थकं चेति बोधितम् ॥ १६ ॥

गो० टी०—अथेत्यादि । श्लोकत्रयमेकान्वयम् । अथेति प्रश्ने त्वं भरतस्य प्रियाप्रिये विषये मां जिज्ञाससे ज्ञातुमिच्छसि तदिदानीमपि भरतोऽभिषिच्यतामिति यत्तदस्तु तदनुचितं त्वया पूर्वं राघवं प्रति स मे ज्येष्ठः सुत इत्यादि यद्व्याहृतं तत् प्रियवादिन्या त्वया सेवार्थं मम मनोरञ्जनार्थं रामकृतशुश्रूषार्थं वा कथितं भवेत्, रामविवासनोक्तिस्तेन विरुद्धेत्यर्थः । परीक्षार्थमपि भरतोऽभिषिच्यतामित्येव वक्तुमुचितं नतु रामो विवास्यतामित्येतत् पूर्वापरविरोधादिति भावः । रामविवासनोक्तिश्च भरते प्रीतिपरीक्षार्थमेवास्त्वित्यत आह—तदिति । तत् रामाभिषेचनं श्रुत्वा शोकसंतप्ता सती मां भृशमतिनिर्बन्धेन संतापयसि किंच परवशं परबोधनवशं गता सती शून्यं गृहं कोषागारमाविष्टासि प्रविष्टासि इदं सर्वं परीक्षार्थत्वेन संगच्छत इति भावः । 'शून्यैर्ग्रहैः' इतिपाठे शून्यैर्ग्रहैराविष्टा पिशाचादिभिराविष्टेत्यर्थः ॥ १६–१८ ॥

१७] ति० टी०—इतीवेत्येतत्प्रकारं यत्त्वया कथितं पूर्वं तन्मच्चित्तावर्जनेन सेवार्थमेव मया स्वसेवाकरणार्थमेव भवेदिति वितर्कः संप्रत्यन्यथोक्तेरिति भावः ॥ १७ ॥

रा० टी०—नन्वभिषेकोचितज्येष्ठपुत्ररामस्येह सत्त्वे कथमभिषेकानुचितकनिष्ठभरतस्याभिषेकः स्यादित्यत आह—स इति । मे ज्येष्ठसुतो रामः यस्माद्धर्मज्येष्ठः सर्वधर्मवच्छ्रेष्ठः तत्तस्माद्धेतोः प्रियवादिन्या त्वया सेवार्थं स्वसेवाकारणार्थमेव कथितं कथितो भवेत् तवायत्त एव तिष्ठेदित्यर्थः एतेन रामस्याभिषिक्तत्वेऽपि तस्य त्वदायत्ततया तवेप्सितसिद्धिर्भविष्यत्येवेति ध्वनितम् । कथितमिति सामान्ये नपुंसकम् ॥ १७ ॥

१८] ति० टी०—यतस्तदाभिषेचनं श्रुत्वा इदानीं शोकसंतप्तासि मां च वरनिर्बन्धेन ततो निवारयन्ती भृशं तापयसि, अतो मया स्वसेवाकरणाय मद्बुद्धनार्थ एव ते राम साधुत्ववाद इत्याशयः । अथवा एवंविधचिन्तापि महाकुलजायां त्वयि असंभावितैव, किं तर्हीदं तत्राह—शून्ये गृहे भूता दिभिराविष्टासि तत्तुल्येन वाक्येन स्विदावेशितदुष्टमतिरसि अतः परवशंगता एवं वदसीत्यर्थः ॥ १८ ॥

रा० टी०—तदिति । तत् रामाभिषेकप्रयतनं श्रुत्वा भृशमत्यन्तं शोकसंतप्ता त्वं मां संतापयसि तत्र हेतुमाह—परेषां प्रार्थनाकर्तृदेवादीनां वशं गता प्राप्ता त्वं शून्ये गृहे आविष्टा प्रविष्टासि ॥ १८ ॥

१ आत्मन इति गो. रा. पाठः । २ नष्टा ... ... चेतनेति गो. पाठः । ३ किमिदमिति गो. पाठः । ४ चिन्त्यते इति रा. पाठः । ५ अस्त्विति गो. रा. पाठः । ६ ज्येष्ठः सुत इति गो. पाठः । ७ गृहं शून्यमिति गो. पाठः ।

इक्ष्वाकूणां कुले देवि संप्राप्तः सुमहानयम् । अनयो नयसंपन्ने यत्र ते विकृता मतिः ॥ १९ ॥
नहि किंचिदयुक्तं वा विप्रियं वा पुरा मम । अकरोस्त्वं विशालाक्षि तेन न श्रद्दधामि ते ॥ २० ॥
ननु ते राघवस्तुल्यो भरतेन महात्मना । बहुशो हि स्म बाले त्वं कथाः कथयसे मम ॥ २१ ॥
तस्य धर्मात्मनो देवि वने वासं यशस्विनः । कथं रोचयसे भीरु नव वर्षाणि पञ्च च ॥ २२ ॥
अत्यन्तसुकुमारस्य तस्य धर्मे कृतात्मनः । कथं रोचयसे वासमरण्ये भृशदारुणे ॥ २३ ॥
रोचयस्यभिरामस्य रामस्य शुभलोचने । तव शुश्रूषमाणस्य किमर्थं विप्रवासनम् ॥ २४ ॥
रामो हि भरताद्भूयस्तव शुश्रूषते सदा । विशेषं त्वयि तस्मात्तु भरतस्य न लक्षये ॥ २५ ॥
शुश्रूषां गौरवं चैव प्रमाणं वचनक्रियाम् । कस्तु भूयस्तरं कुर्यादन्यत्र पुरुषर्षभात् ॥ २६ ॥

१९] ति० टी०–तदेवाह–इक्ष्वाकूणामिति । यत इक्ष्वाकुकुले महानयमनयो ज्येष्ठाभिषेकनिवृत्तिरूपः संप्राप्तः । हे नयसंपन्ने यत्रानये ते तव विकृता मतिः कारणमिति शेषः । अतस्त्वं ग्रहाविष्टेति भावः ॥ १९ ॥

रा० टी०–इक्ष्वाकूणामिति । नयसंपन्ने नीतियुक्ते विकृता त्यक्तस्वभावा अकर्तव्यं कर्तव्यत्वेन स्वीचकारेत्यर्थः ॥ १९ ॥

गो० टी०–कुलानर्थकरं चेदं वचनमित्याह–इक्ष्वाकूणामिति । नयसंपन्ने एतावत्कालं नीतिशालिनि यत्र इक्ष्वाकुकुलमध्ये ते मतिरेवमिदानीं विकृता विपरीता जाता तत्र कुले अयं संनिहितः सुमहाननयः अनर्थः संप्राप्तः, ननु सत्प्रकृतेर्विपरीतबुद्धिः कुलस्यानर्थहेतुरिति भावः ॥ १९ ॥

२०] ति० टी०–नन्वनाविष्टैवाहं वदामि नेत्याह–नहीति । न श्रद्दधामि अस्यानयस्यानाविष्टत्वबुद्धिकृतत्वमिति शेषः ॥ २० ॥

रा० टी०–ननु देवापराधः किमर्थं कल्प्यत इत्यत आह–नेति । अयुक्तं युक्तिविरुद्धं विप्रियं प्रीतिविषयीभूतार्थभिन्नं कर्मेति शेषः एतेनैतद्विरुद्धाचरणे तव स्वातन्त्र्यं नास्तीति ध्वनितम्॥२०॥

गो० टी०–पूर्वापरपर्यालोचनया त्वद्वचनं न श्रद्धेयं चेत्याह–नहीति । अयुक्तमहितमिति यावत् न श्रद्दधामि इदमहितं विप्रियकरणमिति शेषः ॥ २० ॥

२१] ति० टी०–तदेवोपपादयति–नन्विति । नन्वित्यामन्त्रणे । एतत्कथयसे वर्तमानसामीप्ये लट् अनेन यामात्पूर्वं तथा कथनं ध्वन्यते ॥ २१ ॥

रा० टी०–तत्रैव हेत्वन्तरमाह–नन्विति । राघवो रामः भरतेन ते तव बुद्धौ तुल्यः । ननु ध्रुवमेतत्, किंच भरतेन महात्मना भरतस्येनः पूज्यो भरतेनः स एव महात्मेति कर्मधारयः तेन रामेणेत्यर्थः । राघवो भरतः भरतादप्यधिका त्वत्प्रीतिः रामे आसीदित्यर्थः । तत्र हेतुः कथाः रामप्रीतिसंबन्धिनीर्वार्ताः कथयसे स्म ॥ २१ ॥

गो०टी०–त्वत्प्रीतिविरुद्धं चेदं वचनमित्याह–नन्वित्यादि । ते राघवः भरतेन तुल्यो ननु तुल्यः खलु । अत्र त्वद्वचनमेव प्रमाणमित्याह–बहुश इति । बहुश इत्यनेनाहृदयत्वव्याहृत्तिः शुबाले इत्यकुटिलत्वव्याहृत्तिः ॥ २१ ॥

२२–२४] ति० टी०–तस्य भरततुल्यप्रियस्य ॥२२–२४॥

रा० टी०–इयं तवोक्तिर्न संभवतीत्याह–तस्येति । धर्मात्मनः निखिलधर्मप्रवर्तकस्य रामस्य ॥ २२ ॥

गो० टी०–तस्येति । धर्मात्मन इत्यनेन वनवासहेतुभूताकृत्यराहित्यमुक्तम् । भीरु इति तव च धर्मभीरुत्वं क्व गतमिति भावः ॥ २२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अत्यन्तेत्यादिश्लोकद्वयेन ॥ २३ ॥ २४ ॥

गो०टी०–रामसौकुमार्यानुचितं चेदमित्याह–अत्यन्तेति २३

गो० टी०–शुश्रूषादर्शनेनापि रामो न विवासनार्ह इत्याह–रोचयसीति । तव शुश्रूषमाणस्येत्यत्र "न लोकाव्यय–" इत्यादिना निषिद्धापि षष्ठ्यार्थी बोध्या ॥ २४ ॥

२५] ति० टी०–शुश्रुषते सेवते तस्माद्रामाद्रामक्रियमाणगौरवाद्भरतस्य त्वयि विशेषमधिकं गौरवं न लक्षये ॥ २५ ॥

रा० टी०–रामे तव प्रीतिः सहेतुकेति बोधयन्नाह–राम इति । भूयोऽधिकं शुश्रूषते सेवते तस्मात् रामकर्तृकाधिकशुश्रूषणात् त्वयि त्वद्बुद्धावित्यर्थः । भरतस्य विशेषमधिकत्वं रामादिति शेषः ॥ २५ ॥

गो० टी०–शुश्रूषमाणस्येत्येतदुपपादयति–रामो हीति २५

२६] ति० टी०–शुश्रूषां सेवाम् गौरवं बहुमानम् प्रमाणं प्रतिपत्तिः प्रामाण्याद्धिरित्यन्ये वचनक्रिया उक्तकरणम् पुरुषर्षभाद्रामात् ॥ २६ ॥

रा० टी०–रामकर्तृकाधिकशुश्रूषणं द्रढयन्नाह–शुश्रूषामिति । शुश्रूषां सेवां गौरवं महत्त्वं प्रमाणमाप्तत्वं वचनक्रियामाज्ञापितसंपादनं पुरुषर्षभात् रामात् ॥ २६ ॥

गो० टी०–न केवलं शुश्रूषैवैवं वचनकारणमपि तु प्रमाणादिकमपीत्याह–शुश्रूषामिति । गौरवं प्रतिपत्तिः प्रमाणं पूजा वचनक्रिया उक्तकरणम् ॥ २६ ॥

१ अद्दधान्यहमिति गो. पाठः । २ स्विति गो. पाठः । ३ धृतात्मन इति गो. पाठः । ४ ते इति गो. पाठः । ५ मनुजेति गो. पाठः ।

बहूनां स्त्रीसहस्राणां बहूनां चोपजीविनाम् । परिवादोऽपवादो वा राघवे नोपपद्यते ॥ २७ ॥
सान्त्वयन्सर्वभूतानि रामः शुद्धेन चेतसा । गृह्णाति मनुजव्याघ्रः प्रियैर्विषयवासिनः ॥ २८ ॥
सत्त्वेन लोकाञ्जयति द्विजान्दानेन राघवः । गुरून्शुश्रूषया वीरो धनुषा युधि शात्रवान् ॥ २९ ॥
सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् । विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥ ३० ॥
तस्मिन्नार्जवसंपन्ने देवि देवोपमे कथम् । पापमाशंससे रामे महर्षिसमतेजसि ॥ ३१ ॥
न स्मराम्यप्रियं वाक्यं लोकस्य प्रियवादिनः । स कथं त्वत्कृते राम वक्ष्यामि प्रियमप्रियम् ॥ ३२ ॥
क्षमा यस्मिंस्तपस्त्यागः सत्यं धर्मः कृतज्ञता । अप्यहिंसा च भूतानां तमृते का गतिर्मम ॥ ३३ ॥

२७] ति० टी०—बहूनां स्त्रीसहस्राणां मध्ये एकयापि कृतः परिवादोऽकार्यकरणनिमित्तं समूलमयशः उपजीविनां मध्ये एकेनापि कथितोऽपवादः असूयाकल्पितं निर्मूलमयशो राघवे नोपपद्यते न विद्यते ॥ २७ ॥

रा० टी०—रामविवासने कारणाभावं विशदयन्नाह—बहूनामित्यादिचतुर्भिः । अयं भावः प्रायः स्त्रियः उपजीविनश्च परिवादापवादौ कुर्वन्ति तत्कर्तृकौ तौ राघवे रामे नोपपद्येते न प्राप्नुतः क्वापि न श्रुताविति यावत् । उपजीविनो नाम तत्पोष्यत्वसमानाधिकरणतत्समीपवासकर्तारः । समूलकाऽकीर्तिः परिवादः निर्मूलकाऽकीर्तिरपवादः ॥ २७ ॥

गो० टी०—परिवादादिकमपि रामविवासकारणं नास्तीत्याह—बहूनामिति । स्त्रीसहस्राणामुपजीविनां च संबन्धी परिवादो नोपपद्यते । बहूनामिति विशेषणेन तन्मध्ये एकया एकेन वा स्त्रीपुरुषाविशेषेण परिवादस्तत्संबन्धी परिभवविषयवादः अपवादः निन्दा वा राघवे नोपपद्यते न दृश्यते ॥२७॥

२८] ति० टी०—कुतस्तत्राह—सान्त्वयन्निति । प्रियैरिष्टसंपादनैर्गृह्णाति वशीकरोति ॥ २८ ॥

रा० टी०—सान्त्वयन्निति । शुद्धेन कपटरहितेन विषयवासिनो देशवासकर्तॄन् ॥ २८ ॥

गो० टी०—अविवासननिमित्तभूतान् भूयोगुणान् दर्शयति—सान्त्वयन्नित्यादि । अनेन वाङ्मनःकायैर्जनरञ्जकत्वमुक्तं प्रियैः अभीष्टप्रदानैः गृह्णाति संगृह्णाति ॥ २८ ॥

२९] ति० टी०—जयति जयोऽत्र स्वाधीनत्वकरणम् २९॥

रा० टी०—सत्येनेति । सत्येन मृषासंसर्गशून्यवचनेन लोकान्निःशेषजनान् जयति न्यूनीकरोति एतादृशः सत्यवक्ता कोऽपि नास्तीत्यर्थः । दानेन द्विजान् जयति वयं न गृह्णीम इति द्विजकर्तृकोक्तिमन्तरा दानप्रवाहं न निवर्तयतीत्यर्थः । शुश्रूषया सेवया गुरून् जयति अतितृप्ता वयमित्युक्तिमन्तरा पादपीडनादेर्न निवर्तते इत्यर्थः । शात्रवान् शत्रुसंबन्धियुद्धोत्साहादीन् धनुषा धनुष्प्रदर्शनमात्रेण जयति निवर्तयति ॥२९॥

गो० टी०—सत्येनेति । सत्येन भूतहितेन लोकान् स्वर्गादिवैकुण्ठपर्यन्तान् जयति स्वाधीनान् करोति दीनान्[2] दरिद्रान् दानेन धनप्रदानेन जयति वशीकरोति । गुरून् शुश्रूषया जयति स्वहितोपदेशप्रवणान् करोति । शात्रवान् शत्रून् धनुषा धनुःप्रदर्शनमात्रेण नतु बाणप्रयोगेण युधि युद्धे नतु कपटद्यूत्या जयति निरस्यतीत्यर्थः । वीर इति सर्वत्र संबध्यते दयावीरस्त्यागवीरो विद्यावीरः पराक्रमवीर इत्येवं चोलमहीपतिः कदाचित्सन्निहितं मध्यमवीथिभट्टारकं प्रति आत्मानं मानुषं मन्य इति वदन् रामः कथं जटायुषो मोक्षं दत्तवानिति पप्रच्छ सोऽपि सत्येन लोकान् जयतीत्युक्त्या महतीं बहुमतिमवाप्नवानित्यैतिह्यमत्र ज्ञेयम् ॥ २९ ॥

३०] ति० टी०—सत्यं सत्यवचः दानं पारलौकिकम् त्याग ऐहिकप्रयोजनं दानम् मित्रता सत्सु शौचं बाह्यान्तरशुद्धिः आर्जवं वज्रनाराहित्यम् ॥ ३० ॥

रा० टी०—रामगुणा न कादाचित्का इति बोधयन्नाह—सत्यमिति । सत्यादयो राघवे रामे ध्रुवाणि नित्यानि ॥३०॥

गो० टी०—सत्यादीनि च न कादाचित्कानीत्याह—सत्यमिति । तपःप्रभृतिगुणषट्कं पूर्वश्लोकेऽर्थसिद्धमनूद्यते दानं परलोकप्रयोजनं तपः ऋक्षविहितभोजननिष्टत्त्यादिरूपम् त्यागः ऐहिकप्रयोजनः प्रीत्यर्थः मित्रता सर्वसुहृत्त्वं शौचं ज्ञानजन्यशुद्धिः आर्जवं परचित्तानुवर्तित्वं विद्या तत्त्वज्ञानं गुरुशुश्रूषा गुरोः शुश्रूषा पादसंवाहनादिपरिचर्या ॥ ३० ॥

३१] ति० टी०—पापं वनवासरूपं स्वस्य पापजनकमाशंससे प्रार्थयसे । शमदमादिसंपत्त्या महर्षिसमतेजस्त्वम् ३१॥

रा० टी०—तस्मिन्निति । देवोपमे देवानुयोगिकसादृश्यप्रतियोगिनि रामे पापमभिषेकध्वंसकारणभूतादृष्टमाशंसे वाचयसि अदृष्टवशादभिषेकनिष्टत्तिर्जातेति प्रकल्प्य जना वदिष्यन्तीति तात्पर्यम् । एतेन रामस्य नादृष्टतन्त्रत्वमिति बोधितम् ॥ ३१ ॥

गो० टी०—तस्मिन्निति । आर्जवसंपन्न इति दानादिसंपत्तेरप्युपलक्षणं पापं विवासनरूपमाशंससे प्रार्थयसि ॥ ३१ ॥

३२–३३] ति० टी०—लोकस्य लोकं प्रति प्रवादिः स्वस्य कं प्रत्यप्युक्तमप्रियं वाक्यं न स्मरामि । सो[3] त्वत्कृते त्वद्वचनक्रियासंपादननिमित्तं प्रियं राममप्रियं कथं वक्ष्यामीति संबन्धः । प्रियवादिनो रामस्य तत्कर्तृकं तद्विषयकं वेत्यर्थ इति कश्चित् ॥ ३२ ॥ ३३ ॥

१ सत्येनेति गो. रा. पाठः । २ दीनानिति गो. पाठः । ३ दम इति गो. पाठः ।

मम वृद्धस्य कैकेयि गतान्तस्य तपस्विनः । दीनं लालप्यमानस्य कारुण्यं कर्तुमर्हसि ॥ ३४ ॥
पृथिव्यां सागरान्तायां यत्किंचिदधिगम्यते । तत्सर्वं तव दास्यामि मा च त्वं मृत्युमाविश ॥ ३५ ॥
अञ्जलिं कुर्मि कैकेयि पादौ चापि स्पृशामि ते । शरणं भव रामस्य माधर्मो मामिह स्पृशेत् ॥ ३६ ॥
इति दुःखाभिसंतप्तं विलपन्तमचेतनम् । घूर्णमानं महाराजं शोकेन समभिप्लुतम् ॥ ३७ ॥
पारं शोकार्णवस्याशु प्रलपन्तं पुनः पुनः । प्रत्युवाचाथ कैकेयी रौद्रा रौद्रतरं वचः ॥ ३८ ॥
यदि दत्त्वा वरौ राजन्पुनः प्रत्यनुतप्यसे । धार्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ॥ ३९ ॥
यदा समेता बहवस्त्वया राजर्षयः सह । कथयिष्यन्ति धर्मज्ञ तत्र किं प्रतिवक्ष्यसि ॥ ४० ॥

रा० टी०—नेति । योऽहं प्रियवादिनो रामस्य अप्रियं प्रीतिविषयीभूतवचनविरुद्धं लोकस्य वाक्यं लोककर्तृकवचनं न स्मरामि न श्रुतमित्यर्थः सोऽहमप्रियं कथं वक्ष्यामि ॥३२॥

गो० टी०—नेति । लोकस्य जनमात्रस्य प्रियवादिनः प्रियवदनशीलस्य किमुतास्माकमिति भावः रामस्य संबन्धि अप्रियं विवासनविषयं वाक्यं न स्मरामि स्मर्तुमपि न शक्नोमीत्यर्थः । सः तदस्मर्ता अहं त्वत्कृते परुषोक्तिमत् स्त्रीकृते रामं सर्वस्य रमयितारं प्रियं रमयितृत्वाभावेऽपि पुत्रत्वेन प्रियं प्रति कथमप्रियं वक्ष्यामि ॥ ३२ ॥

रा० टी०—इदानीं रामवियोगे मत्प्रवृत्तिर्न संभवतीति बोधयन्नाह—क्ष्मेति । गतिः प्रवृत्तिः का न काचिदित्यर्थः॥३३॥

गो० टी०—क्ष्मेति।यस्मिन् क्षमादयो वर्तन्ते तमृते ममका गतिः को वा रक्षकः, तादृशं रक्षकं कथं त्यक्ष्यामीति भावः ३३

३४] ति० टी०—गतान्तस्य प्राप्तचरमकालस्य तपस्विनः शोचनीयावस्थस्य दीनस्य कारुण्यं दयाम् ॥ ३४ ॥

रा० टी०—ममेति । वृद्धस्य वृत्तं रामसंबन्ध्यतिरिक्तवृत्तिं जहाति त्यजति इति वृद्धस्तस्य अत एव गतान्तस्य निवृत्तकालस्य कालभीतेरपि रहितस्येत्यर्थः तपस्विनः रामविषयकविचारशीलस्य अत एव दीनं रामवियोगभीतिहेतुकदीनतावि शिष्टवचनं लालप्यमानस्य पुनः पुनः कथयतो मम कारुण्यं दयां कर्तुं त्वमर्हसि रामवियोगोद्योगं न कुर्विति तात्पर्यम् ॥ ३४ ॥

गो० टी०—ममेति । गतान्तस्य गतः प्रायः अन्तश्चरमकालो येन तस्य वृद्धत्वेऽपि प्राप्तचरमकालस्येत्यर्थः तपस्विनः शोचनीयावस्थस्य कालप्यमानस्य पुनः पुनः कथनशीलस्य मम मयीत्यर्थः संबन्धसामान्ये षष्ठी ॥ ३४ ॥

३५] ति० टी०—मृत्युं मन्मृत्युसंपादकानिष्टाभिनिवेशम् ३६॥

रा० टी०—तदतिरिक्तमन्यत्सर्वं तवेप्सितं दास्यामीति बोधयन्नाह—पृथिव्यामिति । मृत्युं शोकं त्वं मा आविश भरतादिभिर्निन्दितायास्तवापि अतिशोको भविष्यतीति तात्पर्यम् ॥ ३५ ॥

गो० टी०—पृथिव्यामिति । सागरान्तायामित्यनेन कृत्स्नामिति कथ्यते यत्किंचिदनमधिगम्यते कथ्यते तत्सर्वं तवेप्सितं दास्यामि मन्युः रामविषयकोपः ॥ ३५ ॥

३६] ति० टी०—कुर्मि करोमि । शरणं रक्षित्री । अधर्मो ज्येष्ठातिक्रमेण कनीयसोऽभिषेककृतो निरपराधस्य त्यागकृतश्च ॥ ३६ ॥

रा० टी०—अञ्जलिमिति । कुर्मि करोमि शरणं रक्षित्री अधर्मः रामाभिषेकप्रतिज्ञानिवृत्तिजनितोऽदृष्टविशेषः ॥ ३६ ॥

गो० टी०—अञ्जलिमिति । कुर्मि करोमि अञ्जलिपूर्वकं पादवन्दनं करोमीत्यर्थः । शरणं रक्षितृ अधर्मः प्रतिज्ञाभङ्गरूपः रामाभिषेकमनुजानीहीत्यर्थः ॥ ३६ ॥

३७] ति० टी०—अचेतनं मूर्च्छाप्राप्तम् घूर्णमानं घूर्णमानशरीरम् ॥ ३७ ॥

३८] ति० टी०—पारं निस्तारम् प्रलपन्तं प्रार्थयन्तम् रौद्रतरं दारुणतरम् ॥ ३८ ॥

रा० टी०—इतीति । दुःखाभिसंतप्तं राजवियोगशङ्काजनितक्लेशविशिष्टं घूर्णमानं किं कर्तव्यमिति मनसा भ्रमन्तं शोकार्णवस्य पारमुत्तरणं प्रलपन्तं याचमानं महाराजं रौद्रा भयंकरवचनोच्चारणकर्त्रीत्वेन भयंकरा कैकेयी रौद्रतरं रामवियोगसूचकत्वेन भयंकरं वचः प्रत्युवाच । द्वयोरेकत्रान्वयः ॥३७॥३८॥

गो० टी०—इतीत्यादि । श्लोकद्वयमेकान्वयम् । अचेतनं मूर्च्छितं घूर्णमानं इतस्ततो विवर्तमानं शोकेन भाविरामविरहस्मरणदुःखेन समभिप्लुतं सम्यगभिव्याप्तं पारमन्तं रामाभिषेकमिति यावत् । अथ कृत्स्नमिति वचोविशेषणं रौद्रा भयङ्करविकारा रामाभिषेकनिवर्तनविषये यद्यद्वक्तव्यं तत्सर्वमुवाचेत्यर्थः ॥ ३७ ॥ ३८ ॥

३९] ति० टी०—प्रत्यनुतप्यसे उक्तकरणान्नकथा कथयिष्यसि । लोकैरिति शेषः । स्वार्थण्यन्ताद्धेतुमण्णौ रूपम् ३९॥

रा० टी०—तद्वचनमेवाह—यदीति । धार्मिकत्वं धर्मं कथयिष्यसि उपदेक्ष्यसि धर्मरहितपुरुषकर्तृकोपदेशस्य हास्यास्पदत्वादिति भावः ॥ ३९ ॥

गो० टी०—यदीति । धार्मिकत्वं स्वीयमिति शेषः ॥३९॥

४०] ति० टी०—यदा बहवो मिलिता राजर्षयस्त्वया सह मद्विषयवरदानादिविषयगोष्ठीं करिष्यन्ति तत्र तत्प्रश्ने किं प्रतिवक्ष्यसि किमुत्तरयिष्यसि ॥ ४० ॥

रा० टी०—यदेति । त्वया सह समेताः राजर्षयः यदा

१ त्वां मन्युरविशेदिति गो. पाठः । २ परमिति रा. पाठः । ३ प्रार्थयन्तमिति गो. पाठः । ४ धर्मज्ञ इति गो. पाठः ।

यस्याः प्रसादे जीवामि या च मामभ्यपालयत् । तस्याः कृता मया मिथ्या कैकेय्या इति वक्ष्यसि॥ ४१ ॥
किल्बिषं त्वं नरेन्द्राणां करिष्यसि नराधिप । यो दत्त्वा वरमद्यैव पुनरन्यानि भाषसे ॥ ४२ ॥
शैब्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ । अलर्कश्चक्षुषी दत्त्वा जगाम गतिमुत्तमाम् ॥ ४३ ॥
सागरः समयं कृत्वा न वेलामतिवर्तते । समयं मानृतं कार्षीः पूर्ववृत्तमनुस्मरन् ॥ ४४ ॥
स त्वं धर्मं परित्यज्य रामं राज्येऽभिषिच्य च । सह कौसल्यया नित्यं रन्तुमिच्छसि दुर्मते ॥ ४५ ॥

कथयिष्यन्ति प्रतिज्ञातौ वरौ केकय्यै त्वया किं न दत्तौ इति प्रक्ष्यन्ति तत्र तदा किं प्रतिवक्ष्यसि किमुत्तरं दास्यसीत्यर्थः॥४०॥

गो० टी०–यदेति । कथयिष्यन्ति उपकारिण्याः कैकेय्याः किंप्रत्युपकृतमिति कदाचिद्धर्मप्रसङ्गे वक्ष्यन्ति तत्र तदा किं प्रतिवक्ष्यसि कीदृशं प्रत्युत्तरं दास्यसि ॥ ४० ॥

४१] ति० टी०–न किमप्युत्तरं शक्यमित्याह–यस्या इति । प्रसादे शम्बरमायानिवर्तनलक्षणानुग्रहे सति । 'प्रयत्ने' इति पाठे स्थापनयनादिप्रयत्ने इत्यर्थः । या मामभ्यपालयच्छीतोपचारादिना ररक्ष । मया मिथ्या कृता प्रतिज्ञेति शेषः । इति वक्ष्यसि किमिति सोपहासं वाक्यम् ॥ ४१ ॥

रा० टी०–उचितोत्तरस्याभावादनुचितमेवोत्तरं दास्यसीत्याह–यस्या इति । यस्याः प्रयत्नेऽहं जीवामि या सदैव मां प्रसादयतीत्यर्थः या अभ्यपालयत् सारथ्यकरणेन शत्रुभ्यः अरक्षत्तस्याः केकय्याः न्यासभूतवरदानाय कृता प्रतिज्ञा मिथ्या कृता मयेति वक्ष्यसि एवं सद्भिर्न वक्तव्यमिति तात्पर्यं तेन त्वया वरौ दातव्यावेवेति व्यञ्जितम् ॥ ४१ ॥

गो० टी०–यस्या इति । प्रसादे सति जीवामि प्रसादेन जीवामीत्यर्थः । प्रसादमेवाह–या चेति । या च मां मूर्च्छितदशायां रणादन्यत्रापनीयाभ्यपालयत् शिशिरोपचारादिना ररक्षेत्यर्थः तस्याः मया मिथ्या असत्यं कृतमिति वक्ष्यसि किमिति काकुः, तस्मादद्य प्रतिज्ञां निर्वहेति भावः ॥ ४१ ॥

४२] ति० टी०–नरेन्द्राणां स्ववंश्यानां किल्बिषमयशोरूपं मालिन्यं करिष्यसि । तत्र हेतुः–य इत्यादि । यद्वंशस्थ ईदृशः पापी तद्वंशः सर्वोऽपीदृश एवेति वदिष्यन्ति लोका इति भावः ॥ ४२ ॥

रा० टी०–स्वत्कर्तृकाधर्माचरणे लोकानां महदनुवर्तित्वाद्राजान्तराण्यपि तथैव करिष्यन्तीति बोधयन्ती आह–किल्बिषमिति । अन्यानि वरदानवचनविरुद्धानि ॥ ४२ ॥

गो० टी०–किल्बिषत्वमिति । किल्बिषत्वमपयशोरूपमालिन्यं नरेन्द्राणामित्यनेन सजातीयेष्वेकेन कृतमपयशः सर्वानपि स्पृशति सर्वे राजान एवंविधा इति । अन्यानि वरदानविरुद्धानि ॥ ४२ ॥

४३] ति० टी०–प्रतिज्ञाया अपालनस्याधर्मत्वं बोधयन्ती पूर्वेषां दुष्करप्रतिज्ञापालनं दर्शयति–शैब्य इति । अत्रैषा कथा–इन्द्राग्नी श्येनकपोतरूपौ शैब्यस्यौदार्यजिज्ञासया भक्ष्यभक्षकभावापन्नौ शैब्यसमीपं गतौ । ततः कपोतोऽभयार्थी शैब्याङ्कं प्रविवेश तस्मै च सोऽभयं ददौ ततः श्येनेन मद्भक्ष्यं देवविहितं त्यज ' इत्युक्ते ' नाहं तं त्यजेयम्, अपि-'तु तत्प्रतिनिधिभूतं स्वमांसमेव ददामि ' इत्युक्त्वा सर्वं स्वं मांसं श्येनाय दत्तवानिति । अलर्कश्च राजर्षिर्ब्राह्मणायान्धाय वरं प्रतिश्रुत्य तेन राजचक्षुषा स्वचक्षुः संधानरूपे वरे उक्ते स्वचक्षुषी दत्तवानिति ॥ ४३ ॥

रा० टी०–प्रतिज्ञापालने श्रद्धोत्पत्त्यै शिष्टाचारं प्रमाणयन्ती आह–शैब्य इत्यादिश्लोकद्वयेन । श्येनकपोतीये श्येनकपोतयोर्विवादे पक्षिणे श्येनाय स्वमांसं शैब्यो राजा ददौ दत्त्वा चोत्तमां गतिं जगाम । अलर्कश्चक्षुषी ददौ ब्राह्मणायेति शेषः । उत्तमां गतिं जगाम । इत्थं पुराणप्रसिद्धिः शैब्यौदार्यपरीक्षणाय इन्द्राग्नी श्येनकपोतौ भूत्वा भक्ष्यभक्षकभावं प्राप्तौ शैब्यसमीपमागतौ तत्राऽभयकामः कपोतः शैब्याङ्कमाविवेश स च तस्मै अभयमददात् । ततो देवविहितं मद्भक्ष्यं देहीति श्येनेनोक्तः शैब्योऽहमेनं न दास्यामि मांसान्तरं भक्ष्यं मत्तो गृहाणेत्युवाच । तत्रैतत्प्रतिनिधीभूतं स्वशरीरमांसमेव मह्यं देहीति श्येनेनोक्तः शैब्यः सकलं स्वशरीरमांसं ददौ तेन सोऽतुलां कीर्तिं लेभे इति । राजर्षिरलर्कश्चान्धब्राह्मणाय वरं दास्यामीति प्रतिज्ञाय स्वचक्षुर्मह्यं देहीति तेन याचिते स्वचक्षुर्दत्तवानिति ॥ ४३ ॥

गो० टी०–दुष्करस्यापि प्रतिज्ञातस्य कर्तव्यत्वं पूर्वेषामनुष्ठानेन दर्शयति–शैब्य इति । शैब्यो राजा श्येनकपोतीये श्येनकपोतयोर्विरोधे प्राप्ते पक्षिणे श्येनाय स्वमांसं कपोतमांसप्रतिनिधित्वेन ददौ इत्थं किल पौराणिकी गाथा–इन्द्राग्नी श्येनकपोतौ भूत्वा शैब्यौदार्यं परीक्षितुं भक्षकभक्ष्यभावमापन्नौ शैब्यसमीपमागतौ । तत्र कपोतोऽभयार्थी शैब्याङ्कमाविवेश । तस्मै च सोऽभयं ददौ । ततः श्येनेन मद्भक्ष्यं दैवविहितं त्यजेत्युक्ते नाहं त्यजेयमपि तु तत्प्रतिनिधिमांसमेव ददामीत्युक्ते तर्हि स्वन्मांसमेव मे प्रयच्छ नान्यदित्युक्ते स्वमांसमपि सर्वं दत्तवानिति । अलर्कश्च राजर्षिर्ब्राह्मणायान्धाय वरं प्रतिश्रुत्य तेन राजचक्षुषा स्वचक्षुःप्रतिसंधाने अर्थिते स्वचक्षुषी दत्त्वा उत्तमां गतिं जगाम । किंच सागरः सङ्घशो देवैः प्रार्थितो वेलानतिलङ्घनाय तेभ्यः प्रतिश्रुत्याऽपि वेलां नातिवर्तते तस्मात्त्वमपि पूर्वशैब्यादिदृष्टान्तमनुस्मरन्समयं प्रतिज्ञां अनृतं मिथ्याभूतं मा कार्षीः ॥४३॥४४॥

४४–४५] ति० टी०–सागरः सङ्घशो वेलानतिलङ्घनाय देवैः प्रार्थितस्तेभ्यस्तत्प्रतिश्रुत्य न वेलामतिवर्तते एवं पूर्वेषां शैब्यादीनां वृत्तं स्मरन्समयं प्रतिज्ञामनृतां मा कार्षीः ॥४४॥४५॥

१ प्रयत्ने इति रा. पाठः । २ कृतमिति गो. पाठः । ३ किल्बिषत्वमिति गो. पाठः । ४ पूर्वमिति गो. पाठः ।

भक्त्वधर्मो धर्मो वा सत्यं वा यदि वानृतम् । यत्त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥ ४६ ॥
अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः । पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥ ४७ ॥
एकाहमपि पश्येयं यद्यहं राममातरम् । अञ्जलिं प्रतिगृह्णन्तीं श्रेयो ननु मृतिर्मम ॥ ४८ ॥
भरतेनात्मना चाहं शपे ते मनुजाधिप । यथा नान्येन तुष्येयमृते रामविवासनात् ॥ ४९ ॥
एतावदुक्त्वा वचनं कैकेयी विरराम ह । विलपन्तं च राजानं न प्रतिव्याजहार सा ॥ ५० ॥
श्रुत्वा तु राजा कैकेय्या वाक्यं परमशोभनम् । रामस्य च वने वासमैश्वर्यं भरतस्य च ॥ ५१ ॥
नाभ्यभाषत कैकेयीं मुहूर्तं व्याकुलेन्द्रियः । प्रेक्षतानिमिषो देवीं प्रियामप्रियवादिनीम् ॥ ५२ ॥
तां हि वज्रसमां वाचमाकर्ण्य हृदयाप्रियाम् । दुःखशोकमयीं श्रुत्वा राजा न सुखितोऽभवत् ॥ ५३ ॥

रा० टी०—सागर इति । सागरः समुद्रः समयं देवप्रार्थनया वेलानतिवर्तनाय प्रतिज्ञां कृत्वा वेलां नातिवर्तते अधिकं न गच्छतीत्यर्थः । अतः पूर्ववृत्तंपूर्वेषां वृतान्तमनुस्मरन् सन् अनृतं मा कार्षीः ॥ ४४ ॥

रा० टी०—स इति । दुर्मते दुःस्थिता भाविवियोगजशोकेन विवेकरहिता मतिर्यस्य तत्संबोधनम् । स त्वं रन्तुमिच्छसि किमिति शेषः । एतेन त्यक्तधर्मणां विहारादिर्न सिध्यतीति सूचितम् ॥ ४५ ॥

गो० टी०—एवं न्यायमुक्त्वा तदनुमोदमानं प्रत्याह—स त्वमिति ॥ ४५ ॥

४६] ति० टी०—सिद्धान्तमाह—भवत्विति । मदुक्तो रामविवासनपूर्वको भरताभिषेको धर्मो वाधर्मो वा भवतु । नन्वियं रत्यर्थं मिथ्यैव मे प्रतिज्ञा तत्काले मिथ्यावचनस्य शास्त्रानुमतत्वादिति चेत्तत्राह—यदिति । त्वया यन्मह्यं सत्यमनृतं वा संश्रुतं प्रतिज्ञातं तस्य व्यतिक्रमोऽकरणं नास्ति ॥४६॥

रा० टी०—ननु रामाभिषेकप्रतिज्ञात्यागेऽपि अधर्मः स्यादित्यत आह—भवत्विति । तस्य मदर्थंप्रतिज्ञातस्य व्यतिक्रमः अन्यथाभावो नास्ति न कार्य इत्यर्थः ॥ ४६ ॥

गो० टी०—स्वसिद्धान्तमाह—भवत्विति । मदुक्तो रामविवासनपूर्वको भरताभिषेकः धर्मो वाऽधर्मो वा भवतु रामं प्रव्राजयाऽप्यमित्यादि मदुक्तं वचनं सत्यं समीचीनं वा अनृतं असमीचीनं वा भवतु त्वया यन्मह्यं संश्रुतं शपथपूर्वकं दास्यामीति प्रतिज्ञातं तस्य व्यतिक्रमोऽन्यथाभावो नास्तीति योजना ॥ ४६ ॥

४७] ति० टी०—विषमे । बाधकमाह—अहमित्यादि । पश्यतः पश्यन्तं त्वामनादृत्य ॥ ४७ ॥

रा० टी०—व्यतिक्रमे दोषमाह—अहमिति । बहु अधिकम् ॥ ४७ ॥

गो० टी०—व्यतिक्रमे किं करिष्यसीत्यत्राह—अहमिति ४७

४८] ति० टी०—अञ्जलिं प्रतिगृह्णन्तीं राजमातृत्वेन सर्वैर्लोकानामिति शेषः । नन्विति निश्चये । 'न क्रियां सम्प्रपद्ये' इति पाठेऽपि मरिष्यामीत्येव फलति ॥ ४८ ॥

रा० टी०—एकेति । एकाहं एकदिनमपि अञ्जलिं पुत्राभिषेकहेतुकबद्धयुगलकरसूचितप्रजाप्रणतिं प्रतिगृह्णन्तीं राममातरं कौशल्याम् ॥ ४८ ॥

गो० टी०—कौसल्यातोऽप्यधिकं भोगं तव दास्यामीत्यत्र तत्प्राधान्यं न सह इत्याह—एकाहमिति । अञ्जलिं प्रतिगृह्णन्तीं राजमातृत्वेन सर्वेषामिति शेषः । श्रेयः तदा तदपेक्षयेति शेषः ॥ ४८—५० ॥

४९-५०] ति० टी०—ते तव समीपे आत्मना प्राणभूतेन भरतेन शपे तच्छपथपूर्वकं कथयामि । रामविवासनाकृतेऽन्येन रत्नादिना न तुष्ये इति ॥ ४९ ॥ ५० ॥

रा० टी०—भरतेनेति । ते तवाग्रे भरतेन आत्मना स्वेन यथावत् शपे भरतस्य स्वस्य च शपथं करोमीत्यर्थः । अन्येन धनादिना न तुष्येयम् ॥ ४९ ॥

रा० टी०—एतावदिति । विरराम निवृत्ते अत एव विलपन्तं विविधवचनमुच्चारयन्तं राजानं न प्रतिव्याजहार प्रत्युत्तरयाञ्चकार ॥ ५० ॥

५१] ति० टी०—अशोभनं परं रामवनवासभरतैश्वर्यविषयं वाक्यं श्रुत्वेत्यन्वयः ॥ ५१ ॥

रा० टी०—श्रुत्वेति । राजा तु रामस्य वने वासं वनवासबोधकमित्यर्थः । भरतस्य ऐश्वर्यसंबन्धीत्यर्थः । अशोभनमभिषेकनिवृत्तिहेतुत्वेन शोभारहितं कैकेय्या वाक्यं श्रुत्वा परमन्यत् किंचिन्नाभ्यभाषत । भाषणरहितत्वेऽपि किमकरोदित्यत आह—अनिमिषः सन् प्रैक्षत अपश्यत् । श्लोकद्वयमेकान्वयि ॥ ५१ ॥ ५२ ॥

गो० टी०—श्रुत्वेति । वनवासैश्वर्यरूपं हृतं वरमिति संबन्धः ॥ ५१ ॥

५२-५३] ति० टी०—प्रैक्षत कोपादिति शेषः॥५२॥५३॥

गो० टी०—नाभ्यभाषतेति । प्रैक्षतानिमिष इति निरन्तरचिन्तावशात् क्रोधाद्वा निर्निमेषप्रेक्षणम् ॥ ५२ ॥

रा० टी०—तामिति । हृदये न प्रीयते इति हृदयाप्रियाम् तत्र हेतुः दुःखशोकमयीं संभावितवियोगहेतुकदुःखजनकशोकप्रचुरां सूचितः सूचविशिष्टो नाभवत् ॥ ५३ ॥

१ विवासनमिति रा० पाठः । २ वृतामिति गो० पाठः । ३ वोरमिति गो० पाठः ।

स देव्या व्यवसायं च घोरं च शपथं कृतम् । ध्यात्वा रामेऽतिनिःश्वस्यच्छिन्नस्तरुरिवापतत् ॥५४॥
नष्टचित्तो यथोन्मत्तो विपरीतो यथातुरः । हृततेजा यथा सर्पो बभूव जगतीपतिः ॥ ५५ ॥
दीनयातुरया वाचा इति होवाच कैकयीम् । अनर्थमिममर्थाभं केन त्वमुपदेशिता ॥ ५६ ॥
भूतोपहतचित्तेव ब्रुवन्ती मां न लज्जसे । शीलव्यसनमेतत्ते नाभिजानाम्यहं पुरा ॥ ५७ ॥
बालायास्तत्त्विदानीं ते लक्षये विपरीतवत् । कुतो वा ते भयं जातं या त्वमेवंविधं वरम् ॥ ५८ ॥
राष्ट्रे भरतमासीनं वृणीषे राघवं वने । विरमैतेन भावेन त्वमेतेनानृतेन च ॥ ५९ ॥
यदि भर्तुः प्रियं कार्यं लोकस्य भरतस्य च । नृशंसे पापसंकल्पे क्षुद्रे दुष्कृतकारिणि ॥ ६० ॥

गो० टी०–तामिति । दुःखशोकमयीमिति अनुचितभरताभिषेकात् दुःखं रामविवासनाच्छोकः ॥ ५३ ॥

५४] ति० टी०–व्यवसायं रामविवासनविषयं निश्चयम् । घोरं शपथं भरतशपथरूपं स्वकृतरामसङ्कृतादिशपथं वा ॥५४॥

रा० टी०–स इति । देव्या कैकेय्याः व्यवसायं विवासनविषयकनिश्चयं घोरं कृतं शपथं च ध्यात्वा स्मृत्वा ॥ ५४ ॥

गो० टी०–स इति । शपथं कृतं स्वेनेति शेषः । निश्चयेति अशक्यप्रतीकारत्वादिति भावः ॥ ५४ ॥

५५] ति० टी०–विपरीतः संनिपातादिना विपरीतप्रकृतिः आतुरो व्याधिग्रस्तः । हततेजाः मन्त्रेणेति शेषः ॥ ५५ ॥

रा० टी०–राज्ञो वृत्तान्तरमाह–नष्टेति । नष्टचित्तः त्यक्तपूर्वचैतन्यवद्विपद्यमानः अत एव आतुरो व्याध्यादिग्रस्त इव विपरीतः परिणतक्रियः ॥ ५५ ॥

गो० टी०–नष्टचित्त इति । नष्टचित्तः कलुषितहृदयः उन्मत्तः उन्मादी विपरीतः सन्निपातादिना विपरीतप्रकृतिः आतुरः व्याधितः 'व्याधितोऽपटुरातुरः' इत्यमरः । हततेजाः मन्त्राप्रहतवीर्यः ॥ ५५ ॥

५६] ति० टी०–उपदेशितोपदिष्टा ॥ ५६ ॥

रा० टी०–दीनयेति । राजा दशरथः दीनया वाचा इत्युवाच । तद्वचनमेवाह–अर्थाभम् अर्थत्वेन प्रतीयमानम् ॥ ५६ ॥

गो० टी०–दीनयेति ॥ ५६ ॥

गो० टी०–अनर्थमित्यादि । उपदर्शिता बोधिता शीलव्यसनं सद्वृत्तभंशम् 'व्यसनं विपदि भंशे' इत्यमरः । नाभिजानामि किंतु शीलमेवाभिजानामि ॥ ५७ ॥

५७] ति० टी०–मां न लज्जसे पतिसमक्षमीदृशलोकव्यवहारस्य लोकविगीतत्वात् । शीलव्यसनं सद्वृत्तस्य विशेषेणासनं त्यागः अत एवेदानीं भूतोपघातोत्प्रेक्षा ॥ ५७ ॥

रा० टी०–भूतेति । भूतैर्दुर्ग्रहादिहेतुकप्रेतादिभिरुपहननमस्थाकृतं चित्तं यस्याः सा ते तव शीलव्यसनं कुलाङ्गनोचितशीलत्यागं पुरा नाभिजानामि अस्मज्जानाम् यावत्पुरेति वद् ॥ ५७ ॥

५८] ति० टी०–बालाया इति बालाया अपीत्यर्थकं पूर्वान्वयि । तत्तु शीलं तु इदानीं प्रौढत्वावस्थायामपि विपरीतवद्विपरीतार्हं दुःशीलार्हं लक्षये । कुतो निमित्तात्केन निमित्तेन रामादीदृशं भयं जातमित्यर्थः ॥ ५८ ॥

रा० टी०–बालाया इति । तत्पूर्ववृत्तकुलाङ्गनोचितशीलं विपरीतवत् अन्यथेव लक्षये इवेन वस्तुतो नान्यथाभाव इति बोधितम् तेनैवं कथने ते भीतिः कारणमिति ध्वनितम् । अर्धं पृथक् । भीतौ निमित्तं पृच्छति–कुत इति । ते तव कुतः स्वतः परबोधनाद्वेति भावः । भयप्रौढ्यमाह–राष्ट्रे आसीनं भरतं राघवं रामं वने चरन्तमिति शेषः एवंविधं वरं वृणीषे अर्धद्वयमेकान्वयि ॥ ५८ ॥

गो० टी०–तत्र हेतुमाह–बालाया इति । इदानीं प्रौढतायां तत् शीलं विपरीतवत् विपरीतत्ववत् भावप्रधाननिर्देशः स्वार्थे वतिर्वा ॥ ५८ ॥

गो० टी०–कुत इति । कुतो निमित्तादेवंविधमित्यस्यैव विवरणम् ॥ ५९ ॥

५९] ति० टी०–वरमाह–राष्ट्रे इति । राष्ट्रे भरतमासीनं वने राघवमासीनं वृणीषे एतेन निर्धूतपातित्रत्यलक्षणेन भावेनोपलक्षिता । किं च एतेनाशक्यवरद्वारकेणानृतेन ममानृततार्स पादकेन कर्मणोपलक्षिता त्वमेवंवराद्विरम ॥ ५९ ॥

रा० टी०–विरमेति । यदि भर्त्रादीनां प्रियं कार्यं तदा एतेन भावेन रामविवासनभरताभिषेकाभिप्रायेण अभिप्रायात् एतेन स्वतः परतो वा जातेन अनृतेन मिथ्याभूतरामहेतुकभयेन तादृशभयात् विरम निवर्तस्व ॥ ५९ ॥

गो० टी०–राष्ट्रे इति । वने राघवमिति आसीनमित्यनुषङ्गः । एतेन भावेन भरताभिषेकरूपेण विरम मा प्रवर्तिष्ठाः अनृतेन अनृतपदवाच्येन एतेन वा रामविवासनरूपेण भावेन वा विरमेति संबन्धः ॥ ६० ॥

६०] ति० टी०–यदि भर्तुर्मम लोकस्य भरतस्य च प्रियं कार्यं कर्तव्यं तदा विरमेति संबन्धः ॥ ६० ॥

रा० टी०–नृशंसे इति । नृशंसे क्रूरचेष्टिते पापसंकल्पे पापहेतुभूताभिषेकप्रतिज्ञापनहेतुभूतसंकल्पविशिष्टे क्षुद्रे विचाररहिते दुष्कृतकारिणि दुष्कृतमस्मिन् समये अस्माभिरकर्तव्यं लोकादिकमित्यर्थः तत्कारिणि दुष्टे दुःखकारिणी

---

१ तु गिरा राजेति गो. रा. पाठः । २ उपदर्शितेति गो. पाठः । ३ वेति गो. पाठः ।

किं नु दुःखमलीकं वा मयि रामे च पश्यसि । न कथंचिदृते रामाद्भरतो राज्यमावसेत् ॥ ६१ ॥
रामादपि हितं मन्ये धर्मतो बलवत्तरम् । कथं वक्ष्यसि रामस्य वनं गच्छेति भाषिते ॥ ६२ ॥
मुखवर्णं विवर्णं तु यथैवेन्दुमुपप्लुतम् । तां तु मे सुकृतां बुद्धिं सुहृद्भिः सह निश्चिताम् ॥ ६३ ॥
कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूम् । किं मां वक्ष्यन्ति राजानो नानादिग्भ्यः समागताः ॥ ६४ ॥
बालो बतायमैक्ष्वाकश्चिरं राज्यमकारयत् । यदा हि बहवो वृद्धा गुणवन्तो बहुश्रुताः ॥ ६५ ॥
परिप्रक्ष्यन्ति काकुत्स्थं वक्ष्यामीहं कथं तदा । कैकेय्या क्लिश्यमानेन पुत्रः प्रव्राजितो मया ॥ ६६ ॥

भूतमलीकमपराधं मयि रामे वा किं किमर्थं पश्यसि आरोपयसीत्यर्थः ॥ ६० ॥

गो० टी०—नृशंस इति । नृशंसे निर्दये ! तत्र हेतुः पापसंकल्प इति रामविवासनरूपपापसंकल्पे ! तत्रापि हेतुः क्षुद्र इति अल्पमतिके तत्रापि हेतुः दुष्कृतकारिणीति जन्मान्तरे पापकारिणीत्यर्थः । दुःखं दुःखनिमित्तमलीकमप्रियम् 'अलीकं त्वप्रियेऽनृते' इत्यमरः ॥ ६१ ॥ ६२ ॥

६१] ति० टी०—दुःखं तत्साधनम् । अलीकमपराधं अयं तव क्लेशः सर्वो वृथैव त्वदिष्टस्य भरताभिषेकस्यासिद्धेरित्याह—नेति । रामं विना राज्यं नावसेत् अनेन चतुर्णामपि यथाभागं राज्यमनुमन्यस्व, यद्वास्तु भरत एव राजा रामस्तु वृद्धस्य मम समीपे तिष्ठत्विति मन्यस्व नान्यथा त्वदिष्टसिद्धिरित्युपदेशः ॥ ६१ ॥

रा० टी०—नन्वं स्वसुतराज्यार्थं कल्पयामीत्यत, आह—नेति । रामाद् ऋते विना भरतो राज्यं कथंचिन्नावसेत् । अर्धं पृथक् ॥ ६१ ॥

६२] ति० टी०—अत्र हेतुः—रामादपीति । हि यतस्तं भरतं रामादपि धर्मतो बलवत्तरमतिशयेन धर्मवन्तं मन्ये । भाषिते मयोक्ते सत्यपि त्वं कथं वक्ष्यसि तव तस्यातिप्रियत्वादिति भावः ॥ ६२ ॥

रा० टी०—रामादिति । बलवतरम् अतिबलवन्तं भरतं धर्मतः रामोपासनधर्माद्धेतोः रामादपि हितं प्रियं मन्ये इति भाषिते कथितेऽपि मयेति शेषः । त्वं वनं गच्छ इति रामस्य रामं कथं वक्ष्यसि तवापि रामविषयकप्रीतेरधिक्याद्न वक्ष्यसीति भावः । कर्मणः संबन्धसामान्यत्वेन विवक्षणाद् रामस्येति षष्ठी ॥ ६२ ॥

गो० टी०—कथमिति । वनं गच्छेति मया भाषिते सति विवर्णं विपरीतवर्णत्वमापादितं रामस्य मुखवर्णं उपप्लुतं राहुग्रस्तमिव कथं द्रक्ष्यामीति संबन्धः ॥ ६३ ॥

६३] ति० टी०—उपप्लुतमिन्दुं यथा तमिव विवर्णं मुखवर्णमद्राक्षीत् कथं द्रक्ष्यामीति संबन्धः । किं च सुकृतां सम्यक्प्रवर्तितां तां बुद्धिं रामाभिषेकविषयाम् । तत्र हेतुः—सुहृद्भिः सह निश्चिताम् ॥ ६३ ॥

रा० टी०—मुखेति । उपप्लुतं राहुणा यस्तमिन्दुं चन्द्रमसमिव विवर्णं स्वप्रतिज्ञाच्युतिहेतुकविकृतवर्णविशिष्टं मुखवर्णं स्वमुखकान्तिं कथं द्रक्ष्यामि दर्पणादिना कथमालोकयिष्यामीत्यर्थः । सुकृतां स्वातिविचारसंपन्नां सुहृद्भिः सहापि निश्चितां सुविचारितां परैः शत्रुभिर्हतामभिभूतामत एव अपावृत्तां पलायितां चमूमिव मे बुद्धिं मां च राजानः किं वक्ष्यन्ति एतस्य बुद्धिः अयं च नष्टप्रायाविति वदिष्यन्तीत्यर्थः । श्लोकद्वयमेकान्वयि ॥ ६३ ॥ ६४ ॥

गो० टी०—तामिति । तां बुद्धिस्थां सुकृतां मन्त्रिभिः सह सुष्ठु निश्चितामथ सुहृद्भिः सह निश्चितां बुद्धिमपावृत्तामधरोत्तरीकृतां कथं द्रक्ष्यामि अनुभविष्यामि ॥ ६४ ॥

६४] ति० टी०—अपावृत्तां पराभूताम् । नानादिग्भ्यः समागता राजानः ॥ ६४ ॥

गो० टी०—किमिति । बतेति खेदे ऐक्ष्वाकः रामः राज्यमकारयत् किमकरोत् इति मां किं वक्ष्यन्तीति संबन्धः, यद्वा बालः अज्ञः दशरथः घुणाक्षतलिपिन्यायेन दैवाच्चिरं राज्यमकरोदिति मां वक्ष्यन्ति किमिति ॥ ६५ ॥

६५] ति० टी०—अयं बाल ऐक्ष्वाकः किं कथं राज्यमकारयदपालयदिति मां वक्ष्यन्तीति योजना । बतेति खेदः ॥ ६५ ॥

रा० टी०—बाल इति । ऐक्ष्वाकः इक्ष्वाकुकुले प्रादुर्भूतः अयमस्मद्बुद्धिस्थो बालः चिरं बहुकालिकं राज्यमकारयत् दशरथो राज्याधिकारे स्वबालमस्थापयदित्यर्थः । इति बहु अत्यन्तं श्रुताः श्रुतवन्तः गुणवन्तः बहवो वृद्धाः यदा काकुत्स्थं रामं परिप्रक्ष्यन्ति दूरदेशादागत्य रामः क्वास्तीति प्रश्नं करिष्यन्तीत्यर्थः तदा कैकय्या क्लिश्यमानेन मया पुत्रो रामः प्रव्राजितो वनं प्रेषित इति कथं वक्ष्यामि । हवतशब्दावित्यर्थकौ श्लोकद्वयमेकान्वयि ॥ ६५ ॥ ६६ ॥

गो० टी०—यदेति । यदा श्वः प्रातः वृद्धाः काकुत्स्थं प्रक्ष्यन्ति क्व गतो रामः कुतो नाभिषिक्त इति प्रक्ष्यन्ति तदाहं किं वक्ष्यामि प्रत्युत्तरम् ॥ ६६ ॥

६६] ति० टी०—परिप्रक्ष्यन्ति क्व राम इति प्रातरिति शेषः । कैकेय्या वरार्थं क्लिश्यमानेन क्लेश्यमानेन तां प्रति कृतप्रतिज्ञायाः सत्यत्वरक्षणाय प्रव्राजित इत्युत्तरं लोको न ग्रहीष्यतीत्याह—कैकेय्येति । पूर्वदत्तेनेदानीं दातप्रव्राजनपरतया तया प्रकटीकृतेन वरेणेति शेषः ॥ ६६ ॥

---

१ द्रक्ष्यामीति गो. पाठः । २ तमिति गो. पाठे । ३ हीति गो. पाठः । ४ स्तिति गो. पाठः । ५ किमद्रक्षमिति गो. पाठः ।

यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति । किं मां वक्ष्यति कौसल्या राघवे वनमास्थिते ॥ ६७ ॥
किं चैनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशम् । यदा यदा च कौसल्या दासीव च सखीव च ॥ ६८ ॥
भार्यावच्चभगिनीवच्च मातृवच्चोपतिष्ठति । सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा ॥ ६९ ॥
न मया सत्कृता देवी सत्कारार्हा कृते तव । इदानीं तत्तपति मां यन्मया सुकृतं त्वयि ॥ ७० ॥
अपथ्यव्यञ्जनोपेतं भुक्तमन्नमिवातुरम् । विप्रकारं च रामस्य संप्रयाणं वनस्य च ॥ ७१ ॥

गो० टी०—कैकेयीवरप्रदाननिमित्तं प्रव्राजित इत्युच्यतामित्यत्राह—कैकेय्येति । कैकेय्या क्लिश्यमानेन पूर्वदत्तौ वरौ भरताभिषेकरामविवासनरूपेण दातव्यावित्युक्तवत्या कैकेय्या पीड्यमानेन मया प्रव्राजित इत्येतत्सत्यं यदि ब्रवीमि तदा तत् राममभिषेक्ष्यामीति वचनमसत्यं भविष्यति तद्बाधा न संभवति पूर्वप्रदत्तत्वादिति भावः ॥ ६७ ॥

६७] ति० टी०—यदि यद्यपि । तत्तथापि । एतदसत्यं भविष्यति तस्यां कामहतस्तद्वचसा प्रव्राजितवानिति लोको वदिष्यतीति भावः ॥ ६७ ॥

रा० टी०—यदिति । एतमप्रव्राजनं यदि सत्यं ब्रवीमि तर्हि तत् अभिषेकप्रतिज्ञानमसत्यं भविष्यति एतेन द्वयोरप्यशक्यत्वं बोधितम् प्रव्राजनपक्षे दोषान्तरमप्याह—कौशल्या मां किं वक्ष्यति ईदृशं कर्तुमनर्हमित्यर्थः । विप्रियं विरुद्धं कर्म कृत्वा एनां कौशल्यां किं प्रतिवक्ष्यामि किमर्थं पुत्रः प्रव्राजित इति तया पृष्टः किमुत्तरं दास्यामीत्यर्थः सार्धश्लोकः संमिलितान्वयी ॥ ६७ ॥

गो० टी०—किमिति । किं मां वक्ष्यति मत्पुत्रेण ते किमपराद्धमित्येवं वक्ष्यतीति भावः । किं प्रतिवक्ष्यामि न किमपीत्यर्थः ॥ ६८ ॥

६८–७०] ति० टी०—किं चैनामिति । मया मत्पुत्रेण वा ते किमपराद्धमिति यदा वक्ष्यति तदैनां प्रति निरुत्तर एवेत्यर्थः। यदा यदा च यतो यतश्चेत्यर्थः । दासीवद्रतिव्यवहारे, सखीवद्रहस्यकथने, भार्यावद्धर्माचरणे, भगिनीवद्धितोशंसने, मातृवद्भोजनदाने उपतिष्ठति सेवते । केचित्तु—दासीवद्गृहकार्यकरणे, सखीवत्क्रीडायाम्, भार्यावदुक्ते एव, भगिनीवज्ज्ञानयोगाद्युद्याने, मातृवत्तथ्यकथने इत्याहुः । अत उत्तरमशक्यदानमिति बोध्यम् । प्रियः पुत्रो यस्यां मम सा उक्तप्रकारैः सत्कारार्हापि तव कृते स्वद्वैमनस्यपरिहाराय न सत्कृता तदिदानीं रामविवासनवरे स्वयोक्ते सति यत्त्वयि मया सुकृतं शोभनं कर्म स्वदनुसरणरूपं कृतं तन्मां तपति पीडयति ॥ ६८–७० ॥

रा० टी०—कौशल्याया अप्रियं कर्म कर्तुं नोचितमिति बोधयितुं तदुणान् वर्णयन्नाह—यदेति । दासीवत् शुश्रूषासमये स्वमहिषीत्वं तिरोभूय दासीसदृशीत्यर्थः । सखीव खेलनादिसमये सखीसदृशीत्यर्थः । भार्यावत् धर्माचरणादिसमये साधारणपत्नीसदृशी त्यक्तस्वमहिषीत्वाभिमानेत्यर्थः । भगिनीवत् मद्विवाहान्तरसमये भगिन्युत्साहसदृशोत्साहविशिष्टेत्यर्थः । मातृवत् भोजनादिसमये मातृनिष्टपुत्रकर्तृकभोजनविषयकप्रीतिसदृशप्रीतिमतीत्यर्थः । कौशल्या यदा यदोपतिष्ठति प्राप्नोति तदा तदा तव कृते त्वद्धितेत्यर्थः । सत्कारार्हा देवी मया न सत्कृता तत् सत्काराकरणमिदानीं मां तपति पीडयति । त्वयि त्वद्विषये यन्मया सुकृतं संपादितमतिप्रेम तदपि अपथ्यव्यञ्जनोपेतं अपथ्यं पथ्यविरुद्धं यद्व्यञ्जनं दध्यादि तेनोपेतं संस्कृतं भुक्तमन्नमातुरं ज्वरादिग्रस्तमिव मां तपति । अर्धषट्कमेकान्वयि ॥ ६८–७० ॥

गो० टी०—यदेत्यादिश्लोकद्वयमेकान्वयम् । यदा यदा उपतिष्ठति तत्तदुचितकृत्येनोपास्ते तदा तदा सत्कारार्हा तव कृते न सत्कृता तव विप्रियं भविष्यतीति सा न सत्कृतेत्यर्थः । परिचर्याकाले दासीवत्परिचरति न महिषीत्वं पुरस्करोति द्यूतक्रीडादिसमये सखीव व्यवहरति धर्मानुष्ठानसमये भार्यावत् भार्यया यथा वर्तितव्यं तथा वर्तते नतु महिषीत्वाभिमानेन जोषमास्त इत्यर्थः । भार्यान्तरविवाहसमये भगिनीवत् सोदरीव उपलालयति शरीरपोषणादिदशायां मातृवद्धितपरा तिष्ठतीति भावः ॥ ६९ ॥ ७० ॥

गो० टी—इदानीमिति । इदानीं[1] त्वद्दौर्जन्यदर्शनकाले त्वयि विषये मया यत्सुकृतं सुष्ठूपचरितं तदपथ्यं व्यञ्जनोपेतं दध्याद्युपस्कृतमन्नमातुरं व्याधितमिव मां तपति तापयति अन्तर्भावितण्यर्थोऽयं स्वरूपचाराकरणे संप्रति मम ताप एव न भवेत् एतादृशवाक्छम्याभावादिति भावः ॥ ७१ ॥

७१] ति० टी०—किमिव आतुरं रुग्णमपथ्यव्यञ्जनोपेतं भुक्तमन्नं यथा तपति पीडयति रामस्य विप्रकारमभिषेकनिवृत्तिं वनस्य तदुद्देश्यकं संप्रयाणं च प्रेक्ष्येत्यन्वयः ॥ ७१ ॥

रा० टी०—विप्रकारमिति । विप्रकारमभिषेकनिवृत्तिं वनस्य संप्रयाणं वनकर्मकगमनं प्रेक्ष्य अवलोक्य भीता अयं भ्रष्टप्रतिज्ञः किं किं करिष्यतीति भयं प्राप्ता सती मे कथं विश्वसिष्यति कथमपि विश्वासं न करिष्यतीत्यर्थः । अर्धद्वयमेकान्वयि ॥ ७१ ॥

गो० टी०—विप्रकारमिति । विप्रकारमभिषेकतिरस्कारमित्यर्थः । वनस्येति कर्मणि षष्ठी भीता मत्पुत्रस्य विप्रकारः किमुतेति भीता मे माम् ॥ ७२ ॥

१ इतिं गो. पाठः ।

सुमित्रा प्रेक्ष्य वै भीता कथं मे विश्वसिष्यति । कृपणं बत वैदेही श्रोष्यति द्वयमप्रियम् ॥ ७२ ॥
मां च पञ्चत्वमापन्नं रामं च वनमाश्रितम् । वैदेही बत मे प्राणाञ्छोचन्ती क्षपयिष्यति ॥ ७३ ॥
हीना हिमवतः पार्श्वे किंनरेणेव किंनरी । नहि राममहं दृष्ट्वा प्रवसन्तं महावने ॥ ७४ ॥
चिरं जीवितुमाशंसे रुदन्तीं चापि मैथिलीम् । सा नूनं विधवा राज्यं सपुत्रा कारयिष्यसि ॥ ७५ ॥
[नहि प्रव्राजिते रामे देवि जीवितुमुत्सहे]
सतीं त्वामहमत्यन्तं व्यवस्याम्यसतीं सतीम् । रूपिणीं विषसंयुक्तां पीत्वेव मदिरां नरः ॥ ७६ ॥
अनृतैर्वतं मां सान्त्वैः सान्त्वयन्ती स्म भाषसे । गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः ॥ ७७ ॥
अनार्य इति मामार्याः पुत्रविक्रायकं ध्रुवम् । विक्रैरिष्यन्ति रथ्यासु सुरापं ब्राह्मणं यथा ॥ ७८ ॥
अहो दुःखमहो कृच्छ्रं यत्र वाचः क्षमे तव । दुःखमेवंविधं प्राप्तं पुरा कृतमिवाशुभम् ॥ ७९ ॥

७२] ति० टी०—राज्ञो न किंचिदकर्तव्यमस्तीति विचार्य स्वपुत्रविषये विश्वासं मम न करिष्यति । कृपणं कष्टम् ॥ ७२ ॥

रा० टी०—कृपणमिति । वनमाश्रितं रामं पञ्चत्वमिहलोकपरित्यागेन पञ्चत्वधर्मसदृशधर्ममापन्नं प्राप्तं मामिति द्वयमप्रियं कृपणं कष्टं यथा स्यात्तथा वैदेही श्रोष्यति ॥ ७२ ॥

गो० टी०—कृपणमिति । श्रोष्यतीति यत् तत् कृपणं कष्टं बतेति योजना ॥ ७३-७६ ॥

७३] ति० टी०—अप्रियद्वयमेवाह—मां चेति । मे मदर्थम् उपलक्षणमेतत् रामार्थं च शोचन्ती स्वस्य प्राणान्क्षपयिष्यति ॥ ७३ ॥

रा० टी०—तेनानर्थान्तरं भविष्यतीत्याह—वैदेहीति । क्षपयिष्यति क्षीणा भविष्यति । तत्र दृष्टान्तः किंनरेण स्वभर्त्रा हीना किंनरी इव । यदि च तत्र पत्युर्वियोगः प्रसिद्धः तदा वियोगांशे क्षीणांशे च दृष्टान्तो बोध्यः ॥ ७३ ॥

७४] ति० टी०—किंनरेण श्वशुरभूतेन भर्तृभूतेन च । तव मरणं कृतस्तत्राह—नहीति ॥ ७४ ॥

७५] ति० टी०—नूनं ध्रुवम् ॥ ७५ ॥

रा० टी०—नन्वेतल्लोकत्यागस्तव कथमित्यत आह—नहीति । महावने प्रविशन्तं रामं रुदन्तीं मैथिलीं च दृष्ट्वा चिरं जीवितुमिह लोके स्थातुं नाशंसे इच्छामि अतः सा प्रव्राजितमत्पुत्रा अत एव विधवा पतिरहिता त्वं राज्यं कारयिष्यसि पुत्रेणेति शेषः ॥ ७४ ॥ ७५ ॥

७६] ति० टी०—असतीमेव सतीं पतिमारिकात्वेनासतीत्ववतीमेव सतीं सर्वदा विद्यमानां सतीमापाततः सतीं व्यवस्यामि निश्चिनोमि रूपिणीं दृष्टिप्रियां मदिरां पीत्वा पश्चाद्विकारेण विषसंयुक्तां यथा जानाति तथेत्यर्थः ॥ ७६ ॥

रा० टी०—सतीमिति । असतीं पत्यनिष्टकर्मकर्त्रीत्वेन सतीभिन्नां सतीं स्वसमीपे सर्वदा विद्यमानां रूपिणीं प्रशस्तरूपविशिष्टां त्वामत्यन्तं यथा स्यात्तथा सतीं साध्वीं व्यवस्यामि निश्चिनवं वर्तमानसामीप्य इति भूते लट् । तत्र दृष्टान्तः मदिरां पीत्वा विषमाणो नरः विषसंयुक्तां मदिरामिव मत्ततापगमसमये यथा मदिरामतिमादिकात्वेन जानातीत्यर्थः ॥ ७६ ॥

गो० टी०—सतीमिति । पूर्वं सतीत्वेन ज्ञातां स्वामिदानीमनेन व्यापारेण असतीं सतीमसतीत्वेन स्थितां व्यवस्यामि । कथमिव रूपिणीं दृष्टिप्रियां विषसंयुक्तां मदिरां मद्यविशेषं पीत्वा नरः पानानन्तरं तामसतीं दुष्टामध्यवस्यति तथा कार्यकाले त्वामसतीमध्यवस्यामीत्यर्थः ॥ ७७ ॥

७७] ति० टी०— यच्च त्वमनृतैः सान्त्वैरिष्टवचनैः सान्त्वयन्ती यन्मां भाषसे तद्गीतशब्देन मृगं संरुध्य लुब्ध इव मामवधीः ॥ ७७ ॥

रा० टी०—अनृतैरिति । अनृतैः मिथ्यात्वेन प्रतीयमानैः सान्त्वैः सान्त्वनवचनैः सान्त्वयन्ती त्वं यत् भाषसे स्म तेन लुब्धो व्याधः गीतशब्देन संरुध्य मृगमिव मामवधीः ॥ ७७ ॥

गो० टी०—अनृतैरिति । अनृतैः सान्त्वैरिष्टवचनैः मां सान्त्वयन्ती सती भाषसे स्म अतः गीतशब्देन मृगवधीकरणहेतुगानशब्देन संरुध्य मृगं लुब्धः व्याध इव मामवधीः ॥७८॥

७८] ति० टी०—पुत्रविक्रायकं पुत्रेण मूल्येन क्रीणन्तकेतारम् । अनार्यः पापीति रथ्यासु विक्रैरिष्यन्ति विगर्हिष्यन्ति ॥ ७८ ॥

रा० टी०—अनार्य इति । पुत्रविक्रायकं रत्नादिसदृशमूल्येन पुत्रविक्रयकर्तारं मामार्याः श्रेष्ठाः अनार्यः अयं तुच्छः इति विक्रैरिष्यन्ति निन्दिष्यन्तीत्यर्थः ॥ ७८ ॥

गो० टी०—अनार्य इति । पुत्रविक्रायिकं पुत्रमूल्येन क्रीणन्तकेतारं मामार्याः सन्तः अयमनार्यः पुत्रविक्रयपापकृदिति विक्रैरिष्यन्ति ॥ ७९ ॥

७९] ति० टी०—दुःखं कष्टम् कृच्छ्रं कष्टम् अहो कष्टमहो कष्टमिति यावत् । यत्र वरविषये रामविवासनवरविषयात्तव वाचः क्षमे यतोऽतः पुराकृतमशुभमिव तत्फलमिव । इवशब्द एवार्थे । एवंविधमपरिहार्यत्वेनावश्यानुभाव्यं दुःखं प्राप्तमिति सबन्धः ॥ ७९ ॥

---

१ प्रविशन्तमिति गो०-रा०-पाठः। २ अर्थमिदमधिकं गो०-पाठे। ३ वहिति गो०-पाठः। ४ क्रायिकमिति गो०-पाठः। ५ धिगिति गो०-पाठः। ६ रुदतीमिति युक्तं भाति।

चिरं खलु मया पापे त्वं पापेनाभिरक्षिता । अज्ञानादुपसंपन्ना रज्जुरुद्बन्धनी यथा ॥ ८० ॥
रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये । बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम् ॥ ८१ ॥
[1]तं तु मां जीवलोकोऽयं नूनमाक्रोष्टुमर्हति । मया ह्यपितृकः पुत्रः स महात्मा दुरात्मना ॥ ८२ ॥
बालिशो बत कामात्मा राजा दशरथो भृशम् । स्त्रीकृते यः प्रियं पुत्रं वनं प्रस्थापयिष्यति ॥ ८३ ॥
[3]वेदैश्च ब्रह्मचर्यैश्च गुरुभिश्चोपकर्शितः । भोगकाले महत्कृच्छ्रं पुनरेव प्रपत्स्यते ॥ ८४ ॥
नालं द्वितीयं वचनं पुत्रो मां प्रतिभाषितुम् । स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥ ८५ ॥
यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः । प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति ॥ ८६ ॥

रा० टी०–अहो इति । यत्र यस्मिन्काले तव वाचः ईदृशवचनानि क्षमे सहे तदा अहो कृच्छ्रं कृतः प्रकटितान् प्राणादीन् श्राति पचति संतापयतीत्यर्थः । तत् अहो आश्चर्यभूतं दुःखं प्राप्तं एतेन तव वचनान्यसह्यानीति बोधितम् । एवंविधं व्याप्तदुःखं पुराकृतं पूर्वोपार्जितमशुभं निषिद्धकर्मफलमिव भातीति शेषः । अनिवर्त्यत्वेनाशुभफलकर्मसादृश्यम् नित्यरामाद्युचराणां पुराकृतकर्माभावेनेवेत्युक्तम् ॥ ७९ ॥

गो० टी०–एतादृशदुःखस्यानुभूतत्वाद्विषादातिशयेन विस्मयते–अहो इति । कृच्छ्रं कष्टम् 'स्यात् कष्टं कृच्छ्रम्' इत्यमरः । एतादृशदुःखकृच्छ्रे कदाचिदपि मया न प्राप्ते इत्यर्थः । किंच यस्मिन् वरप्रदानविषये तव वाचः क्षमे एवंविधं दुःखं पुराकृतमशुभमिवाशुभफलमिव प्राप्तम् ॥ ८० ॥

८०] ति० टी०–पापेन मयोपसंपन्ना कण्ठसंलग्ना सौरूप्याय कृतं स्वदक्षणं स्वनाशाय परिणतमित्याशयः ॥ ८० ॥

रा० टी०–चिरमिति । पापेन भ्रष्टप्रतिज्ञत्वरूपापधर्मविशिष्टेन मया चिरं बहुकालमभिरक्षिता त्वम् उद्बन्धनी प्राणापहरणफलिका कण्ठे निबद्धा रज्जुरिवोपसन्ना मम कण्ठे लग्ना ८०॥

गो० टी०–सौरूप्यार्थं कृतं स्वदक्षणं स्वनाशाय परिणतमिति स्रिवति–चिरमित्यादिना ॥ ८१ ॥

८१] ति० टी०–बाल इवेति योजना ॥ ८१ ॥

रा० टी०–रममाण इति । अभिलक्षये अभ्यलक्षयम् "वर्तमानसामीप्ये" इति भूते लट् । तत्र दृष्टान्तः रहसि एकान्ते बालः कृष्णसर्पमिव त्वामस्पृशम् अहमिति शेषः ॥८१॥

गो० टी०–रममाण इति । नाभिलक्षये किंत्वस्पृशमिति योजना ॥ ८२ ॥

८२] ति० टी०–तं त्वध्यहरक्तम् । जीवतापि मया स महात्मा पुत्रोऽपितृकः पितृप्रयुक्तराज्यरहितः कृतो यतोऽत आक्रोष्टुं निन्दितुम् ॥ ८२ ॥

रा० टी०–तमिति । येन दुरात्मना मया पुत्रः अपितृकः पितृरहितो भविष्यति तं मामयं जीवलोकः आक्रोष्टुं निन्दितुमर्हति ॥ ८२ ॥

गो० टी०–मयेति । अपितृकः पितृकृतरक्षणादिरहित इत्यर्थः । आसीदिति शेषः । तं तथाविधं मामाक्रोष्टुमाक्रोशं कर्तुम् । आक्रोशप्रकारमाह–बालिश इति । बालशः मूर्खः 'मूर्खे-वैधेयबालिशाः' इत्यमरः ॥ ८३ ॥ ८४ ॥

८३] ति० टी०–निन्दाप्रकारमाह—बालिश इति । प्रस्थापयिष्यतीत्युपलक्षणं त्रिकालनिन्दायाः ॥ ८३ ॥

रा० टी०–निन्दास्वरूपं बोधयन्नाह–बालिश इति । यः स्त्रीकृते स्त्रीसखाय प्रियं पुत्रं वनं प्रस्थापयिष्यति प्रास्थापयत् स कामात्मा दशरथो बालिशः मूर्खः लृडुपात्तभविष्यत्कालस्याविवक्षा 'मूर्खवैधेयबालिशाः' इत्यमरः ॥ ८३ ॥

८४] ति० टी०–उपकर्शितः काश्यं प्रापितः । कृच्छ्रं जटाभ्युपेततया वने वासक्लेशम् ॥ ८४ ॥

रा० टी०–व्रतैरिति । गुरुभिः बहुभिः ब्रह्मचर्यैः ब्रह्मणो वेदस्य चर्या बोधनं येषु तैर्वेदबोधितैरेवेत्यर्थः । व्रतैः नियमितभोजनादिभिः उपकर्शितः कृशत्वं प्राप्तो रामः भोगकाले एव महत्कृच्छ्रं कष्टं पुनः पुनः प्रपत्स्यते प्राप्स्यते एव । चकारद्वयमेवार्थकम् तृतीयः पुनः पुनरर्थकः ॥ ८४ ॥

गो० टी०–व्रतैरिति । व्रतैः काण्डव्रतैः ब्रह्मचर्यैः मधुमांसवर्जनादिब्रह्मचारिधर्मैः गुरुभिः गुरुकृतशिक्षादिभिः भोगकाले गार्हस्थ्यावस्थायाम् ॥ ८५ ॥

८५] ति० टी०–द्वितीयं वचनं परिहासरूपं वचनम् । अलं समर्थः अहमिव धर्मयन्त्रितत्वात् ॥ ८५ ॥

रा० टी०–नेति । द्वितीयं मद्वचनविरोधिवचनान्तरं मां प्रतिभाषितुं पुत्रो रामः नालं धर्मात्मशिरोमणित्वान्न समर्थः । अतो वनं प्रव्रजेत्युक्तो मया ज्ञापितः स रामः बाढमङ्गीकृतमेतदित्येव वक्ष्यति ॥ ८५ ॥

गो० टी०–नालमिति । सः पुत्रः वनं प्रव्रजेत्युक्तः सन् द्वितीयं वचनं परिहारवचनं मां प्रति भाषितुं नालं किंतु बाढमित्येव वक्ष्यति बाढमित्यङ्गीकारोक्तिः ॥ ८६ ॥

८६] ति० टी०–यदि मे राघवः प्रतिकूलं कुर्यात्तन्मे प्रियं स्यादिति संबन्धः ॥ ८६ ॥

रा० टी०–यदीति । वनं गच्छेति चोदितो मया प्रेरितो राघवो रामः प्रतिकूलं मदुक्तविपरीतं यदि कुर्यान्न गच्छेदित्यर्थः । तदा मे प्रियं स्यात् परंतु वत्सो रामः प्रतिकूलं न करिष्यति प्रतिकूलमित्युभयान्वयि ॥ ८६ ॥

१ उद्बन्धिनीति गो. पाठः । २ अनयोरर्थयोर्व्यत्यस्तपाठः गो. पुस्तके । ३ व्रतैश्चेति गो. रा. पाठः ।

[शुद्धभावो हि भावं मे न तु ज्ञास्यति राघवः । स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥]
राघवे हि वनं प्राप्ते सर्वलोकस्य धिक्कृतम् । मृत्युरक्षमणीयं मां नयिष्यति यमक्षयम् ॥ ८७ ॥
मृते मयि गते रामे वनं मनुजपुंगवे । इष्टे मम जने शेषे किं पापं प्रतिपत्स्यसे ॥ ८८ ॥
कौसल्या मां च रामं च पुत्रौ च यदि हास्यति । दुःखान्यसहती देवी मामेवानुगमिष्यति ॥ ८९ ॥
कौसल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिः सह । प्रक्षिप्य नरके सा त्वं कैकेयी सुखिता भव ॥ ९० ॥
मया रामेण च त्यक्तं शाश्वतं सत्कृतं गुणैः । इक्ष्वाकुकुलमक्षोभ्यमाकुलं पालयिष्यसि ॥ ९१ ॥
प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् । मा स्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः ॥ ९२ ॥
[हन्तानार्ये ममामित्रे सकामा भव कैकयि]
मृते मयि गते रामे वनं पुरुषपुंगवे । सेदानीं विधवा राज्यं सपुत्रा कारयिष्यसि ॥ ९३ ॥

गो० टी०—यदीति । मे मया वनं गच्छेति चोदितो रामः प्रतिकूलं वनं प्रत्यगमनं यदि कुर्यात्तदा मे प्रियं स्यात् वत्सस्तु तत्र करिष्यति ॥ ८७ ॥

गो० टी०—शुद्धभाव इति । शुद्धभावः शुद्धहृदयः मे भावं हृदयं न ज्ञास्यति मां शुद्धतया जानन् मम वचनहृदयं न ज्ञास्यतीति भावः अतः बाढमित्येव वक्ष्यतीति संबन्धः ॥ ८८ ॥

८७] ति० टी०—ततः किमत आह—राघवे हीति । अक्षमणीयं दुःसहदुस्तमत एव सर्वलोकस्य धिक्कृतम् ॥ ८७ ॥

रा० टी०—राघव इति । राघवे रामे वनं प्राप्ते सति सर्वलोकस्य धिक्कृतम् अत एव अक्षमणीयं मां मृत्युः मृतेः डः कालः परमात्मा यमक्षयं यमस्य कालस्य क्षयः अभावो यस्मिन् तं साकेतलोकं नयिष्यति नेष्यति प्रापयिष्यति 'उर्गौरीपतिरुः कालः सेतुरब्धिः परायणम्' इति मात्रिका । अत एव न च कालवशानुग इत्यनेन न विरोधः । स्मृतौ कालशब्दः प्राकृतकालपरः ॥ ८७ ॥

गो० टी०—राघव इति । सर्वलोकस्य सर्वजनस्य 'लोकस्तु भुवने जने' इत्यमरः । धिक्कृतं धिक्करणमक्षमणीयं क्षन्तुमशक्यं किंतु मृत्युर्मां यमक्षयं यमगृहं नयिष्यति ॥ ८९ ॥

८८] ति० टी०—शेषेऽवशिष्टे ममेष्टे कौसल्यादिरूपे जने किं पापं मनोवागगोचरं दुःखसाधनं प्रतिपत्स्यसे करिष्यसि ॥८८॥

रा० टी०—मृते इति । मयि मृते मृत इवाचरति मृतति स तस्मिन् लोकान्तरं प्राप्ते सतीत्यर्थः । शेषे ममेष्टे कौसल्यादौ किं पापं पापजनकीभूतं कर्म प्रतिपत्स्यते कौशल्यादयो मन्थरादेर्वधं करिष्यन्तीति तात्पर्यम् ॥ ८८ ॥

गो० टी०—मृत इति । शेषे कौसल्यादौ किं पापं कर्म न्यायं प्रतिपत्स्यसे चिन्तयिष्यसि ॥ ९० ॥

८९] ति० टी०—यदि कौसल्या मां रामं च हास्यति तान्यां हीना भविष्यति चात्सुमित्रा यदि पुत्रौ च चाद्रामं मां च एतैर्वेदि हीना भविष्यति तदा दुःखान्यसहती देवी कौसल्या सुमित्रा च मामेवानुमरिष्यति लक्ष्मणस्य रामेण सह नियतं गमनाच्छत्रुघ्नस्य भरतानुयायित्वेऽप्यतीव त्वदनुरञ्जनं कुर्वतो रामस्येव तस्यापि त्वया क्रूरतया निराकरणात्पुत्रौ हास्यतीत्युक्तम् तेन तस्याः कौर्यातिशयो व्यङ्ग्यः । राज्ञः शोकातिशयवत्त्वाद्विसंष्ठुलवाक्यप्रयोगो न दोषाय ॥ ८९ ॥

रा० टी०—वस्तुतस्तु कौशल्या नेदृशं कर्म करिष्यतीत्याह—कौशल्येति । कौशल्या मां रामं च पुत्रौ पुत्रप्रायौ लक्ष्मणशत्रुघ्नौ च यदि हास्यति इह न द्रक्ष्यतीत्यर्थः । तदा दुःखान्यसहती सती मामेवानुगमिष्यति प्राप्स्यतीत्यर्थः । एतेन लक्ष्मणो रामेण सहैव गन्तेति भरतो रामप्रतिकूलश्चेत् शत्रुघ्नोऽपि तं त्यक्त्वा राममेव गन्तेति च व्यञ्जितम् ॥ ८९ ॥

गो० टी०—कौसल्यामिति । पुत्रौ लक्ष्मणशत्रुघ्नौ देवी सुमित्रा ॥ ९१ ॥

९०] ति० टी०—पुत्राणां नरकवासो राज्यहान्या राज्ञश्च शोकरूपपापमृत्युमरणादित्याहुः ॥ ९० ॥

रा० टी०—कौशल्यामिति । त्रिभिः पुत्रैः सह कौशल्यादीन् नरके नरकप्रायदुःखे किंच नराणामयोध्याप्रजानां कः अभिषेकनिवृत्तिः कथं जातेति कोलाहलशब्दो यस्मात्तस्मिन् शोके प्रक्षिप्य सुखिता भव ॥ ९० ॥

गो० टी०—कौसल्यामिति । अत्र नरकशब्देन दुःखं लक्ष्यते ॥ ९२ ॥

९१] ति० टी०—मया रामेणेत्यादिव्यङ्ग्योक्तिः । आकुलं क्षुभितम् ॥ ९१ ॥

रा० टी०—मयेति । शाश्वतं बहुकालिकं गुणैर्गुणवद्भिः सत्कृतमिक्ष्वाकुकुलमाकुलं रामादिवियोगेन व्याकुलं यथा स्यात्तथा पालयिष्यसि पालनमपि न भविष्यतीति तात्पर्यम् ॥ ९१ ॥

गो० टी०—मयेति । आकुलं क्षुभितं पालयिष्यसि ॥९३-९६॥

९२-९३] ति० टी०—रामप्रव्राजनस्य भरतसंमतत्वे स मे पुत्र एव नेत्याशयेनाह—प्रियं चेदित्यादि ॥ ९२ ॥ ९३ ॥

रा० टी०—प्रियमिति । रामप्रव्राजनं चेत् यदि भरतस्य प्रियं भवेत् तदा गतायुषः गतः वनं प्रस्थितः आयुः परप्रीति

---

१ ओकोऽन्यमधिको गो. पाठे । २ पत्स्यते इति रा. पाठः। ३ कौसल्यामिति गो. पाठः । ४ मरिष्यतीति गो. पाठः । ५ कैकेयि इति गो. रा. पाठः । ६ अर्धमिदमधिकं गो. पाठे ।

त्वं राजपुत्रि दैवेन न्यवसो मम वेश्मनि । अकीर्तिश्चातुला लोके ध्रुवः परिभवश्च मे ॥
सर्वभूतेषु चावज्ञा यथा पापकृतस्तथा ॥ ॥ ९४ ॥
कथं रथैर्विभुर्यात्वा गजाश्वैश्च मुहुर्मुहुः । पद्भ्यां रामो महारण्ये वत्सो मे विचरिष्यति ॥ ९५ ॥
यस्य चाहारसमये सूदाः कुण्डलधारिणः । अहंपूर्वाः पचन्ति स्म प्रसन्नाः पानभोजनम् ॥ ९६ ॥
स कथं नु कषायाणि तिक्तानि कटुकानि च । भक्षयन्वन्यमाहारं सुतो मे वर्तयिष्यति ॥ ९७ ॥
महार्हवेत्रसंबद्धो भूत्वा चिरसुखोचितः । काषायपरिधानस्तु कथं रामो भविष्यति ॥ ९८ ॥
कस्येदं दारुणं वाक्यमेवंविधमपीरितम् । रामस्यारण्यगमनं भरतस्याभिषेचनम् ॥ ९९ ॥
धिगस्तु योषितो नाम शठाः स्वार्थपरायणाः । न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरम् ॥ १०० ॥

विषयीभूतपुत्रः यस्य तस्य मे प्रेतकृत्यं प्रेतस्य लोकान्तरं प्राप्तस्य यत् कृत्यं शोकादीत्यर्थः तत् भरतो मा कार्षीत् ॥ ९२ ॥

रा० टी०—मृते इति । मृते मृतवत् लोकान्तरं प्राप्ते मयि सा प्रव्राजितमत्पुत्रा त्वं राज्यं कारयिष्यसि ॥ ९३ ॥

९४] ति० टी०—राजपुत्रि ! दैवेन मामकदुरदृष्टवशेन मम वेश्मनि न्यवसः । ' राजपुत्रीवादेन ' इतिपाठे राजपुत्रीव्यपदेशमात्रेणेत्यर्थः । मेऽकीर्तिः परोक्षापयशोऽत्राकीर्तिः महाजनसमक्षं धिक्कारः परिभवः सर्वभूतेष्ववज्ञा क्षुद्रत्वेन प्रतिपत्तिः यतो न्यवसोऽत एतत्सर्वं भविष्यतीति शेषः ॥ ९४ ॥

रा० टी०—त्वमिति । दैवेन देवदेवेन अन्तर्यामिणा प्रेरिता त्वं मम वेश्मनि न्यवसः अत एव अकीर्तिः पापकृतः सर्वभूतेषु अवज्ञा अनादर इव मे परिभवश्च भविष्यति परमात्मकृत्यस्य दुश्चरत्वमस्तीति तात्पर्यम् । सार्धश्लोक एकान्वयी॥९४॥

गो० टी०—त्वमित्यार्धत्रयमेकान्वयम् । अकीर्त्यादित्रयरूपा त्वं राजपुत्रीवादेन राजपुत्रीव्यपदेशेन मम वेश्मनि न्यवसः परिभवः । महाजनसमक्षं धिक्कारः, अवज्ञा क्षुद्रत्वेन प्रतिपत्तिः ॥ ९३ ॥ ९४ ॥

९५] ति० टी०—कथमिति ॥ ९५ ॥

रा० टी०—कथमिति । विभुः समर्थो रामः रथादिभिः मुहुर्मुहुः प्रतिक्षणं यात्वा गन्तव्यदेशं गत्वा महारण्ये पद्भ्यां कथं विचरिष्यति ॥ ९५ ॥

९६] ति० टी०—यस्य चेति ॥ ९६ ॥

रा० टी०—यस्येति । यस्य रामस्य आहारसमये भोजनकाले कुण्डलधारिणः सद्वाः पाककर्तारः अहं पूर्वं येषां ते त्वत्तः पूर्वमहं पक्ष्यामीत्यन्योन्यं कथयन्तः सन्त इत्यर्थः । पानभोजनं पचन्ति स रामः कषायादीनि फलानि वन्यमाहारं मूलादि च भक्षयन् कथं वर्तयिष्यति वर्तिष्यते । श्लोकद्वयमेकान्वयि ॥ ९६ ॥ ९७ ॥

गो० टी०—यस्येति । सद्वाः पाचकाः अहंपूर्वाः अहमहमिकावन्तः प्रशस्तं 'आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः' इत्युक्तप्रकारेण श्रेष्ठम् ॥ ९६ ॥

९७] ति० टी०—स कथमिति । कषायादीनि कन्दमूलानीत्यध्याहारः । तद्रूपं वन्यमाहारं वर्तयिष्यति जीविष्यति९७

गो० टी०—स इति । कषायादित्रयरूपं वन्यमाहारं भक्षयन् कथं नु वर्तयिष्यति केन प्रकारेण जीविष्यति ॥ १०० ॥

९८] ति० टी०—महार्हेति ॥ ९८ ॥

रा० टी०—महार्हेति । महार्हवस्त्रैः महैः सर्वपूज्यैः ब्रह्मादिभिः अर्हाणि प्रशंसनीयानि यानि वस्त्राणि तैः संवीतः भूषितः भूत्वा चिरसुखोचितः सार्वकालिकानन्दयोग्यो रामः काषायपरिधानः ब्रह्मचर्योचितवस्त्रधारी कथं भविष्यति ॥९८॥

गो० टी०—महार्हेति । महार्हेण अतिश्लाघ्येन वस्त्रेण संवीतः संवृतः चिरसुखोषितः चिरकालं सुखास्तरणोषितः काषायपरिधानः कषायेण रक्तं काषायं काषायं परिधानं वस्त्रं यस्य स तथोक्तः ॥ १०१ ॥

९९] ति० टी०—कस्येति । इदमेवंविधं दारुणमेतदुत्तरार्धरूपं रामस्यारण्यगमनमित्यादिवाक्यं वाक्यश्रवणं कस्यापीरितमनिर्वचनीयस्य मम दुष्कर्मणः फलमित्यर्थः ॥ ९९ ॥

रा० टी०—कस्येति । रामस्य अरण्यगमनं भरतस्य अभिषेचनमेवंविधं दारुणं वाक्यं कस्य प्रेरणया हेतोर्वा ईरितं कथितं तद्वदेति तात्पर्यम् ॥ ९९ ॥

गो० टी०—कस्येति । रामस्यारण्यगमनं भरतस्याभिषेचनमित्येवंविधमेतद्वाक्यं कस्य केनोपदिष्टमित्यर्थः । यद्वा कस्य सख्यमिति शेषः ॥ १०२ ॥

१००] ति० टी०—कैकेयीदौर्जन्यं दृष्ट्वा राजा शोकेन स्त्रीमात्रं निन्दति—धिगिति । निन्द्यत्वमस्तित्वर्थः । पुनः स्वाभाविकविवेकेनाह—नेति । कौसल्यादीनां निन्दामर्हत्वादिति भावः ॥ १०० ॥

रा० टी०—धिगिति । भरतस्य मातरमेव न ब्रवीमि सर्वाः ब्रवीमि इत्यर्थः । नन्वं कीदृशीः किं ब्रवीषीत्यत आह—स्वार्थपरायणाः शठाः नाम प्रसिद्धा याः योषितः ताः धिगस्तु ॥ १०० ॥

---

१ राजपुत्रीवादेनेति गो. पाठः । २ त्विति गो. पाठः । ३ प्रशस्तमिति गो. पाठः । ४ त्विति रा. पाठः । ५ वस्त्रैरिति रा. पाठः । ६ संवीत इति गो. रा.पाठः । ७ तपितं इति गो.पाठः । ८ भर्मो निवत्स्यतीति गो.पाठः । ९ एतदिति गो.पाठः । १० अचिन्तितामिति गो.पाठः । ११ पराः सदेति गो.पाठः ।

अनर्थभावेऽर्थपरे नृशंसे ममानुतापाय [1]निवेशितासि ।
किमप्रियं पश्यसि मन्निमित्तं हितानुकारिण्यथवापि रामे ॥ १०१ ॥
परित्यजेयुः पितरोऽपि [2] पुत्रान्भार्याः पतींश्चापि कृतानुरागाः ।
कृत्स्नं हि सर्वं कुपितं जगत्स्याद्दृष्ट्वैव रामं व्यसने निमग्नम् ॥ १०२ ॥
अहं पुनर्देवकुमाररूपमलंकृतं तं सुतमाव्रजन्तम् ।
नन्दामि पश्यन्निव दर्शनेन भवामि दृष्ट्वैव पुनर्युवेव ॥ १०३ ॥
विना [3]हि सूर्येण भवेत्प्रवृत्तिरवर्षता वज्रधरेण वापि ।
रामं तु गच्छन्तमितः समीक्ष्य जीवेन्न कश्चित्किति चेतना मे ॥ १०४ ॥
विनाशकामामहितामित्रामावासयं मृत्युमिवात्मनस्त्वाम् ।
चिरं बताङ्केन धृतासि सर्पी महाविषा तेन हतोऽस्मि मोहात् ॥ १०५ ॥

गो० टी०–धिगिति । शठाः गूढविप्रियकारिण्यः । कौसल्यादिषु तदसंभवादाह–न ब्रवीमीति ॥ १०२ ॥

१०१] ति० टी०–अनर्थे जगदनर्थसाधने भावो यस्याः अर्थपरे स्वार्थसाधनपरे ममानुतापाय मदनुतापार्थं निवेशितासि निवेशितदुर्भावासि ईश्वरेणेति शेषः । मन्निमित्तमिति बहुव्रीहिः रामे वा जगद्धितानुकारिणि किमप्रियं तत्साधनं पश्यसीत्यर्थः ॥१०१॥

रा० टी०–अनर्थेति । अनर्थभावे ! अनर्थः पत्यर्थविरुद्धकारी भावोऽभिप्रायो यस्यास्तत्संबोधनम् अत एव अर्थपरे स्वार्थमात्रसाधिके अत एव नृशंसे क्रूरताविशिष्टे हे हितानुकारिणि ! मम पत्युः अनुतापाय क्लेशाय त्वं निवेशितासि मया स्वगृहे इति शेषः । मन्निमित्तं मद्धेतुकं किं प्रियं स्वप्रीतिविरुद्धं पश्यसि रामे वा किं पश्यसि तद्वदेत्यर्थः ॥ १०१ ॥

गो० टी०–अनर्थभाव इति । मन्निमित्तं मत्कारणकं रामे रामनिमित्तकं वा ॥ १०४ ॥

१०२] ति० टी०–राममरण्यवासरूपे व्यसने निमग्नं दृष्ट्वा कृत्स्नं जगत्कुपितं स्याद्विपरीतं स्यात् । कोपप्रकारमाह–कृतानुरागाः पितरः पुत्रांस्तादृशान् विभक्तिविपरिणामेनात्रापि तत्संबन्धात् बालानपि त्यजेयुः रामेण सह गमनार्थम् । अपिना तादृशाः पुत्रास्तादृशान्वृद्धांस्तादृश्यो भार्यास्तादृशान्पतीन् अपिना तादृशाः पतयस्तादृशीर्भार्या अपि त्यजेयुः एतेन जगदनर्थसाधनभाववत्त्वोपपादिता ॥ १०२ ॥

रा० टी०–परीति । कृतानुरागाः रामविषयकानुरागविशिष्टाः पितरः पुत्रान् भार्याः पतींश्च सर्वमन्यच्च परित्यजेयुः तं रामं व्यसने दुःखे निमग्नं दृष्ट्वैव कृत्स्नं जगत् कुपितं स्यात्१०२

गो० टी०–परित्यजेयुरिति । कृत्स्नं जगत् गच्छतीति व्युत्पत्त्या जगच्छब्देन जीववर्ग उच्यते सर्वशब्देन स्थावरजातमुच्यते कुपितं त्वां प्रतीति शेषः ॥ १०५ ॥

१०३] ति० टी०–स्वस्य रामं विना जीवनव्यतिरेकं दर्शयिष्यंस्तदन्वये स्वजीवनान्वयं दर्शयति–अहमिति । आव्रजन्तं मत्समीपे आगच्छन्तम् । अस्य श्रुत्वेति शेषः । आगच्छन्तं श्रुत्वा दर्शनेन चक्षुषा पश्यन्निव नन्दामि श्रवणमात्रेण दर्शनजन्यं सुखमनुभवामि । दृष्ट्वैव दृष्ट्वा तु पुनर्भिरहद्धोऽपि पुनर्युवेव हृष्टपुष्टान्तर्बहिःपरिकरो भवामि ॥ १०३ ॥

रा० टी०–अहमिति । देवकुमाररूपमाव्रजन्तं मत्समीपे आगच्छन्तं सुतं रामं दर्शनेन चक्षुषा पश्यन् नन्दाम्येव एवेन इतरस्मृतिव्यवच्छेदः । इव एवार्थे । दृष्ट्वा अवलोक्य तु पुनर्युवा इव भवामि उत्साहस्याधिक्यं भवतीति तात्पर्यम् । इवेन तदवस्थाया नित्यात्वं सूचितम् ॥ १०३ ॥

गो० टी०–अहमिति । अहं पुनः अहं तु मत्स्वभावः लौकिकेभ्यो भिन्नः देवकुमाररूपं निसर्गसुन्दरमलंकृतमलंकारैरतिशयितशोभं चन्द्रकान्ताननमित्यस्य हृदि विपरिवर्तमानत्वात्तमित्युक्तं सुतं सौन्दर्याद्यभावेऽपि सुतत्वप्रयुक्तप्रेमास्पदम् आव्रजन्तं मत्तमातङ्गगामिनमित्युक्तरीत्या गमनकालिकसंभ्रमविशेषशालिनं दर्शनेन मानसज्ञानेन पश्यन्नपि नन्दामि दृष्ट्वा पुनः साक्षात्कृत्य तु युवेव भवामि युववद्दृष्टपुष्टाङ्गो भवामि ॥ १०६ ॥

१०४] ति० टी०–हिरपीत्यर्थे । सूर्येण विनापि लोकस्य प्रवृत्तिर्व्यवहारः स्यात् वज्रधरेणावर्षतापि प्रवृत्तिर्लोकस्य जीवनं स्यात् वा इत्यथवा इन्द्रेण स्वरूपसत्तां विनापि प्रवृत्तिर्भवेत् रामं तु विना न कस्यापि जीवनमिति मे मतिः अन्तर्यामिणं विना कस्यापि व्यवहारस्यासिद्धेः । एवं च स्वाजीवनं कैमुतिकन्यायसिद्धमिति भावः ॥ १०४ ॥

रा० टी०–विनेति । सूर्येण विना प्रवृत्तिः लोकस्थितिर्भवेत् अवर्षता वज्रधरेण प्रवृत्तिर्भवेत् इतोऽयोध्यातः गच्छन्तं रामं समीक्ष्य दृष्ट्वा तु कश्चित् अयोध्यावासी न जीवेत् स्वस्थतया तिष्ठेत् इति मे चेतना निश्चयः ॥ १०४ ॥

गो० टी०–विनेति । प्रवृत्तिः संचारः चेतना बुद्धिः वज्रधरपदे प्रवृत्तिशब्देन जीवनविषयप्रवृत्तिरुच्यते ॥ १०७ ॥

१०५] ति० टी०–किं च त्वामात्मनो मृत्युमिव स्वगृहेऽहमावासयम् । किं च त्वं महाविषा सर्पी मयाङ्केन मोहात्तत्त्वेनाज्ञानाद्धृतासि तेनाङ्कधारणेनाहं हतोऽस्मि ॥ १०५ ॥

---

१ निविष्टभावे इति गो.पाठः । २ अपीति गो. पाठः । ३ चेति गो. पाठः । ४ चेति गो. पाठः । ५ अपीति गो. पाठः । ६ कश्चिदितीति रा. पाठः ।

मया च रामेण सलक्ष्मणेन प्रशास्तु हीनो भरतस्त्वया सह ।
पुरं च राष्ट्रं च निहत्य बान्धवान्ममाहितानां च भवाभिहर्षिणी ॥ १०६ ॥
नृशंसवृत्ते व्यसनप्रहारिणि प्रसह्य वाक्यं यदिहाद्य भाषसे ।
न नाम ते तेन मुखात्पतन्त्यधो विशीर्यमाणा दशनाः सहस्रधा ॥ १०७ ॥
न किंचिदाहाहितमप्रियं वचो न वेत्ति रामः परुषाणि भाषितुम् ।
कथं तु रामे ह्यभिरामवादिनि ब्रवीषि दोषान्गुणनित्यसंमते ॥ १०८ ॥
प्रताम्य वा प्रज्वल वा प्रणश्य वा सहस्रशो वा स्फुटितां महीं व्रज ।
न ते करिष्यामि वचः सुदारुणं समाहितं केकयराजपांसने ॥ १०९ ॥

रा० टी०—स्वज्ञानेनैवाहं पराभूत इत्याह—विनाशेति । विनाशकामामिक्ष्वाकुकुलनाशविषयकेच्छावतीमत एवाहितां हिताचरणरहितामत एवामित्रां त्वामात्मनः मृत्युमिव अवासयं स्ववेश्मनीति शेषः । अत एव महाविषा सर्पीव त्वमङ्केन मया धृतासि तेन हेतुना हतोऽस्मि अहमिति शेषः ॥ १०६ ॥

गो० टी०—विनाशकामामिति । मोहादावासयं गृह इति शेषः । सर्पी सर्पजातिः जातिलक्षणो ङीष् त्वं मोहादङ्केन धृतासि । तेनाङ्कधारणेन ॥ १०८ ॥

१०६] ति० टी०—पुरं च राष्ट्रं चेत्यस्य प्रशास्त्वित्यनेन सहान्वयः । त्वं च बान्धवान्पतिपुत्रादीन्निहत्य ममाहितानां शत्रूणामभिभाषणशीला भव वार्तांकरणयोग्यबान्धवाभावादिति भावः । 'अभिहर्षिणी' इतिपाठे तेषां हर्षदा भव ॥ १०६ ॥

रा० टी०—मयेति । मदादिना हीनो भरतः त्वया सह प्रशास्तु लोकमिति शेषः तेन पुरादिकं निहत्य विध्वस्य ममाहितानां शत्रूणामभिहर्षिणी अतिहर्षणशीला भव ॥ १०६ ॥

गो० टी०—मयेति । सलक्ष्मणेन रामेण मया च हीनो भरतस्त्वया सह पुरं राष्ट्रं बान्धवांश्च निहत्य प्रशास्तु पुरादिहननरूपं प्रशासनं करोतु । ममाहितानां शत्रूणां च अभिहर्षिणी भवेति संबन्धः ॥ १०९ ॥

१०७] ति० टी०—व्यसनप्रहारिणि वार्धकरूपापदि पुत्रवियोगरूपप्रहारकारिणि ! प्रसह्य पतिपत्नीभावं तिरस्कृत्येह देशेऽस्य काले यद्भाषसे क्रूरमतस्ते मुखादवश्यपाता दन्ताः केन नाम हेतुना सहस्रधा विशीर्यमाणाः सन्तो न पतन्तीति न जाने इति शेषः ॥ १०७ ॥

रा० टी०—नृशंसेति । व्यसनप्रहारिणि व्यसनेन पुत्रवियोगजनितदुःखदानेन प्रहरति तच्छीला तत्संबोधनं वाक्यं मद्वचनं प्रसह्य अनादृत्य यदिह अस्मिन् समये भाषसे तेन भाषणेन ते तव मुखात् सहस्रधा विशीर्यमाणाः दशनाः दन्ताः अद्य पृथिव्यां न पतन्ति नाम आश्चर्यमेतत् ॥ १०७ ॥

गो० टी०—नृशंसवृत्त इति । नृशंसवृत्ते क्रूरव्यापारे व्यसनप्रहारिणि क्षते प्रहारन्यायेन विपदि प्रहरणशीले ! रामविरहासहनं विपत् तत्र प्रहारः पुनः पुनश्चोदनं त्वमिह देशे अस्मिन्काले प्रसह्य पतिस्वातन्त्र्यं तिरस्कृत्य यद्वाक्यं भाषसे तत्र ते मुखात् दशनाः सहस्रधा विशीर्णाः सन्तः केन नाम हेतुना न पतन्तीति संबन्धः ॥ ११० ॥

१०८] ति० टी०—अप्रियवचोऽकथने हेतुः—न वेत्तीत्यादि । दोषाञ्जटाचीरधारणवनवासादीनात्मनो दोषजनकान् । गुणैर्नित्यं सर्वेषां संमते ॥ १०८ ॥

रा० टी०—नेति । यो रामः परुषाणि अक्षराणि भाषितुं न वेत्ति जानीते अतः किंचिदहितमप्रियं च वचो न आह तस्मिन् अभिरामवादिनि गुणनित्यसंमते गुणैः गुणविशिष्टैः नित्यं संमते पूजिते रामे दोषान् कथं ब्रवीषि दोषकथनं विना तदनिष्टाचरणं लोके न दृष्टमिति तात्पर्यम् ॥ १०८ ॥

गो० टी०—न किंचिदिति । रामः अहितमप्रियं च किंचिद्वचो नाह परुषाणि भाषितुं न वेत्ति ज्ञानपूर्वकत्वात् भाषणस्य कुतस्तत्प्रसक्तिरिति भावः । न केवलं परुषावेदनं प्रत्युताभिरामवादिनि सर्वप्रियभाषिणि गुणैर्नित्यं संमते रामे कथं तु दोषान् प्रव्राजनहेतून् ब्रवीषि ॥ १११ ॥

१०९] ति० टी०—प्रताम्य ग्लायस्व प्रज्वल अग्निप्रवेशेन प्रणश्य विषेण कुठालप्रहारैः सहस्रशः स्फुटितां कृतगर्तां वा महीं व्रज अथापि ते वचो न करिष्य इति संबन्धः ॥ १०९ ॥

रा० टी०—प्रताम्येति । प्रताम्य ग्लानिं कुरु प्रज्वल अग्न्यादिना भस्मीभव प्रणश्य उद्बन्धनादिना ध्वंसं प्राप्नुहि स्फुटिता प्रस्तरादिप्रहारैः स्फुटितशिराः महीं व्रज ॥ १०९ ॥

गो० टी०—प्रताम्येति । प्रताम्य ग्लानिं भज ताम्यतेर्लोप्यमध्यमपुरुषैकवचनम् । प्रज्वल कुपिता भव प्रणश्य नष्टा भव सहस्रशः स्फुटिता सती महीं व्रज वा भूगोः पत वेत्यर्थः । केकयराजानां पांसनि दूषणि ! ॥ ११२ ॥

१ वेति गो. पाठः । २ हर्षिणीति गो. रा. पाठः । ३ केनेति गो. पाठः । ४ न्विति गो. पाठः । ५ स्फुटितेति गो. स. पाठः । ६ मनेति गो. रा. पाठः । ७ पांसनीति गो. रा. पाठः ।

क्षुरोपमां नित्यमसत्प्रियंवदां प्रदुष्टभावां स्वकुलोपघातिनीम् ।
न जीवितुं त्वां विषहेऽमनोरमां दिधक्षमाणां हृदयं सबन्धनम् ॥ ११० ॥
न जीवितं मेऽस्ति कुतः पुनः सुखं विनात्मजेनात्मवतां कुतो रतिः ।
ममाहितं देवि न कर्तुमर्हसि स्पृशामि पादावपि ते प्रसीद मे ॥ १११ ॥
स भूमिपालो विलपन्ननाथवत्त्वया गृहीतो हृदयेऽतिमात्रया ।
पपात देव्याश्चरणौ प्रसारितावुभावसंप्राप्य यथातुरस्तथा ॥ ११२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।

कैकेय्या पुनश्च वरदाननिर्बन्धेन पीडितो दशरथः सकरुणमात्मशोचनपूर्वकं तां जगर्ह । तथैवास्तं गते सवितर्यार्द्रप्रभातं समुदयं कैकेयीं रामराज्यमयाचत तदनङ्गीकाराच्चातितमदुःखावेगान्मूर्छितः क्षितावपतत्प्रतिबुद्धश्च वैतालिकारचितप्राबोधिकमङ्गलबाधादीन्यवारयत् ।

अतदर्हं महाराजं शयानमतथोचितम् । ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम् ॥ १ ॥

११०] ति० टी०—असत्प्रियंवदां मिथ्याप्रियभाषिणीम् प्रदुष्टभावां दुष्टान्तःकरणामत एवामनोरमां संबन्धनं सप्राणं हृदयं दिधक्षमाणां त्वां जीवितुं जीवयितुं न विषहे नोत्सहे तव नाशमेवाशासे इत्यर्थः । " प्राणबन्धनं हि सोम्य मनः " इति च्छान्दोग्यश्रुतिः ॥ ११० ॥

रा० टी०—क्षुर इति । क्षुरोपमां क्षुरवत् स्वसंबद्धच्छेदनकर्त्रीम् । तत्र हेतुः असत्प्रियंवदामसती एव प्रियंवदेति कर्मधारयः प्रदुष्टभावां निषिद्धाभिप्रायविशिष्टामत एव स्वकुलोपघातिनीं मनोरमां रूपलावण्यमात्रेण रमणशीलां सबन्धनं प्राणसहितं हृदयं दिधक्षमाणां त्वां जीवितुं न विषहे उत्साहं न करोमि११०

गो० टी०—क्षुरोपमामिति । क्षुरोपमां तद्वत् क्रूरा मसत्प्रियंवदां मिथ्याप्रियवादिनीं प्रदुष्टभावां प्रकर्षेण दुष्टहृदयाम् अमनोरमामिति पदच्छेदः सबन्धनं समूलं प्राणरूपमूलसहितं "प्राणबन्धनं हि सौम्य मनः" इति श्रुतेः । 'सदिन्धनम्' इति पाठे हृदयमेव सदिन्धनं दिधक्षमाणां दग्धुमिच्छन्तीं त्वां जीवितुं जीवयितुं न विषहे नोत्सहे ॥ ११३ ॥

१११] ति० टी०—दण्डवाक्यमुक्त्वा पुनस्तामाह—नेति । आत्मवतामात्मज्ञानाम् । अत्रापिः पूरणीयः । यदेवमतो ममेत्यादिः ॥ १११ ॥

रा० टी०—नेति । आत्मजेन विना आत्मवतो जानतो मे मम जीवितं नास्ति कुतः सुखं कुतः रतिः तत्कारणीभूतप्रीतिश्च कुतः अतः मम अहितं कर्तुं त्वं नार्हसि ॥ १११ ॥

गो० टी०—नेति । रतिस्त्वद्विषयेति शेषः । यदेवमत आह—ममाहितमिति । आत्मवतः जीवत इत्यर्थः ॥ ११४ ॥

११२] ति० टी०—अतिमात्रयातिक्रान्तसौन्दर्यपरिच्छेदया अतिक्रान्तमर्यादया । हृदये मर्मणि गृहीतः । प्रसारितावित्यनेन पत्यावप्यधमर्णदृष्टिर्व्यौत्यते असंप्राप्येत्यनेन पित्सूक्षोरपि चित्तमूर्छाजनितवैवश्यं द्योतितम् । तदेवाह—यथातुर इति । आतुरो यथा किंचित्सप्रष्टुकामोऽस्पृष्ट्वैव मध्ये मूर्च्छया पतति तथेत्यर्थः ॥ ११२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वादशः सर्गः ॥ १२ ॥

रा० टी०—स इति । अतिमात्रया दृढनिश्चयवत्या क्रिया कैकय्या हृदये गृहीतः स भूमिपालः अनाथवत् विलपन् सन् प्रसारितौ देव्या उभौ चरणौ असंप्राप्य आतुरो यथा तथा पपात चरणौ ग्रहीतुं प्रचलितोऽपि मध्ये एव अपतदित्यर्थः । एतेन विह्वलतातिशयः सूचितः ॥ ११२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्वादशः सर्गः ॥ १२ ॥

गो० टी०—स इति । अतिमात्रया अमर्यादया क्रियहृदये गृहीतः तदधीनहृदय इत्यर्थः । भूमिपालोऽपि तां निग्रहीतुमसमर्थ इत्यर्थः अनाथवद्विलपन् त्वां जीवयितुं नोत्सहे ते पादौ स्पृशामि प्रसीदेत्यनवस्थितवचनानि भाषमाणः प्रसारितावित्यनेनानादर उक्तः असंस्पृश्येत्यनेन पित्सूक्षायामेव मूर्च्छा जातेति गम्यते ॥ ११२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

१] ति० टी०—अथ सत्यपाशबद्धतया प्रणामवाक्येन च न ते वचः करिष्यामीति वचसि दार्ढ्याभावं निश्चित्य पुनरप्याह—अतदर्हं प्रणामानर्हम् । अतथोचितं शयनानर्हम् ॥ १ ॥

१ आत्मवत इति गो. रा. पाठः । २ संस्पृश्येति गो. पाठः ।

अनर्थरूपासिद्धार्था ह्यभीता भयदर्शिनी । पुनराकारयामास तमेव वरमङ्गना ॥ २ ॥
त्वं कत्थसे महाराज सत्यवादी दृढव्रतः । मम चेदं वरं कस्माद्विधारयितुमिच्छसि ॥ ३ ॥
एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा । प्रत्युवाच ततः क्रुद्धो मुहूर्तं विह्वलन्निव ॥ ४ ॥
मृते मयि गते रामे वनं मनुजपुंगवे । हन्तानार्ये ममामित्रे सकामा सुखिनी भव ॥ ५ ॥
स्वर्गेऽपि खलु रामस्य कुशलं दैवतैरहम् । प्रत्यादेशादभिहितं धारयिष्ये कथं बत ॥ ६ ॥
कैकेय्याः प्रियकामेन रामः प्रव्राजितो वनम् । यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति ॥ ७ ॥

२] ति० टी०—अनर्थरूपा कुलस्येति शेषः । असिद्धोऽर्थः प्रयोजनं यस्याः अभीता जनापवादादभीता भयदर्शिनी रामाद्धरतस्येति शेषः । तमेव वरं पूर्वदत्तमेव वरमुद्दिश्य राजानमाकारयामास संबोधयामास ॥ २ ॥

रा० टी०—दशरथोक्त्यानन्तरभवानन्तरकालिकं कैकयीष्टान्तमाह—अतदर्हमिति । अतदर्हं शोकयोग्यतारहितं देवलोकात्परिच्युतं ययातिमिव शयानं भूमौ पतितमतथोचितं तादृक्शयनानर्हं महाराजं दशरथमनर्थरूपा राजेप्सितार्थविरुद्धार्थनिरूपणकर्त्री सिद्धार्था साधितदेवप्रयोजना अभीता वास्तवयशोरूपपत्यर्थसाधिकात्वरूपधर्मावेशिष्टात्वेन धर्मच्युतिभीतिरहिता, किंच अभीता वास्तवयशोरूपपत्यर्थप्रापिका इणो रूपम् । अभयदर्शिनी रामनिष्टसर्वहेतुकभयाभावदर्शनशीला कैकयी तं याचितं वरं पुनः आकारयामास राज्ञा संपादयामास । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—न ते करिष्यामि वच इत्युक्त्वापि धर्मपाशबद्धतया पश्चात्तप्तः पुनस्तां सान्त्वयति त्रयोदशे—अतदर्हमित्यादि श्लोकद्वयमेकान्वयम् । अतदर्हं तादृशदुःखानर्हमतथोचितमधःशयनाद्युचितमनर्थरूपा पापरूपा असिद्धार्था अनिष्पन्नप्रयोजना अभीता लोकापवादभीतिरहिता भयदर्शिनी दशरथस्येति शेषः । यद्वा अभयदर्शिनी दशरथस्य भयमपश्यन्तीत्यर्थः । तमेव वरं पूर्वदत्तमेव वरमुद्दिश्य महाराजमाकारयामास संबोधयामास ' यद्वा दातव्यत्वेन ग्राहयामासेत्यर्थः । वस्तुतस्त्वेकवचनस्वारस्यात् वरं श्रेष्ठं दशरथं स्वाभिमतकथनायाह्वयामासेत्यर्थः ॥ १ ॥ २ ॥

३–५] ति० टी०—कत्थसे श्लाघसे । पूर्वार्धान्ते इतिरध्याहार्यः । विधारयितुम् ऋणत्वेनेति शेषः ॥ ३–५ ॥

रा० टी०—तत्संपादनप्रकारमाह—त्वमिति । हे महाराज ! सत्यवादी अत एव दृढव्रतः त्वं कथ्यसे जनैरिति शेषः । अतो मम वरं विधारयितुं स्वान्तरेव संस्थापयितुं दूरीकर्तुं वा कस्माद्धेतोरिच्छसि अनुचितमेतदिति तात्पर्यम् ॥ ३ ॥

गो० टी०—त्वमिति । विधारयितुं ऋणत्वेन धारयितुं च्यावयितुं वा विशेषेण धारयितुमादातुमिति वार्थः ॥ ३ ॥

रा० टी०—एवमिति । एवमुक्तो राजा क्रुद्ध इव विह्वलन् सन् प्रत्युवाच ॥ ४ ॥

रा० टी०—तदाकारमाह—मृत इति । हे अनार्ये आर्यविरुद्धे ! हे अमित्रे ! मयि मृते लोकान्तरं प्राप्ते सति सुखिनी सुखविशिष्टा भव ॥ ५ ॥

गो० टी०—विह्वलन्मूर्च्छन् ॥ ४ ॥ ५ ॥

६] ति० टी०—रामप्रवासदुःखेन मृत्वा स्वर्गं गतस्यापि मे सुखं नास्तीत्याह—स्वर्गे इति । रामस्य कुशलं दैवतैः पृष्टोऽहं किञ्चन्तरं वदिष्य इति शेषः । वनं प्रत्यादिष्ट इत्युत्तरं देयं चेत्प्रत्यादेशात्तदूपादुत्तरादूर्ध्वं यदेवैरभिहितं भविष्यति ज्येष्ठं श्रेष्ठगुणैर्युक्तं कथं प्रत्याख्यातवानसीत्येवंरूपं वाक्यं तत्कथं धारयिष्ये हृदय इति शेषः अतस्तदप्रत्याख्यानमेव वरमिति भावः ॥ ६ ॥

रा० टी०—स्वर्ग इति । स्वर्गे साकेतेऽपि दैवतैर्देवताभिमानिदेवैरभिहितं कथितं रामस्य कुशलं धारयिष्ये प्रत्यादेशात्प्रत्यादेशं प्राप्तं प्रसङ्गादेवैः कथितं तव कुशलं कथं धारयिष्ये तव कुशलं न श्रोष्यामीत्यर्थः ॥ ६ ॥

गो० टी०—स्वर्ग इति । रामस्य कुशलं प्रति दैवतैः प्रत्यादेशादभिहितं धिक्कारपूर्वमभिहितं वाक्यं कथं धारयिष्ये सहिष्ये मूढः स्त्रीहेतोः कथं गुणवत्पुत्रं त्यक्तवानसीत्यभिहितं श्रुत्वा कथमात्मानं धारयिष्ये तथाच रामप्रवासने इह परत्र च मम सौख्यं नास्तीत्यर्थः ॥ ६ ॥

७] ति० टी०—ननु सत्यवशात्प्रत्यादिष्ट इत्युत्तरं तत्राह—कैकेय्या इति । प्रियकामेन प्रियेण वरेण । एतत्सत्यं यदि यद्यपि ब्रवीमि तत्तथाप्येतन्मे वाक्यमसत्यं भविष्यति, असत्यं मंस्यन्तीत्यर्थः । कामुकतया प्रत्याख्यात इत्येव मंस्यन्त इत्याशयः ॥ ७ ॥

रा० टी०—कैकेय्या इति । कैकेय्याः प्रियकामेन केकयीनिष्टप्रीतिविषयीभूतवरदत्तयदानेच्छावता मया यदि रामो वनं प्रव्राजितः । एतत् सत्यं ब्रवीमि तदा तदभिषेकप्रतिज्ञानमसत्यं भविष्यति एतेन अन्यतरासत्यत्वं दुष्परिहर्तव्यमिति सूचितम् ॥ ७ ॥

गो० टी०—ननु सत्यप्रतिज्ञत्वनिर्वाहार्थं रामः प्रव्राजित इति वक्तव्यमित्यत्राह—कैकेय्या इति । मयेत्यनन्तरमितिकरणं द्रष्टव्यं तदसत्यं भविष्यति श्रुत्वाहमभिषेक्ष्यामि यौवराज्ये परन्तपेति रामोद्देशेनोक्तं वाक्यमसत्यं भविष्यतीत्यर्थः ॥ ७ ॥

१ इममिति गो. पाठः । २ हन्त नार्येति गो. पाठः । ३ मयेति गो. पाठः । ४ मंस्यन्ते इति साधु भाति ।

अपुत्रेण मया पुत्रः श्रमेण महता महान् । रामो लब्धो महातेजाः स कथं त्यज्यते मया ॥ ८ ॥
शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः । कथं कमलपत्राक्षो मया रामो विवास्यते ॥ ९ ॥
कथमिन्दीवरश्यामं दीर्घबाहुं महाबलम् । अभिरामं महं रामं स्थापयिष्यामि दण्डकान् ॥ १० ॥
सुखानामुचितस्यैव दुःखैरनुचितस्य च । दुःखं नामानुपश्येयं कथं रामस्य धीमतः ॥ ११ ॥
यदि दुःखमकृत्वा तु मम संक्रमणं भवेत् । अदुःखार्हस्य रामस्य ततः सुखमवाप्नुयाम् ॥ १२ ॥
नृशंसे पापसंकल्पे रामं सत्यपराक्रमम् । किं विप्रियेण कैकेयि प्रियं योजयसे मम ॥ १३ ॥
अकीर्तिरतुला लोके ध्रुवं परिभविष्यति । तथा विलपतस्तस्य परिभ्रमितचेतसः ॥ १४ ॥
अस्तमभ्यागमत्सूर्यो रजनी चाभ्यवर्तत । सा त्रियामा तदार्तस्य चन्द्रमण्डलमण्डिता ॥ १५ ॥
राज्ञो विलपमानस्य न व्यभासत शर्वरी । सदैवोष्णं विनिःश्वस्य वृद्धो दशरथो नृपः ॥ १६ ॥

८–९] ति० टी०–त्यज्यते त्यक्ष्यते ॥ ८ ॥ ९ ॥

रा० टी०–अपुत्रेणेति । अपुत्रेण पुत्ररहितेन मया महता श्रमेण लब्धो महातेजाः पुत्रः स रामः मया कथं त्यज्यते त्यक्तुं न शक्नोमीत्यर्थः ॥ ८ ॥

रा० टी०–त्यागानर्हत्वमेव बोधयन्नाह–शूर इति । शूरत्वादिगुणविशिष्टः रामः कथं विवास्यते ॥ ९ ॥

गो० टी०–अपरित्यागे हेत्वन्तराणि दर्शयति–अपुत्रेणेत्यादि ॥ ८–१० ॥

१०] ति० टी०–स्थापयिष्यामि प्रस्थापयिष्यामि ॥ १० ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–कथमिति । इन्दीवरश्यामत्वादिगुणविशिष्टं रामं दण्डकान् कथं स्थापयिष्यामि प्रस्थापयिष्यामि ॥ १० ॥

११] ति० टी०–दुःखैरिति षष्ठ्यर्थे तृतीया । दुःखवनगमनरूपं दुःखसाधनम् ॥ ११ ॥

रा० टी०–सुखानामिति । सुखानामेव उचितस्य योग्यस्य दुःखैः दुःखानामनुचितस्य रामस्य दुःखं कथमनुपश्येयम् ॥ ११ ॥

गो० टी०–सुखानामिति । दुःखैरिति षष्ठ्यर्थे तृतीया ॥ ११ ॥

१२] ति० टी०–सर्वथा रामस्यादुःखकरणमेव मे श्रेय इत्याह–यदीति । अदुःखार्हस्य रामस्य दुःखमकृत्वा यदि मम संक्रमणं स्वर्गं प्रति गमनं भवेत्तदा स्वर्गे सुखमाप्नुयामित्यन्वयः । मरणे वराप्रदानजन्यदोषोऽपि न, जीवतो हि सा प्रतिक्रेति भावः ॥ १२ ॥

रा० टी०–स्वसुखोपायं चिन्तयन्नाह–यदीति । अदुःखार्हस्य रामस्य दुःखं दुःखहेतुभूतवनप्रव्राजनरूपवरमकृत्वा असंपाद्य अदत्त्वेत्यर्थः यदि मम संक्रमणं लोकान्तरगमनं भवेत् तदा सुखमवाप्नुयामहमिति शेषः । द्रुतं लोकान्तरं प्राप्ते इहस्थया अनया संभाषणं न स्यात् तहींयं भिया स्वेप्सितं रामसन्निधौ न कथयिष्यतीति रामो वनं न, गमिष्यतीति तात्पर्यम् ॥ १२ ॥

गो० टी०–यदीति । अदुःखार्हस्य रामस्य दुःखमकृत्वा मम संक्रमणं यदि भवेत् ततस्तदा सुखमवाप्नुयां संक्रमणं तृणजलौकान्यायेन देहादेहान्तरप्राप्तिः पञ्चत्वमिति यावत् ॥ १२ ॥

१३] ति० टी०–मम प्रियं रामं विप्रियेण किं योजयसे इत्यन्वयः ॥ १३ ॥

रा० टी०–नृशंसे इति । सत्यपराक्रमं मम प्रियं रामं विप्रियेण वियोगेन किं किमर्थं योजयसे ॥ १३ ॥

गो० टी०–नृशंस इति । मम प्रियं रामं विप्रियेणानभिमतदण्डकारण्यगमनेन किं किमर्थं योजयसे ॥ १३ ॥

१४] ति० टी०–अकीर्तिः जीजित इत्यकीर्तिर्जन्मसंपादितां कीर्तिं परिभविष्यतीत्यर्थः ॥ १४ ॥

रा० टी०–रामप्रव्राजने अनर्थान्तरमपि भविष्यतीत्याह–अकीर्तिरिति । अकीर्तिः त्वद्वरप्रदानमूलकाभिषेकनिवृत्तिहेतुकप्रतिज्ञाहानिजनितदुर्यशः परिभविष्यति दूरीकरिष्यति कीर्तिमिति शेषः । परिभविष्यतीत्यस्य यदि भविष्यतीत्येवार्थः तदा न शेषकल्पना । परीति लोके इत्यस्य विशेषणं वा संपूर्णेत्यर्थः । विप्रत्ययान्तमेतत् । अर्धं पृथक् । दशरथोक्तिं समाप्य वृत्तान्तरमाह–तथेति । तथा वर्णितप्रकारेण विलपतः परिभ्रमितचेतसः तस्य राज्ञः सूर्यः अस्तमभ्यागमत् अत एव रजनी रात्रिः अभ्यवर्तत प्राप्नोत् अर्धद्वयमेकान्वयि । "षष्ठीचानादरे" इत्यनुशासनविहिता तस्येत्यत्र षष्ठी ॥ १४ ॥

गो० टी०–अकीर्तिरित्यर्धम् । भविष्यतीति शेषः ॥ १४ ॥

गो० टी०–तथेति । तस्य विलपतः तस्मिन् विलपति सतीत्यर्थः ॥ १६ ॥

१५–१६] ति० टी०–यत्संबन्धिप्रदोषे स्वनिवेशप्रवेशात्पूर्वं सूर्योऽस्तमगमत्, रजनी चाभ्यवर्तत सा त्रियामा चन्द्रमण्डलमण्डिताप्यार्तस्य दुःखवती विलपमानस्य च न व्यभासत न प्रकाशेन सुखदाभूत् विलापेनैव रात्रिकालो व्यतीत इति भावः । यतः सा शर्वरी हिंसिका तस्येति शेषः शृणातीति योगात् ॥ १५ ॥ १६ ॥

१ बाहुरिति गो. पाठः । २ प्रेक्षयिष्यामीति गो. पाठः । ३ अयेति गो. पाठः । ४ ध्रुवः परिभवश्च मे इति गो. पाठः । ५ तयेति गो. पाठः । ६ तयेति गो. रा. पाठः ।

विललापार्तवद्दुःखं गगनासक्तलोचनः । न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते ॥ १७ ॥
क्रियतां मे दया भद्रे मयायं रचितोऽञ्जलिः । अथवा गम्यतां शीघ्रं नाहमिच्छामि निर्घृणाम् ॥ १८ ॥
नृशंसां केकयीं द्रष्टुं यत्कृते व्यसनं मम । एवमुक्त्वा ततो राजा कैकेयीं संयताञ्जलिः ॥ १९ ॥
प्रसादयामास पुनः कैकेयीं राजधर्मवित् । साधुवृत्तस्य दीनस्य त्वद्वृतस्य गतायुषः ॥ २० ॥
प्रसादः क्रियतां भद्रे देवि राज्ञो विशेषतः । शून्ये न खलु सुश्रोणि मयेदं समुदाहृतम् ॥ २१ ॥
कुरु साधुप्रसादं मे बाले सहृदया ह्यसि । प्रसीद देवि रामो मे त्वदत्तं राज्यमव्ययम् ॥ २२ ॥

रा० टी०—सेति । चन्द्रमण्डलमण्डिता त्रियामा शर्वरी रात्रिः विलपमानस्य राज्ञो दशरथस्य न व्यभासत न प्राकाशयत् अन्तर्भावितणिजर्थः । संबन्धसामान्यविवक्षया राज्ञ इत्यत्र षष्ठी ॥ १६ ॥

गो० टी०—सा त्रियामेति । अत्रियामा यामत्रयवत्त्वं विहायातिदीर्घेत्यर्थः ॥ १६ ॥

रा० टी०—तथेति । तथा तेन प्रकारेण दृढः त्यक्तलोकवृत्तान्तः दशरथः उष्णं विनिःश्वस्य गगनासक्तलोचनः ऊर्ध्वदृष्टिः सन् आर्तवद्विललाप ॥ १६ ॥

गो० टी०—तथेति । आर्तवत् महारोगादिना पीडित इव दुःखं विललाप शृण्वतां यथा दुःखं भवति तथा विललापेत्यर्थः ॥ १७ ॥

१७] ति० टी०—आर्तवद्रोगपीडितवत्, यद्वा स्वार्थे वतिः शृण्वतां दुःखं यथा भवति तथा विललाप, यद्वा दुःखं प्राप्येति शेषः । अथ दुःखवशाद्राज्ञ्या अभ्युदिं प्रार्थयते—न प्रभातमिति । 'त्वया' इति पाठे त्वया गतया जायमानं प्रातः कालमित्यर्थः । 'तव' इति पाठे त्वत्संबन्धिप्रातःकाल मित्यर्थः ॥ १७ ॥

रा० टी०—तद्विलपनमेवाह—नेति । हे नक्षत्रभूषिते निशे तव प्रभातं नेच्छामि प्रभातकालभाविरामवियोगभिया न वाञ्छामीत्यर्थः । हे भद्रे ! मे दया क्रियतामेतेन प्रभातत्वविशिष्टा न भवेति तत्प्रार्थना व्यञ्जिता ॥ १७ ॥

गो० टी०—नेति । प्रभातं प्रभातत्वं भावे निष्ठा अत्र प्रकरणे भर्त्सनप्रसादनाभ्यां पुनः पुनः क्रियमाणाभ्यां धर्ममपि त्यक्तुं न शक्नोमि न पुत्रमपीति गम्यते ॥ १८ ॥

१८-१९] ति० टी०—मे मह्यम् । भद्रे निशे ! एवं हि तस्याः कल्याणदत्वम्, प्रभाते रामविवासनभयमिति भावः । गम्यतां त्रियामया त्वया राज्यपगमे प्रजासंनिधानेनैतदर्शनाभाव इति भावः । यद्वा प्रभाते रामगमनेन झटिति मरणे सत्यस्या अदर्शनमिति भावः । नाहमिच्छामि द्रष्टुमित्यन्वयः ॥ १९ ॥

रा० टी०—अथवेति । अथवा शीघ्रं गम्यताम् । तत्र हेतुः निर्घृणां दयारहितां यत्कृते मम व्यसनं दुःखं तां केकयीं द्रष्टुमहं नेच्छामि एतेन निशाविरामे पुंजनबाहुल्यात् तदर्शनं न स्यादिति हेतुर्व्यक्तः । अर्धद्वयमेकान्वयि ॥ १८ ॥

रा० टी०—एवमिति । राजा केकयीमनेन प्रकारेण उक्त्वा संयताञ्जलिः आसेति शेषः । अर्धं पृथक् ॥ १९ ॥

गो० टी०—अथवेति । निर्घृणां निर्दयां प्रत्युत नृशंसां क्रूराम् ॥ १९ ॥ २० ॥

२०] ति० टी०—त्वद्वृतस्य सत्यवशत्वात्त्वद्वशंगतस्येत्यर्थः गतायुषोऽल्पावशिष्टायुषः ॥ २० ॥

रा० टी०—प्रसादयामासेति । राजधर्मवित् सामादिविज्ञाता राजा कैकेयीं पुनः प्रसादयामास । अर्धं पृथक् । तत्प्रसादनमेवाह—साधुवृत्तस्य कपटरहितवृत्तिविशिष्टस्य त्वद्वृतस्य तव वशे प्राप्तस्येत्यर्थः । गतायुषः गता अवक्तव्यवचनेन निवृत्ता आयुः त्वद्विषयिणी प्रीतिर्यस्य तस्य विशेषतः सर्वराजतोऽधिकस्य राज्ञो मम प्रसादः क्रियताम् विशेषत इत्यत्र षष्ठ्यन्तात्तसिः । प्रसादान्वयित्वे तु प्रथमान्ताद्बोध्यः । अर्धद्वयमेकान्वयि ॥ २० ॥

गो० टी०—साधुवृत्तस्येति । त्वद्वृतस्य त्वदेकशरणस्येत्यर्थः । गतायुषः अल्पावशेषमतीतायुष इत्यर्थः ॥ २१ ॥

२१] ति० टी०—राज्ञो विशेषतो राजत्वाद्विशेषेण प्रसाद उचितः इदं पूर्वोक्तकटुकवाक्यम् । शून्येन दुःखवशाद्वक्तव्यावक्तव्यविवेकरहितेन । यद्वा इदं रामाभिषेचनं शून्य एकान्ते निर्जने नोक्तम् किंतु सभायामतः प्रसादं कुरु सभ्योपहासो यथा न भवति तथेत्यर्थः ॥ २१ ॥

रा० टी०—मदुर्वचनजनितो विषादस्त्वया न कार्य इति बोधयन्नाह—शून्येनेति । हे सुश्रोणि ! शून्येन जनरहितत्वेन हेतुना इदं दुर्वचनं मया सम्यगुदाहृतं कथितम् । एकान्ते क्रूराभासमप्युपदेशवचनं क्रोधकारणं लोके न दृष्टमिति तात्पर्यम् । तेन त्वया कोपो न कार्य इति व्यञ्जितम् । अर्धं पृथक् ॥ २१ ॥

गो० टी०—शून्य इति । शून्ये निर्जने प्रदेशे इदं रामाभिषेचनं न सम्यगुदाहृतं खलु किंतु सर्वजनसन्निधौ सम्यगुदाहृतमित्यर्थः । यद्वा शून्येन दीनेन मयेत्यर्थः ॥ २२-२४ ॥

२२] ति० टी०—सहृदया मद्वचनशून्यहृदया । तदेवाह—प्रसीदेति । त्वया वरबलाद्गृहीतमेव राज्यं मत्प्रीतये रामाय देहीत्याशयः ॥ २२ ॥

रा० टी०—कुर्विति । हे बाले ! यतस्त्वं सहृदया रसज्ञा असि अतः मे प्रसादं प्रसन्नतां कुरु संपादय त्वं च प्रसीद । तेन किमत आह—त्वदत्तं राज्यं रामो लभतां तेन त्वं परं यशः अवाप्स्यसि । सार्धश्लोक एकान्वयी ॥ २२ ॥

१ तवेति रा. पाठः । २ भूषणे इति गो. पाठः । ३ महदिति गो. पाठः । ४ चेदमब्रवीदिति गो. पाठः । ५ विलपत इति साधु भाति ।

लभतामसितापाङ्गे यशः परमवाप्स्यसि । मम रामस्य लोकस्य गुरूणां भरतस्य च ॥
प्रियमेतदुरुश्रोणि कुरु चारुमुखेक्षणे ॥ ॥ २३ ॥

विशुद्धभावस्य हि दुष्टभावा दीनस्य ताम्राश्रुकलस्य राज्ञः ।
श्रुत्वा विचित्रं करुणं विलापं भर्तुर्नृशंसा न चकार वाक्यम् ॥ २४ ॥
ततः स राजा पुनरेव मूर्च्छितः प्रियामतुष्टां प्रतिकूलभाषिणीम् ।
समीक्ष्य पुत्रस्य विवासनं प्रति क्षितौ विसंज्ञो निपपात दुःखितः ॥ २५ ॥
इतीव राज्ञो व्यथितस्य सा निशा जगाम घोरं श्वसतो मनस्विनः ।
विबोध्यमानः प्रतिबोधनं तदा निवारयामास स राजसत्तमः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ।

प्रभाते कैकेय्यन्यदृष्टान्तैः सत्यवचस्त्वं प्रशस्य स्वाभिमताकरणे प्राणविमोक्षणं च प्रतिज्ञाय सद्यो रामप्रवासने दशरथं प्राचोदय तेन दुःशब्दैर्निन्दितापि स्वाशयं निर्बबन्ध । प्रियं रामं द्रष्टुमिच्छामीति दशरथस्तां न्यवेदयत्ततः प्रभातायां शर्वर्यां गृहीतसंभारः शिष्यपरिवृतो वसिष्ठः पुरीं प्राविशत्पूर्वमेव प्राप्तः सुमन्त्रो दशरथं संस्तुत्य रामाभिषेकमस्मारयत्तेनोद्दीपितशोकस्य राज्ञः करुणावचनं संश्रुत्य किंचिदपाक्रमत्ततो दशरथप्रेरणया राममानेतुमन्तःपुराद्भिर्ययौ ।

पुत्रशोकार्दितं पापा विसंज्ञं पतितं भुवि । [४]विचेष्टमानमुत्प्रेक्ष्य ऐक्ष्वाकमिदमब्रवीत् ॥ १ ॥

२३] ति० टी०—गुरूणां वसिष्ठादीनाम् । 'गुरुश्रोणि' इति पाठे 'उरु' इति पाठान्तरे च उर्वी महती श्रोणिर्यस्यास्तादृशि २३॥

रा० टी०—ममेति । मदादेः प्रियमेतद् रामाभिषेचनं कुरु संपादय ॥ २३ ॥

२४] ति० टी०—रोदनेनाक्ष्णोस्ताम्रत्वात्ताम्रस्य अश्रुकलस्याश्रुपूर्णस्य । हिरप्यर्थे ॥ २४ ॥

गो० टी०—विशुद्धभावस्येति । ताम्रेक्षणस्य दुःखातिशयेनेति शेषः । अश्रुकलस्य अश्रुपूर्णस्य कलिः कामधेद्वः विचित्रं प्रसादनभर्त्सनसहितत्वात् ॥ २५ ॥ २६ ॥

रा० टी०—राजवाक्यश्रवणानन्तरं कैकयीवृत्तान्तमाह—विशुद्धेति । दुष्टभावा तत्सदृशी अत एव नृशंसा तत्तुल्या कैकयी विशुद्धभावस्य कापट्यरहिताभिप्रायविशिष्टस्य ताम्राश्रुकलस्य अतिविलापेन ताम्रप्रायनेत्राभ्यामश्रुकला यस्य तस्य भर्तुर्विलापं श्रुत्वा भर्तुर्वाक्यं वचनं न चकार । एतेन राजयशोवृद्धयभिलाषिणीत्वं तस्याः सूचितम् । भर्तुरित्युभयान्वयि ॥२४॥

२५] ति० टी०—तद्रात्रेः प्राक्सदा प्रियामतुष्टामेवंविधविनयवाक्येनापि संतोषमप्राप्ताम् । विवासनं प्रति याच्यमानं वरं समीक्ष्य दुःखितः । चिरपरिचितप्रेमत्वात्तां चिकीर्षुमश्रुवन्प्रयासलब्धं पुत्रं च त्यक्तुमशक्नुवन्कर्तव्यमूढतया दुःखितो विसंज्ञो मूर्छितः क्षितौ पपात ॥ २५ ॥

रा० टी०—तत इति । ततः स्ववचनानङ्गीकारानन्तरं पुत्रस्य विवासनं प्रति विवासनहेतोः प्रतिकूलभाषिणीं प्रियां समीक्ष्य पुनरपि मूर्छितः अत एव विसंज्ञो राजा क्षितौ निपपात ॥ २५ ॥

२६] ति० टी०—दीर्घं घोरमुष्णं च श्वसतः सा निशा जगाम । प्रतिबोधनं तत्साधनमङ्गलगीतादिकम् दुःखवशादिति भावः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०—इतीवेति । इतीव अतीव व्यथितस्य श्वसतः उच्छ्वासं प्राप्नुवतः राज्ञः घोरं यथा स्यात्तथा निशा जगाम अत एव तदा बन्धादिप्रबोधनसमये तैः प्रबोध्यमानोऽपि राजसत्तमः प्रतिबोधनं प्रतिबोधकबन्धादिवचनं निवारयामास तेन क्लेशाधिक्यं सूचितम् ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०—इतीति । प्रतिबोधनं शङ्खपटहवीणादिकं प्रतिबोधनसाधनं, यद्वा वैतालिकैः क्रियमाणं प्रतिबोधनम् ॥२७॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बरारण्यानेऽयोध्याकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

१] ति० टी०—एवंदशां प्राप्तेऽपि राजनि कैकेयी मन्त्रिमित्रतो राजा म्रियते चेन्म्रियतां दृढः, न तु मयोक्तमन्यथा कार्यमिति निश्चित्याह—पुत्रेत्यादि । पापा कैकेयी विचेष्टमानं मरणकाल इव विकृतचेष्टमीक्ष्य सम्यग्दृष्ट्वापीत्यर्थः ॥ १ ॥

---

१ अवाप्नुहीति गो. पाठः । २ ताम्रेक्षणस्याश्रुकलस्येति गो. पाठः । ३ अदुष्टामिति गो. पाठः । ४ विवेष्टमानमुद्वीक्ष्य सैक्ष्वाकमिति गो. पाठः ।

पापं कृत्वेवं किमिदं मम संश्रुत्य संश्रवम् । शेषे क्षितितले सन्नः स्थित्यां स्थातुं त्वमर्हसि ॥ २ ॥
आहुः सत्यं हि परमं धर्मं धर्मविदो जनाः । सत्यमाश्रित्य चै मया त्वं धर्मं प्रतिचोदितः ॥ ३ ॥
संश्रुत्य शैब्यः श्येनाय स्वां तनुं जगतीपतिः । प्रदाय पक्षिणे राजा जगाम गतिमुत्तमाम् ॥ ४ ॥
तथा ह्यलर्कस्तेजस्वी ब्राह्मणे वेदपारगे । याचमाने स्वके नेत्रे उद्धृत्याविमना ददौ ॥ ५ ॥
सरितां तु पतिः स्वल्पां मर्यादां सत्यमन्वितः । सत्यानुरोधात्समये वेलां स्वां नातिवर्तते ॥ ६ ॥
सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः । सत्यमेवाक्षया वेदाः सैत्येनावाप्यते परम् ॥ ७ ॥

रा० टी०–राजवृत्तमुक्त्वा केकयीवृत्तान्तमाह–पुत्रेति । पुत्रशोकार्दितं संभावितपुत्रवियोगहेतुकशोकविशिष्टमत एव विसंज्ञं कर्तव्यविषयकविवेकरहितमत एव भुवि पतितमत एव विचेष्टमानं विविधचेष्टां कुर्वन्तमैक्ष्वाकमुत्प्रेक्ष्य अवलोक्य पापा पत्यनिष्टकारिणीत्वेन प्रतिभासभाना केकयी इदमब्रवीत् ॥ १ ॥

गो० टी०–अथ रामविवासननिर्धारणं दर्शयति चतुर्दशे–पुत्रेत्यादि ॥ १ ॥

२] ति० टी०–मम संश्रवं वरदानरूपं संश्रुत्य प्रतिश्रुत्याङ्गीकृत्य पापं कृत्वेव सन्नः पीडितः सन्छेषे इदं किम्, इदं नोचितमित्यर्थः अतः स्थित्यां सत्यपालनरूपायां सतां मर्यादायाम् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–पापमिति । संश्रवं दास्यामीति पूर्वप्रतिज्ञाविषयीभूतं वरद्वयमित्यर्थः । संश्रुत्य तदहं दास्यामीतीदानीं प्रतिज्ञाय इदं दानं पापमनिष्टमिव कृत्वा मत्वेत्यर्थः । सन्नः पीडितस्त्वं क्षितितले किं किमर्थं शेषे । नन्वु किं कर्तव्यमित्यत आह–स्थित्यां सत्यपालनरूपेक्ष्वाकुकुलोचितमर्यादायां स्थातुमर्हसि । 'मर्यादा धारणा स्थितिः' इत्यमरः ॥ २ ॥

गो० टी०–पापमिति । संश्रवं दास्यामीति प्रतिज्ञां संश्रुत्य कृत्वेत्यर्थः । पाकं पच्यतीतिवन्निर्देशः । पापं प्रतिज्ञाताकरणरूपं पापं कृत्वैव क्षितितले सन्नः अवसन्नः सन् शेषे किमिदं स्थित्यां मर्यादायां सत्यपरिपालनरूपायाम् ' मर्यादा धारणा स्थितिः ' इत्यमरः । स्थातुमर्हसि ॥ २ ॥

३] ति० टी०–सत्यरूपं धर्ममाश्रित्योद्दिश्य त्वं च त्वं तु मया प्रतिचोदितो वरदानविषये प्रेरितः तव सत्यं रक्षितुमेषा मे प्रेरणा, अन्यथा प्रतिज्ञातान्तरदानं विनैव मरणे तवाधर्मः स्यादिति भावः ॥ ३ ॥

रा० टी०–सत्यस्याङ्गीकारे हेतुं वदन्ती आह–आहुरित्यादिभिः । धर्मविदः निखिलधर्मवेदितारः धर्मविषयकसंशयरहिता इत्यर्थः जनाः सत्यं परमं धर्ममाहुः अतः सत्यमाश्रित्य ग्रहीतव्यत्वेन स्वीकृत्य मया त्वं धर्मं प्रति चोदितः कथितः ॥ ३ ॥

गो० टी०–इदमेव युक्तमिति दर्शयति–आहुरित्यादिना । सत्यरूपं धर्ममाश्रित्य हि मया प्रचोदितः ॥ ३ ॥

४–५] ति० टी०–यद्यपि सत्यपालने प्राणसंशयस्तथापि तमङ्गीकृत्य सत्यरक्षणमेव ज्याय इत्याह–संश्रुत्येत्यादि॥४-५॥

रा० टी०–सभिति । जगतीपतिः राजा त्वां तनुं श्येनभक्ष्यकपोतशरीरप्रतिनिधिभूतत्वेन प्रकल्पितामित्यर्थः ॥ ४ ॥

गो० टी०–प्राणसंकटे कथं सत्यं पालनीयमित्याह–संश्रुत्येत्यादिना ॥ ४ ॥

रा० टी०–तथेति । अविमना वैमनस्यरहितः ॥ ५ ॥

गो० टी०–तथेति । याचमाने ब्राह्मणे अविमनाः सुप्रसन्नमनाः सन् नेत्रे ददौ तस्मा इति शेषः ॥ ५ ॥

६] ति० टी०–सरितां पतिः सत्यमन्वितः सत्यं प्राप्तः सत्यानुरोधात्सत्यत्यागभयात्स्वल्पां मर्यादां क्षुल्लकामपि वेलां समये चन्द्रोदयरूपे वृद्धिसमयेऽपि नातिवर्तते ॥ ६ ॥

रा० टी०–सरितामिति । सत्यमन्वितः प्राप्तः सरितां पतिः समुद्रः मर्यादां स्वकृतनियमविशिष्टां स्वां वेलां समये स्ववृद्धिकारणीभूतचन्द्रोदयकालेऽपि सत्यानुरोधात् स्वनिष्ठसत्यस्मरणान्नातिवर्तते उल्लङ्घते ॥ ६ ॥

गो० टी०–सरितामिति । सरितां पतिः समुद्रः मर्यादां सत्यमन्वितः वेलां नातिवर्तत इति मर्यादारूपं सत्यं प्राप्तः सन् सत्यानुरोधात् स्वकृतसत्यानुवर्तनात् समये संकल्पितकाले स्वां वेलां स्वल्पामपि नातिवर्तत इति संबन्धः ॥ ६ ॥

७] ति० टी०–प्रणवरूपैकपदवाच्यत्वाद्वाच्यवाचकयोश्चाभेदाद्यत्प्रणवरूपं ब्रह्म शास्त्रे तत्सत्यवाक्यमेव । अक्षया वेदाः अक्षयं तज्ज्ञानफलम् सत्येनैव परं पदं ब्रह्मस्वरूपं प्राप्यते चित्तशुद्धिद्वारेति भावः ॥ ७ ॥

रा० टी०–सत्यस्य सर्वकारणत्वं प्रदर्शयन्ती आह–सत्यमिति । सत्यमेव एकपदमेकं सर्ववेदकारणत्वेन प्रथमं पदं यद्वर्तते तदेव तदिति कर्मधारयः । ब्रह्म रामशब्दतादात्म्यापन्नप्रणव इत्यर्थः प्रणवोऽपि सत्यप्रतिपादक इत्यर्थः अत एव धर्मः सत्ये एव प्रतिष्ठितः तन्मूलक इत्यर्थः अत एव वेदा अपि सत्यं तत्प्रतिपादका इत्यर्थः अत एव सत्येन सत्यावलम्बेन परम् " सा काष्ठा सा परा गतिः " इति श्रुतिप्रतिपादितं राम इत्यर्थः । अवाप्यते प्राप्यते ॥ ७ ॥

गो० टी०–सत्यमिति । सत्यमेव एकपदं ब्रह्म एकं मुख्यम् 'एके मुख्यान्यकेवलाः' इत्यमरः । पद्यत इति पदं परम-

१ प्रवेति गो. पाठः । २ हीति गो. पाठः । ३ च धर्मप्रचोदित इति गो. पाठः । ४ राजेति गो. पाठः । ५ सत्येनैवाप्यते इति गो. पाठः ।

सत्यं समनुवर्तस्व यदि धर्मे धृता मतिः । स वरः सफलो मेऽस्तु वरदो ह्यसि सत्तम ॥ ८ ॥
धर्मस्यैवाभिकामार्थं मम चैवाभिचोदनात् । प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहम् ॥ ९ ॥
समयं च ममार्यैवं यदि त्वं न करिष्यसि । अग्रतस्ते परित्यक्ता परित्यक्ष्यामि जीवितम् ॥ १० ॥
एवं प्रचोदितो राजा कैकेय्या निर्विशङ्कया । नाशकत्पाशमुन्मोक्तुं बलिरिन्द्रकृतं यथा ॥ ११ ॥
उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत् । स धुर्यो वै परिस्पन्दन्युगचक्रान्तरं यथा ॥ १२ ॥
विकलाभ्यां च नेत्राभ्यामपश्यन्निव भूमिपः । कृच्छ्राद्धैर्येण संस्तभ्य कैकेयीमिदमब्रवीत् ॥ १३ ॥
यस्ते मन्त्रकृतः पाणिरग्नौ पापे मया धृतः । संत्यजामि स्वजं चैव तव पुत्रं सह त्वया ॥ १४ ॥

प्राप्यं ब्रह्मेत्यर्थः । यद्वा एकं पदं प्रणवरूपं वाचकं यस्य तत्तथा "ॐमित्येकाक्षरं ब्रह्म" इतिस्मृतेः । सत्ये धर्मः प्रतिष्ठितः सत्यमेव धर्मस्य परा काष्ठेत्यर्थः । अक्षया वेदाश्च सत्यमेव प्राधान्येन प्रतिपादयन्तीत्यर्थः । परं प्रयोजनं सत्येनैवाप्यते ॥७॥

८] ति० टी०–तस्मात्सत्यमिति ॥ ८ ॥

रा० टी०–सत्यमिति । यदि धर्मे मतिः धृता निश्चिता तर्हि सत्यं समनुवर्तस्व न त्यजेत्यर्थः । अतः स भवत्प्रतिज्ञातः सफलः अस्तु दीयतामित्यर्थः ॥ ८ ॥

गो० टी०–सत्यमिति । अत्रादौ तस्मादित्युपस्कार्यम् धृता स्थिरा । वरदः सर्वेषां सर्ववरप्रदः ॥ ८ ॥

९] ति० टी०–धर्मस्य परलोकसिद्धिफलकस्य अभिकामार्थं प्रार्थनीयफलसिद्ध्यर्थं क्रियमाणान्ममाभिचोदनात्प्रेरणाच्च त्वं सुतं रामं प्रव्राजय । एवं त्वां त्रिर्ब्रवीमि अतो नाहमस्माद्वरग्रहणान्निवर्तयितुं शक्येति भावः ॥ ९ ॥

रा० टी०–धर्मस्येति । धर्मस्य अभिकामार्थं प्रवृत्तिकामनया एव मम अभिचोदनात् प्रार्थनातः रामं प्रव्राजय इति त्रिः त्रिवारं ब्रवीमि ॥ ९ ॥

गो० टी०–धर्मस्येति । अभिकामार्थं प्रीत्यर्थं धर्माभिवृद्ध्यर्थमिति यावत् । मम प्रियाया इति शेषः । समनस्कत्वज्ञापनाय त्रिरित्युक्तम् ॥ ९ ॥

१०] ति० टी०–विपक्षे स्त्रीवधदोषश्चाधिकस्ते इत्याह–समयं चेति । मद्वरविषयमर्थं परित्यक्ता त्वयोपेक्षिता तेऽग्रतो जीवितं त्यक्ष्यामि ॥ १० ॥

रा० टी०–समयमिति । हे आर्य ! समयं प्रतिज्ञाकालोत्तरोचितं न करिष्यसि वरं न दास्यसीत्यर्थः । तर्हि परित्यक्ता प्रतीयमानकटुभाषणेन त्वया दूरीकृता अहं जीवितं परित्यक्ष्यामि ॥ १० ॥

गो० टी०–समयमिति । समयं रामविवासनम् । परित्यक्ता उपेक्षिता ॥ १० ॥

११] ति० टी०–एवं न्यायोपेतप्रकारेण पाशं सत्यपाशबन्धनम् इन्द्रकृतमिन्द्रप्रेरितोपेन्द्रकृतं पदत्रयमितदेयप्रतिश्रवरूपं पाशम् ॥ ११ ॥

रा० टी०–एवमिति । निर्विशङ्कया वास्तवपत्युपकारप्रार्थनया दोषशङ्कारहितया कैकेय्या प्रचोदितः प्रार्थितो राजा पाशं प्रातीतिकभयोत्पादकत्वेन पाशसदृशं वचनमुन्मोक्तुं परिहर्तुं नाशकत् । तत्र दृष्टान्तः इन्द्रकृतम् इन्द्रप्रार्थनया वामनयाचितमित्यर्थः ॥ ११ ॥

गो० टी०–एवमिति । एवं त्रिर्ब्रवीमीत्येवं पाशं सत्यपाशमुन्मोक्तुं मोचयितुं बलिः महाबलिः इन्द्रकृतं इन्द्रद्वारोपेन्द्रकृतं पाशं पदत्रयदानप्रतिज्ञारूपं, पदत्रयादानान्निगलं वा ॥ ११ ॥

१२] ति० टी०–युगचक्रयोरन्तरं मध्यं प्राप्य परिस्पन्दंस्तिर्यक्चेष्टमानो धुर्य इव उद्भ्रान्तहृदयत्वादिविशिष्टोऽभवत् ॥१२॥

रा० टी०–उदिति । स राजा उद्भ्रान्तहृदयः संचलितचित्तः अभवत् । तत्र दृष्टान्तः युगचक्रान्तरं युगचक्रयोर्मध्यं प्राप्येति शेषः । परिस्पन्दन् निःसरणार्थं चेष्टां कुर्वन् धुर्यः अनड्वानिव ॥ १२ ॥

गो० टी०–उद्भ्रान्तहृदय इति । स राजा युगचक्रयोरन्तरं परिस्पन्दन् गच्छन् धुर्यो यथा अनड्वानिव उद्भ्रान्तहृदयो विवर्णवदनश्चाभवत् ॥ १२ ॥

१३] ति० टी०–संस्तभ्य विकलं चित्तमिति शेषः ॥१३॥

रा० टी०–विकलाभ्यामिति । विकलाभ्यां दर्शनकलारहिताभ्यामपश्यन्निव संस्तभ्य चित्तं स्थिरीकृत्य इदमब्रवीत् ॥ १३ ॥

गो० टी०–विह्वलाभ्यामिति । विह्वलाभ्यां क्षुब्धाभ्यामपश्यन्निव अन्ध इव स्थितः भूमिपः कृच्छ्रात् लब्धेन धैर्येण संस्तभ्य दुःखातिशयजनितक्षोभं निरुध्येत्यर्थः ॥ १३ ॥

१४] ति० टी०–ईदृश्याः सपुत्रायास्त्याग एवोचित इत्याशयेनाह–यस्ते इति । मन्त्रकृतः "गृभ्णामि–" इति मन्त्रेण संस्कृतः । संत्यजामि तत्प्रयुक्तं व्यवहारं त्यजामि स्वजं स्वस्माज्जातं तव पुत्रं च त्वया सह त्यजामि ॥ १४ ॥

रा० टी०–तदाकारमाह–य इति । अग्नौ विधिस्थापितवन्निहसन्निधौ मन्त्रकृतः "गृभ्णामि" इतिमन्त्रेण संस्कृत मया धृतः यस्ते पाणिः तं त्वया सह स्वजं तव पुत्रं च संत्यजामि इतःप्रभृति इह लोके न स्प्रक्ष्यामीत्यर्थः ॥ १४ ॥

गो० टी०–य इति । हे पापे ! अग्नौ अग्निसमीपे सामीप्ये सप्तमी मन्त्रकृतः मन्त्रसंस्कृतः यः पाणिर्मया धृतस्तं त्यजामि तत्प्रयुक्तव्यवहारं त्यजामीत्यर्थः । अत एव स्वजं स्वस्मात् जातमपि तव पुत्रं त्वया सह त्यजामि ॥ १४ ॥

---

१ इहेति गो. पाठः । २ अन्यचोदनादिति गो. पाठः । ३ अथेति गो. पाठः । ४ विह्वलाभ्यामिति गो. पाठः । ५ तमिति गो. पाठः ।

प्रयाता रजनी देवि सूर्यस्योदयनं प्रति । अभिषेकाय हि जनस्त्वरयिष्यति मां ध्रुवम् ॥ १५ ॥
रामाभिषेकसंभारैस्तदर्थमुपकल्पितैः । रामः कारयितव्यो मे मृतस्य सलिलक्रियाम् ॥ १६ ॥
सपुत्रया त्वया नैव कर्तव्या सलिलक्रिया । व्याहन्तास्यशुभाचारे यदि रामाभिषेचनम् ॥ १७ ॥
न शक्तोऽद्यास्म्यहं द्रष्टुं दृष्ट्वा पूर्वं तथासुखम् । हतहर्षं तथानन्दं पुनर्जनमवाङ्मुखम् ॥ १८ ॥
तां तथा ब्रुवतस्तस्य भूमिपस्य महात्मनः । प्रभाता शर्वरी पुण्या चन्द्रनक्षत्रमालिनी ॥ १९ ॥
ततः पापसमाचारा कैकेयी पार्थिवं पुनः । उवाच परुषं वाक्यं वाक्यज्ञा रोषमूर्छिता ॥ २० ॥
किमिदं भाषसे राजन्वाक्यं गररुजोपमम् । आनाययितुमक्लिष्टं पुत्रं रामिहार्हसि ॥ २१ ॥

१५–१६] ति० टी०–किं च रामाभिषेको मयाशक्यनिवारण इत्याह–प्रयातेत्यादि । उदयनं प्रत्युदयं प्रतिलभ्य । तदर्थमभिषेकार्थं कल्पितै रामाभिषेकसंभारैरभिषेकं कर्तुं गुरुजनो मां त्वरयिष्यति अतो गुरुजनानुरोधेन मया रामः कारयितव्यः कृताभिषेकः कारयितव्यः । एवंसति रुष्टया मत्सलिलक्रिया न कार्येत्याह–मृतस्येत्यादि । मा कुर्वित्ति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–रामाभिषेकनिवृत्तिर्न स्यादिति बोधयन्नाह–प्रयातेति । हे देवि ! रजनी प्रयाता व्यतीता अत एव सूर्यस्य उदयनं प्रति प्रतिलभ्य रामाभिषेकसंभारैः सहितः जनः अभिषेकाय मां त्वरयिष्यति एतेन रामाभिषेको भविष्यत्येवेति ध्वनितम् । तत्कर्तृकाभिषेकनिवर्तननिवारणाय तां भर्त्सयन्नाह–हे अशुभाचारे ! यदि रामाभिषेचनं व्याहन्तासि विध्वंसितासि तदा तदर्थमभिषेकार्थमुपकल्पितैः अधिकृतैर्गुरुभिः मृतस्य मृतवल्लोकान्तरं प्राप्तस्य मे सलिलक्रियां वेदबोधितलोकान्तरप्राप्तिहेतुकसलिलक्रियोपलक्षितकर्मविशेषमुद्दिश्य रामः कारयितव्य अधिकर्तव्यः सपुत्रया त्वया नैव कर्तव्या । श्लोकत्रयं संमिलितान्वयि ॥ १५–१७ ॥

गो० टी०–प्रयातेति । उदयनं प्रति उदयं प्रतिलभ्य त्वरयिष्यतीति संबन्धः ॥ १५ ॥

गो० टी०–रामाभिषेकसम्भारैरिति । तदर्थं रामाभिषेकार्थमुपकल्पितैः रामाभिषेकसम्भारैः रामाभिषेकसामग्रीभिः सह गुरुजनस्त्वरयिष्यतीति पूर्वेण संबन्धः । यद्वा अभिषेकसामग्र्येव सलिलक्रियासामग्री भवत्वित्यर्थः ॥ १६ ॥

१७] ति० टी०–क्रोधातिशयेनोक्तमेवार्थं पुनराह–सपुत्रयेति । इति कृतकृतीर्थौ मम तु प्रतिभाति–सूर्योदयं प्रतिलभ्याभिषेकं कर्तुं त्वरयिष्यति, अतः स एव मया कर्तव्य इत्यार्थः, त्वं तु त्वाज्यैवेति भावः । नन्वु मयि जीवन्त्यां कथं रामाभिषेको भविष्यति तत्राह–यदि गुरून्प्यवज्ञाय रामाभिषेचनं व्याहन्तासि तद्विघातं करिष्यसि तदाभिषेकार्थं कल्पितै रामाभिषेकसंभारैर्मृतस्य मे सलिलक्रियां मया रामः कारयितव्यः । क्रोधादाह–सपुत्रयेति ॥ १७ ॥

गो० टी०–त्वयेति । व्याहन्तासीति लुप्तमध्यमपुरुषैकवचनम् ॥ १७ ॥

१८] ति० टी०–नन्वु किमनेनात्मवैधव्यव्यवसायेन । पुत्रादप्यात्मनः प्रियत्वात् "आत्मनः कामाय सर्वं प्रियं भवति" इति श्रुतेरत आह–न शक्त इति । तथासुखं तादृशसुखवन्तमूर्ध्वविकसितमुखं दृष्ट्वा पुनरिदानीमवाङ्मुखं म्लानं द्रष्टुं न शक्नोमि । एवं च तादृशजीवनापेक्षया मरणं मे श्रेय इति सर्वथा मया मर्तव्यमिति भावः ॥ १८ ॥

रा० टी०–अभिषेकनिवृत्तौ इह लोके स्वस्थितेरयोग्यतां बोधयन्नाह–नेति । तथासुखं वर्णिताभिषेकहेतुकसुखविशिष्टं जनं पूर्वं दृष्ट्वा हतहर्षं विध्वस्तहर्षकारणकमत एव निरानन्दमानन्दरहितमत एव अवाङ्मुखं जनं द्रष्टुं न शक्तोऽस्मि । जनमित्युभयान्वयि ॥ १८ ॥

गो० टी०–न चेति । तथासुखं तादृशसुखयुक्तं जनं दृष्ट्वा पुनः हतहर्षं हतहर्षविकारं निरानन्दमत एवावाङ्मुखं जनं द्रष्टुं न शक्नोमि ॥ १८ ॥

१९] ति० टी०–तां कैकेयीम् । पुण्या प्रभाता पुण्यसाधनप्रभातकालावच्छिन्ना जातेत्यर्थः । यद्वा निरन्तररामचिन्तासमेतत्वात्पुण्या शर्वरी तथा जातेत्यर्थः ॥ १९ ॥

रा० टी०– तामिति । तां कैकयीं तथा तेन प्रकारेण ब्रुवतः भूमिपस्य शर्वरी रात्रिः प्रभाता प्रभातत्वं प्राप्ता ॥ १९ ॥

गो० टी०–तामिति । तस्य ब्रुवतः तस्मिन् ब्रुवतीत्यर्थः । पुण्येत्युक्तिः अनन्तरं रामदर्शनसंभवात् ॥ १९ ॥

२०] ति० टी०–रोषमूर्च्छिता क्रोधव्याप्ता । परुषं मदीयमुग्रं दत्त्वा इत उत्तिष्ठेत्येवंरूपम् ॥ २० ॥

रा० टी०–तत इति । पापसमाचारा पापत्वेन प्रतीयमानः समाचारो यस्याः, रोषमूर्च्छिता रोषः कोपः मूर्छितो यया क्रोधरहितेत्यर्थः । परुषं वाक्यमुवाच ॥ २० ॥

गो० टी०–तत इति । रोषमूर्च्छिता क्रोधेन व्याप्ता ॥ २० ॥

२१] ति० टी०–गरो विषं रुजा शूलादि तद्वदुःखदं किं भाषसे व्यर्थमेवेति भावः । 'वाक्यमक्लेरुजोपमम्' इतिपाठेऽक्लेति राजामन्त्रणम् । इहानाययितुम् मदनुदानं विना इतो बहिर्गमनमशक्यमिति तात्पर्यम् ॥ २१ ॥

रा० टी०–तद्वचनमेवाह–किमिति । गररुजोपमं हेयत्वेन विषरोगसदृशं किं भाषसे न वक्तव्यमित्यर्थः । उचित-

१ अभिषेकं गुरुजन इति गो० पाठः । २ च शक्तोऽस्म्यहमिति गो. पाठः । ३ सुखमिति गो. रा. पाठः । ४ निरानन्दमिति गो. रा. पाठः । ५ शक्नोमीति गो. पाठः ।

स्थाप्य राज्ये मम सुतं कृत्वा रामं वनेचरम् । निःसपत्नां च मां कृत्वा कृतकृत्यो भविष्यसि॥ २२ ॥
स तुन्न इव तीक्ष्णेन प्रतोदेन हयोत्तमः । राजा प्रचोदितोऽभीक्ष्णं कैकेय्या वाक्यमब्रवीत्॥२३ ॥
धर्मबन्धेन बद्धोऽस्मि नष्टा च मम चेतना । ज्येष्ठं पुत्रं प्रियं रामं द्रष्टुमिच्छामि धार्मिकम्॥ २४ ॥
ततः प्रभातां रजनीमुदिते च दिवाकरे । पुण्ये नक्षत्रयोगे च मुहूर्ते च समागते ॥ २५ ॥
वसिष्ठो गुणसंपन्नः शिष्यैः परिवृतस्तथा । उपगृह्याशु संभारान्प्रविवेश पुरोत्तमम् ॥ २६ ॥
सिक्तसंमार्जितपथां पताकोत्तमभूषिताम् । [विचित्रैःकुसुमाकीर्णां नानास्रग्भिर्विराजिताम्]
संहृष्टमनुजोपेतां समृद्धविपणापणाम् ॥ २७ ॥
महोत्सवसमायुक्तां राघवार्थे समुत्सुकाम् । चन्दनागुरुधूपैश्च सर्वतः परिधूमिताम् ॥ २८ ॥
तां पुरीं समतिक्रम्य पुरंदरपुरोपमाम् । ददर्शान्तःपुरं श्रीमान्नानाध्वजगणायुतम् ॥ २९ ॥
पौरजानपदाकीर्णं ब्राह्मणैरुपशोभितम् । यष्टिभिर्द्विः सुसंपूर्णं सदश्वैः परमार्चितैः ॥ ३० ॥
तदन्तःपुरमासाद्य गतिचक्राम तं जनम् । वसिष्ठः परमप्रीतः परमर्षिभिरावृतः ॥ ३१ ॥

माह—अक्लिष्टं त्रैकालिकबाधारहितं राममानाययितुमिह प्रापयितु महंसि ॥ २१ ॥

गो० टी०—किमिदमिति । गरुजोपमं विषजनितव्याधिसदृशम् ' अङ्गरुजोपमम् ' इतिपाठे सर्वाङ्गव्याप्तमहाव्याधिसदृशमित्यर्थः। अक्लेति संबोधनं वा। अक्लिष्टं अक्लेशं यथा भवति तथा आनाययितुमिति संबन्धः ॥ २१ ॥ २२ ॥

२२] ति० टी०—कृतकृत्यः कृतशौचादिकृत्यः । " कृत्ये " इत्यावश्यके कृत्यप्रत्ययः ॥ २२ ॥

रा० टी०—नन्वं किं प्रयोजनमानयने इत्यत आह—स्थाप्येति। राज्ये राज्यपालने मम सुतं स्थाप्य स्थापयित्वा नियुज्येत्यर्थः । निःसपत्नाम् एतत्प्रतिबन्धकीभूतशत्रुरहिताम् ॥ २२ ॥

२३] ति० टी०—तुन्नो व्यथां प्रापितः । 'तुन्नः' इतिपाठे प्रेरितः तीक्ष्णप्रतोदप्रेरितो हयो यथाभारोहाधीनः तथा तद्वाक्यप्रेरितो राजा तदधीनो भूत्वाहेत्यर्थः ॥ २३ ॥

रा० टी०—स इति । प्रतोदेन कशया तुन्नः ताडितः 'तुन्नः' इति पाठेऽप्ययमेवार्थः । हयोत्तम इव कैकेय्या प्रचोदितो राजा वाक्यमब्रवीत् ॥ २३ ॥

गो० टी०—स इति । तुन्नः व्यथितः प्रतोदेन तोत्रेण अभीक्ष्णं पुनः पुनः ' शश्वदभीक्ष्णमसकृत्समाः ' इत्यमरः ॥ २३ ॥

२४] ति० टी०—तदाह-धर्मेति । एवं च ममाचेतनत्वात्त्वमेव स्वाभीष्टं यथा सिध्यति तथा कुरु अहं न किमपि वक्ष्यामीति भावः। सर्वथा चेतनानाशात्प्राप्तामं द्रष्टुं परमिच्छामि तथा संपद्यते तथा कुरु एतावद्धा मदिष्टं कुर्विति भावः ॥२४॥

रा० टी०—तद्वचनमेवाह-धर्मेति । धर्मबन्धेन स्वकुलोचितसत्यप्रतिज्ञत्वधर्मरूपबन्धनेन बद्धः संयतोऽस्मि अतः मम चेतना बुद्धिः नष्टा कर्तव्यनिश्चयरहिता अतः धार्मिकं रामं द्रष्टुमिच्छामि उचितमेव स करिष्यतीति तात्पर्यम् ॥ २४ ॥

गो० टी०—धर्मबन्धेनेति । धर्मबन्धेन धर्मपाशेन बद्धोऽस्मीत्यनेन रामविवासनं मनागनुज्ञातम् । द्रष्टुमिच्छामि गमनात्पूर्वमिति शेषः ॥ २४ ॥

२५] ति० टी०—प्रभातां रजनीं दृष्ट्वा सरय्वां कृतस्नाना दिनित्यक्रिय इति शेषः । वसिष्ठः पुरोत्तमं प्रविवेशेति उत्तरश्लोकेनान्वयः । कवेरपि वर्णनीयमर्यादाभावेन शोकाविष्टत्वान्न्यूनपदादिकमदोषः ॥ २५ ॥

२६] ति० टी०—संभारान्कुशादीन् ॥ २६ ॥

रा० टी०—तत इति । ततः प्रातरभिषेकनियोगाद्धेतोः प्रभातां रजनीं दृष्ट्वेति शेषः । पुण्ये ज्योतिरुक्तदोषरहिते नक्षत्रयोगे पुण्ये मुहूर्ते च समागते सति गुणसंपन्नः सकलसद्गुणविशिष्टो वसिष्ठः संभारान् अभिषेकसामग्रीः उपगृह्य प्रविवेश । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०—तत इत्यादिपरमद्विजैरित्यन्तमेकं वाक्यम् । प्रभातां रजनीं प्रभातायां रजन्यां समाहिते संनिहिते सति प्रविवेश । पुरोत्तममित्यनेन वसिष्ठो नगरबाह्यसरय्वां स्नानार्थमनुष्ठानं कृत्वा पुरीं प्रविष्टवानित्यवगम्यते । समृद्धविपणापणां समृद्धाः विपणाः विक्रेय्याः येषां ते समृद्धविपणाः आपणाः निचयाः यस्यां तां समुत्सृष्टकां समुत्सृष्टकजनाम् ॥ २५–३० ॥

२७] ति० टी०—संमार्जनं मार्जन्या धूलिनिराकरणम् । समृद्धा विपणाः क्रेयपदार्था येषु तादृशा आपणा यस्यां सा॥२७॥

२८–२९] ति० टी०—समुत्सृष्टकां समुत्सृष्टकजनाम्॥२८–२९

३०–३१] ति० टी०—यष्टिमद्भिरिति ब्राह्मणविशेषणम् 'धारयेद्दैणवीं यष्टिम्' इति स्नातकधर्मप्रकरणोक्तेः । यद्वा यष्टिमद्भिरित्यस्य तद्धरै राजसेवकैरित्यर्थः ॥ ३० ॥ ३१ ॥

रा० टी०—पुरीं वर्णयन्नाह—सिक्तेत्यादिश्लोकचतुष्टयेन । सिक्तसंमार्जितपथां सेकसंमार्जनविशिष्टपथविशिष्टां समृद्धःअत्य-

---

१ तुन्न इति गो. पाठः । २ कैकेयीमिदमिति गो. पाठः । ३ समाहिते इति गो. पाठः । ४ तदेति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ कीर्णामिति गो. पाठः । ७ पुरोपममिति रा. पाठः । ८ श्रेष्ठमिति गो. पाठः । ९ द्विजेति गो. रा. पाठः । १० यज्ञविद्भिरिति गो. पाठः । ११ सदस्यैरिति गो. पाठः । १२ परमद्विजैरिति गो. पाठः । १३ परमः प्रीत इति गो. पाठः । १४ परमर्षिर्विवेश चेति गो. परमर्षिर्विवेश हेति रा. पाठः ।

स त्वपश्यद्विनिष्क्रान्तं सुमन्त्रं नाम सारथिम् । द्वारे मैनुजसिंहस्य सचिवं प्रियदर्शनम् ॥ ३२ ॥
तमुवाच महातेजाः सूतपुत्रं विशारदम् । वसिष्ठः क्षिप्रमाचक्ष्व नृपतेर्मामिहागतम् ॥ ३३ ॥
इमे गङ्गोदकघटाः सागरेभ्यश्च काञ्चनाः । औदुम्बरं भद्रपीठमभिषेकार्थमाहृतम् ॥ ३४ ॥
सर्वबीजानि गन्धाश्च रत्नानि विविधानि च । क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥ ३५ ॥
अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः । चतुरश्वो रथः श्रीमान्निस्त्रिंशो धनुरुत्तमम् ॥ ३६ ॥
वाहनं नरसंयुक्तं छत्रं च शशिसंनिभम् । श्वेते च वालव्यजने भृङ्गारं च हिरण्मयम् ॥ ३७ ॥
हेमदामपिनद्धश्च ककुद्मान्पाण्डुरो वृषः । केसरी च चतुर्दंष्ट्रो हरिश्रेष्ठो महाबलः ॥ ३८ ॥
सिंहासनं व्याघ्रतनुः समिधश्च हुताशनः । सर्वे वादित्रसंघाश्च वेश्याश्चालंकृताः स्त्रियः ॥ ३९ ॥

धिकः विपणः क्रेयपदार्थो यस्मिन् स आपणो यस्यां, सप्तत्सु-कामत्युत्सवयुक्तां पुरन्दरपुरोपमां तां पुरीं समतिक्रम्य लङ्घयित्वा पौरादिभिः आकीर्णं व्याप्तं सदश्वैश्च सुसंपूर्णमन्तःपुरं ददर्श । श्लोकचतुष्टयमेकान्वयि ॥ २७-३० ॥

रा० टी०—तदिति । तत् वर्णितमन्तःपुरमासाद्य प्राप्य तमन्तःपुरद्वारे स्थितं जनं परमर्षिर्वसिष्ठः व्यतिचक्राम विवेश च ततोऽप्यग्रे अगच्छदित्यर्थः ॥ ३१ ॥

गो० टी०—तदिति । तं जनं पौरादिजनं व्यतिचक्रामेत्यनेनान्तःपुरद्वारवेदिकां प्राप्त इति गम्यते । विवेश वेदिकायामिति शेषः ॥ ३१ ॥

३२] ति० टी०—विनिष्क्रान्तमन्तःपुरात् । द्वारेऽन्तःपुरद्वारे ॥ ३२ ॥

रा० टी०—स इति । मनुजसिंहस्य राज्ञः द्वारे अन्तःपुरद्वारि विनिष्क्रान्तमन्तःपुरादागच्छन्तं सचिवं सारथिमेतद्धर्मद्वयाक्रान्तमित्यर्थः । सुमन्त्रं स वशिष्ठोऽपश्यत् ॥ ३२ ॥

गो० टी०—स इति । विनिष्क्रान्तं स्वगृहादिति शेषः । द्वारे अन्तःपुरद्वारे प्रियदर्शनमित्यनेनाभिषेकार्थमात्मानमलंकृत्यागत इत्युक्तम् ॥ ३२ ॥

३३] ति० टी०—वसिष्ठः सूतपुत्रमुवाच । किमुवाचेत्याह—क्षिप्रमित्यादि ॥ ३३ ॥

रा० टी०—तमिति । वशिष्ठः तं सुमन्त्रमुवाच । तदाकारमाह—मामिहागतं प्राप्तं नृपतेराचक्ष्व कथय ॥ ३३ ॥

गो० टी०—तमिति । क्षिप्रमाचक्ष्वेति वसिष्ठः प्रोवाचेति संबन्धः ॥ ३३ ॥

३४] ति० टी०—काञ्चनाः सौवर्णाः । गङ्गोदकघटास्तदुदकपूर्णा घटाः । सागरेभ्यश्च तज्जलपूर्णा घटा आहृता इति शेषः । औदुम्बरं भद्रपीठम् 'औदुम्बर्यासन्दी तस्यै प्रादेशमात्राः पादाः' इति बह्वृचब्राह्मणप्रसिद्धम् ॥ ३४ ॥

रा० टी०—इमे इति । गङ्गोदकघटाः गङ्गाजलविशिष्टघट्यः सागरेभ्यः समाहृता इति शेषः औदुम्बरमुदुम्बरनिर्मितं भद्रपीठं भद्रसूचकचिह्नचिह्नितपीठविशेषश्च आहृतम् । लिङ्गवचनविपरिणामेन पूर्वान्नाप्यन्वयः ॥ ३४ ॥

गो० टी०—इम इत्यादि । काञ्चनाः काञ्चनमयाः गङ्गोदकघटाः गङ्गोदकपूर्णघटाः । अत्र आहृतमित्येतद्वचनव्यत्ययेन संबध्यते । इमे इति छेदमपि सागरेभ्य आहृता इमे उदकघटा इत्यध्याहारेण योज्यम् । क्षौद्रं मधु चतुरश्वो रथः श्रीमान् निस्त्रिंशो धनुरुत्तमामिति । अत्र तुइतिगायत्र्याश्चतुर्थाक्षरम् । निस्त्रिंशः खड्गः भृङ्गारः कनकालुका केसरी प्रशस्तकेसरः हरिश्रेष्ठः अश्वोत्तमः व्याघ्रतनुः व्याघ्रचर्मेत्यर्थः । नैगमा वणिजः 'नैगमो वणिजो वणिक्' इत्यमरः ॥ ३४-४१ ॥

३५] ति० टी०—क्षौद्रं मधु । सुमनसः पुष्पाणि ॥ ३५ ॥

रा० टी०—सर्वेति । सर्वबीजानि अभिषेकोचितनिखिलबीजविशेषाः सुमनसः विहितपुष्पाणि ॥ ३५ ॥

३६] ति० टी०—कन्याः कुमार्यः । निस्त्रिंशः खड्गः ॥ ३६ ॥

रा० टी०—रुचिराः रमणीयाः दोषरहिता इत्यर्थः । अष्टौ कन्या वरवारणः हस्तिश्रेष्ठः चतुरश्वः अश्वचतुष्टयविशिष्टो रथः निस्त्रिंशः खड्गविशेषः ॥ ३६ ॥

३७] ति० टी०—नरसंयुक्तं वाहनं शिबिका । भृङ्गारं कनकालुका स्वर्णकरकपात्रम् ॥ ३७ ॥

रा० टी०—नरसंयुक्तं वाहनं शिबिकेत्यर्थः । वालव्यजने वालौ केशविशेषावेव व्यजने चामरद्वयमित्यर्थः । किंच वालः केशविशेषः चामरद्वयमित्यर्थः । जात्यभिप्रायेणैकवचनम् । स च व्यजनं चेति द्वन्द्वः । अत एव मुख्याभिषेकसामग्रीभूतचामरानुक्तेर्न्यूनता भृङ्गारं भूषणादि ॥ ३७ ॥

३८] ति० टी०—चतुर्दंष्ट्रत्वादेव हरिश्रेष्ठः । यद्वा हरिश्चेष्ठ उत्तमाश्वः ॥ ३८ ॥

रा० टी०—हेम्नः सुवर्णस्य दाम माला तेन पिनद्धो युक्तः वृष उक्षा केशरी सिंहः किंच केशरी प्रशस्तसटाविशिष्टः चतुर्दंष्ट्रः दंष्ट्राचतुष्टयविशिष्टः हरिश्रेष्ठः अश्वमुख्यः ॥ ३८ ॥

३९] ति० टी०—व्याघ्रतनुर्व्याघ्रचर्म ॥ ३९ ॥

१ तु राजेति गो. पाठः । २ भृङ्गारश्च हिरण्मय इति गो. पाठः । ३ समिद्ध इति गो. पाठः । ४ सर्ववादित्रेति गो. पाठः ।

आचार्या ब्राह्मणा गावः पुण्याश्च मृगपक्षिणः । पौरजानपदश्रेष्ठा नैगमाश्च गणैः सह ॥ ४० ॥
एते चान्ये च बहवः प्रीयमाणाः प्रियंवदाः । अभिषेकाय रामस्य सह तिष्ठन्ति पार्थिवैः ॥ ४१ ॥
त्वरयस्व महाराजं यथा समुदितेऽहनि । पुष्ये[1] नक्षत्रयोगे च रामो राज्यमवाप्नुयात् ॥ ४२ ॥
इति तस्य वचः श्रुत्वा सूतपुत्रो महाबलः । स्तुवन्नृपतिशार्दूलं प्रविवेश निवेशनम् ॥ ४३ ॥
तं तु पूर्वोदितं वृद्धं द्वारस्था राजसंमताः[3] । न शेकुरभिसंरोद्धुं राज्ञः प्रियचिकीर्षवः ॥ ४४ ॥
स समीपस्थितो राज्ञस्तामवस्थामजाज्ञिवान् । वाग्भिः परमतुष्टाभिरभिष्टोतुं प्रचक्रमे ॥ ४५ ॥
ततः सूतो यथापूर्वं पार्थिवस्य निवेशने । सुमन्त्रः प्राञ्जलिर्भूत्वा तुष्टाव जगतीपतिम् ॥ ४६ ॥
यथा नन्दति तेजस्वी सागरो भास्करोदये । प्रीतः प्रीतेन मनसा तथा नन्दय नस्ततः[5] ॥ ४७ ॥
इन्द्रमस्यां तु वेलायामभितुष्टाव मातलिः । सोऽजयद्दानवान्सर्वांस्तथा त्वां बोधयाम्यहम् ॥ ४८ ॥

रा० टी०—व्याघ्रतनुः व्याघ्रस्य चर्म वादित्रसङ्घा वाद्यसङ्घाः वेश्यानां पृथगुपादानं स्त्रीभ्यो वैलक्षण्योतनाय ॥ ३९ ॥

४०] ति० टी०—नैगमा वणिजो गणैः स्वस्वगणैः ॥४०॥

रा० टी०—गणैः स्वस्वानुचरसमूहैः नैगमाः वणिजः ॥४०॥

४१] ति० टी०—प्रीयमाणाः प्रीतियुक्ताः । पार्थिवैः सहेत्यन्वयः ॥ ४१ ॥

रा० टी०—प्रीयमाणाः मन्त्रिभिस्तर्पिताः पार्थिवै राजभिः सह तिष्ठन्ति तानपि आचक्ष्वेति तात्पर्यम् । श्लोकाष्टकमेकान्वयि ॥ ४१ ॥

४२-४३] ति० टी०—समुदिते मुहूर्तगुणैः । यथा रामो राज्यमवाप्नुयात्तथा राजानं त्वरयस्वेति संबन्धः ॥ ४२ ॥ ४३ ॥

रा० टी०—त्वरयस्वेति । समुदिते अभिषेकोक्तगुणविशिष्टे अहनि अस्मिन्दिने रामो राज्यं यथा अवाप्नुयात् तथा महाराजं त्वरयस्व ॥ ४२ ॥

रा० टी०—इतीति । सूतपुत्रः सुमन्त्रः नृपतिशार्दूलं स्तुवन् तद्गाम्यवत्तां प्रशंसन् निवेशनमन्तःपुरं प्रविवेश ॥ ४३ ॥

गो० टी०—त्वरयस्व महाराजमिति । समुदिते सम्यग्व्यक्ते ॥ ४२ ॥ ४३ ॥

४४] ति० टी०—पूर्वोदितमयं कदापि न निवारणीय इति पूर्वमेव राज्ञा ज्ञापितम् । एवमाज्ञायां हेतुर्वृद्धमिति ॥ ४४ ॥

रा० टी०—तमिति । वृद्धं ज्ञानवयोभ्यामधिकं पूर्वोदितं त्वया यथेच्छं सर्वदैवेहागन्तव्यं त्वद्गमननिवारणं कदाचिन्न भविष्यतीति पूर्वं राज्ञा प्रबोधितं तं सुमन्त्रं संरोद्धुं राज्ञः प्रियचिकीर्षवः न शेकुः ॥ ४४ ॥

गो० टी०—तं त्विति । पूर्वोदितमयं सर्वदा अनिवार्य इति राज्ञा पूर्वमुक्तम् ॥ ४४ ॥

४५-४६] ति० टी०—तामवस्थां कैकेयीकृतां घोरामवस्थामजाज्ञिवान् अज्ञातवान्यतोऽतो वाग्भिरित्यादि । परमतुष्टाभिस्तोषकृताभिः स्तोषजनिकाभिरेति यावत् ॥ ४५ ॥ ४६ ॥

रा० टी०—स इति । तां केकयीवचनश्रवणहेतुकचञ्चलतारूपामवस्थामजाज्ञिवान् अज्ञाता स सुमन्त्रः परमतुष्टाभिः अतिसंतोषहेतुभिः वाग्भिरभिष्टोतुं प्रचक्रमे निश्चयं जगाम॥४५॥

गो० टी०—स इति । अजाज्ञिवान् अज्ञातवान् ॥ ४५ ॥

रा० टी०—तत इति । ततः स्तवननिश्चयानन्तरं निवेशने अन्तःपुरे स्थित इति शेषः । तुष्टाव ॥ ४६ ॥

गो० टी०—तत इति । यथाकालं प्रातःकालार्हम् ॥४६॥

४७] ति० टी०—भास्करोदये तत्काले प्रत्यूर्मिप्रतिफलितरवितेजसा तेजस्वी सागरो यथा स्नातुकामानन्दति नन्दयति तथा नोऽस्मान्प्रीतेन तुष्टेन मनसा प्रीतोऽस्मद्विषयकप्रीत्याश्रयः सन्नन्दय । यत्तु भास्करश्चन्द्र इति, तत्प्रसिद्धिविरुद्धम् । तथा 'आनन्दघनः' इतिपाठे आनन्दघनः आनन्दपूर्णस्त्वं नन्द नन्दय प्रजा इति शेषः । नन्दानन्देति च तन्त्रेण बोध्यम् ॥ ४७ ॥

रा० टी०—स्तवनप्रकारमाह—यथेत्यादिभिः । सागरः समुद्रः भास्करोदये यथा आनन्दति आनन्दयति तत्पूजनादिकामान् इति शेषः । तथा नोऽस्मानानन्दय प्रसिद्धा च भास्करोदयसमये समुद्रवृद्धिः ततः आनन्दनस्य समयाद्धेतोः केचित्स्वत्र योगरूढ्या भास्करशब्देन चन्द्रमसमाहुः वस्तुतस्तु अभास्करेति छेदः भास्करसदृश इत्यर्थः । स चन्द्र एवेति केचित् ॥ ४७ ॥

गो० टी०—यथानन्दतीत्यादि । भास्करोदयेऽपि समुद्रवृद्धिरस्त्येव, यद्वा भासः करोतीति व्युत्पत्त्या भास्करश्चन्द्रः॥४७॥४८॥

४८] ति० टी०—अस्यां वेलायामुदयवेलायाम् । तथा स्तुत्या चोत्साहयुक्तः सन्यथा दानवान्सोऽजयत्तथा रिपुजयफलकं बोधनं ते करोमीत्यर्थः ॥ ४८ ॥

रा० टी०—इन्द्रमिति । मातलिः इन्द्रसारथिः सः मातलिना स्तुत इन्द्रः दानवान् अजयत् तथा त्वां बोधयामि स्तौमि त्वमपि स्वविरुद्धान् जयेत्यर्थः ॥ ४८ ॥

---

१ पुष्ये इति गो. पाठः । २ महात्मन इति गो. पाठः । ३ संमतमिति गो. पाठः । ४ यथाकालमिति गो. पाठः । ५ आनन्द घनः स्वत

वेदाः सहाङ्गा विद्याश्च यथा ह्यात्मभुवं प्रभुम् । ब्रह्माणं बोधयन्त्यद्य तथा त्वां बोधयाम्यहम् ॥ ४९ ॥
आदित्यः सह चन्द्रेण यथाभूतधरां शुभाम् । बोधयत्यद्य पृथिवीं तथा त्वां बोधयाम्यहम् ॥ ५० ॥
उत्तिष्ठ नृमहाराज कृतकौतुकमङ्गलः । विराजमानो वपुषा मेरोरिव दिवाकरः ॥ ५१ ॥
[सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि । वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते ॥
गता भगवती रात्रिः कृतं कृत्यमिदं तव । बुध्यस्व नृपशार्दूल कुरु कार्यमनन्तरम्]
उदतिष्ठत रामस्य समग्रमभिषेचनम् । पौरजानपदाश्चापि नैगमश्च कृताञ्जलिः ॥ ५२ ॥
अयं वसिष्ठो भगवान्ब्राह्मणैः सह तिष्ठति । क्षिप्रमाज्ञाप्यतां राजन्राघवस्याभिषेचनम् ॥ ५३ ॥
यथा ह्यपालाः पशवो यथा सेना ह्यनायका । यथा चन्द्रं विना रात्रिर्यथा गावो विना वृषम् ॥ ५४ ॥
एवं हि भविता राष्ट्रं यत्र राजा न दृश्यते । एवं तस्य वचः श्रुत्वा सान्त्वपूर्वमिवार्थवत् ॥ ५५ ॥

४९] ति० टी०—अङ्गैः सहिता वेदा विद्याश्च मीमांसादयो यथा ब्रह्माणं सृष्ट्यै बोधयन्ति एवं त्वां बोधयामि । 'वेदेभ्य एव भूरादीन्पदार्थान्ज्ञात्वा वेधास्तान्सृजति' इति श्रुतिस्मृतिप्रसिद्धम् ॥ ४९ ॥

रा० टी०—वेदा इति । सहाङ्गा व्याकरणादिसहिताः विद्या धनुर्वेदादयः आत्मभुवं कर्मातन्त्रमित्यर्थः । तथा त्वां बोधयामि एतदुपमालंकारेण राज्ञः सर्वविषयकज्ञानवत्त्वं सूचितम् ॥ ४९ ॥

गो० टी०—वेदा इति । सहाङ्गविद्याः अङ्गभूतशिक्षादिविद्यासहिताः ब्रह्माणं बोधयन्ति सृष्ट्युपयोगितत्तदर्थबोधं जनयन्ति । तथाह मनुः—'नाम रूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः' इति ॥ ४९ ॥

५०] ति० टी०—यथा चन्द्रसहितो रविरुदयास्तमयाभ्यां पृथिवीं तत्स्थं जनं बोधयति तद्वच्च ॥ ५० ॥

रा० टी०—आदित्य इति । भूतधरां भूतानि धरति ब्रह्मादिद्वारा स्थापयति तां पृथिवीं पृथिवीप्रादुर्भूतां स्वमण्डलवर्तिसीतां चन्द्रेण सहादित्यो यथा बोधयति स्तौति तथाद्य त्वां बोधयामि एतेन सूर्याचन्द्रमसोः रामोपासकत्वं व्यक्तम् । अत एव सूर्यमण्डलमध्यस्थं रामं सीतासमन्वितमित्यादि सङ्गच्छते ॥ ५० ॥

गो० टी०—आदित्य इति । भूतधरां सर्वप्राणिधरां पृथिवीं बोधयति विशेषणद्वारा पृथ्वीबोधनम् अद्य बोधयामीत्यन्वयः ५०

५१] ति० टी०—कृतकौतुकमङ्गलः कृतानि कौतुकेऽभिषेकोत्सवे मङ्गलानि विचित्रवस्त्राभरणधारणादिरूपाणि येन । 'कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः' अत एव वपुषा विराजमानस्त्वं मेरोर्दिवाकर इवोत्तिष्ठ ॥ ५१ ॥

रा० टी०—उत्तिष्ठेति । कृतकौतुकमङ्गलः कृतानि संपादितानि कौतुकमङ्गलानि अभिषेकोत्सवहेतुभूतमङ्गलोपस्कराणि येन स त्वं मेरोर्दिवाकर इव उत्तिष्ठ । 'कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः' इति कोशः ॥ ५१ ॥

रा० टी०—सोमेति । सोमादयस्ते विजयं प्रदिशन्तु ददतुः ५२

रा० टी०—गतेति । भगवती उत्सवैश्वर्यस्याधिक्यात्तद्विशिष्टा शिवं मङ्गलमूलमहो दिनमुपस्थितम् अतः प्रतिबुध्यस्व तत्र हेतुः इदं सामग्रीसंपत्त्यनन्तरकालिकं कर्तव्यं तव कृतकृत्यं त्वत्प्रयत्नसाध्यम् ॥ ५२ ॥

गो० टी०—उत्तिष्ठेति । कृतकौतुकमङ्गलः कृतं कौतुकहेतुभूतं मङ्गलाचरणं येन स तथोक्तः सर्वानन्दोत्पादनाय कृतदेहालंकार इत्यर्थः । यद्वा कौतुकमुत्सवः कृतोत्सवार्थमङ्गलानुष्ठान इत्यर्थः । मेरोर्दिवाकर इव दिवाकरस्य प्रधानमेरोरुत्थानं मेरुसंबद्धरथाक्षद्वारेति ज्ञेयम् ॥ ५१ ॥ ५२ ॥

५२–५४] ति० टी०—कर्तव्यं यद्दाशरथं तत्सर्वं कृतमित्याह—उदतिष्ठतेति । उदतिष्ठत उत्थितं संपन्नमभूदित्यर्थः । अभिषेचनं तदुपकरणम् । नैगमो वणिग्वर्गः ॥ ५२–५४ ॥

रा० टी०—उदिति । समग्रं निःशेषम् अभिषेचनमभिषेकसामग्री पौरादिश्चोदतिष्ठत प्राप्नोत् ॥ ५४ ॥

गो० टी०—गतेति । सर्वानन्दकररामाभिषेकमहोत्सवोपयुक्तत्वाद्रात्रिर्भगवतीति स्तूयते ॥ ५३ ॥

रा० टी०—अयमिति । भगवान् अतिसमर्थः अतः अभिषेचनमाज्ञाप्यताम् ॥ ५५ ॥

रा० टी०—तवोत्थानमन्तरा सर्वं निरर्थकमित्याह—यथेति । अपालाः पालकरहिताः यत्र यस्मिन्काले राजा न दृश्यते तस्मिन्काले राष्ट्रमेवं भविता भवति लुडुपात्तकालस्याविवक्षा ॥ ५६ ॥

गो० टी०—उदतिष्ठतेति । " उदोनूर्ध्वकर्मणि " इत्यात्मने पदम् उपस्थितमित्यर्थः । अभिषेचनमभिषेकसाधनम् 'उपतिष्ठति' इति पाठान्तरम् ॥ ५४—५७ ॥

५५] ति० टी०—भविता लुट् । तस्माच्छीघ्रमुत्तिष्ठेति भावः । इवशब्द एवार्थे ॥ ५५ ॥

१ सहाङ्गविद्या इति गो. पाठः । २ विभुमिति गो. रा. पाठः । ३ आश्रिति गो. रा. पाठः । ४ श्लोकद्वयमेतदधिकं गो. रा. पाठे । ५ अहः शिवमुपस्थितम् । प्रतिबुध्यस्व राजर्षे कृतकृत्यमिदं तवेति रा. पाठः । ६ पदैरिति गो. पदश्रेति रा. पाठः । ७ नैगमैरिति गो. पाठः । ८ स्वयमिति गो. पाठः । ९ अनायकाः इति रा. पाठः । १० भवतेति गो. पाठः । ११ इतीति गो. पाठः ।

अभ्यकीर्यत शोकेन भूय एव महीपतिः । ततस्तु राजा तं सूतं सन्नहर्षः सुतं प्रति ॥ ५६ ॥
शोकरक्तेक्षणः श्रीमानुद्वीक्ष्योवाच धार्मिकः । वाक्यैस्तु खलु मर्माणि मम भूयो निकृन्तसि ॥ ५७ ॥
सुमन्त्रः करुणं श्रुत्वा दृष्ट्वा दीनं च पार्थिवम् । प्रगृहीताञ्जलिः किंचित्तस्मादेशादपाक्रमत् ॥ ५८ ॥
यदा वक्तुं स्वयं दैन्यान्न शशाक महीपतिः । तदा सुमन्त्रं मन्त्रज्ञा कैकेयी प्रत्युवाच ह ॥ ५९ ॥
सुमन्त्र राजा रजनीं रामहर्षसमुत्सुकः । प्रजागरपरिश्रान्तो निद्रावशमुपागतः ॥ ६० ॥
तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनम् । राममानय भद्रं ते नात्र कार्या विचारणा ॥ ६१ ॥
अश्रुत्वा राजवचनं कथं गच्छामि भामिनि । तच्छ्रुत्वा मन्त्रिणो वाक्यं राजा मन्त्रिणमब्रवीत् ॥ ६२ ॥
सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम् । स मन्यमानः कल्याणं हृदयेन ननन्द ह ॥ ६३ ॥
निर्जगाम च सौ प्रीत्या त्वरितो राजशासनात् । सुमन्त्रश्चिन्तयामास त्वरितं चोदितस्तया ॥ ६४ ॥

रा० टी०–एवमिति । अर्थवदर्थविशिष्टं सान्त्वपूर्वमिव सान्त्वनपूर्वकसदृशं वचः श्रुत्वा भूयोऽपि शोकेन अभ्यकीर्यत व्याप्तोत् । प्रार्थनावचनस्य सान्त्वनत्वाभावेन इवेत्युक्तम् ॥५७॥

गौ० टी०–इतीति । सान्त्वपूर्वं सामपूर्वम् 'साम सान्त्वम्' इत्यमरः । अर्थवदितिनिर्देशः प्रातःकालप्रबोधस्य सर्वविजयहेतुत्वात् ॥ ५८ ॥

५६] ति० टी०–अभ्यकीर्यत व्याप्तोऽभवत् सन्नहर्षो नष्टहर्षः ॥ ५६ ॥

रा० टी०–तत इति । ततः केकयीवचःश्रवणात्सन्नहर्षः संभावितरामवियोगजनितनिवृत्तानन्दः अत एव सुतं प्रति शोकरक्तेक्षणः राजा सुतमुद्वीक्ष्य उवाच ॥ ५८ ॥

गौ० टी०–ततः स राजेत्यादि । सुतं प्रति सन्नहर्षः नष्टहर्षः भूयो निकृन्तसि कैकेयीवाक्यकृत्तानि मर्माणि भूयोऽप्यनुचितकालस्तुतिभिर्निकृन्तसीत्यर्थः । अत्र इतिशब्दोऽध्याहार्यः ॥ ५९ ॥

५७] ति० टी०–शोकरक्तेक्षणः शोकजरोदनेन रक्तनेत्रः भूयः कैकेयीवाक्यैः कृत्तानि मर्माणि पुनरधिकं स्तुतिवाक्यैरित्यर्थः अनुचितकालप्रयुज्यमानत्वादिति भावः ॥ ५७ ॥

रा० टी०–तद्वचनमेवाह–वाक्यैरिति । वाक्यैः त्वदुक्ताभिषेकसंबन्धिवचनैः भूयोऽधिकं त्वं मां निकृन्तसि एतेनाभिषेकविघ्नः सूचितः । सुमन्त्र इति । करुणं श्रवणमात्रेण दयोत्पादकं वचनं श्रुत्वा दीनं कर्तव्यविवेकराहित्येन दीनतां प्राप्तं दृष्ट्वा तस्माद्राजाधिष्ठितादेशात्किञ्चिदपाक्रमत् किंचिदित्यनेन स्वाभिप्रायं राजा कथयतु इत्यभिप्रायः सूचितः ॥ ५९ ॥

५८] ति० टी०–अपाक्रमद्बद्धाञ्जलिः सम्भीतोऽपाक्रमत्५८

गो० टी०–करुणं दीनवाक्यम् ॥ ६० ॥

५९] ति० टी०–दैन्यं सत्यपाशबन्धनजम् । मन्त्रज्ञा स्वकार्ये वक्तव्यज्ञा ॥ ५९ ॥

रा० टी०–यदेति । दैन्यादेतोः ॥ ६० ॥

गो० टी०–यदेति । मन्त्रज्ञा राजनीत्यनुसारेण स्वकार्योचितविचारज्ञेत्यर्थः ॥ ६१ ॥

६०–६२] ति० टी०–अत एव मिथ्याप्याह–रामहर्षेति रामाभिषेकहर्षेत्यर्थः ॥ ६०–६२ ॥

रा० टी०–तत्प्रतिवचनमेवाह–सुमन्त्रेति । हे सुमन्त ! प्रजागरपरिश्रान्तो राजा अनिद्रावशं निद्रासदृशमोहपारतन्त्र्यमुपागतः प्राप्तः ॥ ६१ ॥

गो० टी०–सुमन्त्रेति । रजनीमिति अत्यन्तसंयोगे द्वितीया । प्रजागरो निद्राक्षयः । विचारणेत्यनन्तरमितिशब्दोऽध्याहर्तव्यः इति प्रत्युवाचेत्यन्वयः ॥ ६२ ॥ ६३ ॥

रा० टी०–तदिति । तत्तस्माद्धेतोः यशस्विनं नित्ययशोविशिष्टं रामं त्वमानय ॥ ६२ ॥

रा० टी०–केकयीवचनश्रवणानन्तरकालिकं सुमन्त्रोत्तरमाह–अश्रुत्वेति । हे भामिनि ! प्रातीतिककोपविशिष्टे राजवचनमश्रुत्वा अहं कथं गच्छामि एतेन राज्ञः शोककारणं सुमन्त्रेण ज्ञातमिति ध्वनितम् । तत्केकयीवचनप्रत्याख्यानरूपं वाक्यं श्रुत्वा राजा अब्रवीत् ॥ ६३ ॥

६३] ति० टी०–कल्याणं मन्यमानः कदाचिद्रामं दृष्ट्वा तस्मिन्प्रीतिं करिष्यतीति मन्यमानः, यद्वा अस्मिन्नवसरे रामदर्शनमेव कल्याणं मन्यमानः मृतिसमयत्वात् । यद्वा देवानामृषीणां च कल्याणं मन्यमानः अत एव हृदयेन ननन्द न तु बहिस्तद्विरूपमिति भावः ॥ ६३ ॥

रा० टी०–सुमन्त्रेति । हे सुमन्त्र ! रामं शीघ्रमानय सः सुमन्त्रः कल्याणं मन्यमानः राजवचनश्रवणेनेति शेषः ननन्द ॥ ६४ ॥

गो० टी०–स इति । राजशासनादित्युक्तिः राजसंमतमितिबुद्ध्या ॥ ६४–६६ ॥

६४] ति० टी०–निर्गमनकाले पुनस्त्वरितमानेयेति तया कैकेय्या प्रेरितश्चिन्तयामास किमित्येषा भूयस्त्वरयतीति चिन्ता ॥ ६४ ॥

१ स इति गो. पाठः । २ निद्राया वशमीयिवानिति गो. पाठः । ३ अयं सार्धश्लोको गो. पु. नास्ति । ४ संप्रीत्येति गो. पाठः ।

व्यक्तं रामाभिषेकार्थे इहायैस्यति धर्मराट्[1]। इति सूतो मतिं कृत्वा हर्षेण महता पुनः ॥ ६५ ॥
निर्जगाम महातेजा राघवस्य दिदृक्षया। सागरह्रदसंकाशात्सुमन्त्रोऽन्तःपुराच्छुभात् ॥ ६६ ॥
[[6]निष्क्रम्य जनसंबाधं ददर्श द्वारमग्रतः।]
ततः पुरस्तात्सहसा [7]विनिःसृतो महीपतेर्द्वारगतान्विलोकयन्।
ददर्श पौरान्विविधान्महाधनानुपस्थितान्द्वारमुपेत्य [9]विष्ठितान् ॥ ६७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः।

रामानयनायान्तःपुरान्निर्गच्छन्सुमन्त्रो राजागमनं प्रतीक्षमाणान्वसिष्ठादीन्गृहीतोपायनांश्च महीपतीन् द्वार्यवलोक्य राज्ञे तदागमनं न्यवेदयत्तेन प्रतिप्रेरितश्च रामानेतुं तदन्तःपुरं प्रविवेश।

ते तु तां रजनीमुष्य ब्राह्मणा वेदपारगाः। उपतस्थुरुपस्थानं सह राजपुरोहिताः ॥ १ ॥
अमात्या बलमुख्याश्च मुख्या ये निगमस्य च। राघवस्याभिषेकार्थे प्रीयमाणाः सुसंगताः ॥ २ ॥

रा० टी०—निर्जगामेति। तया राजवाण्या त्वरितं चोदितः प्रेरितः राजशासनाद्राज्ञः शासनं शिक्षामतति नित्यं प्राप्नोति प्रीत्या त्वरितः सः सुमन्त्रः निर्जगाम चिन्तयामास च तयेत्यस्य कैकयीविशेषणत्वे तु राजशासनादिति पञ्चम्यन्तमेव ॥ ६५ ॥

६५] ति० टी०—व्यक्तं रामाभिषेकार्थं एवैषा त्वरयति। इह धर्मराड् दशरथ आयास्त्यायासवान्भवति प्रयासबाहुल्येन प्रायो बहिर्नागमिष्यतीति मतिं कृत्वेत्यन्वयः ॥ ६५ ॥

रा० टी०—तच्चिन्तनं बोधयन्नाह व्यक्तमिति। धर्मराट् दशरथः राजा इह अभिषेकशालायां व्यक्तं यथा स्यात्तथा आयास्यतीति मतिं कृत्वा सागरह्रदसंकाशात् समुद्रान्तरवर्तिह्रदसदृशात् अन्तःपुराद्राघवस्य दिदृक्षया सुमन्त्रः निर्जगाम। श्लोकद्वयमेकान्वयि ॥ ६६ ॥ ६७ ॥

६६] ति० टी०—पुरान्तर्वर्तित्वादन्तःपुरस्य सागरान्तर्वर्तिह्रदतुल्यत्वम् ॥ ६६ ॥

गो० टी०—सागरह्रदसंकाशादिति। सागरह्रदः समुद्रान्तर्गतह्रदः पुरान्तर्वर्त्यन्तःपुरत्वात्समुद्रस्थह्रदौपम्यम्। जनसंबाधं जनैर्निबिडम् ॥ ६७ ॥

६७] ति० टी०—तत इति। महीपतेर्द्वारगतानधिकारिणो विलोकयन्पौरान्महाजनान्पुरस्तादग्रे ददर्श। ततो निर्गमनोत्तरम् ॥ ६७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽयोध्याकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

रा० टी०—तत इति। ततः अन्तःपुराद्विनिःसृतः सुमन्त्रः पुरस्तादग्रे महीपतेर्द्वारगतान्द्वारपालान्विलोकयन्सन् द्वारमुपेत्य प्राप्य विष्ठितान्संस्थितान्विविधाननेकप्रकारान्महाधनान्पौरान्ददर्श ॥ ६८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

गो० टी०—तत इति। पुरस्तादग्रे महीपतीन् विलोकयन् पश्चात् पौरान् ददर्श। महाधनान् उपहारपाणीन् उपस्थितान् उपस्थानं सदः कुर्वतः ॥ ६८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

१] ति० टी०—अथ कैकेय्या राज्ञा च सुमन्त्रहृदयतया प्रवर्तितस्य सुमन्त्रस्य यथापूर्वं प्रवृत्तिं वदन्राजाज्ञया राजद्वारि मिलितानां जनानां परस्परसंभाषणप्रकारमाह—ते त्वित्यादि। ते राजप्रेरिताः उष्योषित्वा उपस्थानं राजद्वारम् अधिकरणे ल्युट् ॥ १ ॥

रा० टी०—त इति। सहराजपुरोहिताः वसिष्ठकुलोद्भवराजपुरोहितसहिताः वेदपारगास्ते अभिषेकब्राह्मणाः तां रजनीमुष्य उषित्वा दिने सूर्ये उदिते सति पुष्ये नक्षत्रे अभ्यागते प्राप्ते सति राघवस्याभिषेकार्थे उपस्थानं राजद्वारमुपतस्थुः अमात्यादयश्चोपतस्थुः तत्र बलमुख्याः सेनाधीशाः निगमस्य वणिक्समूहस्य ये मुख्याः प्रधानाः। श्लोकत्रयमेकान्वयि उपस्थानशब्दोऽधिकरणल्युडन्तः ॥ १—३ ॥

गो० टी०—अथ रामाभिषेकसामग्रीसंनिधानमाह पञ्चदशे—ते त्विति। उष्य उषित्वा उपस्थानं सदः ॥ १ ॥

२] ति० टी०—निगमो वणिक्समूहः ॥ २ ॥

गो० टी०—निगमस्य पुरस्य 'निगमो निश्चये वेदे पुरे पथि वणिक्पथे' इति वैजयन्ती ॥ २ ॥

१ अभिषेकार्थमिति गो. पाठः। २ आयास्यतीति गो. रा. पाठः। ३ विदिति गो. पाठः। ४ कृत इति गो. पाठः। ५ बाहुरिति गो. पाठः। ६ अर्धमेतदधिकं गो. पाठे। ७ विनिर्गतो महीपतीनिति गो. पाठः। ८ गत इति गो. पाठः। ९ विष्टिपानिति रा. पाठः। १० त्विति गो. पाठः।

उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि । लग्ने कर्कटके प्राप्ते जन्म रामस्य च स्थिते ॥ ३ ॥
अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितम् । काञ्चना जलकुम्भाश्च भद्रपीठं स्वलंकृतम् ॥ ४ ॥
रथश्च सम्यगास्तीर्णो भास्वता व्याघ्रचर्मणा । गङ्गायमुनयोः पुण्यात्संगमादाहृतं जलम् ॥ ५ ॥
याश्चान्याः सरितः पुण्या ह्रदाः कूपाः सरांसि च । प्राग्वहाश्चोर्ध्ववाहाश्च तिर्यग्वाहाश्च क्षीरिणः ॥ ६ ॥
ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः । क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥ ७ ॥
अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः । सजलाः क्षीरिभिश्छन्ना घटाः काञ्चनराजताः ॥ ८ ॥
पद्मोत्पलयुता भान्ति पूर्णाः परमवारिणा । चन्द्रांशुविकचप्रख्यं पाण्डुरं रत्नभूषितम् ॥ ९ ॥
सज्जं तिष्ठति रामस्य वालव्यजनमुत्तमम् । चन्द्रमण्डलसंकाशमातपत्रं च पाण्डुरम् ॥ १० ॥

३] ति० टी०—अहनि पुष्यनक्षत्रे आगते रामस्य जन्म जन्मनि स्थिते जन्मकालस्थे कर्कटलग्ने च प्राप्ते ॥ ३ ॥

गो० टी०—उदित इति । उपकल्पितम् अभिषेकार्थद्रव्यजातमिति शेषः ॥ ३ ॥

४–५] ति० टी०—भाविने इति शेषः । अभिषेकायाभिषेकार्थमुपकरणम् उपकल्पितं सिद्धं कृतमित्यर्थः । काञ्चना जलकुम्भा आनीताः अलंकृतं भद्रपीठं स्थापितम् ॥ ४ ॥ ५ ॥

रा० टी०—अभिषेकायेति । रामस्य अभिषेकाय अभिषेकं कर्तुं द्विजेन्द्रैर्जलकुम्भादि उपकल्पितं समीपे प्रापितं सामान्यविवक्षया नपुंसकत्वैकत्वे । काञ्चनाः स्वर्णनिर्मिताः भद्रपीठं मङ्गलचिह्नचिह्नितपीठविशेषः ॥ ४ ॥

गो० टी०—उपकल्पितमेव प्रपञ्चयति—काञ्चना इत्यादि । अत्र भान्तीत्यनुषज्यते ॥ ४ ॥

रा० टी०—रथ इति । भास्वता प्रकाशमानेन व्याघ्रचर्मणा सम्यगास्तीर्णो रथ आहृतः पुण्यात् अतिपवित्रस्नहेतुभूतात्संगमाज्जलं चाहृतम् । अन्याः गङ्गायमुनाभिन्नाः पुण्याः पुण्यविशेषहेतुभूताः सरितो नद्यः इदं नदानामप्युपलक्षकम् । पुण्या इति ह्रदादावप्यन्वेति । प्राग्वाहाः प्राचोदिशःप्रभूताः वाहाः प्रवाहाः यासां ताः पश्चिमवाहिन्यः नर्मदादय इत्यर्थः । ऊर्ध्ववाहाः ऊर्ध्वात् पर्वतादेर्वहन्ति अधःपतन्ति ताः गङ्गोत्तर्यादय इत्यर्थः ॥ ५ ॥

गो० टी०—गङ्गेति । आहृतं वर्तत इति शेषः । याश्चान्या सरित इत्यत्र ताभ्यश्चेत्यनुकृष्याहृतमिति पूर्वेण संबन्धः । ये च ह्रदाः कूपाः यानि सरांसि अत्र तु तेभ्य इत्यध्याहारः । हृतं जलमिति पूर्वेण संबन्धः ॥ ६ ॥

६–७] ति० टी०—प्राग्वहा इत्यादेर्नद्य इति शेषः । पर्वतघटनादिनोर्ध्वप्रवाहवत्प्रदेशवत्य ऊर्ध्ववाहाः तिर्यग्वाहा दक्षिणोत्तरप्रवाहाः क्षीरिणः क्षीरपूर्णाः क्षीरमत्र जलम् जीवभाव आर्षः ॥ ६ ॥ ७ ॥

रा० टी०—तिर्यग्वाहाः दक्षिणोत्तराभिमुखवाहिन्यः काशीगङ्गागण्डकीशोणभद्रादयः क्षीरिण्यः दुग्धवाहिन्यश्च याः सन्ति सर्वशस्ताभ्यः सर्वशः समुद्रेभ्यश्च तोयमाहृतम् । सर्वश इत्युभयान्वयि । क्षीरमत्र जलमिति भट्टाः ॥ ६ ॥

गो० टी०—प्राग्वाहा इति । प्राग्वाहाः पूर्वाभिमुखप्रवाहाः गोदावरीकावेर्यादयः । ऊर्ध्ववाहाः ऊर्ध्वोद्गतप्रवाहाः नैमिषारण्यस्थब्रह्मावर्तरुद्रावर्तादिसरोविशेषाः । 'ऊर्ध्ववाहाः प्रत्यग्वाहाः' इत्यप्याहुः ऊर्ध्वाद्रहन्तीत्यूर्ध्ववाहाः निर्झरा इति केचित् । तिर्यग्वाहा दक्षिणोत्तराभिमुखप्रवाहाः गण्डकीशोणभद्रादयः ॥ ६ ॥

रा० टी०—क्षौद्रमिति । दर्भाः कुशाः सुमनसः पुष्पाणि ॥ ७ ॥

गो० टी०—सलाजा इति । क्षीरिभिः अश्वत्थोदुम्बरादिभिः । पूर्वं जलकुम्भमात्रमुक्तम् अत्र तद्विशेष इति न पुनरुक्तिः ॥ ७ ॥

८–१०] ति० टी०—क्षीरिभिः क्षीरिवृक्षपल्लवैः ॥ ८–१० ॥

रा० टी०—अष्टाविति । क्षीरिभिः क्षीरविशिष्टवृक्षविशेषपल्लवैः छन्ना आच्छादिताः पद्मोत्पलयुताः पद्मोत्पलयोः कमलजातिविशेषत्वान्न पौनरुक्त्यम् ॥ ८ ॥

गो० टी०—क्षौद्रमिति । क्षौद्रं मधु सुमनसः कुसुमानि शुभाचाराः अञ्जनस्रगलंकरणादिमङ्गलवेषयुक्ताः ॥ ८ ॥

रा० टी०—चन्द्रेति । चन्द्रांशुविकचप्रख्यं चन्द्रांशुवद्विकचा विस्तृता प्रख्या दीप्तिर्यस्य तत् रत्नभूषितं विहितानेकविधरत्नसंपुर्कं सज्जं गन्धादिभिरलंकृतं वालव्यजनं वालौ पुच्छकेशविशेषौ चामरावित्यर्थः । तौ च व्यजनं चैतेषां समाहारः । तत् रामस्य रामाभिषेकार्थं तिष्ठति ॥ ९ ॥

गो० टी०—चन्द्रांशुविकचप्रख्यं विकचचन्द्रांशुसदृशं विकचत्वं विस्तृतत्वं, यद्वा चन्द्रांशव इव विकचा विस्तृता प्रख्या कान्तिर्यस्य तत्तथा काञ्चनं काञ्चनदण्डं सज्जं गन्धपुष्पादिभिरलंकृतम् ॥ ९ ॥

रा० टी०—चन्द्रमण्डलेति । चन्द्रमण्डलसंकाशं चन्द्रमण्डलप्रकाशकमत एव द्युतिकरं सर्वप्रकाशकरं श्रीमदसंख्यैश्वर्यविशिष्टमभिषेकपुरःसरमभिषेकानामभिषेकसामग्रीणां पुरःसरमग्रे स्थितं मुख्यमित्यर्थः आतपत्रं छत्रं तिष्ठति इति शेषः । अभिषेकशब्दः करणघञन्तः ॥ १० ॥

२ वाहा इति गो. रा. पाठः । २ समाहित इति गो. पाठः । ३ एतदादिश्लोकद्वयस्य व्यत्यस्तपाठो गो. पुस्तके । ४ वेश्याश्चैव शुभाचाराः सर्वाभरणभूषिताः इति गो. पाठः । ५ काञ्चनमिति गो. पाठः ।

सज्जं द्युतिकरं श्रीमदभिषेकपुरःसरम् । पाण्डुरश्च वृषः सज्जः पाण्डुराश्वश्च संस्थितः ॥ ११ ॥
[प्रसृतश्च गजः श्रीमानौपवाह्यः प्रतीक्षते । अष्टौ च कन्या माङ्गल्याः सर्वाभरणभूषिताः ॥]
वादित्राणि च सर्वाणि बन्दिनश्च तथापरे । इक्ष्वाकूणां यथा राज्ये संभ्रियेताभिषेचनम् ॥ १२ ॥
तथाजातीयमादाय राजपुत्राभिषेचनम् । ते राजवचनात्तत्र समवेता महीपतिम् ॥ १३ ॥
अपश्यन्तोऽब्रुवन्को नु राज्ञो नः प्रतिवेदयेत् । न पश्यामश्च राजानमुदितश्च दिवाकरः ॥ १४ ॥
यौवराज्याभिषेकश्च सज्जो रामस्य धीमतः । इति तेषु ब्रुवाणेषु सर्वांस्तांश्च महीपतीन् ॥ १५ ॥
अब्रवीत्तानिदं वाक्यं सुमन्त्रो राजसत्कृतः । रामं राज्ञो नियोगेन त्वरया प्रस्थितो ह्यहम् ॥ १६ ॥
पूज्या राज्ञो भवन्तश्च रामस्य तु विशेषतः । अयं पृच्छामि वचनात्सुखमायुष्मतामहम् ॥ १७ ॥
राज्ञः संप्रतिबुद्धस्य चागमनकारणम् । इत्युक्त्वान्तःपुरद्वारमाजगाम पुराणवित् ॥ १८ ॥

गो० टी०—चन्द्रमण्डलेति । अभिषेकपुरस्कृतमभिषेकाय पुरस्कृतम् ॥ १० ॥

११] ति० टी०—अभिषेकपुरःसरमभिषेकसामग्रीसहितम् ॥ ११ ॥

रा० टी०—पाण्डुर इति । पाण्डुरो वृषः पाण्डुराश्वश्च संस्थितः वादित्राणि बन्दिनश्च संस्थिताः वचनविपरिणामेन संस्थित इत्यत्राप्यन्वेति ॥ ११ ॥

गो० टी०—पाण्डुर इति । प्रसृतः प्रकर्षेण स्रवन्मदः औपवाह्यः राजवाह्यस्त्वौपवाह्यः ' इत्यमरः ॥ ११ ॥

१२] ति० टी०—इक्ष्वाकूणां राज्येऽभिषेचनमुद्दिश्य यथा वस्तुजातं संभ्रियेत संभ्रियते ॥ १२ ॥

रा० टी०—इक्ष्वाकूणामिति । इक्ष्वाकूणां राज्ये राज्याभिषेके अभिषेचनमभिषेकसामग्री यथा संभ्रियेत तथाजातीयमिक्ष्वाकुकुलराज्याभिषेकोचितमित्यर्थः । अभिषेचनमभिषेकसामग्रीं राजवचनादादाय गृहीत्वा समवेताः राजद्वारं प्राप्तास्ते राजकीयाः महीपतिमपश्यन्तः सन्तः राज्ञो नः अस्मान् कः प्रतिवेदयेत् कथयेत् इत्यब्रुवन् । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०—अष्टौ चेति । माङ्गल्याः मङ्गलार्हाः वादित्राणि वीणादिचतुर्विधवाद्यानि ॥ १२ ॥

गो० टी०—इक्ष्वाकूणामिति । इक्ष्वाकूणां राज्ये अभिषेचनमुद्दिश्य यथा संभ्रियेत वस्तुजातमिति शेषः तथाजातीयमनर्घरत्नादिवस्तुजातमादाय ते महीपतयः राजवचनात् राजपुत्राभिषेचनमुद्दिश्य तत्र राजभवनद्वारे समवेताः महीपतिमपश्यन्तः राज्ञः को नु नः प्रतिनिवेदयेदित्यब्रुवन्निति योजना ॥ १३ ॥ १४ ॥

१३-१४] ति० टी०—तथाजातीयं वस्तुजातं रामाभिषेकमुद्दिश्यादाय गृहीत्वा राजवचनाद्राजद्वारे समवेता मिलिता ब्राह्मणादयो महीपतिमपश्यन्तो नोऽस्मान्राज्ञः कः प्रतिवेदयेदित्यब्रुवन् ॥ १३-१४ ॥

रा० टी०—नन्वत्रैव प्रतिपादयेत्यत आह—नेति । दिवाकर उदितः राजानं च न पश्यामः अतः कं प्रति कथयामीत्यर्थः । धीमतो रामस्य यौवराज्याभिषेकश्च सज्ज इत्यनेन प्रकारेण तान्द्वारप्राप्तान्महीपतीन्ब्रुवाणेषु सत्सु राजसत्कृतः सुमन्त्रः तान् ब्रुवाणानिदं वाक्यमब्रवीत् । अर्धचतुष्टयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—नेति । सज्जः संपन्नसाधन इत्यर्थः ॥ १५ ॥ १६ ॥

१५] ति० टी०—यौवराज्याभिषेकस्तत्सामग्री । सर्वांस्तानान्महीपतींश्चाब्रवीदित्यन्वयः ॥ १५ ॥

१६] ति० टी०—रामम् आनेतुमिति शेषः ॥ १६ ॥

रा० टी०—तद्वचनमेवाह—राममिति । यद्यपि राज्ञो नियोगेन राजाज्ञयेत्यर्थः राममानेतुमिति शेषः त्वरयावेगेनाहं प्रस्थितः तथापि राज्ञो रामस्य च भवन्तः पूज्या इति हेतोः आयुष्मतां भवतां वचनात्संप्रतिबुद्धस्य जाग्रतो राज्ञः अनागमनकारणं द्वारगमनाभावहेतुमयमहं सुखं यथा स्यात्तथा पृच्छामि द्वारे समागता ब्राह्मणादयः जाग्रतो भवतः आगमनाभावहेतुं पृच्छन्ति इति राजसन्निधौ गत्वा प्रश्नं कारयिष्यामीत्यर्थः । इति उक्त्वा पुराणवित्सुमन्त्रः अन्तःपुरद्वारमाजगाम । अर्धपञ्चकमेकान्वयि ॥ १६-१८ ॥

गो० टी०—राममिति । रामं प्रस्थितः आनेतुमिति शेषः । यस्मात्पूज्यास्तस्मात् आयुष्मतां युष्माकं वचनात् राज्ञः सुखं पृच्छामि यद्यागमनकारणं दर्शनायानागमनहेतुस्तं च अयमविलम्बेन पृच्छामि । पुराणवित् सामन्तराजाद्यवर्तनरूपपुरातनवृत्तान्तज्ञः सदा सर्वं सर्वदा अनिवारितम् ॥ १७-१९ ॥

१७] ति० टी०—यद्यपि प्रस्थितस्तथापि भवन्तो राज्ञो रामस्य च पूज्या इति कृत्वायुष्मतां युष्माकं वचनात्सर्वे राजानो ब्राह्मणादयश्च महाराजं सुखं सुखशयनं पृच्छन्तीति विज्ञापयामि जाग्रतोऽपि बहिरनागमनकारणं किमिति च पृच्छन्तीति विज्ञापयामि ॥ १७ ॥

१८] ति० टी०—पुराणविच्चिरकालकथाभिज्ञः अतिवृद्ध इति यावत् ॥ १८ ॥

१ पुरस्कृतमिति गो. पाठः । २ पाण्डुरोऽश्व इति गो. पाठः । ३ अधिकोऽयं श्लोकः गो. पुस्तके । ४ प्राप्त इति गो. पाठः । ५ सार्वभौमानिति गो. पाठः । ६ सर्वानिति गो. पाठः । ७ ऽस्म्यहमिति गो. पाठः । ८ यच्चागमनेति गो. पाठः ।

सदा सक्तं च तद्वेश्म सुमन्त्रः प्रविवेश ह । तुष्टावास्य तदा वंशं प्रविश्य स विशांपतेः ॥ १९ ॥
शयनीयं नरेन्द्रस्य तदासाद्य व्यतिष्ठत । सोऽत्यासाद्य तु तद्वेश्म तिरस्करणिमन्तरा ॥ २० ॥
आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवम् । सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ॥ २१ ॥
वरुणश्चाग्निरिन्द्रश्च विजयं प्रदिशन्तु ते । गता भगवती रात्रिरिहः शिवमुपस्थितम् ॥ २२ ॥
बुद्ध्यस्व राजशार्दूल कुरु कार्यमनन्तरम् । ब्राह्मणा बलमुख्याश्च नैगमाश्चागतास्त्विह ॥ २३ ॥
दर्शनं तेऽभिकाङ्क्षन्ते प्रतिबुद्ध्यस्व राघव । स्तुवन्तं तं तदा सूतं सुमन्त्रं मन्त्रकोविदम् ॥ २४ ॥
प्रतिबुद्ध्य ततो राजा इदं वचनमब्रवीत् । राममानय सूतेति यदस्यभिहितो मया ॥ २५ ॥
किमिदं कारणं येन ममाज्ञा प्रतिवाह्यते । न चैव संप्रसुप्तोऽहमानयेहाशु राघवम् ॥ २६ ॥
इति राजा दशरथः सूतं तत्रान्वशात्पुनः । स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तम् ॥ २७ ॥
निर्जगाम नृपावासान्मन्यमानः प्रियं महत् । प्रपन्नो राजमार्गं च पताकाध्वजशोभितम् ॥ २८ ॥

१९] ति० दी०–सदा सक्तमवारितद्वारम् ॥ १९ ॥

रा० दी०–सदेति । सदा सर्वस्मिन् काले आसक्तं स्वसैवितमनिवारितमित्यर्थः । किंच आसक्तं कविभिर्निर्त्यं वर्णितमित्यर्थः । तद्वेश्म गृहं प्रविवेश प्रविश्य विज्ञांपतेरस्य वंशं तुष्टाव ॥ १९ ॥

गो० टी०–तुष्टावेति । शयनीयं शयनयोग्यं गृहम् ॥२०॥

२०] ति० टी०–शयनीयं शयनगृहम् । तिरस्करणीं जवनिकाम् अन्तरा कृत्वेति शेषः एतेन तावत्पर्यन्तं गमनं सूचितम् । अत्यासाद्यातिसमीपं गत्वा ॥ २० ॥

रा० टी०–शयनीयमिति । नरेन्द्रस्य शयनीयं शयनगृहमासाद्य प्राप्य व्यतिष्ठत । अथ पृथक्–स इति । सः शयनगृहसमीपं प्राप्तः सुमन्त्रः तिरस्करणीं जवनिकाम् 'चिक' इति नाम्ना लोके प्रसिद्धामित्यर्थः । अन्तरा विना तद्वेश्म अत्यासाद्य अतिक्रम्य राघवं दशरथं तुष्टाव । अर्धद्वयमेकान्वयि ॥ २० ॥

गो० टी०–स इति । अत्यासाद्य अतिशयेन प्राप्य अतिसमीपं प्राप्येत्यर्थः । तिरस्करणिमन्तरा जवनिकामात्रं व्यवधानं कृत्वेत्यर्थः । राघवं दशरथं पुनस्तोत्रकरणं सूतस्य विज्ञापनात्पूर्वं स्तुतेः कुलधर्मत्वात् ॥ २१–२४ ॥

२१–२२] ति० टी०–राजविज्ञापनस्य स्तुतिपूर्वकत्वात्पुनः स्तुतिप्रवृत्तिः ॥ २१ ॥ २२ ॥

रा० टी०–स्तुतिमेवाह–सोमेति । सोमादयः ते तव विजयं प्रदिशन्तु कथयन्ति ॥ २१ ॥

रा० टी०–गतेति । शिवं कल्याणमूलं बुध्यस्व जागृहि । अनन्तरं कार्यं श्रुतेर्व्यस्त्वेन निश्चितं कुरु ॥ २२ ॥

२३–२४] ति० टी०–निगमो वाणिज्यं तत्संबन्धिनो नैगमाः ॥ २३ ॥ २४ ॥

रा० टी०–ब्राह्मणा इति । इहागताः ब्राह्मणादयः ते दर्शनमभिकाङ्क्षन्ते ॥ २३ ॥

रा० टी०–स्तुवन्तमिति । स्तुवन्तं सुमन्त्रं राजा प्रतिबुध्य इदं वचनमब्रवीत् ॥ २४ ॥

गो० टी०–स्तुवन्तमित्यादि।प्रतिबुध्य ज्ञात्वेत्यर्थः२५॥२६

२५–२७] ति० टी०–प्रतिबुध्य जवनिकान्तर्हितमपि सुमन्त्रं ध्वनिना ज्ञात्वा । 'यदस्यभिहितोऽनया' इति पाठेऽनयेत्युपलक्षणं मया चेत्यर्थः अत एव ममाज्ञेति संगच्छते पूर्वं राज्ञा स्वयमप्युक्तेः । कृतकादयस्तु–कैकेय्यावैवाप्रतिषिद्धमनुमतमिति न्यायेन ममाज्ञा । नन्व निद्रापरवशत्वेन राज्ञोऽनुमतं न वेति मे संदेहस्तत्राह–न चेति । इति व्याचक्षते । तेषाम् 'इति राज्ञा' इतिश्लोके पुनःपदासंगतिः स्पष्टैव पूर्वसर्गान्ते 'अश्रुत्वा राजवचनम्' इत्यादि 'ननन्द च' इत्यन्तश्लोकद्वयस्य सर्वपुस्तकेषूपलम्भाच्च तद्व्याख्यानमसंगतमिति ध्येयम् ॥ २५–२७ ॥

रा० टी०–तद्वचनमेवाह–राममिति । अनया मद्वाण्या राममानय इति त्वं यदभिहितः आज्ञापितोऽसि सा ममाज्ञा त्वया येन कारणेन प्रतिवाह्यते निवर्त्यते तदिदं किं कारणम्२५

रा० टी०–नेति । अहं नैव संप्रसुप्तः ॥ २६ ॥

गो० टी०–कैकेय्युक्तं निद्रापरवशस्य राज्ञोऽनुमतं न वेति न संशयितव्यमित्याह–न चेत्यादिना ॥ २७ ॥ २८ ॥

रा० टी०–इतीति । अन्वशात्तकथत् । स सुमन्त्रः तं राजानं शिरसा प्रतिपूज्य नमस्कृत्य प्रियं मन्यमानः निर्जगाम । सार्धश्लोक एकान्वयी ॥ २७ ॥

२८] ति० टी०–प्रियं मन्यमानो हार्दाभिप्रायज्ञानात् २८

रा० टी०–प्रपन्न इति । राजमार्गं प्रपन्नः प्राप्तः हृष्टगात्रहर्षतां प्राप्तः प्रमुदितः अत्यानन्दमनाः सूतः पताकाध्वजशोभितं राजमार्गं विलोकयन् सन् आशु जगाम राजमार्गमित्युभयान्वयि ॥ २८ ॥

१ कृतकृत्यमिदं त्वेति गो. पाठः । २ नृपेति गो. पाठः । ३ नृपेति गो. पाठः । ४ प्रतीति गो. पाठः । ५ अनयेति गो. रा. पाठः । ६ इन्यते इति गो. पाठः ।

हृष्टः प्रमुदितः सूतो जगामाशु विलोकयन् । स सूतस्तत्र शुश्राव रामाधिकरणाः कथाः ॥ २९ ॥
अभिषेचनसंयुक्ताः सर्वलोकस्य हृष्टवत् । ततो ददर्श रुचिरं कैलाससदृशप्रभम् ॥ ३० ॥
रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभम् । महाकपाटपिहितं[2] वितर्दिशतशोभितम् ॥ ३१ ॥
काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणम् । शारदाभ्रघनप्रख्यं दीप्तं मेरुगुहासमम् ॥ ३२ ॥
मणिभिर्वरमाल्यानां सुमहद्भिरलंकृतम् । मुक्तामणिभिराकीर्णं चन्दनागुरुभूषितम् ॥ ३३ ॥
गन्धान्मनोज्ञान्विसृजद्दार्दुरं शिखरं यथा । सारसैश्च मयूरैश्च विनदद्भिर्विराजितम् ॥ ३४ ॥
सुकृतेहामृगाकीर्णमुत्कीर्णं भक्तिभिस्तथा । मनश्चक्षुश्च भूतानामाददत्तिग्मतेजसा ॥ ३५ ॥
चन्द्रभास्करसंकाशं कुबेरभवनोपमम् । महेन्द्रधामप्रतिमं नानापक्षिसमाकुलम् ॥ ३६ ॥

गो० टी०–प्रपन्न इति । हृष्टः रोमाञ्चाञ्चितगात्रः प्रमुदितः संजातमानसानन्दः ॥ २९ ॥

२९] ति० टी०–हृष्टः पुलकितगात्रः प्रमुदित आनन्दचित्तः राजमार्गं विलोकयन्निति संबन्धः। रामाधिकरणा रामविषयाः२९

रा० टी०–स इति । तत्र मार्गे अभिषेचनसंयुक्ताः रामाभिषेको द्युत स्यादित्यादिवचनसंयुक्ताः रामाधिकरणाः रामनिश्चसौशील्यादिगुणबोधिकाः इत्यर्थः । सर्वलोकस्य कथाः सर्वलोककर्तृकवर्णनं हृष्टवद्धर्षविशिष्टं यथा स्यात्तथा शुश्राव । एतेन स्वार्थे वतिरार्ष इति भट्टायुक्तिश्चिन्त्या ॥ २९ ॥

गो० टी०–स इति । रामाधिकरणाः राममधिकृत्य प्रवृत्ताः हृष्टवत् स्वार्थे वतिः ॥ ३० ॥ ३१ ॥

३०] ति० टी०–हृष्टवद्धृष्टानां जनानाम् स्वार्थे वतिरार्षः३०

रा० टी०–तत इति । कैलाससदृशप्रभं कैलासप्रभासदृशप्रभाविशिष्टं शक्रवेश्मसमप्रभं शक्रवेश्मप्रभासदृशप्रभाविशिष्टं रामवेश्म सुमन्त्रो ददर्श ॥ ३० ॥

३१] ति० टी०–प्रातःसमयत्वान्महाकपाटेन पिहितम् स्वल्पद्वारस्यैवोद्घाटितत्वात् वितर्दिर्वेदिका ॥ ३१ ॥

रा० टी०–रामवेश्मैव वर्णयन्नाह–महेत्यादिभिः । महाकपाटपिहितं महाकपाटेन पिहितमाच्छादितं वितर्दिशतशोभितं वितर्दीनां वेदिकानां यच्छतं तेन शोभितम् महाकपाटपिहितमित्यनेन तदन्तर्वर्तिसूक्ष्मकपाट उद्घाटित इति व्यक्तम् ॥ ३१ ॥

गो० टी०–महाकपाटेत्यादि । महाकपाटविहितं निर्मितमहाकपाटं वितर्दिशतशोभितं वेदिकाशतशोभितम् ' स्याद्वितर्दिस्तु वेदिका'इत्यमरः। काञ्चनप्रतिमैकाग्रं काञ्चनप्रतिमाभिः एकाग्रं निरन्तरं,यद्वा काञ्चनप्रतिमाभिः एकानि मुख्यानि अग्राणि शिखराणि यस्मिन् तत्तथोक्तं मणिविद्रुमतोरणं मणिविद्रुमप्रचुरबहिर्द्वारयुक्तम् ' तोरणोऽस्त्री बहिर्द्वारम् ' इत्यमरः । शारदाभ्रघनप्रख्यं शारदाभ्रमूर्तिसदृशम् ' घनो मेघे मूर्तिगुणे त्रिषु मूर्तौ निरन्तरे' इत्यमरः। दार्दरं मलयसंनिकृष्टश्चन्दनोत्पत्तिस्थानभूतं गिरिर्दर्दरः तत्संबन्धि दार्दरम् । सुकृतेहामृगाकीर्णं द्वारभित्तिस्तम्भादिषु सुष्ठु रचितैः ईहामृगैः वृकैः आकीर्णम् 'कोकस्त्वीहामृगो वृकः ' इत्यमरः । भक्तिभिः सुकीर्णं सुष्ठु रचितं तिग्मतेजसा तीव्रतेजसा 'तिग्मं तीव्रं खरम्' इत्यमरः । अतिशयिततेजसेत्यर्थः। रामवेश्म ददर्श । हेतिपुनर्वचनस्य सामान्योक्तस्य विशेषणविशेषकथनार्थत्वात्र पुनरुक्तिः भगवतो वाल्मीकेरियं हि शैली । उपस्थितैरिति उपादाय उपायनानीति शेषः । समाक्रान्तैः समागतैः उन्मुखैः उत्सुकैः उदग्रमुन्नतं कुब्जकैरातकाढ्यं किरातानां स्वल्पशरीरकाणां समूहः कैरातकम् 'पृथिरल्पशरीरः स्यात्किरातः स च कथ्यते' इति हलायुधः। उपस्थितैः समाकीर्णमित्यादिकमपि रामवेश्मेत्यनेन संबध्यते ॥३२–४०॥

३२] ति० टी०–काञ्चनीभिः प्रतिमाभिर्युक्तमेकं प्रधानमग्रं पुरोभागो यस्य तत् मणिविद्रुमयुक्तं तोरणं बहिर्द्वारं यस्य तच्छारदाभ्रवद्घनप्रख्यं निबिडप्रभम् ॥ ३२ ॥

रा० टी०–काञ्चनप्रतिमैकाग्रं काञ्चन्यः प्रतिमा देवप्रतिकृतयो यस्मिन् तदेकाग्रमेकं मुख्यमतिविलक्षणमित्यर्थः । अग्रमग्रभागो यस्मिन् तदेव तदिति कर्मधारयः । मणिविद्रुमतोरणं मणिविद्रुमनिर्मितं तोरणं बहिर्द्वारं यस्य शारदाभ्रघनप्रख्यं शारदाभ्रवद्घनीभूता प्रख्या प्रभा यस्य मेरुगुहासमं मेरुगुहासदृशम् ॥ ३२ ॥

३३] ति० टी०–वरमाल्यानां स्वर्णपुष्पमालानामन्तरालवर्तिभिर्महद्भिर्महादीप्तिमद्भिर्मणिभिरलंकृतम् ॥ ३३ ॥

रा० टी०–वरमाल्यानां सुवर्णनिर्मितपुष्पमालानां सुमहद्भिरतिमूल्यैर्मणिभिः अन्तराळवर्तिमणिविशेषैः अलंकृतं मुक्तामणिभिः विन्यस्तमुक्तामणिसमूहैः आकीर्णं चन्दनागरुभूषितं चन्दनागरुभिः शोभितम् ॥ ३३ ॥

३४] ति० टी०–दार्दुरम् दर्दुरो मलयसंनिकृष्टश्चन्दनगिरिः ॥ ३४ ॥

रा० टी०–मनोज्ञानतिमनोहरान्गन्धान्विसृजत्यजद्दार्दुरं दर्दुरस्य मलयसन्निकृष्टचन्दनगिरेरिदं शिखरं यथा सारसैः पक्षिविशेषैः ॥ ३४ ॥

३५–३६] ति० टी०–सुकृतैः स्वर्णादिना सुष्ठु निर्मितैरीहामृगैर्वृकैराकीर्णं व्याप्तम् ' कोकस्त्वीहामृगो वृकः' भक्तिभिर्वेधकीनां सूक्ष्मचित्रशिल्पैरुत्कीर्णं चित्रवत् । तिग्मतेजसातिशयिततेजोभया, यद्वा प्रतिबिम्बितसूर्यकिरणैः ॥ ३५ ॥ ३६ ॥

---

१ शिखरेति गो.पाठः। २ विहितमिति गो.पाठः। ३ गुहोपममिति गो.पाठः। ४ अगरुभूषितमिति गो.पाठः। ५ दार्दरमिति गो.पाठः। ६ सुकीर्णमिति गो.पाठः

मेरुशृङ्गसमं सूतो रामवेश्म ददर्श ह । उपस्थितैः समाकीर्णं जनैरञ्जलिकारिभिः ॥ ३७ ॥
उपादाय समाक्रान्तैस्तदा जानपदैर्जनैः । राभाभिषेकसुमुखैरुन्मुखैः समलंकृतम् ॥ ३८ ॥
महामेघसमप्रख्यमुदग्रं सुविराजितम् । नानारत्नसमाकीर्णं कुञ्जकैरपि चावृतम् ॥ ३९ ॥
स वाजियुक्तेन रथेन सारथिः समाकुलं राजकुलं विराजयन् ।
वरूथिना राजगृहाभिपातिना पुरस्य सर्वस्य मनांसि हर्षयन् ॥ ४० ॥
ततः समासाद्य महाधनं महत्प्रहृष्टरोमा स बभूव सारथिः ।
मृगैर्मयूरैश्च समाकुलोल्बणं गृहं वरार्हस्य शचीपतेरिव ॥ ४१ ॥
स तत्र कैलासनिभाः स्वलंकृताः प्रविश्य कक्ष्यास्त्रिदशालयोपमाः ।
प्रियान्वरान्राममते स्थितान्बहून्व्यपोह्य शुद्धान्तमुपस्थितो रथी ॥ ४२ ॥
स तत्र शुश्राव च हर्षयुक्ता रामाभिषेकार्थकृतां जनानाम् ।
नरेन्द्रसूनोरभिमङ्गलार्थाः सर्वस्य लोकस्य गिरः प्रहृष्टाः ॥ ४३ ॥
महेन्द्रसद्मप्रतिमं च वेश्म रामस्य रम्यं मृगपक्षिजुष्टम् ।
ददर्श मेरोरिव शृङ्गमुच्चं विभ्राजमानं प्रभया सुमन्त्रः ॥ ४४ ॥

रा० टी०—चित्रकृताः चित्रवर्णादिना अतिनिर्मिता ये ईहामृगा वृकास्तैः आकीर्णं व्याप्तम् 'कोकस्त्वीहामृगो वृकः' इति कोशः। भक्तिभिः चित्रादिरचनाविशेषैः उत्कीर्णं पूर्णमत एव मनश्चक्षुश्च आददत् हरत् ॥ ३६ ॥

रा० टी०—चन्द्रभास्करसंकाशं चन्द्रादिप्रकाशकं कुबेरभवनमुपमा उपमेयं यस्य महेन्द्रधाम प्रतिमा उपमा यस्य समाकुलं व्याप्तम् ॥ ३६ ॥

३७] ति० टी०—उपस्थितैरागतैः अञ्जलिकारिभिर्नमस्कारार्थम् ॥ ३७ ॥

रा० टी०—अञ्जलिकारिभिर्जनैः समाकीर्णं मेरुशृङ्गसमं रामवेश्म ददर्श मेरुगृहासमित्यनेन गृहान्तर्वर्णनमनेन तु तदुन्नतत्ववर्णनमिति न पौनरुक्त्यम्। सार्धषट्कमेकान्वयि ॥ ३७ ॥

३८] ति० टी०—उपादाय उपायनानीति शेषः। आगतैरिति च शेषः। समाक्रान्तैर्द्वारपालनिरुद्धैः उन्मुखैरुत्सुकैः ॥ ३८ ॥

३९] ति० टी०—उदग्रं प्रशस्तम्। कुञ्जकैर्दासैः ॥ ३९ ॥

४०] ति० टी०—राजकुलं राजमार्गं विराजयञ्शोभयन्। वरूथो रथगुप्तिस्तयुतेन रामगृहं समासददिति शेषः ॥ ४० ॥

४१] ति० टी०—महाधनं महता धनेन युक्तम्। समाकुलैरितस्ततः प्रसृतैरुल्बणमधिकशोभावत्। वरार्हस्योत्तमवस्त्वर्हस्य ॥ ४१ ॥

रा० टी०—उपादायेति। सारथिः सारथिधर्मविशिष्टः सारथिः स सुमन्त्रः समाकुलं गजादिभिराकीर्णं राजकुलं राजमार्गं वाजियुक्तेन वरूथिना रक्षकसहितेन राजगृहाभियातिना राजगृहगमनशीलेन रथेन विराजयन् प्रकाशयन् सन् मनांसि हर्षयंश्च सन् उपादाय गृहीत्वा उपायनानीति शेषः। समाक्रान्तैः समागतैः रामाभिषेकसुमुखैः तदभिषेकोत्सवविशिष्टैः उन्मुखैः भवनशोभानिरीक्षणार्थं कृतोर्ध्वमुखैर्जनैः समलंकृतम्। महामेघसमप्रख्यं महामेघस्य सजलजलदस्य समा सदृशी प्रख्या उक्तिर्यस्मिन्। इदमादर्शशीसादिवेश्मवर्णनमतः शारदाभ्रघनप्रख्यमिति पूर्वेण न विरोधः कुब्जकैः हास्यरसप्रपूरणाय निवासितकुब्जजनसमूहैराढ्यं महाधनं वरार्हस्य वराणां सर्वश्रेष्ठानां ब्रह्मादीनामित्यर्थः। अर्हः तत्कर्तृकपूजा यस्मिंस्तस्य रामस्य गृहं समासाद्य प्राप्य प्रहृष्टरोमा बभूव अत एव आस रराज। श्लोकचतुष्टयमेकान्वयि ॥ ३८-४१ ॥

गो० टी०—सवाजियुक्तेनेति। वरूथिना रथगुप्तिमता 'रथगुप्तिर्वरूथो ना' इत्यमरः। पुरस्य पुरस्थजनस्य रञ्जयत् अरञ्जयत् ॥ ४१ ॥

गो० टी०—तत इति। समाकुलोल्बणम् इतस्ततः समाकुलैर्जनैरुल्बणमतिशयेनोल्बणं वा। वरार्हस्य श्रेष्ठवस्त्वर्हस्य रामस्येति शेषः ॥ ४२ ॥

४२] ति० टी०—व्यपोह्यातिक्रम्य शुद्धान्तमन्तःपुरम् ॥ ४२ ॥

रा० टी०—स इति। कैलासनिभाः कैलाससदृशीः त्रिदशालयोपमाः त्रिदशालय उपमा यासां ताः स्वलंकृताः कक्ष्याः तिस्रो द्वारः प्रविश्य प्रियान् रामप्रीतिविषयीभूतानत एव राममते स्थितानत एव वरान्सर्वश्रेष्ठान्बहून् जनान्व्यपोह्य अतिक्रम्य शुद्धान्तं शास्त्रानुकूलान्तःपुरं रथी सुमन्त्रः उपस्थितः प्राप्तः। कक्ष्याणां त्रित्वलाभस्तु कपिञ्जलाधिकरणन्यायेन ॥ ४२ ॥

गो० टी०—स इति। अपोह्य अतिक्रम्य शुद्धान्तमन्तःपुरम् ॥ ४३ ॥

४३-४४] ति० टी०—रामस्याभिषेकार्थमभिषेकप्रयोजनकं कर्म कुर्वतां जनानां गिरो नरेन्द्रसूनो रामस्याभितो मङ्गलं

१ त्वेति गो.पाठः। २ विभूषितमिति गो.पाठः। ३ कैरातकावृतमिति गो.पाठः। ४ नराकुलमिति गो. पाठः। ५ विलोकयन्निति गो. पाठः। ६ रथक्षत्रिमिति गो. पाठः। ७ बहूनपोह्येति गो. पाठः। ८ कृता इति गो. पाठः। ९ प्रहृष्ट इति गो. पाठः। १० त्विति गो. रा. पाठः।

उपस्थितैरञ्जलिकारिभिश्च सोपायनैर्जानपदैर्जनैश्च ।
कोट्या परार्धैश्च विमुक्तयानैः समाकुलं द्वारपथं ददर्श ॥ ४५ ॥
ततो महामेघमहीधराभं प्रभिन्नमत्यङ्कुशमत्यसह्यम् ।
रामोपवाह्यं रुचिरं ददर्श शत्रुंजयं नागमुदग्रकायम् ॥ ४६ ॥
स्वलंकृतान्साश्वरथान्सकुञ्जरानमात्यमुख्यांश्च ददर्श वल्लभान् ।
व्यपोह्य सूतः सहितान्समन्ततः समृद्धमन्तःपुरमाविवेश ह ॥ ४७ ॥
ततोऽद्रिकूटाचलमेघसंनिभं महाविमानोपमवेश्मसंयुतम् ।
अवार्यमाणः प्रविवेश सारथिः प्रभूतरत्नं मकरो यथार्णवम् ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चदशः सर्गः ॥ १९ ॥

तत्प्रतिपादनमर्थो यासां ताः शुश्राव । स तथा लोकस्य च गिरस्तादृशीः शुश्राव ॥ ४३ ॥ ४४ ॥

रा० टी०—स इति । रामाभिषेकार्थकृतां रामाभिषेकाय इदं रामाभिषेकार्थं तत्कुर्वन्ति संपादयन्ति तेषां जनानां प्रहर्षयुक्ताः गिरः शुश्राव नरेन्द्रसूनोः अभिमङ्गलार्थाः अभितः सर्वप्रकारेण मङ्गलमेव अर्थो यासां ताः सर्वस्य उक्तातिरिक्तस्य लोकस्य तत्रत्यजनस्य प्रहृष्टा गिरश्च शुश्राव । शुश्राव गिर इति च आवर्तते किंच सर्वस्य लोकस्य संबन्धिनां रामाभिषेकार्थे कृत् प्रयत्नो येषां तेषां जनानां नरेन्द्रसूनोः रामस्याभिमङ्गलार्थाः सर्वतो मङ्गलप्रापिकाः हर्षयुक्ताः हर्षेण योजिताः अत एव प्रहृष्टाः हर्षकारिकाः गिरः स सूतः शुश्राव ॥ ४३ ॥

गो० टी०—स इति । रामाभिषेकार्थकृताः रामाभिषेकार्थं प्रयुक्ता इत्यर्थः । अभिमङ्गलार्थाः अभितो मङ्गलप्रतिपादनप्रयोजनाः ॥ ४४ ॥

रा० टी०—कक्ष्यात्रयानन्तरमपि तादृशमेव वेश्मास्तीति बोधयन्नाह—महेन्द्रेति । प्रभया स्वकान्त्या विभ्राजमानं वेश्म कक्ष्यात्रयात्परं गृहं ददर्श ॥ ४४ ॥

गो० टी०—महेन्द्रसद्मप्रतिममिति । वेश्म रामावासभूतं गृहराजम् ॥ ४५ ॥

४५] ति० टी०—कोट्या तत्संख्यया परार्धैस्तत्संख्ययोपलक्षितैर्जनैः अनेनातिसंमर्दो दर्शितः ॥ ४५ ॥

रा० टी०—तस्मिन्द्वारे अत्याश्चर्यमस्तीति बोधयन्नाह—उपस्थितैरिति । विमुक्तयानैः विमुक्तानि यानानि रथादयः यैस्तैः समाकुलं व्याप्तं द्वारपथं ददर्श एतेन तद्द्वारस्य आश्चर्यशक्ति मत्त्वं ध्वनितं प्रसिद्धं चैतादृशशक्तिमत्त्वं पुष्पकविमानादौ ॥ ४५ ॥

गो० टी०—उपस्थितैरिति । कोट्या कोटिसंख्यया परार्धैः परार्धसंख्यया च संख्येयैः सर्वान्तसंख्या परार्धः ॥ ४५ ॥

४६] ति० टी०—महामेघाधिरूढपर्वतसदृशम् प्रभिन्नं मत्तम् शत्रुंजयं तंदुणकं तन्नामानं च राम उपवाह्यो यस्य तम् ॥ ४६ ॥

रा० टी०—तत इति । महामेघैः युक्तो यो महीधरः पर्वतः तदाभं तत्सदृशं प्रभिन्नमतिमदमत्यङ्कुशमतिशयितः लोकविलक्षणः अङ्कुशो यस्य अत्यसह्यं सर्वासह्यविलक्षणं रामोपवाह्यं रामः उपवाह्यो येन तं रुचिरं मनोहरमुदग्रकायमुद् उन्नतः अग्रः अग्रभागो यस्य तत्कायं यस्य तं शत्रुंजयं शत्रुजयनामार्थविशिष्टं नागं गजं ददर्श ॥ ४६ ॥

गो० टी०—तत इति । प्रभिन्नं मत्तम् 'प्रभिन्नो गर्जितो मत्तः' इत्यमरः ॥ ४७ ॥

४७] ति० टी०—वल्लभान् राज्ञ इति शेषः । व्यपोह्य रथागमनेन मार्गादेकदेशे कृत्वा ॥ ४७ ॥

रा० टी०—स्वलंकृतानिति । सूतः सुमन्त्रः स्वलंकृतान् शोभनालंकारविशिष्टान्साश्वरथान्सहितरथविशिष्टान्सकुञ्जरान्कुञ्जरसहितान्वल्लभान्रामप्रियानमात्यमुख्यान्ददर्श समन्ततः हितान्प्राप्तान्तानमात्यमुख्यान्व्यपोह्य अतिक्रम्य समृद्धमतिसंपत्तिविशिष्टमन्तःपुरमाविवेश ॥ ४७ ॥

गो० टी०—स्वलंकृतानिति । वल्लभान् राजप्रियान् ॥ ४८ ॥

४८] ति० टी०—अद्रिकूटेऽद्रिशृङ्ग आरूढोऽचलो यो महामेघस्तत्सदृशमौन्नत्येन । 'तदेन्द्रकूट—' इति पाठे तन्नामा पर्वतविशेषस्तदारूढेत्यादि प्राग्वत् । महाविमानोपमवेश्मभिः संयुतम् महाविमानानां तत्सौधकानामुत्तमवेश्मनां संघो यत्र, महाविमानेभ्य उत्तमानां वेश्मनां संघो यत्रेति वा 'विमानो

---

१ कारकैरिति गो. पाठः । २ च मर्त्यैरिति गो. पाठः । ३ पथमिति गो. रा. पाठः । ४ अप्रसह्यमिति गो. पाठः । ५ औपवाह्यमिति गो. पाठः । ६ शतशश्चेति गो. पाठः । ७ हेति गो. नास्ति । ८ तदद्रीति गो. पाठः । ९ संनिभमहा इति रा. पाठः । १० संघवदिति गो. पाठः ।

षोडशः सर्गः ।

सुमन्त्रो रामसमीपमेत्य तं प्रति तदानयनविषयं दशरथनियोगं न्यवेदयन्निर्गतश्च रामः कनकमयं रथमारुह्य छत्रचामरधारिणा लक्ष्मणेन वीज्यमानः करितुरगदलैः परिवार्यमाणश्चानन्दोद्भुरनरनारीभिर्गीयमानं स्वयशः शृण्वन्नेव दशरथं द्रष्टुं निर्ययौ ।

स तदन्तःपुरद्वारं समतीत्य जनाकुलम् । प्रविविक्तां ततः कक्ष्यामाससाद पुराणवित् ॥ १ ॥
प्रासकार्मुकबिभ्रद्भिर्युवभिर्मृष्टकुण्डलैः । अप्रमादिभिरेकाग्रैः स्वनुरक्तैरधिष्ठिताम् ॥ २ ॥
अत्र काषायिणो वृद्धान्वेत्रपाणीन्सुवेषकृतान् । ददर्श विष्ठितान्द्वारि सुयध्यक्षान्सुसमाहितान् ॥ ३ ॥
ते समीक्ष्य समायान्तं रामप्रियचिकीर्षवः । सहसोत्पतिताः सर्वे ह्यासनेभ्यः ससंभ्रमाः ॥ ४ ॥
तानुवाच विनीतात्मा सूतपुत्रः प्रदक्षिणः । क्षिप्रमाख्यात रामाय सुमन्त्रो द्वारि तिष्ठति ॥ ५ ॥
ते राममुपसंगम्य भर्तुः प्रियचिकीर्षवः । सहभार्याय रामाय क्षिप्रमेवाचचक्षिरे ॥ ६ ॥

त्तमवेश्मसंघवत् ' इति पाठान्तरेऽर्थः । ' विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ' ॥ ४८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०—तत इति । अद्रिकूटाचलमेघसंनिभमहाविमानोपमवेश्मसंयुतमद्रिकूटे पर्वतशृङ्गे अचलः चाञ्चल्यरहितः यो मेघः तत्संनिभानि तान्येव महाविमानोपमानि पुष्पकविमानसदृशानि तान्येव वेश्मानि गृहाणि तैः संयुतं प्रभूतरत्नमतिरत्नविशिष्टमन्तःपुरमर्णवं लक्षुद्रं मकर इव अवार्यमाणः सारथिः प्रविवेश ॥ ४८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो० टी०—तदिति । अद्रिकूटाचलमेघसन्निभम् अद्रिशिखरेण निश्चलमेघेन च सदृशं महाविमानोत्तमवेश्मसंघवत् महाविमानसहितोत्तमवेश्मसमूहयुक्तम् ' विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ' इति निघण्टुः ॥ ४९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

१] ति० टी०—प्रविविक्तां जनासंबाधाम् ॥ १ ॥

२] ति० टी०—प्रासकार्मुकानां विभ्रद्भिः तेषां धारकैरित्यर्थः । एकाग्रैरेकाग्रचित्तैः ॥ २ ॥

रा० टी०—स इति । जनाकुलं बहुजनैराकीर्णं तदन्तःपुरद्वारं समतीत्य अतिक्रम्य ततः रामसमीपगमनस्य आवश्यकत्वादेतोः प्रविविक्तां जनबाहुल्यरहितां प्राप्तकार्मुकबिभ्रद्भिः प्राप्तानि प्रकटीभूतानि कार्मुकाणि धनूंषि बिभ्रति धारयन्ति तैः कर्मणः संबन्धसामान्यत्वेन विवक्षणात् षष्ठी ततः षष्ठीतिविधिना समासः मृष्टकुण्डलैः मृष्टानि स्वतः शुद्धानि कुण्डलानि येषां तैः अतुरक्तैः रामविषयकात्यद्भुतरागविशिष्टैः अत एव एकाग्रैः नियमितचित्तैः अत एव अप्रमादिभिः अनवधानतारहितैः युवभिः अधिष्ठितां कक्ष्यां पुराणवित्सुमन्त्रः आससाद प्राप । द्वयोरेकत्रान्वयः ॥ १ ॥ २ ॥

गो० टी०—एवं सुमन्त्रस्य रामोपस्थानमुक्त्वा रामस्य दशरथोपस्थानमाह षोडशे—स तदित्यादि ॥ १ ॥ २ ॥

३-४] ति० टी०—काषायिणः कौसुम्भादिकषायरक्तवस्त्रधारिण इत्यर्थः ॥ ३ ॥ ४ ॥

रा० टी०—तत्रेति । काषायिणः कुसुम्भादिरक्तवस्त्रधारिण स्वलंकृतान्स्वावस्थायोग्यालंकारविशिष्टान्स्थितान्सुयध्यक्षान्सीसमीपगमनयोग्यानित्यर्थः । वृद्धान् तत्र तस्मिन्समये ददर्श ॥३॥

रा० टी०—ते इति । ते वृद्धाः आसनेभ्यः उत्पतिता उत्थिताः ॥ ४ ॥

गो० टी०—तत्रेति । काषायिणः काषायवस्त्रधारिणः रामप्रीत्यर्थमलंकारकञ्चुकालंकृतानित्यर्थः । वृद्धान् पञ्चनवतिवयस्कान् ते खल्वन्तःपुरे स्थाप्या भवन्ति वेत्रपाणीन् यथा रामो धनुर्धृत्वा लोकं रक्षति तथा तेऽपि वेत्राणि धृत्वा रामं रक्षन्तीति भावः । स्वलंकृतान् रामश्चक्रवर्तिगृहे कृतमज्जनो भुक्त्वा यदा पुनर्दिव्यान्तःपुरमुपयाति तदा चक्रवर्तिवदन्तरङ्गतया च तमुत्सङ्गे निवेश्य परिष्वज्य मूर्ध्न्याघ्राय विसर्जयन्ति तेन कुङ्कुमपङ्कैः कस्तूरिकादिदिव्याङ्गरागैश्चालंकृतान् स्वलंकृतान् रामसीतालंकारेभ्योऽप्ययमलंकारोऽतिशयित इति भावः ॥३॥४॥

५-६] ति० टी०—प्रदक्षिणः प्रकर्षेण सेवादौ निपुणः आख्यात कथयत ॥ ५ ॥ ६ ॥

रा० टी०—तानिति । प्रदक्षिणः मन्त्रादिकर्मस्वतिनिपुणः सूतपुत्रः सुमन्त्रः तानुवाच । तद्वचनमेवाह—सुमन्त्रो द्वारि तिष्ठतीति क्षिप्रं शीघ्रमाख्यात यूयं कथयत ॥ ६ ॥

रा० टी०—ते इति । उपसंगम्य प्राप्य आचचक्षिरे कथयामासुः ॥ ६ ॥

गो० टी०—तानिति । प्रकर्षेण दक्षिणः प्रदक्षिणः सेवानिपुण इत्यर्थः । 'दक्षिणे सरलोदारौ' इत्यमरः । तिष्ठतीत्यत्र इतिकरणं द्रष्टव्यं तिष्ठतीत्याख्यातेत्यन्वयः ॥ ६ ॥ ६ ॥

---

१ प्राप्तिते रा. पाठः । २ स्वनुरक्तैरिति गो. पाठः । ३ तत्रेति गो. रा. पाठः । ४ स्वासनेभ्य इति गो. पाठः । ५ कार्मुकाणामिति भाति ।

प्रतिवेदितमाज्ञाय सूतमभ्यन्तरं पितुः । तत्रैवानाययामास राघवः प्रियकाम्यया ॥ ७ ॥
तं वैश्रवणसंकाशमुपविष्टं स्वलंकृतम् । ददर्श सूतः पर्यङ्के सौवर्णे सोत्तरच्छदे ॥ ८ ॥
वराहरुधिराभेण शुचिना च सुगन्धिना । अनुलिप्तं परार्ध्येन चन्दनेन परंतपम् ॥ ९ ॥
स्थितया पार्श्वतश्चापि वालव्यजनहस्तया । उपेतं सीतया भूयश्चित्रया शशिनं यथा ॥ १० ॥
तं तपन्तमिवादित्यमुपपन्नं स्वतेजसा । ववन्दे वरदं बन्दी विनयज्ञो विनीतवत् ॥ ११ ॥

७–८] ति० टी०–प्रतिवेदितं द्वाःस्थैर्विज्ञापितम् पितुरभ्यन्तरमत्यन्तमन्तरङ्गम् तत्रैव सीतावस्थितिदेश एव । प्रियकाम्यया पितुरिति शेषः ॥ ७ ॥ ८ ॥

रा० टी०–प्रतीति । प्रतिवेदितं निवेदितागमनकं सूतं पितुः अभ्यन्तरमत्यन्तरङ्गमाज्ञाय प्रियकाम्यया तत्प्रसन्नतावाञ्छया तत्रैव आनाययामास ॥ ७ ॥

गो० टी०–प्रतिवेदितमिति । प्रतिवेदितं द्वाःस्थैः निवेदितं पितुः अभ्यन्तरमन्तरङ्गं तत्रैव यत्र सीतया सह स्थितः तत्रैवेत्यर्थः । राघवप्रियकाम्यया राघवस्य दशरथस्य प्रियेच्छया राम इत्यध्याहारः ॥ ७ ॥

गो० टी०–तमिति । वैश्रवणसंकाशं तद्धनवधिकैश्वर्यसंपन्नं, यद्वा यथा वैश्रवणो दाता "कामेश्वरो वैश्रवणो ददातु" इति श्रुतेः । तथा परिगरवर्तिनां स्वसौन्दर्यानुभवसर्वस्वं ददातीत्यर्थः । उपविष्टं सह पत्न्या विशालाक्ष्या नारायणस्योपागमदित्युक्तरीत्या भगवदध्यानपरतयावस्थितं स्वलंकृतं ध्यानानुकूलाऽनुलिप्तं दिव्यमालालंकृतं वा तं सूतो ददर्श उत्कर्षकाष्ठाभूमिभूतं रामं निकर्षसीमाभूमिभूतो ददर्श कोऽयं भाग्यातिशयः इति भावः । पर्यङ्के तादृशैश्वर्यसामग्र्यनुरूपापूर्वसंस्थानप्रतिमाविशेषविशिष्टपर्यङ्केऽत एव श्रुत्तरत्र 'पर्यङ्कमास्तरणं नानारत्नविभूषितम् । तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि' इति श्रुयते तत्स्थापयिष्यति । सौवर्णे उपर्युपविष्टसदृशे काञ्चनगिरिः कालमेघमिव रामं भासयतीत्यर्थः । सोत्तरच्छदे पुष्पहासस्वकुमाररामदेहानुगुणमृदुतरास्तरणयुक्ते पर्यङ्के वियोक्तरीत्या श्रुक्तानुभाव्यदिव्यवेषमहो सूतोऽन्वभूदिति सौशील्यातिशयोक्तिः ॥ ८ ॥

रा० टी०–तमिति । सोत्तरच्छदे आस्तरणसहिते सौवर्णे सुवर्णमये पर्यङ्के उपविष्टं तं वराहरुधिराभेण वराहरुधिरसदृशेन अत्यरुणेनेत्यर्थः । अत्यरुणं वराहरुधिरमिति लोके प्रसिद्धं किंच वरमतिश्रेष्ठं न जहाति प्रयत्नमन्तरानुलेपनकर्तॄन् त्यजतीत्यहं रुधिरा अरुणा आभा यस्य तत्रयाणां कर्मधारयः तेन शुचिना अतिपवित्रेण परार्ध्येन बहुमूल्येन चन्दनेन अनुलिप्तं परं सर्वतृप्तिकारकं तपन्तमैश्वर्यविशिष्टं वालव्यजनहस्तया पार्श्वतः पार्श्वे स्थितया सीतया उपेतं युक्तं रामं चित्रया तदभिधतारया उपेतं युक्तं शशिनं चन्द्रमसमिव भूयोऽत्यन्तं ददर्श । श्लोकत्रयमेकान्वयि ॥ ८–१० ॥

९] ति० टी०–वराहरुधिरवदतिरक्तेन परार्ध्येन श्रेष्ठेन॥९॥

१०] ति० टी०–भूयो वारंवारं ददर्शेत्यन्वयः । तथाभूतस्य दर्शने तृप्त्यभावात् चित्रया सहितं शशिनं यथा लोको भूयो भूयः पश्यति तथेत्यर्थः ॥ १० ॥

गो० टी०–स्रक्चन्दनवनिता इत्युक्तभोग्यवस्तुष्वादौ दिव्यमाल्ययोगमुक्त्वा दिव्यचन्दनयोगं दर्शयति–वराहरुधिराभेणेति । वराहरुधिरमतिरक्तवर्णमिति प्रसिद्धं तत्सदृशेन कुङ्कुममिश्रतयेति भावः । सीताकरकमलानुलिप्ततया तत्कान्तिमिश्रत्वमुच्यते । शुचिना सीताकरस्पर्शपूतेन तत्करस्पर्शकृतशैत्यविशेषं सम्भावयति चकारः । सुगन्धिना सर्वगन्ध इत्यस्य श्रियोऽप्यविशेषात्तत्करस्पर्शजनितनिरवधिकगन्धेन परार्ध्येन कान्तानुलिप्ततया श्रेष्ठेन चन्दनेन अनुलिप्तं पश्चात् लिप्तम् अनेन सीताकूरागकरणानन्तरत्वं गम्यते । परंतपं एतादृशसौन्दर्यानुभवविरोधिनिवर्तकम् । अथाप्राकृतवनितायोगं दर्शयति–स्थितयेति । चापीति निपातः पूर्वोक्तसमुच्चये । पार्श्वतः स्थितया चन्दनानुलिप्तगात्रं कान्तं कृत्वा वालव्यजनं हस्ते कृत्वा पार्श्वे स्थितया सीतया भूयः उपेतं विनयेन पार्श्वतश्चामरमुपवीज्य पुनस्तात्कालिकसुषमाविशेषबलात्कारेण गाढमाश्लिष्टं भूय इत्यत्र विराजमानमिति शेष इत्याहुः । तदानींतनातिशयं दृष्टान्तमुखेन स्पष्टीकरोति–चित्रयेति । चैत्रपौर्णमास्यां चित्रानक्षत्रयतारकयोपेतमुदितं शशिनमिव स्थितम् चित्रयेत्यनेन तत्कृतातिशय उक्तः उपेतमित्यनेन रक्तवर्णत्वं शशिनमित्यनेन सीतालिङ्गनोत्कृष्टचन्दनवक्षस्कत्वमुक्तम् एवंभूतं ददर्शेति दृष्टिसाफल्यमुक्तम् ॥ ९ ॥ १० ॥

११] ति० टी०–बन्दी सूतमन्त्रः विनीतवद्विनीतः सन्॥११॥

रा० टी०–तमिति । स्वतेजसा स्वनित्यप्रकाशेन उपपन्नं युक्तमत एव आदित्यमपि तपन्तं प्रकाशयन्तं तं रामं विनीतवत् विनीतं विनयवचनं वनाति रचयति उच्चारयतीत्यर्थः। स बन्दी सूतमन्त्रः ववन्दे ॥ ११ ॥

गो० टी०–शिरसो वाचश्च साफल्यमाह–तमिति । ववन्द इति शिरसः साफल्यमुक्तं बन्दीति वाक्साफल्यं वरदं स्वानुभवरूपवरप्रदं विनीतवत् विनीतो यथा साष्टाङ्गं वन्दते तथेत्यर्थः । साधारणतेजसा नत्वन्यकृतेन अन्यसाधारणेन चेत्यर्थः । तपन्तमादित्यमिव तेजसोपपन्नमिति संबन्धः । इन्दीवरश्यामामिति स्वभावतः श्यामवर्णस्यादित्यवर्णत्वोक्त्या

१ राघवप्रियेति गो. पाठः ।

प्राञ्जलिः सुमुखं दृष्ट्वा विहारशयनासने । राजपुत्रमुवाचेदं सुमन्त्रो राजसत्कृतः ॥ १२ ॥
कौसल्या सुप्रजा राम पिता त्वां द्रष्टुमिच्छति । महिष्यापि[2] हि कैकेय्या गम्यतां तत्र मा चिरम्॥ १३ ॥
एवमुक्तस्तु संहृष्टो नरसिंहो महाद्युतिः । ततः संमानयामास सीतामिदमुवाच ह ॥ १४ ॥
देवि देवश्च देवी च समागम्य मदन्तरे । मन्त्रयेते ध्रुवं किंचिदभिषेचनसंहितम् ॥ १५ ॥
लक्षयित्वा ह्यभिप्रायं प्रियकामा सुदक्षिणा । संचोदयति राजानं मदर्थं[3]मसितेक्षणा ॥ १६ ॥
सा प्रहृष्टा महाराजं हितकामानुवर्तिनी । जननी चार्थकामा मे केकयाधिपतेः सुता ॥ १७ ॥
दिष्ट्या खलु महाराजो महिष्या प्रियया सह । सुमन्त्रं प्राहिणोद्दूतमर्थकामकरं मम ॥ १८ ॥

प्रदीपे वर्त्यन्तस्थितनीलव्यक्तिवत् परितः प्रसृतशुक्लभास्वरतेजः-पुञ्जवच्च विग्रहकान्त्योर्व्यवस्थितिर्योत्यते तं वैश्रवणेत्यारभ्य स्वतेजसेत्यन्तेन ध्येयशुभाश्रयाकारविशेषो व्यज्यते ॥ ११ ॥

१२] ति० टी०–सुमुखं प्रसन्नवदनम् विहारशयनस्थानरूप आसने विद्यमानं राजपुत्रमित्यन्वयः । यद्वा विहारशयनासने समाहारद्वन्द्वः । तेषु राज्ञा सत्कृतः सुमन्त्र इत्यन्वयः ॥ १२ ॥

रा० टी०–प्राञ्जलिरिति । विहारशयनाय आसनं तस्मिन् स्थितमिति शेषः राजपुत्रं सुमुखं प्रसन्नवदनं दृष्ट्वा इदमुवाच॥१२॥

गो० टी०–प्राञ्जलिरिति । विहारशयनासन इति द्वन्द्वै-कवद्भावः विहारः गतिः ॥ १२ ॥

१३] ति० टी०–सुप्रजाः सुपुत्रेण त्वयेति शेषः ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–कौशल्येति । हे राम ! येन भवता कौशल्या सुप्रजा शोभनपुत्रा तं त्वां कैकेय्या महिष्या सह पिता द्रष्टुमिच्छति अतस्तत्र गम्यतां येन भवतेति शेषः ॥ १३ ॥

गो० टी०–कौसल्येति । सुप्रजाः त्वयेति शेषः, यद्वा कौसल्यायाः सुप्रजः सुपुत्र असिच्प्रत्ययान्तः ॥ १३ ॥

१४] ति० टी०–संमानयामास सुमन्त्रवचोऽङ्गीचकारेत्यर्थः ॥ १४ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्तः नरसिंहः पुरुषश्रेष्ठो रामः ततः तं द्वितीयान्तात्तसिः सूतं संमानयामास त्वदुक्तं मया स्वीकृतमिति कथयामासेत्यर्थः च सीतां इदमुवाच । हथार्थे ॥ १४ ॥

गो० टी०–एवमिति । संमानयामास सूतमिति शेषः ॥१४॥

१५] ति० टी०–देवश्च देवी च मातापितरौ मदन्तरे मदर्थे समागम्य मिलित्वाभिषेचनस्य सम्यग्घितं किंचिद्ध्रुवं निश्चयेन मन्त्रयेते विचारयतः । अत्राभिषेचनसहितं तत्संबन्धम् अभिषेकद्वारकमिति यावत् । किंचिद्वनगमनरूपं तद्विरुद्धं संप्रत्येवास्माभिश्चिन्त्यमानं मन्त्रयेते इत्यध्याहृत्य गर्भितो ज्ञेयः॥१५॥

रा० टी०–तद्वचनमेवाह–देवीति । देवो राजा देवी केकयी समागम्य एकत्र स्थित्वा मदन्तरे मदर्थमभिषेचनसंहितम् अभिषेचनं संहितं विधयतया प्राप्तं यस्मिन् तत्किंचिद्ध्रुवं मन्त्रयेते संमतिं कुरुतः संहितमित्यत्र गत्यर्थकहिधातोर्निष्ठा ॥१५॥

गो० टी०–देवीति । मदन्तरे मदर्थम् 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इत्यमरः । अभिषेचनसंहित-मभिषेचनसंबन्धि मदर्थं किंचिन्मन्त्रयेते विचारयतः ॥ १५ ॥

१६–१७] ति० टी०–तत्र तर्कयति—लक्षयित्वेति । राज्ञोऽभिप्रायं मदभिषेकविषयं लक्षयित्वा सुदक्षिणा समर्था अत एव राज्ञः प्रियकामा अत एव प्रहृष्टा हितवचनेन कामेन च राजानमनुवर्तितुं शीलं यस्यास्तादृशी मे जननी मदर्थकामा महाराजं राजानमिति हर्षवशात्पुनरुक्तिरदोषाय । मदर्थं मद-भिषेकार्थं राजानं संचोदयति त्वरयति, भरतासंनिधौ रामा-भिषेकस्त्वत्संमतो न वेति राज्ञा पृष्टे सर्वथा मत्संमतत्वत्वरया क्रियतां भरतः पश्चाच्छ्रोष्यतीति मन्ये इत्याशयः ॥ १६॥१७॥

१८] ति० टी०–कुत एवं ज्ञायते तत्राह—दिष्ट्येति । मम कामविषयमर्थं करोति तादृशं सुमन्त्रं यतो दूतं प्राहिणो-दत एवं ज्ञायत इति भावः ॥ १८ ॥

रा० टी०–लक्षयित्वेति । हे मदिरेक्षणे ! अभिप्रायं मदी-प्सितं लक्षयित्वा ज्ञात्वा प्रियकामा मत्प्रीतिविषयकेच्छावती सुदक्षिणा अतिनिपुणा केकयी राजानं संचोदयति प्रेरयति ॥ १६ ॥

गो० टी०–महिष्या सहेत्युक्त्योन्नेयमर्थं दर्शयति–लक्षयि-त्वेति । सुदक्षिणा सुकुशला अत एव राज्ञोऽभिप्रायं लक्षयित्वा तदनुवृत्त्यागमनपर्यन्तं न विलम्बः कार्य इति राजाशयं ज्ञात्वा मत्प्रियकामा सती राजानं प्रति मदर्थं मदभिषेकं संचोदयति । एतदानुकूल्यं त्वत्सौभाग्यफलमित्याह–मदिरेक्षण इति ॥ १६॥

रा० टी०–सेति । प्रहृष्टा सा केकयी किंच सा प्रहृष्टा आप्तप्रहृष्टाभिः अतिहर्षविशिष्टाभिः सखीभिः सहिता महाराज-मनुवर्तिनी हितकामा मत्प्रियविषयकेच्छावती अत एव मे अर्थ-कामा मत्प्रयोजनविषयकवाञ्छाविशिष्टा केकयाधिपतेः सुता जननी या केकयी तया प्रियया महिष्या सह महाराजः मम अर्थकामपरं सुमन्त्रं दूतं प्राहिणोत्प्रैषयत् दिष्ट्या भाग्यमेतत् । श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–संदिग्धोक्तिजनितां सीताशङ्कां वारयति–सेति। प्रहृष्टा मयीति शेषः । हितकामा लोकस्येति शेषः महाराजं भर्तारमनुवर्तिनी मे अर्थकामा भवतीति शेषः ॥ १७ ॥ १८ ॥

---

१ तु सुखं पृष्ट्वेति गो. पाठः । २ सहेति गो. रा. पाठः । ३ मदिरेक्षणे इति गो. रा. पाठः ।

यादृशी परिषत्तत्र तादृशो दूत आगतः । ध्रुवमद्यैव मां राजा यौवराज्येऽभिषेक्ष्यति ॥ १९ ॥
हन्त शीघ्रमितो गत्वा द्रक्ष्यामि च महीपतिम् । सह त्वं परिवारेण सुखमास्व रमस्व च ॥ २० ॥
पतिसंमानिता सीता भर्तारमसितेक्षणा । आ द्वारमनुवव्राज मङ्गलान्यभिदध्युषी ॥ २१ ॥
राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनम् । कर्तुमर्हति ते राजा वासवस्येव लोककृत् ॥ २२ ॥
दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिम् । कुरङ्गशृङ्गपाणिं च पश्यन्ती त्वां भजाम्यहम्॥ २३ ॥
पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः । वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशम् ॥ २४ ॥

१९] ति० टी०—तदेव विवृणोति—यादृशी मदर्थपरा। तत्र राजान्तःपुरे परिषत्सभा ॥ १९ ॥

रा० टी०—यादृशीति । तत्र राजसन्निधौ यादृशी परिषत्समज्या तादृशः अयं दूतः आगतः तेन यथेच्छं कार्यसिद्धिर्भविष्यतीति ध्वनितमतः यो राजा यौवराज्ये मामभिषेक्ष्यति मत्कर्मकाभिषेकानुकूल्यापारं करोति तं महीपतिमितः गत्वा ध्रुवं द्रक्ष्यामि त्वं तु परिवारेण सखीगणेन सह सुखमास्व तिष्ठ रमस्व च । अभिषेक्ष्यतीत्यत्र लृडुपात्तभविष्यत्कालस्याविवक्षा। श्लोकद्वयमेकान्वयि ॥ १९–२० ॥

गो० टी०—यादृशीति । तत्र अन्तःपुरे यादृशी परिषत् परिसरवर्ती जनः तादृशस्तत्तुल्यो दूतः ॥ १९ ॥

२०] ति० टी०—परिवारेण सखीसमूहेन ॥ २० ॥

गो० टी०—हन्तेति । हन्तेति हर्षे परिवारेण परिचारिकासंघेन रमस्व वृत्तकीर्तनेन रता भव ॥ २० ॥

२१] ति० टी०—अभिदध्युषी अभिध्यायन्तीत्यर्थे आर्षमिदम् ॥ २१ ॥

रा० टी०—पतीति । असितेक्षणा पतिसंमानिता सीता मङ्गलानि यात्राकालोचितशुभहेतुवचनादीनि अभिदध्युषी उच्चारणादीनि कुर्वती सती भर्तारं राममाद्वारं द्वारं मर्यादीकृत्य अनुवव्राज अभिदध्युषी इत्यार्षम् ॥ २१ ॥

गो० टी०—अथ सीता रामस्य सौन्दर्यालंकृतिविशेषानालोक्य किंवा भविष्यतीति कलुषितहृदया तस्मै मङ्गलमाशासानानुव्रजति—पतिसंमानितेति । पतिसंमानिता पत्या स्वकण्ठादुच्य दत्तमुक्तामालिकेत्यर्थः । पादपल्लवस्पर्शपूर्वकं सान्त्विततेति भट्टारकाः । तदर्हत्वज्ञापनाय तद्वैलक्षण्यं दर्शयति—सीतेति । सीता लाङ्गलपद्धतिः तज्जत्वात्सीता अयोनिजाभावेन स्वस्माद्विलक्षणायां तस्यां तादृशी प्रीतिरुचितैवेति भावः । असितेक्षणा रामेण मालायां दत्तायामियमपि लोचनाभ्यां कुवलयमालां दत्तवती भर्तारमाद्वारमनुवव्राज आत्मानमनवरतं हृदये बिभ्रतो रामस्य विरहासहतया स्वगमनयोग्यदेशपर्यन्तमनुजगाम मङ्गलान्यभिदध्युषी अभिध्यायन्ती किमस्य सौन्दर्यस्य हानिर्भविष्यतीति कलुषितहृदया मङ्गलाशासनपूर्वकमनुवव्राज ॥ २१ ॥

२२–२३] ति० टी०—द्विजातिभिर्जुष्टं राज्यं यौवराज्याभिषेकं कृत्वा कालान्तरेण राजसूयार्हं महाराज्याभिषेचनं कर्तुमर्हति लोककृदिन्द्रस्येव ॥ २२ ॥ २३ ॥

रा० टी०—एतद्यौवराज्याभिषेकेन मदीयाभिरुचिरिति बोधयन्ती आह—राज्यमिति द्वाभ्याम् । यतो राज्यं द्विजातिभिः ब्राह्मणैः जुष्टं सेवितं राज्ये बहवो ब्राह्मणा वसन्तीत्यर्थः। अतस्ते राजसूयाभिषेचनं कर्तुं राजा अर्हति तत्र दृष्टान्तः वासवस्य इन्द्रस्य लोककृद्ब्रह्मेव एतेन राजसूयनिष्पत्तये सर्वे राजानो जेतव्या इति सर्वान्तःपातित्वाद्राक्षसराजादयोऽपि जेतव्या इति सीताभिप्रायो व्यक्तः ॥ २२ ॥

गो० टी०—मङ्गलाभिध्यानमेव दर्शयति—राज्यमिति । द्विजातिभिः ब्राह्मणैः जुष्टं सेवितं राजसूयाभिषेचनं राजसूययागे योऽभिषेकः अथाभिषिच्यत इत्युच्यमानः तदर्हम् अनेन महाराज्यवत्त्वं गम्यते कर्तुं दातुं लोककृत् ब्रह्मा ॥ २२ ॥

रा० टी०—राजसूयाभिषेके स्वाभिलाषातिशयं बोधयन्ती आह—दीक्षितमिति । दीक्षितं राजसूयदीक्षाविशिष्टमत एव व्रतसंपन्नं यागोचितव्रतं कुर्वन्तं वराजिनधरं विहितचर्मधारिणं शुचिं पावनहेतुं कुरङ्गशृङ्गपाणिं कुरङ्गस्य कृष्णमृगस्य शृङ्गं पाणौ कण्डूयनार्थं हस्ते यस्य तं त्वां पश्यन्ती ध्यायन्ती अहं भजामि एतेन ईदृगवस्थासिद्धये भवद्भिर्यतितव्यमिति प्रार्थना सूचिता ॥ २३ ॥

गो० टी०—दीक्षितमिति । दीक्षितं सकृष्णाजिनं नवनीताभ्यक्तं यजमानवेषं द्रष्टुमिच्छामीत्याह—व्रतसंपन्नम् ऋषिणोपवस्तव्यमित्युक्ते मम सौकुमार्यानुगुणमेवमुक्तमिति मत्वा चतुर्गुणमुपवासं करोति श्रद्धया तदाह—संपन्नमिति । वराजिनधरं वज्रधारणादप्यजिनधारणस्योत्कर्षं उच्यते शुचिं कामपि स्त्रियं मा स्पृश धर्मपत्नीत्वेन सीतास्पर्शे न दोष इति श्रुतिनोक्तेऽपि शङ्कया सीतावज्रदशास्पर्शेऽपि ज्ञानं करोति कुरङ्गशृङ्गपाणिं च एकवज्रधरो धन्वीत्येतदपेक्षया कण्डूयनार्थं कृष्णविषाणकृतशोभातिशय उच्यते पश्यन्ती त्वां भजाम्यहं भाविफलापेक्षायां कृतायामन्तरालिकफलमर्थसिद्धमेव अतोऽभिषेकान्तरायविरहो न प्रार्थितः यथा सावित्री भर्तारं दर्शयित्वानेनाहमनेकपुत्रा स्यामित्यर्थितवती तेन सिद्धं भर्तुः पूर्णायुःप्रार्थनं तद्वत्पश्यन्तीति हेतौ शतृप्रत्ययः दर्शनार्थमित्यर्थः । दर्शनार्थं हि भगवन्तं भजन्ते अत इयमपि तथैवाह ॥ २३ ॥

२४] ति० टी०—लक्षयित्वा इत्यादिभिरष्टभिः श्लोकैरर्थान्तरमपि गर्भितम् । तथाहि—अभिप्रायं मम रावणवधरूपमभिप्रायमन्तर्यामिप्रेरणया लक्षयित्वा । अनेन मत्प्रेरणयैव

अथ सीतामनुज्ञाप्य कृतकौतुकमङ्गलः । निश्चक्राम सुमन्त्रेण सह रामो निवेशनात् ॥ २५ ॥
पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः । लक्ष्मणं द्वारि सोऽपश्यत्प्रह्वाञ्जलिपुटं स्थितम् ॥ २६ ॥
अथ मध्यमकक्ष्यायां समागच्छत्सुहृज्जनैः । स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनन्द्य च ॥ २७ ॥
ततः पावकसंकाशमारुरोह रथोत्तमम् । वैयाघ्रं पुरुषव्याघ्रो राजितं राजनन्दनः ॥ २८ ॥
मेघनादमसंबाधं मणिहेमविभूषितम् । मुष्णन्तमिव चक्षूंषि प्रभया मेरुवर्चसम् ॥ २९ ॥
करेणुशिशुकल्पैश्च युक्तं परमवाजिभिः । हरियुक्तं सहस्राक्षो रथमिन्द्र इवाशुगम् ॥ ३० ॥

तस्या एवं प्रवृत्तिरिति सूचितम् । मम देवानां जगतश्च प्रियकामा राज्ञश्रान्तकाले निरन्तरं मद्ध्यानसंपादनेन प्रियकामा अत एव सुदक्षिणा समर्था, राज्ञ आपाततो विपरीतत्वेऽपि जगतः प्रियत्वेन राज्ञोऽपि पर्यन्तसुखदत्वेन तद्वाक्यकथने समर्था अत एव प्रहृष्टा मम हितकामा तदर्थमवतारग्रहणादितं काम्यं च तदनुवर्तनशीला अत एव मेऽर्थकामा मदवतारप्रयोजनसिद्धिकामा महाराजं राजानं मदर्थं मदवतारप्रयोजनरावणवधफलकवनगमनार्थं त्वरयतीत्यर्थः ॥ १६ ॥१७॥ अर्थकामकरं मत्कामविषयार्थकरं यथा भवति तथा प्राहिणोत् ॥ १८ ॥ तादृशो हृष्टोद्विग्नचित्तः । एतदीयेनैव हृष्टोद्विग्नचित्तत्वेन तत्परिषद्स्तत्त्वाह्वानम् । यौवराज्ये देवर्षिपरिपालनफलके ॥१९॥२०॥ मङ्गल्यान्यभिदध्युषी प्रस्थानमङ्गल्यान्यभिध्यायन्ती ॥ २१ ॥ तदेवाह–राज्यमिति । द्विजातिभिराश्रमस्थैर्ऋषिभिर्जुष्टं राज्यं वने राज्यम् तथा राजसूयाभिषेचनं सर्वतो बलवान्सर्वपीडको राजा सूयते कल्प्यते तत्र तादृशकर्मण्यभिषेकं कर्तुमर्हति। तदेव मनसाभिलषति—दीक्षितमित्यादि। तत्र राजसूये दीक्षितत्वादिधर्मकं त्वां पश्यन्ती अहं त्वां भजिष्ये इत्यर्थः । अनेनाहमपि त्वया सह वनं यास्यामीति सूचितम् । अत्र राजसूयाभिषेचनं कर्तुमर्हतीत्यनेन संकल्पेन दीक्षितमित्यादिसंकल्पेन मदुत्कार्थगर्भितत्वमेषां श्लोकानां सूचितम् । अन्यथा सत्यसंकल्पाया भगवत्या अग्रे कदापि रामेण राजसूयानङ्गीकारादीदृशसंकल्पविषयार्थासिद्ध्या तत्त्वं भज्येत । वक्तृश्रोत्रोः सीतारामयोर्वैशिष्ट्याभेदेनार्थावगतिर्बोध्या ॥ २४ ॥

रा० टी०–रामे स्वप्रीत्यतिशयं बोधयन्ती आह–पूर्वोमिति । वज्रधरः इन्द्रः आशां दिशम् ॥ २४ ॥

गो० टी०–पूर्वोमिति । उत्तरां दिशमित्यनन्तरं इति मङ्गल्यान्यभिदध्युषीति योज्यं भर्तृविषयत्वेन न वाचोक्तवतीति भावः ॥ २४ ॥

२५] ति० टी०–कृतकौतुकमङ्गलोऽद्यतिताभिषेकोत्सवार्थमङ्गलः ॥ २५ ॥

रा० टी०–अथेति । कृतकौतुकमङ्गलः रामः सुमन्त्रेण सह निवेशनाद्गृहान्निश्चक्राम ॥ २५ ॥

गो० टी०–अथेति । कृतकौतुकमङ्गलः अद्यतिताभिषेकार्थमङ्गलः ॥ २५ ॥

२६] ति० टी०–प्रह्वाञ्जलिपुटं प्रह्वत्वसूचकाञ्जलिपुटवन्तम् ॥ २६ ॥

रा० टी०–पर्वतादिति । पर्वतादिव गिरिगुहाशयः सिंह इव स रामः निष्क्रम्य गृहादिति शेषः । द्वारि स्थितं प्रह्वाञ्जलिपुटं प्रणतिसूचकबद्धयुगलकरं लक्ष्मणमपश्यत् ॥ २६ ॥

गो० टी०–पर्वतादिति । द्वारि प्रथमद्वारि प्रह्वाञ्जलिपुटं अञ्जलिपुटोऽस्यास्तीत्यञ्जलिपुटः मत्वर्थीयोऽच्प्रत्ययः प्रह्वश्चासावञ्जलिपुटश्चेति कर्मधारयः तम् ॥ २६ ॥

२७] ति०टी०–अर्थिनः स्वदर्शनस्वाभिषेकार्थार्थिनः ॥२७॥

२८] ति० टी०–वैयाघ्रं व्याघ्रचर्मपरिष्टुतमत एव राजितं शोभावन्तम् ॥ २८ ॥

रा० टी०–अथेति । स रामः अथ लक्ष्मणदर्शनानन्तरं मध्यमकक्ष्यायां समागच्छत् अर्थिनो जनान्दृष्ट्वा समेत्य तत्समीपं प्राप्य प्रतिनन्द्य आश्वास्य च वैयाघ्रं व्याघ्रदन्तनिर्मितत्वेन प्रतीयमानं रथोत्तममारुरोह । श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–अथेत्यादिश्लोकद्वयम् । अर्थिनः रामदर्शनार्थिनः अभिषेकार्थिनो वा वैयाघ्रं व्याघ्रचर्मपरिष्टुतम् "द्वैपवैयाघ्रादभ्" इत्यञ् राजतं रजतविकारम् 'राजन्तम्' इति च पाठः ॥ २७ ॥ २८ ॥

२९] ति० टी०–मेघनादसदृशनादम् असंबाधं विपुलम् प्रभया रविकिरणसंयुक्तत्वप्रभया । मेरुवर्चसमित्यनेन रथस्य सौवर्णत्वं ध्वन्यते ॥ २९ ॥

रा० टी०–रथं वर्णयन्नाह–मेघेति । मेघनादं मेघस्वनसदृशस्वनविशिष्टमसंबाधं जनसंकुलादिहेतुकबाधारहितं मणिस्तोमविभूषितं मणिसमूहैः शोभितं प्रभया प्राकृतविलक्षणकान्त्या चक्षूंषि मुष्णन्तं हरन्तमिव करेणुशिशुकल्पैः करिशावकसदृशैः परमवाजिभिरश्वैर्युक्तं रथं तूर्णमास्थाय प्रययौ गन्तुं मनश्चक्रे तत्र दृष्टान्तः हरियुक्तं रथं सहस्राक्ष इव । सार्धश्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०–मेघनादमित्यात्यादि । मेघस्येव नादो यस्य स मेघनादस्तम् असंबाधं संबाधरहितसुचितविस्तारमित्यर्थः ॥ २९ ॥

३०] ति० टी०–करेणुशिशवः कलभा अनेन दृष्टपुष्टो-

प्रययौ तूर्णमास्थाय राघवो ज्वलितः श्रिया । स पर्जन्य इवाकाशे स्वनवानभिनादयन् ॥ ३१ ॥
निकेतान्निर्ययौ श्रीमान्महेन्द्राद्रिव चन्द्रमाः । चित्रचामरपाणिस्तु लक्ष्मणो राघवानुजः ॥ ३२ ॥
जुगोप भ्रातरं भ्राता रथमास्थाय पृष्ठतः । ततो हलहलाशब्दस्तुमुलः समजायत ॥ ३३ ॥
तस्य निष्क्रममाणस्य जनौघस्य समन्ततः । ततो हयवरा मुख्या नागाश्च गिरिसंनिभाः ॥ ३४ ॥
अनुजग्मुस्तथा रामं शतशोऽथ सहस्रशः । अग्रतश्चास्य संनद्धाश्चन्दनागुरुभूषिताः ॥ ३५ ॥
खड्गचापधराः शूरा जग्मुराशंसवो जनाः । ततो वादित्रशब्दाश्च स्तुतिशब्दाश्च बन्दिनाम् ॥ ३६ ॥
सिंहनादाश्च शूराणां ततः शुश्रुविरे पथि । हर्म्यवातायनस्थाभिर्भूषिताभिः समन्ततः ॥ ३७ ॥
कीर्यमाणः सुपुष्पौघैर्ययौ स्त्रीभिररिंदमः । रामं सर्वानवद्याङ्ग्यो रामपिप्रीषया ततः ॥ ३८ ॥

नतमहाबलत्वं सूचितम् । इन्द्रः परमैश्वर्यवान्सहस्राक्ष इव नानाविधदेहवर्त्याभरणस्थरत्नसमूहै रामस्य सहस्राक्षत्वं बोध्यम् ॥ ३० ॥

गो० टी०–करेणुशिशुकल्पैरिति । करेणुशिशुकल्पैः कलभसदृशैः ॥ ३० ॥

३१] ति० टी०–ज्वलितो दीपितः, उज्ज्वलित इति वा तदा संधिरार्षः । आकाशे स्वनवान्नादवान्पर्जन्यो मेघ इव रथस्वनेन दिशो नादयन्प्रययावित्यन्वयः ॥ ३१ ॥

रा० टी०–स इति । स्वनवानतिशब्दविशिष्टः श्रीमान्सकलसंपत्तिविशिष्टः स रथः आकाशे पर्जन्यो मेघ इव अभिनादयन्दिश इति शेषः । महेन्द्रात्पर्वतविशेषाच्चन्द्रमा इव निकेतादृहान्निर्ययौ पर्जन्यशब्दस्य इन्द्रपरत्वे तु सशब्देन रामपरामर्शः तदा अभिनादयन् इत्यत्र रथेनेति शेषः । स्वनवानित्यस्य शोभनो नः पालनं तद्वानित्यर्थः ॥ ३१ ॥

गो० टी०–स इति । आकाशे स्वनवान् नादवान् पर्जन्य इव मेघ इव 'पर्जन्यौ रसदब्देन्द्रौ' इत्यमरः । अभिनादयन् रथेन दिश इति शेषः महेन्द्रशब्द उदयादिपरः ॥ ३१ ॥

३२] ति० टी०–'चन्द्रचामर–' इति पाठे चन्द्रवच्छ्वेतचामरेत्यर्थः । 'चित्रचामर–' इति पाठे चित्रदण्डयुतचामरेत्यर्थः ॥ ३२ ॥

रा० टी०–चित्रेति । चित्रचामरपाणिर्लक्ष्मणस्तु भ्रातरं जुगोप ॥ ३२ ॥

गो० टी०–छत्रचामरपाणिरिति । एकहस्तेन छत्रमपरहस्तेन चामरं च धारयन्नित्यर्थः । जुगोप आतपादिभ्य इति भावः ॥ ३२ ॥

३३] ति० टी०–हलहलेत्यनुकरणम् ॥ ३३ ॥

रा० टी०–तत इति । ततः रथनिर्गमनानन्तरं समन्ततो निष्क्रममाणस्य जनौघस्य हलहलाशब्दः समजायत । हलहलेति जनौघजन्यशब्दानुकरणम् ॥ ३३ ॥

गो० टी०–तत इति । हलहलाशब्दः कलकलाशब्दः तस्य निष्क्रममाणस्य तस्मिन्निष्क्रममाणे सति जनौघस्य हलहलाशब्द इत्यन्वयः ॥ ३३ ॥

३४–३५] ति० टी०–तस्य निष्क्रममाणस्य पुरत इति शेषः । तस्मिन्निष्क्रममाणे इति यावत् जनौघस्य हलहलाशब्द इत्यन्वयः ॥ ३४ ॥ ३५ ॥

रा० टी०–तत इति । ततः रामगमनानन्तरं हयवराः अश्वश्रेष्ठाः गिरिसंनिभाः मुख्या नागा हस्तिनश्च शतशः सहस्रशो राममनुजग्मुः ॥ ३४ ॥

गो० टी०–तत इति । हयनागशब्दौ तथारूढपरौ ॥ ३४ ॥

रा० टी०–अग्रत इति । अस्य रामस्य अग्रतः संनद्धाः धृतकवचाः शूराः आशंसवः वंशादिप्रशंसका जनाश्च जग्मुः ॥ ३५ ॥

गो० टी०–अग्रत इति । रूषिताः लिप्ताः आशंसवः रामश्रेय आशंसमानाः ॥ ३५ ॥

३६] ति० टी०–आशंसवः भद्रमिति शेषः ॥ ३६ ॥

रा० टी०–तत इति । वादित्रशब्दाः वाद्यध्वनयः शूराणां सिंहनादाः सिंहस्वनसदृशस्वनाः ततः तस्मिन्पथि शुश्रुविरे जनैरिति शेषः ॥ ३६ ॥

गो० टी०–तत इति । ततः तत्र वीथ्यां तदा निर्गमनकाले ३६

३७] ति० टी०–तत इत्यावर्तते ततस्ततस्तत्र तत्र देशे शुश्रुविरे । वातायनं बहिरवलोकनयोग्यानि सूक्ष्मद्वाराणि ॥ ३७ ॥

रा० टी०–हर्म्येति । हर्म्यवातायनस्थाभिः हर्म्याणां प्रासादानां वातायनेषु गवाक्षेषु स्थिताभिः स्त्रीभिः पुष्पौघैः कीर्यमाणः अरिंदमो रामो ययौ ॥ ३७ ॥

गो० टी०–हर्म्यवातायनस्थाभिरिति । हर्म्यवातायनस्थाभिः प्रासादगवाक्षस्थाभिः ॥ ३७ ॥

३८] ति० टी०–पिप्रीषा प्रीणनेच्छा ॥ ३८ ॥

रा० टी०–राममिति । रामपिप्रीषया रामतृप्तीच्छया अनवद्याङ्ग्यः निन्दारहिताङ्गविशिष्टाः हर्म्यस्थाः क्षितिस्थाश्च सर्वाः स्त्रियः अत्यैः अत्युत्कृष्टैर्वचोभिः रामं च ववन्दिरे तुष्टुवुः ॥ ३८ ॥

गो० टी०–राममिति । रामपिप्रीषया रामप्रीणनेच्छया ववन्दिरे तुष्टुवुः वन्दिभिवादनस्तुत्योरिति धातुः ॥ ३८ ॥

---

१ वादयन्निति रा. पाठः । २ महेन्द्रादिति गो. रा. पाठः । ३ छत्रेति गो. पाठः । ४ तदेति गो. पाठः । ५ अगरूरूषिता इति गो. अगर्विति

वचोभिरग्र्यैर्हर्म्यस्थाः क्षितिस्थाश्च ववन्दिरे । नूनं नन्दति ते माता कौसल्या मातृनन्दन ॥ ३९ ॥
पश्यन्ती सिद्धयात्रं त्वां पित्र्यं राज्यमुपस्थितम् । सर्वसीमन्तिनीभ्यश्च सीता सीमन्तिनीवरा ॥ ४० ॥
अमन्यन्त हि ता नार्यो रामस्य हृदयप्रियाम् । तया सुचरितं देव्या पुरा नूनं महत्तपः ॥ ४१ ॥
रोहिणीव शशाङ्केन रामसंयोगमाप या । इति प्रासादशृङ्गेषु प्रमदाभिर्नरोत्तमः ॥
शुश्राव राजमार्गस्थः प्रिया वाच उदाहृताः ॥ ॥ ४२ ॥

स राघवस्तत्र तदा प्रलापाञ्शुश्राव लोकस्य समागतस्य ।
आत्माधिकारा विविधाश्च वाचः प्रहृष्टरूपस्य पुरे जनस्य ॥ ४३ ॥
एष श्रियं गच्छति राघवोऽद्य राजप्रसादाद्विपुलां गमिष्यन् ।
एते वयं सर्वसमृद्धकामा येषामयं नो भविता प्रशास्ता ॥ ४४ ॥
लाभो जनस्यास्य यदेष सर्वं प्रपत्स्यते राष्ट्रमिदं चिराय ।
न ह्यप्रियं किंचन जातु कश्चित्पश्येन्न दुःखं मनुजाधिपेऽस्मिन् ॥ ४५ ॥

३९] ति० टी०–ववन्दिरेऽस्तुवन् । स्तुतिप्रकारमाह—नूनमिति ॥ ३९ ॥

रा० टी०–ततस्तवनमेवाह–नूनमिति । सिद्धयात्रं सिद्धा यात्रा यात्राफलं यस्य तं पित्र्यं पितृसंबन्धि राज्यमुपस्थितं प्राप्तं त्वां पश्यन्ती ते माता नूनं नन्दति ॥ ३९ ॥

गो० टी–स्तुतिप्रकारमेवाह–नूनमित्यादि । नन्दतीत्यत्रेतिकरणं द्रष्टव्यं तस्य ववन्दिर इति पूर्वेण संबन्धः । सिद्धयात्रं सफलगमनमत एव पित्र्यं राज्यमवस्थितमधिष्ठितम् ॥ ३९ ॥

४०] ति० टी०–सिद्धयात्रं सफलगमनम् उपस्थितं प्राप्तवन्तम् । सीता सीमन्तिनीषु वरा श्रेष्ठा इत्यमन्यन्तेत्यन्वयः ॥४०॥

रा० टी०–सर्वेति । हितास्तत्र प्राप्ता नार्यः रामस्य हृदयप्रियां सीमन्तिनीं सीतां सर्वसीमन्तिनीभ्यः वराममन्यन्ता-कथयन्तेत्यर्थः ॥ ४० ॥

गो० टी०–उत्तरश्लोकार्थहेतुत्वेनाह–सर्वेति । हि यस्मात्कारणात् एवं तस्मात् तया सुचरितमित्युक्तरीत्या प्रमदाभिरुदीरिता इति योजना ॥ ४०–४२ ॥

४१–४२] ति० टी०–हि यत एवममन्यन्त अतस्तयेत्यादि । तदुचरिता वाचः शुश्रावेत्यन्वयः ॥ ४१ ॥ ४२ ॥

रा० टी०–सीतारामयोः संयोगहेतुं विचारयन्त्य आहुः–तयेति । महत्तपः सुचरितमत एव रामसंयोगमागताः प्राप्ताः ॥ ४१ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण प्रासादशृङ्गेषु विद्यमानाभिः उदाहृताः प्रियाः वाचः नरोत्तमो रामः शुश्राव । प्रासादशृङ्गस्थः क्षितेरप्युपलक्षकः अत एव उपक्रमेण न वैरूप्यम् ॥ ४२ ॥

४३] ति० टी०–आत्माधिकारा आत्मानमधिकृत्य प्रवृत्ताः ॥ ४३ ॥

रा० टी०–स इति । तत्र मार्गे समागतस्य लोकस्य प्रलापान् रघुवंशसंबन्धिविविधकथाः शुश्राव आत्माधिकाराः आत्मनः स्वस्य रामस्येत्यर्थः । अधिकारो यासु ताः विविधाः अनेकप्रकारा प्रहृष्टरूपस्य प्रहृष्टस्वरूपविशिष्टस्य पुरोजनस्य अयोध्यावासिनः वाचश्च शुश्राव ॥ ४३ ॥

गो० टी०–स इति । कथाप्रपञ्चान् लौकिककथाविस्तारान् आत्माधिकाराः आत्मानमधिकृत्य प्रवृत्ताः पुरः पुरस्य संबन्धिनो जनस्य ॥ ४३ ॥

४४] ति० टी०–श्रियं गमिष्यन्प्राप्स्यन् गच्छति पितृगृहमिति शेषः । सर्वसमृद्धकामाः समृद्धसर्वकामा इत्यर्थः । प्रशास्ता राजा ॥ ४४ ॥

रा० टी०– तद्वचनमेवाह–एष इति । गमिष्यन्गच्छन्नेष राघवः राजप्रसादाद्विपुलामत्युत्कृष्टां श्रियं गच्छति प्राप्स्यति अतः येषां नोऽस्माकं प्रशास्ता अयं रामो भविता ते एते वयं सर्वसमृद्धकामाः भविष्याम इति शेषः ॥ ४४ ॥

गो० टी०–एष इति । श्रियं गमिष्यन् गच्छति श्रियं प्राप्तुं गच्छति ॥ ४४ ॥

४५] ति० टी०–सर्वं राष्ट्रमेष प्रपत्स्यत इति यत्, अयमेव लाभः । अस्मिन्रामे मनुजाधिपे सति कश्चित्कश्चिदपि किंचन स्वल्पमप्यप्रियं प्रियाभावं दुःखमनिष्टप्राप्तिं जातु कदापि न पश्येन्न प्राप्नुयात् ॥ ४५ ॥

रा० टी०–लाभ इति । यस्मादेष रामः सर्वं राष्ट्रं राज्यं प्रपत्स्यते प्राप्स्यति तत्तस्मादस्य एतन्नियम्यस्य जनस्य लाभः परमानन्दस्येति शेषः । तत्र हेतुः अस्मिन् रामे मनुजाधिपे राज्ञि सति किंचन अप्रियं द्वेष्यं दुःखं च जातु कदाचिदपि कश्चिन्न पश्येत् ॥ ४५ ॥

गो० टी०–लाभ इति । अस्य जनस्यायमेव लाभः यदेष

---

१ नन्दन्ति इति गो. पाठः । २ अवस्थितमिति गो. पाठः । ३ सीतां सीमन्तिनीवरामिति गो. रा. पाठः । ४ आगतेति रा पाठः । ५ कथाप्रपञ्चानिति गो. पाठः । ६ पुरः इति गो. रा. पाठः ।

सघोषवद्भिश्च हयैः सनागैः पुरःसरैः स्वस्तिकसूतमागधैः ।
महीयमानः प्रवरैश्च वादिकैरभिष्टुतो वैश्रवणो यथा ययौ ॥ ४६ ॥
करेणुमातङ्गरथाश्वसंकुलं महाजनौघैः परिपूर्णचत्वरम् ।
प्रभूतरत्नं बहुपण्यसंचयं ददर्श रामो विमलं महापथम् ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ।

रथेन व्रजन्रामोऽयोध्यारामणीयकं पश्यन्सुहृदामाशिषः स्तुतीः शृण्वन्सकलजननयनान्याकर्षंश्च दशरथभवनमेत्य परिजनं निवर्त्य स्वयं दशरथान्तिकं प्राप ।

स रामो रथमास्थाय संप्रहृष्टसुहृज्जनः । पताकाध्वजसंपन्नं महार्हागुरुधूपितम् ॥ १ ॥
अपश्यन्नगरं श्रीमान्नानाजनसमन्वितम् । स गृहैरभ्रसंकाशैः पाण्डुरैरुपशोभितम् ॥ २ ॥
राजमार्गं ययौ रामो मध्येनागुरुधूपितम् । चन्दनानां च मुख्यानामगुरूणां च संचयैः ॥ ३ ॥
उत्तमानां च गन्धानां क्षौमकौशाम्बरस्य च । आविद्धाभिश्च मुक्ताभिरुत्तमैः स्फाटिकैरपि ॥ ४ ॥
शोभमानमसंबाधं तं राजपथमुत्तमम् । संवृतं विविधैः पुष्पैर्भक्ष्यैरुच्चावचैरपि ॥ ५ ॥

सर्वं राष्ट्रं प्रपत्स्यते अस्मिन् मनुजाधिपे सति कश्चित् जातु कदाचित् किंचनाप्यप्रियं प्रियाभावं दुःखमनिष्टं च न पश्येत् ॥४५॥

४६-४७] ति० टी०-स्वस्तिका जयजयेति वादिनः बन्दिनः, सूता इतरस्तुतिपाठकाः, मागधा वंशपाठकाः, एतैर्वादिकैस्तत्तच्छब्दप्रयोक्तृभिः ॥ ४६ ॥ ४७ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०-स इति । पुरःसरैः अग्रगमनकर्तृभिः स्वस्तिकसूतमागधैः स्वस्तिकाः मङ्गलप्रयोगकर्तारः सूताः पौराणिकाः मागधाः वंशप्रशंसकास्तैर्महीयमानः पूज्यमानः प्रवरैः स्तुतिनिपुणैः वादिकैः स्तुतिकर्तृभिरभिष्टुतः रामः घोषवद्भिः नादविशिष्टैः सनागैर्गजसहितैः हयैरश्वैः वैश्रवण इव ययौ ॥४६॥

गो० टी०-सघोषवद्भिरिति । स्वस्तिकसूतमागधैः स्वस्तिका जयजयेतिमङ्गलं प्रयुञ्जानाः बन्दिन इत्यर्थः । सूता ब्राह्मण्यां क्षत्रियाज्जाताः सारथ्ये स्तुतिकर्मणि च नियुक्ताः । 'ब्राह्मण्यां क्षत्रियात्सूतः' इत्यमरः । मागधाः क्षत्रियायां वैश्याज्जाताः राज्ञां प्रबोधनकर्मणि नियुक्ताः 'मागधः क्षत्रियाविशोः' इत्यमरः ॥ ४६ ॥

रा० टी०-करेण्विति । करेण्वादिभिः संकुलं व्याप्तं महाजनौघैः परिपूर्णाः चत्वराः चतुष्पथा यस्य प्रभूतानि रत्नानि यस्मिन् तं बहुपण्यसंचयमनेकविधानां पण्यानामापणद्रव्याणां संचयो यस्मिन् तं विमलं तृणादिरहितं महापथं राजमार्गं ददर्श ॥ ४७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षोडशः सर्गः ॥ १६ ॥

गो० टी०-करेण्विति । रामो महापथं ददर्शेत्यन्वयः ॥४७॥

इति श्रीगोविन्दराजावरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

१-२] ति० टी०-स राम इति ॥ १ ॥ २ ॥

रा० टी०-स इति । संप्रहृष्टाः सुहृज्जना यस्य स रामो रथमास्थाय पताकाध्वजसंपन्नं पताकादिभिः पूरितं महार्हागरुधूपितं महार्हा बहुमूल्या अगरुधूपा जाता अस्य तत् नानाजनसमन्वितमनेकविधमनुष्यादिभिर्युक्तं नगरमपश्यत् । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०-अथ रामस्य राजसमीपगमनं सप्तदशे-स राम इत्यादि । पताकाध्वजसंपन्नं पताकाः अनामाङ्किताः तदाङ्कितानि ध्वजानि ॥ १ ॥

रा० टी०-स इति । अभ्रसंकाशैः पाण्डुरैर्गृहैः उपशोभितम् । अगरुधूपितं राजमार्गं स रामो मध्येन मध्यभागेन ययौ ॥ २ ॥

गो० टी०-स गृहैरिति । मध्येन वीथीमध्येन प्रकृत्यादित्वात्तृतीया ॥ २ ॥

३] ति० टी०-मध्येनोभयश्रेणीमध्येन ॥ ३ ॥

४] ति० टी०-उत्तमानां गन्धवद्द्रव्याणां संचयैः क्षौमकौशाम्बरस्य च संचयैरित्यन्वयः । क्षौममतसीजम् कौशं पट्टवस्त्रम् आविद्धाभिः कृतच्छिद्राभिः । 'अविद्धाभिः' इति पाठेऽकृतच्छिद्राभिः ॥ ४ ॥

५] ति० टी-असंबाधं विस्तीर्णम् संवृतं व्याप्तम् अत्रत्यराजपथमित्यस्य ददर्शेत्यनेनान्वयः ॥ ५ ॥

१ मतङ्गजैरिति गो. पाठः । २ वादकैरिति गो.रा.पाठः । ३ जनौघप्रतिपूर्णेति गो.पाठः । ४ रुचिरमिति गो.पाठः । ५ अगर्विति गो. रा. पाठः । ६ समाकुलमिति गो. पाठः । ७ अविद्धाभिरिति गो. पाठः । ८ बाधैरिति गो. पाठः । ९ पण्यैरिति गो. पाठः ।

ददर्श तं राजपथं दिवि देवपतिर्यथा । दध्यक्षतहविर्लाजैर्धूपैरगुरुचन्दनैः ॥ ६ ॥
नानामाल्योपगन्धैश्च सदाभ्यर्चितचत्वरम् । आशीर्वादान्बहून्शृण्वन्बैहुभिः समुदीरितान् ॥ ७ ॥
यथार्हं चापि संपूज्य सर्वानेव नरान्ययौ । पितामहैराचरितं तथैव प्रपितामहैः ॥ ८ ॥
अद्योपादाय तं मार्गमभिषिक्तोऽनुपालय । यथा स्म पोषितास्तैः पित्रा यथा सर्वैः पितामहैः ॥
ततः सुखतरं सर्वे रामे वेत्स्याम राजनि ॥ ॥ ९ ॥
अलमद्य हि भुक्तेन परमार्थैरलं च नः । यदि पश्याम निर्यान्तं रामं राज्ये प्रतिष्ठितम् ॥ १० ॥
ततो हि नः प्रियतरं नान्यत्किंचिद्भविष्यति । यथाभिषेको रामस्य राज्येनामिततेजसः ॥ ११ ॥

रा० टी०—चन्दनानामिति । मुख्यानां जात्यादिभिरुत्तमानां चन्दनानामगरूणां च संचयैः उत्तमानां दोषरहितानां गन्धानां गन्धद्रव्याणां क्षौमकौशाम्बरस्य क्षौममतसीनिर्मितं कौशं पट्टनिर्मितं तदेवाम्बरं वस्त्रं तस्य संचयैः शोभमानम् आविद्धाभिः कृतछिद्राभिः मुक्ताभिः क्वचित् ‘ अविद्धाभिः ’ इति पाठः तत्र अप्राप्तच्छिद्राभिरित्यर्थः । स्फाटिकैः स्फटिकाख्यैश्च शोभमानसंबाधं चौरादिबाधारहितं पुष्पादिभिः संवृतं दध्यादिभिः अर्चिताश्चत्वराः चतुष्पथा यस्मिंस्तमुत्तमं राजपथमाशीर्वादान् शृण्वन् रामः ददर्श । तत्र दृष्टान्तः दिवि स्वर्गे वियमानं तं तादृशविशेषणविशिष्टं राजपथं देवपतिरिन्द्रो यथा । अर्धनवकमेकान्वयि ॥ ३–६ ॥

गो० टी०—कीदृशं राजमार्गं ययावित्याकाङ्क्षायामाह—चन्दनानामित्यादिना । क्षौमकौशाम्बरस्य क्षौमं दुकूलम् ‘ क्षौमं दुकूलम् ’ इत्यमरः । कौशाम्बरं कौशेयं अविद्धाभिः अकृतरन्ध्राभिः नूतनाभिरिति यावत् । स्फाटिकैः स्फटिकैः स्वार्थे अण्प्रत्ययः । तं राजपथं सकलभाग्ययुक्तं राजमार्गमित्यर्थः । यद्वा प्रथमस्य राजपथपदस्य ददर्शेत्यनेन संबन्धः द्वितीयस्य वक्ष्यमाणेन ययावित्यनेन संबन्धः ॥ ३–५ ॥

६–७] ति० टी०—एवं दृष्ट्वांस्तं राजपथं ययाविति संबन्धः ॥ ६ ॥ ७ ॥

रा० टी०—यथेति । यथार्हं यथायोग्यं सर्वान्नरान्संपूज्य भवलोकादिना सत्कृत्य ययौ राम इति शेषः । अर्धं पृथक् ॥ ७ ॥

गो० टी०—दध्यक्षतहविरिति । अभ्यर्चितचत्वरं प्रतिपूजिताङ्गणम् अङ्गणं चत्वराजिरे ’ इत्यमरः । यथार्हमिति वीक्षणभूक्षेपवचनाञ्जलिप्रणामादिभिरित्यर्थः ॥ ६ ॥ ७ ॥

८] ति० टी०—यथार्हं दर्शनभूक्षेपवचनादिभिर्यथोचितमित्यर्थः । आचरितमद्धितम् ॥ ८ ॥

रा० टी०—रामस्तद्दिश्य प्रजोक्तिमाह—पितामहैरिति । पितामहैः पितामहोपलक्षितपितृपितामहैः दशरथाज्ञाभ्यां तथा प्रपितामहैः अजपित्रा आचरितं तं प्रसिद्धं मार्गं नीतिपथमुपादाय गृहीत्वा अभिषिक्तः प्राप्तराज्याभिषेकस्त्वं पालय पितामहाद्युत्तरं बहुवचनमादरार्थम् ॥ ८ ॥

गो० टी०—पितामहैरिति । अद्याभिषिक्तस्त्वं पितामहादैराचरितं तं प्रसिद्धं मार्गं मर्यादामनुपालय ॥ ८ ॥

९] ति० टी०—अनुपालयेत्यादिर्द्विढानां वादः ॥ ९ ॥

रा० टी०—तत्पालनफलमाह—यथेति । पित्रा दशरथेन सर्वैः पितामहैरजादिभिः यथा यथावत्पोषिता वयं रामे राजनि सति ततः दशरथादिपालनसुखात्सुखतरमधिकसुखं यथा स्यात्तथा वत्स्यामः सर्वशब्दसमभिव्याहारात्पितामहशब्दः प्रपितामहादीनामपि बोधकः ॥ ९ ॥

गो० टी०—यथेति । रामे राजनि सति सर्वे वयं ततः पूर्वस्मात्सुखतरं यथा भवति तथा वत्स्यामः ॥ ९ ॥

१०] ति० टी०—यदि राज्ये प्रतिष्ठितं प्राप्तराज्याभिषेकं रामं यथागतं पितुर्गेहान्निर्यान्तं निःसरन्तं पश्यामः, तर्हि नोऽस्माकं भुक्तेनैहिकविषयभोगजसुखेन तथा परमार्थैः परमार्थस्वर्गसाधनैश्च कर्मभिरलं न किंचित्तैः फलम् । सर्वसुखस्यैतेनैव लब्धत्वात् अत्र यथन्तर्भावेण विपरीतसंभावनासूचनम् ॥ १० ॥

रा० टी०—अभिषिक्तरामदर्शनजनितसुखस्यातिमहत्त्वं बोधयन्त आहुः—अलमित्यादिश्लोकद्वयेन । राज्ये प्रतिष्ठितं विनिर्यान्तं राजद्वाराद्बहिर्गच्छन्तं रामं यदि पश्याम तर्हि अद्य भुक्तेन ऐहिकभोगेन परमार्थैः मोक्षैश्च अलं न प्रयोजनमित्यर्थः ॥ १० ॥

गो० टी०—अलमिति । भुक्तेन भोजनेन परमार्थैः परमपुरुषार्थसाधनभूतैः जपहोमध्यानादिभिरित्यर्थः । राज्ये प्रतिष्ठितमभिषिक्तं पुनः स्वगृहाय निर्यान्तं यथा यथावत् पश्याम प्रार्थनायां लोट् ॥ १० ॥

११] ति० टी०—तदेवाह—तत इति । अमिततेजसो रामस्य राज्येन राज्यफलकोऽभिषेको यथा प्रियतरः तथा ततोऽन्यन्न किंचित्प्रियतरं प्रेमास्पदमित्यन्वयः । सद्राजमूलकत्वात्सर्वसुखस्येति भावः ॥ ११ ॥

रा० टी०—नन्वत्र पारमार्थिकसुखं कुतो नाभिलष्यत इत्यत आहुः—तत इति । अमिततेजसः इयत्तारहितप्रभावस्य रामस्य राज्येन राज्यार्थमभिषेकः यथा यथावत् प्रियतम इति शेषः । अत एव ततः राज्याभिषेकादन्यत्किंचित्प्रियतरं न

१ पथमिति गो. पाठः । २ अर्गलेति गो. रा. पाठः । ३ सुबुद्धिरिति गो. पाठः । ४ लालिता इति गो. पाठः । ५ पूर्वैरिति गो. पाठः । ६ रामे

एताश्चान्याश्च सुहृदामुदासीनः शुभाः कथाः । आत्मसंपूजनीः शृण्वन्ययौ रामो महापथम् ॥ १२ ॥
नहि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात् । नरः शक्नोत्यपाकृष्टुमतिक्रान्तेऽपि राघवे ॥ १३ ॥
यश्च रामं न पश्येत्तु यं च रामो न पश्यति । निन्दितः सर्वलोकेषु स्वात्माप्येनं विगर्हते ॥ १४ ॥
सर्वेषु स हि धर्मात्मा वर्णानां कुरुते दयाम् । चतुर्णां हि वयःस्थानां तेन ते तमनुव्रताः ॥ १५ ॥
चतुष्पथान्देवपथांश्चैत्यांश्चायतनानि च । प्रदक्षिणं परिहरञ्जगाम नृपतेः सुतः ॥ १६ ॥

भविष्यति किंच ततः तस्य रामस्य यथा अभिषेकः प्रियतरः तथा अन्यत्किंचिन्न प्रियतरमित्यस्य लिङ्गविपरिणामेनान्वयः । राज्येनेति तृतीया हेतौ चेति विहिता, फलस्यापि हेतुत्वेन विवक्षेति तत्र सिद्धान्ततत्वात् ॥ ११ ॥

गो० टी०–तत इति । राज्येनाभिषेको राज्यायाभिषेकः स यथा प्रियतरस्तथा ततोऽन्यत्प्रियतरं किंचिन्नास्ति ॥ ११ ॥

१२] ति० टी०–उदासीनः स्तुतिजहर्षविकाररहितः ॥१२॥

रा० टी०–एता इति । उदासीनः स्वाभिषेकोत्साहरहितो रामः आत्मसंपूजनीः स्वसत्कारकारिकाः कथाः शृण्वन् महापथं ययौ महानां सर्वपूज्यानामपि आपथोऽतिगमनं यस्मिन् तं राजमार्गमित्यर्थः । एतेन महच्छब्दो न दीपत(?) इत्यस्य नायं विषयः निषेधस्याप्रामाणिकत्वं वा ॥ १२ ॥

गो० टी०–एता इति । उदासीनः स्तुतिश्रवणेन निर्विकारः आत्मसंपूजनीः आत्मसंपूजाजननीः मनोहर्षजननीर्वा महापथं राजमार्गम् ॥ १२ ॥

१३] ति० टी०–अतिक्रान्ते दृष्टिपथमिति शेषः । अत्यन्निवन्तासक्त्या पुर इव परिस्फुरणात् ॥ १३ ॥

रा० टी०–नेति । नरोत्तमात्परमपुरुषात्तस्माद्रामादपाकृष्टुं नैयितुमतिक्रान्ते गते ॥ १३ ॥

गो० टी०–नहीति । कश्चिदपि नरः मनश्चक्षुषा वा तस्मात् अपाकृष्टुं निवर्तयितुं न शक्नोति किमुत नारीजन इति भावः । अतिक्रान्ते दूरगतेऽपि किमुत संनिहित इत्याशयः ॥ १३ ॥

१४] ति० टी०–एवं लोकानुरागे कविर्हेतुं दर्शयति–यश्चेति । रामं न पश्येदात्मस्वरूपत्वेनान्तर्यामित्वेन वा न पश्येत्, यथास्थितवेषधारिणं वा तदेशस्थं न पश्येत् रामो यं न पश्येयन्निश्चज्ञानविषयतां न प्राप्नुयात् ज्ञानविषयत्वप्राप्तिरत्र दृशेरर्थः । अत्यन्तं तद्विषयज्ञानाय यतमानोऽपि यस्तत्र लभेदित्यर्थः । यथास्थितवेषधारी वा यं स्वदेशस्थं न पश्येत्–द्विषयकज्ञानवान् भवेत्, स सर्वलोकनिन्दास्पदम् स्वात्मा स्वान्तःकरणमप्येनं विगर्हते धिङ्मां भगवज्ज्ञानायोग्यमिति रामज्ञानं विना सर्वोऽपि निन्द्य इति विनोक्तिरलंकारोऽत्र व्यङ्क्त्यः । अनेन भगवद्विषयकज्ञानवानेव धन्य इति वस्तु व्यज्यते ॥ १४ ॥

रा० टी०–रामानुरागरहितं निन्दन्त आहुः–य इति । यो जनः राममेव न पश्येत्स्वस्वामित्वेन न जानाति रामो वा यं न पश्यति अयं मामेव स्वस्वामित्वेन जानातीति न जानाति सः सर्वलोकेषु निन्दितः अतः एनं रामानुरागरहितं स्वात्मा स्वमनोऽपि विगर्हते निन्दति ॥ १४ ॥

गो० टी०–यश्चेति । चकारो भिन्नक्रमः रामं च दर्शनकाल एव परिपूर्णामृतसरसि मज्जयन्तमपि यस्तु अतिशयितवैलक्षण्यसंपन्नोऽपि न पश्येत् स्तुतिसल्लापसत्कारायभावेऽपि अचेतनविलक्षणाकारेण चक्षुर्विषयं न करोति अत एव यं रामोऽपि न पश्यति नरस्याभिमुख्ये हि भगवान् कटाक्षयति सः राममदृष्ट्वा तत्कटाक्षाविषयः निन्दितो वसेत् यावत्कालं निन्दितः स्यात् लोके निन्दितः स्यात्तं निन्दितुमनर्हः कोऽपि जनो नास्तीति भावः । लोके विषयप्रवणः कश्चित्सत्यामपि लोकगर्हायां स्वयं संतुष्टो भवति न तथेत्याह–स्वात्माप्येनं विगर्हत इति स्वान्तःकरणमप्येनं विशेषेण गर्हते रामादर्शनाल्लोकगर्हया चेति भावः ॥ १४ ॥

१५] ति० टी०–किंच हि यतः स धर्मात्मा चतुर्णां हि चतुर्णामपि वर्णानां सर्वेष्वप्याश्रमेषु वयःस्थानां वयोरूपं स्थानं यस्यास्तां वयोऽनुरूपां दयां कुरुत इत्यर्थः । तेन ते सर्वे लोकास्तं रामं कायवाङ्मनोभिरनुव्रतास्तत्परा इत्यर्थः ॥ १५ ॥

रा० टी०–सर्वेषामिति । यदनुरागमन्तरा जनजन्मवैयर्थ्यं स रामः वयस्थानां वयसि स्थानं स्थितिर्यस्यास्तां तत्तद्वयोनुरूपामित्यर्थः । चतुर्णां वर्णानां सर्वेषां वर्णातिरिक्तानां च दयां तद्विषयककृपां कुरुते तेन हेतुना ते जनाः तं राममनुव्रताः तमेव सेवन्ते इत्यर्थः ॥ १५ ॥

गो० टी०–सर्वेषामिति । स रामः चतुर्णां वर्णानां सर्वेषामपि जनानां सप्तम्यर्थे षष्ठी वयः स्थानं प्रमाणं यस्यास्तां वयोनुरूपां दयां हि यस्मात्कारणात् कुरुते तेन कारणेन ते तमनुव्रता इत्यन्वयः । वयःस्थानां वृद्धानामिति वा सर्वविशेषणम् ॥ १५ ॥

१६] ति० टी०–प्रदक्षिणं परिहरन्निति चतुष्पथादिपेक्षया स्वस्य दक्षिणभागगमनं परिहरन्नित्यर्थः ॥ १६ ॥

रा० टी०–प्रासङ्गिकं समाप्य प्रकृतमाह–चतुष्पथानिति । चतुष्पथान् चत्वरान्देवपथान्ब्रह्मादीनामयोध्यागमनमार्गान् चैत्यानि ग्रामदेवतास्थानानि आयतनानि पाठशालाः प्रदक्षिणं परिहरन्दक्षिणपार्श्वे परित्यजन्नित्यर्थः नृपतेः सुतो रामो जगाम ॥ १६ ॥

गो० टी०–चतुष्पथानिति । चतुष्पथान् शृङ्गाटकानि देवपथान् देवालयान् चैत्यानि चैत्यवृक्षस्थानानि आयतनानि

---

१ स वसेल्लोके इति गो. पाठः । २ सर्वेषामिति गो.रा.पाठः । ३ चैत्यान्यायतनानीति गो. रा.पाठः । ४ लभेतेति यत्तं भाति । ५ मनसैति यत्तं भाति ।

स राजकुलमासाद्य मेघसंघोपमैः शुभैः । प्रासादशृङ्गैर्विविधैः कैलासशिखरोपमैः ॥ १७ ॥
आवारयद्भिर्गगनं विमानैरिव पाण्डुरैः । वर्धमानगृहैश्चापि रत्नजालपरिष्कृतैः ॥ १८ ॥
तत्पृथिव्यां गृहवरं महेन्द्रसदनोपमम् । राजपुत्रः पितुर्वेश्म प्रविवेश श्रिया ज्वलन् ॥ १९ ॥
स कक्ष्या धन्विभिर्गुप्तास्तिस्रोऽतिक्रम्य वाजिभिः । पदातिरपरे कक्ष्ये द्वे जगाम नरोत्तमः ॥ २० ॥
स सर्वाः समतिक्रम्य कक्ष्या दशरथात्मजः । संनिवर्त्य जनं सर्वं शुद्धान्तःपुरमैत्यगात् ॥ २१ ॥
तस्मिन्प्रविष्टे पितुरन्तिकं तदा जनः स सर्वो मुदितो नृपात्मजे ।
प्रतीक्षते तस्य पुनः स्म निर्गमं यथोदयं चन्द्रमसः सरित्पतिः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ।

प्राप्तो रामः पित्रोश्चरणावभिवाद्य करुणवचनादिभिरनुमितपितृशोस्तत्कारणं जिज्ञासुः संभावनार्हहेतूनुपन्यस्य पितुर्वैक्लव्यकारणं कैकेय्यै पप्रच्छ । मह्यमाश्रुतं वरं त्वदप्रियत्वात्त्वां वक्तुमशक्नुवन्नयं विवशोऽतः शुभमशुभं वा सद्यः कर्तासि चेदहं ते वच्मीति वदन्तीं कैकेयीं सद्योऽहं तत्कर्ता शीघ्रं निवेद्यतामिति रामोऽब्रवीत्कैकेय्यपि देवासुरसंग्रामवृत्तं प्रस्तुत्य पूर्वं पित्रा ते वितीर्णौ वरौ मया त्वद्वचनान्निर्वासनभरताभिषेकरूपेण वृतावतो भावित्वद्वियोग एव ते पितुर्वैक्लव्यहेतुरित्यवादीत् ।

स ददर्शासने रामो विषण्णं पितरं शुभे । कैकेय्या सहितं दीनं मुखेन परिशुष्यता ॥ १ ॥

सभादीनि च परिहरन् अप्रदक्षिणं परिहरन् प्रदक्षिणं यथा भवति तथा जगामेति संबन्धः ॥ १६ ॥

१७] ति० टी०-प्रासादशृङ्गैः प्रासादस्थशृङ्गैः ॥ १७ ॥

१८] ति० टी०-आवारयद्भिराक्रमद्भिः वर्धमानगृहैः क्रीडागृहैः रत्नसमूहालंकृतैरेतैः परिवृतम् ॥ १८ ॥

१९] ति० टी०-पितुर्वेश्म पृथिव्यां सर्वगृहेषु श्रेष्ठं प्रविवेशेत्यन्वयः ॥ १९ ॥

रा० टी०-स इति । मेघसंघोपमैः मेघसमूहसदृशैः शुभैः कल्याणहेतुभिः विविधैः अनेकप्रकारैः कैलासशिखरोपमैः कैलासशिखरसदृशैः प्रासादशृङ्गैः गगनं स्वर्गमावारयद्भिः अतिक्रमद्भिरिव पाण्डुरैः पाण्डुरवर्णविशिष्टैः रत्नजालपरिष्कृतैः निषिद्धपक्षिवारकरत्ननिर्मितजालविशिष्टैः वर्धमानगृहैः क्रीडावेश्मभिश्च सहितं राजकुलं राज्ञो गृहमासाद्य प्राप्य राजपुत्रः स रामः पृथिव्यां विद्यमानं महेन्द्रसदनोपममिन्द्रभवनसदृशं गृहवरं गृहाणि अवान्तरवेश्मानि वराणि श्रेष्ठानि यस्मिंस्तत्पितुर्वेश्म पित्रधिष्ठितगृहं प्रविवेश । अर्धषट्कमेकान्वयि ॥१७-१९॥

गो० टी०-स इत्यादि । राजकुलं राजगृहम् 'कुलं गृहेऽपि इत्यमरः । वर्धमानगृहैः वर्धमानलक्षणाधिष्ठानसमेतगृहैः पृथिव्यां गृहवरं पृथिव्यामद्वितीयमित्यर्थः । पितुर्वेश्म पितृवासस्थानम् ॥ १७-१९ ॥

२०] ति० टी०-वाजिभी रथयुक्तैः ॥ २० ॥

रा० टी०-स इति । नरोत्तमः स रामः धन्विभिर्धनुर्धरैः गुप्ताः रक्षिताः तिस्रः कक्ष्याः द्वारः वाजिभिः अतिक्रम्य अपरे द्वे कक्ष्ये पदातिः सन् जगाम ॥ २० ॥

गो० टी०-स इति । वाजिभिः रथयुक्तैर्वाजिभिः पदातिः पादचारी ॥ २० ॥

२१] ति० टी०-सर्वा उक्तपञ्चकक्ष्याः ॥ २१ ॥

रा० टी०-सर्वा इति । दशरथात्मजः सर्वाः कक्ष्याः समतिक्रम्य जनमनुयायिवर्गं संनिवर्त्य शुद्धान्तःपुरमन्वगात्प्राप्नोत् ॥ २१ ॥

गो० टी०-स इति । शुद्धान्तम् अन्तःपुरम् ॥ २१ ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

२२] ति० टी०-अन्तिकं समीपदेशम् ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तदशः सर्गः ॥ १७ ॥

रा० टी०-तस्मिन्निति । तदा तस्मिन्काले तस्मिन् रामे प्रविष्टे सति मुदितः सर्वो जनः तस्य रामस्य निर्गमं राजगृहादागमनं पुनः प्रतीक्षते स्म तत्र दृष्टान्तः चन्द्रमसः उदयं सरित्पतिः समुद्र इव ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तदशः सर्गः ॥ १७ ॥

१] ति० टी०-शुभ आसने पर्यङ्के परिशुष्यता मुखेनोपलक्षितम् ॥ १ ॥

१ चन्द्रेति गो. पाठः । २ शुद्धान्तं पुनरभ्यगादिति गो. पाठः । ३ अन्वगादिति रा. पाठः । ४ तत इति गो. पाठः । ५ वीति गो. पाठः । निषण्णमिति गो. पाठः । ७ कैकेयीसहितमिति गो. केकय्येति रा. पाठः ।

स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् । ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः ॥ २ ॥
रामेत्युक्त्वा तु वचनं बाष्पपर्याकुलेक्षणः । शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ॥ ३ ॥
तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहम् । रामोऽपि भयमापन्नः पदा स्पृष्ट्वेव पन्नगम् ॥ ४ ॥
इन्द्रियैरप्रहृष्टैस्तं शोकसंतापकर्शितम् । निःश्वसन्तं महाराजं व्यथिताकुलचेतसम् ॥ ५ ॥
ऊर्मिमालिनमक्षोभ्यं क्षुभ्यन्तमिव सागरम् । उपप्लुतमिवादित्यमुक्कानृतमृषिं यथा ॥ ६ ॥
अचिन्त्यकल्पं नृपतेस्तं शोकमुपधारयन् । बभूव संरब्धतरः समुद्र इव पर्वणि ॥ ७ ॥
चिन्तयामास चतुरो रामः पितृहिते रतः । किंस्विदद्यैव नृपतिर्न मां प्रत्यभिनन्दति ॥ ८ ॥
अन्यदा मां पिता दृष्ट्वा कुपितोऽपि प्रसीदति । तस्य मामद्य संप्रेक्ष्य किमायासः प्रवर्तते ॥ ९ ॥

रा० टी०—रामदृत्तं बोधयन्नाह—स इति । विषण्णं तं संभावितपुत्रवियोगजनितदुःखाक्रान्तमत एव दीनं केकय्या सहितं परिशुष्यता सुखेनोपलक्षितं पितरमासने पर्यङ्के ददर्श॥१॥

गो० टी०—स इति । आसने पर्यङ्के 'मूर्च्छितो न्यपतत्तस्मिन् पर्यङ्के हेमभूषिते' इत्युत्तरत्र वक्ष्यमाणत्वात् । सुखेनेत्युपलक्षणं तृतीया ॥ १ ॥ २ ॥

२] ति० टी०—विनीतवत् विनीतः सन्निति यावत् । सुसमाहितस्तस्या अतिस्नेष्टकरत्वेन जगद्धितकरत्वेन च तस्यां प्रसन्नचित्तः ॥ २ ॥

रा० टी०—स इति । सुसमाहितः नित्यमेकाग्रचित्तः स रामः विनीतवद्विनम्रताविशिष्टं यथा स्यात्तथा केकय्याः चरणौ ववन्दे ॥ २ ॥

३]ति०टी०—नाभिभाषितुम् रामेत्यक्षरद्वयाधिकमिति शेषः३

रा० टी०—रामप्रणामानन्तरकालिकं राजवृत्तान्तमाह—रामेति । नृपतिस्तु राम इति वचनमुक्त्वा बाष्पपर्याकुलेक्षणः अश्रुव्याप्तनेत्रः सन् ईक्षितुं रामं द्रष्टुं न शशाक अभिभाषितुं प्रत्यभिवादनवाक्यमुच्चारयितुं च न शशाक ॥ ३ ॥

गो० टी०—रामेति । नाभिभाषितुं रामेत्यस्मादधिकमित्यर्थः ॥ ३ ॥

४] ति० टी०—रामोऽपि भयमापन्नो दशरथविषादस्य स्वापराधजन्यत्वशङ्कया ॥ ४ ॥

रा० टी०—तदिति । भयावहं द्रष्टॄणां भयप्रापकं नरपतेः तदीक्षणाभावादविशिष्टमपूर्वरूपं दृष्ट्वा रामोऽपि भयमदृष्टपूर्वराजचेष्टाहेतुभूतनिश्चयाभावहेतुकमीतिमापन्नः प्राप्तः ॥ ४ ॥

गो० टी०—तदिति । अपूर्वम् अदृष्टपूर्वं रामोऽपीत्यपिशब्देन दुःसहसङ्गावेऽप्यधिको रामो दशरथविषादस्य स्वहेतुकत्वमाशङ्क्य भयमापन्न इत्यवगन्तव्यम् ॥ ४ ॥

५] ति० टी०—इन्द्रियैरित्यादिश्लोकद्वये दृष्ट्वा भयमापन्न इत्यनुकृष्यते । अप्रहृष्टैः खिन्नैरुपलक्षितम् व्यथितं खिन्नमाकुलं संभ्रान्तं चेतो यस्य तम् ॥ ५ ॥

६] ति० टी०—ऊर्मिमालायुतमक्षोभ्यमपि क्षुभ्यन्तं सागरमिव स्थितम् । उपप्लुतं राहुग्रस्तम् । उक्तमनृतं येन तद्वन्निस्तेजस्कम् ॥ ६ ॥

रा० टी०—इन्द्रियैरिति । अप्रहृष्टैः हर्षाभावविशिष्टैरिन्द्रियैः शोकसंतापकर्षितमप्रहृष्टेन्द्रियशाप्यशोकसंतापविशिष्टमत एव निःश्वसन्तमत एव व्यथिताकुलचेतसं व्यथिताकुलं चेतो यस्य तं क्षुभ्यन्तं समयविशेषे प्राप्तक्षोभमक्षोभ्यं क्षोभ्तुमशक्यमूर्मिमालिनं तरङ्गसमूहविशिष्टं सागरमिव समुद्रसदृशमुपप्लुतं राहुणाग्रस्तमादित्यमिव ग्रस्तादित्यसदृशमुक्कानृतं भाषितमिथ्यावचनमृषिं यथा भाषितमिथ्यावचनऋषिसदृशं महाराजं दृष्ट्वेति शेषः । अचिन्त्यकल्पं नृपतेः शोकमुपधारयन्निश्चिन्वन्सन् पर्वणि समुद्र इव संरब्धतरः संक्षुब्धः बभूव राम इति शेषः । श्लोकत्रयमेकान्वयि ॥ ५–७ ॥

गो० टी०—इन्द्रियैरित्यादिश्लोकद्वये दृष्ट्वा भयमापन्न इत्येतदनुकृष्य संबध्यते उपप्लुतं राहुग्रस्तम् उक्तानृतमृषिं यथा ऋषिमिव स्थितं निस्तेजस्कमित्यर्थः ॥ ५ ॥ ६ ॥

७] ति० टी०—अचिन्त्यकल्पमत्यन्तमसंभावितम् । उपधारयन्किंहेतुकोऽयं शोक इति चिन्तयन् । संरब्धतरोऽत्यन्तं क्षुभितः यद्यपि पर्वणि समुद्रस्य चन्द्रोदयात्क्षोभस्तथापि क्षोभमात्रे दृष्टान्तः ॥ ७ ॥

गो० टी०—अचिन्त्यकल्पमिति । अचिन्त्यकल्पम् असंभावितमित्यर्थः । उपधारयन् विचारयन् संरब्धतरः संभ्रान्ततरः ॥ ७ ॥

८] ति० टी०—किंस्विदिति ॥ ८ ॥

रा० टी०—चिन्तयामासेति । चतुरः सर्वविषयकनैपुण्यविशिष्टः चिन्तयामास । तच्चिन्तनमेवाह—अद्य अस्मिन्काले एव न प्रत्यभिनन्दति स्विदेतत्किम् ॥ ८ ॥

गो० टी०—चिन्तयामासेति । किंस्वित् किंवा अर्थैवेत्येवकारव्यवच्छेद्यमाह ॥ ८ ॥

९] ति० टी०—अर्थैवेत्येवकारव्यवच्छेद्यमाह—अन्यदेत्यादि । तस्य मदर्शनेऽतिप्रीतिमतः । आयासः खेदः ॥ ९ ॥

रा० टी०—अन्यदेति । अन्यदा अन्यस्मिन्काले यं मां दृष्ट्वा

१ चतुरो बो० पाठः । २ न स्मेति बो० पाठः ।

स दीन इव शोकार्तो विषण्णवदनद्युतिः । कैकेयीमभिवाद्यैव रामो वचनमब्रवीत् ॥ १० ॥
कच्चिन्मया नापराद्धमज्ञानाद्येन मे पिता । कुपितस्तन्ममाचक्ष्व [1]त्वमेवैनं प्रसादय ॥ ११ ॥
अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः । [2]विषण्णवदनो दीनः [3]सदा मां [4]नेति भाषते ॥ १२ ॥
शारीरो मानसो वापि कच्चिदेनं न बाधते । संतापो वाभितापो वा दुर्लभं हि सदा सुखम् ॥ १३ ॥
कच्चिन्न किंचिद्भरते कुमारे प्रियदर्शने । शत्रुघ्ने वा महासत्त्वे मातृणां वा ममाशुभम् ॥ १४ ॥
अतोषयन्महाराजमकुर्वन्वा पितुर्वचः । मुहूर्तमपि नेच्छेयं [5]जीवितुं कुपिते नृपे ॥ १५ ॥
यतोमूलं नरः पश्येत्प्रादुर्भावमिहात्मनः । कथं तस्मिन्न वर्तेत प्रत्यक्षे सति दैवते ॥ १६ ॥
कच्चित्ते परुषं किंचिदभिमानात्पिता मम । उक्तो भवत्या [6]रोषेण येनास्य [7]लुलितं मनः ॥ १७ ॥
एतदाचक्ष्व मे देवि तत्त्वेन परिपृच्छतः । किंनिमित्तमपूर्वोऽयं विकारो मनुजाधिपे ॥ १८ ॥

प्रसीदति तं मां संप्रेक्ष्य दृष्ट्वा तस्य राज्ञः आयासः खेदः प्रवर्तते किम्। आश्चर्यार्थकः किंशब्दः ॥ ९ ॥

गो० टी०–अन्यदेति । आयासः चित्तक्लेशः इति चिन्तयामासेत्यन्वयः ॥ ९ ॥ १० ॥

१०] ति० टी०–दीन इव विषण्णवदनद्युतिरिव स रामः शोकार्त इव वचनमब्रवीदिति संबन्धः ॥ १० ॥

रा० टी०–स इति । दीन इव दीनत्वेन प्रतीयमान इत्यर्थः उत्तरयोरपि इवशब्दसंबन्धेन एवमर्थो बोध्यः ॥ १० ॥

११] ति० टी०–नापराद्धम् काकुः अपराद्धम् । अज्ञानात्प्रमादात् । प्रसादय मत्कृतापराधशान्त्यै इति शेषः ॥ ११ ॥

रा० टी०–तद्वचनमेवाह–कच्चिदिति । अज्ञानाद्विषयिणी एतस्य प्रीतिरप्रीतिर्वा तद्विषयकज्ञानाभावात् अपराद्धं विपरीतकरणेनापकृतं कच्चित् न येनापकारेण मे पिता कुपितः तदाचक्ष्व कथय त्वमेनं प्रसादय एव येनोपायेन प्रसन्नः स्यात्तदुपायं कुर्वित्यर्थः ॥ ११ ॥

गो० टी०–कच्चिदिति । नापराद्धमपराधो न कृतः अज्ञानात् प्रमादात् ॥ ११ ॥ १२ ॥

१२] ति० टी०–सदा मां प्रति वत्सलोऽप्यथ किमप्रसन्नमनाः । हि यतो मां न भाषतेऽतोऽप्रसन्नमनस्त्वनिर्णयः ॥ १२ ॥

रा० टी०–अप्रसन्नेति । यः पिता सदा नित्यं मां प्रति वत्सलः मद्विषयकवात्सल्यविशिष्टः सः अप्रसन्नमनआदिः सन्मां न प्रतिभाषते किंनु किमेतत् ॥ १२ ॥

१३]ति०टी०–शारीरः शरीरव्याधिजः संतापः मानसो मनोनिष्ठाधिजोऽभितापः न बाधत इत्यत्र काकुः । कुत एतत्तत्राह–दुर्लभं हीति। मनुष्यशरीरस्य पापपुण्यारब्धत्वादिति भावः ॥ १३ ॥

रा० टी०–शारीर इति । शारीरः शरीरसंबन्धिज्वरादिजनितः संतापः पीडा मानसः मनस्थवाञ्छापूर्त्यभावजनितोऽभितापः शोकादिर्वा दुर्लभं प्राकृतैर्दुष्प्रापं सदासुखं नित्यसुखविशिष्टमेनं पितरं कच्चिन्न बाधते ॥ १३ ॥

गो० टी०–शारीर इति । शारीरः संतापो व्याधिः मानसोऽभितापः आधिः। दुर्लभं हीतिपुण्यपापारब्धत्वान्मानुषशरीरस्येति भावः ॥ १३ ॥

१४] ति० टी०–भरते शत्रुघ्ने वा मातृणां मम मातृषु वा किंचिदशुभं न पश्यति कच्चिदित्यन्वयः ॥ १४ ॥

रा० टी०–कच्चिदिति । भरतादौ मम मातृणां वा अशुभमपराधो न कच्चित् ॥ १४ ॥

गो० टी०–कच्चिदिति । मातृणामिति निर्धारणे षष्ठी कच्चिदिति प्रश्ने किंचिदशुभं न कच्चिदिति संबन्धः ॥ १४ ॥ १५ ॥

१५] ति० टी०–कुपितेऽतोषेण वचनाकरणाद्वा ॥ १५ ॥

रा० टी०–पितृसंतोषोऽवश्यं कर्तव्य इति बोधयन्नाह–अतोषयन्निति । अतोषयंस्तुष्टमकुर्वञ्जीवितुं न इच्छेयम् ॥ १५ ॥

१६] ति० टी०–यतोमूलम् यन्मूलमित्यर्थे आर्षमेतत् । प्रादुर्भावं जन्म यत्कारणकं पश्येज्जानीयात्तस्मिन्प्रत्यक्षे दैवते सति तस्मिन्कथमानुकूल्येन न वर्तेतेत्यर्थः ॥ १६ ॥

रा० टी०–तत्र हेतुमाह–यत इति । मूलं प्रवृत्तिहेतुभूतमात्मनः स्वस्य प्रादुर्भावं प्राकट्यं यतो यस्मात्पश्येज्जानाति तस्मिन्प्रत्यक्षे दैवते सति कथं न वर्तेत तदानुकूल्येनेति शेषः । एतेन यतो मूलं यन्मूल्यमित्यर्थे आर्षमेतदिति भट्टाणुक्तिश्चिन्त्या ॥ १६ ॥

गो० टी०–यत इति । इह जगति नरः आत्मनो देहस्य प्रादुर्भावमुत्पत्तिं यतोमूलं यत्कारणकं पश्येत् प्रत्यक्षे दैवते सति सिद्धे तस्मिन् पितरि कथं न वर्तेत तद्वश एव वर्तेतेत्यर्थः ॥ १६ ॥

१७–१८] ति० टी०–ते संबन्धसामान्ये षष्ठी । स्वयाभिमानादुर्वाङ्मम पिता परुषमुक्तः, अथवा भवत्या कोपेन किंचिन्निमित्तकोपेन परुषमुक्तः । येनास्य मनो लुलितं कलुषितम् । दुःखितोक्तित्वादधिकपदत्वादि न दोषः ॥ १७ ॥ १८ ॥

रा० टी०–कच्चिदिति । अभिमानादयं मद्वश इति गर्वाद्भवत्या मत्पिता परुषमुक्तः रोषेण रोषहेतुभूतेन येन वचनेन अस्य राज्ञो मनो लुलितं त्यक्तस्वभावम् ॥ १७ ॥

गो० टी०–कच्चित्त इति । ते अभिमानात् तव वाङ्

---

१ त्वं चैवेनमिति गो. रा. पाठः । २ क्लिष्टेति गो. पाठः । ३ नहीति गो. रा. पाठः । ४ अमीति गो. पाठः । ५ जीवितमिति रा. पाठः । ६ कोपेनेति गो. रा. पाठः । ७ यन्नास्येति गो. रा. पाठः ।

एवमुक्ता तु कैकेयी राघवेण महात्मना । उवाचेदं सुनिर्लज्जा धृष्टमात्महितं वचः ॥ १९ ॥
न राजा कुपितो राम व्यसनं नास्य किंचन । किंचिन्मनोगतं त्वस्य त्वद्भयान्नानुभाषते ॥ २० ॥
प्रियं त्वामप्रियं वक्तुं वाणी नास्य प्रवर्तते । तदवश्यं त्वया कार्यं यदनेनाश्रुतं मम ॥ २१ ॥
एष मह्यं वरं दत्त्वा पुरा मामभिपूज्य च । स पश्चात्तप्यते राजा यथान्यः प्राकृतस्तथा ॥ २२ ॥
अतिसृज्य ददानीति वरं मम विशांपतिः । स निरर्थं गतजले सेतुं बन्धितुमिच्छति ॥ २३ ॥
धर्ममूलमिदं राम विदितं च सतामपि । तत्सत्यं न त्यजेद्राजा कुपितस्त्वत्कृते यथा ॥ २४ ॥
यदि तद्रक्ष्यते राजा शुभं वा यदि वाऽशुभम् । करिष्यसि ततः सर्वमाख्यास्यामि पुनस्त्वहम् ॥ २५ ॥

भ्यात् कोपेन वा मम पिता भवत्या किंचित्परुषमुक्तः कश्चित् यत्र येनास्य मनः क्षुभितं कलुषितम् ॥ १७ ॥

रा० टी०–उपसंहरन्नाह–एतदिति । अपूर्वः पूर्वमनुत्पन्नः अयं विकारः अजायतेति शेषः । अत्र निमित्तं किमत्रेत्यध्याहृतम् ॥ १८ ॥

गो० टी०–एतदिति । किंनिमित्तमित्याशाचक्ष्वेति पूर्वोक्तस्य सर्वस्य संग्रहः ॥ १८ ॥

१९] ति० टी०–सुनिर्लज्जा पत्युरेवंविधक्लेशकरणलज्जारहिता । धृष्टं प्रत्यक्षतो वनं गच्छेत्येवंरूपम् ॥ १९ ॥

रा० टी०–एवमिति । सुनिर्लज्जा यशःप्रख्यापनरूपपत्युपकारार्थं त्यक्तव्रीडा कैकयी आत्महितं जीवानानुपकारकमधृष्टं प्रागल्भ्यरहितमिदं वच उवाच ॥ १९ ॥

गो० टी०–एवमिति । एवम् इति धृष्टं प्रत्यक्षतो रामानिष्टवचनविषयवैक्लव्यरहितम् ॥ १९ ॥

२०] ति० टी०–मनोगतम् त्वदप्रियकरमिति शेषः ॥ २० ॥

रा० टी०–तद्वचनमेवाह–नेति । व्यसनं व्याध्यादिजनितदुःखं मनोगतमभिप्रेतं त्वद्भयात्त्वद्वियोगभिया नानुभाषते कथयति एतेन त्वद्वियोगमन्तरा एतदभिप्रेतसिद्धिर्न भविष्यतीति बोधितम् ॥ २० ॥

गो० टी०–न राजेति । त्वद्भयादित्यस्य विवरणम्–प्रियमिति । आश्रुतं प्रतिज्ञातम् ॥ २० ॥ २१ ॥

२१] ति० टी०–तदेवाह–प्रियमिति । आश्रुतं प्रतिज्ञातम् । तदप्रियमपि त्वयावश्यं कार्यम् । यदि पितुर्भक्तोऽसीति शेषः ॥ २१ ॥

रा० टी०–प्रियमिति । अप्रियं प्रियविरुद्धत्वेन प्रतीयमानं तत्तस्मादेतदभिप्रेतत्वान्मम मह्यं यदाश्रुतं प्रतिज्ञातं तत्त्वया कार्यं कर्तव्यम् ॥ २१ ॥

२२] ति० टी०–किं तत्राह–एष इति । अभिपूज्य तेनैव वरदानेन । पश्चात्प्रतिज्ञातवरदानकाले ॥ २२ ॥

रा० टी०–एष इति । पुरा पूर्वं मामभिपूज्य प्रशस्य वरं दत्त्वा स वरदाता एष राजा पश्चात्तप्यते तत्र दृष्टान्तः अन्यः सत्यप्रतिज्ञभिन्नः प्राकृतः प्रकृतिकार्यशरीरको यथा । एतेनोपमालङ्कारेणास्य प्राकृतविलक्षणत्वं ध्वनितम् " न जायते म्रियते वा " इत्यादिवाक्येन सर्वेषामात्मनां प्राकृतविलक्षणत्वेन शरीरे तस्य पर्यवसानं बोध्यम् । अन्य इति विशेषणदानेन प्राकृतोऽपि सत्यप्रतिज्ञो न शोचतीति ध्वनितम् ॥ २२ ॥

गो० टी०–तत्किमित्यपेक्षायां सामान्यतो दर्शयति–एष इत्यादिना ॥ २२ ॥

२३] ति० टी०–अतिसृज्य प्रतिज्ञाय । गतजले नद्यादौ । दानस्य पूर्वमेव कृतत्वात्तद्विषयव्यवहारपरिहारचिन्ता व्यर्थेत्यर्थः ॥ २३ ॥

रा० टी०–शोको न कार्य इति बोधयन्ती आह–अतीति । अहं ददामीति अतिसृज्य प्रतिज्ञाय स विशांपतिः राजा विपरीतमिच्छति चेत्तन्निरर्थं निष्प्रयोजनं सेतुं बन्धितुमिच्छति॥२३॥

गो० टी०–अतिसृज्येति । अतिसृज्य प्रतिज्ञाय गतजले सेतुं बन्धितुमिच्छतीति दानस्य पूर्वमेव कृतत्वादिदानीं तत्परिहारव्यापारो व्यर्थ इति भावः ॥ २३ ॥

२४] ति० टी०–इदं सत्यं धर्मस्य मूलम् । अपि च सतामपि सत्यं धर्ममूलमित्येतद्विदितम् । त्वत्कृते त्वत्प्रयोजनान्तरायवशेन मयि कुपितो राजा कोपदोषेण यथा न त्यजेत् तथा कुर्वित्ति शेषः । एतेन पितुरधर्मात्राणं पित्राज्ञापरिपालनं च पुत्रस्य महान्धर्म इति सूचितम् ॥ २४ ॥

रा० टी०–धर्मेति । हे राम ! सत्यं धर्ममूलं सर्वधर्मकारणमिदं सतां विदितं निश्चितं तत्सत्यम् । कुपितो यथा संभावितत्वद्वियोगहेतुककोपाभासविशिष्टोऽपि राजा त्वत्कृते भवत्परमयशोनिष्पत्तये न त्यजेत् ॥ २४ ॥

गो० टी०–धर्ममूलमिति । इदं जगद्धर्ममूलम् इदं च सतां विदितं सद्भिर्विदितम् " कर्तरि च वर्तमाने " इति षष्ठी तत्तस्मात्सत्यं सत्यरूपधर्मं राजा त्वत्कृते त्वत्प्रयोजनाय मयि कुपितः सन् यथा न त्यजेत् तथा कुर्वित्यर्थः ॥ २४ ॥

२५] ति० टी०–दशरथमिव राममपि निर्बध्नाति–यदीति । राजा यद्रक्ष्यते तद्यदि करिष्यसि ततोऽहं सर्वं पुनर्विशिष्याख्यास्यामि ॥ २५ ॥

रा० टी०–यदीति । यदि यदा अशुभं निम्बौषधादिवत्प्रतिभासिकाशुभत्वविशिष्टं यदि वा शुभं प्रातीतिकपारमार्थिकशुभत्वविशिष्टं राजा वक्ष्यते उक्त्यनुकूलकृतिमान्भवतीत्यर्थः ।

१ तस्येति रा. पाठः । २ अभीति गो.पाठः । ३ उपवर्तत इति गो. रा. पाठः । ४ तच्चेति रा.पाठः । ५ तदेति रा. पाठः ।

यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते । ततोऽहमभिधास्यामि नह्येष त्वयि वक्ष्यति ॥ २६ ॥
एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतम् । उवाच व्यथितो रामस्तां देवीं नृपसंनिधौ ॥ २७ ॥
अहो धिङ् नार्हसे देवि वक्तुं मामीदृशं वचः । अहं हि वचनाद्राज्ञः पतेयमपि पावके ॥ २८ ॥
भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे । नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ॥ २९ ॥
तद्ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम् । करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥ ३० ॥
तमार्जवसमायुक्तमनार्या सत्यवादिनम् । उवाच रामं कैकेयी वचनं भृशदारुणम् ॥ ३१ ॥
पुरा देवासुरे युद्धे पित्रा ते मम राघव । रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥ ३२ ॥
तत्र मे याचितो राजा भरतस्याभिषेचनम् । गमनं दण्डकारण्ये तव चाद्यैव राघव ॥ ३३ ॥

तदैव सर्वं प्रातिभासिकाशुभत्वविशिष्टं प्रातीतिकपारमार्थिकशुभत्वविशिष्टं च त्वं पुनः करिष्यसि अतः सर्वं राजाभिप्रेतमाख्यास्यामि कथयिष्यामि । अत्र वच एव कृतिरर्थ इति न वैयाकरणमतविरोधः । वक्ष्यते करिष्यसीत्यत्र लृडुपात्तभविष्यत्कालस्याविवक्षा ॥ २६ ॥

गो० टी०—तर्हि तद्विशेषतो वक्तव्यमित्यत्राह—यदीति । शुभमशुभं वा तत्प्रतिज्ञातं राजा यद्वक्ष्यति तत् त्वं करिष्यसि यदि तदा राज्ञो विवक्षितमहमेवाख्यास्यामीत्यर्थः ॥ २६ ॥

२६] ति० टी०—राज्ञा राजानुमत्या मया यदभिहितं तत्त्वयि न विपत्स्यते व्यर्थं न भविष्यति, तदाहं वक्ष्यामि । राजैव वदतु तत्राह—नहीत्यादि । त्वदप्रियत्वाच्चत्समक्षं साक्षादिति शेषः ॥ २६ ॥

रा०टी०—रामवचनशुश्रूषयाह—यदीति । यदि राज्ञाऽभिहितं मदनुमितराजाज्ञापितं त्वयि न विपत्स्यते निरर्थं न भवेदित्यर्थः । ततः तदा तन्मदनुमितराजाज्ञापितमहमभिधास्यामि कथयिष्यामि एष तु न वक्ष्यति । प्रसिद्धश्च वचने 'प्रधानविषयाशक्तिः प्रत्ययेनाभिधीयते' इत्यादावभिदधातिः ॥ २६ ॥

गो० टी०—राजैव कुतो न वदतीत्यत्राह—यदीति । न विपत्स्यते यदि विफलं न भविष्यति चेदित्यर्थः ॥ २६ ॥

२७] ति० टी०—रामोऽपि दशरथवदेव घोरत्वं ज्ञात्वापि महापुरुषत्वाद्धीरोदात्तत्वात्सर्वथैव करिष्यामीति प्रतिजानीते—एतदिति । व्यथितो गुरुवचनोल्लङ्घनमनयापि शङ्कितमिति संतप्तः ॥ २७ ॥

रा० टी०—एतदिति । समुदाहृतं कथितं व्यथितः पितृदशादर्शनहेतुकसंचलितचित्तः रामः उवाच ॥ २७ ॥

गो० टी०—एतदिति । व्यथितः गुरुवचनं करिष्यति न वेति संदेहस्य विषयोऽस्मीति संतप्त इत्यर्थः ॥ २७ ॥

२८] ति० टी०—ईदृशमकरणशङ्कावचनम् । यदि तद्रक्ष्यत इत्यादिकमित्यर्थः ॥ २८ ॥

रा० टी०—तद्वचनमेवाह—अहो इति । हे देवि ! ईदृशमाज्ञापनाङ्गीकारविषयकसंशयबोधकं वचः वक्तुं यदि अर्हसे तर्हि मां धिक् एवं संशयो न कार्य इत्यर्थः । तदेव आह—पावके वह्नौ २८॥

गो० टी०—व्यथामेवाह—अहो इत्यादिना ॥ २८ ॥

२९] ति० टी०—गुरुणेहामुत्रहितोपदेष्ट्रा ॥ २९ ॥

रा० टी०—भक्षयेयमिति । अर्णवे समुद्रे गुरुणा वशिष्ठेन हितेन हितोपदेशकर्त्रा पित्रा ॥ २९ ॥

गो० टी०—नियुक्त इति । गुरुत्वपितृत्वनृपत्वहितपरत्वानि वचनकरणहेतवः । करिष्ये तदित्यनुकर्षः ॥ २९ ॥

३०–३१] ति० टी०—प्रतिजाने कृतसुकृतादिसाक्षितयेति शेषः । तदेव स्थिरयति—रामो द्विरिति । यदुक्तं तदुक्तमेव तद्विरुद्धं न पुनर्वदतीत्यर्थः । तत्तदभावविषयतया द्विराहृतं भाषणं न करोतीति यावत् ॥ ३० ॥ ३१ ॥

रा०टी०—तदिति । प्रतिजाने प्रतिज्ञां करोमि । स्वस्वाभाविकं गुणमाह—रामः रामशब्दतादात्म्यापन्नः द्विः प्रतिज्ञाविपरीतं न अभिभाषते ॥ ३० ॥

रा० टी०—तमिति । आर्जवसमायुक्तं विनयसंपन्नं तं राममनार्या सर्वश्रेष्ठा कैकेयी भृशदारुणं रामवियोगसंपादकत्वेनातिकठिनं वचनमुवाच ॥ ३१ ॥

गो० टी०—तदिति । यत्कार्यमभिकाङ्क्षितं तद्वचनं तद्विषयवचनं ब्रूहि तत्कार्यं करिष्ये प्रतिजाने च प्रतिज्ञां करोमि च । रामो द्विर्नाभिभाषते विना प्रतिज्ञया रामो द्विरुक्तिं न करोतीत्यर्थः ॥ ३०–३२ ॥

३२] ति० टी०—पूर्वं सशल्येन पश्चाच्छल्यापाकरणपूर्वं मया रक्षितेन ॥ ३२ ॥

रा० टी०—तद्वचनमेवाह—पुरेति । सशल्येन क्षतविद्धबाणसहितेन ॥ ३२ ॥

३३] ति० टी०—तत्र तयोर्वरयोरेकेन । अद्यैवैतत्क्षण एव ॥ ३३ ॥

रा० टी०—तत्रेति । तत्र देवासुरसंग्रामसमये प्रीतौ वरौ राजा अद्यैव मया याचितः । तावेवाह भरतस्य अभिषेचनमभिषेचनसदृशं तव दण्डकारण्ये गमनम् । अभिषेचनशब्दः आचारक्विबन्तप्रकृतिकक्तर्तृक्विबन्तः ॥ ३३ ॥

गो० टी०—तत्रेति । तत्र वरप्रदाननिमित्तम् ॥३३॥३४॥

---

१ मज्जेयमिति गो. रा. पाठः । २ दैवासुरे इति गो. पाठः । ३ मयेति रा. पाठः ।

यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि । आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु ॥ ३४ ॥
संनिदेशे पितुस्तिष्ठ यथानेन प्रतिश्रुतम् । त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ॥ ३५ ॥
भरतश्चाभिषिच्येत यदेतदभिषेचनम् । त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव ॥ ३६ ॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः । अभिषेकामिदं[2] त्यक्त्वा जटाचीरधरो भव[3] ॥ ३७ ॥
भरतः कोसलपतेः[4] प्रशास्तु वसुधामिमाम्[5] । नानारत्नसमाकीर्णां सवाजिरथसंकुलाम् ॥ ३८ ॥
एतेन त्वां नरेन्द्रोऽयं कारुण्येन समाप्लुतः[6] । शोकैः संक्लिष्टवदनो न शक्नोति निरीक्षितुम्[7] ॥ ३९ ॥
एतत्कुरु नरेन्द्रस्य वचनं रघुनन्दन । सत्येन महता राम तारयस्व नरेश्वरम्[8] ॥ ४० ॥

इतीव तस्यां परुषं वदन्त्यां न चैव रामः प्रविवेश शोकम् ।
प्रविव्यथे चापि महानुभावो राजा च पुत्रव्यसनाभितप्तः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ।

पितृसंतोषणान्नान्यदस्ति मे कर्तव्यमतः कौसल्यामापृच्छ्य सीतामनुनीयाथैवाहं वनं प्रवेक्ष्यामीति प्रतिज्ञाय शोकाकुलेक्षणेन लक्ष्मणेनानुगम्यमानो रामः कौसल्यान्तःपुरं प्रविवेश ।

तदप्रियममित्रघ्नो वचनं मरणोपमम् । श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत् ॥ १ ॥

३४] ति० टी०–यदीति । राज्ञा त्वया च मदुक्तकृतेः सशपथं प्रतिज्ञातत्वादिति भावः ॥ ३४ ॥

रा० टी०–यदीति । हे नरश्रेष्ठ! इदं शृणु श्रवणपूर्वकाचरणं कुरु ॥ ३४ ॥

३५] ति० टी०–संनिदेशे पितृप्रतिज्ञासंपादने ॥ ३५ ॥

रा० टी०–तद्वाक्यमेवाह–सन्निदेश इति । सन्निदेशे पितृप्रतिज्ञापालने प्रतिश्रुतं प्रतिज्ञातम् । तत्प्रतिज्ञातमेवाह–प्रवेष्टव्यं तत्र स्थातव्यम् ॥ ३५ ॥

गो० टी०–संनिदेश इति । संनिदेशे नियमने ॥ ३५ ॥

३६] ति० टी०–अभिषेचनमभिषेकोपकरणम् ॥ ३६ ॥

रा० टी०–भरत इति । विहितं संपादितमभिषेचनमभिषेकद्रव्यं तेन सर्वेण भरतः अभिषिच्येत इव सर्वमेतदायत्तं स्यादित्यर्थः । च इवार्थे ॥ ३६ ॥

गो० टी०–भरत इति । यदेतदभिषेचनम् अभिषेकसाधनं त्वदर्थे विहितं तेन सर्वेण राज्ञा भरतोऽभिषिच्येतेति योजना ॥ ३६–३८ ॥

३७–३८] ति० टी०–अभिषेकं तदुपकरणम् ॥३७॥३८॥

रा० टी०–सप्तेति । सप्तसप्त चतुर्दश वर्षाणीत्यर्थः । जटेत्यादिनाश्चर्योचितचिह्नानाम्नुपलक्षणम् ॥ ३७ ॥

रा० टी०–भरत इति । कोशलपतेः नित्यकोशलाधीशस्य तव वसुधां प्रशास्तु पालयतु । वसुधाविशेषणं नानेत्यादि ॥३८॥

३९] ति० टी०–एतेन वरद्वयप्रदानेन निमित्तेन ॥ ३९ ॥

रा० टी०–एतेनेति । एतेन संभावितत्वद्वियोगजनितेन कारुण्येन करुणया समाप्लुतः युक्तः अत एव शोकसंक्लिष्टवदनः अयं नरेन्द्रः त्वां निरीक्षितुं न शक्नोति ॥ ३९ ॥

गो०टी०–एतेनेति । एतेन वरद्वयप्रदाननिमित्तेन ३९॥४०॥

४०] ति० टी०–सत्येन सत्यपरिपालनेन ॥ ४० ॥

रा० टी०–एतदिति । हे रघुनन्दन ! नरेन्द्रस्य वचनं वक्तुमभिप्रेतं कुरु अत एव महता सत्येन युक्तं नरेन्द्रं तारयस्व तत्सत्यप्रतिज्ञत्वं निर्वाहयेत्यर्थः ॥ ४० ॥

४१] ति० टी०–शोकं तत्सूचकं विकारं न प्रविव्यथे च मनसेति शेषः । राजा च राजा तु पुत्रव्यसनाभितप्तो भावितद्वियोगव्यसनेनाभितप्तः बभूवेति शेषः ॥ ४१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽयोध्याकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०–इतीवेति । परुषमपरुषत्वेन प्रतीयमानम् आचारक्षिबन्तप्रकृतिककर्तृक्षिबन्तम् रामः शोकं नैव प्रविवेश रामस्यापि तत्संमतमिति तात्पर्यम् । महानुभावोऽपि राजा पुत्रव्यसनाभितप्तः संभावितपुत्रवियोगजनितदुःखाक्रान्तः सन् प्रविव्यथे चञ्चलचित्तोऽभवत् ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणा-
वयोध्याकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

गो० टी०–इतीति । इवशब्देन अन्यान्यपि परुषाणि बहून्युक्तानीति गम्यते शोकं सुखवैवर्ण्यादिबाह्यविकारम् प्रविव्यथे चापि रामविकारादर्शनेनाप्यधिकं विव्यथ इत्यर्थः॥४१॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बरा-
ख्यानेऽयोध्याकाण्डव्याख्यानेऽष्टादशः सर्गः ॥ १८ ॥

१] ति० टी०–अथाभिषेकवनवासयोः समचित्ततया धीरो दान्तमहापुरुषत्वं रामस्याह–तदिति । मरणोपमं लोकदृशा ॥१॥

---

१ यदिति रा. पाठः । २ इममिति गो. रा. पाठः । ३ अजिनेति गो. रा. पाठः । ४ वसेति गो. रा. पाठः । ५ पुरे इति गो. पाठः । ६ कुञ्जरामिति गो. रा. पाठः । ७ शोकसंक्लिष्टेति गो. रा. पाठः । ८ त्विति गो. पाठः ।

एवमस्तु गमिष्यामि वनं वस्तुमहं त्वितः । जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन् ॥ २ ॥
इदं तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः । नाभिनन्दति दुर्धर्षो यथापूर्वमरिंदमः ॥ ३ ॥
मन्युर्न च त्वया कार्यो देवि ब्रूमि तवाग्रतः । यास्यामि भव सुप्रीता वनं चीरजटाधरः ॥ ४ ॥
हितेन गुरुणा पित्रा कृतज्ञेन नृपेण च । नियुज्यमानो विस्रब्धः किं न कुर्यामहं प्रियम् ॥ ५ ॥
अलीकं मानसं त्वेकं हृदयं दहते मम । स्वयं यन्नाह मां राजा भरतस्याभिषेचनम् ॥ ६ ॥
अहं हि सीतां राज्यं च प्राणानिष्टान्धनानि च । हृष्टो भ्रात्रे स्वयं दद्यां भरताय प्रचोदितः ॥ ७ ॥
किं पुनर्मनुजेन्द्रेण स्वयं पित्रा प्रचोदितः । तव च प्रियकामार्थं प्रतिज्ञामनुपालयन् ॥ ८ ॥
तथाश्वासय हीमन्तं किं त्विदं यन्महीपतिः । वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ॥ ९ ॥

रा० टी०–तदिति । अप्रियं पितुरिति शेषः । अत एव मरणोपमं वचनं श्रुत्वा अमित्रघ्नः देवशत्रुसूदनः रामः कैकेयीमिदमब्रवीत् ॥ १ ॥

गो० टी०–तदिति । मरणोपममिति लोकदृष्ट्या ॥ १ ॥

२-३] ति० टी०–न द्विर्भाषत इत्युक्त्वादेवमस्त्विवस्येव केवलमाह, यद्वा एवमस्तु भरताभिषेकोऽस्तु ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–एवमिति । वस्तुं वासं कर्तुमितः भवत्याः अभिप्रेतत्वात् ॥ २ ॥

गो० टी०–एवमिति । इतः अस्मान्नगरात् ॥ २ ॥

रा० टी०–इदमिति । अभिनन्दति अभिनन्दयति वचनात्प्रैरिति शेषः अन्तर्भावितण्यर्थः ॥ ३ ॥

गो० टी०–इदं त्विति । यद्यप्येतेन कारुण्येन समाप्लुत इत्यभिनन्दने हेतुरुक्तः तथापि मत्स्वभावं जानन् किमर्थं नाभिनन्दतीत्याहेति बोध्यम् । यथापुरं यथापूर्वम् ॥ ३ ॥

४] ति० टी०–मन्युर्नेति । राजाभिप्रायज्ञानेच्छया प्रभोरिति शेषः । ब्रूमि ब्रवीमि । एतावज्ज्ञात्वा सर्वथा यास्याम्येव न त्वन्यथा शङ्कितव्यमिति भावः ॥ ४ ॥

रा० टी०–मन्युरिति । अग्रतः अग्रे यतो ब्रूमि ब्रवीमि ततः मन्युः मदुक्तमनङ्गीकृत्यैवान्यत्पृच्छतीत्येवंबुद्ध्या कोपो न कार्यः तत्र हेतुः वनं यास्यामि आगमशास्त्रस्य संज्ञापूर्वकविधेश्चानित्यत्वादीङ्गुणयोरभावः ॥ ४ ॥

गो० टी०–मन्युरिति । मन्युः दैन्यम् 'मन्युर्दैन्ये क्रतौ कुधि' इत्यमरः । ब्रूमि ब्रवीमि ॥ ४ ॥

५] ति० टी०–कृतज्ञेन त्वत्कृतस्वापत्राणज्ञेन । विस्रब्धो निर्विशङ्कः ॥ ५ ॥

रा० टी०–हितेनेति । हितेन प्रियोपदेष्ट्रा गुरुणा कृतज्ञेन पित्रा च नियुज्यमानः विस्रब्धः त्वद्वचने कृतविश्वासोऽहं त्वत्प्रीतिविधायीभूतं किमहं न कुर्यां सर्वं करिष्यामीत्यर्थः ॥ ५ ॥

गो० टी०–हितेनेति । हितेन हितपरेण गुरुणेत्यनेन रामस्य तत्सामान्यविशेषस्वीकारोऽस्तीति गम्यते । कृतज्ञेन त्वकृतवरप्रदानाभिज्ञेन ॥ ५ ॥

६] ति० टी०–किं त्विदं मानसं मनसि वर्तमानमलीकं दुःखम् । किं तत्राह–स्वयमित्यादि ॥ ६ ॥

रा० टी०–नन्वेवं चेत्तत्प्रियं कुर्वित्यत आह–अलीकमिति । अलीकं दुःखम् ॥ ६ ॥

गो० टी०–अलीकमिति । अलीकम् अप्रियं मानसं मनसि वर्तमानम् ॥ ६ ॥

७-८] ति० टी०–अयमर्थस्त्वदुःखावहत्वाद्राज्ञा तव साक्षाद्वक्तुमशक्य इति चेत्तत्राह–अहं हीति । प्रचोदितः त्वयापीति शेषः । प्रतिज्ञाकरणं विनापि त्वदुक्तिमात्रेण राज्यादि दद्याम्, तत्र किं वक्तव्यं त्वत्प्रियार्थं राज्ञा प्रेरितः स्वकृतप्रतिज्ञामनुपालयन् हेतौ शता तत्पालनाद्धेतो राज्यं दद्यामित्यर्थः ॥ ७ ॥ ८ ॥

रा० टी०–नन्वेतत्कार्यस्य दुष्करत्वेन करणसंशयात्साक्षान्नोक्तमित्यत आह–अहमिति । प्रचोदितः प्रेरितः त्वयेति शेषः । उत्तरोक्तिस्त्वारस्यात् । तर्हि प्रियकामार्थं प्रीतिकामनया पित्रा प्रचोदितः प्रेरितोऽहं प्रतिज्ञां ब्रह्मादिप्रार्थनया स्वकृतनियोगमनुपालयन्सन् भरताय राज्यं किं न दद्याम् । श्लोकद्वयमेकान्वयि । राज्यमात्रं कर्मावर्तते ॥ ७ ॥ ८ ॥

गो० टी०–तवाप्रीतिर्भविष्यतीति नोक्तवानित्याशङ्क्याह–अहं हीति । सीतां धनुर्भङ्गकाल इति भावः ॥ ७ ॥

गो० टी०–किं पुनरिति । पित्रा प्रचोदितस्तव प्रियकामार्थं प्रतिज्ञामनुपालयंश्च दद्यामिति किं पुनः ॥ ८ ॥

९] ति० टी०–मद्विषयकनियोगसंकोचेन ह्रीमन्तं राजानमाश्वासय । इदं किं किंहेतुकम् । तदेवाह–यदित्यादि ॥ ९ ॥

रा० टी०–तथेति । यतो महीपतिः वसुधासक्तनयनः अधोदृष्टिरित्यर्थः । अश्रूणि विमुञ्चति त्यजति तं ह्रीमन्तम् अनाज्ञाप्याज्ञापकत्वेन लज्जावन्तं महीपतिमिदं भवदाज्ञातं किंतु नाशक्यमित्यर्थः । इति आश्वासय । तथाशब्दः इत्यर्थे ॥ ९ ॥

गो० टी०–तदिति । इमं राजानं त्वमाश्वासय अश्रूणि मुञ्चतीति यद् इदं किंतु निर्हेतुकमित्यर्थः ॥ ९ ॥ १० ॥

१ अजिनेति गो. पाठः । २ पुरमिति गो. पाठः । ३ दहतीव मे इति गो. पाठः । ४ अप्रचोदित इति गो. पाठः । ५ तथेति गो. पाठः । ६ ह्रीमं त्वमिति गो. पाठः । ७ त्विदमिति गो. रा. पाठः ।

गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः । भरतं मातुलकुलादद्यैव नृपशासनात् ॥ १० ॥
दण्डकारण्यमेषोऽहं गच्छाम्येव हि सत्वरः । अविचार्य पितुर्वाक्यं समा वस्तुं चतुर्दश ॥ ११ ॥
सा हृष्टा तस्य तद्वाक्यं श्रुत्वा रामस्य कैकयी । प्रस्थानं श्रद्दधाना सा त्वरयामास राघवम् ॥ १२ ॥
एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः । भरतं मातुलकुलादिहावर्तयितुं नराः ॥ १३ ॥
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलम्बनम् । राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि ॥ १४ ॥
व्रीडान्वितः स्वयं यच्च नृपस्त्वां नाभिभाषते । नैतत्किंचिन्नरश्रेष्ठ मन्युरेषोऽपनीयताम् ॥ १५ ॥
यावत्त्वं न वनं यातः पुरादस्मादरिंदम । पिता तावन्न ते राम स्नास्यते भोक्ष्यतेऽपि वा ॥ १६ ॥
धिक्कष्टमिति निःश्वस्य राजा शोकपरिप्लुतः । मूर्छितो न्यपतत्तस्मिन्पर्यङ्के हेमभूषिते ॥ १७ ॥
रामोऽप्युत्थाप्य राजानं कैकेय्याभिप्रचोदितः । कशयेव हतो वाजी वनं गन्तुं कृतत्वरः ॥ १८ ॥

१०] ति० टी०–अनिर्दत्तस्वकार्यां कथमाश्वासयामीत्याशङ्क्याह–गच्छन्त्वित्यादि ॥ १० ॥

रा० टी०–स्वगमनाभावशङ्कां निवर्तयन्नाह–गच्छन्त्वित्यादि । नृपशासनाद्राजाज्ञां संप्राप्य शीघ्रजवैः अतिवेगविशिष्टैः हयैः भरतमानयितुमानेतुं दूता गच्छन्तु । "ल्यब्लोपे कर्मण्यधिकरणे च" इत्यनुशासनविहितात्र पञ्चमी ॥ १० ॥

११] ति० टी०–अविचार्य युक्तायुक्तविचारमकृत्वैवेत्यर्थः ॥ ११ ॥

रा० टी०–दण्डकेति । एषः स्वदृष्टिपथं प्राप्तोऽहं पितुर्वाक्यमविचार्य किमर्थमिदमुच्यत इति विचारमकृत्वैव चतुर्दश समाः वर्षाणि वस्तुं वासं कर्तुं सत्वरः सन् दण्डकारण्यं गच्छामि ॥ ११ ॥

गो० टी०–दण्डकेति । पितुर्वाक्यमविचार्य वनं गच्छेति पित्रा नोक्तमिति विचारमकृत्वेत्यर्थः। समाः संवत्सरान्११-१३

१२–१३] ति० टी०–प्रस्थानं वनगमनम् । श्रद्दधानावश्यमयं प्रस्थानं करिष्यतीति निश्चयवती ॥ १२ ॥ १३ ॥

रा० टी०–सेति । तस्य रामस्य तद्वनप्रस्थानबोधकं वाक्यं श्रुत्वा हृष्टा स्वेप्सितरघुनाथप्रतिज्ञातार्थसिद्धिहेतुकहर्षं प्राप्ता सा कैकेयी प्रस्थानं श्रद्दधाना प्रस्थानविषयकश्रद्धावती सती राघवं त्वरयामास शीघ्रं कथयामासेत्यर्थः कथनरूपव्यापारार्थे णिच् ॥ १२ ॥

रा० टी०–तत्कथनमेवाह–एवमिति । आवर्तयितुमानेतुं नराः नीतिज्ञाः दूताः यास्यन्ति ॥ १३ ॥

१४] ति०टी०–उत्सुकस्य वनगमनोत्सुकस्य क्षमं युक्तम् १४

रा० टी०–भरतागमने एतस्य यात्रा न स्यादिति मन्यमाना आह–तवेति । हे राम ! उत्सुकस्य गमनोत्सवविधिष्टस्य तव विलम्बनं क्षमञ्चितं न मन्ये तस्माद्धेतोः इतः शीघ्रं गन्तुमर्हसि ॥ १४ ॥

गो० टी०–अयं यावद्भरतागमं विलम्बिष्यते चेन्महाननयः स्याद्भरतस्य ज्येष्ठभ्रातृभक्तत्वादिति मत्वाह–तव त्विति। उत्सुकस्य भरताभिषेकदर्शनोत्सुकस्य गमनोत्सुकस्य वा ॥ १४॥

१५] ति० टी०–राजानमभिनन्दनहेतुमाह–व्रीडेति । स्वसत्यस्य पारम्प्राप्यदर्शनजलज्जायुक्तः । यो हेतौ । अतस्त्वां नाभिभाषते एतदनभिभाषणं न किंचिदन्यकारणकम् त्वदविलम्बगमनाभाव एवास्य कारणम्, अत एव मन्यू राज्ञो दैन्यं स्वाविलम्बगमनेनापनीयतां त्वयेति शेषः ॥ १५ ॥

रा० टी०–नन्वयं राजा कुतो नाज्ञापयतीत्यत आह–व्रीडेति । यथतः नृपो व्रीडान्वितः अतिप्रियपुत्रं प्रवासार्थं कथमाज्ञापयिष्यामीति लज्जायुक्तः अतस्त्वां नाभिभाषते हे नरश्रेष्ठ ! एतदनभिभाषणं किंचिन्न भवद्गमनप्रतिबन्धकं नेत्यर्थः । अतः एष उपस्थितः मन्युः राक्षसविषयकः ऋषीणां कोपः अपनीयतां निवर्त्यतां द्रुतं वनगमनेन राक्षसा हन्यन्तामिति तात्पर्यम् ॥ १५ ॥

गो० टी०–व्रीडान्वित इति । नृपो व्रीडान्वितः सन् स्वयं नाभिभाषत इति यत् एतत् न किंचिद्विचारानर्हं व्रीडां विना कारणान्तराभावात् मन्युः स्वयं नाभिभाषत इत्याग्रहः दैन्यं वा ॥ १५ ॥ १६ ॥

१६–१७] ति० टी०–इतोऽपि न युक्तो विलम्ब इत्याह–यावदिति । मया दरिद्राधमर्णत्वेन तथा शपथैः प्रतिबन्धादिति भावः ॥ १६ ॥ १७ ॥

रा० टी०–शीघ्रं वनगमने हेत्वन्तरमाह–यावदिति । न स्नास्यते न भोक्ष्यते वनगमनसंभ्रमादिति भावः नकार उभयान्वयी ॥ १६ ॥

रा० टी०–नाथाभावे हेतुमाह–धिगिति । शोकपरिप्लुतः संभावितवियोगजनितशोकव्याकुलचित्तः न्यपतत् ॥ १७ ॥

गो० टी०–धिगिति । उक्तासत्यवचनं श्रुत्वेति भावः ॥ १७ ॥

१८] ति० टी०–कृतत्वरोऽभूदिति शेषः ॥ १८ ॥

रा० टी०–राम इति । कशया कस्य स्वर्गवासिनः वं मत्पूर्वं यया तया कैकय्या अभिप्रचोदितः प्रेरितः इतः स्वाभिसारिहननकर्तो रामः राजानमुत्थाप्य अवाजी वाज्युपलक्षितया नरहितः सन् एव वनं गन्तुं कृतत्वरः आसीदिति शेषः ।

१ इतो गच्छामीति गो. पाठः । २ धीति गो. रा. पाठः । ३ उपेति गो. पाठः । ४ अगीति गो. पाठः । ५ आहत इति गो. पाठः ।

तदप्रियमनार्यायाः वचनं दारुणोदयम् । श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत् ॥ १९ ॥
नाहमर्थपरो देवि लोकमावस्तुमुत्सहे । विद्धि मामृषिभिस्तुल्यं विमलं धर्ममास्थितम् ॥ २० ॥
यत्तत्रभवतः किंचिच्छक्यं कर्तुं प्रियं मया । प्राणानपि परित्यज्य सर्वथा कृतमेव तत् ॥ २१ ॥
न ह्यतो धर्मचरणं किंचिदस्ति महत्तरम् । यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ॥ २२ ॥
अनुक्तोऽप्यत्रभवता भवत्या वचनादहम् । वने वत्स्यामि विजने वर्षाणीह चतुर्दश ॥ २३ ॥
न नूनं मयि कैकेयी किंचिदाशंससे गुणान् । यद्राजानमवोचस्त्वं ममेश्वरतरा सती ॥ २४ ॥
यावन्मातरमापृच्छे सीतां चानुनयाम्यहम् । ततोऽद्यैव गमिष्यामि दण्डकानां महद्वनम् ॥ २५ ॥

हत इत्यत्र कर्माविवक्षया अकर्मकत्वेन कर्तरि निष्ठा । इव एवार्थे ॥ १८ ॥

गो० टी०–राम इति । कृतत्वरः अभूदिति शेषः १८॥१९॥

१९] ति० टी०–दारुणोदयं दारुणार्थकं प्रभोत्तरम् ॥१९॥

रा० टी०–तदिति । दारुणोदयं दारुणानां राक्षसानामुत्कर्षेण अयः प्रक्षेपः यस्मिन् तत् राक्षसत्वप्रक्षेपणबोधकमित्यर्थः । अत एव तदप्रियं तेषां राक्षसानां न प्रियं यस्मिन्तत् अनार्यायाः सर्वश्रेष्ठाया कनिष्ठाया वा कैकेय्या वचनं श्रुत्वा गतव्यथः निस्यनिवृत्तदुःखः रामः इदमब्रवीत् उदयमित्यत्र असनार्थकाद्वीत्यत्र प्रश्लिष्टादीधातोरेच् ॥ १९ ॥

२०] ति० टी०–लोकमावस्तुं लोके वस्तुं नोत्सहे । अर्थपरो धनपरः । विमलं धर्ममास्थितं तत्त्वज्ञानरूपं धर्ममाश्रितम् । ऋषयोऽत्र तत्त्वज्ञाः एतेन स्वस्य सुखदुःखयोः समता निवृत्तिमार्गस्थता च स्वाभाविकीति ध्वनितम् ॥ २० ॥

रा० टी०–तद्वचनमेवाह–नेति । हे देवि ! अहमर्थपरः इदानीं राज्याभिलाषी न किंतु लोकमावस्तुमावासयितुमुत्सहे इच्छामि । तत्र हेतुः ऋषिभिः तुल्यं तोलितं निर्णीतमिति यावत् विमलं प्रजामलनिवर्तकं धर्ममास्थितं कुर्वन्तमित्यर्थः । मां विद्धि जानीहि अन्तर्भावितणिजर्थो वसतिः ॥ २० ॥

गो० टी०–नेति । लोकमावस्तुम् लोके वस्तुम् "उपान्वध्याङ्वसः" इति कर्मत्वम् । धर्मम् आस्थितम् आश्रितम् अनेन राज्याय भरतागमनं प्रतीक्षते राम इति कैकेयीशङ्का वारिता२०

२१] ति० टी०–तत्रभवतः पूज्यस्य पितुः वनगमनं कियत्किंचिदतोऽधिकमपि प्रियं कर्तुं शक्यम् तत्कृतमेव विद्धीति शेषः ॥ २१ ॥

रा० टी०–यदिति । तत्रभवतः पूज्यस्य पितुः यत्किंचित्प्रियं कर्तुं मया शक्यं तत्प्राणान् पितृप्रियप्रतिबन्धकीभूतप्राणप्रियानपि परित्यज्य सर्वथा सर्वप्रकारेण कृतमेव विद्धीति पूर्वेणान्वयः ॥ २१ ॥

गो० टी०–यदिति । अत्रभवतः पूज्यस्य पितुः कृतमेवेति विद्धीति शेषः ॥ २१ ॥

२२] ति० टी०–तथा निश्चये हेतुमाह–न ह्रीति । हि हेतौ । शुश्रूषा पादसंवाहनादिरूपा वचनक्रियाज्ञप्तकरणम् ॥ २२ ॥

रा० टी०–पितृप्रियस्य अवश्यं कर्तव्यत्वे हेतुमाह–नेति । अतः पितृप्रियाचरणाद्वचनक्रिया आज्ञापिताचरणम् ॥ २२ ॥

गो० टी०–नहीति । शुश्रूषा पादसंवाहनादिः वचनक्रिया वचनकरणम् ॥ २२ ॥ २३ ॥

२३] ति० टी०–अत्रभवता पूज्येन पित्रा । भवत्या वचनात्पितृवचनवत्तत्पत्नीवचनस्याप्यवश्यकर्तव्यत्वात् । अनेन सापत्नमातुरप्यनिष्टनिष्ठमपि वचनमेव परिपाल्यम्, किमुत मातापित्रोरिति सूचितम् ॥ २३ ॥

रा० टी०–अनुक्त इति । अत्रभवता पूज्येन पित्रा अनुक्तः साक्षादनाज्ञप्तोऽपि भवत्याः वचनाद्वने वत्स्यामि ॥ २३ ॥

२४] ति० टी०–हे कैकेयि ! नूनं मयि किंचित्कमपि गुणं नाशंससे न जानासि । तत्र हेतुः–यदित्यादि । 'गुरून्' इति पाठे पितृपत्न्याद्याज्ञापरिपालनादिरूपानित्यर्थः ॥ २४ ॥

रा० टी०–नेति । हे कैकेयि ! मयि विद्यमानान्गुरून्सत्यप्रतिज्ञत्वादीन्गुणान्न आशंससे अचकथः वर्तमानसामीप्य इति भूते लट् एतेन तत्कथने एवं दुःखं न स्यादिति सूचितम् । अर्थं पृथक्–यदिति । यतः त्वं ईश्वरतरा अतिपूज्या ततः त्वं यद्राजानमवोचः अचकथः तद्दण्डकानां दण्डकनामकक्ष्वाकुक्षतानां महद्वनं शुक्रशापेन वनत्वं प्राप्तं राष्ट्रमयैव गमिष्यामि परंतु यावन्मातरमापृच्छे तदाज्ञां गृह्णामीत्यर्थः, तावदेव विलम्बनमिति शेषः । सार्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०–नेति । गुणमार्जवौदार्यादिगुणं नाशंससे न जानीष इत्यर्थः । ईश्वरतरा अत्यन्तनियन्त्री ॥ २४ ॥

२५] ति० टी०–यावदिति । पूर्वार्धे तावत्क्षमां कुर्विति शेषः । ततस्तदनन्तरम् । दण्डकानां तन्नामकक्षत्रियाणाम् तन्नामकजनपदरूपं शापवशाद्वनत्वं प्राप्तम् ॥ २५ ॥

गो० टी०–अद्यैव गन्तव्यमित्युक्तं तत्र यत् किंचिद्विलम्बं याचते–यावदिति । मातरं यावदापृच्छे सीतां चानुनयामि तावदत्रज्ञां कुर्विति शेषः । ततः तदनन्तरम् अद्यैव दिने दण्डकानां महद्वनं दण्डो नामेक्ष्वाकुक्षतस्तस्य राष्ट्रं शुक्रशापात्पांसुवर्षेण विनाशितं सदरण्यमभूत् तद्राष्ट्रं तन्नाम्ना दण्डकमित्युच्यते "संज्ञायां कन्" इति कन्प्रत्ययः प्रदेशभेदाद्बहुवचनम्॥२५॥

---

१ कैनल्यमिति गो. पाठः । २ अत्रेति गो. पाठः । ३ गुणमिति गो. पाठः ।

भरतः पालयेद्राज्यं शुश्रूषेच्च पितुर्यथा । तथा भवत्या कर्तव्यं स हि धर्मः सनातनः ॥ २६ ॥
रामस्य तु वचः श्रुत्वा भृशं दुःखार्तः पिता । शोकादशक्नुवन्वक्तुं प्ररुरोद महास्वनम् ॥ २७ ॥
वन्दित्वा चरणौ राज्ञो विसंज्ञस्य पितुस्तदा । कैकेय्याश्चाप्यनार्याया निष्पपात महाद्युतिः ॥ २८ ॥
स रामः पितरं कृत्वा कैकेयीं च प्रदक्षिणम् । निष्क्रम्यान्तःपुरात्तस्मात्सुं ददर्श सुहृज्जनम् ॥ २९ ॥
तं बाष्पपरिपूर्णाक्षः पृष्ठतोऽनुजगाम ह । लक्ष्मणः परमक्रुद्धः सुमित्रानन्दवर्धनः ॥ ३० ॥
आभिषेचनिकं भाण्डं कृत्वा रामः प्रदक्षिणम् । शनैर्जगाम सापेक्षो दृष्टिं तत्राविचालयन् ॥ ३१ ॥
न चास्य महतीं लक्ष्मीं राज्यनाशोऽपकर्षति । लोककान्तस्य कान्तत्वाच्छीतरश्मेरिव क्षयः ॥ ३२ ॥
न वनं गन्तुकामस्य त्यजतश्च वसुंधराम् । सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ॥ ३३ ॥
अतिपिध्य शुभं छत्रं व्यजने च स्वलंकृते । विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान् ॥ ३४ ॥

२६] ति० टी०—स हि पितृशुश्रूषारूपः ॥ २६ ॥

रा० टी०—स्वगमनानन्तरकालिकं कैकयीकर्तव्यमाह—भरत इति । पितुः पितरं संबन्धसामान्यविवक्षया षष्ठी ॥२६॥

गो० टी०—भरत इति । धर्मः सनातन इत्यत्र धर्मापेक्षया पुंल्लिङ्गत्वम् ॥ २६ ॥

२७] ति० टी०—बाष्पं रोदुमशक्नुवन् ॥ २७ ॥

रा०टी०—रामस्येति।शोकानिश्चितवियोगजनितदुःखात् २७॥

गो०टी०—स इति।बाष्पमशक्नुवन् निरोद्धुमिति शेषः॥२७॥

२८] ति० टी०—अनार्याया लोकदृष्ट्या तादृश्या अपि स्वयं तथोपगणयन्निति शेषः । निष्पपात निश्चक्राम ॥ २८ ॥

रा० टी०—वन्दित्वेति । अनार्यायाः कनिष्ठायाः महाद्युतिः समातिशयरहितप्रकाशविशिष्टः ॥ २८ ॥

गो० टी०—वन्दित्वेति । निष्पपात निर्जगाम ॥२८—३०॥

२९] ति० टी०—कैकेयीप्रदक्षिणं सम्यगाचरितं मदिष्टं त्वयेत्यत्यन्तसंतोषाच्छिष्टाचाराच्चेति बोध्यम् ॥ २९ ॥

रा० टी०—स इति । स्वमात्मीयम् ॥ २९ ॥

३०] ति० टी०—बाष्पपरिपूर्णाक्षः समीपस्थित्यावगतदृत्तान्तत्वात् । परमक्रुद्ध इत्यनेन लक्ष्मणेऽविद्या विक्षेपशक्तिमती दर्शिता, रामे च न सा इति ध्वनितम् ॥ ३० ॥

रा० टी०—तामिति । अक्रुद्धः रामाभिप्रेतशत्रुत्वेन क्रोधरहितः लक्ष्मणः परं सर्वरक्षकं तं राममनुजगाम ॥ ३० ॥

३१] ति० टी०—आभिषेचनिकमभिषेकप्रयोजनकं भाण्डमुपकरणजातम् तयुक्ताभिषेकशालामिति यावत् । संनिहितगङ्गादिपुण्यतीर्थकत्वात् । तत्राभिषेकशालायाम् । दृष्टिमविचालयन्प्रवर्तयन्सापेक्षः वनं प्रतीति शेषः । यद्वा लोकसमाधानाय तदनुग्रहाय नटवदात्मगोपनाय लोकव्यवहारात्यागाय च सापेक्षः स इव तत्र दृष्टिमविचालयन्नित्यजन् अत एव शनैर्जगाम ॥३१॥

रा० टी०—आभिषेचनिकमिति । आभिषेचनिकमभिषेकप्रयोजनकं भाण्डं सामग्रीं प्रदक्षिणं कृत्वा सापेक्षः वनगमनापेक्षासहितः रामः तत्र अभिषेकशालास्थे जने दृष्टिमविचालयन्नगाम दृष्टिं अविचालयन् इत्यनेन रघुनाथस्य सौशील्यातिशयगुणो व्यक्तः ॥ ३१ ॥

गो० टी०—आभिषेचनिकमिति । आभिषेचनिकमभिषेकप्रयोजनकं भाण्ड मुपकरणजातं प्रदक्षिणकरणं प्रशस्तमाङ्गल्यदेवतायतनचतुष्पथादीन् प्रदक्षिणमावर्तयेदित्यादिधर्मशास्त्रोल्लङ्घनभयात् नतु तदासक्त्या दृष्टिं तत्राविचालयन् स्वयं तत्र निरपेक्ष इत्यर्थः। सापेक्षः भरतस्यानेन नाभिषेकोऽस्त्विति प्रार्थनासहितः शनैर्जगाम तत्र देवतासांनिध्यसंभवादिति भावः॥३१॥

३२] ति० टी०—धीरोदात्तत्वाच्च न तद्विघातप्रयुक्तक्रोधदुःखादीत्याह—न चेति । लक्ष्मीं सहजां शोभाम् । कान्तत्वादविनाशिकान्तियुक्तत्वात् । लोककान्तस्य शीतरश्मेरिन्दोः क्षयो यथा लक्ष्मीं नापकर्षति तद्वत् ॥ ३२ ॥

रा० टी०—नेति । राज्यनाशः राज्याभिषेकाभावपूर्वकगमनमस्य रामस्य महतीं समाधिकरहितां लक्ष्मीं शोभां नैवापकर्षति न्यूनयतीत्यर्थः । तत्र हेतुः लोककान्तस्य लोककानां भुवनजनानामन्तस्य काल्यस्य कान्तत्वात्स्वामित्वात् किंच लोककान्तस्य ब्रह्मादित्रयस्य कान्तत्वान्नियामकत्वात् किंच लोककान्तस्य सकलशोभायाः कान्तत्वाच्छोभात्वेत्सकलशोभाहेतुत्वादित्यर्थः । तत्र दृष्टान्तः शीतरश्मेः चन्द्रमसः क्षयो गमनमिव॥३२॥

गो० टी०—न चेति । लक्ष्मीं सुखविकासं राज्यनाशः राज्यभ्रंशः ॥ ३२ ॥

३३] ति० टी०—सर्वलोकातिगस्येव जीवन्मुक्तस्येव ॥ ३३॥

रा० टी०—न वनमिति । सर्वलोकातिगस्य सकलभुवनातिवर्तिनः सकललोकोर्ध्ववर्तिसाकेतलोकस्थस्येत्यर्थः रामस्य चित्तविक्रिया पित्रादिवियोगहेतुकचित्तविकारो नैव लक्ष्यते । इवशब्द एवार्थे ॥ ३३ ॥

गो० टी०—रामस्य सुखवैवर्ण्यादिशरीरविकाराभावमभिधाय मानसविकाराभावमप्याह—न वनमिति । सर्वलोकातिगस्य तुल्यमानावमानस्य परमयोगीश्वरस्येत्यर्थः ॥ ३३ ॥

३४] ति०टी०—छत्रादिप्रतिज्ञाविरोधाद् व्यजने चामरे३४

१ स रामस्येति गो. पाठः । २ भृशदुःखेति रा. पाठः । ३ हत इति गो. पाठः । ४ बाष्पमिति गो. पाठः । ५ राम इति गो. पाठः । ६ तथेति गो. पाठः । ७ क्षपेति गो. पाठः ।

धारयन्मनसा दुःखमिन्द्रियाणि निगृह्य च । प्रविवेशात्मवान्वेश्म मातुरप्रियशंसिवान् ॥ ३५ ॥
सर्वोऽप्यभिजनः श्रीमाञ्छ्रीमतः सत्यवादिनः । नालक्षयत रामस्य [२]कंचिदाकारमानने ॥ ३६ ॥
उचितं च महाबाहुर्न जहौ हर्षमात्मवान् [३]। शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मजम् ॥ ३७ ॥
वाचा मधुरया रामः सर्वं संमानयञ्जनम् । मातुः समीपं धर्मात्मा प्रविवेश महायशाः ॥ ३८ ॥
तं गुणैः समतां प्राप्तो भ्राता विपुलविक्रमः । सौमित्रिरनुवव्राज धारयन्दुःखमात्मजम् ॥ ३९ ॥
प्रविश्य वेश्मातिभृशं मुदा युतं समीक्ष्य तां चार्थविपत्तिमागताम् ।
न चैव रामोऽत्र जगाम विक्रियां सुहृज्जनस्यात्मविपत्तिशङ्कया ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०-प्रतीति । छत्रादेकं प्रतिषिध्य स्वजनादीन् विसर्जयित्वा विसर्ज्य अदुःखं देवदुःखनिवर्तकयत्नं धारयन् चिन्तयन् इन्द्रियाणि द्रष्टृणां मनआदीति निगृह्य गृहीत्वेव आत्मवान् जीवादिनियन्ता रामः मातुः कौशल्यायाः वेश्म गृहं प्रविवेश । अप्रियशंसिवान् अप्रियमेतद्गमनमिति परस्परमूचिवान् सर्वोऽप्यभिजनः श्रीमतो रामस्य आनने मुखे आकारं पित्रादिवियोगहेतुकदुःखाभासहेतुकविकृतं नालक्षयतअपश्यत् विकृतेरभावोऽस्तीति भावः। अप्रियशंसिवानित्येतद्घटकीभूताप्रियशब्दात्संबन्धसामान्यविवक्षया षष्ठी ततः षष्ठीति सूत्रेण समासः श्लोकत्रयं संमिलितान्वयि ॥ ३४-३६ ॥

गो० टी०-प्रतिषिध्येत्यादि । व्यजने वालव्यजने ॥३४॥

३५] ति० टी०-मनसा दुःखं धारयन् इन्द्रियाणि निगृह्य मनःस्थदुःखाभिव्यञ्जकचेष्टारहितानि कृत्वा आत्मवान्धीरोदात्तः मनसा दुःखं परमदुःखं दुःखलेशेनापि रहितं वनगमनजं धारयन्निन्द्रियाणि निगृह्य तस्य सुखस्य लोकदृष्ट्या राज्यभङ्गजदुःखस्य वा यथा यथाभिव्यक्तिर्न भवति तथा मध्यस्थतया स्थापयित्वात्मवान्साक्षात्कृतनित्यनिर्दुःखस्वतत्त्व इत्यप्यर्थान्तरमत्र व्यङ्ग्यं बोध्यम । दुःखमित्यस्य कैकेय्या लोकापवादजमित्यर्थ इति कश्चित् । अप्रियशंसिवानप्रियं शंसित्यन् कृछ्रार्षः ॥ ३५ ॥

गो० टी०-धारयन्निति । रामस्य परदुःखासहिष्णुत्वाद्दुःखदेन सुहृज्जनदुःखदर्शनजं दुःखमुच्यते अप्रियशंसिवान् अप्रियमभिधातुकामः कृछ्रः समासाभ्यासलोप आर्षः ॥ ३५ ॥

३६] ति० टी०-अभिजनोऽभिषेतो वर्तमानो जनः श्रीमान्रामाभिषेकप्रसङ्गेन कृतैरलंकारैः शोभावानाकारं विकृताकारं नालक्षयत असत्त्वादेवेत्यर्थः ॥ ३६ ॥

गो० टी०-सर्व इति । आकारं विकृताकारं श्रीमान् रामाभिषेकार्थं कृतालंकारः ॥ ३६ ॥

३७-३९] ति० टी०-उचितं सहजसत्त्वगुणोचितं वनगमनजशोकोचितं च । आत्मजं हर्षमात्मनि शरीरे जातं स्वाभाविकं हर्षचिह्नम् ॥ ३७-३९ ॥

रा० टी०-उचितमिति । उचितं पुत्रविहिताचरणं हर्षं च न जहौ, तत्र दृष्टान्तः आत्मजं स्वभावसिद्धं तेजश्चन्द्र इव । आत्मशब्दः स्वभाववाची ॥ ३७ ॥

गो०टी०-उचितमिति । उचितं योग्यं सहजमित्यर्थः॥३७॥

रा० टी०-वाचेति । धर्मात्मा सकलधर्मप्रवर्तकः ॥ ३८ ॥

गो० टी०-एतादृशदुर्दशायामपि रमयितृत्वरूपं रामशब्दार्थं प्रकटयति-वाचेति ॥ ३८ ॥

रा० टी०-तमिति । गुणैः अनियतस्नेहसौशील्यादिभिः समतां प्राप्तः अतिस्नेहादिमत्त्वेन रामसदृश इत्यर्थः । आत्मजमन्तःकरणे उत्पन्नं दुःखं स्वोहितवियोगजनितार्तिं धारयन् प्राप्नुवन् ॥ ३९ ॥

गो० टी०-तमिति । गुणैः सुखदुःखादिभिः समतां प्राप्तः समानदुःख इत्यर्थः ॥ ३९ ॥

४०] ति० टी०-लोकदृष्ट्यार्थविपत्तिमर्थभ्रंशं वीक्ष्यापि रामो विक्रियां न जगाम, किं तु सुहृज्जनस्य कौसल्यादशरथादिरूपस्यात्मनां प्राणानां विपत्तिशङ्कया चिन्तां जगामेति शेषः ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०-प्रविश्येति । मुदा हर्षेणोपलक्षितो रामः युतं सकलसंपत्तिविशिष्टं वेश्म कौशल्यागृहं प्रविश्य अर्थविपत्तिमर्थस्य परमपुरुषार्थस्य रामसंयोगस्येत्यर्थः । विपत्तिमभावमागतां प्राप्तामिव तां कौशल्यामतिभृशमत्यन्तं समीक्ष्य च अत्र अस्मिन्दर्शनेऽपि विक्रियां चित्तविकाराभासं न जगाम। तत्र हेतुः आत्मविपत्तिशङ्कया आत्मनां शरीरसदृशानां मात्रादीनामित्यर्थः । विपत्तिशङ्कया दुःखसंभावनया । एवशब्द इवार्थे चोऽप्यर्थे ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

गो० टी०-प्रविश्येति । अर्थविपत्तिम् अर्थनाशं सुहृज्जनस्य

१ इति गो. पाठः । २ किंचिदिति गो. रा. पाठः । ३ आत्मन इति गो. पाठः । ४ धीरात्मेति गो. पाठः । ५ अन्वितमिति गो. पाठः । ६ प्रथमश्लोकेति रा. पाठः ।

विंशः सर्गः ।

कैकेयीगृहान्निष्क्रामति रामेऽन्तःपुरजना रामगुणान्संस्तुत्य सकरुणं पर्यदेवयन् । प्राप्ताय वन्दारवे रामाय कौसल्या परिष्वज्याशिषा युयोज । रामेण निवेदितस्वगमनवृत्तान्ता शोकपर्याकुला भूमौ पपातातितरात्मदुःखोद्भावनपूर्वकं भृशं च विललाप ।

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ । आर्तशब्दो महाञ्जज्ञे स्त्रीणामन्तःपुरे तदा ॥ १ ॥
कृत्येष्वचोदितः पित्रा सर्वस्यान्तःपुरस्य च । गतिश्च शरणं चासीत्स रामोऽद्य प्रवत्स्यति ॥ २ ॥
कौसल्यायां यथा युक्तो जनन्यां वर्तते सदा । तथैव वर्ततेऽस्मासु जन्मप्रभृति राघवः ॥ ३ ॥
न क्रुध्यत्यभिशप्तोऽपि क्रोधनीयानि वर्जयन् । क्रुद्धान्प्रसादयन्सर्वान्स इतोऽद्य प्रवत्स्यति ॥ ४ ॥
अबुद्धिर्वत नो राजा जीवलोकं चरत्ययम् । यो गतिं सर्वभूतानां परित्यजति राघवम् ॥ ५ ॥
इति सर्वा महिष्यस्ता विवत्सा इव धेनवः । पतिमाचुक्रुशुश्चापि सस्वनं चापि चुक्रुशुः ॥ ६ ॥
स हि चान्तःपुरे घोरमार्तशब्दं महीपतिः । पुत्रशोकाभिसंतप्तः श्रुत्वा व्यालीयतासने ॥ ७ ॥

आत्मविपत्तिं शङ्कया प्राणनाशशङ्कया विक्रियां न जगाम स्वविक्रियास्करणे सुहृज्जनो नश्येदिति शङ्कया स्वविक्रियां राज्यनाशजां नादर्शयदित्यर्थः ॥ ४० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

१] ति० टी०– तस्मिन्निति ॥ १ ॥

रा० टी०–प्रवेशप्रकारं वर्णयन्नाह–तस्मिन्निति । पुरुषव्याघ्रे पुरुषश्रेष्ठे अनिष्क्रामति प्रविशति सति अन्तःपुरे राज्यन्तर्गृहे स्त्रीणां महानार्तशब्दो जज्ञे ॥ १ ॥

गो० टी०–तस्मिन्निति । आर्तशब्दः आर्तानां यादृशः शब्दस्तादृश इत्यर्थः ॥ १ ॥

२] ति० टी०–यः पित्राऽचोदितोऽपि सर्वस्य जनस्यान्तःपुरस्य च कृत्येषु प्रवर्तत इति शेषः । यो गतिः प्राप्यस्य वस्तुनः प्राप्तिमार्गः शरणं रक्षणम् ॥ २ ॥

रा० टी०–तच्छब्दार्थमाविष्कुर्वन्नाह–कृत्येष्विति । सर्वस्यान्तःपुरस्य कृत्येषु अभिप्रेतकार्येषु यः पित्रा अचोदितः अप्रेरितोऽपि गतिः निर्वाहकर्ता शरणं रक्षकश्चासीत् स रामः प्रवत्स्यति वनं गमिष्यति ॥ २ ॥

गो० टी०–कृत्येष्विति । अन्तःपुरस्य कृत्येषु कर्तव्येषु विषये गतिः कर्तृत्वेन प्राप्यः शरणं रक्षिता 'शरणं गृहरक्षित्रोः' इत्यमरः ॥ २ ॥

३] ति० टी०–युक्तः सेवातत्परः ॥ ३ ॥

रा० टी०–कौसल्यायामिति । कौशल्यायां जनन्यां स्वमातरि यथा आयुक्तः एकाग्रचित्तः सन कार्यकारी वर्तते तथैव अस्मास्वपि ॥ ३ ॥

गो० टी०–कौशल्यायामिति । युक्तः सावधानः वर्तते शुश्रूषते ॥ ३ ॥

४] ति० टी०–अभिशप्तोऽप्यन्येन कृतवाक्पारुष्योऽपि न कुध्यति । क्रोधनीयान्यन्यस्य क्रोधोत्पादकान्यनुकम्पया वर्जयन् । अनेन क्रोधक्रियाकर्तृत्वकर्मत्वयोः प्रतिषेधः । यत्र क्वापि क्रुद्धान्स्वयं प्रसादयन् तिष्ठतीति शेषः ॥ ४ ॥

रा० टी०–नेति । अभिशप्तः दुरुक्तोऽपि क्रोधनीयानि क्रोधकारणीभूतवचनानि वर्जयन् विस्मरन् न कुध्यति क्रुद्धानस्मान्महिषीजनान्यः प्रसादयन्सन्वर्तत इति शेषः । स रामोऽद्य प्रवत्स्यति ॥ ४ ॥

गो० टी०–न क्रुध्यतीति । यः अभिशप्तोऽपि परुषमुक्तोऽपि न कुध्यति क्रोधनीयानि क्रोधहेतुकर्माणि वर्जयन् क्रुद्धान् केवलमाग्रहेण कुपितान् प्रसादयंश्च वर्तते सः इतः अस्मादेशात्प्रवत्स्यति हन्तेति शेषः ॥ ४ ॥

५] ति० टी०–जीवलोकं सर्वप्रजारूपं चरति भक्षयति नाशयतीति यावत् ॥ ५ ॥

रा० टी०–अबुद्धिरिति । योऽयं राजा जीवलोकं चरति दिग्विजगीषया अगच्छदित्यर्थः । सर्वभूतानां गतिं राघवं रामं परित्यजति च स राजा अबुद्धिः कर्तव्यविषयकनिश्चयरहितो नो न अवश्यकर्तव्यमुद्दिश्यैव प्रेषयतीत्यर्थः । विनापि चं सम्बुद्धयः ॥ ५ ॥

गो० टी०–अबुद्धिरिति । यः सर्वभूतानां गतिं राघवं परित्यजति स नो राजा अबुद्धिः सन् लोकान् चरति भक्षयति नाशयतीत्यर्थः चरगतिभक्षणयोरिति धातुः॥ ५ ॥

६] ति० टी०–पतिमाचुक्रुशुर्निनिन्दुः । सस्वनं चुक्रुशुः रुरुदुः ॥ ६ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण विवत्सा धेनव इव विद्यमानाः सर्वा महिष्यः सस्वरं शब्दं कुर्वन्तं जनमित्यर्थः। आचुक्रुशुः निनिन्दुः पतिं राजानं चुक्रुशुः । हे पते ! भवद्विचारितं नास्मद्विद्वेषिषय इत्यचारयामाहुरित्यर्थः ॥ ६ ॥

गो० टी०–इतीति । आचुक्रुशुः निन्दति स्म । चक्रुशुः रुरुदुः ॥ ६ ॥

७] ति० टी०–व्यालीयत देहमवगुण्ठ्यावाङ्मुखो विलीन इवाभूदित्यर्थः ॥ ७ ॥

१ यश्चापीति गो. पाठः । २ लोकानामिति गो. पाठः । ३ एवेति गो. पाठः । ४ सस्वरमिति गो. रा. पाठः ।

रामस्तु भृशमायस्तो निःश्वसन्निव कुञ्जरः । जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥ ८ ॥
सोऽपश्यत्पुरुषं तत्र वृद्धं परमपूजितम् । उपविष्टं गृहद्वारि तिष्ठतश्चापरान्बहून् ॥ ९ ॥
दृष्ट्वैव तु तदा रामं ते सर्वे समुपस्थिताः । जयेन जयतां श्रेष्ठं वर्धयन्ति स्म राघवम् ॥ १० ॥
प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः । ब्राह्मणान्वेदसंपन्नान्वृद्धान्राज्ञाभिसत्कृतान् ॥ ११ ॥
प्रणम्य रामस्तान्वृद्धांस्तृतीयायां ददर्श सः । स्त्रियो बालाश्च वृद्धाश्च द्वाररक्षणतत्पराः ॥ १२ ॥
वर्धयित्वा प्रहृष्टास्ताः प्रविश्य च गृहं स्त्रियः । न्यवेदयन्त त्वरितं राममातुः प्रियं तदा ॥ १३ ॥
कौसल्यापि तदा देवी रात्रिं स्थित्वा समाहिता । प्रभाते चाकरोत्पूजां विष्णोः पुत्रहितैषिणी ॥ १४ ॥
सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा । अग्निं जुहोति स्म तदा मन्त्रवत्कृतमङ्गला ॥ १५ ॥
प्रविश्य तु तदा रामो मातुरन्तःपुरं शुभम् । ददर्श मातरं तत्र हावयन्तीं हुताशनम् ॥ १६ ॥

रा० टी०—स इति । महीपतिः स दशरथः अन्तःपुरे घोरं श्रवणानर्हमार्तशब्दं कारुण्यसंपादकस्वनं श्रुत्वा आसने व्यालीयत वक्षेण स्वशरीरमाच्छादयावाङ्मुखोऽतिष्ठदित्यर्थः ॥७॥

गो० टी०—स इति । व्यालीयत लज्जादुःखभरेण शय्यायां विलीनोऽभूदित्यर्थः ॥ ७ ॥

८] ति० टी०—आयस्तः स्वजनदुःखतः प्राप्तखेदः कुञ्जर इव निःश्वसन् । ' आयत्तः ' इति पाठे आयत्तः पराधीनो यः कुञ्जरः स यथा निःश्वसिति तद्वदित्यर्थः ॥ ८ ॥

रा० टी०—राम इति । रामस्तु भृशमत्यन्तमायस्तः आसमन्ताद्भावेन एः कामस्य स्वेशितस्येत्यर्थः । अः प्राप्तिस्तस्माद्भावकिबन्तगत्यर्थकासधातोरूपम इति । अनिःश्वसन् क्रोधादिरहित इत्यर्थः । कुञ्जरो गज इव मातुरन्तःपुरं जगाम प्राप ॥८॥

गो० टी०—राम इति । भृशमायस्तः व्यसनेषु मनुष्याणां भृशं भवति दुःखित इत्युक्तगुणवत्तयान्तःपुरार्तस्वनभवणेनातिशयेन संजातदुःखः निःश्वसन्निव कुञ्जरः परदुःखस्यापरिहार्यतां मत्वा गुप्तदुःखः सन् कुञ्जर इव निःश्वसन्नित्यर्थः । वशी-स्वायत्तीकृतेन्द्रियः ॥ ८ ॥

९] ति० टी०—पुरुषं द्वाराध्यक्षम् ॥ ९ ॥

रा० टी०—स इति । तत्र अन्तःपुरद्वारे उपविष्टं स्थितिमन्तं परमपूजितमतिसत्कृतं वृद्धं ज्ञानवयोभ्यामधिकं पुरुषं द्वारपालमुख्यं गृहद्वारि तिष्ठतः अपरांश्च द्वारपालानपश्यत् ॥९॥

गो० टी०—स इति । पुरुषं द्वारपालाध्यक्षम् ॥ ९ ॥

१०—११] ति० टी०—जयेन विजयी भवेति शब्देनेत्यर्थः । ' जयेति ' इति पाठे जयेति शब्देनेत्यर्थः ॥१०॥११॥

रा० टी०—दृष्ट्वेति । सङ्गपस्थिताः समीपं प्राप्ताः सर्वे जयतां श्रेष्ठं विजयिमुख्यं रामं जयेन जयशब्देन वर्धयन्ति स्म राघवस्य जयः स्यादित्यन्तमुच्चारयन्ति स्मेत्यर्थः । ' जय ' इति पाठे त्वं जय सर्वोत्कर्षेण वर्तस्व इति वर्धयन्ति स्तुवन्ति स्मेत्यर्थः ॥ १० ॥

रा० टी०—प्रविश्येति । प्रथमां कक्ष्यां द्वारं प्रविश्य अतिक्रम्येत्यर्थः ॥ ११ ॥

गो०टी०—दृष्ट्वेति । जयेन विजयस्वेति जयाशिषा ॥१०-१२॥

१२] ति० टी०—स रामस्तृणीकृतराज्यो रामः ॥ १२ ॥

रा० टी०—प्रणम्येति । तान्द्वितीयाकक्ष्यास्थितान् प्रणम्य तृतीयायां क्ष्यादीन्ददर्श ॥ १२ ॥

१३-१४] ति० टी०—वर्धयित्वा । जयशब्देनेत्यर्थः । प्रियं रामागमनम् ॥ १३ ॥ १४ ॥

रा० टी०—वर्धयित्वेति । प्रहृष्टाः रामदर्शनेनातिहर्षं प्राप्ताः ताः द्वाररक्षणतत्पराः स्त्रियः वर्धयित्वा तवासित्यद्धिकालः प्राप्त इत्युक्त्या राममातुः प्रियमत्यन्तं प्रीतिविषयीभूतं रामागमनमित्यर्थः । न्यवेदयन्त तस्यै एवेति प्रत्यासत्तिन्यायलभ्यम् ॥ १३ ॥

गो०टी०—वर्धयित्वेति । वर्धयित्वा जयाशिषेति शेषः ॥१३॥

रा० टी०—निवेदनकालं बोधयन्नाह—कौशल्येत्यादि । पुत्रहितैषिणी कौशल्या विष्णोः सूर्यस्य पूजामकरोत् । रामस्य सूर्यमण्डलमध्यस्थत्वेन स्वकुलमूलपुरुषत्वेन चातिश्लेषात्तत्पूजायां प्रवृत्तिरिति सूचितम् ॥ १४ ॥

गो० टी०—कौसल्येति । रात्रिं रात्रौ " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया । समाहिता नियमयुक्ता ॥ १४ ॥

१५] ति० टी०—अग्निमग्निहोत्रं मन्त्रवज्जुहोति स्म । ज्येष्ठपत्नीत्वादृत्विजेति शेषः ॥ १५ ॥

रा० टी०—क्षेति । क्षौमवसना क्षुमाया अतस्याः विकारः क्षौमं तद्वसनं यस्याः सा मन्त्रवत् मन्त्रविशिष्टं यथा स्यात्तथा अग्निं जुहोति स्म ॥ १५ ॥

गो० टी०—क्षेति । जुहोति हावयति अत एव हावयन्तीमिति वक्ष्यति ब्राह्मणैरिति शेषः ॥ १५ ॥

१६] ति० टी०—तदाह—हावयन्तीमिति ॥ १६ ॥

रा० टी०—प्रविश्येति । शुभं मातुरन्तःपुरं प्रविश्य हावयन्तीं ब्राह्मणैरिति शेषः । मातरं ददर्श एतदनुरोधेन पूर्वत्र जुहोतीत्यस्य हावयन्तीत्यर्थः अत्रैव स्वार्थे णिज्वा ॥ १६ ॥

१ सङ्गतेत्यर्थः इति गो. पाठः । २ त्वरिता इति गो. पाठः । ३ त्विति गो. पाठः । ४ चेति गो. पाठः ।

देवकार्यनिमित्तं च तत्रापश्यत्समुद्यतम् । दैध्यक्षतघृतं[1] चैव मोदकान्हविषस्तथा ॥ १७ ॥
लाजान्माल्यानि शुक्लानि पायसं कृसरं तथा । समिधः पूर्णकुम्भांश्च ददर्श रघुनन्दनः ॥ १८ ॥
तां शुक्लक्षौमसंवीतां व्रतयोगेन कर्शिताम् । तर्पयन्तीं ददर्शाद्भिर्देवतां वरवर्णिनीम्[2] ॥ १९ ॥
सा चिरस्यात्मजं दृष्ट्वा मातृनन्दनमागतम् । अभिचक्राम[3] संहृष्टा किशोरं वडवा यथा ॥ २० ॥
स मातरमुपक्रान्तामुपसंगृह्य[4] राघवः । परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्धनि[5] ॥ २१ ॥
तमुवाच दुराधर्षं राघवं सुतमात्मनः । कौसल्या पुत्रवात्सल्यादिदं प्रियहितं वचः ॥ २२ ॥
वृद्धानां धर्मशीलानां राजर्षीणां महात्मनाम् । प्राप्नुह्यायुश्च कीर्तिं च धर्मं चोप्युचितं[6] कुले ॥ २३ ॥
सत्यप्रतिज्ञं पितरं राजानं पश्य राघव । अद्यैव त्वां स धर्मात्मा यौवराज्येऽभिषेक्ष्यति[7] ॥ २४ ॥
दत्तमासनमालभ्य भोजनेन निमन्त्रितः । मातरं राघवः किंचित्पर्यासार्याञ्जलिमब्रवीत् ॥ २५ ॥

गो० टी०–प्रविश्येत्यादि । देवकार्यनिमित्तमिति द्रव्यजातमिति शेषः ॥ १६ ॥

१७] ति० टी०–हविषो हवींषि ॥ १७ ॥

रा० टी०–देवेति । देवकार्यनिमित्तं देवकार्यार्थं समुद्यतं प्राप्तं दध्यादि ददर्श । श्लोकद्वयमेकान्वयि तत्र हविष इत्यत्र लिङ्व्यत्यय आर्षः । कृसरं द्विदलमिश्रतण्डुलम् ॥ १७ ॥ १८ ॥

गो० टी०–दधीत्यादि । हविषः हवींषि ॥ १७ ॥

१८] ति० टी०–कृसरं तिलमुद्गतण्डुलौदनम् ॥ १८ ॥

गो० टी०–लाजानिति । कृसरं तिलौदनं दध्यक्षतेत्यारभ्य वाक्यान्तरम् अतो न क्रियाद्वयविरोध पूर्वं देवकार्यनिमित्तमिति द्रव्याणि सामान्येनोक्तानि अथ विशेषेणेति विवेकः॥ १८॥

१९] ति० टी०–व्रतयोगेन पुत्राभ्युदयकामनया तद्वदेवोपवासव्रतयोगेनेत्यर्थः । देवतां तर्पयन्तीं वरवर्णिनीं तां ददर्शेत्यन्वयः ॥ १९ ॥

रा० टी०–तामिति । अद्भिर्जलैः देवतां तर्पयन्तीं वरवर्णिनीमुत्तमवर्णविशिष्टां गौराङ्गीमित्यर्थः, ददर्श ॥ १९ ॥

गो० टी०–तामिति । तर्पयन्तीं प्रीणयन्तीम् ॥ १९ ॥

२०] ति० टी०–अभिचक्रामाभिमुखं जगाम । किशोरोऽश्वबालकः ॥ २० ॥

रा० टी०–सेति । चिरस्य बहुकालमात्मजं दृष्ट्वा संहृष्टा सती अभिचक्राम प्रत्युज्जगाम । तत्र दृष्टान्तः किशोरमश्वबालं वडवा अश्वत्वजातिविशिष्टा स्त्री वा किंच अवगतः प्रादुर्भूतः रवः हे पुत्रागच्छेत्यादिः शब्दो यस्याः सा यथावदभिचकाम । भागुरिमतेनावाकारलोपः रवयोरैक्याद्रेफस्य लकारः डलयोरैक्याद्वस्य डः ॥ २० ॥

गो० टी०–सेति । अभिचक्राम अभिमुखं जगाम किशोरम् अश्वबालकं वडवा अश्वस्त्री ॥ २० ॥

२१-२२] ति० टी०–उपसंगृह्याभिवाय स्थितस्तया परिष्वक्त इत्यन्वयः ॥ २१ ॥ २२ ॥

रा० टी०–स इति । उपक्रान्तां स्वसमीपमागतां मातरमुपसंगृह्य कराभ्यां कण्ठे गृहीत्वा यो राघवोऽतिष्ठदिति शेषः । सः बाहुभ्यां परिष्वक्तः मूर्धनि अवघ्रातश्च मात्रेति शेषः ॥ २१ ॥

रा० टी०–तमिति । प्रियहितं प्रियत्वसमानाधिकरणहितत्वविशिष्टमुवाच ॥ २२ ॥

गो० टी०–स इति । उपसंगृह्यः अभिवाय स्थित इति शेषः ॥ २१ ॥ २२ ॥

२३] ति० टी०–कुले उचितं कुलस्योचितमिति यावत् २३

रा० टी०–तद्वचनमेवाह–वृद्धानामिति द्वाभ्याम । वृद्धानां ज्ञानवयोभ्यामधिकानां राजर्षीणामायुः आयुस्तुल्यमायुः प्राप्नुहि आयुश्शब्दः स्वसदृशे लाक्षणिकः मुख्यस्येहासंभवात् । कीर्तिधर्मयोरप्येवैव गतिः एकचकारस्येवार्थकत्वे तु मुख्यत्वेऽपि न क्षतिः ॥ २३ ॥

गो०टी०–वृद्धानामिति । धर्मं चोपहितं कुले इति पाठः२३

२४] ति० टी०–राजानं पश्य गत्वेति शेषः । कौसल्याया राजगृहगमनादिव्यापारापरिज्ञानादेवमुक्तिः ॥ २४ ॥

रा० टी०–सत्येति । पितरं सत्यप्रतिज्ञं पश्य जानीहि अत एव स राजा त्वामद्यैवाभिषेक्ष्यति किंच यः स धर्मात्मा धर्मेण सहितः आत्मा प्रयत्नो यस्य धर्मनिष्पादकप्रयत्नवानित्यर्थः राजा त्वां यौवराज्येऽभिषेक्ष्यति त्वत्कर्मकयौवराज्यसंपादकाभिषेकानुकूलव्यापारं करोति तं राजानं त्वं सत्यप्रतिज्ञं पश्य जानीहि दृष्टिर्ज्ञानसामान्ये लडुपात्तभविष्यत्कालस्याविवक्षा॥ २४॥

गो० टी०–सत्यप्रतिज्ञमिति । अभिषेक्ष्यतीत्यत्र हेतुः इदानीमप्यभिषेको नारब्ध इति नाशङ्कनीयमिति भावः । पश्य जानीहि ॥ २४ ॥

२५] ति० टी०–अत्रोपविश्य भुक्त्वा राजानं द्रष्टुं गच्छेति भोजनेन फलेन निमन्त्रितो राघवः केवलमासनमालभ्य स्पृष्ट्वा न तूपविष्टो व्रीडया किंचिदञ्जलिं प्रसार्यावाङ्मुख एवाब्रवीत् । ' प्रसार्याञ्जलिः ' इति पाठे प्रकर्षेण सत्राञ्जलिर्विशीर्णाञ्जलिरित्यर्थ इति कश्चित् । मातः प्रसादनयोग्याञ्जलिरित्यर्थ उचितः । किंचिदित्यस्य चावाङ्मुख इति शेषः ॥ २५ ॥

---

१ दध्यक्षतं घृतमिति गो. पाठः । २ देववर्णिनीमिति गो.पाठः । ३ अभीति गो.पाठः । ४ उपाघ्रात इति गो. पाठः । ५ चोपहितमिति गो. पाठः । ६ हि त्वामिति गो. पाठः । ७ व्रीडात्प्राञ्जलिरिति गो. पाठः ।

स स्वभावविनीतश्च गौरवाच्च तथानतः । प्रस्थितो दण्डकारण्यमाप्रष्टुमुपचक्रमे ॥ २६ ॥
देवि नूनं न जानीषे महद्भयमुपस्थितम् । इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च ॥ २७ ॥
गमिष्ये दण्डकारण्यं किमनेनासनेन मे । विष्टरासनयोग्यो हि कालोऽयं मामुपस्थितः ॥ २८ ॥
चतुर्दश हि वर्षाणि वत्स्यामि विजने वने । कैन्दमूलफलैर्जीवन्हित्वा मुनिवदामिषम् ॥ २९ ॥
भरताय महाराजो यौवराज्यं प्रयच्छति । मां पुनर्दण्डकारण्यं विवासयति तापसम् ॥ ३० ॥
स षट् चाष्टौ च वर्षाणि वत्स्यामि विजने वने । आसेवमानो वन्यानि फलमूलैश्च वर्तयन् ॥ ३१ ॥

२६] ति० टी०—गौरवाच्च मातृत्वप्रयुक्तगौरवाच्च आनतः सन्प्रस्थितः प्रस्थातुमुपक्रान्त आप्रष्टुमनुज्ञां कारयितुमुपचक्रमे ॥ २६ ॥

रा० टी०—कौसल्योक्तिं संवर्ण्य रामोक्तिं वर्णयितुमुपक्रमते—दत्तमिति । अञ्जलिं प्रसार्य आसनग्रहणार्थं हस्तमुत्थाप्येत्यर्थः दत्तं मात्रा समर्पितमासनमालभ्य प्रसारिताञ्जलिना गृहीत्वा भोजनेन भोजनार्थं निमन्त्रितः मात्रेति शेषः गौरवात्सर्वश्रेष्ठत्वादानतः सर्वैर्नमस्कृतः स्वभावविनीतः स्वभावतो नम्रः दण्डकारण्यं प्रस्थितो राघवः आप्रष्टुं गमनायाज्ञां ग्रहीतुमुपचक्रमे अत एव मातरं किंचिदब्रवीत् । 'प्रसार्याञ्जलिः' इति पाठे प्रकर्षेण संनाञ्जलिः विशीर्णाञ्जलिरित्यर्थः इति कश्चित् मातुः प्रसादनयोग्याञ्जलिरित्यर्थः उचित इति भट्टाः 'व्रीडाञ्जलिः' इति भूषणपाठः । श्लोकद्वयमेकान्वयि ॥ २९ ॥ २६ ॥

गो० टी०—दत्तमित्यादिश्लोकद्वयमेकान्वयम् । स राघवः भोजनेन निमन्त्रितः सन् दत्तमासनमालभ्य स्पृष्ट्वा दण्डकारण्यं प्रस्थितोऽहम् आप्रष्टुं गमनं निमन्त्रयितुम् उपचक्रमे उद्योगमकार्षमिति मातरमब्रवीदिति संबन्धः, यद्वा दत्तमिति भोजनेन निमन्त्रितः भोजनार्थं निमन्त्रितः भोजनार्थं दत्तमासनमालभ्य तिष्ठन् दत्तासने उपवेशनाभावेऽपि स्पर्शमात्रं कार्यमित्यागमात् किंचिद्व्रीडात् एवं ब्रुवन्त्यै मात्रे कथं मया प्रस्थानं कथनीयमिति लज्जया अब्रवीत् । किमर्थमासनमुपलभ्य नोपविष्टवानित्यत्राह—स इति । गौरवात् मातरि बहुमानात् प्रस्थितः प्रस्थातुमुद्यतः आप्रष्टुम् अनुज्ञां कारयितुमुपचक्रमे उपक्रान्तवान् ॥ २९ ॥ २६ ॥

२७] ति० टी०—तव च तवैवाज्ञत्वात् । लोकदृष्ट्याह—वैदेह्या इत्यादि ॥ २७ ॥

रा० टी०—तद्वचनमेवाह—देवीति । हे देवि ! उपस्थितं प्राप्तं महद्भयं राक्षसहेतुकदण्डकारण्यस्थऋषिमहाभीतिं त्वं जानीषे अतः दण्डकारण्यमहं गमिष्ये अतः इदं मत्कर्तृकदण्डकारण्यगमनं तव वैदेह्याश्च लक्ष्मणस्य च दुःखाय न भवतु इति शेषः । अतः विष्टरासनयोग्यः पञ्चविंशतिसंख्याकदर्भनिर्मितासनविशेषार्हः तादृशासनप्रापक इत्यर्थः अयं कालः मामुपस्थितः प्राप्तः अतः अनेन आसनेन मे किं न किंचिदित्यर्थः । श्लोकद्वयमेकान्वयि । 'पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरः' इति स्मृतिः ॥ २७ ॥ २८ ॥

गो० टी०—अब्रवीदित्युक्तमाह—देवीत्यादि । भयं तवेति शेषः इदं वक्ष्यमाणं वचनं दुःखाय तथापि वक्ष्यामीत्यर्थः ॥२७॥

२८] ति० टी०—विष्टरस्तपस्विनामासनविशेषः 'पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरः' इत्युक्तेः ॥ २८ ॥

गो० टी०—इदंशब्दार्थमाह—गमिष्य इति । अनेन रत्नमयेन । विष्टरेत्यादि विष्टरो नाम पञ्चविंशतिदर्भनिर्मितस्तापसासनविशेषः 'पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरः' इति स्मृतेः ॥ २८ ॥

२९-३०] ति० टी०—मुनिवदामिषं सूदैर्विशिष्टसंस्कारसंस्कृतं मांसम् । तेन 'इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना' इति वक्ष्यमाणेन न विरोधः तस्य शुद्धमांसपरत्वात् मुनिवदित्युक्त्या भक्षीयादिमांसपरत्वाच्च ॥ २९ ॥ ३० ॥

रा० टी०—वनवासावधिं बोधयन्नाह—चतुर्दशेति । विजने विशिष्टजनसहिते वने मुनिवद्वत्स्यामि आमिषं राजभोग्यं वस्तु हित्वा त्यक्त्वा 'आकर्षणेऽपि पुंसि स्यादामिषं पुंनपुंसकम् । भोग्यवस्तुनि संभोगेऽप्युत्कोचे पललेऽपि च' इति मेदिनी । 'तां तदा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम् । निषण्णां तां गिरिप्रस्थे सीतां मांसेन छन्दयन् ॥ इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना । एवमास्ते स धर्मात्मा सीतया सह राघवः' इतिपद्यघटकीभूतमांसशब्दार्थस्तु मांसेन मुनिभोग्यफलादिना छन्दयन् लालयन् । लालनप्रकारमाह—इदमित्यादिना । तथा च मेदिनी 'मांसं स्यादामिषे क्लीबम्' इति । तत्रामिषशब्दः भोग्यवस्त्वर्थकः पूर्वोदाहृतकोशात् ॥ २९ ॥

गो० टी०—चतुर्दशेति । मुनिवत् वत्स्यामीति संबन्धः । अत्रामिषशब्देन सूदैः संस्कृतं मांसमुच्यते केवलं मांसस्वीकारस्यौत्तरत्र वक्ष्यमाणत्वात् 'इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना' इति ॥ २९ ॥

रा० टी०—नन्वेवं तव स्वातन्त्र्येण गमनमनुचितमित्यत आह—भरतायेति । महाराजः यौवराज्यं युवराजोचितं प्रजापालनमित्यर्थः । तापसमनेकविधतपस्विविशिष्टं दण्डकारण्यं विवासयति प्रेषयतीत्यर्थः ॥ ३० ॥

गो० टी०—कुत एवमित्यत्राह—भरतायेति ॥ ३० ॥

३१] ति० टी०—वन्यानि वानप्रस्थयोग्यकर्माण्यासेवमान आचरन्, यद्वा वन्यानि वल्कलानि दधानः । वर्तयञ्जीवयन् ३१॥

१ तदेति गो. पाठः । २ मध्यिति गो. पाठः । ३ देवीत्यादि इति गो. पाठः । ४ वनमे इति मुद्रणेऽपि भाति ।

सानिकृत्तेव सालस्य यष्टिः परशुना वने । पपात सहसा देवी देवतेव दिवश्च्युता ॥ ३२ ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव । रामस्तूत्थापयामास मातरं गतचेतसम् ॥ ३३ ॥
उपावृत्त्योत्थितां दीनां वडवामिव वाहिताम् । पांसुगुण्ठितसर्वाङ्गीं विममर्श च पाणिना ॥ ३४ ॥
सा राघवमुपासीनमसुखार्ता सुखोचिता । उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥ ३५ ॥
यदि पुत्र न जायेथा मम शोकाय राघव । न स्म दुःखमतो भूयः पश्येयमहमप्रजाः ॥ ३६ ॥
एक एव हि वन्ध्यायाः शोको भवति मानसः । अप्रजास्मीति संतापो नह्यन्यः पुत्र विद्यते ॥ ३७ ॥
न दृष्टपूर्वं कल्याणं सुखं वा पतिपौरुषे । अपि पुत्रे [2]विपश्येयमिति [3]रामास्थितं मया ॥ ३८ ॥

रा० टी०—वक्ष्यमाणकौशल्यापतनहेतुत्वेनोक्तमर्थं पुनराह—स इति । षट् अष्टौ वर्षाणि वन्यानि सुखानि आसेवमानः सोऽहं वत्स्यामि इति रामोक्तं श्रुत्वेति शेषः । परशुना निकृत्ता छिन्ना शालस्य वृक्षविशेषस्य यष्टिरिव दिवश्च्युता देवतेव सा देवी कौशल्या पपात । श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

गो० टी०—स इति । सोऽहमित्यर्थः । लघुत्वप्रदर्शनाय षट् चाष्टौ चेत्युक्तं चतुर्दशेत्युक्ते हि गौरवं गम्यते । वन्यानि वनसंबन्धीनि वानप्रस्थयोग्यकर्माणीति यावत् । आसेवमानः आचरन् वर्तयन् जीवनं कुर्वन् ॥ ३१ ॥

३२-३३] ति० टी०—यष्टिः शाखा ॥ ३२ ॥ ३३ ॥

गो० टी०—सेति । सा पुत्रोक्तं श्रुतवती सालस्य वृक्षस्य अनोकहः कुटः साल' इत्यमरः । परशुनेति हठाच्छेदनशापनाय नगरे तथा छेदनाभावात् वन इत्युक्तम् ॥ ३२ ॥

रा० टी०—तामिति । गतचेतसं श्रुतवियोगजनितदुःखेन तिरोहितचैतन्यां मातरमुत्थापयामास ॥ ३३ ॥

गो० टी०—तामिति । गतचेतसं मूर्छिताम् ॥ ३३ ॥

३४] ति० टी०—वाहितां पूर्वं वाहितभारां ततः श्रमनिवृत्तय उपावृत्य भुवि लुण्ठनं कृत्वोत्थितां वडवामिव ॥ ३४ ॥

रा० टी०—उपेति । वाहितामभिषेकविषयकप्रयत्नकर्त्रीं-वडवामवगतः प्रादुर्भूतः हे पुत्र ! इत्यादिशब्दो यस्याः तां पांसुगुण्ठितसर्वाङ्गीं धूलीव्याप्तशरीरामुपावृत्य कराभ्यां गृहीत्वैव उत्थितामुत्थापितां तां पाणिना विममर्श परिममार्ज अन्तर्भावितणिजर्थस्तिष्ठतिः । इवशब्द एवार्थे ॥ ३४ ॥

गो० टी०—उपावृत्येति । उपावृत्योत्थितां श्रमनिवृत्यर्थ भुवि वेष्टनं कृत्वोत्थितां वाहितां भारवाहनं प्रापिताम् ॥ ३४ ॥

३५] ति० टी०—असुखेन सुखनाशेनार्ता । उपासीनं समीपे स्थितम् ॥ ३५ ॥

रा० टी०—सेति । उपासीनं त्वां सेवमानं राघवमसुखार्ता असुखेन सुखविरोधिना दुःखेनेत्यर्थः आर्ता व्याप्ता सा कौशल्या उवाच ॥ ३५ ॥

गो० टी०—सेति । असुखार्ता दुःखार्ता ॥ ३५ ॥

३६] ति० टी०—अप्रजा वन्ध्या । अतो वन्ध्यात्वात् भूयो वन्ध्याधिकं पुत्रवियोगदुःखं न पश्येयम् ॥ ३६ ॥

रा० टी०—तद्वचनमेवाह—यदीति । हे पुत्र ! मम शोकाय शोकमपनेतुं यदि त्वं न जायेथाः अजायथास्तदा एवं दुःखं न पश्येयमपश्यमतः वियोगात्तु भूयोऽधिकं दुःखं पश्येयम् । स्मशब्द एवमर्थे ॥ ३६ ॥

गो० टी०—यदीति । हे पुत्र ! त्वं यदि न जायेथा अतः अजननात् भूयः अतिशयितं दुःखम् इष्टपुत्रविश्लेषजं न पश्येयम् अप्रजाः वन्ध्या ॥ ३६ ॥

३७] ति० टी०—वन्ध्यात्वदुःखमितः सुखहमित्याह—एक एवेति । अप्रजास्मीति मानसशोकाभिनयः । समासान्ताभावोऽनित्यत्वात् संधिर्वार्षत्वात् ॥ ३७ ॥

रा० टी०—पूर्वदुःखस्याल्पत्वे हेतुं वदन्ती आह—एकेति । वन्ध्यायाः पुत्ररहितायाः अहमप्रजा पुत्ररहिताऽस्मीति मानसः एक एव शोको भवति अन्यः पुत्रदुःखादिनिमित्तः संतापो न विद्यते । एतेन पुत्रवियोगे वियोगजनितदुःखं पुत्रदुःखादिश्रवणजनितदुःखं चास्तीति दुःखाधिक्यं सूचितम् ॥ ३७ ॥

गो० टी०—इदमेवोपपादयति—एक इति । अन्यः विश्लेषजः भूलुण्ठनादिः कायिकश्च अप्रजास्मीत्यासिजभाव आर्षः ॥ ३७ ॥

३८] ति० टी०—स्वस्य सदा दुःखित्वमिति शोचति—नेति । पत्युः पौरुषमद्भुरागकृतं रक्षनं तस्मिन्यत्प्राप्यं कल्याणं प्रशस्तवस्त्राभरणादिजसौभाग्याधिक्यं सुखं वा पतिसंभोगजम् तन्मया न दृष्टपूर्वम् । अपीति लोकोक्तौ । पुत्रे जाते तदुभयमुत्कृकल्याणं पुत्रदर्शनजं सुखं च पश्येयमित्याशया राम मया स्थितं जीवनं स्थापितम् ॥ ३८ ॥

रा० टी०—त्वच्चिकीर्षितस्य सिद्धिर्भवितैवेत्याह—नेति । हे राम ! पतिपौरुषे पतिकर्तृकादिग्विजयादावित्यर्थः यत्कल्याणं श्रोतॄणां कल्याणसंपादकं सुखं न दृष्टं पूर्वं नानुभूतमित्यर्थः तदपि कल्याणं सुखं पुत्रे त्वयि वनस्थे सत्यपीति शेषः । विपश्येयमनुभवितास्मीत्यर्थः इति मया स्थितं निश्चितम् । एतेन त्वत्कर्तृकविजयेऽस्माकं संशयो नास्तीति सूचितम् ॥ ३८ ॥

१ कुण्ठितेति गो. पाठः । २ त्विति गो. पाठः । ३ राम स्थितमिति गो. रा. पाठः ।

सा बहून्यमनोज्ञानि वाक्यानि हृदयच्छिदाम् । अहं श्रोष्ये सपत्नीनामवराणां परा सती ॥ ३९ ॥
अतो दुःखतरं किं नु प्रमदानां भविष्यति । मम शोको विलापश्च यादृशोऽयमनन्तकः ॥ ४० ॥
त्वयि संनिहितेऽप्येवमहमासं निराकृता । किं पुनः प्रोषिते तात ध्रुवं मरणमेव हि[2] ॥ ४१ ॥
अत्यन्तं निगृहीतास्मि भर्तुर्नित्यमसंमता । परिवारेण कैकेय्याः समा वाप्यथवावरा ॥ ४२ ॥
यो हि मां सेवते कश्चिद्यदि वाप्यनुवर्तते । कैकेय्याः पुत्रमन्वीक्ष्य स जनो नाभिभाषते ॥ ४३ ॥
नित्यक्रोधतया तस्याः कथं नु खरवादिनम्[3] । कैकेय्या वदनं द्रष्टुं पुत्र शक्ष्यामि दुर्गता ॥ ४४ ॥

गो० टी०–नेति । पतिपौरुषे सत्यपि कल्याणं ज्येष्ठपत्नीत्वोचितग्रामाभरणादैश्वर्यरूपं शुभं सुखं वा भर्तृसंमाननादिजनितसौख्यं वा अपि पुत्र इति अपिसंभावनायां पुत्रे सति तद्बलात् पश्येयमिति मया स्थितमित्यर्थः ॥ ३८ ॥

३९] ति० टी०–साहमवराणां कनिष्ठानां सपत्नीनां त्वद्बलादिदानीं परा सती हृदयच्छिदां हृदयविदारिकाणां तासाममनोज्ञानि वाक्यान्येवं जीर्णापि श्रोष्ये ॥ ३९ ॥

रा० टी०–त्वत्कर्तृकविजयकालात्पूर्वं ममातीव दुःखमित्याह–सेति । सा अभिषेकोचितप्रेषितपुत्रा अहममनोज्ञानि अप्रियाणि हृदयच्छिदामस्मत्सपत्नीदर्शनेन विदीर्णहृदयानामवराणामैश्वर्यादितो न्यूनानां सपत्नीनां शत्रुस्त्रीणां बहूनि वाक्यानि अस्मद्वाग्यवत्तादानिसूचकवचनानि श्रोष्ये श्रोतास्मि ॥ ३९ ॥

गो० टी०–भूतदुःखमुक्त्वा भविष्यदुःखमाह–सेति । सा एवं सुखमनुभवमाना बहुनीत्युक्तेः पूर्वमपि स्वल्पानि सन्तीति गम्यते । अमनोज्ञानि परुषाणि परुषाणीत्युक्ते मनोज्ञमिश्रत्वमपि प्रतीयेत वाक्यानि नतु सूचकपदानि हृदयच्छिदां भर्तृहृदयवैकल्यकारिणीनाम् अवराणां स्वेनैव तथा वक्तुमुचितानां सपत्नीनां नतु स्वाधीनानां वरा सती स्वस्याप्यवरत्वे न किंचिदुःखमिति भावः । क्रोधेन सपत्नीनामिति बहुवचनोक्तिः । तत्र हठात्स्वगृहं मा गच्छेत्युक्तिः कोपेन भर्तृसकाशात् निर्याहीत्युक्तिः अपुत्रायाः किमुत्सवेनेत्येवमादीनि सपत्नीवाक्यानि बोध्यानि ॥ ३९ ॥

४०] ति० टी०–अतः सपत्नीधिक्कारवाक्यश्रवणजात्परं दुःखं क्वीणां नास्ति । ममायमनन्तकोऽपारः शोको यादृशस्तादृशो वाचापि वक्तुमशक्य इति शेषः ॥ ४० ॥

रा० टी०–अत इति । अतः एवं दुरुक्तश्रवणादुःखतरं प्रमदानामस्माकं किंतु भविष्यति न भविष्यतीत्यर्थः। अतः यादृशः अयं त्वद्वियोगजनितः शोको विलापश्च तादृशः अनन्तकः त्वद्विजयात्पूर्वकाले अविनाशी भविष्यति । भविष्यतीत्युभयान्वयि ॥ ४० ॥

गो० टी०–अत इति । अतः सपत्नीवाक्यश्रवणजादुःखात् प्रमदानां किं नु दुःखतरं तस्मान्मम शोको विलापश्च यादृशः इयत्तया वक्तुमशक्यः अनन्तकः दुष्पारः ॥ ४० ॥

४१] ति० टी०–निराकृता सपत्न्येति शेषः । ध्रुवम् प्राप्तमिति शेषः । शोकग्रस्तत्वान्न्यूनपदता न दोषः ॥ ४१ ॥

रा० टी०–त्वयीति । हे तात ! संनिहितेऽपि त्वयि अहं निराकृता भविष्यत्त्वद्वियोगश्रवणेन विभिन्नचित्ता आसमभवम् । अतः त्वयि प्रोषिते मरणमिव दुःखं स्यादिति किं वक्तव्यम्। एव इवार्थे ॥ ४१ ॥

गो० टी०–उक्तं दुःखं निदर्शयति–त्वयीति । बलवति त्वयि संनिहितेऽपि एवं भवदनुभूतप्रकारेण निराकृता त्वयि प्रोषिते किं पुनः अतो मे मरणं ध्रुवमिति योजना ॥ ४१ ॥

४२] ति० टी०–निगृहीता भर्तृकृतनिग्रहप्रकारमाह–परिवारेणेति । कैकेय्या दासीजनेन समा अथवावरा ततोऽपि निकृष्टा कृतास्मीति शेषः । '–प्यधरा वरा' इति पाठे वरा श्रेष्ठाप्यधरा निकृष्टा कृतास्मीत्यर्थः ॥ ४२ ॥

रा० टी०–अत्यन्तेति । भर्तुः परिवारेण परिवारसदृशेन सुमन्त्रेणेत्यर्थः । कैकेय्या च असमा श्रेष्ठेत्यर्थः । अवरा तदत्यन्तस्वीकारकर्त्री अहं यतोऽसंमता प्रव्राजने तत्संमतिं न प्राप्ता अतः अत्यन्तनिगृहीता दुःखितास्मीत्यर्थः 'अतन्द्रिता' इति टीकासंमतपाठे संमत्यग्रहणेन अप्रधानीकृतेत्यर्थः । ' तन्त्रं प्रधाने सिद्धान्ते ' इति निघण्टुः ॥ ४२ ॥

गो० टी०–अत्यन्तमिति । भर्तुः भर्त्रा निगृहीता अहं अतन्त्रिता अप्रधानीकृतास्मि ' तन्त्रं प्रधाने सिद्धान्ते ' इति निघण्टुः । अतः कैकेय्याः परिवारेण दासीजनेन समा कृतास्मि अथवा विचार्यमाणे अवरा न्यूना कृतास्मि ॥ ४२ ॥

४३] ति० टी०–स सर्वोऽपीष्टो जनः कदाचिदागतं कैकेय्याः पुत्रमवलोक्य मां नाभिभाषते । इदानीमप्येवमवस्था मम वर्तते, त्वयि गते तु किं वक्तव्यमिति भावः ॥ ४३ ॥

रा० टी०–स्वमहत्त्वं प्रकटयन्ती आह–य इति । कैकेय्याः पुत्रं भरतं यः कश्चित्सेवते अनुवर्तते वा स जनः मामन्वीक्ष्य नाभिभाषते मत्संकोचान्मौनीभूय तिष्ठतीत्यर्थः ॥ ४३ ॥

गो० टी०–दुःखान्तरमाह–य इति । त्वयि प्रोषिते यः स्वजनः मां सेवते परिचरति अनुवर्तते प्रियोक्तिं करोति सोऽपि कैकेय्याः पुत्रं भरतमन्वीक्ष्य तद्भयादित्यर्थः नाभिभाषते नाभिभाषेत ॥ ४३ ॥

४४] ति० टी०–खरवादिनम् । लुगभाव आर्षः । खरवादि परुषवदनशीलं तस्या वदनं कथं द्रष्टुं शक्ष्यामि । दुर्गता त्वद्वियोगेन दुर्दशामापन्ना ॥ ४४ ॥

रा० टी०–नित्येति । नित्यक्रः त्वद्वियोगहेतुकनित्य-

१ वरेति गो. पाठः । २ मे इति गो. पाठः । ३ खरवादिनीति गो. ——

दश सप्त च वर्षाणि जातस्य तव राघव । अतीतानि प्रकाङ्क्षन्त्या मया दुःखपरिक्षयम् ॥ ४५ ॥
तदक्षयं महद्दुःखं नोत्सहे सहितुं चिरात् । विप्रकारं सपत्नीनामेवं जीर्णापि राघव ॥ ४६ ॥
अपश्यन्ती तव मुखं परिपूर्णशशिप्रभम् । कृपणा वर्तयिष्यामि कथं कृपणजीविका ॥ ४७ ॥
उपवासैश्च योगैश्च बहुभिश्च परिश्रमैः । दुःखसंवर्धितो मोघं त्वं हि दुर्गतया मया ॥ ४८ ॥

विक्षेपाद्धेतोः अधतया पोषणानुकूलव्यापाररहित्येनोपलक्षिताहं वदनमिह स्थितिमन्तं केकय्याः खरवादिनं केकयीकर्मककठोरवक्तारं जनं द्रष्टुं बोधयितुं कथं शक्ष्यामि अत एवामोलुगभावे मत्क्लेशकल्पनं दृशिर्ज्ञानसामान्ये वदनमित्यत्र स्थैर्यार्थको वदतिः तेन नेह मम स्थातुं योग्यतेति सूचितम् । 'खरवादवत्' (खरवादि तत्?) इति भूषणपाठः ॥ ४४ ॥

गो० टी०–नित्यक्रोधतयेति । खरवादि परुषवचनशीलं तत्पूर्वाद्धभूतं दुर्गताऽऽतिका ॥ ४४ ॥

४५] ति० टी०–जातस्य उपनयनाख्यद्वितीयजन्मनेति शेषः । 'ऊनषोडशवर्षो मे रामो राजीवलोचनः' इति विश्वामित्रमुद्दिश्य दशरथोक्त्या विवाहकाले पञ्चदशवर्षत्वोक्तेः, 'तत्र द्वादशवर्षाणि राघवः सह सीतया । रमयामास धर्मात्मा नारायण इव श्रिया ॥ तस्मिन्काले महाराजः प्रीतो रामस्य सद्गुणैः । ज्येष्ठं राज्येन संयोक्तुमैच्छत्सर्वनृपाज्ञया ॥' इति पाद्मोक्तेश्च । उपनयनं च गर्भैकादशे । 'एकादशे वा राजन्यम्' इति स्मृतेर्दशमे वर्षे इति बोध्यम् । एवमुपनयनोत्तरं सप्तदश वर्षाण्यतीतानि जातस्य तव । अतः परं यौवराज्येन दुःखपरिक्षयं प्रकाङ्क्षन्त्या मया तद्विघाते तस्या वदनं कथं नु द्रष्टव्यमित्यद्धकर्षः । वस्तुतस्तु "इग्यणः संप्रसारणम्" इति सूत्रस्थभाष्योक्तरीत्या 'प्रविश पिण्डीम्' इत्यादौ यथा 'प्रविश गृहं पिण्डीं भक्षय' इति वाक्यार्थे प्रविशेति पिण्डीमिति च वाक्यैकदेशस्य प्रयोगः, तथा द्विर्दशेतिवाक्यस्यार्थे वाक्यैकदेशप्रयोगोऽयम् । द्विरावृत्ता दश विंशतिः सप्त चेत्यर्थः । अत्र तात्पर्यग्राहिका विश्वामित्रं प्रति दशरथोक्तिः पाद्मोक्तिश्च तादृशप्रयोगश्च कौसल्यायाः पुत्रवियोगदुःखार्ततया वाल्मीकेश्च वर्णनीयमयीभावेन न दोषायेति ध्येयम् ॥ ४५ ॥

रा० टी०–दशेति । दुःखपरिक्षयं दण्डकारण्यऋषिपीडाध्वंसं प्रकाङ्क्षन्त्या मया जातस्य मत्तः प्रकटीभूतस्य तव दश सप्त दश च दशचेत्येकशेषः विंशतिरित्यर्थः । ते च सप्त च च एकश्च दशसप्तचाः अष्टाविंशतिरित्यर्थः । ते एव वर्षाणि किंच सप्तशब्दस्यैवैकशेषः तेन सप्तशब्देन चतुर्दशलाभः चशब्देनैकत्वलाभः एवं च दशसप्त च वर्षाणीत्यस्य पञ्चविंशतिवर्षाणीत्यर्थः अतीतानि चशब्देनैकत्वलाभस्तु चन्द्रमो वाचकत्वेन यथा चैतस्यायमर्थः तथा बालकाण्डे निरूपितम् ॥ ४५ ॥

गो० टी०–दशेति । तव जातस्य त्वयि जाते सति दश सप्त च वर्षाणि दुःखपरिक्षयं प्रकाङ्क्षन्त्या तव यौवराज्येनेति भावः । मया सङ्क्रमासितानि[1] आस्थितानि । नन्वृनषोडशवर्षो मे रामो राजीवलोचन इति विश्वामित्रं प्रति दशरथवचनात् विवाहानन्तरम् उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने इत्युपरि सीतया वक्ष्यमाणत्वाच्च रामस्याष्टाविंशतिवर्षाणि वर्तन्ते तत्कथं दश सप्त च वर्षाणीत्युच्यते इति चेन्नैष दोषः । अत्र जातस्येत्युक्तिः द्वितीयजन्मापेक्षया 'गर्भैकादशेषु राजन्यम्' इति बहुवचने गर्भनवममारभ्य क्षत्रियस्योपनयनकालत्वोक्तेः । वयसा पञ्चविंशक इति सीतावचनात् वचनान्तरविरोधपरिहारादिकं बालकाण्ड एव कृतम् ऊनषोडशवर्षो मे इत्यत्र ॥ ४५ ॥

४६] ति० टी०–दुःखं त्वद्वियोगजम् । अक्षयं तव राज्यनाशात्क्षयसंभावनारहितमपि । अपि च एवं जीर्णा सपत्नीनां विप्रकारं सहितुं सोढुं नोत्सहे ॥ ४६ ॥

रा० टी०–तदिति । अक्षयमन्यैर्विनाशयितुमशक्यं दुःखं राक्षसहेतुकऋषिक्लेशं चिरात् बहुकालं सहितुं क्षन्तुं नोत्सहे एवमनेन प्रकारेण सपत्नीनां शत्रुस्त्रीणां विप्रकारं युवराजत्वोचितः अस्याः पुत्रः प्रव्रजित इति दुर्भाग्यमस्या इति दुरुक्तिं चिरात्सहितुं नोत्सहे एतेनान्यतरक्लेशस्य दुर्निवारत्वं सूचितम् ॥ ४६ ॥

गो० टी०–तदिति । सहितुं सोढुं चिरं नोत्सहे जीर्णापि सपत्नीदुर्वाक्यश्रवणदुःखेन जीर्णापि विप्रकारम् अपकाररूपं दुःखमित्यन्वयः ॥ ४६ ॥

४७] ति० टी०–कृपणजीविका शोच्यजीवना ॥ ४७ ॥

रा० टी०–अपश्यन्तीति । कृपणजीविका कृपणा क्षीणा जीविका जीवनप्रवृत्तिर्यस्याः सा ॥ ४७ ॥

गो० टी०–अपश्यन्तीति । कृपणजीविकां दीनजीवनं वर्तयिष्यामि करिष्यामीत्यर्थः । 'आजीवो जीविकावार्ता वृत्तिर्वर्तनजीवने' इत्यमरः ॥ ४७ ॥

४८] ति० टी०–दुर्गतया भाग्यहीनया मया बहुपरिश्रमजनकैरुपवासैर्योगैर्देवताध्यानैर्दुःखं यथा तथा मोघं वर्धितोऽसि यदि विप्रवत्स्यसीति शेषः त्वद्वर्धनजफलालाभादिति भावः ॥ ४८ ॥

रा० टी०–उपवासैरिति । दुःखं यथा भवति तथा दुर्गतया विविधचिन्तां प्राप्तया मया उपवासायैः संवर्धितस्त्वममोघं क्रियासाफल्यमित्यर्थः कुर्विति शेषः । एतेनास्मदाज्ञापरिपालनं तवोचितमेवेति सूचितम् ॥ ४८ ॥

गो० टी०–उपवासैरिति । योगैः देवताध्यानैः परिश्रमैः व्रतैः मोघं निष्फलं यथा भवति तथा दुर्गतया भाग्यरहितयेति यावत् ॥ ४८–५० ॥

१ आसितानीति गो.पाठः । २ अक्षयमहमिति गो. पाठः । ३ चिरमिति गो. पाठः । ४ जीविकामिति गो. पाठः । ५ दुःखं संवर्धित इति रा. पाठः ।

स्थिरं नु हृदयं मन्ये ममेदं यन्न [2]दीर्यते । प्रावृषीव महानद्याः स्पृष्टं कूलं नवाम्भसा ॥ ४९ ॥
ममैव नूनं मरणं न विद्यते न चावकाशोऽस्ति यमक्षये मम ।
यदन्तकोऽद्यैव न मां जिहीर्षति प्रसह्य सिंहो रुदतीं मृगीमिव ॥ ५० ॥
स्थिरं हि नूनं हृदयं ममायसं न भिद्यते यद्भुवि [3]नो विदीर्यते ।
अनेन दुःखेन [4]च देहमर्पितं ध्रुवं ह्यकाले मरणं न विद्यते ॥ ५१ ॥
इदं तु दुःखं यदनर्थकानि मे व्रतानि दानानि च संयमाश्च हि ।
तपश्च तप्तं यदपत्यकाम्यया सुनिष्फलं बीजमिवोप्तमूषरे ॥ ५२ ॥
यदि ह्यकाले मरणं [5]यदृच्छया लभेत कश्चिद्गुरुदुःखकर्शितः ।
गताहमद्यैव परेतसंसदं विना त्वया धेनुरिवात्मजेन वै ॥ ५३ ॥
अथापि किं जीवितमद्य मे वृथा त्वया विना चन्द्रनिभाननप्रभ ।
अनुव्रजिष्यामि वनं त्वयैव गौः सुदुर्बला वत्समिवाभिकाङ्क्षया ॥ ५४ ॥

४९] ति० टी०—न दीर्यते त्वद्वियोगश्रवणेऽपीति शेषः ४९

रा० टी०—वियोगस्यासह्यत्वं बोधयन्ती आह—स्थिरमिति । स्थिरं कठिनं प्रावृषि वर्षतौ महानद्याः गङ्गादेः ॥ ४९ ॥

५०] ति० टी०—ममैवेति । लौकिक्यतिदृढोक्तिजातिरियम् । मरणं न विद्यत एव न जिहीर्षत्येवेत्यन्वयः । अवकाशोऽवस्थितये स्थलम् ॥ ५० ॥

रा० टी०—भवदागमनं विना मम दुःखक्षयो न भविष्यतीत्याह—ममेति । यतः मम यमक्षये यमकर्तृकमत्कर्मकविनाशने अवकाशः यमकर्तृकप्रकाशः यमसामर्थ्यमिति यावन्नास्ति तस्मान्मम मरणं नैव विद्यते अत एव अन्तकः यमः मां नैव जिहीर्षति आनेतुमिच्छति एतेन यदि मरणं स्यात्तर्हि दुःखक्षयः स्यात्तस्याभावाद्दुःखविनाशः त्वदधीन एवेति सूचितम् ॥५०॥

५१] ति० टी०—आयसमयस्त्वा निर्मितम् । यतो न भिद्यते भुवि पतित्वा नो विदीर्यते । भेदो द्विधा भवनम्, विदारणमनेकच्छिद्ररेखावत्त्वम् । अनेन दुःखेनार्पितं व्याप्तं देहं देहो न भिद्यत इत्याद्यन्वयः अर्धर्चादिर्देहशब्दः हि यतो न भिद्यतेऽतोऽकाले मरणं न विद्यत इति जाने इति शेषः ॥ ५१ ॥

रा० टी०—स्थिरमिति । यत् यतः अकाले अल्पकाले ईश्वराधीनकाले इत्यर्थः मम मरणं न विद्यते अत एव विशेषणविशिष्टं हृदयं न विदीर्यते अतःअनेन भविष्यत्त्वद्वियोगदुःखेन अर्पितं व्याप्तं देहमस्तीति शेषः देहशब्दः अर्धर्चादिः ॥ ५१ ॥

गो० टी०—स्थिरं हीति । अनेन दुःखेन अर्पितम् आहतं मम हृदयं न भिद्यते इति यत् अतः स्थिरं हि नाशरहितमेव देहं च नावदीर्यत इति यत् अतः आयसम् अयोनिर्मितं नूनं तथाहि अकाले अविहितकाले मरणं न विद्यते ध्रुवम् ॥५१॥

५२] ति० टी०—यद्व्रतादीन्यनर्थकानि तदिदं महद्दुःखम् । ऊषरे वप्तमत एव निष्फलं बीजमिव ॥ ५२ ॥

रा० टी०—इदमिति । यद्यतो मे व्रतादीनि अनर्थकानि न अर्थः प्राकृतविषयः फलत्वेन येषु प्राकृतविलक्षणार्थफलकानीत्यर्थः । अपत्यकाम्यया तपश्च सुतप्तमतः इदं दुःखमूषरे उप्तं बीजमिव सुनिष्फलं भविष्यतीति शेषः । शीघ्रमेव विनङ्क्ष्यतीत्यर्थः। एतेन क्षिप्रं ते विजयो भविष्यतीति ध्वनितम्॥५२॥

गो० टी०—इदं त्विति । इदं वक्ष्यमाणं दुःखं तु पूर्वदुःखेभ्यो विलक्षणम् । तदेवाह यदिति यस्मान्मे अपत्यकारणात् कृतानि व्रतानि दानानि संयमाः ध्यानानि च अनर्थकानि जातानि सामान्ये नपुंसकमिति नपुंसकत्वम् तप्तं तपश्च ऊषरे उप्तं बीजमिव सुनिष्फलमासीत् इदं तु दुःखमित्यन्वयः ॥ ५२ ॥

५३] ति० टी०—गुरुदुःखेन कर्शितः पीडितः । परेतसंसदं यमसभाम् अहं गता स्याम् । तत्तु न लभ्यत इति शेषः॥५३॥

रा० टी०—यदिति । त्वया विना गुरुदुःखकर्शितः कश्चित्पतिरित्यर्थः । अकाले कालभयशून्यत्वेऽपि यदृच्छया स्वेच्छया मरणं हि मरणमिव लोकान्तरगमनमित्यर्थः लभेत कुर्यादित्यर्थः । तदा परेतसंसदं मृतसभामिव गता प्राप्ता आत्मजेन विना धेनुरिवाहं स्यामिति शेषः । एव इवार्थे एतेन राजकर्तव्यं तया ज्ञातमिति सूचितम् ॥ ५३ ॥

गो० टी०—ध्रुवं ह्यकाले मरणं न विद्यत इत्येतत्सकार्यं दर्शयति—यदि हीति । यदि लभेत तदाहं परेतसंसदं यमसभां गता स्यामित्यन्वयः ॥ ५३ ॥

५४] ति० टी०—अथापि मरणाभावेऽपि त्वया विना त्वत्संनिधिं विना किंजीवितं कुत्सितं जीवितं वृथा व्यर्थमतोऽनुव्रजिष्यामि अभिकाङ्क्षया वात्सल्येन ॥ ५४ ॥

रा० टी०—त्वद्वियोगे जीवनं वृथेत्याह—अथेति । त्वया विना मे किंजीवितं जीवनमपि कुत्सितमित्यर्थः । अथातो

१ स्थिरं गो. पाठः । २ दीयत इति गो. पाठः । ३ नावदीर्यत इति गो. पाठः । ४ कारणादिति गो. पाठः । ५ स्वयेच्छयेति गो. पाठः । ६ अन्विति गो. पाठः ।

भृशमसुखममर्षिता यदा बहु विललाप समीक्ष्य राघवम् ।
व्यसनमुपनिशाम्य सा महत्सुतमिव बद्धमवेक्ष्य किंनरी ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे विंशः सर्गः ॥ २० ॥

एकविंश सर्गः ।

रामविवासनश्रवणदुःखितां कौसल्यामाश्वासयँल्लक्ष्मणो रामवनगमनं स्वस्यानभिमतमित्युक्त्वा दशरथं विगर्ह्य स्वस्यापि रामानुगमनं निश्चिकाय । कैकेयीवचसोऽधर्म्यत्वेन वनगमनं निषेधन्तीं कौसल्यां रामः पितृवचस्त्वात्तस्य धर्म्यत्वं निश्चित्य स्वगमनमनुमन्तुं प्रस्थानमङ्गलानि च विधातुं कौसल्यां प्रार्थयत ।

तथा तु विपलपन्तीं तां कौसल्यां राममातरम् । उवाच लक्ष्मणो दीनस्तत्कालसदृशं वचः ॥ १ ॥
न रोचते ममाप्येतदार्ये यद्राघवो वनम् । त्यक्त्वा राज्यश्रियं गच्छेत्स्त्रिया वाक्यवशंगतः ॥ २ ॥
विपरीतश्च वृद्धश्च विषयैश्च प्रधर्षितः । नृपः किमिव न ब्रूयाच्चोद्यमानः समन्मथः ॥ ३ ॥

हेतोः वृथा निरर्थकमित्यर्थः । अतस्त्वयैव सह वनमनुव्रजिष्यामि अभिकाङ्क्षया सुखेच्छया ॥ ९४ ॥

गो० टी०—अथेति । अथापि अकालमरणाभावेऽपि किंजीवितं कुत्सितजीवितं वृथा सुदुर्बला अधीरेति यावत् अनुकाङ्क्षया वात्सल्येन ॥ ९४ ॥

५५] ति० टी०—भृशमसुखं दुःखममर्षितासहमाना रामवियोगमूलं सपत्न्यादिकृतं महद्व्यसनं दुःखं निशाम्य पर्यालोच्य सत्यपाशबद्धं सुतमवेक्ष्य यथोक्तनिमित्तवती किंनरी विललाप ॥ ९५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामयणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे विंशः सर्गः ॥ २० ॥

रा० टी०—भृशमिति । यदा महद्व्यसनं श्रुतवियोगजनितमहादुःखमुपनिशाम्य संस्मृत्य अमर्षिता तदुःखसहनसामर्थ्यहीना आसेति शेषः । तदा बद्धं पितृनियन्त्रितं राघवं बहु अत्यन्तं समीक्ष्य सा विललाप ॥ ९५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे विंशः सर्गः ॥ २० ॥

गो० टी०—भृशमिति । असुखं दुःखम् अमर्षिता सोढुमशक्ता व्यसनं रामविश्लेषभवं व्यसनम् उपनिशाम्य आलोच्य ॥ ९५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बरव्याख्याने अयोध्याकाण्डव्याख्याने विंशतितमः सर्गः ॥ २० ॥

१] ति० टी०—तत्कालसदृशं रामवियोगहेतुककौसल्यादुःखप्रवृत्तिकालोचितम् ॥ १ ॥

रा० टी०—कौसल्याविलापानन्तरकालिकवृत्तान्तमाह—तथेत्यादिभिः । तत्कालसदृशं बोधनकालोचितं वच उवाच ॥ १ ॥

गो० टी०—एवमुपक्रान्तस्य पितृवचनपरिपालनस्य स्थैर्यमस्मिन्सर्गे प्रतिपाद्यते—तथेति । तत्कालसदृशं कौसल्यादुःखकालोचितम् एतेन वक्ष्यमाणलक्ष्मणवचनं केवलं कौसल्याशोकशान्त्यर्थं नतु सहृदयमिति गम्यते ॥ १ ॥

२] ति० टी०—आर्ये कौसल्ये ! गच्छेदिति यत्तन्ममापि न रोचते । स्त्रिया इत्यायुक्तरान्वयि ॥ २ ॥

रा० टी०—तद्वचनमेवाह—नेति । आर्ये हे मातः ! स्त्रिया सीतया सह राज्यश्रियं त्यक्त्वा वाक्यवशं गतः ब्रह्मादिविज्ञापनहेतुकस्वप्रतिज्ञावचनाधीनः रामः यद्वनं गच्छेत्तदेतन्ममापि न रोचते एतेनास्मदादिभिः सहैव गन्तव्यमिति सूचितम् । सीतया सहेत्यनेन सीताप्यनुगमिष्यतीति लक्ष्मणनिश्चयो ध्वनितः ॥ २ ॥

गो० टी०—न रोचत इति । ममापि मद्यमपि स्त्रियाः कैकेय्याः ॥ २ ॥

३] ति० टी०—अत एव विपरीतः प्राप्तप्रकृतिवैपरीत्यः । चोद्यमानः स्त्रिया । क्रोधवशात्पुनरुक्तिर्न दोषाय । किमिव न ब्रूयात् अनुचितशतमपि ब्रूयादतस्तद्वचो न श्रद्धेयमिति एतेन राजाज्ञाभङ्गः कथं कार्य इति शङ्का समाहिता ॥ ३ ॥

रा० टी०—नन्वेवंसंमतिमलब्ध्वा राजा कथं प्रेषयतीत्यत आह—विपरीत इति । वृद्धः ज्ञानवयोभ्यां संपन्नः अत एव प्रधर्षितः प्रगल्भः अत एव मन्मथः मदं प्रजादैन्यं मथतीति सः अत एव विषयैः राक्षसबाधितऋषिसमीपदेशवासिभिश्रोद्यमानः प्रार्थ्यमानः अत एव विपरीतः पुत्रविषयकस्नेहरहित इव स नृपः किं न ब्रूयाद्ब्रूयादेवेत्यर्थः । अतः येन राज्ञा राघवः वनवासाय निर्वास्यते तस्य अस्य अपराधं दोषं पुत्रवियोगकारकपापविशेषं वा न पश्यामि । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—नन्वहं कैकेयीवचनाद्गच्छामि किंतु राजवचनादित्याशङ्क्याह—विपरीत इति । विपरीतः विपरीतवयोधर्मा तत्र हेतुः वृद्धत्वं विषयप्रधर्षितत्वं च विषयाः शब्दादयः । नन्वपरिशुद्धं प्रति शब्दादिविषयाः किं कुर्युरित्यत्राह—समन्मथ इति । चोद्यमानः कैकेय्येति शेषः । इवशब्दो वाक्यालंकारे ॥ ३ ॥

---

१ सदृशमिति गो. पाठः ।

नास्यापराधं पश्यामि नापि दोषं तथाविधम् । येन निर्वास्यते राष्ट्राद्वनवासाय राघवः ॥ ४ ॥
न तं पश्याम्यहं लोके परोक्षमपि यो नरः । स्वमित्रोऽपि निरस्तोऽपि योऽस्य दोषमुदाहरेत् ॥ ५ ॥
देवकल्पमृजुं दान्तं रिपूणामपि वत्सलम् । अवेक्षमाणः को धर्मं त्यजेत्पुत्रमकारणात् ॥ ६ ॥
तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः । पुत्रः को हृदये कुर्याद्राजवृत्तमनुस्मरन् ॥ ७ ॥
यावदेव न जानाति कश्चिदर्थमिमं नरः । तावदेव मया सार्धमात्मस्थं कुरु शासनम् ॥ ८ ॥
मया पार्श्वे सधनुषा तव गुप्तस्य राघव । कः समर्थोऽधिकं कर्तुं कृतान्तस्येव तिष्ठतः ॥ ९ ॥
निर्मनुष्यामिमां सर्वामयोध्यां मनुजर्षभ । करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये ॥ १० ॥

४] ति० टी०—ननु रामदोषप्रयुक्तं विवासनं स्यात्तत्राह—नास्येति । रामस्येत्यर्थः । अपराधं पितृविषयकं दोषमसमञ्जादेरिव प्रजावधादिपातकम् ॥ ४ ॥

गो०टी०—ननु रामदोषादेवास्तु विवासनं तत्राह-नास्येति । अपराधं राजद्रोहं दोषं महापातकादिकं तथाविधं निर्वासनयोग्यम् ॥ ४ ॥

५] ति० टी०—सुतराममित्रोऽपि शत्रुरपि निरस्तोऽपि महापातकादिवशं गत्वा त्यक्तोऽपि परोक्षमपि रामस्य दोषं यो वदेत्तं न पश्यामि ॥ ५ ॥

रा० टी०—राज्ञः दोषविशेषास्पर्शित्वमुक्त्वा दोषसामान्यास्पर्शित्वमप्याह—न तमिति । निरस्तः युद्धादिना पराजितोऽपि अस्य राज्ञः एतेन सार्वकालिकसर्ववदोषासंसर्गित्वं राज्ञः सूचितम् ॥ ५ ॥

गो० टी०—दोषाभावे किं प्रमाणमित्याशङ्क्य न तावच्छन्द इत्याह—नेति । स्वमित्रोऽपि सुतरां शत्रुरपि निरस्तोऽपि केनचिदपराधेन तिरस्कृतोऽपि नरः असुरश्चेद्देत्परोक्षमपि प्रत्यक्षे का कथेति भावः दोषं यं कंचिदपि उदाहरेत् वदेत् तं लोके क्वापि न ईक्षयामि ॥ ५ ॥

६] ति० टी०—यदेवमतो देवतुल्यं दान्तं गुरुभिः शिक्षितम् एवम्भूतगुणं पुत्रं धर्ममवेक्षमाणः कस्त्यजेदित्यन्वयः । रिपूणां कैकेय्यादीनां विषयेऽपि वत्सलं स्निग्धम् ॥ ६ ॥

रा० टी०—कारणविशेषाभावे रामप्रव्राजनं न संभवतीत्याह—देवेति । देवकल्पं देवादिनिर्माणकारकम् । अकारणात् कारणविशेषाभावात् ॥ ६ ॥

गो० टी०—नाप्यनुमानं प्रत्यक्षं चेत्याह—देवकल्पमिति । देवकल्पम् "ईषदसमाप्तौ—" इत्यादिना कल्पप्प्रत्ययः देवसमानं नित्यशुद्धमिति यावत् ऋजुं करणत्रयार्जवयुक्तं प्रजाछन्दानुवर्तिनं वा दान्तं दमितं गुरुभिः शिक्षितमित्यर्थः । निगृहीतेन्द्रियं वा रिपूणां कैकेय्यादीनामपि वत्सलं धर्मं धर्मस्वरूपं पुत्रं कारणे सत्यपि त्यागानर्हसंबन्धमवेक्षमाणः पश्यन्, यद्वा धर्ममवेक्षमाणः धार्मिकः अकारणात् दोषं विनापि त्यजेत् ॥ ६ ॥

७] ति० टी०—बाल्यं बालभावमविमृश्यकारित्वं कामपरवशत्वं वोपेयुषः प्राप्तस्य । राजवृत्तं पूर्वराजाचरितम् ॥ ७ ॥

रा० टी०—रामेणेदं दुष्करं कृतामेत्याह—तदिति । बाल्यं स्वदत्तकैकयीवराछादनमुपेयुषः प्राप्तस्य राज्ञः इदं परंपराभिहितं वचनं दुष्करकार्यबोधकवाक्यं कः पुत्रः हृदये कुर्यान्न कोऽपीत्यर्थः । बाल्यमिति संवरणार्थकबलधातुप्रकृतिकण्यन्तम् ॥ ७ ॥

गो० टी०—तदिति । बाल्यं बालभावं कामपारवश्यमित्यर्थः । राजवृत्तं राजनीतिम् ॥ ७ ॥

८] ति० टी०—अतो यावदिममर्थं त्वत्प्रवासनरूपं कश्चिदपि न जानाति तावत्ततः पूर्वमेव शासनं राज्यमभिषेकेणात्मस्थमात्माधीनं कुरु । 'शोभनम्' इति पाठे राज्यफलकमभिषेकम् ॥ ८ ॥

रा० टी०—परमात्माभिप्रायस्य दुर्ज्ञेयत्वेन मदुक्तमेतदभिप्रेतं न वेति तदभिप्रेतजिज्ञासया रामं प्रत्याह—यावदिति । कश्चिन्नरः इमं त्वत्प्रव्राजनरूपमर्थं नैव जानाति तावदेव आत्मस्थं स्वमनसि स्थितं शासनमाज्ञामित्यर्थः तेन भवदाज्ञापितसाधकयज्ञमहं करिष्यामि इति सूचितम् । यावन्न जानातीत्यनेन ज्ञाते रहस्यवचनश्रवणानर्हजनबाहुल्यं स्यादिति व्यञ्जितम् ॥ ८ ॥

गो० टी०—यावदिति । शास्यत इति शासनं राज्यम् । आत्मस्थं कुरु स्वाधीनं कुर्वित्यर्थः ॥ ८ ॥

९] ति० टी०—कथमेवं शक्यं तत्राह—मयेति । अधिकं त्वदाशोल्लङ्घनपूर्वमभिषेकविघ्नम् ॥ ९ ॥

रा० टी०—मयेति । सधनुषा धनुःसहितेन मया गुप्तस्य सेवितस्येत्यर्थः । तव अधिकं तदाज्ञापितात्परं कर्तुं कः समर्थः न कोऽपीत्यर्थः ॥ ९ ॥

गो० टी०—मयेति । तवाधिकं कर्तुं तव पौरुषाधिकं पौरुषं कर्तुमित्यर्थः ॥ ९ ॥

१०] ति० टी०—विप्रिये तव विपक्षभावे ॥ १० ॥

रा० टी०—स्वसेवाकारमाह—निरिति । हे मनुजर्षभ ! विप्रिये तव विरोधे यदि स्थास्यति सर्वो जन इति शेषः । तदा अयोध्यामयोध्यादेशं निर्मनुष्यां मनुष्योपलक्षितविरोधिजनरहितां करिष्यामि ॥ १० ॥

गो० टी०—निर्मनुष्यामिति । विप्रिये प्रातिकूल्ये ॥१०॥

भरतस्याथ पक्ष्यो वा यो वास्य हितमिच्छति । सर्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते ॥ ११ ॥
प्रोत्साहितोऽयं कैकेय्या संतुष्टो यदि नः पिता । अमित्रभूतो निःसङ्गं बध्यतां वध्यतामपि ॥ १२ ॥
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ॥ १३ ॥
बलमेष किमाश्रित्य हेतुं वा पुरुषोत्तम । दातुमिच्छति कैकेय्यै उपस्थितमिदं तव ॥ १४ ॥
त्वया चैव मया चैव कृत्वा वैरमनुत्तमम् । कास्य शक्तिः श्रियं दातुं भरतायारिशासन ॥ १५ ॥
अनुरक्तोऽस्मि भावेन भ्रातरं देवि तत्त्वतः । सत्येन धनुषा चैव दत्तेनेष्टेन ते शपे ॥ १६ ॥
दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति । प्रविष्टं तत्र मां देवि त्वं पूर्वमवधारय ॥ १७ ॥
हरामि वीर्याद्दुःखं ते तमः सूर्य इवोदितः । देवी पश्यतु मे वीर्यं राघवश्चैव पश्यतु ॥ १८ ॥

११] ति० टी०—पक्ष्यो मातुलादिः । यो वान्यः कश्चिदस्य हितमिच्छति । मृदुर्हीति अतो मार्दवं न युक्तम् । मार्दवाद्गुचितः काल इति भावः ॥ ११ ॥

रा० टी०—भरतादीनामपि विपरीतत्वेन भयमस्तीत्याह—भरतस्येति । भरतस्य पक्षः मातुलप्रभृतिः यः अन्यो वा अस्य स्वद्विरोधिभरतस्य हितमिच्छति तान्सर्वान्वधिष्यामि । शान्त्या राजकीयकार्यसिद्धिर्न भविष्यतीत्याह—मृदुः शान्तस्वभावः परिभूयते ॥ ११ ॥

गो० टी०—भरतस्येति । पक्ष्यः सहायभूतो वर्गः ॥ ११ ॥

१२] ति० टी०—नन्वयं राज्ञा राज्यस्य भरताय दीयमानत्वादपरिहार्योऽयमर्थस्तत्राह—प्रोत्साहित इति । कैकेय्या प्रोत्साहितस्तस्यां संतुष्टो यदि पिता नोऽस्माकममित्रभूतो जायते तदासौ बन्धनं प्राप्यताम्, अथवास्य वध एव क्रियताम् । त्रेताद्वापरयोः संधावयमवतारस्तदा च किंचिदधिकपादेनाधर्मप्रवेश इति तदनुसारेण लक्ष्मणस्यैवमुक्तिः, कैकेय्याश्च परोपदेशेनैवं मतिः, छलेन वालिवधे प्रवृत्तिश्च भगवत इति बोध्यम् ॥ १२ ॥

रा० टी०—स्वातिप्रीतिं दर्शयन्नाह—प्रेति । यदि संतुष्टस्त्वदनिष्टसाधने प्रीतिमानत एव अमित्रभूतः नः पिता तर्हि निःसङ्गं यथा स्यात्तथा बध्यतां बध्यतां बन्धनेन नियुज्यताम् वीप्साद्विर्वचनम् ॥ १२ ॥

गो० टी०—प्रोत्साहित इति । अमित्रभूतो यदि शत्रुपक्षसहायभूतश्चेदित्यर्थः ॥ १२ ॥

१३] ति० टी०—नन्वेवं दोषः स्यात्तत्राह—गुरोरिति । एवं च शास्त्रसंमतत्वान्नात्र दोष इति भावः ॥ १३ ॥

रा० टी०—नन्वयं गुरुत्वादेव पिता न वाच्य इत्यत आह—गुरोरिति । अवलिप्तस्य गर्वविशिष्टस्य अत एव कार्याकार्यमजानतः अत उत्पथं शिष्टागृहीतमार्गं प्रतिपन्नस्य प्राप्तस्य गुरोरपि शासनं शिक्षा कार्यं एतेन पितुरपि शासनमुचितमिति ध्वनितम् ॥ १३ ॥

गो० टी०—स्वोक्तार्थे धर्मशास्त्रं प्रमाणयति—गुरोरिति । अवलिप्तस्य गर्वितस्य उत्पथम् अमर्यादम् ॥ १३ ॥

१४] ति० टी०—नन्वयं राज्ञो बलवत्त्वाद्बन्धनाद्यशक्यमत आह—बलमिति । उपस्थितं ज्येष्ठत्वेन न्यायतस्तवैव प्राप्तमिदं राज्यम् । एवं च बलहेत्वोरभावाद्बन्धनादि शक्यमेवेति भावः ॥ १४ ॥

रा० टी०—बलमिति । एषः पिता बलं सैन्यादिहेतुकपराक्रमं हेतुं योग्यताकारणं वाश्रित्य किं दातुमिच्छति ॥ १४ ॥

गो० टी०—बलमिति । बलं राजत्वप्रयुक्तबलं हेतुं वरदानरूपहेतुं वा ॥ १४ ॥ १५ ॥

१५] ति० टी०—बलाभावमेवाह—त्वयेत्यादि ॥ १५ ॥

रा० टी०—त्वयेति । अनुत्तमं निषिद्धमित्यर्थः । अस्य राज्ञः का शक्तिर्न काचिदित्यर्थः ॥ १५ ॥

१६] ति० टी०—नन्वयं तवाप्येवं वदतो न विश्वासो ज्ञातित्वाविशेषादत आह—अनुरक्त इति । भाव आन्तरोऽभिप्रायः ॥ १६ ॥

रा० टी०—राममुक्त्वा मातरं संबोध्याह—अन्विति । हे देवि ! भावेन मद्विषयकातिप्रेम्णा विशिष्टं भ्रातरं राममनुरक्तोऽस्मि तद्विषयकातिप्रेमवानस्मीत्यर्थः । अत्रार्थे विश्वासार्थमाह—सत्येन सत्यरूपधर्मेण धनुषा स्वचापेन दत्तेन वापीकूपादिनिर्माणजनितादृष्टेन यागादिजनितादृष्टेन च शपे एतच्छपथं करोमीत्यर्थः । प्रसिद्धश्च क्षत्रियाणां शस्त्रास्त्रशपथः इति नाप्रसिद्धिः ॥ १६ ॥

गो० टी०—अनुरक्त इति । दत्तेन दानेन इष्टेन देवार्चनादिना ॥ १६—१९ ॥

१७] ति० टी०—संप्रत्येवानुरागनिर्णय इत्याह—दीप्तमिति । दीप्तमग्निम् क्रोधमित्यर्थः । अरण्यं वा पित्राज्ञया ॥ १७ ॥

रा० टी०—नन्वयं रामानुरागिणस्तव रामाभिप्रेतविरुद्धाचरणं न युक्तमित्यत आह—दीप्तमिति । अन्यादिकं प्रवेक्ष्यति पित्राद्याज्ञादिनेति शेषः । अवधारय निश्चिनु एतेनास्मिन् प्रव्रजने रामेप्सिततत्त्वं नास्तीति स्वनिश्चयः सूचितः तेन रामेच्छा ईश्वरैरपि दुर्ज्ञेयेति व्यक्तम् ॥ १७ ॥

१८] ति० टी०—राघवश्चेति । चात्सर्वो जनश्च ॥ १८ ॥

रा० टी०—हरामीति । वीर्यात्स्वपराक्रमात् ॥ १८ ॥

१ सर्वानेतानिति गो. पाठः । २ स दुष्टो इति गो. पाठः । ३ बध्यतां बध्यतामिति रा. पाठः । ४ पुरुषर्षभेति गो. पाठः । ५ राज्यमिति गो. पाठः । ६ प्रियमिति रा. पाठः ।

हनिष्ये पितरं वृद्धं कैकेय्यासक्तमानसम् । कृपणं च स्थितं बाल्ये वृद्धभावेन गर्हितम् ॥ १९ ॥
एतत्तु वचनं श्रुत्वा लक्ष्मणस्य महात्मनः । उवाच रामं कौसल्या रुदती शोकलालसा ॥ २० ॥
भ्रातुस्ते वदतः पुत्र लक्ष्मणस्य श्रुतं त्वया । यदत्रानन्तरं तत्त्वं कुरुष्व यदि रोचते ॥ २१ ॥
न चाधर्म्यं वचः श्रुत्वा सपत्न्या मम भाषितम् । विहाय शोकसंतप्तां गन्तुमर्हसि मामितः ॥ २२ ॥
धर्मज्ञ इति धर्मिष्ठ धर्मं चरितुमिच्छसि । शुश्रूष मामिहस्थस्त्वं चर धर्ममनुत्तमम् ॥ २३ ॥
शुश्रूषुर्जननीं पुत्र स्वगृहे नियतो वसन् । परेण तपसा युक्तः काश्यपस्त्रिदिवं गतः ॥ २४ ॥
यथैव राजा पूज्यस्ते गौरवेण तथा ह्यहम् । त्वां सोऽहं नानुजानामि न गन्तव्यमितो वनम् ॥ २५ ॥
त्वद्वियोगान्न मे कार्यं जीवितेन सुखेन च । त्वया सह मम श्रेयस्तृणानामपि भक्षणम् ॥ २६ ॥

१९-२०] ति० टी०-कैकेय्यासक्तमानसमत एव कृपणम् । वृद्धभावेन वृद्धत्वेन गर्हितं यथा भवति तथा बाल्ये कामुकत्वे स्थितम् ॥ १९ ॥ २० ॥

रा० टी०-रामानुकूल्यं पापाचरणेनापि साधयिष्यामीत्याह-हनिष्ये इति । केकय्या सह वृद्धं पितरं हनिष्ये रामप्रतिकूलत्वेन ज्ञातमिति शेषः । एवं तत्त्वेन ज्ञातमसक्तमानसं विषयासक्तिरहितं परमहंसादिमित्यर्थः कृपणं दीनं च बाल्ये स्थितं बालकं चेत्यर्थः वृद्धभावेन वृद्धत्वेन गर्हितमतिवृद्धमित्यर्थः विषयासक्तिरहितादयो न हन्तव्या इति धर्मशास्त्रे प्रसिद्धम् । एतेन रामप्रतिकूलजनविनाशने मम वध्यावध्यविचारो नास्तीति ध्वनितं तेन प्रीतेः परा काष्ठा सूचिता ॥ १९ ॥

रा० टी०-एतदिति । महात्मनः अतिप्रयत्नशीलस्य लक्ष्मणस्य एतद्वचनं श्रुत्वा रामस्तुवाच ॥ २० ॥

२१] ति० टी०-अनन्तरं युक्तं कार्यं तत्त्वं कुरुष्व यदि रोचते तर्हि लक्ष्मणवाक्यं कुरुष्वेति शेषः । अनेन कौसल्याया गूढं स्वानभिमतत्वं लक्ष्मणोक्तस्य सूचितम् ॥ २१ ॥

रा० टी०-तद्वचनमेवाह-भ्रातुरिति । पुत्र हे राम ! वदतः कथयतः लक्ष्मणस्य तत्त्वं याथार्थ्यविशिष्टमनन्तरं कापट्यरहितं वचनं त्वया श्रुतमतः अत्र अस्मिन् विषये यद्रोचते तत्कुरुष्व २१॥

गो० टी०-भ्रातुरिति । श्रुतं वाक्यजातमिति शेषः । परमधार्मिकरामप्रीतिवाञ्छापरं विहाय यदि रोचते इत्युक्तवती ॥ २० ॥

२२] ति० टी०-पुना रामाभिप्रायनिर्णयाय लक्ष्मणवाक्यमेवोपोद्बलयितुमेतद्वाक्यमपि न येन तव दोषः स्यात्, किंतु मत्सपत्न्या इत्याह-न चेति । अधर्म्यं कनिष्ठस्य राज्यकर्म मम सपत्न्या भाषितं वचः श्रुत्वा मां विहायेतो वनं गन्तुं नार्हसि ॥ २२ ॥

रा० टी०-नेति । मम सपत्न्याः कैकेय्या अधर्म्यं राक्षसाधर्मत्वेनोक्तं किंच अकालप्रव्रजनयाच्ञाबोधकत्वेन धर्मादनपेतं विरुद्धं वचः श्रुत्वा शोकसंतप्तां वियोगहेतुकशोकव्याप्तां मां विहाय त्यक्त्वा इतो गन्तुं नार्हसि मया सह गन्तुमर्हसीत्यर्थः । अत्र संगृह्य शोकसंतप्तामिति वक्तव्ये विहायेत्युक्त्या स्वगमनाभावनिश्चयः सूचितः ॥ २२ ॥

गो० टी०-पितृवचनपरिपालकस्य रामस्य लक्ष्मणवचनमसह्यमिति ज्ञात्वाह-न चेत्यादिना ॥ २१ ॥

२३] ति० टी०-अथ यदि सापत्नमातृवाक्योल्लङ्घनेऽप्यधर्मत्वरया तत्राप्यादरस्तर्हि राज्यं परित्यज्यैवेह तिष्ठेत्याह-धर्मज्ञ इति ॥ २३ ॥

रा० टी०-प्रव्रजनविषयकराजाज्ञाभावनिश्चयहेतुकतज्जिगमिषाभावे तत्कर्तव्यमाह-धर्मज्ञ इति । हे धर्मिष्ठ ! धर्मज्ञस्त्वं यदि इहस्थः सन्धर्मं चरितुमिच्छसि तर्हि मां शुश्रूष इदमनुत्तमं धर्मं चर । इतिशब्दः इदमर्थे ॥ २३ ॥

गो० टी०-धर्मज्ञेति । 'एभ्यो माता गरीयसी' इति वचनं हृदि निधायाह-शुश्रूष मामिति ॥ २२ ॥

२४-२५] ति० टी०-शुश्रूषुः शुश्रूषां कुर्वन् । पुत्रेति रामसंबोधनम् । त्रिदिवं गतः मातृसेवया प्राजापत्यपदं प्राप्त इति भावः । तथाहि ततोऽपि गौरवेणाहं पूज्येत्यर्थः । 'पितुर्दशगुणं माता गौरवेणातिरिच्यते' इति स्मृतेः । नानुजानामि वनं गन्तुमिति शेषः । किं च प्रतिषेधामीत्याह-न गन्तव्यमित्यादि ॥ २४ ॥ २५ ॥

रा० टी०-मातृशुश्रूषणरूपधर्मे शिष्टाचारं प्रमाणयन्ती आह-शुश्रूषुरिति । नियतः निरन्तरमित्यर्थः ॥ २४ ॥

गो० टी०-शुश्रूषुरिति । कश्यपपुत्रेष्वेकः स्वगृहे मातृशुश्रूषारूपमहातपसा त्रिदिवं प्राप्तवानिति गम्यते ॥ २३ ॥

रा० टी०-प्रव्राजननिवर्तनं मया नोचितमित्याह-यथेति । गौरवेण गुरुत्वेन यथा अहं पूज्येत्यर्थः तथा राजा पूज्यः अतः इतो वनं त्वया न गन्तव्यमिति न अनुजानामि आज्ञापयामीत्यर्थः । एतेन पत्यनुकूलाचरणशीलत्वं तस्याः सूचितम् ॥ २५॥

गो० टी०-यथेति । नानुजानामि अनुज्ञां न करोमि २४-२५॥

२६] ति० टी०-अथ वनगमनपर्यन्तं तदाज्ञास्त्वादत्र सर्वथा स्थातुमशक्यमिति चेत्तत्राप्याह-त्वद्वियोगादिति । त्वद्वियोगात्परं जीवितादिना मे न किंचित्कार्यम् अतस्त्वयेत्यादि । एवं च मामपि सह नयेति भावः ॥ २६ ॥

१ क्रोडेऽयं गो. नास्ति । २ हनिष्ये इति रा. पाठः । ३ रुदन्ती इति गो. रा. पाठः । ४ कार्यमिति गो. पाठः । ५ यदीति गो. पाठः । ६ पुनः इति गो. पाठः । ७ नाहमनुजानामीति गो. पाठः । ८ वेति गो. पाठः ।

यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकलालसाम् । अहं प्रायमिहासिष्ये न चै शक्ष्यामि जीवितुम् ॥ २७ ॥
ततस्त्वं प्राप्स्यसे पुत्र निरयं लोकविश्रुतम् । ब्रह्महत्यामिवाधर्मात्समुद्रः सरितां पतिः ॥ २८ ॥
विलपन्तीं तथा दीनां कौसल्यां जननीं ततः । उवाच रामो धर्मात्मा वचनं धर्मसंहितम् ॥ २९ ॥
नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम । प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ॥ ३० ॥
ऋषिणा च पितुर्वाक्यं कुर्वता वैनचारिणा । गौर्हता जानता धर्मं कण्डुना चै विपश्चिता ॥ ३१ ॥
अस्माकं तु कुले पूर्वं सगरस्याज्ञया पितुः । खनद्भिः सागरैर्भूमिमवाप्तः सुमहान्वधः ॥ ३२ ॥
जामदग्न्येन रामेण रेणुका जननी स्वयम् । कृत्ता परशुनारण्ये पितुर्वचनकारिणात् ॥ ३३ ॥

रा० टी०–अहं त्वया सहैव नेतव्येति बोधयन्ती आह–त्वदिति । त्वद्वियोगात्त्वद्वियोगं प्राप्य जीवितादिना मे न कार्यम् ॥ २६ ॥

२७] ति० टी०–प्रायमनशनदीक्षाम् यो हेतौ यतो जीवितुं न शक्ष्यामि ॥ २७ ॥

रा० टी०–यदीति । शोकलालसां शोकव्यासां मां त्यक्त्वा यदि वनं यास्यसि तर्हि अहं प्रायं क्षमकूलं यथा स्यात्तथा इह न आसिष्ये स्थास्यामीत्यर्थः अत एव जीवितुं जीवयितुं पालयितुमित्यर्थः न शक्ष्यामि एतेन रामगमने दशरथो नेह स्थास्यतीति कौशल्यायाः निश्चयः सूचितः ॥ २७ ॥

गो० टी०–यदीति । प्रायं प्रायोपवेशनम् अनशनदीक्षामिति यावत् ॥ २६ ॥

२८–२९] ति० टी०–ततो मातुर्मरणान्तदुःखदानात् । सगरो हि कस्मिंश्चित्कल्पे मातुर्दुःखजननरूपापधर्मात्पिप्पलादब्रह्मर्षिकृतां कृत्यां प्राप्य नरकवासतुल्यं दुःखं प्राप्तवानिति क्वचित्पुराणे प्रसिद्धमित्याहुः ॥ २८ ॥ २९ ॥

रा० टी०–तत इति । ततः प्रजापालनविधाताल्लोकविश्रुतं लोकैर्विश्रावितं कथितमित्यर्थः निरयं मङ्गलरहितं वचनं प्राप्स्यसे श्रोष्यसीत्यर्थः । तत्र दृष्टान्तः अधर्मात् पिप्पलादापराधरूपकर्मणः ब्रह्महत्यां पिप्पलादोत्पादितकृत्याबोधकशब्दं सगर इव सगरकर्तृकब्रह्महत्याया अप्रसिद्धिरिति भूषणकृतः । पिप्पलादस्य कृत्याकर्तृत्वादि तु ' पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरे । पाषाणं ते मया दत्तमाहारार्थं प्रकल्पितम् ' इत्यादिना पुराणेषु प्रसिद्धम् ॥ २८ ॥

रा० टी०–विलपन्तीमिति । धर्मात्मा सकलधर्मप्रवर्तकः राम उवाच ॥ २९ ॥

गो० टी०–तत इति । निरयशब्देन दुःखं लक्ष्यते ब्रह्महत्यामिवाधर्मात्सगरः सरितां पतिः अधर्मात् पिप्पलादविषये कृतादपकारात् ब्रह्महत्यामिव ब्राह्मणनिमित्तका हिंसा ब्रह्महत्येति व्युत्पत्त्या पिप्पलादोत्पादितकृत्यया सगरस्य प्राप्तं दुःखं ब्रह्महत्येत्युच्यते पिप्पलादेन कृत्योत्पादनं च 'पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरि । पाषाणं ते मया दत्तमाहारार्थं प्रकल्पितम्' इति प्रसिद्धम् । साक्षात्सगरकर्तृकब्रह्महत्याया अश्रवणादेवं व्याख्यातम्, यद्वा शुश्रूषुरित्यत्र काश्यपः पूर्वजन्मनि मातुःशुश्रूषां कृत्वा तत्फलत्वेन दिवं गत्वा प्रजापतित्वं च गतवानिति पुराणकथा। उत्तरत्र सगरः किल मातृदुःखजननरूपापधर्माद्ब्रह्महत्यां ब्रह्महत्याप्राप्यनरकविशेषान् प्राप्तवानिति पौराणिकी कथा ॥ २७ ॥ २८ ॥

३०] ति० टी०–तद्वचनस्य कर्तव्यत्वेऽपि युगपदद्वयानासंभवात्पितृवचसः प्रथमप्राप्तत्वेन प्राबल्यात्तदतिक्रमो, शक्य इत्याह–नास्तीति ॥ ३० ॥

रा० टी०–तद्वचनमेवाह–नेति । समतिक्रमितुमुल्लङ्घितुं पितुर्वाक्यमित्यनेन कैकेय्युक्तं राजसंमतमेवेति रामनिश्चया व्यक्तः ॥ ३० ॥

गो० टी०–नास्तीति । शक्तिः उत्साहः पितृवचनस्य त्वद्वचनापेक्षया प्राथमिकत्वादिति भावः ॥ २९ ॥

३१] ति० टी०–किं च पितुर्वाक्येन गोमातृवधोऽपि पूर्वैर्महात्मभिः कृतः, मया तु दुःखमात्रं मातुः संपाद्यत इति न किंचिदेतदित्याह–ऋषिणेति । अधर्मं जानतापि ऋषिणापि मन्त्रद्रष्ट्रापि पितृवाक्यतो गौर्हता तस्मात्पितृवाक्याकरणे महानधर्म इति सूचितम् ॥ ३१ ॥

रा० टी०–अकार्यमपि पित्राज्ञया कर्तव्यमित्यत्र शिष्टाचारं प्रमाणयन्नाह–ऋषिणेति । ऋषिणा मन्त्रद्रष्ट्रा पितुर्वाक्यं कुर्वता कण्डुना ऋषिविशेषेण गौर्हता ॥ ३१ ॥

गो० टी०–मद्विपत्तिकरं कथं करिष्यसीत्यत्राह–ऋषिणेत्यादिना ॥ ३०–३२ ॥

३२] ति० टी०–महान्वधो ब्राह्मणसकाशादतिनिन्द्यो वधः । अनेन प्राणत्यागेनापि पितृवाक्यं पालनीयमिति सूचितम् ॥ ३२ ॥

रा० टी०–अस्माकमिति । सागरैः सगरपुत्रैः सुमहानस्युग्रः वधः कपिलहेतुकात्मविघातः ॥ ३२ ॥

३३] ति० टी०–परशुना स्वयं स्वहस्तेन छिन्ना । अरण्ये तपोवने । एवं पित्राज्ञया मातृवधोऽपि यद्यधर्मो न तदा दुःखमात्रं न तथेति किं वक्तव्यम् ॥ ३३ ॥

रा० टी०–जामदग्न्येनेति । कृत्ता छिन्ना ॥ ३३ ॥

१ हीति गो. पाठः । २ तदेति गो. पाठः । ३ त्रेति गो. पाठः । ४ अपीति गो. पाठः । ५ चेति गो. पाठः । ६ कारिणेति गो. पाठः ।

एतैरन्यैश्च बहुभिर्दिवि देवसमैः कृतम् । पितुर्वचनमक्लीबं करिष्यामि पितुर्हितम् ॥ ३४ ॥
न खल्वेतन्मयैकेन क्रियते पितृशासनम् । एतैरपि कृतं देवि ये मया पैरिकीर्तिताः ॥ ३५ ॥
नाहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्तये । पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते ॥ ३६ ॥
तदेतत्तु मया कार्यं क्रियते भुवि नान्यथा । पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते ॥ ३७ ॥
तामेवमुक्त्वा जननीं लक्ष्मणं पुनरब्रवीत् । वाक्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ॥ ३८ ॥
तव लक्ष्मण जानामि मयि स्नेहमनुत्तमम् । विक्रमं चैव सत्त्वं च तेजश्च सुदुरासदम् ॥ ३९ ॥
मम मातुर्महदुःखमतुलं शुभलक्षण । अभिप्रायं नै विज्ञाय सत्यस्य च शमस्य च ॥ ४० ॥
धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम् । धर्मसंश्रितमप्येतत्पितुर्वचनमुत्तमम् ॥ ४१ ॥

३४-३५] ति० टी०-अक्लीबं कातर्यरहितम् । अतः पितुर्हितं करिष्यामि ॥ ३४ ॥ ३५ ॥

रा० टी०-एतैरिति । देवसमैः देवसदृशैः अनेन तेषामाप्तत्वं बोधितम् पितुर्हितम् । परमयशःप्रापकत्वेनातिप्रियं पितुर्वचनमक्लीबं यथा स्यातथा करिष्यामि ॥ ३४ ॥

रा० टी०-नेति । यतः ये कण्डुजामदग्न्यादयः मया परिकीर्तिताः तैरेतैरपि कृतमतः एकेन मया न क्रियते ॥ ३५ ॥

गो० टी०-एतैरिति । अक्लीबम् अकातरम् अक्लिष्टमिति यावत् ॥ ३३ ॥ ३४ ॥

३६] ति० टी०-ते प्रतिकूलमपूर्वं पूर्वानाचरितं धर्मं नाहं प्रवर्तये । उक्तस्यैवार्थस्यान्वयेन प्रतिपादनं पूर्वैरिति । अयमभिप्रेतो धर्मजनकत्वेनेष्टः पितृवाक्यपालनरूपः पूर्वैरयं मार्गोगतः प्राप्तः, मयापि तेषामनु पश्चाद्गम्यते ॥ ३६ ॥

रा० टी०-मत्पूर्वजैः स्वीकृतत्वान्मयावश्यं कर्तव्य इत्याह-नाहमिति । यतः पूर्वैः सागरादिभिः अयं मार्गोऽभिप्रेतः इष्टः अत एव गतः प्रतिकूलं स्वकुलाननुरूपमपूर्वं नवीनं न प्रवर्तये अत एव पूर्वैर्गतो मार्गो मयाऽनुगम्यते ॥ ३६ ॥

गो० टी०-नेति । अपूर्वम् अभिनवम् अभिप्रेतः अङ्गीकृतमित्यर्थः सर्वसंमत इति वार्थः तेन चन्द्रकूततारागमनादिव्यावृत्तिः । नन्व दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषामिति मातृवधादिकं साहसत्वेन निन्दितमिति चेन्न, साहसस्य पितृनियुक्तव्यतिरिक्तविषयत्वात् व्याख्यातृभिस्तदुदाहरणमज्ञानविजृम्भितम् 'पितुः शतगुणं माता गौरवेणातिरिच्यते' इति तु शुश्रूषामात्रे नतु वचनकरणे पितुरेव नियन्तृत्वात् अत एव 'माता भक्ता पितुः पुत्रो यस्माज्जातः स एव सः' इतिवचने नाप्यविरोधः ॥ ३६ ॥

३७] ति० टी०-तस्मादेतौर्ध्वदेहिकौ भूलोके कार्यं कर्तुं योग्यमेव तदेतत्पितृवाक्यं मया क्रियते नान्यथाऽकृत्यं न क्रियत इत्यर्थः । नाम प्रसिद्धम् । कश्चिन्न हीयते मातुः किंचित्तुल्योत्पादकेऽपि धर्मेणेति शेषः ॥ ३७ ॥

रा० टी०-उपसंहरन्नाह-तदिति । तद्घटितहेतोः कार्यं कर्तव्यं पित्रा निर्दिष्टं भुवि कस्मिंश्चित्स्थले अन्यथा न क्रियते तदेव क्रियते इत्यर्थः । हि यतः पितुर्वचनं कुर्वन् पुरुषः न हीयते त्यज्यते धर्मेणेति शेषः नाम प्रसिद्धमेतत् । किंच अमहीयते न पूज्यते न सर्वोऽपि पूज्यते इत्यर्थः ॥ ३७ ॥

गो० टी०-तदिति । तत्तस्मात्कारणात् भुवि कार्यं कर्तव्यम् एतत् पितृवचनं मया स्वन्यथा न क्रियत इति संबन्धः हि यस्मात् पितृवचनं कुर्वन् कश्चिन्न हीयते नाम । नामेति प्रसिद्धौ ॥ ३६ ॥

३८-३९] ति० टी०-पुनरनन्तरम् ॥ ३८ ॥ ३९ ॥

रा० टी०-तामिति । सर्वधनुष्मतां श्रेष्ठो रामः लक्ष्मणमब्रवीत् ॥ ३८ ॥

रा० टी०-तद्वचनमेवाह-तवेति । हे लक्ष्मण ! अनुत्तममतिश्रेष्ठं स्नेहादि जानामि ॥ ३९ ॥

गो० टी०-तामिति । पुनः अनन्तरमित्यर्थः ॥३७॥३८॥

४०] ति० टी०-मम मातुर्यन्महदुःखं तत्सत्यशमयोरभिप्रायं तद्विषयमदभिप्रायमज्ञात्वा इत्यतस्तवेदृशं वाक्यं तत्त्वज्ञस्यानुचितमिति भावः ॥ ४० ॥

रा० टी०-ममेति । हे शुभलक्षण ! सत्यस्य सत्यप्रतिज्ञस्य अत एव शमस्य नित्यनियमितोभयकरणस्य पितुरतुलं प्राकृतविलक्षणमभिप्रायं प्रतिज्ञापालनादिरूपमभिप्रेतं विज्ञाय मम मातुः महदुःखं न एतेन प्रव्रजनप्रतिबन्धकारकं वचनं न वक्तव्यमिति सूचितम् ॥ ४० ॥

गो० टी०-ममेति । सत्यस्य धर्मस्य अभिप्रायं रहस्यमविज्ञाय मम मातुः अतुलं महदुःखं जायत इति शेषः । धर्मरहस्यं जानन्नपि त्वं किमर्थमेवं वदसीति भावः ॥ ३९ ॥

४१] ति० टी०-तदेवाह-धर्म इति । धर्मः सर्वपुरुषार्थेषूत्तमः श्रेष्ठः । प्रतिष्ठितं प्रशस्तं कारणम् । एतदुत्तमं पितुर्वचनं धर्मसंश्रितमपि वने तपस्यया तपस्विरक्षणेन च धर्मलाभात् अतोऽवश्यं कर्तव्यं तद्वच इति भावः । अत्रोत्तममित्यस्य त्रैलोक्यपवित्रत्वेनोत्तममिति व्याख्येयम् ॥ ४१ ॥

रा०टी०-धर्मोऽवश्यमाचरणीय इति बोधयन्नाह-धर्म इति । धर्मः प्रजापालनादिः परमः अतिश्रेष्ठः अत एव धर्मे सत्यं धर्मनिमित्तकं सत्यमित्यर्थः प्रतिष्ठितमतिश्रेष्ठमत एव धर्मसंश्रितं

---

१ देवेति गो. ग. पाठः । २ तवेति गो. पाठः । ३ अविज्ञायेति गो. पाठः । ४ एतवेति गो. पाठः ।

संश्रुत्य च पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा । न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता ॥ ४२ ॥
सोऽहं न शक्ष्यामि पुनर्निर्योगमतिवर्तितुम् । पितुर्हि वचनाद्वीरे[1] कैकेय्याहं प्रचोदितः ॥ ४३ ॥
तदेतां विसृजानार्यां क्षत्रधर्माश्रितां मतिम् । धर्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ॥ ४४ ॥
तमेवमुक्त्वा सौहार्दाद्भ्रातरं लक्ष्मणाग्रजः । उवाच भूयः कौसल्यां प्राञ्जलिः शिरसा नतः॥ ४५ ॥
अनुमन्यस्व मां देवि गमिष्यन्तमितो वनम् । शापितासि मम प्राणैः[2] कुरु स्वस्त्ययनानि मे॥ ४६ ॥
तीर्णप्रतिज्ञश्च वनात्पुनरेष्याम्यहं पुरीम् । ययातिरिव राजर्षिः पुरा हित्वा पुनर्दिवम् ॥ ४७ ॥

धर्मनिष्पादकमित्यर्थः । अपिना सत्यसंश्रितमेतत्पितुः वचनमुत्तममेतेन इदं पित्राज्ञापितं कर्तव्यमस्माभिरिति सूचितम् ॥४१॥

गो० टी०–धर्मतत्त्वमाह–धर्मो हीति । लोके पुरुषार्थेषु धर्मः परमः प्राथमिकः प्रधानभूतः । ततः किमित्यत्राह–धर्मे सत्यं प्रतिष्ठितमिति धर्मैकपर्यवसायि सत्यमित्यर्थः । उत्तमं मातृवचनापेक्षया उत्कृष्टम् एतत् पितृवचनं च धर्मसंश्रितं धर्मैकफलम् ॥ ४० ॥

४२] ति० टी०–पितृवाक्यकरणस्य प्रतिज्ञातत्वादपि तदुल्लङ्घनमनुचितमित्याह–संश्रुत्येति । प्रतिज्ञाय । वृथा मोघम् ॥ ४२ ॥

रा० टी०–वाक्यकरणाभावे दोषमाह–संश्रुत्येति । पित्रादिवाक्यं संश्रुत्य करिष्यामीति प्रतिज्ञाय धर्ममाश्रित्य तिष्ठता पुरुषेण वृथा मिथ्या न कर्तव्यम् किंच न कर्तव्यमिति वचनं वृथा तदाचरितधर्मादिवैयर्थ्यसंपादकमित्यर्थः । एतेन स्वधर्मं रक्षता पुरुषेण पित्राद्याज्ञापनमवश्यमनुष्ठेयमिति सूचितम् ॥४२॥

गो० टी०–एवं सत्यवचनं पितृवचनकरणं च द्वयमपि धर्मनिमित्तमित्युक्तं तत्र सत्यस्य कर्तव्यत्वमाह–संश्रुत्येति । धर्ममाश्रित्य तिष्ठता धर्मरूपफलमिच्छता ॥ ४१ ॥

४३] ति० टी०–इदं सपथ्याः कैकेय्या वचनं न पितुस्तत्राह–सोऽहमित्यादि ॥ ४३ ॥

रा० टी०–स इति । हे धीर! पितुर्वचनात्पित्राज्ञापितत्वहेतोः कैकेय्या प्रचोदितः वनगमनाय प्रेरितः सोऽहं नियोगमाज्ञामतिवर्तितुमुल्लङ्घितुं न शक्ष्यामि ॥ ४३ ॥

गो० टी०–पितृवचनकरणस्य कर्तव्यत्वमाह–सोऽहमिति । प्रतिज्ञातवानहमित्यर्थः । नियोगं आज्ञां पितृवचनत्वाभावं परिहरति–पितुर्हीति । पितृवचनकरणं सत्यं च एकैकमेव धर्ममूलं कार्यं किं पुनर्मिलितमिति भावः ॥ ४२ ॥

४४–४५] ति० टी०–अनार्यां मतिं पितरं वधूं हत्वा वा राज्यं कर्तव्यमित्येवमधर्मविषयां मतिम् । मद्बुद्धिः पितृवाक्यकरणरूपा अनुगम्यतामनुवर्त्यताम् ॥ ४४ ॥ ४५ ॥

रा० टी०–तदिति । तद्वर्णितहेतोः अनार्यां क्षुद्रां क्षत्रधर्माश्रितां क्षत्रधर्मैः राज्यधर्मनिष्पातैः आश्रितामासेवितामेनां पित्राज्ञापनहापिकां मतिं विसृज त्यज अत एव तैक्ष्ण्यं प्राजनहेतुभूतकैकेय्यादिषु तीक्ष्णत्वं धर्मं माश्रय न स्वीकुरु अत एव मद्बुद्धिः मत्स्वीकृतो निश्चयः अनुगम्यतां क्रियतामित्यर्थः । अयं निरनुबन्धको भाशब्दः अत एव " माङि लुङ् " इत्यस्य न प्रवृत्तिः ॥ ४४ ॥

रा० टी०–तमिति । कौसल्यां भूय उवाच ॥ ४५ ॥

गो० टी०–एवं सत्यरहस्यमुक्त्वा शमस्य तत्वमाह–तदिति । अनार्यां दुष्टां पितरमपि हत्वा राज्यं कुर्यामित्येवंरूपां क्षत्रधर्माश्रितां केवलशूरधर्माश्रितां रौद्रशाक्त्यसहितक्षत्रधर्माश्रितामिति वार्थः । क्षत्रधर्मस्य तथात्वं प्रतिपादितं महाभारते राजधर्मे–'क्षत्रधर्मो महारौद्रः शठकृत्य इति स्मृतः' इति । तादृशीं मतिं विसृज किंतु धर्ममप्याश्रय मा तैक्ष्ण्यम्, इतः परमपि क्रौर्यं माश्रय मद्बुद्धिः मम बुद्धिः अनुगम्यतामनुवर्त्यतां लोकायतमतं केवलनीतिर्नाश्रयणीया किंतु धर्माश्रिता नीतिरित्यर्थः । अस्मिन् हि शास्त्रे धर्मस्थापनमुच्यते, स्थापनं च धर्ममन्तरेण केवलनीतिरेवार्थसाधनमिति लोकायतमतनिरासेन प्रवर्तनं, तेन तत्र तत्र लक्ष्मणमुखेन लोकायतं प्रवर्तितं उपन्यस्तं तन्निरासेन रामेण धर्मः स्थाप्यत इति रहस्यम् ॥ ४३–४५ ॥

४६] ति० टी०–शापितासि शपथं प्रापितासि । गमननिरोधं मा कुर्विति शेषः ॥ ४६ ॥

रा० टी०–तद्वचनमेवाह–अन्विति । इतः उक्तहेतोः वनं गमिष्यन्तं मामनुमन्यस्व आज्ञापयेत्यर्थः । नन्वियोगकारिणीभूतमत्कर्तृका प्रव्रजनप्रेरणा कथं स्यादित्यत आह–शा नित्यमङ्गलस्वरूपा त्वं प्राणैः प्राणप्रियलक्ष्मणादिभिः सह मम मया आपिता नित्यं प्राप्ता नित्यसंबन्धविशिष्टासीत्यर्थः एतेन सर्वेषां नित्यत्वं सूचितम् तेन नित्येषु ध्वंसप्रतियोगित्वाभावेन विनानामकिंचित्करत्वाद्वियोगेऽपि शोको न कार्य इति ध्वनितम् ॥ ४६ ॥

४७] ति० टी०–दिवं हित्वा भूमौ पतितः पुनर्दिवं यथा गतस्तथेत्यर्थः ॥ ४७ ॥

रा० टी०–तीर्णेति । तीर्णा समापिता प्रतिज्ञा येन सोऽहं पुनरेष्यामि । पुनरागमनमात्रे दृष्टान्तः ययातिरिवेति ययातिः स्वर्गाद्भ्रष्टो पतितः पुनः स्वर्गं जगामेति प्रसिद्धम् ॥ ४७ ॥

गो० टी०–किं ते मद्वचनं न कर्तव्यमित्याशङ्क्य प्रथमप्रवृत्तपितृवचनकरणानन्तरं क्रियत इत्याह–तीर्णप्रतिज्ञ इति । ययातिः स्वर्गाद्भ्रष्टः पुनः स्वर्गं गत इति महाभारते प्रसिद्धम् ४६॥४७

---

१ पितुरिति गो. पाठः । २ वीरेति रा. पाठः । ३ एनामिति गो. रा. पाठः ।

शोकः संधार्यतां मातर्हृदये साधु मा शुचः । वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥ ४८ ॥
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया । पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः ॥ ४९ ॥
अम्ब संभृत्य संभारान्दुःखं हृदि निगृह्य च । वनवासकृता बुद्धिर्मम धर्म्यानुवर्त्यताम् ॥ ५० ॥

एतद्वचस्तस्य निशम्य माता सुधर्म्यमव्यग्रमविक्लवं च ।
मृतेव संज्ञां प्रतिलभ्य देवी समीक्ष्य रामं पुनरित्युवाच ॥ ५१ ॥
यथैव ते पुत्र पिता तथाहं गुरुः स्वधर्मेण सुहृत्तया च ।
न त्वानुजानामि न मां विहाय सुदुःखितामर्हसि पुत्र गन्तुम् ॥ ५२ ॥
किं जीवितेनेह विना त्वया मे लोकेन वा किं स्वधयामृतेन ।
श्रेयो मुहूर्तं तव संनिधानं ममैर्व कृत्स्नादपि जीवलोकात् ॥ ५३ ॥
नरैरिवोल्काभिरपोह्यमानो महागजो ध्वान्तमभिप्रविष्टः ।
भूयः प्रजज्वाल विलापमेवं[6] निशम्य रामः करुणं जनन्याः ॥ ५४ ॥

४८] ति० टी०–पुनरेष्यामीत्यन्वयः ॥ ४८ ॥

रा० टी०–शोक इति । हे मातः ! शोकः शोकविशिष्टः पितेति शेषः संधार्यतां बोध्यतामित्यर्थः । ननु शोकाक्रान्तया मया कथं तस्य प्रबोध इत्यत आह–मा शुचः शोकं त्यजेत्यर्थः। तत्र हेतुः एष्यामि आगन्तास्मि अत एव मा शुच इत्यनेन न पौनरुक्त्यम् ॥ ४८ ॥

४९] ति० टी०–पितुः राज्ञो दशरथस्य ॥ ४९ ॥

रा० टी०–त्वयेति । नियोगे आज्ञापने ॥ ४९ ॥

गो० टी०–न केवलं ममैवायं भारः किंतु युष्माकमपीत्याह–त्वयत्येादिश्लोकेन ॥ ४८ ॥

५०] ति० टी०–संभारानभिषेकसंभारान् निगृह्य निवार्य अनुवर्त्यतां त्वयानुमन्यतामित्यर्थः ॥ ५० ॥

रा० टी०–अम्बेति । संभारानभिषेकसामग्रीः अवसंहृत्य संस्थाप्य धर्म्या धर्मादनपेता मम बुद्धिः अनुवर्त्यतां तदनुसारेणैव क्रियतामित्यर्थः ॥ ५० ॥

गो० टी०–अम्बेति । संभारान् पूजाद्रव्याणि ॥ ५९ ॥

५१] ति० टी०–सुधर्म्यं धर्मयुक्तम् अव्यग्रं धैर्ययुक्तम् अविक्लवमकातरम् । मृतेव मूर्च्छितेति यावत् ॥ ५१ ॥

रा० टी०–एतदिति । सुधर्म्यमतिधर्मविशिष्टमव्यग्रं व्यग्रताविरोधि अविक्लवं कातर्यरहितं वचो निशम्य श्रुत्वा रामामिति शेषः ॥ ५१ ॥

गो० टी०–एतदिति । अव्यग्रम् अनाकुलम् ' व्यग्रो व्यासक्त आकुलः ' इत्यमरः । अविक्लवम् अविह्वलं दृढनिश्चयप्रतिपादकमित्यर्थः । मृतेव मूर्च्छितेति यावत् ॥ ५० ॥

५२] ति० टी०–स्वधर्मेण पालनादिरूपमातृधर्मेण । सुहृत्तया पितुरिव स्नेहवत्तया ॥ ५२ ॥

रा० टी०–तद्वचनमेवाह–यथेति । यथा ते गुरुः पिता तथा अहमतः स्वधर्मेण स्वस्य आत्मनः पुत्रस्येत्यर्थः धर्मेण सेवादिना सुहृत्तया चोपलक्षितस्त्वं न मां त्वत्कर्तृकनमस्कारकर्मीभूतां सुदुःखितां त्वद्वियोगश्रुतिहेतुकदुःखविशिष्टां मां विहाय त्यक्त्वा गन्तुं नार्हसि इति त्वा त्वामनुजानामि बोधयामि मया सहैव गन्तुं योग्योऽसीति त्वाभिप्रायः सूचितः ॥ ५२ ॥

गो० टी०–यथेति । सुहृत्तया स्नेहेन एवं सुदुःखितामिति संबन्धः ॥ ५१ ॥

५३] ति० टी०–लोकेनेतरबन्धुजनेन । स्वधया पितृपूजनेन इदमुपलक्षणं देवपूजादेरपि । अमृतेनामृतत्वसाधनेन तत्त्वज्ञानेनापि किम् कृत्स्नादपि जीवलोकात्कृत्स्नलोकसंनिध्यान्मुहूर्तमपि तव संनिधानमेव श्रेयः ॥ ५३ ॥

रा० टी०–ननु विपिने क्लेशभिया न नेतास्मीत्यत आह–किमिति । लोकेन सुहृज्जनेन स्वधया स्वधादिशब्दवत्या निखिलक्रियेत्यर्थः। अमृतेन ध्वंसाप्रतियोगिना जीवितेन कृत्स्नान्निखिलाजीवलोकात्सकललोकराज्येनेत्यर्थः । मुहूर्तमपि त्वया विना किं सर्वं व्यर्थमित्यर्थः । तत्र हेतुः तव संनिधानमेव मम श्रेयः ॥ ५३ ॥

गो० टी०–ननूक्तं राजनियोगस्त्वयाप्यनुवर्तनीय इति तत्राह–किमिति । लोकेन परलोकेन स्वधया पितृलोकप्राप्तिसिद्धया किं प्रयोजनमित्यर्थः अमृतेन स्वर्गलोकप्राप्तिसिद्धेनामृतेन किं प्रयोजनं कृत्स्नादपि जीवलोकात् आनन्दहेतुभूतमहर्लोकापुपरितनलोकान्तर्वर्तिजीववर्गात् संनिहितमिति शेषः॥५३॥

५४] ति० टी०–नरैरुल्काभिरज्ञातैरपोह्यमानस्तुद्यमानो निशि ध्वान्तमभिप्रविष्टो गज इव भूयः प्रजज्वाल । किमिदं यन्मामधर्मे प्रवर्तयितुं विपलतीति क्रोधः ॥ ५४ ॥

रा० टी०–रामजननीवचनं संवर्ण्य तत्समीपवर्तितदभिप्रायानभिज्ञजनवृत्तमाह–नरैरिति । एवं जननीविलापसदृशं जन-

---

१ इहेष्यामीति रा. पाठः । २ अवसंहृत्येति रा. पाठः । ३ गन्तुमेवमिति गो. पाठः । ४ इहेति गो. पाठः । ५ ऽध्वानमन्विति गो. पाठः । ६ एनमिति गो. पाठः ।

स मातरं चैव विसंज्ञकल्पमार्तं च सौमित्रिमभिप्रतप्तम् ।
धर्मे स्थितो धर्म्यमुवाच वाक्यं यथा स एवार्हति तत्र वक्तुम् ॥ ५५ ॥
अहं हि ते लक्ष्मण नित्यमेव जानामि भक्तिं च पराक्रमं च ।
मम त्वभिप्रायमसंनिरीक्ष्य मात्रा सहाभ्यर्दसि मा सुदुःखम् ॥ ५६ ॥
धर्मार्थकामाः खलु जीवलोके समीक्षिता धर्मफलोदयेषु ।
ये[3] तत्र सर्वे स्युरसंशयं मे भार्येव वश्याभिमता सपुत्रा ॥ ५७ ॥
यस्मिंस्तु सर्वे स्युरसंनिविष्टा धर्मो यतः स्यात्तदुपक्रमेत ।
द्वेष्यो भवत्यर्थपरो हि लोके कामात्मता खल्वपि न प्रशस्ता ॥ ५८ ॥

न्या समीपवर्तिनामिति शेषः । विलापं निशम्य श्रुत्वा उल्कादिभिः अपोह्यमानः निवार्यमाणः अध्वानं मार्गं प्रविष्टो महागज इव भूयः प्रज्ज्वाल अधिकं शुशुभे गमनाय मतिं चक्रे इत्यर्थः । एतेन जनन्यभिप्रायः रामेण बोधित इति ध्वनितम् ॥५४॥

गो० टी०–एवं मातृकारुण्येऽपि धर्म एव स्थिरोऽभूदित्याह–नरैरिति । नरैर्गजग्राहिभिः उल्काभिः साधनैः अपोह्यमानः निवार्यमाणोऽपि अध्वानं मार्गमनुप्रविष्टो महागज इव मात्रादिवाक्येन वार्यमाणोऽपि धर्ममनुप्रविष्टो रामः भूयः प्रज्ज्वाल संरब्धोऽभूत् स्वमार्ग एव स्थितोऽभूदित्यर्थः । अत्र नरैरित्युपमानगतबहुवचनेन पुनः सौमित्रिणापि तथैवोक्तमिति गम्यते अत एव मातरं सौमित्रिं चेत्युक्तम् ॥ ५३ ॥

५५] ति० टी०–तत्र रामस्य धर्मे निष्ठां वाल्मीकिः श्लाघते–यथा स एवेति । तत्र तथाविधघोरदशायाम् । अनन्वयालंकारोऽत्र ॥ ५५ ॥

रा० टी०–स इति । विसंज्ञकल्पां विसंज्ञं संज्ञारहितं कल्पयति करोति सा तां तच्चेष्टादर्शनमात्रेण अन्या अपि विसंज्ञा भवन्तीत्यर्थः । किंच प्राप्तकिंचित्संज्ञां मातरं सौमित्रिं च यत्स एव वक्तुमर्हति तद्धर्म्यं धर्मादनपेतं वाक्यं धर्मे स्थितः स रामः यथा यथावदुवाच ॥ ५५ ॥

गो० टी०–स इति । तत्र तस्मिन्धर्मसंकटे अतिकृच्छ्रावस्थायां एतादृशधर्मैकनिष्णातपुरुषान्तरस्याभावात् स एवार्हतीति वाल्मीकिः स्तौति ॥ ५४ ॥

५६] ति० टी०–ममाभिप्रायं धर्मैकनिष्ठत्वरूपम् । अभ्यर्दयसि पीडयसि । 'अभ्यर्थयसि' इति पाठे प्रेरयसीत्यर्थः । सर्वधान्तर्भावितण्यर्थता । एवं सुतरां दुःखं मा मा कुर्वित्यर्थः ॥ ५६ ॥

रा० टी०–तद्वचनमेवाह–अहमिति । हे लक्ष्मण ! ते नित्यं पराक्रमं भक्तिं च अहं जानामि त्वं तु ममाभिप्रायमसंनिरीक्ष्य अज्ञात्वा सुदुःखं यथा स्यात्तथा मात्रा सह मा माम् अर्दसि सहगमनं याचसे ॥ ५६ ॥

गो० टी०–अहमिति । अभ्यर्दसि व्यथयसि ॥ ५५ ॥

५७] ति० टी०–धर्मफलोदयेषु पूर्वकृतधर्मफलोत्पत्तिकालेषु ये धर्मार्थकामास्त्रयोऽपि लोके समीक्षिता दृष्टा मन्वादिभिर्धर्मफलत्वेन ये त्रयोऽपि दृष्टास्ते सर्वे तत्र धर्मे सति अवश्यं भवेयुरिति मे मतिः न तु तत्र मे कश्चित्संदेह इति भावः । एकतोऽनेककार्यलाभे दृष्टान्तमाह–भार्येवेति । वश्याऽनुकूला । अतिथिपूजादिधर्मसाधनम्, अभिमताभिप्रिया कामसाधनम् । सपुत्रा परमलोकगमनरूपार्थसाधनं च भवति तद्वत् । तस्माद्धर्म एव मुख्य इति स एव रक्ष्य इति भावः ॥ ५७ ॥

रा० टी०–स्वाभिप्रायमाह–धर्मेति । धर्मफलोदयेषु धर्माणां सदसत्कर्मणां फलोदयेषु फलभोगसमयेषु समीक्षितास्तत्रतो ज्ञाताः तत्र प्रसिद्धे जीवलोके ये धर्मार्थकामाः ते वश्या, स्वाधीनतां प्राप्ता अभिमता सौन्दर्यादिना अत्यन्तमीप्सिता सपुत्रा पुत्रसहिता भार्येव असंशयं यथा स्यात्तथा मे वश्याः स्युः सन्ति एतेन सर्वे स्वस्वसमये मया रक्षणीया इति सूचितम् ॥५७॥

गो० टी०–धर्मो हि परमो लोक इत्यादिना पूर्वं संग्रहेणोक्तं प्रपञ्चयति–धर्मेति । तातेति सान्त्वसंबोधने किलेति प्रसिद्धौ लोक इति मोक्षव्याहृत्तिः धर्मफलोदयेषु धर्मस्य फलभूतानां सौख्यानामुदयेषु प्राप्तिषु समीक्षिताः उपायत्वेन निश्चिताः ये धर्मार्थकामाः ते सर्वे तत्र धर्मे स्युः धर्म एवानुष्ठिते सौख्यातिशयप्रदानस्वभावाः सर्वे पुरुषार्थाः सिध्यन्तीति भावः । अत्रार्थे मे असंशयं संशयो नास्ति अर्थाभावेऽव्ययीभावः । उक्तार्थे दृष्टान्तमाह–भार्येत्यादि । यथा भार्या वश्या अनुकूला सती धर्मं जनयति अभिमता प्रिया कामं, सुपुत्रा सती अर्थं, सुलक्षणसुलग्नप्रभवपुत्रे जाते हि पितुरर्थाः सिध्यन्तीति तथा सर्वपुरुषार्थानां धर्म एव निदानं तथाहि धर्मो हि धर्महेतुरर्थहेतुः काम्यमानस्रक्चन्दनवनितादिहेतुश्च अतो धर्म एव समाश्रयणीय इति भावः । यद्वा लोके धर्मादयः फलसाधनत्वेन समीक्षिताः ज्ञानादिभिरवगतास्ते सर्वे तत्र फलोदयेषु स्युः समर्थाः स्युः मे असंशयं मया निश्चितमित्यर्थः यथा उक्तगुणविशिष्टा भार्या फलसाधनं तथेति अस्मिन् पक्षे अध्याहारादिक्लेशो नास्ति उत्तरश्लोकानुरूप्यं च ५६

५८] ति० टी०–अनुमेवार्थं भङ्ग्यन्तरेण द्रढयति–यस्मिन्निति । यस्मिन्कर्मणि सर्वे धर्मादयोऽतिनिविष्टा असंबद्धास्त-

१ मामिति गो. पाठः । २ किल तात लोके इति गो. पाठः । ३ ते इति गो. पाठः । ४ पश्चेति गो. पाठः । ५ सुपुत्रेति गो. रा. पाठः । ६ अपीति गो. पाठः ।

गुरुश्च राजा च पिता च वृद्धः क्रोधात्प्रहर्षादथवापि कामात् ।
यद्व्यादिशेत्कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः ॥ ५९ ॥
नै तेन शक्नोमि पितुः प्रतिज्ञामिमां नै कर्तुं सकलां यथावत् ।
स ह्यावयोस्तात गुरुर्नियोगे देव्याश्च भर्ता स गतिश्चै धर्मः ॥ ६० ॥
तस्मिन्पुनर्जीवति धर्मराजे विशेषतः स्वे पथि वर्तमाने ।
देवी मया सार्धमितोऽभिगच्छेत्कथंस्विदन्या विधवेव नारी ॥ ६१ ॥
सा मानुमन्यस्व वनं व्रजन्तं कुरुष्व नः स्वस्त्ययनानि देवि ।
यथा समाप्ते पुनराव्रजेयं यथा हि सत्येन पुनर्ययातिः ॥ ६२ ॥

नोपक्रमेत नारभेतैवेति शेषः । एकैकफलकानेककर्मसंभवेऽपि यतो धर्मः स्यात्तदुपक्रमेत तदेव कुर्यान्नापरम् । कुतस्तत्राह—द्वेष्य इति । अर्थपरो धर्मविरुद्धकेवलार्थपरः । कामात्मता धर्मविरुद्धकामपरता न प्रशस्ता गर्हिता राज्ञ इव ॥ ५८ ॥

रा० टी०—धर्मस्तु सदैव रक्षणीय इति बोधयितुमाह—यस्मिन्निति । यस्मिन्धर्मे सर्वे जनाः असंनिविष्टाः उपदेशमन्तरा प्रवृत्तिरहिताः स धर्मः यतः येनोपायेन स्यात्तेनोपायेन तत्तं धर्ममुपक्रमेत आरभेत । तदिति सामान्ये नपुंसकं धर्महेतुत्वानाक्रान्ता अर्थकामा न सेव्या इति बोधयितुं तत्र दोषमाह—अर्थपरः धर्माकारणीभूतद्रव्यादिसंग्रहीता द्वेष्यो भवति अतः कामात्मता कामपरत्वं न प्रशस्तं तत्रापि द्वेषादेर्दर्शनमस्तीति तात्पर्यम् ॥ ५८ ॥

गो० टी०—एवं धर्मादीनां फलसाधनत्वं निर्णीतं तेष्वविशेषादन्यतमस्याश्रयणीयत्वे प्राप्ते आह—यस्मिन्निति । यस्मिन् कर्मणि आश्रयमाणे सर्वे अर्थादयस्त्रयः असन्निविष्टा न प्रविशन्ति न संभवन्तीति यावत् किंतु यतो धर्मः यस्माद्धर्म एव स्यात्तदारभेत अथवा यस्मिन् कर्मणि सर्वे धर्मार्थकामाः असंनिविष्टाः स्युः अविद्यमानाः भवेयुः तत् कर्म नोपक्रमेत यतः यस्मात्कर्मणः धर्मः स्यात् तदुपक्रमेत । प्रथमयोजनायामर्थकामयोः संनिवेशे को दोष इत्याह—द्वेष्य इति । तस्मादर्थकामौ परित्यज्य केवलधर्मपरो भवेदित्यर्थः ॥ ५७ ॥

५९] ति० टी०—यदेवमतो—गुरुश्चेत्यादि । गुरुरुपनेता धनुर्वेदाद्युपदेष्टा च स यत्कार्यं व्यादिशेत्तद्धर्ममवेक्ष्य पितृवचनकरणं धर्म इति ज्ञात्वा को न कुर्यात् ॥ ५९ ॥

रा० टी०—गुरुरिति । गुर्वानिर्दिश्यद्व्यादिशेदाज्ञापयेत्तत्कार्यं धर्ममवेक्ष्य कः अनृशंसवृत्तिर्न कुर्यात् कुर्यादेवेत्यर्थः ॥ ५९ ॥

गो० टी०—यतो धर्म एव कर्तव्यः अत आह—गुरुरिति । गुरुः धनुर्वेदगीतिशास्त्राद्युपदेशात् । यदिवेत्येकनिपातो वार्थे अपिचेत्यर्थः । धर्मं सत्यप्रतिज्ञास्वरूपमवेक्ष्य तत्परिपालनायेत्यर्थः । यत्कार्यं व्यादिशेत् निरूपयेत् तत्कर्म अनृशंसवृत्तिः को न कुर्यात् को न करोति स केवलं नृशंस इति भावः ॥ ५८ ॥

६०] ति० टी०—इमां सकलां संपूर्णां न कर्तुं न शक्नोमि । नियोगे प्रभुरिति शेषः । मातुः स्वेन सह गमननिषेधायाह—देव्याश्चेति । भर्तृत्वात्स एवास्या गतिर्न तु पुत्रः । 'सगतिः स धर्मः' इति पाठे तेन सगतिः समानगतिरेषा । सः तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्तेन सहवास एवास्या धर्मः, न तु मया सह वास इत्यर्थः ॥ ६० ॥

रा० टी०—नेति । तेन हेतुना इमां पितुः प्रतिज्ञां यथावत्कर्तुं न शक्नोमि न शक्नोम्येवेत्यर्थः । त्वया जनन्या च तदनुष्ठातव्यमित्याह—हे तात! आवयोः नियोगे आज्ञापने स एव गुरुः जनन्यास्तु स एव गतिर्धर्मश्च तत्सेवाधीनमेव गत्यादीत्यर्थः । तत्र हेतुः यतो भर्ता पतिः ॥ ६० ॥

गो० टी०—स इति । सोऽहमनृशंसोऽहं पितुः प्रतिज्ञां वरदानहेतुकभरताभिषेकमद्विवासनरूपां प्रतिज्ञामकर्तुं न शक्नोमि अवश्यं कुर्यामित्यर्थः । तत्र हेतुमाह—स ह्रीति । आवयोः मम भरतस्य चेत्यर्थः । नियोगे गुरुः प्रभुरित्यर्थः । देव्याः कौसल्यायाः तथा च देव्यापि तद्वचनं नातिक्रमणीयमिति भावः । धर्मः अलौकिकश्रेयःसाधनम् ॥ ५९ ॥

६१] ति० टी०—तदेवाह—तस्मिन्निति । स्वे पथीष्टपुत्रं परित्यज्यापि सत्यं रक्षणीयमित्येवंरूपे सत्यमार्गे । अन्येत्यस्य विवरणं विधवेति ॥ ६१ ॥

रा० टी०—तस्मिन्निति । स्वे पथि राजधर्मे वर्तमाने धर्मराजे पितरि जीवति पालयति सति अन्या प्राकृतविलक्षणा देवी माता विधवा स्वामिरहिता नारीव मया सार्धमितः कथमभिगच्छेन्मातुर्गमनं नोचितमिति तात्पर्यम् ॥ ६१ ॥

गो० टी०—देव्याश्चेत्यस्याशयमुद्घाटयति—तस्मिन्निति । धर्मराजे धर्मप्रवर्तके विशेषतः पूर्वराजापेक्षया विशिष्य स्वे पथि स्वासाधारणे पथि धर्ममार्गे वर्तमाने स्वमर्यादानतिलङ्घिनीत्यर्थः । तस्मिन् गतिभूते भर्तरि जीवति देवी कृताभिषेका महिषी सहधर्मचारिणीति यावत् मया पुत्रेण सह अन्येव या काचित् जीव कथं स्वित् कथं वा वनमुपगच्छेत् अभर्तृकाया एव पुत्रेण सह वनगमनमुचितमिति भावः ॥ ६० ॥

६२] ति० टी०—मा मामित्यर्थः । पुनर्ययातिः स्वर्गमापेति शेषः ॥ ६२ ॥

१ यदीति गो. पाठः । २ स वै नेति गो. पाठः । ३ अकर्तुमिति गो. पाठः । ४ स इति गो. पाठः । ५ अनुगच्छेदिति गो. पाठः ।

यशो ह्यहं केवलराज्यकारणान्न पृष्ठतः कर्तुमलं महोदयम् ।
अदीर्घकालेन तु देवि जीविते वृणेऽवरामद्य महीमधर्मतः ॥ ६३ ॥
प्रसादयन्नरवृषभः सतं मातरं पराक्रमाज्जिगमिषुरेव दण्डकान् ।
अथानुजं भृशमनुशास्य दर्शनं चकार तां हृदि जननीं प्रदक्षिणम् ॥ ६४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ।

रामः स्वनिर्वासने कैकेय्याः कारणत्वं निराकृत्य स्वदैवस्यैव तत्कारणतां प्रतिपाद्य कैकेय्यै संक्रुद्धं लक्ष्मणमसान्त्वयत् ।

अथ तं व्यथया दीनं सविशेषममर्षितम् । सैरोषमिव नागेन्द्रं रोषविस्फारितेक्षणम् ॥ १ ॥

रा० टी०–सेति । देवि हे मातः ! सातिपूज्या त्वं मा मामनुमन्यस्व आज्ञापय अत एव नः स्वस्त्ययनानि कुरुष्व । तत्र हेतुः यथा समाप्ते नियमितवनप्रव्रजनवर्षपूर्तौ आव्रजेयमागच्छेयम् । तत्र दृष्टान्तः ययातिर्यथेति ॥ ६२ ॥

गो० टी०–सेति । सा जीवद्भर्तृका त्वं मा मामनुमन्यस्व अनुजानीहि इतः पूर्वं वनगमनं प्रति सीताभिप्रायस्यापरिज्ञातत्वात् दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ॥ प्रविष्टं तत्र मां देवि त्वं पूर्वमुपधारय' इत्युक्त्या लक्ष्मणाभिप्रायस्य ज्ञातत्वाच्च न इत्येतदावयोरित्यस्मिन्नर्थे वर्तते । "अस्मदो द्वयोश्च" इति द्विवचने बहुवचनादेशादेवं व्याख्यातम् एवं च सति 'अनुज्ञातश्च भवता पूर्वमेव यदस्म्यहम्' इति वक्ष्यमाणवचनं चोपपद्यते । स्वस्त्ययनानि शोभनप्राप्तिप्रार्थनानि समाप्ते चतुर्दशवर्षाचरणीये व्रते समाप्ते यथा पुनरागच्छेयं तथा स्वस्त्ययनानि कुरुष्व । पुनरागमने निदर्शनमाह–ययेति । स्वर्गाच्च्युतो ययातिः यथा सत्येन सत्यवचनेन अष्टकादिदौहित्रोक्तसत्यवचनेन पुनः स्वर्गमगच्छत्तथेत्यर्थः । तथोक्तं महाभारते 'आतिष्ठ स्वर्गं राजन् विक्रमस्व विहायसम् । वयमप्यत्र यास्यामो यत्र लोको भविष्यति' इत्यादिना ॥ ६१ ॥

६३] ति० टी०–केवलराज्यकारणाद्धर्महीनराज्यहेतोः । महोदयं महाफलम् । यशः प्राप्तमपि राज्यं त्यक्त्वा पितृवाक्यपालनं कृतवानित्येवं यशः पृष्ठतः कर्तुं नालम् । जीविते मनुष्यजीवनेऽदीर्घकालेऽल्पकालतया निश्चिते सति तदर्थमवरामवरप्रयोजनिकां महीमधर्मतः परमपुरुषार्थत्यागेन न तु तृणे इति संबन्धः ॥ ६३ ॥

रा० टी०–यश इति । अवरां सर्वलोकापेक्षया न्यूनां महीमदीर्घकाले जीविते प्रकटतया पालने केवलराज्यकारणान्महोदयमत्युदयप्रापकं यशः अधर्मतः पृष्ठतः कर्तुमहं न तृणे । अन्तर्भावितण्यिजर्थो जीवतिः ततो भावे निष्ठा ॥ ६३ ॥

गो० टी०–यश इति । केवलराज्यकारणात् धर्मविरहितराज्यहेतोः महोदयं महाफलं यशः पृष्ठतः कर्तुमुपेक्षितुमहं नालं न समर्थोऽस्मि किंच अदीर्घकाले चञ्चले जीविते प्राणधारणे निमित्तसप्तमीयं तडिद्विच्चञ्चलजीवितनिमित्तम् अवरां तुच्छप्रयोजनभूतां महीमधर्मतो न तृणे न स्वीकरोमि ॥ ६२ ॥

६४] ति० टी०–पराक्रमाद्धैर्यात् । दर्शनं स्वसंमतं धर्मरहस्यमनुशास्योपदिश्य तां जननीं प्रदक्षिणं कृत्वा हृदि चकार गन्तुं मनश्चकारेत्यर्थः ॥ ६४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकविंशः सर्गः ॥ २१ ॥

रा० टी०–प्रसादयन्निति । नरवृषभः प्राकृतविलक्षणत्वेन सकलनरश्रेष्ठः पराक्रमात्परेषां सुनिश्चयानामाक्रमः विध्वंसनं तस्माद्धेतोः दण्डकान् जिगमिषुः स रामः मातरमनुजं च दर्शनं धर्मविषयकज्ञानमनुशास्य जननीं प्रदक्षिणं हृदि हृदये चकार प्रत्यक्षप्रदक्षिणस्य वियोगज्ञापकत्वात् तत्र कृतमिति तात्पर्यम् ॥ ६४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकविंशः सर्गः ॥ २१ ॥

गो० टी०–प्रसादयन्निति । पराक्रमात् राम तस्मादितः शीघ्रं वनं गन्तुं त्वमर्हसीत्युक्तकैकेयीप्रेरणात् अनुजं दर्शनं स्वमतमनुशास्य प्रदर्श्येत्यर्थः । शासिर्द्विकर्मकः हृदि प्रदक्षिणं चकार प्रदक्षिणं कर्तुं संकल्पितवानित्यर्थः । लोकप्रसिद्धाश्चयः पुरुषार्थाः तेषु सर्वमूलत्वादितरयोः सापायत्वाच्च धर्म एवाश्रयणीय इति स्थापितं भवति ॥ ६३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

१] ति० टी०–अथ रामः सौमित्रेः कैकेयीविषयं रोषं शमयतीत्याह–अथेति । व्यथया रामस्य राज्यहानिजन्यया । सविशेषं रामेष्टजनान्तरापेक्षयेति शेषः । अमर्षितं प्राप्तासहनम् । विस्फारणं विस्तारः ॥ १ ॥

१ अहमिति रा. पाठः । २ स्वेति गो. रा. पाठः । ३ श्वसन्तमिति गो. पाठः ।

आसाद्य रामः सौमित्रिं सुहृदं भ्रातरं प्रियम् । उवाचेदं स धैर्येण धारयन्सत्त्वमात्मवान् ॥ २ ॥
निगृह्य रोषं शोकं च धैर्यमाक्रम्य केवलम् । अवमानं निरस्यैनं[2] गृहीत्वा हर्षमुत्तमम् ॥ ३ ॥
उपकॢप्तं[3] यदैतन्मे अभिषेकार्थमुत्तमम् । सर्वं[4] निवर्तय क्षिप्रं कुरु कार्यं निरव्ययम्[5] ॥ ४ ॥
सौमित्रे योऽभिषेकार्थे मम संभारसंभ्रमः । अभिषेकनिवृत्त्यर्थे सोऽस्तु संभारसंभ्रमः ॥ ५ ॥
यस्या मदभिषेकार्थे मानसं परितप्यति[6] । माता नः[7] सा यथा न स्यात्सविशङ्का तथा कुरु ॥ ६ ॥
तस्याः शङ्कामयं दुःखं मुहूर्तमपि नोत्सहे । मनसि प्रतिसंजातं सौमित्रेऽहमुपेक्षितुम् ॥ ७ ॥

२] ति० टी०–आसायाभिमुखीकृत्य धैर्येण सत्त्वं चित्तमविकारितया धारयन्प्रकटयन् ॥ २ ॥

रा० टी०–अथेति । व्यथया भ्रातृवियोगशङ्कया प्राप्तप्रकृतिविपर्यासेन दीनं क्षीणत्वेन प्रतीयमानं सविशेषं रामातिप्रियत्वेन विशेषसंहितमर्पितं रामवियोगासहनशीलं सरोषं नागेन्द्रमिव अत एव रोषविस्फारितेक्षणं रोषेण विस्फारिते ईक्षणे यस्य तं सुहृदं सरलस्वभावं प्रियं स्वातिप्रीतिविषयीभूतं भ्रातरं सौमित्रिमासाद्य हस्तग्रहेण स्वसमीपं प्रापय्य इदमुवाच । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–अथ रामः सौमित्रेः कैकेयीविषयं रोषमुपशमयति–अथेत्यादिश्लोकद्वयमेकं वाक्यम् । सविशेषमन्तरङ्गजनापेक्षया सातिशयम् अर्पितं प्राप्तासहनं रोषविस्फारितेक्षणं क्रोधविस्तारितनयनम् आसाद्य अभिमुखीकृत्य सुहृत्त्वादिविशेषणं कोपेऽप्यनुपेक्षणीयत्वाय सत्त्वं सर्वविषयकं स्वं बलं धैर्येण धारयन्नप्रकटयन् आत्मवान् प्रशस्तमनाः वक्ष्यमनस्क इत्यर्थः ॥ १ ॥ २ ॥

३] ति० टी०–किमुवाचेत्यत्राह–निगृह्येति । रोषं पित्रादिवधहेतुम् । अवमानं वनप्रवासनरूपं निरस्य शत्रुकृतत्वाभावात् । उत्तमं हर्षं सत्यपालनेन पितुः पुण्यलोकसिद्धिजं हर्षम् ॥३॥

४] ति० टी०–तादृशहर्षसिद्ध्यर्थमेव हे लक्ष्मण ! अभिषेकप्रयोजनकं निवर्तय । कार्यं वनगमनोपयुक्तम् ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–निगृह्येति । रोषादिकं निगृह्य सत्यज्येत्यर्थः । धैर्यमाश्रित्य स्वीकृत्य अवमानं प्रव्राजनविषयकसंमतिग्रहणाभावमूलकानादरं निरस्य परिहृत्य उपकल्पं प्राप्तं सर्वमेतत्सामग्रीजातं क्षिप्रं निवर्तय निरव्ययं विघ्नरहितं यथा स्यात्तथा कार्यं कर्तव्यं गमनोद्योगमित्यर्थः कुरु । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–निगृह्येत्युपकल्पमिति च श्लोकद्वयमेकान्वयम् । रोषं पित्रादिविषयं शोकं मद्विषयम् । रोषशोकयोर्निग्रहे हेतुमाह–धैर्यमाश्रित्येति केवलमिति धैर्येनैरन्तर्यमुच्यते अवमानम् आरब्धाभिषेकस्यामपूर्वकवनगमनं निरस्य निजदौर्बल्यकृतत्वाभावाच्चिरार्य उत्तमं हर्षं सत्यपरिपालनेन पितरं तारयिष्याम इति हृद्यन्यं मेऽभिषेकार्थमुपकल्पं संपादितं यत्किंचिदलंकारादिकं ततसर्वं विसर्जय निरत्ययं निरपायं सत्यपरिपालनोपयुक्तं कार्यं वल्कलधारणादिकं कुरु ॥ ३ ॥ ४ ॥

५] ति० टी०–तदेवाह–सौमित्रे इति । संभारसंपादनाय यः संभ्रमस्त्वरा साभिषेकनिवृत्त्यर्थेऽस्तु । वनगमनपरिकरसंपादनायास्त्विति यावत् ॥ ५ ॥

रा० टी०–सौमित्रे य इति । संभारसंभ्रमः सामग्रीसंपादनविषयिणी त्वरा आदरो वा ॥ ५ ॥

गो० टी०–सौमित्र इति । संभारसंभ्रमः संभारसंपादनविषयोत्साहः अभिषेकनिवृत्त्यर्थे अभिषेकनिवृत्तिरूपवनवासार्थे स संभारः संभ्रमोऽस्तु वनवासोचितसाधनसंपादनविषयो भवत्वित्यर्थः ॥ ५ ॥

६] ति० टी०–किंच यस्या मदभिषेकार्थे मदभिषेकनिवृत्तौ अर्थशब्दो निवृत्तिवचन इह 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः । सविशङ्का कथमयं वने स्थास्यतीति शङ्कया सदुःखा । तथा कुरु । अल्पेनैव कालेन रामं द्रष्टासि, पित्राज्ञाभङ्गश्चातिनिन्द्य इत्यादिवाक्यैरिति शेषः । यद्वा यस्याः कैकेय्या नो माता कैकेयी सशङ्का अयं वनं न गमिष्यतीति शङ्कासहिता ॥ ६ ॥

रा० टी०–यस्या इति । मदभिषेकार्थे अभिषेकरूपे वस्तुनि मानसं वर्तत इति शेषः । सा नः माता कौशल्या सविशङ्का विगतवनवासक्लेशविषयकशङ्काविशिष्टा सती न परितप्यते तथा कुरु ॥ ६ ॥

गो० टी०–यस्या इति । मदभिषेकार्थे मदभिषेकप्रयोजनविषये माता कैकेयी सविशङ्का लक्ष्मणेन संमन्त्र्य राज्यं पुनः किं रामो ग्रहीष्यतीति शङ्कावती ॥ ६ ॥

७] ति० टी०–कुत एवं तत्राह–तस्या इति । तस्या मनसि प्रतिसंजातं शङ्कामयं दुःखं मुहूर्तमप्युपेक्षितुं नोत्सहे, 'उदीक्षितुम्' इति पाठे द्रष्टुमित्यर्थः ॥ ७ ॥

रा० टी०–तस्या विशङ्काकरणे हेतुमाह–तस्या इति । शङ्कामयं शङ्काहेतुकमित्यर्थः । मनस्यपि प्रतिसंजातं किं पुनर्बहिःप्रकटितमित्यर्थः । दुःखमुपेक्षितुं तिष्ठत्विदमित्युपेक्षां कर्तुमहं नोत्सहे 'उदीक्षितुम्' इतिपाठे द्रष्टुमित्यर्थ इति भट्टाः ॥ ७ ॥

गो० टी०–तस्या इति । कैकेय्याः शङ्कामयं शङ्कारूपं स्वार्थे मयट् प्राचुर्ये वा ॥ ७ ॥

१ आश्रित्येति गो. पाठः । २ इममिति गो. पाठः । ३ हि यत्कॢप्तादति गो. पाठः । ४ अद्य मे इति गो. पाठः । ५ विसर्जयेति गो. पाठः । निरत्ययमिति गो. पाठः । ७ तप्यते इति गो. रा. पाठः । ८ मे इति गो. पाठः ।

न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन । मातृणां वा पितुर्वाहं कृतमल्पं च विप्रियम् ॥ ८ ॥
सत्यः सत्याभिसंधश्च नित्यं सत्यपराक्रमः । परलोकभयाद्भीतो निर्भयोऽस्तु पिता मम ॥ ९ ॥
तस्यापि हि भवेदस्मिन्कर्मण्यप्रतिसंहृते । सत्यं नेति मनस्तापस्तस्य तापस्तपेच्च माम् ॥ १० ॥
अभिषेकविधानं तु तस्मात्संहृत्य लक्ष्मण । अन्वगेवाहमिच्छामि वनं गन्तुमितः पुरः ॥ ११ ॥
मम प्रव्राजनादद्य कृतकृत्या नृपात्मजा । सुतं भरतमव्यग्रमभिषेचयितां ततः ॥ १२ ॥
मयि चीराजिनधरे जटामण्डलधारिणि । गतेऽरण्यं च कैकेय्या भविष्यति मनःसुखम् ॥ १३ ॥
बुद्धिः प्रणीता येनेयं मनश्च सुसमाहितम् । तं नु नार्होमि संक्लेष्टुं प्रव्रजिष्यामि मा चिरम् ॥ १४ ॥

८] ति० टी०–तदेवोपपादयति–न बुद्धीति । अबुद्धम् अज्ञानपूर्वं वा । अल्पं चाल्पमपि विप्रियं विप्रियकरं कदाचन कदापि कृतं न स्मरामीत्यन्वयः । 'समारब्धम्' इति पाठे नारब्धवानस्मीत्यर्थः ॥ ८ ॥

रा० टी०–स्वस्मिन्मात्रादेः स्नेहबोधकं लिङ्गमाह–नेति । बुद्धिपूर्वं विप्रियं न कृतमबुद्धमबुद्धिपूर्वकं वा न कृतमिति अहं स्मरामि ॥ ८ ॥

गो० टी०–नेति । मातृणां पितुर्वा विषये कदाचन कृतं बुद्धिपूर्वमपि विप्रियं न स्मरामि अबुद्धम् अबुद्धिपूर्वकमपि विप्रियं न स्मरामि ॥ ८ ॥

९] ति० टी०–सत्यः सत्यवचनस्वभावः सत्याभिसंधः सत्यप्रतिज्ञः परलोकभयात्परलोकभयहेतोरसत्याद्भीतः पिता निर्भयोऽस्तु मया तत्कृतसत्यपरिपालनात् ॥ ९ ॥

रा० टी०–सत्य इति । सत्यः सत्यवादी अत एव सत्यसंधः सत्यप्रतिज्ञः अत एव परलोकभयादयं सत्यात्प्रच्युतः इति शत्रुजनापवादाद्भीतः मम पिता निर्भयः लोकापवादभयरहितो [1] तु ॥ ९ ॥

गो० टी०–सत्य इति । सत्यः सत्यवचनः सत्याभिसन्धः सत्यप्रतिज्ञः सत्यपराक्रमः अमोघपराक्रमः परलोकभयात्परलोकसंबन्धिभयहेतोः परलोकहानेरिति यावत् निर्भयोऽस्तु प्रतिष्ठितसत्यत्वादिति भावः ॥ ९ ॥

१०] ति० टी०–अस्मिन्कर्मण्यभिषेकविषये कर्मणि अप्रतिसंहृतेऽनिवर्तिते मम वचः सत्यं न वृत्तमिति मनस्तापो भवेत् तस्य च मनस्तापो मामपि तपेत् पितृहितमकुर्वतो मम जन्म व्यर्थमिति पीडयेत् ॥ १० ॥

रा० टी०–स निर्भयोऽवश्यं कर्तव्य इत्यत्र हेतुं वदन्नाह–तस्येति । कर्मणि अभिषेकानुकूलव्यापारे अप्रतिसंहृते अनिवर्तिते सति मम वचः सत्यं नेति तस्य पितुर्मनस्तापः भवेत्तस्य तापो मामपि तपेत् ॥ १० ॥

गो० टी०–तस्येति । तस्य दशरथस्यापि अस्मिन्नभिषेककर्मणि अप्रतिसंहृते अनिवर्तिते सति सत्यं नेति मम वरदानविषयसत्यं नेति मनस्तापो भवेत्तस्य तापः मां तपेत्तापयेदित्यर्थः ॥ १० ॥

११] ति० टी०–यत एवमतः–अभिषेकेति । संहृत्य त्यक्त्वा अन्वगेव शीघ्रमेव इतः पुरोऽस्मान्नगरात् ॥ ११ ॥

रा० टी०–अभिषेकेति । हे लक्ष्मण ! तस्मादुक्तहेतोः अन्वक् शीघ्रमेव इतः अस्मात्पुरः पुर्याः गन्तुमिच्छामि ॥११॥

गो० टी०–अभिषेकेति । अन्वक् अनुपदमेव 'अन्वगन्वक्षमनुगेऽनुपदम्' इत्यमरः । इतः अस्मान्नगरात् ॥ ११ ॥

१२] ति० टी०–नृपात्मजा कैकेयी । अव्यग्रमव्याकुलम् ॥ १२ ॥

रा० टी०–ममेति । कृतकृत्या साधितसुनिप्रयोजना नृपात्मजा केकयी अव्यग्रमनवधानतारहितं भरतमभिषेचयतामभिषेचमिव प्रापयताम् इवार्थान्तर्भावेण प्रापणरूपधात्वर्थे णिच् यद्वा यतः मम प्रव्राजनान्नृपात्मजा केकयी कृतकृत्या अतः अग्रः विष्णुरेव व्यग्रः विशेषेण अग्रः मत्प्रीतिपात्राग्रणीत्वं यस्मिन्स तं भरतमभिषेचयतामभिषेचः अभिषेकः यतः निवर्तितो यया तामुपरमार्थकयमोरूपम् स चान्तर्भावितणिजर्थः । केकयीमथ दुर्वचनादिना न पीडय । निषेधार्थकमव्ययमिति ॥ १२ ॥

गो० टी०–ममेति । अभिषेचयिता लुट् ॥ १२ ॥

१३] ति० टी०–गते गते एव ॥ १३ ॥

रा० टी०–मयीति । मनःसुखं मयशःप्रातिहेतुकानन्दः भविष्यति ॥ १३ ॥

गो० टी०–मयीति । स्पष्टम् ॥ १३ ॥

१४] ति० टी०–कैकेय्या अत्र नापराधः अन्यप्रेरितत्वात् । तर्हि स एव दण्ड्यस्तत्राह–बुद्धिरिति । येनेश्वरेण विधात्रेयं बुद्धिः कैकेय्याः प्रणीता मन्थराद्वारा दत्ता, मनश्च तद्बुद्धिविषयेऽर्थे सुसमाहितं स्थिरीकृतं तं संक्लेष्टुं मत्कृतमन्यथा जातमिति क्लेशयितुं नार्होमि तस्य मदधिकारित्वान्मदूपत्वाद्वेति गूढ आशयः मत्संकल्पकृतमेव तदिति गूढं व्यङ्ग्यम् अशक्यत्वादित्यापाततोऽर्थः । अतो वनं प्रव्रजिष्यामि । चिरं विलम्बो मा भूत्वित्यर्थः ॥ १४ ॥

रा० टी०–बुद्धिरिति । येन मद्विजयकालेन बुद्धिः विजयविषयकनिश्चयः प्रणिहिता संपादिता अनु पश्चान्मनः केकयीसंकल्पः समाहितं प्रापितं कारितमित्यर्थः तं कालं संक्लेष्टु-

१ पुनः इति गो. पाठः । २ अभिषेचयितेति गो. पाठः । ३ प्रणिहिता येन मनश्चान्विति रा. पाठः । ४ क्लिति गो. पाठ ।

कृतान्त एव सौमित्रे द्रष्टव्यो मत्प्रवासने । राज्यस्य च वितीर्णस्य पुनरेव निवर्तने ॥ १५ ॥
कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम वेदने । यदि तस्याः न भावोऽयं कृतान्तविहितो भवेत् ॥ १६ ॥
जानासि हि यथा सौम्य न मातृषु ममान्तरम् । भूतपूर्वं विशेषो वा तस्या मयि सुतेऽपि वा ॥ १७ ॥
सोऽभिषेकनिवृत्त्यर्थैः प्रवासार्थैश्च दुर्वचैः । उग्रैर्वाक्यैरहं तस्या नान्यद्दैवात्समर्थये ॥ १८ ॥
कथं प्रकृतिसंपन्ना राजपुत्री तथागुणा । ब्रूयात्सा प्राकृतेव स्त्री मत्पीड्यं भर्तृसंनिधौ ॥ १९ ॥

मतिवर्तितुमित्यर्थः नैवार्हामि अतः प्रव्रजिष्यामि अतः मा चिरमस्मिन्विषये विलम्बो न कार्यः ॥ १४ ॥

गो० टी०—बुद्धिरिति । येन मया इयं बुद्धिः वनवासबुद्धिः प्रणीता शिक्षिता मनश्च सुसमाहितं स्थिरीकृतं तं मां संक्लेष्टुं क्लेशयितुं नार्हामि अतः प्रव्रजिष्यामि मा चिरं मास्तु विलम्बः ॥ १४ ॥

१५] ति० टी०—तत्प्रेरयितारमाह—कृतान्त इत्यादि । मद्विवासने मद्विवासनप्रेरणायाम् एवमभिषेकविवर्तनप्रेरणायां कृतान्तो दैवमेवेन्द्रादीनां दुःखनिवर्तकादृष्टमेवेति गद्गदम् । मत्प्रजानां मत्कृतपरिपालनलाभाभावजनकमदृष्टमिति स्फुटं द्रष्टव्यः कारणत्वेन द्रष्टव्यः । यत्तु रामस्य प्राकृतदुरदृष्टं दैवमिति तन्न, भगवतस्तस्याभावात् ॥ १५ ॥

रा० टी०—कैकेय्यादिविषये द्वेषाभावाय कालस्यैव प्रवर्तकत्वं बोधयति-कृतान्त इति।कृतान्तः काल एव कारणमिति शेषः। वितीर्णस्य पित्रा दत्तस्य राज्यस्य निवर्तने विलम्बने॥१५॥

गो० टी०—पूर्वसर्गे धर्मोऽस्तीत्युक्तम् । अधुना प्रसङ्गाद्धर्मातिरिक्तं दैवं किंचिदस्ति फलप्रदमिति दर्शयन् अस्मत्प्रवासे न कैकेयीनिमित्तमत सा ननिन्दितव्येत्याह—कृतान्त इत्यादिना । कृतान्तः दैवं 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इति निघण्टुः । दैवं च प्राक्तनादृष्टमित्येके ईश्वर एवेत्याचार्याः । द्रष्टव्यः कारणत्वेनेति शेषः वितीर्णस्य दत्तस्य ॥ १५ ॥

१६] ति० टी०—तदुपपादयति—कैकेय्या इति । प्रतिपत्तिरध्यवसायः । यदि कृतान्तविहितस्तत्प्रेरितोऽयं भावोऽभिप्रायो न भवेत् ॥ १६ ॥

रा० टी०—कालस्यैव प्रवर्तकत्वे हेतुमाह-कैकेय्या इति । तस्याः कैकेय्याः भावोऽभिप्रायः यदि कृतान्तविहितः मद्विज्ञकालप्रेरितो न भवेत्तर्हि मम पीडने मत्कर्मकप्रवासहेतुकपीडादाने प्रतिपत्तिः निश्चयः कथं स्यात् न स्यादित्यर्थः ॥ १६ ॥

गो० टी०—कृतान्त एवेत्येवकारव्यवच्छेद्यमाह—कैकेय्या इति । दैवः दैवीसंबन्धी कैकेयीसंबन्धी अयं भावः अयमभिप्रायः कृतान्तविहितो यदि न भवेत् तदा मम पीडने कैकेय्याः प्रतिपत्तिः बुद्धिः कथं स्यात् पीडनमिति लक्ष्मणबुध्या ॥ १६ ॥

१७] ति० टी०—ईदृशस्य कैकेय्या भावस्य दैवकारणकत्वसिद्धये तस्याः सहजभावमाह—जानासीत्यादि । अन्तरं वैषम्यम् । भूतपूर्वं तस्या वा मयि सुते भरतेऽपि वा न विशेषो भूतपूर्वः तस्माद्दैवकृतमेव वैषम्यमिति भावः ॥ १७ ॥

रा० टी०—तस्याः स्वतः प्रवर्तिकात्वाभावे हेतुमाह-जानासीति । हे सौम्य ! मातृषु कौशल्यादिषु अन्तरं पूज्यत्वे भेदो मम मत्कृतमित्यर्थः। भूतपूर्वं न तस्याः कैकेय्या मयि सुते भरते वा विशेषो भूतपूर्वो न इति त्वं यथा यथावज्जानासि ॥ १७ ॥

गो० टी०—जानासीति । हे सौम्य ! मातृषु मे अन्तरं भेदः 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इति निघण्टुः । यथा न भूतपूर्वं तथा जानासि तस्या अपि कैकेय्या अपि मयि वा सुते भरते वा विशेषो यथा न भूतपूर्वः तथा जानासि हि ॥ १७ ॥

१८] ति० टी०—तस्मात्—स इति । सोऽहं रामो दुर्वचैः सामान्येनापि न वक्तुं शक्यैः किं पुनर्वाच्यं दशरथपत्न्या केकयकन्यया, तादृशैर्वाक्यैः राज्ञः कैकेय्या प्रेरणे दैवादन्यत्कारणं सोऽहं रामो न समर्थय इत्यन्वयः ॥ १८ ॥

रा० टी०—स इति । अभिषेकनिवृत्त्यर्थैः अभिषेकनिवृत्तिरर्थो येषां तैः प्रवासार्थैः प्रवासबोधकैः अत एव उग्रैः अत एव दुर्वचैः वक्तुमनर्हैः तस्याः कैकेय्या वाक्यैः वचनैः प्रव्राजने दैवादेवोदयकारककालादन्यत्कारणं न समर्थये निश्चिनोमि ॥ १८ ॥

गो० टी०—स इति । सोहम् एवमद्भूततद्वात्सल्योऽहं वाक्यैरिति हेतौ तृतीया दैवादन्यद् बुद्धिभेदकारणं न समर्थये न निश्चिनोमि ॥ १८ ॥

१९] ति० टी०—तदेव द्रढयति—कथमिति । प्रकृतिसंपन्ना सत्त्वप्रकृतियुक्ता तथागुणा प्रागद्यभूततादृक्कल्याणगुणा तत्रापि भर्तृसंनिधौ मत्पीड्यं मत्पीडाजनकं तदेव । 'मदघम्' इति पाठेऽप्ययमेवार्थः । वाक्यं ब्रूयात् यदि न दैवप्रेरितेति भावः ॥ १९ ॥

रा० टी०—कथमिति । तथागुणा मद्विषकातिवात्सल्यविशिष्टा प्रकृतिसंपन्ना सत्त्वभावसंयुक्ता विक्षेपादिरहितेत्यर्थः । राजपुत्री कैकयी भर्तृसंनिधौ मत्पीड्यं पीडाबोधकं प्राकृता जीव कथं ब्रूयात् ब्रूयादित्यर्थः एतेन मम हितमेव तयोक्तमिति सूचितम् इवेन तस्याः प्राकृतविलक्षणात्वं ध्वनितम्॥१९॥

गो० टी०—कथमिति । प्रकृतिः साधुस्वभावः 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे' इति निघण्टुः । प्रकृतिसंपन्ना साधुस्वभावसंपन्ना राजपुत्री महाकुलप्रसूता तथागुणा पूर्वाह्नभूतदयादिसद्गुणा सा कैकेयी प्राकृतेव स्त्री दुष्प्रकृतिका दुष्कृता गुणलेशशून्या क्षुद्रा जीव भर्तृसन्निधौ न तु यस्य कस्यचित्

१ स्वेवेति गो. रा. पाठः । २ पीडने इति गो. पाठः । ३ भावो न दैवोऽयमिति गो. पाठः । ४ पीडामिति गो. पाठः ।

यदचिन्त्यं तु तद्दैवं भूतेष्वपि न हन्यते । व्यक्तं मयि च तस्यां च पतितो हि विपर्ययः ॥ २० ॥
कश्च दैवेन सौमित्रे योद्धुमुत्सहते पुमान् । यस्य नु[1] ग्रहणं किंचित्कर्मणोऽन्यत्र[2] दृश्यते ॥ २१ ॥
सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ । यस्य किंचित्तथाभूतं ननु दैवस्य कर्म तत् ॥ २२ ॥
ऋषयोऽप्युग्रतपसो दैवेनाभिप्रचोदिताः[3] । उत्सृज्य नियमांस्तीव्रान्भ्रश्यन्ते काममन्युभिः[4] ॥ २३ ॥
असंकल्पितमेवेह यदकस्मात्प्रवर्तते । निवर्त्यारब्धमारम्भैर्[5]ननु दैवस्य कर्म तत् ॥ २४ ॥
एतया तत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना । व्याहतेऽप्यभिषेके मे परितापो न विद्यते ॥ २५ ॥

संनिधौ न तु दूत्यादिसुखेन मत्पीडां मम निरवधिकस्नेहपात्रस्य पीडां नत्वप्रियमात्रं कथं ब्रूयात् व्यक्तं वदेत् न तु सूचयेत्तस्मादैवमेवात्र कारणमिति ॥ १९ ॥

२०] ति० टी०—ननु तर्हि क्वास्ति, कीदृक्चेत्यत आह—यदिति । देशकालवृत्तितया यदचिन्त्यमीदृग्विधमिति चिन्तयितुमशक्यं तदैवं यद्भूतेषु भूताधिष्ठातृषु ब्रह्मादिष्वपि न हन्यते न प्रतिहतं भवति हि अतस्तत्कृत एव तस्यां मयि च विपर्ययः पूर्वस्थितवात्सल्यापगमरूपो हस्तगतराज्यभ्रंशरूपश्च पतितः ॥२०॥

रा० टी०—अदृष्टस्य बलवत्त्वं बोधयन्नाह—यदिति । यस्मादेतोः दैवमदृष्टमचिन्त्यम् इदानीमिदमिति निश्चेतुं न शक्यमित्यर्थः तत्तस्मादेतोः भूतेषु हन्यमानेष्विति शेषः । न हन्यते अत एव मयि तस्यां केकय्यां च व्यक्तं देवदृष्टप्रभावः प्रकटित इत्यर्थः तत्प्रभावादेव प्रव्रजने प्राव्राजने च द्वयोर्बुद्धिरासीदिति तात्पर्यम् अत एव विपर्ययः अभिषेकविपरीतः पतितः प्राप्तः ॥ २० ॥

गो० टी०—यदिति । यदचिन्त्यमचिन्त्यप्रभावं दैवं तदेव सर्वेष्वपि भूतेषु न हन्यते सर्वत्राप्यप्रतिहतफलप्रदानस्वभावं वर्तते व्यक्तम् अत्र संशयो नास्ति अत एव हि मयि तस्यां च विपर्ययः वैपरीत्यं मयि हस्तगतराज्यभ्रंशरूपः तस्यां पूर्वस्थितवात्सल्यापगमरूपः पतितः प्राप्तः ॥ २० ॥

२१] ति० टी०—ननु शौर्येण दैवं हनिष्यामीति चेत्तत्राह—कश्चेति । यस्य दैवस्य ग्रहणं ज्ञानं ज्ञानजनकं कर्मणः फलादन्यत्र दृश्यते । एवं च नित्यकार्याद्यनुमेयतया प्रागज्ञातत्वाद्योद्धुमशक्यं जाते तु फले विफलं युद्धम् फलेन तस्य नाशाच्चेति भावः ॥ २१ ॥

रा० टी०—दैवनिवृत्त्यर्थं यत्नो न कर्तव्य इति बोधयन्नाह—कश्चिदिति । यस्य दैवस्य ग्रहणं बोधकं कर्मणः फलभोगादन्यत्र दृश्यते तेन दैवेन सह योद्धुं कश्चित्पुमान्न उत्सहते नच्च आहत्योभयत्रान्वयः ॥ २१ ॥

गो० टी०—एवं प्रबलमपि दैवं पौरुषेण निवर्त्यतामित्यत्राह—क इति । कियत इति कर्म कार्यं फलरूपकार्यतोऽन्यत्र यस्य ग्रहणं ज्ञानसाधनं न दृश्यते कार्यैकानुमेयं यस्य स्वरूपमित्यर्थः । तेन फलात्पूर्वमज्ञायमानेन दैवेन कः पुमान् योद्धुमुत्सहते कस्तं निवारयितुं समर्थ इत्यर्थः ॥ २१ ॥

२२] ति० टी०—सर्वतो दैवमेव प्रबलं पौरुषं तु काकतालीयमित्याह—सुखेत्यादि । भवाभवौ बन्धमोक्षौ एषां मध्ये यस्य यत्तथाभूतमचिन्त्यकारणकं किंचित्कार्यं तन्नतु निश्चयेन दैवस्य कर्म फलम् ॥ २२ ॥

रा० टी०—सुखेति । यस्य जनस्य सुखादयः स्वातन्त्र्येण दृश्यन्ते तथाभूतं तत्सदृशमन्यदपि सुषुप्त्यादि तत्सर्वं दैवस्य कर्म कृतं भवाभवौ उत्पत्तिविनाशौ एतेन स्वतन्त्रसुखादिरहितानां नादृष्टमिति सूचितम् ॥ २२ ॥

गो० टी०—ननु कर्मणोऽन्यत्रेत्युक्तं किं तत्कर्म तत्राह—सुखदुःखे इति । अत्र भयशब्देन शान्तिरुच्यते भवाभवौ उत्पत्तिविनाशौ यच्च किंचित्तथाभूतमचिन्त्यकारणकं लोके दृश्यते तत्सर्वं दैवस्य कर्म कार्यम् । ननु हीत्यर्थः ॥ २२ ॥

२३] ति० टी०—दैवप्राबल्यमेव द्रढयति—ऋषय इति । विश्वामित्रादयः मन्युः क्रोधः बहुवचनं व्यक्तिबहुत्वात् तैर्भ्रश्यन्तेऽभिभूयन्ते ॥ २३ ॥

रा० टी०—दैवप्राबल्यं दृष्टान्तमुखेन द्रढयन्नाह—ऋषय इति । तीव्राननियप्रयत्नेन संपादितान् ॥ २३ ॥

गो० टी०—दैवप्राबल्यमेव द्रढयति—ऋषय इति । ऋषयः विश्वामित्रादयः नियमान् व्रतोपवासादीन् काममन्युभिरिति व्यक्तिबहुत्वाद् बहुवचनं भ्रश्यन्ते ऋषित्वादिति शेषः ॥ २३ ॥

२४] ति० टी०—पुनरपि स्ववनवासस्य दैवजत्वं द्रढयितुं दैवकार्यलक्षणमाह—असंकल्पितमिति । आरम्भैर्यत्नैरारब्धमुपक्रान्तं कार्यं निवर्त्य यदसंकल्पितमेवाचिन्तितमेवाकस्मादृष्टहेतुं विना प्रवर्तते तदैवस्य कर्म ननु ॥ २४ ॥

रा० टी०—दैवबोधकमसाधारणं लिङ्गमाह—असंकल्पितमिति । आरम्भैः सामग्रीभिः आरब्धं प्रारम्भविषयीभूतं निवर्त्य असंकल्पितं संकल्परहितं यदकस्मात्प्रवर्तते तदैवस्य कर्म ॥ २४ ॥

गो० टी०—यच्च किंचित्तथाभूतमित्येतद्विशदयति—असंकल्पितमिति । इह अस्मिन् लोके आरब्धमुपक्रान्तम् आरम्भं कार्यं निवर्त्य असंकल्पितमचिन्तितमेव यत्कार्यमकस्मात् झटिति प्रवर्तते तदैवस्य कर्म ॥ २४ ॥

२५] ति० टी०—उपसंहरति—एतयेति । तत्त्वया यथार्थया बुद्धया बुद्धियोगेनात्मनान्तःकरणस्थेनात्मानमन्तःकरण

१ कश्चिदिति रा. पाठः । २ नेति गो. रा. पाठः । ३ अन्यत्रेति गो. पाठः । ४ यच्चेति गो. पाठः । ५ प्रपीडिता इति गो. पाठः । ६ आरम्भारम्भमिति गो. पाठः ।

तस्मादपरितापः संस्त्वमप्यनुविधाय माम् । प्रतिसंहारय क्षिप्रमाभिषेचनिकीं क्रियाम् ॥ २६ ॥
एभिरेव घटैः सर्वैरभिषेचनसंभृतैः । मम लक्ष्मण तापस्ये व्रतस्नानं भविष्यति ॥ २७ ॥
अथवा किं मयैतेन राज्यद्रव्यमयेन तु । उद्धृतं मे स्वयं तोयं व्रतादेशं करिष्यति ॥ २८ ॥
मा च लक्ष्मण संतापं कार्षीर्लक्ष्म्या विपर्यये । राज्यं वा वनवासो वा वनवासो महोदयः ॥ २९ ॥
न लक्ष्मणास्मिन्मम राज्यविघ्ने माता यवीयस्यभिशङ्कितव्या ।
दैवाभिपन्ना नं पिता कथंचिज्जानासि दैवं हि तथाप्रभावम् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

संस्तभ्य यदि तिष्ठसीति शेषः । तदा मेऽभिषेके व्याहतेऽपि तव परितापो न विद्यते न भवति ॥ २५ ॥

रा० टी०—प्रासङ्गिकादृष्टवर्णनं परिसमाप्य प्रकृतमाह—एतयेति । अभिषेके व्याहतेऽपि तत्त्वया स्वधर्मपालनरूपया-धार्य्यविषयिण्या बुद्ध्या निश्चयेन आत्मना मनसा सह आत्मानमन्तःकरणं संस्तभ्य स्थिरीकृत्य परितापो न विद्यते न स्थाप्यते अन्तर्भावितणिजर्थो विद्यतिः ॥ २५ ॥

गो० टी०—उपदेशफलमाह—एतयेत्यादिश्लोकद्वयेन । तत्त्वया अबाधितया एतया बुद्ध्या आत्मानमन्तःकरणमात्मना स्वयमेव उपदेशं विनेत्यर्थः संस्तभ्य निश्चलीकृत्य स्थितस्य मे अभिषेके व्याहतेऽपि परितापो न विद्यते तस्मात्तत्त्वस्यैवंरूपत्वात् अनुविधाय अनुसृत्य आभिषेचनिकीमभिषेकप्रयोजनिकां क्रियालङ्करणादि प्रतिसंहारय निवर्तय ॥ २५ ॥ २६ ॥

२६] ति० टी०—अथ तत्कालकर्तव्यं नियुङ्क्ते—तस्मादिति । उपदिष्टबुद्धियोगबलादित्यर्थः । अपरितापः परितापहीनः संस्त्वमपि मामनुविधाय मामनुसृत्याभिषेचनिकीं तत्प्रयोजनिकां क्रियामलंकारं प्रतिसंहारय निवर्तय अनेन गूढं लक्ष्मणस्यापि वनगमनं सूचितम् ॥ २६ ॥

रा० टी०—तस्मादिति । तस्मादुक्तहेतोः मामनुविधाय अनुसृत्य अपरितापः परितापरहितः सन् आभिषेचनिकीं क्रियां क्षिप्रं प्रतिसंहारय निवर्तय ॥ २६ ॥

२७] ति० टी०—तापस्ये तदूपव्रतस्य संकल्पे व्रतस्नानं व्रतसंकल्पायापेक्षितं स्नानं व्रतस्नानं तदेभिर्भविष्यतीति योजना ॥ २७ ॥

रा० टी०—नन्वेतत् सामग्रीणां का गतिरित्यत आह—एभिरिति । अभिषेचनसंभृतैः अभिषेकार्थमानीतैः एभिर्घटैः मम तापस्ये तपःकर्मणि व्रतस्नानं व्रतोद्देश्यकस्नानं भविष्यति ॥२७॥

गो० टी०—एभिरिति । तापस्ये तापसयोग्ये कर्मणीत्यर्थः । अभिषेचनसंभृतैः अभिषेचनाय संपादितैः ॥ २७ ॥

२८] ति० टी०—तापस्यव्रतस्नानेऽप्येभिः क्रियमाणे राज्यलिप्सया स्नानं कृतवानिति कैकेय्याः शङ्का मा भूदिति तन्निषेधति—अथवेति । राज्यद्रव्यमयेन राज्याभिषेकसाधनमङ्गलद्रव्यप्रचुरेण । स्वयं स्वहस्तेनोद्धृतं तोयं मे व्रतादेशं व्रतसंकल्पाधिकारम् ॥ २८ ॥

रा० टी०—एतज्जलेन स्नाने अयं वनं न गमिष्यतीति देवादीनां शङ्कासंभवात् शेषसामग्रीवैयर्थ्यस्यार्थतः सिद्धत्वाच्च पश्चान्तरमाह—अथवेति । स्वयं स्वहस्तेनेत्यर्थः । उद्धृतमानीतं व्रतादेशं व्रतस्नानं करिष्यति विधास्यति ॥ २८ ॥

गो० टी०—घटस्थजलैः तापस्यव्रतस्नाने क्रियमाणेऽपि राज्यलिप्सया स्नानं कृतवानिति कैकेय्याः शङ्का मा भूदिति स्नानं निषेधति—अथवेति । राजद्रव्यमतेन राजद्रव्यत्वेन संमतेन 'राज्यद्रव्यमयेन' इति पाठे राज्यार्थमङ्गलद्रव्यप्रचुरेणेत्यर्थः । व्रतादेशं व्रतनियमम् ॥ २८ ॥

२९] ति० टी०—राज्यवनवासयोर्वनवासो महोदयो महाफलः । प्रजानां कृत्याकृत्यचिन्ताव्यग्रराहित्येन सततं तपःप्रवृत्त्या पितृवाक्यपरिपालनेन चेति भावः ॥ २९ ॥

रा० टी०—मेति । हे लक्ष्मण ! लक्ष्म्याः राज्यश्रियः विपर्यये वनवासश्रियः प्राप्तावित्यर्थः संतापं मा कार्षीस्तत्र हेतुः लोके लक्ष्मीद्वयं राज्यं राज्यलक्ष्मीः वनवासो वनवासलक्ष्मीः च तत्रैका प्राप्तेवेति तात्पर्यं प्रत्युत इयं प्राप्तिर्हर्षावहेत्याह—वनवासमहोदयः अतियशःसंपादकत्वेनातिहर्षहेतुरिति तात्पर्यम् ॥२९॥

गो० टी०—मा चेति । राज्यं वा वनवासो वा उभावपि तुल्यौ विचार्यमाणे वनवास एव महोदयः महाफलः राज्यव्यापारकेशाभावात् अपूर्वदर्शनसौरूप्याच्चेति भावः ॥ २९ ॥

३०] ति० टी०—उपदेशस्य परमप्रयोजनमाह—नेति । न माताभिशङ्कितव्या, न पिताभिशङ्कितव्यः, यतो दैवाभिपन्ना दैवग्रस्ता एवमभिशङ्कत इति शेषः । यद्वा दैवाभिपन्नत्वं मातापित्रोर्विशेषणम् । त्वं च दैवं तथाप्रभावमिति जानासि, अतो नातिशङ्कनीया ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०—उपसंहरन्नाह—नेति । हे लक्ष्मण ! अस्मिन् रा-

---

१ संस्तभ्येति रा. पाठः । २ राजद्रव्यमतेनेति गो. पाठः । ३ खलु कर्मविघ्ने इति गो. पाठः । ४ अतिशङ्कनीयेति गो. पाठः । ५ हि वदत्यभिशङ्कितेति गो. पाठः । ६ चेति गो. पाठः ।

त्रयोविंशः सर्गः ।

रामवचःश्रवणकुपितो लक्ष्मणः पितृवचसोऽधर्म्यत्वादुपेक्ष्यत्वं प्रतिपाद्य दैवपौरुषयोः पौरुषस्यैव प्राधान्यं दर्शयित्वा तदवलम्बनेनाभिषेकविहन्तृन्निवार्य स्वाभिषेकं संसाधयितुं रामं प्राचोदयत् । रामस्तु लक्ष्मणं परिसान्त्व्य पितृवचस एवावश्यकर्तव्यत्वं प्रत्यपादयत् ।

इति ब्रुवति रामे तु लक्ष्मणोऽवाक्शिरा इव । ध्यात्वा मध्यं जगामाशु सहसा दैन्यहर्षयोः ॥ १ ॥
तथा तु बद्ध्वा भ्रुकुटीं भ्रुवोर्मध्ये नरर्षभः । निश्श्वास महासर्पो बिलस्थ इव रोषितः ॥ २ ॥
तस्य दुष्प्रतिवीक्ष्यं तद्भ्रुकुटीसहितं तदा । बभौ क्रुद्धस्य सिंहस्य मुखस्य सदृशं मुखम् ॥ ३ ॥
अग्रहस्तं विधुन्वंस्तु हस्ती हस्तमिवात्मनः । तिर्यगूर्ध्वं शरीरे च पातयित्वा शिरोधराम् ॥ ४ ॥

ज्यविघ्ने दैवाभिपन्ना देवविजयादृष्टप्रेरिता यवीयसी कनिष्ठा मम माता केकयी न अभिशङ्कितव्या किमाचरितमनयेति शङ्कितुमनर्हा, पितापि न शङ्कितव्यः शङ्कितव्येति लिङ्गविपरिणामेन इहाप्यन्वेति त्वत्कर्तृकशङ्कितव्यत्वाभावे हेतुः तथाप्रभावं मदुक्तप्रभावविशिष्टं दैवं त्वं जानासि ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०–महता प्रबन्धेनोक्तं संग्रहेण दर्शयति–नेति । यवीयसी कनिष्ठा कानिष्ठ्यं महिषीत्रयापेक्षया न तेऽम्बा मध्यमेत्यत्र मध्यमात्वं सर्वराजपत्न्यपेक्षया दैवाभिपन्ना दैवाविष्टा तथाप्रभावं तादृशप्रभावयुक्तम् अप्रतिहतप्रभावमित्यर्थः ॥३०॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१] ति० टी०–दुःखहर्षयोर्मध्यं जगाम । रामस्य धर्मे धैर्यं दृष्ट्वा हर्षस्तस्य राज्यभ्रंशाद्दुःखमित्येषा मध्यगतिः लक्ष्मणस्य शेषावतारत्वेन तमोगुणप्रधानता, ज्येष्ठस्य विवेकवाक्यश्रवणेन सत्त्वोदयश्चेति भावः । अधःशिरस्त्वेनोक्तार्थस्यार्थाङ्गीकारध्वननम् । इवेन तमसः स्वाभाविकत्वात्तस्य स्थिरता ध्वन्यते ॥ १ ॥

रा० टी०–इतीति । इति उक्तप्रकारेण रामे ब्रुवति सत्येव अवाक्शिरा अधोमुखो लक्ष्मणः आशु शीघ्रं ध्यात्वा रामोक्तितात्पर्यं विचार्य दैन्यहर्षयोः पितृकृताभिषेकप्रतिज्ञाभङ्गेन दैन्यं रामेप्सितराक्षसवधादिसान्निध्येन हर्षः तयोर्मध्यमिव सहसा जगाम इवेन तटस्थजनबोधनायैवमाचरणमिति ध्वन्यते तेन तस्य लोकापवादभीरुत्वं व्यक्तम् एतेनास्यापि रामेप्सितमेवेप्सितमिति सूचितम् ॥ १ ॥

गो० टी०–पूर्वं दैवस्य प्रबलत्वेन राज्यविपर्यये न संतापः कार्यः धर्मस्य सर्वश्रेयःसाधनत्वात् तन्मूलभूते पितृवचनकरणसत्ये अवश्यं कर्तव्ये मातृवचनं च पश्चात्तनत्वात्पश्चात्पालनीयमित्येतावत्सयुक्तिकमुपपादितं तत्र पौरुषमेव बलं बलीयः दैवबलं तु दुर्बलानुसरणीयं धर्मश्चार्थकामविरोधे न कर्तव्य इति पूर्वपक्षं पूर्वं संग्रहेण लक्ष्मणवाक्येनोक्तं पुनस्तन्मुखेन प्रपञ्चयन् संग्रहेण सिद्धान्तं च दर्शयति–इतीत्यादिना । रामे मुहुः ब्रुवति सति लक्ष्मणः स्वानभ्युपगमसूचनायाधःशिराः सन् श्रुत्वा दुःखहर्षयोर्मध्यं धर्मे स्थिरोऽयमिति हर्षं राज्यं त्यक्ष्यतीति दुःखं च मनसा जगाम न तु वाचा प्रतिपादितवान् । इवशब्देनास्थिरत्वमुच्यते उत्तरक्षणे माध्यस्थ्यत्यागस्य वक्ष्यमाणत्वात् ॥ १ ॥

२] ति० टी०–तामेव दर्शयति–तथा त्विति । तथा भयंकरामित्यर्थः । बिलमत्र परबिलम् ॥ २ ॥

रा० टी०–तथेति । तथा नैतत्संमतं रामगमनमिति लोकप्रतीतिकारकत्वप्रकारेण भ्रुकुटीं भ्रुवौ बद्ध्वा भ्रुवोर्मध्ये निश्श्वास भ्रूमध्याच्छ्वासोऽगच्छदित्यर्थः । तत्र दृष्टान्तः बिलस्थः बिले निरुद्ध इत्यर्थः रोषितः सर्प इव ॥ २ ॥

गो० टी०–तदेति । तुशब्देन पूर्वावस्थातो बिलक्षणावस्था सूच्यते भ्रुवोर्मध्ये ललाटे भ्रुकुटीं कृत्वेत्यर्थः । बिलस्थः पेटिकाबिलस्थः नतु वल्मीकस्थः तदानीं रोषासंभवात् ॥ २ ॥

३] ति० टी०–दुष्प्रतिवीक्ष्यं संमुखतया द्रष्टुमशक्यम् । सादृश्यं दुर्दर्शत्वेन ॥ ३ ॥

रा० टी०–तस्येति । दुष्प्रतिवीक्ष्यं कोपबोधकत्वेन वीक्षणानर्हं मुखं बभौ ॥ ३ ॥

गो० टी०–तस्येति । दुष्प्रतिवीक्षमभिमुखतया दुर्निरीक्षं तस्य मुखम् ॥ ३ ॥

४] ति० टी०–अग्रहस्तं हस्ताग्रम् । रामेण क्षमापनाय गृहीतमित्यर्थः । तिर्यगित्यादि क्रोधातिशयेन विविधं शिरोधूननं कृत्वेत्यर्थः चादध इत्यपि ॥ ४ ॥

रा० टी०–अग्रेति । हस्ती हस्तं शुण्डादण्डमिव अग्रहस्तं दक्षिणकरमित्यर्थः । शरीरे तिर्यगूर्ध्वं यथा स्यात्तथा विधुन्वन्सन् अग्राक्ष्णा अक्ष्यग्रभागेन भ्रातरं वीक्षमाणश्च सन् शिरोधरां पृथ्वीं पातयित्वा अस्यधोमुखीभूयेत्यर्थः अब्रवीत् । सार्धश्लोक एकान्वयी ॥ ४ ॥

गो० टी०–क्रोधविकारं दर्शयति–अग्रहस्तमित्यादिसार्ध-

१ ऽधःशिरा मुहुरिति गो. पाठः । २ श्रुत्वेति गो. पाठः । ३ इव मनसा दुःखेति गो. पाठः । ४ तदेति गो. पाठः । ५ भ्रुकुटीं इति रा. पाठः । ६ वीक्षमिति गो. पाठः ।

अग्राक्ष्णा वीक्षमाणस्तु तिर्यग्भ्रातरमब्रवीत् । अस्थाने संभ्रमो यस्य जातो वै सुमहानयम् ॥ ५ ॥
धर्मदोषप्रसङ्गेन लोकस्यानतिशङ्कया । कथं ह्येतदसंभ्रान्तस्त्वद्विधो वक्तुमर्हति ॥ ६ ॥
यथा ह्येवमशौण्डीरं शौण्डीरः क्षत्रियर्षभः । किं नाम कृपणं दैवमशक्तमभिशंससि ॥ ७ ॥
पापयोस्ते कथं नाम तयोः शङ्का न विद्यते । सन्ति धर्मोपधासक्ता धर्मात्मन्किं न बुध्यसे ॥ ८ ॥

कः । अग्रं हस्तस्य अग्रहस्तः एकदेशसमासः पूर्वापरादिव्यरिक्तस्थलेऽपि क्वचिदस्ति अग्रं चासौ हस्तश्च अग्रहस्तः हस्तदो हस्तावयवे उपचर्यत इति वामनः शरीरे उरसि अधः यर्थः । यद्वा शिरोधरां शरीरे तिर्यगूर्ध्वं चकारादधश्च पातत्वा क्रोधातिशयेन विविधं शिरोविधूननं कृत्वेत्यर्थः । अग्राणा कटाक्षेण तिर्यग्वीक्षमाणः सन् अब्रवीत् ॥ ४ ॥

५–७] ति० टी०–अग्राक्ष्णा कटाक्षेण । तिर्यग्वक्रं भ्रातरीक्षमाणः । धर्मदोषो धर्मविरोधस्तत्प्रसङ्गेन तत्परिहारशेषणा, पितृवचनमकुर्वन्कथमस्मान्धर्मेण पालयिष्यतीति या कस्यातिशङ्का तदभावसंपादनहेतुना मयापि पितृवचसोऽकरऽन्योऽपि पितृवचो न करिष्यतीति लोकनाशशङ्काहेतुना च, स्य ते सुमहानयं वनगमनं प्रति संभ्रमो जातः सोऽस्थानेऽयुक्तो न्तिमूल एव । भ्रान्तिमूलत्वमेवाह–कथं हीति । अशौण्डीरसमर्थं दैवमिति किंचिद्वस्तु प्रबलमिति । एवंजातीयकं यथा यथैव त्वं वदसि एतदेतज्जातीयं त्वद्विधः शौण्डीरो दैवनिकरणेऽपि समर्थः क्षत्रियर्षभो यत्संभ्रान्तः स्यात्कथमेतद्वक्तुमति, न कथमपि । अतः कृपणमसमर्थैकपरिग्राह्यतया शोच्यम् शक्तं पौरुषसंनिधौ कार्यासमर्थं दैवपदार्थं प्राकृतवत्किमभिशंस्यभिष्टौषि ॥ ५–७ ॥

रा० टी०–तद्वचनमेवाह–अस्थाने इति । अयस्य अयोध्याभिन्नकर्मकगमनकर्तृत्वाभावविशिष्टस्य तव अयं सुमहान् भ्रमो गमनत्वरा अस्थाने अप्रसङ्गे अभिषेकस्योपस्थितत्वामनस्यानवसरे इत्यर्थः जातः । अर्धं पृथक् ॥ ५ ॥

गो० टी०–अस्थान इति । धर्मदोषप्रसङ्गेन पितृवचनपपालनरूपधर्महानिप्रसक्त्या लोकस्य अनतिशङ्कया अतिशङ्कापरिहाराय मयानुष्ठिते लोको धर्मं त्यजतीति शङ्कापरिहाराय चेत्यर्थः । एवंविधकार्यद्वयार्थं यस्य प्रसिद्धस्य ते जातोऽयं सुमहान् संभ्रमः वनगमनत्वरा अस्थाने अनवकाशे अयुक्त इत्यर्थः । 'अवकाशे स्थितौ स्थानम्' इत्यमरः ॥ ५ ॥

रा० टी०–लोकादिभीतिरपि त्वयि उचितेति बोधयन्नाह–धर्मेति । त्वद्विधः सत्यप्रतिज्ञात्वेन त्वत्सदृशः असंभ्रान्तः सार्वकालिकसर्वहेतुकभयरहितः अत एव लोकस्य राक्षसादिजनस्य अनतिशङ्कया अतिशङ्काभावेनोपलक्षितो जनः राजा केकयीरा धर्मदोषप्रसङ्गेन धर्माणां सुन्यायानुष्ठितसत्कर्मणां यो दोषः राक्षसादिकर्तृकोपद्रव इत्यर्थः । तत्प्रसङ्गेन तच्छ्रवणेनेत्यर्थः । इदमवसरगमनाज्ञापनं कथं वक्तुमर्हति एतेनाभिषेकप्रतिज्ञातः पूर्वमेवाज्ञापनं युक्तमिति ध्वनितम् ॥ ६ ॥

गो० टी०–तथात्वमेवोपपादयति–कथमित्यादिना । हे शौण्डीर समर्थ! दैवमपि निराकर्तुं क्षमेत्यर्थः क्षत्रियर्षभ क्षत्रियश्रेष्ठ! त्वं शौण्डीरमशूरम् एतत् दैवं यथा समर्थं वदसि एवमसंभ्रान्तस्त्वद्विधः कथं वक्तुमर्हति न कथमपि अशूरः संभ्रान्तः क्षत्रबन्धुरेवासमर्थं दैवमनुसर्तुमर्हतीत्यर्थः।अस्थानइत्यादिश्लोकद्वयस्यैवं वार्थः धर्महानिप्रसक्त्या लोकस्यानतिशङ्क्या आनतिः पूजा तद्विषये शङ्क्या लोको मामधर्मिष्ठ इति न पूजयेदितिशङ्क्येत्यर्थः । यस्य ते अयुक्तः सुमहान्संभ्रमो भ्रान्तिः जातः धर्महानिर्लोकानत्यभावो वा सर्वातिशायिनस्ते किं करिष्यतीति भावः। भ्रमसद्भावं व्यतिरेकमुखेन द्रढयति–कथमिति ॥ ६ ॥

रा० टी०–यथेति । शौण्डीरः प्रारब्धादिनिरसनसमर्थः क्षत्रियर्षभस्त्वमशौण्डीरं त्वद्विषयकसामर्थ्यहीनमत एव कृपणं दैवमशक्तं सामर्थ्यहीनं यथा भवति तथा किं यथावदभिशंससि एतेन देवादृष्टवशात्तवाभिषेकनिवृत्तिर्न युक्तेति सूचितम् ॥ ७ ॥

गो० टी०–दैवालम्बनस्य भ्रमत्वमुपपादयति–किमिति । 'कृपणं बुद्धिपौरुषहीनानां जीविका' इति बृहस्पतिरित्युक्तरीत्या दुर्बलैकपरिग्राह्यतया शोच्यम् अशक्तं शक्तिहीनं पौरुषं तिरस्कृत्य कार्यकरणाक्षमम् दैवं किं नाम अभिशंससि अभिष्टौषि अशक्तत्वादेव न कार्यानुमेयो दैवसद्भावः असद्भावादेव तदवलम्बनं ते भ्रम इत्यर्थः । एवं दैवकृतस्यानतिलङ्घनीयत्वं परिहृतं पितृवाक्यपरिपालनरूपधर्मदोषप्रसङ्गं परिहरति–पापयोरिति । पापयोः कैकेयीदशरथयोर्विषये ते शङ्का पापित्वशङ्का कथं नाम न विद्यते पापिनौ तौ त्वयि पापं कर्तुमिच्छतः अतस्तद्वचनाकरणे न धर्महानिरिति भावः ॥ ७ ॥

८] ति० टी०–एवं दैवावलम्बनं प्रतिक्षिप्य धर्मदोषप्रसङ्गं परिहरति–पापयोरिति । पापात्मनोस्तयोः कैकेयीदशरथयोर्विषये ते कथं नाम शङ्का पापात्मत्वशङ्का न विद्यते न जायते । ननु धर्मैव्यवहारवतोः कथमेषा शङ्का तत्राह–सन्तीति । हे धर्मात्मन्धर्मैकस्वभाव! धर्म उपधा छलं तत्रासक्तमासक्तिर्लोकप्रतारणाय येषां तादृशा बहिर्धर्मपरा अन्तःपापासक्ताः सन्ति तान्किं कथं न बुध्यसे ॥ ८ ॥

रा० टी०–ननु रावणोऽतिबलवान् शत्रुरतस्तन्निरसनयत्नो द्रुतं कर्तव्य इत्यत आह–पापयोरिति । पापयोः पापाचरणशीलयोस्तयोः रावणकुम्भकर्णयोः शङ्का कथं विद्यते कथमपि नेत्यर्थः । तत्र हेतुः धर्मोपधासक्ताः धर्मं भवदुपासनाव्यपदधाति धारयति स विभीषण इत्यर्थः तत्रासक्ताः तद्विषयकप्रीतिमन्तो न सन्ति तयोः पुरुषा इति शेषः । धर्मात्मन्

१ दैवमिति गो. पाठः । २ शौण्डीर क्षत्रियर्षभेति गो. पाठः । ३ अक्ष्णा इति गो. सक्ता इति रा. पाठः ।

तयोः सुचरितं स्वार्थं शाठ्यात्परिजिहीर्षतोः । यदि नैवं व्यवसितं स्याद्धि प्रागेव राघव ॥
तयोः प्रागेव दत्तश्च स्याद्वरः प्रकृतश्च सः ॥ ॥ ९ ॥
लोकविद्विष्टमारब्धं त्वदन्यस्याभिषेचनम् । नोत्सहे सहितुं वीर तत्र मे क्षन्तुमर्हसि ॥ १० ॥
येनैवमागता बुद्धिर्मम ते राघवं । सोऽपि धर्मो मम द्वेष्यो यत्प्रसङ्गाद्विमुह्यसि ॥ ११ ॥

परमधर्मप्रवर्तक ! किं कथं न बुध्यसे स्मरसि एतेन रामोपासकद्रोही ध्रुवं नश्यतीति सूचितम् । 'धर्मोपधाः श्लक्ष्णाः' इति भूषणपाठः तत्र धर्मोपधाः धर्मध्वंसकाः श्लक्ष्णाः स्वरक्षणे चतुराः न सन्तीत्यर्थः ॥ ८ ॥

गो० टी०—नन्वु धर्मिष्ठयोस्तयोः कथं पापित्वशङ्केत्यत्राह—सन्तीति । धर्मः उपधा व्याजो येषां ते धर्मोपधाः श्लक्ष्णाः धर्माचरणकल्पुकेन स्वदोषपिधानचतुराः सन्ति लोके इति शेषः । हे धर्मात्मन् धर्मैकप्रवणस्वभाव ! शाक्याद्रूढविप्रियकारित्वात् स्वार्थमभिषेकरूपमस्मत्प्रयोजनं परिजिहीर्षतोः परिहर्तुमिच्छतोः तयोः कैकयीदशरथयोः सुचरितं सुष्ठु मन्त्रितं किं न बुध्यसे ॥ ८ ॥

९] ति० टी०—तयोर्धर्मोपधत्वं दर्शयति—तयोरिति । स्वार्थं स्वकार्यसिद्ध्यर्थम् सुचरितं त्वाम् शाक्यान्मृषाकल्पधर्मव्यवहारात् परिजिहीर्षतोस्त्यक्तुमिच्छतोस्तयोः कृत्यं किं न बुध्यसे इत्यनुकर्षः । अस्मदर्थमर्थापत्त्या साधयति—यदीति । यदि तयोरेवं शाक्येन त्वदर्थप्रच्यावनं यव्वसितमभिप्रेतं न स्यात्तदाभिषेकारम्भं कृत्वा तद्विघ्नकरणं न स्यादिति शेषः । हि यस्मात्प्रागेव पूर्वकाल एव तयोर्दातृप्रतिग्रहीतृभावेन संबद्धः स वरः प्रकृतः प्रदत्तप्रसङ्गस्तथ्यः स्यात्तदा प्रागेवाभिषेकारम्भात्पूर्वमेव दत्तः स्यात् त्वदभिषेकारम्भं विनैव भरताभिषेकत्वद्वनवासौ कृतौ स्याताम् । तस्माद्वरप्रदानकथा मिथ्यैवेति भावः ॥ ९ ॥

रा० टी०—तयोरिति । शाक्याद्धेतोः स्वार्थं स्वैश्वर्यं जिहीर्षतोः त्यक्तुमिच्छोः तयोः रावणकुम्भकर्णयोः यदि सुचरितं स्यात्तर्हि प्राक् पूर्वमेव एवं मुनिदुःखदानप्रकारेण व्यवसितं निश्चितं न स्यात् ॥ ९ ॥

रा० टी०—ननु प्राप्तवरत्वात्कथं तयोर्विनाश इत्यत आह—तयोरिति । दत्तः ब्रह्मणा ग्राहितः तयोः रावणकुम्भकर्णयोर्वरः प्रकृतः अतिशयेन छिन्नः छेदनार्थककृतो रूपम् । तत्र हेतुः यतः लोकविद्विष्टं भवज्जनद्वेषः आरब्धमत एव अन्यस्य रावणाद्विन्नस्य विभीषणस्येत्यर्थः । स्वस्वतः अभिषेचनं लब्ध्वा राज्याभिषेकः स्याद्धविष्यतीत्यर्थः । एतेन भक्तापराधिनः कल्याणं न भवतीति सूचितम् ॥ १० ॥

गो० टी०—विपर्ययेऽनिष्टं प्रतनुते—यदीति । हे राघव ! प्रागेव अभिषेकात्पूर्वमेव एवमुक्तप्रकारेण तयोः कैकेयीदशरथयोः व्यवसितं निश्चयः यदि न स्यात् तदा प्रकृतः पूर्वमेव प्रसक्तः स वरश्च प्रागेव दत्तः स्यात् । किंचेति चार्थः अयं भावः भरतायावश्यं राज्यं देयं रामस्य ज्येष्ठत्वेन तद्विपर्योऽभिषेक आरभ्यते तदानीं त्वया वरद्वयं प्रष्टव्यं तद्यावेन रामो विवास्यते भरतोऽभिषिच्यत इतिकैकेयीदशरथाभ्यां संकेतितमन्यथा सा वरद्वयं किमेतावत्पर्यन्तं न याचेत अयाचितमपि तत् नीतिज्ञो राजा वा कुतो न पूर्वमेव परिहरेदिति ॥ ९ ॥

१०] ति० टी०—यद्यपि दत्तोऽपि वरो राज्ञा विस्मृत इति तेन मदभिषेकारम्भः कृत इत्यादिसमाधानं शक्यं तथापीदृशवरदानस्य लोकविद्विष्टत्वेनानौचित्यादनुचितकर्तृत्वेन राजा त्याज्य एवेत्याह—लोकेति । ज्येष्ठे श्रेष्ठगुणे जाग्रति कनिष्ठविषयकत्वात्तदभिषेचनस्य लोकविद्विष्टत्वं प्रत्यक्षव्यवहारविरोधाच्छास्त्रविरोधाच्चेति भावः । मे अपराधमिति शेषः । त्वद्विषये प्रतिवचनदानरूपं ममापराधं क्षन्तुमर्हसि॥१०॥

रा० टी०—नेति । हे वीर ! येन अनवसरकैकयीवचनेन हेतुना तव बुद्धिः एवमनवसरगमनेन द्वैधं द्वौ रावणकुम्भकर्णौ धयति विध्वंसयतीत्यर्थः स तस्य भावः तदागता प्राप्ता तं हेतुं कैकयीवचनमित्यर्थः सहितुं नोत्सहे । ननु माता कथमेवमुच्यते इत्यत आह—तत्र मातृवचनासहनविषये क्षन्तुमर्हसि तदसहनं मम दुर्निवारमिति तात्पर्यम् ॥ ११ ॥

गो० टी०—अस्तु तथा ततः किमित्यत्राह—लोकविद्विष्टमिति । लोकविद्विष्टं ज्येष्ठं परित्यज्य कनिष्ठस्याभिषेचनात् लोकविद्वेषविषयमित्यारम्भक्रियाविशेषणं मे तत्र असहनविषये क्षन्तुमर्हसि ॥ १० ॥

११] ति० टी०—प्रतिवचनमेवाह—येनेत्यादि । यत्प्रसङ्गाद्यस्य पितृवचनस्य प्रसङ्गाद्धर्मत्वप्रसङ्गकल्पनाद्धेतोर्विमुह्यसि तदकरणे प्रत्यवायः स्यादिति मोहं प्राप्तोऽसि । येन च मोहेन तव बुद्धिरेवं द्वैधमागता पूर्वं राज्यग्रहणविषयत्वमधुना तत्यागविषयत्वरूपं प्रकारद्वयं प्राप्ता स धर्मोऽपि मम द्वेष्यः धर्माभासत्वादिति भावः ॥ ११ ॥

रा० टी०—स इति । यत्प्रसङ्गाद्यद्वृत्तानादित्यर्थः । विमुह्यसि सर्वोन्विचित्तान् करोषि स धर्मः अनवसरे प्रतिज्ञापालनमित्यर्थः मम द्वेष्यः मत्प्रीतिविषयीभूतो न भवतीत्यर्थः । अन्तर्भावितणिजर्थो मुह्यतिः । अर्थं पृथक् । वनगमननिवारणमपि कर्तुं न शक्यते इति बोधयन्नाह—कथमिति । कर्मणा धर्मक्रिययोपलक्षितः शक्तः समर्थस्त्वं कैकेयीवशवर्तिनः तत्त्वेन प्रतीयमानस्य पितुः वाक्यं अधर्मिष्ठमत एव विगर्हितं कथं करिष्यसि त्वत्कर्तृकपितृवचनाकरणे इदं पितृवाक्यमधर्मिष्ठमिति जना वदिष्यन्तीति तात्पर्यम्, यद्वा विगर्हि-

१ स इति गो० पाठः ।

कथं त्वं कर्मणा शक्तः कैकेयीवशवर्तिनः । करिष्यसि पितुर्वाक्यमधर्मिष्ठं विगर्हितम् ॥ १२ ॥
यदेयं किल्विषाद्भेदः कृतोऽप्येवं न गृह्यते । जायते तत्र मे दुःखं धर्मसङ्गश्च गर्हितः ॥ १३ ॥
तवायं धर्मसंयोगो लोकस्यास्य विगर्हितः । मनसापि कथं कामं कुर्यात्त्वां कामवृत्तयोः ॥
तयोस्त्वहितयोर्नित्यं शत्रवोः पित्रभिधानयोः ॥ ॥ १४ ॥
यद्यपि प्रतिपत्तिस्ते दैवी चापि तयोर्मतम् । तथाप्युपेक्षणीयं ते न मे तदपि रोचते ॥ १५ ॥
विक्लवो वीर्यहीनो यः स दैवमनुवर्तते । वीराः संभावितात्मानो न दैवं पर्युपासते ॥ १६ ॥

तमसमयोद्भवत्वेन लोकापवादसहितमपि धर्मिष्ठं स्वनिरक्षारूपस्वधर्मबोधकत्वेन धर्मसहितं वाक्यं कथं न करिष्यसि करिष्यस्येवेत्यर्थः ॥ १२ ॥

गो० टी०–यथाकथंचित् पितृवचनं कर्तव्यमेवेति मन्वानं रामं प्रत्याह–येनेति । इयं ते बुद्धिः येन पितृवचनपरिपालनरूपधर्मेण द्वैधं भेदमागता प्राप्ता नाभिषिच्ये वनं प्रवेक्ष्यामीति यस्य प्रसङ्गात्प्रस्तावाद् मुह्यसि अकरणे प्रत्यवायः स्यादिति मोहं प्राप्तोऽपि स धर्मो मम द्वेष्यः ॥ ११ ॥

१२] ति० टी०–तस्य धर्माभासत्वमेवाह–कथमिति । कर्मणाचिन्त्यवैभवस्वक्रियाशक्त्या कर्तुमकर्तुमन्यथा कर्तुं च शक्तः समर्थस्त्वं कैकेयीवशवर्तिनः स्त्रीजितस्य अत एव गर्हितं लोकनिन्यमधर्मिष्ठं च वचः करिष्यसि ॥ १२ ॥

गो० टी०–मोहं विशदयति–कथमिति । कर्मणा पौरुषकर्मणा शक्तः प्रतीकारसमर्थ इत्यर्थः । त्वं कैकेयीवशवर्तित्वादेवाधर्मिष्ठं विगर्हितं च वाक्यं कथं केन प्रकारेण मोहं विना करिष्यसि ॥ १२ ॥

१३] ति० टी०–एवं स्पष्टेऽप्यधर्मे तवाधर्मबुद्धिर्न जायत इति मे दुःखमित्याह–यदिति । अयं भेदोऽभिषेकविघटनात्मा किल्विषान्मृषावरप्रकल्पनात्कृतोऽपि यद्यतस्त्वयैवं मृषावरप्रकल्पितत्वेन न गृह्यते, अतो मे तत्र तद्विषये दुःखं जायते । कपटकृतमप्यर्थमसौ साधुत्या गृह्णातीति मम व्यथेति भावः । किंचैवंविधधर्मसङ्ग एवंविधधर्मासक्तिर्निन्द्या ॥ १३ ॥

रा० टी०–नन्वु तर्हि गमनसंमतिं कुर्वित्यत आह–यदिति । किल्विषात्पितृवचनाकरणे दोषोद्भावनाद्धेतोः अयं भेदः स्थितिनिराकरणं कृतोऽपि मयेति शेषः । न गृह्यते स्वीकर्तुं न शक्यते इत्यर्थः । तत्र हेतुः तत्र गमने च मे दुःखं जायते वियोगशङ्कयेति भावः । अत एव धर्मसङ्गः धर्मासक्तिरपि गर्हितः मया मनसि निन्दितः, एतेनाहमपि सहैव नेतव्य इति ध्वनितम् ॥ १३ ॥

गो० टी०–त्वन्मोहादेव मे दुःखमित्याह–यदीति । अयं भेदः अभिषेकविघातात्मा विपर्यासः किल्विषात् मृषावरकल्पनात् कृतोऽपि एवं किल्विषकल्पित इति यदि न गृह्यते तत्राग्रहणनिमित्ते मे दुःखं जायते धर्मसङ्गश्च एतादृशधर्मसङ्गश्च विगर्हितः ॥ १३ ॥

१४] ति० टी०–तदेवाह–तवेत्यादिना । अयं वनवासरूपो दोषस्य दोषत्वाग्रहमेव शोचति । त्वां त्वां विना तत्कृते कर्मणि दैवकृतत्वबुद्धिं त्वां विनान्यः कामवृत्तयोरहितयोर्नित्यं पितृनामकशत्रोः कामं मनोरथं मनसापि कथं कुर्यात अनुष्ठानं तु दूरत इति भावः ॥ १४ ॥

रा० टी०–स्थापयितुं गमयितुं वा मया न शक्यमिति बोधयन्नाह–तवेति । अयं भवता आरब्धः धर्मसंयोगः धर्महेतुकवनसंबन्धः अस्य अयोध्यास्थस्य लोकस्य जनस्य विगर्हितः वियोगस्यासह्यत्वेन अनीप्सित इत्यर्थः । अनेन गमनसंमतेरशक्यत्वं सूचितम् पित्रभिधानयोः मातापित्रोरित्यर्थः । अहितयोः अनीप्सिततत्पाल्यसुन्यादिदोहकर्तृत्वेन तदहिताचरणविशिष्टयोरित्यर्थः अत एव शत्रोः कामवृत्तयोः स्वच्छन्दचारिणोः तयोः रावणकुम्भकर्णयोः कामं कस्य स्वच्छन्दवर्तिहेतुकस्यस्य अमं निवारणं त्वां विना अन्यः मनसापि कथं कुर्यात्न कुर्यादित्यर्थः । विनेति अन्य इति चाध्याहृतम् एतेन निवारणमप्यशक्यमिति ध्वनितम् । सार्धश्लोक एकान्वयी ॥१४॥१५॥

गो० टी०–तस्मान्मनसापि तत्र कर्तव्यमित्याह–मनसेत्यादिना ॥ १४ ॥

१५] ति० टी०–वरस्य वास्तवं दैवकृतत्वमभ्युपेत्याप्याह–यद्यपीति । तयोः पित्रोः प्रतिपत्तिस्त्वदभिषेकविघटनविषया बुद्धिरपि दैवी च दैव्येवेति यद्यपि ते मतं तथापि ते त्वया स्वमतमप्येतदुपेक्षणीयं यत्तस्तदपीदृशं विरुद्धकारि दैवमपि न रोचते । एवं च प्रियभ्रातुर्ममासंमतत्वादिदं त्वया त्याज्यमिति भावः ॥ १५ ॥

रा० टी०–यद्यपीति । यद्यपि ते प्रतिपत्तिर्गमननिश्चयः दैवी देवाद्यदृष्टप्रार्थिता तयोः रावणकुम्भकर्णयोः मतम् उपद्रवविषयिणी मतिश्च दैवं देवादृष्टप्रेरितं द्वयमपि दुर्निवारमिति तात्पर्यम् तथापि यत्ते उपेक्षणीयमभिषेकत्यागः तन्मे नैव रोचते । दैवीशब्दः लिङ्गविपरिणामेनान्यत्राप्यन्वेति ॥ १६ ॥

गो० टी०–मम विवासनं दैवकृतं न तु कैकेयीकृतमिति पूर्वं रामोक्तमनद्य परिहरति–यद्यपीत्यादिना । तयोः पित्रोः प्रतिपत्तिः अभिषेकविघटनविषया बुद्धिः दैवी चापि दैवकृतैवेति ते मतं यद्यपि तथापि ते त्वया तत् उपेक्षणीयं तदपि दैवमपि मम न रोचते ॥ १५ ॥

१६] ति० टी०–किं च त्वादृशस्य दैवालम्बनवादोऽप्ययुक्त इत्याह–विक्लव इति । लोकाप्रसिद्ध इत्यर्थः । संभावितात्मानः सर्वलोकश्लाघ्यशौर्यादिमन्तः ॥ १६ ॥

१ यद्यपीति गो. पाठः । २ अर्धमिदं गो. नास्ति । ३ कुर्यास्त्वमिति गो. पाठः ।

दैवं पुरुषकारेण कः समर्थः प्रबाधितुम् । न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति ॥ १७ ॥
द्रक्ष्यन्ति त्वद्य दैवस्य पौरुषं पुरुषस्य च । दैवमानुपयोरद्य व्यक्ता व्यक्तिर्भविष्यति ॥ १८ ॥
अद्य [1]मे पौरुषहतं दैवं द्रक्ष्यन्ति वै जनाः । [2]यैर्दैवादाहतं तेऽद्य दृष्टं राज्याभिषेचनम् ॥ १९ ॥
अत्यङ्कुशमिवोद्दामं गजं मदजलोद्धतम् [3]। प्रधावितमहं दैवं पौरुषेण निवर्तये ॥ २० ॥
लोकपालाः समस्तास्ते नाद्य रामाभिषेचनम् । न च कुर्वन्त्वलोका विहन्युः किं पुनः पिता ॥ २१ ॥

रा० टी०—दैवानुसरणं तवानुचितमिति बोधयन्नाह—विक्लव इति । धी वीर्यहीनः दैवान्यथाकरणे असमर्थः अत एव विक्लवः कातरः प्राकृतो जन इत्यर्थः । सः दैवमनुवर्तते अनुसरति संभावितात्मानः संभावितः नित्यं परिशीलितः आत्मा स्वस्वरूपं यैस्ते अत एव वीरा ईश्वरा इत्यर्थः दैवं न पर्युपासते अनुसरन्तीत्यर्थः एतेन यदीश्वरा दैवं नानुसरन्ति तर्हि ईश्वरेश्वरो नानुसरतीति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः ॥ १७ ॥

गो० टी०—उपेक्षणीयतायां हेतुमाह—विक्लव इति । विक्लवः कातरः वीर्यहीन इत्यस्य प्रतियोगितयोक्तं वीरा इति विक्लव इत्यस्य प्रतियोगितयोक्तं संभावितात्मान इति संभावितः सम्यक् प्रापितः दृढ इति यावत् आत्मा मनो येषां ते तथा धीरा इत्यर्थः नोपासते नाश्रयन्ति ॥ १६ ॥

१७] ति० टी०—समर्थस्त्वादृशः विपन्नार्थो हतप्रयोजनः सः त्वादृशः ॥ १७ ॥

रा० टी०—दैवमिति । यः पुरुषकारेण स्वपौरुषेण दैवं प्रबाधितुं समर्थः स पुरुषः परमपुरुषः ईश्वरेश्वर इत्यर्थः दैवेन विपन्नार्थः विध्वंसितप्रयोजनः सन्नावसीदति खेदं प्राप्नोति एतेन देवादृष्टानुसारेणाभिषेकनिवर्तनं न योग्यमिति ध्वनितम् तेनादृष्टमेवान्यथा कुतो न कृतमिति जिज्ञासा सूचिता ॥ १८ ॥

गो० टी०—कुतो नाश्रयन्तीत्यपेक्षायां पौरुषबलो दैवेन प्रयोजनहान्यभावादित्याह—दैवमिति । पुरुषकारेण पुरुषबलेन दैवं बाधितुमतिक्रम्य वर्तितुं यः समर्थः स दैवेन विपन्नार्थः विहतप्रयोजनः सन् नावसीदति न क्लिश्यति ॥ १७ ॥

१८] ति० टी०—ननु दैवबाधनसामर्थ्यं न कस्यापि इति चेत्तत्राह—द्रक्ष्यन्तीति । पौरुषं बलं द्रक्ष्यन्ति लोका इति शेषः । व्यक्तिः प्रबलदुर्बलत्वविवेकः । अथ मत्पौरुषेणेति शेषः ॥ १८ ॥

रा० टी०—त्वत्कर्तृकगमने इदमाश्चर्यं भविष्यतीत्याह—द्रक्ष्यन्तीति । पुरुषस्य पुरुषे त्वयि दैवस्य पौरुषमयैव द्रक्ष्यन्तीति जनाः इति शेषः । ननु ततः किमित्यत आह—दैवमानुषयोः देवदेवमनुष्ययोः अव्यक्तिः अविभागः व्यक्ता प्रकटिता भविष्यति तेन परमपुरुषोपासना निवर्तिष्यते इति तात्पर्यम् ॥ १९ ॥

गो० टी०—पुरुषकारापेक्षया दैवस्य दुर्बलत्वे प्रत्यक्षं प्रमाणयति—द्रक्ष्यन्तीति । पौरुषं सामर्थ्यं व्यक्तिः प्रबलदुर्बलविवेकः व्यक्ता स्फुटा भविष्यति ॥ १८ ॥

१९] ति० टी०—तदेवाह—अद्येति । यैर्दैवादाहतं राज्याभिषेचनं ते दृष्टं ते जना अद्य मत्पौरुषहतं दैवं द्रक्ष्यन्ति यदैवात् इति पाठे यस्माद्दैवादाहतम् । येन दैवेनाहतमिति यावत् । दृष्टं यैर्जनैर्दृष्टं ते जनास्तद्दैवं मत्पौरुषहतं द्रक्ष्यन्तीत्यर्थः॥१९॥

रा० टी०—यदि मत्प्रार्थनया भवद्गमननिवृत्तिः स्यात्तर्हि उचितं स्यादित्याह—अद्येति । यैः जनैः दैवादैवाद्यदृष्टादाहतं निवृत्तं ते राज्याभिषेचनं दृष्टं ते जना अद्यैव मत्पौरुषहतं मत्पौरुषेण मत्कर्तृकभवत्कर्मकमत्प्रार्थनया हतं निवृत्तं दैवं द्रक्ष्यन्ति तेन ममापि कीर्तिः स्यादिति सूचितम् । ' यदैवात् , इति पाठे यैरित्यध्याहर्तव्यम् यदित्यभिषेचनविशेषणम् ॥ २० ॥

गो० टी०—तदेव स्पष्टमाह—अद्येति । यदैवात् यस्मादैवात् आहतं विघ्नितं ते राज्याभिषेचनं दृष्टं तदैवं मत्पौरुषहतं द्रक्ष्यन्ति ॥ १९ ॥

२०] ति० टी०—अत्यङ्कुशमतिक्रान्ताङ्कुशव्यापारम् । उद्दामसुत्कृष्टदामं निःशृङ्खलमिति यावत् । प्रधावितमभिमुखं धावितं पौरुषेण स्वगतबलेन निवर्तये ॥ २० ॥

रा० टी०—ननु सुखप्रापकदैवादृष्टनाशे तेषां दुःखनिवृत्तिर्न स्यादतो मद्गमनं स्यादेवेत्यत आह—अतीति । अत्यङ्कुशमङ्कुशव्यापारानियम्यमुद्दामं बन्धनरहितमित्यर्थः । मदबलोद्धतं मदबलहेतुकौद्धत्यविशिष्टं प्रधावितं धावनक्रियाविशिष्टं गजमिव दुर्निवारं दैवं रावणकुम्भकर्णोदयकारकादृष्टं पौरुषेण निवर्तये त्वदाज्ञामात्रेण रावणादीनहमेव निहनिष्यामीति तात्पर्यं तेन देवादिदुःखध्वंसो भविष्यत्येवेति सूचितम् ॥ २१ ॥

गो० टी०—अत्यङ्कुशमिति । अत्यङ्कुशमतिक्रान्ताङ्कुशव्यापारमुद्दामं छिन्ननिगलं मदबलोद्धतं मदबलाभ्यां गर्विष्ठं प्रधावितं दुर्निवारं स्वच्छन्दगमनं गजमिव दुर्निवारत्वेन त्वदभिमतं दैवं पौरुषेण निवर्तये ॥ २० ॥

२१] ति० टी०—दैवनिवर्तनं स्वबलस्येषत्करमित्याह—लोकेत्यादि ॥ २१ ॥

रा० टी०—ननु गमननिरोधे देवाः प्रार्थयिष्यन्तीत्यत आह—लोकेति । हे राम ! ते अभिषेचनं लोकपालादयो न विहन्युः गमनप्रार्थनया न निवर्तयिष्यन्तीत्यर्थः । गमनप्रयोजनस्य सिद्धत्वनिश्चयो भविष्यतीति तात्पर्यम् पिता किं किमर्थमित्यर्थः ॥ २२ ॥

गो० टी०—लोकपाला इति । ते प्रसिद्धाः हे राम ! ते तवाभिषेचनमिति वा न विहन्युः न विहन्तुं शक्ताः कृत्वा अन्यूनाः ॥ २१ ॥

१ मत्पौरुषेति गो. रा. पाठः । २ यदैवादिति गो. पाठः । ३ बलोद्धतमिति गो. रा. पाठः । ४ दामानमिति युः भाति ।

यैर्विवासस्तवारण्ये मिथो राजन्समर्थितः । अरण्ये ते विवत्स्यन्ति चतुर्दश समास्तथा ॥ २२ ॥
अहं तदाशां धक्ष्यामि पितुस्तस्याश्च या तव । अभिषेकविघातेन पुत्रराज्याय वर्तते ॥ २३ ॥
मद्बलेन विरुद्धाय न स्यादैवबलं तथा । प्रभविष्यति दुःखाय यथोग्रं पौरुषं मम ॥ २४ ॥
ऊर्ध्वं वर्षसहस्रान्ते प्रजापाल्यमनन्तरम् । आर्यपुत्राः करिष्यन्ति वनवासं गते त्वयि ॥ २५ ॥
पूर्वराजर्षिवृत्त्या हि वनवासोऽभिधीयते । प्रजा निक्षिप्य पुत्रेषु पुत्रवत्परिपालने ॥ २६ ॥
स चेद्राजन्यनेकाग्रे राज्यविभ्रमशङ्कया । नैवमिच्छसि धर्मात्मन्राज्यं राम त्वमात्मनि ॥ २७ ॥
प्रतिजाने च ते वीर मा भूवं वीरलोकभाक् । राज्यं च तव रक्षेयमहं वेलेव सागरम् ॥ २८ ॥

२२] ति० टी०–मिथः परस्परैकवाक्यतया स्वपौरुषेण । राजत्वं सिद्धवत्कृत्याह–राजन्निति ॥ २२ ॥

रा० टी०–यैरिति । राजन् हे नित्यराजत्वविशिष्ट ! यैर्देवादिदुःखैर्हेतुभिः चतुर्दशसमा अरण्ये ते वासो मिथः परस्परं समर्थितः ते अरण्ये विवत्स्यन्ति नङ्क्ष्यन्तीत्यर्थः ॥ २२ ॥

गो० टी०–यैरिति । राजत्वं सिद्धवत्कृत्याह–राजन्निति । मिथः रहसि मिथोऽन्योन्यरहस्ययोः' इति वैजयन्ती । तथा त्वां प्रत्युक्तप्रकारेण ॥ २२ ॥

२३] ति० टी०–तदाशां तामाशाम् । तां काम् या तवाभिषेकविघातेन पुत्रराज्याय पुत्रराज्यप्रापणार्थं वर्तते तामित्यर्थः ॥ २३ ॥

रा० टी०–अहमिति । या सर्वोत्क्रमणाविषयिणी रावणाशा तस्याः केकय्याः तव पितुश्च तवाभिषेकविघाते मातापितृकर्तृकत्वत्कर्मकाभिषेकविध्वंसे तदर्थं वर्तते अत एव पुत्रराज्याय पुत्रस्य तव राज्याय राज्यं प्रापयितुं न वर्तते तां तदाशां तस्य रावणस्यातितृष्णां धक्ष्यामि निवर्तयिष्यामीत्यर्थः । ' आशा दिगतितृष्णयोः ' इति वैजयन्ती ॥ २४ ॥

गो० टी०–अहमिति । तत्तस्मात् या तवाभिषेकविघातेन द्वारेण पुत्रराज्याय वर्तते प्रवर्तते तस्याः पितुश्च आशामतितृष्णाम् ' आशा दिगतितृष्णयोः ' इति वैजयन्ती ॥ २३ ॥

२४] ति०टी०–मद्बलेन त्वत्पक्षभूतेन मया विरुद्धाय जनाय यथा ममोग्रं पौरुषं दुःखाय प्रभविष्यति तथा दैवबलं न स्यात् तन्निरासनसमर्थमिति शेषः ॥ २४ ॥

रा० टी०–मदिति । मद्बलेन साकं विरुद्धाय विरोधं कर्तुं न स्यात्तथा विरोधाय स्याच्चेत्तर्हि मम उग्रं पौरुषं दुःखाय दैवबलनिवृत्तये यथा यथावत्प्रभविष्यति ॥ २५ ॥

गो० टी०–मद्बलेनेति । मद्बलेन विरुद्धाय जनाय ममोग्रं पौरुषं दुःखाय यथा प्रभविष्यति तथा दैवबलं न स्यात् सुखाय न भवेत् ॥ २४ ॥

२५] ति० टी०–अथ वनवासोचितं कालं स्वयमेवाह–ऊर्ध्वमिति । एतद्विवरणं वर्षसहस्रान्त इति । तस्मिन्नतीते त्वयि वनवासं गतेऽनन्तरमार्यपुत्रा आर्यस्य तव पुत्राः प्रजापाल्यं प्रजापालनरूपं राज्यं करिष्यन्ति तदानीमप्यन्येषां नावकाश इति भावः ॥ २५ ॥

रा० टी०–ऊर्ध्वमिति । वर्षसहस्रान्ते यथेप्सितराज्यकरणानन्तरमित्यर्थः । त्वयि वनवासं गते मर्यादापालनार्थं प्राप्ते सति आर्यपुत्राः आर्यस्य सर्वश्रेष्ठस्य तव पुत्राः प्रजापाल्यं प्रजारक्षणमनन्तरं निरन्तरं यथा स्यात्तथा करिष्यन्ति ॥२६॥

गो० टी०–न कदाचिदपि भरतस्य राज्यप्राप्तिरस्तीत्याह–ऊर्ध्वमिति । ऊर्ध्वमित्यस्य विवरणं वर्षसहस्रान्त इति प्रजापाल्यं प्रजापालनं स्वार्थे यत्प्रत्ययः ऊर्ध्वं वर्षसहस्रान्ते त्वयि वनं गते सति वानप्रस्थाश्रमस्थे सति अनन्तरं प्रजापाल्यम् आर्यस्य ते पुत्राः करिष्यन्ति ॥ २५ ॥

२६] ति० टी०–इदमेव युक्तमित्याह–पूर्वेति । हि यतः पुत्रवत्परिपालननिमित्तं पुत्रेषु प्रजा निक्षिप्य पश्चाद्वनवासः पूर्वराजर्षिवृत्त्या तदाचारेणाभिधीयते । ' विधीयते ' इत्येव क्वचित्पाठः ॥ २६ ॥

रा० टी०–नन्वु वनगमनेन कथं मर्यादापालनं स्यादित्यत आह–पूर्वेति । पुत्रवत्परिपालने परिपालनार्थं प्रजाः पुत्रेषु निःक्षिप्य पूर्वराजर्षिवृत्त्या राजर्षीणामाचरणेन हेतुना वनवासः अभिधीयते मया प्रार्थ्यते ॥ २७ ॥

गो० टी०–मदुक्त एव वनवासः पूर्वसंमत इत्याह–पूर्वेति । पुत्रेषु प्रजाः पुत्रवत्परिपालने परिपालननिमित्तं निक्षिप्य पूर्वराजर्षिवृत्त्या तदाचारेण वनवासो विधीयते ॥ २६ ॥

२७] ति० टी०–राजनि दशरथेऽनेकाग्रे कामवशादुक्तवान्प्रस्थधर्मादुद्यानैकाग्र्यतारहित्येन चलचित्ततया प्रतिकूले सति राज्यविभ्रमशङ्कया तद्रक्षोविरोधेन राज्यग्रहणे सकललोकक्षोभेण स्वस्मिन्राज्यस्य विभ्रमशङ्कया चलनशङ्कया स्थैर्यशङ्कया त वनवासधर्मः त्वया चेदङ्गीक्रियत इति शेषः । किंच हे राम ! एवं श्रेष्ठत्वाद्धर्मतः प्राप्तं राज्यं तवैव शङ्कया यथात्मनि नेच्छसि तदा तां शङ्कां त्यजेति शेषः । 'राज्यकामत्वम्' इति पाठे एवं प्राप्तं राज्यभोक्तृत्वं राज्यरूपभोग्यसंबन्धं वा यदि नेच्छसीत्यादि प्राग्वत् ॥ २७ ॥

२८] ति० टी०–तत्र हेतुः–प्रतिजाने इत्यादि । अहं वेला सागरमिव तव राज्यं च त्वां च रक्षेयम् अन्यथा वीरलोकभाङ्मा भूवमिति ते तवाग्रे प्रतिजाने ॥ २८ ॥

रा० टी०–स इति । राज्यविभ्रमशङ्कया राक्षसादिकर्तृ-

१ क्षेत्स्यामीति गो. पाठः । २ पूर्वमिति गो. पाठः ।

मङ्गलैरभिषिञ्चस्व तत्र त्वं व्यापृतो भव । अहमेको महीपालानलं वारयितुं बलात् ॥ २९ ॥
न शोभार्थावितौ बाहू न धनुर्भूषणाय मे । नासिरावन्धनार्थाय न शराः स्तम्भहेतवः ॥ ३० ॥
अमित्रमथनार्थाय सर्वमेतच्चतुष्टयम् । न चाहं कामयेऽत्यर्थं यः स्याच्छत्रुर्मतो मम ॥ ३१ ॥
असिना तीक्ष्णधारेण विद्युच्चलितवर्चसा । प्रगृहीतेन [2]वै शत्रुं वज्रिणं वा न कल्पये ॥ ३२ ॥
खड्गनिष्पेषनिष्पिष्टैर्गहना दुश्चरा च मे । हस्त्यश्वरथिहस्तोरुशिरोभिर्भविता [4]मही ॥ ३३ ॥
खड्गधाराहता मेऽद्य दीप्यमाना इवाग्नयः । पतिष्यन्ति [5]द्विषो भूमौ मेघा इव सविद्युतः ॥ ३४ ॥

कप्रजादौस्थ्यसंदेहेन राजनि दशरथे अनेकाग्रे अनवस्थिते सति आत्मनि स्वमनसि राज्यं नैव इच्छसि चेत्तर्हि हे वीर ! तव राज्यमहं रक्षेयमन्यथा वीरभाक् वीरशब्दवाच्यो मा भूवमिति अहं प्रतिजाने प्रतिज्ञां करोमि।श्लोकद्वयमेकान्वयि२८-२९॥

गो० टी०—स चेत्यादिश्लोकद्वयमेकान्वयम्। हे राम ! स राजनि दशरथे एकमनेकाग्रे चलचित्ते अव्यवस्थितचित्ते सति राज्यविभ्रमशङ्कया राज्यस्य विविधचलनशङ्कया आत्मनि राज्यं नेच्छसि चेदहं तव राज्यं च रक्षेयं कथमिव वेला सागरमिव नोचेद्वीरलोकभाक् मा भूवम् ते तुभ्यं प्रतिजाने च ॥२७॥२८॥

२९] ति० टी०—तस्मात्त्वं मङ्गलैरभिषेकसाधनैरात्मानमभिषिञ्चस्व वसिष्ठादिभिरिति शेषः । तत्राभिषेकव्यापारे व्यापृतो व्यापृतचित्तो भव । तत्प्रतिबन्धकानहं वारयिष्यामीत्याह—अहमिति । अलं समर्थः ॥ २९ ॥

रा० टी०—राक्षसानुयायिराजान्तरकृतोपद्रवशङ्कापि न कर्तव्येति बोधयन्नाह—मङ्गलैरिति । मङ्गलैर्मङ्गलद्रव्यैः त्वमभिषिञ्चस्व स्वाभिषेकं कारय अतः तत्र तस्मिन् अभिषेके त्वं व्यापृतो व्यापारवान्भव एकः सहायान्तररहितोऽहं बलात्पौरुषान्महीपालान्राक्षसानुयायिराजान्वारयितुं नियमयितुमलं समर्थः ॥ ३० ॥

गो० टी०—मङ्गलैरिति । मङ्गलैः मङ्गलद्रव्ययुक्तैः जलैः अभिषिञ्चस्व आत्मानं वसिष्ठादिभिरिति शेषः । तत्र अभिषेककर्मणि व्यापृतो भव व्यासक्तचित्तो भवेत्यर्थः अलं पर्याप्तं वारयितुं निवारयितुम् ॥ २९ ॥

३०] ति० टी०—तदेव दर्शयति—नेति । आबन्धनार्थाय काष्ठानां परस्परं बन्धनहेतुच्छिद्रादिकरणाय स्तम्भः कस्यचित्काष्ठादेरधःपतनप्रतिबन्धः ॥ ३० ॥

रा० टी०—ननु तव श्रमः स्यादित्यत आह—नेति । इमौ क्षत्रियशरीरसंबन्धिनौ बाहू शोभार्थौ शोभाप्रयोजनकौ न धनुःभूषणाय न असिः खड्गः आबन्धनार्थाय कुड्यादिनिर्मापकरज्वादिछेदनाय न शराः बाणाः स्तम्भहेतवः समूहीभूय स्तम्भनिर्मापका न ॥ ३१ ॥

गो० टी०—न शोभार्थावित्यादि सार्धश्लोकमेकं वाक्यम्। नेति । आबन्धनार्थाय अपाततः वीरभूषणतया कव्यां बन्धनरूपप्रयोजनायेत्यर्थः । स्तम्भहेतवः केवलं लक्ष्यभूतस्तम्भहेतवः तूष्णीं स्थापनहेतव इति वा ॥ ३० ॥

३१-३२] ति० टी०—न चेत्यादि सार्धश्लोक एकं वाक्यम् । योऽत्यर्थं मम मतः संमतः शत्रुः स्यात्तं यं कंचिच्छत्रुं वज्रिणं वा इन्द्ररूपं वा प्रगृहीतेन तीक्ष्णधारत्वादिविशिष्टेनासिना न कल्पये न खण्डशः कल्पये, एवमहं न कामये च एवं कामनामपि न करोमि सर्वथा खण्डयाम्येवेति भावः ॥ ३१ ॥ ३२ ॥

रा० टी०—ननु किमर्थमित्यत आह—अमित्रेति । चतुष्टयं बाह्वादि। अर्थं पृथक्—न चेति। यः शत्रुः मम मतः मज्ज्ञानविषयीभूतः स्यात्तं कं साधारणं वज्रिणमिन्द्रं वा प्रगृहीतेन उत्थापितेन विद्युच्चलितवर्चसा विद्युच्चलितमिव चलितं वर्चस्तेजो यस्य तेन असिना न कल्पये छिनद्मि इत्यहं न कामये इच्छामि। सार्धश्लोक एकान्वयी ॥ ३२ ॥ ३३ ॥

गो० टी०—न चाहमित्यादिसार्धश्लोकः। यः मम अत्यर्थं शत्रुः शातयिता मतः स्यात् परीक्षकैरिति शेषः ! तमहं न कामये तस्य स्थितिं न सह इत्यर्थः किंत्वसिना वज्रिणमपि शत्रुं न कल्पये न स्थापयामि हन्मीत्यर्थः। तीक्ष्णधारेण तीक्ष्णाग्रेण विद्युच्चलितवर्चसा विद्युदिव चलितं निर्गतं वर्चः स्फुलिङ्गरूपं यस्य तेन ॥ ३१ ॥

३३] ति० टी०—खड्गनिष्पेषनिष्पिष्टैः खड्गकृताघातेन खण्डितैर्मही गहना निरन्तरत्वात्। अत एव दुश्चरा हस्त्यादीनां हस्तादिभिः क्रमात्संबन्धः। भविष्यतीति लृट् ॥ ३३ ॥

रा० टी०—शत्रूनवश्यं हनिष्यामीति स्पष्टं बोधयन्नाह—खड्गेति । मे खड्गस्य यो निष्पेषः छेदनानुकूलः व्यापारः तेन निष्पिष्टैः छिन्नैः हस्त्यादिहस्तादिभिः गहना व्याप्ता अत एव दुश्चरा संचारायोग्या मही भविता ॥ ३४ ॥

गो० टी०—खड्गेति । खड्गकृतमर्दनेन चूर्णीकृतैर्गहना काननमिव निरन्तरा अत एव दुश्चरा संचारायोग्या च भविता भविष्यति ॥ ३२ ॥

३४] ति० टी०—हता विच्छिन्ना अग्नय इव दीप्यमाना रक्तधारया अत एव सविद्युतो मेघा इव ॥ ३४ ॥

रा० टी०—तदेव द्रढयन् भङ्ग्यन्तरेणाह—खड्गेति । अग्नय इव दीप्यमानाः रुधिरसहितदेहा इत्यर्थः द्विषः शत्रवः तत्र दृष्टान्तः सविद्युतः विद्युत्सहिताः ॥ ३५ ॥

गो० टी०—खड्गधारेति । मे खड्गधारया खड्गकोट्या हताः अत एव सविस्फुलिङ्गस्वारीप्यमानाः ज्वलिताः अग्नय इव

---

१ दमनार्थं मे इति गो. पाठः । २ कमिति रा. पाठः । ३ नरेति गो. पाठः । ४ अग्नय इति गो. पाठः । ५ द्विषा इति गो. पाठः ।

बद्धगोधाङ्गुलित्राणे प्रगृहीतशरासने । कथं पुरुषमानी स्यात्पुरुषाणां मयि स्थिते ॥ ३५ ॥
बहुभिश्चैकमत्यस्यन्नेकेन च बहून्रणान् । विनियोक्ष्याम्यहं बाणान्नृवाजिगजमर्मसु ॥ ३६ ॥
अद्य मेऽस्त्रप्रभावस्य प्रभावः प्रभविष्यति । राज्ञश्चाप्रभुतां कर्तुं प्रभुत्वं च तव प्रभो ॥ ३७ ॥
अद्य चन्दनसारस्य केयूरामोक्षणस्य च । वसूनां च विमोक्षस्य सुहृदां पालनस्य च ॥ ३८ ॥
अनुरूपाविमौ बाहू राम कर्म करिष्यतः । अभिषेचनविघ्नस्य कर्तॄणां ते निवारणे ॥ ३९ ॥
ब्रवीहि कोऽद्यैव मया वियुज्यतां तवासुहृत्प्राणयशःसुहृज्जनैः ।
तथा तवेयं वसुधा वशा भवेत्तथैव मां शाधि तवास्मि किंकरः ॥ ॥ ४० ॥

सवियुतो मेघा इव च स्थिताः द्विपाः शत्रुगणाः भूमौ पतिष्यन्ति ॥ ३३ ॥

३५] ति० टी०–उक्तधर्मविशिष्टे मयि स्थिते सति पुरुषाणां मध्ये कश्चिदपि कथं पुरुषमानी आत्मानं पुरुषं मन्यमानः शूराभिमानी कथं स्यादित्यर्थः ॥ ३५ ॥

रा० टी०–बद्धेति । बद्धं गोधायै ज्याघातनिवारणाय अङ्गुलित्राणं येन तस्मिन् बद्धकवचे इत्यर्थः । मयि स्थिते सति पुरुषाणां मध्ये पुरुषमानी अहं पुरुषः परमयोद्धेत्यर्थः इति मानी अभिमानी कथं त्यात्र स्यादित्यर्थः । तेन परमपुरुषानुगृहीतस्य मे पराभवो नैव भविष्यतीति स्वनिश्चयः सूचितः 'गोधा ज्याघातवारणे' इत्यमरः ॥ ३५ ॥

गो० टी०–बद्धेति । गोधा ज्याघातवारणम् 'गोधातलं ज्याघातवारणे' इत्यमरः । गोधारूपाङ्गुलिरक्षककवचवति मयि स्थिते सति पुरुषाणां मध्ये कश्चित्कथं पुरुषमानी शूरमानी स्यात् सर्वे स्त्रीप्राया भविष्यन्तीत्यर्थः ॥ ३४ ॥

३६] ति० टी०–अत्यस्यन्पातयन् बहुभिर्बाणैः एकेन बाणेन विनियोक्ष्यामि त्यक्ष्यामि ॥ ३६ ॥

रा० टी०–अन्वेकस्त्वं बहून् रिपून्कथं हनिष्यसीत्यत आह–बहुभिरिति । बहुभिः बाणैः एकं मुख्यं शरमित्यर्थ । अत्यस्यन्प्रक्षिपन्नेकेन बाणेन बहून् असुरूयानित्यर्थः । अत्यस्यन् नादिमर्मसु बाणान्विनियोक्ष्यामि ॥ ३७ ॥

गो० टी०–बहुभिरिति । अहं बहुभिर्बाणैरेकं शरमत्यस्यन् प्रकर्षेण क्षिपन् 'प्रकर्षे लङ्नेप्यति' इत्यमरः । एकेन बाणेन बहून् क्षुद्रान् अत्यस्यन् अनेन प्रकारेण नृवाजिगजानां मर्मसु मर्मस्थलेषु बाणान्विनियोक्ष्यामि विसर्जयिष्यामि अतः कथमेको बहून् हनिष्यतीति न चिन्तनीयमिति भावः ॥ ३६ ॥

३७] ति० टी०–अस्त्रप्रभावस्यास्त्रसामर्थ्यस्य प्रभावः प्रतापः राज्ञो दशरथस्य प्रभविष्यत्युज्जृम्भितो भविष्यति ॥ ३७ ॥

रा० टी०–अद्येति । अद्य परकृताभिषेकविघ्नकाले रक्षः राक्षसराजादेः अप्रभुतामसामर्थ्यं कर्तुं प्रकटयितुं तव प्रभुत्वं समाधिकरहितसामर्थ्यं च प्रकटयितुमस्त्रप्रभावस्य मदस्त्रशस्त्रसामर्थ्यस्य प्रभावः प्रतापः प्रभविष्यति विरुद्धराजानिराकरणेन प्रकटीभविष्यति एतेन लक्ष्मणस्य रामातिप्रेयत्वं व्यक्तम् राज्ञ इत्यत्र जात्यभिप्रायेणैकवचनम् अत एव अभिषेचनविघ्नस्य कर्तृणामिति वक्ष्यमाणस्य न वैरूप्यम् ॥ ३८ ॥

गो० टी०–अद्येति । अस्त्रप्रभावस्य अस्त्रमाहात्म्यस्य प्रभावः प्रतापः 'प्रतापप्राहात्म्ययोः प्रभावः स्यात्' इति वैजयन्ती ॥ ३६ ॥

३८–३९] ति०टी०–चन्दनसारस्य चन्दनसारानुलेपनस्य केयूरामोक्षणस्याङ्गदधारणस्य, वसूनां मोक्षणस्य दानस्य, सुहृज्जनपालनस्यानुरूपावहौं मे बाहू इमौ पीनप्रलम्बौ तेऽभिषेचनविघ्नस्य कर्तृणां निवारणे कर्म स्वानुरूपं कर्म करिष्यतः ॥ ३८ ॥ ३९ ॥

रा० टी०–अद्येति । हे राम ! अभिषेचनविघ्नस्य कर्तॄणां निवारणे कर्म व्यापारं करिष्यतो मे बाहू चन्दनसारस्य उत्तमचन्दनानुलेपनस्य केयूरामोक्षणस्य केयूरस्य अङ्गदस्य-मोक्षणस्य धारणस्य वसूनां द्रव्याणां विमोक्षस्य दानस्य सुहृदां पालनस्य च अनुरूपौ योग्यौ भविष्यत इति शेषः । एतेन रामसेवाकरणमन्तरा सर्वं कर्म निरर्थकमिति सूचितम् । श्लोकद्वयमेकान्वयि । ' केयूरमङ्गदम्' इत्यमरः ॥ ३९ ॥ ४० ॥

गो० टी०–अद्येत्यादिश्लोकद्वयमेकं वाक्यम् । चन्दनसारस्य चन्दनपङ्कस्य केयूरामोक्षणस्य अङ्गदधारणस्य ' केयूरमङ्गदम् ' इत्यमरः । वसूनां धनानां विमोक्षस्य त्यागस्य सुहृदां पालनस्य शत्रुभ्यो रक्षणस्य च अनुरूपौ राजपुत्रत्वेन योग्यावपि इमौ बाहू हे राम ! तत्सर्वं विहाय ते अभिषेचनविघ्नस्य कर्तॄणां निवारणे विषये कर्म करिष्यतः ॥ ३७ ॥ ३८ ॥

४०] ति० टी०–ब्रवीहीत्यार्ष इट् । वियुज्यतां वियोज्यताम् ॥ ४० ॥

रा० टी०–ब्रवीहीति । तव असुहृत् अरिः कः इति त्वं ब्रवीहि ब्रूहि इडागमगुणावार्षौ । नन्वेवं किमर्थं पृच्छसीत्यत आह–अथैव प्राणयशःसुहृज्जनैः मया वियुज्यताम् स इति शेषः । यथा येन प्रकारेण वसुधा तव वशा भवेत् तथा मां शाधि शिक्षय ॥ ४१ ॥

गो० टी०–त्वदाज्ञात्वेकावश्यं भाविनीत्याह–ब्रवीहीति । ब्रवीहि ब्रूहि वियुज्यतां मया वियोज्यताम् ॥ ३९ ॥

विमृज्य बाष्पं परिसान्त्व्य चासकृत्स लक्ष्मणं राघववंशवर्धनः ।
उवाच पित्रोर्वचने व्यवस्थितं निबोध मामेष हि सौम्य सत्पथः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ।

रामं पित्राज्ञानुवर्तने दृढमनस्कं दृष्ट्वा कौसल्या मामपि सार्कं नयेत्यवादीत् । भर्तृशुश्रूषणमेव सभर्तृकायाः कर्तव्यमिति कथयतो रामस्य वनगमनं सा यथाकथंचिदनुमेने ।

तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने । कौसल्या बाष्पसंरुद्धा वचो धर्मिष्ठमब्रवीत् ॥ १ ॥
अदृष्टदुःखो धर्मात्मा सर्वभूतप्रियंवदः । मयि जातो दशरथात्कथमुञ्छेन वर्तयेत् ॥ २ ॥
यस्य भृत्याश्च दासाश्च मृष्टान्यन्नानि भुञ्जते । कथं स भोक्ष्यते रामो वने मूलफलान्ययम् ॥ ३ ॥
क एतच्छ्रद्दधेच्छ्रुत्वा कस्य वा न भवेद्भयम् । गुणवान्दयितो राज्ञः काकुत्स्थो यद्विवास्यते ॥ ४ ॥

४१] ति० टी०—एवंवादिनं लक्ष्मणं रामो नायमेतस्य काल इत्याह—विमृज्येति । बाष्पं लक्ष्मणनयनजं विमृज्य परिमृज्य । 'विसृज्य' इति पाठेऽन्तर्भावितण्यर्थतया विसर्जयित्वा । चक्षुषी परिमृज्येति यावदिति कतकः । पित्रोर्वचने व्यवस्थितं प्रतिष्ठितं मां निबोध । हे सौम्य ! एष हि सत्पथः 'जीवतोर्वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥' इति न्यायादिति भावः । निबोधेत्यस्य नितरामतिशयेनावहितेन कालिकवृत्तान्तस्मरणपूर्वकं जानीहि । एष हि एष एव सत्पथः सतां रक्षकः पन्था इत्यर्थयोर्ऽत्र गूढः ॥ ४१ ॥

इति श्रीराघाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०—लक्ष्मणवचनश्रवणानन्तरकालिकं रामवृत्तमाह—विमृज्येति । बाष्पमश्रूणि विमृज्य लक्ष्मणनेत्राद्दूरीकृत्य लक्ष्मणमसकृद्भृशं वारं परिसान्त्व्य राघववंशवर्धनः स रामः लक्ष्मणमुवाच । तद्वचनमेवाह—पित्रोर्वचने व्यवस्थितमेव मां निबोध एतेन भीतिनिवृत्तिर्बोधिता । तत्र हेतुः हे सौम्य ! एष पितृवचनपालनं सत्पथः समीचीनो मार्गः 'जीवतोर्वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता' इति स्मृतिः ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

गो० टी०—एवं विस्तरेण पूर्वपक्षमुपन्यस्तवन्तं लक्ष्मणं मतिपूर्वं विस्तृतं सिद्धान्तं संग्रहेणाह—विमृज्येति । बाष्पं रामासंमतिजं राघववंशवर्धनः रघोः संबन्धी राघवः राघवश्चासौ वंशश्चेति विशेषणसमासः सत्पथे पित्र्ये वचने व्यवस्थितं निश्चलं मां निबोध जानीहि सर्वथाहं पितृवचनं न त्यजामीत्यर्थः 'जीवतोर्वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता' इतिस्मरणादिति भावः ॥ ४० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

१] ति० टी०—व्यवसितं निश्चितमतिम् निर्देश आज्ञा बाष्पसंरुद्धवाक् । धर्मिष्ठं रामम् ॥ १ ॥

रा० टी०—कौशल्यावृत्तान्तमाह—तमिति । निर्देशपालने आज्ञापितकरणे व्यवसितं कृतनिश्चयं तं रामं समीक्ष्य ज्ञात्वा कौशल्या वचः अब्रवीत् ॥ १ ॥

गो० टी०—अथ धर्मस्य रामनिश्चयस्यानुमोदनं कौसल्या करोति—तं समीक्ष्येत्यादिना । तं रामं समीक्ष्य निश्चित्यावहितं सावधानं निर्देशे नियोगे ॥ १ ॥

२] ति० टी०—उञ्छः क्षेत्रपतितकणशो ग्रहणम् । वर्तयेज्जीवेत् भवानिति शेषः ॥ २ ॥

रा० टी०—तद्वचनमेवाह—अदृष्टेति । मयि जातः प्रकटीभूतो रामो भवान् उञ्छेन क्षेत्रादिपतितकणिशग्रहणेन कथं वर्तयेत् वर्तेत ॥ २ ॥

गो० टी०—अदृष्टदुःख इति । उञ्छो नाम दैवात्प्रकीर्णानां व्रीह्यादिधान्यानामङ्गुल्या एकैकशो ग्रहणं कणिशग्रहणं तु शिलमेव इदं फलमूलाद्याहरणं लक्षयति वर्तयेत् जीवेत् ॥ २ ॥

३] ति० टी०—भृत्या भर्तव्याः । अयमुपस्कृतमांसादिभोजनशीलः ॥ ३ ॥

रा० टी०—यस्येति । यस्य भृत्यादयः मृष्टानि स्वच्छानि भुञ्जते ॥ ३ ॥

गो० टी०—यस्येति । भृत्याः भटाः दासाः दास्यकराः मृष्टानि श्लाघ्यानि ॥ ३ ॥

४] ति० टी०—वियास्यत इति यदेतच्छ्रुत्वा कः श्रद्धेयस्तत्यं मन्वीत सत्यमिति वा ज्ञात्वा कस्य स्वपित्रादिभ्यो भयं न भवेत् ॥ ४ ॥

रा० टी०—क इति । काकुत्स्थो रामः यद्विवास्यते तच्छ्रुत्वा कः श्रद्धेयत्समीचीनं मन्येत भयं रामगमने कथमत्रस्थानां जीवनमिति कस्यायोध्याजनस्य भीतिर्न भवेत् ॥ ४ ॥

गो० टी०—क इति । विवास्यत इति यत् एतत् कः श्रद्-

१ पित्र्ये इति गो. पाठः । २ त्वदहितमिति गो. पाठः । ३ निदेश इति गो. पाठः । ४ राजेति गो. राज्ञेति रा. पाठः । ५ विसर्ज्येति युक्तं भाति ।

नूनं तु बलवांल्लोके कृतान्तः सर्वमादिशन् । लोके रामाभिरामस्त्वं वनं यत्र गमिष्यसि ॥ ५ ॥
अयं तु मामात्मभवस्तवादर्शनमारुतः । विलापदुःखसमिधो रुदिताश्रुहुताहुतिः ॥ ६ ॥
चिन्ताबाष्पमहाधूमस्तवागमनचिन्तजः । कर्शयित्वाधिकं पुत्र निःश्वासायाससंभवः ॥ ७ ॥
त्वया विहीनामिह मां शोकाग्निरतुलो महान् । प्रधक्ष्यति यथा कक्ष्यं चित्रभानुर्हिमात्यये ॥ ८ ॥
कथं हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति । अहं त्वानुगमिष्यामि यत्र वत्स गमिष्यसि ॥ ९ ॥
यथा निगदितं मात्रा तद्वाक्यं पुरुषर्षभः । श्रुत्वा रामोऽब्रवीद्वाक्यं मातरं भृशदुःखिताम् ॥ १० ॥
कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते । भवत्या च परित्यक्तो न नूनं वर्तयिष्यति ॥ ११ ॥

धेनुणवत्पुत्रविवासनस्य असंभावितत्वात् श्रद्धेयत्वे वा कस्य भयं न भवेत् ममाप्येवं विवासनं भविष्यतीति ॥ ४ ॥

५] ति० टी०–सर्वमादिशन्सुखदुःखेन योजयन् । कृतान्तो दैवं बलवानिति नूनमहं मन्ये । यत्र यस्माद्धे राम ! अभिरामस्त्वं लोके कर्मलोके स्थितो वनं गमिष्यसि ॥ ५ ॥

रा० टी०–नूनमिति । हे राम ! अभिरामस्त्वं यत्र यदर्थं वनं गमिष्यसि स कृतान्तः धर्मध्वंसकर्ता रावणः सर्वमादिशन्स्वाज्ञाविषयीभूतं कुर्वन् सन् लोके इह पृथिव्यां बलवान् इति अहं लोके जाने एतेन सावधानतया वर्तितव्यमिति सूचितम् इह पृथिव्यामित्यनेन तत्राग्ने वस्तुतो न बलवानिति सूचितम् ॥ ५ ॥

गो० टी०–नूनमिति । सर्वं सुखदुःखादिकमादिशन् प्रदिशन् कृतान्तः दैवम् यत्र दैवे निमित्ते ॥ ५ ॥

६–८] ति० टी०–आत्मभव आत्मजः स्वमनःसंभूतः तवादर्शनमेव वर्धकत्वान्मारुतो यस्य सः विलापदुःखैः समिधः समिन्धनं यस्य सः घञर्थे कः रुदिताश्रूण्येव हुता आहुतयो यस्मिन्सः चिन्ताहेतुकबाष्पमेव महाधूमो यस्य स तवागमनचिन्तजः चिन्तज इति बाहुलकाद्डस्वः तव या गमनचिन्ता तया जनितः । 'अदर्शनचिन्तजः' इति पाठेऽप्यदर्शनजातचिन्ताजनित इत्यर्थः । परे त्वदर्शनस्य मारुतत्वेन निरूपणात्स चिन्त्य इत्याहुः । निःश्वासरूपायासेन संधुक्षणात्संभवो वृद्धिर्यस्य सः । त्वया विहीनां मामधिकं कर्शयित्वा कृशां कृत्वातुलो युक्तगुणः शोकाग्निर्मां धक्ष्यति । हिमात्यये ग्रीष्मे चित्रभानुर्वह्निः सूर्यो वा ॥ ६–८ ॥

रा० टी०–इदानीं त्वद्वियोगजनितं दुःखं दुःसहमिति बोधयन्ती आह–अयमित्यादिभिः । आत्मभवः मनसि प्रादुर्भूतः अदर्शनं दर्शनाभावः मारुतो वायुपर्यस्य सः विलापदुःखं समिधः इन्धनं यस्य सः रुदिताश्रुहुताहुतिः रुदिताश्रूणि रोदनजन्यनेत्रजलानि हुता प्रक्षिप्ता आहुतिर्यस्य सः चिन्ताबाष्पः चिन्तोष्मा महाधूमो यस्य सः आगमनचिन्तजः अतिदुःखसंपादकदूरदेशगमनोत्तरं कथमयमागमिष्यतीति चिन्तनजनितः निःश्वासायासेन संभवो वृद्धिर्यस्य अत एव अतुल इयत्तां कर्तुमशक्यः अत एव महान् शोकाग्निः त्वया विहीनां मां मां राज्यलक्ष्मीं च अधिकं यथा स्यात्तथा कर्शयित्वा क्लेशतां प्रापय्य प्रधक्ष्यति अत एव मामित्यनयोर्न पौनरुक्त्यं हिमात्यये हिमध्वंससमये चित्रभानुर्वह्निः सूर्यो वा कक्ष्यं यथाचिन्तज इति बाहुलकाद्डस्व इति भट्टाः 'अदर्शनचिन्तजः' इति पाठेऽपि अदर्शनजातचिन्ताजनित इत्यर्थः । परे त्वदर्शनस्य मारुतत्वेन निरूपणात्स चिन्त्य इत्याहुरिति भट्टाः वस्तुतस्त्वेवं पाठे आदर्शनमिति छेदः आदर्शनं नित्यदर्शनं कदा स्यादिति चिन्ताजनित इत्यर्थः । श्लोकत्रयमेकान्वयि ॥ ६–८ ॥

गो० टी०–अयं त्वित्यादिश्लोकत्रयमेकं वाक्यम् । अत्र विश्लेषजनितशोकस्याग्निसमाधिरुच्यते आत्मभवः देहजः अदर्शनमारुतः शोकाग्नेरदर्शनजत्वात् तस्य मारुतत्वनिरूपणं विलापदुःखं प्रलापजं दुःखं तदेव समिधा यस्य तस्य तद्वर्धकत्वात् आपं चैव हलन्तानामिति समिच्छब्दाट्टाप् । रुदिताश्रूणि रोदनजाश्रूणि तान्येव हुता क्षिप्ता आहुतिर्यस्य चिन्ताबाष्पं चिन्तोष्मा स एव महाधूमो यस्य तवादर्शनेन हेतुना चित्तज इति हेतुमात्रोक्तिः । 'आगमनचित्तजः' इति पाठान्तरं निःश्वास एवायासः पुरुषप्रयत्नः समिदादिजन्याग्नेः पुरुषप्रयत्नजत्वात्तथा निरूपणम् त्वया जलस्थानीयेन विहीनां मां शोक एवाग्निः शोकाग्निः वैतानिकाग्निः कर्शयित्वा शुष्कीकृत्य हिमात्यये शिशिरतौ कक्ष्यं गुल्मं चित्रभानुः वन्योऽग्निरिव मां प्रधक्ष्यति भस्मीकरिष्यति ॥ ६–८ ॥

९] ति० टी०–कथमिति यथेत्यर्थः क्वचित्तथैव पाठः ॥ ९ ॥

रा० टी०–शोकाभावे उपायं वदन्ती आह–कथमिति । कथंशब्दो यथार्थकः क्वचित्तथैव पाठ इति भट्टाः । त्वा त्वामनुगमिष्यामि 'नानुगच्छन्ति' इति पाठे तु कथमो न यथार्थत्वम् । तत्रोत्तरार्धादौ तस्मादिति पूरणीयम् ॥ ९ ॥

गो० टी०–कथं हीति । उत्तरार्धादौ तथेत्युपस्कार्यम् ॥ ९ ॥

१०] ति० टी०–यथा निगदितं येन प्रकारेण निगदितं तद्वाक्यं श्रुत्वा आत्मानुगमनं श्रुत्वेति यावत् ॥ १० ॥

रा० टी०–मातृवचनश्रवणानन्तरकालिकवृत्तमाह–यथेति । मात्रा निगदितं कथितं यथा यथावच्छ्रुत्वा भृशदुःखितां निश्चितवियोगजनितदुःखाक्रान्तां मातरमब्रवीत् ॥ १० ॥

गो० टी०–तथेति । तथा निगदितमिति स्ववाचोऽप्यविषयत्वं दर्शयति मुनिः ॥ १० ॥

११] ति० टी०–वञ्चितो वञ्चनया मद्वियोजनाद्दुःखं प्रापितो न वर्तयिष्यति न जीविष्यति ॥ ११ ॥

१ चित्तज इति गो. पाठः । २ कक्ष्यमिति गो. रा. पाठः । ३ नानुगच्छतीति गो. पाठः । ४ तथेति गो. पाठः ।

भर्तुः पुनः परित्यागो नृशंसः केवलं स्त्रियाः । स भवत्या न कर्तव्यो मनसापि विगर्हितः ॥ १२ ॥
यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः । शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः ॥ १३ ॥
एवमुक्ता तु रामेण कौसल्या शुभदर्शना । तथेत्युवाच सुप्रीता राममक्लिष्टकारिणम् ॥ १४ ॥
एवमुक्तस्तु वचनं रामो धर्मभृतां वरः । भूयस्तामब्रवीद्वाक्यं मातरं भृशदुःखिताम् ॥ १५ ॥
मया चैव भवत्या च कर्तव्यं वचनं पितुः । राजा भर्ता गुरुः श्रेष्ठः सर्वेषामीश्वरः प्रभुः ॥ १६ ॥
इमानि तु महारण्ये विहृत्य नव पञ्च च । वर्षाणि परमप्रीत्या स्थास्यामि वचने तव ॥ १७ ॥
एवमुक्ता प्रियं पुत्रं बाष्पपूर्णानना तदा । उवाच परमार्ता तु कौसल्या सुतवत्सला ॥ १८ ॥
आसां राम सपत्नीनां वस्तुं मध्ये न मे क्षमम् । नय मामपि काकुत्स्थ वनं वन्यां मृगीमिव ॥ १९ ॥

रा० टी०–तद्वचनमेवाह–कैकेय्येति । अवञ्चितः वञ्चनकर्तृत्वाभाववान् कैकेय्या सहितो राजा मयि अरण्यमाश्रिते गते सति भवत्या परित्यक्तः मद्वियोगहेतुत्वबुद्ध्या प्रीतिविषयत्वाभाववान् यदि स्यादिति शेषः । तदा न वर्तयिष्यति प्रजापालनं न करिष्यतीत्यर्थः । एतेन प्रीतिरेव कर्तव्येति सूचितम् ॥ ११ ॥

गो० टी०–कैकेय्येति । न वर्तयिष्यति न जीविष्यतीत्यर्थः ॥ ११ ॥

१२] ति० टी०–केवलं नृशंसः क्रौर्यमेव न तु तेनेहामुत्र सुखमित्यर्थः । मनसापि न कर्तव्यो न चिन्तनीयः यतो विगर्हितो महापापेहतैर्निन्दितः ॥ १२ ॥

रा० टी०–तत्र हेतुं वदन्नाह–भर्तुरिति । भर्तुः परित्यागः केवलं नृशंसः क्रूरतैव अतो विगर्हितो निन्दितः स त्यागो भवत्या मनसापि न कर्तव्यः नृशंसशब्दो भावप्रधानः ॥ १२ ॥

गो० टी०–भर्तुरिति । नृशंसः नृशंसत्वम् सिद्ध्यतीति शेषः मनसापि न कर्तव्यः न चिन्तनीय इत्यर्थः ॥ १२ ॥

१३–१४] ति० टी०–अतः–यावदिति । ॥ १३॥१४ ॥

रा० टी०–यावदिति । ककुत्स्थवंशोद्भवः पिता यावज्जीवति इह प्रजाः पालयति तावच्छुश्रूषा क्रियताम् एतेन तेन सह त्वया न गन्तव्यमिति ध्वनितं तेन पितुर्लोकान्तरगमनावश्यकत्वं बोधितं तेन पुत्रसेवार्थं कौसल्या इहैव तिष्ठतु इति राजेच्छा सूचिता तेन रामस्य पित्राभिप्रेतसाधकत्वं ध्वनितम् ॥ १३ ॥

गो० टी०–यावदिति । सः शुश्रूषाधर्मापेक्षया पुंल्लिङ्गत्वम् १३

रा० टी०–एवमिति । अक्लिष्टकारिणं क्लेशकारिपितियोगिकभेदविशिष्टं रामं तथा इत्युवाच ॥ १४ ॥

गो० टी०–एवमिति । शुभदर्शना धर्म्यबुद्धिरित्यर्थः ॥१४॥

१५] ति० टी०–एवं वचनमुक्तो भर्तृशुश्रूषाङ्गीकारवचनमुक्तः श्रावितः ॥ १५ ॥

रा० टी०–मातृसंतोषपरीक्षणहेतुकं रामवचनं वर्णयन्नाह–एवमुक्त इति । भृशदुःखितां निश्चितवियोगस्मृतिजनितदुःखाक्रान्तां भूपः अब्रवीत् ॥ १५ ॥

गो० टी०–दार्ढ्यार्थं पुनराहेत्याह–एवमित्यादिना ॥१५॥

१६] ति० टी०–उभयोस्तद्वचनावश्यकर्तव्यत्वं हेतुभर्ता गुरुरिति च यथायोगम् ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–मयेत्यादिभिः । पितुः वचनं मया भवत्या च कर्तव्यमेव तत्र हेतुः राजा भूपतिः भर्ता सविधि भवत्याः पाणिग्रहीता गुरुः तत्त्वोपदेष्टा श्रेष्ठो महात्मा प्रभुः सकलसामर्थ्यविशिष्टः सर्वेषामीश्वरः पूज्य इत्यर्थः ॥१६॥

गो० टी०–मयेति । उत्तरार्धादौ स इत्युपस्कार्यम् प्राथमिकपितृवचनपरिपालनानन्तरम् ॥ १६ ॥

१७] ति० टी०–पितृवाक्यकरणानन्तरं त्वच्छुश्रूषापि कार्येत्याह–इमानीति । विहृत्येत्यनेन वनवासस्य मृगयावल्लीलात्वं दर्शितम् । वचने स्थास्यामि वचनमनुष्ठास्यामि ॥ १७ ॥

रा० टी०–इमानीति । इमानि पित्राज्ञप्तानि नवपञ्चवर्षाणि विहृत्य विहारं कृत्वा तव वचने आज्ञापिते स्थास्यामि तत्करिष्यामीत्यर्थः । विहृत्येत्यनेन वनगमनस्य स्वप्रीतिविषयीभूतत्वं बोधितं तेन भवत्या विषादो न कर्तव्य इति ध्वनितम् ॥ १७ ॥

गो० टी०–तव वचनं करिष्यामीत्याह–इमानीति । इमानीत्यल्पत्वज्ञापनाय विहृत्येत्यनेन क्लेशराहित्यमुक्तम् ॥१७-१८॥

१८] ति० टी०–एवमुक्ता पुत्रेणेति शेषः ॥ १८ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेणोक्ता पुत्रेणेति शेषः सुतवत्सला सुतविषयकातिवात्सल्यविशिष्टा अत एव परमार्ता अत एव बाष्पपूर्णानना कौसल्या उवाच एतेन वियोगदुःखस्य दुर्निवारत्वं सूचितम् ॥ १८ ॥

१९] ति० टी०–अङ्गीकृतभर्तृसेवापि सपत्नीदुःखस्मरणात्पुनरामानुगमनमभिलषति–आसामित्यादि । वन्यां वने भवाम् १९

रा० टी०–तद्वचनमेवाह–आसामिति । आसां त्वद्वियोगहेतुभूतानां सपत्नीनां मध्ये वस्तुं क्षमम् उचितं न अतः हे काकुत्स्थ ! पितुः अपेक्षया संतोषहेतुना यदि ते गमने बुद्धिर्निश्चयः तर्हि मामपि वनं नय प्रापय तत्र दृष्टान्तः वन्यां मृगीमिव एतेन रामवियोगजन्यं दुःखं सर्वासां भवतीति सूचितं तेन तद्दुःखासहिष्णुत्वं व्यक्तम् । सार्धश्लोक एकान्वयी ॥ १९ ॥

१ किलेति गो. पाठः । २ स्त्रिय इति रा. पाठः । ३ प्रीत इति गो. पाठः । ४ पुत्रेति गो. पाठः ।

यदि ते गमने बुद्धिः कृता पितुरपेक्षया । तां तथा रुदतीं रामोऽरुदन्वचनमब्रवीत् ॥ २० ॥
जीवन्त्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च । भवत्या मम चैवाद्य राजा प्रभवति प्रभुः ॥ २१ ॥
न ह्यनाथा वयं राज्ञा लोकनाथेन धीमता । भरतश्चापि धर्मात्मा सर्वभूतप्रियंवदः ॥ २२ ॥
भवतीमनुवर्तेत स हि धर्मरतः सदा । यथा मयि तु निष्क्रान्ते पुत्रशोकेन पार्थिवः ॥ २३ ॥
श्रमं नावाप्नुयात्किंचिदप्रमत्ता तथा कुरु । दारुणश्चाप्ययं शोको यथैनं न विनाशयेत् ॥ २४ ॥
राज्ञो वृद्धस्य सततं हितं चर समाहिता । व्रतोपवासनिरता या नारी परमोत्तमा ॥ २५ ॥
भर्तारं नानुवर्तेत सा च पापगतिर्भवेत् । भर्तुः शुश्रूषया नारी लभते स्वर्गमुत्तमम् ॥ २६ ॥
अपि दग्धा निर्नमस्कारा निवृत्ता देवपूजनात् । शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता ॥ २७ ॥

गो० टी०—एवमनुमतरामवनगमनस्वनगरवर्तनापि पुनः सपत्नीस्मरणादनुगमनमर्थयते—आसामिति । वन्यां मृगीमिव यथा वन्या मृगी वने संतुष्टा वर्तते तथाहमपि वर्ते न भवन्तं नाशयिष्यामीति भावः । पितरपेक्षया पितुरिच्छया ॥ १९ ॥

२०] ति० टी०—यदि ते इत्यादयं पूर्वान्वयि । तां तथा रुदतीं दृष्ट्वापि स्वयमरुदन्वचोऽब्रवीत् । रोदने कातर्यप्रकटनेन मातुः पुनरप्यनुगमनप्रत्याशाप्रसङ्गात् ॥ २० ॥

रा० टी०—तामिति । अरुदन् रोदननिवृत्तिं कुर्वन् मन्त्रित्यर्थः रामः अब्रवीत् । अर्थं पृथक् ॥ २० ॥

गो० टी०—तामिति । रुदन् व्यसनेषु मनुष्याणां भृशं भवति दुःखित इत्युक्तगुणविशिष्टोऽपि रामो मातृव्यसनं दृष्ट्वा पितृवचनपरिपालनरूपधर्मविघ्नभयाद्धैर्येण स्थितवान् इदानीं वनगमनानुमतिं लब्ध्वा स्वस्नेहप्रदर्शनेन मातृव्यसनं निवर्तयितुं रुदितवानित्यवगम्यते ॥ २० ॥ २१ ॥

२१] ति० टी०—प्रभवति दण्डादौ समर्थो भवति ॥ २१॥

रा० टी०—तद्वचनमेवाह—जीवन्त्या इति । स्त्रियाः भर्तैव दैवतं देवता प्रभुः सामर्थ्यं च भावप्रधानो निर्देशः किंच प्रभुः सर्वार्थसंपादनसमर्थः अत एव जीवन्त्याः बहून् जीवयन्त्याः भवत्याः मम च राजैव प्रभुः नियोगे समर्थः एतेन राजनियोगाभावत्वास्तव गमनमनुचितमिति बोधितम् ॥ २१ ॥

२२] ति० टी०—धीमतेति । सनाथा इति शेषः । अथ सपत्नीमध्यवासो दुष्कर इत्यत्र परिहारमाह—भरत इति॥२२॥

रा० टी०—ननु त्वां विना अहं कथं स्थास्यामीत्यत आह—नहीति । लोकनाथेन सकललोकनियन्त्रा राज्ञा वयं भरतश्च अपिना भवत्यादयः अनाथाः न एतेन राजकर्तृकगमननियोगाभावादुष्करापि स्थितिः कर्तव्यैवेति ध्वनितम् ॥ २२ ॥

गो० टी०—नहीति । राज्ञा सनाथा इति शेषः राज्ञा सनाथा वयं नह्यनाथा इत्यर्थः सपत्नीमध्यवासदोषं परिहरति—भरतश्चापीति ॥ २२ ॥ २३ ॥

२३-२४] ति० टी०—भवतीमिति । अतः कैकेयीकोपोऽकिंचित्कर इति भावः । यथा मयि निष्क्रान्ते श्रमं नाप्नुयात्तथा कुरु यथा चैनं राजानं शोको न विनाशयेत्तथा च कुरु॥ २३ ॥२४॥

रा० टी०—त्वादृशः सेवको नास्तीत्यपि नाशङ्क्यमिति बोधयन्नाह—भवतीमिति । स भरतः अनुवर्तेत सेविष्यते इत्यर्थः । अर्धं पृथक्—यथेति । निष्क्रान्ते वनं गते सति श्रमं खेदं किंचिदल्पमपि अप्रमत्ता अनवधानतारहिता । अर्धद्वयमेकान्वयि ॥ २३ ॥

रा० टी०—दारुण इति । अयं मद्वियोगजनितः शोकः एनं पितरं न विनाशयेल्लोकान्तरगमनहेतुकादर्शनतां न प्रापयेत्तथा तेन प्रकारेण वृद्धस्य ज्ञानवयोभ्यामधिकस्य राज्ञः हितं प्रियं सततं चर कुरु ॥ २४ ॥

गो० टी०—दारुण इति । हितं चरेत्यत्र तथेति शेषः ॥२४॥

२५-२६] ति० टी०—द्विजस्य गायत्रीजपवत्स्त्रिया भर्तृशुश्रूषैव परं नित्या नान्यत्किंचित्प्रत्युत तद्विरोधन्यदाचर्यमाणं प्रत्यवायजनकमपीत्याह—व्रतेत्यादि । नित्याकरणजप्रत्यवायानर्थं साङ्गाप्यनित्यधर्मकृतिः परिहर्तुं न शक्नोतीति भावः॥२५॥२६

रा० टी०—हिताचरणाभावे दोषमाह—व्रतेति । परमोत्तमा उत्कर्षगुणजात्यादिमत्त्वेन सर्वोत्कृष्टा अत एव व्रतोपवासनिरतापि या नारी भर्तारं नानुवर्तेत सेवेत सा पापगतिः पापानां पापविशिष्टानां गतिरिव गतिर्यस्याः सा भवेद्भर्तुः शुश्रूषया तु नारी साधारणस्त्री अपि उत्तमं स्वर्गं लभते । साधश्लोक एकान्वयी ॥ २५ ॥ २६ ॥

गो० टी०—पतिशुश्रूषणमेव पत्न्याः परमो धर्म इत्यन्वयव्यतिरेकाभ्यां श्लोकद्वयेन दर्शयति—व्रतेति । पापस्य गतिः फलमिव फलं यस्याः सा तथा निर्नमस्कारापि भर्तृभिन्नद्विजादिविषयनमस्काररहितापि ॥ २५ ॥ २६ ॥

२७] ति० टी०—नित्यानुष्ठाने सत्यनित्याकरणेऽपि न परलोकनाश इत्याह—अपि येति । निर्नमस्कारा भर्तृव्यतिरिक्तदेवादेर्नमस्कारादुपचाररहिता । देवपूजनाद्विष्ण्वादिदेवपूजनात् । सापि स्वर्गं लभते इति प्राक्तनेनान्वयः । एतमेवार्थं नियमविधिद्वारेण द्रढयति—शुश्रूषामेवेति । तत्प्रीतिजनकं कर्मैवेत्यर्थः। तदेवाह—प्रियहिते रतेति ।हितपदेन पश्चादुक्तेनैतद्ध्वनयति । आपाततोऽप्रियमपि हितं कुर्यादापातप्रियमप्यहितं त्यजेदिति॥२७॥

रा० टी०—स्त्रिया देवपूजनादिप्रवृत्तिरपि नावश्यकीति

---

१ त्रिति गो. पाठः ।

एष धर्मः स्त्रिया नित्यो वेदे लोके श्रुतः स्मृतः । अग्निकार्येषु च सदा सुमनोभिश्च देवताः ॥ २८ ॥
पूज्यास्ते मत्कृते देवि ब्राह्मणाश्चैव सत्कृताः । एवं कालं प्रतीक्षस्व ममागमनकाङ्क्षिणी ॥ २९ ॥
नियता नियताहारा भर्तृशुश्रूषणे रता । प्राप्स्यसे परमं कामं मयि पर्यागते सति ॥ ३० ॥
यदि धर्मभृतां श्रेष्ठो धारयिष्यति जीवितम् । एवमुक्ता तु रामेण वाष्पपर्याकुलेक्षणा ॥ ३१ ॥
कौसल्या पुत्रशोकार्ता रामं वचनमब्रवीत् । गमने सुकृतां बुद्धिं न ते शक्नोमि पुत्रक ॥ ३२ ॥
विनिवर्तयितुं वीर नूनं कालो दुरत्ययः । गच्छ पुत्र त्वमेकाग्रो भद्रं तेऽस्तु सदा विभो ॥ ३३ ॥
पुनस्त्वयि निवृत्ते तु भविष्यामि गतक्रमा । प्रत्यागते महाभागे कृतार्थे चरितव्रते ॥
पितुरानृण्यतां प्राप्ते स्वपिष्ये परमं सुखम् ॥ ॥ ३४ ॥
कृतान्तस्य गतिः पुत्र दुर्विभाव्या सदा भुवि । यैस्त्वां संचोदयति मे वच आविद्ध्य गायव ॥ ३५ ॥

बोधयन्नाह–अपीति । देवपूजाग्निकृत्या अज्ञानादिना देवाराधनरहिता अत एव निर्नमस्कारा नमस्कारादिक्रियारहिता या नारी भर्तुः प्रियहिते रता सती शुश्रूषामेव कुर्वीत सापि उत्तमं स्वर्गं लभते इति पूर्वेणान्वयः ॥ २७ ॥

गो० टी०–उपसंहरति–शुश्रूषामिति । लोके पुरा दृष्टः पुरातनलोकाचारसिद्ध इत्यर्थः वेदे श्रुतः वेदावगत इत्यर्थः स्मृतः स्मृत्यवगतश्चेत्यर्थः ॥ २७ ॥

२८] ति० टी०–तत्र मानमाह–एष भर्तृसेवारूपो धर्मः स्त्रिया नित्य इति वेदे श्रुतः लोके स्मृतः । तर्हि किं कर्मान्तरं सर्वथा त्याज्यं नेत्याह–अग्नीत्यादि । भर्तृसंमतेष्वग्निकार्येषु च तेष्वेव । च एवकारार्थः ॥ २८ ॥

रा० टी०–तत्र हेतुं वदन्नाह–एष इति । एषः पतिशुश्रूषणरूपो धर्मः वेदे लोके च नित्यः श्रुतः अत एव स्मृतः समये स्मृतिविषयीभूतो जातः । अर्धं पृथक् कालक्षेपणार्थं स्वागमनहेतुत्वेन प्रकल्पितां क्रियामाह–अग्नीति । अग्निकार्येषु द्वादशसु सर्वेषु इत्यर्थः । सुमनोभिः पुष्पैः देवताः पूज्याः सुव्रता ब्राह्मणाश्च पूज्याः एतेन स्वपूजैव परोक्षेण निर्दिष्टा इति व्यक्तम् । अर्धद्वयमेकान्वयि ॥ २८ ॥

गो० टी०–तूष्णीमवस्थाने एनां दुःखमाक्रमिष्यतीति धिया दुःखविच्छेदनार्थं कालक्षेपसाधनं विधत्ते–अग्नीति । अग्निकार्येषु शान्तिकपौष्टिकहोमेषु सुमनोभिश्चेत्यत्र चकारेण चन्दनताम्बूलादीनि समुच्चीयन्ते अग्निकार्येषु क्रियमाणेषु सुमनःप्रभृतिभिर्देवता ब्राह्मणाश्च पूज्या इत्यर्थः ॥ २८ ॥

२९] ति० टी०–एवं भर्तृसेवातत्परतया । कालं ममागमनकालम् ॥ २९ ॥

रा० टी०–एवमिति । एवमुक्तपूजनादिना नियता यतचित्ता भर्तृशुश्रूषणे रता सती कालं प्रतीक्षस्व अत एव मयि पर्यागते सति धर्मभृतां श्रेष्ठः पिता यदि जीवितं सर्वेषां जीवनं धारयिष्यति पालयिष्यतीत्यर्थः । तर्हि परमं कामं स्वेप्सितं प्राप्स्यसे पक्षे विशेष्यमात्रे पर्यवसानं सूचितम् । अर्धचतुष्टयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०–एवमिति । नियता स्नानादिनियमयुक्ता नियताहारा मधुमांसादिवर्जनेन शुद्धाहारा ॥ २९ ॥

३०] ति० टी०–काममैहिकविषयसुखम् ॥ ३० ॥

गो० टी०–प्राप्स्यस इति । भर्तृजीवनपुत्रागमनयोः सतोरेव हि परमकामप्राप्तिसंभव इति भावः ॥ ३० ॥ ३१ ॥

३१] ति० टी०–तस्य पुत्रमात्रासाध्यत्वादाह–यदीति । अनेन दशरथमरणस्य संनिहितत्वं सूचितम् ॥ ३१ ॥

रा०टी०–एवमिति । राममब्रवीत् अर्धद्वयमेकान्वयि॥३१॥

३२] ति० टी०–सुकृतां सुष्ठुकृतनिश्चयाम् ॥ ३२ ॥

रा० टी०–तद्वचनमेवाह–गमन इति । हे पुत्रक हे वीर ! गमने सुकृतामतिनिश्चितां ते बुद्धिं निवर्तयितुं न शक्नोमि तत्र हेतुः कालः विजयसमयः दुरत्ययः ॥ ३२ ॥

गो० टी०–गमन इति । सुकृतां सुदृढामित्यर्थः ॥ ३२ ॥

३३] ति० टी०–काल इष्टवियोगादिजनकः ॥ ३३ ॥

रा० टी०–गच्छेति । हे पुत्र ! हे विभो ! एकाग्रो नियतचित्तः त्वं गच्छ ते तुभ्यं सदा भद्रं कल्याणमस्तु अहं तु त्वयि निवृत्ते वनादागते सति गतक्रमा त्यक्तकालनिर्भविष्यामि भवितास्मि । अर्धद्वयमेकान्वयि ॥ ३३ ॥

गो० टी०–गच्छेति । गतक्रमा गतक्लेशा ॥ ३३ ॥

३४] ति० टी०–आनृण्यताम् । स्वार्थे ष्यञ् ॥ ३४ ॥

रा० टी०–प्रत्यागते इति । चरितव्रते चरितमाचरितं व्रतं येन तस्मिन्कृतः संपादितः अर्थः प्रतिज्ञाविषयीभूतं वस्तु येन तस्मिन्नत एव पितुः आनृण्यतां प्राप्ते प्रत्यागते इह प्राप्ते महाभागे महाभां राज्यलक्ष्मीमागच्छति प्राप्नोति तस्मिन् त्वयि सति परमं सुखं स्वपिष्ये ॥ ३४ ॥

गो० टी०–प्रत्यागत इति । महाभागे महाभागधेये आनृण्यतामनृणतां स्वार्थे ष्यञ् ॥ ३४ ॥

३५] ति० टी०–मे वच आविद्ध्याच्छिद्य त्वां संचोदयति । वनायेति शेषः इति यत्, अतः कृतान्तस्य गतिर्दुर्विभाव्या ॥३५॥

रा० टी०–कृतान्तस्येति । यतस्माद्धेतोः कृतान्तस्य राक्षसानामित्यर्थः गतिर्गमनं दुर्विभाव्या दुर्लक्ष्या तस्माद्धेतोः

---

१ सुव्रता इति गो. पाठः । २ प्राप्स्यते इति रा. पाठः ३ त्वयि लप्स्ये परमिति गो. पाठः । ४ यस्त्वामिति रा. पाठः । ५ आच्छिद्येति गो. पाठः ।

गच्छेदानीं महाबाहो क्षेमेण पुनरागतः । नन्दयिष्यसि मां पुत्र साम्ना श्लक्ष्णेन चारुणा॥३६॥
अपीदानीं स कालः स्याद्वनात्प्रत्यागतं पुनः । यत्त्वां पुत्रक पश्येयं जटावल्कलधारिणम् ॥ ३७ ॥
तथाहि रामं वनवासनिश्चितं ददर्श देवी परमेण चेतसा ।
उवाच रामं शुभलक्षणं वचो बभूव च स्वस्त्ययनाभिकाङ्क्षिणी ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ।

कौसल्यया सविस्तरं कृतप्रयाणमङ्गलाशासनो रामस्तच्चरणावभिवाद्य सीतां द्रष्टुं तदावास जगाम ।

सा विनीय तमायासमुपस्पृश्य जलं शुचि । चकार माता रामस्य मङ्गलानि मनस्विनी ॥ १ ॥
न शक्यते वारयितुं गच्छेदानीं रघूत्तम । शीघ्रं च विनिवर्तस्व वर्तस्व च सतां क्रमे ॥ २ ॥
यं पालयसि धर्मं त्वं प्रीत्या च नियमेन च । स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ॥ ३ ॥

आविध्य स्वस्त्यादिविधानं कृत्वा मे वचः त्वां संचोदयति गमनाय प्रेरयति । 'आच्छिद्य' इति पाठे तु स्वस्त्यादिकरणेन विघ्नान् छित्वेत्यर्थः ॥ ३५ ॥

गो० टी०–कृतान्तस्येति । आच्छिद्य छित्वा अन्यथा कृत्वेत्यर्थः ॥ ३५ ॥

३६] ति० टी०–श्लक्ष्णेन निर्मलेन चारुणा मनोहरेण साम्ना सान्त्वेन वचनेन । 'शुक्लेन' इति पाठान्तरम् ॥ ३६ ॥

रा० टी०–गच्छेति । हे महाबाहो ! इदानीं क्षेमेण मत्कृतमङ्गलवचनहेतुककल्याणेन सहितस्त्वं गच्छ । हे पुत्र ! आगतः त्वमहि प्राप्तः त्वं श्लक्ष्णेन रमणीयार्थेन चारुणा रमणीयवर्णविशिष्टेन साम्ना शान्तिकारकेण वाक्येनेति[1] शेषः मां नन्दयिष्यसि ॥ ३६ ॥

गो० टी०–गच्छेति । साम्ना सान्त्वरूपेण ॥ ३६ ॥

३७] ति० टी०–अदर्शनासहिष्णुत्वात्प्रत्यागमनकाल इदानीमेव भवेदिति प्रार्थयते–अपीति । येन कालेन प्रत्यागतं प्रत्यागमनं भवेत्स इत्यर्थः । अपीदानीमिति लोकोक्त्योवाच ॥ ३७ ॥

रा० टी०–अपीति । यस्मिन् काले वनात्प्रत्यागतं त्वां पश्येयं स कालः इदानीं समीपे एवेत्यर्थः स्यात् भवेत् वियोगकालस्याधिक्यं न प्रतिभासेतेति तात्पर्यम् ॥ ३७ ॥

गो० टी०–क्षणमात्रमप्यदर्शनासहिष्णुत्वात् प्रत्यागमनकाल इदानीमेव संभवेदिति प्रार्थयते–अपीति । यत् येन चतुर्दशवर्षान्तेन कालेन वनात्प्रत्यागतं त्वां पुनः पश्येयं स काल इदानीमेवापि स्यात् अपिशब्दः संभावनायाम् 'अपिः संभावनाप्रश्नगर्हाशङ्कासमुच्चये' इति वैजयन्ती । यत् यत्रेति वार्थः॥३७॥

३८] ति० टी०–परमेणादरवता । धर्मशीलत्वादेवर्षिरक्षणोद्यतत्वाच्च भगवत्संकल्पेनैव तथा ज्ञानं तस्या इति बोध्यम् । स्वस्त्ययनं मङ्गलमभिकाङ्क्षितुं शीलमस्त्यस्याः सा ॥ ३८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

रा० टी०–तदेति । वनवासनिश्चितं वनवासविषयकनिश्चयवन्तं शुभलक्षणं रामं परमेण सूक्ष्मेण चेतसा विचारेण ददर्श स्वस्त्ययनाभिकाङ्क्षिणी स्वस्त्ययनं कर्तुकामा बभूव अत एव शुभलक्षणं शुभसूचकं वच उवाच ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

गो० टी०–तथेति । वनवासनिश्चितं निश्चितवनवासम् परमेण चेतसा आदरेणेति यावत् स्वस्त्ययनं मङ्गलमभिकाङ्क्षितुं शीलमस्या अस्तीति तथा ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

१] ति० टी०–मङ्गलकरणमेवाह–सेति । आयासं तज्जनकं शोकम् उपस्पृश्याचम्य मङ्गलानि मङ्गलवचनानि ॥ १ ॥

रा० टी०–तद्वचनमेवाह–सेति । सा कौशल्या तं निश्चिततवियोगजनितमायासं दुःखं विनीय विचारेण दूरीकृत्य मङ्गलानि चकार ॥ १ ॥

गो० टी०–तान्येव स्वस्त्ययनानि दर्शयति–सेत्यादि । आयासं क्लेशमपनीय त्यक्त्वा जलमुपस्पृश्याचम्येत्यर्थः । 'उपस्पर्शस्त्वाचमनम्' इत्यमरः । रोदनस्याशुचिताहेतुत्वात् देवताप्रार्थनस्य शुचिना कर्तव्यत्वादुपस्पर्शनमुक्तम् अत एव शुचिरित्युच्यते मङ्गलानि मङ्गलाशासनानि ॥ १ ॥

२–३] ति० टी०–सतां क्रमे सतां मार्गे ॥ २–३ ॥

रा० टी०–नेति । हे रघूत्तम ! इदानीं वारयितुं गमनमिति शेषः न शक्यते अतः गच्छ अतः सतां महात्मनां क्रमे मार्गे महात्माचरितप्रतिज्ञापालने वर्तस्व शीघ्रं विनिवर्तस्व च वनादिति शेषः ॥ २ ॥

गो० टी०–नेति । शीघ्रं विनिवर्तस्व चतुर्दशवर्षान्त इति शेषः । सतां क्रमे अभिधेचने ॥ २ ॥

---

१ वाक्येनेति गो. पाठः । २ तदेति रा. पाठः । ३ अपनीयेति गो. पाठः । ४ शक्यसे इति गो. पाठः ।

येभ्यः प्रणमसे पुत्र [1]देवेष्वायतनेषु च । ते च त्वामभिरक्षन्तु वने सह महर्षिभिः ॥ ४ ॥
यानि दत्तानि तेऽस्त्राणि विश्वामित्रेण धीमता । तानि त्वामभिरक्षन्तु गुणैः समुदितं सदा ॥ ५ ॥
पितृशुश्रूषया पुत्र मातृशुश्रूषया तथा । सत्येन च महाबाहो चिरं जीवाभिरक्षितः ॥ ६ ॥
समित्कुशपवित्राणि वेद्यश्चायतनानि च । स्थण्डिलानि चै विप्राणां शैला वृक्षाः क्षुपा ह्रदाः ॥
पतङ्गाः पन्नगाः सिंहास्त्वां रक्षन्तु नरोत्तम ॥ ॥ ७ ॥
स्वस्ति साध्याश्च विश्वे च मरुतश्च महर्षिभिः । स्वस्ति धाता विधाता च स्वस्ति पूषा भगोऽर्यमा ॥ ८ ॥
लोकपालाश्च ते सर्वे वासवप्रमुखास्तथा । ऋतवः षट् च ते सर्वे मासाः संवत्सराः क्षपाः ॥ ९ ॥
दिनानि च मुहूर्ताश्च स्वस्ति कुर्वन्तु ते सदा । श्रुतिः स्मृतिश्च धर्मश्च पातु त्वां पुत्र सर्वतः ॥ १० ॥
स्कन्दश्च भगवान्देवः सोमश्च सबृहस्पतिः । सप्तर्षयो नारदश्च ते त्वां रक्षन्तु सर्वतः ॥ ११ ॥
[2]ते चापि सर्वतः सिद्धा दिशश्च सदिगीश्वराः । स्तुता मया वने तस्मिन्पान्तु त्वां पुत्र नित्यशः ॥१२॥
शैलाः सर्वे समुद्राश्च राजा वरुण एव च । द्यौरन्तरिक्षं पृथिवी वायुश्च सचराचरः ॥ १३ ॥

रा० टी०–यमिति । राघवशार्दूल रघुवंशिश्रेष्ठ ! अभिरक्षतु विघ्नान् विनाशयतु इत्यर्थः ॥ ३ ॥

गो० टी०–यमिति । पालयसि अप्रच्युतमनुतिष्ठसि धृत्या प्रीत्या नियमेन समग्रतया स वै प्रसिद्धो धर्मः राघवशार्दूल रघुकुलश्रेष्ठ ! अभिरक्षतु अभितो रक्षतु पुनर्धर्मपदप्रयोगात् स एव रक्षत्वित्युच्यते ॥ ३ ॥

४] ति० टी०–देवेष्वायतनेषु देवालयेषु । प्रणमसे च । चाद्रक्षितुमिच्छसि च । ते च देवाः चादृषयः ॥ ४ ॥

रा० टी०–येभ्य इति । हे पुत्र ! देवेषु कान्तिमत्सु आयतनेषु गृहेषु येभ्यः प्रणमसे ते देवाः महर्षिभिः सह सहितं त्वां वने अभिरक्षन्तु ' चैत्येषु ' इति भूषणपाठः । महर्षिभिः सह देवा अभिरक्षन्त्वित्यन्वयो वा ॥ ४ ॥

गो० टी०–येभ्य इति । चैत्येषु चतुष्पथेषु आयतनेषु देवतागृहेषु ते देवा इति सिद्धम् ॥ ४ ॥

५] ति० टी०–गुणैः सद्गुणैः ॥ ५ ॥

रा० टी०–यानीति । सदा नित्यं गुणैः सद्गुदितं प्रकाशितम् ॥ ५ ॥

गो० टी०–यानीति । सद्गुदितं श्रेष्ठम् ॥ ५ ॥ ६ ॥

६] ति० टी०–मातृशुश्रूषयेति । मातात्र कैकेयी ॥ ६ ॥

रा० टी०–पितृरिति । शुश्रूषया सेवया सत्येन चाभिरक्षितस्त्वं चिरं जीव पालय प्रजा इति शेषः । अन्तर्भावितण्यिर्थः ॥ ६ ॥

७] ति० टी०–समिदादिपदेन तदधिष्ठात्र्यो देवता उपलक्ष्यन्ते । क्षुपा ह्रस्वशाखास्तरवः शिफायुक्तवृक्षाः क्षुपा इत्यन्ये । ह्रदा इति जलाशयमात्रोपलक्षणम् । त्वां रक्षन्त्वित्यग्रिमेण संबन्धः । पतङ्गाः पक्षिणः ॥ ७ ॥

रा० टी०–समिदिति । समिदादयः तत्तदन्तर्यामिण इत्यर्थः । तत्र क्षुपाः ह्रस्वशाखावन्तो वृक्षविशेषाः ' ह्रस्वशाखाशिफः क्षुपः ' इत्यमरः पतङ्गाः पक्षिणः पन्नगाः सर्पाः त्वां रक्षन्तु । सार्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–समिदित्यादिसार्धश्लोक एकान्वयः । वन्याः समित्कुशादयः प्रमादकृतप्रत्यवायसहिष्णवः सन्तो वने चरन्तं भवन्तं रक्षन्त्विति वाक्यार्थः पवित्राणि दर्भग्रन्थयः वेद्यः अग्रिधिष्ण्यानि स्थण्डिलानि देवपूजास्थलानि तेषामलंकारभेदात् संस्थानभेदाच्च वैचित्र्यं वृक्षग्रहणं लतादेरप्युपलक्षणं क्षुपाः ह्रस्वशाखाशिफायुक्ताः वृक्षविशेषाः ' ह्रस्वशाखाशिफः क्षुपः ' इत्यमरः । वृक्षविशेषणं वा ह्रस्वशाखावृक्षेष्वेव प्रायशो देवताः संनिदधत इत्यैतिह्यात् । पतङ्गाः पक्षिणः ॥ ७ ॥

८–१३] ति० टी०–स्वस्ति इत्यस्य कुर्वन्त्वित्यग्रिमेण संबन्धः । धाता विराट् । विधाता सृष्टिविधायकः ॥ ८–१३ ॥

रा० टी०–स्वस्तीति । महर्षिभिः सह स्वस्ति कुर्वन्तु इति शेषः ॥ ८ ॥

रा०टी०–स्वस्तीति । धाता दक्षादिः विधाता ब्रह्मा करोतु कुर्वन्तु इति शेषः ॥ ९ ॥

रा० टी०–ऋतव इति । ऋतवो वसन्तादयः मासाः चैत्रादयः संवत्सराः प्रभवादयः क्षपाः रात्रयः मुहूर्ताः गिरिशादयः ॥ १० ॥

गो० टी०–स्वस्तीत्यादि । कुर्वन्त्वित्यनुषङ्गः स्वस्ति धातेत्यादौ करोत्वित्यध्याहारः साध्याः देवताविशेषाः विश्वे त्रिश्वेदेवाः मरुतः वायवः धातृविधातृशब्दौ देवताविशेषवाचकौ पूषादिशब्दाः द्वादशसंख्याकादित्यावान्तरभेदवाचकाः मुहूर्तः दिनस्य त्रिंशो भागः ॥ ८ ॥ ९ ॥

रा० टी०–धृतिरिति । धृतिर्धैर्यं स्मृतिः स्मरणं धर्मः

१ चैत्येष्विति गो. पाठः । २ विचित्राणीति गो. पाठः । ३ धृतिरिति गो. रा. पाठः ४ । ग्राः इति गो. पाठः । ५ नद्यः सर्वास्तथैव चेति गो. पाठः ।

नक्षत्राणि च सर्वाणि ग्रहाश्च सह दैवतैः । अहोरात्रे तथा संध्ये पान्तु त्वां वनमाश्रितम् ॥ १४ ॥
ऋतवश्चापि षट् चान्ये मासाः संवत्सरास्तथा । कलाश्च काष्ठाश्च तथा तव शर्म दिशन्तु ते ॥ १५ ॥
महावनेऽपि चरतो मुनिवेषस्य धीमतः । तथा देवाश्च दैत्याश्च भवन्तु सुखदाः सदा ॥ १६ ॥
राक्षसानां पिशाचानां रौद्राणां क्रूरकर्मणाम् । क्रव्यादानां च सर्वेषां मा भूत्पुत्रक ते भयम् ॥ १७ ॥
प्लवगा वृश्चिका दंशा मशकाश्चैव कानने । सरीसृपाश्च कीटाश्च मा भूवन्गहने तव ॥ १८ ॥
महाद्विपाश्च सिंहाश्च व्याघ्रा ऋक्षाश्च दंष्ट्रिणः । महिषाः शृङ्गिणो रौद्रा न ते द्रुह्यन्तु पुत्रक ॥ १९ ॥
नृमांसभोजना रौद्रा ये चान्ये सर्वजातियाः । मा च त्वां हिंसिषुः पुत्र मया संपूजितास्त्विह ॥ २० ॥
आगमास्ते शिवाः सन्तु सिध्यन्तु च पराक्रमाः । सर्वसंपत्तयो राम स्वस्तिमान्गच्छ पुत्रक ॥ २१ ॥

श्रुतिस्मृतिविहितः स्कन्दः कार्तिकेयः सोमः उमासहितः देवो महादेवः ॥ ११ ॥

गो० टी०–स्मृतिर्धृतिश्च धर्मश्च पातु त्वां पुत्र सर्वतः । स्मृतिः ध्यानं धृतिः ऐकाग्र्यं निष्पन्नयोग इतियावत् धर्मः श्रुतिस्मृत्युदितः यं पालयसीत्यत्र पितृवाक्यपरिपालनज एवोक्त इति न पुनरुक्तिः ॥ १० ॥

रा० टी०–सप्तर्षय इति । हे पुत्र ! मया स्तुताः सप्तर्ष्यादयः नित्यशः पान्तु । सार्धश्लोक एकान्वयी ॥ १२ ॥

गो० टी०–स्कन्द इति । स्कन्दः सनत्कुमारः तं स्कन्द इत्याचक्षत इति दहरविद्यायां तथाभिधानात् कुमारो वा ॥११॥

गो० टी०–याश्चापीति । सर्वतः सिद्धाः प्रसिद्धाः ॥१२॥

रा० टी०–शैला इति । शैलाः अद्रयः वनमाश्रितं त्वां पान्तु । अर्धचतुष्टयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–शैला इति । शैलाः कुलपर्वताः समुद्रसन्निधानात् शैला वृक्षा इत्यत्र क्षुद्रपर्वताः राजा कुबेरः ग्रहाः कुजादयः सहदेवताः तदभिमानिदेवतासहिताः अहोरात्रे तदभिमानिदेवते अतो न पुनरुक्तिः ॥ १३–१४ ॥

१३–१६] ति० टी०–नक्षत्राणि रेवत्यादिनक्षत्राधिष्ठात्र्यो देवताः ग्रहाः सूर्यादयः ग्रहदेवतास्तत्तदधिदेवताः । पुनरुक्तिरत्र पुत्रप्रेमपारवश्यान्न दोषाय । पाठान्तरेऽप्ययमेवार्थः ॥१४–१६॥

रा० टी०–ऋतव इति । षट् षट्संख्याका ऋतवः ऋत्वयवीभूताधिकमासे दिनाभिमानिदेवताः मासा अधिकचैत्रादिमासदेवताः संवत्सराः त्रयोदशमासात्मकवर्षाभिमानिदेवताः किंच अन्ये सौरत्वादिभेदेन पूर्वतो भिन्नाः ऋत्वादयः कलादयश्च महावने विचरतः तव शर्म कल्याणं दिशन्तु ददतु । सार्धश्लोक एकान्वयी ॥ १५ ॥ १६ ॥

गो० टी०–ऋतव इति । ऋतुमासादिशब्दास्तदधिदेवतापराः केचिदाहुः अस्मिन् प्रकरणे प्रायशः पुनरुक्तयः पुत्ररक्षणविषयप्रेमपारवश्यकृता इति शर्म सुखम् ' शर्मशातसुखानि च ' इत्यमरः ॥ १५ ॥

रा० टी०–त्वेति । आदित्याः देवताः दैत्याश्च तव सुखदा भवन्तु । अर्धं पृथक्–राक्षसानामिति । राक्षसादीनां भयं ते माभूत् । अर्धद्वयमेकान्वयि ॥ १७ ॥

गो० टी०–महावन इति । आदित्याः देवताः ॥ १६ ॥

१७] ति० टी०–सर्वक्रव्यादसंबन्धिभयं पुत्रक ! ते मा भूदित्यन्वयः ॥ १७ ॥

गो० टी०–राक्षसानामिति । राक्षसादिसंबन्धिभयम् संबन्धसामान्ये षष्ठी तेभ्यो भयमित्यर्थः ॥ १७ ॥

१८] ति० टी०–प्लवगा वानराः दंशा वनमक्षिकाः गहने तव मा भूवन्मा सन्तु ॥ १८ ॥

रा० टी०–प्लवगा इति । गहने निबिडे कानने वने प्लवगा प्लवेन उत्प्लुत्यागच्छन्ति ते मण्डूकजातिविशेषादय इत्यर्थः । वृश्चिकादयश्च तव समीपे मा भूवन् । सार्धश्लोक एकान्वयी ॥ १८ ॥ १९ ॥

गो० टी०–प्लवगा इति । प्लवगाः वानराः दंशाः वनमक्षिकाः 'दंशस्तु वनमक्षिका' इत्यमरः । सरीसृपाः गिरिसर्पाः गहने वने मा भूवन् हिंसका मा भूवन्नित्यर्थः ॥ १८ ॥

१९] ति० टी०–ऋक्षा भल्लूकाः । ते तुभ्यम् ॥ १९ ॥

रा० टी०–महिषा इति । महिषादयो न द्रुह्यन्तु । अर्धं पृथक्–नृमांसेति । अन्ये उक्तादिरिक्ताः सर्वजातयः क्रूरा इति शेषः मया संपूजिताः प्रार्थिताः ॥ २० ॥

गो० टी०–महाद्विपा इति । ऋक्षाः भल्लूकाः न ते द्रुह्यन्तु "कुधद्रुहे–" इत्यादिना चतुर्थी ॥ १९ ॥

२०] ति० टी०–सर्वजातियाः सर्वजातीयाः । 'सर्वजातयः' इति पाठे क्रूरजन्मत्व इति 'क्रूरत्वार्थः ॥ २० ॥

गो० टी०–नृमांसभोजना इति । सत्त्वजातयः सत्त्वस्य जातिर्जन्म येषु ते सत्त्वजातयः क्रूरजन्मत्व इत्यर्थः ॥ २० ॥

२१] ति० टी०–आगमा मार्गाः ते झटिति त्वदागमनयोग्या भवन्त्वित्यभिप्रायेणैवमुक्तिः । सर्वसंपत्तयो वनवासापेक्षिताः फलमूलादिरूपाः सन्त्विति शेषः ॥ २१ ॥

रा० टी०–आगमा इति । आगमाः आगमनाद्यनुकूलव्यापाराः शिवाः मङ्गलविशिष्टा विजयपूर्वका इत्यर्थः सन्तु पराक्रमाः सिध्यन्तु सफला भवन्तु ॥ २१ ॥

---

१ देवता इति गो. पाठः । २ चैव षट् पुण्या इति गो. पाठः । ३ तवादित्याश्चेति गो. रा. पाठः । ४ सत्त्वजातय इति गो. सर्वजातय इति रा. पाठः । ५ संपत्तये इति गो. पाठः

स्वस्ति तेऽस्त्वान्तरिक्षेभ्यः पार्थिवेभ्यः पुनः पुनः। सर्वेभ्यश्चैव देवेभ्यो ये च ते परिपन्थिनः ॥ २२ ॥
शुक्रः सोमश्च सूर्यश्च धनदोऽथ यमस्तथा। पान्तु त्वामर्चिता राम दण्डकारण्यवासिनम् ॥ २३ ॥
अग्निर्वायुस्तथा धूमो मन्त्राश्चर्षिमुखच्युताः। उपस्पर्शनकाले तु पान्तु त्वां रघुनन्दन ॥ २४ ॥
सर्वलोकप्रभुर्ब्रह्मा भूतकर्तृ तथर्षयः। ये च शेषाः सुरास्ते तु रक्षन्तु वनवासिनम् ॥ २५ ॥
इति माल्यैः सुरगणान्गन्धैश्चापि यशस्विनी। स्तुतिभिश्चानुरूपाभिरानर्चायतलोचना ॥ २६ ॥
ज्वलनं समुपादाय ब्राह्मणेन महात्मना। हावयामास विधिना राममङ्गलकारणात् ॥ २७ ॥
घृतं श्वेतानि माल्यानि समिधश्चैव सर्षपान्। उपसंपादयामास कौसल्या परमाङ्गना ॥ २८ ॥
उपाध्यायः स विधिना हुत्वा शान्तिमनामयम्। हुतहव्यावशेषेण बाह्यं बलिमकल्पयत् ॥ २९ ॥
मधुदध्यक्षतघृतैः स्वस्तिवाच्यं द्विजांस्ततः। वाचयामास रामस्य वने स्वस्त्ययनक्रियाम् ॥ ३० ॥
ततस्तस्मै द्विजेन्द्राय राममाता यशस्विनी। दक्षिणां प्रददौ काम्यां राघवं चेदमब्रवीत् ॥ ३१ ॥

रा० टी०–सर्वसंपत्तय इति। सर्वसंपत्तयः अपेक्षितसामग्र्यः प्राप्नुवन्तु इति शेषः अन्तरिक्षादिभ्यः ये ते परिपन्थिनः शत्रवस्तेभ्यश्च स्वस्ति अस्तु। सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०–आगमा इति। आगम्यन्त इति आगमाः मार्गाः सर्वसंपत्तये वन्यफलमूलादिसंपत्तये ॥ २१ ॥

२२–२३] ति०टी०–पार्थिवेभ्यः पृथिवीभवसत्त्वेभ्यः। देवेभ्यो ये च ते परिपन्थिनस्तेभ्यश्च स्वस्त्यस्त्विति योजना २२॥२३

गो० टी०–स्वस्तीति। अन्तरिक्षेभ्यः अन्तरिक्षचारिभ्यः पार्थिवेभ्यः पृथिवीवर्तिभ्यः एकाशात् परिपन्थिन शत्रवः ॥ २२ ॥

रा०टी०–शुक्र इति। शुक्रादयः पान्तु अर्धद्वयमेकान्वयि २३

गो० टी०–गुरुरित्यादि। पृथक् पृथक् मिलिताश्च रक्षन्त्वित्यर्थः इति न पुनरुक्तिः ॥ २३ ॥

२४] ति० टी०–ऋषिमुखाच्युता निर्गताः। त्वया गृहीताश्चेति शेषः ॥ २४ ॥

रा० टी०–अग्निरिति। उपस्पर्शनकाले अस्पृश्यस्पर्शन समये अग्न्यादयः ऋषिमुखाच्युताः महात्मोपदिष्टाः मन्त्राश्च त्वां पान्तु ॥ २४ ॥

गो० टी०–अग्निरिति। ऋषिमुखाच्युताः निर्गताः त्वया गृहीताश्चेति शेषः ॥ २४ ॥

२५–२७] ति० टी०–भूतकर्तृ ब्रह्म। जगत्कारणं ब्रह्मेत्यर्थः ॥ २५–२७ ॥

रा० टी०–सर्वेति। ब्रह्मा साकेतलोकस्थः अतः पूर्वोक्तविधातेत्यनेन न पौनरुक्त्यं शिष्यते इति शेषाः नित्या इत्यर्थः इतराः साकेतलोकस्था इत्यर्थः ॥ २५ ॥

गो० टी०–सर्वलोकप्रभुरिति। भूतभर्ता नारायणः ॥२५॥

रा० टी०–इतीति। अनुरूपाभिः स्वयोग्याभिः ॥ २६ ॥

गो० टी०–इतीति। इतीत्यत्र मत्वेति शेषः ॥ २६ ॥ २७॥

रा० टी०–ज्वलनमिति। ज्वलनमग्निं समुपादाय ग्राहयित्वा मङ्गलकारणान्मङ्गलहेतोः ब्राह्मणेन हावयामास ॥ २७॥

२८] ति० टी०–उपसंपादयामास। होमायेति शेषः॥२८॥

रा० टी०–हावनप्रकारमाह–घृतमिति। घृतादीन्युपसंपादयामास ब्राह्मणसमीपं प्रापयामास ॥ २८ ॥

गो० टी०–घृतमिति। उपसंपादयामास होमायेति शेषः ॥ २८ ॥

२९] ति० टी०–अनामयमारोग्यम् उद्दिश्येति शेषः। बाह्यं बलिं होमस्थानाद्बहिर्भूतं लोकपालादिबलिम् ॥ २९ ॥

रा० टी०–उपाध्याय इति। शान्तिमभिभवकारकविग्रहराहित्यमनामयं रोगराहित्यं च उद्दिश्येति शेषः हुत्वा बाह्यं होमस्थानाद्बहिर्भागयोग्यं बलिं विहितलोकपालादिपूजामकल्पयत् ॥ २९ ॥

गो० टी०–उपाध्याय इति। शान्तिं सर्वोपद्रवशान्तिम् अनामयम् आरोग्यं च उद्दिश्येति शेषः। हुतहव्यावशेषेण हुतहविःशेषेण बाह्यं होमस्थानाद्बहिर्भवम् ॥ २९ ॥

३०] ति० टी०–स्वस्तिवाच्यं स्वस्तिवाचनमुद्दिश्य मध्वादिभिरुपलक्षितान्द्विजान्कृत्वा रामस्य वने स्वस्त्यस्त्वित्येवंरूपां वने स्वस्त्ययनक्रियां वाचयामासेत्यन्वयः ॥ ३० ॥

रा० टी०–मध्विति। मध्वादिभिः सहितान्स्वस्तिवाच्यद्विजान् स्वस्तिवचनार्हब्राह्मणान् वने स्वस्त्ययनक्रियां वनविषयस्वस्तिबोधकवाक्यमित्यर्थः। वाचयामास "जल्पतिप्रभृतीनाम्" इति कर्मत्वम् ॥ ३० ॥

गो० टी०–मध्विति। मध्वादिद्रव्यदक्षिणाभिर्दत्ताभिः द्विजान् स्वस्तिवाच्य पुण्याहं वाचयित्वेत्यर्थः स्वस्त्ययनक्रियाः स्वस्त्ययनक्रियाप्रतिपादकमन्त्रानित्यर्थः ॥ ३० ॥

३१] ति० टी०–काम्यामिच्छाविषयाम् ॥ ३१ ॥

१ गुरुरिति गो. पाठः। २ मुखाच्युता इति गो. पाठः। ३ भूतभर्तेति ३ कृत्व कर्तेति रा. पाठः। ४ अनुकूलाभिरिति गो. पाठः। ५ वाच्येति गो. रा. पाठः। ६ क्रिया इति गो. पाठः।

यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते । वृत्रनाशे समभवत्तत्ते भवतु मङ्गलम् ॥ ३२ ॥
यन्मङ्गलं सुपर्णस्य विनताकल्पयत्पुरा । अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥ ३३ ॥
अमृतोत्पादने दैत्यान्व्रतो वज्रधरस्य यत् । अदितिर्मङ्गलं प्रादात्तत्ते भवतु मङ्गलम् ॥ ३४ ॥
[1]त्रिविक्रमान्प्रक्रमतो विष्णोरतुलतेजसः । यदासीन्मङ्गलं राम तत्ते भवतु मङ्गलम् ॥ ३५ ॥
[2]ऋषयः सागरा द्वीपा वेदा लोका दिशश्च तौः । मङ्गलानि महाबाहो दिशन्तु शुभमङ्गलम् ॥ ३६ ॥
इति पुत्रस्य शेषांश्च कृत्वा शिरसि भामिनी । गन्धैश्चापि समालभ्य राममायतलोचना ॥ ३७ ॥
औषधीं चैं सुसिद्धार्थां विशल्यकरणीं शुभाम् । चकार रक्षां कौसल्या मन्त्रैरभिजजाप च ॥ ३८ ॥
उवाचापि प्रहृष्टेव सा दुःखवशवर्तिनी । वाङ्मात्रेण न भावेन वाचा संसज्जमानया ॥ ३९ ॥
आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी । अवदत्पुत्रमिष्टार्थो गच्छ राम यथासुखम् ॥ ४० ॥

रा० टी०–तत इति । तस्मै हवनकर्त्रे काम्यां तदीप्सितां दक्षिणां प्रददौ राघवं राममब्रवीच्च ॥ ३१ ॥

गो० टी०–तत इति । काम्यामभीष्टाम् ॥ ३१ ॥

३२] ति० टी०–वृत्रनाशे तदूपनिमित्ते ॥ ३२ ॥

रा० टी०–तद्वचनमेवाह–यदिति । यथादृशं मङ्गलं विजय इत्यर्थः वृत्रनाशे वृत्रासुरवधसमये सर्वदेवनमस्कृते सहस्राक्षे इन्द्रे समभवत्तत्तादृशं मङ्गलं ते भवतु ॥ ३२ ॥

गो० टी०–यन्मङ्गलमिति । वृत्रनाशे वृत्रनाशनिमित्ते ॥ ३२–३४ ॥

३३–३४] ति० टी०–प्रार्थयानस्य आर्षत्वान्मुगभावः । अनेन भावि महद्युद्धं तत्र जयश्च सूचितः ॥ ३३ ॥ ३४ ॥

रा० टी०–यदिति । सुपर्णस्य गरुडस्य विनता गरुडमाता प्रार्थयानस्य प्रार्थयमानस्य आगमशास्त्रस्यानित्यत्वान्मुगभावः ॥ ३३ ॥

रा० टी०–अमृतेति । अमृतस्य उत्पादनमुत्पत्तिर्यस्मिन्समये तस्मिन्समये वज्रधरस्य इन्द्रस्य यन्मङ्गलमदितिः प्रादात्तन्मङ्गलं ते भवतु ॥ ३४ ॥

३५] ति० टी०–विक्रमः पादविक्षेपः ॥ ३५ ॥

रा० टी०–त्रीति । त्रिविक्रमान्वारत्रयपादविक्षेपान्प्रक्रमतः कुर्वतः तन्मङ्गलं ते भवतु ॥ ३५ ॥

गो० टी०–त्रीनिति । विक्रमान् पादविक्षेपान् ॥ ३५ ॥

३६] ति० टी०–शुभमङ्गलं मङ्गलानामपि मङ्गलम्॥३६॥

रा० टी०–ऋषय इति । ऋष्यादयः दिशन्तु ददतु ॥३६॥

गो० टी०–ऋतव इति । शुभमङ्गलाः मङ्गलानामपि मङ्गलाः मङ्गलद्रव्याणामप्यतिशयदायका इत्यर्थः ॥ ३६ ॥

३७] ति० टी०–इति उक्त्वेति शेषः । पुत्रस्य शिरसि शेषा अक्षताः शेषा इत्यक्षतनामेति कतकः । समालम्भो विलेपनम् ॥ ३७ ॥

३८] ति० टी०–सिद्धार्थां दृष्टवीर्यां विशल्यकरणीमित्यन्वर्थनामिकामौषधीं गुलकीकृत्य शुभां रक्षां चकार रक्षाहेतुत्वेन हस्ते बबन्धेत्यर्थः तां मन्त्रैरातेशयितां कर्तुं जजाप च ॥ ३८ ॥

रा० टी०–इतीति । दुःखवशवर्तिनी वियोगजनितदुःखाक्रान्तापि वाचा प्रहृष्टा वचनज्ञाप्यप्रहृष्टात्वविशिष्टैव कौशल्या इति अनेन प्रकारेणैव शेषानक्षतान्पुत्रस्य शिरसि शिरएकदेशे मस्तके इत्यर्थः कृत्वा अलंतैरलंकृत्येत्यर्थः गन्धैः अनेकविधचन्दनैः रामं समालभ्य विलिप्य सुसिद्धार्थां सुसिद्धः परीक्षितः अर्थो यस्याः तां रिपुबाणभेदनकर्त्रीमित्यन्वर्थसंज्ञावतीमित्यर्थः विशल्यकरणीमौषधिं रक्षामुद्दिश्य मन्त्रैः चकार हस्ते बबन्धेत्यर्थः अत एव जजाप मनसि उच्चारयामास मन्त्रानिति शेषः । इव उत्प्रेक्षार्थौ । शेषा इत्यक्षतनामेति भट्टोदाहृतकतकः । अर्धपञ्चकमेकान्वयि ॥ ३७–३९ ॥

गो० टी०–इतीति । शेषान् अक्षतानि गन्धैश्च समालभ्य विलिप्य ' समालम्भो विलेपनम् ' इत्यमरः । सिद्धार्थां दृष्टफलां विशल्यकरणीं च अन्तर्गतशल्यनिर्गमनकारिणीं च ओषधीं मूलिकां मन्त्रैरभिमन्त्र्य रक्षां चकार रक्षाहेतुत्वेन हस्ते बबन्धेत्यर्थः पुनर्जजाप च ॥ ३७ ॥ ३८ ॥

३९] ति० टी०–उवाचापि मन्त्रानिति शेषः । जपोत्तरं स्पष्टमपि मन्त्रानुच्चारयामासेत्यर्थः । एतच्च तन्मन्त्रार्थानुसंधानेन रामस्य हृत्प्रसादार्थम् । प्रहृष्टेवेति हर्षापारमार्थ्यद्योती इवशब्दः । तदेवाह–वाङ्मात्रेणेति । संसज्जमानयान्तरखेदगद्गदया ॥३९॥

रा० टी०–वागिति । संसज्जमानया अत्यासक्तिबोधिकया वाचोपलक्षिता कौशल्या पुत्रमानम्य आघ्राणादि कृत्वा च हे राम ! इष्टार्थः इष्टः अभीप्सितः अर्थः देवप्रयोजनं यस्य सः त्वं यथासुखं गच्छ इति भावेनातिप्रेम्णा वदद्वाङ्मात्रेण नावदथापि निषेधोऽर्थतः सिद्धस्तथापि स्पष्टप्रतिपत्त्यर्थमिदम् । सार्धश्लोक एकान्वयी ॥ ४० ॥

गो० टी०–उवाचेति । अतिप्रहृष्टेव दुःखवशवर्तिन्यपि पुत्रमुत्कोत्साहार्थमतिसंतुष्टेव भावयन्तीत्यर्थः । असंसज्जमानया स्खलन्त्येत्यर्थः ॥ ३९ ॥

४०] ति० टी०–आनम्येति उक्त्वात्पुत्रस्य यद्वा

१ त्रीमिति गो. पाठः । २ अमिमेति गो. पाठः । ३ गो. भूत ... ज्ञातगो. पाठः । ४ ते इति गो. पाठः । ५ मङ्गला इति गो. पाठः । ६ शेषांश्चेति गा. पाठः । ७ चापीति गो. पाठः । ८ सिद्धार्थां इति गो. पाठः ।

अरोगं सर्वसिद्धार्थमयोध्यां पुनरागतम् । पश्यामि त्वां सुखं वत्स संधितं[1] राजवर्त्मसु ॥ ४१ ॥
[प्रणष्टदुःखसंकल्पा हर्षविद्योतिताननना । द्रक्ष्यामि त्वां वनात्प्राप्तं पूर्णचन्द्रमिवोदितम् ॥
भद्रासनगतं राम वनवासादिहागतम् । द्रक्ष्यामि च पुनस्त्वां तु तीर्णवन्तं पितुर्वचः ॥]
मङ्गलैरुपसंपन्नो[2] वनवासादिहागतः[3] । वध्वाश्च मम नित्यं त्वं कामान्संवर्ध याहि भोः[4] ॥ ४२ ॥

मयार्चिता देवगणाः शिवादयो महर्षयो भूतगणाः[5] सुरोरगाः ।
अभिप्रयातस्य वनं चिराय ते हितानि काङ्क्षन्तु दिशश्च राघव ॥ ४३ ॥
अतीव चाश्रुप्रतिपूर्णलोचना समाप्य च स्वस्त्ययनं यथाविधि[6] ।
प्रदक्षिणं चापि चकार राघवं पुनः पुनश्चापि निरीक्ष्य[7] सस्वजे ॥ ४४ ॥
तयौ हि देव्या च कृतप्रदक्षिणो निपीड्य[8] मातुश्चरणौ पुनः पुनः ।
जगाम सीतानिलयं महायशाः स राघवः प्रज्वलितस्तया श्रिया ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

वाल्मीकेरपि वर्णनीयमर्यादाभावाद्वाचेत्युक्तावपि पुनरुक्तदोषाय ॥ ४० ॥

गो० टी०–केन प्रकारेणोवाचेत्यत्राह–आनम्येति । आनम्य आनमय्य सिद्धार्थः सिद्धप्रयोजनः गच्छेत्यत्रेतिकरणं द्रष्टव्यम् ॥ ४० ॥

४१] ति० टी०–संधितं राजवर्त्मसु प्राप्तराज्यमिति यावत् ॥ ४१ ॥

रा० टी०–अरोगमिति । हे वत्स ! अरोगं नित्यं रोगरहितं सर्वसिद्धार्थं प्राप्तसकलेप्सितमयोध्यामागतं प्राप्तं राजवर्त्मसु संधितमास्थावन्तं त्वां सुखं यथा स्यात्तथा पश्यामि । सार्धश्लोक एकान्वयी ॥ ४१ ॥

गो० टी०–अरोगमिति । सर्वसिद्धार्थं सिद्धसर्वप्रयोजनं पश्यामि द्रक्ष्यामि ॥ ४१ ॥

गो० टी०–प्रणष्टदुष्टसंकल्पेति । प्रणष्टदुःखसंकल्पासंकल्पः मानसं कर्म वने रामस्य किं भविष्यतीतिचिन्तात्मक इत्यर्थः ॥ ४२ ॥ ४३ ॥

४२-४३] ति० टी०–मङ्गलै राजोचितवस्त्राभरणैः वध्वाः सीतायाः संवर्ध संवर्धय । याहि भोः गच्छ भोः । भो इति निपात आमन्त्रणे ॥ ४२ ॥ ४३ ॥

रा० टी०–मङ्गलैरिति । उपसंपन्नः सम्यक् प्राप्तः त्वं याहि अत एव वनवासादिह अयोध्यायामागतः प्राप्तः त्वं मम वध्वाः कामान्संवर्ध अनुदात्तेत्त्वप्रयुक्तात्मनेपदस्यानित्यत्वात्परस्मैपदम् । अर्धद्वयमेकान्वयि ॥ ४२ ॥

रा० टी०–मयेति । हे राघव ! मया अर्चिताः पूजिताः देवगणाद्यः वनमभिप्रयातस्य ते हितानि काङ्क्षन्तु ॥ ४३ ॥

गो० टी०–मङ्गलैरिति । वध्वाः स्नुषायाः सीतायाः कामान् काम्यमानवस्त्राभरणादीनि ॥ ४४ ॥ ४५ ॥

४४] ति० टी०–मात्रा प्रदक्षिणकरणं रक्षार्थम् ॥ ४४ ॥

रा० टी०–अतीवेति । अश्रुप्रतिपूर्णलोचना सा कौशल्या स्वस्त्ययनं यथाविधि समाप्य राघवं रामं प्रदक्षिणं चकार पुनः पुनः निरीक्ष्य सस्वजे च मातृप्रदक्षिणकरणेन पुत्राभीष्टसिद्धिरिति धर्मशास्त्रे प्रसिद्धम् ॥ ४४ ॥

गो० टी०–तदा कौशल्योक्तस्य वाचामगोचरत्वादाह–इतीवेत्यादि । इतीव एवंविधमित्यर्थः प्रदक्षिणमनुकूलं रक्षामिति यावत् ॥ ४६ ॥

४५] ति० टी०–निपीड्य नमस्कृत्य । तया श्रिया मातृकृतमङ्गलजशोभया ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०–तयेति । देव्या कौशल्यया कृतप्रदक्षिणः स राघवो रामः मातृश्चरणौ पुनः पुनः निपीड्य तया मातृसेवाजनितया श्रिया शोभया प्रज्वलितः सन् सीतानिलयं जानकीगृहं जगाम ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

गो० टी०–तयेति । निपीड्य निपीडनपूर्वकमभिवाद्येत्यर्थः स्वया स्वतः सिद्धया ॥ ४७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

---

१ सुस्थितं राजवर्त्मनीति गो. पाठः । २ श्लोकावेतौ गो. अधिकौ । ३ महसुरेति गो. पाठः । ४ इतीति गो. पाठः । ५ चैवेति गो. पाठः । ६ निपीड्येति गो. पाठः । ७ तथा त्विति गो. पाठः । ८ स इति गो. पाठः ।

षड्त्रिंशः सर्गः ।

अश्रुताभिषेकविघाततो मोदमाना सीता देवताः समभ्यर्च्य यावद्रामागमनं प्रतीक्षते तावद्भताभिषेकत्वादुर्मनस्कं हतकान्ति लज्जावनतमुखं प्राप्तं रामं दृष्ट्वा कुतस्त्वामभिषेकसंभारैश्वर्यादि नोपतिष्ठते कुतश्चेदं दौर्मनस्यमिति सीतया पृष्टो रामो नाभिषेकः किंवा-चतुर्दशवत्सरं वनवासः सेव्य इति पित्राज्ञप्तोऽहं वनं प्रविशामि त्वं मे मातुः पितरं यथापूर्वं सेवस्व मासूयेथा भरतशत्रुघ्नौ भ्रातृपुत्रनि-र्विशेषं चोपावर्तस्वेति सीतां प्रायूयुजत् ।

अभिवाद्य तु कौसल्यां रामः संप्रस्थितो वनम् । कृतस्वस्त्ययनो मात्रा धर्मिष्ठे वर्त्मनि स्थितः ॥ १ ॥
विराजयन्राजसुतो राजमार्गं नरैर्वृतम् । हृदयान्याममन्थेव जनस्य गुणवत्तया ॥ २ ॥
वैदेही चापि तत्सर्वं न शुश्राव तपस्विनी । तदेव हृदि तस्याश्च यौवराज्याभिषेचनम् ॥ ३ ॥
देवकार्यं स्म सा कृत्वा कृतज्ञा हृष्टचेतना । अभिज्ञा राजधर्माणां राजपुत्री प्रतीक्षति ॥ ४ ॥
प्रविवेशाथ रामस्तु स्वैवेश्म सुविभूषितम् । प्रहृष्टजनसंपूर्णं ह्रिया किंचिदवाङ्मुखः ॥ ५ ॥
अथ सीता समुत्पत्य वेपमाना च तं पतिम् । अपश्यच्छोकसंतप्तं चिन्ताव्याकुलितेन्द्रियम् ॥ ६ ॥
तां दृष्ट्वा सै हि धर्मात्मा न शशाक मनोगतम् । तं शोकं राघवः सोढुं ततो विवृततां गतः ॥ ७ ॥

१] ति० टी०—धर्मिष्ठेऽतिशयेन धर्मवति ॥ १ ॥

रा० टी०—कौशल्यावृत्तमुक्त्वा रामवृत्तान्तं वर्णयन्नाह—अभिवाद्येत्यादिभिः । धर्मिष्ठे वर्त्मनि मार्गे स्थितः रामः कौशल्यामभिवाद्य प्रणम्य वनं संप्रस्थितः आसीदिति शेषः ॥१॥

गो० टी०—एवं मातरमनुमान्य सीतामनुमानयितुं निर्ग-च्छति—अभिवाद्येत्यादि । श्लोकद्वयमेकं वाक्यम् । वनं संप्रस्थितः वनं गन्तुं प्रवृत्तः धर्मिष्ठे अतिशयितधर्मे आममन्थेव विलोडयामासेत्यर्थः । गुणवत्तया पूर्वभाषी प्रियवादी चेत्यायुक्तगुणविशिष्टतया ॥ १ ॥ २ ॥

२] ति०टी०—आममन्थ क्षोभयति स्म । तत्र हेतुर्गुणवत्ता ॥२॥

रा० टी०—मार्गवृत्तान्तं वर्णयन्नाह—विराजयन्निति । राजसुतः नित्यराजसुतत्वाक्रान्तः रामः नरैः रामदर्शनाकाङ्क्षि-जनैः वृतं राजमार्गं विराजयन् प्रकाशयन् सन् गुणवत्तया समाधिकरहितगुणविशिष्टत्वेन हेतुना जनस्य हृदयानि आममन्थेव ॥ २ ॥

३] ति० टी०—तत्सर्वं वनगमनवृत्तान्तम् । तस्याश्च तस्यास्तु हृदि तदेव यौवराज्याभिषेचनं स्थितमभूदिति शेषः ॥ ३ ॥

रा० टी०—वैदेहीगृहगमनमुपक्रमन्नाह—वैदेहीति । तप-स्विनी सर्वविषयकनित्यज्ञानविशिष्टा वैदेही तत्सर्वं सद्वृत्तगमनं शुश्राव तद्वनगमनमेव तस्याः हृदि आसीदिति शेषः अत एव राज्याभिषेचनं हृदि नासीत् ॥ ३ ॥

गो० टी०—वैदेहीति । तत्सर्वमभिषेकविघातादिकं तप-स्विनी रामाभिषेकार्थव्रतोपवासादिनियमविशिष्टा यौवराज्याभि-षेचनम् वर्तत इति शेषः ॥ ३ ॥

४] ति० टी०—देवकार्यं देवपूजाम् । देवकार्यकरणे हेतुः कृतज्ञत्वं राजधर्माभिज्ञत्वं च । देवैरेवं राज्यप्रदानोपकृतत्वेन कृतज्ञतया तत्पूजा ॥ ४ ॥

रा० टी०—देवेति । कृतज्ञा देवादिप्रार्थनावेदित्री हृष्टचे-तना राजधर्माणामभिज्ञा तत्त्वज्ञात्री सा वैदेही देवकार्यं सूर्याया-राधनं कृत्वा राजपुत्रं प्रतीक्षते स्म ॥ ४ ॥

गो० टी०—देवकार्यमिति । देवकार्यं देवपूजाम् कृतज्ञा अभिषिक्तभर्तृविषये षट्महिषीभिः गन्धपुष्पादिना कृतपादार्च-नादिसमाचारज्ञेत्यर्थः हृष्टचेतना हृष्टमनस्का राजधर्माणाम-भिज्ञा अभिषिक्तराजासाधारणलक्षणानि श्वेतच्छत्रचामरपुर-स्कृतभद्रासनादीनि ज्ञातवती प्रतीक्षते स्म उक्तलक्षणविशिष्टो भर्ता कदा समागमिष्यतीत्यपेक्षया स्थितवतीत्यर्थः ॥ ४ ॥

५] ति० टी०—ह्रिया सीतायै कथमिदमन्याख्यं स्वमाता-पितृकृतं कथयामीति लज्जयावाङ्मुख इव ॥ ५ ॥

रा० टी०—प्रेति । सुविभूषितं प्रहृष्टजनसंपूर्णं प्राप्तानन्द-सखीजनविशिष्टं स्ववेश्म स्वकीयं गृहं किंचिद्ध्रिया पित्राद्याज्ञाप-नमन्तरा इमां कथं सह नेष्यामीति लज्जया अवाङ्मुखः न वाक् वचनं यस्मिन्तन्मुखं यस्य स रामः प्रविवेश ॥ ५ ॥

गो० टी०—प्रविवेशेति । ह्रिया गृहालंकारजनप्रहर्षजया५॥

६] ति० टी०—वेपमाना भर्तुर्विगतहर्षत्वावाङ्मुखत्वादि-दर्शनात्कम्पमाना ॥ ६ ॥

रा० टी०—अथेति । अथ रामकर्तृकवचनोच्चारणाभावहेतोः वेपमाना सीता समुत्पत्य सम्यगुत्थाय चिन्ताव्याकुलितेन्द्रियं चिन्तया इमां कथं सह नयामीति विचारेण व्याकुलितानि इन्द्रि-याणि यस्य तमत एव शोकसंतप्तमुक्तविचारहेतुकशोकाक्रान्तं प-तिमपश्यत् एतेन सीतावियोगासहिष्णुत्वं राघवस्य सूचितम्॥६॥

गो० टी०—अथेति । समुत्पत्य स्वासनादुत्थाय वेपमाना भर्तुर्विगतहर्षत्वावाङ्मुखत्वादिदर्शनात्कम्पमानेत्यर्थः ॥ ६ ॥

७] ति० टी०—सोढुं गूढं कर्तुम् । शोकमन्येषां प्राकृ-तानां शोकजनकं वस्तु शोकरूपकार्याजनकं कर्तुं न शशाक-ततस्तदनन्तरं स शोकस्तच्छोकजनकं वस्तु विवृततां प्रकटकार्य-त्वं गतः, यद्वा स रामो विवृताभिप्रायं गतः । शुद्धमुक्तस्व-

---

१ चेति गो. रा. पाठः । २ स्वयमिति गो. पाठः । ३ पुत्रं प्रतीक्षते इति गो. रा. पाठः । ४ स्वमिति गो. पाठः । ५ स इति गो. पाठः ।

विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् । आह दुःखाभिसंतप्ता किमिदानीमिदं प्रभो ॥ ८ ॥
अद्य बार्हस्पतः श्रीमान्युक्तः पुष्येण राघव । प्रोच्यते ब्राह्मणैः प्राज्ञैः केन त्वमसि दुर्मनाः ॥ ९ ॥
न ते शतशलाकेन जलफेननिभेन च । आवृतं वदनं वल्गुच्छत्रेणाभिविराजते ॥ १० ॥
व्यजनाभ्यां च मुख्याभ्यां शतपत्रनिभेक्षणम् । चन्द्रहंसप्रकाशाभ्यां वीज्यते न तवाननम् ॥ ११ ॥
वाग्मिनो वन्दिनश्चापि प्रहृष्टास्त्वां नरर्षभ । स्तुवन्तो नाद्य दृश्यन्ते मङ्गलैः सूतमागधाः ॥ १२ ॥
न ते क्षौद्रं च दधि च ब्राह्मणा वेदपारगाः । मूर्ध्नि मूर्धाभिषिक्तस्य ददति स्म विधानतः॥ १३ ॥
न त्वां प्रकृतयः सर्वाः श्रेणीमुख्याश्च भूषिताः । अनुव्रजितुमिच्छन्ति पौरजानपदास्तदा ॥ १४ ॥

भावोऽपि मायाख्यप्रकृत्यवतारसीतासांनिध्यादुद्भूढावक्षेपशक्तिरिव जात इत्यर्थः । अनेन हि नाव्येन प्रियाया अग्रे न किंचित्पुंसो गोप्यमिति लोकव्यवहारो दर्शितः ॥ ७ ॥

रा० टी०–तामिति । धर्मात्मा परमधर्मप्रवर्तको राघवो रामः तां सीतां दृष्ट्वा तं सीतानयनयुक्त्यभावमूलकसंभावितसीतावियोगजनितं शोकं सोढुं न शशाक ततस्तस्माद्धेतोः विवृततां प्रातीतिकवर्णविशेषविशिष्टत्वं गतः प्राप्तः आसीदिति शेषः ॥७॥

गो० टी०–तामिति । ततः सोढुमशक्तत्वादेव विवृततां व्यक्तदुःखताम् एतावत्पर्यन्तं शोकलेशहीनस्य रामस्येदानीं शोकाविर्भावः सीताया भाविदुःखस्मरणेनेति बोध्यम् ॥ ७ ॥

८] ति० टी०–प्रस्विन्नं प्राप्तदुःखजस्वेदम् अमर्षणं शोकधारणाक्षममिव । यत्तु सीताया दुःखेन कथमेष कालं नेष्यतीति धिया दुःखित इति विवर्णवदनत्वादिकमिति तदनुचितं, भगवति कथमपि दुःखासंबन्धात्तादृशधियोऽप्यभावाच्च । ' व्यसनेषु मनुष्याणां भृशं भवति दुःखितः' इत्यादावपि दुःखित इत्येवार्थ इति ममाभाति ॥ ८ ॥

रा० टी०–रामाभिप्रायविज्ञानहेतुकं सीताप्रभं वर्णयन्नाह–विवर्णेति । अमर्षणं वियोगदुःखासहिष्णुं तं रामं दृष्ट्वा दुःखाभिसंतप्ता चेष्टालक्षिततदुःखजनितदुःखेनाभिसंतप्ता सीता आह । तद्वचनमेवाह हे प्रभो ! इदानीमिदं वैवर्ण्यादिकं किं कथम् ॥ ८ ॥

गो० टी०–विवर्णवदनमिति । प्रस्विन्नं हस्तगतराज्यस्यान्यगामित्वं स्ववनप्रव्राजनं च कथमस्यै निवेदयिष्यामीति शोकेन प्रस्वेदः अमर्षणं संजातदुःखं नियन्तुमशक्तम् इदानीं हर्षकाले इदं दौस्थ्यम् ॥ ८ ॥

९] ति० टी०–बार्हस्पतो बृहस्पतिदेवताकः युक्तः चन्द्रेणेति शेषः । युक्तस्तेन पुष्येणाभिषेक इति ब्राह्मणैः प्रोच्यते इत्यन्वयः तज्जन्यसंतोषं विहाय दुर्मनाः केनासि ॥ ९ ॥

रा० टी०–अद्येति । हे राघव ! अयेदानीं बार्हस्पतः बृहस्पतिदेवताकः श्रीमान् कर्मारम्भकर्तॄणां सकलसद्बुद्धिप्रापकः अत एव युक्तः अभिषेकयोग्यः पुष्यः प्राज्ञैर्ब्राह्मणैः प्रोच्यते कथ्यते हर्षकालोऽयमिति तात्पर्यम् त्वं तु केन हेतुना दुर्मना असि ॥ ९ ॥

गो० टी०–अद्येति । बार्हस्पतः बृहस्पतिदैवत्यः उक्तः अभिषेकार्हत्वेन विहितः ' युक्तः ' इतिपाठे अभिषेकार्हः श्रीमान् कर्मारब्धवतां श्रीकरः पुष्यः पुष्यनक्षत्रम् अद्येतिब्राह्मणैः प्रोच्यते हु प्रोच्यते खल्वित्यर्थः । अन्विति छित्वा अनुप्रोच्यत इति वा संबन्धः ॥ ९ ॥

१०] ति० टी०–शतं शलाका यस्मिंश्छत्रे तेन छत्रेणावृत्तः सन्नभिविराजत इति योजना । वल्गु सुन्दरम् ॥ १० ॥

रा० टी०–नेति । शतशलाकेन शलाकाशतविशिष्टेन जलफेननिभेन जलवृत्तिफेनसदृशेन सादृश्यं च श्वेतत्वेन छत्रेण आवृतं वल्गु सुन्दरं वदनं न विराजते अत्र हेतुं वदेति तात्पर्यम् एवमुत्तरेष्वपि तात्पर्यं बोध्यम् ॥ १० ॥

गो० टी०–नेति । शतं शलाका यस्य तेन स्थलस्थत्वेन मालिन्यं व्यावर्तयितुं जलपदम् वल्गु सुन्दरम् आवृतं सन्न विराजत इति संबन्धः ॥ १० ॥

११-१२] ति० टी०–व्यजनाभ्यां वालव्यजनाभ्याम् । शतपत्रं पद्मं तत्सदृक्षमेक्षणम् ॥ ११ ॥ १२ ॥

रा०टी०–व्यजनाभ्यामिति । चन्द्रहंसप्रकाशाभ्यां मुख्याभ्यां च चक्रवर्तिमात्रवृत्तिभ्यां व्यजनाभ्यां चामराभ्यामित्यर्थः शतपत्रनिभे कमलसदृशे ईक्षणे नेत्रे यस्मिंस्तत्तवाननं न वीज्यते ११

गो० टी०–व्यजनाभ्यामिति । व्यजनाभ्यां वालव्यजनाभ्यां शतपत्रं पद्मम् ॥ ११ ॥

रा० टी०–वाग्मिन इति । वाग्मिनः चतुराः ॥ १२ ॥

गो० टी०–वाग्मिन इति । बन्दिनः स्तुतिपाठकाः । 'बन्दिनः स्तुतिपाठकाः' इत्यमरः मङ्गलैः मङ्गलवचनैः सूताः पुरावृत्तकथाशंसिनः मागधाः वंशशंसकाः ॥ १२ ॥

१३] ति० टी०–क्षौद्रं च दधि च तीर्थोदकमिश्रितमिति शेषः । मूर्धाभिषिक्तस्य शिरःस्नातस्य ॥ १३ ॥

रा० टी०–नेति । क्षौद्रं मधुमूर्धाभिषिक्तस्य कृतसशिरःस्नानस्य तव मूर्ध्नि विधानतो न ददति स्म ॥ १३ ॥

गो० टी०–नेति । क्षौद्रं मधु मूर्ध्नि न दधति स्म नाभिषिञ्चन्ति स्मेत्यर्थः ॥ १३ ॥

१४] ति० टी०–श्रेणीमुख्याः परिषन्मुख्याः, सर्वत्र तत्कृत इति शेषः ॥ १४ ॥

---

१ पुष्योऽन्विति गो. रा. पाठः । २ अपीति रा. पाठः । ३ नात्रेति गो.पाठः । ४ दधतीति गो. पाठः । ५ तयेति गो. रा.पाठः । ६ नेष्यतीति युक्तं भाति ।

चतुर्भिर्वेगसंपन्नैर्हयैः काञ्चनभूषणैः । मुख्यः पुष्परथो युक्तः किं न गच्छति तेऽग्रतः ॥ १५ ॥
न हस्ती चाग्रतः श्रीमान्सर्वलक्षणपूजितः । प्रयाणे लक्ष्यते वीर कृष्णमेघगिरिप्रभः ॥ १६ ॥
न च काञ्चनचित्रं ते पश्यामि प्रियदर्शन । भद्रासनं पुरस्कृत्य यान्तं वीर पुरःसरम् ॥ १७ ॥
अभिषेको यदा सज्जः किमिदानीमिदं तव । अपूर्वो मुखवर्णश्च न प्रहर्षश्च लक्ष्यते ॥ १८ ॥
इतीव विलपन्तीं तां प्रोवाच रघुनन्दनः । सीते तत्रभवांस्तातः प्रव्राजयति मां वनम् ॥ १९ ॥
कुले महति संभूते धर्मज्ञे धर्मचारिणि । शृणु जानकि येनेदं क्रमेणाद्यागतं मम ॥ २० ॥
राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन वै । कैकेय्यै मम मात्रे तु पुरा दत्तौ महावरौ ॥ २१ ॥
तयाद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते । प्रचोदितः स समयो धर्मेण प्रतिनिर्जितः ॥ २२ ॥

रा० टी०–न त्वामिति । श्रेणीमुख्याः परिषत्प्रधानाः पौरजानपदाः प्रकृतयः प्रजाः ॥ १४ ॥

गो० टी०–नेति । प्रकृतयः अमात्यादयः श्रेणीमुख्याः वीथीप्रधानाः ॥ १४ ॥

१५] ति० टी०–पुष्परथो लीलागमनप्रयोजनो रथः न तु युद्धार्ह इत्यर्थः । तादृग्रथो निर्जिगमिषो राज्ञोऽग्रे भवति तस्मिन्सत्यामिच्छायामारोहति नो चेदग्रतो गच्छति ॥ १५ ॥

रा० टी०–चतुर्भिरिति । वेगसंपन्नैः अतिवेगविशिष्टैः हयैर्युक्तः मुख्यः श्रेष्ठः पुष्परथः प्रचुरपुष्पभूषितरथविशेषः किं न गच्छति ॥ १५ ॥

गो० टी०–चतुर्भिरिति । पुष्परथः उत्सवाय कल्पितो रथ इत्यर्थः । 'असौ पुष्परथश्चक्रयानं न समराय यत्' इत्यमरः । स हि राज्ञामग्रतो नीयते केवलं संभ्रमाय ॥ १५ ॥

१६] ति० टी०–हस्ती कृष्णमेघप्रभो गिरिप्रभश्च ॥ १६ ॥

रा० टी०–नेति । सर्वलक्षणपूजितः सर्वसल्लक्षणसंपन्नः कृष्णमेघगिरिप्रभः कृष्णमेघकृष्णगिर्युभयसदृशः श्रीमान् सर्वसंपत्तिहेतुः हस्ती प्रयाणे न लक्ष्यते ॥ १६ ॥

गो० टी०–नेति । कृष्णमेघगिरिप्रभः कृष्णमेघयुक्तगिरिप्रभः उभयोरुपमानत्वे वैषम्यापत्तिः ॥ १६ ॥

१७] ति० टी०–भद्रासनं पुरस्कृत्य पूजायुक्तं यथा भवति तथा गृहीत्वा यान्तं ते पुरःसरमग्रगं सेवकं न पश्यामि ॥ १७ ॥

रा० टी०–नचेति । काञ्चनचित्रं स्वर्णमयचित्रविशिष्टं भद्रासनं कल्याणहेतुभूतासनविशेषं पुरस्कृत्य हस्ताग्रे धृत्वा यान्तं पुरस्सरं भृत्यविशेषं न पश्यामि ॥ १७ ॥

गो० टी०–न च काञ्चनचित्रमिति । वीरपुरस्कृतं भद्रासनं पुरस्कृत्य ते यातं गमनं न पश्यामीत्यन्वयः ॥ १७ ॥

१८] ति० टी०–यदाभिषेकः सज्ज इदानीं तस्मिन्नेवैतस्मिन्वर्तमानकाल उक्तराजचिह्नाभावो मुखवर्णश्चापूर्वः कदाप्यनद्भूतो हर्षकाले हर्षाभावश्चेतादृं किमित्यर्थः ॥ १८ ॥

रा० टी०–अभिषेक इति । तवाभिषेको यथा यथावदिदानीमसज्जः न सज्जते प्रसङ्गं न प्राप्नोतीत्यर्थः । इदं यथावत्प्रसङ्गाप्रापणं किं किमर्थमित्यर्थः ॥ १८ ॥

गो० टी०–अभिषेक इति । यथा अभिषेकः सज्जः सन्नद्धः इदानीं तथैवेत्यर्थः तवापूर्वो मुखवर्णो दृश्यते प्रहर्षश्च न लक्ष्यते किमिदमिति संबन्धः ॥ १८ ॥

१९] ति० टी०–विलपन्तीं दुःखेन भाषमाणाम् । तत्रभवान्पूज्यः । तातो दशरथःअत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ॥१९॥

रा० टी०–इतीवेति । इतीव अनेन प्रकारेण विलपन्तीं विविधपृच्छन्तीं तां सीतां रघुनन्दनः प्रोवाच । तद्वचनमेवाह–हे सीते ! तत्रभवान् पूज्यस्तातः पिता मां वनं प्रव्राजयति । अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ इति हलायुधे स्पष्टम् ॥ १९ ॥

गो० टी०–इतीति । विलपन्तीं विविधं लपन्तीं तत्रभवान् पूज्यः 'तत्रभवानत्रभवानितिशब्दो वृद्धैः प्रयुज्यते पूज्ये' इति हलायुधः । प्रव्राजयतीत्यनन्तरमितीति शेषः ॥ १९ ॥

२०-२१] ति० टी०–उत्कटाप्रियश्रवणेन सीताया अत्यन्तमोहो मा भूदिति विविधगुणकीर्तनेन संबोधयति--कुले इत्यादि। येन क्रमेण हेतुनेदं प्रव्राजनमागतं तच्छृणु ॥ २० ॥ २१ ॥

रा० टी०–प्रव्राजनमेव सकारणमाह–कुले इत्यादिभिः । येन हेतुनः अद्य मम आगतमिहागमनं तत्क्रमेण शृणु । गतं तिरश्चीनमनुरुसारथेरितिवत् षष्ठी ॥ २० ॥

रा० टी०–राज्ञेति । महावरौ वरे महत्त्वं स्वनिवार्यत्वेन ॥ २१ ॥

गो० टी०–महतो प्रियस्य श्रवणे सीतायाः किं भविष्यतीति भयात् चित्तदार्ढ्यार्थं विविधगुणकीर्तनेन संबोधयति–कुल इत्यादि। इदं प्रव्राजनम् येन क्रमेण येन मार्गेण ॥ २० ॥ २१ ॥

२२] ति० टी०–नृपेणोद्यते प्रस्ताविते ममाभिषेके सज्जे सति तयाद्य स समयः प्राचीनो वरसंकेतः प्रचोदितः प्रवर्तितः । तेन प्रवर्तनेन राजा धर्मेण धर्ममार्गेण प्रतिनिर्जितः स्ववशः कृतः ॥ २२ ॥

रा० टी०–तयेति । नृपस्य उद्यतः उद्योगो यस्मिन् तस्मिन्नभिषेके सज्जे प्रसक्ते सति स समयः समयेन स्वाधितमवश्यं दास्यामीति शपथेन सहितः धर्मेण प्रतिनिर्जितः धर्मवशीभूतः अतिधर्मनिष्ठ इत्यर्थः मम पिता तया लब्धव-

१ भूषितैरिति गो. पाठः ।२ पुष्परथ इति गो. रा. पाठः । ३ त्वेति गो. पाठः । ४ यातमिति गो. पाठः । ५ कृतामिति गो. पाठः । ६ यथेति गो. रा. पाठः । ७ अभ्यागतमिति गो. पाठः ।

चतुर्दश हि वर्षाणि वस्तव्यं दण्डके मया । पित्रा मे भरतश्चापि यौवराज्ये नियोजितः ॥ २३ ॥
सोऽहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनम् । भरतस्य समीपे [1]ते नाहं कथ्यः कदाचन ॥ २४ ॥
ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम् । तस्मान्न ते गुणाः कथ्या भरतस्याग्रतो मम ॥ २५ ॥
[2]अहं ते नानुवक्तव्यो विशेषेण कदाचन । अनुकूलतया शक्यं समीपे तस्य वर्तितुम् ॥ २६ ॥
तस्मै दत्तं नृपतिना यौवराज्यं सनातनम् । स प्रसाद्यस्त्वया सीते नृपतिश्च विशेषतः ॥ २७ ॥
अहं चापि प्रतिज्ञां तां गुरोः समनुपालयन् । वनमद्यैव यास्यामि स्थिरीभव [3]मैनस्विनि ॥ २८ ॥
याते च मयि कल्याणि वनं मुनिनिषेवितम् । व्रतोपवासपरया भवितव्यं [4]त्वयानघे ॥ २९ ॥

रया केकय्या प्रचोदितः प्रार्थित इत्यर्थः । आसीदिति शेषः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः ॥ २२ ॥

गो० टी०–तयेति । अथ नृपोयते ममाभिषेक सज्जे सति प्रचोदितः पूर्वदत्तं वरद्वयं देहीति प्रकर्षेण प्रेरितः ससमयः त्वदपेक्षितं करिष्यामीति कृतशपथ इत्यर्थः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । धर्मेण प्रतिनिर्जितः कर्तृभूतधर्मेण स्वायत्तीकृत इत्यर्थः ॥ २२ ॥

२३] ति० टी०–अस्तु प्रकृते किं तत्राह–चतुर्दशेत्यादि । पित्रा वरनिर्जितापितृनियोगेनाद्यवरपालनरूपेण भरतश्च द्वितीयवरपालनरूपपितृनियोगेन यौवराज्ये नियोजितः मयेति शेषः । ज्येष्ठाज्ञां विना तस्य तल्लाभासंभवात् ॥ २३ ॥

रा० टी०–तत्प्रार्थनमेवाह–चतुर्दशेति । यौवराज्ये यौवराज्यसदृशे पालने इत्यर्थः ॥ २३ ॥

गो० टी०–ततः किमित्यत्राह–चतुर्दशेति । मया पितृचोदितेनेत्यर्थः ॥ २३ ॥

२४] ति० टी०–अथ सीताया गृहेऽवस्थितौ सुखजनकबुद्धिरुपदिश्यते–भरतस्येत्यादिना । न कत्थ्यो न श्लाघनीयः ॥ २४ ॥

रा० टी०–स इति । विजनं सज्जनसहितं वनं प्रस्थितः सः पित्राज्ञप्तोऽहं त्वां द्रष्टुमागतः तेन मत्प्रव्रजनेन हेतुना भरतस्य समीपे कदाचन समयेऽहं कथ्यः श्लाघनीयः मद्गुणवर्णनं कर्तव्यमित्यर्थः । तेन मद्वियोगजनितातिदुःखं भरतस्य न भविष्यतीति सूचितं तेन रामगुणानां सर्वतापशामकत्वं व्यञ्जितम् ॥ २४ ॥

गो० टी०–सीताहृदयं ज्ञातुं बुद्ध्युपदेशव्यपदेशेन प्रणयरोषमुत्पादयन्नाह–भरतस्येति । त्वया न कथ्यः न श्लाघनीयः त्वत्प्रणामागमनदशायामिति शेषः ॥ २४ ॥ २५ ॥

२५] ति० टी०–ते प्रसिद्धा मम गुणाः ॥ २५ ॥

रा० टी०–ननु प्राप्ताधिकारत्वाद्भरतोऽपि प्रशंसनीय इत्यत आह–ऋद्धीति । मम ऋद्धियुक्ताः मत्प्रसादप्राप्तैश्वर्याः पुरुषाः परस्तवं स्वकीयातिस्तुतिं न सहन्ते तस्माद्धेतोर्भरतस्य गुणाः अग्रतः भरतसमीपे न कत्थ्याः न श्लाघनीयाः ॥ २५ ॥

२६] ति० टी०–'अहं ते नानुवक्तव्यो विशेषेण कदाचन' इति प्राचीनः पाठः कतकेन दर्शितः । अहमस्मत्स्वरूपं ते त्वया विशेषेण विशिष्य कदाचन कदापि नानुवक्तव्यः सखीभिर्वार्ताप्रसङ्ग इति शेषः । भरतस्याग्रत इत्यनुकर्षः । तत्र हेतुः–अनुकूलतयेति । मत्स्वरूपवर्णनं च तस्य प्रतिकूलमिति भावः । 'नापि त्वं तेन भर्तव्या विशेषेण कदाचन' इत्याधुनिकपाठस्तु न तथा चमत्कारी विशेषेण न भर्तव्या किंतु बन्धुसाधारण्येनेत्यर्थेऽनुकूलतयेत्युत्तरार्धस्य तथोपयोगाभावात् ॥ २६ ॥

रा० टी०–अहमिति । तेन पूर्वोक्तहेतुना कदाचन भरतागमनसमये अहं विशेषेण सर्वविशिष्टत्वेन रूपेण अनुवक्तव्यः कथनीयः तस्य प्रतिकूलं नाचरणीयमित्याह–तस्य भरतस्य समीपे अनुकूलतया वर्तितुं शक्यं त्वयेति शेषः । 'अहं ते नानुवक्तव्यो विशेषेण कदाचन' इति प्राचीनः पाठः कतकेन दर्शित इति भट्टाः ॥ २६ ॥

गो० टी०–नेति । तेन भरतेन विशेषेण भर्तव्या बन्धुसाधारण्येन भरणीयेत्यर्थः अशनादिभरणं लक्ष्मणशत्रुघ्नार्याभ्यां विशेषेण न काङ्क्षणीयमिति भावः । अनुकूलतया स्वजनसाधारणतया शक्यं योग्यम् ॥ २६ ॥

२७–२८] ति० टी०–तदनुकूलाचरणं किमर्थमत आह–तस्मा इति । नृपतिना दशरथेन स त्वया विशेषतः प्रसाद्यः । चो हेतौ यतो नृपतिः ॥ २७ ॥ २८ ॥

रा० टी०–अनुकूलवर्तने हेतुं वदन्नाह–तस्मै इति । तस्मै भरताय यौवराज्यं यौवराज्यसदृशं सः यौवराज्यसदृशदाता २७॥

गो० टी०–तदनुकूलाचरणं किमर्थमित्यत आह–तस्मा इति । नृपतिना दशरथेन ॥ २७ ॥

रा० टी०–अहमिति । स्थिरीभव मद्वियोगहेतुकानवस्थितिं न प्राप्नुहीत्यर्थः ॥ २८ ॥

गो० टी०–अहमिति । गुरोः दशरथस्य स्थिरा भव मयि स्थिरानुरागा भवेत्यर्थः । तत्र हेतुः मनस्विनीति दृढमनस्केत्यर्थः ॥ २८ ॥ २९ ॥

२९] ति० टी०–याते गते ॥ २९ ॥

रा० टी०–यात इति । याते गते सति ॥ २९ ॥

---

१ त्विति गो. पाठः । २ नापि त्वं तेन भर्तव्येति गो. पाठः । ३ त्वस्येति गो. पाठः । ४ स्थिरेति गो. पाठः । ५ मनस्विनी इति गो. पाठः ।

कैल्यमुत्थाय देवानां कृत्वा पूजां यथाविधि । वन्दितव्यो दशरथः पिता मम जनेश्वरः ॥ ३० ॥
माता च मम कौसल्या वृद्धा संतापकर्शिता । धर्ममेवाग्रतः कृत्वा त्वत्तः संमानमर्हति ॥ ३१ ॥
वन्दितव्याश्च ते नित्यं याः शेषा मम मातरः । स्नेहप्रणयसंभोगैः समा हि मम मातरः ॥ ३२ ॥
भ्रातृपुत्रसमौ चापि द्रष्टव्यौ च विशेषतः । त्वया भरतशत्रुघ्नौ प्राणैः प्रियतरौ मम ॥ ३३ ॥
विप्रियं च न कर्तव्यं भरतस्य कदाचन । स हि राजा चं वैदेहि देशस्य च कुलस्य च ॥ ३४ ॥
आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः । राजानः संप्रसीदन्ति प्रकुप्यन्ति विपर्यये ॥ ३५ ॥
औरस्यानपि पुत्राहि त्यजन्त्यहितकारिणः । समर्थान्संप्रगृह्णन्ति जनानपि नराधिपाः ॥ ३६ ॥
सा त्वं वसेह कल्याणि राज्ञः समनुवर्तिनी । भरतस्य रता धर्मे सत्यव्रतपरायणा ॥ ३७ ॥
अहं गमिष्यामि महावनं प्रिये त्वया हि वस्तव्यमिहैव भामिनि ।
यथा व्यलीकं कुरुषे न कस्यचित्तथा त्वया कार्यमिदं वचो मम ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षड्विंशः सर्गः ॥ २६ ॥

३०] ति० टी०–कल्यमुषसि ॥ ३० ॥

रा० टी०–कल्यमिति। कल्यं प्रातः नरेश्वरो राजा ॥३०॥

गो० टी०–काल्यमिति। काल्यम् अहर्मुखे 'प्रत्यूषोऽहर्मुखं काल्यम्' इत्यमरः ॥ ३० ॥

३१] ति० टी०–त्वयि गते त्वन्मातुर्नमस्कारेण किं फलं सति तु त्वत्प्रातिकूल्याकरणे तत्फलमिति चेत्तत्राह–धर्ममेवाग्रतः कृत्वा धर्म एव तत्फलं मुख्यं बुद्धौ कृत्वा तत्संमानः कार्य इति भावः ॥ ३१ ॥

रा० टी०–मातेति। वृद्धा ज्ञानवयोभ्यामधिका संतापकर्शिता मद्वियोगहेतुकसंतापं प्राप्ता धर्ममेवाग्रतः कृत्वा अनुसृत्येत्यर्थः सन्मानं सत्कृतिम् ॥ ३१ ॥

गो० टी०–मातेति । धर्ममेवाग्रतः कृत्वा स्थितायाः इति शेषः ॥ ३१ ॥

३२] ति० टी०–स्नेहेन मातृत्वप्रयुक्तेन । प्रणयेन प्रकृष्टः स्नेहः प्रणयः । संभोगः सेवा अन्नपानादिविशेषप्रदानम् ॥ ३२॥

रा० टी०–वन्दितव्या इति। शेषाः कौशल्यातिरिक्ताः वन्दितव्याः । तत्र हेतुः मम स्नेहप्रणयसंभोगैः स्नेहः अतिप्रीतिः प्रणयोऽतिसौहार्दं भोगः पालनं तैः समाः कौशल्यासदृश्यः 'प्रणयः स्यात्परिचये याच्ञायां सौहृदेऽपि च। भोगे राजधने सौख्ये पालनाभ्यवहारयोः' इति वैजयन्ती ॥ ३२ ॥

गो० टी०–वन्दितव्या इति। स्नेहः प्रीतिः प्रणयः सौहृदम् 'प्रणयः स्यात्परिचये याच्ञायां सौहृदेऽपि च' इति वैजयन्ती। भोगः पालनम् 'भोगो राज्ये धने सौख्ये पालनाभ्यवहारयोः' इति वैजयन्ती । मयि स्नेहादित्रयमविशेषेण कुर्वन्ति अतस्तास्तुल्यतया वन्द्या इति भावः ॥ ३२ ॥

३२–३४] ति० टी०–भ्रात्रा पुत्रेण च समौ प्राणैः प्राणेभ्यः प्रियतरौ ॥ ३३ ॥ ३४ ॥

रा० टी०–भ्रात्रिति । मम प्राणैः प्रियतरौ भरतशत्रुघ्नौ भ्रातृपुत्रसमौ त्वया द्रष्टव्यौ ॥ ३३ ॥

गो० टी०–भ्रातृपुत्रसमाविति । भ्रातृपुत्रसमौ भ्रात्रा पुत्रेण च समौ प्राणैः प्राणेभ्यः ॥ ३३ ॥

रा० टी०–विप्रियमिति । विप्रियं विरुद्धं नैव कर्तव्यम् । तत्र हेतुः राजा च पालकत्वेन राजसदृशः । च इवार्थे ॥ ३४॥

गो० टी०–विप्रियमिति । राजत्वेऽप्यप्रभुत्वमनियन्तृत्वं कस्यचित्संभवतीति तद्व्यावृत्त्यर्थं प्रभुरित्युक्तम् । देशपतेरकुलपतित्वदर्शनाद्वाह–देशस्य च कुलस्य चेति ॥ ३४ ॥

३५] ति० टी०–विपर्यये शीलादिविपर्यये ॥ ३५ ॥

रा०टी०–जानकीसमीपवर्तिजनानिशिक्षयन्नाह–आराधिता इति। शीलेन तदनुकूलस्वाचरणेन आराधिताः स्वेप्सितधर्मपालकत्वसिद्धिं प्राप्ताः प्रयत्नैः तदपेक्षितसाधकव्यापारैः उपसेविताः तद्व्यापारजनितसुखं प्राप्ताः राजानः संप्रसीदन्ति ॥३५॥

गो० टी०–आराधिता इति । शीलेन अकुटिलतया प्रयत्नैः आलस्यत्यागादिभिः विपर्यये शीलाद्यभावे ॥ ३५ ॥

३६–३७] ति० टी०–जनान्प्राकृतान् संबन्धलेशहीनानिति यावत् ॥ ३६ ॥ ३७ ॥

रा० टी०–राजधर्ममाह–औरसानिति । अहितकारिणः पुत्रानपि त्यजन्ति जनान् संबन्धशून्यजन्तूनपि समर्थानुकूलकारिणः संप्रगृह्णन्ति स्वीकुर्वन्ति ॥ ३६ ॥

गो० टी०–औरसानिति । जनान् अबन्धून् ॥ ३६ ॥

रा० टी०–सेति। धर्मे प्रजापालने रता प्रीता भरतस्य समनुवर्तिनी अनुकूला त्वमिहायोध्यायां राज्ञो दशरथस्य समीपे वसे ॥ ३६ ॥

गो० टी०–सा त्वमिति । सत्यव्रतम् अमोघव्रतम् ॥३७॥

३८] ति० टी०–यथा कस्यचिन्मद्बन्धोर्न व्यलीकं व्य-

---

१ काल्यमिति गो. पाठः । २ नरेश्वर इति गो. रा. पाठः । ३ कर्शितेति रा. पाठः । ४ सन्मानमिति रा. पाठः । ५ ता इति रा. पाठः । ६ प्रभुश्चेवेति गो. पाठः । ७ औरसानिति गो. रा. पाठः ।

सप्तविंशः सर्गः ।

रामेण पित्रादिसेवार्थमनुशिष्टा सीता कृतप्रणयकोपापि तद्वचसो जनापहास्यत्वं प्रदर्श्य त्वन्निर्वासनेन सिद्धमेव मन्निर्वासनमपि चासोढस्ते मे वियोगोऽतो मां सहैव नयेति तं प्रार्थयामास ।

एवमुक्ता तु वैदेही प्रियार्हा प्रियवादिनी । प्रणयादेव संक्रुद्धा भर्तारमिदमब्रवीत् ॥ १ ॥
किमिदं भाषसे राम वाक्यं लघुतया ध्रुवम् । त्वया यदपहास्यं मे श्रुत्वा नरवरोत्तम ॥ २ ॥
वीराणां राजपुत्राणां शस्त्रास्त्रविदुषां नृप । अनर्हमयशस्यं च न श्रोतव्यं त्वयेरितम् ॥ ३ ॥
आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा । स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ॥ ४ ॥

लीकत्वमनृतत्वं न कुरुषे तथेदमपि मे वचः कार्यम् अनुष्ठेयमित्यर्थः । वचसोऽनृतत्वकरणं चानुष्ठाने भवति ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षड्विंशः सर्गः ॥ २६ ॥

रा० टी०—नन्वहं त्वया सहैव गमिष्यामीत्यत आह—अहमिति। हे प्रिये! अहं महावनं गमिष्यामि वने महत्त्वं त्वद्गमनायोग्यत्वेन अतस्त्वया इहैव वस्तव्यम् । इह वासे हेत्वन्तरमपीत्याह—यथा येन प्रकारेण व्यलीकमप्रियं कस्यचिन्मत्पित्रादेः न कुरुषे तथैव त्वया कार्यम् सदैवेति शेषः । इदं मम वचः उक्तिः एतेन त्वद्गमने मत्पित्रादीनां दुःखाधिक्यं भविष्यतीति सूचितं तेन त्वत्कर्तृकगमनमनुचितमिति सूचितम् ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षड्विंशः सर्गः ॥ २६ ॥

गो० टी०—अहमिति । व्यलीकम् अप्रियं कस्यचिदपि जनस्य यथा व्यलीकं न कुरुषे तथा त्वया वर्तितव्यम् इदं मम वचश्च कार्यम् अत्रैव स्थातव्यमिति मम वचश्च कार्यमिति यद्वा यथा कस्यचिदपि व्यलीकं न कुरुषे तथा इदमपि मम वचस्त्वया कार्यमित्यर्थः ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बरास्यानेऽयोध्याकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

१] ति० टी०—एवं रामेण गृहवासे नियुक्ता ममापि वनवास एव धर्मतो न्याय्यप्राप्त इति सीताह—एवमित्यादि। प्रणयात्स्नेहादेव संक्रुद्धा कथं मम पृथक्स्थितिमादिशतीत्यमर्षवती ॥१॥

रा० टी०—रामवचनश्रवणानन्तरकालिकं जानकीक्षुभितवर्णयितुमाह—एवमिति । प्रणयात्स्नेहादेव हेतो संक्रुद्धा जेहकारणफलकक्रोधवती वैदेही इदमब्रवीत् ॥ १ ॥

गो० टी०—एवं रामायणपुरुषेषु रामकर्तव्यं सामान्यधर्मादृष्टान्तं दर्शितम् अथ सीतानुष्ठेयं पातिव्रत्यधर्मं संक्षेपेणोपन्यस्यति-एवमुक्तेत्यादि । अप्रियवादिन्यपि प्रियार्हा प्रियभाषणार्हा तदुपरि प्रियवादिनी तथाप्येवमुक्ता अप्रियमुक्ता प्रणयादेव सौहृदादेव न तु वैरात् संक्रुद्धा ॥ १ ॥

२] ति० टी०—स एवामर्षो दर्श्यते—किमिति । लघुतया मयि क्षुद्रत्वाध्यवसायेनेदं किं भाषसे । किं च हे नरवरोत्तम! त्वया यदुक्तं तच्छ्रुत्वा मे ममापहास्यमतिशयितो हासो जायते ॥ २ ॥

रा० टी०—तद्वचनमेवाह—किमिति । हे नरवरोत्तम राम! यत् श्रुत्वा त्वया वक्ता सह मे अपहास्यमपहासास्पदं मे लघुतया विशिष्टं मल्लघुताफलकमित्यर्थः अत एव अध्रुवमनिश्चितं यद्वाक्यं तदिदं त्वं किं किमर्थं भाषसे एतेनैवं न वक्तव्यमिति सूचितम् ॥ २ ॥

गो० टी०—किमिति । हे राम! त्वया लघुतया ध्रुवं निश्चितम् अत्यन्तनिःसारमित्यर्थः । 'ध्रुवो भमेदे क्लीबं तु निश्चिते शाश्वते त्रिषु' इत्यमरः । लघुत्वमेवाह—यदिति । यद्वाक्यं श्रुत्वा मे त्रिया अपि अपहास्यं भवति तद्वाक्यं भाषसे किमिदम् अयमपूर्वप्रकारः इतः पूर्वं न दृष्टचरः नरवरात्मजेत्यनेनास्यासंभावितत्वमुच्यते त्वामिह स्थाप्य वनं गमिष्यामीत्येतद्वचनमेतावत्पर्यन्तमनुसृतायाः प्रणयधारायाः पन्थानं नारोहतीति भावः ॥ २ ॥

३] ति० टी०—यत्त्वयेरितं तद्वीराणामनर्हमयशस्यं च अतो न श्रोतव्यं श्रोतुमयोग्यम् ॥ ३ ॥

रा० टी०—वीराणामिति । त्वयेरितमिदानीं कथितं राजपुत्राणामनर्हमयोग्यमत एव अयशस्यं यशोनिवर्तकमित्यर्थः अत एव न श्रोतव्यम् ॥ ३ ॥

४] ति० टी०—कुत एवं तत्राह—आर्यपुत्रेत्यादि । पित्रादयः स्वानि पुण्यानि स्वस्य कर्मफलानि भुञ्जानाः स्वं स्वं भाग्यं स्वानुष्ठितं कर्मैवोपासत उपजीवन्ति न पुत्रायनुष्ठितम् । तत्र तेषां सहाधिकाराभावात् ॥ ४ ॥

रा० टी०—वचनस्यानार्हत्वं साधयन्ती आह—आर्येत्यादिभिः । हे आर्यपुत्र! पित्रादयः स्वानि पुण्यानि कर्मफलानि भुञ्जानाः सन्तः स्वं स्वं भाग्यं कर्म उपासते कुर्वते ॥ ४ ॥

गो० टी०—कथं मम वाक्यस्य परिहासास्पदत्वमित्यत्राह—आर्यपुत्रेति । भर्तारं प्रति भार्यायाः संबोधनमार्यपुत्रेति भर्तृसंबन्धि पित्रादयः स्वानि पुण्यानि स्वकृतपुण्यफलानि एतत् पापफलस्याप्युपलक्षणं भुञ्जानाः अनुभवन्तः स्वं स्वं स्वस्यैव फलप्रदं भाग्यं शुभाशुभं कर्म उपासते आचरन्ति 'भाग्यं कर्म शुभाशुभम्' इत्यमरः ॥ ३ ॥

---

१ वरात्मजेति गो० पाठः ।

भर्तुर्भाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ । अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि ॥ ५ ॥
न पिता नात्मजो वात्मा न माता न सखीजनः । इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥ ६ ॥
यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव । अग्रतस्ते गमिष्यामि मृद्नन्ती[1] कुशकण्टकान् ॥ ७ ॥
ईर्ष्यां[2] रोषं बहिष्कृत्य भुक्तशेषमिवोदकम् । नय मां वीर विस्रब्धः पापं मयि न विद्यते ॥ ८ ॥
प्रासादाग्रे विमानैर्वा वैहायसगतेन वा । सर्वावस्थागता भर्तुः पादच्छाया विशिष्यते ॥ ९ ॥

५] ति० टी०–एका नारी तु भर्त्रा सहाधिकाराद्भर्तुर्भाग्यं भर्त्रनुष्ठितं कर्मफलं प्राप्नोति अतस्तव वनवासादेशेनैव त्वत्पितृभ्यां सर्वकर्मणि सहाधिकारादहमपि वने वस्तव्यमित्यादिष्टैव । तथैव ममापि गुरुत्वात्स आदेशोऽवश्यं नेय एवेति भावः ॥ ५ ॥

रा० टी०–भर्तुरिति । हे पुरुषर्षभ ! एका केवलं नारी तु भर्तुः भाग्यं भर्तृकृतकर्मफलं प्राप्नोति भुङ्क्ते अतः भर्तृकृतकर्मफलभोक्तीत्वाद्धेतोः अहमपि आदिष्टा त्वत्कर्माज्ञापनेनैवाज्ञप्ता इति हेतोः मयापि वने वस्तव्यं मयेत्यध्याहृतम् । एतेन पित्राद्यनाज्ञप्तामिमां कथं नेष्यामीति संकोचस्त्वया न कार्य इति ध्वनितम् एतेन मयापि तदाज्ञा नोल्लङ्घनीयेति सूचितम् ॥५॥

गो० टी०–पूर्वोक्ताः सर्वे स्वकीयकर्मफलान्यनुभवन्ति भर्तुरर्धशरीरभूता भार्या भर्तृकृतभाग्यफलमेवानुभवतीत्याह–भर्तुरिति । भार्यैका भार्यैव तु भर्तुर्भाग्यं प्राप्नोति सहाधिकृतत्वात् यस्मादेवं तस्मादेवाहमपि वने वस्तव्यमित्यादिष्टैव त्वदादेष्टृभिः आवयोः सहधर्मचारित्वात्त्वदादेशेनैव ममाप्यादेशः सिद्ध इति भावः ॥ ४ ॥

६] ति० टी०–यदेवमतो न पित्रादिरिह लोके प्रेत्य परलोके च नारीणां गतिः, किंतु एकः पतिरेव सदा गतिः ॥ ६ ॥

रा० टी०–नेति । पित्रादिर्गतिर्न पतिरेव एको मुख्यो गतिः सर्वनाशाद्युद्देश्यविधेयान्यतरलिङ्गतेति पुंस्त्वम् । आत्मा स्वकीयमात्रयत्नः ॥ ६ ॥

गो० टी०–एवं भर्तृसमानभाग्यत्वं स्वगमनहेतुरुक्तः तदेकगतिकत्वमपि गमनहेतुरित्याह–नेति । प्रेत्य परलोक इत्यर्थः ॥ ६ ॥

७] ति० टी०–अतो–यदि त्वमिति । मृद्नन्ती कुशेत्यनेन पद्भ्यामेव गमिष्यामीति न च ते दुःखं दास्यामीति च ध्वनितम् ॥ ७ ॥

रा० टी०–यदीति । हे राघव ! यदि त्वमद्यैव दुर्गं वनं प्रस्थितः तदापि कुशादीन्मृद्नन्ती स्वपद्भ्यां मर्दयन्ती अहं ते अग्रतो गमिष्यामि एतेन गमने स्वविलम्बाभावः सूचितः ॥७॥

गो० टी०–फलितार्थमाह–यदीति । अग्रतो गमने हेतुमाह–मृद्नन्ती मर्दयन्ती मृदूकुर्वन्तीत्यर्थः कुशरूपकण्टकान्॥६॥

८] ति० टी०–स्त्रिया वनगमनसाहसं कथमित्यशङ्कान्तरीर्ष्या, तां स्ववाक्योल्लङ्घनेन रोषं च बहिष्कृत्य त्यक्त्वा विस्रब्धो निःशङ्को मां नय । तत्र हेतुगर्भविशेषणम्–वीरेति । स्ववीरत्वस्य लोके ख्यापनाय । अन्यथा कृतस्तत्ख्यातिरिति ध्वनित्र । त्यागप्रयोजकं पापं च मयि न विद्यते । ननु भुक्तभोगया त्वया वने किं प्रयोजनमत आह—भुक्तशेषमुदकमिव यथा दुष्प्रापपानीयकान्तारयायिना पीतशेषं कमण्डलुनिष्ठमुदकमवश्यं नेयमेव, तथाहमपि त्वया नेयैव । तरुणत्वादिति गूढहासोक्तिः ॥ ८ ॥

रा० टी०–अज्ञातस्वापराधं क्षमापयन्ती आह–ईर्ष्यामिति । भुक्तशेषमुच्छिष्टं जलमिव ईर्ष्यादिकं बहिष्कृत्य त्यक्त्वा विस्रब्धः मयि कृतविश्वासस्त्वं मां नय । ज्ञातापराधस्य तु न संभव इत्याह–मयि पापमपराधः ॥ ८ ॥

गो० टी०–ईर्ष्येति । परातिशयाक्षमा ईर्ष्या त्वदनुवर्तनेन चरितार्थैयं भविष्यतीत्येवंरूपा अत्रैव सुखमास्वेति मयोक्तापि स्वयमनुगमिष्यामीति ब्रूत इति रोषः तौ भुक्तशेषं शास्त्रनिषिद्धतयोक्तमुदकमिव बहिष्कृत्य निःशेषं निरस्य विस्रब्धः निःशङ्कः सन् मां नय वीरेत्यनेन स्त्रियमेकाकी कान्तारं कथं नयेयमिति शङ्का न कर्तव्येत्युक्तं पापं मयि न विद्यते भवद्वियोगे जीवनहेतुपापं विद्यत इत्यर्थः । पापान्तरस्यात्र प्रसक्त्यभावात् ॥ ७ ॥

९] ति० टी०–अतोऽपि मे वनगमनमेवोचितमित्याह–प्रासादाग्रे । स्थितापेक्षयेति शेषः । विमानैर्वा वैहायसगतेन वा आकाशगमनेन । उपलक्षितानिमाश्चष्टापेक्षयेति शेषः । सर्वावस्थागता भर्तुः । 'विष्णोरभक्तिकावस्था सर्वावस्थेति गीयते' इत्यभिधानात् । तां गतस्यात एव आ ईषद्भर्तुः । भर्तुरित्यन्तमेकं पदम् । अथवा पृथक्पदे । श्रुत्युक्तधर्मानुष्ठानरूपां तां गतापीति योजना । सकलभर्तृधर्मरहितस्यापि पत्युः पादच्छाया पादसेवनमेवेतरधर्मापेक्षया स्त्रिया विशिष्यतेऽधिकं भवति। श्रुतिस्मृत्योः सर्वपरित्यागेन भर्तृसेवाया एव स्त्रीणां नित्यत्वबोधनादिति भावः ॥ ९ ॥

रा० टी०–त्वया सह गमनमेव मम श्रेय इति बोधयन्ती आह–प्रासादेति । प्रासादाग्रैः उत्तमप्रासादस्थितिभ्यः विमानैः वैहायसगतेन आकाशगमनाच्च सर्वावस्थागता सर्वावस्थाश्च आगता विधिप्राप्ता भर्तुः पादच्छाया पादसेवनमित्यर्थः । विशिष्यते अतिश्रेष्ठेत्यर्थः । पूर्वोत्तरयोस्तृतीया पञ्चम्यर्थे ॥ ९ ॥

गो० टी०–प्रासादवासं विहाय किमर्थं वनवासं गच्छसीत्याह–प्रासादाग्रैरिति । पञ्चम्यर्थे तृतीया प्रासादाग्रैः सार्वभौमवासप्रासादाग्रेभ्यः विमानैर्वा स्वर्लोकादिस्थितविमानाग्रे

१ रामेति गो. पाठः । २ मृद्नती इति गो. पाठः । ३ ईर्ष्यारोषाविति गो. पाठः । ४ अग्रैरिति गो. रा. पाठः ।

अनुशिष्टास्मि मात्रा च पित्रा च विविधाश्रयम् । नास्मि संप्रति वक्तव्या वर्तितव्यं यथा मया ॥ १० ॥
अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् । नानामृगगणाकीर्णं शार्दूलगणसेवितम् ॥ ११ ॥
सुखं वने निवत्स्यामि यथैव भवने पितुः । अचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम् ॥ १२ ॥
शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी । सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु ॥ १३ ॥
त्वं हि कर्तुं वने शक्तो राम संपरिपालनम् । अन्यस्यापि जनस्येह किं पुनर्मम मानद ॥ १४ ॥
सोऽहं त्वया गमिष्यामि वनमद्य न संशयः । नाहं शक्या महाभाग निवर्तयितुमुद्यता ॥ १५ ॥
फलमूलाशना नित्यं भविष्यामि न संशयः । न ते दुःखं करिष्यामि निवसन्ती त्वया सदा ॥ १६ ॥
अग्रतस्ते गमिष्यामि भोक्ष्ये भुक्तवति त्वयि । इच्छामि परतः शैलान्पल्वलानि सरांसि च ॥ १७ ॥

भ्यो वा वैहायसगतेन अणिमाद्यष्टैश्वर्यसिद्धिसंपन्नोचितविहायः-संबन्धिगमनाद्वा सर्वावस्थागता दुरवस्थापन्नापीत्यर्थः । यद्वा सर्वावस्थाऽगता अनुगता स्थायिनी स्वरूपप्राप्तेति यावत् पादच्छाया पादसेवा विशिष्यते अतिरिच्यते ॥ ८ ॥

१०] ति० टी०–मद्रूपदेशोऽप्येवमेवेत्याह–अनुशिष्टेत्यादि । विविधाश्रयं नानाविधावस्थभर्तृनित्याश्रयमनुशिष्टास्मि अतो भर्तरि मया यथोपदिष्टं वर्तितव्यम्, तथा संप्रति नो वक्तव्यास्मि नोपदेष्टव्यास्मि ॥ १० ॥

रा० टी०–ननु त्वया इदं कथं ज्ञातमित्यत आह–अनुशिष्टेति । विविधाश्रयमनेकदृष्टान्तविशिष्टमनेकवारं वानुशिष्टा शिक्षितास्मि अतः संप्रति इदानीं न वक्तव्या पतिसेवाविषये उपदेष्टव्या भवतेति शेषः अतः यथा यथावद्वर्तितव्यम् तव सेवायामिति शेषः ॥ १० ॥

गो० टी०–उपदेशानुसारादपि मयानुगन्तव्यमित्याह–अनुशिष्टेति । यथा मया भर्तृविषये वर्तितव्यं तथा मात्रा पित्रा च विविधाश्रयं विविधप्रकारमनुशिष्टास्मि संप्रतीदानीं न वक्तव्यास्मि न शिक्षणीयास्मीति यावत् ॥ ९ ॥

११] ति० टी०–यदेवमतः–अहमिति । गमिष्यामि त्वद्गमनमन्विति शेषः ॥ ११ ॥

रा० टी०–अहमिति । पुरुषवर्जितं भृत्यादिरहितं यथा स्यात्तथा गमिष्यामि ॥ ११ ॥

गो० टी०–उपदेशफलमाह–अहमित्यादि । दुर्गत्वादिविशेषणविशिष्टमपीत्यर्थः ॥ १० ॥

१२] ति० टी०–त्रींल्लोकानचिन्तयन्ती त्रैलोक्यैश्वर्यमप्यगणयन्ती पतिव्रतं पत्या सहवासरूपं व्रतम् चिन्तयन्त्यपेक्षमाणा ॥ १२ ॥

रा० टी०–तत्र क्लेशशङ्कापि न कर्तव्येत्याह–सुखमिति । पितुर्भवने इव निवत्स्यामि त्रीन् लोकांस्तदाधिपत्यमित्यर्थः अचिन्तयन्ती अगणयन्ती पतिव्रतं पतिसेवारूपधर्मं चिन्तयन्ती ध्यायन्ती ॥ १२ ॥

गो० टी०–दुःखावहेयं प्रष्टतिरित्यत्राह–सुखमिति । त्रीन् लोकान् अचिन्तयन्ती त्रैलोक्यैश्वर्यमप्यगणयन्तीत्यर्थः पतिव्रतं पतिविषयं व्रतं पतिशुश्रूषणमित्यर्थः ॥ ११ ॥

१३] ति० टी०–ब्रह्मचारिणी तपश्चरणशीला नियता त्वदुपदिष्टनियमयुक्ता मधुगन्धिषु मकरन्दसुरभिषु ॥ १३ ॥

रा० टी०–शुश्रूषमाणेति । ब्रह्मचारिणी वेदविहितव्रतपरायणा रंस्ये विहरिष्ये मधुगन्धिषु पुष्परसगन्धविशिष्टेषु किंच क्षौद्रगन्धविशिष्टेषु 'मधु मद्यं मधु क्षौद्रं मधु पुष्परसं विदुः' इत्यनेकार्थः । एतेन वनगमनविषयकः उत्साहो व्यञ्जितः ॥ १३ ॥

गो० टी०–शुश्रूषमाणेति । नियता नियमयुक्ता ब्रह्मचारिणी नियतेन्द्रियेत्यर्थः । कामभोगवर्जिता वा रंस्ये अपूर्वदर्शनेन संतुष्टा भविष्यामीत्यर्थः । मधुगन्धिषु पुष्परसगन्धिषु 'मद्ये पुष्परसे मधु' इति वैजयन्ती ॥ १२ ॥ १३ ॥

१४] ति० टी०–अन्यस्यापि जनस्य जीवसमूहस्य ॥१४॥

रा० टी०–त्वमिति । अन्यस्य स्वनिरूपितस्त्रीत्वादिधर्मरहितस्य ॥ १४ ॥

१५] ति० टी०–न निवर्तयितुं शक्या न्यायप्राप्तानुगमनत्वात् त्वच्छक्तिरूपत्वादिति गूढोऽभिप्रायः । उद्यता वनं गन्तुमिति शेषः ॥ १५ ॥

रा० टी०–मद्गमननिष्टत्तिवार्ता न वक्तव्येति बोधयन्ती आह–सेति । उद्यता वनगमनोद्योगं कुर्वती अहं निवर्तयितुं न शक्या ॥ १५ ॥

गो० टी०–सहेति । उद्यता वनगमनोद्युक्ता ॥ १४ ॥

१६] ति० टी०–दुःखं न करिष्यामि विशिष्टान्नपानादीच्छयेति शेषः । त्वया सह शक्तिरूपत्वात्सदा वसन्ती दुःखमयकार्यापि यथा पूर्वं न कदापि दुःखं कृतवती एवमग्रेऽपि न करिष्यामीति भावः ॥ १६ ॥

रा० टी०–ननु त्वदुद्देश्यकभोजनाद्युद्योगेन मम श्रमः स्यादित्यत आह–फलेति । फलमूलाशना स्वार्जितफलमूलभोजना भविष्यामि अतः ते दुःखं श्रमजनितखेदं न करिष्यामि उत्पादयिष्यामि ॥ १६ ॥

गो० टी०–फलमूलाशनेति । दुःखम् अशनपानाभ्यर्थनरूपम् ॥ १५ ॥ १६ ॥

१७] ति० टी०–सरांसि चेत्यस्य द्रष्टुमित्यनेनान्वयः॥१७॥

रा० टी०–अग्रत इति । ते गमनविशिष्टस्य तव अग्रतः

---

१ वृकेति गो. पाठः । २ सहेति गो. पाठः । ३ सह त्वयेति गो. पाठः । ४ सरित इति गो. रा. पाठः । ५ वनानीति गो. पाठः ।

द्रष्टुं सर्वत्र निर्भीता त्वया नाथेन धीमता । हंसकारण्डवाकीर्णाः पद्मिनीः साधुपुष्पिताः ॥ १८ ॥
इच्छेयं सुखिनी द्रष्टुं त्वया वीरेण संगता । अभिषेकं करिष्यामि तासु नित्यमनुव्रता ॥ १९ ॥
सह त्वया विशालाक्ष रंस्ये परमनन्दिनी । एवं वर्षसहस्राणि शतं वापि त्वया सह ॥ २० ॥
व्यतिक्रमं न वेत्स्यामि स्वर्गोऽपि हि न मे मतः । स्वर्गेऽपि च विना वासो भविता यदि राघव ॥
त्वया विना नरव्याघ्र नाहं तदपि रोचये ॥ ॥ २१ ॥
अहं गमिष्यामि वनं सुदुर्गमं मृगायुतं वानरवारणैश्च ।
वने निवत्स्यामि यथा पितुर्गृहे तवैव पादावुपगृह्य संमता ॥ ॥ २२ ॥
अनन्यभावामनुरक्तचेतसं त्वया वियुक्तां मरणाय निश्चिताम् ।
नयस्व मां साधु कुरुष्व याचनां नातो मया ते गुरुता भविष्यति ॥ ॥ २३ ॥

अग्रे गमिष्यामि भुक्तवति कृतभोजने त्वयि सति भोक्ष्ये । अर्धं पृथक्—इच्छामीति । पल्वलानि अल्पसरांसि सरांसि महातडागांस्त्वया सह निर्भीताहं द्रष्टुमिच्छामि । अर्धद्वयमेकान्वयि ॥ १७ ॥

१८] ति० टी०—कारण्डवा जलकुक्कुटाः ॥ १८ ॥

१९] ति० टी०—अभिषेकं करिष्यामि । तासु पद्मिनीष्विति शेषः ॥ १९ ॥

रा० टी०—हंसेति । हंसाश्च कारण्डवा जलकुक्कुटाश्च तैराकीर्णा व्याप्ताः पद्मिनीः कमलिनीः त्वया सह द्रष्टुमिच्छेयं त्वा त्वामनुव्रताहमभिषेकं स्नानं करिष्यामि पद्मिनीयुक्तजलेष्विति शेषः । सार्धश्लोक एकान्वयी ॥ १८ ॥ १९ ॥

गो० टी०—हंसेति । कारण्डवाः जलकुक्कुटाः 'मद्गुः कारण्डवः प्लवः' इत्यमरः ॥ १७ ॥ १८ ॥

२०] ति० टी०—वर्षसहस्राणि शतं वा त्वया सह वसन्ती तेषां व्यतिक्रमं वनवासदुःखं न वेत्स्यामि, किंतु क्षणमिव तावन्तं कालं नेष्यामीति भावः ॥ २० ॥

रा० टी०—सहेति । हे विशालाक्ष ! एवमनेन प्रकारेण त्वया सह अहं रंस्ये एवमेतादृशरमणप्रकारेण व्यतिक्रमं व्यतीतं वर्षसहस्राणां शतमपि न वेत्स्यामि स्वर्गः सुखविशेषः एवमेतत्सुखसदृशः न मतोऽभिमतः । तत्र हेतुमाह—स्वर्ग इति । हे राघव ! अविना सर्वरक्षकेण त्वया विना स्वर्गेऽपि यदि वासो भविता तदा अहं न रोचये इच्छामि किंचित्सुखमिति शेषः । सार्धश्लोकद्वयमेकान्वयि । एवमिति स्थलत्रयान्वयी ॥ २० ॥२१॥

गो० टी०—एवमिति । व्यतिक्रमं व्यतिक्रान्तं वर्षसहस्राणां शतमपि न वेत्स्यामि क्षणमिव नेष्यामि किं पुनः चतुर्दश समा इति भावः । स्वर्गोऽपि नहि मे मतः त्वया विनेति शेषः ॥ १९ ॥

२१] ति० टी०—स्वर्गोऽपि न मे मतः । त्वया विनेति शेषः । तदेव विवृणोति—स्वर्गेऽपि चेति ॥ २१ ॥

गो० टी०—एतदेव विवृणोति—स्वर्गेऽपि चेति ॥ २० ॥

२२] ति० टी०—मृगैरायुतं मृगैरासमन्तायुतं युक्तम् वानरवारणैश्च युक्तमिति शेषः । संमता तवेति शेषः । त्वदाज्ञावर्तिनीति यावत् ॥ २२ ॥

रा० टी०—उपसंहरन्ती आह—अहमिति । मृगायुतं मृगैर्व्याप्तं वानरवारणैः वानराश्च वारणा हस्तिनश्च तैश्च युक्तमिति शेषः । सुदुर्गमं कातरगमनानर्हं वनं गमिष्यामि वने तस्मिन्कानने तव संमता त्वत्संमतिविषयीभूता अहं पितुर्गृहे इव निवत्स्यामि प्रथमार्धे अन्त्यपादे वर्णैकन्यूनता अपूर्वच्छन्दोद्योतना यद्यपि 'वारणैर्युतम्' इति भूषणटीकाङ्कितपुस्तकेषु दृश्यते तथापि तत्पाठस्य टीकास्पृष्टत्वादेवमुक्तम् 'उपगृह्य संयता' इति भूषणपाठः ॥ २२ ॥

गो० टी०—अहमिति । मृगैः आयुतम् आसमन्तायुक्तम् मृगैः अयुतं नामिश्रितं मिश्रितमित्यर्थः । युमिश्रणामिश्रणयोरिति धातुः । अत्रेदमवधेयं वने मारीचो मृगो भविष्यति तत्प्रसङ्गेनावयोर्वियोगः स्यात् तत्र को वा पुनर्घटकः कथं त्वं तु मया विना स्थातुं शक्तासीति चिन्तयन्तं रामं प्रति सीता सूचयति—वानरवारणैरित्यादि । तथाहि मृगो मारीचः वानरवारणैः वानरश्रेष्ठैः सुग्रीवादिभिः पुनर्वनग्रहणात् वनेऽपि अशोकवनेऽपि वत्स्यामि पुनस्तवैव पादावुपसंगृह्य संयता नियता भविष्यामीति ॥ २१ ॥

२३] ति० टी०—त्वया वियुक्तामित्यादि । त्वद्वियोगे मरणविषयनिश्चितमतिम् । याचनां मामिकां वनान्नगमनयाचनां साधु कुरुष्व चरितार्थां संपादय मया क्रियमाणादतोऽनुगमनात्ते गुरुता भारो न भविष्यति ॥ २३ ॥

रा० टी०—अनन्येति । अनन्यभावां त्वदतिरिक्तविषयकप्रीतिरहितामत एव अनुरक्तचेतसं त्वद्विषयकपरमानुरागयुक्तचित्तामत एव त्वया वियुक्तां त्वद्वियोगयुक्तां स्वव्यक्तिमालक्ष्येति शेषः । मरणाय निश्चितां मरणाय एतल्लोकत्यागाय निश्चितां मां नयस्व अतः मन्नयनात्ते गुरुता भारः अगुरुता लघुता वा न भविष्यति ॥ २३ ॥

१ त्वाहं नित्यमनुव्रतेति रा. पाठः । २ यतव्रतेति गो. पाठः । ३ सहस्राणामिति गो. रा. पाठः । ४ वाहमिति गो. पाठः । ५ ममेति गो. पाठः । ६ तमपीति गो. पाठः । ७ युतमिति गो. पाठः । ८ संयतेति गो. पाठः ।

तथा ब्रुवाणामपि धर्मवत्सलां न च स्म सीतां नृवरो निनीषति ।
उवाच चैनां बहु सन्निवर्तने वने निवासस्य च दुःखितां प्रति ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।

अतिकष्टप्रदत्वाद्दुःसहत्वं वनवासस्य प्रबोध्य रामः सीतां तस्मान्निवर्तयितुं प्रायतत ।

स एवं ब्रुवतीं सीतां धर्मज्ञां धर्मवत्सलः । न नेतुं कुरुते बुद्धिं वने दुःखानि चिन्तयन् ॥ १ ॥
सान्त्वयित्वा ततस्तां तु बाष्पदूषितलोचनाम् । निवर्तनार्थे धर्मात्मा वाक्यमेतदुवाच ह ॥ २ ॥
सीते महाकुलीनासि धर्मे च निरता सदा । इहाचरस्व धर्मं त्वं यथा मे मनसः सुखम् ॥ ३ ॥
सीते यथा त्वां वक्ष्यामि तथा कार्यं त्वयाबले । वने दोषा हि बहवो वसतस्तान्निबोध मे ॥ ४ ॥
सीते विमुच्यतामेषा वनवासकृता मतिः । बहुदोषं हि कान्तारं वनमित्यभिधीयते ॥ ५ ॥

गो० टी०—अनन्यभावामिति । अन्वयव्यतिरेकाभ्यां स्वानुरक्तेत्युच्यते अत एव त्वया वियुक्तां मरणाय निश्चितां त्वया वियुक्तत्वे मरणाय निश्चितामित्यर्थः । मां नयस्व परमार्थस्तु रावणगृहीतामपि त्वय्येवासक्तचित्ताम् अथ वेण्युद्ग्रथनेन मरणाय निश्चितां हनुमत्प्रेषणादिकमुखेन नयस्व याचनां देवकृतरावणवधाभ्यर्थनं साधु कुरुष्व मया कृतात् अतोऽनुगमनात्ते गुरुता भारः न भविष्यति क्लेशो न भविष्यतीत्यर्थः ॥ २२ ॥

२४] ति० टी०—तथा न्याययुक्तं न निनीषतिस्म न नेतुमैच्छत् । अत एवास्या निवर्तने निवर्तनरूपप्रयोजननिमित्तं वनवासस्य दुःखतां दुःखजनकतां प्रति सत्संभवद्बहुहेतुजातमुवाचेत्यर्थः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽयोध्याकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०—तथेति । तथा तेन प्रकारेण ब्रुवाणां सीतां धर्मवत्सलः धर्मयुक्तवात्सल्यविशिष्टः नृवरो रामः न निनीषति नेतुमिच्छति इति अ न तथापि एनां सन्निवर्तने वनगमनप्रवृत्तिनिवृत्यर्थं वने निवासस्य दुःखितां वनवाससंबन्धिदुःखं बहु यथा स्यात्तथा उवाच दुःखिशब्दाद्भावे तल् निषेधार्थकाकारलाभस्तु नृवरो निषीदतीत्यत्र त्यौकारात्परं प्रश्लेषात् ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणा-
वयोध्याकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो० टी०—तथेति । धर्मवत्सलः कान्ताक्लेशासहिष्णुः निनीषति नेतुमिच्छति बाह्वितिक्रियाविशेषणम् सान्निवर्तने सन्निवर्तनानिमित्तम् ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बरा-
ख्यानेऽयोध्याकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

१-२] ति० टी०—स इति । न नेतुं कुरुते बुद्धिं न नेतुं कुरुते इव ॥ १ ॥ २ ॥

रा० टी०—रामवचनमेव सप्रसङ्गं निरूपयन्नाह—स इति । धर्मवत्सलः स रामः वने दुःखानि चिन्तयन्विचारयन् सन् सीतां नेतुं बुद्धिं निश्चयं न कुरुते ॥ १ ॥

रा० टी०—सान्त्वयित्वेति । बाष्पदूषितलोचनामश्रुव्याप्तनेत्रां तां सीतां सान्त्वयित्वा निवर्तनार्थे निवृत्तिरूपप्रयोजनार्थमेतद्वाक्यमुवाच ॥ २ ॥

गो० टी०—वने निवासस्य च दुःखितामित्युक्तं विवृणोति—स एवमित्यादिना ॥ १ ॥ २ ॥

३] ति० टी०—महाकुलीनेत्यायुक्तिः स्ववाक्याङ्गीकारप्रयोजना । इहैव स्थित्वा यथा मे मम मनसः सुखं भवति तथा मदागमनमुद्दिश्य स्वधर्मं चर धर्ममेवाचर ॥ ३ ॥

रा० टी०—तद्वाक्यमेवाह—सीते इति । इह अयोध्यायामेव धर्मं मदाज्ञप्तमत्पित्रादिसेवनं कुरु यथा येन सेवनेन मे मनसः सुखं स्यादिति शेषः ॥ ३ ॥

गो० टी०—सीत इति । मा यथा मनसः सुखं मनसो यथा सुखं भवति तथा मा चरेत्यर्थः ॥ ३ ॥ ४ ॥

४] ति० टी०—हि यतो वने बहवो दोषाः क्लेशाः, अतो मदुक्तं कार्यमित्यन्वयः ॥ ४ ॥

रा० टी०—सीते यथेति । वने वसतः पुरुषस्य बहवो दोषाः सन्तीति शेषः तान्दोषान्मे मत्तः निबोध जानीहि अहं वच्मीत्यर्थः ॥ ४ ॥

५] ति० टी०—कान्तारं गहनत्वाद्दुष्प्रवेशं वनं बहुदोषमित्यभिधीयत इति योजना । सीते इति कलत्रनामग्रहणमपि दुःखाकुलचित्तत्वनाटनेन न दोषाय ॥ ५ ॥

रा० टी०—सीते विमुच्यतामिति । एषा मत्सन्निधौ बोधिता मतिः वनगमननिश्चयः विमुच्यताम् । तत्र हेतुः कान्तारं

१ वत्सलो इति गो. पाठः । २ धर्मज्ञो इति गो. पाठः । ३ पुन इति गो. पाठः । ४ पर्याकुलेक्षणामिति गो. पाठः । ५ मा यथेति गो. पाठः । ६ वदत इति गो. पाठः ।

हितबुद्ध्या खलु वचो मयैतदभिधीयते । सदा सुखं न जानामि दुःखमेव सदा वनम् ॥ ६ ॥
गिरिनिर्झरसंभूता गिरिनिर्दरिवासिनाम् । सिंहानां निनदा दुःखाः श्रोतुं दुःखमतो वनम् ॥ ७ ॥
क्रीडमानाश्च विस्रब्धा मत्ताः शून्ये तथा मृगाः । दृष्ट्वा समभिवर्तन्ते सीते दुःखमतो वनम् ॥ ८ ॥
सग्राहाः सरितश्चैव पङ्कवत्यस्तु दुस्तराः । मत्तैरपि गजैर्नित्यमतो दुःखतरं वनम् ॥ ९ ॥
लताकण्टकसंकीर्णाः कृकवाकूपनादिताः । निरपाश्च सुदुःखाश्च मार्गा दुःखमतो वनम् ॥ १० ॥
सुप्यते पर्णशय्यासु स्वयंभग्नासु भूतले । रात्रिषु श्रमखिन्नेन तस्माद्दुःखमतो वनम् ॥ ११ ॥

निबिडं वनं बहुदोषमनेकदोषविशिष्टमिति अभिधीयते कथ्यते अभिज्ञैरिति शेषः ॥ ६ ॥

गो० टी०–सीत इति । बहुदोषम् अहिकण्टकादियुक्तत्वात्कान्तारं महारण्यम् 'महारण्ये दुर्गपथे कान्तारं पुंनपुंसकम्' इत्यमरः ॥ ६ ॥

६] ति० टी०–हितबुद्ध्या एतदभिधीयते न तु त्वद्भरणादिप्रयासोपाधिनेत्यर्थः । सदा सर्वकालं सुखं वने नास्ति । सुखं सुखदं न भवति, किंतु दुःखं दुःखदमेवेत्येव जानामि निश्चिनोमि ॥ ६ ॥

रा० टी०–हितेति । सदा नित्यमप्यसुखं सुखविरोधि वनं सदा दुःखं दुखहेतुमेव जानामि एतद्वचः हितबुद्ध्या त्वद्विषयकातिप्रीत्येत्यर्थः । मया अभिधीयते कथ्यते ॥ ६ ॥

गो० टी०–हितबुद्ध्येति । हितबुद्ध्या न तु त्वद्भरणक्लेशेन ॥ ६ ॥

७] ति० टी०–गिरिनिर्झरा गिरिनद्यस्तन्निनदैः संभूताः प्रभूताः । गिरिनिर्दरिवासिनां सिंहानां निनदाः श्रोतुं दुःखा अतो वनं दुःखं दुःखजनकम् ॥ ७ ॥

रा० टी०–दुःखान्येवाह–गिरीत्यादिभिः । गिरिनिर्झरसंभूताः पर्वतनदीशब्दप्रहृद्धाः गिरिनिर्दरिवासिनां गिरिदरीनिवसनशीलानां सिंहानां निनदाः शब्दाः श्रोतुं दुःखाः दुःखप्रदाः अतो वनं श्रोतुं प्रवृत्तजनस्येति दुःखं भवतीति शेषः 'गिरिकन्दरवासिनाम्' इति भूषणटीकाङ्कितपुस्तकपाठः ॥ ७ ॥

गो० टी०–महावने विद्यमानान् दोषानाह–गिरिनिर्झरेत्यादि । गिरिनिर्झरसंभूताः गिरिनिर्झरेषु प्रहृद्धाः श्रोतुं दुःखाः दुःखकराः अतो वनं दुःखं दुःखकरम् ॥ ७ ॥

८] ति० टी०–विस्रब्धा निःशङ्काः । दृष्ट्वा मनुष्यं दृष्ट्वा समभिवर्तन्ते हन्तुं संमुखमायान्ति ॥ ८ ॥

रा० टी०–क्रीडमाना इति । विस्रब्धाः शङ्कारहिता इत्यर्थः । महामृगाः वनजन्तुविशेषाः दृष्ट्वा मनुष्यमिति शेषः । समभिवर्तन्ते हन्तुं संमुखमायान्तीत्यर्थः ॥ ८ ॥

गो० टी०–क्रीडमाना इति । शून्ये निर्मानुषे प्रदेशे विस्रब्धाः निःशङ्काः सन्तः क्रीडमानाः क्रीडन्तः अत एव मत्ताः महामृगाः सिंहशार्दूलादयः अस्मान् दृष्ट्वा अपूर्वदर्शनात्सममिवर्तन्ते हन्तुमभिमुखमागच्छेयुः ॥ ८ ॥

९] ति० टी०–सग्राहकत्वं पङ्कवत्त्वं च दुस्तरत्वे हेतुः । नित्यं गजैरित्यस्य युक्तमिति शेषः ॥ ९ ॥

रा० टी०–सग्राहा इति । सग्राहाः ग्राहसहिताः पङ्कवत्यः अतिकर्दमविशिष्टाः सरितो नद्यः मत्तैरपि गजैः सुदुस्तराः तरितुमशक्याः ॥ ९ ॥

गो० टी०–सग्राहा इति । सग्राहाः सनक्राः पङ्कवत्यः बहुपङ्का मत्तैर्गजैरुपलक्षिताश्च अत एव दुस्तराः सरितः सन्ति अतो दुःखतरं पूर्वोक्तदुःखसंमेलनादतिशयेन दुःखवत् ॥ ९ ॥

१०] ति० टी०–कृकवाकुर्वनकुक्कुटः सरट इत्यन्ये । निरपा निर्गतोदकाः । "ऋक्पूः–" इत्यप्समासान्तः ॥ १० ॥

रा० टी०–लतेति । मार्गाः पन्थानः लताकण्टकसंकीर्णाः लताकण्टकैर्व्याप्ताः कृकवाकूपनादिताः कृकवाकुभिः मयूरसरटचरणायुधैः उपनादिताः निरपाः जलरहिताश्च सन्तीति शेषः । "ऋक्पूः–" इत्यप् । अत एव सुदुःखाः अतिदुःखहेतवः ॥ १० ॥

गो० टी०–यत्र न निर्झरादयस्तेनैव मार्गेण गमिष्याम इत्याह–लता इति । लताः पदाकर्षिण्यः कण्टकाः पादवेधकाः कृकवाकवः वनकुक्कुटास्तैरुपनादिताः तत्रादयुक्ता इत्यर्थः । तत्रादा अप्यश्रुतपूर्वत्वात् भयावहा एव निरपाः निर्गतजलाः "ऋक्पूरब्धूः–" इत्यादिना समासान्तः अप्रत्ययः ॥ १० ॥

११] ति० टी०–स्वयं भग्नास्तु स्वयं पतितशीर्णपर्णमयशय्यास्विति यावत् । श्रमखिन्नेन दिवा फलाद्याहरणश्रमखिन्नेन सुप्यते । वनवासिना जनेनेति शेषः । तेन तवापि स श्रमस्तदेव शयनं चेति समभिवेति ध्वनितम् ॥ ११ ॥

रा० टी०–सुप्यते इति । स्वयं भग्नास्तु स्वतःपतितास्तु पर्णशय्यासु पर्णमयतल्पेषु श्रमखिन्नेन फलाद्याहरणादिजनितश्रमजनितखेदविशिष्टेन पुरुषेण रात्रिषु सुप्यते तस्माद्वनमतो वनपर्यटनशीलस्य दुःखम् ॥ ११ ॥

गो० टी०–सुप्यत इति । भूतले न तु पर्यङ्के तत्रापि पर्णशय्यासु न तु मृदुतूलास्तरणेषु तत्रापि स्वयं भग्नास्तु जीर्णतया स्वयमेव पतितासु रात्रिषु नत्वहःसु श्रमखिन्नेन फलमूलाद्याहरणश्रमदुःखितेन वनवासिना सुप्यते अतोऽस्माभिरपि तथा स्वपितव्यमिति भावः ॥ ११ ॥

---

१ कन्दरेति गो. पाठः । २ महामृगा इति गो. रा. पाठः । ३ सुदुस्तरा इति रा. पाठः । ४ सुदुर्गाश्चेति गो. पाठः । ५ तरिमांते गो. पाठः । ६ स्वप्तव्यमिति युक्तं भाति ।

अहोरात्रं च संतोषः कर्तव्यो नियतात्मना । फलैर्वृक्षावपतितैः सीते दुःखमतो वनम् ॥ १२ ॥
उपवासश्च कर्तव्यो यथा प्राणेन मैथिलि । जटाभारश्च कर्तव्यो वल्कलाम्बरधारणम् ॥ १३ ॥
देवतानां पितॄणां च कर्तव्यं विधिपूर्वकम् । प्राप्तानामतिथीनां च नित्यशः प्रतिपूजनम् ॥ १४ ॥
कार्यस्त्रिरभिषेकश्च काले काले च नित्यशः । चरतां नियमेनैव तस्माद्दुःखतरं वनम् ॥ १५ ॥
उपहारश्च कर्तव्यः कुसुमैः स्वयमाहृतैः । आर्षेणविधिना वेद्यां सीते दुःखमतो वनम् ॥ १६ ॥
यथालब्धेन कर्तव्यः संतोषस्तेन मैथिलि । यथाहारैर्वनचरैः सीते दुःखमतो वनम् ॥ १७ ॥
अतीव वातस्तिमिरं बुभुक्षा चास्ति नित्यशः । भयानि च महान्त्यत्र अतो दुःखतरं वनम् ॥ १८ ॥
सरीसृपाश्च बहवो बहुरूपाश्च भामिनि । चरन्ति पथि ते दर्पात्ततो दुःखतरं वनम् ॥ १९ ॥
नदीनिलयनाः सर्पा नदीकुटिलगामिनः । तिष्ठन्त्यावृत्य पन्थानमतो दुःखतरं वनम् ॥ २० ॥

१२] ति० टी०–वृक्षावपतितैर्वृक्षेभ्यः स्वयमेव पतितैः । अहोरात्रं प्रातःसायम् ॥ १२ ॥

रा० टी०–अहोरात्रमिति । नियतात्मना यतचित्तेन वृक्षावपतितैः वृक्षेभ्यः पृथिव्यामागतैः ॥ १२ ॥

गो० टी०–अहोरात्रमिति । अहोरात्रं सायंप्रातश्च वृक्षावपतितैः वृक्षात्स्वयं पतितैः फलैः नियतात्मना नियतमनस्केन इतरानभिलाषिणेत्यर्थः । वनवासिना संतोषः भोजनतृप्तिः कर्तव्यः ॥ १२ ॥

१३] ति० टी०–यथा प्राणेन यथाबलानुसारेण । केशसंस्काराभावाज्जटाभारकरणम् ॥ १३ ॥

रा० टी०–उपवास इति । यथाप्राणेन यथासामर्थ्यमित्यर्थः। जटाभारः जटायाः भारो धारणम् अभार इति छेदो वा केशसंस्कारस्य निषिद्धत्वेन पोषणाभाव इति तदर्थः ॥ १३ ॥

गो० टी०–उपवास इति।यथाप्राणेन यथाशक्त्या१३।१४

१४] ति० टी०–प्रतिपूजनं कार्यं तेन तदर्थसामग्रीसंपादनक्लेशो ध्वनितः ॥ १४ ॥

रा० टी०–देवतानामिति । विधिपूर्वकं ब्रह्मचर्यविहितविधिनेत्यर्थः ॥ १४ ॥

१५] ति० टी०–काले काले प्रातःकालादौ नियमेनैव चरतां कालक्षेपं कुर्वतां त्रिरभिषेकः कार्यः त्रिषवणस्नानं कर्तव्यमित्यर्थः ॥ १५ ॥

रा० टी०–कार्य इति। काले काले नियमेनैव चरतां वर्तमानानां जनानां नित्यशः त्रिः त्रिवारमभिषेकः स्नानं कार्यः ॥१५॥

गो० टी०–कार्य इति । त्रिरभिषेकश्च नैककाल इत्याह–काले काल इति प्रातर्मध्याह्नसायाह्नेष्वित्यर्थः । एतच्च न कतिपयदिनेषु किंतु प्रतिदिनमित्याह–नित्यश इति ॥ १५ ॥

१६] ति० टी०–उपहारः पूजा । आर्षो विधिरुञ्छादिवृत्तिः । वेद्यामित्यनेन तत्करणदुःखं ध्वनितम् ॥ १६ ॥

रा० टी०–उपहार इति । स्वयमाहृतैः आनीतैः कुसुमैः पुष्पैः आर्षेण वेदविहितेन विधिना वेद्यां स्वनिर्मितस्थलविशेषे उपहारः पूजा कर्तव्यः ॥ १६ ॥

गो० टी०–उपहार इति । उपहारो बलिः ' उपहारो बलिर्मतः ' इति हलायुधः । आर्षेण ऋषिप्रोक्तेन विधिना कल्पेन ॥ १६ ॥

१७] ति० टी०–तेन वन्यपदार्थेन । यथाहारैर्यथालब्धाहारैः ॥ १७ ॥

रा० टी०–यथेति । यथालब्धेन यथाकालं प्राप्तेन तेन फलादिना यताहारैः नियमिताहारविशिष्टैः वनचरैः संतोषः कर्तव्यः ॥ १७ ॥

गो० टी०–यथेति । यतालब्धेन यावल्लब्धेन तेन फलादिना आहारेण संतोषः तृप्तिः यताहारैर्नियताहारैः ॥ १७ ॥

१८] ति० टी०–तिमिरम् रात्रिष्विति शेषः ॥ १८ ॥

रा० टी०–अतीवेति । तिमिरमन्धकारः अत एव महान्ति विपुलानि भयानि सन्तीति शेषः ॥ १८ ॥

गो० टी०–अतीति । अत्र वने वाताश्चातीव बहुला तिमिरं च रात्रिष्वतीवास्ति बुभुक्षा चातीव भवति भयानि पूर्वोक्तानि ॥ १८ ॥

१९] ति० टी०–बहुरूपाः सरीसृपाः सन्ति ते च मार्गमध्य दर्पाच्चरन्ति ॥ १९ ॥

रा० टी०–भयहेतूनाह–सरीसृपा इति । बहुरूपाः अनेकविधाः बहवः अनेके ते प्रसिद्धाः सरीसृपाः स्थलनिवासिसर्पाः दर्पादस्मन्निहन्ता कश्चन नास्तीति गर्वात्पथि मार्गे चरन्ति ॥ १९ ॥

गो० टी०–सरीसृपा इति । सरीसृपाः गिरिसर्पाः बहुरूपाः पृथुशरीराः ॥ १९ ॥

२०] ति० टी०–निलयनं वासस्थानम् । नदीवत्कुटिलगतयः ॥ २० ॥

रा० टी०–नदीति । नदीनिलयनाः नदीनिवासिनः अत एव नदीकुटिलगामिनः नदीकौटिल्यसदृशकौटिल्यविशिष्टगमनशीलाः सर्पाः पन्थानमावृत्य परिवृत्य तिष्ठन्ति ॥ २० ॥

गो० टी०–नदीनिलयना इति । नदीकुटिलगामिनः नदीवत्कुटिलगामिनः ॥ २० ॥

---

१ धारिणेति गो. पाठः । २ चरतेति गो. पाठः । ३ बाले इति गो. पाठः । ४ यताहारैरिति गो रा. पाठः । ५ नित्यमिति गो. पाठः । ६ वाता इति गो. पाठः । ७ चात्रेति गो. पाठः । ८ तत इति गो. रा. पाठः । ९ पृथिवीमिति गो. पाठः । १० तत इति गो. पाठः ।

पतङ्गा वृश्चिकाः कीटा दंशाश्च मशकैः सह । बाधन्ते नित्यमबले सर्वं दुःखमतो वनम् ॥ २१ ॥
द्रुमाः कण्टकिनश्चैव कुशाः काशाश्च भामिनि । वने व्याकुलशाखाग्रास्तेन दुःखमतो वनम् ॥ २२ ॥
कायक्लेशाश्च बहवो भयानि विविधानि च । अरण्यवासे वसतो दुःखमेव सदा वनम् ॥ २३ ॥
क्रोधलोभौ विमोक्तव्यौ कर्तव्या तपसे मतिः । न भेतव्यं च भेतव्ये दुःखं नित्यमतो वनम् ॥ २४ ॥
तदलं ते वनं गत्वा क्षेमं नहि वनं तव । विमृशन्निर्वं पश्यामि बहुदोषकरं वनम् ॥ २५ ॥
वनं तु नेतुं न कृता मतिर्यदा बभूव रामेण तदा महात्मना ।
न तस्य सीता वचनं चकार तं ततोऽब्रवीद्रामामिदं सुदुःखिता ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।

ईषदश्रुमुखी सीता रामोक्तवनदोषान्प्रगुणीकृत्य स्वस्यापि पितृगृहे सामुद्रिकोक्तं वनवासं प्रस्ताव्य स्त्रीयां वनगमनोत्कण्ठामधिकृत्य प्रार्थयत तथापि रामस्तत्प्रतिषिध्य वियोगभीरुं तां पर्यसान्त्वयत् ।

एतत्तु वचनं श्रुत्वा सीता रामस्य दुःखिता । प्रसक्ताश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥ १ ॥

२१] ति०टी०—अबले इत्यनेन तन्निवारणासामर्थ्यं ध्वनितम् २१ ।

रा० टी०—पतङ्गा इति । पतङ्गाः शलभादयः कीटाः कृमयः दंशाः वनमक्षिकाः 'दंशस्तु वनमक्षिका' इत्यमरः ॥ २१ ॥

गो० टी०—पतङ्गा इति । पतङ्गाः शलभाः दंशाः वनमक्षिकाः 'दंशस्तु वनमक्षिका' इत्यमरः ॥ २१ ॥

२२-२३] ति० टी०—व्याकुलशाखाग्रत्वं यथायोगं द्रुमेषु कुशकाशयोश्च बोध्यम् ॥ २२ ॥ २३ ॥

रा० टी०—द्रुमा इति । कण्टकिनः बहुकण्टकविशिष्टाः व्याकुलशाखाग्राः व्याकुलाः व्याप्ताः शाखाग्राः येषां ते कुशादयश्च सन्तीति शेषः । तेन हेतुना अतो वनं प्राप्तस्य जनस्य वनं दुःखं दुःखप्रदम् ॥ २२ ॥

गो० टी०—द्रुमा इति । कुशकाशयोः शाखाः कुशकाशपर्णान्येव ॥ २२ ॥

रा० टी०—कायेति । अरण्यवासे वसतः सविधिवनवासिनः पुरुषस्य विविधानि अनेकहेतुकानि भयानि सन्तीति शेषः । अत एव बहवोऽनेकविधाः कायक्लेशाः सन्ति ॥ २३ ॥

गो० टी०—कायक्लेशा इति । कायक्लेशाः व्रतोपवासादयः अरण्यवासे अरण्यरूपवासस्थाने ॥ २३ ॥

२४] ति० टी०—भेतव्ये भेतव्यविषये ॥ २४ ॥

रा० टी०—क्रोधेति । विमोक्तव्यौ अतिशयेन त्यक्तव्यौ मतिर्निश्चयः भेतव्ये भयहेतुभूतोत्तसपादौ तत्समीपे इत्यर्थः न भेतव्यं भयं न कार्यम् ॥ २४ ॥

गो० टी०—क्रोधलोभाविति । भेतव्ये भयहेतुविषये प्रागुक्तसर्पादौ न भेतव्यं भयं न कार्यम् ॥ २४ ॥

२५] ति० टी०—अलं गत्वा न गन्तव्यमित्यर्थः । विमृशन्दोषान्विचारयन् तान्दोषानिहस्थोऽपि पश्यामीव अतो बहुदोषकरं वनमिति ब्रवीमीति शेषः ॥ २५ ॥

रा० टी०—उपसंहरन्नाह—तदिति । तदुक्तहेतोः वनं ते अलं न गन्तव्यं तत्र हेतुः बहुदोषकरं वनमनेकरचनाविषयीभूतं वनं काननं गत्वा प्राप्य तव क्षमं त्वत्कर्तृकवनवासदुःखकर्मकसहनं विमृशन् विचारयन्नपि न पश्यामि । इवोऽप्यर्थे अलमिति निषेधार्थकम् संभवत्यर्थकवनधातुप्रकृतिककर्मकान्तमेकं वनमिति ॥ २५ ॥

गो० टी०—तदिति । वनं गत्वालमिति "अलं खल्वोः—" इति निषेधार्थालमुपपदे क्त्वा न गन्तव्यमित्यर्थः ॥ २५ ॥

२६] ति० टी०—रामेण यदा वने नेतुं मतिर्न कृता बभूव तदा सीता तस्य वचनं न चकार नाङ्गीचकार ततो हेतोरिदमब्रवीत् ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

रा० टी०—वनमिति । महात्मना रामेण वनं नेतुं मतिर्निश्चयः यदा न कृता बभूव तदा तस्य रामस्य वचनं वननयननिषेधकवाक्यं सीता न चकार तत्याज भवतैवं न वक्तव्यमित्यनुक्त्वा मौनीभूय तस्थावित्यर्थः । तद्वचने विश्वासं चकारेति तात्पर्यम् । ततोऽनन्तरमिदं वचः अब्रवीत् ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०—वनमिति । रामेण वनं नेतुं मतिर्यदा न कृता बभूव तदा सीता तस्य वचनं न चकार नाङ्गीचकार इदमुत्तरसर्गे वक्ष्यमाणम् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने ऽष्टाविंशः सर्गः ॥ २८ ॥

१] ति० टी०—एतदिति ॥ १ ॥

१ सर्वदुःखतरमिति गो.पाठः । २ दुःखतरमिति गो.पाठः । ३ तत इति गो.पाठः । ४ क्षमभिति गो.रा.पाठः । ५ इहेति गो.पाठः । ६ तदिति गो.रा.पाठः ।

ये त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति । गुणानित्येव तान्विद्धि तव स्नेहपुरस्कृता ॥ २ ॥
मृगाः सिंहा गजाश्चैव शार्दूलाः शरभास्तथा । चमराः सृमराश्चैव ये चान्ये वनचारिणः ॥ ३ ॥
अदृष्टपूर्वरूपत्वात्सर्वे ते तव राघव । रूपं दृष्ट्वाऽपसर्पेयुस्तैव सर्वे हि बिभ्यति ॥ ४ ॥
त्वया च सह गन्तव्यं मया गुरुजनाज्ञया । त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् ॥ ५ ॥
नहि मां त्वत्समीपस्थामपि शक्रोऽपि राघव । सुराणामीश्वरः शक्तः प्रधर्षयितुमोजसा ॥ ६ ॥
पतिहीना तु या नारी न सा शक्ष्यति जीवितुम् । काममेवंविधं राम त्वया मम निदर्शितम् ॥ ७ ॥

रा० टी०—उत्तरग्रन्थसङ्गतिप्रदर्शनाय पूर्वसर्गान्ते उक्तमप्यर्थं वदन्नाह—एतदिति । एतद्वियोगबोधकं रामस्य वचनं श्रुत्वा दुःखिता अत एव अश्रुमुखी अश्रुयुक्तमुखविशिष्टा प्रसक्ता पतिविषयकात्यनुरागविशिष्टा सीता इदमब्रवीत् ॥ १ ॥

गो० टी०—एतदिति । पूर्वसर्गान्ते इदमित्युक्तावपि पुनरिदमित्युक्तिर्विशेषणविशेषाभिधानार्था प्रसक्ताश्रुमुखी ईषदश्रुमुखीत्यर्थः ॥ १ ॥

२] ति० टी०—वने वस्तव्यतां वासं प्रति त्वया ये दोषाः कीर्तितास्तान्मां प्रति गुणानेव विद्धि । यतोऽहं तव स्नेहेन पुरस्कृता त्वन्निष्ठस्नेहविषया । अनेन त्वत्स्नेहविषयस्य दोषपदार्थो न कोऽपीति भावः । यद्वा यतस्त्वद्विषयकस्नेहेनाग्रगा इत्यर्थः ॥२॥

रा० टी०—तद्वचनमेवाह—ये इति । वस्तव्यतां वासं प्रति ये दोषास्त्वया कीर्तिताः तान्गुणानेव विद्धि इति । यतः तव स्नेहपुरस्कृता त्वद्विषयकस्नेहमात्रदर्शनशीलाहमस्मीति शेषः ॥२॥

गो० टी०—य इति । वस्तव्यतां वासित्वं तान् दोषान् तव स्नेहपुरस्कृतान् गुणानित्येव विद्धि प्रेयसा त्वया सह वर्तमानायाः मम कोकिलालापचन्दनमलयमारुतवत्सुखकरान् जानीहीत्यर्थः । अमुमर्थमुपरितनसर्गे कुशकाशेत्यादिश्लोकैर्विवरिष्यति ॥ २ ॥

३] ति० टी०—तदेवाह—मृगा इत्यादि ॥ ३ ॥

४] ति० टी०—अदृष्टपूर्वं तावकं रूपं येषां तत्त्वात् रूपं दृष्ट्वेति । 'स्थाने हृषीकेश तव प्रकीर्त्या' इति न्यायाद्येषामन्यकर्तृकत्वत्स्मरणेन भयं तेषां साक्षात्त्वदर्शने भयमित्यर्थसिद्धमिति ध्वनितम् । तव सर्वे हि बिभ्यति । अनेन "यद्भीषोदेति सूर्यः" इत्यर्थो ध्वनितः ॥ ४ ॥

रा० टी०—मृगा इति । तव अदृष्टपूर्वरूपत्वाददृष्टपूर्वं रूपं स्वरूपं यैः तेषां भावः तस्माद्धेतोः ते त्वत्परिगणिताः सर्वे मृगादयः तव रूपं दृष्ट्वा अपसर्पेयुः तत्र हेतुः यतः सर्वे बिभ्यति अपूर्वरूपं दृष्ट्वेति शेषः । तत्र शरभाः अष्टपादवन्तो मृगविशेषाः सृमराः गवयाः । श्लोकद्वयमेकान्वयि ॥३॥४॥

गो० टी०—मृगा इत्यादि । शरभाः अष्टपादमृगाः सृमराः गवयाः भये भयहेतौ अस्मान् दृष्ट्वा अभिमुखमायास्यन्तीत्युक्तवान् रामः इयं त्वपसर्पेयुरिति तत् परिजहार ॥ ३ ॥ ४ ॥

५] ति० टी०—गुरुजनाज्ञया 'इयं सीता मम सुता छायेवानुगता सदा' इति सूचितपित्राद्याज्ञयोक्तरीत्या त्वत्पित्राद्याज्ञया त्वद्वियोगेन हेतुना ॥ ५ ॥

रा० टी०—त्वयेति । गुरुजनाज्ञया आर्थिकत्वत्पित्राद्याज्ञया इह जीवितमेतल्लोके स्थितिः ॥ ५ ॥

गो० टी०—त्वयेति । गुरुजनाज्ञया पित्रोराज्ञया त्वया च सह मया गन्तव्यम् "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुत्युक्तप्रक्रियया जायापत्योरेकात्मत्वात् त्वद्विषयादेश एव मद्विषयादेश इत्यर्थः । त्वद्वियोगेन हेतुना मे मया ॥ ५ ॥

६] ति० टी०—आद्योऽपिर्लोकोक्तौ ॥ ६ ॥

रा० टी०—नेति । हे राघव ! सुराणां देवानामीश्वरः शक्रः इन्द्रोऽपि प्रधर्षयितुं पराभवितुं न शक्तः ॥ ६ ॥

गो० टी०—न चेति । अपिशब्दो भिन्नक्रमः सुराणामीश्वरोऽपीत्यर्थः ॥ ६ ॥

७] ति० टी०—एवंविधं पतिहीनाया जीवनमशक्यमित्येवंरूपं त्वया दर्शितं भरतानुकूलतयात्र वाससिथत्युपदेशेन, अतोऽहं त्वया सह यास्यामि त्वदुपदिष्टभरतानुकूल्येन स्थातुमशक्यत्वादिति भावः । केचित्तु एवंविधं वनवासदुःखं कामं त्वया मम दर्शितं यद्यपि तथापि तादृशवने पतिहीना प्रबलभर्तृहीना न जीवितुं शक्यति न तु मादृशी प्रबलभर्तृकेत्यहं वनं यास्याम्येवेति भाव इत्याहुः ॥ ७ ॥

रा० टी०—पतिहीनेति । पतिहीना पतिवियोगविशिष्टा नारी जीवितुं न शक्यति अतः हे राम ! एवंविधं त्वद्वियोगेऽपि स्थितिकारकं मम काममिच्छाविषयीभूतं वस्तु न निदर्शितम् । नकार उभयान्वयी । किंच एवंविधं सहगमननिवारकवचनं मम कामं कस्य सुखस्य अमो गमनं यस्मात् दुःखदमित्यर्थः निदर्शितं कथितम् । किंच एवंविधमुक्तप्रकारकं मम कामं मदिच्छाविषयीभूतं वस्तु त्वयैव निदर्शितं कौशल्याप्रार्थनासमये उक्तम् ॥ ७ ॥

गो० टी०—पतिहीनेति । या नारी पतिहीना पतिवियुक्ता सा जीवितुं न शक्यतीत्येवंविधं त्वया मम काममत्यर्थं विदर्शितमुपदिष्टम् ॥ ७ ॥

१ पुरस्कृतामिति गो. पाठः । २ पक्षिण इति गो. पाठः । ३ भये इति गो. पाठः । ४ न चेति गो. पाठः । ५ शक्नोतीति गो. पाठः । ६ शक्र इति गो. पाठः । ७ विदर्शितमिति गो. पाठः ।

अथापि च महाप्राज्ञ ब्राह्मणानां मया श्रुतम् । पुरा पितृगृहे सत्यं वस्तव्यं किल मे वने ॥ ८ ॥
लक्षणिभ्यो द्विजातिभ्यः श्रुत्वाहं वचनं गृहे । वनवासकृतोत्साहा नित्यमेव महाबल ॥ ९ ॥
आदेशो वनवासस्य प्राप्तव्यः स मया किल । सा त्वया सह भर्त्राहं यास्यामि प्रिय नान्यथा ॥ १० ॥
कृतादेशा भविष्यामि गमिष्यामि त्वया सह । कालश्चायं समुत्पन्नः सत्यवाग्भवतु द्विजः ॥ ११ ॥
वनवासे हि जानामि दुःखानि बहुधा किल । प्राप्यन्ते नियतं वीर पुरुषैरकृतात्मभिः ॥ १२ ॥
कन्यया च पितुर्गेहे वनवासः श्रुतो मया । भिक्षिण्याः शमवृत्तायाः मम मातुरिहाग्रतः ॥ १३ ॥

८] ति० टी०—अथापि वनस्य सदोषत्वेऽपि वने त्वया वस्तव्यं किलेति ब्राह्मणानां सत्यं वचनं पूर्वं पितृगेहे निवसन्त्या मया श्रुतम्, अतोऽवश्यंभावित्वान्मम वनवासस्य न दोषगणनेति भावः ॥ ८ ॥

रा० टी०—स्ववनवासस्यावश्यकत्वं बोधयन्ती आह—अथेति । ब्राह्मणानां सत्यं वच इति शेषः पितृगृहे मया श्रुतम् । किं तदित्यत आह—मे मम वने वस्तव्यं वास इति । च इत्यर्थे ॥ ८ ॥

गो० टी०—अथेति । अथ चापि अपि चेत्यर्थः । हे महाप्राज्ञ ! पुरा पितृगृहे वसन्त्या मया ब्राह्मणानां ब्राह्मणेभ्यः ज्योतिर्विद्भ्यः मे मया वने वस्तव्यं किलेति सत्यं वचनं मया श्रुतम् ॥ ८ ॥

९] ति० टी०—तदेव पुनर्दर्शयति—लक्षणिभ्य इति । सामुद्रिकलक्षणविद्भ्यः । वचनं वनवाससंपादकलक्षणसत्ताविषयकं वचनम् । नित्यमेवेतः प्रागपि ॥ ९ ॥

रा० टी०—लक्षणिभ्य इति । लक्षणिभ्यः शुभाशुभसूचकलक्षणज्ञातृभ्यो द्विजातिभ्यः वचनं वनवासबोधकवाक्यं श्रुत्वा वनवासकृतोत्साहा नित्यमेवाहमस्मीति शेषः ॥ ९ ॥

गो० टी०—लक्षणिभ्य इति । लक्षणिभ्यः सामुद्रिकलक्षणज्ञेभ्यः लक्षणज्ञानमस्त्येषामिति इनिः ॥ ९ ॥

१०] ति० टी०—स वनवासस्यादेशो ब्राह्मणोक्तो मया प्राप्तव्यः किल भाविनोऽन्यथाभावाभावात् । तस्मात्त्वया सह यास्यामि । इदमन्यथा न कथमप्यन्यथा न भविष्यतीत्यर्थः । अत्राज्ञापर्यायादेशशब्देन ब्राह्मणोक्तित्वदाज्ञैव तव सर्वान्तर्यामित्वादिति सूचितम् । किं चावतारकरणमसमकालिकोऽयं तवादेशोऽयतनरात्रिशेषकालिकश्चादेश इति ध्वनितम् ॥ १० ॥

रा० टी०—आदेश इति । वनवासस्य आदेशः त्वत्कर्तृकाज्ञापनं मया प्राप्तव्यः अतः सा भवदाज्ञाहं त्वया सह यास्यामि अन्यथा न भविष्यतीति शेषः । एतेन ब्राह्मणवचनं त्वया अन्यथा न कर्तव्यमिति सूचितम् ॥ १० ॥

गो० टी०—आदेश इति । सः ब्राह्मणोक्तो वनवासस्यादेशः आदिष्टो वनवास इत्यर्थः । मया प्राप्तव्यः किल ललाटलिखितस्यापरित्याज्यत्वादिति भावः । सा एवमादिष्टाहं त्वया सह यास्यामि नान्यथा केवलं स्वेच्छया न यास्यामीत्यर्थः ॥ १० ॥

११ ति० टी०—तदेवाह—कृतेति । कृतादेशा अनुष्ठिताज्ञा । अन्यथा प्रतिज्ञाताचरणाभावे दोषाभावो ममापि तवेव स्यादिति भावः । अतस्त्वया सह गमिष्यामि । सम्भुत्पन्नः संप्राप्तः पूर्वकल्पितवनवासस्येति शेषः । द्विज इति जात्यभिप्रायेण । अत्र द्विजपदेन रावणोऽपि । तेन यच्छ्रुतद्वीपे तेनोक्तं लक्ष्मीनिमित्तं त्वत्तो मे वधोऽस्विति, तत्सत्यं भवत्वित्येषि गूढं सूचितम् ॥ ११ ॥

रा० टी०—मर्यादापालकत्वाद्भवदाज्ञावश्यं भविष्यतीत्याह—कृतेति । कृतादेशा कृत आदेश आज्ञा यस्यै साहं भविष्यामि अत एव त्वया सह गमिष्यामि अत एव द्विजः सत्यवाक् भवतु ॥ ११ ॥

गो० टी०—फलितमाह—कृतादेशेत्यादि । अयं कालः वनवासकालः द्विजः लक्षणवादी जातावेकवचनम् ॥ ११ ॥

१२] ति० टी०—इति तात्त्विकमर्थमुक्त्वा पुनर्लोकानुसारेणाह—वनेत्यादि । हिरेवार्थे किलेति निश्चये । वनवासे बहुधा दुःखानि सन्तीति निश्चितं जानाम्येव, तथापि तान्यकृतात्मभिरजितेन्द्रियैः पुरुषैः स्त्रीसाहित्यवशात्प्राप्यन्ते । अत्र पुरुषप्रकरणाभावेऽपि तदुक्तिस्त्वयापि सा बुद्धिर्वनवासदुःखं दृष्ट्वा न निवर्तनीयेति ध्वनयितुम् ॥ १२ ॥

रा० टी०—वनेति । अकृतात्मभिः अजितेन्द्रियैः दुःखानि प्राप्यन्ते तेनावयोर्दुःखं न भवितेति सूचितं तेन तयोरिन्द्रियानधीनत्वं व्यक्तम् ॥ १२ ॥

गो० टी०—वनवास इति । वनवासे दुःखानि जानामि तानि अकृतात्मभिः अशिक्षितमनस्कैः प्राप्यन्ते न तु मादृशैर्जनैरिति भावः ॥ १२ ॥

१३] ति० टी०—ननु लक्षणज्ञानां भ्रमो भवेत्तत्राह—कन्यया चेति । भिक्षिण्याः शमवृत्तायाः शमवदाचारायास्तापस्याः तपोयुक्तत्वेन तस्य भ्रमो न संभवतीति भावः । अत्रत्यमिहेत्युत्तरश्लोकान्वयि ॥ १३ ॥

रा० टी०—सिंहावलोकन्यायेन प्रमाणान्तरमप्याह—कन्ययेति । शमवृत्तायाः शमदमादिसंपन्नायाः भिक्षिण्याः कन्ययोक्त इति शेषः वनवासो मया श्रुतः शमवृत्तायाः इत्यनेन तत्कन्योक्तमन्यथा न भवितेति सूचितम् ॥ १३ ॥

गो० टी०—कन्ययेत्यादिश्लोकद्वयमेकान्वयम् । भिक्षि-

१ पुरेति गो. पाठः । २ तत्रेति गो. पाठः । ३ साध्विति गो. पाठः ।

प्रसादितश्च वै पूर्वं त्वं मे[1] बहुतिथं प्रभो । गमनं वनवासस्य काङ्क्षितं हि सह त्वया ॥ १४ ॥
कृतक्षणाहं भद्रं ते गमनं प्रति राघव । वनवासस्य शूरस्य मम चर्या हि रोचते ॥ १५ ॥
शुद्धात्मन्प्रेमभावाद्धि भविष्यामि विकल्मषा । भर्तारमनुगच्छन्ती भर्ता हि परैदैवतम् ॥ १६ ॥
प्रेत्यभावे [3]हि कल्याणः संगमो मे सदा[4] त्वया । श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनाम्[5] ॥ १७ ॥
इहलोके च पितृभिर्या स्त्री यस्य महाबल[6] । अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा ॥ १८ ॥
एवमस्मात्स्वकां नारीं सुवृत्तां हि पतिव्रताम् । नाभिरोचयसे नेतुं त्वं मां केनेह हेतुना ॥ १९ ॥

ण्यास्तापस्याः क्रीत्यादित्वादिनिः वनवासः श्रुतः भावीति श्रुतः इह गृहे त्वया सह वनवासस्य गमनं लीलार्थं जाह्नवीतीरतपोवनादिगमनं काङ्क्षितं हि त्वं च बहुविधं प्रसादितो वै प्रसादित एवेति संबन्धः ॥ १३ ॥ १४ ॥

१४] ति० टी०–इहास्मिन्गृहे पूर्वमेव त्वं मे मया बहुतिथं बहुवारं वनवासस्य लीलार्थं वनगमनं प्रति प्रसादितः । अतस्त्वया सह वनगमनं मे काङ्क्षितम् । हि निश्चयेन । इति जानीहीति शेषः ॥ १४ ॥

रा० टी०–प्रसादित इति । वनवासस्य वने वासो यस्य स तस्य मुनिसमूहस्य त्वया सह गमनं वनवासिमुनिकर्मकत्वत्साहित्यविशिष्टमत्कर्तृका गतिः काङ्क्षितमेव अत एव बहुतिथमनेकवारं त्वं प्रसादितः मुनिदर्शनार्थं प्रार्थित इत्यर्थः॥१४॥

१५] ति० टी०–हे राघव, ते भद्रम् अहं गमनं प्रति कृतक्षणास्मि कृतानुमतिकास्मि वने वासो यस्य तादृशस्य शूरस्य तव चर्या शुश्रूषा मम रोचते हि । तादृशस्य शूरस्य तव चर्या रक्षोवधादिरूपा मम रोचते मत्संबन्धेनैव शोभते संपद्यते हि यत इति गूढम् ॥ १५ ॥

रा० टी०–कृतक्षणेति । गमनं प्रति त्वया सह वनगमनार्थमहं कृतक्षणा जातोत्सवास्मीति शेषः । साहित्ये कारणमाह–वनवासस्य वनं प्राप्तस्येत्यर्थः शूरस्य तव चर्या अनुचरणं मम रोचते ॥ १५ ॥

गो० टी०–कृतक्षणेति । कृतक्षणा कृतोत्सवा[2] निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः[3] इत्यमरः । वनवासस्य वने वासो यस्य इति वनवासः तस्य शूरस्य तव चर्या परिचर्या मम मह्यं रोचते ॥ १५ ॥

१६] ति० टी०–प्रेमभावाद्भर्तारमनुगच्छन्ती विकल्मषा भविष्यामीत्यन्वयः । त्वया विनात्र स्थितौ हि लोकः कल्मषं संभावयिष्यतीति भावः ॥ १६ ॥

रा० टी०–शुद्धात्मन्निति । प्रेमभावात् रात्रिंदिवं त्वन्निकटवर्तित्वेन प्रवृद्धस्नेहात् भर्तारं त्वामनुगच्छन्ती अहं विकल्मषा दिवा(?दैव)वियोगरूपकल्मषरहिता भविष्यामि । ननु किमर्थं मय्येवमनुरागवान्छेत्यत आह–भर्ता त्वमेव मम दैवतं देवता१६

गो० टी०–शुद्धात्मन्निति । शुद्धात्मन् ईर्ष्यादिरहित-प्रेमभावात्प्रेमस्वभावात्, हिः प्रसिद्धौ, भर्तारं त्वामनुगच्छन्ती विकल्मषा विगतकल्मषा भविष्यामि । नन्वत्रैव स्थित्वा कुलदेवतामाराध्य विशुद्धा भवेत्यत्राह–भर्ता हि मम दैवतमिति॥१६॥

१७] ति० टी०–प्रेत्यभावे मृत्वा शरीरान्तरपरिग्रहेऽपि परलोकेऽपीति यावत् त्वया सह संगमः कल्याणो दिव्यसुखहेतुः । अत इहसंगमस्य कल्याणत्वं कैमुतिकन्यायसिद्धमिति भावः । प्रेत्यसंगमसत्त्वे मानमाह–ब्राह्मणानां मुखात्पुण्या किल श्रुतिर्यत उक्तार्थप्रतिपादिका श्रूयते ॥ १७ ॥

रा० टी०–नन्वपूर्वो निरवच्छिन्नसंबन्धः किमर्थं प्रार्थ्यते इत्यत आह–प्रेत्येति । प्रकर्षेण इतिर्जगद्भक्षणं यस्मिन् स प्रेतिः कालः मृत्युस्तस्याभावो यस्मिन् साकेतलोके इत्यर्थः। कल्याणः श्रोतॄणां कल्याणप्रदः त्वया सह मे सङ्गमः सदा नित्यः इति ब्राह्मणानामुच्चारिता श्रुतिर्वेदः श्रूयते श्रुतिश्च कौषीतक्यादौ प्रसिद्धा अत एव सशरीरः सहानुज इत्यादिवक्ष्यमाणं संगच्छते ॥१७॥

गो० टी०–प्रेत्यभाव इति । प्रेत्यभावेऽपि परलोकेऽपि त्वया सह संगमः कल्याणः शोभनः ॥ १७ ॥

१८] ति० टी०–तां श्रुतिं पठति–इहेति । या स्त्री पितृभिः पितृपितामहमात्रादिभिर्यस्याद्भिः स्वधर्मेण स्वस्वजातीयकन्यादानधर्मेण दत्ता सा इहलोके च तस्यैव प्रेत्यभावेऽपि तस्यैव भवतीति ॥ १८ ॥

रा० टी०–प्राकृतस्त्रीणामपि पातिव्रतधर्मस्वीकारे नित्यः पतिसंगमो भवतीत्याह–इहेति । यस्य पुरुषस्य या स्त्री पितृभिर्दत्ता सा स्वधर्मेण पातिव्रतधर्मेण प्रेत्यभावे नित्यलोके तस्य पत्युः नित्यसंयोगं लभत इति शेषः ॥ १८ ॥

गो० टी०–अत्र प्रमाणमाह–श्रुतिर्हीत्यादिसार्धश्लोकेन । पितृभिरिति बहुवचनं पितामहाद्यपेक्षया । श्रुतिमेवाह–इहेति । महामत इत्यनेन न त्वां बोधयामीति सूच्यते । स्वधर्मेण स्वस्ववर्णोक्तब्राह्मादिविवाहविधिना ॥ १८ ॥

१९] ति० टी०–एवं श्रुतिन्यायतो नित्यसंबन्धे सतीत्यर्थः अस्मान्नगरात् स्वकां स्वीयाम् सुवृत्तामित्यस्य विवरणं पतिव्रतामिति ॥ १९ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण सुवृत्तां शोभनवृत्तान्तविज्ञापनकर्त्रीं स्वकां स्वकीयां पतिव्रतां नारीं मामस्मात्पुराद्भेतुं केन हेतुना नेच्छसि तं वदेति तात्पर्यम् ॥ १९ ॥

---

१ वै बहुविधमिति गो. वै. इति रा. पाठः । २ समेति गो. रा. पाठः । ३ ऽपीति गो. पाठः । ४ सहेति गो. पाठः । ५ तपस्विनामिति गो. पाठः । ६ महामते इति गो. पाठः ।

भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः । नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम् ॥ २० ॥
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि । विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥ २१ ॥
एवं बहुविधं तं सा याचते गमनं प्रति । नानुमेने महाबाहुस्तां नेतुं विजनं वनम् ॥ २२ ॥
एवमुक्ता तु सा चिन्तां मैथिली समुपागता । स्रापयन्तीव गामुष्णैरश्रुभिर्नयनच्युतैः ॥ २३ ॥
चिन्तयन्तीं तदा तां तु निवर्तयितुमात्मवान् । क्रोधाविष्टां तु वैदेहीं काकुत्स्थो बहु सान्त्वयत्[3] ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ।

बहुशः सान्त्व्यमानापि सीता रामे रक्षणासामर्थ्यमारोप्य तं जगर्ह तथा वनवासाचरणे स्वस्या दुःखाभावं प्रतिपाद्य मा त्यक्त्वा गते त्वय्यहं विषं पास्यामीति निश्चयं प्रास्तवीत्तेन वशीभूतो रामस्तस्या अनुगमनमङ्गीकृत्य प्रयाणमङ्गलदानादीनि कर्तुं तस्यै संदिदेश ।

सान्त्व्यमाना तु रामेण मैथिली जनकात्मजा । वनवासनिमित्तार्थं[1] भर्तारमिदमब्रवीत् ॥ १ ॥

गो० टी०–एवमिति । एवं पूर्वोक्तश्रुतिरूपप्रबलप्रमाणसद्भावेऽपीत्यर्थः । अस्मान्नगरात् नेतुमित्यनेनान्वयः । यद्वा अस्मात् अद्रिर्दानादेतोः ॥ १९ ॥

२०] ति० टी०–सुखदुःखयोः समाम् । अस्यैव विवरणं समानसुखदुःखिनीम् नेतुम् वनमिति शेषः ॥ २० ॥

रा० टी०–भक्तामिति । सुखदुःखयोः सुखं कुबेरादीनां राज्यादिभोगानन्दः दुःखमिव याभ्याम् तयोः रावणकुम्भकर्णयोरित्यर्थः । दीनां विध्वंसिकां भक्तां त्वत्प्रीत्यनुकूलव्यापारवतीं समां प्रशस्तकुलादिमत्त्वेन त्वत्सदृशीं पतिव्रतामत एव समानसुखदुःखिनीं मां नेतुमर्हसि । सुखदुःखयोर्दीनामित्यनेन तद्धेयेऽहं निमित्तं भवितास्मीति ध्वनितम् । अन्तर्भावितण्यर्थत्वेन दीङः सकर्मकत्वं, तत्कर्माविवक्षया कर्तरि निष्ठा, तदनन्तरं कर्मसमभिव्याहारः । प्रसिद्धश्चायं पन्थाः प्रत्युदाहृतकृतपूर्वीकटमित्यादिना भाष्ये ॥ २० ॥

गो० टी०–भक्तामिति । सुखदुःखयोः समां प्राप्तयोः सुखदुःखयोरेकरूपां समानसुखदुःखिनीं त्वत्समानसुखदुःखाम् ॥२०॥

२१] ति० टी०–न चेच्छसि नैवेच्छसीत्यर्थः ॥ २१ ॥

रा० टी०–यदीति । मृत्युकारणान्मृत्युसदृशदुःखहेतोः विषादिकमास्थास्ये तत्तद्भक्षणादिविषयकनिश्चयं करिष्ये विषभक्षणाद्विजनितपीडया वियोगदुःखाल्पता भवितेति तात्पर्यम् ॥२१॥

गो० टी०–यदीति । आस्थास्ये स्वीकरिष्ये ॥ २१ ॥

२२] ति० टी०–अनुमतौ हेतुर्विजनत्वं श्वश्रूप्रभृतिरक्षकजनरहितत्वम् ॥ २२ ॥

रा० टी०–एवमिति । सा सीता महाबाहुः रामः नानुमेने अनुमतिं न चकार तेन प्रणयकोपसूचकवचःशुश्रूषाव्यक्ता ॥ २२ ॥

गो० टी०–एवमिति । याचते अयाचत विजनं बन्धुजनरहितम् ॥ २२ ॥

२३] ति० टी०–एवमुक्तानुमतिबोधकवाक्यमुक्त्वा स्नापयन्तीवेत्युक्त्या तस्या अपि वास्तवदुःखाभावो ध्वनितः रामवाक्यस्य नाट्यतया ज्ञानात् ॥ २३ ॥

रा० टी०–एवमिति । चिन्तां सम्मुपागता प्राप्ता अत एव उष्णैः अश्रुभिः गां पृथ्वीं स्नापयन्ती इव आसेति शेषः ॥ २३ ॥

गो० टी०–एवमिति । गां भुवम् ॥ २३ ॥

२४] ति०टी०–सान्त्वयत् सान्त्ववाक्यान्युवाचेत्यर्थः २४

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्ड एकोनत्रिंशः सर्गः ॥ २९ ॥

रा० टी०–चिन्तयन्तीमिति । चिन्तयन्तीं सहगमनोपायं विचारयन्तीं क्रोधाविष्टां प्रणयकोपविशिष्टां वैदेहीं निवर्तयितुं कोपं दूरीकर्तुं सान्त्वयन्सन्नासेति शेषः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

गो० टी०–चिन्तयन्तीमिति । तामोष्ठीमित्यनेन सान्त्वादिना स्थातुमशक्यत्वमुच्यते ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥२९॥

१] ति० टी०–वनवासनिमित्तार्थं वनवासनिमित्तानुमतिसिद्ध्यर्थम् ॥ १ ॥

रा० टी०–सीतावृत्तं वर्णयितुमुपक्रमते–सान्त्व्यमानेति । मैथिली मिथिलादेशप्रादुर्भूता जनकात्मजा सीता वनवासो निमित्तं कारणं यस्य तदेव अर्थमनेकार्थविशिष्टमिदं वचनमब्रवीत् ॥ १ ॥

गो० टी०–सान्त्व्यमानेति । जनकात्मजेतिविशेषणं स्वकुलोचिताचारदार्ढ्याय वनवासनिमित्ताय वनवास एव निमित्तं प्रयोजनं तस्मै ॥ १ ॥

---

१ तथेति गो. पाठः । २ तामोष्ठीं स तदा सीतामिति गो. पाठः । ३ सान्त्वयन्निति रा. पाठः । ४ निमित्तायेति गो. पाठः ।

सा तमुत्तमसंविग्ना सीता विपुलवक्षसम् । प्रणयाच्चाभिमानाच्च परिचिक्षेप राघवम् ॥ २ ॥
किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः । राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥ ३ ॥
अनृतं बत लोकोऽयमज्ञानाद्यदि वक्ष्यति । तेजो नास्ति परं रामे तपतीव दिवाकरे ॥ ४ ॥
किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते । यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ॥ ५ ॥

२] ति० टी०—उत्तमसंविग्ना अतिभीता सैव प्रणयात्स्नेहात् अभिमानोऽत्यन्तमिष्टत्वेन रहसि कोपप्रीत्यादिप्रयुक्तसकलवचनार्हं इत्येवंरूपः परिचिक्षेप सोपहासवचनमुक्तवती ॥ २ ॥

रा० टी०—वचनस्य विशेषस्वरूपं वर्णयन्नाह—सेति । उत्तमसंविग्ना वियोगहेतुकात्युद्वेगं प्राप्ता अभिमानादहमस्यान्यथेति मां त्यक्तुमयमसमर्थ इति गर्वात्प्रणयात्प्रकर्षेण नयः रामकर्तृकस्वकर्मैकनयनं तस्माद्धेतोः राघवं परिचिक्षेप विलक्षणवचनमुच्चारयामास ॥ २ ॥

गो० टी०—सेति । उत्तमसंविग्ना उत्तममत्यन्तं कम्पमाना विपुलवक्षसं शूरमिति यावत् । शूरमपि कथंचिक्षेपेत्याह—प्रणयादित्यादि । प्रणयात् स्नेहात् अभिमानान्मदीयोऽयमित्यभिमानात् कोपाद्वा प्रणयकोपादिति संपिण्डितोऽर्थः परिचिक्षेप निनिन्द ॥ २ ॥

३] ति० टी०—पुरुषविग्रहमाकारेण पुरुषं क्रियया तु स्त्रियमेव त्वां जामातरं प्राप्य मे पिता किममन्यत तव तत्त्वं न ज्ञातवानित्यर्थः यदि जानीयान्मां तुभ्यं न प्रयच्छेदिति शेषः ॥ ३ ॥

रा० टी०—वचनमेवाह—किमिति । पुरुषविग्रहं पुरुषाकृतिं स्त्रियं क्रयन्तराकाङ्क्षारहितत्वेन स्त्रीसदृशं त्वां वैदेहः विदेहकुलोद्भवो मे पिता जामातरं किममन्यत जामातृत्वेन त्वयि निश्चयमकरोत् एवं ज्ञाने तुभ्यं न दद्यादिति तात्पर्यं यद्वा यः त्वया प्रापि स वैदेहः विदेहकुलोत्पन्नः मे पिता पुरुषविग्रहं पुरुषत्वस्य विशेषेण ग्रहो ज्ञानं यस्मिन् परमपुरुषमित्यर्थः तं जामातरं त्वामस्त्रियं स्त्रीरहितं किं कथममन्यत एतेन तव क्रयन्तरमस्तीत्यनुमीयते तेन तदर्थमेव ते वनगमनमिति व्यञ्जितम् । किंच अस्त्रियमस्त्रिणा निखिलास्त्रज्ञेन विश्वामित्रेण सह यांतं गच्छंतं तं विश्वामित्रसहचारिणमित्यर्थः जामातरं त्वां पुरुषविग्रहं विशेषपुरुषं किं कथममन्यत तवेदृग्वचनश्रवणेन विशेषपुरुषत्वं न प्रतीयत इति तात्पर्यं तेन पितुर्भ्रमः सूचितः ॥ ३ ॥

गो० टी०—किंत्वेति । मां त्यक्त्वा वनं गतं त्वां यदि मे पिता श्रुणुयात्तदा त्वां क्रयेव काचित्पुरुषवेषं धृत्वा मत्कन्यामुपयेमे इति मन्येतेत्यर्थः हे राम सौन्दर्यमात्रेण परभामक ! वैदेहः विदेहवंश्यः ' कर्मणैव हि संसिद्धिमास्थिता जनकादयः ' इतिकर्मप्रधानतया कदाचिदपि पत्नीविरहमसहमान इत्यर्थः मिथिलाधिपः जनपदस्य सम्यग्रक्षकः मे पिता त्वा मामेकां रक्षितुमशक्त्या मां पत्नीं त्यक्त्वा गतं त्वां प्राप्य ज्ञात्वा गत्यर्थो ज्ञानार्थः स्त्रियम् अन्तःस्त्रीस्वभावं पुरुषविग्रहं बहिः पुरुषवेषं जामातरममन्यत किं मन्यते किम् अवश्यमित्थं मन्येतेत्यर्थः । स्त्रियं पुरुषविग्रहमिति पुरुषत्वेऽपि मोहिनीरूपभ्रमकृत्त्वं पूर्वकृतं सूचयतीति प्राहुः ॥ ३ ॥

४] ति० टी०—यदि मां विहाय भवान्वनगमनभारं वक्ष्यति प्राप्स्यति वह प्रापणेऽस्य रूपम् । तदा यदिदं लोको वदति रामे यत्तेजस्तत्तपति दिवाकरे नास्तीवेति तदज्ञानादिव गदितमनृतं भविष्यतीति शेषः । बतेति खेदे खेदातिशयख्यापकतया च न्यूनपदत्वादि न दोषः ॥ ४ ॥

रा० टी०—न केवलं मत्पितुरेव भ्रमः एवं त्वद्वचनश्रवणे सर्वेषां भ्रान्तिः प्रकटीभविष्यतीति बोधयन्ती आह—अनृतमिति । यदि मां न नेष्यसीति शेषः तदा दिवाकरे सूर्ये इव तपति त्वयि अज्ञानात्त्वन्निश्चितमन्यथाभावहेतुविषयकज्ञानाभावाद्धेतोः रामे परं तेजो नास्तीति अनृतं मिथ्या अयं लोको जनः वक्ष्यति वदिता तेन तद्वचनश्रवणे मम खेदो भवितेति सूचितम् । अयतनत्वस्याविवक्षा ॥ ४ ॥

गो० टी०—अनृतमिति । बतेति खेदे अयं लोकः तपति दिवाकर इव रामे परं तेजोऽस्तीति अज्ञानात् यद्वक्ष्यति वदति तदनृतं कुतः नास्ति अनुपलभ्यमानत्वात्तादृशं तेजो नास्त्येवेत्यर्थः । यद्वा अयं लोकः यद्वक्ष्यति यद्वदति रामे परं तेजोऽस्तीत्यर्थसिद्धं तद् अज्ञानात् अतोऽनृतं बत तपति दिवाकर इव रामे परं तेजो नास्ति व्यतिरेकदृष्टान्तः यथास्ति दिवाकर इव उपलभ्येत इति भावः । यद्वा अज्ञानात् रामस्वरूपाज्ञानात् लोकोऽयं यद्वदति तदनृतम् किं वदतीत्याह—तेज इति । राम इव तपति दिवाकरे परं तेजो नास्तीति यद्वदति तदनृतमिति पूर्वेणान्वयः ॥ ४ ॥

५] ति० टी०—किं हि कृत्वा किं मनसि विचार्येत्यर्थः विषण्णः प्राप्तविषादः ॥ ५ ॥

रा० टी०—ननु गमनाभावहेतुमुक्त्वा त्वयैव लोको बोद्धव्य इत्यत आह—किमिति । किं कारणं कृत्वा मनसि प्रकल्प्य त्वं विषण्णः उदासीनः भयं वा कुतः यथस्मात्त्वं परित्यक्तुकाम, एतेन मयापि हेतुर्न ज्ञात इति कथं बोधयितास्मीति ध्वनितम् ॥ ५ ॥

गो० टी०—किमिति । किं हि कृत्वा किमकार्यं कृत्वा विषण्णः ' अप्यकार्यशतं कृत्वा भर्तव्यामनुरज्यते ' इत्युक्तावश्यभरणीयविषये विषादप्राप्तिर्न युक्तेति भावः । ते कालाग्निसदृशकोधस्य तव यथस्मात्कारणात् मां परित्यक्तुकामोऽसि

१ यद्धीति गो. पाठः ।

द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् । सावित्रीमिव मां विद्धि त्वमात्मवशवर्तिनीम् ॥ ६ ॥
न त्वहं मनसा त्वन्यं द्रष्टास्मि त्वदृतेऽनघ । त्वया राघव गच्छेयं यथान्या कुलपांसनी ॥ ७ ॥
स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम् । शैलूष इव मां राम परेभ्यो दातुमिच्छसि ॥ ८ ॥
यस्य पथ्यंचरामात्थ यस्य चार्थेऽवरुध्यसे । त्वं तस्य भव वश्यश्च विधेयश्च सदानघ ॥ ९ ॥
स मामनादाय वनं न त्वं प्रस्थितुमर्हसि । तपो वा यदि वारण्यं स्वर्गो वा स्यात्त्वया सह ॥ १० ॥
न च मे भविता तत्र कश्चित्पथि परिश्रमः । पृष्ठतस्तव गच्छन्त्या विहारशयनेष्विव ॥ ११ ॥
कुशकाशशरेषीका ये च कण्टकिनो द्रुमाः । तूलाजिनसमस्पर्शा मार्गे मम सह त्वया ॥ १२ ॥

तादृशं कारणं नास्तीत्यर्थः यद्वा किं हि कृत्वा किं मनसि कृत्वा किं विचार्येत्यर्थः यस्मात् विषादात् भयाच्च मां परित्यक्तुकामोऽसि ॥ ५ ॥ ६ ॥

६] ति० टी०—द्युमत्सेनसुतं सत्यवन्तमनुव्रतां तत्पत्नीं सावित्रीमिव मां विद्धि ॥ ६ ॥

रा० टी०—नाहं परित्यागार्हेति बोधयन्ती आह—द्युमदिति । द्युमत्सेनसुतं सत्यवन्तं सत्यवत्संज्ञकमनुव्रतां तद्भक्तिनीं सावित्रीमिव आत्मवशवर्तिनीं विद्धि जानीहि ॥ ६ ॥

७] ति० टी०—यथान्या कुलपांसन्यन्यं पश्यति, एवमहं मनसाप्यन्यं न द्रष्टास्मि अतस्त्वदृते त्वां विना नात्र स्थास्ये अतो हे राघव ! त्वया सह गच्छेयम् ॥ ७ ॥

रा० टी०—नेति । त्वदृते त्वां विना अन्यं भवदुपदिष्टमत्सुखहेतुभूतपदार्थं मनसापि अहमन्या पतिव्रताविलक्षणा कुलपांसनीव न द्रष्टास्मि अतः त्वया सह गच्छेयम् ॥ ७ ॥

गो० टी०—नत्विति । हे राघव ! अन्या कुलपांसिनी यथा कुलपांसिनीव अहं त्वदृते अन्यं मनसापि न द्रष्टास्मि न द्रक्ष्याम्येव अतस्त्वया गच्छेयमिति योजना ॥ ७ ॥

८] ति० टी०—एवमप्यनुमतिमेव दृष्ट्वा पुनराक्षिपति—स्वयं त्विति । कौमारीम् अन्यापूर्वेण विवाहितामन्यापूर्वां च चिरमध्युषिताम् अनेन तरुणीत्वमुक्तम् । शैलूष इव जायाजीव इव ॥ ८ ॥

रा० टी०—स्वयमिति । चिरं बहुकालमध्युषितां स्वसमीपवर्तिनीं कौमारीं भार्यां कुमारावस्थायामेव विवाहितामित्यर्थः सतीं मां शैलूषः नर्तनकालिकनट इव परेभ्यः स्वातिरिक्तेभ्यः दातुं तत्सन्निधौ स्थापयितुं किमिच्छसि । तुः किमर्थे । 'प्रसृतोन्मुखे च शैलूषः कथितो नटबिल्वयोः' इति विश्वः ॥ ८ ॥

गो० टी०—वृद्धपातिव्रत्यप्रदर्शनेऽपि वनगमनासंमतिं ज्ञात्वा कुध्यति—स्वयमिति । कौमारीं कुमारावस्थायामेव परिणीतां शैलूष इव जायाजीव इव 'शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः' इत्यमरः परेभ्यः स्वयं दातुमिच्छसि ॥ ८ ॥

९–१०] ति० टी०—तदेव दर्शयति—यस्य भरतस्य मां पथ्यंचरामिष्टानुवर्तिनीमात्थ संप्रत्येव कथितवानसि पथ्यंचरामित्यत्र द्युमार्षः । यस्य च भरतस्यार्थे तदभिषेकरूपप्रयोजननिमित्तः अवरुध्यसे निरुद्धाभिषेकोऽसि तस्य त्वमेव वश्य इष्टानुवर्ती विधेयो नियोज्यश्च भव नाहं तदिष्टानुवर्तिनी तद्विधेया चेह वसामीत्याशयः ॥ ९ ॥ १० ॥

रा० टी०—यस्येति । हे राम ! यस्य स्वमात्रादेः पथ्यं हितं त्वमात्थ कथयसि अत एव यस्यार्थे प्रयोजनार्थमवरुध्यसे मामवरोधयसि इह स्थापयसि तस्य वश्यः त्वमेव भव त्वयैव विधेयः तस्यार्थ इति शेषः ॥ ९ ॥

गो० टी०—मातरं शुश्रूषस्वेति यदुक्तं तत्र परिहारमाह—यस्येति । यस्य मातृजनस्य पथ्यं हितमात्थ यस्य चार्थे अवरुध्यसे मां निवारयसे तस्य जनस्य त्वमेव वश्यः अनुकूलः विधेयः प्रेष्यश्च भव अहं तु त्वामनुयास्यामीत्यर्थः यद्वा यस्य मद्रूपजनस्य पथ्यं चात्थ एतावत्पर्यन्तं यस्य चार्थे अवरुध्यसे क्लिश्यसि तस्य जनस्य त्वं वश्यो विधेयश्च भव त्वमेव मद्वचनं श्रुण्वित्यर्थः अथवा यस्य भरतस्य पथ्यमात्थ यस्य चार्थे यस्याभिषेकरूपप्रयोजननिमित्ते अवरुद्धयसे निगृहीतोऽसि तस्य वश्यः इच्छानुसारी विधेयश्च प्रेष्यश्च भवेति संबन्धः ॥ ९ ॥

रा० टी०—स इति । अनादाय अगृहीत्वा प्रस्थितुं नार्हसि तत्र हेतुः तपआदिकं त्वया सहैव स्यात् ॥ १० ॥

गो० टी०—स इति । वश्यो विधेयश्च त्वं तपो वा तपश्चरणं वा अरण्यमरण्यवासो वा स्वर्गो वा स्वर्गगमनं वा त्वया सह भवत्विति शेषः ॥ १० ॥

११] ति० टी०—विहारशयनेषु सुप्ताया इवारण्ये गच्छन्त्या न मे परिश्रम इति योजना ॥ ११ ॥

रा० टी०—नेति । पृष्ठतः गच्छन्त्या मे विहारशयनेष्विव श्रमो न भविता ॥ ११ ॥

गो० टी०—न चेति । पथि तव पृष्ठतो गच्छन्त्या मे विहारशयनेष्विव विहारः परिक्रमः उद्यानसंचार इति यावत् 'विहारस्तु परिक्रमः' इत्यमरः ॥ ११ ॥

१२] ति० टी०—तूलैरजिनैः प्रियकादिमृगाजिनैश्च समः स्पर्शो येषां तादृशाः भविष्यन्तीति शेषः ॥ १२ ॥

रा० टी०—कुशेति । मार्गे त्वया सह त्वत्साहित्यविशिष्टायाः मम कुशादयः तूलादिसमस्पर्शाः भवितार इति शेषः तत्राजिनं कोमलं मृगविशेषचर्म ॥ १२ ॥

१ वीरेति गो. पाठः । २ ऽप्यन्यमिति गो. पाठः । ३ पांसिनीति गो. पाठः । ४ प्रस्थातुमिति गो. पाठः । ५ मे सह त्वयेति गो. पाठः ।

महावातसमुद्धूतं यन्मामवकरिष्यति । रजो रमण तन्मन्ये परार्ध्यमिव चन्दनम् ॥ १३ ॥
शाद्वलेषु यदा शिश्ये वनान्तर्वनगोचरा । कुथास्तरणयुक्तेषु किं स्यात्सुखतरं ततः ॥ १४ ॥
पत्रं मूलं फलं वापि अल्पं वा यदि वा बहु । दास्यसे स्वयमाहृत्य तन्मेऽमृतरसोपमम् ॥ १५ ॥
न मातुर्न पितुस्तत्र स्मरिष्यामि न वेश्मनः । आर्तवान्युपभुञ्जाना पुष्पाणि च फलानि च ॥ १६ ॥
न च तत्र तैतः किंचिद्द्रष्टुमर्हसि विप्रियम् । मत्कृते न च ते शोको न भविष्यामि दुर्भरा ॥ १७ ॥
यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना । इति जानन्परां प्रीतिं गच्छ राम मया सह ॥ १८ ॥
अथ मामेवमव्यग्रां वनं नैव नयिष्यसे । विषमद्यैव पास्यामि मा वशं द्विषतां गमम् ॥ १९ ॥

गो० टी०–कुशेति । त्वया सह गच्छन्त्या मम तूलाजिनसमस्पर्शाः तूलं तूलपिण्डः अजिनं कन्दल्याद्यजिनम् ' कदलीकन्दलीचीनचमूरुप्रियका अपि । समूरुश्चेति हरिणा अमी अजिनयोनयः ' इत्यभिधानात् भवन्तीति शेषः ॥ १२ ॥

१३] ति० टी०–अवकरिष्यति विक्षेप्स्यतीति यावत् परार्ध्यमत्युत्तमम् ॥ १३ ॥

रा० टी०–महति । महावातसमुद्धूतं महावातनीतं यद्रजः मां त्वत्सहचारिणीमवकरिष्यति आच्छादयिष्यति तत्परार्ध्यमुत्तमं चन्दनमिवाहं मन्ये ॥ १३ ॥

गो० टी०–महावातेति । परार्ध्यं श्रेष्ठं चन्दनं वासितं चन्दनचूर्णमित्यर्थः ॥ १३ ॥

१४] ति० टी०–वनान्तर्वनमध्ये शिश्ये त्वया सहेति शेषः । कुथाश्चित्रकम्बलास्तदूपास्तरणयुक्तेषु मञ्चेषु सुप्ताया मम ततः शाद्वलशयनात्किं सुखतरं स्यात्किमधिकं सुखं स्यात्र किमपीत्यर्थः ॥ १४ ॥

रा० टी०–शाद्वलेष्विति । यदा यस्मिन्काले वनगोचरा वनं प्राप्ताहं वनान्तः वनमध्ये शाद्वलेषु दूर्वादियुक्तभूमिषु शिश्ये तदा कुथास्तरणयुक्तेषु विलक्षणचित्रकम्बलरूपास्तरणविशिष्टेषु पर्यङ्केष्विति शेषः यत्सुखतरमनुभूतमित्यर्थः तत्ततः शाद्वलशयनात्किं साधारणं स्यात् भवितेत्यर्थः ॥ १४ ॥

गो० टी०–शाद्वलेष्विति । शाद्वलेषु बालतृणवत्प्रदेशेषु शिश्ये त्वया सहेति शेषः । कुथाश्चित्रकम्बलाः आस्तरणानि कौशम्भोत्तरच्छदाः तैर्युक्तेषु तल्पेषु ॥ १४ ॥ १५ ॥

१५] ति० टी०–स्वयमाहृत्य दास्यस इत्यनेन स्वस्य तदाहरणप्रयुक्तश्रमाभावः सूचितः ॥ १५ ॥

रा० टी०–पत्रमिति । पत्रादन्यतमं यदास्यसे तदमृतरसोपमं स्यादिति शेषः ॥ १५ ॥

१६] ति० टी०–मातुरित्यादि कर्मणः शेषत्वविवक्षया षष्ठी आर्तवानि तत्तदृतुभवानि ॥ १६ ॥

रा० टी०–नेति । आर्तवानि फलोत्पत्तियोग्यताविशिष्टऋतूत्पन्नानि पुष्पाणि फलानि च भुञ्जानाहं मात्रादिकं न स्मरिष्यामि " अधीगर्थ–" इति षष्ठी ॥ १६ ॥

गो० टी०–नेति । मातुरित्यादौ अधीगर्थदयेशामिति षष्ठी आर्तवानि तत्तदृतुसमुत्पन्नानि ॥ १६ ॥

१७] ति० टी०–तत उक्तहेतोः ॥ १७ ॥

रा० टी०–न चेति । ततः मदुमनाद्विप्रियमनिष्टं द्रष्टुं नार्हसि यतः मत्कृते मदर्थं शोकः शोकहेतुः न भविष्यतीति शेषः । अत एव दुर्भरा त्वत्कर्तृकभरणाशक्या अहं न भविष्यामि ॥ १७ ॥

गो० टी०–न चेति । तत्र वने गतस्त्वं मत्कृते मन्निमित्तं किंचिद्विप्रियं दुःखं द्रष्टुं नार्हसि ते शोकश्च न भवेत् अतो दुर्भरा दुःखेन भर्तव्या न भविष्यामि ॥ १७ ॥

१८] ति० टी०–त्वत्साहित्येन नरकोऽपि स्वर्गस्त्वद्राहित्येन स्वर्गो नरक इति मम निश्चयं जानन् ॥ १८ ॥

रा० टी०–य इति । यः देशः त्वया सह त्वत्साहित्यविशिष्टः स एव स्वर्गः साकेतलोकः यो देशः त्वया विना त्वत्साहित्याभावविशिष्टः स एव निरयः निर्गतः अयः कल्याणं यस्मात्प्राकृतलोक इत्यर्थः इति परां सर्वविलक्षणां प्रीतिं त्वद्विषयकमत्प्रेम जानन् त्वं मया सह गच्छ ॥ १८ ॥

गो० टी०–किं बहुनोक्तेन निश्चितमेकं संक्षेपतः श्रृणित्याह–य इति । त्वया सह यो वासः सः स्वर्गः मे स्वर्गसमः त्वया विना यो वासः सः निरयः नरकोपमः त्वत्संश्लेषविश्लेषादन्ये न मे सुखदुःखे स्त इति भावः इति एवं परां विश्लेषासहां प्रीतिं जानन् पूर्वमपि बहुशोऽनुभवन् मया सह गच्छ॥१८॥

१९] ति० टी०–ककेयीवन्मथितसिद्धान्तमाह–अथेति । अव्यग्रां वनवासे दोषानगणयन्तीम् द्विषतां भरतादीनाम् ॥१९॥

रा० टी०–अथेति । अथ एवं मत्प्रार्थनानन्तरमपि अव्यग्रामनवधानतारहितचित्तां न नयिष्यसे नेष्यसे तर्हि विषं अतिमादककालकूटविशेषमद्यैव पास्यामि । तत्र हेतुः द्विषतां त्वद्वियोगहेतुकसर्ववस्तुविषयकप्रीत्यभावविशिष्टानां भवन्मात्रादीनामवशमप्रीतिहेतुककान्त्यभावं मा गमं न प्राप्स्यामि द्रष्टुं न शक्ष्यामीत्यर्थः एतेन दुःखादर्शित्वं गुणः सीताया व्यक्तः ॥ १९ ॥

गो० टी०–अथेति । अथेति प्रश्ने एवमुक्तप्रकारेण अव्यग्रां वनगमनविषयभीतिरहिताम् अद्यैव त्वत्सन्निधावेव

१ समुद्धूतमिति गो. रा. पाठः । २ अपेति गो. पाठः । ३ वनान्ते वनगोचरेति गो.पाठः । ४ तल्पेष्विति गो. पाठः । ५ यन्मामिति गो. पाठः । ६ दास्यसीति गो. पाठः । ७ गत इति गो. पाठः । ८ नयिष्यसीति गो.पाठः । ९ विशमिति गो. पाठः । १० वशमिति गो. पाठः ।

पश्चादपि हि दुःखेन मम नैवास्ति जीवितम् । उज्झितायास्त्वया नाथ तदैव मरणं वरम् ॥ २० ॥
इमं हि सहितुं शोकं मुहूर्तमपि नोत्सहे । किं पुनर्दशवर्षाणि त्रीणि चैकं च दुःखिता ॥ २१ ॥
इति सा शोकसंतप्ता विलप्य करुणं बहु । चुक्रोश पतिमायस्ता भृशमालिङ्ग्य सस्वरम् ॥ २२ ॥
सा विद्धा बहुभिर्वाक्यैर्दिग्धैरिव गजाङ्गना । चिरसंनियतं बाष्पं मुमोचाग्निमिवारणिः ॥ २३ ॥
तस्याः स्फटिकसंकाशं वारि संतापसंभवम् । नेत्राभ्यां परिसुस्राव पङ्कजाभ्यामिवोदकम् ॥ २४ ॥
तैरसितामलचन्द्राभं मुखमायतलोचनम् । पर्यशुष्यत बाष्पेण जलोद्धृतमिवाम्बुजम् ॥ २५ ॥
तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखिताम् । उवाच वचनं रामः परिविश्वासयंस्तदा ॥ २६ ॥
न देवि वत दुःखेन स्वर्गमप्यभिरोचये । नहि मेऽस्ति भयं किंचित्स्वयंभोरिव सर्वतः ॥ २७ ॥

द्विषतां भरतादीनां वशम् मा विशं न प्राप्नुयां विरहो वा द्विषन्तः ॥ १९ ॥

२०] ति० टी०–पश्चात्त्वद्गमनोत्तरकालम् अतस्तदैव त्वद्वियोगकाल एव ॥ २० ॥

रा० टी०–ननु विषमदस्याल्पकालस्थायित्वाद्विषपानमिदंचित्करमित्यत आह–पश्चादिति । पश्चाद्विषमदध्वं सानन्तरमपि दुःखेन मम जीवितं मत्कर्तृकत्वन्मात्रादिपालनं सेवनमित्यर्थः नैव स्यादत एव त्वयोज्झितायाः त्यक्तायाः मम मरणमिहलोकत्यागेन मरणसदृशं साकेतगमनमित्यर्थः वरं श्रेष्ठमस्ति तेन तत्र तव संयोगो भवितैवेति ध्वनितम् ॥ २० ॥

गो० टी०–पश्चादिति । पश्चादपि त्वद्गमनानन्तरमपि उज्झितायाः त्यक्तायाः तदैव त्वत्सन्निधानकाल एव ॥ २० ॥

२१] ति० टी०–किमिति । वियुक्त्य कथनेन वनवासकालसंख्याया अतिदुस्तरत्वं ध्वनयति ॥ २१ ॥

रा० टी०–ननु चतुर्दशवर्षानन्तरमिह मदागमनस्य निश्चितत्वात्किमर्थं शोक इत्यत आह–इममिति । दुःखिता त्वद्वियोगहेतुकातिदुःखविशिष्टा ॥ २१ ॥

गो० टी०–विषकृतदुर्मरणाद्दुःखेन मरणं ज्याय इत्याशङ्क्याह–इममिति । आदौ दशवर्षाणि मध्ये त्रीणि वर्षाणि अन्ते एकवर्षं च तुल्यतया भाति विरहिण्या इत्यावेदयितुं विभज्योक्तिः ॥ २१ ॥

२२] ति०टी०–आयस्तायासं प्राप्ता सस्वरं सशब्दम्॥२२॥

रा० टी०–इतीति । आयस्ता अत्यायासं प्राप्ता ॥ २२ ॥

गो० टी०–इतीत्यादि । आयस्ता आयासं प्राप्ता प्रश्चियिलगात्रीत्यर्थः सस्वरं सतारध्वनीत्यर्थः ॥ २२ ॥

२३–२४] ति० टी०–दिग्धैर्विषलिप्तबाणैः चिरसंनियतं बहुकालं संनिरुद्धम् ॥ २३ ॥ २४ ॥

रा० टी०–सेति । दिग्धैः विषविशेषसंस्कृतबाणैः विद्धा ताडिता गजाङ्गना इव बहुभिः वियोगादिसूचकैर्वाक्यैः विद्धा उक्ता सा सीता चिरसंनियतं बहुकालनिरुद्धं बाष्पमग्निमरणिरिव मुमोच ॥ २३ ॥

गो० टी०–सेति । विद्धा ताडिता वाक्यैः पूर्वं रामोक्तैः दिग्धैः विषलिप्तैः बाणैः चिरसंनियतं वार्ताप्रसङ्गेन चिरात्संनिरुद्धम् अरणिरित्यत्रापि विदेत्यनुषञ्जनीयम् ॥ २३ ॥

रा० टी०–तस्या इति । संतापसंभवं वियोगश्रुतिहेतुकसंतापजनितं स्फटिकसंकाशं स्फटिकसूक्ष्मगुटिकावद्भासमानं तस्याः नेत्राभ्यां पङ्कजाभ्यामुदकमिव परिसुस्राव ॥ २४ ॥

गो० टी०–तस्या इति । स्फटिकसंकाशमित्यनेन विकजलतावगमात् चिरविगलितधारत्वमवगम्यते उदकं मकरन्दरूपं तद्धृष्णं निर्मलं च ॥ २४ ॥

२५] ति० टी०–सिता पूर्णमासी तत्संबन्ध्यमलो राह्वाद्यनुपरक्तो यश्चन्द्रस्तत्सदृशं जलोद्धृतं जलमुद्धृतं यस्मात् । आहिताग्न्यादिः ॥ २५ ॥

रा० टी०–तादिति । सितामलचन्द्राभं सिते शुक्लपक्षेऽमलोऽन्धकारनिवर्तकः यश्चन्द्रः पूर्णिमाचन्द्र इत्यर्थः । तत्सदृशमायते लोचने यस्मिंस्तन्मुखं जलोद्धृतं जलान्निःसृतमम्बुजमिव पर्यशुष्यत इव । इव उभयान्वयी ॥ २५ ॥

गो० टी०–तदिति । ‘ अमलसङ्काशम् ’ इतिपाठे अमलतया प्रकाशमानं बाष्पेण संतापसंभवेनोष्णेन अम्बुजपक्षे ऊष्मणेत्यर्थः । ‘ बाष्प ऊष्मा ’ इत्यमरः ॥ २५ ॥

२६] ति० टी०–परिविश्वासयन्नुज्जीवयन् ॥ २६ ॥

रा० टी०–तामिति । दुःखितां वियोगश्रवणहेतुकदुःखाक्रान्तामत एव विसंज्ञामिव संज्ञारहितासदृशीं तां सीतां परिष्वज्य विश्वासयन् साहित्यगमने विश्वासमुत्पादयन् सन्नुवाच२६

गो० टी०–तामिति । विसंज्ञामित्यनेन मूर्च्छाभावः सूच्यते परिविश्वासयन्सम्यग्विश्वासयन् ॥ २६ ॥

२७] ति० टी०–तव दुःखेन त्वद्वियोगदुःखेन प्राप्तमपीति शेषः । स्वयंभोर्ब्रह्मणः स्वव्यतिरिक्ततत्त्वसत्त्वन्तराभावेन पूर्णबलत्वेन च यथा भयाभावस्तद्वदेव ममापि सर्वतो भयाभावः ॥ २७ ॥

रा० टी०–तद्वचनमेवाह–नेति । तव दुःखेन स्वर्गं त्वन्निष्ठदुःखफलकसुखविशेषमपि नाभिरोचये तेन त्वां सह नेष्यामीति सूचितम् । पूर्वोक्तभयादिकमप्यकिंचित्करमित्याह स्वयं

---

१ तत्त्वेवामलेति गो. पाठः ।

तव सर्वमभिप्रायमविज्ञाय शुभानने । वासं न रोचयेऽरण्ये शक्तिमानपि रक्षणे ॥ २८ ॥
यत्सृष्टासि मया सार्धं वनवासाय मैथिलि । न विहातुं मया शक्या प्रीतिरात्मवता यथा ॥ २९ ॥
धर्मस्तु गजनासोरु सद्भिराचरितः पुरा । तं चाहमनुवर्तिष्ये यथा सूर्यं सुवर्चला ॥ ३० ॥
न खल्वहं न गच्छेयं वनं जनकनन्दिनि । वचनं तन्नयति मां पितुः सत्योपबृंहितम् ॥ ३१ ॥
एष धर्मश्चे सुश्रोणि पितुर्मातुश्च वश्यता । आज्ञां चाहं व्यतिक्रम्य नाहं जीवितुमुत्सहे ॥ ३२ ॥
अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते । स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ॥ ३३ ॥

भोः स्वयंप्रकाशसर्वावभासकब्रह्मण इव मे भयं नास्ति स्वयं भोरित्यत्र भाषातोरौणादिको डुः ॥ २७ ॥

गो० टी०–नेति । तव दुःखेन हेतुना प्राप्यं स्वर्गमपि न रोचये त्वयि दुःखितायां स्वर्गमपि नेच्छामीत्यर्थः स्वयंभोः नारायणस्य न तु चतुर्मुखस्य तस्य मधुकैटभादिभ्यो भयसंभवात् आर्षो डुप्रत्ययः सर्वतः सर्वजन्तुभ्यः ॥ २७ ॥

२८] ति० टी०–सर्वं समग्रमान्तरमभिप्रायमविज्ञाय तत एव हेतोस्तव वनवासं न रोचये नाङ्गीकृतवान् इतः प्रागिति शेषः ॥ २८ ॥

रा० टी०–ननु गमननिवारकवाक्यं पूर्वं कथमुक्तमित्यत आह–तवेति । तवाभिप्रायं सहगमनविषकत्वदिच्छामविज्ञाय तवारण्ये वासं न रोचये । एतेन त्वदभिप्रायाविज्ञानार्थमेव पूर्वमुक्तमिति सूचितम् ॥ २८ ॥

गो० टी०–तवेति । तव निरहदुःखासहिष्णुरपि निर्भयोऽपि शक्तिमानपि तवान्तराभिप्रायानभिज्ञानादेतावत्पर्यन्तं त्वां वनं नेतुं नेच्छामीति भावः ॥ २८ ॥

२९] ति० टी०–यत्सृष्टासि निश्चितासि मया सार्धं वनवासाय गन्तुमिति शेषः, यद्वा सृष्टास्यवतीर्णासि अतस्त्वं मया विहातुं न शक्या आत्मवतात्मज्ञेन यथा प्रीतिर्दया हातुमशक्या ॥ २९ ॥

रा० टी०–यदिति । यद्यस्माद्धेतोः मया सार्धं वनवासाय सृष्टा निश्चयं प्राप्ता किंच सृष्टा प्रकटितासि अतः विहातुं त्यक्तुं मया त्वं न शक्या तत्र दृष्टान्तः आत्मवता परमात्मविषयकविज्ञानविशिष्टेन प्रीतिः तद्विषयकस्नेहो यथा ॥ २९ ॥

गो० टी०–यदिति । सृष्टा दैवेनेति शेषः आत्मवता शीलवता अतिकृच्छ्रावस्थायामप्यक्षुभितमनस्केन वा यच्छब्दयोगात्तदिति पूरणीयम् ॥ २९ ॥

३०] ति० टी०–सर्वथा त्वां सह नेष्यामीत्याह–धर्मस्त्विति । वानप्रस्थधर्म इत्यर्थः तं पूर्वाचरितधर्मम् त्वं च यथा सूर्यं सुवर्चलानुवर्तते तथा मामनुवर्तस्व ॥ ३० ॥

रा० टी०–धर्म इति । हे गजनासोरु गुप्तादप्यसदृशोरुविशिष्टे यो धर्मः पुरा सद्भिराचरितः तं पतिव्रताधर्मसहचरणधर्ममनुवर्तिष्ये प्रवर्तयिष्यामि अतः सूर्यं सुवर्चला तत्पत्नीव मामनुवर्तस्वेति शेषः ॥ ३० ॥

गो० टी०–इदं पत्न्या सह वनगमनं रागप्राप्तं न भवति-अपि तु शिष्टाचारसिद्धमित्याह–धर्म इति । धर्मः वानप्रस्थधर्मः सद्भिः सपत्नीकै राजर्षिभिः यथा सूर्यं सुवर्चलेतिभिन्नलिङ्गयोरप्यौपम्यमार्षम् यथा सूर्यं सुवर्चला देवी तद्वन्मामनुवर्तस्वेति वार्थः ॥ ३० ॥

३१] ति० टी०–मम तु गमनं निश्चितमेवेत्याह–न खल्विति । अहं वनं न गच्छेयमिति न, किं तु सर्वथा गच्छेयमेव यतस्तत्पितुर्वचनं मां नयति ॥ ३१ ॥

रा० टी०–स्वगमनस्यावश्यकत्वं बोधयन्नाह–नेति । सत्योपबृंहितं सत्यसंयुक्तं पितुर्वचनं मां वनं नयति अतो वनं न गच्छेयमिति न गमिष्याम्येवेत्यर्थः ॥ ३१ ॥

गो० टी०–न खल्विति । सत्योपबृंहितं पितुर्वचनं मां वनं नयति खलु तत्तस्मात्कारणादहं न गच्छेयमिति न अयैव गच्छेयमेवेत्यर्थः ॥ ३१ ॥

३२] ति० टी०–ननु यदि तव नेच्छा तदा पितृवच्च उज्झित्वापि तिष्ठेत्याह–एष धर्म इति । एतत्पदार्थः पितुर्मातुश्च वश्यतेष्टानुवर्तिता अतोऽहं तदाज्ञां व्यतिक्रम्य जीवितुं नोत्सह इति मया निश्चितम् ॥ ३२ ॥

रा० टी०–पितुराज्ञापालनस्यावश्यकत्वं बोधयन्नाह–एष इति । पित्रादिवश्यता धर्मः अत एव व्यतिक्रम्य उज्झित्वा जीवितुं प्रजाः पालयितुं नोत्सहे ॥ ३२ ॥

गो० टी०–एष इति । पितुर्मातुश्च वश्यतेत्येष एव धर्मः वश्यता विधेयता अहं पितृवचनपरिपालनोद्युक्तोऽहं तं व्यतिक्रम्य मातापितृविधेयत्वरूपधर्मं व्यतिक्रम्य अहं जीवितुं नोत्सह इति संबन्धः ॥ ३२ ॥

३३] ति० टी०–अस्वाधीनमप्रत्यक्षत्वात्तादृशं दैवं प्रकारैर्भावनामात्रसाध्याराधनप्रकारैः स्वाधीनं प्रत्यक्षदृश्यमानत्वात् ॥ ३३ ॥

रा० टी०–अस्वाधीनमिति । स्वाधीनं प्रत्यक्षस्वसेवायत्तत्वविशिष्टं मात्रादिकं समतिक्रम्य अस्वाधीनमप्रत्यक्षत्वेन प्रत्यक्षस्वसेवायत्तत्वरहितं दैवं स्वेप्सितदेवताप्रकारैः क्रियाभिः कथमभिराध्यते एतेन गुरूपदिष्टपथेनैव देवा आराधनीया इति सूचितम् ॥ ३३ ॥

गो० टी०–मा भूत् पितृवचनकरणं दैवमाराध्यास्माभिर-

---

१ अनुवर्तेऽद्यति गो. पाठः । २ त्विति गो. पाठः । ३ अतश्च तमिति गो. पाठः ।

यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि । नान्यदस्ति शुभापाङ्गे तेनेदमभिराध्यते ॥ ३४ ॥
न सत्यं दानमानौ वा यज्ञो वाप्याप्तदक्षिणः । तथा बलकराः सीते यथा सेवा पितुर्मता ॥ ३५ ॥
स्वर्गो धनं वा धान्यं वा विद्या पुत्राः सुखानि च । गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम् ॥ ३६ ॥
देवगन्धर्वगोलोकान्ब्रह्मलोकांस्तथापरान् । प्राप्नुवन्ति महात्मानो मातापितृपरायणाः ॥ ३७ ॥
स मा पिता यथा शास्ति सत्यधर्मपथे स्थितः । तथा वर्तितुमिच्छामि स हि धर्मः सनातनः ॥ ३८ ॥
मम सन्ना मतिः सीते नेतुं त्वां दण्डकावनम् । वसिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ॥ ३९ ॥
सा हि दिष्टानवद्याङ्गि वनाय मदिरेक्षणे । अनुगच्छस्व मां भीरु सहधर्मचरी भव ॥ ४० ॥

त्रय स्थातव्यमित्यत्राह-अस्वाधीनमिति । अस्वाधीनमाराधकानधीनं स्वतन्त्रमिति यावत्, यद्वा अस्वाधीनं प्रत्यक्षतया अनाज्ञापयत् स्वाधीनं प्रत्यक्षतया नियोजयन्तं गुरुम् गुरुं चेत्यर्थः प्रकारैः आराधनप्रकारैः ॥ ३३ ॥

३४] ति० टी०-यत्र पित्राद्याराधने सति त्रयं धर्मार्थकामरूपं भवति त्रयो लोकाश्चाराधिता भवन्ति अनेन तदाराधनेन लोकत्रयान्तर्गतसकलदेवताराधनफलं दर्शितम् अतस्तत्समममन्यत्पवित्रं पुण्यजनकम् यद्वा पवित्रमहाभयरूपः संसारः 'पवित्रं त्रं महाभयम्' इत्यभिधानात् । तस्मात्त्रायते तत्तेन संसारतारकमित्यर्थः अन्यत्त्रैलोक्ये नास्ति तेन भुवि स्थितैरिदमाराध्यते ॥ ३४ ॥

रा० टी०-यत्रेति । यत्र मात्राद्याराधने त्रयं धर्मार्थकामाः अस्तीति शेषः अत एव त्रयः उर्ध्वाधोमध्यवर्तिनः लोकाः जना यत्र वर्तन्त इति शेषः अतस्तत्समं मात्राद्याराधनसदृशं पवित्रं भुवि कस्मिंश्चिद्देशे अन्यन्नास्ति तेन हेतुना इदं पितृवचनमभिराध्यते परिपाल्यते अर्थशब्देन परमपुरुषार्थभूतमोक्षस्यापि ग्रहणान्न व्याख्याने न्यूनता अत एव त्रयमित्युक्तिः सानुकूला ॥ ३४ ॥

गो० टी०-यादिति । यत् गुर्वादित्रयं तत् त्रयो लोकाः लोकत्रयमपि तदाराधनसाध्यमित्यर्थः भुवि तत्समं पवित्रमन्यन्नास्ति गगनं गगनाकारमितिवत् स्वस्य स्वेनौपम्यसंभवात्त्वाद्यर्थमन्यपदं तेन कार्त्स्न्येन इदं गुर्वादित्रयमभिराध्यते॥३४॥

३५] ति० टी०-बलकराः परलोकबलकराः तद्धिताबहा इति यावत् ॥ ३५ ॥

रा० टी०-नेति । यथा पितुः पित्रादेः सेवा बलकरी प्राबल्यसंपादिका मता निश्चिता तथा सत्यादयः आप्तदक्षिणः आप्ता ब्राह्मणैः आप्ता दक्षिणा यस्मिन् स यज्ञश्च न बलकराः बलकरा इति लिङ्गवचनविपरिणामेनान्यत्राप्यन्वेति । 'हिता' इति पाठान्तरम् ॥ ३५ ॥

गो० टी०-पितृवाक्यस्य सत्यादिवैलक्षण्यमाह-न सत्यमिति । हिताहितकरी पितुः सेवा यथा बलकरी तथा सत्यादयः न बलकराः न परलोकबलकराः न पारत्रिकाभ्युदयसाधका इत्यर्थः ॥ ३५ ॥

३६-३७] ति० टी०-गुरुवृत्तिर्गुरुचित्तवृत्तिः ॥३६॥३७॥

रा० टी०-तदेव दृढयन्नाह-स्वर्ग इति । गुरुवृत्त्यनुरोधेन गुर्वादिसेवानुरूपेण स्वर्गादिकं किंचिदपि दुर्लभं न सेवानुरूपं फलं भवत्येवेत्यर्थः ॥ ३६ ॥

गो० टी०-स्वर्ग इति । स्वर्गादीनि गुरुवृत्त्यनुरोधेन सिध्यन्तीति शेषः गुरूणां मात्रादीनां वृत्तिः शुश्रूषणं तदनुरोधेन तदनुवर्तनेन 'अनुरोधोऽनुवर्तनम्' इत्यमरः । व्यतिरेकेणाप्याह-न किंचिदिति ॥ ३६ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-देवेति । मातापितृपरायणाः मात्रादिभक्ताः ॥ ३७ ॥

गो० टी०-देवगन्धर्वेति । क्रमेण ब्रह्मलोकं प्राप्नुवन्तीति भावः नरा इति सर्ववर्णसाधारण्योक्तिः महात्मानः दृढमनस्काः मातेति तच्छुश्रूषणैकरता इत्यर्थः ॥ ३७ ॥

३८] ति० टी०-मा माम् ॥ ३८ ॥

रा० टी०-स इति । मा मां शास्ति आज्ञापयति ॥३८॥

गो० टी०-स इति । मा मां सः स्वतन्त्रः वर्तितुमनुष्ठातुं सः वर्तनम् धर्मापेक्षया पुंस्त्वम् ॥ ३८ ॥

३९] ति० टी०-यतो वने वसिष्यामीति दृढनिश्चयेन त्वं मामनुयातुं निश्चिता अतस्त्वां दण्डकावनं नेतुं मम या मतिस्तद्विरुद्धा या मतिरासीत्सेदानीं सन्ना विशीर्णा ॥ ३९ ॥

रा० टी०-ममेति । वसिष्यामि वत्स्यामि पत्या सहेति शेषः इति हेतोः मामनुयातुं यतस्त्वं सुनिश्चिता अतस्त्वां नेतुं मम मतिः सन्ना प्राप्ता ॥ ३९ ॥

गो० टी०-ममेति । सन्ना त्वद्भावपरिज्ञानात् क्षीणा सा त्वं मया सह वसिष्यामीति मामनुयातुं सुनिश्चिता तेन इदानीं ज्ञातासीति भावः ॥ ३९ ॥

४०] ति० टी०-सा त्वं हि यतोऽधुना वनाय वनगमनाय दिष्टा मयानुज्ञाता, अतो मामनुगच्छस्व । सहधर्मचरी भवेत्यनेन वनवाससाध्यस्य स्वधर्मस्य रक्षोवधजस्य त्वया विनासंभव इति सूचितम् ॥ ४० ॥

रा० टी०-सेति । वनाय वनं गन्तुं यतः दिष्टा आज्ञप्ता तस्मान्मामनुगच्छस्व ॥ ४० ॥

गो० टी०-सेति । सृष्टा दैवेनेति शेषः ॥ ४० ॥

---

१ यत्रयं तत्रय इति गो. पाठः । २ न यज्ञश्चाप्तदक्षिणा इति गो. पाठः । ३ हितेति गो. पाठः । ४ नरा इति गो. पाठः । ५ सृष्टेति गो. पाठः ।

सर्वथा सदृशं सीते मम स्वस्य कुलस्य च । व्यवसायमनुक्रान्ता कान्ते त्वमतिशोभनम् ॥ ४१ ॥
आरभस्व शुभश्रोणि वनवासक्षमाः क्रियाः । नेदानीं त्वदृते सीते स्वर्गोऽपि मम रोचते ॥ ४२ ॥
ब्राह्मणेभ्यश्च रत्नानि भिक्षुकेभ्यश्च भोजनम् । देहि चाशंसमानेभ्यः संत्वरस्व च मा चिरम् ॥ ४३ ॥
भूषणानि महार्हाणि वरवस्त्राणि यानि च । रमणीयाश्च ये केचित्क्रीडार्थाश्चाप्युपस्कराः ॥ ४४ ॥
शयनीयानि यानानि मम चान्यानि यानि च । देहि स्वभृत्यवर्गस्य ब्राह्मणानामनन्तरम् ॥ ४५ ॥
अनुकूलं तु सा भर्तुर्ज्ञात्वा गमनमात्मनः । क्षिप्रं प्रमुदिता देवी दातुमेव प्रचक्रमे ॥ ४६ ॥
[ततः प्रहृष्टा प्रतिपूर्णमानसा यशस्विनी भर्तुरवेक्ष्य भाषितम् ।
धनानि रत्नानि च दातुमङ्गना प्रचक्रमे धर्मभृतां मनस्विनी ॥ ४७ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ।

श्रुतरामसीतासंवादो लक्ष्मणो धनुर्धरोऽहं तेऽग्रेसरो भवामीति रामं प्रार्थयत रामस्तंन्यषेधीत् पूर्वं कृताङ्गीकारोऽपि किमिति निषेधसीति पृष्टे मातृपालनं त्वया कार्यमिति बहुशः सान्त्व्यमानोऽपि मादृक्सहस्रपालनसमर्थानां मातॄणां कोऽहं पालक इति कैमुत्येन तन्न्यषेधीत् रामस्तद्गमनमनुमत्यात्मीयधनदानपात्रीभूतान्सुयज्ञादिऋषीनानाययितुं लक्ष्मणं प्राचोदयत् ।

एवं श्रुत्वा तु संवादं लक्ष्मणः पूर्वमागतः । बाष्पपर्याकुलमुखः शोकं सोढुमशक्नुवन् ॥ १ ॥

४१] ति० टी०–व्यवसायं भर्तृानुसरणनिश्चयमनुक्रान्ता प्रकर्षेण प्राप्ता प्रीत्यतिशयात्संबोधनद्वयम् ॥ ४१ ॥

रा० टी०–सर्वथेति । मम कुलस्य स्वस्य स्वकीयस्य कुलस्य त्वत्पितृकुलस्येत्यर्थः सदृशं योग्यं व्यवसायं सहगमनविषयकनिश्चयमनुक्रान्ता प्राप्ता अतोऽतिशोभनमेतत् ॥ ४१ ॥

गो० टी०–सर्वथेति । व्यवसायं भर्तृानुसरणाध्यवसायमतिक्रान्ता प्रकर्षेण प्राप्ता 'प्रकर्षे लङ्घनेऽप्यति' इत्यमरः ॥४१॥

४२] ति० टी०–क्रिया दानादिक्रियाः । इदानीमेवं दृढनिश्चये ॥ ४२ ॥

रा० टी०–आरभस्वेति । वनवासक्षमाः वनवासोचिताः क्रिया आरभस्व ॥ ४२ ॥

गो० टी०–आरभस्वेति । वनवासक्षमाः वनवासहिताः 'क्षमं शक्ते हिते त्रिषु ' इत्यमरः । क्रियाः दानादिक्रियाः ॥ ४२ ॥

४३] ति० टी०–रत्नान्युत्तमवस्तूनि भोजनमाशंसमानेभ्यो भिक्षुकेभ्यो भोजनं देहि ॥ ४३ ॥

रा० टी०–ब्राह्मणेभ्य इति । आशंसमानेभ्यः मङ्गलोच्चारयितृभ्यः भिक्षुकेभ्यो ब्राह्मणेभ्यः रत्नानि उत्तमपदार्थान् भोजनं च देहि संत्वरस्व मा चिरं विलम्बं न कुरु ॥ ४३ ॥

गो० टी०–ब्राह्मणेभ्य इति।आशंसमानेभ्यः अर्थयमानेभ्यः ४३

४४] ति० टी०–क्रीडार्था उपस्कराः स्वर्णमयपुत्रिकाद्युपकरणानि ॥ ४४ ॥

४५] ति० टी०–शयनीयानि मम च चात्स्वस्य अन्यानि यानि च वस्तूनीति शेषः । ब्राह्मणानामनन्तरब्राह्मणदानोत्तरमवशिष्टानि भृत्यवर्गेभ्यो देहीत्यर्थः ॥ ४५ ॥

रा० टी०–भूषणानीति । ब्राह्मणानां ब्राह्मणसंप्रदानकदानानामनन्तरं महार्हाणि अतिपूज्यानि क्रीडार्थाः क्रीडामात्रप्रयोजनकाः उपस्कराः सामग्र्यः मम शयनीयादीनि च स्वभृत्यवर्गेभ्यो देहि । श्लोकद्वयमेकान्वयि ॥ ४४ ॥ ४५ ॥

गो० टी०–भूषणानीति । क्रीडार्थाश्चाप्युपस्कराः जातरूपमयकृत्रिमपुत्रिकालीलापाकभाजनादिविचित्रोपकरणानि ब्राह्मणानामनन्तरं स्वभृत्यवर्गस्य देहीति संबन्धः ॥ ४४ ॥ ४५ ॥

४६] ति० टी०–अनुकूलमिष्टं गमनं वनानुगमनम्॥४६॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०–अनुकूलमिति । आत्मनो गमनं भर्तुरनुकूलं ज्ञात्वा प्रमुदिता सती क्षिप्रं दातुं प्रचक्रमे ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रिंशः सर्गः ॥ ३० ॥

गो० टी०–अनुकूलमिति । अनुकूलं संमतम् ॥ ४६ ॥

गो०टी०–तत इतिप्रतिपूर्णमानसा निश्चिन्ता इत्यर्थःअवेक्ष्य आलोच्य धर्मभृतां धर्मभृद्भ्यः मनस्विनी निश्चित मनस्का ४७

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

१] ति० टी०–संवादम् रामसीतयोरिति शेषः । पूर्वमागतः कौसल्यागृहाद्रामसीतासंवादप्रदेशे पूर्वमेवागतः शोकं स्वस्य वनगमनमङ्गीकरोति न वेति शङ्क्या संभावितरामविरहजम् ॥ १ ॥

१ अतोति गो. पाठः । २ उपचक्रमे इति गो. पाठः । ३ श्लोकोऽयमधिको गो. पाठे । ४ त्विति गो. पाठः ।

स भ्रातुश्चरणौ गाढं निपीड्य[1] रघुनन्दनः । सीतामुवाचातियशा[2] राघवं च महाव्रतम् ॥ २ ॥
यदि गन्तुं कृता बुद्धिर्वनं मृगगजायुतम्[3] । अहं त्वानुगमिष्यामि वनमग्रे धनुर्धरः[4] ॥ ३ ॥
मया समेतोऽरण्यानि रम्याणि विचरिष्यसि[5] । पक्षिभिर्भृङ्गयूथैश्च संघुष्टानि समन्ततः[6] ॥ ४ ॥
न देवलोकाक्रमणं नामरत्वमहं वृणे । ऐश्वर्यं चापि लोकानां कामये न त्वया विना ॥ ५ ॥
एवं ब्रुवाणः सौमित्रिर्वनवासाय निश्चितः । रामेण बहुभिः सान्त्वैर्निषिद्धः पुनरब्रवीत्[7] ॥ ६ ॥
अनुज्ञातस्तु भवता पूर्वमेव यदस्म्यहम्[8] । किमिदानीं पुनर्[9]रपि क्रियते मे निवारणम् ॥ ७ ॥

रा० टी०–सीतारामयोर्वृत्तमुक्त्वा लक्ष्मणवृत्तमुपक्रमत्राह–एवमिति । पूर्वमागतः पौर्वकालिकागमनविशिष्टः बाष्पपर्याकुलमुखः अश्रुव्याप्तमुखविशिष्टः स लक्ष्मणः एवमनेन प्रकारेण संवादं सीतारामोक्तिप्रत्युक्ती श्रुत्वा शोकं रामवियोगहेतुकसंतापं सोढुमशक्नुवन्सन्नासेति शेषः ॥ १ ॥

गो० टी०–एवं रामेण सीतागमनेऽङ्गीकृते लक्ष्मणस्यानुगमनप्रार्थनमुपक्षिपति–एवमित्यादिना । श्लोकद्वयमेकं वाक्यम् । एवं संवादं पूर्वोक्तं सीतारामयोः संवादं पूर्वमागतः कौसल्यागृहाद्रामेण सह पूर्वमेवागतः शोकमर्षशरीरभूतायाः सीताया अपि वनानुगमनं कृच्छ्रादप्यङ्गीकृतं मम कथं तत्संभविष्यतीति विचारजं शोकं स्वानुवृत्तिरूपप्रयोजनाय सीता पुरुषकारेण रामे शरणायतिं विधत्ते–स भ्रातुरिति । सः रामानुवृत्तिरूपप्रयोजनाय उपायान्तरशून्यः भ्रातुरित्यवर्जनीयसंबन्धकथनाच्छरण्यत्वमुक्तम् चरणौ निपीड्येति शरणागत्युक्तिः गाढमित्यश्लथत्वोक्त्या महाविश्वास उक्तः रघुनन्दनः लक्ष्मणः अतियशाः आनुकूल्यसंकल्पप्रातिकूल्यवर्जनवान् आदौ सीतां पुरुषकारत्वेन परिगृह्योवाच पश्चात्तत्पुरुषकारेण महाव्रतं न त्यजेयं कथंचन एतद्व्रतं मम इत्युक्तगुरुतरव्रतयुक्तं राघवं रघुराक्षससंवादादिप्रसिद्धकुलधर्मशरणागतरक्षणं च उवाच शरणागतेः सर्वफलप्रदत्वेन स्वाभिमतफलं विज्ञापयामास निपीड्येत्यन्तेन द्वयस्य पूर्वखण्डोक्तशरणागतिरुदिता, राघवमुवाचेत्यनेनोत्तरखण्डोक्तफलप्रार्थनोक्ता, सीतामुवाचेत्युभयत्र पुरुषकारपरिग्रहोक्तिः ॥ १ ॥ २ ॥

२] ति० टी०–भ्रातुश्चरणौ गाढं निपीड्य प्रणम्येति यावत् । अतियशाश्रुतकृष्टकीर्तिमतीं सीतां चक्षुरादिभिः प्रार्थयन् महाव्रतं वनवासलक्षणमहाव्रतकृतनिश्चयं रामं तूवाच चस्त्वर्थे । स्वाभिमतप्राप्तौ सीताशरणागमनमेव मदनमङ्गीकारयत्येवं मुख्य उपाय इति मत्वा तत्प्रार्थना ॥ २ ॥

रा० टी०–स इति । अतियशाः स रघुनन्दनो लक्ष्मणः भ्रातुः रामस्य चरणौ गाढं दृढं निष्पीड्य सीतां राघवं रामं चोवाच ॥ २ ॥

३–४] ति० टी०–बुद्धिर्युवाभ्यामिति शेषः । त्वा त्वां वनगन्तारम् । अनुगमिष्यामि । अनुः सहार्थे । गमनकाले चाग्रत एव धनुर्धरो गमिष्यामि ॥ ३ ॥ ४ ॥

रा० टी०–तद्वचनमेवाह–यदीति । मृगगजायुतं मृगगजैरायुतं व्याप्तम् एतेन स्वनिष्ठभीत्यभावः सूचितः ॥ ३ ॥

रा० टी०–स्वानुगमने प्रयोजनमाह–मयेति । समेतो युक्तः बहूनि अनेकविधानि ॥ ४ ॥

गो० टी०–कैङ्कर्यप्रार्थनमेवाह–यदीति । यदीत्यनेन रामस्य वनगमनं स्वानभिमतमित्युक्तम् । कैङ्कर्यसाधनमाह–धनुर्धर इति । धनुर्धरत्वे हेतुमाह–मृगेति । अहं त्वा अनु पश्चादग्रे च वनं गमिष्यामि तवाग्रे पश्चाद्वा यत्र दुष्टमृगशङ्का तत्र सावधानो गमिष्यामीत्यर्थः अत एव मया समेत इति वक्ष्यति मया धनुर्धरेण मया त्वदीयं धनुर्वहतेति वार्थः बहूनीत्यनेन सर्वदेशसर्वकालसर्वावस्थोचितसर्वविधकैङ्कर्यप्रार्थनं कृतम् ॥ ३ ॥ ४ ॥

५–६] ति० टी०–नन्विहैव भोगान्भुक्त्वा स्थातव्यमित्यत्राह–नेति । आक्रमणमारोहः ॥ ५ ॥ ६ ॥

रा० टी०–रामवियुक्तस्थाने स्वस्थित्ययोग्यतां बोधयन्नाह–नेति । देवलोकाक्रमणं नहुषादिवद्देवलोकगमनं त्वया विना न वृणे स्वीकरोमि अमरत्वं देवत्वं च लोकानां भुवनानामैश्वर्यमाधिपत्यं च न कामये ॥ ५ ॥

रा० टी०–एवमिति । वनवासाय वनवासं कर्तुं निश्चितः एवं ब्रुवाणः सौमित्रिर्लक्ष्मणः बहुभिः अनेकविधैः सान्त्वैः वियोगश्रुतिहेतुकोद्वेगशामकैः वचनैः रामेण निषिद्धो वनगमनान्निवारितोऽपि पुनरब्रवीत् ॥ ६ ॥

गो० टी०–अनन्योपायत्ववदनन्यप्रयोजनत्वमाह–नेति । देवलोकाक्रमणं देवानां पूरयोध्येत्युक्तपरमपदप्राप्तिं त्वया विना न वृणे स्वत्कैङ्कर्यं विना कृतं मोक्षमपि न वाञ्छामीत्यर्थः । अमरत्वं जरामरणमोक्षायेत्युक्तं कैवल्याख्यं मोक्षमपि न वृणे लोकानामैश्वर्यं त्रिलोकाधिपतित्वं ब्रह्मत्वमिति यावत् मोक्षमप्यकामयमानोऽहं कथं कैवल्यादिकं कामयेयेति भावः, यद्वा अवरोहकमेण त्रैलोक्यैश्वर्यादिकमपि न कामय इति अतो न पतत्प्रकर्षदोषः देवलोकगमनं देवत्वमिन्द्रत्वं वा न कामय इति वाक्यार्थस्तुच्छः ॥ ५ ॥ ६ ॥

७] ति० टी०–पूर्वमेव भवतानुज्ञातः । तस्मादपरितापः संस्त्वमप्युद्यविधाय माम् । प्रतिसंहारय क्षिप्रमाभिषेचनिकीं क्रियामित्युक्तेः । किं च पूर्वम् अवतरणसमय इत्यप्यर्थः ॥ ७ ॥

१ निष्पीड्येति रा. पाठः । २ यशा इति गो. रा. पाठः । ३ बहूनीति गो. पाठः । ४ मृगेति गो. रा. पाठः । ५ वेति गो. पाठः । ६ इदमिति गो. पाठः । ७ प्रार्थयमान इति युक्तं भाति ।

यदर्थं प्रतिषेधो मे क्रियते गन्तुमिच्छतः । एतदिच्छामि विज्ञातुं संशयो [1]हि ममानघ ॥ ८ ॥
ततोऽब्रवीन्महातेजा रामो लक्ष्मणमग्रतः । स्थितं प्राग्गामिनं [2]धीरं याचमानं कृताञ्जलिम् ॥ ९ ॥
स्निग्धो धर्मरतो [3]धीरः सततं सत्पथे स्थितः । प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे ॥ १० ॥
मयाद्य सह सौमित्रे त्वयि गच्छति तद्वनम् । को भजिष्यति कौसल्यां सुमित्रां वा यशस्विनीम्॥११ ॥
अभिवर्षति कामैर्यः पर्जन्यः पृथिवीमिव । स कामपाशपर्यस्तो महातेजा महीपतिः ॥ १२ ॥
सा हि राज्यमिदं प्राप्य नृपस्याश्वपतेः सुता । दुःखितानां सपत्नीनां न करिष्यति शोभनम् ॥ १३ ॥

रा० टी०—तद्वचनमेवाह—अन्विति । भवता पूर्वमेवानुज्ञातः आनुमानिकगमनकर्मिकाज्ञाविषयीभूतः अत एव यद्गमनविषकयत्नवानहमस्मि इदानीं तु मे मम निवारणं गमनप्रतिषेधो भवता क्रियते इदं किं न युक्तमित्यर्थः । अनुमानप्रकारस्तु त्वया भरतशत्रुघ्नौ प्राणैः प्रियतरौ ममेति सीतां प्रति भवदुक्तेः अहं सहगमनविषयकरामाज्ञापितः मद्विषयकानुशासनान्तराभावान्नित्यसहचारिराजवर्गवत् ॥ ७ ॥

गो० टी०—अनुज्ञात इति । अनुज्ञातश्च अनुज्ञात एव 'उपक्रान्तं च यत्किंचिदभिषेकार्थमद्य मे । सर्वं विसर्जय क्षिप्रं कुरु कार्यं निरत्ययम्' इति वचनात् । अन्यत्र च 'तस्मादपरितापः संस्त्वमप्यनुविधाय माम् । प्रतिसंहारय क्षिप्रमाभिषेचनिकीः क्रियाः' इति । अपरत्र च 'भ्रातृपुत्रसमौ चापि द्रष्टव्यौ च विशेषतः । त्वया भरतशत्रुघ्नौ प्राणैः प्रियतरौ मम' इति भरतशत्रुघ्नयोरेवानुसरणीयत्वोक्तेरनुज्ञा सिद्धा ॥ ७ ॥

८] ति० टी०—एतत्प्रतिषेधप्रयोजनम् । संशयः पूर्वं केनाभिप्रायेणानुमतिः, इदानीं केनाभिप्रायेण प्रतिषेध इति संदेहः ॥ ८ ॥

रा० टी०—नन्वनुज्ञातस्य सत्त्वात्पूर्वं गमनायाज्ञापितः इदानीं तदभावान्निवार्यसे इत्यत आह—यदिति । गन्तुमिच्छतः मे यदर्थं प्रतिषेधः गमननिवारणं क्रियते एतद्विज्ञातुमहमिच्छामि तत्र हेतुः यतो मे संशयः गमनप्रतिषेधहेतोः प्राबल्याप्राबल्यविषयकसंदेहः ॥ ८ ॥

गो० टी०—यदर्थमिति । अनुज्ञातत्वेऽपि प्रतिषेधात् किमथ मयापराद्धमिति संशयः ॥ ८ ॥

९] ति० टी०—प्राग्गामिनं वनं प्रति प्रथमगमनाभिप्रायवन्तम् याचमानम् तत्रानुमतिमिति शेषः ॥ ९ ॥

रा० टी०—तत इति । अग्रतः अग्रे स्थितं प्राग्गामिनं रामगमनात्पूर्वमेव गमनशीलं रामगमननिश्चये सतीति शेषः याचमानं सहगमनं प्रार्थयन्तं धीरं कृताञ्जलिं लक्ष्मणं रामोऽब्रवीत् ॥ ९ ॥

गो० टी०—तत इति । स्थितमग्रतः स्थितं प्राग्गामिनं प्रागेव गन्तुमुद्युक्तं वीरं प्राग्गमनोचितवीर्यवन्तं याचमानं गमनाज्ञां याचमानं कृताञ्जलिं याच्ञाव्यञ्जकाञ्जलियुक्तम् ॥९॥

१०] ति० टी०—वश्यविधेयावसकृद्व्याख्यातौ ॥ १० ॥

रा० टी०—तद्वचनमेवाह—स्निग्ध इति । यद्यपि स्निग्धः मद्विषयकस्नेहवान् अत एव धर्मरतः मत्तोषककर्मनिष्ठः अत एव धीरः कर्मविषयकानवधानतारहितः अत एव सत्पथे वेदोक्तमार्गे स्थितः अत एव प्राणसमः प्राणप्रतियोगिकसादृश्यानुयोगी अत एव प्रियः मन्निष्टप्रीतिविषयीभूतः अत एव अवश्यः मदतिरिक्तनिरूपितवश्यत्वानाक्रान्तः अत एव विधेयः मयाऽवश्यं धारणीयः अत एव मे सखा तथापि हे सौमित्रे ! मया सह त्वयि तन्मज्जिगमिषितं वनं गच्छति सति कौशल्यां सुमित्रां च को भजिष्यति सेविष्यते 'भरिष्यति' इति पाठान्तरमिति भट्टाः । श्लोकद्वयमेकान्वयि । चशब्दौ यद्यपितथाप्यर्थौ वाशब्दार्थे ॥ १० ॥ ११ ॥

गो० टी०—स्निग्ध इत्यादिविशेषणानि स्वकार्यकरणार्हतानुगुणानि ॥ १० ॥

११] ति० टी०—को भजिष्यतीति । 'भरिष्यति' इति पाठान्तरम् । एवं च मातृसेवार्थमेव प्रतिषिद्ध्यते । अलंकारप्रतिसंहारोक्तिश्च उत्सवार्थधनाधिकालंकारविषया मदनुविधानं च मदिष्टाप्रतिबन्धरूपमिति भावः ॥ ११ ॥

गो० टी०—प्रतिषेधनिमित्तमाह—मयेति । कौसल्यादिभरणार्थमेव त्वं वारितोऽसि पूर्वानुज्ञा तु तात्कालिकपरिहारायेति भावः ॥ ११ ॥

१२-१३] ति० टी०—कामैरिष्टान्नपानैः । नन्वत्रैवास्या रक्षकस्तत्राह स इति । स कामपाशेन पर्यस्तः कैकेय्यनुरागेण बद्ध इत्यर्थः ॥ १२ ॥ १३ ॥

रा० टी०—नन्वनु राजैव पालयितेत्यत आह—अभीति । यो महीपतिः कामैः प्रजेप्सितैः पर्जन्य इव अभिवर्षति प्रजानिखिलमनोरथान्प्रापयदित्यर्थः स महीपतिः कामपाशपर्यस्तः कामेन स्वेच्छया यः पः पालनं तस्य यः अंशो व्याप्तिस्तस्मात्पर्यस्तो निवृत्तः आस्ते इति शेषः ॥ १२ ॥

गो० टी०—राजैव भरिष्यतीत्यत्राह—अभिवर्षतीति । कामपाशपर्यस्तः पराभिलाषरूपपाशेन संयत इत्यर्थः ॥ १२ ॥

रा० टी०—नन्वनु प्राप्तराज्याधिकारत्वात्कैकयी पालयितेत्यत आह—सेति । अश्वपतेः अश्वपतिनाम्नो नृपस्य सुता कैकयी शोभनमतिसंपन्नमिदं राज्यं प्राप्यापि दुःखितानां मद्वियोगजनितप्राप्तदुःखानां सपत्नीनां समीपे न करिष्यति राज्यं न पाल-

१ अयमिति गो. पाठः । २ वीरमिति गो. पाठः । ३ वीर इति गो. पाठः । ४ भ्राता चापीति गो. पाठः । ५ भरिष्यतीति गो. पाठः ।

न भरिष्यति कौसल्यां सुमित्रां च सुदुःखिताम् । भरतो राज्यमासाद्य कैकेय्यां पर्यवस्थितः ॥ १४ ॥
तामार्यां स्वयमेवेह राजानुग्रहणेन वा । सौमित्रे भर कौसल्यामुक्तमर्थमुं चर ॥ १५ ॥
एवं मयि च ते भक्तिर्भविष्यति सुदर्शिता । धर्मज्ञगुरुपूजायां धर्मश्चाप्यतुलो महान् ॥ १६ ॥
एवं कुरुष्व सौमित्रे मत्कृते रघुनन्दन । अस्माभिर्विप्रहीणाया मातुर्नो न भवेत्सुखम् ॥ १७ ॥
एवमुक्तस्तु रामेण लक्ष्मणः श्लक्ष्णया गिरा । प्रत्युवाच तदा रामं वाक्यज्ञो वाक्यकोविदम् ॥ १८ ॥
तवैव तेजसा वीर भरतः पूजयिष्यति । कौसल्यां च सुमित्रां च प्रयतो नास्ति संशयः ॥ १९ ॥
यदि दुःस्थो न रक्षेत भरतो राज्यमुत्तमम् । प्राप्य दुर्मनसा वीर गर्वेण च विशेषतः ॥ २० ॥
तमहं दुर्मतिं क्रूरं वधिष्यामि न संशयः । तत्पक्षानपि तान्सर्वांस्त्रैलोक्यमपि किं तु सा ॥ २१ ॥
कौसल्या बिभृयादार्या सहस्रं मद्विधानपि । यस्याः सहस्रं ग्रामाणां संप्राप्तमुपजीविनाम् ॥ २२ ॥

यिष्यतीत्यर्थः तेन केकय्यपि तदुःखदुःखिता भवितेति ध्वनितम्। हिरण्यर्थे ॥ १३ ॥

गो० टी०–तर्हि भरतो भरिष्यतीत्यपेक्षायां सोऽपि कैकयीपरवशो न भरिष्यतीत्याशयेनाह–सा हीत्यादि ॥ १३ ॥ १४ ॥

१४] ति० टी०–पुत्रत्वाद्भरतो रक्षिष्यतीत्यत्राह–न स्मरिष्यतीति । कैकेय्यां तन्नियोगे सपत्नीतिरस्कारविषयके पर्यवस्थितः प्रतिष्ठितः ॥ १४ ॥

रा० टी०–ननु भरतः पालयितेत्यत आह–नेति । केकय्यां न पर्यवस्थितः केकयीविषयकास्थारहितः केकय्या मद्वियोगहेतुत्वेन तद्विषयकौदासीन्यविशिष्ट इत्यर्थः भरतः कौसल्यां सुमित्रां च राज्यं च आसाद्य प्राप्य स्मरिष्यति मत्कर्मकोत्कण्ठापूर्वकस्मरणमेव करिष्यतीत्यर्थः एतेन भरतस्यापि पालनायोग्यत्वं सूचितम् ॥ १४ ॥

१५] ति० टी०–तर्हि मयापि कथं रक्षणं कर्तुं शक्यमत आह–राजानुग्रहणेन वा दशरथानुग्रहसंपादनेनेत्यर्थः ॥ १५ ॥

रा० टी०–तामिति । हे सौमित्रे ! राजानुग्रहणेन युक्तस्त्वम् आर्यां सर्वश्रेष्ठां तां कौशल्यां भर पालय उक्तं मया वर्णितमनुमर्थमिह स्थितौ प्रयोजनं चर जानीहि । गत्यर्थानां ज्ञानार्थकत्वप्रसिद्धेः प्रकृते चरो ज्ञानमर्थः ॥ १५ ॥

गो० टी०–मया वा कथं भर्तुं शक्यमित्यत आह–तामिति । राजानुग्रहणेन राजानुमत्या तदभावे स्वयमेव वा भरेत्यर्थः । अस्योत्तरं मा वदेत्याह–उक्तमर्थमिमं चरेति ॥ १५ ॥

१६] ति० टी०–मयि भक्तिर्मदाज्ञायाः पालनात् । गुरुः कौसल्यादिः ॥ १६ ॥

रा० टी०–नन्विह स्थितौ मत्कर्तृकत्वत्सेवाभङ्गः स्यादित्यत आह–एवमिति । एवं मदुक्तप्रकारेण ते गुरुपूजायां त्वत्कर्तृकमात्रादिशुश्रूषायां सत्यां सुदर्शिता विधिनोक्ता मम भक्तिः मत्कर्मिका सेवा भविष्यति अत एव अतुलः उपमारहितः महान्धर्मश्च भविष्यति ॥ १६ ॥

गो० टी०–त्वत्कैङ्कर्यपरस्य मे किमनेनेत्यत आह–एवमिति । एवम् एवं च सतीत्यर्थः मम मयीत्यर्थः गुरुपूजा मातृशुश्रूषणम् ॥ १६ ॥

१७–१८] ति० टी०–विप्रहीणाया वियुक्तायाः । नोऽस्माकम् ॥ १७ ॥ १८ ॥

रा० टी०–उपसंहरन्नाह–एवं कुरुष्वेति । हे रघुनन्दन ! हे सौमित्रे ! एवं मदुक्तप्रकारेण कुरुष्व मात्रादिसेवामिति शेषः । विपक्षे दोषमाह–विप्रहीणायाः त्यक्तायाः नः अस्माकम् ॥ १७ ॥

गो० टी०–एवमिति । अस्माभिः आवाभ्यां सीतया चेत्यर्थः नः नौ " अस्मदो द्वयोश्च " इति द्विवचनस्य बहुवचनम् ॥ १७ ॥

रा० टी०–एवमुक्त इति । श्लक्ष्णया सरसया प्रत्युवाच कथयामास ॥ १८ ॥

गो० टी०–एवमिति । वाक्यज्ञो वाक्यकोविदमिति उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथेत्युक्तवक्तृत्वविशिष्टं राममपि प्रतिवचनरचनाचातुर्येण तोषयितुं समर्थ इत्यर्थः ॥ १८ ॥

१९] ति० टी०–मातृसेवायां भरत एवास्तीत्याह–तवैवेति । अनेन रामोक्तानुपपत्तिपरिहारः । अप्रमेयबलराममातृसेवायां मम महाननर्थ इति मत्वा भरत एव तां पूजयिष्यतीत्यर्थः ॥ १९ ॥

रा० टी०–तद्वचनमेवाह–तवेति । तव तेजसा त्वत्प्रभावेणैव पूजयिष्यति संशयः अस्मिन्विषयसंदेहो नास्ति ॥ १९ ॥

गो० टी०–पूर्वं रामोक्तानुपपत्तिं परिहरति–तवैवेत्यादिना ॥ १९–२१ ॥

२०] ति० टी०–तदेव कालान्तरभवं भयं दर्शयति–यदीति । दुःस्थो दुर्मार्गस्थो राज्यं प्राप्येत्यन्वयः । दुर्मनसा कैकेय्यनुरोधादुष्टमनसा ॥ २० ॥

२१] ति० टी०–त्रैलोक्यमपि तत्पक्षं वधिष्यामीत्यनुकर्षः किं तु सेत्युत्तरश्लोकान्वयि ॥ २१ ॥

२२] ति० टी०–किं च स्वात्मभरणे कौसल्यायाः कस्याप्यपेक्षा नेत्याह–किं तु सा कौसल्येत्यादि । कुतस्तस्या एवं

---

१ इममिति गो. पाठः । २ ममेति गो. अपीति रा. पाठः । ३ नात्रेति गो. पाठः । ४ एतदादि श्लोकद्वयं गो. नास्ति ।

तदात्मभरणे चैव मम मातुस्तथैव च । पर्याप्ता मद्विधानां च भरणाय मनस्विनी ॥ २३ ॥
कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते । कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्प्यते ॥ २४ ॥
धनुरादाय सगुणं खनित्रपिटकाधरः । अग्रतस्ते गमिष्यामि पन्थानं तव दर्शयन् ॥ २५ ॥
आहरिष्यामि ते नित्यं मूलानि च फलानि च । वन्यानि च तथान्यानि स्वाहार्हाणि तपस्विनाम् ॥ २६ ॥
भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते । अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥ २७ ॥

शक्तिस्तत्राह-यस्या इति । यस्या उपजीविनामुपजीविभिः सहस्रं ग्रामाणां प्राप्तं वर्तते ॥ २२ ॥

रा० टी०-ननु भरतमात्रस्थितौ राजान्तरकृतोपद्रवः स्यादित्यत आह-यदिति । यतः राजादेर्हेतोः दुःस्थः चञ्चलचित्तः सन् भरत उत्तमं राज्यं न रक्षेत् तं वीरगर्वेण अहं वीर इत्यभिमानविशिष्टेन दुर्मनसा दुष्टान्तःकरणेनोपलक्षितं दुर्मतिं दुष्टनिश्चयवन्तमत एव विशेषतः क्रूरं राजादिं तान्प्रसिद्धान्सर्वांस्तत्पक्षान्प्राप्याहं वधिष्यामि । ननु बहुभिः सह विरोधे कथं त्वकर्तृकहननमित्यत आह-त्रैलोक्यमपि तत्पक्षं चेदहं वधिष्यामि एतेन स्वपराक्रमस्यातिमहत्त्वं सूचितं तेन रामसेवायाः प्रभावातिशयो ध्वनितः । इकारो वितर्कार्थकमव्ययम किंतु अपरञ्चक्यत इत्यर्थः । यस्याः उपजीविनामुपजीविभिः भृत्यादिभिरित्यर्थः ग्रामाणां सहस्रं संप्राप्तं सा कौसल्या मद्विधान् सहस्रमपि बिभृयात् । श्लोकत्रयमेकान्वयि ॥ २०-२२ ॥

२३] ति० टी०-यदेवं तदिति ॥ २३ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-तदिति । तदुक्तहेतोः आत्मभरणस्वरक्षणे मम मातुः मद्विधानां च भरणाय मनस्विनी कौशल्या पर्याप्ता ॥ २३ ॥

२४] ति० टी०-यदेवमतो ममानुचरं कुरुष्व मत्सेवामनुमन्यस्व । इह मत्सेवानुमतौ वैपरीत्यसाधकं न विद्यते त्वदुक्तहेतोरन्यथासिद्धेर्दर्शितत्वात् । तवार्थः फलमूलाद्याहरणरूपस्त्वत्प्रयासं विना प्रकल्प्यते प्रसिद्ध्यति । अहं च तेन कृतार्थो भवामि । अत उभयहितं मदनुगमनमिति भावः ॥२४॥

रा० टी०-कुरुष्वेति । यतः इह सहगमने वैधर्म्यं विरुद्धत्वं न विद्यते अतः मामनुचरं सहगमनकारिणं कुरुष्व अत एव अहं कृतार्थो भविष्यामि तवार्थः त्वत्कर्मकसेवेत्यर्थः प्रकल्पते सेद्धा "वर्तमानसामीप्य-" इति भविष्यति लट् ॥२४॥

गो० टी०-एवं रामोक्तं परिहृत्य प्रस्तुतं स्वाभिमतं कैङ्कर्यं प्रपञ्चयति-कुरुष्वेत्यादि । मां शेषभूतमनुचरं शेषत्वानुगुणकैङ्कर्ययुक्तं कुरुष्व तत्करणमपि तवैव प्रयोजनमित्यात्मनेपदाद्भुभ्यते वैधर्म्यं नेह विद्यते इहानुचरत्वकरणे वैधर्म्यं सेव्यसेवकधर्मराहित्यं नास्ति तव सेव्यधर्मः पर्याप्तः स्वामित्वात् मम सेवकधर्मश्च पूर्णः स्वाभाविकशेषत्वात्, यद्वा वैधर्म्यं वैपरीत्यसाधकं न विद्यते त्वदुक्तहेतोरन्यथासिद्धेरुक्तत्वादित्याशयः । अनुचरकरणस्य किं प्रयोजनमित्यपेक्षायामाह-तवेति । तवार्थः स्वावासं विना फलमूलाद्याहरणं प्रकल्पते सिध्यति अहं च कृतार्थः लब्धत्वत्कैङ्कर्यफलो भविष्यामि, यद्वा मां स्वाभाविकशेषभूतं मामनुचरं स्वरूपानुरूपशेषवृत्तियुक्तं कुरुष्व इहास्मिन् जने ऽपि वैधर्म्यं शेषत्वविपर्यासो नास्ति अनेन शेषत्वस्य स्वाभाविकत्वं तज्ज्ञानवतः फलं कैङ्कर्यं चेत्युक्तम् । कैङ्कर्याकरणे तव का हानिरित्याह-कृतार्थोऽहं भविष्यामीति अकिंचित्करवेतः शेषत्वानुपपत्तेरिति भावः । तच्च प्राप्यं कैङ्कर्यं निष्कृष्य दर्शयति-तव चेति । चोऽवधारणे तवैवार्थः न तु मम परार्थकैङ्कर्यस्यैव पुरुषार्थत्वादिति भावः । शेषत्वाध्यवसाय उपायः अस्यार्थशेषिकैङ्कर्यमेव फलमित्युपायोपेयनिष्कर्षोऽनेन कृत इति रहस्यं वैधर्म्यं नेह विद्यत इत्युक्तिः ज्येष्ठभ्रातुः पितृसमत्वात् । आवयोः श्रेयश्चास्तीत्याह-कृतार्थ इतीति केचिद्व्याचक्षते ॥२२॥

२५] ति० टी०-तदेव दर्शयति-धनुरित्यादिना । श्वापदादिभ्यो रक्षार्थं धनुर्ग्रहः । पिटका फलमूलाद्याहरणयोग्या वंशपेटी ॥ २५ ॥

रा० टी०-सेवामेव दर्शयन्नाह-धनुरिति । सगुणं ज्यासहितं खनित्रपिटकाधरः खनित्रेण कुद्दालादिना सहिता पिटका फलादिस्थापनयोग्यवंशादिनिर्मिता मञ्जूषाविशेषः तां धरति सः अत्र धनुर्ग्रहणं क्रूरजन्तुभर्त्सनार्थम् ॥ २५ ॥

गो० टी०-स्वकृतार्थत्वं प्रपञ्चयति-धनुरिति । धनुरादानं हिंस्रनिवारणाय खनित्रं मूलकन्दखननसाधनं कुद्दालादि पिटका अल्पार्थे क प्रत्ययः फलमूलाद्याहरणयोग्याल्पकण्डोलः 'कण्डोलपिटौ' इत्यमरः ॥ २३ ॥

२६] ति० टी०-स्वाहार्हाणि होमयोग्यानि हविर्भूतानि । स्वाहाराणि' इति पाठे सुष्ठ्वाहारयोग्यानि ॥ २६ ॥

रा० टी०-आहरिष्यामीति । अन्यानि शाकादीनि स्वाहार्हाणि स्वाहायोग्यानि 'स्वाहाराणि' इतिपाठे शोभनाहारसाधकानीत्यर्थः ॥ २६ ॥

गो० टी०-एवं मार्गे संभावितं कैङ्कर्यमुक्त्वा स्थाने संभावितमाह-आहरिष्यामीति । अन्यानि शाकप्रियालबीजक्षौद्रादीनि स्वाहाराणि सुखेनाहर्तुं भोक्तुं योग्यानि ॥ २४ ॥

२७] ति० टी०-स्वपतश्चेत्यनेन रात्रौ स्वस्य निर्निद्रत्वं ध्वनयति ॥ २७ ॥

रा० टी०-सेवान्तरमाह-भवानिति । गिरिसानुषु पर्वतशृङ्गेषु रंस्यते विहरिष्यते सर्वमाज्ञप्तमनुमतं चेत्यर्थः जाग्रतः स्वपतश्चेत्यनेन स्वस्य निद्रावशकर्तृत्वं सूचितम् ॥ २७ ॥

१ प्रकल्पते इति गो.रा.पाठः । २ सशरमिति गो.पाठः । ३ मन्विति गो.पाठः । ४ यानि चान्यानि स्वाहाराणीति गो.पाठः । ५ रस्यते इति गो.रा.पाठः ।

रामस्त्वनेन वाक्येन सुप्रीतः प्रत्युवाच तम् । व्रजापृच्छस्व सौमित्रे सर्वमेव सुहृज्जनम् ॥ २८ ॥
ये च राज्ञो ददौ दिव्ये महात्मा वरुणः स्वयम् । जनकस्य महायज्ञे धनुषी रौद्रदर्शने ॥ २९ ॥
अभेद्ये[1] कवचे दिव्ये तूणी चाक्षय्यसायकौ[2] । आदित्यविमलाभौ[3] द्वौ खड्गौ हेमपरिष्कृतौ ॥ ३० ॥
सत्कृत्य निहितं सर्वमेतदाचार्यसद्मनि । सर्वमायुधमादाय क्षिप्रमाव्रज लक्ष्मण ॥ ३१ ॥
स सुहृज्जनमामन्त्र्य वनवासाय निश्चितः । इक्ष्वाकुगुरुमागम्य जग्राहायुधमुत्तमम् ॥ ३२ ॥
तदिव्यं राजशार्दूलः[4] सत्कृतं माल्यभूषितम् । रामाय दर्शयामास सौमित्रिः[5] सर्वमायुधम् ॥ ३३ ॥
तमुवाचात्मवान्रामः प्रीत्या लक्ष्मणमागतम् । काले त्वमागतः सौम्य काङ्क्षिते[6] मम लक्ष्मण ॥ ३४ ॥
अहं प्रदातुमिच्छामि यदिदं मामकं धनम् । ब्राह्मणेभ्यस्तपस्विभ्यस्त्वया सह परंतप ॥ ३५ ॥
वसन्तीह दृढं भक्त्या गुरुषु द्विजसत्तमाः । तेषामपि च मे भूयः सर्वेषां चोपजीविनाम् ॥ ३६ ॥

गो० टी०—एवं सर्वदेशकर्तव्यकैङ्कर्याण्युक्तानि कैङ्कर्यस्य शिष्टविषयस्यैव रस्यत्वाद्विशिष्टविषयत्वमाह—भवांस्त्विति । अग्रतः स्वपतश्चत इत्यनेन सर्वकालसर्वावस्थोचितकैङ्कर्यमुक्तं वै करिष्यामीत्यनेन सर्वविधं कैङ्कर्यमुक्तम् तथा च देवी-शिष्टस्य शेषिणः सर्वदेशसर्वकालसर्वावस्थासु सर्वविधमपि कैङ्कर्यं शेषभूतेन कर्तव्यमिति दर्शितम् ॥ २९ ॥

२८] ति० टी०—अनेन वाक्येन स्वपतश्चेत्यन्तेन । व्रज व्रजेत्यनुव्रज आपृच्छस्व सुहृज्जनानामाज्ञां गृहाण ॥ २८ ॥

रा० टी०—राम इति । अनेन निर्हेतुकप्रीतिबोधकेन वाक्येन लक्ष्मणोक्त्या सुप्रीतो रामः प्रत्युवाच । तत्प्रतिवचनमेवाह—हे सौमित्रे ! त्वं व्रज मया सहेति शेषः अत एव सुहृज्जनं सुहृदं स्वसौहार्दं जनयति नित्यं प्रकटयति तं मात्रामित्यर्थः आपृच्छ अनुमतिं गृहाण अनुमतिकरणाज्ञापनं तत्संमाननं कर्तव्यमिति सूचितं तेन ते न नेतव्या इति ध्वनितम् ॥ २८ ॥

गो० टी०—रामस्त्विति । अनेनानुगमनाज्ञाव्यञ्जिता॥२६॥

२९] ति० टी०—महायज्ञे तुष्टो वरुणो राज्ञो जनकस्य धनुरादिकं ददौ तच्च जनकेनास्माकं यौतकत्वेन दत्तं तत्सर्वमाचार्यसद्मन्याचार्यं सत्कृत्य निहितं तदादाय क्षिप्रमाव्रजाच्छ । अत्रैवमनुवादादेव तत्र जनकाय वरुणकर्तृकधनुरादिकं रामलक्ष्मणाभ्यां च तत्कर्तृकतदानं बोध्यम् ॥ २९ ॥ ३० ॥

३१] ति० टी०—आयुधमिति जात्या ॥ ३१ ॥

रा० टी०—ये इति । राज्ञो जनकस्य महायज्ञे यद्धनुरादि राज्ञो जनकस्य वरुणः स्वयं ददौ तत्सर्वमाचार्यसद्मनि निहितं वेत्याहसमये जनकाज्ञप्त्येति शेषः एतत्सर्वमायुधमादाय गुरोर्गृहीत्वा क्षिप्रं शीघ्रमाव्रज आगच्छ जनकस्येत्युभयान्वयि उत्तरत्र जनकस्येति संबन्धसामान्ये षष्ठी । श्लोकत्रयमेकान्वयि ॥२९-३१॥

गो० टी०—ये चेत्यादि । जनकस्य राज्ञो यज्ञे महात्मा वरुणः स्वयमेव मह्यं यद्धनुरादिकं ददौ आचार्यसद्मनि आचार्यस्य गृहे पूजार्थं निहितं तदेतत्सर्वमायुधमादाय स आपृष्टसुहृज्जनस्त्वं क्षिप्रमाव्रजेत्यन्वयः । अत्र धनुरादिषु सर्वत्र द्विवचनादावयोर्दशावितिसिद्धं बालकाण्डेऽनुक्तोप्ययं वृत्तान्तोऽनुवादात्सिद्धः यथासुन्दरकाण्डेऽभिहितं मणिबन्धनम् 'मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले तथा बद्धमधिकं मूर्ध्नि शोभते ' इति । यथा चायोध्याकाण्डेऽनभिहितोऽपि वायसवृत्तान्तः सुन्दरकाण्डेऽनूद्यते 'स पित्रा च परित्यक्तः सुरैश्च स महर्षिभिः । त्रींल्लोकान्संपरिक्रम्य तमेव शरणं गतः' इति । आचार्यो वसिष्ठः इक्ष्वाकुगुरुमागम्येत्युत्तरत्रानुवादात् नहीक्ष्वाकुकुलगुरुर्वसिष्ठादन्योस्ति ॥ २७-३१ ॥

३२] ति० टी०—स लक्ष्मणः ॥ ३२ ॥

रा० टी०—स इति । इक्ष्वाकुगुरुं वशिष्ठमागम्य प्राप्य स लक्ष्मणः जग्राह ॥ ३२ ॥

३३] ति० टी०—राजशार्दूलः क्षत्रियश्रेष्ठः ॥ ३३ ॥

रा० टी०—तदिति । तद्गुरुगृहादानीतं सत्कृतं पूजितमत एव माल्यभूषितमायुधं दर्शयामास ॥ ३३ ॥

३४-३५] ति० टी०—मम काङ्क्षिते मदभीष्टप्रयोजननिमित्तसंपादनोचितकाल आगतः ॥ ३४ ॥ ३५ ॥

रा० टी०—तमिति । आत्मवान् जीवादिनियन्ता रामः उवाच । तद्वचनमेवाह—मम काङ्क्षिते मदीप्सिते काले आगतः शीघ्रं प्राप्त इत्यर्थः ॥ ३४ ॥

गो० टी०—तमिति । प्रीत्योवाचेत्यन्वयः ॥ ३२ ॥

रा० टी०—अहमिति । मामकं मदुपार्जितमित्यर्थः धनं ब्राह्मणेभ्यः त्वया सह प्रदातुमहमिच्छामि ॥ ३५ ॥

गो० टी०—काङ्क्षितत्वमेवाह—अहमित्यादिना ॥ ३३ ॥

३६] ति० टी०—इह मत्समीपे । गुरुषु दृढभक्त्योपेताः । एतेन पूर्णविषयतया दानपात्रत्वं सूचितम् ॥ ३६ ॥

रा० टी०—वसन्तीति । गुरुषु दृढभक्ता ये द्विजसत्तमा वसन्ति तेषां द्विजसत्तमानां सर्वेषां मे उपजीविनां च ये भूयः श्रेष्ठास्तान्द्विजानामार्य श्रेष्ठमत एव प्रवरं प्रकर्षेण वरणीयं सुयज्ञं सुयज्ञनामानं वसिष्ठपुत्रं च अपरांस्तद्भिन्नाञ्छिष्टान्सदाचा-

---

१ अभेद्यकवचे इति गो. पाठः । २ अक्षयसायकाविति गो. पाठः । ३ विमलौ चोभाविति गो. पाठः । ४ स त्वमिति गो. पाठः । ५ शार्दूलेति गो. पाठः ।

वसिष्ठपुत्रं तु सुयज्ञमार्यं त्वमानयाशु प्रवरं द्विजानाम् ।
अपि प्रयास्यामि वनं समस्तानभ्यर्च्य शिष्टानपरान्द्विजातीन् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ।

सीतारामाभ्यां वितीर्णरत्नाभरणः सुयज्ञस्तेभ्यो मङ्गलाशिषो युयोज । रामादिष्टो लक्ष्मणोऽगस्त्यपुत्रादिभ्यः कौशेयाभरणादीनि व्यतरत् । भार्याप्रेरितास्त्रिजटो नामं ऋषिः प्राप्य रामं धनं ययाचे । दण्डप्रक्षेपावधि विद्यमानगवीनां दाने रामेण प्रतिज्ञातेऽनेकसहस्रगवीर्विजित्य जघ्राह रामस्तमक्षमयद्धर्मबलोपार्जितधनेन सुहृज्जनं च युयोज ।

ततः शासनमाज्ञाय भ्रातुः प्रियैंकरं हितम् । गत्वा स प्रविवेशाशु सुयज्ञस्य निवेशनम् ॥ १ ॥
तं विप्रमग्न्यगारस्थं वन्दित्वा लक्ष्मणोऽब्रवीत् । सखेऽभ्यागच्छ पश्य त्वं वेश्म दुष्करकारिणः ॥ २ ॥
ततः संध्यामुपास्थाय गत्वा सौमित्रिणा सह । ऋद्धं स प्राविशल्लक्ष्म्या रम्यं रामनिवेशनम् ॥ ३ ॥
तमागतं वेदविदं प्राञ्जलिः सीतया सह । सुयज्ञमभिचक्राम राघवोऽग्निमिवार्चितम् ॥ ४ ॥

रसंपन्नान्द्विजातींश्च अभ्यर्च्य वनं प्रयास्यामीति हेतोः आशु शीघ्रमानय । श्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–वसन्तीति । यच्छब्दोऽर्थसिद्धः इह नगरे गुरुषु भक्त्या ये दृढं वसन्ति नित्यं गुरुशुश्रूषणं कुर्वन्तीत्यर्थः । तेषामपि मे सर्वेषामुपजीविनां च भूयः अतिशयेन नित्यदेयाधिकतया दातुमिच्छामि तानानयेति शेषः ॥ ३४ ॥

३७] ति० टी०–वसिष्ठपुत्रं सुयज्ञमानयेत्यनेन मूलप्रभोर्दशरथस्य वसिष्ठः पुरोहितस्तत्पुत्रस्य तत्पुत्र इति न्यायेन सुयज्ञस्य विशिष्यानयननियोगः । अस्यैव गृहं आयुधस्थापनमिति शेषः ॥ ३७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–वसिष्ठपुत्रमिति । वसिष्ठपुत्रमार्यं द्विजानां प्रवरं सुयज्ञम् अन्यानपि शिष्टानन्य सुयज्ञं तांश्चाभ्यर्च्याभिप्रयास्यामीत्यर्थः ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने श्रीमदयोध्याकाण्डव्याख्याने एकत्रिंशः सर्गः ॥३१॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–रामवचनश्रवणानन्तरकालिकलक्ष्मणवृत्तं वर्णयन्नाह–तत इति । भ्रातुः रामस्य शुभकरं मङ्गलप्रापकमत एव प्रियं प्रीतिविषयीभूतं भ्रातुः शासनमाज्ञाय ज्ञात्वा ततः रामसमीपात्सुयज्ञस्य निवेशनं गत्वा प्राप्य आशु शीघ्रं प्रविवेश ॥१॥

गो० टी०–एवं निश्चितसीतालक्ष्मणानुयात्रस्य रामस्य यात्रादानं प्रस्तूयते द्वात्रिंशे–तत इत्यादि । आज्ञाय अङ्गीकृत्य शुभतरं ब्राह्मणोपकारत्वात् प्रियमात्मनोऽनुगमनाङ्गीकारफलत्वात् ॥ १ ॥

२] ति० टी०–अग्न्यगारमग्निहोत्रशाला । हे सखे रामस्य वेश्मागच्छ दुष्करकारिणो रामस्य प्राप्तराज्यस्यागपूर्वं वनं जिगमिषोः कृत्यं च पश्येति शेषः ॥ २ ॥

रा० टी०–तमिति । अग्न्यागारस्थं यज्ञशालायां स्थितं तं सुयज्ञं वन्दित्वा लक्ष्मणोऽब्रवीत् । तद्वचनमेवाह–हे सखे ! अभ्यागच्छ इह प्रामुहि दुष्करकारिणः अन्याशक्यक्रियाकरणशीलस्य रामस्य वेश्म गृहं पश्य रामसमीपं प्राप्नुहीत्यर्थः ॥ २ ॥

गो० टी०–तमिति । अग्न्यागारस्थमग्निहोत्रशालास्थं दुष्करकारिणः दुष्करकर्मकारिणः वेश्माभ्यागच्छ कृत्यं च पश्येत्यर्थः ॥ २ ॥

३] ति० टी०–संध्यां माध्याह्निकीम् ॥ ३ ॥

रा० टी०–तत इति । ततः लक्ष्मणोक्त्यनन्तरं संध्यां संध्याकृत्यमुपास्थाय समाप्येत्यर्थः लक्ष्म्या सर्वसंपत्त्या जुष्टं सेवितं रामनिवेशनं रामाधिष्ठितगृहं सौमित्रिणा सह गत्वा प्राविशत् सुयज्ञ इति शेषः ॥ ३ ॥

गो० टी०–तत इति । संध्योपासनं माध्याह्निकम् अथवा संध्या नियताग्निहोत्रम् अग्न्यागारस्थमित्युक्तेः ॥ ३ ॥

४] ति० टी०–अभिचक्राम प्रत्युत्थानादि कृतवान् । अर्चितमग्निमिव होमकाल इति शेषः ॥ ४ ॥

रा० टी०–तमिति । अर्चितं पूजितमग्निं यागपावकमिव आगतं तं सुयज्ञं सीतया सह राघवो रामः अभिचक्राम अभ्युत्थानादिसत्कृतिं चकार ॥ ४ ॥

गो० टी०–तमिति । अर्चितं हुतम् ॥ ४ ॥

---

१ अर्थीति गो. पाठः । २ अवरानिति गो. पाठः । ३ शुभतरंप्रियमिति गो. शुभकरमिति रा. पाठः । पाठः । ४ अग्न्यागारस्थमिति गो. रा. पाठः । ५ उपास्याग्निति गो. पाठः । ६ जुष्टं तदिति गो. जुष्टं स इति रा. पाठः ।

जातरूपमयैर्मुख्यैरङ्गदैः कुण्डलैः शुभैः । सहेमसूत्रैर्मणिभिः केयूरैर्वलयैरपि ॥ ५ ॥
अन्यैश्च रत्नैर्बहुभिः काकुत्स्थः प्रत्यपूजयत् । सुयज्ञं स तदोवाच रामः सीताप्रचोदितः ॥ ६ ॥
हारं च हेमसूत्रं च भार्यायै सौम्य हारय । रशनां चार्थे सा सीता दातुमिच्छति ते सखी ॥ ७ ॥
अङ्गदानि चै चित्राणि केयूराणि शुभानि च । प्रयच्छति सखी तुभ्यं भार्यायै गच्छती वनम् ॥ ८ ॥
पर्यङ्कमप्यास्तरणं नानारत्नविभूषितम् । तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि ॥ ९ ॥
नागः शत्रुंजयो नाम मातुलो यं ददौ मम । तं ते निष्कसहस्रेण ददामि द्विजपुंगव ॥ १० ॥
इत्युक्तः स तु रामेण सुयज्ञः प्रतिगृह्य तत् । रामलक्ष्मणसीतानां प्रयुयोजाशिषः शिवाः ॥ ११ ॥
अथ भ्रातरमव्यग्रं प्रियंरामः प्रियंवदम् । सौमित्रिं तमुवाचेदं ब्रह्मेव त्रिदशेश्वरम् ॥ १२ ॥

५] ति० टी०–अङ्गदं बाहुमूलधार्यं भूषणम् । केयूरं तदधोभागस्थम् । सहेमसूत्रैर्मणिभिः स्वर्णसूत्रस्यूतैर्मुक्तादिरत्नमालाभिः ॥ ५ ॥

६] ति० टी०–सीताप्रचोदितः सीतया सुयज्ञपत्न्यै सखीस्वादिव्याभरणदानाय प्रचोदितः ॥ ६ ॥

रा० टी०–जातरूपेति । जातरूपं सुवर्णं तन्मयैः सुरूपैः श्रेष्ठैः अङ्गदैः शुभैः शुभकारकैः कुण्डलैः सहेमसूत्रैः हेमसूत्रसहितैः तत्प्रोतैरित्यर्थः भूषणविशेषैर्वा मण्यादिभिः बहुभिः अनेकविधैः अन्यैः उक्तेभ्यो विलक्षणैः रत्नैश्च काकुत्स्थः ककुत्स्थवंशोद्भवो रामः सुयज्ञं वसिष्ठपुत्रं प्रत्यपूजयत् तदा पूजनकाले सीताप्रचोदितः जानकीप्रेरितो रामः सुयज्ञमुवाच । सुयज्ञमित्युभयान्वीयं ॥ ५ ॥ ६ ॥

गो० टी०–जातरूपमयैरित्यादि । जातरूपमयैः स्वर्णमयैः अङ्गदैः कूर्परोपरिधार्यैः बाहुभूषणैः सहेमसूत्रैर्मणिभिः हेमसूत्रप्रोतैर्वैदूर्यपद्मरागमुक्तादिमणिभिः ' रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ' इत्यमरः । केयूरैः भुजशिरोव्यापिफणाकारशिखरयुक्तबाहुभूषणैः अथवा अङ्गदकेयूरयोः स्थूलत्वसूक्ष्मत्वाभ्यां भेदः । वलयैः कटकैः ' कटको वलयोऽस्त्रियाम् ' इत्यमरः । रत्नैः भूषणप्रकरणाद्भूषणश्रेष्ठैरित्यर्थः ' रत्नं स्वजातिश्रेष्ठेऽपि ' इत्यमरः ॥ ५ ॥ ६ ॥

७] ति० टी०–हेमसूत्रमुरोभूषणविशेषः । हारय सेवकद्वारा प्रापय । रशना काञ्ची । सा मदनुगामिनी सखी । तव भार्याया इति शेषः ॥ ७ ॥

रा० टी०–तद्वचनमेवाह–हारमिति । हेमसूत्रं भूषणविशेषं रशनां क्षुद्रघण्टिकां च ते तव भार्यायै सीता दातुमिच्छति अतः हे सौम्य हे सखे ! हारय हारादिकं स्वभार्यासमीपे प्रापय ॥ ७ ॥

गो० टी०–हारमिति । हेमसूत्रं हेममयं कण्ठसूत्रं रशनां च ते भार्यायै सीता दातुमिच्छति तत्सर्वं हारय दापयेत्यर्थः ॥ ७ ॥

८] ति० टी०–तुभ्यं भार्यायै च । गच्छती तुमभाव आर्षः ॥ ८ ॥

रा० टी०–अङ्गदानीति । चित्राणि अनेकचित्रविशिष्टानि अङ्गदादीनि भार्यायै भवद्भार्यां प्रापयितुं तुभ्यं वनं गच्छन्ती सीता प्रयच्छति आगमशास्त्रस्यानित्यत्वात्तुमभावः ॥ ८ ॥

गो० टी०–अङ्गदानीति । भार्यायै भार्याधारणार्थं तुभ्यं प्रतिग्रहीत्रे प्रयच्छति गच्छतीत्यत्र तुमभाव आर्षः ॥ ८ ॥

९] ति० टी०–त्वयि त्वद्गृहे प्रतिष्ठापयितुं दानपूर्वकं प्रापयितुम् ॥ ९ ॥

रा० टी०–पर्यङ्कमिति । अन्यास्तरणमुत्तमास्तरणविशिष्टं तं पर्यङ्कमपि त्वयि त्वद्गृहे प्रतिष्ठापयितुमतिसर्जनपूर्वकं प्रेषयितुमिच्छति ॥ ९ ॥

गो० टी०–पर्यङ्कमिति । त्वयि प्रतिष्ठापयितुं तुभ्यं दातुमित्यर्थः ॥ ९ ॥

१०–११] ति० टी०–शत्रुंजयो नाम तथा प्रसिद्धं यं गजं मातुलो मम ददौ तं गजं ते ददामि । निष्कसहस्रेण स्वनामाङ्कितनिष्कसहस्रदक्षिणया ॥ १० ॥ ११ ॥

रा० टी०–नाग इति । योऽयं शत्रुंजयो नाम नागो हस्ती मम मातुलो मह्यं ददौ तं निष्कसङ्ख्येन सहस्रसंख्याकस्वर्णमुद्राभिः सह ते तुभ्यं ददामि ॥ १० ॥

गो० टी०–नाग इति । मातुलो ददाविति दशरथीयशत्रुञ्जयव्याख्यातृत्तिः ॥ १० ॥

रा० टी०–इतीति । शिवाः मङ्गलहेतुभूताः आशिषः प्रयुयोज ॥ ११ ॥

गो० टी०–इतीति । प्रतिगृह्येत्यनेन न्यासभूतत्वं व्यावर्त्यते ॥ ११ ॥

१२] ति० टी०–ब्रह्मा त्रिदशेश्वरमिव । नियोक्तृनियोज्ययोः परापरप्रभुत्वे दृष्टान्तः ॥ १२ ॥

रा० टी०–अथेति । अथ सुयज्ञाशीर्वाददानानन्तरं त्रिदशेश्वरं ब्रह्मेव रामः प्रियंवदं प्रियवक्तारं तं लक्ष्मणमुवाच ॥ १२ ॥

गो० टी०–अथेति । त्रिदिशेश्वरमिन्द्रम् ॥ १२ ॥

---

१ अधुनेति गो. पाठः । २ सखे इति गो. रा. पाठः । ३ विचित्राणीति गो. पाठः । ४ गजेति गो. पाठः । ५ हीति गो. पाठः । ६ प्रियं रामः प्रियंवद इति गो. पाठः ।

अगस्त्यं कौशिकं चैव तावुभौ ब्राह्मणोत्तमौ । अर्चयाहूय सौमित्रे रत्नैः सस्यमिवाम्बुभिः ॥ १३ ॥
तर्पयस्व महाबाहो गोसहस्रेण राघव । सुवर्णरजतैश्चैव मणिभिश्च महाधनैः ॥ १४ ॥
कौसल्यां च य आशीर्भिर्भक्तः पर्युपतिष्ठति । आचार्यस्तैत्तिरीयाणामभिरूपश्च वेदवित् ॥ १५ ॥
तस्य यानं च दासीश्च सौमित्रे संप्रदापय । कौशेयानि च वस्त्राणि यावत्तुष्यति स द्विजः ॥ १६ ॥
सूतश्चित्ररथश्चार्यः सचिवः सुचिरोषितः । तोषयैनं महार्हैश्च रत्नैर्वस्त्रैर्धनैस्तथा ॥ १७ ॥
पशुकाभिश्च सर्वाभिर्गवां दशशतेन च । ये चैं मे कठकालापा बहवो दण्डमाणवाः ॥ १८ ॥
नित्यस्वाध्यायशीलत्वान्नान्यत्कुर्वन्ति किंचन । अलसाः स्वादुकामाश्च महतां चापि संमताः ॥ १९ ॥
तेषामशीतियानानि रत्नपूर्णानि दापय । शालिवाहसहस्रं च द्वे शते भद्रकांस्तथा ॥ २० ॥

१३–१४] ति० टी०–कौशिको विश्वामित्रः आहूयार्चय अनन्तरं रत्नैस्तर्पय ॥ १३ ॥ १४ ॥

रा० टी०–तद्वचनमेवाह–आगस्त्यमिति । आगस्त्यसुतं कौशिकं विश्वामित्रमर्चय सत्कारेणाहूय रत्नादिभिस्तर्पयस्व । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–आगस्त्यमिति । आगस्त्यम् अगस्त्यपुत्रं कौशिकं विश्वामित्रपुत्रं रत्नैः श्रेष्ठवस्तुभिः ॥ १३ ॥

गो० टी०–रत्नैरर्चनं विवृणोति–तर्पयस्वेति ॥ १४ ॥

१५] ति० टी०–तैत्तिरीयाणां तैत्तिरीयशाखोध्यतॄणामाचार्यो यो द्विजः कौसल्यामाशीर्भिः पर्युपतिष्ठति सेवते अभिरूपः श्लाघ्यगुणः ॥ १५ ॥

१६] ति० टी०–यावद्यावता धनेन तुष्यति तावद्दापय । कौशेयानि कृमिकोशोत्थानि ॥ १६ ॥

रा० टी०–कौशल्यामिति । तैत्तिरीयाणां तित्तिरिशाखाध्येतॄणामाचार्यः अत एव वेदविदत एव अभिरूपः दानप्राप्तियोग्यः यो द्विजः कौशल्याभक्तः कौशल्यानिष्टस्वविषयप्रीत्युद्भूकुलव्यापारवान् अत एव आशीर्भिः आशीर्वचनैः कौशल्यां पर्युपतिष्ठति स द्विजः यावद्यावद्वित्तुष्यति तावन्ति यानादीनि तस्य तस्मै संप्रदापय तत्र कौशेयानि कृमिविशेषकोशोद्भवनिर्मितानि 'कौशेयं कृमिकोशोत्थम्' इत्यमरः । कौसल्यामित्युभयान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–कौसल्यामित्यादिश्लोकद्वयमेकान्वयम् । तैत्तिरीयाणां तित्तिरिसंबन्धिशाखाध्येतॄणामाचार्यः अध्यापिता अभिरूपः बुधः 'प्राज्ञरूपसुरूपाभिरूपा बुधमनोज्ञयोः' इति विश्वः । कौशेयानि कृमिकोशोत्थानि 'कौशेयं क्रिमिकोशोत्थम्' इत्यमरः । यावत् यावत्पर्यन्तं तुष्यति तावत्संप्रदापयेति संबन्धः ॥ १५ ॥ १६ ॥

१७] ति० टी०–चित्ररथनामा सुमन्त्रादन्यः सूतः सुचिरोषितश्चिरकालवृद्धः ॥ १७ ॥

रा० टी०–सूत इति । सुचिरोषितः बहुकालान्मत्समीपे स्थितः आर्यसचिवः सचिवश्रेष्ठः चित्ररथः चित्ररथसंज्ञः सूतोऽस्तीति शेषः महार्हैः अतिप्रशंसनीयैः वस्त्रादिभिरेनं सूतं तोषय यदि च चित्रं रथो यस्य इति यौगिकार्थमात्रविवक्षा तदा सूतशब्देन सुमन्त्र एव ग्राह्यः ॥ १७ ॥

गो० टी०–सूत इत्यादिसार्धश्लोक एकान्वयः । सूतः सुमन्त्रभिन्नः कश्चित्ररथनामा सुचिरोषितः चिरकालमस्मद्गृहे स्थितः पशुकाभिः अल्पार्थे कन्प्रत्ययः अजादिभिरित्यर्थः ॥ १७ ॥

१८] ति० टी०–पशुका अजादयो यज्ञपशवो महिष्यादयश्च कठकालापाः कठकालापसंबन्धिशाखाध्यायिनः दण्डमाणवा दण्डप्रधाना माणवा उपकुर्वाणब्रह्मचारिणः ॥ १८ ॥

१९] ति० टी०–अन्यद्व्रतोपवासादि अलसा भिक्षादौ स्वादुकामाः सदन्नकामाः । तेषां दानयोग्यत्वायाह–महतामिति "तपो हि स्वाध्यायः" इति श्रुतेर्नित्यतपस्वित्वेन महतां संमताः ॥ १९ ॥

२०] ति० टी०–यानान्युष्ट्राः शालीन्वहन्तीति तादृशबलीवर्दानां सहस्रम् । भद्रकांस्तदाख्यान्धान्यविशेषांश्चणकमुद्गादिरूपान्भक्षणार्हान्दापय ॥ २० ॥

रा० टी०–पशुकाभिरिति । पशुकाभिः प्रशस्ताः पशवः पशुकाः ताभिः यज्ञयोग्याभिरित्यर्थः सर्वाभिः अजादिव्यक्तिभिः दशशतेन सहस्रेणेत्यर्थः । तोषयेति पूर्वेणान्वयः मे मत्संबन्धिनः बहवोऽनेकविधाः ये कठकालापाः कठकलापशाखाध्यायिनः ये च नित्यस्वाध्यायशीलत्वाद्धेतोः अन्यत्स्वाध्यायातिरिक्तं किंचन न कुर्वन्ति ते दण्डमाणवाः ब्रह्मचारिविहितदण्डधारिणः उपकुर्वाणब्रह्मचारिणः ये च महतां संमताः महद्भिरादृताः स्वादुकामाः सुस्वादुन्नादिभक्षणाकाङ्क्षिणः अलसाः तेषां तेभ्यः रत्नपूर्णानि अशीतियानानि शालिवाहसहस्रं सहस्रसंख्याकशालिवहनयोग्यबलीवर्दान् द्वे शते शतद्वयसंख्याकान्भद्रकान्भद्रकसंज्ञकहस्तिनश्च भद्रसंज्ञकधान्यविशेषान्वा कर्षकवर्दान्वा दापय । श्लोकत्रयमेकान्वयि ॥ १८–२० ॥

गो० टी०–ये चेत्यादि उपकुर्वित्यन्तमेकं वाक्यम् । कठेन प्रोक्तमधीयते कठाः कठशब्दात्प्रोक्तार्थे वैशम्पायनान्तेवासित्वाञ्ञिनिः तस्य कठचरकादिति लुक् ततः तदधीते तद्वेदेत्यण् तस्य प्रोक्ताल्लुक् इतिलुक् कलापिना प्रोक्तमधीयते कालापाः कलापिशब्दात् प्रोक्तार्थे "कलापिनोऽण्" इत्यण् "सब्रह्मचारि

---

१ आगस्त्यमिति गो. रा. पाठः । २ सहस्रैश्च मानदेति गो. पाठः । ३ सुवर्णैरिति गो. पाठः । ४ आर्येति गो. पाठः । ५ चेमे इति गो. पाठः ।

व्यञ्जनार्थं च सौमित्रे गोसहस्रमुपाकुरु । मेखलीनां महासंघः कौसल्यां समुपस्थितः ॥
तेषां सहस्रं सौमित्रे प्रत्येकं संप्रदापय ॥ ॥ २१ ॥
अम्बा यथा नो नन्देच्च कौसल्या मम दक्षिणाम् । तथा द्विजातींस्तान्सर्वांल्लक्ष्मणार्चय सर्वशः ॥ २२ ॥
ततः पुरुषशार्दूलस्तद्धनं लक्ष्मणः स्वयम् । यथोक्तं ब्राह्मणेन्द्राणामददाद्धनदो यथा ॥ २३ ॥
अथाब्रवीद्बाष्पगलांस्तिष्ठतश्चोपजीविनः । सर्वं प्रदाय बहुद्रव्यमेकैकस्योपजीवनम् ॥ २४ ॥
लक्ष्मणस्य च यद्वेश्म गृहं च यदिदं मम । अशून्यं कार्यमेकैकं यावदागमनं मम ॥ २५ ॥
इत्युक्त्वा दुःखितं सर्वं जनं तमुपजीविनम् । उवाचेदं धनाध्यक्षं धनमानीयतां मम ॥ २६ ॥
ततोऽस्य धनमाजह्रुः सर्वं एवोपजीविनः । स राशिः सुमहांस्तत्र दर्शनीयो ह्यदृश्यत ॥ २७ ॥

सपीठ–" इत्यादिना ठिलोपः ततः "तदधीत" इत्याद्यण् तस्य "प्रोक्ताङ्ठक्" कठप्रोक्तशाखाध्यायिनः कलापिप्रोक्तशाखाध्यायिन श्चेत्यर्थः कठाश्च कालापाश्च कठकालापाः दण्डप्रधानाः माणवाः दण्डमाणवा इति काशिकायां सदा पलाशदण्डधारिणो ब्रह्मचारिण इत्यर्थः । किंचन आहारार्थयजनादिकं केवलं नित्यस्वाध्यायशीलत्वात् किंचिन्न कुर्वन्ति किंत्वालस्याच्चेत्याशयेवाह–अलसा इति । गोसहस्रप्रदानहेतुत्वेनाह–स्वादुकामाश्चेति रसवत्पदार्थकाङ्क्षिण इत्यर्थः । महतां चापि संमताः अतीवसाध्वाचारा इत्यर्थः रत्नपूर्णानि रत्नालंकारपूर्णानि अशीतियानानीत्युक्त्या दण्डमाणवाश्चाशीतिसंख्याका इति गम्यते रत्नवाहाढ्यानिति वा शालिवाहसहस्रं शालिधान्यवाहकबलीवर्दसहस्रं भद्रकान् अल्पार्थे कम्प्रत्ययः कर्षणयोग्याननडुह इत्यर्थः धान्यविशेषानित्यपरे व्यञ्जनार्थं क्षीरं दधि घृतार्थमुपाकुरु ददस्वेत्यर्थः ॥ १८–२० ॥

२१] ति० टी०–व्यञ्जनार्थं दधिघृतार्थमुपाकुरु देहि । मेखलीनां ब्रह्मचारिणाम् दीर्घं आर्षः सन्नुपस्थितः विवाहार्थमिति शेषः । सहस्रं गवां निष्काणां वा ॥ २१ ॥

२२–२३] ति० टी०–नोऽस्माकमम्बा कौसल्या यथा मम दक्षिणां मया तदाश्रितब्रह्मचारिवर्गस्य दापितां नन्देत्तथा तानर्चयेत्यन्वयः ॥ २२ ॥ २३ ॥

रा० टी०–व्यञ्जनार्थमिति । व्यञ्जनार्थं व्यज्यते संस्क्रियते ओदनादिकमनेनेति व्यञ्जनं दधिघृतादि तदर्थं गोसहस्रं सहस्रसंख्याकगवीः उपाकुरु देहि अग्निहोत्रिभ्यः इति शेषः । अर्धं पृथक्–मेखलीनामिति । मेखलीनां ब्रह्मचारिणां महासंघः बहुसमूहः कौसल्यां सन्नुपस्थितः तत्समीपे प्राप्त इत्यर्थः । तेषां मेखलिनां प्रत्येकं सहस्रं विवाहोपयोगि सहस्रसंख्याकद्रव्यविशेषं संप्रदापय अत एव नोऽस्माकमम्बा कौसल्या मम दक्षिणामवलोक्येति शेषः यथा यथावन्नन्देत । अर्धत्रयमेकान्वयि । मेखलीनामित्यत्र दीर्घ आर्षः ॥ २१ ॥ २२ ॥

गो० टी०–मेखलीनामिति । मेखला मौञ्जी तद्वतां ब्रह्मचारिणामित्यर्थः आर्षो दीर्घः । सहस्रं गोसहस्रं प्रकृतत्वात्तासां ममाम्बेत्यन्वयः दक्षिणां पूर्वोक्तदानाङ्गभूतां सर्वशः वस्त्रधान्यादिसर्वप्रकारैः ॥ २१ ॥ २२ ॥

रा० टी०–उपसंहरन्नाह–तथेति । सर्वान्द्विजातीन्सर्वशः सर्वप्रकारेण अर्चय । अर्धं पृथक्–तत इति । ततः रामाज्ञापनानन्तरं यथोक्तं रामोक्तिमनतिक्रम्य ब्राह्मणेन्द्राणां ब्राह्मणेन्द्रेभ्यः धनद इव अददात् । अर्धद्वयमेकान्वयि ॥ २३ ॥

गो० टी०–तत इति । यथोक्तं रामोक्तमनतिक्रम्य अददात् धनदो यथेति धनदस्य दातृत्वं धनदेन समस्त्याग इति बालरामायण एवोक्तं ब्राह्मणेन्द्राणामिति चतुर्थ्यर्थे षष्ठी ॥ २३ ॥

२४] ति० टी०–बाष्पगलान्बाष्पगद्गदान् । उपजीवनं जीवनसाधनम् ॥ २४ ॥

२५–२७] ति० टी०–एकैकं प्रत्येकम् । यावन्ममागमनमशून्यं कार्यं पर्यायेणैकशः स्थित्वा पूर्ववद्रक्षणीयमित्यर्थः ॥ २५–२७ ॥

रा० टी०–अथेति । अथ ब्राह्मणसंप्रदानकदानानन्तरं स रामः एकैकस्योपजीविनः उपजीवनमुपजीवनहेतुभूतं बहुद्रव्यं प्रदाय दापयित्वा बाष्पगलानुपजीविनः अब्रवीत् । तद्वचनमेवाह–लक्ष्मणस्य यद्वेश्म गृहं मम च यदिदं गृहं तथावन्ममागमनं तावदेकैकं संस्थाप्येति शेषः अशून्यं शून्यं न कार्यम् । असूर्यंपश्या राजदारा इतिवत्समासः । अर्धचतुष्टयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–अथेति । बाष्पं कलन्ति स्रवन्तीति बाष्पकलाः तान् उपजीविनः प्रति एकैकस्योपजीविनो बहुद्रव्यं संप्रदायाब्रवीत् अशून्यं कार्यं यथापूर्वं भवद्भिरुपविश्य रक्षणीयमित्यर्थः । एकैकं पृथक् पृथक् ॥ २४ ॥ २५ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेणोक्त्वा दुःखितं निश्चितवियोगहेतुकदुःखाक्रान्तं तं पूर्वोक्तिकर्मीभूतं सर्वमुपजीविनमिदमुवाच । तद्वचनमेवाह–मम धनाध्यक्षं कोशाधीशाद्धनमानीयताम् "अकथित च" इति कर्मत्वम् । अर्धद्वयमेकान्वयि ॥ २६ ॥

गो० टी०–इतीति । धनाध्यक्षं कोशगृहाधिकृतम् ॥ २६ ॥

रा० टी०–तत इति । ततः रामाज्ञापनानन्तरमस्य रामस्योपजीविनः धनमाजह्रुः आनिन्युः । अर्धं पृथक् ॥ २७ ॥

---

१ च सा नन्देदिति गो. पाठः । २ स पुरुषव्याघ्र इति गो. पाठः । ३ कलान्ति गो. पाठः । ४ संप्रदायेति गो. पाठः । ५ इतीति गो. पाठः । ६ सर्वमिति गो. पाठः ।

ततः स पुरुषव्याघ्रस्तद्धनं सहलक्ष्मणः । द्विजेभ्यो बालवृद्धेभ्यः कृपणेभ्यो ह्यदापयत् ॥ २८ ॥
तत्रासीत्पिङ्गलो गार्ग्यस्त्रिजटो नाम वै द्विजः । क्षेतवृत्तिर्वने नित्यं फालकुदालल[1]ाङ्गली ॥ २९ ॥
तं वृद्धं तरुणी भार्या बालानादाय दारकान् । अब्रवीद्ब्राह्मणं वाक्यं स्त्रीणां भर्ता हि देवता[2] ३० ॥
अपास्य फालं कुद्दालं कुरुष्व वचनं मम । रामं दर्शय धर्मज्ञं यदि किंचिदवाप्स्यसे[3] ॥ ३१ ॥
स भार्यया[4] वचः श्रुत्वा शाटीमाच्छाद्य दुश्छदाम् । स प्रातिष्ठत पन्थानं यत्र रामनिवेशनम् ॥ ३२ ॥
भृग्वङ्गिरःसमं दीप्त्या त्रिजटं जनसंसदि । आपञ्चमायाः कक्ष्याया [6]नैतं कश्चिदवारयत् ॥ ३३ ॥
स राममासाद्य तदा त्रिजटो वाक्यमब्रवीत् । निर्धनो बहुपुत्रोऽस्मि राजपुत्र महाबल[7] ॥ ३४ ॥

गो० टी०–तत इति । अस्य रामस्य ॥ २७ ॥

२८] ति० टी०–कृपणेभ्यो दीनेभ्यः ॥ २८ ॥

रा० टी०–स इति । दर्शनीयः दर्शनयोग्यः समहान् स उपजीव्यानीतः राशिः धनसमूहः अदृश्यत ततः धनदर्शनानन्तरं द्विजेभ्यः तद्धनमदापयत् । सार्धश्लोक एकान्वयी ॥२८॥

गो० टी०–तत इति । बालवृद्धेभ्यः बालेभ्यो वृद्धेभ्यश्चेत्यर्थः ॥ २८ ॥

२९] ति० टी०–तत्र गार्ग्यो गर्गगोत्रः । क्षतेन खननेन वृत्तिर्जीविका यस्य क्षीणवृत्तिरिति वा । ' उञ्छवृत्तिः ' इति पाठान्तरम् । फालं हलावयवविशेषस्तत्सदृशं मृत्खननार्थं लोहमयमत्र विवक्षितं कुद्दालकं खननसाधनम् लाङ्गलं हलाकारो दण्डः फलापाकर्षणार्थः ॥ २९ ॥

रा० टी०–तत्रेति । तत्र तस्मिन्समये गार्ग्यो गर्गगोत्रः क्षतवृत्तिः क्षतेन पिपीलिकारहिते देशखनने वृत्तिर्जीविका यस्य किंच क्षता त्यक्ता वृत्तिः प्रतिग्रहादिजीविका येन उञ्छवृत्तिरिति यावत् क्वचित् ' उञ्छवृत्तिः ' इत्येव पाठः । फालकुदाललाङ्गली यागादिहेतुकखननोपकरणीभूतफालादिविशिष्टः पिङ्गलः व्रतोपवासादिना पीतवर्णविशिष्टः त्रिजटो नाम द्विजः वने नित्यमासीत् नित्यमित्यनेन ग्रामगमनव्युदासः ॥ २९ ॥

गो० टी०–तत्रेति । तत्र तस्मिन्काले देशे वा पिङ्गलः पिङ्गलवर्ण इति दारिद्र्यलक्षणोक्तिः पिङ्गलकेशो वा गार्ग्यः गर्गगोत्रनिर्वेश्यः उञ्छवृत्तिः उञ्छेन एकैकशो धान्यग्रहणेन वृत्तिर्जीवनं यस्य तथा 'क्षतवृत्तिः' इति पाठे क्षतेन खननेन जीवनं यस्येत्यर्थः खननलब्धकन्दमूलादिजीवन इत्यर्थः । फालकुदाललाङ्गली फल्यते अनेनेति फालः द्वैधीकरणसाधनं कुठारश्चकुलादिकं कुद्दालः खननसाधनं खनित्रमिति यावत् लाङ्गलं हलाकारः फलाकर्षणसाधनभूतो दण्डविशेषः तद्वान् एवं वनवासी कश्चिद्विप्रो गृहस्थः दैवात्तत्र नगरे तदानीं सङ्कुतोऽभूदिति भावः ॥२९॥

३०] ति० टी०–दारकाः पुत्राः । ' स्त्रीणां भर्ता हि देवता ' इति पाठे यद्यपि देवतात्वादाज्ञानर्हस्तथापि प्रीत्या मद्वचनं कुरुष्वेत्यर्थः ॥ ३० ॥

रा० टी०–तमिति । यतः स्त्रीणां देवताव्यवहारनिर्वाहकः भर्तैवातः बालान् अल्पवयस्कान्दारकान्पुत्रानादाय गृहीत्वा तं फालाद्युपस्करविशिष्टं वृद्धं ब्राह्मणं त्रिजटं तरुणी भार्या वाक्यमब्रवीत् ' दारिद्र्येणातुपीडिता ' इति प्रचुरः पाठः ॥ ३० ॥

गो० टी०–तमिति । दारकान् पुत्रकान् ॥ ३० ॥

३१] ति०टी०–यदीत्यस्य दर्शयसि तदा सर्वयेति शेषः॥३१॥

रा० टी०–तद्वाक्यमेवाह–अपास्येति । अपास्य त्यक्त्वा वचनं प्रार्थनावाक्यं कुरुष्व परिपालय । किं प्रार्थयसीत्यत आह–धर्मज्ञं रामं दर्शय स्ववृत्तं बोधय अत एव यत्किंचिदवाप्स्यसे प्राप्स्यसि । इकारोऽव्ययम् ॥ ३१ ॥

गो० टी०–अपास्येति । कुद्दालमिति लाङ्गलस्याप्युपलक्षणं दर्शयेति भार्यापुत्रसहितमात्मानमित्यर्थः गतिबुद्धीत्यादिना द्विकर्मकत्वम् यदि दर्शयसि तदा किंचिदवाप्स्यसीत्यर्थः किंचिदिति स्वभाग्यहान्यपेक्षयोक्तम् ॥ ३१ ॥

३२] ति० टी०–दुश्छदामतिजीर्णत्वादाच्छादनायोग्यां यत्र रामनिवेशनं यस्मिन्पथ्याश्रिते रामवेशनं प्राप्यते तं पन्थानमास्थाय प्रातिष्ठत ॥ ३२ ॥

रा० टी०–स इति । दुश्छदां छिद्रादिविशिष्टत्वेन छादनानर्हां शाटीमाच्छाय वसित्वा यत्र यस्मिन्पथि रामनिवेशनं रामकर्तृकप्रवेशः तं पन्थानं स द्विजः प्रातिष्ठत ॥ ३२ ॥

गो० टी०–स इति । दुश्छदाम् अतिजीर्णत्वादाच्छादयितुमशक्यां रामदर्शनार्थमाच्छादनयत्नः यत्र यन्मार्गाभितवीथ्याम् ॥ ३२ ॥

३३–३४] ति० टी०–दीप्त्या ब्रह्मवर्चसेन ॥ ३३ ॥ ३४ ॥

रा० टी०–भृग्विति । आपञ्चमायाः कक्षायाः पञ्चमकक्षापर्यन्तं त्रिजटं कश्चिन अवारयत् अत एव सः त्रिजटः राममासाद्य प्राप्य वाक्यमब्रवीत् । अर्धत्रयमेवान्वयि ३३॥३४

गो० टी०–भृग्वङ्गिरेति । अङ्गिरेत्यत्र अकारान्तत्वमार्षम् ॥ ३३ ॥

रा० टी०–तद्वाक्यमेवाह–निर्धन इति । निर्धनत्वादिविशिष्टोऽहमस्मीति मां प्रत्यवेक्षस्व ॥ ३५ ॥

गो० टी०–स इत्यादि । प्रत्यवेक्षस्व कटाक्षयेत्यर्थः॥३४॥

---

१ उञ्छवृत्तिरिति गो. पाठः । २ दारिद्र्येणाभिपीडितेति गो. पाठः । ३ अवाप्स्यसीति गो. पाठः । ४ भार्यावचनमिति गो. पाठः । ५ अङ्गिरसमभिति गो. पाठः । ६ नैनमिति गो. नचेति रा. पाठः । ७ महाबश इति गो. पाठः ।

क्षेतवृत्तिर्वने नित्यं प्रत्यवेक्षस्व मामिति । तमुवाच ततो रामः परिहाससमन्वितम् ॥ ३५ ॥
गवां सहस्रमप्येकं न चै विश्राणितं मया । परिक्षिपसि दण्डेन यावत्तावद्वौप्स्यसे ॥ ३६ ॥
स शाटीं पैरितः कट्यां संभ्रान्तः परिवेष्ट्य ताम् । आविद्ध्य दण्डं चिक्षेप सर्वप्राणेन वेगैतः ॥ ३७ ॥
स तीर्त्वा सरयूपारं दण्डस्तस्य कैराच्युतः । गोव्रजे बहुसाहस्रे पपातोक्षाणसंनिधौ ॥ ३८ ॥
तं परिष्वज्य धर्मात्मा आ तस्मात्सरयूतटात् । आनयामास ता गावस्त्रिजटस्याश्रमं प्रति ॥ ३९ ॥
उवाच च तदा रामस्तं गार्ग्यमभिसान्त्वयन् । मन्युर्न खलु कर्तव्यः परिहासो ह्ययं मम ॥ ४० ॥

३५] ति० टी०–प्रत्यवेक्षस्व मां मयि कृपां कुर्विस्यर्थः । परिहाससमन्वितं क्रीडाप्रयोजनव्यवहारविशेषसमन्वितम् ॥ ३५ ॥

रा० टी०–तमिति । परिहाससमन्वितमन्यकर्तृकपरिहासप्रापकं वचनं ब्राह्मणं राम उवाच । तद्वचनमेवाह–गवामेकमपि सहस्रं मया न विश्राणितं दत्तमदत्ता एवेमाः बहुसहस्रसंख्याकगव्यस्तिष्ठन्तीत्यर्थः ॥ ३६ ॥

गो० टी०–तमिति । परिहाससमन्वितं लीलास्मितसमन्वितं बहुकुटुम्बिनो दरिद्रस्य अस्य कियती धनाशेति जिज्ञासया सस्मित इत्यर्थः ॥ ३५ ॥

३६] ति० टी०–'अस्त्येकम्' इति पाठे तावदेव शिष्टमस्तीत्यर्थः । 'अप्येकम्' इति पाठे गवामसंख्यातानां मध्ये एकमपि सहस्रं मया न विश्राणितं दत्तम्, अतोऽत्रैव स्थित्वा दण्डेन यावद्गवाकीर्णं यावन्तं देशं परिक्षिपसि परिगृह्णासि तावत्तावद्देशावस्थिता गा अवाप्स्यसे ब्राह्मणस्य गोग्रहणचापलकौतुकदर्शनार्थमेतद्भगवद्वचनम् ॥ ३६ ॥

रा० टी०–नन्वु दानाभावेन किमित्यत आह–परीति । दण्डेन यावद्गाः परिक्षिपसि स्प्रक्ष्यसीत्यर्थः तावद्गास्त्वमवाप्स्यसे यावदिति सामान्ये नपुंसकम् अत एवैकवचनान्तत्वस्य नानुपपत्तिः।अर्थं पृथक्कारामोक्तिं संवर्ण्य द्विजदत्तमाह–स इति । संभ्रान्तः रामेणाकृतः स द्विजः कट्यां परितः शाटीं परिवेष्ट्य सर्वप्राणेन कृत्स्नस्ववलेन दण्डमाविध्य भ्रामयित्वा वेगतः चिक्षेप । सार्धश्लोक एकान्वयी ॥ ३७ ॥

गो० टी०–गवामिति । अनेकगोसहस्राणां मध्ये एकमपि सहस्रं न विश्राणितमित्यर्थः यद्वा असङ्ख्यातानां गवां मध्ये एकमपि सहस्रं मया न विश्राणितं न दत्तं तुभ्यमिति शेषः । अपि तु दण्डेन यावत् परिक्षिपसि गवाकीर्णं यावन्तं देशं परिक्षिपसि तावदवाप्स्यसि तावद्देशस्थं गोजातमवाप्स्यसीत्यर्थः एकं गोसहस्रमात्रं न दत्तम् अन्यत्सर्वं दत्तमिति वार्थः बहुसाहस्र इत्यादिवक्ष्यमाणेन विरोधाद् अपिशब्दास्वारस्याच्च ॥ ३६ ॥

३७] ति० टी०–संभ्रान्तस्त्वरितः सर्वप्राणेन सर्वबलेन आविध्य भ्रामयित्वा वेगतो वेगेन ॥ ३७ ॥

गो० टी०–शाटीमिति । कट्यां परिवेष्टनं बलोत्तम्भनाय आविध्य भ्रामयित्वा सर्वप्राणेन सर्वशक्त्या 'शक्तिः पराक्रमः प्राणः' इत्यमरः ॥ ३७ ॥

३८] ति० टी०–स दण्डस्तस्य कराच्युतः सरयूपारं तीर्त्वातिक्रम्योक्षाणसंनिधावुक्षणां वृषभाणां संनिधिर्यत्र आर्षं आनङ् तादृशे गोव्रजे पपात ॥ ३८ ॥

रा० टी०–स इति । तस्य द्विजस्य करोयतः स दण्डः सरयूपारं तीर्त्वा उक्षाणसन्निधौ वृषसमीपवर्तिनि बहुसाहस्रे गोव्रजे पपात। अर्धद्वयमेकान्वयि । उक्षाणेत्यार्षम् किं च उक्षणां वृषाणाम् अणाः शब्दास्तैः संनिधीयते स्वसमीपं प्राप्यतेऽसौ तादृशे गोव्रजे पपातेत्यर्थः । भागुरिमतेनेदमिति भूषणोक्तिस्तु दुर्ग्रहा एतादृशनिपातनस्य अजादिगणे अदृष्टत्वात् स्वार्थिकाणादिकल्पनाप्येतन्मार्गिकैव ॥ ३८ ॥

गो० टी०–स इति । उक्षणसन्निधौ उक्षसन्निधौ वष्टिभागुरिरित्यादिरीत्या अकारान्तत्वम् ॥ ३८ ॥

३९] ति० टी०–आ तस्मात्सरयूतटात्परपारस्थसरयूमभिव्याप्य या गावः स्थितास्ता आनयामास त्रिजटाश्रमं प्रति नाययामास चेति शेषः ॥ ३९ ॥

रा० टी०–तमिति । धर्मात्मा रामः सरयूतटात्तं ब्राह्मणमावाप्य प्राप्य परिष्वज्य मिलित्वा च ताः त्रिजटदण्डस्पृष्टा गावः त्रिजटस्याश्रमं प्रत्यानयामास प्रापयामास वाक्यार्थस्य कर्मतासंबधेनान्वयात् द्वितीया ॥ ३९ ॥

गो० टी०–तमिति । आतस्मादित्यत्राभिविधिवाचकस्याङः सरयूतटादित्यनेन संबन्धः आनयामास नाययामासेत्यर्थः ॥ ३९ ॥

४०] ति० टी०–अयं दण्डपरिक्षेपवचनरूपः परिहास एवेत्यर्थः ॥ ४० ॥

रा० टी०–उवाचेति । तदा गोप्रापणकाले गार्ग्यंप्रवाच । तद्वचनमेवाह–ममायं दण्डस्पर्शाज्ञापनपदार्थः परिहासः अन्यकर्तृकपरिहासकारकः अतः मन्युः कोपः न कर्तव्यः ॥४०॥४१॥

गो० टी०–उवाचेति । परिहासो ह्ययं मम अयं दण्डक्षेपणप्रचोदनापरिहासः विनोदार्थ इत्यर्थः ॥ ४० ॥

१ उञ्छवृत्तिरिति गो. पाठः । २ त्विति गो. पाठः । ३ अवाप्स्यसीति गो. पाठः । ४ त्वरित इति गो. पाठः । ५ वेगेत इति गो. पाठः । ६ करोयत इति रा.पाठः । ७ उक्षणेति गो. पाठः । ८ आवाप्येति रा.पाठः । ९ गोपैरिति गो.पाठः १० तत इति गो. पाठः ।११ अमक्किवेति युक्तं भाति ।

इदं हि तेजस्तव यद्दुरत्ययं तदेव जिज्ञासितुमिच्छता मया ।
इमं भवानर्थमभिप्रचोदितो वृणीष्व किं चेदपरं व्यवस्यसि ॥ ४१ ॥
ब्रवीमि सत्येन न ते स्म यन्त्रणां धनं हि यद्यन्मम विप्रकारणात् ।
भवत्सु सम्यक्प्रतिपादनेन मयार्जितं चैव यशस्करं भवेत् ॥ ४२ ॥
ततः सभार्यस्त्रिजटो महामुनिर्गवामनीकं प्रतिगृह्य मोदितः ।
यशोबलप्रीतिसुखोपबृंहिणीस्तदाशिषः प्रत्यवदन्महात्मनः ॥ ४३ ॥
स चापि रामः प्रतिपूर्णपौरुषो महाधनं धर्मबलैरुपार्जितम् ।
नियोजयामास सुहृज्जने चिराद्यथार्हसंमाननवचःप्रचोदितः ॥ ४४ ॥
द्विजः सुहृद्भृत्यजनोऽथवा तदा दरिद्रभिक्षाचरणश्च यो भवेत् ।
न तत्र कश्चिन्न बभूव तर्पितो यथार्हसंमाननदानसंभ्रमैः ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

४१] ति० टी०–इदं हीति । इदं दूरपरिक्षेपजनकं तेजः शक्तिस्तव वृद्धस्यापि यत्तदेव जिज्ञासितुं ज्ञातुं स्वार्थे सन्नायः इच्छता इममर्थं दण्डप्रक्षेपरूपमर्थं भवान्प्रचोदितोऽसि अपरं गोभ्योऽन्यदपि किंचिद्बहुमूल्यमपि वस्तु वरीतुं व्यवस्यसि चेत्तदपि वृणीष्व ॥ ४१ ॥

रा० टी०–नन्व परिहासस्य कोपहेतुत्वे किमर्थं कृत इत्यत आह–इदमिति । दुरत्ययं दुर्निवारं यदिदं तव तेजः तज्जिज्ञासितुं जिज्ञापयितुमिच्छता भवत्प्रभावप्राकट्यं वाञ्छता मया इमं दण्डप्रक्षेपणरूपमर्थं भवानभिप्रचोदितः प्रार्थितः अपरं गोभ्यिनं किं किंचित् व्यवस्यसि इच्छसि चेद्वृणीष्व स्वीकुरु ॥ ४२ ॥

गो० टी०–परिहासमेव विवृणोति–इदमिति । तेजः बलं दुरत्ययं निरतिशयमित्यर्थः । जिज्ञासितुं ज्ञातुमित्यर्थः । यद्वा जिज्ञासितुं मीमांसितुं मानेजिज्ञासायामिति मीमांसार्थे जिज्ञासाशब्दप्रयोगात् । इममर्थं दण्डप्रक्षेपणरूपम् अपरं किंचिद्व्यवस्यति अभिलषति चेत् तद्वृणीष्व ॥ ४१ ॥

४२] ति० टी०–इदमुपचारमात्रमिति न मन्तव्यमित्याह–ब्रवीमीति । यन्त्रणा संकोचः हि यतो मम यद्यदनं तद्विप्रकारणाद्विप्रप्रयोजनसंपादनार्थम् । कथं तथात्वमत आह–भवत्सु विप्रेषु सम्यग्यथाशास्त्रं प्रतिपादनेन दानेन तत्फलरूपेण हेतुना दानरूपफलार्थं मयार्जितं धनं मे यशस्करं भवेत् न तु भूमिनिक्षेपफलकम् ॥ ४२ ॥

रा० टी०–ब्रवीमीति । ते तव यन्त्रणा याचनविषकसंकोचो न कार्यो । तत्र हेतुः मम यद्यदनं तत्तद्विप्रकारणाद्ब्राह्मणहेतोः इति सत्येव सत्यं ब्रवीमि अतो मयार्जितं धनं भवत्सु सम्यक्प्रतिपादनेन विधिपूर्वकदानेन यशस्करं परमयशःसंपादकं भवेत् एतेन यथेच्छं ग्राह्यमिति सूचितम् ॥ ४२ ॥

गो० टी०–इदं च पूर्ववन्न परिहासरूपमित्याह–ब्रवीमीति । यन्त्रणा निरोध इत्यर्थः । मम यद्यदनमस्ति तत्सर्वं विप्रकारणात् विप्रार्थमेव आर्जितं भवत्सु भवादृक्षेषु विप्रेषु सम्यक्करणत्रयपूर्वकं प्रदानेन मम प्रीतियशस्करं भवेत् ॥ ४२ ॥

४३] ति० टी०–मोदितः संजातमोदः यशआदीनाम्बृंहिणीर्विवर्धनीर्महात्मनो रामस्य तदाशिषः प्रत्यवदत् ॥४३॥

रा० टी०–तत इति । अनीकं समूहं यशआयुपबृंहिणीः वर्धिनीः आशिषः महात्मनो रामस्य तदा तस्मिन्काले प्रत्यवदत् एतेन नान्यत्किंचिदयाचदिति सूचितम् ॥ ४४ ॥

गो० टी०–तत इति । मोदित इत्यनेन गोभ्योऽन्यन्नापेक्षितवानित्यवगम्यते उपबृंहणीर्वर्धनीः तदा गमनकाले महात्मनो रामस्य ॥ ४३ ॥

४४] ति० टी०–धर्मबलैर्धर्मप्रयुक्तपराक्रमैः चिराद्यथार्हं कृतैः संमानवचोभिः सुहृज्जनीयैः प्रचोदितः प्रेरितः प्रेरितदानव्यापारः ॥ ४४ ॥

रा० टी०–स इति । प्रतिपूर्णपौरुषः प्रतिपूर्णः नित्यं संभृतः पौरुषः पुरुषार्थो यस्मिन् यथार्हसंमानवचःप्रचोदितः यथोचितसंमानवचोभिः प्रचोदितः जनैरुक्तः स रामः सुहृज्जने महाधनमचिरात् क्षिप्रं नियोजयामास दापयामासेत्यर्थः ॥ ४५ ॥

गो० टी०–स इति । धर्मबलैः धर्मप्रयुक्तपराक्रमैः नियोजयामास प्रतिपादयामास सुहृज्जने विषये यथार्हसंमानवचःप्रचोदितः आहिताग्न्यादित्वाश्विडायाः परनिपातः । तत्तदौचित्येनाभिहितसंमानवाक्य इत्यर्थः ॥ ४४ ॥

४५] ति० टी०–सुहृद्भृत्यजनस्तथुक्तः अर्थेआथजन्तमेतत् । दरिद्रः सन् भिक्षाचरणकर्ता संभ्रम आदरः ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

---

१ व्यवस्यतीति गो. पाठः । २ ऽतीति गो. पाठः । ३ तन्मयार्जितमिति गो. पाठः । ४ प्रीतीति गो. पाठः । ५ मानसो महद्वनमिति गो. पाठः । ६ ऽभवदिति गो. पाठः ।

अयस्त्रिंशः सर्गः ।

ब्राह्मणाय धनादि वितीर्य सीतालक्ष्मणसहितो रामो दशरथं द्रष्टुं तद्गृहं व्रजन्पथि शोकाकुलमानसानां पौराणां बहुविधसंभाषणं श्रुत्वाप्यविकृतमना दशरथगृहं प्राप्य स्वागमनं बोधयितुं सुमन्त्रं चोदयामास ।

दत्त्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु । जग्मतुः पितरं द्रष्टुं सीतया सह राघवौ ॥ १ ॥
ततो गृहीते [1]प्रेष्याभ्यामशोभेतां तदायुधे । मालादामभिरासक्ते [2]सीतया समलंकृते ॥ २ ॥
ततः प्रासादहर्म्याणि विमानशिखराणि च । [3]अभिरुह्य जनः श्रीमानुदासीनो व्यलोकयत् ॥ ३ ॥
न हि रथ्याः [4]सुशक्यन्ते गन्तुं बहुजनाकुलाः । आरुह्य तस्मात्प्रासादान्नाः पश्यन्ति राघवम् ॥ ४ ॥
पदातिं सानुजं दृष्ट्वा ससीतं च जनास्तदा । ऊचुर्बहुविधा वाचः [5]शोकोपहतचेतसः ॥ ५ ॥
यं यान्तमनुयाति स्म चतुरङ्गबलं महत् । तमेकं सीतया सार्धमनुयाति स्म लक्ष्मणः ॥ ६ ॥

रा० टी०–द्विज इति । तदा तस्मिन्काले द्विजो ब्राह्मणः सुहृद्भृत्यजनो वा दरिद्रभिक्षाचरणः दरिद्रत्वसमानाधिकरणभिक्षावृत्तिविशिष्टो वा यथार्हसंमाननादिभिः यो न तर्पितः तृप्तिं न प्राप्तः स तत्र तस्मिन् जनसमूहे कश्चिन्न बभूव ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

गो० टी०–द्विज इति । द्विजः ब्राह्मणः सुहृत् द्विजत्वाभावेऽपि सुहृत् द्विजत्वसुहृत्त्वाभावेऽपि भृत्यजनः तथात्वाभावेऽपि दरिद्रभिक्षाचरणः भिक्षां चरतीति भिक्षाचरणः "कृत्यल्युटो बहुलम्" इति कर्तरि ल्युट् कर्मधारयसमासः तत्र तेषु मध्ये कश्चिदपि यथार्हसंमाननदानसंभ्रमैः संभ्रमस्त्वरा 'आरम्भः संभ्रमस्त्वरा' इत्यमरः । न तर्पितो न बभूव त्वरया क्रियमाणैरपि संमानदानैः सर्वेऽपि तर्पिता बभूवुरित्यर्थः ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

१] ति० टी०–दत्त्वेति ॥ १ ॥

रा० टी०–दानौत्तरकालिकं रामदृत्तमाह–दत्त्वेति । ब्राह्मणेभ्यो बहु अधिकं धनं दत्त्वा वैदेह्या विदेहतनयया सीतया सह राघवौ रामलक्ष्मणौ पितरं द्रष्टुं जग्मतुः ॥ १ ॥

गो० टी०–पूर्वं पित्रानुज्ञातोऽपि सीतालक्ष्मणयोरनुज्ञापनाय पुनः रामो दशरथसमीपं गच्छति–दत्त्वेत्यादि ॥ १ ॥

२] ति० टी०–आयुधे इति जात्यभिप्रायेण सीतयालंकृते पूजार्थचन्दनादिभिः ॥ २ ॥

रा० टी०–तत इति । प्रेष्याभ्यां रामलक्ष्मणभृत्याभ्यां गृहीते मालादामभिः उत्तममालाभिरासक्ते युक्ते सीतया समलंकृते चन्दनादिभिरर्चिते तदायुधे रामलक्ष्मणधनुषी अशोभेताम् ॥ २ ॥

गो० टी०–तत इति । तदायुधे तयोरायुधे धनुषी इति यावत् अङ्गादीनामप्युपलक्षणमेतत् मालादामभिः मालानिचयैरित्यर्थः अलंकृते चन्दनादिभिरलंकृते ॥ २ ॥

३] ति० टी०–विमानशिखराणि सप्तभूमिकगृहाग्रभागाः । प्रासादस्त्रिभूमिकः हर्म्यं राजगृहम् उदासीनोऽरक्षितृत्वेन निरुत्सुकः व्यलोकयत् राममिति शेषः ॥ ३ ॥

रा० टी०–तत इति । ततः पितृगृहकर्मकरामगमनानन्तरं प्रासादहर्म्याणि प्रासादाः राजदेवायतनानि हर्म्याणि तदितरधन्यायतनानि विमानाः सप्तभूमिकगृहाणि शिखराणि मणिपर्वतशृङ्गाणि अधिरुह्य आरुह्य उदासीनः निश्चितरामवियोगहेतुकौदासीन्यविशिष्टः श्रीमान् जनः व्यलोकयत् राममिति शेषः । 'प्रासादो देवभूभुजाम्' इत्यमरः 'विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि' इति वैजयन्ती ॥ ३ ॥

गो० टी०–तत इति । प्रासादहर्म्याणि प्रासादो देवतानां भुभूजां चावासः हर्म्याणि धनिनां मन्दिराणि 'हर्म्यादिर्धनिनां वासः प्रासादो देवभूभुजाम्' इत्यमरः । विमानशिखराणि विमानं सप्तभूमिसहितं सद्म 'विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि' इति वैजयन्ती । उदासीनः निरुत्सुकः निर्विण्ण इति यावत् ॥ ३ ॥

४] ति० टी०–यतो बहुजनाकुलत्वाद्रथ्या गन्तुं न सुखेन शक्यन्ते तस्मात्प्रासादमारुह्य प्रासादात्तत्र प्रासादे संस्थाय ॥ ४ ॥

रा० टी०–नन्वत रामसमीपमेव कुतो न जग्मुरित्यत आह–नेति । यतो रथ्याः मार्गाः बहुजनाकुला अतो गन्तुं न सुशक्यन्ते तस्माद्धेतोः दीनाः सर्वेजनाः प्रासादाद्राघवं पश्यन्ति ॥ ४ ॥

गो० टी०–नहीति । तस्मात् रथ्यागमनस्याशक्यत्वात् 'प्रासादान्' इति पाठः प्रसादादितिपाठे ल्यब्लोपे पञ्चमी क्ष्विदा ४ ॥

५–६] ति० टी०–दीनत्वे हेतुमाह–पदातिमिति ॥ ५–६ ॥

रा० टी०–पदातिमिति । शोकोपहतचेतसः निश्चितवियोगहेतुकशोकव्याप्तचित्ताः जनाः बहुविधा वाचः ऊचुः ॥ ५ ॥

गो० टी०–दीनत्वे हेतुमाह–पदातिमित्यादिना ॥ ५ ॥

रा० टी०–तद्वचनमेवाह–यमिति । यान्तं गच्छन्तं यं रामं महत् चतुरङ्गबलं साङ्गसैन्यमनुयाति स्म तं सीतया सार्धं यान्तमेकं सीतातिरिक्तजनरहितमेव लक्ष्मणोऽनुयाति गच्छति । द्वितीयः स्म एवार्थे ॥ ६ ॥

१ दुष्प्रेक्ष्ये लक्ष्मीसमानमिति गो. पाठः । २ बद्धे इति गो. पाठः । ३ अभीति गो. रा. पाठः । ४ स्मेति गो. पाठः । ५ प्रासादानिति गो. पाठः । ६ वर्जितच्छत्रं रामं दृष्ट्वा तदा जना इति गो. पाठः । ७ विधा इति गो. रा. पाठः ।

ऐश्वर्यस्य रसज्ञः सन्कामानां चाकरो महान् । नेच्छत्येवानृतं कर्तुं वचनं धर्मगौरवात् ॥ ७ ॥
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि । तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ॥ ८ ॥
अङ्गरागोचितां सीतां रक्तचन्दनसेविनीम् । वर्षमुष्णं च शीतं च [3]नेष्यत्याशु विवर्णताम् ॥ ९ ॥
अद्य नूनं दशरथः सत्त्वमाविश्य भाषते । नहि राजा प्रियं पुत्रं विवासयितुमर्हति ॥ १० ॥
निर्गुणस्यापि पुत्रस्य कथं स्याद्विनिवासनम् । किं पुनर्यस्य लोकोऽयं जितो वृत्तेन केवलम् ॥ ११ ॥
आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः । राघवं शोभयन्त्येते षड्गुणाः पुरुषर्षभम् ॥ १२ ॥
तस्मात्तस्योपघातेन प्रजाः परमपीडिताः । औदकानीव सत्त्वानि ग्रीष्मे सलिलसंक्षयात् ॥ १३ ॥
पीडया पीडितं सर्वं जगदस्य जगत्पतेः । मूलस्येवोपघातेन वृक्षः पुष्पफलोपगः ॥ १४ ॥

गो० टी०–यमिति । एकं मुख्यम् ॥ ६ ॥

७] ति० टी०–रसज्ञः सुखज्ञः कामानां भोग्यवस्तूनाम् वचनं पितृवचनम् ॥ ७ ॥

रा० टी०–ऐश्वर्यस्येति । कामानां प्रजेप्सितपदार्थानां महान् व्ययेप्यूनतारहितः आकरः सर्वदा दातेत्यर्थः । रामः धर्मगौरवात्स्वनिष्ठवेदविहितानुष्ठानस्याधिक्याढ्येतोः वचनमानुमानिकपित्राज्ञापनमनृतं मिथ्या कर्तुं नेच्छति ॥ ७ ॥

गो० टी०–ऐश्वर्यस्येति । रसज्ञः संग्रहसुखज्ञः कामिनामर्थकाङ्क्षिणां कामदः अभीष्टधनप्रदः अनृतमनृतवचनं कर्तुं धर्मगौरवात् पितृशुश्रूषणवचनकरणविधेयत्वादिरूपधर्मविषयकबहुमानात् ॥ ७–९ ॥

८–९] ति० टी०–भूतैः प्राणिभिः वनप्रयाणानुमत्यर्थं राजसंनिधौ गमनसमये ॥ ८ ॥ ९ ॥

रा० टी०–येति । आकाशगैः भूतैर्वायवादिभिरपि ॥ ८ ॥

रा० टी०–अङ्गेति । अङ्गरागोचितां नित्यं कस्तूर्याद्यालेपनयोग्यां सीतां वर्षादित्रयं विवर्णतां वर्णान्तराक्रान्ततां नेष्यति प्रापयिष्यति ॥ ९ ॥

१०] ति० टी०–सत्त्वं पिशाचम् राजा स्वस्वभावे वर्तमानो हि यतो न पुत्रं विवासयितुमर्हति ॥ १० ॥

रा० टी०–अद्येति । सत्त्वं महात्मनां धर्मं सत्यप्रतिज्ञत्वमित्यर्थः आविश्य आश्रित्य भाषते रामगमनं वक्ति अन्यथा विवासयितुं वनं प्रेषयितुं नार्हति हिरन्यथार्थे । एतेन सत्त्वं पिशाचमित्यर्थं वर्णयन्तो भट्टादयः चिन्त्यास्तदर्थे संकेताभावादसंभवाच्च ॥ १० ॥

गो० टी०–अद्येति । सत्त्वं जन्तुम् 'सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । पिशाचमिति यावत् आविश्य प्राप्य ॥ १० ॥

११] ति० टी०–तदेवाह–निर्गुणस्यापीति । वृत्तेन चरित्रेण तस्मात्पिशाचग्रस्त एवेति भावः ॥ ११ ॥

रा० टी०–तत्र हेतुं वदन्त आहुः–निर्गुणस्येति । वृत्तेनाचरितेन लोको जितः वशीभूत इत्यर्थः ॥ ११ ॥

गो० टी०–निर्गुणस्यापीति । वृत्तेन केवलं चरित्रमात्रेण 'वृत्तं पद्ये चरित्रे च' इत्यमरः । वृत्तेन केवलमित्युक्तिः दानमानादौ विद्यमानेऽपि चरित्रप्राधान्यात् ॥ ११ ॥

१२] ति० टी०–आनृशंस्यमहिंसा अनुक्रोशो दया श्रुतमनुष्ठानपर्यवसायि शास्त्राध्ययनम् शीलं सत्स्वभावः दमो बाह्येन्द्रियनिग्रहः शमश्चित्तनिग्रहः ॥ १२ ॥

रा० टी०–आनृशंस्यमिति । आनृशंस्यं सार्वकालिकसर्वप्रकारकहिंसाभावः अनुक्रोशो दयाबाहुल्यं श्रुतं विज्ञापनाश्रवणं शीलमतिसुशीलता दमः यथापराधं दण्डः शमः शान्तिकरणमेते षड्गुणाः पुरुषर्षभं पुरुषश्रेष्ठं राघवं शोभयन्ति ॥ १२ ॥

गो० टी०–आनृशंस्यमिति । आनृशंस्यमहिंसकत्वम् अनुक्रोशो दया 'कृपा दयानुकम्पा स्यादनुक्रोशः' इत्यमरः । दमः इन्द्रियनिग्रहः शमः चित्तप्रशान्तिः 'शमश्चित्तप्रशान्तिः स्याद्दम इन्द्रियनिग्रहः' इति निर्वचनात् ॥ १२ ॥

१३] ति० टी०–तस्मात्तस्य षड्गुणवत्त्वात् उपघातः पीडनम् पाठान्तरेऽपि स एवार्थः ॥ १३ ॥

रा० टी०–तस्मादिति । तस्मादुक्तषड्गुणवत्त्वाद्धेतोः तस्य रामाभिषेकस्योपघातेन निवर्तनेन प्रजाः परमपीडिताअतिदुःखिताऽसन्तीति शेषः तत्र दृष्टान्तः औदकानि उदकनिवासिनः ॥ १३ ॥

गो० टी०–तस्मादिति । तस्मात् षाड्गुण्ययुक्तत्वात् तस्य रामस्य उपघातेन हिंसनेन औदकानि उदकजीवनानि शैषिकोऽण् ॥ १३ ॥

१४] ति० टी०–जगत्पालकत्वादपि तस्योपघातेन जगत्पीडितमित्याह–पीडयेति । पुष्पफलोपगः पुष्पफलसहितः मूलस्येवेत्यनेन सर्वजगदधिष्ठानत्वमस्य सूचितम् ॥ १४ ॥

रा० टी०–पीडयेति । पीडया निश्चिततरावियोगजनितदुःखेन जगत्पतेः साक्षाद्ब्रह्मादिद्वारा च निखिलभुवननियन्तुः अस्य रामस्य सर्वं जगत्पीडितं तत्र दृष्टान्तः पुष्पफलोपगः पुष्पफलानि प्राप्तः ॥ १४ ॥

गो० टी०–पीडयेति । अस्य जगत्पतेः रामस्य पीडया विवासनरूपया पुष्पफलैरुपगमो यस्य स पुष्पफलोपगः वृक्ष इव अन्येष्वपि दृश्यत इति डप्रत्ययः ॥ १४ ॥

१ कामिनां चैव कामद इति गो. पाठः । २ पितरमिति गो. पाठः । ३ नेष्यन्तीति गो. पाठः । ४ इच्छतीति गो. पाठः । ५ विप्रवासनमिति गो. पाठः ।

मूलं ह्येष मनुष्याणां धर्मसारो महाद्युतिः । पुष्पं फलं च पत्रं च शाखाश्चास्येतरे जनाः ॥ १५ ॥
ते लक्ष्मण इव क्षिप्रं सपतयः सहबान्धवाः । गच्छन्तमनुगच्छामो येन गच्छति राघवः ॥ १६ ॥
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च । एकदुःखसुखा राममनुगच्छाम धार्मिकम् ॥ १७ ॥
समुद्धृतनिधानानि परिध्वस्ताजिराणि च । उपात्तधनधान्यानि हृतसाराणि सर्वशः ॥ १८ ॥
रजसाभ्यवकीर्णानि परित्यक्तानि दैवतैः । मूषकैः परिधावद्भिरुद्विलैरावृतानि च ॥ १९ ॥
अपेतोदकधूमानि हीनसंमार्जनानि च । प्रणष्टबलिकर्मेज्यामन्त्रहोमजपानि च ॥ २० ॥
दुष्काळेनेव भग्नानि भिन्नभाजनवन्ति च । अस्मत्प्रत्यक्तानि कैकेयी वेश्मानि प्रतिपद्यताम् ॥ २१ ॥
वनं नगरमेवास्तु येन गच्छति राघवः । अस्माभिश्च परित्यक्तं पुरं संपद्यतां वनम् ॥ २२ ॥
बिलानि दंष्ट्रिणः सर्वे सानूनि मृगपक्षिणः । त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि ॥ २३ ॥

१५] ति० टी०–मनुष्याणामित्युपलक्षणं प्राणिमात्रस्य वस्तुमात्रस्य च धर्म एवान्तःसारो यस्य सः ॥ १६ ॥

रा० टी०–रामस्य मनुवंशश्रैष्ठ्यमुपपादयन्त आहुः–मूलमिति । धर्मसारः परमधर्मज्ञः महाद्युतिः समाधिकरहिततेजोविशिष्टः एष रामः मनुष्याणां मनुवंशजातानां मूलं तत्प्रभूतत्वकारणमितरे एतद्भिन्नाः जनाः मनुवंशोद्भवाः पुष्पादिकम् एतेन रामसुखेनैव सर्वेषां सुखमिति सूचितम् ॥ १५ ॥

गो० टी०–मूलमिति । मनुष्याणां प्राणिनाम् उपलक्षणमेतत् धर्म एव सारो यस्य स धर्मसारः ॥ १६ ॥

१६] ति० टी०–सपत्न्यः पत्नीसहितास्ते रामोपघातमसहन्तो वयं येन मार्गेण ॥ १६ ॥

रा० टी०–ते इति । सपत्न्यः पत्नीसहिताः वयं येन पथा राघवो गच्छति तेन पथा गच्छन्तं राममनुगच्छामः ॥ १६ ॥

गो० टी०–त इति । ते वयं सपत्न्यः सपत्नीकाः समानान्तविधेरनित्यत्वेन " नपुंसश्च " इति कबभावः येन मार्गेण गच्छति तेनेति शेषः ॥ १६ ॥

१७] ति० टी०–एकदुःखसुखाः समानदुःखसुखाः ॥ १७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–उद्यानानीति । एकदुःखसुखाः रामसमानदुःखसुखभोगिनः, किंच दुःखसुखोपलक्षितसमानद्वन्द्वाः वयं राममनुगच्छामः ॥ १७ ॥

गो० टी०–उद्यानानीति । उद्यानानि राजार्होद्यानसदृशक्रीडावनानि एकदुःखसुखाः समानसुखदुःखाः ॥ १७ ॥

१८] ति० टी०–समुद्धृतनिधानत्वादिधर्मकाणि गृहाणि कैकेयी प्रतिपद्यतामित्यन्वयः निधानानि निक्षेपाः अजिरमङ्गणं परिध्वस्तं मार्जनादिरहितं येषु धनं गवादि, अनिक्षिप्तभूषणादि चोपात्तं गृहीतं येभ्योऽत एव हृतसाराणि ॥ १८ ॥

१९] ति० टी०–उद्विलैरुद्भिलैः ॥ १९ ॥

रा० टी०–इदानीं रामवियोगहेतुत्वात्कैकेयीमाधिक्षिपन्त आहुः–समुद्धृतेत्यादिभिः । समुद्धृतनिधानानि समुद्धृतानि प्रक्षिप्तानि निधानानि संस्थापनयोग्यवस्तूनि येषु परिध्वस्तानि उद्धृतप्रस्तरादिना विनष्टानि अजिराणि अङ्गणानि येषु उपात्तानि चोरादिभिर्गृहीतानि धनधान्यानि येभ्यः तानि अत एव सर्वशः सर्वप्रकारेण हृतानि साराणि येभ्यः अत एव रजसा धूलीभिः अभ्यवकीर्णानि व्याप्तानि अत एव दैवतैः दैवैः परित्यक्तानि अत एव उद्विलैः बिलेभ्यो निःसृतैः परिधावद्भिः मूषकैः आवृतानि ॥ १८ ॥ १९ ॥

गो० टी०–समुद्धृतनिधानानीत्यादि । समुद्धृतनिधानानि सम्यगुद्धृतनिक्षेपाणि परिध्वस्ताजिराणि भग्नाङ्गणानि 'अङ्गणं चत्वराजिरे' इत्यमरः।उपात्तधनधान्यानि अत्र धनशब्देन गवादिकं निक्षिप्तभूषणनिष्कादिकं चोच्यते साराणि शय्यासनादीनि दैवतैः गृहदेवतैः उद्विलैः उद्भिन्नबिलैः उदकसुदकसेचनम् हीनसंमार्जनानि संमार्जनहीनानि दुष्काळेन क्षामक्षोभयुक्तकालेन भाजनं भाण्डादि ॥ १८–२१ ॥

२०] ति० टी०–अपेतोदकत्वादिना मनुष्यराहित्यं सूच्यते ॥ २० ॥

रा० टी०–अत एव अपेताः अभावप्रतियोगिनः उदकधूमा येषु तानि अत एव हीनानि अभावप्रतियोगीनि संमार्जनानि येषु तानि अत एव प्रनष्टाः बल्यादयो येषु तानि ॥ २० ॥

२१] ति० टी०–दुष्काळो राजिकदैविकक्षोभकालः ॥ २१ ॥

रा० टी०–अत एव दुष्काळेन प्रलयकालेनेव भग्नानि अत एव भिन्नानि विदीर्णानि यानि भाजनानि तद्वन्ति अस्मत्यक्तानि अस्मत्कर्तृकत्यागकर्मीभूतानि वेश्मानि गृहाणि कैकेयी प्रतिपद्यतां प्राप्नोतु । श्लोकचतुष्टयमेकान्वयि ॥ २१ ॥

२२] ति० टी०–येन वनेन हेतुना ॥ २२ ॥

रा० टी०–इदानीं रामसहगमनकर्तृणामेव सुखं भवितेति बोधयन्त आहुः–वनमित्यादिभिः। येन वनेन राघवो गच्छति गमिष्यति तद्वनमेव नगरमस्तु भविष्यतीत्यर्थः अस्माभिः रामसहगमनकारिभिः परित्यक्तं पुरमयोध्या वनं वनत्वं संपद्यतां प्राप्स्यतीत्यर्थः ॥ २२ ॥

गो० टी०–वनमिति । येन वनेन हेतुना ॥ २२ ॥

२३] ति० टी०–दंष्ट्रिणः सर्पाः मृगपक्षिणो गिरिस्थाः ॥ २३ ॥

१ त्यजन्तीति गो० पाठः ।

अस्मत्त्यक्तं प्रपद्यन्तु सेव्यमानं त्यजन्तु च । तृणमांसफलादानं देशं व्यालमृगद्विजम् ॥ २४ ॥
प्रपद्यतां हि कैकेयी सपुत्रा सह बान्धवैः । राघवेण वयं सर्वे वने वत्स्याम निर्वृताः ॥ २५ ॥
इत्येवं विविधा वाचो नानाजनसमीरिताः । शुश्राव राघवः श्रुत्वा न विचक्रेऽस्य मानसम् ॥ २६ ॥
स तु वेश्म पुनर्मातुः कैलासशिखरप्रभम् । अभिचक्राम धर्मात्मा मत्तमातङ्गविक्रमः ॥ २७ ॥
विनीतवीरपुरुषं प्रविश्य तु नृपालयम् । ददर्शावस्थितं दीनं सुमन्त्रमविदूरतः ॥ २८ ॥
प्रतीक्षमाणोऽभिजनं तदार्तमनार्तरूपः प्रहसन्निवाथ ।
जगाम रामः पितरं दिदृक्षुः पितुर्निदेशं विधिवच्चिकीर्षुः ॥ २९ ॥
तत्पूर्वमैक्ष्वाकसुतो महात्मा रामो गमिष्यन्नृपमार्तरूपम् ।
व्यतिष्ठत प्रेक्ष्य तदा सुमन्त्रं पितुर्महात्मा प्रतिहारणार्थम् ॥ ३० ॥

रा० टी०–वने सिंहादिभीतिरप्यस्माकं न भविष्यतीति बोधयन्त आहुः–बिलानीति । सर्वे दंष्ट्रिणः सर्पादयः अस्मद्भयाद्भीताः सन्तः बिलानि मृगपक्षिणः सानूनि शिखराणि च गजाः सिंहाश्च वनानि त्यजन्तु त्यक्ष्यन्ति ॥ २३ ॥

गो० टी०–बिलानीति । दंष्ट्रिणः सर्पाद्याः अस्मद्भयात् अस्मत्प्रयुक्तभयहेतोः ॥ २३ ॥

२४–२५] ति० टी०–अस्मत्त्यक्तम् पुरमिति शेषः सेव्यमानमस्माभिः सेव्यमानं वनमित्यर्थः । कर्तारोऽत्र पूर्वोक्ता दंष्ट्र्यादयः तृणमांसफलानामादानं यस्मात्तम् । व्यालमृगद्विजं तद्वन्तम् अर्शआद्यच् । तादृशं देशमिमं कैकेयी प्रपद्यतामित्यन्वयः ॥ २४ ॥ २५ ॥

रा० टी०–ननु भवत्कर्तृकसर्ववन्यजन्तुपीडा भविष्यतीत्यत आहुः–अस्मदिति । अस्मत्त्यक्तमस्माभिर्हीनं वनं प्रपद्यन्तु प्रपद्यन्तां दंष्ट्र्यादय इति शेषः तेन तेषामपि स्थितेः सावकाशत्वाच्च पीडेति सूचितम् तृणमांसफलादानां तृणादिभक्षणशीलानां देशं निवासस्थानं रामविहीनमेतत्पुरमिति शेषः कैकेयी प्रपद्यतामत एव व्यालमृगद्विजं व्यालादीन् प्रपद्यतां तैरेव सह मैत्र्यादिकं क्रियतामित्यर्थः । वयं सर्वे तु राघवेण सह निर्वृताः परमानन्दं प्राप्ताः सन्तः वने वत्स्याम वत्स्यामः ॥ २४ ॥ २५ ॥

गो० टी०–अस्मत्त्यक्तमिति । अस्माभिस्त्यक्तं पुरं सेव्यमानं वनमित्यर्थसिद्धम् । अत्र कर्तारः पूर्वोक्तदंष्ट्र्यादयः॥२४॥

गो० टी०–तृणेति । तृणमांसफलादानां तृणादाः हरिणादयः, मांसादाः व्याघ्रादयः, फलादाः वायसादयः, व्यालमृगद्विजं व्यालाः क्रूराः मृगद्विजाः यस्मिंस्तादृशं देशम् इदमेव वनरं तादृशं भविष्यतीति भावः निर्वृताः सुखिताः ॥ २५ ॥

२६] ति० टी०–न विचक्रे न विकारं प्राप्तम् ॥ २६ ॥

रा० टी०–इतीति । समीरिताः उच्चारिताः विविधा अनेकविधैकैकप्रत्ययोद्भाविषयैकपरिछेदपटुकाः वाचः शुश्राव श्रुत्वापि अस्य रामस्य मानसं मनः न विचक्रे विकारं न प्रापोत् तेन रामस्य क्षमातिशयो गुणो व्यक्तः ॥ २६ ॥

गो० टी०–इतीति । श्रुत्वावस्थितस्येति शेषः न विचक्रे न विकारं प्राप ॥ २६–२८ ॥

२७–२८] ति० टी०–पुनस्तद्वार्तांश्रवणानन्तरमपि मातुः कैकेय्याः ॥ २७ ॥ २८ ॥

रा० टी०–प्रासङ्गिकप्रजावृत्तं संवर्ण्य प्रकृतरामवृत्तमाह–स इति । धर्मात्मा रामः मातुः कैकेय्याः वेश्म गृहमभिचक्राम जगाम पितुस्तद्वेश्मन्येव स्थितत्वादिति भावः ॥ २७ ॥

रा० टी०–विनीतेति । विनीताः नम्रीभूताः वीरपुरुषाः यं तं सुमन्त्रं ददर्श ॥ २८ ॥

२९] ति० टी०–आर्तं खिन्नमभिजनं देशं तत्स्थजनमिति यावत् । प्रतीक्षमाणः पश्यन्नपि निदेशमाज्ञाम् ॥ २९ ॥

रा० टी०–सुमन्त्रदर्शनानन्तरकालिकं गमनं वर्णयन्नाह–प्रतीक्षमाण इति । आर्तं निश्चितवियोगजनितदुःखाक्रान्तमभिजनं प्रतीक्षमाणः पश्यन्नार्तरूपः सावकालिकार्तत्वाभावः विशिष्टरूपविशिष्टः पितुर्निदेशमाज्ञां विधिवच्चिकीर्षुः कर्तुमिच्छुः रामः प्रहसन्निव पितरं जगाम ॥ २९ ॥

गो० टी०–प्रतीक्षमाण इति । निदेशं नियोगम् ॥ २९ ॥

३०] ति० टी०–तत्पूर्वं सः स्वाकारणार्थागमनकालः पूर्वो यस्यार्तरूपत्वतस्तादृशं तदारभ्यार्तरूपमिति यावत् । सुमन्त्रं प्रेक्ष्य प्रतिहारणार्थं स्वागमननिवेदनार्थं व्यतिष्ठत द्वार्येवेति शेषः ॥ ३० ॥

रा० टी०–तदिति । आर्तरूपं निश्चिततरमवियोगजनितदुःखाक्रान्तस्वरूपं नृपं गमिष्यन् ऐक्ष्वाकसुतो रामः तत्पूर्वं तस्मात्पितुरपि पूर्वं पौर्वकालिकं सुमन्त्रं प्रेक्ष्य दृष्ट्वा पितुः प्रतिहारणार्थं स्वागमनबोधनार्थं व्यतिष्ठत । एकमहात्मशब्दस्य महतां ब्रह्मादित्रयाणां ब्रह्मा आत्मा प्रवर्तक इत्यर्थः द्वितीयस्य तु मर्यादापालकत्वरूपस्वभावविशिष्ट इत्यर्थ इति न पौनरुक्त्यम् ॥ ३० ॥

गो० टी०–तत्पूर्वमिति । तत्पूर्वं तत्प्रथमं महात्मा महावैद्यः प्रतिहारणार्थं स्वागमननिवेदनार्थम् ॥ ३० ॥

१ प्रपद्यन्तामिति गो. पाठः । २ फलादानामिति गो. रा. पाठः । ३ वने सर्वे सहेति गो. पाठः । ४ रामः श्रुत्वा चेति गो. पाठः । ५ पितुर्दूरादिति गो. पाठः । ६ नपीति गो. पाठः । ७ वनमिति गो. पाठः ।

पितुर्निदेशेन तु धर्मवत्सलो वनप्रवेशे कृतबुद्धिनिश्चयः ।
स राघवः प्रेक्ष्य सुमन्त्रमब्रवीन्निवेदयस्वागमनं नृपाय मे ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ।

सुमन्त्रावेदितरामागमनो दशरथो दारैः समं तमानेतुं सुमन्त्रं न्ययोजयत् । रामदर्शनमात्रेण मूर्छितं दशरथं दृष्ट्वा राजस्त्रियो भृशं विलेपुः । सीतालक्ष्मणाभ्यां समं वनगमनाभ्यनुज्ञामर्थयमाने रामे स त्वनिग्रहपूर्वकं राज्यस्वीकारमनुमेने । राज्यादिष्वात्मनो निरभिलाषित्वं पितृवचसोऽवश्यकर्तव्यत्वं च विनिवेद्य रामः पितरमसान्त्वयदथो पुत्रवियोगशोकेन मूर्छामाविशति दशरथे सुमन्त्रसहिताः सर्वा अन्तःपुरस्त्रियो मूर्छां प्रपेदिरे ।

ततः कमलपत्राक्षः श्यामो निरुपमो महान् । उवाच रामस्तं सूतं पितुराख्याहि मामिति ॥ १ ॥
स राममेषितः क्षिप्रं संतापकलुषेन्द्रियम् । प्रविश्य नृपतिं सूतो निःश्वसन्तं ददर्श ह ॥ २ ॥
उपरक्तमिवादित्यं भस्मच्छन्नमिवानलम् । तटाकमिव निस्तोयमपश्यज्जगतीपतिम् ॥ ३ ॥
आबोध्य च महाप्राज्ञः परमाकुलचेतनम् । राममेवानुशोचन्तं सूतः प्राञ्जलिरब्रवीत् ॥ ४ ॥
तं वर्धयित्वा राजानं पूर्वं सूतो जयाशिषा । भयविक्लवया वाचा मन्दया श्लक्ष्णयाब्रवीत् ॥ ५ ॥

३१] ति० टी०—तदेव सुमन्त्रमाह—पितुरिति ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०—पितुरिति । पितुर्निदेशेन आज्ञयैव वनप्रवेशे कृतौ बुद्धिनिश्चयौ मतिजनतासंग्रहाभावौ येन सः राघवः मे स्वागमनं नृपाय निवेदय इति सुमन्त्रमब्रवीत् ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

गो० टी०—पितुरिति । अस्यान्ते इतिकरणं द्रष्टव्यम् ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

१-२] ति० टी०—'निरुदरः' इति पाठे तनुमध्य इत्यर्थः। श्यामः श्यामवर्णः तरुणश्च । अत्र कवेरपि करुणासमग्रत्वेन वर्णितस्यैव पुनः पुनः कथनमदोषाय ॥ १ ॥ २ ॥

रा० टी०—उत्तरग्रन्थसंदर्भशुद्धये पुनः सूतं प्रति रामोक्तिमाह—तत इति । निरुपमः सादृश्यप्रतियोगित्वाद्वयोगित्वाभावाक्रान्तत्वेनोपमानोपमेयरहितः राम उवाच ॥ १ ॥

रा० टी०—स इति । संतापकलुषेन्द्रियं निश्चिततरामवियोगजनितसंतापव्याप्तचित्तं नृपतिं ददर्श ॥ २ ॥

गो० टी०—पूर्वसर्गान्तोक्तमर्थं वक्ष्यमाणसंघट्टनार्थं संग्रहेण दर्शयति—तत इति । विशेषणैर्निर्विकारत्वं सूच्यते निरुदरः तनुमध्य इत्यर्थः ॥ १ ॥ २ ॥

३] ति० टी०—उपरक्तं राहुग्रस्तम्। पुनरपश्यदिति वाल्मीकेः प्रयोगो वर्णनीयमयीभावेन तस्यापि शोकग्रस्तत्वात् ॥ ३ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—उपेति । उपरक्तं राहुणा ग्रस्तमादित्यमिव निस्तोयं शैवालाद्याच्छादनहेतुकतोयरहितत्वेन प्रतीयमानं तटाकमिवापश्यत् अत एव पूर्वोपमानाभ्यां न वैरूप्यम् एतदुपमालङ्कारेण राज्ञो वास्तवदुःखाभावः सूचितः तेनाप्रकटसाकेते रामसंयोगो भवितेति राजनिश्चयः पूचितः ॥ ३ ॥

गो० टी०—उपरक्तमिति । उपरक्तं राहुग्रस्तं विशेषणान्तरकथनार्थं पुनरपश्यदित्युक्तिः ॥ ३ ॥ ४ ॥

४] ति० टी०—आबोध्य महाराज इति संबोध्य राममेवोद्दिश्य शोचन्तम् ॥ ४ ॥

रा० टी०—आबोध्येति । आबोध्य महाराजादिशब्देन राजानं संबोध्याब्रवीत् ॥ ४ ॥

५] ति० टी०—वर्धयित्वा संपूज्य । भयविक्लवया रामो वनप्रयाणोद्युक्त इतीदं परमनिष्टं कथं राज्ञे वदिष्यामीति भयेन विक्लवया कातरया अश्लक्ष्णयेति छेदः ॥ ५ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—तमिति । जयाशिषा जयसूचकाशीर्वचनैः पूर्वं पौर्वकालिकं तं राजानं वर्धयित्वा प्रोत्साह्य भयविक्लवया स्वाभाविकराजतेजोहेतुकभीतियुक्तया मन्दया दैन्यविशिष्टया वाचा अब्रवीत् ॥ ५ ॥

गो० टी०—तमिति । भयविक्लवया भयेन कातरया दुःखितोऽयं किं वदेदिति भयमत एव मन्दया ॥ ५ ॥

---

१ निरुदर इति गो. पाठः । २ कलुषेन्द्रिय इति गो. पाठः । ३ आलोक्य इति गो. पाठः । ४ चेतसमिति गो. पाठः । ५ आसदर्दिति गो. पाठः । ६ श्लक्ष्णमब्रवीदिति गो. पाठः ।

अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः । ब्राह्मणेभ्यो धनं दत्त्वा सर्वं चैवोपजीविनाम् ॥ ६ ॥
स त्वां[1] पश्यतु भद्रं ते रामः सत्यपराक्रमः । सर्वान्सुहृद आपृच्छ्य त्वां[2] हीदानीं दिदृक्षते ॥ ७ ॥
गमिष्यति महारण्यं तं पश्य जगतीपते । वृतं राजगुणैः सर्वैरादित्यमिव रश्मिभिः ॥ ८ ॥
स सत्यवाक्[3]यो धर्मात्मा गाम्भीर्यात्सागरोपमः । आकाश इव निष्पङ्को[4] नरेन्द्रः प्रत्युवाच तम् ॥ ९ ॥
सुमन्त्रानय मे दारान्ये केचिदिह मामकाः । दारैः परिवृतः सर्वैर्द्रष्टुमिच्छामि राघवम् ॥ १० ॥
सोऽन्तःपुरमतीत्यैव स्त्रियस्ता वाक्यमब्रवीत् । आर्यो[5] ह्वयति वो राजा गम्यतां तत्र मा चिरम् ॥ ११ ॥
एवमुक्ताः स्त्रियः सर्वाः सुमन्त्रेण नृपाज्ञया । प्रचक्रमुस्तद्भवनं भर्तुराज्ञाय शासनम् ॥ १२ ॥
अर्धसप्तशतास्तत्र[6] प्रमदास्ताम्रलोचनाः । कौसल्यां परिवार्याथ शनैर्जग्मुर्धृतव्रताः ॥ १३ ॥
आगतेषु च दारेषु समवेक्ष्य महीपतिः । उवाच राजा तं सूतं सुमन्त्रानय मे सुतम् ॥ १४ ॥
स सूतो राममादाय लक्ष्मणं मैथिलीं तथा । जगामाभिमुखस्तूर्णं सकाशं जगतीपतेः ॥ १५ ॥
स राजा पुत्रमायान्तं दृष्ट्वा चारात्कृताञ्जलिम् । उत्पपातासनात्तूर्णमार्तः स्त्रीजनसंवृतः ॥ १६ ॥

६–८] ति० टी०–उपजीविनां च तेभ्यश्च दत्त्वा सर्वं धनं दत्त्वेत्यनेन सर्वथा तिष्ठासाभावो ध्वन्यते ॥ ६–८ ॥

रा० टी०–तद्वचनमेवाह–अयमिति । उपजीविनामुपजीविभ्यश्च धनं दत्त्वा ते सुतो द्वारि तिष्ठति ॥ ६ ॥

रा० टी०–स इति । स रामः त्वां पश्यतु तत्र हेतुः सर्वान् सुहृदः आपृच्छ्य वनगमनाय संमतिं कृत्वा इदानीं त्वां दिदृक्षते द्रष्टुमिच्छति ॥ ७ ॥

रा० टी०–गमिष्यतीति । यः महारण्यं गमिष्यति तं राजगुणैर्वृतं युक्तं रामं पश्य ॥ ८ ॥

गो० टी०–अयमित्यादि । सर्वं गृहोपकरणादिकम् ६–८

९] ति० टी०–स दशरथः निष्पङ्को निष्पापः । 'निष्पन्दः' इति पाठे निश्चल इत्यर्थः ॥ ९ ॥

रा० टी०–स इति । धर्मात्मा परमधर्मप्रवर्तकः निष्पङ्कः पङ्करहितः आकाश इव नरेन्द्रस्तं रामं प्रत्युवाच सविशेषणाकाशोपमया राज्ञः सर्वकालमधर्मसंसर्गाभावः सूचितः ॥ ९ ॥

गो० टी०–स इति । निष्पङ्कः निर्लेपः ॥ ९ ॥ १० ॥

१०] ति० टी०–इह मद्वेश्मनि ये केचिन्मामका दाराः स्त्रियः सन्ति तान्दारानिहानय ॥ १० ॥

रा० टी०–तद्वचनमेवाह–सुमन्त्रेति । हे सुमन्त्र ! मे दारान् स्त्रियस्त्वमानय । नन्वत्र दाराणां किं प्रयोजनमित्यत आह–मामकाः ये केचिद्दारास्तैः सर्वैः परिवृतोऽहं राघवं द्रष्टुमिच्छामि ॥ १० ॥

११] ति० टी०–अतीत्यातिवेगेन प्राप्य ह्वयत्याह्वयति वो युष्माकं राजा अवैधव्यदत्वात्, न तु प्रजानां तासां दुःखदत्वात् आगम्यतामिति पदम् ॥ ११ ॥

रा० टी०–राजवचनश्रवणानन्तरकालिकं सुमन्त्रवृत्तमाह–स इति । आर्यः राजा वः युष्मान् ह्वयति आह्वयति अतस्तत्र गम्यताम् ॥ ११ ॥

गो०टी०–सोऽन्तःपुरमिति । ह्वयति आह्वयति॥११॥१२॥

१२] ति० टी०–प्रचक्रमुर्गच्छन्ति स्म । तद्भवनं तस्य राज्ञो भवनम् ॥ १२ ॥

रा० टी०–एवमिति । शासनमाज्ञापनमाज्ञाय ज्ञात्वा प्रचक्रमुः जग्मुः ॥ १२ ॥

१३] ति० टी०–अर्धसप्तशताः एकदेशिसमासः सप्तशतस्यार्धं संख्या यासां ता इत्यर्थः । अर्धमाद्यजन्तः । अत एवाग्रे वक्ष्यति–'त्रयः शतशतार्धा हि' इति । ताम्रलोचनाः रामप्रयाणश्रवणजदुःखजातरोदनेनेति शेषः । कौसल्यां परिवार्येत्यनेन प्राग्लक्ष्मणोक्तं तस्याः सर्वप्रभ्वीत्वं ध्वनितम् ॥ १३ ॥

रा० टी०–अर्धेति । अर्धसप्तशताः सार्धशतत्रयसंख्याकाः ताम्रलोचनाः निश्चितरामवियोगजनितशोकहेतुकरोदनहेतुकात्यन्तारुणीभूतनयनाः प्रमदाः कौशल्यां परिवार्य परिवृत्य तत्र राजसमीपे जग्मुः प्रापुः । अर्धसप्तशतशब्दः एकदेशिसमासप्रकृतिकः अर्धमाद्यजन्तः ॥ १३ ॥

गो० टी०–अर्धसप्तशता इति । अर्धसप्तशताः अर्धं सप्तशतस्येति विग्रहः अर्धं नपुंसकमिति समासः । ताम्रलोचनाः सदा रामविवासननिमित्तरोदनादिति भावः ॥ १३–१५ ॥

१४–१५] ति०टी०–समवेक्ष्य दारानिति शेषः॥१४॥१५॥

रा० टी०–आगतेष्विति । समवेक्ष्य अवलोक्य ॥ १४ ॥

रा०टी०–स इति । आदाय गृहीत्वा सकाशं समीपम्॥१५॥

१६] ति० टी०–आरादूरतः उत्पपातालिङ्गनार्थम् ॥१६॥

रा० टी०–स इति । आरादूरत एव दृष्ट्वा तूर्णं शीघ्रमासनादुत्पपात उत्तस्थौ ॥ १६ ॥

गो० टी०–स इति । उत्पपात उदतिष्ठत् ॥ १६ ॥

---

१ स्वेति गो. पाठः । २ स्वामिदानीमिति गो. पाठः । ३ वादीति गो. पाठः । ४ धार्मिकमिति गो. पाठः । ५ आर्या इति गो. पाठः । ६ तास्त्विति गो. पाठः । ७ त्वेति गो. पाठः । ८ दूरादिति गो. पाठः ।

सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशांपतिः । तमसंप्राप्य दुःखार्तः पपात भुवि मूर्छितः ॥ १७ ॥
तं रामोऽभ्यपतत्क्षिप्रं लक्ष्मणश्च महारथः । विसंज्ञमिव दुःखेन सशोकं नृपतिं तदा ॥ १८ ॥
स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि । हा हा रामेति सहसा भूषणध्वनिभिश्रितः ॥ १९ ॥
तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ । पर्यङ्के सीतया सार्धं रुदन्तः समवेशयन् ॥ २० ॥
अथ रामो मुहूर्तस्य लब्धसंज्ञं महीपतिम् । उवाच प्राञ्जलिर्बाष्पशोकार्णवपरिप्लुतम् ॥ २१ ॥
आपृच्छे त्वां महाराज सर्वेषामीश्वरोऽसि नः । प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् ॥ २२ ॥
लक्ष्मणं चानुजानीहि सीता चोन्वेतु मां वनम् । कारणैर्बहुभिस्तथ्यैर्वार्यमाणौ न चेच्छतः ॥ २३ ॥
अनुजानीहि सर्वान्नः शोकमुत्सृज्य मानद । लक्ष्मणं मां च सीतां च प्रजापतिरिवात्मजान् ॥ २४ ॥

१७] ति० टी०–तमालिङ्गितुमिच्छितं राममप्राप्य मध्य एव दुःखितः पपात ॥ १७ ॥

रा० टी०–सोऽभीति । दुःखार्तः निश्चितवियोगजनितदुःखाक्रान्तः ॥ १७ ॥

गो० टी०–स इति । अभिदुद्राव अभिमुखमाजगाम॥१७॥

१८] ति० टी–अभ्यपतदभ्यागतवान् विसंज्ञमिव विसंज्ञमेव ॥ १८ ॥

रा० टी०–तमिति । तथा तेन प्रकारेण पतितमतएव विसंज्ञं संज्ञारहितमिव तं नृपतिं रामोऽभ्यपतच्छीघ्रमभिमुखमगच्छत् ॥ १८ ॥

गो० टी०–तमिति । अभ्यपतद् उत्थापनार्थमिति भावः इवशब्द एवकारार्थः ॥ १८ ॥

१९] ति० टी०–भूषणध्वनिमिश्रित उरश्शिरस्ताडनादिना चञ्चलतरचञ्चद्भूषणध्वनिमिलितः ।' मूर्छितः ' इति पाठेऽपि स एवार्थः व्याप्त इत्यर्थो वा ॥ १९ ॥

रा० टी०–स्त्रीति । हा हा रामेति स्त्रीसहस्रनिनादः संजज्ञे ॥ १९ ॥

गो० टी०–स्त्रीसहस्रनिनाद इति । भूषणध्वनिभिः मूर्छितः व्याप्तः ॥ १९ ॥

२०] ति० टी०–तौ सीतया सार्धं तं राजानं बाहुभ्यां परिष्वज्य यथा पीडा न भवति तथालिङ्गितमुत्थाप्य पर्यङ्के समवेशयन्स्थापितवन्तः ॥ २० ॥

रा० टी०–तमिति । सीतया सार्धं रामलक्ष्मणौ रुदन्तः रुदन्तं तं राजानं परिष्वज्य आलिङ्ग्य पर्यङ्के समवेशयन् समवेशयेतां समस्थापयेताम् ॥ २० ॥

गो० टी०–तमिति । रामलक्ष्मणौ सीतया सार्धं तं बाहुभ्यां परिष्वज्य पर्यङ्के समवेशयन्नित्यर्थः ॥ २० ॥

२१] ति० टी०–मुहूर्तस्य संबन्धसामान्ये षष्ठी मुहूर्तेन लब्धसंज्ञमित्यर्थः ॥ २१ ॥

रा० टी०–अथेति । मुहूर्तस्य मुहूर्तेन लब्धा संज्ञा येन तं शोकार्णवपरिप्लुतं महीपतिं प्राञ्जलिः राम उवाच मुहूर्तस्येति संबन्धसामान्ये षष्ठी ॥ २१ ॥

गो० टी०–अथेति । 'मुहूर्तस्य' इतिपाठे मुहूर्तेनेत्यर्थः॥२१॥

२२] ति० टी०–कुशलेन मां पश्य सौम्येन चक्षुषा मामनुगृह्णाणेत्यर्थः ॥ २२ ॥

रा० टी०–तद्वचनमेवाह–आपृच्छ इति । यतः नोऽस्माकं सर्वेषां त्वमीश्वरोऽसि अतस्त्वामापृच्छे विज्ञापयामि । विज्ञापनमेवाह दण्डकारण्यं प्रस्थितं मां कुशलेन पश्य कुशलफलकावलोकनं कुरु फलस्य हेतुत्वेन विवक्षणात्तृतीया ॥ २२ ॥

गो० टी०–आपृच्छ इति । कुशलेन चक्षुषेति शेषः हेतौ तृतीया वा ॥ २२ ॥

२३] ति० टी०–वनं प्रति प्रस्थितं मां सीता चान्वेतु गच्छत्विति लक्ष्मणं च प्रस्थितमनुजानीहीत्यर्थः । ननु लक्ष्मणसीतयोः कुतो वनवासकष्टप्राप्तिः नह्यसौ वरनिर्बन्धस्तयोरत आह–कारणैरिति । हेतुभिस्तथ्यैर्व्यवहारदशयासत्यैः न चेच्छतः इह स्थातुमिति शेषः ॥ २३ ॥

रा० टी०–लक्ष्मणमिति । अनुजानीहि आज्ञापय वनं गन्तुमिति शेषः सीता च मामन्वेति अनुगच्छति तामप्यनुज्ञापयेत्यर्थः । नन्विमौ वारयेत्यत आह–तथ्यैः प्रलम्भनादिसंसर्गरहितैः बहुभिः अनेकविधैः कारणैः भवदादिसेवादिकपहेतुभिः वार्यमाणावपि तौ नेच्छत इह स्थितिमिति शेषः ॥२३॥

गो० टी०–लक्ष्मणमिति । सीता चेति तामप्यनुजानीहीति भावः । तौ निवर्तयेत्याशङ्क्याह–कारणैरिति । कारणैः दुःखादिकारणैः तथ्यैः परमार्थैः नचेच्छतः अननुगमनमिति शेषः ॥ २३ ॥

२४] ति० टी०–अनुजानीमनुज्ञां देहि प्रजापतिर्ब्रह्मात्मजान्सनकादींस्तपांसि चरितुमुद्युक्तान्यथानुज्ञां दत्तवांस्तद्वदित्यर्थः ॥ २४ ॥

रा० टी०–उपसंहरन्नाह–अन्विति । हे मानद ! सर्वेसंमानदातः ! प्रजापतिर्ब्रह्मा आत्मजान् तपश्चरणोत्सुकसनकादीनिव सर्वान्नोऽस्माननुजानीहि आज्ञापय ॥ २४ ॥

---

१ तदेति गो. पाठः । २ मूर्छित इति गो. पाठः । ३ मुहूर्तेनेति गो. पाठः । ४ भूयेति गो. वाक्यमिति रा. पाठः । ५ अन्वेतीति गो. रा. पाठः । ६ प्रभा इति गो. पाठः ।

प्रतीक्षमाणमव्यग्रमनुज्ञां जगतीपतेः । उवाच राजा संप्रेक्ष्य वनवासाय राघवम् ॥ २५ ॥
अहं राघव कैकेय्या वरदानेन मोहितः । अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् ॥ २६ ॥
एवमुक्तो नृपतिना रामो धर्मभृतां वरः । प्रत्युवाचाञ्जलिं कृत्वा पितरं वाक्यकोविदः ॥ २७ ॥
भवान्वर्षसहस्राय पृथिव्या नृपते पतिः । अहं त्वरण्ये वत्स्यामि न मे राज्यस्य काङ्क्षिता ॥ २८ ॥
नव पञ्च च वर्षाणि वनवासे विहृत्य ते । पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप ॥ २९ ॥
रुदन्नार्तः प्रियं पुत्रं सत्यपाशेन संयुतः । कैकेय्या चोद्यमानस्तु मिथो राजा तमब्रवीत् ॥ ३० ॥
श्रेयसे वृद्धये तात पुनरागमनाय च । गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयम् ॥ ३१ ॥

गो० टी०–अनुजानीहीति । लक्ष्मणं सीतां मां च सर्वान्नः अनुजानीहीत्यन्वयः । "त्यदादीनि सर्वैर्नित्यम्" इत्येकशेषः ॥ २४ ॥

२५] ति० टी०–वनवासाय जगतीपतेः स्वस्यानुज्ञामनुमतिं प्रतीक्षमाणं प्रार्थयमानम् अव्यग्रं लेशतोऽपि विषादरहितं राघवं प्रेक्ष्योवाच ॥ २५ ॥

रा० टी०–प्रतीति । जगतीपतेः वनवासायानुज्ञां प्रतीक्षमाणमव्यग्रं सर्वकालं व्यग्रतारहितं राघवं रामं प्रेक्ष्य इवाच ॥२५॥

गो० टी०–प्रतीक्षमाणमिति । वनवासाय जगतीपतेः स्वस्यानुज्ञां प्रतीक्षमाणमित्यन्वयः ॥ २५ ॥

२६–२७] ति० टी०–हे राघव ! यतोऽहं कैकेय्या वरदानेन मोहितो निरुत्तरतया शोकपरवशो जातः, अतो राज्यानर्हः अतो मां निगृह्य बद्ध्वाऽयोध्यायां त्वमेव स्वभुजवैभवेन राजा भव प्रदत्तमभिषेकं समापयेति यावत् ॥ २६ ॥ २७ ॥

रा० टी०–तद्वचनमेवाह–अहमिति । हे राघव ! कैकेय्या सह अहं वरदानेन देवादिप्रार्थितत्वत्कर्तृकवरप्रदानेन मोहितः वैचित्त्यं प्राप्तः देवादिप्रार्थनां संस्मृत्यैव त्वां वनं प्रेषितुमुद्यतोऽस्मीत्यर्थः । अतोऽद्य मां राज्यहेतुभूतविजयसंपत्तिं निगृह्य अयोध्यायां त्वं राजा भव ॥ २६ ॥

रा० टी०–एवमिति । वाक्यकोविदं पितरं रामः प्रत्युवाच ॥ २७ ॥

गो०टी०–अहमिति । मोहितः वञ्चित इत्यर्थः॥२६॥२७॥

२८] ति० टी०–भवान्वर्षसहस्राय पतिर्भवतु, अतः परमप्यनेककालं राजा भवेत्यर्थः । त्वया यो वरो दत्तस्तमनृतं कर्तुमहं न योग्यः तव नरकपातप्रसङ्गात् अतोऽहमरण्ये वत्स्यामि मे राज्यस्य काङ्क्षिता इच्छा न ॥ २८ ॥

रा० टी०–तद्वचनमेवाह–भवानिति । हे नृपते ! वर्षसहस्राय पृथिव्याः वर्षसहस्राणां बहुखण्डानामयः प्राप्तिर्यस्यां सा एव पृथिवीति कर्मधारयः तस्याः यतो भवानेव पतिः अतः राज्यस्य काङ्क्षिता आकाङ्क्षा मे नास्ति अतः अरण्ये अहं वत्स्यामि भवदाज्ञापिताचरणपूर्वकं विहरिष्यामीत्यर्थः ॥ २८ ॥

गो० टी०–भवानिति । वर्षसहस्राय अनेकवर्षाणीत्यर्थः मे मय्यनृतमनृतवचनम् ॥ २८ ॥

२९] ति० टी०–प्रतिज्ञान्ते प्रतिज्ञासमाप्तौ ते पादौ ग्रहीष्यामीत्यन्वयः ॥ २९ ॥

रा० टी०–विहारावधिं बोधयन्नाह–नवेति । प्रतिज्ञान्ते अवध्यवसाने ते पादौ पुनः ग्रहीष्यामि पुनरित्यनेन प्रतिज्ञामध्ये एव तव पादौ एकवारं ग्रहीष्यामिति सूचितम् । नचावध्यन्ते राज्ञः प्रकटस्थित्यभावेन तत्पादग्रहणासंभवात् रामस्य मृषा संसर्गित्वापत्तिरिति वाच्यं मातापित्रोरभेदाध्यवसायात् मातृपादग्रहणस्य संभवात् तस्य च पितृपादग्रहणानतिरेकान्मृषासंसर्गित्वस्यासंभवात्, किंच पदयोश्चरणयोः इमौ पादौ पादुकापदार्थौ ग्रहीष्यामि नमस्करिष्यामीत्यर्थः । 'पादम्' इति पाठे तु पदमेव पादं त्वदत्तं राजोचितस्थानं त्राणं वेत्यर्थः ग्रहीष्यामि स्वीकरिष्यामि । तथा च मेदिनी–'पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः । पादतद्विक्षयोः स्थानत्राणयोरङ्घ्रिवस्तुनोः' ॥ २९ ॥

गो० टी०–नवेति । प्रतिज्ञान्ते प्रतिज्ञावसाने ॥ २९ ॥

३०] ति० टी०–कैकेय्यापैव गमनमनुमन्यस्वेति मिथो रहसि चोद्यमानः ॥ ३० ॥

रा० टी०–रुदन्निति । सत्यपाशेन सत्यस्य यः पः पालनं तस्य यः अंशो व्याप्तिः परिपूर्णता तेन संयुतः चोद्यमानः वनायाज्ञापयेति रामेण प्रार्थ्यमानः कैकेय्या सह राजा तं राममब्रवीत् । मिथ एवार्थकम् ॥ ३० ॥

गो० टी०–रुदन्निति । मिथः रहसि कैकेय्या चोद्यमानः अद्यैव प्रस्थापयेति प्रेर्यमाणः ॥ ३० ॥

३१] ति० टी०–श्रेयसे परलोकहिताय वृद्धये इहलोकेऽभ्युदयाय अरिष्टं पापदुःखभिन्नं पुण्यं सुखं च तेऽस्तु । अव्ययः सन्नकुतोभयं पन्थानं गच्छस्वेत्यार्षम् ॥ ३१ ॥

रा० टी०–तद्वचनमेवाह–श्रेयसे इति । तात हे प्रिय हे स्व ममात्मप्रभूते ! श्रेयसे अवलोकनकर्तॄणां कल्याणाय वृद्धये केषांचिद्राज्यादिप्राप्तये पुनः आगमनाय च अकुतोभयं सर्वहेतुकभयाभावविशिष्टमारिष्टमनिशयेन शत्रूणां निवर्तकं पन्थानमव्ययः सर्वकालं व्यग्रतारहितस्त्वं गच्छ ॥ ३१ ॥

गो० टी०–श्रेयस इति । श्रेयसे पारलौकिकफलाय वृद्धये ऐहिकफलाय गच्छस्व गच्छ अरिष्टं शुभम् 'अरिष्टेति शुभाशुभे' इत्यमरः । अकुतोभयं कुतश्चिदपि जन्तोर्भयरहितम् ॥ ३१ ॥

१ कोविदमिति रा० पाठः । २ कार्यं त्वयानृतमिति गो० पाठः । ३ संयत इति गो० पाठः ।

नहि सत्यात्मनस्तात धर्माभिमनसस्तव । [1]संनिवर्तयितुं बुद्धिः शक्यते रघुनन्दन ॥ ३२ ॥
अद्य त्विदानीं रजनीं पुत्र मा गच्छ सर्वथा । [2]एकाहं दर्शनेनापि साधु तावच्चराम्यहम् ॥ ३३ ॥
मातरं मां च संपश्यन्वसेमामद्य शर्वरीम् । तर्पितः सर्वकामैस्त्वं श्वः [3]काल्ये साधयिष्यसि ॥ ३४ ॥
दुष्करं क्रियते पुत्र सर्वथा राघव [4]प्रिय । त्वया हि मत्प्रियार्थं तु वनमेवमुपाश्रितम् ॥ ३५ ॥
न चैतन्मे प्रियं पुत्र शपे सत्येन राघव । छद्मना चलितस्त्वस्मि स्त्रिया [5]भस्माग्निकल्पया ॥ ३६ ॥
वञ्चना या तु लब्धा मे तां त्वं निस्तर्तुमिच्छसि । अनया वृत्तसादिन्या कैकेय्याभिप्रचोदितः ॥ ३७ ॥

३२] ति०टी०—सत्यात्मनः सत्यप्रतिष्ठितस्वभावस्य धर्माभिमनसो धर्मसंपादनाभिनिविष्टमनसः ॥ ३२ ॥

रा० टी०—नेति । तात हे प्रिय ! धर्माभिमनसः परमधर्मप्रवर्तकस्य अत एव सत्यात्मनः मिथ्यासंसर्गरहितस्वभावविशिष्टस्य तव बुद्धिः वनगमनविषयकनिश्चयः संनिवर्तयितुमपाकर्तुं न शक्यते ॥ ३२ ॥

गो० टी०—नेति । सत्यात्मनः सत्यस्वभावस्य 'आत्मा देहे धृतौ जीवे स्वभावे' इति वैजयन्ती । धर्माभिमनसः धर्माभिनिविष्टमनसः ॥ ३२ ॥

३३] ति० टी०—प्रातरेव कैकेय्या प्रस्थितस्य मात्राद्यनुनयदानादिना चतुर्थप्रहरं व्यापृतस्य तुर्ययामे राजानुमत्यर्थमागतस्य राज्ञा तत्कालसमीपमेव प्रवर्त्स्यमानरजनीसहवासः प्रार्थ्यते—अद्येत्यादि । इदानीमिति समीपलक्षकम् रजनीमात्रस्त सर्वथा मा गच्छ । किमर्थं तत्राह—चरामि त्वया सह भोक्ष्यामि ॥ ३३ ॥

रा० टी०—नन्वतर्हि गच्छाम इत्यत आह—अद्येति । अस्मिन्दिवसे त्वं मा गच्छ अत्रैव तिष्ठेत्यर्थः । तत्प्रयोजनमाह—एकाहमेकदिनमिदानीं रजनीमेकरात्रिं दर्शनेन तवावलोकनेनापि सर्वथा सर्वप्रकारेण साधु अतिशोभनं चरामि प्राप्नोमि ॥ ३३ ॥

गो० टी०—अद्येति । अथ अस्मिन् दिने इदानीमासनामित्यर्थः साधु सुखं चरामि वसामि ॥ ३३ ॥

३४] ति० टी०—साधयिष्यसि गमिष्यसि ॥ ३४ ॥

रा० टी०—शोभनत्वमेवोपपादयन्नाह—मातरमिति । इमां शर्वरीं रात्रिं वस अथ अस्यां शर्वर्यां सर्वकामैः सर्वैः कामैः इच्छाविषयभूतैः तर्पितः मया तृप्तिं प्रापितस्त्वं श्वः आगामिनि काल्ये प्रातःकाले साधयिष्यसि सत्यप्रतिज्ञत्वं पालयितासि वर्म गन्तासीत्यर्थः ॥ ३४ ॥

गो० टी०—मातरमिति । साधयिष्यसि गमिष्यसि काल प्रातःकाले ॥ ३४ ॥

३५] ति० टी०—मत्प्रियार्थं मम परलोकहितार्थम् ॥३५॥

रा० टी०—दुष्करमिति । हे राघव हे पुत्र ! दुष्करम् अन्यैः कर्तुमशक्यं त्वया क्रियते यत्तस्माद्धेतोः मत्प्रियार्थं मत्तृप्तिकामनया प्रियानतिप्रीतिविषयीभूतानस्मदादींस्त्यक्त्वा विजनं वनं यासि ॥ ३५ ॥

गो० टी०—दुष्करमिति । मत्प्रियार्थं मम परलोकप्रियार्थमित्यर्थः अन्यथा उत्तरश्लोकविरोधात् प्रियान् अभिमतवर्गान् ३५॥

३६] ति० टी०—तदेव दर्शयति—न चेत्यादि । छद्मना गूढकूराभिप्रायया चलितोऽस्मि भ्रंशितोऽस्मि स्वदभिषेकमनोरथात् भस्माग्निकल्पया भस्मच्छन्नाग्नितुल्यया ॥ ३६ ॥

रा० टी०—मत्प्रियार्थमित्युक्त्या प्रतिभासितं वियोगप्रियत्वं स्वस्मिन्निवारयन्नाह—न चेति । हे पुत्र ! यद्यपि एतत्त्वद्वियोगरूपं वस्तु मे प्रियं न तथापि भस्माग्निकल्पया भस्मापिहितवह्नितुल्यया स्त्रिया केकय्या सहाहं छद्मना चलितः छद्म राज्ञां सर्वापराधनिवारकः यो नयो नीतिः तेन आचलितः वनकर्मकगमनानुकूलव्यापारानुकूलप्रेरणावानस्मि । चो यद्यपीत्यर्थे तुस्तथापीत्यर्थे भस्माग्निकल्पयेति विशेषणदानेन कैकेय्याः कापट्यसंसर्गाभावः सूचितः ॥ ३६ ॥

गो० टी०—नेति । छद्मना गूढाभिप्रायया चलितः स्वाधीनत्वाच्चलनं प्राप्तः पाठान्तरे तु वञ्चित इत्यर्थः । छद्माग्निकल्पया भस्मच्छन्नाङ्गारतुल्यया ॥ ३६ ॥

३७] ति० टी०—वञ्चना सामान्येन प्रतिश्रुतवरयोर्भरताभिषेकत्वद्विवासनरूपविशेषपर्यवसायित्वरूपा या मे लब्धा यतोऽनया वृत्तसादिन्या कुलोचितचारित्रनाशिन्याभिप्रचोदितोऽस्मि एवमिति शेषः । अतो या वञ्चना मया लब्धा तां निस्तर्तुमिच्छसीति यावत् ॥ ३७ ॥

रा० टी०—ब्रह्मादिकर्तृकराज्ञसवधादिफलकत्वत्पूजनं त्वयैव सफलं भवितुमर्हतीति बोधयन्नाह—वञ्चनेति । वृत्तसादिन्या मदुर्वशोचिताचरितप्रापिकया अनया कैकय्या सह मे मया लब्धा स्मृता या वञ्चना वो ब्रह्मणः अञ्चना तत्कर्तृकभवत्कर्मकपूजनं तां निस्तर्तुं पूरयितुमित्यर्थः प्रचोदितः ब्रह्मादिप्रार्थितो मे सुतस्त्वं यदिच्छसि तदेतदाश्चर्यतमं न यच्च पितरं मामपाकृतकथमपगता नित्यं निवृत्ता अनृतकथा मिथ्याकथनं यस्मात्तं कर्तुमिच्छसि तदपि नाश्चर्यतमम् । तत्र हेतुः—यतो ज्येष्ठः गुणैः सर्वश्रेष्ठोऽसि । श्लोकद्वयमेकान्वयि । 'ऊकारो ब्रह्मणि स्थितः' इत्येकाक्षरः ॥ ३७ ॥ ३८ ॥

गो० टी०—वञ्चनेति । या वञ्चना सामान्येन प्रतिश्रुतयोर्वरयोर्भरताभिषेचनत्वद्विवासनरूपविशेषपर्यवसायित्वरूपा-

१ विनीति गो. पाठः । २ एकाहदर्शनेनेति गो. पाठः । ३ काले इति गो. पाठः । ४ त्वयेति गो. रा. पाठः । ५ मत्प्रियार्थं प्रियांस्त्यक्त्वा यथासि विजनं वनमिति गो. रा. पाठः । ६ छद्माग्निकल्पयेति गो. पाठः ।

न चैतदाश्चर्यतमं यत्त्वं ज्येष्ठः सुतो मम । अपानृतकथं पुत्र पितरं कर्तुमिच्छसि ॥ ३८ ॥
अथ रामस्तदा श्रुत्वा पितुरार्तस्य भाषितम् । लक्ष्मणेन सह भ्रात्रा दीनो वचनमब्रवीत् ॥ ३९ ॥
प्राप्स्यामि यानद्य गुणान्को मे श्वस्तान्प्रदास्यति । अपक्रमणमेवातः सर्वकामैरहं वृणे ॥ ४० ॥
इयं सराष्ट्रा सजना धनधान्यसमाकुला । मया विसृष्टा वसुधा भरताय प्रदीयताम् ॥ ४१ ॥
वनवासकृता बुद्धिर्न च मेऽद्य च लिष्यति । यस्तुं युद्धे वरो दत्तः कैकेय्यै वरद त्वया ॥ ४२ ॥
दीयतां निखिलेनैव सत्यस्त्वं भव पार्थिव । अहं निदेशं भवतो यथोक्तमनुपालयन् ॥ ४३ ॥
चतुर्दश समा वत्स्ये वने वनचरैः सह । मा विमर्शो वसुमती भरताय प्रदीयताम् ॥ ४४ ॥
नहि मे काङ्क्षितं राज्यं सुखमात्मनि वा प्रियम् । यथानिदेशं कर्तुं वै तवैव रघुनन्दन ॥ ४५ ॥

मया लब्धा तामपि वञ्चनां वृत्तसादिन्या कुलोचिताचारलाजिन्या अनया प्रचोदितस्त्वं निस्तर्तुमिच्छसि समापयितुमिच्छसि अहो ते गुण इति भावः ॥ ३७ ॥

३८] ति० टी०—एतदाश्चर्यतमं न अपानृतकथमपगतानृतवचनम् एतच्च नाश्चर्यम् यतो ज्येष्ठो गुणैर्वयसा च श्रुतोऽसि ॥ ३८ ॥

गो० टी०—न चेति । अपानृतकथम् अपगतासत्यवचनम् ॥ ३८ ॥

३९] ति० टी०—आर्तस्य पितुर्भाषितं श्रुत्वैकाहदर्शनेनापीत्युक्तरूपं दीनः-कैकेय्याश्च गच्छेति नियोगस्यावश्यानुष्ठेयत्वप्रतिज्ञानात्तावन्मात्रपितृमनोरथपूरणासक्त्याप्राप्तश्लोकाइव ॥ ३९ ॥

रा० टी०—अथेति । अदीनः सर्वकालं दीनत्वाभावविशिष्टो रामः अब्रवीत् ॥ ३९ ॥

गो० टी०—अथेति । भाषितम् एकाहदर्शनेनापीत्याद्युक्तं दीनः एकाहमपि पितृदर्शनसौख्यं न लब्धमिति दीनः ॥ ३९ ॥

४०–४१] ति० टी०—तर्पितः सर्वकामैरित्यस्योत्तरमाह—प्राप्स्यामीति । गुणान्मृष्टान्नादीन् । अतः सर्वकामैः सर्वकामप्रतिनिधित्वेनापक्रमणमितो गमनमेव वृणे इत्यर्थः यद्वाद्य प्रयाणे सतीमान्गुणान्प्रतिज्ञापालनजधर्मरूपान्प्राप्स्यामि श्वो गमने कस्तान्दास्यति प्रत्युताधर्म एव अतः सर्वकामैरित्यादि प्राग्वदेव ॥ ४० ॥ ४१ ॥

रा० टी०—तद्वचनमेवाह—प्राप्स्यामीति । अद्य एतत्कालिकगमने यान्गुणान्सत्यप्रतिज्ञत्वादीन्प्राप्स्यामि तान्गुणान् श्वः तत्कालिकगमने को दास्यति दाता एतेनाद्य स्थितौ तन्नङ्क्ष्यतीति सूचितमतः सर्वकामैर्विशिष्टोऽहमपक्रमणमितः क्षीघ्रं गमनमेव वृणे । एतेन रामस्य सत्यप्रियत्वातिशयः सूचितः ॥ ४० ॥

गो० टी०—तर्पितः सर्वकामैरित्यस्योत्तरमाह—प्राप्स्यामीति । गुणान् गुणविशिष्टाभिमतपदार्थान् सर्वकामैरपक्रमणमेव वृणे सर्वकामप्रतिनिधित्वेनापक्रमणमेव वरय इत्यर्थः ॥ ४० ॥

रा० टी०—इयमिति । राष्ट्रादिसहिता वसुधा भरताय प्रदीयतां पालने भरतो नियोज्यतामित्यर्थः ॥ ४१ ॥

गो० टी०—इयमिति । विसृष्टा त्यक्ता ॥ ४१ ॥

४२] ति० टी०—अथ वनवासकृता तदर्था बुद्धिर्न चलिष्यति अतो गमनानुज्ञामेव कुर्वित्याशयः । अतिदानशूरस्य भवतोऽनुचितमप्येतदित्याह—य इति ॥ ४२ ॥

रा० टी०—वनेति । चलिष्यति अन्यथा भविष्यति त्वयापि कैकेय्यै यो वरो युद्धे दत्तः स वरः दीयतामतः निखिलेन सर्वेण कर्मणा त्वं सत्यो भव निदेशमाज्ञां पालयन्सन्वत्स्ये अतः मा विमर्शः एतद्विरोधी विचारो न कर्तव्य इत्यर्थः । श्लोकत्रयमेकान्वयि ॥ ४२–४४ ॥

गो० टी०—वनवासेत्यर्धमेकं वाक्यम् ॥ ४२ ॥

गो० टी०—य इति । अत्र स इत्यध्याहार्यः निखिलेन सर्वात्मना अतस्त्वं सत्यः सत्यवचनो भव ॥ ४३ ॥

४३] ति० टी०—निखिलेनार्थेन मत्प्रस्थापनात् निदेशं शासनम् ॥ ४३ ॥

गो० टी०—अहमिति । निदेशं शासनम् 'निदेशः शासनम्' इत्यमरः । वनचरैः तपस्विभिः ॥ ४४ ॥

४४] ति० टी०—वनचरैस्तपस्विभिः । मा विमर्शो भरताय राज्यदाने मास्तु संदेहः सर्वथा तस्मै वसुमती दीयताम् ॥ ४४ ॥

गो० टी०—भव राजा निगृह्य मामित्यस्योत्तरमाह—मा विमर्श इति । मा विमर्शः विचारो मा भूत् आत्मनि मनसि सुखं प्रियं वा उद्दिश्य राज्यं न काङ्क्षितमपि तु तव निदेशं तवाज्ञां यथाकर्तुमेव यथावत्कर्तुमेवेत्यर्थः ॥ ४५–४७ ॥

४५] ति० टी०—कथमेवमत आह—नहीति । आत्मनि स्वमनसि सुखं स्वीयानां प्रियं चोद्दिश्य राज्यं न काङ्क्षितमपि तु तव निदेशं यथावत्कर्तुमेव काङ्क्षितमिच्छामि ॥ ४५ ॥

रा० टी०—स्वकामपूर्णत्वं बोधयन्नाह—नेति । निदेशमाज्ञाम् ॥ ४५ ॥

---

१ वस्त्वमिति गो. पाठः । २ तर्पेति गो. पाठः । ३ तुष्टेनेति गो. पाठः ।

अपगच्छतु ते दुःखं मा भूर्बाष्पपरिप्लुतः । नहि क्षुभ्यति दुर्धर्षः समुद्रः सरितां पतिः ॥ ४६ ।
नैवाहं राज्यमिच्छामि न सुखं न च मैथिलीम्[1] । नैव सर्वानिमान्कामान्न स्वर्गं नै[2] च जीवितुम् ॥ ४७ ।
त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ । प्रत्यक्षं तव सत्येन सुकृतेन[3] च ते शपे ॥ ४८ ।
न च शक्यं मया तात स्थातुं क्षणमपि प्रभो । सै[4] शोकं धारयस्वैमं नहि मेऽस्ति विपर्ययः ॥ ४९ ॥
अर्थितो ह्यस्मि कैकेय्या वनं गच्छेति राघव । मया चोक्तं व्रजामीति तत्सत्यमनुपालये ॥ ५० ॥
मा चोत्कण्ठां कृथा देव वने रंस्यामहे वयम् । प्रशान्तहरिणाकीर्णे नानाशकु[5]निनादिते ॥ ५१ ॥
पिता हि दैवतं तात देवतानामपि स्मृतम् । तस्माद्दैवतमित्येवं करिष्यामि पितुर्वचः[6] ॥ ५२ ॥
चतुर्दशसु वर्षेषु गतेषु नृपसत्तम । पुनर्द्रक्ष्यसि मां प्राप्तं संतापोऽयं विमुच्यताम् ॥ ५३ ॥
येन संस्तम्भनीयोऽयं सर्वो बाष्पकलो जनः । स त्वं पुरुषशार्दूल किमर्थं विक्रियां गतः ॥ ५४ ॥
पुरं च राष्ट्रं च मही च केवला मया विसृष्टा भरताय दीयताम् ।
अहं निदेशं भवतोऽनुपालयन्वनं गमिष्यामि चिराय सेवितुम् ॥ ५५ ॥

४६-४७] ति० टी०—क्षुभ्यति मर्यादां त्यजति॥४६॥४७॥

रा० टी०—अपेति । ते दुःखमपगच्छतु पुत्रेप्सितसिद्धिर्जातेति विचारेण त्यजेत्यर्थः । हि यतः सरितां पतिः समुद्रः नैव क्षुभ्यति मर्यादां त्यजति ॥ ४६ ॥

रा० टी०—स्वेप्सितसिद्धिमेव भङ्ग्यन्तरेण बोधयन्नाह—नैवेति । राज्यादि नैवेच्छामि किं तु सत्यं सत्यवन्तं त्वामिच्छामि अनृतमनृतवन्तं नेच्छामि मिथ्यासंसर्गशून्यं त्वामिच्छामीत्यर्थः । तत्प्रतीतिं द्रढयन्नाह—सत्येन सुकृतेन च युक्तस्य तव शपे शपथं करोमि । श्लोकद्वयमेकान्वयि ॥ ४७ ॥ ४८ ॥

४८] ति० टी०—अनृतमनृतयुक्तम् एवं सत्यं सत्ययुक्तम् । तव प्रत्यक्षं तव संनिधौ सत्येन सुकृतेन ते त्वया च शपे शपथं करोमीत्यर्थः ॥ ४८ ॥

गो० टी०—त्वामहमिति । अहं त्वां सत्यं सत्ययुक्तमिच्छामि अनृतमनृतयुक्तं नेच्छामि तव प्रत्यक्षं प्रत्यक्षदैवभूतस्य तव संनिधौ सत्येन सुकृतेन च ते तुभ्यं शप इत्यन्वयः । "शपश्चुरुत्था—" इत्यादिना चतुर्थी ॥ ४८ ॥

४९-५०] ति० टी०—क्षणमपि इह पुर इति शेषः । स त्वमिमं मद्गमनसंभवं शोकं धारयस्व । विपर्यय इहाय स्थितिरूपं प्रतिज्ञातार्थविपरीतानुष्ठानम् ॥ ४९ ॥ ५० ॥

रा० टी०—न चेति । स त्वं शोकं धारयस्व निवर्तयस्व अनवस्थानार्थकधृङो रूपम् ॥ ४९ ॥

गो० टी०—न चेति । स्थातुमिह नगर इति शेषः । विपर्ययः संकल्पितवनगमनोद्योगनिवृत्तिः ॥ ४९ ॥

रा० टी०—अर्थित इति । राघव हे राम ! त्वं वनं गच्छेति कैकेय्या अहमर्थितः आज्ञापितोऽस्मि अहं व्रजामीति मया चोक्तं तद्वचनं यथा स्यात्तथानुपालये वनं गच्छामीत्यर्थः ॥ ५० ॥

गो० टी०—न केवलं स्वदाज्ञापरिपालनार्थमेव गच्छामि किंतु मत्प्रतिज्ञापरिपालनार्थमपीत्याह—अर्थित इति ॥ ५० ॥

५१-५३] ति० टी०—उत्कण्ठा दर्शनादिविषयोत्कण्ठाजन्यं दुःखम् ॥ ५१-५३ ॥

रा० टी०—मेति । उत्कण्ठामितः प्रभृति चतुर्दशवर्षसंख्याककालिकदर्शनविषयकौत्सुक्यं मा कृथाः ॥ ५१ ॥

गो० टी०—मा चेति । उत्कण्ठाम् उत्कलिकाम् 'उत्कण्ठोत्कलिके समे' इत्यमरः । शोकातुरतया स्मरणमिति यावत् ॥ ५१ ॥

रा० टी०—पितेति । दैवतं देवता तस्माद्धेतोः दैवतं देवता देवतासंबन्ध्येवेतीदं पितुर्वचः करिष्यामि ॥ ५२ ॥

रा० टी०—चतुर्दशस्विति । गतेषु व्यतीतेषु प्राप्तमयोध्यावासिभिः सङ्गतं मां त्वं द्रक्ष्यसि द्रष्टासि एतेन तस्य सर्वलोकेषु कामचारत्वं सूचितम् पुनरित्यनेनावधिमध्येऽप्येकवारं दर्शनं भवितेति ध्वनितम् अतः अयं मद्वियोगहेतुकः संतापः शोको विमुच्यताम् ॥ ५३ ॥

गो० टी०—पितेति । देवतानामपि दैवतमिति स्मृतं किमुत मनुष्याणामिति भावः । दैवतमित्येव पिता परमदैवतमिति मत्वेत्यर्थः ॥ ५२ ॥ ५३ ॥

५४] ति० टी०—येन त्वया ॥ ५४ ॥

रा० टी०—तव शोकः सर्वथा न युक्त इति बोधयन्नाह—येनेति । बाष्पकलः वियोगहेतुकशोकजनिताश्रुव्याप्तोऽयं जनः येन त्वया संस्तम्भनीयः बाष्परहितः कर्तव्यः स त्वं विक्रियां चित्तविकारं किमर्थं गतः प्राप्तः ॥ ५४ ॥

गो० टी०—येनेति । संस्तम्भनीयः निवृत्तबाष्पः करणीयः ॥ ५४ ॥

५५] ति० टी०—केवला कृत्स्ना चिराय वनं सेवितुं गमिष्यामि ॥ ५५ ॥

---

१ मैथिलीमिति गो. पाठः । २ नैव जीवितमिति गो. न च जीवितमिति रा. पाठः । ३ नेति गो. पाठः । ४ एनमिति गो. पाठः । ५ शकुनादिते इति गो. पाठः । ६ नरेति गो. पाठः ।

मया विसृष्टां भरतो महीमिमां सशैलखण्डां सपुरोपकाननाम् ।
शिवासु सीमास्वनुशास्तु केवलं त्वया यदुक्तं नृपते तथास्तु तत् ॥ ५६ ॥
न मे तथा पार्थिव दीयते मनो महत्सु कामेषु न चात्मनः प्रिये ।
यथा निदेशे तव शिष्टसंमते व्यपैतु दुःखं तव मत्कृतेऽनघ ॥ ५७ ॥
तदद्य नैवानघराज्यमव्ययं न सर्वकामान्न सुधां न मैथिलीम् ।
न चिन्तितं त्वामनृतेन योजयन्वृणीय सत्यं व्रतमस्तु ते तथा ॥ ५८ ॥
फलानि मूलानि च भक्षयन्वने गिरींश्च पश्यन्सरितः सरांसि च ।
वनं प्रविश्यैव विचित्रपादपं सुखी भविष्यामि तवास्तु निर्वृतिः ॥ ५९ ॥
एवं स राजा व्यसनाभिपन्नस्तापेन दुःखेन च पीड्यमानः ।
आलिङ्ग्य पुत्रं सुविनष्टसंज्ञो भूमिं गतो नैव विचेष्ट किंचित् ॥ ६० ॥

रा० टी०-पुरमिति । विसृष्टा इदानीं त्यक्ता केवला पुरादिरहिता च मही दीयताम् अहं तु वनं गमिष्यामि ॥ ५५ ॥

गो० टी०-सथः शोकनिवृत्तये पुनः पुनराह-पुरं चेत्यादि । मया निसृष्टं पुरं च दीयतां मया निसृष्टं राज्यं च दीयतामिति प्रत्येकमन्वयः । सेवितुं न पुनरहमागन्तुम् ॥ ५५ ॥

५६] ति० टी०-शिवासु सीमास्विति स्थित इति शेषः । मया विना तेनात्र पुरे स्थातुमशक्यत्वादिति भावः । केवलमनुशास्तु रक्षणमात्रं करोतु, न तु राजत्वाभिमानो राज्यसुखं वा तस्येति ध्वनितम् अनेन राज्ञोऽजीवनं भरतस्य नन्दिग्रामवासश्च ध्वनितः । शिवासु सीमासु रममाण इत्यापाततोऽर्थः त्वया यदुक्तं कैकेयीं प्रतीति शेषः ॥ ५६ ॥

रा० टी०-मयेति । सशैलखण्डां शैलखण्डसहितां सपुरोपकाननां पुरग्रामादिसहितामिमां महीं शिवासु राजकल्याणकारणीषु सीमासु मनुवंशमर्यादासु स्थितो भरत अनुशास्तु शिवां 'सुसीमाम्' इति पाठे इमे अपि महीविशेषणे ॥ ५६ ॥

गो० टी०-मयेति । शिवामित्यनेन राज्यस्य दुर्भरत्वान्न त्यजामीति गम्यते इदं च स्वेच्छया न करोमि किंतु त्वदनुज्ञयैवेत्याह-त्वया यदिति ॥ ५६ ॥

५७] ति० टी०-यथा शिष्टसंमते तव निदेशे मया मनो दीयते, तथा महत्सु कामेषु काम्यवस्तुषु मनः संकल्पात्मकं मे मया न दीयते न च नाप्यात्मनोऽन्तःकरणस्य प्रियेऽतो मत्कृते दुःखं व्यपैतु ॥ ५७ ॥

रा० टी०-राजानं पुनर्बोधयन्नाह-नेति । हे पार्थिव ! शिष्टसंमते तव निदेशे आज्ञायां यथा मनो धीयते संस्थाप्यते तथा महत्सु प्राकृतविलक्षणेषु कामेषु अत्यन्तशोभावत्सु भवनादिष्वित्यर्थः आत्मनः प्रिये स्वसुखादिषु च मनो न धीयते अतो मत्कृते मदर्थं दुःखं व्यपैतु त्यजतु भवानिति शेषः ॥ ५७ ॥

गो० टी०-नेति । धीयते स्थाप्यते ॥ ५७ ॥

५८-५९] ति० टी०-त्वामनृतेन योजयन्राज्यादिकं चिन्तितं मद्विषयचिन्तावन्तं त्वामपि न वृणीय न वरिष्यामीति मे सत्यं व्रतं तथा ते व्रतं कैकेयीवरदानसंकल्पः सत्यमस्तु अत्र चिन्तितं त्वामित्यनेन चिन्तया तव मरणेऽपि मया न स्थेयं मरणादपि परलोकनाशकानृतत्वस्थातिकष्टत्वं सूचितम् तेन तव मरणेन मे दुःखं नापि पापं यथा तवानृतत्वकारण इति सूचितम् ॥ ५८ ॥ ५९ ॥

रा० टी०-तदिति । हे अनघ ! चिन्तितं मच्चिन्ताविशिष्टं त्वामनृतेन मृषया योजयन्सन्नव्ययं बाधारहितं राज्यं न सर्वकामान्न मैथिलीं न वृणीयमतस्ते व्रतं संकल्पः सत्यमस्तु ॥५८॥

गो० टी०-तदिति । त्वामनृतेन योजयन् सन् राज्यादिकं न वृणीय तव व्रतं यथा सत्यं तथास्त्वित्यन्वयः ॥ ५८ ॥

रा० टी०-मद्भोजनादिविषयिण्यपि चिन्ता न कर्तव्येति बोधयन्नाह-फलानीति । फलानि मूलान्येव भक्षयन्सुखी भविष्यामि अतः तव निर्वृतिः परमानन्दोऽस्तु ॥ ५९ ॥

गो० टी०-मम दुःखं भविष्यतीति त्वया न क्लेष्टव्यमित्याह-फलानीति । निर्वृतिः सुखम् ॥ ५९ ॥

६०] ति० टी०-तापस्त्वग्दाहोत्पादकः दुःखमन्तर्व्यथोत्पादकम् ॥ ६० ॥

रा० टी०-एवमिति । व्यसनाभिपन्नः व्यसनं रामकर्मकाभिषेकत्यागः अभिपन्नं प्रापितं येन सः किंच व्यसनं राजवृत्तान्तत्यागमभिपन्नः प्राप्तः शोकेन दुःखेन तत्कार्येण च पीड्यमानः अत एव विनष्टसंज्ञः कार्याकार्यविवेकरहितः भूमिं गतो किंचिदपि न चिचेष्ट ॥ ६० ॥

गो० टी०-एवमिति । एवम् उक्तवन्तमिति शेषः । त्वग्दाहोत्पादकः शोकः दुःखमन्तर्व्यथोत्पादकम् । न चिचेष्ट न चेष्टते स्म ॥ ६० ॥

१ निसृष्टामिति गो. पाठः । २ सपुरां सकाननामिति गो. पाठः । ३ शिवां सुसीमामिति गो. पाठः । ४ धीयते इति गो. रा. पाठः । ५ व्यपेक्षिति रा. पाठः । ६ न सुखमिति गो. पाठः । ७ जीवितमिति गो. पाठः । ८ शोकेनेति गो. पाठः । ९ ताम्यमान इति गो. पाठः । १० मोहमिति गो. पाठः । ११ चिचेष्टेति गो. रा. पाठः ।

देव्यः समस्ता रुरुदुः समेतास्तां वर्जयित्वा नरदेवपत्नीम् ।
रुदन्सुमन्त्रोऽपि जगाम मूर्छां हाहाकृतं तत्र बभूव सर्वम् ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ।

अथेयं संप्राप्तसंरम्भापि शिथिलयेदाग्रहमिति सुमन्त्रः कैकेयी मातुर्दुश्चरितं प्रस्तुत्य कैकेयीं दुर्धरं निनिन्दाथापि क्रोधस्तस्यां नावकाशं प्रपेदे ।

ततो निर्धूय सहसा शिरो निःश्वस्य चासकृत् । पाणिं पाणौ विनिष्पिष्य दन्तान्कैटकटाय्य च ॥ १ ॥
लोचने कोपसंरक्ते वर्णं पूर्वोचितं जहत् । कोपाभिभूतः सहसा संतापमशुभं गतः ॥ २ ॥
मनः समीक्षमाणश्च सूतो दशरथस्य चै । कम्पयन्निव कैकेय्या हृदयं वाक्शरैः शितैः ॥ ३ ॥
वाक्यवज्रैरनुपमैर्निर्भिन्दन्निव चाशुभैः । कैकेय्याः सर्वमर्माणि सुमन्त्रः प्रत्यभाषत ॥ ४ ॥

६१] ति० टी०–समेता मिलिताः तां कैकेयीम् हाहा इति शब्दः कृतो येन तथाभूतं सर्वं परिचारिकादिजनजातम् ॥ ६१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०–राजवृत्तान्तमुक्त्वा कौशल्यादीनां वृत्तान्तं वर्णयन्नाह–देव्य इति । समेताः कौशल्यासमीपं प्राप्ताः समस्ताः देव्यो राजमहिष्यः तां मुख्यां नरदेवपत्नीं कौशल्यां वर्जयित्वा रुरुदुः अत एव सुमन्त्रोऽपि रुदन्सन्मूर्छां जगाम अत एव तत्र तस्मिन्समये सर्वं पुरं हाहाकृतं हाहाशब्दवद्बभूव कौशल्यां वर्जयित्वेत्यनेन तस्याः तात्कालिकशोकाभावः सूचितः तेन रामोपदेशस्य अघटितघटनापटीयस्त्वं व्यक्तम् ॥ ६१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्यायां रामायणशिरोमणावयोध्याकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०–देव्य इति । तां रामस्तस्मादितः शीघ्रं वनं गन्तुं त्वमर्हसीत्यायुक्तकौर्ययुक्तां कैकेयीं हाहाकृतं हाहाशब्दस्य कृतं करणं यस्मिंस्तत्तथा सर्वं परिचारकादिजनजातम् ॥ ६१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

१] ति० टी०–एवं सपरिकरस्य राज्ञः परमशोके प्राप्ते सुमन्त्रः कैकेयीं प्रत्याह–तत इति । शिरोनिर्धूननादि कोपविकाराभिनयः । कटकटाय्य कटकटशब्दवतः कृत्वा ॥ १ ॥

२] ति० टी०–कोपसंरक्ते कृत्वेति शेषः वर्णं मुखकान्तिम् । पूर्वोचितं पूर्वकालस्थितं राजमन्त्रिण उचितं च ॥ २ ॥

३–४] ति० टी०–दशरथस्य मनः समीक्षमाणः कैकेयीविषयस्नेहरहितं जानन् ॥ ३ ॥ ४ ॥

रा० टी०–तत इति । ततः सर्वस्यातिशोकवत्त्वाद्धेतोः शिरः असकृन्निर्धूय कराभ्यां संताड्य दन्तान्कटकटाय्य कटकटाशब्दविशिष्टान्कृत्वा लोचने कोपसंरक्ते कोपेन अकालप्रार्थनाहेतुकमन्थराविषयकक्रोधेन संरक्ते अत्यरुणे कृत्वा कोपाभिभूतः कोपः अभिभूतः पराभूतो येन सः अशुभं शुभनिवर्तकं संतापं जनानां खेदं गतो निवर्तकः सूतः सुमन्त्रः दशरथस्य मनः अन्तर्वृत्तिं समीक्षमाणः जिज्ञासमानः सन् अत एव पूर्वोचितं पौर्वकालिकयोग्यताविशिष्टं वर्णं स्वनम्रतामित्यर्थः । जहत् त्यजन् सन्नत एव शितैः तीक्ष्णैः वाक्शरैः कैकेय्या हृदयं हृत् हृदयमयते अन्यविषयं प्रापयति तन्मन्थरामित्यर्थः । सामान्ये नपुंसकं कम्पयन्निव आशुभैः जनसंतापनिवर्तकत्वेनातिशुभहेतुभिः अनुपमैः अतिविलक्षणत्वेनोपमारहितैः वाक्यवज्रैः लक्ष्यविदारकत्वेन वज्रसदृशवचनैः कैकेय्याः सर्वमर्माणि संभावितापराधजातानि निर्भिन्दन् विदारयन्निव प्रत्यभाषत अनुकरणीभूतकटकटाशब्दप्रकृतिककरोत्यर्थणिजन्तप्रकृतिकल्यबन्तं कटकटाय्येति 'कटकटाय्य' इति पाठे तु कटकटां कटकटाशब्दत्वमयते प्राप्नोतीति कटकटायः तं करोतीति णिचि ल्यपि च साधुः गत इत्यत्रान्तर्भावितणिजर्थः कर्तरि निष्ठा । श्लोकचतुष्टयमेकान्वयि ॥ १–४ ॥

गो० टी०–सुमन्त्रस्य कैकेयीविषयकोपानुभावं दर्शयति–तत इत्यादि । कटकटाय्य कटकटाशब्दयुक्तान् कृत्वा कटकटाशब्दात्करोतीतिण्यन्ताल्ल्यप् । कोपसंरक्ते कृत्वेति शेषः । वर्णं देहकान्तिं पूर्वोचितं पूर्वाभ्यस्तं स्वाभाविकमित्यर्थः । जहत् त्यजन् कोपरक्ताङ्ग इत्यर्थः अशुभं तीव्रमित्यर्थः मनः समीक्ष्यमाणः कैकेयीविषयस्नेहरहितं जानन्नित्यर्थः सूतः सारथिः आशुगैरिव बाणैरिव स्थितैः वाक्यवज्रैः वाक्सारैर्मर्माणि मर्मतुल्यान् दोषान् निर्भिन्दन् प्रकाशयन् ॥ १–४ ॥

१ ततः संसरुरुदुरिति गो. पाठः । २ कटकटाप्येति गो. कटकट्येति रा. पाठः । ३ स इति गो. पाठः ।

यस्यास्तव पतिस्त्यक्तो राजा दशरथः स्वयम् । भर्ता सर्वस्य जगतः स्थावरस्य चरस्य च ॥ ५ ॥
नह्यकार्यतमं किंचित्तव देवीह विद्यते । पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि चान्ततः ॥ ६ ॥
यन्महेन्द्रमिवाजय्यं दुष्प्रकम्प्यमिवाचलम् । महोदधिमिवाक्षोभ्यं संतापयसि कर्मभिः ॥ ७ ॥
मावमंस्था दशरथं भर्तारं वरदं पतिम् । भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते ॥ ८ ॥
यथावयो हि राज्यानि प्राप्नुवन्ति नृपक्षये । इक्ष्वाकुकुलनाथेऽस्मिंस्तं लोपयितुमिच्छसि ॥ ९ ॥
राजा भवतु ते पुत्रो भरतः शास्तु मेदिनीम् । वयं तत्र गमिष्यामो यत्र रामो गमिष्यति ॥ १० ॥
न चै ते विषये कश्चिद्ब्राह्मणो वस्तुमर्हति । तादृशं त्वममर्यादमद्य कर्म करिष्यसि ॥ ११ ॥
नूनं सर्वे गमिष्यामो मार्गं रामनिषेवितम् । त्यक्ता या बान्धवैः सर्वैर्ब्राह्मणैः साधुभिः सदा ॥ १२ ॥
का प्रीती राज्यलाभेन तव देवि भविष्यति । तादृशं त्वममर्यादं कर्म कर्तुं चिकीर्षसि ॥ १३ ॥

५] ति० टी०—यस्यास्तव यया त्वया ॥ ९ ॥

रा० टी०—तत्प्रतिभापणमेवाह—यस्या इति । स्थावरस्य चरस्य च सर्वस्य जगतो भर्ता पालकः यस्याः तव पतिः राजा दशरथः स्वयं शोभनः अयः शुभावहो विधिर्यस्मिंस्तद्राज्यं त्यक्तः 'अयः शुभावहो विधिः' इत्यमरः कर्तरि निष्ठा तस्याः तव इह रामाभिषेके अकार्यतमं किंचिन्न विद्यते एतेन रामाभिषेकानन्तरं वनयात्रा स्यादिति प्रार्थना सूचिता । सार्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०—यस्या इत्यादि । यस्यास्तव यया त्वयेत्यर्थः । नवेत्यत्र तस्या इत्युपस्कार्यम् ॥ ९ ॥

६] ति० टी०—अतः—नहीति । हे देवि ! तवातिशयेन कर्तुमशक्यं न किंचिद्विद्यते । इह संसारे अन्ततः सर्वान्ते त्वत्कृत्यसाध्यफलविचार इत्यर्थः । पतिघ्नीमिति । रामगमने राजमरणस्यावश्यकत्वादिति भावः । रामस्य विवासनाद्राज्ञो मरणाच्च कुलघ्नीम् ॥ ६ ॥

७] ति० टी०—अचलमिव दुष्प्रकम्प्यम् । कर्मभिः क्रूरैः संतापयसि राजानमिति शेषः ॥ ७ ॥

रा० टी०—ननु यदि तव प्रार्थितं वरं स्यात्तर्हि अतिबुद्धिमती मन्थरात्रार्थे संमतिं कुतो न कुर्यादित्यत आह—पतिघ्नीमिति । यतः यस्याः कर्मभिः वचनैः महेन्द्रमिन्द्रमिवाजय्यं जेतुमशक्यमचलं महापर्वतमिव दुष्प्रकम्प्यं महोदधिं समुद्रमिवाक्षोभ्यं राजानं संतापयसि तस्माद्धेतोः तां त्वां विलक्षणसंमतिदात्रीत्वेन सर्वस्वीभ्योऽत्यन्तभिन्नां मन्थरामेव पतिघ्नीं सर्वस्वामिपीडादात्रीमत एव कुलघ्नीं प्रजादिसमूहपीडादात्रीमहं मन्ये प्रसिद्धोऽन्यपर्यायः त्वशब्दः सर्वादौ अत एवास्य वचनस्य वक्ष्यमाणकृताल्यनुरूपत्वम् । सार्धश्लोक एकान्वयी ॥६॥७॥

गो० टी०—पतिघ्नीमिति । अन्ततः पर्यवसानगत्या पतिहननद्वारा सर्वेषां विनाशनादिति भावः । तत्रैव युक्त्यन्तरमाह—यदिति ॥ ६ ॥ ७ ॥

८] ति० टी०—भर्तुरिच्छा भर्तुरिच्छाविषयानुसरणम् ॥८॥

रा० टी०—मेति । दशरथं मावमंस्थाः तदवमानं न कुर्वित्यर्थः । ननु रामेच्छयैव मयेत्थं क्रियते इत्यत आह—पुत्रकोट्याः पुत्रकोटीच्छातः भर्तुः पाणिग्रहीतुः इच्छा विशिष्यते एतेन स्त्रीभिः पत्यनुसारेणैव वर्तितव्यमिति सूचितम् ॥ ८ ॥

गो० टी०—मावमंस्था इत्यादि । भर्तुरिच्छा हि भर्तुरिच्छानुसरणमेव पुत्रकोट्या इति पञ्चमी पुत्रानुसरणं त्यक्त्वापि भर्तुरिच्छानुसर्तव्येति भावः ॥ ८ ॥

९–१०] ति० टी०—यथावयः वयःक्रममनतिक्रम्य नृपक्षये राजभूतेपितृक्षये राज्यानि प्राप्नुवन्ति ज्येष्ठक्रमेणेति यावत् तमिममनादिप्रवृत्तमाचारमिक्ष्वाकुकुलनाथे दशरथे जीवत्येव लोपयितुमिच्छसीति योजना ॥ ९ ॥ १० ॥

रा० टी०—ननु भर्तुः राज्ये स्थितत्वात्किमर्थं पुत्राभिषेकयत्न इत्यत आह—यथेति । यथावयः वृद्धावस्थातिरिक्तावस्थामनतिक्रम्यैव नृपक्षये राज्यासने स्थिता इक्ष्वाकुकुलराजा इति शेषः राज्यानि प्राप्नुवन्ति पालयन्तीत्यर्थः । एतेन वृद्धावस्थायां तपः कुर्वन्तीति सूचितम् । अस्मिन् दशरथे तं तपश्चरणधर्मं लोपयितुं ध्वंसितुमिच्छसि एतेनेदं न युक्तमिति व्यञ्जितम् ॥ ९ ॥

गो० टी०—यथेति । यथावयः वयःक्रममनतिक्रम्य ज्येष्ठानुक्रमेणेत्यर्थः प्राप्नुवन्ति पुत्रा इति शेषः इक्ष्वाकुकुलनाथे वर्तमान इति शेषः । तत्पूर्वोक्तराजधर्मद्वयम् ॥ ९ ॥

रा० टी०—ननु पतिपुत्रानुक्तं त्वद्वचो नाद्रियते इत्यत आह—राजेति । भरतः मेदिनीं शास्तु अत एव राजा भवतु वयं तु तत्र गमिष्यामः ॥ १० ॥

गो० टी०—राजेति । शास्तु शास्तु च ॥ १० ॥

११–१३] ति० टी०—विषये देशे तादृशं ब्राह्मणवासानर्हम् अमर्यादमतिक्रमितज्येष्ठराज्यादिव्यवहारं करिष्यसीत्यनेनापि रामं निवर्तयेति सूचयति ॥ ११–१३ ॥

रा० टी०—अन्येऽपि गन्तार इति बोधयन्नाह—नेति । अमर्यादं प्रारब्धकार्यनिवर्तनरूपमर्यादाविरुद्धं तादृशं प्रारब्धाभिषेकत्याजनपूर्वकप्रव्राजनं कर्म करिष्यसि चेत्तर्हि ते विषये देशे कश्चिद्ब्राह्मणो विशाता वस्तुं नार्हति अर्हिष्यति "वर्तमानासामीप्ये" इति भविष्यति लट् । चस्येदर्थे ॥ ११ ॥

१ हीति गो. पाठः । २ चिकीर्षसीति गो. पाठः । ३ श्लोकद्वयमिदं गो. रा. नास्ति ।

आश्चर्यमिव पश्यामि यस्यास्ते वृत्तमीदृशम् । आचरन्त्या न विदृता सद्यो भवति मेदिनी ॥ १४ ॥
महाब्रह्मर्षिसृष्टा[1] वा ज्वलन्तो भीमदर्शनाः । धिग्वाग्दण्डा न हिंसन्ति रामप्रव्राजने स्थिताम्[2] ॥ १५ ॥
आम्रं छित्त्वा कुठारेण निम्बं परिचरेत्तु कः[3] । यश्चैनं पयसा सिञ्चेन्नैवास्य मधुरो भवेत् ॥ १६ ॥
आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च । नहि निम्बात्स्रवेत्क्षौद्रं लोके निगदितं वचः ॥ १७ ॥
तव मातुरसद्ग्राहं विद्म[4] पूर्वं यथा श्रुतम् । पितुस्ते वरदः कश्चिद्ददौ वरमनुत्तमम् ॥ १८ ॥

गो० टी०–नेति । विषये देशे 'नीवृज्जनपदो देशविषयौ' इत्यमरः । ब्राह्मण इति सत्पुरुषमात्रोपलक्षणं तत्र हेतुमाह–तादृशमिति । तादृशं ब्राह्मणनिर्गमनार्हम् अमर्यादज्येष्ठाभिषेकादिमर्यादाशून्यम् ॥ ११ ॥

१४] ति० टी०–यस्यास्त इदृशं घोरं वृत्तमस्ति तया त्वया तदाचरन्त्या हेतुभूतया पृथिवी यत्र विदृता न विदीर्णा तदाश्चर्यमिव पश्यामि ॥ १४ ॥

रा० टी०–आश्चर्यमिति । ईदृशमर्यादं ते वृत्तं वृत्तान्तमाचरन्त्याः आचरयन्त्याः यस्याः मन्थरायाः मेदिनी पृथ्वी सद्यो न विदृता विदीर्णा तस्यास्तेजः आश्चर्यमिव पश्यामि । तेज इत्यध्याहृतम् ॥ १२ ॥

गो० टी०–आश्चर्यमिति । ईदृशममर्यादं वृत्तसमाचारमाचरन्त्या यस्यास्ते मेदिनी न विदृता न विदीर्णा तस्यास्ते इदमविदारणमाश्चर्यमिव पश्यामि ॥ १२ ॥

१५] ति० टी०–किं च महाब्रह्मर्षिभिः सृष्टाः प्रयुक्ताः, ज्वलन्तोऽग्निवद्भस्मकरणसमर्थाः, भीमदर्शना भीमं फलं दृश्यते येषु तादृशा धिगिति वाग्रूपा दण्डास्त्वां न हिंसन्ति इदमप्याश्चर्यमित्यनुकर्षः । स्थितां कृतनिश्चयाम् अनेन सर्वे त्वां धिक्कुर्वन्तीति ध्वनयति ॥ १५ ॥

रा० टी०–महेति । महाब्रह्मर्षिसृष्टाः वसिष्ठप्रभृतिप्रयुक्ता वाग्दण्डाः रामप्रव्राजने स्थितां परमहेतुभूतां मन्थरामित्यर्थः यतो न हिंसन्ति अतो धिक् प्रत्यासत्तिन्यायेन वाग्दण्डानेवेत्यर्थः ॥ १३ ॥

गो० टी०–महाब्रह्मर्षीति । महाब्रह्मर्षिभिः वसिष्ठादिभिः जुष्टाः प्रयुक्ताः ज्वलन्तः तीव्राः धिग्वाग्दण्डाः धिगित्येवंरूपाः वाग्दण्डाः रामप्रव्राजने स्थितां स्थिरबुद्धिं त्वां न हिंसन्ति वाशब्द एवकारार्थः 'वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये' इति विश्वः ॥ १३ ॥

१६] ति० टी०–अथान्यापदेशेन राजानं निन्दति–आम्रमिति । परिचरेदालवालादिकरणेन रोपयेत्, आम्रस्थाने तं च पुनः पयसा सिञ्चेत् अस्यैवं निम्बसेवां कुर्वतः प्रीतये स मधुरो न भवेत् अतो दृष्टैवेदं कैकेय्यद्यवर्तनं राज्ञ इत्याशयः ॥१६॥

रा० टी०–इदानीमस्मत्यागपूर्वकमन्थरासंमतिग्रहणं स्वदनिष्टकारकमेवेति बोधयन्नाह–आम्रमिति । कुठारेण आम्रं छित्त्वा अतिस्वाद्वाम्रस्यादीभूतनिम्बवृक्षादिप्रतिबन्धकीभूतबुद्ध्या भित्त्वा निम्बं परिचरेत् स्वादुलाभबुद्ध्या सेवेत यश्च एनं निम्बं पयसा सिञ्चेत्तस्यास्य परिवरणसेचनयोः कर्तुरपि मधुरो न भवेदेतेन मन्थरासंमतौ इष्टसाधिकात्वबुधिर्न कर्तव्येति सूचितम् ॥ १४ ॥

गो० टी०–अथ कैकेयीदशरथावन्यापदेशेन निन्दति–आम्रमिति । आम्रं मधुरफलदं कुठारेण सद्यः बुद्धिपूर्वकं छित्त्वा निम्बं कटुफलकं यः परिचरेत् आलवालादिकरणेन संरक्षेत् यश्चेत्यपि स एवोच्यते एनं निम्बं पयसा क्षीरेण सिञ्चेत् अस्य आम्रं छित्त्वा निम्बं पयसा सिञ्चतः स इति शेषः स निम्बः मधुरः मधुरफलदः नैव भवेत् अनेन गुणं रामं वरव्याजेन विवास्य कैकेयीचित्तानुसरणं न युक्तमित्युक्तं तेन च सर्वथा कैकेयी कटुरेवेत्युक्तम् ॥ १४ ॥

१७] ति० टी०–इदानीं कैकेय्या मर्मवचनान्यप्याह–आभिजात्यमिति । यथा ते मातुराभिजात्यं प्रशस्तमातापितृजत्वोचितव्यवहाररूपं तथैव ते तव मन्ये कारणानुसारित्वात्कार्यस्येति भावः । तदुपपादयति दृष्टान्तेन–नहीति । निम्बात्क्षौद्रं न स्रवेदिति वचो लोकप्रसिद्धं किलेत्यर्थः ॥ १७ ॥

रा० टी०–इदानीमसत्संग्रहस्तव दुस्त्यज इति बोधयन्नाह–आभिजात्यमिति । यथा येन प्रकारेण ते तव मातुः आभिजात्यं स्वभावः तवापि तत्तथैव इति अहं मन्ये निश्चिनोमि । स्वनिश्चियस्य प्रामाणिकत्वं द्रढयन्नाह–हि यतः निम्बात् क्षौद्रं मधु न भवेत् इति वचः लोके निगदितम् एतेन तन्मातुः असत्संग्रहकर्तृस्वभाववतीत्वं व्यञ्जितम् ॥ १६ ॥

गो० टी०–अभिजातमिति । अभिजातमभिजननं स्वभाव इति यावत् ते मातुर्यादृशी तादृशी तवापि प्रकृतिरित्यर्थः । कारणानुसारिकार्यसंभवे लौकिकवाक्यं निदर्शयति–नहीति । क्षौद्रं मधु स्रवेदित्यत्र इतिकरणं बोध्यम् ॥ १६ ॥

१८] ति० टी०–ननु मे मातुः कथमाभिजात्यप्रतिपत्तिस्तत्राह–तवेति । असद्ग्राहं घोरपापकर्माभिनिवेशं पूर्वदृष्टेभ्यो यथा येन प्रकारेण श्रुतं तथा संप्रति विद्म स्मरामः । तदेवाह–पितुरित्यादि । कश्चिदृषिः ॥ १८ ॥

रा० टी०–तदेवोपपादयन्नाह–तवेति । पूर्वं यथाश्रुतं श्रुतमनतिक्रम्य तव मातुः असद्ग्राहमसत्संग्रहकर्तृस्वभावं विद्मः । श्रुतमेव बोधयन्नाह–वरदो वरदानसमर्थः कश्चिदनुत्तमं श्रेष्ठं वरं ते तव पितुः पित्रे ददौ ॥ १६ ॥

१ विवृतेति गो. पाठः । २ जुष्टा वेति गो. पाठः । ३ य इति गो. रा. पाठः । ४ अभिजातामिति गो. पाठः । ५ भवेदिति रा. पाठः । ६ विद्मः पूर्वमिति गो. रा. पाठः ।

सर्वभूतरुतं तस्मात्संजज्ञे वसुधाधिपः । तेन तिर्यग्गतानां च भूतानां विदितं वचः ॥ १९ ॥
ततो जृम्भस्य शयने विरुताद्भूरिवर्चसः । पितुस्ते विदितो भावः स तत्र बहुधाहसत् ॥ २० ॥
तत्र ते जननी क्रुद्धा मृत्युपाशमभीप्सती । हासं ते नृपते सौम्य जिज्ञासामीति चाब्रवीत् ॥ २१ ॥
नृपश्चोवाच तां देवीं हासं शंसामि ते यदि । ततो मे मरणं सद्यो भविष्यति न संशयः ॥ २२ ॥
माता ते पितरं देवी पुनः केकयमब्रवीत् । शंस मे जीव वा मा वा न मां त्वं प्रहसिष्यसि ॥ २३ ॥
प्रियया च तथोक्तः सँ केकयः पृथिवीपतिः । तस्मै तं वरदायार्थं कथयामास तत्त्वतः ॥ २४ ॥

गो० टी०—कैकेय्याः पतिघ्नीत्वस्वभावो मातृसंबन्धप्रयुक्त इति प्रस्तावं कृत्वा तन्मातुः वृत्तान्तं वक्तुमुपक्रमते—तव मातुरित्यादिना। असद्ग्राहमसदर्थाभिनिवेशं पूर्वं यथा तेन प्रकारेण श्रुतं तथा विद्मः ॥ १६ ॥

१९] ति० टी०—तस्माद्वरदानात्सर्वभूतानां व्यक्ताव्यक्तवाचां रुतं शब्दं तद्बोध्यमर्थं संजज्ञे जानीते स्म तेन सर्वभूतरुतज्ञत्वेन तिर्यग्गतानां तिर्यक्स्रोतसां पशुपक्ष्यादीनां वचो विदितं ज्ञातार्थं भवति ॥ १९ ॥

रा० टी०—वरस्वरूपं बोधयन्नाह—सर्वेति । तस्माद्वरदानाद्वसुधाधिपस्तव पिता सर्वभूतरुतं सर्वभूतोच्चारितशब्दं संजज्ञे तच्छ्रवणसामर्थ्यं प्रापेत्यर्थः अत एव तेन राज्ञा तिर्यग्गतानामपि भूतानां वचो विदितं ज्ञातम् ॥ १७ ॥

गो० टी०—पितुरिति । कश्चियोगी गन्धर्व इति श्रुतं तस्माद्वरदानात् रुतं शब्दम् 'तिरश्चां वाशितं रुतम्' इत्यमरः । संजज्ञे सम्यक् ज्ञातवान् तेन सर्वभूतरुतज्ञेन राज्ञा तिर्यग्गतानां तिर्यग्गमनानाम् ॥ १७ ॥

२०] ति० टी०—ततस्तत एव हेतोः शयने शयानस्य ते पितुर्भूरिवर्चसः सुवर्णकान्तेर्जृम्भस्य जृम्भाख्यस्य पक्षिणो भावोऽभिप्रायो विरुतात्तदीयशब्दाद्विदितः । अथ स ते पिता तत्र शयने शयान एव तद्भावपरिज्ञानजसंतोषेण बहुधा द्विर्त्रिर्बहुप्रकारेण चाहसत् ॥ २० ॥

रा० टी०—तत इति । ततः शब्दविज्ञातृत्वप्राप्त्यनन्तरं जृम्भस्य पक्षिविशेषस्य विरुताच्छब्दाद् जृम्भस्य भावोऽभिप्रायः शयने पर्यङ्कशयानस्येति शेषः भूरिवर्चसस्ते पितुः विदितो ज्ञातः अत एव सः ज्ञाताभिप्रायस्त्वत्पिता तत्र तस्मिन् शयने बहुधा अनेकवारमहसत् एतेन तदभिप्रायस्य हास्यरसोत्पादकत्वं व्यक्तम् ॥ १८ ॥

गो० टी०—तत इति । जृम्भस्य पिपीलिकाविशेषस्य शयने शयनसमीपे पर्यङ्काधःप्रदेश इत्यर्थः । भूरिवर्चस इति पितुर्विशेषणं वरलाभेन अधिकतेजस इत्यर्थः जृम्भाविशेषणं वा तदा सुवर्णवर्चस इत्यर्थः । 'सुवर्णे भूः' इत्यमरः । सः पिता तत्र रुते विषये बहुधा द्विर्त्रिः अहसत् ॥ १८ ॥

२१] ति० टी०—तत्र शयने शयाना ते जननी मामयं हसतीति क्रुद्धा सती मृत्युरूपं पाशमिच्छन्ती हे नृपते ! ते हासं हासकारणं ज्ञातुमिच्छामीति ते पितरमब्रवीत् । 'वरं ते' इति पाठे ते जननी मामयं हसतीति बुद्ध्या क्रुद्धाभवत् ततो राज्ञा त्वद्विषयोऽयं न हासः, किं तु वरबलान्मे सर्वरुतज्ञानसामर्थ्यमस्ति, अतः किंचिज्ज्ञातुं विदिततद्भावोऽहासिषमित्युक्ते तद्वरस्वरूपं तद्दातारं च जिज्ञासामीत्यर्थः ॥ २१ ॥

रा० टी०—तत्रेति । तत्र हसनसमये क्रुद्धा मामयं हसतीति बुद्ध्या क्रोधविशिष्टा अत एव मृत्युपाशं मृत्युकारणीभूतगलबन्धनयोग्यरज्जुविशेषमभीप्सती इच्छन्ती सती हे नृपते हे सौम्य ! ते हासं जिज्ञासामि किमर्थं हसितवानसीति ज्ञातुमिच्छामीत्यब्रवीत् संज्ञापूर्वकविधेरनित्यत्वात् ज्ञादिशास्त्राप्रवृत्तिः ॥ १९ ॥

गो० टी०—तत्रेति । तत्र हासविषये क्रुद्धा मां परिहसतीति क्रुद्धा हे नृपते ! हासं हासनिमित्तं जिज्ञासामि ज्ञातुमिच्छामि ॥ १९ ॥ २० ॥

२२] ति० टी०—हासं तत्कारणम् । 'वरम्' इति पाठे तद्दातारम् ॥ २२ ॥

रा० टी०—राजवचनं बोधयन्नाह—नृप इति । तां पृच्छन्तीं नृप उवाच । तद्वचनमेवाह—हासं हासस्वरूपं यदि ते तुभ्यं शंसामि तदा मे मरणं सद्यो भविष्यति अत्र अस्मिन्विषये संशयो न एतेन कथने तव मृतिर्भवितेति वरदानसमये वरदात्रोक्तमिति व्यक्तम् ॥ २० ॥

२३] ति० टी०—सर्वथा शंस जीव वा मा वा म्रियस्व वा । तस्मिन्नवगते इतः परं कदापि न हसिष्यसि त्वत्कर्तृकमत्कर्मकभाविहासाभावं निश्चेष्यामीत्यर्थः ॥ २३ ॥

रा० टी०—मातेति । देवी राज्ञी ते माता केकयं पुनः अब्रवीत् । तद्वचनमेवाह—जीव वा मा जीव वा त्वं मे मह्यं शंस कथय । नन्वु किमर्थमेवमाग्रहः इत्यत आह—मां त्वं न प्रहसिष्यसि मदुपहासं न करिष्यसि हासकारणकथनादिति शेषः । अयं मां परिहसतीति मयि भ्रमो न भविष्यतीत्यर्थः एतेन पतिकर्तृकमरणोक्तिरपि हासहेतुकेति तया निश्चितमिति ध्वनितम् ॥ २१ ॥

गो० टी०—मातेति । जीव वा मा वेत्यनेन कैकेयीमातुः पतिघ्नीत्वमुक्तम् ॥ २१ ॥

२४] ति० टी०—तस्मै वरदाय ऋषये तमर्थं कथननिर्बन्धरूपं कथयामासेत्यन्वयः ॥ २४ ॥

१ देवि इति गो० पाठः । २ तत इति गो० पाठः । ३ अपहसिष्यसीति गो० पाठः । ४ सन्निति गो० पाठः ।

ततः स वरदः साधू राजानं प्रत्यभाषत । म्रियतां ध्वंसतां [1]वेयं मा [2]शंसीस्त्वं महीपते ॥ २५ ॥
स तच्छ्रुत्वा वचस्तस्य प्रसन्नमनसो नृपः । मातरं ते निरस्याशु विजहार कुबेरवत् ॥ २६ ॥
तथा त्वमपि राजानं दुर्जनाचरिते पथि । असद्ग्राहमिमं मोहात्कुरुषे पापदर्शिनी ॥ २७ ॥
सत्यश्चायं प्रवादोऽयं लौकिकः प्रतिभाति मा । पितॄन्समनुजायन्ते नरा मातरमङ्गनाः ॥ २८ ॥
नैवं भव गृहाणेदं यदाह वसुधाधिपः । भर्तुरिच्छामुपास्येह जनस्यास्य गतिर्भव ॥ २९ ॥
[3]मां त्वं प्रोत्साहिता पापैर्देवराजसमप्रभम् । भर्तारं लोकभर्तारमसद्धर्ममुपादधे ॥ ३० ॥
नहि मिथ्याप्रतिज्ञातं करिष्यति तवानघः । श्रीमान्दशरथो राजा देवि राजीवलोचनः ॥ ३१ ॥

रा० टी०—प्रिययेति । प्रियया उक्तः स केकयः वरदाय वरदात्रे तं स्वभार्याग्रहरूपमर्थं तत्त्वतः कथयामास ॥ २२ ॥

गो० टी०—प्रिययेति । वरदाय तत्त्वतः कथयामास अत्यन्तसंकटेऽपि विमृश्यकारी सन् वरदाय कथयामासेत्यर्थः ॥ २२ ॥

२५] ति० टी०—ततः साधुः स वरदः प्रत्यभाषत ध्वंसतां वा स्वपित्रादिसमीपं गच्छतु वा । 'मा कथाः' इति पाठेऽस्या वच इति शेषः ॥ २५ ॥

रा० टी०—तत इति । ततः केकयराजवचनश्रवणानन्तरं वरदः साधुः राजानं प्रत्यभाषत । तद्भाषणमेवाह—हे महीपते ! इयं तव पत्नी म्रियतां ध्वंसतां पित्रादिगेहं गच्छतु वा त्वं मा शंसीः न कथय ॥ २३ ॥

गो० टी०—तत इति । ध्वंसतां स्वाधिकारात्प्रच्युता स्यात् ॥ २३ ॥ २४ ॥

२६] ति० टी०—निरस्य भद्रे ! त्वमितो गच्छेति ते मातरं परित्यज्य ॥ २६ ॥

रा० टी०—स इति । प्रसन्नमनसः तस्य वरदातुः वचः श्रुत्वा ते मातरं निरस्य नृपः केकयः कुबेरवद्विजहार ॥ २४ ॥

२७] ति० टी०—तथा त्वमपि दुर्जनाचरिते पथि स्थितेति शेषः अतः इमं राजानं मोहान्मोहमुत्पाद्यासद्ग्राहमसत्कार्यग्राहकं कुरुषे ॥ २७ ॥

रा० टी०—तथेति । पापदर्शिनी पापं पापाचरणशीलं मन्थरां पश्यति तदनुमतिं गृह्णाति तच्छीला अत एव दुर्जनाचरिते प्रतिज्ञाहापनरूपे पथि मार्गे प्रवर्तिता त्वं तथा स्वमातरमिव असद्ग्राहं प्रतिज्ञात्यागरूपासत्कर्मग्राहकं राजानं मोहान्मन्थराया अविवेकाद्धेतुभूतात्कुरुषे ॥ २६ ॥

गो० टी०—उक्तमर्थं प्रकृते निगमयति—तथेति । दुर्जनाचरिते पथि स्थितेति शेषः । असद्ग्राहमसदर्थाभिनिवेशम् ॥ २६ ॥

२८] ति० टी०—कन्यानां मातृतुल्यत्वं न्यायप्राप्तमित्याह—सत्य इति । मा माम् नराः पुत्ररूपाः समनुजायन्ते पितृस्वभावानुवर्तिनो जायन्ते ॥ २८ ॥

रा० टी०—ननु पितुः स्वभावो मयि कुतो नागत इत्यत आह—सत्य इति । प्रवादः उक्तिः मा मां सत्यः प्रतिभाति । प्रवादस्वरूपमाह—नराः पुरुषाः पितॄन्समनुजायन्ते पितृस्वभावसदृशस्वभाववन्तो भवन्तीत्यर्थः । अङ्गनाः कन्या मातरं समनुजायन्ते ॥ २६ ॥

गो० टी०—सत्य इति । सत्य इति मा मां प्रतिभातीत्यन्वयः "अभितः परितः—" इत्यादिना प्रतियोगे द्वितीया । पितॄन् समनुजायन्ते अत्र इतिकरणं द्रष्टव्यं पितृसमानलक्षणा जायन्त इत्यर्थः । अङ्गनाः पुत्र्यः ॥ २६ ॥

२९] ति० टी०—नैवं भव मातृवन्मा भव यद्वसुधाधिप आह तद्गृहाण रामाभिषेकरूपं वचः । 'नेया' इति पाठे विधेया भवेत्यर्थः । भर्तुरिच्छां तद्विषयमुपास्य तदनुवर्तिनी भूत्वास्य जनस्यास्मदादेर्गतिः शरणं भव ॥ २९ ॥

रा० टी०—ननु लोकप्रवादस्य सत्यत्वे किमर्थं तन्निवारणयत्नः क्रियते इत्यत आह—नेति । एवं लोकवत्त्वं न भव तेन तस्याः प्राकृतविलक्षणत्वात् ध्वनितम् । ननु तर्हि मया किं कर्तव्यमित्यत आह—वसुधाधिपो राजा यदाह वदति तदिदं गृहाण एतेन राजेदानीं प्रव्रजनं निवारयतु इत्यभिप्रायः सूचितः तेन राजसत्यप्रतिज्ञत्वस्य सुमन्त्रविस्मृतिः सूचिता तेन वियोगदुःखस्याश्वर्यशक्तिमत्त्वं व्यक्तम् । ग्रहणफलमाह—उपास्य तदनुसारेण वर्तित्वा इह दुःखे वियमानस्य अस्य जनस्य गतिर्भव ॥ २७ ॥

गो० टी०—नेति । 'नैवं भव' इति पाठः 'नेया भव' इतिपाठे नेया नेतुं योग्या विधेया भवेत्यर्थः । वसुधाधिपः यदाहश्च एव पुष्यो भविता श्वोऽभिषिच्यते मे सुत इति यद्वचनमाह इदं गृहाण अस्य जनस्य पौरजानपदस्य गतिः शरणमिति सान्त्वोक्तिः ॥ २७ ॥

३०] ति० टी०—प्रोत्साहिता प्रेरिता । असद्धर्मं कनिष्ठाभिषेकपूर्वं ज्येष्ठस्य विवासनरूपमुपादध ग्राहय । 'उपावह' इति पाठेऽप्ययमेवार्थः ॥ ३० ॥

रा० टी०—तदेव द्वयमाह—मेति । पापैः मन्थरादिभिः प्रोत्साहिता त्वं भर्तारमसद्धर्ममभिषेकप्रतिज्ञात्यागं मा उपावह प्रापय एतेन प्रतिज्ञातः पूर्वमेव प्रव्राजनं त्वया कर्तव्यमिदानीं तन्नोचितमिति सूचितम् ॥ २८ ॥

गो० टी०—मेति । असद्धर्मं कनिष्ठाभिषेकपूर्वकज्येष्ठविवासनरूपं मोपादधाः मा ग्राहय ॥ २८ ॥

३१] ति० टी०—तव मिथ्याप्रतिज्ञातं लीलयोक्तं वरदानरूपं वचः, अतो राजा न करिष्यति तत् ॥ ३१ ॥

१ चेयमिति रा. पाठः । २ कथास्त्वमिति गो. पाठः । ३ अथेति गो. पाठः । ४ मेति गो. रा. पाठः । ५ दधा इति गो. वहेति रा. पाठः ।

ज्येष्ठो वदान्यः कर्मण्यः स्वधर्मस्यापि रक्षिता । रक्षिता जीवलोकस्य बली रामोऽभिषिच्यताम् ॥ ३२ ॥
परिवादो हि ते देवि महांल्लोके चरिष्यति । यदि रामो वनं याति विहाय पितरं रूपम् ॥ ३३ ॥
स्वराज्यं राघवः पातु भव त्वं विगतज्वरा । नहि ते राघवादन्यः क्षमः पुरवरे वसन् ॥ ३४ ॥
रामे हि यौवराज्यस्थे राजा दशरथो वनम् । प्रवेक्ष्यति महेष्वासः पूर्ववृत्तमनुस्मरन् ॥ ३५ ॥
इति सान्त्वैश्च तीक्ष्णैश्च कैकेयीं राजसंसदि । भूयः संक्षोभयामास सुमन्त्रस्तु कृताञ्जलिः ॥ ३६ ॥
नैव सा क्षुभ्यते देवी न च स्मे परिदूयते । न चास्या मुखवर्णस्य लक्ष्यते विक्रिया तदा ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०—ननु त्वमेव राजानं बोधयित्वा प्रव्राजननिवृत्तिं कुरु इत्यत आह-नेति । अनघः अघसंसर्गशून्यो राजा तवाग्रे प्रतिज्ञातं मिथ्या न करिष्यति एतेन मद्बोधनमकिंचित्करमिति सूचितम् ॥ २९ ॥

गो० टी०—एवं क्रियमाणे मम वरस्य का गतिरित्याशङ्क्य प्रकारान्तरेण गतिर्भविष्यतीत्याह-नहीति । प्रतिज्ञातं प्रतिश्रुतं वरद्वयं तन्मिथ्या न करिष्यति राज्यादप्यधिकमूल्यरत्नभूषणसंमानादिभिः सफलं करिष्यतीत्यर्थः ॥ २९ ॥

३२] ति० टी०—अतो ज्येष्ठत्वादिगुणको रामोऽभिषिच्यताम् तदभिषेकेऽनुमतिः क्रियताम् । कर्मण्यः कर्मणि साधुः ॥ ३२ ॥

रा० टी०—ननु निवारणे राक्षसध्वंसः कथं भविष्यतीत्यत आह वारणफलमाह-ज्येष्ठ इति । ज्येष्ठः सर्वगुणैः श्रेष्ठः कर्मण्यः निखिलसत्कर्मणि साधुः रक्षिता रामोऽभिषिच्यताम् । एतेनैतद्वृणश्रवणादेव राक्षसध्वंसो भवितेति बोधितम् ॥ ३० ॥

गो० टी०—रामस्य राज्याभिषेकार्हतासाधनगुणानाह-ज्येष्ठ इति । कर्मण्यः कर्मणि साधुः सदाचारपर इत्यर्थः । वदान्यः उदारः स्वधर्मपरिरक्षिता स्वधर्मस्य दुष्टनिग्रहपूर्वकशिष्टपरिपालनरूपक्षत्रियधर्मस्य परिरक्षिता बली रामोऽभिषिच्यतां त्वयेति शेषः अभिषेकानुमतिः क्रियतामित्यर्थः ॥ ३० ॥

३३] ति० टी०—विपक्षे बाधकमाह-परिवाद इति । परिवादोऽपवादः चरिष्यति प्रचरिष्यति ॥ ३३ ॥

रा० टी०—ननु प्रतिज्ञापनयत्नो निरर्थक इत्यत आह-परीति । एतेन परिहासभीतिश्चेन्निवारयेति ध्वनितम् ॥ ३१ ॥

गो० टी०—परिवाद इति । परिवादः अपवादः दोषवाद इत्यर्थः ॥ ३१ ॥

३४] ति० टी०—राघवाद्रामादन्यः पुरवरे वसंस्ते क्षमोऽनुकूलो नहि भवेदित्यर्थः भरतस्त्वत्प्रतिकूल एव भविष्यतीति भावः ॥ ३४ ॥

रा० टी०—स्वेति । राघवो रामः स्वराज्यं पातु त्वं विगतज्वरा भव । ननु पालनं विगतज्वरात्वं च राजैव कर्तेत्यत आह—राघवाद्रामादन्यः राजा भरतो वा इह पुरे वसन् वस्तुं न क्षमः हिते त्वत्प्रियाचरणे च न क्षमो भविता रामगमने सतीति शेषः ॥ ३२ ॥

गो० टी०—स इति । ते पुरवरे हि यस्मात्कारणात् क्षमो राघवादन्यो न वसेत् अतः स राघवः राज्यं पात्विति संबन्धः, यद्वा राघवादन्यः पुरवरे राजतया वसन् भरतः ते न क्षमः न युक्तः कनिष्ठस्त्वया राज्ये स्थापयितुं न युक्त इत्यर्थः, हिते हितकरणे न क्षम इति वा ॥ ३२ ॥

३५] ति० टी०—अतः—रामे हीति । पूर्ववृत्तं पूर्वराजाचारम् ॥ ३५ ॥

रा० टी०—स्वविचारितमाह—राम इति । पूर्ववृत्तं स्वकुलमर्यादाम् ॥ ३३ ॥

गो० टी०—राम इति । पूर्ववृत्तमिक्ष्वाकुकुलक्रमागतवृत्तम् ॥ ३३ ॥ ३४ ॥

३६] ति० टी०—भूयोऽत्यर्थम् ॥ ३६ ॥

रा० टी०—उपसंहरन्नाह—इतीति । तीक्ष्णैः मातृवृत्तान्तकथनादिभिः भूयः अत्यन्तं क्षोभयामास चालयामास ॥ ३४ ॥

३७] ति० टी०—सान्त्वैर्न क्षुभ्यते तीक्ष्णैर्न परिदूयते॥३७॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०—नैवेति । तदा सुमन्त्रचालनकाले एतेन रामानुरागरक्तानां क्षोभादिविक्रियाराहित्यं व्यञ्जितम् ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

गो० टी०—नेति । मुखवर्णस्य मुखवर्णस्य ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

---

१ स्वधर्मपरिरक्षितेति गो. पाठः । २ स राज्यमिति गो. पाठः । ३-वसेदिति गो. पाठः । ४ सुमन्त्रः क्षोभयामास भूय एवेति गो. पाठः। ५ संपरीति गो. पाठः ।

षट्त्रिंशः सर्गः।

दशरथः सुमन्त्रं महता कोशबलेन राममनुगन्तुं न्ययुङ्क्तथाप्यसमञ्जं दृष्टान्तीकृत्य कैकेय्यभ्यमपि रामं निष्किंचनमेव निर्वासयितुं निर्बन्ध। अथो सिद्धार्थनामा सचिवो दुश्चरितादसमञ्जात्प्रतिगुणोऽयं गुणाभिरामो रामोऽतो विरमस्वाग्रहाद्योजयस्वैनं यौवराज्येनेति कैकेयीं प्रोवाच। सिद्धार्थोक्ताकरणेऽहमपि राममनुव्रजामीति दशरथः प्रोवाच।

ततः सुमन्त्रमैक्ष्वाकः पीडितोऽत्र प्रतिज्ञया। सबाष्पमतिनिःश्वस्य जगादेदं पुनर्वचः॥ १॥
सूत रत्नसुसंपूर्णा चतुर्विधबला चमूः। राघवस्यानुयात्रार्थं क्षिप्रं प्रतिविधीयताम्॥ २॥
रूपाजीवाश्च वादिन्यो वणिजश्च महाधनाः। शोभयन्तु कुमारस्य वाहिनीः सुप्रसारिताः॥ ३॥
ये चैनमुपजीवन्ति रमते यैश्च वीर्यतः। तेषां बहुविधं दत्त्वा तानप्यत्र नियोजय॥ ४॥
आयुधानि च मुख्यानि नागराः शकटानि च। अनुगच्छन्तु काकुत्स्थं व्याधाश्चारण्यकोविदाः॥ ५॥
निघ्नन्मृगान्कुञ्जरांश्च पिबंश्चारण्यकं मधु। नदीश्च विविधाः पश्यन्न राज्यं संस्मरिष्यति॥ ६॥
धान्यकोशश्च यः कश्चिद्धनकोशश्च मामकः। तौ राममनुगच्छेतां वसन्तं निर्जने वने॥ ७॥

१] ति० टी०—एवं सुमन्त्रेण राजप्रतिज्ञाया मिथ्यात्वोक्तावपि राजा तस्या वास्तवत्वं जानन्रामस्य वन एव सुखवासोपायमादिशति—तत इति। कैकेय्यनङ्गीकारानन्तरम्। प्रतिज्ञया कैकेयीमुद्दिश्य कृतया वास्तवया। इदं वक्ष्यमाणम्॥१॥

रा० टी०—सुमन्त्रवचनश्रवणानन्तरकालिकं राजवृत्तमाह—तत इत्यादिभिः। प्रतिज्ञया राक्षसहननविषयकरामप्रतिश्रवेण स्वकृतरामाभिषेकप्रतिश्रवेण च पीडितः ऐक्ष्वाको दशरथः सबाष्पं बाष्पसहितं यथा स्यात्तथा अतिनिःश्वस्येदं जगाद कथयामास॥ १॥

गो० टी०—तत इत्यादि। ततः कैकेयीसंमत्यभावानन्तरम् अत्र वरदानविषये॥ १॥

२–३] ति० टी०—चतुर्विधबला रथादिचतुर्विधबलवती चमूः सेना अनुयात्रार्थं सेवार्थं प्रतिविधीयतां नियुज्यतां प्रस्थाप्यताम्॥ २॥ ३॥

रा० टी०—तद्वचनमेवाह—सूतेति। हे सूत! रत्नसुसंपूर्णा नानारत्नव्याप्ता चतुर्विधबला चतुर्विधानि रथादिचतुष्टयप्रकाराणि बलानि वीर्याणि यस्यां सा चमूः सेना राघवस्य अनुयात्रार्थमनुगमनार्थं क्षिप्रं शीघ्रं प्रतिविधीयतां प्रस्थाप्यताम् २

गो० टी०—सूतेति। अनुयात्रार्थं प्रतिविधीयतां प्रेष्यताम्॥ २॥

रा० टी०—रूपाजीवा इति। वादिन्यः रमणीयवचनशीलाः रूपाजीवा वेश्याः महाधनाः प्रभूतधनवन्तः सुप्रसारिताः पण्याः द्रव्यप्रसारणचतुराश्च वणिजः वणिग्जातयः कुमारस्य रामस्य वाहिनीं सेनां शोभयन्तु। वादिन्य इत्यस्य स्थाने शालिन्य इति भूषणपाठः। 'वारस्त्री गणिकावेश्या रूपाजीवा' इत्यमरः॥ ३॥ २॥

गो० टी०—रूपाजीवा इति। रूपाजीवाः वेश्याः 'वारस्त्री गणिका वेश्या रूपाजीवा' इत्यमरः। वादिन्यः परचित्ताकर्षणचतुरवचनाः सुप्रसारिताः शिबिरदेशे पण्यपदार्थप्रसारणं कुर्वन्तः॥ ३॥

४] ति०टी०—यैर्मद्दैः वीर्यतो वीर्यपरीक्षया रमत इत्यर्थः॥४॥

रा० टी०—ये इति। एनं रामसुपजीवन्ति यैश्च सः वीर्यतः पराक्रमदर्शनादिना रमते तेषां योग्यं बहुविधमनेकप्रकारधनं दत्त्वा तानपि अत्र रामसहगमने नियोजय प्रेषयेत्यर्थः॥ ४॥

गो० टी०—य इति। एनं रामं बहुविधं सुवर्णरत्नवस्त्रादिकम् अत्र वाहिन्याम्॥ ४॥

५] ति० टी०—नागरा जनाः। अरण्ये कोविदा अरण्यमर्मज्ञाः॥ ५॥

रा० टी०—आयुधानीति। मुख्यानि राममात्रग्रहणयोग्यानि आयुधानि बाणप्रभृतीनि नागराः नगरवासिनः शकटानि च अरण्यकोविदाः वनविषयकातिज्ञानवन्तो व्याधाश्च काकुत्स्थं राममनुगच्छन्तु॥ ५॥

गो० टी०—आयुधानीति। आयुधानि आयुधधराः नागराः नगरजाः श्रेष्ठिनः शकटानि तैलघृतादिप्रापकाणि व्याधा वने मार्गदर्शिनः॥ ५॥

६–७] ति० टी०—राज्यं राज्यस्थितिम्॥ ६॥ ७॥

रा० टी०—व्याधप्रेषणे प्रयोजनं वदन्नाह—निघ्नन्निति। हननयोग्यानपि मृगादीन्निघ्नन्निवर्तयन्नारण्यकं वनोद्भवं मधु अनेकविधपुष्परसं पिबन्सन्राज्यं राजसुखं न संस्मरिष्यति एतेन रामो विहारप्रियोऽस्तीति राजनिश्चयः सूचितः। प्रसिद्धश्च निपूर्वकहनः निवर्तनार्थकत्वं शिष्टं निघ्नन्ति कम्पितमित्यादिवेदभाष्ये तत्र वधो नार्थः शब्दानामनित्यत्वापत्तेः मतान्तरेऽपि शब्दानां प्राणसंबन्धाभावेन प्राणावियोगानुकूलव्यापारार्थस्यात्रासंभवात्॥ ६॥

गो० टी०—निघ्नन्निति। राज्यस्येति अधीगर्थदयेशां कर्मणि इति षष्ठी॥ ६॥

१ पुनः पुनरिति गो. रा. पाठः। २ गोचरा इति गो. पाठः। ३ राज्यस्य स्मरिष्यतीति गो. पाठः।

यजन्पुण्येषु देशेषु विसृजंश्चाप्तदक्षिणाः । ऋषिभिश्चापि[1] संगम्य प्रवत्स्यति सुखं वने ॥ ८ ॥
भरतश्च महाबाहुरयोध्यां पालयिष्यति । सर्वकामैः पुनः श्रीमान्रामः संसाध्यतामिति ॥ ९ ॥
एवं ब्रुवति काकुत्स्थे कैकेय्या भयमागतम् । मुखं चाप्यगमच्छोषं स्वरश्चापि व्यरुध्यत[2] ॥ १० ॥
सा विषण्णा च संत्रस्ता मुखेन परिशुष्यता । राजानमेवाभिमुखी कैकेयी वाक्यमब्रवीत् ॥ ११ ॥
राज्यं गतधनं साधो पीतमण्डां सुरामिव । निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते[3] ॥ १२ ॥
कैकेय्यां मुक्तलज्जायां वदन्त्यामतिदारुणम् । राजा दशरथो वाक्यमुवाचायतलोचनाम् ॥ १३ ॥
वहन्तं किं तुदसि मां नियुज्य धुरि माहिते । अनार्ये कृत्यमारब्धं किं न पूर्वमुपारुधः ॥ १४ ॥

रा० टी०–धान्येति । मामको मत्संबन्धी एतेन रामसमीपं तज्जिगमिषा सूचिता ॥ ७ ॥

गो० टी०–धान्यकोश इति । कोशो वासस्थानम् अनुगच्छेतां गोप्युष्ट्रादिमुखेनेति शेषः ॥ ७ ॥

८] ति० टी०–आप्तदक्षिणा उक्तदक्षिणाः ॥ ८ ॥

रा० टी०–कोशप्रेषणे प्रयोजनं वदन्नाह–यजन्निति । आप्तदक्षिणाः आचार्यानुचितस्वर्णादीन् विसृजन् ददत् सन्वने सुखं प्रवत्स्यति ॥ ८ ॥

गो० टी०–यजन्निति । विसृजन् दददिति यावत् दक्षिणाः यज्ञदक्षिणाः ॥ ८ ॥

९] ति० टी०–पालयिष्यतीति सोपालम्भोक्तिः संसाध्यतां प्रस्थाप्यताम् ॥ ९ ॥

रा० टी०–नन्विह कः पालयितेत्यत आह–भरत इति । महाबाहुर्भरतः अयोध्यां पालयिष्यति अतः सर्वकामैः इच्छाविषयीभूतकृत्स्नपदार्थैर्युक्तो रामः संसाध्यतां तदीप्सितगमनसिद्धिः संपाद्यतामित्यर्थः ॥ ९ ॥

गो० टी०–भरत इति । अयोध्यां पालयिष्यतीति सोपालम्भोक्तिः सर्वकामैः सह संसाध्यतां प्रस्थाप्यताम् । इतिशब्दः नियोगसमाप्तिवाचकः ॥ ९ ॥ १० ॥

१०–११] ति० टी०–स्वरश्च व्यरुध्यत रुद्धो जातः । भयकार्यमेतत् ॥ १० ॥ ११ ॥

रा० टी०–एवमिति । काकुत्स्थे दशरथे एवमनेन प्रकारेण ब्रुवति कथयति सति कैकेय्या भयं क्षुद्रराक्षसवधफलकनिखिलपरिवारगमनहेतुकलोकापवादभीतिमागतं प्राप्तमत एव मुखं तस्याः आननं शोषमगमत् अत एव स्वरोऽपि व्यरुध्यत१०

रा० टी०–सेति । संत्रस्ता सैन्यगमननिवारणफलकस्वविज्ञापनाहेतुकसंदिग्धराजकोपहेतुकोद्वेगविशिष्टा अत एव विषण्णा उदासीनचित्ता अभिमुखी राजसंमुखे स्थिता परिशुष्यता मुखेनोपलक्षिता कैकेयी इदं वाक्यमब्रवीत् ॥ ११ ॥

गो० टी०–सेति । मुखेनेत्युपलक्षणे तृतीया ॥ ११ ॥

१२–१३] ति० टी०–मण्डः सुरासारांशः । निरास्वाद्यं निर्गतास्वाद्यतमं शून्यमवस्तुकम् ॥ १२ ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–राज्यमिति । साधो हे प्राज्ञजनसाधक ! गतजनं गताः जनाः पित्रादयो यस्मात्तत एव शून्यं पित्रादिसामग्रीजातरहितमत एव निरास्वाद्यतममास्वाद्यतमपित्रादिसंमाननादिसुखरहितं राज्यं भरतो न अभिपत्स्यते प्राप्स्यते । तत्र दृष्टान्तः पीतमण्डां पीतसारां सुरां जना इव किंच पीतः मण्डो दधिसारो यस्याः तां सुरां सुदत्तां दधिव्यक्तिमिव एतेन भरतोऽपि सहैव गन्तेति सूचितं तेन भवदादिरहितेनैव रामेण गन्तव्यमिति व्यञ्जितम् ॥ १२ ॥

गो० टी०–राज्यमिति । पीतमण्डां मण्डं दधिभवं मस्त्विति मण्डशब्दो यथा दधिसारवाचकः तद्वदत्रापि मण्डशब्देन सुरासार उच्यते साधो इति सहासोक्तिः निरास्वाद्यतमं निर्गतभोग्यवस्तुयुक्तम् ॥ १२ ॥

रा० टी०–कैकेय्यामिति । कैकेय्यामतिदारुणं वियोगबोधकत्वेनातिदारुणत्वेन प्रतीयमानं वाक्यं वदन्त्यामत एव मुक्तलज्जायां मुक्तानैहिकामुष्मिकानुरागरहितान्परमहंसानपि लज्जयति तस्यां सत्यामायतलोचनां कैकेयीं राजा दशरथ उवाच ॥ १३ ॥

गो० टी०–कैकेय्यामिति । आयतलोचनामिति दैन्योक्तिमूलसौन्दर्योक्तिः ॥ १३ ॥

१४] ति० टी०–हे अहिते ! मा मां धुरि दासवद्धरहेतुकरामविवासनभरताभिषेकरूपभारे नियुज्य तं च भारं वहन्तं मां किं तुदसि व्यथयसि । हे अनार्ये ! यदिदानीमारब्धं कृत्स्नं सार्वभौमभोगसहितस्य प्रस्थापनप्रतिबन्धरूपं तत्तादृशं गमनं पूर्वमेव वनवासप्रार्थनकाल एव नोपारुधः सर्वं त्यक्त्वा केवलो यास्यिति किं न प्रार्थितवत्यसि तत एतन्निरोधे तव सामर्थ्यं नास्तीति भावः कुब्दीनोक्तित्वात्सर्वदोषपरिहारः ॥ १४ ॥

रा० टी०–तद्वाक्यमेवाह–वहन्तमिति । धुरि धरणीभारभूते अनार्ये क्षुद्रे अहिते धर्मविरोधित्वेन शत्रौ राक्षसजाते तद्विनाशार्थं मां राज्यलक्ष्मीं सेनामित्यर्थः वहन्तं प्रेषयन्तं मा मां किं तुदसि खेदयसि । नन्वहं तुदामि किंतु प्रार्थयामीत्यत आह–आरब्धं मदाज्ञया सर्वजनकर्तृकप्रारम्भकर्मीभूतं कृत्यं कृतिनिष्पाद्यं सेनागमनमित्यर्थापूर्वं मदाज्ञापनात्पूर्वकाले किं किमर्थं न उपारुधः सैन्यादिभिर्न गन्तव्यमिति पूर्वमेव कुतो नोक्तमित्यर्थः ॥ १४ ॥

१ सम्यगम्येति गो. पाठः । २ न्यरुध्यतेति गो. पाठः । ३ गतजनमिति गो. रा. पाठः ।

तस्यैतत्क्रोधसंयुक्तमुक्तं श्रुत्वा वराङ्गना । कैकेयी द्विगुणं क्रुद्धा राजानमिदमब्रवीत् ॥ १५ ॥
तवैव वंशे सगरो ज्येष्ठपुत्रमुपारुधत् । असमञ्ज इति ख्यातं तथायं गन्तुमर्हति ॥ १६ ॥
एवमुक्तो धिगित्येव राजा दशरथोऽब्रवीत् । व्रीडितश्च जनः सर्वः सा च तन्नावबुध्यत ॥ १७ ॥
तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः । शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥ १८ ॥
असमञ्जो गृहीत्वा तु क्रीडतः पथि दारकान् । सरय्वां प्रक्षिपन्नप्सु रमते तेन दुर्मतिः ॥ १९ ॥
तं दृष्ट्वा नागराः सर्वे क्रुद्धा राजानमब्रुवन् । असमञ्जं वृणीष्वैकमस्मान्वा राष्ट्रवर्धन ॥ २० ॥
तानुवाच ततो राजा किंनिमित्तमिदं भयम् । ताश्चापि राज्ञा संपृष्टा वाक्यं प्रकृतयोऽब्रुवन् ॥ २१ ॥
क्रीडतस्त्वेष नः पुत्रान्बालानुद्धान्तचेतसः । सरय्वां प्रक्षिपन्मौर्ख्यादतुलां प्रीतिमश्नुते ॥ २२ ॥

गो० टी०–वहन्तमिति । हे अहिते अहितकारिणि ! धुरि वरदानहेतुकभरताभिषेचनरामविवासनरूपदुर्वहभारे नियुज्य तथा वहन्तं मां वत्सतरमिव किं तुदसि व्यथयसि त्वदाज्ञप्त-रामविवासनकारिणं किमर्थं पुनरपि पीडयसीत्यर्थः । किमधुना पीड्यते पूर्वमेव भवता दत्तं खल्वित्यत्राह–अनार्य इति । हे अनार्ये ! आरब्धं कृत्यं सेनाप्रेषणादिकं पूर्वं वरप्रार्थनाकाले किमर्थं नोपारुधः नोपरुद्धवती न प्रार्थितवतीति यावत् वरयाचनाकाले अनुद्घाटितत्वात् सेनाप्रेषणादिकं न निवर्तितव्यमिति भावः ॥ १४ ॥

१५] ति० टी०–द्विगुणं क्रुद्धा प्रकारान्तरेण मत्प्रयोजन नाशयतीत्याशयेन ॥ १५ ॥

रा० टी०–तस्येति । क्रोधसंयुक्तं क्रोधहेतुकत्वेन प्रतीयमानं तस्य राज्ञः उक्तं वचनं श्रुत्वा क्रुद्धा कुध् क्रोधं जहाति हापयति सा कैकेयी द्विगुणं द्वौ रामविषयकस्नेहदृढिरामसत्यप्रतिज्ञत्वे गुणौ यस्मिन् तदिदं भोगत्यागविषयककुलाचारप्रमाणबोधनपूर्वकसत्यप्रतिज्ञत्वबोधकं वचनं राजानमब्रवीत् ॥ १५ ॥

गो० टी०–तस्येति । द्विगुणं क्रुद्धा प्रकारान्तरेण मदभिमतं विघटयतीति बहुतरं क्रुद्धेत्यर्थः ॥ १५ ॥

१६] ति० टी०–पूर्वमनुक्तमपि केवलत्वं वनगमनत्वादेव सिद्धमिति दृष्टान्तबलेनाह–तवैवेति । उपारुधत् राज्यभोगेभ्य इति शेषः ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–तवेति । तव वंशे पूर्वपरम्परायामेव असमञ्ज इति ख्यातं ज्येष्ठपुत्रमुपारुधत् तद्भोग्यभोगाभ्यवर्तयत् तथा राज्यभोगत्यागप्रकारेण अयं रामो गन्तुमर्हति ॥ १६ ॥

गो० टी०–यद्यपि पूर्वमिदं न दत्तं तथाप्यर्थसिद्धमित्याशयेनाह–तवैवेति । उपारुधदिति निष्कासनमेवोच्यते गन्तुमर्हतीति निर्देशात् तथायमिति निर्धन एवेत्यर्थः ॥ १६ ॥

१७] ति० टी०–एवमुक्तोऽसमञ्जतुल्यतया गमन उक्तः स्वप्रतिश्रुतातिरिक्तप्रलापाद्राज्ञो धिगित्युक्तिः जनः कैकेयीसेवकजनः सर्वस्वामिन्या असंबद्धप्रलापात् नावबुध्यते क्रोधवशादिति भावः ॥ १७ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण कैकेय्या उक्तः राजा दशरथः धिक् त्वदत्तदृष्टान्तमिति शेषः इत्येवाब्रवीद्रामगमननिवृत्तिप्रकारं नाब्रवीदित्यर्थः एतेन राज्ञो लज्जा जातेति व्यक्तमत एव सर्वो जनः व्रीडितः राजव्रीडितत्वदर्शनेन लज्जित आसीदिति शेषः । सा कैकयी तं राजकृतदृष्टान्तधिक्कारं नावबुध्यत अगणयत् पत्युक्तसर्वप्रकारवचनस्य सत्यत्वात्र किंचिदब्रवीदित्यर्थः ॥ १७ ॥

गो० टी०–एवमिति । प्रतिज्ञातातिरिक्तेऽपि चापलवतीं निन्दति–धिगिति । सा कैकेयी तं व्रीडितं जनं नावबुध्यत नाजीगणत् ॥ १७ ॥

१८] ति० टी०–तद्वद्गमनस्य नात्र प्रसङ्ग इति महामात्र आह–तत्रेति । महामात्रः प्रधानः ॥ १८ ॥

रा० टी०–तत्रेति । तत्र राज्ञस्तूष्णींभावेन स्थितौ सत्यां नामतः सिद्धार्थः सिद्धार्थनामेत्यर्थः कैकेयीमिदं नाम प्रसिद्धमब्रवीत् ॥ १८ ॥

गो० टी०–तत्रेति । महामात्रः प्रधानः शुचिः अकुटिलः १८

१९–२२] ति० टी०–सरय्वामप्सु प्रक्षिपन्रमते तेन कारणेन दुर्मतिः सः न तादृशोऽयमिति भावः ॥ १९–२२ ॥

रा० टी०–तद्वचनमेवाह–असमञ्ज इति । पथि मार्गे क्रीडतो दारकान्बालान्प्रक्षिपन्सन्नास्ते इति शेषः तेन प्रक्षेपेण दुर्मतिरसमञ्जो रमते ॥ १९ ॥

गो० टी०–असमञ्ज इति । दारकान् बालकान् तेन प्रक्षेपेण सशब्दबुद्बुदजननेन हसन् रमत इत्यर्थः ॥ १९ ॥

रा० टी०–तमिति । तमसमञ्जकर्तृकबालक्षेपं दृष्ट्वा क्रुद्धनागराः अब्रुवन् । तद्वचनमेवाह–असमञ्जमस्मान्वा वृणीष्व स्वीकुरु द्वयोरत्र स्थितौ निर्वाहो न भवितेति तात्पर्यम् ॥ २० ॥

गो० टी०–तमिति । वृणीष्व अत्र नगरे स्थापय ॥२०॥

रा० टी०–तानिति । इदं निर्वाहो न भवितेत्येतद्भयम् । भयं किंनिमित्तं किंकारणकमिति राजा तान्नागरानुवाच राज्ञा संपृष्टाः ताः प्रकृतयः प्रजाः नागरा इत्यर्थः वाक्यमब्रुवन् ॥ २१ ॥

गो० टी०–तानिति । भयमित्यमन्तरमितिकरणं द्रष्टव्यं ता इति प्रकृतयः प्रजाः ॥ २१ ॥

---

१ सरय्वा इति गो. पाठः । २ चेतन इति गो. पाठः ।

स तासां वचनं श्रुत्वा प्रकृतीनां नराधिपः । तं तत्याजाहितं पुत्रं तासां प्रियचिकीर्षया ॥ २३ ॥
तं यानं शीघ्रमारोप्य सभार्यं सपरिच्छदम् । यावज्जीवं विवास्योऽयमिति तानन्वशात्पिता ॥ २४ ॥
सफालपिटकं गृह्य गिरिदुर्गाण्यलोकयत् । दिशः सर्वास्त्वनुचरन्स यथा पापकर्मकृत् ॥ २५ ॥
इत्येनमत्यजद्राजा सगरो वै सुधार्मिकः । रामः किमकरोत्पापं येनैवमुपरुध्यते ॥ २६ ॥
नहि कंचन पश्यामो राघवस्यागुणं वयम् । दुर्लभो ह्यस्य निरयः शशाङ्कस्येव कल्मषम् ॥ २७ ॥
अथवा देवि त्वं कंचिद्दोषं पश्यसि राघवे । तमद्य ब्रूहि तत्त्वेन ततो रामो विवास्यते ॥ २८ ॥
अदुष्टस्य हि संत्यागः सत्पथे निरतस्य च । निर्दहेदपि शक्रस्य द्युतिं धर्मविरोधवान् ॥ २९ ॥
तदलं देवि रामस्य श्रिया विहतया त्वया । लोकतोऽपि हि ते रक्ष्यः परिवादः शुभानने ॥ ३० ॥
श्रुत्वा तु सिद्धार्थवचो राजा श्रान्ततरस्वरः । शोकोपहतया वाचा कैकेयीमिदमब्रवीत् ॥ ३१ ॥

रा० टी०—तद्वाक्यमेवाह—क्रीडत इति । एषोऽसमञ्जो बालानल्पवयस्कान्मौर्ख्यात्क्रीडाकर्तृनत एवोद्भ्रान्तचेतसोऽनवस्थिताचित्तान्नोऽस्माकं पुत्रान्सरय्वां प्रक्षिपन्सन्ततुलां प्रीतिं प्रसन्नतामभुते प्राप्नोति ॥ २२ ॥

गो० टी०—क्रीडत इति । उद्भ्रान्तचेतनः भ्रान्तबुद्धिः ॥ २२ ॥ २३ ॥

२३] ति० टी०—तं प्रकृतीनामहितं पुत्रं तत्याजेत्यन्वयः ॥ २३ ॥

रा० टी०—स इति । स नराधिपः सगरस्तासां प्रकृतीनां वचनं श्रुत्वा प्रकृतीनामहितं तमसमञ्जं पुत्रं तत्याज ॥ २३ ॥

२४] ति० टी०—शीघ्रं यानमारोप्य स्वेच्छया गमने विलम्बकरणसंभवात् सपरिच्छदं वनयोग्यफालपिटकादिपरिच्छदसहितं तान्विवासनाधिकारिणोऽन्वशादुक्तवान् ॥ २४ ॥

रा० टी०—त्यागप्रकारं बोधयन्नाह—तमिति । सपरिच्छदं वनवासयोग्यसामग्रीसहितं तमसमञ्जं यानमारोप्य यावज्जीवमयं विवास्यः वने स्थापनीय इति तान् प्राप्तविवासनाधिकारान्पिता अन्वशादब्रवीत् ॥ २४ ॥

गो० टी०—तमिति । अन्वशात् अनुशिष्टवान् ॥ २४ ॥

२५] ति० टी०—यथापापकर्मकृत्यथोक्तपापकर्मकृत्स फालसहितं पिटकं गृहीत्वा कन्दार्थं सर्वा दिशः सर्वदिक्षु गिरिदुर्गाण्यनुचरन्भ्रममाणः कन्दायलोकयत् । 'सर्वा दिशस्त्वनुचरन्नतिष्ठत्पापकर्मकृत्' इति पाठे गिरिदुर्गाणि वासार्थमेव विलोकयन्सर्वा दिशश्च कन्दार्थमनुचरन्नतिष्ठत् यावज्जीवं निजापराधाद्वन इति शेषः ॥ २५ ॥

रा० टी०—सेति । फालं वनस्थोपभोग्यकन्दमूलादिखननसाधकं, पिटका फलादिस्थापनयोग्यमञ्जूषाविशेषः तयोः समाहारद्वन्द्वः तेन सहितं पितृप्रेषितसामग्रीजातमित्यर्थः । गृह्य गृहीत्वा सर्वाः दिशः अनुचरन्सन् सः असमञ्जः गिरिदुर्गाणि अलोकयत् । तत्र दृष्टान्तः यथा पापकर्मकृत् एतदुपमालंकारेण असमञ्जस्य पापकर्मकर्तृत्वाभावः सूचितः तेन स्वविषयकपित्रतिप्रीतिनिरसनार्थं जले बालप्रक्षेप इति सूचितं तेन तस्य विज्ञानि श्रेष्ठत्वं व्यक्तम् ॥ २५ ॥

गो० टी०—सफालेति । फालं कन्दमूलादिखननसाधनं पिटका तदाहरणपात्रम् एकवद्भावः गृह्य गृहीत्वा अलोलयत् कन्दमूलाद्यर्थमखनदित्यर्थः । यथा पापकृत्तथाचरन् अलोलयदित्यन्वयः ॥ २५ ॥

२६] ति० टी०—प्रकृते तदप्रसङ्ग इत्याह—रामः किमिति ॥ २६ ॥

रा० टी०—इतीति । सुधार्मिकः सगरः इति अनेन प्रकारेण एनमसमञ्जमत्यजत् एवमसमञ्जोक्तिप्रकारेण रामः किं पापं पापाभासमकरोत् येन हेतुभूतेन उपरुध्यते तद्राज्यभोग इति शेषः ॥ २६ ॥

गो० टी०—इतीति । उपरुध्यते विवास्यते ॥ २६ ॥

२७–२९] ति० टी०—अगुणं दोषं व्यसनरूपं निरयः पापं कल्मषं मालिन्यम् ॥ २७–२९ ॥

रा० टी०—नन्वेवं विचारयेत्यत आह—नहीति । राघवस्य रामस्य कंचन अगुणं गुणाविरोधि दोषकमित्यर्थः वयं न पश्यामः तत्र हेतुः शशाङ्कस्य द्वितीयाचन्द्रस्य कल्मषमिव अस्य निरयः कल्मषं दुर्लभः नैवास्तीत्यर्थः ॥ २७ ॥

रा० टी०—अथवेति । अथवा तत्त्वेन त्वं पश्यसि चेद् ब्रूहि ॥ २८ ॥

रा० टी०—अदुष्टस्येति । अदुष्टस्येति दोषरहितस्य धर्मविरोधवान् धर्मविरोधबोधकः संत्यागः शक्रस्यापि द्युतिं तेजः निर्दहेद्विनाशयेत् ॥ २९ ॥

गो० टी०—नहीति । निरयः निरयहेतुभूतो दोषः ॥ २७–२९ ॥

३०–३१] ति० टी०—त्वया विहतया रामस्य श्रिया तेन किंचित्फलमिति शेषः भरतस्य त्वदनुरूपमतित्वाभावात् तदलं तथाश्रमेण हि यतो लोकतः प्राप्तः परिवादश्च ते रक्ष्यः परिहार्यो भवति एवं च लोकापवादमात्रमस्य फलं, नान्यत्किंचिदिति भावः ॥ ३० ॥ ३१ ॥

१ तेषामिति गो. पाठः । २ स्वानिति गो. पाठः । ३ अलोलयदिति गो. पाठः । ४ इत्येवमिति गो. पाठः । ५ ततो रामो विवास्यतामिति गो. पाठः । ६ निरोधनादिति गो. पाठः । ७ स्वन इति गो. पाठः । ८ भ्रमन्निति भाति ।

एतद्वचो नेच्छसि पापरूपे हितं न जानासि ममात्मनोऽथवा ।
आस्थाय मार्गं कृपणं कुचेष्टा चेष्टा हि ते साधुपथादपेता ॥ ३२ ॥
अनुव्रजिष्याम्यहमद्य रामं राज्यं परित्यज्य सुखं धनं च ।
सर्वे च राज्ञा भरतेन च त्वं यथासुखं भुङ्क्ष्व चिराय राज्यम् ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

सप्तत्रिंशः सर्गः ।

रामः स्वनिःसङ्गत्वमुत्कीर्त्यानुयात्रिकान्प्रतिषिध्य चीरादानेतुं परिचारकान्प्रैरयत्तच्छ्रुत्वा कैकेयी स्वयमेव तदसाधयद्गृहीत्वा च रामलक्ष्मणौ चारणि परिदधतुः कौशेयाभ्यस्तत्वाच्चीरपरिधाने क्लिश्यन्तीं सीतां रामः कौशेयोपर्येव चीरं प्रग्राहयत्सहेतूपन्यास वसिष्ठे सीतां चीरपरिधारणानिषेधयत्यपि रामसाधर्म्याकाङ्क्षिणी सा तदेव परिदधौ ।

महामात्रवचः श्रुत्वा रामो दशरथं तदा । अभ्यभाषत वाक्यं तु विनयज्ञो विनीतवत् ॥ १ ॥
त्यक्तभोगस्य मे राजन्वने वन्येन जीवतः । किं कार्यमनुयात्रेण त्यक्तसङ्गस्य सर्वतः ॥ २ ॥

रा० टी०—नन्वु किं रामधर्मविरोधकर्त्री त्वं मयि पश्यसि येनैवं वदसीत्यत आह—तदिति । अविहतया नित्ययेत्यर्थः श्रिया युक्तया त्वया लोकतोऽपि रामस्य परिवादः परिहासः हिते स्वकर्तृकशुभलोकप्राप्तये अरक्ष्यः परिहर्तव्य इत्यर्थः । एतेन तत्र कृतमित्येव त्वयि विरोधकर्त्रीत्वमिति ध्वनितं तेन रामविवासनं किंचित्तदोषानुमापकं भवितेति सूचितं तेन स न विवासनीय इति प्रार्थना बोधिता ॥ ३० ॥

गो० टी०—तदिति । विहतया श्रिया अलम् अभिषेकविघातं मा कुर्वित्यर्थः । रक्ष्यः परिहरणीयः परिवादः निन्दा ॥ ३० ॥

रा० टी०—श्रुत्वेति । श्रान्ततरस्वरौ राजा शोकोपहतया निश्चितरामवियोगजनितशोकाक्रान्तया वाचा अब्रवीत् ॥ ३१ ॥

गो० टी०—श्रुत्वेति । श्रान्ततरः हीनतरः ॥ ३१ ॥

३२] ति० टी०—एतद्वचः सिद्धार्थवचः हि यतः कृपणं मार्गमास्थाय येयं त्वया कुचेष्टारूपा चेष्टा कृता सा साधुपथादपेता ३२

रा० टी०—तद्वचनमेवाह—एतदिति । पापरूपे राक्षसे कृपणं दुःखदं मार्गमास्थाय निश्चित्य एतद्वचः सिद्धार्थवचनं ममात्मनो रामस्य हितं नैव जानासि अत एव नेच्छसि अतस्ते कुचेष्टा कुत्सितव्यापारत्वेन प्रतीयमाना चेष्टा व्यापारः असाधुपथादपेता त्यक्ता शिष्टसंमत एवायं पन्था इत्यर्थः कुचेष्टाशब्दः आचारक्रियन्तप्रकृतिककर्तृक्रियन्तः ॥ ३२ ॥

गो० टी०—एतदिति । एतद्वचः सिद्धार्थवचः कृपणं कुत्सितमित्यर्थः । 'कदर्ये कृपणक्षुद्रे' इत्यमरः । कुचेष्टेत्येतदुपादयति—चेष्टाहीति ॥ ३२ ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

३३] ति० टी०—सर्वे चायोध्यावासिनो जनाः राज्ञा भरतेन च । चस्त्वर्थे ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०—इदानीं स्वस्य रामवियोगासहिष्णुत्वं बाधयन्नाह—अन्विति । राज्यादिकं परित्यज्य अथ अस्मिन् दिने राममनुव्रजिष्यामि सर्वे मन्त्रिणः त्वं च चिराय बहुकालं प्रभूतं राज्यं सुखं यथा स्यात्तथा भुङ्क्ष्व पालय भुजोऽनवन इत्यस्याप्रवृत्तिस्तु संज्ञापूर्वकविधेरनित्यत्वादेतेन भरतं क्षिप्रमानयेति सूचितम् ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

१] ति० टी०—रामो धीरोदात्तत्वेन कैकेयीपरितोषायाह—महामात्रेति । महामात्रः सिद्धार्थः विनीतवद्विनीतः सन् ॥ १ ॥

रा० टी०—अमात्यराज्ञोर्वचनश्रवणानन्तरकालिकं रामवृत्तमाह—महेति । महामात्रवचः महान् अमात्यः अमात्यो यस्य सुतस्य वचो वचनम् किंच महामात्रस्य वचो यस्मिन् तदुभयवचनमित्यर्थः किंच महान् सर्वपूज्यो राजा च अमात्यश्च तयोर्वचः श्रुत्वा विनयज्ञो रामः विनीतवद्विशेषनीतिविशिष्टं वाक्यमभ्यभाषत ॥ १ ॥

गो० टी०—महामात्रेत्यादि । महामात्रवचः सिद्धार्थवचः विनीतवत् विनीत इव अभ्यभाषत सविनयमाहेत्यर्थः ॥ १ ॥

२] ति० टी०—अनुयात्रेणानुयात्रावता सैन्येन त्यक्तसङ्गस्य सर्वतः "असङ्गो ह्ययमात्मा" इति श्रुतेः ॥ २ ॥

रा० टी०—तद्वाक्यमेवाह—त्यक्तेति । राजन् हे मद्विषयकपरमानुरागविशिष्ट ! त्यक्तभोगस्य अस्वीकृतराज्यपालनस्य अत एव त्यक्तसङ्गस्य परित्यक्तराज्यभोगासक्तेः अत एव सर्वतः सुन्युपभोग्यकृत्स्नेन वने वन्येन जीवतो मे अनुयात्रेण सेनायतव्रजनेन किं कार्यं प्रयोजनं न किमपीत्यर्थः ॥ २ ॥

गो० टी०—त्यक्तभोगस्येति । अनुयात्रेण अनुगतबलेन भोगत्यागेऽपि सङ्गो वर्तते लौकिकानां लोऽपि नास्तीत्याह—त्यक्तसङ्गस्य सर्वत इति ॥ २ ॥

१ वृत्ते इति गो० पाठः । २ आत्मनो वेति गो० रा० पाठः । ३ सहेवेति गो० पाठः ।

यो हि दत्त्वा [1]द्विपश्रेष्ठं कक्ष्यायां कुरुते मनः । रज्जुस्नेहेन किं तस्य त्यजतः कुञ्जरोत्तमम् ॥ ३ ॥
तथा मम सतां श्रेष्ठ किं ध्वजिन्या जगत्पते । सर्वाण्येवानुजानामि चीराण्येवानयन्तु मे ॥ ४ ॥
खनित्रपिटके चोभे समानयत गच्छत । चतुर्दश वने वासं वर्षाणि वसतो मम ॥ ५ ॥
अथ चीराणि कैकेयी स्वयमाहृत्य राघवम् । उवाच परिधत्स्वेति जनौघे निरपत्रपा ॥ ६ ॥
स चीरे पुरुषव्याघ्रः कैकेय्याः प्रतिगृह्य ते । सूक्ष्मवस्त्रमवक्षिप्य मुनिवस्त्राण्यवस्त ह ॥ ७ ॥
लक्ष्मणश्चापि तत्रैव विहाय वसने शुभे । तापसाच्छादने चैव जग्राह पितुरग्रतः ॥ ८ ॥
अथात्मपरिधानार्थं सीता कौशेयवासिनी । [2]संप्रेक्ष्य चीरं संत्रस्ता पृषती वागुरामिव ॥ ९ ॥

३] ति० टी०—असंगतं चेदं ससैन्यस्य वनगमनमित्याह—यो हीति । कक्ष्या गजमध्यबन्धनरज्जुः ॥ ३ ॥

रा० टी०—मन्वनुयात्रमात्रसाहाय्येन किंचित्सुखं भवितेत्यत आह—य इति । द्विपश्रेष्ठं कुञ्जरवरं दत्त्वा कक्ष्यायां गजमध्यबन्धनरज्जौ मनः स्थापयितुं स्नेहं कुरुते कुञ्जरोत्तमं त्यजतस्तस्य पुरुषस्य रज्जुस्नेहेन किं न किंचिदित्यर्थः 'कक्ष्या प्रकोष्ठे हर्म्यादौ काञ्च्यां मध्येभबन्धने' इत्यमरः ॥ ३ ॥

गो० टी०—य इति । कक्ष्यायाम् इभबन्धनरज्जौ 'कक्ष्या प्रकोष्ठे हर्म्यादौ काञ्च्यां मध्येभबन्धने' इत्यमरः ॥ ३ ॥

४] ति० टी०—ध्वजिन्या कक्ष्यातुल्यया अनुजानामि मातृप्रीतये भरताय ददामि चीराणि वनोपयुक्तवासांस्यानयन्तु कैकेयीदास्यः ॥ ४ ॥

रा० टी०—तथेति । तथा ध्वजिन्या सेनया किं न किंचित्प्रयोजनमित्यर्थः अतः सर्वाणि सैन्यादीनि अनुजानामि ददामि भरतायेति शेषः । अतः मे मह्यं चीराणि वनवासिधारणयोग्यवस्त्राणि आनयन्तु वस्त्रानयनाधिकारिण इति शेषः ॥ ४ ॥

गो० टी०—तथेति । ध्वजिन्या सेनया सर्वाणि त्वया मह्यं दातुमुद्युक्तानि अनुजानामि प्रददामि भरतायेति शेषः सर्वाणि कार्याणि सम्यक् जानामीति वार्थः । चीराणि वल्कलवस्त्राणि आनयन्तु परिचारका इति शेषः ॥ ४ ॥

५] ति० टी०—चतुर्दशवर्षाणि वने वसतो मम फलाद्यानयनसाधने उभे खनित्रपिटके भो कैकेयीदास्यः समानयत गच्छत शीघ्रं तदानयनायेति शेषः ॥ ५ ॥

रा० टी०—खनित्रेति । चतुर्दशवर्षाणि वने वासं वसतः कर्तुमिच्छोः मम उभे खनित्रपिटके खनित्रं वनस्थोपभोग्यमूलादिखननयोग्यकुद्दालविशेषः, पिटका आहृतफलमूलादिस्थापनयोग्यमञ्जूषाविशेषः, तच्च सा च ते समानयत समानाययत यूयमधिकारिजनेनेति शेषः अत एव गच्छत गमयत यूयमधिकारिजनमिति शेषः ॥ ५ ॥

गो० टी०—खनित्रपिटके इति । खनित्रपिटके खनित्रम् अवदारणं पिटकम् अल्पार्थे कन् प्रत्ययः फलमूलाद्याहरणयोग्याल्पकण्डोलः 'कण्डोलपिटौ' इत्यमरः । वासं वस्तुतः वासं कुर्वत इत्यर्थः ॥ ५ ॥ ६ ॥

६] ति० टी०—एतत्पर्यन्तं मन्थराप्रेरितं सिद्धं कृत्वा ब्राह्मणशापप्राप्तलोकासूयाविषयत्वसंपादकं कर्म कैकेय्यारभते—अथेति । स च शापोऽध्यात्मरामायणे स्पष्टः ॥ ६ ॥

रा० टी०—अथेति । अथ रामवचनश्रवणानन्तरकाले निरपत्रपा निर्निरन्तरमपः पालनाभावो येषु तान् त्रपते धिक्कारादिना लज्जयति सा किंच निर्गतः अपः पालनाभावो येषां ते निरन्तरं पालनकर्तार इत्यर्थः तान् त्रपते लज्जयति सा विलक्षणपालनकर्त्रीत्यर्थः कैकेयी जनौघे जनसमूहे पश्यति सति चीराणि स्वयमाहृत्य परिधत्स्वेति राघवमुवाच एतेन तस्याः पत्यभिप्रायाभिज्ञात्वं ध्वनितम् ॥ ६ ॥

७–८] ति० टी०—स रामः चीरे अन्तरीयोत्तरीयरूपे अवक्षिप्य परित्यज्य अवस्त धृतवान् 'वस आच्छादने' ॥७॥८॥

रा० टी०—स इति । स रामः ते वनस्थधारणयोग्य चीरे कैकेय्याः प्रतिगृह्य सूक्ष्मवस्त्रं दुर्ज्ञेयमूल्यकमहावस्त्राणि अवक्षिप्य कैकेयीदत्तचीराणि अवस्त अधारयत् । चीरे द्विवचनम् अधोधार्यत्वोर्ध्वधार्यत्वधर्मद्वयाक्रान्तत्वविवक्षया तद्वतद्वित्वारोपात् उत्तरत्र बहुवचनं तु उद्भूतावयवविवक्षया प्रक्षेपणकर्मीभूतवस्त्रे एकत्वं तु जात्यभिप्रायेण ॥ ७ ॥

रा० टी०—लक्ष्मण इति । वसने ऊर्ध्वाधोदेशधारितमहावस्त्राणि विहाय त्यक्त्वा ॥ ८ ॥

गो० टी०—स इति । स रामः कैकेय्याः सकाशात् मुनिवस्त्राणि परिगृह्य तेषु द्वे चीरे उत्तरीयान्तरीयरूपे सूक्ष्मवस्त्रमवक्षिप्य अवस्त ह आदीधरदित्यर्थः ॥ ७ ॥ ८ ॥

९] ति० टी०—अथात्मनः परिधानार्थं तया दत्तं चीरं सीता संप्रेक्ष्य वागुरां संप्रेक्ष्य पृषती मृगीव संत्रस्ता सेवाभूत् ॥ ९ ॥

रा० टी०—अथेति । आत्मपरिधानार्थं स्वधारणप्रयोजनकं चीरं संप्रेक्ष्य आदरादवलोक्य अत एव कैकेय्याः दत्ते ते कुञ्जचीरे प्रगृह्य अगुरां राहुत्साहसंपत्तिं पृषती चन्द्रस्थमृगीव संत्रस्ता राक्षसान्संत्रासयन्तीव अभ्यपत्रपमाणा लज्जां त्यजन्ती इव शुभलक्षणा दुर्मना जनौघासन्न्यदर्शनहेतुकदुर्मनस्त्वेन प्रतीयमाना जानकी जनकप्रादुर्भूता अश्रुसंपूर्णनेत्रा धर्मज्ञा धर्मदर्शिनी कौशेयवासिनी गन्धर्वराजप्रतिमं भर्तारमिदमब्रवीत् । श्लोकत्रयमेकान्वयि ॥ ९–११ ॥

१ गजेति गो० पाठः । २ समीक्ष्येति गो० पाठः ।

सा व्यपत्रपमाणेव प्रगृह्य च सुदुर्मनाः । [1]कैकेय्याः कुशचीरे ते जानकी शुभलक्षणा ॥ १० ॥
अश्रुसंपूर्णनेत्रा च धर्मज्ञा धर्मदर्शिनी । गन्धर्वराजप्रतिमं भर्तारमिदमब्रवीत् ॥ ११ ॥
कथं नु चीरं बध्नन्ति मुनयो वनवासिनः । इति ह्यकुशला सीता सा मुमोह मुहुर्मुहुः ॥ १२ ॥
कृत्वा कण्ठे स्म सा चीरमेकमादाय पाणिना । तस्थौ ह्यकुशला तत्र व्रीडिता जनकात्मजा ॥ १३ ॥
तस्यास्तत्क्षिप्रमागत्य रामो धर्मभृतां वरः । चीरं बबन्ध सीतायाः कौशेयस्योपरि स्वयम् ॥ १४ ॥
रामं प्रेक्ष्य तु सीताया बध्नन्तं चीरमुत्तमम् । अन्तःपुरचरा[3] नार्यो मुमुचुर्वारि नेत्रजम् ॥ १५ ॥
ऊचुश्च परमायत्ता रामं ज्वलिततेजसम् । वत्स नैवं नियुक्तेयं वनवासे मनस्विनी ॥ १६ ॥
पितुर्वाक्यानुरोधेन गतस्य विजनं वनम् । तावद्दर्शनमस्या नः सफलं भवतु प्रभो ॥ १७ ॥
लक्ष्मणेन सहायेन वनं गच्छस्व पुत्रक । नेयमर्हति कल्याणी वस्तुं तापसवद्वने ॥ १८ ॥
कुरु नो याचनां पुत्र सीता तिष्ठतु भामिनी । धर्मनित्यः स्वयं स्थातुं नहीदानीं त्वमिच्छसि ॥ १९ ॥

गो० टी०–अथेति । संत्रस्ता अभवादति शेषः । पृषती मृगी वागुरां मृगबन्धनीम् 'वागुरा मृगबन्धनी' इत्यमरः ॥९॥

१०] ति० टी०–व्यपत्रपमाणेव लज्जमानेव कैकेय्याः सकाशात्ते कुशचीरे प्रगृह्य भर्तुरीदृश्यवस्थेति सुतरां दुर्मना इव ॥१०॥

११] ति० टी०–अत एवाश्रुपूर्णनेत्रा ॥ ११ ॥

गो० टी०–सेति । व्यपत्रपमाणा विशेषेण लज्जमाना कैकेयीकुशचीरे कैकेयीसंबन्धिनी कुशचीरे धर्मज्ञा पातिव्रत्यधर्मज्ञा धर्मदर्शिनी स्वानुष्ठानेन पातिव्रत्यधर्मप्रदर्शिनी बध्नन्तीतीदमब्रवीदिति संबन्धः ॥ १० ॥ ११ ॥

१२] ति० टी०–अकुशलापरिचयाच्चीरबन्धनेऽनिपुणा मुमोह बन्धनस्थलनिश्चयं न प्रापेव ॥ १२ ॥

रा० टी०–तद्वचनमेवाह–कथमिति । बध्नन्ति धारयन्ति इति एवमुक्त्वा अकुशला मुनिवस्त्रधारणविषयककौशल्यरहिता सीता मुहुर्मुहुर्मुमोह ॥ १२ ॥

गो० टी०–कथमिति । मुमोह स्तब्धा बभूवेत्यर्थः ॥१२॥

१३] ति० टी०–कृत्वा कण्ठे अनेनेदृश्यां राजकुमार्यामस्यां ईदृशो व्यवहार इति कैकेय्यां तत्रत्यजनस्यात्यन्तमसूया सूचिता ॥ १३ ॥

रा० टी०–मोहहेतुकटत्तमाह–कृत्वेति । एकं कण्ठे कण्ठप्रदेशे स्कन्धे इत्यर्थः एकं पाणिना आदाय तस्थौ एकमिस्युभयान्वयि ॥ १३ ॥

गो० टी०–तदेव विवृणोति–कृत्वेति ॥ १३–१६ ॥

१४] ति० टी०–कौशेयस्योपरीति तस्याः कौशेयत्यागप्रसक्तस्याभावात् ॥ १४ ॥

रा० टी०–तस्या इति । आगम्य सीतासमीपं प्राप्य कौशेयस्योपरि चीरं बबन्ध परिधापयामास एतेन तस्याः कौशेयत्यागस्यौचित्याभावः सूचितः ॥ १४ ॥

१५] ति० टी०–सीतायाश्चीरं बध्नन्तमुत्तमं रामं संप्रेक्ष्येत्यन्वयः ॥ १५ ॥

रा० टी०–राममिति । सीतायाः उत्तमं चीरं बध्नन्तं परिधापयन्तं रामं प्रेक्ष्य परमायत्ता नार्यः नेत्रजं वारि मुमुचुः ज्वलिततेजसं राममूचुश्च तेन तासां प्रीत्यतिशयो ध्वनितः । सीतायाः इति संबन्धसामान्ये षष्ठी । सार्धश्लोक एकान्वयी ॥ १५ ॥

१६] ति० टी०–परमायत्ताः परमखिन्नाः 'यत्तः खेदोपस्करयोः' एवं त्वद्वदियं नियुक्ता न ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–वत्सेति । इयं मनस्विनी सीता वनवासे वनवासार्थम् एवं भवानिव वियुक्ता न भवत्विति शेषः । एतेन सीतैव संस्थापनीयेति सूचितम् । अर्धं पृथक् ॥ १६ ॥

गो० टी०–ऊचुरिति । एवं त्वामिव इयं सीता वनवासे न नियुक्तेति पित्रेति यावत् ॥ १६ ॥

१७–१८] ति० टी०–विजनं वनं गतस्य यावदागमनं तावदस्या दर्शनं नोऽस्तु तेन च नो जीवनं सफलं भवतु॥१७॥१८॥

रा० टी०–इह संस्थापने प्रयोजनं वदन्त्य आहुः–पितुरिति । विजनं वनं तस्य तव पत्न्याः अस्याः सीतायाः सफलं परमफलसहितं दर्शनं नोऽस्माकं तावत् त्वद्वनवासपर्यन्तं भवतु ॥ १७ ॥

रा० टी०–अस्या नयनमयुक्तमिति बोधयन्त्य आहुः–लक्ष्मणेनेति । इयं सीता वने वस्तुं नार्हति ॥ १८ ॥

गो० टी०–पितुरिति । तावत् तवागमनपर्यन्तं पितुर्वाक्यानुरोधेन विजनं वनं गतस्य तव दर्शनमस्यां सफलं भवतु त्वामिवैनां द्रक्ष्याम इति भावः ॥ १७–१९ ॥

१९] ति० टी०–तिष्ठतु अत्रैवेति शेषः हि यद्यपि धर्मनित्यस्त्वमिदानीं स्वयं स्थातुं नेच्छसि तथापीयं तिष्ठतु ॥१९॥

रा० टी०–कुर्विति । यद्यपि धर्मनित्यः धर्म एव नित्यो निरन्तरं धार्यो यस्य स त्वं स्वयमेकाकी स्थातुं नेच्छसि तथापि नो याचनां कुरु । याचनास्वरूपमाह–भामिनी सीता इदानीमिह तिष्ठतु । हिर्यद्यप्यर्थे । एतेन रामेच्छान्यथा न भवती-

---

१ कैकेयीति गो. पाठः । २ आगम्येति गो. रा. पाठः । ३ गता इति गो. पाठः । ४ आयत्ता इति गो. पाठः । ५ अस्यामिति गो. पाठः ।

तासामेवंविधा वाचः शृण्वन्दशरथात्मजः । बबन्धैव तथा चीरं सीतया तुल्यशीलया ॥ २० ॥
चीरे गृहीते तु तया सबाष्पो नृपतेर्गुरुः । निवार्य सीतां कैकेयीं वसिष्ठो वाक्यमब्रवीत् ॥ २१ ॥
अतिप्रवृत्ते दुर्मेधे कैकेयि कुलपांसनि । वञ्चयित्वा तु राजानं न प्रमाणेऽवतिष्ठसि ॥ २२ ॥
न गन्तव्यं वनं देव्या सीतया शीलवर्जिते । अनुष्ठास्यति रामस्य सीता प्रकृतमासनम् ॥ २३ ॥
आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम् । आत्मेयमिति रामस्य पालयिष्यति मेदिनीम् ॥ २४ ॥
अथ यास्यति वैदेही वनं रामेण संगता । वयमप्यनुयास्यामः पुरं चेदं गमिष्यति ॥ २५ ॥
अन्तपालाश्च यास्यन्ति सदारो यत्र राघवः । सहोपजीव्यं राष्ट्रं च पुरं च सपरिच्छदम् ॥ २६ ॥

त्यंशस्य तासां विस्मृतिः सूचिता तेन प्रीतेरतिशयो ध्वनितः ॥ १९ ॥

२०] ति० टी०–तुल्यशीलयानङ्गीकृतनगरस्थित्या सीतया प्रेरितः संश्चीरं बबन्धेत्यन्वयः ॥ २० ॥

रा० टी०–तासामिति । तुल्यशीलया रामसमानशीलयुक्तया सीतया प्रार्थित इति शेषः दशरथात्मजो रामः चीरं बबन्ध बन्धनानुकूलव्यापारं चकार । सीतया प्रार्थित इत्यनेन सह गमने प्रतिबन्धः कैश्चिन्न कार्य इति सीताभिप्रायो व्यक्तः ॥२०॥

गो० टी०–तासामिति । सीतयेति षष्ठ्यर्थे तृतीया । बबन्धैवेति । कैकेय्यनुज्ञाभावादिति भावः ॥ २० ॥ २१ ॥

२१] ति० टी०–चीरे गृहीते समीक्ष्येति शेषः । 'सबाष्पः' इति पाठे पाठान्तरं तु सम्यगेव ॥ २१ ॥

रा० टी०–चीरे इति । तया सीतया गृहीते चीरे समीक्ष्य सीतां कैकेयीं च निवार्य मत्कथनसमये भवतीभ्यां किंचिन्न वक्तव्यमित्युक्त्वा नृपतेर्गुरुर्वसिष्ठः वाक्यमब्रवीत् ॥२१॥

२२] ति० टी०–अतिप्रवृत्ते मर्यादातिक्रमेण प्रवृत्ते यावद्वरस्तावत्प्रमाणे नावतिष्ठसि कुतः अस्या वनगमनस्य त्वयाऽतत्त्वादिति भावः । 'सप्रमाणेव–' इति पाठस्तद्व्याख्यानं च न प्रकृतोपयोगीति चिन्त्यम् ॥ २२ ॥

रा० टी०–तद्वाक्यमेवाह–अतीति । अतिप्रवृत्ते अति प्रवृत्तिहेतुभूते अत एव दुर्मेधे हे कैकेयि कुलपांसिनि कैकेय्याः केकयराजापत्यानि संत्यस्मिन् इति कैकेयि तदेव कुलमिति कर्मधारयः तस्य पांसिनी तत्संबोधनं हे मन्थरे इत्यर्थः राजानं वञ्चयित्वा अकालकवरयाच्ञानुमत्या संवञ्च्य विद्यमाना त्वं राजानं प्रमाणे प्रामाणिके पथि किं नावतिष्ठसि स्थापयिष्यसि अन्तर्भावितणिजर्थः । तुः किमर्थे ॥ २२ ॥

गो० टी०–अतीति । अतिप्रवृत्ते अतिक्रम्य प्रवर्तमाने प्रमाणे मर्यादायाम् ' प्रमाणं हेतुमर्यादाशास्त्रयत्नप्रमातृषु ' इत्यमरः ॥ २२ ॥

२३] ति० टी०–अत एव–न गन्तव्यमिति । रामस्य प्रकृतं प्रस्तुतमासनं सीतानुष्ठास्यत्यधिष्ठास्यति राज्यं करिष्यति, यावद्रामागमनमित्यर्थः ॥ २३ ॥

रा० टी०–नन्वत्र कः प्रामाणिकः पन्था इत्यत आह–नेति । हे शीलवर्जिते ! सीतया वनं न गन्तव्यमिदमेव राजानं बोधयेति तात्पर्यम् । नन्वत्रास्याः किं प्रयोजनमित्यत आह–प्रकृतमुचितकाले राज्ञा प्रापितं रामस्यासनं सीता अनुष्ठास्यति ॥ २३ ॥

गो० टी०–न गन्तव्यमिति । प्रकृतं प्रस्तुतम् आसनं सिंहासनम् अनुष्ठास्यति अधिष्ठास्यति ॥ २३ ॥

२४] ति० टी०–नन्वियाः कथं राज्याधिष्ठानमत आह–आत्मा हीति । दारसंग्रहवर्तिनां गृहस्थानां सर्वेषामात्मा दाराः "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः । अनेन स्त्रीपुरुषोपाधोः परस्परावयवमेलनं सूचितम् अत एव लोकेऽपि सर्वतस्तयोः परस्परप्रियत्वं दृश्यते ॥ २४ ॥

रा० टी०–तत्र हेतुं वदन्नाह–आत्मेति । दारसंग्रहवर्तिनां गृहस्थानामित्यर्थः । दाराः पत्नी आत्मा अर्धाङ्गमित्यर्थः । इति हेतोः रामस्यात्मा इयं सीता मेदिनीं पृथ्वीं पालयिष्यति ॥२४॥

गो० टी०–आत्मेति । दारसंग्रहवर्तिनां गृहस्थानाम् आत्मेयमिति "अर्धो वै एष आत्मनो यत्पत्नी" इति श्रुतेरिति भावः ॥ २४ ॥ २५ ॥

२५] ति० टी०–अथ यास्यति त्वन्निबन्धादिति शेषः । वयं मदाश्रया ब्राह्मणाः अत्र यत्र रामोऽत्र स्थातुमेनमनुगमिष्यामः ॥ २५ ॥

रा० टी०–सहयाने दोषमाह–अथेति । रामेण सङ्गता संयुक्ता ॥ २५ ॥

२६] ति० टी०–अन्तपालाः गुह्यान्तरक्षकाः राष्ट्रान्तःस्थितदण्डनायका इत्यन्ये उपजीव्यं जीवनसाधनं धनं तेन सहितं राष्ट्रं सपरिच्छदं दासीदासादिसहितं पुरं च यास्यति ॥ २६ ॥

रा० टी०–अन्तपाला इति । अन्तपालाः अन्तःपुररक्षकाः सहोपजीव्यः उपजीव्येन धनेन सहितं राष्ट्रं राष्ट्रस्थो जनः पुरमयोध्यां च अत्र पुरशब्दो न भाक्तः पूर्वपदे तस्योक्तत्वात् । तेनायोध्यायाः चेतनात्वं व्यक्तम् ॥ २६ ॥

गो० टी०–अन्तपाला इति । अन्तपालाः राष्ट्रान्तपरिपालकाः दण्डनायकाः सहोपजीव्यं जीवाजीवरूपधनसहितं सपरिच्छदं दासदासीशकटादिपरिकरयुक्तम् ॥ २६–२९ ॥

---

१ त्वेति गो. पाठः । २ समीक्ष्येति गो. रा. पाठः । ३ पांसिनीति रा. पाठः । ४ चेति. गो.पाठः । ५ ऽवतिष्ठसे इति गो. पाठः । ६ अपीति गो. पाठः ।

भरतश्च सशत्रुघ्नश्चीरवासा वनेचरः । वने वसन्तं काकुत्स्थमनुवत्स्यति पूर्वजम् ॥ २७ ॥
ततः शून्यां गतजनां वसुधां पादपैः सह । त्वमेका शाधि दुर्वृत्ता प्रजानामहिते स्थिता ॥ २८ ॥
नहि तद्भविता राष्ट्रं यत्र रामो न भूपतिः । तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति ॥ २९ ॥
नह्यदत्तां महीं पित्रा भरतः शास्तुमिच्छति । त्वयि वा पुत्रवद्वस्तुं यदि जातो महीपतेः ॥ ३० ॥
यद्यपि त्वं क्षितितलाद्गगनं चोत्पतिष्यसि । पितृवंशचरित्रज्ञः सोऽन्यथा न करिष्यति ॥ ३१ ॥
तत्त्वया पुत्रगर्धिन्या पुत्रस्य कृतमप्रियम् । लोके नहि स विद्येत यो न राममनुव्रतः ॥ ३२ ॥
द्रक्ष्यस्यथैव कैकेयि पशुव्यालमृगद्विजान् । गच्छतः सह रामेण पादपांश्च तदुन्मुखान् ॥ ३३ ॥
अथोत्तमान्याभरणानि देवि देहि स्नुषायै व्यपनीय चीरम् ।
न चीरमस्याः प्रविधीयतेति न्यवारयत्तद्वसनं वसिष्ठः ॥ ३४ ॥

२७] ति० टी०–भरतश्च पूर्वजमनुवत्स्यति तत्सदृशावस्थयैव स्थास्यति दशरथजातस्य तत्स्वभावताया एवौचित्यमिति भावः ॥ २७ ॥

रा० टी०–भरत इति । काकुत्स्थं रामं भरत इति कौशल्याकैकेय्यादीनामप्युपलक्षकम् अत एव तद्विषये न किंचिद्दुष्कृम् । एतेन भरतः पालयितेत्याशा न कर्तव्येति सूचितम् ॥ २७ ॥

२८–२९] ति० टी०–पादपैः सहेत्यनेनाटवीभूतामिति द्योत्यते ॥ २८ ॥ २९ ॥

रा० टी०–तत इति । पादपैः वृक्षैः सह एका त्वं शाधि शिक्षय ॥ २८ ॥

रा० टी०–नेति । यत्र यस्मिन् स्थले ॥ २९ ॥

३०] ति० टी०–सर्वथैव तव भरतराज्यप्रयासो व्यर्थ इत्याह–नहीति । अदत्तां प्रीतिपूर्वमदत्तां किंतु त्वन्निबन्धनेन दत्तां त्वयि वा परम्पराप्राप्तधर्मनाशिकायाममतः परं पुत्रवद्वस्तुं नार्हति । कुतस्तत्राह–यदीति । महीपतेर्दशरथाज्जातो यदि 'पितृन्समनुजायन्ते नराः' इति न्यायादित्याशयः । यदीत्यसंदेहे संदिग्धवचनम् 'वेदाश्चेत्प्रमाणम्' इतिवत्, यद्वा कैकेय्या धिक्कारान्तरमिदम् ॥ ३० ॥

रा० टी०–नहीति । पित्रा अदत्तां महीं शास्तुम् त्वयि त्वत्समीपे वस्तुं वा पुत्रवत् पुत्रधर्मज्ञानवान् भरतः नेच्छति तत्र हेतुः यत् यतः महीपतेः निखिलपृथ्वीनियन्तुः जातः अतिधर्मात्मपुत्रत्वादन्याय्यं न कर्तेति भावः वदो ज्ञानार्थकत्वं तु भासनोपसंभाषेतिसूत्रे प्रसिद्धम् इ इत्यव्ययम् ॥ ३० ॥

गो० टी०–नेति । अदत्तां प्रीतिपूर्वकमदत्ताम् ॥ ३० ॥ ३१ ॥

३१] ति० टी०–पितृवंशचरित्रं ज्येष्ठे विद्यमाने कनिष्ठस्य राज्यानर्हत्वरूपं तज्ज्ञः ॥ ३१ ॥

रा० टी०–नन्वतीव बुद्धिमतीत्वात् भरतेन राज्यं कारयितास्म्येवेत्यत आह–यद्यपीति । सः भरतः अन्यथा विधिविरुद्धं न करिष्यति ॥ ३१ ॥

३२] ति० टी०–पुत्रगर्धिन्या पुत्रराज्याभिलाषवत्या लोके स न विद्येत तत्सत्ता न संभाविता यो रामं नानुव्रतः ॥ ३२ ॥

रा० टी०–ननु मया तु हितानुष्ठानमेव कृतं तद्भरतो जानातु न वेत्यत आह–तत्त्वयेति । पुत्रगर्धिन्या पुत्रसदृशभरतहिताभिकाङ्क्षायुक्तया तत्त्वया यथार्थवक्त्र्या त्वया पुत्रस्य पुत्रसदृशस्य भरतस्य अप्रियं कृतम् । तत्र हेतुः यो रामं नानुव्रतः स लोके कस्मिंश्चिद्भुवने नैव विद्यते एतेन रामसेवामन्तरा भरतो राज्यं नाभिकाङ्क्षतीति सूचितम् तेन सीतास्थितिप्रयत्नं कुर्विति व्यञ्जितम् ॥ ३२ ॥

गो० टी०–तदिति । पुत्रगर्द्धिन्या पुत्रविषयस्नेहयुक्तया ॥ ३२ ॥

३३] ति० टी०–तत्र प्रत्यक्षं मानमाह–द्रक्ष्यसीति । पादपांश्चेति किंतु वक्तव्यं मनुष्यानिति शेषः ॥ ३३ ॥

रा० टी०–ननु रामेण सह सकलजनगमनं न संभवतीत्यत आह–द्रक्ष्यसे इति । हे कैकेयि केकयीसंबन्धिनि! तस्येदमित्यणि ङीप् । रामेण सह गच्छतः पश्चादीन् तदुन्मुखान् रामसहगमनमतीन् पादपांश्चावैव द्रक्ष्यसे पादपांश्चेत्यनेनायोध्यातरूणां चेतनत्वं व्यक्तम् ॥ ३३ ॥

गो० टी०–द्रक्ष्यसीति । पादपांश्च तदुन्मुखानिति वृक्षाणां तदुन्मुखत्वं नाम रामविषयस्नेहासक्तत्वं तथोपरिष्टात् स्पष्टीभविष्यति 'अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः' इति ॥ ३३ ॥

३४] ति० टी०–एवं वसिष्ठो भाव्यर्थजातमुक्त्वा प्रकृतमनुष्ठेयमुपदिशति–अथेति । प्रविधीयत इति च्छेदः इकारलोप आर्षः दातुं युज्यत इत्यर्थः । इत्युक्त्वा तद्वसनं परिधानं न्यवारयत् जानक्या इति शेषः ॥ ३४ ॥

रा० टी०–तात्कालिककर्तव्यमुपदिशन्नाह–अथेति । देवि हे स्वविजयेच्छावति अत उक्तहेतोः चीरं व्यपनीय दूरीकृत्य स्नुषायै सीतायै उत्तमान्याभरणानि देहि । तत्र हेतुः अस्या चीरं न प्रविधीयते इति अनेन प्रकारेण वसनं चीरं वसिष्ठो न्यवारयत् प्रविधीयतेतीत्यत्र संधिस्तु "नमुने" इत्यत्र योगविभागेन क्वचिन्निपाताः असिद्धत्वाभावज्ञापनात् आर्षत्वाद्वा ॥ ३४ ॥

१ अर्हतीति गो. पाठः । २ द्रक्ष्यसे इति रा. पाठः ।

एकस्य रामस्य वने निवासस्त्वया वृतः केकयराजपुत्रि ।
विभूषितेयं प्रतिकर्मनित्या वसत्वरण्ये सह राघवेण ॥ ३५ ॥
यानैश्च मुख्यैः परिचारकैश्च सुसंवृता गच्छतु राजपुत्री ।
वस्त्रैश्च सर्वैः सहितैर्विधानैर्नेयं वृता ते वरसंप्रदाने ॥ ३६ ॥
तस्मिंस्तथा जल्पति विप्रमुख्ये गुरौ नृपस्याप्रतिमप्रभावे ।
नैव स्म सीता विनिवृत्तभावा प्रियस्य भर्तुः प्रतिकारकामा ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टात्रिंशः सर्गः ।

चीरं वसानायां वैदेह्यां जनैर्विधीयमानदुःखाक्रोशेनोद्दीपितमन्युर्दशरथः कैकेयीमुपालभत । निर्गच्छद्रामः कौसल्यारक्षणे दशरथं प्रार्थयाम्बभूव ।

तस्यां चीरं वसानायां नाथवत्यामनाथवत् । प्रचुक्रोश जनः सर्वो धिक्त्वां दशरथं त्विति ॥ १ ॥

गो० टी०–एवं वसिष्ठो भाव्यर्थमुक्त्वा प्रकृतमाह–अथेत्यादि । व्यपनीय निरस्य प्रविधीयत इतीति वक्तव्ये प्रविधीयतेति सन्धिरार्षः ॥ ३४ ॥

३५] ति० टी०–दानयोग्यत्वमुपपादयति–एकस्येति । प्रतिकर्म प्रसाधनव्यापारः स नित्यं यस्याः सा अत एव विभूषिता वसत्वरण्ये स्वभर्तृशुश्रूषार्थम् ॥ ३५ ॥

रा० टी०–निवारणे मन्थराया असामर्थ्यं ज्ञात्वा केकयीं प्रत्याह–एकस्येति । हे केकयराजपुत्रि ! एकस्य रामस्यैव वने निवासः त्वया वृतः तेन सीतागमनं निवारयेति सूचितम् । तस्या अपि गमननिवारणे असामर्थ्यं ज्ञात्वा आह–प्रतिकर्म रामसंबन्धिनी सर्वक्रिया तत्र नित्या नित्यसंबन्धवती रामक्रियानिर्वाहिकेत्यर्थः सा इयं सीता राघवेण सह विभूषिता सती अरण्ये वसतु ॥ ३५ ॥

गो० टी०–न प्रविधीयत इत्येतदुपपादयति–एकस्येति । प्रतिकर्मनित्या अलंकारनियता नित्यमलंकरणयोग्येत्यर्थः ॥ ३५ ॥

३६] ति० टी०–विधानैरुपकरणैः ॥ ३६ ॥

रा० टी०–यानैरिति । मुख्यैः श्रेष्ठैः यानैः रथादिभिः परिचारकैः भृत्यवर्गैः सर्वैर्वस्त्रैश्च सहितैः हितकारकैः विधानैरुपकरणैश्च संवृता युक्ता राजपुत्री गच्छतु तत्र हेतुः वरसंप्रदाने वरयाचनसमये इयं चीरादुपकरणसहिता न वृता याचितवतीत्यर्थः वनगमनायेति शेषः । एतेनास्याः अलंकारविश्लिष्टत्वे न तव क्षतिरिति ध्वनितम् ॥ ३६ ॥

गो० टी०–यानैरिति । विधानैः भूक्षरादुपकरणैः ॥३६॥

३७] ति० टी०–तस्मिन् गुरौ तथा जल्पत्यपि भर्तुः प्रतिकारकामा वेषादिभिस्तदवस्थासदृशावस्थासंपादनकामा सती चीरपरिग्रहाद्विनिवृत्तभावा नैव बभूव स्म ॥ ३७ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०–तस्मिन्निति । अप्रतिमप्रभावे तस्मिन् नृपस्य गुरौ जल्पति कथयति सति भर्तुः प्रतिकारकामा भर्तृवस्त्रादिसदृशवस्त्रादीच्छावती सीता विनिवृत्तभावा विनिवृत्तचीरधारणाभिप्राया नैवाभवदिति शेषः ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरमणावयोध्याकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

गो० टी०–तस्मिन्निति । प्रतिकारकामा प्रतिकारं सदृशकरणं कामयमाना भर्तृसदृशतया वनवासकरणमिच्छन्तीत्यर्थः विनिवृत्तभावा चीरपरिधानाद्विनिवृत्तभावा न बभूवेति ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

१] ति० टी०–तस्यामिति । तद्वरानन्तर्गतायामीदृशमनिष्टव्यवहारमनिवारयंस्तूष्णीं तिष्ठतीति जनाक्रोशः ॥ १ ॥

रा० टी०–सीताचीरधारणसमयभवजनवृत्तमाह–तस्यामिति । नाथवत्यां नित्यं स्वामियुक्तायां तस्यां सीतायां चीरं वसानायां सत्यां त्वां सर्वसंमतिविलक्षणसंमतिदात्रीत्वेन सर्वतो भिन्नां मन्थरां धिगिति सर्वो जनः दशरथमनाथवत् प्रचुक्रोश कथयामास । अयमन्यपर्यायोऽव्ययस्त्वशब्दः ॥ १ ॥

गो० टी०–तस्यामित्यादि । त्वां धिगिति दशरथं चुक्रोशेत्यर्थः ॥ १ ॥

तेन तत्र प्रणादेन दुःखितः स महीपतिः । [[1]चिच्छेद जीविते श्रद्धां धर्मे यशसि चात्मनः]
स निःश्वस्योष्णमैक्ष्वाकस्तां भार्यामिदमब्रवीत् । [[2]कैकेयि कुशचीरेण न सीता गन्तुमर्हति] ॥ २ ॥
सुकुमारी च बाला च सततं च सुखोचिता । नेयं वनस्य योग्येति सत्यमाह गुरुर्मम ॥ ३ ॥
इयं हि कस्यापि करोति किंचित्तपस्विनी राजवरस्य पुत्री [3]।
या चीरमासाद्य वनस्य मध्ये [4]जाता विसंज्ञा श्रमणीव काचित् ॥ ४ ॥
चीराण्यपास्याज्जनकस्य कन्या [5]नेयं प्रतिज्ञा मम दत्तपूर्वा ।
यथासुखं गच्छतु राजपुत्री वनं समग्रा सह सर्वरत्नैः [6] ॥ ५ ॥
अजीवनार्हेण मया नृशंसा कृता प्रतिज्ञा नियमेन तावत् ।
त्वया हि बाल्यात्प्रतिपन्नमेतत्तन्मां [7]दहेद्वेणुमिवात्मपुष्पम् ॥ ६ ॥

२-३] ति० टी०—तेन प्रणादेन जनाक्रोशेन तां भार्यां कैकेयीम् ॥ २ ॥ ३ ॥

रा० टी०—तेनेति । तेन सर्वजनजनितेन प्रणादेन दुःखितः स महीपतिः आत्मनो धर्मे जीविते पालने यशसि च श्रद्धामुत्कटेच्छां चिच्छेद जहौ ॥ २ ॥

रा० टी०—स इति । उष्णं निःश्वस्य हे कैकेयि ! कुशचीरेण युक्ता सीता गन्तुं नार्हति इदं वचनमैक्ष्वाको राजा दशरथस्तां कैकेयीमब्रवीत् ॥ ३ ॥

रा० टी०—तत्र हेतुं वदन्नाह—सुकुमारीति । इयं सीता वनस्य योग्या न इति हेतोर्मम गुरुर्वशिष्ठः सत्यमुचितमाह ॥४॥

गो० टी०—तेनेति । श्रद्धाम् आदरम् ॥ २-४ ॥

४] ति० टी०—वनस्य वनगमनयोग्यचीरस्य कस्यापि किंचित्करोति काकुः अपि तु नेत्यर्थः । किंचिद्राज्यप्रतिबन्धादि विसंज्ञा अपरिचिताऽशक्यार्थानुष्ठानप्रसक्तेःप्राप्तमोहा श्रमणीव भिक्षुकीव ॥ ४ ॥

रा० टी०—नन्वियमपि राक्षसादिवधादौ साहाय्यं कर्तेत्यत आह—इयमिति । या चीरमासाद्य प्राप्य विसंज्ञा संज्ञारहिता काचिच्छ्रमणीव ब्रह्मचारिणीव जनस्य मध्ये स्थिता सा राजवरस्य जनकस्य पुत्री तपस्विनी नित्यं पातिव्रतरूपतपोयुक्ता इयं सीता कस्यापि किंचिदनिष्टमिति शेषः किं करोति नेत्यर्थः । हिः किमर्थः 'अपकरोति' इति पाठे त्वनिष्टं नाध्याहर्तव्यम् ॥५॥

गो० टी०—इयमिति । तपस्विनी पातिव्रत्यतपोयुक्ता विसंज्ञा मुग्धा श्रमणीव तपस्विनीव श्रमु तपसि खेदे चेति धातुः ॥ ५ ॥

५] ति० टी०—अपास्यात्यजतु इयं प्रतिज्ञा चीरवासिनी सीता वनं यास्यिति त्वदीया प्रतिज्ञा न मम दत्तपूर्वा न मया पूर्वमनुभूता वरदानसमये अतो यथासुखं गच्छत्वित्यन्वयः ॥५॥

रा० टी०—चीराणीति । अपास्यात् जहातु तत्र हेतुः यतो दत्तपूर्वा वरप्रदानपूर्विका इयं सीता चीरधारणविषयिणी मम प्रतिज्ञा न अतः सर्वरत्नैः सह समग्रा अतिभाग्यवती राजपुत्री यथासुखं सुखमनतिक्रम्य वनं गच्छतु ॥ ६ ॥

गो० टी०—चीराणीति । अपास्यात् त्यजतु इयं प्रतिज्ञा सीतायाश्चीरधारणपूर्वकवनगमनरूपप्रतिज्ञा मम मया तृतीयार्थे षष्ठी समग्रा वस्त्रालङ्कारसंपूर्णा सर्वरत्नैः सर्वश्रेष्ठवस्तुभिः ॥६॥

६] ति० टी०—अजीवनार्हेण सुमूर्षुणा अनेन मतिभ्रंशः सूच्यते नृशंसातिक्रूरा प्रतिज्ञा रामवनवासविषया नियमेन शपथपूर्वं सा तावत्कृता यदेतद्धि यतोऽधिकं सीताचीरग्रहणं त्वया प्रतिपन्नमारब्धं तद्बाल्यादज्ञानादेव नात्र ते सामर्थ्यं तस्माद्वेणुमात्मपुष्पमिव त्वत्कृतातिप्रवृत्तिस्त्वां मा दहेन्मा नाशयतु, यद्वा एषा तव प्रवृत्तिस्तव वैधव्यप्राप्तये मां दहेन्नाशयेत् ॥ ६ ॥

रा० टी०—नन्वु रामचीरधारणे कुतो नैवं दुःखमित्यत आह—अजीवनार्हेणेति । अजीवनार्हेण प्रतिज्ञाभङ्गे जीवनायोग्येन मया त्वया करणभूतया नियमेन यदा याचितासि तदा दातास्मीति मत्कर्तृकनियमनेन हेतुभूतेन बाल्यादसमये एवमियं याचिष्यतीत्येतद्विषयकाज्ञानान्नृशंसा अत्युत्साहभङ्गेन सर्वजनघातिका अजीवनार्हेण समर्थपुत्रवत्त्वात्पालनायोग्येन मया तावत्प्रथमं कृता या प्रतिज्ञा त्वयाचितं ददामीति प्रतिश्रवणं तत् ततः प्रतिपन्नं प्राप्तम् एतद्रामचीरधारणजनितदुःखमपि दहेत् दहति शोषयतीत्यर्थः । तत्र दृष्टान्तः आत्मपुष्पं वेणुं वंशमिव एतेन दुःखप्रदत्वेऽपि तच्चीरधारणस्य प्रतिज्ञाविषयीभूतत्वादनिवार्यत्वं सूचितम् । हिरव्यर्थो ॥७॥

गो० टी०—अजीवनार्हेणेति । अजीवनार्हेण जीवनानर्हेण आसन्नमरणेनेति यावत् मया नृशंसा क्रूरा प्रतिज्ञा त्वत्प्रार्थितं करिष्यामीति शपथपूर्विका प्रतिज्ञा तावत् प्रथमं कृता त्वया हि दत्तवरद्वयया बाल्यात् बालिशत्वात् एतत् प्रतिज्ञानं नियमेन भरताभिषेकरामविवासनरूपविषयव्यवस्थया प्रतिपन्नं निश्चितं तत् मत्कृतप्रतिज्ञानमात्मपुष्पं वेणुमिव मां दहेदिति योजना ॥ ७ ॥

---

१ अर्धमेतदधिकं गो. रा. पाठे । २ अर्धमेतदधिकं गो. रा. पाठे । ३ अपकरोतीति गो.पाठः । ४ कन्येति गो. पाठः । ५ जनस्येति गो. रा. पाठः । ६ स्थितेति गो. रा. पाठः । ७ माभिति गो. रा. पाठः ।

रामेण यदि ते पापे किंचित्कृतमशोभनम् । अपकारः क इह ते वैदेह्या दर्शितोऽधमे ॥ ७ ॥
मृगीवोत्फुल्लनयना मृदुशीला मैनस्विनी । अपकारं कमिवै ते करोति जनकात्मजा ॥ ८ ॥
ननु पर्याप्तमेवं ते पापे रामविवासनम् । किमेभिः कृपणैर्भूयः पातकैरपि ते कृतैः ॥ ९ ॥
प्रतिज्ञातं मया तावत्त्वयोक्तं देवि शृण्वता । रामं यदभिषेकाय त्वमिहागतमब्रवीः ॥ १० ॥
तत्त्वेतत्समतिक्रम्य निरयं गन्तुमिच्छसि । मैथिलीमपि या हि त्वमीक्षसे चीरवासिनीम् ॥ ११ ॥
[इतीव राजा विलपन्महात्मा शोकस्य नान्तं स ददर्श किंचित् ।
भृशातुरत्वाच्च पपात भूमौ तेनैव पुत्रव्यसने निमग्नः ॥]
एवं ब्रुवन्तं पितरं रामः संप्रस्थितो वनम् । अवाक्शिरसमासीनमिदं वचनमब्रवीत् ॥ १२ ॥
इयं धार्मिक कौसल्या मम माता यशस्विनी । वृद्धा चाक्षुद्रशीला च न च त्वां देव गर्हते ॥ १३ ॥

७-८] ति० टी०-अशोभनमपराधः वैदेह्या ते कोऽपकारश्चीरग्रहणपूर्वकवनवासप्रयोजनको दर्शितः संपादितः॥७॥८॥

रा० टी०-इदानीं राममात्रस्यैव गमने प्रयोजनमिति बोधयन्नाह-रामेणेति । यदि यदा त्वद्वरयाचनानन्तरकाले रामेण हेतुभूतेन अधमे पापे राक्षसे किंचित् राक्षसत्वनिवृत्तिफलकैश्वर्यादित्याजनमशोभनं ते त्वया मया च कृतं प्रमाणतो निश्चितं तदा वैदेह्या कः अपकारः राक्षसापकृतिः दर्शितो निश्चितः न कोऽपीत्यर्थः ॥ ८ ॥

गो० टी०-कोपे रामापराधमभ्युपेत्याह-रामेणेति । अशोभनमपराधः इह विवासे दर्शितः संपादित इति यावत् ॥ ८ ॥

रा० टी०-इहापि कस्यचिदपकारोऽनया न कृत इति बोधयन्नाह-मृगीति । ते तव स्नुषा जनकात्मजा इह अयोध्यायामपकारं कस्यचिदपकृतिं किं करोति न किमपीत्यर्थः । एतेनैतत्सर्वनाथो रामोऽपि न कंचन हन्तेति सूचितम् एतेन तस्या दयालुत्वातिशयः सूचितः तेनैतद्गमनं नोचितमिति सूचितम्॥९॥

गो० टी०-मृगीति । मृगीवोत्फुल्लनयनेत्यनेन सौन्ध्यमुक्तं मृदुशीलेत्यनेन अपराधभीरुत्वमुक्तम् ॥ ९ ॥

९] ति० टी०-ते तव एवं रामविवासनं चीरादिवैशिष्ट्येन रामवनगमनं पर्याप्तं सकलनरकानुभवायालं ते त्वया कृतैरेभिरपि कृपणैरनिर्वाच्यदुःखप्रदैः सीताप्रव्राजनादिरूपैः पातकैः किं किमनुभविष्यसि वा न जानामीति शेषः ॥ ९ ॥

रा० टी०-सीताविवासने दोषान्तरं वदन्नाह-नन्विति । एवमनेन प्रकारेण रामविवासनमेव पापे पापिराक्षसार्थं पर्याप्तं परिपूर्णमतः एभिः कृपणैः कार्पण्यहेतुभिः अत एव पातकैः पापसंपादकैः ते कृतैः त्वत्कर्तृकसीताविवासनव्यापारैः किं न किमपीत्यर्थः ॥ १० ॥

गो० टी०-नन्विति । पर्याप्तं यावदात्मभावि नरकानुभवायालम् ॥ १० ॥

१०] ति० टी०-अभिषेकाय मया कृतनिश्चयं पश्चात्तत्प्रतिबन्धे त्वया कृते मत्प्रेरणयेहागतं रामं प्रति यत्त्वमब्रवीर्जटाचीरधरो वनं गच्छेति तत्त्वयोक्तं शृण्वता मया तावदेव प्रतिज्ञातं तथास्त्वित्यनुमतं न तु सीताप्रव्राजनादि ॥ १० ॥

रा०टी०-प्रतिज्ञातमिति। इहागतं राममभिषेकाय इदानीन्तनाभिषेकं निवर्तयितुं यत्त्वमब्रवीस्तत् त्वयोक्तं शृण्वता मया प्रतिज्ञातमङ्गीकृतम् ॥ ११ ॥

गो० टी०-प्रतिज्ञातमिति । अभिषेकाय इहागत रामं त्वं यदब्रवीः 'सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः । अभिषेकमिमं त्यक्त्वा जटाचीरधरो वस ' इति यदब्रवीः त्वयोक्तं तच्छृण्वता मया तावत् रामविवासनमात्रमेव प्रतिज्ञातं न तु सीताप्रव्राजनमिति भावः ॥ ११ ॥

११] ति० टी०-एतत्त्वोक्तं तदतिक्रम्याधिकार्थं प्रवृत्तत्वान्निरयं गन्तुमर्हसि । कोऽत्र मेऽतिक्रमोऽत आह—मैथिलीमिति । ईक्षसे वाञ्छसि "स ऐक्षत बहु स्यां प्रजायेय" इत्यादाविच्छार्थस्येक्षतेर्दर्शनात् ॥ ११ ॥

रा० टी०-तदिति । मैथिलीं चीरवासिनीं सतीं याहि इति यत्त्वमीक्षसे ईक्षापूर्वकं कथयसि तदेतत्पूर्वप्रतिज्ञातं समतिक्रम्य निरयममङ्गलं गन्तुं गमयितुं जनानिति शेषः किमर्थमिच्छसि । अपिः किमर्थमित्यर्थे ॥ १२ ॥

रा० टी०-इतीति । भृशातुरत्वाद्धेतोः इत्यनेन प्रकारेण विलपन् राजा शोकस्य अन्तं निवर्तकं किंचित्र ददर्श अत एव तेन तादृशेन पुत्रव्यसनेन पुत्रवियोगजनितदुःखेन निमग्नोऽभिभूतो राजा भूमौ पपात ॥ १३ ॥

गो० टी०-तदिति । मया प्रतिज्ञातमतिक्रम्य निरयं नरकं गन्तुमिच्छसि कुतः हि यस्मात् या त्वं मैथिलीमपि चीरवासिनीमीक्षसे वाञ्छसि ॥ १२ ॥ १३ ॥

१२] ति० टी०-एवं ब्रुवन्तं सीता यथासुखं गच्छत्विति ब्रुवन्तं संप्रस्थित एवं वादात्तया सह गमने कृतानुमतिकत्वात्तया गन्तुं प्रवृत्तः ॥ १२ ॥

रा० टी०-एवमिति । वनं संप्रस्थितो रामः इदं वचनं पितरमब्रवीत् ॥ १४ ॥

गो० टी०-एवमिति । संप्रस्थितो गन्तुमुद्यतः ॥ १४ ॥

१३] ति० टी०-न च गर्हते स्वशङ्कया मयि वनं गच्छत्यपीति शेषः । सत्यरक्षणं धर्म इति ज्ञात्वेति भावः ॥ १३ ॥

---

१ अथेति गो. पाठः । २ तपस्विनीति गो.पाठः । ३ इहेति गो. रा. पाठः । ४ एतदिति गो. पाठः । ५ दृश्यतेऽयधिकः श्लोकः गो. रा. पाठे । ६ व्यसनेन मग्न इति रा. पाठः ।

मया विहीनां वरद प्रपन्नां शोकसागरम् । अदृष्टपूर्वव्यसनां भूयः संमन्तुमर्हसि ॥ १४ ॥
[पुत्रशोकं यथा नच्छेत्त्वया पूज्येन पूजिता । मां हि संचिन्तयन्ती सा त्वयि जीवेत्तपस्विनी ॥]
इमां महेन्द्रोपमजातगर्धिनीं तथा विधातुं जननीं ममार्हसि ।
यथा वनस्थे मयि शोककर्शिता न जीवितं न्यस्य यमक्षयं व्रजेत् ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ।

दशरथेनामन्त्रितः सुमन्त्रो रामप्रापणार्थं रथं सज्जीचकार । धनाधिकृतानीताभरणैः सीतात्मानमलंचक्रे । राज्यभ्रंशितरामो नावमन्तव्य इति कौशल्या सीतामन्वशात्तदङ्गीकृत्य सीता स्वैवनत्यं प्राकाशयत् । रामः कौसल्यामाश्वास्येतरमातृः क्षमामयाचत् । तास्तूचतर भृशं चुक्रुशुः ।

रामस्य तु वचः श्रुत्वा मुनिवेषधरं च तम् । समीक्ष्य सह भार्याभी राजा विगतचेतनः ॥ १ ॥
नैनं दुःखेन संतप्तः प्रत्यवैक्षत राघवम् । न चैनमभिसंप्रेक्ष्य प्रत्यभाषत दुर्मनाः ॥ २ ॥
स मुहूर्तमिवासंज्ञो दुःखितश्च महीपतिः । विललाप महाबाहू राममेवानुचिन्तयन् ॥ ३ ॥
मन्ये खलु मया पूर्वं विवत्सा बहवः कृताः । प्राणिनो हिंसिता वापि तन्मामिदमुपस्थितम् ॥ ४ ॥

रा० टी०–तद्वचनमेवाह-इयमिति । अक्षुद्रशीला महाशीलविशिष्टेत्यर्थः । त्वां न गर्हते मद्वियोगहेतुत्वबुद्ध्या न निन्दति ज्ञाताभिप्रायत्वादिति तात्पर्यम् ॥ १५ ॥

गो० टी०–इयमित्यादि । प्रपन्नां प्राप्तां भूयः अतिशयेन संमन्तुं संमानयितुं ज्येष्ठपत्नीत्वेन पूर्वमेव संमानिता अथ विशेषेण मयाऽभ्यर्थेति भावः ॥ १५ ॥ १६ ॥

१४] ति० टी०–प्रपन्नां प्राप्तां भूयः संमन्तुं प्रधानपत्नीत्वात्क्रियमाणसंमानामपि भूयोऽधिकं संमन्तुमर्हसि संमन्तुं तस्याः समानं कर्तुं मत्प्रार्थनयेति शेषः ॥ १४ ॥

रा०टी०–मयेति । हे वरद ! अदृष्टपूर्वव्यसनां मया विहीनामत एव शोकसागरं प्रपन्नां प्राप्तां निमग्नामित्यर्थः । कौसल्यां भूयोऽधिकं संमन्तुमर्हसि ॥ १६ ॥

गो० टी०–पुत्रशोकमिति । पुत्रशोकं यथा नच्छेत्तथा संमन्तुमर्हसीति पूर्वेण संबन्धः, यद्वा उत्तरेणैवान्वयः मां संचिन्तयन्तीयं तपस्विनी अपि जीवेत् यदि जीवेत्तदा त्वया पूजिता सती पुत्रशोकं यथा नच्छेत्तथा कुर्वित्यर्थः । 'न मच्छोकायथा नश्येत्त्वया पूज्येन पूजिता । मां हि संचिन्तयन्तीयं त्वयि जीवेत्तपस्विनी' इत्येव पाठः । पूर्वार्धस्य पूर्वेणान्वयः त्वयि विषये जीवेत् मां चिन्तयन्त्यपि त्वदुपलालनेन जीवेदित्यर्थः, यद्वा मां संचिन्तयन्ती मच्छोकायथा न नश्येत्तथा त्वया पूजिता त्वयि जीवेदित्येकं वाक्यम् ॥ १७ ॥

१५] ति० टी०–जातगर्धिनीं त्वत्समीपे जातो मद्दर्शनविषयो गर्धोऽभिलाषो यस्यास्तां न्यस्य त्यक्त्वा ॥ १५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०–इमामिति । हे महेन्द्रोपम! जातगर्धिनीं निरन्तरमदर्शनविषयकातिशयेच्छावतीं मम जननीं वनस्थे मयि शोककर्शिता सती जीवितं स्वपरिकरपालनं न्यस्य परित्यज्य यमक्षयं कालागम्यमप्रकटसाकेतमित्यर्थः यथा न व्रजेत्तथा विधातुं त्वमर्हसि ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०–इमामिति । जातगर्धिनीं पुत्रदर्शनकाङ्क्षिणीमित्यर्थः । न्यस्य त्यक्त्वा ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

१] ति० टी०–रामस्येति । विगतचेतनोऽभूदिति शेषः ॥ १ ॥

रा० टी०–रामस्येति । वचो वचनं श्रुत्वा मुनिवेषधरं तं रामं समीक्ष्य च भार्याभिः सह राजा विगतचेतनः कर्तव्यविषयकनिश्चयाभाववानासेति शेषः ॥ १ ॥

गो० टी०–रामस्येति । विगतचेतनः अभूदिति शेषः ॥ १–३ ॥

२–३] ति० टी०–न प्रत्यवैक्षत द्रष्टुं नाशक्नोत् ॥ २ ॥ ३ ॥

रा० टी०–नेति । एनं राघवं दुःखेन सन्तप्तो राजा न प्रत्यवैक्षत अत्यन्तं नावालोकयत् अभिसंप्रेक्ष्य किंचिदवलोक्यापि न प्रत्यभाषत ॥ २ ॥

रा० टी०–स इति । दुःखितः अतिदुःखाक्रान्तः अत एव असंज्ञः संज्ञारहित इव स महीपतिः मुहूर्तं विललाप विविधमभाषत ॥ ३ ॥

४] ति० टी०–विवत्सा इति धेनव इति शेषः ॥ ४ ॥

---

१ क्रोऽवमधिक गो. पाठे । २ तस्मादिति गो. पाठः ।

न त्वेवानागते काले देहाच्च्यवति जीवितम् । कैकेय्या क्लिश्यमानस्य मृत्युर्मम न विद्यते ॥ ५ ॥
योऽहं पावकसंकाशं पश्यामि पुरतः स्थितम् । विहाय वसने सूक्ष्मे तापसाच्छादमात्मजम् ॥ ६ ॥
एकस्याः खलु कैकेय्याः कृतेऽयं क्लिश्यते जनः । स्वार्थे प्रयतमानायाः संश्रित्य निकृतिं त्विमाम् ॥ ७ ॥
एवमुक्त्वा तु वचनं बाष्पेण [1]विहतेन्द्रियः । रामेति सकृदेवोक्त्वा व्याहर्तुं न शशाक सः ॥ ८ ॥
संज्ञां तु प्रतिलभ्यैव मुहूर्तात्स महीपतिः । नेत्राभ्यामश्रुपूर्णाभ्यां सुमन्त्रमिदमब्रवीत् ॥ ९ ॥
[2]औपवाह्यं रथं युक्त्वा त्वमायाहि हयोत्तमैः । प्रापयैनं महाभागमितो जनपदात्परम् ॥ १० ॥
एवं मन्ये गुणवतां गुणानां फलमुच्यते । पित्रा मात्रा च यत्साधुर्वीरो निर्वास्यते वनम् ॥ ११ ॥

रा० टी०–तद्भाषणमेवाह–मन्ये इत्यादिभिः । विवत्सा वत्सरहिता कृताः बहवो धेनव इति शेषः प्राणिनो मनुष्यादयो वा हिंसिताः किंच बहवः प्राणिनः विवत्साः प्रियापत्यरहिताः कृताः अत एव हिंसिताः पीडिताः तत्तस्माद्धेतोः इदं दुःखं मामुपस्थितम् एतेन तस्मिन्काले वियोगदुःखेन स्वपापसंसर्गित्वाभावादिर्विस्मृत इति सूचितम् तेन तदुःखस्य परा काष्ठा सूचिता ॥ ४ ॥

गो० टी०–मन्य इति । विवत्साः धेनव इति शेषः उपस्थितमित्यत्रेतिकरणं द्रष्टव्यम् इति मन्य इत्यन्वयः ॥ ४ ॥

५] ति० टी०–कैकेय्या क्लिश्यमानस्यापि मम यतो मृत्युर्न विद्यते तत्प्राप्तिर्न दृश्यतेऽतः कालेऽनागते देहाज्जीवितं नैव च्यवते इति जाने इति शेषः ॥ ५ ॥

६] ति० टी०–आच्छाद्यतेऽनेनेत्याच्छादः तापसानामाच्छादो यस्य तादृशमात्मजं पश्यामि यस्तस्य मे मृत्युर्न विद्यत इत्यन्वयः ॥ ६ ॥

रा० टी०–इदं दुःखं मृते सति कथंचित्निवर्तेत तत्त्वस्माकं दुर्लभमिति बोधयन्नाह–नेति । अनागते अने सर्वरक्षके परमात्मनि आगते नित्यं प्राप्ते अत एव अकाले कालगतिरहिते जने विद्यमानादेहाज्जीवितं जीवनं नैव भवति अतो हेतोः सूक्ष्मे वसने वाससी विहाय तापसाच्छादं तपस्विजनोचिताच्छादनविशिष्टं पावकसंकाशं पुरतः स्थितमात्मजं कैकेय्या सहितो योऽहं पश्यामि तस्य क्लिश्यमानस्य मम मृत्युर्न विद्यते एतेन रामागमनात्पूर्वं तदुःखस्य दुष्परिहरत्वं सूचितम् । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–नेति । काले देहारम्भककर्मावेनाशकाले ॥ ५ ॥ ६ ॥

७–८] ति० टी०–जनः कैकेयीव्यतिरिक्तः सर्वोऽपि इमां निकृतिं वरलक्षणशाठ्यं संश्रित्येत्यस्य स्थिताया इति शेषः ॥ ७ ॥ ८ ॥

रा० टी०–अकालविवासने केकय्या नापराध इति बोधयन्नाह–एकस्या इति । इमां प्रसिद्धां निकृतिं शाठ्यं संश्रित्य स्वार्थे अहमतीव राज्ञीप्रियेत्यर्थे प्रयतमानायाः केकय्याः केकयप्रेषितायाः केकयीदास्या इत्यर्थः एकस्याः प्रधानायाः मन्थरायाः कृते कृतिसाध्ये अकालिकरामविवासने अयं सर्वो जनः खिद्यते 'एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽल्पे संख्यायां च प्रवर्तते' इत्यभियुक्तोक्तिः ॥ ७ ॥

रा० टी०–एवमिति । बाष्पेण अश्रुणा पिहितेक्षणः व्याप्तनेत्रः स राजा एवं वचनमुक्त्वा रामेति सकृदेकवारमुक्त्वा व्याहर्तुमन्यत्किंचिद्वक्तुं नैव शशाक ॥ ८ ॥

गो० टी०–एकस्या इति । निकृतिः शाठ्यम् ' कुसृतिर्निकृतिः शाठ्यम् ' इत्यमरः । निकृतिं संश्रित्य स्वार्थे प्रयतमानाया इत्यन्वयः ॥ ७ ॥ ८ ॥

९] ति० टी०–नेत्राभ्यामुपलक्षितः ॥ ९ ॥

रा० टी०–संज्ञामिति । उपलभ्य प्राप्य अश्रुपूर्णाभ्यां नेत्राभ्यामुपलक्षितो महीपतिः इदमब्रवीत् ॥ ९ ॥

गो० टी०–संज्ञां त्विति । नेत्राभ्यामित्युपलक्षणे तृतीया ॥ ९ ॥

१०] ति० टी०–औपवाह्यं वाहनमात्रोपयुक्तं युद्धानर्हमित्यर्थः युक्त्वा योजयित्वा । 'योज्या' इति पाठेऽप्येवमेव परं दक्षिणस्यामिति शेषः ॥ १० ॥

रा० टी०–तद्वचनमेवाह–उपवाह्यमिति । हयोत्तमैः उत्तमाश्वैः रथं युक्त्वा योजयित्वा त्वमायाहि इह प्राप्नुहि । तत्प्रयोजनमाह–उपवाह्यं नित्यं रथकरणकवहनकर्मीभूतं महाभागमेनं राममितोऽस्माज्जनपदात्परं जनपदं देशं प्रापय । 'औपवाह्यम्' इति पाठस्तु स्वार्थिकष्यञा साधुः 'योज्य' इति पाठे तु त्यबर्थः ॥ १० ॥

गो० टी०–औपवाह्यमिति । औपवाह्यम् उपवहनमात्रयोग्यं युद्धानर्हमित्यर्थः राजयोग्यमिति वार्थः । युक्त्वा योजयित्वा ॥ १० ॥

११] ति० टी०–साधुर्वीरो रामः पित्रा मात्रा च वनं निर्वास्यते यत् अतो गुणवतां पुंसां गुणानां फलमेवं निर्वासनरूपमुच्यते शास्त्रेणेति मन्ये इति दुःखातिशयादुक्तिः उत्प्रेक्षालंकारः ॥ ११ ॥

रा० टी०–एवमिति । साधुर्वीरः पुत्रः पित्रादिना यन्निर्वास्यते तद्गुणवतां गुणानां फलमुच्यते ॥ ११ ॥

गो० टी०–एवमिति । गुणवतां पुंसां संबन्धिगुणानां फलं यदुच्यते तदेवमेवंविधं मन्ये । अनन्यरूपं मन्ये । एवं-

१ क्लिश्यते इति गो. पाठः । २ पिहितेति गो. रा. पाठः । ३ हेति गो. पाठः । ४ उपवाह्यमिति रा. पाठः ।

राज्ञो वचनमाज्ञाय सुमन्त्रः शीघ्रविक्रमः । योजयित्वा ययौ तत्र रथमश्वैरलंकृतम् ॥ १२ ॥
तं रथं राजपुत्राय सूतः कनकभूषितम् । आचचक्षेऽञ्जलिं कृत्वा युक्तं परमवाजिभिः ॥ १३ ॥
राजा सत्वरमाहूय व्यापृतं वित्तसंचये । उवाच देशकालज्ञो निश्चितं सर्वतः शुचिः ॥ १४ ॥
वासांसि च वैराहाणि भूषणानि महान्ति च । वर्षाण्येतानि संख्याय वैदेह्याः क्षिप्रमानय ॥ १५ ॥
नरेन्द्रेणैवमुक्तस्तु गत्वा कोशगृहं ततः । प्रायच्छत्सर्वमाहृत्य सीतायै क्षिप्रमेव तत् ॥ १६ ॥
सा सुजाता सुजातानि वैदेही प्रस्थिता वनम् । भूषयामास गात्राणि तैर्विचित्रैर्विभूषणैः ॥ १७ ॥
व्यराजयत वैदेही वेश्म तत्सुविभूषिता । उद्यतोंऽशुमतः काले खं प्रभेव विवस्वतः ॥ १८ ॥
तां भुजाभ्यां परिष्वज्य श्वश्रूर्वचनमब्रवीत् । अनाचरन्तीं कृपणं मूर्ध्न्युपाघ्राय मैथिलीम् ॥ १९ ॥

श्लोकार्थमाह–पित्रेति । यस्मात्साधुवीरः पित्रा मात्रा च वनं प्रति निर्वास्यते अतो गुणा नार्जनीया एवेति भावः ॥ ११ ॥

१२] ति० टी०–रथं योजयित्वा तत्र रामसंनिधौ ययौ ॥ १२ ॥

रा० टी०–राज्ञ इति । शीघ्रविक्रमः अतित्वरया कार्यसाधकः सुमन्त्रः तत्र रामसन्निधौ ययौ प्राप ॥ १२ ॥

गो० टी०–राज्ञ इति । शीघ्रविक्रमः शीघ्रपदविक्षेपः योजयित्वा ययावित्यत्र आययाविति पदच्छेदः ॥ १२ ॥ १३ ॥

१३] ति० टी०–आचचक्षे रथ उपस्थित इत्युक्तवान्॥१३॥

रा० टी०–तमिति । अञ्जलिं प्रणयसूचकबद्धयुगलकरं कृत्वा परमवाजिभिर्युक्तं रथमाचचक्षे भवत्पित्राज्ञप्तेन मया रथोऽयं प्रापित इत्युवाच ॥ १३ ॥

१४] ति० टी०–वित्तसंचये व्यापृतं धनाध्यक्षमित्यर्थः निश्चितं वच उवाचेत्यन्वयः सर्वतः शुचिरिहामुत्रानृणः ॥ १४ ॥

रा० टी०–राजेति । सर्वतः सर्वप्रकारेण शुचिः कापट्यादिसंसर्गरहितः देशकालज्ञो राजा वित्तसंचये धनधान्यसंग्रहे व्यापृतं निपुणं कोशाधिकारिणमित्यर्थः सत्वरमाहूय निश्चितं वचः उवाच । 'शुचिम्' इति भूषणपाठः ॥ १४ ॥

गो० टी०–राजेति । वित्तसंचये कोशगृहे व्यापृतम् अध्यक्षत्वेन व्यापृतं धनाध्यक्षमित्यर्थः । निश्चितं यावदवस्थितत्तत्तद्वस्तुविषयनिश्चितज्ञानवन्तं शुचिं बाह्यान्तरशुद्धियुक्तम्॥१४॥

१५] ति० टी०–एतानि वर्षाणि चतुर्दशवर्षाणि एतैर्नेतावानेव वनवासो नाधिक इति पुनर्दार्ढ्याय ध्वनितम् ॥ १५ ॥

रा० टी०–तद्वचनमेवाह–वासांसीति । एतानि वनवासे नियमेतानि वर्षाणि संख्याय ज्ञात्वा वराहाणि अतिप्रशंसनीयानि वासांसि चतुर्दशवर्षेषु धारणयोग्यवस्त्राणि तादृशानि भूषणानि च वैदेह्याः वैदेह्यर्थं क्षिप्रमानय ॥ १५ ॥

गो० टी०–वासांसीति । वर्षाण्येतानि संख्याय गणयित्वा चतुर्दशवर्षपर्याप्तान्यवेत्यर्थः ॥ १५ ॥

१६] ति० टी०–प्रायच्छदनाध्यक्षः । 'सममेव' इति पाठे वचनसमकालमेवेत्यर्थः ॥ १६ ॥

रा० टी०–नरेन्द्रेणेति । ततः राजसमीपात्कोशगृहं गत्वा तत् राजाज्ञप्तं सर्वमाहृत्य आनीय सीतायै प्रायच्छत् ॥१६॥

गो० टी०–नरेन्द्रेणेति । प्रायच्छत् कोशाध्यक्ष इति शेषः । समं युगपत् तत्सर्वमित्यन्वयः ॥ १६ ॥

१७] ति० टी०–सुजाताऽयोनिजा सुजातानि सामुद्रिकोक्तलक्षणवन्ति गात्राणीत्यन्वयः ॥ १७ ॥

रा० टी०–सेति । सुजाता शोभनं सर्वमङ्गलकारकं जातं जन्म यस्याः सा वनं प्रस्थिता वैदेही सुजातानि शोभनलक्षणवन्ति गात्राणि तैः राज्ञा दापितैः विचित्रैर्विभूषणैर्भूषयामास ॥ १७ ॥

गो० टी०–सा सुजातेति । सुजाता सुजन्मा अयोनिजेति यावत् सुजातानि 'समः समविभक्ताङ्गः' इतिवत्सामुद्रिकोक्तलक्षणवत्तया उत्पन्नानि ॥ १७ ॥

१८] ति० टी०–उद्यत उदयं प्राप्नुवतः काले प्रातःकाले अनेन लेशतोऽपि विषादराहित्यं तस्याः सूचितम् ॥ १८ ॥

रा० टी०–व्यराजयतेति । सुविभूषिता शोभनविभूषणविशिष्टा वैदेही तत्स्वाधिष्ठितं वेश्म गृहं व्यराजयत अशोभयत तत्र दृष्टान्तः उद्यतः उदयं प्राप्नुवतः अंशुमतः प्रशस्तकिरणविशिष्टस्य विवस्वतः सूर्यस्य प्रभा कान्तिः काले घनाद्यनाच्छन्नसमये खमाकाशमिव एतेन तस्याः परमोत्साहः सूचितः ॥ १८ ॥

गो०टी०–व्यराजयतेति । अंशुमतः प्रशस्तकिरणस्य१८

१९] ति० टी०–कृपणमनाचरन्तीं क्षुद्राचारहीनां तां भर्तुः श्वश्रूरपरां सीताम् ॥ १९ ॥

रा० टी०–तामिति । कृपणं कार्पण्यमनाचरन्तामिदं रक्षेदामित्यर्थः मां मैथिलीं मूर्ध्न्युपाघ्राय भुजाभ्यां परिष्वज्य श्वश्रूः कौसल्या वचनमब्रवीत् ॥ १९ ॥

गो० टी०–तामिति । श्वश्रूः कौसल्या कृपणं क्षुद्रम् अनाचरन्तीमकुर्वतीम् ॥ १९ ॥

---

१ ऋजुमिति गो. पाठः । २ शुचिमिति गो. पाठः । ३ महार्हाणीति गो. पाठः । ४ वराणीति गो. पाठः । ५ सममेवेति गो. पाठः ।

असत्यः सर्वलोकेऽस्मिन्सततं सत्कृताः प्रियैः । भर्तारं नानुमन्यन्ते विनिपातगतं स्त्रियः ॥ २० ॥
एष स्वभावो नारीणामनुभूय पुरा सुखम् । अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि ॥ २१ ॥
असत्यशीला विकृता दुर्गा अहृदयाः सदा । असत्यः पापसंकल्पाः क्षणमात्रविरागिणः ॥ २२ ॥
न कुलं न कृतं विद्या न दत्तं नापि संग्रहः । स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः ॥ २३ ॥
साध्वीनां तु स्थितानां तु शीले सत्ये श्रुते स्थिते । स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥ २४ ॥

२०] ति० टी०–सततं प्रियैः सत्कृता अपि विनिपातगतं कृच्छ्रगतं भर्तारं याः शुश्रूषितुं नानुमन्यन्ते ताः सर्वलोके परलोके इहलोके चासत्योऽसतीत्वेन गणिताः ॥ २० ॥

रा० टी०–तद्वचनमेवाह–असत्य इति । प्रियैः स्वस्वामिभिः सततं सत्कृताः याः स्त्रियः विनिपातगतं त्यक्तैश्वर्यं भर्तारं नाभिमन्यन्ते असेव्यत्वेन नेच्छन्ति ताः अस्मिन् लोकवेदप्रसिद्धे सर्वलोके असत्यः पापिन्य इत्यर्थः ॥ २० ॥

गो० टी०–असत्य इति । असत्यः कुलटाः विनिपातगतं स्वस्थानात्प्रच्युतिं प्राप्तमित्यर्थः नानुमन्यन्ते न गणयन्ति ॥२०॥

२१] ति० टी०–नारीणां प्रकृतत्वादसतीनां यत्पुराऽनापदवस्थायां सुखं भर्तृदत्तमनुभूय तस्याल्पामापि रोगदारिद्र्यादिलक्षणमापदं प्राप्य दृष्ट्वा तं दुष्यन्ति दूषयन्ति नानादूषणयुक्तत्वेन वदन्ति नैतावदेव प्रजहत्यपि ॥ २१ ॥

रा० टी०–एष इति । पुरा अनापत्काले सुखं पत्या सहानन्दमनुभूय भुक्त्वा अल्पामीषदपि आपदं पत्यापत्तिं प्राप्य दृष्ट्वेत्यर्थः दुष्यन्ति नानादुर्गुणैर्दूषयन्ति प्रजहति त्यजन्त्यपि एषः पत्युर्दोषवादः त्यागश्च नारीणां दुष्टस्त्रीणां स्वभावः । कर्तृकर्मणी अध्याहर्तव्ये ॥ २१ ॥

गो० टी०–एष इति । दुष्यन्ति विकृता भवन्तीत्यर्थः । प्रजहति " अदभ्यस्तात् " इत्यदादेशः ॥ २१ ॥

२२] ति० टी०–असत्यशीला असत्यवचनशीला विकृता विकृतोपताक्ष्यादिव्यापाराः दुर्गा दुष्टाभिसरणादिगतिशीलाः अहृदयाः स्वभर्तरि विरसाः असत्यः कुलटाः पापे परपुरुषप्रसङ्गादौ संकल्पो मनोव्यापारो यासां क्षणमात्रविरागिणः क्षणमात्रविरागिण्य इत्यर्थः अल्पनिमित्ततः क्षणमात्रेण त्यक्तानुरागाः अविश्वसनीयस्नेहा इति यावत् । विरागिण इत्यत्र ङीषभाव आर्षः ता असत्य इति विधेयम् ॥ २२ ॥

रा० टी०–स्वभावान्तराणि वर्णयन्त्याह–असत्यशीला इति । असत्यं मृषा कथनं शीलं स्वभावो यासां ताः अत एव विकृताः दर्शनमात्रेण विकारोत्पादिकाः अत एव दुर्गाः दुरवगाह्याभिप्रायाः अत एव अहृदया न हृदयं स्वपतिविषयकं मनो यासां ताः अत एव पापसंकल्पाः पापेषु परपुरुषप्रसङ्गादिषु संकल्पो यासां ताः अत एव क्षणमात्रविरागिणः पुरुषान्तरलावण्यमवलोक्य ततोऽपि तूर्णं विरक्तचित्ताः असत्यः स्त्रियो भवन्तीति शेषः । क्षणमात्रविरागिण इति सामान्ये नपुंसकम् एतेनैवंविधाः स्त्रियः दूरतः परिहर्तव्या इति ध्वनितम् ॥ २२ ॥

गो० टी०–असत्यशीला इति । विरागिणः विरागिण्यः ङीषभाव आर्षः ॥ २२ ॥

२३] ति० टी०–कुलं प्रशस्तं, कृतमुपकारः, विद्या गुरूपदिष्टधर्मविद्या, दत्तं भूषणादिदानं, संग्रहो दृष्टेऽपि दोषे स्वीकारः यद्वा संग्रहो बन्धनादि एतत्सर्वमपि स्त्रीणामसतीनां हृदयं न गृह्णाति पापकृत्तेन प्रतिबध्नाति नव्बाहुल्यमप्रतिबन्धदार्ढ्यप्रतिपादनाय ' कामातुराणां न भयं न लज्जा ' इति न्यायात् । कुलायुचितं कृत्यं पृष्ठे कृत्वा लोकगर्हितकृत्य एव प्रवर्तन्ते कुतः यतोऽनित्यहृदया अव्यवस्थितचित्ताः ॥ २३ ॥

रा० टी०–नन्वु मामकीं रीतिमवलोक्य ता अपि स्वदुःस्वभावं त्यक्ष्यन्ति इत्यतः स्वभावान्तराण्याह–नेति । कुलं शोभनकुलोत्पत्तिः स्त्रीणां दुष्टस्त्रीणां हृदयं न गृह्णाति पापेभ्यो निवर्तयति एवमन्यदपि योजनीयम् तत्र कृतमुपकारः, विद्या सदुपदेशः, दत्तं द्रव्यादि, समर्पणं संग्रहः, स्वसमीपेत्यन्तस्थापनं तत्र हेतुः यतस्ता अनित्यहृदयाः प्रतिक्षणं ध्वंसप्रतियोगिनिश्चयकारिण्यः एतेन तत्संसर्गो दोषावह एवेति व्यञ्जितम् ॥२३॥

गो० टी०–नेति । कुलमाभिजात्यं, कृतमुपकारं, दत्तं संमानपूर्वकवस्त्राभरणादिदानं, संग्रहम् अग्निसाक्षिकपाणिग्रहणम् अनित्यहृदयाश्चञ्चलहृदयाः असतीनां भर्तुः कुलादिकं न संतोषाय किंतु धनमेवेति भावः एवं कैकेयी व्याजेन निन्दिता॥२३॥

२४] ति० टी०–साध्वीनां तु पतिव्रतानां तु शीले सच्चरित्रे सत्ये सत्यवचने श्रुते गुरुजनोपदेशे स्थिते स्वकुलोचितमर्यादावस्थितौ तु । तुरेवार्थे । एवेत स्थितानां स्त्रीणां परमं पवित्रमुत्तमं पुण्यसाधनं पतिरेक एव अत एव स्त्रियाः सर्वधर्मसाधनेभ्यो विशिष्यते ॥ २४ ॥

रा० टी०–साध्वीनामिति । शीले स्वधर्मचिन्तने चित्तवृत्तिनिरोधे वा सत्ये मिथ्यारहितवचने श्रुते गुरूपदेशश्रवणे स्थिते स्थिरे स्वकुलमर्यादायामिति शेषः स्थितानां साध्वीनां, पतिव्रतानां स्त्रीणां तु परमुत्तमं पवित्रकारकमेकः पतिः पतिसेवैव पतिसेवामन्तरा सर्वं निरर्थकं भवतीति तात्पर्यम् अतः पतिरेव विशिष्यते सर्वधर्मेभ्य इति शेषः ' श्रुते समे ' इति भूषणपाठः ॥ २४ ॥

गो० टी०–स्थूणानिखननन्यायेन पातिव्रत्यदृढीकरणार्थं

१ नाभिमन्यन्त इति रा. पाठः । २ दुर्गाह्यहृदया इति गो. पाठः । ३ युवत्य इति गो. पाठः । ४ क्षणमात्रादिति गो. पाठः । ५ विद्यामिति गो. पाठः । ६ संग्रहमिति गो. पाठः । ७ ह्रीति गो. पाठः । ८ शमे इति गो. पाठः ।

स त्वया नावमन्तव्यः पुत्रः प्रव्राजितो वनम् । तव [2]देवसमस्त्वेष निर्धनः सधनोऽपि वा ॥ २५ ॥
विज्ञाय वचनं सीता तस्या धर्मार्थसंहितम् । [3]कृत्वाञ्जलिमुवाचेदं श्वश्रूमभिमुखे स्थिता ॥ २६ ॥
करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम् । अभिज्ञास्मि यथा भर्तुर्वर्तितव्यं श्रुतं च मे ॥ २७ ॥
न मामसज्जनेनार्या समानयितुमर्हति । धर्माद्विचलितुं नाहमलं चन्द्रादिव प्रभा ॥ २८ ॥
नातन्त्री [4]विद्यते वीणा नाचक्रो विद्यते रथः । नापतिः सुखमेधेत या स्यादपि शतात्मजा ॥ २९ ॥
मितं ददाति हि पिता मितं भ्राता मितं सुतः । अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥ ३० ॥
साहमेवंगता श्रेष्ठा श्रुतधर्मपरा वरा । आर्यं किमवमन्येयं स्त्रिया भर्ता हि दैवतम् ॥ ३१ ॥

मसतीनां स्वभावमुक्त्वा सतीनां स्वभावमाह–साध्वीनामिति। शीले कुलोचितचरित्रे श्रुते गुरुजनकृतोपदेशे शमे शान्तौ च स्थितानां साध्वीनां पतिव्रतानां स्त्रीणां परमं पवित्रं परमं पावनं पतिरेकः पतिरेव विशिष्यते उत्कृष्टो भवति ॥ २४ ॥

२५–२६] ति० टी०–यदेवमतः किमत आह–स इति। देवसमो देवतुल्यः एष पतिः ॥ २५ ॥ २६ ॥

रा० टी०–स इति। वनं प्रव्राजितः अस्माभिः प्रेषितः पुत्रो मत्सुतः स त्वत्पतिः रामः त्वया नावमन्तव्यः केनापि हेतुना तदपमानं न कार्यमित्यर्थः। तत्र हेतुः एष रामः तव देवसमः सर्वप्रमोदः देवशब्दो मोदार्थक दिवुप्रकृतिकघञन्तः समशब्दः सर्वपर्यायः तयोः समानाधिकरणः तत्पुरुषः पञ्चम्यर्थे बहुव्रीहिर्वा ॥ २५ ॥

गो० टी०–स इति। स्पष्टम् ॥ २५ ॥

रा० टी०–विज्ञायेति। धर्मार्थसंहितं धर्म एव अर्थः प्रयोजनं तेन संहितं तस्याः कौशल्यायाः वचनं विज्ञाय सतात्पर्यं ज्ञात्वा सीता इदमुवाच ॥ २६ ॥

गो० टी०–विज्ञायेति। धर्मार्थसंहितं धर्मरूपप्रयोजनसहितम् अभिमुखे अग्र इत्यर्थः ॥ २६ ॥

२७] ति० टी०–यथा भर्तुर्भर्तृविषये वर्तितव्यं तथाभिज्ञास्मि किंच तथा श्रुतं मे स्वमातापितृभ्यामिति शेषः ॥२७॥

रा० टी०–तद्वचनमेवाह–करिष्य इति। आर्या सर्वश्रेष्ठा भवती यन्मामनुशास्ति तत्सर्वमहं करिष्ये एव तत्र हेतुः भर्तुः संबन्धिनि यथा वर्तितव्यं तथा मे मया श्रुतं पूर्वमेव मातापितृभ्यामिति शेषः अतोऽहमभिज्ञा भवदादिसेवाविषयकज्ञानवत्यस्मि ॥ २७ ॥

गो० टी०–कारिष्य इति। भर्तुः भर्तरि विषये वर्तितव्यं शुश्रूषितव्यं मे मया श्रुतं च मातापितृभ्यामिति शेषः ॥ २७ ॥

२८] ति० टी०–असज्जनेनासतीजनेन समानयितुं समानां कर्तुमार्या नार्हति नाहमलं न समर्था ॥ २८ ॥

रा० टी०– दुःसङ्गोऽपि ममाकिंचित्कर इति बोधयितुमाह–नेति। असज्जनेन अल्पसज्जनेन अपरिपक्वेनेत्यर्थः मां समानयितुं समानां कर्तुमार्या भवती नार्हति परिपक्वपतिव्रताहमिति तात्पर्यम् अतः धर्माद्धर्मपथाद्विचलितुं दुःसङ्गेनाप्यन्यत्र गन्तुमहं नालं न समर्था तत्र दृष्टान्तः चन्द्रात्प्रभा तत्कान्तिरिव ॥ २८ ॥

गो० टी०–नेति। समानयितुं समानां कर्तुं नालम् अक्षमेत्यर्थः ॥ २८ ॥

२९] ति० टी०–विद्यते वादनसमर्था इति गमनसमर्थः इति च शेषः। शतात्मजेति बहुव्रीहिः शतपुत्रा ॥ २९ ॥

रा० टी०–नातन्त्रीति। अतन्त्री तन्त्रीरहिता वीणा न विद्यते यत्नान्तरशतैरपि वादनाश्रया न भवतीत्यर्थः अचक्रः चक्राभ्यां रहितो रथो न विद्यते यत्नान्तरशतैरपि गमनाश्रयो न भवतीत्यर्थः एवं शतात्मजापि या स्त्री अपतिः पतिरहिता स्यात्सा सुखं न एधेत सुखाश्रया न भवतीत्यर्थः एतेन पतिरेव स्त्रीणां सुखहेतुरिति व्यञ्जितम् ॥ २९ ॥

गो० टी०–नातन्त्रीति। तन्त्री वीणाशिरा शतात्मजा पुत्रशतवती ॥ २९ ॥

३०] ति० टी०–अमितस्यैहिकामुष्मिकसकलसुखस्य कर्मणि षष्ठी ॥ ३० ॥

रा० टी०–तदेव दृढयन्ती आह–मितमिति। मितं परिमितमत अमितस्य सर्वस्वस्य दातारं का अभिज्ञा न पूजयेत्सर्वापि पूजयेदित्यर्थः ॥ ३० ॥

गो० टी०–मितमिति। मितम् अल्पम् ऐहिकमात्रमित्यर्थः अमितस्य ऐहिकामुष्मिकफलस्य ॥ ३० ॥

३१] ति० टी०–एवंगता भर्ता परमपूज्य इति ज्ञानवती। 'श्रेष्ठाश्रुतधर्म–' इति पाठे श्रेष्ठाभ्यः श्वश्रूमातृप्रमुख्याभ्यः श्रुतः परावरः सामान्यविशेषरूपो धर्मो यया 'श्रेष्ठे' इति पाठः क्वचित्। किमवमन्येयं कस्मादवमंस्यामि ॥ ३१ ॥

रा० टी०–सेति। श्रेष्ठा श्रुतधर्मपरावरा श्रेष्ठाभ्यः स्वमात्रादिभ्यः श्रुतः धर्मपरावरः उत्कृष्टापकृष्टरूपधर्मो यया सा अत एव स्त्रियाः भर्तैव दैवतं देवता एवं गता ज्ञानवती अहं किं किमर्थमवमन्येयम् ॥ ३१ ॥

गो० टी०–सेति। एवंगता एवंविधपातिव्रत्यधर्मं प्राप्ता श्रेष्ठा श्रुतधर्मपरावरा श्रेष्ठाभ्यो मात्रादिपतिव्रताभ्यः सम्यक्

---

१ मर्मेति गो. पाठः। २ दैवतमस्त्विति गो. पाठः। ३ कृताञ्जलिरुवाचेति गो. रा. पाठः। ४ वाक्षते इति गो. पाठः। ५ वर्तते इति गो.पाठः। ६ भ्रातेति गो. पाठः। ७ ईति गो. पाठः। ८ मन्येऽहमिति गो. पाठ। ९ स्त्रीणामिति गो. पाठः।

सीताया वचनं श्रुत्वा कौसल्या हृदयंगमम् । शुद्धसत्त्वा मुमोचाश्रु सहसा दुःखहर्षजम् ॥ ३२ ॥
तां प्राञ्जलिरभिप्रेक्ष्य मातृमध्येऽतिसत्कृताम् । रामः परमधर्मात्मा मातरं वाक्यमब्रवीत् ॥ ३३ ॥
अम्ब मा दुःखिता भूत्वा पश्येस्त्वं पितरं मम । क्षयोऽपि वनवासस्य क्षिप्रमेव भविष्यति ॥ ३४ ॥
सुप्तायास्ते गमिष्यन्ति नव वर्षाणि पञ्च च । समग्रमिह संप्राप्तं मां द्रक्ष्यसि सुहृद्वृतम् ॥ ३५ ॥
एतावदभिनीतार्थमुक्त्वा स जननीं वचः । त्रयः शतशतार्धा हि ददर्शाविक्ष्य मातरः ॥ ३६ ॥
ताश्चापि स तथैवार्ता मातॄर्दशरथात्मजः । धर्मयुक्तमिदं वाक्यं निजगाद कृताञ्जलिः ॥ ३७ ॥
संवासात्परुषं किंचिदज्ञानादपि यत्कृतम् । तन्मे समुपजानीत सर्वाश्चामन्त्रयामि वः ॥ ३८ ॥

श्रुतसामान्यविशेषरूपधर्मोत्कर्षा किमवमन्ये भर्तारमिति सिद्धम् ॥ ३१ ॥

३२] ति० टी०–शुद्धसत्त्वा शुद्धचित्ता पुत्रादेर्वनगमनेन दुःखं सीतावाक्यश्रवणेन च हर्षः ॥ ३२ ॥

रा० टी०–सीताया इति । हृदयंगमं मनोहरं वचनं श्रुत्वा शुद्धसत्त्वा विशुद्धान्तःकरणा कौशल्या दुःखहर्षजं दुःखवत्प्रतीयमानो यो हर्षः तज्जन्यमश्रु मुमोच। दुःखत्वेन प्रतीयमानत्वं हर्षस्य नवोढानां पतिसहगमने प्रसिद्धम् ॥ ३२ ॥

गो० टी०–सीताया इति । शुद्धसत्त्वा सत्त्वगुणाढ्या दुःखहर्षजरामारण्यगमनप्रयुक्तं दुःखं दृढपातिव्रत्ययुक्तसीतावचःश्रवणजो हर्षः ॥ ३२ ॥

३३] ति० टी०–अभिप्रेक्ष्य दृष्ट्वा अतिसत्कृतां सर्वजनैरिति शेषः ॥ ३३ ॥

रा० टी०–तामिति । मातृमध्येतिसत्कृतां तां मातरमभिप्रेक्ष्य रामो वाक्यमब्रवीत् ॥ ३३ ॥

गो० टी०–तामिति । अभिक्रम्य प्रदक्षिणीकृत्य ॥ ३३ ॥

३४] ति० टी०–वनवासस्य वनवासकालस्य ॥ ३४ ॥

रा० टी०–तद्वाक्यमेवाह–अम्बेति । अम्ब हे मातः! दुःखिता भूत्वा मम पितरं त्वं मा पश्येः तत्र हेतुः वनवासस्य वनवाससमयस्य क्षयो ध्वंसः क्षिप्रमेव भविष्यति त्वदुःखमवलोक्य सोऽतिदुःखी भविता तन्माभूदिति तात्पर्यम् ॥ ३४ ॥

गो० टी०–अम्बेति । वनवासस्य वनवासकालस्य ॥३४॥

३५] ति० टी०–सुप्तायाः सुप्ताया इव चतुर्दशघटीवद्भिष्यन्ति समग्रं भ्रातृभार्यासहितं समग्रश्रेयस्कं च पुनरपि सुहृद्भिर्वृतं राजत्वेन ॥ ३५ ॥

रा० टी०–नन्वतिवनवासकालस्य बहुत्वात्कथं द्रुतं नाशं इत्यत आह–सुप्तायाः इति । सुप्ताया इव ते गमिष्यन्ति गन्तारः अनन्तरं समग्रं समीचीनः अग्रः अग्रगन्ता संदेशहर इत्यर्थः यस्य तं सुहृद्वृतं संप्राप्तं मां द्रक्ष्यसि द्रष्टासि । सुप्ताशब्द आचारक्विबन्तः चशब्दोऽनन्तरार्थकः ॥ ३५ ॥

गो० टी०–सुप्ताया इति । सुप्तायाः एकस्यां रात्रौ संप्राप्तस्वापाया इवेत्यर्थः । समग्रं निर्वर्तितपितृवचनं संपूर्णः मनोरथं वा ॥ ३५॥

३६] ति० टी०–अभिनीतार्थं निर्णीतार्थं त्रयःशतानि त्रीणि शतानि शतार्धं च संख्या यासां ताः त्रेखयसादेश आर्षः एवंभूता या मातरः सन्ति ताः अवेक्ष्य विविच्य ददर्शेत्यर्थः तथा मातरश्च तं ददृशुरिति शेषः ॥ ३६ ॥

रा० टी०–एतावदिति । अभिनीतः प्राप्तः अर्थः मातृप्रयोजनं यस्मिन् तदेतावद्वचः जननीमुक्त्वा त्रयः शतशतार्धाः त्रयश्शतेन शतत्रयेण युक्तः शतार्धः पञ्चाशत्परिच्छेदकत्वेन यास्तु ताः मातरः अवेक्ष्य संविविच्य ददर्श। तथा चोत्पत्तयः शुभा इतिवत्प्रयोगः त्रेखय आदेशोऽत एव निर्देशात् ॥ ३६ ॥

गो० टी०–एतावदिति । अभिनीतार्थं क्रोडीकृतसर्वार्थमित्यर्थः । त्रयःशतशतार्धाश्च त्रयः शतं त्रिशतं त्रेखयसादेशशतार्धं पञ्चाशत् त्रयःशतशतार्धं प्रमाणं यासां तास्तथोक्ता मातरः मातॄः द्वितीयार्थे प्रथमा अवेक्ष्य वक्तव्यमालोच्य ददर्शेति संबन्धः ॥ ३६ ॥

३७] ति० टी०–तथैव कौसल्यावदेवार्तास्ता मातॄः प्रतीदं जगादेत्यन्वयः ॥ ३७ ॥

रा० टी०–ता इति । स दशरथात्मजो रामः इदं वाक्यं निजगाद ॥ ३७ ॥

गो० टी०–ता इति। तथैवार्ताः कौसल्येव दुःखिताः॥३७॥

३८] ति० टी०–संवासः सहवासः परुषम् उक्तमिति शेषः अज्ञानादपि यत्कृतं परुषं कर्म समुपजानीत क्षान्तमित्यनुजानीतेत्यर्थः ॥ ३८ ॥

रा० टी०–तद्वाक्यमेवाह–संवासादिति । संवासादत्यन्तसन्निकर्षादज्ञानाद्भवतीनामभिप्रायाविचारणाद्वा परुषं भवत्प्रतीतिविषयीभूतकठोरवचनादि यत्किंचित्कृतं निष्पादितं तन्मे कृतं समुपजानीत क्षमध्वम् एतदर्थं सर्वाः वो युष्मान् आमन्त्रयामि प्रार्थयामि ॥ ३८ ॥

गो० टी०–संवासादिति । संवासात् एकत्र सहवासात् चिरपरिचयादित्यर्थः समनुजानीत क्षान्तमित्यनुज्ञां कुरुतेत्यर्थः आमन्त्रयामि आपृच्छामि ॥ ३८ ॥

---

१ क्रम्येति गो. पाठः । २ भूत्वं पश्य त्वमिति गो. पाठः । ३ ह्रीति गो. पाठः । ४ सा समग्रमिह प्राप्तमिति गो. पाठः । ५ अज्ञानाद्वापीति गो. पाठः । ६ समन्विति गो. पाठः । ७ आत्मनेपदमपेक्षितम् ।

वचनं राघवस्यैतद्धर्मयुक्तं समाहितम् । शुश्रुवुस्ताः स्त्रियः सर्वाः शोकोपहतचेतसः ॥ ३९ ॥
जज्ञेऽथ तासां संनादः क्रौञ्चीनामिव निःस्वनः । मानवेन्द्रस्य भार्याणामेवं वदति राघवे ॥ ४० ॥
मुरजपणवमेघघोषवद्दशरथवेश्म बभूव यत्पुरा ।
विलपितपरिदेवनाकुलं व्यसनगतं तदभूत्सुदुःखितम् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।

सीतारामलक्ष्मणा दशरथं प्रदक्षिणीकृत्याभ्यवादयत । ससीतो रामः कौसल्यां ननाम । लक्ष्मणोऽपि कौसल्यामभिवाद्य सुमित्रामभ्यवादयत । सुमित्रा लक्ष्मणं हिनानुबन्ध्यत्वशात्। तेषु रथमधिरूढेषु सुमन्त्रोऽश्वान्प्राचोदयत् । रथमनुधावन्तः पौरा रथस्याधिक्यात्तमप्राप्यैव न्यवर्तन्त । कौसल्यादिभिः समं रामरथमनुदवन्नपि दशरथो गमनाशक्त्या सीदन्नेव कुशलसचिवानुशिष्टो मन्त्रेपथमधितस्थौ ।

अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः । उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् ॥ १ ॥
तं चापि समनुज्ञाप्य धर्मज्ञः सह सीतया । राघवः शोकसंमूढो जननीमभ्यवादयत् ॥ २ ॥
अन्वक्षं लक्ष्मणो भ्रातुः कौसल्यामभ्यवादयत् । अपि मातुः सुमित्राया जग्राह चरणौ पुनः ॥ ३ ॥
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् । हितकामा महाबाहुं मूर्ध्न्युपाघ्राय लक्ष्मणम् ॥ ४ ॥

३९] ति० टी०–समाहितं धीरम् ॥ ३९ ॥

रा० टी०–वचनमिति । समाहितं समाधानकारकमेतद्वचनं शोकोपहतचेतसः सर्वाः स्त्रियः शुश्रुवुः ॥ ३९ ॥

गो० टी०–वचनमिति । समाहितं समीचीनार्थयुक्तमित्यर्थः ॥ ३९ ॥ ४० ॥

४०] ति० टी०–अथ रामवचःश्रवणानन्तरं संनादः शोकजः शब्दः ॥ ४० ॥

रा० टी०–जज्ञ इति । संनादो महान् शब्दः मानवेन्द्रस्य दशरथस्य राघवे रामे ॥ ४० ॥

४१] ति० टी०–मेघो वाद्यविशेषः मुरजपणवा एव मेघा इति रूपकं वा विलपितं रामगुणकैकेयीदुर्गुणप्रतिपादकं वाक्यं परिदेवनं रोदनं व्यसनगतं प्राप्तेष्टवियोगम् ॥ ४१ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रा० टी०–मुरजेति । यद्वेश्म गृहं मुरजादिवाद्यविशेषत्रयघोषवत्तच्छब्दविशिष्टं पुरा बभूव तत् विलपितपरिदेवनाकुलं विलपितैः कोऽस्मान् रक्षितेत्यादिवाक्यैः यत्परिदेवनं तेनाकुलं व्याप्तं बभूव अत एव व्यसनगतं विविधकर्मकक्षित्तचालनप्रापकमत एव सुदुःखितमतिदुःखप्रदमभूत् श्रोतृणामिति शेषः ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणाश्चरोमणावयोध्याकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

गो० टी०–मुरजपणवेति । मुरजपणवा एव मेघास्तेषां घोषास्तद्वत्, यद्वा मुरजादिसहपाठात् मेघोऽपि वाद्यविशेषः मुरजश्च पणवश्च मेघश्च मुरजपणवमेघम् "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इत्येकवद्भावः तद्घोषवत् विलपितपरिदेवनाकुलं विविधानि लपितानि रामगुणकैकेयीदुर्गुणप्रतिपादकवाक्यानि यस्मिंस्तद्विलपितं परिदेवनं रोदनशब्दः तेनाकुलं व्यसनगतम् आपद्गतमत एव दुःखितमभूत् ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

१] ति० टी०–उपसंगृह्य पादपतनपूर्वकं प्रणम्य दीना मातापित्रोः शोकदर्शनादीना इव ॥ १ ॥

रा० टी०–रामादिवृत्तमाह–अथेति । उपसंगृह्य पितृपादस्पर्शनपूर्वकप्रणतिं कृत्वा दीनाः राक्षसक्षयकारकाः रामादयो राजानं प्रदक्षिणं चक्रुः अन्तर्भावितणिजर्थो दीङ्क्षयार्थो विवक्षया कर्तरि निष्ठा ॥ १ ॥

गो० टी०–अथेति । उपसंगृह्य पादग्रहणपूर्वकं प्रणम्य दीनाः वृद्धयोर्मातापित्रोः शुश्रूषा न लब्धेति दीनाः ॥ १ ॥ २ ॥

२] ति० टी०–समनुज्ञाप्य कृतानुमतिकं कृत्वा शोकसंमूढो मातृदुःखदर्शनात्स इव ॥ २ ॥

रा० टी०–तमिति । तं राजानं समनुज्ञाप्य तत्संमतिं लब्ध्वेत्यर्थः शोकसंमूढः शोकः संमूढो येन सः शोकापहर्तेत्यर्थः सीतया सह धर्मज्ञो राघवः जननीमभ्यवादयत्प्राणमत् ॥ २ ॥

३-४] ति० टी०–अन्वक्षमनुपदं रामेण कौसल्यावन्दनानन्तरं भ्रातुः जननीमिति शेषः कौसल्यामभ्यवादयत्

---

१ अथेति गो. पाठः ।

सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने । रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ॥ ५ ॥
व्यसनी वा समृद्धो वा गतिरेष तवानघ । एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ॥ ६ ॥
इदं हि वृत्तमुचितं कुलस्यास्य सनातनम् । दानं दीक्षा च यज्ञेषु तनुत्यागो मृधेषु हि ॥ ७ ॥
लक्ष्मणं त्वेवमुक्त्वासौ संसिद्धं प्रियराघवम् । सुमित्रा गच्छ गच्छेति पुनः पुनरुवाच तम् ॥ ८ ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् । अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥ ९ ॥
ततः सुमन्त्रः काकुत्स्थं प्राञ्जलिर्वाक्यमब्रवीत् । विनीतो विनयज्ञश्च मातलिर्वासवं यथा ॥ १० ॥

पुनः कौसल्यावन्दनानन्तरं मातुः सुमित्राया अपिनान्यासां च ॥ ३ ॥ ४ ॥

रा० टी०–अन्वक्षमिति । भ्रातुः रामस्य अन्वक्षमनुपदं लक्ष्मणः कौशल्यामभ्यवादयन्मातुः सुमित्रायाः अपि चरणौ जग्राह ॥ ३ ॥

रा० टी०–तमिति । हितकामा पुत्रप्रियमिच्छन्ती रुदती वियोगहेतुकरोदनं कुर्वती माता सुमित्रा तं वन्दमानं सौमित्रिं मूर्ध्न्युपाघ्राय आघ्राणं कृत्वा अब्रवीत् ॥ ४ ॥

गो० टी०–अन्वक्षमिति । अन्वक्षम् अनुपदम् 'अन्वगन्वक्षमनुगेऽनुपदम्' इत्यमरः ॥ ३ ॥ ४ ॥

५] ति० टी०–अत्यन्तसुहृज्जने स्वनुरक्तोऽपि त्वं मया वनवासाय सृष्टोऽनुमतः वनं गच्छति भ्रातरि रामे प्रमादमनवधानं मा कार्षीः भ्रातरीत्यनेन सोदरवदेवायं द्रष्टव्य इति सूचितम् ॥ ५ ॥

रा० टी०–तद्वचनमवाह–सृष्ट इति । हे पुत्र ! सुहृज्जने सुहृदं सौहार्दं जनयति उत्पादयति स तस्मिन् गच्छति भ्रातरि रामे स्वनुरक्तः अत्यनुरागविशिष्टः अत एव वनवासाय सृष्टो मया प्रेरितस्त्वं प्रमादं तत्सेवायामनवधानतां मा कार्षीः ॥ ५ ॥

गो० टी०–सृष्ट इति । सृष्टस्त्वं दैवेनेति शेषः । भ्रातरि गच्छति देव्या सह पुष्पितवनदर्शनपारवश्येन गच्छति सतीत्यर्थः । प्रमादम् अनवधानं मा कार्षीः सावधानो भवेत्यर्थः । सृष्ट इति । यथा कौसल्या लोकरक्षणार्थं पुत्रं प्रास्तृत एवं मया सुहृज्जने रामे स्वनुरक्तस्त्वं वनवासाय सृष्टः वने रामानुवर्तनायोत्पादितः अतो रामे गच्छति प्रमादं मा कार्षीः रामगमनसौन्दर्याकृष्टमनस्कतया रक्षणकर्मण्यनवहितो मा भूरित्यर्थः, यद्वा रामे वनं गच्छति त्वमत्रैव मा तिष्ठेति भावः ॥ ५ ॥

६] ति० टी०–कनीयसो ज्येष्ठानुवर्तनं परमो धर्म इत्याह–व्यसनी वेति । राज्याभावेन ॥ ६ ॥

रा० टी०–तत्सेवावश्यं कर्तव्येत्यत्र हेतुं वदन्ती आह–व्यसनीति । हे अनघ ! कपटसंसर्गशून्य व्यसनी त्यक्तैश्वर्यः समृद्धः स्वीकृतैश्वर्यो वा एष राम एव लोके सर्वभुवने तव गतिः तत्र हेतुः यस्माद्धेतोः ज्येष्ठवशगो भवेत् अनुजम् इति शेषः एषः ज्येष्ठवशगत्वभावः सतां धर्मः ॥ ६ ॥

गो० टी०–रामगमने गन्तव्यतायां निमित्तमाह–व्यसनीति । गतित्वे धर्मशास्त्रानुमतिं दर्शयति–एष इति ॥ ६ ॥

७] ति० टी०–इदं ज्येष्ठानुवर्तनरूपं धर्मान्तरमपि क्षत्रोचितमाह–दानमित्यादि । मृधेषु युद्धेषु तनुत्यागस्तनावनास्थापूर्वकं युद्धकरणम् ॥ ७ ॥

रा० टी०–वने राक्षसादिहेतुकभीतिर्न कार्येति बोधयन्ती आह–इदमिति । उचितं राजकुलयोग्यमिदं वृत्तमस्य रघुसंबन्धिनः कुलस्य सनातनं सार्वकालिकम् । तद्वृत्तमेवाह–दानं याचकेप्सितसमर्पणं यज्ञेषु दीक्षा च मृधेषु सङ्ग्रामेषु तनुत्यागः शत्रुतनुत्याजनं च ॥ ७ ॥

गो० टी०–ज्येष्ठानुवर्तनादपि परमधर्म कुलोचितं दर्शयति–इदमिति । मृधेषु युद्धेषु तनुत्यागेनापि रामो रक्षणीय इति भावः ॥ ७ ॥

८] ति० टी०–असावेवं स्वपुत्रं लक्ष्मणमुक्त्वा संसिद्धं वनं गन्तुं निश्चितमनस्कं प्रियराघवं प्रियरूपं राघवं गच्छ गच्छेति पुनः पुनरुवाच शकुनसंपत्तय इति भावः तं लक्ष्मणं पुनरुवाचेत्यनुकर्षः ॥ ८ ॥

रा० टी०–लक्ष्मणमिति । एवमनेन प्रकारेण उक्त्वा उपदिश्य संसिद्धं गमनानुकूल्यव्यापारवन्तं प्रियराघवं सर्वप्रीतिविषयीभूतरामं त्वं गच्छ गच्छ इत्यसौ सुमित्रा तं लक्ष्मणं पुनः पुनरुवाच संसिद्धमित्यत्र गत्यर्थकधियो निष्ठा पुनः पुनरित्यनेन सुमित्रायाः रामविषयकप्रीत्यतिशयः सूचितः ॥ ८ ॥

गो० टी०–लक्ष्मणमिति । संसिद्धं सिधुगत्यामित्यस्माद्धातोर्निष्ठायां रूपम् गमनोद्युक्तमित्यर्थः । गच्छ गच्छेति वीप्सया सुमित्राया अपि रामानुवर्तने महानादरो द्योत्यते ॥ ८ ॥

९–१०] ति० टी०–तद्वचनमाह–राममिति । एवं च पितृमातृनगरस्मरणेन मनश्चाञ्चल्यं मा कुर्विति ध्वनितम् रामस्य पितृवत्सेव्यत्वं सीतायां मातृवद्भावकरणमटव्या अयोध्यावत्पाल्यत्वं तेन तत्रत्यजन्तूनामुद्वेगकरणं च ध्वनितम् ॥ ९ ॥ १० ॥

रा० टी०–रामसेवान्तरायकारकपित्रादिस्मरणमपि न कर्तव्यमिति बोधयन्ती आह–राममिति । रामं दशरथं वात्सल्यरसहेतुत्वेन दशरथसदृशं विद्धि जानीहि एवं जनकात्मजां सीतां मां स्वजननीं विद्धि अटवीं वनमयोध्यां सर्वसंपत्संप्रापकत्वेन अयोध्यासदृशं विद्धि अतः यथासुखं सुखमनतिक्रम्य गच्छ रामेण सहेति शेषः यत्त्वस्यार्थान्तरवर्णनाय दशतीति दशः पक्षी स गरुडो रथो यस्येति व्युत्पत्त्या दशरथशब्दस्य

१ चेति गो. पाठः । २ सेति गो. पाठः ।

रथमारोह भद्रं ते राजपुत्र महायशः । क्षिप्रं त्वां प्रापयिष्यामि यत्र मां राम वक्ष्यसे ॥ ११ ॥
चतुर्दश हि वर्षाणि वस्तव्यानि वने त्वया । तान्युपक्रमितव्यानि यानि देव्या प्रचोदितः ॥ १२ ॥
तं रथं सूर्यसंकाशं सीता हृष्टेन चेतसा । आरुरोह वरारोहा कृत्वालंकारमात्मनः ॥ १३ ॥
वैनवासं हि संख्याय वासांस्याभरणानि च । भर्तारमनुगच्छन्त्यै सीतायै श्वशुरो ददौ ॥ १४ ॥
तथैवायुधजातानि भ्रातृभ्यां कवचानि च । रथोपस्थे प्रवेन्यस्य सचर्म कठिनं च यत् ॥ १५ ॥
अथो ज्वलनसंकाशं चामीकरविभूषितम् । तमारुरुहतुस्तूर्णं भ्रातरौ रामलक्ष्मणौ ॥ १६ ॥
सीतातृतीयानारूढान्दृष्ट्वा रथमचोदयत् । सुमन्त्रः संमतान्श्वान्वायुवेगसमाञ्जवे ॥ १७ ॥

विष्णुपरत्वं भूषणे व्याख्यातं तच्चिन्त्यम् दशशब्दस्य गरुड दशरथशब्दस्य विष्णौ शक्त्यभावात् दंशधातोरचि दश इति रूपस्यासिद्धत्वाच्च मूलविभुजादित्वकल्पनं तु निष्प्रामाणिकत्वाद्धेयमत एव ब्रह्मेशानाच्युतेशायत्यादिभिर्न विरोधः एवं तृतीयार्थकल्पनाय रामशब्दः उपरतपरत्वेन व्याख्यातस्तदपि उपायुपपदमन्तरा विरुद्धम्, एवं मां जनकस्य पितुः आत्मजां विद्धि कैकेयीविवासिततया पितृगृहवर्तिनीं विद्धीत्यर्थो व्याख्यातः सोऽपि दुर्लभः जनकजाशब्दस्य कयाचिदपि वृत्त्या स्वरसतः पितृगेहवर्तिनीत्वाबोधनात् तस्माद्यथोक्तमेव न्याय्यमिति दिक् ॥९॥

रा० टी०—तत इति । विनीतो विनम्रः विनयज्ञः सुमन्त्रः वासवमिन्द्रं मातलिस्तत्सारथिरिव काकुत्स्थं राममब्रवीत्॥१०॥

गो० टी०—वनवासे पितृमातृनगरस्मरणेन मनश्चाञ्चल्यं भविष्यतीति धिया तत्रैव प्रतिनिधिं कल्पयति—राममिति । यथासुखं गच्छेत्यस्य इत्युवाचेति पूर्वेण संबन्धः रामं दशरथं विद्धि पितरमगवच्छेत्यर्थः । जनकात्मजां मां विद्धि मातरं विद्धीत्यर्थः । अटवीमयोध्याम् तद्वत् भोगस्थानं विद्धि गच्छ तात यथासुखम् तदनुवर्तनमेव उचितं सुखमित्यर्थः । यद्वा रामं दशरथं विद्धि दशति मत्स्यकच्छपोरगादीन् दंष्ट्राव्यापारविषयान् करोतीति दशः पक्षी दंशदशन इति धातुः दशनं दंष्ट्राव्यापारः " पचाद्यच् " गृध्रोदरादित्वादनुनासिकलोपः स गरुडः रथो यस्य तम् विष्णुं विद्धीत्यर्थः । जनकात्मजां मां लक्ष्मीं विद्धि अटवीमयोध्याम् अपराजितारूयां वैकुण्ठनगरीं विद्धि तद्वासस्थानमिति भावः । यद्वा रामं दशरथं च विद्धि उभयोस्तारतम्यं पश्येत्यर्थः, मां जनकात्मजां च विद्धि गुणतः आलोचय मदपेक्षया सीतैव तव हितपरेति भावः । अयोध्याम् अटवीं च विद्धि एतन्नगरापेक्षया वनमेव तव कैङ्कर्यैकान्तस्थानतयोत्कृष्टमित्यर्थः । यद्वा दशरथ रामम् उपरतं विद्धि मां जनकस्य पितुरात्मजां विद्धि कैकेयीविवासिततया पितृगृहवर्तिनीं विद्धीत्यर्थः । अयोध्यामटवीं विद्धि निर्जनेयं भविष्यतीत्यर्थः । एवं तात्पर्यान्तराण्यूह्यानि ॥ ९ ॥ १० ॥

११] ति० टी०—यत्र यद्देशप्रापणे मां वक्ष्यसे नियोजयसि तं देशं क्षिप्रं प्रापयिष्यामि नेह रजन्यां वस्तव्यमिति शेषः॥११॥

रा० टी०—तद्वचनमेवाह—रथमिति । हे राजपुत्र महायशः हे राम ! रथं त्वमारोह । तत्प्रयोजनमाह—यत्र यस्मिन् देशे मां त्वं वक्ष्यसे प्रापणार्थं नियोजयिष्यसि तस्मिन् देशे त्वां क्षिप्रं प्रापयिष्यामि ॥ ११ ॥

गो० टी०—रथमिति । यत्र यस्मिन् प्रदेशविषये ॥ ११ ॥

१२] ति० टी०—कुतस्तत्राह—चतुर्दशेति । यानि चतुर्दश वर्षाणि वने वस्तव्यानि तान्यवैवोपक्रमितव्यान्यारम्भणीयानि यतो देव्या कैकेय्यावैव वनं गच्छेति प्रेरितोऽसि ॥ १२ ॥

रा० टी०—चतुर्दशेति । यानि चतुर्दश वर्षाणि वने त्वया वस्तव्यानि देव्या कैकेय्या त्वं प्रचोदितः राजाभिप्रायनिरूपणेनाज्ञापितोऽसि तानि वर्षाणि उपक्रमितव्यानि अयैवारम्भणीयानि एतेनेतःप्रभृत्यत्र स्थितावाज्ञाभङ्गः स्यादिति सूचितं तेन सुमन्त्रस्य परमधर्मज्ञत्वं व्यक्तम् ॥ १२ ॥

गो० टी०—चतुर्दशेति । वर्षाणीति चतुर्दशवर्षैकदिवसापनयनमपि महान् लाभ इति धिया त्वरयति तान्युपक्रमितव्यानीति देव्यासि चोदितः अयैव गच्छेति कैकेय्या चोदितत्वादित्यर्थः ॥ १२ ॥

१३] ति० टी०—हृष्टेन चेतसेत्यनेन 'अङ्गिरा मन उत्साहम्' इत्युक्तो मुख्यः शकुनो ध्वनितः ॥ १३ ॥

रा० टी०—तमिति । वरारोहा वरः अयोनिजात्वेन सर्वोत्कृष्टः आरोहः प्रादुर्भावो यस्याः सा सीता आत्मनः स्वदेहस्य अलंकारं स्वकीयवस्त्राभरणादिभूषां कृत्वा हृष्टेन चेतसा सूर्यसंकाशं सूर्यस्यापि प्रकाशकं तं रथमारुरोह ॥ १३ ॥

गो० टी०—तमिति—अलंकारं कृत्वा श्वशुरदत्तवस्त्राभरणादिभिरिति शेषः ॥ १३ ॥

१४] ति० टी०—अलंकारकरणोपायमुक्तं स्मारयति—वनवासं हीति । यानि ददौ तानि रथोपस्थे विन्यस्येत्यन्वयः अग्रिमश्लोके तथैवेतिपदस्वरसात् ॥ १४ ॥

१५] ति० टी०—भ्रातृभ्यां भ्रात्रोरित्यर्थः सचर्म चर्मपिनद्धं पेटकं कठिनं खनित्रं प्रविन्यस्य स्थापयित्वा ॥ १५ ॥

१६] ति० टी०—अथो अनन्तरमारुरुहतुः ॥ १६ ॥

१७] ति० टी०—संमतान्संमतसर्वलक्षणान् ॥ १७ ॥

---

१ वक्ष्यसीति गो. पाठः । २ असीति गो. पाठः । ३ अस्मात्पूर्वं गो. अथा (१६) इत्यस्य पाठमिच्छति । ४ जालानीति गो. पाठः । ५ प्रतिन्यस्येति गो. पाठः । ६ तदिति गो. पाठः । ७ अथेति रा. पाठः । ८ हृष्टमिति गो. पाठः ।

प्रेयाते तु महारण्यं चिररात्राय राघवे । बभूव नगरे मूर्च्छा बलमूर्च्छा जनस्य च ॥ १८ ॥
तत्समाकुलसंभ्रान्तं मत्तसंकुपितद्विपम् । हयसिञ्जितनिर्घोषं पुरमासीन्महास्वनम् ॥ १९ ॥
ततः सबालवृद्धा सा पुरी परमपीडिता । राममेवाभिदुद्राव धर्मार्तः सलिलं यथा ॥ २० ॥
पार्श्वतः पृष्ठतश्चापि लम्बमानास्तदुन्मुखाः । बाष्पपूर्णमुखाः सर्वे तमूचुर्भृशनिःस्वनाः ॥ २१ ॥
संयच्छ वाजिनां रश्मीन्सूत याहि शनैः शनैः । मुखं द्रक्ष्याम रामस्य दुर्दर्शं नो भविष्यति ॥ २२ ॥

रा० टी०–वनेति । वनंवासं वनवासनियमितवर्षपरिधानयोग्यतां संख्याय ज्ञात्वा यत् प्रयत्नवान् श्वशुरो दशरथः वासआदीनि यथा सीतायै ददौ तथा आयुधजातानि शस्त्रास्त्रसमूहान् कवचानि वर्माणि च कठिनं दृढं सचर्म चर्मणा पिनद्धं शस्त्रास्त्रस्थापनयोग्यमञ्जूषाविशेषमित्यर्थः भ्रातृभ्यां रामलक्ष्मणार्थे रथोपस्थे रथैकदेशविशेषे प्रविन्यस्य संस्थाप्य ददौ बोधयामासेत्यर्थः किंच स इति कर्तृविशेषणं चर्मशब्दः खड्गादिघातवारकयन्त्रविशेषपरः । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

रा० टी०–अथेति । अथ स्वोद्देश्यकशस्त्रादिस्थापनानन्तरं चामीकरविभूषितं रचितस्वर्णविशेषैः शोभितं ज्वलनसंकाशं वह्नेरपि प्रकाशकं तं संस्थापितशस्त्रास्त्रविशिष्टं रथं रामलक्ष्मणौ तूर्णं शीघ्रमारुरुहतुः ॥ १६ ॥

रा० टी०–सीतेति । सीतातृतीयान् सीता तृतीया येषु तान् सीतारामलक्ष्मणान् रथमारूढान् दृष्ट्वा वायुवेगसमान् वायुवेगसदृशवेगविशिष्टान् संमतान् स्वानुकूलान् अश्वान् जवे अतिवेगचलनयोग्ये रथे स्थितः सुमन्त्रः अचोदयत् ॥ १७ ॥

गो० टी०–एतच्छ्लोकानन्तरमथो ज्वलनेति श्लोकः पठितव्यः । अथो इति । ज्वलनसंकाशम् आयुधपूर्णत्वादिति भावः ॥ १४ ॥

गो० टी०–वनवासं हीति श्लोकस्तथैवेति श्लोकस्सीतातृतीयानिति श्लोकश्चैकं वाक्यम् । श्वशुरो दशरथः सीतायै यानि ददौ तानि च रथोपस्थे प्रतिन्यस्य तथा भ्रातृभ्यां दत्तान्यायुधजालानि कवचानि सचर्म चर्मपिनद्धम् अल्पकण्डोलं कठिनं तत् खनित्रं च रथमध्ये प्रतिन्यस्य सीतातृतीयानारूढान् दृष्ट्वा अश्वानचोदयदिति योजना धृष्टं सधैर्यं संमतान् श्रेष्ठानित्यर्थः यथान्यासमेव वास्तु तदा तं रथमिति श्लोको वनवासमिति श्लोकः तथैवेतिश्लोकश्चैकं वाक्यं सीतात्मनोऽलंकारं कृत्वा यानि श्वशुरो ददौ यानि भ्रातृभ्यामानीतानि आयुधजालानि कवचानि सचर्मकठिनं च तत्सर्वं रथोपस्थे प्रतिन्यस्यारुरोहेत्यन्वयः ॥ १६–१७ ॥

१८] ति० टी०–चिररात्रायेत्यव्ययं चिरकालावस्थित्यर्थमित्यर्थः । नगरे विद्यमानस्य सर्वमनुष्यस्य बलस्याश्वगजादेर्मूर्च्छा जनस्य तिर्यग्जन्तुरूपस्य च मूर्च्छा बभूवेत्यर्थः ॥ १८ ॥

रा० टी०–प्रयाते इति । राघवे रामे चिररात्राय बहुकालं वासार्थं महारण्यं प्रयाते सति नगरे अयोध्यायां विद्यमानस्य जनस्य मूर्छा बभूव बलमूर्छा सेनायाः मूर्छा च बभूव चिररात्रायेत्यव्ययम् ॥ १८ ॥

गो० टी०–प्रतियात इति । चिररात्राय चिरकालं नगरे मूर्च्छा बभूव नगरस्थस्त्रीबालादिषु दुःखातिशयेन विसंज्ञता बभूवेत्यर्थः । बलमूर्च्छा अश्वगजादिमोहः जनस्य उत्सवार्थमागतजनपदजनस्य ॥ १८ ॥

१९] ति० टी०–तदेव प्रपञ्चयति–तदिति । समाकुलमिति कर्तव्यतामूढं च तत्संभ्रान्तं रामानुगमनाय त्वरायुक्तं मत्ता रामवियोगेन संकुपिता द्विपा यस्मिन् , हयानां दुःखेन सिञ्जितानां शब्दवतां पर्याकुलप्राणिभूषणानां निर्घोषो यस्मिन् ॥ १९ ॥

रा० टी०–तदिति । समाकुलसंभ्रान्तं समाकुलं व्याप्तं संभ्रान्तमुद्वेगो यस्मिंस्तन्मत्तसंकुपितद्विपं मत्तेन सर्वदैन्यावलोकनेन संकुपिताः दैन्यसंपादनहेतुभूता दृष्टादिविषयककोपविशिष्टाः द्विपाः हस्तिनो यस्मिंस्तदत एव हयसिञ्जितनिर्घोषं हयानामश्वानां सिञ्जितैर्वचोभिः नितरां घोषो यस्मिंस्तदत एव महास्वनमतिशब्दविशिष्टं तत्पुरमयोध्या आसीत् ॥ १९ ॥

गो० टी०–तदिति । समाकुलम् अन्तःकरणक्षोभयुक्तं संभ्रान्तं बाह्येन्द्रियक्षोभयुक्तं सर्वेन्द्रियक्षोभवत् पौरजनयुक्तमित्यर्थः । मत्तसंकुपितद्विपं व्यसनातिशयेन संकुपितमत्तद्विपमित्यर्थः । हयसिञ्जितनिर्घोषं परितापातिशयेन तत इतश्चलतां हयानां भूषणरवेण संजातघोषमित्यर्थः । ' भूषणानां तु सिञ्जितम् ' इत्यमरः । अत एव महास्वनमासीत् ॥ १९ ॥

२०] ति० टी०–परमपीडिता रामवियोगदुःखेनेति शेषः ॥ २० ॥

रा० टी०–तत इति । सबालवृद्धा बालवृद्धसहिता परमपीडिता रामवियोगहेतुकातिपीडां प्राप्ता पुरी सा अयोध्या राममेवाभिदुद्राव रामेण सह जगामेत्यर्थः । तत्र दृष्टान्तः धर्मार्तः धर्मपीडितः । पुरी परमपीडितेत्यनेन तस्याश्चेतनात्वं व्यक्तम् ॥ २० ॥

गो० टी०–तत इति । परमपीडिता रामविरहदुःखेनेति शेषः ॥ २० ॥

२१–२२] ति० टी०–तं सुमन्त्रम् ॥ २१ ॥ २२ ॥

रा० टी०–पार्श्वत इति । पार्श्वादौ लम्बमानाः गच्छन्तः तदुन्मुखाः रामं पश्यन्त इत्यर्थः भृशनिस्वनाः परस्परं स्वस्वदुःखकथनेनातिशब्दविशिष्टाः सर्वेऽयोध्यावासिनस्तं सुमन्त्रमूचुः ॥ २१ ॥

१ प्रतियाते इति गो० पाठः । २ घर्मार्तेति गो० पाठः ।

आयसं हृदयं नूनं राममातुरसंशयम् । यदेवगर्भप्रतिमे वनं याति न भिद्यते ॥ २३ ॥
कृतकृत्या हि वैदेही छायेवानुगता पतिम् । न जहाति रता धर्मे मेरुमर्कप्रभा यथा ॥ २४ ॥
अहो लक्ष्मण सिद्धार्थः सततं प्रियवादिनम् । भ्रातरं देवसंकाशं यस्त्वं परिचरिष्यसि ॥ २५ ॥
महत्येषा हि ते बुद्धिरेष चाभ्युदयो महान् । एष स्वर्गस्य मार्गश्च यदेनमनुगच्छसि ॥ २६ ॥
एवं वदन्तस्ते सोढुं न शेकुर्बाष्पमागतम् । नरास्तमनुगच्छन्ति प्रियमिक्ष्वाकुनन्दनम् ॥ २७ ॥
अथ राजा वृतः स्त्रीभिर्दीनाभिर्दीनचेतनः । निर्जगाम प्रियं पुत्रं द्रक्ष्यामीति ब्रुवन्गृहात् ॥ २८ ॥
शुश्रुवे चाग्रतः स्त्रीणां रुदतीनां महास्वनः । यथा नादः करेणूनां बद्धे महति कुञ्जरे ॥ २९ ॥
पिता हि राजा काकुत्स्थः श्रीमान्सन्नस्तदा बभौ । परिपूर्णः शशी काले ग्रहेणोपप्लुतो यथा ॥ ३० ॥
स च श्रीमानचिन्त्यात्मा रामो दशरथात्मजः । सूतं संचोदयामास त्वरितं वाह्यतामिति ॥ ३१ ॥
रामो याहीति तं सूतं तिष्ठेति च जनस्तथा । उभयं नाशकत्सूतः कर्तुमध्वनि चोदितः ॥ ३२ ॥

रा० टी०—तद्वचनमेवाह—संयच्छेति । वाजिनामश्वानां रश्मीन् संयच्छ आकर्षय । तत्प्रयोजनमाह—हे सूत ! शनैश्शनैर्याहि गच्छ । तस्यापि प्रयोजनमाह—रामस्य मुखं द्रक्ष्याम द्रक्ष्यामः । तत्र हेतुर्दुर्दर्शं द्रष्टुमशक्यं नोऽस्माकं भविष्यति ॥२२॥

गो० टी०—पार्श्वत इति । लम्बमानाः रथैकदेशमाश्रित्येति शेषः ॥ २१ ॥ २२ ॥

२३] ति० टी०—देवगर्भप्रतिमे स्कन्दतुल्ये, यद्वा देवगर्भो देवनिर्धिर्हिरण्यगर्भस्तत्प्रतिमे याति गच्छति सति ॥ २३ ॥

रा० टी०—आयसमिति । देवगर्भप्रतिमे देवगर्भो देवजन्मा देवताविशेष इत्यर्थः स एव प्रतिमा उपमेयं यस्य तस्मिन् रामे याति गच्छति सति राममातुः यद्धृदयं न भिद्यते तदायसं लोहनिर्मितम् मन्ये इति शेषः ॥ २३ ॥

गो०टी०—आयसमिति । देवगर्भप्रतिमे देवकुमारसदृशे २३

२४]ति०टी०—मेरुमित्यादि । नित्यं तत्प्रदक्षिणसंचारात् २४

रा० टी०—कृतेति । धर्मे पातिव्रतरूपकर्मणि रता अत एव पतिमनुगता वैदेही सीता यतः पतिं न जहाति अतः कृतकृत्या साधितस्वनिखिल प्रयोजना । पतिमित्युभयान्वयि हिर्हेतौ ॥ २४ ॥

गो० टी०—कृतकृत्येति । मेरुमर्कप्रभा यथेति सूर्यस्य प्रादक्षिण्येन मेरुगमनमिति सर्वदा तस्य मेरुसंबन्धोऽस्त्येव २४—२९॥

२५] ति० टी०—यस्त्वं भ्रातरं परिचरिष्यसि स त्वं सिद्धार्थः कृतार्थः ॥ २५ ॥

रा० टी०—अहो इति । हे लक्ष्मण ! सततं निरवच्छिन्नं प्रियवादिनं प्रीत्युत्पादकवचनविशिष्टं देवसंकाशं देवानामपि प्रकाशकं भ्रातरं रामं यस्त्वं परिचरिष्यसि तत्परिचर्यां कर्तासि स त्वं सिद्धार्थः निष्पादितनिखिलप्रयोजनः अहो अतिभाग्योदयमेतत् ॥ २५ ॥

२६—२८] ति० टी०—तदेवाह—महतीत्यादि । अभ्युदय ऐहिकः ॥ २६—२८ ॥

रा० टी०—सिद्धार्थत्वे हेतुं वदन्नाह—महतीति । यद् यमेनमनुगच्छसि स एषः स्वर्गस्य साभ्यातिशयरहितसुखविशेषस्य मार्गः उपाय इत्यर्थः अतः एषः राममहगमनमेव महानभ्युदयः अत एव एषा रामसहगमनसाधिका ते बुद्धिर्महती ॥ २६ ॥

रा० टी०—एवमिति । प्रियं सर्वप्रीतिविषयीभूतमिक्ष्वाकुनन्दनं तं राममनुगच्छन्तः एवं वदन्तस्ते नराः जनाः आगतं बाष्पं सोढुं न शेकुः ॥ २७ ॥

रा० टी०—अथेति । अथ रामरथनिर्गमनानन्तरं प्रियं पुत्रमहं द्रक्ष्यामि इति ब्रुवन् सन् राजा गृहात् निर्जगाम ॥२८॥

२९] ति० टी०—करेणूनां तत्पालकवृद्धिकारिणीनाम्॥२९॥

रा० टी०—शुश्रुव इति । कुञ्जरे बद्धे सति करेणूनां हस्तिनीनां यथा नादः नाद इव रुदन्तीनां स्त्रीणां महास्वनः अग्रतः शुश्रुवे राज्ञेति शेषः ॥ २९ ॥

३०] ति० टी०—सन्नः खिन्नः ग्रहेण राहुणा ॥ ३० ॥

रा० टी०—पितेति । काले ज्योतिःशास्त्रोक्तसमये ग्रहेण राहुणा उपप्लुत उपद्रुतः शशी चन्द्र इव सन्नः खेदं प्राप्तः राजा तदा निर्गमनसमये बभौ जनैर्दृष्ट इत्यर्थः । अबभाविति वा छेदः तत्राकारो निषेधार्थकमव्ययम् ॥ ३० ॥

गो० टी०—पितेति । सन्नः अवसन्नतेजा इत्यर्थः ॥ ३० ॥

३१] ति० टी०—अचिन्त्यात्माहंममताभिमानराहित्येन तद्वद्भिरज्ञेयस्वरूपः एतेन सर्वथा ममतारहित्यं सूचितम् तदेव स्वस्य ध्वनयन्नाह—त्वरितं वाह्यतामिति ॥ ३१ ॥

रा० टी०—स इति । अचिन्त्यात्मा तत्कृपामन्तरा चिन्तनाशक्यस्वरूपो रामस्त्वरितं शीघ्रं वाह्यतामिति संचोदयामास ॥ ३१ ॥

गो० टी०—स इति । अचिन्त्यात्मा इयत्तया परिच्छेतुमशक्यधैर्य इत्यर्थः ॥ ३१ ॥

३२] ति० टी०—तं सुमन्त्रम् आहेति शेषः । उभयं नाशकत् एवं च नातिमन्दं नातिवेगमवाहयदित्यर्थः ॥ ३२ ॥

रा० टी०—नोदनमेव वर्णयन्नाह—राम इति । याहीति रामः तिष्ठेति जनश्च संचोदयामासेत्यनुकृष्यते अत एव चो-

१ सिद्धिरिति गो. पाठः । २ गच्छन्त इति गो.रा.पाठः । ३ रुदन्तीनामिति गो.रा.पाठः । ४ऽभवदिति गो.पाठः । ५ स जनस्तदेति गो. पाठः ।

निर्गच्छति महावाहौ रामे पौरजनाश्रुभिः । पतितैरभ्यवहितं प्रणनाश महीरजः ॥ ३३ ॥
रुदिताश्रुपरिप्लुतं हाहाकृतमचेतनम् । प्रयाणे राघवस्यासीत्पुरं परमपीडितम् ॥ ३४ ॥
मुस्राव नयनैः स्त्रीणामास्रमायाससंभवम् । मीनसंक्षोभचलितैः सलिलं पङ्कजैरिव ॥ ३५ ॥
दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं पुरम् । निपपातैव दुःखेन कृत्तमूल इव द्रुमः ॥ ३६ ॥
ततो हलहलाशब्दो जज्ञे रामस्य पृष्ठतः । नराणां प्रेक्ष्य राजानं सीदन्तं भृशदुःखितम् ॥ ३७ ॥
हा रामेति जनाः केचिद्राममातेति चापरे । अन्तःपुरसमृद्धं च क्रोशन्तं पर्यदेवयन् ॥ ३८ ॥
अन्वीक्षमाणो रामस्तु विषण्णं भ्रान्तचेतसम् । राजानं मातरं चैव ददर्शानुगतौ पथि ॥ ३९ ॥
स बद्ध इव पाशेन किशोरो मातरं यथा । धर्मपाशेन संयुक्तः प्रकाशं नाभ्युदैक्षत ॥ ४० ॥

दितः उभयप्रेरितः सन्तः उभयं वाहनस्थापनं नाशकत् । न च रामाज्ञापनात् जनप्रेरणायाः दौर्बल्याद्बाधसंभवेनोभयं नाशकदिति विरुद्धमिति वाच्यम् राजादीनामपि जनान्तःपातित्वेन तदनुमतिसंभावनया तस्यापि बलवत्त्वेन अतिविचारमन्तरा बाधायोगात् ॥ ३२ ॥

गो० टी०–राम इति । याहि तिष्ठेति उभयवाचोदयादिति शेषः । उभयं यानं स्थानं चाध्वनि रामजनाभ्यां चोदितः सन् कर्तुं नाशकत् ॥ ३२ ॥

३३] ति० टी०–अभ्यवहितं रथेनभ्युद्धतम् ॥ ३३ ॥

रा० टी०–निरिति । रामे निर्गच्छति सति पतितैः पौरजनाश्रुभिः अभ्यवहितं रथचलनैरभ्युत्थितं महीरजः प्रणनाश प्रशशाम ॥ ३३ ॥

गो० टी०–निर्गच्छतीति । अभ्यवहितं सिक्तम् ॥ ३३ ॥

३४] ति० टी०–रुदिताश्रुपरिप्लुतमनुत्साहवत् ॥ ३४ ॥

रा० टी०–रुदितेति । राघवस्य प्रयाणे सति रुदिताश्रुपरिप्लुतं रोदनाश्रुज्ञाप्योत्साहाभाववदत एव अचेतनं चेतनाभाववत्पुरमासीत् ॥ ३४ ॥

गो० टी०–रुदिताश्रुपरिप्लुतमिति । हाहाकृतं हाहाकारवत् मत्वर्थीयलोपः । अचेतनं मूढं राघवस्य दशरथस्य पुरं पुरस्थजनाः ॥ ३४ ॥

३५] ति० टी०–आयासः खेदः चलितैस्तिर्यग्भूतैः पङ्कजैः वर्षसंभूतोदकैरिति बोध्यम् अपादानस्यैव करणत्वविवक्षा॥३५॥

रा० टी०–मुस्रावेति । आयासंभवं वियोगजनितदुःखसंभूतमस्रमश्रु स्त्रीणां नयनेभ्यः मुस्राव । तत्र दृष्टान्तः मीनसंक्षोभचलितैः मीनानां यः संक्षोभः आकुलतया संचलनं तेन चलितैः पङ्कजैः पङ्कजेभ्यः सलिलमिव ॥ ३५ ॥

गो० टी०–मुस्रावेति । नयनैः नयनेभ्य आयाससंभवं खेदजनितं संक्षोभः उल्लसनं सलिलं मकरन्दरूपम् ॥ ३५ ॥

३६] ति०टी०–एकचित्तगतं दुःखेनैकचित्ततां प्राप्तम्॥३६॥

रा० टी०–दृष्ट्वेति । एकचित्तगतं रामवियोगासहिष्णुत्वेन समानचित्ततां प्राप्तं पुरं दृष्ट्वा नृपतिः पपात तत्र दृष्टान्तः कृत्तमूलः कृत्तं छिन्नं मूलं यस्य स द्रुम इव ॥ ३६ ॥

गो०टी०–दृष्ट्वेति । एकचित्तगतम् एकचित्ततां गतम्॥३६॥

३७] ति० टी०–सीदन्तं मूर्छन्तम् ॥ ३७ ॥

रा० टी०–तत इति । ततः दशरथपातानन्तरं सीदन्तं राजानं प्रेक्ष्य विद्यमानानां नराणां भृशदुःखितं यथा स्यात्तथा हलहलाशब्दः एककालसर्वजनप्रभूतत्वेन महास्वनविशेषः जज्ञे बभूव । यदि च सीदन्तमित्यस्य समीपं प्राप्तमित्यर्थः तदा भृशदुःखितमिति राजविशेषणम् ॥ ३७ ॥

गो० टी०–तत इति । प्रेक्ष्य स्थितानामिति शेषः ॥३७॥

३८] ति० टी०–अन्तःपुरसमृद्धमन्तःपुरसहितं क्रोशन्तमुच्चैःशब्देन रुदन्तं राजानं दृष्ट्वा केचिन्नरा हा रामेति केचिद्धा राममातेति पर्यदेवयन्शुशुचुः उपलक्षणमेतत् केचिद्धा राजन्नित्यपि राममातेत्यार्षम् ॥ ३८ ॥

रा० टी०–हा रामेति । अन्तःपुरसमृद्धमन्तःपुरसहितमित्यर्थः क्रोशन्तं राजानमवलोक्येति शेषः । केचित् हा राम! इति अपरे राममातेति पर्यदेवयन् व्यलपन् ॥ ३८ ॥

गो० टी०–हा रामेति । हा रामेति परिदेवनप्रकारराममातेत्यत्रापि हेत्यनुषङ्गनीयं सन्धिरार्षः राममातरित्यर्थः । जनाः क्रोशन्तः सन्तः पर्यदेवयन् अरुदन् समृद्धमन्तःपुरमन्तःपुरजनश्च पर्यदेवयदिति विपरिणामेनानुषङ्गः ॥ ३८ ॥

३९] ति० टी०–अनु पश्चाद्भाग ईक्षमाणो रामो मातरं राजानं च स्वमनुगतौ ददर्श ॥ ३९ ॥

रा० टी०–अन्वीक्षमाण इति । पथि अनुगतौ प्राप्तौ " पुमान् स्त्रिया " इति एकशेषः ॥ ३९ ॥

गो० टी०–अन्वीक्षमाण इति । अन्वीक्षमाणः आकोशानुसारेण पश्चात्सामान्यत ईक्षमाणः ॥ ३९ ॥

४०] ति० टी०–पाशेन निबद्धः किशोरोऽश्वबालो मातरं यथा न पश्यति, एवं धर्मपाशेन संयुक्तः संबद्ध इव नित्यमुक्तस्वभावत्वादेवमुक्तिः प्रकाशं नाभ्युदैक्षत संकुचितदर्शनव्यापारोऽभूदित्यर्थः ॥ ४० ॥

रा० टी०–स इति । धर्मपाशेन धर्मस्य यः पालनं तस्य अंशो व्याप्तिस्तेन संयुक्तः स रामः पाशेन बद्धः किशोरोऽश्वशावः इव प्रकाशं यथा स्यात्तथा मातरं नाभ्युदैक्षत तेन रामस्य सुशी

१ आस्रमिति गो. पाठः । २ हतमूल इति गो. पाठः । ३ पुरमिति गो. पाठः । ४ क्रोशन्त इति गो. पाठः । ५ संक्षिप्त इति गो. पाठः ।

पदातिनौ च यानार्हावदुःखार्हौ सुखोचितौ । दृष्ट्वा संचोदयामास शीघ्रं याहीति सारथिम् ॥ ४१ ॥
नहि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः । मातुश्च सहितुं शक्तस्तोत्रैर्नुन्न इव द्विपः ॥ ४२ ॥
प्रत्यगारमिवायान्ती सवत्सा वत्सकारणात् । बद्धवत्सा यथा धेनू राममाताभ्यधावत ॥ ४३ ॥
तथा रुदन्तीं कौसल्यां रथं तमनुधावतीम् । क्रोशन्तीं राम रामेति हा सीते लक्ष्मणेति च ॥ ४४ ॥
रामलक्ष्मणसीतार्थं स्रवन्तीं वारि नेत्रजम् । असकृत्प्रैक्षत सतां नृत्यन्तीमिव मातरम् ॥ ४५ ॥
तिष्ठेति राजा चुक्रोश याहि याहीति राघवः । सुमन्त्रस्य बभूवात्मा चक्रयोरिव चान्तरा ॥ ४६ ॥
नाश्रौषमिति राजानमुपालब्धोऽपि वक्ष्यसि । चिरं दुःखस्य पापिष्ठमिति रामस्तमब्रवीत् ॥ ४७ ॥

लतातिशयो व्यक्तः 'धर्मपाशेन संक्षिप्तः' इति भूषणपाठः तत्र धर्मपालनव्याप्त्या संप्रेरित इत्यर्थः । व्याप्तेः प्रेरिकात्वं च भिक्षा वासयतीत्यादाविव भाक्तम् ॥ ४० ॥

गो० टी०—स इति । किशोरोऽपचालः संक्षिप्तः बद्ध इति यावत् प्रकाशं नाभ्युदैक्षत अपाङ्गेनाभ्युदैक्षतेत्यर्थः ॥ ४०॥४१॥

४१] ति० टी०—यानार्हत्वादिगुणविशिष्टौ पितरौ दृष्ट्वेत्यन्वयः ॥ ४१ ॥

रा० टी०—पदातिनाविति । यानार्हौ नित्यं यानगमनयोग्यौ सुखोचितौ नित्यं सुखप्राप्तियोग्यौ मातापितरौ पदातिनौ दुःखार्तौ च दृष्ट्वा शीघ्रं याहि रथं प्रापयेति सारथिं संचोदयामास ॥ ४१ ॥

४२] ति० टी०—दुःखजं दुःखं जायतेऽस्मात्तादृशम् "अन्यत्रापि दृश्यते" इति डः । 'दुःखदम्' इति पाठान्तरम् लोकदृष्टेदम् सहितुम् " तीषसह—" इति वेट् । दुःखितौ पितरौ द्रष्टुं न शक्त इति यावत् तोत्रमङ्कुशस्तत्पीडितो द्विपो यथा स्वपृष्ठवर्तिवस्तुदर्शनाशक्तस्तद्वत् अस्य च कैकेयीवाक्यमेवाङ्कुशः॥४२॥

रा० टी०—शीघ्रं यापने हेतुं वदन्नाह—नहीति । दुःखजं दुःखजनकं पितुर्मातुश्च दर्शनं सहितुं नैव शक्तः, तत्र दृष्टान्तः तोत्रैरङ्कुशैर्नुन्नः प्रेरितो द्विप इव ॥ ४२ ॥

गो० टी०—नहीति । सहितुं सोढुं तोत्रादितः वैणुकेन पीडितः 'तोत्रं वैणुकम्' इत्यमरः ॥ ४२ ॥

४३–४४] ति० टी०—वत्सकारणात्प्रत्यगारं वत्सावस्थितिमदृष्ट्वादृष्ट्वागच्छन्ती सवत्सा बद्धवत्सा धेनुर्यथा धावति, एवं राममाताधावत । एषु सवत्सेत्यायधिककथनं कवेरपि शोकाधिष्ट्यान्न दोषाय ॥ ४३ ॥ ४४ ॥

४५] ति० टी०—रामलक्ष्मणसीतार्थं तद्वियोगजशोकवशान्नेत्रजं वारि स्रवन्तीं मुञ्चन्तीं नृत्यन्तीमिवेतस्ततः परिभ्रमन्तीमसकृत्प्रैक्षत राम इति शेषः ॥ ४५ ॥

रा० टी०—प्रत्यगारमिति । सा राममाता अभ्यधावत रथमिति शेषः तत्र दृष्टान्तः बद्धवत्सा बद्धः गृहे निरुद्धो वत्सो यस्याः सा सवत् प्रयत्नसहिता वत्सकारणात् वत्सार्थं प्रत्यगारं प्रतिदिनमागन्तव्यगृहमायान्ती धावन्ती धेनुर्यथा ॥ ४३ ॥

रा० टी०—तथेति । तेन प्रकारेण रथमनुधावतीमनुधावन्तीं नेत्रजं वारि स्रवन्तीं नृत्यन्तीं गात्रविक्षेपं कुर्वन्तीं तां मातरं कौशल्यां स रामः असकृदेव प्रैक्षत । इव एवार्थे श्लोकद्वयमेकान्वयि ॥ ४४ ॥ ४५ ॥

गो० टी०—प्रत्यगारमिति । बद्धवत्सा वत्सकारणात् अगारं प्रत्यायान्ती धेनुरिव वत्सला राममाता अभ्यधावत् रथमिति शेषः ॥ ४३ ॥

गो० टी०—तथेत्यादि । नृत्यन्तीमिति तद्वदितस्ततः परिभ्रमन्तीमित्यर्थः ॥ ४४ ॥ ४५ ॥

४६] ति० टी०—चक्रयोर्युयुत्सुसेनयोरन्तरा स्थित उदासीनः पुरुष इव सुमन्त्रस्यात्मा दोलायितो बभूव ॥ ४६ ॥

रा० टी०—तिष्ठेति । सुमन्त्रस्य आत्मा मनः चक्रयोः युद्धार्थं विष्वग्व्यप्रक्षेपितसुदर्शनयोरन्तरा मध्ये इव बभूव ॥४६॥

गो० टी०—तिष्ठेति । सुमन्त्रस्य आत्मा मनः चक्रयोरन्तरेव रथपूर्वपश्चाद्भागस्थितयोश्चक्रयोर्मध्यगतः पुरुष इव बभूव दशरथरामवचनाभ्यामतिसंकटं प्राप्त इत्यर्थः ॥ ४६ ॥

४७] ति० टी०—नन्वु राजवचनातिक्रमे दोषः स्यादत आह—नेति । उपालब्धोऽपि मया बहुशस्तिष्ठ तिष्ठेत्युक्तोऽपि मद्वचनं नाकार्षीरिति पुनर्गमनानन्तरं राज्ञोपालब्धोऽपि नाश्रौषमिति वक्ष्यसि दुःखस्य महदुःखस्य हेतुभूतं पापिष्ठमतिदुःखजनकत्वात् पापिष्ठं चिरविलम्बनमिति हेतोः शीघ्रं गच्छेति रामस्तमब्रवीत् ॥ ४७ ॥

रा० टी०—मत्कर्तृकनिवारणेऽपि त्वया रथः किमर्थं न स्थापित इति राज्ञा पृष्टेन मया किमुत्तरयितव्यमिति सुमन्त्रमङ्कुशमुपलभ्य राम आह—नाश्रौषमिति । उपालब्धः राज्ञा भर्त्सनपूर्वकं पृष्टोऽपि स्वं दुःखस्य चिरं विलम्बः पापिष्ठमतिपापानुमापकमित्यर्थः । अतो नाश्रौषं रथनिवारणफलकभवद्वचनकर्मकश्रुत्यनुकूलव्यापारानुकूलकृतिमान्नासमिति वक्ष्यसि इति तं सुमन्त्रं रामोऽब्रवीत् अत्र नैयायिकमते फलव्यापारौ धात्वर्थौ कृतिः प्रत्ययार्थः वैयाकरणमतेऽपि न क्षतिः तन्मते कृतेर्धात्वर्थत्वात् प्राचीनमतेऽपि व्यापारस्य धात्वर्थत्वेन तस्य च व्यापारो भावना सैवेत्यादिना कृत्यनतिरेकात् तस्या अपि धात्वर्थत्वं सिद्धमेव प्राचीनमते कृतिजन्यत्वेन व्यापारस्य न बोधविषयत्वं नवीनमते तत्त्वेनापत्त्यन्यदेतत् अत्रैवंकल्पने

---

१ तोत्रार्दित इति गो. पाठः । २ वत्सलेति गो. पाठः ।

सं रामस्य वचः कुर्वन्ननुज्ञाप्य च तं जनम् । व्रजतोऽपि हयाञ्शीघ्रं चोदयामास सारथिः ॥ ४८ ॥
न्यवर्तत जनो राज्ञो रामं कृत्वा प्रदक्षिणम् । मनसाप्याशुवेगेन न न्यवर्तत मानुषम् ॥ ४९ ॥
यमिच्छेत्पुनरायातं नैनं दूरमनुव्रजेत् । इत्यमात्या महाराजमूचुर्दशरथं वचः ॥ ५० ॥
तेषां वचः सर्वगुणोपपन्नः प्रस्विन्नगात्रः प्रविषण्णरूपः ।
निशम्य राजा कृपणः सभार्यो व्यवस्थितस्तं सुतमीक्षमाणः ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ।

पौरशोकानुवासितहृदय आदिकविः सिंहावलोकनन्यायेन तद्दुर्दशामेव विस्फारयति ।

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ । आर्तशब्दो हि संजज्ञे स्त्रीणामन्तःपुरे महान् ॥ १ ॥

धर्मात्मा सत्यसंधश्च सत्यवाक्यो दृढव्रत इत्यादिना नित्यं सत्यादिधर्मपरायणस्य रामस्य न मिथ्योपदेशकत्वम् । न च कृतेर्निषेधे तज्जन्यव्यापारजनितश्रुतेरपि निषेधापत्त्या मिथ्योपदेशकर्तृत्वं तदवस्थमिति वाच्यं कृतिजन्यव्यापारमन्तराऽपि श्रुतेरनुभवसिद्धत्वात् । तथाच कृतिजन्यव्यापारजनितश्रुतेर्निषेधेऽपि विषयेन्द्रियसंबन्धजनितश्रुतेर्निषेधात् न मिथ्यासंसर्गित्वम् । कृतिजन्यव्यापारजनितश्रुतेर्निषेधो विषयेन्द्रियसंबन्धजनितश्रुतेरपि निषेध इति तु न भ्रमितव्यं श्यामं घटं न पश्येत्युक्तं श्यामेतरघटविषयकदर्शननिषेधस्यानुभवविरुद्धत्वात् चिरं दुःखस्य पापिष्ठमित्युक्तेः स्थितावधिकं दुःखं भवितेति ध्वनितम् ॥४७॥

गो० टी०—राजवचनातिक्रमणे महान् दोषो भविष्यतीत्याशङ्क्यायामाह—नाश्रौषमिति । पुनरागमनानन्तरं राज्ञा किमर्थं मद्वाक्येन स्थितोऽसीति निन्दितोऽपि नाश्रौषं त्वद्वचनमिति वक्ष्यसि । किमर्थमेवमसत्यवचनं तत्राह—चिरमिति । दुःखस्य इदानीमनुभूयमानदुःखस्य चिरं विलम्बः पापिष्ठमतिदुःसहम् ॥ ४७ ॥

४८] ति० टी०—तं जनमनुव्रजत्पौरजनमनुज्ञाप्य रामेण कृतां पुनः पराङ्मुख्य गमनानुज्ञां प्रापय्य व्रजतोऽपि स्वतो गच्छतोऽपि पुनः शीघ्रं शीघ्रगत्यर्थम् ॥ ४८ ॥

रा० टी०—स इति । स सुमन्त्रः तं समीपस्थं जनमनुज्ञाप्य तदनुमतिं गृहीत्वा व्रजतः चलतोऽपि हयान् शीघ्रमतिवेगं यथा स्यात्तथा चोदयामास ॥ ४८ ॥

गो० टी०—रामस्येति । तं जनं कौसल्यां परिवेष्ट्यागतमवरोधजनमनुज्ञाप्य रामेणानुज्ञां प्रापय्येत्यर्थः ॥ ४८ ॥

४९] ति० टी०—राज्ञो जनो राजसंबन्धी जनः, अवरोधजन उपजीविजनश्च रामं मनसा प्रदक्षिणं कृत्वा न्यवर्तत देहमात्रेणेति शेषः रथस्य शीघ्रगत्वादिति भावः आशुवेगेन मनसा तु न न्यवर्तत, मानुषमितरमनुष्यसमूह आशुवेगेन मनसापि न न्यवर्तत आपिना देहेन च न न्यवर्तत । 'मनसाप्यशुवेगैश्च' इति पाठान्तरम् अत्र पाठे मनसोऽनिवृत्तेरशुवेगो ज्ञापकः ॥४९॥

रा० टी०—न्यवर्तत इति । राज्ञो जनः राजकीयः पुरुषः रामं प्रदक्षिणं कृत्वा न्यवर्तत दशरथसमीपं प्रापेत्यर्थः आशुवेगेन मनसा तु राजकीयो जनः मानुषं साधारणजनोऽपि न न्यवर्तत जनस्य नश्वरात्तिः ॥ ४९ ॥

गो० टी०—न्यवर्ततेति । राज्ञो जनः राजसंबन्ध्यवरोधजनः मानुषं मानुषाणां समूहः समूहार्थेऽण्प्रत्ययः मनसा अशुवेगैश्च निवृत्तावरोधजनस्य मनसा अशुवेगैश्च सह न न्यवर्ततेति संबन्धः ॥ ४९ ॥

५०] ति० टी०—उत्कटदिदृक्षावतो राज्ञस्तु सचिववचनान्निवृत्तिरित्याह—यमिच्छेदिति ॥ ५० ॥

रा० टी०—राजकीयपुरुषस्य राजसमीपगमने प्रयोजनं वदन्नाह—यमिति । पुनरायातं पुनरागमनविशिष्टं यं जनमिच्छेत्तं जनं दूरं नैवानुव्रजेत् इति वचोऽमात्या ऊचुः ॥ ५० ॥

गो० टी०—कालोचितकर्तव्यज्ञाः सचिवाः शास्त्रार्थकथनेन राजानं निवर्तयन्ति—यमिच्छेदिति ॥ ५० ॥

५१] ति० टी०—व्यवस्थितोऽवस्थितः ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०—तेषामिति । तेषाममात्यानां वचो निशम्य श्रुत्वा सभार्यो राजा व्यवस्थितः तत्रैवातिष्ठदित्यर्थः ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

गो० टी०—तेषामिति । व्यवस्थितः स्थितवान् ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

१] ति० टी०—इदानीं तत्प्रयाणनिमित्तः सर्वप्रजाशोक उच्यते—तस्मिन्निति । मातृवेष्टितपितृदेशेन कृताञ्जलौ निष्क्रामति नगरान्निर्गच्छति सति ॥ १ ॥

रा० टी०—सिंहावलोकनन्यायेन रामनिष्क्रमणकाले जातं वृत्तं वर्णयन्नाह—तस्मिन्निति । पुरुषव्याघ्रे परमपुरुषे रामे निष्क्रामति निर्गच्छति सति महान् आर्तशब्दो दीनः स्वनः संजज्ञे ॥ १ ॥

---

१ रामस्य स इति गो. पाठः । २ अशुवेगैश्चेति गो. पाठः । ३ आयान्तामिति गो. पाठः । ४ नैवेति रा. पाठः। ५ पन्नमिति गो. पाठः । ६ विनिर्गते इति गो. पाठः। ७ ऽयेति गो. पाठः ।

अनाथस्य जनस्यास्य दुर्बलस्य तपस्विनः । यो गतिः शरणं चासीत्स नाथः क्व नु गच्छति ॥ २ ॥
न क्रुध्यत्यभिशस्तोऽपि क्रोधनीयानि वर्जयन् । क्रुद्धान्प्रसादयन्सर्वान्समदुःखः क्व गच्छति ॥ ३ ॥
कौसल्यायां महातेजा यथा मातरि वर्तते । तथा यो वर्ततेऽस्मासु महात्मा क्व नु गच्छति ॥ ४ ॥
कैकेय्या क्लिश्यमानेन राज्ञा संचोदितो वनम् । परित्राता जनस्यास्य जगतः क्व नु गच्छति ॥ ५ ॥
अहो निश्चेतनो राजा जीवलोकस्य सँक्षयम् । धर्म्यं सत्यव्रतं रामं वनवासे प्रवत्स्यति ॥ ६ ॥
इति सर्वा महिष्यस्ता विवत्सा इव धेनवः । रुरुदुश्चैव दुःखार्ताः सस्वरं च विचुक्रुशुः ॥ ७ ॥
स तमन्तःपुरे घोरमार्तशब्दं महीपतिः । पुत्रशोकाभिसंतप्तः श्रुत्वा चासीत्सुदुःखितः ॥ ८ ॥
नाग्निहोत्राण्यहूयन्त [नापचन्गृहमेधिनः । अकुर्वन्न प्रजाः कार्यं] सूर्यश्चान्तरधीयत ।
व्यसृजन्कवलान्नागा गावो वत्सान्न पाययन् [पुत्रं प्रथमजं लब्ध्वा जननी नाभ्यनन्दत] ॥ ९ ॥

गो० टी०–तस्मिन्नित्यादि । कृताञ्जलौ मातृपरिवेष्टितं पितरमुद्दिश्य कृताञ्जलौ अन्तःपुरे स्त्रीणां दशरथेन समागतानामन्तःपुरवासिनीनां स्त्रीणाम् ॥ १ ॥

२] ति० टी०–तदेवाह–अनाथस्येति । तपस्विनः शोच्यस्य गतिः सकलदुःखवह्निहेतुः शरणं सर्वापद्भ्यो रक्षिता ॥ २ ॥

रा० टी०–शब्दस्वरूपं बोधयन्नाह–अनाथस्येति । अनाथस्य रक्षणरहितस्य रक्षाविषयकौदासीन्यविशिष्टदशरथस्येत्यर्थः दुर्बलस्य रामातिरिक्तबलरहितस्य अस्य जनस्य प्रजासमूहस्य च तपस्विनः नित्यतपोनिरतस्य वशिष्ठादिब्रह्मकुलस्य चेत्यर्थः यो रामः गतिः प्राप्यः शरणं चासीत् स नाथः अस्मन्मनोरथपूरकः क्व गच्छति किंच अनाथस्य दशरथस्य पालनोदासीनत्वेन रामातिरिक्तरक्षकरहितस्य अत एव दुर्बलस्य रामातिरिक्तबलरहितस्य अत एव तपस्विनः स्वरक्षा कथं स्यादिति विचारयतः अस्य जनस्य गतिः रामः क्व गच्छति शेषं पूर्ववत् ॥ २ ॥

गो० टी०–अनाथस्येति । तपस्विनः शोच्यस्य गम्यत इति गतिः प्राप्य इति यावत् । शरणं रक्षिता ' शरणं गृहरक्षित्रोः ' इत्यमरः ॥ २ ॥

३–४] ति० टी०–अभिशस्तो मिथ्याभिशंसनं प्रापितः क्रोधनीयानि प्रजाक्रोधकराणि ॥ ३ ॥ ४ ॥

रा० टी०–नेति । अभिशस्तः हास्यादिना केनचिद्रुरुक्तोऽपि क्रोधनीयानि क्रोधोत्पादकवचनानि वर्जयन् अश्रण्वन्निवेत्यर्थः क्रोधनीयानीति भावानीयान्तप्रकृतिकार्शआद्यजन्तं कुद्धान् कैश्चिद्धेतुभिःक्रोधविशिष्टान्प्रसादयन् तत्क्रोधदूरीकरणपूर्वकतत्प्रीतिमुत्पादयन् समदुःखः किंचिद्धेतुकात्समदुःखदर्शनमात्रेण तदुःखविशिष्टः सन् यो न कुध्यति स रामः क्व गच्छति ॥ ३ ॥

रा० टी०–कौसल्यायामिति । महात्मा रामः ॥ ४ ॥

गो० टी०–नेति । अभिशस्तः मिथ्याभिशंसनं प्रापितः क्वचिदित्यस्य न कुध्यतीत्यनेन संबन्धः ॥ ३–६ ॥

५] ति० टी०–वनं गन्तुमिति शेषः । अस्य जनस्येत्युक्त्वा किं विशिष्य कथनेन सर्वस्य जगतः परित्रातेति भगवत्स्वरूपज्ञायाः कस्याश्चिद्वचः ॥ ५ ॥

रा० टी०–कैकेय्येति । कैकेय्या सह क्लिश्यमानेन निश्चितवियोगहेतुकक्लेशविशिष्टेन राज्ञा अवनं वनस्थरक्षणं यथा स्यात्तथा संचोदितः प्रेरितः अस्य जनस्य चेतनस्येत्यर्थः जगतो जडस्येत्यर्थः परित्राता रक्षको रामः क्व गच्छति ॥ ५ ॥

६–८] ति० टी०–संक्षयमाधारत्वेन गृहभूतं वनवासे तन्निमित्तम् । प्रवत्स्यति प्रवासयति ॥ ६–८ ॥

रा० टी०–अहो इति । जीवलोकस्य चिदचितोः संक्षयं समीचीनमाश्रयं धर्म्यं नित्यं धर्मसंयुक्तमत एव सत्यव्रतं रामं वनवासे यत्प्रवत्स्यति प्रेषयति अतो राजा निश्चेतनः प्रशस्तनिश्चयाभाववान् अहो कष्टमेतत् ॥ ६ ॥

रा० टी०–इतीति । रुरुदुः विचुक्रुशुः हा रामेत्यूचुश्च ॥ ७ ॥

रा० टी०–स इति । स महीपतिः तमार्तशब्दं श्रुत्वा सुदुःखितश्चासीत् ॥ ८ ॥

गो० टी०–अहो इति । निश्चेतनः बुद्धिहीनः प्रवत्स्यति प्रवासयति ॥ ६–८ ॥

९] ति० टी०–नाह्रयन्ताग्निहोत्रिभिः रामदुःखादिति शेषः । अन्तरधीयत रामव्यसनात्तद्वंश्यतया दिवसशेषे सत्यप्यन्तर्हितोऽभूत् अकाले दुर्दिनमभूदिति भावः । व्यसृजंस्त्यक्तवन्तः नागा गजाः न पाययन्नापाययन् अडभाव आर्षः । दुर्दिनाद्युत्पाता राज्ञो रावणस्य च नाशसूचका इति बोध्यम् ॥ ९ ॥

रा० टी०–नेति । अग्निहोत्राणि न अह्रयन्त हवनकरणयोग्यैरिति शेषः । सूर्यः अन्तरधीयत अकालकदुर्दिनादिना तिरोऽभवदित्यर्थः । नाना हस्तिनः कम्बलान् स्वपृष्ठाच्छादनविशेषान् व्यसृजन् । गावः वत्सान् न पायन् अपाययन् आगमशास्त्रस्थानित्यत्वादहविरहः । एतेन सर्वेषां रामवियोगदुःखासहिष्णुत्वं सूचितम् ॥ ९ ॥

गो० टी०–नाग्निहोत्राणीति । नाह्रयन्त अग्नीनामन्त-

---

१ क्षम इति गो. रा. पाठः । २ कचिद्वत इति गो. पाठः । ३ संप्रियमिति गो. पाठः । ४ चरणद्वयमेतदधिकं गो. पाठे । ५ कम्बलानिति रा. पाठः । ६ अर्धमेतदधिकं गो. पाठे । ७ भावार्थकानीकर प्रत्ययान्त इति तात्पर्यम् ।

त्रिशङ्कुर्लोहिताङ्गश्च बृहस्पतिबुधावपि । दारुणाः सममभ्येत्य ग्रहाः सर्वे व्यवस्थिताः ॥ १० ॥
नक्षत्राणि गतार्चींषि ग्रहाश्च गततेजसः । विशाखाश्चैव सधूमाश्च नभसि प्रचकाशिरे ॥ ११ ॥
कालिकानिलवेगेन महोदधिरिवोत्थितः । रामे वनं प्रव्रजिते नगरं प्रचचाल तत् ॥ १२ ॥
दिशः पर्याकुलाः सर्वास्तिमिरेणेव संवृताः । न ग्रहो नाऽसिनक्षत्रं प्रचकाशे न किंचन ॥ १३ ॥
अकस्मान्नागरः सर्वो जनो दैन्यमुपागमत् । आहारे वा विहारे वा न कश्चिदकरोन्मनः ॥ १४ ॥
शोकपर्यायसंतप्तः सततं दीर्घमुच्छ्वसन् । अयोध्यायां जनः सर्वश्चुक्रोश जगतीपतिम् ॥ १५ ॥

र्णनाद्धोतॄणां व्यसनाचेति भावः । अन्तरधीयत निस्तेजस्कोऽभूदित्यर्थः ॥ ९ ॥

गो० टी०–व्यसृजन्निति । पाययन् अपायन् आगमशास्त्रानस्यानित्यत्वादडभावः ॥ १० ॥

१०] ति० टी०–त्रिशङ्कुर्दक्षिणदिक्स्थः लोहिताङ्गो भौमः बुधौ अन्ये सर्वे ग्रहाः शनिशुक्रादयः सोममभ्येत्य रात्रौ वक्रगत्या चन्द्रं प्राप्य दारुणाः क्रूरार्चिषः सन्तो व्यवस्थिताः॥१०॥

रा० टी०–इहस्थानां शोकं संवर्ण्य लोकान्तरस्थानामपि वर्णयन्नाह–त्रिशङ्कुरिति । त्रिशङ्कुः विश्वामित्रानिर्मितस्वर्गशेषस्थित इक्ष्वाकुवंश्यविशेषः लोहिताङ्गो मङ्गलः बृहस्पतिबुधावपि दारुणाः क्रूराः सर्वे ग्रहाः शनैश्चरादयश्च सोमं चन्द्रसमभ्येत्य रात्रौ वक्रगमनेन प्राप्य अव्यवस्थिताः चञ्चलचित्ता आसन्निति शेषः ॥ १० ॥

गो० टी०–त्रिशङ्कुरिति । त्रिशङ्कुरिक्ष्वाकुकुलकूटस्थः लोहिताङ्गोऽङ्गारकः बृहस्पतिबुधयोर्दारुणत्वं दारुणाङ्गारकसंयोगात् क्रूरस्थानगतत्वाद्वा त्रिशङ्कोर्ग्रहत्वाभावेऽपि छत्रिणो गच्छन्तीतिवद्व्यपदेशः त्रिशङ्कोः सोमप्राप्तिः ऋजुदेशत्वेन ज्ञेया । नन्वर्णे चतुर्दशे वर्षे पञ्चम्यां भरताग्रजः इति वक्ष्यमाणरीत्या तत्रैकदाचित्पुष्ययोगसंभावनया च पञ्चम्यामभिषेक इति सिद्धं तस्मिन्नेव च निर्गतः तथा च कर्कटकस्थे चन्द्रे कथं बुधसमागमः तस्य सूर्यसमीपवर्तित्वात् उच्यते प्राप्तिरत्र नैकराशिस्थितिः किंतु क्वचित् प्राप्तिः क्वचिद्दृष्टिरिति न दोषः वक्रगत्या समागम इत्यप्याहुः ॥ ११ ॥

११] ति० टी०–गतार्चींषि त्यक्तस्वाभाविककान्तीनि ग्रहा शन्यादयः विशाखा विमार्गस्थाः सधूमाश्च नभसि दृश्यन्ते ॥ ११ ॥

रा० टी०–नक्षत्राणीति । गतार्चींषि अनुद्भूततेजांसि नक्षत्राणि गततेजसः ग्रहादयश्च सधूमाः धूमसदृशाः नभसि चकाशिरे ददृशिरे ॥ ११ ॥

गो० टी०–नक्षत्राणीति । विशाखाः इक्ष्वाकुदेशनक्षत्रं धूमा इत्यनेन भाविराजविपत् सूच्यते ॥ १२ ॥

१२–१३] ति० टी०–कालिका मेघपङ्क्तिरनिलवेगेनाकाश उत्थित उदधिरिव दृश्यते नगरं प्रचचालेत्यनेन भूकम्पः ॥ १२ ॥ १३ ॥

रा० टी०–कालिकेति । कालिका मेघमाला अनिलवेगेनोत्थितो महोदधिः समुद्र इवोत्थिता एतेनाकालदृष्टया रामगमनं निवारयामीति तदभिप्रायः सूचितः अत एव तदयोध्यानगरं प्रचचाल रामेण सहागच्छदित्यर्थः । अत्र सत्त्वगुणवतां शोकः सार्वकालिकस्वसहायीभूतदशरथादिशोकदर्शनजनितः, तमोगुणवतां तु निश्चितरावणादिविध्वंसजनित इति विवेकः । किं च अत्र सत्त्वासत्त्वगुणवतां शोकः प्रातिभासिकरामौदासीन्यजनितः तेन रामस्वरूपस्य सर्वचित्तापहारकत्वं व्यक्तम् । 'मेघजाले च कालिका' इत्यमरः ॥ १२ ॥

गो० टी०–कालिकेति । कालिकानिलवेगेन मेघजालयुक्तप्रभञ्जनवेगेन 'मेघजाले च कालिका' इत्यमरः । प्रचचाल व्यसनातिशयात्प्रकम्पितमभूत् ॥ १३ ॥

रा० टी०–दिश इति । तिमिरेण संवृताः सर्वा दिशः तदभिमानिदेवताः पर्याकुला व्याकुलचित्ता आसन्निति शेषः अत एव ग्रहः शन्यादिः किंचन नैव प्रचकाशे नक्षत्रमश्विन्यादि च नैव प्रचकाशे ॥ १३ ॥

गो० टी०–दिश इति । ग्रहः जात्येकवचनं नवग्रहा इत्यर्थः । नक्षत्रम् अश्विन्यादि न किंचित् प्रचकाशे सप्तर्षिध्रुवादिकं न प्रचकास इत्यर्थः ॥ १४ ॥

१४] ति० टी०–अकस्माद्दैन्यहेतुकारणाभावेऽपि दैन्यं रामवियोगदैन्यादधिकं दैन्यम् ॥ १४ ॥

रा० टी०–अकस्मादिति । अकस्मादतर्कितरामवियोगादैन्यमुपागमत् अत एवाहारादौ मनो नाकरोत् ॥ १४ ॥

गो० टी०–अकस्मादिति । अकस्मात् रामप्रव्राजनव्यतिरिक्तबन्धुविश्लेषणादिकारणं विनेत्यर्थः ॥ १५ ॥

१५] ति० टी०–शोकेन रामवियोगजेन पर्यायसंतप्तः पुनः पुनःसंतप्तः प्रतिज्ञापालनरूपधर्मवत्यपि कोप उत्पातः॥१५॥

रा० टी०–शोकेति । शोकपर्यायसंतप्तः शोकस्य परम्परयातितापं प्राप्तः अयोध्यायां विद्यमानः सर्वो रामप्रेषणाभिप्रायानभिज्ञो जनः जगतीपतिं चुकोप किं च जगतीपतिं प्राप्य मन्थरायै चुकोप अत एव जगतीपतेः कर्मत्वम् ॥ १५ ॥

१ त्रिति गो. पाठः । २ नापीति गो. वापीति रा. पाठः । ३ शुशोचेति गो. चुकोपेति रा. पाठः ।

बाष्पपर्याकुलमुखो राजमार्गगतो जनः । न हृष्टो लभ्यते कश्चित्सर्वः शोकपरायणः ॥ १६ ॥
न वाति पवनः शीतो न शशी सौम्यदर्शनः । न सूर्यस्तपते लोकं सर्वं पर्याकुलं जगत् ॥ १७ ॥
अनर्थिनः सुताः स्त्रीणां भर्तारो भ्रातरस्तथा । सर्वे सर्वं परित्यज्य राममेवान्वचिन्तयन् ॥ १८ ॥
ये तु रामस्य सुहृदः सर्वे ते मूढचेतसः । शोकभारेण चाक्रान्ताः शयनं [1]नैव भेजिरे ॥ १९ ॥
ततस्त्वयोध्या रहिता महात्मना पुरंदरेणेव मही सपर्वता ।
चचाल घोरं भयशोकदीपिता सनागयोधाश्वगणा ननाद च ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ।

प्रजविना रथेन निर्गते रामे तदन्तरमुल्लिलिङ्गिषुर्दशरथो रथरजसोऽप्यदर्शनाद्विगुणितखेदः संमुमूर्छ । पतन्तं तमवष्टभ्धुमागतां कैकेयीं निर्भर्त्स्य स्पर्शेऽपि न्यषेधीत् । कौसल्या तमुत्थाप्य न्यवर्तयत् । भृत्यास्तं कौसल्यागृहं निन्युः । रामानुशोचनेन सीदतो राज्ञः पार्श्वोपविष्टायाः कौसल्याया बहुविधो विलापः ।

यावत्तु निर्यतस्तस्य रजोरूपमदृश्यत । नैवेक्ष्वाकुवरस्तावत्संजहारात्मचक्षुषी ॥ १ ॥

गो० टी०–शोकेति । शोकपर्यायसंतप्तः शोकपरम्परासंतप्तः ॥ १६–१८ ॥

१६–१७] ति० टी०–पूर्वं तु केषांचित्तत्त्वज्ञानां हर्ष आसीत्, संप्रति तु सर्वोऽप्यदृष्टः ॥ १६ ॥ १७ ॥

रा० टी०–बाष्पेति । राजमार्गगतः सर्वो जनः शोकपरायणः आसीदिति शेषः अत एव बाष्पपर्याकुलमुखः आसीदत एव कश्चिद्धृष्टो न लभ्यते ॥ १६ ॥

रा० टी०–नेति । सर्वं जगत् पर्याकुलं व्याकुलचित्तमासीदिति शेषः ॥ १७ ॥

१८–१९] ति० टी०–सुता अनर्थिनोऽनपेक्षिणः मातापित्रोरिति शेषः स्त्रीणां भर्तारोऽनर्थिनः भ्रातरः भ्रातृणामनर्थिनः इति शेषः राममेवान्वचिन्तयन् तदध्यानेन सर्वो जनः सर्वत्र विरक्तोऽभूदित्याशयः ॥ १८ ॥ १९ ॥

रा० टी०–अनर्थिन इति । सुताः मातापित्रोः अनर्थिनः मातापित्रर्थसाधनरहिताः भर्तारः पतयः स्त्रीणामनर्थिनः भ्रातरो भ्रातृणामनर्थिनः आसन् । मातापित्रोरिति भ्रातृणामिति च आसीदिति शेषः । तत्र हेतुः सर्वं स्वस्वकर्तव्यं परित्यज्य राममेव अन्वचिन्तयन् ॥ १८ ॥

गो० टी०–अनर्थिन इति । सुताः स्त्रीणामनर्थिनः मातृणां स्तन्यं नापेक्षन्त इत्यर्थः । भर्तारः स्त्रीणामनर्थिनः भ्रातरः अनर्थिनः अन्योन्यमिति शेषः । सर्वे अनुरक्ताः सर्वे ॥ १९ ॥

रा० टी०–ये इति । शोकभारेण आक्रान्ता व्याप्ता अत एव मूढचेतसः ये सर्वे रामस्य सुहृदः ते तु शयनं निद्रां नैव भेजिरे प्राप्तुरित्यर्थः ॥ १९ ॥

गो० टी०–ये त्विति । शयनं मूर्च्छाशयनमित्यर्थः । ये त्वित्यनेन पूर्वेभ्यो वैलक्षण्यमुच्यते चक्रवर्तिगतिमनुमेने श्रीकौसल्या मनुकाशासनमकरोत् तथा न भवन्ति सुहृदः तेषामेकोऽपि न किंचिदकार्षीत् रामस्य सुहृदः पित्रोरपि गोप्यं रामो येभ्यः प्रकाशयति तादृशाः सुशोभनहृदयाः सुहृदः आत्मनं त्यक्त्वा राममेव रक्षन्त इत्यर्थः । सर्वे त इति तेषु कश्चिदप्यन्यादृशो नास्तीति भावः । यदि सुहृदस्तर्हि पादौ संगृह्य रामो निवर्त्यतामित्यत्राह–मूढचेतसः प्रसन्नबुद्धिभिः कर्तव्यं कथं बुद्धिहीनाः कुर्वन्तीति भावः। ज्ञानध्वंशस्य हेतुमाह–शोकेति। पर्वतेनेव शोकभारेणाक्रान्ताः शयनं न जहुः पर्वताक्रान्ताः कथमुत्तिष्ठेयुरिति भावः । तदा पारवश्यकाले न तु स्वयं स्वबुद्धया शयाना श्रुतिष्ठन्ति ॥ २० ॥

२०] ति० टी०–पुरंदरेण रहिता सपर्वता समेरुर्यथा मही चलति तस्य त्रिलोकीपतित्वात् तथा रामेण रहितायोध्या चचाल रक्षकाभावात् ननाद च दुःखाच्चक्रन्देत्यर्थः ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०–तत इति । महात्मना रामेण रहिता प्रातीतिकवियोगं प्राप्ता चचाल रामेण सहाप्रकटरूपान्तरेणेति शेषः ननाद च ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०–तत इति । पुरन्दरेणेव महीति त्रैलोक्याधिपतित्वादुक्तम्, यद्वा पुरन्दरेण गोत्रभिदा हेतुना पर्वतसहिता मही यथा चलति तद्वक्षकरामविश्लेषेण गजाश्वसहितायोध्या भयेन चचालेत्यर्थः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

१] ति० टी०–निर्यतस्तस्य रामस्य संबन्धि रजसो रूपं रथ्याधूलेः स्वरूपं यावत्तेनादृश्यत तावदात्मनश्चक्षुषी न संजहार इदं रामरथोद्धतं रज इति प्रीत्या तत्पश्यन्नेवासीदिति भावः ॥ १ ॥

१ न नुत्तस्थेति गो. पाठः । २ पीडितेति गो. पाठः ।

यावद्राजा प्रियं पुत्रं पश्यत्यत्यन्तधार्मिकम् । तावद्वृत्तवर्धतेवास्य धरण्यां[1] पुत्रदर्शने ॥ २ ॥
न पश्यति रजोऽप्यस्य यदा रामस्य भूमिपः । तदार्तश्च विषण्णश्च पपात धरणीतले ॥ ३ ॥
तस्य दक्षिणमन्वागात्कौसल्या बाहुमङ्गना । पैरं[2] चास्यान्वगात्पार्श्वं कैकेयी सा सुमध्यमा ॥ ४ ॥
तां नयेन च संपन्नो धर्मेण विनयेन च । उवाच राजा कैकेयीं समीक्ष्य व्यथितेन्द्रियः ॥ ५ ॥
कैकेयि मामकाङ्गानि[4] मा स्पाक्षीः पापनिश्चये । नहि त्वां द्रष्टुमिच्छामि न भार्या न च बान्धवी ॥ ६ ॥
ये च त्वामनुजीवन्ति नाहं तेषां न ते मम । केवलार्थपरां हि त्वां त्यक्तधर्मां त्यजाम्यहम् ॥ ७ ॥

रा० टी०–राजवृत्तं वर्णयन्नाह–यावदिति । निर्यतो निर्गच्छतो रामरथस्य रजोरूपं धूलीस्वरूपं यावत्कालमदृश्यत तावत्कालमिक्ष्वाकुवरो दशरथः आत्मचक्षुषी नैव संजहार अकर्षयत् ॥ १ ॥

गो० टी०–यावत्त्वित्यादि । निर्यतः निर्गच्छतः तस्य रामस्य संबन्धि रजोरूपं रजःस्वरूपं यावदृश्यत तावन्न संजहार न निवर्तितवान् ॥ १ ॥

२] ति० टी०–यावत्प्रियं पुत्रं राजा पश्यति रथधूलिदर्शनद्वारेति शेषः । तावत्पुत्रदर्शने तन्निमित्तं धरण्यां स्थितोऽस्य देहो व्यवर्धतेव उत्थाय स्थित एवाभूदित्यर्थः ॥ २ ॥

रा० टी०–यावद्राजेति । यावत्प्रियं पुत्रं पश्यति रथ रजोवलोकनद्वारेति शेषः तावत्कालं धरण्यां स्थितमस्य शरीरमिति शेषः । पुत्रदर्शने पुत्रदर्शनार्थं व्यवर्धत इव उत्थायोत्थायालोकतेत्यर्थः ॥ २ ॥

गो० टी०–यावद्राजेति । पश्यति रजोद्वारेणेति शेषः पुत्रदर्शने पुत्रदर्शननिमित्तं धरण्यां रजो व्यवर्धत मन्निमित्तकेन पुत्रदर्शनेन राजा कंचित्कालमाप्यायितो भवेदिति मत्वेव रजो व्यवर्धतेत्यर्थः, अथवा अस्य देहो व्यवर्धत पुत्रदर्शनायोत्थाय स्थित इत्यर्थः ॥ २ ॥

३] ति० टी०–रजसोऽप्यदर्शने तच्छरीरं पतितमभूदित्याह–नेति । रामस्य रजः रामरथोद्धतं रज इत्यर्थः ॥ ३ ॥

रा० टी०–नेति । अस्य रामरथस्य रजोऽपि यदा न पश्यति नापश्यत् तदा आर्तो दुःखितः अत एव विषण्णः उदासीनो भूमिपः पपात ॥ ३ ॥

गो० टी०–न पश्यतीति । आर्तः पीडितशरीरः विषण्णः दुःखितः ॥ ३ ॥

४] ति० टी०–तस्येति । पतितमुत्थाप्य तस्य दक्षिणं बाहुं धृत्वा कौसल्यान्वगात्स्वपुरं प्रति गम्यमानमन्वगात्सहैव ससार कैकेयी त्वस्य वामं पार्श्वमेव केवलमन्वगात् तथात्वं च राज्ञोऽस्यां परमवैरस्यात् ॥ ४ ॥

रा० टी०–तस्येति । दक्षिणं बाहुं कौसल्या अन्वगात्प्राप्नोत् उत्थापनार्थमिति शेषः परं भिन्नं वाममित्यर्थः पार्श्वं बाहुमित्यर्थः कैकेयी अन्वगात् एतेन तत्तद्बाहुसमीपे एव तत्तत्स्थितिरिति फलितम् ॥ ४ ॥

गो० टी०–तस्येति । बाहुमन्वगात् उद्धरणार्थमिति भावः । भरतप्रिया प्रियभरता पार्श्वमित्यनेन कौसल्यावद्बाहुं नालम्बितवतीति गम्यते ॥ ४ ॥

५] ति० टी०–तदेवाह–तामिति ॥ ५ ॥

रा० टी०–तामिति । नयादिना संपन्नो राजा तां कैकेयीमुवाच ॥ ५ ॥

गो० टी०–तामिति । नयेन नीत्या विनयेन सदाचारेण ॥ ५ ॥

६–७] ति० टी०–न च बान्धवी बन्धूनां स्नेहपात्रदास्यादिरूपापि नेत्यर्थः अण्णन्तत्वान्ङीप् ॥ ६ ॥ ७ ॥

रा० टी०–तद्वचनमेवाह–कैकेयीत्यादिभिः । पापनिश्चये पापाय पापिराक्षसविध्वंसाय निश्चयो यस्याः तत्संबोधनं हे कैकेयि! मामकाङ्गानि भार्या परमशोभावती त्वं मा स्पाक्षीः तत्र हेतुः यतस्त्वं बान्धवी अस्मत्प्रतिज्ञाविषयीभूतत्वादस्मदभिप्रेतत्वेन देवाद्युपकारकत्वेन चाभिषेकप्रतिज्ञायाः पूर्वदिनेषु अभिषेकोत्तरदिनेषु वावश्यं याचनीयस्यापि वरस्य अकालकयाचनेन बन्धुहितकारिणी न अतः त्वां द्रष्टुं नैवेच्छामि त्वां त्वद्विधां स्त्रियं च द्रष्टुं नेच्छामि एतेन त्वदर्शनविषयकेच्छाभावः अकालिकवरयाचनरूपापराधेन अन्यदर्शनविषयकेच्छाभावः भरप्रतिज्ञं मां कथयिष्यन्तीति लज्जया च प्रादुर्भूत इति सूचितं तेन लोकान्तरगमनेच्छा ममास्तीति व्यञ्जितम् । अयमन्यपर्यायः सर्वादिपठितस्त्वशब्दः जात्यभिप्रायेणैकवचनम् । अत एव ये अनुजीवन्ति तेषामहं न पालयितास्मीति शेषः अत एव ते मम न पाल्या इति शेषः । मामकाङ्गानि मा स्पाक्षीरित्यनेन स्पर्शने त्यागविरोधिस्नेहातिशयो भविष्यतीति बोधितं तेन कौशल्यास्पर्शोऽपि निवारित इति सूचितमत एव कौशल्या न्यवर्तत इति वक्ष्यमाणं सङ्गच्छते तेषामित्यत्र कर्मणः शेषत्वविवक्षया षष्ठी । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०–कैकेयीति । न भार्या न च बान्धवी त्वमिति शेषः । न च बान्धवी पत्नीत्वसंबन्धोऽपि नास्तीत्यर्थः । अण्णन्तत्वान्ङीप् ॥ ६ ॥

रा० टी०–ननु मन्थरोक्त्या भ्रान्तत्वादेवमाचरितं मयेत्यत आह–केवलेति । केवलार्थपरामहमतीव राज्ञी प्रियेति स्वार्थसाधिकामत एव त्यक्तधर्मां त्यक्तः त्याजितः धर्मः प्रारम्भविषयीभूतकार्यसमापनरूपमर्यादा यया तां त्वामेवंविधक्रूरकर्मकारिकात्वेन सर्वतो विलक्षणां मन्थरामहं त्यजामि त्याजयामि संमतिदानाधिकारतः सा बहिष्कार्येति तात्पर्यम् । अर्धं पृथक् ॥ ७ ॥

गो० टी०–न केवलं त्वयि संबन्धाभावः त्वत्संबन्धिष्वपि मम संबन्धो नास्तीत्याह–ये चेति । नाहं तेषामिति प्रस्मरिति शेषः न ते मम शेषभूता इत्यर्थः ॥ ७ ॥

१ धरण्येति रा. पाठः । २ वाममिति गो. पाठः । ३ भरतप्रियेति गो. पाठः । ४ मा ममाङ्गानि स्पाक्षीस्त्वं दुष्टचारिणीति गो. पाठः ।

अगृह्णां यच्च ते पाणिमग्निं पर्यणयं च यत् । अनुजानामि तत्सर्वमस्मिँल्लोके परत्र च ॥ ८ ॥
भरतश्चेत्प्रतीतः स्याद्राज्यं प्राप्यैतदव्ययम् । यन्मे स दद्यात्पितृत्वं मा मां तद्दत्तमागमत् ॥ ९ ॥
अथ रेणुसमुद्ध्वस्तं समुत्थाप्य नराधिपम् । न्यवर्तत तदा देवी कौसल्या शोककर्शिता ॥ १० ॥
हत्वेव ब्राह्मणं कामात्स्पृष्ट्वाग्निमिव पाणिना । अन्वतप्यत धर्मात्मा पुत्रं संचिन्त्य राघवम् ॥ ११ ॥
निवृत्त्यैव निवृत्त्यैव सीदतो रथवर्त्मसु । राज्ञो नातिबभौ रूपं ग्रस्तस्यांशुमतो यथा ॥ १२ ॥
विललाप स दुःखार्तः प्रियं पुत्रमनुस्मरन् । नगरान्तमनुप्राप्तं बुद्ध्वा पुत्रमथाब्रवीत् ॥ १३ ॥
वाहनानां च मुख्यानां वहतां तं ममात्मजम् । पदानि पथि दृश्यन्ते स महात्मा न दृश्यते ॥ १४ ॥

८] ति० टी०—न केवलमैहिकव्यवहारस्य त्यागः किंतु पारलौकिकस्यापीत्याह—अगृह्णामिति । यच्च ते पाणिं पर्यगृह्णाम्, यच्च त्वामग्निं पर्यणयं प्रदक्षिणमनयम्, अग्निहोत्रसंबन्धं वा कार्यम् तत्सर्वमस्मिंल्लोके पाणिग्रहणसाध्यक्रीडादि परलोकेऽग्निहोत्रादिसाध्यस्वर्गादि चानुजानामि त्यजामि ॥ ८ ॥

रा० टी०—नन्विमामहं त्यजामि पाणिगृहीतीत्यागस्यानौचित्यात्त्वं तु मां मा त्यजेत्यत आह—अगृह्णामिति । अस्मिंल्लोके ते पाणिं यदहमगृह्णां यच्चाहं त्वामग्निं पर्यणयं प्रदक्षिणं प्रापं तत्सर्वं परत्र भिन्ने लोके अनुजानामि स्मरामि मत्स्मरणेनैव भवतीनां कल्याणं भवितेति तात्पर्यं तेनानौचित्यं न स्यादिति व्यञ्जितं तेनेह स्थातुमशक्तोऽहमिति सूचितम् ॥ ८ ॥

गो० टी०—अग्निसाक्षिकमूढा कथं न भार्या स्यामित्यत्राह—अगृह्णामिति । पर्यणयं प्रदक्षिणमनयम् अनुजानामि परित्यजामीत्यर्थः । इह लोके परत्र च ऐहिकमामुष्मिकं च सर्वं त्वत्संबन्धेनागतं त्यजेयमित्यर्थः ॥ ८ ॥

९] ति० टी०—नन्वु मम त्यागेऽपि मत्पुत्रादेः कथं त्यागः ' ये च त्वामनुजीवन्ति ' इत्यादिनोक्तस्तत्राह—भरत इति । यदि त्वया प्रापितं राज्यं प्राप्य भरतः प्रतीतः स्यात्तुष्टः स्यात्, तर्हि मे मरणानन्तरं स भरतः पित्रर्थं पितृत्वप्रयुक्तश्राद्धार्थं यद्यात्तत्तद्दत्तं मां मा गमत् मा प्राप्नोत्वित्यर्थः । अन्यथा तु तं न त्यजामीत्यर्थः । कतकस्तु—' अनुजानामि ' इत्यादिसार्धश्लोक एकं वाक्यं तत्पूर्वार्धे त्यजामीत्यस्यानुकर्षः तत्तृतीयार्धे ' यन्मे स दद्यात्पितरं मामतद्दत्तमागमत् ' इति पाठः स दद्यादिति चावर्तते भरतस्त्वया प्रापितं राज्यं प्राप्य प्रतीतो विवेकवान्सन्यत्प्राप्तं राज्यं तत्स पित्रर्थं पितुर्मम प्रीतिसंपादनाय यदि दद्यात्त्यजेत्, मां चातदत्तं न कृतं तस्मै दत्तं दानं राज्यस्य येन तादृशं मां प्रीत्या पूर्ववदागमत्प्राप्नुयाच्चेत्, तदा यत्स मे दद्यादस्मिंल्लोके विहारशय्याभोजनादि परत्र च परलोके पिण्डदानादि तत्सर्वमनुजानाम्यङ्गीकरोमि अन्यथा तं त्यजाम्येवेत्यर्थ इत्याह ॥ ९ ॥

रा० टी०—नन्वु भरतादीनां शोकातिशयः स्यादित्यत आह—भरत इति । चेद्यदि भरतः प्रतीतः मद्वचनविषयकविश्वासवान्स्यात्तदा अव्ययं विघ्नरहितमेतद्रामराज्यं प्राप्य पाल्यत्वेन स्वीकृत्य पित्रर्थं पितृदेयधनादिकं यन्मे मदुद्देशेन दद्यात्तद्दत्तं भरतसमर्पितं मा मां मया सर्वसंपत्त्या युक्तं मामागमत्प्राप्ता लुङुपात्तभूतस्याविवक्षा ॥ ९ ॥

गो० टी०—भरत इति । प्रतीतः प्रमुदित इत्यर्थः । पित्रर्थं यदुदकादिकं दद्यात् तद्दत्तं मां मागमत् नोपतिष्ठेदित्यर्थः ॥ ९ ॥

१०] ति० टी०—रेणुसमुध्वस्तं भुवि लुण्ठनाद्रजोव्याप्तं न्यवर्तत राज्ञा सहेति शेषः ॥ १० ॥

रा० टी०—अथेति । अथ राजवचनश्रवणानन्तरकाले रेणुसमुध्वस्तं पृथिव्यां पतनेन तद्रजो व्याप्तं नराधिपं समुत्थाप्य शोककर्शिता देवी कौशल्या न्यवर्तत राजस्पर्शान्निवृत्ते अत्र कौशल्यायाः प्राधान्यात्तन्मात्रोक्तिः ॥ १० ॥

गो० टी०—अथेति । न्यवर्तत तेन सहेति शेषः ॥ १० ॥

११] ति० टी०—यथा पाणिनाग्निं स्पृष्ट्वा स्वकर्तृकदोषेण तत्पीडयानुतप्तो भवति तथा स्वकृतमेतद्दुःखमित्यनुतापः ॥ ११ ॥

रा० टी०—राज्ञः शोकं वर्णयन्नाह—हत्वेति । कामात्स्वेच्छातः ब्राह्मणं हत्वा संताडयेव पाणिना अग्निं स्पृष्ट्वेव राघवं स्वप्रेषितरामं संचिन्त्य संस्मृत्य धर्मात्मा राजा अन्वतप्यत खेदं प्राप्नोत्प्रसिद्धं च हनस्ताडनार्थकत्वं मालाहत इव द्विप इत्यादौ ॥ ११ ॥

गो० टी०—हत्वेति । तापसं तापसवेषधारिणम् ॥ ११ ॥

१२] ति० टी०—निवृत्त्य पुनःपुनरित्यर्थः । रथवर्त्मसु सीदतो रथमार्गदर्शने क्लिश्यतः ग्रस्तस्य राहुणा ॥ १२ ॥

रा० टी०—निवृत्त्येति । निवृत्त्य विचारेण शोकात्पुनः पुनर्बहिरागत्यापि सीदतः पुनः पुनः खेदं प्राप्नुवतो राज्ञः रथवर्त्मसु गतरामरथमार्गेषु विद्यमानं रूपं शरीरं नातिबभौ तत्र दृष्टान्तः ग्रस्तस्य राहुणा स्पृष्टस्य अंशुमतः सूर्यादेः रूपमिव ॥ १२ ॥

गो० टी०—निवृत्त्येति । ग्रस्तस्य राहुग्रस्तस्य ॥ १२–१४ ॥

१३–१४] ति० टी०—आत्मानं नगरान्तं नगरसमीपं प्राप्तं बुद्ध्वा पुत्रं चाप्राप्तं बुद्ध्याब्रवीदिति कतकः, यद्वा पुत्रं नगरान्तं नगरबाह्यं देशं प्राप्तं मत्वेत्यर्थः ॥ १३ ॥ १४ ॥

१ इदमिति गो. पाठः । २ प्रीत्यर्थमिति गो. पाठः । ३ तमिति गो. पाठः । ४ तापसमिति गो. पाठः ।

यः सुखेनोपधानेषु शेते चन्दनरूषितः । वीज्यमानो महार्हाभिः स्त्रीभिर्मम सुतोत्तमः ॥ १५ ॥
स नूनं क्वचिदेवाद्य वृक्षमूलमुपाश्रितः । काष्ठं वा यदि वाश्मानमुपधाय शयिष्यते ॥ १६ ॥
उत्थास्यति च मेदिन्याः कृपणः पांसुगुण्ठितः । विनिःश्वसन्प्रस्रवणात्करेणूनामिवर्षभः ॥ १७ ॥
द्रक्ष्यन्ति नूनं पुरुषा दीर्घबाहुं वनेचराः । राममुत्थाय गच्छन्तं लोकनाथमनाथवत् ॥ १८ ॥
सा नूनं जनकस्येष्टा सुता सुखसदोचिता । कण्टकाक्रमणक्लान्ता वनमद्य गमिष्यति ॥ १९ ॥
अनभिज्ञा वनानां सा नूनं भयमुपैष्यति । श्वपदानर्दितं श्रुत्वा गम्भीरं रोमहर्षणम् ॥ २० ॥
सकामा भव कैकेयि विधवा राज्यमावस । नहि तं पुरुषव्याघ्रं विना जीवितुमुत्सहे ॥ २१ ॥
इत्येवं विलपन्राजा जनौघेनाभिसंवृतः । अपस्नात इवारिष्टं प्रविवेश गृहोत्तमम् ॥ २२ ॥

रा० टी०–विललापेति । नगरान्तं नगरमर्यादायाः परं प्राप्तं पुत्रं बुद्ध्वा पुत्रं स्मरन्सन्विललाप रुरोद अथ अब्रवीत् ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–वाहनानामित्यादिभिः । वाहनानामश्वानां मध्ये मुख्यानां ममात्मजं वहतामश्वानां पदानि दृश्यन्ते स तु न दृश्यते ॥ १४ ॥

१५] ति० टी०–महार्हाभिरुत्तमरूपालंकारवतीभिः॥१५॥

१६] ति० टी०–क्वचिन्नदीतीरादौ अश्मा पाषाणः॥१६॥

रा० टी०–य इति । चन्दनरूषितः चन्दनैर्भूषितः महार्हाभिः अतिसत्कारकर्त्रीभिः स्त्रीभिः सीताज्ञापिततत्परिचारिकाभिः वीज्यमानः यः सुतोत्तमः उपधानेषु उत्तमोपबर्हणविशिष्टशय्यासु शेते स अद्य क्वचिद्वृक्षमूलमुपाश्रितः प्राप्तः काष्ठमश्मानं प्रस्तरं वा उपाधाय शिरोधोभागे कृत्वा शयिष्यते । श्लोकद्वयमेकान्वयि शेते इत्यत्र "वर्तमानसामीप्य–" इति भूते लट्१५–१६

गो० टी०–य इति । वीज्यमानः चामरव्यजनादिभिरिति शेषः स्त्रीभिः परिचारिकाभिः ॥ १५ ॥ १६ ॥

१७–१८] ति० टी०–बन्दिस्तुत्यादिराहित्येन कृपण इव प्रस्रवणाद्गिरिप्रस्थादिप्रदेशात् ॥ १७ ॥ १८ ॥

रा० टी०–उत्थास्यतीति । पांशुगुण्ठितः शयनभूमिधूलिव्याप्तशरीरः कृपणः बन्दीगणादिस्तुत्यादिरहितत्वेन कृपण इव प्रतीयमानः रामः विनिःश्वसन्पित्रादिवियोगजनितशोकहेतुकोच्छ्वासं प्राप्नुवन्सन्मेदिन्याः शयनभूमेः उत्थास्यति तत्र दृष्टान्तं प्रस्रवणात्प्रदेशविशेषात्करेणूनामृषभ इव । यदि च प्रस्रवणशब्दार्थः प्रस्रवणं वृक्षपतितकठोरफलादि तदतति प्राप्नोतीत्यर्थः तदा प्रस्रवणादिति रामाविशेषणम् । च शब्द इवार्थकः ॥ १७ ॥

गो० टी०–उत्थास्यतीति । प्रस्रवणात् निर्झरात् तत्समीपादित्यर्थः 'उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः' इत्यमरः ॥ १७ ॥

रा० टी०–द्रक्ष्यन्तीति । लोकनाथं सर्वलोकाधीशमुत्थाय गच्छन्तं राममनाथवन्नाथप्रतियोगिकभेदविशिष्टमिव नाथत्वाभाववन्तमिव वा वनेचराः द्रक्ष्यन्ति ॥ १८ ॥

गो०टी०–द्रक्ष्यन्तीति । अनाथवत् गच्छन्तमित्यन्वयः१८

१९] ति० टी०–सुखसदोचिता सुखस्य सदा उचिता तादृश्यपि कण्टकैश्चाक्रमणेन पादविक्षेपेण क्लान्ता पीडिता ॥ १९ ॥

रा० टी०–सेति । सुखसदोचिता सुखसंबन्धिसार्वकालिकौचित्यविशिष्टा किंच सुखसदः सुखप्राप्तेः आसमन्ताद्भावेनोचिता योग्या जनकस्येष्टा प्रिया सुता सा सीता कण्टकाक्रमणक्लान्ता कण्टकेषु यदाक्रमणं पादविक्षेपः तेन क्लान्ता खेदं प्राप्ता सती वनं गमिष्यति ॥ १९ ॥

गो० टी०–सेति । सुखसदोचिता सुखस्य सदोचिता कण्टकेष्वाक्रमणं पदविक्षेपः ॥ १९ ॥

२०] ति० टी०–श्वापदानां व्याघ्रादीनामासमन्तादर्दितम् ॥ २० ॥

रा० टी०–अनभिज्ञेति । वनानामनभिज्ञा वनविषयकविशेषज्ञानाभाववती सा श्वापदानर्दितं व्याघ्रादिबहुशब्दं श्रुत्वा भयमुपैष्यति ॥ २० ॥

गो० टी०–अनभिज्ञेति । श्वापदानर्दितं श्वापदाः व्याघ्रादिहिंस्रपशवस्तेषामानर्दितं शब्दम् ॥ २० ॥ २१ ॥

२१] ति० टी०–सकामा भवेति वक्रोक्त्यानपकारिणां दुःखदानात्ते कामपूर्तिर्न कदापीति भावः । विधवात्वे हेतुः–नहीत्यादि ॥ २१ ॥

रा० टी०–भरतागमनात्पूर्वं राजाभावप्रयुक्तसंभावितराज्योपद्रवाभावाय कैकेयीमुपदिशन्नाह–सकामेति । विधवा विशेषेण धं राज्यपोषणं वाति अमात्यादिद्वारा प्रापयति सा राज्यपालनेच्छावतीत्यर्थः, किंच विगतः धवः भीतिहेतुकप्रकम्पो यस्याः निर्भयेत्यर्थः, किंच धुनोति स्वतेजसा रिपून्प्रकम्पयति सा त्वं सकामा कस्य सुखस्य आमः प्रापणं तेन सहिता प्रजासुखप्राप्तिकर्त्रीत्यर्थः भव अत एव राज्यमावस आवासय । ननु भवता पाल्यत एवेति किमनेनोपदेशेनेत्यत आह–पुरुषव्याघ्रं परमपुरुषं तं रामं विना जीवितुं प्रजाः पालयितुं नैवोत्सहे ॥ २१ ॥

२२] ति० टी०–अपस्नातो मृतस्नानस्नातः अरिष्टं कश्मलमयम् ॥ २२ ॥

रा० टी०–उपसंहरन्नाह–इतीति । अपस्नातः अपगतं स्नातं स्नानं यस्य अकृतस्नान इत्यर्थः, किंच अपस्नानमपस्नाः स्नानाभाव इत्यर्थः भावे क्विप् तामतति प्राप्नोतीति अपस्नातः पचाद्यच् । किंच पानं पः पानार्थकपाधातोः घञर्थे कः जल-

१ कुण्ठित इति गो. पाठः । २ ऽऽक्रान्तेति गो. पाठः । ३ पुरोत्तममिति गो. रा. पाठः ।

शून्यचत्वरवेश्मान्तां संवृतापणवेदिकाम् । क्रान्तदुर्बलदुःखार्तां नात्याकीर्णमहापथाम् ॥ २३ ॥
तामवेक्ष्य पुरीं सर्वां राममेवानुचिन्तयन् । विलपन्प्राविशद्राजा गृहं सूर्य इवाम्बुदम् ॥ २४ ॥
महाह्रदमिवाक्षोभ्यं सुपर्णेन हृतोरगम् । रामेण रहितं वेश्म वैदेह्या लक्ष्मणेन च ॥ २५ ॥
अथ गद्गदशब्दस्तु विलपन्[2]वसुधाधिपः । उवाच मृदु मन्दार्थं वचनं दीनमस्वरम् ॥ २६ ॥
कौसल्याया गृहं शीघ्रं राममातुर्नयन्तु माम् । नह्यन्यत्र [3]ममाश्वासो हृदयस्य भविष्यति ॥ २७ ॥

पानादिरित्यर्थः तस्याभावोऽपः अपे ज्ञातो निरतः अपज्ञातः ज्ञाधातोर्निरतार्थत्वं तु मन्त्रज्ञात इत्यादौ प्रसिद्धम् । तथा च अकृतभोजनादिरित्यर्थः संपन्नः, किंच पानं पः रक्षणार्थकपाधातोः कः तस्याभावोऽपः तत्र ज्ञातो निरतः अपज्ञातः इतःप्रभृति पृथिवीराज्यं न करिष्यामीति प्रतिज्ञातवानिति भावः, किंच अं विष्णुं पाति रक्षतीत्यपः अप्रकटसाकेतस्थो रघुनाथः कर्तरि कः तत्र ज्ञातः निरत इत्यर्थः अप्रकटसाकेतस्थरघुनाथलालने कृतमना इत्यर्थः । किंच न पीयेते इत्यपौ अश्रुप्रस्वेदौ ताभ्यां ज्ञातः प्रस्वेदाश्रुक्लिन्नशरीरक इत्यर्थः राजा आरिष्टं रामवियोगिनामतिहिंसकमिव पुरोत्तममयोध्यां प्रविवेश अपज्ञातो मृतज्ञात इति कोशघटकीभूतापज्ञातशब्दस्तु अपोपसर्गपूर्वकज्ञाप्रकृतिकनिष्ठान्त इति नात्र तद्विषयतां एतेन अपज्ञातो मृतज्ञात इति भट्टभूषणाद्युक्तिश्चिन्त्या अमाङ्गलिकत्वेन तस्येहासंभवात् ॥ २२ ॥

गो० टी०–इतीति । अपज्ञातः मृतज्ञातः 'अपज्ञातो मृतज्ञातः' इत्यमरः । अरिष्टमशुभम् 'अरिष्टे तु शुभाशुभे' इत्यमरः । ननु राममनुगम्य पुनः पुरप्रवेशसमये अपज्ञातोऽरिष्टमिति कथमश्लीलमुक्तं रुत्यं दशरथो हि तदानीं नूनं भयमुपैष्यतीत्यादिना सीताविपत्तिं शङ्कमानस्तद्वारा रामविपत्तिं तन्मुखेन स्वस्यापि विनाशं शङ्कितवान् अत एव सीताद्वारा रामविपत्तिशङ्कया सकामा भव कैकेयीत्युक्तवान् स्वविनाशाभिप्रायेण विधवा राज्यमावसेत्युपदर्शितवांश्च तेनापज्ञात इवेत्युक्तिः राजबुद्ध्यनुसारादुचितैव ॥ २२ ॥

२३–२४] ति० टी०–तदेवाह–शून्येति । शून्या निर्मनुष्याश्चत्वरा गृहप्रान्तभागा वेश्मान्ता वेश्ममध्यभागाश्च यस्यां सर्वजनानां रामपृष्ठे गतत्वात् । संवृतापणवेदिकां संवृता आवृताः पण्यस्थापनवेदिका यस्यां सा । 'देवताम्' इति पाठे पिहितापणदेवतागृहामित्यर्थः । क्रान्ता गन्तुमशक्ताः अत एव दुर्बला दुःखार्ता रामवियोगपीडार्ता यस्यां नात्याकीर्णोऽत्यन्तसंमर्दरहितो महापथो यस्यां ताम् ॥ २३ ॥ २४ ॥

रा० टी०–पुरीस्वरूपं बोधयन्नाह–शून्येति । शून्याः जनरहिताः चत्वरवेश्मान्ताः यस्यां सा ताम् । तत्र चत्वराश्चतुष्पथाः वेश्मानि गृहाणि अन्तास्तद्वाराणि अत एव संवृतापणवेदिकां संवृताः आच्छादिताः आपणवेदिकाः आपणस्थानि यस्याः सा तां क्रान्तदुर्बलदुःखार्तां क्रान्ताः हतहर्षाः अत एव दुर्बलाः तत्र हेतुः दुःखार्तां तादृशजनवतीं कर्मधारयादर्शआद्यच् अत एव नात्याकीर्णमहापथां नात्याकीर्णाः जनैर्नातिव्याप्ताः महापथाः राजद्वारमार्गाः यस्याः सा तां सर्वां पुरीमवेक्ष्य राममेवानुचिन्तयन्नत एव विलपन् राजा अम्बुदं मेघमण्डलं सूर्य इव प्राविशत् अभूतोपमैषा यदि च अम्बूनि जलानि मेघेभ्यो ददातीति अम्बुदः समुद्रः तदा तु नाभूतोपमा । श्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–शून्येत्यादि । शून्यचत्वरवेश्मान्तां निर्जनचतुष्पथगृहद्वारां संवृतापणदेवतां पिहितापणदेवतागृहद्वारां क्रान्तदुर्बलदुःखार्तां चिन्तातिरेकेण क्रान्ता रामविरहेण निःसत्त्वाः दुःखार्ताश्च जनाः यस्यां तथा अनेन संचारक्षमाः सर्वे राममनुगता इति द्योत्यते नात्याकीर्णमहापथां क्वचित् क्वचित् दृश्यमानजनयुक्तमहापथामित्यर्थः अवान्तरमार्गास्तु केवलं निर्जना इति भावः ॥ २३ ॥ २४ ॥

२५] ति० टी०–सुपर्णेन हृतोरगं महाह्रदमिवेति रिपूणां निर्भयप्रवेशद्योतकम् ॥ २५ ॥

रा० टी०–पुर्याः रिप्वाक्रमणयोग्यतां बोधयन्नाह–महाह्रदमिति । सुपर्णेन गरुडेन हृतोरगं हृता उरगा यस्मादत एव अक्षोभ्यं क्षोभाकारणं महाह्रदमिव रामादिना रहितं वेश्मालक्ष्यदिति शेषः ॥ २५ ॥

गो० टी०–कीदृशं प्राविशदित्यपेक्षायामाह–महाह्रदमिति। अक्षोभ्यं सोरगतया प्राविशदित्यनुषङ्गः ॥ २५ ॥

२६] ति० टी०–मृदु मन्दोच्चारणात् । अत एव मन्दार्थमबुद्धार्थं दीनं शोच्यम् अस्वरं शुद्धकण्ठध्वनिरहितम् ॥ २६ ॥

रा० टी०–अथेति । अथ अतो हेतोः गद्गदशब्दः स्खलद्वाग्विशिष्टशब्दविशिष्टः वसुधाधिपः मन्दार्थं मन्दो गमनं अर्थः प्रयोजनं यस्मिंस्तत् अस्वरं नीचैरुच्चारितत्वेनाल्पकं दीनं वचनं मृदु यथा स्यात्तथा उवाच ॥ २६ ॥

गो० टी०–अथेति । गद्गदः शब्दो यस्य स तथोक्तः मृदु उपांशुः मन्दार्थमल्पार्थं शब्दप्रपञ्चवदित्यर्थः । अस्वरं कण्ठस्वररहितम् ॥ २६ ॥

२७] ति० टी०–नयन्तु ये केचिदत्र मनुष्या इति शेषः। अन्यत्र क्वयन्तगृहे आश्वासः खेदापगमः ॥ २७ ॥

रा० टी०–तदेवाह–कौसल्याया इति । राममातुः कौशल्यायाः गृहं शीघ्रं मां नयन्तु द्वारपालका इति शेषः तत्प्रयो-

---

१ देवतामिति गो. पाठः । २ मनुजाधिप इति गो. पाठः । ३ समाश्वास इति रा. पाठः।

इति ब्रुवन्तं राजानमनयन्द्वारदर्शिनः । कौसल्याया गृहं तत्र न्यवेश्यत विनीतवत् ॥ २८ ॥
ततस्तत्र प्रविष्टस्य कौसल्याया निवेशनम् । अधिरुह्यापि शयनं बभूव लुलितं मनः ॥ २९ ॥
पुत्रद्वयविहीनं च स्नुषया च विवर्जितम् । अपश्यद्भवनं राजा नष्टचन्द्रमिवाम्बरम् ॥ ३० ॥
तच्च दृष्ट्वा महाराजो भुजमुद्यम्य वीर्यवान् । उच्चैःस्वरेण प्राक्रोशद्धा राम विजहासि नौ॥ ३१ ॥
सुखिता बत तं कालं जीविष्यन्ति नरोत्तमाः । परिष्वजन्तो ये रामं द्रक्ष्यन्ति पुनरागतम् ॥ ३२ ॥
अथ रात्र्यां प्रपन्नायां कालरात्र्यामिवात्मनः । अर्धरात्रे दशरथः कौसल्यामिदमब्रवीत् ॥ ३३ ॥
न त्वां पश्यामि कौसल्ये साधु मां पाणिना स्पृश । रामं मेऽनुगता दृष्टिरद्यापि न निवर्तते ॥ ३४ ॥

जनमाह-अन्यत्र हृदयस्य मनसः आश्वासः स्वास्थ्यं न भविष्यति ॥ २७ ॥

गो० टी०-कौसल्याया इति । नयन्तु द्वारदर्शिन इति शेषः अन्यत्र तद्व्यतिरिक्तस्त्रीगृहे ॥ २७ ॥

२८] ति० टी०-द्वारदर्शिनो वेत्रिणः कौसल्याया गृहमनयन् तत्र गृहे तैर्विनीतवत्पर्यङ्के न्यवेश्यत राजेति शेषः यद्वा तन्निवेशनोत्तरं राजा विनीतवदधोमुख आसेति शेषः ॥२८॥

रा० टी०-इतीति । द्वारदर्शिनः द्वारपालकाः कौशल्यायाः गृहं विनीतवद्भवन्तं राजानमनयन् तत्र कौशल्यागृहपर्यङ्के न्यवेश्यत तैः राजेति शेषः॥ २८ ॥

गो० टी०-इतीति । द्वारदर्शिनः मार्गप्रदर्शकाः द्वारपालकाः न्यवेश्यत निवेशितः विनीतवत् विनीतार्हम् ॥ २८ ॥

२९-३०] ति० टी०-कौसल्याया निवेशनं प्रविष्टस्य स्वापस्थानभूतं शयनं मञ्चमारुह्यापि लुलितं कलुषं बभूव ॥ २९॥३० ॥

रा० टी०-तत इति । ततः वियोगजनितदुःखस्यातिशयत्वाद्धेतोः कौशल्याया निवेशनं गृहं प्रविष्टस्य शयनं शय्यामधिरुह्य वियमानस्यापि तस्य राज्ञो मनः लुलितं चञ्चलं बभूव ॥ २९ ॥

गो० टी०-तत इति । लुलितं कलुषितमिति यावत् ॥२९॥

रा० टी०-पुत्रेति । नष्टचन्द्रं चन्द्ररहितम् अम्बरमाकाशमिव ॥ ३० ॥

गो० टी०-पुत्रेति । नष्टचन्द्रमुपलक्षणमेतत् चन्द्रनक्षत्रताराहीनमित्यर्थः ॥ ३० ॥ ३१ ॥

३१] ति० टी०-नौ आवां मातापितरावित्यर्थः ॥३१ ॥

रा० टी०-तच्चेति । तद्भवनं दृष्ट्वा हा राम नौ आवां मातापितरौ विजहासि त्यजसि इत्युच्चैः स्वरेण प्राक्रोशत् ॥ ३१ ॥

३२] ति० टी०-ये बत तं कालं तावत्कालं रामपरायणतया लुलितकालपर्यन्तं जीविष्यन्ति पुनरागतं रामं परिष्वजन्तो रामं द्रक्ष्यन्ति ते सुखिता नरोत्तमाश्च तेन स्वस्याधमत्वादि व्यङ्ग्यम् ॥ ३२ ॥

रा० टी०-सुखिता इति । ये नरोत्तमाः तं रामप्रापकं कालं जीविष्यन्ति इह तिष्ठन्तीत्यर्थः ते पुनरागतं रामं परिष्वजन्तः अत एव सुखिताः सन्तः द्रक्ष्यन्ति एतेनाहमत्र न स्थास्यामीति सूचितम् ॥ ३२ ॥

गो० टी०-सुखिता इति । तं कालं तस्मिन् काले तावत्कालमिति वा ॥ ३२ ॥

३३] ति० टी०-अथ कौसल्यागृहप्रवेशानन्तरमात्मनः कालरात्र्यामिव संहाररात्र्यामिव रात्र्यां प्रपन्नायां मध्यं प्राप्तायाम् ॥ ३३ ॥

रा० टी०-अथेति । आत्मनः कालरात्र्यां संहारकारकनिशीव प्रपन्नायां प्राप्तायां सत्यामर्धरात्रे इदमब्रवीत् ॥ ३३ ॥

गो० टी०-अथेति । कालरात्र्यां संहाररात्र्यां प्रपन्नायां प्राप्तायाम् ॥ ३३ ॥

३४] ति० टी०-मा स्पृश स्वसत्ताज्ञापनार्थमिति भावः । कौसल्यादर्शने हेतुमाह-राममिति । काव्यलिङ्गमत्रालंकारः दृष्टेर्दर्शनशक्ते रामविषये समनस्काया विलीनत्वात्पदार्थान्तरं न स्फुरतीति व्यङ्ग्यं परं गुणीभूतम् ॥ ३४ ॥

रा० टी०-तद्वचनमेवाह-न त्वामिति । हे कौशल्ये! त्वामहं न पश्यामि द्रष्टुमिच्छामि अतो मां पाणिना अस्पृश स्पर्शं मा कुरु दर्शनेच्छाभावे हेतुः अनुगता प्राप्ता । अ इति निषेधार्थकमव्ययं प्रक्षिप्यते ॥ ३४ ॥

गो० टी०-राममिति । राममनुगता दृष्टिः सम्प्रद्गृहीतं पुनः किं निवर्तते मे दृष्टिः षष्टिवर्षसहस्रकृतोपवासादिक निवर्तते अद्यापि न निवर्तते तदर्शनाभावेऽपि तन्मातृत्वदर्शनं कर्तुमुचिते कालेऽपि न निवर्तते । न त्वापश्यामि कौसल्ये रामदर्शनं विना कैकेयीसुखदर्शनपापानिष्टत्तये त्वन्मुखं द्रष्टुमुत्सुकोऽस्मि तदपि न लब्धं साधु मां पाणिना स्पृश नित्यानुमेयानीन्द्रियाणि कार्यकल्पानि रूपग्रहणाभावात् चक्षुरिन्द्रियगतमित्यवगतं त्वगिन्द्रियमस्ति न वेति संप्रति जानीहि साधु कैकेय्या कृतसंकेतो रामं निर्यापितवान् अथ किंचिदभिनयं करोतीति मन्ये यः अयमज्ञानादेवं कृतवानिति समनस्कतया स्पृश यद्वा मां पाणिना स्पृश राममातृत्वात् तव पाणिस्पर्शनं रामस्पर्शनमिति भावः ॥ ३४ ॥

---

१ तस्येति गो. रा. पाठः। २ चुक्रोश हा राघव जहासि मामिति गो. पाठः।३ एतच्छ्लोकगतार्धयोर्व्यत्यासः गो. पाठे।४ त्वेति गो.पाठः। ५ मेति गो. पाठः।

तं राममेवानुविचिन्तयन्तं समीक्ष्य देवी शयने नरेन्द्रम् ।
उपोपविश्याधिकमार्तरूपा विनिःश्वसन्तं[1] विललाप कृच्छ्रम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ।

भैक्ष्यादप्यत्र रामो गृहे वसति चेन्मे वरं कामकारः किंतु भुजङ्गीभूतकैकेय्या निर्वासितो मे रामः कदाऽऽगन्तेति तद्भावभाविहृदया कौसल्याऽऽह—ततः समीक्ष्येति तद्भावभाविहृदया कौसल्याऽऽहनिशं बहुशो विलपति।

ततः समीक्ष्य शयने सन्नं शोकेन पार्थिवम् । कौसल्या पुत्रशोकार्ता तमुवाच महीपतिम् ॥ १ ॥
राघवे नरशार्दूले विषं मुक्त्वा हि[2] जिह्मगा । विचरिष्यति कैकेयी निर्मुक्तेव हि पन्नगी ॥ २ ॥
विवास्य रामं सुभगा लब्धकामा समाहिता । त्रासयिष्यति मां भूयो दुष्टाहिरिव वेश्मनि ॥ ३ ॥
अथास्मिन्नगरे रामश्चरन्भैक्षं गृहे वसेत् । कामकारो वरं दातुमपि दासं ममात्मजम् ॥ ४ ॥

३५] ति० टी०—विनिःश्वसन्तं राजानमुपोपविश्य शयनसमीप उपविश्य ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रा० टी०—तमिति । राममेवानुविचिन्तयन्तमत एव कृच्छ्रं यथा स्यात्तथाऽधिकं विनिःश्वसन्तं नरेन्द्रं समीक्ष्य आर्तरूपा देवी कौशल्या उपोपविश्य समीपे स्थित्वा विललाप ॥३५॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

गो० टी०—तमिति । उपोपविश्य शयनसमीपे उपविश्येत्यर्थः ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१] ति० टी०—सन्नं खिन्नम् ॥ १ ॥

रा० टी०—कौशल्यावचनं वर्णयितुमाह—तत इति । शोकेन सन्नं शोककर्तृकप्राप्तिमन्तं पार्थिवं समीक्ष्य उवाच ॥१॥

गो० टी०—तत इत्यादि ॥ १ ॥

२–३] ति० टी०—अहिजिह्मगा सर्पवत्कुटिलगतिः कुटिलचरित्रा । ' जिह्मताम् ' इति पाठे जिह्मतां कौटिल्यरूपं विषं मुक्त्वेत्यर्थः निर्मुक्ता त्यक्तकञ्चुका ॥ २ ॥ ३ ॥

रा० टी०—तद्वचनमेवाह—राघवे इत्यादिभिः । हे नरशार्दूल ! जिह्मगा जिह्मं कौटिल्यं गाते स्वस्वामिन्यां प्रापयति सा कैकेयी केकयीदासी मन्थरा विषं मुक्त्वा त्यक्त्वा संदश्येत्यर्थः निर्मुक्ता पन्नगी सर्पिणीव राघवे रघुवंशप्रभूते त्वयि विषं खेदं मुक्त्वा संस्थाप्य विचरिष्यति यथा केनचित्पालिता सर्पिणी स्वपालकं संदश्यानन्तरं तेन त्यक्ता विचरति तथा स्वस्वामिनि दुःखं प्रापय्य संमतिदानाधिकारात्यक्ता विचरिष्यतीत्यर्थः ॥ २ ॥

रा० टी०—नन्वत्यक्ताधिकाराया मन्थरायाः विचरणेन किमित्यत आह—विवास्येति । रामं विवास्य सुभगा सुभमहो अस्याः केकय्यतिवशेति प्रशंसाजनितातिदीप्तिं गच्छति प्राप्नोति सा अत एव लब्धकामा प्राप्तस्वप्रतिष्ठारूपमनोरथा अत एव समाहिता एकाग्रचित्ता सती मन्थरा मां भूयोऽधिकं त्रासयिष्यति तत्र दृष्टान्तः वेश्मनि गृहे दुष्टाहिरिव यथा कस्मिंश्चित्कार्येऽधिकाराभावेऽपि सर्पस्य स्थितिरेवानर्थकारिणी तथेयमप्यधिकानर्थकारिणी भवितेत्यर्थः तेन गृहान्निःसारयितव्या सेति सूचितम् ॥ ३ ॥

गो० टी०—राघव इति । विजिह्मतां विषं कौटिल्यरूपं विषं राघवे उप्त्वा निक्षिप्य निर्मुक्ता मुक्तकञ्चुका ' निर्मुक्तो मुक्तकञ्चुकः ' इत्यमरः अनेन क्रौर्यातिशय उक्तः ॥ २ ॥ ३ ॥

४] ति० टी०—भवतु भरतराज्यवरणम्, अथापीहैव नगरे रामो भैक्षं चरन्गृहे वसेदिति यद्यनया दत्तं स्यात्तं वरं दातुं ममापि कामकार इष्टाचरणम् अप्यात्मजं राममस्या दासमपि दातुं वरं मम कामकार इष्टमेव तद्वियोगशोकाभावात् एवं चैवं वरयाचनं ममातित्रासनार्थमेवेति व्यङ्ग्यम् ॥४॥

रा० टी०—अथेति । अथ मन्थरानिःसारणानन्तरं वरम् अस्मदीप्सिततरामाभिषेचनं दातुं निवर्तयितुमस्मिन्नगरे यः कामकारः इच्छावानत एव केकय्या मन्थरया हेतुभूतया दासं देनातिदानेन आसो अतिप्रकाशो यस्य तं ममात्मजं स्थानादाज्यासनात्पातयित्वा अभिषेकतो बहिष्कृत्येत्यर्थः प्रविद्धः अस्मद्दुःखदाता अत एव अरामः रामविरोधी सः मन्थरातुकूलज्ञातिरित्यर्थः भैक्ष्यं भिक्षान्नं यथेष्टतः चरन्भक्षयन्सन् गृहे स्ववेश्मनि अत्रसेन्न तिष्ठेत् । नन्वत्रनिःसारणे तदुपदिष्टतत्स्वामिन्या अभिनिःसारणं स्यादित्यतो दृष्टान्तेन तत्स्वामिन्या निःसारणाभावं बोधयन्नाह—आहिताग्निना रक्षसां भागः धान्यसंलग्नतुषादिरिव यथाग्निहोत्रिणा यतुषादिसंबन्धेन

१ श्वसन्तीति गो. पाठः । २ विजिह्मतामिति गो. पाठः । ३ अथ स्मेति गो. पाठः ।

पातयित्वा तु कैकेय्या रामं स्थानाद्यथेष्टतः । प्रैविद्धो रक्षसां भागः पर्वणीवाहिताग्निना ॥ ५ ॥
नागराजगतिर्वीरो महाबाहुर्धनुर्धरः । वनमाविशते नूनं सभार्यः सहलक्ष्मणः ॥ ६ ॥
वने त्वदृष्टदुःखानां [3]कैकेय्यनुमते त्वया । त्यक्तानां वनवासाय कान्यावस्था भविष्यति ॥ ७ ॥
ते रत्नहीनास्तरुणाः फलकाले विवासिताः । कथं वत्स्यन्ति कृपणाः फलमूलैः कृताशनाः ॥ ८ ॥
अपीदानीं स कालः स्यान्मम शोकक्षयः शिवः । सहभार्यं सहभ्रात्रा पश्येयमिह राघवम् ॥ ९ ॥
श्रुत्वैवोपस्थितौ वीरौ कदायोध्या भविष्यति । यशस्विनी हृष्टजना सूच्छ्रितध्वजमालिनी ॥ १० ॥
कदा प्रेक्ष्य नरव्याघ्रावरण्यात्पुनरागतौ । भविष्यति पुरी हृष्टा समुद्र इव पर्वणि ॥ ११ ॥
कदायोध्यां महाबाहुः पुरीं वीरः प्रवेक्ष्यति । पुरस्कृत्य रथे सीतां वृषभो गोवधूमिव ॥ १२ ॥
कदा प्राणिसहस्राणि राजमार्गे ममात्मजौ । लाजैरवकरिष्यन्ति प्रविशन्तावरिन्दमौ ॥ १३ ॥

धान्यस्य राक्षसभागत्वं भवति तत्तुषादिरेव त्यज्यते तथा यत्संबन्धेन राज्याः कैकेय्या बुद्धिसंचलनं तत्तदेव त्वयापि त्यज्यतामित्यर्थः । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–अथ स्मेति । अथापि भरते राज्यदानस्यावश्यकत्वेऽपि रामो नगरे भैक्षं चरन् सन् गृहे वसेत् वने विवासनं किमर्थं राज्याभावेऽपि ममात्मजं भरतस्य दासं दातुं कामकारः इच्छा वरं वनवासाच्छ्रेष्ठतमः ॥ ४ ॥

५–६] ति० टी०–कैकेय्या कन्यां रामं स्थानात्स्वथानाद्यथेष्टतः स्वेच्छानुसारेण पातयित्वा प्रभ्रश्य पर्वण्याहिताग्निना रक्षसां भागस्तुषादिरूपो विप्रविद्धः प्रक्षिप्तः इतःपरं तदर्शनमसंभावितं रक्षोभिर्नाशादिति व्यङ्ग्यम् ॥ ५–६ ॥

गो० टी०–पातयित्वेति । रामं स्वस्थानात् यथेष्टतः स्वेच्छया अमर्यादया पातयित्वा त्वया रामाय प्रदेयो राज्यभागः कैकेय्या प्रदिष्टः कथमिव आहिताग्निना पर्वणि देवेभ्यो देयः हविर्भागः पुरोडाशैकदेशः रक्षसामिव सर्वथानुचितं त्वया कृतमिति भावः ॥ ५ ॥ ६ ॥

रा० टी०–राजकर्तव्यं संप्रार्थ्य शोचन्ती आह–नागराजेत्यादिभिः । धनुर्धरो रामः वनमाविशते ॥ ६ ॥

७] ति० टी०–कैकेय्यनुमते स्थितेनेति शेषः कान्यावस्था रक्षोभक्षणातिरिक्ता, न कापि जीवनं सर्वथा न संभावितमिति भावः ॥ ७ ॥

रा० टी०–वने इति । त्वया अन्यया मन्थरया कैकेय्यनुमते संमतौ सति वनवासाय त्यक्तानां रामादीनामन्या वनवासावस्थातो भिन्ना कावस्था दुःखमित्यर्थः भविष्यति इदमेवाधिकं दुःखमित्यर्थः ॥ ७ ॥

गो० टी०–वन इति । वने अदृष्टदुःखानाम् अदृष्टवनदुःखानामित्यर्थः । कैकेय्यानुमते कैकेय्या अनुमते स्थितेनेति शेषः । सवर्णदीर्घ आर्षः त्यक्तानां सीतारामलक्ष्मणानाम् ॥७॥

८] ति० टी०–रत्नहीना उत्तमवस्तुहीनाः तरुणौ च तरुणी च तरुणाः फलकाले युवावस्थत्वेन राज्यभोगकाले ॥८॥

रा० टी०–ते इति । फलकाले अत्यभ्युदयसमये विवासिताः अत एव रत्नहीना उत्तमवस्त्रभूषणादिरहिताः अत एव कृपणास्तरुणास्ते फलमूलैः कृताशनाः कृतभोजनाः सन्तः कथं वत्स्यन्ति 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः ॥ ८ ॥

गो० टी०–त इति । रत्नहीनाः श्रेष्ठवस्तुहीनाः 'रत्नं स्वजातौ श्रेष्ठेऽपि' इत्यमरः प्रवरशय्यासनादिहीना इत्यर्थः । तरुणी च तरुणौ च तरुणाः "पुमान् स्त्रिया" इत्येकशेषः । फलकाले फलभोगकाले ॥ ८ ॥

९–११] ति० टी०–शोकक्षयः शोकस्य क्षयो यस्मिन्स अपीदानीं स्यात् इदानीमेव स्यात्स काल इत्यर्थः । अपीदानीमिति लोकोक्तौ वा ॥ ९–११ ॥

रा० टी०–अपीति । यस्मिन्काले सभार्यं भार्यासहितं सह भ्रात्रा भ्रात्रा सहितं राघवमिह अयोध्यायां पश्येयं सः शिवः अतिकल्याणसंपादकः शोकक्षयः शोकस्य क्षयो विध्वंसो यस्मिन्स कालः इदानीमस्मिन्दिने अपि स्यात् । संभावनार्थकोऽपिः ॥९॥

गो० टी०–अपीति । स कालः वनात्प्रत्यागमनकालः अपिः संभावनायाम् इदानीमद्य दिने स्यात् स्यात् किमित्यर्थः । शोकक्षयः शोकक्षयकरः यत् यस्मिन् काले ॥ ९ ॥

रा० टी०–श्रुत्वेति । वीरौ रामलक्ष्मणौ उपस्थितौ प्राप्तौ श्रुत्वेव हृष्टजना हर्षविशिष्टजनविशिष्टा अत एव सूच्छ्रितध्वजमालिनी समुत्थितध्वजसमूहविशिष्टा यशस्विनी अयोध्या कदा भविष्यति ॥ १० ॥

गो० टी०–सुप्त्वेति । उपस्थितौ नगरसमीपमागतौ ॥१०॥

रा० टी०–कदेति । नरव्याघ्रौ परमपुरुषौ ॥ ११ ॥

गो० टी०–कदेति । पुरी पौरजनः ॥ ११–१३ ॥

१२–१३] ति० टी०–गोरूपां वधूम् ॥ १२ ॥ १३ ॥

रा० टी०–कदायोध्यामिति । वीरो रामः गोवधूं यज्ञपत्नीं वृषभः यज्ञ इव रथे सीतां पुरस्कृत्य अग्रे कृत्वा अयोध्यां कदा प्रवेक्ष्यति 'गौर्नाऽऽदित्ये बलीवर्दे किरणक्रतुभेदयोः' इति कोशः । वृषभशब्दार्थस्तु वृषेण यागकर्तृणामभीष्टदानेन भादीप्तिर्यस्य सः किंच गोवधूं सूर्यपत्नीं वृषभः वृषा जलवृष्टिकर्त्री भा किरणो यस्य स सूर्य इव ॥ १२ ॥

---

१ प्रविद्ध इति गो. पाठः । २ गजेति गो. पाठः । ३ कैकेय्येति गो. पाठः । ४ का न्ववस्थेति गो. पाठः । ५ सभार्यं यदिति गो.रा.पाठः । ६ सुप्त्वैवेति गो. पाठः । ७ अयोध्यां गमिष्यत इति गो. पाठः । ८ नन्दिष्यतीति गो. पाठः ।

प्रविशन्तौ कदायोध्यां द्रक्ष्यामि शुभकुण्डलौ । उदग्रायुधनिस्त्रिंशौ सगृङ्गाविव पर्वतौ ॥ १४ ॥
कदा सुमनसः कन्या द्विजातीनां फलानि च । प्रदिशन्तः पुरीं हृष्टाः करिष्यन्ति प्रदक्षिणम् ॥ १५ ॥
कदा परिणतो बुद्ध्या वयसा चामरप्रभः । अभ्युपैष्यति धर्मात्मा सुवर्ष इव लालयन् ॥ १६ ॥
निःसंशयं मया मन्ये पुरा वीर कदर्यया । पातुकामेषु वत्सेषु मातॄणां शातिताः स्तनाः ॥ १७ ॥
साहं गौरिव सिंहेन विवत्सा वत्सला कृता । कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात् ॥ १८ ॥
नहि तावद्गुणैर्जुष्टं सर्वशास्त्रविशारदम् । एकपुत्रा विना पुत्रमहं जीवितुमुत्सहे ॥ १९ ॥
नहि मे जीविते किंचित्सामर्थ्यमिह कल्प्यते । अपश्यन्त्याः प्रियं पुत्रं लक्ष्मणं च महाबलम् ॥ २० ॥

रा० टी०—कदा प्राणीति । प्राणिसहस्राणि असंख्येयजनाः ॥ १३ ॥

१४] ति० टी०—उदग्रायुधनिस्त्रिंशौ आयुधं धनुरादि निस्त्रिंशः खड्गः ॥ १४ ॥

रा० टी०—प्रविशन्ताविति । उदग्रायुधनिस्त्रिंशौ उदग्राणि अत्युत्कृष्टानि आयुधानि धनुरादीनि निस्त्रिंशाः खड्गाश्च ययोस्तौ अत एव शृङ्गौ शृङ्गसहितौ पर्वताविव अयोध्यां प्रविशन्तौ कदा द्रक्ष्यामि 'तूण्यां खड्गे तु निस्त्रिंशः' इत्यमरः ॥ १४ ॥

गो० टी०—प्रविशन्ताविति । उदग्रायुधनिस्त्रिंशौ आयुधशब्देनात्र धनुरुच्यते निस्त्रिंशः खड्गः 'खड्गे तु निस्त्रिंशः' इत्यमरः ॥ १४ ॥

१५] ति० टी०—कन्याद्विजार्तीनामिति द्वन्द्वः तत्र कन्यानां सुमनसः पुष्पाणि द्विजानां फलानि च प्रदिशन्तः प्रगृह्णन्तो हृष्टा भूत्वा सकलपौरजनोत्सवाय कदा पुरीं प्रदक्षिणं करिष्यन्ति ॥ १५ ॥

रा० टी०—कदेति । सुमनसो देवाः द्विजातीनां कन्याश्च हृष्टाः फलानि प्रदिशन्तः रामं समर्पयन्तश्च सन्तः पुरीमयोध्यां प्रदक्षिणं कदा करिष्यन्ति प्रदिशन्त इत्यादौ "पुमान्स्त्रिया" इत्येकशेषः 'प्रदिशन्त्यः' इति भूषणसंमतपाठे तु सुमनस इत्यत्र लिङ्गविपरिणामेनान्वयः ॥ १५ ॥

गो० टी०—कदेति । द्विजातीनां ब्राह्मणानां कन्याः सुमनसः पुष्पाणि फलानि च प्रदिशन्त्यः सत्यः पुरीं कदा प्रदक्षिणं करिष्यन्ति अयमौत्तराणां मङ्गलाचारः ॥ १५ ॥

१६] ति० टी०—बुद्ध्या परिणतो ज्ञानेन वृद्धः वयसा चामरप्रभस्तरुणतर इव देवानां सदा तरुणत्वात् सुवर्ष इव कालिकः कालिकसृष्टिरिव जनाँल्लालयन् । 'त्रिवर्ष इव लालयन्' इति पाठे मामिति शेषः 'मां लालन्' इति पाठे प्रतिक्रीडां कुर्वन्नित्यर्थः ॥ १६ ॥

रा० टी०—कदा परिणत इति । बुद्ध्या वयसा च अपरिणतः परिणामरहितः सर्वकालमपरिणतज्ञानवयोविशिष्ट इत्यर्थः । अत एव अमरप्रभः अमरान्देवानपि प्रभाति प्रकाशयति स धर्मात्मा रामः त्रिवर्षः त्रैवार्षिक इव लालयन्स्मार्क लालनाबुद्धिमुत्पादयन्कदाभ्युपैष्यति । अन्तर्भावितण्यर्थो भातिः ॥ १६ ॥

गो० टी०—कदेति । बुद्ध्या परिणतः ज्ञानवृद्ध इत्यर्थः । वयसा चामरप्रभः पञ्चविंशतिवर्ष इत्यर्थः । अमरा हि सदा पञ्चविंशतिवर्षाः लालयन् लालनां जनयन् ॥ १६ ॥

१७] ति० टी०—कदर्यया क्षुद्राचारया पातुं कामो येषां तेषु पातुकामेषु शातिताः कृताः ॥ १७ ॥

रा० टी०—वियोगदुःखस्यासह्यत्वेन वियोगहेतुविषयकनिश्चयाभावानवगमाद्धेत्वाभासं प्रकल्प्याह—निःसंशयमिति । हे वीर! कदर्यया मया वत्सेषु पातुकामेषु सत्सु मातॄणां तज्जनिकानां स्तनाः निःसंशयं यथा स्यात्तथा शातिताः छिन्नाः इत्यहं मन्ये ॥ १७ ॥

गो० टी०—निःसंशयमिति । कदर्यया क्षुद्रया पातुकामेषु स्तन्यपानकामेषु शातिताः वियोजिता इति यावत् ॥ १७ ॥

१८] ति० टी०—वत्सला पुत्रवत्सला सिंहेन गौरिव त्वया विवत्सा कृता उक्तपातकेनेति शेषः । एवं कैकेय्या सिंह्या बालवत्सा गौरिव बलाद्विवत्सा कृता ॥ १८ ॥

रा० टी०—सेति । हे पुरुषव्याघ्र! वत्सलापुत्रविषयकातिवात्सल्यविशिष्टा बालवत्सा बालवत्सविशिष्टा गौरिव याहं सा सिंहेनेव कैकेय्या ककयीदास्या मन्थरया बलाद्बलाद्विवत्सा प्रियवत्सरहिता गौरिव कृता ॥ १८ ॥

गो० टी०—साहमिति । बालवत्सा साहं सिंहेन गौरिव कैकेय्या बलाद्विवत्सा कृतेति संबन्धः ॥ १८ ॥

१९] ति० टी०—अतः—नहीति । गुणैः सर्वकल्याणगुणैः ॥ १९ ॥

रा० टी०—नेति । गुणैः समातिशयरहितसौशील्यवात्सल्यादिभिर्जुष्टं सेवितं पुत्रं विना एकपुत्राहं जीवितुं पालयितुं न उत्सहे ॥ १९ ॥

गो० टी०—नहीति । तावद्गुणैर्जुष्टं यावन्तः कल्याणगुणाः सन्ति तावद्भिर्गुणैर्युक्तमित्यर्थः ॥ १९ ॥

२०] ति० टी०—कल्प्यते दैवेनेति शेषः 'कल्पते' इति पाठे विधत इत्यर्थः ॥ २० ॥

रा० टी०—नत्वत्साहाभावेऽपि यथाकथंचित्पालनं युक्तमेवे-

१ प्रदिशन्त्य इति गो. पाठः । २ धर्मस्त्रिवर्ष इति गो. त्रिवर्ष इति रा. पाठः । ३ महाबाहुमिति गो. पाठः ।

अयं हि मां दीपयतेऽद्य वह्निस्तनूजशोकप्रभवो महाहितः ।
महीमिमां रश्मिभिरुत्तमप्रभो यथा निदाघे भगवान्दिवाकरः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ।

श्रीराममहिमानं प्रतिपादयन्ती वचोवितानचतुरा सुमित्रा कौसल्यायाः शोकमपनुदति ।

विलपन्तीं तथा तां तु कौसल्यां प्रमदोत्तमाम् । इदं धर्मे स्थिता धर्म्यं सुमित्रा वाक्यमब्रवीत् ॥ १ ॥
तवार्ये सद्गुणैर्युक्तः स पुत्रः पुरुषोत्तमः । किं ते विलपितेनैवं कृपणं रुदितेन वा ॥ २ ॥
यस्तवार्ये गतः पुत्रस्त्यक्त्वा राज्यं महाबलः । साधु कुर्वन्महात्मानं पितरं सत्यवादिनम् ॥ ३ ॥
शिष्टैराचरिते सम्यक्शश्वत्प्रेत्य फलोदये । रामो धर्मे स्थितः श्रेष्ठो न स शोच्यः कदाचन ॥ ४ ॥
वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन्सदानघः । दयावान्सर्वभूतेषु लाभस्तस्य महात्मनः ॥ ५ ॥

त्यत आह—**नहीति** । प्रियं पुत्रमपश्यन्त्याः मे जीविते पालने किंचित्सामर्थ्यं न कल्प्यते केनापि कल्पयितुं न शक्यते इत्यर्थः ॥ २० ॥

गो० टी०—नहीति । कल्प्यते दैवेनेति शेषः । 'कल्पते' इति पाठे विद्यत इत्यर्थः ॥ २० ॥

२१] ति० टी०—दीपयते संतापयति ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०—अयमिति । महाहितः अत्यहितकारी तनूजशोकप्रभवः पुत्रशोकजनितः अयं वह्निः मां दीपयते संतापयति तत्र दृष्टान्तः उद्धतप्रभः उद्भूतप्रभावान् भगवानतिशयसामर्थ्यविशिष्टः दिवाकरः सूर्यः निदाघे ग्रीष्मे महीमिव ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०—अयमिति । दीपयते संतापयति उद्धतप्रभः उत्कटकिरणः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

१] ति० टी०—एवं दुःखितां कौसल्यां सुमित्रा समाश्वासयतीत्याह—विलपन्तीमिति । इदं वाक्यमित्यन्वयः ॥ १ ॥

रा० टी०—कौशल्याश्वासनहेतुभूतसुमित्रोक्तिं वर्णयितुमाह—विलपन्तीमिति । धर्मे स्थिता सुमित्रा धर्म्यं धर्मादनपेतमिदं वाक्यमब्रवीत् ॥ १ ॥

गो० टी०—विलपन्तीमित्यादि । इदं वक्ष्यमाणम् ॥ १ ॥

२] ति० टी०—कृपणं यथा तथा रुदितेन वा किम् अयुक्तमेवेत्यर्थः । तत्र हेतुः—**सद्गुणैर्युक्त** इति तादृशस्य च न क्वाप्यपाय इति भावः । पुरुषोत्तम इत्यनेन तस्येश्वरत्वं व्यङ्ग्यम् एवं च सर्वव्यापकत्वेनात्रापि संनिधानाद्विलापादि व्यर्थमिति च व्यङ्ग्यम् ॥ २ ॥

रा० टी०—तद्वचनमेवाह—तवेति । हे आर्ये सर्वश्रेष्ठे ! सद्गुणैः समाधिकरहितासाधारणसौशील्यादिभिर्युक्तः अत एव पुरुषोत्तमः 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः । उत्तमः पुरुषस्त्वन्यः' इत्यादिश्रुतिस्मृतिप्रतिपाद्यपरमपुरुषः स तव पुत्रोऽस्ति अतः एवं दीनतासूचकेन ते विलपितेन विविधकथनेन कृपणं रुदितेन वा किं न किमपीत्यर्थः विलापादि न कर्तव्यमिति तात्पर्यम् एतेन रामस्य निखिलशक्तिमत्त्वं सूचितं तेन तस्य दुःखास्पर्शित्वं ध्वनितं तेन शोको न कार्य इति बोधितम् ॥ २ ॥

गो० टी०—सत्पुरुषाचरितं धर्ममाचरन्तं रामं प्रति संतोषे कर्तव्ये किमर्थो विषादः कृत इति कौसल्यां समाश्वासयति—तवेत्यादिना ॥ २ ॥

३] ति० टी०—तदेवाह—य इति । श्लोकद्वयमेकं वाक्यम् साधु सिद्धसंकल्पं कुर्वन्गतः वनमिति शेषः । सत्यवादिनं तत्त्वेन प्रसिद्धम् ॥ ३ ॥

४] ति० टी०—शश्वत्सर्वथा नित्यं प्रेत्य फलस्यामुष्मिकसुखस्योदयो यस्मात्तत्र धर्मे स्थितः अतो न शोच्यः ॥ ४ ॥

रा० टी०—नन्वेवं यदि रामस्य सर्वशक्तिमत्त्वं स्यात्तर्हीहस्थः सन्नेव निखिलं कार्यं कुर्यादिति वनगमनेनेत्यत आह—य इति । हे आर्ये ! शिष्टैः अधर्मसंसर्गशून्यैः सम्यक् शश्वदाचरिते अत एव प्रेत्य फलोदये प्रेत्यानां लोकान्तरगतानामपि फलोदयः शुभफलप्राप्तिर्यस्मात्तस्मिन्धर्मे स्थितः अत एव श्रेष्ठः महाबलो यस्तव पुत्रो रामः सः महात्मानं पितरं सत्यवादिनं कुर्वन्नेव साधु यथा स्यात्तथा राज्यं त्यक्त्वा गतः वनमिति शेषः अतः कदाचन न शोच्यः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—य इत्यादिश्लोकद्वयमेकं वाक्यम् । शिष्टैरिति । प्रेत्य फलोदये आमुष्मिकफलकारणे ॥ ३ ॥ ४ ॥

५] ति० टी०—सुसहायसंपत्तेश्च नैं शोच्य इत्याह—वर्तते चेति । उत्तमां वृत्तिं पितृतुल्यशुश्रूषाव्यापारं वर्तते वर्तयते करोतीति यावत् लाभः सुखमेव ॥ ५ ॥

---

१ समुचित इति गो. पाठः । २ उद्धतप्रभ इति गो. पाठः ।

अरण्यवासे यद्दुःखं जानन्त्येव सुखोचिता । अनुगच्छति वैदेही धर्मात्मानं तवात्मजम् ॥ ६ ॥
कीर्तिभूतां पताकां यो लोके भ्रामयति प्रभुः । धर्मः सत्यव्रतपरः किं न प्राप्तस्तवात्मजः ॥ ७ ॥
व्यक्तं रामस्य विज्ञाय शौचं माहात्म्यमुत्तमम् । न गात्रमंशुभिः सूर्यः संतापयितुमर्हति ॥ ८ ॥
शिवः सर्वेषु कालेषु काननेभ्यो विनिःसृतः । राघवं युक्तशीतोष्णः सेविष्यति सुखोऽनिलः ॥ ९ ॥
शयानमनघं रात्रौ पितेवाभिपरिष्वजन् । धर्मज्ञः संस्पृशञ्छीतश्चन्द्रमा ह्लादयिष्यति ॥ १० ॥
ददौ चास्त्राणि दिव्यानि यस्मै ब्रह्मा महौजसे । दानवेन्द्रं हतं दृष्ट्वा तिमिध्वजसुतं रणे ॥ ११ ॥
स शूरः पुरुषव्याघ्रः स्ववाहुवलमाश्रितः । असंत्रस्तो ह्यरण्येऽसौ वेश्मनीव निवत्स्यते ॥ १२ ॥

रा० टी०–वर्तत इति । सदानघः सर्वकालमघशून्यः सर्वभूतेषु दयावांल्लक्ष्मणः अस्मिन्रामे उत्तमां सानुकूलां वृत्तिं सेवामित्यर्थः वर्तते वर्तयति करोतीत्यर्थः । दयावानित्यादिविशेषणोक्तिः ' समानशीलव्यसनेषु मैत्री ' इत्याद्युक्त्या राममैत्रीयोग्यताबोधनाय ॥ ५ ॥

गो० टी०–पितृवचनपरिपालके रामे शोको न कार्य इत्युक्त्वा लक्ष्मणसीतयोरपि स्वस्वधर्मनिष्ठत्वात् तद्विषयेऽपि शोको न कार्यः अपि तु प्राप्तलाभत्वात् संतोष एव कार्य इत्याह–वर्तत इत्यादिना । अत्र व इति गायत्र्याः पञ्चमाक्षरम् । वर्तते करोति वृत्तिं शुश्रूषाम् अस्मिन् रामे तस्य लक्ष्मणस्य ॥ ५ ॥

६] ति० टी०–एवं वैदेह्यप्यनुगच्छति तेन लाभ एव तस्य अनेन सर्वभूतदयावत्त्वेन लक्ष्मणस्य सर्वभूताधारभूधारकशेषावतारत्वं धर्मानुगत्या च जानक्याः श्रीत्वं ध्वनितं तेन रामस्य भगवत्त्वं ध्वनितम् ॥ ६ ॥

रा० टी०–सीतयापि शोको न कार्य इति बोधयन्ती आह–अरण्येति । सुखोचिता वैदेही अरण्यवासे यद्दुःखं तज्जानन्ती अयोध्यास्थापनफलकरामवर्णितवनदुःखजातविषयकज्ञानं प्राप्नुवत्येव तवात्मजमनुगच्छति एतेन रामानुगमनछेन वनवासक्लेशो न तद्बुद्ध्यारूढो भवितेति सूचितम् । अत एव अनभिज्ञा वनानां सेति पूर्वोक्तेन विरोधः ॥ ६ ॥

गो० टी०–अरण्येति । अरण्यवासे यद्दुःखं तद्दुःखं जानती वै जानन्त्येव तवात्मजमनुगच्छति स्त्रीणां भर्ता हि दैवतमित्युक्तरीत्यानुगच्छतीत्यर्थः ॥ ६ ॥

७] ति० टी०–तदेवाह–कीर्तीति । यः कीर्त्यात्मना संभूतां पताकां ध्वजं लोके त्रैलोक्येऽपि भ्रामयति प्रवर्तयति प्रभुः सर्वभूतपालको दयया स तवात्मजः साक्षाद्धर्मस्तद्रूपो यतः सत्यव्रतपरः अतः किं न प्राप्तः किं तच्छ्रेयो यन्न प्राप्तः अनेन तदेव व्यङ्ग्यं दृढीकृतम् सर्वश्रेयःस्थानत्वस्य भगवद्तिरिक्तेऽभावात् ॥ ७ ॥

रा० टी०–प्रस्तुत वनगमनं श्रेयःसाधनमिति बोधयन्ती आह–कीर्तीति । कीर्तिभूतां यशोरूपां पताकां लोके त्रिलोक्यां यो भ्रामयति स धर्मः सर्वधर्मप्रवर्तकस्तवात्मजो रामः किं श्रेयो न प्राप्तः सर्वं प्राप्त इत्यर्थः ॥ ७ ॥

गो० टी०–कीर्तीति । कीर्तिभूतां पताकां कीर्तिरूपं ध्वजं भ्रामयति संचारयति सर्वभूतविदितप्ररूयातिक इत्यर्थः तवात्मजः किं श्रेयः न प्राप्तः सर्वस्यापि श्रेयसो योग्य इत्यर्थः अतो न शोच्य इति भावः ॥ ७ ॥

८] ति० टी०–एतदेव ध्वनयन्ती सकलदेवसेव्यत्वं तस्याह व्यक्तमिति । शौचमपहतपाप्मत्वादिलक्षणं माहात्म्यं सर्वनियन्तृत्वम् " यद्वीषोदेति सूर्यः " इति श्रुतेः ॥ ८ ॥

रा० टी०–व्यक्तमिति । व्यक्तं देवादिषु प्रसिद्धं शौचम् अतिपवित्रकारकमत एव उत्तमं रामस्य माहात्म्यं विज्ञाय सूर्यः अंशुभिः किरणैः रामस्य गात्रं संतापयितुं नार्हति ॥ ८ ॥

गो० टी०–तदेतद्विशिनष्टि–व्यक्तमित्यादि । शौचं त्रिविधकरणशुचित्वं माहात्म्यं सर्वोत्तमत्वम् ॥ ८ ॥

९] ति० टी०–युक्तशीतोष्णोऽत एव सुखः सुखस्पर्श इत्यर्थः ॥ ९ ॥

रा० टी०–शिव इति । काननेभ्यो वनेभ्यो विनिःसृतः युक्तशीतोष्णः यथोप्सितशीतोष्णविशिष्टः अत एव सुखः सुखसंपादकः अत एव शिवः माङ्गलिककार्यप्रवर्तकोऽनिलः सर्वेषु कालेषु राघवं सेविष्यति सेविष्यते ॥ ९ ॥

गो० टी०–शिव इति । सर्वेषु कालेषु वसन्तादिकालेषु युक्तशीतोष्णः तत्तत्कालोचितद्रव्यसंस्पर्शनेन संपादितशीतोष्णस्पर्श इत्यर्थः ॥ ९ ॥ १० ॥

१०] ति० टी०–चन्द्रमाश्चन्द्रः ह्लादयिष्यति सुखयिष्यति ॥ १० ॥

रा० टी०–शयानमिति । पिता दशरथ इव शीतैः रश्मिभिः करैरास्पृशन्नभिपरिष्वजन् संमिलंश्च संश्चन्द्रमाश्चन्द्रः ह्लादयिष्यति ॥ १० ॥

११–१२] ति० टी०–ब्रह्मा ब्राह्मणो विश्वामित्रः ब्रह्मैव सृष्टिकर्ता वा तिमिध्वजः शम्बरस्तत्सुतः सुबाहुरित्यर्थ इति कतककृतः । तीर्थस्तु–कदाचिद्रामो वैजयन्तं नगरं निरुध्य तत्रत्यतिमिध्वजाख्यशम्बरपुत्रस्य दानवस्य पुत्रं हतवान् तेन

१ जानती वै इति गो. पाठः । २ भ्रमयतीति गो. पाठः । ३ धर्मसत्यव्रतधन इति गो. पाठः । ४ रश्मिभिः…शीतैरिति गो. पाठः । ५ ऽप्यरण्यस्थ इति गो. पाठः । ६ वत्स्यतीति गो. पाठः ।

यस्येषुपथमासाद्य विनाशं यान्ति शत्रवः । कथं न पृथिवी तस्य शासने स्थातुमर्हति ॥ १३ ॥
या श्रीः शौर्यं च रामस्य या च कल्याणसत्त्वता । निवृत्तारण्यवासः स्वं क्षिप्रं राज्यमवाप्स्यति ॥ १४ ॥
सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः । श्रियाः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमाक्षमा ॥ १५ ॥

प्रीतो ब्रह्मा रामाय दिव्यास्त्राणि ददावित्येतद्बलात्कल्पयति कृतकोक्तं तु न युक्तं ताटकावधोत्तरं सुबाहुवधात्प्रागेव विश्वामित्रेणास्त्रोपदेशस्य प्रागुक्तत्वात्, सुबाहोर्मारीचभ्रातृत्वस्य पूर्वमुक्तत्वेन शम्बरपुत्रत्वानौचित्याच्च ॥ ११ ॥ १२ ॥

रा० टी०–ददाविति।दानवेन्द्रं तमतिप्रबलं तिमिध्वजसुतं तिमिध्वजः शम्बरस्तस्य सुतः सुबाहुस्तं रणे दृष्ट्वा ज्ञात्वा ब्रह्मा ब्राह्मणत्वं प्राप्तः सृष्टिकर्तृत्वेन ब्रह्मसदृशो वा विश्वामित्रः महौजसे अतिपराक्रमविशिष्टाय यस्मै रामाय दिव्यानि अस्त्राणि हर्षेण ददौ सः शूरः पुरुषव्याघ्रः परमपुरुषः स्वबाहुबलमाश्रितः अत एव रणे असंत्रस्तः असौ रामः वेश्मनि गृहे इव अरण्ये वने निवत्स्यते एतेन सुबाहुवधात्पूर्वमेव विश्वामित्रास्त्रदानस्योक्तत्वात् हतं दृष्ट्वेत्यर्थे असमञ्जसमुपलभ्य कदाचिद्रामो वैजयन्तं नगरं निरुध्य तत्रत्यतिमिध्वजाख्यशम्बरपुत्रस्य दानवस्य पुत्रं हतवांस्तेन प्रीतो ब्रह्मा रामाय दिव्यास्त्राणि ददौ इत्येतत्तीर्थकल्पितं क्लिष्टं तादृशकल्पनायां प्रमाणाभावात् सुबाहोर्मारीचभ्रातृत्वस्य पूर्वमुक्तत्वेन शम्बरपुत्रानौचित्यादिति भट्टोक्त्या न भ्रमितव्यं मारीचपितुरेव शम्बरेति नामान्तरे बाधकाभावात्। श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–ददाविति । तिमिध्वजः शम्बरः वैजयन्तमिति ख्यातं पुरं यत्र तिमिध्वजः स शम्बर इति ख्यातः शतमायो महासुर इत्युक्तत्वात् तत्सुतं दानवेन्द्रं हतं दृष्ट्वा यस्मै रामाय दिव्यास्त्राणि ददौ । 'यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा । गत्वा सौमित्रिसहितो नाविजित्य निवर्तते' इत्यभियानात् । कदाचिद्रामो दण्डकारण्यं गत्वा वैजयन्तपुरं निरुध्य दशरथविरोधिभूतशम्बरसुतं हतवान् तेन प्रीतो ब्रह्मा रामाय दिव्यास्त्राणि ददावित्यवगम्यते ॥ ११ ॥

गो० टी०–स शूर इति । अरण्यस्थोऽपीत्यन्वयः ॥ १२ ॥

१३] ति० टी०–तस्य शासने पृथिवी तत्स्थाः प्राणिनः कथं न शासने स्थास्यन्ति अतस्तस्य कुतोऽपि न भयमिति भावः ॥ १३ ॥

रा० टी०–यस्येति । यस्य रामस्य इषुपथमासाद्य प्राप्य शत्रवो विनाशं यान्ति तस्य शासने आज्ञायां पृथिवी स्थातुं कथं नार्हति ॥ १३ ॥

गो० टी०–वने रामस्य सौख्यं भवतु भरतस्य रूढमूलत्वात् रामस्य राज्यं न सिध्यतीत्याशङ्क्याह–यस्येति ॥ १३ ॥

१४] ति० टी०–या यादृशी श्रीः शरीरशोभा यादृशं च शौर्यं यादृशी च कल्याणसत्त्वता दृश्यते तया ज्ञायते निवृत्तवनवासः क्षिप्रमेव स्वं राज्यं प्राप्स्यति ॥ १४ ॥

रा० टी०–येति । रामस्य या श्रीः विलक्षणसंपत्तिः शौर्यं विलक्षणशूरता च या च कल्याणसत्त्वता कल्याणकारकविलक्षणबलयुक्तत्वं तैर्हेतुभिः रामः स्वं राज्यं क्षिप्रमवाप्स्यति प्राप्स्यति ॥ १४ ॥

गो० टी०–येति । रामस्य या श्रीः सर्वलक्षणसंपन्ना गात्रशोभा यच्च शौर्यं शूरो जेता तस्य भावः शौर्यम् 'शूरो वीरश्च विक्रान्तो जेता' इत्यमरः । या च कल्याणसत्त्वता प्रशस्तबलयुक्तता एतैरसाधारणहेतुभिः स रामः क्षिप्रं राज्यमवाप्स्यतीति संबन्धः ॥ १४ ॥

१५] ति० टी०–इदानीं साक्षादेव सर्वान्तर्यामित्वं रामस्य दर्शयति–सूर्यस्यापीति । सर्वस्यापि स्वस्वकार्यजनकत्वमेतदधीनमेवेति भावः क्षमाक्षमेति षष्ठीतत्पुरुषः ॥ १५ ॥

रा० टी०–रामस्य सर्वनियन्तृत्वं बोधयन्ती आह–सूर्यस्येति । सूर्यस्य सर्वावभासकादित्यस्यापि सूर्योऽवभासक इत्यर्थः । ननु "तमेव भान्तमनुभाति सर्वम्" इत्यादिश्रुत्या सूर्यावभासकत्वं ब्रह्मणः प्रसिद्धमिति ब्रह्म किमित्यत आह–अग्नेः सर्वाद्यस्य प्रकाशब्रह्मणोऽप्यग्निः प्रकाशक इत्यर्थः । अत एव प्रभोः सर्वनियन्तुर्ब्रह्मादित्यस्यापि प्रभुर्नियन्ता अग्निशब्दस्य ब्रह्मपरत्वम् । अद्भ्यस्त्वादग्निनामासावित्यादिना मध्वाचार्यैर्व्याख्यातम् अभिमतश्चायं सिद्धान्तो भूषणकृतामपि अत एव प्रभोः सर्वनियन्तुरपि नियन्तेति तैर्व्याख्यातं सर्वनियन्तृत्वं च विष्ण्वादीनामेवेति भावः। किंच सूर्यस्य प्रकाशकारणस्यापि सूर्यः कारणमित्यर्थः। ननु सूर्यकारणत्वेन वह्निः प्रसिद्ध इति किं स इत्यत आह–अग्नेरप्यग्निः कारणमित्यर्थः । ननु सर्वकारणत्वेन ब्रह्मणः प्रसिद्धत्वादिति किं तदित्यत आह–प्रभोः सकलनियन्तुरपि प्रभुर्नियन्तेत्यर्थः । अद्या रामाग्रे गमनशीला क्षमाक्षमा क्षमायाः पृथिव्याः क्षमा क्षान्तिर्यस्याः सा किंच क्षमायाः शान्तेरपि क्षमा शान्तिः अतिशान्तिविशिष्टेत्यर्थः । किंच क्षमया पृथिव्या क्षम्यते सह्यते पाल्यते इत्यर्थः सा सीता तु श्रियाः लक्ष्म्याः श्रीः स्वामिनीत्यर्थः अत एव कीर्त्याः रामयशसः कीर्तिः कारणभूतेत्यर्थः । सूर्यस्य सर्वजगद्व्यवभासकस्यापि सूर्योऽवभासकः अग्नेः सर्वदाहकस्याप्यग्निर्दाहक इति भूषणोक्तार्थस्तु न युक्तः दाहकत्वेन प्रकाशकत्वेन च द्वयोः प्रसिद्धयोऽन्यत रोपादानस्य निरर्थकत्वापत्तिः नापि सूर्यस्यापि प्रकाशको दाहकश्च अग्नेरपि प्रकाशको दाहकश्चेत्यर्थो युज्यते पतत्प्रकर्षदोषवत्तापत्तेरिति दिक् ॥ १५ ॥

१ स इति गो. पाठः ।

दैवतं देवतानां च भूतानां भूतसत्तमः । तस्य के ह्यगुणा देवि वने वाप्यथवा पुरे ॥ १६ ॥
पृथिव्या सह वैदेह्या श्रिया च पुरुषर्षभः । क्षिप्रं तिसृभिरेताभिः सह रामोऽभिषेक्ष्यते ॥ १७ ॥
दुःखजं विसृजत्यश्रु निष्क्रामन्तमुदीक्ष्य यम् । अयोध्यायां जनः सर्वः शोकवेगसमाहतः ॥ १८ ॥
कुशचीरधरं वीरं गच्छन्तमपराजितम् । सीतेवानुगता लक्ष्मीस्तस्य किं नाम दुर्लभम् ॥ १९ ॥
धनुर्ग्रहवरो यस्य बाणखड्गास्त्रभृत्स्वयम् । लक्ष्मणो व्रजति ह्यग्रे तस्य किं नाम दुर्लभम् ॥ २० ॥
निवृत्तवनवासं तं द्रष्टासि पुनरागतम् । जहि शोकं च मोहं च देवि सत्यं ब्रवीमि ते ॥ २१ ॥
शिरसा चरणावेतौ वन्दमाननिन्दिते । पुनर्द्रक्ष्यसि कल्याणि पुत्रं चन्द्रमिवोदितम् ॥ २२ ॥
पुनः प्रविष्टं दृष्ट्वा तमभिषिक्तं महाश्रियम् । समुत्सृक्ष्यसि नेत्राभ्यां शीघ्रमानन्दजं जलम् ॥ २३ ॥

गो० टी०–सूर्यस्येत्यादि । सूर्यस्यापि सूर्यो भवेत् सकलजगत्प्रकाशकस्य सूर्यस्यापि प्रकाशको भवेत् । अग्नेरग्निर्दाहकस्याप्यग्नेर्दाहकः प्रभोः प्रभुः सर्वनियन्तुरपि नियन्ता श्रियः श्रीः संपदोऽपि संपत् यद्वा कान्तेरपि कान्तिः कान्तेरप्यतिशयावह इत्यर्थः । क्षमाक्षमा क्षमाया अप्यतिशयोऽनेनेति भावः । दैवतं दैवतानां च दैवतानामपि सकलकार्यनिर्वहणक्षम इत्यर्थः । भूतानां भूतसत्तमः उत्तमभूतमित्यर्थः । भूतत्वं सत्ता सर्वेषां सत्ता तत्सत्ताधीनेति भावः तस्यैवंभूतस्य सर्वगुणसंपन्नस्य देशे वने वा पुरे वा के अगुणाः न कोऽपीत्यर्थः अगुणः प्रतिबन्धकीभूत इति यावत् ॥१५॥१६॥

१६] ति० टी०–अगुणाः दोषजनका इत्यर्थः ॥ १६ ॥

रा० टी०–दैवतमिति । हि पूर्वोक्तहेतोः भूतसत्तमः भूतान् प्राणिनः सत्तमर्यति सत्तमभिच्छति यः सीतारामः भूतानां पृथिव्याद्यधोदेशवासिनां देवतानामूर्ध्वदेशवासिनां च दैवतं देवता पूज्य इत्यर्थः । तस्य सीतारामस्य अगुणाः नित्यगुणविरोधिनः अन्यथा कर्तार इत्यर्थः देशे दण्डकादौ पुरे लङ्कादौ वा के सन्ति न केऽपीत्यर्थः ॥ १६ ॥

१७] ति० टी०–राम एताभिस्तिसृभिः सहाभिषेक्ष्यते वसिष्ठादिभिरिति शेषः श्रिया विजयलक्ष्म्या ॥ १७ ॥

रा० टी०–पृथिव्येति । पृथिव्या शासनान्तररहितभूम्या श्रिया अन्यासाध्यविजयसंपत्त्या च वैदेह्या निखिलकार्यसाधनकारणीभूतसतिया च एताभिस्तिसृभिः सह सहितः स रामो ह हर्षेण अभिषेक्ष्यते वसिष्ठादिभिरिति शेषः ॥ १७ ॥

गो० टी०–पृथिव्येति । सहेत्यत्र स इति पदच्छेदः स रामः पृथिव्या वैदेह्या श्रिया विजयलक्ष्म्या च एताभिः तिसृभिः सह क्षिप्रमभिषेक्ष्यति हेतिसंबन्धः ॥ १७ ॥

१८] ति० टी०–कालान्तरेऽपि राज्यार्हतां जनानुरागप्रदर्शनेनाह–दुःखजमिति । यतोऽयोध्यायां वियमानः सर्वो जनोऽयं निष्क्रामन्तमुदीक्ष्य दुःखजमश्रु विसृजति, अतस्तस्य राज्यमवश्यं भावीति शेषः ॥ १८ ॥

रा० टी०–दुःखजमिति । अपराजितं कैश्चिदपि पराजेतुमशक्यं कुशचीरधरं कुशचीरयोर्धारणं गच्छन्तं प्राप्नुवन्तं वीरं यं रामं निष्क्रामन्तमयोध्याया निर्गच्छन्तमुदीक्ष्य दृष्ट्वा अयोध्यायां वियमानः सर्वो जनः दुःखजमश्रु विसृजति यस्य च सीतेव सीतासदृशी अनुगता नित्यं प्राप्ता लक्ष्मीः महाराजत्वसूचकशोभा संपत्तिः तस्य रामस्य किं दुर्लभं न किंचिदित्यर्थः । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०–दुःखजमिति । अस्य श्लोकस्य पृथिव्या सहेति पूर्वश्लोकस्थेन स रामोऽभिषेक्ष्यतीत्यनेन संबन्धः ॥१८॥

१९] ति० टी०–अथ तस्य वने विषयसुखं नास्तीति शोचन्तीमाह–कुशचीरादिधरमपि यं लक्ष्मीरिव सीतानुगता तस्य किं दुर्लभम् । इवशब्द एवार्थे । सीतारूपेण लक्ष्मीरेवैषेति भावः एतेन स विष्णुरेवेति ध्वनितम् ॥ १९ ॥

गो० टी०–कुशचीरेति । लक्ष्मीरिव स्थिता सीतानुगतेत्यन्वयः अनेन राज्यश्रीरन्यत्र परिगृह्णातीति द्योत्यते ॥ १९ ॥

२०] ति० टी०–धनुर्ग्रहाणां वरः श्रेष्ठः पुरुषोत्तमत्वं विना न लक्ष्मणोऽग्रेसरः स्यादिति भावः ॥ २० ॥

रा० टी०–धनुरिति । धनुर्ग्रहवरो धनुर्धारिश्रेष्ठः अत एव बाणखड्गास्त्रभृत्स्वयं लक्ष्मणो यस्याग्रे व्रजति तस्य किं दुर्लभं न किमपीत्यर्थः ॥ २० ॥

गो०टी०–धनुर्ग्रहेति।धनुर्ग्रहवरः धनुर्धरश्रेष्ठः॥२०–२१॥

२१–२३] ति० टी०–द्रष्टासि लुट् ॥ २१–२३ ॥

रा० टी०–निवृत्तेति । निवृत्तवनवासं वनवासान्निवृत्तं तं रामं द्रष्टासि ॥ २१ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–शिरसेति । एतौ भवदीयौ चरणौ शिरसा मूर्ध्ना वन्दमानं पुत्रमुदितं चन्द्रमिव पुनर्द्रक्ष्यसि ॥ २२ ॥

गो० टी०–शिरसेति । एतौ परिदृश्यमानसर्वलक्षणसंपन्नौ उदितं चन्द्रं प्रतिपचन्द्रम् ॥ २२ ॥ २३ ॥

रा० टी०–पुनरिति । प्रविष्टं गृहे समागतं दृष्ट्वा आनन्दजं जलं नेत्राभ्यां शीघ्रं समुत्सृक्ष्यसि त्यक्तासि ॥ २३ ॥

१ दैवतानामिति गो. पाठः । २ राष्ट्रे इति गो. देशे इति रा. पाठः । ३ ऽभिषेक्ष्यतीति गो. पाठः । ४ आस्त्रमिति गो.पाठः । ५ जनाः सर्वे ··· इतः इति गो. पाठः । ६ देवमिति गो. पाठः । ७ क्षिप्र···पद इति गो. पाठः ।

मा शोको देवि दुःखं वा न रामे दृश्यतेऽशिवम् । क्षिप्रं द्रक्ष्यसि पुत्रं त्वं ससीतं सहलक्ष्मणम् ॥ २४ ॥
त्वयाऽशेषो जनश्चायं समाश्वास्यो यतोऽनघे । किमिदानीमिदं देवि करोषि हृदि विक्लवम् ॥ २५ ॥
नार्हा त्वं शोचितुं देवि यस्यास्ते राघवः सुतः । नहि रामात्परो लोके विद्यते सत्पथे स्थितः ॥ २६ ॥
अभिवादयमानं तं दृष्ट्वा ससुहृदं सुतम् । मुदाश्रु मोक्ष्यसे क्षिप्रं मेघरेखेव वार्षिकी ॥ २७ ॥
पुत्रस्ते वरदः क्षिप्रमयोध्यां पुनरागतः । करांभ्यां मृदुपीनाभ्यां चरणौ पीडयिष्यति ॥ २८ ॥
अभिवाद्य नमस्यन्तं शूरं ससुहृदं सुतम् । मुदाश्रैः प्रोक्षसे पुत्रं मेघराजिरिवाचलम् ॥ २९ ॥

आश्वासयन्ती विविधैश्च वाक्यैर्वाक्योपचारे कुशलानवद्या ।
रामस्य तां मातरमेवमुक्त्वा देवी सुमित्रा विरराम रामा ॥ ३० ॥
निशम्य तल्लक्ष्मणमातृवाक्यं रामस्य मातुर्नरदेवपत्न्याः ।
सद्यः शरीरे विननाश शोकः शरद्गतो मेघ इवाल्पतोयः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

२४] ति० टी०—रामे रामविषये शोकः प्रलापादिदुःखं व्यथा मास्तु यतस्तस्मिन्नशिवमशुभं न दृश्यते ॥ २४ ॥

रा० टी०—मेति । हे देवि ! रामे अशिवं न दृश्यते अत एव पुत्रं क्षिप्रं शीघ्रं द्रक्ष्यसि अत एव शोकस्तज्जन्यं दुःखं वा मास्तु ॥ २४ ॥

गो० टी०—मा शोक इति । हे देवि ! रामे अशिवम् अशुभं न दृश्यते अतः शोकः प्रलापादिः दुःखं मनोव्यथा वा मा न कार्यमित्यर्थः ॥ २४ ॥

२५-२६] ति० टी०—हे अनघे! यस्मात्त्वयाशेषोऽयं जनस्त्वत्परिवाररूपत्वात्त्वया समाश्वास्यः अतो देवि ! त्वं हृदि विक्लवं दुःखं किं करोषि ॥ २५ ॥ २६ ॥

रा० टी०—त्वयेति । हे अनघे ! अशेषः सर्वोऽयं रामवियोगजनितदुःखवाञ्जनः यतस्त्वया समाश्वास्यः अतः तत् विक्लवं शोकं हृदि करोषि तत्किं कुत्सितं न युक्तमित्यर्थः ॥ २५ ॥

रा० टी०—नेति । सत्पथे अतिसमीचीनमार्गे स्थितः यस्मादामात्परो भिन्नो लोके कस्मिंश्चिद्भुवने न स राघवो यस्यास्ते सुतः सा त्वं शोचितुं शोकं कर्तुं नार्हा ॥ २६ ॥

गो०टी०—त्वयेति। विक्लवम् भावप्रधानो निर्देशः॥२५॥२६॥

२७-२८] ति० टी०—मेघरेखा मेघपङ्क्तिः ॥ २७ ॥ २८ ॥

रा० टी०—अभीति । ससुहृदं सुहृत्सहितमभिवादयमानं वन्दनां कुर्वन्तं तं रामं क्षिप्रं दृष्ट्वा मुदा अतिहर्षेणाश्रु मोक्ष्यसे तत्र दृष्टान्तः वार्षिकी वर्षासंबन्धिनी मेघरेखा अभ्रपङ्क्तिरिव ॥ २७ ॥

रा० टी०—पुत्र इति । अयोध्यां पुनरागतस्ते पुत्रः चरणौ त्वत्पादौ पीडयिष्यति ॥ २८ ॥

गो० टी०—अभिवादयमानमिति । मेघरेखा मेघपङ्क्तिः ॥ २७ ॥ २८ ॥

२९] ति० टी०—अभिवाद्य चरणौ स्पृष्ट्वा प्रोक्षसे 'उक्ष सेचने' । वर्तमानसमामीप्ये लट् ॥ २९ ॥

रा० टी०—अभिवाद्येति । अभिवाद्य सुहृद्भिरभिवादनं कारयित्वा नमस्यन्तं सुतं मुदाश्रैः आनन्दाश्रुभिः पुनः प्रोक्ष्यसि वर्तमानसामीप्य इति भविष्यति लट् ॥ २९ ॥

गो० टी०—अभिवाद्येति । अभिवाद्य नमस्यन्तम् अभिवादनपूर्वकं प्रणमन्तम् ॥ २९ ॥

३०-३१] ति० टी०—वाक्योपचारे वाक्यरचनायाम् । रामा रमणीया ॥ ३० ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामार्ये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रा० टी०—उपसंहरन्नाह—आश्वासयन्तीति । वाक्योपचारे वाक्यप्रयोगे कुशला अनवद्या मृषावक्तृत्वादिदोषसंसर्गरहिता विविधैर्वाक्यैः रामस्य मातरमाश्वासयन्ती रामा रामविषयकस्मृतिमती देवी सुमित्रा एवमुक्त्वा विरराम तूष्णीं बभूव रामाशब्द अर्थादाद्यजन्तः ॥ ३० ॥

रा० टी०—निशम्येति । तद्वर्णितं लक्ष्मणमातृवाक्यं निशम्य श्रुत्वा विद्यमानायाः रामस्य मातुः शरीरे शोकः सद्यो विननाश ध्वंसे तत्र दृष्टान्तः अल्पतोयः स्वल्पवारिविशिष्टः शरद्गतः शरदृतौ दृश्यमानः मेघ इव ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

गो० टी०—आश्वासयन्तीति । वाक्योपचारे वाक्यैरुपचारविषये ॥ ३० ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने ऽयोध्याकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

---

१ तमिति गो. पाठः । २ एवेति गो. पाठः । ३ इमामिति गो. पाठः । ४ पाणिभ्यामिति गो. पाठः । ५ प्रोक्ष्यसि पुनरिति गो. रा. पाठः ।

पञ्चचत्वारिंशः सर्गः ।

नगरगमनाय बहुशः प्रार्थ्यमाना अपि रामविरहमसहमानाः पौरा न विरेमुस्तदा ससीतालक्ष्मणो रामा रथादवतीर्य पद्भ्यामेवाक्रमीत्पौरास्तं निवर्तयितुं सुतरां प्रायतंस्तथापि स पितृनिदेशमेवानुससाराथो क्रममाणास्ते परिणतेऽह्नि तमसातीरमासेदुः ।

अनुरक्ता महात्मानं रामं सत्यपराक्रमम् । अनुजग्मुः प्रयान्तं तं वनवासाय मानवाः ॥ १ ॥
निवर्तितेऽतीव बलात्सुहृद्भिर्मेण राजनि । नैव ते संन्यवर्तन्त रामस्यानुगता रथम् ॥ २ ॥
अयोध्यानिलयानां हि पुरुषाणां महायशाः । बभूव गुणसंपन्नः पूर्णचन्द्र इव प्रियः ॥ ३ ॥
स याच्यमानः काकुत्स्थस्ताभिः प्रकृतिभिस्तदा । कुर्वाणः पितरं सत्यं वनमेवान्वपद्यत ॥ ४ ॥
अवेक्षमाणः सस्नेहं चक्षुषा प्रपिबन्निव । उवाच रामः सस्नेहं ताः प्रजाः स्वाः प्रजा इव ॥ ५ ॥
या प्रीतिर्बहुमानश्च मय्ययोध्यानिवासिनाम् । मत्प्रियार्थं विशेषेण भरते सा विधीयताम् ॥ ६ ॥
स हि कल्याणचारित्रः कैकेय्यानन्दवर्धनः । करिष्यति यथावद्वः प्रियाणि च हितानि च ॥ ७ ॥
ज्ञानवृद्धो वयोबालो मृदुर्वीर्यगुणान्वितः । अनुरूपः स वो भर्ता भविष्यति भयापहः ॥ ८ ॥

१] ति० टी०–इदानीं दूरमनुगच्छत्पौरजननिवर्तनमाह–अन्विति । वनवासाय प्रयान्तमित्यन्वयः ॥ १ ॥

रा० टी०–नगरवासवृत्तं वर्णयन्नाह–अनुरक्ता इति । वनवासाय प्रयान्तं तं राममनुरक्ताः तद्विषयकातिप्रीतिमन्तः मानवाः अयोध्यावासिजनाः अनुजग्मुः ॥ १ ॥

गो० टी०–एवं सुमित्रया कौसल्याश्वासनपर्यन्तं कथासंवृत्तं परिसमाप्य संप्रति रामगमनवृत्तान्तं प्रस्तौति–अनुरक्ता इत्यादि ॥ १ ॥

२] ति० टी०–सुहृद्धर्मेण 'यमिच्छेत्पुनरायातं नैव दूरमनुव्रजेत्' इत्युक्तिरूपेण तेऽनुरक्ताः पौराः ॥ २ ॥

रा० टी०–निवर्तिते इति । सुहृद्धर्मेण अनुव्रजने सुहृद्विराचरणीयो धर्मः तेन 'यमिच्छेत्पुनरायान्तं नैव दूरमनुव्रजेत्' इत्युक्तिरूपेणेत्यर्थः । राजनि निवर्तिते सति रामस्य रथमनुगतास्तेनैव सन्न्यवर्तन्त तेन तेषां तत्सहगमनेच्छा सूचिता ॥ २ ॥

गो० टी०–निवर्तित इति । सुहृद्वर्ग राजसुहृद्भूतावरोधवर्गे राजनि च सचिवसहिते राजनि च ते पौरजनाः ॥ २॥३॥

३] ति० टी०–तदनिवृत्तौ हेतुमाह–अयोध्येति ॥ ३ ॥

४] ति० टी०–याच्यमानः प्रतिनिवृत्तिमिति शेषः । ताभिः प्रकृतिभिरनुरक्तकतमप्रजाभिः सत्यं सत्यवन्तम् ॥ ४ ॥

रा० टी०–अयोध्येति । गुणसंपन्नो यो रामः येषां अयोध्यानिलयानामयोध्यावासिनां पूर्णचन्द्र इव प्रियो बभूव स काकुत्स्थः ताभिः प्रकृतिभिर्याच्यमानः सहगमनाय प्रार्थ्यमान एव पितरं सत्यं कुर्वाणः सन् वनमन्वपद्यत अगच्छत् । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–स इति । याच्यमानः निवर्तस्व निवर्तस्वेति प्रार्थ्यमानः सत्यं सत्यप्रतिज्ञम् ॥ ४ ॥

५] ति० टी०–स्वाः प्रजा इव स्वपुत्रानिव ॥ ५ ॥

रा० टी०–अवेक्षमाण इति । स्वाः स्वकीयाः प्रजाः पुत्रानिव ताः याचमानाः प्रजाः राम उवाच ॥ ५ ॥

गो० टी०–अवेक्षमाण इति । स्वाः प्रजा इव स्वान्यपत्यानीव ॥ ५ ॥

६] ति० टी०–अयोध्यानिवासिनाम् युष्माकमिति शेषः ॥ ६ ॥

रा० टी०–तद्वचनमेवाह–येत्यादिभिः । अयोध्यावासिनां भवतामपि या यादृशी प्रीतिः स्नेहः यो बहुमानः अतिसत्कारश्च सा स च मत्प्रियार्थं मन्निष्टप्रीतिदृढार्थं भरते विधीयतां क्रियताम् एतेन भरतो मदतिप्रिय इति व्यञ्जितम् ॥ ६ ॥

गो० टी०–स्वेन पितृवचनपरिपालनस्यावश्यकर्तव्यत्वात् प्रजानुरागेण ताभ्यो हितमुपदिशति–या प्रीतिरित्यादिना ॥ ६–८ ॥

७] ति० टी०–प्रियाण्यैहलौकिकसुखजनकानि हितानि परलोकसुखजनकानि ॥ ७ ॥

रा० टी०–स इति । कल्याणचारित्रः सर्वकल्याणकारकाचरणविशिष्टः स भरतः वो युष्माकं प्रियाणि प्रीतिनिष्पादकानि हितानि दृढिकारककार्याणि यथावत्करिष्यति ॥ ७ ॥

८] ति० टी०–वयसा बालोऽपि ज्ञानवृद्धः वीर्यगुणान्वितोऽपि मृदुः ॥ ८ ॥

रा० टी०–तत्पालनयोग्यतां बोधयन्नाह–ज्ञानेति । ज्ञानवृद्धः अतिज्ञानवान् मृदुवीर्यगुणान्वितः मृदुः अतिकोमलचित्तः वीर्यगुणैः अतिपराक्रमवात्सल्यादिभिरन्वितो युक्तः स एव स इति कर्मधारयः, मृदुशब्दस्य धर्मपरत्वे तु त्रयाणां द्वन्द्वे कृते तत्पुरुषः अत एव अनुरूपः पालनयोग्यः अत एव भयापहः प्रजाभयनाशनयोग्यः वयोबालः वयसा बालः स भरतः वो युष्माकं भर्ता भविष्यति ॥ ८ ॥

---

१ प्रवन्तमिति गो. पाठः । २ ऽपि चेति गो. पाठः । ३ वर्गे चेति गो. पाठः । ४ स्वाभिरिति गो. पाठः । ५ स्नेहेनेति गो. पाठः । ६ निवेश्यतामिति गो. पाठः । ७ मृदुर्वीर्यगुणान्वित इति रा. पाठः ।

स हि राजगुणैर्युक्तो युवराजः समीक्षितः । अपि चापि मया शिष्टैः कार्यं वो भर्तृशासनम् ॥ ९ ॥
न संतप्येद्यथा चासौ वनवासं गते मयि । महाराजस्तथा कार्यो मम प्रियचिकीर्षया ॥ १० ॥
यथा यथा दाशरथिर्धर्ममेवाश्रितो भवेत् । तथा तथा प्रकृतयो रामं पतिमकामयन् ॥ ११ ॥
बाष्पेण पिहितं दीनं रामः सौमित्रिणा सह । चकर्षैव गुणैर्बद्धं जनं पुरनिवासिनम् ॥ १२ ॥
ते द्विजास्त्रिविधं वृद्धा ज्ञानेन वयसौजसा । वयःप्रकम्पशिरसो दूरादूचुरिदं वचः ॥ १३ ॥
वहन्तो जवना रामं भो भो जात्यास्तुरंगमाः । निवर्तध्वं न गन्तव्यं हिता भवत भर्तरि ॥ १४ ॥
कर्णवन्ति हि भूतानि विशेषेण तुरंगमाः । यूयं तस्मान्निवर्तध्वं याचनां प्रतिवेदिताः ॥ १५ ॥

९] ति० टी०—समीक्षितो राज्ञा निश्चितः मया शिष्टैः मत्तोऽधिकैरिति यावत्, ईदृशै राजगुणैर्युक्तः हि यतः अपि चाप्यस्मादपि हेतोः भरते प्रीतिर्विधीयतां यतो वो युष्माकं भर्तृशासनं राजाज्ञा कार्यावश्यकार्या भवति[1]॥ ९ ॥

रा० टी०—स इति । मया शिष्टैः शिक्षितैः राजगुणैर्युक्तः स भरतः युवराजः प्रजापालकत्वेन युवराजसदृशः समीक्षितो निश्चितः पित्रादिभिरिति शेषः अतः भर्तृशासनं राजाज्ञा वो युष्माकं कार्यम् ॥ ९ ॥

गो० टी०—स हीति । हि यस्मात् कारणात् भरतो वः युष्माकं युवराजः समीक्षितः राज्ञेति शेषः अतो मया शिष्टैः अवशिष्टैः लक्ष्मणशत्रुघ्नादिभिः सर्वैरपि भर्तृशासनं कार्यम् । अपि चेति वक्तव्यान्तरसमुच्चये ॥ ९ ॥

१०] ति० टी०—तथा कार्योऽनुकूलाचरणेन सदा समाराधनीयः ॥ १० ॥

रा० टी०—नेति । महाराजो दशरथः यथा न संतप्येत्तथा कार्यः अनुकूलाचरणेन तोषणीय इत्यर्थः ॥ १० ॥

गो० टी०—नेति । मयि वनं गते सति असौ महाराजः यथा न संतप्येत् मम प्रियचिकीर्षया तथा कार्यः ॥ १० ॥

११] ति० टी०—धर्मं राजवाक्यपरिपालनरूपम् अकार्यंश्चित्ते स्वीकृतवन्तः अत्यन्तधर्मशालित्वात् ॥ ११ ॥

रा० टी०—यथेति । दाशरथिः रामः यथा यथा येन येन प्रकारेण धर्ममाश्रितः ग्राहितवाँस्तथातथा तेन तेन प्रकारेण धर्ममाश्रितः आश्रयणकर्त्र्यः प्रकृतयः प्रजाः पतिं राममकामयन्नशोभयन्नाश्रितः शब्दाद्यस्या उभयान्वयी पूर्वव्रान्तर्भावितार्थिजर्थः श्रिञः कर्तरि निष्ठा परत्र कर्तरि क्विप् ॥ ११ ॥

गो० टी०—यथेति । धर्मं पितृवचनपरिपालनरूपे धर्मे तथा तथा प्रकृतयो रामं पतिमकामयन् आदौ राजा ज्येष्ठं भवन्तमेवास्मद्रक्षणार्थं युवराजत्वेन कल्पितवान् अयमर्थो भवतास्माभिश्च कर्तव्य इति राममेव पुनः पुनः पतिमकामयन्त्येत्यर्थः ॥ ११ ॥

१२] ति० टी०—बाष्पेण पिहितं पिहितनेत्रं रज्जुरूपैः स्वगुणैर्बद्धं पुरनिवासिनं सौमित्रिसहितो रामश्चकर्षैव उत्प्रेक्षालंकारः गुणैरित्यंशे शोकः ॥ १२ ॥

रा० टी०—बाष्पेणेति । दीनं निश्चितरामवियोगजनितदुःखाक्रान्तमत एव बाष्पेण अश्रुणा पिहितं व्याप्तं गुणैः रघुनाथनिष्ठातिसौशील्यादिभिर्बद्धं स्वाधीनीकृतं पुरवासिनं जनं गुणैः रज्जुभिः बद्धमिव रामश्चकर्ष । अत्रापि गुणबद्धशब्दौ शब्दाद्यर्थोभयान्वयिनौ ॥ १२ ॥

गो० टी०—बाष्पेणेति । सौमित्रिणा सहेत्यनेन रामस्येव लक्ष्मणस्यापि गुणपौष्कल्यमस्तीति द्योत्यते गुणैरेव गुणैः पाशैरिति श्लिष्टरूपकम् ॥ १२ ॥

१३] ति० टी०—ओजसा तपोबलेन एवं त्रिविधं यथा तथा वृद्धास्तेषां मध्ये वयःप्रकम्पशिरसो वयस आधिक्यात्कम्पयुक्तशिरसोऽतिवृद्धत्वादतिधावनाशक्त्या दूरादिदमूचुः । क्वचित्तु ' प्रभुग्रशिरसः ' इति पाठः ॥ १३ ॥

रा० टी०—ते इति । ज्ञानादिभिस्त्रिभिः त्रिविधं यथा स्यात्तथा वृद्धाः ये अत एव वयःप्रकम्पशिरसः अतिवयोहेतुकप्रकम्पविशिष्टशिरोविशिष्टाः ये द्विजाः ते दूरादिदं वचः ऊचुः । दूरादित्यनेन तत्समीपगमनासामर्थ्यं तेषां सूचितम् ॥ १३ ॥

गो० टी०—त इति । त्रिविधमिति क्रियाविशेषणम् ओजसा तपोबलेन वयसा प्रकम्पं चञ्चलं शिरो येषां ते तथा ॥ १३ ॥ १४ ॥

१४] ति० टी०—किमूचुस्तदाह—वहन्त इति । रथेन प्रापयन्त इत्यर्थः जात्या उत्तमजातीयाः भर्तरि रामविषये हिता भवत वनं मा नयतेति यावत् आज्ञणयाच्चामतिक्रम्य युष्मद्गमनं भर्तुरहितमिति भावः ॥ १४ ॥

रा० टी०—तद्वचनमेवाह—वहन्त इति । जात्याः उत्तमजातिप्रसूताः अत एव जवनाः अतिगमनशीलाः भो भो तुरङ्गमाः मन्तव्यं मननयोग्यं रामं वहन्तो यूयं भर्तरि रामे हिताः प्रियवहनकर्तारः भवत न निवर्तध्वं गन्तव्यदेशमप्राप्य भवद्भिर्न निवर्तितव्यमित्यर्थः । ' गन्तव्यम् ' इति पाठे अनुगमनार्हमित्यर्थः ॥ १४ ॥

१५] ति० टी०—विशेषेण यूयं कर्णवन्त इत्यनुकर्षकस्तस्माद्बधिरवन्न गन्तव्यम्, अपि तु याचनामस्मदीयां प्रतिवेदिता ज्ञातवन्तो निवर्तध्वम् ॥ १५ ॥

रा० टी०—ननु पशुत्वादस्माभिः कथं तव संभाषणमि

१ चेति गो. पाठः । २ धर्म एव स्थितोऽभवदिति गो. पाठः । ३ बद्ध्वेति गो. पाठः । ४ मन्तव्यमिति रा. पाठः ।

धर्मतः स विशुद्धात्मा वीरः शुभदृढव्रतः । उपवाह्यस्तु वो भर्ता नापवाह्यः पुराद्वनम् ॥ १६ ॥
एवमार्तप्रलापांस्तान्वृद्धान्प्रलपतो द्विजान् । अवेक्ष्य सहसा रामो रथादवततार ह ॥ १७ ॥
पद्भ्यामेव जगामाथ ससीतः सहलक्ष्मणः । संनिकृष्टपदन्यासो रामो वनपरायणः ॥ १८ ॥
द्विजातीन्हि पदातींस्तान्रामश्चारित्रवत्सलः । न शशाक घृणाचक्षुः परिमोक्तुं रथेन सः ॥ १९ ॥
गच्छन्तमेव तं दृष्ट्वा रामं संभ्रान्तमानसाः । ऊचुः परमसंतप्ता रामं वाक्यमिदं द्विजाः ॥ २० ॥
ब्राह्मण्यं कृत्स्नमेतत्त्वां ब्रह्मण्यमनुगच्छति । द्विजस्कन्धाधिरूढास्त्वामग्नयोऽप्यनुयान्त्यमी ॥ २१ ॥
वाजपेयसमुत्थानि च्छत्राण्येतानि पश्य नः । पृष्ठतोऽनुप्रयातानि मेघानिव जलात्यये ॥ २२ ॥

त्यत आहुः—कर्णवन्तीति । भूतानि प्राणिनः कर्णवन्ति सन्तीति शेषः तत्र तुरङ्गमाः अश्वाः विशेषेण कर्णवन्तः अतो याचनां प्रतिवेदिताः मत्प्रार्थनाविषयकज्ञानवन्तो यूयं तस्मात्स्वविचारितवनमार्गमध्यनिवर्तनान्निवर्तध्वं वनप्रापणमन्तरा न निवर्तितव्यमित्यर्थः ॥ १६ ॥

गो० टी०—कर्णवन्तीति । याचनां प्रतिवेदिताः प्रार्थनां ज्ञापिताः अस्माभिरिति शेषः ॥ १६ ॥

१६] ति० टी०—उपवाह्यः पुरसमीपं प्रापणीयः वो युष्माकम्, न तु पुरादपनीय वनं वाह्यः प्रापणीयः ॥ १६ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—धर्मत इति । विशुद्धात्मा वो युष्माकं भर्ता अत एव नापवाह्यः विरुद्धवहनानर्हः स रामः पुराद्वनं धर्मतः सुखप्रापकत्वेन उपवाह्यः प्रापणीयः ॥ १६ ॥

गो० टी०—धर्म इति । उपवाह्यः पुरसमीपे वाह्यः ॥१६॥

१७] ति० टी०—आर्तप्रलापानार्तवाक्यानि प्रलपतः कथयतः ॥ १७ ॥

रा० टी०—एवमिति । आर्तप्रलापान्दुःखसूचकशब्दान्प्रलपतः कथयतो द्विजान्ब्राह्मणानवेक्ष्य रथादवततार एतेन रामस्य मर्यादापालकत्वं व्यक्तम् ॥ १७ ॥

गो० टी—एवमिति । आर्तप्रलापान् प्रलपतः आर्तवाक्यानि प्रयुञ्जानानित्यर्थः ॥ १७ ॥

१८] ति० टी०—द्विजानां संगमार्थं संनिकृष्टपदन्यासो भूत्वा वनपरायण एव शनैर्जगाम नतु निवृत्तो नापि स्थितः रथेन गमने ब्राह्मणक्लेशेन दोषः प्रतिनिवृत्य ब्राह्मणाश्वासने व्रतभङ्गो भवतीति धिया पद्भ्यां मन्दगमनोऽभूत् यावद्वृद्धसंनिधानमिति भावः ॥ १८ ॥

रा० टी०—पद्भ्यामिति । संनिकृष्टपदन्यासः संनिकृष्टो ब्राह्मणसंगमनेच्छया अल्पीभूतः पदन्यासो यस्य स रामः पद्भ्यामेव जगाम ॥ १८ ॥

गो० टी०—पद्भ्यामिति । संनिकृष्टपदन्यासः पद्भ्यां जगामेति ब्राह्मणवाक्यश्रवणानन्तरं रथगमने दोषो भवतीति प्रतिनिवृत्य ब्राह्मणाश्वासन व्रतभङ्गो भवतीति धिया रथादवतीर्य तदागमनपर्यन्तं मन्दं मन्दं जगामेत्यर्थः ॥ १८ ॥

१९] ति० टी०—रथेन परिमोक्तुं न शशाक अत्यन्तं रथवेगालम्बनेन निवर्तयितुं न शशाकेत्यर्थः । तत्र घृणाचक्षुर्हेतुः घृणा दया तत्सूचकचक्षुष्मानित्यर्थः ॥ १९ ॥

रा० टी०—रथादवतरणे प्रयोजनं वदन्नाह—द्विजातीनिति । चारित्रवत्सलः वात्सल्यसूचकाचरणविशिष्टः घृणाचक्षुः दयासूचकदृष्टिमान् रथेन सहितः स रामः पदातीन्द्विजातीन्परिमोक्तुं निवर्तयितुं न शशाक तेन रामस्याधर्मभीरुत्वं सूचितम् ॥ १९ ॥

गो० टी०—रथादवतीर्य किमर्थं पादगमनं कृतवानित्याशङ्क्याह—द्विजातीनिति । रथेन द्विजातीन् परिमोक्तुं न शशाक रथेनोपलक्षितः सन् सावरोधं दशरथमिवाज्ञप्त्यादिना द्विजातीन् निवर्तयितुं न शशाकेत्यर्थः । घृणाचक्षुः दयार्द्रचक्षुरित्यर्थः ॥ १९ ॥

२०] ति० टी०—गच्छन्तमेव स्वप्रार्थनानन्तरमपि न स्थितं नापि निवृत्तमित्यर्थः ॥ २० ॥

रा० टी०—गच्छन्तमिति । रामं सर्वाभिरामदातारम् एवं रथादिरहितत्वेन गच्छन्तं तं रामं दृष्ट्वा संभ्रान्तमानसाः संभ्रान्ते रामकर्तृकादरे मानसं येषां ते परमसंतप्ताः निश्चितरामवियोगजनितसंतापं प्राप्ताः द्विजाः इदं वाक्यमूचुः ॥ २० ॥

गो० टी०—गच्छन्तमिति । गच्छन्तमेव बहुशो निवृत्तिहेतुप्रदर्शनेऽपि पितृवचनचिकीर्षया गच्छन्तमेवेत्यर्थः ॥२०॥

२१] ति० टी०—ब्राह्मण्यं ब्राह्मणसमूहः ब्रह्मण्यं ब्रह्महितम् द्विजस्कन्धाधिरूढाः पात्रारणिद्वारेणेति शेषः ॥ २१ ॥

रा० टी०—तद्वचनमेवाह—ब्राह्मण्यमिति । कृत्स्नं निखिलमेतद्ब्राह्मण्यं ब्राह्मणसमूहः "ब्राह्मणमाणववाडवाद्यत्" इति यत् । ब्रह्मण्यम् ब्राह्मणहितं त्वामनुगच्छति अत एव द्विजस्कन्धाधिरूढाः ब्राह्मणस्कन्धेषु स्थिताः अमी अरणीपात्रादिद्वारका अग्नयस्त्वामनुयान्ति ॥ २१ ॥

गो० टी०—दुःखप्रलापादिनाप्यनिवृत्तं रामं सहवनगमनलक्षणं महाभारमारोप्य निवर्तयितुमुद्युक्ते—ब्राह्मण्यमित्यादिना । ब्राह्मण्यं ब्राह्मणसमूहः "ब्राह्मणमाणववाडवाद्यत्" इति यत्प्रत्ययः । ब्रह्मसु ब्राह्मणेषु साधुः ब्रह्मण्यः तमग्नयः अरण्यारोपिताः केवलानां द्विजस्कन्धाधिरूढत्वासंभवात् ॥ २१ ॥

२२] ति० टी०—वाजपेयसमुत्थानि वाजपेययाजिनो रा-

---

१ त्रिति गो. पाठः । २ चेलस इति गो. पाठः । ३ वान्त्यमीति गो. रा. पाठः ।

अनवाप्तातपत्रस्य रश्मिसंतापितस्य ते । एभिश्छायां करिष्यामः स्वैश्छत्रैर्वाजपेयकैः ॥ २३ ॥
या हि नः सततं बुद्धिर्वेदमन्त्रानुसारिणी । त्वत्कृते सा कृता वत्स वनवासानुसारिणी ॥ २४ ॥
हृदयेष्वेवतिष्ठन्ते वेदा ये नः परं धनम् । वत्स्यन्त्यपि गृहेष्वेव दाराश्चारित्ररक्षिताः ॥ २५ ॥
पुनर्न निश्चयः कार्यस्त्वद्गतौ सुकृता मतिः । त्वयि धर्मव्यपेक्षे तु किं स्याद्धर्मपथे स्थितम् ॥ २६ ॥
याचितो नो निवर्तस्व हंसशुक्लशिरोरुहैः । शिरोभिर्निभृताचार महीपतनपांशुलैः ॥ २७ ॥

जवच्छत्रादिसंबन्धस्य श्रुताबुक्तेः मेघानिव जलात्यये शारदमेघवत्पाण्डुराणिच्छत्राणीत्यर्थः ॥ २२ ॥

रा० टी०–वाजपेयेति । वाजपेयसमुत्थानि वाजपेये वाजपेययागे समुत्थानि लब्धानि पृथ्वतोऽनुप्रयातानि जलात्यये शरदि मेघानिव एतानि नोऽस्माकं छत्राणि पश्य वाजपेयिनां राजवच्छत्रधारणं श्रुतौ प्रसिद्धम् ॥ २२ ॥

गो० टी०–वाजपेयेति । वाजपेयसमुत्थानि वाजपेयानुष्ठानसंभृतानि जलात्यये शरदि ॥ २२ ॥

२३] ति० टी०–अनवाप्तातपत्रस्याप्राप्तश्वेतच्छत्रस्य वाजपेयकैर्वाजपेययागप्राप्तैः ॥ २३ ॥

रा० टी०–छत्रदर्शने प्रयोजनं वदन्नाह–अनवाप्तेति । न अवाप्तं प्राप्तमातपत्रं छत्रं येन तस्य अत एव रश्मिसंतापितस्य ते वाजपेयकैः वाजपेये उपलब्धैः एभिःस्वैः स्वकीयैश्छत्रैः छायां करिष्यामः " यावज्जीवं कंचन प्रत्यारोहेद्बृहस्पतिसवेन वा यजेतप्रत्यवरोहिणीयेन यजेत् श्वेतच्छत्री भवतीति विज्ञायते" इति वाजपेययाजिनां श्वेतच्छत्रधारणविधानम् ॥ २३ ॥

गो० टी०–अनवाप्तेति । वाजपेयिकैः वाजपेयप्राप्तैः "यावज्जीवं न कंचन प्रत्यवरोहेत् बृहस्पतिसवेन वा प्रत्यवरोहणीयेन यजेत श्वेतच्छत्री भवतीति विज्ञायते" इति वाजपेयाजिनां श्वेतच्छत्रधारणविधानादिति भावः ॥ २३ ॥

२४] ति० टी०–वेदमन्त्रानुसारिणी तदभ्यासानुसरणशीला त्वत्कृते त्वन्निमित्तं वनवासानुसारिणी वेदाभ्यासादि परित्यज्य वनवासोन्मुखीकृतेत्यर्थः ॥ २४ ॥

रा० टी०–येति । नोऽस्माकं या बुद्धिः वेदमन्त्रानुसारिणी मन्त्राभ्यासनिरतेत्यर्थः सा बुद्धिस्त्वत्कृते त्वदर्थं वनवासानुसारिणी कृता एतेन वयमपि सहैव नेतव्या इति सूचितम् ॥ २४ ॥

गो० टी०–अस्माकं बुद्धिरेतावन्तं कालं निश्चिन्ततया मन्त्रविषयाभूत् इदानीं त्वत्कृतवनवासविषयाभूदिति रामे महान्तं भारमारोपयन्ति–याहीत्यादिना ॥ २४ ॥

२५] ति० टी०–अस्माकं त्वया सह वनागमने न काप्यनुपपत्तिरित्याहुः–हृदयेष्विति । ये नोऽस्माकं परं धनं वेदाः तेऽस्माकं हृदय एवावतिष्ठन्ते चारित्रं पातिव्रत्यम् ॥ २५ ॥

रा० टी०–ननु धनदारान्विहाय कथं भवतां सह गमनमित्यत आहुः–हृदयेष्विति । ये वेदाः नः परमुत्कृष्टं धनं ते हृदयेष्वेव अवतिष्ठन्ते चारित्ररक्षिताः स्वाचरणकर्तृकरक्षाविशिष्टा दारा अपि गृहे वत्स्यन्ति एतेन सहगमने न काप्यनुपपत्तिरिति सूचितम् ॥ २५ ॥

गो० टी०–ब्राह्मणानां धनभूतं वेदं परित्यज्य सहधर्मचारिदारसंरक्षणमप्यकृत्वा कथमस्माभिः सह गन्तव्य इत्याकाङ्क्षायामाह–हृदयेष्विति । नः परं धनं उत्कृष्टधनभूता ये वेदास्ते हृदयेष्वेव तिष्ठन्ति अनुच्चारणे तेषां न कापि हानिरिति भावः । चारित्रेण पातिव्रत्येन रक्षिता दाराश्च गृहेष्वेव तिष्ठन्ति चारित्राणामेव तदक्षकत्वान्नास्मद्रक्ष्यास्त इति भावः ॥ २५ ॥

२६] ति० टी०–पुनरिति । यद्यपि त्वद्गतौ त्वदनुगमनेऽस्माकं मतिः सुकृता निश्चिता अतः पुनर्वनगमननिश्चयोऽस्माकं न कार्योऽस्ति कृतत्वादेव तथापि किंचिद्भ्रम इति शेषः । त्वयि धर्मव्यपेक्षे ब्राह्मणवचनरूपधर्मनिरपेक्षे सति किंभूतं धर्मपथे स्थितं स्यात्, न किमपि सर्वे धर्ममार्गं व्यतिक्रमेयुः ॥ २६ ॥

रा० टी०–ननु बहूनामसंमतत्वान्मद्गमनमेव संदिग्धमित्यत आहुः–पुनरिति । गतौ त्वत्कर्तृकगमने त्वद्गमनविरोध्यन्यः निश्चयः पुनर्न कार्यः कैश्चिदिति शेषः । इति मतिर्निश्चयः सुकृता अस्माभिरिति शेषः । अयं त्वच्छब्दः सर्वादिपठितोन्यपर्यायः । तत्र हेतुमाह–त्वयि धर्मव्यपेक्षे धर्मापेक्षारहिते सति धर्मपथे धर्ममार्गे स्थितं किं वस्तु स्यात्र किमपीत्यर्थः ॥ २६ ॥

गो० टी०–अथ मत्प्रार्थनया निवर्तध्वमित्यत्राह–नेति । त्वद्गतौ त्वन्निवर्तनरूपगतौ मतिः सुकृता सुष्ठुकृता निश्चयः वनगमननिश्चयः पुनर्न कार्यः त्वयेति शेषः । त्वयि धर्मव्यपेक्षे पितृवचनपरिपालनरूपधर्मसापेक्षे सति अस्माभिः धर्ममपेक्षितुं पालयितुं किं निमित्तं स्यात् त्वयि वनं गतेऽस्माभिर्धर्म एव त्यक्तव्य इति भावः, यद्वा त्वयि तु धर्मपरायणे त्वयि तु धर्मव्यपेक्षे सति ब्राह्मणप्रार्थनाकरणरूपधर्मनिरपेक्षे सति किं भूतं धर्ममपेक्षितुं स्यात् न किमपीत्यर्थः ॥ २६ ॥

२७] ति० टी०–तस्मादस्माभिर्हंसशुक्लशिरोरुहैः पालितकेशैः शिरोभिः साष्टाङ्गप्रणामेन महीपतनपांशुलैर्महीपतनेन पांशुलै रजोव्याप्तैर्देहैश्च याचितस्त्वं निभृताचार निश्चलधर्मानुष्ठान! निवर्तस्व । अत्र ब्राह्मणैर्नमस्कारः क्षत्रियस्य कथमिति न शङ्क्यं तत्त्वज्ञतया भगवदवतारत्वदृष्ट्या नमस्कारेणादोषात्, यद्वा राज्ञो विष्ण्वंशत्वेन नतौ न दोष इत्याहुः ॥ २७ ॥

रा० टी०–याचित इति । हंसशुक्लशिरोरुहैः हंसशुक्लसदृशशुक्लविशिष्टकेशविशिष्टैः शिरोभिरुपलक्षितैः महीपतनपांशुलैः

१ वाजपेयिकैरिति गो. पाठः । २ एव तिष्ठन्तीति गो. पाठः । ३ पुनरिति गो. पाठः । ४ धर्ममपेक्षितुमिति गो. पाठः ।

बहूनां विततां यज्ञां द्विजानां य इहागताः । तेषां समाप्तिरायत्ता तव वत्स निवर्तने ॥ २८ ॥
भक्तिमन्तीह भूतानि जङ्गमाजङ्गमानि च । याचमानेषु तेषु त्वं भक्तिं भक्तेषु दर्शय ॥ २९ ॥
अनुगन्तुमशक्तास्त्वां मूलैरुद्धतवेगिनः । उन्नता वायुवेगेन विक्रोशन्तीव पादपाः ॥ ३० ॥
निश्चेष्टाऽऽहारसंचारा वृक्षैकस्थाननिश्रिताः । पक्षिणोऽपि प्रयाचन्ते सर्वभूतानुकम्पनम् ॥ ३१ ॥
एवं विक्रोशतां तेषां द्विजातीनां निवर्तने । ददृशे तमसा तत्र वारयन्तीव राघवम् ॥ ३२ ॥

प्रणामार्थं महीपतनेन धूलीधूसरैः अमात्यादिभिर्याचितोऽपि त्वं नो निवर्तस्व निभृताचारेति संबोधनं तदर्थस्तु निभृतो नितरां पोषितः आचारः सज्जनमार्गो येनेति ॥ २७ ॥

गो० टी०—ज्ञानवयस्तपोवृद्धा अपि द्विजाः विश्लेषासहिष्णुतया प्रणामेनापि रामं निवर्तयितुमुद्युञ्जते—याचित इति । हे निभृताचार निश्चलधर्मानुष्ठान ! हंसशुक्लशिरोरुहैः पलितकेशैः महीपतनपांसुलैः कृतसाष्टाङ्गप्रणामैः नः अस्माकं शिरोभिर्याचितो निवर्तस्व वृद्धब्राह्मणानां क्षत्रियकुमारप्रणामः परत्वबुद्ध्या ॥ २७ ॥

२८] ति० टी०—एवमपि गच्छन्तमेव दृष्ट्वाहुः—बहूनामिति । ये द्विजा इहागतास्तेषां बहूनां यज्ञा इह काले विततां सन्ति तेषां समाप्तिस्त्वन्निवर्तनायत्ता अनिष्टत्तौ सर्वयज्ञविघ्नकर्तृत्वं त्वय्यापत्स्यतीति भावः ॥ २८ ॥

रा० टी०—बहूनामिति । हे वत्स ! ये इहागतास्तेषां बहूनां द्विजानां ये विततां विस्तृता यज्ञास्तेषां समाप्तिः निवर्तने वनवासान्निवृत्तिसमये आयत्ता अस्माभिर्निश्चितेत्यर्थः । पूर्वस्तेषांशब्दो यच्छब्दमहिम्ना उत्तरत्र ये इति तच्छब्दमहिम्ना चाध्याहृतः ॥ २८ ॥

गो० टी०—बहूनामिति । ये द्विजा इहागतास्तेषां ये यज्ञाः विततां विस्तृताः संभृतसंभारा इति यावत् तेषां यज्ञानां समाप्तिस्तव निवर्तने आयत्ता त्वन्निवर्तनाधीनेत्यर्थः । एवं न कृतं चेत्सर्वे यज्ञास्त्वयैव विघ्निताः स्युरिति भावः ॥२८॥

२९] ति० टी०—न केवलमस्मत्प्रार्थनैव अपि तु सर्वभूतप्रार्थनापीत्याहुः—भक्तीति । जङ्गमाजङ्गमानि सर्वाण्यपि भूतानि भक्तिमन्ति स्नेहवन्ति तेषु त्वन्निवृत्तिं याचमानेषु भक्तेषु त्वमपि भक्तिं स्नेहं प्रदर्शय निवृत्त्येति शेषः ॥ २९ ॥

रा० टी०—वनगमने प्रयोजनान्तरं वदन्त आहुः—भक्तिमन्तीति । जङ्गमाजङ्गमानि चराचराणि ते भक्तिमन्ति सन्तीति शेषः अतो याचमानेषु तेषु भक्तेषु वियमानां भक्तिं त्वं दर्शय स्वगमनेन प्रकटय तेन " भक्तिरेवैनं गमयति " इत्यादिश्रुतिसार्थक्यं कुर्विति प्रार्थना सूचिता ॥ २९ ॥

गो० टी०—न केवलं वयमेव तिर्यक्स्थावराण्यपि त्वन्निवृत्तिमपेक्षन्त इत्याह—भक्तिमन्तीति । भक्तिं स्नेहं दर्शय सफलयेत्यर्थः ॥ २९ ॥

३०] ति० टी०—तेषां याच्ञाप्रकारमाह—मूलैः स्थावरत्वादुद्धृतवेगा अतस्त्वामनुगन्तुमशक्ता उन्नता उच्छ्रिताः पादपा वायुवेगेन वायुवेगजशाखाचलनशब्दैर्विक्रोशन्तीव त्वन्निवर्तनायेति शेषः ॥ ३० ॥

रा० टी०—ननु भक्ताः स्वयमेवागत्य मद्दर्शनं करिष्यन्तीति किं मद्गमनेनेत्यत आहुः—अनुगन्तुमिति । वायुवेगेन करणेन मूलेन सह उद्धतवेगिनः अतिप्रकम्पविशिष्टाः इत्यर्थः पादपा इव उद्धतवेगिनः अतिवृद्धा इत्यर्थः अत एव त्वामनुगन्तुमशक्ताः उन्नताः उदि परमात्मनि त्वयि नताः महान्तः त्वां विक्रोशन्ति आह्वयन्ति त्वदागमनं वाञ्छन्तीत्यर्थः । त्वामित्युभयान्वयि । एतेन त्वयैव गन्तव्यमिति सूचितम् ॥ ३० ॥

गो० टी०—अनुगन्तुमिति । मूलैः पादस्थानीयैस्त्वामनुगन्तुमशक्ताः उद्धतवेगिनः प्रतिहतवेगिनः वायुवेगेन उन्नताः ऊर्ध्वबाहव इव स्थिता इति भावः । पादपाः विक्रोशन्तीव क्रन्दन्तीव वायुवेगोत्थशब्दैरिति भावः । उद्धतवेगिभिरित्यपि पाठः ॥ ३० ॥

३१] ति० टी०—चेष्टा गात्रचलनादिरूपा आहारार्थसंचारश्च तेभ्यो निर्गतास्तद्रहिताः वृक्षरूपैकस्थान एव निश्रिता निश्चयेन स्थिताः, न त्वाहारायापि भुवमवतीर्णाः एवं मरणपर्यन्तव्यापारेण त्वां याचन्ते निवृत्तिमिति शेषः ॥ ३१ ॥

रा० टी०—तद्वने तिर्यग्योनीनामपि तव दर्शनाकाङ्क्षेति बोधयन्त आहुः—निश्चेष्टेति । निश्चेष्टाहारसंचाराः वृक्षत्वादिना निर्गताश्चेष्टा बहुवाग्व्यापाराः आहारसंचाराः आहारार्थं संचरणं येषां ते अत एव वृक्षैकस्थाननिश्रिताः एकवृक्षस्थितिविषयकनिश्चयवन्तः पक्षिणः संपातिप्रभृतयोऽपि सर्वभूतानुकम्पनं त्वां प्रयाचन्ते द्रष्टुमिच्छन्तीत्यर्थः ॥ ३१ ॥

गो० टी०—निश्चेष्टेति । चेष्टा चलनादिकम् आहारसंचाराश्च येभ्यो निर्गतास्ते तथोक्ताः प्रयाचन्ते प्रार्थयन्ते निवृत्तिमिति शेषः । एवं तिर्यक्स्थावराणामपि स्नेहो रामस्य सर्वशरीरित्वात्, शरीरिणो वैपरात्ये हि शरीरव्यथा दृष्टा ॥ ३१ ॥

३२] ति० टी०—निवर्तने निवर्तननिमित्तं विक्रोशतां तेषामनुग्रहाय मार्गे तिर्यक्प्रवाहत्वाद्राघवं वारयन्तीव तमसा ददृशे दृष्टा ॥ ३२ ॥

रा० टी०—एवमिति । एवमनेन प्रकारेण विक्रोशतां तेषां द्विजातीनां निवर्तने इव स्थिता राघवं रामं वारयन्ती वरमिच्छन्ती तमसा तत्र तस्मिन्समये ददृशे कर्मणि लिट् । वीरशब्दः स्वार्थिकाणन्तः ॥ ३२ ॥

१ ह्रीति गो. पाठः । २ रामेति गो. पाठः । ३ विहिता इति गो. पाठः । ४ कम्पनमिति गो. पाठः । ५ आपत्स्यते इति युक्तं भाति ।

ततः सुमन्त्रोऽपि रथाद्विमुच्य श्रान्तान्हयान्संपरिवर्त्य शीघ्रम् ।
पीतोदकांस्तोयपरिप्लुताङ्गानचारयद्वै तमसाविदूरे ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।

तमसातीरमनुगतो रामोऽयोध्यास्थजनवृत्तं भावयमानः पितरावनुशोच्य पुनश्च भरतसादृण्येनाश्वास्यमानः पञ्चवारचितशयनीये संविवेश । लक्ष्मणस्तु सुमन्त्राग्रे रामगुणान्प्रस्तूयमान एवास्तेऽथ प्रबुध्यमानो रामोऽनुसृतपौरवञ्चनाय वनगमनमबोधयन्त्या नगरगमनमेव प्रदर्शयन्त्या गत्या रथं प्रवर्त्यानेतुं सूतं प्रेरयत्तथा तेनानुष्ठिते प्रापितरथमधिरुह्य ससीतालक्ष्मणो रामोऽग्रेवणं प्रतस्थे ।

ततस्तु तमसातीरं रम्यमाश्रित्य राघवः । सीतामुद्वीक्ष्य सौमित्रिमिदं वचनमब्रवीत् ॥ १ ॥
इयमद्य निशा पूर्वा सौमित्रे प्रहिता वनम् । वनवासस्य भद्रं ते नै चोत्कण्ठितुमर्हसि ॥ २ ॥
पश्य शून्यान्यरण्यानि रुदन्तीव समन्ततः । यथा निलयमायद्भिर्निलीनानि मृगद्विजैः ॥ ३ ॥
अद्ययोध्या तु नगरी राजधानी पितुर्मम । सस्त्रीपुंसा गतानस्माञ्छोचिष्यति न संशयः ॥ ४ ॥

गो० टी०—एवमिति । निवर्तने विषये यद्वा, द्विजातीनामिति संबन्धसामान्ये षष्ठी द्विजातिभिः प्रार्थ्यमानरामनिवर्तन इत्यर्थः ॥ ३२ ॥

३३] ति० टी०—संपरिवर्त्य श्रमापनुत्तये कृतविलुण्ठनान्विधाय तोयपरिप्लुताङ्गान्स्नापितांस्तमसाया अविदूरेऽचारयद्भक्षिततृणानकारयत् ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०—तत इति । ततस्तमसादर्शनानन्तरं श्रान्तान्हयान्रथाद्विमुच्य परिवर्त्य श्रमनिवर्तकपरिभ्रमणं कारयित्वा पीतोदकान्पीतजलांस्तोयपरिप्लुताङ्गान्कृतस्नानान्हयांस्तमसाविदूरे तमसाया निकटे अचारयत् ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

गो० टी०—तत इति । संपरिवर्त्य अध्वश्रमनिवृत्त्यर्थं परिवेष्टनं कारयित्वा ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

१] ति० टी०—सीतामुद्वीक्ष्य सौमित्रिमब्रवीदित्यनेन सीतोद्देश्यकताप्यस्य वचसो ध्वनिता ॥ १ ॥

रा० टी०—रामवृत्तं बोधयितुमाह—तत इति । रम्यं रमणीयं तमसायाः नदीविशेषस्य तीरमाश्रित्य सीतामुद्वीक्ष्य अवलोक्य सौमित्रिमिदं वचनमब्रवीत् ॥ १ ॥

गो० टी०—ततस्त्विति । सीतामुद्वीक्ष्येति लक्ष्मणं प्रति कथनं वक्ष्यमाणस्यात्युत्कण्ठाकारणस्य सीताविषयेऽपि तुल्यत्वज्ञापनाय ॥ १ ॥

२] ति० टी०—हे सौमित्रे ! वनवासस्य वनवाससंबन्धिनिशानां मध्येऽद्य प्रवृत्तेयं निशा वनं वनवासं प्रति पूर्वा प्रहिता प्राप्ता वनवासकालस्यैतन्निशामारभ्य गणनीयत्वात् अतस्त्वमुत्कण्ठितुमद्यप्रभृति पुरौत्सुक्येनायोध्यादिस्मरणं कर्तुं नार्हसि ॥ २ ॥

रा०टी०—तद्वचनमेवाह—इयमिति । हे सौमित्रे ! वनवासस्य वनवाससंबन्धिनी इयं पूर्वा प्रथमा निशा प्रहिता प्राप्ता इतःप्रभृत्येव चतुर्दशवर्षगणना कर्तव्येति तात्पर्यम् अतः अवनं वनवासविरोधि वस्तु उत्कण्ठितुं स्मर्तुं नार्हसि ते भद्रं कल्याणमेव सर्वत्रेति शेषः ॥ २ ॥

गो० टी०—इयमिति । वनवासस्य पूर्वा प्रथमा अद्येयं निशा इदानीमुपस्थिता रात्रिः प्रहिता गतप्राया अतः स त्वम् उत्कण्ठितुं नार्हसि सीतामुद्वीक्ष्य सौमित्रिमब्रवीदित्यस्यैवं वाभिप्रायः अतिसुकुमारी सीता कथं पद्भ्यामेव वनं गच्छेदिति नोत्कण्ठितुमर्हसीति ॥ २ ॥

३] ति० टी०—यथायोगं स्वस्वनिलयमायद्भिरागच्छद्भिर्मृगद्विजैर्निलीनानि सशब्दमन्तर्लीनतया व्याप्तानि अत एव शून्यान्यरण्यानि रुदन्तीवास्मान्दृष्ट्वा खिन्नानीव वर्तन्ते तानि पश्य ॥ ३ ॥

रा० टी०—पश्येति । समन्ततः चतुर्दिक्षु यथानिलयं स्वस्ववासस्थानमनतिक्रम्य आयद्भिरागच्छद्भिः मृगद्विजैः मृगपक्षिभिः निलीनानि शून्यानि मङ्गलकार्यरहितानि रुदन्तीवारण्यानि तमसातीरवनानि त्वं पश्य ॥ ३ ॥

गो० टी०—पश्येति । शून्यानि निष्प्रभाणि यथानिलयं यथास्थानमायद्भिरागच्छद्भिः मृगद्विजैर्निलीनानि व्याप्तानि तात्कालिकतच्छब्दैः रुदन्तीव निष्प्रभत्वेन रोदनोत्प्रेक्षा ॥ ३ ॥

४] ति० टी०—सस्त्रीपुंसा स्त्रीपुंसैः सहिता अद्यप्रभृति ॥ ४ ॥

१ स नेति गो. पाठः । २ अत्र पञ्चमी युक्तेति भाति ।

अनुरक्ता हि मनुजा राजानं बहुभिर्गुणैः । त्वां च मां च नरव्याघ्र शत्रुघ्नभरतौ तथा ॥ ५ ॥
पितरं चानुशोचामि मातरं च यशस्विनीम् । अपि नान्धौ भवेतां नौ रुदन्तौ तावभीक्ष्णशः ॥ ६ ॥
भरतः खलु धर्मात्मा पितरं मातरं च मे । धर्मार्थकामसहितैर्वाक्यैराश्वासयिष्यति ॥ ७ ॥
भरतस्यानृशंसत्वं संचिन्त्याहं पुनः पुनः । नानुशोचामि पितरं मातरं च महाभुज ॥ ८ ॥
त्वया कार्यं नरव्याघ्र मामनुव्रजता कृतम् । अन्वेष्टव्या हि वैदेह्या रक्षणार्थं सहायता ॥ ९ ॥
अद्भिरेव हि सौमित्रे वत्स्याम्यद्य निशामिमाम् । एतद्धि रोचते मह्यं वन्येऽपि विविधे सति ॥ १० ॥
एवमुक्त्वा तु सौमित्रिं सुमन्त्रमपि राघवः । अप्रमत्तस्त्वमश्वेषु भव सौम्येत्युवाच ह ॥ ११ ॥

रा० टी०–अद्येति । सस्त्रीपुंसा स्त्रीपुंसैः सहिता "अचतुरविचतुर–" इत्यच् । अयोध्या अस्माञ्छोचिष्यति ॥ ४ ॥

गो० टी०–वनरोदनोत्प्रेक्षया उद्बुद्धसंस्कारो नगरवृत्तान्तं स्मरति–अद्येति । स्त्रीपुंसेति "अचतुरविचतुरसुचतुरस्त्रीपुंस–" इत्यादिना निपातनादकारान्तत्वम् ॥ ४ ॥

५] ति० टी०–कुतस्तत्राह–अनुरक्ता इति । बहुभिर्गुणैरिति सर्वान्वयि ॥ ५ ॥

रा० टी०–शोके हेतुं वदन्नाह–अनुरक्ता इति । बहुभिर्गुणैरुपलक्षितान्राजादीन्मनुजा अयोध्यावासिजनाः अनुरक्तास्तद्विषयकातिस्नेहवन्तः सन्तीति शेषः ॥ ५ ॥

गो० टी०–शोचनहेतुमाह–अनुरक्ता इति । गुणैर्हेतुभिः राजानं प्रत्यनुरक्ता हि राजानमित्युपादानमौद्धत्यपरिहाराय ॥ ५ ॥

६] ति० टी०–नावस्मदर्थे अस्मन्निमित्तमभीक्ष्णं मुहुर्मुहु रुदन्तौ पितरावन्धौ न भवेताम्, अपि भवेतामेव अतः शोचामि तौ ॥ ६ ॥

रा० टी०–पितरमिति । यशस्विनीमितियशोविशिष्टामनुशोचामि । ननु किमर्थमनुशोचसीत्यत आह–नौ अस्मदर्थमभीक्ष्णशः वारंवारं रुदन्तौ तौ मातापितरौ अन्धौ नापि भवेतां बहिर्दृष्टितां नापि निवर्तेयातामित्यर्थः किंच अन्धौ अस्मद्विषयकद्वेषवत्तासंभावनया बहूनां चक्षुरपहारकौ नापि भवेतां तेनापहारकत्वेन मत्पितृदोषस्पर्शित्वं स्यादिति पश्चात्तापः सूचितः । अपिः संभावनार्थकः ॥ ६ ॥

गो० टी०–पितरमिति । रुदन्ताविति सन्ततरोदनवशेनान्धौ स्यातामित्यर्थः ॥ ६ ॥

७] ति० टी०–अथवा तदनुशोकोऽस्माकं वृथेत्याह–भरत इति ॥ ७ ॥

रा० टी०–वस्तुतस्त्वेवं न भवितेति बोधयन्नाह–भरत इति। धर्मार्थकामसहितैर्धर्मादिबोधकैर्वाक्यैः आश्वासयिष्यति ॥ ७ ॥

गो० टी०–एवमपि कांचित्प्रत्याशास्तीत्याह–भरत इति ॥ ७ ॥ ८ ॥

८] ति० टी०–अनृशंसत्वमक्रूरत्वम् ॥ ८ ॥

रा० टी०–भरतस्येति । अनृशंसत्वं सर्वकालं क्रूरतासंसर्गरहितत्वं क्रूरताविरोधित्वं वा संचिन्त्य संस्मृत्य नानुशोचामि ॥ ८ ॥

९] ति० टी०–अथ लक्ष्मणानुगमनेन संतुष्ट आह–त्वयेति । मामनुव्रजता त्वया तु यत्कार्यं कर्तव्यं तत्कृतमेव हि यतस्त्वदनुव्रजनाभावे वैदेहीरक्षणार्थं सहायता सहायसमूहोऽन्वेष्टव्यः स्यात् त्वमेकोऽपि सहायसमूहस्थानीय इति भावः । अतस्त्वस्यै अद्यारभ्यैव सुखाहारादिकं संपादयेति शेषः ॥ ९ ॥

रा० टी०–लक्ष्मणोपकृतिं बोधयन्नाह–त्वयेति । अनुव्रजता अनुगमनं कुर्वता त्वया कार्यमस्माभिः कर्तव्यं कृतं साधितमन्यथा वैदेह्या रक्षणार्थं सहायता सहायसमूहः अन्वेष्टव्या अन्वेषणीया स्यादिति शेषः तेन सहायसमूहसामर्थ्यं लक्ष्मणे एव दर्शितमिति व्यक्तम् ॥ ९ ॥

गो० टी०–त्वया चोदितमेव कृतमित्याह–त्वयेति । कार्यमवश्यं कर्तव्यं, तत्र हेतुः अन्वेष्टव्येति ॥ ९ ॥

१०–११] ति० टी०–अहं त्वत्र तमसातीरे इमां निशामद्भिरेव कृतप्राणरक्षणो वत्स्यामि प्रथमदिनत्वाद्वनवासंकल्पाङ्गत्वेनेति शेषः । तदेवाह–एतद्धीति । वन्ये सत्यपीत्यन्वयः ॥ १० ॥ ११ ॥

रा० टी०–तात्कालिककर्तव्यं बोधयन्नाह–अद्भिरिति । अद्भिर्जलैरेव इमां निशां वत्स्यामि एवेन भक्षणान्तरव्यावृत्तिः । तत्र हेतुः विविधे अनेकप्रकारे वन्ये भक्ष्यफलादौ सत्यपि एतज्जलमात्रभक्षणमेव अद्य अस्यां रात्रौ रोचते एतेन तमसायास्तीर्थत्वात्तदुपवासविधिः कृत इति व्यक्तं तेन तस्य मर्यादापालकत्वं ध्वनितम् ॥ १० ॥

रा० टी०–एवमिति । सौमित्रिमेवमुक्त्वा अश्वेषु अश्वरक्षणेषु अप्रमत्तस्त्वं भवेति सुमन्त्रमुवाच ॥ ११ ॥

गो० टी०–अद्भिरेव वत्स्यामि अप एवाहारीकृत्य वत्स्यामि । वनवासोपक्रमदिवसत्वादस्य पुण्यक्षेत्रत्वाच्चोपवासः एतद्धि रोचते नान्यत् अनुरक्तजनदुःखस्मरणादिति भावः ॥ १० ॥ ११ ॥

१ वेति गो. पाठः । २ त्विति गो. पाठः । ३ विचिन्त्येति गो. पाठः । ४ अपि लक्ष्मणेति गो. पाठः । ५ रक्षणार्थे इति गो. पाठः । ६ त्विति गो. पाठः । ७ विरोचते इति रा. पाठः ।

सोऽश्वान्सुमन्त्रः संयम्य सूर्येऽस्तं समुपागते । प्रभूतयवसान्कृत्वा बभूव प्रत्यनन्तरः ॥ १२ ॥
उपास्य तु शिवां संध्यां दृष्ट्वा रात्रिमुपागताम् । रामस्य शयनं चक्रे सूतः सौमित्रिणा सह ॥ १३ ॥
तां शय्यां तमसातीरे वीक्ष्य वृक्षदलैर्[1]कृताम् । रामः सौमित्रिणा सार्धं सभार्यः संविवेश ह[2] ॥ १४ ॥
सभार्यं संप्रसुप्तं तु[3] श्रान्तं संप्रेक्ष्य लक्ष्मणः । कथयामास सूताय रामस्य विविधान्गुणान् ॥ १५ ॥
जाग्रतोरेव[4] तां रात्रिं सौमित्रेरुदितो रविः । सूतस्य तमसातीरे रामस्य ब्रुवतो गुणान् ॥ १६ ॥
गोकुलाकुलतीरायास्तमसाया विदूरतः । अवसत्तत्र तां रात्रिं रामः प्रकृतिभिः सह ॥ १७ ॥
उत्थाय[5] तु महातेजाः प्रकृतीस्ता निशाम्य च । अब्रवीद्भ्रातरं रामो लक्ष्मणं पुण्यलक्षणम् ॥ १८ ॥
अस्मद्व्यपेक्षान्सौमित्रे निर्व्यपेक्षान्गृहेष्वपि[6] । वृक्षमूलेषु संसक्तान्पश्य लक्ष्मण साम्प्रतम् ॥ १९ ॥

१२] ति० टी०–संयम्य यथायोग्यं बन्धनं कृत्वा प्रभूतयवसान्प्रभूतघासान् प्रत्यनन्तरः प्रत्यासन्नः ॥ १२ ॥

रा० टी०–स इति । स सुमन्त्रः अश्वान्संयम्य यथोचितं बन्धनं प्रापय्य प्रभूतयवसान्बहुघासान्कृत्वा तदग्रे संस्थाप्य प्रत्यनन्तरः रामं प्रत्यासन्नो बभूव ॥ १२ ॥

गो० टी०–स इति । प्रभूतयवसान् पर्याप्ततृणान् ' यवसं तृणमर्जुनम् ' इत्यमरः । प्रत्यनन्तरः प्रतिगतमनन्तरकृत्यं येन स तथोक्तः अवगतानन्तरकार्य इत्यर्थः । संनिहित इत्यर्थ इत्येके ॥ १२ ॥

१३] ति० टी०–शयनं शयनस्थलं शर्करापांसुत्वेषणादिना चक्रे इत्यन्वयः ॥ १३ ॥

रा० टी०–उपास्येति । उपागतां रात्रिं दृष्ट्वा सौमित्रिणा सह सूतः शिवां कल्याणप्रदां संध्यामुपास्य सांध्यविधिं समाप्येत्यर्थः वियमानस्य रामस्य शयनं शयनयोग्यस्थलं चक्रे । वियमानस्येति ल्यबन्तार्थान्वयार्थमध्याहृतम् ॥ १३ ॥

गो० टी०–उपास्येति । उपासनं नमस्कारः सूतजातेरपि नमस्कारमात्रं संभवति ॥ १३ ॥

१४] ति० टी०–वृक्षदलैर्वृक्षपर्णैः सौमित्रिणा सार्धं सूतेन कृतां शय्यां वीक्ष्य सभार्यः संविवेश ॥ १४ ॥

रा० टी०–तामिति । सौमित्रिणा सार्धं सूतेन वृक्षदलैः वृक्षपर्णैः कृत्तां रचितामित्यर्थः तां शय्यां वीक्ष्य सभार्यो रामः संविवेश ॥ १४ ॥

गो० टी०–तामिति । वृक्षदलैः सौमित्रिणा सार्धं सूतेन कृतां वीक्ष्य इत्यन्वयः ॥ १४ ॥ १५ ॥

१५] ति० टी०–गुणान्कथयामास जागरणार्थमिति भावः ॥ १५ ॥

रा० टी०–सभार्यमिति । संप्रेक्ष्य समवलोक्य विविधान् अनेकप्रकारान्रामस्य गुणाँल्लक्ष्मणः कथयामास ॥ १५ ॥

१६] ति० टी०–तां रात्रिमित्यत्यन्तसंयोगे द्वितीया । उदितो रविः अरुणोदयकालो जात इत्यर्थः ॥ १६ ॥

रा० टी०–जाग्रत इति । सूतस्य सुमन्त्राय रामस्य गुणान् ब्रुवतः अत एव तां रात्रिं जाग्रतः सौमित्रेः रविरुदितः । " षष्ठी चानादरे " इति षष्ठी " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया । सूतस्येत्यत्र संबन्धसामान्ये षष्ठी ॥ १६ ॥

गो० टी०–जाग्रत इति । तां रात्रिमिति अत्यन्तसंयोगे द्वितीया सर्वां रात्रिं जाग्रतः सूतस्य सूताय रामस्य गुणान् कालक्षेपार्थं ब्रुवतः सौमित्रेः सौमित्रौ ब्रुवति सति रविरुदितः उदितुमारब्धः उपःकालोऽभूदित्यर्थः । यद्वा उदयपर्यन्तं गमनकालेऽपि गुणानब्रवीदिति भावः ॥ १६ ॥

१७] ति० टी०–गोकुलैराकुलं व्याप्तं तीरं यस्यास्तस्यास्तमसायास्तीरे विदूरतो द्विजसंवेशदेशादतिदूरदेशेऽतिसंधाय गमनसौकर्यार्थमवसत् । प्रकृतिसाहित्यं तमसातीरवासमात्रे बोध्यम् ॥ १७ ॥

रा० टी०–गोकुलेति । गोकुलाकुलतीरायाः गोसमूहव्याप्ततीरविशिष्टायाः तमसायाः विदूरतः क्षीवनादिहेतुकापचारभिया किंचिद्दूरं तां रात्रिमवसत् ॥ १७ ॥

गो० टी०–पूर्वकथाशेषं प्रस्तौति–गोकुलेति । विदूरतः प्रकृतिभिः पौरश्रेणिभिः ' राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ' इत्यमरः ॥ १७ ॥

१८] ति० टी०–निशाम्यावलोक्य निद्राणा इति शेषः॥१८॥

रा० टी०–उत्थायेति । ताः सुप्ताः प्रकृतीः प्रजाः निशाम्य दृष्ट्वा लक्ष्मणमब्रवीत् ॥ १८ ॥

गो० टी०–उत्थायेति । निशाम्य दृष्ट्वा ॥ १८ ॥

१९] ति० टी०–अस्मद्व्यपेक्षानस्मास्वेव विशेषेणापेक्षावतः अत एव गृहेषु निर्व्यपेक्षान्निरपेक्षान् श्रमात्सांप्रतमरुणोदयेऽपि सुप्तान् ॥ १९ ॥

रा० टी०–तदाकारमाह–अस्मदिति । अस्मद्व्यपेक्षानस्मद्विषयकात्यपेक्षाविशिष्टानत एव गृहेषु अपिना पुत्रादिषु निर्व्यपेक्षानपेक्षारहितान् अत एव वृक्षमूलेषु संसुप्तान् अध्वश्रमादेतावत्कालपर्यन्तमपि स्वापविशिष्टान्पौरान्पश्य विशेष्यमध्याहृतम् ॥ १९ ॥

१ कृतामिति गो. पाठः । २ तमिति गो. रा. पाठः । ३ ह्येवेति गो. रा. पाठः । ४ त्विति गो. पाठः । ५ निरपेक्षानिति गो. पाठः । ६ संसुप्तानिति गो. पाठः ।

यथैते नियमं पौराः कुर्वन्त्यस्मन्निवर्तने । अपि प्राणान्न्यसिष्यन्ति न तु त्यक्ष्यन्ति निश्चयम् ॥ २० ॥
यावदेव तु संसुप्तास्तावदेव वयं लघु । रथमारुह्य गच्छामः पन्थानमकुतोभयम् ॥ २१ ॥
अतो भूयोऽपि नेदानीमिक्ष्वाकुपुरवासिनः । स्वपेयुरनुरक्ता मा वृक्षमूलेषु संश्रिताः ॥ २२ ॥
पौरा ह्यात्मकृताद्दुःखाद्विप्रमोच्या नृपात्मजैः । न तु खल्वात्मना योज्या दुःखेन पुरवासिनः ॥ २३ ॥
अब्रवील्लक्ष्मणो रामं साक्षाद्धर्ममिव स्थितम् । रोचते मे तथा प्राज्ञ क्षिप्रमारुह्यतामिति ॥ २४ ॥
अथ रामोऽब्रवीत्सूतं शीघ्रं संयुज्यतां रथः । गमिष्यामि ततोऽरण्यं गच्छ शीघ्रमितः प्रभो ॥ २५ ॥
सूतस्ततः संत्वरितः स्यन्दनं तैर्हयोत्तमैः । योजयित्वा तु रामस्य प्राञ्जलिः प्रत्यवेदयत् ॥ २६ ॥
अयं युक्तो महाबाहो रथस्ते रथिनां वर । त्वरयारोह भद्रं ते ससीतः सहलक्ष्मणः ॥ २७ ॥

गो० टी०–अस्मदिति । अस्मद्यपेक्षान् अस्मास्वेव विशेषेणापेक्षावतः ॥ १९ ॥

२०] ति० टी०–एते पौरा अस्मन्निवर्तने यथा नियमं यत्नं कुर्वन्ति तथा जाने अपि प्राणान्न्यसिष्यन्ति त्यक्ष्यन्ति न त्वस्मन्निवर्तननिश्चयं त्यक्ष्यन्तीत्यर्थः ॥ २० ॥

रा० टी०–यथेति । यथा येन प्रकारेण अस्मन्निवर्तने अस्मत्कर्तृकंकिंचिज्जनबोधितनिष्टत्तौ नियमं नियोगं कुर्वन्ति तथा प्राणानपि न्यसिष्यन्ति त्यक्ष्यन्ति ज्ञातवियोगे सतीति शेषः निश्चयं सहगमनकृतनियोगं तु न त्यक्ष्यन्ति एतेन एतन्निवारणे यत्नोऽन्वेषणीय इति ध्वनितम् ॥ २० ॥

गो० टी०–यथेति । पौराः अस्मन्निवर्तने यथा येन प्रकारेण नियमं कुर्वन्ति तेन प्रकारेण प्राणानपि असिष्यन्ति त्यक्ष्यन्ति निश्चयं तु निवर्तननिश्चयं तु न त्यक्ष्यन्तीति संबन्धः ॥ २० ॥

२१] ति० टी०–अतः–यावदिति । लघु शीघ्रम् ॥ २१ ॥

रा० टी०–तात्कालिकस्वकर्तव्यमाह–यावदिति । यावत् यावत्कालं वयं लघुसंसुप्तास्तावत्कालं द्वित्रिघटिकयेत्यर्थः रथमारुह्य अकुतोभयं सर्वतो भयरहितं पन्थानं गच्छाम एतेन तमसातरक्षिणतटादारभ्य किंचिद्दूरं प्रशस्तो मार्गो नास्तीति व्यक्तम् ॥ २१ ॥

गो० टी०–यावदिति । यावदेव यावत्येव काले तावदेव तावत्येव काले लघु क्षिप्रं रथमारुह्य गच्छाम 'लघु क्षिप्रमरं द्रुतम्' इत्यमरः ॥ २१ ॥

२२] ति० टी०–शीघ्रगमने हेतुमाह–अत इति । एवमन्तरमेते यतो मामनुरक्ता अतो भूयोऽपि न स्वपेयुः अतो यावन्नोत्तिष्ठन्ति तावच्छीघ्रं गच्छाम इत्याशयः ॥ २२ ॥

रा० टी०–नन्वेषां पुरवासिनां का गतिरित्यत आह–अत इति । स्वप हे स्वकीयरक्षक लक्ष्मण ! अतः मध्ये सुमार्गाभावादेतोः भूयोऽधिकं मामनुरक्ता अपि इक्ष्वाकुपुरवासिनः इदानीं मां न ईयुः आगच्छेयुः इदानीमित्यनेन भरतेन सह आगन्तार इति सूचितम् ॥ २२ ॥

गो० टी०–अत इति । इक्ष्वाकुपुरवासिनः मामनुरक्ताः इदानीमिव भूयः पुनर्वृक्षमूलानि संश्रिताः न स्वपेयुः अतो रथमारुह्य गच्छामेति पूर्वेण संबन्धः ॥ २२ ॥

२३] ति० टी०–तत्र हेत्वन्तरमाह–पौरा हीति । आत्मकृतादात्मनिमित्तकात् आत्मनात्मनिमित्तकेन योज्याः संयोज्या ॥ २३ ॥

रा० टी०–ननु सहगमने का क्षतिरित्यत आह–पौरा इति । नृपात्मजैः आत्मकृतात्स्वकारणकादपि दुःखात्पौरा विप्रमोच्याः आत्मना स्वेनापि कृतेन दुःखेन पुरवासिनो न योज्याः एतेन सह गमने तेषां दुःखातिशयो भवितेति ध्वनितं तेन रामस्य दयालुत्वातिशयो व्यक्तः ॥ २३ ॥

गो० टी०–पौरा इति । आत्मकृतात्स्वकृतात् आत्मना स्वेन ॥ २३–२६ ॥

२४] ति० टी०–आरुह्यताम् रथ इति शेषः ॥ २४ ॥

रा० टी०–अब्रवीदिति । हे प्राज्ञ ! येन प्रकारेण भवता उक्तं तथा मे रोचते अतः क्षिप्रमारुह्यतां रथ इति शेषः इति लक्ष्मणो राममब्रवीत् ॥ २४ ॥

२५–२६] ति० टी०–ततः संयोजितेन तेन रथेनेत्यर्थः । शीघ्रं गच्छ रथयोजनायेति शेषः प्रभो समर्थ ! ॥ २५ ॥ २६ ॥

रा० टी०–अथेति । प्रभो हे समर्थ सूत ! रथः शीघ्रं संयुज्यतां ततस्तेन रथेन इतः अस्मात्स्थानाच्छीघ्रं गमिष्यामि इति रामः सूतमब्रवीत् ॥ २५ ॥

रा० टी०–सूत इति । ततः रामोक्त्यनन्तरं त्वरितः वेगवान् सूतः हयोत्तमैः रामस्य स्यन्दनं योजयित्वा प्राञ्जलिः सन्प्रत्यवेदयदबोधयत् ॥ २६ ॥

२७] ति० टी०–युक्तः सज्जः ॥ २७ ॥

रा० टी०–बोधनप्रकारमाह–अयमिति । हे महाबाहो ! अयं रथो युक्तः अश्वैः योजितः अतस्त्वरया वेगेन आरोह त्वमिति शेषः ॥ २७ ॥

गो० टी०–अयमिति । युक्तः सज्जः ॥ २७ ॥

---

१ प्राण्या नसिष्यन्तीति गो. पाठः । २ गच्छामेति गो. पाठः । ३ मूलानीति गो. पाठः । ४ मोक्ष्या इति गो. पाठः । ५ ते इति गो. पाठः । ६ श्रीमान्सुमन्त्र युज्यतामिति गो. पाठः । ७ स त्वरित इति रा. पाठः । ८ अथ रामायेति गो. पाठः । ९ तमारोह सुभद्रमिति गो. पाठः ।

तं स्यन्दनमधिष्ठाय राघवः सपरिच्छदः । शीघ्रगामाकुलावर्तां तमसामतरन्नदीम् ॥ २८ ॥
स संतीर्य महाबाहुः श्रीमाञ्छिवमकण्टकम् । प्रापद्यत महामार्गमभयं भयदर्शिनाम् ॥ २९ ॥
मोहनार्थं तु पौराणां सूतं रामोऽब्रवीद्वचः । उदङ्मुखः प्रयाहि त्वं रथमारुह्य सारथे ॥ ३० ॥
मुहूर्तं त्वरितं गत्वा निवर्तय रथं पुनः । यथा न विद्युः पौरा मां तथा कुरु समाहितः ॥ ३१ ॥
रामस्य तु वचः श्रुत्वा तथा चक्रे च सारथिः । प्रत्यागम्य च रामस्य स्यन्दनं प्रत्यवेदयत् ॥ ३२ ॥
तौ संप्रयुक्तं तु रथं समास्थितौ तदा ससीतौ रघुवंशवर्धनौ ।
प्रचोदयामास ततस्तुरंगमान्स सारथिर्येन पथा तपोवनम् ॥ ३३ ॥

२८] ति० टी०–परिच्छदो धनुःष्कवचादि आकुलावर्तां निबिडावर्ताम् आवर्तैराकुलामिति वा ॥ २८ ॥

रा० टी०–तमिति । सपरिच्छदः धनुरादिसामग्रीसहितो राघवः स्यन्दनमधिष्ठाय शीघ्रगामतिवेगवतीमाकुलावर्तां आकुला व्याप्ता आवर्ता यस्यां तां तमसां नदीमतरत् ॥ २८ ॥

गो० टी०–तमिति । सपरिच्छदः धनुष्कवचादिसहितः आकुलावर्तां आवर्ताकुलाम् ॥ २८ ॥

२९] ति० टी०–भयदर्शिनामप्यभयं मार्गं राजमार्गमित्यर्थः ॥ २९ ॥

रा० टी०–स इति । महाबाहुः स रामः महाप्रशंसनीयेन घट्टेनेत्यर्थः संतीर्य तमसामिति शेषः भयदर्शिनां भीतिमतामपि अभयं भयनिवर्तकं शिवं मार्गं प्रापद्यत प्राप्तुमैच्छत् ॥ २९ ॥

गो० टी०–स संतीर्येति । महामार्गं प्रापद्यत जलस्थितरथादवतीर्य पद्भ्यामेव महामार्गं प्रापयदित्यर्थः भयदर्शिनां श्वापदादीनाम् अभयं तत्संबन्धिभयरहितमित्यर्थः ॥ २९ ॥

३०] ति० टी०–त्वमेव रथमास्थायोदङ्मुखः प्रयाहि मत्प्रतिनिवृत्तिबुद्ध्युत्पादनेन जनमोहनाय न तु वयम् व्रतभङ्गात्तेः ॥ ३० ॥

रा० टी०–मोहनार्थमिति । हे सारथे ! रथमारुह्य उदङ्मुखः सन्पौराणां पाटलिपुत्रदेशादागतानामश्वानां मोहनार्थं मोहजनितातिवेगकुटिलगतिनिवृत्त्यर्थं त्वं प्रयाहि अतिवेगेनाश्वान् गमयेत्यर्थः इति वचः सूतं रामोऽब्रवीत् । एतेन तमसोत्तरणानन्तरं रामो रथादवततारेति सूचितं तेन स्वस्योदङ्मुखगमने व्रतभङ्गः स्यादिति हेतुः सूचितः ' पुरं नपुंसकं गेहे देहपाटलिपुत्रयोः ' इति मेदिनी ॥ ३० ॥

गो० टी०–मोहनार्थमिति । मोहनं वञ्चनं नतु सदयस्य रामस्य स्वविरहासहिष्णूनां स्वस्मिन्निरतिशयप्रेमभाजां वञ्चनमनुचितमुच्यते नेदं वञ्चनं व्रणचिकित्सान्यायेन नागरिकाणामुन्मस्तकानन्देन सत्ता न भवेदिति सुसात्म्यानुभवप्रदानार्थं वनवासव्याजेन विश्लेषस्य संकल्पिततया हितव्यापारत्वेन वञ्चनत्वासंभवात् यदि रामस्य तथा संकल्पो न भवेत्तर्हि कथं निःशेषसर्वजननिद्राकरणं सुमन्त्रलक्ष्मणवत्तेष्वेकस्यापि निर्निद्रत्वापत्तेः । मोहनमेवाह–उदङ्मुख इत्यादि । पौराणां मोहनार्थमुदङ्मुखः प्रयाहि अयोध्यां प्रति रामो निवृत्त इति पौराणां भ्रान्तिमुत्पादयितुमुदङ्मुखो याहीत्यर्थः । स्वस्य रथेनोदङ्मुखं गत्वा मार्गान्तरेण वनममनस्य कर्तुं शक्यत्वेऽपि अयोध्याभिमुखगमने व्रतभङ्गः स्यादिति धिया सुमन्त्रमभिमुखो याहीत्युक्तवान् तथा कुर्विति पौराणां मोहनार्थं सूतमब्रवीदिति संबन्धः ॥ ३० ॥ ३१ ॥

३१] ति० टी०–तदेवाह–मुहूर्तमिति । न विद्युर्वनमेव गत इति न जानीयुः ॥ ३१ ॥

रा० टी०–ननूदङ्मुखगमनानन्तरं किं कर्तव्यमित्यत आह–मुहूर्तमिति । त्वरितं शीघ्रं यथा स्यात्तथा मुहूर्तं गत्वा उत्तरदक्षिणक्रमेण पुनः पुनर्यात्वा पुनः रथं निवर्तय मत्समीपं प्रापयेत्यर्थः । एवं गमनस्य प्रयोजनं पुनराह–यथा येन प्रकारेण पौराः अश्वमार्गावगतिसंपत्तिं न विद्युः संस्मरेयुः त्वं तथा कुरु ॥ ३१ ॥

३२] ति० टी०–तथा चक्रे उदङ्मुखतया गत्वा मार्गान्तरेण निवृत्तिपूर्वकमागत्य एवं हि रामः प्रतिनिवृत्त इति पौरभ्रमः सिध्यति महामायाधिष्ठातुर्भगवत इयत्या क्रियया पौरमोहनं नाश्चर्यायेति मन्तव्यम् । प्रत्यवेदयदारोहणार्थमज्ञापयत् ॥ ३२ ॥

रा० टी०–रामस्येति । वचो वचनं श्रुत्वा स सारथिस्तथा चक्रे अतिवेगेन मुहूर्तमुदङ्मुखं गत्वा रामसमीपं पुनः प्रापेत्यर्थः प्रत्यागम्य रामसमीपं प्राप्य स्यन्दनं रामस्य रामाय प्रत्यवेदयत् आरोहणार्थं प्रार्थयदित्यर्थः ॥ ३२ ॥

गो० टी०–रामस्येति । प्रत्यागम्येति मार्गान्तरेण प्रत्यागम्येत्यर्थः ॥ ३२ ॥

३३] ति० टी०–संप्रयुक्तं सम्यगानीय दर्शितं समास्थितावारूढौ अभूतामिति शेषः । येन पथा मार्गेण तपोवनं प्राप्यत इति शेषः ततस्तेन मार्गेण तुरङ्गमान्प्रचोदयामास ॥ ३३ ॥

रा० टी०–ताविति । तदा सूतप्रार्थनानन्तरकाले ससीतौ सीतासहितौ रघुवंशवर्धनौ तौ रामलक्ष्मणौ संप्रयुक्तं सारथिना सम्यक्प्रदर्शितं रथं समास्थितौ बभूवतुरिति शेषः ततः रामप्ररोहणानन्तरं येन पथा अध्वना तपोवनं प्राप्यते इति शेषः तेन पथा स सारथिस्तुरङ्गमान् प्रचोदयामास ॥ ३३ ॥

१ आस्थायेति गो. पाठः । २ वचनमिति गो. पाठः । ३ स इति गो. पाठः ।

ततः समास्थाय रथं महारथः ससारथिर्दाशरथिर्वनं ययौ ।
उदङ्मुखं तं तु रथं चकार प्रयाणमाङ्गल्यनिमित्तदर्शनात् ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।

प्रातः प्रतिबुद्धाः पौरा रामादर्शनेनात्मानमुपालभमानाः शोकाक्रान्ताः दृढतरप्रयत्नै रामरथगतिमन्वेषयन्तोऽप्यलभमाना अनन्यगतित्वान्नगरमेव प्रपेदिरे ।

प्रभातायां तु शर्वर्यां पौरास्ते राघवं विना । शोकोपहतनिश्चेष्टा बभूवुर्हतचेतसः ॥ १ ॥
शोकजाश्रुपरिप्लुना वीक्षमाणास्ततस्ततः । आलोकमपि रामस्य न पश्यन्ति स्म दुःखिताः ॥ २ ॥
ते विषादार्तवदना रहितास्तेन धीमता । कृपणाः करुणा वाचो वदन्ति स्म मनीषिणः ॥ ३ ॥
धिगस्तु खलु निद्रां तां ययापहृतचेतसः । नाद्य पश्यामहे रामं पृथूरस्कं महाभुजम् ॥ ४ ॥

गो० टी०–ताविति । संप्रयुक्तं सम्यगानीतं रथं समास्थितौ अभूतामिति शेषः । येन पथा तपोवनं प्राप्यते तेन प्रचोदयामास ॥ ३३ ॥

३४] ति० टी०–उक्तं निगमयति–तत इति । प्रयाणापेक्षितं माङ्गल्यं शुभं यन्निमित्तं शकुनं तदर्शनात्तदनुभवहेतोरुदङ्मुखं रथं चकार स्थापयामास । तत आरुह्य दक्षिणाभिमुखतया वनं ययौ ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रा० टी०–तत इति । ससारथिः सारथिसहितो दाशरथिः रामः रथं समास्थाय ततस्तमसातीराद्वनं ययौ तं रामाधिष्ठितरथं तु सः सारथिः प्रयाणमाङ्गल्यनिमित्तदर्शनात्प्रयाणे यन्माङ्गल्यं तस्य यन्निमित्तं तदर्शनात्सुशकुनपक्ष्यादिदर्शनार्थमुदङ्मुखं चकार तेन प्रयाणे मङ्गलसूचकः कश्चन पक्ष्यादिरुदीच्यां स्थित इति सूचितम् । किंच प्रयाणमाङ्गल्यनिमित्ते यदर्शनमुदङ्मुखीभूय गन्तव्यमिति बोधकशास्त्रं तस्मात् ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०–तत इति । सः सुमन्त्रः प्रयाणमाङ्गल्यनिमित्तदर्शनात् प्रयाणानुकूलमङ्गलसूचकनिमित्तदर्शनाद्धेतोः रथमुदङ्मुखं चकार निमित्तस्वीकारार्थमुदङ्मुखं चकारेत्यर्थः । ततः निमित्तस्वीकारानन्तरं रथमास्थाय वनं ययाविति संबन्धः । प्रयाणे दक्षिणपादोद्धारवदुदङ्मुखगमनं मङ्गलायेति भावः॥३४॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

१] ति० टी०–शोकेनोपहता अत एव निश्चेष्टाः हतचेतसो मूर्च्छिताः ॥ १ ॥

रा० टी०–रामगमनानन्तरकालिकं सुप्तोत्थितपौरवृत्तं वर्णयन्नाह–प्रभातायामिति । शर्वर्यां रात्रौ प्रभातायां प्रभातत्वं प्राप्तायां ते सुप्तोत्थिताः पौरा राघवं विना शोकोपहतनिश्चेष्टाः शोकेन उपहताः विपरिणताः अत एव निश्चेष्टाः व्यापाररहितास्ते एव ते इति कर्मधारयः अत एव हतचेतस इव बभूवुः । तुरिवार्थे ॥ १ ॥

गो० टी०–अथ पौरवृत्तान्तं दर्शयति–प्रभातायामित्यादि । शोकोपहतनिश्चेष्टाः शोकोपहतत्वान्निश्चेष्टाः हतचेतसः मूढाः ॥ १ ॥

२–३] ति० टी०–परिप्लुनाः खिन्नाः आलोकमालोकसाधनं रथोद्धतधूल्यादयपि ॥ २ ॥ ३ ॥

रा० टी०–प्राप्तकिंचिच्चैतन्यकालोद्भूतं तद्वृत्तं वर्णयन्नाह–शोकजेति । शोकजाश्रुभिः परिप्लुनाः व्याप्ताः वीक्षमाणाः दुःखिताः पौराः रामस्यालोकं बोधकं रथरजोरेखादिकमपीत्यर्थः न पश्यन्ति स्म ॥ २ ॥

गो० टी०–शोकजेति । शोकजाश्रुभिः परिप्लुना परिक्रान्ताः आलोकमपि रामस्य रामसंबन्धयोलोकमपि आलोक्यत इत्यालोकः तमालोकसाधनं रथरेण्वादिकमपीत्यर्थः ॥२॥

रा० टी०–त इति । तेन धीमता रामेण रहिताः अत एव विषादार्तवदनाः विषादेनातिदुःखेन आर्तं दीनं वदनं मुखं येषां ते अत एव कृपणाः कर्तव्यविवेकरहिताः मनीषिणोऽपि ते पौराः करुणाः वाचो वदन्ति स्म ॥ ३ ॥

गो० टी०–त इति । विषादार्तवदनाः दुःखेन म्लानमुखाः कृपणाः दीनवेषाः करुणा वाचः दीनवचांसि वदन्ति स्म अन्योन्यमिति शेषः ॥ ३ ॥ ४ ॥

४] ति० टी०–यया निद्रया ' निद्रां भगवतीं विष्णोः ' इत्यादिना मार्कण्डेयेन तस्या भगवन्मायारूपत्वाभिधानात् तदावरणादेव च विषयाविष्टानां भगवददर्शनं प्रसिद्धं श्रुतिशिरःसु पश्यामह इति तत्कर्षः । हे इति संबोधनं वा परस्परम्॥४॥

१ मनस्विन इति गो. पाठः । २ अपहृतेति गो. पाठः ।

कथं रामो महाबाहुः स तथावितथक्रियः । भक्तं जनमभित्यज्य प्रवासं तापसो गतः ॥ ५ ॥
यो नः सदा पालयति पिता पुत्रानिवौरसान् । कथं रघूणां स श्रेष्ठस्त्यक्त्वा नो विपिनं गतः ॥ ६ ॥
इहैव निधनं याम महाप्रस्थानमेव वा । रामेण रहितानां नो किमर्थं जीवितं हितम् ॥ ७ ॥
सन्ति शुष्काणि काष्ठानि प्रभूतानि महान्ति च । तैः प्रज्वाल्य चितां सर्वे प्रविशामोऽथवा वयम् ॥ ८ ॥
किं वक्ष्यामो महाबाहुरनसूयः प्रियंवदः । नीतः स राघवोऽस्माभिरिति वक्तुं कथं क्षमम् ॥ ९ ॥
सा नूनं नगरी दीना दृष्ट्वास्मान्राघवं विना । भविष्यति निरानन्दा सस्त्रीबालवयोऽधिका ॥ १० ॥
निर्यातास्तेन वीरेण सह नित्यं महात्मना । विहीनास्तेन च पुनः कथं द्रक्ष्याम तां पुरीम् ॥ ११ ॥
इतीव बहुधा वाचो बाहुमुद्यम्य ते जनाः । विलपन्ति स्म दुःखार्ता हृतवत्सा इवाव्रयगाः ॥ १२ ॥
ततो मार्गानुसारेण गत्वा किंचित्ततः क्षणम् । मार्गनाशाद्विषादेन महता समभिप्लुताः ॥ १३ ॥

रा० टी०–तद्वचनमेवाह–धिगिति । यया निद्रया अपहृतचेतसो वयमद्य रामं न पश्यामहे तां निद्रां धिक् ॥ ४ ॥

५–६] ति० टी०–तथाऽवितथाऽमोघा क्रिया यस्य स त्यक्त्वा गतः इदमनुचितं तस्येति भावः ॥ ५ ॥ ६ ॥

रा० टी०–कथमिति । अवितथक्रियः न वितथा कदाचिदपि मर्यादामतिक्रान्ता क्रिया व्यापारो यस्य सोऽपि रामः भक्तं सेवोन्मुखं जनमभित्यज्य कथं गतः केन मार्गेण यात इत्यर्थः ॥ ५ ॥

रा० टी०–य इति । औरसान्मुख्यान्पुत्रान् पितेव यः पालयति सः नस्त्यक्त्वा विपिनं कथं गतः ॥ ६ ॥

गो० टी०–कथमिति । अवितथक्रियः अमोघानुवृत्तिः ५॥६

७–८] ति० टी०–निधनं प्रायोपवेशेन मरणम् महाप्रस्थानं मरणदीक्षापूर्वकमुत्तराभिमुखागमनम्, तद्रहितानां जीवितं किमर्थं कस्मै फलाय हितम् न कस्मा अपीत्यर्थः अतो मरणमेव श्रेयः ॥ ७ ॥ ८ ॥

रा० टी०–इहेति । निधनं मरणमिह अस्मिँस्थाने एव याम प्राप्नुयाम महाप्रस्थानं हिमालयान्तर्वर्तिमहापथं वा याम । नन्वु किमर्थमेवंक्रिया इत्यत आहुः–रामेण रहितानां जीवनं हितं नो नास्ति अतः किमर्थं न स्यादित्यर्थः किंच रामेण रहितानां नोऽस्माकं जीवितं किमर्थमुद्दिश्य हितं न कस्यापीत्यर्थः । अतो मास्तु इति तात्पर्यम् ॥ ७ ॥

गो० टी०–इहैवेति । इहैव निधनं प्रायोपवेशनेन मरणं महाप्रस्थानं मरणदीक्षापूर्वकमुत्तराभिमुखगमनम् । हिः प्रसिद्धौ ॥ ७ ॥

रा० टी०–नन्वकाले इह मरणं कथं भविष्यतीत्यत आहुः–सन्तीति । महान्ति बृहन्ति प्रभूतानि बहूनि काष्ठानि सन्ति अथ अतः तैरेव कृतां चितां वयं प्रविशामः ॥ ८ ॥

गो० टी०–सन्तीति । प्रविशामोऽथेति अथवेत्यर्थः॥ ८ ॥

९–११] ति० टी०–रामवृत्तान्तं पृच्छन्तं जनं प्रति किं वक्ष्यामः । अस्माभी राघवो वनं नीतः प्रापित इत्युत्तरं देयमिति चेदिदं वक्तुं कथं क्षमं वक्तुमशक्यमयोग्यं चेत्यन्यच्च न सदुत्तरमिति भावः ॥ ९–११ ॥

रा० टी०–नन्वु दुःखसत्वेऽपि स्वगृहे स्थीयतामित्यत आहुः–किमिति । किं वक्ष्यामः रामः क्वास्तीति तन्मात्रादिभिः पृष्टाः वयं किमुत्तरं दास्याम इत्यर्थः । नन्वु वनं गत इत्युत्तरं दातव्यमित्यत आहुः–राघवोऽस्माभिः नीतः वनं प्रापितः इति वक्तुमुत्तरं दातुं कथं क्षमं योग्यं न योग्यमित्यर्थः ॥ ९ ॥

रा० टी०–सेति । सस्त्रीबालवयोधिका स्त्रीबालवयोधिकसहिता सा नगरी अयोध्या राघवं विनाऽस्मान् दृष्ट्वा निरानन्दा आनन्दरहिता अत एव दीना क्षीणा भविष्यति ॥ १० ॥

रा० टी०–निर्याता इति । तेन वीरेण रामेण नित्यं निर्याता नित्यं गमनशीलिनो वयं तेन हीनाः सन्तः तामयोध्यां कथं द्रक्ष्याम द्रक्ष्यामः ॥ ११ ॥

गो० टी०–किं वक्ष्याम इति । न किमपि वक्तुं शक्यमित्यर्थः । तदेव विवृणोति महाबाहुरित्यादिना नीतः वनमिति शेषः ॥ ९–१२ ॥

१२] ति० टी०– अग्रे भवा अग्र्याः पुरोगामिन्यस्ताश्च ता गाश्चेत्यर्थः । यद्वा अग्र्या मुख्याः पृथ्वदुग्धवत्त्वादिगुणा गाव इवेत्यर्थः । गा इत्यार्षम् ॥ १२ ॥

रा० टी०–इतीवेति । दुःखार्ताः ते पौरा जना बाहुमुद्यम्य उत्थाप्य बहुधा बहुप्रकारा वाचः इतीव अत्यन्तं विलपन्ति स्म दुःखार्तत्वे दृष्टान्तः हृतवत्साः अग्र्याः अग्र्याः मुख्यास्ता एव गाव इति कर्मधारयः ता इव गा इति आर्षमिति भट्टाः ॥ १२ ॥

१३] ति० टी०–ततो मार्गानुसारेणातिसंधानप्रवर्तितमार्गानुसारेण किंचित्क्षणं किंचित्कालं गत्वा ततो मार्गनाशाद्भ्रान्तया मार्गान्तरे प्रवृत्त्या रथमार्गादर्शनाद् महता विषादेन समभिप्लुता व्याप्ताः ॥ १३ ॥

रा० टी०–तत इति । ततः वर्णितविलापानन्तरं मार्गानुसारेण गतस्थरेखावलोकनेन किंचित् क्षणं कालं ततः

१ नामेति गो. पाठः । २ राघव इति गो. पाठः । ३ हीति गो. पाठः । ४ हि न इति गो. पाठः । ५ विवत्सा इव धेनव इति गो. पाठः । ६ क्षणं पुनः इति गो. पाठः ।

रथमार्गानुसारेण न्यवर्तन्त मनस्विनः । किमिदं किं करिष्यामो दैवेनोपहता इति ॥ १४ ॥
तदा यथागतेनैव मार्गेण क्लान्तचेतसः । अयोध्यामगमन्सर्वे पुरीं व्यथितसज्जनाम् ॥ १५ ॥
आलोक्य नगरीं तां च क्षयव्याकुलमानसाः । आवर्तयन्त तेऽश्रूणि नयनैः शोकपीडितैः ॥ १६ ॥
एषा रामेण नगरी रहिता नातिशोभते । आपगा गरुडेनेव ह्रदादुद्धृतपन्नगा ॥ १७ ॥
चन्द्रहीनमिवाकाशं तोयहीनमिवार्णवम् । अपश्यन्निहतानन्दं नगरं ते विचेतसः ॥ १८ ॥
ते तानि वेश्मानि महाधनानि दुःखेन दुःखोपहता विशन्तः ।
नैव प्रजग्मुः स्वजनं परं वा निरीक्षमाणाः प्रविनष्टहर्षाः ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ।

राममार्गापरिज्ञानात्प्रत्यागतपौरैर्निवेदितरामवृत्तान्ताः पौरस्त्रियः कैकेयीमुपालभ्यातितरां परिदेवयन्ति स्म ।

तेषामेवं विषण्णानां पीडितानामतीव च । बाष्पविप्लुतनेत्राणां सशोकानां मुमूर्षया ॥ १ ॥
अभिगम्य निवृत्तानां रामं नगरवासिनम् । उद्धृतानीव सत्त्वानि बभूवुरमनस्विनाम् ॥ २ ॥

तस्मात्स्थानाद्गत्वा मार्गनाशादागतपथेन रथपरावर्तनादग्रे रेखोत्पत्त्यभावेन मार्गादर्शनान्महता विशालेन समभिप्लुताः व्याप्ताः बभूवुरिति शेषः ॥ १३ ॥

गो० टी०–तत इति । मार्गानुसारेण किंचिद् किंचिद्दूरं मार्गनाशाद् रथमार्गादर्शनाद् तच वीरुत्तृणपटलपिहितप्रदेशे रथचारणादिति ज्ञेयम् समभिप्लुताः व्याप्ता इत्यर्थः ॥ १३ ॥

१४] ति० टी०–किमिदं यद्रथमार्गादर्शनम् इतःपरं किं करिष्यामः अहो दैवेनोपहता वयमिति वदन्तो न्यवर्तन्तेत्यन्वयः ॥ १४ ॥

रा० टी०–रथेति । रथमार्गानुसारेण स्वगतरथमार्गेणेत्यर्थः । न्यवर्तन्त इदमग्रे रथरेखाभावः किं कथं जातमिदं न संभवतीत्यर्थः अतः दैवेन अदृष्टविशेषेण उपहता वयं किं करिष्याम इत्यब्रुवन्निति शेषः ॥ १४ ॥

गो० टी०–रथस्येति । दैवेनोपहता इति प्रलपन्त इति शेषः ॥ १४ ॥ १५ ॥

१५] ति० टी०–व्यथिताः सज्जना यस्यां ताम् सत्पदेन कैकेय्या व्याप्तत्तिः ॥ १५ ॥

रा० टी०–तदेति । तदा रामः क्व गत इति निश्चयाभावे यथागतेनैव मार्गेण पथा व्यथितसज्जनामयोध्यां सर्वे अगमन् । क्लान्तचेतस इत्यनेन पुनः पुनः रथमार्गान्वेषणे सामर्थ्याभावः सूचितः ॥ १५ ॥

१६–१८] ति० टी०–क्षयो हर्षक्षयस्तेन व्याकुलमानसा यद्वा क्षयं गृहं प्रति व्याकुलं गन्तव्यं न वेत्येवरूपं मानसं येषां तादृशाः आवर्तयन्ताक्षुब्धन् ॥ १६–१८ ॥

रा० टी०–आलोक्येति । क्षयव्याकुलमानसाः क्षयेन रामप्रतियोगिकसंयोगाभावेन व्याकुलं मानसं येषां ते नगरीमयोध्यामालोक्य शोकपीडितैर्नयनैः अश्रूणि आवर्तयन्त अक्षुब्धन् ॥ १६ ॥

रा० टी०–एषेति । रामेण रहिता एषा नगरी नातिशोभते तत्र दृष्टान्तः ह्रदात् दहराद्गरुडेन उद्धृतपन्नगा उद्धृताः पन्नगाः यस्याः सा आपगा नदीव एतेन रिपुसत्त्वे तद्गमनयोग्यात्वं सूचितम् ॥ १७ ॥

रा० टी०–चन्द्रेति । हीनं रहितं निहतानन्दं हतसुखम् १८

गो० टी०–आलोक्येत्यादिश्लोकद्वयमेकं वाक्यम् । अन्त इतिकरणं बोध्यम् । क्षयव्याकुलमानसाः संमार्जनलेपनादिक्षयेण व्यथितमनस्काः अवर्तयन्त अक्षुब्धन् ॥ १६–१८ ॥

१९] ति० टी०–दुःखेन रामवियोगदुःखेनोपहताः कथं गृहं प्रवेष्टव्यमिति दुःखेन विशन्तोऽपि नैव प्रजग्मुः स्ववेश्मपरवेश्मविवेकं नाशासिषुः तथा निरीक्षमाणा अपि स्वजनपरजनविवेकं न प्राप्तवन्तः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०–त इति । दुःखोपहतास्ते पौराः महाधनानि तानि वेश्मानि गृहाणि दुःखेन विशन्तोऽपि निरीक्षमाणा अपि स्वजनं स्वकीयं जनं परं परकीयं जनं वा नैव प्रजग्मुः न ज्ञातवन्त इत्यर्थः ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

गो० टी०–ते तानीति । दुःखेन दुःखेन सहितं स्वजनं जनं वा पौरजनं वा न प्रजग्मुः नाशासिषुः ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१–२] ति० टी०–तेषामित्यादि षडन्वयमेकं वाक्यम् । मुमूर्षयोपलक्षितानाममनस्विनां दुर्मनसां खिन्नानामिति

---

१ रथस्य मार्गनाशेनेति गो. पाठः । २ तत इति गो. पाठः । ३ अवर्तयन्तेति गो. पाठः । ४ प्रजह्रुरिति गो. पाठः । ५ जनमिति गो. पुरमिति रा. पाठः । ६ अनुगम्येति गो. पाठः । ७ वासिनमिति गो. रा. पाठः ।

स्वं स्वं निलयमागम्य पुत्रदारैः समावृताः । अश्रूणि मुमुचुः सर्वे बाष्पेण पिहिताननाः ॥ ३ ॥
न चाहृष्यन्न चामोदन्वणिजो न प्रसारयन् । न चाशोभन्त पण्यानि नापचन्गृहमेधिनः ॥ ४ ॥
नष्टं दृष्ट्वा नाभ्यनन्दन्विपुलं वा धनागमम् । पुत्रं प्रथमजं लब्ध्वा जननी नाप्यनन्दत ॥ ५ ॥
गृहे गृहे रुदत्यश्च भर्तारं गृहमागतम् । व्यगर्हयन्त दुःखार्ता वाग्भिस्तोत्रैरिव द्विपान् ॥ ६ ॥
किं नु तेषां गृहैः कार्यं किं दारैः किं धनेन वा । पुत्रैर्वापि सुखैर्वापि ये न पश्यन्ति राघवम् ॥ ७ ॥
एकः सत्पुरुषो लोके लक्ष्मणः सह सीतया । योऽनुगच्छति काकुत्स्थं रामं परिचरन्वने ॥ ८ ॥

यावत् । सत्त्वान्यसव उद्गतानीवोत्क्रान्तानीव मृतप्राया जाता इति भावः ॥ १ ॥ २ ॥

रा० टी०–गृहप्रवेशानन्तरकालिकं प्रजावृत्तं बोधयन्नाह–तेषामित्यादिभिः । सशोकानामत एव विषण्णानां दुःखितानामत एवातीवपीडितानां पीडाविशिष्टाङ्गविशिष्टानामत एव बाष्पपरिप्लुतनेत्राणामत एव मुमूर्षया मरणेच्छया उपलक्षितानामत एव अमनस्विनामनवस्थितचित्तानां राममभिगम्य निवृत्तानां नगरवासिनां सत्त्वानि प्राणाः उद्गतानीव बभूवुः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–तेषामित्यादि । मुमूर्षया मर्तुमिच्छयोपलक्षितानां सत्त्वानि प्राणाः ' द्रव्यास्तुव्यवसायेषु सत्त्वम् ' इत्यमरः । उद्गतानीव बभूवुः मुमूर्छुरित्यर्थः । अमनस्विनां धैर्यहीनानाम् ॥ १–३ ॥

३] ति० टी०–बाष्पेण पिहिताननाः अश्रुव्याप्तमुखा इत्यर्थः ॥ ३ ॥

रा० टी०–स्वं स्वमिति । निलयं गृहं बाष्पेण धूमाभासेन पिहिताननाः सर्वे अश्रूणि मुमुचुः ॥ ३ ॥

४] ति० टी०–हर्षः शारीरो मुखविकासादिरूपः मोद आन्तरो हर्षः परस्मैपदमार्षम् । प्रसारयन् प्रासारयन्नित्यर्थः प्रसारितान्यपि नाशोभन्त ॥ ४ ॥

रा० टी०–नगरवृत्तं वर्णयन्नाह–नचेत्यादिभिः । वणिजो न अहृष्यन् केनापि वस्तुना संतोषं न प्राप्नुवन्नत एव अमोदन् आनन्दं प्राप्नुवंश्च न प्रसारयन् प्रासारयंश्च न क्रय्यद्रव्याणीति शेषः अत एव पण्यानि आपणद्रव्याणि नाशोभन्त गृहमेधिनो गृहस्थाः न अपचन् पाको नैवाभवदित्यर्थः प्रायोऽन्येषां पाकानधिकारान्न न्यूनता ॥ ४ ॥

गो० टी०–नेति । न चाहृष्यन् सुहृद्दर्शनेनापि हर्षं न प्रापुः न च मोदमपूर्ववस्तुलाभेऽपि मोदं न प्रापुः प्रसारयन् प्रासारयन् पण्यानीति शेषः । पुण्यानि पुण्यफलभूतपुत्रकलत्रादीनि नापचन्निति गृहमेधिनः गृहस्थाः तेषां पचिक्रियासंबन्धस्त्वर्धशरीरभूतपत्नीद्वारा ॥ ४ ॥

५] ति० टी०–नष्टमिति । चिरनष्टधनस्य विपुलस्यागमं लाभं दृष्ट्वापि नाभ्यनन्दन् वाशब्द एवार्थे नाभ्यनन्दन्नेवेत्यर्थः ॥ ५ ॥

रा० टी०–नष्टमिति । नष्टं चोरादिना अपहृतं वस्तु लब्ध्वा विपुलं बहुधनागममपूर्वधनप्राप्तिं च दृष्ट्वा अवलोक्य नाभ्यनन्दन् अयोध्यावासिन इति शेषः । प्रथमजं पूर्वजातम् ॥ ५ ॥

गो० टी०–नष्टमिति । नष्टं चिरकालनष्टं रत्नादिकं धनागमं निध्यादिलाभम् ॥ ५ ॥

६] ति० टी०–व्यगर्हयन्त राघवमप्रतिनिवर्त्य किमर्थं यूयमागता इत्येवं वाग्रूपैस्तोत्रैरङ्कुशैः ॥ ६ ॥

रा० टी०–गृहे गृहे इति । गृहमागतं भर्तारं गृहे गृहे रुदन्त्यः दुःखार्ताः स्त्रियः वाग्भिः दुरुक्तैः व्यगर्हयन्त अपीडयन्तेत्यर्थः तत्र दृष्टान्तः तोत्रैः अङ्कुशैः द्विपानिव ॥ ६ ॥

गो० टी०–गृहे गृह इति । रुदन्त्यः सर्वाः स्त्रियः भर्तारं स्वस्वभर्तारं व्यगर्हयन्त किमर्थं भवद्भिरागतमित्येवं निन्दन्ति स्म तोत्रैः अङ्कुशैः । गर्हां विशदयति–किं न्वित्यादिश्लोकेन । इति व्यगर्हयन्तेत्यन्वयः ॥ ६ ॥ ७ ॥

७] ति० टी०–तेषां रामं विना आगतानां रामं राजानं विना सर्वेस्यास्थिरत्वात् । किं च भगवन्तं राममादरेणापश्यन्तो ये गृहपुत्रदारसुखादिष्वासक्त्या प्रतिनिवृत्तास्तेषां पुनःपुनः संसारप्राप्तिरेव न तु कदापि मोक्ष इत्याशयः तस्य मायिकरूपदर्शनेऽपि चित्तशुद्धिद्वारा मोक्षोपयोगिज्ञानाधिकारो भवति ॥ ७ ॥

रा० टी०–तदुक्तमेव वर्णयन्नाह–किमित्यादिभिः । किं कार्यं न किंचिदित्यर्थः । तेन रामं विना भवतां गृहे स्थितिर्व्यर्थेति सूचितम् ॥ ७ ॥

८] ति० टी०–सत्पुरुषो भाग्यवान्पुरुषः सीता च भाग्यवती यो वने रामं परिचरन्ननुगच्छति ॥ ८ ॥

रा० टी०–एक इति । यः सीतया सह रामं परिचरन्सन्ननुगच्छति सः एकः लक्ष्मण एव लोके सत्पुरुषः तेन भवत्सु न सत्पुरुषत्वमिति व्यञ्जितम् ॥ ८ ॥

गो० टी०–एक इति । सीतया सह रामं सीतासहितं राममित्यर्थः ॥ ८ ॥ ९ ॥

१ पुण्यानीति गो. पाठः । २ नाभ्यनन्देतेति गो. पाठः । ३ रुदन्त्य इति गो. रा. पाठः । ४ किमिति गो. पाठः ।

आपगाः कृतपुण्यास्ताः पद्मिन्यश्च सरांसि च । येषु यास्यति काकुत्स्थो विगाह्य सलिलं शुचि ॥ ९ ॥
शोभयिष्यन्ति काकुत्स्थमटव्यो रम्यकाननाः । आपगाश्च महानूपाः सानुमन्तश्च पर्वताः ॥ १० ॥
काननं वापि शैलं वा यं रामोऽनुगमिष्यति । प्रियातिथिमिव प्राप्तं नैनं शक्ष्यन्त्यनर्चितुम् ॥ ११ ॥
विचित्रकुसुमापीडा बहुमञ्जरिधारिणः । राघवं दर्शयिष्यन्ति नगा भ्रमरशालिनः ॥ १२ ॥
अकाले चापि मुख्यानि पुष्पाणि च फलानि च । दर्शयिष्यन्त्यनुक्रोशाद्गिरयो राममागतम् ॥ १३ ॥
प्रस्रविष्यन्ति तोयानि विमलानि महीधराः । विदर्शयन्तो विविधान्भूयश्चित्रांश्च निर्झरान् ॥ १४ ॥
पादपाः पर्वताग्रेषु रमयिष्यन्ति राघवम् । यत्र रामो भयं नात्र नास्ति तत्र पराभवः ॥ १५ ॥
स हि शूरो महाबाहुः पुत्रो दशरथस्य च । पुरा भवति नोऽदूरादनुगच्छाम राघवम् ॥ १६ ॥

९] ति० टी०–सांतालक्ष्मणावेवेति किं वाच्यम्, अचेतना आपगादयोऽपि सभाग्याः न तु वयमित्याहुः–आपगा इति । विगाह्य स्नात्वा ॥ ९ ॥

रा० टी०–आपगा इति । ताः एव आपगा नद्यः कृतपुण्याः तान्येव सरांसि च कृतपुण्यानि येषु शुचि सलिलं विगाह्य अवगाह्य काकुत्स्थो रामो यास्यति ॥ ९ ॥

१०] ति० टी०–रम्यकाननाश्चारुवृक्षसंघाः अनूपा जलप्रायदेशः ॥ १० ॥

रा० टी०–शोभयिष्यन्तीति । रम्यकाननाः चारुवृक्षसमूहविशिष्टाः अटव्यो वनानि महानूपाः जलप्रायदेशविशिष्टाः आपगा नद्यश्च सानुमन्तः प्रशस्तशृङ्गविशिष्टाः पर्वताश्च काकुत्स्थं शोभयिष्यन्ति तेन तेषामतिभाग्यवत्त्वं सूचितम् ॥ १० ॥

गो० टी०–शोभयिष्यन्तीति । रम्यकाननाः तत्र तत्र रम्यवृक्षराजियुक्ताः महानूपाः रम्यकच्छप्रदेशाः 'जलग्रायमनूपं स्यात्' इत्यमरः ॥ १० ॥

११] ति० टी०–ते शैलादयोऽनर्चितं न शक्ष्यन्ति अर्चितुमेव शक्ष्यन्तीत्यर्थः ॥ ११ ॥

रा० टी०–काननमिति । यं रामः अनुगमिष्यति सः प्राप्तमेनं प्रियातिथिमनर्चितुं नैव शक्ष्यति अर्चिष्यत्येवेत्यर्थः । इव एवार्थे ॥ ११ ॥

गो० टी०–काननमिति । नैनं शक्ष्यन्त्यनर्चितुम् अर्चितुं शक्ष्यन्त्येवेत्यर्थः ॥ ११ ॥

१२] ति० टी०–तदेव दर्शयति—विचित्रेत्यादि । विचित्रैः कुसुमैरापीडः शिरोभूषणमेषाम् बह्वीर्मञ्जरीः पुष्पस्तबकान्यर्तुं शीलमेषां छान्दसो ह्रस्वः । नगा वृक्षाः दर्शयिष्यन्ति आत्मानमिति शेषः । एवं च पुष्पाञ्जलिरूपार्चायां ते शक्ता इति भावः ॥ १२ ॥

रा० टी०–विचित्रेति । विचित्रकुसुमैः अनेकविधपुष्पैः आपीडः शिरोभूषणं येषां ते बहुमञ्जरिधारिणः बह्वः विपुलाः मञ्जरीः पुष्पस्तबकान् धरन्ति तच्छीलाः अत एव भ्रमरशालिनः भ्रमराश्रयभूताः नगाः राघवं दर्शयिष्यन्ति स्वस्वरूपामिति शेषः । तेन तेषामतिसाफल्यं सूचितम् ॥ १२ ॥

गो० टी०–विचित्रेति । विचित्रकुसुमापीडाः विचित्रपुष्पशेखराः मञ्जरीत्यत्र छान्दसो ह्रस्वः दर्शयिष्यन्ति आत्मानमिति शेषः । नगाः वृक्षाः ॥ १२ ॥

१३–१४] ति० टी०–गिरयो दर्शयिष्यन्ति स्वगतवृक्षद्वारेति शेषः ॥ १३ ॥ १४ ॥

रा० टी०–अकाले इति । गिरयः गिरिस्थवृक्षाः अकाले पुष्पफलादिप्रसूतिकालाभावेऽपि अनुक्रोशात् अत्यादरात्पुष्पादीनि आगतं रामं दर्शयिष्यन्ति तेन तेषां हर्षातिशयो भवितेति व्यञ्जितम् ॥ १३ ॥

रा० टी०–प्रस्रविष्यन्तीति । महीधराः पर्वताः विविधान्भूयश्चित्रान्बहुविचित्रत्वविशिष्टान्निर्झरान्दर्शयन्तः सन्तः विमलानि तोयानि प्रस्रविष्यन्ति ॥ १४ ॥

गो० टी०–अकाल इति । दर्शयिष्यन्ति वृक्षलतादिद्वारेति भावः अनुक्रोशात् आदरादित्यर्थः ॥ १३ ॥ १४ ॥

१५] ति० टी०–पादपा रमयिष्यन्ति स्वमूलाकीर्यमाणपल्लवकुसुमरचितशय्यास्विति शेषः यत्र रामः वसतीति शेषः१५

रा० टी०–पादपा इति । पर्वताग्रेषु विद्यमानाः पादपा वृक्षाः राघवं रमयिष्यन्ति तेन तत्रैवास्माभिरपि गन्तव्यमिति सूचितम् । ननु तत्स्थानस्य व्याघ्रादिमत्त्वेन भीतिबहुत्वात्कथं गन्तव्यमित्यत आहुः यत्र रामो विद्यत इति शेषः तत्र भयं कुतश्चिद्भीतिर्नास्ति अत एव पराभवः किंचित्कर्तृकास्मत्पराभूतिर्नास्ति ॥ १५ ॥

गो० टी०–यत्रेति । यत्र देशे रामो वर्तते अत्र भयं नास्ति तत्र पराभवोऽपि नास्ति ॥ १५ ॥

१६] ति० टी०–भयाभावादौ हेतुः–स हि शूर इत्यादि । नोऽस्माकमदूरात्पुरा भवति "यावत्पुरा–" इति भविष्यति लट् आसन्नो भविष्यतीत्यर्थः । अतो राघवमनुगच्छाम प्रार्थनायां लोट् ॥ १६ ॥

रा० टी०–स इति । दशरथस्य पुत्रः स रामः पुरा इह प्राक्कालात्पूर्वमपि नोऽस्माकं स्वामी भवति अतो दूरादपि राघवमनुगच्छाम एतेन नित्यपरिकराणामियमाकांक्षेति व्यक्तम् ॥ १६ ॥

१ स्नास्यतीति गो. पाठः । २ ऽभिगमिष्यतीति गो. पाठः । ३ शक्ष्यतीति स. पाठः ।

पादच्छाया सुखं भर्तुस्तादृशस्य महात्मनः । स हि नाथो जनस्यास्य स गतिः स परायणम् ॥ १७ ॥
वयं परिचरिष्यामः सीतां यूयं च राघवम् । इति पौरस्त्रियो भर्तृदुःखार्तास्तत्तदब्रुवन् ॥ १८ ॥
युष्माकं राघवोऽरण्ये योगक्षेमं विधास्यति । सीता नारीजनस्यास्य योगक्षेमं करिष्यति ॥ १९ ॥
को न्वनेनाप्रतीतेन सोत्कण्ठितजनेन च । संप्रीयेतामनोज्ञेन वासेन हृतचेतसा ॥ २० ॥
कैकेय्या यदि चेद्राज्यं स्यादधर्म्यमनाथवत् । नहि नो जीवितेनार्थः कुतः पुत्रैः कुतो धनैः ॥ २१ ॥
यया पुत्रश्च भर्ता च त्यक्तौ वैश्वर्यकारणात् । कं सा परिहरेदन्यं कैकेयी कुलपांसनी ॥ २२ ॥
कैकेय्या न वयं राज्ये भृतका हि वसेमहि । जीवन्त्या जातु जीवन्त्यः पुत्रैरपि शपामहे ॥ २३ ॥

गो० टी०—पुरेति। दूरात्पुरा भवति भविष्यति ततः पूर्वमेवानुगच्छाम इत्यर्थः। "यावत्पुरानिपातयोर्लट्" इतिलट् ॥१६॥

१७] ति० टी०—पादच्छाया छायापदेनानुग्रहहेतुभूता सेवा लक्ष्यते। भर्तुः रामचन्द्रस्य पादसेवैव नः परमसुखं सुखसाधनम् गतिः शरणम् परायणं शाश्वतप्रतिष्ठा ॥ १७ ॥

रा० टी०—तत्र गमने प्रयोजनं वदन्त आहुः—पादेति। महात्मनः तादृशस्य नित्यस्य भर्तुः स्वामिनो रामस्य पादच्छाया चरणसमीपस्थितिरेव सुखं तत्र हेतुः अस्य नित्यपरिकरस्य स राम एव नाथः वाञ्छितदाता स एव गतिः प्राप्यः अत एव स एव परायणं परमाश्रयः ॥ १७ ॥

गो० टी०—पादच्छायेति पादसेवा लक्ष्यते सुखा सुखसाधनभूता गम्यत इति गतिः प्राप्यः परायणं परमयनं सर्वप्रकारेणाधारभूत इत्यर्थः ॥ १७-१९ ॥

१८] ति० टी०—वयं स्त्रियः, यूयं पुरुषाः ॥ १८ ॥

रा० टी०—वयमिति। तत्रित्यपरिकरत्वाद्धेतोः परिचरिष्यामः सेविष्यामहे पौरस्त्रियः नित्यमयोध्यावासिन्यः तद्वचोऽब्रुवन् ॥ १८ ॥

१९] ति० टी०—अप्राप्तप्राप्तियोगः प्राप्तरक्षणं क्षेमम् ॥१९॥

रा० टी०—नन्वने कथं निर्वाह इत्यत आहुः—युष्माकमिति। योगक्षेमं योगमलब्ध्योच्छिष्टपुष्पफलादिलाभं क्षेमं पूर्वलब्धसेवाधिकारपालनं विधास्यति ॥ १९ ॥

२०] ति० टी०—अप्रतीतेनासुखेन सोत्कण्ठितजनेनोत्कण्ठितजनसहितेन अत एवामनोज्ञेन हृतचेतसा चित्तनाशकेन वासेन को नु संप्रीयेतेत्यर्थः ॥ २० ॥

रा० टी०—तत्र स्थितेरयोग्यतां वर्णयन्त आहुः—क इति। अप्रतीतेन रामागमनविषयकप्रतीत्यनिष्पादकेन सोत्कण्ठितजनेन उत्कण्ठितजनसहितेन अत एवामनोज्ञेन रमणीयतारहितेन अत एव हृतचेतसा चेतश्चालकेन वासेन रामसाहित्यरहितनिवासेन कः संप्रीयेत न कोऽपीत्यर्थः ॥ २० ॥

गो० टी०—कोन्वनेनेति। अप्रतीतेन अप्रशस्तेन सतामयोग्येनेति यावत्। उत्कण्ठया शोकस्मरणेन सहितः सोत्कण्ठः कृतः सोत्कण्ठः सोत्कण्ठितः तादृशो जनो यस्य तेन अमनोज्ञेन उद्वेगकारिणा हृतचेतसा चित्तनाशकेन अनेन वासेन नगरेणेत्यर्थः। को नु जनःसंप्रीयेत न कोऽपीत्यर्थः तस्मादयं वासः त्याज्य इति भावः ॥ २० ॥

२१] ति० टी०—यदि चेदिति सम्भवायो यद्यर्थः अधर्म्यमधर्मयुक्तम्, अत एवानाथवन्नाथवद्रहितम् जीवितेनार्थो जीवितामिलोऽर्थोऽपि न पुत्रादिरूपस्तु सुतरां नेत्यर्थः ॥ २१ ॥

रा० टी०—इदानीं प्रवासकारणीभूतमन्थरां निन्दयन्त्य आहुः—कैकेय्या इति। इतः रामपालनाश्रयुतमत एव अनाथवन्नाथरहितसदृशमिदं राज्यं यदि च कैकेय्याः केकयीदास्या मन्थरायाः अधर्म्यं धर्मादनपेतविरुद्धमधर्मेण पालितमित्यर्थः स्यात्तदा नोऽस्माकं जीवितेन न अर्थः प्रयोजनं पुत्रैः कुतः धनैश्च कुतः ॥ २१ ॥

गो० टी०—कैकेय्या इति। अधर्म्यं धर्मादपेतमित्यर्थः अनाथवत् नाथशून्यं भावि प्रतिसन्धानेनेदमुक्तम्। कुत इति पुत्रधनकृतपुरुषार्थस्य जीवितमूलत्वादित्यर्थः ॥ २१ ॥

२२] ति० टी०—पुत्रो रामः परिहरेत्यागात्परिहरेत् पुत्रभर्तृत्यागिन्या इतरत्यागः कियानिति भावः ॥ २२ ॥

रा० टी०—ययेति। यया हेतुभूतया मन्थरया ऐश्वर्यकारणादहमतीव राज्ञीप्रियेति स्वप्रभूतिहेतोः पुत्रो रामः भर्ता दशरथश्च त्यक्तौ त्याजितौ सा कैकेयी कुलस्य पांसनी मलभूता मन्थरा अन्यं कं परिहरेत्यजेन्न त्याजयेदित्यर्थः ॥ २२ ॥

गो० टी०—ययेति। पुत्रो रामः परिहरेत् विपक्षय इति शेषः रक्षेदिति यावत् ॥ २२ ॥

२३] ति० टी०—जीवन्त्याः कैकेय्या राज्ये तया भृतकाः पोषिता हि अपि जीवन्त्यो न वसेमहि न वसेम इममर्थं प्रति पुत्रैरपि शपामहे ॥ २३ ॥

रा० टी०—कैकेय्या इति। जीवन्त्याः पालयन्त्याः कैकेय्याः केकयीदास्याः राज्ये भृतकाः तया पालिता अपि जीवन्त्यो वयं जातु कदाचिदपि न वसेमहि हि निश्चितमेतत् अत एव पुत्रैः अपिना भर्त्रादिभिरपि शपामहे अत्रार्थे शपथं कुर्मः शप उपालम्भे इत्यात्मनेपदम् ॥ २३ ॥

---

१ सुखेति गो. पाठः। २ लिति गो. पाठः। ३ त्यक्तौ चेति रा. पाठः। ४ नीति गो. पाठः।

या पुत्रं पार्थिवेन्द्रस्य प्रवासयति निर्घृणा । कस्तां प्राप्य सुखं जीवेदधर्म्यां दुष्टचारिणीम् ॥ २४ ॥
उपद्रुतमिदं सर्वमनालम्भमनायकम्[1] । कैकेयास्तु[2] कृते सर्वं विनाशमुपयास्यति ॥ २५ ॥
नहि प्रव्रजिते रामे जीविष्यति महीपतिः । मृते दशरथे व्यक्तं विलोपस्तदनन्तरम्[3] ॥ २६ ॥
ते वयं पिबतालोड्य[4] क्षीणपुण्याः सुदुःखिताः[5] । राघवं वानुगच्छध्वमश्रुतिं वापि गच्छत ॥ २७ ॥
मिथ्याप्रव्राजितो रामः सभार्यः सहलक्ष्मणः । भरते संनिबद्धाः स्मः सौनिके पशवो यथा ॥ २८ ॥
पूर्णचन्द्राननः श्यामो गूढजत्रुररिंदमः । आजानुबाहुः पद्माक्षो रामो लक्ष्मणपूर्वजः ॥ २९ ॥
पूर्वाभिभाषी मधुरः सत्यवादी महाबलः । सौम्यश्च सर्वलोकस्य चन्द्रवत्प्रियदर्शनः ॥ ३० ॥
नूनं पुरुषशार्दूलो मत्तमातङ्गविक्रमः । शोभयिष्यत्यरण्यानि विचरन्स महारथः ॥ ३१ ॥

गो० टी०–कैकेय्या इति । जीवन्त्याः कैकेय्याः राज्ये भृतकाः भृतिभुजः ' भृतको भृतिभुक् ' इत्यमरः कैकेयीजीवनपर्यन्तं न तस्या राज्ये निवसेमहीति जीवन्तीशब्दस्य भावः ॥ २३ ॥ २४ ॥

२४] ति० टी०–अधर्म्यामधर्मयुताम् ॥ २४ ॥

रा० टी०–नन्वस्तु वासे को दोष इत्यत आहुः–योति । निर्घृणा अतिक्रूरा या मन्थरा पार्थिवेन्द्रस्य पुत्रं प्रवासयति तामधर्म्यां प्राप्य कः सुखं जीवेन्न कोऽपीत्यर्थः ॥ २४ ॥

२५] ति० टी०–अनालम्भमयज्ञम् । तत्र हेतुः—अनायकमिति कृते तन्निमित्तम् ॥ २६ ॥

रा० टी०–उपद्रुतमिति । कैकेय्याः मन्थरायाः कृते अनायकं नायकरहितमत एव उपद्रुतं नानोपद्रवसहितमत एव अनालम्भं पशालम्भोपलक्षितयागरहितं सर्वमिदं राज्यं विनाशमुपयास्यति प्राप्स्यति ॥ २५ ॥

गो० टी०–उपद्रुतमिति । कैकेय्याः कृते कैकेयीनिमित्तम् ॥ २६ ॥

२६] ति० टी०–विलोपो नाशः ॥ २६ ॥

रा० टी०–नन्वस्तु राज्ञो दशरथस्य सत्त्वादनायकं कथमुच्यते इत्यत आहुः–नहीति । रामे प्रव्रजिते सति महीपतिर्न जीविष्यति पालयिष्यति लोकान्तरं गमिष्यतीत्यर्थः । अतः दशरथे मृते लोकान्तरं प्राप्ते सति अनन्तरं विघ्नरहितं व्यक्तं शोभितं यद्राज्यं तत्तस्य विलोपो विनाशो भविष्यतीति शेषः ॥ २६ ॥

गो० टी०–विनाशप्रकारमुपपादयन्ति–नहीति । विलापो विनाशः ॥ २६ ॥

२७] ति० टी०–ते यूयं पुरुषाः सज्जीका इति शेषः आलोड्य पेषयित्वा अश्रुतिं वापि यत्र देशे कैकेय्या नामश्रवणमपि न भवति तादृशं दूरदेशं वा गच्छतेत्यर्थः ॥ २७ ॥

रा० टी०–त इति । ते अस्मदुक्तिं श्रुतवन्तः क्षीणपुण्या यूयमालोड्य अस्मदुक्तिं विचार्य राघवं राममनुगच्छध्वं वा तस्यानक्यत्वे विषं पिबत वा तस्यानक्यत्वे अश्रुतिं मन्थराराज्यभवणरहितदेशं गच्छत, अस्मदादिभिः सहेति शेषः ॥ २७ ॥

गो० टी०–त इति । ते यूयमालोड्य अस्मदर्थमालोच्य सुदुर्गताः सुदरिद्राः रामरूपधनहीना इत्यर्थः । अश्रुतिं यत्र गते नामापि न श्रूयते तं देशमित्यर्थः ॥ २७ ॥

२८] ति० टी०–मिथ्याप्रव्राजितो मिथ्यावरकल्पनया प्रव्राजितोऽभूत् ततः कैकेयीवशगे भरते राजनि वसति सौनिके सूना पशुवधस्थानं तत्र भवे हिंसके तत्समीपे पशवो यथा निश्चितमरणास्तथा संनिबद्धाः स्मः संनिविष्टा भवामः ॥ २८ ॥

रा० टी०–मिथ्येति । रामः मिथ्या वृथा प्रव्राजितः। ननु राजनियोगे भवदुक्त्या किमित्यत आहुः–भरते कैकय्यतिप्रियत्वेन भरतसदृशे मन्थरायां तदाज्ञायामित्यर्थः । वयं संनिबद्धाः स्मः तत्र दृष्टान्तः सौनिके पशुहिंसके पशव इव एतेन मन्थराज्ञायाः सत्त्वेऽस्माकं कल्याणं न भविष्यतीति वस्तु व्यक्तं भरतशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः सामान्ये नपुंसकम् ॥ २८ ॥

गो० टी०–पितृवचननिर्देशेन कैकेयीप्रियचिकीर्षया च क्रियमाणे प्रव्रजने को दोष इत्यत्राह–मिथ्या प्रव्राजित इति। मिथ्या प्रव्राजितः कपटेन प्रव्राजितः सन्निसृष्टाः निक्षिप्ताः राज्ञेति शेषः । सौनिके पशुमारके ॥ २८ ॥

२९] ति०टी०–इदानीं तद्गुणवर्णनेनात्मानमाप्याययन्ति–पूर्णेत्यादि ॥ २९ ॥

३०–३१] ति० टी०–पूर्वाभिभाषी सौहार्दप्रदर्शनाय परभयापगमाय च सर्वत्र पूर्वभाषणशीलः ॥ ३० ॥ ३१ ॥

रा० टी०–रामगुणवर्णनपूर्वकारण्यभाग्यवत्तां बोधयन्त्य आहुः–पूर्णेत्यादि श्लोकत्रयेण । पूर्वाभिभाषी अत्यैश्वर्यवत्ताहेतुकपरभीतिनिवर्तनफलकस्वनिष्ठसौहार्दप्रकटनहेतुकपौर्वकालिकभाषणशीलः रामः अरण्यानि विचरन् सन् शोभयिष्यति । श्लोकत्रयमेकान्वयि ॥ २९–३१ ॥

गो० टी०–विश्लेषासहिष्णुतया रामस्त्वकार्यं कृतवानित्यभिधाय तद्गुणकीर्तनेनाप्यायनं कुर्वन्ति—पूर्णेत्यादिना । गूढजत्रुः गूढे निमग्ने जत्रुणी अंससंधी यस्य स तथोक्तः 'स्कन्धो भुजशिरोंसोऽञ्जी संधी तत्रैव जत्रुणी' इत्यमरः । पूर्वाभिभाषी स्वसौहार्दमव्यत्वप्रदर्शनाय सर्वत्र पूर्वभाषणशीलः ॥ २९–३१॥

---

१ लम्बमिति गो. पाठः । २ हीति गो. पाठः । ३ विलाप इति गो. पाठः । ४ सुदुर्गता इति गो. स्म दुःखिता इति रा. पाठः । ५ कृत्वा इति गो. पाठः ।

तास्तथा विलपन्त्यस्तु नगरे नागरस्त्रियः । चुक्रुशुर्दुःखसंतप्ता मृत्योरिव भयागमे ॥ ३२ ॥
इत्येवं विलपन्तीनां स्त्रीणां वेश्मसु राघवम् । जगामास्तं दिनकरो रजनी चाभ्यवर्तत ॥ ३३ ॥
नष्टज्वलनसंतापा प्रशान्ताध्यायसत्कथा । तिमिरेणानुलिप्तेव तदा सा नगरी बभौ ॥ ३४ ॥
उपशान्तवणिक्पण्या नष्टहर्षा निराश्रया । अयोध्या नगरी चासीन्नष्टतारमिवाम्बरम् ॥ ३५ ॥
तदा स्त्रियो रामनिमित्तमातुरा यथा सुते भ्रातरि वा विवासिते ।
विलप्य दीना रुरुदुर्विचेतसः सुतैर्हि तासामधिकोऽपि सोऽभवत् ॥ ३६ ॥
प्रशान्तगीतोत्सववृत्यवादना विभ्रष्टहर्षा पिहितापणोदया ।
तदा ह्ययोध्या नगरी बभूव सा महार्णवः संक्षपितोदको यथा ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ।

अवशिष्टरात्र्या बहुध्वानमतिक्रान्तो रामः प्रातः स्नात्वोपास्य वेदश्रुतिं गोमतीस्यन्दिके चोत्तीर्य बहूद्रिक्तिः स्फीतान्कोसलान्सीतायै दर्शयन्नात्मनो भावि प्रत्यागमनं च सुमन्त्रेण मन्त्रयमाणोऽग्रतः प्रतस्थे ।

रामोऽपि रात्रिशेषेण तेनैव महदन्तरम् । जगाम पुरुषव्याघ्रः पितुराज्ञामनुस्मरन् ॥ १ ॥

३२] ति० टी०—मृत्योरिव भयागमे मृत्युहेतुकभयागम इवेत्यर्थः ॥ ३२ ॥

रा० टी०—ता इति । तथा उक्तप्रकारेण विलपन्त्यः नगरस्त्रियः मृत्योर्भयागमे मृत्युकालोद्भूतभयप्राप्ताविव चुक्रुशुः रुरुदुः ॥ ३२ ॥

गो० टी०—ता इति । मृत्योर्भयागमे मरणसमये ॥ ३२ ॥

३३] ति० टी०—विलपन्तीनाम् दुःखं दृष्ट्वेति शेषः । रविरस्तं जगाम तदीयदुःखदर्शनासहिष्णुतया रविरपि शीघ्रगतिरभूदित्याशयः ॥ ३३ ॥

रा० टी०—उपसंहरन्नाह—इतीति । वेश्मसु स्वस्वगृहेषु विलपन्तीनां स्त्रीणां दिनकरः सूर्योऽस्तं जगाम अत एव रजनी रात्रिरभ्यवर्तत ॥ ३३ ॥

गो० टी०—इतीति । विलपन्तीनां विलपन्तीषु सतीष्वित्यर्थः । राघवमुद्दिश्येति शेषः ॥ ३३ ॥

३४] ति०टी०—नष्टो होमाद्यर्थोऽपि ज्वलनसंतापो ज्वलनसंगमो यस्याम् प्रशान्ता अध्याया अध्ययनानि सत्कथाश्च यस्यां सा ॥ ३४ ॥

रा० टी०—नष्टेति । नष्टो विध्वस्तः ज्वलनस्य आहवनीयाग्नेः संतापः ऊष्मा यस्यां सा, प्रशान्ताः विनष्टाः अध्यायसत्कथा अध्ययनसमीचीनवार्ताः यस्यां सा अत एव तिमिरेण अन्धकारेण अनुलिप्ता इव सा नगरी बभौ ददृशे इत्यर्थः॥३४॥

गो० टी०—नष्टेति । नष्टज्वलनसंतापा नष्टाग्निप्रणयना प्रशान्ताध्यायसत्कथा अध्यायो वेदः सत्कथा पुराणादिः निष्टत्तवेदाध्ययनपुराणपाठेत्यर्थः ॥ ३४ ॥

३५] ति० टी०—निराश्रया रामरूपाश्रयरहित्यात् ॥३५॥

रा० टी०—उपशान्तेति । निराश्रया रामरूपाश्रयरहिता अयोध्या नष्टतारमम्बरमाकाशमिवासीत् ॥ ३५ ॥

गो० टी०—उपशान्तेति । उपशान्तवणिक्पण्या उपशान्तानि वणिजां पण्यानि यस्यां सा पण्यकल्पनाशून्येत्यर्थः॥३५॥

३६] ति० टी०—सुतैः तृतीयार्थे सुतेभ्योऽपि तासां सोऽधिकोऽभवत् ॥ ३६ ॥

रा० टी०—तदिति । रामनिमित्तं रामवियोगहेतोः आतुराः स्त्रियः सुते भ्रातरि च विवासिते इव विलप्य विविधमुक्त्वा रुरुदुः हि यतः सुतैः सुतादिभ्यः अधिकः प्रीतिविषयत्वेनोत्कर्षः तासां स रामोऽभवत् सुतैरित्यत्र पञ्चम्यर्थे तृतीया ॥ ३६ ॥

गो० टी०—तथेति । सुतैः सुतेभ्यः पञ्चम्यर्थे तृतीया भ्रातृभ्यश्चेत्यपि द्रष्टव्यम् ॥ ३६ ॥

३७] ति० टी०—वादनं वादित्रम् प्रशान्तानि गीतोत्सववादित्राणि यस्यां सा पिहित आपणानां पण्यवस्तूनामुदयः प्रसारणं यस्यां सा संक्षपितोदकः क्षीणोदकः। 'संक्षुभितोदकः' इति पाठे क्षैण्यात्संक्षुभितोदक इत्यर्थः ॥ ३७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रा० टी०—प्रशान्तेति । पिहिता आपणोदया आपणवस्तूनि यस्यां सा नगरी अयोध्या संक्षपितोदकः विनष्टजलः अर्णवः समुद्र इव बभूव । 'संक्षुभितोदकः' इति पाठे क्षैण्यात्संक्षुभितोदक इत्यर्थ इति भट्टाः ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

गो०टी०—प्रशान्तेति । पिहितापणोदया पिहितः आपणोदयः आपणस्थवस्तुसमृद्धिर्यस्याः सा तथोक्ता आपणोदयस्य पिहितत्वमापणविधानात् संक्षपितोदकः संशोषितोदक इत्यर्थः ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने ऽयोध्याकाण्डव्याख्यानेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१] ति० टी०—अथ रामवृत्तान्तमाह—रामोऽपीति । तेनैव यत्र रात्रिशेषे द्विजा वञ्चितास्तेनैव महदन्तरं बहुदूरम् ॥१॥

---

१ तथेति गो. पाठः । २ नृत्तेति गो. पाठः । ३ व्यपास्तहर्षेति गो. पाठः ।

तथैव गच्छतस्तस्य व्यपायाद्रजनी शिवा । उपास्य तु शिवां संध्यां विषयानत्यगाहत ॥ २ ॥
ग्रामान्विकृष्टसीमान्तान्पुष्पितानि वनानि च । पश्यन्नतिययौ शीघ्रं शनैरिव हयोत्तमैः ॥ ३ ॥
शृण्वन्वाचो मनुष्याणां ग्रामसंवासवासिनाम् । राजानं धिग्दशरथं कामस्य वशमास्थितम् ॥ ४ ॥
हा नृशंसाद्य कैकेयी पापा पापानुबन्धिनी । तीक्ष्णा संभिन्नमर्यादा तीक्ष्णकर्मणि वर्तते ॥ ५ ॥
या पुत्रमीदृशं राज्ञः प्रवासयति धार्मिकम् । वनवासे महाप्राज्ञं सानुक्रोशं जितेन्द्रियम् ॥ ६ ॥
[कथं नाम महाभागा सीता जनकनन्दिनी । सदा सुखेष्वभिरता दुःखान्यनुभविष्यति]
अहो दशरथो राजा निःस्नेहः स्वसुतं प्रति । प्रजानामनघं रामं परित्यक्तुमिहेच्छति ॥ ७ ॥
एता वाचो मनुष्याणां ग्रामसंवासवासिनाम् । शृण्वन्नतिययौ वीरः कोसलान्कोसलेश्वरः ॥ ८ ॥

रा० टी०–पुरवासिवृत्तान्तमुक्त्वा रामवृत्तान्तमाह–राम इत्यादिभिः । तेन उत्थानकालादारब्धेन रात्रिविशेषेण महदन्तरमतिदूरं रामो जगाम ॥ १ ॥

गो० टी०–अथ रामवृत्तान्तं प्रस्तौति–रामोऽपीति । तेनैव रात्रिशेषेण येन रात्रिशेषेण पौरान् विहाय गतस्तेनैव महदन्तरं महान्तकाशं महदूरमिति यावत् ॥ १ ॥

२] ति० टी०–व्यपायाद्गता विषयो देशः ॥ २ ॥

रा० टी०–तथेति । तथा अतिवेगेन गच्छतस्तस्य रामस्य शिवा हर्षदा रजनी व्यपायादगच्छदत एव शिवां संध्यामुपास्य विषयान्देशान्तराणि अत्यगाहत ॥ २ ॥

गो० टी०–तथेति । गच्छतः गच्छति सति व्यपायात् निरगात् विषयान्तम् उत्तरकोसलदक्षिणावधिम् ॥ २ ॥

३] ति० टी०–विशेषेण कृष्टाः सीमान्ता येषु अनेन सौराज्यं ध्वनितम् तान्यतिक्रामञ्छनैरिव शीघ्रं ययौ । रमणीयदेशादिदर्शनपारवश्यादतिशीघ्रमपि गमनं शनैरिव प्रत्यभादित्यर्थ इति तीर्थः 'शरैरिव' इति पाठे शरसदृशवेगवद्भिरश्वोत्तमैरित्यर्थ इति कतकः ॥ ३ ॥

रा०टी०–गमनप्रकारं वर्णयन्नाह–ग्रामानिति । विकृष्टसीमान्तान् विकृष्टाः वपनाय कर्षिताः सीमान्ताः सीमापर्यन्तभूमयो येषु तान् वनानि च पश्यन् ग्रामसंवासवासिनां ग्रामाः बहुगृहकाः संवासाः अल्पगृहकाः तद्वासिनां वाचः शृण्वन् सन् शरैरिव बाणवेगसदृशवेगविशिष्टैः हयोत्तमैः शीघ्रं ययौ अयमेव पाठः कतकसंमतः । तीर्थसंमतस्तु 'शनैः' इति पाठः । शनैरिव शीघ्रं ययौ रमणीयदेशादिदर्शनपारवश्यादतिशीघ्रमपि गमनं शनैरिव प्रत्यभादिति भट्टोदाहृततीर्थव्याख्या । सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०–ग्रामानिति । विकृष्टसीमान्तान् विशेषेण कृष्टसीमान्तान् बीजावापार्थं सज्जीकृतक्षेत्रानित्यर्थः । शनैरिव ययौ उत्तमाश्वानां गतिचातुर्यात् पुष्पितवनरामणीयकदर्शनपारवश्याच्चातिशीघ्रमपि गमनं शनैरिव जानन् ययावित्यर्थः । शृण्वन्निति ग्रामसंवासवासिनां ग्रामाः महाग्रामाः संवासा अल्पग्रामाः तेषु वासिनां शृण्वन्नतिययाविति पूर्वेण संबन्धः ॥ ३ ॥

४] ति० टी०–ग्रामा महान्तः संवासाः स्वल्पग्रामाः शृण्वन्ययावित्यन्वयः । ता वाच आह–राजानं धिगित्यादि । आस्थितं प्राप्तम् ॥ ४ ॥

रा० टी०–तद्वचनस्वरूपं बोधयन्नाह–राजानमित्यादिभिः । राजानं दशरथं हा इमं पुत्रं विना कथं जीविष्यतीति तत्संबन्धिनी शोच्यतेत्यर्थः । आस्थितं कविभिर्वर्णितं कामस्य वशं कान्तिं धिक् रामकान्त्यग्रे तत्कान्तिस्तुच्छेत्यर्थः ॥ ४ ॥

गो० टी०–वाच एव प्रपञ्चयति–राजानमित्यादि । पापा पापस्वभावा पापानुबन्धिनी नैरन्तर्येण पापकारिणीत्यर्थः । तीक्ष्णा क्रूरा वनवासं वनवासनिमित्तं प्रवासयतीत्यन्वयः । अतियययौ अतिक्रम्य ययौ ॥ ४–९ ॥

५] ति० टी०–पापा पापकर्मारब्धशरीरा पापानुबन्धिनी पापकर्मनिरता तीक्ष्णा क्रूरदर्शना संभिन्नमर्यादा त्यक्तमर्यादा ॥ ५ ॥

रा० टी०–योग्यतया व्युत्क्रमेणान्वयः नृशंसा अतिक्रूरा अत एव पापा क्रूरत्वकारणीभूतपापविशिष्टा अत एव पापानुबन्धिनी पापं सर्वजनदुःखदानरूपाधर्ममनुबध्नाति शिक्षयतीत्यर्थः तच्छीला अत एव तीक्ष्णा अनघ्रा अत एव संभिन्नमर्यादा संभिन्ना निवर्तिता मर्यादा निश्चितकार्यासमापनरूपा यया सा या कैकेयी केकयीदासी मन्थरा सानुक्रोशमतिदयावन्तमीदृशं राज्ञः पुत्रं विवासयति सा मन्थरा तीक्ष्णकर्मणि अनघ्रतासूचकव्यापारे स्वापराधक्षमापनाभावविशिष्टचेष्टायामप्यपि वर्तते । सार्धश्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

६] ति० टी०–ईदृशमनेककल्याणगुणवन्तं, सानुक्रोशं सदयम् ॥ ६ ॥

रा० टी०–कथमिति । जनकनन्दिनी दुःखान्दुःखोत्पादकान्पदार्थान्कण्टकादीन्कथमनुभविष्यति सहेतेरित्यर्थः ॥ ७ ॥

७] ति० टी०–प्रजानां प्रियमिति शेषः । यद्वा प्रजाविषयेऽनघं पापरहितम् ॥ ७ ॥

रा० टी०–अहो इति । प्रजानामनघमघनिवर्तकं रामं परित्यक्तुं राजा दशरथः इच्छति अतः स्वसुतं प्रति निःस्नेहः स्नेहरहितोऽस्तीति शेषः । अहो आश्चर्यमेतत् ॥ ८ ॥

८] ति० टी०–कोसलानति अतिक्रम्य ययौ ॥ ८ ॥

१ स इति गो. पाठः । २ विषयान्तं व्यत्याहतेति गो. पाठः । ३ शरैरिवेति हा. पाठः । ४ श्लोकोऽयमधिको गो. रा. पाठे । ५ निःस्नेहि

ततो वेदश्रुतिं नाम शिववारिवहां नदीम् । उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशम् ॥ ९ ॥
गत्वा तु सुचिरं कालं ततः शीतवहां नदीम् । गोमतीं गोयुतानूपामतरत्सागरंगमाम् ॥ १० ॥
गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः । मयूरहंसाभिरुतां ततार स्यन्दिकां नदीम् ॥ ११ ॥
स महीं मनुना राज्ञा दत्तामिक्ष्वाकवे पुरा । स्फीतां राष्ट्रवृतां रामो वैदेहीमन्वदर्शयत् ॥ १२ ॥
सूत इत्येव चाभाष्य सारथिं तमभीक्ष्णशः । हंसमत्तस्वरः श्रीमानुवाच पुरुषोत्तमः ॥ १३ ॥
कदाहं पुनरागम्य सरय्वाः पुष्पिते वने । मृगयां पर्यटिष्यामि मात्रा पित्रा च संगतः ॥ १४ ॥
नात्यर्थमभिकाङ्क्षामि मृगयां सरयूवने । रतिर्ह्येषातुला लोके राजर्षिगणसंमता ॥ १५ ॥

रा० टी०–एता इति । ग्रामेषु यः संवास उत्तमनिवासस्तद्वासिनां मनुष्याणाम् एता वाचः शृण्वन्सन्कोशलेश्वरो रामः कोशलान्देशविशेषानतिययौ अतिक्रमणपूर्वकदेशान्तरं प्राप ॥ ९ ॥

९] ति० टी०–शिववारिवहां शिवानि वारीणि वहन्तीम् ॥ ९ ॥

रा० टी०–तत इति । ततः कोशलदेशातिक्रमणानन्तरं शिववारिवहां कल्याणप्रदजलवतीं वेदश्रुतिं वेदश्रुत्यभिधां नदीमुत्तीर्य अगस्त्याध्युषितामगस्त्यवासाधिकरणीभूतां दिशं दक्षिणामित्यर्थः । अभिमुखः संमुखो ययौ ॥ १० ॥

गो० टी०–तत इति । अगस्त्याध्युषितां दिशं दक्षिणां दिशम् ॥ १० ॥

१०] ति० टी०–गोभिर्युतान्यनूपानि जलप्रायदेशा यस्याम् सागरंगमामित्यनेन यमुनावत्तस्या अपि पृथक्सागरप्रवेशं सूचयति ॥ १० ॥

रा० टी०–गत्वेति । सुचिरं बहुकालं ततः वेदश्रुतिनद्याः गत्वा शीतवहां शैत्यविशिष्टजलवहनकर्त्रीं गोयुतानूपां गोयुक्तजलप्रदेशविशिष्टां सागरंगमां सर्वकालं गङ्गासङ्गमद्वारा समुद्रं प्राप्तां गोमतीं नदीमतरत् गमेः सुप्युपसंख्यानमिति खचि मुमि च सिद्धम् ॥ ११ ॥

गो० टी०–गत्वेति। गोयुतानूपां गोयुक्तकच्छप्रदेशां सागरंगमामिति गमेः सुप्युपसंख्यानमिति खचि मुम् ॥ ११ ॥ १२ ॥

११] ति० टी०–स्यन्दिकां तदाख्याम् ॥ ११ ॥

रा० टी०–गोमतीमिति । गोमतीमतिक्रम्य तीर्त्वा मयूरहंसाभिरुतां मयूरादिशब्दविशिष्टां स्यन्दिकां तदभिधां नदीं ततार ॥ १२ ॥

१२] ति० टी०–सोऽतीतस्यन्दिकः महीं स्यन्दिकासीमां कोसलदेशरूपां राष्ट्रवृतामवान्तरजनपदावृतां वैदेहीमन्वदर्शयत् इक्ष्वाकवे मनुना दत्तकोसलदेशस्य दक्षिणसीमां कथयामासेत्यर्थः । यद्यपीक्ष्वाकादयः सार्वभौमास्तथापि तेषां स्वराजधानीत्वात्स्यन्दः कोसलदेश एव सार्वभौमत्वं तु तद्देशसिंहासनाधिष्ठातृसकलराजपालनीयाज्ञत्वमेवेत्यलम् ॥ १२ ॥

रा० टी०–स इति । सः उत्तीर्णस्यन्दिकानदीको रामः इक्ष्वाकवे तदभिधमहाराजाय राज्ञा राजगजेन मनुना दत्ता राजधानीप्रकल्पनायाज्ञप्तामित्यर्थः । स्फीतां स्वच्छां राष्ट्रावृतामवान्तरदेशविशिष्टां महीं पृथ्वीं वैदेहीमन्वदर्शयत् ॥ १३ ॥

गो० टी०–स इति । महीं कोसलदेशं राष्ट्रावृतामवान्तरजनपदावृतां यद्यपीक्ष्वाकूणामियं भूमिः सशैलवनकाननेति भूमिमात्रमिक्ष्वाकोरेव तथापि तस्य जन्मभूमित्वियम् इतरजनपदस्थाः करदा इति बोध्यम् ॥ १३ ॥

१३] ति० टी०–मृत ३ प्लुतः शृण्वित्यादि भाभाष्य संबोध्य हंसमत्तस्वरो मत्तहंसस्वरः ॥ १३ ॥

रा० टी०–सूतेति । सारथिं सूत ! इति अभीक्ष्णशः आभाष्य संबोध्य हंसमत्तस्वरः मत्तहंसस्वरसदृशस्वरविशिष्टः श्रीमान् अतिशोभाविशिष्टो रामः उवाच ॥ १४ ॥

गो० टी०–सूत इतीति । सूत इतीत्यत्र गुणाभावो वाक्यसन्धेरनित्यत्वात् हंसमत्तस्वरः हंसस्येव मत्तः कलः स्वरो यस्य स तथा ॥ १४ ॥

१४] ति० टी०–अथ परिगृहीतमनुष्यदेहस्य तद्देहग्रहणानुरूपोऽभिनयः–कदेति । आगम्य अतिक्रान्तं स्वदेशमिति शेषः ॥ १४ ॥

रा० टी०–तदाकारमाह–कदेति । आगम्य वनवासानिवृत्य पुष्पिते सरय्वाः वने मात्रादिना संगतोऽहं मृगयामाखेटं कदा पर्यटिष्यामि ॥ १५ ॥

गो० टी०–भाविपितृवियोगस्मरकमौत्कण्ठ्यमाह–कदेति । पर्यटिष्यामि चरिष्यामि ॥ १५ ॥

१५] ति० टी०–नन्वु मृगयायाः 'स्त्रीद्यूतमृगयाश्ववाक्पारुष्योग्रदण्डताः । अर्थस्य दूषणं चेति राज्ञां व्यसनसप्तकम्' इत्युक्तेर्व्यसनानां निषेधाच्च कथं तदिच्छेत्यत आह–नात्यर्थमिति । प्रजान्यायचिन्तादिवैक्लव्यापादकतयात्यन्ततरत्वे तस्यां निषेधात् नतु सर्वथैव निषेधोऽस्त्यत आह–एषा रतिः क्रीडा लोके राजर्षिगणसंमता, अतोऽतुला न सर्वथा निषिद्धेत्यर्थः । 'गजादयो न हन्तव्या मृगयायां महेषुभिः' इत्यादिनास्या अप्यनुमतत्वमिति भावः ॥ १५ ॥

१ शिवजलामिति गो. पाठः । २ राष्ट्रावृतामिति गो. रा. पाठः । ३ पुरुषर्षभ इति गो. पाठः । ४ पञ्चदशपादशयोः स्थानव्यत्यासेन गो. पाठः ।

राजर्षीणां हि लोकेऽस्मिन्रत्यर्थं मृगयावने । काले कृतां तां मनुजैर्धन्विनामभिकाङ्क्षिताम् ॥ १६ ॥
स तमध्वानमैक्ष्वाकः सूतं मधुरया गिरा । तं तमर्थमभिप्रेत्य ययौ वाक्यमुदीरयन् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ।

रामोऽयोध्याभिमुखीभूय तामापृच्छय मध्येमार्गं द्रष्टुमागताञ्जानपदजनान्निवर्त्य कोसलानतिक्रम्य गङ्गां प्राप । प्रसङ्गतो वाल्मीकिर्गङ्गां वर्णयति । लक्ष्मणसुमन्त्रानुमतो रामो गङ्गातटगतेङ्गुदीतरुमूले रथादवारुरोह स्वं द्रष्टुमागतं गुहनामानं निषादराजमभ्युज्जगामाथ पश्चिमसंध्यामुपास्य कृतजलाहार एव भुवमधिशिश्ये । सुमन्त्रगुहलक्ष्मणाः संभाषमाणा एव निशां निन्युः ।

विशालान्कोसलान्रम्यान्यात्वा लक्ष्मणपूर्वजः । अयोध्यामुन्मुखो धीमान्प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥
आपृच्छे त्वां पुरिश्रेष्ठे काकुत्स्थपरिपालिते । दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥ २ ॥

रा० टी०—नन्वु 'क्षीयूतमृगयामद्यवाक्पारुष्योग्रदण्डताः । अर्थस्य दूषणं चेति राज्ञां व्यसनसप्तकम् ' इत्यादिना मृगयाया निषिद्धत्वादिंसाप्रचुरत्वाच्च कथं तामभिकाङ्क्षसे इत्यत आह—नेति । सरयूवने मृगयामाखेटमत्यर्थमर्थातिक्रमणां हिंसमित्यर्थः नाभिकाङ्क्षामि । नन्वु पुनः किमर्थमुच्यते इत्यत आह—एषा मदीप्सिता मृगयारतिः मृगादिना विहरणमेव नन्वु हिंसेत्यर्थः । अत एव राजर्षिगणसंमता मन्वादिसंमतिविषयीभूता अत एव लोके अतुला हिंसाप्रचुराखेटोपमारहिता एतेन निषेधवाक्यानि प्रचुरहिंसाविशिष्टाखेटपराणीति सूचितम् ॥ १६ ॥

गो० टी०—नन्वु 'क्षीयूतमृगयामद्यवाक्पारुष्योग्रदण्डताः । अर्थस्य दूषणं चेति राज्ञां व्यसनसप्तकम्' इति निन्दिता मृगया कथं काङ्क्ष्यत इत्याशङ्क्य हिंसमृगनिवृत्त्यर्था कादाचित्का न गर्हिता किंतु निरन्तरैव यथा राजसूये " तस्याः सभाया मध्ये अधिदेवनमुद्धत्यावोक्ष्याऽक्षान् निर्वपेत्" इति विहितं द्यूतमित्याह—राजर्षीणामिति । हि यस्मात्कारणात् राजर्षीणां वने मृगया रत्यर्थमस्तीति शेषः । काले श्राद्धादिकाले मनुजैः सदाचारपरैः वृतां स्वीकृतां धन्विनामभिकाङ्क्षितां चलल्क्ष्यवेधनार्थं धन्विभिरभिकाङ्क्षितां तां मृगयां नात्यर्थमभिकाङ्क्षामि किंचित् काङ्क्षामीत्यर्थः । रतिः क्रीडा ॥ १६ ॥ १७ ॥

१६] ति० टी०—' राजर्षीणां हि ' इति श्लोकः पुनरुक्तार्थक इव कतकासंमतश्चेति बोध्यम् एवं हि तद्व्याख्या—हि यतो स्मिंल्लोके राजर्षीणां वने मृगया रत्यर्थमासीत् । अतोऽहमपि काले श्राद्धादिकाले मनुजैर्मनुपुत्रैः सदाचारपरैरपि कृतां स्वीकृतां धन्विनां चञ्चललक्ष्येष्विषुसिद्ध्यर्थमभिकाङ्क्षितां नात्यर्थमभिकाङ्क्षामीति संबन्धः ॥ १६ ॥

रा० टी०—राजर्षीणामिति । यतः राजर्षीणां रत्यर्थं मृगया अतः काले विहरणसमये मनुजैः मनुवंश्यराजैः कृतां स्वीकृतामत एव धन्विनामितरधनुर्धराणामभिकाङ्क्षितां मृगयामाकाङ्क्षामीति शेषः ॥ १७ ॥

१७] ति० टी०—तं तमर्थमभिप्रेत्य विषयीकृत्य मधुरया गिरा सूतं प्रति वाक्यमुदीरयन्स ऐक्ष्वाको रामस्तमध्वानं ययाविति संबन्धः ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०—स इति । ऐक्ष्वाकः इक्ष्वाकुवंशप्रसूतः स रामः मधुरया गिरा वाक्यमुदीरयन् सन् तं स्वोक्तवाक्यार्थं तं सूतमभिप्रेत्य बोधयित्वा तमध्वानं ययौ ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

गो० टी०—स इति । ऐक्ष्वाकः "दाण्डिनायन—"इत्यादिना निपातनात् साधुः स रामः सूतं प्रति तं तमर्थं राजगुणादिरूपम् अभिप्रेत्य हृदये कृत्वा मधुरया गिरा वाक्यमुदीरयन् सन् अध्वानं ययौ अमुमर्थमुत्तरत्र दशरथं प्रति सूतो व्यक्तीकरिष्यति ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१] ति० टी०—अथ जन्मभूमिप्रयुक्तस्नेहेन निर्गमनकाले शिष्टाचारपरिप्राप्ततया च स्वदेशमापृच्छति स्वस्वरूपगोपनाय—विशालानिति । यात्वा तदन्तं गत्वा ॥ १ ॥

रा० टी०—सूतसंभाषणानन्तरकालिकं वृत्तमाह—विशालानित्यादिभिः । विशालान्विस्तीर्णान्रम्यान्कोसलान्यात्वा तदन्तं प्राप्य अयोध्यामुन्मुखः अभिमुखो रामः वाक्यमब्रवीत् ॥१॥

गो० टी०—विशालानिति । कोसलान् यात्वा अन्तपर्यन्तदक्षिणकोसलान् यात्वेत्यर्थः ॥ १ ॥

२] ति० टी०—हे पुरि श्रेष्ठे ! त्वां त्वत्संबन्धिदैवतानि च आपृच्छे प्रार्थयामि ॥ २ ॥

रा० टी०—तद्वाक्यमेवाह—आपृच्छे इति । पुरि श्रेष्ठे सर्वोत्कृष्टे हे पुरि! त्वां यानि दैवतानि त्वां पालयन्ति रक्षन्ति यानि च आवसन्ति भवत्प्रीत्या नित्यं तिष्ठन्ति तानि च आपृच्छे कथयामि ॥ २ ॥

१ कृतामिति गो. पाठः । २ ऽभिमुख इति गो. पाठः । ३ आत्मनेपदमत्र चर्क्त भाति ।

निवृत्तवनवासस्त्वामनृणो जगतीपतेः । पुनर्द्रक्ष्यामि मात्रा च पित्रा च सह संगतः ॥ ३ ॥
ततो रुचिरताम्राक्षो भुजमुद्यम्य दक्षिणम् । अश्रुपूर्णमुखो दीनोऽब्रवीज्जानपदं जनम् ॥ ४ ॥
अनुक्रोशो दया चैव यथार्हं मयि वः कृतः । चिरं दुःखस्य पापीयो मा गम्यतामर्थसिद्धये ॥ ५ ॥
तेऽभिवाद्य महात्मानं कृत्वा चापि प्रदक्षिणम् । विलपन्तो नरा घोरं व्यतिष्ठंश्च क्वचित्क्वचित् ॥ ६ ॥
तथा विलपतां तेषामतृप्तानां च राघवः । अचक्षुर्विषयं प्रायाद्यथार्कः क्षणदामुखे ॥ ७ ॥
ततो धान्यधनोपेतान्दानशीलजनाञ्छिवान् । अकुतश्चिद्भयान्रम्यांश्चैत्ययूपसमावृतान् ॥ ८ ॥
उद्यानाम्रवणोपेतान्संपन्नसलिलाशयान् । तुष्टपुष्टजनाकीर्णान्गोकुलाकुलसेवितान् ॥ ९ ॥

गो० टी०–निर्गमनावसरे शिष्टाचारप्राप्तस्य पुरदेवता-नमस्कारस्य कार्यसंकटेनाकृतत्वादिदानीमयोध्याराज्यसीमान्ते स्थित्वा आरब्धस्य चतुर्दशवर्षावधिकव्रतस्य निर्विघ्नपरिसमाप्त्यर्थं पुरदेवतानमस्कारपूर्वकमभ्यनुज्ञां प्रार्थयते–आपृच्छ इत्यादिना । यानीति तान्यप्यापृच्छ इत्यर्थसिद्धम् ॥ २ ॥ ३ ॥

३] ति० टी०–प्रार्थनाप्रकारमाह–निवृत्त इति ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–निवृत्तेति । निवृत्तवनवासः चतुर्दशवर्षनियमितवनवासान्निवृत्तः अत एव जगतीपतेः पितुः अनृणः आज्ञापितकरणेन तदृणरहितः त्वां दैवतसहितभवतीं पुनर्द्रक्ष्यामि एतेन भवत्यपि पित्रादिसमीपे गन्तव्यमिति सूचितं तेन केनचिद्रूपेण सापि सहैवागतेति व्यक्तं तेन तस्याः कामचारगमनकर्त्रीत्वं व्यञ्जितम् ॥ ३ ॥

४] ति० टी०–जानपदं जनं स्वदर्शनार्थं तत्रागतं तेषामश्रुपूर्णमुखत्वाल्लोकव्यवहारानुसारेण नट इव स्वयमप्यश्रुपूर्णमुखः ॥ ४ ॥

रा० टी०–तत इति । ततः अयोध्याज्ञापनानन्तरं रुचिरताम्रे स्वाभाविकस्वच्छारुणे अक्षिणी नेत्रे यस्य सः अश्रुपूर्णमानन्दजलव्याप्तं मुखं यस्य सः अदीनः नित्यं दीनत्वाभावविशिष्टः रामः जानपदं जनमब्रवीत् ॥ ४ ॥

गो० टी०–तत इति । भुजोद्यमनं रथवेगेन दूरगमनात् अश्रुपूर्णमुखत्वं तदश्रुदर्शनात् जनं दर्शनार्थमागतम् ॥ ४ ॥

५] ति० टी०–अनुक्रोश आदरोऽनुतापो वा दया कारुण्यम् । यथायोग्यं मयि वो युष्माकम् युष्माभिरिति यावत् कृतः कृता च दुःखस्य चिरमनुभव इति शेषः । पापीयोऽशोभनम् अतो युष्माभिर्गम्यताम् वयमप्यर्थसिद्धये पित्रनुज्ञातार्थसिद्धयेऽवतारप्रयोजनार्थसिद्धय इति हृत्स्थम् गच्छाम इति शेषः । व्याख्यानानन्तरं स्वप्रयोजकत्वान्नोक्तम् ॥ ५ ॥

रा० टी०–तद्वचनमेवाह–अनुक्रोश इति । यथार्हं यथायोग्यमपि अनुक्रोश आदरः दया च कृतः कृता लिङ्गविपरिणामेनान्यत्राप्यन्वयः । अतः अर्थसिद्धये स्वस्वकार्यनिर्वर्तनाय गम्यताम् । ननु सहगमने का क्षतिरित्यत आह–दुःखस्य चिरं विलम्बः पापीयः न युक्तमित्यर्थः । एतेन सहगमने भवतां मद्गमनादिजनितः खेदातिशयो भविष्यतीति सूचितम् ॥ ५ ॥

गो० टी०–अनुक्रोश इति । अनुक्रोशः आदरः दया अनुकम्पा यथार्हं स्वामित्वानुगुणं वः युष्माभिः कृतः कृता चेत्यपि द्रष्टव्यम् दुःखस्य अनुभूयमानस्य दुःखस्य चिरं चिरकालविशिष्टत्वं पापीयः अशोभनं मद्दर्शने भवतां दुःखमभिवर्धते अतो गम्यताम् अर्थसिद्धये गृहकृत्यादिकरणाय ॥ ५ ॥

६] ति० टी०–त एवं रामेण बोधिताः ॥ ६ ॥

रा० टी०–ते इति । ते रामेण निवारिताः नराः घोरं विलपन्तः विविधं कथयन्तः क्वचित्क्वचिद्व्यतिष्ठन् स्थितियोग्यस्थलाविचारेणैवातिष्ठन्नित्यर्थः ॥ ६ ॥

गो० टी०–त इति । व्यतिष्ठन्त रामदर्शनाशया शीघ्रं न जग्मुरित्यर्थः ॥ ६ ॥

७] ति० टी०–अतृप्तानां दर्शनतृप्तिरहितानाम् क्षणदामुखे सायंकालेऽर्को यथा तथा चक्षुर्विषयं देशं गतः ॥ ७ ॥

रा० टी०–तथेति । अतृप्तानां रामदर्शनहेतुकतृप्तिरहितानामत एव तथा तेन प्रकारेण विलपतामेषां जनानामचक्षुर्विषयं चक्षुर्गतिरहितदेशं राघवः प्रायात् तत्र दृष्टान्तः क्षणदामुखे सायंसमये अर्को यथा ॥ ७ ॥

गो० टी०–तथेति । विलपतामित्यनादरे षष्ठी अचक्षुर्विषयं चक्षुर्विषयताभावम् क्षणदामुखे निशामुखे ॥ ७ ॥

८] ति० टी०–तदेवाह वाल्मीकिः–तत इति । दानशीला जना येषु तान् चैत्यैर्देवताधिष्ठानवृक्षैर्यूपैश्च समावृतान्॥८॥

रा० टी०–तत इति । धान्यधनैः उपेतान्युक्तान्दानशीलजनान्दानिजनविशिष्टानत एव शिवान्मङ्गलविशिष्टानकुतश्चिद्भयान् कुतश्चिद्भयरहितानत एव रम्यान् चैत्ययूपसमावृतान् चैत्याः देवाधिष्ठितवृक्षादयः यूपाः यज्ञस्तम्भास्तैर्युक्तान्॥८॥

गो० टी०–दुस्त्यजामपि राज्यश्रियं तृणीकृत्य गतवान् राम इति बोधयितुमृषिः कोसलानभिवर्णयति–तत इत्यादिना । धनधान्ययोः प्रयोजनमाह दानेति । चैत्ययूपसमावृतान् चैत्यानि देवतायतनानि यूपाः सर्वतोमुखादियागप्रख्यापकाः यूपाकारत्वेन स्थापिताः स्तम्भाः उद्यानानि पुष्पवाटिकाः संपन्नाः संपूर्णाः गोकुलैराकुलं निबिडं यथा भवति यथा सेवितान् नरेन्द्राणां लक्षणीयान् एकैकशो नगरसदृशत्वेन लक्षयितुं योग्यान् कोसलान् कोसलदेशस्थग्रामान् ॥ ८–१० ॥

९] ति० टी०–गोकुलैराकुलतया सेवितान् ॥ ९ ॥

१ रुचिरेति गो. पाठः । २ व्यतिष्ठन्तेति गो. पाठः ।

रक्षणीयान्नरेन्द्राणां ब्रह्मघोषाभिनादितान् । स्थेन पुरुषव्याघ्रः कोसलानत्यवर्तत ॥ १० ॥
मध्येन मुदितं स्फीतं रम्योद्यानसमाकुलम् । राज्यं भोज्यं नरेन्द्राणां ययौ धृतिमतां वरः ॥ ११ ॥
तत्र त्रिपथगां दिव्यां शीततोयामशैवलाम् । ददर्श राघवो गङ्गां रम्यामृषिनिषेविताम् ॥ १२ ॥
आश्रमैरविदूरस्थैः श्रीमद्भिः समलंकृताम् । कालेऽप्सरोभिर्हृष्टाभिः सेवितामम्भोहदां शिवाम्॥१३॥
देवदानवगन्धर्वैः किंनरैरुपशोभिताम् । नागगन्धर्वपत्नीभिः सेवितां सततं शिवाम् ॥ १४ ॥
देवाक्रीडशताकीर्णां देवोद्यानयुतां नदीम् । देवार्थमाकाशगतां विख्यातां देवपद्मिनीम् ॥ १५ ॥
जलाघाताट्टहासोग्रां फेननिर्मलहासिनीम् । क्वचिद्वेणीकृतजलां क्वचिदावर्तशोभिताम् ॥ १६ ॥

रा० टी०–उद्यानाम्रवणोपेतामुद्यानैः पुष्पवृक्षादिनिर्मितवाटिकाविशेषैः आम्रवनैश्च उपेतान्युक्तान्संपन्नाः अतिरमणीयाः सल्लिलाशयाः येषु तानत एव तुष्टपुष्टजनैः आकीर्णान्व्याप्तान्गोकुलाकुलसेवितान् गवां कुलैः गवादिभिः गवामकुलैः गवयमहिष्यादिभिः सेवितान् ॥ ९ ॥

१०] ति० टी०–नरेन्द्राणां रक्षणीयान् ग्रामश्च इति शेषः । नरेन्द्ररक्षणयोग्यैकैकग्रामान् इतरनरेन्द्रराज्यतुल्यैकैकग्रामानिति यावत् ॥ १० ॥

रा० टी०–ब्रह्मघोषैः वेदनादैः अभिनादितानत एव नरेन्द्राणां रक्षणीयान्कोशलानत्यवर्तत । श्लोकत्रयमेकान्वयि ॥१०॥

११] ति० टी०–मध्येन मध्यगत्या नरेन्द्राणामितरेषां भोज्यं राज्यं देशं ययौ स्वदेशत्वाभावेन तज्जनानुद्यानशङ्काभावाच्छत्रैर्देशसौभाग्यं पश्यन्नगमदित्यर्थः ॥ ११ ॥

रा० टी०–मध्येनेति । मुदितं स्फीतं स्वच्छं नरेन्द्राणां खण्डमण्डलेश्वराणां भोज्यं राज्यं मध्येन मध्यगतमार्गेण ययौ ॥ ११ ॥

गो० टी०–मध्येनेति । मध्येन मार्गेण भोग्यस्यापि राज्यस्य त्यागमृषिर्विस्मयते–धृतिमतां वर इति ॥ ११ ॥

१२] ति० टी०–तत्रायोध्याराज्यादक्षिणराज्ये ॥ १२ ॥

रा० टी०–तत्रेति । तत्र तस्मिन् समये त्रिपथगां त्रयः स्वर्गमृत्युपातालल्लोका एव पन्थानः तैर्गच्छति तां दिव्यां प्राकृतविलक्षणां शिवतोयां परमकल्याणप्रदजलविशिष्टामशैवलां शैवालरहिताम् ऋषिभिर्निषेवितामत एव रम्यां मनोहरां गङ्गां ददर्श ॥ १२ ॥

गो० टी०–तत्रेत्यादि । तत्र कोसलादक्षिणदेशे त्रिभिः पथिभिर्गच्छतीति त्रिपथगा तां स्वर्गमर्त्यपातालल्लोकगामिनीमित्यर्थः । शिवतोयाम् अच्छतोयाम् ॥ १२ ॥

१३] ति० टी०–काले क्रीडाकाले सेविता अम्भःपूर्णहृदा यस्यां ताम् ॥ १३ ॥

रा० टी०–आश्रमैरिति । आश्रमैः सिद्धन्यादिगृहैः समलंकृतां काले स्नानादिसमये हृष्टाभिः अप्सरोभिः सेवितामम्भोहदाम्भःपूर्णहृदविशिष्टां शिवां शिवसंबन्धिनीम् ॥ १३ ॥

गो० टी०–आश्रमैरित्यादि । श्रीमद्भिः धर्मसमृद्धिमद्भिः काले क्रीडाकाले उचितकाले वा सेवितानि प्राप्तानि अम्भांसि येषां तादृशा हृदाः यस्यां सा शिवां क्रीडार्थं सेवनेऽपि पावनाम् ॥ १३ ॥

१४] ति० टी०–नागपत्नीभिर्गन्धर्वपत्नीभिश्च सेविताम् । सततं शिवामित्यनेन महानिशायामपि तस्यां स्नानाधिकारः सूचितः । तदुक्तं भारते–‘ भुक्त्वा वा यदि वाऽभुक्त्वा रात्रौ वा यदि वा दिवा । न कालनियमः क्वचिद्गङ्गां प्राप्य सरिद्वराम् ॥’ इति ॥ १४ ॥

रा० टी०–देवादिभिः किंनरैश्च उपशोभितां नागगन्धर्वपत्नीभिः सततं सेवितां शिवां शिवप्रापिकाम् ॥ १४ ॥

गो० टी०–नानागन्धर्वपत्नीभिः गन्धर्वाणां नानात्वं देवगन्धर्वमनुष्यगन्धर्वभेदात् सेवितां शिवामिति पूर्ववत् सेवितृभेदेऽप्येकरूपपावनत्वकथनान्नानर्थक्यम् ॥ १४ ॥

१५] ति० टी०–देवानामाक्रीडैः क्रीडापर्वतैर्हिमवत उभयतीरवर्तिभिर्युक्तां । देवार्थं देवानां स्नानपानादिप्रयोजनाय तत्प्रार्थनयाऽऽकाशगताम् देवपद्मिनीं देवभोग्यहेमपद्मवतीम् ॥ १५ ॥

रा० टी०–देवाक्रीडानां देवाक्रीडाविशिष्टपर्वतानां शतैः आकीर्णां तीरद्वये व्याप्तां देवोद्यानैः देवनिर्मितपुष्पादिवृक्षवाटिकाभिर्युतां नदीं सर्वनदीमनोरथपूरिकां सर्वनदीस्वामिनीमित्यर्थः । देवार्थं क्रीडार्थमाकाशगमां शिलासंघट्टोत्थितजलकणिकाद्वारा आकाशगमनकर्त्रीं विख्यातां सकलभुवनप्रसिद्धां देवपद्मिनीं देवभोग्यपद्मविशिष्टाम् ॥ १५ ॥

गो० टी०–देवाक्रीडाः देवार्हक्रीडापर्वताः देवोद्यानानि देवार्होद्यानानि देवार्थमाकाशगमां देवपूजनार्थमाकाशं प्राप्तां देवपद्मिनीं देवार्हाम्भोजयुक्तामित्यर्थः ॥ १५ ॥

१६] ति० टी०–शिलामयस्थले यो जलाघातशब्दस्तदुपाट्टहासेनोग्राम् । पाठान्तरे जलेनाधूताः प्रक्षालिता गुहाग्रा गुहाग्राणि यया ताम् फेनरूपो यो निर्मलो हासो मन्दहासस्तद्वतीम् एवमादिना स्त्रीरूपेण वर्णनं प्रवाहरूपाया गङ्गाया इति बोध्यम् । वेणीकृतजलां द्वित्रिजलसंयोगात् ॥ १६ ॥

रा० टी०–जलाघाताट्टहासोग्रां जलानां शिलासु पतिततोयानां यः आघातः अतिसंघर्षः तेन जातो योऽट्टहासः अट्टहाससदृशशब्दः तेन उग्रां फेननिर्मलहासेनीं फेन एव निर्मलहासोऽस्त्यस्याः तां क्वचिद्देशे वेणीकृतजलामनेकविधातिर्यगादि-

१ रक्षणीयानिति गो. पाठः । २ भोग्यामिति गो. पाठः । ३ शिवेति गो. पाठः । ४ पुण्यामिति गो. पाठः । ५ सरोभिरिति गो. पाठः । ६ क्रीडाशतार्णामिति गो. पाठः । ७ उद्यानशताद्युतामिति गो. पाठः । ८ गमामिति गो. रा. पाठः ।

क्वचित्स्तिमितगम्भीरां क्वचिद्वेगसमाकुलाम् । क्वचिद्गम्भीरनिर्घोषां क्वचिद्भैरवनिःस्वनाम् ॥ १७ ॥
देवसंघाप्लुतजलां निर्मलोत्पलसंकुलाम् । क्वचिदाभोगपुलिनां क्वचिन्निर्मलवालुकाम् ॥ १८ ॥
हंससारससंघुष्टां चक्रवाकोपशोभिताम् । सदामत्तैश्च विहगैरभिपन्नामनिन्दिताम् ॥ १९ ॥
क्वचित्तीरुहैर्वृक्षैर्मालाभिरिव शोभिताम् । क्वचित्फुल्लोत्पलच्छन्नां क्वचित्पद्मवनाकुलाम् ॥ २० ॥
क्वचित्कुमुदखण्डैश्च कुड्मलैरुपशोभिताम् । नानापुष्परजोध्वस्तां समदामिव च क्वचित् ॥ २१ ॥
व्यपेतमलसंघातां मणिनिर्मलदर्शनाम् । दिशागजैर्वनगजैर्मत्तैश्च वरदारणैः ॥ २२ ॥
देवराजोपवाह्यैश्च संनादितवनान्तराम् । प्रमदामिव यत्नेन भूषितां भूषणोत्तमैः ॥ २३ ॥
फलपुष्पैः किसलयैर्वृतां गुल्मैर्द्रुमैस्तथा । विष्णुपादच्युतां दिव्यामपापां पापनाशिनीम् ॥ २४ ॥

गमनेन वेणीकृतं जलं यया सा तामावर्तैः अनेकविधभ्रमितजलैः शोभिताम् ॥ १६ ॥

गो० टी०–गङ्गां स्त्रीत्वेन रूपयति–जलाघातेत्यादिना। जलाघातः शिलासु जलपतनं तेन तच्छब्दो लक्ष्यते स एवाट्टहासः सघोषहासः तेनोद्यां फेनमेव निर्मलहासः तद्वतीं वेणीकृतजलां निम्नोन्नतशिलापतनेन वेण्याकारतया कृतजलाम्॥१६॥

१७] ति० टी०–स्तिमिता निश्चला सा चासौ गम्भीरा च तां गम्भीरनिर्घोषां मृदङ्गादिवत्, भैरवनिःस्वनाम् अशन्यादिवत् ॥ १७ ॥

रा० टी०–स्तिमितगम्भीराम् स्तिमिता निश्चला सा एव गम्भीरेति कर्मधारयः तां वेगेन समाकुलां व्याप्तां गम्भीरः निर्घोषः शब्दो यस्याः सा तां भैरवो भयप्रदः निःस्वनो यस्याः सा ताम् ॥ १७ ॥

गो० टी०–क्वचिदगाधस्थले स्तिमितगम्भीरां निश्चलगम्भीरां गम्भीरनिर्घोषो मृदङ्गादेरिव भैरवो निःस्वनोऽशन्यादेरिव १७

१८–२०] ति० टी०–आभोगपुलिनां विशालसैकताम् ॥ १८–२० ॥

रा० टी०–देवसंघैः आप्लुतं स्नातं जलं यस्याः सा तां निर्मलान्येवोत्पलानि तैः संकुलां व्याप्ताम् आभोगेन जलपरिपूर्णतया विशिष्टं पुलिनं यस्याः सा ताम् ' आभोगः परिपूर्णता ' इत्यमरः । निर्मला स्वच्छा वालुका यस्यां ताम् ॥ १८ ॥

गो० टी०–आभोगपुलिनां परिपूर्णतायुक्तपुलिनां विशालसैकतामित्यर्थः । 'आभोगः परिपूर्णता' इत्यमरः । निर्मलवालुकां निर्मलसिकताम् ॥ १८ ॥

रा० टी०–हंसादिभिः संघुष्टामभिपन्नां व्याप्तामनिन्दितां स्वजननिन्दानिवर्तिकाम् ॥ १९ ॥

गो० टी०–सारसो हंसविशेषः विहगैः हंसादिभिन्नैः पक्षिविशेषैः ॥ १९ ॥

रा० टी०–क्वचित्तीरुहैः तीरजनितैः, फुल्लान्येवोत्पलानि तैः छन्नां, पद्मवनैः कमलजातिविशेषसमूहैः आकुलाम् ॥ २० ॥

गो० टी०–क्वचित् फुल्लोत्पलच्छन्नामिति पूर्वमुत्पलशोभोक्ता अत्र तच्छन्नत्वमिति विशेषः कुड्मलैः कह्लारादिकुड्मलैः॥२०॥

२१] ति० टी०–कुड्मलरूपैः कुमुदखण्डैः समूहैरित्यर्थः। पुष्परजसा ध्वस्तां संयुक्तां समदामिव मदसहितां प्रमदामिव स्थिताम् ॥ २१ ॥

रा० टी०–कुड्मलैः कलिकाभिः कुमुदखण्डैः कुमुदसमूहैः उपशोभितां नानापुष्परजोभिर्ध्वस्तां व्याप्तामित्यर्थः । क्वचित्प्रयागादौ समदां स्वेच्छयोत्पथगत्यादिभिः मदसहितामिव॥२१॥

गो० टी०–नानापुष्परजोभिः ध्वस्तां वर्णान्तरं प्राप्तामित्यर्थः। एवं रक्तवर्णत्वात् समदामिव स्थितां व्यपेतमलसंघातामत एव मणिनिर्मलदर्शनाम् ॥ २१ ॥

२२] ति० टी०–व्यपेतो दूरीकृतो मलसंघातः पापसंघातो यया ताम् । 'व्यपेतजलसंघाताम्' इति पाठे तीरे क्रूरप्रवाहरहितामित्यर्थः । मणिर्मुक्तामणिः अनेनातिस्वच्छशुभ्रजलत्वं दिग्गजायालोडनेऽपि निर्मलत्वमित्यतिशयोक्तिरलंकारः। वरवारणैरुत्तमगजैः ॥ २२ ॥

रा० टी०–व्यपेति । व्यपेतो निःशेषतो निवर्तितो मलसंघातः जनानां पापसमूहो यया तां मणिनिर्मलदर्शनां रजोसंबन्धाभावे शिलाघाते वा मणिवन्निर्मलं स्वच्छं दृश्यते सा तां दिशागजैः दिग्गजजातीयगजैः मत्तैर्वनगजैश्च वरवारणैः ग्रामीणोत्तमगजैश्च ॥ २२ ॥

गो० टी०–वैडूर्यमणिवन्निर्मलदर्शनां वरवारणैः राजगजैः देवोपवाह्यैः देवानां वाहनभूतैः ॥ २२ ॥

२३] ति० टी०–देवराजानस्ते उपवाह्या येषां तैश्च वरगजैः । 'औपवाह्यैः' इति पाठे तेषां क्रीडार्थयानभूतैरित्यर्थः ॥ २३ ॥

रा० टी०–देवराज इन्द्रः उपवाह्यो येषां तैः ऐरावतजातीयगजैरित्यर्थः । सन्नादितवनान्तराम् सन्नादितं वनस्यारण्यस्य जलस्य वा अन्तरं मध्यं समीपदेशो वा यस्याः तां जलवाची वनशब्दः कोशे प्रसिद्धः भूषणोत्तमैः भूषितां प्रमदामिव ॥२३॥

२४] ति० टी०–भूषणान्येवाह–फलेत्यादि । द्विजैः

---

१ जलाकुलामिति गो. पाठः । २ शोभितामिति गो. पाठः । ३ कूजितामिति गो. पाठः । ४ संनादितान्तरामिति गो. पाठः । ५ उपेति गो. पाठः । ६ देवोपवाह्यैश्च मुहुरिति गो. पाठः । ७ फलैरिति गो. पाठः । ८ एतदार्धयोर्व्यत्यासेन गो. पाठः । ९ राजास्ते इति युक्तमिति भाति ।

शिंशुमारैश्च नक्रैश्च भुजंगैश्च समन्विताम् । [1]शंकरस्य जटाजूटाद्भ्रष्टां सागरतेजसा ॥ २५ ॥
समुद्रमहिषीं गङ्गां सारसक्रौञ्चनादिताम् । आससाद महाबाहुः शृङ्गवेरपुरं प्रति ॥ २६ ॥
तापसैर्मिकलिलावर्तामन्ववेक्ष्य महारथः । सुमन्त्रमब्रवीत्सूतमिहैवाद्य वसामहे ॥ २७ ॥
अविदूरादयं नद्या बहुपुष्पप्रवालवान् । सुमहानिङ्गुदीवृक्षो वसामोऽत्रैव सारथे ॥ २८ ॥
[3]प्रेक्षामि सरितां श्रेष्ठां संमान्यसलिलां शिवाम् । देवर्षिगणगन्धर्वमृगपन्नगपक्षिणाम् ॥ २९ ॥
लक्ष्मणश्च सुमन्त्रश्च बाढमित्येव राघवम् । उक्त्वा तमिङ्गुदीवृक्षं तदोपययतुर्हयैः ॥ ३० ॥
रामोऽभियाय तं रम्यं वृक्षमिक्ष्वाकुनन्दनः । रथादवतरत्तस्मात्सभार्यः सहलक्ष्मणः ॥ ३१ ॥

पक्षिभिः । विष्णुपादस्पर्शेन ब्रह्मलोकाद्ब्रह्माण्डबाह्यजलदेशाच्च च्युतामपापां कर्मनाशादित्कनापि प्रकारेण पापजनकत्वाभाववतीमिति कतकः तत्र, पापजनकत्वसंभावनाया एवाभावात् वस्तुतोऽपापां पापजन्तुरहिताम् । तत्र हेतुः—पापनाशिनीं दर्शनमात्रेण तादृशीम् ॥ २४ ॥

रा० टी०—किसलयैः नवीनपत्रैः द्विजैः विलक्षणपक्षिभिः वृताम् विष्णुपादच्युतां[2] विष्णोर्महाविष्णोः पादं स्थानं साकेतान्तर्वर्तिमहावैकुण्ठः तस्माच्च्युतां प्रथमं निर्गतामत एव बालकाण्डोक्तहिमवत्प्रभवत्वं न विरुध्यते अत एव दिव्यां प्राकृतविलक्षणजनैरपि सेवितां[4] अर्शआयजन्तः । अत एव अपापां सर्वकालं पापसंसर्गशून्याम् ॥ २४ ॥

गो० टी०—फलैः पुष्पैः किसलयैरेव भूषणोत्तमैरिति व्यस्तरूपकं, यद्वा फलपुष्पादिभिर्वृतामत एव भूषितां प्रमदामिव स्थितामिति वार्थः । द्विजैः पक्षिभिः ॥ २३ ॥

२५] ति० टी०—'शिंशुमारो जलकपिः' इति वैजयन्तीकोशकर्ता । नक्रैर्मकरैः, सागरतेजसा भगीरथतपसा ॥ २५ ॥

रा० टी०—शिंशुमारैर्जलकपिभिः 'शिंशुमारो जलकपिः' इति वैजयन्ती । नक्रैः मकरैः सागरतेजसा भगीरथतपोबलेन शङ्करस्य जटाजूटाद्भ्रष्टाम् ॥ २५ ॥

गो० टी०—शिंशुमारैः नक्रविशेषैः, यद्वा शिंशुमारैः जलकपिभिः 'शिंशुमारस्त्वम्बुकपिः' इति वैजयन्ती । अत्र विष्णुपादच्युतामित्युक्त्या बालकाण्डे हिमवत्प्रभवत्वं तत्र प्रादुर्भावमात्रेणेति ज्ञेयम् ॥ २४ ॥

२६] ति० टी०—शृङ्गवेरपुरं प्रस्थितामिति शेषः ॥ २६ ॥

रा० टी०—सारसादिनादितां शृङ्गवेरपुरं प्रति शृङ्गवेरपुरसमीपे विद्यमानां गङ्गां महाबाहुः राम आससाद ॥ २६ ॥

गो० टी०—सारसक्रौञ्चनादितां सरो निवासो येषां ते सारसाः पक्षिविशेषाः "सोऽस्य निवासः" इत्यण् । अतो हंससारससंघुष्टामित्यनेन न पौनरुक्त्यं शृङ्गवेरपुरं प्रति गङ्गामाससाद शृङ्गवेरपुरं प्रति गच्छन् गङ्गामाससादेत्यर्थः, यद्वा शृङ्गवेरपुरं प्रति शृङ्गवेरपुरसमीपे गङ्गामाससादेत्यर्थः ॥ २५ ॥

२७] ति० टी०—ऊर्मिभिः कलिलाः संपृक्ता आवर्ता यस्यां सा ताम् इह गङ्गातीरे ॥ २७ ॥

रा० टी०—तामिति । ऊर्मिभिः लहरीभिः कलिला व्याप्ता आवर्ता यस्या तामन्ववेक्ष्य अवलोक्य अथ इहैव वसामहे इति सुमन्त्रमब्रवीत् ॥ २७ ॥

गो० टी०—तामिति । ऊर्मिकलिलावर्तां ऊर्मिमिश्रावर्तां ॥ २६ ॥

२८] ति० टी०—नद्यविदूरत्वं बहुपुष्पप्रवालत्वे हेतुः इङ्गुदी तापसतरुः ॥ २८ ॥

रा० टी०—स्थलविशेषं निर्दिशन्नाह—अविदूरादिति । प्रवालं नवीनपत्रमविदूरात्समीपे सुमहान् इङ्गुदीवृक्षः तापसतरुः अत्रैव वसामः ॥ २८ ॥

गो० टी०—अविदूरादिति । अविदूरात्समीपे इङ्गुदीवृक्षस्तापसतरुः ॥ २७ ॥

२९] ति० टी०—देवादीनां संमान्यं सलिलं यस्यास्ताम् अनेन गङ्गाजलं प्रयागादन्यत्रानीतमपि सकलपापक्षयसमर्थमिति ध्वनितम् ॥ २९ ॥

रा० टी०—प्रेक्षामीति । देवादिभिः संमान्यं पूजनीयं सलिलं यस्याः तां सरितां श्रेष्ठां प्रेक्षामि इहस्थ एव पश्यामीत्यर्थः एतेन वासयोग्यत्वं सूचितम् ॥ २९ ॥

गो० टी०—द्रक्ष्याम इति । संमान्येत्यस्य देवेत्यादिना संबन्धः ॥ २८ ॥

३०] ति० टी०—तत्र गङ्गातीरे स्थितमिङ्गुदीवृक्षं हयैर्ययतुः ॥ ३० ॥

रा० टी०—लक्ष्मण इति । बाढमतिशोभनमित्येवोक्त्वा तं राघवमिङ्गुदीवृक्षमुपययतुः प्रापयामासतुः ॥ ३० ॥

गो० टी०—लक्ष्मण इति । बाढमित्यङ्गीकारे ॥ २९ ॥

३१] ति० टी०—तमभियाय तत्समीपं गत्वेति यावत् अवतरदवातरत् ॥ ३१ ॥

रा० टी०—राम इति । अभियाय प्राप्य रथात् अवतरदवातरत् आगमशास्त्रस्थानित्यत्वादद्विरुहः ॥ ३१ ॥

---

१ निषेवितामिति गो. पाठः । २ अर्धमिदं गो. नास्ति । ३ द्रक्ष्याम इति गो. पाठः । ४ दानवेति गो. पाठः । ५ मानुषेति गो. पाठः ।

सुमन्त्रोऽप्यवतीर्याथ मोचयित्वा हयोत्तमान् । वृक्षमूलगतं राममुपतस्थे कृताञ्जलिः ॥ ३२ ॥
तत्र राजा गुहो नाम रामस्यात्मसमः सखा । निषादजात्यो बलवान्स्थपतिश्चेति विश्रुतः ॥ ३३ ॥
स श्रुत्वा पुरुषव्याघ्रं रामं विषयमागतम् । वृद्धैः परिवृतोऽमात्यैर्ज्ञातिभिश्चाप्युपागतः ॥ ३४ ॥
ततो निषादाधिपतिं दृष्ट्वा दूरादुपस्थितम् । सह सौमित्रिणा रामः समागच्छद्गुहेन सः ॥ ३५ ॥
तमार्तः संपरिष्वज्य गुहो राघवमब्रवीत् । यथायोध्या तथेदं ते राम किं करवाणि ते ॥ ३६ ॥
ईदृशं हि महाबाहो कः प्राप्स्यत्यतिथिं प्रियम् । ततो गुणवदन्नाद्यमुपादाय पृथग्विधम् ॥ ३७ ॥
अर्घ्यं चोपानयच्छीघ्रं वाक्यं चेदमुवाच ह । स्वागतं ते महाबाहो तवेयमखिला मही ॥ ३८ ॥

गो० टी०—राम इति । अभियाय प्राप्य ॥ ३० ॥ ३१ ॥

३२] ति० टी०—उपतस्थे समीपे सेवार्थं प्राप्तः ॥ ३२ ॥

रा० टी०—सुमन्त्र इति । उपतस्थे सेवार्थं समीपं प्राप ॥ ३२ ॥

३३] ति० टी०—आत्मसमः प्राणसमः निषादजात्यस्तज्जातौ भवः बलवान्प्राणतः सेनातश्च स्थपतिर्निषादाधिपतिः । 'निषादजात्यः स्थपतिः' इत्यनेन निषादस्थपतिं याजयेदित्यत्र कर्मधारय इति सूचितम् । यद्यपीदृशसख्यं हीनप्रेष्यं हीनसख्यमित्यादिनोपपातकेषु गणितम्, तथापि तद्विप्रविषयं राज्ञामाटविकबलेन प्रयोजनवत्त्वात् । षड्विधबलसंग्रहस्य राजधर्मत्वाच्च तत्सख्यमेवेति दिक् । अत्रेदं बोध्यम्—निषादगुहविषये 'रामस्यात्मसमः सखा' इत्येवं वदता वाल्मीकिना रामसमत्वरामसमानख्यातित्वोक्त्या भगवद्भक्तत्वेन निषादत्वेऽपि पूर्वकृतश्रवणादिमत्त्वेन तस्य तत्त्वज्ञत्वं सूचितम् ॥ ३३ ॥

रा० टी०—तत्रेति । तत्र तस्मिन्देशे आत्मसमः निखिलधृतिमानतिधैर्यवानित्यर्थः बलवान् निषादजात्यः निषादजातीयः स्थपतिः अधीशः इति विश्रुतः ख्यातः गुहो नाम गुहनामा राजा दशरथेन आज्ञप्त इति शेषः रामस्य सखा आसीदिति शेषः । नन्वु 'हीनप्रेष्यं हीनसख्यं हीनगेहनिवेशनम्' इत्यादिना हीनजातिसख्यस्य उपपातकेषु परिगणनात्प्रशस्तकुले प्रसूतः परमधर्मज्ञो राजा दशरथः रामश्च हीनजातिनिषादेन सह सख्यं कथं कृतवान् इति तु न भ्रमितव्यम् । निषादानां भगवदवतारभूतपृथुराजजनकब्राह्मणमथितवेनशरीरोद्भवत्वेन क्षत्रियत्वादत एव निषादस्थपत्याधिकरणे "निषादस्थपतिं याजयेत्" इति श्रुत्या निषादस्थपतीनां याजनाधिकारः संगच्छते । प्रपञ्चितं चैतत् निषादस्थपत्यधिकरणे मीमांसकैः अत एव रामभोजनार्थं निषादकर्तृकोदनानयनं न विरुध्यते । धर्मशास्त्रे हीनप्रकरणे निषादपरिगणनं तु निषादविलोमजातानामिति न विरोधस्तत्र निषादत्वव्यवहारस्तु भाक्त इति दिक् ॥ ३३ ॥

गो० टी०—तत्रेत्यादि । तत्र देशे राजा तद्देशाधिपतिः आत्मसमः प्राणसमः निषादजात्यः निषादजातौ भवः दिगादित्वाद्यत् । बलवान् चतुरङ्गबलवान् स्थपतिः निषादाधिपतिः 'स्थपतिः पुनः स्थापत्येऽधिपतौ तक्षिण' इति वैजयन्ती 'हीनप्रेष्यं हीनसख्यं हीनगेहनिवेशनम्' इत्युपपातकपरिगणितं हीनजातिसख्यं महाकुलप्रसूतस्य रामस्य कथमुपपद्यत इति चेत्सत्यं "निषादस्थपतिं याजयेत्" इति निषादाधिपतेर्यज्ञसंबन्धश्रवणात् अत्यन्तानुचितं न भवतीत्यनुमन्तव्यं वस्तुतस्तु 'न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः । सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने' इत्युक्तरीत्या रामभक्तोऽयमत्युत्तम एव, गुहस्य भगवत्प्रियत्वं गुहेन सहितो रामो लक्ष्मणेन च सीतयेति दर्शितम् ॥ ३२ ॥ ३३ ॥

३४] ति० टी०—उपागतो रामसमीपं प्राप्तः विषयं स्वदेशम् ॥ ३४ ॥

रा० टी०—स इति । विषयं स्वदेशमागतं प्राप्तं रामं श्रुत्वा वृद्धादिभिः परिवृतः स गुहः उपागतः रामसमीपं प्राप्तः ॥ ३४ ॥

३५] ति० टी०—समागच्छत्क्षेमालिङ्गनादिना संगतोऽभूत् ॥ ३५ ॥

रा० टी०—तत इति । दूरादुपस्थितं प्राप्तं दृष्ट्वा सौमित्रिणा सह रामः गुहेन समागच्छदालिङ्गनमकरोत् ॥ ३५ ॥

गो० टी०—तत इति । दूरादुपस्थितं दृष्ट्वा समागच्छदित्यनेन प्रत्युत्थानाभिगमनोक्तिः । लक्ष्मणेन सह समागच्छत् लक्ष्मणवत्तस्मिन्भ्रातृत्वबुद्धिमकरोदित्यर्थः । समित्येकीभावे ३४

३६] ति० टी०—आर्तो रामीयवल्कलादिधारणदर्शनेन तप्तः । इदमस्मत्पुरम् ॥ ३६ ॥

रा० टी०—तमिति । आर्तः रामदर्शनमन्तरा अतिदुःखी गुहः तं राघवं संपरिष्वज्य अब्रवीत् । तद्वचनमेवाह—हे राम! यथा अयोध्या तव तथा इदं मत्पुरं तव अतः ते किं करवाणि यथेच्छमाज्ञापयेत्यर्थः ॥ ३६ ॥

गो० टी०—तमिति । आर्तः धृतवल्कलदर्शनेन संतप्तः अनेन रामस्य पूर्वमेव मृगयाव्यापारादिना सख्यमस्तीति गम्यते इयमस्मत्पुरी ॥ ३५ ॥ ३६ ॥

३७–३८] ति० टी०—ईदृशवचने कारणमाह—ईदृशं हीति । अनेन भगवत्स्वरूपज्ञत्वमात्मनो ध्वनितम् । अन्नाद्यमन्नमोदनस्तदार्थं भोज्यादीत्यर्थः ॥ ३७ ॥ ३८ ॥

रा० टी०—स्वभाग्यातिशयं बोधयन्नाह—ईदृशमिति । ईदृशमतिमनोहरं प्रियमतिथिं कः प्राप्स्यति न कोऽपीत्यर्थः । अर्घं

१ तथेयमिति गो. पाठः । २ क्षिप्रमिति गो. पाठः ।

वयं प्रेष्या भवान्भर्ता साधु राज्यं प्रशाधि नः । भक्ष्यं भोज्यं च पेयं च लेह्यं चैतदुपस्थितम् ॥ ३९ ॥
शयनानि च मुख्यानि वाजिनां खादनं च ते । गुहमेवं ब्रुवाणं तु राघवः प्रत्युवाच ह ॥
अर्चिताश्चैव हृष्टाश्च भवता सर्वदा वयम् । ॥ ४० ॥
पद्भ्यामभिगमाच्चैव स्नेहसंदर्शनेन च । भुजाभ्यां साधुवृत्ताभ्यां पीडयन्वाक्यमब्रवीत् ॥ ४१ ॥
दिष्ट्या त्वां गुह पश्यामि ह्यरोगं सह बान्धवैः । अपि ते कुशलं राष्ट्रे मित्रेषु च धनेषु च ॥ ४२ ॥
यत्त्विदं भवता किंचित्प्रीत्या समुपकल्पितम् । सर्वं तदनुजानामि नहि वर्ते प्रतिग्रहे ॥ ४३ ॥
कुशचीराजिनधरं फलमूलाशनं च माम् । विद्धि प्रणिहितं धर्मे तापसं वनगोचरम् ॥ ४४ ॥
अश्वानां खादनेनाहमर्थी नान्येन केनचित् । एतावतात्र भवता भविष्यामि सुपूजितः ॥ ४५ ॥

पृथक्–तत इति । पृथग्विधमनेकप्रकारं गुणवत् स्वादुशीघ्रपरिपाकादिगुणविशिष्टमन्नाद्यमोदनादि उपादाय प्रापय्य३७

गो० टी०–तत इति । आद्यशब्देन पेयादिकमुच्यते पृथग्विधं मांसादिभेदेन बहुविधम् ॥ ३७ ॥

रा० टी०–अर्घ्यमर्घहितजलोपलक्षितपूजनसामग्रीमुपानयत् उवाच च । हकारो हर्षार्थः । अर्धद्वयमेकान्वयि । तद्वचनमेवाह–स्वागतमिति । इयं मम भोग्या मही तवैव ॥ ३८ ॥

गो० टी०–स्वागतमिति । इयं मही अटवीराज्यम् ॥३८॥

३९] ति० टी०–नो राज्यं भक्ष्यादिकं च प्रशाधि स्वीकुरु ॥ ३९ ॥

रा० टी०–अतः भर्ता स्वामी भवानेव वयं प्रेष्या दासाः सर्वं वाक्यं सावधारणं भवतीति न्यायेन एवकारलाभः अतः वः प्रदर्शितं राज्यमुपस्थितभक्ष्यादि च शयनानि शय्याश्च खादनं घासादि च प्रशाधि स्वीकुरु तत्र भक्ष्यमन्नादि, भोज्यं पायसादि, पेयं पानकरसादि, लेह्यं विलक्षणयवागूवादि चकारेण चूष्येक्षुदण्डादि । अर्धचतुष्टयमेकान्वयि ॥ ३९ ॥

गो० टी०–भक्ष्यमिति । भक्ष्यं खाद्यं व्यञ्जनादि भोज्यम् अन्नं, पेयं पानकादि लेह्यं रसायनादि खादनं घासः ॥ ३९ ॥

४०] ति० टी०–वाजिनां खादनं घासादि महाप्रभुरपि सन्स्वगृहादिह दूरं यत्पद्भ्यामागतोऽसि, यच्च 'तवेयमखिला मही' इत्यनेन स्नेहं दर्शयसि, तेन त्वया वयमर्चिता एव, हृष्टाश्च वयमित्युवाचेत्यर्थः । 'सर्वदा वयमर्चिताः' इत्यनेन मद्यानमेव मे महती पूजा, तच्च सर्वदा तवास्ते इत्यप्यर्थो गर्भितः अत एव वयं त्वाये सदा हृष्टाः ॥ ४० ॥

रा० टी०–गुहमिति । राघवो रामः प्रत्युवाच ॥ ४० ॥

रा० टी०–तत्प्रतिवचनमेवाह–अर्चिता इत्यादिभिः । पद्भ्यामुपानदादिरहितचरणाभ्यामभिगमात् आगमनात् स्नेहसंदर्शनेन च सर्वदा निखिलदानकर्त्रा भवता वयमर्चिताः अत एव हृष्टाः अतिसंतोषं प्राप्ताः ॥ ४१ ॥

गो० टी०–गुहमिति । अर्चितत्वेऽपि केचिन्न तन्मात्रेण तुष्यन्ति न तथा वयमित्याह–हृष्टाश्चेति । स्नेहसंदर्शनेन राज्यं प्रशाधीतिवाक्यकृतेन स्नेहप्रदर्शनेन ॥ ४० ॥

४१] ति० टी०–अत एव पुनरालिङ्गति, अत्यन्तप्रेमास्पदत्वं बोधयितुं भुजाभ्यामिति ॥ ४१ ॥

रा० टी०–भुजाभ्यामिति । साधुषु महात्मसु वृत्तं वर्तनं ययोस्ताभ्यां पीडयन् पुनरालिङ्गनं कुर्वन् वाक्यं वचनान्तरमब्रवीत् । वचनान्तरमेवाह–बान्धवैः सह त्वां पश्यामि दिष्ट्या भाग्यमेतत् ॥ ४२ ॥

गो० टी०–भुजाभ्यामिति । साधु पीडयन् सम्यगालिङ्गन् पीनाभ्यामित्यनेन सुखहेतुत्वमुच्यते ॥ ४१ ॥ ४२ ॥

४२] ति० टी०–वनेषु चेति तस्याटविकत्वाद्वनकुशलप्रभुः । क्वचित् 'धनेषु' इति पाठः ॥ ४२ ॥

रा० टी०–अपीति । राष्ट्रादौ ते कुशलम् । अपिः प्रश्ने । त्वत्समुपकल्पितं प्रापितं तत्सर्वं तु प्रतिजानामि मित्रधनत्वात् ममैवेदं सर्वमिति प्रतिज्ञां करोमि तथापि प्रतिग्रहे राजभोग्यवस्तुग्रहणे न वर्ते अतो न गृह्णामीत्यर्थः । सार्धश्लोक एकान्वयी हिस्तथाप्यर्थकः ॥ ४३ ॥

४३] ति० टी०–अनुजानाम्यङ्गीकृत्य ददामि प्रतिग्रहे भोगफलके ॥ ४३ ॥

गो० टी०–यत्त्विति । अनुजानामि मम सर्वं सम्यक् कृतमित्यनुजानामि प्रतिग्रहे न वर्ते प्रतिग्रहधर्मं नाश्रितवानस्मीति भावः ॥ ४३ ॥

४४-४५] ति० टी०–धर्मे प्रणिहितं पित्राज्ञापालनलक्षणे धर्मे सावधानम् अत्र तदत्तस्याग्रहे प्रतिग्रहेऽप्रतिग्रहीतृत्वरूपश्चत्रधर्मोपन्यासेनान्नभोजनायोग्यत्वे व्रतस्थत्वरूपहेतूपन्यासेन च तदन्नस्य भोजनायोग्यत्वं सूचयता तस्य तत्त्वज्ञत्वं सूचितम् अन्यथा निषादत्वेनाभोज्यान्नतया तमेव हेतुमुपन्यसेत्, स वा कथं पक्वान्नमाहरेत् एतेन तत्त्वज्ञः सर्वोऽपि भोज्यान्न एवेति ध्वनितम् ॥ ४४ ॥ ४५ ॥

रा० टी०–स्वदृत्तिं बोधयन्नाह–कुशेति । वनगोचरं वनमात्रवसनशीलं तापसं तपोनिरतमत एव धर्मे तापसोचितकर्मणि प्रणिहितमत एव कुशादिधरमत एव फलाद्यशनं मां विद्धि जानीहि अतः अश्वानां खादनेन अश्वकर्तृकभोजनेनैवाहमर्थी अपेक्ष्यते इत्यर्थः ॥ ४४ ॥ ४५ ॥

१ इदमिति गो. पाठः । २ सर्वमेति गो. पाठः । ३ पीनाभ्यामिति गो. पाठः । ४ धनेष्विति गो. पाठः । ५ अश्विनमिति गो. पाठः ।

एते हि दयिता राज्ञः पितुर्दशरथस्य मे। एतैः सुविहितैरश्वैर्भविष्याम्यहमर्चितः ॥ ४६ ॥
अश्वानां प्रतिपानं च खादनं चैव सोऽन्वशात्। गुहस्तत्रैव पुरुषांस्त्वरितं दीयतामिति ॥ ४७ ॥
ततश्चीरोत्तरासङ्गः संध्यामन्वास्य पश्चिमाम्। जलमेवाददे भोज्यं लक्ष्मणेनाहृतं स्वयम् ॥ ४८ ॥
तस्य भूमौ शयानस्य पादौ प्रक्षाल्य लक्ष्मणः। सभार्यस्य ततोऽभ्येत्य तस्थौ वृक्षमुपाश्रितः ॥ ४९ ॥
गुहोऽपि सह सूतेन सौमित्रिमनुभाषयन्। अन्वजाग्रत्ततो राममप्रमत्तो धनुर्धरः ॥ ५० ॥

तथाशयानस्य ततो यशस्विनो मनस्विनो दाशरथेर्महात्मनः।
अदृष्टदुःखस्य सुखोचितस्य सा तदा व्यतीता सुचिरेण शर्वरी ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

गो० टी०—राज्यान्नाद्यपरिग्रहे हेतुं दर्शयति—कुशचीराजिनधरमिति। कुशं पवित्रमेखलादिरूपं चीरं वल्कलम् अजिनं कृष्णाजिनम् धर्मे प्रणिहितं पितृवाक्यपरिपालनादिधर्मे सावधानं वनं गोचरः संचारविषयो यस्य तम् ॥ ४४ ॥

रा० टी०—एतावतेति। एतावता भवदागमनादिनैव सुपूजितो भविष्यामि। अर्धं पृथक्—एते इति। एते अश्वा दयिताः प्रियाः अतः सुविहितैः घासादिना तृप्तिं प्राप्तैः अश्वैः अहमर्चितो भविष्यामि। सार्धश्लोक एकान्वयी ॥ ४६ ॥

गो० टी०—अश्वानामिति अश्वानां खादनेन ग्रासेन अर्थी प्रयोजनवान् अश्वघास एव प्रयोजनमित्यर्थः। अत्र अस्मिन्समये ॥ ४६ ॥

४६] ति० टी०—एते अश्वाः ॥ ४६ ॥

गो० टी०—एते हीति। सुविहितैः पोषितैः ॥ ४६ ॥

४७] ति० टी०—प्रतिपानं जात्याश्वानां राजोपवाह्यानां घासदानानन्तरं यत्पाय्यते क्षीरादि तत्प्रतिपानम्, यच्च घृतशर्करादियुतयवचूर्णादि खाद्यते तत्खादनम्, त्वरितं दीयतामित्यन्वशादित्यन्वयः ॥ ४७ ॥

रा० टी०—रामवचनश्रवणानन्तरकालिकां गुहोक्तिमाह—अश्वानामिति। प्रतिपानं घासभक्षणानन्तरं पेयं पायसादि खादनं घृतशर्करादिमिश्रयवचूर्णादि त्वरितं दीयतामिति स गुहः पुरुषान् स्वभृत्यान् अन्वशात् आज्ञापयत्। अर्धद्वयमेकान्वयि ॥ ४७ ॥

गो० टी०—अश्वानामिति। स गुहस्तत्रैव तदानीमेव पुरुषान् स्वभृत्यान् प्रति अश्वानां खादनं प्रति पानं क्षीरादिकं च त्वरितं दीयतामित्यन्वशात् ॥ ४७ ॥

४८] ति० टी०—जलमेवाददे तीर्थप्राप्तिनिमित्तकोपवासस्यावश्यकत्वात् ॥ ४८ ॥

रा० टी०—तत इति। चीरोत्तरासङ्गः उत्तरीययुक्तो रामः स्वयं लक्ष्मणेन आहृतमानीतं जलमेवाददे पपौ तीर्थोपवासविधिः कृत इत्यर्थः ॥ ४८ ॥

गो० टी०—तत इति। उत्तरासङ्गः उत्तरीयमन्वास्य उपास्य अनेन स्नानमाक्षिप्यते भोज्यमाहारम् ॥ ४८ ॥

४९] ति० टी०—अभ्येत्य ततोऽन्यत्र समीपदेश आगत्य तस्थावित्यनेन तस्य निद्राभावः सूचितः ॥ ४९ ॥

रा० टी०—तस्येति। वृक्षमुपाश्रितः प्राप्तस्य सभार्यस्य तस्य रामस्य पादौ प्रक्षाल्य ततः सीता रामादभ्येत्य तत्समीपदेशादेशान्तरं प्राप्य लक्ष्मणः तस्थौ सूतेन सह गुहोऽपि धनुर्धरः सन् सौमित्रिमनुभाषयन् सन् रामं सखुखं यथा स्यात्तथा अन्वजाग्रदजागरीत् आर्षमेतत्। सार्धश्लोक एकान्वयी ४९॥५०

गो० टी०—तस्येति। शय्याकाले पादप्रक्षालनं राज्ञोपचाराद्वा स्वशेषवृत्त्यनुरूपत्वाद्वा, यद्वा प्रक्षालनं रामकर्तृकतदाचमनस्याप्युपलक्षणम् प्रक्ष्याल्याचम्य शयानस्य शयाने सतीत्यर्थः। भावलक्षणे षष्ठी ततस्तस्मात् शयनप्रदेशात् अभ्येत्य गुहाभिमुखमेत्य वृक्षमेवोपाश्रितस्तस्थौ ॥ ४९ ॥

५०] ति०टी०—अन्वजाग्रदित्यार्षम् अजागरीदित्यर्थः५०॥

गो० टी०—गुहोऽपीति। सौमित्रिमनुभाषयन् रामगुणान् प्रस्तुत्य सौमित्रिं वाचयन्नित्यर्थः। अन्वजाग्रत् जाग्रतं सौमित्रिमन्वजाग्रत् किमर्थः राममुद्दिश्य रामं संरक्षितुमित्यर्थः। धनुर्धर इत्यनेन लक्ष्मणेऽप्यतिशङ्का गुहस्य द्योत्यते ॥ ५० ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

५१] ति० टी०—सुचिरेण शर्वरीति निद्रागमनाचिरत्वप्रतिभासस्तस्याम् ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०—तथेति। यशस्विनः समाधिकरहितयशोविशिष्टस्य शर्वरी रात्रिः व्यतीता ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चाशत्तमः सर्गः ॥ ५० ॥

---

१ ऽस्य धीमतो यशस्विन इति गो. पाठः। २ व्यतीयाय चिरेणेति गो. पाठः।

एकपञ्चाशः सर्गः ।

सञ्जोऽस्मि रघुवरपरिरक्षणेऽतः सुखं स्वपिहीति गुहो लक्ष्मणं प्रार्थयते । लक्ष्मणो रामप्रभावं प्रस्तुत्यान्यनिर्वर्तितपरिरक्षाक वेऽप्यात्मनो निद्रासुखायोग्यत्वं समर्थयन् पित्रादीनां दुरवस्थितिसंभावनया परिशोचन्नथो गुहेन मन्त्र्यमाणो जाग्रदेव रात्रिं नयति ।

तं जाग्रतमदम्भेन भ्रातुरर्थाय लक्ष्मणम् । गुहः संतापसंतप्तो राघवं वाक्यमब्रवीत् ॥ १ ॥
इयं तात सुखा शय्या त्वदर्थमुपकल्पिता । प्रत्याश्वसिहि साध्वस्यां राजपुत्र यथासुखम् ॥ २ ॥
उचितोऽयं जनः सर्वः क्लेशानां त्वं सुखोचितः । गुप्त्यर्थं जागरिष्यामः काकुत्स्थस्य वयं निशाम् ॥ ३ ॥
नहि रामात्प्रियतमो ममास्ते भुवि कश्चन । ब्रवीम्येवं च ते सत्यं सत्येनैव च ते शपे ॥ ४ ॥
अस्य प्रसादादाशंसे लोकेऽस्मिन्सुमहद्यशः । धर्मावाप्तिं च विपुलामर्थकामौ च पुष्कलौ ॥ ५ ॥
सोऽहं प्रियसखं रामं शयानं सह सीतया । रक्षिष्यामि धनुष्पाणिः सर्वथा ज्ञातिभिः सह ॥ ६ ॥
न मेऽस्त्यविदितं किंचिद्वनेऽस्मिंश्चरतः सदा । चतुरङ्गं ह्यतिबलं सुमहत्संतरेमहि ॥ ७ ॥
लक्ष्मणस्तु ततोवाच रक्ष्यमाणास्त्वयानघ । नात्र भीता वयं सर्वे धर्ममेवानुपश्यता ॥ ८ ॥
कथं दाशरथौ भूमौ शयाने सह सीतया । शक्या निद्रा मया लब्धुं जीवितं वा सुखानि वा ॥ ९ ॥
यो न देवासुरैः सर्वैः शक्यः प्रसहितुं युधि । तं पश्य सुखसंसुप्तं तृणेषु सह सीतया ॥ १० ॥

१] ति० टी०–एवं रामे शयाने तद्रक्षार्थं जाग्रल्लक्ष्मण-गुहसंवादः–तमित्यादि । अदम्भेनाकृत्रिमाद्भुरागेण भ्रातुरर्थाय भ्रातृ रक्षार्थं राघवं रघुकुलजं संतापसंतप्तो रामस्य भूशय्यादिजेन संतापेन पीडितः ॥ १ ॥

रा० टी०–गुहोक्तिं वर्णयितुमाह–तमिति । भ्रातुरर्थाय सुखं शयनाय जाग्रतं तं लक्ष्मणं संतापसंतप्तः लक्ष्मणदुःखदर्शनजनितसंतापवान् गुहः राघवं लक्ष्मणमब्रवीत् ॥ १ ॥

गो० टी०–तं जाग्रतमित्यादि । अदम्भेन अकृत्रिमेण अर्थाय रक्षणाय संतापसंतप्तः रामदुर्दशादर्शनसंतापेन संतप्तः राघवं लक्ष्मणम् ॥ १ ॥

२] ति० टी०–इयमिति । प्रत्याश्वसिहि विश्रान्तो भव॥२॥

रा० टी०–तद्वचनमेवाह–इयमिति । साधु यथा तथा उपकल्पिता रचिता अतः अस्यां शय्यायां यथासुखं प्रत्याश्वसिहि विश्रान्तिं कुरु ॥ २ ॥

गो० टी०–इयमिति । प्रत्याश्वसिहि विश्रान्तो भवेति यावत् ॥ २ ॥

३] ति० टी०–अयं जन आटविकः ॥ ३ ॥

रा० टी०–उचित इति । क्लेशानां जागरणादिदुःखानामयं मदादिर्जनः उचितः योग्यः त्वं तु सुखोचितः अतः काकुत्स्थस्य रामस्य गुप्त्यर्थं वयं निशां सर्वरात्रं जागरिष्यामः ॥ ३ ॥

गो० टी०–उचित इति । अयं जनः वनचारित्वेन क्लेशसहो जनः ॥ ३ ॥ ४ ॥

४-६] ति०टी०–नहि रामादिति । सर्वात्मभूतात्॥४-६॥

रा० टी०–नहीति । ते तवाग्रे सत्यं ब्रवीमि अत्र विश्वासार्थं सत्येन स्वसुकृतेनेत्यर्थः शपे शपथं करोमि ॥ ४ ॥

रा० टी०–अस्येति । अस्य रामस्य प्रसादात् प्रसाद्यैव यशआदिकमाशासे वाञ्छामि एतेन प्रसादाभावे यशआदिकं व्यर्थमेवेति सूचितम् । एकश्चकार एवार्थे ॥ ५ ॥

गो० टी०–अस्येति । आशंसे प्रार्थये केवलमर्थावाप्तिम् अर्थावाप्तिमेवेत्यर्थः । केचित्तु केवलमिति पठित्वा केवलं प्रसादादीति योजयन्ति ॥ ५ ॥

रा० टी०–स इति । सः रामप्रसादाकाङ्क्षी अहं सर्वथा सर्वप्रकारेण रक्षिष्यामि ॥ ६ ॥

गो० टी०–स इति । सर्वतः सर्वदिक्षु ॥ ६ ॥

७] ति० टी०–अविदितमज्ञातम् । किं च–चतुरङ्गमिति । परकीयमिति शेषः । तादृशमपि परकीयं बलं संतरेमहि युद्धेन जयेम ॥ ७ ॥

रा० टी०–रक्षणे स्वयोग्यतां प्रकाशयन्नाह–नेति । अविदितमज्ञातं सुमहदतिविस्तीर्णमतिबलं चतुरङ्गं रिपुप्रेषितसैन्यं संतरेमहि सुखं जेष्याम इत्यर्थः ॥ ७ ॥

गो० टी०–नहीति । अविदितमिति पदच्छेदः किंचित् विरोध्यागमनस्थानं बलं परकीयं प्रसहेमहीत्येतदात्मनि बहुवचनं जात्यपेक्षया ॥ ७ ॥ ८ ॥

८] ति० टी०–ततोवाच तत उवाचेति च्छेदः आर्षः संधिः । अत्र देशे वयं न भीताः यतो धर्ममेवानुपश्यता त्वया रक्ष्यमाणा भवामः ॥ ८ ॥

रा० टी०–लक्ष्मण इति । ततः गुहवचनश्रवणानन्तरं लक्ष्मण उवाच ततोवाचेत्यत्र गुणः अतः एव निर्देशात् । वचनमेवाह–धर्मं सेवकरीतिमनुपश्यता ज्ञातवता त्वया रक्ष्यमाणाः वयं नैव भीताः ॥ ८ ॥

९-१०] ति० टी०–तथापि जागरणे कारणमाह–कथमिति । जीवितं विशिष्टसुखजीवितजनकं भोजनादि ॥९॥१०॥

---

१ अस्ति इति गो. रा. पाठः । २ एतदहमिति गो. पाठः । ३ वाप्तिं च केवलामिति गो. पाठः । ४ तममिति गो. पाठः । ५ सर्वत इति गो. पाठः । ६ नहि मेऽविदितमिति गो. पाठः । ७ प्रसहेमहीति गो. पाठः । ८ तं तदेति गो. पाठः । ९ संविष्टमिति गो. पाठः ।

यो मन्त्रतपसा लब्धो विविधैश्च पराक्रमैः । एको दशरथस्यैष पुत्रः सदृशलक्षणः ॥ ११ ॥
अस्मिन्प्रव्रजिते राजा न चिरं वर्तयिष्यति । विधवा मेदिनी नूनं क्षिप्रमेव भविष्यति ॥ १२ ॥
विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः । निर्घोषोपरतं तात मन्ये राजनिवेशनम् ॥ १३ ॥
कौसल्या चैव राज्ञश्च तथैव जननी मम । नाशंसे यदि जीवन्ति सर्वे ते शर्वरीमिमाम् ॥ १४ ॥
जीवेदपि हि मे माता शत्रुघ्नस्यान्ववेक्षया । तद्दुःखं यदि कौसल्या वीरसूर्विनशिष्यति ॥ १५ ॥
अनुरक्तजनाकीर्णा सुखालोकप्रियावहा । राजव्यसनसंसृष्टा सा पुरी विनशिष्यति ॥ १६ ॥
कथं पुत्रं महात्मानं ज्येष्ठपुत्रमपश्यतः । शरीरं धारयिष्यन्ति प्राणा राज्ञो महात्मनः ॥ १७ ॥

रा० टी०–नन्वेवं तर्हि किमर्थं जागरणमित्यत आह–कथमिति । दाशरथौ रामे भूमौ शयाने सति निद्रादि लब्धुं मया कथं शक्या तत्र जीवितशब्दः करणनिष्ठान्तः भावनिष्ठान्तप्रकृतिकअर्शआद्यजन्तो वा अत एव भक्षणमर्थः ॥ ९ ॥

गो० टी०–भीत्यभावे किमर्थं जागरणमित्याह–कथमिति। निद्रा न लभ्यत इति भावः जीवितम् आशासनं निद्रैव न लभ्यते जीवितसुखानां का कथेति भावः ॥ ९ ॥

रा० टी०–भूमिशयनायोग्यत्वं बोधयन्नाह–य इति । सर्वैः मिलितैरित्यर्थः देवासुरैः प्रसहितुं पराभवितुं न शक्यः तं तृणेषु सुखसंसुप्तं पश्य ॥ १० ॥

गो० टी०–य इति । प्रसहितुमिति "तीषसह" इत्यादिना साक्षिक इट् संविष्टं शयानम् ॥ १० ॥

११] ति० टी०–मन्त्रो गायत्र्यादिः तपः कृच्छ्रादि पराक्रमैस्तज्जन्यैरैष्वृङ्काथानयनाश्वमेधाथनुष्ठानैः एको मुख्यः । तत्र हेतुः–सदृशलक्षणः पुरुषोत्तमसदृशलक्षणः दशरथसदृशलक्षण इत्यापाततोऽर्थः ॥ ११ ॥

रा० टी०–य इति । विविधैः पराक्रमैः उपलक्षितः सदृशलक्षणः सदृशानि सकलसद्गुणबोधकानि लक्षणानि शरीरचिह्नानि यस्य सः अत एव एकः मुख्यः मन्त्रतपसा लब्धः यः दशरथस्य पुत्रः तस्मिन्नस्मिन्रामे प्रव्रजिते सति राजा चिरं बहुकालं न वर्तयिष्यति राज्यं पालयिष्यति अतः विधवा पालकरहिता मेदिनी क्षिप्रं भविष्यति । श्लोकद्वयमेकान्वयि॥११॥१२॥

गो० टी०–य इति । मन्त्रतपसा मन्त्रयुक्ततपसा मन्त्रतपोभ्यामित्यर्थः परिश्रमैः यज्ञादिभिः एकः मुख्यः ' एके मुख्यान्यकेवलाः ' इत्यमरः । सदृशलक्षणः स्वसदृशलक्षणः ॥ ११ ॥

१२] ति० टी०–विधवा विगतपतिका ॥ १२ ॥

गो० टी०–अस्मिन्निति । वर्तयिष्यति जीविष्यति विधवा पतिरहिता ॥ १२ ॥

१३] ति० टी०–श्रमेणोपरता राजभवनेऽयोध्यानगरे च भविष्यन्तीति शेषः । निर्घोषोपरतमुपरतनिर्घोषं भवतीति मन्ये ॥ १३ ॥

रा० टी०–विनद्येति । सुमहानादं विनद्य रामरामेत्याद्यार्येत्यर्थः श्रमेण खेदाधिक्येन उपरताः निवृत्ताः स्त्रियो भविष्यन्तीति शेषः अतः रामनिवेशनं रामगृहं निर्घोषोपरतं निर्घोषरहितं मन्ये ॥ १३ ॥

गो० टी०–विनद्येति । उपरताः भविष्यन्तीति शेषः अत एव निर्घोषोपरतम् उपरतनिर्घोषं भविष्यतीति मन्ये॥१३॥

१४] ति० टी०–जीवन्तीति नाशंसे न संभावयामि यदि वा जीवन्त्येतावत्पर्यन्तम्, तदेमां शर्वरीमेव जीविष्यन्ति नाग्रे अन्नपानाद्यभावादिति संभावयामीति शेषः ॥ १४ ॥

रा० टी०–कौशल्येति । कौशल्यादयः इमां शर्वरीं रात्रिं यदि जीवन्ति अतिमूर्च्छां न प्राप्नुवन्तीत्यर्थः तदा अहमाशंसे तद्धैर्यप्रशंसां करिष्यामीत्यर्थः ॥ १४ ॥

गो० टी०–कौसल्येति । सर्वे जीवन्ति जीविष्यन्तीति नाशंसे यदि जीवन्ति इमां शर्वरीमेव ॥ १४ ॥

१५] ति० टी०–जीवेदपि एतद्राज्ञ्याः परमर्षीति शेषः । यदि यत् वीरसूः कौसल्या एकपुत्रत्वाद्विनशिष्यत्येव तदतिदुःखमित्यर्थः ॥ १५ ॥

रा० टी०–जीवेदिति । शत्रुघ्नस्य स्वपुत्रस्य अन्ववेक्षया अवलोकनेन हि यदि मे माता जीवेत्तदापि यदि वीरसूः अतिवीरपुत्रोत्पादनकर्त्री कौशल्या विनशिष्यति विनङ्क्ष्यति लोकान्तरगमनेन अदृश्यत्वं प्राप्स्यति तत्तदा दुःखमतिक्लेशः स्थास्यत्येवेति शेषः ॥ १५ ॥

गो० टी०–जीवेदिति । शत्रुघ्नस्यान्ववेक्षया शत्रुघ्नस्नेहेनेत्यर्थः । पुनः पुनर्दर्शनेन वा वीरं सुत इति तथा कौसल्या विनशिष्यतीति यद्दुःखं तद्दुःसहमित्यर्थः ॥ १५ ॥

१६] ति० टी०–अनुरक्तैः रामानुरक्तैर्जनैराकीर्णा व्याप्ता सुखालोकरूपं प्रियमावहति सा सदा सुखवल्लोका इदानीं राजव्यसनेन दशरथमरणदुःखेन संसृष्टा युक्ता ॥ १६ ॥

रा० टी०–अनुरक्तैरिति । अनुरक्ताः रामविषयकानुरागविशिष्टाः ये जनास्तैः आकीर्णाः व्याप्ता अत एव सुखा अतिसुखहेतुः अत एव लोकप्रियावहा या पुरी सा अयोध्या राजव्यसनसंसृष्टा राजदुःखसंबन्धवती सती विनशिष्यति ॥ १६ ॥

गो० टी०–अनुरक्तजनाकीर्णेति । राजव्यसनसंसृष्टा राजमरणनिमित्तव्यसनसंयुक्तेत्यर्थः ॥ १६–१८ ॥

१७] ति०टी०–राजव्यसनमेव दर्शयति–कथमिति॥१७॥

१ परिश्रमैरिति गो. पाठः । २ इट इत गो. पाठः । ३ प्रव्राजित ... गो. पाठः । ४ क्त्वात इति गो. पाठः । ५ रामेति रा. पाठः । ६ वीर्ति गो. पाठः । ७ ज्येष्ठं प्रियमिति गो. पाठः ।

विनष्टे नृपतौ पश्चात्कौसल्या विनशिष्यति । अनन्तरं च मातापि मम नाशमुपैष्यति ॥ १८ ॥
अतिक्रान्तमतिक्रान्तमनवाप्य मनोरथम् । राज्ये राममनिक्षिप्य पिता मे विनशिष्यति ॥ १९ ॥
सिद्धार्थाः पितरं वृत्तं तस्मिन्काले ह्युपस्थिते । प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति राघवम् ॥ २० ॥
रम्यचत्वरसंस्थानां संविभक्तमहापथाम् । हर्म्यप्रासादसंपन्नां गणिकावरशोभिताम् ॥ २१ ॥
रथाश्वगजसंबाधां तूर्यनादविनादिताम् । सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलाम् ॥ २२ ॥
आरामोद्यानसंपन्नां समाजोत्सवशालिनीम् । सुखिता विचरिष्यन्ति राजधानीं पितुर्मम ॥ २३ ॥
अपि जीवेदशरथो वनवासात्पुनर्वयम् । प्रत्यागम्य महात्मानमपि पश्येम सुव्रतम् ॥ २४ ॥
अपि सत्यप्रतिज्ञेन सार्धं कुशलिनो वयम् । निवृत्ते वनवासेऽस्मिन्नयोध्यां प्रविशेमहि ॥ २५ ॥

रा० टी०—कथमिति । ज्येष्ठपुत्रमपश्यतः राज्ञः प्राणाः शरीरं कथं धारयिष्यन्ति न धारयिष्यन्तीत्यर्थः । राजा लोकान्तरं गमिष्यतीति तात्पर्यम् ॥ १७ ॥

१८] ति० टी०—मातापि भर्तृपुत्रवियोगात्सत्यप्येकपुत्रसंनिधौ ॥ १८ ॥

रा० टी०—अनर्थान्तरमाह—विनष्टे इति । नृपतौ विनष्टे लोकान्तरगमनप्रयुक्तादृश्यत्वं प्राप्ते सति अनन्तरं शीघ्रं यथा स्यात्तथा कौसल्या विनशिष्यति पश्चान्मम मातापि नाशमुपैष्यति ॥ १८ ॥

१९] ति० टी०—मनोरथं रामराज्याभिषेकमनवाप्य अतिक्रान्तमतिक्रान्तं नष्टं नष्टमिति क्रोशन्निति शेषः । प्रत्यागतं रामं राज्येऽनिक्षिप्यैव मे पिता विनशिष्यतीत्यन्वयः ॥१९॥

रा० टी०—ननु यथा विश्वामित्रसहगमनसमये रामदर्शनाभावप्रयुक्तराजकर्तृकलोकान्तरगमनाभावः तथापि भविष्यतीत्यत आह—अतिक्रान्तमिति । राज्ये राममनिक्षिप्य अप्रापय्य प्रारम्भविषयीभूताभिषेकमदृष्ट्वेत्यर्थः अत एव अतिक्रान्तं सर्वत उत्कृष्टमित्यर्थः मनोरथमनवाप्य मे पिता विनशिष्यति विनङ्क्ष्यति लोकान्तरं गमिष्यतीत्यर्थः एतेनेदानीं गमने हीहैंतुर्भविष्यतीति ध्वनितम् ॥ १९ ॥

गो० टी०—अतिक्रान्तमिति । मे पिता रामे राज्यमनिक्षिप्य अत एव मनोरथमनवाप्य विनशिष्यतीति यत्तस्मात् अतिक्रान्तमतिक्रान्तं सर्वप्रयोजनमतीत्य गतमित्यर्थः । अथवा अतिक्रान्तमतिक्रान्तमनोरथमनवाप्य पुनः पुनर्वर्धनं मनोरथमनवाप्य रामो जातः वर्धिष्यते उद्वाहं करिष्यति राज्यं प्राप्स्यतीत्येवमभिवृद्धं मनोरथमित्यर्थः । मनोरथातिक्रान्तिमेवाह—राज्ये राममनिक्षिप्येति ॥ १९ ॥

२०—२२] ति० टी०—तस्मिन्काले मरणकाल उपस्थिते वे वृत्तं मृतं पितरं रघुकुलजं सर्वप्रेतकार्येषु संस्करिष्यन्ति ते सिद्धार्था भाग्यवन्तः प्राप्तराज्याश्च भरतादय इति शेषः । क्रोधात्तत्रामाग्रहणम् ॥ २०—२२ ॥

२३] ति० टी०—विचरिष्यन्ति भरतादय इति शेषः ॥२३॥

रा० टी०—सिद्धार्था इति । तस्मिन्लोकान्तरप्रयाणयोग्ये काले उपस्थिते सति सर्वेषु प्रेतकार्येषु प्रयाणसमयोचितकर्तव्येषु राघवं दशरथं ये संस्करिष्यन्ति मङ्गलपाठादिकं करिष्यन्ति ते सिद्धार्थाः एतेन भरतोऽपि तस्मिन्काले तं प्राप्स्यति न वेति संशयः सूचितः ॥ २० ॥

गो० टी०—सिद्धार्था इति । तस्मिन्काले मरणकाले उपस्थिते प्रेतकार्येष्वप्युपस्थितेषु । वृत्तमतीतं मृतमिति यावत् । 'वृत्तं पथे चरित्रे त्रिष्वतीते दृढनिस्तले' इत्यमरः । भूमिपं पितरं सिद्धार्थाः कृतार्थाः संस्करिष्यन्ति वयं त्वकृतार्था इति भावः ॥ २० ॥

रा० टी०—रम्येति । अपि यदि दशरथो जीवेत्प्रजाः पालयेत्तदा रम्यचत्वरसंस्थानां रमणीयचतुष्पथयुक्तां हर्म्यैर्धनिनां गृहैः प्रासादैर्देवभूभुजां सदनैः संपन्नां रथाश्वगजसंबाधां रथादिभिर्व्याप्तां समाजोत्सवशालिनीं समाजानां ब्राह्मणादिसमूहानामुत्सवस्य शालिनीमाश्रयभूतां मम पितुः राजधानीमयोध्यां विचरिष्यन्ति सुखेन स्थास्यन्तीत्यर्थः अयोध्याः वासिन इति शेषः वयं वनवासात्प्रत्यागम्य निवर्त्य महात्मानं राजानं पश्याम । श्लोकचतुष्टयमेकान्वयि ॥ २१—२४ ॥

गो० टी०—रम्यचत्वरसंस्थानामिति । रम्यचत्वरसंस्थानां रमणीयाङ्गणसंस्थानां सुविभक्तमहापथां गृहपङ्क्तिभिः सम्यक् विभक्तराजमार्गां हर्म्यप्रासादसंपन्नां हर्म्यैर्धनिनां वासैः प्रासादैर्देवभूभुजां वासैश्च संपूर्णां 'हर्म्यादिर्धनिनां वासः प्रासादो देवभूभुजाम्' इत्यमरः । रथाश्वगजसंबाधां संबाधां निबिडां नादितां संजातनादां सर्वकल्याणसंपूर्णां सर्वैः पुत्रजन्मोत्सवप्रभृतिभिः संपन्नाम् आरामोद्यानसंपन्नाम् आरामाः उद्यानानि च उपवनानि राज्ञः क्रीडार्हवनानि च समाजोत्सवशालिनीं समाजैः संघैः क्रियमाण उत्सवः समाजोत्सवः देवोत्सव इत्यर्थः २१—२३

२४] ति० टी०—अपि जीवेदिति संभावने लिङ् । अपि च अपि पश्याम अपि द्रक्ष्यामः ॥ २४ ॥

गो० टी०—अपीति । अपिः संभावनायाम् ॥ २४ ॥

२५] ति० टी०—सत्यप्रतिज्ञेन रामेण ॥ २५ ॥

१ रामे राज्यमिति गो. पाठः । २ ऽपीति गो. पाठः । ३ भूमि[illegible] । ४ विनादितामिति गो. रा. पाठः । ५ पश्येमेति गो. पाठः ६ कुशलिनेति गो. पाठः ।

परिदेवयमानस्य दुःखार्तस्य महात्मनः । तिष्ठतो राजपुत्रस्य शर्वरी सात्यवर्तत ॥ २६ ॥
तथाहि सत्यं ब्रुवति प्रजाहिते नरेन्द्रसूनौ गुरुसौहृदाद्रुहः ।
मुमोच बाष्पं व्यसनाभिपीडितो ज्वरातुरो नाग इव व्यथातुरः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकपञ्चाशः सर्गः ॥ ९१ ॥

द्विपञ्चाशः सर्गः ।

अनुचरैः प्रापितां नावमारुरुक्षुं रामं किं ते भूयः करवाणीत्यर्थयमानं गुहं रामो राजानुवर्तने न्ययुङ्क्त । वनेऽप्यनुचरत्वमर्थयमानं सुमन्त्रं निविवर्तयिषू रामः सहेतून्यासं तत्समर्थं न्यवर्तयत । आज्ञापितगुहोपनीतवटक्षीरेण निर्वर्तितजटाभारास्ते नावमारुरुहुः । प्राप्तमध्या सीता गङ्गां प्रार्थयत । प्रतीरमवतीर्णास्ते सायं कस्यचित्तरोर्मूलमासेदुः ।

प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः । उवाच रामः सौमित्रिं लक्ष्मणं शुभलक्षणम् ॥ १ ॥
भास्करोदयकालोऽसौ गता भगवती निशा । असौ सुकृष्णो विहगः कोकिलस्तात कूजति ॥ २ ॥
बर्हिणानां च निर्घोषः श्रूयते नदतां वने । तराम जाह्नवीं सौम्य शीघ्रगां सागरंगमाम् ॥ ३ ॥
विज्ञाय रामस्य वचः सौमित्रिर्मित्रनन्दनः । गुहमामन्त्र्य सूतं च सोऽतिष्ठद्भ्रातुरग्रतः ॥ ४ ॥

रा० टी०–संभावनान्तरमाह–अपीति । सत्यप्रतिज्ञेन रामेण सार्धमयोध्यामपि प्रविशेमहि । संभावनार्थोऽपिः ॥२६॥

गो० टी०–अपि सत्यप्रतिज्ञेनेति । सत्यप्रतिज्ञेन पित्रेति शेषः । अस्मिन् रामे प्रविशेमहीत्याशंसायां लिङ् ॥ २६ ॥

२६] ति० टी०–परिदेवयमानस्येति इत्थमित्यादिः तिष्ठतो जाग्रतः ॥ २६ ॥

रा० टी०–परीति । दुःखार्तस्य अत एव परिदेवयमानस्य राजपुत्रस्य लक्ष्मणस्य शर्वरी रात्रिः अत्यवर्तत व्यतीताऽभवत् ॥ २६ ॥

गो० टी०–परिदेवयमानस्येति । परिदेवयमानस्येत्यादौ संबन्धसामान्ये षष्ठी एवमिति शेषः ॥ २६ ॥

२७] ति० टी०–गुरौ रामे सौहृदादित्युभयान्वयि अतिस्नेहाज्ज्वरातुरो गुहः व्यथातुरो नागो गज इव ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

रा० टी०–तथेति । नरेन्द्रसूनौ लक्ष्मणे सत्यं मृषासंसर्गशून्यं वचनं ब्रुवति सति गुरुं सौहृदादहेतोः व्यसनाभिपीडितः अत एव व्यथातुरश्चञ्चलचित्तः गुहः बाष्पमश्रु मुमोच, तत्र दृष्टान्तः ज्वरातुरः ज्वरपीडितः नागो गज इव ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

गो० टी०–तथेति । सत्यं वास्तवं नरेन्द्रपुत्रे लक्ष्मणे गुरुसौहृदात् गुरुषु पित्रादिषु सौहृदात् स्नेहात् ज्वरातुरो नागो गज इव व्यथातुरो गुह इत्यन्वयः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बरारूयानेऽयोध्याकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

१] ति० टी०–प्रभातायामिति ॥ १ ॥

रा० टी०–लक्ष्मणोक्त्यनन्तरकालिकां रामोक्तिं वर्णयितुमाह–प्रभातायामिति । शर्वर्यां रात्रौ प्रभातायां सत्यां रामः लक्ष्मणमुवाच ॥ १ ॥

गो० टी०–प्रभातायामिति । पृथुवक्षा इत्युत्साहातिरेकोक्तिः महायशा इति धर्मव्यतिक्रमाभावः सूचितः सौमित्रिमिति रामं दशरथं विद्धि इत्यादिनोक्तार्थाद्बुद्धायित्वं सूचितं शुभलक्षणमित्यनेन स्वभक्तिरुक्ता ॥ १ ॥

२–३] ति० टी०–सुकृष्णो विहगः काकः कोकिलपालकत्वाच्च कोकिलपदेनोक्तः, काकेति नामग्रहणस्य प्रातर्निन्द्यत्वादेवमुक्तिः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनमेवाह–भास्करेति । असौ भास्करोदयकालः अतः भगवती तारासंपत्तिमती निशा गता तत्र हेतुः सुकृष्णः अतिश्यामः कोकिलः कोकिलपालितः विहगः काक इत्यर्थः कूजति प्रातःकाले काकशब्दस्यैव प्रसिद्धत्वात्कोकिलशब्देन काक उच्यते काकशब्दाद्युक्तिस्तु प्रातस्तन्नामोच्चारणस्य निषिद्धत्वादिति दिक् । बर्हिणानां मयूराणां निर्घोषश्च श्रूयते अतः जाह्नवीं तराम । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–भास्करोदयकाल इति । भास्करशब्दोऽयं तत्संबन्ध्यरुणवाची गता गतप्राया भगवती कामवर्धिनी 'भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु' इत्यमरः । सुकृष्णो विहगः भरद्वाजः कोकिलः कोकिलश्चेत्यर्थः ॥ २ ॥

गो० टी०–बर्हिणानामिति । वने नदतामिति नगरस्थक्रीडामयूरव्यावृत्तगम्भीरध्वनिरुक्ता शीघ्रगामिति नावं विना दुस्तरत्वोक्तिः सारङ्गमामिति महत्त्वोक्तिः ॥ ३ ॥

४] ति० टी०–विज्ञाय तरणसाधनं शीघ्रमानेयमित्येवं रामवचनतात्पर्यं ज्ञात्वा गुहं सूतं चामन्त्र्यामन्त्रणेनैव तत्तात्पर्यं बोधयित्वा यथापूर्वं भ्रातुरग्रतोऽतिष्ठत् ॥ ४ ॥

रा० टी०–विज्ञायेति । सौमित्रिः रामस्य वचः विज्ञाय विशेषेण ज्ञात्वा तरणार्थं नावमाकाङ्क्षते इति बुद्धेत्यर्थः गुहं

१ पुत्रे इति गो. पाठः । २ ऽयमिति गो. पाठः ।

स तु रामस्य वचनं निशम्य प्रतिगृह्य च । स्थपतिस्तूर्णमाहूय सचिवानिदमब्रवीत् ॥ ५ ॥
अस्यवाहनसंयुक्तां कर्णग्राहवतीं शुभाम् । सुतारां दृढां तीर्थे शीघ्रं नावमुपाहर ॥ ६ ॥
तं निशम्य गुहादेशं गुहामात्यो गतो महान् । उपोह्य रुचिरां नावं गुहाय प्रत्यवेदयत् ॥ ७ ॥
ततः स प्राञ्जलिर्भूत्वा गुहो राघवमब्रवीत् । उपस्थितेयं नौर्देव भूयः किं करवाणि ते ॥ ८ ॥
तवामरसुतप्रख्य तर्तुं सागरगामिनीम् । नौरियं पुरुषव्याघ्र [3]शीघ्रमारोह सुव्रत ॥ ९ ॥
अथोवाच महातेजा रामो गुहमिदं वचः । कृतकामोऽस्मि भवता शीघ्रमारोप्यतामिति ॥ १० ॥
ततः कलापान्संनह्य खड्गौ बद्ध्वा च धन्विनौ । जग्मतुर्येन तां गङ्गां सीतया सह राघवौ ॥ ११ ॥
राममेवं तु धर्मज्ञमुपागत्य विनीतवत् । किमहं करवाणीति सूतः प्राञ्जलिरब्रवीत् ॥ १२ ॥

सूतं च आमन्त्र्य शीघ्रं नौरानेया शीघ्रं तरणकामो रामः इत्युक्त्वेत्यर्थः भ्रातुः अग्रतः अग्रे अतिष्ठत् ॥ ४ ॥

गो० टी०–विज्ञायेति । वचो विज्ञाय नदीतरणसाधनं शीघ्रमानेतव्यमित्येवंरूपं वचनतात्पर्यं ज्ञात्वा गुहं सूतं चामन्त्र्य युवाभ्यामपि रामवचनतात्पर्यं ज्ञातं किमिति संबोध्य भ्रातुरग्रतोऽतिष्ठत् ॥ ४ ॥

५] ति० टी०–स तु गुहस्तु रामस्य वचनं तराम जाह्नवीमित्येवं निशम्य तात्पर्यतो ज्ञात्वा प्रतिगृह्य नमस्कारपूर्वं प्रतिगृह्य सचिवानाहूय तन्मध्ये कंचित्प्रत्यब्रवीत् ॥ ५ ॥

रा० टी०–स इति । स्थपतिः निषादाधिपतिः सः गुहः रामस्य वचनं निशम्य श्रुत्वा प्रतिगृह्य लक्ष्मणद्वारा तदभिप्रायं बुद्ध्वा सचिवान्स्वमन्त्रिणस्तूर्णमाहूय इदमब्रवीत् ॥ ५ ॥

गो० टी०–सत्विति । प्रतिगृह्य शिरोनतिपूर्वकं तथैव करिष्यामीत्यङ्गीकृत्य ॥ ५ ॥

६] ति० टी०–अस्यवाहनसंयुक्ताम् अस्य जलं निरस्य नावं तीरं प्रापयतीत्यस्यवाहनमरित्रं मयूरव्यंसकादित्वात्समासः कर्णग्राहः कर्णधारः सुखेन प्रतारः प्रतरणं यया तां दृढां दृढसंबिबन्धां तीर्थेऽवतारमार्गे उपाहर समीपं प्रापय ॥६॥

रा० टी०–अस्येति । वाहनसंयुक्तां वाहयति जलानिरसनद्वारा नावं तीरं प्रापयतीति वाहनमरित्रं तेन संयुक्तां कर्णग्राहवतीं कर्णग्राहः कर्णधारः तद्वतीं शुभां रमणीयरागादिविशिष्टत्वेन मनोरमां दृढां छिद्रादिरहितत्वेन अदार्व्यशङ्कारहितामत एव अस्य रामस्य सुप्रतारां सुखं तारणयोग्यां नावं तीर्थे तरणघट्टे शीघ्रमुपाहर प्रापय ॥ ६ ॥

गो० टी०–अस्येति । अस्य रामस्य वाहनसंयुक्तां वाह्यते नीयतेऽनेनेति वाहनमरित्रादि तेन संयुक्तां कर्णग्राहवतीं कर्णमरित्रं गृह्णातीति कर्णग्राहः कर्णधारः तद्वतीं 'कर्णं श्रोत्रमरित्रं च' इति निघण्टुः । सुप्रतारां सुष्ठु तारयितुं समर्थां दृढां सुश्लिष्टसन्धिबन्धां तीर्थेऽवतारमार्गे उपाहरेत्येकवचनं सचिवगणाभिप्रायेण ॥ ६–८ ॥

७–९] ति० टी०–उपोह्य समीपं प्रापय्य ॥ ७–९ ॥

रा० टी०–तमिति । गुहादेशं निशम्य श्रुत्वा रुचिरां नावमुपोह्य तत्समीपघट्टे प्रापय्य प्रत्यवेदयत् इयं नौरागतेत्यबोधयत् ॥ ७ ॥

रा० टी०–तत इति । ततः स्वमन्त्रिबोधितनौदर्शनानन्तरं गुहः राघवं राममब्रवीत् । तद्वचनमेवाह–हे देव ! नौरुपस्थिता प्रापिता भूयः पुनस्ते किं करवाणि ॥ ८ ॥

रा० टी०–तवेति । हे अमरसुतप्रख्य ! अमरा ध्वंसाऽप्रतियोगिनी सुतप्रख्या दशरथसुतेति नाम यस्य तत्संबोधनं सागरगामिनीं गङ्गां तर्तुमियं नौः प्रापितेति शेषः अतः शीघ्रमारोह ॥ ९ ॥

गो० टी०–तवेति । नौरियमिति उपस्थितेति शेषः ॥९॥

१०] ति० टी०–आरोप्यताम् स्वनित्रपिटकवैदेहीवस्त्राभरणादिकमिति शेषः ॥ १० ॥

रा० टी०–अथेति । अथ गुहप्रार्थनाश्रवणानन्तरं भवता अहं कृतकामः निष्पादिताभीष्टः अतः शीघ्रमारोप्यतां स्वनित्रपिटकादि आरोह्यतामित्यर्थः इदं वचः रामो गुहमुवाच ॥१०॥

गो० टी०–अथेति । आरोप्यतामिति स्वनित्रपिटकवैदेहीवस्त्राभरणादिकमिति शेषः ॥ १० ॥

११] ति० टी०–संनह्य कवचं कलापांस्तूणीरान् येनावतरणमार्गेण नावमारुह्य तामनिर्वाच्यगुणां गङ्गां लोकास्तरन्ति तमवतारं तर्तुं जग्मतुः ॥ ११ ॥

रा० टी०–तत इति । ततः गुहाज्ञापनानन्तरं संनह्य कवचं संधार्य कलापांस्तूणीरान्खड्गौ च बद्ध्वा धन्विनौ राघवौ येन मार्गेण तरणार्थं जना गच्छन्ति इति शेषः तेन मार्गेण गङ्गां जग्मतुः ॥ ११ ॥

गो० टी०–तत इति । तौ राघवौ संनह्य कवचौ धृत्वा कलापान् तूणीरान् खड्गौ च बद्ध्वा धन्विनौ जना येन मार्गेण गङ्गां प्राप्नुवन्ति तेन मार्गेण जग्मतुः ॥ ११ ॥

१२] ति० टी०–एवं तु एवंभूतं तु रथादिनिरपेक्षं गच्छन्तं तु ॥ १२ ॥

रा० टी०–राममिति । एवं स्वकर्मकानाज्ञापनप्रकारेण विद्यमानं राममुपागत्य विनीतवद्विनीतिविशिष्टं किमहं करवाणीति वचः सूतोऽब्रवीत् ॥ १२ ॥

---

१ ऽमरस्वगण इति गो. पाठः । २ तां त्वमिति गो. पाठः । ३ तावित्ति गो. पाठः । ४ उपगम्येति गो. पाठः । ५ तरितुमिति युक्तं भाति ।

ततोऽब्रवीद्दाशरथिः सुमन्त्रं स्पृशन्करेणोत्तमदक्षिणेन ।
सुमन्त्र शीघ्रं पुनरेव याहि राज्ञः सकाशे भव चाप्रमत्तः ॥ १३ ॥
निवर्तस्वेत्युवाचैनमेतावद्धि कृतं मम । रथं विहाय पद्भ्यां तु गमिष्यामो महावनम् ॥ १४ ॥
आत्मानं त्वभ्यनुज्ञातमवेक्ष्यार्तः स सारथिः । सुमन्त्रः पुरुषव्याघ्रमैक्ष्वाकमिदमब्रवीत् ॥ १५ ॥
नातिक्रान्तमिदं लोके पुरुषेणेह केनचित् । तव सभ्रातृभार्यस्य वासः प्राकृतवद्वने ॥ १६ ॥
न मन्ये ब्रह्मचर्ये वा स्वधीते वा फलोदयः । मार्दवार्जवयोर्वापि त्वां चेद्व्यसनमागतम् ॥ १७ ॥
सेह राघव वैदेह्या भ्राता चैव वने वसन् । त्वं गतिं प्राप्स्यसे वीर त्रींल्लोकांस्तु जयन्निव ॥ १८ ॥

गो० टी०–राममिति । धर्मज्ञं भृत्यधर्मज्ञं विनीतवत् सविनयमिति क्रियाविशेषणम् ॥ १२ ॥

१३] ति० टी०–उत्तमश्चासौ दक्षिणश्च तेन स्पर्शादिव्यापारे उत्तमेन स्पर्शमात्रेण सकलदुःखहारकत्वाद्दक्षिणेनेदृशेन करेण दक्षिणकरेण ॥ १३ ॥

रा० टी०–तत इति । हे सुमन्त्र ! राज्ञः दशरथस्य सकाशे समीपे शीघ्रं याहि अप्रमत्तः मद्वियोगहेतुकानवधानतारहितश्च भव इति वचः उत्तमदक्षिणेन स्पर्शमात्रेण स्पृश्यमानोत्तमत्वसूचकसव्येतरेण करेण सुमन्त्रं स्पृशन्सन्नुवाच ॥ १३ ॥

गो० टी०–तत इति । उत्तमेति संबोधनम् ॥ १३ ॥

१४] ति० टी०–गमनप्रत्याशानिवृत्तये पुनः सावधारणां निवृत्तिमाह–निवर्तस्वेति । एतावत्पर्यन्तं राजाज्ञया यानेन गमनं कृतम् हि अतः परं ममानेन न प्रयोजनं यतो रथं विहाय पद्भ्यामेव महावनं गमिष्यामः, अतस्त्वं सर्वथा निवर्तस्व ॥ १४ ॥

रा० टी०–तदौदासीन्यमुपलक्ष्य पुनः प्रवृत्तं रामवचनं वर्णयन्नाह–निवर्तस्वेति । एतावद्रूक्षपर्यन्तरथकरणकगमनमेव कृतं पित्राज्ञया स्वीकृतमतस्त्वं निवर्तस्व वयं तु पद्भ्यां गमिष्यामः इति एनं सुमन्त्रमुवाच ॥ १४ ॥

गो० टी०–याहीति सामान्योक्तं सोपपत्तिकमाह–निवर्तस्वेति । मम एतावत् कृतं हि गङ्गातीरपर्यन्तं रथेन प्रापणं कृतं हि हीति राजाज्ञाद्योतनम् । अतः परं यानं विहाय पद्भ्यामेव महावनं गमिष्यामः अतस्त्वं निवर्तस्वेत्येवमुवाच ॥ १४ ॥

१५] ति०टी०–अभ्यनुज्ञातम् प्रतिनिवृत्त्यै इति शेषः॥१५॥

रा० टी०–आत्मानमिति । अभ्यनुज्ञातमयोध्यागमनायाज्ञप्तमात्मानमवेक्ष्य ज्ञात्वा ऐक्ष्वाकं राममब्रवीत् ॥ १५ ॥

गो० टी०–आत्मानमिति । अवेक्ष्य बुद्ध्या आर्तः अनुगमनेऽभ्यनुज्ञानकृतेऽतिदुःखितः ॥ १५ ॥

१६] ति० टी०–तदादौ लोकदृष्ट्या शोकापनुदं वचनमाह–नातीति । सभ्रातृभार्यस्य तव प्राकृतवत्क्षुद्रवद्वने वासो येन दैवेन कृतस्तदिदं दैवमिह लोके केनाप्यतिक्रान्तं लङ्घितं न अतो हृदये मा शुच इत्यर्थः । यद्वा ते वनवासो जात इति यदिदमिह लोकेऽयोध्यास्थलोकमध्ये केनापि पुरुषेण न हृद्यत्यन्तं कान्तं स्वीकृतं सर्वासंमतमेव, अतोऽस्मदादीन्दोषेण मा गृह्णीया इति तात्पर्यम् ॥ १६ ॥

रा० टी०–तद्वचनमेवाह–नेति । पौरैश्वर्यमतिक्रम्य सभ्रातृभार्यस्य तव वने वासः तदिदमैश्वर्यं लोके केनचित्पुरुषेण नाक्रान्तं परित्यक्तम् ॥ १६ ॥

गो० टी०–नातिक्रान्तमिति । तव सभ्रातृभार्यस्य वने प्राकृतवत् क्षुद्रस्येव योयं वासः तदिदं लोके केनचिदपि पुरुषेण नातिक्रान्तं नाङ्गीकृतं सर्वासंमतोऽयं तव वने वास इत्यर्थः । किं पुनर्ममेति भावः ॥ १६ ॥

१७] ति० टी०–किं च यदि त्वामीदृशं व्यसनमागतं तदा ब्रह्मचर्यादि निष्फलमिति मन्ये ॥ १७ ॥

रा० टी०–नेति । यदि ब्रह्मचर्यादौ फलोदयः तर्हि व्यसनं दुःखमागतं प्राप्तं त्वामहं न मन्ये त्वां व्यसनं नैव प्राप्स्यतीति निश्चिनोमीत्यर्थः । अत्र मार्दवं दयालुत्वमार्जवं नृशंकारकवचनोच्चारणमिति न पौनरुक्त्यम् ॥ १७ ॥

गो० टी०–न मन्य इति । त्वां ब्रह्मचर्यस्वाध्यायमार्दवार्जवयुक्तं त्वां व्यसनमागतं चेत् ब्रह्मचर्ये अधःशयनादिलक्षणे अध्ययनकालकृते स्वधीते स्वाध्यायाध्ययने मार्दवे दयालुत्व इति यावत् आर्जवे अकौटिल्ये च फलोदयः फलसिद्धिर्नास्तीति मन्ये यदि ब्रह्मचर्यादिकं फलदं स्यात्तत् त्वयि दृश्येत न दृश्यते प्रत्युत वनवास एव दृष्टः अतो न तत् फलदमिति मन्ये इति भावः । खेदातिशयादेवमुक्तम् ॥ १७ ॥

१८] ति० टी०–इदानीं रामं भगवन्तं मत्वाह–सहेति । गतिमुत्कर्षमेकस्यैव त्रिलोकजिगीषुर्जयेन पितृवाक्यपरिपालनेन च त्रींल्लोकाञ्जयन्निव एवं च तवायं वनवासोऽपि महाफल एव॥१८॥

रा० टी०–सहेति । हे राघव ! वैदेह्या भ्रात्रा च सह वने वसन्संस्त्रीन्लोकाञ्जयन्निव गतिमत्युत्कर्षं प्राप्स्यसे ॥ १८ ॥

गो० टी०–सहेति । त्रीन् लोकान् जयन्निव विष्णुरिवेत्यर्थः । गम्यत इति गतिः । कीर्तिं तां प्राप्स्यसे अतुलां कीर्तिं प्राप्स्यस इत्यर्थः । सुमन्त्रः पुरवासिष्वात्मानमन्तर्भाव्य वदति ॥ १८ ॥

१ ऽस्तीति गो. पाठः । २ सहेति रा. पाठः ।

वयं खलु हता राम यैस्त्वया ह्युपवञ्चिताः । कैकेय्या वशमेष्यामः पापाया दुःखभागिनः ॥ १९ ॥
इति ब्रुवन्नात्मसमं सुमन्त्रः सारथिस्तथा । दृष्ट्वा दूरगतं रामं दुःखार्तो रुरुदे चिरम् ॥ २० ॥
ततस्तु विगते बाष्पे सूतं स्पृष्टोदकं शुचिम् । रामस्तु मधुरं वाक्यं पुनः पुनरुवाच तम् ॥ २१ ॥
इक्ष्वाकूणां त्वया तुल्यं सुहृदं नोपलक्षये । यथा दशरथो राजा मां न शोचेत्तथा कुरु ॥ २२ ॥
शोकोपहतचेताश्च वृद्धश्च जगतीपतिः । कामभारावसन्नश्च तस्मादेतद्ब्रवीमि ते ॥ २३ ॥
यद्यथा ज्ञापयेत्किंचित्स महात्मा महीपतिः । कैकेय्याः प्रियकामार्थं कार्यं तदविकाङ्क्षया ॥ २४ ॥
एतदर्थं हि राज्यानि प्रशासति नराधिपाः । यदेषां सर्वकृत्येषु मनो न प्रतिहन्यते ॥ २५ ॥
यद्यथा स महाराजो नालीकमधिगच्छति । न च ताम्यति शोकेन सुमन्त्र कुरु तत्तथा ॥ २६ ॥

१९] ति० टी०—वयं तु सर्वथा पीडिता इत्याह—वयमिति । उपवञ्चिताः केचिदाश्रावविदितगमनेन अहं बलान्निवर्तनेन एवं सर्वे त्यक्ताः ॥ १९ ॥

रा० टी०—ननु तर्हि किमर्थं शोचसीत्यत आह—वयमिति । हे राम ! त्वया सह वयं कैकेय्या कैकेयीदास्या मन्थरया वञ्चिता अकालकवरयाचनप्रेरण्या प्रलम्भिताः अत एव दुःखभागिनो वयं पापायाः मन्थरायाः वशमेष्यामः ॥ १९ ॥

गो० टी०—वयमिति । वयं त्वामनुगता वयं त्वयाप्युपवञ्चिताः खलु रात्रौ निद्रासमये अविदितगमनेन उपवञ्चिता एव अपि शब्दादभिषेकविघटनेन कैकेय्यापि वञ्चिता इति वोत्यते उपवञ्चिताः समीपे वञ्चिताः वनं प्रापय्यमाना इव त्यक्ता इति वार्थः । अत एव पापायाः कैकेय्या वशं दुःखभागिनः सन्तः एष्यामः अतो वयं हता इत्यन्वयः ॥ १९ ॥ २० ॥

२०] ति० टी०—आत्मसममतिबुद्धिमन्मन्त्रियोग्यम् । 'दूरगतम्' इति पाठे दूरदेशावस्थानवन्तं निश्चित्य तत्समीपे दुःखार्तश्चिरं रुरोद ॥ २० ॥

रा० टी०—इतीति । आत्मसममात्योचितमित्यर्थः ब्रुवन् सुमन्त्रः दूरगतं दूरदेशसंयोगानुकूलव्यापारवन्तं रामं दृष्ट्वा चिरं रुरुदे ॥ २० ॥

२१] ति० टी०—स्पृष्टोदकमाचामन्तं शुचिं पवित्रम् ॥ २१ ॥

रा० टी०—तत इति । बाष्पे अश्रुणि विगते सति स्पृष्टोदकं स्पृष्टमुदकं येन तं सूतं रामः मधुरं वाक्यं पुनः पुनरुवाच ॥ २१ ॥

गो० टी०—तत इति । रोदनस्याशुचिताहेतुत्वात् स्पृष्टोदकम् आचान्तम् अत एव शुचिम् ॥ २१–२३ ॥

२२] ति० टी०—सुहृदं व्यसनापनोदकम् । यत एवमतः—वयेत्यादि ॥ २२ ॥

रा० टी०—तद्वाक्यमेवाह—इक्ष्वाकूणामिति । त्वया तुल्यं त्वदन्यं इक्ष्वाकूणां सुहृदं नोपलक्षये पश्यामि अतः यथा येन प्रकारेण राजा मां न शोचेत्तथा कुरु ॥ २२ ॥

२३] ति० टी०—कामभारावसन्नः कामवेगेन पीडितः, यद्वाऽवसन्नो मदभिषेकादिमनोरथसमूहः तस्मादेतदुक्तं वक्ष्यमाणं च ॥ २३ ॥

रा० टी०—शोकेति । कामभारावसन्नः कामः इच्छाविषयीभूतः भारोऽभिषेकधारणं अवसन्नः विध्वस्तः यस्य अत एव शोकोपहतचेताः अस्तीति शेषः तस्मादेतद्ब्रवीमि ॥ २३ ॥

२४] ति० टी०—कैकेय्याः प्रियो यः कामो विषयो भरताभिषेकादिस्तदर्थं यथा येन प्रकारेण यद्वस्त्वाज्ञापयेत्तदविकाङ्क्षयाऽस्मदादीनामविशङ्कया कार्यं सादरमनुष्ठेयम् ॥ २४ ॥

रा० टी०—शोकनाशकोपायं बोधयन्नाह—यदिति । महात्मा महीपतिः कैकेय्याः प्रियकामार्थं यद्वस्तु यथा येन प्रकारेण आज्ञापयेत्तत्तथा तेन प्रकारेण अविकाङ्क्षया विकाङ्क्षा अनादरः तदभावेन अत्यादरेणेत्यर्थः कार्यं कर्तव्यम् ॥ २४ ॥

गो० टी०—गुरवः स्वामिनश्च न नियम्याः अपि तु सर्वप्रकारेणानुवर्तनीया इत्याशयेनाह—यद्यदिति । विकाङ्क्षा अनादरः तदभावेन आदरेणेत्यर्थः ॥ २४ ॥

२५] ति० टी०—एतच्छब्दार्थमाह—यदेषामिति । प्रशासतीत्यभ्यस्तत्वादत् सर्वकृत्येष्वपि कामक्रोधप्रवृत्तेष्वपि ॥ २५ ॥

रा० टी०—एतदर्थमिति । नराधिपाः राजानः एतदर्थं राज्यानि प्रशासति । एतदर्थमेवाह—यत्येन प्रशासनेन सर्वकृत्येषु एषां राज्ञां मनः ईप्सितं न प्रतिहन्यते एतेन राजेप्सितमविचारेण कर्तव्यमिति सूचितम् ॥ २५ ॥

गो० टी०—एतदिति । एतच्छब्दार्थमाह—यदेषामिति । प्रशासतीति अभ्यस्तत्वाददादेशः सर्वकृत्येषु कामात् क्रोधाद्वा प्रवृत्तेष्वित्यर्थः ॥ २५ ॥

२६] ति० टी०—यत्कार्यं प्राप्ति यथा येन प्रकारेणालीकमप्रियम् ताम्यति ग्लायति ॥ २६ ॥

रा० टी०—यदिति । यस्मिन्कार्ये अलीकमौदासीन्यं नाधिच्छति शोकेन न ताम्यति तदेव कार्यं तथा तेन प्रकारेण कुरु ॥ २६ ॥

१ वै त्वयाप्युपेति गो. पाठः । २ तदेति गो. पाठः । ३ यद्यदाज्ञापयेदिति गो. पाठः । ४ नरेश्वरा इति गो. पाठः । ५ दुःखेनेति गो. पाठः ।

अदृष्टदुःखं राजानं वृद्धमार्यं जितेन्द्रियम् । ब्रूयास्त्वमभिवाद्यैव मम हेतोरिदं वचः ॥ २७ ॥
नै चाहमनुशोचामि लक्ष्मणो न च शोचति । अयोध्यायाश्च्युताश्चेति वने वत्स्यामहेति वा॥ २८ ॥
चतुर्दशसु वर्षेषु निवृत्तेषु पुनःपुनः । लक्ष्मणं मां च सीतां च द्रक्ष्यसे शीघ्रमागतान्॥ २९ ॥
एवमुक्त्वा तु राजानं मातरं च सुमन्त्र मे । अन्याश्च देवीः सहिताः कैकेयीं च पुनःपुनः॥ ३० ॥
आरोग्यं ब्रूहि कौसल्यामथ पादाभिवन्दनम् । सीताया मम चार्यस्य वचनाल्लक्ष्मणस्य च ॥ ३१ ॥
ब्रूयाश्चापि[4] महाराजं भरतं क्षिप्रमानय । आगतश्चापि भरतः स्थाप्यो नृपमते पदे ॥ ३२ ॥
भरतं च परिष्वज्य यौवराज्येऽभिषिच्य च । अस्मत्संतापजं दुःखं न त्वामभिभविष्यति ॥ ३३ ॥
भरतश्चापि वक्तव्यो यथा राजनि वर्तसे । तथा मातृषु वर्तेथाः सर्वास्वेवाविशेषतः ॥ ३४ ॥

गो० टी०–यदिति । अलीकमप्रियम् 'अलीकं त्वप्रियेऽनृते' इत्यमरः ॥ २६ ॥

२७] ति० टी०–अभिवाद्य मत्प्रतिनिधितया मदीयनमस्कारं कृत्वा ॥ २७ ॥

रा० टी०–अदृष्टेति । त्वं राजानं अभिवाद्य मम हेतोः मम इदं वचः ब्रूयाः ॥ २७ ॥

गो० टी०–अदृष्टदुःखमिति । मम हेतोः मदर्थं मम प्रतिनिधित्वेनेत्यर्थः ॥ २७ ॥

२८] ति० टी०–इदंपदार्थमाह–न चेति । वने वत्स्यामहेति वेति संधिरार्षः वत्स्यामहे इति वा । नानुशोचामीति संबन्धः ॥ २८ ॥

रा० टी०–स्ववचनमेवाह । नेति । अयोध्यायाः वयं च्युताः इति न शोचामि लक्ष्मणश्च न शोचति वने वत्स्यामहे इति वा न शोचामि एतेन मच्छोकहेतुकः शोकस्त्वया न कार्य इति सूचितम । नञनेत्यत्र नकारस्य योगविभागेन त्रिपाद्याः क्वचिदसिद्धत्वाभावबोधनात्सन्धिः ॥ २८ ॥

गो० टी०–स्वविश्लेषजनितदुःखेन राजा न निर्वहेदिति भिया तदाश्वासकानि वाक्यान्याह–नैवाहमिति । लक्ष्मणो न च मैथिलीत्यत्र शोचतीति विपरिणामः कर्तव्यः वत्स्यामहेत्यत्र आर्षः सन्धिः ॥ २८ ॥

२९] ति० टी०–पुनरागतानस्मान्पुनस्त्वं द्रक्ष्यसीति संबन्धः, पुनः पुनरभीक्ष्णं द्रक्ष्यसि वा ॥ २९ ॥

रा० टी०–चतुर्दशेति । शीघ्रमागतौँल्लक्ष्मणादीन्द्रक्ष्यसे ॥ २९ ॥

गो० टी०–चतुर्दशस्विति । पुनः पुनर्द्रक्ष्यसि "नित्यवीप्सयोः" इति द्विवचनम् आदरातिशयेन सदा द्रक्ष्यसीत्यर्थः॥२९॥

३०] ति० टी०–सहिताः मम मात्रेति शेषः । पुनः पुनरभीक्ष्णं पूर्वोक्तं वाक्यमुक्त्वा कौसल्यामित्युपलक्षणम् सर्वाः प्रति कैकेयीं चारोग्यम् अहमरोगोऽदुःख इति ब्रूहि कैकेयीमिति न व्यक्त्योक्तिः किंतु दैवकृतत्वेनास्या अनपराधित्वमित्याशयेन ॥ ३० ॥

३१] ति० टी०–अथारोग्यकथनानन्तरं सर्वान्प्रत्यार्यस्य ज्येष्ठस्य मम सीताया लक्ष्मणस्य च वचनात्पादाभिवन्दनं ब्रूहि ॥ ३१ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण राजानमुक्त्वा मे मातरं कौशल्यां सहिताः हितत्वयुक्ताः अन्याश्च देवी राज्ञीः कैकयीं च पुनः पुनः मे आरोग्यं ब्रूहि । अथ अनन्तरं सीतायाः आर्यस्य मम च लक्ष्मणस्य च वचनात् पादाभिवन्दनं कौशल्यादिचरणप्रणामं ब्रूहि । श्लोकद्वयमेकान्वयि हितशब्दो भावप्रधानः ॥ ३० ॥ ३१ ॥

गो० टी०–एवमित्यादि । राजानं मे मातरं अन्या देवीः सहिताः कौसल्यया सह वर्तमानाः कैकेयीं च पुनः पुनरेवमुक्त्वा अथ कौसल्यामारोग्यं पादाभिवन्दनं च ब्रूहीत्यन्वयः । आर्यस्य शास्त्रोदितज्येष्ठानुवर्तनरूपपरमधर्मवेदित्वात् लक्ष्मणस्यार्यत्वोक्तिः, कौसल्यां प्रत्येव पादाभिवन्दनकथनम् अन्यत्र निषेधात् 'आचार्यवदाचार्यदारे वृत्तिः पादसंवाहनवर्जम्' इति निषेधस्य सपत्नीमातृष्वपि तुल्यत्वात् ॥ ३०–३१ ॥

३२] ति० टी०–एवं पितरं मातरं प्रति संदिश्य पुनः पितरं प्रतिसंदिशति–ब्रूया इति । महाराजं दशरथं नृपमते राजसंमते पदे राज्ये ॥ ३२ ॥

रा० टी०–ब्रूया इति । भरतं क्षिप्रं शीघ्रमानय इति च महाराजं ब्रूयाः तदानयने प्रयोजनमाह–आगतो भरतः नृपमते राजेच्छाविषयीभूते पदे स्थाने स्थाप्यः ॥ ३२ ॥

गो० टी०–ब्रूया इति । नृपमते राज्ञामभिमते पदे यौवराज्य इत्यर्थः । अभिषिच्य स्थितमिति शेषः नाभिभविष्यतीत्यत्रेतिकरणं द्रष्टव्यम् अस्य ब्रूया इत्यनेन संबन्धः ॥३२॥३३॥

३३] ति० टी०–अथ सुमन्त्रं प्रत्याह–भरतं चेति । अभिषिच्याभिषेचय्य ॥ ३३ ॥

रा० टी०–सुमन्त्रदुःखध्वंसोपायं वदन्नाह–भरतमिति । यौवराज्ये भरतमभिषिच्य इव सर्वं तदधीनं कृत्वेत्यर्थः परिष्वज्य तमालिङ्ग्येत्यर्थः विद्यमानं त्वामस्मत्संतापजं दुःखं नाभिभविष्यति । च इवार्थे ॥ ३३ ॥

३४] ति० टी०–राजनि दशरथे ॥ ३४ ॥

---

१ नैवाहमिति गो. पाठः । २ मैथिलीति गो. पाठः । ३ चेति गो. पाठः । ४ द्रक्ष्यसि क्षिप्रमिति गो. पाठः । ५ हीति गो. पाठः ।

यथा च तव कैकेयी सुमित्रा चाविशेषतः । तथैव देवी कौसल्या मम माता विशेषतः ॥ ३५ ॥
तातस्य प्रियकामेन यौवराज्यमवेक्षता । लोकयोरुभयोः शक्यं नित्यदा सुखमेधितुम् ॥ ३६ ॥
निवर्त्यमानो रामेण सुमन्त्रः प्रतिबोधितः । तत्सर्वं वचनं श्रुत्वा स्नेहात्काकुत्स्थमब्रवीत् ॥ ३७ ॥
यदहं नोपचारेण ब्रूयाः स्नेहादविक्लवम् । भक्तिमानिति तत्तावद्वाक्यं त्वं क्षन्तुमर्हसि ॥ ३८ ॥
कथं हि त्वद्विहीनोऽहं प्रतियास्यामि तां पुरीम् । तव तात वियोगेन पुत्रशोकातुरामिव ॥ ३९ ॥
सराममपि तावन्मे रथं दृष्ट्वा तदा जनः । विना रामं रथं दृष्ट्वा विदीर्येतापि सा पुरी ॥ ४० ॥
दैन्यं हि नगरी गच्छेद्दृष्ट्वा शून्यमिमं रथम् । सूतावशेषं स्वं सैन्यं हतवीरमिवाहवे ॥ ४१ ॥
दूरेऽपि निवसन्तं त्वां मानसेनाग्रतः स्थितम् । चिन्तयन्तोऽद्य नूनं त्वां निराहाराः कृताः प्रजाः॥४२॥

रा० टी०–भरत इति । भरतश्च वक्तव्यः । वक्तव्यमेवाह-अविशेषतः वैषम्यरहितत्वेन ॥ ३४ ॥

३५] ति० टी०–अविशेषतः शत्रुघ्नसंबन्धात्कैकेय्यविशेषतः कैकेय्यविशेषेत्यर्थः । एवं मम मातापि कैकेय्यविशेषाद्रष्टव्येत्यर्थः ॥ ३५ ॥

रा० टी०–यथेति । एतावद्ध विषमदृष्टिर्न कर्तव्येति तात्पर्यम् ॥ ३५ ॥

गो० टी०–भरत इत्यादिश्लोकेनोक्तमर्थं विवृणोति-यथेति । सुमित्रोक्तिः लक्ष्मणशत्रुघ्नपक्षपातात् अवेक्षता अङ्गीकुर्वता त्वयेति शेषः । नित्यदा सर्वदा छान्दसो दाप्रत्ययः इति भरतश्चापि वक्तव्य इति पूर्वेणान्वयः ॥ ३४–३७ ॥

३६–३७] ति० टी०–अवेक्षताङ्गीकुर्वता उभयोर्लोकयोरिहपरलोकयोः । नित्यदा सर्वदा छान्दसो दाप्रत्ययः । सुखं वर्धयितुं शक्यम् तेन तथा वर्तस्व येन लोकद्वयेऽपि सुखं भवतीति व्यङ्ग्यं पर्यायोक्तमत्रालंकारः ॥ ३६ ॥ ३७ ॥

रा० टी०–तातस्येति । तातस्य जनकस्य प्रियकामेन अत एव यौवराज्यं यौवराज्यसदृशपालनमित्यर्थः अपेक्षता स्वीकुर्वता त्वया उभयोः प्रकटाप्रकटसाकेतयोः सुखमेधितुं वर्धयितुमतिसुखं प्राप्तुमित्यर्थः शक्यम् ॥ ३६ ॥

रा० टी०–निवर्त्यमान इति । रामेण निवर्त्यमानः अत एव प्रतिबोधितः सुमन्त्रः काकुत्स्थमब्रवीत् ॥ ३७ ॥

३८] ति० टी०–उपचारः स्वामिभृत्योचितः सत्कारः तेन न ब्रूयां ब्रूयाम् छान्दसमेतत् । अपि तु स्नेहाद्विक्लवं वाक्यं ब्रवीमि तद्वाक्यं भक्तिमानिति ज्ञात्वा क्षन्तुमर्हसीति संबन्धः ॥ ३८ ॥

रा० टी०–तद्वचनमेवाह–यदिति । यद्वचः उपचारेण भृत्यवक्तव्यत्वेन न ब्रूयां किंतु स्नेहादविक्लवं धार्ष्ट्यविनिष्टं यथा स्यात्तथा ब्रूयाम् तद्वाक्यं भक्तिमानयं मद्विषयकातिस्नेहवानिति ज्ञात्वा क्षन्तुमर्हसि ॥ ३८ ॥

गो० टी०–यदिति । अहमविक्लवः धृष्टः सन् यद्वाक्यं ब्रूयां तन्नोपचारेण किंतु स्नेहात् तद्वाक्यं त्वं तावत् साकल्येन क्षन्तुमर्हसीति संबन्धः पाठभेदः । तव स्नेहादविक्लवो निर्भयः यद्वच उपचारेण न ब्रूयां सेवाधर्मं विहाय ब्रूयां तद्वाक्यं भक्तिमानिति हेतोः क्षन्तुमर्हसि ॥ ३८ ॥

३९] ति० टी०–पुत्रशोकः पुत्रवियोगजः शोकः ॥ ३९ ॥

रा० टी०–तद्वचनमेवाह–कथमिति । हे तात ! तव वियोगेन पुत्रशोकातुरामिव तां पुरीमयोध्यां त्वद्विहीनोऽहं कथं प्रतियास्यामि ॥ ३९ ॥

गो० टी०–कथमिति । तव तावद्वियोगेनेति पाठः । तव तातेति पाठे तात स्वामिन्नित्यर्थः वृद्धत्वाद्वत्सेति संबोधनं वा । पुत्रवियोगजः शोकः पुत्रशोकः तेनाकुलामिव स्थितां पुरीमित्यन्वयः ॥ ३९ ॥

४०] ति० टी०–मे रथं मत्प्रवर्त्यं रथं दूराद्दृष्ट्वा । तदा दर्शनकाले सराममपि अपिः संभावने स रामं संभावयमानो जनः पुरी च निकटगतं रथं विना रामं दृष्ट्वा विदीर्येतापि । अपिः संभावनायाम् ॥ ४० ॥

रा० टी०–स इति । तावत्पूर्वं मे रथं सरामं रामविशिष्टं दृष्ट्वा क्षणमानतो ज्ञात्वा तदा समीपागमनसमये विना रामं रथं दृष्ट्वा साक्षादवलोक्य सा पुरी विदीर्येतापि । अपिः संभावनार्थकः ॥ ४० ॥

गो० टी०–सराममिति । पूर्वं सरामं रथं दृष्ट्वा इदानीं रामं विना स्थितं रथं दृष्ट्वा जनः सा पुर्यपि विदीर्येत दुःखेन भिद्येत पुरीशब्दोऽत्र जनव्यतिरिक्तपश्चादिपरः ॥ ४० ॥

४१] ति० टी०–सतावशेषं हतवीरं रथं दृष्ट्वा स्वसैन्यमिव ॥ ४१ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–दैन्यमिति । शून्यं त्वया रहितं रथं दृष्ट्वा नगरी दैन्यं गच्छेत् तत्र दृष्टान्तः सूतावशेषं सूतमात्रावशिष्टमाहवे संग्रामे हतवीरं स्वसैन्यमिव ॥ ४१ ॥

गो० टी०–दैन्यमिति । आहवे हतवीरं हतं वीरं दृष्ट्वा स्वसैन्यमिव सूतावशेषं शून्यं रामरहितं रथं दृष्ट्वा नगरी दैन्यं गच्छेत् ॥ ४१ ॥

४२] ति० टी०–दूरेऽपि निवसन्तं त्वां मानसेन व्या-

१ च विशेषत इति गो. पाठः । २ शोककर्षित इति गो. पाठः । ३ ब्रूयामिति गो. रा. पाठः । ४ अविक्लव इति गो. पाठः । ५ तावदिति गो. पाठः । ६ आकुलमिति गो. पाठः । ७ चिन्तयन्त्य इति गो. रा. पाठः ।

दृष्टं तद्वै त्वया राम यादृशं त्वत्प्रवासने । प्रजानां संकुलं वृत्तं त्वच्छोकाक्रान्तचेतसाम् ॥ ४३ ॥
आर्तनादो हि यः पौरैरुन्मुक्तस्त्वत्प्रवासने । सरथं मां निशाम्यैव कुर्युः शतगुणं ततः ॥ ४४ ॥
अहं किं चापि वक्ष्यामि देवीं तव सुतो मया । नीतोऽसौ मातुलकुलं संतापं मा कृथा इति ॥ ४५ ॥
असत्यमपि नैवाहं ब्रूयां वचनमीदृशम् । कथमप्रियमेवाहं ब्रूयां सत्यमिदं वचः ॥ ४६ ॥
मम तावन्नियोगस्थास्त्वद्बन्धुजनवाहिनः । कथं रथं त्वया हीनं प्रवाह्यन्ति हयोत्तमाः ॥ ४७ ॥

पारेणाग्रतः पुरः स्थितमिव त्वां चिन्तयन्त्यो रथेनागतप्रायो राम इति चिन्तयन्त्यः प्रजा जना अद्य एकस्य मम गमनदिने नूनं निश्चयेन निराहाराः कृता निराहारसंकल्पवत्यः कृता मरिष्यन्तीति यावत् ॥ ४२ ॥

रा० टी०—दूरे इति । दूरे निवसन्तं त्वां दूरे निवसन्तीं त्वां सर्वतो विलक्षणां सीतां च मानसेन मनोव्यापारेण अग्रतः स्थितं स्थितां च चिन्तयन्त्यः प्रजाः अद्य त्वद्रहितरथगमनसमये निराहाराः कृताः त्वदागमनाभावं श्रुत्वा आहारादिकं न करिष्यन्तीत्यर्थः निवसन्तमित्यस्य स्थितमित्यस्य च लिङ्गविपरिणामेनान्यत्राप्यन्वयः । एकस्त्वाशब्दः सर्वादिपठितादन्तप्रकृतिकटाबन्तः ॥ ४२ ॥

गो० टी०—दूर इति । प्रजाः अयोध्यावासिन्यः दूरे निवसन्तमपि त्वां मानसेनाग्रतः स्थितं त्वां चिन्तयन्त्यः भावनाप्रकर्षेण पुरतः स्थितमिव पश्यन्त्यः निराहाराः कृताः आहारेऽप्यादरं न कुर्वन्तीत्यर्थः ॥ ४२ ॥

४३] ति० टी०—तस्यैव युक्त्या साधनं करोति—दृष्टमित्यादिना । संकुलमार्तनादादि ॥ ४३ ॥

रा० टी०—अत्र त्वदनुभव एव प्रमाणमिति बोधयन्नाह—दृष्टमिति । हे राम ! त्वत्प्रवासने त्वच्छोकाक्रान्तचेतसां प्रजानां संकुलमार्तरवादिविशिष्टं यादृशं वृत्तं तत्तादृशं त्वया दृष्टमेव ॥ ४३ ॥

गो० टी०—अत्रार्थे पूर्वानुभवं प्रमाणयति—दृष्टमिति । त्वत्प्रवासने प्रजानां यादृशं संकुलं वृत्तं संक्षोभो जातः तादृशं त्वया दृष्टं हि ॥ ४३ ॥

४४] ति० टी०—सरथं मामेव निशाम्येत्यन्वयः ॥४४॥

रा० टी०—आर्तेति । त्वत्प्रवासने यः आर्तनादः पौरैः उन्मुक्तः ततस्तस्मादार्तनादाच्छतगुणं नादं सरथं रथसहितं मामेव निशम्य कुर्युः ॥ ४४ ॥

गो० टी०—आर्तनाद इति । ततः प्रवासकालिकनादादित्यर्थः ॥ ४४ ॥

४५—४६] ति० टी०—पुना रामं विना स्वगमनेऽनुपपत्तिमाह—अहमिति । अपि च अहं देवीं किं वक्ष्यामि देवीं कौसल्याम् । तव सुतो मया मातुलकुलं प्रापित इति ब्रूहि, तत्राह—ईदृशं वचनं प्रियमप्यसत्यं नैवाहं ब्रूयाम् । वनं प्रापित इत्येव तर्हि ब्रूहि, तत्राह—इदं सत्यमप्यप्रियमेव, अतः कथं ब्रूयाम् ' सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ' इति स्मृतेः । तस्मात्तव मातरं प्रति वक्तुं योग्यस्योत्तरस्याभावादहं न गमिष्यामीति भावः । एतदेव ध्वनयन्वक्ष्यति—'तत्र शक्ष्याम्यहं गन्तुम्' इति । यत्तु कतकेनासत्यमपि मातुलकुलगमनं वक्ष्यामि न तु सत्यमपि वनगमनमप्रियत्वादित्युक्तम्, तत्तु तत्र शक्ष्यामि इत्यादिनोक्तवचसां नगरगमनाभावप्रतिपादकत्वस्यैव लाभाच्चिन्त्यम् ॥ ४५ ॥ ४६ ॥

रा० टी०—अहमिति । देवीं कौशल्यामहं किं वक्ष्यामि येन वचनेन शोको न स्यात्तद्वचनं वदेत्यर्थः । ननु त्वयैव तद्विचार्य उच्यतामित्यत आह—तव सुतो मया मातुलकुलं नीतः अतः संतापं मा कृथाः इतीदृशमसत्यमेव वचनमहं नैव ब्रूयाम् एतेनेदृशासत्यकथन कंचित्कालं किंचिच्छोकहानिः संभवतीति सूचितम् । ननु तर्हि सत्यमेव ब्रूहीत्यत आह—अप्रियमिदं सत्यं वचः कथं ब्रूयाम् । तथा च मनुः 'सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ' इति । श्लोकद्वयमेकान्वयि ॥ ४५ ॥ ४६ ॥

गो० टी०—यदि प्रियं ब्रूयां तदसत्यं भवति यदि च सत्यं ब्रूयां तदप्रियं भवति अतः कौसल्यां प्रति किमपि वक्तुं न शक्यमित्यभिप्रायेणाह—अहमित्यादिना । देवीमहं किं वा वक्ष्यामि न किमपि वक्तुं शक्नोमीत्यर्थः । तदेवोपपादयति—तवेत्यादिना । तवासौ सुतो मया मातुलकुलं नीतः तस्मात् संतापं मा कृथा इतीदृशमसत्यवचनमप्यहं नैव ब्रूयाम् असत्यवचनप्रतिषेधादिति भावः । सत्यमेव वेदेत्यत्राह—कथमिति । अप्रियमिदं वनप्रापणरूपं सत्यं वचनं कथं ब्रूयां देव्या हानिप्रसङ्गादिति भावः ॥ ४५ ॥ ४६ ॥

४७] ति० टी०—रथोऽपि नेतुमशक्य इत्युपपत्त्यन्तरमाह—ममेति । एतेऽश्वा मम नियोगस्था मत्प्रेरणमात्राधीना मत्प्रेरणया त्वद्बन्धुजनवहनशीला एव, न त्वन्यवहनशीलाः, नापि त्वद्बन्धुरहितरथवहनशीलाः अतस्त्वया हीनं रथमेते कथं प्रवाह्यन्ति, न कथमपि वहन्ति अतो रथनयनं दुःशक्यमिति भावः ॥ ४७ ॥

रा० टी०—इदानीं रथगमनस्यैवाशक्यत्वं बोधयन्नाह—ममेति । मम नियोगस्थाः मम नियमने स्थिताः त्वद्बन्धुजनवाहिनः तव बन्धुजनः त्वमेव बन्धुजनश्च त्वद्बन्धुजनः स च स च त्वद्बन्धुजनौ तावेव वहन्ति तच्छीलिनः हयोत्तमाः त्वया त्वद्बन्धुना च विहीनं रथं कथं प्रवाह्यन्ति प्रवहनं करिष्यन्ति कथमिति संभावनायाम् । अत्र त्वयेत्यनेन त्वद्बन्धुलाभो भेदाध्यवसायाद्बाधाकाभावयोर्ग्रहणं त्वाद्दस्यागमर्कं तत्र प्रकरणम् ॥४७॥

१ तद्धीति गो. पाठः । २ पौरैर्मुक्तस्त्वद्विप्रवासने इति गो. पाठः । ३ एवेति गो. रा. पाठः । ४ प्रवक्ष्यन्तीति गो. पाठः

तन्न शक्ष्याम्यहं गन्तुमयोध्यां त्वद्दृतेऽनघ । वनवासानुयानाय मामनुज्ञातुमर्हसि ॥ ४८ ॥
यदि मे याचमानस्य त्यागमेव करिष्यसि । सरथोऽग्निं प्रवेक्ष्यामि त्यक्तमात्र इह त्वया ॥ ४९ ॥
भविष्यन्ति वने यानि तपोविघ्नकराणि ते । रथेन प्रतिबाधिष्ये तानि सर्वाणि राघव ॥ ५० ॥
त्वत्कृतेन मया प्राप्तं रथचर्याकृतं सुखम् । आशंसे त्वत्कृतेनाहं वनवासकृतं सुखम् ॥ ५१ ॥
प्रसीदेच्छामि तेऽरण्ये भवितुं प्रत्यनन्तरः । प्रीत्याभिहितमिच्छामि भव मे प्रत्यनन्तरः॥ ५२ ॥
इमेऽपि च हया वीर यदि ते वनवासिनः । परिचर्यां करिष्यन्ति प्राप्स्यन्ति परमां गतिम् ॥५३॥
तव शुश्रूषणं मूर्ध्ना करिष्यामि वने वसन् । अयोध्यां देवलोकं वा सर्वथा प्रजहाम्यहम् ॥ ५४ ॥
नहि शक्या प्रवेष्टुं सा मयाऽयोध्या त्वया विना । राजधानी महेन्द्रस्य यथा दुष्कृतकर्मणा ॥ ५५ ॥

गो० टी०–ममेति । त्वद्बन्धुजनाः त्वद्वंश्याः यद्वा त्वद्बन्धुभूतसीतालक्ष्मणरूपजनाश्च त्वद्बन्धुजनाः तद्वाहिनः प्रवक्ष्यन्ति वोढारो भविष्यन्ति वहेर्लृटि रूपम् ॥ ४७ ॥ ४८ ॥

४८] ति० टी०–उपसंहरति–तन्नेति ॥ ४८ ॥

रा० टी०–तदिति । तदुक्तहेतोः त्वदृते त्वां विना अयोध्यां गन्तुं न शक्ष्यामि अतः वनवासानुयानाय वनवासानुगमनाय मामनुज्ञातुं त्वमर्हसि ॥ ४८ ॥

४९] ति० टी०–त्यक्तमात्रे त्यागक्षण एव ॥ ४९ ॥

रा० टी०–यदीति । याचमानस्य मे यदि त्यागमेव करिष्यसि तर्हि त्यक्तमात्रः कारणाभावेनापि त्यक्त एव सरथोऽहमग्निं प्रवेक्ष्यामि ॥ ४९ ॥

गो० टी०–यदीति । त्यक्तमात्रः तत्क्षण एव व्यक्तः॥४९॥

५०] ति० टी०–भविष्यन्ति संभावितानि रथेन साधनेनाहमेव रथी भूत्वा प्रतिबाधिष्ये ॥ ५० ॥

रा० टी०–अनुगमने प्रयोजनं बोधयन्नाह–भविष्यन्तीति। ते तपोविघ्नकराणि यानि भविष्यन्ति चेदिति शेषः तानि बाधिष्ये एतेनाहमवश्यं नेतव्य इति सूचितम् ॥ ५० ॥

गो० टी०–भविष्यन्तीति । रथेन साधनेन प्रतिबाधिष्ये अहमेव रथी भूत्वा निवर्तयिष्यामीत्यर्थः। 'तानि सत्त्वानि' इति पाठः सर्वाणीति पाठे सत्त्वानीति शेषः ॥ ५० ॥

५१] ति० टी०–नन्वहं सूतेन त्वया कथं रथिकृत्यं कर्तुं शक्यं तत्राह–त्वत्कृतेनेति । न केवलमहं सूतः किंतु प्रधानभूतो मन्त्री सूतत्वं तु त्वत्कृतानुग्रहरूपफलेन तदर्थफलस्यापि हेतुत्वाङ्गीकाराम्मयाङ्गीकृतमिति शेषः तत्फलं च त्वदीयरथचर्यया त्वदनुग्रहकृतं सुखं मया प्राप्तम्, इदानीं त्वत्कृतेन त्वदङ्गीकृतवनानुगमनानुग्रहेण वनवासकृतं सुखं राज्यचिन्तादुःखाभावाम्महत्सुखमाशंसे प्रार्थयामि, एतेन त्वदवतारं ज्ञात्वैव त्वद्रथचर्यासौभाग्याय सूतत्वं मयाङ्गीकृतमिति ध्वनितम् ॥५१॥

रा० टी०–नन्वनुगमने क्लेशः स्यादित्यत आह–त्वदिति। त्वत्कृतेन त्वल्लाभेच्छया मया रथचर्याकृतं रथवाहनजनितं सुखं प्राप्तमतः त्वत्कृतेन त्वल्लाभेच्छयैव वनवासकृतं सुखमाशंसे इच्छामि ॥ ५१ ॥

गो० टी०–त्वदिति। त्वत्कृते त्वन्निमित्तं रथचर्याकृतं सुखं मया नावाप्तं राज्याभिषिक्तत्वद्रथचर्याकृतसुखं मया भाग्यहीनेन न लब्धं तथापि त्वत्कृतेन त्वत्साहाय्यकरणेन वनवासकृतमपि सुखमाशंसे इच्छामि राज्ये रथचर्याकृतसुखाभावेऽपि वा सारथित्वेन परिचर्याकरणकृतं वापि सुखं मम भवत्विति भावः, यद्वा त्वत्कृतेन त्वया कृतेनानुग्रहेणेत्यर्थः । रथचर्याकृतं रथप्रेरणकृतं सुखं कृतं मया अवाप्तम् एवं त्वत्कृतेनानुग्रहेण वनवासकृतं सुखमप्यहमाशंस इति ॥ ५१ ॥

५२–५३] ति० टी०–प्रत्यनन्तरः प्रत्यासन्नः अनुकूल इति यावत् । प्रत्यनन्तरो भवेति त्वया प्रीत्याभिहितं वाक्यं श्रोतुमिच्छामि ॥ ५२ ॥ ५३ ॥

रा० टी०–प्रसीदेति । अरण्ये ते प्रत्यनन्तरः अतिनिकटकवर्ती भवितुमिच्छामि । तत्र हेतुः प्रीत्या ते अभिहितमुक्तमिच्छामि श्रोतुमिति शेषः । अतः मे प्रत्यनन्तरस्त्वं भव । यदि च अभिहितमित्यस्य आज्ञामित्यर्थस्तदा श्रोतुमिति नाध्याहार्यम् ॥ ५२ ॥

गो० टी०–प्रसीदेति । प्रत्यनन्तरः समीपवर्ती मे प्रत्यनन्तरो भवेति प्रीत्या अभिहितमिच्छामि त्वत्कर्तृकमभिधानमिच्छामीत्यर्थः । क्रियतामिति मां वदेतिवत् ॥ ५२ ॥

रा० टी०–इमे इति । परिचर्यां सेवाम् ॥ ५३ ॥

गो० टी०–इम इति । परमां गतिं स्वामिशुश्रूषणादिति भावः ॥ ५३ ॥

५४–५५] ति० टी०–देवलोकं वेत्यनेन त्वद्भक्तानां भक्त्यन्तरायभूतदेवलोकप्राप्तिरपि हेयैवेति सूचितम् ॥५४॥५५॥

रा० टी०–तवेति । तव शुश्रूषणं सेवां वने करिष्यामि अतः अयोध्यां देवलोकं देवलोकगमनं च प्रजहामि त्यजामि एतेन यथेच्छं देवलोकमप्ययं गच्छतीति व्यञ्जितम् ॥ ५४ ॥

गो० टी०–तवेति । मूर्ध्नेत्यस्य सोपचारमिति फलितार्थः । सर्वथा सर्वप्रकारेण ॥ ५४ ॥

रा० टी०–नहीति । दुष्कृतकर्मणा पापकर्मकारिणा महेन्द्रस्य इन्द्रस्य राजधानी अमरावतीव ॥ ५५ ॥

गो० टी०–नहीति । महेन्द्रस्य राजधानी स्वर्गः ॥५५॥

१ सत्त्वानीति गो. पाठः । २ ऽवासमिति गो. पाठः ।

वनवासे क्षयं प्राप्ते ममैष हि मनोरथः । यदनेन रथेनैव त्वां वहेयं पुरीं पुनः ॥ ५६ ॥
चतुर्दश हि वर्षाणि सहितस्य त्वया वने । क्षणभूतानि यास्यन्ति शतसंख्यानि चान्यथा ॥ ५७ ॥
भृत्यवत्सल तिष्ठन्तं भर्तृपुत्रगते पथि । भक्तं भृत्यं स्थितं स्थित्या न मा त्वं हातुमर्हसि ॥ ५८ ॥
एवं बहुविधं दीनं याचमानं पुनः पुनः । रामो भृत्यानुकम्पी तु सुमन्त्रमिदमब्रवीत् ॥ ५९ ॥
जानामि परमां भक्तिं मयि ते भर्तृवत्सल । शृणु चापि यदर्थं त्वां प्रेषयामि पुरीमितः ॥ ६० ॥
नगरीं त्वां गतं दृष्ट्वा जननी मे यवीयसी । कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः ॥ ६१ ॥
विपरीते तुष्टिहीना वनवासं गते मयि । राजानं नातिशङ्केत मिथ्यावादीति धार्मिकम् ॥ ६२ ॥
एष मे प्रथमः कल्पो यदम्बा मे यवीयसी । भरतारक्षितं वृत्तं पुत्रराज्यमवाप्स्यते ॥ ६३ ॥
मम प्रियार्थं राज्ञश्च सुमन्त्र त्वं पुरीं व्रज । संदिष्टश्चापि यानर्थांस्तांस्तान्ब्रूयास्तथा तथा ॥ ६४ ॥
इत्युक्त्वा वचनं सूतं सान्त्वयित्वा पुनः पुनः । गुहं वचनमक्लीबो रामो हेतुमदब्रवीत् ॥ ६५ ॥

५६] ति० टी०—वनवासे क्षयं प्राप्ते वनवासकाले समाप्ते पुरीं वहेयं प्रापयेयमिति यत्, एष मे मनोरथः ॥ ५६ ॥

रा० टी०—वनवासे स्वप्रयोजनान्तरं बोधयन्नाह—वनवास इति । वनवासे नियमितवनवासकाले क्षयं प्राप्ते सति यत्प्रयत्नवानहमनेन रथेन पुरीमयोध्यां त्वां वहेयं हि एष मम मनोरथः ॥ ५६ ॥

गो० टी०—वनवास इति । वनवासे क्षयं प्राप्ते वनवासे समाप्ते सतीत्यर्थः । वहेयमिति यत् अयं मे मनोरथ इति संबन्धः ॥ ५६ ॥

५७] ति० टी०—अन्यथा त्वया रहितस्य स्थितिपक्षे॥५७॥

रा० टी०—चतुर्दशेति । वने त्वया सहितस्य मे चतुर्दशवर्षाणि क्षणभूतानि क्षणत्वं प्राप्तानि यास्यन्ति अन्यथा सहगमनाभावे शतसंख्यानि यास्यन्ति संहिताया अभावस्तु "इकोऽसवर्णे शाकल्यस्य—" इति प्रकृतिभावात् ॥ ५७ ॥

गो० टी०—चतुर्दशेति । त्वया सहितस्येति ममेति शेषः । क्षणभूतानि क्षणतुल्यानि अतोऽन्यथा त्वद्विरह इत्यर्थः । शतसंख्यानि भवेयुरिति शेषः । शतगुणितानि भविष्यन्तीति भावः ॥ ५७ ॥

५८–६०] ति० टी०—भर्तृपुत्रगते राजपुत्राश्रिते पथि यथा भृत्येन स्थातव्यं तथा त्वद्विषये तिष्ठन्तं सर्वभृत्यमध्ये भक्तिमन्तं भृत्यं स्थित्या भृत्ययोग्यया स्थित्या सर्वदा स्थितं नियुक्तं कार्यविषये कदाप्यपराधरहितमिति यावत् ॥५८–६०॥

रा० टी०—भृत्येति । हे भृत्यवत्सल! भर्तृपुत्रगते स्वामिपुत्रकर्तृकगतिमति पथि मार्गे तिष्ठन्तं स्थित्या सेवकरीत्या स्थितं विद्यमानं मां हातुं त्यक्तुं त्वं नार्हसि ॥ ५८ ॥

रा० टी०—एवमिति । भृत्यानुकम्पी भृत्यविषयकातिदयावान्रामः सुमन्त्रमब्रवीत् ॥ ५९ ॥

रा० टी०—तद्वचनमेवाह—जानामीति । यदर्थं त्वामितः प्रहयामि तच्छृणु ॥ ६० ॥

गो० टी०—भृत्येति । हे भृत्यवत्सल! भक्तं भृत्यमत एव स्थित्यां मर्यादायां स्थितम् अस्खलितमर्यादमत एव भर्तृपुत्रगते स्वामिपुत्रेण त्वया गते पथि वनगमने तिष्ठन्तं निश्चितत्वदनुगमनं मां त्वं हातुं नार्हसि ॥ ५८–६० ॥

६१] ति० टी०—रामो वनं गत इति प्रत्ययं निश्चयं कैकेयी गच्छेदित्यन्वयः ॥ ६१ ॥

रा० टी०—तत्प्रयोजनमाह—नगरीमिति । नगरीमयोध्यां त्वां गतं प्राप्तं दृष्ट्वा यवीयसी कनिष्ठा मे जननी कैकेयी रामो वनं गत इति प्रत्ययं प्रतीतिं गच्छेत्प्राप्नुयात् । रथेन गमने केनचिद्राज्ञा स्वदेशं प्रापित इति शङ्का भविष्यतीति सूचितम्॥६१॥

गो० टी०—नगरमित्यादि । श्लोकत्रयमेकान्वयम् । रामो वनं गत इति कैकेयी प्रत्ययं विश्वासं गच्छेत् धार्मिकं राजानं मिथ्यावादीति नातिशङ्केत भरतारक्षितं भरतेन आसमन्तात् रक्षितं पुत्रराज्यम् अवाप्नुयादिति च यत् एषः मे प्रथमः कल्पः कर्तव्येषु प्रयोजनेषु मुख्यः 'मुख्यः स्यात् प्रथमः कल्पः' इत्यमरः ॥ ६१–६३ ॥

६२] ति० टी०—अतिशङ्काऽन्यथाशङ्का तां न कुर्यात्॥६२॥

रा० टी०—नन्वं तत्प्रतीत्या किमित्याह—परितुष्टेति । मयि वनवासं गतं तन्निश्चयत्वविशिष्टगतिमति सति परितुष्टा सती धार्मिकं राजानं मिथ्यावादी इति नातिशङ्केत ॥ ६२ ॥

६३–६५] ति० टी०—इत्येष मे प्रथमः कल्पो मुख्यं प्रयोजनं त्वद्गमनस्येत्यन्वयः भरतेनारक्षितं समन्तादक्षितमीदृशं पुत्रराज्यं तज्जन्यं सुखं प्राप्नुयादिति च मम त्वद्गमनस्य प्रयोजनं भरतानयनस्य त्वदधीनत्वात् ॥ ६३–६५ ॥

रा० टी०—एष इति । भरतारक्षितं भरतेन आसमन्ताद्रक्षितमत एव वृत्तं प्रशस्तवृत्तिमत्पुत्रराज्यं यवीयसी अम्बा कैकेयी अवाप्स्यते एषः मम प्रथमः कल्पः संकल्पः एतेन भरतागमनादि त्वद्गमनसाध्यमिति बोधितम् ॥ ६३ ॥

१ एवेति रा. पाठः । २ अतोऽन्यथेति गो. अन्यथेति रा. पाठः । ३ स्थित्यां त्वं न मामिति गो. पाठः । ४ मयीति गो. पाठः । ५ परितुष्टा हि सा देवीति गो. रा. पाठः । ६ स्फीतं……मवाप्नुयादिति गो. पाठः । ७ सरथ इति गो. पाठः । ८ असीति गो. पाठः । ९ अक्लीबमिति रा. पाठः

नेदानीं गुह योग्योऽयं वासो मे सजने वने । अवश्यमाश्रमे वासः कर्तव्यस्तदृतो विधिः ॥ ६६ ॥
सोऽहं गृहीत्वा नियमं तपस्विजनभूषणम् । हितकामः पितुर्भूयः सीताया लक्ष्मणस्य च ॥ ६७ ॥
जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय । तत्क्षीरं राजपुत्राय गुहः क्षिप्रमुपाहरत् ॥ ६८ ॥
लक्ष्मणस्यात्मनश्चैव रामस्तेनाकरोज्जटाः । दीर्घबाहुर्नरव्याघ्रो जटिलत्वमधारयत् ॥ ६९ ॥
तौ तदा चीरसंपन्नौ जटामण्डलधारिणौ । अशोभेतामृषिसमौ भ्रातरौ रामलक्ष्मणौ ॥ ७० ॥
ततो वैखानसं मार्गमास्थितः सहलक्ष्मणः । व्रतमादिष्टवान्रामः सहायं गुहमब्रवीत् ॥ ७१ ॥

रा० टी०–ममेति । पुरीमयोध्यां त्वं व्रज यान्यानर्थान्यथा यथा त्वं संदिष्टः पृष्टस्तांस्तानर्थांस्तथा तथा ब्रूयाः ॥ ६४ ॥

गो० टी०–ममेति । यानथान् संदिष्टोऽसि तानर्थान्दशरथादीनुद्दिश्य तथा तथा ब्रूया इति संबन्धः ॥ ६४ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेण वचनमुक्त्वा तेन सूतं सान्त्वयित्वा अक्लीबं क्लीबतानिवर्तकं हेतुमद्वचनं गुहमब्रवीत् ॥ ६६ ॥

गो० टी०–इतीति । हेतुमत् युक्तिमत् नेदानीमित्यनेन इह वस्तव्यमिति गुहप्रार्थनं द्योतितं मे सजने सजनप्रदेशे अयं वासो न योग्यः तद्गतो विधिः आश्रमवासगतः तद्विषय इत्यर्थः । विधिः पितृनियमनम् । सोहम् 'सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः । अभिषेकमिमं त्यक्त्वा जटाजिनधरो वस' इति कैकेय्या नियुक्तोऽहं तपस्विजनभूषणं तपस्विजनातिशयावहं नियममधःशयनादिकं गृहीत्वा अङ्गीकृत्य पितुः सीताया लक्ष्मणस्य च भूयो हितकामः अतिशयेन परलोकसाधनपुण्यकामः सन् जटाः कृत्वा गमिष्यामि तदर्थं न्यग्रोधक्षीरमानय जटाकरणस्य सीतालक्ष्मणयोः प्रियत्वाभावेऽपि हितत्वमस्त्येव तयोरपि तेन धर्मातिशयात् रामजटाकरणे हि सहधर्मचारिण्याः सीताया अपि धर्मः सिद्धः लक्ष्मणस्य च तदनुरोधेन जटाकरणाद्धर्मः, यद्वा हितकामः न तु प्रियकाम इत्यर्थः ॥ ६६–६७ ॥

६६] ति० टी०–सजने वने वासो न योग्य इत्युक्तिरत्रैव वने स्थेयमिति कदाचिद्दुराग्रहः प्रार्थयेत्तत्प्रतिबन्धाय आश्रमे जनपदरहिते वासो योग्यः, अतस्तद्गत आश्रमवासोचितो विधिर्जटाधारणादिरूप इदानीं कर्तव्य इत्यन्वयः ॥ ६६ ॥

रा० टी०–तदाकारमाह–नेति । हे गुह ! सजने स्वकीयजनसहिते वने मे वासो न योग्यः अतः आश्रमे स्वकीयजनागम्यवनपर्णशालादाववश्यं वासः कर्तव्यः अत एव तद्गतस्तद्वासिषु प्राप्तः विधिश्च कर्तव्यः । कर्तव्य इत्युभयान्वयी ॥ ६६ ॥

६७–६८] ति० टी०–सोऽहं नियमं वन्याहारभूशयनादिरूपं गृहीत्वा सीताया लक्ष्मणस्य चानुमत्या तपस्विजनभूषणं जटाः कृत्वा गमिष्यामि, अतो न्यग्रोधक्षीरमानय । भूयोऽतिशयेन पितुर्हितकामस्तत्प्रतिज्ञारक्षणेन । यत्तु सीताया हितकाम इति तन्न, जटाधारणेन सीताहिताप्रसिद्धेः । अनुमतिस्त्वपेक्षितैव अन्यथा संन्यासदुष्टया परमदुःखापत्तेः ॥ ६७ ॥ ६८ ॥

रा० टी०–तद्विधिं बोधयन्नाह–स इति । पित्रादेर्हितकामोऽहं तपस्विजनभूषणं नियमं भूशयनादि गृहीत्वा अत एव जटाः कृत्वा निर्माय गमिष्यामि अतः न्यग्रोधक्षीरं वटदुग्धपय आनय तदाज्ञापितं क्षीरं गुहः क्षिप्रमुपाहरत् । श्लोकद्वयमेकान्वयि ॥ ६७ ॥ ६८ ॥

गो० टी०–तत्क्षीरमिति । लक्ष्मणस्य चेति तेनापि भ्रातृवदवस्थानस्य संकल्पितत्वादिति भावः अकरोदिति लक्ष्मणे प्रयोज्यकर्तृत्वं बोध्यम् । ऋषिः खियति दीर्घबाहुरिति । जटिलत्वं जटावत्त्वं तुन्दादित्वादिलच् ॥ ६८ ॥ ६९ ॥

६९–७०] ति० टी०–लक्ष्मणस्याकरोत् तेनापि रामवदवस्थानस्य संकल्पितत्वात् ॥ ६९ ॥ ७० ॥

रा० टी०–लक्ष्मणस्येति । तेन गुहानीतक्षीरेण जटाः अकरोत् । अतः जटिलत्वं जटिलधर्ममधारयत् ॥ ६९ ॥

रा० टी०–ताविति । चीरसंपन्नौ भ्रातरौ ऋषिसमौ अशोभेताम् ॥ ७० ॥

गो० टी–तस्यामप्यवस्थायां दर्शनीयतमत्वमाह–तावित्यादिश्लोकेन ॥ ७० ॥

७१] ति० टी०–वैखानसं मार्गं वानप्रस्थाश्रमधर्ममास्थितः प्राप्तुं कृतबुद्धिः सन्व्रतं वानप्रस्थव्रतमादिष्टवानङ्गीकृतवान् अत्र गङ्गारूपतीर्थप्राप्तौ, अग्रे प्रयागरूपतीर्थप्राप्तौ, तदग्रे पितृमरणश्रवणेऽपि यन्मुण्डनाकरणं रामलक्ष्मणयोस्तेनानेन परकृतिरूपार्थवादेन क्षत्रियाणां तीर्थादिषु मुण्डननिषेधं प्रतीम इत्यलम् । सहायं गङ्गातरणादिकृतसहायम् ॥ ७१ ॥

रा० टी०–तत इति । वैखानसं मार्गं वानप्रस्थधर्मम् आस्थितः अत एव व्रतं तदनुष्ठानमादिष्टवान् स्वीकृतवान्रामः सहायं तरणादिसाहाय्यकारिणं गुहमब्रवीत् ॥ ७१ ॥

गो० टी०–तत इति । विखना नाम ब्रह्मनखोत्पन्नः कश्चिन्मुनिः 'ये नखास्ते वैखानसाः । ये वालास्ते वालखिल्याः' इत्युक्तेः । सिंहादिशब्दवद्वर्णविपर्ययः । तेन प्रोक्तं वैखानसं प्रोक्तार्थे अण् मार्गं धर्ममित्यर्थः वानप्रस्थधर्ममिति यावत्, आस्थितः आश्रितः व्रतं ब्रह्मचर्यादिनियमम् आदिष्टवान् अङ्गीकृतवान् । नन्वत्र सर्वो वानप्रस्थधर्मोऽङ्गीकृतः उत यः कश्चित् । नाथः तस्य पुनर्गार्हस्थ्यग्रहणायोगात् आरूढपतितो हि स इत्युत्तराश्रमप्राप्तस्य पुनः पूर्वाश्रमावरोहो निन्दितः ।

१ आश्रम इति गो. रा. पाठः ।

अप्रमत्तो बले कोशे दुर्गे जनपदे तथा । भवेथा गुह राज्यं हि दुरारक्षतमं मतम् ॥ ७२ ॥
ततस्तं समनुज्ञाप्य[1] गुहमिक्ष्वाकुनन्दनः । जगाम तूर्णमव्यग्रः सभार्यः सहलक्ष्मणः ॥ ७३ ॥
स तु दृष्ट्वा नदीतीरे नावमिक्ष्वाकुनन्दनः । तितीर्षुः शीघ्रगां गङ्गामिदं वचनमब्रवीत् ॥ ७४ ॥
आरोह त्वं नरव्याघ्र स्थितां नावमिमां शनैः । सीतां चारोपयान्वक्षं परिगृह्य मनस्विनीम् ॥ ७५ ॥
स भ्रातुः शासनं श्रुत्वा सर्वमप्रतिकूलयन् । आरोप्य मैथिलीं पूर्वमारुरोहात्मवांस्ततः ॥ ७६ ॥
अथारुरोह तेजस्वी स्वयं लक्ष्मणपूर्वजः । ततो निषादाधिपतिर्गुहो ज्ञातीनचोदयत् ॥ ७७ ॥
राघवोऽपि महातेजा नावमारुह्य तां ततः । ब्रह्मवत्क्षत्रवच्चैव जजाप हितमात्मनः ॥ ७८ ॥
आचम्य च यथाशास्त्रं नदीं तां सह सीतया । प्रैणमत्प्रतिसंतुष्टो लक्ष्मणश्च महारथः ॥ ७९ ॥
अनुज्ञाय सुमन्त्रं च सबलं चैव तं गुहम् । आस्थाय नावं रामस्तु चोदयामास नाविकान् ॥ ८० ॥

न द्वितीयः गृहस्थस्य वनस्थासाधारणजटाधारणादिकरणे । शास्त्रारण्डवदाश्रमरण्डतापत्तेः । मैवं पितृनियोगकृतसांकल्पिकनियमविशेषस्य युधिष्ठिरादिसन्यासधर्मवदविरुद्धत्वात् । उक्तं हि मनुना ' सम्यक् संकल्पजः कामो धर्ममूलमिदं स्मृतम् ' इति । सहायं गङ्गावतरणसहायं 'सखायम्'इति च पाठः ॥७१॥

७२-७४] ति० टी०-किमब्रवीत्तदाह—अप्रमत्त इति। दुःखेनारक्षा रक्षणं यस्य तदुरारक्षम् अतिशयेन दुरारक्षं दुरारक्षतमम् । ' दुरारक्ष्यतमम् ' इति पाठेऽतिशयेन दुःखेन रक्षितुं योग्यत्वमित्यर्थः ॥ ७२-७४ ॥

रा० टी०-तद्वचनमेवाह-अप्रमत्त इति । बलादौ अप्रमत्तस्त्वं भवेथाः तत्र हेतुः-हि यतः राज्यं दुरारक्षतमं दुःखेन आरक्ष्यते दुरारक्षं अतिशयेन दुरारक्षं दुरारक्षतमं मतं निश्चितम् ॥ ७२ ॥

गो० टी०-अप्रमत्त इति । बले चतुरङ्गबले कोशे अर्थौघे ' कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ' इत्यमरः । दुरारक्षं दुःखेन आ समन्तात् रक्षितुं शक्यम् । (पाठभेदः दुःखेन आरक्षा रक्षणं यस्य तदुरारक्षम् अतिशयेन दुरारक्षं दुरारक्षतमं भवेथाः इत्यार्षमात्मनेपदम) ॥ ७२ ॥

रा० टी०-तत इति । गुहं तूर्णं समनुज्ञाप्य इक्ष्वाकुनन्दनो रामः जगाम ॥ ७३ ॥

गो० टी०-तत इति । अव्यग्रः अव्यासक्तः ' व्यग्रो व्यासक्त आकुले ' इत्यमरः ॥ ७३ ॥ ७४ ॥

रा० टी०-स इति । गङ्गां तितीर्षुः स रामः नदीतीरे उत्तरतीरवर्तिजले नावं दृष्ट्वा अब्रवीत् लक्ष्मणमिति शेषः ॥७४॥

७५] ति० टी०-स्थितामिमां नावं परिगृह्य हस्ते गृहीत्वा सीतामारोपय अन्वक्षं पश्चात्त्वमारोह ॥ ७५ ॥

रा० टी०-तद्वचनमेवाह-आरोहेति । हे नरव्याघ्र लक्ष्मण ! मनस्विनीं सीतां परिगृह्य स्थितां नावं शनैरारोपय अन्वक्षं पश्चात्त्वमारोह ॥ ७५ ॥

गो० टी०-आरोहेति । स्थितामिमां नावं परिगृह्य सीतां शनैरारोपय अन्वक्षम् अनुपदं त्वं चारोहेति संबन्धः, यद्वा त्वं प्रथममारोह अन्वक्षं मनस्विनीं सीतां परिगृह्य करायत्तीकृत्य आरोपयेत्युपचारोक्तिः । मनस्विनीमिति निन्दायां मतुप् भीरुमिति यावत् । पूर्वारोहणेऽसौ बिभीयादिति भावः ॥ ७५ ॥

७६-७७] ति० टी०-अप्रतिकूलयन्ननुकूलयन् ॥७६॥७७॥

रा० टी०-स इति । स लक्ष्मणः भ्रातुः शासनं श्रुत्वा अप्रतिकूलयन्ननुकूलयन्सन्मैथिलीं पूर्वमारोप्य आरुरोह ॥ ७६ ॥

गो० टी०-लक्ष्मणस्तु निपुणतया प्रथमं सीतामारोप्य पश्चात्स्वयमारुढ इत्याह-स भ्रातुरिति । अप्रतिकूलयन् यथा तथा वाप्यारोहणशासनमनुतिष्ठन् आत्मवान् रामाशयज्ञ इत्यर्थः । पूर्वं मनस्विनीमित्युक्तम् इदानीमात्मवानित्युक्तम् उभाभ्यामारोपणे दोषशङ्काराहित्यं चोक्तम् ॥ ७६ ॥

रा० टी०-अथेति । अथ लक्ष्मणारोहणानन्तरं लक्ष्मणपूर्वजो रामः आरुरोह ततोऽनन्तरं गुहः ज्ञातीनचोदयत् रामाज्ञानुकूलं वर्तितव्यमिति प्रैरयत् ॥ ७७ ॥

गो० टी०-अथेति । ज्ञातीन् बन्धून् अचोदयत् नौः पारं नीयतामित्यचोदयत् ॥ ७७ ॥

७८] ति० टी०-ब्रह्मवत्क्षत्रियवद्ब्राह्मणक्षत्रियार्हं ब्रह्मक्षत्रदेवताकमित्यर्थो वा आत्मनो हितमुद्दिश्य जजाप । ' त्रायमाणमृचा नावमारोहेत् ' इति स्मृतेः क्षत्रियाधिकारे पाठाद्ब्रह्मक्षत्रदेवताकत्वं चास्य ब्राह्मणे उक्तमिति कतकः । "दैवीं नावम्" इत्यादिर्ब्रह्मक्षत्रसाधारणो मन्त्र इत्यन्ये ॥ ७८ ॥

रा० टी०-राघव इति । ब्रह्मवद्वेदप्रवर्तकः महातेजा राघवः क्षत्रवत्क्षत्रियकुलविहितं यथा भवति तथा आत्मनो हितं स्वप्रापकं मन्त्रविशेषं जजाप एतेन तन्मन्त्रोच्चारणे रामस्य प्रीत्यतिशयो ध्वनितः ॥ ७८ ॥

गो० टी०-राघव इति । ब्रह्मवत् क्षत्रवदित्यर्हार्थे वतिप्रत्ययः । ब्राह्मणार्हं क्षत्रियार्हम् आत्मनो हितं जजाप " दैवीं नावम् "इत्यादि ब्रह्मक्षत्रसाधारणमन्त्रं जजापेत्यर्थः । यद्वा ब्रह्मक्षत्रशब्दयुक्तं मन्त्रं जजापेत्यर्थः । स च मन्त्रः "त्रायमाणम्" इत्यादिः तत्र ह्यरिष्टनेमिः पृतनाजिदिति ब्रह्मक्षत्रशब्दौ श्रुतौ॥७८॥

७९-८०]ति० टी०-प्रणमत् अडभाव आर्षः॥७९॥८०॥

---

१ समनुज्ञायेति गो. पाठः । २ लक्ष्मणमिति गो. पाठः । ३ प्राणमत्प्रीतिसंहृष्टो लक्ष्मणश्चामितप्रभ इति गो. पाठः ।

ततस्तैश्चालिता नौका कर्णधारसमाहिता । शुभस्फ्येवेगाभिहता शीघ्रं सलिलमत्यगात् ॥ ८१ ॥
मध्यं तु समनुप्राप्य भागीरथ्यास्त्वनिन्दिता । वैदेही प्राञ्जलिर्भूत्वा तां नदीमिदमब्रवीत् ॥ ८२ ॥
पुत्रो दशरथस्यायं महाराजस्य धीमतः । निदेशं पालयत्वेनं गङ्गे त्वदभिरक्षितः ॥ ८३ ॥
चतुर्दश हि वर्षाणि समग्राण्युष्य कानने । भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति ॥ ८४ ॥
ततस्त्वां देवि सुभगे क्षेमेण पुनरागता । यक्ष्ये प्रमुदिता गङ्गे सर्वकामसमृद्धिनी ॥ ८५ ॥
त्वं हि त्रिपथगे देवि ब्रह्मलोकं समक्षसे । भार्या चोदधिराजस्य लोकेऽस्मिन्संप्रदृश्यसे ॥ ८६ ॥
सा त्वां देवि नमस्यामि प्रशंसामि च शोभने । प्राप्तराज्ये नरव्याघ्रे शिवेन पुनरागते ॥ ८७ ॥
गवां शतसहस्रं च वस्त्राण्यन्नं च पेशलम् । ब्राह्मणेभ्यः प्रदास्यामि तव प्रियचिकीर्षया ॥ ८८ ॥

रा० टी०–आचम्येति । सीतया सह संतुष्टो रामः लक्ष्मणश्च यथाशास्त्रमाचम्य प्रणमत्प्राणमत् । आगमशास्त्रस्यानित्यत्वादडविरहः ॥ ७९ ॥

रा० टी०–अनुज्ञायेति । सुमन्त्रं सबलं सैन्यसहितं गुहं चानुज्ञाय नावमास्थाय नाविकांश्चोदयामास ॥ ८० ॥

गो० टी०–पूर्वोक्तं नावारोहणं विष्ण्वन्नाह–आचम्येत्यादिना ॥ ७९ ॥ ८० ॥

८१] ति० टी०–कर्णधारेण नाविकेन समाहिता सज्जीकृता स्फ्यमरित्रं तेन वेगादभिहता प्रणुन्ना ॥ ८१ ॥

रा० टी०–तत इति । ततः नाविककर्मकप्रेरणानन्तरं तैः नाविकैः चालिता कर्णधारैः अरित्रग्राहकैः समाहिता तरणग्रहसंमुखीकृता शुभस्फ्यवेगाभिहता शुभस्फस्य शोभनारित्रस्य वेगेन अभिहता शीघ्रं चालिता नौका सलिलं गङ्गाजलमत्यगाच्छीघ्रमचलत् ॥ ८१ ॥

गो० टी०–तत इति । कर्णधारसमाहिता समाहितकर्णधारा शुभस्फ्यवेगाभिहता शुभानां स्फ्यानामरित्राणां वेगेनाभिहता प्रणुन्ना ॥ ८१ ॥ ८२ ॥

८२] ति० टी०–गङ्गाया महादेवतात्वात्लक्ष्मीदेवतात्वाच्च सीता प्रार्थयतीत्याह—मध्यमिति ॥ ८२ ॥

रा० टी०–मध्यमिति । भागीरथ्याः मध्यं समनुप्राप्य अनिन्दिता आश्रितानां निन्दितत्वनिवर्तिका वैदेही इदमब्रवीत् ॥ ८२ ॥

८३] ति० टी०–पालयतु पारयतु समापयत्विति यावत् रलयोः समानश्रुतित्वात् ॥ ८३ ॥

रा० टी०–तद्वचनमेवाह–पुत्र इति । अयं दशरथस्य पुत्रः त्वदभिरक्षितः सन्निदेशं राजाज्ञापितं पालयतु निर्विघ्नं चतुर्दशवर्षपर्यन्तं वनवासं करोत्वित्यर्थः ॥ ८३ ॥

गो० टी०–पुत्र इति । निदेशं चतुर्दशवर्षावधिकवनवासविषयनियोगं पारयित्वा निर्विघ्नं परिसमाप्य उष्य उषित्वा प्रत्यागमिष्यति यदेति शेषः ॥ ८३ ॥ ८४ ॥

८४] ति० टी०–पुनः प्रत्यागमिष्यति स्वदेशं यदीति शेषः ॥ ८४ ॥

रा० टी०–चतुर्दशेति । कानने वने उष्य उषित्वा भ्रात्रादिना सह यस्मिन्समये प्रत्यागमिष्यति ततः तस्मिन्समये क्षेमेण आगता अत एव प्रमुदिताहं त्वां यक्ष्ये पूजयितास्मि श्लोकद्वयमेकान्वयि ॥ ८४ ॥ ८५ ॥

८५] ति० टी०–सर्वकामसमृद्धिनी सर्वकामसमृद्धं सर्वकामपूरणमस्या अस्ति दातव्यत्वेनेत्यर्थः ॥ ८५ ॥

गो० टी०–तत इति । ततः तदा सुभगे सुकीर्तें ' भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ' इत्यमरः । क्षेमेण कुशलेन सह यक्ष्ये पूजयिष्यामि सर्वकामसमृद्धिनीति व्रीह्यादित्वादिनिः ॥ ८५ ॥

८६] ति० टी०–समक्षसे व्याप्नोषि 'अक्षू व्याप्तौ संघाते च' तत्त्वं चास्या बालकाण्डे निरूपितम् ॥ ८६ ॥

रा० टी०–गङ्गायाः सामर्थ्यं पूजासमयविशेषं च बोधयन्तीं आह–त्वमिति । हे देवि हे त्रिपथगे ! या त्वं ब्रह्मलोकं समक्षसे व्याप्नोषि अस्मिँल्लोके उदधिराजस्य भार्या संप्रदृश्यसे तां त्वां सा सीताहं नमस्यामि प्रशंसामि स्तौमि च शिवेन कल्याणेन पुनरागतेन नरव्याघ्रे रामे प्राप्तराज्ये सति तव प्रीतिचिकीर्षया गवां शतसहस्रं शतसहस्रसंख्याकगवीः वस्त्राणि च पेशलमतिस्वादु अन्नं च ब्राह्मणेभ्यस्त्वत्तीरवर्तिविप्रेभ्यः प्रदास्यामि । श्लोकत्रयमेकान्वयि ॥ ८६–८८ ॥

गो० टी०–त्वमिति । ब्रह्मलोकं समीक्षसे ब्रह्मकमण्डल्वां द्रवीभूतधर्मरूपतया स्थित्वा ब्रह्मप्रक्षालितविष्णुपादोद्भवत्वादिति भावः अत एव विष्णुपादोद्भवामिति पूर्वमुक्तम् ॥ ८६ ॥

८७–८८] ति० टी०–प्रशंसामि स्तौमि शिवेन क्षेमेण ॥ ८७ ॥ ८८ ॥

गो० टी०–सेति । प्रशंसामि स्तौमि शिवेन क्षेमेण पेशलं रम्यं तव प्रियचिकीर्षया ब्राह्मणमुखेन हि देवतानां ग्रहणमिति भावः ॥ ८७ ॥ ८८ ॥

---

१ चोदित्वा सु. नौः इति गो. पाठः । २ स्फेति रा. पाठः । ३ पारयित्वेममिति गो. पाठः । ४ त्रिपथगा देवीति गो. पाठः । ५ समीक्षसे इति गो. पाठः ।

सुराघटसहस्रेण मांसभूतौदनेन च । यक्ष्ये त्वां [1]प्रीयतां देवि पुरीं पुनरुपागता ॥ ८९ ॥
यानि [2]चैत्यतीरवासीनि दैवतानि च सन्ति हि । तानि सर्वाणि यक्ष्यामि तीर्थान्यायतनानि च ॥ ९० ॥
पुनरेव महाबाहुर्मया भ्रात्रा च संगतः । अयोध्यां वनवासात्तु प्रविशत्वनघोऽनघे ॥ ९१ ॥
तथा संभाषमाणा सा सीता गङ्गामनिन्दिता । दक्षिणा दक्षिणं तीरं क्षिप्रमेवाभ्युपागमत् ॥ ९२ ॥
तीरं तु समनुप्राप्य नावं हित्वा नरर्षभः । प्रातिष्ठत सह भ्रात्रा वैदेह्या च परंतपः ॥ ९३ ॥
अथाब्रवीन्महाबाहुः सुमित्रानन्दवर्धनम् । भव संरक्षणार्थाय सजने विजनेऽपि वा ॥ ९४ ॥
अवश्यं रक्षणं कार्यं [3]मद्विधैर्विजने वने । अग्रतो गच्छ सौमित्रे सीता त्वामनुगच्छतु ॥ ९५ ॥
पृष्ठतोऽ[4]नुगमिष्यामि सीतां [5]त्वां चानुपालयन् । अन्योन्यस्य [6]हि नो रक्षा कर्तव्या पुरुषर्षभ ॥ ९६ ॥
नहि तावदतिक्रान्ताऽसुकरा काचन क्रिया । अद्य दुःखं तु वैदेही वनवासस्य वेत्स्यति ॥ ९७ ॥

८९] ति० टी०–मांसभूतौदनेन यक्ष्ये महाबलिदानेनेति शेषः ॥ ८९ ॥

रा० टी०–गङ्गापूजनसामग्रीं बोधयन्ती आह–सुरेति । पुरीं पुनः प्रयागता प्राप्ता अहं सुराघटसहस्रेण सुरेषु देवेषु न घटन्ते न सन्तीत्यर्थः तेषां सहस्रं तेन सहस्रसंख्याकसुरदुर्लभपदार्थेनेत्यर्थः । मांसभूतौदनेन मा नास्ति अंसो राजभागो यस्यां सा एव भूः पृथ्वी च उतं वस्त्रं च ओदनं च एतेषां समाहारः तेन च त्वां यक्ष्ये अतः प्रीयतां दन्त्योपधोऽप्यंसशब्दो भागवाची कोशे प्रसिद्धः ॥ ८९ ॥

गो० टी०–सुराघटसहस्रेणेति । मांसभूतौदनेन मांसरूपान्नेनेति यावत् ॥ ८९ ॥

९०–९१] ति० टी०–तीर्थानि प्रयागादीनि आयतनानि काश्यादीनि ॥ ९०–९१ ॥

रा० टी०–यानीति । त्वत्तीरवासीनि यानि दैवतानि तीर्थानि प्रयागादीनि च आयतनानि अक्षयवटालोप्यादीनि च सन्ति तानि सर्वाणि यक्ष्यामि ॥ ९० ॥

रा० टी०–पूजनप्रयोजनमुपसंहरन्ती आह–पुनरिति । हे अनघे ! मया भ्रात्रा च सङ्गतः संयुक्तो रामः अयोध्यां पुनः प्रविशतु ॥ ९१ ॥

गो० टी०–यानीति । तीर्थानि मणिकर्णिकादीनि आयतनानि काश्यादीनि ॥ ९०–९३ ॥

९२–९३] ति० टी०–दक्षिणा भर्तुरनुकूला ॥९२॥९३॥

रा० टी०–तथेति । दक्षिणा पत्यनुकूला गङ्गां तथा संभाषमाणा सा सीता दक्षिणं तीरमभ्युपागमत् ॥ ९२ ॥

रा० टी०–तीरमिति । नावं हित्वा त्यक्त्वा नरर्षभो रामः प्रातिष्ठत गमनप्रारम्भमकरोत् ॥ ९३ ॥

९४] ति टी०–संरक्षणार्थम् सीताया इति शेषः । भव सावधान इति शेषः ॥ ९४ ॥

रा० टी०–अथेति । सुमित्रानन्दवर्धनं लक्ष्मणं महाबाहुः रामः अब्रवीत् । तद्वचनमेवाह–विजने जनरहिते सजने परजनसहितेऽपि वने संरक्षणार्थाय सीतारक्षायै भव उद्युक्त इति शेषः ॥ ९४ ॥

गो० टी०–अथेति । भवेति । सावधान इति शेषः । अदृष्टे अदृष्टपूर्वे नः आवयोः "अस्मदो द्वयोश्च" इति बहुवचनं तावच्छब्दः साकल्यार्थकः अन्योन्यस्य साकल्येन रक्षा कर्तव्येति संबन्धः । यत्स्यावश्यकर्तव्यत्वे युक्तिमाह–नहीति । अतिक्रान्ता अतिक्रान्तकाला काचनक्रिया न सुकरा हि पुनः संधातुं न शक्या हीत्यर्थः । तस्मात्काले सावधानतयास्माभिः स्थातव्यमिति भावः संबाधः संमर्दः क्षेत्रं शाल्यादिक्षेत्रद्विस्थलं विषमं निम्नोन्नतप्रदेशयुक्तं प्रपतन्त्यस्मिन्निति प्रपातः गर्तः हि यस्मादद्य प्रवेक्ष्यति तस्माद्दुःखं वेत्स्यतीति संबन्धः इति सुमित्रानन्दवर्धनमब्रवीदित्यन्वयः ॥ ९४–९९ ॥

९५] ति० टी०–यदेवमतः–अग्रत इति । एवं च कार्यवशाद्घोरप्यग्रतो गमनमदोषायेति ध्वनितं मार्ग एव लघोरग्रतो गमनमदोषायेत्यन्ये एवं व्ययविश्वसनीयेति च ध्वनितम् ॥ ९५ ॥

९६] ति० टी०–नोऽस्माकम् सीतयापि पातिव्रत्यमहिन्नेतररक्षणम् ॥ ९६ ॥

रा० टी०–रक्षणे हेतुं वदन्नाह–अवश्यमिति । मद्विधैः मर्यादापालकैः विजने स्वजनेन रहिते वने रक्षणमवश्यं कार्यं बालादीनां स्त्रियाश्चेति शेषः अतः हे सौमित्रे ! त्वमग्रतो गच्छ त्वामनुपश्चात्सीता गच्छतु अनुपालयन्सन्पृष्ठतः अहमनुगमिष्यामि । नन्वावयो रक्षकत्वेऽपि रक्षकान्तरापेक्षा स्यादित्यत आह–नोऽस्माकमन्योन्यस्य रक्षा कर्तव्या तेन रक्षकान्तरापेक्षा नास्तीति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ९५ ॥ ९६ ॥

९७] ति० टी०–कुत एवमतियत्नोऽत आह–नहीति । असुकरा दुष्करा काचन कापि क्रियातिक्रान्ता न, किं त्वितः प्रभृति दुष्करक्रियारम्भ इति भावः, यद्वा काचन क्रिया-

१ प्रयतेति गो. पाठः । २ वसन्ति चेति गो. पाठः । ३ अदृष्टे इति गो. पाठः । ४ऽहमिति गो. पाठः । ५ त्वां च सीतां चेति गो. पाठः । ६ इहेति गो. पाठः ।

प्रणष्टजनसंबाधं क्षेत्रारामविवर्जितम् । विषमं च प्रपातं च वनमेष प्रवेक्ष्यति ॥ ९८ ॥
श्रुत्वा रामस्य वचनं प्रतस्थे लक्ष्मणोऽग्रतः । अनन्तरं च सीताया राघवो रघुनन्दनः ॥ ९९ ॥
गतं तु गङ्गापरपारमाशु रामं सुमन्त्रः सततं निरीक्ष्य ।
अध्वप्रकर्षाद्विनिवृत्तदृष्टिर्मुमोच बाष्पं व्यथितस्तपस्वी ॥ १०० ॥
स लोकपालप्रतिमप्रभावस्तीर्त्वा महात्मा वरदो महानदीम् ।
ततः समृद्धाञ्छुभसस्यमालिनः क्षणेन वैत्सान्मुदितानुपागमत् ॥ १०१ ॥
तौ तत्र हत्वा चतुरो महामृगान्वराहमृश्यं पृषतं महारुरुम् ।
आदाय मेध्यं त्वरितं बुभुक्षितौ वासाय काले ययतुर्वनस्पतिम् ॥ १०२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

ऽपायलक्षणाऽतिक्रान्तास्मानतिक्रम्य प्राप्ता चेत्ततो रक्षा सुकरा नहि 'प्रहृतं प्रहृतमेव' इति न्यायादित्यर्थः । अथेत्यादि सार्धश्लोक एकं वाक्यम् ॥ ९७ ॥

रा० टी०–नहीति । यया वैदेह्या असुकरा अतिप्रयत्नसाध्या काचनक्रिया नातिक्रान्ता कृतेत्यर्थः । सा वैदेही अथ गमनसमये वनवासस्य वनवाससंबन्धि दुःखं वनगमनजनितखेदं वेत्स्यति अयं खेदो निवार्य इति तात्पर्यम् ॥ ९७ ॥

९८–१००] ति० टी०–दुःखज्ञाने हेतुः—प्रणष्टेति । क्षेत्रं शाल्यादिक्षेत्रम् । विषमं निम्नोन्नतं प्रपातं गर्तादि तद्युक्तम् ॥ ९८–१०० ॥

गो० टी०–दुःखे हेतुं वदन्नाह–प्रनष्टेति । प्रनष्टा अतिसूक्ष्मत्वाददृष्टा जनसंबाधा जनगमनहेतुकमार्गतृणादिश्रेणी यस्मिंस्तत्प्रायो जनैरगम्यमित्यर्थः अत एव क्षेत्रादिभिर्विवर्जितमत एव विषमं सर्वत्र निम्नोन्नताभ्यां सहितमत एव प्रपातं पतनयोग्यगर्तादिविशिष्टं वनमयं गमिष्यति प्रवेक्ष्यति ॥ ९८ ॥

रा० टी०–श्रुत्वेति । अग्रतः अग्रे लक्ष्मणः प्रतस्थे सीतया लक्ष्मणमनुगच्छन्त्या इति शेषः रघुनन्दनो रामः ॥९९॥

रा० टी०–गतमिति । गतं प्राप्तं रामं सुमन्त्रः निरीक्ष्य अध्वप्रकर्षाद्रामाधिष्ठितमार्गस्य दूरत्वादेतोः विनिवृत्तदृष्टिः अत एव व्यथितः सन् बाष्पं मुमोच ॥ १०० ॥

गो० टी०–गतमिति । गङ्गायाः अपरं पारं प्रततं निरीक्ष्य अविच्छिन्नं निरीक्ष्येत्यर्थः । तपस्वी संतापयुक्तः तप संताप इति धातुः । प्रतपन्निति पाठे तापवानित्यर्थः । तपस्वी शोचनीयः अध्वप्रकर्षात् मार्गविप्रकर्षात् विनिवृत्तदृष्टिः विनिवृत्तदृष्टिव्यापारः ॥ १०० ॥

१०१] ति० टी०–वत्सान्वत्सदेशान् ॥ १०१ ॥

रा० टी०–स इति । महानदीं गङ्गां तीर्त्वा शुभसस्यमालिनः निर्बाधसस्यसमूहविशिष्टानत एव मुदितान्वत्स्यान् वत्स्यनामकदेशानुपागमत् । देशव्यवस्था तु गङ्गायमुनासङ्गमसमीपवर्त्यन्तर्वेदीदेशः प्रयागदेशः, ततः पश्चिमभागे वत्सकदेशः, ततः पश्चिमभागे पाञ्चालः, यमुनादक्षिणतीरे शूरसेनदेशः, तस्मात्पश्चिमतो मत्स्यदेश इत्यादि ग्रन्थान्तरादवगन्तव्यम् ॥ १०१ ॥

गो० टी०–स इति । वत्सान् वत्सदेशान् मत्स्यानिति पाठे लेखकप्रमादकृतः । इत्थं हि देशव्यवस्था दृश्यते गङ्गायमुनयोर्मध्ये प्रयागप्रदेशो वत्सदेशः । ततः पश्चिमभागे पाञ्चालः । यमुनादक्षिणतीरे शूरसेनदेशः । तस्मात्पश्चिमतो मत्स्यदेश इति । 'सलोकपालप्रतिमप्रभाववान्' इतिपाठः अन्यथा वृत्तभङ्गः स्यात् ॥ १०१ ॥

१०२] ति० टी०–ऋश्यादयो हरिणभेदाः काले सायंकाले मांसस्य च वन्याहारान्तर्गतत्वान्न दोषः मृगयाधर्मकत्वाच्च न मृगहनने दोषः । बुभुक्षितौ हत्वा तानादाय गतावित्यनेन भोजनमर्थसिद्धमेवेति नोक्तम् ॥ १०२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०–ताविति । तत्र वत्स्यदेशे वराहादीन् चतुरो महामृगान्हत्वा खेलनार्थं संताप्य बुभुक्षितौ तौ रामलक्ष्मणौ मेध्यं व्रतिभिर्भोक्तव्यं फलादिकमित्यर्थः आदाय गृहीत्वा वनस्पतिं वृक्षसमीपं ययतुः ॥ १०२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्विपञ्चाशत्तमः सर्गः ॥ ५२ ॥

गो० टी०–ताविति । चातुर्विध्यमेवाह–वराहमित्यादि । ऋश्यादयो हरिणभेदाः ऋश्यं पृषतं महारुरुं च आदाय स्वीकृत्येत्यर्थः । मेध्यमिति ऋश्यादिसर्वविशेषणं काले सायंकाले त्वरितत्वोक्तिः सायंकालत्वात् बुभुक्षितत्वाच्च । द्विवचनेन सीतां कुत्रचिद्वनस्पतिमूले निक्षिप्य मृगग्रहणार्थं गत्वा पुनरागताविति गम्यते ॥ १०२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

---

१ क्षेत्रेति गो. पाठः । २ प्रततमिति गो. पाठः । ३ प्रभाववानिति गो. पाठः । ४ क्रमेणेति गो. पाठः । ५ वत्स्यानिति रा. पाठः ।

त्रिपञ्चाशः सर्गः ।

न्यग्रोधमूलमुपाश्रितो बहुविधवचनचातुरीधुरीणो रामो दशरथमुपालभ्य कैकेयीतः कौसल्यादीनामनिष्टाशङ्कामुद्राव्य लक्ष्मणं निवितर्तयिषुः परं प्रायतत । लक्ष्मणस्तु नैवाद्यां त्वद्वियुक्तौ जीवाव इत्युक्तवैवावतस्थेऽथ रामस्तस्यानुवासं बाढमङ्गीचकार ।

स तं वृक्षं समासाद्य संध्यामन्वास्य पश्चिमाम् । रामो रमयतां श्रेष्ठ इति होवाच लक्ष्मणम् ॥ १ ॥
अद्येयं प्रथमा रात्रिर्याता जनपदाद्बहिः । या सुमन्त्रेण रहिता तां नोत्कण्ठितुमर्हति ॥ २ ॥
जागर्तव्यमतन्द्रिभ्यामद्यप्रभृति रात्रिषु । योगक्षेमौ हि सीताया वर्तेते लक्ष्मणावयोः ॥ ३ ॥
रात्रिं कथंचिदेवेमां सौमित्रे वर्तयामहे । अपवर्तामहे भूमावास्तीर्य स्वयमर्जितैः ॥ ४ ॥
स तु संविश्य मेदिन्या महार्हशयनोचितः । इमाः सौमित्रये रामो व्याजहार कथाः शुभाः ॥ ५ ॥
ध्रुवमद्य महाराजो दुःखं स्वपिति लक्ष्मण । कृतकामा तु कैकेयी तुष्टा भवितुमर्हति ॥ ६ ॥
सा हि देवी महाराजं कैकयी राज्यकारणात् । अपि न च्यावयेत्प्राणान्दृष्ट्वा भरतमागतम् ॥ ७ ॥
अनाथश्च हि वृद्धश्च मया चैव विना कृतः । किं करिष्यति कामात्मा कैकेय्या वशमागतः ॥ ८ ॥
इदं व्यसनमालोक्य राज्ञश्च मतिविभ्रमम् । काम एवार्थधर्माभ्यां गरीयानिति मे मतिः ॥ ९ ॥

१] ति० टी०–स तमिति ॥ १ ॥

रा० टी०–वासवृक्षप्राप्त्यनन्तरकालिकं रामवृत्तमाह–स इति । समासाद्य प्राप्य पश्चिमामुत्तरां संध्यामन्वास्य रामः लक्ष्मणमुवाच ॥ १ ॥

गो० टी०–स तमित्यादि । अत्र मृगमांसादनमस्तमयात् प्रागर्थसिद्धम् अन्वास्य उपास्य ॥ १ ॥

२] ति० टी०–आ जनपदादिति च्छेदः आ इति यातेत्यनेन संबध्यते अस्मज्जनपदाद्बहिर्देशेऽद्येयं या रात्रिरायाता प्राप्ता, येयं वनवासरात्रिषु प्रथमा सुमन्त्रेण रहिता च, तामिमां प्राप्य नोत्कण्ठितुं नगरादि स्मर्तुम् ॥ २ ॥

रा० टी०–तद्वचनमेवाह–अद्येति । जनपदात्स्वकीयजनसेवितदेशाद्बहिः याता प्राप्ता सुमन्त्रेण रहिता प्रथमा या इयं रात्रिः तां प्राप्य उत्कण्ठितुं पित्रादि स्मर्तुं नार्हसि ॥ २ ॥

गो० टी०–अद्येति । याता प्राप्ता अद्येत्यस्य नोत्कण्ठितुमर्हसीत्यनेनान्वयः । उत्कण्ठा दुःखस्मरणं तां प्रतीति शेषः ॥ २ ॥

३] ति० टी०–न विद्यते तन्द्री ययोस्ताभ्याम् इदभावो ह्रस्वत्वं चार्षम् । क्वचित्तु ' अतन्द्राभ्याम् ' इत्येव पाठः आवयोर्वर्तेतेऽस्मदायत्तावित्यर्थः । अप्राप्तप्राप्तियोगः लब्धपरिपालनं क्षेमः ॥ ३ ॥

रा० टी०–जागर्तव्यमिति । अतन्द्रिभ्यां तन्द्रारहिताभ्यामावाभ्यां जागर्तव्यं जागरितव्यम् तत्र हेतुः सीतायाः योगक्षेमौ आवयोरधीनौ इति शेषः वर्तेते तत्र योगः अलभ्यस्य वन्यफलादेर्लाभः, क्षेमः लब्धस्य स्वमर्यादारूपवस्तुनः परिपालनम् ॥ ३ ॥

गो० टी०–जागर्तव्यमिति । योगक्षेमं पालनमिति यावत्, आवयोर्वर्तेते अस्मदधीनमित्यर्थः ॥ ३ ॥

४] ति० टी०–कथंचिदेवेमाम्, उटजादिनिर्माणाभावात् स्वयमर्जितैः तृणपर्णादिभिरिति शेषः । अपवर्तामहे यथाकथंचिच्छयनं कुर्मः ॥ ४ ॥

रा० टी०–रात्रिमिति । हे लक्ष्मण ! कथंचित्सुखाभावेऽपीत्यर्थः इमां रात्रिं वर्तयामहे व्यतीतयामः सुखाभावे हेतुः भूमौ पर्णशालारहितस्थले स्वयमर्जितैः तृणादिभिः आस्तीर्य अपवर्तामहे तिष्ठामः 'उपावर्तामहे' इति भूषणपाठः ॥ ४ ॥

गो० टी०–रात्रिमिति । कथंचिदेवेमामिति प्राथमिकत्वादिति भावः इमां शय्यासंपादनात् पूर्वमेव प्राप्तां स्वयमार्जितैः तृणपर्णैरिति शेषः । उपावर्तामहे शयिष्यामहे वर्तमानसामीप्ये वर्तमानवद्भावः ॥ ४ ॥

५] ति० टी०–कथा वार्ताः ॥ ५ ॥

रा० टी०–रामविशेषोक्तिं वर्णयितुमाह–स इति । स रामः इमाः कथाः सौमित्रये व्याजहार कथयामास ॥ ५ ॥

गो० टी०–स इति । संविश्य शयनं संकल्प्योपेत्य शयनस्य सर्गान्ते वक्ष्यमाणत्वात् कथाः वार्ताः ॥ ५ ॥

६] ति० टी०–कृतकामा संपन्नमनोरथा ॥ ६ ॥

रा० टी०–तत्कथनमेवाह–ध्रुवमिति । अथ अस्मिन्समये दुःखं यथा स्यात्तथा महाराजः स्वपिति ध्रुवं निश्चितमेतत् अतः कृतकामा प्राप्तस्वाभीष्टवरापि कैकेयी किं तुष्टा भवितुमर्हति नेत्यर्थः । तुः किमर्थे ॥ ६ ॥

गो० टी०–ध्रुवमिति । कृतकामा फलितेच्छा ॥ ६ ॥

७–९] ति० टी०–राज्यकारणान्महाराज्यपदाभिषेककारणात्प्राणानपि न च्यावयेत् अपि तु च्यावयेदित्यर्थः ॥ ७–९ ॥

रा० टी०–सेति । प्राणान्प्राणसदृशास्मद्रक्षक हे लक्ष्मण! आगतं भरतम न दृष्ट्वा भरतकर्तृकागमनमदृष्ट्वेत्यर्थः किंच अ न-

१ अर्हसीति गो. रा. पाठः । २ योगक्षेमं……वर्तते इति गो. पाठः । ३ उपावर्तामहे इति गो. पाठः । ४ आर्जितैरिति गो. पाठः । ५ कैकेयीवशमागत इति गो. पाठः ।

को ह्यविद्वानपि पुमान्प्रमदायाः कृते त्यजेत् । छन्दानुवर्तिनं पुत्रं तातो मामिव लक्ष्मण ॥ १० ॥
सुखी बत सभार्यश्च भरतः केकयीसुतः । मुदितान्कोसलानेको यो भोक्ष्यत्यधिराजवत्॥ ११ ॥
स हि राज्यस्य सर्वस्य सुखमेकं भविष्यति । तातेऽतु वयसातीते मयि चारण्यमाश्रिते ॥ १२ ॥
अर्थधर्मौ परित्यज्य यः काममनुवर्तते । एवमापद्यते क्षिप्रं राजा दशरथो यथा ॥ १३ ॥
मन्ये दशरथान्ताय मम प्रव्राजनाय च । कैकेयी सौम्य संप्राप्ता राज्याय भरतस्य च ॥ १४ ॥

आगतमागमनं यस्य तं भरतं दृष्ट्वा ज्ञात्वा भरतो नागत इति विचार्येत्यर्थः आगतमित्यत्र निषेधार्थकमकारं प्रक्षिप्येमौ अर्थौ राज्यकरणाद्राज्यकरणहेतुकभरतानयनार्थं महाराजं तु न च्यावयेत्प्रेषयेत् अस्माद्वियोगदुःखितत्वादिति तात्पर्यम् । तेन सुमन्त्रमेव प्रेषयितेति व्याख्यातम् ॥ ७ ॥

रा० टी०–अनाथ इति । अनाथः सर्वनियन्तृत्वेन नाथान्तररहितः चक्रवर्तीत्यर्थः । वृद्धः ज्ञानवयोभ्यामधिकः अत एव वशमतिकान्तिमागतो नित्यं प्राप्तोऽपि महाराजः कैकेय्या मन्थरया मया विना कृतः अत एव कामात्मा कामः अभिषेकविषयिणीच्छा आत्मनि मनस्येव यस्य सः दुःखी सन्नित्यर्थः किं करिष्यति एतेन तत्कृत्यं विचारणीयमिति ध्वनितम् ॥८॥

गो० टी०–सा हीति । राज्यकारणात् राज्यस्थैर्यकारणात् । ननु न तेम्बा मध्यमा तात गर्हितव्या कथंचन । तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुर्विति वदतो रामस्य सर्वपुरुषार्थनिस्पृहस्य कथमेवंविधाः कैकेयीनिन्दाप्रधानाः स्वालापगर्भा उक्तयो युज्यन्ते । उच्यते अयोध्यामित एव त्वं काल्ये प्रविश लक्ष्मणेति वक्ष्यति अतस्तन्मतमनुवर्तितुमेवमुक्तमिति शेयम् ॥ ७ ॥ ८ ॥

रा० टी०–इदमिति । कामे अभिषेकविषयकोत्कटेच्छायां सत्यां मतिविभ्रमं मतिविभ्रमकारकमिदं वियोगजं व्यसनं दुःखमालोक्य अनुभूय विद्यमानस्यापि राज्ञः अर्थधर्माभ्यां गरीयान्गरीयस्त्वमस्ति अर्थधर्मयोर्नैव त्याग इत्यर्थः इति मे मतिः निश्चयः तेन तस्य धैर्यातिशयवत्त्वं मर्यादापालकत्वं च ध्वनितम् ॥ ९ ॥

गो० टी०–इदमिति । व्यसनं मदीयं मतिविभ्रमम् अर्थधर्मौ विहाय कामैकसेवित्वं पाठभेदः 'व्यसनं मदीयम्' अनेन धर्मस्याप्राधान्यमुक्तं मतिविभ्रमम् अतिनिस्पृहत्वम् अनेनार्थाप्राधान्यमुक्तम् ॥ ९ ॥

१०] ति० टी०–कामस्य गरीयस्त्वं साधयति–को ह्रीत्यादिना । अत्यज्ञोऽपि कः पुमान्मामिव छन्दानुवर्तिनमाज्ञाकारिणं पुत्रं प्रमदायाः कृते प्रमदातोषनिमित्तं त्यजेत्, किं पुनः सर्वज्ञो राजा तस्मात्सर्वतः प्रबलः काम इति भावः॥१०॥

रा० टी०–तस्य धैर्यातिशयवत्त्वं प्रकाशयन्नाह–क इति । तातो दशरथो मामिव अविद्वान् अरसज्ञोऽपि कः पुमान् कृते परोपकाराय छन्दानुवर्तिनमाज्ञाकारिणं पुत्रं प्रमदायाः अतिहर्षहेतुभूतायाः पुर्यास्त्यजेत् पृथक् कुर्यात् न कोपीत्यर्थः । कृते इत्यत्र विनापि प्रत्ययमित्युपपदलोपः ॥ १० ॥

गो० टी०–कामस्य गरीयस्त्वमुपपादयति–क इति । छन्दानुवर्तिनं स्वेच्छानुवर्तिनम् ॥ १० ॥ ११ ॥

११] ति० टी०–एवं वादो हि भगवतो लक्ष्मणमतिपरीक्षार्थमयोध्यां त्वं प्रविशेति लक्ष्मणं प्रति वक्तुं तदाशयं ज्ञातुं च न वास्तव इति बोध्यम् ॥ ११ ॥

रा० टी०–इदानीं भरतस्यापि दुःखातिशयो भवितेति बोधयन्नाह–सुखीति । एकः मया रहितः सभार्यः केकयीसुतो यो भरतः सः सुखी सन् अधिराजवत्कोशलान् बत किं भोक्ष्यते पालयिता नेत्यर्थः ॥ ११ ॥

१२] ति० टी०–एकं मुख्यं सुखम् अनुभवितेति शेषः ईदृशो भविष्यति । ' सुखमेकः ' इति वा पाठः एक एव राजा भविष्यतीत्यर्थ इति तीर्थः ॥ १२ ॥

रा० टी०–ननु तर्हि राज्याधिकारे एव न तिष्ठेदित्यत आह–स इति । तातो वयसातीते अतिवयस्के सतीत्यर्थः स वशिष्ठादिभिर्बोधितो भरतः सर्वस्य राज्यस्य सर्वप्रजाभ्य इत्यर्थः एकमल्पं प्राणरक्षामात्रजं सुखं भविष्यति प्रापयिष्यति प्राप्त्यर्थकोऽन्तर्भावितणिजर्थश्च भवतिः ॥ १२ ॥

गो० टी०–स हीति । सुखमेकम् अद्वितीयं प्रधानभूतमित्यर्थः ॥ १२ ॥

१३–१४] ति० टी०–यो भरतः काममनुवर्तते स यथा राजा दशरथो विपदमापन्न एवं विपदमापद्यते प्राप्नोतीत्यर्थः अन्ये तु राजा दशरथो यथा राजत्वमापन्नस्तथा भरतो राजत्वमापद्यते इत्यर्थमाहुः ॥ १३ ॥ १४ ॥

रा० टी०–इदानीमिदं वियोगजनितदुःखं न दशरथयोग्यमिति बोधयन्नाह–अर्थेति । राजा दशरथो यथा येन प्रकारेण क्षिप्रं दुःखं प्राप्त इति शेषः एवमनेन प्रकारेण दुःखं यः पुरुषः अर्थधर्मौ परित्यज्य कामं स्वेच्छामनुवतत सः आपद्यते एतेन अकारणकमिदं दुःखं शीघ्रं नष्टेति सूचितम् ॥ १३ ॥

गो० टी०–प्रसङ्गात्केवलं कामं निन्दति–अर्थधर्माविति । दशरथो यथा व्यसनीति शेषः ॥ १३ ॥

रा० टी०–इदानीं कैकेय्यां दुःखातिशयोऽस्तीति बोधयन्नाह–मन्य इति । मम प्रव्राजनं निर्वर्तयितुं दशरथान्ताय दशरथसिद्धान्तं निर्वर्तयितुं भरतस्य राज्याय स्वनियुक्तत्वम्-

१ तत इति गो. पाठः । २ सभार्य इति गो. रा. पाठः । ३ चेति गो. पाठः । ४ आस्थिते इति गो. पाठः ।

अपीदानीं तु कैकेयी सौभाग्यमदमोहिता । कौसल्यां च सुमित्रां च सा प्रबाधेत मत्कृते ॥ १५ ॥
मातास्मत्कारणादेवी सुमित्रा दुःखमावसेत् । अयोध्यामित एव त्वं काले प्रविश लक्ष्मण ॥ १६ ॥
अहमेको गमिष्यामि सीतया सह दण्डकान् । अनाथाया हि नाथस्त्वं कौसल्याया भविष्यसि ॥ १७ ॥
क्षुद्रकर्मा हि कैकेयी द्वेषादन्यायमाचरेत् । परिदद्याद्धि धर्मज्ञ गरं ते मम मातरम् ॥ १८ ॥
नूनं जात्यन्तरे तात स्त्रियः पुत्रैर्वियोजिताः । जनन्या मम सौमित्रे तदेवेदमुपस्थितम् ॥ १९ ॥
मया हि चिरपुष्टेन दुःखसंवर्धितेन च । विप्रयुज्यत कौसल्या फलकाले धिगस्तु माम् ॥ २० ॥
मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम् । सौमित्रे योऽहमम्बाया दद्मि शोकमनन्तकम् ॥ २१ ॥
मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण सारिका । यत्तस्याः श्रूयते वाक्यं शुक पादमरेर्दश ॥ २२ ॥

लक्ष्मरतसंबन्धिराज्यपालनाय विषमाना कैकेयी संतप्ता अस्मद्वियोगजदुःखाक्रान्तास्तीति मन्ये अत एव मत्कृते हर्षध्वंसे सति सौभाग्यमदमोहिता अहमतीव पतिप्रियेति सौभाग्यविषयको यो मद्धर्षस्तेन अमोहिता सा कैकेयी कौशल्यादीन् अ न प्रबाधेत । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–मन्य इति । संप्राप्तेत्यत्रेतिकरणं बोध्यम् ॥ १४ ॥

१५] ति० टी०–मत्कृते मम दुःखसंपादननिमित्तम् ॥ १५ ॥

गो० टी०–अपीति । कैकेयी न संप्रबाधेत इत्यत्र काकुः मत्कृते मत्संबन्धादित्यर्थः ॥ १५ ॥

१६] ति० टी०–माता तवेति शेषः । काले प्रातःकाले उत्थायेत्यर्थः ॥ १६ ॥

रा० टी०–नन्वेतत्स्मरणस्य इदानीं किं प्रयोजनमित्यत आह–मातेति । माताः कौशल्यादयः सुमित्रा च अस्मत्कारणादस्मदर्थमदुःखमावसेत्प्राप्नुयात् इतः हेतोः काले प्रभातसमये अयोध्यां प्रविश गच्छ सुमित्राया मातृग्रहणेन ग्रहणेऽपि पुनरुपादानं गोबलीवर्दन्यायेन वैशिष्ट्यबोधनाय ॥ १६ ॥

गो० टी०–मा स्मेति । इत एव समीपप्रदेशादेव ॥ १६ ॥

१७] ति० टी०–नाथो रक्षकः ॥ १७ ॥

रा० टी०–अहमिति । एकः सहायान्तररहितः नाथो रक्षकः ॥ १७ ॥

गो० टी०–अहमिति । नाथः रक्षकः ॥ १७ ॥

१८] ति० टी०–क्षुद्रकर्मा कैकेयी द्वेषादन्यायमाचरेत् हि निश्चितम् । तदेवाह–हे धर्मज्ञ ! ते मम च मातरं सुमित्रां कौसल्यां चोद्दिश्य गरं विषं हि तु दद्यात् ॥ १८ ॥

रा० टी०–मन्थरातोऽवश्यं रक्षा कर्तव्येति बोधयन्नाह–क्षुद्रेति । कैकेयी तदासौ मन्थरा द्वेषात्सर्वनिष्टप्रीत्यभावादेतोः क्षुद्रकर्मा सती अन्यायमाचरेत् । तदेवाह–गरं विषम् ॥ १८ ॥

गो० टी०–क्षुद्रकर्मेति । "डाबुभाभ्याम्" इति डाप् द्वेष्यं द्वेषार्हं स्वकृतद्वेषोचितमित्यर्थः । अन्याय्यम् अवमानमित्यर्थः । 'द्वेषात्' इति च पाठः । परिदद्याः परिदानं नाम रक्ष्यतया प्रदानम् ॥ १८ ॥

१९] ति० टी०–जात्यन्तरे जन्मान्तरे एतत्पुत्रवियोगदुःखम् ॥ १९ ॥

रा० टी०–ननु हिंसाजनकं कर्म कथं करिष्यतीत्यत आह–नूनमिति । जात्यन्तरे मनुवंशातिरिक्तक्षत्रियजातौ स्त्रियः पुत्रैरपत्यैर्वियोजिताः अत्यन्तवियोगं प्राप्ता भवन्ति बालान् घ्नन्तीत्यर्थः तत्तस्माद्धेतोः एतदुपस्थितं दुःखं वारयेति शेषः ॥ १९ ॥

गो० टी०–नूनमिति । कस्मिंश्चित् जात्यन्तरे कस्मिंश्चित् जन्मनि एतत् पुत्रवियोजनम् ॥ १९ ॥

२०] ति० टी०–फलकाले सुखानुभवकाले ॥ २० ॥

रा० टी०–मयेति । चिरपुष्टेन चिरं पोषितेन अत एव दुःखसंवर्धितेन कदा अयं संवर्धितो भविष्यतीति संभावनामूलकदुःखाभासं यथा स्यात्तथा संवर्द्धिं प्रापितेन मया फलकाले विप्रायुज्यत अतः मां वियोगसंपत्तिं धिक् ॥ २० ॥

गो० टी०–मयेति । फलकाले पुत्रोत्पत्तिफलस्य मातृशुश्रूषणस्य काले ॥ २० ॥ २१ ॥

२१] ति० टी०–कुत इत्यतः–सौमित्रे इति ॥ २१ ॥

रा० टी०–मेति । यतः योऽहम् अनन्तकमनिवानिवार्यम् अम्बायाः मातुः शोकं दद्मि अतः ईदृशं मत्सदृशवियोगहेतुकं सीमन्तिनी स्त्री मा स्म जनयेत् ॥ २१ ॥

२२] ति० टी०–हे लक्ष्मण ! अम्बया पालिता कृतवचनशिक्षा च सारिका मत्तोऽम्बायां प्रीतिविशिष्टा अधिकप्रीतियुक्ता इति मन्ये यद्यस्मात्तस्याः सारिकायाः सकाशादेवं शत्रुनिग्रहविषयम् 'शुक ! पादमरेर्दश' इति वाक्यं श्रूयते कौसल्ययेति शेषः अस्मत्तस्तु तदपि नेति भावः । अत्रेदं वाक्यम्–अरेर्बडालस्य पादं हे शुक ! दशेत्यर्थकतया लोकप्रसिद्धमरेर्मत्पालयितुः कौसल्यायाः शत्रोः पादं दशेत्यर्थकतया रामेण योजितमिति वक्रोक्तिरलंकारः ॥ २२ ॥

रा० टी०–मन्ये इति । सा मात्रा कौशल्यया पालिता सारिका पक्षिविशेषः । मत्तोऽधिका प्रीतिविशिष्टा मातृविषयस्नेहयुक्ता मातृप्रमोदजनिकेत्यर्थः यद्यस्माद्धेतोः शुक पाद-

---

१ नेति गो. पाठः । २ संप्रबाधेतेति गो. पाठः । ३ मा स्मेति गो. पाठः । ४ काल्ये इति गो. पाठः । ५ द्वेष्यमन्याय्यमिति गो. पाठः । ६ परिदद्या हि धर्मज्ञे भरते इति गो. पाठः । ७ कस्मिंश्चिदिति गो. पाठः । ८ तत्पादेतदिति गो. पाठः । ९ विप्रायुज्यतेति गो. रा. पाठः । १० शारिकेति गो. पाठः ।

शोचन्त्याश्चाल्पभाग्यायां न किंचिदुपकुर्वता । पुत्रेण किमपुत्राया मया कार्यमरिंदम ॥ २३ ॥
अल्पभाग्या हि मे माता कौसल्या रहिता मया । शेते परमदुःखार्ता पतिता शोकसागरे ॥ २४ ॥
एको ह्यहमयोध्यां च पृथिवीं चापि लक्ष्मण । तरेयमिषुभिः क्रुद्धो ननु वीर्यमकारणम् ॥ २५ ॥
अधर्मभयभीतश्च परलोकस्य चानघ । तेन लक्ष्मण नाद्याहमात्मानमभिषेचये ॥ २६ ॥

मरेर्दशेति तस्याः सारिकायाः वाक्यं श्रूयते नात्रेति शेषः तदर्थस्तु हे शुक! अरेः कौशल्याशत्रोः पादं त्वं दशेति सा तु वचनश्रवणेनापि संतोषयति अहं तु तत्राप्यशक्त इति तात्पर्यम् ॥ २२ ॥

गो० टी०–अम्बया वर्धिततिर्यग्जन्तुकृतप्रीतिमात्रमपि न मया कृतमित्याह–मन्य इति । हे लक्ष्मण ! सा पूर्वमावाभ्यामनुभूता शारिका मत्तः अस्मदपेक्षया प्रीतिविशिष्टेति मन्ये प्रीत्याऽधिकेति मन्ये मदपेक्षया अधिकां प्रीतिं कौसल्याया जनयतीत्यर्थः, यद्वा मदपेक्षया कौसल्यायामधिकप्रीतियुक्तेत्यर्थः। उभयत्र हेतुमाह–यस्या इति । यस्याः शारिकायाः हे शुक! अरेः अरिभूतस्य बिडालस्य पादं दश खण्डय इति तत् अनुभूतसदृशं प्रीतिसंजननं वाक्यं श्रूयते अम्बयेति शेषः । लोके हि काचित्पोषिता शारिका समीपवर्तिनं शुकं प्रति बिडालं दशदशेति कूजन्ती दृश्यते, यद्वा अरेः कौसल्याशत्रोः पादं दशेति वाक्यं श्रूयते । पोषितत्वाविशेषेऽपि शारिकावदरिनिवर्तनवाचमप्यनुक्तवतो मम जन्म धिगित्यर्थः । अत्र प्रकरणबलेन भगवद्भजनादप्याचार्यसमाश्रयणस्य सुकरोपायत्वं दर्शितं भवति ' न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः ' इत्युक्तेः । तथाहि शारिकेत्यनेन ज्ञानकर्मरूपपक्षद्वयवानाचार्यो लक्ष्यते स्त्रीलिङ्गेन स्त्रीप्रायमितरत्सर्वमित्युक्तं भगवत्पारतन्त्र्यमुच्यते । आचार्यो भगवदपेक्षया मोक्षानन्दजननेऽधिकसुकरोपाय इत्यर्थः । ' पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम् ' इति वचनात् । कोऽयमाचार्य इत्यत आह–यस्या इति । यस्या इति पञ्चमी । यस्मात् तत् गुरुपरंपरया प्राप्तं वाक्यं रहस्यमन्त्ररूपं श्रूयते। कीदृशं वाक्यमित्यत्राह–शुकेति । हे शुक ! शुकसमानवर्ण भगवन् अरेः विरोधिभूतस्य संसारस्य पादमाधारं संसारबीजभूताहंकारममकारावित्यर्थः । ' अनात्मन्यात्मबुद्धिर्या अस्ते स्वमिति या मतिः । अविद्यातरुसंभूतिबीजमेतद्विधा स्थितम् ' इत्युक्तेः । दश निवर्तयेत्यर्थः । एवंरूपं वाक्यं यत्सकाशात् श्रूयते स मत्तः श्रेष्ठ इति संबन्धः । प्रकरणेनाप्ययमर्थोऽभिव्यज्यते तथाहि अयोध्यापुरपर्यायाद्वैकुण्ठान्निर्गत्य विरजां तीर्त्वा संसारकाननं प्रविश्य । " द्वासुपर्णा स या सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति" इति वेदान्तोक्तप्रक्रियया शरीराख्यमेकं वृक्षं जीवेन सहास्थाय "ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये" इत्युक्तरीत्या कर्मफलं भोजयन् स्वानुभवलाभबद्धिष्टसूरिजनोत्कण्ठया वर्तमानः संसारिषु स्वागमनप्रयोजनालाभेन चरमोपायनिष्ठामेव परमोपायं निश्चिकायेत्युच्यते ॥ २२ ॥

२३] ति० टी०–अपुत्रायाः पुत्रकृतप्रयोजनरहितायाः॥२३॥

रा० टी०–शोचन्त्या इति । अल्पभाग्यायाः अल्पभाग्यासदृश्याः अपुत्रायाः प्रव्राजितपुत्रवत्याः मातुः न किंचिदुपकुर्वता वियोगजदुःखमशमयतेत्यर्थः मया किं कार्यम् ॥२३॥

गो० टी०–शोचन्त्या इति । अल्पभाग्यायाः अत एव अपुत्रायाः पुत्रकृतप्रयोजनरहितायाः अत एव शोचन्त्याः अम्बायाः किंचिदपि नोपकुर्वता मया पुत्रेण किं कार्यं किं प्रयोजनम् ॥ २३ ॥

२४] ति० टी०–शेते इदानीमिति शेषः ॥ २४ ॥

रा० टी०–अल्पभाग्येति । यतो मया रहिता अत एव अल्पभाग्या तत्सदृशी अत एव परमदुःखार्ता अत एव शोकसागरे पतिता मे माता शेते आस्ते ॥ २४ ॥

गो० टी०–न केवलं प्रयोजनालाभः प्रत्युत दुःखितैवेत्याह–अल्पभाग्येत्यादिश्लोकेन ॥ २४ ॥

२५] ति० टी०–नन्वेवं हृदये शोकस्तर्हि मया सर्वनिवारणसहायेनोक्तं राज्यमेव कुतो नाङ्गीकृतमिति चेन्न, राज्यकरणे त्वदपेक्षापि मे न, किंत्वधर्मभयादेव मया तन्नाङ्गीकृतमित्याह–एक इत्यादि । तरेयम् निरस्तारातिकां कर्तुं शक्त इत्यर्थः । ननु वीर्यमकारणं परलोकहितेऽपि तु धर्म एवेति शेषः ॥ २५ ॥

रा० टी०–ननु भवदमनमन्तरा कथं शत्रुविनाशः तं विना कथं तस्याः परमसुखमिति सुखार्थमेव गच्छसीत्यत आह–एक इति । अयोध्यां नित्यं प्राप्त इति शेषः एकोऽहं पृथिवीं निखिलपृथिवीशत्रून् चकारेण लोकान्तरशत्रूनपि क्रुद्धः सन्निषुभिः तरेयम्। ननु तर्हि किमर्थं गम्यत इत्यत आह–अकारणं विशेषकारणरहितं वीर्यं वीर्यहेतुकशत्रुनाशो न भवति तु निश्चितमेतत् ॥ २५ ॥

गो० टी०–तर्हि मातुर्दुःखनिवारणाय राज्यमाक्रम्यतामित्यत्राह–एक इत्यादिश्लोकद्वयेन । तरेयं तरितुं शक्तवृयामाक्रमितुं शक्तवृयामित्यर्थः। तर्हि किमर्थं तथा न कृतमित्यत आह–ननु वीर्यमकारणमिति । धर्महानिकरे कृत्ये वीर्यं साधकत्वेन नावलम्बनीयं खल्वित्यर्थः ॥ २५ ॥

२६] ति० टी०–अधर्मात्कैकेय्यै पितृदत्तवरपालनप्रति-

१ शोचन्त्या अल्पभाग्याया इति गो. पाठः ।

एतदन्यच्च करुणं विलप्य विजने बहु । अश्रुपूर्णमुखो [1]दीनो निशि तूष्णीमुपाविशत् ॥ २७ ॥
[2]विलापोपरतं रामं गतार्चिषमिवानलम् । समुद्रमिव निर्वेगमाश्वासयत लक्ष्मणः ॥ २८ ॥
ध्रुवमद्य पुरी राम अयोध्याऽऽयुधिनां वर । निष्प्रभा त्वयि निष्क्रान्ते गतचन्द्रेव शर्वरी ॥ २९ ॥
नैतदौपयिकं राम यदिदं परितप्यसे । विषादयसि सीतां च मां चैव पुरुषर्षभ ॥ ३० ॥
न च सीता त्वया हीना न चाहमपि राघव । मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ॥ ३१ ॥
नहि तातं न शत्रुघ्नं न सुमित्रां परंतप । द्रष्टुमिच्छेयमद्याहं स्वर्गं चापि त्वया विना ॥ ३२ ॥

शाश्वतिरूपादधर्माद्भीतः अत एव परलोकस्य च नाशाद्भीत इति शेषः ॥ २६ ॥

रा० टी०—नन्वपराधविशेषाभावेऽपि शत्रुत्वेन प्रसिद्धा हन्तव्या एवेत्यत आह—अधर्मभयभीतः संग्रामादन्यत्र रिपूणामपि वधः अधर्मः इति भयेन भीतः परलोकस्य दूरशत्रुजनस्य हन्ता नास्मीति शेषः तेन हेतुना नाभिषेचये ॥ २६ ॥

गो० टी०—वीर्यस्यानवलम्बने हेतुमाह—अधर्मेति । अधर्मभयभीतः अधर्मादुत्पन्नं भयं लोकापवादः तस्माद्भीतः परलोकस्य नाशात् भीत इति शेषः अहमिति च शेषः । तेनाधर्मपरलोकभीतत्वेन हेतुना ॥ २६ ॥

२७-२८] ति० टी०—अन्यच्च एतज्जातीयम् । विजने इत्यनेन स्वविलापेन लोकदुःखाभावो ध्वनितः । अश्रुपूर्णमुखत्वं मदवल्लोकन्यवहारानुसारेणेति बोध्यम् ॥ २७ ॥ २८ ॥

रा० टी०—एतदिति । अदीनः नित्यं दीनतारहितोऽपि रामः विलप्य विविधमुक्त्वा उपाविशत् ॥ २७ ॥

गो० टी०—एतदिति । एतत्पूर्वोक्तमर्थजातम् अन्यदित्यनेन तादात्विकविलापस्य वाचामगोचरत्वमुक्तं विजने वन इति शोकहेतुत्वोक्तिः उपाविशत् अतिष्ठदित्यर्थः ॥ २७ ॥

रा० टी०—विलापेति । आश्वासयदाश्वासनफलकविज्ञापनामकरोत् ॥ २८ ॥

गो० टी०—विलप्येति । विलप्योपरतमित्यनेन मध्ये समाश्वासानर्हत्वोक्तिः ॥ २८ ॥

२९] ति० टी०—आ युधिनामिति च्छेदः ॥ २९ ॥

रा० टी०—तद्विज्ञापनामेवाह—ध्रुवमिति । आयुधिनां वर श्रेष्ठ ! शर्वरी रात्रिः एतेन त्वया विना मद्गमनमनर्थकमिति ध्वनितम् ॥ २९ ॥

गो० टी०—ध्रुवमिति । आयुधिनाम् आयुधवतां वर श्रेष्ठेत्यर्थः । निष्प्रभा भवेदिति शेषः ॥ २९ ॥

३०] ति० टी०—औपयिकं युक्तं यतस्त्वत्परितापेन सीताया मम च विषादो भवति ॥ ३० ॥

रा० टी०—नेति । यदिदं परितप्यसे शोचसि तदौपयिकं युक्तं न अत एव विषादयसि दुःखयसि ॥ ३० ॥

गो० टी०—नैतदिति । परितप्यस इति यदिदमस्ति एतत् परिदेवनं नौपयिकं न युक्तम् 'युक्तमौपयिकम्' इत्यमरः । "उपायाद्भस्वश्च" इति ठक् आकारस्य ह्रस्वश्च । अयुक्तत्वमेवाह—विषादयसीति । पुरुषर्षभेत्यनेन पुरुषधौरेयस्य तव नैतद्युक्तम् अनेन विलापो न युक्त इत्यर्थः ॥ ३० ॥

३१] ति० टी०—अथ गन्तव्यमिति यदुक्तं तदुत्तरं सीतावदहमप्यवर्जनीय इति वक्तुमात्मनः सीतासाधर्म्यमाह—न चेति । त्वया हीना सीता त्वया हीनोऽहं च जलादुद्धृतौ मत्स्याविव न जीवावो न जीवाव इति जीवाव इत्यस्याद्दृश्या नन्द्ययान्वयः । जीवनाभावस्य सर्वथा सत्यत्वप्रतिपादनाय द्विरुक्तिः ॥ ३१ ॥

रा० टी०—मन्मात्रप्रेषणं सर्वथा अयुक्तमिति बोधयन्नाह—न चेति । त्वया हीना सीता अहं च न जीवावो न जीवावः नन्द्ययेन क्रियाऽऽवर्त्यते ॥ ३१ ॥

गो० टी०—अयोध्यामित एव त्वं काल्ये प्रविश लक्ष्मणेति यदुक्तं तत्रोत्तरमाह—न च सीतेति । त्वया हीना सीता च न न जीवतीत्यर्थः । त्वद्विहीनोऽहमपि न च । च एवकारार्थः । अहमपि न जीवाम्येवेत्यर्थः । दृष्टान्तार्थं सीताग्रहणम्, यद्वा सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीदिति सीता पुरुषकारेण शरणागतिकरणात् स्वस्य शरणागतिफलाभावे पुरुषकारभूता सीतापि नेति भावः । अपि जीवावः यदि जीवावः तदा जलादुद्धृतौ मत्स्याविव मुहूर्तं स्वल्पकालं जीवावः यथा जलोद्धृतौ मत्स्यौ यावज्जलसंसर्गं जीवित्वा तद्विलये विनश्यतः तथा आवामपि त्वद्वचनहृदयज्ञानपर्यन्तमिति भावः । तथा वक्ष्यति सुन्दरकाण्डे 'न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्ति मया समो वा । तावद्ध्यहं दूत जिजीविषेयं यावत्प्रवृत्तिं शृणुयां प्रियस्य' इति ॥ ३१ ॥

३२] ति० टी०—अत्र नोत्कण्ठितुमर्हसीत्यस्योत्तरम्—नहीति । नन्वयस्य नेच्छेयं नेच्छेयं नेच्छेयमिति प्रकारेणेच्छेयमिति पदाद्दृश्यान्वयः स्वर्गं चाप्यथ प्राप्तं द्रष्टुं त्वया विना नेच्छेयम् किमुत गन्तुमिति भावः ॥ ३२ ॥

रा० टी०—नहीति । तातादिकं स्वर्गं साकेतं च त्वया विना द्रष्टुं नेच्छेयम् एतेन नोत्कण्ठितुमर्हसीत्यस्योत्तरं जातम् ३२॥

गो० टी०—अथ नोत्कण्ठितुमर्हसीत्युक्तस्योत्तरमाह—नहि तातमित्यादिश्लोकेन ॥ ३२ ॥

१ वने इति गो. पाठः । २ राम इति गो. पाठः । ३ विलप्योपरतमिति गो. पाठः । ४ राजर्षिति गो. पाठः । ५ वेति गो. पाठः ।

ततस्तत्र समासीनौ नातिदूरे निरीक्ष्य ताम् । न्यग्रोधे सुकृतां शय्यां भेजाते धर्मवत्सलौ ॥ ३३ ॥
स लक्ष्मणस्योत्तमपुष्कलं वचो निशम्य चैवं वनवासमादरात् ।
समाः समस्ता विदधे परंतपः प्रपद्य धर्मं सुचिराय राघवः ॥ ३४ ॥
ततस्तु तस्मिन्विजने महाबलौ महावने राघववंशवर्धनौ ।
न तौ भयं संभ्रममभ्युपेयतुर्यथैव सिंहौ गिरिसानुगोचरौ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ।

सीतालक्ष्मणाभ्यां संप्रस्थितो रामः साय गङ्गायमुनासंभेदसंनिहितभरद्वाजाश्रमं प्राप । भरद्वाजो राममभ्यर्च्यावासे चित्रकूटमस्तौषीत् चित्रकथासंलापैरात्रिमपनीयाथ प्रभाते चित्रकूटं प्रस्थितं रामं मुनिरनुजज्ञे ।

ते तु तस्मिन्महावृक्षे उषित्वा रजनीं शुभाम् । विमलेऽभ्युदिते सूर्ये तस्मादेशात्प्रतस्थिरे ॥ १ ॥
यत्र भागीरथीं गङ्गां यमुनाभिप्रवर्तते । जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद्वनम् ॥ २ ॥

३३] ति० टी०–ततो लक्ष्मणवचनानन्तरं तत्र तस्मिन्नेव न्यग्रोधमूले समासीनौ सीतारामौ न्यग्रोधमूले स्वावस्थानदेशादतिसमीपे लक्ष्मणेन सुकृतां सम्यग्रचितां शय्यां भेजाते वत्सला च वत्सलश्च वत्सलौ 'पुमान्स्त्रिया' इत्येकशेषः ॥३३॥

रा० टी०–तत इति । ततः लक्ष्मणोक्तिश्रवणानन्तरं तत्र न्यग्रोधे सुखासीनौ धर्मवत्सलौ सीतारामौ नातिदूरे समीपे इत्यर्थः सुकृतां लक्ष्मणेन रचितां शय्यां निरीक्ष्य भेजाते तस्थतुः ॥३३॥

गो० टी०–तत इति । ततः लक्ष्मणवचनानन्तरं तत्र पूर्वाश्रितवृक्षमूले भुक्तिस्थाने सुखासीनौ सुखोपविष्टौ सुखासीना च सुखासीनश्च सुखासीनौ सर्वत्र " पुमान् स्त्रिया " इत्येकशेषः सीतारामौ न्यग्रोधे न्यग्रोधमूले सुकृतां लक्ष्मणेन सुष्ठु कृतां शय्यां निरीक्ष्य तां भेजाते इति संबन्धः ॥ ३३ ॥

३४] ति० टी०–स रामो लक्ष्मणस्य वनवासं प्रत्यादरादुच्यमानमेवंभूतमत एवोत्तमपुष्कलमत्यन्तश्रेष्ठं वचो निशम्य सुचिराय स्वयं वनवासरूपं धर्मं प्रपद्याङ्गीकृत्य समस्ताः समा वनवासं प्रति विदधे लक्ष्मणस्यानुमतिमिति शेषः ॥ ३४ ॥

रा० टी०–स इति । उत्तमपुष्कलं मधुरं पूर्णार्थं लक्ष्मणस्य वचः सुचिराय बहुकालं निशम्य श्रुत्वा वनवासं वनवासोचितं धर्मं प्रपद्य यथाकालं कर्तव्यत्वेन निश्चित्य समस्ताः समाः वर्षाणि विदधे विधातुमभिप्रैक्षयत् ॥ ३४ ॥

गो० टी०–सलक्ष्मणस्येति । उत्तमं च तत् पुष्कलं च उत्तमपुष्कलम् अतीव भावूनेहपुरस्कृतत्वादुत्तमं वक्तव्यस्य सर्वस्योक्तेः पुष्कलं पूर्णार्थं लक्ष्मणस्य वचः आदरान्निशम्य चिराय चिरं वानप्रस्थधर्ममधःशयनादिकं प्रतिपद्य समस्ताः समाः वनवासम् अत्यन्तसंयोगे द्वितीया । विदधे लक्ष्मणेन सह विधातुमैच्छदित्यर्थः । अन्यथा भूतार्थासंभवः कविनाप्यादौ तथा वक्तुमयुक्तं लक्ष्मणस्य समस्ताः समाः प्रत्यनुमतिं विदध इति केचिदाहुः ॥ ३४ ॥

३५] ति० टी०–भयं तत्कार्यमितस्तत ईक्षणरूपं संभ्रमं च नोपेयतुः ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रा० टी०–तत इति । भयं कृताश्चिद्भीतिं संभ्रमसुद्वेगं च नैव अभ्युपेयतुः ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रिपञ्चाशत्तमः सर्गः ॥ ५३ ॥

गो० टी०–तत इति । भयं व्याघ्रादिभ्यः संभ्रमं व्याकुलत्वं भयहेतुशङ्कया इतस्ततो निरीक्षणमिति यावत् ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१] ति० टी०–ते इति ॥ १ ॥

रा० टी०–उत्तरदिनवृत्तं बोधयितुमाह–ते इति । ते रामादयः शुभां रजनीमुषित्वा प्रतस्थिरे ॥ १ ॥

गो० टी०–ते त्विति । महावृक्षे महावृक्षमूले सामीप्ये सप्तमी । विमलेऽभ्युदिते स्पष्टमुदित इत्यर्थः ॥ १ ॥

२] ति० टी०–गङ्गामभि यमुना प्रवर्तते तदेशं प्रयागम् गङ्गाया अतिपुण्यत्वध्वननायैवमुक्तिः ॥ २ ॥

रा० टी०–प्रस्थानमेव सविशेषं वर्णयन्नाह–यत्रेति । सुमहद्वनं विगाह्य अवलोक्येत्यर्थः । भागीरथी गङ्गा यत्र यमुनाभिप्रवर्तते तया सह सङ्गतेत्यर्थः । तं देशं प्रयागतीर्थमित्यर्थः उद्दिश्य जग्मुः ॥ २ ॥

गो० टी०–यत्रेत्यादिश्लोकद्वयमेकान्वयम् । भूमिभागान्

१ सुखासीनाविति गो. रा. पाठः । २ वने तदा महाबलाविति गो. पाठः भागीरथी गा यमुनामभीति रा. पाठः ।

ते भूमिभागान्विविधान्देशांश्चापि [1]मनोहरान् । अदृष्टपूर्वान्पश्यन्तस्तत्र तत्र यशस्विनः ॥ ३ ॥
यथा क्षेमेण [2]संपश्यन्पुष्पितान्विविधान्द्रुमान् । [3]निर्वृत्तमात्रे दिवसे रामः सौमित्रिमब्रवीत् ॥ ४ ॥
प्रयागमभितः पश्य सौमित्रे धूममुत्तमम् । अग्नेर्भगवतः केतुं मन्ये संनिहितो मुनिः ॥ ५ ॥
नूनं प्राप्ताः स्म संभेदं [4]गङ्गायमुनयोर्वयम् । तथाहि श्रूयते शब्दो वारिणोर्वारिसंभवः ॥ ६ ॥
दारूणि परिभिन्नानि वनजैरुपजीविभिः । [5]छिन्नाश्चाप्याश्रमे चैते दृश्यन्ते विविधा द्रुमाः ॥ ७ ॥
धन्विनौ तौ सुखं गत्वा लम्बमाने दिवाकरे । गङ्गायमुनयोः संधौ प्रापतुर्निलयं मुनेः ॥ ८ ॥
रामस्त्वाश्रममासाद्य त्रासयन्मृगपक्षिणः । गत्वा मुहूर्तमध्वानं भरद्वाजमुपागमत् ॥ ९ ॥

वनप्रदेशान् देशान् वत्सदेशावान्तरदेशान् एतदेव नानात्वमाह–तत्रतत्रेति यशस्विन इत्यनेन तत्तद्देशीयैरर्चितत्वमुक्तम् ॥ २ ॥ ३ ॥

३] ति० टी०–भूमिभागा भूमिप्रदेशाः ते पश्यन्तो जग्मुरिति संबन्धः ॥ ३ ॥

रा० टी०–विगाहनप्रकारं बोधयन्नाह–त इति । भूमिभागान् भूमेर्भागो विभागो येषु तानदृष्टपूर्वान् विविधान्देशान् तत्र तत्र तत्तद्देशे यशस्विनः अतितपोविशिष्टत्वेन प्रशस्तयशोविशिष्टमुनींश्च किंच देशान् वत्स्यदेशोत्तरवर्त्यवान्तरदेशांस्तत्र तत्र भूमिभागान् तत्तद्देशज्ञानजनकभूमिप्रदेशान् सीमा इत्यर्थः पश्यन्तो यशस्विनस्ते रामादयो जग्मुरित्यनुकृष्यते ॥ ३ ॥

४] ति० टी०–यथा यथासुखं जनानुमानशङ्काभावात्क्षेमेणोपविश्योत्थाय च शनैः शनैः स्वेच्छानुरोधेन संपश्यन्समपश्यन् निवृत्तमात्रेऽर्धमण्डलकाले ॥ ४ ॥

रा० टी०–यथेति । यथाक्षेमेण क्षेममनतिक्रम्य द्रुमान् संपश्यन्सन् दिवसे निवृत्तमात्रे निवृत्तप्राये किंचिदवशिष्टे सतीत्यर्थः सौमित्रिमब्रवीत् ॥ ४ ॥

गो० टी०–यथाक्षेमेणेति । यथाक्षेमेण क्षेमानतिक्रमेण "यथा सादृश्ये" इति पदार्थानतिवृत्तावव्ययीभावः "तृतीयासप्तम्योर्बहुलम्" इत्यलुक् क्षेमहेत्ववधानमनतिक्रम्येत्यर्थः । निवृत्तमात्रे अर्धमण्डलकाल इत्यर्थः ॥ ४ ॥

५] ति० टी०–भगवतोऽग्नेः केतुं लिङ्गं धूमं पश्य यदेवमतोऽत्र मुनिः संनिहित इति मन्ये ॥ ५ ॥

रा० टी०–तद्वचनमेवाह–प्रयागमिति । प्रयागमभितः प्रयागक्षेत्रसमीपे गङ्गायमुनासङ्गमसन्निधावित्यर्थः भगवतः समर्थस्य अग्नेः केतुं सूचकमुत्तमं सुगन्धविशिष्टमित्यर्थः धूमं पश्य । नन्वु किं दर्शनेनेत्यत आह–मुनिर्भरद्वाजः सन्निहित इत्यहं मन्ये हवनसंबंधिधूमदर्शनेनानुमिनोमीत्यर्थः ॥ ५ ॥

गो० टी०–प्रयागमिति । प्रयागमाभितः प्रयागस्याभितः "अभितः परितः–" इत्यादिना द्वितीया केतुं ध्वजीभूतं धूममिति संबन्धः अतः संनिहितो मुनिरिति मन्ये ॥ ५ ॥

६] ति० टी०–संभेदं संगमम् । वारिणोर्गङ्गायमुनाजलयोः । वारिघर्षो विजातीयवारिसंबन्धः । 'घट्ट–' इति पाठेऽप्येवमेव ॥ ६ ॥

रा० टी०–नन्वु प्रयागोऽयमित्यत्र किं गमकमित्यत आह–नूनमिति । गङ्गायमुनयोः संभेदं संगमं वयं प्राप्ताः स्म नूनं निश्चितमेतत् । तथाहि यतः गङ्गायमुनयोर्वारिणोः वारिघर्षजः उभयवारिसंघर्षजनितः शब्दः श्रूयते ' घट्टज ' इति पाठेऽप्येवमेवेति भट्टाः 'घट्टित' इति भूषणपाठः ' संभेदः सिन्धुसंगमः ' इत्यमरः तत्र सिन्धुर्नदी ॥ ६ ॥

गो० टी०–नूनमिति । संभेदं संगमम् ' संभेदः सिन्धुसंगमः ' इत्यमरः । वारिघट्टितो वारिणः शब्दः वारिजनितो वारिशब्दः वारिणोरन्योन्यघट्टनजः शब्द इत्यर्थः ॥ ६ ॥

७] ति० टी०–येषां दारूणि भिन्नानि ते द्रुमा दृश्यन्त इत्यन्वयः ॥ ७ ॥

रा० टी०–दारूणीति । वनजैः वनोद्भूतफलपुष्पादिभिर्हेतुभिः उपजीविभिः जीविकावद्भिः दारूणि काष्ठानि परिभिन्नानि विदारितानि दृश्यन्ते छिन्नाः विदारिता द्रुमाश्च दृश्यन्ते वनजशब्देन यदि जन्तव उच्यन्ते तदा उपजीविभिरित्यस्य समानाधिकरणं विशेषणम् ॥ ७ ॥

गो० टी०–दारूणीति । वनजैरुपजीविभिः वनोत्पन्नैः फलमूलकाष्ठाद्युपजीविभिः दारूणि इत्यत्रापि दृश्यन्त इत्यनुषज्यते ॥ ७ ॥

८] ति० टी०–' धन्विनां विततौ ' इति पाठे तेषां मध्ये-विततौ मुख्याविति यावत् । संधावन्तर्वेदिदेशे निलयमावासं तत्समीपदेशम् ॥ ८ ॥

रा० टी०–रामोक्तिं समाप्य तद्वृत्तमाह–धन्विनाविति । दिवाकरे लम्बमाने अर्धास्तं प्राप्ते सति संधौ विद्यमानं मुनेर्भरद्वाजस्य निलयमाश्रमं प्रापतुः ॥ ८ ॥

गो० टी०–धन्विनाविति । लम्बमाने अस्तगिरौ लम्बमान इव दृश्यमाने संगमे वर्तमानं निलयम् आश्रमं तत्समीपप्रदेशं प्रापतुः ॥ ८ ॥

९] ति० टी०–आश्रमं तत्समीपवनप्रदेशम् त्रासयन्धनुर्धरत्वादिस्वरूपमात्रेण केवलं त्रासयन् । भरद्वाजं तदाश्रमम् ॥ ९ ॥

रा० टी०–राम इति । मृगपक्षिणः दुष्टान्मृगान्पक्षिणश्च त्रासयन् भरद्वाजमुपागमत् ॥ ९ ॥

गो० टी०–राम इति । त्रासयन् अपूर्वदर्शनेन त्रासं जनयन् मुहूर्तं मुहूर्तंगम्यं भरद्वाजं भरद्वाजसमीपम् ॥ ९ ॥

---

१ मनोरमानिति गो. पाठः । २ गच्छन् स पश्यंश्चेति गो. पाठः । ३ निवृत्तेति गो. रा. पाठः । ४ उन्नतमिति गो. पाठः । ५ घट्टित इति गो. पाठः । ६ भरद्वाजाश्रमे इति गो. पाठः । ७ द्वितीयाविधानेऽपि स्पष्टीकरणाय तात्पर्यप्रदर्शनम् ।

ततस्त्वाश्रममासाद्य मुनेर्दर्शनकाङ्क्षिणौ । सीतयानुगतौ वीरौ दूरादेवावतस्थतुः ॥ १० ॥
स प्रविश्य महात्मानमृषिं शिष्यगणैर्वृतम् । संशितव्रतमेकाग्रं तपसा लब्धचक्षुषम् ॥ ११ ॥
हुताग्निहोत्रं दृष्ट्वैव महाभागः कृताञ्जलिः । रामः सौमित्रिणा सार्धं सीतया चाभ्यवादयत् ॥ १२ ॥
न्यवेदयत चात्मानं तस्मै लक्ष्मणपूर्वजः । पुत्रौ दशरथस्यावां भगवन्रामलक्ष्मणौ ॥ १३ ॥
भार्या ममेयं कल्याणी वैदेही जनकात्मजा । मां चानुयाता विजनं तपोवनमनिन्दिता ॥ १४ ॥
पित्रा प्रव्राज्यमानं मां सौमित्रिरनुजः प्रियः । अयमन्वगमद्भ्राता वनमेव धृतव्रतः ॥ १५ ॥
पित्रा नियुक्ता भगवन्प्रवेक्ष्याम तपोवनम् । धर्ममेवाचरिष्यामस्तत्र मूलफलाशनाः ॥ १६ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः । उपानयत धर्मात्मा गामर्घ्यमुदकं ततः ॥ १७ ॥
नानाविधान्नरसान्वन्यमूलफलाश्रयान् । तेभ्यो ददौ तप्ततपा वासं चैवाभ्यकल्पयत् ॥ १८ ॥

१०] ति० टी०–आश्रमं भरद्वाजस्य दूरादेवावतस्थतुः कार्यवशनिर्गतशिष्यद्वारा विज्ञापनपूर्वकानुमतिलाभार्थमिति भावः ॥ १० ॥

रा० टी०–तत इति । अनुगतौ युक्तौ दर्शनकाङ्क्षया आसाद्य प्राप्य दूरात् दूरे एव अवतस्थतुः तदाज्ञाकाङ्क्षयेति शेषः ॥ १० ॥

गो० टी०–तत इति । दूरादेवावतस्थतुः सायंतनसमयत्वादग्निहोत्रावसानं प्रतीक्षमाणाववतस्थतुरित्यर्थः ॥ १० ॥

११] ति० टी०–स तथा लब्धानुमतिः प्रविश्य उटजमिति शेषः संशितव्रतं तीक्ष्णव्रतम् तपसा लब्धचक्षुषं त्रैकालिकसर्वजगद्वृत्तान्ताभिज्ञम् ॥ ११ ॥

१२] ति० टी०–दृष्ट्वाऽवसरं ज्ञात्वा सौमित्रिणा सार्धम् अभ्यवन्दतेति शेषः । सीतया च नमस्कारं कारितवान् । तदाह–अभ्यवादयत् ॥ १२ ॥

रा० टी०–स इति । स बहिःप्राप्तशिष्यादिद्वारा लब्धाज्ञः रामः शिष्यगणैः शिष्यसमूहैः वृतं संशितव्रतं तीक्ष्णव्रतधारिणं तपसा लब्धं चक्षुः सर्वविषयकज्ञानं येन तं महात्मानमृषिं रामोऽभ्यवादयत् । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–स प्रविश्येत्यादिश्लोकद्वयम् । प्रविश्य दैवान्निर्गतशिष्यसुखेनेति शेषः । संशितव्रतं तीक्ष्णव्रतम् एकाग्रम् एकप्रधानं ध्यानपरमिति यावत् । तपसा तपोवैभवेन लब्धचक्षुषं लब्धज्ञानम् अतीतानागतवर्तमानयावदर्थगोचरज्ञानयुक्तमित्यर्थः । दृष्ट्वैव दर्शनोत्तरकालमेवेत्यर्थः ॥ ११ ॥ १२ ॥

१३–१५] ति० टी०–तत्र मूलफलाशनम इत्यन्तेन स्ववृत्तान्तसहितमात्मानं भरद्वाजाय न्यवेदयत ॥ १३–१५ ॥

रा० टी०–न्यवेदयतेति । लक्ष्मणपूर्वजो रामस्तस्मै भरद्वाजाय आत्मानं न्यवेदयत अबोधयत । तदेवाह–आवां दशरथस्य पुत्रौ रामलक्ष्मणौ ॥ १३ ॥

रा० टी०–भार्येति । मामनुयाता अनुगता इयं वैदेही मम भार्या न्यवेदयत स्वात्मानमित्यत्रात्मशब्देनात्मभूतानामपि ग्रहणात् लक्ष्मणनिवेदनमधिकम् ॥ १४ ॥

रा० टी०–आगमने कारणं बोधयन्नाह–पित्रेति । पित्रा वनं प्रव्राज्यमानं कैकयीवरदानहेतुना प्रेष्यमाणं माममयं भ्राता अन्वगमत् ॥ १५ ॥

गो० टी०–न्यवेदयतेत्यादिश्लोकद्वयमेकान्वयम् । सीतालक्ष्मणयोः सर्वात्मना परतन्त्रत्वादात्मानमित्यनेन तयोरपि ग्रहणं कल्याणी पतिव्रतेत्यर्थः । अनुयातेति न्यवेदयतेति संबन्धः ॥ १३–१५ ॥

१६] ति० टी०–धर्ममेव वानप्रस्थधर्ममेव मूलफलाद्यहणं मांसस्याप्युपलक्षणम् ॥ १६ ॥

रा० टी०–उपसंहरन्नाह–पित्रेति । नियुक्ता साक्षात्परंपरया चाज्ञप्ताः वयं तपोवनं प्रवेक्ष्यामः धर्मं वानप्रस्थोचितकर्म आचरिष्यामः ॥ १६ ॥

गो० टी०–पित्रेति । धर्मं पितृवचनपरिपालनरूपम् ॥१६॥

१७] ति० टी–गां मधुपर्काङ्गं महोक्षम् ॥ १७ ॥

रा० टी०–तस्येति । तस्य रामस्य वचनं श्रुत्वा गां मधुपर्काङ्गीभूतमहोक्षं अर्घ्यमर्घोहितमुदकं तदुपलक्षितनिखिलपूजनसामग्रीं धर्मात्मा भारद्वाजः उपानयत् रामसमीपं प्रापयत् ॥१७॥

गो० टी०–तस्येति । गां मधुपर्काङ्गभूतमहोक्षं तथा च स्मृतिः ' गोमधुपर्काहों वेदाध्यायी आचार्य ऋत्विक् स्नातको राजा वा धर्मयुक्तः ' इति अर्घ्यं पूजाविधेरङ्गम् अन्नरसान् अदनीयरसान् रसप्रधानान् पदार्थविशेषानित्यर्थः । वन्यमूलफलाश्रयान् वन्यमूलफलप्रकृतिकान् ॥ १७ ॥ १८ ॥

१८] ति० टी०–अन्नमत्रादनीयमात्रम् अत एव मूलफलाश्रयान् इति वक्ष्यति । रसाः पानीयविशेषाः वासं वासस्थानम् ॥ १८ ॥

रा० टी०–नानेति । वन्यान्येव मूलफलानि आश्रयः उपादानं येषां तान् नानाविधान्नरसान् अन्ना अदनीया एव रसास्तान् तेभ्यो रामादिभ्यो ददौ वासं वासयोग्यस्थलं च अभ्यकल्पयत् अरचयत् अन्नस्यौदनार्थकत्वं तु नात्र संभवति धर्ममेवाचरिष्यामस्तत्र मूलफलाशना इत्यनेन तन्निषेधस्य बोधितत्वात् अत एव न स्वातन्त्र्येण कर्मणोरन्वयः ॥ १८ ॥

१ महाभागमिति गो. पाठः । २ प्रवेक्ष्यामः इति गो. रा. पाठः; एव चरिष्याम इति गो. पाठः । ४ अत्रात्मनेपदं युक्तमिति भीति ।

मृगपक्षिभिरासीनो मुनिभिश्च समन्ततः । राममागतमभ्यर्च्य स्वागतेनागतं मुनिः ॥ १९ ॥
प्रतिगृह्य तु तामर्चामुपविष्टं स राघवम् । भरद्वाजोऽब्रवीद्वाक्यं धर्मयुक्तमिदं तदा ॥ २० ॥
चिरस्य खलु काकुत्स्थ पश्याम्यहमुपागतम् । श्रुतं तव मया चैव विवासनमकारणम् ॥ २१ ॥
अवकाशो विविक्तोऽयं महानद्योः समागमे । पुण्यश्च रमणीयश्च वसत्विह भवान्सुखम् ॥ २२ ॥
एवमुक्तस्तु वचनं भरद्वाजेन राघवः । प्रत्युवाच शुभं वाक्यं रामः सर्वहिते रतः ॥ २३ ॥
भगवन्नित आसन्नः पौरजानपदो जनः । सुदर्शमिह मां प्रेक्ष्य मन्येऽहमिममाश्रमम् ॥ २४ ॥
आगमिष्यति वैदेहीं मां चापि प्रेक्षको जनः । अनेन कारणेनाहमिह वासं न रोचये ॥ २५ ॥
एकान्ते पश्य भगवन्नाश्रमस्थानमुत्तमम् । रमते यत्र वैदेही सुखार्हा जनकात्मजा ॥ २६ ॥

१९-२०] ति० टी०–आगतमागतं तेजोविशेषान्मर्यादारक्षणाय मध्ये मध्ये स्थित्वा निकटं प्राप्तं मृगपक्षिभिर्मुनिभिश्च सह स्वागतेनाभ्यर्च्य मुनिभिः सह मुनौ रामं समन्तत आसीनोऽभवदिति योजना मृगपक्षिणामर्चा च प्रदक्षिणगमनादिरूपा वर्णिता ॥ १९ ॥ २० ॥

रा० टी०–मृगेति । समन्ततः मृगपक्षिभिः मुनिभिश्च सहासीनो मुनिः भरद्वाजः तां मुनिसमर्पितामर्चां प्रतिगृह्य उपविष्टं संस्थितं राघवमिदं धर्मयुक्तं वाक्यमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–मृगपक्षिभिरिति । मृगपक्षिभिरासीनो मुनिभिश्चेत्यनेन मुनिवैभवात्तिर्यञ्चोऽपि मुनिनिर्विशेषं संजातविश्वासा सेवन्त इति गम्यते । स्वागतेनाह स्वागतमाहेत्यर्थः, यद्वा मृगपक्षिभिः सहेति शेषः । स्वागतेनाभ्यर्च्येति संबन्धः ॥१९॥

गो० टी०–मुनिराहेत्येतद्विद्वष्णोति–प्रतिगृह्येति ॥ २० ॥

२१-२३] ति० टी०–चिरस्य चिरकालस्य इहाश्रम आगतं त्वां पश्यामि अनेन सर्वमपि कदाचिदागमनं ध्वनितम् पूर्वरामावतारकालिकमागनं मनसि निधाय वैषोक्तिः । चक्षुषा एव रूपं पश्यामि यः केवलं ध्यानगोचर एव सोऽप्येवंभूत इत्याश्चर्यं व्यङ्ग्यम् अकारणं निर्निमित्तम् ॥ २१–२३ ॥

रा० टी०–तद्वाक्यमेवाह–चिरस्येति । हे काकुत्स्थ राम ! तव उपागतं समीपागमनं चिरस्य बहुकालतः पश्यामि कदा आगन्तेति सर्वदैवालोचयामीत्यर्थः । तत्र हेतुः अकारणं स्वेच्छातिरिक्तकारणरहितं तव विवासनं श्रुतं वाल्मीकिमुखादवगतम् । चो हेतौ ॥ २१ ॥

रा० टी०–स्वाभिप्रेतमाह–अवकाश इति । महानद्योः गङ्गायमुनयोः समागमे सङ्गमसमीपे अवकाशः विशाल इत्यर्थः विविक्तः दुर्जनसंसर्गरहितः अत एव पुण्यः अत एव रमणीयः अयं देशोऽस्तीति शेषः अतः इह भवान्सुखं वसतु ॥ २२ ॥

रा० टी०–एवमिति । भरद्वाजेन एवमुक्तो राघवः प्रत्युवाच ॥ २३ ॥

गो० टी०–चिरस्य चिरम् ॥ २१–२३ ॥

२४-२५] ति० टी०–इत आसन्न एतदाश्रमाद्दूरवर्ती पौरजानपदो जनो मां सुदर्शं सुखेन द्रष्टुं शक्यं प्रेक्ष्य ज्ञात्वा वैदेहीं मां च प्रेक्षको जनो वैदेह्यादिदर्शनार्थी जनस्तदर्थमिममाश्रममागमिष्यतीत्यहं मन्य इत्यन्वयः ॥ २४ ॥ २५ ॥

रा० टी०–तदेवाह–भगवन्निति । इतः स्थानात् आसन्नः निकटवर्ती प्रेक्षको दर्शनाभिलाषी पौरजानपदः अयोध्यातदेशयोर्भवः अजनः कर्माधीनजन्मरहितः नित्यसुखादिरित्यर्थः जनः सुदर्शनं सुखेन दर्शनयोग्यं मां वैदेहीं च प्रेक्ष्य ज्ञात्वा इममाश्रममागमिष्यति अनेन कारणेन न रोचये वाञ्छामि । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–भगवन्नित्यादि । इत एतदाश्रमापेक्षया इह आश्रमे सुदर्शं सुखेन द्रष्टुं शक्यं प्रेक्ष्य ज्ञात्वा वैदेहीं मां च प्रेक्षको जनः इममाश्रममागमिष्यतीत्यहं मन्ये अनेन कारणेन इह वासं न रोचय इत्यन्वयः मां प्रेक्षक इत्यत्र "अकेनोर्भविष्यदाधमर्ण्ययोः" इति षष्ठी प्रतिषेधः । एकान्ते पौरजनाविदिते पश्य चिन्तय ॥ २४–२६ ॥

२६] ति० टी०–यत्र यस्मिन्नाश्रमस्थाने तादृशमेकान्ते वर्तमानं पश्य ज्ञात्वा निर्दिशेत्यर्थः । अत्र भगवन्नित्यादिश्लोकत्रयस्य तीर्थेन वास्तवस्त्वर्थः–रावणवधार्थं गूढमवतीर्णं मां मा प्रकटीकुरु अन्यथा सर्वोऽपि जनः सुदर्शं विष्णुं मां ज्ञात्वा वैदेहीं च मां लक्ष्मीं प्रेक्ष्य ज्ञात्वा तां मां च प्रेक्षकः सन्निहागच्छतीति अत एवंविधं प्रकटवासं न रोचये, अतो यत्र वैदेही रमते तम् , आश्रयतीत्याश्रमं जगत्, तस्य स्थानं सर्वोत्तमं मां त्वमेवैकान्ते पश्य मत्स्वरूपं न प्रकटयेत्यन्तेन व्याख्यातम् तदयुक्तम् , मुनिना रामस्वरूपप्रकटनस्य सर्ववेद्यं यथा भवति प्राक् काव्यकरणात् अक्षरमर्यादयापि तादृशार्थालाभाच्च । पौरजानपदो जन इति पदस्वारस्यादेति सुधियो विभावयन्तु ॥ २६ ॥

रा० टी०–एकान्त इति । आश्रम आसमन्तात् अश्रमं श्रमनिवर्तकं स्थानं पश्य आलोच्य आज्ञापय यत्र वैदेही रमते रमेत ॥ २६ ॥

१ आह त्वामिति गो. पाठः । २ ऋषि गो. पाठः । ३ त्वामिहागतमिति गो. पाठः । ४ इदमिति गो. पाठः । ५ रमेतेति गो. पाठः ।

एतच्छ्रुत्वा शुभं वाक्यं भरद्वाजो महामुनिः । राघवस्य तु तद्वाक्यमर्थग्राहकमब्रवीत् ॥ २७ ॥
दशक्रोश इतस्तात गिरिर्यस्मिन्निवत्स्यसि । महर्षिसेवितः पुण्यः पर्वतः शुभदर्शनः ॥ २८ ॥
गोलाङ्गूलानुचरितो वानरर्क्षनिषेवितः । चित्रकूट इति ख्यातो गन्धमादनसंनिभः ॥ २९ ॥
यावता चित्रकूटस्य नरः शृङ्गाण्यवेक्षते । कल्याणानि समाधत्ते न मोहे कुरुते मनः ॥ ३० ॥
ऋषयस्तत्र बहवो विहृत्य शरदां शतम् । तपसा दिवमारूढाः कपालशिरसा सह ॥ ३१ ॥
प्रविविक्तमहं मन्ये तं वासं भवतः सुखम् । इह वा वनवासाय वस राम मया सह ॥ ३२ ॥
स रामं सर्वकामैस्तं भरद्वाजः प्रियातिथिम् । सभार्यं सह च भ्रात्रा प्रतिजग्राह हर्षयन् ॥ ३३ ॥

२७] ति० टी०–एतदिति । राघवस्यार्थग्राहकं तदुक्तप्रयोजनप्रतिपादकं तद्वक्ष्यमाणमब्रवीत् ॥ २७ ॥

रा० टी०–एतदिति । अर्थग्राहकं स्थानान्तरान्वेषणप्रयोजनबोधकं तद्वाक्यं श्रुत्वा भरद्वाज एतद्वाक्यमब्रवीत्॥२७॥

गो० टी०–एतदिति । अर्थग्राहकम् अर्थबोधकं यथा भवति तथा, यद्वा अर्थग्राहकं बहूर्थवत् अब्रवीत् ॥ २७ ॥

२८-२९] ति० टी०–दशक्रोश इति सप्तम्यन्तम् । इतो मदाश्रमात् ॥ २८ ॥ २९ ॥

रा० टी०–तद्वचनमेवाह–दशेति । इतः दशक्रोशे त्रिंशत्क्रोशपरिच्छिन्नदेशसन्निधौ महर्षिसेवितः पर्वतः अवान्तरपर्वतविशिष्टः गिरिः पर्वतोऽस्ति यस्मिंस्त्वं निवत्स्यसि दशशब्दस्यैकशेषेणायमर्थो लब्धः अत एव नासंभवः दशक्रोशः दशक्रोशपरिमित इति पर्वतविशेषणे तु नैकशेषकल्पना ॥ २८ ॥

रा० टी०–नन्वु तद्गिरेः किं नामेत्यत आह–गोलाङ्गूलेति । गोलाङ्गूलानुचरितः वानरादिभिर्निषेवितः गन्धमादनसदृशः चित्रकूट इति ख्यातोऽस्तीति शेषः ॥ २९ ॥

गो० टी०–दशक्रोश इत्यादि । यस्मिन् गिरौ निवत्स्यसि सगिरिरितो दशक्रोशः दशक्रोशावस्थित इत्यर्थः । गन्धमादनसन्निभः गन्धमादनपर्वतसन्निभः । अतीतानागतवर्तमानज्ञो महर्षिः गोलाङ्गूलानुचरितो वानरर्क्षनिषेवित इति केवलत्रिवर्गाभिधानेन एतत्सजातीया एव रामस्य सहाया अपि भविष्यन्तीति सूचितवानिति गम्यते ॥ २८ ॥ २९ ॥

३०] ति० टी०–यावता यदा शृङ्गाण्यवेक्षते तदेति शेषः । समाधत्ते मनसा कर्तुमाशास्ते ॥ ३० ॥

रा० टी०–यावतेति । यावता कालेन नरः शृङ्गाणि अवेक्षते पश्यति तावता कालेनैव कल्याणानि दर्शनप्रभावजनितशुभानि समाधत्ते प्राप्नोति अत एव पापे मनः न कुरुते ॥ ३० ॥

गो० टी०–यावतेति । नरः यावता दूरेण चित्रकूटस्य शृङ्गाण्यवेक्षते तावता कल्याणानि पुण्यकर्माणि समाधत्ते प्राप्नोति, यद्वा समाधत्ते आचरति पापे मनो न कुरुते तत्र वसन् किमुतेति भावः । यद्वा यावता कालेन ॥ ३० ॥

३१] ति० टी०–तदुपपादयति–ऋषय इति । बहुदिनमृततृकपालवच्छुष्कं शिरस्तेन सह तेन विधमानेनोपलक्षिताः तपसा शरदां शतं विहृत्यातिवार्धकेऽपि तपसा क्रीडित्वा दिवं स्वर्गमारूढाः । केचित्तु कपालशिरसेति शरीरोपलक्षणं सशरीराः स्वर्गं गता इत्याहुः तत्र, धर्मपुत्रादीनामपि कियदूरमेव धर्मवैभवदर्शनायैतच्छरीरेण गमनं ततस्तन्निरासपूर्वकमेव स्वर्गं गमनश्रवणादिति कतकः ॥ ३१ ॥

रा० टी०–तत्र वासे शिष्टाचारं प्रमाणयन्नाह–ऋषय इति । तत्र चित्रकूटे तपसा युक्ता बहवः ऋषयः कपालशिरसा त्वद्दर्शनफलकनित्यस्थितिमच्छिवेन सह शरदां शतं विहृत्य दिवप्रमोदविशेषमारूढाः प्राप्ताः एतेन शिवस्य रामानुरागिश्रेष्ठत्वं व्यञ्जितम् ॥ ३१ ॥

गो० टी०–ऋषय इति । तत्र चित्रकूटे शरदां शतं तपसा विहृत्य क्रीडन्त इव महत्तपः परिसमाप्येत्यर्थः । कपालशिरसा सह दिवमारूढाः तपश्चरणेन निरन्तरकपालासनेन प्रक्षीणत्वक्शिरोरुहतया कपालावशिष्टशिरसा सह दिवमारूढा इत्यर्थः । कपालशिरसेत्येतच्छरीरोपलक्षणं सशरीराः स्वर्गं गता इत्यर्थः, यद्वा कपालशिरा इति कस्यचित् ऋषेः संज्ञा कपालशिरसा कपालरूपशिरोयुक्तेनेत्यध्याहृतशरीरपदविशेषणमित्येके कपालमात्रावशिष्टं शिरो यस्मिन्निति तपोविशेषणमित्येके ॥ ३१ ॥

३२] ति० टी०–वनवासाय वनवासनियमसिद्धये इह वेति शिष्टाचारमात्रम् ॥ ३२ ॥

रा० टी०–प्रविविक्तमिति । प्रविविक्तं दुष्टजनरहितं सुखं सुखप्रदं तं चित्रकूटं भवतः वासं वासाश्रयं मन्ये अतः तत्र इह वा मया सह वस तत्रेत्यध्याहृतम् ॥ ३२ ॥

गो० टी०–प्रविविक्तमिति । प्रविविक्तं प्रकर्षेण विजनम् ॥ ३२ ॥

३३] ति० टी०–रामं तद्जन्यां तत्र वसन्तं प्रतिजग्राहातिथियोग्यसत्कारैर्वशीकृतवान् ॥ ३३ ॥

रा० टी०–स इति । प्रियातिथिं तं रामं सर्वकामैः निखिलेच्छाविषयीभूतपदार्थप्रापकवचनैः हर्षयन्स्स भरद्वाजो जग्राह तस्यां रात्रौ निवासयामास ॥ ३३ ॥

गो० टी०–सरामामिति । सर्वकामैः प्रतिजग्राह अति-

१ तत्ते वाक्यमिति गो. पाठः । २ सर्वतः सुखदर्शन इति गो. पाठः । ३ पापे इति गो. पाठः । ४ धर्मविदिति गो. पाठः

तस्य प्रयागे रामस्य तं महर्षिमुपेयुषः । प्रपन्ना रजनी पुण्या चित्राः कथयतः कथाः ॥ ३४ ॥
सीतातृतीयः काकुत्स्थः परिश्रान्तः सुखोचितः । भरद्वाजाश्रमे रम्ये तां रात्रिमवसत्सुखम् ॥ ३५ ॥
प्रभातायां तु शर्वर्यां भरद्वाजमुपागमत् । उवाच नरशार्दूलो मुनिं ज्वलिततेजसम् ॥ ३६ ॥
शर्वरीं भगवन्नद्य सत्यशील तवाश्रमे । उषिताः स्मोऽह वसतिमनुजानातु नो भवान् ॥ ३७ ॥
रात्र्यां तु तस्यां व्युष्टायां भरद्वाजोऽब्रवीदिदम् । मधुमूलफलोपेतं चित्रकूटं व्रजेति ह ॥ ३८ ॥
वासमौपयिकं मन्ये तव राम महाबल । नानानगगणोपेतः किंनरोरगसेवितः ॥ ३९ ॥
मयूरनादाभिरतो गजराजनिषेवितः । गम्यतां भवता शैलश्चित्रकूटः स विश्रुतः ॥ ४० ॥
पुण्यश्च रमणीयश्च बहुमूलफलायुतः । तत्र कुञ्जरयूथानि मृगयूथानि चैव हि ॥ ४१ ॥
विचरन्ति वनान्तेषु तानि द्रक्ष्यसि राघव । सरित्प्रस्रवणप्रस्थान्दरीकन्दरनिर्झरान् ॥
चरतः सीतया सार्धं नन्दिष्यति मनस्तव ॥ ॥ ४२ ॥
प्रहृष्टकोयष्टिभकोकिलस्वनैर्विनोदयन्तं च सुखं परं शिवम् ।
मृगैश्च मत्तैर्बहुभिश्च कुञ्जरैः सुरम्यमासाद्य समावसाश्रयम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

थियोग्यसत्कारैर्वशीकृतवानित्यर्थः पाठभेदः प्रतिजग्राह पञ्चचार ॥ ३३ ॥

३४-३६] ति० टी०-रजनी प्रपन्ना प्राप्ता ॥३४-३६॥

रा० टी०-तस्येति । प्रयागे महर्षिमुपेयुषः प्राप्तस्य कथाः कथयतो रामस्य रजनी प्रपन्ना प्राप्ता ॥ ३४ ॥

रा० टी०-सीतेति । सीता तृतीया यस्य सः सुखोचितः परिश्रान्तः अध्वजनितश्रमवत्तया प्रतीयमानः काकुत्स्थः भरद्वाजाश्रमे सुखमवसत् ॥ ३५ ॥

रा० टी०-प्रभातायामिति । ज्वलिततेजसं मुनिमुवाच ॥ ३६ ॥

गो० टी०-तस्येति । प्रपन्ना प्राप्ता ॥ ३४-३६ ॥

३७] ति० टी०-इहाश्रमे शर्वरीमुषिताः स्म । अह अथेत्यर्थे । वसतिं गन्तव्यां चित्रकूटरूपां तद्गमनं प्रत्यनुजानातु ॥ ३७ ॥

रा० टी०-तद्वचनमेवाह-शर्वरीति । हे भगवन् सत्यशील! तवाश्रमे एव शर्वरी रात्रिः उषिता स्म इह अथ वसतिं वासस्थलं गन्तुमिति शेषः अनुजानातु आज्ञापयतु । ऽरेवार्थे ॥ ३७ ॥

गो० टी०-शर्वरीमिति । वसतिमनुजानातु पूर्वोक्तां वसतिं प्रति गन्तुमनुज्ञां करोत्वित्यर्थः ॥ ३७ ॥

३८] ति० टी०-भरद्वाजः तथा रामेण प्रार्थित इति शेषः । व्रज इति अनुजगावितिं शेषः ॥ ३८ ॥

रा० टी०-रात्र्यामिति । व्युष्टायां व्यतीतायां सत्यां भरद्वाजः इदमब्रवीत् । तद्वचनस्वरूपमाह-इति इतः चित्रकूटं व्रज ३८

गो० टी०-रात्र्यामिति । व्रजेत्यब्रवीदित्यन्वयः । हेति पादपूरणे हर्षे वा ॥ ३८ ॥

३९-४१] ति० टी०-औपयिकमुचितम् । नगा वृक्षाः ॥ ३९-४१ ॥

रा० टी०-तत्र हेतुं वदन्नाह-वासमिति । नाना अनेकविधैः नगगणैर्वृक्षसमूहैः उपेतः मयूरनादैः अभिरतः रमणीयः गजराजैः निषेवितः विश्रुतः प्रख्यातः शैलश्चित्रकूटः गम्यतां तत्र वासमौपयिकं युक्तं मन्ये । श्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

रा० टी०-पुण्य इति । तानि कुञ्जरमृगयूथानि सारंदादीनि च द्रक्ष्यसि अतः तव मनो नन्दिष्यति । तत्र सरितो नद्यः, प्रस्रवणाः बिन्दुशो जलनिपाताः, प्रस्थाः शिलाः, दर्यः पाषाणसन्धयः, कन्दराः गुहाः, निर्झराः गिरिच्युतालपप्रवाहाः । सार्धश्लोकद्वयमेकान्वयि ॥ ४१ ॥ ४२ ॥

गो० टी०-वासमिति । तत्रेति शेषः औपयिकं युक्तं 'युक्तमौपयिकम्' इत्यमरः । नानानगगणोपेतः नानावृक्षनिचयोपेतः ॥ ३९-४१ ॥

४२] ति० टी०-विचरन्ति इदं शत्रन्तम् । सरितो नद्यः प्रस्रवणास्तनुतरजलप्रवाहास्तद्युताः प्रस्थाः सानूनि, दरी पाषाणनिर्भेदः, कन्दरा गिरिगुहाः, निर्झरा घनप्रवाहाः, तान्द्रक्ष्यसीत्यन्वयः एते कुञ्जरादयः सीतया सार्धं चरतस्तवेत्यन्वयः ॥ ४२ ॥

गो० टी०-सरित्प्रस्रवणप्रस्थानिति । सरितो नद्यः, प्रस्रवणानि तनुतरजलप्रवाहाः, प्रस्थाः सानवस्तान् दरीकन्दरनिर्दरान् दर्यः पाषाणसंश्लेषस्थानानि, कन्दराः गुहाः, निर्दरा विदीर्णपाषाणसंधयः तान् ॥ ४२ ॥

४३] ति० टी०-कोयष्टिभष्टिट्टिभः ॥ ४३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

---

१ पुण्ये इति रा. पाठः । २ रजन्यां त्विति गो. पाठः । ३ शर्वरीति रा. पाठः । ४ उषिता स्म हेति रा. पाठः । ५ स्मेहेति गो. पाठः । ६ रुत इति गो. पाठः । ७ चाभित इति गो. पाठः । ८ वनान्तेऽस्मिन्निति गो. पाठः । ९ निर्दरानिति गो. पाठः । १० कोयष्टिकेति गो. रा. पाठः । ११ विनादितं तं वसुधाधरमिति गो. पाठः । १२ आश्रममिति गो. पाठः ।

पञ्चपञ्चाशः सर्गः ।

चित्रकूटं प्रति प्रस्थितयो रामलक्ष्मणयोर्भरद्वाजो मार्गमुपदिशति । स्वनिर्मितकाष्ठादिनावा ससीतौ रामलक्ष्मणौ यमुनां प्रतेरतुः । अभिमतफलमूलादिप्राप्त्या मोदमानया सीतया समं तौ सायं स्वोचितयमुनातटं ऊषतुः ।

उषित्वा रजनीं तत्र राजपुत्रावरिंदमौ । महर्षिमभिवाद्याथ जग्मतुस्तं गिरिं प्रति ॥ १ ॥
तेषां स्वस्त्ययनं चैव महर्षिः स चकार ह । प्रस्थितान्प्रेक्ष्य तांश्चैव पिता पुत्रानिवौरसान् ॥ २ ॥
ततः प्रचक्रमे वक्तुं वचनं स महामुनिः । भरद्वाजो महातेजा रामं सत्यपराक्रमम् ॥ ३ ॥
गङ्गायमुनयोः संधिमासाद्य मनुजर्षभ । कालिन्दीमनुगच्छेतां नदीं पश्चान्मुखाश्रिताम् ॥ ४ ॥
अथासाद्य तु कालिन्दीं प्रतिस्रोतःसमागताम् । तस्यास्तीर्थं प्रचरितं प्रकामं प्रेक्ष्य राघव ॥
तत्र यूयं प्लवं कृत्वा तरतांशुमतीं नदीम् । ॥ ५ ॥
ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम् । परीतं बहुभिर्वृक्षैः श्यामं सिद्धोपसेवितम् ॥ ६ ॥

रा० टी०–प्रहृष्टेति । प्रहृष्टानां कोयष्टिककोकिलानां स्वनैः शब्दैः सुखं विनोदयन्तं प्रापयन्तं मृगैः कुञ्जरैश्च सुरम्यमाश्रयं वासयोग्यपर्वतमासाद्य प्राप्य समावस ॥ ४३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणश्रीमणावयोध्याकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

गो० टी०–प्रहृष्टेति । कोयष्टिकाः टिट्टिभकाः 'कोयष्टिकष्टिट्टिभकः' इत्यमरः ॥ ४३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

१] ति० टी०–अथ भरद्वाजेन मार्गोपदेशः–उषित्वेति॥१॥

रा० टी०–भरद्वाजवचनश्रवणानन्तरकालिकं रामवृत्तमाह–उषित्वेत्यादिभिः । तत्र भरद्वाजाश्रमे उषित्वा महर्षिमभिवाद्य तं महर्षिनिर्दिष्टं गिरिं चित्रकूटं जग्मतुः ॥ १ ॥

गो० टी०–उषित्वेत्यादि ॥ १ ॥

२] ति० टी०–औरसान्पुत्रान्पितेव तान्प्रस्थितान्प्रेक्ष्य तेषां स्वस्त्ययनं चकार । चैवौ पादपूरणार्थौ ॥ २ ॥

रा० टी०–तेषामिति । औरसान् पुत्रान् पितेव तान्प्रस्थितान्प्रेक्ष्य तेषां रामादीनां स्वस्त्ययनं गमनकालोचितस्वस्तिक्रियां चकार ॥ २ ॥

गो० टी०–तेषामिति । तेषां प्रस्थातुमुद्युक्तानाम् 'अन्वगात्' इति पाठः । 'अन्वशात्' इति पाठे अनुशिष्टवान् मार्गोपदेशमकरोदित्यर्थः ॥ २ ॥

३] ति० टी०–प्रचक्रमे मार्गोपदेशार्थमिति शेषः ॥ ३ ॥

रा० टी०–तत इति । स महामुनिः वक्तुं प्रचक्रमे ॥ ३ ॥

गो० टी०–तदेव विवृणोति–तत इति ॥ ३ ॥

४] ति० टी०–पश्चान्मुखाश्रितां गङ्गाजलवेगाभिघातेन किंचिदूरं पश्चान्मुखं गतामिति तीर्थः । संधिः संगमतीर्थम् । संगमात्पश्चिमप्रदेश एवाश्रितस्वप्रयुक्तव्यवहारां संगमपूर्वभागे तु गङ्गाया एव व्यवहार इति भाव इति कतकः, अन्ये तु पश्चान्मुखया गङ्गया श्रितां कालिन्दीमनुगच्छेतामित्यर्थः । अत एवाग्रे कालिन्दीमासाद्येत्युक्तिरित्याहुः ॥ ४ ॥

रा० टी०–वचनस्वरूपमाह–गङ्गेत्यादिभिः । गङ्गायमुनयोः सन्धिं सङ्गममादाय आरभ्य पश्चान्मुखाश्रितामतिप्रबलगङ्गावेगेन पश्चान्मुखं किंचिदूरं पश्चिमाभिमुखत्वमाश्रितं यया तां कालिन्दीमनुगच्छेतां तां पश्यंस्तदुत्तरतीरवर्तिमार्गेण गच्छेत्यर्थः अत्र द्विर्वचं तु सीतारामानतिरेकबुद्ध्या ॥ ४ ॥

गो० टी०–गङ्गायमुनयोरिति । प्रथमं गङ्गायमुनयोः संधिमासाद्य पश्चान्मुखाश्रितां गङ्गाजलवेगाभिहत्या किंचित्पश्चान्मुखप्रवाहं प्राप्तां कालिन्दीं नदीम् अनुगच्छेताम् अनुसृत्य गच्छेतां पश्चिमाभिमुखौ भूत्वा गच्छेतां भवन्ताविति शेषः । पाठभेदः 'अभिगच्छेताम्' अभिमुखं गच्छेतां कालिन्द्या अभिमुखीभूय गच्छेतामित्यर्थः ॥ ४ ॥

५] ति० टी०–अथ शुद्धां कालिन्दीं प्रतिस्रोतो यथा भवति तथा समागतां विपरीतप्रवाहामासाद्य तस्यास्तीर्थमवतरणप्रदेशं प्रचरितं गमनागमनाभ्यामतिक्षुण्णं दृष्ट्वा प्लवं तरणसाधनम् अंशुमतीं सूर्यतनयाम् ॥ ५ ॥

रा० टी०–अथेति । अथ यमुनातीरतो गमनानन्तरं प्रतिस्रोतः समागतां प्रवाहमार्गलब्धानेकतीर्थसङ्गमवतीं कालिन्दीमासाद्य प्राप्य तीर्थं पवित्रकारकं तस्याः कालिन्द्याः प्रचरितं विलक्षणप्रचलनं प्रकामं यथा स्यात्तथा प्रेक्ष्य तत्र यमुनायां प्लवमुडुपं कृत्वा आंशुमतीम् अंशुमतः सूर्यस्य इयं कन्या तां तरत । सार्धश्लोक एकान्वयी ॥ ५ ॥

गो० टी०–शीघ्रस्रोतसमित्यनेन गङ्गाजलवेगप्रतिहतिस्तिमितजलव्यतिरिक्तप्रदेश उच्यते तीर्थम् अवतरणप्रदेशं प्रचरितं गमनागमनाभ्यामतिक्षुण्णमित्यर्थः । आंशुमतीम् अंशुमतः सूर्यस्यापत्यभूताम् ॥ ५ ॥

६] ति० टी०–श्यामं श्यामनामकम् ॥ ६ ॥

---

१ इवान्वगादिति गो. पाठः । २ आसाद्य मनुजर्षभाविति गो. पाठः । ३ शीघ्रस्रोतसमापगामिति गो. पाठः । ४ पुराणं प्रेक्ष्य राघवाविति गो. पाठः । ५ विवृद्धमिति गो. पाठः ।

तस्मिन्सीताञ्जलिं कृत्वा प्रयुञ्जतीशिषां क्रियाम् । समासाद्य च तं वृक्षं वसेद्वातिक्रमेत वा ॥ ७ ॥
क्रोशमात्रं ततो गत्वा नीलं प्रेक्ष्य च काननम् । सल्लकीबदरीमिश्रं रामं वन्यश्च यामुनैः ॥ ८ ॥
स पन्थाश्चित्रकूटस्य गतस्य बहुशो मया । रम्यो मार्दवयुक्तश्च दावैश्चैव विवर्जितः ॥ ९ ॥
इति पन्थानमादिश्य महर्षिः संन्यवर्तत । अभिवाद्य तथेत्युक्त्वा रामेण विनिवर्तितः ॥ १० ॥
उपावृत्ते मुनौ तस्मिन्रामो लक्ष्मणमब्रवीत् । कृतपुण्याः स्म भद्रं ते मुनिर्यन्नोऽनुकम्पते ॥ ११ ॥
इति तौ पुरुषव्याघ्रौ मन्त्रयित्वा मनस्विनौ । सीतामेवाग्रतः कृत्वा कालिन्दीं जग्मतुर्नदीम्॥ १२ ॥
अथासाद्य तु कालिन्दीं शीघ्रस्रोतस्विनीं नदीम् । चिन्तामापेदिरे सद्यो नदीजलतितीर्षवः ॥ १३ ॥
तौ काष्ठसंघाटमथो चक्रतुः सुमहाप्लवम् । शुष्कैर्वेण्वैः समाकीर्णमुशीरैश्च समावृतम् ॥ १४ ॥
ततो वेतसशाखाश्च जम्बुशाखाश्च वीर्यवान् । चकार लक्ष्मणश्छित्त्वा सीतायाः सुखमासनम्॥१५॥

रा० टी०–तत इति । ततो यमुनासंतरणानन्तरं महान्तमतिप्रहृष्टं हरितच्छदं हरितपत्रविशिष्टमत एव श्यामं बहुभिर्वृक्षैः परीतं युक्तं न्यग्रोधं वटवृक्षमासाद्य प्राप्य तस्मिन्न्यग्रोधे स्थिता सीता अञ्जलिं प्रणयसूचकबद्धयुगलकरं कृत्वा आशिषः वनवासनिवर्तनरूपमनोरथस्य क्रिया कुशलमस्माकमागमनं भवत्विति प्रार्थनां प्रयुञ्जीत 'आशिषः शिवाः' इति भूषणपाठः । सार्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०–ततः तरणानन्तरं न्यग्रोधं तीरस्थं हरितच्छदं श्यामलपत्रम् अत एव श्यामं श्यामनामकं वृक्षैः सह विद्यते, यद्वा वृक्षैः श्यामं वृक्षसहितत्वात् विशेषेण श्यामलं वृक्षैरित्युपलक्षणे तृतीया आशिषः मनोरथान् प्रयुञ्जीत प्रार्थयेत् । सीतेति शेषः ॥ ६ ॥

७] ति० टी०–आशिषां क्रियां करणं प्रयुञ्जीतास्माकं पुनरागमनं भवत्विति सीता वृक्षं नत्यादिना प्रार्थयेत् । वसेद्वातिक्रमेत वेत्येकवचनं सीताभिप्रायकम् । श्रमे वसेत् अन्यथाग्रे गच्छेदित्यर्थः ॥ ७ ॥

रा० टी०–समासाद्येति । तं वृक्षं समासाद्य पूजनादिना सम्यक् प्राप्य वसेत् तत्रैव निशि शयीत वा अतिक्रमेत्ततः परं गच्छेत्ततः तस्मान्न्यग्रोधात्क्रोशमात्रं गत्वा पलाशबदरीमिश्रं पलाशैः बदरीभिश्च युक्तं यामुनैः यमुनातीरोद्भवैः वंशैः वेणुभिरुपलक्षितं नीलं काननं वनं प्रेक्ष्य मया बहुशो गतस्य बहुवारं मत्कर्तृकगमनविशिष्टस्य चित्रकूटस्य यः रम्यः रमणीयः मार्दवयुक्तः मृदुः स प्रसिद्धः पन्थाः मार्गः त्वया प्राप्स्यते इति शेषः । सार्धश्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०–वसेद्वातिक्रमेत वा सीता श्रान्ता चेत् किंचित्कालं वसेत् नो चेदतिक्रमेतेत्यर्थः ॥ ७ ॥

८] ति० टी०–ततः कालिन्दीदक्षिणतीरवर्तिन्यग्रोधात् । यामुनैर्यमुनातीरजैः ॥ ८ ॥

गो० टी०–ततः दक्षिणतटस्थन्यग्रोधात् यामुनैः यमुनासंबन्धिभिः यमुनातीरजैरित्यर्थः ॥ ८ ॥

९] ति० टी०–मार्दवयुक्तः वालुकोपेतत्वात्कण्टकपाषाणादिरहितत्वाच्च । दावैर्विवर्जितो वनाग्निरहितः ॥ ९ ॥

गो० टी०–सः काननं पथिशब्दापेक्षया पुंलिङ्गत्वम् मार्दवयुक्तः सूक्ष्मसिकतावत्त्वात् वनदावैर्वनाग्निभिः ' दवदावौ वनारण्यवह्नी ' इत्यमरः । तथाप्यत्र दावशब्दोऽग्निमात्रपरः विशिष्टवाचकानामिति न्यायात् ॥ ९ ॥

१०–१३] ति० टी०–तथेत्युक्त्वा त्वदुपदिष्टमार्गेणैव गमिष्याम इत्युक्त्वा ॥ १०–१३ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण पन्थानमादिश्य बोधयित्वा तथेत्युक्त्वा अभिवाद्य त्वमानेन रामेण विनिवर्तितः स महर्षिः न्यवर्तत । अर्धद्वयमेकान्वयि ॥ १० ॥

रा० टी०–उपेति । उपावृत्ते निवृत्ते सति यस्मात् नः अस्मान्मुनिः अनुकम्पते तस्माद्वयं कृतपुण्याः अतः ते भद्रं कल्याणमिति रामः लक्ष्मणमब्रवीत् ॥ ११ ॥

गो० टी०–अभिवाद्येत्यर्धेन महर्षिं विशेषयति तथैव गमिष्याम इत्युक्त्वा अभिवाद्य त्वमाश्रमं गच्छेति रामेण विनिवर्तितो महर्षिः न्यवर्ततेति संबन्धः ॥ १०–११ ॥

रा० टी०–इतीति । मन्त्रयित्वा परस्परं संभाष्य तौ रामलक्ष्मणौ कालिन्दीं जग्मतुः ॥ १२ ॥

गो० टी०–इतीति । मन्त्रयित्वा पूर्वोक्तरीत्या कृतार्थतामनुसंधाय ॥ १२ ॥ १३ ॥

रा० टी०–अथेति । शीघ्रस्रोतस्विनीं झटितिप्रवाहविशिष्टां कालिन्दीमासाद्य चिन्तां कालिन्दीतरणोद्देश्यकभरद्वाजोक्तिविषयकस्मृतिमापेदिरे प्रापुः ॥ १३ ॥

१४–१५] ति० टी०–काष्ठसंघाटः काष्ठसंघातस्तदूर्ध्वं

१ तस्मायिति गो. पाठः । २ आशिषः शिवा इति गो. आशिष इति रा. पाठः । ३ त्विति गो. पाठः । ४ द्रक्ष्यथेति गो. पाठः । ५ पलाशेति गो. रा. पाठः । ६ रम्यं वंशैरिति गो. वंशैरिति रा. पाठः । ७ वनदावैरिति गो. पाठः । ८ आवेशेति गो. पाठः । ९ सौमित्रे इति गो. पाठः । १० स्रोतोवहामिति गो. पाठः । ११ सर्वे इति गो. पाठः । १२ शुष्कैर्वंशैरिति गो. पाठः । १३ आस्तीर्णमिति गो. पाठः । १४ वेतसेति गो. पाठः । १५ जम्बुशाखा इति गो. पाठः ।

तत्र श्रियमिवाचिन्त्यां रामो दाशरथिः प्रियाम् । ईषत्[1]स लज्जमानां तामध्यारोपयत प्लवम् ॥ १६ ॥
पार्श्वे तत्र च वैदेह्या वसने भूषणानि च । प्लवे कठिनकाजं च रामश्चक्रे[2] समाहितः ॥ १७ ॥
आरोप्य सीता प्रथमं संघाटं परिगृह्य तौ । ततः प्रतेरतुर्यत्तौ [3]प्रीतौ दशरथात्मजौ ॥ १८ ॥
कालिन्दीमध्यमायाता सीता त्वेनामवन्दत । स्वस्ति देवि तरामि त्वां पारयेन्मे पतिर्व्रतम् ॥ १९ ॥
यक्ष्ये त्वां गोसहस्रेण सुराघटशतेन च । स्वस्ति प्रत्यागते रामे पुरीमिक्ष्वाकुपालिताम् ॥ २० ॥
कालिन्दीमथ सीता तु याचमाना कृताञ्जलिः । तीरमेवाभिसंप्राप्ता दक्षिणं वरवर्णिनी ॥ २१ ॥
ततः प्लवेनांशुमतीं शीघ्रगामूर्मिमालिनीम् । तीरजैर्बहुभिर्वृक्षैः संतेरुर्यमुनां नदीम् ॥ २२ ॥
[4]तेषु ते प्लवमुत्सृज्य प्रस्थाय यमुनावनात् । श्यामं न्यग्रोधमासेदुः शीतलं हरितच्छदम् ॥ २३ ॥
न्यग्रोधं [5]समुपागम्य वैदेही चाभ्यवन्दत । नमस्तेऽस्तु महावृक्ष पारयेन्मे पतिर्व्रतम् ॥ २४ ॥

महाप्लवमुडुपम् उशीरैर्नलदैः वेतसैरित्यर्थं इति कतकोक्तमनुक्तम् ॥ १४ ॥ १६ ॥

रा० टी०–ताविति । काष्ठानां संघाटः समूहो यस्मिन्प्लुष्कैर्वेत्सैः समाकीर्णं संयुक्तमुशीरैः शोभनगन्धवत्तृणविशेषैः समावृतं सुमहाप्लवं चक्रतुः ॥ १४ ॥

रा० टी०–तत इति । ततः प्लवनिर्माणानन्तरं वैतसशाखाः जम्बुशाखाश्च छित्वा सीतायाः सुखमासनं चकार॥१५॥

गो० टी०–तौ काष्ठसंघाटमिति । काष्ठसंघाटः काष्ठनिचयः उशीरैः वीरणतृणमूलैः ' मूलेऽस्योशीरमस्त्रियाम्' इत्यमरः॥ १४ ॥ १६ ॥

१६] ति० टी०–अचिन्त्यामचिन्त्यप्रभावाम्। स रामः १६

रा० टी०–तत्रेति । तत्र तस्मिन्समये अचिन्त्यां श्रियं शोभामिव ईषल्लज्जमानां तां प्रियां स दाशरथिः प्लवमध्यारोपयत ॥ १६ ॥

गो० टी०–तत्रेति । अचिन्त्याम् अचिन्त्यसौन्दर्यां कान्तकरग्रहादावश्यकत्वाच्चेषल्लज्जावतीम् ॥ १६ ॥

१७] ति० टी०–कठिनं खनित्रम् काजं पेटकम् द्वन्द्व एकवद्भावः । कठिनकं खनित्रम् आजमजचर्मपिनद्धं पेटकमित्यर्थमन्वे ॥ १७ ॥

रा० टी०–पार्श्वे इति । तत्र प्लवे वैदेह्याः पार्श्वे वसनादीनि कठिनकाजं च काठनकं खनित्रमाजमजचर्मपिनद्धं पिटकमित्यर्थः चक्रे स्थापयामासेत्यर्थः ॥ १७ ॥

गो० टी०–पार्श्व इति । तत्रैव वैदेह्याः पार्श्वे कठिनकाजं कठिनकं कन्दमूलखननसाधनमायसाग्रं दारु आजम् अजचर्मपिनद्धं पिटकं द्वन्द्वैकवद्भावः । चक्रे स्थापितवानित्यर्थः ॥१७॥

१८] ति० टी०–संघाटं प्लवम् ॥ १८ ॥

रा० टी०–आरोप्येति । यत्तौ कृतप्रयत्नौ प्रीतौ तौ रामलक्ष्मणौ प्रथमं संघाटं प्लवं परिगृह्य सीतामारोप्य प्रतेरतुः पुप्लुवाते ॥ १८ ॥

गो० टी०–आरोप्येति । संघाटं प्लवं यत्तौ प्लवचालने यतमानौ ॥ १८ ॥

१९] ति० टी०–पतिर्व्रतं चतुर्दशवर्षावधिकं पारयेत्समापयेत् ॥ १९ ॥

रा० टी०–कालिन्दीति । कालिन्दीमध्यमायाता सीता एनां कालिन्दीमवन्दत वन्दनपूर्वकं प्रार्थयत्। अर्धं पृथक् ॥१९॥

रा० टी०–प्रार्थनास्वरूपमाह–स्वस्तीति । हे देवि ! याऽहं त्वां तरामि तस्याः मे पतिः स्वस्ति यथा स्यात्तथा व्रतं प्रतिज्ञां पारयेत् समापयेत् । अर्धं पृथक्–यक्ष्ये इति । रामे स्वस्ति यथा स्यात्तथा प्रत्यागते सति गोसहस्रेण सहस्रसंख्याकगवीभिः सुराघटशतेन शतसंख्याकदेवदुर्लभपदार्थेन च त्वां यक्ष्ये ॥ २० ॥

गो० टी०–कालिन्दीमध्यमित्यादि । मे पतिः व्रतं वनवाससंकल्पं पारयेत् समापयेत् गोसहस्रेण त्वामुद्दिश्य गोसहस्रप्रदानेन सुराघटशतेन च नैवेद्येन स्वस्ति यथा भवति तथा प्रत्यागते सति गोसहस्रप्रदानेन सुराघटशतेन च त्वां यक्ष्य इत्यादि याचमाना तीरं प्राप्तेत्यन्वयः ॥ १९–२१ ॥

२०–२१] ति० टी०–स्वस्ति प्रत्यागते यक्ष्य इति संबन्धः ॥ २० ॥ २१ ॥

रा० टी०–कालिन्दीमिति । वरवर्णिनी उत्तमवर्णविशिष्टा विलक्षणगौराङ्गीत्यर्थः कालिन्दीं याचमाना सीता दक्षिणं तीरमभिसंप्राप्ता ॥ २१ ॥

२२] ति० टी०–उक्तमेवोपसंहरति–तत इति । तीरजैर्वृक्षैरुपलक्षिताम् ॥ २२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–तत इति । तीरजैर्वृक्षैरुपलक्षितामंशुमतीं यमुनां प्लवेन संतेरुः ॥ २२ ॥

गो० टी०–तत इति । वृक्षैरिति उपलक्षणे तृतीया ॥२२॥

२३–२४] ति० टी०–यमुनातीरसंबन्धिवनात् ॥२३॥२४॥

रा० टी०–ते इति । तीर्णाः ते रामादयः प्लवमुत्सृज्य त्यक्त्वा यमुनावनात् प्रस्थाय श्यामं न्यग्रोधमासेदुः ॥ २३ ॥

रा० टी०–न्यग्रोधमिति । समुपागम्य संप्राप्य वैदेही न्यग्रोधमभ्यवन्दत वन्दनपूर्वकप्रार्थनामकरोत्। अर्धं पृथक् २४

---

१ संलज्जमानामिति गो. पाठः । २ सहायुधैरिति गो. पाठः । ३ वीराविति गो. पाठः । ४ ते तीर्णा इति गो. रा. पाठः । ५ तमिति गो. पाठः । ६ वाक्यमब्रवीदिति गो. पाठः ।

कौसल्यां चैव पश्येम सुमित्रां च यशस्विनीम् । इति सीताञ्जलिं कृत्वा पर्यगच्छन्मनस्विनी ॥ २५ ॥
अवलोक्य ततः सीतामायाचन्तीमनिन्दिताम् । दयितां च विधेयां च रामो लक्ष्मणमब्रवीत् ॥ २६ ॥
सीतामादाय गच्छ त्वमग्रतो भरतानुज । पृष्ठतोऽनुगमिष्यामि सायुधो द्विपदां वर ॥ २७ ॥
यद्यत्फलं प्रार्थयते पुष्पं वा जनकात्मजा । तत्तत्प्रयच्छ वैदेह्या यत्रास्या रमते मनः ॥ २८ ॥
[गच्छतोस्तु तयोर्मध्ये बभूव जनकात्मजा । मातङ्गयोर्मध्यगता शुभा नागवधूरिव ॥]
एकैकं पादपं गुल्मं लतां वा पुष्पशालिनीम् । अदृष्टरूपां पश्यन्ती रामं पप्रच्छ साऽबला ॥ २९ ॥
रमणीयान्बहुविधान्पादपान्कुसुमोत्करान् । सीतावचनसंरब्ध आनयामास लक्ष्मणः ॥ ३० ॥
विचित्रवालुकजलां हंससारसनादिताम् । रेमे जनकराजस्य सुता प्रेक्ष्य तदा नदीम् ॥ ३१ ॥
क्रोशमात्रं ततो गत्वा भ्रातरौ रामलक्ष्मणौ । बहून्मेध्यान्मृगान्हत्वा चेरतुर्यमुनावने ॥ ३२ ॥
विहृत्य ते बर्हिणपूगनादिते शुभे वने वारणवानरायुते ।
समं नदीवप्रमुपेत्य सत्वरं निवासमाजग्मुरदीनदर्शनाः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चपञ्चाशः सर्गः ॥ ९९ ॥

गो० टी०–ते तीर्णा इति । यमुनावनात् यमुनातीरवनात् ॥ २३ ॥ २४ ॥

२५] ति० टी०–पर्यगच्छत्परितोऽगच्छत् प्रदक्षिणं चकारेति यावत् ॥ २५ ॥

रा० टी०–प्रार्थनास्वरूपमाह–नम इति । मे पतिः व्रतं प्रतिज्ञां पारयेत् कौशल्यां सुमित्रां च चकारान्तरेण केकयीं च पश्येम ॥ २५ ॥

गो० टी०–नमस्त इत्यादि।पर्यगच्छत् प्रदक्षिणं चकार२५

रा० टी०–इतीति । सीता पर्यगच्छत्परितोऽगच्छत्प्रदक्षिणमकरोदित्यर्थः । अर्घं पृथक्–अवलोक्येति । आयाचन्तीं प्रार्थयन्तीं पूजां समापयन्तीमित्यर्थः विधेयां स्वाधुकूलां दयितामवलोक्य रामो लक्ष्मणमब्रवीत् । अर्धद्वयमेकान्वयि ॥ २६ ॥

२६–२८] ति० टी०–विधेयामनुकूलां सीतामायाचन्तीं प्रार्थयन्तीमवलोक्याब्रवीदित्यन्वयः ॥ २६–२८ ॥

गो० टी०–अवलोक्येति । अवलोक्य सीतायाः श्रान्त्यश्रान्ती परीक्ष्येत्यर्थः। आयाचन्तीं मनोरथान् प्रार्थयन्तीम्॥२६॥

रा० टी०–वचनस्वरूपमाह–सीतामिति । अग्रतः अग्रे गच्छ सायुधोऽहं पृष्ठतः अनुगमिष्यामि ॥ २७ ॥

गो० टी०–सीतामादायेति । भरताग्रजेति बहुव्रीहिः। अग्रतो गच्छेत्यनेन सीतायाः पुरतो गच्छेत्युक्तम् ॥ २७ ॥

रा० टी०–यद्यदिति । यत्र यस्मिंस्थले अस्याः मनो रमते तत्र यथत्प्रार्थयते तत्तत्प्रयच्छ ॥ २८ ॥

गो० टी०–अग्रतो गमनफलमाह–यद्यत्फलमित्यादिश्लोकेन ॥ २८ ॥ २९ ॥

२९] ति० टी०–साबला सीता पप्रच्छ कोऽयं वृक्ष इत्यादि२९

रा० टी०–रामोक्तिं संवर्ण्य सीताहृत्तमाह–एकैकमिति। अदृष्टरूपपादपादीन्पश्यन्ती सीता एकैकं पप्रच्छ प्रश्नपूर्वकोत्तरजनितनिश्चयं चकार अदृष्टरूपामित्यस्य लिङ्गादिविपरिणामेनान्येष्वप्यन्वयः पादपानित्यस्य पादपावयवानित्यर्थः अतो न पौनरुक्त्यम् । सार्धश्लोक एकान्वयी ॥ २९ ॥ ३० ॥

गो० टी०–एकैकमिति । पप्रच्छ कैषां संज्ञेति पृष्टवतीत्यर्थः ॥ ३० ॥

३०] ति० टी०–रमणीयान्रम्यान् कुसुमोत्करान्पादपान्कुसुमस्तोमविशिष्टवृक्षावयवान् सीतावचनेन संरब्धस्त्वरावानानयामासेत्यन्वयः । आनयामासेत्यानिन्य इत्यर्थं आर्षम्॥३०॥

रा० टी०–सीतेति । सीतावचनसंरब्धः सीताज्ञापनहेतुत्वरावाँल्लक्ष्मणः विचित्रा वालुका यस्मिंस्तज्जलं यस्याः तां हंसादेर्निनादितां यमुनामानगामास ॥ ३१ ॥

गो० टी०–रमणीयामिति । पादपानित्यनेन स्तवकविशिष्टाः पादपावयवा उच्यन्ते सीतावचनसंरब्धः सीतावचनेन त्वरितः ॥ ३१ ॥

३१] ति० टी०–विचित्रेत्यादि नदीविशेषणम् । नदीं यमुनाम् ॥ ३१ ॥

रा० टी०–रेमे इति । नदीं यमुनां जनकराजस्य सुता प्रेक्ष्य रेमे एतेन यमुनादक्षिणतटेनैव स मार्ग इति व्यक्तम् । ततोऽनन्तरं क्रोशमात्रं गत्वा मेध्यान्मार्गे संप्राप्तान्मृगान्हत्वा संताप्य यमुनावने चेरतुः । सार्धश्लोक एकान्वयी ॥ ३२ ॥

गो० टी०–विचित्रवालुकजलामिति । नदीं यमुनां सुदूरं तत्तीरे गमनात्तद्दर्शनम् ॥ ३२ ॥

३२] ति० टी०–चेरतुर्भुक्तवन्तौ ॥ ३२ ॥

गो० टी०–क्रोशमात्रमिति । मेध्यान् शुचीन् भक्ष्यानिति यावत् चेरतुः भक्षितवन्तौ 'चर गतिभक्षणयोः' ॥ ३३ ॥

३३] ति० टी०–वप्रं तीरम् ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

---

१ पश्येयमिति गो. पाठः । २ वनस्पतिमिति गो. पाठः । ३ अग्रजेति गो. पाठः । ४ऽहमिति गो. पाठः । ५ प्रदद्या इति गो. पाठः । ६ अधिकोऽयं श्लोको गो. पाठे । ७ पूर्वोमिति गो. पाठः । ८ उत्कटानिति गो. पाठः । ९ संमतमिति गो. पाठः ।

षट्पञ्चाशः सर्गः ।

प्रातरग्ने प्रस्थितास्ते वनरामणीयकेन मोदमानाश्चित्रकूटं प्राप्य वाल्मीक्याश्रमं प्राविशन्। वाल्मीक्यनुज्ञया तद्वासमना रामो लक्ष्मणेन पर्णशालां निर्मापयामास। कृतदेवयजनास्ते सुमुहूर्ते तां विविशुः।

अथ रात्र्यां व्यतीतायामवसुप्तमनन्तरम्। प्रबोधयामास शनैर्लक्ष्मणं रघुपुंगवः ॥ १ ॥
सौमित्रे शृणु वन्यानां वल्गु व्याहरतां स्वनम्। संप्रतिष्ठामहे कालः प्रस्थानस्य परंतप ॥ २ ॥
प्रसुप्तस्तु ततो भ्रात्रा समये प्रतिबोधितः। जहौ निद्रां च तन्द्रां च प्रसक्तं च पथिश्रमम् ॥ ३ ॥
तत उत्थाय ते सर्वे स्पृष्ट्वा नद्याः शिवं जलम्। पन्थानमृषिभिर्जुष्टं चित्रकूटस्य तं ययुः ॥ ४ ॥
ततः संप्रस्थितः काले रामः सौमित्रिणा सह। सीतां कमलपत्राक्षीमिदं वचनमब्रवीत् ॥ ५ ॥
आदीप्तानिव वैदेहि सर्वतः पुष्पितान्नगान्। स्वैः पुष्पैः किंशुकान्पश्य मालिनः शिशिरात्यये ॥ ६ ॥
पश्य भल्लातकान्बिल्वान्नरैरनुपसेवितान्। फलपुष्पैरवनतान्नूनं शक्ष्याम जीवितुम् ॥ ७ ॥

रा० टी०—विहृत्येति । बर्हिणपूगैः मयूरसमूहैः नादिते वारणवानराभ्यामाकुले व्याप्ते वने विहृत्य समं वैषम्यरहितं नदीवप्रं यमुनादक्षिणतीरमुपेत्य प्राप्य निवासं निवासयोग्यवृक्षमाजग्मुः ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

गो० टी०—विहृत्येति । पूगः समूहः समम् अनिम्नोन्नतं नदीवप्रं नदीतीरं संमतं निवासं सीताभिमतं वासस्थानम्॥३४॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१] ति० टी०—अथावसुप्तं स्वप्रबोधानन्तरमपीषत्सुप्तम् एतेन चतुर्दशवर्षपर्यन्तं लक्ष्मणः स्वापहीनोऽनाहारश्चेति लोकप्रवादोऽपास्तः ॥ १ ॥

रा० टी०—शयनानन्तरकालिकं रामवृत्तमाह—अथेति । रात्र्यां व्यतीतायां सत्यामनन्तरं दूररहितं यथा स्यात्तथा अवसुप्तं लक्ष्मणं रघुपुङ्गवो रामः प्रबोधयामास ॥ १ ॥

गो० टी०—अथेति । अनन्तरं स्वप्रबोधानन्तरम् अवसुप्तम् ईषत्सुप्तमित्यर्थः ॥ १ ॥

२] ति० टी०—वन्यानां शुकपिकादीनां स्वनं शृणु प्रस्थानस्य कालो जातोऽतः संप्रतिष्ठामहे गच्छामः । 'संप्रतीक्षामहे कालम्' इति पाठे प्रस्थानकालं जानीम इत्यर्थः ॥ २ ॥

रा० टी०—प्रबोधनप्रकारमाह—सौमित्रे इति । वल्गु व्याहरतां शोभनशब्दं कुर्वतां वन्यानां स्वनं शृणु । तच्छ्रवणप्रयोजनमाह—प्रस्थानस्य कालः समागत इति शेषः । हे परन्तप अतः संप्रतिष्ठाम व्रजेम ॥ २ ॥

गो० टी०—सौमित्र इति । वन्यानां शुकपिकशारिकादीनां वल्गु सुन्दरं कालः प्राप्त इति शेषः ॥ २ ॥

३] ति० टी०—समये प्रबोधसमये । तन्द्रामालस्यम्॥३॥

रा० टी०—प्रसुप्त इति । प्रसुप्तो लक्ष्मणः समये प्रातःकाले भ्रात्रा प्रबोधितः सन्निद्रादिप्रसक्तमध्वप्राप्तं परिश्रमं च जहौ ॥ ३ ॥

गो० टी०—स सुप्त इति । समये प्रबोधनसमये तन्द्रीं जाड्यं जहौ तदा प्रभृतीति शेषः । पथिश्रमं तत्कृतोपचारमित्यर्थः ॥ ३ ॥

४–५] ति० टी०—नद्याः कालिन्द्या जलं स्पृष्ट्वा स्नानान्तं नित्यकृत्यं कृत्वा ॥ ४ ॥ ५ ॥

रा० टी०—तत इति । सर्वे रामादयः नद्या यमुनाया जलं स्पृष्ट्वा ऋषिभिर्जुष्टं सेवितं तं भारद्वाजनिर्दिष्टं चित्रकूटस्य पन्थानं ययुः ॥ ४ ॥

रा० टी०—तत इति । संप्रस्थितो रामः कमलपत्राक्षीं सीतामिदमब्रवीत् ॥ ५ ॥

गो० टी०—तत उत्थायेति । नद्याः कालिन्द्याः स्पृष्ट्वेत्युपलक्षणं प्रातःकालिकस्नानादिकृत्यानां तं पन्थानं पलाशवनरूपम् ॥ ४ ॥ ५ ॥

६] ति० टी०—आदीप्तानिव ज्वलितानिव मालिनः स्वैः पुष्पैर्मालावत इव स्थितान् शिशिरात्यये वसन्ते ॥ ६ ॥

रा० टी०—आदीप्तानिति । हे वैदेहि ! शिशिरात्यये माघफाल्गुनापगमे वसन्ते इत्यर्थः स्वैः स्वकीयैः स्वकीयैः पुष्पैः मालिनः मालाधारिण इव पुष्पितान्किंशुकान्पलाशाभिधान्नगान्वृक्षान्सर्वतश्चतुर्दिक्षु आदीप्तान् प्रचलितानिव पश्य । इव उभयान्वयी ॥ ६ ॥

गो० टी०—आदीप्तानिति । आदीप्तानिव आसमन्ताज्ज्वलत इव नगान् वृक्षान् स्वैः पुष्पैः मालिनः मालावत इव स्थितान् शिशिरात्यये वसन्तसमये ॥ ६ ॥

७] ति० टी०—शक्ष्याम जीवितुम् जीवनसाधनफलादिसंपत्तेः ॥ ७ ॥

१ नन्दन इति गो. पाठः । २ स सुप्तः समये भ्रात्रा लक्ष्मण इति गो. पाठः । ३ तन्द्रीमिति गो. पाठः । ४ पथीति गो. पाठः । ५ ऋषिणा दिष्टमिति गो. पाठः । ६ फुल्लानिति गो. पाठः । ७ पत्रैरिति गो. पाठः । ८ शक्ष्यामीति गो. पाठः ।

पश्य द्रोणप्रमाणानि लम्बमानानि लक्ष्मण । मधूनि मधुकारीभिः संभृतानि नगे नगे ॥ ८ ॥
एष क्रोशति नत्यूहस्तं शिखी प्रतिकूजति । रमणीये वनोद्देशे पुष्पसंस्तरसंकटे ॥ ९ ॥
मातङ्गयूथानुसृतं पक्षिसंघानुनादितम् । चित्रकूटमिमं पश्य प्रवृद्धशिखरं गिरिम् ॥ १० ॥
समभूमितले रम्ये द्रुमैर्बहुभिरावृते । पुण्ये रंस्यामहे तात चित्रकूटस्य कानने ॥ ११ ॥
ततस्तौ पादचारेण गच्छन्तौ सह सीतया । रम्यमासेदतुः शैलं चित्रकूटं मनोरमम् ॥ १२ ॥
तं तु पर्वतमासाद्य नानापक्षिगणायुतम् । बहुमूलफलं रम्यं सँपन्नसरसोदकम् ॥ १३ ॥
मनोज्ञोऽयं गिरिः सौम्य नानाद्रुमलतायुतः । बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे ॥ १४ ॥
मुनयश्च महात्मानो वसन्त्यस्मिञ्छिलोच्चये । अयं वासो भवेत्तात वयमत्र वसेमहि ॥ १५ ॥
इति सीता च रामश्च लक्ष्मणश्च कृताञ्जलिः । अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् ॥ १६ ॥
तान्महर्षिः प्रमुदितः पूजयामास धर्मवित् । आस्यतामिति चोवाच स्वागतं ³तं निवेद्य च ॥ १७ ॥

रा० टी०–पश्येति । नरैरनुपसेवितानगम्यत्वेन नररहितान्फलपुष्पैरवनतान्भक्षातकान्वीराभिधवृक्षान् बिल्वांश्च पश्य अतिमनोहरा इमे इत्यर्थः अतो जीवितुं गजादिसंघर्षाद्रक्षितुं शक्ष्याम शक्ष्यामः ॥ ७ ॥

गो० टी०–पश्येति । भक्षातकान् वीरवृक्षान् फुल्लान् फुल्लपुष्पान् अनुपसेवितान् दुर्गमत्वादिति भावः । जीवितुं शक्ष्यामि एवमादिजीवनसाधनस्य विद्यमानत्वादिति भावः ॥७॥

८] ति० टी०–आढकचतुष्टयं द्रोणस्तत्प्रमाणमधुपूर्णानि मधूनि मधुपटलानि मधुकारीभिर्मधुमक्षिकाभिः नगे वृक्षे ॥८॥

रा० टी०–पश्येति । द्रोणप्रमाणानि आढकचतुष्टय-परिमितानि मधुकारीभिः मधुमक्षिकाभिः संभृतानि नगे नगे पतितवृक्षे लम्बमानानि मधूनि पश्य ॥ ८ ॥

गो० टी०–पश्येति । द्रोणप्रमाणानि द्रोणम् आढकद्वयं तत्प्रमाणानि तत्प्रमाणमधुपूरितानि मधूनि कुर्वन्तीति मधुकार्यः "कर्मण्यण्" ङीप् ताभिः मधुमक्षिकाभिरिति यावत् संभृतानि निर्मितानि नगे नगे वृक्षे वृक्षे लम्बमानानि मधूनि मधुपटलानि पश्य ॥ ८ ॥

९–१२] ति० टी०–नत्यूहो दात्यूहः । पुष्पसंस्तरसंकटे पुष्पैः कृतेन संस्तरेणाच्छादनेन संकटे निबिडे वनोद्देशे॥९–१२॥

रा० टी०–एष इति । एषः परिदृश्यमानः नत्यूहः दात्यूहः क्रोशति तं क्रोशन्तं नत्यूहं शिखी मयूरः प्रतिकूजति तं पश्येत्यनुकृष्यते । अथ पृथक्–रमणीये इति । पुष्पाणां संस्तरः सर्वत्र विद्यमानत्वेन आच्छादनं तस्य संकटे तत्कर्तृकदृष्टिविशिष्टे अत एव रमणीये वनोद्देशे मातङ्गयूथैर्गजसमूहैः अनुसृतं युक्तं पक्षिसंघैः अनुनादितं प्रवृद्धानि शिखराणि यस्य तं चित्रकूटं गिरिं पश्य ॥ ९ ॥ १० ॥

गो० टी०–एष इति । नत्यूहः दात्यूहः वनोद्देशे वनप्रदेशे पुष्पसंस्तरसंकटे पुष्पमयास्तरणेन निबिडे ॥ ९ ॥

गो० टी०–मातङ्गयूथानुसृतमिति । मातङ्गयूथानुसृतं गजकुलैर्व्याप्तं प्रवृद्धशिखरम् उन्नतशिखरम् ॥ १० ॥ १२ ॥

रा० टी०–समेति । समान्येकाकाराणि भूमितलानि यस्मिँस्तस्मिंश्चित्रकूटस्य कानने रंस्यामहे " ११ ॥

रा० टी०–तत इति । ततः तस्मात् स्थलात् पादचारेण गच्छन्तौ रामलक्ष्मणौ रम्यं विहरणयोग्यमत एव मनोरमं चित्रकूटमासेदतुः प्रापतुः ॥ १२ ॥

१३] ति० टी०–संपन्नसरसोदकं स्वादूदकसहितम्॥१३॥

१४] ति० टी०–सुतरामाजीवो जीवनोपायो यस्मिन्१४

रा० टी०–तमिति । नानापक्षिगणैः आयुतं व्याप्तं संपन्नानि सम्यक् प्राप्तानि सरसानि आस्वादसहितानि उदकानि यस्मिँस्तं पर्वतमासाद्य प्राप्य अयं गिरिः रम्यः रमणयोग्यः अत एव मनोज्ञः मनोहरः अत एव स्वाजीवः शोभनमाजीवः जीविका यस्मिन् सः मे प्रतिभाति निश्चयविषयो भवति इत्युवाचेति शेषः । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–तं त्वित्यारभ्य अभिवादयन्नित्यन्तमेकं वाक्यम्। तं त्विति । सरसोदकं स्वादूदकं स्वाजीवः शोभनः आजीवो जीविका यस्मिन् स तथोक्तः शिलोच्चये पर्वते इति इति निश्चित्य आश्रमं वाल्मीकीयम् अभिवादयन् अभ्यवादयन् । तदानीं चित्रकूटे वाल्मीकेर्वासः भरतागमनानन्तरमृषिनिर्गमनकथनात्ततः प्रभृति तमसातीर इति ज्ञेयम् । अतो न बालकाण्डकथाविरोधः ॥ १३–१९ ॥

१५] ति० टी०–अयं वासो भवेद्वासयोग्यो भवेत् ॥१५॥

रा० टी०–मुनय इति । अस्मिन् शिलोच्चये मुनयो वसन्ति अत एव अयं दृश्यमान आश्रमः वासः वासयोग्यो भवेद्भवति अत एव वयं वसेमहि ॥ १५ ॥

१६] ति० टी०–वाल्मीकिमभिवादयन्नभ्यवादयन् चित्रकूटे स्थित एव वाल्मीकौ रामराज्यप्राप्तिसमये तमसातीरं गत इति न विरोध इति प्राञ्चः, प्राचेतसादयं वाल्मीकिरन्य एवेति तत्त्वम् ॥ १६ ॥

रा० टी०–इतीति । इति अनेन प्रकारेणोक्त्वा सर्वे रामादयः आश्रमं प्राप्य वाल्मीकिमभिवादयन्नभ्यवादयन् ॥ १६ ॥

१७] ति० टी०–तं रामं प्रति स्वागतं स्वागतप्रश्नं निवेद्य विज्ञाप्य ॥ १७ ॥

१ संपन्नमिति गो. पाठः । २ तावदत्र सौम्य रमेमहीति गो. पाठः । ३ त्विति गो. पाठः ।

ततोऽब्रवीन्महाबाहुर्लक्ष्मणं लक्ष्मणाग्रजः । संनिवेद्य यथान्यायमात्मानमृषये प्रभुः ॥ १८ ॥
लक्ष्मणानय दारूणि दृढानि च वराणि च । कुरुष्वावसथं सौम्य वासे मेऽभिरतं मनः ॥ १९ ॥
तस्य तद्वचनं श्रुत्वा सौमित्रिर्विविधान्द्रुमान् । आजहार ततश्चक्रे पर्णशालामरिंदमः ॥ २० ॥
तां निष्ठितां वद्धकटां दृष्ट्वा रामः सुदर्शनाम् । शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत् ॥ २१ ॥
ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम् । कर्तव्यं वास्तुशमनं सौमित्रे चिरजीविभिः ॥ २२ ॥
मृगं हत्वानय क्षिप्रं लक्ष्मणेह शुभेक्षण । कर्तव्यः शास्त्रदृष्टो हि विधिर्धर्ममनुस्मर ॥ २३ ॥
भ्रातुर्वचनमाज्ञाय लक्ष्मणः परवीरहा । चकार चै[1] यथोक्तं[2] हि तं रामः पुनरब्रवीत् ॥ २४ ॥
ऐणेयं श्रपयस्वैतच्छालां यक्ष्यामहे वयम् । त्वर सौम्यमुहूर्तोऽयं ध्रुवश्च दिवसो ह्ययम्[3] ॥ २५ ॥
स लक्ष्मणः कृष्णमृगं हत्वा मेध्यं प्रतापवान् । अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि ॥ २६ ॥

रा० टी०–तानिति । तानभिवादनकर्तॄन् धर्मविन्महर्षिः स्वागतं निवेद्य उक्त्वा आस्यतामित्युवाच पूजयामास च अर्घ्यादिभिरिति शेषः ॥ १७ ॥

१८–२०] ति० टी०–आत्मानं संनिवेद्यामुकपुत्रोऽमुककार्यार्थमागतोऽस्मीत्युक्त्वा ॥ १८–२० ॥

रा० टी०–तत इति । ततः वाल्मीकिकर्तृकपूजनप्राप्त्यनन्तरमात्मानं समूलवनगमनप्रयत्नमृषये यथान्यायं संनिवेद्य कथयित्वा लक्ष्मणमब्रवीत् ॥ १८ ॥

गो० टी०–तत इत्यादि श्लोकद्वयमेकं वाक्यम् । यथान्यायं यथाक्रमम् आत्मानमृषये संनिवेद्य अमुकस्य पुत्रोऽहम् अयमस्मद्भ्राता इयमस्मद्भार्या एतादृशकार्यार्थमागता वयमित्येवमुक्त्वा वराणि जम्ब्वप्रभृतीनि गृहनिर्माणार्हाणि तिन्त्रिणीमधूकादेस्त्याज्यत्वात् आनय आवसथं कुरुष्वेति लक्ष्मणमब्रवीदिति संबन्धः ॥ २० ॥

रा० टी०–तद्वचनस्वरूपमाह–लक्ष्मणेति । वराणि निषिद्धच्छायकविभीतकादिभिन्नत्वेनोत्कृष्टानि काष्ठानि आनय । तत्प्रयोजनमाह–आवसथं वासशालां कुरुष्व वासे अत्र निवसने मे मनोऽभिरतम् ॥ १९ ॥

रा० टी०–तस्येति । द्रुमान् द्रुमावयवानाजहार आनिन्ये ततः पर्णशालां चक्रे ॥ २० ॥

२१] ति० टी०–निष्ठितामन्तर्बहिः काष्ठभित्त्या सुप्रतिष्ठापितां वद्धकटां वद्धकवाटां छान्दसो वर्णलोपः, यद्वा वद्धच्छदिषम् वद्धः कटो वर्षावारको यस्यामित्यर्थात् एकाग्रं लक्ष्मणम् ॥ २१ ॥

रा० टी०–तामिति । निष्ठितां दृढकाष्ठादिरचितात्वेन वातवर्षादिना परामवितुमशक्यां वद्धकटां वद्धः संरचितः कटः वर्षाच्छादको यस्याः तामत एव सुदर्शनां तां पर्णशालां दृष्ट्वा एकाग्रं सावधानचित्तं लक्ष्मणमब्रवीत् ॥ २१ ॥

गो० टी०–तामिति । निष्ठितां निश्चलां वातादिना चालयितुमशक्यां भित्तिसहितां परिनिष्पन्नां वद्धकटां कुड्यार्थे कल्पितास्तरणां वद्धबाह्यावरणां वा ' कटे वर्षावरणयोः ' इति धातुः सुदर्शनां शोभनदर्शनां शुश्रूषमाणं परिचर्यां कुर्वन्तम् एकाग्रम् इतः परं किंवा आज्ञापयिष्यतीति सावधानम् ॥२१॥

२२] ति० टी०–शालां पर्णशालाधिष्ठातृदेवताम् वास्तुशमनं वास्तुशान्तिः चिरजीविभिश्चिरजीवित्वेच्छावद्भिः ॥ २२ ॥

रा० टी०–वचनस्वरूपमाह–ऐणेयमिति । ऐणेयमेणीसुतं मृगमित्यर्थः मां समाहृत्य प्रापय्य वर्तस्वेति शेषः । तत्प्रयोजनमाह–वयं शालां शालाभिमानिदेवतां यक्ष्यामहे एतेन पर्णशालादेवतापूजने मृगः स्थापनीय इति सूचितं प्रसिद्धं च कर्मविशेषे मेषादीनां मृगमिति शास्त्रदृष्टो विधिः कर्तव्यः इमं धर्मं कुलपरंपराप्राप्तरीतिमनुस्मर अतः मृगं क्षिप्रमेव इहैव आनय । हेतुशब्दौ एवार्थौ ॥ २२ ॥ २३ ॥

गो० टी०–ऐणेयमिति । ऐणेयम् एणसंबन्धि एणाद्ढञ् आर्षः शालां शालाधिष्ठात्रीस्तत्तद्दिग्वासिनीर्देवताः तास्तु शय्यादेशे कामलिङ्गेन देहल्यामन्तरिक्षलिङ्गेनेत्यादिनगरखण्डप्रतिपाद्याः तादृशयागार्थं पूर्वं वास्तुशमनं वास्तुशान्तिः गृहप्रवेशार्हं कर्म कर्तव्यं गृहदेशे वर्तमानभूतपिशाचादीनां शमनं कर्तव्यमित्यर्थः । कर्तव्यं चिरजीविभिरित्यनेन अकरणे आयुःक्षयो दर्शितः । तदुक्तं ब्रह्माण्डपुराणे–' न च व्याधिभयं तस्य न च बन्धुजनक्षयः । जीवेद्वर्षशतं स्वर्गकल्पमेवं वसेन्नरः ' इति । कथं कर्तव्यमित्यपेक्षायामाह–कर्तव्य इति । शास्त्रदृष्टः शास्त्रेषु निर्णीतः विधिः प्रकारः कर्तव्यः धर्मं तदनुकूलधर्मशास्त्रम् अनुस्मर अवधेहीत्यर्थः ॥ २२–२४ ॥

२३–२४] ति० टी०–पशुवधदोषशङ्कां वारयति–कर्तव्य इति । यज्ञार्थपशुहिंसा न दोष इति भावः । शास्त्रदृष्टः शास्त्रबोधितो धर्मशास्त्रबोधितकर्तव्यत्वरूपः ॥ २३ ॥ २४ ॥

रा० टी०–भ्रातुरिति । आज्ञाय सम्यक् ज्ञात्वा यथोक्तमुक्तमनतिक्रम्य लक्ष्मणः चकार मृगमानिनायेत्यर्थः तं लक्ष्मणं स रामः पुनरब्रवीत् ॥ २४ ॥

२५–२६] ति० टी०–ऐणेयं मृगमांसम् एतच्छालामेनां शालां तदधिष्ठातृशिखिपर्जन्यादिपञ्चाशद्देवताः । अयं सौम्यो मुहूर्तः दिवसश्चायं ध्रुवसंज्ञकः ॥ २५ ॥ २६ ॥

१ स यथोक्तं चेति गो. पाठः । २ स इति रा. पाठः । ३ ऽप्ययमिति गो. पाठः ।

तैत्तु पक्वं समाज्ञाय निष्टप्तं छिन्नशोणितम् । लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् ॥ २७ ॥
अयं सर्वः समस्ताङ्गः श्रुतः कृष्णमृगो मया । देवता देवसंकाश यजस्व कुशलो ह्यसि ॥ २८ ॥
रामः स्नात्वा तु नियतो गुणवाञ्जपकोविदः । संग्रहेणाकरोत्सर्वान्मन्त्रान्सत्रावसानिकान् ॥ २९ ॥
ईड्या देवगणान्सर्वान्विवेशावसथं शुचिः । बभूव च मनोह्लादो रामस्यामिततेजसः ॥ ३० ॥
वैश्वदेवबलिं कृत्वा रौद्रं वैष्णवमेव च । वास्तुसंशमनीयानि मङ्गलानि प्रवर्तयन् ॥ ३१ ॥
जपं च न्यायतः कृत्वा स्नात्वा नद्यां यथाविधि । पापसंशमनं रामश्चकार बलिमुत्तमम् ॥ ३२ ॥

रा० टी०—वचनस्वरूपमाह—ऐणेयमिति । ऐणेयं ऐणेयभक्ष्यं फलं श्रपयस्व त्वर अत्र विलम्बं न कुर्वित्यर्थः । तत्र हेतुः अयं मुहूर्तो ध्रुवः ध्रुवसंज्ञकः निश्चयेन कार्यसाधक इत्यर्थः । ननु पुनरयमागमिष्यति किं त्वरयेत्यत आह—अयं विधिः दिवसः दिनसंबन्धी रात्रौ न कर्तव्य इत्यर्थः । अतः वयं शालां यक्ष्यामहे यजामः लृङुपात्तभविष्यत्वस्याविवक्षा श्रपयस्वेत्यनेन अपक्वफलं मृगाय न समर्पणीयमिति व्यञ्जितम् । अत्रैणेयशब्दात्तस्येदमित्यण् वृद्धाच्छ इत्यस्याप्रवृत्तिस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ २५ ॥

गो० टी०—ऐणेयं श्रपयस्वेति । श्रपयस्व पच अयं मुहूर्तः ध्रुवः स्थिरः अयं शोभनतिथिनक्षत्रयुक्तो दिवसो वासरश्च ध्रुवः स्थिर इत्यर्थः । पाठभेदः अयं सौम्यमुहूर्तः शुभमुहूर्तः अयं दिवसश्च ध्रुवः यजमानस्थैर्यकारी ॥ २५ ॥

रा० टी०—स इति । सः रामाज्ञापितः लक्ष्मणः आमेध्यमतिपवित्रमेव कृष्णमृगं कृष्णमृगभक्ष्यपरिपक्वफलं समिद्धे प्रज्वलिते एव जातवेदसि वह्नौ चिक्षेप कृष्णमृगशब्दः अर्शआद्यजन्तः तस्येदमित्यण्णन्तो वा, चरमे वृद्धयभावः संज्ञापूर्वकविधेरनित्यत्वात् । कृष्णो मृगो भक्षकत्वेन यस्येति बहुव्रीहिर्वा । हतुशब्दावेवार्थौ अत एव मृगं हत्वानय क्षिप्रमित्याज्ञापनवचनेन चकार च यथोक्तं स इत्यनेन च न विरोधः ॥२६॥

गो० टी०—स लक्ष्मण इति । समिद्धे सम्यग्दीप्ते जातवेदसि अग्नौ चिक्षेप पपाचेत्यर्थः ॥ २६ ॥

२७] ति० टी०—निष्टप्तं नितरां तप्तम् । छिन्नशोणितमपरतरुधिरस्यन्दम् ॥ २७ ॥

रा० टी०—तमिति । तं मृगभक्ष्यं पक्वं तत्र हेतुः निष्टप्तं चिरकालस्थापितत्वेनातितापविशिष्टमत एव छिन्नशोणितमारुष्यरहितं समाज्ञाय लक्ष्मणः पुरुषव्याघ्रं राघवं राममब्रवीत् ॥ २७ ॥

गो० टी०—तं त्विति । निष्टप्तं सोष्णं छिन्नशोणितं क्षीणशोणितम् ॥ २७ ॥

२८] ति० टी०—सर्वः सर्वकर्माहः समस्ताङ्गः शिरःपादादिसर्वाङ्गोपेतः श्रुतः पक्वः ॥ २८ ॥

रा० टी०—वचनस्वरूपमाह—अयमिति । मया श्रुतः परिपक्वः समस्ताङ्गः सर्वावयवसंपन्नः सर्वोऽयं कृष्णमृगः कृष्णमृगभक्ष्यः स्थित इति शेषः अतः हे देवसङ्काश देवता यथा यथाविधि यजस्व मृगोद्देश्यकभक्ष्यसमर्पणपूर्वकयजनं कुरु त्वं कुशलोऽसि ॥ २८ ॥

गो० टी०—अयमिति । कृष्णः कृष्णमृगः समाप्ताङ्गः परिपूर्णावयवः श्रुतः पक्वः कृष्णमृगो यथा पूर्णावयवत्वात् पाकतः श्यामत्वाच्च पूर्ववस्थ इव दृश्यत इत्यर्थः । कुशलोऽसि यजने समर्थोऽसि ॥ २८ ॥

२९–३०] ति० टी०—गुणवान्कर्मापेक्षितप्रायत्यादिगुणवान् सत्रावसानिकान्यागसमाप्तिप्रयोजनान्मन्त्रान्गृहीत्वा संग्रहेण वास्तुशान्त्यायकरोत् ॥ २९ ॥ ३० ॥

रा० टी०—राम इति । जपकोविदः जपेषु मन्त्रेषु कोविदोऽभिज्ञः रामस्तु स्नात्वा भक्ष्यसमर्पणपूर्वकस्नानं कृत्वा सत्रावसानिकान् यज्ञसमाप्तिहेतुभूतान्मन्त्रान्संग्रहेण संक्षेपेणाकरोत् यथाक्रियमुदचारयत् ॥ २९ ॥

गो० टी०—राम इति । गुणवान् प्रायत्यादिगुणवान् जप्यकोविदः जप्यमन्त्रेषु समर्थः संग्रहेण संक्षेपेण सत्रावसानिकान् सत्रं वास्तुयागः यैर्मन्त्रैरवसीयते परिसमाप्यते ते सत्रावसानाः सत्रावसाना एव सत्रावसानिकाः विनयादेराकृतिगणत्वात् स्वार्थे ठक् छान्दसो वृद्धयभावः अकरोत् यावता वास्तुशान्तिकर्म समाप्यते तावन्मन्त्रान् जजापेत्यर्थः । मन्त्रजप्पूर्वकं कर्माण्यकरोदित्यर्थः ॥ २९ ॥

रा० टी०—दृष्ट्वेति । सर्वान् यागसमागतनिखिलान्देवगणान् दृष्ट्वा शुचिः राम आवसथं विवेश । अमिततेजसो रामस्य मनोह्लादो बभूव ॥ ३० ॥

गो० टी०—दृष्ट्वा देवगणानिति । देवगणान् वास्तुदेवताः ह्लादस्तुष्टिः ॥ ३० ॥

३१] ति० टी०—एवं गृहाधिष्ठितदेवतापूजामुक्त्वा पुनः स्नानपूर्वकं वैश्वदेवादिप्रकारमाह—वैश्वदेवेत्यादि । वास्तुसंशमनीयानि वास्तुदोषशमनार्थं मङ्गलानि मङ्गलपाठादीनि ॥ ३१ ॥

३२] ति० टी०—पापसंशमनं पापशमनसाधनं बलिं वैश्वदेवबलिमित्युपसंहारेण वादः ॥ ३२ ॥

रा० टी०—यागमेव विशिष्य वर्णयन्नाह—वैश्वेति । वास्तुसंशमनीयानि वास्तुदोषपरिहारकाणि मङ्गलानि प्रवर्तयन्रामः नद्यां यथाविधि स्नात्वा न्यायतो जपं कृत्वा पापसंशमनं

१ तं त्विति गो. रा. पाठः । २ कृष्णः समाप्ताङ्ग इति गो. पाठः । ३ यथेति गो. पाठः । ४ देवतामिति गो. पाठः । ५ जप्येति गो. पाठः । ६ दृष्ट्वेति रा. पाठः ।

वेदिस्थलविधानानि चैत्यान्यायतनानि च । आश्रमस्थानुरूपाणि स्थापयामास राघवः ॥ ३३ ॥
[वन्यैर्माल्यैः फलैर्मूलैः पक्वैर्मांसैर्यथाविधि । अद्भिर्जपैश्च वेदोक्तैर्दर्भैश्च ससमित्कुशैः ॥
तौ तर्पयित्वा भूतानि राघवौ सह सीतया । तदा विविशतुः शालां सुशुभां शुभलक्षणौ ॥]
तां वृक्षपर्णच्छदनां मनोज्ञां यथाप्रदेशं सुकृतां निवाताम् ।
वासाय सर्वे विविशुः समेताः सभां यथा देवगणाः सुधर्माम् ॥ ३४ ॥
[अनेकनानामृगपक्षिसंकुले विचित्रपुष्पस्तवकैर्द्रुमैर्युते ।
वनोत्तमे व्यालमृगानुनादिते तदा विजह्रुः सुमुखं जितेन्द्रियाः ॥]
सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थाम् ।
ननन्द हृष्टो मृगपक्षिजुष्टां जहौ च दुःखं पुरविप्रवासात् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

वैश्वदेवबलिं रौद्रं रुद्रसंबन्धिनं बलिं च वैष्णवं बलिं च चकार एतेन पुनः स्नानकरणं रौद्रयागकरणादिति भूषणोक्तव्याख्यानं चिन्त्यं पाठक्रमादार्थक्रमो बलीयानित्यस्य सर्वशास्त्रसैलीसिद्धत्वात् । अन्यथा वैश्वदेवबलिवैष्णवबलिजपानन्तरं स्नानकर्तृत्वापत्तिरिति तथैव तेषां वक्तव्यं स्यादिति दिक् । श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

गो० टी०—वैश्वदेवबलिमिति । वैश्वदेवबलिं वैश्वदेवबलिहरणे रौद्रं रुद्रदेवताकं वैष्णवं विष्णुदेवताकं च यागं वास्तुसंशमनीयानि गृहारिष्टशामकानि मङ्गलानि मङ्गलकराणि पुण्याहवाचनशान्तिजपादीनि । स्नात्वेति पुनः स्नानकरणं 'ततः सर्वौषधीस्नानं यजमानस्य कारयेत्' इति स्मरणादित्याहुः। वस्तुतस्तु रौद्रयागकरणात् पुनः स्नानं रौद्रकर्मकरणे अप उपस्पृश्येति विधानादिति ज्ञेयम् । पापसंशमनं पापशब्देन पापप्रधानानि दिवाचरनक्तंचराणि क्रूरभूतान्युच्यन्ते तेषां संशमनं, यद्वा पापसंशमनं पञ्चसूना गृहस्थस्येत्यापुक्तरीत्या सूनारूपपापशमनं वैश्वदेवबलिमित्यत्र भूतबलिमात्रोक्तिः अत्र तद्व्यतिरिक्तः पित्रादिविषयः, यद्वा पूर्वं वैश्वदेवरूपबलिमित्यर्थः अत्र सर्वभूतबलिः, यद्वा पूर्वोक्तस्य सर्वस्योपसंहारः ॥३१॥ ३२ ॥

३३] ति० टी०—वेदिस्थलानां बलिहरणवेदिस्थलानामष्टदिग्वर्तिनां विधानानि चैत्यं गणपत्यायतनम् आयतनानि विष्ण्वादेः अनुरूपाणि सूक्ष्ममार्गेणेति यावत् ॥ ३३ ॥

रा० टी०—वेदीति । वेदिस्थले विधानं येषां तानि आश्रमस्थानुरूपाणि योग्यानि चैत्यानि ज्ञातव्यानि स्मर्तव्यानीत्यर्थः । आयतनानि गणपत्यादिविशिष्टस्थलानि स्थापयामास प्रतिष्ठाविधिं चकारेत्यर्थः ॥ ३३ ॥

गो० टी०—वेदिस्थलविधानानीति । वेदिस्थलविधानानि बलिहरणादिवेदिस्थलसंस्थानानि 'वेदिः परिष्कृता भूमिः' इत्यमरः । चैत्यानि नन्दवांथावासस्थानानि आयतनानि विष्ण्वावासस्थलानि । पाठभेदः चैत्यानि देवतास्थानानि आयतनानि अन्यगाराणि अनुरूपाणि आश्रमस्थानुरूपाणि सूक्ष्माणीत्यर्थः । स्थापयामास मन्त्रतस्तत्तद्देवतानां तत्र तत्रावस्थानं कल्पितवानित्यर्थः ॥ ३३–३५ ॥

३४] ति० टी०—वृक्षपर्णैः कृतं छदनं छादनं यस्यां ताम् ॥ ३४ ॥

रा० टी०—तामिति । वृक्षपर्णैः तरुविशेषपत्रैः छदनमाच्छादनं यस्यास्तां मनोज्ञां रमणीयां निवातां वातनिवारणयोग्यां यथाप्रदेशसुचितस्थले सुकृतां निर्मितां तां पर्णशालां समेताः सर्वे रामादयः वासाय विविशुः । तत्र दृष्टान्तः सुधर्मां सभां देवगणाः यथा एतेन पर्णशालायाः अतिसमृद्धिमतीत्वं व्यक्तं तेन रामस्य अचिन्त्यशक्तिमत्वं बोधितम् ॥ ३४ ॥

गो० टी०—तामिति । वृक्षपर्णच्छदनां वृक्षपर्णरूपाच्छादनपटलयुक्तां यथाप्रदेशं शास्त्रोक्तप्रदेशमनतिक्रम्य 'आग्नेय्यां पाकशाला' इत्यादिशास्त्रं सुधर्मां देवसभां 'स्यात्सुधर्मा देवसभा इत्यमरः ॥ ३६ ॥

गो० टी०—अनेकेति । पुष्पस्तबकपदं कर्णावतंसादिपदवत्रिर्वाह्यं व्यालाः सर्पाः गजा वा जितेन्द्रिया इत्यनेन विहारो ग्राम्यभिन्नजलक्रीडापुष्पापचयादिरिति सूच्यते ॥ ३७ ॥

३५] ति० टी०—मृगपक्षिजुष्टां तां नदीमासाद्य हृष्टः ३६ इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०—सुरम्यमिति । सुरम्यं चित्रकूटमासाद्य प्राप्य तत्र सुतीर्थामतिपवित्रत्वविशिष्टां मृगपक्षिभिर्जुष्टां सेवितां माल्यवतीं नदीं च आसाद्य हृष्टः प्राप्तसंतोषः सन्ननन्द अत एव पुरविप्रवासात् पुरविप्रवासजन्यं दुःखं जहौ ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

---

१ श्लोकद्वयमेतदधिकं गो. पाठे । २ श्लोकोऽयमधिको गो. पाठे ।

सप्तपञ्चाशः सर्गः ।

गुहचारैर्निवेदितरामचित्रकूटगमनः सुमन्त्रो गुहमापृच्छ्यायोध्यां जगाम । तत्रानुद्रवत्पौरेषु निवेदितपूर्वं रामवृत्तं सोऽन्तःपुरं प्राप्य दशरथाग्रे न्यवेदीत् । तच्छ्रुत्वा कौसल्यादशरथयोर्मूर्छितयोः सर्वे दुःखाद्विलेपुः ।

कथयित्वा तु दुःखार्तः सुमन्त्रेण चिरं सह । रामे दक्षिणकूलस्थे जगाम स्वगृहं गुहः ॥ १ ॥
भरद्वाजाभिगमनं प्रयागे च सभाजनम् । आ गिरेर्गमनं तेषां तत्रस्थैरभिलक्षितम् ॥ २ ॥
अनुज्ञातः सुमन्त्रोऽथ योजयित्वा हयोत्तमान् । अयोध्यामेव नगरीं प्रययौ गाढदुर्मनाः ॥ ३ ॥
स वनानि सुगन्धीनि सरितश्च सरांसि च । पश्यन्यत्तो ययौ शीघ्रं ग्रामाणि नगराणि च ॥ ४ ॥
ततः सायाह्नसमये द्वितीयेऽहनि सारथिः । अयोध्यां समनुप्राप्य निरानन्दां ददर्श ह ॥ ५ ॥
स शून्यामिव निःशब्दां दृष्ट्वा परमदुर्मनाः । सुमन्त्रश्चिन्तयामास शोकवेगसमाहतः ॥ ६ ॥

गो० टी०–सुरम्यमिति । तां प्रसिद्धां श्रुतीर्थां शोभनजलावतरणप्रदेशां हृष्टः पुलकितः पुरविप्रवासात् जनितमिति शेषः ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

१] ति० टी०–एवं रामव्यापारमुक्त्वा विसृष्टसुमन्त्रव्यापारमाह–कथयित्वेति । रामे दक्षिणतीरस्थे सुमन्त्रेण सह दुःखार्तो गुहश्चिरं रामगुणान्कथयित्वा रामभद्रे दृष्टिपथादतिक्रान्ते तेन सह स्वगृहं जगाम ॥ १ ॥

रा० टी०–रामवृत्तमुक्त्वा गङ्गाकूलस्थितगुहवृत्तमाह–कथयित्वेति । रामे दक्षिणकूलस्थे सति चिरं कथयित्वा रामकथा इति शेषः भरद्वाजाभिगमनं प्रयागे रामभरद्वाजसमागमं सभाजनं भरद्वाजकर्तृकरामसत्कारं च तेषां रामादीनामागिरेः चित्रकूटगिरिपर्यन्तं गमनं च तत्रस्थैः गुहप्रेषितशृङ्गवेरपुरस्थचारैः अभिलक्षितं दृष्टं ज्ञात्वा चेति शेषः सुमन्त्रेण सह गुहः स्वगृहं जगाम एतेन पञ्चदिनपर्यन्तं शृङ्गवेरपुरसमीपे सुमन्त्रगुहाभ्यां स्थितमिति व्यक्तम् । श्लोकद्वयमेकान्वयि॥१॥२॥

गो० टी०–एवं रामस्य चित्रकूटगमनपर्यन्तवृत्तान्तमभिधाय गुहसुमन्त्रादिवृत्तान्तमृषिः प्रस्तौति–कथयित्वेति । गुहो रामे दक्षिणकूलस्थे सति सुदुःखार्तः सन् सुमन्त्रेण सह चिरं कथयित्वा यावद्रामोऽक्षिपथमतिक्रामति तावत्पर्यन्तं तत्रैव स्थित्वा रामगुणान् कथयित्वेत्यर्थः । स्वगृहं जगाम तेन सह स्वगृहं जगामेत्यर्थः ॥ १ ॥

२] ति० टी०–भरद्वाजाभिगमनं रामादीनां भरद्वाजाश्रित्य गमनम् । सभाजनं भरद्वाजेनेति शेषः । 'सहासनम्' इति पाठान्तरम् तत्रस्थैः शृङ्गवेरपुरस्थैर्गुहप्रेषितचारैः करणभूतैस्तन्मुखेनाभिलक्षितं ज्ञातं कृत्वा गुहाद्यज्ञातः सुमन्त्रो ययाविति यन्वयः । गङ्गोत्तरणतृतीयदिवसे भरद्वाजाश्रमात्प्रतिनिवृत्तदुत्तमुखात्तावत्पर्यन्तं तद्वृत्तं ज्ञात्वा तस्मिन एव शृङ्गवेरपुरात्सुमन्त्रस्य प्रतिनिवृत्तिरिति बोध्यमत एव 'रामस्य निर्गमदिनादिने षष्ठेऽहोरात्रके । हा हा लक्ष्मण हा सीते हा रामेति मृतो नृपः॥' इति पाद्मं संगच्छते । दिनद्वयेन शृङ्गवेरपुरे रामागमनम् तद्वितीयदिने गङ्गोत्तरणम्, तदा दिनत्रयं सुमन्त्रस्य तत्र स्थितिः तत्र तृतीयदिवसे मध्याह्ने प्रयागत आगतचारेभ्यो रामवृत्तान्तं लब्ध्वा ततः प्रस्थाय मध्येऽवस्थानम्, ततः षष्ठेऽपराह्णेऽयोध्याप्रवेशः सुमन्त्रस्य, तदर्धरात्रे राज्ञो मरणमिति ॥ २ ॥

गो० टी०–भरद्वाजाभिगमनमिति । तेषां रामादीनां भरद्वाजाभिगमनं भरद्वाजसेवनं प्रयागे भरद्वाजेन सहासनम् आगिरेश्चित्रकूटपर्यन्तं गमनं च तत्रस्थैः शृङ्गवेरपुरस्थैश्चारैरभिलक्षितं निवेदितं सुमन्त्रेण सम्यग्विदितमित्यर्थः । गङ्गोत्तरणदिवसनिशा वनस्पतिमूले द्वितीया भरद्वाजाश्रमे तृतीया यमुनातीरे चतुर्थेऽहनि चित्रकूटगमनं पञ्चमे पुनरागम्य चारैर्निवेदनम् ॥२॥

३] ति० टी०–अनुज्ञातः गुहेनेति शेषः ॥ ३ ॥

रा० टी०–सुमन्त्रवृत्तमाह–अनुज्ञात इति । गुहेनानुज्ञातः सुमन्त्रः गाढदुर्मनाः अतिखिन्नः सन्नयोध्यां प्रययौ ॥ ३ ॥

गो० टी०–अनुज्ञात इति । अथ रामवृत्तान्तश्रवणानन्तरम् अनुज्ञातः गुहेनेति शेषः । गाढदुर्मनाः अत्यन्तदुर्मनाः ॥३॥

४] ति० टी०–यत्तः सावधानः शीघ्रमतिवेगेन ॥ ४ ॥

रा० टी०–स इति। वनादीनि पश्यन् सः सुमन्त्रः प्रययौ॥४॥

गो० टी०–स वनानीति । ग्रामाणि ग्रामान् ॥ ४ ॥

५] ति० टी०–द्वितीयेऽहनि शृङ्गवेरपुरतः प्रतिनिवृत्तिदिवसात् ॥ ५ ॥

रा० टी०–तत इति । ततः शृङ्गवेरपुराद्वितीये अहनि सायाह्ने समये निरानन्दां प्रकटानन्दरहितामयोध्यां समुद्गप्राप्य ददर्श 'तृतीयेऽहनि' इति भूषणपाठः ॥ ५ ॥

गो० टी०–तत इति । ततः ग्रामनगरातिक्रमणानन्तरं तृतीयेऽहनि शृङ्गवेरपुरान्निर्गमापेक्षया तृतीयदिवसे, यद्वा अहनि तृतीये सायाह्नसमये अह्नः तृतीयकालभूते सायाह्नकाले अयोध्यां समनुप्राप्य निरानन्दां तां ददर्श ॥ ५–७ ॥

६] ति० टी०–शून्यामिव शून्यनगरीमिव ॥ ६ ॥

रा० टी०–स इति । शून्यामिव रामरहितत्वेन प्रतीय-

---

१ स्विति गो. पाठः । २ सहासनमिति गो. पाठः । ३ अतीति गो. पाठः । ४ तृतीये इति गो. पाठः ।

कच्चिन्न सगजा साश्वा सजना सजनाधिपा । रामसंतापदुःखेन दग्धा शोकाग्निना पुरी ॥ ७ ॥
इति चिन्तापरः सूतो वाजिभिः शीघ्रयायिभिः । नगरद्वारमासाद्य त्वरितः प्रविवेश ह ॥ ८ ॥
सुमन्त्रमभिधावन्तः शतशोऽथ सहस्रशः । क्व राम इति पृच्छन्तः सूतमभ्यद्रवन्नराः ॥ ९ ॥
तेषां शशंस गङ्गायामहमापृच्छ्य राघवम् । अनुज्ञातो निवृत्तोऽस्मि धार्मिकेण महात्मना ॥ १० ॥
ते तीर्णा इति विज्ञाय बाष्पपूर्णमुखा नराः । अहो धिगिति निःश्वस्य हा रामेति विचुक्रुशुः ॥ ११ ॥
शुश्राव च वचस्तेषां वृन्दं वृन्दं च तिष्ठताम् । हताः स्म खलु ये नेह पश्याम इति राघवम् ॥ १२ ॥
दानयज्ञविवाहेषु समाजेषु महत्सु च । न द्रक्ष्यामः पुनर्जातु धार्मिकं राममन्तरा ॥ १३ ॥
किं समर्थं जनस्यास्य किं प्रियं किं सुखावहम् । इति रामेण नगरं पित्रेव परिपालितम् ॥ १४ ॥

मानामत एव निःशब्दामयोध्यां दृष्ट्वा शोकवेगसमाहतः शोकवेगव्याप्तः अत एव परमदुर्मनाः स सुमन्त्रश्चिन्तयामास ॥ ६ ॥

७-८] ति० टी०-चिन्ताप्रकारमाह-कच्चिदिति । नञ्शब्दो वितर्के ॥ ७ ॥ ८ ॥

रा० टी०-चिन्तास्वरूपमाह-कच्चिदिति । सगजा गजसहिता साश्वा अश्वसहिता सजना जनसहिता सजनाधिपा जनाधिपो राजा तत्सहिता पुरी अयोध्या रामसंतापदुःखेन रामस्य यः संतापः प्रातिभासिकवनगमनजनितखेदस्तेन जातं यद्दुःखं तेन तद्धेतुकेन शोकाग्निना कच्चिन्न दग्धा । कच्चिदिति संभावनायाम् ॥ ७ ॥

रा० टी०-इतीति । इत्यनेन प्रकारेण चिन्तापरः अत एव त्वरितः वेगवान्सूतः शीघ्रयायिभिः त्वरितं गमनशीलैर्वाजिभिः नगरद्वारमासाद्य प्रविवेश ॥ ८ ॥

गो० टी०-इतीति । त्वरितः प्रविवेश नगरं जनसंचारशून्यं निःशब्दं वर्तते राजा कामवस्थां प्राप्त इति ज्ञातुं त्वरितः प्रविष्टवानित्यर्थः ॥ ८ ॥ ९ ॥

९] ति० टी०-अभ्यद्रवन्सूतसंमुखमाजग्मुः ॥ ९ ॥

रा० टी०-सुमन्त्रमिति । अभियान्तं प्राप्तिमन्तं सूतं सुमन्त्रं रामः क्व इति पृच्छन्तः शतशः सहस्रशः नराः अभ्यद्रवन् ॥ ९ ॥

१०] ति० टी०-गङ्गायां शृङ्गवेरपुरे रामेणानुज्ञातस्तमापृच्छ्य निवृत्तोऽस्मि ततः परं वृत्तान्तं न जानामीति शशंस १०

रा० टी०-तेषामिति । गङ्गायां गङ्गातटे राघवमापृच्छ्य किं कुर्यामिति पृष्ट्वा अनुज्ञातः अयोध्यां व्रजेत्याज्ञप्तोऽहं निवृत्तोऽस्मि इति तेषां शशंस ॥ १० ॥

गो० टी०-तेषामिति । गङ्गायां गङ्गातीरे निवृत्तोऽस्मीति तेषां शशंसेति संबन्धः ॥ १० ॥

११] ति० टी०-तीर्णा गङ्गामुत्तीर्यं गताः ॥ ११ ॥

रा० टी०-त इति । ते रामादयस्तीर्णा गङ्गापारं गता इति विज्ञाय सुमन्त्रकथनादवगम्य अहो धिक् रामविहीनानस्मानिति शेषः इति निःश्वस्य बाष्पपूर्णमुखाः नराः हा रामेति विचुक्रुशुः ॥ ११ ॥

गो० टी०-त इति । ते रामादयः ॥ ११ ॥

१२] ति० टी०-वृन्दं वृन्दं संघशस्तिष्ठतां तेषां जनानां य इह रथे रामं न पश्यामस्ते हताः खल्विति वचः शुश्राव ॥ १२ ॥

रा० टी०-शुश्रावेति । ये वयमिह अस्मिन्समये राघवं न पश्यामः ते वयं हताः स्म इति ॥ १२ ॥

गो० टी०-शुश्रावेति । वृन्दं वृन्दं च तिष्ठतां संघशः तिष्ठतां हता इति ये वयम् इह अस्मिन् रथे राघवं न पश्यामः इति अस्माद्धेतोः ते हता स्मेति संबन्धः । दानयज्ञविवाहेष्विति । दानादिषु अन्तरा मध्ये नायकमणिवत् वर्तमानं रामं पुनः जातु कदाचिदपि न द्रक्ष्यामः किमिति काकुः । येन केनापि दाने क्रियमाणे रामः स्वयं तत्र गत्वा तिष्ठति किमर्थं देशे काले पात्रे च दापयितुं यज्ञेऽपि गच्छति किमर्थं न्यायार्जितधनैः कारयितुं तत्तत्कर्म संदेहविच्छेदविस्मृतज्ञापनादिकं कर्तुं च विवाहे च मध्ये गच्छति किमर्थम् उभयवर्गसंघटनायासंमतानामभिमतद्रविणप्रदानाय अस्खलितं कर्मणामनुष्ठापनाय च समाजेषु महत्सु अन्यत्रापि महासदस्सु दीर्घसत्रेष्वपीत्यर्थः । यत्र कुत्राप्यदृष्टकार्येष्विति वा अत्र सर्वत्र हेतुर्धार्मिकमिति । किमिति । अस्य जनस्य किं समर्थं किं क्षेमंकरं वस्तु किं प्रियं किं सुखावहमिति रामेण तत्तदभिमतवस्तुप्रदात्रा रामेण पित्रेव नगरं परिपालितं नगरशब्देन नगरस्थजना लक्ष्यन्ते इति वचः शुश्रावेति पूर्वेण संबन्धः ॥ १२-१४ ॥

१३] ति० टी०-दानादिव्यवहारेषु धार्मिकं रामं वयमन्तरा दानादिव्यवहारमध्ये जातु पुनर्न द्रक्ष्याम इति च शुश्राव ॥ १३ ॥

रा० टी०-दानादिविषये महत्सु प्रवृद्धेषु समाजेषु जनसमूहेषु अन्तरा मध्ये जातु कदाचिद्धार्मिकं रामं पुनर्न द्रक्ष्यामः । इति च नेति च संभावनायाम् ॥ १३ ॥

१४] ति० टी०-पित्रेव रामेण परिपालितं नगरमस्व

१ पाप्तिमिरिति गो. पाठः । २ यान्तं त्रमिति गो. यातं स्विति रा. पाठः । ३ जना इति गो. पाठः । ४ चेति गो. पाठः । ५ पितवदिति गो. पाठः ।

वातायनगतानां च स्त्रीणामन्वन्तरापणम् । राममेवाभितप्तानां शुश्राव परिदेवनाम् ॥ १५ ॥
स राजमार्गमध्येन सुमन्त्रः पिहिताननः । यत्र राजा दशरथस्तदेवोपययौ गृहम् ॥ १६ ॥
सोऽवतीर्य रथाच्छीघ्रं राजवेश्म प्रविश्य च । कक्ष्याः सप्ताभिचक्राम महाजनसमाकुलाः ॥ १७ ॥
हर्म्यैर्विमानैः प्रासादैरवेक्ष्याथ समागतम् । हाहाकारकृता नार्यो रामादर्शनकर्शिताः ॥ १८ ॥
आयतैर्विमलैर्नेत्रैरश्रुवेगपरिप्लुतैः । अन्योन्यमभिवीक्षन्ते व्यक्तमार्ततराः स्त्रियः ॥ १९ ॥
ततो दशरथस्त्रीणां प्रासादेभ्यस्ततस्ततः । रामशोकाभितप्तानां मन्दं शुश्राव जल्पितम् ॥ २० ॥
सह रामेण निर्यातो विना राममिहागतः । सूतः किं नाम कौसल्यां क्रौशन्तीं प्रतिवक्ष्यति ॥ २१ ॥

जनस्य किं समर्थमुचितं किं प्रियं तत्करं वस्तु किमिहाश्रुत्र सुखावहं वस्त्विति चिन्ताव्याप्तं बभूवेति शेषः ॥ १४ ॥

रा० टी०–किमिति । यत् इति इदं नगरं रामेण पित्रेव परिपालितं मर्यादास्वलावण्यातिशयादिदर्शनेन परिपोषितं तस्यास्य जनस्य समर्थं सम्यगर्थः प्रयोजनसिद्धियेन तद्वस्तु किं प्रियं प्रीतिविषयीभूतं च किं सुखावहं सुखप्रापकं च किं रामं विना न किमपीत्यर्थः । इति च वृन्दं वृन्दं तिष्ठतां तेषां जनानां वचः शुश्राव कर्मकर्तरि लिट् अधिगच्छति शास्त्रार्थ इत्यादाविव नात्मनेपदं सुमन्त्र इति कर्तुरध्याहारो वा । श्लोकत्रयमेकान्वयि ॥ १४ ॥

१५–१६] ति० टी०–अन्वनन्तरम् । वातायनगतानां स्त्रीणां रामसुद्दिश्याभितप्तानां परिदेवनामन्तरापणमापणमध्ये गच्छन्शुश्राव ॥ १५ ॥ १६ ॥

रा० टी०–वातायनेति । वातायनगतानां रामवार्ताश्रवणाय गवाक्षसंलग्नानां रामसुद्दिश्य अभितप्तानां स्त्रीणां परिदेवनम् अन्तरापणं आपणमध्ये अनुशुश्राव धातूपसर्गयोर्व्यवहितप्रयोगस्त्वत एव निर्देशात् ॥ १५ ॥

गो० टी०–वातायनगतानामिति । अन्वन्तरापणं शुश्राव उभयपार्श्वस्थानामापणानां मध्ये मध्ये शुश्रावेत्यर्थः । विभक्त्यर्थेऽव्ययीभावः ॥ १५ ॥

रा० टी०–स इति । पिहिताननः वस्त्रेणाच्छादितमुखः सुमन्त्रः राजमार्गमध्येन यत्र गृहे राजा दशरथः तदेव गृहमुपययौ ॥ १६ ॥

गो० टी०–स राजमार्गमध्येनेति । पिहिताननः जनदर्शनाक्षमतया ॥ १६ ॥

१७] ति० टी०–कक्ष्या द्वाराणि ॥ १७ ॥

रा० टी०–स इति । सः राजगृहं प्राप्तः सुमन्त्रः रथादवतीर्य राजवेश्म प्रविश्य महाजनसमाकुलाः सप्त कक्ष्या अभिचक्राम ॥ १७ ॥

गो० टी०–सोऽवतीर्येति । राजनिर्गमाभावेन महाजनसंकुलत्वम् ॥ १७ ॥

१८] ति० टी०–हाहाकारः कृतो याभिस्ताः हर्म्यं धनिकगृहं विमानं सप्तभूमिकं गृहम् प्रासादो राजगृहम् त्रिभूमिकं गृहमित्यन्ये तदुपलक्षितामयोध्यां समागतमवेक्ष्येत्यन्वयः, यद्वा तैः करणैरवेक्ष्य तत्रारोहणपूर्वकमवेक्ष्येत्यन्वयः ॥ १८ ॥

रा० टी०–हर्म्यैरिति । हर्म्यैः धनिनां गृहविशेषैः विमानैः सप्तभूमिगृहैः । ' विमानोऽस्त्री देवयाने सप्तभूमिगृहेऽपि च ' इति वैजयन्ती । प्रासादैः राजाधिराजगृहविशेषैरुपलक्षिताः रामादर्शनकर्शिताः रामदर्शनाभावेन पीडिताः नार्यः समागतं रामं विना आगतं किंच समागतमगतेन रामकर्तृकगमनाभावेन समं सहितं रथं सुमन्त्रं वा अवेक्ष्य हाहाकारकृताः आसन्निति शेषः ॥ १८ ॥

गो० टी०–हर्म्यैरिति । हर्म्यैर्धनिनां वासैः विमानैः सप्तभूमिगृहैः ' विमानोऽस्त्री देवयाने सप्तभूमिगृहेऽपि च ' इति वैजयन्ती । प्रासादैः महाराजार्हगृहविशेषैः उपलक्षिताः नार्यः समागतं रामेण विना समागतं सुमन्त्रमवेक्ष्य हाहाकारकृताः कृतहाहाकाराः बभूवुरिति शेषः ॥ १८ ॥

१९] ति० टी०–अन्योन्यमव्यक्तं यथा भवति तथा वीक्षन्ते इतिकर्तव्यतामौदयादिति शेषः ॥ १९ ॥

रा० टी०–आयतैरिति । आर्ततरा अत्यार्ताः स्त्रियः अश्रुवेगेन व्याप्तैः अत एव विमलैः कज्जलादिरहितैः आयतैः विशालैः नेत्रैः व्यक्तं यथा भवति तथा अन्योन्यमभिवीक्षन्ते । एतेन कर्तव्यविषयकविवेकाभावस्तासां ध्वनितः ॥ १९ ॥

गो० टी०–आयतैरिति । अव्यक्तमस्पष्टमिति क्रियाविशेषणम् ॥ १९ ॥ २० ॥

२०] ति० टी०–प्रासादेभ्यः सुमन्त्रस्य राजवेश्मप्रवेशं दृष्ट्वा प्रासादेभ्योऽवतीर्णानामित्यर्थः । मन्दं राजसांनिध्यान्मन्दत्वम् ॥ २० ॥

रा० टी०–तत इति । ततस्ततः तेभ्यस्तेभ्यः प्रासादेभ्यः रामशोकाभितप्तानां स्त्रीणां जल्पितं मन्दं शुश्राव एतेन इन्द्रियपाटवराहित्यं सूचितं तेन रामवियोगदुःखस्यातिशयत्वं व्यक्तम् ॥ २० ॥

२१] ति० टी०–किं नाम प्रतिवक्ष्यति अतिघोरत्वान्न किमपि वक्तुं शक्ष्यामीति भावः ॥ २१ ॥

रा० टी०–जल्पितस्वरूपमाह–सहेति । रामेण सह

१ शोकाभीति गो. पाठः । २ देवनमिति गो. रा. पाठः । ३ शोक्तीमिति गो. पाठः ।

यथा च मन्ये दुर्जीवमेवं न सुकरं ध्रुवम् । आच्छिद्य पुत्रे निर्याते कौसल्या यत्र जीवति ॥ २२ ॥
सत्यरूपं तु तद्वाक्यं राजस्त्रीणां निशामयन् । प्रदीप्त इव शोकेन विवेश सहसा गृहम् ॥ २३ ॥
स प्रविश्याष्टमीं कक्ष्यां राजानं दीनमातुरम् । पुत्रशोकपरिद्यूनमपश्यत्पाण्डुरे गृहे ॥ २४ ॥
अभिगम्य तमासीनं राजानमभिवाद्य च । सुमन्त्रो रामवचनं यथोक्तं प्रत्यवेदयत् ॥ २५ ॥
स तूष्णीमेव तच्छ्रुत्वा राजा [1]विद्रुतमानसः । मूर्छितो न्यपतद्भूमौ रामशोकाभिपीडितः ॥ २६ ॥
ततोऽन्तःपुरमाविद्धं मूर्च्छिते पृथिवीपतौ । उच्छ्रित्य बाहू चुक्रोश नृपतौ पतिते क्षितौ ॥ २७ ॥
सुमित्रया तु सहिता कौसल्या पतितं पतिम् । उत्थापयामास तदा वचनं चेदमब्रवीत् ॥ २८ ॥
इमं तस्य महाभाग दूतं दुष्करकारिणः । वनवासादनुप्राप्तं कस्मान्न प्रतिभाषसे ॥ २९ ॥
अद्येममनयं कृत्वा व्यपत्रपसि राघव । उत्तिष्ठ सुकृतं तेऽस्तु शोकेन स्यात्सहायता ॥ ३० ॥

निर्यातः निर्गतः रामं विना इहागतः सूतः नाम प्रसिद्धं क्रोशन्तीं कौसल्यां किं प्रतिवक्ष्यति ॥ २१ ॥

गो० टी०–सह रामेणेत्यादिश्लोकत्रयमेकं वाक्यम् । यथेति । यत्रेति विभक्तिप्रतिरूपको निपातः प्रथमार्थे वर्तते यथा क इत्यावेद यत्र स इत्यत्र यथा येन प्रकारेण अस्मज्जीवितं दुर्जीवं दुःखेन जीवनार्हं मन्ये एवमेव कौसल्यापुत्रे निर्याते सति आच्छिद्य प्रसह्य जीवति यत्र जीवतीति यत् । तत् न सुकरं दुःसंपादं ध्रुवं मन्य इत्येकैकव्यक्त्यपेक्षया एकवचनं विभक्तिप्रतिरूपकमव्ययं वा । सत्यरूपमिति । निशामयन् निश्चमयन् दीर्घश्छान्दसः शृण्वन्नित्यर्थः ॥ २१–२३ ॥

२२] ति० टी०–अथ प्रत्येकं राममातॄणां दुःखप्रलापः–यथा चेति । यथा जीवं जीवनं दुःखजनकं मन्ये, एवं ध्रुवं निश्चयेन सुकरं सुकरनाशं नेति मन्ये । यत्र यतः पुत्रे राम आच्छिद्य न्यायप्राप्तमभिषेकमाच्छिद्य त्यक्त्वा निर्याते सत्यपि कौसल्या जीवति । मन्ये इत्येकैकव्यक्त्यपेक्षयैकवचनम् ॥२२॥

रा० टी०–यत्रेति । आच्छिद्य राज्यं त्यक्त्वेत्यर्थः । पुत्रे निर्याते यत्र यस्मिन्नुपाये सति कौशल्या जीवति तं ध्रुवं निश्चितं सुकरमुपायं न मन्ये । नन्वु कौशल्यायाः नित्यत्वान्मरणाभावेन जीवनं सिद्धमेवेत्यत आहुः–एवं चेत् दुर्जीवं यावद्रामागमनं दुःखेन जीवनं यथा यथावन्मन्ये । चशब्दश्चेदर्थे ॥२२॥

२३] ति० टी०–सत्यरूपं परमार्थरूपं तत्स्त्रीणां वाक्यं निशामयञ्शोकेन प्रदीप्त इव सन्राजगृहं विवेश । अत्र श्लोकद्वये तीर्थकतकादिव्याख्या नात्यन्तं समञ्जसेत्युपेक्षिता ॥२३॥

रा० टी०–सत्येति । सत्यरूपं तत्त्वार्थनिरूपकं राजस्त्रीणां तद्वाक्यं निशामयञ्छृण्वन्सञ्शोकेन प्रदीप्त इव सुमन्त्रः सहसा शीघ्रं गृहं गृहावयवीभूताष्टमीं कक्ष्यां विवेश ॥ २३ ॥

२४] ति० टी०–स इति । परिद्यूनं म्लानम् ॥ २४ ॥

रा० टी०–स इति । स सुमन्त्रः अष्टमीं कक्ष्यां प्रविश्य पुत्रशोकेन परिद्यूनं मलिनमत एव दीनं क्षीणत्वेन प्रतीयमानमातुरं पुत्रदर्शने उत्कण्ठितं राजानं पाण्डुरे श्वेते राजते इत्यर्थः । गृहे अपश्यत् ॥ २४ ॥

गो० टी०–स प्रविश्येति । परिद्यूनं क्षीणं "दिवो विजिगीषायाम्" इति निष्ठानत्वं पाण्डुर इति विशेषणाद्राजलक्ष्मीर्ना स्तीत्युच्यते ॥ २४ ॥ २५ ॥

२५–२६] ति० टी०–प्रत्यवेदयत् विस्तरेण प्रतिपादनमग्रे भविष्यति ॥ २५ ॥ २६ ॥

रा० टी०–अभिगम्येति । अभिगम्य संप्राप्य सुमन्त्रः रामवचनं यथोक्तमुक्तमनतिक्रम्य प्रत्यवेदयत् ॥ २५ ॥

रा० टी०–स इति । तद्रामवचनं तूष्णीमेव श्रुत्वा शोकाभिपीडितः अत एव विद्रुतमानसः अनवस्थमनाः अत एव मूर्च्छितो राजा भूमौ न्यपतत् ॥ २६ ॥

गो० टी०–स तूष्णीमिति । तूष्णींभावे हेतुः विभ्रान्तचेतन इति ॥ २६ ॥

२७–२९] ति० टी०–आविद्धं दुःखाभिहतम् ॥२७–२९॥

रा० टी०–तत इति । ततः तस्मिन्पृथिवीपतौ क्षित्यधीशे नृपतौ राजनि मूर्च्छिते सति अत एव क्षितौ पतिते सति आविद्धमतिपीडितमन्तःपुरं बाहू उच्छ्रित्य चुक्रोश ॥२७॥

रा० टी०–सुमित्रयेति । तदाऽऽक्रोशनकाले पतितमुत्थापयामास तदा इदं वचनं चाब्रवीत् ॥ २८ ॥

गो० टी०–तत इति । आविद्धं शोकेनाभिहतम् अभूदिति शेषः । मूर्च्छिते आविद्धमासीत् पतिते बाहू उद्धृत्य चुक्रोशेति विशेषः ॥ २७ ॥ २८ ॥

रा० टी०–वचनस्वरूपमाह–इममिति । वनवासादनुप्राप्तं दुष्करकारिणो रामस्य दूतं संदेशहरमिमं सुमन्त्रं कस्मादेतोः न प्रतिभाषसे हेतुं वदेत्यर्थः ॥ २९ ॥

गो० टी०–इममिति । दूतं संदेशहरं दुष्करकारिणः दुष्करकार्यकारिणः ॥ २९ ॥

३०] ति० टी०–अद्येति । इमं दुःखसाधनं पुत्रप्रवासनरूपमनयं कृत्वाद्य किं व्यपत्रपसि लज्जसे यत्र प्रतिभाषसे तस्माच्छोकं विधूयोत्तिष्ठ ते सुकृतं सत्यपरिपालनरूपं

१ नरेन्द्रमिति गो. पाठः । २ विभ्रान्तचेतन इति गो. पाठः । ३ उद्धृत्येति गो. पाठः ।

देव यस्या भयाद्रामं नानुपृच्छसि सारथिम् । नेह तिष्ठति कैकेयी विस्रब्धं प्रतिभाष्यताम् ॥ ३१ ॥
सा तथोक्त्वा महाराजं कौसल्या शोकलालसा । धरण्यां निपपाताशु बाष्पविप्लुतभाषिणी ॥ ३२ ॥
[1]विलपन्तीं तथा दृष्ट्वा कौसल्यां पतितां भुवि । पतिं चावेक्ष्य ताः सर्वाः [2]समन्ताद्रुरुदुः स्त्रियः ॥ ३३ ॥
ततस्तमन्तःपुरनादमुत्थितं समीक्ष्य वृद्धास्तरुणाश्च मानवाः ।
स्त्रियश्च सर्वा रुरुदुः समन्ततः पुरं तदासीत्पुनरेव संकुलम् ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ।

दुःखानर्हान् रामादीननुशोचन्दशरथः सुमन्त्रं तेषां वचनादि कथयितुं प्रेरयत्सुमन्त्रस्तेषां वचांसि कथयति स्म ।

प्रत्याश्वस्तो यदा राजा मोहात्प्रत्यागतस्मृतिः । तदाजुहाव तं सूतं रामवृत्तान्तकारणात् ॥ १ ॥
तदा सूतो महाराजं कृताञ्जलिरुपस्थितः । राममेवानुशोचन्तं दुःखशोकसमन्वितम् ॥ २ ॥
वृद्धं परमसंतप्तं नवग्रहमिव द्विपम् । विनिःश्वसन्तं ध्यायन्तमस्वस्थमिव कुञ्जरम् ॥ ३ ॥

पुण्यमस्तु । किंच एवं शोके त्वया क्रियमाणे तव सहायता सहायसमूहः परिजनः सर्वोऽपि न स्यात् त्वच्छोकेन सर्वोऽपि नश्येदित्यर्थः ॥ ३० ॥

रा० टी०—अद्येति । हे राघव ! इमं स्वपुत्रप्रव्राजमनयं नीतिविरुद्धमिव कृत्वा व्यपत्रपसि किं नैतयुक्तमित्यर्थः अतः उत्तिष्ठ ते सुकृतं सत्यपरिपालनमस्तु सदैव तिष्ठत्वित्यर्थः ते शोके सति सहायता सहायसमूहः मन्त्र्यादिरित्यर्थः न स्याद्विनश्येदित्यर्थः ॥ ३० ॥

गो० टी०—अद्येममिति । इममनयं पुत्रविवासनं सुकृतं शोभनं शोके विषये सहायता न स्यात् शोकानुवर्तनं मा कृथा इत्यर्थः ॥ ३० ॥

३१] ति० टी०—कैकेयीभयान्न पृच्छामीति चेत्तत्राह—देवेति । विस्रब्धं निःशङ्कम् ॥ ३१ ॥

रा० टी०—यथा रामानुगमने अस्मदादयः केकय्या निवारिताः तथा तद्वार्ताश्रवणमपि निवार्येतेति केकयीभिया न ब्रूषे चेत्तद्वीरिदानीं नास्तीत्याह—देवेति । यस्या भयान्निवारणशङ्कया रामं नानुपृच्छसि सा कैकेयी इह न तिष्ठति अतः विस्रब्धं निःशङ्कं प्रतिभाष्यताम् ॥ ३१ ॥

गो० टी०—व्यसनानुशयकृतमूर्ष्णीभावे हेत्वन्तरं कल्पयति—देवेति । कैकेयी सेति शेषः । विस्रब्धं सविश्वासं निःशङ्कमिति यावत् ॥ ३१ ॥

३२–३४] ति०टी०—विप्लुतभाषिणी गद्गदभाषिणी ३२-३४

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०—सेति । तथा उक्त्वा शोकलालसा शोकव्याप्ता अत एव बाष्पविप्लुतभाषिणी बाष्पा बाष्पविशिष्टा विप्लुतभाषिणी स्खलद्वाग्विशिष्टा सैव सेति कर्मधारयः सा कौशल्या निपपात ॥ ३२ ॥

गो० टी०—सेति । बाष्पेण विप्लुतं विलुप्तं सगद्गदं यथा भवति तथा भाषिणी ॥ ३२ ॥

रा० टी०—विलपन्तीमिति । अवेक्ष्य दृष्ट्वा रुरुदुः ॥३३॥

गो० टी०—एवमिति । पतितमिति शेषः ॥ ३३ ॥

रा० टी०—तत इति । ततः तस्मिन्समये उत्थितं तमन्तःपुरनादं समीक्ष्य वृद्धादयो मानवाः सर्वाः स्त्रियः पुरवासिन्यश्च समन्ततो रुरुदुः अतः तत्पुरं पुनः संकुलं रोदनव्याप्तमासीत्॥३४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

गो० टी०—तत इति । समीक्ष्य श्रुत्वा पुनरेव संकुलं रामगमनकाल इव व्याकुलमासीत् ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१–२] ति० टी०—प्रत्याश्वस्त इति । प्रत्याश्वस्तः कृतोपचारः मोहान्मोहं परित्यज्य प्रत्यागतस्मृतिः प्रत्यागतसंज्ञः । 'प्रत्यागतः पुनः' इति पाठेऽप्ययमेवार्थः । रामवृत्तान्तकारणादाजुहाव रामवृत्तान्तं प्रष्टुम् ॥ १ ॥ २ ॥

३] ति० टी०—नवग्रहं नवो नूतनो ग्रहो ग्रहणं यस्य तं द्विपमिव विनिःश्वसन्तमस्वस्थं स्वीयमध्येन स्थितं कुञ्जरमिव ध्यायन्तम् ॥ ३ ॥

रा० टी०—राजवृत्तमाह—प्रत्याश्वस्त इत्यादिभिः । यदा राजा मोहात् मूर्छातः प्रत्यागता प्राप्ता स्मृतिः स्वपरिकरविषयकस्मरणं यस्य सः अत एव प्रत्याश्वस्तः स्थिरचित्तस्तदा रामवृत्तान्तकारणाद्रामवृत्तश्रवणहेतोः सूतमाजुहाव ॥१॥

---

१ विस्रब्धमिति गो. रा. पाठः । २ एवं विलपतीमिति गो. पाठः । ३ सुस्वरमिति गो. पाठः । ४ पुनरिति गो. पाठः । ५ अद्येति गो. पाठः ।

राजा तु रजसा सूतं ध्वस्ताङ्गं समुपस्थितम् । अश्रुपूर्णमुखं दीनमुवाच परमार्तवत् ॥ ४ ॥
क्व नु वत्स्यति धर्मात्मा वृक्षमूलमुपाश्रितः । सोऽत्यन्तसुखितः सूत किमशिष्यति राघवः ॥ ५ ॥
दुःखस्यानुचितो दुःखं सुमन्त्र शयनोचितः । भूमिपालात्मजो भूमौ शेते कथमनाथवत् ॥ ६ ॥
यं यान्तमनुयान्ति स्म पदातिरथकुञ्जराः । स वत्स्यति कथं रामो विजनं वनमाश्रितः ॥ ७ ॥
व्यालैर्मृगैराचरितं कृष्णसर्पनिषेवितम् । कथं कुमारौ वैदेह्या सार्धं वनमुपाश्रितौ ॥ ८ ॥
सुकुमार्या तपस्विन्या सुमन्त्र सह सीतया । राजपुत्रौ कथं पादैरवरुह्य रथाद्गतौ ॥ ९ ॥
सिद्धार्थैः खलु सूत त्वं येन दृष्टौ ममात्मजौ । वनान्तं प्रविशन्तौ तावश्विनाविव मन्दरम् ॥ १० ॥
किमुवाच वचो रामः किमुवाच च लक्ष्मणः । सुमन्त्र वनमासाद्य किमुवाच च मैथिली ॥ ११ ॥
आसितं शयितं भुक्तं सूत रामस्य कीर्तय । जीविष्याम्यैयमेतेन ययातिरिव साधुषु ॥ १२ ॥

गो० टी०–प्रत्याश्वस्त इति । प्रत्यागतः सूतस्याभिमुखागतः ॥ १ ॥

रा० टी०–तदेति । तदा राजाह्वानसमये नवग्रहं वनात्सद्यो गृहीतमत एव कुञ्जरं स्वयूथगजं ध्यायन्तमत एव विनिःश्वसन्तं परमसंतप्तमत एव अस्वस्थं द्विपं गजमिव दुःखशोकसमन्वितं महाराजं कृताञ्जलिः सूतः उपस्थितः प्राप्तः । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–अथेत्यादिश्लोकद्वयमेक वाक्यम् । नवग्रहं सद्यो गृहीतम् अस्वस्थं व्याधिग्रस्तम् ॥ २ ॥ ३ ॥

४] ति० टी०–रजसा मार्गरजसा परमार्तवत्परमार्ताहं वच उवाच ॥ ४ ॥

रा० टी०–राजेति । रजसा ध्वस्ताङ्गं सञ्जपस्थितं सूतं परमार्तवत्परमार्तत्वविशिष्टं वच उवाच ॥ ४ ॥

गो० टी०–राजेति । ध्वस्ताङ्गं रजसा धूसरिताङ्गं [1] धूतं कम्पितं परमार्तवत्परमार्त इव दीन इत्यर्थः ॥ ४ ॥

५] ति० टी०–वत्स्यति वनवासकालस्य बहुदीर्घत्वाद्भविष्यत्प्रयोगः ॥ ५ ॥

रा० टी०–तद्वचनप्रकारमाह–क्वेति । स राघवो रामः किमशिष्यति भोक्ष्यते ॥ ५ ॥

गो० टी०–पूर्वसर्गे यथोक्तमित्युक्तं विवरीतुं प्रभवतारयति–क्व नु वत्स्यतीत्यादिना ॥ ५ ॥

६–७] ति० टी०–दुःखस्यानुचितोऽपि दुःखं प्राप्तः शयनमुत्तमम् ॥ ६ ॥ ७ ॥

रा० टी०–दुःखस्येति । हे सुमन्त्र ! दुःखस्य अनुचितो रामः दुःखं प्राप्तः शयनोचितः महाराजशय्यायोग्यः अनाथवन्नाथत्वाभाववानिव भूमौ कथं शेते ॥ ६ ॥

रा० टी०–यमिति । विजनं स्वजनरहितं वनं कथं वत्स्यति ॥ ७ ॥

गो० टी०–दुःखमित्येतत् क्रियाविशेषणम् शयनोचितः महार्हशयनोचितः ॥ ६ ॥ ७ ॥

८] ति० टी०–व्यालैरजगरैः मृगैर्व्याघ्रादिभिः ॥ ८ ॥

रा० टी०–व्यालैरिति । व्यालैर्महासर्पैः मृगैः सिंहादिभिः आचरितं निषेवितं वनं वैदेह्या सार्धं कुमारौ कथमुपाश्रितौ संश्रितौ ॥ ८ ॥

गो० टी०–महार्हशयनोचितः व्यालैरजगरादिभिर्मृगैः सिंहव्याघ्रादिदुष्टमृगैः उपस्थितो उपाश्रितौ आसितमित्यादौ भावे निष्ठा ॥ ८–११ ॥

९] ति० टी०–रथादवरुह्य कथं पादैर्गतौ ॥ ९ ॥

रा० टी०–सुकुमार्येति । सुकुमार्या अतिमृदुशरीरया तपस्विन्या धर्मान्वेषणशीलया सीतया सह राजपुत्रौ रथादवरुह्य पादैः कथं गतौ ॥ ९ ॥

१०–११] ति० टी०–अश्विनाविव मन्दरम् मन्दरस्य काण्यैमात्राद्वनसादृश्यम् ॥ १० ॥ ११ ॥

रा० टी०–सिद्धार्थ इति । येन त्वया मन्दरं मन्दराचलं प्रविशन्तौ अश्विनाविव वनान्तं प्रविशन्तौ ममात्मजौ दृष्टौ स त्वं सिद्धार्थः सिद्धनिखिलप्रयोजनकोऽसीति शेषः ॥१०॥

रा० टी०–किमिति । वनमासाद्य प्राप्य रामादिः किमुवाच ॥ ११ ॥

१२] ति० टी०–आसितादयो भावे निष्ठान्ताः एतेनासनादिव्यापारश्रवणेन ययातिरिव साधुषु स्वर्गात्पतन्ययातिमां साधुषु पातयेतीन्द्रं प्रार्थयित्वा यथा साधुषु पतितस्तद्वार्तया सुखजीवनो जातः, एवं स्वर्गतुल्यात्पुत्रसंयोगाद्भ्रष्टस्य भवद्दर्शनसाधुसमागमात्पुत्रवार्ताश्रवणेन जीविष्यामीति भावः ॥१२॥

रा० टी०–आसितमिति । रामस्य आसितं संस्थितिं शयितं शयनं भुक्तं भोजनं कीर्तय कथय एतेन कथनेनाहं जीविष्यामि, तत्र दृष्टान्तः साधुषु साधुभिरित्यर्थः ययातिर्नहुषपुत्र इव । अत्रेयमाख्यायिका स्वर्गात्पतनसमये मां साधुषु पातयेतीन्द्रं संप्रार्थ्य साधुसङ्गं लब्ध्वा तेभ्यस्तत्त्वज्ञानं प्राप्येन्द्रलोकादपि परं लोकं प्राप्य सुखं प्राप्तो ययातिरिति । भावनिष्ठान्ता आसितादयः ॥ १२ ॥

गो० टी०–आसितम् आसनं शयितं शयनं भुक्तं भोजनं च

१ धूतमिति गो० पाठः । २ उपस्थितामिति गो० पाठः । ३ अहमिति गो० रा० पाठः ।

इति सूतो नरेन्द्रेण चोदितः सज्जमानया । उवाच वाचा राजानं स बाष्पपरिरुद्धया ॥ १३ ॥
अब्रवीन्मे महाराज धर्ममेवानुपालयन् । अञ्जलिं राघवः कृत्वा शिरसाभिप्रणम्य च ॥ १४ ॥
सूत मद्वचनात्तस्य तातस्य विदितात्मनः । शिरसा वन्दनीयस्य वन्द्यौ पादौ महात्मनः ॥ १५ ॥
सर्वमन्तःपुरं वाच्यं सूत मद्वचनात्त्वया । आरोग्यमविशेषेण यथार्हमभिवादनम् ॥ १६ ॥
माता च मम कौसल्या कुशलं चाभिवादनम् । अप्रमादं च वक्तव्या ब्रूयाश्चैनामिदं वचः ॥ १७ ॥
धर्मनित्या यथाकालमग्न्यगारपरा भव । देवि देवस्य पादौ च देववत्परिपालय ॥ १८ ॥
अभिमानं च मानं च त्यक्त्वा वर्तस्व मातृषु । अनुराजानमार्यां च कैकेयीमम्ब कारय ॥ १९ ॥
कुमारे भरते वृत्तिर्वर्तितव्या च राजवत् । अप्यज्येष्ठा हि राजानो राजधर्ममनुस्मर ॥ २० ॥

कीर्तय एतेन रामसंबन्ध्यासनादिकीर्तनेन अहं साधुषु ययातिरिव जीविष्यामि ययातिः सत्सु पतेयमितीन्द्रं प्रार्थ्य स्वर्गाद्भ्रष्टः साधुसमागमं प्राप्य यथा निवृत्तदुःखोऽभूत् तद्वदहमपि निवृत्तदुःखो भविष्यामीत्यर्थः ॥ १२ ॥

१३] ति० टी०–सज्जमानया स्खलन्त्या बाष्पपरिवृद्धया कण्ठगतबाष्पनिरुद्धया ॥ १३ ॥

रा० टी०–इतीति । सज्जमानया रामसंलग्नया बाष्पपरिरुद्धया बाष्पाणि परिरुद्धानि यया तया वाचा नरेन्द्रेण चोदितः स सूतः उवाच ॥ १३ ॥

गो० टी०–इतीति । बाष्पपरिरुद्धया कण्ठगतबाष्परुद्धयेत्यर्थः अत एव सज्जमानया स्खलन्त्या षस्जगताविति धातुः धातोरनेकार्थत्वादत्र स्खलनार्थकः ॥ १३ ॥ १४ ॥

१४–१५] ति० टी०–हे महाराज ! राघवो धर्ममेवानुपालयंस्तत्पालनाद्धेतोरब्रवीद्वक्ष्यमाणं वचः । तदाह–हे सूत मत्प्रतिनिधित्वेन राज्ञेऽञ्जलिं कृत्वा तथैव शिरसा नत्वा विदितात्मनो लोके धर्मिष्ठत्वेन प्रसिद्धस्य शिरसा वन्दनयोग्यस्य राज्ञः पादौ मद्वचनाद्रामोऽभिवादयत इत्युक्त्वा मत्प्रतिनिधित्वेन वन्द्यौ ॥ १४ ॥ १५ ॥

रा० टी०–तद्वचनस्वरूपमाह–अब्रवीदिति । हे महाराज ! अञ्जलिं प्रणयसूचकबद्धयुगलकरं कृत्वा धर्मं स्वकुलपरंपरारीतिमनुपालयन्राघवो रामः अब्रवीत् ॥ १४ ॥

रा० टी०–रामवचनस्वरूपं बोधयन्नाह–सूतेति । हे सूत ! विदितात्मनः ज्ञातस्वस्वरूपस्य अत एव महात्मनः अत एव शिरसा वन्दनीयस्य तातस्य पादौ मद्वचनाद्रामेणातीव वन्दितावित्युक्त्वा वन्द्यौ अभिवन्दनीयौ ॥ १५ ॥

गो० टी०–सूतेति । वन्द्यौ वन्दनीयौ ॥ १५ ॥

१६] ति० टी०–ततः सर्वमन्तःपुरं त्वया मद्वचनाद्रामो वः सर्वा अविशेषेणारोग्यं पृच्छतीति वाच्यं यथार्हं यथायोग्यं तासां मदभिवादनं च वाच्यम् ॥ १६ ॥

रा० टी०–सर्वमिति । सर्वमन्तःपुरमविशेषेण अयोध्यातः किंचिद्विशेषाभावेन आरोग्यं रोगराहित्यं वाच्यं मद्वचनाद्यथार्हं यथायोग्यमभिवादनं च वाच्यम् । अप्रधानीभूतान्तःपुररूपकर्मणि क्यप् ॥ १६ ॥

गो० टी०–सर्वमिति । अन्तःपुरम् आरोग्यमभिवादनं च वाच्यं ब्रूत्रो द्विकर्मकत्वादप्रधानकर्मण्यन्तःपुरे प्रथमा कृताभिहितत्वात् एवमुत्तरश्लोकेऽपि ॥ १६ ॥

१७–१८] ति० टी०–ततो मम माता कौसल्या मद्वचनात्कुशलं प्रणामं धर्मेऽप्रमादं च वक्तव्या किं चैनामिदं वक्ष्यमाणं विशिष्य ब्रूयाः । किं तदित्याह–धर्मेत्यादि ॥ १७ ॥ १८ ॥

रा० टी०–मातेति । मम माता कौशल्या च कुशलादिकं वक्तव्या तत्राप्रमादं सावधानतामेनां कौशल्यामिदं वचश्च ब्रूयाः ॥ १७ ॥

रा० टी०–रामवचनस्वरूपमाह––धर्मेति । हे देवि ! धर्मनित्या नित्यं धर्मविशिष्टा त्वं यथाकालमग्न्यगारपरा यागशालारक्षिका भव देवस्य राज्ञः पादौ देववत्परिपालय निषेवस्व ॥ १८ ॥

गो० टी०–मातेति । अप्रमादम् धर्मे भर्तरि च इदं वक्ष्यमाणम् ॥ १७ ॥

गो० टी०–धर्मनित्येत्यादि । अभिमानं गर्वम् 'गर्वोऽभिमानोऽहंकारः' इत्यमरः । कुलाभिमानमित्यर्थः । मानः चित्तसमुन्नतिः ज्येष्ठपत्नीत्वनिबन्धनां चित्तसमुन्नतिमित्यर्थः । अनुराजानमार्यां च कारय अनुकारयेत्यर्थः । व्यवहिताश्चेति व्यवहितप्रयोगः । अन्विति तुल्यार्थे 'पश्चात्सादृश्ययोरनु' इत्यमरः । राजानं कैकेयीं च तुल्यमनुवर्तस्वेत्यर्थः ॥ १८ ॥ १९ ॥

१९] ति० टी०–अभिमानः प्रधानमहिषीत्वप्रयुक्ताऽहंकारः मानस्तत्प्रयुक्त इतरतिरस्कारकश्चित्तविकारः मातृष्वित्यस्य मदीयास्विति शेषः । अनुगतो राजा यस्यास्तां कैकेयीं हे अम्ब ! आर्यां श्लाघ्यां कारय । 'धारय' इति पाठेऽप्ययमेवार्थः तया सह मा विरौत्सीरित्यर्थः ॥ १९ ॥

रा० टी०–अभिमानमिति । अनुराजानं राजसेवानन्तरमभिमानमहं सर्वश्रेष्ठेति गर्वं मानं तत्तत्कृतसत्कारं च त्यक्त्वा तत्रास्थामकृत्वेत्यर्थः मातृषु स्वसपत्नीषु वर्तस्व कैकेयीं च अवधारय सौहार्देन स्वीकुरु ॥ १९ ॥

२०] ति० टी०–भरते च राजवद्वृत्तिः कार्या तत्र

---

१ रक्ष्येति गो. पाठः । २ मामिति गो. पाठः । ३ चामीति गो. पाठः । ४ अवधारयेति रा. पाठः । ५ अर्थेति गो. रा. पाठः ।

भरतः कुशलं वाच्यो वाच्यो मद्वचनेन च । सर्वास्वेव यथान्यायं वृत्तिं वर्तस्व मातृषु ॥ २१ ॥
वक्तव्यश्च महाबाहुरिक्ष्वाकुकुलनन्दनः । पितरं यौवराज्यस्थो राज्यस्थमनुपालय ॥ २२ ॥
अतिक्रान्तवया राजा मा स्मैनं व्यपरोरुधः । कुमारराज्ये जीवस्त्वं तस्यैवाज्ञाप्रवर्तनात् ॥ २३ ॥
अब्रवीच्चापि मां भूयो भृशमश्रूणि वर्तयन् । मातेव मम माता ते द्रष्टव्या पुत्रगर्धिनी ॥ २४ ॥
इत्येवं मां महाबाहुर्ब्रुवन्नेव महायशाः । रामो राजीवपत्राक्षो भृशमश्रूण्यवर्तयत् ॥ २५ ॥
लक्ष्मणस्तु सुसंक्रुद्धो निःश्वसन्वाक्यमब्रवीत् । केनायमपराधेन राजपुत्रो विवासितः ॥ २६ ॥
राज्ञा तु खलु कैकेय्या लघु चाँश्रुत्य शासनम् । कृतं कार्यमकार्यं वा वयं येनाभिपीडिताः ॥ २७ ॥

हेतुः—अज्येष्ठा अपि राजानो हि निश्चयेन पूज्या इति यावत् राजधर्ममनुस्मर । 'अर्थज्येष्ठा हि' इति पाठेऽर्थेन राज्यरूपार्थेन ज्येष्ठा हि यतोऽतः पूज्या इति शेषः इति राजधर्ममनुस्मरेति । कृतकृत्तु—राजानमनुराज्ञः पश्चात् आर्यां कैकेयीमभिवादयेत्यर्थः 'कैकेयीमभिवादय' इति पाठः । कुमारे चेत्यादि प्राग्वत् । कैकेय्या वरबलेनाधिकत्वाद्भरतस्य च राजदत्तार्थवत्त्वेन ज्येष्ठत्वात्तयोरभिवादनमम्बाया युक्तम् तद्वैषम्ब्यनिवृत्तये च राजधर्ममनुस्मरेत्याह ॥ २० ॥

रा० टी०—कुमार इति । कुमारे भरते राजवद्राजनीव वृत्तिः सत्कार इत्यर्थः कर्तव्या । ननु राजभिन्ने कथमिदमित्यत आह अर्थज्येष्ठा अत्यैश्वर्यनियामका इत्यर्थः राजानः राजवन्मन्तव्याः इति इमं धर्ममनुस्मर । हिरिवार्थे ॥ २० ॥

गो० टी०—राजवत् राज्ञीव वृत्तिर्वर्तितव्या उपचारः कर्तव्य इत्यर्थः अर्थज्येष्ठाः अर्थेनैव ज्येष्ठाः न तु वयसेत्यर्थः ॥ २० ॥

२१] ति० टी०—भरतो मद्वचनेन कुशलं वाच्यः सर्वासु मातृषु न्यायमनतिक्रम्य वृत्तिं वर्तस्वेति वाच्यः ॥ २१ ॥

रा० टी०—भरत इति । मद्वचनेन भरतः कुशलं वाच्यः सर्वासु मातृषु यथान्यायं वृत्तिमनुवर्तनं सेवामित्यर्थः वर्तस्व कुरुष्व इति च वाच्यः ॥ २१ ॥

गो० टी०—भरत इति । भरतः कुशलं वाच्यः त्वयेति शेषः । वाच्यो मद्वचनेन च मयोक्तमित्यपि वाच्य इत्यर्थः । यद्वा भरतो मद्वचनेन कुशलं वाच्यः सर्वास्वेव मातृषु यथान्यायं यथाक्रमं वृत्तिं वर्तस्व वृत्तिं कुरु शुश्रूषस्वेत्यर्थः । इति वाच्यश्चेति द्वितीयवाच्यपदान्वयः ॥ २१ ॥

२२] ति० टी०—वक्तव्यश्चेति । भरत इति शेषः । राज्यस्थं प्रधानराज्यस्थम् ॥ २२ ॥

रा० टी०—वक्तव्य इति । यौवराज्यस्थः युवराजसदृशस्त्वं राज्यस्थं पितरमनुपालय निषेवस्व इति च इक्ष्वाकुकुलनन्दनो भरतो वक्तव्यः ॥ २२ ॥

गो० टी०—वक्तव्य इति । राज्यस्थं प्रधानराज्यस्थं मा व्यवरोरुधः अवरुद्धं मा कार्षीः अतिक्रान्तवयस्कत्वादिति तत्र हेतुः कुमारराज्ये यौवराज्ये जीव भोगान् भुङ्क्ष्वेत्यर्थः इति च वक्तव्य इत्यन्वयः ॥ २२ ॥ २३ ॥

२३] ति० टी०—व्यपरोरुधः राज्याद्भ्रंशयेत्यर्थः । तस्यैवाज्ञाप्रवर्तनान्मदनुग्रहाय तस्यैवाज्ञां प्रवर्तयन्कुमारराज्ये जीवस्व तोषं कुरु ॥ २३ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—अतीति । अतिक्रान्तवयाः चिरकालप्रादुर्भूतिमान् यो राजा तं मा व्यपरोरुधः तन्मनोभङ्गं न कुर्वित्यर्थः । तदुपायमाह—तस्य राज्ञः आज्ञाप्रवर्तनादेव यौवराज्येऽधिकृतस्त्वं जीवस्व निर्वाहं कुरु ॥ २३ ॥

२४-२५] ति० टी०—अब्रवीदित्यादि वाक्यं भरतं प्रत्येव । अब्रवीदित्यादि श्लोकद्वयं प्रक्षिप्तमिति कतकः ॥२४-२५॥

रा० टी०—अब्रवीदिति । पुत्रगर्धिनी पुत्रविषयकातीच्छावती मम माता इव ते तव द्रष्टव्या इति भृशमश्रूणि वर्तयन्सन् मां भूयो बहुवारमब्रवीत् ॥ २४ ॥

रा० टी०—इतीति । इति ब्रुवन्महाबाहुः रामः भृशमश्रूणि अवर्तयदिव तच्छ्रवणमात्रेणैवाश्रुपूर्णे मम नेत्रे अभवतामित्यर्थः ॥ २५ ॥

गो० टी०—अब्रवीदिति । अश्रूणि वर्तयन् करिष्यमाणमातृविषयपीडास्मरणादिति हृदयं स्वस्य मातृविषयशुश्रूषाया अलाभाद्वा अश्रुवर्तनं मम माता स्वमातेव त्वया द्रष्टव्या इति भरतमुद्दिश्य मां ब्रुवन्नेव भृशमश्रूण्यवर्तयत् । शोकजनितरक्तिमानमाह—राजीवताम्राक्ष इति । अनन्तरमश्रुमोचनं ततोऽवक्तव्यस्यानुचितत्वात् अस्रुमाशयमुत्तरत्र सीतापहरणानन्तरमुद्भाटयिष्यति सुप्तप्रमत्तकुपितानां वचनैर्भावज्ञानं द्रष्टव्यमिति न्यायेन ॥ २४ ॥ २५ ॥

२६] ति० टी०—अथ लक्ष्मणवाक्यमाह—लक्ष्मण इति । केनेत्यादिसार्धसप्तश्लोकास्तद्वचः ॥ २६ ॥

रा० टी०—रामोक्तिमुक्त्वा लक्ष्मणोक्तिमाह—लक्ष्मण इति । अयं राजपुत्रो रामः केनापराधेन विवासितः अकारणकमेवैतत्कालिकं विवासनमित्यर्थः ॥ २६ ॥

गो० टी०—लक्ष्मणस्त्विति । तु शब्देन रामवत्र सर्वथा हृदयं जुगोपेत्युक्तम् ॥ २६ ॥

२७] ति० टी०—येन विवासनेन वयं पीडितास्तद्विवासनं राज्ञा तु कार्यं वाकार्यमिवाकार्यं कृतम् कैकेय्या लघु

---

१ व्यवेति गो. पाठः । २ त्वमिति गो. पाठः । ३ महाराजेति गो. पाठः । ४ इवेति रा. पाठः । ५ ताम्राक्ष इति गो. पाठः । ६ त्वाश्रित्येति गो. पाठः ।

यदि प्रव्राजितो रामो लोभकारणकारितम् । वरदाननिमित्तं वा सर्वथा दुष्कृतं कृतम् ॥ २८ ॥
इदं तावद्यथाकाममीश्वरस्य कृते कृतम् । रामस्य तु परित्यागे न हेतुमुपलक्षये ॥ २९ ॥
असमीक्ष्य समारब्धं विरुद्धं बुद्धिलाघवात् । जनयिष्यति संक्रोशं राघवस्य विवासनम् ॥ ३० ॥
अहं तावन्महाराजे पितृत्वं नोपलक्षये । भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ॥ ३१ ॥

शासनमाश्रुत्य प्रतिज्ञाय कृतम्, यद्वा तद्विवासनं कृतं कार्यं कर्तुं योग्यं वा भवतु, अकार्यमकर्तुं योग्यं वा भवतु, अस्माकं तु पीडा सर्वथैवेत्यर्थः ॥ २७ ॥

रा० टी०–वस्तुतस्त्वस्मिन्विषये राज्ञो नापराध इति बोधयन्नाह–राज्ञेति । येन विवासनेन वयमभिपीडितास्तत्कार्यं विवासनं कैकेय्याः लघुशासनमाश्रुत्य अकार्यमिव कृतम् अभिषेकप्रतिबन्धकत्वाद्विरुद्धं प्रतिभातीत्यर्थः ।वाशब्द इवार्थे॥२७॥

गो० टी०–राज्ञेति । येन विवासनेन वयमभिपीडिताः तद्विवासनम् अकार्यं तु अकार्यमेव राज्ञा तु कैकेय्याः लघुशासनमाश्रित्य कार्यं वाऽकार्यमिव कृतं खलु, यद्वा राज्ञा खलु लघु तुच्छं कैकेय्याः शासनमाश्रित्याकार्यमेव कार्यं कृतं येन कार्येण वयमभिपीडिताः ॥ २७ ॥

२८] ति० टी०–उक्तमेवार्थं प्रकारान्तरेणाह–यदीति। यदि यद्रामः प्रव्राजितस्तल्लोभरूपेण कारणेन कैकेय्या कारितम्, यद्वा कैकेय्यै प्रतिश्रुतवरदाननिमित्तकं वा भवतु सर्वथा दुष्कृतं कृतमनुचितं कृतम् एतद्व्यतिरिक्तं वरयेति सुवचत्वात् वरदानकाले विशिष्य नियोगाभावाच्च पतित्वेन भार्याशिक्षणे समग्राधिकाराच्च ॥ २८ ॥

रा० टी०–यदीति । यद्राज्ञा रामः प्रव्राजितः तल्लोभकारणकारितं लोभकारणेन राजातीव सत्यवक्ता पुत्रश्चैतस्यातीवाज्ञाकारीति यशोभिवाञ्छारूपहेतुना कारितं कृतं वरदाननिमित्तं वा कृतं सर्वथा इदानीं दुष्कृतं न कर्तव्यमित्यर्थः । इतीदानीमर्थे । दशैते राजमातङ्गाः स्तस्यैवामी तुरङ्गमा इत्यादाविवाप्रधानीभूतमपि प्रव्राजनं यत्तच्छब्दाभ्यां परामृश्यते अत एव नपुंसकत्वम् ॥ २८ ॥

गो० टी०–प्रतिज्ञातार्थप्रदानस्य कथमकार्यत्वं तत्राह–यदीति । रामः प्रव्राजितो यदि प्रव्राजित इति यत् एतत् लोभकारणकारितं वरदाननिमित्तं वा कैकेय्याः प्रतिश्रुतवरदाननिमित्तं वा सर्वथा दुष्कृतं कृतं वरदानसमये वरद्वयस्य भरताभिषेकरामनिष्कासनरूपेण विनियोगाभावात् । यदिशब्दस्त्वारस्यानुरोधेनेत्थं वा योजनीयं लोभकारणकारितमिति क्रियाविशेषणं रामः लोभकारणकारितं वा वरदाननिमित्तं वापि यदिप्रव्राजितः तथापि सर्वथा दुष्कृतमकार्यं राज्ञा कृतं न राज्यं दास्यामीति प्रतिज्ञातुं शक्यत्वात् ज्येष्ठपुत्रविवासनस्यानुचितत्वाच्चेति भावः । 'नत्वेकपुत्रं दद्यान्न त्वेव ज्येष्ठपुत्रम् ' इति हि स्मर्यते । 'लोभकारणकारितः' इति पाठे रामविशेषणं लोभरूपकारणेन प्रेरित इत्यर्थः ॥ २८ ॥

२९–३०] ति० टी०–नन्वयं दैवप्रेरणयेदं जातमिति न दोषो राज्ञ इत्याशङ्क्य निरपराधपुत्रत्यागे दोषस्तवश्यं राज्ञ इत्याह–इदमिति । ईश्वरस्य कृत ईश्वरप्रेरणायां सत्यां यथाकाममीश्वरेच्छामनतिक्रम्येदं तावत्कृतं भवतु नाम, तथापि तु रामस्य परित्यागे हेतुभूतं दोषं न पश्यामि अतः केवलं बुद्धिलाघवादसमीक्ष्योचितानुचितमनवेक्ष्य विरुद्धं धर्मशास्त्रविरुद्धमारब्धं रामविवासनं संक्रोशमिह परत्र च दुःखं जनयिष्यत्येव निर्हेतुकपुत्रदारत्यागस्योपपातकेषु गणनादिति भावः ॥ २९ ॥ ३० ॥

रा० टी०–ननु कर्तृत्वं करणत्वं च 'स्वभावचेतना धृतिः' इत्यायुक्त्या सर्वस्य परमात्मायत्तत्वाद्राज्ञः कोऽपराध इत्यत आह–इदमिति । ईश्वरस्य परमात्मनः कृते इच्छया निष्पादिते एव कृतं राज्ञः प्रयत्नः इदं यथाकामं यथेष्टं स्यादिति शेषः । परं तु परित्यागे हेतुं न उपलक्षये ईश्वरस्यापि कृताविति शेषः ॥ २९ ॥

गो० टी०–इदमिति । रामस्य परित्यागे हेतुं नोपलक्षये किंतु ईश्वरस्य कृते स्वतन्त्रव्यापारे स्थितेन राज्ञेति शेषः । इदं रामप्रव्राजनं यथाकामं तावत् यथेच्छमेव कृतं, यद्वा इदं रामविवासनमीश्वरस्य कृते ईश्वरप्रयोजनाय यथाकामं कृतं केवलमीश्वरप्रेरणेन शास्त्रमनवेक्ष्य कृतमित्यर्थः । हि यस्माद्रामस्य परित्यागे हेतुं नोपलक्षये परित्यागहेतुदोषसद्भावे हि पुत्रविवासनं शास्त्रीयं स्यात् अयं चोपसंहारश्लोकः ॥ २९ ॥

रा० टी०–नन्वीश्वरस्य स्वतन्त्रत्वान्निर्हेतुकमपि कार्यं स्यादित्यत आह–असमीक्ष्येति । बुद्धिलाघवाद्बुद्धौ विचारे लाघवादालस्यादिना विचारस्यालप्तत्वादित्यर्थः । असमीक्ष्य सम्यग्विचारमकृत्वा समारब्धं विरुद्धं राघवस्य विवासनं संक्रोशं स्वकर्तुर्निन्दां जनयिष्यति ॥ ३० ॥

गो० टी०–यथेष्टकरणं चेत् कथमनुतप्तवान् राजेत्यत्राह–असमीक्ष्येति । विरुद्धमत एव असमीक्ष्यानालोच्य बुद्धिलाघवात् समारब्धं कृतं राघवस्य विवासनं संक्रोशं दुःखं जनयिष्यति जनयति अतो राज्ञोऽनुताप इति भावः ॥ ३० ॥

३१] ति० टी०–'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥' इति वचनार्थं हृदि निधायाह–अहमिति । भर्ता स्वामी पिता चेति 'ज्येष्ठो भ्राता पितुः समः' इत्युक्तेः । वस्तुतस्तु केवलमायिकत्वाल्लक्ष्मणादिशरीराणां तेषामेवमुक्तौ न दोष इति बोध्यम् ॥ ३१ ॥

रा० टी०–ननु पित्रादिवियोगस्यासह्यत्वादयोध्यागमनेच्छया एवं ब्रूषे चेन्मया सार्धं त्वं मागच्छेत्यत आह–अह-

सर्वलोकप्रियं त्यक्त्वा सर्वलोकहिते रते[1] । सर्वलोकोऽनुरज्येत कथं चानेन[2] कर्मणा ॥ ३२ ॥
सर्वप्रजाभिरामं हि रामं प्रव्रज्य धार्मिकम् । सर्वलोकविरोधेन[3] कथं राजा भविष्यति[4] ॥ ३३ ॥
जानकी तु महाराज निःश्वसन्ती तपस्विनी । भूतोपहतचित्तेव विष्ठिता विस्मृता[5] स्थिता ॥ ३४ ॥
अदृष्टपूर्वव्यसना राजपुत्री यशस्विनी । तेन दुःखेन रुदती नैव मां किंचिदब्रवीत् ॥ ३५ ॥
उद्वीक्षमाणा भर्तारं मुखेन परिशुष्यता । मुमोच सहसा बाष्पं प्रयान्तमुपवीक्ष्य सा[6] ॥ ३६ ॥

मिति । पितृत्वं मत्कर्तृकसेव्यत्वं नोपलक्षये रामवियोगे सतीति शेषः । तत्र हेतुः—मम भ्रात्रादिः राघव एव ॥ ३१ ॥

गो० टी०—पिता कथं निन्द्य इत्यत्राह—अहमिति । गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते, इति वचनादिति भावः । भ्राता राघव एव मम पिता 'ज्येष्ठो भ्राता पितृसमः' इत्युक्तेः तस्य पितृत्वाभावेऽपि भर्तृत्वमस्त्येवेत्याशङ्क्याह—भर्ता चेति स्वामीत्यर्थः । किं बहुना बन्धुः सर्वविधोऽपि राघव एव एतेन परमैकान्तिभिः प्राकृतपित्रादयः परित्याज्याः भगवानेव निरुपाधिकः पिता भर्ता बन्धुश्चेत्युक्तं भवति ॥ ३१ ॥

३२] ति० टी०—सर्वलोकप्रियं रामं त्यक्त्वा स्थिते त्वयि प्राक्सर्वलोकहिते रते संप्रति सर्वलोकाहितेऽरते वानेन क्रूरेण कर्मणा सर्वलोकः कथमनुरज्येत । ' सर्वलोकहिते रतम ' इति पाठे रामविशेषणं सर्वलोकप्रियत्वे हेतुतयेति बोध्यम् ॥ ३२ ॥

रा० टी०—सर्वेति । सर्वलोकहिते रतमत एव सर्वलोकप्रियं रामं त्यक्त्वा विषमानेन मया अनेन रामत्यागरूपेण कर्मणा करणभूतेन सर्वलोकः कथमनुरज्येत ॥ ३२ ॥

गो० टी०—कथं भ्रुरूयं पितरं विहाय गौणमनुवर्तसे तत्राह—सर्वलोकप्रियमिति । अनेन कर्मणा प्रियपुत्रप्रव्राजनरूपक्रूरकर्मणा सर्वलोकहिते रतं सर्वलोकप्रियं रामं त्यक्त्वा अनेन कर्मणोपलक्षितं सर्वलोकाहिते रतं सर्वलोकाप्रियमित्यर्थः त्वा त्वां प्रति सर्वलोकः कथमनुरज्येत कश्चिद्भरततुल्योऽनुरज्यतां न तु सर्वोऽपीति भावः । सर्वलोकनिरुपाधिकबन्धुं त्यक्त्वा सोपाधिकबन्धुं त्वां कथमाश्रयेयमिति हृदयम् ॥ ३२ ॥

३३] ति० टी०—कथं राजा भविष्यति पितेति शेषः । इत्येवं राजानं ब्रूहीति लक्ष्मणोऽवोचदित्यर्थः ॥ ३३ ॥

रा० टी०—रामं विना पितुरपि तत्र स्थितिर्दुर्लभेति बोधयन्नाह—सर्वेति । सर्वलोकविरोधेन विरुद्धभाषणेनेत्यर्थः । राजा दशरथः कथं भविष्यति स्थास्यति न स्थास्यतीत्यर्थः ॥ ३३ ॥

गो० टी०—अनेनेत्युक्तं प्रपञ्चयति—सर्वप्रजाभिरामिति । कथं राजा भविष्यसीत्येवं राजानं ब्रूहीत्यब्रवीदिति पूर्वेणान्वयः सुमन्त्रप्रेषणवेलायां लक्ष्मणादिवाक्याश्रवणेऽप्यत्र सिद्धवदनुवादः सामर्थ्यात्तदानीमेवमुक्तमित्यवगन्तव्यम् ॥ ३३ ॥

३४-३६] ति० टी०—विस्मृता विस्मृतसर्वप्रयोजनेऽवस्थिता आश्चर्यं मन्यमानेव विष्ठिता स्थिता ॥ ३४-३६ ॥

रा० टी०—जानकीवृत्तमाह—जानकीति । तपस्विनी अतिविचारशीला विस्मृता भवनादिविषयकविशेषस्मृतिरहिता भूतोपहितचित्ता अत एव विष्ठिता चेष्टारहितात्वेन स्थिता कान्तेव तेन भवदादिदुःखस्मरणेन निःश्वसन्ती रुदती च सती स्थिता न दृष्टं पूर्वव्यसनं पौर्वकालिकदुःखं यया सा राजपुत्री जानकी तु मां किंचिन्न अब्रवीत् । श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०—जानकी त्विति । तुशब्देन लक्ष्मणाद्वैषम्यमुच्यते लक्ष्मणो रामशोकविकारमालक्ष्य हृदयनिहितं वचसोद्घाटितवान् सीता तु न तथेति मयोच्यमानं सीताशोकानुभावमाकर्ण्य क्षुब्धहृदयेन त्वया न भवितव्यमिति द्योतयितुं महाराजेति संबोधनं हृदयस्थशोकातिरेकेण निःश्वसन्ती मनस्विनी गम्भीरमनस्का भूतोपहतचित्तेव विष्ठिता स्तिमिता विस्मिता विस्मितेवोत्फुल्लनयना स्थिता ॥ ३४ ॥

गो० टी०—अदृष्टपूर्वव्यसनेति । अदृष्टपूर्वव्यसना अननुभूतपूर्वव्यसना तत्र हेतुः राजपुत्रीति यशस्विनीति तदानीमप्युदितैकैकेयीनिन्दात्वेन कीर्तिमती तेन दुःखेन भर्तृदुःखदर्शनजदुःखेन रुदती रोदनानुभाववती सती मां किंचिदपि नैवाब्रवीत् केनचित्संभाषणस्याप्यसह्यत्वात् ॥ ३५ ॥

रा० टी०—उद्वीक्षेति । मां प्रयान्तं प्रयाणाभिमुखमुदीक्ष्य अवलोक्य परिशुष्यता मुखेनोपलक्षिता भर्तारमुद्वीक्षमाणा सा सीता सहसा बाष्पं मुमोच ॥ ३६ ॥

गो० टी०—उद्वीक्षमाणेति । ततो भर्तारमभिमुखमुद्वीक्षमाणा सती परिशुष्यता मुखेन उपलक्षिता मां प्रयान्तमुद्वीक्ष्य सहसा बाष्पं मुमोच रथे गते कथं पद्भ्यामेव क्रूरं कान्तारं चरिष्यति राम इति हृदयं धारयितुमशक्ता अश्रूणि मुमोचेत्यर्थः ॥ ३६ ॥ ३७

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

१ रतमिति गो. रा. पाठः । २ त्वा इति गो. पाठः । ३ लोकं विरुध्येममिति गो.पाठः । ४ भविष्यसीति गो. पाठः । ५ विस्मितेति गो. पाठः । ६ मां प्रयान्तमुदीक्ष्येति रा. पाठः ।

तथैव रामोऽश्रुमुखः कृताञ्जलिः स्थितोऽब्रवील्लक्ष्मणबाहुपालितः ।
तथैव सीता रुदती तपस्विनी निरीक्षते राजरथं तथैव माम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ।

पृष्टः सुमन्त्रः पुनरपि रामस्य वने प्रयाणमयोध्यां प्रति निवृत्तिसमयदृष्टां स्थिरचराद्यवस्थामयोध्याद्यवस्थां च वर्णयति । शोकाविष्टो दशरथः सुमन्त्राग्रे बहुशः प्रलपति ।

मम त्वश्वा निवृत्तस्य न प्रावर्तन्त वर्त्मनि । उष्णमश्रु विमुञ्चन्तो रामे संप्रस्थिते वनम् ॥ १ ॥
उभाभ्यां राजपुत्राभ्यामथ कृत्वाहमञ्जलिम् । प्रस्थितो रथमास्थाय तद्दुःखमपि धारयन् ॥ २ ॥
गुहेन सार्धं तत्रैव स्थितोऽस्मि दिवसान्बहून् । आशया यदि मां रामः पुनः शब्दापयेदिति ॥ ३ ॥
विषये ते महाराज महाव्यसनकर्शिताः । अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः ॥ ४ ॥

३७] ति० टी०—लक्ष्मणबाहुपालितो लक्ष्मणेन सेव्यमानः अब्रवीत् उक्तमिति शेषः । निरीक्षते राज्ञस्तव रथं मां च ॥३७॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०—तथैवेति । यो रामः तथा अब्रवीत्तंदेशमिति शेषः सः अश्रुमुखः सन् राजरथं मां च निरीक्षते तथैव सीता च निरीक्षते ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टपञ्चाशत्तमः सर्गः ॥ ५८ ॥

१] ति० टी०—एवं रामवृत्तान्तमुक्त्वा प्रत्यागतिसमयानुभूतस्वदेशपुरवृत्तान्तमाह—मम त्विति । ममाश्वा मन्नियम्याश्वा न प्रावर्तन्त यथापूर्वं रथवहनोन्मुखा नाभूवन्नित्यर्थः । जात्याश्वस्वभाववर्णनेन स्वभावोक्तिरलंकारः ॥ १ ॥

रा० टी०—रामादीनां वृत्तमुक्त्वा स्ववृत्तमाह—ममेति । रामे वनं संप्रस्थिते सति निवृत्तस्य मम नियम्या अश्वाः अश्रु विमुञ्चन्तः सन्तः वर्त्मनि मार्गे न प्रावर्तन्त पूर्ववन्न चेलुः ॥ १ ॥

गो० टी०—ममेति । मम वर्त्मनि मत्संबन्धिनि मार्गे न प्रावर्तन्त नववियोगक्लेशादिति भावः ॥ १ ॥

२] ति० टी०—तद्दुःखं तद्वियोगदुःखम् ॥ २ ॥

रा० टी०—उभाभ्यामिति । तद्दुःखं वियोगजनितखेदं धारयन् सहमानोऽहं प्रस्थितः ॥ २ ॥

गो० टी०—उभाभ्यामिति । राजपुत्राभ्यामिति चतुर्थी तद्दुःखं तादृशं दुःखम् ॥ २ ॥

३] ति० टी०—बहून्रामस्य गङ्गोत्तरणदिनादिदिनत्रयम् यद्यपि भरद्वाजाश्रमाचारप्रतिनिवृत्तिमत्तृतीयदिवस एव सुमन्त्रप्रस्थानम्, तथापि तद्दिनेऽल्पावशिष्टदिनपर्यन्तं स्थित्या बहूनित्युक्तम् । किमर्थं तत्र स्थितिस्तत्राह—शब्दापयेदिति । तत्समीपचरद्दूहमनुष्यमुखेनाकारयेदित्यर्थः ॥ ३ ॥

रा० टी०—गुहेनेति । यदि कदाचिद्रामः मां पुनः शब्दापयेत् आह्वयेत् इति आशया बहून् त्रीन् दिवसान् गुहेन सार्धं तत्रैव स्थितोऽस्मि वर्तमानसामीप्य इति भूते लट् ॥ ३ ॥

गो० टी०—गुहेनेति । गुहेन सार्धं तत्क्षेहितजनसंदर्शनमपि क्लेशापहमिति भावः । तत्रैव नतु वर्त्मनि दिवसानिति बहुवचनेन कपिञ्जलाधिकरणन्यायेन त्रित्वसिद्धिरित्येके । वस्तुतस्तु वनस्पतिमूले एकदिनं भरद्वाजाश्रमे द्वितीयं यमुनातीरे तृतीयं चतुर्थे चित्रकूटप्रवेशः पञ्चमे गुहचारैस्तत्सर्वं निवेदितं षष्टे सूतनिर्गमः, यद्वा द्वितीयदिने भरद्वाजाश्रमे रामस्य चित्रकूटगमनव्यवसायात् तृतीयदिने चारैर्निवेदनं चतुर्थे सूतनिर्गमः अतः त्रीन् दिवसान् गङ्गाकूले स्थितोऽस्मीत्यर्थः । बहूनिति विशेषणात् रामवियोगेन एकैकस्य दिवसस्य कल्पवत् प्रतिभानमिति दर्शितं पुनः शब्दापयेत् पुनराह्वयेत् वनचरमुखेनेति हृदयम् शब्दशब्दाण्णौ तत्कृतापुगन्तोऽप्ययमस्ति अतोऽङ्गापयतीत्यादिवत् सिद्धम् ॥ ३ ॥

४] ति० टी०—कैकेयीनिमित्तं रामविवासनं सर्वक्षोभकरमभूदित्याह—विषये ते इति । तव देशे पुष्पमपि न विकसितम् अङ्कुराः शाखासु पल्लवोद्भेदाः, कोरकाः पुष्पमुकुलानि, तैः सहिता वृक्षाः अत्र सर्वत्र हेत्वंशे चोत्प्रेक्षा बोध्या ॥ ४ ॥

रा० टी०—स्ववृत्तमुक्त्वा देशवृत्तमाह—विषय इति । ते विषये देशे सपुष्पाङ्कुरकोरकाः वृक्षा अपि महाव्यसनेनातिदुःखेन कर्शिताः पीडिताः अत एव परिम्लानाः तत्राङ्कुराः शाखासु नवीनपल्लवोद्गमाः कोरकाः कुसुममुकुलानि ॥ ४ ॥

गो० टी०—अथ रामस्य सर्वान्तर्यामितादात्म्यं सूचयितुं सर्वेषां रामविरहक्लेशं वर्णयति, यद्वा कैकेयीप्रियार्थमविचारेण सहसा कृतं कार्यं सर्वक्षोभनिमित्तमभूदित्याह—विषय इत्यादि । विषये देशे 'देशविषयौ तूपवर्तनम्' इत्यमरः । अपिशब्देन लतादयः समुदीयन्ते व्याध्यादिना एकदेशगलानिं व्यावर्तयितुं

१ कृताञ्जलिमिति रा. पाठः । २ ऽभवदिति गो. पाठः । ३ प्रमुञ्चत इति गो. पाठः । ४ मे इति रा. पाठः । ५ रामेति गो. पाठः ।

उपतप्तोदका नद्यः पल्वलानि सरांसि च । परिशुष्कपलाशानि वनान्युपवनानि च ॥ ५ ॥
न च सर्पन्ति सत्त्वानि व्याला न प्रसरन्ति च । रामशोकाभिभूतं तं निष्कूजमिव तद्वनम् ॥ ६ ॥
लीनपुष्करपत्राश्च नद्यश्च कलुषोदकाः । संतप्तपद्माः पद्मिन्यो लीनमीनविहंगमाः ॥ ७ ॥
जलजानि च पुष्पाणि माल्यानि स्थलजानि च । नातिभान्त्यल्पगन्धीनि फलानि च यथापुरम् ॥ ८ ॥
अत्रोद्यानानि शून्यानि प्रलीनविहगानि च । न चाभिरामानारामान्पश्यामि मनुजर्षभ ॥ ९ ॥
प्रविशन्तमयोध्यायां न कश्चिदभिनन्दति । नरा राममपश्यन्तो निःश्वसन्ति मुहुर्मुहुः ॥ १० ॥

सपुष्पेत्यादि सपुष्पाङ्कुरकोरकाः पुष्पाणि अभिनवविकसितानि अङ्कुराः शाखास्तु नवपल्लवोद्भेदाः कोरका कलिकाः 'कलिका-कोरकः पुमान्' इत्यमरः । तैः सहिता दृश्या अपि परिम्लानाः कठिनकोमलविभागमन्तरेणापि सर्वमेकदैव परिम्लानमभू-दित्यर्थः ॥ ४ ॥

५] ति० टी०–उपतप्तोदकाः शुष्कोदकाः पलाशः पर्णम् ॥ ५ ॥

रा० टी०–उपेति । पल्वलानि अल्पसरांसि उपतप्तोदका इत्यस्य लिङ्गविपरिणामेनान्यत्राप्यन्वयः परिशुष्काणि पला-शानि पत्राणि येषां तानि ॥ ५ ॥

गो० टी०–उपतप्तोदका इति । अकात्स्न्येनोपतप्तत्वव्यु-दासायोदकपदं तेनातपकार्योपतापव्याप्तिः पल्वलानि सरांसि च पल्वलानीति दृष्टान्तार्थम् एवं वनानीत्यपि अनेनाल्पाधि-कविभागमन्तरेण परितप्तत्वं द्योत्यते उपतप्तोदका इति पदं लिङ्गविपरिणामेन पल्वलादौ योजनीयं वनानि सन्ततजलसेक-मन्तरेण प्रशुष्कानि कठिनाकाराणि, उपवनानि जलसेकेन प्रशु-ष्कान्यतिकोमलानि परिशुष्कपलाशानि एकरूपेण शुष्कपत्राणि 'पत्रं पलाशम्' इत्यमरः ॥ ६ ॥

६] ति० टी०–सत्त्वानि प्राणिनो न सर्पन्ति न प्रसर-न्तीत्यादावाहारार्थमपीति शेषः । यतस्तत्प्राणिजातं रामशोका भिभूतं तद्वनं मार्गस्थमत्यन्तं पक्षिशब्दवन्निष्कूजमिव पक्षिश-ब्दरहितम् ॥ ६ ॥

रा० टी०–न चेति । सत्त्वानि वनवासिजनाः न सर्पन्ति व्यालाः सर्पादयश्च न प्रसरन्ति । तत्र हेतुः तत्प्राणिजातं राम-शोकेन अभिभूतं पराभूतमत एव तद्वनं निःकूजं शब्दरहित-मिव अभवदिति शेषः ॥ ६ ॥

गो० टी०–नेति । न सर्पन्ति न गच्छन्ति किंतु स्तब्ध-तया तिष्ठन्ति सत्त्वानि जन्तवः व्यालाः हिंस्रपशवः सर्वदा संचारस्वभावा गजा वा न प्रचरन्ति आहारार्थमपि न संचर-न्तीत्यर्थः। गमनवच्छब्दोऽपि नास्तीत्याह–निष्कूजमिति निष्कूजं निःशब्दम् ॥ ६ ॥

७] ति० टी०–लीनं संकुचितं पुष्करपत्रं नलिनीदलं यासु ताः संतप्तपद्माः शुष्कपद्माः पद्मिन्यः सरांसि विहंगमा अत्र जलपक्षिणः ॥ ७ ॥

रा० टी०–लीनेति । लीनपुष्करपत्राः गलितनलिनीदल-विशिष्टाः कलुषाणि मलिनानि उदकानि यासां ताः नद्य आस-न्निति शेषः । पद्मिन्यः सरांसि सन्तप्तपद्माः शुष्कपद्मविशिष्टाः अत एव लीना विध्वस्ताः मीनविहङ्गमाः यासु ताः आस-न्निति शेषः ॥ ७ ॥

गो० टी०–लीनपुष्करपत्रा इति । लीनपुष्करपत्राः ग्लान्य-तिशयेन जलान्तर्विलीनपद्मपत्राः लीनाः संचाररहिताः विहङ्गमा जलकाकादयः ॥ ७ ॥

८] ति० टी०–स्थलजानि माल्यानि पुष्पाणि यथापुरं यथापूर्वम् ॥ ८ ॥

रा० टी०–जलजानि जलोत्पन्नानि पुष्पाणि स्थलजानि माल्यानि पुष्पाणि नातिभान्ति । तत्र हेतुः अल्पगन्धीनि परि-भ्रष्टबहुगन्धवन्ति फलानि च यथापुरं यथापूर्वं न भान्ति 'माल्यं पुष्पे पुष्पदाम्नि' इति वैजयन्ती ॥ ८ ॥

गो० टी०–जलजानीति । माल्यानि पुष्पाणि 'माल्यं पुष्पे पुष्पदाम्नि' इति वैजयन्ती । यथापुरं यथापूर्वं अल्पग-न्धीनीति मत्वर्थीय इनिः स्वभावस्य दुस्त्यजत्वादल्पत्वं फलानि रसालपनसादीनि ॥ ८ ॥

९] ति० टी०–उद्यानानि पुष्पवाटिकाः आरामान्कृत्रि-मवनानि अनेन मनुष्याणां सर्वशोऽत्यन्तदुःखवत्त्वं कैमुतिक-न्यायेनैव प्रतिपादितं बोध्यम् ॥ ९ ॥

रा० टी०–अत्रेति । प्रलीनविहगानि परिध्वस्तपक्षीणि अत एव शून्यानि अत्र अयोध्यायामुद्यानानि पुष्पवाटिकाः सन्तीति शेषः । आरामान् कृत्रिमवनानि अभिरामान्न पश्यामि 'आरामः स्यादुपवनं कृत्रिमं वनमेव यत्' इत्यमरः ॥ ९ ॥

गो० टी०–अत्रेति । उद्यानानि आक्रीडाः 'पुमानाक्रीड उद्यानम्' इत्यमरः । शून्यानि निर्जनानि प्रलीनाः नीडेषु मू-र्च्छिताः विहगाः शुकपिकशारिकादयः येषु तानि तथोक्तानि आरामान् कृत्रिमवनानि 'आरामः स्यादुपवनं कृत्रिमं वनमेव यत्' इत्यमरः । न चाभिरामान् किंतु निःश्रीकान् पश्यामी-त्यर्थः ॥ ९ ॥ १० ॥

१०] ति० टी०–तदेवाह–प्रविशन्तमिति ॥ १० ॥

रा० टी०–प्रविशन्तमिति । अयोध्यायां प्रविशन्तं मां कश्चिज्जनो नाभिनन्दति । तत्र हेतुः राममपश्यन्तो नराः मुहुर्मुहुः निश्वसन्ति ॥ १० ॥

१ प्रचरन्तीति गो.पाठः। २ निःकूजमिति रा.पाठः। ३ अभवदिति गो. पाठः। ४ नोद्येति गो.पाठः। ५ नाद्येति गो.पाठः। ६ अयोध्यां मामिति गो.पाठः।

देव राजरथं दृष्ट्वा विना राममिहागतम् । दूरादश्रुमुखः सर्वो राजमार्गे गतो जनः ॥ ११ ॥
हर्म्यैर्विमानैः प्रासादैरवेक्ष्य रथमागतम् । हाहाकारकृता नार्यो रामादर्शनकर्शिताः ॥ १२ ॥
आयतैर्विमलैर्नेत्रैरश्रुवेगपरिप्लुतैः । अन्योन्यमभिवीक्षन्तेऽव्यक्तमार्ततराः स्त्रियः ॥ १३ ॥
नामित्राणां न मित्राणामुदासीनजनस्य च । अहमार्ततया [3]कंचिद्विशेषं [4] नोपलक्षये ॥ १४ ॥
अप्रहृष्टमनुष्या च दीननागतुरंगमा । आर्तस्वरपरिम्लानविनिःश्वसितनिःस्वना ॥ १५ ॥
निरानन्दा महाराज रामप्रव्राजनातुरा । कौसल्या पुत्रहीनेव अयोध्या प्रतिभाति मे [6] ॥ १६ ॥
सूतस्य वचनं श्रुत्वा वाचा परमदीनया । बाष्पोपहतया सूतमिदं वचनमब्रवीत् ॥ १७ ॥
कैकेय्या विनियुक्तेन पापाभिजनभावया । मया न मन्त्रकुशलैर्वृद्धैः सह समर्थितम् ॥ १८ ॥

११-१२] ति० टी०-देवेति संबुद्धिः राजरथं राज्ञस्तव रथम् अश्रुमुखः अभूदिति शेषः ॥ ११-१२ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-देवेति । देव हे राजन् ! रामं विना इहागतं राजरथं दूरादृष्ट्वा सर्वो जनः अश्रुमुख आसेति शेषः ॥ ११ ॥

गो० टी०-देव राजरथमिति । देवराजरथमित्यत्र देवेति संबोधनम् ॥ ११ ॥

रा० टी०-हर्म्यैरिति । हर्म्यादिभिरुपलक्षिताः नार्यः आगतं रथमवेक्ष्य रामस्य अदर्शनेन कर्शिताः प्राप्तखेदाः सत्यः हाहाकारकृता आसन् ॥ १२ ॥

गो० टी०-हर्म्यैरित्यादिश्लोकद्वयमेकान्वयम् । हाहाकारकृताः कृतहाहाकाराः आयतैरित्यश्रुवेगातिशयोक्त्यर्थः निरञ्जनत्वं द्योतयितुं विमलैरित्युक्तम् । अभिवीक्षन्ते व्यक्तमित्यत्र अव्यक्तमिति पदच्छेदः ॥ १२ ॥ १३ ॥

१३] ति० टी०-अव्यक्तमिति छेदः रामप्रवासजनितपीडयार्ताः परस्परं सम्यङ् नेक्षन्त इत्यर्थः ॥ १३ ॥

रा० टी०-आयतैरिति । आर्ततराः स्त्रियः अश्रुवेगपरिप्लुतैः अत्यश्रुव्याप्तैः अत एव विमलैः कज्जलादिरहितैः आयतैर्विशालैर्नेत्रैः अन्योन्यं व्यक्तं यथा स्यात्तथाऽभिवीक्षन्ते । अयं श्लोकः पूर्वमपि पठितः ॥ १३ ॥

१४] ति० टी०-अन्योन्यं शत्रूणां तथा मित्राणामुदासीनजनस्य चार्ततयार्तत्वगुणसाम्येन विशेषं नोपलक्षये इत्यन्वयः । यद्यपि रामस्य स्वतोऽमित्रासंभवः, कैकेयीकुब्जयोस्तत्त्वस्य दैववशात्संभवेऽपि तयोरार्तत्वभावः, (?) तथाप्यनयोः शत्रुत्वमनयोर्मित्रत्वमयमुदासीन इति भेदो न ज्ञायत इति तात्पर्यम् ॥ १४ ॥

रा० टी०-नेति । अमित्राणां शत्रूणां मित्राणां च उदासीनजनस्य शत्रुत्वमित्रत्वानाक्रान्तस्य च आर्ततया हेतुना कंचिद्विशेषं परस्परं भेदं नोपलक्षये नकारत्रयेण क्रियाप्यावर्तते तेनोपलक्षणे स्वप्रमादाभावः सूचितः ॥ १४ ॥

गो० टी०-नामित्राणामिति । उदासीनेत्यत्रापि नञ्वुषज्यते अमित्राणां तवेति शेषः । रामस्यामित्रप्रसङ्गाभावात् यद्वा पौरजनस्यामित्राणां पौरजनस्य मित्राणां च उदासीनजनस्य उदासीनजनापेक्षया आर्ततया हेतुना विशेषं नोपलक्षये कुत्रचित्पुरुषे मित्राणि च न स्वकार्याणि कुर्वन्ति नापि शत्रवोऽपीति भावः ॥ १४ ॥

१५] ति० टी०-आर्तस्वरपरिम्लानविनिःश्वसितनिःस्वना दीर्घशब्दवन्निःश्वासयुक्तेति यावत् ॥ १५ ॥

१६-१७] ति० टी०-पुत्रहीना पुत्रवियुक्ता कौसल्येव अनेन सर्वेषां रामे पुत्रवत्प्रेम ध्वनितम् ॥ १६-१७ ॥

रा० टी०-अप्रहृष्टेति । न प्रहृष्टाः मनुष्या यस्यां सा दीनाः क्षीणाः नागाः गजाः तुरङ्गमाः अश्वा यस्यां सा आर्तस्वरैः दीनतासूचकशब्दैः परिम्लाना विनिःश्वसितामत्युच्छ्वासानां निःस्वनः शब्दो यस्यां सा अत एव निरानन्दा आनन्दरहिता, तत्र हेतुः रामप्रव्राजनातुरा अयोध्या पुत्रहीना कौशल्येव प्रतिभाति । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

रा० टी०-सूतस्येति । परमदीनया बाष्पोपहतया बाष्पैः उपहतया स्खलितया वाचा सूतमिदं वचनमब्रवीत् ॥ १७ ॥

गो० टी०-अप्रहृष्टमनुष्येत्यादिश्लोकद्वयमेकान्वयम् । विनिःश्वसितनिःस्वना दीर्घनिःश्वासस्वनयुक्ता, यद्वा विनिःश्वसितस्येव निःस्वनो यस्याः सा व्याधिविशेषोपरुद्धनिःश्वासजनवदविरतहाहाकारयुक्तेत्यर्थः । संनिहितत्वेन कौसल्यां दृष्टान्तीकरोति पुत्रहीना पुत्रवियुक्ता एतावता प्रबन्धेन रामस्य सर्वात्मकता ऋषिणानुसंहितेति प्रबन्धगतवस्तुध्वनिः ॥ १५-१७ ॥

१८] ति० टी०-राजा सर्वथा त्वया महदकार्यं कृतमिति सुमन्त्राभिप्रायं तदीयात्युक्तिवचनेनैर्नीयाङ्गीकारेणोत्तरमाह-कैकेय्येति । पापाभिजनभावया पापकुलजया पापदेशजया पापाभिप्रायया च ' कुलेऽप्यभिजनो जन्मभूम्याम् ' इत्यमरः । विनियुक्तेन रामप्रव्राजने इति शेषः न समर्थितं न विचारितम् ॥ १८ ॥

रा० टी०-तद्वचनमेवाह-कैकेय्येति । पापाभिजनभा-

१ दुःखादिति गो. पाठः । २ मार्गगत इति गो. रा. पाठः । ३ किंचिदिति गो. पाठः । ४ विशेषमुपलक्षये इति गो. पाठः । ५ म्लाना विनिरिति गो. पाठः । ६ मेति गो. पाठः । ७ राजा तं सूतमिदमिति गो. पाठः

न सुहृद्भिर्न चामात्यैर्मन्त्रयित्वा सनैगमैः । मयायमर्थः संमोहात्स्त्रीहेतोः सहसा कृतः ॥ १९ ॥
भवितव्यतया नूनमिदं वा व्यसनं महत् । कुलस्यास्य विनाशाय प्राप्तं सूत यदृच्छया ॥ २० ॥
सूत यद्यस्ति ते किंचिन्मयापि[2] सुकृतं कृतम् । त्वं प्रापयाशु मां रामं प्राणाः संत्वरयन्ति माम् ॥ २१ ॥
यद्यद्यापि ममैवाज्ञा निवर्तयतु राघवम् । न शक्ष्यामि विना रामं मुहूर्तमपि जीवितुम् ॥ २२ ॥
अथवापि महाबाहुर्गतो दूरं भविष्यति । मामेव रथमारोप्य शीघ्रं रामाय दर्शय ॥ २३ ॥
वृत्तदंष्ट्रो महेष्वासः क्वासौ लक्ष्मणपूर्वजः । यदि जीवामि साध्वेनं पश्येयं सीतया सह ॥ २४ ॥

वया पापाः क्रूरकर्मविषयकसंमतिदानजनितपापविशिष्टा ये अभिजनाः अभितः समीपे विद्यमानाः जनाः मन्थरादयस्तैः सहभावो नित्यं स्थितिर्यस्यास्तया कैकेय्या विनियुक्तेन प्रार्थितेन मया यद्यपि मन्त्रकुशलैर्वृद्धैः सुहृद्भिः सनैगमैः शास्त्रसंपन्नैरमात्यैश्च सह मन्त्रयित्वा न समर्थितं कृतं रामप्रव्राजनमिति शेषः तथापि अयं रामप्रव्राजनरूपोऽर्थः संमोहादविवेकात्स्त्रीहेतोः सहसा न कृतः न कृतः नव्द्वयोपादानं दार्ढ्यबोधनाय विवेकादेव कृत इत्यर्थः। वा शब्दो यद्यपीत्यर्थे श्लोकद्वयमेकान्वयि ॥१८-१९॥

गो० टी०–सुमन्त्रे पृष्टस्योत्तरमभिधाय ततोऽधिकं राज्यपुरुषक्षोभादिकं कथयति सति तन्ममाकृत्यकरणद्योतनार्थमिति बुद्धाङ्गीकारेणोत्तरमाह–कैकेय्येति । विनियुक्तेन 'प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि । अथ तद्व्याहरिष्यामि यदभिप्रार्थितं मया' इत्युक्तक्रमेण विशेषेण नियोगं प्रापितेनेत्यर्थः। पापाभिजनभावया पापविषयजन्मभूम्यभिप्रायमुक्तया, यद्वा पापो योऽभिजनभावः कुलक्रमागतोऽभिप्रायः स यस्यास्तया 'कुलेऽप्यभिजनो जन्मभूमौ' इत्यमरः । शंस मे जीव वा मा वा न मामुपहसिष्यसीत्युक्तवत्या मात्रा तुल्यस्वभावयेत्यर्थः । न समर्थितं न विचारितम् ॥ १८ ॥

१९] ति० टी०–नञोऽनेकधा प्रयोगः शोकेन चित्तवैक्लव्यात् सहसा झटित्यविचारेणैव ॥ १९ ॥

गो० टी०–न सुहृद्भिरिति । निगमः पुरम् 'पुरं वणिक्पथो वेदो निगमः' इत्यमरः तत्र भवा नैगमाः तैः अत्रापि नेत्यनुषज्यते अयमर्थः रामप्रवासनरूपार्थः सुहृद्भिर्मन्त्रयित्वा न कृतः अमात्यैश्च मन्त्रयित्वा न कृतः नैगमैश्च मन्त्रयित्वा न कृतः किंतु स्त्रीहेतोः संमोहात् सहसा कृतः ॥ १९ ॥

२०] ति० टी०–भवितव्यतयावश्यप्रापकदुरदृष्टवशात् वा इति वैशब्दसमानार्थम् । यदृच्छया दैवेच्छया ॥ २० ॥

रा० टी०–विवेककरणे हेतुं वदन्नाह–भवितव्यतयेति । यस्माद्राक्षसकुलादस्य मद्बुद्धिस्थस्य ऋषिसमूहस्य महद्व्यसनं दुःखं तस्य कुलस्य विनाशाय भवितव्यतया उपलक्षितया कृच्छ्रया वनगत्या इदं दुःखं प्राप्तम् ॥ २० ॥

गो० टी०–भवितव्यतयेति।अथवा इदं व्यसनं यदृच्छया दृष्टहेतुं विना भवितव्यतया पापेन प्राप्तमिति संबन्धः ॥ २० ॥

२१] ति० टी०–यदि यदि वा अथवेति यावत् । सुकृतं प्रियम् । संत्वरयन्ति निष्क्रमितुमिच्छन्तीति यावत् ॥ २१ ॥

रा० टी०–दुःखशान्त्यर्थं यत्नमाह–सूतेति। हे सूत ! यदि ते तुभ्यं किंचित्सुकृतमुपकारः मया कृतमस्ति तर्हि आशु शीघ्रं मां रामं रामसमीपं प्रापय तत्र हेतुः प्राणाः इन्द्रियाणि मां संत्वरयन्ति रामसंदर्शनार्थमिति शेषः ॥ २१ ॥

गो० टी०–सूतेति । ते तुभ्यं सुकृतमुपकारः संत्वरयन्ति निर्जिगमिषन्तीत्यर्थः॥ २१ ॥

२२] ति० टी०–मदाज्ञया भवान्गत्वा राघवं निवर्तयतु । नन्वहं भरताय त्वया राज्यस्य दत्तत्वात्त्वदाज्ञया मया कथं गन्तव्यं तत्राह–अद्यापि ममैवाज्ञा यावद्भरतागमनमिति भावः । निवृत्तौ हेतुः–नेत्यादि ॥ २२ ॥

रा० टी०–प्रापणप्रकारं वदन्नाह–यदीति । यदि अद्यापि ममैवाज्ञा वर्तते इति शेषः तर्हि राघवं रामं निवर्तयतु निवर्त्य मत्समीपे आनयत्वित्यर्थः कश्चिदिति शेषः । नन्वहं किमर्थमेवं त्वरेत्यत आह–रामं विना मुहूर्तमपि जीवितुं स्थातुं न शक्ष्यामि ॥ २२ ॥

गो० टी०–यदीति । अद्यापि अस्यां विपद्यपि ममैवाज्ञा यदि प्रवर्तते तदा राघवं निवर्तय। तुशब्दोऽवधारणे॥२२॥२३॥

२३] ति० टी०–पुनरपि रामनिवर्तनस्याशक्यत्वात्स्वनयनमेवाह–अथवापीति ॥ २३ ॥

रा० टी०–पक्षान्तरमाह–अथवेति । अथवा निवर्तनयोग्यजनाभावे अपि यदि महाबाहुः रामः दूरं गतो भविष्यति तदा रामाय रामं प्रापयितुं मामेव रथमारोप्य शीघ्रं दर्शय ॥ २३ ॥

२४] ति० टी०–वृत्तदंष्ट्रः कुन्दकुड्मलाकारदंष्ट्रः । यदि जीवामीति तत्समीपगमनपर्यन्तमपि जीवने संदेह इति भावः ॥ २४ ॥

रा० टी०–वृत्तेति । वृत्तदंष्ट्रः कुन्दकुड्मलसदृशदन्तवान्सौ रामः क्वास्ति यदि सीतया सह एनं रामं पश्येयं तर्हि साधु यथा स्यात्तथा जीवामि जीवितास्मि वर्तमानसामीप्ये इति भविष्यति लट् ॥ २४ ॥

गो० टी०–वृत्तदंष्ट्र इति । वृत्तदंष्ट्रः कुन्दकुड्मलाकारदंष्ट्र यदि पश्येयं जीवामीति संबन्धः॥ २४ ॥

---

१ चेति गो. पाठः । २ त्विति गो. पाठः ।

[लोहिताक्षं महाबाहुमामुक्तमणिकुण्डलम् । रामं यदि न पश्येयं गमिष्यामि यमक्षयम् ॥]
अतो नु किं दुःखतरं योऽहमिक्ष्वाकुनन्दनम् । इमामवस्थामापन्नो नेह पश्यामि राघवम् ॥ २५ ॥
हा राम रामानुज हा हा वैदेहि तपस्विनि । न मां जानीत दुःखेन म्रियमाणमनाथवत् ॥ २६ ॥
स तेन राजा दुःखेन भृशमर्पितचेतनः । अवगाढः सुदुष्पारं शोकसागरमब्रवीत् ॥ २७ ॥
रामशोकमहावेगः सीताविरहपारगः । श्वसितोर्मिमहावर्तो बाष्पवेगजलाविलः ॥ २८ ॥
बाहुविक्षेपमीनोऽसौ विक्रन्दितमहास्वनः । प्रकीर्णकेशशैवालः कैकेयीवडवामुखः ॥ २९ ॥
ममाश्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः । वरवेलो नृशंसाया रामप्रव्राजनायतः ॥ ३० ॥
यस्मिन्वत निमग्नोऽहं कौसल्ये राघवं विना । दुस्तरो जीवता देवि मयायं शोकसागरः ॥ ३१ ॥

रा० टी०—लोहिताक्षमिति । लोहिताक्षमरुणनयनम् आमुक्तानि परित्यक्तानि मणिकुण्डलानि येन तं रामं यदि न पश्यामि तर्हि यमक्षयं यमस्य कालस्य क्षयः अभावो यस्मिंस्तं साकेतलोकं गमिष्यामि ॥ २५ ॥

गो० टी०—लोहिताक्षमिति । आमुक्तमणिकुण्डलं धृतरत्नकुण्डलम् ॥ २५ ॥

२५–२६] ति० टी०—अतो न्वित्यतःशब्दार्थमाह—इमामिति । एवमत्यन्तसंनिहितमरणकाले उत्तमलोकदस्वस्मरणाभ्याससंपादनाय भगवतात्मविषोगः पितुः संपादित इति तत्त्वम् ॥ २५ ॥ २६ ॥

रा० टी०—अत इति । इमामवस्थामापन्नः प्राप्तो योऽहमिक्ष्वाकुनन्दनं न पश्यामि तस्य मे अतः अस्मादर्शनाभावात्किं दुःखतरं न किमपीत्यर्थः ॥ २६ ॥

गो० टी०—अतो न्विति । न पश्यामीति यत् अतः अदर्शनात् दुःखतरं किंतु किमपि दुःखतरं नास्तीत्यर्थः ॥२६॥२७॥

रा० टी०—हेति । अनाथवद्रक्षकरहितवत् दुःखेन म्रियमाणं मां भवान्न जानीत हा अतिदुःखमेतत् ॥ २७ ॥

२७] ति० टी०—अर्पितचेतनो गतचेतनः सुदुष्पारं शोकसागरमवगाढः प्रविष्टः अब्रवीत् । शोकं सागरत्वेनावर्णयदित्यर्थः ॥ २७ ॥

रा० टी०—स इति । तेन रामवियोगजनितेन दुःखेन अर्पितचेतनः निविष्टचित्तः अत एव सुदुष्पारं शोकसागरमवगाढो निमग्नो राजा अब्रवीत् वचनान्तरमुच्चारयामास । 'अर्दितचेतनः' इति भूषणपाठः ॥ २८ ॥

गो० टी०—स तेनेति । दुःखेन तप्तायःपिण्डस्थानीयेन अर्पि(र्दि ?)तचेतनः व्याप्तचित्तः । अवगाढः प्रविष्टः ॥ २८ ॥

२८] ति० टी—तदाह—रामेत्यादि । रामशोकरूपो महानावेगो वैपुल्यं यस्य सीताविरहरूपपारगतस्तत्पारसंबन्धः श्वसितरूप ऊर्मियुक्तो महावर्तो यस्य सः बाष्पवेगरूपनदीजलैराविलः ॥ २८ ॥

रा० टी०—वचनान्तरस्वरूपमाह—रामेति । रामशोकमहावेगः रामनिष्ठपित्रादिविषोगहेतुकशोकस्मरणजनितः रामकर्मको वा शोक एव महावेगो यस्मिन् सः सीताविरहपारगः सीताविरहः सीतावियोगजनितशोकः स एव पारः परसमुद्रस्तं गच्छतीति सः सीतावियोगजनितशोकसागरेण सङ्गत इत्यर्थः । श्वसितोर्मिमहावर्तः श्वसितौ ऊर्ध्वाधश्चलितमहाश्वासौ ऊर्मिमहावर्तौ यस्मिन् सः बाष्पवेगजलाविलः बाष्पवेगाः अतिवेगवत्कौशल्यायश्रूणि तान्येव जलानि तैः आविलः परिपूर्णः ॥ २९ ॥

गो० टी०—अनुभूयमानस्वशोकस्यापरिमेयत्वात्तं सागरत्वेन रूपयति—रामशोकमहाभोग इत्यादिना । रामशोक एव महानाभोगो वैपुल्यं यस्य स तथा, सीताविरहरूपं पारं गच्छतीति तथा अश्रुवेगस्य प्रभवो मूलहेतुः । सागरो हि वर्षस्य निदानं महाग्रहः अनेन कुब्जावाक्यमेव रामप्रवासनमूलमिति राज्ञा ज्ञातमित्यवगम्यते नृशंसायाः कैकेय्याः वर एव वेला जलोद्वहिर्यस्य रामप्रव्राजनमेवायतमायामो दैर्घ्यं यस्य स तथा । सागरत्वरूपणप्रयोजनमाह—यस्मिन्नित्यादिश्लोकेन ॥ २९–३२ ॥

२९] ति० टी०—शोचितॄणां प्रकीर्णकेशा एव शैवालं यत्र कैकेय्येव वडवामुखं यत्र ॥ २९ ॥

रा० टी०—बाहुविक्षेपा एव मीना यस्मिन् सः विक्रन्दितानि नानाविधजनरुदितानि महास्वनाः यस्मिन्सः प्रकीर्णकेशा एव शैवाला यस्मिन्सः कैकेय्येव वडवामुखः बोधकत्वचनेनापारजलशोषणप्रवृत्तवडवाग्निर्यस्मिन्सः ॥ ३० ॥

३०–३१] ति० टी०—अश्रुवेगप्रभवः षष्ठीतत्पुरुषः अश्रुवेगोत्पादक इत्यर्थः । नृशंसायाः कैकेय्याः वर एव वेला मर्यादा यस्य यतो रामप्रव्राजना समुद्रास्कालकूटमिव जातेति कतकः । अन्ये तु—रामप्रव्राजनमेवायतं विस्तारो यस्य स रामप्रव्राजनायत इत्यर्थमाहुः ॥ ३० ॥ ३१ ॥

रा० टी०—ममाश्रुवेगात्प्रभवति उत्पद्यते सः कुब्जाया मन्थरायाः वाक्यमेव महाग्रहः महाग्रहसदृशग्राहको मकरो यस्मिन्सः या नृशंसा मन्थरा सैव वरा उत्तमा वेला मर्यादा यस्मिन् सः रामप्रव्राजनेन आयतः विस्तृतः ॥ ३१ ॥

१ श्लोकोऽयमधिको गो. रा. पाठे । २ पश्यामीति रा. पाठः । ३ महाभोग इति गो. पाठः । ४ फेनेति गो. पाठः । ५ मीनोद्य इति गो.पाठः । ६ वेलेति रा. पाठः ।

अशोभनं योऽहमिहाद्य राघवं दिदृक्षमाणो न लभे सलक्ष्मणम् ।
इतीव राजा विलपन्महायशाः पपात तूर्णं शयने स मूर्च्छितः ॥ ३२ ॥
इति विलपति पार्थिवे प्रनष्टे करुणतरं द्विगुणं च रामहेतोः ।
वचनमनुनिशम्य तस्य देवी भयमगमत्पुनरेव राममाता ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ।

रामशोकाद्भुवि परिलुठन्त्यै कौसल्यायै रामादीनां धीरोदात्ततया संतापं व्यवधूय वने वासं संवर्ण्यापि सुमन्त्रो न तद्दुःखमपनेतुं शशाक ।

ततो भूतोपसृष्टेव वेपमाना पुनः पुनः । धरण्यां गतसत्त्वेव कौसल्या सूतमब्रवीत् ॥ १ ॥
नय मां यत्र काकुत्स्थः सीता यत्र च लक्ष्मणः । तान्विना क्षणमप्यद्य जीवितुं नोत्सहे ह्यहम् ॥ २ ॥
निवर्तय रथं शीघ्रं दण्डकान्नय मामपि । अथ तान्नानुगच्छामि गमिष्यामि यमक्षयम् ॥ ३ ॥
बाष्पवेगोपहतया स वाचा सज्जमानया । इदमाश्वासयन्देवीं सूतः प्राञ्जलिरब्रवीत् ॥ ४ ॥
त्यज शोकं च मोहं च संभ्रमं दुःखजं तथा । व्यवधूय च संतापं वने वत्स्यति राघवः ॥ ५ ॥

रा० टी०–यस्मिन्नहं निमग्नः सोऽयं शोकसागरः राघवं विना जीवता मया दुस्तरः । श्लोकचतुष्टयमेकान्वयि ॥ ३२ ॥

३२] ति० टी०–दिदृक्षमाणो यद्राघवं द्रष्टुं न लभे तदशोभनं मम महत्पापम् पापजन्यं तददर्शनमिति यावत् ॥३२॥

रा० टी०–अशोभनमिति । राघवं दिदृक्षमाणो योऽहं न लभे तस्य मे अशोभनमेतत् इति प्रलपन्सन् सुमूर्च्छितो राजा शयने शय्यायां पपात ॥ ३२ ॥

गो० टी०–अशोभनमिति । न लभ इति यत् इदमशोभनमित्यन्वयः । कविनापि वक्तुमशक्यत्वादिवेत्युक्तम् ॥ ३२ ॥

३३] ति० टी०–रामहेतोरिति विलपति पार्थिवे प्रनष्टे मूर्छिते सति तस्य करुणतरं वचनं निशम्य देवी द्विगुणं भयमुपागमत् भर्तृवियोगदुःखस्यापारस्य संभावनया ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

रा० टी०–इतीति । प्रनष्टे परिणतत्वेन प्रतीयमाने पार्थिवे इत्यनेन प्रकारेण करुणतरं रामहेतोः विलपति सति तस्य विलपतो राज्ञः वचनमनुनिशम्य द्विगुणं राजानवधानताभयापेक्षयाकिं भयं देवी कौशल्याऽगमत् ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

गो० टी०–इतीति । इति उक्तप्रकारेण रामहेतोः करुणतरं यथा तथा द्विगुणं विलपति पार्थिवे प्रणष्टे मूर्छिते सति देवी पुनरेव भयममगत् पूर्वं रामस्य किं भविष्यतीति इदानीं भर्तुरपि किं भविष्यतीति भयमगमदित्यर्थः ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

१–२] ति० टी०–तत इति । भूतोपसृष्टेव भूताविष्टेव गतसत्त्वेव गताङ्गेरिव धरण्याम् पतितेति शेषः ॥ १ ॥ २ ॥

रा० टी०–कौशल्याष्टत्तान्तं वर्णयन्नाह–तत इति । भूतोपसृष्टा भूतेन गृहीतेव पुनः पुनर्वेपमाना गतसत्त्वेव धरण्यां पतिता कौशल्या सूतमब्रवीत् ॥ १ ॥

रा० टी०–तद्वचनस्वरूपमाह–नयेति । काकुत्स्थो रामः यत्रास्ति तत्र मां नय तान् विना जीवितुं स्थातुं नोत्सहे ॥ २ ॥

गो० टी०–तत इति । भूतोपसृष्टेव धरण्यां वेपमाना भूतगृहीतेव भूमौ पतित्वा विवर्तमानेत्यर्थः । गतसत्त्वेव गतप्राणेव 'द्रव्यास्तव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः ॥१॥२॥

३–४] ति० टी०–अथ यदि ॥ ३ ॥ ४ ॥

रा० टी०–निवर्तयेति । रथं शीघ्रं निवर्तय रामसंमुखं कुरु अथ यदि तान् रामादीन्नानुगच्छामि तदा यमक्षयं कालागम्यं साकेतं गमिष्यामि ॥ ३ ॥

गो० टी०–निवर्तयेति । अथ तान्नानुगच्छामि तान्नानुगच्छामि चेत् ॥ ३ ॥

रा० टी०–बाष्पेति । सज्जमानया रामसंलग्नया अत एव बाष्पवेगेन उपहतया स्खलन्त्या वाचा देवीमाश्वासयन्निदमब्रवीत् ॥ ४ ॥

गो० टी०–बाष्पवेगेति । सज्जमानया विक्लवया ॥ ४ ॥

५] ति० टी०–संभ्रममावेगम् ॥ ५ ॥

रा० टी०–तद्वचनस्वरूपमाह–त्यजेति । दुःखजं संभ्रमं च त्यज तत्र हेतुः संतापं प्रातिभासिकमात्रादिवियोगजनितदुःखं व्यवधूय दूरीकृत्य राघवो वने वत्स्यति ॥ ५ ॥

१ अत्रेति गो. पाठः ।

लक्ष्मणश्चापि रामस्य पादौ परिचरन्वने । आराधयति धर्मज्ञः परलोकं जितेन्द्रियः ॥ ६ ॥
विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव । विस्रम्भं लभतेऽभीता रामे [1]विन्यस्तमानसा ॥ ७ ॥
नास्या दैन्यं कृतं किंचित्सुसूक्ष्ममपि लक्ष्यते । उचितेव प्रवासानां वैदेही प्रतिभाति [2]मे ॥ ८ ॥
नगरोपवनं गत्वा यथा स्म रमते पुरा । तथैव रमते सीता निर्जनेषु वनेष्वपि ॥ ९ ॥
बालेव रमते सीतावालचन्द्रनिभानना । रामा रामे ह्रदीनात्मा विजनेऽपि वने सती ॥ १० ॥
तदूतं हृदयं यस्यास्तदधीनं च जीवितम् । अयोध्या [3]हि भवेदस्या रामहीना तथा वनम् ॥ ११ ॥
[4]परिपृच्छति वैदेही ग्रामांश्च नगराणि च । गतिं दृष्ट्वा नदीनां च पादपान्विविधानपि ॥ १२ ॥
रामं वा लक्ष्मणं वापि [5]दृष्ट्वा जानाति जानकी । अयोध्या क्रोशमात्रे तु विहारमिव साश्रिता ॥ १३ ॥

गो० टी०—त्यजेति । मोहं रामस्य किं भविष्यतीत्यज्ञानं संभ्रमं व्याकुलत्वं संतापं शोकजनितदेहसंतापं रामो दुःखितो भविष्यतीति संतापमित्यर्थः । यस्माद्राघवः संतापं व्यवधूय वत्स्यति तस्माच्छोकादिकं त्यजेत्यन्वयः ॥ ५ ॥

६] ति० टी०—रामस्य पादौ परिचरन्परलोकमाराधयति संपादयति ॥ ६ ॥

रा० टी०—लक्ष्मण इति । रामस्य पादौ परिचरन्स परलोकं परः सर्वोत्कृष्टः यो लोको जनः तं परमपुरुषमित्यर्थः किंच परः सर्वोत्कृष्टः लोक्यते दृश्यते असौ स तं किंच परः सर्वोत्कृष्टः लोको यस्य स तं साकेताधीशमित्यर्थः आराधयति निषेवते ॥ ६ ॥

गो० टी०—लक्ष्मण इति । परलोकमाराधयति परलोकं साधयति राधसाधसंसिद्धाविति धातुः ॥ ६ ॥

७] ति० टी०—अभीतेति च्छेदः विस्रम्भः प्रणयः ॥ ७ ॥

रा० टी०—विजने इति । वनेऽपि वा संप्राप्य रामे विन्यस्तमानसा अत एव अभीता सीता गृहेष्विव विश्रम्भं प्रणयं लभते 'विश्रम्भः प्रणयेऽपि च' इत्यमरः ॥ ७ ॥

गो० टी०—विजन इति । लभते भीतेत्यत्र अभीतेति पदच्छेदः विस्रम्भं प्रणयम् 'विस्रम्भः प्रणयेऽपि च' इत्यमरः ॥७॥

८–९] ति० टी०—कृतं वनवासकृतं दैन्यमित्यर्थः ॥८॥९॥

रा० टी०—नेति । अस्याः सीतायाः कृतं सुसूक्ष्ममपि किंचिद्दैन्यं न लक्ष्यते अत एव प्रवासानामुचिता योग्या प्रतिभात्येव । इव एवार्थे ॥ ८ ॥

रा० टी०—नगरेति । पुरा पूर्वं नगरोपवने गत्वा यथा रमते स्म तथैव निर्जनेष्वपि वनेषु रमते ॥ ९ ॥

गो० टी०—नास्या इति । कृतं वनवासकृतम् किंचिदित्यस्य विवरणं सुसूक्ष्ममिति । प्रवासानामुचितेव प्रवासानां योग्येव अभ्यस्तवनवासप्रयासेवेत्यर्थः ॥ ८ ॥ ९ ॥

१०] ति० टी०—बालेवेति दुःखापरिज्ञानेनोपमा तस्या देहाद्यभिमानाभावान्नाधिजं दुःखमिति भावः । अबालचन्द्रेत्यादिच्छेदः । रामारामे रामरूपे आराम इत्यर्थः, भिन्नपदे वा ॥१०॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—बालेति । अबालचन्द्रनिभानना अबालचन्द्रः पूर्णचन्द्रस्तत्सदृशाननविशिष्टा किंचाबालचन्द्रं निभाति प्रकाशयति तदाननं यस्याः सा रामा सीता रामे रामसमीपे बालेव रमते ॥ १० ॥

गो० टी०—बालेति । क्रीडैकरसत्वाद्बालादृष्टान्तः दुःखापरिज्ञाने वा बालादृष्टान्तः । अबालचन्द्रनिभाननेतिच्छेदः । रामे अधीनात्मा सक्तचित्तेत्यर्थः । यद्वा रामारामे रामरूपारामे ॥ १० ॥

११] ति० टी०—रामहीनायोध्या यथा वनं तथा भवेदित्यन्वयः ॥ ११ ॥

रा० टी०—तदिति । यस्याः सीतायाः हृदयं तदूतं नित्यं रामं प्राप्तमत एव यस्याः जीवितं तदधीनं रामायत्तं तस्याः अस्याः सीतायाः रामहीना अयोध्या यथा वनं तथा भवेत् एतेन सीतासुखे रामसन्निधिरेव कारणमिति ध्वनितं तेन सीताया अतिसुखात्वं व्यञ्जितम् ॥ ११ ॥

गो० टी०—तदूतमिति । यस्मात्कारणात् अस्याः सीतायाः हृदयं तदूतं रामगतं जीवितं च तदधीनं तस्माद्वनं रामसहितम् अयोध्या भवेत् रामहीना अयोध्यापि तथा वनं भवेदित्यर्थः ॥ ११ ॥

१२–१३] ति० टी०—नदीनां गतिं रामनगरलक्षांश्च दृष्ट्वा रामं वा लक्ष्मणं वा पृच्छति पृष्ट्वा च जानाति अयोध्यातः क्रोशमात्रे विद्यमानं विहारं संश्रिता यथा रमते स्म तथैव वनेऽप्यरमतेत्यर्थः ॥ १२ ॥ १३ ॥

रा० टी०—वैदेहीसुखज्ञापकचिह्नानि वदन्नाह—परीति । वैदेही विदेहकुलप्रादुर्भूता जानकी रामं लक्ष्मणं वा ग्रामादीन् परिपृच्छति नदीनां गतिं विलक्षणगमनं च दृष्ट्वा परिपृच्छति पृष्ट्वा जानाति तत्कथनेन निश्चिनोति अतः अयोध्याक्रोशमात्रे एव वियमानं विहारं विहरणोपवनमिव संश्रिता संप्राप्ता विहारशब्दोऽधिकरणघञन्तः । श्लोकद्वयमेकान्वयि एवार्थे ॥ १२ ॥ १३ ॥

गो० टी०—पथीत्यादिना सीतायाः उल्लास उच्यते दृष्ट्वेति

१ संन्यस्तेति गो. पाठः । २ मेति गो. पाठः । ३ ऽपीति गो. पाठः । ४ पथीति गो. पाठः । ५ पृष्ट्वेति गो. रा. पाठः ।

इदमेव स्मराम्यस्याः सहसैवोपजल्पितम् । कैकेयीसंश्रितं जल्पं नेदानीं प्रतिभाति माम् ॥ १४ ॥
ध्वंसयित्वा तु तद्वाक्यं प्रमादात्पर्युपस्थितम् । ह्लादनं वचनं सूतो देव्या मधुरमब्रवीत् ॥ १५ ॥
अध्वना वातवेगेन संभ्रमेणातपेन च । न विगच्छति वैदेह्याश्चन्द्रांशुसदृशी प्रभा ॥ १६ ॥

सर्वत्रान्वेति रामं लक्ष्मणं वा पृच्छति पृष्ट्वा जानाति च अयोध्यायाः कोशमात्रे विहारं क्रीडां संश्रितेव स्थिता, यद्वा विहरन्त्यस्मिन्निति विहारः तम् । अधिकरणे घञ् उद्यानमित्यर्थः १२॥१३

१४–१६] ति० टी०–इदमेव सीतायाः संबन्धीदमेव प्रस्तुतवृत्तान्तजातमेव स्मरामि । कैकेयीसंश्रितं कैकेयीमुद्दिश्य प्रवृत्तम् । सहसा हठेन । सीतया तस्याः परमदुःखकारिणीत्वान्मां प्रति यत्तद्विषयं जल्पं वाक्यमुपजल्पितमुक्तं तदिदानीं मां न प्रतिभात्येवेत्येवंरूपेण प्रमादात्पर्युपस्थितं मुखान्निर्गतं कैकेयीविषयं सीतावाक्यं ध्वंसयित्वा व्यवधारान्तरेणानुक्तप्रायमिव कृत्वा देव्याः कौसल्याया ह्लादनं मधुरं वचनं सूतोऽब्रवीदित्याह कविः ॥ १४–१६ ॥

रा० टी०–इदमिति । अस्याः सीतायाः इदं रामसंयोगजनितसुखसूचकाचरणमेव स्मरामि अत एव जल्पितं तदेव कथितमत एव कैकेयीसंश्रितं कैकेय्युद्देश्यकमुपजल्पितं मन्थरया प्रदर्शितं जल्पमनेकविधवचनं मां न प्रतिभाति एतेन सीतासुखदर्शनेनास्माकं सर्वं दुःखं प्रनष्टमिति व्यञ्जितं तेन भवत्यापि सीतासुखमन्तरान्यन्न स्मर्तव्यमिति सूचितम् ॥१४॥

रा० टी०–ध्वंसयित्वेति । प्रमादाद्रामवियोगजनितग्लानेः पर्युपस्थितं संस्मृतं तत्प्रव्रजनबोधकं वाक्यं मन्थरासंमतिजनितकैकयीवचनं ध्वंसयित्वा सीतासुखस्मारणेन विस्मार्य देव्याः कौशल्याया ह्लादनं सुखप्रापकं मधुरवचनं सूतोऽब्रवीत् ॥ १५ ॥

गो० टी०–अयोध्यानिर्गमकालिकं ककेयीविषयकं सीतायाः परुषं वचनं कौसल्यायाः प्रियमिति वक्तुमुपक्रम्य तस्य दृढयोर्जीवननिराशाहेतुत्वं मत्वा नोचितमिदं वक्तुमित्यस्मरणव्याजेनोपारमतेत्याह–इदमेवेत्यादि । अस्याः सीतायाः संबन्धि इदमेव स्मरामि प्रस्तुतवृत्तान्तमेव स्मरामि कैकेयीसंश्रितं कैकेयीमुद्दिश्य प्रवृत्तं सहसा उपजल्पितं हठात्सीतयोक्तं वाक्यम् इदानीं मा मां प्रति न भातीति सूतः प्रमादात् इदं गोपनीयमित्यवधानाभावात् पर्युपस्थितं सीतावचनत्वेन वक्तुमुपक्रान्तं तद्वाक्यं ध्वंसयित्वा प्रच्याव्य देव्याः ह्लादनम् आह्लादनकरम् उपक्रान्तवाक्यवद्देव्याः संतापहेतुभूतं मधुरं वचनमब्रवीदिति पदयोजना । सहसा त्वरया उपजल्पितम् अकस्मेणोक्तमित्यस्मरणहेतूपदर्शनं कैकेयीसंश्रितमित्युपक्रान्तांशः इदं स्मरामीति पुनः स्मरेति चोदनावकाशप्रदानम् इदानीं भवद्दुःखदर्शनसमये मा मां प्रति न भातीति ध्वंसनप्रकारः । ध्वंसनहेतुं कविरनुवदति ध्वंसयित्वा तु तद्वाक्यं प्रमादात् पर्युपस्थितमिति । ह्लादनमित्यनेनोपस्थितवचनस्य तापहेतुत्वं द्योत्यते। ननु कैकेयीनिन्दारूपत्वेऽपि देव्यास्तापकारणमवश्यं गोपनीयं कीदृशं तद्वाक्यं स्यात्किंचिदिदमित्युक्तौ तव किं प्रमाणं स्यात् उच्यते अवधेहि एवंविधं हि कार्यवशात् गुप्तं कुत्रचित्कविर्न विदृणोति चेत् सर्वज्ञोऽपि तत्कथमिदमित्यभिदध्यात् अत्रेमं च प्रमादादुपस्थितं ध्वंसितं दृढयोः संतापकरं कैकेयीविषयकं वृत्तान्तं कविरुत्तरत्र व्यक्तीकरिष्यति युद्धकाण्डे सीतामधिकृत्य विजगर्हेऽत्र कैकेयीं कोशन्ती कुररी यथाइत्युक्त्वा । कैकेयीविषयकं सीतावचनमेवाह–'सकामा भव कैकेयि इतोऽयं कुलनन्दनः' इति इदं सीताहृदयं कैकेय्याः राज्यलाभेनैवाभीष्टसिद्धेः रामविवासनाभ्यर्थनस्येदमाकूतं रामविवासने हि तद्वियोगं क्षणमपि सोढुमक्षमा सीताप्येनमनुगच्छेत् सा च लोकोत्तरसुन्दरी केनाप्यपहियेत तस्यां च हृतायां रामः स्वत एव नश्येत् ततो मे राज्यं सुप्रतिष्ठितं स्यात् अन्यथा लब्धेनापि राज्येन न किंचित्प्रयोजनं यतो रामगुणपरवशः सर्वोऽपि जनः तद्विधेयः स्यात् तस्मादामोऽपि विनाशाय विवासनीय इति इदमेव सीतोक्तं रामोऽप्यारण्यकाण्डे सुप्तप्रमत्तकुपितानां वचनैर्भावज्ञानं दृष्टमिति न्यायेन वक्ष्यति 'कचित्सकामा कैकेयी सुखिता सा भविष्यति । या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी ॥ अन्यत्र च 'यदभिप्रेतमस्माच्छ प्रियं वरदृतं च यत् । कैकेय्यास्तत्समृद्धं क्षिप्रमेवैव लक्ष्मणे' इति ॥ इममेवार्थं पूर्वसर्गान्ते सूचितवान् 'जानकी तु महाराज निःश्वसन्ती तपस्विनी। भूतोपहतचित्तेव विष्ठिता विस्मिता स्थिता ॥ अदृष्टपूर्वव्यसना राजपुत्री यशस्विनी । तेन दुःखेन रुदती नैव मां किंचिदब्रवीत् ॥ उद्वीक्षमाणा भर्तारं मुखेन परिशुष्यता । मुमोच सहसा बाष्पं मां प्रयान्तमुदीक्ष्य सा' इति ॥ अत्र रोदनमवचनं परिशुष्यता मुखेन भर्तृवीक्षणं पुनः सुमन्त्रवीक्षणं बाष्पमोचनं च कुर्वन्त्या पूर्वोक्तार्थस्मरणम् तत एव स्तब्धता भर्तृमुखवीक्षणेन वक्तुमनर्हत्वज्ञानं बाष्पमोचनेन सूतवीक्षणेन च श्वश्रूं प्रत्यकथनीयत्वद्योतनं चेति व्यज्यते । तत्र सीतयोक्तं प्रामादिकमिति जुगोप अत्र तु स्वस्यैव प्रमादोत्थं व्याजेन परिहृतवान् ॥ १४ ॥ १५ ॥

रा० टी०–तद्वचनस्वरूपमाह–अध्वनेति । अध्वना अध्वगमनजनितश्रमेण वातवेगेन अतिवायुप्रवाहेण च संभ्रमेण भयहेतुभूतव्याघ्रादिदर्शनेन च आतपेन घर्मेण च वैदेह्याः प्रभा न विगच्छति परिणामं प्राप्नोति ॥ १६ ॥

गो० टी०–अध्वनेति । अध्वना अध्वगमनेन संभ्रमेण व्याघ्रादिदर्शनजन्यव्याकुलत्वेन न विगच्छति न विकरोति॥१६॥

१ वाक्यमिति गो. पाठः । २ मेति गो. पाठः ।

सदृशं शतपत्रस्य पूर्णचन्द्रोपमप्रभम् । वदनं तद्वदान्याया वैदेह्या न विकम्पते ॥ १७ ॥
अलक्तरसरक्ताभावलक्तरसवर्जितौ । अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ ॥ १८ ॥
नूपुरोत्कृष्टलीलेव खेलं गच्छति भामिनी । इदानीमपि वैदेही तद्रागान्यस्तभूषणा ॥ १९ ॥
गजं वा वीक्ष्य सिंहं वा व्याघ्रं वा वनमाश्रिता । नाहारयति संत्रासं बाहू रामस्य संश्रिता ॥ २० ॥
न शोच्यास्ते न चात्मा ते शोच्यो नापि जनाधिपः । इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वतम् ॥ २१ ॥
विधूय शोकं परिहृष्टमानसा महर्षियाते पथि सुव्यवस्थिताः ।
वने रता वन्यफलाशनाः पितुः शुभां प्रतिज्ञां प्रतिपालयन्ति ते ॥ २२ ॥

१७] ति० टी०–वदान्याया दात्र्या वल्गुवाचश्च 'वदान्यो वल्गुवागपि' । न विकम्पते म्लानतां न याति ॥ १७ ॥

रा० टी०–सदृशमिति । शतपत्रस्य कमलस्य सदृशं सदृशत्वेन प्रतीयमानं पूर्णचन्द्रेण उपमा उपमेया प्रभा यस्य तद्वदान्याया मधुरवचनशीलायाः वैदेह्याः वदनं मुखं न विकम्पते कदाचिदपि परिणतिं न प्राप्नोतीत्यर्थः । उपमाशब्दः कर्मप्रत्ययान्तः 'वदान्यो वल्गुवागपि' इत्यमरः ॥ १७ ॥

गो० टी०–सदृशमिति । शतपत्रस्य पद्मस्य पूर्णचन्द्रोपमप्रभं पूर्णचन्द्रसदृशप्रभं वदान्यायाः वल्गुवाचः 'वदान्यो वल्गुवागपि' इत्यमरः । न विकम्पते न विचलति स्वाभाविकप्रभां न जहातीत्यर्थः ॥ १७ ॥

१८] ति० टी०–अलक्तरसवर्जितावापि तद्वत्सरक्तकान्ती स्वभावरक्ततया पद्मकोशसमप्रभौ न तु मार्गगतिप्रक्तकाठिन्यभाजा ॥ १८ ॥

रा० टी०–अलक्तेति । अलक्तरसेन वर्जितौ रहितावपि तस्याः चरणौ अलक्तरसरक्ताभौ अलक्तरसरक्ताभसदृशाभाविशिष्टौ अद्यापि पादचारेण वनगमनेऽपि दृश्येते इति शेषः॥१८॥

गो० टी०–अलक्तरसरक्ताभाविति–अद्यापि वनगमनेऽपि ॥ १८ ॥

१९] ति० टी०–नूपुरेणोत्कृष्टा तिरस्कृता हंसादिलीला यया सेव खेलं विलासयुतम् अर्शआद्यजन्तम् । तद्रागेण भर्तृप्रीतियोजकभूषणानुरागेणान्यस्तान्यत्यक्तानि भूषणानि यया ॥ १९ ॥

रा० टी०–नूपुरेति । तस्मिन् रामे यो रागोऽत्यनुरागस्तेन अन्यस्तानि अपरित्यक्तानि भूषणानि यया सा अत एव नूपुरोत्कृष्टलीला नूपुराभ्यामुत्कृष्टा हंसादिलीलातिरस्कारिकात्वेनातिश्रेष्ठा लीला यस्याः सा भामिनी वैदेही खेलं सविलासमेव यथा स्यात्तथा इदानीं वनाध्वन्यपि गच्छति 'उद्धुष्टहेलेव' इति भूषणपाठः ॥ १९ ॥

गो० टी०–नूपुरेति । तद्रागात् भूषणविषयस्नेहात् न्यस्तभूषणा चरणाद्यवयवेष्वर्पितभूषणा वैदेही नूपुरोद्घुष्टहेलेव नूपुरोत्पन्नस्वनानुकारिलीलायुक्तेव खेलं सलीलं गच्छति सीतायाः सर्वदा साभरणत्वं मन्ये साभरणा सुप्ता सीतास्मिन् शयनोत्तम इत्युत्तरत्र भरतवचनादवगम्यते यद्वा तद्रागात् रामेण सह गमनकौतुकात् न्यस्तभूषणा उत्सृष्टनूपुराऽपि नूपुरोत्कृष्टहेलेव नूपुरखचितविलासेव ॥ १९ ॥

२०] ति० टी०–नाहारयति न करोति न संप्राप्नोतीति वा ॥ २० ॥

रा० टी०–गजमिति । वनमाश्रिता प्राप्ता सीता रामस्य बाहू संश्रिता सती गजादिकं वीक्ष्य संत्रासं नाहारयति प्राप्नोति ॥ २० ॥

गो० टी०– गजमिति । गजं दर्शनमात्रेण भीषणमहाकायं वीक्ष्य न तु श्रुत्वा सिंहं तमपि तृणाय मत्वा व्याघ्रं वा जन्तुमात्रहिंसकतया सिंहादप्यतिक्रूरं सिंहदर्शनादपि व्याघ्रदर्शनमतिक्रूरमिति न तत्प्रकर्षः वनमाश्रिता विनापि सिंहादीन् स्वत एव भयंकरं प्रदेशमवगाहमानापि नाहारयति नारोपयति आहारयतेरारोपार्थकत्वात् भयभावना मात्रमपि न करोतीत्यर्थः। नाहारयति संत्रासं स्त्रीत्वप्रयुक्तस्वाभाविकभीतिरपि निर्गता तत्र हेतुमाह–बाहू रामस्य संश्रिता परिवान्तर्गताः किं बिभ्यतीति भावः ॥२०॥

२१] ति० टी०–अतस्ते रामादयो न शोच्याः ते तवात्माप्यत एव न शोच्यः । न राजापि तेषां सुखश्रवणेन तस्यापि जीवनसंभवात् । इतोऽपि न शोच्यांश इत्याह–इदं हीत्यादि । प्राप्तमपि राज्यं महाबलोऽपि परित्यज्य पितृवचनमपालयदित्येवमादि रामचरितं स्वार्थमुद्दिश्य भर्तारमपि परित्यज्यातिघोरं कृतवती कैकेयीत्यादि इदं रामचरितं शाश्वतं प्रतिष्ठास्यतीत्यनेन तन्नामवदेवास्य सुस्थिरत्वं वदता तस्येश्वरत्वं ध्वनितम् न ह्यन्यचरित्रं शाश्वतं प्रतिष्ठां लभते ॥ २१ ॥

रा० टी०–नेति । हि सर्वेषां सुखित्वाद्धेतोः ते रामादयो न शोच्या अतस्ते आत्मा देहोऽपि न शोच्यः अत एव जनाधिपो राजाऽपि न शोच्यः एतेन त्वदादीनां तत्सुखसुखित्वसुचितमिति ध्वनितम् । रामसुखहेतुमाह–इदं चरितं परमधर्महेतुकरामाचरणं शाश्वतं बहुकालं लोके सर्वभुवने प्रतिष्ठास्यति अतिप्रतिष्ठां प्राप्स्यतीत्यर्थः ॥ २१ ॥

गो० टी०–नशोच्या इति । ते रामादयः आत्मानो वयम् इदं चरितं पितृवचनपरिपालनरूपं चरित्रं शाश्वतम् आचन्द्रार्कम् ॥ २१ ॥

२२] ति० टी०–महर्षिभिर्याते ॥ २२ ॥

---

१ उद्घुष्टहेलेवेति गो. पाठः । २ आत्मान इति गो. पाठः ।

तथापि सूतेन सुयुक्तवादिना निवार्यमाणा सुतशोककर्शिता ।
न चैव देवी विरराम कूजितात्प्रियेति पुत्रेति च राघवेति च ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ।

पतिव्रतावरिष्ठापि कौसल्या पुत्रशोकासहिष्णुतया तद्दुरवस्थां संभावयन्ती दशरथमुपालभते ।

वनं गते धर्मरते रामे रमयतां वरे । कौसल्या रुदती चार्ता भर्तारमिदमब्रवीत् ॥ १ ॥
यद्यपि त्रिषु लोकेषु प्रथितं ते महद्यशः । सानुक्रोशो वदान्यश्च प्रियवादी च राघवः ॥ २ ॥
कथं नरवरश्रेष्ठ पुत्रौ तौ सह सीतया । दुःखितौ सुखसंवृद्धौ कथं दुःखं सहिष्यतः ॥ ३ ॥
सा नूनं तरुणी श्यामा सुकुमारी सुखोचिता । कथमुष्णं च शीतं च मैथिली विसहिष्यते ॥ ४ ॥

रा० टी०—विधूयेति । शोकं पित्रादिवियोगजनितं विधूय त्यक्त्वा महर्षियाते महर्षिभिः सेविते पथि सुव्यवस्थिताः अत एव परिहृष्टमानसास्ते रामादयः पितुः शुभां प्रतिज्ञां प्रतिपालयन्ति ॥ २२ ॥

गो० टी०—विधूयेति । महर्षियाते महर्षिभिः प्राप्ते ॥२२॥

२३] ति० टी०—तथाऽपीति । सूतेन निवार्यमाणा सूतोक्तं गृहीतवत्यपि न विरराम दुःखप्राबल्यादिति शेषः ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०—तथेति । सुयुक्तवादिना न्याय्यकथनशीलेन सूतेन यद्यपि निवार्यमाणा देवी कौशल्या तथापि सुतशोककर्शिता सती प्रियेत्यादिकूजिताच्छब्दान्नैव विरराम ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षष्टितमः सर्गः ॥ ६० ॥

गो० टी०—तथापीति । तथापीत्युक्तं विवृणोति—सूतेनेत्यादिना सुयुक्तवादिना सूतेन तथा निवार्यमाणापि सुतशोककर्शितत्वाद् देवी प्रियेत्यादिकूजितान्न विरराम ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१] ति० टी०—परमपतिव्रतापि कौसल्या दुःखातिशयात्पूर्वं जानत्यपि त्रेताश्रयव्यवहारवल्लोकाश्रयेण राजानमुपालभते—वनमिति । आर्ता खिन्ना । 'स्वार्ता' इति पाठे सुतरामार्ता 'रुदतीव' इति पाठे इव एवार्थे, यद्वा उक्तार्थध्वननायेवशब्दः ॥ १ ॥

रा० टी०—राजानं प्रति कौशल्योक्तिं वर्णयितुमाह—वनमिति । रमयतां वरे रामे वनं गते सति रुदती कौशल्या भर्तारमब्रवीत् ॥ १ ॥

गो० टी०—वनमिति । स्वार्ता सुतरामार्ता ॥ १ ॥

२] ति० टी०—अनुक्रोशादिविशिष्टो राघव इति ते महद्यशः प्रथितमिति योजना ॥ २ ॥

३] ति० टी०—अथापि हे नरवरश्रेष्ठ ! सीतया सह तौ पुत्रौ कथं त्यक्तवानिति शेषः । अथ ताञ्शोचति—दुःखितावित्यादि । दुःखं प्राप्तावित्यर्थः ॥ ३ ॥

रा० टी०—तद्वचनाकारमाह—यद्यपीति । सानुक्रोशोऽतिदयावान् वदान्योऽतिवक्ता प्रियवादी प्रीत्युत्पादकवचनवान् राघवो दशरथोऽस्तीति ते महद्यशः यद्यपि त्रिषु लोकेषु विदितं तथापि सीतया सह तौ पुत्रौ कथमत्यज इति शेषः अनुचितं कृतमिति तात्पर्यम् । त्यागे दोषमाह—सुखसंवृद्धौ रामलक्ष्मणौ दुःखितौ प्राप्तपित्रादिवियोगजनितदुःखविशिष्टौ सन्तौ दुःखं वनवासजनितखेदं कथं सहिष्यतः एतेनायं त्यागस्तव यशोदूषक इव प्रतिभातीति ध्वनितम् । श्लोकद्वयमेकान्वयि॥२॥३॥

गो० टी०—यद्यपीति । राघवः दशरथः सानुक्रोशः वदान्यश्च प्रियवादी चेति ते महद्यशः त्रिषु लोकेषु प्रथितं यद्यपि तथापि अतिशयिताऽपयशस्करं कृत्यं कृतमिति वाक्यशेषः। तथापि दुःखितौ मार्गे दुःखितौ तौ वने कथं दुःखं सहिष्यत इति वक्ष्यमाणेनान्वयो वा यद्वा वार्द्धके नानाव्रतोपवासादिमहाप्रयासलब्धं ज्येष्ठमपि पुत्रमभिषेककाले त्यक्त्वापि प्रतिज्ञां निरूढवानिति ते महद्यशस्त्रिषु लोकेषु यद्यपि प्रथितं भवति राघवश्च वदान्यतया दयया प्रियवचनशीलतया मह्यं वाचा पूर्वं दत्तं राज्यं न त्यजामीति वक्तुमशक्नुमतया च राज्यं दत्तवान् अतस्तस्यापि महद्यश इति युवयोरिदं युक्तमस्तु तथापि तौ कथं दुःखं सहिष्यत इति योजना ॥ २ ॥ ३ ॥

४] ति० टी०—तरुण्यतिक्रान्तकौमारा श्यामा प्राप्तयौवना ॥ ४ ॥

रा० टी०—सेति । श्यामाषोडशवर्षपरिमितात्वेन प्रतीयमाना मैथिली उष्णादिकं कथं विसहिष्यते ॥ ४ ॥

१ परे इति गो. पाठः । २ स्वार्तेति गो. रा. पाठः । ३ वने इति गो. पाठः । ४ प्रेति गो. पाठः ।

भुक्त्वाशनं विशालाक्षी सूपदंशान्वितं शुभम् । वन्यं नैवारमाहारं कथं सीतोपभोक्ष्यते ॥ ५ ॥
गीतवादित्रनिर्घोषं श्रुत्वा शुभसमन्विता । कथं क्रव्यादसिंहानां शब्दं श्रोष्यत्यशोभनम् ॥ ६ ॥
महेन्द्रध्वजसंकाशः क्व नु शेते महाभुजः । भुजं परिघसंकाशमुपाधाय महाबलः ॥ ७ ॥
पद्मवर्णं सुकेशान्तं पद्मनिःश्वासमुत्तमम् । कदा द्रक्ष्यामि रामस्य वदनं पुष्करेक्षणम् ॥ ८ ॥
वज्रसारमयं नूनं हृदयं मे न संशयः । अपश्यन्त्या न तं यद्वै फलतीदं सहस्रधा ॥ ९ ॥
यत्त्वया करुणं कर्म व्यपोह्य मम बान्धवाः । निरस्ताः परिधावन्ति सुखार्हाः कृपणा वने ॥ १० ॥
यदि पञ्चदशे वर्षे राघवः पुनरेष्यति । जह्याद्राज्यं च कोशं च भरतो नोपलक्ष्यते ॥ ११ ॥

गो० टी०—सा नूनमिति । तरुणी आरब्धयौवना श्यामा यौवनमध्यस्था एतत् पदद्वयोपादानेनेषन्न्यूनयौवनमध्यं प्राप्तेत्यवगम्यते । पाठभेदः श्यामा तरुणी यौवनमध्यस्था तरुणी न तु यौवनारम्भस्था तरुणीत्यर्थः ॥ ४ ॥

५-६] ति० टी०—सूपदंशान्वितं शोभनव्यञ्जनसहितं नैवारं नीवारसंबन्धिनम् ॥ ५ ॥ ६ ॥

रा० टी०—भुक्त्वेति । सूपदंशं शोभनव्यञ्जनयुक्तमशनं भोज्यपदार्थं भुक्त्वा नैवारं नीवारसंबन्धि वन्यमाहारं कथमुपभोक्ष्यते ॥ ५ ॥

गो० टी०—भुक्त्वाशनमिति । सूपदंशान्वितं शोभनव्यञ्जनसहितं नैवारं नीवारसंबन्धिनम् ॥ ५ ॥

रा० टी०—गीतेति । गीतादिकं श्रुत्वा क्रव्यादसिंहानां मांसमात्रभक्षककेसरिणामशोभनं शब्दं कथं श्रोष्यति ॥ ६ ॥

गो० टी०—गीतवादित्रनिर्घोषमिति । क्रव्यादाः मांसभक्षकाः ॥ ६ ॥

७] ति० टी०—महेन्द्रध्वजसंकाशस्तद्वत्सर्वलोकस्योत्सवदः ॥ ७ ॥

रा० टी०—महेन्द्रेति । महेन्द्रध्वजसंकाशः सर्वोत्सवदातृत्वेन महेन्द्रध्वजसदृशः महाभुजो रामः परिघसकाशं भुजमुपधाय उपबर्हणत्वेन निधाय क्व शेते ॥ ७ ॥

गो० टी०—महेन्द्रध्वजसंकाश इति । महेन्द्रध्वजो नाम इन्द्रधनुः कदाचित् ध्वजाकारेण परमाभ्युदयनिमित्ततया प्रतिभातीत्याहुः ॥ ७ ॥

८] ति० टी०—पद्मवर्णं पद्मदलवर्णं पद्मनिःश्वासं पद्मपत्रगन्धिनिःश्वासम् ॥ ८ ॥

रा० टी०—पद्मेति । पद्मवर्णं पद्मवद्वर्ण्यते कविभिर्गीयते तत् सुकेशान्तं सुकेशपर्यन्तं पद्मनिःश्वासं पद्मसुगन्धसदृशसुगन्धविशिष्टनिःश्वासविशिष्टं पुष्करेक्षणं कमलसदृशनेत्रविशिष्टं रामस्य वदनं मुखं कदा द्रक्ष्यामि ॥ ८ ॥

गो० टी०—पद्मवर्णमिति । पद्मवर्णं पद्मपत्रवर्णं पद्मनिःश्वासं पद्मगन्धिनिःश्वासम् ॥ ८ ॥

९] ति० टी०—यद्यतस्तमपश्यन्त्या इदं सहस्रधा न फलति न विशीर्यतेऽतस्तद्वज्रसारं वज्रवत्कठिनं नूनमित्युत्प्रेक्षा ॥ ९ ॥

रा० टी०—वज्रसारेति । तं तादृशवदनवन्तं रामं अपश्यन्त्या मम यद्धृदयं सहस्रधा न फलति भिद्यते तद्धृदयं वज्रसारमयसुत्तमवज्रकाठिन्यसदृशकाठिन्यविशिष्टमस्तीति शेषः॥९॥

गो० टी०—वज्रसारमयमिति । न फलति न स्फुटति स्फिला विशरण इति धातुः ॥ ९ ॥

१०] ति० टी०—त्वया व्यपोह्य दूरैरविचार्य यत्करुणं शोचनीयं कर्मानुचितवरदानरूपं कृतं तेन हेतुना मम बान्धवाः कैकेय्या निरस्ताः सुखार्हा अपि कृपणाः सन्तो वने धावन्ति, यद्वा व्यपोह्य अनादृत्य राज्यात्प्रभ्रश्य वा त्वया निरस्ता वने परिधावन्तीति यत्तदकरुणं क्रूरं कर्म त्वया कृतमित्यर्थः ॥१०॥

रा० टी०—यदिति । यस्मात्करुणं सदयं कर्म प्रव्राजनाभावसंपादकं व्यापारं व्यपोह्य सन्त्यज्य सुखार्हा मम बान्धवाः अतिप्रीतिविषयीभूता रामादयः निरस्ताः प्रव्राजितास्तस्माद्धेतोः कृपणाः सन्तो वने परिधावन्ति ॥ १० ॥

गो० टी०—यत्त्वयेति । त्वया निरस्ताः मम बान्धवा रामादयः व्यपोह्य नगरं त्यक्त्वा वने परिधावन्तीति यत् एतत् अकरुणं कर्म करुणाराहित्येन कृतं कर्मेत्यर्थः ॥ १० ॥

११] ति० टी०—नन्वु चतुर्दशवर्षानन्तरं तव पुत्रस्यैव राज्यं भविष्यति तत्राह—यदीति । तावत्पर्यन्तं वने जीवनमेव न संभाव्यते तथापि यदि जीवन्पुनरेष्यति तथापि भरतो राज्यं जह्यादिति नोपलक्ष्यते न संभाव्यत इत्यर्थः ॥ ११ ॥

रा० टी०—यदीति । पञ्चदशे वर्षे चतुर्दशवर्षान्ते इत्यर्थः यदि राघवः पुनर्नैष्यति आयाता तर्हि भरतोपि राज्यं कोशं च जह्यात्त्यक्तुमर्थं इत्युपलक्ष्यते अनुभीयते ॥ ११ ॥

गो० टी०—चतुर्दशवर्षानन्तरं रामो राज्यं प्राप्स्यतीत्याशङ्क्य परिहरति—यदीति । पञ्चदशे वर्षे राघवो यदि पुनरेष्यति तथापि राज्यं कोशं च जह्यात् त्यजेत् कुतः यस्मात् कारणात् भरतेनोपभुज्यते भरतेनोपभुक्ततया तेन पुनर्दत्तमपि राज्यं

---

१ शुभमनिन्दितेति गो. पाठः । २ उपधायेति गो. रा. पाठः । ३ भरतेनोपभुज्यते इति गो. पाठः ।

भोजयन्ति किल श्राद्धे केचित्स्वानेव बान्धवान् । ततः पश्चात्समीक्षन्ते कृतकार्या द्विजोत्तमान् ॥ १२ ॥
तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातयः । न पश्चात्तेऽभिमन्यन्ते सुधामपि सुरोपमाः ॥ १३ ॥
ब्राह्मणेष्वपि वृत्तेषु भुक्तशेषं द्विजोत्तमाः । नाभ्युपेतुमलं प्राज्ञाः शृङ्गच्छेदमिवर्षभाः ॥ १४ ॥
एवं कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते । भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नावमन्यते ॥ १५ ॥
न परेणाहृतं भक्ष्यं व्याघ्रः खादितुमिच्छति । एवमेव नरव्याघ्रः पैरलीढं न मन्यते ॥ १६ ॥

रामस्त्यजेदित्यर्थः । भरतो नोपलक्ष्यत इति पाठान्तरम् राज्यं कोशं च भरतो जह्यात् इदं तु नोपलक्ष्यते यद्रामः पुनर्भरतदत्तं राज्यं प्रतिगृह्णीयादिति । यद्वा यदि राघवः पुनरेष्यति तदा भरतः राज्यं कोशं च जह्यादिति नोपलक्ष्यते करस्थराज्यत्यागस्यासंभावितत्वादित्यर्थः । भरतो यदि भोक्ष्यत इति च पाठः ॥ ११ ॥

१२] ति० टी०—अथापि कदाचिद्भरतो जह्यात्तथापि रामस्तन्नाङ्गीकरिष्यतीति सदृष्टान्तमाह—भोजयन्तीत्यादिना । केचिच्छ्राद्धकर्तारो वयोगुणैरधिकान्विप्रान्श्राद्धे निमन्त्र्य वयोगुणहीनानपि स्वान्बान्धवान्श्राद्धे भोजयन्ति ततः कृतकार्याः सन्तो निमन्त्रितान्द्विजर्षभान्पश्चादिष्टपङ्क्तौ भोजयितुं समीक्षन्ते विचारयन्ति ॥ १२ ॥

१३] ति० टी०—तत्र निमन्त्रितेषु ये गुणवन्तः श्राद्धापेक्षितगुणवन्तस्ते सुरोपमाः पश्चात्पङ्क्तौ सुधासदृशं स्वाद्वन्नमपि नानुमन्यन्ते ॥ १३ ॥

रा० टी०—चतुर्दशवर्षान्ते आगतोऽपि रामः चतुर्दशवर्षपर्यन्तं भरतस्य राज्यस्वामित्वाभिमानित्वे पश्चात्त्यक्तमपि राज्यं न ग्रहीष्यतीति बोधयन्ती आह—भोजयन्तीति । ये केचित्पुरुषाः श्राद्धे स्वान् स्वकीयान् बान्धवाज्ञामात्रादीनेव अधिकदक्षिणादानादिहेतुना पूर्वं भोजयन्ति ततः पश्चात्कृतकार्याः निष्पादितश्राद्धप्रयोजनाः सन्तोऽपि द्विजोत्तमान्निमन्त्रितब्राह्मणान्त्समीक्षन्ते भोजनार्थं प्रतीक्षन्ते तत्र तात्कालिकप्रतीक्षणसमये ये गुणवन्तो विद्वांसः अत एव सुरोपमा देवतुल्याः द्विजातयः ते पश्चाद्भोज्यं सुधामपि अमृतवत्स्वाद्वपि पायसादिकं नाभिमन्यन्ते स्वीकुर्वन्ति श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०—भरतेनोपभुक्ततया पुनर्दत्तमपि राज्यं रामो न भोक्ष्यत इत्यत्र दृष्टान्तमाह—भोजयन्तीत्यादिना । किलेति वार्तायाम् लोके केचित् ब्राह्मणाः विद्यागुणवयोऽभ्यधिकेषु विप्रेषु विद्यमानेषु दक्षिणाविशेषप्रापणलोभेन स्वानेव बान्धवान् श्राद्धे भोजयन्ति ततः पश्चात्तदनन्तरं कृतकार्याः कृतश्राद्धकार्याः सन्तः श्राद्धावसाने द्विजर्षभान् पूर्वभुक्तविप्रापेक्षया विद्यावृत्तवयोभिः श्रेष्ठान् समीक्षन्ते इष्टपङ्क्तौ भोजयितुमिच्छन्ति तत्र तदानीं ये गुणवन्तः वृत्तवन्तः विद्वांसः विद्यावन्तः सुरोपमाः देववत्पूज्यतमा वृद्धाः द्विजातयः ते पश्चादिष्टपङ्क्तौ सुधामपि अमृततुल्यान्नमपि नाभिमन्यन्ते नाद्रियन्ते नन्वु कुतो नाद्रियन्ते ब्राह्मणशेषभोजने शूद्रशेषवन्निषेधाभावादित्यत्राह—ब्राह्मणेष्वित्यादिना । वृत्तेष्वपि ब्राह्मणेषु पूर्वभुक्तानां ब्राह्मणत्वेपीत्यर्थः । प्राज्ञाः द्विजर्षभाः ऋषभाः शृङ्गच्छेदमिव निजावमानहेतुं पश्चाद्भोक्तुमिच्छाम् अभ्युपैतुं नालं न क्षमन्त इत्यर्थः । यद्वा शृङ्गमग्रं शृङ्गे छेदो यस्य तत् शृङ्गच्छेदं छिन्नाग्रं तृणम् यथा वृषभा वृषभान्तरजग्धाग्रं तृणं भोक्तुं नालं तद्वदित्यर्थः । शृङ्गच्छेदमिति वृषभभक्षिताग्रतृणनामेत्यप्याहुः ॥ १२–१४ ॥

१४] ति० टी०—नन्वु कुतो नानुमन्यन्ते ब्राह्मणशेषभोजने शूद्रशेषभोजनवद्दोषाभावादत आह—ब्राह्मणेष्वपीति । ब्राह्मणेषु वृत्तेषु भुक्तवत्सु तद्भुक्तशेषमपि यतो द्विजोत्तमाः प्राज्ञाश्चातस्तद्भोजनमभ्युपेतुमङ्गीकर्तुं नालम् अवमाननात् ऋषभाः स्वशृङ्गच्छेदमिव शृङ्गस्थानीयो हि सतां मानः ॥ १४ ॥

रा० टी०—नन्वु शूद्रशेषभोजनस्य निषिध्यत्वेपि ब्राह्मणशेषभोजनस्य निषेधाभावात्कुतो न स्वीकुर्वन्तीत्यत आह—ब्राह्मणेष्विति । ब्राह्मणेष्वपि वृत्तेषु पूर्वं भुक्तेषु सत्सु द्विजोत्तमाः भुक्तशेषमन्नमभ्युपेतुं स्वीकर्तुं नालं समर्थाः एतेन निष्कारणकपश्चाद्भोजने अत्याज्यमानभङ्गः स्यादिति हेतुः सूचितः मानस्यात्याज्यत्वे दृष्टान्तः ऋषभाः आत्मानः शृङ्गच्छेदमिव शृङ्गच्छेदे हि तेषां मानभङ्गः इति प्रसिद्धं यद्वा भुक्तशेषं भुक्तशेषभोजनं शृङ्गच्छेदमिव मानध्वंसकत्वेन प्रभुत्वविघातकमेव इति हेतोः ऋषभाः जात्यादिना श्रेष्ठाः प्राज्ञाः द्विजोत्तमाः अभ्युपेतुमङ्गीकर्तुंनालं न समर्थाः शृङ्गं प्रभुत्वे शिखरे चित्रे क्रीडाम्बुयन्त्रके इति मेदिनी ॥ १४ ॥

१५] ति० टी०—दार्ष्टान्तिके योजयति—एवमिति । कनीयोभुक्तत्वात्स्वयं ज्येष्ठो वयसा गुणैश्च वरिष्ठः संस्तेन त्यक्तमपि राज्यं किमर्थं नावमंस्यते सर्वथा तिरस्करिष्यत्येवेत्यर्थः । मदर्शनानुरोधेनागतो मज्जीवनपर्यन्तमेव स्थास्यति तूष्णीं न पुना राज्यं करिष्यतीत्यर्थः ॥ १५ ॥

रा० टी०—दृष्टान्तमुक्त्वा दार्ष्टान्तिके नियोजयन्ति—एवमिति । एवमनेन प्रकारेण कनीयसा कनिष्ठेन भुक्तं राज्यं ज्येष्ठो वरिष्ठो रामः किमर्थंकृतः नावमंस्यते तिरस्करिष्यति तिरस्करिष्यत्येवेत्यर्थः ॥ १५ ॥

गो० टी०—उक्तमर्थं दार्ष्टान्तिके योजयति एवमित्यादिना । एवं पूर्वोक्तद्विजर्षभवत् कनीयसा कनिष्ठेन विशांपते हे प्रजानाथ वरिष्ठः गुणैः श्रेष्ठः किमर्थं नावमंस्यते कस्मै प्रयोजनाय न तिरस्करिष्यति सर्वात्मना तिरस्करिष्यत्येवेत्यर्थः ॥ १५ ॥

१६] ति० टी०—परेणाहृतं क्रोष्टुादिखादितशेषम् । परलीढं परास्वादितं न मन्यते न मंस्यते ॥ १६ ॥

---

१ द्विजर्षभानिति गो. पाठः । २ सुरामपीति रा. पाठः । ३ वृत्तेषु पश्चाद्भोक्तुं द्विजर्षभाः । नाभ्युपैतुमितिं गो. पाठः। ४ मंस्यते इति गो. पाठः। ५ परालीढमिति रा. पाठः ।

हविराज्यं पुरोडाशः कुशा यूपाश्च खादिराः । नैतानि यातयामानि कुर्वन्ति पुनरध्वरे ॥ १७ ॥
तथा ह्यात्तमिदं राज्यं हृतसारां सुरामिव । नाभिमन्तुमलं रामो नष्टसोममिवाध्वरम् ॥ १८ ॥
नैवंविधमसत्कारं राघवो मर्षयिष्यति । बलवानिव शार्दूलो बालधेरभिमर्शनम् ॥ १९ ॥
नैतस्य सहिता लोका भयं कुर्युर्महामृधे । अधर्मं त्विह धर्मात्मा लोकं धर्मेण योजयेत् ॥ २० ॥
नन्वसौ काञ्चनैर्बाणैर्महावीर्यो महाभुजः । युगान्त इव भूतानि सागरानपि निर्दहेत् ॥ २१ ॥

रा० टी०—पुनः सदृष्टान्तं तदेवाह—न परेणेति । परेण स्वातिरिक्तेनाहृतं स्वीकृतं भक्ष्यं व्याघ्रः खादितुं नेच्छति एवं नरव्याघ्रः रामोऽपि परालीढं स्वकीयत्वेन भरतस्वीकृतं न मन्यते मन्ता ॥ १६ ॥

गो० टी०—न परेणेति । परेण अन्येन टकगोमाय्वादिना आहृतं भक्षितशेषत्वेनानीतं परलीढं परेणास्वादितं परभुक्तशेषमिति यावत् न मन्यते न बहुमन्यते ॥ १६ ॥

१७] ति० टी०—एतानि हविरादीन्येकत्राध्वरे विनियोगात्यातयामानि पुनरध्वरेऽध्वरान्तरे विनियुक्तानि न कुर्वन्ति । 'जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्' इत्यमरः। यद्यपि मन्त्राः कृष्णाजिनं दर्भा इति स्मृत्या कुशानां यातयामत्वदोषो नेत्युक्तं तथापि तज्जीर्णत्वरूपयातयामत्वदोषाभावपरं न तु विनियुक्तविनियोगपरम् 'ब्रह्मयज्ञेषु ये दर्भा विनियुक्ता न तेऽन्यतः' इत्यनेन विनियुक्तविनियोगनिषेधस्य न्यायेन सर्वत्र लाभादित्याहुः ॥ १७ ॥

रा० टी०—हविरिति । यातयामानि अध्वरान्तरविनियुक्तत्वेन परिभुक्तानि एतानि हविरादीनि अध्वरे प्रकृतयागे न कुर्वन्ति नियोजयन्ति तत्र. खादिराः खदिरादिनिर्मिता यूपा यागस्तम्भाः 'जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्' इत्यमरः । न च मन्त्राः कृष्णाजिना दर्भा इत्यादिस्मृत्या कुशानां यातयामत्वदोषास्पर्शित्वादत्र कुशोक्तिर्विरुद्धेति वाच्यं स्मृतेर्जीर्णत्वरूपयातयामत्वदोषाभावपरत्वादत एव 'ब्रह्मयज्ञेषु ये दर्भा विनियुक्ता न तेऽन्यतः' इति स्मृत्यन्तरं सङ्गच्छते ॥१७॥

गो० टी०—हविरिति । हविः चरुप्रभृतं पुरोडाशाः पिष्टादिविकाराः खादिरा इत्येतत् पालाशादीनामुपलक्षणं यातयामानि परिभुक्तानि यागे विनियुक्तानीति यावत्। 'जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्' इत्यमरः । अध्वरे यागान्तरे पुनर्न कुर्वन्ति न विनियुञ्जते मन्त्राः कृष्णाजिनं दर्भा इत्याद्यायातयामत्वबोधकवचनेषु दर्भादिशब्दाः कुशादिव्यतिरिक्तपराः ॥ १७ ॥

१८] ति० टी०—तथैवान्येनात्तमुपभुक्तपूर्वमिदं राज्यं रामोऽभिमन्तुमङ्गीकर्तुं नालम् । नष्टसोमं भुक्तसोममध्वरं तत्स्थं सोमरूपं हविः ॥ १८ ॥

रा० टी०—तथेति । तथा तेन प्रकारेण आत्तं भरतेनोपभुक्तमिदं राज्यं हृतसारां हृतः सारांशो यस्यास्तां सुरामिव आध्वरमध्वरसंबन्धि नष्टसोममुपभुक्तसोममिव अभिमन्तुं स्वीकर्तुं रामो नालम् ॥ १८ ॥

गो० टी०—तथेति । आत्तम् उपभुक्तपूर्वं हृतसारां गृहीतसारांशाम् अभिमन्तुम् अभिलषितुं नष्टसोममिवाध्वरमिति अन्येन सोमपाने कृते सत्रूपमध्वरं तद्भक्षमतायां यथान्यो नाभिलषति तद्वदित्यर्थः ॥ १८ ॥

१९] ति० टी०—बालधेः पुच्छस्य ॥ १९ ॥

रा० टी०—नैवमिति । एवं विधमसत्कारं भवत्कर्तृकसत्काराभावं राघवो न मर्षयिष्यति असत्कारेण दत्तं राज्यं न स्वीकरिष्यतीत्यर्थः मर्षणाभावे दृष्टान्तः बालधेः पुच्छस्य अभिमर्शनं स्पर्शं बलवाञ्छार्दूल इव ॥ १९ ॥

गो० टी०—नैवंविधमिति । बालधेः पुच्छस्य अवमर्शनम् अवमत्य स्पर्शनम् ॥ १९ ॥

२०] ति० टी०—शार्दूलवद्बलवत्त्वमेव दर्शयति—नैतस्येति । सहिताः सुरासुरैः सहिताः लोकाः प्रतियोधाः किमर्थं तर्हि मामाक्रम्य राज्यं न कृतवांस्तत्राह—अधर्मं त्विति । अधर्मं तु मत्वा न तथा कृतवानिति भावः । नन्वेवं तस्य धर्मनिष्ठता कथमत्र आह—इहेति । यो धर्मात्मा इह मनुष्यलोके लोकं धर्मेण योजयेत् एवं धर्मप्रवर्तकस्य तस्य धर्मनिष्ठता अनुक्तिसिद्धैवेति भावः । यद्वातुरप्यर्थे अधर्ममधर्मप्रवृत्तमपि लोकं दण्डादिना यो धर्मेण योजयेत्स कथं स्वयमधर्मं कुर्यादित्यर्थः ॥ २० ॥

रा० टी०—एतद्राज्यस्वीकाराभावेऽपि तस्य न काचित्क्षतिरिति बोधयन्ती आह—नैतस्येति । सहिताः हिताः पालकास्तैः सहिताः लोकाः सर्वभुवनवर्तिसुरासुराः मृधे संग्रामे एतस्य रामस्य भयं न कुर्युः अत एव इहास्मिन्कालेऽपि धर्मात्मा रामः अधर्मं लोकं जनं धर्मेण योजयेत् योजयिष्यति एतेन सर्वनियमनसमर्थस्य साक्षाद्राज्यशासने न किंचित्प्रयोजनमिति ध्वनितम् ॥ २० ॥

गो० टी०—नन्वयं किं कुर्मः पौरुषधर्मबलाभ्यां हीनः स्वयमेव गत इत्यत्राह—नैतस्येति । सहिताः मिलिताः लोकाः चतुर्दशभुवनस्थाः सुरासुरादयः महामृधे महायुद्धे एतस्य रामस्य भयं न कुर्युः भयं कर्तुं न शक्नुयुरित्यर्थः । किंतु अधर्मम् अधर्ममार्गस्थं लोकं जनं धर्मेण योजयेत् 'चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति' इत्युक्तो रामः स्वयमधर्मं कथं कुर्यादित्यर्थः ॥ २० ॥

२१] ति० टी०—रामेऽशक्तिशङ्कापि नेत्याह—नन्विति ।

१ पुरोडाशा इति रा. पाठः । २ अवेति गो. पाठः ।

स तादृशः सिंहबलो वृषभाक्षो नरर्षभः । स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥ २२ ॥
द्विजातिचरितो धर्मः शास्त्रे दृष्टः सनातनैः । यदि ते धर्मनिरते त्वया पुत्रे विवासिते ॥ २३ ॥
गतिरेका पतिर्नार्या द्वितीया गतिरात्मजः । तृतीया ज्ञातयो राजंश्चतुर्थी नैव विद्यते ॥ २४ ॥
तत्र त्वं मम नैवासि रामश्च वनमाहितः । न वनं गन्तुमिच्छामि सर्वथा हा हता त्वया ॥ २५ ॥
हतं त्वया राष्ट्रमिदं सराज्यं हताः स्म सर्वाः सह मन्त्रिभिश्च ।
हता सपुत्रास्मि हताश्च पौराः सुतश्च भार्या च तव प्रहृष्टौ ॥ २६ ॥

काञ्चनैः काञ्चनभूषितपुङ्खैर्युगान्ते युगान्तकाले ईश्वर इव भूतानि सप्तद्वांश्च निर्दहेन्नाशयेच्छोषयेच्च ॥ २१ ॥

रा० टी०–तत्सामर्थ्यमेव भङ्ग्यन्तरेणाह–नन्विति । नन्विच्छायां सत्यां महावीर्योऽसौ रामः काञ्चनैः काञ्चनभूषितपुंखविशिष्टैः बाणैः युगान्ते प्रलयकाले इव भूतानि सागरानपि निर्दहेत् ॥ २१ ॥

गो० टी०–नन्विति । युगान्तः युगान्तकालः भूतानि पञ्चमहाभूतानि ॥ २१ ॥

२२] ति० टी०–पित्रा त्वया स्वयमेव स्वपुत्रो हतो भ्रष्टराज्यः कृतः । जलजेन मत्स्येन स यथात्मजानेव भक्षयति तद्वदित्यर्थः ॥ २२ ॥

रा० टी०–स इति । तादृशः अतिप्रभावविशिष्टः सः रामः पित्रा त्वया स्वयमेव हतः ऐश्वर्यशोभायास्त्याजितः तत्र दृष्टान्तः जलजेन कमलेन आत्मजः आत्मनः स्वस्य जो जनिर्यस्मात्सजलपदार्थो यथा यथा स्वशोभासम्पादकजलशोभां स्वातिप्रसूत्या जलजं निवारयति तथा स्वस्वातन्त्र्येण स्वशोभाजनकीभूतपुत्रशोभां भवान्निवारितवानित्यर्थः । 'जो ना मृत्युञ्जये जन्ये' इति मेदिनी । ममैवाधिकः खेद इति बोधयन्ती आह द्विजातीति । यथः सनातनैः ऋषिभिः शास्त्रस्मृत्यादौ धर्मः द्विजातिचरितः त्रिवर्णाधिकृतः दृष्टो बोधितस्तेन धर्मेणोपलक्षिताहं धर्मनिरते पुत्रे त्वया विवासिते सति त्वया हता धर्मरहिता कृता अतः वनं गन्तुमिच्छामि धर्मरहितत्वे हेतुः पतिरेव नार्या एका गतिः धर्मरक्षकः द्वितीया गतिरात्मजः तृतीया ज्ञातयस्तत्र तेषु मध्ये त्वं मदये नैवासि मूर्छितोऽसीत्यर्थः रामः वनमाहितः प्राप्तः अतो न सोपीऽह नास्ति चकारेणात एव ज्ञातयो विनष्टाः एतेन मम धर्मनिर्वाहकः कश्चिन्नास्तीति सूचितम् । श्लोकद्वयमेकान्वयि इतिर्हेत्वर्थेऽव्ययं यदिति सामान्ये नपुंसकम् ॥ २२–२५ ॥

गो० टी०– स तादृश इति । तादृशः अवाङ्मनसगोचरपराक्रमयुक्तः जलजेन मत्स्येन । मत्स्यो ह्यात्मजानेव भक्षयतीति प्रसिद्धम् ॥ २२ ॥

२३] ति० टी०–एवं चाहमेव हतेत्याह श्लोकत्रयेण–द्विजातीत्यादि । सनातनैर्ऋषिभिः शास्त्रे वेदे दृष्टश्चैवर्णिकैर्द्विजातिभिश्चरितो धर्मो यदि ते सत्यः स्यात्तर्हि पुत्रो न विवासितः स्यादिति शेषः । एवं धर्मसुपेक्ष्य धर्मनिरते पुत्रे त्वया विवासिते सति ॥ २३ ॥

गो० टी०–इयता प्रबन्धेनोक्तमुपसंहरति–द्विजातिचरित इति । धर्मनिरते पुत्रे त्वया विवासिते सति द्विजातिचरितः शिष्टत्रैवर्णिकाचरितः शास्त्रदृष्टः सनातनो धर्मः ते यदि अस्ति किमित्यर्थेऽव्ययमिदम् ॥ २३ ॥

२४–२५] ति० टी०–शास्त्रेणोच्यमानाः स्त्रियास्तिस्रो गतयः । तत्र ताश्च प्रथमगतिभूतस्त्वं मम नास्त्येव सपत्नीवशत्वात् । 'नास्ति' इति पाठ आर्षत्वं बोध्यम् । द्वितीयगतिभूतो रामश्च वनमाहितो वनं प्रहितस्त्वया । न च तत्प्राप्तये वनं गन्तुमिच्छामि सपतिकात्वात् । तृतीया ज्ञातयस्त्वसंनिहितास्तस्मात्सर्वथा हता त्वया ॥ २४ ॥ २५ ॥

गो० टी०–एवं राजकृतानीत्या स्वहानिमाह–गतिरित्यादि । एका मुख्या प्रथमेत्यर्थः । द्वितीया भर्त्रभावे गतिरित्यर्थः । ज्ञातयः पित्रादयः तृतीया भर्तृपुत्राभावे गतिरित्यर्थः । चतुर्थी स्वातन्त्र्यरूपा तथा च स्मृतिः 'पिता रक्षति कौमारे भर्ता रक्षति यौवने । वार्द्धके तनयो रक्षेन्न स्त्री स्वातन्त्र्यमर्हति' इति ॥ २४ ॥

गो० टी०–तत्रेति । तत्र तासु गतिषु त्वं न त्वं भर्ता न भवसि सपत्नीपरतन्त्रत्वात् । मे ज्ञातिरपि नास्ति दूरस्थत्वादिति भावः न वनंगन्तुमिच्छामि सभर्तृकत्वात् निहता अस्मीति शेषः ॥ २५ ॥

२६] ति० टी०–सुतश्च भार्या च भरतकैकेय्यौ प्रहृष्टौ ॥ २६ ॥

रा० टी०–उपसंहरन्ती आह–हतमिति । सराज्यं अन्तरङ्गराज्यसहितं राष्ट्रं बहिरङ्गराज्यं त्वया हतं विनाशितमत एव मन्त्रिभिः सह सर्वाः प्रजा हताः अत एव सपुत्राहं हतास्मि अत एव पौरा हताः । ननु सर्वेषां विद्यमानत्वात्कथमिदमुच्यते इत्यत आह तव प्रहृष्टौ त्वन्निष्टहर्षे एव सुतो रामादिरस्ति भार्या अस्मदादिरप्यस्ति चकारेण राष्ट्रादयोऽपि सन्ति अन्यथा सर्वेषां विनाश इत्यर्थः ॥ २६ ॥

गो० टी०–न केवलमहमेका हता अन्येऽपीत्याह–हत-

१ शास्त्रदृष्टः सनातने इति गो. पाठः । २ नेहेति गो. पाठः । ३ चैव मे नास्तीति गो.पाठः । ४ वनमाश्रित इति गो. पाठः । ५ निहतेति गो. पाठः । ६ राज्यमिदं सराष्ट्रं हतस्तथात्मेति गो. पाठः ।

इमां गिरं दारुणशब्दसंहितां निशम्य रौमेति मुमोह दुःखितः ।
ततः स शोकं प्रविवेश पार्थिवः स्वदुष्कृतं चापि पुनस्तथाऽस्मरत् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ।

पुत्रवियोगविमना अपि कौसल्यापरुषोक्त्यभिहतो दशरथः एतन्निदानभूतमुनिकुमारहननरूपस्वदुष्कृतं स्मरन्मुमोहाथोत्थित साञ्जलिबन्धं कौसल्यां प्रसादयामास । विलोक्यैतद्विषीदन्त्या कौसल्यया सप्रणामं प्रसादितो दशरथो निद्रां प्रपेदे ।

एवं तु क्रुद्धया राजा राममात्रा सशोकया । श्रावितः परुषं वाक्यं चिन्तयामास दुःखितः ॥ १ ॥
चिन्तयित्वा स च नृपो [४]मोहव्याकुलितेन्द्रियः । अथ दीर्घेण कालेन संज्ञामाप परंतपः ॥ २ ॥
स संज्ञामुपलभ्यैव दीर्घमुष्णं च निःश्वसन् । कौसल्यां पार्श्वतो दृष्ट्वा तंतश्चिन्तामुपागमत् ॥ ३ ॥
तस्य चिन्तयमानस्य प्रत्यभात्कर्म दुष्कृतम् । यदनेन कृतं पूर्वमज्ञानाच्छब्दवेधिना ॥ ४ ॥
अमनास्तेन शोकेन रामशोकेन च प्रभुः । द्वाभ्यामपि महाराजः शोकाभ्यामभितप्यते ॥ ५ ॥

मिति । राज्यं कौसलराज्यं राष्ट्राणि अन्यानि त्वन्मित्रपालितानि सुतः भरतः तवैव तव सुताभिमानात् भार्या कैकेयी तद्वचनकरणात् ॥ २६ ॥

२७] ति० टी०–दारुणशब्दसंहितां दारुणशब्दयुक्ताम् स्वदुष्कृतं वक्ष्यमाणम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

रा० टी०–इममिति । दारुणशब्दसंहितां प्रातिभासिककठिनस्वविशिष्टशब्दविशिष्टामिमां कौशल्योक्तां गिरं निशम्य मामेति कृत्वा मुमोह ततो मोहानन्तरं दुःखितः पार्थिवः स्वदुष्कृतं स्वकीयाया दुष्कृतमकालिकवरयाचनं स्मरन्सन् शोकं प्रविवेश ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

गो० टी०–इमामिति । प्रविवेश तत्र मग्न इत्यर्थः दुष्कृतं स्मरन् एतादृशदुःखस्य निदानभूतं किं कर्म पूर्वं कृतमिति स्मरन्नित्यर्थः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

१] ति० टी०–एवं कौसल्याकूरवचोभीतस्य राज्ञोऽञ्जलिपर्यन्तं दैन्यं दृष्ट्वा राजानमनुनयति–एवं त्विति । चिन्तयामासानयोच्यमानं सर्वं सत्यं किमिह कर्तव्यमिति विचारयामास ॥ १ ॥

रा० टी०–राजवृत्तं बोधयन्नाह–एवमिति । क्रुद्धया प्रातिभासिककोपविशिष्टया राममात्रा परुषं कठिनत्वेन प्रतीयमानं वाक्यं श्रावितो राजा चिन्तयामास ॥ १ ॥

गो० टी०–एवमिति । चिन्तयामास अनया सत्यमेव कथितं मया चान्यैरकृतपूर्वं महदकृत्यं कृतं किमतः परं करोमीति चिन्तयामासेत्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०–मोहव्याकुलितेन्द्रियः जात इति शेषः॥२॥

रा० टी०–चिन्तयित्वेति । मोहव्याकुलितेन्द्रियो राजा दीर्घेण अनल्पेन कालेन संज्ञां बहिःपदार्थविषयकज्ञानमाप ॥२॥

३] ति० टी०–चिन्तामुपागमत्पुत्रविश्लेषजदुःखसाधनं कर्म ममेति चिन्तामाप । ३ ॥

रा० टी०–स इति । उपलभ्य प्राप्य पार्श्वतः पार्श्वे कौशल्यां दृष्ट्वा चिन्तामुपागमत् ॥ ३ ॥

गो० टी०–ससंज्ञामिति । पुनश्चिन्तामुपागमत् अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इति न्यायेन प्रियपुत्रविश्लेषजं महद्दुःखमनुभवामि एतद्धेतुभूतं किं कर्मकृतमिति पुनश्चिन्तां प्राप्तवानित्यर्थः ॥ ३ ॥

४] ति० टी०–प्रत्यभात्प्रतिभातम् दुष्कृतं कर्म मुनिकुमारवधरूपं शब्दमेव लक्ष्यदेशस्थं प्राप्य विध्यतीति शब्दवेधी ॥ ४ ॥

रा० टी०–तस्येति । चिन्तयमानस्य तस्य राज्ञः अज्ञानादयं क्रूरमृगमिव इति ज्ञानाभावाच्छब्दवेधिना शब्दमेव लक्ष्यीकृत्य विध्यतीति शब्दवेधी तेन बाणेन करणेन यदनेन राज्ञ दुष्कृतं कर्म कृतं तत्कर्म प्रत्यभाद्बुद्धिविषयत्वमगच्छत् ॥ ४ ॥

गो० टी०–तस्येति । दुष्कृतं कर्म मुनिकुमारवधरूपं कर्म प्रत्यभात् प्रतीतमभूत् शब्दवेधिना शब्देन लक्ष्येण वेद्धुं शीलमस्यास्तीति शब्दवेधी राजा बाणो वा ॥ ४ ॥

५] ति० टी०–अमना दुर्मनाः तेन शोकेन मुनिकुमारवधजेन शोकेन ॥ ५ ॥

१ संश्रितामिति गो. पाठः । २ राजापीति गो. पाठः । ३ तदास्मरन्निति गा. तथा स्मरन्निति रा. पाठः । ४ मुमोह व्याकुलेन्द्रिय इति गा. पाठः ५ पुनरिति गो. पाठः । ६ अन्वतप्यतेति गो. पाठः । ७ व्वद्धुमिति युक्तम् ।

दह्यमानस्तु शोकाभ्यां कौसल्यामाह दुःखितः । वेपमानोऽञ्जलिं कृत्वा प्रसादार्थमवाङ्मुखः ॥ ६ ॥
प्रसादये त्वां कौसल्ये रचितोऽयं मयाञ्जलिः । वत्सला चानृशंसा च त्वं हि नित्यं परेष्वपि ॥ ७ ॥
भर्ता तु खलु नारीणां गुणवान्निर्गुणोऽपि वा । धर्मं विमृशमानानां प्रत्यक्षं देवि दैवतम् ॥ ८ ॥
सा त्वं धर्मपरा नित्यं दृष्टलोकपरावरा । नार्हसे विप्रियं वक्तुं दुःखितापि सुदुःखितम् ॥ ९ ॥
तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् । कौसल्या व्यसृजद्बाष्पं प्रणालीव नवोदकम् ॥ १० ॥
सा मूर्ध्नि बद्ध्वा रुदती राज्ञः पद्ममिवाञ्जलिम् । संभ्रमादब्रवीत्रस्ता त्वरमाणाक्षरं वचः ॥ ११ ॥
प्रसीद शिरसा याचे भूमौ निपतितास्मि ते । याचितास्मि हता देव क्षन्तव्याहं नहि त्वया ॥ १२ ॥

रा० टी०—दुष्कृतस्वरूपं तु स्वयमेव वक्ष्यति—अमना इति तेन स्मृतिविषयीभूतदुष्कृतजनितेन शोकेन रामशोकेन च महाराजः अमनाः दुर्मना अभवदिति शेषः अत एव द्वाभ्यां शोकाभ्यामभितप्यते अभ्यतप्यत ॥ ६ ॥

गो० टी०—अमना इति । अमनाः अस्वस्थचित्तः क्षुभितान्तःकरण इत्यर्थः तेन सुनिकुमारवधजनितेन ॥ ६ ॥

६] ति०टी०—अवाङ्मुखः स्वकृततदप्रियस्मरणाल्लज्जया ६॥

रा० टी०—दह्यमान इति । प्रसादार्थं कौशल्याप्रीत्यर्थमञ्जलिं कृत्वा अवाङ्मुखः उदासीनमुखदर्शनसहनासमर्थत्वेन अवनतमुखः अत एव वेपमानो राजा कौशल्यामाह ॥ ६ ॥

गो० टी०—दह्यमान इति । अवाङ्मुखः अवनतमुखः स्वकृतकौसल्याविषयाप्रियजन्यया लज्जया भीत्या चेति भावः॥६॥

७] ति० टी०—परेष्वपि शत्रुष्वपि ॥ ७ ॥

रा० टी०—वचनाकारमाह—प्रसादय इति । यतः परेषु शत्रुष्वपि त्वं वत्सला अत एव अनृशंसा क्रूरतारहिता त्वमसि अतस्त्वां प्रसादये ॥ ७ ॥

गो० टी०—प्रसादय इति । परेष्वपि प्रतिकूलेष्वपि ॥ ७ ॥ ८ ॥

८] ति० टी०—विमृशमानानां जानतीनाम् ॥ ८ ॥

रा० टी०—भर्तेति । धर्मं विमृशमानानां विचारयन्तीनां नारीणां गुणवान्निर्गुणो वा भर्ता दैवतं देवता तासां पतिभिन्नं दैवतं नास्तीत्यर्थः ॥ ८ ॥

९] ति० टी०—दृष्टौ लोके परावरावुत्कर्षापकर्षौ यया सा अपकृष्टा अपि भर्तारमेवं न वदन्तीति भावः ॥ ९ ॥

रा० टी०—सेति । सा ज्ञातसकलधर्मतत्त्वा अत एव धर्मपरा अत एव दृष्टलोकपरावरा दृष्टौ निश्चितौ लोकपरावरौ जनानामुत्तममध्यमत्वे यया सा त्वं दुःखितापि प्रियं भर्तारं[1] विप्रियं वक्तुं नार्हसे अर्हसि ॥ ९ ॥

गो० टी०—सा त्वमिति । दृष्टलोकपरावरा दृष्टौ लोके जने परावरौ उत्कर्षापकर्षौ यया सा तथोक्ता सुदुःखितं मां प्रतीति शेषः ॥ ९ ॥

१०] ति० टी०—प्रणाली प्रासादादौ जलनिर्गममार्गः नवोदकं वर्षजलम् ॥ १० ॥

रा० टी०—तदिति । तत्करुणं वाक्यं श्रुत्वा बाष्पमश्रु व्यसृजत् तत्र दृष्टान्तः प्रणाली प्रासादादिषु निर्मितजलनिर्गममार्गः नवोदकं वृष्टिजलमिव 'द्वयोः प्रणाली पयसः पदव्याम्' इत्यमरः ॥ १० ॥

गो० टी०—तद्वाक्यमिति । प्रणाली प्रासादादिषु दार्वादिनिर्मितजलनिर्गममार्गः । 'द्वयोः प्रणाली पयसः पदव्याम्' इत्यमरः । नवोदकं वर्षजलम् ॥ १० ॥

११] ति० टी०—स्वानुनयाय राज्ञा कृतं राज्ञोऽञ्जलिं पाणिभ्यां गृहीत्वा पद्ममिव मूर्ध्नि बद्ध्वा रुदती त्रस्ता अहमपि कैकेयीवत्पतिशोककारिवचनादिकं प्राप्तवतीति भीता संभ्रमाद्राज्ञ्यत्यादराद्वच आह ॥ ११ ॥

रा० टी०—सेति । रुदती त्रस्ता पतिविषयकस्वापराधहेतुकत्रासविशिष्टा सा कौशल्या राज्ञः अञ्जलिं बद्धयुगलकरं पद्ममिव मूर्ध्नि स्वशिरसि बद्ध्वा धृत्वा संभ्रमादत्यादरात्त्वरमाणं अतिवेगविशिष्टमक्षरं यस्मिंस्तद्वचः अब्रवीत् ॥ ११ ॥

गो० टी०—सेति । राज्ञः अञ्जलिं पद्ममिव मूर्ध्नि बद्ध्वा-पाणिभ्यां गृहीत्वा मूर्ध्नि बद्धेत्यर्थः त्रस्ता धर्माद्भीता ॥ ११ ॥

१२] ति० टी०—भूमौ निपतितास्मि साष्टाङ्गं प्रणमामि हे देव त्वया याचिताहमनुनीताहं हतास्मि ईश्वरेप्सितवैपरीत्यस्यान्याय्यत्वात् अतस्त्वया क्षन्तव्या न किंतु दासीवत्प्रहर्तव्येत्यर्थः ॥ १२ ॥

रा० टी०—वचनाकारमाह—प्रसीदेति । ते अग्रे भूमौ निपतिता कृतप्रणामास्मि हे देव हता पुत्रवियोगपीडिताऽहं त्वया न हन्तव्या स्वदैन्यवचनोक्त्या न पीडयितव्या इत्यहं याचिता याचनकर्त्री पूर्वं कर्मोविवक्षया कर्तरि निष्ठा 'क्षन्तव्याहं नहि त्वया' इति भट्टपाठस्तत्र त्वयाहं न हता पीडिता किंतु मन्थरया पीडितेत्यर्थः ॥ १२ ॥

गो० टी०—प्रसीदेति । भूमौ निपतितास्मि प्रणतास्मीत्यर्थः कृतः यतः ते याचिता त्वया याचिताहं हतास्मि अतः त्वयाहं हन्तव्या नहि संहर्तव्या नहि एतदपराधक्षान्तये मम प्रहार एव त्वया कर्तव्यो न संहारो दास्या इवेत्यर्थः॥१२॥

१ स इति गो. पाठः । २ भूपतिरिति गो. पाठः। ३ हन्तव्येति गो. रा. पाठः ।

नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता । उभयोर्लोकयोर्लोके पत्या या संप्रसाद्यते ॥ १३ ॥
जानामि धर्मं धर्मज्ञ त्वां जाने सत्यवादिनम् । पुत्रशोकार्तया तत्तु मया किमपि भाषितम् ॥ १४ ॥
शोको नाशयते धैर्यं शोको नाशयते श्रुतम् । शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥ १५ ॥
शक्यमापतितः सोढुं प्रहारो रिपुहस्ततः । सोढुमापतितः शोकः सुसूक्ष्मोऽपि न शक्यते ॥ १६ ॥
वनवासाय रामस्य पञ्चरात्रोऽत्र गण्यते । यः शोकहतहर्षायाः पञ्चवर्षोपमो मम ॥ १७ ॥

१३] ति० टी०–एषा हि लोके सा स्त्री कुलस्त्री न भवति या उभयोः श्लाघनीयेन पत्या संप्रसाद्यते ॥ १३ ॥

रा० टी०–नेति । उभयोर्लोकयोः श्लाघनीयेन पत्या या स्त्री संप्रसाद्यते सा स्त्री लोके नास्ति एवेन स्वभाग्यवत्तातिशयः सूचितः ॥ १३ ॥

गो० टी०–नैषेति । श्लाघनीयेन स्वयं प्रसादेन पत्या लोके या संप्रसाद्यते सा स्त्री उभयोर्लोकयोर्न भवति । ऐहिकामुष्मिकसुखभागिनी न भवतीत्यर्थः ॥ १३ ॥

१४] ति० टी०–किमप्यत्यनुचितं भाषितं तत्क्षन्तव्यमिति शेषः ॥ १४ ॥

रा० टी०–जानामीति । हेधर्मज्ञ धर्मं पतिः परुषं न वक्तव्य इत्यादिरीतिं जानामि त्वां सत्यवादिनं च जाने तथापि पुत्रशोकार्तया मया तत्परुषाभासं किमपि भाषितम् । तुस्तथाप्यर्थे ॥ १४ ॥

गो० टी०–जानामीति । किमपि अविचारितम् अनुचितं च तत् क्षन्तव्यमिति शेषः ॥ १४ ॥ १५ ॥

१५] ति० टी०–शोक एवमार्यमनुचितव्यवहारप्रवर्तक इत्याह–शोक इत्यादि ॥ १५ ॥

रा० टी०–शोकस्यार्यकारित्वं बोधयन्ती आह–शोक इति । श्रुतं शास्त्रश्रवणजनितनिश्चितधर्ममतः सर्वं यशआदिकं नाशयते ॥ १५ ॥

१६] ति० टी०–सुसूक्ष्मोऽपि शोकः सोढुं न शक्यते किं पुनर्महानिति शेषः ॥ १६ ॥

रा० टी०–शक्यमिति । रिपुहस्ततः आपतितः प्रहारः आयुधादिः सोढुं शक्यं आपतितः विधिवशात्प्राप्तः सुसूक्ष्मोऽपि शोकः सोढुं न शक्यते शक्यमिति सामान्ये नपुंसकम् ॥ १६ ॥

गो० टी०–शक्य इति । आपतितः हठात्प्राप्तः ॥ १६ ॥

१७] ति० टी०–स्वशोकस्य महत्त्वं दर्शयति–वनेति । पञ्चरात्र इत्यस्य गत इति शेषः । तत्र प्रथमा तमसातीरे, द्वितीया गुहपुरे, तृतीया गङ्गातीरे, चतुर्थी प्रयागे, पञ्चमी यमुनातीरे, षष्ठी चित्रकूटे तस्मिन् दिने सुमन्त्रस्यायोध्याप्राप्तिः अत एवाग्रे षष्ठीति दशरथोक्तिः । अथवाद्यदिने संपूर्णमेदिनं स्वनिकटे स्थितत्वेन स्वदेशे तमसातीरे एव स्थितत्वेन तस्मिन्नगण्य कौसल्यायाश्च पञ्चरात्रो गण्यत इत्युक्तम् राजा तु तमपि गृहीत्वा षष्ठीति वक्ष्यति । यत्तु कतकेन निर्गमनात्सप्तरात्रः सुमन्त्रागमनदिने इत्युक्तम्, तदज्ञानात् गङ्गोत्तरणदिनानूर्ध्वतृतीयेऽहनि चारप्रतिनिवृत्युत्तरं सायाह्ने तस्मिन् एव सुमन्त्रप्रस्थानस्य वक्तुं शक्यत्वात् रामस्य निर्गमनादिने षष्ठे इति पूर्वोल्लिखितपाठविरोधाच्च ॥ १७ ॥

रा० टी०–शोकस्य चिरकालस्थायित्वं बोधयन्ती आह–वनेति । वनवासाय गतस्य रामस्य अथ इदानीं यः पञ्चरात्रो गतः सः पञ्चरात्रः शोकहतहर्षाया मम अत्रास्मिन्समये पञ्चवर्षोपमो गण्यते ज्ञायते ॥ १७ ॥

गो० टी०–शोकस्य नूतनत्वादशक्यत्वमाह–वनवासायेति । वनवासाय वने वासं कर्तुं प्रस्थितस्य रामस्य पञ्चरात्रोऽद्य गण्यते वने पञ्चरात्रो वासो गण्यते अत्र केचित् प्रथमायां रात्रौ तमसातीरे द्वितीयरात्रौ जाह्नवीतीरे तृतीयरात्रौ गङ्गादक्षिणकूलस्थे वनस्पतौ, चतुर्थरात्रौ प्रयागे, पञ्चमरात्रौ यमुनातीरे, ततः सुमन्त्रः षष्ठदिवसे रामश्चित्रकूटं गमिष्यतीति वृत्तान्तं ज्ञात्वा तदहः सायाह्नसमये अयोध्यां प्राप्तवान् ततोऽत्र पञ्चरात्रगणनमुपपद्यत इत्यूचिरे । अन्ये त्वाहुः गङ्गावतरणपर्यन्तं वनवासत्वाभावात् ततः परं वनस्पतिभरद्वाजाश्रमयमुनातीरचित्रकूटेषु चतस्रो रात्रयः चतुर्थ्यां सुमन्त्रस्य निर्गमः पञ्चम्यामिदं वचनमिति एवं सत्ययपदस्वारस्यमिति । नन्वेवं सप्तपञ्चाशे सर्गे ' भरद्वाजाभिगमनम् प्रयागे च सहासनम् । आगिरेर्गमनं तेषां तत्रस्थैरभिलक्षितम् ॥ अनुज्ञातः सुमन्त्रोऽथ योजयित्वा हयोत्तमान् । ' इत्यादिनन्तरं 'ततः सायाह्नसमये तृतीयेऽहनि सारथिः । अयोध्यां समनुप्राप्य निरानन्दां ददर्श ह' इत्युक्त्या अयोध्यानिर्गमदिवसमारभ्य षष्ठेऽहनि किल रामस्य चित्रकूटप्रवेशः अथ चारेभ्यः सप्तमे अष्टमे वा सुतस्य तद्वृत्तान्तश्रवणं ततस्तृतीयेऽहनि सुतस्यायोध्याप्रवेशः तत्कथं पञ्चरात्र इति परिगण्यते । उच्यते तृतीयेऽहनीत्यत्र अह्नस्तृतीयभाग इत्यर्थः । आगिरेर्गमनमित्यत्र गमनोद्योगमित्यर्थः । तथा च 'गुहेन सार्धं तत्रैव स्थितोऽस्मि दिवसान् बहून् । आज्ञया यदि मां रामः पुनः शब्दापयेदिति' इत्यत्र बहूनित्युक्त्या दिनत्रयं शृङ्गिबेरपुरे सुतस्य वासः चतुर्थे दिने ऋजुमार्गेण दिवारात्रमागतचारमुखात् रामस्य चित्रकूटप्रवेशोद्योगं निशम्य तद्दिवसस्यायंकाले वेगेनायोध्याप्रवेशस्तस्मिन् दिने कौसल्याद्य–पञ्चरात्रोऽद्य गण्यत इति । अतो न किंचिदनुपपन्नम्॥१७॥

---

१ शक्य इति गो. पाठः । २ ऽथेति गो. पाठः । ३ त्रे इति युक्तम् ।

तं हि चिन्तयमानायाः शोकोऽयं हृदि वर्धते । नदीनामिव वेगेन समुद्रसलिलं महत् ॥ १८ ॥
एवं हि कथयन्त्यास्तु कौसल्यायाः शुभं वचः । मन्दरश्मिरभूत्सूर्यो रजनी चाभ्यवर्तत ॥ १९ ॥
अथ प्रह्लादितो वाक्यैर्देव्या कौसल्यया नृपः । शोकेन च समाक्रान्तो निद्राया वशमेयिवान् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।

निशीथे प्रबुद्धो दशरथः पुत्रशोकान्मरणप्रयोजकस्वदुष्कृतमनुस्मृत्य कौसल्यां वक्तुमुपक्रमते । युवराजावस्थायां मृगयामटन्नेकदा परारात्रेऽम्भसि कुम्भं निमज्जयत ऋषिकुमारस्य जलपूरणशब्दं शृण्वन्वृंहितभ्रान्त्या शरमसृजं, तदभिहतस्तपस्विकुमारको जरन्तौ पितरौ चुक्रोश, श्रुत्वा तत्प्राप्तविषादोऽहं तमुपागच्छम्, आर्तः स स्ववृत्तं निवेद्य वृद्धावाश्वासयितुं मां नियोज्य शल्योद्धरणे प्रैरयदुद्धृते च शल्ये प्राणान्मुमोच ।

प्रतिबुद्धो मुहूर्तेन शोकोपहतचेतनः । अथ राजा दशरथः स चिन्तामभ्यपद्यत ॥ १ ॥
रामलक्ष्मणयोश्चैव विवासाद्वासवोपमम् । आपेदे उपसर्गस्तं तमः सूर्यमिवासुरम् ॥ २ ॥
सभार्ये हि गते रामे कौसल्यां कोसलेश्वरः । विवक्षुरसितापाङ्गीं स्मृत्वा दुष्कृतमात्मनः ॥ ३ ॥
स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनम् । अर्धरात्रे दशरथः सोऽस्मरद्दुष्कृतं कृतम् ॥ ४ ॥
स राजा पुत्रशोकार्तः स्मृत्वा दुष्कृतमात्मनः । कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५ ॥

१८] ति० टी०—नदीनां वेगेन समुद्रसलिलमिवेत्युत्प्रेक्षामात्रं न तु तस्य तेन वृद्धिरित्याहुः परे तु महत्समुद्रसलिलं वेगेन चन्द्रोदयवृद्धिवेगे नदीनां हृदि तदद्वयान्तरे यथा वर्धत इत्यर्थः । समुद्रगामिनदीनां चन्द्रोदयकालिकसमुद्रवृद्ध्या हृद्धेः क्वचिदूरमप्याप्युपलम्भादित्याहुः ॥ १८ ॥

रा० टी०—तमिति । तं रामं चिन्तयमानायाः मे अयं शोकः हृयेव वर्धते न बहिर्गच्छतीत्यर्थः तत्र दृष्टान्तः नदीनां वेगेन महत्समुद्रसलिलमिव एतेन शोकस्य स्थिरत्वं ध्वनितम् ॥ १८ ॥

गो० टी०—तमिति । नदीवेगेन समुद्रवृद्धिरिति लोकवादः ॥ १८ ॥

१९-२०] ति० टी०—शुभं वचोऽतिदुःखितायाः अपि पत्यद्यनयपरत्वाद्वचसः शुभत्वम् ॥ १९ ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

रा० टी०—एवमिति । कौशल्याया एवमनेन प्रकारेण कथयन्त्याः सत्याः सूर्यो मन्दरश्मिरभूदतएव रजनी रात्रिः अभ्यवर्तत ॥ १९ ॥

रा० टी०—अथेति । शोकेन समाक्रान्तः कौशल्यया प्रह्लादितो नृपः निद्राया वशमेयिवान्प्राप्तः ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

गो० टी०—एवमिति । कथयन्त्याः कथयन्त्यामित्यर्थः शुभं वचः अतिदुःखितावस्थायामपि पत्यद्यनयपरत्वात् वचसः शुभत्वम् ॥ १९ ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

१] ति० टी०—प्रतिबुद्धे इति ॥ १ ॥

रा० टी०—राजवृत्तमाह—प्रतिबुद्ध इति । मुहूर्तेन प्रतिबुद्धः गतनिद्रः शोकोपहतचेतनः राजा दशरथः चिन्तामभ्यपद्यत प्राप्नोत् ॥ १ ॥

गो० टी०—प्रतिबुद्ध इत्यादि ॥ १ ॥

२] ति० टी०—वासवोपमं तं दशरथम् उपसर्ग उपद्रवः शोक इति यावत् । आसुरं तमोऽसुरस्य राहोः संबन्धि तम आवरणशक्तिर्यथा सूर्यमावृणोति तद्वत् ॥ २ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—रामेति । वासवोपममिन्द्रसदृशं तं दशरथं विवासाद्धेतोः उपसर्गः उपद्रवहेतुभूतशोक आपेदे प्राप्नोत्तत्र दृष्टान्तः आसुरं राहुसंबन्धि तमः सूर्यमिव॥२॥

गो० टी०—रामलक्ष्मणयोरिति । रामलक्ष्मणयोर्विवासात् उपसर्गः महोपद्रवः पुत्रशोकरूपः आसुरम् असुरसंबन्धि तमः राहुः ॥ २ ॥

३] ति० टी०—आत्मनो दुष्कृतं स्मृत्वासितापाङ्गीं विवक्षुरभवत् ॥ ३ ॥

रा० टी०—सेति । रामे गते सति कोशलेश्वरः राजा आत्मनः दुष्कृतं स्मृत्वा वियोगहेतुत्वेन प्रकल्प्येत्यर्थः असितापाङ्गीं कौशल्यां विवक्षुः वक्तुमिच्छुः आसीदिति शेषः ॥ ३ ॥

गो० टी०—सभार्य इति । विवक्षुः अभूदिति शेषः । असितापाङ्गीमित्यनेन निष्टक्रोधत्वमुक्तम् ॥ ३ ॥

४-५] ति० टी०—षष्ठीं रजनीम् । प्राप्येति शेषः ॥४॥५॥

रा० टी०—स इति । रामे वनं प्रव्राजिते सति षष्ठीं रजनीं रात्रिमुपलभ्य अर्धरात्रे कृतं स्वनिष्पादितं दुष्कृतं स राजा दशरथोऽस्मरत् क्रमशः सस्मार ॥ ४ ॥

१ तथा प्रसादित इति गो. पाठः । २ आविवेशेति गो. पाठः । ३ संस्मरन्निति गो. पाठः ।

यदाचरति कल्याणि शुभं वा यदि वाऽशुभम् । तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥ ६ ॥
गुरुलाघवमर्थानामारम्भे कर्मणां फलम् । दोषं वा यो न जानाति स बाल इति होच्यते ॥ ७ ॥
कश्चिदाम्रवणं छित्त्वा पलाशांश्च निषिञ्चति । पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥ ८ ॥
अविज्ञाय फलं यो हि कर्म त्वेवानुधावति । स शोचेत्फलवेलायां यथा किंशुकसेचकः ॥ ९ ॥
सोऽहमाम्रवणं छित्त्वा पलाशांश्च न्यषेचयम् । रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः ॥ १० ॥

रा० टी०-स इति । पुत्रशोकार्ता कौशल्यामिदं वचनमब्रवीत् ॥ ५ ॥

गो० टी०-स राजेति । रजनीमिति सप्तम्यर्थे द्वितीया षष्ठीं रजनीं प्राप्येति शेषो वा संस्मरन् स्थित इति शेषः॥४॥ ५॥

६] ति० टी०-तदेव लभते तल्लभत एवेति च ॥ ६ ॥

रा० टी०-वचनाकारमाह-यदिति । हे कल्याणि ! शुभं विहितमशुभमविहितं वा यदाचरति तत् आत्मनः कर्मजं शुभाशुभकर्मजनितं शुभमशुभं वा सुखं दुःखं वेत्यर्थः कर्ता लभते एव शुभाशुभशब्दौ कार्यकारणयोस्तादात्म्यादुभयपरौ ॥ ६ ॥

गो० टी०-स्मृतमात्मदुष्कृतं वक्तुं तदनुकूलां लोकस्थितिं दर्शयति-यदिति । कल्याणीति सान्त्वोक्तिः । लोके पुरुषः शुभं वा अशुभं वा यदाचरति परस्य कर्मजं परशुभाशुभप्रापकपुण्यापुण्यात्मककर्मजम् तदेव शुभं वा अशुभं वा फलम् आत्मनोऽपि लभते तथा च ऋषेः पुत्रवियोगकरणेन ममापि पुत्रवियोगः प्राप्त इति भावः ॥ ६ ॥

७] ति० टी०-अर्थानामैहिकानां कर्मणां पारलौकिकानामारम्भ आरम्भकाले फलं प्रति यो गुरुलाघवं गौरवं लाघवं च दोषं वा गुणं वा न जानाति केनचिदल्पेन हत्यादिना महदनिष्टं केनचिन्महतापि यागादिनाल्पफलं तथेदं कर्माल्पदोषं बहुगुणमिदं च बहुदोषमल्पगुणमित्येवं न जानाति स बाल इत्युच्यते न स्तनंधयः ॥ ७ ॥

रा० टी०-गुर्विति । आरम्भे आरम्भसमये कर्मणां गुरुलाघवं वा फलं सुखं दोषं दुःखं वा यो न जानाति स बाल इत्युच्यते ॥ ७ ॥

गो० टी०-अन्यामपि लोकस्थितिमाह-गुरुलाघवमिति । कर्मणामारम्भे आरम्भसमये अर्थानां फलानां गुरुलाघवं गुरुत्वं लघुत्वं च फलं दोषं वा फलं फलहानिं वा यद्वा सुखरूपतां दुःखरूपतां वा यो न जानाति सः बालः अज्ञ इत्युच्यते अल्पफलकं बहुकर्मनिष्फलं च कर्मारभमाणो बुद्धिहीनः बहुफलकमल्पं कर्म सफलं कर्म चारभमाणः सुबुद्धिरित्यर्थः । तथा चात्मविनोदरूपाल्पफलं पुत्रवियोगरूपमहाफलहानिकरं मृगयाकर्म कुर्वन्नहमज्ञ एवास्मीति भावः ॥ ७ ॥

८] ति० टी०-छित्त्वा पलाशोपरोधनिष्टरयर्थामिति शेषः । पुष्पं दृष्ट्वा पुष्पमहत्त्वं दृष्ट्वा फलमहत्त्वमनुमायेत्यर्थः । गृध्नुर्लिप्सुः शोचति स्वतर्कितफलाभावात् ॥ ८ ॥

रा० टी०-कश्चिदिति । यः कश्चित्पुरुषः पुष्पमतिमनोहरपलाशकुसुमं दृष्ट्वा फले गृध्नुरभिलाषी सन् आम्रवणं छित्त्वा इदं न मनोहरपुष्पकमित्यस्य फलं न स्वादु भवितेति बुद्ध्या संछिद्य पलाशान्निषिञ्चति सः पुरुषः फलागमे फलप्राप्तिसमये शोचति तत्फलकटुत्वमुपलभ्य पश्चात्तापं करोतीत्यर्थः ॥ ८ ॥

गो० टी०-फलतारतम्यविचारमन्तरेण कर्मणि प्रवृत्तस्योक्तं बालिशत्वं दृष्टान्तमुखेन विवृणोति कश्चिदिति । लोके कश्चित्पुरुषः पुष्पं दृष्ट्वा फले गृध्नुः साभिलाषः सन् अधिकवर्णमहापुष्पवत्त्वात् तदनुगुणमहाफलं भविष्यतीति साभिलाष इत्यर्थः । आम्रवणं चूतवनम् अल्पनिर्वर्णपुष्पकं छित्त्वा पलाशोपरोधपरिहारार्थं छित्त्वा पलाशांश्च किंशुकानेव निषिञ्चति जलसेचनादिना पोषयति सः फलागमे फलप्राप्तिकाले सति अनुपभोग्यफलदर्शनात् शोचति ॥ ८ ॥

९] ति० टी०-दृष्टान्तं दार्ष्टान्तिके योजयति--अविज्ञायेति । फलं क्रियमाणकर्मणो भावि फलमविज्ञायाविचार्य कर्म त्वेव कर्मैव तु लौकिकं वैदिकं वानुधावत्यनुतिष्ठति शोचेत् तप्येदित्यर्थः ॥ ९ ॥

रा० टी०-अविज्ञायेति । यः पुरुषः फलमविज्ञाय इदं ममेष्टमिदमित्यविचार्य कर्म लौकिकीं वैदिकीं वा क्रियां अनुधावति करोति सः पुरुषः फलवेलायां शोचेत् तत्र दृष्टान्तः किंशुकस्य पलाशस्य सेचक इव ॥ ९ ॥

गो० टी०-दृष्टान्तोक्तं दार्ष्टान्तिके दर्शयति-अविज्ञायेति । भाविफलमविज्ञाय कर्म त्वेवानुधावति कर्मैवानुसरति तदनुकूलहिंसां तु न पश्यतीत्यर्थः ॥ ९ ॥

१०] ति० टी०-अस्तु प्रकृते किं तत्राह सोऽहमिति । फलागमे रामकृतस्वोत्तरक्रियया लभ्यपारलौकिकफलप्राप्तिसमये रामाभिषेकजसुखप्राप्तिसमये वा ॥ १० ॥

रा० टी०-स इति । सः कर्मफलविषयकविवेकरहितोऽहमाम्रवणं तत्स्थानीयं शुभकर्म छित्त्वा पलाशांस्तत्स्थानीयाशुभकर्माणि न्यषेचयमकरवमतः फलागमे तत्कर्मफलप्राप्तिसमये रामं त्यक्त्वा पश्चाच्छोचामि ॥ १० ॥

गो० टी०-एवं सदृष्टान्तमुक्तस्य प्रकृतोपयोगं दर्शयति-सोहमिति । आम्रवणच्छेदनपूर्वकपलाशसेचकतुल्योहमित्यर्थः । आम्रवणं छित्त्वेत्यनेन अभिषेकविघातपूर्वकरामवि-

लब्धशब्देन कौसल्ये कुमारेण धनुष्मता । कुमारः शब्दवेधीति मया पापमिदं कृतम् ॥ ११ ॥
तदिदं मेऽनुसंप्राप्तं देवि दुःखं स्वयंकृतम् । संमोहादिह बालेन यथा स्याद्भक्षितं विषम् ॥ १२ ॥
यथान्यः पुरुषः कश्चित्पलाशैर्मोहितो भवेत् । एवं मयाप्यविज्ञातं शब्दवेध्यमिदं फलम् ॥ १३ ॥
देव्यनूढा त्वमभवो युवराजो भवाम्यहम् । ततः प्रावृडनुप्राप्ता मम कामविवर्धिनी ॥ १४ ॥
अपास्य हि रसान्भौमांस्तप्त्वा च जगदंशुभिः । परेताचरितां भीमां रविराचरते दिशम् ॥ १५ ॥

यासमं लक्ष्यते पलाशांश्च न्यषेचयमित्यनेन कैकेयीप्रियकरणं लक्ष्यते ॥ १० ॥

११] ति० टी०—यदाचरतीत्यायुक्तविषयमाह—लब्धेति । कुमारोऽजकुमारः शब्दवेधीति लब्धः शब्दो येन तादृशेन मया शब्दवेधीत्येवं लब्धकीर्तिनेति यावत् । कुमारेण जीवितपुत्रकेण इदं वक्ष्यमाणम् ॥ ११ ॥

रा० टी०—ननु तर्हि दुष्कृतं कर्मेत्यत आह—लब्धेति । लब्धः श्रुतः शब्दो येन तेन धनुष्मता कुमारः शब्दवेधी अयं कुमारः शब्दश्रवणमात्रेण लक्ष्यान्विध्यतीति प्रशंसाविशिष्टेन मया पापं कृतम् ॥ ११ ॥

गो० टी०—एतदुःखानुभवस्य निदानं वक्तुमुपक्रमते—लब्धशब्देनेति । कुमारः शब्दवेधीति लब्धशब्देन प्राप्तख्यातिना मया इदं वक्ष्यमाणं पापं मुनिकुमारवधरूपं कर्मकृतमितिसंबन्धः यद्वा लब्धशब्देन लब्धगजतुल्यमुनिपुत्रशब्देन मया शब्दवेधी कुमार इत्यभिमानेन इदं वक्ष्यमाणं मुनिकुमारवधरूपं पापं कृतम् ॥ ११ ॥

१२] ति०टी०—तदिदं तत्फलमिदं दुःखम् । अज्ञानकृतकर्म०. कथमेवं फलं तत्राह—संमोहादिति । अज्ञानेनापि भक्षितं विषं यथा बालमपि हन्ति तद्वदित्यर्थः ॥ १२ ॥

रा० टी०—तदिति । तत्तस्मात्कर्मणः स्वयं कृतं निष्पादितमिदं वियोगजनितं दुःखं संप्राप्तं तत्र दृष्टान्तान्तरमाह—मोहादिदं दुःखदमिति ज्ञानाभावाद्बालेन यथा विषं भक्षितम् ॥१२॥

गो० टी०—शुभं वा अशुभं वा पुरुषकृतं कर्म लोकान्तरे जन्मान्तरे वा फलाय भवेत् मत्कृतकर्मणस्त्वत्युत्कटत्वादिहैव तत्फलं प्राप्तमित्याह—तदिदमिति । इह लोके बालेन संमोहात् भक्षितं विषं यथा दुःखरूपं स्यात्तथैव स्वयं कृतं तदिदं दुष्कृतं मे दुःखरूपम् अनुसंप्राप्तं जातमित्यर्थः ॥ १२ ॥

१३] ति० टी०—शब्दवेध्यं शब्दवेधित्वामित्यर्थे आर्षम् । इदं फलमेवं दुष्टफलमिति मयाप्यविज्ञातम् । अयं भावः—यथान्यः प्राकृतः पुरुषः पलाशैः पलाशपुष्पैर्मोहितस्तत्फलं न जानाति, तथाहमपि शब्दवेधित्वं लोकपूज्यं ज्ञात्वा तत्फलमेवं क्रूरमिति न ज्ञातवानिति। कतकस्तु—यथा पलाशपुष्पैरन्यो मोहितो भवति, तथाहं कैकेयीवाक्यैरिति शेषः । अथाज्ञानकृतस्यापि विषपानवदावश्यकं फलमित्युपसंहरति—एवमिति । शब्दवेधित्वरूपं सामर्थ्यं प्राप्य यत्कर्माविज्ञातं सत्कृतं तस्य कर्मण इदं फलं कैकेयीवाक्यकृतो मोह इत्यर्थ इत्याह ॥ १३ ॥

रा० टी०—तदेव भङ्ग्यन्तरेण सदृष्टान्तमाह—यथेति । यथा कश्चित्प्राकृतः पुरुषः पलाशैः पलाशकुसुमैः मोहितः इदमनिष्टफलकमिति ज्ञानाभाववान् सन् भवेच्छुभफलकमिति तत्फलाभिकाङ्क्षी स्यात्तथा मयापि इदमशुभं फलं यस्य तच्छब्दवेध्यमविज्ञातमत एव शब्दवेध्यमिदं फलं प्रशंसारूपशुभफलदमिदमिति मोहितोऽभवमिति शेषः ॥ १३ ॥

गो० टी०—उक्तमर्थं संग्रहेण दर्शयनुपसंहरति—यथान्य इत्यादिना । अन्यः प्राकृतः कश्चित्पलाशैः पलाशपुष्पैः "फलेलुक्" यथा मोहितो भवेत् यादृशं पुष्पं तादृशं फलं भविष्यतीति मोहं प्राप्तो भवेत् एवं ममापि मयापि शब्दो वेध्यो लक्ष्यं यस्य स शब्दवेध्यः शरः शब्दवेध्यमयं शब्दवेध्यविकारभूतं तद्धेतुकमित्यर्थः फलमविज्ञातं शब्दवेधित्वख्यातिमात्रमेव जानता मया भाव्यनर्थफलं न विज्ञातमित्यर्थः ॥ १३ ॥

१४] ति० टी०—तादृशदुष्कर्मप्राप्तिः कदेत्यत्राह—देवीति । ॥ १४ ॥

रा० टी०—संक्षिप्योक्तं सकारणं कर्म विशदयन्नाह—देवीत्यादिभिः । हे देवि यदा त्वमनूढा विवाहरहिता अभवः अहं युवराजो भवामि अभवंस्ततस्तदा भौमान्भूमौ प्राप्तान् रसानपास्य संत्याज्य शोषयित्वेत्यर्थः । तत्र हेतुः—अंशुभिः किरणैः जगत्तप्त्वा परेताचरितां परेतसेवितामतएव भीमां दिशं दक्षिणामित्यर्थः । रविराचरते प्राप्नोत् अत एव कामविवर्धिनी प्राट्टडनुप्राप्ता । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—एतादृशशब्दवेधनं कदा प्राप्तमित्याकाङ्क्षायामाह—देवीत्यादिना । अनूढा अकृतविवाहा युवत्वे सति राजा युवराजः भवामि अभवं प्राट्ट् वर्षाकालः ॥ १४ ॥

१५] ति० टी०—प्राट्टं वर्णयति—अपास्येति । भौमान्रसानपास्य निरस्य शोषयित्वेति यावत् तेनैव हेतुना जगत्तप्त्वा परेताचरितामतएव भीमां दिशं दक्षिणां दिशमा-

---

१ वेध्यमयमिति गो. पाठः । २ मदकामविवर्धनीति गो. पाठः । ३ उपास्येति गो. पाठः । ४ भीतामिति रा. पाठः । ५ आविशते इति गो. पाठः ।

उष्णमन्तर्दधे सद्यः स्निग्धा ददृशिरे घनाः । ततो जहृषिरे सर्वे भेकसारङ्गबर्हिणः ॥ १६ ॥
क्लिन्नपक्षोत्तराः स्नाताः कृच्छ्रादिव पतत्रिणः । दृष्टिवातावधूताग्रान्पादपानभिपेदिरे ॥ १७ ॥
पतितेनाम्भसाऽऽच्छन्नः पतमानेन चासकृत् । आबभौ मत्तसारङ्गस्तोयराशिरिवाचलः ॥ १८ ॥
पाण्डुरारुणवर्णानि स्रोतांसि विमलान्यपि । सुस्रुवुर्गिरिधातुभ्यः सभस्मानि भुजङ्गवत् ॥ १९ ॥
तस्मिन्नतिसुखे काले धनुष्मानिषुमान्रथी । व्यायामकृतसंकल्पः सरयूमन्वगां नदीम् ॥ २० ॥
निपाने महिषं रात्रौ गजं वाभ्यागतं मृगम् । अन्यद्वा श्वापदं किंचिज्जिघांसुरजितेन्द्रियः ॥ २१ ॥
अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः । अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥ २२ ॥

वरते गच्छति । 'आविशते' इति पाठान्तरम् 'उपास्य' इति पाठेऽपि सेवित्वेत्यर्थद्वारा शोषयित्वेत्यत्रैव पर्यवसानं बोध्यम् ॥ १५ ॥

गो० टी०–उपास्येति । उपास्य गृहीत्वा रसान् जलानि जगद्भूमिं परेताचरितां प्रेताचरितामत एव भीमां दिशं दक्षिणामित्यर्थः । आविशते आविशते स्म ॥ १५ ॥

१६] ति० टी०–सारङ्गा हरिणाश्चातका वा ॥ १६ ॥

रा० टी०–उष्णमिति । स्निग्धाः सजलाः मेघाः ददृशिरे अत एव उष्णमन्तर्दधे तिरोबभूव ततस्तस्माद्धेतोर्भेकादयः जहृषिरे तत्र भेकाः मण्डूकाः, सारङ्गाः हरिणाश्चातकाश्च, बर्हिणः मयूराः ॥ १६ ॥

गो० टी०–उष्णमिति । स्निग्धाः शीतलाः भेका मण्डूकाः, सारङ्गा हरिणाश्चातका वा ॥ १६ ॥

१७] ति० टी०–क्लिन्नाः पक्षोत्तराः पक्षोपरिभागा येषाम् अत एव कृच्छ्रात्कृच्छ्राचरणनिमित्तं स्नाता इव दृष्टियुक्तवातेन कम्पिताग्रान् ॥ १७ ॥

रा० टी०–क्लिन्नेति । क्लिन्ना आर्द्राः पक्षोत्तराः पक्षोत्तरभागाः येषां ते अत एव कृच्छाद्व्रतविशेषाद्धेतोरिव स्नाताः पतत्रिणः पक्षिणः दृष्टिवाताभ्यामधूतानि अग्राणि येषां तान्पादपान्दृक्षानभिपेदिरे प्रापुः ॥ १७ ॥

गो० टी०–क्लिन्नपक्षोत्तरा इति । क्लिन्नपक्षोत्तराः सिक्तपक्षोपरिभागाः अत एव स्नाता इव स्थिताः दृष्टिवातावधूताग्रान् दृष्टिवाताभ्यां कम्पिताग्रानपि पादपान् कृच्छ्रात् क्लिन्नपक्षत्वेन यत्नात् अभिपेदिरे आरूढाः ॥ १७ ॥

१८] ति० टी०–पतमानेन पतता मत्ताः सारङ्गा यस्मिंस्तादृशोऽचलस्तोयराशिरिवाबभौ ॥ १८ ॥

रा० टी०–पतितेनेति । पतितेन भूतकालोद्भवपातविशिष्टेन पतमानेन वर्तमानकालोद्भवपातविशिष्टेन च अम्भसा जलेन आच्छन्नः मत्तसारङ्गः मदविशिष्टगजः अचलः तरङ्गरहितः तोयराशिः समुद्र इव आबभौ 'सारङ्गो हरिणे भृङ्गे चातके शबले गजे' इति च निघण्टुः ॥ १८ ॥

गो० टी०–पतितेनेति । पतितेन पतमानेन च निरन्तरेणेत्यर्थः । अम्भसा वर्षजलेन छन्नः मत्तसारङ्गः मत्तगजः 'सारङ्गो हरिणे भृङ्गे चातके शबले गजे' इति निघण्टुः । अचलः गिरिः अचलो निश्चलः निस्तरङ्गः तोयराशिः समुद्र इवाबभौ अचलपदस्याद्रत्या एकस्य गिरिपरस्य विशेष्यत्वम् अन्यस्य तोयराशिविशेषणत्वमिति ध्येयम् ॥ १८ ॥

१९] ति० टी०–गिरिधातुभ्यो धातुरूपहेतुभ्यः क्वचित्पाण्डुरधातुसंयोगात्पाण्डुराणि क्वचिदरुणधातुसंयोगादरुणानि क्वचित्सभस्मानि, भस्मसंबन्धाद्भुजंगवत्कुटिलानीति शेषः ॥ १९ ॥

रा० टी०–पाण्डुरेति । विमलानि मलरहितान्यपि स्रोतांसि भुजङ्गवत्कुटिलगतिमत्त्वेन भुजङ्गसदृशानि गिरिधातुभ्यः हेतुभ्यः पाण्डुरारुणवर्णानि पाण्डुरवर्णारुणवर्णविशिष्टानि सभस्मानि भस्मसंबन्धाद्भस्मसहितानि च सुस्रुवुः ॥ १९ ॥

गो० टी०–पाण्डुरारुणवर्णानीति । गिरिधातुभ्यो हेतुभ्यः विमलान्यपि स्रोतांसि पाण्डुरारुणवर्णानि पाण्डुरधातुसंयोगात् पाण्डुरवर्णानि अरुणधातुसंयोगादरुणवर्णानि सभस्मानि दावानलभस्मसहितानि भुजङ्गवत् नानावर्णयुक्तसर्पा इव कुटिलानि सुस्रुवुः ॥ १९ ॥

२०] ति० टी०–व्यायामो मृगयाविहारः ॥ २० ॥

२१] ति० टी०–जिघांसुरन्वगामित्यन्वयः ॥ २१ ॥

रा० टी०–तस्मिन्निति । अतिसुखे अतिसुखकरे तस्मिन्काले धनुष्मान् धनुर्विशिष्टः इषुमान्बाणविशिष्टः रथी रथविशिष्टः अजितेन्द्रियः न जितानि मृगयाविहाराभिवर्तिता नीन्द्रियाणि येन सः अत एव व्यायामे मृगयाविहारे कृतसंकल्पो निश्चयो येन सः अत एव महि प्रशंसनीये निपाने नदीजलपानोचितनदीप्रदेशे अभ्यागतं प्राप्तं वन्य उपद्रवकारिणं गजं मृगं हिंसार्थमन्वेषणकर्तारमन्यद्वा किंदिच्छ्वापदं व्याघ्रादिं जिघांसुरहं सरयूं नदीमन्वगाम् । श्लोकद्वयमेकान्वयि 'उपसर्गे परीक्षे च षकारः परिकीर्तितः' इत्येकाक्षरः । एको वा शब्दः हेतौ ॥ २० ॥ २१ ॥

गो० टी०–तस्मिन्निति । आदिश्लोकद्वयमेकं वाक्यम् व्यायामकृतसंकल्पः मृगयाविहारे कृतसंकल्प इत्यर्थः । निपीयते अस्मिन्निति निपानम् नद्यवतारस्थलं तस्मिन् श्वापदं व्याघ्रादिदुष्टमृगम् ॥ २० ॥ २१ ॥

२२] ति० टी०–पूर्यतः स्रवन्तस्यमार्षम् ॥ २२ ॥

---

१ नद्यामिति गो. पाठः । २ अन्यं वेति गो. पाठः । ३ कंचिदिति गो. पाठः ।

ततोऽहं शरमुद्धृत्य दीप्तमाशीविषोपमम् । शब्दं प्रति गजप्रेप्सुरभिलक्ष्यमपातयम् ॥ २३ ॥
अमुञ्चं निशितं बाणमहमाशीविषोपमम् । तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः ॥ २४ ॥
हा हेति पततस्तोये बाणाद्व्यथितमर्मणः । तस्मिन्निपतिते भूमौ वागभूत्तत्र मानुषी ॥ २५ ॥
कथमस्मद्विधे शस्त्रं निपतेच्चै तपस्विनि । प्रविविक्तां नदीं रात्रावुदाहारोऽहमागतः ॥ २६ ॥
इषुणाऽभिहतः केन कस्य वाऽपकृतं मया । ऋषेर्हि न्यस्तदण्डस्य वने वन्येन जीवतः ॥ २७ ॥
कथं नु शस्त्रेण वधो मद्विधस्य विधीयते । जटाभारधरस्यैव वल्कलाजिनवाससः ॥ २८ ॥
को वधेन ममार्थी स्यात्किं वास्यापकृतं मया । एवं निष्फलमारब्धं केवलानर्थसंहितम् ॥ २९ ॥

रा० टी०–अथेति । अथ सरयूतीरगमनानन्तरमन्धकारे अन्धकारसमये जले पूर्यतः पूर्यमाणस्य कुम्भस्य घटस्य अच्छविषये प्रभूतं घोषं नर्दतः वारणस्य घोषमिव अश्रौषम् ॥२२॥

गो० टी०–अथान्धकार इति । पूर्यत इति शत्रन्तत्वमार्षम् ॥ २२ ॥

२३] ति० टी०–शब्दं प्रति शब्दं लक्ष्यं कृत्वा, यद्वा शब्दावगतवेध्यं प्रति गजप्रेप्सुर्गजरूपं वध्यं प्राप्तुमिच्छुः । तज्जिघांसया शरमुद्धृत्याभिलक्ष्यं संमुखमपातयम् ॥ २३ ॥

रा० टी०–तत इति । ततस्तच्छब्दश्रवणानन्तरमाशीविषोपमं शरमुद्धृत्य गजप्रेप्सुः वध्यत्वेन गजं प्राप्तुमिच्छुरहमभिलक्ष्यं लक्ष्यगजसमीपवर्तिनः शब्दं प्रति अपातयमत्यजम् ॥ २३ ॥

गो० टी०–ततोऽहमिति । गजप्रेप्सुः गजरूपवेध्यं प्राप्तुमिच्छुः हननेच्छुरित्यर्थः । शब्दं प्रति शब्दं लक्ष्यं कृत्वा अभिलक्ष्य शब्दकर्तृभूतो गज एतावन्मात्रे तिष्ठतीति लक्षीकृत्येत्यर्थः । शरमपातयमिति संबन्धः ॥ २३ ॥

२४–२५] ति० टी०–यत्र निशितं बाणममुञ्चं तत्र वनौकस आरण्यकमनुष्यस्य बाणाभिहतमर्मणस्तोये पततो हा हेति व्यक्ता वागुषसि प्रादुरासीत् तत्र भूमौ तस्मिन्निपतिते सति मानुषी वागभूत् ॥ २४ ॥ २५ ॥

रा० टी०–अमुञ्चमिति । पदानि चितं तीक्ष्णं बाणमहममुञ्चं तत्र तस्मिन्नुषसि प्रातःकाले बाणात् व्यथितमर्मणः अत एव तोये पततः वनौकसः वनवासिनः हा हेति शब्देन व्यक्ता वाक् प्रादुरासीत् । सार्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०–अमुञ्चमिति । यत्र बाणममुञ्चं तत्र वनौकसः वनम् ओकः स्थानं यस्य तस्य तपस्विन इति यावत् व्यक्ता वाक् प्रादुरासीदिति संबन्धः ॥ २४ ॥

रा० टी०–तस्मिन्निति । तस्मिन् वनवासिनि तत्र भूमौ निपतिते सति अस्मद्विधे तपस्विनि तपोनिरते शस्त्रं कथं निपतेत् इति मानुषी मनुष्योच्चारिता वागभूत् मम शस्त्रोत्पातादसंभवमेतदिति तात्पर्यम् । अर्धद्वयमेकान्वयि ॥ २५ ॥

गो० टी०–विविच्य वागुदितेत्याह–तस्मिन्नित्यादि । अस्मद्विधे अजातशत्रौ प्रविविक्तां प्रकर्षेण निर्जनां रात्रौ अपररात्रौ उदकमाहारयतीत्युदाहारः मन्थौदनेत्यादिना उदकशब्दस्योदादेशः । यद्यपि हारशब्दे परे उदादेशो विहितः तथाप्येकदेशविकृतमनन्यवद्भवतीति दीर्घः, छान्दसो वा । किं कृतं किमनिष्टं कृतं न्यस्तदण्डस्य उपरतवाङ्मनःकायसंबन्धिपरहिंसस्य 'दण्डोऽस्त्री शासने राज्ञां हिंसायां दमसैन्ययोः' इति विश्वः अर्थी प्रयोजनवान् गुरुतल्पगं गुरुदारगम् 'तल्पं शय्याट्टदारेषु' इत्यमरः । हत इत्येतन्मातापितरावित्यत्र वचनविपरिणामेन योजनीयम् सर्वे निहता इत्युक्तिर्मातापितृजीवनहेतुभूतस्य स्वस्य वधात् अकृतात्मना अनिश्चितबुद्धिना इति वागभूदिति पूर्वेणान्वयः ॥ २५–२२ ॥

२६] ति० टी०–तामेव वाणीमाह–कथमित्यादि । अस्मद्विधे तपस्विन्यजातशत्रौ प्रविविक्तां निर्जनां रात्रावपररात्रे उदाहार इत्यत्र दीर्घ आर्षः ॥ २६ ॥

रा० टी०–प्रविविक्तामिति । उदाहारः उदकाहरणकर्ता योऽहं प्रविविक्तां जनसंचाररहितां नदीमागतः सोऽहं केन पुरुषेण इषुणा बाणेनाभिहतः कस्य पुरुषस्य मयापकृतम् ॥२६॥

२७] ति० टी०–न्यस्तदण्डस्य त्यक्तपरपीडस्य ॥ २७ ॥

रा० टी०–ऋषेरिति । न्यस्तदण्डस्य त्यक्तपरपीडनस्य वन्येन फलादिना जीवतः मद्विधस्य ऋषेः शस्त्रेण वधः कथं विधीयते ॥ २७ ॥

२८] ति० टी०–जटाभारेत्यादिना हन्तुरपि लाभाभावः सूचितः ॥ २८ ॥

रा० टी०–जटेति । जटाभारधरस्य द्रव्यादिभाररहितस्येत्यर्थः । मम वधेन कोऽर्थी धनादिमान् स्यात् । नन्वपकारिवध एवार्थः इत्यत आह–कस्य मयाऽपकृतं न कस्यापीत्यर्थः ॥ २८ ॥

२९] ति० टी०–मम वधेन कः पुमानर्थी मनुष्यमांसेन न कस्यापि प्रयोजनमिति व्यर्थ एव मद्वध इति भावः । परलोकनाशकत्वात्केवलानर्थसंहितमिह लोके च फलरहितम् ॥२९॥

रा० टी०–एवमिति । एवमनेन प्रकारेण निष्फलं फलरहितं कर्म आरब्धं आरम्भकर्तारं केवलानर्थसंहितं केवलानर्थेन प्रयोजनसंसर्गशून्यस्वार्थविध्वंसेन संहितं सहितं जनं

१ अस्य त्वपतयमिति गो. पाठः । २ बाणाभिहतेति गो. बाणश्चयितेति रा. पाठः । ३ बाणे इति गो. पाठः । ४ स्विति गो पाठः । ५ वा किं कृतमिति गो. पाठः । ६ अपररात्र इति वृत्तं दृश्यते ।

न [1]कैचित्साधु मन्येत यथैव गुरुतल्पगम् । [2]नेमं तथानुशोचामि जीवितक्षयमात्मनः ॥ ३० ॥
मातरं पितरं चोभावनुशोचामि मद्वधे । तदेतन्मिथुनं वृद्धं चिरकालभृतं मया ॥ ३१ ॥
मयि पञ्चत्वमापन्ने कां वृत्तिं वर्तयिष्यति । वृद्धौ च मातापितरावहं चैकेषुणा हतः ॥ ३२ ॥
केन स्म निहताः सर्वे सुबालेनाकृतात्मना । तां गिरं करुणं श्रुत्वा मम धर्मानुकाङ्क्षिणः ॥ ३३ ॥
कराभ्यां सशरं चापं व्यथितस्यापतद्भुवि । तस्याहं करुणं श्रुत्वा [3]ऋषेर्विलपतो निशि ॥ ३४ ॥
संभ्रान्तः शोकवेगेन भृशमासं विचेतनः । तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः ॥ ३५ ॥
अपश्यमिषुणा तीरे सरय्वास्तापसं हतम् । अवकीर्णजटाभारं प्रविद्धकलशोदकम् ॥ ३६ ॥
पांसुशोणितदिग्धाङ्गं शयानं शल्यवेधितम् । स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतनम् ॥ ३७ ॥
इत्युवाच वचः क्रूरं दिधक्षन्निव तेजसा । किं तवापकृतं राजन्वने निवसता मया ॥ ३८ ॥
जिहीर्षुरम्भो गुर्वर्थं यदहं ताडितस्त्वया । एकेन खलु बाणेन मर्मण्यभिहते मयि ॥ ३९ ॥

[1] कश्चित्कस्मिंश्चिल्लोके गुरुतल्पगमिव साधु न मन्येत एतेन साधुकृतमिति कश्चिन्न वदिष्यतीत्यर्थः ॥ २९ ॥

३०-३१] ति० टी०-क्वचिदिहलोके परत्र वा यथा गुरुतल्पगं न साधु मन्यन्त एवमेनं न मन्येत कोऽपीत्यर्थः । आत्मन इमं जीवितक्षयं नानुशोचामि ॥ ३० ॥ ३१ ॥

रा० टी०-नेति । मद्वधे सति मातरं पितरञ्चौ यथानुशोचामि तथात्मनः स्वस्य इमं प्राप्तं जीवितक्षयं प्राणनाशं नानुशोचामि ॥ ३० ॥

रा० टी०-तदिति । मया चिरकालभृतं बहुकालं पोषितं वृद्धं तदेतन्मिथुनं मातापितृयुग्मं मयि पञ्चत्वमापन्ने प्राप्ते सति कां वृत्तिं जीविकां वर्तयिष्यति प्राप्स्यति ॥ ३१ ॥

३२] ति० टी०-एकेनेषुणा वृद्धौ हतौ, अहं च हतः मद्वधेन तयोर्वधस्य सिद्धत्वादित्याशयः ॥ ३२ ॥

रा० टी०-वृद्धाविति । यस्य मातापितरौ वृद्धौ सोऽहमकृतात्मना अनिश्चितान्तःकरणेन अत एव सुबालेन केन पुरुषेणैकेषुणा एकबाणेन हतोऽस्मि येनैकस्यापि हननेन वयं सर्वे निहताः रक्षकाभावान्मातापितरावपि निहतप्रायावित्यर्थः ॥ ३२ ॥

३३] ति० टी०-अकृतात्मनाऽजितेन्द्रियेण धर्मानुकाङ्क्षिणो धर्मप्रतीक्षाशीलस्य मम कराभ्यामित्यन्वयः ॥ ३३ ॥

रा० टी०-तामिति । करुणां कारुण्यजनिकां तां गिरं श्रुत्वा विद्यमानस्य धर्मानुकाङ्क्षिणः धर्ममात्रापेक्षासहितस्य अत एव व्यथितस्य मे सशरं शरान्तरसहितं चापं श्रुव्यपतत् ॥ ३३ ॥

गो० टी०-तामिति । सशरं चापमित्यनेन शरे सुक्तेऽपि हस्तलाघवाच्छरान्तरं धनुषि संहितवानित्यवगम्यते करुणां गिरं श्रुत्वा करुणाजनकं वचः श्रुत्वा स्थितस्येति शेषः ॥३३॥

३४-३५] ति० टी०-करुणं करुणाजनकं वचः श्रुत्वा विलपतः । 'लालप्यतः' इति पाठे तु यङन्ताच्छता आर्षः ॥ ३४ ॥ ३५ ॥

रा० टी०-तस्येति । विलपतस्तस्य ऋषेः करुणं करुणाजनकं वचः श्रुत्वा शोकवेगेन भृशं संभ्रान्तः उद्वेगं प्राप्तः अत एव विचेतन आसं लालप्यत इति पाठे तु यङन्ताच्छता आर्षः इति भट्टाः 'लालपतः' इति भूषणपाठः ॥ ३४ ॥

गो० टी०-तस्येति । लालपत इति यङ्लुगन्ताच्छतृप्रत्ययः प्रलपत इत्यर्थः विलपनमित्यर्थसिद्धम् ॥ ३४ ॥

३६] ति० टी-प्रविद्धं ध्वस्तं पर्यस्तं वा ॥ ३६ ॥

रा० टी०-तमिति । तम् ऋषिणाधिष्ठितं देशमागम्य दीनसत्त्वः क्षीणबलः अत एव सुदुर्मनाः अहं अवकीर्णजटाभारमवकीर्णः शिथिलीभूतो जटाभारो यस्य तं प्रविद्धं विभिन्नं कलशोदकमुदककलशो यस्य तं पांशुशोणिताभ्यां दिग्धं व्याप्तमङ्गं यस्य तमिषुणा हतमत एव शल्यपीडितं विद्धबाणजनितपीडाविशिष्टमत एव शयानं भुवि पतितं तापसमपश्यम् । अर्धचतुष्टयमेकान्वयि ॥ ३५ ॥ ३६ ॥

गो० टी०-तमिति । दीनसत्त्वः दीनहृदयः सुदुर्मनाः अत्यन्तदुःखितमनाः प्रविद्धकलशोदकं पर्यस्तकलशोदकमित्यर्थः नतु ध्वस्तकलशोदकमिति ततस्तं घटमादाय पूर्णं परमवारिणेति वक्ष्यमाणविरोधात् पांशुशोणितदिग्धाङ्गं पांशुविशिष्टशोणितेन लिप्ताङ्गं शल्यपीडितं शरापीडितम् ॥ ३५ ॥ ३६ ॥

३७-३९] ति० टी०-त्रस्तं नेत्राभ्यामुद्वीक्ष्य॥३७-३९॥

रा० टी०-स इति । स तापसः त्रस्तं भीतिविशिष्टमत एव अस्वस्थचेतनं मां सशुद्वीक्ष्य तेजसा दिधक्षन् दग्धुमिच्छन्निव क्रूरं प्रातिभासिककूरत्वविशिष्टमितीदं वच उवाच ॥३७॥

गो० टी०-स मामुद्वीक्ष्येति । त्रस्तं भीतमत एवास्वस्थचेतसं व्याकुलचित्तम् ॥ ३७ ॥

रा० टी०-वचनाकारमाह-किमिति । हे राजन् ! मया

[1] कश्चिदिति गो. पाठः । [2] नाहमिति गो. पाठः । [3] करुणामिति गो. रा. पाठः । [4] निशि लालपतो बहिति गो. पाठः । [5] पीडितमिति गो. रा. पाठः । [6] चेतसमिति गो. पाठः । [7] तत इति गो. पाठः ।

द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे । तौ नूनं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ ॥ ४० ॥
चिरमाशां कृतां कष्टां तृष्णां संधारयिष्यतः । न नूनं तपसो वास्ति फलयोगः श्रुतस्य वा ॥ ४१ ॥
पिता यन्मां न जानीते शयानं पतितं भुवि । जानन्नपि च किं कुर्यादशक्तश्चापरिक्रमः ॥ ४२ ॥
भिद्यमानमिवाशक्तस्त्रातुमन्यो नगो नगम् । पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ॥ ४३ ॥
न त्वामनुदहेत्क्रुद्धो वनमग्निरिवैधितः । इयमेकपदी राजन्यतो मे पितुराश्रमः ॥ ४४ ॥
तं प्रसादय गत्वा त्वं न त्वां संकुपितः शपेत् । विशल्यं कुरु मां राजन्मर्म मे निशितः शरः ॥ ४५ ॥
रुणद्धि मृदु सोत्सेधं तीरमम्बुरयो यथा । सशल्यः क्लिश्यते प्राणैर्विशल्यो विनशिष्यति ॥ ४६ ॥
इति मामविशच्चिन्ता तस्य शल्यापकर्षणे । दुःखितस्य च दीनस्य मम शोकातुरस्य च ॥ ४७ ॥

किं तवापकृतं येनापकारेण गुर्वर्थं मातापितृक्रियानिर्वाहार्थमम्भो जलं जिहीर्षुराहर्तुमिच्छुरहं त्वया ताडितः ॥ ३८ ॥

रा० टी०–एकेनेति । एकेन बाणेन मर्मणि मर्मस्थले मयि अभिहते सति मे जनयिता जनकः माता चेमौ द्वौ अन्धावपि निहतौ रक्षकाभावेन निहतप्रायौ ॥ ३९ ॥

गो० टी०–किं त्वयेति । जिहीर्षुः आहर्तुमिच्छुः गुर्वर्थं मातापितृनिमित्तम् ॥ ३८ ॥ ३९ ॥

४०] ति० टी०—जनयिता पिता नूनं निश्चयेन मत्प्रतीक्षौ ॥ ४० ॥

रा० टी०–ताविति । पिपासितौ पातुमिच्छू अत एव मत्प्रतीक्षौ मत्कर्मकप्रतीक्षावन्तौ तौ मातापितरौ कष्टां कष्टसपादिकां तृष्णां पिपासाहेतुकां चिरं कृतां बहुकालतो निष्पन्नामाशां मदानीतजलविषयकोत्कटेच्छां संधारयिष्यतः ॥४०॥

गो० टी०–ताविति । आशाकृतां पुत्रो मे जलमाहरिष्यतीत्याशासहितां तृष्णां पिपासां कष्टां दुःसहाम् ॥ ४० ॥

४१] ति० टी०–कृताशां पुत्रो जलमानेष्यतीत्येवंरूपां ममागमनात्तृष्णां पिपासां च चिरं धारयिष्यतः तपसः श्रुतस्य वेत्यत्र मामकस्य पित्र्यस्य चेति शेषः । फलयोगः फलसंबन्धो नास्ति ॥ ४१ ॥

रा० टी०–नेति । तपसः मदाचरितशुभकर्मणः श्रुतस्य मच्छ्रवणविषयीभूतेतिहासपुराणादेर्वा फलयोगः फलसंबन्धः मयि नास्ति यद्यस्माद्धेतोः पतितं बाणेन पातितमत एव भुवि शयानं मां न जानीते एतेन तज्ज्ञाने यथाकथंचिद्दुःखनिवृत्तिः स्यादिति संभावना सूचिता ॥ ४१ ॥

गो टी०–न नूनमिति । तपसः श्रुतस्य वेत्यत्र मामकस्येति विशेषणं देयम् ॥ ४१ ॥

४२] ति० टी०–अपरिक्रमः संचाराक्षमोऽन्धत्वात्॥४२॥

रा० टी०–दुःखनिवर्तनस्याशक्यत्वादाह–जानन्निति । अपरिक्रमः पङ्गुत्वेन संचाररहितः अत एव अशक्तः पिता जानन्नपि किं कुर्यात् न किमपीत्यर्थः अकरणे दृष्टान्तः भिद्यमानं नगं तटं त्रातुमशक्तिः अन्यो नग इव ॥ ४२ ॥

गो० टी०–जानन्निति । अपरिक्रमः असंचारः पङ्गुरिति यावत् भिद्यमानं वातादिनेति शेषः ॥ ४२ ॥

४३] ति० टी०–अशक्तिर्वृद्धत्वात् वातादिना भिद्यमानं नगं टङ्कमन्यो नग इव मां त्रातुमशक्तः त्वमेव मे पितुराचक्ष्व ॥ ४३ ॥

रा० टी०–राजकर्तव्यं बोधयन्नाह–पितुरिति । आचक्ष्व मद्वृत्तान्तं कथय । अर्थं पृथक् ॥ ४३ ॥

गो० टी०–पितुरिति । राघवेति संबोधनात् सरयूतीरे बहुशो मृगयापर्यटनेन पूर्वमेव दशरथं ज्ञातवानित्यवगम्यते । न त्वामनुदहेदिति । अन्यथा दहेदिति भावः ॥ ४३ ॥

४४] ति० टी०–एधितो वर्धितो वह्निर्वनमिव त्वां न दहेत् मा दहत्वित्यर्थः एकपदी सूक्ष्ममार्गः यतो यया एकपया मे पितुराश्रमः प्राप्यते सेयमेकपदी ॥ ४४ ॥

रा० टी०–तं शापभीतमवलोक्याह–नेति । एधितः प्रवृद्धः अग्निर्वनमिव क्रुद्धो मत्पिता त्वां न दहेत् तेन पितुरतिशान्तिमत्त्वं ध्वनितम् । आश्रमप्रापकमार्गं बोधयन्नाह–इयमेकपदी मार्गः यतो यया आश्रमः प्राप्यते इति शेषः तेनानयैव गच्छेति सूचितम् 'वर्त्मन्येकपदीति च' इत्यमरः ॥४४॥

गो० टी०–इयमिति । एकपदी एकपदन्यासमात्रयुक्ता सरणिरित्यर्थः । ' वर्त्मन्येकपदी ' इत्यमरः । यतः यत्रैकपयाम् ॥ ४४ ॥

४५–४७] ति० टी०–तया गत्वा तथा प्रसादय यथा त्वां न शपेत् मां विशल्यं कुरु ते शरो मे मर्म रुणद्धि पीडयति । मृदु सिकताप्रायम् सोत्सेधमुच्छ्रायवत्तीरम् अम्बुरयो नदीवेग इव ॥ ४५–४७ ॥

रा० टी०–तमिति । प्रसादय प्रसन्नं कुरु यतः संकुपितः पिता न शपेत् । अर्धं पृथक्–विशल्यमिति । हे राजन्! विशल्यं विद्धबाणरहितं कुरु तत्र हेतुः शरः मे मर्म मर्मस्थलं रुणद्धि पीडयति तत्र दृष्टान्तः मृदुवालुकामयत्वेनातिस्निग्धं सोत्सेधमुन्नततत्वविशिष्टं तीरमम्बुरयः गङ्गाप्रवाहवेगो यथा । अर्धद्वयमेकान्वयि ॥ ४६ ॥

---

१ आशामकृत्स्नामिति गो. पाठः । २ अशक्तिरपरिक्रम इति गो. पाठः । ३ अशक्तिरिति रा. पाठः । ४ वह्निरिति गो. पाठः । ५ त्वां स इति गो. पाठः ।

लक्षयामास स ऋषिश्चिन्तां मुनिसुतस्तदा । ताम्यमानं स मा कृच्छ्रादुवाच परमार्थवित् ॥ ४८ ॥
सीदमानो विवृत्ताङ्गोऽचेष्टमानो गतः क्षयम् । संस्तभ्य शोकं वैयेंण स्थिरचित्तो भवाम्यहम् ॥ ४९ ॥
ब्रह्महत्याकृतं तापं हृदयादपनीयताम् । न द्विजातिरहं राजन्मा भूत्ते मनसो व्यथा ॥ ५० ॥
शूद्रायामस्मि वैश्येन जातो नरवराधिप । इतीव वदतः कृच्छ्राद्घ्राणाभिहतमर्मणः ॥ ५१ ॥
विघूर्णतो विचेष्टस्य वेपमानस्य भूतले । तस्य त्वताम्यमानस्य तं बाणमहमुद्धरम् ॥
स मामुद्वीक्ष्य संत्रस्तो जहौ प्राणांस्तपोधनः ॥ ॥ ५२ ॥

जलार्द्रगात्रं तु विलप्य कृच्छ्रं मर्मव्रणं संततमुच्छ्वसन्तम् ।
ततः सरय्वां तमहं शयानं समीक्ष्य भद्रे सुभृशं विषण्णः ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०—तपस्विववचनश्रवणानन्तरकालिकं राजवृत्तमाह—सेति । सशल्यः बाणसहितोऽयं प्राणैः क्लिश्यते विशल्यश्चेद्विनशिष्यति विनङ्क्ष्यति इति चिन्ता शल्यापकर्षणे मामविशत्॥४६॥

गो० टी०—विशल्यमिति । मर्म रुणद्धि पीडयतीत्यर्थः । मृदुसिकतामयं सोत्सेधम् औन्नत्यवत् अम्बुरयः नदीवेगः ॥ ४५ ॥ ४६ ॥

रा० टी०—दुःखितस्येति । शोकातुरस्य मे चिन्तां स ऋषिर्ज्ञानी मुनिसुतः लक्षयामास अत एव ताम्यमानं मां कृच्छ्रादुवाच । सार्धश्लोक एकान्वयी ॥ ४७ ॥ ४८ ॥

गो० टी०—दुःखितस्येति । दुःखितस्य महदकृत्यं प्राप्तमिति दुःखितस्य शोकातुरस्य ब्रह्महत्या भविष्यतीति भिया शोकेन पीडितस्य ॥ ४७ ॥

४८] ति० टी०—मम चिन्तां लक्षयामासेत्यन्वयः । एवं चिन्तया शल्यं नोद्धरतीति ज्ञातवान् परमार्थः शास्त्रतत्त्वम् । 'परमार्तवत्' इति पाठे परमार्तः सन्नित्यर्थः ॥ ४८ ॥

गो० टी०—ताम्यमान इति । क्षयं गतः नाशं प्राप्तुमुपक्रान्तः संस्तभ्येत्यादिश्लोकद्वयस्य इति माम्बुवाचेत्यनेनान्वयः । स्थिरचित्तो भवाम्यहमित्यत्र स्थिरचित्तो भवानेति च पाठः शूद्रायां वैश्येन जातः करण इत्यर्थः 'शूद्राविशोस्तु करणः' इत्यमरः ॥ ४८—५० ॥

४९] ति० टी०—क्षयं शक्तिक्षयं गतः प्राप्तः विवृत्ताङ्गः परावृत्तनेत्रः अचेष्टमानो हस्तपादादिचेष्टारहितः धैर्येण शोकं संस्तभ्याहं स्थिरचित्तो भवामि मम चित्ते मोहो नास्तीत्यर्थः अतो यद्ददामि तच्छृण्वित्यर्थः । शोकं ब्रह्महत्याभिजं संस्तभ्य त्यक्त्वा अधुना स्थिरचित्तो भवेति पाठान्तरेऽर्थः ॥ ४९ ॥

रा० टी०—वचनाकारमाह—सीदमान इति । सीदमानः क्लेशं प्राप्तः तत्र हेतुः विवृत्ताङ्गः विपरिणतनेत्रादिविशिष्टः अत एव अचेष्टमानः कायव्यापाररहितः अत एव क्षयं विनाशं गतः प्राप्तोऽहं धैर्येण शोकं संस्तभ्य निरुध्य स्थिरचित्तो भवामि ॥४९॥

५०] ति० टी०—अतो ब्रह्महत्याकृतं तापं भयम् अर्थचादिस्तापशब्दः ॥ ५० ॥

रा० टी०—ब्रह्महत्येति । हे राजन्! ब्रह्महत्याकृतं ब्राह्मण हननजनितं पापं हृदयात्स्वान्तःकरणादपनीयतां निःसार्यतां ब्रह्महत्यादोषो मां प्राप्तः इति स्वनिश्चयस्त्यज्यतामित्यर्थः । ननु कथं त्याग इत्यत आह—अहं द्विजातिर्न अतस्ते मनसो व्यथा दुःखं मास्तु ॥ ५० ॥

५१] ति० टी०—वैश्येन शूद्रायां जातः करणः इतीव इत्येवंजातीयकम् ॥ ५१ ॥

५२] ति० टी०—आताम्यमानस्य ताम्यतः व्यथया संकुचिताङ्गस्येति यावत् । उद्धरम् अडभाव आर्षः संत्रस्तः प्राणहरत्वात् तपोधनस्तत्कुमारः ॥ ५२ ॥

रा० टी०—नन्वं कोऽसीत्यत आह—शूद्रायामिति । वैश्येन शूद्रायामहं जातोऽस्मि तेन करणोऽस्मीति सूचितं कृच्छ्रादितीव अतीव वदतः विघूर्णतः लुण्ठतः अत एव विचेष्टस्य उचितव्यापाररहितस्य आताम्यमानस्य अतिग्लानिं प्राप्नुवतस्तस्य मुनिसुतस्य बाणमुद्धरं आगमशास्त्रानित्यत्वादडभावः 'शूद्राविशोस्तु करणः' इत्यमरः । श्लोकद्वयमेकान्वयि ॥ ५१ ॥ ५२ ॥

रा० टी०—स इति । संत्रस्तः मातापित्रोर्निर्वाहः कथं भविष्यतीतिसंभावनाहेतुकसंत्रासविशिष्टः स तपोधनः मामुद्वीक्ष्य प्राणाञ्जहौ । अर्धं पृथक् ॥ ५३ ॥

गो० टी०—इतीति । विघूर्णतः कदाचिदतीव वेपमानस्येत्यर्थः विचेष्टस्य कदाचिदिति शेषः । वेपमानस्य कदाचिदीषत्कम्पमानस्येत्यर्थः । आनम्यमानस्य व्यथया संकुचिताङ्गस्येत्यर्थः । नानथमानस्येति पाठे अतिशयेन नदत इत्यर्थः । उद्धरम् उदहरम् अडभावोऽनित्यत्वात् ॥ ५१ ॥ ५२ ॥

५३] ति० टी०—कृच्छ्रं मर्मव्रणं प्राप्य विलप्य च संत-

१ हृदये इति गो. पाठः । २ ताम्यमानः इति गो. पाठः । ३ परमार्तवदिति गो. परमार्थवदिति रा. पाठः । ४ विवृत्ताङ्गश्चेष्टमान इति रा. पाठः । ५ वेष्टमान इति गो. पाठः । ६ पाप्मेति गो. रा. पाठः । ७ जनपदाधिपेति गो.पाठः । ८ आनम्येति गो. आतम्येति रा. पाठः । ९ कृच्छ्रादिति गो. पाठः। १० ऽस्मीति गो. पाठः ।

चतुःषष्टितमः सर्गः ।

प्राप्तजरद्दम्पतिरहं ताभ्यां पुत्रवृत्तं न्यवेदयम्, तौ च पुत्रान्तिकं प्रापयम्, तमालिङ्ग्य करुणं विलपन्तौ तौ तस्मै निवापाञ्जलिं ददतुः । प्राप्तदिव्यदेहः स वृद्धावाश्वास्य स्वर्गं जगाम, पुत्रवियोगदुःखितौ तौ पुत्रशोकादन्तकरं शापं मह्यं वितीर्य देहं विमुच्य परं प्रापतुः । निवेद्यैवं विलपन्दशरथोऽपरात्रे राममनुस्मृत्य प्राणाञ्जहौ ।

वधमप्रतिरूपं तु महर्षेस्तस्य राघवः । विलपन्नेव धर्मात्मा कौसल्यामिदमब्रवीत् ॥ १ ॥
तदज्ञानान्महत्पापं कृत्वा संकुलितेन्द्रियः । एकस्त्वचिन्तयं बुद्ध्या कथं नु सुकृतं भवेत् ॥ २ ॥
ततस्तं घटमादाय पूर्णं परमवारिणा । आश्रमं तमहं प्राप्य यथाख्यातपथं गतः ॥ ३ ॥
तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ । अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ॥ ४ ॥
तन्निमित्ताभिरासीनौ कथाभिरपरिश्रमौ । तामाशां मत्कृते हीनावुपासीनावनाथवत् ॥ ५ ॥

तमुच्छ्वसन्तं सरयूतीरे मृत्वा शयानं वीक्ष्याहं भृशं विषण्णोऽभवमिति कौसल्यां प्रत्युक्तानुवादः ॥ ६३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०–जलार्द्रेति । सरय्वां शयानमत एव जलार्द्रगात्रं सरयूजलक्लिन्नशरीरं मर्मत्रणं मर्मेषु व्रणं यस्य तमत एव कृच्छ्रं यथा स्यात्तथा विलप्य विविधमुक्त्वा उच्छ्वसन्तं तं तपस्विनं समीक्ष्य सुभृशम् अतीव विषण्णः दुःखी आसमिति शेषः ॥ ६४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–जलार्द्रगात्रमिति । अयं श्लोकः प्रथमदृष्टानुवादः मर्मणि प्राणस्थाने व्रणः यस्य तं सरय्वां सरयूतीरे विषण्णोऽस्मि विषण्णोऽभवम् ॥ ६३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

१] ति० टी०–वधमिति । राघवो दशरथो वधं स्मृत्वा पुत्रं प्रति विलपन्नेव कौसल्यामिदमब्रवीदवदत् ॥ १ ॥

रा० टी०–उपरतऋषिपुत्रदर्शनकथनानन्तरकालिकं राजवृत्तमाह–वधमिति । अप्रतिरूपमयोग्यं तस्य महर्षेर्वधं विलपन्कथयन्राघवो दशरथः इदमब्रवीत् ॥ १ ॥

गो० टी०–वधमिति । विलपन्नेव मध्ये स्वपुत्रं विलपन्नेव ॥ १ ॥

२] ति० टी०–संकुलितेन्द्रियः क्षुभितेन्द्रियः कथ नु सुकृतं भवेदित्यचिन्तयम् ॥ २ ॥

रा० टी०–वचनाकारमाह–तदिति । अज्ञानान्महत्पापं कृत्वा संकुलितेन्द्रियः व्याकुलकरणोऽहं तत्पापं सुकृतं सुविनष्टमित्यर्थः कथं भवेदिति बुद्ध्या मनसाहमचिन्तयम् ॥ २ ॥

गो० टी०–तदिति । संकुलेन्द्रियः व्याकुलेन्द्रियः सुकृतं दृष्ट्वा कृतं मुनिकुमारवचनमिति शेषः । इत्यचिन्तयमित्युपस्कार्यं यद्वा अस्य वधज्ञापनाज्ञापनयोः किं शुभोदकं भवेदित्यचिन्तयमित्यर्थः ॥ २ ॥

३] ति० टी०–तत एवं चिन्तानन्तरं यथाख्यातपथं मुनिकुमारोपदिष्टं मार्गं प्राप्याऽऽख्याऽऽश्रमं गतः ॥ ३ ॥

रा० टी०–तत इति । ततः चिन्तानन्तरं परमवारिणा अत्युत्कृष्टसरयूजलेन पूर्णं तं घटमादाय आख्यातपथम् ऋषिबालोपदिष्टमार्गं गतः प्राप्तोऽहं तं मुनिपित्रधिष्ठितमाश्रमं यथावत्प्राप्य तत्र तस्मिन्नाश्रमे दुर्बलौ पङ्गुत्वेन चलनसामर्थ्यरहितौ अन्धौ अपरिणायकौ रक्षकान्तररहितौ तन्निमित्ताभिः पुत्रसंबन्धिनीभिः कथाभिः अपरिश्रमौ श्रमाभाववन्तौ तां मत्पुत्रो जलमानेष्यतीत्याकारिकामाशामिच्छाविशेषमुपासीनौ प्राप्तौ मत्कृते मत्कर्तृकवधे सति हीनौ पुत्ररहितौ अत एव लूनौ छिन्नौ पक्षौ ययोः तौ द्विजौ पक्षिणाविव आसीनौ तस्य पितरौ अनाथवन्नाथत्वाभाववानिवाहमपश्यम् । श्लोकत्रयमेकान्वयि ॥ ३–५ ॥

गो० टी०–ततस्तं घटमिति । ततः मुनिकुमारोक्तज्ञापनमेव श्रेयस्करमिति निश्चयानन्तरं यथाख्यातपथं प्राप्य आश्रमं गत इति संबन्धः ॥ ३ ॥

४] ति० टी०–तत्राश्रमेऽपरिणायकौ संचारयितृपुरुषान्तररहितौ ॥ ४ ॥

५] ति० टी०–तन्निमित्ताभिः पुत्रनिमित्ताभिः कथाभिर्हेतुभिरपरिश्रमावासीनौ पुत्रो जलमानेष्यतीत्येवंरूपां तामाशामुपासीनौ सेवमानौ मत्कृते मत्कृतदुष्कर्मनिमित्तं तामाशां प्रति हीनावपि तां सेवमानावपश्यमिति पूर्वेणान्वयः । 'उदासीनौ' इति पाठेऽनाथवदुदासीनौ दुःखिताविव ॥ ५ ॥

गो० टी०–तत्रेत्यादि । परितो नयति संचारयतीति परिणायकः तद्रहितौ तन्निमित्ताभिः पुत्रविषयाभिः कथाभिः उपलक्षितौ अपरिक्रमौ पङ्गुभूतौ मत्कृते मन्निमित्तं तामाशां हीनौ जलानयनाशारहितौ पुत्रविषयाशारहितौ उदासीनौ प्रयत्नशून्यौ तस्य पितरावपश्यमिति संबन्धः ॥ ४ ॥ ५ ॥

१ पुनरिति गो. पाठः । २ ऽहं संकुलेन्द्रिय इति गो. पाठः । ३ अपरिक्रमाविति गो. पाठः । ४ उदासीनाविति गो. पाठः ।

शोकोपहतचित्तश्च भयसंत्रस्तचेतनः । तच्चाश्रमपदं गत्वा भूयः शोकमहं गतः ॥ ६ ॥
पदशब्दं तु मे श्रुत्वा मुनिर्वाक्यमभाषत । किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ॥ ७ ॥
यन्निमित्तमिदं तात सलिले क्रीडितं त्वया । उत्कण्ठिता ते मातेयं प्रविश क्षिप्रमाश्रमम् ॥ ८ ॥
यद्व्यलीकं कृतं पुत्र मात्रा ते यदि वा मया । न तन्मनसि कर्तव्यं त्वया तात तपस्विना ॥ ९ ॥
त्वं गतिस्त्वगतीनां च चक्षुस्त्वं हीनचक्षुषाम् । समासक्तास्त्वयि प्राणाः कथं त्वं नाभिभाषसे ॥ १० ॥
मुनिमव्यक्तया वाचा तमहं सज्जमानया । हीनव्यञ्जनया प्रेक्ष्य भीतचित्त इवाब्रुवम् ॥ ११ ॥
मनसः कर्म चेष्टाभिरभिसंस्तभ्य वाग्बलम् । आचचक्षे त्वहं तस्मै पुत्रव्यसनजं भयम् ॥ १२ ॥
क्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः । सज्जनावमतं दुःखमिदं प्राप्तं स्वकर्मजम् ॥ १३ ॥

६] ति० टी०–तौ दृष्ट्वा शोकोपहतचित्त इत्यादि भूयोऽधिकम् ॥ ६ ॥

रा० टी०–शोकेति । भयेन वधजनितदोषेण संत्रस्तं चेतः यस्य सः अहं तदाश्रमं श्रमनिवर्तकं पदं स्थानं गत्वा भूयः तद्दुःखदर्शनेनाधिकं शोकं गतः प्राप्त आसमिति शेषः ॥ ६ ॥

गो० टी०–शोकोपहतचित्त इति । पुत्रवधेन पूर्वमेव शोकोपहतचित्तः भूयः शोकं गतः तदर्शनादतिशयितशोकं गतः॥६॥

७] ति० टी०–चिरायसि विलम्बयसि ॥ ७ ॥

रा० टी०–पदेति । पदशब्दं पादक्रमजनितस्वनं श्रुत्वा अभाषत । भाषणाकारमाह–किं किमर्थं चिरयसि विलम्बं करोषि ॥ ७ ॥

गो० टी०–पदशब्दमिति । पदशब्दं चरणविन्यासजशब्दं चिरायसि विलम्बसे तत्करोतीति णिच् यन्निमित्तं किं निमित्तमित्यर्थः । यद्वा यन्निमित्तं त्वया सलिले क्रीडितम् इदं ब्रूहीति शेषः । 'यन्न दत्तम्' इति पाठे इदानीं पानीयं न दत्तमिति यत् तस्मात्त्वया सलिले क्रीडितमित्यन्वयः उत्कण्ठिता शोकस्मरणवत्यभूत् व्यलीकमप्रियम् 'अलीकम्' इति पाठे अलीकमपराधः 'अलीकमपराधः' इति हलायुधः ॥ ७–९ ॥

८] ति० टी०–यन्निमित्तं येन हेतुना एतावत्कालं त्वया सलिले क्रीडितं तेन ते मातोत्कण्ठिता सशोकस्मरणवत्यभूत् । 'यन्न दत्तम्' इति पाठे यत्त्वया शीघ्रं जलमाक्षयोर्न दत्तम्, यत्त्वया सलिले क्रीडितं तेन ते मातोत्कण्ठितेत्यन्वयः ॥ ८ ॥

रा० टी०–यदिति । यन्निमित्तं येन कारणेन इदमतिविलम्बं त्वया सलिले क्रीडितं तेन कारणेन ते माता उत्कण्ठिता शोकसहितं सस्मार अतः क्षिप्रं प्रविश ॥ ८ ॥

९] ति० टी०–व्यलीकमप्रियम् ॥ ९ ॥

रा० टी०–यदिति । व्यलीकमप्रियं तत्त्वया मनसि न कर्तव्यं स्मर्तव्यमेतेन मातापितृकर्तृकापकृतिरपि पुत्राणां कल्याणप्रदेति व्यञ्जितम् ॥ ९ ॥

१०] ति० टी०–अगतीनां त्वं गतिः हीनचक्षुषां त्वं चक्षुः अतो यन्न भाषसे तत्कथं कस्मात् ॥ १० ॥

रा० टी०–त्वमिति । अगतीनां रक्षकरहितानां हीनचक्षुषामस्माकं त्वमेव गतिः रक्षकः अत एव चक्षुश्च अत एव त्वयि प्राणाः अस्माकमिन्द्रियाणि समासक्ता संलग्नाः त्वं कथं किमर्थं न अभिभाषसे ॥ १० ॥

गो० टी०–त्वमिति । नः अस्मान् इति मुनिर्वाक्यमभाषतेत्यन्वयः ॥ १० ॥

११] ति० टी०–श्रुतपदशब्दत इव श्रुतधिया सज्जमानया गद्गदया अत एव हीनव्यञ्जनया व्यञ्जनाक्षरव्यक्तिरहितया अत एवाव्यक्तया वाचा वदन्तं मुनिं प्रेक्ष्य भीतचित्त इवाहं तादृश्यैव वाचाऽब्रुवमित्यन्वयः ॥ ११ ॥

रा० टी०–मुनिमिति । सज्जमानया पुत्रासक्तिसहितया अव्यक्तया अतिशब्दत्वाद्व्यक्ताक्षररहितया वाचा उपलक्षितं तं हतपुत्रं मुनिं प्रेक्ष्य भीतचित्त एवाहं हीनव्यञ्जनया भीत्या व्यक्तिरहितयेत्यर्थः । वाचा अब्रुवम् । इव एवार्थे ॥ ११ ॥

गो० टी०–मुनिमिति । सज्जमानया स्खलन्त्या हीनव्यञ्जनया अस्पष्टाक्षरया 'व्यञ्जनं इमश्रुनिष्ठानचिह्नेष्ववयवेक्षरे' इति वैजयन्ती । अव्यक्तया वाचा अब्रुवमिति संबन्धः । भीतोऽपि सन् भीतः भीतभीतः अत्यन्तभीत इत्यर्थः। पाठभेदः भीतोऽपि सन्नभीत इवाब्रुवम् । इवशब्दो वाक्यालङ्कारे ॥ ११ ॥

१२] ति० टी०–मनस इति । मनसः कर्म भीतिरूपं वाग्बलमाश्रित्य चेष्टाभिरभीतिसाध्यव्यवहारैरभि अभितः संस्तभ्य भीताकारतामाच्छाद्याभीत इवाचचक्षे ॥ १२ ॥

रा० टी०–भङ्ग्यन्तरेण तदेवाह–मनस इति । वाग्बलं वाच आच्छादकं मनसः कर्म भीतिमित्यर्थः । चेष्टाभिः अवचनेन न निर्वाह इत्यादिविचारूपव्यापारैरभिसंस्तभ्य आछाद्य पुत्रव्यसनजं पुत्रमरणजनितं भयमहमाचचक्षे ॥ १२ ॥

गो० टी०–उक्तमेव विशदं दर्शयति–मनस इति । मनसः कर्म ऊहापोहात्मकं चेष्टाः इन्द्रियनियमनरूपव्यापाराः ताभिर्वाग्बलम् अभिसंस्तभ्य स्खलितां वाचं बलात् दृढीकृत्येत्यर्थः । तस्मै भयमाचचक्ष इति संबन्धः । यद्वा वाग्बलमभिसंस्तभ्य लज्जाभीतिप्रभृतिभिः मन्दवचनोऽभूत्वेत्यर्थः । आचचक्षे इति क्षिप्तमपुरुषैकवचनम् ॥ १२ ॥

१३] ति० टी०–महात्मनस्तव पुत्रो नाहमिति योजना सज्जनावमतं सज्जनगर्हितम् मया भवता चेति शेषः ॥ १३ ॥

५ किं-त्वं नो इति गो. पाठः ।

भगवंश्चापहस्तोऽहं सरयूतीरमागतः । जिघांसुः श्वापदं [1]किंचिन्निपाने वागतं गजम्॥ १४ ॥
[2]ततः श्रुतो मया शब्दो जले कुम्भस्य पूर्यतः । द्विपोऽयमिति मत्वाहं बाणेनाभिहतो मया ॥ १५ ॥
गत्वा तस्यास्ततस्तीरमपश्यमिषुणा हृदि । विनिर्भिन्नं गतप्राणं शयानं भुवि तापसम् ॥ १६ ॥
[भगवञ्छब्दमालक्ष्य मया गजजिघांसुना । विसृष्टोऽम्भसि नाराचस्ततस्ते निहतः सुतः ॥]
ततस्तस्यैव वचनादुपेत्य परितप्यतः । स मया सहसा बाण उद्धृतो मर्मतस्तदा ॥ १७ ॥
स चोद्धृतेन बाणेन सहसा स्वर्गमास्थितः । भगवन्तावुभौ शोचन्नन्धाविति विलप्य च ॥ १८ ॥
अज्ञानाद्भवतः पुत्रः सहसाभिहतो मया । शेषमेवं गते यत्स्यात्तत्प्रसीदतु मे मुनिः ॥ १९ ॥
स तच्छ्रुत्वा वचः क्रूरं मया तदघशंसिना । नाशकत्तीव्रमायासं सं कर्तुं भगवानृषिः ॥ २० ॥
स बाष्पपूर्णवदनो निःश्वसञ्शोकमूर्छितः । मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ २१ ॥

रा० टी०–कथनप्रकारमाह–क्षत्रिय इत्यादिभिः । येन मया सज्जनैः अवमतं तिरस्कृतं स्वकर्मजमिदं दुःखं प्राप्तं प्रापितं स दशरथोऽहं महात्मनस्तव पुत्रो नाहम् ॥ १३ ॥

गो० टी०–क्षत्रिय इति । महात्मनः तवेति शेषः । सज्जनावमतं सज्जनावमतिविषयभूतं सत्पुरुषगर्हितमित्यर्थः ॥ १३ ॥

१४] ति० टी०–तदेवाह–भगवन्निति । निपाने आगतं श्वापदं व्याघ्रादिं गजं वा जिघांसुरित्यन्वयः ॥ १४ ॥

रा० टी०–ननु किं तत्कर्मेत्यत आह–भगवन्निति । निपाने जलपानदेशे आगतं प्राप्तं किंचित्क्रूरमित्यर्थः श्वापदं व्याघ्रादिं गजं च जिघांसुरहं सरयूतीरमागतः ॥ १४ ॥

गो० टी०–भगवन्निति । निपाने जलावतारे आगतं गजं श्वापदं हिंस्रशार्दूलादिकं च जिघांसुः चापहस्तोऽहं सरयूतीरमागतः ॥ १४ ॥

१५] ति० टी०–अयं शब्दहेतुः पदार्थ इत्यर्थः । द्विप इति मत्वाहं स्थितस्ततो मया स बाणेन हतः ॥ १५ ॥

रा० टी०–तत इति । ततः सरयूतीरगमनानन्तरं जले पूर्यतः पूर्यमाणस्य कुम्भस्य शब्दो मया श्रुतः अयम् एतच्छब्दकारणीभूतः द्विपः गजः इति मत्वा अहमतिष्ठमिति शेषः । अत एव मया बाणेन अभिहतः ॥ १५ ॥

गो० टी०–तत्रेति । पूर्यतः पूर्यमाणस्य द्विप इति मत्वा अयं शब्दहेतुः पदार्थः मया अभिहतः ॥ १५–१८ ॥

१६] ति० टी०–गतप्राणं गतकल्पप्राणम् ॥ १६ ॥

रा० टी०–गत्वेति । तस्याः सरय्वास्तीरं गत्वा अमुना मत्प्रयुक्तबाणेन विनिर्भिन्नमत एव गता गमनानुकूलव्यापारविधिधाः प्राणा यस्य तं तापसमपश्यम् ॥ १६ ॥

१७] ति० टी०–तस्यैव त्वत्पुत्रस्यैव वचनाद्बाण उद्धृत इत्यन्वयः ॥ १७ ॥

रा० टी०–तत इति । ततस्तदर्शनानन्तरं परितप्यतः विद्धबाणेन खेदं प्राप्नुवतस्तस्य तपस्विनो वचनादेव उपेत्य तत्समीपं प्राप्य मर्मतः मर्मस्थलात्स बाणो मयोद्धृतः ॥ १७ ॥

१८] ति० टी०–अन्धौ मातापितरौ कोऽतःपरं रक्षिष्यतीति भगवन्तौ शोचन्विलप्य च स्वर्गमास्थित इत्यन्वयः ॥ १८ ॥

रा० टी०–स इति । उद्धृतेन बाणेन हेतुभूतेन भगवन्तावुभौ मातापितरौ शोचन् विलप्य स तापसः स्वर्गमास्थितः॥१८॥

गो० टी०–स इति । उद्धृतेन बाणेन हेतुना अन्धौ पितरौ मातापितराविति भवन्तावेव शोचन् विलप्य च स्वर्गमास्थितः१९॥

१९] ति० टी०–युष्मद्रक्षके पुत्रे एवं गते सति शेषं कर्तव्यं यत्स्यात्तत्तत्र मह्यं भगवान्प्रसीदतु तदुद्दिश्य मामाज्ञापयत्वित्यन्वयः । युष्मद्रक्षणमपि मया कर्तुं शक्यमिति भावः ॥ १९ ॥

रा० टी०–अज्ञानादिति । एवमनेन प्रकारेण भवतः पुत्रः अज्ञानान्मयाभिहतः अतः शेषं शिष्यते प्रलयेऽपि न विध्वस्यते सः नित्यलोकस्तं गते प्राप्ते सति यत्कर्तव्यं स्यात्तथा भवति तथा मुनिर्भवान्प्रसीदतु अनुग्रहं निग्रहं वा कुर्वित्यर्थः ॥ १९ ॥

गो० टी०–अज्ञानादिति । एवं गते एवं प्राप्ते सति यच्छेषं कर्तव्यं स्यात् शापानुग्रहादिकं तत्प्रति मे मयि प्रसीदतु शापो वाऽनुग्रहो वा यः कर्तव्यस्तं करोत्वित्यर्थः॥ २० ॥

२०–२१] ति० टी०–एवमज्ञानकृतत्वबोधनाच्छेषायुःपर्यन्तं रक्षणस्यापि कर्तव्यताबोधनाच्च मां दैवान्न भस्मसादकरोदित्याह—स इति । तीव्रमायासं भस्मीभावफलकशापदानम् ॥ २० ॥ २१ ॥

रा० टी०–स इति । अघशंसिना मया कथितमिति शेषः । क्रूरं वचः श्रुत्वा तीव्रमायासं विध्वंसकशापं कर्तुं दातुं भगवान्समर्थोऽपि स ऋषिर्नाशकत् एतेन पुत्रवधस्याज्ञानजातत्वान्न विध्वंसनयोग्यत्वं राज्ञ इति तन्निश्चितो हेतुः सूचितः तेन ऋषेः परमधर्मज्ञत्वं व्यञ्जितम् । 'अकर्तुम्' इति भूषणपाठः ॥ २० ॥

१ कंचिन्निपाने चागतमिति गो. पाठः । २ तथेति गो. पाठः । ३ अयमिति गो. पाठः । ४ अमुनेति रा. पाठः । ५ श्लोकोऽयमधिको गो. पुस्तके । ६ तत्रेति गो. पाठः । ७ भवन्तौ पितराविति गो. पाठः । ८ वृद्धाविति रा. पाठः । ९ मयोक्तमिति गो. पाठः । १० अकर्तुमिति गो. पाठः । ११ कर्षित इति गो. पाठः ।

यद्येतदशुभं कर्म न स्म मे कथयेः स्वयम् । फलेन्मूर्धा स्म ते राजन्सद्यः शतसहस्रधा ॥ २१ ॥
क्षत्रियेण वधो राजन्वानप्रस्थे विशेषतः । ज्ञानपूर्वं कृतः स्थानाच्यावयेदपि वज्रिणम् ॥ २३ ॥
सप्तधा तु भवेन्मूर्धा मुनौ तपसि तिष्ठति । ज्ञानाद्विसृजतः शस्त्रं तादृशे ब्रह्मवादिनि ॥ २४ ॥
अज्ञानाद्धि कृतं यस्मादिदं ते तेन जीवसे । अपि ह्यकुशलं न स्याद्राघवाणां कुतो भवान् ॥ २५ ॥
नय नौ नृप तं देशमिति मां चाभ्यभाषत । अद्य तं द्रष्टुमिच्छावः पुत्रं पश्चिमदर्शनम् ॥ २६ ॥
रुधिरेणावसिक्ताङ्गं प्रकीर्णाजिनवाससम् । शयानं भुवि निःसंज्ञं धर्मराजवशं गतम् ॥ २७ ॥
अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ । अस्पर्शयमहं पुत्रं तं मुनिं सह भार्यया ॥ २८ ॥

गो० टी०—स इति । अवशंसिना दुःखशंसिना आर्य संव्यसनम् अकर्तुं नाशकत् कृतवानेवेत्यर्थः ॥ २१ ॥

रा० टी०—स इति । महातेजाः स ऋषिः उपस्थितं समीपे प्राप्तं माम्बुवाच ॥ २१ ॥

गो टी०—स इत्यादि । स्मेति वाक्यालङ्कारे फलेत् विशीर्येत स्फिला विशरण इति धातुः मच्छापेनेति शेषः क्षत्रियेण पालकेन वानप्रस्थे अज्ञानतः कृतो वधः वज्रिणमिन्द्रमपि स्थानात् च्यावयेत् ज्ञानपूर्वं कृतः ज्ञानकृतस्तु विशेषतश्च्यावयेत् अविलम्बो विशेषः सप्तधेत्युपलक्षणं बहुधेत्यर्थः । ब्रह्मवादिनि परमात्मज्ञे 'ब्रह्मचारिणि' इति पाठे चरतेर्गत्यर्थत्वात् 'सर्वे गत्यर्था ज्ञानार्थाः' इति न्यायेन ब्रह्मतत्त्वं चरितुं ज्ञातुं शीलमस्यास्तीति ब्रह्मचारी तस्मिन् 'ज्ञाने तत्त्वे तपोऽध्यात्मवेदेषु ब्रह्म चोच्यते' इति निघण्टुः । यस्मात् कारणात् इदं दुष्कृतमज्ञानात्कृतं तेन त्वं जीवसि अपि च अथ ज्ञानपूर्वकत्वे वधस्य राघवाणां कुलं न स्यात् भवान् कुतः स्यात् जीवेत् इति माम्बुवाचेत्यन्वयः २२—२६

२२] ति० टी०—स्मशब्दो वाक्यालंकारे । फलेद्विशीर्येत २२

रा० टी०—वचनाकारमाह—यदीति । एतदज्ञानात्स्वकृतमशुभं कर्म मे मह्यं यदि न कथयेः तर्हि ते मूर्धा शतसहस्रधा फलेत् भिद्येत ॥ २२ ॥

२३] ति० टी०—ज्ञानपूर्वत्वे सद्योऽनर्थप्राप्तिः स्यादित्याह—क्षत्रियेणेति । विशेषतोऽन्यत्वानाथत्वादेः ज्ञानपूर्वं कृतो यद्यपि वधः स्यात्तदा तच्छ्रवणजो मत्कोपो वज्रिणमपि स्थानाच्यावयेत्पातयेत्किमु त्वादृशमित्यर्थः ॥ २३ ॥

रा० टी०—तत्र हेतुं वदन्नाह—क्षत्रियेणेति । हे राजन् ! वानप्रस्थे क्षत्रियेण ज्ञानपूर्वकृतो वधस्ताडनं वज्रिणमिन्द्रमपि स्थानात्स्वर्गाच्यावयेत्पातयेदेतेन यदिन्द्रं पातयेत्तर्हि तदितरं पातयेदिति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः ॥२३॥

२४] ति० टी०—पुत्रकोपेनापि तत्कालनाशाभावोऽज्ञानादेवेत्याह—सप्तधा त्विति । स्वापेक्षया तपोन्यूनत्वात्सप्तधेति ब्रह्मवादिनि ब्रह्मवादिसमे । 'ब्रह्मचारिणि' इति पाठान्तरम् ॥ २४ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—सप्तधेति । तपसि कृच्छ्रचान्द्रायणादौ तिष्ठति कुर्वति मुनौ ब्रह्मवादिनि ब्रह्मवेत्तरि वा ज्ञानाच्छस्त्रं विसृजतः पुरुषस्य मूर्धा सप्तधा उपलक्षणविधया अनेकधेत्यर्थः । भवेत् किंच तपसि ब्रह्मविचारे तिष्ठति अत एव ब्रह्मवादिनि ब्रह्मप्राप्ते तादृशे मत्पुत्रसदृशे मुनौ शस्त्रं विसृजतः पुरुषस्य मूर्धा सप्तधा अनेकधा भवेत् 'ब्रह्मचारिणि' इति पाठान्तरे तस्यापि ब्रह्मप्राप्ते इत्येवार्थः । तत्र पक्षे तपसीत्यस्य पूर्व एवार्थः ॥ २४ ॥

२५] ति० टी०—जीवसे जीवसि ते तव यस्मादिदं कर्माज्ञानात्कृतं तेन जीवसि । हिः पादपूरणार्थः । यदि ज्ञानपूर्वं कृतमिदं स्यात्तदा राघवाणां कुलमेव न स्यात् कुतो भवान् जीवेदिति शेषः ॥ २५ ॥

रा० टी०—अज्ञानादिति । हि यस्मादिदं कर्म त्वया अज्ञानात्कृतं तेन हेतुना जीवसि अपि अन्यथा ज्ञानपूर्वकवधे कुलं न स्यात् नश्येदित्यर्थः । भवानेव कुतः एतेन काव्यार्थापत्त्यलंकारेण ज्ञानपूर्वकवधः कैश्चिदपि न कर्तव्य इत्युपदेशः सूचितः ॥ २५ ॥

२६-२७] ति० टी०—पश्चिमदर्शनमन्तर्दर्शनं द्रष्टुमिच्छावोऽतस्तं देशं नयेति मामभाषत ॥ २६ ॥ २७ ॥

रा० टी०—नयेति । हे नृप! तं पुत्रशरीराधिष्ठितदेशं नौ आवां नय प्रापय । तत्र हेतुः—पश्चिमदर्शनं पश्चिममन्तिमं दर्शनं यस्य तं रुधिरेण अवसिक्तमङ्गं यस्य तं प्रकीर्णानि प्रक्षिप्तानि अजिनवासांसि यस्य तं निःसंज्ञं संज्ञारहितमत एव भुवि शयानं धर्मराजवशं गतं धर्मराजादुत्तमधर्माचरणाद्वशं कान्तिविशेषं गतं प्राप्तं पुत्रं द्रष्टुमिच्छावः इति मामभ्यभाषत । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०—नयेत्यादि श्लोकद्वयमेकं वाक्यम् । धर्मराजवशं गतं पुत्रं द्रष्टुमिच्छावः अतः नौ तं देशं नयेति मामभ्यभाषतेति संबन्धः ॥ २७ ॥ २८ ॥

२८] ति० टी०—अहं तं देशं नीत्वा तं पुत्रमस्पर्शयम् ॥२८॥

रा० टी०—अथेति । अथ तदाज्ञापनानन्तमेक एवाहं नीत्वा अहं सर्वकालं धर्मत्यागाभावं तमत एव आर्यया मादीप्रया सह सहितं तं मुनिपुत्रं भृशदुःखितौ मातापितरौ अस्पर्शं स्पर्शमकारयम् अहमित्यत्र नञ्पूर्वकहृधातोः कर्तरि कः ॥२८॥

---

१ त्वमिति गो. पाठः । २ ज्ञानपूर्वकृत इति रा. पाठः । ३ फलेदिति गो. पाठः । ४ तेनैव जीवसीति गो. जीवसीति रा. पाठः । ५ ह्यथ कुलं न स्यादिक्ष्वाकूणामिति गो. ह्यथ कुलमिति रा. पाठः ।

तौ पुत्रमात्मनः स्पृष्ट्वा तमासाद्य तपस्विनौ । निपेततुः शरीरेऽस्य पिता [1]चैनमुवाच ह ॥ २९ ॥
नाभिवादयसे माऽद्य न च मामभिभाषसे । किं [2]चै शेषे तु[3] भूमौ त्वं वत्स किं कुपितो ह्यसि॥३०॥
[4]नन्वहं तेऽप्रियः पुत्र मातरं पश्य धार्मिकीम् । किं [5]चै नालिङ्गसे पुत्र सुकुमारवचो वद ॥ ३१ ॥
कस्य वा पररात्रेऽहं श्रोष्यामि हृदयंगमम् । अधीयानस्य मधुरं शास्त्रं वान्यद्विशेषतः ॥ ३२ ॥
को मां संध्यामुपास्यैव स्नात्वा हुतहुताशनः । श्लाघयिष्यत्युपासीनः पुत्रशोकभयार्दितम् ॥ ३३ ॥
कन्दमूलफलं हृत्वा यो मां प्रियमिवातिथिम् । भोजयिष्यत्यकर्मण्यमप्रग्रहमनायकम् ॥ ३४ ॥
इमामन्धां च वृद्धां च मातरं ते तपस्विनीम् । कथं पुत्र भरिष्यामि कृपणां पुत्रगर्धिनीम् ॥ ३५ ॥
तिष्ठ मा मा गमः पुत्र यमस्य सदनं प्रति । श्वो मया सह गन्तासि जनन्या च समेधितः ॥ ३६ ॥

गो० टी०–अथेति । अहं तौ नीत्वा अहं तमस्पर्शयमिति संबन्धेनाहंशब्दद्वयावैयर्थ्यम् ॥ २९–३१ ॥

२९] ति० टी०–तं तदवस्थमात्मनः पुत्रमासाद्य स्पृष्ट्वास्य शरीरे निपेततुः पितैनमुवाच च ॥ २९ ॥

रा० टी०–ताविति । आत्मनः स्वस्य पुत्रमासाद्य प्राप्य स्पृष्ट्वा अस्य शरीरे तौ मातापितरौ निपेततुः अस्य पिता एनमुवाच च ॥ २९ ॥

३०] ति० टी०–कुपितो जातकोपः ॥ ३० ॥

रा० टी०–वचनाकारमाह–नेति । मां मामद्य नाभिवादयसे प्रणमसि भाषसे च न किं किमर्थं भूमौ शेषे कुपितः किमसि ॥ ३० ॥

३१] ति० टी०–'नन्वहम्' इति पाठः । अप्रिय इति च्छेद इति कतकः 'न त्वहम्' इति पाठः । अहं यदि तव प्रियो न तथापि मातरं पश्येति संबन्ध इति तीर्थः ॥ ३१ ॥

रा० टी०–नन्विति । हे पुत्र ! ननु यदि अहं ते अप्रियः तदा मातरं पश्य किं किमर्थं नालिङ्गसे हे सुकुमार ! वद ब्रूहि ॥३१॥

गो० टी०–न त्विति । अहं ते प्रियः न तु चेत् मातरं पश्येत्यन्वयः ॥ ३१ ॥

३२] ति० टी०–अन्यद्वा पुराणं वैश्याच्छूद्रयां जातत्वेन संकरत्वाद्वेदप्रसक्तौ नोक्तः ॥ ३२ ॥

रा० टी०–कस्येति । पररात्रे अपररात्रादूर्ध्वभागे शास्त्रमन्यत्पुराणादिकं वा अधीयानस्य कस्य विशेषतो मधुरं हृदयङ्गमं मनोहरं वचः श्रोष्यामि ॥ ३२ ॥

गो० टी०–कस्येति । हृदयंगमं मनोहरस्वरमधीयानस्य पठतः अन्यद्वा इतिहासपुराणादिकं वा ॥ ३३ ॥

३३] ति० टी०–संध्यामिति तन्त्रमार्गेणेति शेषः । हुतहुताशनो 'नमस्कारेण मन्त्रेण पञ्चयज्ञान्समापयेत्' इत्युक्तरीत्या श्लाघयिष्यति श्लाघनमुद्भूतनं तत्पूर्वकं ज्ञापयिष्यति । 'नाप्तु श्लाघमानः जायात्' इति ब्रह्मचारिप्रकरणस्थापस्तम्बसूत्रौ तथा व्याख्यानात् ॥ ३३ ॥

रा० टी०–क इति । पुत्रशोकभयेन अर्दितं पीडितं मामुपासीनः समीपे स्थितः सन्कः श्लाघयिष्यति स्तोष्यति ॥ ३३ ॥

गो० टी०–क इति । संध्यामुपास्य नमस्कारपूर्वकं तान्त्रिकं संध्यावन्दनं कृत्वेत्यर्थः । हुतहुताशनः कृतहोमः । ननु वैश्यात् शूद्रायां जातो हि करणस्तस्य कथं होमाधिकार इति मैवं 'नमस्कारेण मन्त्रेण पञ्चयज्ञान्समापयेत्' इति चतुर्थवर्णस्यापि पञ्चमहायज्ञाधिकारः स्मर्यते ततोऽप्यधिकस्य करणस्य स्वोचितमन्त्रैर्होमाधिकारस्य कैमुत्यन्यायसिद्धत्वात् श्लाघयिष्यति उपचरिष्यतीत्यर्थः ॥ ३४ ॥

३४] ति० टी०–कन्दं जलोद्भवपद्मादीनाम्, मूलं स्थलोद्भवानामिति तीर्थः अकर्मण्यं कर्मानुष्ठानाक्षमम् अप्रग्रहं नीवारादिसंग्रहरहितम् अनायकं पालकहीनमित्यर्थं तीर्थः । कर्मणि साधुं कर्मण्यमित्यतिथिविशेषणम् भोजयिष्यति । 'कर्मण्यम्' इत्येव च पाठः अप्रग्रहं यष्टिग्रहणपूर्वकमार्गप्रदर्शकरहितम् अत एवानायकं स्नानादिकर्मप्रवर्तकहीनमित्यर्थं कतकः ॥ ३४ ॥

रा० टी०–कन्देति । अकर्मण्यं कर्मानुष्ठानानर्हमप्रग्रहं मुनिभक्ष्यसंग्रहरहितमनायकं रक्षकरहितं मां प्रियमतिथिमिव कन्दादिकं हृत्वा आनीय यो भोजयिष्यति स कः न कोऽपीत्यर्थः । तत्र कन्दं जलजन्यानां कमलादीनां मूलं, मूलं स्थलजन्यानां मृत्तिकातिरोहिताधोभागः 'कर्मण्यम्' इति कतकपाठः अतिथिविशेषणं कर्मणि साधुरिति तदर्थः ॥ ३४ ॥

गो० टी०–कन्दमूलफलमिति । कन्दं जलोद्भवानां पद्मादीनां, मूलं स्थलोद्भवानाम्, अकर्मण्यं कर्मानुष्ठानाक्षमम् अप्रग्रहं नीवारादिसंग्रहरहितम् अनायकम् अनाथं रक्षकरहितं यष्टिं गृहीत्वा मार्गदर्शकरहितमिति वार्थः ॥ ३५ ॥ ३६ ॥

३५] ति० टी०–भरिष्यामि स्वयमन्ध इति शेषः ॥३५॥

रा० टी०–इमामिति । पुत्रगर्धिनीं पुत्रविषयकातीच्छावतीमिमामन्धां तव मातरं कथं भरिष्यामि ॥ ३५ ॥

३६] ति० टी०–मा मेत्याबाधे द्विर्वचनम् । मामुद्दिश्य तिष्ठ मा गमः मा गच्छेति वा । समेधितः संगतः ॥ ३६ ॥

रा० टी०–तिष्ठेति । हे पुत्र! मा मां प्रति त्वं तिष्ठ यमस्य सदनं त्वं मा गमं न गच्छ समेधितः वर्धितस्त्वं मया जनन्या च सह गन्तासि समेधनकर्तृत्वं च प्रत्यासत्तिन्यायेन साहि-

---

१ चास्त्वेवमन्यत्रादिति गो. पाठः । २ त्विति गो. पाठः । ३ चेति गो. पाठः । ४ न त्वहमिति गो. पाठः । ५ धार्मिकेति गो. पाठः । ६ वत्सेति गो. पाठः ।

उभावपि च शोकार्तावनाथौ कृपणौ वने । क्षिप्रमेव गमिष्यावस्त्वया हीनौ यमक्षयम् ॥ ३७ ॥
ततो वैवस्वतं दृष्ट्वा तं प्रवक्ष्यामि भारतीम् । क्षमतां धर्मराजो मे विभृयात्पितरावयम् ॥ ३८ ॥
दातुमर्हति धर्मात्मा लोकपालो महायशाः । ईदृशस्य ममाक्षय्यामेकामभयदक्षिणाम् ॥ ३९ ॥
आपापोऽसि यथा पुत्र निहतः पापकर्मणा । तेन सत्येन गच्छाशु ये लोकास्त्वस्त्रयोधिनाम्[1] ॥ ४० ॥
यां हि शूरा गतिं यान्ति संग्रामेष्वनिवर्तिनः । हतास्त्वभिमुखाः पुत्र गतिं तां परमां व्रज ॥ ४१ ॥
यां गतिं सगरः शैब्यो दिलीपो जनमेजयः । नहुषो धुन्धुमारश्च प्राप्तास्तां गच्छ पुत्रक ॥ ४२ ॥

त्यान्वयिनोरेव एतेन त्वां विनास्मज्जीवनं नैव भविष्यतीति सूचितम् ॥ ३६ ॥

गो० टी०–तिष्ठेति । तिष्ठ मां मां प्रति तिष्ठ मा गमः मागच्छ समेधितः सहित इत्यर्थः ॥ ३७ ॥ ३८ ॥

३७] ति० टी०–यमक्षयं यमगृहम् ॥ ३७ ॥

रा० टी०–उभाविति । त्वया हीनौ आवां यमक्षयं धर्मराजगृहं क्षिप्रमेव गमिष्यावः ॥ ३७ ॥

३८] ति० टी०–यमगृहगमने स्वप्रयोजनमाह–तत इति । धर्मराजो मे क्षमतां पुत्रवियोगजनकं पूर्वकृतापराधम् अयं मे पुनः पितरौ बिभृयात्पालयतु ॥ ३८ ॥

रा० टी०–नन्वु तत्र गमने भवतोः किं प्रयोजनमित्यत आह–तत इति । वैवस्वतं धर्मराजं दृष्ट्वा भारतीं वचनं प्रवक्ष्यामि । वचनाकारमाह–धर्मराजो भवान्क्षमतामस्मदपराधमिति शेषः । तत्प्रयोजनमाह–मे ममायं पुत्रः पितरौ आवां बिभृयात् ॥ ३८ ॥

गो० टी०–तत इति । वैवस्वतं यमं धर्मराजः क्षमतां मत्पुत्रस्य स्वपरिसरागमनविलम्बं सहतां मे मत्संबन्धी अयं पुत्रः पितरौ बिभृयादिति भारतीं प्रवक्ष्यामीति संबन्धः ॥३९॥४०॥

३९] ति० टी०–नन्वु त्वया याचितेऽपि कथमेतल्लभ्यतेऽत आह–दातुमिति । लोकपालोपम ईदृशस्यानाथस्याभयदक्षिणां पुत्रदानेन तदभावेन महाभयप्राप्तेरिति भावः । कतकस्तु–यतोऽयं मे पुत्रः पितरौ बिभृयात्, अतोऽस्य धर्मराजो भवान्क्षमतां शस्त्रघातजन्यदुर्मरणजनकं पापं क्षमताम् एवं मया प्रार्थितो दुर्मरणजां दुर्गतिं दूरीकृत्य त्वां स्वर्गं नेष्यति, ईदृशस्य तपस्विनो ममैकां पुत्रतारणरूपाभयदक्षिणां लोकपालत्वाद्दातुमर्हतीत्यर्थमाह ॥ ३९ ॥

रा० टी०–नन्विह गतेन कथं त्वत्सेवेत्यत आह–दातुमिति । ईदृशस्य अन्धत्वादिविशिष्टस्य मम अक्षय्यां क्षेतुमशक्याम् एकामभयदक्षिणां भवान्दातुमर्हति तेन पुनर्मद्गृहं प्रेषयेति सूचितम् ॥ ३९ ॥

४०] ति० टी०–अथ मृतस्य पुनर्लोभमशक्यं मत्वा विश्वामित्र इव त्रिशङ्कुं स्वमहिम्ना सुतं स्वर्गं प्रापयति—अपापोऽसीत्यादि । अपापस्त्वं पुत्र ! पापकर्मणानेन क्षत्रियेण यथा निहतोऽसि, तेन हननेन प्रायश्चित्तरूपेण शुद्धः सत्येन मदीयेनास्त्रयोधिनां शूराणां लोकान्गच्छेत्यर्थः । यद्वा हे पुत्र ! पापेन कर्मणा शस्त्रवधलक्षणेन निहतो यथा यद्यपि त्वमसि, तथापि तेन मदीयेन सत्येनापापो भूत्वास्त्रयोधिनां लोकान्गच्छ ॥ ४० ॥

रा० टी०–नन्वु प्रार्थितोऽपि दुर्लभं मत्वा यदि न दास्यति तर्हि का मद्गतिरित्यत आह–अपाप इति । हे पुत्र ! पापकर्मणा केनचित्पूर्वादृष्टेन हेतुना निहतोऽपि त्वं यथा यथावदपापः पापरहितोऽसि अवशिष्टकिंचित्सूक्ष्मपापफलस्यापि भुक्त्वा-ऽधेदानीं तव पापसंभावनास्तीति तात्पर्यं तेन हेतुना सत्येन सर्वधर्ममूलभूतसत्यरूपधर्मेणोपलक्षितस्त्वमस्त्रयोधिनां ये लोकाः तानाशु गच्छ एतेनाकालमृत्युभीतिस्त्वया न कर्तव्येति सूचितं तेन ब्रह्मवेत्तृणामकालमरणादिकमकिंचित्करमिति सूचितम् । नचास्य ब्रह्मवेत्तृत्वेन ब्रह्मलोकप्राप्तियोग्यस्य कथमस्त्रयोधिलोकप्राप्तिप्रेरणेति वाच्यम् ब्रह्मलोकस्यैवास्त्रयोधिनोऽपि प्राप्यत्वात् । तथा च स्मृतिः 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥' इति ॥ ४० ॥

गो० टी०–राज्ञा स्वहस्तकृतं हननं पूर्वकृतस्य पापस्य प्रायश्चित्तत्वेन प्राप्तमिति मत्वा वदति—अपाप इति । पापकर्मणा राज्ञा यदा निहतः तदैवापापोऽसि तेन अपापत्वेन हेतुना सत्येन मम सत्येन शस्त्रयोधिनां ये लोकास्तान् आशु गच्छेति योजना। नन्वस्य तपस्विनो ब्रह्मलोकप्राप्तिरेव वक्तव्या शस्त्रहननमात्रेण शस्त्रयोधिनां लोकं प्राप्त्यत्वेन वदति एतत्कथमुपपद्यते उच्यते ' द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च शरेणाभिमुखो हतः ' इति । शस्त्रयोधिनामुत्कृष्टलोकप्राप्तिश्रवणान्न दोषः ॥ ४१–४३ ॥

४१] ति० टी०–उक्तमेवार्थं पुनराह—यामिति ॥४१॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–यामिति । अनिवर्तिनः संग्रामेभ्यः पलायनरहिताः संग्रामेषु हता इत्यर्थः यां गतिं यान्ति तां व्रज ॥ ४१ ॥

४२] ति० टी०–तमेवार्थं विश्लेषत आह–यां गतिमिति ॥ ४२ ॥

रा० टी०–तदेव महतां गम्यमिति बोधयन्नाह–यामिति । यां सगरादयः प्राप्तास्तां गच्छ ॥ ४२ ॥

१ यदेति गो. पाठः । २ लोकांः शस्त्रेति गो. पाठः । ३ नेष्यतीति युक्तं भाति ।

या गतिः सर्वभूतानां[1] स्वाध्यायात्तपसश्च[2] या । भूमिदस्याहिताग्नेश्च एकपत्नीव्रतस्य च ॥ ४३ ॥
गोसहस्रप्रदातॄणां गुरुसेवाभृतामपि[3] । देहन्यासकृतां[4] या च तां गतिं गच्छ पुत्रक ॥ ४४ ॥
न हि त्वस्मिन्कुले जातो गच्छत्यकुशलां गतिम् । स तु यास्यति येन त्वं निहतो मम बान्धवः ॥ ४५ ॥
एवं स कृपणं तत्र पर्यदेवयतासकृत्[5] । तथोक्त्वा कर्तुमुदकं प्रवृत्तः[6] सह भार्यया ॥ ४६ ॥
स तु दिव्येन रूपेण मुनिपुत्रः स्वकर्मभिः । स्वर्गमध्यारुहत्क्षिप्रं शक्रेण सह धर्मवित्[7] ॥ ४७ ॥
आबभाषे च तौ वृद्धौ शक्रेण सह तापसः । आश्वस्य[8] च मुहूर्तं तु पितरं वाक्यमब्रवीत्[9] ॥ ४८ ॥
स्थानमस्मि महत्प्राप्तो भवतोः परिचारणात् । भवन्तावपि च क्षिप्रं मम मूलमुपैष्यथः[10] ॥ ४९ ॥
एवमुक्त्वा तु दिव्येन विमानेन वपुष्मता । आरुरोह दिवं क्षिप्रं मुनिपुत्रो जितेन्द्रियः ॥ ५० ॥
स कृत्वोदकं तूर्णं तापसः सह भार्यया । मामुवाच महातेजाः कृताञ्जलिमुपस्थितम्[11] ॥ ५१ ॥

४३] ति० टी०–सर्वभूतानां गतिराश्रयो ब्रह्म । एकपत्नीव्रता रामादयः ॥ ४३ ॥

४४] ति० टी०–गुरुसेवाभृतस्तत्सेवाकर्तारः देहन्यासकृतो महाप्रस्थानादिना परलोकार्थं तनुत्यजः ॥ ४४ ॥

रा० टी०–इदानीं तव कामचारगतिर्भवितेति बोधयन्नाह–येति । स्वाध्यायो वेदाध्ययनं देहन्यासकृतः प्रयागादौ बुद्धिपूर्वं तनुत्यागकर्तारः एतेन यामिच्छसि तां गच्छेतिसूचितम । श्लोकद्वयमेकान्वयि ॥ ४३ ॥ ४४ ॥

गो० टी०–या गतिरिति । एकपत्नीव्रतस्येति इदं च व्रतमनुकूलायां पुत्रिण्यां पत्न्यां बोध्यम् ॥ ४४ ॥

गो० टी०–गोसहस्रप्रदातृणामिति । या येति एकस्य यच्छब्दस्य पूर्वेणान्वयः गुरुभृतां गुरुशुश्रूषाकारिणां देहन्यासकृतां महाप्रस्थानादिनेति शेषः यद्वा परलोकप्राप्तिसंकल्पपूर्वकं गङ्गायमुनासंगमादौ जलेऽग्नौ वा तनुं त्यजतामित्यर्थः ॥ ४५ ॥

४५] ति० टी०–अस्मिन्कुले मदीये नित्यतपस्विकुले यास्यति अकुशलां गतिमित्यनुकर्षः ॥ ४५ ॥

रा० टी०–नहीति । अस्मिन् तपसि कुले जातः कश्चिदपि जनः येन हेतुना अकुशलां गतिं न गच्छति तेनैव हेतुना मम बान्धवो निहतो भवान् अकुशलां गतिं नैव यास्यति एतेन ब्रह्मवित्तपस्विकुलस्य दोषास्पर्शित्वं सूचितं तेन तत्कुलस्य ब्रह्मवेत्तृत्वं व्यक्तम् ॥ ४५ ॥

गो० टी०–नेति । अस्मिन्कुले तपोनिष्ठानामस्माकं कुले जातः अकुशलाम् अशुभां गतिं न गच्छेत् अपि तु मम बान्धवः पुत्रः त्वं येन निहतः स एवाकुशलां गतिं यास्यति ॥ ४६ ॥

४६] ति० टी०–उदकं संस्कारपूर्वकम् ॥ ४६ ॥

रा० टी०–एवमिति । सः तत्पिता कृपणं यथा स्यात्तथा पर्यदेवयत व्यलपत्तथा तेन प्रकारेण उक्त्वा विलप्य उदकं प्रमीतक्रियाङ्गीभूतोदकक्रियां कर्तुं प्रवृत्तः ॥ ४६ ॥

गो० टी०–एवमिति । उदकं संस्कारपूर्वोदकक्रियाः ॥ ४७ ॥

४७] ति० टी०–स्वर्गमध्यारुहत् तेन सत्येनाशु गच्छेति वचनानन्तरमेवेति शेषः । शक्रेण सहेत्यनेन मुनिपुत्रं स्वर्गं नेतुं शक्रः समागत इति ध्वनितम् ॥ ४७ ॥

रा० टी०–स इति । दिव्येन रूपेणोपलक्षितः स मुनिपुत्रः शक्रेण सह स्वर्गमध्यारुहत् ॥ ४७ ॥

गो० टी०–स त्विति । शक्रेण सह स्वर्गमध्यारुहदित्यनेन मुनिपुत्रं स्वर्गं नेतुं शक्रः समागत इति गम्यते ॥ ४८ ॥

४८] ति० टी०–आरुह्य पुनः शक्रेण सहागत्यावभाषे इत्यन्वयः । अस्यैव प्रपञ्चः—आश्वस्येत्यादि । अत्र वृद्धैः शोकग्रस्ततया बभाषेऽब्रवीदिति प्रौनरुक्त्यं न दोषाय ॥ ४८ ॥

रा० टी०–आबभाष इति । शक्रेण सह तापसस्तौ मातापितरौ मुहूर्तमावभाषे आश्वासयामासेत्यर्थः । आश्वास्य पितरमिदमब्रवीत् । शक्रेण सहेत्युक्त्या शक्रोऽपि तदानयनार्थमागत इति व्यक्तम् ॥ ४८ ॥

गो० टी०–संग्रहेणोक्तं स्वर्गारोहणं विवृणोति–आबभाष इति । तापसः शक्रेण सह तौ वृद्धौ आबभाषे । आभाषणेऽपि वृद्धयोरश्रवणात् पुनराहेत्याह–आश्वास्य चेति ॥ ४९ ॥

४९] ति० टी०–भवतोरिति अनेन मातापितृसेवा धर्मान्तराभावेऽपि सैवेन्द्रसालोक्यदेति ध्वनितम् । मूलं समीपम् ॥ ४९ ॥

रा० टी०–वचनाकारमाह–स्थानमिति । परिचारणात्सेवनान्महत्स्थानं प्राप्तोऽस्मि भवन्तावपि मम मूलं मत्समीपं क्षिप्रमुपेष्यतः प्राप्स्यतः ॥ ४९ ॥

गो० टी०–स्थानमिति । मूलं समीपम् 'आद्ये शिफायां नक्षत्रे मूलं कुञ्जसमीपयोः' इति निघण्टुः ॥ ५० ॥

५०–५१] ति० टी०–वपुष्मता पुष्पकादिवत्प्रशस्ताकारेण ॥ ५० ॥ ५१ ॥

रा० टी०–एवमिति । वपुष्मता प्रशस्तशरीरविशिष्टेन प्रशस्ताकारेणेत्यर्थः । विमानेन आरुरोह ॥ ५० ॥

रा० टी०–स इति । उपस्थितं समीपे स्थितं मां भार्यया सह तापसः उवाच ॥ ५१ ॥

१ सर्वभूतानामिति गो. पाठः । २ तपसेति गो. पाठः । ३ या या गुरुभृतामिति गो. पाठः । ४ ततोऽस्मै इति गो. पाठः । ५ आश्वास्येति गो. रा. पाठः । ६ प्रवित्तइति गो. पाठः । ७ उपैष्यत इति गो. उपेष्यत इति रा. पाठः । ८ तूदकमिति गो. पाठः ।

अद्यैव जहि मां राजन्मरणे नास्ति मे व्यथा । यैः शरैरेकपुत्रं मां त्वमकार्षीरपुत्रकम् ॥ ५२ ॥
त्वयापि च यदज्ञानान्निहतो मे सुतो बालकः । तेन त्वामपि शप्स्येऽहं सुदुःखमनिदारुणम् ॥ ५३ ॥
पुत्रव्यसनजं दुःखं यदेतन्मम सांप्रतम् । एवं त्वं पुत्रशोकेन राजन्कालं करिष्यसि ॥ ५४ ॥
अज्ञानात्तु हतो यस्मात्क्षत्रियेण त्वया मुनिः । तस्मात्त्वां नाविशत्याशु ब्रह्महत्या नराधिप ॥ ५५ ॥
त्वामप्येतादृशो भावः क्षिप्रमेव गमिष्यति । जीवितान्तकरो घोरो दातारमिव दक्षिणाम् ॥ ५६ ॥
एवं शापं मयि न्यस्य विलप्य करुणं बहु । चितामारोप्य देहं तन्मिथुनं स्वर्गमभ्ययात् ॥ ५७ ॥
तदेतच्चिन्तयानेन स्मृतं पापं मया स्वयम् । तदा बाल्यात्कृतं देवि शब्दवेध्यनकर्षिणा ॥ ५८ ॥

गो० टी०–एवमिति । वपुष्मतां प्रशस्ताकारेण प्रशंसायां मतुप् ॥ ५१ ॥ ५२ ॥

५२] ति० टी०–जहि प्राणैर्वियोजय ॥ ५२ ॥

रा० टी०–वचनाकारमाह–अद्येति । हे राजन् ! यस्त्वं शरेण एकपुत्रं मामपुत्रकमकार्षीः स त्वं मामद्यैव जहि ॥५२॥

गो० टी०–अद्येति । जहि प्राणान् मोचय "हन्तेर्जः" इति जादेशः । कथं मारणं दुःखाकरत्वादित्याह–मरणे नास्ति मे व्यथेति । व्यथाभावहेतुमाह–यदिति । अतोऽपि किं व्यथास्तीति भावः ॥ ५३ ॥

५३] ति० टी०–यदज्ञानान्निहतोऽतः शप्स्ये, न तु प्रत्यक्षमेव भस्मीकरोमि । सुदुःखमतिदारुणमिति क्रियाविशेषणे ॥ ५३ ॥

रा० टी०–त्वयेति । येन हेतुना मे बालस्त्वया निहतस्तेनैव हेतुना त्वामतिदारुणमसह्यं सुदुःखं शप्स्ये बोधयामि । लडुपात्तभविष्यत्वस्याविवक्षा शपो बोधनार्थकत्वं तु 'नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि' इत्यादिना मनोरमादौ स्पष्टम् ॥ ५३ ॥

गो० टी०–त्वयेति । अभिशप्स्यामि नतु भस्मीकरोमीति भावः सुदुःखमतिदारुणमिति क्रियाविशेषणम् ॥ ५४ ॥

५४] ति० टी०–दुःखं मरणपर्यवसायि सांप्रतं वर्तते त्वन्निमित्तमिति शेषः । कालं करिष्यसि मृत्युं प्राप्स्यसि ॥५४॥

रा० टी०–पुत्रेति । हे राजन् ! एतत्त्वन्निमित्तकं पुत्रव्यसनजं दुःखं मम यथास्ति एवं तथा पुत्रशोकेन कालं पुत्रसंयोगजनितसुखसमयं करिष्यसि त्यक्ष्यसि विक्षेपणार्थककृधातोर्लृट् ॥ ५४ ॥

गो० टी०–पुत्रव्यसनजमिति । यस्मात्कारणात् मम एतन्मरणपर्यवसायिपुत्रव्यसनजं दुःखम् अभूदिति शेषः एवं पुत्रशोकेन कालं करिष्यसि मृत्युं प्राप्स्यसीत्यर्थः । 'कालो मृत्यौ च समये' इति वैजयन्ती ॥ ५५ ॥

५५] ति० टी०–ब्रह्महत्या तत्समं पापम् ॥ ५५ ॥

रा० टी०–अज्ञानादिति । क्षत्रियेण त्वया यतः अज्ञानान्मुनिर्हतस्तस्माद्धेतोः ब्रह्महत्या ब्रह्महत्यासदृशकरणवधजनितपापं त्वां न आविशति ब्रह्महत्याशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः अत एव ब्राह्मणजातिनिषेधकैतत्पुत्रत्वोक्त्या न विरोधः यदि चेह ब्रह्मशब्दे न ब्रह्मज्ञानी उच्यते तदा शङ्कोत्तरयोर्निर्दलत्वं बोध्यम् ॥ ५५ ॥

गो० टी०–अज्ञानादिति । ब्रह्महत्या बहुपातकमित्यर्थः । अन्यथा वैश्यात् शूद्रायां जातस्य करणाख्यसंकरजातित्वेन ब्रह्महत्याप्रसक्त्यभावात् ॥ ५६ ॥

५६] ति० टी०–एतादृशो भावः पुत्रशोकेन मरणरूपः । यथा तत्तद्वस्तु दक्षिणां दातारं यथा सा दक्षिणान्यतः प्राप्ता भवति तद्वत् ॥ ५६ ॥

रा० टी०–दोषस्पर्शित्वाभावेऽपि परमात्मेच्छा न निवार्येति बोधयन्नाह–त्वामिति । जीवितान्तकरः पालनविघातकः अत एव घोरः एतादृशः मत्खेदसदृशखेदस्य भावः सत्ता दक्षिणं सर्वस्वादिरूपं दातारं त्वामप्यागमिष्यति । इवो हेतौ । यदि मकाररहितः पठेस्तदा दक्षः अतिसामर्थ्यमस्ति अस्येति दक्षी तेन परमात्मेच्छारूपकालेन हेतुना आगमिष्यतीत्यर्थः ॥ ५६ ॥

गो० टी०–त्वामिति । एतादृशः पुत्रशोकरूपः भावः स्वभावः दातारमिव दक्षिणा यथा विप्राय दक्षिणा दत्ता दातारं स्वसदृशफलं प्रापयति तथेत्यर्थः । पुत्रशोकातिशयेन इह जन्मन्येव फलमनुभविष्यसीति धिया क्षिप्रमित्युक्तवान् दक्षिणाशब्देन दक्षिणाहेतुकं सुकृतं लक्ष्यते ॥ ५७ ॥

५७] ति० टी०–देहं देहौ ॥ ५७ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण मयि शापं भविष्यत्कालिकवस्तुबोधनं न्यस्य उक्त्वेत्यर्थः चितामारोप्य तन्मिथुनं स्त्रीपुरुषं स्वर्गमभ्ययात् प्राप्नोत् ॥ ५७ ॥

गो० टी०–एवमिति । देहमित्येकवचनेन चितारोहणकाले देहयोर्गाढबद्धत्वं लक्ष्यते ॥ ५८ ॥

५८] ति० टी०–शब्दवेध्यनुकर्षिणा प्रथमं शब्दवेधिना पश्चाद्विद्धशल्यानुकर्षणमपि कृतवता पापं मुनिकुमारवधरूपम् । तीर्थस्तु–'शब्दवेध्यानुशिक्षिणा' इति पाठं शब्देन वेद्धुं योग्यं

१ यदिति गो. पाठः । २ तु यदविज्ञानादिति गो. पाठः । ३ सुतः शुचिरिति गो. पाठः । ४ अभिशप्स्यामीति गो. पाठः । ५ आगमिष्यतीति रा. पाठः । ६ दक्षिणेति गो. पाठः ।

तस्यायं कर्मणो देवि विपाकः समुपस्थितः । अपथ्यैः सह संभुक्ते व्याधिरन्नरसे यथा ॥ ५९ ॥
तस्मान्मा मा गतं भद्रे तस्योदारस्य तद्वचः । इत्युक्त्वा स रुदंस्रस्तो भार्यामाह तु भूमिपः ॥ ६० ॥
यदहं पुत्रशोकेन संत्यजिष्यामि जीवितम् । चक्षुर्भ्यां त्वां न पश्यामि कौसल्ये त्वं हि मां स्पृश ॥ ६१ ॥
यमक्षयमनुप्राप्ता द्रक्ष्यन्ति नहि मानवाः । यदि मां संस्पृशेद्रामः सकृदेन्वारभेत वा ॥ ६२ ॥
धनं वा यौवराज्यं वा जीवेयमिति मे मतिः । न तन्मे सदृशं देवि यन्मया राघवे कृतम् ॥ ६३ ॥
सदृशं तत्तु तस्यैव यदनेन कृतं मयि । दुर्वृत्तमपि कः पुत्रं त्यजेद्भुवि विचक्षणः ॥ ६४ ॥
कश्च प्रव्राज्यमानो वा नासूयेत्पितरं सुतः । चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते ॥ ६५ ॥
दूता वैवस्वतस्यैते कौसल्ये त्वरयन्ति माम् । अतस्तु किं दुःखतरं यदहं जीवितक्षये ॥ ६६ ॥
नहि पश्यामि धर्मज्ञं रामं सत्यपराक्रमम् । तस्य दर्शनजः शोकः सुतस्याप्रतिकर्मणः ॥ ६७ ॥
उच्छोषयति वै प्राणान्वारि स्तोकमिवातपः । न ते मनुष्या देवास्ते ये चारुशुभकुण्डलम् ॥ ६८ ॥
मुखं द्रक्ष्यन्ति रामस्य वर्षे पञ्चदशे पुनः । पद्मपत्रेक्षणं सुभ्रु सुदंष्ट्रं चारुनासिकम् ॥ ६९ ॥
धन्या द्रक्ष्यन्ति रामस्य ताराधिपसमं मुखम् । सदृशं शारदस्येन्दोः फुल्लस्य कमलस्य च ॥ ७० ॥
सुगन्धि मम रामस्य धन्या द्रक्ष्यन्ति ये मुखम् । निवृत्तवनवासं तमयोध्यां पुनरागतम् ॥ ७१ ॥

शब्दवेध्यं तदनुशिक्षितुं शीलं यस्य तेनेत्यर्थं चाह । तदसमञ्जसमिति स्पष्टमेव ॥ ५८ ॥

रा० टी०—तदिति । यत् आबाल्यादीषदज्ञानात्पापं कृतं तच्चिन्तयानेन चिन्तयमानेन शब्दवेध्यनुकर्षिणा शब्दवेधिना बाणेन अनुकर्षति प्राणानपहरति तच्छीलेन मया तदेतन्मुनिवचनं स्मृतम् ॥ ५८ ॥

गो० टी०—तदिति । शब्दवेध्यनुकर्षिणा शब्दवेधिनं बाणं प्रयुञ्जानेन यद्वा शब्दवेधिनं बाणं मुक्त्वा पुनस्तच्छरीरप्रोतशल्यमनुकृष्टवतेत्यर्थः । चिन्तयानेन मरणपर्यवसायी पुत्रशोकः प्राप्तः अस्य किं निदानमिति चिन्तयानेन एतत् पापं स्मृतं मुनिकुमारवधरूपं पापं स्मृतिविषयमभूदित्यर्थः ॥ ५९ ॥

५९] ति० टी०—विपाकः फलम् अपथ्यैर्व्यञ्जनैः सह भुक्तेऽन्नरसे व्याधिर्यथोपतिष्ठते । ' व्याधिमन्नरसो यथा ' इति पाठे उपस्थापयतीति शेषः ॥ ५९ ॥

रा० टी०—परमात्मेच्छायत्तस्वदुःखस्य कर्मफलत्वेनोत्प्रेक्ष्याह—तस्येति । हे देवि ! तस्य मुनिदुःखदानरूपस्य कर्मणः अयं विपाकः फलं समुपस्थितः प्राप्तः । नन्वज्ञानाज्जातकर्मण कथं फलप्राप्तिरित्यत आह—अपथ्यैः अपक्वहरितालादिभिः सह अन्नरसे संभुक्ते अज्ञानतोऽपि भक्षिते सति व्याधिर्यथा ॥ ५९ ॥

गो० टी०—तस्येति । अपथ्यैः व्याधिविवर्धकैः व्यञ्जनैः सह संभुक्तः अन्नरसः व्याधिमुल्बणयतीति शेषः । समुपस्थितो भवति बाधकत्वेन प्राप्तो भवति । ' अपथ्यैः सह संभुक्ते व्याधिरन्नरसे यथा ' इति च पाठः ॥ ६० ॥

६०–७१] ति० टी०—उदारस्य श्रेष्ठस्य तद्वचस्तद्वचःफलं त्रस्तो मरणभयादिति शेषः । रुदन् जीवितं त्यक्ष्यामीति भार्यामाहेति संबन्धः ॥ ६० ॥ चक्षुर्भ्यां न पश्यामि अमूर्तत्वादिति भावः ॥ ६१ ॥ नहि द्रक्ष्यन्तीति इह विद्यमानान्स्वेष्टबन्धूनिति शेषः । इतः परं त्वत्स्पर्शादिकं मे दुर्लभमिति भावः । यदि मामयं रामः सकृदपि स्पृशेत् अन्वारभेत्किंचिद्द्वारा वा स्पृशेत् ॥ ६२ ॥ यदि वा धनं कोशं यौवराज्यं वा लभेत तदा जीवेयम् । राघवे यन्मया कृतं विवासनरूपं तन्मे वृत्तस्य सदृशं न ॥ ६३ ॥ अनेन रामेण यन्मयि कृतं राज्यं त्यक्त्वा मद्वचःपरिपालनरूपं तत्तस्यैव सदृशम् । अनन्वयोऽत्रालंकारः । मत्सदृशोऽन्यायकृद्रामसदृश उचितकर्ता च भुवि नाभूदस्ति भविष्यति वान्य इत्याह—दुर्वृत्तमपीति ॥ ६४–६७ ॥ स्तोकमल्पं वारि आतपो यथा शुष्कं करोति । ये द्रक्ष्यन्ति न ते मनुष्याः, किं देवांश एव ॥ ६८–७१ ॥

रा० टी०—तस्मादिति । उदारस्य महतः तस्य ऋषेर्वचः वचनबोधितं दुःखमागतं प्राप्तमिति उक्त्वा त्रस्तः वियोगजनितदुःखेनोद्विग्नः भूमिपो दशरथः रुदन्सन्भार्यां कौशल्यामाह 'उदारो दातृमहतोः' इत्यमरः ॥ ६० ॥ वचनाकारमाह—यदिति । यत् यस्माद्धेतोः पुत्रशोकेन जीवितं प्रजापालनम् इह लोके स्थितिमित्यर्थः । संत्यजिष्यामि संत्यक्ष्यामि अतः त्वां न पश्यामि अत एव त्वमपि मा स्पृश मामिति शेषः । 'मा' इति पाठः अत एव मा मामिति भूषणे व्याख्यातम् ॥ ६१ ॥ नन्वतो न मां पश्यसीत्यत आह—यमक्षयमिति । यमक्षयं यमस्य कालगतेः क्षयः विध्वंसो यस्मिँस्तं कालागम्यसाकेतलो-

---

१ संभुक्त इति गो. पाठः । २ व्याधिमन्नरस इति गो. पाठः । ३ ममागतमिति रा. पाठः । ४ अर्धमेतत् गो. नास्ति । ५ संत्यक्ष्याम्यपेति गो. पाठः । ६ साधु मेति गो. पाठः । ७ श्लोकोऽयं सार्धचतुःषष्टेरग्रे गो. पाठे । ८ स स्पृशेदिति रा. पाठः । ९ अथ लभेतेति गो. पाठः । १० इत्युक्त्वा स रुदंस्तस्तो भार्यामाह च भूमिपः । एतदिति गो. पाठः । ११ स्पृशेति रा. पाठः । १२ अदर्शनज इति गो. पाठः । १३ मे इति गो. पाठः १४ निधनमिति गो. पाठः । १५ नाभस्पृशेति गो. पाठः । १६ तदिति गो. पाठः ।

द्रक्ष्यन्ति सुखिनो रामं शुक्रं मार्गगतं यथा । कौसल्ये चित्तमोहेन हृदयं सीदतेराम् ॥ ७२ ॥
वेदये न च संयुक्ताञ्शब्दस्पर्शरसानहम् । चित्तनाशाद्विपद्यन्ते सर्वाण्येवेन्द्रियाणि [2]हि ॥
क्षीणस्नेहस्य दीपस्य [3]संरक्ता रश्मयो यथा ॥ ॥ ७३ ॥
अयमात्मभवः शोको मामनाथमचेतनम् । संसाधयति वेगेन यथा कूलं नदीरयः ॥ ७४ ॥
हा राघव महाबाहो हा ममायासनाशन । हा पितृप्रिय मे नाथ हा ममासि गतः [4]मृत ॥ ७५ ॥
हा कौसल्ये न पश्यामि हा सुमित्रे तपस्विनि । हा नृशंसे ममामित्रे कैकेयि कुलपांसनि ॥ ७६ ॥
इति मातुश्च रामस्य सुमित्रायाश्च संनिधौ । राजा दशरथः शोचञ्जीवितान्तमुपागमत् ॥ ७७ ॥

तथा तु दीनः कथयन्नराधिपः प्रियस्य पुत्रस्य विवासनातुरः ।
गतेऽर्धरात्रे भृशदुःखपीडितस्तदा जहौ प्राणमुदारदर्शनः ॥ ७८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

कमित्यर्थः । येन मानवाः मनुवंशिनः अनुप्राप्ता प्राप्स्यनुकूलव्यापारवन्तः ते न द्रक्ष्यन्ति इहलोकस्थान्न पश्यन्ति एतेन मनुवंशीयानां स्वाभाविकः सौशील्यगुणो व्यञ्जितः । अर्धं पृथक् । नन्विहस्थितौ उपायं विचार्य स्थीयतामित्यत आह–यदि रामः मां सकृदपि स्पृशेदन्वारभेत पश्चाद्मनारम्भं कुर्यात्तदा धनं कोशादिकं यौवराज्यं युवराजपाल्यं जीवेयं पालयेयमिति मे मतिः निश्चयः । अर्धद्वयमेकान्वयि ॥ ६२ ॥ रामागमनं विना स्थित्यभावे हेतुं वदन्नाह–नेति । यदकालकप्रव्राजनं मया कृतं तन्मेऽसदृशमनुचितमित्यर्थः । यदाज्ञापरिपालनमनेन रामेण कृतं तत्तस्य सदृशमुचितमेव एतेनेह स्थितौ जना नपहसिष्यन्तीति ध्वनितम् ॥ ६३ ॥ तदेव भङ्ग्यन्तरेण बोधयन्नाह–दुर्वृत्तमिति । दुर्वृत्तमसद्वृत्तिमसत्येनिन्देत् ॥ ६४ ॥ वियोगजदुःखस्य परां काष्ठां बोधयन्नाह–चक्षुषेति । मयि विषयमाना स्मृतिं रामभिन्नविषयकस्मरणं विलप्यते ॥ ६५ ॥ स्मृत्यन्तराभावे हेतुं वदन्नाह–दूता इति । स्वतस्य स्वः स्वकीय एव सः रामः तस्य किं च सुशोभनः अतः गुणद्वारा सर्वत्र व्याप्तिर्यस्य तस्य रामस्य एते प्रसिद्धाः गुणाः दूतावदूता इव त्वरयन्ति रामसन्निधिं द्रुतं प्राप्तुमुत्साहयन्तीत्यर्थः वै निश्चितमेतत् । अर्धं पृथक्–अत इति । जीवितस्य पालनस्य शयः अवसानं यस्मिन् समये तस्मिन्रामं न पश्यामि अतः किं दुःखतरं न किमपीत्यर्थः । अर्धद्वयमेकान्वयि ॥ ६६ ॥ तस्येति । स्तोकं स्वल्पं वारि आतपो घर्म इव ॥ ६७ ॥ नन्विह स्थितौ प्रयोजनाभावाद्वयमपि भवता सहैव गमिष्याम इत्यत आह–नेति । ये रामस्य मुखं द्रक्ष्यन्ति ते मनुष्याः प्राकृतनरा न । तत्र हेतुः–यतो देवाः अतिप्रमोदवन्तः अत एव धन्याः चारुः अतिमनोहरा नासिका यस्मिंस्तत्तारादिपश्चन्द्रस्तत्समं तत्सदृशम् एतेन तदर्शनार्थं भवतीभिः स्थातव्यमिति ध्वनितम् । अर्धचतुष्टयमेकान्वयि ॥ ६८ ॥ ६९ ॥ तदेव भङ्ग्यन्तरेणाह–सदृशमिति । शारदस्य शरत्संबन्धिनः शोभनो गन्धो यस्मिंस्तत् ॥ ७० ॥ निवृत्तेति । शुक्रमतिप्रभावविशिष्टं मार्गः गतो येन तं यथा यथावत् द्रक्ष्यन्ति एतेन तद्दर्शनमतिभाग्यवशेन लभ्यमिति सूचितम् ॥ ७१ ॥

गो० टी०–तस्मादिति । उदारस्य शापप्रदातुः उदारत्वोक्तिरपुत्रस्य पुत्रसंपादनपरत्वाद्, यद्वा उदारस्य महतः 'उदारो दातृमहतोः' इत्यमरः वचो मामागतं शापरूपवचनार्थों मां प्राप्त इत्यर्थः ॥ ६१ ॥ चक्षुर्भ्यामिति । मा माम् ॥ ६२ ॥ इत्युक्त्वा स रुदंस्तो भार्यामाह च भूमिप इत्यर्धानन्तरम् 'एतन्मे सदृशं देवि यन्मया राघवे कृतम् । सदृशं तत्तु तस्यैव यदनेन कृतं मयि ॥' इति क्रमः ॥ ६३ ॥ एतदर्धद्वयं क्रमेणोपपादयति–दुर्वृत्तमित्यर्धद्वयेन ॥ ६४ ॥ यदीति । रामः सकृदप्यथ मां संस्पृशेत् लभेत वा चक्षुर्विषयतां प्राप्नुयाद्वा तदा जीवेयमिति गम्यमानत्वात्तदनुक्तिः । किमर्थमेवमर्थं न करोषीत्यत्राह–यमेति । यमक्षयं यमगृहमनुप्राप्ताः मानवाः बान्धवाश्च द्रक्ष्यन्ति हीत्यर्थः । तस्माज्जीवनकाल एव दर्शनमपेक्ष्यत इति भावः ॥६६–६७॥ तस्येति । अप्रतिकर्मणः प्रतिक्रियारहितस्य स्तोकमल्पम् 'स्तोकाल्पक्षुल्लकाः' इत्यमरः ॥ ६८ ॥ नेति । मनुष्याः जरायुक्ताः न भवन्ति किंतु देवाः नित्ययौवनाः 'अहं पुनर्देवकुमाररूपमलंकृतं तं सुतमात्रजन्तम् । नन्दामि पश्यन्नपि दर्शनेन भवामि दृष्ट्वा च पुनर्युवेव ॥' इति हि पूर्वमुक्तवान् । चारुशुभकुण्डलं तन्मुखसंयोगात् कुण्डलमतीव शोभां प्राप्तमित्युच्यते ॥ ६९ ॥ ७१ ॥ निवृत्तेति । मार्गगतं शुक्रं यथा मौढ्यं विहाय स्वस्थानगतं शुक्रमिव ॥ ७२ ॥

७२–७८] ति० टी०–शुक्रं मार्गगतं यथा मौढ्यादि विहाय स्वोचमार्गगतं शुक्रमिवेत्यर्थ इति तीर्थः । कतकस्तु—'शुक्रं मार्गगतं यथा' इति पाठः, हस्तात्पञ्चराद्वान्यदेशगतं पुनश्च मार्गे यथास्थानं गतं प्राप्तं शुक्रं क्रीडाशुकमिवेत्यर्थ इत्याह । चित्त-

---

१ सीदतीव मे इति गो. पाठः । २ मे इति गो. पाठः । ३ संसक्ता इति गो. पाठः । ४ सादयतीति गो. पाठः । ५ -ऽथ क्वासीति गो. पाठः । ६ नक्षिष्यामीति गो पाठः । ७ यदा तु दीनमिति गो. पाठः ।

पञ्चषष्टितमः सर्गः ।

प्रभाते प्राबोधिकवादित्रघोषान्वितबन्दिस्तुतिपाठे प्रवृत्तेऽप्यप्रबुध्यमानं दशरथमन्तिकचराः स्त्रिय उपायान्तरैर्गतप्राणं विनिश्चिक्युरथ प्रबुद्धानां कौसल्यासुमित्रादीनां दुःखाक्रन्देनोच्चैस्तमामव्याहृतं प्रससे ।

अथ रात्र्यां व्यतीतायां प्रातरेवापरेऽहनि । बन्दिनः पर्युपातिष्ठंस्तत्पार्थिवनिवेशनम् ॥ १ ॥
सूताः परमसंस्कारा मागधाश्चोत्तमश्रुताः । गायकाः श्रुतिशीलाश्च निगदन्तः पृथक्पृथक् ॥ २ ॥
राजानं स्तुवतां तेषामुदात्ताभिहिताशिषाम् । प्रासादाभोगविस्तीर्णः स्तुतिशब्दो ह्यवर्तत ॥ ३ ॥

मोहेन दुःखातिशयप्राप्तमूर्छया सीदतेतरामतिशयेन शीर्यतीव ॥ ७२ ॥ वेदये जानामि संयुक्तानिन्द्रियसंयुक्तान् संरक्ता भस्मतां प्राप्ता यथा दीपस्य रश्मयो विपद्यन्ते तथेन्द्रियाणीत्यर्थः ॥७३॥ संसाधयति नाशयति ॥ ७४–७८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

रा० टी०–कौशल्ये इति । चित्तस्य यो मोहः इह स्थितौ कर्तव्याविषयकविवेकाभावस्तेन मे हृदयं सीदतेतराम् । अत एव संयुक्तानिन्द्रियसंबन्धानपि शब्दादीनहं न वेद जानामि । तत्र हेतुः चित्तनाशात्सर्वाणि विपद्यन्ते परिणतानि भवन्ति तत्र दृष्टान्तः संरक्ताः अरुणाः । अर्धचतुष्टयमेकान्वयि ॥ ७२ ॥ ७३ ॥ अयमिति । आत्मना निष्पादितः शोकः मामचेतनं शिथिलमित्यर्थः संसाधयति करोति, तत्र दृष्टान्तः नदीरयः गङ्गावेगः कूलमिव ॥ ७४ ॥ तद्विलापमाह–हेति । आयासनाशन दुःखविध्वंसक ॥ ७५ ॥ हेति । नाथ मनोरथपूरक ॥ ७६ ॥ हेति । अनृशंसे क्रूरचेष्टारहिते अत एव आमित्रे अविप्रिये कुलपांसनि कुलाधिपप्रकाशिके कैकेयि इति अनेन प्रकारेण रामस्य मातुः कौशल्यायाः संनिधौ शोचन्सञ्जीवितान्तं पालनाभावमप्रकटसाकेतलोकमित्यर्थः । उपागमत् प्राप्नोत् ॥७७॥ गमनसमयं बोधयन्नाह–तथेति । प्राणं पालनं जहौ अप्रकटसाकेतं प्रापेत्यर्थः ॥ ७८ ॥.

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–कौसल्य इति । चित्तमोहेन चित्तस्य मोहो दुःखातिशयप्राप्ता मूर्च्छा तयेत्यर्थः । 'मूर्छा तु कश्मलं मोहः' इत्यमरः । हृदयं मनसोऽधिष्ठानं सीदतीव विशीर्यतीव संयुक्तान् इन्द्रियसंयुक्तान् न वेद येन जाने ॥७३॥ हृदयविशरणेन शब्दाद्यज्ञाने हेतुमाह–चित्तनाशादिति । संसक्ताः दीपाविनाभूताः यथा स्नेहनाशकृतदीपनाशाद्दिनाशः एवं शरीरशैथिल्यकृतचित्तनाशादिन्द्रियनाश इति सूचितम् ॥ ७४ ॥ ७५ ॥ हेति । आयासनाशन दुःखनाशन ॥ ७६–७९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥६४॥

१] ति० टी०–अथेति ॥ १ ॥

२] ति० टी०–परमसंस्कारा व्याकरणादिशिक्षावन्तः परमालंकारा वा । मागधा वंशावलीकीर्तकाः । 'मङ्गलाः' इति पाठेऽपि मङ्गलपाठकास्त एव उत्तमश्रुता उत्तमं श्रुतं वंशपरम्पराश्रवणमेषां ते मागधाः । श्रुतिशीला गायकास्तन्त्रीनादविभाजनशीला गायकाः पृथक्पृथक् निगदन्तः स्वस्वमार्गानुसारेणेति शेषः ॥ २ ॥

रा०टी०–अप्रकटसाकेतस्थराजैश्वर्यं वर्णयन्नाह–अथेति । अथ अप्रकटसाकेतलोकप्रस्थानानन्तरं रात्र्यां व्यतीतायां सत्यामपरेऽहनि प्रातरेव बन्दिनः राजस्तुतिकर्तारः परमसंस्काराश्छन्दोव्याकरणाध्ययनाध्यापनजनितसंस्कारविशिष्टवाणीविशिष्टाः सूताः वंशपरम्पराप्रवक्तारश्च मङ्गलाः गणपत्यादिस्तवपाठकाश्च उत्तमश्रुताः उत्तमं श्रुतं गानाभिज्ञश्रुतेभ्यः श्रवणं येषां ते अतिशिक्षावन्त इत्यर्थः अत एव श्रुतिशीलाः श्रवणश्रावणकर्मपरिशीलनकर्तारः अत एव पृथक् पृथक् निगदन्तः स्वस्वाभिज्ञतां दर्शयन्तो गायकाश्च पार्थिवनिवेशनमप्रकटसाकेतान्तर्वर्तिराजाधिष्ठितगृहं पर्युपातिष्ठन्प्रापुः । श्लोकद्वयमेकान्वयि ।'परमसंस्कारा मागधाश्च'इति पाठान्तरं राजवंशपरम्परावक्तार इति तदर्थः अस्मिन्पक्षे सूतशब्दः पौराणिकार्थकः॥१॥२॥

गो० टी०–अथेत्यादि श्लोकद्वयमेकं वाक्यम् । रात्र्यां रात्रिशेषे परमसंस्काराः व्याकरणायुत्तमसंस्कारयुक्ताः श्रेष्ठालंकारयुक्ता वा बन्दिन इति पूर्वसूक्तत्वात् सूताः वंशावलिकीर्तकाः मङ्गलाः मङ्गलपाठकाः उत्तमं श्रुतं गान्धर्वशास्त्रश्रवणं येषां ते उत्तमश्रुताः एतद्विशेषणद्वयं गायकमात्रविशेषणम् अन्यत्सर्वविशेषणं सर्वत्र पर्युपातिष्ठन्निति क्रियापदम् ॥ १–२॥

३] ति० टी०–उदात्तमुच्चैःस्वरेणाभिहिता आशिषो यैस्तेषां प्रासादानामाभोगेषु मध्येषु विस्तीर्णः प्रतिध्वनिनेति शेषः ॥ ३ ॥

रा० टी०–राजानमिति । उदात्तेन उच्चैःस्वरेण अभिहिताः प्रयुक्ताः आशिषो यैस्तेषां राजानं स्तुवतां तोषयतां बन्यादीनां प्रासादाभोगविस्तीर्णः प्रासादानां देवगृहादीनामाभोगेषु मध्येषु विस्तीर्णं विस्तारो यस्य सः स्तुतिशब्दोऽवर्तत ॥ ३ ॥

---

१ मङ्गला इति गो. रा. पाठः । २ स्तुतिशीला इति गो. पाठः ।

ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः । अपदानान्युदाहृत्य पाणिवादान्यवादयन् ॥ ४ ॥
तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः । शाखास्थाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥ ५ ॥
व्याहृताः पुण्यशब्दाश्च वीणानां चापि निःस्वनाः। आशीर्गेयं च गाथानां पूरयामास वेश्म तत् ॥ ६ ॥
ततः शुचिसमाचाराः पर्युपस्थानकोविदाः । स्त्रीवर्षवरभूयिष्ठा उपतस्थुर्यथापुरा ॥ ७ ॥
हरिचन्दनसंपृक्तमुदकं काञ्चनैर्घटैः । आनिन्युः स्नानशिक्षाज्ञा यथाकालं यथाविधि ॥ ८ ॥
मङ्गलालम्भनीयानि प्राशनीयान्युपस्करान् । उपानिन्युस्तथा पुण्याः कुमारीबहुलाः स्त्रियः ॥ ९ ॥

गो० टी०–राजानमिति । उदात्ताभिहिताशिषाम् उदात्तेन उच्चैःस्वरेण अभिहिताः प्रयुक्ताः आशिषो यैस्तेषां प्रासादाभोगविस्तीर्णः प्रासादेषु आभोगः परिपूर्णता तया विस्तीर्णः 'आभोगः परिपूर्णता' इत्यमरः ॥ ३ ॥

४] ति० टी०–पाणिवादकाः पाणिवादनशीलाः अपदानानि राज्ञां वृत्ताद्भुतकर्माण्युदाहृत्य तदनुगतं पाणिवादान्यवादयन् ॥४॥

रा०टी०–तत इति । ततः शब्दप्रवृत्त्यनन्तरं तेषां सूतानां स्तुवतां सतां पाणिवादकाः तालगत्यनुरोधेन पाणिवादनकुशलाः पुरुषाः अपदानानि राजकुलप्रभृतविचित्रचरितानि उदाहृत्य पाणिवादान्पाणिरूपवाद्यानि अवादयन् ॥ ४ ॥

गो० टी०–तत इति । स्तुवतां स्तुवत्सु सत्सु पाणिवादकाः तालगत्या विविधं पाणिभ्यां वादयन्तीति पाणिवादका अपदानानि वृत्तान्यद्भुतकर्माणि पाणिवादानवादयन् पाणिवादानकुर्वन्नित्यर्थः ॥ ४ ॥

५] ति० टी०–सस्वनुः फणादित्वात्पक्षे एत्वाभ्यासलोपाभावः । ये राजकुलगोचरा राजकुलवासयोग्या ये शुकादयः ॥ ५ ॥

रा० टी०–तेनेति । तेन पाण्यादिवादनजनितेन शब्देन प्रतिबुद्धा इव शाखास्थाः पुष्पवाटिकादिवृक्षशाखानिवासिनः ये राजकुलगोचराः राजकुलमात्रनिवसनशीलाः अत एव पञ्जरस्थाः विहगाः ते च सस्वनुः ॥ ५ ॥

गो० टी०–तेनेति । शाखास्थाः गृहारामवृक्षशाखाश्च वर्तमानाः राजकुलगोचराः राजगृहे दृश्यमानाः विहगाः शुकनादयः ५

६] ति० टी०–तैः पूर्वश्लोकोक्तैः शुकादिभिर्व्याहृताः पुण्यशब्दाः काशीगङ्गादिरूपाः गाथानां केवलगायकानामाशीर्गेयमाशीर्वादप्रधानं गानं यद्वा गाथा राज्ञां चरित्रादिप्रतिपादिकास्तासामाशीर्वादघटितं गानमित्यर्थः ॥ ६ ॥

रा० टी०–व्याहृता इति । व्याहृता ब्राह्मणशुकाद्युच्चारिताः पुण्याः वेदवेदादिसंबन्धित्वेन पवित्रकारका एव शब्दाः वीणानां निःस्वनाश्च तद्राजाधिष्ठितं वेश्म गृहं पूरयामासुः गाथानां ब्राह्मणादिरचितप्रबन्धानां संबन्धि आशीर्गेयम् आशिषो राजाभिप्रेतस्य गेयं गानं च पूरयामास पूरयामासेत्यस्य वचनविपरिणामेनान्यत्राप्यन्वयः ॥ ६ ॥

गो० टी०–व्याहृता इति । व्याहृताः ब्राह्मणैरुक्ताः पुण्यशब्दाः पुण्यपुरुषक्षेत्रतीर्थकीर्तनादिरूपाः पूरयामासुरिति विपरिणामेन योजनीयं गाथानां दशरथविषयप्रबन्धविशेषाणां संबन्धि आशीर्गेयम् आशीर्वादरूपगानम् ॥ ६ ॥

७] ति० टी०–पर्युपस्थानं परिचर्या स्त्रीभिर्वर्षवरैः षण्डैश्च भूयिष्ठाः । 'षण्ढो वर्षवरस्तुल्यौ' । परिचारका इति शेषः ॥७॥

रा० टी०–तत इति । ततः ब्राह्मणादिशब्दश्रवणानन्तरं शुचिः कपटसंसर्गशून्यः समाचारः सम्यगाचरणं येषां ते स्त्रियश्च वर्षवराः क्लीबानि च तैः भूयिष्ठाः अधिकाः पर्युपस्थाने सेवायां कोविदाः निपुणाः जनाः पुरा यथा प्रकटायोध्यास्थितिसमये इव उपतस्थुः एतेन असाधारणदशरथपरिकरा अपि दशरथेन सहैव अप्रकटसाकेतलोकं प्रापुरिति व्यञ्जितम् ॥७॥

गो० टी०–तत इति । पर्युपस्थानकोविदाः कालोचितपरिचर्याविचक्षणाः स्त्रीवर्षधरभूयिष्ठाः अन्तःपुराध्यक्षस्त्रीभिः वर्षधरैः षण्डैश्च समूहाः परिचारका इति शेषः ॥ ७ ॥

८] ति० टी०–स्नानशिक्षाज्ञाः स्नानविधिज्ञाः यद्वारुणोदयात्पूर्वमेवोषसि स्नानार्थं जलायानेतव्यमिति शिक्षाज्ञाः ॥ ८ ॥

रा० टी०–सेवाकारमाह–हरीति । स्नानशिक्षाज्ञाः स्नानशिक्षां यथाविधिस्नानशासनं जानन्ति ताः पूर्वोक्ताः स्त्र्यादयः हरिचन्दनैः संपृक्तं संमिश्रमुदकं काञ्चनैर्घटैर्यथाकालं यथाविधि आनिन्युः ॥ ८ ॥

गो० टी०–हरिचन्दनसंपृक्तमिति । हरिचन्दनसंपृक्तं हरिचन्दनसंमिश्रं स्नानशिक्षाज्ञाः स्नानप्रकारज्ञाः यथाविधि यथानियमम् ॥ ८ ॥

९] ति० टी०–मङ्गलालम्भनीयानि मङ्गलार्थमालम्भनीयानि स्पर्शनीयानि गवादीनि । 'आलम्भः स्पर्शहिंसयोः' । प्राशनीयानि गङ्गोदकादीनि । दन्तधावनानन्तरं गण्डूषत्वेन प्राशनीयानि यानि नारिकेलोदकजीरकोदकानि च उपस्करा दर्पणवस्त्राभरणादयः कुमारीबहुलाः कुमार्यो बहुला यासु ताः स्त्रियो वरनार्यः ॥ ९ ॥

रा० टी०–मङ्गलेति । मङ्गलालम्भनीयानि मङ्गलहेतुकस्पर्शयोग्यानि गोप्रभृतीनि प्राशनीयानि दन्तधावनानन्तरं गण्डूषेण प्राशनयोग्यानि गङ्गोदकनारिकेलोदकजीरकोदकानि उपस्करान्वस्त्राभरणदर्पणादीन्कुमारीणां बहुलमाधिक्यं यासु ताः पुण्याः दोषरहिताः स्त्रियः उपानिन्युः ॥ ९ ॥

१ वादानिति गो. रा. पाठः । २ वीति गो. पाठः । ३ धरेति गो. पाठः । ४ उपनिन्युरिति गो. पाठः ५ ऽप्यन्या इति गो. पाठः । ६ श्लोकशेषे पुंल्लिङ्गो दृश्यते ।

सर्वलक्षणसंपन्नं सर्वं विधिवदर्चितम् । सर्वं सुगुणलक्ष्मीवत्तदभूदाभिहारिकम् ॥ १० ॥
ततः सूर्योदयं यावत्सर्वं परिसमुत्सुकम् । तस्थावनुपसंप्राप्तं किंस्विदित्युपशङ्कितम् ॥ ११ ॥
अथ याः कोशलेन्द्रस्य शयनं प्रत्यनन्तराः । ताः स्त्रियस्तु समागम्य भर्तारं प्रत्यबोधयन् ॥ १२ ॥
[3]अथाप्युचितवृत्तास्ता विनयेन नयेन च । नह्यस्य शयनं स्पृष्ट्वा किंचिदप्युपलेभिरे ॥ १३ ॥
ताः स्त्रियः स्वप्रशीलज्ञाश्चेष्टां संचलनादिषु । ता वेपथुपरीताश्च राज्ञः प्राणेषु शङ्किताः ॥ १४ ॥

गो० टी०–मङ्गलालम्भनीयानीति । मङ्गलालम्भनीयानि मङ्गलरूपानुलेपनानि तैलोद्वर्तनादीनि स्पर्शनीयानि गवादीनीत्येके प्राशनीयानि दन्तधावनानन्तरं गण्डूषत्वेन प्राशनीयानि संपिष्टतिलनारिकेलजीरकादिद्रव्याणि औषधविशेषानिति वार्थः, गङ्गादितीर्थोदकानीति वार्थः, अहर्दिनमखिलदुरितहरणायाखिलकर्मणामधिकारापादनाय च प्राशनीयानि कुलाराधनभूतश्रीरङ्गनाथचरणारविन्दसमर्पिततीर्थोदकतुलस्यादीनीति वार्थः, तीर्थोदकभाजनावरणपेटिकादेरेव परिचारकैरानयनं ज्ञेयम् । उपस्करान् दर्पणवस्त्राभरणकुङ्कुमादीनि कुमारीबहुलाः कुमारीप्रायाः स्त्रियः इति द्वितीया वारयोषित इति यावत् ॥ ९ ॥

१०] ति० टी०–आभिहारिकं प्रातःसमये राज्ञे यदभिहर्तव्यं मङ्गलार्थमानेतव्यम्, तत्सर्वं सर्वलक्षणयुक्तं सर्वं विधिवदर्चितं यथायोग्यं बहुकृतं सुगुणं च तल्लक्ष्मीवच्च ॥ १० ॥

रा० टी०–सर्वेति । सर्वैः निखिलैः लक्षणैः संपन्नं युक्तमत एव अर्चितं प्रशंसाविशिष्टं सुगुणलक्ष्मीवच्छोभनाः गुणाः संपादकत्वेन यस्मिन्नत एव लक्ष्मीवच्छोभासंपत्तिभ्यां विशिष्टं तदेव तदिति कर्मधारयः यत्सर्वं निखिलमाभिहारिकं मङ्गलार्थं राज्ञे प्रातः प्रापणीयं तत्सर्वं विधिवदभूत् ॥ १० ॥

गो० टी०–सर्वलक्षणसंपन्नमिति । आभिहारिकं राज्ञे प्रातर्यदाहर्तव्यं मङ्गलार्थमानेतव्यं तत्सर्वं सर्वलक्षणसंपन्नत्वादिधर्मविशिष्टं बभूव सुगुणं च तत् लक्ष्मीवचेति समासः॥१०॥

११] ति० टी०–परिसमुत्सुकं राजदर्शनं प्रतीति शेषः तस्थौ ततोऽनुपसंप्राप्तमप्राप्तराजदर्शनमत एव किंस्विदित्युपशङ्कितमभूत् ॥ ११ ॥

रा० टी०–अप्रकटसाकेतलोकप्राप्तराजसंपत्तिं संवर्ण्य राजकर्तृकगमनानन्तरकालिकप्रकटसाकेतलोकजनवृत्तान्तं वर्णयन्नाह–तत इत्यादिभिः । परिसमुत्सुकं रामवृत्तान्तश्रवणफलकराजदर्शनौत्सुक्यविशिष्टं यत्सर्वं प्रकटायोध्याजनजातं यावत्सूर्योदयं सूर्योदयपर्यन्तं तस्थौ तज्जनजातमनुपसंप्राप्तं बहिर्गमनाभावविशिष्टराजानं ज्ञात्वा स्विद् इदं राजानागमनं किं किंनिमित्तकमित्युपशङ्कितं शङ्कां प्राप उपलक्ष्येत्यध्याहृतम्॥११॥

गो० टी०–तदिति । तद् पूर्वोक्तं परिजनजातं सूर्योदयं यावत्सूर्योदयात्पूर्वमेव परिसमुत्सुकं राजसेवासमुत्सुकम् अनुपसंप्राप्तम् अनागतं राजानं प्रति किंस्विदित्युपशङ्कितं सत् तस्थौ राजानागतः तस्य किं वा स्यादिति शङ्कासंयुक्तं तस्थावित्यर्थः ॥ ११ ॥

१२] ति० टी०–शयनं प्रति अनन्तरा आसन्नाः कौसल्यादिभ्यातिरिक्ताः प्रत्यबोधयन्प्रतिबोधनोचितमृदुविनीतवचनैः स्पर्शैश्च ॥ १२ ॥

रा० टी०–अथेति । अथ सूर्योदयानन्तरं कोशलेन्द्रस्य दशरथस्य अनन्तराः समीवर्तिन्यः याः स्त्रियस्तास्तु शयनं शय्यां प्रति संगम्य भर्तारं राजानं प्रत्यबोधयन् ॥ १२ ॥

गो० टी०–अथेति । याः कौसल्यादिभ्यतिरिक्ताः शयनं प्रत्यनन्तराः शयनसन्निकृष्टा इत्यर्थः । प्रत्यबोधयन् प्रबोधनोचितसविनयमृदुवाक्यैः प्राबोधयन्नित्यर्थः ॥ १२ ॥

१३] ति० टी०–उचितवृत्ताः स्पर्शनादिव्यापारोचिताः किंचिदपि जीववेष्टादि ॥ १३ ॥

रा० टी०–अथेति । अथ प्रबोधनानन्तरं तत्प्रबोधोपलम्भाभावानन्तरमित्यर्थः । उचितवृत्ताः उचितं योग्यं वृत्तं बोधनविषयिणी प्रवृत्तिर्यासां ताः स्त्रियः विनयेन नम्रतया नयेन यथोचितरीत्या अस्य राज्ञः शयनं शय्यां स्पृष्ट्वा अत्रास्ति नास्ति वेति शङ्कानिवृत्त्यर्थं संस्पृश्य किंचिद्राजनित्यधार्यं वस्त्रादिकमपि न उपलेभिरे शय्यायां न प्रापुः एतेन सवस्त्राभरणशरीरसहितः साकेतलोकं जगामेति सूचितम् ॥ १३ ॥

गो० टी०–तथेति । तथापि बोधयित्वापि उचितवृत्ताः स्पर्शनादिव्यापारोचिताः विनयेन प्रश्रयेण नयेन युक्त्या च अस्य शयनं शयनस्थानं स्पृष्ट्वा किंचिदपि निद्रालक्षणम् उच्छ्वासादिकं न लेभिरे न ज्ञातवत्यः ॥ १३ ॥

१४] ति० टी०–स्वप्रशीलज्ञाः स्वप्रभावज्ञाः संचलनादिषु हृदयकरमूलनाडिषु चेष्टां नोपलेभिरे ततो वेपथुयुक्ताः राज्ञः प्राणेषु शङ्किता आसन् ॥ १४ ॥

रा० टी०–ता इति । राज्ञः चेष्टासंचलनादिषु चेष्टा कायव्यापारः असञ्चलनादयः प्रकृतिविपर्यासाभावप्रभृतयः तेषु प्राणेषु इन्द्रियेषु च शङ्किताः स्वप्रशीलज्ञाः स्वप्रसूचकस्वभावज्ञानवत्यस्ताः अमृतपाणयस्ताः राजदर्शनार्थमागताः वेपथुपरीताः राजशरीराद्यदर्शनेन कम्पयुक्तदेहाः स्त्रियः प्रतिस्रोतस्तृणाग्राणां स्रोतःसमीपोद्भूतवेतसप्रभृतिकोमलतृणाग्रभागानां सदृशं कम्पवत्त्वेन तुल्यं यथा स्यात्तथा संचकाशिरे, यद्वा ताः अदृष्टराजशरीराः स्वप्रशीलज्ञास्ताः अमृतपाणयः राज्ञः स्त्रियः

१ तद्भूवेति गो. पाठः । २ तथेति गो. पाठः । ३ चेष्टासंचलनादिष्विति गो. रा. पाठः । ४ राजानिति रुचिरं दृश्यते ।

प्रतिस्रोतस्तृणाग्राणां सदृशं संचकाशिरे । अथ संदेहमानानां स्त्रीणां दृष्ट्वा च पार्थिवम् ॥
यत्तदाशङ्कितं पापं तदा जज्ञे विनिश्चयः ॥ ॥ १५ ॥
कौसल्या च सुमित्रा च पुत्रशोकपराजिते । प्रसुप्तेन प्रबुद्धयेते यथाकालसमन्विते ॥ १६ ॥
निष्प्रभासौ विवर्णा च सन्ना शोकेन संनता । न व्यराजत कौसल्या तारेव तिमिरावृता ॥ १७ ॥
कौसल्यानन्तरं राज्ञः सुमित्रा तदनन्तरम् । न स्म विभ्राजते देवी शोकाश्रुकुलितानना ॥ १८ ॥
ते च दृष्ट्वा तदा सुप्ते उभे देव्यौ च तं नृपम् । सुप्तमेवोद्गतप्राणमन्तःपुरमदृश्यत ॥ १९ ॥

चेष्टादिषु स्वकायव्यापारादिषु शङ्किताः अत एव तृणाग्राणां सदृशं वेपथुपरीताः सत्यः संचकाशिरे । सार्धश्लोक एकान्वयी 'तश्चैरामृतपुच्छेषु' इति मेदिनी ॥ १४ ॥

गो० टी०—एतदेवोपपादयति—ता इति । स्वप्नशीलज्ञाः स्वापस्वभावज्ञाः ताः पूर्वोक्ताः स्त्रियः चेष्टासंचलनादिषु चेष्टा हस्तपादादिचलनं संचलनं हृदयादिस्पन्दनम् आदिशब्देन निश्वासादिकं गृह्यते तेषु किंचित्रोपलेभिरे इत्यनुषङ्गेण संबन्धः । वेपथुना कम्पेन परीताः व्याप्तास्ताः स्त्रियः राज्ञः प्राणेषु शङ्किताः सत्यः प्रतिस्रोतस्तृणाग्राणां नदीप्रवाहाभिमुखवेतसादितृणाग्राणां सदृशं तुल्यं यथा तथा संचकाशिरे संचकम्पिर इत्यर्थः ॥ १४ ॥

१५] ति० टी०—प्रतिस्रोत इति । स्रोतोभिमुखस्थितवेतसादितृणाग्राणां सदृशं कम्पं संचकाशिरे प्रकाशितवत्यः प्राप्ता इति यावत् । संदेहमानानां संदिहानानां यदाशङ्कितं पापं मरणपूर्वं राज्ञेति शेषः । तस्य निश्चयो जज्ञे जातः ॥ १५ ॥

रा० टी०—अथेति । अथ प्रकम्पप्राप्त्यनन्तरं पार्थिवं पार्थिवशयनस्थानमेव दृष्ट्वा संदिहानानां संदेहमानानां स्त्रीणां यत्पापं दुःखदायकत्वेन पापसदृशं स्वलोकान्तरगमनमित्यर्थः। आशङ्कितं राज्ञा कथितमित्यर्थः तत्तस्य विनिश्चयस्तदा तस्मिन्काले जज्ञे पार्थिवमित्यत्र तस्येदमित्यण् नच तदपवादस्य वृद्धाच्छ इत्यस्य प्रवृत्त्या कथमणुच्यत इति वाच्यं "संज्ञायां वा" इत्यनेन वृद्धसंज्ञायाः वैकल्पिकत्वात्तस्याः प्राप्ताप्राप्तविभाषात्वेन "वृद्धिर्यस्याचामादि—" इत्यस्यापि निवर्तिकात्वादिति दिक् । अर्धद्वयमेकान्वयि ॥ १५ ॥

गो० टी०—अथेति । यत्पापं मरणरूपमाशङ्कितं तस्य निश्चयस्तदा जज्ञ इति संबन्धः ॥ १५ ॥

१६] ति० टी०—यथाकालसमन्विते मृते इव, यद्वा यथाकालसमन्विते बह्वीषु रात्रिषु दुःखतो जागरणादयथाकाले प्रत्युषसि निद्रया समन्विते इत्यर्थः ॥ १६ ॥

रा० टी०—कौशल्येति । पुत्रशोकेन पराजिते अत एव कालसमन्विते अन्तकालयुक्ते इव प्रसुप्ते कौशल्यासुमित्रा च न प्रबुध्येते जागृतः ॥ १६ ॥

गो० टी०—कौसल्येति । पुत्रशोकेन पराजिते आक्रान्ते अत एव यथाकालसमन्विते मृते इव प्रसुप्ते न प्रबुध्येते ॥ १६ ॥

१७] ति० टी०—शोकेन सन्नोपहता संनता सुप्तिवशसंकुचितहस्तपादादिकरणा। कौसल्येति अत्रसुप्तेति शेषः॥ १७ ॥

रा० टी०—निष्प्रभेति । शोकेन सन्नता पराभूता सन्ना दुःखिता कौशल्या तिमिरावृता अन्धकाराच्छन्ना तारेव न व्यराजत अशोभत ॥ १७ ॥

गो० टी०—निष्प्रभेति । निष्प्रभा निःश्रीका विवर्णा पूर्ववर्णाद्विपरीतवर्णा शोकेन सन्ना कृशा सन्नता काश्यैन नम्रा तिमिरावृता उत्पातकालोत्थधूमास्तिमिरं तेनावृता तारेव तारकेव न व्यराजत ॥ १७ ॥

१८] ति० टी०—न विभ्राजते न विशेषेण भ्राजते । तत्र हेतुः—शोकेत्यादि ॥ १८ ॥

रा० टी०—कौसल्येति । राज्ञोऽनन्तरं समीपे वियमाना या कौशल्या न विभ्राजतेस्म सा कौशल्या तदनन्तरं तत्सन्निधौ वियमाना सुमित्रा च न विभ्राजते स्म अत एव देवी शेषराजपत्नी न विभ्राजते स्म ॥ १८ ॥

गो० टी०—कौसल्यानन्तरमिति । प्रथमं राजा न विभ्राजते स्म राज्ञो नन्तरं कौसल्याशोकाश्रुकुलितानना सती न विभ्राजते स्म तदनन्तरं देवी तथाविधा सुमित्रा न विभ्राजते स्म मृताद्दशरथाज्जीवन्त्योः कौसल्यासुमित्रयोर्विशेषो नासीदित्यर्थः ॥ १८ ॥

१९] ति टी०—ते उभे देव्यौ प्रश्वासादिना सुप्ते दृष्ट्वा नृपं च तं सुप्तमेव सन्तं तदवस्थायामेवोद्गतप्राणं लक्षणतो दृष्ट्वा सर्वमेवान्तःपुरसुद्गतप्राणं तत्कल्पमदृश्यत । 'अमन्यत' इति पाठेऽन्तःपुरं कर्तृ नृपसुद्गतप्राणममन्यतेत्यर्थः । तीर्थस्तु अदृश्यतेत्येतत्परस्परमपश्यदित्यर्थं व्याचष्टे ॥ १९ ॥

रा० टी०—ते इति । उभे कौशल्यासुमित्रे देव्यौ सुप्ते इव दृष्ट्वा नृपं नृपसंबन्धि शयनं तमाकाशमिव शून्यं दृष्ट्वा वियमानमन्तःपुरसुद्गतालयं प्राप्ताः प्राणा इन्द्रियाणि यस्य तदिव अत एव सुप्तं स्वापाश्रयीभूतमिव अदृश्यत नृपशब्दः इदमर्थाण्णन्तः वृद्धयभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ १९ ॥

गो० टी०—ते इति । सुप्ते ते उभे देव्यौ च दृष्ट्वा सुप्तमेव सन्तमुद्गतप्राणं तं नृपं च अन्तःपुरम् अन्तःपुरजनः अदृश्यत-अपश्यत् ॥ १९ ॥ २० ॥

---

१ संवेपमानानामिति गो. पाठः । २ तस्येति गो. पाठः । ३ चेति गो. पाठः । ४ तथेति गो. पाठः ।

ततः प्रचुक्रुशुर्दीनाः सस्वरं ता वराङ्गनाः । करेणव इवारण्ये स्थानप्रच्युतयूथपाः ॥ २० ॥
तासामाक्रन्दशब्देन सहसोद्भ्रतचेतने । कौसल्या च सुमित्रा च त्यक्तनिद्रे बभूवतुः ॥ २१ ॥
कौसल्या च सुमित्रा च दृष्ट्वा स्पृष्ट्वा च पार्थिवम् । हा भर्तेति परिक्रुष्य पेततुर्धरणीतले ॥ २२ ॥
सा कोसलेन्द्रदुहिता चेष्टमाना महीतले । न भ्राजते रजोध्वस्ता तारेव गगनच्युता ॥ २३ ॥
नृपे शान्तगुणे जाते कौसल्यां पतितां भुवि । अपश्यंस्ताः स्त्रियः सर्वा हतां नागवधूमिव ॥ २४ ॥
ततः सर्वा नरेन्द्रस्य कैकेयीप्रमुखाः स्त्रियः । रुदत्यः शोकसंतप्ता निपेतुर्गतचेतनाः ॥ २५ ॥
ताभिः स बलवान्नादः क्रोशन्तीभिरनुद्रुतः । येन स्फीतीकृतो भूयस्तद्गृहं समनादयत् ॥ २६ ॥
तत्पेरित्रस्तसंभ्रान्तपर्युत्सुकजनाकुलम् । सर्वतस्तुमुलाक्रन्दं परितापार्तबान्धवम् ॥ २७ ॥
सद्योनिपतितानन्दं दीनं विक्लवदर्शनम् । बभूव नरदेवस्य सद्म दिष्टान्तमीयुषः ॥ २८ ॥

२०–२१] ति० टी०–स्थानाद्वासस्थानात्प्रच्युतो यूथपो महागजो यासां ताः करेणव इव प्रचुक्रुशुरित्यन्वयः ॥ २० ॥ २१ ॥

रा० टी०–तत इति । ततः राजदर्शनाभावानन्तरं वराङ्गनाः राजपत्न्यः प्रचुक्रुशुः तत्र दृष्टान्तः स्थानात्स्वसमीपात्प्रच्युतः क्वचिद्गतः यूथपो यासां ताः करेणव इव ॥ २० ॥

रा० टी०–तासामिति । कौशल्या सुमित्रा च आक्रन्दशब्देन रोदनस्वनेन त्यक्तनिद्रे त्यक्ता विनष्टा निद्रा तत्सदृशमूर्छा ययोस्ते अत एव उद्भ्रतचेतने प्राप्तचैतन्ये बभूवतुः ॥ २१ ॥

गो० टी०–तासामिति । सहसोद्भ्रतचेतने सहसोत्पन्नप्रबोधे ॥ २१–२३ ॥

२२] ति० टी०–हा भर्तेति । हा भर्तरित्यर्थः ॥ २२ ॥

रा० टी०–कौसल्येति । पार्थिवं पार्थिवशय्यां धरणीतले पेततुः ॥ २२ ॥

२३] ति० टी०–अयोध्याजनपदवाची कोशलशब्दस्तालव्यमध्यः कौसल्यापितृदेशवाची तु दन्त्यमध्यः ॥ २३ ॥

रा० टी०–सेति । महीतले चेष्टमाना लुण्ठन्ती अत एव रजोध्वस्ता धूलीं प्राप्ता कोशलेन्द्रदुहिता कौशल्या गगनच्युता तारेव न भ्राजते ॥ २३ ॥

२४–२५] ति० टी०–शान्तगुणे उपशान्तजीवनधर्मे ॥ २४ ॥ २५ ॥

रा० टी०–नृप इति । नृपे राजनि शान्तगुणे जाते पालकत्वाभावत्वं प्राप्ते सतीत्यर्थः । भुवि पतितां कौशल्यां हतां नागवधूमिव अपश्यन् ॥ २४ ॥

रा० टी०–तत इति । कैकेयीप्रमुखाः कैकयीप्रभृतयः निपेतुः ॥ २५ ॥

गो० टी०–नृप इति । शान्तगुणे शान्तदेहोष्णस्पन्दादिगुणे ॥ २४ ॥ २५ ॥

२६] ति० टी०–ताभिः कैकेयीप्रभृतिभिः पश्चादन्तःपुरं प्रविष्टाभिः स्वनादेन प्रथमप्रविष्टानां स्त्रीणां बलवान्नादोऽनुद्रुतो युक्तः अभूदिति शेषः, येनानुद्रवणेन स्फीतीकृतो वर्धितः स नादो भूयोऽधिकं तद्गृहं समनादयद्व्याप्तवान् । तीर्थस्तु–'येन स्थिरीकृतं भूयः' इति पठित्वा येन नादेन स्थिरीकृतं श्लथरितं तद्गृहं कर्तृ भूयोऽत्यर्थं समनादयदनददित्यर्थमाह ॥ २६ ॥

रा० टी०–ताभिरिति । क्रोशन्तीभिः ताभिः स्त्रीभिः बलवान् अतिवृद्धो नादः अनुद्रुतः प्रापितः येन नादेन भूयः अधिकं यथा स्यात्तथा स्फीतीकृतः प्रवर्धितः नादः प्रतिध्वनिरित्यर्थः, गृहं समनादयत् अतिनादविशिष्टमकरोत् ॥ २६ ॥

गो० टी०–ताभिरिति । स नादः कौसल्याप्रभृतीनां नादः क्रोशन्तीभिस्ताभिः प्रश्चात्प्रविष्टकैकेयीप्रभृतिभिरनुद्रुतः अनुसृतोऽभूत् येनानन्तरक्रोशानुद्रुतेन पूर्वनादेन स्थिरीकृतं व्याप्तं तत्सर्वं गृहं समनादयत् महान्तं प्रतिध्वनिमजनयदित्यर्थः ॥ २६ ॥

२७] ति० टी०–पर्युत्सुकजनाकुलं पूर्ववृत्तान्तज्ञानाय पर्युत्सुकजननिविडम् ॥ २७ ॥

२८] ति० टी०–दिष्टान्तं कालधर्मञ्चपेयुषः प्राप्तस्य सद्म परित्रस्तसंभ्रान्तत्वादिगुणविशिष्टं बभूव ॥ २८ ॥

रा० टी०–तदिति । तासां स्त्रीणां परित्रस्तं अस्युद्वेगत्वेन संभ्रान्ताः ते एव पर्युत्सुकाः वृत्तान्तश्रवणौत्सुक्यवन्तस्ते एव जनास्तैः आकुलं व्याप्तमत एव तुमुलः वचनान्तरश्रवणाभावसंपादकः आक्रन्दो यस्मिन्नत एव परितापेन आर्ता व्याप्ताः बान्धवाः यस्मिन्नत एव दीनं क्षीणमत एव विक्लवं विक्लवकारकं दर्शनं यस्य तदिष्टान्तं दिष्टस्य कालस्य अन्तः अभावो यस्मिंस्तं लोकम् ईयुषः प्राप्तस्य नरदेवस्य वेश्म गृहं बभूव । अर्धचतुष्टयमेकान्वयि । 'दिष्टं दैवे पुमान्काले' इति मेदिनी ॥ २७ ॥ २८ ॥

गो० टी०–तदित्यादि । पर्युत्सुकजनाकुलं पूर्वं पर्युत्सुकजनाकुलं सद्म नरदेवस्य दिष्टान्तमीयुषः नरदेवे मरणं प्राप्ते

---

१ नाथेति परिक्रुश्येति गो. पाठः । २ गगनाच्युतेति गो. पाठः । ३ रुदत्य इति गो. रा. पाठः । ४ स्थिरीकृतमिति गो. पाठः । ५ सुमुत्सुकसंभ्रान्तमिति गो. पाठः । ६ दीनमिक्लवेति गो. पाठः ।

अतीतमाज्ञाय तु पार्थिवर्षभं यशस्विनं [1]तं परिवार्य पत्नयः ।
भृशं रुदन्त्यः करुणं सुदुःखिताः प्रगृह्य बाहू व्यलपन्ननाथवत् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

निःसंज्ञस्य राज्ञः शिरः स्वाङ्क आनीय कैकेयीं विनिन्द्य कौसल्या रामादीन्परिशोचति । आलिङ्ग्य विलपन्तीं कौसल्यामपनीय राज्ञो देहं तैलद्रोण्यां निक्षिप्यामात्यादयः सार्यं स्वस्वभवनमुपजग्मुः ।

तमग्निमिव संशान्तमम्बुहीनमिवार्णवम् । [2]गतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य [3]भूमिपम् ॥ १ ॥
कौसल्या वाष्पपूर्णाक्षी विविधं शोककर्शिता । उपगृह्य शिरो राज्ञः कैकेयीं प्रत्यभाषत ॥ २ ॥
सकामा भव कैकेयि भुङ्क्ष्व राज्यमकण्टकम् । त्यक्त्वा राजानमेकाग्रा नृशंसे दुष्टचारिणि ॥ ३ ॥
विहाय मां गतो रामो भर्ता च स्वर्गतो मम । विपथे सार्थहीनेव नाहं जीवितुमुत्सहे ॥ ४ ॥
भर्तारं तु परित्यज्य का स्त्री दैवतमात्मनः । इच्छेज्जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मणः ॥ ५ ॥

सति सम्भ्रस्तसंभ्रान्तं सम्भ्रस्तम् उद्विग्नं संभ्रान्तम् अनवस्थितं च इत्येवमादिविशेषणयुक्तं बभूवेति संबन्धः ॥ २७ ॥ २८ ॥

२९] ति० टी०—अतीतं मृतं पत्नयः पत्न्यः बाहू प्रगृह्याभिहत्य अनाथवदनाथार्हम् ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रा० टी०—अतीतमिति । पार्थिवर्षभमतीतं लोकान्तरगतमाज्ञाय परिवार्य शयनस्थानं परित्यज्य बाहू प्रगृह्य अन्योन्यं गृहीत्वा करुणं रुदन्त्यः पत्नयः तत्पत्न्यः व्यलपन् विविधमकथयन् ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

गो० टी०—अतीतमिति । आज्ञाय सम्यक् ज्ञात्वा पत्नयः पत्न्यः बाहू प्रगृह्य परस्परं बाहू गृहीत्वेत्यर्थः ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

१] ति० टी०—तमिति ॥ १ ॥

२] ति० टी०—राज्ञः शिर उपगृह्य अङ्के कृत्वेत्यर्थः ॥ २ ॥

रा० टी०—कौशल्याहृत्तं बोधयन्नाह—तमिति । भूमिपं राजानं स्वर्गस्थमप्रकटसाकेतपुरस्थं प्रेक्ष्य ज्ञात्वा अत एव तं तदधिष्ठितागारं संशान्तं प्रज्वलनरहितमग्निमिव अम्बुहीनमर्णवमिव गतप्रभं निहृत्ततेजसमादित्यमिव प्रेक्ष्य शोककर्शिता शोकेन वियोगजनितदुःखेन कर्शिता पीडिता अत एव बाष्पैः अश्रुभिः पूर्णे अक्षिणी यस्याः सा कौशल्या विविधमनेकप्रकारेण रचितं राज्ञः शिरः शय्याग्रभागादुपगृह्य गृहीत्वा कैकेयीं केकयीदासीं मन्थरां प्रत्यभाषत 'अग्रे प्रधाने च शिरः' इति नानार्थः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—तमित्यादि । राज्ञः शिर उपगृह्य अङ्के कृत्वेत्यर्थः ॥ १–३ ॥

३] ति० टी०—एकाग्रा पुत्रराज्यैकाग्रचित्ता ॥ ३ ॥

रा० टी०—तत्प्रतिभाषणमेवाह—सकामेति । नृशंसे क्रूरस्वभावे अत एव दुष्टचारिणि कैकेयि मन्थरे ! राजानं त्यक्त्वा इमं लोकं त्याजयित्वा एकाग्रा स्वस्थचित्ता सती त्वम् अकण्टकं विघ्नरहितं राज्यं भुङ्क्ष्व अत एव सकामा प्राप्तस्वमनोरथा भव ॥ ३ ॥

४] ति० टी०—राज्यस्याकण्टकत्वं दर्शयति—विहायेति । विपथे कान्तारे सार्थहीना सहायभूतपथिकसंघरहिता ॥ ४ ॥

रा० टी०—नन्वस्मिन्यास्तव सत्त्वे कथं मम राज्यभोग इत्यत आह—विहायेति । मां विहाय रामो गतः वनमिति शेषः, भर्ता च स्वः सर्वतः परलोकं गतः अतः विपथे दुर्गममार्गे सार्थहीना रक्षणयोग्यपथिकजनरहिता इवाहं जीवितुं पालयितुं नोत्सहे ॥ ४ ॥

गो० टी०—विहायेति । विपथे दुर्मार्गे सार्थहीना सहायभूतपथिकसंघरहितेत्यर्थः ॥ ४ ॥

५] ति० टी०—आत्मनो दैवतं भर्तारं परित्यज्य त्यक्तधर्मणस्त्यक्तः धीधर्मो यया तादृश्याः कैकेय्या अन्यत्र अन्या पुत्रराज्ये का जीवितुमिच्छेत् । 'परिष्वज्य' इति पाठे परिष्वज्य तेन सह भोगान्भुक्त्वा तं कालान्तरे परित्यज्येति शेषः ॥ ५ ॥

रा० टी०—नन्वतिरिक्तानामपि बहूनां राजस्त्रीणां सत्त्वात्तदायत्तं राज्यं स्यादित्यत आह—भर्तारमिति । आत्मनः दैवतं देवं भर्तारं परित्यज्य अन्यत्र भर्तृरहितस्थाने त्यक्तधर्मणः त्यक्तः धर्मः स्वामिसंरक्षणरूपा सेवकरीतिर्यया तस्याः कैकेय्याः केकयीदास्यास्तव संनिधौ का मदन्यापि स्त्री जीवितुमिच्छेत् काप्यित्यर्थः ॥ ५ ॥

---

१ संमिति गो. पाठः । २ हतेति गो. पाठः । ३ पार्थिवमिति गो. पाठः ।

न लुब्धो बुध्यते दोषान्किंपाकामिव भक्षयन् । कुब्जानिमित्तं कैकेय्या राघवाणां कुलं हतम् ॥ ६ ॥
अनियोगे नियुक्तेन राज्ञा रामं विवासितम् । सभार्यं जनकः श्रुत्वा परितप्स्यत्यहं यथा ॥ ७ ॥
स मामनाथां विधवां नाद्य जानाति धार्मिकः । रामः कमलपत्राक्षो जीवनाशमितो[1] गतः ॥ ८ ॥
विदेहराजस्य सुता तथा चारुतपस्विनी[2] । दुःखस्यानुचिता दुःखं वने पर्युद्विजिष्यति ॥ ९ ॥
नदतां भीमघोषाणां निशासु मृगपक्षिणाम् । निशम्यमाना[3] संत्रस्ता राघवं संश्रयिष्यति ॥ १० ॥
वृद्धश्चैवाल्पपुत्रश्च वैदेहीमनुचिन्तयन् । सोऽपि शोकसमाविष्टो नूनं[4] त्यक्ष्यति जीवितम् ॥ ११ ॥

गो० टी०–भर्तारमिति । त्यक्तधर्मणः त्यक्तधर्मायाः "धर्मादनिच् केवलात्" इत्यनिच् ॥ ५ ॥

६] ति० टी०–एवं साहसकरणे हेतुमाह–नेति । किंपाको निम्बः, कतकस्तु–किंपाको विषभेदस्तं कोपादिना भक्षयन्नात्महत्यादोषं न बुध्यते तद्वदित्यर्थ इत्याह तत्र लुब्ध इति नात्यन्तं समञ्जसं धनलोभादिना परस्य विषभक्षणं कारयन्यथा हत्यादोषं न बुध्यते इति वक्तुमुचितम् । यत्कैकेय्या राघवाणां कुलं हतं कल्कुब्जानिमित्तं प्रेरकतया ॥ ६ ॥

रा० टी०–नेति । कैकेय्या कैकेयीदास्या राघवाणां कुलं हतं पीडितम् तत्र निमित्तं कारणं कुब्जा तन्निष्ठकुब्जात्वं कुब्जात्वविशिष्टा प्रायः कुटिला भवन्तीति प्रसिद्धम् । एतेन स्वनिष्ठकौटिल्यप्रयोगकार्यमपि कृतमिति ध्वनितं तेन कौटिल्यविशिष्टैरकार्यं न गण्यते इति ध्वनितम् । तत्र दृष्टान्तः लुब्धः स्वजीवनविषयकलोभविशिष्टः जनः किंपाकं ब्राह्मण्यनाशकनिषिद्धलशुनपाकादिकं भक्षयन् चिरकालजीवनहेतुभूतं किंचिद्व्याधिनिवर्तनार्थं स्वादन्सन्नपि दोषान्भक्षणजनितदुरितानि न बुध्यते । इवोऽप्यर्थे ॥ ६ ॥

गो० टी०–नेति । लुब्धः अर्थलिप्सुः किम्पाकं कुत्सितपाक विषविपाकमित्यर्थः । किम्पाको नाम काकमर्दनामकविषफलविशेषः इति केचित्, कुब्जानिमित्तं कुब्जाहेतोः "निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्" इति हेतौ प्रथमा ॥ ६ ॥

७]ति० टी०–अनियोगेऽनुचितनियोगे। वरव्याजात्कैकेय्या नियुक्तेन राज्ञा सभार्यं रामं विवासितं श्रुत्वा जनकोऽहमिव परितप्स्यति ॥ ७ ॥

रा० टी०–अनियोग इति । अनियोगे नियोगानुचितकाले नियुक्तेन नियोगकर्त्रा राज्ञा विवासितं सभार्यं भार्यासहितं रामं श्रुत्वा जनकः मिथिलाधीशः अहमिव परितप्स्यति॥७॥

गो० टी०–अनियोगे नियुक्तेनेति । अनियोगे वरप्रदानसमये वरस्य विशेषनिर्देशाभावे सति नियुक्तेन इदानीं भरताभिषेकरूपे रामविवासनरूपे च कैकेय्या नियुक्तेन अनुचितनियोगे नियुक्तेनेति वार्थः, जनको वैदेहः ॥ ७ ॥

८] ति० टी०–जीवनेव नाशमदर्शनं गतः । 'जीवनाशमितो गतः' इति पाठे राज्ञो जीवनाशो यथा भवति तथा गत इत्यर्थः ॥ ८ ॥

रा० टी०–स इति । जीवनाशं जीवतां सफलजन्मनामृषीणां नाशः विध्वंसो यस्मिन्देशे तं देशमितो गतः धार्मिको रामः विधवां लोकान्तरगमनकर्तृत्वेन धवरहितामत एव अनाथां मामद्य न जानाति हृतश्रवणजनितज्ञानवानास्तीत्यर्थः । 'जीवनाशम्' इति पाठान्तरं तत्रापि स एवार्थः ॥८॥

गो० टी०–स इति । इतः अत्र देशे राज्ञा जीवनाशं गतः प्राप्तः स रामः अनाथां पुत्रविरहेण रक्षकान्तररहितां विधवां मां न जानाति ॥ ८ ॥

९] ति० टी०–चारुतपस्विनी भर्तृसेवनादित्याशयः । पर्युद्वेगो भयं वने दुःखं प्राप्येति शेषः ॥ ९ ॥

रा० टी०–विदेहेति । चारुतपस्विनी पतिसेवाविषयकशुचिविचारविशिष्टा विदेहराजस्य सुता वने दुःखमनुभूयेति शेषः । पर्युद्विजिष्यति उद्वेगं प्राप्स्यति ॥ ९ ॥

गो० टी०–विदेहराजस्येति । तपस्विनी शोचनीया, दुःखमिति क्रियाविशेषणं पर्युद्विजिष्यति भयं प्राप्स्यतीत्यर्थः ॥ ९ ॥

१०] ति० टी०–निशम्यमाना नादमिति शेषः । 'निशम्य नादम्' इति पाठान्तरम् ॥ १० ॥

रा० टी०–नदतामिति । नदतां नादं कुर्वतां भीमघोषाणां भयंकरघोषकारकस्वभावविशिष्टानां मृगादीनां निशम्यमाना नादमिति शेषः, अत एव संत्रस्ता सीता राघवं संश्रयिष्यति रामकण्ठसंलग्ना भविष्यति । किंच भीमघोषाणां भयंकरशब्दविशिष्टानां मृगादीनां नदतां नादं निशम्यमानेत्यर्थः । 'निशम्य नादम्' इति पाठान्तरमिति भट्टाः ॥ १० ॥

गो० टी०–नदतामिति । नदतां नदत्सु निशम्य नादमित्यर्थसिद्धम् ॥ १० ॥

११] ति० टी०–अल्पपुत्रश्चेति जनक इति शेषः । अल्पपुत्र इत्यस्य कन्यामात्रसंततिरित्यर्थ इति तीर्थः ॥ ११ ॥

रा० टी०–वृद्ध इति । वृद्धः ज्ञानवयोभ्यामधिकोऽपि अल्पपुत्रः अल्पः एक इत्यर्थः, पुत्रः पुत्रसदृशः कन्येत्यर्थः यस्य स जनकः वैदेहीं वनगमनजनितवैदेहीदुःखमनुचिन्तयन्वत

---

[1] जीवनाशमिति गो. पाठः । [2] सीतेति गो. पाठः । [3] नूनमिति गो. पाठः । [4] नन्विति गो. पाठः ।

साहमद्यैव दिष्टान्तं गमिष्यामि पतिव्रता । इदं शरीरमालिङ्ग्य प्रवेक्ष्यामि हुताशनम् ॥ १२ ॥
तां ततः संपरिष्वज्य विलपन्तीं तपस्विनीम् । व्यपनिन्युः[1] सुदुःखार्तां कौसल्यां व्यावहारिकाः[2]॥ १३ ॥
तैलद्रोण्यां तदामात्याः[3] संवेश्य जगतीपतिम् । राज्ञः सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनन्तरम् ॥ १४ ॥
न तु संकालनं[4] राज्ञो विना पुत्रेण मन्त्रिणः । सर्वज्ञाः कर्तुमीषुस्ते ततो रक्षन्ति भूमिपम् ॥ १५ ॥
तैलद्रोण्यां शायितं[5] तं सचिवैस्तु नराधिपम् । हा मृतोऽयमिति ज्ञात्वा स्त्रियस्ताः पर्यदेवयन् ॥ १६ ॥
बाहूनुच्छ्रित्य कृपणा नेत्रप्रस्रवणैर्मुखैः[6] । रुदत्यः[7] शोकसंतप्ताः कृपणं पर्यदेवयन् ॥ १७ ॥
हा महाराज रामेण सततं[8] प्रियवादिना । विहीनाः सन्यसंधेन किमर्थं विजहासि नः ॥ १८ ॥
कैकेय्या दुष्टभावाया राघवेण विवर्जिताः[9] । कथं सपत्न्या वत्स्यामः समीपे विधवा वयम् ॥ १९ ॥

एव शोकसमाविष्टः सञ्जीवितं प्रजापालनं त्यक्ष्यति पुत्रशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः ॥ ११ ॥

गो० टी०—वृद्ध इति । अल्पपुत्रः दुहितृमात्रपुत्रः सोऽपि जनकोऽपि ॥ ११ ॥

१२] ति० टी०—दिष्टान्तं मरणम् । शरीरालिङ्गनपूर्वकमग्निप्रवेशे हेतुः—पतिव्रतेति ॥ १२ ॥

रा० टी०—सेति । सा प्राप्तपुत्रपतिवियोगा पतिव्रताहमिदं परिदृश्यमानं शरीरं राजशरीरसंबन्धिशय्यावस्त्रादिकमालिङ्ग्य हुताशनं वह्निलोकं प्रवेक्ष्यामि प्रवेशनानुकूलव्यापारानुकूलेच्छावत्यस्मीत्यर्थः । अत एव दिष्टान्तं कालगतिरहितं पत्यधिष्ठितसाकेतमित्यर्थः, गमिष्यामि संयोगानुकूलव्यापारानुकूलकृतिमती भविष्यामीत्यर्थः । एतेन साकेतलोकस्य मार्गो वह्निलोक इति ध्वनितम् ॥ १२ ॥

गो० टी०—साहमिति । दिष्टान्तं मरणं पतिव्रता । 'आर्तातें मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता' इत्युक्तपातिव्रत्यविशिष्टा ॥ १२ ॥

१३] ति० टी०—व्यावहारिका व्यवहारे बाह्याभ्यन्तरसकलराज्यकृत्ये नियुक्ता अमात्या व्यपनिन्युः अन्तःपुराध्यक्षस्त्रीद्वारा भर्तृलिङ्गनाद्विमोच्यान्यतो निन्युरित्यर्थः ॥ १३ ॥

रा० टी०—तामिति । तां राजशय्यां परिष्वज्य विलपन्तीं कौशल्यां व्यावहारिकाः राजकुलोचितव्यवहारे नियुक्ताः जनाः व्यपनिन्युः शय्यातोऽन्यत्र प्रापयामासुः ॥ १३ ॥

गो० टी०—तामिति । व्यावहारिकाः व्यवहारे बाह्याभ्यन्तरसकलराजकृत्ये नियुक्ताः "तत्र नियुक्तः" इति ठक् अमात्या इत्यर्थः, कौसल्यां भर्तृलिङ्गनाद्व्यपनीय विमोच्य अन्यतोऽपनीयेत्यर्थः, तैलद्रोण्यां तैलपूरितकटाहे जगतीपतिं भूपतिं संनिवेश्य राज्ञोऽनन्तरकर्तव्यानि सर्वाणि कर्माणि दुःखापनोदनादीनि चक्रुः । 'अपनिन्युः' इति पाठे व्यावहारिकाः व्यवहारविदो लौकिकाः अपनिन्युरित्येकं वाक्यम् । तैलद्रोण्यामित्यारभ्य वाक्यान्तरम् आदिष्टाः राजकृत्येष्वादिष्टाः अमात्याः कर्माणि प्रजाशासनादीनि चक्रुः ॥ १३ ॥ १४ ॥

१४] ति० टी०—तैलद्रोणी तैलपूर्णकटाहः आदिष्टाः वसिष्ठादिभिराज्ञप्ता अमात्यास्तस्यां नृपं संवेश्य स्थापयित्वाऽनन्तरं कर्तव्यानि दुःखपरिपालनादीनि कर्माणि चक्रुः ॥ १४ ॥

रा० टी०—तैलेति । तदा कौशल्याया अन्यत्र नयनसमये आदिष्टाः वसिष्ठेनाज्ञप्ताः राज्ञो मान्याः राजसत्कृता जनाः तैलद्रोण्यां, तानां चौराणां भयौ प्राणलक्ष्म्यौ लान्ति गृह्णन्ति ते तेषां द्वारपानां द्रोणीस्थितिर्यस्यां स्थल्यां तस्यां जगतीपतिं जगत्याः पतिः स्थितो यस्मिँस्तं पर्यङ्कं संवेश्य संस्थाप्य अनन्तरं विघ्नरहितं यथा स्यात्तथा कर्माणि तत्कालोचितकृत्यानि अथ कृत्स्नं यथा भवति तथा चक्रुः 'द्रोणी काष्ठाम्बुवाहिन्यां गवां वासभुजि स्थितौ' इति विश्वः 'तश्चौरामृतपुच्छेषु' इति मेदिनी । 'अः कृष्णः शंकरो ब्रह्मा शक्रः सोमोऽनिलोऽनलः । सूर्यः प्राणो यमः कामो वसन्तः प्रणवः सुख इति मात्रिका 'लक्ष्मीर्गकार उच्यते' इत्येकाक्षरः ॥ १४ ॥

१५] ति० टी०—पुत्रेण विना संकालनं प्रेतनिर्हारं न कर्तुमीषुः यतः सर्वज्ञास्ततो हेतोस्तैलद्रोण्यां भूपं रक्षन्ति ॥ १५ ॥

रा० टी०—नन्विति शय्यारक्षणं किमर्थमित्यत आह—नेति । राज्ञः पुत्रेण विना संकालनं सविधिप्रक्षेपं कर्तुं सर्वज्ञा अपि मन्त्रिणः न ईषुः ततः तस्मात् हेतोः भूमिपं राजपर्यङ्कं रक्षन्ति ॥ १५ ॥

गो० टी०—संस्कारं कुतो न चक्रुरित्यत्राह—न त्विति । सर्वज्ञाः सर्वधर्मज्ञाः अतो न धर्मलोप इति भावः । अनेन गम्यते तैलमिश्रत्वे शवस्य पर्युषितत्वदोषो नास्तीति संकलनं संस्कारम् ॥ १५ ॥

१६] ति० टी०—शायितं ज्ञात्वा हा मृतोऽयमिति पर्यदेवयन् ॥ १६ ॥

रा० टी०—तैलेति । तं राजपर्यङ्कं तैलद्रोण्यां प्रतिष्ठितद्वारपरक्षितस्थल्यां सचिवैः शायितं तं राजपर्यङ्कं नराधिपं ज्ञात्वा पर्यङ्के राजा शयान इति निश्चित्येत्यर्थः, अयं राजा अमृतः मृतसदृशः पुत्रवियोगेन मूर्छित इत्यर्थः, हा अतिकष्टमेतदिति ताः राजगमनवृत्तान्तानभिज्ञाः स्त्रियः पर्यदेवयन् ॥ १६ ॥

गो० टी०—तैलद्रोण्यामिति । तैलद्रोण्यां शायितं नृपं ज्ञात्वा तत्र निवेशकाले राजदर्शनाभावात् हा मृतोऽयमिति भूयोऽपि पर्यवारयन्नित्यर्थः ॥ १६ ॥

१७–१९] ति० टी०—नेत्राणां प्रस्रवणमश्रुप्रवाहो येषु मुखेषु तैः ॥ १७–१९ ॥

---

१ व्यपनीयेति गो. पाठः । २ अथेति गो. पाठः । ३ मान्या इति रा. पाठः । ४ संकलनमिति गो. पाठः । ५ उद्यम्येति गो. पाठः । ६ रुदन्त्य इति गो. रा. पाठः । ७ सततमिति गो. रा. पाठः । ८ वियोजिता इति गो. पाठः । ९ पतिघ्न्येति गो. पाठः ।

स हि नाथः स चास्माकं तव च प्रभुरात्मवान् । वनं रामो गतः श्रीमान्विहाय नृपतिश्रियम् ॥ २० ॥
त्वया तेन च वीरेण विना व्यसनमोहिताः । कथं वयं निवत्स्यामः कैकेय्या च विदूषिताः ॥ २१ ॥
यया च राजा रामश्च लक्ष्मणश्च महाबलः । सीतया सह संत्यक्ताः सा कमन्यं न हास्यति ॥ २२ ॥
ता बाष्पेण च संवीताः शोकेन विपुलेन च । व्यचेष्टन्त[2] निरानन्दा राघवस्य वरस्त्रियः ॥ २३ ॥
निशा नक्षत्रहीनेव[3] स्त्रीव भर्तृविवर्जिता । पुरी नाराजतायोध्या हीना राज्ञा महात्मना ॥ २४ ॥
बाष्पपर्याकुलजना हाहाभूतकुलाङ्गना । शून्यचत्वरवेश्मान्ता न बभ्राज यथापुरम् ॥ २५ ॥
गते तु शोकात्त्रिदिवं नराधिपे महीतलस्थासु नृपाङ्गनासु च ।
निवृत्तचारः सहसा गतो रविः प्रवृत्तचारा रजनी ह्युपस्थिता ॥ २६ ॥
ऋते तु पुत्रादहनं महीपतेर्[4]नारोचयंस्ते सुहृदः समागताः ।
इतीव तस्मिञ्शयने न्यवेशयन्विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ २७ ॥

रा० टी०–कौशल्यादीनां विलापं वर्णयन्नाह–बाहूनिति । नेत्रप्रस्रवणैः नेत्रेभ्यः प्रस्रवः अश्रुप्रच्युतिर्येषु तैर्मुखैरुपलक्षिताः बाहूनुच्छ्रित्य उत्क्षिप्य रुदन्त्यः शोकसंतप्ताः स्त्रियः कृपणं यथा स्यात्तथा पर्यदेवयन्विविधमुच्चारयामासुः ॥ १७ ॥

रा० टी०–परिदेवनाकारमाह–हेत्यादिभिः । रामेण विहीनाः नोऽस्मान् किमर्थं विजहासि ॥ १८ ॥

रा० टी०–कैकेय्या इति । सपत्न्याः कैकेय्याः संबन्धिन्याः दुष्टभावायाः दुष्टो भावश्चिन्तनं यस्यास्तस्याः मन्थरायाः समीपे धवरहिताः वयं कथं वत्स्यामः यदि चायं सपत्नीशब्दः शाङ्करवादिस्तदा सामानाधिकरण्येनैवान्वयः कैकेय्या इत्यस्य केकयीदास्या इत्यर्थः ॥ १९ ॥

गो० टी०–बाहूनिति । नेत्राणां प्रस्रवणं वारिप्रवाहो येषु तथा ॥ १७–२० ॥

२०] ति० टी०–तव प्रभुस्तव जीवनस्य प्रभुः॥२०॥

रा० टी०–स इति । प्रभुः निखिलसामर्थ्यविशिष्टः अत एव आत्मवानधिर्यवान्यो रामः अस्माकं तव च नाथः स रामः नृपतिश्रियं राजलक्ष्मीं विहाय वनं गतः॥ २० ॥

२१–२२] ति० टी०– विदूषिता राज्यगर्वात्तिरस्कृताः ॥ २१ ॥ २२ ॥

रा० टी०–त्वयेति । त्वया तेन रामेण च विना व्यसनमोहिताः व्यसनेन दुःखेन मोहिताः कर्तव्यविषयकविवेकरहिताः अत एव विदूषिताः कार्पण्यादिदोषविशिष्टाः वयं कैकेय्या मन्थरया सह कथं निवत्स्यामः ॥ २१ ॥

रा० टी०–ययेति । यया मन्थरया राजादयः संत्यक्ताः वियोजिताः सा मन्थरा अन्यं भरतादिकं कं न हास्यति वियोजयिष्यति ॥ २२ ॥

गो० टी०–त्वयेति । विदूषिताः राज्यगर्वात् तिरस्कृताः ॥ २१–२४ ॥

२३] ति० टी०–राघवस्य दशरथस्य ॥ २३ ॥

रा० टी०–राजस्त्रीणां विलापमुपसंहरन्नाह–ता इति । बाष्पादिना संवीताः संयुक्ता राघवस्य दशरथस्य वरस्त्रियः व्यचेष्टन्त विविधचेष्टामकुर्वत ॥ २३ ॥

२४] ति० टी०–न अराजतेति च्छेदः ॥ २४ ॥

रा० टी०–निशेति । नक्षत्रहीना निशेव भर्तृवर्जिता पाणिग्रहीतृरहिता स्त्रीव महात्मना राज्ञा रहिता अयोध्या पुरी न अराजत ॥ २४ ॥

२५] ति० टी०–शून्यचत्वरवेश्मान्ता संमार्जनालेपबल्यादिशून्यचत्वरायन्ता यथापुरं यथापूर्वम् ॥ २५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–बाष्पेति । बाष्पपर्याकुला बाष्पैर्व्याप्ताः जनाः यस्यां सा, हाहाभूताः कुलाङ्गनाः यस्यां सा, शून्याः संमार्जनादिरहिताः चत्वरवेश्मान्ताः यस्यां सा, यथापुरं न बभ्राज । चत्वरश्चतुष्पथः वेश्मान्तो द्वारम् ॥ २५ ॥

गो० टी०–बाष्पपर्याकुलजनेति । शून्यचत्वरेति संमार्जनानुलेपनबल्यादिशून्यचत्वरादियुक्तेति यावत् यथापुरं यथापूर्वम् ॥ २५ ॥

२६] ति० टी०–रात्रि शोकात्पुत्रशोकात्त्रिदिवं स्वर्गं गते नृपाङ्गनासु च शोकादेव महीतलस्थासु महीतले लुठन्तीषु निवृत्तचारो निवृत्तकिरणप्रचारः प्रवृत्तचारा प्रवृत्ततमःप्रचारा॥२६॥

रा० टी०–गत इति । नराधिपे दशरथे त्रिदिवं त्रिभिः ब्रह्मादिभिः दीव्यते स्तूयते असौ तं साकेतं गते सति नृपाङ्गनासु महीतलस्थासु सतीषु रविः निवृत्तचारः निवृत्तकिरणप्रचारः सन्गतोऽस्तमिति शेषः, अत एव प्रवृत्तचारा प्रवृत्तः चारः तमःसंचारो यस्यां सा रजनी उपस्थिता प्राप्ता ॥ २६ ॥

गो० टी०–गते त्विति । शोकात् पुत्रशोकात् निवृत्तचारः निवृत्तकिरणप्रचारः गत इति अस्तमिति शेषः । प्रवृत्तचारा प्रवृत्ततमःप्रचारा ॥ २६ ॥

२७] ति० टी०–सुहृदो वसिष्ठाद्याः पर्युपितदाहनिषेध-

१ सदेति गो. पाठः । २ व्यवेष्टन्तेति गो. पाठः । ३ चन्द्रविहीनेवेति गो. पाठः । ४ न रोचयन्त इति गो. पाठः ।

गतप्रभा द्यौरिव भास्करं विना व्यपेतनक्षत्रगणेव शर्वरी ।
पुरी बभासे रहिता महात्मना कैण्ठास्रकण्ठाकुलमार्गचत्वरा ॥ २८ ॥
नराश्च नार्यश्च समेत्य संघशो विगर्हमाणा भरतस्य मातरम् ।
तदा नगर्यां नरदेवसंक्षये बभूवुरार्ता न च शर्म लेभिरे ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।

अपरेऽह्न्यास्थानमागता मार्कण्डेयादयो राज्ञः सत्त्वासत्त्वाभ्यां जनपदस्योत्कर्षापकर्षौ निर्दिश्य राजपुत्रेषु कंचिद्राज्येऽभिषेक्तुं वसिष्ठं प्रार्थयामासुः ।

औक्रन्दिता निरानन्दा सास्रकण्ठजनाविला । अयोध्यायामवतता सा व्यतीयाय शर्वरी ॥ १ ॥
व्यतीतायां तु शर्वर्यामादित्यस्योदये ततः । समेत्य राजकर्तारः सभार्मायुर्द्विजातयः ॥ २ ॥
मार्कण्डेयोऽथ मौद्गल्यो वामदेवश्च कश्यपः । कात्यायनो गौतमश्च जाबालिश्च महायशाः ॥ ३ ॥
एते द्विजाः सहामात्यैः पृथग्वाचमुदीरयन् । वसिष्ठमेवाभिमुखाः श्रेष्ठं राजपुरोहितम् ॥ ४ ॥

वचनानि तु विप्रविषयाणीति न विरोधः । तस्मिन्शयने तैलद्रोण्याम् ॥ २७ ॥

रा० टी०—याचकानां वृत्तान्तं वर्णयन्नाह—ऋते इति । समागताः सुहृदः नृपतेर्दशरथात्पुत्राद्रामाच्च ऋते विना दहनं सर्वेषां संतापं नारोचयन् असहन्निति व अतो हेतोः अचिन्त्यं चिन्तयितुमशक्यं दर्शनं अवलोकननिश्चयो यस्य तं राजानं विचिन्त्य शयने पर्यङ्कसन्निधौ न्यवेशयन् न्यविशन् ॥ २७ ॥

गो० टी०—ऋते त्विति । समागताः सुहृदः बान्धवाः पुत्रादृते महीपतेर्दहनं न रोचयन्ते । अनेनातिबलपराक्रमयुक्तसत्पुत्रसद्भावेऽप्यस्मिन् काले दैववशादेकोऽप्यसन्निहितः तूष्णीमवस्थानमयुक्तम् अतो येन केनापि प्रकारेण संस्कारः कर्तव्य इति कैश्चियत्नः कृत इति गम्यते । तस्मिन् शयने पूर्वोक्तैतद्रोण्याम् ॥ २७ ॥

२८–२९] ति० टी०—आ कण्ठं धारारूपेण प्रवहद्भिरश्रुरुपलक्षिताः कण्ठा येषां तैराकुला मार्गाश्चत्वराश्च यस्यां सा ॥ २८ ॥ २९ ॥

एकः श्लोकोऽत्रसर्गे कतकसंख्यया षष्ट इति ज्ञायते ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

रा० टी०—गतेति । भास्करं विना गतप्रभा नष्टप्रकाशा द्यौरिव व्यपेताः अन्धकारादिना तिरोहिताः नक्षत्रगणाः यस्यां सा शर्वरी रात्रिरिव महात्मना रामादिना रहिता अत एव आकण्ठं कण्ठमभिव्याप्य वर्तमानानि अस्राणि अश्रूणि येषु ते कण्ठाः येषां तैः, आकुलानि निबिडानि मार्गचत्वराणि यस्याः सा पुरी बभासे न बभासे इत्यर्थः । मगधेष्विवोशीनरेषु यवा इत्यादाविव नञर्थलाभः 'नचाश्रुकण्ठा' इति भूषणपाठः ॥ २८ ॥

रा० टी०—भरतपरिकरवृत्तान्तं वर्णयन्नाह—नरा इति । भरतस्य संबन्धिनो नगर्यां विद्यमानाः ये नरादयस्ते संघशः नरदेवसंक्षये नरदेवशोभनगृहे विद्यमानां भरतस्य मातरं समेत्य प्राप्य विगर्हमाणाः स्वस्वभाग्यं निन्दन्तः सन्तः आर्ता बभूवुः अत एव शर्म सुखं न लेभिरे भरतस्येत्युभयान्वयि ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

गो० टी०—गतप्रभेति । व्यपेतनक्षत्रगणा चन्द्रादिसकलतेजोहीना रामादिसकलराजरहितस्योपमा अस्रकण्ठैः कण्ठस्तम्भितबाष्पैः आकुलानि मार्गचत्वराणि यस्याः सा तथोक्ता ॥ २८ ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

१] ति० टी०—संजाताक्रन्दा अत एव निरानन्दा विद्यमानास्रकण्ठैर्जनैराविला आकुला अवतता दुःखवशादीर्घीभूता ॥ १ ॥

रा० टी०—दिवाकृत्तं वर्णयितुमाह—आक्रन्दितेति । आक्रन्दिता आसमन्तात्क्रन्दितं परिदेवनं यस्यामत एव सास्रकण्ठैः अश्रुसहितकण्ठविप्लिष्टैर्जनैराकुला निबिडा अयोध्यायामवतता अतिविस्तृतात्वेन प्रतीयमाना या शर्वरी रात्रिः सा व्यतीयाय ॥ १ ॥

गो० टी०—अथाराजकदोषवर्णनम्—आक्रन्दितनिरानन्देति । आक्रन्दितेन हेतुना निरानन्दा अवतता दीर्घा दुःखवशादतिदीर्घभूतेत्यर्थः ॥ १ ॥

२–३] ति० टी०—राजकर्तारो राज्ञोऽभिषेककार्यकर्तारः ॥ २ ॥ ३ ॥

४] ति० टी०—पृथग्वाचं राजकार्यविषये भिन्नभिन्नप्र-

---

१ नचेति गो० पाठः । २ आक्रन्दितनिरानन्देति गो० पाठः । ३ आकुलेति गो० पाठः । ४ काश्यप इति गो० रा० पाठः ।

अतीता शर्वरी दुःखं या नो वर्षशतोपमा । अस्मिन्पञ्चत्वमापन्ने पुत्रशोकेन पार्थिवे ॥ ५ ॥
स्वर्गस्थश्च महाराजो रामश्चारण्यमाश्रितः । लक्ष्मणश्चापि तेजस्वी रामेणैव गतः सह ॥ ६ ॥
उभौ भरतशत्रुघ्नौ [1]केकयेषु परंतपौ । पुरे राजगृहे रम्ये मातामहनिवेशने ॥ ७ ॥
इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् । अराजकं हि नो राष्ट्रं [2]विनाशं समवाप्नुयात् ॥ ८ ॥
नाराजके जनपदे विद्युन्माली महास्वनः । अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ॥ ९ ॥
नाराजके जनपदे बीजमुष्टिः प्रकीर्यते । नाराजके पितुः पुत्रो भार्या वा वर्तते वशे ॥ १० ॥
[3]अराजके धनं नास्ति नास्ति भार्याप्यराजके । इदमत्याहितं चान्यत्कुतः सत्यमराजके ॥ ११ ॥

स्थाना वाचोऽब्रुवन् । एवं च कार्यसिद्धेरयोगाद्वसिष्ठमेवाभिमुखा बभूवुः ॥ ४ ॥

रा० टी०–व्यतीतायामिति । राजकर्तारः राजोचितकर्मनिर्वाहकाः द्विजातयः समेत्य संघीभूय सभामीयुः प्रापुः ॥२॥

रा० टी०–द्विजातीन्निर्दिशन्नाह—मार्कण्डेय इति द्वाभ्याम् । श्रेष्ठं वशिष्ठमेवाभिमुखाः एते मार्कण्डेयादयो द्विजाः भ्रमत्यैः सह पृथक् भिन्नां वाचमुदीरयन्तकथयन् आगमशास्त्रस्यानित्यत्वादाद्विरहः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–व्यतीतायामिति । राजकर्तारः राजाभिषेककार्यकर्तारः ॥ २–४ ॥

५–६] ति० टी०–पुत्रशोकेनास्मिन्पार्थिवे पञ्चत्वं मरणमापन्ने सति दुःखं यथा तथा वर्षशतोपमा शर्वर्यतीतेति संबन्धः ॥ ५ ॥ ६ ॥

रा० टी०–तद्वचनान्येवाह–अतीतेति । नोऽस्माकं पार्थिवे पञ्चत्वम् । अप्रकटसाकेतमापन्ने प्राप्ते सति वर्षशतोपमा या एका शर्वरी सा दुःखं यथा स्यात्तथा अतीता ॥ ५ ॥

रा० टी०–स्वर्गेति । महाराजः स्वर्गस्थः अप्रकटसाकेतपुरनिवासी बभूवेति शेषः ॥ ६ ॥

गो० टी०– अतीतेति । अस्मिन्पार्थिवे पुत्रशोकेन पञ्चत्वमापन्ने सति या शर्वरी नः अस्माकं वर्षशतोपमा आसीत् सा शर्वरी दुःखं यथा तथा अतीता ॥ ५ ॥ ६ ॥

७] ति० टी०–केकयेषु तदाख्यदेशेषु । अवान्तरभेदापेक्षया बहुवचनमिति कतकः । वस्तुतोऽङ्गा इत्यादिवद्बहुवचनान्त एव जनपदवाचीत्यन्ये । राजगृहे राजगृहाख्ये पुरे॥७॥

रा० टी०–उभाविति । केकयेषु तदभिधदेशेषु राजगृहे तदभिधे पुरे रम्ये मातामहनिवेशने मातामहस्य गृहे भरतशत्रुघ्नौ आसाते इति शेषः ॥ ७ ॥

गो० टी०–उभाविति । राजगृहे राजगृहनामनि पुरे वर्तेते इति शेषः ॥ ७ ॥

८–९] ति० टी०–इक्ष्वाकूणाम्मध्ये । विपक्षे बाधकमाह–अराजकं हीति । हि यतोऽराजकं नो राष्ट्रं विनाशमवाप्नुयात्, अतः कश्चिद्राजा विधीयताम् । 'राजकं सद्धि राष्ट्रं नो नाशं नावाप्नुयाद्यथा' इति कतकसंमतः पाठः । नोऽस्माकं राष्ट्रं राजकं राजयुतं सन्नाशं नाप्नुयाद्यथा तथा कश्चिद्राजा विधीयतामित्यन्वयः । हिर्वाक्यालंकारे ॥ ८ ॥ ९ ॥

रा० टी०–इक्ष्वाकूणामिति । इह अस्यामयोध्यायामिक्ष्वाकूणां मध्ये कश्चिद्राजा रक्षकत्वेन राजसदृशः अद्यैव विधीयताम् । तदभावे दोषमाह–अराजकं नियन्तृरहितं राष्ट्रं विनाशं समवाप्नुयात् ॥ ८ ॥

गो० टी०–इक्ष्वाकूणामिति । निर्धारणे षष्ठी रामादीनां चतुर्णां मध्ये इत्यर्थः । अद्यैव राजाऽविधाने दोषः अराजकं हीति ॥ ८ ॥

रा० टी०–विनाशे हेतुं वदन्नाह–नेत्यादिभिः । विद्युत एव माला अस्येति महास्वनः अतिस्वनविशिष्टः पर्जन्यो मेघः अराजके दिव्येन वारिणा नाभिवर्षति ॥ ९ ॥

गो० टी०–अराजकत्वस्य विनाशहेतुत्वं प्रपञ्चयति–नाराजक इत्यादिना । विद्युन्मालीत्यादिविशेषणैर्महावर्षो दुर्लभ इति भावः । दिव्येनेत्यनेन शिलावर्षस्तु भविष्यतीति भावः॥९॥

१०] ति० टी०–बीजमुष्टिर्न प्रकीर्यते बीजानामारोपो न क्रियते फलकाले लुण्टाकशङ्कया । पितुर्वशे पुत्रो भार्या वा पत्युर्वशे न वर्तते अतिक्रमे दण्डयितृभावात् ॥ १० ॥

रा० टी०–नेति । बीजमुष्टिः बीजयुक्तकर्षकबद्धकरः न प्रकीर्यते मुच्यते किंच मुष्टेः बीजं बीजमुष्टेः राजदन्तादित्वान्मुष्टेः परत्वं न प्रकीर्यते उप्यते पुत्रः पितुर्वशे भार्या च पत्युर्वशे न वर्तते, पत्युरिति शेषः ॥ १० ॥

गो० टी०–नेति । बीजमुष्टिः न प्रकीर्यते फलाभिनिश्चयाभावादिति भावः । भार्यावशे न वर्तते व्यभिचारे शिक्षकाभावादिति भावः ॥ १० ॥

११] ति० टी०–धनाद्यभावश्च परिपालकाभावात् । इदमुक्तरूपमत्याहितं महद्भयमराजके प्रथमं प्राप्नोति । 'अत्याहितं महाभीतिः' इत्यमरः । अन्यत्सत्यं पितापुत्रपतिभार्याख्यप्रधानसत्यादन्यत्कथविकयादिलक्षणं कुतः ॥ ११ ॥

रा० टी०–अराजके इति । धनं नास्ति भार्यापि नास्ति व्यभिचारनिरतात्वाद्गृहे न तिष्ठतीत्यर्थः । इदमुक्तमत्याहितं महद्भयम् 'अत्याहितं महाभीतिः' इत्यमरः । तर्हि अन्यदेतद्भिन्नमसत्यं सर्वधर्ममूलसत्य[illegible]पणं कुतः न संभवतीत्यर्थः॥११॥

---

१ स्वर्गत इति गो. पाठः । २ केकयेष्विति गो. पाठः । ३ न विनाशमवाप्नुयादिति गो. पाठः । ४ नाराजके धनं चास्तीति गो. पाठः ।

नाराजके जनपदे कारयन्ति सभां नराः । उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च॥ १२ ॥
नाराजके जनपदे यज्ञशीला द्विजातयः । सत्राण्यन्वासते दान्ता ब्राह्मणाः संशितव्रताः॥ १३ ॥
नाराजके जनपदे महायज्ञेषु यज्वनः । ब्राह्मणा वसुसंपूर्णा विसृजन्त्याप्तदक्षिणाः ॥ १४ ॥
नाराजके जनपदे प्रहृष्टनटनर्तकाः । उत्सवाश्च समाजाश्च वर्धन्ते राष्ट्रवर्धनाः ॥ १५ ॥
नाराजके जनपदे सिद्धार्था व्यवहारिणः । कथाभिरीरिभिरज्यन्ते कथाशीलाः कथाप्रियैः॥ १६ ॥
नाराजके जनपदे तूद्यानानि समागताः । सायाह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः॥ १७ ॥
नाराजके जनपदे धनवन्तः सुरक्षिताः । शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥ १८ ॥
नाराजके जनपदे वाहनैः शीघ्रवाहिभिः । नरा निर्यान्त्यरण्यानि नारीभिः सह कामिनः॥ १९ ॥

गो० टी०—नाराजक इति । यत्र नास्ति चोरभयादिति भावः । भार्या नास्ति बन्धुनिग्रहादिति भावः इदं वक्ष्यमाणम् अन्यत् पूर्वोक्तभयात् अन्यत् अत्याहितं महाभीतिरस्ति 'अत्याहितं महाभीतिः' इत्यमरः । तदेवाह- कुत इति । सत्यं क्रयविक्रयादिलक्षणम् ॥ ११ ॥

१२] ति० टी०—सभां न कारयन्ति । न्यायविचारायेति शेषः । ' केऽपि यन्ति ' इति पाठान्तरम् । उद्यानानीत्यादौ न यान्तीत्यनुषङ्गः । वस्त्राद्यपहारभयात् न कारयन्ति वा भयादेव । पुण्यगृहाणि पुण्यसंपादकगृहाणि विप्राद्यर्थानि ॥१२॥

रा० टी०—नेति । सभां न कारयन्ति धर्मविचारकारणीभूता सभा न भवतीत्यर्थः । उद्यानादीनि च न कारयन्ति॥१२॥

गो० टी०—नेति । सभां न कारयन्ति मनःस्वास्थ्याभावात् उद्यानानि न कारयन्ति छेदनभयात् पुण्यगृहाणि देवतायतनादीनि न कारयन्ति दुर्गनिर्माणभयादिति भावः ॥ १२ ॥

१३] ति० टी०—सत्रं यत्र सर्वे ऋत्विजः सर्वे च यजमानाः । नान्वासते नानुतिष्ठन्ति ॥ १३ ॥

रा० टी०—नेति । द्विजातयः यज्ञशीलाः यागसंपादकस्वभाववन्तः अत एव दान्ताः जितेन्द्रियाः संशितव्रताः ब्राह्मणाः सत्राणि महायागान्नान्वासते ॥ १३ ॥

गो० टी०—नेति। ब्रह्म वेदः तदध्येतारो ब्राह्मणाः "तदधीते तद्वेद" इत्यण् सत्राणि महायज्ञान् यत्र सर्वे यजमानाः सर्वे ऋत्विजः नान्वासते नानुतिष्ठन्ति विघ्नभयात् ॥ १३ ॥

१४] ति० टी०—वसुसंपूर्णा बहुधनाः । आप्तदक्षिणाः शास्त्रेण यथा प्राप्तदक्षिणा यज्वनो ऋत्विजः प्रति न विसृजन्ति ॥ १४ ॥

रा० टी०—नेति । महायज्ञेषु किंचिदल्पकोत्कटेच्छाहेतुकप्रवृत्तमहायागेषु वसुसंपूर्णाः अतिधनवन्तोऽपि ब्राह्मणाः आप्तदक्षिणाः आप्ताः विधिप्राप्ताः शास्त्रोक्ता इत्यर्थः दक्षिणाः कर्मधारयः यज्वनः ऋत्विजः उद्दिश्य न विसृजन्ति ददति ॥१४॥

गो० टी०—नेति । यज्वनः यज्वानः वसुसंपन्ना अपि धनसंपन्ना अपि आप्तदक्षिणाः भूरिदक्षिणाः न विसृजन्ति न दिशन्ति आद्यत्वव्यञ्जनेन दण्डभयादिति भावः ॥ १४ ॥

१५] ति० टी०—नर्तकः सूत्रधारः । नटाश्च प्रहृष्टा यत्र तादृशा उत्सवा देवानुत्सवाः, समाजास्तत्तद्दृष्टकार्यमिलिता योजनाः समूहाः, ते उभयेऽपि हृष्टादृष्टशान्तिद्वारा राष्ट्रवर्धनाः भवन्ति तेन वर्धन्ते ॥ १५ ॥

रा० टी०—नेति । प्रभूताः प्रगल्भा नटाः अभिनयसमर्थाः नर्तकाः गात्रविक्षेपणकर्तारो येषु ते राष्ट्रवर्धनाः देशवृद्धिकारकाः उत्सवाः देवोद्देश्यकोत्साहाः समाजाः विवाहोत्सवाः न वर्धन्ते न भवन्तीत्यर्थः ॥ १५ ॥

गो० टी०—नेति । नटाः नाट्याभिनयसमर्थाः नर्तकाः नर्तनमात्रसमर्थाः प्रभूताः बहुलाः नटनर्तका येषु ते तथोक्ताः उत्सवाः देवतोत्सवाः समाजाः तीर्थयात्राः एतदुभयाभावे राष्ट्रहानिरित्याभिप्रायेणाह- राष्ट्रवर्धना इति ॥ १५ ॥

१६] ति० टी०—व्यवहारिणः क्रमप्यर्थमुद्दिश्यान्योन्यं विवदमानाः सिद्धार्थाः निर्णीतार्थाः, यद्वा व्यवहारिणः पण्यजीविनः, असिद्धार्था अनिष्पन्नप्रयोजनाः । कथाशीलाः पुराणादिकथाश्रवणशीलाः कथाप्रियैः कथाकथनप्रियैः पौराणिकैरुक्ताभिः कथाभिर्न रज्यन्ते वक्तृश्रोतृणां स्वास्थ्याभावात् ॥ १६ ॥

रा० टी०—नेति । कथाशीलाः भगवद्वार्ताश्रवणस्वभावा अपि व्यवहारिणः स्वजीविकार्थं क्रयविक्रयकर्तारः जनाः असिद्धार्थाः अनिष्पन्नप्रयोजनाः सन्तः कथा भगवद्वार्ताकथनं प्रिया प्रीतिकारिका येषां तैः पौराणिकैः कथितताभिः कथाभिः नानुरज्यन्ते प्रीयन्ते तेन प्रीतिपरमकारणीभूतचित्तस्वास्थ्याभावः सूचितः ॥ १६ ॥

गो० टी०—नेति । व्यवहारिणः क्रमप्यर्थमुद्दिश्यान्योन्यं विवदमानाः सिद्धार्थाः लब्धप्रयोजनाः न भवन्ति निरूपणनियमनकर्तुरभावादुत्कोचप्रायत्वाच्चेति भावः । यद्वा व्यवहारिणः क्रयविक्रयरूपेण व्यापारेण जीवन्तः, कथाशीलाः इतिहासपुराणादिकथावदनशीलाः, कथाप्रियैः कथासु तत्परैः श्रोतृभिः कथाभिः हेतुभिः नानुरज्यन्ते अनुरक्ता न क्रियन्ते श्रोतृणां स्वास्थ्याभावादिति भावः । यद्वा कथाशीलाः, वावदूकाः कथाभिः वादजल्पवितण्डाभिः कथाप्रियैः सामाजिकैः सह नानुरज्यन्ते न तुष्यन्ति तत्पारितोषिकादिप्रदराजाभावात् ॥ १६ ॥

१७–१९] ति० टी०—समागता मिलिताः ॥१७–१९॥

१ संपन्ना इति गो. पाठः । २ प्रभूतेति गो. रा. पाठः । ३ अत्रेति गो. पाठः । ४ त्रिति गो. रा. नास्ति । ५ अष्टादशोनविंशश्लोकयोः गो. व्यत्यस्तः पाठः । ६ यामिभिरिति गो. रा. पाठः ।

नाराजके जनपदे बद्धघण्टा विषाणिनः । अटन्ति राजमार्गेषु कुञ्जराः षष्टिहायनाः ॥ २० ॥
नाराजके जनपदे शरान्संतंतमस्यताम् । श्रूयते तलनिर्घोष इष्वस्त्राणामुपासने ॥ २१ ॥
नाराजके जनपदे वणिजो दूरगामिनः । गच्छन्ति क्षेममध्वानं बहुपण्यसमाचिताः ॥ २२ ॥
नाराजके जनपदे चरत्येकचरो वशी । भावयन्नात्मनात्मानं यत्रसायंगृहो मुनिः ॥ २३ ॥
नाराजके जनपदे योगक्षेमः प्रवर्तते । न चाप्यराजके सेना शत्रून्विषहते युधि ॥ २४ ॥
नाराजके जनपदे हृष्टैः परमवाजिभिः । नराः संयान्ति सहसा रथैश्च प्रतिमण्डिताः ॥ २५ ॥
नाराजके जनपदे नराः शास्त्रविशारदाः । संवदन्तोपतिष्ठन्ते वनेषूपवनेषु वा ॥ २६ ॥

रा० टी०–नेति । कुमार्यः समागताः संघीभूताः हेमभूषिताः सत्यः क्रीडितुं विहर्तुमुद्यानानि पुष्पवाटिकाः न यान्ति ॥ १७ ॥

गो० टी०–नेति । समागताः संघीभूताः न यान्ति पुष्पापचयार्थं सखीभिः सह न यान्ति चोरभयादिति भावः ॥१७॥

रा० टी०–नेति । धनवन्तः कृषिगोरक्षजीविनः वैश्या इत्यर्थः सुरक्षिताः स्वपरिकरैरत्यन्तं रक्षिता अपि विघटितद्वाराः दिवापि अपिहितकपाटवन्तः सन्तः न शेरते ॥ १८ ॥

गो० टी०–नेति । शीघ्रगामिभिर्वाहनैः रथैरित्यर्थः, न निर्यान्ति परिभवशङ्कयेति भावः ॥ १८ ॥

रा० टी०–नेति । शीघ्रगामिभिः वाहनैः रथादिभिः करणैः नार्याभिः सहिताः कामिनः नराः अरण्यानि न निर्यान्ति ॥१९॥

गो० टी०–नेति । विघटितद्वाराः न शेरते किंतु बद्धकपाटा एव ॥ १९ ॥

२०] ति० टी०–विषाणिनः प्रशस्तदन्ताः ॥ २० ॥

रा० टी०–नेति । षष्टिहायनाः षष्टिवर्षमितावस्थावन्तः बद्धघण्टाः विषाणिनः प्रशस्तदन्तविशिष्टाः कुञ्जराः न अटन्ति घण्टाग्रहणदन्तोत्पाटनशङ्कयेति तात्पर्यं तेन चौराणां बाहुल्यं सूचितम् ॥ २० ॥

गो० टी०–नेति । विषाणिनः प्रशस्तदन्ताः षष्टिहायनाः षष्टिवर्षाः ॥ २० ॥

२१–२२] ति० टी०–उपासनेऽभ्यासे ॥ २१ ॥ २२ ॥

रा० टी०–नेति । संततं निरन्तरं शरान्बाणान् अस्यतां लक्ष्यमुद्दिश्य त्यजतां वीराणामिष्वस्त्राणामुपासने अभ्यासकाले तलनिर्घोषः युद्धोत्साहजनकज्यासंयुक्तकरतलशब्दः न श्रूयते 'स्यादुपासनमभ्यासः' इत्यमरः ॥ २१ ॥

गो० टी०–नेति । अस्यतां क्षिपताम् उपासने अभ्यासे 'स्यादुपासनमभ्यासः' इत्यमरः । तलनिर्घोषः ज्याकरतलनिर्घोषः ॥ २१ ॥

रा० टी०–नेति । बहुपण्यसमाचिताः बहुपण्यैर्युक्ताः दूरगामिनो वणिजः क्षेमं यथा स्यात्तथा अध्वानं न गच्छन्ति ॥२२॥

गो० टी०–नेति । क्षेमं क्षेमावहं बहुपण्यैः समाचिताः समूढाः, यद्वा पण्यानां क्रय्यद्रव्याणां समाचिताः दृशभाराः 'आचितो दशभारः स्यात्' इत्यमरः बहवः पण्यसमाचिताः येषां ते तथोक्ताः ॥ २२ ॥

२३–२४] ति० टी०–एकोऽसहाय एव चरतीत्येकचरो यतिः वशी जितेन्द्रियः आत्मना मनसा आत्मानं ब्रह्म ॥२३॥२४॥

रा० टी०–नेति । एकचरः असहायचारी वशी जितेन्द्रियः यत्र सायं तदेव गृहं निवासो यस्य स मुनिः आत्मना मनसा आत्मानं परमात्मानं भावयन् चिन्तयन्सन्न चरति गच्छति अन्नलाभविषयकसंशयहेतुकचित्तस्वास्थ्याभावादिति भावः ॥२३॥

गो० टी०–नेति । एकोऽसहायश्चरतीत्येकचरः वशी जितेन्द्रियः आत्मना अन्तःकरणेन आत्मानं परमात्मानं भावयन् चिन्तयन् यत्र सायंगृहः यस्मिन्प्रदेशे सायंकालो भवति तत्र गृहं निवासो यस्य तथा सन्न चरति अन्नप्रदात्रभावादिति भावः ॥२३॥

रा० टी०–नेति । योगक्षेमः योगेन सहितः क्षेमः न प्रवर्तते भवति अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः । सेना शत्रून्न विषहते पराभावयति ॥ २४ ॥

गो० टी०–नेति । योगक्षेमम् अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः योगश्च क्षेमश्च योगक्षेमं द्वन्द्वैकवद्भावः । विषहते जयति ॥ २४ ॥

२५] ति० टी०–प्रतिमण्डिताः भूषिताः । 'प्रतिमण्डितैः' इति पाठान्तरम् ॥ २५ ॥

रा० टी०–नेति । प्रतिमण्डिताः भूषिताः नराः हृष्टैः परमवाजिभिरुत्कृष्टाश्वैः युक्तैः रथैः न संयान्ति 'प्रतिमण्डितैः' इति पाठान्तरमिति भट्टाः ॥ २५ ॥

गो० टी०–नेति । परिमण्डिताः भूषिताः ॥ २५ ॥

२६] ति० टी०–संवदन्त उपतिष्ठन्ते संधिस्त्वार्षः ॥२६॥

रा० टी०–नेति । शास्त्रविशारदाः शास्त्रेषु निपुणाः नराः व्रनेषु जलसमीपेषु उपवनेषु आरामेषु वासं वदन्तः स्वस्वगृहीतपक्षस्थापनपूर्वकपरपक्षं निराकुर्वन्तः सन्तः न वसिष्यन्ते शोभिष्यन्ते ॥ २६ ॥

गो० टी०–नेति । संवदन्तः व्याकुर्वन्तः वनेषु मुनीनामावासभूतवनेषु ॥ २६ ॥

१ सततमिति गो. पाठः । २ क्षेममिति गो. पाठः । ३ परीति गो. पाठः । ४ ऽवेति गो. ऽवशिष्यन्त इति रा. पाठः । ५ चेति गो. पाठः ।

नाराजके जनपदे माल्यमोदकदक्षिणाः । देवताभ्यर्चनार्थाय कल्प्यन्ते नियतैर्जनैः ॥ २७ ॥
नाराजके जनपदे चन्दनागुरुरूषिताः । राजपुत्रा विराजन्ते वसन्ते इव शालिनः ॥ २८ ॥
यथा ह्यनुदका नद्यो यथा वाप्यतृणं वनम् । अगोपाला यथा गावस्तथा राष्ट्रमराजकम् ॥ २९ ॥
ध्वजो रथस्य प्रज्ञानं धूमो ज्ञानं विभावसोः । तेषां यो नो ध्वजो राजा स देवत्वमितो गतः ॥ ३० ॥
नाराजके जनपदे स्वकं भवति कस्यचित् । मत्स्या इव जना नित्यं भक्षयन्ति परस्परम् ॥ ३१ ॥
ये हि संभिन्नमर्यादा नास्तिकाश्छिन्नसंशयाः । तेऽपि भावाय कल्पन्ते राजदण्डनिपीडिताः ॥ ३२ ॥
यथा दृष्टिः शरीरस्य नित्यमेव प्रवर्तते । तथा नरेन्द्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ॥ ३३ ॥
राजा सत्यं च धर्मश्च राजा कुलवतां कुलम् । राजा माता पिता चैव राजा हितकरो नृणाम् ॥ ३४ ॥
यमो वैश्रवणः शक्रो वरुणश्च महाबलः । [3]विशिष्यन्ते नरेन्द्रेण वृत्तेन महता ततः ॥ ३५ ॥

२७–२९] ति० टी०–कल्प्यन्ते प्रवर्त्यन्ते ॥२७–२९॥

रा० टी०–नेति । नियतैः यतचित्तैर्जनैः माल्यादीनि न कल्प्यन्ते संपाद्यन्ते ॥ २७ ॥

गो० टी०–नेति । कल्प्यन्ते संपाद्यन्ते ॥ २७ ॥

रा० टी०–नेति । चन्दनादिभिः रूषिताः भूषिताः राजपुत्राः वसन्ते शाखिनो वृक्षा इव न विराजन्ते ॥ २८ ॥

गो० टी०–नेति । रूषिताः लिप्ताः ॥ २८ ॥

रा० टी०–यथेति । अराजकं राजरहितं राष्ट्रमुदकादिरहितनद्यादयो यथा तथा भवतीति शेषः ॥ २९ ॥

गो० टी०–यथेति । तथा राष्ट्रमिति न शोभत इति शेषः ॥ २९ ॥

३०] ति० टी०–प्रज्ञानमनुमापकः । तेषां राज्यकर्तृणां नोऽस्माकं यो राजा ध्वजोऽस्माच्च राज्यभारप्रतिष्ठाज्ञापकः स इतो देवत्वं गतः एवं चास्मानितः परं केऽपि जना न मंस्यन्त इति भावः ॥ ३० ॥

रा० टी०–ध्वज इति । रथस्य प्रज्ञानमनुमानेन बोधकं ध्वजः विभावसोः वह्नेः ज्ञानमनुमानेन बोधकं धूमः एतेन तेषां प्रसिद्धानां नोऽस्माकं ध्वजो ज्ञापको यो राजा स इतः निर्गत्येति शेषः देवत्वमतिप्रमोदं गतः प्राप्तः ॥ ३० ॥

गो० टी०–ध्वज इति । ध्वजो रथस्येत्यादिदृष्टान्तार्थं वचः प्रज्ञानं ज्ञापकं ज्ञानं लिङ्गं ध्वजः प्रकाशकः इतः अस्माल्लोकात्प्रेत्य देवत्वं गत इत्यर्थः ॥ ३० ॥ ३१ ॥

३१] ति० टी०–स्वकं जीवनमित्यर्थः ॥ ३१ ॥

रा० टी०–नेति । कस्यचित्पुरुषस्य स्वकं स्वकीयं न भवति किंचिदिति शेषः अत एव परस्परं भक्षयन्ति ॥ ३१ ॥

३२] ति० टी०–ये संभिन्नमर्यादा उल्लङ्घितस्वजातिवर्णाश्ममर्यादाः अत एव पूर्वं राजदण्डनिपीडिता नास्तिकाः सन्ति तेऽपीदानीं छिन्नसंशया राजदण्डशङ्कारहिताः सन्तो भावाय प्रभुत्वाय कल्पन्ते ॥ ३२ ॥

रा० टी०–य इति । संभिन्नमर्यादाः संभिन्नाः दूरीकृता मर्यादा वैदिकरीतिर्यैस्ते अत एव नास्तिकाः न अस्ति परलोको येषां ते अत एव राजदण्डनिपीडिताः प्राप्तराजदण्डाः ये जनाः ते हि अराजकसमये छिन्नसंशयाः राजदण्डविषयकसंशयरहिताः सन्तः अतिभावाय अतिभावं मर्यादसत्तातिक्रमं प्रापयितुं कल्पन्ते ॥ ३२ ॥

गो० टी०–ये हीति । संभिन्नमर्यादाः उल्लङ्घितस्वस्त्रजातिवर्णाश्ममर्यादाः अत एव पूर्वं राजदण्डनिपीडिताः ये नास्तिकास्ते इदानीं छिन्नसंशयाः राजदण्डशङ्कारहिताः सन्तः भावाय सद्भावाय प्रभावाय वा कल्पन्ते समस्तदैहिकपीडासमर्था भवन्तीत्यर्थः ॥ ३२ ॥

३३] ति० टी०–दृष्टिश्चक्षुर्यथा शरीरस्य हितसाधनेऽहितनिवारणे च नित्यमेव प्रवर्तते तथा राजा राष्ट्रस्य सत्यधर्मयोः प्रभवः प्रवर्तको राजा प्रजानां हितसाधनेऽहितनिवारणे च नित्यमेव प्रवर्तते ॥ ३३ ॥

रा० टी०–यथेति । दृष्टिः स्वावलोकनं शरीरस्य हितप्रवर्तनायेति शेषः, नित्यं प्रवर्तते तथा सत्यधर्मयोः प्रभवः कारणं राजा राष्ट्रस्य हितप्रवर्तनाय प्रवर्तते ॥ ३३ ॥

गो० टी०–यथेति । दृष्टिः शरीरस्य यथा प्रवर्तते हितसाधकत्वेनाहितनिवारकत्वेन च सदैव प्रवर्तते सत्यधर्मयोः प्रभवः कारणं राजापि राष्ट्रस्य तथा प्रवर्तत इत्यर्थः ॥ ३३ ॥

३४] ति० टी०–राजा सत्यं च धर्मश्च सत्यधर्मयोः प्रवर्तक इत्यर्थः । कुलवतां क्षेत्रबीजशुद्धिमतां कुलं तत्प्रवर्तकः ॥ ३४ ॥

रा० टी०–राजेति । नृणां सत्यादिकं राजैव ॥ ३४ ॥

गो० टी०–राजेति । कुलवतां क्षेत्रबीजशुद्धिमतां कुलं कुलाचारप्रवर्तकः ॥ ३४ ॥

३५] ति० टी०–यमादयो महता वृत्तेन युक्तेन राज्ञा विशिष्यन्तेऽतिशय्यन्ते तिरस्क्रियन्ते यमस्य दण्डमात्रं कुबेरस्य धनदत्वमेवेन्द्रस्य पालनमेव वरुणस्य सदाचारे नियमनमेव गुणचतुष्टयवता राज्ञा ते निरस्क्रियन्त इति भावः ॥ ३५ ॥

१ अगर्हितेति गो० रा० पाठः । २ नरा इति गो० पाठः । ३ विशेष्यन्ते इति गो० पाठः ।

अहो तम इवेदं स्यान्न प्रज्ञायेत किंचन । राजा चेन्न भवेल्लोके विभजन्साध्वसाधुनी ॥ ३६ ॥
जीवत्यपि महाराजे तवैव वचनं वयम् । नातिक्रमामहे सर्वे वेलां प्राप्येव सागरः ॥ ३७ ॥
स नः समीक्ष्य द्विजवर्य वृत्तं नृपं विना राष्ट्रमरण्यभूतम् ।
कुमारमिक्ष्वाकुसुतं तथान्यं त्वमेव राजानमिहाभिषेचय ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ।

मार्कण्डेयाद्यनुमतो वसिष्ठो भरतशत्रुघ्नौ प्रापयितुं दूतान् दिदेश । तेषां प्रयाणं केकयनगरे प्रवेशश्च ।

तेषां तद्वचनं श्रुत्वा वसिष्ठः प्रत्युवाच ह । मित्रामात्यजनान्सर्वान्ब्राह्मणांस्तानिदं वचः ॥ १ ॥

रा० टी०–यम इति । महता अतिप्रशंसनीयेन वृत्तेन यमादिचतुष्टयान्यतमनिष्ठधर्मसदृशसर्वधर्माचरणेन उपलक्षितेन नरेन्द्रेण राज्ञा यमादयो विशिष्यन्ते अप्रधानतां प्राप्यन्ते अयं भावः यमे दण्डदानमात्रं धर्मः कुबेरस्य धनदत्वमात्रमिन्द्रस्य रक्षणमात्रम् वरुणस्य सदाचारनियमनमात्रं राजनि तु सर्वे इति तेभ्यो राज्ञः आधिक्यमिति, किंच महता वृत्तेन युक्तेन नरेन्द्रेणैव यमादयो विशिष्यन्ते ऐश्वर्यविशिष्टा भवन्तीत्यर्थः, एतेन महतां राज्ञां धर्मत्यागे देवानां ह्रास एवेति सूचितम् ॥ ३५ ॥

गो० टी०–यम इति । नरेन्द्रेण महता वृत्तेन सर्वप्रकाररक्षणरूपचरित्रेण विशेष्यन्ते अधःक्रियन्ते यकि गुणश्छान्दसः । यमस्य दण्डनमात्रं कुबेरस्य धनदत्वमेव इन्द्रस्य पालनमेव वरुणस्य सदाचारनियमनमेव एतद्गुणचतुष्टययुक्तत्वान्नरेन्द्रेण यमादयो व्यावर्त्यन्त इत्यर्थः, यद्वा यतो महता वृत्तेन युक्तः ततो हेतोः एकैकदिग्वर्तिप्रजारक्षकयमादिभ्यः विशेष्यते अतिशीयते ॥ ३५ ॥

३६] ति० टी०–साध्वसाधुनी विभजन्व्यवस्थापयन्राजा चेन्न स्यात्तदाहो सूर्याभावे तम इव तमसीव न किंचन कर्तव्याकर्तव्यं प्रज्ञायेत प्रतीयेत । तम इति प्रथमा सप्तम्यर्थे अकारान्ततमशब्दस्य तमे इति सप्तम्यन्तं वा । 'तमस्यपि तमं तथा' इति द्विरूपकोशात् ॥ ३६ ॥

रा० टी०–अहो इति । साध्वसाधुनी कर्मणी विभजन् यथोचितं निश्चयन् राजा चेद्यदि लोके न भवेत्तर्हि इदं भूतलं तम इव सूर्याभावहेतुकान्धकारप्रचुरमिव स्यादत एव किंचन स्वकर्तव्यादिकं न प्रज्ञायेत तेन विपरीतप्रवृत्तिः स्यादिति सूचितम् ॥ ३६ ॥

गो० टी०–अहो इति । साध्वसाधुनी लोके विभजन् व्यवस्थापयन् राजा न स्याच्चेत् इदमराजकत्वम् अहो तम इव स्यात् यतः किंचन कर्तव्याकर्तव्यं न प्रज्ञायेत, यद्वा साध्वसाधुनी विभजन् राजा लोके न भवेत् चेत् इदं जगत् किंचन किंचिदपि न प्रज्ञायेत न प्रतीयेत किंतु तम इव स्यात् सूर्याभाव इव तमोरूपमेव स्यात् ॥ ३६ ॥

३७] ति० टी०–राजनि जीवत्यपि तव वचनं वयं नातिक्रमाम अत इदानीमपि त्वमेव गतिरिति वसिष्ठं प्रति सर्वेषामुक्तिः ॥ ३७ ॥

रा० टी०–वशिष्ठोदेश्यकप्रवृत्तं सर्ववचनमाह–जीवतीति । महाराजे दशरथे जीवति अस्मान् पालयत्यपि वयं तव वचनं वेलां प्राप्य सागर इव नैवातिक्रमामहे ॥ ३७ ॥

गो० टी०–जीवतीति । महाराजे जीवत्यपि वयं तव वचनं नातिक्रमामहे इदानीं किमुतेति भावः ॥ ३७ ॥

३८] ति० टी०–स त्वं नोऽस्माकं वृत्तं कृत्यं नृपं विना प्रभ्रष्टमिति शेषः । तादृशं वीक्ष्य राष्ट्रं चेदं तं विनारण्यभूतं समीक्ष्येक्ष्वाकुसुतं भरतं तथान्यं वा कंचिद्राजानमभिषेचय॥३८॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०–स इति । द्विजवर्य हे वसिष्ठ ! स त्वं नोऽस्माकं वृत्तं पौर्वकालिकस्वायत्तवार्तां समीक्ष्य संस्मृत्य नृपं विना अरण्यभूतं राष्ट्रं च समीक्ष्य विचार्य कुमारं कुमारावस्थापन्नमिक्ष्वाकुसुतमन्यं वा त्वमेव राजानमभिषेचय राज्यपालकत्वेन कंचन स्थापयेत्यर्थः ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्यायां रामायणशिरोमणावयोध्याकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

गो० टी०–स इति । हे द्विजवर्य वसिष्ठ ! सः त्वं नः अस्माकं वृत्तम् अराजकत्वप्रवृत्तं सर्वं कृत्यं समीक्ष्य नृपं विना राज्यमरण्यभूतं स्यादित्यपि समीक्ष्य इक्ष्वाकुसुतं दशरथतनयम् अभिषिञ्चेति योजना ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यायां अयोध्याकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

१] ति० टी०–मित्रामात्यजनाः सुमन्त्रादयः ब्राह्मणा मार्कण्डेयादयः ॥ १ ॥

१ राज्यमिति गो० पाठः । २ वदान्यमिति गो० पाठः । ३ अभिषिञ्चेति गो० पाठः । ४ इति गो० पाठः ।

यदसौ मातुलकुले दत्तराज्यः परं सुखी । भरतो वसति भ्रात्रा शत्रुघ्नेन सुदान्वितः ॥ २ ॥
तच्छीघ्रं जवना दूता गच्छन्तु त्वरितं हयैः । आनेतुं भ्रातरौ वीरौ किं समीक्षामहे वयम् ॥ ३ ॥
गच्छन्त्विति ततः सर्वे वसिष्ठं वाक्यमब्रुवन् । तेषां तद्वचनं श्रुत्वा वसिष्ठो वाक्यमब्रवीत् ॥ ४ ॥
एहि सिद्धार्थ विजय जयन्ताशोकनन्दन । श्रूयतामितिकर्तव्यं सर्वानेव ब्रवीमि वः ॥ ५ ॥
पुरं राजगृहं गत्वा शीघ्रं शीघ्रजवैर्हयैः । त्यक्तशोकैरिदं वाच्यः शासनाद्भरतो मम ॥ ६ ॥
पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिणः । त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥ ७ ॥
मा चास्मै प्रोषितं रामं मा चास्मै पितरं मृतम् । भवन्तः शंसिषुर्गत्वा रावणामित्रतः क्षयम् ॥ ८ ॥

रा० टी०–वशिष्ठप्रत्युक्तिं वर्णयितुमाह–तेषामिति । तेषां मित्रामात्यसहितब्राह्मणानां वचनं श्रुत्वा मित्रादीनिदं वचः प्रत्युवाच ॥ १ ॥

गो० टी०–तेषामित्यादि । मित्रामात्यगणान् मित्रभूतामात्यगणान् सुमन्त्रादीन् ब्राह्मणान् मार्कण्डेयादीन् ॥ १ ॥

२] ति० टी०–यस्मात्प्राज्ञा कैकेयीवचनादत्तराज्यो भरतो मातुलकुले वसति ॥ २ ॥

३] ति० टी०–अतस्तावानेतुं दूता गच्छन्तु वयं किं समीक्षामहे विचारयामहे राज्ञैव भरतराज्यस्य निश्चितत्वादिति भावः ॥ ३ ॥

रा० टी०–तत्प्रतिवचनमेवाह–यदिति । यस्माद्धेतोः राजगृहे तदभिधे पुरे मातुलकुले शत्रुघ्नेन सह सुदान्वितोऽसौ भरतो वसति तत्तस्माद्धेतोः शीघ्रं यथा स्यात्तथा जवनाः शीघ्रगमनकर्तारो दूताः भ्रातरावानेतुं हयैस्त्वरितं गच्छन्तु इदमेवोचितमिति तात्पर्यम् अतः परमुत्कृष्टं वयं किं समीक्षामहे अतः परमुत्कृष्टं नास्त्येवेति तात्पर्यम्। श्लोकद्वयमेकान्वयि ॥ २ ॥३॥

गो० टी०–यदित्यादि । राजगृहे राजगृहाख्ये पुरे यस्मात् वसति तत्तस्मात् जवनाः वेगवन्तः दूताः गच्छन्त्विति संबन्धः किं समीक्षामहे किं विचारयामः राज्ञैव भरताय राज्यस्य दत्तत्वादिति भावः ॥ २ ॥ ३ ॥

४] ति० टी०–मन्त्रिणो वसिष्ठवाक्यमनुजानन्ति–गच्छन्त्विति ॥ ४ ॥

रा० टी०–गच्छन्त्विति । ततो वशिष्ठवचनश्रवणानन्तरं गच्छन्तु दूता इति शेषः । इति वाक्यं सर्वे सुमन्त्रमार्कण्डेयप्रभृतयः वशिष्ठमब्रुवन् तेषां सुमन्त्रादीनां वचनं श्रुत्वा वशिष्ठः वाक्यमब्रवीत् ॥ ४ ॥

गो० टी०–तथैवामात्या अनुजानन्ति–गच्छन्त्विति ॥४॥

५] ति० टी०–सिद्धार्थादयो मन्त्रिसमाननामानो दूता न मन्त्रिण इत्याहुः । अन्ये तु–मन्त्रिणो दूताश्चेमे इत्याहुः । इतिकर्तव्यं गतैर्युष्माभिरनुष्ठेयकृत्यजातम् ॥ ५ ॥

रा० टी०–वाक्याकारमाह–एहीति । हे सिद्धार्थादयो दूताः ! सर्वान्पञ्चसंख्याकान् वो युष्मान् कर्तव्यं ब्रवीमि इति अतः श्रूयतां सिद्धार्थादयो मन्त्रिनामानो दूता न तु मन्त्रिणः नन्दनसाहचर्यादित्येके यदि च सिद्धादिसाहचर्येण नन्दनोऽपि मन्त्री एवेति व्याख्यायते तदा नन्दन इति कस्यचिन्मन्त्रिणो नामान्तरमिति बोध्यम् । मन्त्रिभिर्दूतकर्म कथं क्रियते इति तु न भ्रमितव्यम् अतिनिपुणानां सर्वेकर्मस्वधिकारात् ॥ ५ ॥

गो० टी०–एहीति । सिद्धार्थविजयजयन्ताशोका अमात्यमन्त्रिसमाननामानो दूताः न तु मन्त्रिणः मन्त्रिव्यतिरिक्तनन्दनशब्दसहपाठात् पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिण इत्युपरि वक्ष्यमाणत्वाच्च इतिकर्तव्यं कार्यकलापम् ॥ ५ ॥

६] ति० टी०–शीघ्रजवैरतिवेगैः मम शासनाद्भरतो वाच्य इत्यन्वयः ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–पुरमिति । राजगृहं राजगृहाख्यं पुरं गत्वा त्यक्तशोकैर्भवद्भिर्मम शासनाद्वचनाद्भरतः इदं वाच्यः ॥ ६ ॥

गो० टी०–पुरमिति । त्यक्तशोकैः भवद्भिरिति शेषः । इदं वक्ष्यमाणं वचनं मम शासनात् भरतो वाच्यः ॥ ६ ॥

७] ति० टी०–कथं वाच्यस्तदाह–पुरोहित इति । अत्ययमसह्यकालातिक्रमं तदेवात्ययिकम् । अतिक्रमे एतीत्यव्ययम् । कालातिक्रमे एति नश्यतीति वाच्योऽर्थः विनयादित्वाठक् । तादृशं कृत्यमस्ति, अतस्त्वरमाणो निर्याहीति वाच्यमित्यनुकर्षः ॥ ७ ॥

रा० टी०–इममर्थमेवाह–पुरोहित इति । पुरोहितो वशिष्ठः मन्त्रिणश्च त्वरमाणस्त्वं निर्याहि आगच्छ त्वया कृत्यं कर्तव्यम् आत्ययिकमावश्यकमित्यर्थः । इति प्राह प्राहुश्च वचनविपरिणामेनात्राप्यन्वेति । अत्येति कालातिक्रमे नश्यति तदेवात्ययिकं विनयादित्वात्स्वार्थिकष्ठक् ॥ ७ ॥

गो० टी०–पुरोहित इति । मन्त्रिणः प्राहुरिति विपरिणामः । अत्ययः कालातिपातः तं प्राप्तमात्ययिकं "विनयादिभ्यष्ठक्" इति ठक् तादृशं कृत्यमस्ति अतस्त्वरमाणो निर्याहीति वाच्य इत्यनुकर्षः । यद्वा अत्ययः कृच्छ्रं तत्र भवमात्ययिकम् 'अत्ययोऽतिक्रमे कृच्छ्रे' इत्यमरः । कृत्यमस्तीति शेषः ॥ ७ ॥

८] ति० टी०–इतः स्त्रीरूपान्मूलात्क्षयं मा शंसिषुर्मा कथयन्तु ॥ ८ ॥

रा० टी०–सिद्धार्थादीन्प्रदिश्यवशिष्ठ आह–मेति । अस्मै

१ पुरे राजगृहे इति गो. रा. पाठः । २ समन्वित इति गो. पाठः । ३ त्वरितैरिति गो. पाठः । ४ इममिति गो. पाठः ।

भर्तुः प्रियार्थं कुलरक्षणार्थं भर्तुश्च वंशस्य परिग्रहार्थम् ।
अहेडमानास्त्वरया स्म दूता राज्यां तु ते तत्पुरमेव याताः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ।

तप्यमानं विमनस्कं भरतमनुलक्ष्य तद्विनोदनायातोद्याख्यायिकाभिः प्रयतमानानां सवयसामप्यन्ते कस्मात्ते वैमनस्यमिति प्रश्ने रात्रावनुभूतदुःस्वप्नप्रकारं दौर्मनस्यहेतुत्वेन भरतः प्रस्तौति ।

यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम् । भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः ॥ १ ॥
व्युष्टामेव तु तां रात्रिं दृष्ट्वा तं स्वप्नमप्रियम् । पुत्रो राजाधिराजस्य सुभृशं पर्यतप्यत ॥ २ ॥
तप्यमानं तमाज्ञाय वयस्याः प्रियवादिनः । आयासं [2]विनयिष्यन्तः सभायां चक्रिरे कथाः ॥ ३ ॥
वादयन्ति [3]तदा शान्तिं लासयन्त्यपि चापरे । नाटकान्यपरे [4]स्माहुर्हास्यानि विविधानि च ॥ ४ ॥

सांनिध्येन अञ्जसाशब्देन मानसत्वरोच्यते अञ्जसा आर्जवेनेति वार्थः ॥ २१ ॥

२२] ति० टी०–भर्तुरिति । भर्तुर्नियोक्तुर्वसिष्ठस्य प्रियार्थं शीघ्रगमनेन प्रीतिसंपादनार्थं, यद्वा भर्तुर्दशरथस्य प्रियार्थं शीघ्रानीतभरतकृतौर्ध्वदेहिकेन परलोकप्राप्तेः । कुलस्य प्रजाकुलस्य रक्षणार्थम् भर्तुर्दशरथस्य यो वंशो वंशपरम्परागतराज्यं तस्य परिग्रहार्थं भरतेन स्वीकारार्थम् अहेडमाना उपेक्षारहिताः 'हेडृ अनादरे' अत एव त्वरया युक्ता दूता राज्यामेव तत्पुरं यातः अत्र कतकोक्तसंख्यारीत्या षट् श्लोकाश्रुटिताः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

रा० टी०–भर्तुरिति । भर्तुः दशरथादेः प्रियार्थं कुलस्य प्रजासमूहस्य रक्षणार्थं वंशस्य वंशरीतेः परिग्रहार्थं निर्वाहार्थमहेडमानाः अनादररहितास्ते दूताः राज्यामेव तत्पुरं याताः प्राप्ताः२२

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

गो० टी०–भर्तुरिति । भर्तुः दशरथस्य प्रियार्थं शीघ्रानीतभरतकृतौर्ध्वदैहिकादिना दशरथस्य परलोकप्राप्तिहेतुत्वात्, कुलरक्षणार्थं सनाथीकरणेन कुलजातानां संरक्षणार्थं भर्तुर्वंशस्य इक्ष्वाकुवंशस्य परिग्रहार्थं प्रतिष्ठार्थं, यद्वा भर्तुर्वंशो भरतादिः तस्य परिग्रहार्थं प्रतिष्ठार्थं पित्रौर्ध्वदैहिककर्मनिर्वर्तनेन सज्जनपरिग्रहार्थं वा अहेडमानाः हेडृ अनादर इत्यस्माद्धातोः शानच् अनादरमकुर्वाणाः सादरा इति यावत् अत एव त्वरया युक्ता दूताः राज्यामेव अस्तमयानन्तरमपि कियत्कालं गत्वा राज्यामेव तत्पुरं याताः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यायेऽयोध्याकाण्डव्याख्यानेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

१] ति० टी०–यामिति । यामेव रात्रिं प्राप्य दूताः पुरीं प्रविशन्ति स्मेति योजना । अयं वक्ष्यमाणः ॥ १ ॥

रा० टी०–मातुलकुलस्थभरतवृत्तान्तमाह–यामित्यादिभिः । यां रात्रिमुपलभ्य दूताः पुरीं प्रविशन्ति स्म तां रात्रिमुपलभ्य भरतेन अयं वक्ष्यमाणः अप्रियः स्वप्नः दृष्टः ॥ १ ॥

गो० टी०–यामिति । यामेव यस्यामेव सप्तम्यर्थे द्वितीया छान्दसी । तां तस्याम् अयं वक्ष्यमाणः ॥ १ ॥

२] ति० टी०–व्युष्टां प्रभातरूपां तां रात्रिं प्राप्याप्रियं स्वप्नं दृष्ट्वा पर्यतप्यतेत्यन्वयः । प्रातःकालिकत्वेन शीघ्रफलता स्वप्नस्य सूचिता ॥ २ ॥

रा० टी०–स्वप्नकालविशेषं बोधयन्नाह–व्युष्टामिति । व्युष्टां व्यतीतप्रायां प्रातरित्यर्थः, रात्रिमुपलभ्य पुत्रो भरतः सुभृशमत्यन्तं पर्यतप्यत ॥ २ ॥

गो० टी०–व्युष्टामिति । व्युष्टां प्रभातायां सत्यामित्यर्थः, प्रभातस्वप्नः सद्यः फलद इति द्योतयितुमिदमुक्तम् ॥ २ ॥

३] ति० टी०–आयासं दुःस्वप्नदर्शनजं दुःखं विनयिष्यन्तोऽपनेष्यन्तः ॥ ३ ॥

रा० टी०–तप्यमानमिति । तप्यमानं दुष्टस्वप्नदर्शनजनितखेदवन्तमाज्ञाय आयासं खेदं विनयिष्यन्तः विनेष्यन्तः दूरीकुर्वन्तो वयस्याः सभायां कथाः व्यथापनोदकवार्ताः चक्रिरे परस्परं कथयामासुः ॥ ३ ॥

गो० टी०–तप्यमानमिति । वयस्याः सुहृदः आयासं मनःखेदम् ॥ ३ ॥

४] ति० टी०–अन्ये तदूरीकुर्वन्तो वीणादि वादयन्ति अपरे शान्तिं तस्य खेदशान्तिमुद्दिश्य लासयन्ति नर्तयन्ति वेश्याः । 'शान्तिं लोलयन्ति' इति पाठः तस्य शान्तिं तूष्णीमवस्थानं लोलयन्ति चालयन्ति श्लोकार्थप्रभव्याजेनेत्यर्थः ।

१ समाख्येति गो. पाठः । २ हि विनेष्यन्त इति गो. पाठः । ३ तथेति गो. पाठः । ४ प्राहुरिति गो. रा. पाठः ।

स तैर्महात्मा भरतः सखिभिः प्रियबोधिभिः । गोष्ठीहास्यानि कुर्वद्भिर्न प्राहृष्यत राघवः ॥ ५ ॥
तमब्रवीत्प्रियसखो भरतं सखिभिर्वृतम् । सुहृद्भिः पर्युपासीनः किं सखे नानुमोदसे ॥ ६ ॥
एवं ब्रुवाणं सुहृदं भरतः प्रत्युवाच ह । शृणु त्वं यन्निमित्तं मे दैन्यमेतदुपागतम् ॥ ७ ॥
स्वप्ने पितरमद्राक्षं मलिनं मुक्तमूर्धजम् । पतन्तमद्रिशिखरात्कलुषे गोमये ह्रदे ॥ ८ ॥
प्लवमानश्च मे दृष्टः स तस्मिन्गोमये ह्रदे । पिबन्नञ्जलिना तैलं हसन्निव मुहुर्मुहुः ॥ ९ ॥
ततस्तिलोदनं भुक्त्वा पुनः पुनरधःशिराः । तैलेनाभ्यक्तसर्वाङ्गस्तैलमेवान्वगाहत ॥ १० ॥
स्वप्नेऽपि सागरं शुष्कं चन्द्रं च पतितं भुवि । उपरुद्धां च जगतीं तमसेव समावृताम् ॥ ११ ॥
औपवाह्यस्य नागस्य विषाणं शकलीकृतम् । सहसा चापि संशान्ता ज्वलिता जातवेदसः ॥ १२ ॥
अवदीर्णां च पृथिवीं शुष्कांश्च विविधान्द्रुमान् । अहं पश्यामि विध्वस्तान्सधूमांश्चैव पर्वतान् ॥ १३ ॥

अपरे हास्यानि हास्यरसप्रधानानि विविधानि नाटकान्याहुः ॥ ४ ॥

रा० टी०–कथाप्रकारं वर्णयन्नाह–वादयन्तीति । शान्तिं खेदनिवृत्तिमुद्दिश्य वादयन्ति वीणादीति केचिदिति च शेषः । अपरे लासयन्ति नृत्यन्ति अपरे हास्यानि हास्यरसोत्पादकानि भाषासंस्कृतमिश्रवचनादीनि प्राहुः ॥ ४ ॥

गो० टी०–वादयन्तीति । शान्तिं भरतस्य दुःखशान्तिमुद्दिश्य वादयन्ति वीणादिकमिति शेषः । लासयन्ति लास्यं कुर्वन्ति लास्यं सुकुमारनृत्तं, नाटकानि संस्कृतप्राकृतपैशाचमागधादिमिश्रगद्यपद्यरूपाणि, हास्यानि हासजनकवाक्यानि ॥४॥

५] ति० टी०–गोष्ठीहास्यानि गोष्ठ्युचितानि हास्यानि नर्माणि ॥ ५ ॥

रा० टी०–स इति । गोष्ठीहास्यानि गोष्ठ्युचितहास्यसंपादकवचनोच्चारणानि कुर्वद्भिः प्रियबोधनशीलैः सखिभिः सहितोऽपि भरतः न प्राहृष्यत ॥ ५ ॥

गो० टी–स तैरिति । गोष्ठीहास्यानि गोष्ठी सभा सभ्यहास्यानीत्यर्थः ॥ ५ ॥

६–७] ति० टी०–प्रियसखः सखिमात्रस्य प्रियत्वाविवादादूयो गतिर्ज्ञेया अत्यन्तप्रिय इति । नानुमोदसे गानादिति शेषः ॥ ६ ॥ ७ ॥

रा० टी०–तमिति । हे सखे! सुहृद्भिः पर्युपासीनस्त्वं किं किमर्थं नानुमोदसे इति सखिभिर्वृतं भरतं प्रियसखः भरतस्य प्रियः सखा अब्रवीत् ॥ ६ ॥

रा० टी०–एवमिति । एवं ब्रुवाणं कथयन्तं सुहृदं प्रत्युवाच । तत्प्रतिवचनमेवाह–यन्निमित्तं यत्कारणकमेतन्मे दैन्यमुपागतं प्राप्तं तत्कारणं शृणु ॥ ७ ॥

गो० टी–तमिति । प्रियसखः अन्तरङ्गसुहृत् "राजाहस्सखिभ्यष्टच्" इति टच् ॥ ६–८ ॥

८–९] ति० टी०–गोमये ह्रदे गोमयपूर्णे ह्रदे ॥ ८॥९॥

रा० टी०–स्वप्न इति । मलिनं म्लानं मुक्तमूर्धजमबद्धकेशं गोमये गोमयप्रचुरे कलुषे ह्रदे भद्रिशिखरात्पतन्तं पितरं स्वप्नेऽद्राक्षम् ॥ ८ ॥

रा० टी०–प्लवमान इति । तस्मिन्ह्रदे प्लवमानः अञ्जलिना तैलं पिबन्मुहुर्मुहुः हसन्निव स पिता दृष्टः ॥ ९ ॥

गो० टी०–प्लवमान इति । प्लवमानः मण्डूकवत् ॥ ९ ।

१०] ति० टी०–तिलोदनं तिलमिश्रमोदनम् । अन्वगाहतेत्यन्तः प्रथमः स्वप्नः ॥ १० ॥

रा० टी०–तत इति । ततः तैलपानानन्तरं तिलौदनं तिलमिश्रमोदनं भुक्त्वा अधश्शिराः तैलेन अभ्यक्तानि सर्वाङ्गानि यस्य स राजा तैलमेवान्वगाहत तैले अज्ञात् ॥ १०

गो० टी०–तत इति । तिलमिश्र ओदनः तिलोदनः ॥१०

११] ति० टी०–स्वप्नान्तरमाह–स्वप्नेऽपीति । तमसा समावृतामेवोपरुद्धां तिरोहितां, यद्वाक्षररक्षोभिरुपरुद्धाम् ॥११

१२] ति० टी०–औपवाह्यस्य राजवाहनस्य नागस्य दन्तिनः विषाणं दन्तः, ज्वलिता अग्नयोऽकस्माच्छान्ता दृष्टाः ॥ १२

१३] ति० टी०–अवदीर्णां विदीर्णाम् ॥ १३ ॥

रा० टी०–स्वप्नान्तरमाह–स्वप्न इति । शुष्कं सागरं भुवि पतितं चन्द्रं च उपरुद्धां राक्षसादिभिः पीडितामतएव तमसेव समावृतां जगतीं पृथिवीं च औपवाह्यस्य राजवाहनस्य योग्यस्य नागस्य हस्तिनः शकलीकृतं खण्डीकृतं विषाणं दन्तं च ज्वलिताः पूर्वं प्रज्वलिताः ये जातवेदसो वह्नयस्ते पश्चात् सहसा त्वरितं संशान्ताः गतज्वालास्तांश्च अवदीर्णां विदीर्णतामिष्टां पृथिवीं च विध्वस्तान्पतितान्सधूमान् धूमसहितान्पर्वतांश्च अहं पश्यामि अपश्यम् "वर्तमानसामीप्ये"इति भूते लट् श्लोकत्रयमेकान्वयि'औपवाह्यो राजवाह्यः'इति हलायुधः११–१

गो० टी०–स्वप्नेऽपीति । तमसा समावृतामिव उपरुद्धां तिरोहिताम् औपवाह्यस्य राजवाह्यस्य 'औपवाह्यो राजवाह्य' इति हलायुधः । नागस्य गजस्य जातवेदसा अग्निना । अवदीर्णामिति । अवतीर्णाम् अधःपतितां पश्यामीति सर्वत्रान्वयः वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ ११–१३ ॥

---

१ वादिभिरिति गो. पाठः । २ गोमयह्रदे इति गो. पाठः । ३ एवावगाहतेति गो. पाठः । ४ संशान्तं ज्वलितं जातवेदसामिति गो. पाठ ५ तीर्णामिति गो. पाठः । ६ चापीति गो. पाठः ।

पीठे कार्ष्णायसे चैवं निषण्णं कृष्णवाससम् । प्रहरन्ति स्म राजानं प्रमदाः कृष्णपिङ्गलाः ॥ १४ ॥
त्वरमाणश्च धर्मात्मा रक्तमाल्यानुलेपनः । रथेन खरयुक्तेन प्रयातो दक्षिणामुखः ॥ १५ ॥
प्रहसन्तीव राजानं प्रमदा रक्तवासिनी । प्रकर्षन्ती मया दृष्टा राक्षसी विकृताननाः ॥ १६ ॥
एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् । अहं रामोऽथवा राजा लक्ष्मणो वा मरिष्यति ॥ १७ ॥
नरो यानेन यः स्वप्ने खरयुक्तेन याति हि । अचिरात्तस्य धूम्राग्रं चितायां संप्रदृश्यते ॥ १८ ॥
एतन्निमित्तं दीनोऽहं न वचः प्रतिपूजये । शुष्यतीव च मे कण्ठो न स्वस्थमिव मे मनः ॥ १९ ॥
न पश्यामि भयस्थानं भयं चैवोपधारये । भ्रष्टश्च स्वरयोगो मे छाया चोपगता मम ॥
जुगुप्स इव चात्मानं नच पश्यामि कारणम् ॥ ॥ २० ॥
इमां च दुःखप्रगतिं निशम्य हि त्वनेकरूपामवितर्कितां पुरा ।
भयं महत्तद्धृदयान्न याति मे विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

१४-१५] ति० टी०-कृष्णाश्च पिङ्गलाश्च प्रमदाः॥१४॥१५॥

रा० टी०-प्रथमस्वप्नसमानं स्वप्नान्तरमाह-पीठे इति । कृष्णपिङ्गलाः कृष्णपिङ्गलवर्णविशिष्टाः प्रमदाः कार्ष्णायसे नीललोहनिर्मिते पीठे निषण्णं संस्थितं कृष्णवाससं धृतनीलवस्त्रं राजानं मत्पितरं प्रहरन्ति स्म ॥ १४ ॥

रा० टी०-त्वरमाण इति । रक्तमाल्यानुलेपनः अरुणमालाचन्दनधारी खरयुक्तेन रथेन त्वरमाणः धर्मात्मा राजा दक्षिणाभिमुखः सन्प्रयातः ॥ १५ ॥

गो० टी०-पीठ इति । कृष्णाश्च पिङ्गलाश्च कृष्णपिङ्गलाः ॥ १४-१६ ॥

१६] ति० टी०-रक्तवासिनी रक्तवस्त्रा प्रहसन्तीव॥१६॥

रा० टी०-प्रहसन्तीति। रक्तवासिनी धृतरक्तवस्त्रा विकृताननना छिन्ननासिकादिविशिष्टाननविशिष्टा राजानं प्रकर्षन्ती प्रहसन्तीव प्रमदा स्वप्ने मया दृष्टा ॥ १६ ॥

१७] ति० टी०-इमां भयावहां रात्रिं प्राप्य एवमेतदृष्टम्। अहं मरिष्यामीति विपरिणामः ॥ १७ ॥

रा० टी०-एवमिति । वाम हे सुन्दरसखे! भयावहां भयप्रापिकामिमां रात्रिमुपलभ्य एवमनेन प्रकारेण एतन्मया दृष्टम् । ननु किमेवंदर्शनेनेत्यत आह-मदाद्यन्यतमः रिष्यति स्वजनागम्यदेशं प्राप्स्यति गत्यर्थकरिधातोर्लृट् ॥ १७ ॥

गो० टी०-उक्तस्वप्नदर्शनफलमाह-एवमित्यादिना । इमां रात्रीम् अस्यां रात्रौ अहं मरिष्यामीति विपरिणामः कार्यः१७॥

१८] ति० टी०-दृष्टदुःस्वप्नफलं निगमयति-नर इत्यादि । धूम्राग्रं धूमशिखा ॥ १८ ॥

रा० टी०-प्राकृतविलक्षणजनविषयकस्वप्नफलमुक्त्वा प्राकृतजनविषयकं फलं वदन्नाह-नर इति । यः प्राकृतो नरः खरयुक्तेन यानेन स्वप्ने याति तस्य जनस्य चितायां धूमाग्रं धूमशिखा अचिरात्संप्रदृश्यते ॥ १८ ॥

गो० टी०-नर इति । धूमाग्रं धूमशिखा ॥ १८ ॥

१९] ति० टी०-एतदुक्तं निमित्तं स्वप्नरूपं दृष्टेति शेषः । वचो युष्माकं न प्रतिपूजये । ' न प्रतिपेप्रिये ' इति पाठे युष्माकं वचः प्रति नयेन भृशं प्रीतो भवामीत्यर्थः । यङन्ताच्छडिति कतकः ॥ १९ ॥

रा० टी०-एतदिति । येन अहं दीनः तन्निमित्तमेतदेव अत एव वचः भवद्वचनं न प्रतिपूजये अत एव मे कण्ठः शुष्यत्येव मनः स्वस्थं नैव ॥ १९ ॥

गो०टी०-एतदिति।एतन्निमित्तम् उक्तस्वप्नदर्शनहेतुना१९

२०] ति० टी०-भयस्थानं भयकारणम् उपधारयेऽवशतो बिभर्मि । छाया कान्तिः अपगता पूर्वरूपं त्यक्तवती मलिनेत्यर्थः । आत्मानं जुगुप्स इव किमर्थं मम जन्मेत्येवमादिरूपेण। कारणं जुगुप्साकारणम् । ' जुगुप्सन्निव ' इति पाठे जुगुप्सन्निव तिष्ठामि तत्कारणं च न पश्यामीत्यर्थः ॥ २० ॥

रा० टी०-नेति । भयस्थानं भयनिमित्तं न पश्यामि भयं तु उपधारये प्राप्नुयामि अत एव मे स्वरयोगः युक्तस्वरः भ्रष्टः विपरिणतः अत एव छाया कान्तिः अपगता विवर्णतां प्राप्ता२०

गो० टी०-नेति । भयस्थानं भयकारणम् अथ च भयमुपधारये अवशतो बिभेमि छाया कान्तिः 'छाया त्वनातपे कान्तौ' इति वैजयन्ती ॥ २० ॥

रा० टी०-जुगुप्सन्निति । आत्मानं भयनिवर्तकयज्ञं जुगुप्सनयुक्तत्वेन निन्दनेवाहं कारणं भयनिवृत्तिहेतुं न पश्यामि। अर्धं पृथक् ॥ २१ ॥

गो० टी०-जुगुप्सन्निति । जुगुप्सन्निव अस्मीति शेषः । कारणं जुगुप्साकारणम् ॥ २१ ॥

२१] ति० टी०-पुरा पूर्वमतर्कितामनेकरूपां दुःस्वप्नगतिं

---

१ एवमिति गो. पाठः । २ हसन्तीति गो. पाठः । ३ धूमाग्रमिति गो. रा. पाठः । ४ तन्न वः इति गो. पाठः । ५ चोपहतेति गो. पाठः । ६ जुगुप्सन्निति गो. रा. पाठः । ७ हीति गो. पाठः । ८ निशाम्य तामनेकेति गो. पाठः । ९ प्राप्नोमीति युक्तं दृश्यते ।

सप्ततितमः सर्गः ।

दृष्टं स्वप्नं सुहृदः प्रति कथयति भरतेऽयोध्यातः प्राप्ता दूता भरतं प्रणम्य वसिष्ठप्रभृतयो गं न्यवेदयन् । दूतमुखाच्छ्रुतकुशलवार्तो भरतो मातामहादीन्संपृच्छ्यायोध्यां प्रति प्रतस्थे ।

भरते ब्रुवति स्वप्नं दूतास्ते क्लान्तवाहनाः । प्रविश्यासह्यपरिखं रम्यं राजगृहं पुरम् ॥ १ ॥
समागम्य च राज्ञा ते राजपुत्रेण चार्चिताः । राज्ञः पादौ गृहीत्वा च तमूचुर्भरतं वचः ॥ २ ॥
पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिणः । त्वरमाणश्च निर्याहि कृत्यमान्ययिकं त्वया ॥ ३ ॥
इमानि च महार्हाणि वस्त्राण्याभरणानि च । प्रतिगृह्य विशालाक्ष मातुलस्य च दापय ॥ ४ ॥
अत्र विंशतिकोट्यस्तु नृपतेर्मातुलस्य ते । दशकोट्यस्तु संपूर्णास्तथैव च नृपात्मज ॥ ५ ॥

निशम्य हि दुःस्वप्नं स्मृत्वा हि स्मृत्वैव चिन्तायां अविषयदर्शनमपि राजानं विचिन्त्य राजदर्शनविषयां चिन्तां प्राप्य महद्भयं मे हृदयान्न यातीत्यर्थः ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनसप्ततितमः सर्गः ॥६९॥

रा० टी०–इमामिति । पुरा पूर्वमवितर्कितामनेकरूपामिमां स्वप्नगतिं निशम्य राजानमविचिन्त्यं निश्चितत्वेन चिन्तनानर्हं दर्शनं यस्य तं विचिन्त्य हृदयान्महद्भयं न याति ॥२१॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

गो० टी०–इमामिति । तामिमां दुःस्वप्नगतिं दुःस्वप्नभेदम् अवितर्कितां पूर्वमविचारिताम् अमोघामिति भावः । पूर्वचिन्ताकृतत्वे हि वैफल्यम् । अचिन्त्यदर्शनम् असंभाव्यदर्शनम् अत्र सर्गे अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति "खरैर्वराहैः" इत्यादिश्रुतिरुपबृंहिता स्वप्नश्च पूर्वचिन्तापुरस्कृतो न फलति प्रत्यूषे च फलति सद्यः यामविलम्बात्फलविलम्बः फलं च द्रष्टुः दृष्टस्य तत्संबन्धिनो वा भविष्यतीत्यादिकमुक्तम् ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

१] ति० टी०–असह्या दुःसहाः परिखाः परिखाप्रदेशवर्तिप्राकारयन्त्रसमूहो यस्य तत् । 'असह्यपरिघम्' इति पाठान्तरम् ॥ १ ॥

२] ति० टी०–राज्ञा केकयेन राजपुत्रेण युधाजिता समागम्य वसिष्ठादिदत्तपदार्थपुरःसरतया संगमपूर्वं यथोचितं व्यवहारं कृत्वा ताभ्यामार्चिता राज्ञः स्वीयस्य भरतस्य पादौ गृहीत्वा नमस्कृत्य भरतं वच ऊचुः । राज्ञः केकयराजस्यैवेत्यन्ये ॥ २ ॥

रा० टी०–वृत्तवृत्तान्तं वर्णयन्नाह–भरत इति । भरतं एवमनेन प्रकारेण स्वप्नं ब्रुवति सति दूताः असह्यपरिघं शत्रुभिः न सह्या परिखा यस्य तद्राजगृहं राजगृहाख्यं पुरं समागम्य राज्ञा केकयराजेन राजपुत्रेण च अर्चिताः सत्कृताः सन्तः राज्ञः भरतस्य पादौ गृहीत्वा अभिवन्द्य तं भरतमूचुः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–भरत इति । असह्यपरिघं परैरप्रधृष्यपरिघं राज्ञा केकयराजेन राजपुत्रेण युधाजिता अर्चिताः आनीतोपायननिरीक्षणेन संमानिताः राज्ञः भरतस्य । भरतस्य परमकृतत्वात् तमिति निर्देशः ॥ १ ॥ २ ॥

३] ति० टी०–मन्त्रिणः प्राहुरिति विपरिणामः आत्ययिकं कालातिक्रमासहं कृत्यमस्तीति शेषः ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–पुरोहित इति । पुरोहितो वसिष्ठः ॥ ३ ॥

गो० टी०–पुरोहित इति । आत्ययिकं दुष्करम् अत्ययः कृच्छ्रम् 'अत्ययोऽतिक्रमे कृच्छ्रे मरणे दण्डदोषयोः' इति वैजयन्ती । त्वया कृत्यं कर्तव्यम् अतो निर्याहीत्यन्वयः ॥ ३ ॥

४] ति० टी०–मातुलस्य च चान्मातामहस्य च ॥ ४ ॥

रा० टी०–इमानीति । महार्हाणि बहुमूल्यकानि वस्त्राणि आभरणानि च प्रतिगृह्य मातुलस्य दापय ॥ ४ ॥

गो० टी०–इमानीति । विशालाक्षेति विभूषणावलोकनजनितविस्मयोत्फुल्लाक्षत्वमाह । मातुलस्य च दापयेति सङ्गत्यात् प्रथमं मातामहस्य दापय अथ मातुलस्य दापयेत्यर्थः ॥४॥

५] ति० टी०–अत्राहृतद्रव्ये विंशतिकोट्यस्तत्संख्याकवस्त्राभरणानि नृपतेर्मातामहस्य तदर्धं मातुलस्य ॥ ५ ॥

रा० टी०–देयद्रव्याणां संख्यां बोधयन्नाह–अत्रेति । अत्र आहृत देयद्रव्येषु विंशतिकोट्यः विंशतिकोटिपरिमितद्रव्यकयः नृपतेस्तव मातामहस्य प्राप्या इति शेषः दशकोट्यस्तु ते मातुलस्य प्राप्याः ॥ ५ ॥

गो० टी०–अत्रेति । अत्र वस्त्राभरणादिमहार्हवस्तुजाते

१ परिघमिति गो. पाठः । २ तु राज्ञा चेति गो. पाठः । ३ स्थिति गो. पाठः ।

प्रतिगृह्य तु तत्सर्वं स्वनुरक्तः सुहृज्जने । दूतानुवाच भरतः कामैः संप्रतिपूज्य तान् ॥ ६ ॥
कच्चित्सौ कुशली राजा पिता दशरथो मम । कच्चिदारोग्यता रामे लक्ष्मणे च महात्मनि ॥ ७ ॥
आर्या च धर्मनिरता धर्मज्ञा धर्मवादिनी । अरोगा चापि कौसल्या माता रामस्य धीमतः ॥ ८ ॥
कच्चित्सुमित्रा धर्मज्ञा जननी लक्ष्मणस्य या । शत्रुघ्नस्य च वीरस्य अरोगा चापि मध्यमा ॥ ९ ॥
आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी । अरोगा चापि मे माता कैकेयी किमुवाच ह ॥ १० ॥
एवमुक्तास्तु ते दूता भरतेन महात्मना । ऊचुः संप्रश्रितं वाक्यमिदं तं भरतं तदा ॥ ११ ॥
कुशलास्ते नरव्याघ्र येषां कुशलमिच्छसि । श्रीश्च त्वां वृणुते पद्मा युज्यतां चापि ते रथः ॥ १२ ॥

नृपतेः विंशतिकोट्यः विंशतिकोटिमूल्यानि वस्त्राभरणादीनि मातुलस्य दशकोट्यः दशकोटिमूल्यानि संपूर्णा अन्यूना इत्युभयविशेषणं तथैव तदर्हमेव अन्यथा राजतुल्यतया राजपुत्रदाने तस्य बहुमान एव न भवतीति भावः ॥ ५ ॥

६] ति० टी०–सुहृज्जने मातुलादिरूपे प्रदाप्येति शेषः । कामैरभिमतवस्तुजातैः ॥ ६ ॥

रा० टी०–प्रतीति । तदूतसमर्पितं सर्वं वस्तु प्रतिगृह्य सुहृज्जने मातुलादिरूपे प्रदाप्येति शेषः । तान्दूतान् संप्रतिपूज्य सम्यक् सत्कृत्य उवाच ॥ ६ ॥

गो० टी०–प्रतिगृह्येति । सुहृज्जने मातुलादौ स्वनुरक्तः प्रदाप्येति शेषः । कामैरभीष्टान्नपानादिभिः ॥ ६ ॥

७—९] ति० टी०–अथ क्रमेण कुशलं पृच्छति––राजेत्यादि ॥ ७–९ ॥

रा० टी०–तद्वचनाकारमाह–कच्चिदिति । कच्चिदित्यभीष्टप्रश्ने ॥ ७ ॥

गो० टी०–कच्चिदिति । अरोगता आरोग्यम् 'आरोग्यता' इति पाठे स्वार्थे ष्यञ् ॥ ७ ॥

रा० टी०–आर्येति । धीमतः समाधिकरहितधीविशिष्टस्य ॥ ८ ॥

गो० टी०–आर्येति । आर्या ज्येष्ठमातृत्वेन पूज्या धर्मनिरता धर्मानुष्ठानपरा धर्मज्ञा ज्ञात्वानुष्ठानमिति न्यायेन अनुष्ठानमूलज्ञानयुक्ता धर्ममेव जनेषु पश्यतीति धर्मदर्शिनी गुणग्राहिणी नतु दोषदर्शिनीत्यर्थः अप्यरोगेत्यन्वयः । अपिः प्रश्ने धीमत इत्यनेन पुत्रकृतातिशय उच्यते ॥ ८ ॥

रा० टी०–कच्चिदिति । अरोगा रोगरहिता ॥ ९ ॥

गो० टी०–कच्चिदिति । सेति धर्मज्ञात्वस्मरणाविनयः । मध्यमेत्यनेन न तेऽम्बा मध्यमाता तेऽत्यत्र कैकेय्या मध्यमात्वमितरव्यपेक्षया ॥ ९ ॥

१०] ति० टी०–मातुः स्वभावानुवादपूर्वं तस्या आरोग्यं पृच्छति––आत्मकामेति । आत्मप्रयोजनकामा प्राज्ञमानिनी आत्मानं प्राज्ञां मन्यते सा ॥ १० ॥

रा० टी०–आत्मेति । सदा नित्यं आत्मकामा आत्मनां जीवानां कं सुखममति प्रापयति सा अत एव चण्डी क्रोधना चण्ड्यां हिंसिकायां क्रोधनं कोपो यस्याः ' चण्डी कात्यायनीदेव्यां हिंस्रकोपनयोषितोः' इति मेदिनी । प्राज्ञमानिनी प्राज्ञान् तत्त्वज्ञान् मानयति पूजयति तच्छीला अरोगा नित्यं रोगरहिता कैकेयी किमुवाच कथयामास ॥ १० ॥

गो० टी०–आत्मकामेति । आत्मानं कामयत इति आत्मकामा स्वप्रयोजनपरेत्यर्थः । प्रज्ञैव प्राज्ञा प्राज्ञामात्मानं मन्यत इति प्राज्ञमानिनी मन इति णिनिः "क्यङ्मानिनोश्च" इति पुंवद्भावः चण्डी उग्रा क्रोधना कोपवती मे माता अप्यरोगा कैकेयी किमुवाच स्वबन्धुविषये किमुवाचेत्यर्थः । दुःस्वप्नदर्शनदूतागमनाभ्यां कैकेय्या किंचित्कृतं भवेदित्यूहितवान् भरत इति सूचयत्यात्मकामेत्यादिभिः ॥ १० ॥

११] ति० टी०–संप्रश्रितं सविनयं संक्षिप्तं च ॥ ११ ॥

रा० टी०–एवमिति । तदा भरतप्रश्नकाले एवमनेन प्रकारेणोक्ता दूताः संप्रश्रितं विनयसहितमिदं वाक्यमूचुः॥११॥

गो० टी०–एवमिति । महात्मना महाबुद्धिना एतेनायोध्यावृत्तान्तोऽनेन ज्ञात इति सूचितं सप्रश्रयं सविनयम् अनेन सर्वात्मना अयोध्यावृत्तान्तगोपनं सूच्यते तदेत्यनेन किंचिद्विलम्बोक्तौ भरतोऽन्यथा मन्येतेति झटित्युत्तरमुक्तमित्युच्यते ११

१२] ति० टी०–येषां कुशलमिच्छसि तेषां कुशलमेव । त्वरयाह्वानेन शङ्का न कार्या । पद्मा पद्मवती श्रीस्त्वां वृणुते तथा शोभा त्वयि दृश्यते येन सर्वामङ्गलशङ्काव्यावृत्तिः, अतो यात्रायै रथो युज्यताम् ॥ १२ ॥

रा० टी०–वचनाकारमाह–कुशला इति । येषां कुशलं त्वमिच्छसि ते कुशलाः सन्तीति शेषः । पद्मा पद्मगृहा श्रीर्लक्ष्मीस्त्वां वृणुते आवङ्क्षते एतेन भरतस्य नारायणत्वं तत्पत्न्या ऋतुकालश्च सूचितः अतः रथः युज्यतां तेन विशेषव्यवस्था न प्रष्टव्येति व्यञ्जितं तेन तेषामसत्यकथनाद्भीतिः सूचिता ॥ १२ ॥

गो० टी०–कुशला इति । कुशला इति सामान्योक्तिः प्रत्येकोक्त्याः संदेहादुत्पादाय । श्रीः लक्ष्मीः पद्मा पद्महस्ता

---

१ स्विति गो. पाठः । २ चारोगेतेति गो. पाठः । ३ दर्शिनीति गो. पाठः । ४ वार्षीति रा. पाठः । ५ साऽरोगेति गो. पाठः । ६ सप्रश्रयमिति

भरतश्चापि तान्दूतानेवमुक्तोऽभ्यभाषत । [1]आपृच्छेऽहं महाराजं दूताः संत्वरयन्ति माम् ॥ १३ ॥
एवमुक्त्वा तु तान्दूतान्भरतः पार्थिवात्मजः । दूतैः संचोदितो वाक्यं मातामहमुवाच ह ॥ १४ ॥
राजन्पितुर्गमिष्यामि सकाशं दूतचोदितः । पुनरप्यहमेष्यामि यदा मे त्वं स्मरिष्यसि ॥ १५ ॥
भरतेनैवमुक्तस्तु नृपो मातामहस्तदा । तमुवाच शुभं वाक्यं [2]शिरस्याघ्राय राघवम् ॥ १६ ॥
गच्छ तातानुजाने त्वां कैकेयी सुप्रजास्त्वया । मातरं कुशलं ब्रूयाः [3]पितरं च परंतप ॥ १७ ॥
पुरोहितं च कुशलं ये चान्ये द्विजसत्तमाः । तौ च तात महेष्वासौ भ्रातरौ रामलक्ष्मणौ ॥ १८ ॥
तस्मै हस्त्युत्तमांश्चित्रान्कम्बलानजिनानि च । [4]सत्कृत्य केकयो राजा भरताय ददौ धनम् ॥ १९ ॥
[5]अन्तःपुरेऽतिसंवृद्धान्व्याघ्रवीर्यबलोपमान् । दंष्ट्रायुक्तान्महाकायाञ्शुनश्चोपायनं ददौ ॥ २० ॥
रुक्मनिष्कसहस्रे द्वे षोडशाश्वशतानि च । सत्कृत्य केकयीपुत्रं केकयो धनमाविशन् ॥ २१ ॥
[6]तदामात्यानभिप्रेतान्विश्वास्यांश्च गुणान्वितान् । ददावश्वपतिः [7]शीघ्रं भरतायानुयायिनः ॥ २२ ॥

अश्वैश्चाशच् राज्यश्रीरिति हार्दो भावः अमङ्गल्यव्याहृतिभीरुतप्रत्याख्या ॥ १२ ॥

१३] ति० टी०—दूता मां संत्वरयन्तीत्युक्त्वा महाराजमापृच्छे गमनानुज्ञायै इति दूतानभ्यभाषतेत्यन्वयः ॥ १३ ॥

रा० टी०—भरत इति । दूतैरेवमुक्तो भरतः तान्दूतानभ्यभाषत । भाषणाकारमाह—दूताः मां संत्वरयन्ति गन्तुमिति शेषः । इति महाराजं मातामहमापृच्छेयम् ॥ १३ ॥

गो० टी०—भरत इति । एवमुक्तो भरतः दूताः मां संत्वरयन्तीति महाराजमापृच्छ इति तान् दूतानभ्यभाषतेति योजना ॥ १३ ॥

१४] ति० टी०—संचोदितः शीघ्रं गच्छेत्येवं प्रेरितः॥१४॥

रा० टी०—एवमिति । भरतस्तान्दूतानेवमुक्त्वा दूतैः संचोदितः प्रार्थितः सन्मातामहमुवाच ॥ १४ ॥

गो० टी०—एवमिति । दूतैः संचोदितो भरतस्तान् दूतानेवमुक्त्वा मातामहं वाक्यमुवाच ॥ १४ ॥

१५-१६] ति० टी०—मे स्मरिष्यसीति शेषत्वविवक्षायां षष्ठी मामित्यर्थः ॥ १५ ॥ १६ ॥

रा० टी०—वचनाकारमाह—राजन्निति । दूतचोदितोऽहं पितुः सकाशं प्रकाशमानं गृहमित्यर्थः, गमिष्यामि यदा मे स्मरिष्यसि तदा पुनरेष्यामि "अधीगर्थ—" इति षष्ठी ॥ १५ ॥

गो० टी०—राजन्निति । मे मां यदा स्मरिष्यसि यदा आगन्तव्यमिति स्मरिष्यसि तदैष्यामि आगन्तव्यमिति भवत्स्मरणं यदा जानामि तदा आगमिष्यामीत्यर्थः । मे इत्यत्र "अधीगर्थदयेशाम्" इति षष्ठी ॥ १५ ॥

रा० टी०—भरतेनेति । एवमुक्तो मातामहस्तं भरतं शिरसा शिरोदेशेनाघ्राय वाक्यमुवाच ॥ १६ ॥

गो० टी०—भरतेनेत्यादि । रामलक्ष्मणावित्यन्तं स्पष्टम् ॥ १६-१८ ॥

१७] ति० टी०—सुप्रजाः शुभप्रजावती ॥ १७ ॥

रा० टी०—वचनाकारमाह—गच्छेति । हे तात ! येन त्वया कैकेयी सुप्रजास्तं त्वामनुजाने आज्ञापयामि अतः गच्छ ॥ १७ ॥

१८] ति० टी०—तौ च कुशलं ब्रूया इति संबन्धः॥१८॥

रा० टी०—पुरोहितमिति । तौ प्रसिद्धौ ॥ १८ ॥

१९] ति० टी०—तस्मै भरतायेत्यन्वयः । चित्रान्कम्बलान् चित्राण्यजिनानि मृगाणाम् ॥ १९ ॥

रा० टी०—केकयराजोऽपि संवर्ण्य तत्कृत्यमाह—तस्मै इति । हस्त्युत्तमानुत्तमहस्तिनः चित्रान्विचित्रान्कम्बलानजिनानि मृगविशेषचर्माणि च धनं स्वर्णपात्रादि च तस्मै भरताय ददौ ॥ १९ ॥

गो० टी०—तस्मा इति । अस्यादावित्युक्त्वेत्युपस्कार्यं तस्मै भरतायाभिसत्कृत्य ददौ श्लाघापूर्वं ददावित्यर्थः ॥ १९ ॥

२०] ति० टी०—अतिसंवृद्धान्यत्नेन वर्धितान् व्याघ्रवीर्यबलोपमांस्तदुपमवीर्यबलवतः । 'बलान्वितान्' इति पाठान्तरम् ॥ २० ॥

रा० टी०—अन्तःपुर इति । व्याघ्रवीर्यबलाभ्यामुपमा येषां तान्दंष्ट्रायुक्तान्महाकायान्बृहद्देहान्शुनः कुक्कुरांश्च उपायनं ददौ ॥ २० ॥

गो० टी०—अन्तःपुर इति । मातुल इत्यनुषज्यते २१-२५॥

२१] ति० टी०—निष्कस्वरोभूषणं धनमुक्तरूपम् ॥ २१ ॥

रा० टी०—रुक्मेति । द्वे रुक्मनिष्काणां सहस्रे अश्वशतानि षोडश च धनं कैकयीपुत्रं भरतं सत्कृत्यादिशद्ददौ ॥२१॥

गो० टी०—रुक्मनिष्कसहस्रे इति । निष्काः वक्षोभूषणानि 'निष्कोऽब्धौ हेम्नि दीनारे साष्टे कर्षचतुष्टये पले । वक्षोविभूषणे कर्षे' इति वैजयन्ती । धनम् उक्तरूपम् आदिशत् आदाय गच्छतेति भृत्यानाज्ञापयामास ॥ २० ॥

२२] ति० टी०—अमात्यान्स्वीयान् अश्वपतिः केकयः२२॥

---

१ आपृच्छेयमिति रा. पाठः । २ शिरसेति रा. पाठः । ३ अभिसत्कृत्य कैकेयी इति गो. पाठः । ४ श्लोकोऽयं चतुर्विंशतितमस्थाने ('स इतं' इत्यनन्तरपूर्वं) गो. पाठे । ५ आदिशदिति गो. रा. पाठः । ६ तमेति गो. पाठः । ७ क्षिप्रमिति गो. पाठः ।

ऐरावतानैन्द्रशिरान्नागान्वै प्रियदर्शनान् । खराञ्शीघ्रान्सुसंयुक्तान्मातुलोऽस्मै धनं ददौ॥ २३ ॥
स दत्तं केकयेन्द्रेण धनं तन्नाभ्यनन्दत । भरतः केकयीपुत्रो गमनत्वरया तदा ॥ २४ ॥
बभूव ह्यस्य हृदये चिन्ता सुमहती तदा । त्वरया चापि दूतानां स्वप्नस्यापि च दर्शनात् ॥ २५ ॥
स स्ववेश्माभ्यतिक्रम्य नरनागाश्वसंकुलम् । प्रपेदे सुमहच्छ्रीमान्राजमार्गमनुत्तमम् ॥ २६ ॥
अभ्यतीत्य ततोऽपश्यदन्तःपुरमनुत्तमम् । ततस्तद्धरतः श्रीमानाविवेशानिवारितः ॥ २७ ॥
स मातामहमापृच्छ्य मातुलं च युधाजितम् । रथमारुह्य भरतः शत्रुघ्नसहितो ययौ ॥ २८ ॥
रथान्मण्डलचक्रांश्च योजयित्वा परं शतम् । उष्ट्रगोऽश्वखरैर्भृत्या भरतं यान्तमन्वयुः ॥ २९ ॥
बलेन गुप्तो भरतो महात्मा सहार्यकस्यात्मसमैरमात्यैः ।
आदाय शत्रुघ्नमपेतशत्रुर्गृहाद्ययौ सिद्ध इवेन्द्रलोकात् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

रा० टी०–तदेति । अभिप्रेतान्स्वेप्सितान्विश्वास्यान्विश्वासार्हानद्भुतायिनः अद्भुतगमनशीलानमात्यान्स्वमन्त्रिणः अश्वपतिः केकयराजः भरताय ददौ ॥ २२ ॥

गो० टी०–तथेति । अमा सह प्राणांस्त्यजन्तीत्यमात्यास्तान् अभिप्रेतान् सहायभूतानित्यर्थः। विश्वास्यान् विश्वसनीयान् अश्वपतिः केकयः ॥ २१ ॥

२३–२५] ति० टी०–ऐरावतानिरावत्पर्वतभवानैरावतकुलोद्भवान्वा । ऐन्द्रशिरानिन्द्रशिरनामकदेशभवान्नागान्नागजान् ॥ २३–२५ ॥

रा० टी०–उपसंहरन्नाह–ऐरावतानिति । ऐरावतानिरावत्पर्वतोद्भवानैरावतकुलोद्भवांश्च ऐन्द्रशिरानिन्द्रशिराभिधदेशोद्भवांश्च नागान्गजान्प्रियदर्शनान्सुसंयुक्ताञ्छिक्षितान्खरानश्वतरांश्च धनं ददौ ॥ २३ ॥

गो० टी०–मातामहकृतसत्कारप्रकारमुक्त्वा मातुलकृतसत्कारप्रकारमाह–ऐरावतानित्यादिना । ऐरावतान् इरावत्पर्वतभवान् ऐन्द्रशिरान् इन्द्रशिरास्यपर्वतभवान् शीघ्रान् वेगवतः सुसंयुक्तान् परिचितान् ॥ २२ ॥

रा० टी०–स इति । गमनत्वरया हेतुना केकयेन्द्रेण दत्तं धनं भरतो नाभ्यनन्दत ॥ २४ ॥

रा० टी०–बभूवेति । स्वप्नस्य दर्शनाद्दूतानां त्वरया च अस्य भरतस्य हृदये सुमहती चिन्ता बभूव ॥ २५ ॥

२६] ति० टी०–स इति । स मातामहादिभ्यो लब्धधनो यात्रापरिकरसंनाहनाय स्ववेश्माभिगम्य कृतयात्रापरिकरस्ततोऽभ्यतिक्रम्य निर्गत्य नरादिसंकुलं राजमार्गं प्रपेदे । सुमहती श्रीः सुमहच्छ्रीस्तद्वान् ॥ २६ ॥

रा० टी०–स्वस्वेति । स्वस्ववेश्म स्वकीयस्वेनाभिमतनिखिलगृहाणि अभ्यतिक्रम्य त्यक्त्वा नरनागाश्वसङ्कुलं राजमार्गं श्रीमान्भरतः प्रपेदे प्राप ॥ २६ ॥

गो० टी०–स इति । स्ववेश्म व्यतिक्रम्येत्यनेन स्ववेश्मप्रवेशोऽर्थसिद्धः । तथा च राज्ञा मातुलेन च स्वगृह एव कृतसत्कारो मातामह्यादिदर्शनार्थमन्तःपुरं गतवानिति बोध्यम्, अथवा भरतस्य दुःस्वप्नदर्शनदुःखदूतागमनवृत्तान्तश्रवणेन केकयमातुलौ स्वगृहमेवागतावितति द्रष्टव्यं, सुमहच्छ्रीमान् सुमहाश्रीमान् ॥ २६ ॥

२७] ति० टी०–अभ्यतीत्य स्वगृहाद्राजगृहपर्यन्तं राजमार्गमतीत्येत्यर्थः ॥ २७ ॥

रा० टी०–अभ्यतीत्येति । ततो राजमार्गादभ्यतीत्यागत्य अन्तःपुरमपश्यत्। ततो दर्शनानन्तरमनिवारितो भरत अन्तःपुरमाविवेश अन्तःपुरमित्युभयान्वयि ॥ २७ ॥

गो० टी०–अभ्यतीत्येति । राजमार्गमिति शेषः ॥ २७ ॥

२८] ति० टी०–मातुलं च चेन मातामहीमातुलाभ्यौ॥२८॥

रा० टी०–स इति । सः मातामह्यानुज्ञातो भरतः मातामहं मातुलं चापृच्छ्य रथमारुह्य ययौ ॥ २८ ॥

गो० टी०–स इति । मातामहं स्वेनैव सहान्तःपुरमागतं मातुलं च तथाभूतम् ॥ २८ ॥

२९] ति० टी०–मण्डलाकाराणि चक्राणि येषां तान् । कतकस्तु––मण्डलाकारतया रथप्रवर्तनसाधकं चक्रं मण्डलचक्रं चतुर्दिक्चक्रमध्यस्थं तद्येषां तान् । काङ्ख्यादौ च तथेदानीं प्रसिद्धमित्याह ॥ २९ ॥

रा० टी०–रथानिति । मण्डलचक्रान्मण्डलानि मण्डलाकारसंपादकानि चक्राणि येषां तान्परं भिन्नं शतं रथानुष्ट्रादिभिर्योजयित्वा भरतमन्वयुः ॥ २९ ॥

गो० टी०–रथानिति । मण्डलचक्रान् वर्तुलचक्रयुक्तान् परःशतं शतात्परान् पञ्चविंशतीत्यादिसूत्रे निपातनादेकवचनं, रथानुष्ट्रादिभिः संयोज्य भृत्याः यान्तं भरतमन्वयुः॥२९॥

३०] ति० टी०–बलेन स्वीयेन मातुलीयेन च आर्यकस्य मातामहस्य । ‘ सभार्यकः स्वात्मसमैः ’ इति पाठान्तरं भार्यासहित इत्यर्थः ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

---

१ स्वेति रा. पाठः। २ व्यतीति गो. पाठः। ३ संवृतमिति गो. पाठः। ४ उदारधीरिति गो. पाठः। ५ परःशतमिति गो. पाठः। ६ यातमिति रा. पाठः।

एकसप्ततितमः सर्गः ।

उत्तीर्णानेकनदनदीको भरतोऽनेकाश्रमपदानुल्लङ्घ्य यावदयोध्यां प्राप्नोति तावत्तां हृतदर्पत्वादुजनप्राया विलोक्यानेकशस्त्कारणानि वितर्कयन्सूतं प्रति पृच्छंश्च विमना एव राजगृहं प्रविवेश ।

स प्राङ्मुखो राजगृहादभिनिर्याय [1]वीर्यवान् । ततः सुदामां द्युतिमान्संतीर्यावेक्ष्य तां नदीम् ॥ १ ॥
ह्लादिनीं दूरपारां च प्रत्यक्स्रोतस्तरङ्गिणीम् । शतद्रुमतरच्छ्रीमान्नदीमिक्ष्वाकुनन्दनः ॥ २ ॥
[3]ऐलधाने नदीं तीर्त्वा प्राप्य चापरपर्वतान् । शिलामाकुर्वतीं तीर्त्वा आग्नेयं शल्यकर्पणम् ॥ ३ ॥
सत्यसंधः शुचिर्भूत्वा प्रेक्षमाणः शिलावहाम् । अभ्यगात्स महाशैलान्वनं चैत्ररथं प्रति ॥ ४ ॥

रा० टी०—बलेनेति । बलेन मातामहप्रेषितसेनया गुप्तो रक्षितो भरतः शत्रुघ्नमादाय आर्यकस्य मातामहस्य आत्मसमैः अमात्यैः सह इन्द्रलोकात्सिद्ध इव गृहाययौ ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणाघयोध्याकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

गो० टी०—बलेनेति । महात्मा महाधैर्यो भरतः आर्यकस्य मातामहस्य बलेन गुप्तः आत्मसमैः स्वप्रभावसदृशैः अमात्यैः सह शत्रुघ्नमादाय अपेतशत्रुः निष्कण्टकः सन् इन्द्रलोकात् सिद्धो देवजातिरिव गृहाययौ ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने सप्ततितमः सर्गः ॥७०॥

१] ति० टी०—सुदामां तदाख्यां नदीम्, इदं मार्गान्तरं चतुरङ्गबलगमनोचितं दूतास्तु शीघ्रं तन्नगरप्राप्तये क्रान्तारमार्गेण गताः इदं च दूतमार्गोक्तनद्यादीनामिहाद्युक्तैरन्येषामुक्तैश्च ज्ञायते ॥ १ ॥

२] ति० टी०—दूरं पारं परतीरं यस्यास्तां ह्लादिनीं तदाख्यां नदीम् । प्रत्यक्स्रोतस्तरङ्गिणीं पश्चिमप्रवाहां नदीम् ततः शतद्रूं तत्संज्ञिकाम् ॥ २ ॥

रा० टी०—मार्गवृत्तं वर्णयन्नाह—स इत्यादिभिः । स भरतः प्राङ्मुखः सन्राजगृहात्तदभिधपुरान्निर्याय गत्वा सुदामां तदभिधां नदीं संतीर्य अवेक्ष्य रमणीयतत्प्रवाहादीनवलोक्य दूरपारां दूरे पारं परतीरं यस्यास्तामतिविशालामित्यर्थः । ह्लादिनीं तदभिधां प्रत्यक् पश्चिमाभिमुखं स्रोतः प्रवाहो यस्याः सा एव तरङ्गिणी तां नदीं च शतद्रूं तदभिधां च नदीमतरत् । दूरपारेति नयन्तरं वा । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—स प्राङ्मुख इत्यादि । अत्र दूता ऋजुदुर्गमार्गेण त्वरितं गिरिव्रजमागताः भरतस्तु चतुरङ्गबलयुक्तत्वा वक्रमपि महामार्गमाश्रित्य ययौ अतो नदीपर्वतादिभेदकीर्तनमिति बोध्यम् । सुदामां सुदामाख्यां नदीम् अवेक्ष्य तां संतीर्य दूरे पारं परतीरं यस्यास्तां दूरपारां विशालामित्यर्थः, ह्लादिनीं ह्लादिन्याख्यां नदीं संतीर्य शतद्रूं शतद्रुाख्यां प्रत्यक्स्रोतस्तरङ्गिणीं पश्चिमाभिमुखप्रवाहतरङ्गयुक्तां च नदीमतरत् ॥१॥२॥

३] ति० टी०—ऐलधाने तदाख्ययामे नदीं तद्ग्रामवर्तिनीम् । 'ऐलधानीम्' इति पाठे तदाख्यामित्यर्थः कृतकः । अपरपर्वता जनपदविशेषाः । 'अपरपर्पटान्' इति पाठान्तरम् । शिलां तदाख्यनदीम् । आकुर्वतीनामकं नयन्तरमिति कृतकः । शिलामासमन्तात्कुर्वतीं शिलाकर्पणस्वभावामित्यर्थ इति तीर्थः । स्वमध्यपतितं वस्तु शिलारूपं कुर्वतीमित्यर्थः । तरणं च तद्वर्तिशिलाप्रायकाष्ठनौकयेत्यन्ये । आग्नेयमाग्नेयदिग्गतं शल्यकर्पणं तदोषध्युपेतं देशम् तत्र च शिलावहा नदीति कृतकः आग्नेयं शल्यकर्तनमिति ग्रामद्वयम्, तन्मध्ये शिलावहा नदीति तीर्थः ॥ ३ ॥

४] ति० टी०—महाशैलानतीत्य चैत्ररथं वनमभ्यगात् । चैत्ररथं यातुं महाशैलानत्यगादिति पाठान्तरेऽर्थः ॥ ४ ॥

रा० टी०—ऐलधान इति । ऐलधाने ऐलधानाभिधनगरे विद्यमानां नदीं तीर्त्वा अपरपर्पटान् पर्पटाः औषधिविशेषाः सन्ति येषु ते पर्पटाः ग्रामविशेषाः अपरे पूर्वे एव पर्पटाः अपरपर्पटाः तान्पूर्वदेशवर्तिपर्पटाभिधौषधिविशिष्टग्रामविशेषानित्यर्थः । प्राप्य शिलां पाषाणमाकुर्वतीं स्वमध्यपतितवस्तुजातेन रचयन्तीं नदीविशेषं तीर्त्वाग्नेयमग्निदिशि भवं शल्यकर्षणं तदोषधियुक्तदेशमाग्नेयं शल्यकर्षणमिति ग्रामद्वयं वा प्रेक्षमाणः सन् शिलावहां शिलामपि वाहयति सा ताम् अतिवेगवन्नदीविशेषमित्यर्थः अभ्यगात् । व्याख्याद्वयं कृतकतीर्थयोः प्रसिद्धम्। अनन्तरं शुचिर्भूत्वा तत्र स्नात्वेत्यर्थः।महाशैलान्पूजनीयपर्वतान् चैत्ररथं वनं च अभ्यगात् । अभ्यगादित्यनुकृष्यते यदि तु शिलावहामित्यस्यापि प्रेक्षणकर्मत्वं तदा पर्वतवनयोरेवाभिगमनकर्मत्वं पूर्वार्धे प्रतिरनन्तरार्थः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—ऐलधान इति । ऐलानामेलकानाम् आधानमुत्पत्तिस्थानं तद्वत्त्वादेलाधानाख्ये नगरे नदीं पूर्वोक्तां शतद्रूं तीर्त्वेत्यनुवादः । अपरपर्पटान् पर्पटानामदूरभवो ग्रामः पर्पटाः प-

१ राघव इति गो. पाठः । २ ह्लादिनीमिति गो. रा. पाठः । ३ एलधाने इति गो. पाठः । ४ पर्पटानिति गो. रा. पाठः । ५ ह्लाग्नेयमिति रा. पाठः । ६ कर्तनमिति गो. पाठः । ७ श्रीमानिति गो. रा. पाठः ।

सरस्वतीं च गङ्गां च युग्मेन प्रतिपद्य च । उत्तरान्वीरमत्स्यानां भारुण्डं प्राविशद्वनम् ॥ ५ ॥
वेगिनीं च कुलिङ्गाख्यां ह्लादिनीं पर्वतावृताम् । यमुनां प्राप्य संतीर्णो बलमाश्वासयत्तदा ॥ ६ ॥
शीतीकृत्वा तु गात्राणि क्लान्तानाश्वास्य वाजिनः । तत्र स्नात्वा च पीत्वा च प्रायादादाय चोदकम् ॥ ७ ॥
राजपुत्रो महारण्यमनभीक्ष्णोपसेवितम् । भद्रो भद्रेण यानेन मारुतः खमिवात्यगात् ॥ ८ ॥
भागीरथीं दुष्प्रतरां सोऽशुधाने महानदीम् । उपायाद्राघवस्तूर्णं प्राग्वटे विश्रुते पुरे ॥ ९ ॥
स गङ्गां प्राग्वटे तीर्त्वा समायात्कुटिकोष्टिकाम् । सबलस्तां स तीर्त्वाथ समगाद्धर्मवर्धनम् ॥ १० ॥

पटाः ओषधिविशेषाः अदूरभवश्चेति प्राप्तस्याणो "वरणादिभ्यश्च" इति लुप् लुपि युक्तव्यक्तिवचनता पूर्वपर्पटाः अपरपर्पटाश्चेति ग्रामद्वयमस्ति तत्रापरपर्पटान् विश्रान्त्यर्थं प्राप्य शिलामाकुर्वतीं शिलामासमन्तात्कुर्वतीं शिलाकर्षणस्वभावामत एव शिलावहामित्यन्वर्थसंज्ञां नदीं तीर्त्वा तस्या आग्नेय्यां दिशि भवमाग्नेयं शल्यं हृदयशल्यं दुःखं कर्तयति छेदयतीति शल्यकर्तनं नाम नगरं प्रेक्षमाणः सन् अत्ययात्सत्यसंधः शुचिरित्याभ्यां तत्रत्यजनेभ्य ईतिवारणं [भीतिवारणं] प्रतिज्ञाय तथैव कृतवानित्युच्यते । चैत्ररथं चैत्ररथतुल्यस्वान्तदारुयं वनं प्रति उद्दिश्य महाशैलानत्ययात् तदर्शनकुतूहलेन महापर्वतानत्यगादित्यर्थः ॥ ३ ॥ ४ ॥

५] ति० टी०–सरस्वतीम् इयमत्र पश्चिमप्रवाहा, गङ्गापदेनात्र सुखसुसीतावन्यतमाः पश्चिमप्रवाहा ग्राह्याः, एतास्तिस्रो गङ्गाप्रवाहा एवेति पुराणप्रसिद्धम् । तां युग्मेन संगमेन प्रतिपथ प्राप्य वीरमत्स्यानां देशानामुत्तरान्देशान्प्राप्य भारुण्डाख्यं वनं प्राविशत् । 'उत्तरम्' इति पाठे वनविशेषणं तत् ॥ ५ ॥

रा० टी०–सरस्वतीमिति । युग्मेन सङ्गमत्वेन रूपेण विद्यमानां सरस्वतीं तदभिधपश्चिमवाहिनीं नदीविशेषं, गङ्गां तदभिधपश्चिमवाहिनीं नदीविशेषं प्रतिपथ तत्सङ्गमं प्राप्येत्यर्थः । वीरमत्स्यानां देशानां उत्तरोत्तरभागांश्च प्रतिपथ भारुण्डं तन्नामकं वनं प्राविशत् । प्रतिपथेत्युभयान्वयि । 'उत्तरम्' इति पाठे वनविशेषणमिति भट्टाः । अस्मिन्पक्षे प्रतिपथेति नावर्तते ५॥

गो० टी०–सरस्वतीमिति । सरस्वतीं तदाख्यां नदीं गङ्गां गङ्गाख्यां कांचिन्नदीं पश्चिमसमुद्रगामिनीं गङ्गास्रोतोभेदं वा युग्मेन संगमेन प्रत्यपद्यत ययौ, यद्वा युग्मेन द्वन्द्वतया पार्श्वद्वये प्रवहन्तीमिति शेषः । वीरमत्स्यानां वीरमत्स्याख्यदेशानाम् उत्तरं भारुण्डं भारुण्डाख्यं वनं प्राविशत् ॥ ५ ॥

६] ति० टी०–ततो वेगिनीत्वादिविशेषवतीं कुलिङ्गाख्यां नदीं संतीर्णो यमुनां प्राप्य बलमाश्वासयत् ॥ ६ ॥

रा० टी०–वेगिनीमिति । वेगिनीमतिवेगविशिष्टां ह्लादिनीं सेवकसुखप्रदां पर्वतैरावृतां कुलिङ्गाख्यां नदीं यमुनां च प्राप्य सन्तीर्णो भरतः बलं सेनामाश्वासयत् व्यश्रमयत्, कुलिङ्गाख्यां तीर्णो भरतः यमुनां प्राप्याश्वासयदित्यर्थो वा ॥ ६ ॥

गो० टी०–वेगिनीमिति । वेगिनीं वेगयुक्तां ह्लादिनीं संतोषकारिणीं पर्वतैरावृतां कुलिङ्गाख्यां नदीं यमुनां प्राप्य संतीर्णः यमुनासमीपे संतीर्ण इत्यर्थः । अन्यत्रातिवेगत्वादन्यत्र पर्वतावृतत्वाच्चेति भावः । आतपक्लिन्नं बलं मध्याह्ने आश्वासयत् ॥ ६ ॥

७] ति० टी०–गात्राणि वाजिनाम् शीतीकृत्वा जलपानादिना । आश्वास्य छायायां घासादिदानेन । उदकमादाय तीर्थबुद्ध्या ॥ ७ ॥

रा० टी०–आश्वासमाकारमाह–शीतीति । गात्राणि अश्वशरीराणि शीतीकृत्वा जलपानादिना तद्घ्माणं निवर्त्येत्यर्थः क्लान्तान् श्रान्ताम्वाजिनः आश्वास्य घासादिदानेन संतोष्य तत्र स्नात्वा उदकमादाय तीर्थबुद्ध्या गन्तव्यप्रदेशे जलाभावबुद्ध्या वा गृहीत्वा अनभीक्ष्णोपसेवितं न अभीक्ष्णं वारंवारमुपसेवितं जनकर्तृकोपसेवा यस्य तन्महारण्यं भद्रः नित्यं कल्याणयुक्तो भरतः भद्रेण कल्याणयुक्तेन यानेन मारुतो वायुः खमाकाशमिव अभ्यगात् । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०–आश्वासनप्रकारमाह–शीतीकृत्येति । तत्र कुलिङ्गायमुनासंभेदे दूरगमनेन क्लान्तान् वाजिनः कंचित्कालं छायास्वाश्वास्य तेषां गात्राणि शीतीकृत्य आर्द्रपृष्ठानि कृत्वा स्वयं स्नात्वा उदकं च पीत्वा उत्तरत्र गन्तव्यदेशस्य निर्जलदेशत्वात्तत्र पानार्थमुदकमादाय च प्रायात् ॥ ७ ॥

८] ति० टी०–अनभीक्ष्णोपसेवितं बहुधा जनैरुपसेवितम्, भद्रेण प्रशस्तेन रथेन भद्रजातीयेन गजेन वा ॥ ८ ॥

गो० टी०–राजपुत्र इति । राजपुत्रत्वेन भद्रः मङ्गलाचारयुक्तः अनभीक्ष्णोपसेवितम् अत्यन्तं जनैरुपसेवितं महारण्यत्वादप्रहतमित्यर्थः, महारण्यं दुर्गमं वनं भद्रेण भद्रगजरूपेण यानेन अरण्यसंचारनिपुणो भद्रजातीयः मारुतः खमिवात्ययात् अतिवेगेनातिक्रान्तवान् भूमौ हि मारुतः पर्वतादिना मन्दीभवति ॥ ८ ॥

९–१०] ति० टी०–अंशुधाने ग्रामे महानदीं गङ्गां दुष्प्रतरां ज्ञात्वा प्राग्वटे पुरे आगत्य तत्र तां तीर्त्वा कुटिकोष्टिकामायत्तां तीर्त्वा धर्मवर्धनं ग्राममगात् ॥ ९ ॥ १० ॥

रा० टी०–भागीरथीमिति । स भरतः अंशुधाने अंशु-

---

१ प्रत्यपद्येति गो. पाठः । २ उत्तरमिति गो. रा. पाठः । ३ ह्लादिनीमिति गो. रा. पाठः । ४ अत्ययादिति गो. अभ्यगादिति स. पाठः । ५ दुष्प्रतरामंशुधाने इति गो. पाठः । ६ कोष्टिकामिति गो. पाठः । ७ समाययाविति गो. पाठः ।

तोरणं दक्षिणार्धेन जम्बूप्रस्थं समागमत् । वरूथं च ययौ रम्यं ग्रामं दशरथात्मजः ॥ ११ ॥
तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ । उज्जिहानायाः प्रियका यत्र पादपाः ॥ १२ ॥
सं तांस्तु प्रियकान्प्राप्य शीघ्रानास्थाय वाजिनः । अनुज्ञाप्याथ भरतो वाहिनीं त्वरितो ययौ ॥ १३ ॥
वासं कृत्वा सर्वतीर्थे तीर्त्वा चोत्तरगां नदीम् । अन्या नदीश्च विविधैः पार्वतीयैस्तुरंगमैः ॥ १४ ॥
हस्तिपृष्ठकमासाद्य कुटिकामप्यवर्तत । ततार च नरव्याघ्रो लोहित्यं च कपीवतीम् ॥ १५ ॥
एकसाले स्थाणुमतीं विनते गोमतीं नदीम् । कलिङ्गनगरे चापि प्राप्य सालवनं तदा ॥ १६ ॥

धानग्रामसमीपे भागीरथीं दुष्प्रतरां ज्ञात्वेति शेषः । विश्रुते प्रसिद्धे प्राग्वटे तदभिधे पुरे उपायात्प्राप्नोत् ॥ ९ ॥

गो० टी०–भागीरथीमिति । अंशुधाने नगरे दुष्प्रतरां भागीरथीं विश्रुते तरणस्थलत्वेन प्रसिद्धे प्राग्वटे पुरे उपायात् आगच्छत् तत्तरणार्थमिति शेषः ॥ ९ ॥

रा० टी०–स इति । प्राग्वटे तदभिधग्रामसमीपे गङ्गां तीर्त्वा कुटिकोष्टिकां तदभिधां नदीं समायात्प्राप्नोत् । सबलः सेनासहितो भरतः तां कुटिकोष्टिकां तीर्त्वा धर्मवर्धनं तदभिधग्रामं समगात्प्राप्नोत् ॥ १० ॥

गो टी०–स इति । सबलः स भरतः प्राग्वटे तत्समीपे गङ्गां तीर्त्वा कुटिकोष्टिकां नदीं समायात् । स तां तीत्वा धर्मवर्धनं ग्रामं समायात् प्राप ॥ १० ॥

११] ति० टी०–तोरणं दक्षिणार्धेन तोरणग्रामस्य दक्षिणभागेन जम्बूप्रस्थाख्यं ग्राममागतः वरूथं तदाख्यम् ॥ ११ ॥

रा० टी०–तोरणमिति । दक्षिणार्धेन तोरणाभिधग्रामस्य दक्षिणार्धभागेन जम्बूप्रस्थं तदभिधग्रामं समागमत् । अनन्तरं वरूथं वरूथाख्यं ग्रामं ययौ ॥ ११ ॥

गो० टी०–तोरणमिति । तोरणं दक्षिणार्धेन तोरणग्रामस्य दक्षिणभागेन जम्बूप्रस्थं ग्रामम् उपागमत्[1], ततो वरूथाख्यं ग्रामं ययौ ॥ ११ ॥

१२] ति० टी०–उज्जिहानायास्तन्नामकनगर्याः प्रियकास्तन्नामानो वृक्षाः ॥ १२ ॥

रा० टी०–तत्रेति । तत्र वरूथग्राममीपे वने वासं कृत्वा प्राङ्मुखः सन् यत्र प्रियकाः अतिप्रियाः प्रियकनामानो वा पादपाः तदुज्जिहानायाः तदभिधनगर्याः उद्यानं ययौ ॥ १२ ॥

गो० टी०–तत्रेति । तत्र तत्समीपे रम्ये वने वासं रात्रिवासं कृत्वा प्रभाते प्राङ्मुखः सन् उज्जिहानायाः नगर्याः उद्यानं ययौ यत्र उद्याने प्रियकाः बन्धूकाः कदम्बा वा सन्ति ॥ १२ ॥

१३] ति० टी०–' सालांस्तु प्रियकान् ' इति पाठे सालशब्दो वृक्षपर्यायः । ' स तांस्तु ' इति पाठे स भरत इत्यर्थः । शीघ्रान्वाजिन आस्थाय रथे संयोज्यानुज्ञाप्य मया शीघ्रं गम्यते भवद्भिर्मन्दमागन्तव्यमित्येवम् उज्जिहानाया अर्वाक्स्वदेशत्वेन तथाभावात् ॥ १३ ॥

रा० टी०–स इति । स भरतः तान्प्रियकान्प्राप्य शीघ्राञ्छीघ्रगमनशीलान् वाजिनोऽश्वानास्थाय वाहिनीं सेनामनुज्ञाप्य भवद्भिः शनैरागन्तव्यमित्युक्त्वा त्वरितो ययौ एतेन तद्देशस्य विभयत्वं सूचितम् । ' सालांस्तु प्रियकान् ' इति पाठे सालशब्दो वृक्षपर्याय इति भट्टाः ॥ १३ ॥

गो० टी०–सालानिति । सालान् वृक्षान् 'अनोकहः कुटः सालः' इत्यमरः । पूर्वोक्तवनस्थान् प्रियकवृक्षान् प्राप्य शीघ्रान् वाजिनः आस्थाय रथे बद्धा वाहिनीमनुज्ञाप्य त्वरितो ययौ उज्जिहानायाः परं स्वदेशस्त्वन्निर्भयं मन्दमागम्यतामिति सेनामनुज्ञाप्य स्वयं त्वरितो ययौ ॥ १३ ॥

१४] ति० टी०–सर्वतीर्थे तदाख्यग्रामे पार्वतीयैः पर्वतोद्भवैः स्वार्थिकाणन्तमित्याहुः ॥ १४ ॥

१५–१६] ति० टी०–हस्तिपृष्ठकं ग्रामः कुटिका नदी लोहित्ये ग्रामे कपीवतीं नदीम् । 'हस्तिपृष्ठ—' इति, 'एकसाले ' इति श्लोकद्वयं प्रक्षिप्तमिति कतकः ॥ १५ ॥ १६ ॥

रा० टी०–वासमिति । सर्वतीर्थे तदभिधग्रामविशेषे वासमेकरात्रिं निवासं कृत्वा पार्वतीयैः पर्वतभवैस्तुरङ्गमैरश्वैः उत्तानिकां तदभिधां नदीमन्याश्च नदीस्तीर्त्वा हस्तिपृष्ठकं तदभिधग्राममासाद्य प्राप्य कुटिकां तदभिधनदीमत्यवर्तत ततार, लोहित्ये तदभिधनगरसमीपे कपीवतीं तदभिधनदीं च ततार । श्लोकद्वयमेकान्वयि पार्वतीयशब्दः स्वार्थाणन्तः ॥ १४ ॥ १५ ॥

गो० टी०–वासमिति । सर्वतीर्थे ग्रामे वासम् एकरात्रिवासं कृत्वा । पाठभेदः सर्वतीर्थे सर्वतीर्थाख्ये ग्रामे उत्तानिकाम् उन्नतजलत्वेन तदाख्याम् अन्याः नदीः स्वल्पजलाः पार्वतीयैः पर्वतदेशोत्पन्नैस्तुरंगमैः रथाश्वैः तीर्त्वेत्यनुषङ्गः हस्तिपृष्ठवदुन्नतत्वात् हस्तिपृष्ठकाख्यं ग्राममासाद्य कुटिकां नदीमत्यवर्तत हस्तिपृष्ठकसमीपे कुटिकामतरदित्यर्थः । लौहित्ये लोहितमूरुवाल्लौहित्यनाम्नि नगरे कपीवतीं बहुकपिवत्त्वात्तन्नाम्नीं नदीम् " अन्येषामपि दृश्यते " इति दीर्घः ॥ १४ ॥१५॥

रा० टी०–एकेति । एकसाले तदभिधनगरसमीपे स्थाणुमतीं तदभिधनदीं विनते तदभिधग्रामसमीपे गोमतीं नदीं च प्राप्य ततारेति शेषः । कलिङ्गनगरे तत्समीपे सालवनं क्षिप्रमागच्छत् । सार्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०–एकसाल इति । एकसाले एकसालादूरभव-

१ उपागमदिति गो. पाठः । २ सालांस्त्विति गो. पाठः । ३ उत्तानिकामिति गो. रा. पाठः । ४ विविधा इति गो. रा. पाठः । ५ अतीति

भरतः क्षिप्रमागच्छत्सुपरिश्रान्तवाहनः । वनं च समतीत्याशु शर्वर्यामरुणोदये ॥ १७ ॥
अयोध्यां मनुना राज्ञा निर्मितां सै ददर्श ह । तां पुरीं पुरुषव्याघ्रः सप्तरात्रोषितः पथि ॥ १८ ॥
अयोध्यामग्रतो दृष्ट्वा सारथिं [2]चेदमब्रवीत् । एषा नातिप्रतीता मे पुण्योद्याना यशस्विनी ॥ १९ ॥
अयोध्या दृश्यते दूरात्सारथे पाण्डुमृत्तिका । यैर्ज्विभिर्गुणसंपन्नैर्ब्राह्मणैर्वेदपारगैः ॥ २० ॥
भूयिष्ठमृद्धैराकीर्णा राजर्षिवरपालिता । अयोध्यायां पुरा शब्दः श्रूयते तुमुलो महान् ॥ २१ ॥
समन्तान्नरनारीणां तमद्य न शृणोम्यहम् । उद्यानानि हि सायाह्ने क्रीडित्वोपरतैर्नरैः ॥ २२ ॥
समन्ताद्विप्रधावद्भिः प्रकाशन्ते ममान्यथा । तान्यद्यानुरुदन्तीव परित्यक्तानि कामिभिः ॥ २३ ॥
अरण्यभूतेव पुरी सारथे प्रतिभाति माम् । नह्यत्र यानैर्दृश्यन्ते न गजैर्न च वाजिभिः ॥
निर्यान्तो वाभियान्तो वा नरमुख्या यथा पुरा ॥ ॥ २४ ॥

त्वादेकसालाख्ये ग्रामे स्थाणुमतीं संततजलप्रवाहेन स्थाणुभूतदृश्यत्वात् स्थाणुमतीं नाम नदीं निम्नप्रदेशत्वात् विनताख्ये नगरे बहुजलवत्त्वेन गोमत्याख्यां नदीं च ततार । भरतः सुपरिश्रान्तवाहनः सन् कलिङ्गनगरसमीपस्थं सालवनं सर्जकवनं प्राप्य विश्रमार्थं गत्वा ततस्तदा स्वल्पकाल एवागच्छत् ॥ १६ ॥

१७-१८] ति० टी०-भरत इति ॥ १७ ॥ १८ ॥

रा० टी०-वनमिति । समतीत्य तद्वनमुल्लङ्घ्य शर्वर्यां रात्रौ अरुणोदये तत्समये मनुना निर्मितां प्रकटितामयोध्यां पुरीं पथि मार्गे सप्तरात्रोषितः स भरतः ददर्श ॥ १७ ॥ १८॥

गो० टी०-वनमिति । सालवनं च शर्वर्यामाशु समतीत्य अरुणोदयेऽयोध्यां संददर्श ॥ १७ ॥

गो० टी०-तामिति । पथि सप्तरात्रोषितः अष्टमदिवसे त्वरातिशयेन रात्रावपि गत्वा अरुणोदयसमये अयोध्यां ददर्श, दृष्ट्वा सारथिमब्रवीच्च ॥ १८ ॥

१९] ति० टी०-नातिप्रतीता नातिहृषिता । ' प्रतीतो हृषितः ख्यातः ' इति वैजयन्ती ॥ १९ ॥

रा० टी०-अयोध्यामिति । अग्रतोऽयोध्यां दृष्ट्वा सारथिमब्रवीत् । वचनाकारमाह-पुण्योद्याना एषा अयोध्या यतः पाण्डुमृत्तिका उत्साहसूचकगोमयादिलेपनाभावयुक्तपाण्डुवर्णविशिष्टमृत्तिकायुक्तप्रदेशविशेषवती अतः अतिप्रतीता अतिप्रहृष्टा मे न दृश्यते ' प्रतीतो हृषितः ख्यातः ' इति वैजयन्ती। सार्धश्लोक एकान्वयी ॥ १९ ॥

गो० टी०-एषेत्यादिश्लोकद्वयमेकान्वयम् । पाण्डुमृत्तिका गोमयानुलेपनाद्याचरणाभावाच्छ्वेतमृत्तिका एषायोध्यानातिप्रतीता मे दृश्यते नातिसंतुष्टा दृश्यते सुप्सुपेतिसमासः । ' प्रतीतो हृषिते ख्याते ज्ञाते प्रत्ययिते बुधे ' इति वैजयन्ती । यज्वभिः विधिनेष्टवद्भिः गुणसंपन्नैः शमदमादिगुणसमृद्धैः भूयिष्ठं भूयम् ऋद्धैः धनिकैः ॥ १९ ॥ २० ॥

२०-२१] ति० टी०-पाण्डुमृत्तिका सुधाधवलितत्वान्निरानन्दत्वाच्च पाण्डुमृत्तिकारूपकम् । यज्वादिभिर्व्याप्तापि राजपालितापि पाण्डुमृत्तिकासमूह इव निःसारा ॥ २०॥२१॥

रा० टी०-यज्वभिरिति । गुणसंपन्नैः शमदमादिगुणविशिष्टैः यज्वभिर्याज्ञिकैः वेदपारगैर्ब्राह्मणैश्च ऋद्धैः धनादिना प्रवृद्धैर्जनैश्च भूयिष्ठमधिकं यथा भवति तथा आकीर्णा संकुला राजर्षिवरेण पालिता या अयोध्या पुरी तस्यामयोध्यायां पुरा पूर्वं नरनारीणां समन्तात् यः शब्दः श्रूयते अश्रौषं तं शब्दमद्य न शृणोमि । वर्तमानसामीप्ये इति भूते लट् । अर्धचतुष्टयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०-अयोध्यायामिति । श्रूयत इति वर्तमाननिर्देशस्मृतौ वर्तमानवद्भानात् नरविशिष्टा नार्यो नरनार्यस्तासाम् ॥ २१ ॥

२२-२३] ति० टी०-सायाह्ने उद्यानानि प्रविश्य रात्रौ क्रीडित्वोपरतैर्नरैः प्रातः समन्ताद्विप्रधावद्भिर्यानि पूर्वमत्यन्तं प्रकाशन्ते तान्यद्य कामिभिः परित्यक्तानि अतु मां लक्षीकृत्य रुदन्तीव ममान्यथा महारण्यानीव प्रकाशन्ते ॥ २२ ॥ २३ ॥

रा० टी०-उद्यानानीति । सायाह्ने यानि उद्यानानि प्रविश्येति शेषः, क्रीडित्वा रात्रौ विहृत्य उपरतैः प्रातर्निर्गतैः अत एव समन्ताद्विप्रधावद्भिर्नरैः प्रकाशन्ते प्राकाशन्त, तान्यद्य इदानीं कामिभिः परित्यक्तानि अत एव अनुरुदन्तीव अत एव अन्यथा पूर्वतो विलक्षणं प्रकाशन्ते । सार्धश्लोक एकान्वयी ॥ २२ ॥ २३ ॥

गो० टी०-उद्यानानीति । सार्धश्लोकमेकं वाक्यम् । उद्यानानि सायाह्ने गते त्विति शेषः । रात्रौ क्रीडित्वा उपरतैः प्रातर्विप्रधावद्भिः गृहं प्रति गच्छद्भिः नरैः अन्यदा पूर्वं प्रकाशन्ते अद्य त्वाहतानीति ॥ २२ ॥

२४] ति० टी०-यानैः शिबिकादिभिः अभियान्तः प्रविशन्तः ॥ २४ ॥

१ संददर्शेति गो. पाठः । २ वाक्यमिति गो. पाठः । ३ यज्वभिरिति गो. रा. पाठः । ४ परीति गो. रा. पाठः । ५ अन्यदेति गो. पाठः ६ मे इति गो. पाठः । ७ पुरमिति गो. पाठः ।

उद्यानानि पुरा भान्ति मत्तप्रमुदितानि च । जनानां रतिसंयोगेष्वत्यन्तगुणवन्ति च ॥ २५ ॥
तान्येतान्यद्य पश्यामि निरानन्दानि सर्वशः । स्रस्तपर्णैरनुपथं विक्रोशद्भिरिव द्रुमैः ॥ २६ ॥
नाद्यापि श्रूयते शब्दो मत्तानां मृगपक्षिणाम् । सं रक्तं मधुरं वाणीं कलं व्याहरतां बहु ॥ २७ ॥
चन्दनागुरुसंपृक्तधूपसंमूर्छितोऽमलः । प्रवाति पवनः श्रीमान्किं नु नाद्य यथा पुरा ॥ २८ ॥
भेरीमृदङ्गवीणानां कोणसंघट्टितः पुनः । किमद्य शब्दो विरतः सदादीनगतिः पुरा ॥ २९ ॥
अनिष्टानि च पापानि पश्यामि विविधानि च । निमित्तान्यमनोज्ञानि तेन सीदति मे मनः ॥ ३० ॥
सर्वथा कुशलं सूत दुर्लभं मम बन्धुषु । या ह्यसति संमोहे हृदयं सीदतीव मे ॥ ३१ ॥

रा० टी०–अरण्येति । हे सारथे ! इयं पुरी अरण्यभूतेव मां प्रतिभाति । तत्र हेतुः–यानैः शिबिकादिभिः गजैर्वाजिभिर्वा निर्यान्तः पुरान्निर्गच्छन्तः अभियान्तः निविशन्तो वा नरमुख्याः पुरा इव न दृश्यन्ते । सार्धश्लोक एकान्वयी॥२४॥

गो० टी०–प्रकारान्तरमप्याह–अरण्येति ॥ २३ ॥

गो० टी०–नहीति । यानैः शिबिकादिभिः निर्यान्तः नगरान्निर्गच्छन्तः अभियान्तः प्रविशन्तः ॥ २४ ॥

२५] ति० टी०–मत्तप्रमुदितानि मत्तप्रमुदितभृङ्गकोकिलादिमन्ति तादृशस्त्रीपुरुषवन्ति च रत्यर्थसंयोगे विविधकुसुमलतागृहदीर्घिकाक्रीडापर्वतादियुक्ततया यान्यत्यन्तगुणवन्त्यत्यन्तमङ्गलानि तान्यद्य निरानन्दानि पश्यामि ॥ २५ ॥

२६] ति० टी०–यतो विक्रोशद्भिरिव द्रुमैरुपलक्षितानि२६

रा० टी०–उद्यानानीति । जनानां रतिसंयोगेषु प्रीतिहेतुकसंसर्गेषु सत्सु यानि उद्यानानि मत्तप्रमुदितानि मत्तानि हर्षितानि प्रमुदितानि प्रमोदकारणानि अत एव गुणवन्ति विचित्रगुणविशिष्टानि पुरा भान्ति अशोभन्त तानि एतानि स्रस्तपर्णैः स्रस्तानि पर्णानि येभ्यः अत एव अनुपथं प्रतिमार्गं विक्रोशद्भिरिव द्रुमैरुपलक्षितानि सर्वशः उद्यानानि निरानन्दानि पश्यामि । अर्धचतुष्टयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०–उद्यानानीति । मत्तानि फलपल्लवमकरन्दास्वादेन मत्तशुककोकिलभ्रमरादियुक्तत्वान्मत्तानि प्रमुदितानि आलवालकरणदोहदसेचनादिना कन्दलितानि रतिसंयोगेषु रत्यर्थसंयोगेषु अत्यन्तगुणवन्ति विविधकुसुमलतागृहदीर्घिकाक्रीडापर्वतादिगुणयुक्तानि अद्य त्वाहतानीति द्रुमैरुपलक्षितानि पश्यामीत्यन्वयः ॥ २५ ॥ २६ ॥

२७] ति० टी०–अद्यापीत्यादितोऽपि सूर्योऽस्माच्छ प्रत्यासन्नेष्वपि कलमव्यक्तम् ॥ २७

रा० टी०–नेति । सरक्तामनुरागविशिष्टां मधुरां वाणीं कलं रमणीयं यथा स्यात्तथा बहु व्याहरतां निकूजतां मृगपक्षिणां शब्दः अद्य सूर्योदयसमयेऽपि न श्रूयते ॥ २७ ॥

गो० टी०–नेति । अद्यापि सूर्योदयेऽपि मत्तानां स्वस्वाभीष्टफलभोजनेन मत्तानाम् अत एव संरक्तां रागयुक्ताम् मधुरां रमणीयाम् वाणीं कलं यथा भवति तथा व्याहरतां मृगपक्षिणां क्रीडामृगशुकसारिकाप्रभृतीनां शब्दो न श्रूयते ॥ २७ ॥

२८] ति० टी०–संमूर्छितो व्याप्तः ॥ २८ ॥

रा० टी०–चन्दनेति । चन्दनागरुभिस्तत्सुगन्धैः संपृक्तः संमिश्रः धूपसंमूर्छितः धूपसुगन्धव्याप्तः अमलः श्रीमान्पवनः पुरेव किं नु किमर्थं न प्रवाति ॥ २८ ॥

गो० टी०–चन्दनागरुसंपृक्त इति । चन्दनागरुसंपृक्तः चन्दनागरुगन्धसंपृक्तः धूपसंमूर्छितः धूपव्याप्तः श्रीमान् रमणीयः ॥ २८ ॥

२९] ति० टी०–कोणो भेर्यादिवादनदण्डस्तेन संघट्टितस्तदाऽऽघातजनितो यः पुरा सदा अदीनगतिरनुभूतः स किं विरतः ॥ २९ ॥

रा० टी०–भेरीति । कोणसंघट्टितः कोणैः भेर्यादिवादनसाधनीभूतदण्डाङ्गुल्यादिभिः संघट्टितो निष्पादितः अदीनगतिः दीनगतिनिवर्तकः सदा नित्यं पुरा पूर्वं यो भेर्यादीनां शब्दोऽभवदिति शेषः, सोऽद्य इदानीं किं किमर्थं विरतो निवृत्तः॥२९॥

गो० टी०–भेरीमृदङ्गवीणानामिति । कोणसंघट्टितः भेरीमृदङ्गवीणावादनसाधनभूतदण्डहस्ततलाङ्गुल्याद्याहतिजनितः सदा अदीनगतिरिति पदच्छेदः पुरा अदीनगतिशब्दः अद्यपुनः किमर्थं विरतः उपरतः ॥ २९ ॥

३०] ति० टी०–अनिष्टान्यनिष्टसूचकानि पापानि क्रूराणि काकादयः । 'पापं स्यात्क्रूरपाप्मनोः' । अमनोज्ञान्यशुभसूचकानि निमित्तानि वामाक्षिस्पन्दादीनि ॥ ३० ॥

रा० टी०–अनिष्टानीति । अनिष्टानि इष्टविरोधिदर्शनानि पापानि क्रूराणि काकादीनि निमित्तानि दुःखहेतुभूतानि अत एव अमनोज्ञानि अप्रियाणि वामाक्षिस्फुरणादीनि च पश्यामि तेन मनः सीदति 'पापं स्यात्क्रूरपाप्मनोः' इति वैजयन्ती ॥ ३० ॥

गो० टी०–अनिष्टानीति । अनिष्टानि अनिष्टसूचकानि पापानि क्रूराणि 'पापं स्यात् क्रूरपाप्मनोः' इति वैजयन्ती । अमनोज्ञानि दर्शनमात्रेण दुःखकराणि निमित्तानि अशुभसूचकानि शिवावाश्रितादीनि ॥ ३० ॥

३१] ति० टी०–असति संमोहे तत्कारणे ॥ ३१ ॥

१ संरक्तामिति गो. सुरक्तामिति रा. पाठः । २ अगरुसंपृक्तो इति गो. पाठः । ३ ऽतुल इति गो. पाठः। ४ पुरमिति गो. पाठः । ५ मेऽवसीदतीति रा.पाठः ।

विषण्णः श्रान्तहृदयस्त्रस्तः [1]संलुलितेन्द्रियः । भरतः प्रविवेशाशु पुरीमिक्ष्वाकुपालिताम् ॥ ३२ ॥
द्वारेण वैजयन्तेन प्राविशच्छ्रान्तवाहनः । द्वाःस्थैरुत्थाय विजयं पृष्टस्तैः सहितो ययौ ॥ ३३ ॥
स त्वनेकाग्रहृदयो द्वास्थं प्रत्यर्च्य तं जनम् । सूतमश्वपतेः क्लान्तमब्रवीत्तत्र राघवः ॥ ३४ ॥
किमहं त्वरयानीतः कारणेन विनानघ । अशुभाशङ्कि हृदयं शीलं च पततीव मे ॥ ३५ ॥
श्रुता नु यादृशाः पूर्वं नृपतीनां विनाशने । आकारांस्तानहं सर्वानिह पश्यामि सारथे ॥ ३६ ॥
संमार्जनविहीनानि परुषाण्युपलक्षये । असंयतकवाटानि श्रीविहीनानि सर्वशः ॥ ३७ ॥
बलिकर्मविहीनानि धूपसंमोदनेन च । अनाशितकुटुम्बानि प्रभाहीनजनानि च ॥ ३८ ॥

रा० टी०—सर्वथेति । तथा सेन प्रकारेण असति असमीचीने संमोहे संमोहकारणे अशकुने सति मम बन्धुषु सर्वथा सर्वप्रकारेण कुशलं दुर्लभमत एव मम हृदयं सीदति ॥ ३१ ॥

गो० टी०—सर्वथेति । संमोहे संमोहकारणे ॥ ३१ ॥

३२] ति० टी०—विषण्णो दीनः, श्रान्तहृदयः खिन्नचित्तः, संलुलितानि क्षुभितानीन्द्रियाणि यस्य सः ॥ ३२ ॥

रा० टी०—भरतोक्तिं संवर्ण्य तद्वृत्तान्तमाह—विषण्ण इत्यादिभिः । श्रान्तहृदयः कुशकुनदर्शनेहेतुकखेदविशिष्टहृदयविशिष्टः अत एव त्रस्तः उद्विग्नः अत एव विषण्णः औदासीन्यविशिष्टः अत एव संलुलितानि संचलितानि इन्द्रियाणि यस्य स भरतः पुरीमयोध्यां प्रविवेश ॥ ३२ ॥

गो० टी०—विषण्ण इति । विषण्णः दुःखितः श्रान्तहृदयः कलुषितमनस्कः लुलितेन्द्रियः क्षुभितबाह्येन्द्रियः ॥ ३२ ॥

३३] ति० टी०—वैजयन्तेनेन्द्रप्रासादद्वारतुल्यद्वारेण तन्नामकेन वा विजयं पृष्टः कृतविजयप्रश्नः । 'विजयमुक्तः' इति पाठान्तरम् ॥ ३३ ॥

रा० टी०—प्रवेशनप्रकारमाह—द्वारेणेति । वैजयन्तेन तदभिधपश्चिमद्वारेण श्रान्तवाहनो भरतः प्राविशदनन्तरं द्वाःस्थैः विजयं पृष्टस्तैर्द्वाःस्थैः सहितश्च सन् ययौ ॥ ३३ ॥

गो० टी०—द्वारेणेति । वैजयन्तेन वैजयन्ताख्येन द्वारेण नगरपश्चिमद्वारेण अत्र । रे इति गायेऽक्षरम् पञ्चसहस्राणि श्लोकानां गतानि ॥ ३३ ॥

३४] ति० टी०—अनेकाग्रहृदयो व्याकुलहृदयः द्वाःस्थं जनं प्रत्यर्च्य सोपचारं निवर्त्य अश्वपतेः केकयस्य ॥ ३४ ॥

रा० टी०—स इति । अनेकाग्रहृदयः चञ्चलचित्तः राघवो भरतः एनं सहागतं द्वाःस्थं जनं प्रत्यर्च्य सत्कारपूर्वकं निवर्त्य अश्वपतेः केकयस्य सूतमब्रवीत् ॥ ३४ ॥

गो० टी०—स त्विति । अत्रेकाग्रहृदयः व्याकुलमनाः प्रत्यर्च्य सोपचारं निवर्त्य ॥ ३४ ॥

३५] ति० टी०—आनीतः दूतद्वारेति शेषः । कारणेन विना कारणोक्तिं विना अत एव मे हृदयमशुभाशङ्कि । शीलं धैर्यास्तित्वभावः पतति गलति ॥ ३५ ॥

रा० टी०—वचनाकारमाह—किमिति । हे अनघ ! कारणेन विना किं त्वरया वेगेन अहमानीतः दूतैरिति शेषः, कारणमस्त्येवेत्यर्थः, अत एव मम हृदयमशुभाशङ्कि अशुभसंशयविशिष्टमस्तीति शेषः, अत एव शीलं नित्यं दैन्यरहितस्वभावः पतति अपगच्छतीव ॥ ३५ ॥

गो० टी०—किमिति । कारणेन विना आह्वानकारणोक्तिं विना त्वरयाऽऽनीतः दूतं वसिष्ठेनानीतः अनघेति चिन्तासमर्थतोक्तिः ॥ ३५ ॥

३६] ति० टी०—श्रुताः कथास्विति शेषः । तांस्तादृशान्३६

रा० टी०—श्रुता इति । नृपतीनां विनाशे विनाशकाले यादृशा आकाराः पूर्वं नोऽस्माभिः श्रुतास्तादृशान्सर्वानाकारानिहास्मिन्समये अहं पश्यामि ॥ ३६ ॥

गो० टी०—श्रुता इति । नः अस्माभिः आकारान् वक्ष्यमाणान् तान् तादृशान् इह नगरे ॥ ३६ ॥

३७] ति० टी०—तानाकारानाह—संमार्जनेत्यादि । ईदृशानि कुटुम्बिभवनान्युपलक्षये इति संबन्धः । असंयतकवाटानि, अनाशितकुटुम्बानीति वक्ष्यमाणत्वेन तद्बन्धनसामर्थ्याभावात् ॥ ३७ ॥

रा० टी०—आकारानेवाह—संमिति । संमार्जनैर्विहीनानि रहितानि असंयताः आपिहिताः कवाटाः कोशगृहकपाटाः येषां तानि सर्वशो गृहाणि उपलक्षये ॥ ३७ ॥

गो० टी०—आकारानेव दर्शयति—संमार्जनविहीनानीत्यादिना । संमार्जनविहीनानि कानिचित्कुटुम्बिभवनानीति शेषः ॥ ३७ ॥

३८] ति० टी०—धूपसंमोदनेन परिमलेन हीनानीति शेषः । अनाशितकुटुम्बान्यभोजितकुटुम्बानि । प्रभा शोभा ॥ ३८ ॥

रा० टी०—तदेव विशिष्याह—बलीत्यादिभिः । धूपसंमोदनेन धूपसुगन्धप्रसरेण विहीनानीति शेषः । न आशिताः भोजिता कुटुम्बा येषु अत एव प्रभाहीनाः जनाः येषु अलक्ष्मीकानि लक्ष्मीरहितानि कुटुम्बिभवनानि पश्यामि । सार्धश्लोक एकान्वयी ॥ ३८ ॥ ३९ ॥

गो० टी०—बलिकर्मविहीनानीति । धूपसंमोदनेन धूमपरिमलेन विहीनानीत्यनुकर्षः अनाशितकुटुम्बानि अभोजितकुटुम्बानि ण्यन्तप्रयोगः भोजयितॄणामपि दुःखाक्रान्ततया पाकयज्ञाभावात् ॥ ३८ ॥

१ स इति गो. पाठः । २ चेति रा. पाठः । ३ नो इति गो. पाठः ।

अलक्ष्मीकानि पश्यामि कुटुम्बिभवनान्यहम् । अपेतमाल्यशोभानि असंमृष्टाजिराणि च ॥ ३९ ॥
देवागाराणि शून्यानि न भान्तीह यथा पुरा । देवतार्चाः प्रविद्धाश्च यज्ञगोष्ठास्तथैव च ॥ ४० ॥
माल्यापणेषु राजन्ते नाद्य पण्यानि वा तथा । दृश्यन्ते वणिजोऽप्यद्य न यथापूर्वमत्र वै ॥ ४१ ॥
ध्यानसंविग्नहृदया नष्टव्यापारयन्त्रिताः । देवायतनचैत्येषु दीनाः पक्षिमृगास्तथा ॥ ४२ ॥
मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानपरं कृशम् । सस्त्रीपुंसं च पश्यामि जनमुत्कण्ठितं पुरे ॥ ४३ ॥
इत्येवमुक्त्वा भरतः सूतं तं दीनमानसः । तान्यनिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ ॥ ४४ ॥
तां शून्यशृङ्गाटकवेश्मरथ्यां रजोरुणद्वारकवाटयन्त्राम् ।
दृष्ट्वा पुरीमिन्द्रपुरीप्रकाशां दुःखेन संपूर्णतरो बभूव ॥ ४५ ॥
बभूव पश्यन्मनसोऽप्रियाणि यान्यन्यदा नास्य पुरे बभूवुः ।
अवाक्शिरा दीनमना न हृष्टः पितुर्महात्मा प्रविवेश वेश्म ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

३९] ति० टी०—अलक्ष्मीकानि विचित्रध्वजतोरणाद्यभावात् ॥ ३९ ॥

रा० टी०—अपेतेति । अपेता निवृत्ता माल्यानां पुष्पाणां शोभा येषु तानि न संमृष्टानि अजिराणि अङ्गणानि येषु अत एव शून्यानि देवागाराणि देवगृहाणि पुरा इव न भान्ति॥४०॥

गो० टी०—अपेतमाल्यशोभानीति । अपेता माल्यशोभा द्वारि बद्धपुष्पदामशोभा येभ्यस्तानि शून्यानि पूजकपरिचारकादिरहितानि ॥ ३९ ॥

४०] ति० टी०—देवतार्चाः प्रतिमाः प्रविद्धा निरस्तपूजनाः यज्ञगोष्ठास्तथाविधाः प्रविद्धा यज्ञरहिताः ॥ ४० ॥

रा० टी०—देवतेति । देवतार्चाः देवप्रतिमापूजाः प्रविद्धा निवृत्ताः, यज्ञगोष्ठाः यज्ञशालाश्च तथा प्रविद्धाः दूषिताः । प्रविद्धशब्दः शब्दाक्षेपोभयान्वयी । माल्यापणेषु पुष्पक्रयार्हापणविशेषेषु यानि पण्यानि क्रयार्हाणि पुष्पाणि राजन्तेऽराजन्त तानि अद्य तथा न, न राजन्त इत्यर्थः॥ ४१ ॥

गो० टी०—देवतार्चा इति । देवतार्चाः देवपूजाः प्रविद्धाः लुप्ताः 'अर्चा पूजाप्रतिमयोः' इति वैजयन्ती । यज्ञगोष्ठयः यज्ञसभाः तथाविधाः प्रविद्धा इत्यर्थः । पण्यानि क्रयपुष्पाणि ॥ ४० ॥

४१] ति० टी०—माल्यापणेषु माल्यविक्रयापणेषु पण्यानि माल्यरूपाणि ॥ ४१ ॥

रा० टी०—दृश्यन्त इति । ध्यानेन चिन्तया संविग्नानि हृदयानि येषां ते अत एव नष्टव्यापारेण निवृत्तक्रयविक्रयव्यवहारेण यन्त्रिताः संकुचिताः सन्तः वणिजोऽपि पूर्वमिव न दृश्यन्ते ४२॥

गो० टी०—दृश्यन्त इति । ध्यानसंविग्नहृदयाः ध्यानासक्तहृदयाः नष्टव्यापारयन्त्रिताः नष्टक्रयविक्रयादिव्यापाराः यन्त्रिताः निरुद्धाश्च 'यत्रि संकोचे' इति धातुः ॥ ४१ ॥

४२] ति० टी०—नष्टेन व्यापारेण क्रयविक्रयादिव्यापारेण यन्त्रिता निरुद्धापणाः ॥ ४२ ॥

रा० टी०—देवेति । देवायतनचैत्येषु देवालयस्थलविशेषेषु पक्षिमृगाः दीनाः दृश्यन्ते इति शेषः । अर्धं पृथक्—मलिनमिति । ध्यानपरं चिन्ताविष्टमत एव पूर्णाक्षमुत्कण्ठितं किंचिद्विषयकाध्यानविशिष्टं जनं पश्यामि ॥ ४३ ॥

गो० टी०—देवायतनचैत्येष्वित्यादि । स्त्रीपुंसेति निपातनाद् समासान्तोऽच्प्रत्ययः सस्त्रीदायसस्त्रीदायिनोर्भेदविवक्षया जनविशेषणत्वम् ॥ ४२ ॥ ४३ ॥

४३-४४] ति० टी०—मलिनत्वादिगुणकं स्त्रीपुंसं पश्यामि ॥ ४३ ॥ ४४ ॥

रा० टी०—इतीति । प्रेक्ष्य दृष्ट्वा राजगृहं ययौ ॥ ४३ ॥

गो० टी०—इतीति । तान्यरिष्टानि प्रेक्ष्य तं क्षत्तारमित्येवमुक्त्वेत्यन्वयः ॥ ४४ ॥

४५] ति० टी०—शृङ्गाटकं चतुष्पथः रजसाऽरुणानि धूसराणि द्वारकवाटानि द्वारयन्त्राणि च यस्याम् ॥ ४५ ॥

रा० टी०—तामिति । इन्द्रपुरीप्रकाशां शून्याः शृङ्गाटकादयो यस्यां तां शृङ्गाटकं चतुष्पथः रजोभिः अरुणानि धूसराणि द्वारकपाटयन्त्राणि यस्यां तां पुरीं दृष्ट्वा दुःखेन संपूर्णतरो व्याप्तो बभूव ॥ ४४ ॥

गो० टी०—तामिति । शून्याः जनरहिताः शृङ्गाटकवेश्मरथ्याः चतुष्पथगृहवीथ्यो यस्यां रजोरुद्धद्वारकपाटयन्त्रां रजोभिः अरुणानि मलिनानि द्वारस्थकपाटानां यन्त्राणि दारुबन्धादीनि यस्याम् संमार्जनाद्यभावादिति भावः॥ ४५ ॥

४६] ति० टी०—अन्यदा राजजीवने ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

१ भान्ति यथापुरमिति गो. रा. पाठः । २ गोष्ठयस्तथाविधा इति गो. गोष्ठास्तथाविधा इति रा. पाठः । ३ गण इति गो. पाठः । ४ ध्यानकृशं परमिति रा. पाठः । ५ कपाटेति गो. पाठः । ६ पुरेति गो. पाठः । ७ बहूनीति गो. पाठः ।

एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा । शशिनेवामलं रात्रौ गगनं तोयदात्यये ॥ १९ ॥
तदिदं न विभात्यद्य विहीनं तेन धीमता । व्योमेव शशिना हीनमप्शुष्क इव सागरः ॥ २० ॥
बाष्पमुत्सृज्य कण्ठेन स्वात्मना परिपीडितः । प्रच्छाद्य वदनं श्रीमद्वस्त्रेण जयतां वरः ॥ २१ ॥
तमार्तं देवसंकाशं समीक्ष्य पतितं भुवि । निकृत्तमिव सालस्य स्कन्धं परशुना वने ॥ २२ ॥
माता मातङ्गसंकाशं चन्द्रार्कसदृशं सुतम् । उत्थापयित्वा शोकार्ता वचनं चेदमब्रवीत् ॥ २३ ॥
उत्तिष्ठोत्तिष्ठ किं शेषे राजपुत्र महायशः । त्वद्विधा नहि शोचन्ति सन्तः सदसि संमताः ॥ २४ ॥
दानयज्ञाधिकारा हि शीलश्रुतितपोनुगा । बुद्धिस्ते बुद्धिसंपन्न प्रभेवार्कस्य मन्दिरे ॥ २५ ॥
स रुदित्वा चिरं कालं भूमौ परिविवृत्य च । जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः ॥ २६ ॥

गमनत्वेन मरणसदृशेन दुःखितः अत एव शोकेन संवीतः संयुक्तः अत एव भ्रान्ताकुलितचेतनः भ्रान्तेन कार्यविषयकाविवेकेनाकुलिता व्याप्ता चेतना यस्य स भरतः विललाप ॥ १८ ॥

गो० टी०–तत इति । शोकेन संवीतः शोकेनावृतः मरणदुःखितः मरणश्रवणेन संजातदुःखः भ्रान्ता अनवस्थिता आकुलिता खिन्ना चेतना यस्य सः भ्रान्ताकुलितचेतनः ॥१८॥

१९] ति० टी०–विलापं दर्शयति–एतदिति । पुरा भाति स्म ॥ १९ ॥

रा० टी०–विलापाकारमाह–एतदित्यादिभिः । यदिदं शयनं तोयदात्यये शरत्काले रात्रौ शशिना अमलं गगनमिव सुरुचिरं मनोहरं पुरा पूर्वं भाति अभात् तसेन धीमता राज्ञा विहीनं इदं शयनं शशिना विहीनं व्योमाकाशमिव अप्शुष्कः आपः शुष्काः यस्य सः सागर इव अथ न विभाति। श्लोकद्वयमेकान्वयि 'शुष्काप' इति पाठान्तरमिति भट्टाः ॥ १९ ॥ २० ॥

गो० टी०–विलापमेवाह–एतदित्यादिना ॥ १९ ॥

२०] ति० टी०–अप्शुष्क आपः शुष्का यस्मिन्कालाग्निना सः । 'अप्शुष्कमिव सागरम्' इति पाठे सागरस्वरूपमित्यर्थः । 'शुष्कापः' इति पाठान्तरम् ॥ २० ॥

गो० टी०–तदिति । अप्शुष्कः शुष्कापः आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । 'उच्छुष्कः' इति पाठान्तरम् ॥२०॥

२१] ति० टी०–श्रीमद्वदनं वस्त्रेणाच्छाद्य कण्ठेन कण्ठस्वरेण सह बाष्पं नेत्रजलमुत्सृज्य भूमौ पतित्वा विललापेति शेषः ॥ २१ ॥

रा० टी०–बाष्पमिति । बाष्पमश्रूणि कण्ठेन कण्ठदेशेन उत्सृज्य संत्यज्य श्रीमद्वदनं मुखं वस्त्रेण प्रच्छाद्य आच्छाद्य परमपीडितः अतिदुःखी अत एव स्वार्तः स्वः स्वकीयो मित्रादिवर्गः आर्तः पीडितो यस्य सः जयतां वरो भरतः विललापेति शेषः । 'स्वात्मना परिपीडितः' इति पाठान्तरम् ॥ २१ ॥

गो० टी०–बाष्पमिति । कण्ठेन कण्ठस्वरेण स्वार्तः सुतरामार्तः अभवदिति शेषः । परमपीडितः मानसव्यथायुक्तः ॥ २१—२३ ॥

२२-२३] ति० टी०–सालस्य सालवृक्षस्य स्कन्धं शाखाम् ॥ २२ ॥ २३ ॥

रा० टी०–तमिति । चन्द्रार्कसदृशं चन्द्रार्कान्यतरसदृशत्वेन प्रतीयमानं मातङ्गसंकाशं गजसदृशदेहवत्त्वेन प्रतीयमानं सालस्य वृक्षविशेषस्य परशुना निकृत्तं छिन्नमत एव भुवि पतितं स्कन्धं महाशाखामिव भुवि पतितं देवसंकाशं देवानामपि प्रकाशकमार्तं दुःखितमत एव शोकार्तं शोकव्याप्तं सुतं माता समीक्ष्य उत्थापयित्वा उत्थाप्य च इदं वचनमब्रवीत्। श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

२४] ति० टी०–राजपुत्रेति । 'राजपुत्र' इति वा पाठः सदसि संमताः सभ्याः ॥ २४ ॥

रा० टी०–उत्थापनाकारं बोधयन्नाह–उत्तिष्ठेति । राजन् हे परमानुरागविशिष्ट! त्वमुत्तिष्ठोत्तिष्ठ आदरे वीप्सा किं किमर्थं शेषे हि यतः सदसि संमताः पूज्याः त्वद्विधाः सन्तो नहि शोचन्ति ॥ २४ ॥

गो० टी०–उत्तिष्ठोत्तिष्ठेति । राजन्निति भरतशोकनिवर्तनार्थमित्युक्तवती सदसि संमताः सभ्या इत्यर्थः । दानयज्ञौ अधिक्रियेते अनयेति दानयज्ञाधिकारा तत्र हेतुः शीलेति। शीलं सद्वृत्तं श्रुतिवचो वेदवाक्यं ते अनुगच्छतीति तदनुगा तदनुसारिणी बुद्धिः अध्यवसायः अर्कस्य प्रभा मन्दिर इव सूर्यप्रभा यथा स्वस्थाने निश्चला भवति तथा ते बुद्धिर्निश्चला भातीत्यर्थः। 'मन्दर' इतिपाठे अर्कस्य प्रभा मन्दर इवेत्युक्तिरत्युन्नतमन्दरपर्वते अर्कप्रभायाः पर्वतान्तरापेक्षया चिरकालावस्थानात् । पाठभेदः मन्दर इतिपाठे मन्दरशिखरे स्थितस्यार्कस्य प्रभेवाधिकप्रकाशवतीत्यर्थः । उत्तरायणे हि मन्दरगतस्य सूर्यस्य प्रभाधिकं प्रकाशत इति प्रसिद्धम् ॥२४–२६॥

२५-२६] ति० टी०–शीलं सद्वृत्तम्, श्रुतिः श्रुतम् तपश्चान्द्रायणादि, तदनुगा । 'शीलश्रुतिमनोनुगा' इति पाठे तदुभयपरिशीलनविषयं यन्मनःसंकल्पात्मकं तदनुगा बुद्धिरध्यवसायात्मिका । अर्कस्य मन्दिरेऽर्कमण्डले तदेव हि तस्य गृहम् । तीर्थस्तु–'मन्दरे' इति पाठं मत्वाऽत्युन्नतमन्दरपर्वतेऽर्कप्रभायाश्चिरावस्थानादेवमुक्तिरिति व्याचख्यौ ॥२५-॥ २६॥

---

१ स्वार्तः परमपीडित इति गो. रा. पाठः । २ मत्तमातङ्गेति गो. पाठः । ३ सुत इति गो. पाठः । ४ वचोनुगेति गो. पाठः । ५ तिष्ठिष्ठेति गो. पाठः ।

अभिषेक्ष्यति रामं तु राजा यज्ञं नु यक्ष्यते । इत्यहं कृतसंकल्पो हृष्टो यात्रामयासिषम् ॥ २७ ॥
तदिदं ह्यन्यथाभूतं व्यवदीर्णं मनो मम । पितरं यो न पश्यामि नित्यं प्रियहिते रतम् ॥ २८ ॥
अम्ब केनात्यगाद्राजा व्याधिना मय्यनागते । धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम्॥ २९ ॥
न नूनं मां महाराजः प्राप्तं जानाति कीर्तिमान् । उपजिघ्रेत्तु मां मूर्ध्नि तातः संनाम्य सत्वरम्॥ ३० ॥
क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः । यो हि मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥ ३१ ॥
यो मे भ्राता पिता बन्धुर्यस्य दासोऽस्मि संमतः । तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥ ३२ ॥
पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः । तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम ॥ ३३ ॥
धर्मविद्धर्मशीलश्च महाभागो दृढव्रतः । आर्यं किमब्रवीद्राजा पिता मे सत्यविक्रमः ॥ ३४ ॥
[गुरुरेकः प्रजानां तु पिता मे सत्यविक्रमः ।]
पश्चिमं साधुसंदेशमिच्छामि श्रोतुमात्मनः । इति पृष्ट्वा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ॥ ३५ ॥

रा० टी०–दानेति । हे बुद्धिसंपन्न ! शीलश्रुतितपोऽनुगा-शीलं सत्स्वभावः श्रुतिः सच्छास्त्रश्रवणं तपः तस्यातिविचारः मननं निदिध्यासनं चेत्यर्थः । तदनुगा तदनुगामिनी अत एव दानयज्ञाधिकारा दानयज्ञे अधिकारो यस्याः सा ते बुद्धिः मन्दिरे मण्डलरूपस्वगृहे अर्कस्य प्रभेव राजते इति शेषः । एतेन शोकं त्यक्त्वा दानादिकं कर्तव्यमिति सूचितम् । तीर्थस्तु मन्दरे ' इति पाठं मत्वा अत्युन्नतमन्दरपर्वते अर्कप्रभायाः चेरावस्थानादेवमुक्तिरिति व्याचख्युरिति भट्टाः ॥ २६ ॥

रा० टी०–स इति । चिरं कालं रुदित्वा परिविलप्य राज-सामग्रीनिरीक्षणार्थमितस्ततो भ्रान्त्वा च बहुभिः शोकैराहतः स भरतः जननीं प्रत्युवाच ॥ २६ ॥

२७] ति० टी०–यक्ष्यते करिष्यति । यात्रामयासिषं यात्रा-कार्यम् । ' अयाचिषम् ' इति पाठे मातामहायेति शेषः॥२७॥

रा० टी०–तत्प्रतिवचनमेवाह–अभिषेक्ष्यतीति । राजा राममभिषेक्ष्यति अनन्तरं यज्ञमेव यक्ष्यते करिष्यति इति कृतसंकल्पः कृतनिश्चयः अहं यात्रामयोध्याकर्मकगमनमयाचिषम् कृतगमनात्पूर्वं मातामहमिति शेषः । एतेन रामाभिषेककालो दशरथेनोक्तो भरतसंनिधाविति व्यक्तम् अत एव भरतस्य न मृषा संसर्गित्वम् । एकस्तुशब्दोऽनन्तरार्थकः द्वितीय एवार्थः ॥ २७ ॥

गो० टी०–अभिषेक्ष्यतीति । यज्ञं यक्ष्यत इति यज्ञं करिष्यत इत्यर्थः । यात्रामयासिषं यात्रामकार्षमित्यर्थः ॥२७॥

२८] ति० टी०–अन्यथाभूतं चिन्तितविपरीतं जातम्॥२८॥

रा० टी०–तदिति । योऽहं पितरं न पश्यामि तस्य मम इत्यनेन प्रकारेण इदं संकल्पितमन्यथाभूतमत एव मनो व्यवदीर्णमतिदुःखितम् ॥ २८ ॥

गो० टी०–तदिति । व्यवदीर्णं भिन्नम् ॥ २८–३० ॥

२९] ति० टी०–रामेणौर्ध्वदेहिकं कृतमिति मन्वान आह–धन्या इत्यादि ॥ २९ ॥

रा० टी०–अम्बेति । अम्ब हे मातः ! राजा केन व्याधिना मानसिकव्यथाविशेषेण हेतुभूतेन अत्यगात् स्वाकेतमगच्छत् । मयि अनागते सति यः पिता संस्कृतः सेवितः ते रामादयो धन्याः॥ २९ ॥

३०] ति० टी०–पुनः शोचति–नेति । प्राप्तमिहागतं संनाम्य मूर्धानमिति शेषः ॥ ३० ॥

रा० टी०–नेति । मां प्राप्तमतो राजा न जानाति ननं निश्चितमेतत् अन्यथा मां संनाम्य मूर्ध्नि उपजिघ्रेत् । तुरन्यथार्थे ॥ ३० ॥

३१] ति० टी०–परिमार्जति परिमार्ष्टि ॥ ३१ ॥

रा० टी०–क्वेति । यः रजसा ध्वस्तं व्याप्तं मा परिमार्जति सः अक्लिष्टकर्मणः सरलस्वभावस्य तातस्य सुखस्पर्शः पाणिः क्वास्तीति शेषः । परिमार्जतीत्यत्र गणकार्यस्यानित्यत्वात्न शपो लुक् ॥ ३१ ॥

गो० टी०–क्वेति । परिमार्जति परिमार्ष्टि माम् आगतमिति शेषः । क्व स पाणिः गत इति शेषः ॥ ३१–३४ ॥

३२ ति० टी०–आख्याहि आगतामिति शेषः ॥ ३२ ॥

रा० टी०–य इति । यो रामः मम भ्राता पिता च यस्याहं संमतो दासस्तस्य रामस्य समीपे मामाख्याहि ममागमनं कथयेत्यर्थः ॥ ३२ ॥

३३–३४] ति० टी०–धर्मं जानत आर्यस्य श्रेष्ठस्य विवेकिनः पुरुषस्य ज्येष्ठो ज्येष्ठभ्राता पिता भवति अतस्तस्य पादौ ग्रहीष्यामि यतः स इदानीं मम गतिः ॥ ३३ ॥ ३४ ॥

रा० टी०–सगमकं तत्प्रयोजनमाह–पितेति । धर्मं जानतः पुरुषस्य ज्येष्ठो भ्राता पिता भवति हि अतः तस्य पादौ अहं ग्रहीष्यामि स एव मम गतिः ॥ ३३ ॥

रा० टी०–धर्मेति । धर्मविच्चादिधर्मविशिष्टो राजा आर्यं रामे किमब्रवीत् यात्रासमय इति शेषः । तत्कथयेत्यर्थः ॥३४॥

३५] ति० टी०–पश्चिमं संदेशमन्त्यकालिकम ॥ ३५ ॥

१ तु इति रा. पाठः । २ अयाचिषमिति रा. पाठः । ३ सत्कृत इति रा. पाठः । ४ संनम्येति गो. पाठः । ५ येनेति गो. पाठः । ६ पीयत इति रा. पाठः । ७ नित्यश्च सत्यसंधो इति गो. पाठः । ८ आर्यं इति गो. पाठः । ९ अर्धं मेतदिति रा. पाठे ।

रामेति राजा विलपन्हा सीते लक्ष्मणेति च । स महात्मा परं लोकं गतो मतिमतां वरः ॥ ३६ ॥
इतीमां पश्चिमां वाचं व्याजहार पिता तव । कालधर्मं परिक्षिप्तः पाशैरिव महागजः ॥ ३७ ॥
सिद्धार्थास्तु नरा राममागतं सह सीतया । लक्ष्मणं च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥ ३८ ॥
तच्छ्रुत्वा विषसादैवं द्वितीयाप्रियशंसनात् । विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥ ३९ ॥
क्व चेदानीं स धर्मात्मा कौसल्यानन्दवर्धनः । लक्ष्मणेन सह भ्रात्रा सीतया च समागतः ॥ ४० ॥
तथा पृष्टा यथान्यायमाख्यातुमुपचक्रमे । मातास्य युगपद्वाक्यं विप्रियं प्रियशंसया ॥ ४१ ॥
स हि राजसुतः पुत्र चीरवासा महावनम् । दण्डकान्सह वैदेह्या लक्ष्मणानुचरो गतः ॥ ४२ ॥
तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया । स्वस्य वंशस्य माहात्म्यात्प्रष्टुं समुपचक्रमे ॥ ४३ ॥

३६] ति० टी०–विलपन्परलोकं गतः न तु किंचिदपि संदेशमवोचदित्यर्थः ॥ ३६ ॥

रा० टी०–गुरुरिति । तु यतः मे पिता प्रजानामेको मुख्यो गुरुरुपदेष्टा अतः आत्मनः मत्संबन्धिनं पश्चिममन्तिमं संदेशं तदुपदिष्टं श्रोतुमिच्छामि एतेन संदेशं वदेति सूचितम् ॥३६॥

रा० टी०–इतीति । इति पृष्टा कैकेयी यथातत्त्वं तत्त्वमनतिक्रम्य अब्रवीत् । अर्थं पृथक् । तद्वचनाकारमाह—रामेति । पाशैः पस्य पालनस्य आशो व्याप्तिर्यैस्तैः रामादिगमनैः हेतुभिः रामेत्यादिविलपनकालधर्मपरिक्षिप्तः कालधर्मेभ्यः शरीरविकारादिभ्यः परिक्षिप्तः परित्यक्तः रहित इत्यर्थः । महान् गजो यस्य स इन्द्र इव परं लोकं साकेतं गतः साकेतकर्मकगमनानुकूलव्यापारवान्सन् ये नरा पुनरागतं रामं द्रक्ष्यन्ति ते सिद्धार्थाः इतीमां पश्चिमां वाचं तव पिता व्याजहार । श्लोकत्रयमेकान्वयि ॥ ३६–३८ ॥

गो० टी०–पश्चिममिति । आत्मनः संदेशं मद्विषयसंदेशम् ॥ ३६ ॥

गो० टी०–एवं पृष्टवन्तं भरतं प्रति त्वां राजा न स्मृतवान् किंतु राममेव स्मरन् स्वर्गमगादिति पितृविषयस्नेहनिवर्तनाभिप्रायेणोत्तरमाह–रामेत्यादिना ॥ ३६ ॥

३७–३८] ति० टी०–इमां वाचं सिद्धार्थास्त्वित्यादि वक्ष्यमाणाम् ॥ ३७ ॥ ३८ ॥

गो० टी०–इमामित्यादिश्लोकद्वयमेकान्वयम् । सिद्धार्थाः कृतार्थाः पुनरागतं द्रक्ष्यन्तीति इमां वाचं व्याजहारेति संबन्धः ॥ ३७ ॥ ३८ ॥

३९] ति० टी०–एवं द्वितीयेति राजमरणापेक्षया रामवनगमनरूपाप्रियस्य द्वितीयत्वम् ॥ ३९ ॥

रा० टी०–तदिति । एवमिदं कैकेयीवचनं श्रुत्वा तत्तेन कैकेयीवचनेन द्वितीयाप्रियशंसनादामवियोगरूपापरद्वेष्यसूचनात् विषसाद विषादं प्राप अत एव विषण्णवदनो भूत्वा मातरं भूयः पप्रच्छ ॥ ३९ ॥

गो० टी०–तदिति । द्वितीयाप्रियशंसनात् राजमरणापेक्षया रामस्य देशान्तरगमनरूपाप्रियस्य द्वितीयत्वम् ॥३९॥४०॥

४०] ति० टी०–क्व चेदानीं गत इति शेषः । समागतो मिलितः ॥ ४० ॥

रा० टी०–प्रश्नाकारमाह–क्वेति । राम इदानीं क्वास्ति॥४०॥

४१–४२] ति० टी०–विप्रियं रामविवासनरूपम् । प्रियशंसया प्रियशङ्कया एतच्छ्रवणे भरतस्य सुखं भविष्यतीति तर्केण । युगपद्राजमरणकथनसमकालमेव ॥ ४१ ॥ ४२ ॥

रा० टी०–तथेति । तथा तेन प्रकारेण पृष्टाऽस्य भरतस्य माता कैकेयी प्रियशंसया प्रियबोधनशीलया वाचा विप्रियमप्रियत्वेन प्रतिभासमानं वाक्यं राज्ञो रामादीनां च गमनसूचकवचनं युगपदेककालावच्छेदेन यथान्यायं न्यायमतिक्रम्य व्याख्यातुं वक्तुमुपचक्रमे 'प्रियशङ्कया' इति पाठे तु इदं गमनद्वयं तत्त्वतः प्रियमप्रियं वेति संशयेनोपलक्षितेति कैकेयीविशेषणम् ॥ ४१ ॥

गो० टी०–तथेति । यथातथमिति सम्यक्पाठः यथा चायमिति पाठे अयं दृष्टान्तः यथा तथाख्यातुमित्यन्वयः । विप्रियं रामविवासनप्रतिपादकं प्रियशङ्कया एतच्छ्रवणेन भरतस्य प्रियं भविष्यतीति वितर्केण 'शङ्का वितर्कभययोः' इति वैजयन्ती । युगपत् राजमरणकथनसमकालमेव, यद्वा युगपदाख्यातुमुपचक्रम इत्युपक्रमस्य वक्ष्यमाणपरत्वात् याचितस्ते पिता राज्यं रामस्य च विवासनमिति वक्ष्यमाणवाक्यार्थाभिप्रायेण यौगपद्यम् ॥ ४१ ॥

रा० टी०–स इति । हे पुत्र! स ज्येष्ठो राजसुतः चीरवासाः सन्दण्डकान् गतः ॥ ४२ ॥

गो० टी०–स हीति । दण्डकान् महावनमिति वेदाः प्रमाणमितिवन्निर्देशः ॥ ४२ ॥

४३] ति० टी०–चारित्रशङ्कया रामस्य धर्मच्युतिशङ्कया त्रस्तः स्ववंशस्य माहात्म्यमसदाचाराभावपूर्वकं सदाचारनिरतत्वमसदाचारत्यागित्वं च तत्संस्मृत्य प्रष्टुं दण्डकारण्यगमनकारणमिति शेषः ॥ ४३ ॥

१ गतिमत्तामिति गो. रा. पाठः । २ इमां त्विति गो. पाठः । ३ कालधर्मपरिक्षिप्त इति रा. पाठः । ४ ते इति गो. पाठः । ५ एवेति गो. पाठः । ६ सर्वं गत इति गो. पाठः । ७ यथातत्त्वमिति गो. पाठः । ८ शङ्कयेति गो. संशयेति रा. पाठः ।

कच्चिन्न ब्राह्मणधनं हृतं रामेण कस्यचित् । कच्चिन्नाढ्यो दरिद्रो वा नेनापापो विहिंसितः ॥ ४४ ॥
कच्चिन्न परदारान्वा राजपुत्रोऽभिमन्यते । कस्मान्मे दण्डकारण्ये भ्राता रामो विवासितः॥ ४५ ॥
अथास्य चपला माता तत्स्वकर्म यथातथम् । तेनैव स्त्रीस्वभावेन व्याहर्तुमुपचक्रमे ॥ ४६ ॥
एवमुक्ता तु कैकेयी भरतेन महात्मना । उवाच वचनं हृष्टा वृथापण्डितमानिनी ॥ ४७ ॥
न ब्राह्मणधनं किंचिद्धृतं रामेण कस्यचित् । कश्चिन्नाढ्यो दरिद्रो वा नेनापापो विहिंसितः ॥
न रामः परदारान्सं चक्षुर्भ्यामपि पश्यति ॥ ॥ ४८ ॥
मया तु पुत्र श्रुत्वैव रामस्येहाभिषेचनम् । याचितस्ते पिता राज्यं रामस्य च विवासनम् ॥ ४९ ॥
स स्वदृत्तिं समास्थाय पिता ते तत्तथाकरोत् । रामस्तु सह सौमित्रिः प्रोषितः सह सीतया ॥ ५० ॥
तमपश्यन्प्रियं पुत्रं महीपालो महायशाः । पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान ॥ ५१ ॥

रा० टी०—तदिति । तदुक्ताकारपूर्वकं रामगमनं श्रुत्वा स्वस्य वंशस्य माहात्म्यान्महत्त्वं प्राप्य वियमानस्य भ्रातुः रामस्य चारित्रशङ्कया वनगमनहेतुभूतसदाचरणसंशयेन प्रष्टुं सम्पचक्रमे आरेभे ॥ ४३ ॥

गो० टी०—तदिति । चारित्रशङ्कया चारित्रं किमभूदितिशङ्कया वंशस्य माहात्म्यात् असदाचारवैमुख्यपूर्वकसदाचारनिरतत्वं वंशस्य माहात्म्यम् ॥ ४३ ॥

४४] ति० टी०—कस्यचित् हेतोरिति शेषः । अपापो निरपराधः ॥ ४४ ॥

रा० टी०—प्रभाकारमाह—कच्चिदिति । रामेण ब्राह्मणधनं कस्यचिदन्यस्य वा धनमिति शेषः, न हृतं कच्चित् । अपापः पापरहितः न विहिंसितः केनचित्प्रबलहेतुना विध्वंसितः कच्चित् । कच्चिदितिप्रभ ॥ ४४ ॥

गो० टी०—कच्चिदिति । ब्राह्मणधनमित्यत्राविभक्तिको निर्देशः कस्यचिद्ब्राह्मणस्येत्यर्थः, यद्वा कस्यचित् कस्माच्चिद्धेतोरित्यर्थः ॥ ४४ ॥

४५] ति० टी०—'भ्रूणहेव विवासितः' इति पाठे सर्वशास्त्राध्यायी भ्रूणस्तस्य हन्तेत्यर्थ इति तीर्थः । भ्रूणो गर्भ इत्यन्ये ॥ ४५ ॥

रा० टी०—कच्चिदिति । कस्माद्धेतोः ॥ ४५ ॥

गो० टी०—कच्चिदिति । भ्रूणः श्रुताध्ययनसंपन्नः 'अनूचानो गुणैर्युक्तो व्रतस्वाध्यायवाञ्छुचिः । भ्रूण इत्युच्यते सद्भिस्त्वेष यो विजितेन्द्रियः ॥' इतिस्मृतेः ॥ ४५ ॥

४६-४८] ति० टी०—स्त्रीस्वभावेन धर्माधर्महिताहितोचितानुचितविवेकशून्यतारूपेण ॥ ४६ ॥ ४८ ॥

रा० टी०—अथेति । स्त्रीस्वभावेन स्त्रीषु सुतरागभावो यस्य तेन अतिचपलेनेत्यर्थः, उपलक्षितापि माता अथ नित्यं बाधितत्वेनाप्रष्टव्यभरतप्रश्नश्रवणहेतुना चपला चापल्यं प्राप्ता सती यथातथं सत्यं यथा स्यात्तथा स्वकर्म व्याहर्तुमुपचक्रमे॥४६॥

गो० टी०—अथेति । यथातथं यथाऽऽत्तं निपातनात्साधुः स्त्रीस्वभावेन चापलेनेत्यर्थः। व्याहर्तुमुपचक्रमे वक्तुं व्यवसितवतीत्यर्थः । अथास्येतिश्लोको मुनेः सेदाभिनयः एवमिति-श्लोकः क्रमिक इति केचित ॥ ४६ ॥

रा० टी०—नन्वेव भरतेनोक्तेत्याह—एवमिति । भरतेनैवमुक्ता हृष्टा तत्त्वज्ञानेन प्राप्तमनोरथा अत एव पण्डितमानिनी पण्डितांस्तत्त्वज्ञान्मानयति पूजयति तच्छीला, किंच पण्डितमानः तत्त्वज्ञकर्तृकपूजा अस्त्यस्याः सा कैकेयी अवृथा प्रयोजनाभावरहितं सप्रयोजनमित्यर्थः वचनमुवाच ॥ ४७ ॥

गो० टी०—एवमिति । अर्धं श्लोक पूर्ववदादार्षः ॥४७॥

रा० टी०—वचनाकारमाह—नेति । किंचिदपि ब्राह्मणधनं रामेण न हृतं कस्यचिदन्यस्यापि धनमिति शेष ॥ ४८॥

गो० टी०—न ब्राह्मणेत्यादि । रामः परदारान् चक्षुर्भ्यामपि न पश्यति एवं सति न स्पृशतीत्यत्र किं वक्तव्यमिति भावः ॥ ४८ ॥

रा० टी०—नेति । चक्षुर्भ्यामपि न पश्यति स्पर्शादि नेति किं वक्तव्यमित्यर्थः । अर्धं पृथक् ॥ ४८ ॥

४९] ति० टी०—इह राज्ये ते राज्यं रामस्य च विवासनं ते पिता याचित इति संबन्धः ॥ ४९ ॥

रा० टी०—ननु तर्हि किमर्थं स वनं गत इत्यत आह—मयेति । हे पुत्र! रामस्याभिषेचनं श्रुत्वैव पिता भवज्जनकः ते त्वदर्थं राज्यं राज्यरक्षणं रामस्य विवासनं च याचितः ॥५०॥

गो० टी०—मयेति । ते राज्यं रामस्य विवासनं च पिता याचितः पूर्वदत्तवरद्वयविषयत्वेन याचित इत्यर्थः ॥४९॥

५०] ति० टी०—स्वदृत्तिं स्वस्य सत्यस्थितिलक्षणाम् । तथाकरोत् तुभ्यं राज्यं दत्तवानित्यर्थः ॥ ५० ॥

रा० टी०—स इति । स राजा स्वदृत्तिं सत्यप्रतिज्ञत्वरूपस्वस्वभावमास्थाय तथा मयाचनानुरूपमकरोत् । अत एव रामो वनं प्रेषितः ॥ ५० ॥

गो० टी०—स इति । स्वदृत्तिं स्वप्रतिज्ञारूपां दृत्तिम् ॥५०॥

५१] ति० टी०—परिद्यूनः क्षीणो विलपन्वा ॥ ५१ ॥

१ भ्रूणहेवेति गो. पाठः । २ मूढेति गो. पाठः । ३ कच्चिदिति रा. पाठः । ४ चेति गो. पाठः । ५ एवेति गो. पाठः । ६ चेति गो. पाठः । ७ प्रेषित इति गो. रा. पाठः ।

त्वया त्विदानीं धर्मज्ञ राजत्वमवलम्ब्यताम् । त्वत्कृते हि मया सर्वमिदमेवंविधं कृतम् ॥ ५२ ॥
मा शोकं मा च संतापं धैर्यमाश्रय पुत्रक । त्वदधीना हि नगरी राज्यं चैतदनामयम् ॥ ५३ ॥
तत्पुत्र शीघ्रं विधिना विधिज्ञैर्वसिष्ठमुख्यैः सहितो द्विजेन्द्रैः ।
संकाल्य राजानमदीनसत्त्वमात्मानमुर्व्यामभिषेचयस्व ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ।

भरतः स्वमभिप्रायं कैकेयीं बहुधा विनिन्द्य राममानीय राज्ये निवेश्याहं त्वदप्रियार्थं तदनुचरो भवामीति प्रतिजानीते ।

श्रुत्वा चैं स पितुर्वृत्तं भ्रातरौ च विवासितौ । भरतो दुःखसंतप्त इदं वचनमब्रवीत् ॥ १ ॥
किं नुं कार्यं हतस्येह मम राज्येन शोचतः । विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥ २ ॥
दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः । राजानं प्रेतभावस्थं कृत्वा रामं च तापसम् ॥ ३ ॥

रा० टी०–तमिति । प्रियं पुत्रं राममपश्यन्महीपालः पुत्रशोकेन परिणूनः क्षीणः सन्पञ्चत्वं पञ्चभ्यः पञ्चसंख्याकभूतनिर्मितेभ्यः त्वमन्यं साकेतमित्यर्थः उपपेदिवान्प्राप ॥ ५२ ॥

गो० टी०–तमिति । पुत्रशोकपरिणूनः पुत्रशोकेन परिणूनः तप्तः विलपन्नित्यर्थो वा " दिवो विजिगीषायाम् " इति निष्ठानत्वम् ॥ ५१ ॥

५२] ति० टी०–धर्मज्ञ रामस्येव पित्राज्ञापालनरूपधर्मज्ञ ! ॥ ५२ ॥

रा० टी०–त्वयेति । हे धर्मज्ञ ! इदानीं यावद्रामवनस्थितिसमये राजत्वं राजधर्मं पालनमित्यर्थः अवलम्ब्यतां स्वीक्रियताम् । नन्वेवं किमर्थमेवं कृतमित्यत आह–त्वत्कृते त्वत्तः अन्यस्य देवादेः कृते कार्यार्थमिदं सर्वं मया कृतं निष्पादितम् ॥ ५३ ॥

गो० टी०–त्वयेति । धर्मज्ञ राजनीतिज्ञ ! ॥ ५२ ॥

५३] ति० टी०–मा शोकम् कुर्विति शेषः । अनामयं निरुपद्रवं राज्यं चैतत्त्वदधीनम् ॥ ५३ ॥

रा० टी०–मेति । यतो नगरी त्वदधीना अनामयं निरुपद्रवं राज्यं च त्वदधीनमतः शोकं मा संतापं च मा कुरु इति शेषः, धैर्यमाश्रय स्वीकुरु । त्वदधीनाशब्दः लिङ्गविपरिणामेनान्वाख्यान्येति ॥ ५४ ॥

गो० टी०–मा शोकमिति । अनामयं निरुपद्रवम् ॥ ५३ ॥

५४] ति० टी०–संकाल्य प्रेतसंस्कारेण संस्कृत्य ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

रा० टी०–तदिति । हे पुत्र ! वसिष्ठप्रमुखैः द्विजेन्द्रैः सहितस्त्वमदीनसत्त्वम् न दीनं क्षीणं सत्त्वं येन तं राजानं राजत्वं संकल्प्य वसिष्ठाद्युपदेशपूर्वकं गृहीत्वा आत्मानं स्वबुद्धिमभिषेचय राजनीतौ स्थापय निवेशयेत्यर्थः । राजशब्दो भावप्रधानः ॥ ५५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

गो० टी०–तदिति । संकाल्य संस्कृत्य ॥ ५४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

१] ति० टी०–अथ सर्वानर्थमूलत्वं मातुस्तद्वचनादेव ज्ञात्वा तामुपालभते–श्रुत्वेति । वृत्तमत्यग्रः ॥ १ ॥

रा० टी०–मातृवचनश्रवणानन्तरकालिकं भरतवृत्तान्तमाह–श्रुत्वेति । पितुः वृत्तं वृत्तान्तं विवासितौ च भ्रातरौ श्रुत्वा दुःखसंतप्तः स भरत इदमब्रवीत् ॥ १ ॥

गो० टी०–श्रुत्वेत्यादि । वृत्तम् अतीतं मृतमिति यावत् १

२] ति० टी०–हतस्य त्वयाऽपारदुःखं प्रापितस्य ॥ २ ॥

रा० टी०–वचनाकारमाह–किमिति । पित्रा विहीनस्य अथ पितृसमेन भ्रात्रा विहीनस्य अत एव शोचतः अत एव हतस्य निहतप्रायस्य मम राज्येन किं कार्यं न किमपीत्यर्थः ॥ २ ॥

गो० टी०–किं न्विति । कार्यं प्रयोजनं हतस्य भाग्यहीनस्य ॥ २ ॥

३] ति० टी०–दुःखे दुःखकरणे दृष्टान्तः व्रणे क्षारमिव क्षारं खरमूत्रसहितचूर्णम् ॥ ३ ॥

रा० टी०–भवत्या अनुष्ठितं नोचितमिति बोधयन्नाह–दुःखे इति । दुःखे पितृलोकान्तरगमनश्रवणजनितखेदे यद्दुःखं रामवियोगश्रवणजनितं खेदमकरोः तद्व्रणे क्षारं लवणादीव अददाः । अर्थं पृथक् । राजानमिति । राजानं प्रेतभावस्थं लोकान्तरगमनकर्तृत्वेन मृतसदृशं रामं तापसं च कृत्वा

१ संकल्प्येति रा० पाठः । २ तु पितरमिति गो० पाठः । ३ त्विति रा० पाठः । ४ अदधा इति गो० पाठः ।

कुलस्य त्वमभावाय कालरात्रिरिवागता । अङ्गारमुपगूह्य स्म पिता मे नावबुद्धवान् ॥ ४ ॥
मृत्युमापादितो राजा त्वया मे पापदर्शिनि । सुखं परिहृतं मोहात्कुलेऽस्मिन्कुलपांसनि ॥ ५ ॥
त्वां प्राप्य हि पिता मेऽद्य सत्यसंधो महायशाः । तीव्रदुःखाभिसंतप्तो वृत्तो दशरथो नृपः ॥ ६ ॥
विनाशितो महाराजः पिता मे धर्मवत्सलः । कस्मात्प्रव्राजितो रामः कस्मादेव वनं गतः ॥ ७ ॥
कौसल्या च सुमित्रा च पुत्रशोकाभिपीडिते । दुष्करं यदि जीवेतां प्राप्य त्वां जननीं मम ॥ ८ ॥
नैन्वार्योऽपि च धर्मात्मा त्वयि वृत्तिमनुत्तमाम् । वर्तते गुरुवृत्तिज्ञो यथा मातरि वर्तते ॥ ९ ॥
तथा ज्येष्ठा हि मे माता कौसल्या दीर्घदर्शिनी । त्वयि धर्मं समास्थाय भगिन्यामिव वर्तते ॥ १० ॥
तस्याः पुत्रं महात्मानं चीरवल्कलवाससम् । प्रस्थाप्य वनवासाय कथं पापे न शोचसे ॥ ११ ॥

कुलस्य अयोध्याजनसमूहस्य अभावाय रामवियोगदुःखहेतुकानवस्थित्यै त्वं कालरात्रिः उपागता प्राप्ता अत एव अङ्गारं प्रकाशब्रह्मरूपरामाङ्गतेजः उपगूह्य तद्वारा साकेतं गत्वेत्यर्थः, मे पिता न अवबुद्धवान्न किंचिदाज्ञापितवानित्यर्थः । सार्धश्लोक एकान्वयी स्मो हेतौ ॥ ३ ॥ ४ ॥

गो० टी०–दुःख इति । दुःखे दुःखकरणात् व्रणक्षाराधानसादृश्यम् ॥ ३ ॥

४] ति० टी०–कालरात्रिः संहाररात्रिः । मे पिताङ्गारमुपगूह्यालिङ्ग्य नावबुद्धवान् । स्मेति लोकोक्तौ ॥ ४ ॥

गो० टी०–कुलस्येति । कालरात्रिः प्रलयकालेत्थितसर्वसंहारशक्तिः उपगूह्य आलिङ्ग्य ॥ ४–६ ॥

५] ति० टी०–मे राजेति योजना । अस्मिन्कुले सुखं त्वया परिहृतम् ॥ ६ ॥

रा० टी०–मृत्युमिति । कुलपांसनि कुलपस्य कुलधर्मरक्षणस्य ज्येष्ठपुत्राभिषेकस्येत्यर्थः, अंसो निवर्तनमस्त्यस्याः तत्संबोधनं पापदर्शिनि राक्षसदोषदर्शनशीले त्वया राजा मृत्युं लोकान्तरगमनकर्तृत्वेन मृत्युसदृशमापादितः प्रापितः अत एव अस्मिन्कुले अयोध्याजनसमूहे मोहात्कर्तव्यविषयकाविवेकात्सुखं परिहृतं दूरीकृतम् ॥ ५ ॥

६] ति० टी०–वृत्तोऽतीतः ॥ ६ ॥

रा० टी०–त्वामिति । सत्यसंधो महायशाः वृद्धः ज्ञानवयोभ्यामधिको मे पिता त्वां प्राप्य अथ अस्मिन्समये दुःखाभिसंतप्तः रामवियोगजनितदुःखाक्रान्तोऽभवदिति शेषः ॥ ६ ॥

७] ति० टी०–कस्माद्विनाशितः, कस्मात्प्रव्राजितः, स वा कस्माद्वनं गतः निष्प्रयोजनमेवेत्यर्थः ॥ ७ ॥

रा० टी०–विनाशित इति । धर्मवत्सलो मे पिता कस्माद्विनाशितः लोकान्तरप्रेषणत्वेनादर्शनं प्रापितः । ननु पुत्रवियोगात्त्वयमेवादर्शनं गत इत्यत आह–रामः प्रव्राजितः अयोध्यायाः निर्गमितः सन् वनं कस्माद्गतः प्राप्तः तं हेतुं वेत्यर्थः ॥ ७ ॥

गो० टी०–विनाशित इति । महाराजः कस्माद्विनाशितः रामः कस्मात्प्रव्राजित इति संबन्धः त्वया सर्वं निष्फलमेव कृतमिति भावः ॥ ७ ॥

८] ति० टी०–न केवलं पितृभ्रातृपीडा, अपि तु मात्रोरपीत्याह–कौसल्येत्यादि । मम जननीं त्वामेव मृत्युं प्राप्य यदि जीवेतां तदपि दुष्करं दुर्लभमेव ॥ ८ ॥

रा० टी०–इदानीं कौशल्यादेरतीव दुःखमिति बोधयन्नाह–कौशल्येति । मम जननीं त्वां प्राप्य यदि जीवेतां तर्हि दुष्करं ताभ्यां कृतमिति शेषः ॥ ८ ॥

गो० टी०–कौसल्येति । यदि जीवेतां तदा दुष्करं जीवेतामिति संबन्धः ॥ ८ ॥

९] ति० टी०–आर्यो रामः गुरुषु कर्तव्यां वृत्तिं जानाति तादृशः ॥ ९ ॥

रा० टी०–तत्तदपरावहेतुका त्वत्कृतिर्न संभवतीत्याह–नन्विति । गुरुवृत्तिज्ञः पित्रादिसेवारीतिज्ञाता धर्मात्मा आर्यो रामः यथाऽत्तमां वृत्तिं मातरि कौशल्यायां वर्तते वर्तयति तथा त्वयि वर्तते वर्तयति ॥ ९ ॥

गो० टी०–ननु त्विति । आर्यः ज्येष्ठः वृत्तिं शुश्रूषां वर्तते करोतीत्यर्थः मातरि वर्तते मातरि शुश्रूषते ॥ ९ ॥

१०] ति० टी०–राममात्रापि न कश्चिदपराधस्त्वयि कृत इत्याह–तथेति । दीर्घदर्शिनी त्वत्तो दूरकालभाव्यनर्थं जानती त्वयि धर्मं त्वच्चित्तानुवर्तनरूपं धर्ममास्थाय यथा भगिन्यां वर्तते तथा त्वयि वर्तत इत्यर्थः ॥ १० ॥

रा० टी०–तथेति । दीर्घदर्शिनी दीर्घं सार्वकालिककुलधर्मं पश्यति जानाति तच्छीला मे माता कौशल्या धर्मं समास्थाय आश्रित्य भगिन्यामिव त्वयि वर्तते एतेन द्वयोरपराधसंभावना नास्तीति सूचितम् ॥ १० ॥

गो० टी०–तथेति । दीर्घदर्शिनी दूरकालभाव्यनर्थदर्शिनी 'दूरानर्थस्य संदर्शी दीर्घदृष्टिः प्रकीर्तितः' इति ॥ १० ॥

११] ति० टी०–तस्यास्तादृग्धर्मवृत्तायाः । चीरपर्यायं वल्कलं वासो यस्य तम् ॥ ११ ॥

---

१ पांसिनीति गो. रा. पाठः । २ वृद्ध इति रा. पाठः । ३ ननु त्वार्योऽपीति गो. पाठः । ४ कृतारमान्नमिति गो. पाठः ।

अपापदर्शिनं शूरं कृतात्मानं यशस्विनम् । प्रव्राज्य चीरवसनं किं नु पश्यसि कारणम् ॥ १२ ॥
लुब्धाया विदितो मन्ये न तेऽहं राघवं यथा । तथा ह्यनर्थो राज्यार्थं त्वया नीतो महानयम् ॥ १३ ॥
अहं हि पुरुषव्याघ्रावपश्यन्रामलक्ष्मणौ । केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे ॥ १४ ॥
तं हि नित्यं महाराजो बलवन्तं महौजसम् । उपाश्रितोऽभूद्धर्मात्मा मेरुर्मेरुवनं यथा ॥ १५ ॥
सोऽहं कथमिमं भारं महाधुर्यसमुद्यतम् । दम्यो धुरमिवासाद्य सहेयं केन चौजसा ॥ १६ ॥
अथवा मे भवेच्छक्तिर्योगैर्बुद्धिबलेन वा । सकामां न करिष्यामि त्वामहं पुत्रगर्धिनीम् ॥ १७ ॥

रा० टी०–तस्या इति । पापे राक्षसार्थं वनवासाय तस्याः कौशल्यायाः पुत्रं प्रस्थाप्य कथं न शोचसि ॥ ११ ॥

गो० टी०–तस्या इति । तस्याः तादृशधर्मयुक्तायाः॥११॥

१२] ति० टी०–किं कारणं फलं पश्यसि ॥ १२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अपापेति । पापं स्वाश्रितजनापराधं पश्यति तच्छीलस्तद्विस्तं स्वाश्रितापराधविषयकज्ञानाभाववन्तमित्यर्थः, यशस्विनं रामं प्रव्राज्य किंनु किंचित्कारणं पश्यसि जानासि ॥ १२ ॥

गो० टी०–अपापदर्शनमिति । किंनु पश्यसि कारणं किं फलं पश्यसीत्यर्थः । फलं हि प्रयोजकतया कारणं न किमपीत्यर्थः ॥ १२ ॥

१३] ति० टी०–अहं राघवं प्रति यथा यादृशो यादृशभक्तिमांस्तथा लुब्धाया राज्यलुब्धायास्ते न विदितो मन्ये । तत्र हेतुः–तथाहि तत एव राज्यार्थं महानयमनर्थः पितृनाशराज्याहेज्येष्ठवनवासादिरूप आनीतः संपादितः ॥ १३ ॥

रा० टी०–लुब्धाया इति । यथा येन प्रकारेणाहं राघवं सेवे इति शेषः तथा लुब्धायाः रामप्रीतिविषयकलोभविशिष्टायास्ते तव विदितः ज्ञातोऽस्ति अतः राज्यार्थं मद्राज्यनिमित्तं त्वया अनर्थो न नीतः प्रापितः इत्यहं मन्ये निश्चिनोमि एतेन प्रव्राजनकारणं न विज्ञायते इति ध्वनितम् ॥ १३ ॥

गो० टी०–लुब्धाया इति । अहं राघवं प्रति यथा यादृशप्रकारयुक्तः तथा लुब्धायास्ते लुब्धया त्वया न विदित इति-मन्ये। अविदितत्वे हेतुमाह–तथाहीति । राज्यार्थं मम राज्यार्थं महानयमनर्थस्त्वया आनीतो हि आनीतः खलु संपादितः खलु १३

१४] ति० टी०–उक्तानर्थमात्रमेव त्वदुश्चेष्टाफलम्, न तु त्वदिष्टसिद्धिरित्याह–अहं हीति । न कथमपीति भावः॥१४॥

रा० टी०–नन्वहं राज्यस्य स्वतः प्राप्तत्वात्स्वीक्रियतां तदित्यत आह–अहमिति । रामलक्ष्मणावपश्यन् केन शक्तिप्रभावेण किंनिष्टशक्तिसत्तया रक्षितुमुत्सहे एतेन तावेव मच्छक्तिरिति सूचितम् ॥ १४ ॥

गो० टी०–राघवं प्रत्यहं यादृश इत्युक्तं विवृणोति–अहमिति । अपश्यन् हि अपश्यन्नेव 'हि हेताववधारणे' इत्यमरः केन शक्तिप्रभावेन शक्तस्वतिशयेन भ्रातृसंपत्तिरेव मम शक्त्यतिशय इति भावः ॥ १४ ॥

१५] ति० टी०–न केवलं ममैव रामशक्त्यपेक्षा, किंतु पितुरपीत्याह–तं हीति । मेरुः स्वजनितमेरुवनं यथा स्वरक्षणार्थमाश्रितः, अन्यथा परैराक्रमणीय एव स्यात्, एवं राजा इहामुत्रार्थसिद्धये राममाश्रितः ॥ १५ ॥

रा० टी०–इदानीं न केवलं ममैव शक्तिः सः किंतु मत्पितुरपीति बोधयन्नाह–तमिति । तं रामं नित्यं सर्वकालमुपाश्रितः सेवमानो महाराजोऽभूत्तत्र दृष्टान्तः मेरुः सुमेरुः मेरुवनं स्वदत्तिवृक्षसमूहमिव ॥ १५ ॥

गो० टी०–न केवलं ममैव रामापेक्षा पितुरपीत्याह–तमिति । मेरुर्मेरुवनं यथा मेरुजनितमेरुवनस्य तद्रक्षकत्वं परैराक्रमितुमशक्यत्वसंपादनेन ॥ १५ ॥

१६–१७] ति० टी०–सोऽहं ज्येष्ठरामैकबलः भारं राज्यभारं महाधुर्येण समुद्यतं धृतं धुरमासाद्य दम्यो वत्सतर इव कथं सहेयम्, केन चौजसा बलेन सहेयं रामं विनेति शेषः। तर्हि त्वं षण्ढकल्पस्तत्राह–अथवेति । शक्तौ राज्यभरणसामर्थ्यम् । योगैः 'योगः संहननोपायध्यानसंगतियुक्तिषु' इत्युक्तयोगैर्बुद्धियुक्तमहाप्राणत्वलक्षणबलेन यद्यपि भवेत्संभावितैवाथापि पुत्रगर्धिनीं पुत्रराज्याभिलाषवतीं त्वां सकामां पूर्णकामनां न करिष्यामि अन्यथा त्वमिवाहमपि लोके दूषितः स्यामिति भावः ॥ १६ ॥ १७ ॥

रा० टी०–स इति । इमं भारं राज्यभरं महाधुर्यसमुद्यतं महाधुर्यां द्वलीवर्दात्समुद्यतमुत्तारितं धुरं भारं दम्यः अल्पवत्स इव सः रामलक्ष्मणाभ्यां रहितोऽहं केन ओजसा बलेन सहेयं महाधुर्यसमुद्यतमिति सामान्ये नपुंसकम् 'वहेयम्' इति भूषणपाठः । 'दम्यवत्सतरौ समौ' इत्यमरः ॥ १६ ॥

गो० टी०–केन शक्तिप्रभावेनेत्युक्तमर्थं सदृष्टान्तमाह–स इति । अहं बालः इमं प्रवृद्धपितृधृतं भारं राज्यभारं महाधुर्यो महाबलीवर्दः धुरं वहतीति धुर्यः "धुरो यड्ढकौ" इति यत्प्रत्ययः तेन समुद्धृतं धुरं भारं पुंस्त्वमार्षं दम्यः तरुणवत्स इव तर्णकः स्मर्यते वत्सो दम्यो वत्सतरश्च सः' इति हलायुधः। 'दम्यवत्सतरौ समौ' इत्यमरश्च। केनौजसा केनावष्टम्भेन 'ओजोऽवष्टम्भबलयोः' इति वैजयन्ती। कथं केन प्रकारेण वहेयम्॥१६॥

रा० टी०–अथवेति । योगैः स्वव्यापारैः बुद्धिबलेन प्रयत्नेन वा शक्तिः राक्षसविनाशनसामर्थ्यं यदि भवेत्तदा पुत्रगर्धिनीं

१ दर्शनमिति गो. पाठः । २ प्रतीति गो. त्वेति रा. पाठः । ३ प्रभावेनेति गो. पाठः । ४ महाबल इति गो. पाठः । ५ अपाश्रित इति गो. । ६ समुद्धृतमिति गो. पाठः । ७ वहेयमिति गो. पाठः ।

न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम् । यदि रामस्य नोवेक्षा त्वयि स्यान्मातृवत्सदा ॥ १८ ॥
उत्पन्ना तु कथं बुद्धिस्तवेयं पापदर्शिना । साधुचारित्रविभ्रष्टे पूर्वेषां नो विगर्हिता ॥ १९ ॥
अस्मिन्कुले हि सर्वेषां ज्येष्ठो राज्येऽभिषिच्यते । अपरे भ्रातरस्तस्मिन्प्रवर्तन्ते समाहिताः ॥ २० ॥
न हि मन्ये नृशंसे त्वं राजधर्ममवेक्षसे । गतिं वा न विजानासि राजवृत्तस्य शाश्वतीम् ॥ २१ ॥
सततं राजपुत्रेषु ज्येष्ठो राजाभिषिच्यते । राज्ञामेतत्समं तत्स्यादिक्ष्वाकूणां विशेषतः ॥ २२ ॥

पुत्रविषयकोत्कटेच्छावतीं सकामां राक्षसविनाशविषयकेच्छावतीं त्वां न करिष्यामि तत्कामापूर्त्या पीडयिष्यामि रामगमनात्पूर्वमेव राक्षसान्निहनिष्यामीत्यर्थः । हिंसार्थककृधातोर्लेट् तदुपात्तभविष्यत्त्वस्याविवक्षा ॥ १७ ॥

गो० टी०-अथवेति। योगैः सामदानादिभिरुपायैः 'योगः सन्नहनोपायध्यानसंगतियुक्तिषु' इत्यमरः। बुद्धिबलेन ग्रहणधारणाद्यष्टाङ्गपुक्तबुद्धिबलेन वा मे शक्तिर्भवेत् राजपुत्रत्वेन संभावितत्वात् तथापि पुत्रगर्धिनीं पुत्रप्रयोजनाभिलाषवतीं त्वां सकामां न करिष्यामि गर्हितामिलाषत्वादिति भावः ॥ १७ ॥

१८] ति० टी०-किं च 'त्यजेदेकं कुलस्यार्थे' इति न्यायेन तव विवासनमेव सांप्रतम्, तथापि रामस्य त्वयि मातृवद्व्यवहारान्न कर्तुं शक्यमित्याह-नेति । त्वां त्यक्तुं विकाङ्क्षा इच्छाभावो नैव जायेत, यदि रामस्यमातृवदवेक्षा त्वयि न स्यात् ॥ १८ ॥

रा० टी०-रामप्रीतिंविषयीभूतमेव मम प्रीतिविषयीभूतमिति बोधयन्नाह-नेति । सदा नित्यं त्वयि रामस्य मातृवदवेक्षा दृष्टिर्न स्यात्तर्हि पापनिश्चयां पापेषु पापविशिष्टास्त्रविनाशेषु निश्चयो यस्याः सा तां राक्षसनिरासहेतुकरामप्रव्राजनकर्त्रीमित्यर्थः त्वां त्यक्तुं विकाङ्क्षा काङ्क्षाभावः मे न जायेत त्यजेयमेवेत्यर्थः ॥ १८ ॥

गो० टी०-नेति । रामस्य त्वयि मातृवत् मातरीव सदा अपेक्षा भक्तिपूर्वकेक्षणं यदि न स्यात्तदानीं पापनिश्चयां त्वां त्यक्तुं मे विकाङ्क्षा काङ्क्षाराहित्यं न जायेत काङ्क्षा जायेतैव रामस्य त्वयि मातृवत् प्रतिपत्तिसद्भावात् त्वां त्यक्तुं नेच्छामीत्यर्थः ॥ १८ ॥

१९] ति० टी०-इयं बुद्धिः कनिष्ठस्याभिषेकबुद्धिः ॥ १९ ॥

रा० टी०-उत्पन्नेति । पापदर्शिनि पापाचरणशीले ! अत एव साधुचरित्रात्समीचीनाचरणात् विभ्रष्टे राक्षसे निमित्तभूते इयमकालिका अत एव नः पूर्वेषां दशरथादीनां विगर्हिता तव बुद्धिः प्रव्राजनविषयकनिश्चयः कथमुत्पन्ना ॥ १९ ॥

गो० टी०-उत्पन्नेति । नः पूर्वेषां पूर्वैः विगर्हिता इयं बुद्धिः ज्येष्ठे विद्यमाने कनिष्ठस्य राज्यप्रार्थनाविषया बुद्धिः तव कथमुत्पन्ना ॥ १९ ॥

२०] ति० टी०-अस्या बुद्धेः पूर्वगर्हितत्वमेव दर्शयति-अस्मिन्निति । अस्मदीये कुले सर्वेषां ज्येष्ठोऽभिषिच्यते, न त्वापेक्षिकज्येष्ठः अपरे भ्रातरस्तस्मिन्समाहितास्तद्भक्ताः प्रवर्तन्ते एवं किल नः सर्वेषामाचार इति शेषः। स्मरति च मनुः-'ज्येष्ठ एव तु गृह्णीयात्सकलं पैतृकं धनम्। अन्ये तमनुजीवेयुर्यथैव पितरं तथा॥' इति ॥ २० ॥

रा० टी०-नन्वयं राज्यस्यायोग्यस्य तवेह विद्यमानत्वात्कथमनेऽपि का क्षतिरित्यत आह-अस्मिन्निति । अस्मिन्नस्मदीये कुले सर्वेषां मध्ये ज्येष्ठो राज्येऽभिषिच्यते अपरे कनिष्ठभ्रातरः समाहिता एकाग्रचित्ताः सन्तः तस्मिन् ज्येष्ठे प्रवर्तन्ते अनुवर्तन्ते। तथा च मनुः 'ज्येष्ठएव तु गृह्णीयात्पित्र्यं धनमशेषतः। शेषास्तमनुजीवेयुर्यथैव पितरं तथा' इति ॥ २० ॥

गो० टी०-अस्मिन्निति । पूर्वेषामिति निर्धारणे षष्ठी अपरे कनिष्ठा भ्रातरः तस्मिन्समाहिताः प्रवर्तन्ते पितृवत्तच्चित्तानुवर्तने सावधाना जीवन्तीत्यर्थः । तथाहमनुः 'ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः । शेषास्तमनुजीवेयुर्यथैव पितरं तथा' इति ॥ २० ॥

२१] ति० टी०-राजधर्मं नावेक्षसे न जानासि राजवृत्तस्य राजधर्मस्य शाश्वतीमव्यभिचरितां गतिं कदापि न जानासीति मन्ये ॥ २१ ॥

रा० टी०-नेति । नृशंसे घातुके राक्षसे ! तद्विषयं राजधर्ममेव अवेक्षसे दुष्टवध. कर्तव्य इत्येव जानासीत्यर्थः । राजवृत्तस्य राजवृत्तान्तस्य शाश्वतीं सार्वकालिकीं गतिं नैतिं नैव विजानासि इति अहं न मन्ये सर्वं विजानासीति मन्ये इत्यर्थः। एतेन जानत्यैव त्वया विपरीतं कृतमिति ध्वनितम् ॥ २१ ॥

गो० टी०-नेति । राजधर्मं राज्ञां विहितं धर्मं नावेक्षसे नादियसे अथवा राजवृत्तस्य राजसमाचारस्य गतिं प्रकारं वा न जानासीति मन्ये ॥ २१ ॥

२२] ति० टी०-एतद्राज्ञां सर्वराज्ञां समम्, यद्राजपुत्रेषु ज्येष्ठस्याभिषेकः इक्ष्वाकूणां तज्ज्येष्ठाभिषेचनं विशेषतः स्यात्संभाव्यते । 'राज्ञां सर्वम्' इति पाठे सर्वमित्यत्र छान्दसी षष्ठ्यर्थे द्वितीया सर्वेषामित्यर्थः ॥ २२ ॥

रा० टी०-विपरीतत्वमेव प्रकटयितुमाह-सततमिति । राजपुत्रेषु मध्ये ज्येष्ठो राजा राजत्वेन अभिषिच्यते एतन्मतं राज्ञां सर्वराजानां समं तुल्यं सततं सार्वकालिकं च इक्ष्वाकूणां तु एतन्मतं विशेषतः विशेषेण ॥ २२ ॥

गो० टी०-न केवलमस्माकमेवायं धर्मः किंतु सर्वेषा-

---

१ नापेक्षेति गो. पाठः । २ दर्शिनि इति गो. रा. पाठः । ३ पूर्वेषामिति गो. पाठः । ४ वृत्ते हीति गो. पाठः । ५ सर्वराजानामिति युक्तं दृश्यते ।

तेषां धर्मैकरक्षाणां कुलचारित्रशोभिनाम्[1] । अद्य चारित्रशौटीर्यं[2] त्वां प्राप्य विनिवर्तितम् ॥ २३ ॥
तवापि सुमहाभागे[3] जनेन्द्रकुलपूर्वके[4] । बुद्धिमोहः कथमयं संभूतस्त्वयि गर्हितः[5] ॥ २४ ॥
न तु कामं करिष्यामि तवाहं पापनिश्चये[6] । यया व्यसनमारब्धं जीवितान्तकरं मम[7] ॥ २५ ॥
एष त्विदानीमेवाहमप्रियार्थं तवानघे[8] । निवर्तयिष्यामि वनाद्भ्रातरं स्वजनप्रियम् ॥ २६ ॥
निवर्तयित्वा रामं च तस्याहं दीप्ततेजसः । दासभूतो भविष्यामि सुस्थितेनान्तरात्मना ॥ २७ ॥

मपीत्याह–सततमिति । राजवृत्ते विचार्यमाण इति शेषः । एतद्राज्ञां सर्वेषां समम् इक्ष्वाकूणां तु तज्ज्येष्ठाभिषेचनं विशेषतः स्यात् अस्खलिताचारत्वादिति भावः ॥ २२ ॥

२३] ति० टी०–धर्मेणैकेन रक्षा रक्षणं येषां तेषां धर्मैकरक्षाणां धर्ममेकं रक्षन्ति तेषां वा कुलक्रमागतचारित्रेण शोभावतां यच्चारित्रविषयकं शौटीर्यं गर्वस्तदद्य त्वां प्राप्य त्वत्संबन्धान्निवर्तितमित्यर्थः ॥ २३ ॥

रा० टी०–तेषामिति । धर्मैकरक्षाणा धर्मैकेण मुख्यधर्मेण रक्षा रक्षणं येषां तेषां किंच धर्मैकं मुख्यधर्मं सदाचारं रक्षन्ति तेषामत एव कुलचारित्रेण कुलोचिताचरणेन शोभिनां चारित्रशौण्डीर्यं चारित्रेण प्रवृद्धं कुलं त्वां प्राप्य विनिवर्तितम् । तव विपरीताचरणेन परिणतम् ॥ २३ ॥

गो० टी०–तेषामिति । धर्मेण एका रक्षा येषां ते तथा कुलचारित्रशोभिनां कुलक्रमागतचरित्रशोभिनाम् 'चरित्रं चरितं शीलं चारित्रं च समं मतम् ' इति हलायुधः । चारित्रशौण्डीर्यं चरित्रगर्वितत्वं चरित्रजनितसमुन्नतत्वमिति यावत् त्वां प्राप्य विनिवर्तितं त्वत्संबन्धान्निवृत्तमित्यर्थः ॥ २३ ॥

२४] ति० टी०–तथा त्वय्यपि महाकुलप्रसूतायामेवंविधबुद्धिकारणं न पश्यामीत्याह–तवापीति । हे सुमहाभागे ! तदुपपादकं विशेषणं जनेन्द्रकुलपूर्वके इति । जनेन्द्रः कैकेयकुलकूटस्थः पूर्वकः कारणं यस्यास्तथाभूते अतो महाकुलप्रसूतायास्तव गर्हितोऽयं बुद्धिमोहस्त्वयि कथं संभूत इत्यन्वयः । ' जनेन्द्राः कुलपूर्वगाः ' इति पाठे तव पितृवंशराजानोऽपि कुलपूर्वं कुलज्येष्ठं गच्छन्ति, राजत्वेन तादृशा इत्यर्थः । शेषं प्राग्वत् ॥ २४ ॥

रा० टी०–इदं तवाचरणं मातृवंशाचरणस्यापि विरोधीति बोधयन्नाह–तवेति । शोभनो महाभागः अत्यैश्वर्यं यस्मिँस्तस्मिन् जनेन्द्रकुलपूर्वके जनेन्द्रः केकयराजविशिष्टः स एव कुलं कुलाचारः पूर्वं मुख्यमित्यर्थः । तस्मिन्वंशे प्रसूतायास्तव गर्हितः सज्जनैर्निन्दितः अयं बुद्धिमोहस्तु कथं संभूतः अपि अनन्वितमेतत् । प्रसूताया इति सप्तमीमहिम्ना लब्धं 'सुमहाभागा जनेन्द्राः कुलपूर्वगाः' इति भूषणपाठः॥२४॥

गो० टी०–स्वकुलचारित्रक्रममभिधाय मातृकुलाचारक्रममप्याह–तवेति । जनेन्द्राः राजानः कुलपूर्वगाः कुलपूर्वाः कुलज्येष्ठाः तान् गच्छन्तीति कुलपूर्वगाः ज्येष्ठाभिषेचनशीला इत्यर्थः सुमहाभागाः सुचरित्राः ॥ २४ ॥

२५] ति० टी०–सर्वथा त्वद्बुद्धिमहं नानुवर्तिष्य इत्याह–न त्विति ॥ २५ ॥

रा० टी०–नत्विति । यया त्वया जीवितान्तकरं पितृपालनविध्वंसजनितं मम व्यसनं दुःखमारब्धं तस्यास्तव पापनिश्चये राक्षसे तद्विषयकं काममिच्छां न करिष्यामि निवर्तयिष्यामि विक्षेपार्थककृधातोर्लृट् ॥ २५ ॥

गो० टी०–फलितमाह–न त्वित्यादिना ॥ २५ ॥

२६] ति० टी०–न केवलं त्वदिष्टाकरणम् । किं त्वनिष्टमपि करिष्यामीत्याह—एष इति । अप्रियार्थं तत्संपादनार्थम् ॥ २६ ॥

रा० टी०–नन्वु तर्हि किमर्थं बहु वदसीत्यत आह–एष इति । इदानीं तु तव अप्रियार्थं त्वद्विषयकसर्वाप्रीतिनिवृत्त्यर्थमनघं स्वाश्रितजनाघनिवर्तकमत एव स्वजनप्रियं भ्रातरं रामं वनान्निवर्तयिष्यामि एतेन त्वदीप्सितराक्षसवधः कालान्तरे भवितेति सूचितम् ॥ २६ ॥

गो० टी०–न केवलमिष्टाकरणम् अनिष्टमपि तव करोमीत्याह–एष इति । एष इत्यविलम्बोक्तिः तव मद्व्याजेन राज्यं भोक्तुकामायाः ॥ २६ ॥

२७] ति० टी०–दासभूतो दासत्वं प्राप्तः मद्राज्येच्छोस्तवानिष्टसंपादनार्थमित्याशयः । न केवलं त्वत्कोपादेवैतदाचरणम्, अपि तु परमार्थत एवेत्याह–सुस्थितेनेति सुखप्रतिष्ठेन चित्तेनेत्यर्थः । ज्येष्ठानुवर्तनस्यैव शास्त्रतः परमहितत्वादिति भावः ॥ २७ ॥

रा० टी०–निवर्तयित्वेति । रामं निवर्तयित्वा निवर्त्य तस्य रामस्य दासभूतः नित्यं दासत्वं प्राप्तः सुस्थितेनान्तरात्मना मनसा भविष्यामि स्थास्यामि ॥ २७ ॥

गो० टी०–न केवलं निवर्तनं दासश्च तस्य स्यामित्याह–निवर्तयित्वेति । दासभूतः छत्रचामरादिधारणेन किंकरवृत्तिर्भविष्यामि । इदं च न त्वयि कोपात् किंतु स्वरूपेणेत्याशयेनाह–सुस्थितेनेति सुप्रतिष्ठितेनान्तःकरणेनेत्यर्थः ॥ २७ ॥

---

१ अत्रेति गो. पाठः । २ शौण्डीर्यमिति गो. रा. पाठः । ३ भागा जनेन्द्राः कुलपूर्वगा इति गो. पाठः । ४ बुद्धेरिति गो. पाठः । ५ त्वयेति गो. पाठः । ६ अनघमिति गो. रा. पाठः । ७ राजा इति युक्तमिति भाति । ८ विशेष इति भाति ।

इत्येवमुक्त्वा भरतो महात्मा प्रियेतरैर्वाक्यगणैस्तुदंस्ताम् ।
शोकार्दितश्चापि ननाद भूयः सिंहो यथा मन्दरकन्दरस्थः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

चतुःसप्ततितमः सर्गः ।

कैकेयीदुश्चेष्टानुस्मरणेन समाविष्टकोपो भरतः पुनस्तां विनिन्द्य कौसल्यायाः पुत्रशोकासहिष्णुत्वे कामधेनुवृत्तं दृष्टान्ततया संवर्ण्य रामं वनादानीय राज्येऽभिषिच्य तत्प्रतिज्ञातवनवासमहं पूरये इति निश्चिन्वन्नेव शोकातिरेकात्प्राप्तमूर्छः पपात ।

तां तथा गर्हयित्वा तु मातरं भरतस्तदा । रोषेण महताविष्टः पुनरेवाब्रवीद्वचः ॥ १ ॥
राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि । परित्यक्तासि[3] धर्मेण मा मृतं रुदती भव ॥ २ ॥
किं नु तेऽदूषयद्रामो राजा वा भृशधार्मिकः । ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ ॥ ३ ॥
भ्रूणहत्यामसि प्राप्ता कुलस्यास्य विनाशनात् । कैकेयि नरकं गच्छ मा च तातसलोकताम् ॥ ४ ॥

२८] ति० टी०—प्रियेतरैर्दुःखकरैः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

रा० टी०—इतीति । अप्रियेतरैः अप्रियसदृशैः वाक्यगणैः तां मातरं तुदन्निव इति वचनं भरत उक्त्वा शोकार्दितः सन् मन्दरकन्दरस्थः सिंह इव भूयोऽधिकं ननाद 'पर्वतगह्वरस्थः' इति भूषणपाठः ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

गो० टी०—इतीति । तुदन् व्यथयन् पर्वतगह्वरस्थः पर्वतगुहास्थः गुहास्थत्वे संतोषातिशयात् सिंहस्य नादातिशय इत्यभिप्रायेण विशेषणमिदम् ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने ऽयोध्याकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

१] ति० टी०—तामिति ॥ १ ॥

रा० टी०—रोषावेशकालप्रभूतभरतदुष्टान्तमाह—तामिति । तां मातरं गर्हयित्वा अनुचितं त्वया कृतमित्याक्षुक्त्वा महता प्रदुष्टेन रोषेण अभीप्सिततरामाभिषेकनिवृत्तिश्रवणजनितकोपेन आविष्टो भरतः अब्रवीत् ॥ १ ॥

गो० टी०—एवं सामान्यतो मृदुतया निन्दित्वा पुनस्तदपराधस्मरणेन प्रदुष्टरोषः क्रूरं निन्दति—तामित्यादिना । तथा मृदुतया ॥ १ ॥

२] ति० टी०—भ्रंशस्व भ्रष्टा भव वनं गच्छेत्यर्थः । मृतं भर्तारमुद्दिश्य रुदती मा भव धर्मत्यागेन भार्यापतिभावस्य नष्टत्वादिति भावः । केचित्तु—परित्यक्तधर्मेणस्ते पुत्रजीवनमसंभावितम्, अतो मा मां मृतं दृष्ट्वा रुदती भवेत्यर्थः । तव पुत्रमरणकृतः शोकोऽस्त्विति भाव इत्याहुः ॥ २ ॥

रा० टी०—वचनाकारमाह—राज्यादिति । नृशंसाः क्रूराः दास्यः सन्ति अस्याः तत्संबोधनम् अतः एवदुष्टचारिणि दुष्टानां दुर्मन्त्राणां चारः संचारोऽस्त्यस्यास्तत्संबोधनं हे कैकेयि ! धर्मेण सेवकरीत्या ऋतं युक्तं मां राज्याद्भ्रंशस्व असि मत्कृतैकगमने सति त्वमपि रुदती भव असीति गत्यर्थकासधातुप्रकृतिकक्विबन्तप्रकृतिकसप्तम्यन्तम् ॥ २ ॥

गो० टी०—राज्यादिति । भ्रंशस्व भ्रष्टा भव त्वन्मातृवत्त्वमपि वनं प्रविशेत्यर्थः । मा मृतं रुदती भव प्राणहानिकरकार्यकरणान्मां मृतं मत्वा रोदनं कुर्वित्यर्थः । यद्वा मृतं भर्तारमुद्दिश्य रुदती च मा भव पतिभार्याभावस्य गतत्वादिति भावः ॥ २ ॥

३] ति० टी०—अदूषयत्त्वत्संबन्धि किं गुणादिकमदूषयत् । तुल्यं युगपत् ॥ ३ ॥

रा० टी०—किमिति । ययोः मृत्युः प्राकृतागम्यलोकान्तरगमनं विवासश्च तुल्यमेककालावच्छेदेन आगतौ प्राप्तितौ सः रामः राजा वा ते किमदूषयत् ॥ ३ ॥

गो० टी०—किमिति । ते किं त्वदूषयत् तव संबन्धि किंतु गुणचारित्रादिकमदूषयत् तुल्यं युगपत् ॥ ३ ॥

४] ति० टी०—तस्माद्भ्रूणहत्यां शास्त्राध्येतृब्रह्महत्यां प्राप्तासि उत्तमक्षत्रियस्य राज्ञो भर्तुर्वधाद्रामादीनां विवासनाद्धेति भावः । नरकं गच्छ प्राप्तकाले लोट् । नरक एव ते न्यायप्राप्त इत्यर्थः ॥ ४ ॥

रा० टी०—भ्रूणेति । असि प्रव्राजनरूपायां भ्रूणहत्यां बालताडने प्राप्ता अत एव अस्य कुलस्य अयोध्यावासिजनसमूहस्य विनाशनात् विनाशमतिक्लेदमतति प्रापयति सा त्वं तातसलोकतां गच्छ प्राप्नुहि नरकं नरकसदृशदुःखितस्वजनदर्शनजनितक्लेदं मा गच्छ 'भ्रूणः क्षीणर्भेऽम्भसोः' इति मेदिनी । असीतिगत्यर्थकासधातुप्रकृतिकक्विबन्तप्रकृतिकसप्तम्यन्तं नरकशब्दः आचारक्विबन्तप्रकृतिकर्तृक्विबन्तः ॥ ४ ॥

गो० टी०—भ्रूणहत्यामिति । भ्रूणहत्यां भ्रूणहत्यातुल्यपापं सलोकतां समानलोकत्वम् ॥ ४ ॥

---

१ तदिति रा० पाठः । २ पर्वतगह्वरस्थ इति गो० पाठः । ३ चेति गो० पाठः । ४ भर्तुरिति गो० पाठः ।

यत्त्वया हीदृशं पापं कृतं घोरेण कर्मणा । सर्वलोकप्रियं हित्वा ममाप्यापादितं भयम् ॥ ५ ॥
त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः । अयशो जीवलोके च त्वयाहं प्रतिपादितः ॥ ६ ॥
मातृरूपे ममामित्रे नृशंसे राज्यकामुके । न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥ ७ ॥
कौसल्या च सुमित्रा च याश्चान्या मम मातरः । दुःखेन महताविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥ ८ ॥
न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः । राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥ ९ ॥
यत्त्वया धार्मिको रामो नित्यं सत्यपरायणः । वनं प्रस्थापितो वीरः पितापि त्रिदिवं गतः ॥ १० ॥
यत्प्रधानासि तत्पापं मयि पित्रा विना कृते । भ्रातृभ्यां च परित्यक्ते सर्वलोकस्य चाप्रिये ॥ ११ ॥

५] ति० टी०–ईदृशं भर्तृमरणरामविवासनरूपम् । घोरेण कर्मणा कर्मणो घोरत्वं च सामान्यविषयवरद्वयस्येदृशविशेषविषयत्वकरणम् । सर्वलोकप्रियं रामं हित्वा विवास्य भयं कैकेयीपुत्रोऽयं तद्वदेव दुष्टस्वभाव इति लोककलङ्करूपम्, यद्वा त्वद्दोषतो रामो मां त्यक्ष्यतीति भयम् , यद्वा महापातकपुत्रायास्तव संसर्गेण पञ्चमपातकित्वरूपभयम् ॥ ५ ॥

रा० टी०–यदिति । घोरेण क्रूरेण कर्मणा राक्षसाचरणेन हेतुना सर्वलोकप्रियं रामं हित्वा वनं प्रापय्य ईदृशं पापं पापानुमापकं दुःखं यत्त्वया कृतं संपादितं तेन ममापि भयं कर्तव्यविषयकसंशयजनितभीतिः आपादितं प्रापितम् ॥ ५ ॥

गो० टी०–यादिति । घोरेण कर्मणा घोरेण व्यवसायेन ईदृशं रामविवासनभर्तृमरणरूपं यत्पापं कृतं तेन सर्वलोकप्रियं रामं त्यक्त्वा स्थितस्य ममापि भयमापादितं त्वत्कृतं पापं ममापि भयमजनयत् ननु राज्यमिति भावः ॥ ५ ॥

६] ति० टी०–तदेवाह—त्वदिति । जीवलोके च । चात्परलोके च प्रतिपादितः प्रापितः ॥ ६ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–त्वदिति । त्वत्कृते त्वदर्थं रामः अरण्यमाश्रितः अत एव मे पिता आवृतः लोकान्तरकर्तव्यकर्मणि प्रवृत्तः अत एव अयशः भरतमात्रा राजेप्सितो विध्वंसितः इत्याकारकं दुर्यशः जीवलोके त्वयाऽहं प्रतिपादितः प्रापितः ॥ ६ ॥

गो० टी०–त्वत्कृत इति । अयशः मातृमुखेन ज्येष्ठं विवास्य राजानं नाशितवानित्येवंविधं प्रतिपादितः प्रापितः ॥६॥

७–८] ति० टी०–न तेऽहमभिभाष्यः मत्संभाषणं त्वया न कार्यमित्यर्थः ॥ ७ ॥ ८ ॥

रा० टी०–इदानीं राज्यपालनार्थमहं नाज्ञापितव्य इति बोधयन्नाह–मात्रिति । मातृरूपे विषयेयत्ताविशिष्टे अमित्रे जननीद्वारा रामवियोगहेतुत्वेन मित्ररहिते अनृशंसे क्रूरविरोधिनि अराजि राजरहिते अकामुके मदिच्छाया अविषये दुर्वृत्ते दुःखेन वृत्तं वर्तनं यस्य तस्मिन्पतिघातिनि स्वामिपीडादायिनि पालनेऽहं न अभिभाष्यः आज्ञापयितव्योऽस्मि ॥७॥

गो० टी०–मातृरूप इति । राज्यकामुक इति अमैथुनेच्छातो न क्विप् न तेऽहमभिभाष्य इति "कृत्यानां कर्तरि वा" इति षष्ठी मत्संभाषणं त्वया न कर्तव्यमित्यर्थः ॥ ७ ॥

रा० टी०–कौशल्येति । कुलदूषाः अयोध्याजनसमूहदूषका जना भृत्यादयः सन्ति अस्याः तां त्वां प्राप्य कौशल्यादयो महता दुःखेनाविष्टा व्याप्ताः सन्तीति शेषः ॥ ८ ॥

गो० टी०–कौसल्येति । याश्चान्या इत्यत्र ता इत्यध्याहारः ॥ ८ ॥

९] ति० टी०–न त्वमश्वपतेः कन्या तत्कुलोचिता कन्या न भवसीत्यर्थः । पितुरित्यस्य ममेति शेषः, यद्वा स्वपितुः कुलस्य प्रध्वंसिनी दुश्चरित्रत्वव्यवस्थापिका ॥ ९ ॥

रा० टी०–स्वद्भृत्यवर्गस्यैवायमपराध इति बोधयन्नाह–नेति । धर्मराजस्य धर्मेणैव शोभमानस्य धीमतः अश्वपतेः कन्या त्वं पितुर्दशरथस्य कुलप्रध्वंसिनी नासि ननु तर्हि का प्रध्वंसिनीत्यत आह–तत्र रामाभिषेकसमये राक्षसी अतिक्रूरकर्मकारिकात्वेन राक्षसीसदृशी काचित्सखी जाता प्रादुर्भूता प्राप्तेत्यर्थः । तेन तयैव अभिषेकध्वंसः कारित इति ध्वनितम् ॥ ९ ॥

गो० टी०–नेति । नत्वमश्वपतेः कन्या तत्कुलोचितकन्या न भवसीत्यर्थः । धर्मराजस्य धर्मप्रधानराजस्य तत्र केकयराजे । उक्तेर्थे हेतुमाह–यदित्यादिना ॥ ९ ॥ १० ॥

१०] ति० टी०–पिता मम गतो गमितः ॥ १० ॥

रा० टी०–यदिति । पापनिश्चये यस्य अयोध्यारक्षणस्य अपगतो निश्चयो यस्यास्तत्संबोधनं यत् यया राक्षसीरूपया सख्या हेतुभूतया रामो वनं प्रस्थापितः अत एव पिता त्रिदिवं त्रिभिर्ब्रह्मविष्णुमहेश्वरैः दीव्यते स्तूयते यः तं साकेतं गतः प्राप्तः सा सखी यत्प्रधाना या राक्षसीरूपा सखी प्रधाना स्वमन्त्रग्राहिकात्वेन मुख्या यस्याः सा अत एव निरयगामिनी अमङ्गलप्रापिका त्वं च मयि पित्रा विना कृते सति भ्रातृभ्यां च परित्यक्ते सति अत एव सर्वलोकस्य अप्रिये प्रीत्यविषयीभूते सति धर्मसंयुक्तां कौशल्यां वियुक्तां पतिपुत्रवियोगविशिष्टां कृत्वा तया सह किं पापं प्राप्स्यसे कं लोकं च प्राप्स्यसे सामान्योक्त्या रामपरिकराणां कर्मफलभोगाभावः सूचितः यदिति सामान्ये नपुंसकं कर्मणि लिङ्गविपरिणामेनान्यत्राप्यन्वेति । श्लोकत्रयमेकान्वयि ॥ १०–१२ ॥

११] ति० टी०–यत्प्रधाना यत्पापप्रधाना तत्पापं तत्पा-

१ दुःखादिति गो. पाठः । २ चेति गो. पाठः ।

कौसल्यां धर्मसंयुक्तां वियुक्तां पापनिश्चये । कृत्वा कं प्राप्स्यसे चैव लोकं निरयगामिनी ॥ १२ ॥
किं नावबुध्यसे क्रूरे नियतं बन्धुसंश्रयम् । ज्येष्ठं पितृसमं रामं कौसल्यायात्मसंभवम् ॥ १३ ॥
अङ्गप्रत्यङ्गजः पुत्रो हृदयाद्यो ऽभिजायते । तस्मात्प्रियतरो मातुः प्रियो एव तु बान्धवः ॥ १४ ॥
अन्यदा किल धर्मज्ञा सुरभिः सुरसंमता । वहमानौ ददर्शोर्व्यां पुत्रौ विगतचेतसौ ॥ १५ ॥

पफलम् । पितृभ्रातृरहितेऽस्त एव त्वन्निमित्तं सर्वलोकाप्रिये मयि दत्तं तद्राहित्यरूपं सर्वलोकाप्रियत्वरूपं च ॥ ११ ॥

गो० टी०–यत्प्रधानेति । यत्प्रधानं यस्याः सा यत्प्रधाना यत्पापकर्मप्रधानासि त्वं तत्पापं तत्कर्मजनितं पापं पित्रा विनाकृते भ्रातृभ्यां परित्यक्ते मयि संक्रान्तमिति शेषः । संक्रान्तकार्यं विशेषणद्वयेन दर्शितम् अप्रिये इति संबुद्धिः ॥ ११ ॥

१२] ति० टी०–हे पापनिश्चये! वियुक्तां पतिपुत्रवियुक्तां कृत्वा कं लोकं कं नरकलोकम् ॥ १२ ॥

गो० टी०–कौसल्यामिति । वियुक्तां गुणवत्पुत्रवियुक्तां कृत्वा निरयगामिनि त्वं कं लोकं प्राप्स्यसे निरयं विना कं लोकं प्राप्स्यस इत्यर्थः कं लोकं कं नरकं निरयगामिनीति सिद्धवत्कारात् कमितिक्षेपोक्त्या पूर्वसृष्टा अपर्याप्ता इत्युच्यते । विशेषणद्वयं संबोधनम् ॥ १२ ॥

१३] ति० टी०–बन्धुसंश्रयं बन्धूनामाश्रयभूतम् । कौसल्याया आत्मसंभवमौरसं संधिस्त्वार्षः एवंगुणविशिष्टं किं नावबुध्यसे न जानासीत्यर्थः ॥ १३ ॥

रा० टी०–किमिति । क्रूरे हे क्रूरजनविशिष्टे! नियतं नितरां यता नियमिताः ब्रह्मादयो येन तं बन्धुसंश्रयं बन्धूनां पराश्रयं कौशल्यायाः याति प्राप्नोति प्रादुर्भवतीत्यर्थः । स एवात्मसंभवः आत्मना स्वमनसैव संभवो यस्य तं पितृसमं पितृसदृशत्वेन प्रतीयमानं ज्येष्ठं रामं किं नावबुध्यसे जानासि अत एव संधौ नार्षकल्पना ॥ १३ ॥

गो० टी०–किमिति । बन्धुसंश्रयं बन्धूनामाश्रयभूतं कौसल्यायां आत्मसंभवमित्यत्र कौसल्यायात्मसंभवमित्यार्षसंधिः, यद्वा पृषोदरादित्वेन आकारलोपः गुद्धोऽत्मा न प्रकाशते इतिवत् तेन सम्यक्संधिः । नियतं किं नावबुध्यसे प्राकृतवद्बन्धुविघातकमवगतासीति भावः ॥ १३ ॥

१४] ति० टी०–अस्त्वौरसस्ततः किं तत्राह–अङ्गेत्यादि । अङ्गानि मुखवक्षउदरपाणिपादरूपाणि प्रत्यङ्गानि नेत्राङ्गुल्यादीनि । एतेन ' अङ्गादङ्गात्संभवसि ' इति श्रुतौ वीप्सयाऽङ्गप्रत्यङ्गग्रहणं सूचितम् एतेन तस्य सर्वाङ्गतेजःसंभूतत्वं दर्शितम् " यदेतद्वेतस्तत्सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतम् " इति श्रुतेः । स्त्रिया रक्तमेव रेतः हृदयं हृदयपुण्डरीकमात्माधिष्ठानम् अनेन " हृदयादधिजायसे " इति श्रुत्यर्थ उक्तः । यदेवं तस्मान्मातुरौरसः पुत्रः प्रियतरः " आत्मा वै पुत्रनामासि " इति श्रुतेः । निरुपाधिप्रेमाम्पदत्वं चात्मनः सर्वलोकसिद्धमेव । बान्धवाः पितृमात्रादयः प्रिया एव, न तु प्रियतराः। एवं चौरसवियोगदुःखमतिदुःसहमिति भावः । ' प्रियत्वान्न तु बान्धवः ' इति पाठं मत्वा तीर्थेनेत्थं व्याख्यातम्–प्रियत्वादेव न बान्धवो बन्धुदत्तपुत्रादिवत्र भवतीति । तत्र नार्थसामञ्जस्यमिति कनकसंमतपाठ एव न्यायान् ॥ १४ ॥

रा० टी०–इदानीं लौकिकदृष्टान्तेन रामे मातुरतिप्रियत्वं बोधयन्नाह–अङ्गेति । अङ्ग हे मातः! हृदयान्मनसः प्राप्य प्रत्यङ्गजः अङ्गमङ्गं प्रति प्रत्यङ्गं तस्मान्मुखनेत्रवक्षउदरपाणिपादादितेजोभ्यः जायते साकारतां प्राप्नोति सः अभिजायते उत्पद्यते तस्माद्धेतोः पुत्रः औरसः मातुः प्रियतरः इतरे बान्धवास्तु प्रिया एव एवेन प्रियतरत्वव्यवच्छेदः एतेन रामस्य कौशल्यातिप्रियत्वं सूचितम् । तथाहि " अङ्गादङ्गात्संभवसि " इति श्रुतिः नच वास्तवोदरादिसंबन्धशून्यजन्मवतो रामस्य वास्तवोदरादिसंबन्धवल्लौकिकपुत्रदृष्टान्तेन रामस्य कौशल्यातिप्रियत्वं कथं साधितमिति वाच्यं कौशल्यायास्तादृशातिविनिवेशाङ्गीकारेणादोषात् ॥ १४ ॥

गो० टी०–औरसपुत्रविश्लेषो मातुरसह्य इति दर्शयितुम् " अङ्गादङ्गात् " इति श्रुत्यर्थं हृदि निधायाह–अङ्गेति । अङ्गानि मुखकण्ठवक्षःकुक्षिहस्तपादाः प्रत्यङ्गानि नेत्रनासाङ्गुल्यादीनि तज्जस्तत्तेजोजः "अङ्गादङ्गात्संभवसि हृदयादधि जायसे । आत्मा वै पुत्रनामासि" इति श्रुतावपि वीप्सयाङ्गप्रत्यङ्गग्रहः अङ्गप्रत्यङ्गजत्वं च सर्वाङ्गतेजःसंभूतत्वम् " यदेतद्रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतम् " इति श्रुतेः । स्त्रियास्तु शोणितमेव रेतः हृदयात् हृदयपुण्डरीकात् प्रत्यगात्मस्थानाच्च जायते तस्मात्पुत्रो मातुः प्रियतमो भवति बान्धवो भ्रात्रादिः न प्रियतमः किं तु प्रिय एव एवमतिशयप्रियत्वात्पुत्रस्य तद्वियोगादिदुःखं दुःसहमिति भावः । सुरभिर्बन्धुमात्रे दुःखितवती किं पुनः पुत्रे कौसल्येति सूचयति–ननु बान्धव इति ॥ १४ ॥

१५] ति० टी०–अत्रार्थे इतिहासमाह–अन्यदेति । कस्मिंश्चित्पूर्वकाल इत्यर्थः । सुरभिः कामधेनुः किलेत्यैतिह्ये । धर्मज्ञाः पुराविदो दृष्ट्वा एवं वदन्ति किलेत्यर्थः । वहमानौ हलम् ॥ १५ ॥

रा० टी०–तदेव दृष्टान्तान्तरेण बोधयन्नाह–अन्यदेत्यादिभिः । अन्यदा अन्यस्मिन्काले सुरसंमता देवपूजिता सुरभिः कामधेनुः वहमानौ हलं कर्षन्तौ अत एव विगतचेतसौ पुत्रौ वृषभौ उर्व्यां पृथिव्यां ददर्श ॥ १५ ॥

गो० टी०–पुत्रशोको मातुर्दुःसह इत्यत्रेतिहासं प्रमाणयति–अन्यदेत्यादिना । अन्यदा पूर्वकाले । किलेत्यैतिह्ये

१ त्वयेति गो. पाठः । २ गामिनि इति गो. पाठः । ३ अपीति गो. पाठः । ४ तम इति गो. पाठः । ५ प्रियत्वान्न तु बान्धव इति गो. पाठः ।

तावर्धदिवसं[1] श्रान्तौ दृष्ट्वा पुत्रौ महीतले । रुरोद पुत्रशोकेन बाष्पपर्याकुलेक्षणम्[2] ॥ १६ ॥
अधस्ताद्व्रजतस्तस्याः सुरराज्ञो महात्मनः । बिन्दवः पतिता गात्रे सूक्ष्माः सुरभिगन्धिनः ॥ १७ ॥
[3]निरीक्षमाणस्तां शक्रो ददर्श सुरभिं स्थिताम्[4] । आकाशे [5]विष्ठितां दीनां रुदंतीं[6] भृशदुःखिताम्[7]॥ १८ ॥
तां दृष्ट्वा शोकसंतप्तां वज्रपाणिर्यशस्विनीम्[8] । इन्द्रः प्राञ्जलिरुद्विग्नः सुराराजोऽब्रवीद्वचः ॥ १९ ॥
भयं कचिन्न चास्मासु कुतश्चिद्विद्यते महत्[9] । कुतोनिमित्तः शोकस्ते ब्रूहि सर्वहितैषिणि[10] ॥ २० ॥
एवमुक्ता तु सुरभिः सुरराजेन धीमता । प्रत्युवाच ततो धीरा वाक्यं वाक्यविशारदा ॥ २१ ॥
शान्तं पापं न वः किंचित्कुतश्चिदमराधिप । अहं तु मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ ॥ २२ ॥
एतौ दृष्ट्वा कृशौ दीनौ सूर्यरश्मिप्रतापितौ । वैध्यमानौ बलीवर्दौ कर्षकेण दुरात्मना ॥ २३ ॥

तथावदन्ति किलेत्यर्थः । धर्मज्ञा कर्षणकालधर्मज्ञा सुरभिः कामधेनुः सुरसंमता देवपूजिता वहमानौ हलमिति शेषः, विगतचेतसौ मूर्छितावित्यर्थः, पुत्रौ साक्षात्पुत्रौ किंचिन्निमित्तवशाद्भूमिं गतौ, यद्वा पुत्रौ स्ववैश्यत्वेन पुत्रव्यपदेश्यौ ॥ १५ ॥

१६] ति० टी०–अर्धदिवसं दिवसस्यार्धं व्याप्य वहनेन श्रान्तौ दृष्ट्वा । पुत्रौ स्वाङ्गजौ कुतोऽपि हेतोर्भुवं गतौ । वक्ष्यति च—मम कायात्प्रसूतावितिं ॥ १६ ॥

रा० टी०–ताविति । तौ हलं कर्षन्तौ अर्धदिवसं प्राप्य श्रान्तौ पुत्रौ वृषभौ दृष्ट्वा बाष्पपर्याकुलेक्षणा सुरभिः रुरोद ' अर्धदिवसे ' इति भूषणपाठः ॥ १६ ॥

गो० टी०–तावितिं । अर्धदिवसे दिवसस्यार्धे मध्याह्न इत्यर्थः ' अर्धदिवसम् ' इतिपाठे " कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया सर्वथा एकदेशिसमासः मध्याह्नपर्यन्तमित्यर्थः१६

१७–१९] ति० टी०–सुरराज्ञः सुरराजस्य अनित्यत्वान्न टच् ॥ १७–१९ ॥

रा० टी०–अधस्तादिति । तस्याः सुरभेः अधस्तादधोमार्गेण व्रजतः सुरराज्ञः इन्द्रस्य गात्रेषु सुरभिगन्धिनः शोभनगन्धविशिष्टाः सूक्ष्माः बिन्दवः अश्रुबिन्दुकणिकाः पतिताः समासान्तविधेरनित्यत्वाट्टजभावः ॥ १७ ॥

गो० टी०–अधस्तादिति । सुरराज्ञः सुरराजस्य समासान्तविधेरनित्यत्वाट्टजभावः ॥ १७ ॥

रा० टी०–निरीक्षमाण इति । तां बिन्दुपातनकर्त्रीं निरीक्षमाणः शक्रः आकाशे अधिष्ठितामाकाशाश्रितां भृशदुःखितां स्थितां सुरभिं ददर्श ॥ १८ ॥

रा० टी०–तामिति । वज्रपाणिः इन्द्रः तां सुरभिं दृष्ट्वा अब्रवीत् ॥ १९ ॥

गो० टी०–निरीक्षमाण इति । निरीक्षमाणः उपरि निरीक्षमाणः ॥ १९ ॥ २० ॥

२०–२१] ति० टी०– अस्मास्वमरेषु । कुतोनिमित्तः किंनिमित्तकः कुत इत्याद्यादित्वात्प्रथमार्थे तसिः । न चास्मास्विति नाम्नि कार्ष्ट्यदृष्ट्या ॥ २० ॥ २१ ॥

रा० टी०–वचनाकारमाह–भयमिति । कुतश्चित्कस्मादपि हेतोः अस्मासु भयं न विद्यते अतः अयं तव शोकः कुतोनिमित्तः किंनिमित्तकस्तद्ब्रूहि ॥ २० ॥

रा० टी०–एवमिति । वाक्यविशारदा वचननिपुणा सुरभिः प्रत्युवाच ॥ २१ ॥

गो० टी०–भयमिति । अस्मासु सुरेषु मध्ये कुतश्चिदपि भूतान्महद्भयं न विद्यते कचित्प्रायशः त्वदश्रुमोचनरूपभयसूचकत्वादिति भावः । कुतोनिमित्त इत्यत्र आद्यादित्वात्प्रथमान्तविहिततस्यन्तस्य कुतःशब्दस्य निमित्तशब्देन समानाधिकरणेन बहुव्रीहिः किंनिमित्तक इत्यर्थः, यद्वा सार्वविभक्तिकस्तसिरित्यनुशासनात् अत्र प्रथमार्थे तसिप्रत्ययः॥ २१ ॥२२॥

२२–२३] ति० टी०–किंचिदपि भयं कुतोऽपि हेतोर्युष्माकं नास्ति । शान्तं पापमित्यादिकमनुचितश्रवणजदोषनिवर्तको वचनविशेषो युष्मदुःखजनकं पापं शान्तमित्यर्थः । किं त्वहं मग्नौ दुःखमग्नौ विषमे देशे स्थितौ कर्षकेण प्रतोदादिना वध्यमानौ ताड्यमानौ दृष्ट्वा शोचामि ॥ २२ ॥ २३ ॥

रा० टी०–तदाकारमाह–शान्तमिति । पापं पापाचरणशीलं रक्षोजातं शान्तं कालवशेन शान्तिं प्राप्तमतः कुतश्चिदपि वो युष्माकं देवानां किंचिद्भयं नास्ति । ननु कुतः शोचसीत्यत आह–विषमे विषमगतौ स्थितौ प्रारब्धवशेन प्राप्तौ सूर्यरश्मिप्रतापितौ सूर्यकिरणैः संतापितौ कर्षकेण वध्यमानौ ताड्यमानौ अत एव दीनौ क्षीणमानसौ अत एव कृशौ दुर्बलशरीरौ अत एव मग्नौ दुःखे निमग्नौ स्वपुत्रौ बलीवर्दौ दृष्ट्वा शोचामि । श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०–शान्तमिति । शान्तं पापं प्रतिहतममङ्गलमित्यादिकमनुचितप्रसङ्गश्रवणदोषनिवर्तकवचनविशेषः । वः युष्माकं मध्ये कुतश्चिदपि पुरुषार्किंचिद्भयं नास्ति किंतु मग्नौ दुःखमग्नौ विषमे संकटे स्थितौ स्वपुत्रौ प्रति शोचामि ॥२३॥

गो० टी०–एताविति । एतौ दृष्ट्वेति श्लोकस्य पूर्वश्लोकस्योत्तरार्धेनान्वयः ॥ २४ ॥

---

१ दिवसे इति गो.पाठः । २ पर्याकुलेक्षणेति गो. रा. पाठः । ३ चतुर्विंशश्लोकोऽस्मात्पूर्वं गो. पाठे । ४ ऽधिष्ठितामिति रा. पाठः । ५ रुदन्तीमिति गो. रा. पाठः । ६ सर्वं हितैषिणी इति रा. पाठः । ७ अर्थमानाविति गो. पाठः । ८ सुराधिपेति गो.पाठः ।

मम कायात्प्रसूतौ हि दुःखितौ भारपीडितौ । यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः ॥ २४ ॥
यस्याः पुत्रसहस्रैस्तु कृत्स्नं व्याप्तमिदं जगत् । तां दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परम् ॥ २५ ॥
इन्द्रो ह्यश्रुनिपातं तं स्वगात्रे पुण्यगन्धिनम् । सुरभिं मन्यते दृष्ट्वा भृयसीं तामिहेश्वरः ॥ २६ ॥
समाप्रतिमवृत्तायाः लोकधारणकाम्यया । श्रीमत्या गुणमुख्यायाः स्वभावपरिचेष्टया ॥ २७ ॥
यस्याः पुत्रसहस्राणि सापि शोचति कामधुक् । किं पुनर्या विना रामं कौसल्या वर्तयिष्यति ॥ २८ ॥
एकपुत्रा च साध्वी च विवत्सेयं त्वया कृता । तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥ २९ ॥
अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमाम् । वर्धनं यशसश्चापि करिष्यामि न संशयः ॥ ३० ॥

२४] ति० टी०–नास्ति पुत्रसमः प्रिय इति सुरभिवचनोपसंहारः ॥ २४ ॥

रा० टी०–ममेति । यौ मम कायात्प्रसूतौ तौ भारपीडितौ दृष्ट्वा अहं परितप्ये, तत्र हेतुः पुत्रसमः प्रियः अन्यो नास्ति ॥२४॥

गो० टी०–पुत्रं विशेषयति–ममेति । यौ दृष्ट्वा अहं परितप्ये तौ मम कायात्प्रसूतौ प्रसूतत्वं परंपरया तस्मात्पुत्रसमः प्रियो नास्तीति योजना ॥ २५ ॥

२५] ति० टी०–अथेन्द्रव्यापारमाह–यस्या इति । पुत्रसहस्रैः साक्षात्पुत्रसंतानपतितैः । तां रुदतीं दृष्ट्वा इन्द्रोऽपि सुतात्परमधिकं किमपि न मन्यते ॥ २५ ॥

रा० टी०–यस्या इति । यस्याः सुरभेः पुत्रसहस्रैः इयत्तारहितपुत्रैः इदं जगद्व्याप्तं तां रुदतीं सुरभिं दृष्ट्वा सुतात्परमधिकं प्रियं शक्रो न मन्यते अमन्यत ॥ २५ ॥

गो० टी०–कविराह–यस्या इति । मेन्यत अमन्यत ॥२६॥

२६] ति० टी०–इह संसारे भूयसीं सर्वोत्कृष्टाम् ॥२६॥

रा० टी०–इन्द्र इति । स्वगात्रे पुण्यगन्धिनं तं सुरभिकर्तृकमश्रुनिपातं दृष्ट्वा सुरभिं भूयसीं सर्वोत्कृष्टां मन्यते अमन्यत तेन तद्गन्धस्य विलक्षणत्वं सूचितम् । तदुःखप्रतीकाराकरणेन तत्प्रतीकारस्य इन्द्राशक्यत्वं व्यञ्जितम् ॥ २६ ॥

गो० टी०–इन्द्रोऽपीति । इन्द्रोऽपि स्वगात्रे पुण्यगन्धिनं रम्यगन्धम् अश्रुनिपातम् अश्रुपातं दृष्ट्वा तां सुरभिं भूयसीं श्रेष्ठाम् अमन्यत ॥ १८ ॥

२७] ति० टी०–समं सर्वप्राण्यनुग्रहे वैषम्यरहितमप्रतिमं सर्वोत्तमं वृत्तं चरित्रं यस्याः श्रीमत्या इष्टदानैश्वर्यशक्तिमत्याः गुणमुख्यायाः सत्यरूपमुख्यगुणवत्या लोकधारणकाम्यया प्रवृत्ताया इति शेषः । स्वभावपरिचेष्टया ' आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणाम् ' इति सामान्यप्राप्तमिथुनीभावलक्षणया ॥ २७ ॥

२८] ति० टी०–यस्याः पुत्रसहस्राणि संतानपरंपराद्वारेण सन्ति सापि शोचति, किं पुनर्मादृषी एकपुत्रा कौसल्या रामं विना वर्तयिष्यति जीविष्यति शोकेन विशिष्टा सतीति शेषः । इदं किं वक्तव्यमित्यर्थः ॥ २८ ॥

रा० टी०–समेति । लोकधारणकाम्यया सर्वस्थितीच्छया समं वैषम्यरहितमत एव अप्रतिममत्पुत्तमामित्यर्थः वृत्तं वर्तनं यस्यास्तस्याः श्रीमत्याः निखिलैश्वर्ययुक्तायाः गुणः सत्त्वसङ्ग इत्यर्थः मुख्यो यस्यास्तस्याः यस्याः पुत्रसहस्राणि अनन्तपुत्राः सन्तीति शेषः । सापि कामधुक् सुरभिः स्वभावपरिचेष्टया स्वाभाविकस्वपुत्रव्यापारदर्शनेन हेतुना शोचति या एकपुत्रा कौशल्या रामं विना वर्तयिष्यति वर्तते सा शोचतीति किं वक्तव्यम् । 'मदा' इति 'स्वभावपरिवेषया' इति च भूषणपाठः । श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–भरतवचनम्–सदेत्यादि । श्लोकद्वयमेकं वाक्यम् । अप्रतिमं निस्तुलं वृत्तं चरित्रं यस्यास्तस्याः श्रीमत्याः समृद्धिमत्याः गुणनित्यायाः नित्यगुणायाः यस्याः सुरभेः स्वभावपरिवेषया स्वभावेन स्त्रीपुंस्वभावेन मैथुनेन परिवेष आवृत्तिर्यस्यास्तादृश्या लोकधारणकाम्यया लोकधारणेच्छया पुत्रसहस्राणि सन्ति सन्तानपरंपरया बहवः पुत्राः सन्तीत्यर्थः । सापि कामधुक् कामधेनुः यथेष्टसृष्टिक्षमा शोचति अशोचत् । या राममेकं विना वर्तयिष्यति सा हि शोचतीति किं पुनः ॥ २७ ॥ २८ ॥

२९] ति० टी०–विवत्सा विवत्सेव । यदेवं–तस्मादिति ॥ २९ ॥

रा० टी०–एकेति । एकपुत्रा इयं कौशल्या त्वया विवत्सा पुत्रवियुक्ता कृता तस्माद्धेतोः इह लोके प्रेत्य लोकान्तरं गत्वा च वियमाना त्वं दुःखमपवादजनितखेदं लप्स्यसे प्राप्स्यसि ॥ २९ ॥

गो० टी०–एकपुत्रेत्यादि । विवत्सा पुत्रविरहिता तस्मात् विवत्सात्वकरणात् लप्स्यसे तत्फलत्वेन ॥ २९ ॥

३०] ति० टी०–अपचितिं पूजां पितुरिमां वक्ष्यमाणौर्ध्वदेहिकक्रियारूपां पूजां करिष्यामीत्यपकर्षः ॥ ३० ॥

रा० टी०–नन्वं मत्पुत्रत्वात्त्वमपि तथैव प्राप्स्यसीत्यत आह–अहमिति । भ्रातुः पितुश्च यशसो वर्धिनीमपचितिं पूजां करिष्यामि तेन ममापवादो न भवितेति सूचितम् । ' पूजनं स्यादपचितिः ' इत्यमरः ॥ ३० ॥

१ऽपीति गो. पाठः । २ सुरेश्वर इति गो. पाठः । ३ सदेति गो. पाठः । ४ नित्याया इति गो. पाठः । ५ परिवेषयेति गो. पाठः । ६ हीति गो. पाठः । ७ वर्धिनीमिति रा. पाठः ।

आनाय्य च महाबाहुं कोशलेन्द्रं महाबलम् । स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥ ३१ ॥
नह्यहं पापसंकल्पे पापे पापं त्वया कृतम् । शक्तो धारयितुं पौरैरश्रुकण्ठैर्निरीक्षितः ॥ ३२ ॥
सा त्वमग्निं प्रविश वा स्वयं वा विश दण्डकान् । रज्जुं बद्ध्वाथवा कण्ठे नहि तेऽन्यत्परायणम् ॥ ३३ ॥
अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे । कृतकृत्यो भविष्यामि विप्रवासितकल्मषः ॥ ३४ ॥
इति नाग इवारण्ये तोमराङ्कुशतोदितः । पपात भुवि संक्रुद्धो निःश्वसन्निव पन्नगः ॥ ३५ ॥
संरक्तनेत्रः शिथिलाम्बरस्तथा विधूतसर्वाभरणः परंतपः ।
बभूव भूमौ पतितो नृपात्मजः शचीपतेः केतुरिवोत्सवक्षये ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

गो० टी०–अहमिति । अपचितिं पूजाम् 'पूजा नमस्यापचितिः' इत्यमरः । भ्रातुरपचितिं राज्यप्रदानरूपां पितुरिमां सकलामपचितिम् और्ध्वदैहिकात्मिकाम् ॥ ३० ॥

३१] ति० टी०–अथ यशोवर्धनं भ्रातृपूजां चाह–आनाय्येत्यादि । महाबाहुं रामं वनं प्रवेक्ष्यामि तद्भरतसमाप्तये तत्प्रतिनिधितयेति भावः ॥ ३१ ॥

रा० टी०–पूजाकारमाह–आनाय्येति । महाबाहुं कोशलेन्द्रं राममानाय्य अयोध्यां प्रापय्य स्वयमेवाहं वनं प्रवेक्ष्यामि वनं प्रवेक्ष्यामीत्यनेन मद्भारैव रामस्य वनवासो भवितेति सूचितं तेन रामनिवृत्तौ न तत्सत्यप्रतिज्ञत्वहानिरिति ध्वनितम् एतेन रामप्रीतौ पितुरत्यन्तप्रीतिर्भवितेति सूचितं तेन महाराजस्य रामसुखसुखित्वं व्यक्तम् तेन भरतस्य हार्दज्ञत्वं व्यक्तमत एव रामपूजावत्र पितृपूजाप्रकारान्तरकथनम् । 'आनीय' इति भूषणपाठः ॥ ३१ ॥

गो०टी०–भ्रातुरपचितिमाह–आनाययित्वेत्यादिना ३१

३२] ति० टी०–पापं ज्येष्ठविवासनपूर्वकं कनिष्ठराज्यरूपम् ॥ ३२ ॥

रा० टी०–न हीति । पापसंकल्पे पस्य अयोध्यापालनस्य अपगतः संकल्पः निश्चयो यस्यास्तत्संबोधनम् अपापे पापसंसर्गशून्ये रामाभिषेके त्वया कृतं निष्पादितं पापमुचितविघातरूपापराधं धारयितुं सहितुमश्रुकण्ठैः पौरैः निरीक्षितोऽहं न शक्तः ॥ ३२ ॥

गो० टी०–नहीति । पापं रामविवासनरूपं धारयितुं सोढुम् अश्रुकण्ठैः गद्गदकण्ठैः ॥ ३२ ॥

३३] ति० टी०–अस्य मरणान्तमेव प्रायश्चित्तमित्याह–सेति । बुद्धिपूर्वकृतमहापापेत्यर्थः । कण्ठे रज्जुं बद्धेत्यस्य ध्रियस्वेति शेषः । परायणं गतिः ॥ ३३ ॥

रा० टी०–ननु तदपराधनिवृत्त्यर्थं मया किं कर्तव्यमित्यत आह–सेति । सा सहचरीजनमन्त्रस्वीकारपूर्वकंकृतरामापराधा त्वं रज्जुं वेणीं कण्ठे बद्धा कृत्वेत्यर्थः, अग्निं रामाङ्गप्रकाशरूपं ब्रह्म प्रविश तद्द्वारा राजाधिष्ठितसाकेतं वाऽऽश्रयेत्यर्थः । अथवा दण्डकान्रामाधिष्ठितवनमाविश रामं प्रसादयेत्यर्थः । अन्यदेतदुपायद्वयाद्भिन्नं परायणमुत्तमत्वप्रापकं नैव । वेण्याः कण्ठे करणं तु वस्त्रस्य कण्ठे करणवदार्तत्वद्योतनाय एतेन अन्यतरप्रसादनेन द्वयोः प्रसादनं भवितेति सूचितं तेन जन्यजनकयोः परस्परं परा प्रीतिर्व्यञ्जिता 'रज्जुर्वेण्यां गुणेऽपि च' इति मेदिनी ॥ ३३ ॥

गो० टी०–अस्य पापस्य मरणान्तिकप्रायश्चित्तं विना निवर्तकान्तरं नास्तीत्यभिप्रायेणाह–सेति । सा बुद्धिपूर्वकमहापापकारिणी कण्ठे रज्जुं बधान बद्धा ध्रियस्वेत्यर्थः । परायणं गतिः ॥ ३३ ॥

३४] ति० टी०–विप्रवासितकल्मषो दूरीकृतकलङ्कः ३४

रा० टी०–अहमिति । रामे अवनीमयोध्याभूमिं प्राप्ते सति विप्रवासितकल्मषः दूरीकृतप्रातिभासिकापराधः अत एव कृतकृत्यो भविष्यामि ॥ ३४ ॥

गो० टी०–अहमिति । विप्रवासितकल्मषः अपनीतकिल्बिषः ॥ ३४ ॥

३५] ति० टी०–इतीत्यस्य विलप्येति शेषः । 'नाग इवारण्यस्तोमर–' इति पाठान्तरम् । संक्रुद्धः पन्नग इव श्वसन्नित्यन्वयः । पाठान्तरेऽरण्ये तत्संबन्धिनि बन्धनस्थाने तोमराङ्कुशतोदितो नाग इवेत्यर्थः । भुवि पपात भरत इति शेषः ॥ ३५ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेण उक्त्वा तोमराङ्कुशतोदितः तोमरैः अङ्कुशैश्च व्यथितो नागो गज इव संक्रुद्धः पन्नगः सर्प इव संक्रुद्धः स्मृतरामवियोगजनितदुःखहेतुकक्रोधाक्रान्तो भरतः भुवि पपात ॥ ३५ ॥

गो० टी०–इतीति । इति संक्रुद्धः पन्नगः इव निःश्वसन् आरण्ये अरण्यगतें तोमराङ्कुशचोदितः तोमरैरङ्कुशैश्च विद्धो नाग इव भुवि पपात भरत इति शेषः ॥ ३५ ॥

३६] ति० टी०–शचीपतेः केतुरिन्द्रध्वजः । उत्सवक्षय उत्सवान्ते ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

१ आनाययित्वा तत्रैव कौसल्याया इति गो. पाठः । २ अवनिमिति गो. पाठः । ३ चोदित इति गो. पाठः ।

पञ्चसप्ततितमः सर्गः ।

वृत्तं रामविवासनादि स्वस्यानभिमतमिति निवेदयन्भरतः शत्रुघ्नेन सह कौसल्यागृहं प्राप । राज्यकामस्य ते कार्यं ककेय्या सुविहितमित्यादिदोषारोपैः परुषभाषिणीमपि कौसल्यां विनतो भरतो यद्यहं तादृशोऽनिष्टम् अयोक्ष्य एभिश्चेतकपातकान्युपन्यस्यश्वासयत्ततो ज्ञातहृदयत्वादृजुभावा कौसल्या भरतमङ्क आनीय शनैः रुरोद ।

दीर्घकालात्समुत्थाय संज्ञां लब्ध्वा सुवीर्यवान् । नेत्राभ्यामश्रुपूर्णाभ्यां दीनामुद्वीक्ष्य मातरम् ॥ १ ॥
सोऽमात्यमध्ये भरतो जननीमभ्यकुत्सयत् । राज्यं न कामये जातु मन्त्रये नापि मातरम् ॥ २ ॥
अभिषेकं न जानामि योऽभूद्राज्ञा समीक्षितः । विप्रकृष्टे ह्यहं देशे शत्रुघ्नसहितोऽभवम् ॥ ३ ॥
वनवासं न जानामि रामस्याहं महात्मनः । विवासनं च सौमित्रेः सीतायाश्च यथाभवत् ॥ ४ ॥
तथैव क्रोशतस्तस्य भरतस्य महात्मनः । कौसल्या शब्दमाज्ञाय सुमित्रां चेदमब्रवीत् ॥ ५ ॥
आगतः क्रूरकार्यायाः कैकेय्या भरतः सुतः । तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम् ॥ ६ ॥
एवमुक्त्वा सुमित्रां तां विवर्णवदना कृशा । प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥ ७ ॥

रा० टी०–पातमेव भङ्गयन्तरेणाह–सामिति । शिथिलान्यम्बराणि वस्त्राणि यस्य विधूतानि देहकम्पेन कम्पितानि भृत्यैरपवर्जितानि वा सर्वाभरणानि यस्य स भरतः उत्सवक्षये उत्सवान्ते शचीपतेरिन्द्रस्य केतुर्ध्वज इव भूमौ पतितो बभूव ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

गो० टी०–संरक्तनेत्र इति । शचीपतेः केतुः इन्द्रध्वजः उत्सवक्षये उत्सवान्ते ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने चतुःसप्ततितमः सर्गः ॥ ७४ ॥

१] ति० टी०–दीनां स्वमनीषितभङ्गतः ॥ १ ॥

रा० टी०–मूर्च्छानन्तरकालिकं भरतवृत्तमाह–दीर्घकालादित्यादिभिः । समुत्थाय मूर्छां निवर्त्य संज्ञां विवेकं लब्ध्वा जननीं स्वजननिकां दीनां कुमन्त्रेणानुचितमनुष्ठितं मयेति विचारेण खिन्नां मातरमुद्वीक्ष्य सवीर्यवान् वीर्यवद्भ्रातृसहितो भरतः अमात्यमध्ये अभ्यकुत्सयत् । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–दीर्घकालादिति । दीनां प्रतिहतेच्छत्वात् । स इति । अमात्यमध्ये सुमन्त्रादिमध्ये अनेन भरतागमनं श्रुत्वा सुमन्त्रादयः इतः पूर्वमागता इति गम्यते अभ्यकुत्सयत् मन्त्रिणां ज्ञापनाय पुनरप्यनिन्ददित्यर्थः ॥ १ ॥

२] ति० टी०–अमात्या भरतागमनं श्रुत्वा प्राप्ताः सुमन्त्रादयः । अभ्यकुत्सयत् लोकस्येव स्वस्यापि कैकेयीकृतव्यवहारे परमानिष्टताख्यापनायोत्करीत्यैव सर्वलोकसमक्षं जगर्ह इत्यर्थः । अथ प्रयोजकत्वानुमन्तृत्वाद्यपि स्वस्य प्रकृतविषये नास्तीति मन्त्रिणः प्रत्यापयति–राज्यमित्यादि । मातरं नैव मन्त्रये अपिरवार्थे, राज्यग्रहणार्थं न प्रेरयामि । तत्र हेतुः–राज्यं न कामये इति ॥ २ ॥

रा० टी०–अभिकुत्सनाकारमाह–राज्यमिति । जातु कदाचिदपि राज्यं न कामये नेच्छामि अत एव मातरं न मन्त्रये संमत्यर्थमभिभाषे ॥ २ ॥

गो० टी०–कैकेय्या कृतं स्वेष्टं नेति मन्त्रिभ्यो ज्ञापयति–राज्यमिति । जातु कदाचिदपि एतत् न कामये, न मन्त्रये इत्युभयत्रापि संबध्यते मन्त्रये राज्यार्थमिति शेषः । मन्त्रणं विचारः न जानामि मदनुज्ञापूर्वकोऽयं न भवतीत्यर्थः । यो मदर्थोऽभिषेकः राज्ञा समीक्षितश्चिन्तितः अभूत् तमभिषेकं न जानामि । अज्ञाने हेतुमाह–विप्रकृष्ट इति ॥ २ ॥

३–४] ति० टी०–योऽभिषेको राज्ञा समीक्षितश्चिन्तितः अज्ञाने हेतुमाह–विप्रकृष्ट इति । अतिदूरतरे इत्यर्थः ॥३॥४॥

रा० टी०–अभिषेकनिवृत्तिफलकस्वसंमतिविषयकजनसंभावनानिवृत्त्यर्थमाह–अभिषेकमिति । राज्ञा दशरथेन समीक्षितो विचारितः योऽभिषेकस्तमभिषेकं न जानामि विशिष्य न ज्ञातमित्यर्थः । तत्र हेतुः विप्रकृष्टे अतिदूरे देशे शत्रुघ्नसहितोऽहमभवमासम् ॥ ३ ॥

रा० टी०–वनेति । रामादेः वनवासं वने वासो येन तत् विवासनं प्रव्राजनं यथा अभवत्तथा न जानामि ॥ ४ ॥

गो० टी०–वनवासमिति । विवासनं वेत्यत्र न जानामीत्यनुकर्षः ॥ ३ ॥ ४ ॥

५] ति० टी०–तथैव प्राग्वदेव ॥ ५ ॥

६–७] ति० टी०–दीर्घदर्शिनमैहिकामुष्मिककर्मणः कालान्तरभाविफलज्ञानक्षमबुद्धिमन्तम् अत एव तं द्रष्टुमिच्छामि ॥ ६ ॥ ७ ॥

रा० टी०–तथेति । तथा क्रोशतः उच्चारयतः भरतस्य शब्दमाज्ञाय बुद्ध्वा सुमित्रां कौसल्या इदं वचनमब्रवीत् ॥ ५ ॥

१ चेति गो. पाठः । २ सुमित्रामिदमिति गो. पाठः । ३ सा विवर्णा मलिनेति गो. पाठः ।

स तु राजात्मजश्चापि शत्रुघ्नसहितस्तदा । प्रतस्थे भरतो [1]येन कौसल्याया निवेशनम् ॥ ८ ॥
ततः शत्रुघ्नभरतौ कौसल्यां प्रेक्ष्य दुःखितौ । पर्यष्वजेतां दुःखार्तां पतितां नष्टचेतनाम् ॥ ९ ॥
रुदन्तौ [2]रुदती दुःखात्समेत्यार्या [3]मनस्विनी । भरतं प्रत्युवाचेदं कौसल्या भृशदुःखिता ॥ १० ॥
इदं ते राज्यकामस्य राज्यं प्राप्तकमकण्टकम् । संप्राप्तं बत कैकेय्या शीघ्रं क्रूरेण कर्मणा ॥ ११ ॥
प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम् । कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिनी ॥ १२ ॥
क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति । हिरण्यनाभो यत्रास्ते सुतो मे सुमहायशाः ॥ १३ ॥
अथवा स्वयमेवाहं सुमित्रानुचरा सुखम् । अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये [4]येन राघवः ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–आगत इति । क्रूरकार्यायाः क्रूरं कार्यं कृत्यं यस्यास्तस्याः कैकेय्याः सुतो भरतः आगतः तं दीर्घदर्शिनमतिज्ञानवन्तं भरतं द्रष्टुमिच्छामि ॥ ६ ॥

गो० टी०–आगत इति । दीर्घदर्शिनमित्यनेन रामनिर्गमनं भरतो न संमन्यत इति कौसल्याहृदयमिति सूचितम् ॥६॥

रा० टी०–एवमिति । सुमित्रामेवमुक्त्वा विवर्णवदना विचेतना कौशल्या यत्र भरतस्तत्र प्रतस्थे ॥ ७ ॥

गो० टी०–एवमिति । भरतो यत्र स्थितः तत्र प्रतस्थे॥६॥

८] ति० टी०–चापिभ्यां सुमन्त्रादयः । येन मार्गेण निवेशनं प्राप्यत इति शेषः ॥ ८ ॥

रा० टी०–स इति । राजात्मजः भरतश्च येन मार्गेण कौसल्यायाः निवेशनं गृहं प्राप्यते इति शेषः, तेनमार्गेण प्रतस्थे ॥ ८ ॥

गो० टी०–स इति । यत्र कौसल्याया निवेशनं स्थितं तत्र प्रतस्थे ॥ ७ ॥

९] ति० टी०–कौसल्यां स्वगृहात्प्रस्थिताम् ॥ ९ ॥

रा० टी०–तत इति । ततः स्वप्रस्थानानन्तरं दुःखितौ शत्रुघ्नभरतौ दुःखार्तामत एव पतितां मार्गे स्खलितां नष्टचेतनां कौसल्यां प्रेक्ष्य अवलोक्य पर्यष्वजेताम् ॥ ९ ॥

गो० टी०–तत इत्यादि । आर्यां ज्येष्ठां मातरम् ॥८॥९॥

१०] ति० टी०–समेत्यालिङ्ग्य । तादृशसमयेऽप्यालिङ्गनकरणयोग्यं विशेषणम्–मनस्विनीति ॥ १० ॥

रा० टी०–रुदन्ताविति । दुःखाद्रुदन्तौ शत्रुघ्नभरतौ समेत्य प्राप्य आर्या ज्येष्ठा कौसल्या भृशदुःखिता अत एव रुदती सती भरतं प्रत्युवाच ॥ १० ॥

११] ति० टी०–राज्यं प्राप्तं भुङ्क्ष्वेति शेषः । राज्यप्राप्तिप्रकारमाह–क्रूरेण रामविवासनरूपेण कर्मणा । कैकेय्या तयेत्यर्थे शेषत्वविवक्षायाम् । संप्राप्तं राजतः ततश्च त्वया प्राप्तमिति भावः ॥ ११ ॥

रा० टी०–इदमिति । अराज्यकामस्य सर्वकालं राज्यविषयकामनारहितस्य ते तव अकण्टकं रिपुरहितं प्राप्तं प्रकृत्या आप्तैः वस्तुतस्तु स्वयमेव राज्यं शीघ्रमविचारितं यथा स्यात्तथेत्यर्थः, कैकेय्याः कैकयीदास्याः मन्थरायाः कर्मणा क्रियया संप्राप्तं त्वां प्रापितम् ॥ ११ ॥

गो० टी०–इदमिति । कथं राज्यं प्राप्तं तत्राह–संप्राप्तमिति । क्रूरेण रामविवासनपूर्वकेण कर्मणा वराभ्यर्थनेन ॥ १० ॥

१२] ति० टी०–त्वमपि मे पुत्र इति तव राज्यदाने न किमपि मे दुःखम्, अपि तु चीरवसनं वनचारिणं चीरवसनत्वादिवनचारिवेषं मे पुत्रं रामं त्वदागमनादपि पूर्वं शीघ्रं वनं प्रति प्रस्थाप्य राजानं मारितवती कैकेयी तत्र तादृशप्रस्थापने कं गुणं पश्यतीति न जाने इति दुःखमिति शेषः । स्थिते तु रामे स एव पितृवाक्यात्त्वामेवाभिषिच्य रक्षेत्, अतो व्यर्थोऽयं तत्प्रयास इति भावः ॥ १२ ॥

रा० टी०–प्रस्थाप्येति । तत्राभिषेकसमये चीरवसनं वनवासिनं मे पुत्रं रामं कारयित्वेति शेषः । प्रस्थाप्य च कैकेयी मन्थरा कं गुणं पश्यति न कमपीत्यर्थः ॥ १२ ॥

गो० टी०–प्रस्थाप्येति । तत्र प्रस्थापने कं गुणम् अतिशयं पश्यति न कमपि गुणं रामप्रस्थापनं विनापि राज्यलाभसंभवात् ॥ ११ ॥

१३] ति० टी०–मामपि प्रस्थापयितुमर्हति मां प्रति तस्या दुःखहेतुत्वप्रकृतेरिति भावः । हिरण्यनाभो हिरण्यवर्णनाभियुक्तः । इदमसाधारणं रामलक्षणम् ॥ १३ ॥

रा० टी०–क्षिप्रमिति । हिरण्यनाभः मनोहरविशिष्टः मे सुतो रामो यत्रास्ते तत्र मामपि क्षिप्रं प्रस्थापयितुमर्हति॥१३॥

गो० टी०–क्षिप्रमिति । कैकेयी मामपि प्रस्थापयितुमर्हति सर्वस्य राज्यस्य तदायत्तत्वादिति भावः । हिरण्यनाभः हिरण्यवत्सुहृणीयनाभियुक्तः नाभिग्रहणं शरीरस्योपलक्षणम् ॥१३

१४] ति० टी०–कैकेयीचित्तानुवृत्तेस्तव राजसंस्कारेऽधिकारो नास्तीति ध्वनयन्त्याह–अथवेति । अग्निहोत्रमिति राजदेहस्याप्युपलक्षणं कैकेयीवर्त्मगमने भरतो मे प्रेतकार्यं न कुर्यादिति राज्ञा निषेधादिति भावः ॥ १४ ॥

रा० टी०–अथेति । अथवा तत्कर्तृकप्रस्थापनाभावे सुमित्रा अनुचरा यस्याः साऽहमग्निहोत्रं पुरस्कृत्य ब्राह्मणद्वारा

१ रामानुज इति गो. पाठः । २ यत्रेति गो. पाठः । ३ रुदतीमिति गो. पाठः । ४ आर्यां मनस्विनीमिति गो. पाठः । ५ यत्रेति गो. रा. पाठः ।

कामं वा स्वयमेवाद्य तत्र मां नेतुमर्हसि । यत्रासौ पुरुषव्याघ्रस्तप्यते मे सुतस्ततः ॥ १५ ॥
इदं हि तव विस्तीर्णं धनधान्यसमाचितम् । हस्त्यश्वरथसंपूर्णं राज्यं निर्यातितं तया ॥ १६ ॥
इत्यादिबहुभिर्वाक्यैः क्रूरैः संभर्त्सितोऽनघः । विव्यथे भरतोऽतीव व्रणे तुद्येव सूचिना ॥ १७ ॥
पपात चरणौ तस्यास्तदा संभ्रान्तचेतनः । विलप्य बहुधाऽसंज्ञो लब्धसंज्ञस्तदाऽभवत् ॥ १८ ॥
एवं विलपमानां तां प्राञ्जलिर्भरतस्तदा । कौसल्यां प्रत्युवाचेदं शोकैर्बहुभिराकुलाम् ॥ १९ ॥
आर्ये कस्मादजानन्तं गर्हसे मामकल्मषम् । विपुलां च मम प्रीतिं स्थितां जानासि राघवे ॥ २० ॥
कृतशास्त्रानुगा बुद्धिर्मा भूत्तस्य कदाचन । सत्यसंधः सतां श्रेष्ठो यस्यार्योऽनुमते गतः ॥ २१ ॥

अग्रे कृत्वा यत्र राघवः तत्र प्रस्थास्ये उपलक्षणविधया राजशरीरस्य ग्रहणं तु न युक्तं प्रमाणाभावात् सशरीरराजस्य गमनस्योक्तत्वेन तच्छरीरस्येहाभावाच्च ॥ १४ ॥

गो० टी०–कैकेयीकृतपापानुबन्धिनस्तव राजसंस्काराधिकारो नास्तीति ध्वनयन्त्याह–अथवेति । अग्निहोत्रं राजाग्निहोत्रम् अग्निहोत्रस्य ज्येष्ठभार्याधीनत्वात् दशरथेन भरतसंस्कारप्रतिषेधाच्चेति भावः । एतेन राजशरीरप्रापणमप्यर्थसिद्धम्॥१३॥

१५] ति० टी०–अथवा तत्रातत्पक्षत्वे राजसंस्कारादि कृत्वा पश्चान्मां तत्र नयेत्याह–कामं वेति । तप्यते तप्यते चेत्यपि बोध्यम् ॥ १५ ॥

रा० टी०–काममिति । वा अथवा असौ मे सुतः यत्र तपस्तप्यते तत्र स्वयमेव त्वं नेतुमर्हसि ॥ १५ ॥

गो० टी०–काममिति । तपस्तप्यते तपः करोतीत्यर्थः "तपस्तपः कर्मकस्यैव" इति कर्मवद्भावादात्मनेपदम् ॥ १४ ॥

१६] ति० टी०–समाचितं व्याप्तम् । निर्यातितं दत्तम् ' निर्यातनं वैरशुद्धौ दाने न्यासार्पणे मतम् ' ॥ १६ ॥

रा० टी०–इदमिति । धनधान्यसमाचितं धनादिभिर्व्याप्तं हस्त्यादिभिः संपूर्णं विस्तीर्णमिदं राज्यं तव निर्यातितं न्यासत्वेन समर्पितं तथा निश्रितमेतत् ॥ १६ ॥

गो० टी०–तव प्रस्थापने मम का शक्तिस्तत्राह–इदमिति । धनधान्यसमाचितं धनधान्यसंपूर्णं तया कैकेय्या निर्यातितं दापितम् 'निर्यातनं वैरशुद्धौ दाने न्यासार्पणे मतम्'इति विश्वः१६॥

१७] ति० टी०–व्रणे प्राचीने सूचिना प्रतुद्येव संभर्त्सितः कैकेयीपक्षत्वधिया गर्हितो विव्यथे पितृभ्रातृवियोगखिन्नेनाप्तासार्थमागतस्थलेऽपि खेदहेतुवचनश्रवणादिति भावः ॥ १७ ॥

रा० टी०–इतीति । क्रूरैः क्रूरसदृशैः बहुभिर्वाक्यैः भर्त्सित इव भरतः व्रणे सूचिना तुद्य प्रतुद्य विद्यमान इव अतिविव्यधे । अतीवौ भिन्नक्रमौ क्रूरशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः पूर्वरामवियोगश्रवणजनितखेदस्य व्रणोपमा ॥ १७ ॥

गो० टी०–इत्यादिबहुभिरिति । संभर्त्सितः परपक्ष्यबुद्ध्या भाषितः व्रणे सूचिना तुद्येव व्यथयित्वेव पूर्वमेव भ्रातृपितृवियोगखिन्नोऽपि कौसल्यावाक्यश्रवणखिन्न इत्यर्थः ॥ १६ ॥

१८] ति० टी०–असंज्ञ इति छेदः ॥ १८ ॥

रा० टी०–पपातेति । तदा कौशल्योक्तिश्रवणकाले संभ्रान्तचेतनः उद्विग्नचित्तः अत एव असंज्ञः कर्तव्यविषयकज्ञानरहितो भरतः यदा लब्धसंज्ञोऽभवत् तदा बहुधा विलप्य तस्याः कौशल्यायाश्चरणौ उद्दिश्य पपात ॥ १८ ॥

गो० टी०–पपातेति । चरणौ प्रतीति शेषः । बहुधासंज्ञ इत्यत्र असंज्ञ इति पदच्छेदः ॥ १७ ॥

१९] ति टी०–विलपमानामिदं ते राज्यकामस्येत्यादि भाषमाणाम् ॥ १९ ॥

रा० टी०–एवमिति । एवमुक्तप्रकारेण विलपमानां तां कौशल्यां प्राञ्जलिर्भरतः प्रत्युवाच ॥ १९ ॥

गो० टी०–एवमिति । एवं विलपमानां पूर्वोक्तप्रकारेण विलपन्तीम् ॥ १८ ॥

२०] ति० टी०–अजानन्तम् अत्रत्यवृत्तान्तमिति शेषः । राघवे तद्विषये मम हृदि पूर्वं स्थितां विपुलां प्रीतिं जानास्येव इदानीं तु ततोऽधिका पितृबुद्धेरपि तत्रैवोपसंहारात् ॥ २० ॥

रा० टी०–तत्प्रतिवचनाकारमाह–आर्य इति । अकल्मषं कपटशून्यमजानन्तं रामप्रव्राजनविषयकज्ञानाभाववन्तं मां कस्माद्गर्हसे इदं राज्यं तव निर्यातितमित्यादि वदसि । नन्वेतदाज्ञापनं न विगर्हणेत्यत आह–राघवे रामे मे विपुलां प्रीतिं त्वं जानासि एतेन तं विना अहमप्यत्र स्थातुमशक्त इति व्यञ्जितं तेनाशक्यशापनं विगर्हणामूलमिति ध्वनितम् । अजानन्तमित्यनेन पूर्वं मन्त्रिज्ञाने रामप्रव्राजनं नैव स्यादिति सूचितम् ॥ २० ॥

गो० टी०–आर्य इति । अजानन्तम् अभिषेकादिकमिति शेषः ॥ १९ ॥

२१] ति० टी०–इममर्थं परबुद्धेरप्रत्यक्षत्वाच्छपथैः प्रत्यापयति–कृतेति । सत्यसंधत्वादिगुणविशिष्ट आर्यो रामो यस्यानुमते संमते सति वनं गतस्तस्य कृतशास्त्रानुगा गुरुशिक्षितश्रुतिस्मृतिमार्गगा बुद्धिर्मा भूत् इतोऽधिकानर्थाभावादयं परमः शपथः अतः परं प्रपञ्चः सामान्येन शपथकरणमपि विशेषतः स्वस्मिन्नपि पर्यवस्यतीति बोध्यम् ॥ २१ ॥

---

१ पुत्रो मे तप्यते तप इति गो. तप्यते म सुतस्तप इति रा. पाठः । २ तयेति रा. पाठः । ३ भरतस्तत्रेमिति गो. रा. पाठः । ४ ततः स्थिर इति गो. पाठः । ५ अकिल्बिषमिति गो. पाठः । ६ स्थिरमिति गो. पाठः । ७ कृता शास्त्रेति गो. पाठः ।

प्रैष्यं पापीयसां यातु सूर्यं च प्रति मेहतु । हन्तु पादेन गा सुप्ता यस्यार्योऽनुमते गतः ॥ २२ ॥
कारयित्वा महत्कर्म भर्ता भृत्यमनर्थकम् । अधर्मो योऽस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः॥२३ ॥
परिपालयमानस्य राज्ञो भूतानि पुत्रवत् । ततस्तु दुह्यतां पापं यस्यार्योऽनुमते गतः ॥ २४ ॥
बलिषड्भागमुद्धृत्य नृपस्यारक्षितुः प्रजाः । अधर्मो योऽस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः॥२५॥
संश्रुत्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणाम् । तां चापलपतां पापं यस्यार्योऽनुमते गतः ॥ २६ ॥
हस्त्यश्वरथसंबाधे युद्धे शस्त्रसमाकुले । मा स्म कार्षीत्सतां धर्मं यस्यार्योऽनुमते गतः ॥ २७ ॥

रा० टी०—रामविषयकस्वप्रीत्यज्ञातजनकर्तृकविपरीतसंभावनानिवृत्त्यर्थं भरतशपथमाह—कृतेत्यादिभिः । यस्य मम अनुमते संमतौ सत्यामार्यो ज्येष्ठो रामः गतः वनमिति शेषः । तस्य मम कृतशास्त्रानुगा कृता गुरुणा निष्पादिता शास्त्रानुगा धर्मशास्त्रानुवर्तिनी बुद्धिः कदाचन कस्मिंश्चित्काले मा भूत् विनश्येदेत्यर्थः एतेनैवं सत्यहमपि विनश्येयमिति व्यञ्जितम् । तथा च स्मृतिः ' बुद्धिनाशात्प्रणश्यति ' इति ॥ २१ ॥

गो० टी०—कौसल्यया स्वस्मिन्नारोपितं दोषं परिहर्तुं शपथवाक्यान्याह—कृतेत्यादिना । आर्यः रामः यस्यानुमते संमतौ सत्यां गतः तस्य शास्त्रानुगा कृता बुद्धिः गुरुणा विधिनेषधबोधकशास्त्रानुसारित्वेन शिक्षिता बुद्धिः कदाचन मा भूदिति संबन्धः यद्यहमार्यप्रवासने अनुमन्तास्मि तर्हि श्रुतिस्मृतिज्ञानात् प्रच्युतो भूयासमित्यर्थः । एवमुत्तरत्रापि सामान्यनिर्देशो भरतविषयतया योजनीयः 'निर्विशेषं न सामान्यम्' इति न्यायात् अत्र शपथव्याजेन धर्मविशेषाश्च शिक्ष्यन्ते मुनिनेति बोध्यम् । अत्र च सत्पुरुषविषयापराधे शास्त्रज्ञानभ्रंशो भवतीति सूचितम्॥२०॥

२२] ति० टी०—प्रैष्यं प्रेष्यत्वं, प्रतिमेहतु अभिमुखं मूत्रादि करोतु ॥ २२ ॥

रा० टी०—प्रैष्यमिति । पापीयसामतिशयानां हीनजात्यादीनां प्रैष्यं प्रेष्यत्वं दासत्वमित्यर्थः, यातु प्राप्नोतु । सूर्यं प्रति सूर्याभिमुखं मेहतु मूत्रपुरीषोत्सर्गं करोतु सूर्याभिमुखेन मेहने यत्पापं तत् प्राप्नोत्वित्यर्थः । अनेन सूर्यं प्रति मेहनं न कर्तव्यमिति सिद्धं, गां सुप्तां पादेन हन्तु पादेन गोहननपापं प्राप्नोतु । पादेन गोहननं दोषः सुप्तामित्यनेन स्वहननप्रवृत्तगोहननं न दोषायेत्युक्तम् ॥ २२ ॥

२३] ति० टी०—यो भर्ता भृत्यं महत्कर्म कारयित्वा अनर्थकं भृतिरहितं करोति तस्य योऽधर्मः सोऽस्यास्त्वन्वयः ॥ २३ ॥

रा० टी०—कारयित्वेति । भर्ता स्वामी महदुष्करं कर्म कारयित्वा भृत्यमनर्थकमर्थरहितं करोति तस्याप्यर्थं हरतीत्यर्थः । अस्य भर्तुः योऽधर्मः सः यस्यानुमते आर्यो गतः अस्त्वस्तु ॥ २३ ॥

गो० टी०—कारयित्वेति । यो भर्ता भृत्यं महत्कर्म कारयित्वा " हक्रोरन्यतरस्याम् " इति द्विकर्मकत्वम् अनर्थकं तं प्रयोजनशून्यं करोतीति शेषः, अस्य भर्तुः यः अधर्मः सोऽस्तु ॥ २३ ॥

२४] ति० टी०—ततस्तस्मै आद्यादित्वाच्चतुर्थ्यर्थे तसिः । यस्यानुमते गतस्तस्यास्त्विति शेषः ॥ २४ ॥

रा० टी०—परीति । पुत्रवद्भूतानि प्रजाः परिपालयमानस्य ततस्तस्य राज्ञो दुह्यतां जनानां पापं तस्य स्यादिति शेषः संबन्धसामान्यविवक्षया षष्ठी ॥ २४ ॥

गो० टी०—परिपालयमानस्येति । परिपालयमानस्य राज्ञः राज्ञि परिपालयति सात तं प्रति दुह्यतां पापं ततः तस्य ॥२३॥

२५] ति० टी०—बलिः करस्तद्रूपं षड्भागमुद्धृत्यादाय प्रजा अरक्षितुर्योऽधर्मः सोऽस्यास्तु ॥ २५ ॥

रा० टी०—बलीति । बलिः करः स एव षड्भागः षष्ठांशस्तमुद्धृत्य गृहीत्वा प्रजाः अरक्षितुः योऽधर्मः सोऽस्य स्यात् तृजन्तमेतत् अत एव न कर्मणि षष्ठी ॥ २५ ॥

गो० टी०—बलिषड्भागमिति । बलिषड्भागं बलिः करः 'बलिः पूजोपहारे च दैत्यभेदे करेऽपि च' इति वैजयन्ती । षष्ठो भागः षड्भागः बलिश्चासौ षड्भागश्चेति विशेषणसमासः उद्धृत्य आदाय ॥ २५ ॥

२६] ति० टी०—सत्रे यागे । संश्रुत्य प्रतिज्ञाय । अपलपतां तपस्विभ्यो ऋत्विग्भ्यः ॥ २६ ॥

रा० टी०—संश्रुत्येति । सत्रे यागे तपस्विभ्यो ऋत्विग्भ्यः दक्षिणां संश्रुत्य एतावत्परिमितां दास्यामीति प्रतिज्ञाय तां प्रतिज्ञाविषयीभूतदक्षिणामपलपतां नैव मया प्रतिज्ञातेति कथयतां पापं स्यात् । ' विप्रलपताम् ' इति भूषणपाठः॥२६॥

गो० टी०—संश्रुत्येति । सत्रे यागे तपस्विभ्यः व्रतोपवासशीलेभ्यः ऋत्विग्भ्यः यज्ञदक्षिणां संश्रुत्य प्रतिज्ञाय तां दक्षिणां विप्रलपतां विरुद्धोक्त्या अपलपताम् ॥ २६ ॥

२७] ति० टी०—सतां धर्ममपराङ्मुखतया युद्धम् ॥२७॥

रा० टी०—हस्तीति । हस्त्यश्वरथसंबाधे युद्धे हस्त्यादिसंकुले शस्त्रसमाकुले शस्त्रास्त्रव्याप्ते युद्धे सतां महात्मनां धर्मं पलायनाभावादिं यो मा स्म कार्षीत् पलायनादीनि वा कार्षीदित्यर्थः, तस्य यत्पापं तत्स्यादिति शेषः ॥ २७ ॥

---

१ प्रैष्यमिति गो. पाठः । २ तमिति गो. पाठः । ३ अरक्षत इति गो. पाठः । ४ विप्रलपतामिति गो. पाठः ।

उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता । स नाशयतु दुष्टात्मा यस्यार्योऽनुमते गतः ॥ २८ ॥
मा च तं व्यूढबाहुंसं चन्द्रभास्करतेजसम् । द्राक्षीद्राज्यस्थमासीनं यस्यार्योऽनुमते गतः ॥ २९ ॥
पायसं कृसरं छागं वृथा सोऽश्नातु निर्घृणः । गुरूंश्चाप्यवजानातु यस्यार्योऽनुमते गतः ॥ ३० ॥
गवां स्पृशतु पादेन गुरून्परिवदेत च । मित्रे द्वेष्टेत सोऽत्यर्थं यस्यार्योऽनुमते गतः ॥ ३१ ॥
विश्वासात्कथितं किंचित्परिवादं मिथः क्वचित् । विवृणोतु स दुष्टात्मा यस्यार्योऽनुमते गतः ॥ ३२ ॥
अकर्ता चाकृतज्ञश्च त्यक्तश्च निरपत्रपः । लोके भवतु विद्विष्टो यस्यार्योऽनुमते गतः ॥ ३३ ॥

गो० टी०—हस्त्यश्वरथसंबाध इति । सतां सराणां धर्मम् अपरावर्तनं मा स्म कार्षीद् परावर्तमानस्य यत्पापं तदस्त्वित्यर्थः ॥ २६ ॥

२८] ति० टी०—सुसूक्ष्मार्थं शास्त्रं वेदः । धीमता आचार्येणेति शेषः । ब्रह्मोज्झत्वरूपं पापं प्राप्नोत्वित्यर्थः ॥ २८ ॥

रा० टी०—उपदिष्टमिति । स दुष्टात्मा धीमता आचार्येण यत्नेन अतिप्रयत्नेन उपदिष्टं तद्बुद्धिविषयत्वं प्रापितं सुसूक्ष्मः अतिदुर्लक्ष्यः अर्थो यस्य तच्छास्त्रं नाशयतु अभ्यासाभावेन बुद्धिविषयरहितत्वं प्रापयतु तज्जन्यपापं प्राप्नुयादित्यर्थः ॥ २८ ॥

गो० टी०—उपदिष्टमिति । धीमता गुरुणा यत्नेनोपदिष्टं सुसूक्ष्मार्थं परलोकसाधकरहस्यार्थयुक्तं शास्त्रं वेदान्तादिविशिष्टार्थं नाशयतु विस्मरतु ॥ २७ ॥

२९] ति० टी०—व्यूढौ विशालौ बाहू अंसौ च यस्य तं रामं राज्यस्थमत एवासीनं सिंहासने मा द्राक्षीत् । तादृशरामदर्शनभाग्यरहितो भवतु ज्येष्ठानुवर्तनरहितो भवत्वित्यर्थः, तावत्पर्यन्तं जीवनं मा भूदिति वा ॥ २९ ॥

रा० टी०—मेति । व्यूढबाहुंसं व्यूढं विशालं बाहुंसं बाहू च अंसौ च तेषां समाहारो यस्य तं राज्यस्थं स्वीकृतस्वराज्यमत एव आसीनं सिंहासने स्थितं रामं स मा द्राक्षीद् अतिदुर्भगः स्यादित्यर्थः ॥ २९ ॥

गो० टी०—मेति । व्यूढबाहुंसं व्यूढौ संहतौ मांसलौ बाहू अंसौ च यस्य तम् 'व्यूढौ विन्यस्तसंहतौ' इत्यमरः । राज्यस्थं प्राप्तराज्यम् आसीनं सिंहासने आसीनं तं रामं मा द्राक्षीत् तादृशरामदर्शनभाग्यरहितो भवत्वित्यर्थः ॥ २८ ॥

३०] ति० टी०—कृसरं तिलमुद्गतण्डुलात्मकम् । छागं छागमांसं वृथा श्राद्धादिनिमित्तं विना अज्ञात अशनजं पापं प्राप्नोतु ॥ ३० ॥

रा० टी०—पायसमिति । पायसं पयःपक्वं कृसरं मिश्रितिलमुद्गतण्डुलं छागं छं निर्मलत्वमगं न गच्छति यस्य तं ताम्बूलादिमित्यर्थः । किंच छो निर्मल एव अगो वृक्षस्तं तदवयवीभूततुलसीपत्रकमलपत्रादिकमित्यर्थः । वृथा परमात्मसमर्पणमन्तरा स निर्घृणः शास्त्रत्यागहेतुकभविष्यद्दण्डाश्रयीभूतस्वविषयकदयारहितः अज्ञातु गुरून् पित्रादींश्च अवजानातु तदनादरं करोतु अवज्ञाजनितपापं प्राप्नोत्वित्यर्थः ॥ ३० ॥

गो० टी०—पायसमिति । कृसरं तिलौदनं छागम् अमांसमात्रोपलक्षणमेतद् वृथाऽश्नातु देवतापित्रतिथिनिवेदनमन्तरेण भुङ्क्तामित्यर्थः । अवजानातु प्रत्युत्थानाभिवादनादिकं न करोत्वित्यर्थः ॥ २९ ॥

३१] ति० टी०—गवामिति । अङ्गमिति शेषः । परिवदेतापवदेत् मित्रे मित्राय ॥ ३१ ॥

रा० टी०—गवामिति । स गवां गाः पादेन स्पृशतु गुरून् पित्रादीन् परिवदेत दोषविशिष्टत्वेन कथयेत् । मित्रे मित्राय अत्यर्थमत्यन्तं द्वेष्टेत 'गां च' इति भूषणपाठः ॥ ३१ ॥

गो० टी०—गा इति । गाः पादेन स्पृशतु । हन्तु पादेनेत्यत्र हननमुक्तम् इह तु पादस्पर्शोऽपि पापहेतुरित्युच्यते । परिवदेत् अपवदेत्, मित्रे द्वेष्टेत मित्राय द्वेष्ट्वित्यर्थः ॥ ३० ॥

३२] ति० टी०—विश्वासादयं क्वापि न प्रकटयिष्यतीति विश्वासात् । मिथो रहसि 'मिथोऽन्योन्यरहस्ययोः' । किंचित्परिवादं कस्यचित्सुरापानादिदोषम् ॥ ३२ ॥

रा० टी०—विश्वासादिति । स दुष्टात्मा विश्वासात् अयं ममातीव मित्रमित्यप्रकटनीयमदुक्तं क्वापि न प्रकटयितेति निश्चयात् मिथो रहसि कथितं किंचित्परिवादमभक्ष्यभक्षणादिकं विवृणोतु सर्वत्र प्रकाशयतु 'मिथोन्योन्यरहस्ययोः' इति कोशः॥३२॥

गो० टी०—विश्वासादिति । परिवादम् अपवादम् 'अपवादोपकोशनिर्वादावर्णपरिवादाः' इति हलायुधः । मिथः रहसि 'मिथोऽन्योन्यरहस्ययोः' इति वैजयन्ती । विश्वासाद्गृहः कथितस्य परिवादस्य क्वचिदन्यत्र प्रकटीकरणं पातकमिति भावः ॥३१॥

३३] ति० टी०—अकर्ता प्रत्युपकारा[3]कर्ता अत एवाकृतज्ञः, अत एव त्यक्तः सज्जनैः । 'त्यक्तात्मा' इति पाठे सज्जनैस्त्यक्त आत्मा स्वरूपं यस्येत्यर्थः । उद्बन्धनादिना त्यक्तदेह इत्यर्थं तीर्थः । अत एव लोके विद्विष्टश्च भवतु॥३३॥

रा० टी०—अकर्तेति । सः अकर्ता प्रत्युपकाराकारकः अत एव अकृतज्ञः प्रत्युपकारविषयकाज्ञानवानत एव त्यक्तः सज्जनैर्बहिष्कृतः निरपत्रपः लज्जारहितः अत एव विद्विष्टः सर्वजनद्वेषविषयीभूतो भवतु 'त्यक्तात्मा' इति पाठान्तरम्॥३३॥

गो० टी०—अकर्तेति । अकर्ता प्रत्युपकारस्याकर्ता अथाप्यकृतज्ञः आभ्यामेकं पापमुक्तम् । त्यक्तात्मा सद्भिः परिहृतः

---

१ चन्द्रार्कसमतेजसमिति गो. पाठः । २ गाश्चेति गो. पाठः । ३ वदेत्स्वयमिति गो. पाठः । ४ ऽत्यन्तमिति गो. पाठः । ५ हीति गो. पाठः । ६ त्यक्तात्मेति गो. पाठः । ७ विद्वेष्य इति गो. पाठः ।

पुत्रैर्दासैश्च भृत्यैश्च स्वगृहे परिवारितः । स एको मृष्टमश्नातु यस्यार्योऽनुमते गतः ॥ ३४ ॥
अप्राप्य सदृशान्दारानननपत्यः प्रमीयताम् । अनवाप्य क्रियां धर्म्यां यस्यार्योऽनुमते गतः ॥ ३५ ॥
मात्मनः संततिं द्राक्षीत्स्वेषु दारेषु दुःखितः । आयुःसमग्रमप्राप्य यस्यार्योऽनुमते गतः ॥ ३६ ॥
राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते । भृत्यत्यागे च यत्पापं तत्पापं प्रतिपद्यताम् ॥ ३७ ॥
लाक्षया मधुमांसेन लोहेन च विषेण च । सदैव बिभृयाद्भृत्यान्यस्यार्योऽनुमते गतः ॥ ३८ ॥
संग्रामे समुपोढे च शत्रुपक्षभयंकरे । पलायमानो वध्येत यस्यार्योऽनुमते गतः ॥ ३९ ॥
कपालपाणिः पृथिवीमटतां चीरसंवृतः । भिक्षमाणो यथोन्मत्तो यस्यार्योऽनुमते गतः ॥ ४० ॥
मद्यप्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यशः । कामक्रोधाभिभूतश्च यस्यार्योऽनुमते गतः ॥ ४१ ॥
मास्या धर्मे मनो भूयादधर्मं स निषेवताम् । अपात्रवर्षी भवतु यस्यार्योऽनुमते गतः ॥ ४२ ॥

अथापि निरपत्रपः निर्लज्जः अकृतप्रायश्चित्त इति यावत्, इदमेकं पापम् ॥ ३३ ॥

३४] ति० टी०—एको मृष्टमभातु, इतरेष्वभोजितेषु॥३४॥

रा० टी०—पुत्रैरिति । सः पुत्रादिभिः स्वगृहे परिवारितो युक्तोऽपि एक एव मृष्टमभातु ॥ ३४ ॥

गो० टी०—पुत्रदारैरिति । मृष्टमभातु इतरेषु कदन्नभुक्षु स्वयं मृष्टं समीचीनमन्नमभातु ॥ ३३ ॥

३५] ति० टी०—प्रमीयतां म्रियताम् । धर्म्यां क्रियामग्निहोत्रादिकाम् । म्रियतामित्युक्तकर्षः ॥ ३५ ॥

रा० टी०—अप्राप्येति । सः सदृशान् कुलशीलादिना स्वतुल्यान् दारान् भार्याः अप्राप्य अनपत्यः सन् धर्म्यां धर्महितां क्रियां च अनवाप्य प्रमीयतां म्रियताम् ॥ ३५ ॥

गो० टी०—अप्राप्येति। सदृशान्समानकुलान् धर्म्यां क्रियाम् अग्निहोत्रादिकं च अप्राप्य अनपत्यः सन् प्रमीयताम् ॥ ३४ ॥

३६] ति० टी०—दुःखित इत्यस्य भवत्विति शेषः । अप्राप्येत्यस्य म्रियतामिति शेषः ॥ ३६ ॥

रा० टी०—मेति । सः स्वेषु दारेषु आत्मनः सन्ततिं मा द्राक्षीत् अत एव दुःखितः सन् आयुः समग्रमप्राप्य प्रमीयतामित्युक्तकर्षः ॥ ३६ ॥

गो० टी०—अप्राप्येत्यादिविवरणम्—आत्मन इति । अनेन ऋणापकरणं विना ब्रह्मचर्यादेव संन्यासः प्रतिषिध्यते । अविरक्तविषयमिदमिति चेन्न, ब्रह्मचर्यादेव प्रव्रजेदित्यादेर्दाराद्याभावविषयत्वात् तत्रैव हि इतरेत्यनेनायमर्थो दर्शितः ॥ ३५ ॥

३७] ति० टी०—राजस्त्रीत्यादौ यस्यार्य इत्याद्यनुषङ्गः॥३७॥

रा० टी०—राजेति । राजादीनां वधे यत्पापं भृत्यत्यागे अपराधरहितसमीचीनसेवकत्यागे यत्पापमुच्यते धर्मशास्त्रे इति शेषः, तत्पापं सः प्रतिपद्यताम् ॥ ३७ ॥

गो० टी०—राजस्त्रीबालवृद्धानामिति । राजस्त्रीत्यत्रापि यस्यार्योऽनुमते गत इत्यनुषञ्जनीयम् ॥ ३६ ॥

३८] ति० टी०—लाक्षयेति । पतनायतासंपादकवस्तुविक्रयेणेत्यर्थः । भृत्यान्भरणीयान्पुत्रदारादीन् ॥ ३८ ॥

रा० टी०—लाक्षयेति । सः लाक्षादिनिषिद्धक्रयविक्रयादिलब्धद्रव्यादिना भृत्यान्भर्तव्यान्पुत्रादीन्सदैव बिभृयात् ॥३८॥

गो० टी०—लाक्षयेति। भृत्यान् भरणीयान् लाक्षादिविक्रयलब्धद्रव्येण बिभृयाद्रक्षेदित्यर्थः 'लाक्षालवणमांसानि वर्जनीयानि विक्रये' इति स्मृतेः। 'अप्यकार्यशतं कृत्वा' इत्यस्यापवादोऽयम् ॥ ३७ ॥

३९] ति० टी०—समुपोढे प्राप्ते ॥ ३९ ॥

रा० टी०—संग्राम इति । सः शत्रुपक्षभयंकरे शत्रुपक्षाणां भयं करोति उत्पादयति तस्मिन्संग्रामे समुपोढे प्राप्ते सति पलायमानः सन् वध्येत रिपुणेति शेषः ॥ ३९ ॥

गो० टी०—संग्राम इति । समुपोढे निकटे 'उपोढो निकटोढयोः' इति वैजयन्ती ॥ ३८ ॥

४०-४१] ति० टी०—चीरं जीर्णमलिनवस्त्रम् । ब्रह्महा भवत्विति शेषः । तादृशी निषिद्धाचरणा प्रव्रज्या भवत्विति वा भावः ॥ ४० ॥ ४१ ॥

रा० टी०—कपालेति । सः कपालपाणिः सन् उन्मत्त इव पृथिवीमटताम् ॥ ४० ॥

गो० टी०—कपालपाणिरिति । अटतां चरतु चीरं मलिनं जीर्णवस्त्रम् अनेन शैवमतप्रवेशो निन्द्यते ॥ ३९ ॥

रा० टी०—मद्य इति । सः कामादिभिः अभिभूतः पराभूतः सन्मद्यादिषु नित्यशः प्रसक्तो भवतु ॥ ४१ ॥

गो० टी०—पाने प्रसक्त इति । स्पष्टम् ॥ ४० ॥

४२] ति० टी०—अपात्रवर्षी अपात्रे दाता ॥ ४२ ॥

रा० टी०—मेति । तस्य अस्य धर्मे मनो मा भूयात् अत एव सः अधर्मं निषेवतामत एव अपात्रवर्षी कुपात्रेऽदेयकदाता भवतु ॥ ४२ ॥

गो० टी०—मा स्मेति। अपात्रवर्षी अपात्रे बहुदायी॥४१॥

---

१ पुत्रैरेति गो. रा. पाठः । २ स्मेति गो. पाठः । ३ पाने प्रसक्त इति गो. मद्ये प्रसक्त इति रा. पाठः । ४ त्विति गो. पाठः । ५ स्मेति गो. मद्यनेति रा. पाठः । ६ त्विति गो. पाठः ।

संचितान्यस्य वित्तानि विविधानि सहस्रशः । दस्युभिर्विप्रलुप्यन्तां यस्यार्योऽनुमते गतः ॥ ४३ ॥
उभे संध्ये शयानस्य यत्पापं परिकल्प्यते । तच्च पापं भवेत्तस्य यस्यार्योऽनुमते गतः ॥ ४४ ॥
यदग्निदायके पापं यत्पापं गुरुतल्पगे । मित्रद्रोहे च यत्पापं तत्पापं प्रतिपद्यताम् ॥ ४५ ॥
देवतानां पितॄणां च मातापित्रोस्तथैव च । मा स्म कार्षीत्स शुश्रूषां यस्यार्योऽनुमते गतः ॥ ४६ ॥
सतां लोकात्सतां कीर्त्याः सञ्जुष्टात्कर्मणस्तथा । भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥ ४७ ॥
अपास्य मातृशुश्रूषामनर्थे सोऽवतिष्ठताम् । दीर्घबाहुर्महावक्षा यस्यार्योऽनुमते गतः ॥ ४८ ॥
बहुभृत्यो दरिद्रश्च ज्वररोगसमन्वितः । समायात्सततं क्लेशं यस्यार्योऽनुमते गतः ॥ ४९ ॥
आशामाशंसमानानां दीनानामूर्ध्वचक्षुषाम् । अर्थिनां वितथां कुर्याद्यस्यार्योऽनुमते गतः ॥ ५० ॥
मायया रमतां नित्यं पुरुषः पिशुनोऽशुचिः । राज्ञो भीतस्त्वधर्मात्मा यस्यार्योऽनुमते गतः ॥ ५१ ॥
ऋतुस्नातां सतीं भार्यामृतुकालानुरोधिनीम् । अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गतः ॥ ५२ ॥

४३] ति० टी०–दस्युभिर्विप्रलुप्यन्ताम्, त्यागभोगविहीनानि भवन्त्विति भावः ॥ ४३ ॥

रा० टी०–सम्मिति । तस्य अस्य सहस्रशः बहूनि विविधानि अनेकप्रकाराणि संचितानि अर्जितानि वित्तानि धनानि दस्युभिश्चौरैः विप्रलुप्यन्तां बलात्प्रगृह्यन्ताम् ॥ ४३ ॥

गो० टी०–संचितानीति । दस्युभिस्तस्करैः ॥ ४२ ॥

४४-४५] ति० टी०–उभे संध्ये व्याप्येति शेषः॥४४॥४५॥

रा० टी०–उभे इति । उभे संध्ये प्राप्य शयानस्य जनस्य यत्पापं परिकल्पते प्राप्नोति तत्पापं तस्य भवेत् ॥ ४४ ॥

गो० टी०–उभे इति । उभयोः संध्ययोः ॥ ४३ ॥

रा० टी०–यदिति । अग्निदायकादौ यत्पापं तत्पापं सः प्रतिपद्यताम् ॥ ४५ ॥

गो० टी०–यदिति । गुरुतल्पगे गुरुदारगे ॥ ४४ ॥

४६] ति० टी०–देवतानामिति । देवतादिशुश्रूषारहितस्य यत्पापं तत्पापं स प्रतिपद्यतामित्यर्थः ॥ ४६ ॥

रा० टी०–देवतानामिति । सः देवतादीनां शुश्रूषां सेवां मा कार्षीत् ॥ ४६ ॥

गो० टी०–देवतानामिति । देवानां शुश्रूषा अग्निहोत्रादि कर्म संभृतैराज्यचरुपशुपुरोडाशादिभिः प्रीणनं पितॄणां तु उपरागादिषु मातापितृमरणतिथ्यादिषु च पूर्वोक्तैरन्यैश्च तिलादिभिराराधनम् । पितृशुश्रूषयैव मृतमातापितृशुश्रूषाग्रहणसंभवात् मातापित्रोरित्यत्र जीवतोरिति विवक्षितम् ॥ ४६ ॥

४७] ति० टी–सतां कीर्त्याः सद्भिः क्रियमाणश्लाघायाः । भश्यतु सा मा भूत्तस्येत्यर्थः ॥ ४७ ॥

रा० टी०–सतामिति । सः सतां सज्जनसंबन्धिनो लोकात्सतां कीर्त्याश्च संजुष्टात्सज्जनसेव्यात्कर्मणश्च भश्यतु सल्लोकादीन प्राप्नोत्वित्यर्थः ॥ ४७ ॥

गो० टी०–सतामिति । सतां कीर्त्याद् सद्भिः क्रियमाणश्लाघनाद् संजुष्टात्सत्सेवितात् ॥ ४६ ॥

४८] ति० टी०–अनर्थे जीवत्स्वाधनर्थे ॥ ४८ ॥

रा० टी०–अपास्येति । सः मातृशुश्रूषामपास्य त्यक्त्वा अनर्थे अर्थविध्वंसके मार्गे अवतिष्ठताम् ॥ ४८ ॥

गो० टी०–अपास्येति । पुनर्मातृशुश्रूषाग्रहणं तत्यागे प्रत्यवायभूयस्तया तन्नित्यतया च मातृशुश्रूषा हि नित्या यतस्तस्यां पतितायामपि शुश्रूषां विदधति स्मृतयः । अनर्थे अधर्मे ॥ ४७ ॥

४९] ति० टी०–समायात्प्राप्नुयात् ॥ ४९ ॥

रा० टी०–बहुभृत्य इति । सः बहुभृत्यादिविशिष्टः सन् क्लेशं समायात्प्राप्नुयात् ॥ ४९ ॥

गो० टी०–बहुपुत्र इति । बहुपुत्रस्यापि धनिनो दुःखाभावात् अपुत्रस्य दारिद्र्येऽपि भरणीयाल्पतया क्लेशाल्पतेति च विशेषणद्वयम् ॥ ४८ ॥

५०] ति० टी०–अर्थिनामाशामिति संबन्धः । आशंसमानानां स्तुवताम् ऊर्ध्वचक्षुषां दातृसुखनिरीक्षकाणाम्॥ ५० ॥

रा० टी०–आशामिति । सः आर्यः स्ववाञ्छामाशंसमानानां कथयतामत एव ऊर्ध्वचक्षुषां तत्स्तवनार्थं कृतोर्ध्वदृष्टीनामर्थिनामाशां मनोरथं वितथां निष्फलं कुर्यात् । आशामित्युभयान्वयि ॥ ५० ॥

गो० टी०–आशामिति । आशंसमानानां स्तुवताम् ऊर्ध्वचक्षुषाम् उन्नतासनस्थदातृसुखनिरीक्षकाणाम् अर्थिनाम् आशां वितथां कुर्यात् ॥ ४९ ॥

५१] ति० टी०–मायया वञ्चनया राज्ञो भीत इति भयकारणं पिशुनत्वाद्येव ॥ ५१

रा० टी०–माययेति । सः जनः पिशुनः सूचकः अत एव अशुचिः अत एव अधर्मात्मा अत एव राज्ञो भीतः सन्मायया नानाकपटवेषेण नित्यं रमताम् ॥ ५१ ॥

गो० टी०–माययेति । मायया वञ्चनया रमतां सक्तो भवतु ॥ ५० ॥

५२] ति० टी०–ऋतुकालानुरोधिनीमृतुस्नानकालत्वात्स्वसंनिहिताम् ॥ ५२ ॥

१ कल्प्यते इति रा. पाठः । २ कीर्त्यासंजुष्टादिति गो. कीर्त्याः सञ्जुष्टादिति रा. पाठः । ३ बहुपुत्र इति गो. पाठः । ४ स भूयात्सततं क्लेशमिति गो. पाठः । ५ परेष इति गो. रा. पाठः ।

[1]विप्रलुप्तप्रजातस्य दुष्कृतं ब्राह्मणस्य यत् । तदेतत्प्रतिपद्येत यस्यार्योऽनुमते गतः ॥ ५३ ॥
ब्राह्मणायोद्यतां पूजां विहन्तु कलुषेन्द्रियः । बालवत्सां च गां [2]दोग्ध्वर्यस्यार्योऽनुमते गतः ॥ ५४ ॥
धर्मदारान्परित्यज्य परदारान्निषेवताम् । त्यक्तधर्मरतिर्मूढो यस्यार्योऽनुमते गतः ॥ ५५ ॥
पानीयदूषके पापं तथैव विषदायके । यत्तदेकः स लभतां यस्यार्योऽनुमते गतः ॥ ५६ ॥
[3]तृषार्ते सति पानीये विप्रलम्भेन [4]योजयन् । यत्पापं लभते तत्स्याद्यस्यार्योऽनुमते गतः ॥ ५७ ॥
भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः । [5]तेन पापेन युज्येत यस्यार्योऽनुमते गतः ॥ ५८ ॥
[6]एवमाश्वासयन्नेव दुःखार्तोऽनुपपात ह । विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ॥ ५९ ॥
तदा तं शपथैः कष्टैः शपमानमचेतनम् । भरतं शोकसंतप्तं कौसल्या वाक्यमब्रवीत् ॥ ६० ॥

रा० टी०–ऋत्विति । सः पुरुषः ऋतुस्नातामत एव ऋतुकालानुरोधिनीमृतुकालहेतुकपतिसंनिधिप्राप्तिमतीं सतीं भार्यामतिवर्तेत तस्त्वीकारं न कुर्यात् ॥ ५२ ॥

गो० टी०–ऋतुस्नातामिति । ऋतुकालानुरोधिनीम् ऋतुस्नानादिवसं स्वसंनिहिताम् ॥ ५२ ॥

५३] ति० टी०–विप्रलुप्तप्रजातस्यानाद्यदानेन प्रनष्टसंतानस्य स्त्रीद्वेषाद्वा तथाभूतस्य, यद्वा विप्रलुप्ता विवर्जिता प्रजाता जातापत्या जाया येन तस्य ॥ ५३ ॥

रा० टी०–विप्रलुप्तेति । विप्रलुप्ताः अन्नाद्यदानेन विनष्टाः प्रजाताः पुत्राः यस्य तस्य ब्राह्मणस्य यदुष्कृतं तदेतत्पापं सः प्रतिपद्येत ॥ ५३ ॥

गो० टी०–विप्रलुप्तप्रजातस्येति । विप्रलुप्तप्रजातस्य नष्टापत्यस्य संततिहीनस्येत्यर्थः. तदेव दुष्कृतं प्रतिपद्येत ॥५३॥

५४] ति० टी०–विहन्तु विघ्नयतु । बालवत्सां दोग्ध्वः शास्त्रोक्तदोहनाधिकं दोग्धुः ॥ ५४ ॥

रा० टी०–ब्राह्मणायेति । सः पुरुषः ब्राह्मणाय उद्यतां केनचित्प्रापितां पूजां सत्कृतिं विहन्तु ब्राह्मणनिन्दादिना वारयतु बालः अल्पकालको वत्सो यस्यास्तां गां च दोग्धु ॥५४॥

गो० टी०–ब्राह्मणायेति । बालवत्सामनिर्दशाम्॥५५॥

५५] ति० टी०–परदारान्निषेवता यत्पापं तत्पापं प्रतिपद्यताम् । मृदः भूयादिति शेषः ॥ ५५ ॥

रा० टी०–धर्मेति । सः पुरुषः धर्मदारान्पाणिगृहीतीं परित्यज्य त्यक्तधर्मरतिः सन् परदारान्निषेवताम् ॥ ५५ ॥

गो० टी०–धर्मदारानिति । निषेवतां भजताम् ॥५२॥

५६] ति० टी०–एको यत्पापद्वयं तदेक एव लभतामित्यर्थः ॥ ५६ ॥

रा० टी०–पानीयेति । पानीयदूषके कूपादिविघातके यत्पापं तत्पापं सः एकः असहायः सन् लभताम् ॥ ५६ ॥

गो० टी०–पानीयेति । पानीयदूषके विषदायके च यत्पापं तत् द्वयम् एको लभतामित्यर्थः ॥ ५४ ॥

५७] ति० टी०–विप्रलम्भेन वञ्चनया योजयन् अप्रयच्छन्निति यावत् ॥ ५७ ॥

रा० टी०–तृषार्तमिति । पानीये जले सति तृषार्तं पिपासार्दितं जनं विप्रलम्भेन अत्र जलं नास्तीति वञ्चनया योजयन्सन्यत्पापं लभते तत्पापं तस्य स्यात् ' योजयेत् ' इति भूषणपाठः ॥ ५७ ॥

गो० टी०–तृष्णार्तमिति । पानीये सति गृहे विद्यमाने सति विप्रलम्भेन वञ्चनया यो योजयेत् न ददातीत्यर्थः, तस्य यत्पापं तल्लभेत ॥ ५६ ॥

५८-६०] ति० टी०–भक्त्या शिवविष्ण्वादिदेवताभक्त्या। मार्गं तत्तदुपोद्बलकशैववैष्णवादिशास्त्रमाश्रित्यायमुत्कृष्टोऽयं नेति विवदमानेषु यत्पापं यच्च तयोर्विवादं पश्यतः शृण्वतः पापं तेन पापेन स युज्येतेत्यर्थः । ' तस्य पापेन ' इति पाठे तेषां यत्पापं तेन यस्यानुमते गतस्तस्य योगः संबन्धो भूयादित्यर्थः । भावे च युज्येतेति प्रयोगः । ' अयं परस्त्वयं नेति सैरक्षाभिनिवेशिनः । यातुधाना भवन्त्येव पिशाचाश्च न संशयः ॥ ' इति शिवपुराणोक्तेः । ' यो ब्रह्मविष्णुरुद्राणां भेदं युक्तिनिवेशतः । साध्येदुदरव्याधियुक्तो भवति मानवः ॥ इति कर्मविपाकशास्त्रोक्तेश्च । अत्र विवदमानानां जयोपायं ज्ञात्वा तदकथयतः पापमिति तीर्थव्याख्या । द्वयोः साम्यस्थापनपूर्वकं तेषां कलहशमनमकुर्वतः कलहप्रियस्य यत्पापमिति कतकव्याख्या ॥ ५८–६० ॥

रा० टी०–भक्त्येति । विवदमानेषु वादिप्रवादिषु भक्त्या अन्यतरविषयकप्रीत्या मार्गं स्वप्रीतिविषयीभूतजनजयरीतिमाश्रित्य विचार्य पश्यतः स्वप्रीतिविषयीभूतजनं चौर्येण बोधयतस्तस्य मध्यस्थस्य पापेन सः पुरुषः युज्येत ॥ ५८ ॥

गो० टी०–भक्त्येति । विवदमानेषु वादिप्रतिवादिषु विवादं कुर्वत्सु भक्त्या एकस्मिन् स्नेहेन मार्गं जयोपायमाश्रित्य पश्यतः ब्रुवतस्तस्य पापेन युज्येतेति संबन्धः ॥ ५७–५९ ॥

रा० टी०–एवमिति । पतिपुत्राभ्यां विहीनां कौसल्या-

१ ५३।५४।५५।५६ श्लोकाः ५४।५६।५३ । ५५ स्थानेषु गो. पाठे । २ तदेवेति गो. पाठः । ३ दोग्ध्विति गो. रा. पाठः । ४ तृष्णार्तमिति गो. पाठः । ५ योजयेदिति गो. पाठः । ६ ऊर्ध्वमिति गो. रा. पाठः । ७ एतच्छ्लोकभगार्धयोर्व्यत्यासेन गो. पाठः । ८ निषण्णातेति रा. पाठः । ९ तथा स्थिति गो. पाठः ।

मम दुःखमिदं पुत्र भूयः समुपजायते । शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥ ६१ ॥
दिष्ट्या न चलितो धर्मादात्मा ते सहलक्षणः । वत्स सत्यप्रतिज्ञो हि सतां लोकानवाप्स्यसि ॥ ६२ ॥
इत्युक्त्वा चाङ्कमानीय भरतं भ्रातृवत्सलम् । परिष्वज्य महाबाहुं रुरोद भृशदुःखिता ॥ ६३ ॥
एवं विलपमानस्य दुःखार्तस्य महात्मनः । मोहाच्च शोकसंरम्भाद्भृशं लुलितं मनः ॥ ६४ ॥
लालप्यमानस्य विचेतनस्य प्रनष्टबुद्धेः पतितस्य भूमौ ।
मुहुर्मुहुर्निःश्वसतश्च दीर्घं सा तस्य शोकेन जगाम रात्रिः ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ।

वसिष्ठानुयुक्तो भरतः पितुर्दहं नैलद्राप्या निःसार्य राजोचितद्रव्यैः संस्कृत्य सरय्वामुदकक्रियां विधायायोध्यां प्राप ।

तमेवं शोकसंतप्तं भरतं कैकयीसुतम् । उवाच वदतां श्रेष्ठो वसिष्ठः श्रेष्ठवागृषिः ॥ १ ॥

मेवमाश्वासयन्सन्नेव दुःखार्तः दुःखदर्शनेनातिदुःखितो भरतः निपपात ॥ ६९ ॥

रा० टी०–तदेति । कष्टैः दुष्करैः शपथैः शपमानं शपथं कुर्वन्तं शोकसंतप्तमत एव अचेतनं भरतं कौशल्या अब्रवीत्॥६०॥

६१] ति० टी०–भूयोऽन्यधिकं दुःखं हि यदेवं कष्टैः शपथैः शपमानो मे प्राणानुपरुणत्सि पीडयसे ॥ ६१ ॥

रा० टी०–तद्वचनाकारमाह–ममेति । हे पुत्र ! शपथैः शपमानस्त्वं यद्यपि मे प्राणानुच्छ्वासानुपरुणत्सि निरोधयसि तथापि इदं त्वच्छपथकरणं मम भूयोऽधिकं दुःखं समुपजायते जनयति त्वदुःखदर्शनेनाधिकदुःखं प्राप्नोमीत्यर्थः ॥ ६१ ॥

गो० टी०–ममेति । उपरुणत्सि पीडयसीत्यर्थः, यद्वा प्राणानुपरुणत्सि रामवियोगेन मे निर्गच्छतः प्राणान् स्थापयसि शपथकरणेन ममाश्वासो जात इत्यर्थः ॥ ६० ॥

६२] ति० टी०–अथ विशुद्धभावं ज्ञात्वाऽनुगृह्णाति–दिष्ट्येति । आत्मान्तःकरणं लक्ष्मणैः शुभलक्षणैः सहितः सहलक्ष्मणस्ते आत्मेत्यर्थः । हे वत्स ! हि यदि सत्यप्रतिज्ञो भविष्यसि तदा सतां लोकानवाप्स्यसि । कैकेय्यये कृतां रामानयनप्रतिज्ञां सत्यां कुर्विति व्यङ्ग्यम् ॥ ६२ ॥

रा० टी०–दिष्ट्येति । हे वत्स ! यस्य ते आत्मा मनः धर्मान्न चलितः सः सहलक्षणः सकलसल्लक्षणसंपन्नः सत्यप्रतिज्ञस्त्वं सतां रामादीनां लोकान्कृपादृष्टिपथानवाप्स्यसि दिष्ट्या भाग्येनैतत् । ' सहलक्ष्मणः ' इति भूषणपाठः । लक्ष्मणवत्सत्यप्रतिज्ञोऽसीति तद्व्याख्या ॥ ६२ ॥

गो० टी०–दिष्ट्येति । दिष्ट्या भाग्येन आत्मा अन्तःकरणं धर्मात् ज्येष्ठानुवर्तनधर्मात् मे मत्तः सहलक्ष्मणः सत्यप्रतिज्ञोऽसि लक्ष्मणवत् सत्यप्रतिज्ञोऽसीत्यर्थः, अतः सतां लोकानवाप्स्यसि ॥ ६१ ॥ ६२ ॥

६३] ति० टी०–एवमनुगृह्य पुत्रोचितकृत्येनाश्वासयति–इत्युक्त्वेति ॥ ६३ ॥

रा० टी०–इतीति । इत्युक्त्वा रुरोद ॥ ६३ ॥

६४] ति० टी०–शोकसंरम्भाच्छोकाधिक्यात् तत एव मोहः लुलितं क्षुभितम् ॥ ६४ ॥

रा० टी०–भरतवृत्तमाह–एवमिति । एवमुक्तप्रकारेण विलपमानस्य शपथादि कुर्वतो हे लक्ष्मण भरतस्य मनो मोहात्कर्तव्यविवेकाभावादत एव शोकसंरम्भाच्छोकातिवेगाद्भृशं लुलितं चञ्चलं बभूव । ' शोकसंरोधात् ' इति भूषणपाठः ॥ ६४ ॥

गो० टी०–एवमिति । एवं विलपमानस्य पूर्वोक्तशपथरूपेण विलपतः शोकसंरोधात् शोककृतसंरोधात् ॥ ६३ ॥

६५] ति० टी०–दीर्घं यथा भवति तथा रात्रिः रात्रिशेषः पाठान्तरे घर्मोष्णं यथा भवति तथा ॥ ६२ ॥

अत्रैकश्लोकोऽधिक इति कतकसंख्यया ज्ञायते ॥

इति श्रीमाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चसप्ततितमः सर्गः ॥७५॥

रा० टी०–लालप्यमानस्येति । लालप्यमानस्य उक्तप्रकारेण बहु कथयतः विचेतनस्य कार्याकार्यविवेकरहितस्य अत एव प्रनष्टबुद्धेः विध्वस्तकर्तव्यविषयकनिश्चयस्य अत एव भूमौ पतितस्य अत एव दीर्घं मुहुर्मुहुर्निःश्वसतस्तस्य भरतस्य शोकेन रात्रिर्जगाम ॥ ६५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोरत्नाख्ययोध्याकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

गो० टी०–लालप्यमानस्येति । लालप्यमानस्य भृशं प्रलपतः विचेतनस्य मूर्च्छितस्य प्रनष्टबुद्धेः क्षुभितान्तःकरणस्य घर्मम् उष्णं यथा भवति तथा निःश्वसतः ॥ ६४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

१] ति० टी०–तमिति । वसिष्ठ. भरतागमनं श्रुत्वाऽऽगत इति शपः ॥ १ ॥

---

१ लक्ष्मण इति गो. पाठः । २ म इति गो. पाठः । ३ संरोधादिति गो. पाठः । ४ धर्ममिति गो. पाठः । ५ केकयीति रा. पाठः ।

अलं शोकेन भद्रं ते राजपुत्र महायशः । प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥ २ ॥
वसिष्ठस्य वचः श्रुत्वा भरतो धैरणीं गतः । प्रेतकृत्यानि सर्वाणि कारयामास धर्मवित् ॥ ३ ॥
उद्धृत्य तैलसंसेकात्स तु भूमौ निवेशितम् । आपीतवर्णवदनं प्रसुप्तमिव भूमिपम् ॥ ४ ॥
संवेश्य शयने चाग्र्ये नानारत्नपरिष्कृते । ततो दशरथं पुत्रो विललाप सुदुःखितः ॥ ५ ॥
किं ते व्यवसितं राजन्प्रोषिते मय्यनागते । विवास्य रामं धर्मज्ञं लक्ष्मणं च महाबलम् ॥ ६ ॥
क्व यास्यसे महाराज हित्वेमं दुःखितं जनम् । हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्मणा ॥ ७ ॥
योगक्षेमं तु तेऽव्यग्रं कोऽस्मिन्कल्पयिता पुरे । त्वयि प्रयाते स्वस्तात रामे च वनमाश्रिते ॥ ८ ॥
विधवा पृथिवी राजंस्त्वया हीना न राजते । हीनचन्द्रेव रजनी नगरी प्रतिभाति माम् ॥ ९ ॥
एवं विलपमानं तं भरतं दीनमानसम् । अब्रवीद्वचनं भयो वसिष्ठस्तु महामुनिः ॥ १० ॥

रा० टी०–भरतशोकानन्तरकालिकं वृत्तमाह–तमिति । एवं शोकसंतप्तं भरतं श्रेष्ठा वाक् भरतकर्तृकसत्कृतिवचनं यस्मै सः वदतां श्रेष्ठो वशिष्ठः उवाच ॥ १ ॥

गो० टी०–तमिति । कैकेयीसुतमित्यत्र "केकयमित्रयुप्रलयानां यादेरियः" इति विहितस्येयादेशस्याभावः ॥ १ ॥

२] ति० टी०–संयानं प्रेतनिर्हारम् ॥ २ ॥

रा० टी०–वचनाकारमाह–अलमिति । शोकेन अलं न कुर्वित्यर्थः । कर्तव्यमाह–नरपतेः नरस्य पतिः राजा यस्य यत्संबन्धी तस्य तदुपबर्हणादेरित्यर्थः, उत्तमं यथोचितं संयानं बहिर्निर्गमनं कुरु ॥ २ ॥

गो० टी०–अलमिति । संयानं सम्यग्यानं स्वर्गप्रापकक्रियाजातमित्यर्थः ॥ २ ॥

३] ति० टी०–धरणीं गतः वसिष्ठं साष्टाङ्गं नमस्कृत्येत्यर्थः । 'धारणां गतः' इति पाठे धैर्यं प्राप्त इत्यर्थः । कारयामास तत्करणार्थं मन्त्रिणः प्रेरयामासेत्यर्थः ॥ ३ ॥

रा० टी०–वसिष्ठस्येति । धरणीं भूमिं गतः प्राप्तो भरतः वशिष्ठस्य वचः श्रुत्वा प्रेतकृत्यानि लोकान्तरगतसंबन्धिकर्तव्यानि कारयामास ॥ ३ ॥

गो० टी०–वसिष्ठस्येति । धारणां गतः धैर्यं प्राप्तः 'मर्यादा धारणा स्थितिः' इत्यमरः स्वस्थान्तःकरण इत्यर्थः । कारयामासेति संज्ञापेक्षिकः ॥ ३ ॥

४] ति० टी०–बहुदिवसतैलावस्थानोपाधिना आपीतवर्णं वदनं यस्य तम् ॥ ४ ॥

५] ति० टी०–दशरथमिति उद्दिश्येति शेषः ॥ ५ ॥

रा० टी०–कर्तव्याकारमाह–उद्धृत्येति । तैलसंरोधात् तीनां चौराणां अग्र ईश अयौ प्राणलक्ष्मौ लान्ति गृह्णन्ति तेषां द्वारपाणां कर्तॄणां संरोधोऽन्यजननिवारणं यस्मिन् तस्मात्स्थलविशेषादुद्धृत्य बहिरानीय भूमौ निवेशितं पर्यङ्कादेः स्थापनमापीतवर्णस्य अतिशीतलविशिष्टवर्णस्य वदनं स्थितिर्यस्मिंस्तं भूमिपं भूमेः पः पलको यस्य यत्संबन्धी तमुपबर्हणविशिष्टास्तरणपटम् अग्र्ये अत्युत्तमे नानारत्नपरिष्कृते नानारत्नविशिष्टे शयने नवीने पर्यङ्के सुप्तं दशरथमिव संवेश्य संस्थाप्य ततः तस्य तत्स्मारकत्वेन प्राप्तस्मृतित्वाद्धेतोः पुत्रो विललाप । श्लोकद्वयमेकान्वयि 'तथौरामृतपुच्छेषु' इति मेदिनी 'अः कृष्णः शंकरो ब्रह्मा शक्रः सोमोऽनलोऽनिलः । सूर्यः प्राणो यमः कामो वसन्तः प्रणवः सुखी ॥ लक्ष्मीरीकारउच्यते' इति कोशः ॥ ४ ॥ ५ ॥

गो० टी०–उद्धृतमित्यादि श्लोकद्वयमेकान्वयम् । ततः स पुत्रः तैलसंरोधात् तैलद्रोण्याः उद्धृतं ततस्तैलापमार्जनाय भूमौ निवेशितं चिरं तैले स्थापनादापीतवर्णवदनम् अवयवशैथिल्याभावात् प्रसुप्तमिव स्थितं दशरथं भूपतिम् उक्तविशेषणे शयने संवेश्य शाययित्वा सुदुःखितः सन् विलालाप ॥ ४ ॥ ५ ॥

६] ति० टी०–व्यवसितं मनीषितम् । प्रोषिते देशान्तरगते ॥ ६ ॥

रा० टी०–विलापाकारमाह–किमिति । मयि प्रोषिते मातुलकुलं प्राप्ते अनागते भवन्निकटकर्मकगमनाभाववति सति रामादिकं विवास्य त्वया किं व्यवसितं निश्चितम्, अनुचितं कृतमित्यर्थः ॥ ६ ॥

गो० टी०–किमिति । किं ते व्यवसितं त्वया किमर्थं व्यवसितं स्वर्गगमनायेति शेषः ॥ ६ ॥ ७ ॥

७] ति० टी०–रामेण हीनमिमं दुःखितं जनं हित्वा क्व यास्यसीत्यन्वयः ॥ ७ ॥

रा० टी०–क्वेति । अक्लिष्टकर्मणा सरलस्वभावेन रामेण हीनमत एव दुःखितमिमं जनं हित्वा क्व यास्यसि ॥ ७ ॥

८–१०] ति० टी०–ते तवास्मिन्पुरेऽयोध्यायां योगक्षेमं प्रजानाम् अव्ययं परित्यक्तदुःखपारवश्यं यथा तथा स्वः स्वर्गम् ॥ ८–१० ॥

रा० टी०–योगेति । हे तात ! रामे वनमाश्रिते प्राप्ते सति त्वयि स्वः सर्वपरलोकं प्रयाते प्राप्ते सति ते पुरे अव्ययं यथा स्यात्तथा योगक्षेमं कः कल्पयिता ॥ ८ ॥

१ धारणामिति गो. प. पाठः । २ कार्यामिति गो. पाठः । ३ उद्धृतमिति गो. पाठः । ४ संरोधादिति गो. पाठः । ५ भूपतिमिति गो. पाठः । ६ वासयसीति गो. रा. पाठः । ७ राजन्निति गो. पाठः । ८ वचनमिति रा. पाठः ।

प्रेतकार्याणि यान्यस्य कर्तव्यानि विशांपतेः । तान्यव्यग्रं महाबाहो [1]क्रियतामविचारितम् ॥ ११ ॥
तथेति भरतो वाक्यं वसिष्ठस्याभिपूज्य तत् । ऋत्विक्पुरोहिताचार्यांस्त्वरयामास सर्वशः ॥ १२ ॥
ये त्वग्नयो नरेन्द्रस्य [3]अग्न्यगाराद्बहिष्कृताः । ऋत्विग्भिर्याजकैश्चैव [4]ते ह्रियन्तां यथाविधि ॥ १३ ॥
शिबिकायामथारोप्य राजानं गतचेतनम् । बाष्पकण्ठा विमनसस्तमूहुः परिचारकाः ॥ १४ ॥
हिरण्यं च सुवर्णं च वासांसि विविधानि च । प्रकिरन्तो जना मार्गं [6]नृपतेरग्रतो ययुः ॥ १५ ॥
चन्दनागुरुनिर्यासान्सरलं पद्मकं तथा । देवदारूणि चाहृत्य [8]क्षेपयन्त तथापरे ॥ १६ ॥

रा० टी०–विधवेति । त्वया हीना अत एव विधवा रक्षकरहिता पृथिवी भूतलं न राजते अत एव हीनचन्द्रा चन्द्ररहित रजनी रात्रिरिव मां प्रतिभाति ॥ ९ ॥

रा० टी०–एवमिति । एवं विलपमानं भरतं वसिष्ठः भूयोऽब्रवीत् ॥ १० ॥

गो० टी०–योगक्षेममिति । ते पुरे अयोध्यायां कः जनः योगक्षेमं स्वकीयपरयोगक्षेमं कल्पयिता करिष्यति स्वः स्वर्गम् ॥ ८–१० ॥

११] ति० टी०–अविचारितं प्राचीनवैभवादिस्मरणरहितं यथा तथा ॥ ११ ॥

रा० टी०–वचनाकारमाह–प्रेतेति । अस्य साकेतं प्राप्तस्य विशां प्रजानां पतेः पत्युः यानि प्रेतकार्याणि परलोकगमनविहितकर्माणि कर्तव्यानि तानि अव्यग्रं यथा स्यात्तथा अविचारितं सशरीरं लोकान्तरं गतस्य प्रेतकार्याणि कर्तव्यानि न वेति संशयरहितं यथा स्यात्तथा क्रियताम् एतेन सशरीरगतपुरुषस्य वस्त्रादिषु तच्छरीरबुद्धिः कर्तव्येति सूचितं तेन कर्मणामवश्यकर्तव्यता व्यञ्जिता तेन वसिष्ठस्य मर्यादापालकत्वं व्यक्तम् ॥ ११ ॥

गो० टी०–प्रेतकार्याणीति । विशांपतेः प्रजानां पत्युः ॥ ११ ॥

१२] ति० टी०–ऋत्विजो यज्ञकर्मणि हृताः, पुरोहिताः सर्वहितप्रवर्तकाः । तदुक्तम्–' मन्त्रे च धर्मकृत्ये च शान्तिकर्मणि पौष्टिके । अध्वरे यश्च कुशलः स स्याद्राजपुरोहितः ॥' इति । उपनीय वेदाध्यापक आचार्यः ॥ १२ ॥

रा० टी०–तथेति । वसिष्ठस्य तद्वाक्यं तथेत्यभिपूज्य भरतः सर्वशः ऋत्विक्पुरोहिताचार्यान् त्वरयामास । तत्र ऋत्विजो यागकर्मसु प्रवृत्ताः, पुरोहिताः सकलहितकार्यप्रवर्तकाः । तथाहि 'मन्त्रे च धर्मकृत्ये च शान्तिकर्मणि पौष्टिके । अध्वरे यश्च कुशलः स स्याद्राजपुरोहितः ॥' इति । आचार्याः वेदाध्यापकाः ॥ १२ ॥

गो० टी०–तथेतीति । ऋत्विक्पुरोहिताचार्यान् ऋत्विजो यज्ञकर्मणि हृताः पुरोहिताः पुरोहितपरत्वेन शान्तिकपौष्टिकादिक्रियाप्रवर्तकाः आचार्याः वसिष्ठवामदेवादयः । 'त्रय्यां च धर्मकृत्ये च शान्तिकर्मणि पौष्टिके । अध्वरे यश्च कुशलः स स्याद्राजपुरोहितः ॥ उपनीय ददद्वेदमाचार्यः स उदाहृतः ।' इति लक्षणम् ॥ १२ ॥

१३–१४] ति० टी०–अग्न्यगाराद्बहिष्कृता अन्त एव स्वाद्बहिःप्रदेशे प्रतिष्ठापिताः याजकैरुपद्रष्टृभिः हूयन्त स्म १३॥१४

रा० टी०–य इति । ये नरेन्द्रस्याग्नयः अग्न्यगाराद्बहिर्वेश्मनः ऋत्विग्भिर्याजकैश्च बहिष्कृतास्ते यथाविधि हूयन्ते॥१३॥

रा० टी०–शिबिकायामिति । गतचेतनं राजानमिव ते राजशय्योपबर्हणविशिष्टपटं शिबिकायामारोप्य परिचारकाः तात्कालिकवहनयोग्याः ऊहुः । अथशब्द इवार्थे ॥ १४ ॥

गो० टी०–य इति । अग्न्यगारात् अग्निगृहात् बहिष्कृताः अन्तःशववत्त्वात् बहिः प्रतिष्ठापिताः अग्नयो गार्हपत्यादयः याजकैः उपद्रष्टृभिः ऋत्विग्भिश्च आहूयन्त आनीयन्त १३॥१४

१५] ति० टी०–हिरण्यं रजतम् । सुवर्णरजतपुष्पाणीति यावत् ॥ १५ ॥

रा० टी०–हिरण्यमिति । नृः पतिः राजा यस्य यत्संबन्धी तस्य उपबर्हणविशिष्टपटस्य अग्रतः मार्गे हिरण्यादीन्प्रकिरन्तः प्रक्षिपन्तो नराः ययुः । तत्र हिरण्यशब्देन रजतं ग्राह्यं, किंच शोभनो वर्णो यस्य तद्धिरण्यमिति च समानाधिकरणमतो न पौनरुक्त्यम् ॥ १५ ॥

गो० टी०–हिरण्यमिति । हिरण्यं च सुवर्णं च रजतं च सुवर्णं च तत्कृतपुष्पाणीत्यर्थः ॥ १५ ॥

१६] ति० टी०–निर्यासो गुग्गुल्वादिः सरलपद्मके काष्ठभेदः देवदारूणि देवदारुकाष्ठानि, क्षेपयन्ति चितायामिति शेषः १६

रा० टी०–चन्दनेति । अपरे चन्दनादीनि आहृत्य चितां चक्रुः तत्र निर्यासो गुग्गुलुः 'गुग्गुलुः कालनिर्यासौ' इति निघण्टुः । सरलपद्मके काष्ठविशेषौ चाहृत्य चितां चक्रुः 'क्षेपयन्ति तथा परे' इति भट्टपाठः ॥ १६ ॥

गो० टी०–चन्दनागरुनिर्यासानिति । चन्दनागरुनिर्यासान् निर्यासो गुग्गुलुः 'गुग्गुलुः कालनिर्यासौ' इति निघण्टुः । चन्दनागरुजनितधूपद्रव्याणीति यावत् सरलं धूपसरलं पद्मकं सुरभिकाष्ठविशेषं क्षेपयन्ति पुरतः पर्वतश्च म्रियमाणसौवर्णराजताङ्गारयानपि धूपार्थमिति शेषः । चन्दनादीनि गन्धान्तानि चिताकाष्ठद्रव्याणीत्येव तु युक्तं तदा क्षेपयन्ति दहनार्थं चितामकुर्वन्नित्यर्थः ॥ १६ ॥

१ क्रियन्तामिति गो. पाठः । २ चान्येति गो. पाठः । ३ आहियन्तेति गो. पाठः । ४ चेतसानिति गो. पाठः । ५ ऊहुरिति गो. रा. पाठः । ६ मार्गमिति गो. पाठः । ७ अगादिति गो. रा. पाठः । ८ चितां चक्रुरिति रा. पाठः ।

गन्धानुच्चावचांश्चान्यांस्तत्र गत्वाथ भूमिपम् । तैत्र संवेशयामासुश्चितामध्ये तमृत्विजः ॥ १७ ॥
तदा हुताशनं हुत्वा जेपुस्तस्य तदृत्विजः । जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः ॥ १८ ॥
शिबिकाभिश्च यानैश्च यथार्हं तस्य योषितः । नगरान्निर्ययुस्तत्र वृद्धैः परिवृतास्तथा ॥ १९ ॥
प्रसव्यं चापि तं चक्रुर्ऋत्विजोऽग्निचितं नृपम् । स्त्रियश्च शोकसंतप्ताः कौसल्याप्रमुखास्तदा ॥ २० ॥
क्रौञ्चीनामिव नारीणां निनादस्तत्र शुश्रुवे । आर्तानां करुणं काले क्रोशन्तीनां सहस्रशः ॥ २१ ॥
ततो रुदन्त्यो विवशा विलप्य च पुनःपुनः । यानेभ्यः सरयूतीरमवतेरुर्नृपाङ्गनाः ॥ २२ ॥
कृत्वोदकं ते भरतेन सार्धं नृपाङ्गना मन्त्रिपुरोहिताश्च ।
पुरं प्रविश्याश्रुपरीतनेत्रा भूमौ दशाहं व्यनयन्त दुःखम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

१७] ति० टी०—तत्र चितादेशे गत्वा तं चितामध्ये संवेशयामासुः स्थापयामासुः ॥ १७ ॥

रा० टी०—गन्धानिति । अन्यान् विलक्षणानुच्चावचान्गन्धांस्तत्र चितायां दत्त्वा भूमिपम् उपबर्हणसहितास्तरणपटं चितामध्ये ऋत्विजः संवेशयामासुः ॥ १७ ॥

गो० टी०—तत्र गत्वाथ भूमिपमित्युत्तरशेषः अथ चितासंकल्पनानन्तरं तत्र चितासमीपं गत्वा तं भूमिपं चितामध्ये ततः शिबिकायाः उद्धृत्येति शेषः, संवेशयामासुः शाययामासुः ॥ १७ ॥

१८-१९] ति० टी०—जेपुः पैतृमेधिकमन्त्रान् तस्य परलोकशुद्ध्यर्थमिति शेषः । तदृत्विजस्तत्यज्ञप्रवर्तकाः ॥१८॥१९॥

रा० टी०—तदेति । हुताशनं वह्निं दत्त्वा भरतेन चितायां दापयित्वा तस्य राज्ञः तदृत्विजः जेपुः विहितमन्त्रमुच्चारयामासुः तत्र तस्मिन्समये सामगाः सामानि च जगुः ॥ १८ ॥

गो० टी०—तथेति । हुताशनं दत्त्वा भरतेन दापयित्वा जेपुः पैतृमेधिकमन्त्रविशेषानिति शेषः, तस्य परमगत्यर्थमिति शेषः। तमिति हुताशनविशेषणं हुतं प्रेताग्निमित्यर्थः । ते उद्गातृप्रभृतयः ऋत्विजः ॥ १८ ॥

रा० टी०—शिबिकाभिरिति । तस्य राज्ञः वृद्धैः परिवृता योषितः शिबिकाभिः यानैः रथादिभिश्च नगरान्निर्ययुः ॥ १९ ॥

गो० टी०—शिबिकाभिरिति। यानैरश्वादिभिः वृद्धैः परिवारकैः ॥ १९ ॥

२०-२२] ति० टी०—प्रसव्यमप्रदक्षिणम् अग्निचितमग्निं चितवन्तम् अश्वमेधान्तयज्ञकर्तारं स्त्रियश्च प्रसव्यं चक्रुरित्यन्वयः ॥ २०-२१ ॥

रा० टी०—प्रसव्यमिति । अग्निचितमग्निं प्राप्तं नृपं नृपसंबन्धिनं ते चत्वारः ऋत्विजः ऋत्विक्सहितो भरतः स्त्रियश्च प्रसव्यं प्रदक्षिणं चक्रुः ॥ २० ॥

रा० टी०—क्रौञ्चीनामिति । तत्र तस्मिन्काले आर्तानामत एव करुणं क्रोशन्तीनां क्रौञ्चीनां निनाद इव निनादः शुश्रुवे ॥ २१ ॥

रा० टी०—तत इति । ततः अत्यार्तत्वाद्धेतोः रुदन्त्यः अत एव विवशाः कान्तिरहिताः नृपाङ्गनाः पुनः पुनः विलप्य यानेभ्यः सरयूतीरमवतेरुः ॥ २२ ॥

गो० टी०—प्रसव्यमिति । अग्निचितम् अग्निचयनं कृतवन्तं तं नृपम् ऋत्विजः स्त्रियश्च प्रसव्यं सव्यापसव्यं प्रदक्षिणमप्रदक्षिणं च चक्रुः । पाठभेदः प्रसव्यम् अप्रदक्षिणम् इदं प्रदक्षिणस्याप्युपलक्षणम् भरतश्रेत्यर्थसिद्धम् इदं चाग्निदानात्पूर्वं शिबिकास्थे प्रेते क्रमस्याविवक्षितत्वादत्रोक्तं देशविशेषाचारोऽयं वा ॥ २०-२२ ॥

२३] ति० टी०—दशाहम् अत्यन्तसंयोगे द्वितीया दुःखमाशौचम् भूमौ शयाना इति शेषः । इदं ब्रह्मचर्यमात्रोपलक्षणम् । ननु 'द्वादशाहेन भूपालः क्षत्रियः षोडशेऽहनि' इति स्मृतेः कथं क्षत्रियस्य दशाहेनाशौचात्ययः इति चेन्न 'क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः' इति पराशरोक्तेरिति दिक् ॥२३॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

रा० टी०—कृत्वेति । भरतेन सार्धं नृपाङ्गनाः ते मन्त्रिपुरोहिताश्च उदकमुदकदानं कृत्वा दशाहं दश दिनानि भूमौ दुःखं व्यनयन्त । न च 'द्वादशाहेन भूमिपः' इत्यादिवचनात् राज्ञां द्वादशाहेन शुद्धेः दशाहमिति विरुद्धमिति वाच्यं, तादृशवचनानां शरीरदाहविषयत्वेनादोषात् अत एव 'क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः' इत्यादिवचनं संगच्छते ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

गो० टी०—कृत्वेति । ताश्च ते च ते पुमांस्त्रियेत्येकशेषः, दशाहम् "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया भूमौ शयाना

१ तत्र इति गो० पाठः । २ तमेति गो० पाठः । ३ दत्त्वेति गो० रा० पाठः । ४ तमिति गो० पाठः । ५ तदेति गो० पाठः । ६ वराङ्गना इति गो० पाठः ।

सप्तसप्ततितमः सर्गः ।

दशेऽह्नि शत्रुघ्नयुतो भरतः सकलश्राद्धानि निर्वर्त्य तदङ्गत्वेन ब्राह्मणेभ्यो बहुधनरत्नादि व्यतरत् । त्रयोदशेऽह्न्यस्थिसंचितामूलमुपागतो भरतः शोकाकुलः सन्धरण्यां निपपात । भुवि लुठन्तं शत्रुघ्नं बहु व्यलपत् । अथो वसिष्ठसुमन्त्राभ्यां सान्त्वितौ तावस्थिसंचयनकर्मण्यमात्यांस्त्वरयामासतुः ।

ततो दशाहेऽतिगते कृतशौचो नृपात्मजः । द्वादशेऽहनि संप्राप्ते श्राद्धकर्माण्यकारयत् ॥ १ ॥
ब्राह्मणेभ्यो धनं रत्नं ददावन्नं च पुष्कलम् । [वासांसि च महार्हाणि रत्नानि विविधानि च ।]
बास्तिकं बहु शुक्लं च गाश्चापि बहुशस्तदा । ॥ २ ॥
दासीदासांश्च यानानि वेश्मानि सुमहान्ति च । ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्ध्वदेहिकम् ॥ ३ ॥
ततः प्रभातसमये दिवसे च त्रयोदशे । विललाप महाबाहुर्भरतः शोकमूर्च्छितः ॥ ४ ॥
शब्दापिहितकण्ठश्च शोधनार्थमुपागतः । चितामूले पितुर्वाक्यमिदमाह सुदुःखितः ॥ ५ ॥

इति शेषः । कियद्बध्नाशना भूमौ स्वपेयुस्ते पृथक् पृथक् इत्याशौचिनां पृथक्शयनं हि विहितं दुःखमाशौचं व्यनयन्त अगमयन् । नन्वं 'षोडशाहेन भूपालाः' इति क्षत्रियस्य षोडशाहाशौचस्मद्भावात् कथं दशाहमित्युच्यत इति चेत् सत्यम् 'क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः' इत्यादिविशेषशास्त्रानुसारेणोक्तमिति न दोषः । अत्र स्त्रीणां प्रेतदक्षिणमुदकदानं च सूत्रान्तरोक्तं ज्ञेयं तथा चितास्थस्य प्रदक्षिणं च अत एवाह बोधायनः 'प्रदक्षिणमपि बान्धवाः कुर्वन्ति' एवं मार्गेऽपि चितामारोप्य चितायामेवेत्यर्थः इति । अत्र प्रेतेन सहाग्न्यानयनं चितारोपणं समन्त्रकमग्निदानं प्रदक्षिणीकरणमुदकदानं दशाहमाशौचेन भूमौ शयनमित्येतावन्मात्रं देशकुलसूत्रभेदेन और्ध्वदैहिकविशेष उक्त इति वा प्रधानोक्तिः सर्वग्रहणार्थमिति वा ज्ञेयम् ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-
ऽयोध्याकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

१] ति० टी०—तत इति । दशाहेऽतिगते एकादशेऽह्नि कृतशौचोऽनुष्ठितप्रेतविमुक्तिदैकादशाहश्राद्धः । श्राद्धकर्माणि द्वितीयमासिकादिसपिण्डीकरणान्तश्राद्धानि ॥ १ ॥

रा० टी०—दशाहानन्तरकालिकं वृत्तमाह—तत इत्यादिभिः । दशाहेऽतिगते व्यतीते सति एकादशेऽहनीत्यर्थः, कृतशौचः कृतं शौचं स्वशुद्धिहेतुभूतैकादशाहविहितं कर्म येन स भरतः द्वादशेऽहनि संप्राप्ते सति श्राद्धकर्माणि द्वादशाहविहितकर्मविशेषानकार्यदकरोत् । रामो राज्यमचीकरदित्यादाविवात्र णिच् ॥ १ ॥

गो० टी०—तत इति । दशाहे अतिगते अतीते एकादशाह इत्यर्थः, कृतशौचः कृतशौचापादकपुण्याहवाचननवश्राद्धादिक इत्यर्थः द्वादशेऽहनि श्राद्धकर्माणि षोडशमासिकानि सपिण्डीकरणान्तानीत्यर्थः अकारयत् अकरोदित्यर्थः स्वार्थे णिच् ॥ १ ॥ २ ॥

२] ति० टी०—बास्तिकं छागसमूहम् आर्षत्वक् । बस्तोऽजः शुक्लं रजतम्, 'शुक्लो योगान्तरे श्वेते शुक्लं च रजते मतम् ॥ २ ॥

रा० टी०—ब्राह्मणेभ्य इति । पुष्कलं बहु धनं रत्नं च बास्तिकं बस्तानां छागानां समूहः आर्षत्वक् तं च बहु शुक्लं प्रभूतरजतं च बहुशो गाश्च ब्राह्मणेभ्यो ददौ । यदि च बहु अधिकं शुक्लं स्वच्छत्वं यस्येति बहुव्रीहिस्तदा बास्तिकविशेषणम् । 'अजः प्रोक्तस्ततो बस्तः' इत्यमरः, 'शुक्लो योगान्तरे श्वेते शुक्लं च रजतं मतम्' इति विश्वः ॥ २ ॥

३] ति० टी०—ऊर्ध्वदेहोद्भवमौर्ध्वदैहिकं पारलौकिकम् ॥ ३ ॥

रा० टी०—दासीति । और्ध्वदैहिकं पारलौकिकं यथा स्यात्तथा दास्यादीन् ददौ "ऊर्ध्वदेहाच्चेति वक्तव्यम्" इति ठक् ॥ ३ ॥

गो० टी०—बास्तिकमित्यादि । बस्तानां छागानां समूहो बास्तिकं छान्दसषत्वं 'अजा छागी स्तुभच्छागबस्तच्छागलका अजे' इत्यमरः बहुशुक्लमिति छागविशेषणं रजतं वा पितृप्रियत्वात् 'शुक्लो योगान्तरे श्वेते शुक्ले च रजते तथा' इति विश्वः । दासीदासं गवाश्वप्रभृतित्वादेकवद्भावः ऊर्ध्वं देहादूर्ध्वदेहः तत्र भवमौर्ध्वदैहिकम् "ऊर्ध्वदेहाच्चेति वक्तव्यम्" इति ठक् ॥ ३ ॥

४–५] ति० टी०—त्रयोदशे त्रयोदशेऽहनि शोधनार्थमुपागतो विललापेत्यन्वयः । दशाहाभ्यन्तरेऽस्थिसंचयनं कृत्वा सकलश्राद्धानन्तरं त्रयोदशेऽहनि चिताभस्मोद्धारपूर्वकं स्थलशुद्धिः कर्तव्येति क्षत्रियधर्म इति वाल्मीकिपुत्रैर्ज्ञायते इति कतकः । तीर्थस्तु—शोधनमस्थिसंचयनमित्याह । शब्देन रोदनशब्देन पिहित आवृतः कण्ठो यस्य, चितामूले इदं वाक्यमाह ॥ ४ ॥ ५ ॥

रा० टी०—तत इति । त्रयोदशे दिने प्रभातसमये भरतो विललाप ॥ ४ ॥

गो० टी०—तत इति । शब्दापिहितकण्ठः रोदनध्वनिना व्याप्तकण्ठः शोधनार्थं स्थलशोधनार्थम् 'दहनदेशमुदकुम्भैः स्ववोक्षति' इति सूत्रात् अस्थिसंचयनार्थमित्यर्थः सावशेषास्थिनिचय इति वक्ष्यमाणत्वात् त्रयोदशेऽप्यस्थिसंचयनं सूत्रान्तरे दृश्यते

१ अर्धमेतदधिकं गो. पाठे । २ शतश इति गो. पाठः । ३ दासीदासं च यानं चेति गो. दासीदासं च यानानीति रा. पाठः । ४ और्ध्वदैहिकामिति गो. रा. पाठः । ५ श्चेति गो. पाठः । ६ इति गो. पाठः ।

तात यस्मिन्निसृष्टोऽहं त्वया भ्रातरि राघवे । तस्मिन्वनं प्रव्रजिते शून्ये त्यक्तोऽस्म्यहं त्वया ॥६॥
यस्या गतिरनाथायाः पुत्रः प्रव्राजितो वनम् । तामम्बां तात कौसल्यां त्यक्त्वा त्वं क्व गतो नृप ॥ ७ ॥
दृष्ट्वा भस्मारुणं तच्च दग्धास्थि स्थानमण्डलम् । पितुः शरीरनिर्वाणं निष्टनन्विषसाद ह ॥ ८ ॥
स तु दृष्ट्वा रुदन्दीनः पपात धरणीतले । उत्थाप्यमानः शक्रस्य यन्त्रध्वज इवोच्छ्रितः ॥ ९ ॥
अभिपेतुस्ततः सर्वे तस्यामात्याः शुचिव्रतम् । अन्तकाले निपतितं ययातिमृषयो यथा ॥ १० ॥
शत्रुघ्नश्चापि भरतं दृष्ट्वा शोकपरिप्लुतम् । विसंज्ञो न्यपतद्भूमौ भूमिपालमनुस्मरन् ॥ ११ ॥

यथाह बोधायनः 'द्वितीयेऽह्नि युग्मदिवसेष्वर्धमासान्मासानृतून् संवत्सरं वा संचयं कुर्यात्' इति ॥ ४ ॥

रा० टी०–विलापाकारमाह–शब्देति। चितामूले चितस्य स्वायत्तराजार्जितपदार्थस्य आमूलमासमन्ताद्भावेन स्थापनं यत्र तस्मिन् गृहे शोधनार्थं यथोचितं संस्थापनार्थमुपागतः प्राप्तः अत एव अतिदुःखितः पितृस्मारकपित्रसाधारणवस्तुदर्शनजनितपितृस्मरणहेतुकदुःखाक्रान्तः शब्दापिहितकण्ठः शब्दैः बहुप्रलापैः आपिहितः कण्ठो यस्य स भरतः इदं वाक्यमाह ॥ ५ ॥

गो० टी०–चितामूल इत्यर्थम् ॥ ५ ॥

६] ति० टी०–तदेवाह–तातेति। निसृष्टो दत्तः। प्रव्रजिते प्रव्राजिते। अहं शून्ये त्यक्तो निरवलम्बतया निरस्तः ॥ ६ ॥

रा० टी०–वाक्याकारमाह–तातेति। हे तात! त्वया यस्मिन् राघवे रामे अहं निसृष्टः नियुक्तस्तस्मिन्वनं प्रव्रजिते अत एव शून्ये स्वजनरहिते समये त्वयाऽहं त्यक्तोऽस्मि एतेन तव लोकान्तरगमनं नोचितमिति सूचितम् ॥ ६ ॥

गो० टी०–तातेति । निसृष्टः दत्तः प्रव्रजिते प्रव्राजिते छान्दसो ह्रस्वः ॥ ६ ॥ ७ ॥

७] ति० टी०–यस्या अनाथाया गतिरवलम्बः पुत्र इत्यर्थः ॥ ७ ॥

रा० टी०–यस्या इति । अनाथायाः त्वदतिरिक्तरक्षकरहितायाः यस्याः कौसल्यायाः पुत्रः वनं प्रव्राजितस्तामम्बां मातरं कौशल्यां त्यक्त्वा त्वं क्व गतः स्वगमनस्थानं स्वयं कथयेत्यर्थः। तेन भरतस्य पितृदर्शनेच्छातिशयः सूचितः ॥७॥

८] ति० टी०–भस्मारुणं भस्मयुतम्, अतिदाहारुणं च दग्धास्थि दग्धान्यस्थीनि यस्मिन् स्थानमण्डलं चितास्थानमण्डलं पितुः शरीरनिर्वाणं शरीरनाशस्थानं तदृष्ट्वा निष्टनन्नत्यन्तं विलपन्विषसाद ॥ ८ ॥

रा० टी०–दृष्ट्वेति । तत्र भस्मनित्यधारणयोग्याग्निहोत्रविभूतिं दग्धास्थिस्थानमण्डलं दग्धास्थिनां दग्धाः अतिशयेन निकृत्ताः आस्था असदाग्रहाः तद्वतां महात्मनां स्थानेन स्थित्या मण्डलं यस्य तदरुणं गौरं पितुः शरीरनिर्वाणं शरीरवोपकं चित्रलिखिततराजशरीरं चेत्यर्थः, दृष्ट्वा निष्टनन् अतिविलापं कुर्वन् विषसाद "अभिनिसः स्तनः शब्दसंज्ञायाम्" इति षत्वम् ॥ ८ ॥

गो० टी०–दृष्ट्वेति । भस्मारुणं भस्मयुक्तमरुणं च अरुणत्वमतिदग्धत्वात् पितुः शरीरनिर्वाणं शरीरं निर्वाप्यते विनाश्यते अस्मिन्निति शरीरनिर्वाणम् अधिकरणे ल्युट् । 'निर्वाणो निर्हते मोक्षे विनाशे गजमज्जने' इति वैजयन्ती । निष्टनन् नितरां स्तनन् "अभिनिसस्तनः शब्दसंज्ञायाम्" इति षत्वम् । पाठभेदः भस्मारुणं भस्मना अरुणम् अत्यन्तरागं दग्धास्थिस्थानमण्डलं दग्धानामस्थ्नां यानि स्थानानि विन्यासविशेषाः तेषां मण्डलं समूहं दृष्ट्वा अस्थिमण्डलं दृष्ट्वेत्यर्थसिद्धं पितुः शरीरनिर्वाणं शरीरविनाशं प्रति निष्टनन् नितरां रोदनशब्दं कुर्वन् विषसाद दुःखितोऽभूत् ॥ ८ ॥

९] ति० टी०–दीनो दुःखितो भूत्वा पपात । उत्थाप्यमानः पुरुषैः यन्त्रबद्धो ध्वजो यन्त्रध्वजः स इव पपात। शक्रयन्त्रध्वजस्याकाशस्थस्य भूमौ पातायोगात् गृहाद्यलंकारार्थं ध्वजयन्त्ररूपेण ध्वजसदृशरूपेण निर्मित इत्यर्थ इति कतकः, उत्पाततः पतितेन तेनोपमेत्यन्ये ॥ ९ ॥

रा० टी०–स इति । दृष्ट्वा राजधार्याग्निहोत्रविभूतिं चित्रलिखिततच्छरीरं चावलोक्य दीनः क्षीणचित्तः भरतः जनैः उत्थाप्यमानः शक्रस्य यन्त्रध्वजः यथाविधि यन्त्रसंबद्धध्वज इव पपात ॥ ९ ॥

गो० टी०–स इति । उत्थाप्यमानः रज्जुभिरुत्थाप्यमानः च्युतः स्रस्तः शक्रस्य यन्त्रबद्धो ध्वजो यन्त्रध्वजः रज्जुयुक्तो ध्वज इव पपात यथा यन्त्रपतनात् ध्वजपतनम् एवं राजपतनात् भरतपतनमिति भावः ॥ ९ ॥

१०–११] ति० टी०–अन्तकाले पुण्यक्षयकाले ॥१०॥११॥

रा० टी०–अभीति । ततस्तस्य भूमौ पाताद्धेतोः सर्वे अमात्याः शुचिव्रतं भरतमभिपेतुः प्रापुः, तत्र दृष्टान्तः निपतितं ययातिम् ऋषयो यथा ॥ १० ॥

गो० टी०–अभिपेतुरिति । अमात्याः ज्ञातयः शुचिव्रतं तम् अन्तकाले पुण्यक्षयकाले निपतितं ययातिम् ऋषयः दौहित्रभूता इव अभिपेतुः ॥ १० ॥

रा० टी०–शत्रुघ्न इति । शोकपरिप्लुतं भरतं दृष्ट्वा विसंज्ञः शत्रुघ्नोऽपि भूमिपालं राजानमनुस्मरन्भूमौ न्यपतत् ॥ ११ ॥

गो० टी०–शत्रुघ्न इति । भरतपतनावधि शत्रुघ्नस्य धैर्यं स्थितं तत्पतनानन्तरं तु भूमिपालमनुस्मरन्व्यपतत् ॥ ११ ॥

१ सः इति गो. पाठः । २ इव च्युत इति गो. पाठः ।

उन्मत्त इव निश्चित्तो विललाप सुदुःखितः । स्मृत्वा पितुर्गुणाङ्गानि तानि तानि तदा तदा ॥ १२ ॥
मन्थराप्रभवस्तीव्रः कैकेयीग्राहसंकुलः । वरदानमयोऽक्षोभ्योऽमज्जयच्छोकसागरः ॥ १३ ॥
सुकुमारं च बालं च सततं लालितं त्वया । क्व तात भरतं हित्वा विलपन्तं गतो भवान् ॥ १४ ॥
ननु भोज्येषु पानेषु वस्त्रेष्वाभरणेषु च । प्रवारयति सर्वान्नस्तन्नः कोऽद्य करिष्यति ॥ १५ ॥
अवदारणकाले तु पृथिवी नावदीर्यते । विहीना या त्वया राज्ञा धर्मज्ञेन महात्मना ॥ १६ ॥
पितरि स्वर्गमापन्ने रामे चारण्यमाश्रिते । किं मे जीवितसामर्थ्यं प्रवेक्ष्यामि हुताशनम् ॥ १७ ॥
हीनो भ्रात्रा च पित्रा च शून्यामिक्ष्वाकुपालिताम् । अयोध्यां न प्रवेक्ष्यामि प्रवेक्ष्यामि तपोवनम् ॥ १८ ॥
तयोर्विलपितं श्रुत्वा व्यसनं चाप्यवेक्ष्य तत् । भृशमार्ततरा भूयः सर्व एवानुगामिनः ॥ १९ ॥
ततो विषण्णौ श्रान्तौ च शत्रुघ्नभरतावुभौ । धरायां स्म व्यचेष्टेतां भग्नशृङ्गाविवर्षभौ ॥ २० ॥

१२] ति० टी०–गुणाङ्गान्युपलालनगुणस्याङ्गभूतानि विचित्रवस्त्राभरणादिदानादिकर्माणि स्मृत्वा विललाप ॥ १२ ॥

रा० टी०–उन्मत्त इति । तदा तदा स्वस्योचिततत्तत्काले उपलब्धानि तानि पितुर्गुणाङ्गानि गुणान् वात्सल्यादीन् अङ्गानि मृदुभूषणादिविशिष्टसुखादीनि स्मृत्वा दुःखितः अत एव उन्मत्त इव निश्चित्तः शत्रुघ्नो विललाप ॥ १२ ॥

गो० टी०–उन्मत्त इति । गुणाङ्गानि गुणानङ्गानि चेत्यर्थः, तदा तदा तानि तानि तत्तत्कालोचिताभिमतप्रदानोपलालनकराणि गुणाङ्गानि ॥ १२ ॥

१३–१४] ति० टी०–वरदानमयत्वादक्षोभ्यः । अमज्जयद् अस्मानिति शेषः ॥ १३ ॥ १४ ॥

रा० टी०–विलापाकारमाह–मन्थरेति । मन्थराप्रभवः मन्थरायाः प्रभवति उत्पद्यते मन्थरामूलकारणक इत्यर्थः । कैकेयीग्राहसंकुलः कैकेयी तद्वचनमेव ग्राहः तेन संकुलः संयुक्तः वरदानमयः वरदानरूपः अत एव अक्षोभ्यः निवर्तयितुमशक्यस्तीव्रः अतलस्पर्शी शोकसागरः अमज्जयत् भरतादीनिति शेषः १३

रा० टी०–सुकुमारमिति । भरतं त्यक्त्वा भवान् क्व गतः एतेन स्वस्य भरतसुखसुखित्वं सूचितम् ॥ १४ ॥

गो० टी०–मन्थरेति । मन्थरेति सगरव्याहृत्तिः, तीव्रः अगाध इति यावत्, अमज्जयत् अस्मानिति शेषः ॥ १३॥१४॥

१५] ति० टी०–नन्विति । बहून्याभरणादीनि दिव्यवस्तून्युपस्थाप्याङ्ग एषु किं तेऽपेक्षितं गृह्यतेति प्रकर्षेणास्मदिष्टवरणं कारयति भावन् तदद्य नः कः करिष्यति त्वयि गते इति शेषः ॥ १५ ॥

रा० टी०–नन्विति । सर्वान्नोऽस्मान्भोज्यादिषु भवान् प्रवारयति बलान्नियोजयत् तन्नियोजनम् अद्य कः करिष्यति ॥१५॥

गो० टी०–नन्विति । प्रवारयसि एष्वाभरणादिषु किं तवेष्टं गृह्यतेति प्रकर्षेण स्वयं ग्राहयसि तत्प्रवारणम् ॥ १५ ॥

१६–१८] ति० टी०–या त्वया विहीना सा पृथिवी अवदारणकाले तु तस्मिन्नपि नावदीर्यते ॥ १६—१८ ॥

रा० टी०–अवेति । धर्मज्ञेन महात्मना त्वया विहीना रहिता या पृथिवी सा अवदारणकाले अस्मिन्नवदारणसमये विदीर्यते न तु । तुःसंभावनायाम् भागुरिमतेनावाकारलोपे नञ्समासः १६

गो० टी०–अवदारणेति । या पृथिवी धर्मज्ञेन त्वया विहीना नावदीर्यते न भिद्यते स्वयमिति शेषः, सा अवदारणकाले तु प्रलयकालेऽपि नावदीर्यते नावदीर्येतेत्यर्थः । पाठभेदः अवदारणकाले त्वद्विहीनतया अवदारणस्य प्राप्तकाले अवदारणकालत्वे हेतुः–त्वया विहीनेति । धर्मज्ञेन महात्मना त्वया राज्ञा एतादृशगुणाढ्येन त्वयेत्यर्थः, विहीना या सा पृथ्वी अवदारणकाले नावदीर्यत इत्यन्वयः ॥ १६ ॥

रा० टी०–पितरीति । मे जीवितसामर्थ्यं पालनसामर्थ्यं किं नास्तीत्यर्थः, अतः हुताशनं रामाङ्गतेजोरूपं ब्रह्म प्रवेक्ष्यामि तद्वारा तं प्राप्स्यामीत्यर्थः ॥ १७ ॥

रा० टी०–हीन इति । भ्रात्रादिना हीनोऽहमयोध्यां न प्रवेक्ष्यामि न स्थास्यामीत्यर्थः किंतु तपोवनं प्रवेक्ष्यामि ॥१८॥

गो०टी०–पितरीति।जीवितसामर्थ्यं जीवनशक्तिः१७–१८

१९] ति० टी०–अनुगामिनोऽनुचराः आर्ततरा अभूवन्निति शेषः ॥ १९ ॥

रा० टी०–तयोरिति । तयोः शत्रुघ्नभरतयोः विलपनं श्रुत्वा व्यसनं दुःखं च भृशमवेक्ष्य सर्वेऽनुगामिनः भृयः आर्ततराः बभूवुरिति शेषः ॥ १९ ॥

गो० टी०–तयोरिति । आर्ततराः आसन्निति शेषः॥१९॥

२०] ति० टी०–व्यचेष्टेतां व्यलुण्ठेताम् । 'विश्रान्तौ' इति पाठे विशेषेण श्रान्तावित्यर्थः ॥ २० ॥

रा० टी०–तत इति । ततः अनुगाश्चार्तिदर्शनानन्तरं विषण्णौ अत एव श्रान्तौ संतप्तौ उभौ धरायां पृथिव्यां व्यचेष्टेतां व्यलुण्ठताम्, तत्र दृष्टान्तः भग्नशृङ्गौ विभिन्नाग्रभागौ ऋषभौ बलीवर्दाविव । ' विश्रान्तौ ' इति भूषणपाठः ॥ २० ॥

गो० टी०–तत इति । विश्रान्तौ विशेषेण श्रान्तौ व्यचेष्टेतां व्यलुण्ठेताम् ॥ २० ॥

१ चेता इति गो. पाठः । २ प्रवारयसि नः सर्वांस्तन्नः कोऽद्य इति गो. पाठः । ३ अन्ववेक्ष्येत गो. पाठः । ४ विश्रान्तावितिं गो. पाठः ५ भरण्यामिति गो. पाठः ।

ततः प्रकृतिमान्वैद्यः पितुरेषा पुरोहितः । वसिष्ठो भरतं वाक्यमुत्थाप्य तमुवाच ह ॥ २१ ॥
त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते विभो । सावशेषास्थिनिचये किमिह त्वं विलम्बसे ॥ २२ ॥
त्रीणि द्वन्द्वानि भूतेषु प्रवृत्तान्यविशेषतः । तेषु चापरिहार्येषु नैवं भवितुमर्हसि ॥ २३ ॥
सुमन्त्रश्चापि शत्रुघ्नमुत्थाप्याभिप्रसाद्य च । श्रावयामास तत्त्वज्ञः सर्वभूतभवाभवौ ॥ २४ ॥
उत्थितौ तौ नरव्याघ्रौ प्रकाशेते यशस्विनौ । वर्षातपपरिक्लान्तौ पृथगिन्द्रध्वजाविव ॥ २५ ॥
अश्रूणि परिमृद्नन्तौ रक्ताक्षौ दीनभाषिणौ । अमात्यास्त्वरयन्ति स्म तनयौ चापराः क्रियाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

२१] ति० टी०–प्रकृतिमान्सत्त्वप्रकृतिः वैद्यः ' सर्वज्ञभिषजौ वैद्यौ ' ॥ २१ ॥

रा० टी०–तत इति । ततः भरतातिविषाददर्शनानन्तरं प्रकृतिमान् प्रशस्तस्वभावविशिष्टः वैद्यः भिषक् निखिलविषयकज्ञानवान् एषां रामादीनां पितुः दशरथस्य पुरोहितो वसिष्ठः भरतमुत्थाप्य उवाच 'सर्वज्ञभिषजौ वैद्यौ' इत्यमरः॥२१॥

गो० टी०–तत इति । प्रकृतिमान् प्रशस्तस्वभावः 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे ' इति वैजयन्ती । वैद्यः विद्यां तत्त्वज्ञानहेतुभूतां वेदान्तविद्यां वेदेति वैद्यः वेदान्तविद्याधिगतपरावरतत्त्वयाथात्म्यविज्ञानः सर्वज्ञ इति यावत् । "तदधीते तद्वेद" इत्यण् ' सर्वज्ञभिषजौ वैद्यौ ' इत्यमरः । एषामिति बहुवचननिर्देशो बुद्धिस्थरामाद्यपेक्षया पितुर्दशरथस्य ॥ २१ ॥

२२] ति० टी०–वृत्तस्य कृतदाहस्य सावशेषास्थिनिचये ऽस्थिसंचयनाख्यकर्मण आशौचान्तरा कृतस्याप्यवशेषो भूशुद्धिभस्मोद्धारलक्षणः, तेन सहितः सावशेषस्तस्मिन्कर्तव्ये सतीत्यर्थः । एतेन त्रयोदशेऽहन्यस्थिसंचयनं स्मृतिविरुद्धमित्यपास्तम् ॥ २२ ॥

रा० टी०–त्रयोदश इति । हे विभो! वृत्तस्य लोकान्तरे प्रवृत्तस्य ते पितुः अयं त्रयोदशो दिवसः दिनमतः सावशेषास्थिनिचये ऽनवशेषाः अवशेषाः कृत्वा इत्यर्थः । आस्थाः सद्वस्तुविषयकाभिनिवेशः ते सन्ति येषां तैः परिकरैः सहितस्य गात्रः निचये अर्जितवस्तुसमीपे इह अस्मिन्समये त्वं किं किमर्थं विलम्बसे ॥ २२ ॥

गो० टी०–त्रयोदश इति । वृत्तस्य संस्कृतस्य त्रयोदशोऽयं दिवसः सावशेषोऽस्थिनिचये अस्थिसंचयनाख्ये कर्मण्यवशिष्ट इत्यर्थः । दशाहमध्ये शास्त्रविहितं प्रधानावयवास्थिसंचयनं कृतं त्रयोदशे दिवसे तदेकीयशिष्टाचारप्राप्तस्थलशोधनमात्रं कृतमिति न स्मृतिविरोध इत्यप्याहुः । स्मृतिश्चास्माभिर्दर्शितैव ॥ २२ ॥

२३] ति० टी०–त्रीणि द्वन्द्वानि–बुभुक्षापिपासे, शोकमोहौ, जरामृती, जन्ममरणे, सुखदुःखे, लाभालाभौ, चेति तीर्थः । अस्ति, जायते, वर्धते, अपक्षीयते, विपरिणमते, विनश्यतीत्येवंरूपाणीति कतकः । भूतेषु प्राणिषु । एवं भवितुमतिशोकाक्रान्ततया भवितुम् ॥ २३ ॥

रा० टी०–भवतां शोकोसंभव इति बोधयितुमाह–त्रीणीति । त्रीणि त्रित्वसंख्याविशिष्टानि द्वन्द्वानि क्षुत्पिपासे शोकमोहौ जरामृत्यू अविशेषतः सामान्याकारेण भौतिकेषु प्राकृतेष्वेव प्रवृत्तानि अतः अपरिहार्येषु प्राकृतैरनिवर्त्येषु द्वन्द्वेषु भवितुं प्राप्तुं त्वं नार्हसि एतेन तेषां प्राकृतविलक्षणत्वं ध्वनितम् । जन्ममरणसुखदुःखलाभालाभानां द्वन्द्वत्रयाणामपि उपलक्षणादिना तेष्वेवान्तर्भावान्न न्यूनता एकशेषवृत्त्या त्रिशब्देनैव पण्णा ग्रहणे तु नावान्तर्भावविचारक्लेशः ॥ २३ ॥

गो० टी०–त्रीणीति । अशनायापिपासे शोकमोहौ जरामृत्यू इत्युक्तानि त्रीणि द्वन्द्वानि भूतेषु जन्तुषु अविशेषतः प्रवृत्तानि तेषु चापरिहार्येषु प्राप्तेषु त्वमेवं भवितुं नार्हसि अज्ञवन्मोहेन प्रलपितुं नार्हसि ॥ २३ ॥

२४–२५] ति० टी०–सर्वभूतभवाभवौ उत्पत्तिविनाशौ ॥ २४ ॥ २५ ॥

रा० टी०–सुमन्त्र इति । तत्त्वज्ञः सुमन्त्रः शत्रुघ्नमुत्थाप्य अभिप्रसाद्य सर्वभूतभवाभवं सर्वभूतानां प्राकृतानामेव भवाभवमुत्पत्तिविनाशौ नतु प्राकृतविलक्षणानामित्यर्थः, श्रावयामास कथयामास एतेन रामलक्ष्मणविषये कथंचित्संशयो न कार्य इति ध्वनितम् ॥ २४ ॥

रा० टी०–उत्थिताविति । उत्थितौ तौ नरव्याघ्रौ शत्रुघ्नभरतौ पृथगुत्थितौ इन्द्रध्वजाविव प्रकाशेते ॥ २५ ॥

गो० टी०–सुमन्त्र इति । सर्वभूतभवाभवौ सर्वभूतोत्पत्तिविनाशौ ॥ २४ ॥ २५ ॥

२६] ति० टी०–परिमृद्नन्तौ माजयन्तौ । तनयौ राजपुत्रौ अपराः क्रिया भस्मोद्धारादिक्रियाः उद्दिश्येति शेषः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

रा० टी०–अश्रूणीति । अश्रूणि परिमृद्नन्तौ दूरीकुर्वन्तौ दीनभाषिणौ क्षीणभाषाविशिष्टौ तनयौ राजपुत्रौ अपराः त्रयोदशदिनोचिताः क्रियाः कर्तुमिति शेषः, त्वरयन्ति स्म ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

---

१ भवाभवमिति रा. पाठः । २ चेति गो. पाठः । ३ छिन्नाविति गो. पाठः ।

अष्टसप्ततितमः सर्गः ।

रामसमीपयात्रामीहमानं भरतं प्रति पितरं निगृह्य लक्ष्मणः किमिति रामप्रवासं नाचारदिति शत्रुघ्नस्योक्तिः । भूषणभरिता तार्ती द्वारस्थां कुब्जां भरतः सर्वाभरणदातृत्वेन निर्दिशति । सर्वामध्यगतां कुब्जां शत्रुघ्नः कैकेय्याकृष्य धरण्यां क्षेप्तुं न्यकरोत्तमपि निर्भर्त्सयते । कुब्जां विमोक्तुं कैकेयीं भरतं प्रार्थयते । भरतेन सयुक्तिकमुक्तः शत्रुघ्नस्तां मुमोच ।

अथ यात्रां समीहन्तं शत्रुघ्नो लक्ष्मणानुजः । भरतं शोकसंतप्तमिदं वचनमब्रवीत् ॥ १ ॥
गतिर्यः सर्वभूतानां दुःखे किं पुनरात्मनः । स रामः सत्त्वसंपन्नः स्त्रिया प्रव्राजितो वनम् ॥ २ ॥
बलवान्वीर्यसंपन्नो लक्ष्मणो नाम योऽप्यसौ । किं न मोचयते रामं कृत्वापि[1] पितृनिग्रहम् ॥ ३ ॥
पूर्वमेव तु निग्राह्यः समवेक्ष्य नयानयौ । उत्पथं यः समारूढो नार्या राजा वशं गतः ॥ ४ ॥
इति संभाषमाणे तु शत्रुघ्ने लक्ष्मणानुजे । प्राग्द्वारेऽभूत्तदा कुब्जा सर्वाभरणभूषिता ॥ ५ ॥

गो० टी०—अश्रूणीति । परिमृद्नन्तौ मार्जयन्तौ तनयौ राजपुत्रौ अपराः क्रियाः अस्थिसंचयनादिकाः प्रतीति शेषः॥२६॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

१] ति० टी०—यात्रां रामसमीपयात्रां समीहन्तं समीहमानं विचारयन्तमित्यर्थः ॥ १ ॥

रा० टी०—त्रयोदशदिनक्रियासमाप्त्यनन्तरकालिकं वृत्तान्तमाह—अथेति । यात्रां रामसमीपोद्देश्यकगमनं समीहन्तमिच्छन्तं भरतं शत्रुघ्नः इदमब्रवीत् ॥ १ ॥

गो० टी०—अथेत्यादि । अथ अपरक्रियां निर्वर्त्य गृहं प्रति गमनानन्तरं यात्रां रामसमीपगमनं समीहन्तं समीहमानं यात्रोद्युक्तमित्यर्थः ॥ १ ॥

२] ति० टी०—दुःखे दुःखजनकसंकटे प्राप्ते यः सर्वभूतानां गतिः स्मरणमात्रेण सर्वदुःखनाशकः, आत्मनः स्वस्यावयोश्च गतिरिति किं वक्तव्यम् अनेनातिसंकटे भगवत्स्मरणमेव दुःखनाशे समर्थं नान्यदिति सूचितम् । स रामः स्त्रिया प्रव्राजितः स च गत इत्येतदनुचितं तेन कृतं सामर्थ्ये सतीति शेषः ॥ २ ॥

रा० टी०—वचनाकारमाह—गतिरिति । सर्वभूतानां गतिर्यः स रामो नित्यविहारसहितो रामः स्त्रिया सह वनं प्रव्राजितः तस्य दुःखे सति आत्मनः अस्मदादेः दुःखे किं वक्तव्यम् ॥ २ ॥

गो० टी०—गतिरिति । सर्वभूतानां प्राणिमात्रस्य दुःखे सति यो गतिः स आत्मनो दुःखे सति गतिरिति किं पुनः किं वक्तव्यम् । एवं दुःखनिस्तारक्षमो रामः सत्त्वसंपन्नोऽपि बलसंपन्नोऽपि स्त्रिया अत्यन्ताबलया वनं प्रव्राजितः इदमत्यन्तचित्रमिति भावः ॥ २ ॥

३] ति० टी०—किं वा रामो राज्यलोभात्पित्राज्ञामुल्लङ्घितवानित्ययशोभयादेवं करोतु लक्ष्मणः सर्वथाप्युचितं कृतवानित्याह—बलवानिति । लक्ष्मणो नामानुचितकर्तृत्वेन शोच्यः। योऽप्यस्मद्भ्राता असौ पितृनिग्रहं कृत्वा रामं न मोचयते स्म वनवासात् ॥ ३ ॥

रा० टी०—बलवानिति । वीर्यसंपन्नो योऽसौ लक्ष्मणो नाम सः पितृनिग्रहं पित्राग्रहविपर्ययीभूतरामप्रव्राजनं कृत्वा छित्त्वा रामं किं किमर्थं न मोचयते अमोचयत् दुःखादिति शेषः ॥ ३ ॥

गो० टी०—पितृपरतन्त्रो रामः किं करोत्वित्यत्राह—बलवानित्यादिना । नामेति कृत्स्ने 'नामप्राकाश्यसंभाव्यक्रोधोपगमकृत्स्ने' इति वैजयन्ती । लक्ष्मणो नाम योऽपीत्यनादरोक्तिः असौ पितृनिग्रहं कृत्वापि रामं वनवासात् किं न मोचयते स्म किं न मोचितवान् इदमप्यपरमाश्चर्यमिति भावः ॥३॥

४] ति० टी०—कथं पितृनिग्रह उचितस्तत्राह—पूर्वमिति । यो राजा नार्या वशं गतः सन्नुत्पथमन्यायमार्गमारूढः प्राप्तः, अतो लक्ष्मणः स्वयं नयानयौ न्यायान्यायौ अभिषेकविघ्नौ समीक्ष्य विचार्य 'गुरोरप्यवलिप्तस्य' इति शास्त्रानुसारेण वनप्रव्राजनात्पूर्वमेव तत्प्रसङ्गकाल एव निग्राह्यः नेदमनुचितमिति भावः ॥ ४ ॥

रा० टी०—नन्वनिवर्तनीयपित्राग्रहस्य कथं निवृत्तिरित्यत आह—पूर्वमिति । नार्याः स्त्रीणामवशं गतोऽपि यः राजा उत्पथं प्रतिज्ञातनिवर्तनरूपदुर्मार्गं समारूढः मन्थरासंमतिहेतुकारूढवान् स राजा नयानयौ समवेक्ष्य सम्यग्बोधयित्वा पूर्वमाग्रहप्राप्तेः प्रागेव निग्राह्यः निवारणीयः ॥ ४ ॥

गो० टी०—पितृनिग्रहे दोषो नास्तीत्याशङ्कां परिहरति—पूर्वमित्यादिना । यो राजा नार्या वशं गतः उत्पथं समारूढः अपथं प्राप्तः सः नयानयौ नीत्यनीती समवेक्ष्य सम्यक् विचार्य पूर्वमेव अन्यायप्रवृत्तिसमापनात् पूर्वमेव निग्राह्य इति योजना॥४॥

५] ति० टी०—प्राग्द्वारे शत्रुघ्नाधिष्ठितद्वारे कुब्जा दैवादागताभूत् ॥ ५ ॥

रा० टी०—इतीति । तदा तस्मिन्समये शत्रुघ्ने इति अनेन प्रकारेण संभाषमाणे सति सर्वाभरणभूषिता कुब्जा मन्थरा प्राग्द्वारे अभूत् प्राप्तोत् ॥ ५ ॥

गो० टी०—इतीति । कुब्जा प्राग्द्वारेऽभूत् स्वाभिलषितो

१ स्मेति गो. पाठः ।

लिप्ता चन्दनसारेण राजवस्त्राणि बिभ्रती । विविधं विविधैस्तैस्तैर्भूषणैश्च विभूषिता ॥ ६ ॥
मेखलादामभिश्चित्रैरन्यैश्च वरभूषणैः । बभासे बहुभिर्बद्धा रज्जुभिरिव वानरी ॥ ७ ॥
तां समीक्ष्य तदा द्वाःस्थो भृशं पापस्य कारिणीम् । गृहीत्वाकरुणं कुब्जां शत्रुघ्नाय न्यवेदयत् ॥ ८ ॥
यस्याः कृते वने रामो न्यस्तदेहश्च वः पिता । सेयं पापा नृशंसा च तस्याः कुरु यथामति ॥ ९ ॥
शत्रुघ्नश्च तदाज्ञाय वचनं भृशदुःखितः । अन्तःपुरचरान्सर्वानित्युवाच धृतव्रतः ॥ १० ॥
तीव्रमुत्पादितं दुःखं भ्रातॄणां मे तथा पितुः । यथा सेयं नृशंसस्य कर्मणः फलमश्नुताम् ॥ ११ ॥
एवमुक्त्वा च तेनाशु सखीजनसमावृता । गृहीता बलवत्कुब्जा सा तद्गृहमनादयत् ॥ १२ ॥
ततः सुभृशसंतप्तस्तस्याः सर्वः सखीजनः । क्रुद्धमाज्ञाय शत्रुघ्नं व्यपलायत सर्वशः ॥ १३ ॥
आमन्त्रयत कृत्स्नश्च तस्याः सर्वः सखीजनः । यथायं समुपक्रान्तो निःशेषं नः करिष्यति ॥ १४ ॥

भरताभिषेकः कदा भविष्यतीति अवसरं प्रतीक्षमाणा भरतशत्रुघ्नाधिष्ठितराजगृहस्य प्राग्द्वारे दैवादागताभूत् ॥ ५ ॥

६] ति० टी०–राजवस्त्राणि राजार्हवस्त्राणि ॥ ६ ॥

रा० टी०–तामेव वर्णयन्नाह–लिप्तेति । चन्दनसारेण उत्तमचन्दनेन तैस्तैः राजगृहप्रसिद्धैः विविधैः भूषणैः विविधं विभूषिता चित्रैः विचित्रैः मेखलादामभिः अन्यैः अयोध्यादेशाप्रसिद्धैः वरभूषणैः उपलक्षिता मन्थरा बभासे, तत्र दृष्टान्तः रज्जुभिः वेणीभिः बद्धा वानरी तारा इव । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०–लिप्तेति । चन्दनसारेण चन्दनपङ्केन राजवस्त्राणि राजार्हवस्त्राणि कैकेयीदत्तानि, कञ्चुकान्तरीयोत्तरीयादिभेदाद्बहुवचनं तैस्तैरिति तत्तदवयवोचितत्वमुच्यते । एकैकाभरणे रत्नखचितत्वादिवैविध्यमाह–विविधैरिति । विविधमिति क्रियाविशेषणं तेन भूषणसंस्थानविशेष उच्यते ॥ ६ ॥

७] ति० टी०–वानरी कुरूपत्वात् । अत्र गुरुलघुप्रयुक्तश्छन्दोभङ्ग आर्षः । पाठान्तरे चः पादपूरणे ॥ ७ ॥

गो० टी०–मेखलादामभिरिति । भूषणशब्दोऽपि मेखलादामभिन्नपरः गोबलीवर्दन्यायात् अन्यैः मेखलाप्रदेशधारणीयैः बद्धेतिविशेषणात् भूषणानि बन्धनस्थानीयानि न तु शोभाकराणीत्युक्तम् ॥ ७ ॥

८] ति० टी०–अकरुणं निर्दयम् ॥ ८ ॥

रा० टी०–तामिति । तां मन्थरां पापस्य अकालिकप्रव्राजनजनितधर्मस्य कारिणीं तां मन्थरां भृशमत्यन्तं समीक्ष्य अकरुणं यथा स्यात्तथा द्वाःस्थः शत्रुघ्नाय न्यवेदयत् ॥ ८ ॥

गो० टी०–तामिति । अकरुणां निर्दयाम् ॥ ८ ॥

९] ति० टी०–वने रामः तिष्ठतीति शेषः । यथामति निग्रहमिति शेषः ॥ ९ ॥

रा० टी०–निवेदनप्रकारमाह–यस्या इति । यस्याः कृते प्रयत्ने सति रामो वने इति शेषः, वो युष्माकं पिता च अन्यस्तदेहः सशरीरः साकेतं गत इति शेषः, सा नृशंसा क्रूरा पापा सर्वदुःखदानरूपपापकारिणी सा मन्थरा इयमेव तस्या दण्डमिति शेषः, यथामति यथेच्छं कुरु ॥ ९ ॥

गो० टी०–यस्या इति । वने अभूदिति शेषः, कुरु शिक्षणमिति शेषः ॥ ९–१२ ॥

१०] ति० टी०–धृतव्रतः कर्तव्यत्वेनावधृतव्रत इत्यर्थः । ' द्रुतं वचः ' इति पाठान्तरम् ॥ १० ॥

रा० टी०–शत्रुघ्न इति । भृशदुःखितः शत्रुघ्नः तद्वाःस्थोक्तं वचनमाज्ञाय ज्ञात्वा सर्वानन्तःपुरचरान् इति इदं वचः द्रुतमुवाच ॥ १० ॥

११–१३] ति० टी०–अश्नुतां प्राप्नुताम् । तथा कर्तव्यं मयेति शेषः ॥ ११–१३ ॥

रा० टी०–वचनाकारमाह–तीव्रमिति । यया मे भ्रातॄणां पितुश्च दुःखमुत्पादितं सेयं नृशंसस्य क्रूरस्य कर्मणः फलमश्नुतां हन्यतामित्यर्थः ॥ ११ ॥

रा० टी०–एवमिति । तेन शत्रुघ्नेन एवमुक्त्वा सखीजनसमावृता बलवत् अतिबलं यथा स्यात्तथा गृहीता सा कुब्जा तद्गृहमनादयत्स्वोच्चारितशब्देनापूरयदित्यर्थः ॥ १२ ॥

रा० टी०–तत इति । ततः शत्रुघ्नाज्ञापनानन्तरं क्रुद्धं शत्रुघ्नमाज्ञाय सुभृशमत्यन्तं तप्तः सन् तस्याः मन्थरायाः सखीजनः सर्वशः सर्वप्रकारेण व्यपलायत ॥ १३ ॥

गो० टी०–तत इति । विपलायतेति "उपसर्गस्यायतौ" इति रेफस्य लत्वम् ॥ १३ ॥

१४] ति० टी०–समुपक्रान्त आरब्धपराक्रमः ॥ १४ ॥

रा० टी०–पलायनप्रकारमाह–अमन्त्रयतेति । तस्याः मन्थरायाः कृत्स्नः सकलः सखीजनः अमन्त्रयत परस्परं संमतिमकरोत् । संमतिप्रकारमाह–सर्वः सकलस्वजनसहितः समुपक्रान्तः कोपप्रारम्भवान् अयं शत्रुघ्नः नः अस्मान्निश्शेषं यथा भवति तथा यथा यथावत्करिष्यति ॥ १४ ॥

---

१ शुभेति गो. पाठः । २ रज्जुबद्धेवेति गो. पाठः । ३ द्वाःस्थां सुभृशं पापेति गो. पाठः । ४ ऽकरुणामिति गो.पाठः । ५ न्यवेदयन्निति गो. पाठः। ६ द्रुतं वच इति रा. पाठः । ७ यथेति रा. पाठः । ८ उक्ता त्विति गो. पाठः । ९ विपलायतेति गो. पाठः । १० आमन्त्रयतेति गो. पाठः । ११ निःशेषानिति गो. पाठः ।

सानुक्रोशां वदान्यां च धर्मज्ञां च यशस्विनीम् । कौसल्यां शरणं यामः सा हि नोऽस्मिन् ध्रुवा गतिः ॥ १५ ॥
स च रोषेण संवीतः शत्रुघ्नः शत्रुसूदनः । संचकर्ष तदा कुब्जां क्रोशन्तीं पृथिवीतले ॥ १६ ॥
तस्यां ह्याकृष्यमाणायां मन्थरायां ततस्ततः । चित्रं बहुविधं भाण्डं पृथिव्यां तद्व्यशीर्यत ॥ १७ ॥
तेन भाण्डेन विस्तीर्णं श्रीमद्राजनिवेशनम् । अशोभत तदा भूयः शारदं गगनं यथा ॥ १८ ॥
स बली बलवत्क्रोधाद्गृहीत्वा पुरुषर्षभः । कैकेयीमभिनिर्भर्त्स्य बभाषे परुषं वचः ॥ १९ ॥
तैर्वाक्यैः परुषैर्दुःखैः कैकेयी भृशदुःखिता । शत्रुघ्नभयसंत्रस्ता पुत्रं शरणमागता ॥ २० ॥
तं प्रेक्ष्य भरतः क्रुद्धं शत्रुघ्नमिदमब्रवीत् । अवध्याः सर्वभूतानां प्रमदाः क्षम्यतामिति ॥ २१ ॥
हन्यामहमिमां पापां कैकेयीं दुष्टचारिणीम् । यदि मां धार्मिको रामो नासूयेन्मातृघातकम् ॥ २२ ॥

गो० टी०—आमन्त्रयतेति । आमन्त्रयत अन्योन्यमाह्वयत् तस्याः सर्वः सखीजनः कृत्स्नः तदितरः सर्वोऽपि जनः यथा येन प्रकारेणार्यं शत्रुघ्नः उपक्रान्तः तथा नः निःशेषान्करिष्यति जनापेक्षया पुंस्त्वम् । वदान्यां वल्गुवाचम् 'वदान्यो वल्गुवागपि' इति वैजयन्ती । कौसल्यां शरणं याम सा नो ध्रुवा गतिरस्त्वित्यन्योन्यमाह्वयदित्यन्वयः ॥ १४—१६ ॥

१५] ति० टी०—अतः—सानुक्रोशामिति । सा नोऽस्माकं ध्रुवा गतिरस्ति, अतस्तां शरणं याम इत्यमन्त्रयतेत्यन्वयः ॥ १५ ॥

रा० टी०—नन्वु पलायनेऽपि कथं रक्षा भवितेत्यत आह—सानुक्रोशामिति । अनुक्रोशो दया तत्सहितामत एव वदान्यां मृदुभाषणशीलामत एव धर्मज्ञां कौशल्यां शरणं रक्षिकां यामः सा कौशल्या एव नोऽस्माकमिदानीं ध्रुवा गतिरस्ति वर्तमानत्वस्य चिरक्षयेदानींलाभः ॥ १५ ॥

१६] ति० टी०—पृथिवीतले पातयितेति शेषः ॥ १६ ॥

रा० टी०—स इति । रोषेण संवीतः संयुक्तः शत्रुघ्नः क्रोशन्तीं विलपन्तीं कुब्जां पृथिवीतले संचकर्ष ॥ १६ ॥

१७-१८] ति० टी०—भाण्डं भूषणमात्रेऽपि ॥ १७॥१८॥

रा० टी०—तस्यामिति । ततस्ततः तत्र तस्यां कुब्जायामाकृष्यमाणायां सत्यां बहुविधमनेकप्रकारं चित्रमद्भुतं भाण्डं भूषणं व्यशीर्यत विदीर्णतां प्राप्नोत् 'भाण्डं भूषणमात्रेऽपि' इति कोशः ॥ १७ ॥

गो० टी०—तस्या इति । भाण्डं भूषणम् 'वणिङ्मूलधने पात्रे भाण्डं भूषाश्वभूषयोः' इति वैजयन्ती । पृथिव्यां तद्व्यशीर्यत विशीर्णमासीत्, पाठभेदः पृथिव्यां तद्विशीर्यते विशीर्णमासीत्१७

रा० टी०—तेनेति । तेन मन्थरासंबन्धिना भाण्डेन भूषणेन विस्तीर्णं श्रीमद्राजस्य निवेशनं गृहं शारदं शरत्कालसंबन्धि गगनमिव यथा यथावद्भूयोऽधिकमशोभत ॥ १८ ॥

गो० टी०—तेनेति । शारदं प्रसन्ननक्षत्रमित्यर्थः ॥ १८ ॥

१९] ति० टी०—गृहीत्वा कुब्जां कैकेयीमभिनिर्भर्त्स्य कुब्जामोचनार्थमागतामिति शेषः । निर्भर्त्सनमत्र हस्तेन दूरीकरणम् ॥ १९ ॥

रा० टी०—स इति । बली स शत्रुघ्नः कैकेयीं तन्निवारणार्थमागतां स्वमातरं गृहीत्वा निर्भर्त्स्य च परुषं वचो बभाषे एतेन रामवियोगदुःखस्य दुःसहत्वं सूचितम् ॥ १९ ॥

गो० टी०—स इति । बलवत् क्रोधात् अतीवक्रोधात् कैकेयीमभिनिर्भर्त्स्येत्यनेन मन्थरामोचनार्थं तदा कैकेयी समागतेत्यवगम्यते ॥ १९ ॥

२०] ति० टी०—परुषैर्मर्मग्राहिभिः । अत एव दुःखैः पुत्रं शरणमागता कुब्जामोचनार्थमिति शेषः ॥ २० ॥

रा० टी०—तैरिति । तैः शत्रुघ्नोच्चारितैः दुःखैः दुःखप्रापकैः वाक्यैः भृशदुःखिता अत एव शत्रुघ्नभयसंत्रस्ता कैकेयी शरणं मन्थररक्षामुद्दिश्य पुत्रं भरतमागता ॥ २० ॥

गो० टी०—तैरिति । शत्रुघ्नभयसंत्रस्ता पुत्रं शरणमागतेत्यनेन भर्त्सनानन्तरं तां प्रहर्तुमप्युद्युक्तवानिति सूच्यते ॥ २० ॥

२१] ति० टी०—यतः सर्वभूतानामवध्या अतः क्षम्यतामित्यब्रवीत् ॥ २१ ॥

रा० टी०—तमिति । क्रुद्धं तं शत्रुघ्नं प्रेक्ष्य भरतः इदमब्रवीत् । वचनाकारमाह—प्रमदाः स्त्रियः सर्वभूतानामवध्याः इति हेतोः क्षम्यतां मन्थरापराध इति शेषः ॥ २१ ॥

गो० टी०—तामिति । क्षम्यतामित्यब्रवीदित्यन्वयः ॥ २१ ॥

२२] ति० टी०—मातृघातकं मां प्रति यदि रामो नासूयेन्न कुप्येत्, तदाहमिमां मातरमपि हन्याम् ॥ २२ ॥

रा० टी०—हन्यामिति । यदि मन्थरावधे इति शेषः, धार्मिको रामः मां मातृघातकं नासूयेत्तर्हि दुष्टचारिणीं दुष्टाचरणप्रापणशीलामत एव पापां कैकेयीं कैकेयीदासीमिमां मन्थरामहं हन्याम् । मन्थरायां मातृत्वं च मातृसखीत्वेनारोपात् ॥ २२ ॥

गो० टी०—हन्यामिति । नासूयेन्न गर्हेत ॥ २२ ॥

---

१ यामेति गो. पाठः । २ ताम्राक्ष इति गो. पाठः । ३ तापन इति गो. पाठः । ४ बिचकर्षेति गो. पाठः । ५ चरणीति गो. पाठः । ६ तस्या ह्याकृष्यमाणाया मन्थराया इति गो. पाठः । ७ संस्तीर्णमिति गो. पाठः । ८ तां प्रेक्ष्येति गो. पाठः ।

इमामपि हतां कुब्जां यदि जानाति राघवः । त्वां च मां चैव धर्मात्मा नाभिभाषिष्यते ध्रुवम्॥२३॥
भरतस्य वचः श्रुत्वा शत्रुघ्नो लक्ष्मणानुजः । न्यवर्तत ततो दोषात्तां मुमोच च मूर्छिताम् ॥ २४॥
सा पादमूले कैकेय्या मन्थरा निपपात ह । निःश्वसन्ती सुदुःखार्ता कृपणं विललाप हैं॥ २५ ॥
शत्रुघ्नविक्षेपविमूढसंज्ञां समीक्ष्य कुब्जां भरतस्य माता ।
शनैः समाश्वासयदार्तरूपां क्रौञ्चीं विलग्नामिव वीक्षमाणाम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥

एकोनाशीतितमः सर्गः ।

मन्त्रिप्रमुखाश्चतुर्दशेऽह्नि भरतं प्रति राज्यस्वीकारेऽभ्यर्थयन्त । तत्प्रतिषिध्य रामं प्रत्यानिनीषुर्भरतो यात्रार्थं मार्गादिनिर्माणे शिल्पिनो योजयितुं मन्त्रिणः प्राचोदयत् ।

ततः प्रभातसमये दिवसेऽथ चतुर्दशे । समेत्य राजकर्तारो भरतं वाक्यमब्रुवन् ॥ १ ॥
गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः । रामं प्रव्राज्य वै ज्येष्ठं लक्ष्मणं च महाबलम् ॥ २ ॥
त्वमद्य भव नो राजा राजपुत्र महायशः । संगत्या नापराप्नोति राज्यमेतदनायकम् ॥ ३ ॥

२३-२५] ति० टी०-जानाति ज्ञास्यते । नाभिभाषिष्यते श्रीघातिनाविति मत्वा इत्यब्रवीदिति पूर्वेण संबन्धः॥२३-२५॥

रा० टी०-इमामिति । इमां कुब्जां हतां त्वत्कर्तृकप्राणवियोगाश्रयीभूतां यदि राघवो जानाति जानीयात्तर्हि त्वां मां च न अभिभाषेत ध्रुवं निश्चितमेतत् ॥ २३ ॥

रा० टी०-भरतस्येति । भरतस्य वचः वचनं श्रुत्वा शत्रुघ्नः ततः मन्थरावधरूपादोषान्न्यवर्तत अत एव तां मन्थरां मुमोच ॥ २४ ॥

रा० टी०-सेति । सा भरतेन मोचिता सुदुःखार्ता मन्थरा कैकेय्याः पादमूले निपपात कृपणं यथा स्यात्तथा विललाप च ॥ २५ ॥

गो० टी०-मा भून्मातृहत्या सर्वकुहनामूलभूतेयमेव कुब्जा हन्यतामित्यत्राह-इमामित्यादिना । नाभिभाषिष्यते इत्यब्रवीदिति अनुकृष्टेन पूर्वेण संबन्धः ॥ २३-२५ ॥

२६] ति० टी०-शत्रुघ्नविक्षेपः शत्रुघ्नेनेतस्ततः कर्षणं तेन प्रनष्टज्ञानां विलग्नां यन्त्रादिना संयताम् ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥

रा० टी०-शत्रुघ्नेति । शत्रुघ्नविक्षेपेण तत्कर्तृकात्याकर्षणेन विमूढा विवेकरहिता संज्ञा बुद्धिर्यस्यास्तामार्तरूपां दुःखचेष्टावतीं विलग्नां विगतवायुरां क्रौञ्चीमिव वीक्षमाणां कुब्जां भरतस्य माता समीक्ष्य शनैः समाश्वासयत् । शनैरित्यनेन तस्याः अपि वियोगदुःखितात्वं सूचितम् ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्या+ण्डेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥

गो० टी०-शत्रुघ्नविक्षेपविमूढसंज्ञामिति । विक्षेपो भामणं तेन विमूढसंज्ञाम् अन्यथाभूतमतिं विलग्नां वायुरालग्नामिति भावः 'विविग्नाम्' इति पाठे कम्पवतीमित्यर्थः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्यानेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥

१] ति० टी०-तत इति ॥ १ ॥

रा० टी०-चतुर्दशदिवसत्तमाह-तत इत्यादिभिः । चतुर्दशे दिवसे प्रभातसमये राजकर्तारो राजोचितमार्गप्रदर्शकाः मन्त्रिणः समेत्य एककालावच्छेदेनागत्य भरतमब्रुवन्॥१॥

गो० टी०-ततः प्रभात इत्यादि । त्रयोदशदिवसपर्यन्तमपरक्रियाव्याकृत्तत्वाच्चतुर्दश इत्युक्तं, समेत्य एकीभूय ॥ १ ॥

२] ति० टी०-रक्षासाधनत्वाद्राजा गुरुः, तत्राप्ययं गुरुतरः । ज्येष्ठं राज्यार्हम् ॥ २ ॥

रा० टी०-तद्वाक्याकारमाह-गत इति । गुरुतरः अतिश्रेष्ठो गुरुर्यो दशरथः सः रामं प्रव्राज्य स्वर्गं साकेतं गतः प्राप्तः ॥ २ ॥

गो० टी०-गत इति । गुरुतरो गुरुः परमगुरुरित्यर्थः॥२॥

३] ति० टी०-यत एतद्राज्यमनायकं ततो राजा भव । नन्वु ज्येष्ठे विद्यमाने कथमहं राजा तत्राह-संगत्या ज्येष्ठस्य वनवासं प्रति पितुराज्ञासंगत्या तव च राज्यं प्रति तदाज्ञासंगत्या राज्यं कुर्वन्नपि भवान्नापराप्नोति धर्मविरोधज्येष्ठविरोधलोकविरोधान्न प्राप्नोति । पित्राज्ञाया उभाभ्यामपि पालनीयत्वादिति बहवः । एतद्राज्यमनायकमप्यमात्यादीनां संगत्यैकमत्येन दैवगत्या वा नापराप्नोति न नश्यति, अतो नो राजा भवेत्यर्थं तीर्थ आह ॥ ३ ॥

रा० टी०-नन्वु तर्हि किं कर्तव्यमित्यत आह-त्वमिति ।

१ इति गो. पाठः । २ भाषेत वै इति रा. पाठः । ३ मन्थरामिति गो. पाठः । ४ चेति गो. पाठः । ५ चेति गो. पाठः ।

आभिषेचनिकं सर्वमिदमादाय राघव । प्रतीक्षते त्वां स्वजनः श्रेणयश्च नृपात्मज ॥ ४ ॥
राज्यं गृहाण भरत पितृपैतामहं ध्रुवम् । अभिषेचय चात्मानं पाहि चास्मान्नरर्षभ ॥ ५ ॥
आभिषेचनिकं भाण्डं कृत्वा सर्वं प्रदक्षिणम् । भरतस्तं जनं सर्वं प्रत्युवाच धृतव्रतः ॥ ६ ॥
ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्य नः । नैवं भवन्तो मां वक्तुमर्हन्ति कुशला जनाः ॥ ७ ॥
रामः पूर्वो हि नो भ्राता भविष्यति महीपतिः । अहं त्वरण्ये वत्स्यामि वर्षाणि नव पञ्च च ॥ ८ ॥
युज्यतां महती सेना चतुरङ्गमहाबला । आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ॥ ९ ॥
आभिषेचनिकं चैव सर्वमेतदुपस्कृतम् । पुरस्कृत्य गमिष्यामि रामहेतोर्वनं प्रति ॥ १० ॥
तत्रैव तं नरव्याघ्रमभिषिच्य पुरस्कृतम् । आनयिष्यामि वै रामं हव्यवाहमिवाध्वरात् ॥ ११ ॥

यतः अथ अस्मिन् समये एतद्राज्यमनायकं राजरहितमतः त्वं राजा भव एतेन मन्त्रिणां शत्रुकर्तृकाक्रमणशङ्का भरताभिप्रेतज्ञानेच्छा वा सूचिता । ननु सर्वसामर्थ्यविशिष्टज्येष्ठस्य विद्यमानत्वात्कथं मत्कर्तृकराजत्वप्राप्तिरित्यत आह–सङ्कल्प्य ज्येष्ठसंमत्या राजत्वं प्राप्त इति शेषः । नापराध्नोति अपराधं न प्राप्नोति एतेन रामाभिप्रेतमेवास्माभिरुच्यते इति सूचितम् ॥३॥

गो० टी०–त्वमिति । ' राजानं प्रथम विन्देत्ततो भार्यां ततो धनम् ' इति मातापित्रादेरपि राज्ञ एवान्तरङ्गरक्षकत्वोपदेशात् अनायकमपि एतद्राज्यं सङ्कल्प्य दैवयोगेन नापराध्नोति राज्यस्थजनजातमन्योन्यं न द्रुह्यतीत्यर्थः ॥ ३ ॥

४–५] ति० टी०–आभिषेचनिकमभिषेचनप्रयोजनं वस्तुजातं रामाभिषेकाय विततम् । स्वजनो मन्त्र्यादिः, श्रेणयः पौराः ॥ ४ ॥ ५ ॥

रा० टी०–अन्येषामप्येवैव संमतिरिति बोधयन्नाह–आभिषेचनिकमिति । राघव हे भरत ! आभिषेचनिकमभिषेकप्रयोजनकमिदं सर्वं सामग्रीजातमादाय गृहीत्वा स्वजनः अमात्यवर्गः श्रेणयः पौराश्च त्वां प्रतीक्षते प्रतीक्षन्ते च वचनविपरिणामेनान्यत्राप्यन्वयः ॥ ४ ॥

रा० टी०–राज्यमिति । हे भरत ! पितृपैतामहं राज्यं ध्रुवं गृहाण अत एव आत्मानमभिषेचय अत एव अस्मान्पाहि रक्ष ॥ ५ ॥

गो० टी०–प्रकृत्याभिमुख्यमप्यस्तीत्याह–आभिषेचनिकमिति । आभिषेचनिकम् अभिषेकप्रयोजनं पदार्थजातं स्वजनः अमात्यादयः श्रेणयः नैगमाः प्रतीक्षन्त इति विपरिणामः ॥ ४ ॥ ५ ॥

६] ति० टी०–भाण्डमुपकरणम् ॥ ६ ॥

रा० टी०–आभिषेचनिकमिति । आभिषेचनिकमभिषेकप्रयोजनकं सर्वं भाण्डं सामग्रीजातं प्रदक्षिणं भरतानुकूलं यथा स्यात्तथा कृत्वा निवेद्य विद्यमानं सर्वं जनं प्रति धृतव्रतः अतोषकव्रतपरायणो भरतः प्रत्युवाच ॥ ६ ॥

गो० टी०–आभिषेचनिकमिति । भाण्डम् उपकरणम् ६

७] ति० टी०–राजता राजत्वम् ॥ ७ ॥

रा० टी०–प्रतिवचनाकारमाह–ज्येष्ठस्येति । नोऽस्माकं कुलस्य राजता राजत्वं ज्येष्ठस्य नित्यमुचिता अतः कुशला जनाः भवन्तः एवं वक्तुं नार्हन्ति ॥ ७ ॥

गो० टी०–ज्येष्ठस्येति । राजता राजत्वम् ॥ ७ ॥

८] ति० टी०–पूर्वो ज्येष्ठः । अरण्ये वत्स्यामि रामप्रतिनिधित्वेनेति शेषः ॥ ८ ॥

रा० टी०–ननु तर्हि कथं राज्यरक्षणमित्यत आह–राम इति । पूर्वो ज्येष्ठः नोऽस्माकं भ्राता रामः महीपतिर्भविष्यति, अरण्ये रामेप्सितवने तु अहं वत्स्यामि ॥ ८ ॥

गो० टी०–राम इति । वत्स्यामि रामप्रतिनिधित्वेनेति शेषः ॥ ८ ॥

९] ति० टी०–आनयिष्यामि इडार्षः ॥ ९ ॥

रा० टी०–युज्यतामिति । चतुरङ्गमहाबला चतुर्भिः अङ्गैः सहिताः महाबला यस्यां सा महती सेना युज्यताम् । तत्प्रयोजनमाह–राघवं रामं वनादहमानयिष्यामि आनेष्यामि ॥ ९ ॥

गो० टी०–युज्यतामिति । आनयिष्यामीत्यत्र इडार्षः ॥ ९ ॥

१०] ति० टी०–रामहेतो रामाभिषेकार्थम् ॥ १० ॥

रा० टी०–ननु यदि नायास्यति तदा कथं तदभिषेक इत्यत आह–आभिषेचनिकमिति । पुरस्कृतं भवद्भिः संमुखे प्रदर्शितमाभिषेचनिकमेतदुपस्कृतमग्रे कृतं यथा स्यात्तथा वनं प्रति गमिष्यामि ॥ १० ॥

गो० टी०– आभिषेचनिकमिति । उपस्कृतं संस्कृतम् उपकरणमिति वार्थः, रामहेतोः रामाभिषेकार्थम् ॥ १० ॥

११] ति० टी०—पुरस्कृतमग्रतः कृतम् । अध्वरान्महायज्ञशालायाः स्वाग्निहोत्रगृहमित्यर्थः ॥ ११ ॥

रा० टी०–तत्रेति । पुरस्कृतं पूजितं तं राममध्वरात् यज्ञशालातः हव्यवाहमग्निमिव आनयिष्यामि आनेष्यामि 'पुरस्कृतः पूजितः स्यादभियुक्तेऽग्रतः कृते' इति वैजयन्ती ॥ ११ ॥

गो० टी०–तत्रैवेति । पुरस्कृतं पूजितम् 'पुरस्कृतः पूजिते स्यादभियुक्तेऽग्रतः कृते' इति वैजयन्ती । यद्वा पुरस्कृतं स्वजनदर्शनेनाभिमुखीकृतमित्यर्थः । अध्वरात् यागशालायाः हव्यवाहं त्रेताग्निम् ॥ ११ ॥

१ आनेष्यामि तु वै इति गो. पाठः ।

न सकामां करिष्यामि स्वामिमां मातृगन्धिनीम् । वने वत्स्याम्यहं दुर्गे रामो राजा भविष्यति ॥ १२ ॥
क्रियतां शिल्पिभिः पन्थाः समानि विषमाणि च । रक्षिणश्चानुसंयान्तु पथि दुर्गविचारकाः ॥ १३ ॥
एवं संभाषमाणं तं रामहेतोर्नृपात्मजम् । प्रत्युवाच जनः सर्वः श्रीमद्वाक्यमनुत्तमम् ॥ १४ ॥
एवं ते भाषमाणस्य पद्मा श्रीरुपतिष्ठताम् । यस्त्वं ज्येष्ठे नृपसुते पृथिवीं दातुमिच्छसि ॥ १५ ॥
अनुत्तमं तद्वचनं नृपात्मजः प्रभाषितं संश्रवणे निशम्य च ।
प्रहर्षजास्तं प्रति बाष्पबिन्दवो निपेतुरार्याननने त्रसंभवाः ॥ १६ ॥

१२] ति० टी०–मातृगन्धिनीं केवलमातृव्यपदेशां मातृसंज्ञामात्रामित्यर्थ इति तीर्थः । कतकस्तु–' पुत्रगृद्धिनीम् ' इति पाठः पुत्रगर्धिनीमित्यर्थ इत्याह ॥ १२ ॥

रा० टी०– नेति । स्वां स्वमातृकुलोद्भवामत एव मातृगन्धिनीं मातृस्नेहलेशविशिष्टामिमां मन्थरां मद्राज्यविषयकेच्छावतीं न करिष्यामि अत एव दुर्गे दुर्गमे वत्स्यामि अत एव रामो राजा भविष्यति ॥ १२ ॥

गो० टी०–नेति । मातृगन्धिनीं केवलमातृव्यपदेशां लेशमात्रमातृभावामिति वा 'गन्धो लेशे महीगुणे' इति वैजयन्ती १२

१३] ति० टी०–शिल्पिनः खनकाः यत्र पथोऽभावस्तत्र पन्था गमनमार्गः क्रियताम्, विषमाणि च निम्नोन्नतानि च समानि क्रियन्ताम् रथादिसुखगत्यर्थमिति भावः । पथि विषमानेषु दुर्गेषु विशेषेण जनांश्चारयन्तीति पथिदुर्गविचारकाः । ' पथिदुर्गविशारदाः ' इति पाठे तत्र वर्तमानदुर्गे चोरादिभीत्या गन्तुमशक्यप्रदेशे रक्षणविशारदा इत्यर्थः ॥ १३ ॥

रा० टी०–क्रियतामिति । शिल्पिभिः शिल्पकर्मकुशलैः पन्थाः मार्गः क्रियतां विषमाणि उन्नतानुन्नतत्वविशिष्टस्थलानि समानि एकरूपाणि क्रियन्ताम्, रक्षिणः रक्षणनिपुणाः पथिदुर्गविचारकाः पथि मार्गे दुर्गस्य दुर्गस्थलस्य विचारकाः शोधकाश्च अनुसंयान्तु ॥ १३ ॥

गो० टी०–क्रियतामिति । तत्समीपगमनायेति शेषः । विषमाणि निम्नोन्नतस्थलानि समानि क्रियन्तां पथिदुर्गविचारकाः मार्गे दुर्गस्थलशोधकाः, यद्वा दुर्गाभिज्ञा रक्षिणः ॥ १३ ॥

१४] ति० टी०–एवं संभाषमाणं तं प्रति सर्वोऽपि जनः श्रीमच्छब्दमनुत्तमं वाक्यमुवाच ॥ १४ ॥

रा० टी०–एवमिति । रामहेतोः श्रीमत्संपत्तिकारकमनुत्तमं सर्वोत्तमं वाक्यम् एवं संभाषमाणं तं भरतं सर्वो जनः प्रत्युवाच ॥ १४ ॥

गो० टी०–एवमिति । रामहेतोः अनुत्तमं श्रीमद्वाक्यम् एवं संभाषमाणं: प्रत्युवाचेति संबन्धः ॥ १४ ॥

१५] ति० टी०–तदेवाह–एवमिति । एवं रामराज्यविषयं भाषमाणस्य ते पद्मा तदाख्या पद्मचिह्ना च श्रीरुपतिष्ठताम्, ज्येष्ठानुसरणादिति भावः । तदेवाह–यस्त्वमिति । ज्येष्ठे ज्येष्ठाय पृथिवीं दातुमिच्छसि, अतः श्रीस्त्वामुपतिष्ठताम् ॥ १५ ॥

रा० टी०–तत्प्रतिवचनमेवाह–एवमिति । यस्त्वं ज्येष्ठे पृथिवीं दातुमिच्छसि तस्यैवंभाषमाणस्य ते पद्मा कमलकरा श्रीः लक्ष्मीः उपतिष्ठतां स्तौतु, वयं न स्तवने समर्था इत्यर्थः । एतेनेदमेव कर्तव्यमिति सूचितम् ॥ १५ ॥

गो० टी०–एवमिति । पद्मा पद्माख्या श्रीः ते उपतिष्ठतां त्वत्समीपे अनपायिनी तिष्ठत्वित्यर्थः । नृपसुते नृपसुताय स एव सुतः ज्येष्ठत्वात् 'इतरे कामजाः स्मृताः' इतिवचनादिति भावः १५

१६] ति० टी०–संश्रवणे रामानयनप्रतिज्ञाविषयेऽनुत्तमं नृपात्मजेन प्रभाषितं तद्वचनं निशम्य स्थितानां जनानां प्रति भरतमुद्दिश्य प्रहर्षजा आर्याननने त्रसंभवा हर्षयुक्तमुखस्थनेत्रजबिन्दवो निपेतुरिति तीर्थः । अत्र आननपदमधिकम् । कतकस्तु–' नृपात्मजः प्रभाषितम् ' इति सविसर्गपाठः । नृपात्मजो जनैः प्रभाषितमनुत्तमं तद्वचनमाशीर्वचनं संश्रवणे सम्यक्श्रवणविषये प्राप्तं निशम्य श्रुत्वा हृष्टोऽभूदिति शेषः । अथ तं प्रति तं जनं लक्षीकृत्य कर्मप्रवचनीयत्वाद्वितीया । आर्यस्य पूज्यस्य भरतस्यार्यं पूज्यं यदाननं मुखम् । जनाशीर्वादश्रवणजसंतोषेण पूज्यत्वं मुखस्य । तद्भर्तिनेत्रसंभवाः, अत एव प्रहर्षजा बिन्दवो निपेतुः । अनुक्तभरतसौमुख्यकथनं चास्य श्लोकस्य प्रयोजनमित्याह–अत्र कतकपाठस्तद्व्याख्या च ज्यायसी ॥ १६ ॥

रा० टी०–अनुत्तममिति । संश्रवणे रामानयनप्रतिज्ञाविषये नृपात्मजप्रतिभाषितमनुत्तममत्युत्कृष्टं तद्वचनं निशम्य श्रुत्वा प्रहर्षजाः अतिहर्षेण सम्भ्रूताः आर्याननने त्रसंभवाः आर्याणामुत्तमानामननं जीवनं येभ्यः यद्वेतुकानन्दानुमानेन अन्येऽपि सज्जनाः सानन्दा भवन्तीत्यर्थः । ते एव नेत्रसंभवाः नयनजाताः बाष्पबिन्दवः निपेतुः । कतकस्तु ' नृपात्मजः प्रभाषितम् ' इति सविसर्गः पाठः । नृपात्मजो जनैः प्रभाषितमाशीर्वचनं संश्रवणे सम्यक् श्रवणविषये प्राप्तं निशम्य श्रुत्वा हृष्टोऽभूदिति शेष इति भट्टाः ॥ १६ ॥

गो० टी०–अनुत्तममिति । संश्रवणे रामानयनप्रतिज्ञाविषये । ' आगूसंगरसंधाः प्रतिश्रवः संश्रवः प्रतिज्ञा च ' इति हलायुधः । निशम्य स्थितानामिति शेषः । आर्याननने त्रसंभवा इत्यत्र आर्येत्यविभक्तिकनिर्देशः आर्याणामिति यावत् ॥ १६ ॥

१ नृपात्मजेति गो. रा. पाठः ।

ऊचुस्ते वचनमिदं निशम्य हृष्टाः सामात्याः सपरिषदो वियातशोकाः ।
पन्थानं नरवर भक्तिमाञ्जनश्च व्यादिष्टस्तव वचनाच्च शिल्पिवर्गः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

अशीतितमः सर्गः ।

भरतामात्यनियुक्ताः शिल्पिन आगङ्गातटं सुरम्यशिबिरोदपानादिभिः सुखसंचारं मार्गं निर्ममुः ।

अथ भूमिप्रदेशज्ञाः सूत्रकर्मविशारदाः । स्वकर्माभिरताः शूराः खनका यन्त्रकास्तथा ॥ १ ॥
कर्मान्तिकाः स्थपतयः पुरुषा यन्त्रकोविदाः । तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः ॥ २ ॥
सूपकाराः सुधाकारा वंशचर्मकृतस्तथा । समर्था ये च द्रष्टारः पुरस्तैर्ये प्रतस्थिरे ॥ ३ ॥

१७] ति० टी०—इदं वचनं रामानयनवचनम् । वियातो विशेषेण यातो गतः शोको येषां ते जना इति विशेष्यम् । ' विधूतशोकाः ' इति पाठान्तरम् । हे नरवर ! तव वचनाद्रामे त्वयि च भक्तिमाञ्छिल्पिवर्गः पन्थानं कर्तुं व्यादिष्टो जनो रक्षकजनश्च रक्षणं कर्तुं व्यादिष्टः ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

रा० टी०—ऊचुरिति । हे नरवर ! इदं भरतोक्तं वचनं निशम्य श्रुत्वा वियातशोकाः शोकरहिताः अत एव हृष्टाः सामात्याः अमात्यसहिताः सपरिषदः परिषत्सहिताः ते जनाः पन्थानं मार्गं रचयितुमिति शेषः, भक्तिमान् शिल्पिवर्गः जनः रक्षणकुशलपुरुषश्च तव वचनाद्यादिष्टः कथितः अस्माभिरिति शेषः, इदं वचनमूचुः इदं वचनमिति चोभयान्वयि ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

गो० टी०—ऊचुरिति । हे नरवर ! तव वचनात् शिल्पिवर्गः भक्तिमान् जनः रक्षकश्च पन्थानं प्रति व्यादिष्टः आज्ञप्तः इतीदमूचुरिति संबन्धः ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोनाशीतितमः सर्गः ॥ ७९ ॥

१] ति० टी०—भूमिप्रदेशज्ञा अन्तःसजलनिर्जलादिभूमिप्रदेशज्ञाः । सूत्रकर्मविशारदाः शिबिरादिनिर्माणे सूत्रग्रहणकुशलाः निर्जलेष्वगाधवापीकूपादिनिर्माणं सूत्रकर्मेति कतकः । खनकाः स्वकर्मणि खननेऽभिरताः परसैन्यावष्टम्भेऽपि खनने दक्षाः, अत एव शूराः, यन्त्रका जलप्रवाहादियन्त्रणसमर्थाः॥१॥

२] ति० टी०—कर्मान्तिका वेतनजीविनः स्थपतयो रथादिकर्तारः, प्रधानवर्धकयः यन्त्रकोविदाः क्षेपणीयादियन्त्रकरणकुशलाः । ' पथदर्शनकोविदाः ' इति पाठान्तरम् । वर्धकयस्तक्षाणः, मार्गिणस्तत्तद्वनमार्गविशेषरक्षानियुक्ताः, वृक्षतक्षका मार्गावरोधिवृक्षच्छेत्तारः ॥ २ ॥

३] ति० टी०—सूपकाराः सूदाः, सुधा अवलेपः, वंशचर्मकृतो वंशदलैः कटशर्पादिकृतः । चर्मकृतोऽस्थानाधमर्ण्यशरीरोप्यमाणपल्ययनादिकृतः । समर्था द्रष्टारः पूर्वानुभूतमार्गा-मार्गदृष्टारः ॥ ३ ॥

रा० टी०—शिल्पादिनियोगकत्वेमात्यादिप्रार्थनानन्तरकालिकं वृत्तमाह—अथेत्यादिभिः । अथ भरताज्ञाश्रवणानन्तरं स्वकर्माभिरताः स्वस्वक्रियाविषयकातिप्रीतिमन्तः अत एव शूराः स्वस्वकर्मविषयककातर्यरहिताः भूमिप्रदेशज्ञाः सजलनिर्जलादिप्रदेशज्ञानवन्तः, सूत्रकर्मविशारदाः वेश्मादिनिर्माणोपयुक्तसूत्रग्रहणरूपक्रियानिपुणाः, खनकाः वापीकूपादिनिर्माणचतुराः, यन्त्रकाः नद्यादितरणकारणीभूतसयोयन्त्रनिर्मायकाः, कर्मान्तिकाः वेतनजीविनः साधारणकर्मकरा इत्यर्थः, स्थपतयः प्रधानशिल्पिनः 'स्थपतिः कल्वुकी कारुभेदे' इति नानार्थः, यन्त्रकोविदाः प्रक्षेपणीयप्रभृतियन्त्रनिर्माणनिपुणाः, वर्धकयस्तक्षाणः, ' तक्षा तु वर्धकिः ' इत्यमरः, मार्गिणः वनाध्वरक्षणयोग्याः, वृक्षतक्षकाः मार्गप्रतिबन्धकीभूतवृक्षावयवादिच्छेत्तारः पुरुषा इति सर्वेषां विशेष्यम् सूपकाराः पाककर्तारः । एतत्स्थाने ' कूपकारा ' इति भूषणपाठः । सुधाकाराः प्रासादादिभिरुद्यादिलेपनकारणीभूतपाषाणादिभस्मनिर्मापकाः, वंशचर्मकृतः वेणुत्वक्छेदकाः, समर्थाः चिरकालानुभूतविषयकस्मृतिविषयकसामर्थ्यविशिष्टाः, द्रष्टारः अनुभूतमार्गाश्च ये पुरुषास्ते पुरतः प्रतस्थिरे । श्लोकत्रयमेकान्वयि ॥ १–३ ॥

गो० टी०—अथेत्यादि । भूमिप्रदेशज्ञाः निम्नोन्नतादिप्रदेशज्ञाः, यद्वा नानादेशविदः सूत्रकर्मविशारदाः सूत्रकर्मणि निर्जलप्रदेशेष्वगाधवापीकूपादिजलोद्धारसूत्रकर्मणि विशारदाः समर्थाः, यद्वा सूत्रैः कर्म सूत्रकर्म तत्र विशारदाः समर्थाः तन्तुवाया इत्यर्थः । स्वकर्माभिरताः मार्गरक्षणादिस्वकर्मसावधानाः, खनकाः खननोपजीविनः सुरङ्गादिकृत इत्यर्थः, यन्त्रकाः महाकुल्यादितरणाय काष्ठादिना उपयन्त्रप्रकर्तारः वागुरिकाः वा, कर्मान्तिकाः कर्मणि अन्तोऽवसानमेषा-

१ व्यादिष्टा इति गो. पाठः । २ कूपकारा इति गो. पाठः । ३ कर्मकृत इति गो. पाठः । ४ ते इति गो. पाठः ।

स तु हर्षात्तमुद्देशं जनौघो विपुलः प्रयान् । अशोभत महावेगः सागरस्येव पर्वणि ॥ ४ ॥
ते स्ववारं समास्थाय वर्त्मकर्मणि कोविदाः । करणैर्विविधोपेतैः पुरस्तात्संप्रतस्थिरे ॥ ५ ॥
लता वल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च । जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान्द्रुमान् ॥ ६ ॥
अवृक्षेषु च देशेषु केचिद्वृक्षानरोपयन् । केचित्कुठारैष्टङ्कैश्च दात्रैश्छिन्दन्कचित्कचित् ॥ ७ ॥
अपरे वीरणस्तम्बान्बलिनो बलवत्तराः । विधमन्ति स्म दुर्गाणि स्थलानि च ततस्ततः ॥ ८ ॥
अपरेऽपूरयन्कूपान्पांसुभिः श्वभ्रमायतम् । निम्नभागांस्तथैवाशु समांश्चक्रुः समन्ततः ॥ ९ ॥

मस्तीति कर्मान्तिकाः परिकल्पितकर्मकारिणः भृतिजीविन इति यावत्, स्थपतयः कारवः 'स्थपतिः कारुभेदेऽपि' इत्यमरः। पुरुषाः अध्यक्षराजपुरुषाः, यन्त्रकोविदाः क्षेपणीयादियन्त्रकरणसमर्थाः, वर्धकयस्तक्षाणः ' तक्षा तु वर्धकिः ' इत्यमरः । मार्गिणः मार्गसमीकरणसमर्थाः, टङ्कतक्षकाः मार्गनिरोधकवृक्षच्छेदकाः, कूपकाराः कूपनिर्माणसमर्थाः, सुधाकाराः प्रासादस्थलश्लिष्यादिलेपनकराः, वंशकर्मकृतः वंशैः कटापिटकशर्पादिकर्मकराः, समर्थाः कार्यान्तरेषु समर्थाः, द्रष्टारः पूर्वानुभूतमार्गाः मार्गप्रदर्शका इति यावत् ॥ १-३ ॥

४] ति० टी०-स त्विति । एवं मार्गसंनाहप्रवृत्तौ जनौघो रामदर्शनकौतुकजहर्षान्महावेगो महावेगवान्प्रयान्गच्छन्पर्वणि सागरस्य महावेगो जलौघ इवाशोभत ॥ ४ ॥

रा० टी०-स इति । तं रामाधिष्ठितमुद्देशं प्रदेशं हर्षात्प्रयान् गच्छन् जनौघः पर्वणि सागरस्य महावेग इव अशोभत ॥ ४ ॥

गो० टी०-स त्विति । हर्षात् कर्मकरणस्य दुःखात्मकत्वेऽपि जनौघस्य हृष्टत्वं रामदर्शनकुतूहलात्, तमुद्देशं प्रयान् रामाधिष्ठितप्रदेशमुद्दिश्य गच्छन् ॥ ४ ॥

५] ति० टी०-ते मार्गशोधकाः स्ववारं स्वसमूहं समास्थाय । 'वारसंघातसंचयाः' इत्यमरः । विविधोपेतैर्नानाप्रकारयुक्तैः पिटकखनित्रदात्रादिकरणैर्युक्ता इति शेषः ॥ ५ ॥

रा० टी०-ते इति । ते पूर्वोक्ताः कोविदाः निपुणाः स्ववारं स्वस्वजातीयसंघं समास्थाय विविधोपेतैः अनेकप्रकारविशिष्टैः करणैः स्वस्वकर्मनिष्पादकसामग्रीभिः पुरस्तात्प्रतस्थिरे 'वारसंघातसंचयाः' इत्यमरः ॥ ५ ॥

गो० टी०-त इति । ते मार्गशोधकाः स्ववारं समास्थाय स्वस्वशोध्यमार्गशोधने अन्योन्यपर्यायकरणं प्राप्य ' निवहावसरौ वारौ ' इत्यमरः । विविधोपेतैः विविधाः नानाप्रकाराः तानुपेतैः नानाविधैरित्यर्थः, करणैः खनित्रपिटककुठारादिभिः सह पुरस्तात्संप्रतस्थिरे ॥ ५ ॥

६] ति० टी०-लताः शाखाः, स्थाणून्शङ्कून् अपसारयन्त इति शेषः ॥ ६ ॥

रा० टी०-लता इति । लताः मार्गावरोधकशाखाः ' समे शाखालते ' इत्यमरः । वल्लीः वीरुधः, गुल्मान्गुच्छान्, स्थाणून् शङ्कूनपरिछिन्नोर्ध्वभागकाल्पवृक्षानित्यर्थः । ' स्थाणुरस्त्री ध्रुवः शङ्कुः ' इत्यमरः। अश्मनः पाषाणान् विविधान् द्रुमांश्च छिन्दन्तो जनाः मार्गं चक्रिरे ॥ ६ ॥

गो० टी०-लता इति । लताः मार्गावरणीभूताः शाखाः ' समे शाखालते ' इत्यमरः । वल्लीः वीरुधः, गुल्मान् कक्षान्, स्थाणून् शङ्कून् ' स्थाणुरस्त्री ध्रुवः शङ्कुः' इत्यमरः ॥ ६ ॥

७] ति० टी०-अरोपयन् छायार्थमिति शेषः । टङ्कः पाषाणभेदनः । छिन्दन् अडभाव आर्षः ॥ ७ ॥

रा० टी०-अवृक्षेष्विति । केचिन्मुरुषाः कुठारैः केचित् टङ्कैः पाषाणभेदनसाधनैः केचित् दात्रैश्च क्वचित्क्वचित् छिन्दन् अच्छिन्दन् छेदनयोग्यानिति शेषः, आगमशास्त्रस्यानित्यत्वादइविरहः । अवृक्षेषु वृक्षरहितेषु देशेषु वृक्षांश्च आरोपयन् छायासंपत्त्यर्थं शिल्पकौशलेन झटित्यरचयन्नित्यर्थः ॥ ७ ॥

गो० टी०-अवृक्षेष्विति । टङ्कैः पाषाणभेदनादिसाधनैः 'टङ्कः पाषाणदारणः' इत्यमरः । दात्रैर्लवित्रैः ' दात्रं लवित्रम् ' इत्यमरः, छिन्दन् अच्छिन्दन् ॥ ७ ॥

८] ति० टी०-बलिनो रूढमूलान्वीरणस्तम्बान् विधमन्ति हस्ताभ्यामेव निःसारयन्ति । दुर्गाणि स्थलान्युन्नतान्प्रदेशान्विधमन्ति खननेन समीकुर्वन्ति ॥ ८ ॥

रा० टी०-अपर इति । बलिनः अतिदृढमूलविशिष्टान्वीरणस्तम्बान्विगतमीरणमतिवायावपि कम्पो येषां ते एव स्तम्बाः प्रकाण्डरहितद्रुमाः तान्बलवत्तराः विधमन्ति स्वबाहुभ्यामुन्मूलयन्ति ततस्ततस्तत्र तत्र दुर्गाणि दुर्गमानि स्थलानि च समानि अकुर्वत इति शेषः 'स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेऽपि च ' इति विश्वः ॥ ८ ॥

गो० टी०-अपर इति । वीरणस्तम्बान् वीरणतृणकाण्डान् विधमन्ति स्म अदहन्, ध्मा शब्दाग्निवक्रसंयोगयोरित्यस्मात् धातोर्धमादेशः । बलिनः रूढमूलान् छेत्तुमशक्यानित्यर्थः, दुर्गाणि गन्तुमशक्यानि निम्नो[1]त्थलानीत्यर्थः । स्थलानि समानि चक्रुरिति शेषः ॥ ८ ॥

९] ति० टी०-कूपान्मार्गमध्यवर्तिनः तादृशमायतं श्वभ्रं गर्तं च पांसुभिरपूरयन् ॥ ९ ॥

रा० टी०-अपर इति । कूपान् मार्गमध्यवर्तिजलरहिततृणाद्याछादितकूपविशेषानायतं विस्तृतं श्वभ्रं गर्तं च पां-

१ समुद्र इवेति गो. पाठः । २ ततः केचिदिति गो. पाठः ।

बबन्धुर्बन्धनीयांश्च क्षोद्यान्संचुक्षुदुस्तथा । विभिदुर्भेदनीयाश्च तांस्तान्देशान्नगम्नदा ॥ १० ॥
अचिरेण तु कालेन परिवाहान्बहूदकान् । चक्रुर्बहुविधाकारान्सागरप्रतिमान्बहून् ॥ ११ ॥
निर्जलेषु च देशेषु खानयामासुरुत्तमान् । उदपानान्बहुविधान्वेदिकापरिमण्डितान् ॥ १२ ॥
समुधाकुट्टिमतलः प्रपुष्पितमहीरुहः । मत्तोद्घुष्टद्विजगणः पताकाभिरलंकृतः ॥ १३ ॥
चन्दनोदकसंसिक्तो नानाकुसुमभूषितः । बहुशोभत सेनायाः पन्थाः सुरपथोपमः ॥ १४ ॥
आज्ञाप्याथ यथाज्ञप्तिं युक्तास्तेऽधिकृता नराः । रमणीयेषु देशेषु बहुस्वादुफलेषु च ॥ १५ ॥
यो निवेशस्त्वभिप्रेतो भरतस्य महात्मनः । भूयस्तं शोभयामासुर्भूषाभिर्भूषणोपमम् ॥ १६ ॥

सभिः धूलिभिः अपूरयन् तथा तेन, प्रकारेण भूमेः निम्नभागाननुन्नतप्रदेशान्समन्ततः समाँश्चक्रुः ॥ ९ ॥

गो० टी०—अपर इति । कूपान् मार्गस्थान् आयतं श्लक्ष्णवटं च पांसुभिरपूरयन् , निम्नभागांश्च पांसुभिः समांश्चक्रुः प्रपूर्येति शेषः, यद्वा पूर्वश्लोके दुर्गाणि तृणलतादिच्छन्नानि स्थलानि च विषमन्ति स्मेति योजना अतो न पुनरुक्तिः॥९॥

१०] ति० टी०—बन्धनीयान्सेतून् क्षोद्यान्क्षोदनीयाञ्शर्कराभूयिष्ठप्रदेशान् संचुक्षुदुश्चूर्णयामासुः भेदनीयाञ्जलनिर्गमार्थं भेद्यान् ॥ १० ॥

रा० टी०—बबन्धुरिति । बन्धनीयान्संतारणार्थं बन्धनयोग्यान् सेतूनित्यर्थः, बबन्धुः । क्षोद्यान् विषमशर्करादिमयत्वेन क्षोदनयोग्यान् तांस्तान् देशांश्चुक्षुदुः सुखेन गमनं यथा स्यात्तथा संपेषयामासुः । भेदनीयान् जलनिर्गमार्थं भेत्तव्यान् बिभिदुश्च ॥ १० ॥

गो० टी०—बबन्धुरिति । बन्धनीयान् जलप्रदेशान् बबन्धुः सेनासंतरणार्थं सेतुभिर्बबन्धुः । क्षोद्यान् क्षोदार्हान् शर्कराभूयिष्ठप्रदेशान् संचुक्षुदुः चूर्णयामासुः । भेदनीयान् कच्छादिबहुजलप्रदेशान् जलनिर्गमनार्थं बिभिदुः॥ १० ॥

११] ति० टी०—परिवाहानल्पप्रवाहान्बन्धनेन बहूदकांश्चक्रुः ॥ ११ ॥

रा० टी०—अचिरेणेति । परिवाहान्बहुसुखवहनशीलान्बहूदकान् एकसुखवहनयोग्यबन्धनादिना बहूदकाविशिष्टानत एव सागरप्रतिमान्सागरसदृशान्बहुविधाकारान् रचितवद्दादिनाऽनेकाकारविशिष्टान्बहूंश्चक्रुः ॥ ११ ॥

गो० टी०—अचिरेणेति । परिवाहान् अल्पप्रवाहान् जलोच्छ्वासान् बन्धनेन बहूदकान् चक्रुः, यद्वा परिवाहान् दूरस्थतटाकप्रवर्तितान् बहुविधाकारान् सोपानावतारायनेकप्रकारानित्यर्थः ॥ ११ ॥

१२] ति० टी०—खानयामासुरखनन् उदपानान्कूपवाप्यादीन् वेदिकाभिः परितोऽलंकृतान् ॥ १२ ॥

रा० टी०—निर्जलेष्विति । निर्जलेषु जलरहितेषु देशेषु वेदिकापरिमण्डितानत एव उत्तमान् बहुविधान् उदपानान्वापीकूपादीन् खानयामासुः ॥ १२ ॥

गो० टी०—निर्जलेष्विति । उदपानान् कूपान् 'पुंस्येषान्यः प्रहिः कूप उदपानं तु पुंसि वा' इत्यमरः । बहुविधान् नरगजतुरगादिपानयोग्यसरोवाप्यादिभेदेन बहुविधान् वेदिकापरिमण्डितान् जलपानकाले विश्रान्त्यर्थं तीरे वेदिकायुक्तान् कृतान् ॥ १२ ॥

१३-१४] ति० टी०—ससुधाकुट्टिमतलस्तत्र तत्र सन्निधायजलाशयसमीपे विश्रमार्थं निवासाय समुधायुक्तः सुधामिश्रबद्धभूदेशः सकुट्टिमतलश्च 'कुट्टिमोऽस्त्री निबद्धा भूः' क्वचित्सुधाभिः क्वचिन्मृत्तिकाभिरेव बद्धत्वात् इत्यर्थः ॥ १३ ॥ १४ ॥

रा० टी०—तन्मार्गमेव वर्णयति—ससुधेत्यादि द्वाभ्याम् । ससुधाकुट्टिमतलः समुधया पाषाणादिभस्मसहितया सामग्र्या कुट्टिमं निबद्धं दृढीकृतमित्यर्थः, तलं भूमिभागो यस्य सः, प्रपुष्पितमहीरुहः प्रपुष्पिताः अतिपुष्पविशिष्टाः महीरुहाः वृक्षाः यत्र सः, मत्ताः अत एवोद्घुष्टाः स्वस्वोचितशब्दविशिष्टाः द्विजगणाः पक्षिसमूहाः यत्र सः, पताकाभिः अलंकृतः शोभितः चन्दनोदकैः चन्दनमिश्रजलैः संसिक्तः नानाकुसुमैः अनेकविधपुष्पैः भूषितः अत एव सुरपथोपमः स्वर्गमार्गतुल्यः सेनायाः पन्थाः बहु अधिकमशोभत । श्लोकद्वयमेकान्वयि 'कुट्टिमोऽस्त्री निबद्धा भूः' इत्यमरः ॥ १३ ॥ १४ ॥

गो० टी०—ससुधेत्यादिश्लोकद्वयमेकान्वयम् । सुधालिप्तकुट्टिमतलोपेतः 'कुट्टिमोऽस्त्री निबद्धा भूः' इत्यमरः । प्रपुष्पितमहीरुहः जलसेचनेनेति शेषः । चन्दनोदकसंसिक्तः विश्रान्तिप्रदेशेषु चन्दनयुक्तवारिसिक्तः, नानाकुसुमभूषितः प्रकीर्णनानापुष्पशोभितः ॥ १३ ॥ १४ ॥

१५-१६] ति० टी०—अथ मार्गकरणानन्तरमधिकृता मार्गशिबिरादिनिवेशाधिकारिणो यथाज्ञप्ति यथाभरताज्ञापनं शिबिरादिनिवेशेऽनुचरानाज्ञाप्य यो यादृशो भरतस्याभिमतो निवेशस्तं तथा कृत्वा भूयोऽधिकभूषाभिः शोभयामासुर्वितानकनककलशरत्नध्वजादिभिर्भूषयामासुः । निवेशः शिबिरम् भूषणोपमं मार्गस्यालंकारसदृशम् अतिरमणीयमिति यावत् ॥१५॥१६॥

रा० टी०—आज्ञाप्येति । अथ मार्गनिर्माणानन्तरमधिकृताः मार्गवेश्मादिनिर्मापणे प्राप्ताधिकाराः अत एव युक्ताः तत्तन्निर्मापणे संलग्नचित्ताः नराः यथाज्ञप्ति भरताज्ञप्तिमनति-

१ तदेति गो. पाठः । २ तत्रेति रा. पाठः । ३ एवेति गो. पाठः ।

नक्षत्रेषु प्रशस्तेषु मुहूर्तेषु च तद्विदः । निवेशान्स्थापयामासुर्भरतस्य महात्मनः ॥ १७ ॥
बहुपांसुचयाश्चापि परिखाः[1] परिवारिताः[2] । तत्रेन्द्रनीलप्रतिमाः[3] प्रतोलीवरशोभिताः ॥ १८ ॥
प्रासादमालासंयुक्ताः[4] सौधप्राकारसंवृताः । पताकाशोभिताः सर्वे सुनिर्मितमहापथाः ॥ १९ ॥
वितर्दिभिरिवाकाशे[5] विटङ्कैरग्रविमानकैः । समुच्छ्रितैर्निवेशास्ते बभुः शक्रपुरोपमाः ॥ २० ॥
जाह्नवीं तु समासाद्य विविधद्रुमकाननाम् । शीतलामलपानीयां बहुमीनसमाकुलाम् ॥ २१ ॥
सचन्द्रतारागणमण्डितं यथा नभः क्षपायाममलं विराजते ।
नरेन्द्रमार्गः स तदा व्यराजत क्रमेण रम्यः शुभशिल्पिनिर्मितः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

क्रम्य बहुस्वादुविशिष्टानि फलानि येषु तेषु रमणीयेषु देशेषु यो निवेशः शिबिरं महात्मनो भरतस्यामिमतः तं भूषणोपमं मार्गभूषणसदृशं निवेशं कारयित्वेति शेषः, भूषाभिः वितानसुवर्णकलशरत्नध्वजादिभिः भूयोऽधिकं शोभयामासुः । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–आज्ञाप्येत्यादि । अथ मार्गकरणानन्तरम् अधिकृताः मार्गशिबिरादिकरणे नियुक्ताः युक्ताः परस्परं युक्ताः बहुस्वादुफलेषु रमणीयेषु देशेषु भरतस्य यो निवेशः यादृशाकारविशिष्टो निवेशोऽभिप्रेतः अभिमतस्तं तादृशसंनिवेशं यथाज्ञप्ति यथामति आज्ञाप्य कर्तुं नियम्य भूषणोपमं भूषणभूतं स्वतोऽलंकृतमिति यावत्, निवेशं भूषाभिः वितानकनककलशध्वजादिभिः भूयोऽपि शोभयामासुः भूषयामासुः ॥१५॥१६॥

१७] ति० टी०–निवेशाञ्शिबिराणि ॥ १७ ॥

रा० टी०–वेश्मनिर्माणप्रारम्भकालं बोधयन्नाह–नक्षत्रेष्विति । नक्षत्रेषु मुहूर्तेषु च प्रशस्तेषु ज्यौतिःशास्त्रगृहीतेषु सत्सु निवेशाञ्शिबिराणि स्थापयामासुः ॥ १७ ॥

गो० टी०–नक्षत्रेष्वित्यादि । तद्विदः वास्तुशास्त्रज्ञाः, निवेशान् शिबिराणि ॥ १७ ॥

१८] ति० टी०–बहुपांसुचया इत्यनेन शर्करादिराहित्यमुच्यते । परिखाः सगर्ताः पर्यन्तभित्तयः तत्र परिखावच्छेदेनेत्यर्थः । इन्द्रनीलमणिनिर्मिताः प्रतिमाश्चित्रप्रतिमा येषु निवेशेषु । 'इन्द्रकीलप्रतिमाः' इति पाठे इन्द्रकीलपर्वतसदृश इत्यर्थः । एवमुत्तरोऽपि परिखा इति यावत् । प्रतोली रथ्या ॥१८॥

१९] ति० टी०–सौधसदृशैः प्राकारैः संवृताः ॥ १९ ॥

२०] ति० टी०–आकाशे वितर्दिभिरिव विविधिष्ण्यैरिव स्थितैरुपलक्षिताः । विटङ्कैः कपोतपालिका तयुतायैर्विमानकैः सप्तभूमिकगृहैरत्युन्नतैरुपलक्षिता इत्यर्थ इति कतकः । 'विसर्पद्भिरिवाकाशे' इति पाठान्तरं तदोर्ध्वमूर्ध्वं गच्छद्भिरिवेत्यर्थः कथंचिद्योज्यः ॥ २० ॥

रा० टी०–बर्हिति । बहुपानामतिरक्षकाणामंशुचयः प्रभासमूहो येषु कान्तिमद्धवकपुक्ता इत्यर्थः, परिखाभिः परिवारिताः युक्ताः इन्द्रनीलाः इन्द्रनीलमणिनिर्मिताः प्रतिमा येषु ते प्रतोलीवरैः रथ्याश्रुरुयैः शोभिताः प्रासादमालाभिः देवनृपतिभवनसमूहै संयुक्ताः सौधाः सुधालिप्ता एव प्राकारास्तैः संवृताः निबिडाः पताकाभिः शोभिताः सुनिर्मिताः महापथाः राजमार्गा येषु, आकाशे विसर्पद्भिः गच्छद्भिरिव समुच्छ्रितैः अत्युन्नतैः विटङ्काग्रविमानकैः विटङ्कैः कपोतपालिकाभिः विमानकैः सप्तभूमिकगृहैः उपलक्षिताः ते भरताज्ञप्ताधिकारिनिर्मापिताः शक्रपुरोपमाः निवेशाः शिबिराणि बभुः 'अंशुः प्रभाकिरणयोः' इति मेदिनी 'प्रासादो देवभूभुजाम्' इत्यमरः । 'कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम्' इत्यमरः । श्लोकत्रयमेकान्वयि ॥१८–२०॥

गो० टी०–बर्हित्यादिश्लोकत्रयमेकं वाक्यम् । तत्र मार्गे बहुपांसुचयाः पांसुशब्देनात्र सूक्ष्मसिकता उच्यन्ते बहवः पांसुचया येषु ते तथोक्ताः परिखापरिवारिताः खेयैर्वेष्टिताः इन्द्रकीलप्रतिमाः इन्द्रकीलपर्वतसदृशाः प्रतोलीवरशोभिताः प्रतोली वीथिः 'रथ्या प्रतोली विशिखा' इत्यमरः । प्रासादमालावितताः प्रासादा देवगृहाणि 'प्रासादो देवभूभुजाम्' इत्यमरः । सौधप्राकारसंवृताः सौधाः राजगृहाणि, यद्वा सौधाः सुधाधवलिताः " तेन रक्तं रागात् " इत्यण् । समुच्छ्रितैः उन्नतैः अत एव आकाशे विसर्पद्भिरिव स्थितैः विटङ्काग्रविमानकैः विटङ्कयुक्ताग्रविमानैः ' कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ' इत्यमरः । विमानानि सप्तभूमिकाः प्रातादास्तैर्बभुः शक्रपुरोपमाः अमरावतीसदृशाः ॥ १८–२० ॥

२१–२२] ति० टी०–जाह्नवीं समासाद्याभिव्याप्य प्रवर्तितो नरेन्द्रमार्गो व्यराजतेत्यन्वयः ॥ २१ ॥ २२ ॥

इति श्रीरामानन्दतीर्थभरतविरचिते श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

रा० टी०–जाह्नवीमिति । विविधद्रुमकाननामनेकविधद्रुमविशिष्टवनविशिष्टां शीतलममलं मलनिवर्तकं पानीयं जलं यस्यास्तां महामीनैः समाकुलां निबिडां जाह्नवीं समासाद्य उत्तरतो दक्षिणतश्च प्राप्य शुभशिल्पिभिः क्रमेण निर्मितः रम्य-

---

१ परिखापरिवारिता इति गो. रा. पाठः । २ कीर्णेति गो. पाठः । ३ वितता इति गो. पाठः । ४ विसर्पद्भिरिति गो० रा. पाठः । ५ तथेति गो. पाठः ।

एकाशीतितमः सर्गः ।

प्रभाते सूतमागधबन्दिभिर्मङ्गलतूर्यरवमिश्रं भरतगुणस्तवे प्रारब्धे भरतस्तान्हर्षं राज्ञे निवेद्य शत्रुघ्नसहायपक्षपाती स्वयमेव राजसभां प्राप्तो वसिष्ठो भरताद्यानयनाय दूतान्प्राहिणोत्। शत्रुघ्नामात्यादिभिर्वृतो भरतो वसिष्ठानभिवाद्य सभां प्रविशत्।

ततो नान्दीमुखीं रात्रिं भरतं सूतमागधाः । तुष्टुवुः सविशेषज्ञाः स्तवैर्मङ्गलसंस्तवैः ॥ १ ॥
सुवर्णकोणाभिहतः प्राणदद्यामदुन्दुभिः । दध्मुः शङ्खांश्च शतशो वाद्यांश्चोच्चावचस्वरान् ॥ २ ॥
स तूर्यघोषः सुमहान्दिवमापूरयन्निव । भरतं शोकसंतप्तं भूयः शोकैरवन्धयत् ॥ ३ ॥
ततः प्रबुद्धो भरतस्तं घोषं संनिवर्त्य च । नाहं राजेति चोक्त्वा तं शत्रुघ्नमिदमब्रवीत् ॥ ४ ॥
पश्य शत्रुघ्न कैकेय्या लोकस्यापकृतं महत् । विसृज्य मयि दुःखानि राजा दशरथो गतः ॥ ५ ॥

रमणीयः सः प्रसिद्धो नरेन्द्रमार्गः क्षपायां रात्रौ सचन्द्रतारागणमण्डितं चन्द्रसहिततारासमूहशोभितममलं नभः आकाशमिव व्यराजत अशोभत । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

गो० टी०–जाह्नवीमिति । समासाद्य अवधीकृत्य तत्पर्यन्तमित्यर्थः, निवेशा बभुरिति पूर्वेणान्वयः उत्तरेण वा । गङ्गाविशेषणैस्ततः परं निवेशकरणाशक्यत्वं द्योत्यते ॥ २१ ॥

गो० टी०–सचन्द्रतारागणमण्डितमिति । सचन्द्रो यस्तारागणः तेन मण्डितम् ॥ २२ ॥

इमि श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्यानेऽशीतितमः सर्गः ॥ ८० ॥

१] **ति० टी०–**नान्दीमुखीं भरताभिषेकाय वसिष्ठेन करिष्यमाणनान्दीमुखाख्यभ्युदयप्राग्वर्तिनीम् । रामानयनाभ्युदयप्रारम्भयुक्ता नान्दीमुखीति कश्चित् रात्रिमल्पावशेषां दृष्ट्वेति शेषः । सविशेषज्ञा राजनि राजपुत्रे चापेक्षितविशेषस्तवं जानन्ति तादृशाः मङ्गलसंस्तवैर्मङ्गलप्रतिपादकैः ॥ १ ॥

रा० टी०–भरतवृत्तान्तं बोधयितुमाह–तत इत्यादित्रिभिः । नान्दीमुखीं नान्द्याः रामागमनविषयकोद्योगजनितानन्दस्य मुखं प्रारम्भो यस्यां तां रात्रिं ज्ञात्वेति शेषः, वाग्विशेषज्ञाः सूतमागधाः मङ्गलसंस्तवैः मङ्गलप्रतिपादकैः स्तवैस्तुष्टुवुः । नान्दीमुखीं ज्ञात्वेत्यनेन रामनिर्गमानन्तरमेतद्रात्रेः पूर्वं सूतादिभिर्न स्तुतमिति ध्वनितम् 'नन्दिरानन्दने धूते' इति विश्वः । अत्र दीर्घः स्वार्थिकाणन्तात् ङीपि बोध्यः । किंच नन्दो नन्दत्वमेव नान्दः सोऽस्त्यस्येति नान्दी तस्य इयः व्याप्तेर्मुखमारम्भो यस्यां तामित्यर्थः ॥ १ ॥

गो० टी०–तत इत्यादि । नान्दीमुखीं रामानयनाभ्युदयप्रारम्भयुक्तां, यद्वा भरताभिषेकाय वसिष्ठेन कृतनान्दीमुखाभ्युदययुक्तां, यद्वा शोकविगमाय कृताभ्युदयामित्यर्थः रात्रिं रात्रौ अपररात्र इत्यर्थः, यद्वा रात्रिं प्राप्येति शेषः । मङ्गलसंहितैः मङ्गलशब्दसहितैः ॥ १ ॥

२] **ति० टी०–**सुवर्णकोणः सुवर्णदण्डः, यामदुन्दुभिर्यामावसानसूचको दुन्दुभिः उच्चावचानुच्चावचस्वरान्वाद्यान्वाद्यविशेषान्दध्मुः । 'नान्यान्' इति पाठः मङ्गलादीनित्यर्थ इति तीर्थः॥२॥

रा० टी०–सुवर्णेति । सुवर्णकोणेन स्वर्णनिर्मितवादनदण्डेन अभिहतस्ताडितः यामदुन्दुभिः यामः याममात्रावशिष्टरात्रिसूचकः, किंच यामः ज्ञानादिप्रवृत्तिरूपः संयमहेतुः दुन्दुभिः प्रणदन् प्राणदन् आगमशास्त्रस्यानित्यत्वादद्यभावः । शतशः शङ्खास्तु वाद्यान् वादनयोग्यान् उच्चावचस्वरान् उच्चावचस्वरहेतून् शङ्खान् दध्मुः नरा इति शेषः । 'यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः' इति मेदिनी ॥ २ ॥

गो० टी०–सुवर्णकोणाभिहत इति । कोणो वादनदण्डः यामावसानसूचको दुन्दुभिः यामदुन्दुभिः प्राणदत् नदति स्म नाद्यन्ते एभिरिति नादाः काहल्यादयस्तान् उच्चावचस्वरान् निम्नोन्नतस्वरान् मन्द्रमध्यमतारारूपेण नानास्वरानित्यर्थः॥ २ ॥

३–४] **ति० टी०–**शोकैः शोकोत्पादनैः अरन्धयद्धिनस्ति स्म । 'रध पाकहिंसनयोः' ॥ ३–४ ॥

रा० टी०–स इति । दिवमापूरयन्निव स तूर्यघोषः शोकसंतप्तं भरतं भूयः शोकैः अरन्धयदपीडयत् ॥ ३ ॥

रा० टी०–तत इति । ततः तच्छब्दश्रवणानन्तरं प्रबुद्धो भरतः अहं राजा न इत्युक्त्वा तं घोषं संनिवर्त्य शत्रुघ्नमब्रवीत् ॥ ४ ॥

गो० टी०–स इति । अरन्धयत् व्यदारयत् 'अरन्धयत्' इतिपाठे अपचत् अतपदित्यर्थः ॥ ३ ॥ ४ ॥

५] **ति० टी०–**कैकेय्या हेतुना मद्विषये जायमानं लोकस्य सूतमागधादेरपकृतमनुचितं कर्म पश्य । एवंरूपाणि दुःखानि दुःखकराणि मयि विसृज्य राजा गतः ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह–पश्येत्यादिभिः । हे शत्रुघ्न ! कैकेय्याः संबन्धिनः लोकस्य जनस्य मन्थराया इत्यर्थः ।

१ वाग्विशेषज्ञा इति गो. रा. पाठः । २ संहितैरिति गो. पाठः । ३ प्रणदन्निति रा. पाठः । ४ नादानिति गो. पाठः । ५ अरन्धयदिति गो. पाठः । ६ चाप्युक्त्वेति गो. पाठः ।

तस्यैषा धर्मराजस्य धर्मपूता महात्मनः । परिभ्रमति राजश्रीर्नौरिवाकर्णिका जले ॥ ६ ॥
यो हि नः सुमहान्नाथः सोऽपि प्रव्राजितो वने । अनया धर्ममुत्सृज्य मात्रा मे राघवः स्वयम् ॥ ७ ॥
इत्येवं भरतं वीक्ष्य विलपन्तमचेतनम् । कृपणा रुरुदुः सर्वाः सुस्वरं योषितस्तदा ॥ ८ ॥
तथा तस्मिन्विलपति वसिष्ठो राजधर्मवित् । सभामिक्ष्वाकुनाथस्य प्रविवेश महायशाः ॥ ९ ॥
शातकुम्भमयीं रम्यां मणिहेमसमाकुलाम् । सुधर्मामिव धर्मात्मा सगणः प्रत्यपद्यत ॥ १० ॥
स काञ्चनमयं पीठं स्वस्त्यास्तरणसंवृतम् । अध्यास्त सर्ववेदज्ञो दूताननुशशास च ॥ ११ ॥
ब्राह्मणान्क्षत्रियान्योधानमात्यान्गणवल्लभान् । क्षिप्रमानयताव्यग्राः कृत्यमात्ययिकं हि नः ॥ १२ ॥
सराजपुत्रं शत्रुघ्नं भरतं च यशस्विनम् । युधाजितं सुमन्त्रं च ये च तत्र हिता जनाः ॥ १३ ॥

महदपकृतमपकारं त्वं पश्य जानीहि येन अपकारेण मयि दुःखानि विसृज्य संस्थाप्य राजा गतः साकेतमिति शेषः, एतेन कैकेय्याः नापराध इति सूचितम् । तेन तत्स्वभावस्य अतिसरलत्वं व्यञ्जितम् ॥ ६ ॥

गो० टी०-पश्येति । कैकेय्या हेतुभूतया जायमानं लोकस्य सूतमागधादेः अपकृतम् अनुचितं कर्म पश्य, यद्वा लोकस्य जनस्य कैकेय्या महद्यथा भवति तथाऽपकृतम् । तदेवाह—विसृज्येत्यादि ॥ ६ ॥

६-८] ति० टी०-तस्य योगतस्तस्येत्यर्थः, अकर्णिका अकर्णधारा । 'अकण्टका' इति पाठः कण्टको नाविकस्तद्रहितेत्यर्थ इति कतकः ॥ ६-८ ॥

रा० टी०-तस्येति । धर्मराजस्य तस्य पितुः एषा राजश्रीः अकर्णिका कर्णधाररहिता नौरिव परिभ्रमति स्वनिर्वाहकं न प्राप्नोतीत्यर्थः । 'अकण्टका' इति पाठः । कण्टको नाविकः तद्रहिता इत्यर्थ इति कतक इति भट्टाः भट्टसंमतस्तु 'अकर्णिका' इति ॥ ६ ॥

रा० टी०-य इति । यः नोऽस्माकं सुमहानतिशयितो नाथः स राघवः अनया दासीभ्रान्तया मात्रा धर्मं पितृप्रतिज्ञाविषयीभूताभिषेकमुत्सृज्य त्याजयित्वा वने प्रव्राजितः प्रेषितः ॥ ७ ॥

रा० टी०-इतीति । एवं विलपन्तं भरतं वीक्ष्य सर्वाः योषितो रुरुदुः ॥ ८ ॥

गो० टी०-तस्येति । राजश्रीः प्रधाने राजनि वर्तमाने ज्येष्ठपुत्रस्य युवराजत्वेन प्राप्तेत्येवमविच्छिन्ना राज्यलक्ष्मीः अकर्णिका कर्णोऽरित्रम् 'कर्णः श्रोत्रमरित्रं च' इति भुवनः । सोऽस्यास्तीति कर्णी स एव कार्णिकः कर्णधार इति यावत्, तद्रहिता ॥ ६-९ ॥

९] ति० टी०-राजधर्मविद्राजपुरोहितकर्तव्यधर्मवेत्ता । अतः स्वकृत्यं स्वयं संपादयतीत्याह-सभामित्यादि ॥ ९ ॥

रा० टी०-तथेति । तस्मिन् भरते विलपति सति राजधर्मवित् वसिष्ठः इक्ष्वाकुनाथस्य सभां प्रविवेश ॥ ९ ॥

१०] ति० टी०-तद्विशेषेण-शातकुम्भमयीत्यादि । सगणः सशिष्यगणः ॥ १० ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-शातेति । शातकुम्भमयीं सुवर्णप्रचुरां मणिभिः रत्नैश्च समाकुलां व्याप्तां सुधर्मामिव प्रतीयमानां सभां सगणः शिष्यसर्वसहितः धर्मात्मा वशिष्ठः प्रत्यपद्यत ॥ १० ॥

गो० टी०-शातकुम्भमयीमिति । शातकुम्भमयीं स्वर्णमयीं मणिरत्नसमाकुलां मणिश्रेष्ठसमाहृताम् 'रत्नं स्वजातौ श्रेष्ठेऽपि' इत्यमरः । यद्वा मणयो मुक्ताः 'मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इत्यमरः । रत्नानि पद्मरागादीनि अत्र सभामिति विशेष्यं सगणः सशिष्यगणः ॥ १० ॥ ११ ॥

११] ति० टी०-स्वस्त्यास्तरणसंवृतं स्वस्तिकाकारमण्डलवदास्तरणसंवृतं पीठमध्यास्त, ततो दूताननुशशास च ॥११॥

रा० टी०-स इति । स्वस्त्यास्तरणेन स्वस्तिकसदृशमण्डलाकारास्तरणविशेषेण विशिष्टं काञ्चनमयं स्वर्णनिर्मितं पीठं सर्ववेदज्ञो वशिष्ठः अध्यास्त दूतान् अनुशशास च ॥११॥

१२] ति० टी०-गणवल्लभाः सेनानायकाः । आत्ययिकं कालविलम्बासहिष्णु ॥ १२ ॥

१३] ति० टी०-सराजपुत्रं राजपुत्रैरितरैः सहितं शत्रुघ्नं युधाजिन्नामा कश्चिन्मन्त्री ये च हिता जनास्तांश्चानयत ॥१३॥

रा०टी०-अनुशासनाकारमाह-ब्राह्मणानिति द्वाभ्याम् । अव्यग्राः सावधानाः यूयं ब्राह्मणादीन् सराजपुत्रं इतरराजकुमारसहितं शत्रुघ्नादिकं च क्षिप्रमानयत नोऽस्माकमात्ययिकं विलम्बानर्हं कृत्यमस्ति । गणवल्लभाः सेनाधीशाः युधाजिन्नामा कश्चित् सखा भरतमातुलस्य तु तत्रासत्त्वात् । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०-ब्राह्मणानिति । गणवल्लभान् गणाध्यक्षान् आत्ययिकम् अत्ययः कृच्छ्रं तत्र भवमात्ययिकं यत्नसाध्यमित्यर्थः, सराजभृत्यं राजान्तरङ्गभृत्यसहितम् युधाजिदिति विजयाख्यमन्त्रिणो नामान्तरं सुमन्त्रशब्दसाहचर्यात् । ये च

१ वर्त्मेति गो. पाठः । २ प्रेक्ष्येति गो. पाठः । ३ विचेतनामिति गो. पाठः । ४ कृपणामिति गो. रा. पाठः । ५ सस्वरमिति गो. रा. पाठः । ६ मणिरत्नेति गो. पाठः । ७ वैद्यानिति गो. रा. पाठः ।

ततो हलहलाशब्दो महान्समुदपद्यत । रथैरश्वैर्गजैश्चापि जनानामुपगच्छताम् ॥ १४ ॥
ततो भरतमायान्तं शतक्रतुमिवामराः । प्रत्यनन्दन्प्रकृतयो यथा दशरथं तथा ॥ १५ ॥
ह्रद इव तिमिनागसंवृतः स्तिमितजलो मणिशङ्खशर्करः ।
दशरथसुतशोभिता सभा सदशरथेव बभूव सा पुरा ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

द्व्यशीतितमः सर्गः ।

पित्रा भ्रात्रा च ते दत्तमिदं राज्यं स्वीकुर्विति वसिष्ठो भरतं निर्बन्ध । भरतोऽपि साधिक्षेपं निषिध्य तत्करणमहं राज्यं प्रत्यानेतुं यथाशक्ति प्रयतिष्य इति प्रतिजज्ञे । भरतोक्तः सुमन्त्रो रामसमीपयात्रार्थं स्यन्दनं संयोज्य भरतायाचख्यौ । भरतश्च प्रायात् ।

तामार्यगणसंपूर्णां भरतः प्रग्रहां सभाम् । ददर्श बुद्धिसंपन्नः पूर्णचन्द्रां निशामिव ॥ १ ॥
आसनानि यथान्यायमार्याणां विशतां तदा । वस्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा ॥ २ ॥
सा विद्वज्जनसंपूर्णा सभासु रुचिरा तथा । अदृश्यत घनापाये पूर्णचन्द्रेव शर्वरी ॥ ३ ॥

तत्र भरते हिताः हितपराः जनाः तानप्यानयतेति पूर्वेण संबन्धः ॥ १२-१६ ॥

१४-१५] ति० टी०-हलहलेति शब्दानुकरणम्॥१४॥१५॥

रा० टी०-तत इति । ततो वसिष्ठाज्ञापनानन्तरं रथादिभिरुपगच्छतां जनानां हलहलाशब्दः समुपपपत समुपापपत, हलहलेति प्रभूतशब्दानुकरणम् ॥ १४ ॥

रा० टी०-तत इति । ततः गुर्वाज्ञाश्रवणानन्तरमायान्तं भरतं शतक्रतुमिन्द्रममरा इव दशरथं यथा तथा प्रकृतयः पजाः प्रत्यनन्दन् ॥ १५ ॥

१६] ति० टी०-ह्रद इव सभा । ह्रदोऽत्र सामुद्रः । भिन्नलिङ्गत्वेऽपि सहृदयोद्वेगाभावाच्च इव मुखमितिवन्न दुष्टोपमा । तिमिरनेकयोजनायामविस्तारो मत्स्यः, नागा जलगजाः सर्पाश्च, मणयो मुक्ताद्याः, शर्कराः सुवर्णखनिमृत्तिकाः सभायां जलस्थाने सभातेजः एतदेव द्योतनयता स्तिमितजल इत्युक्तम् । चित्रस्थतिमिनागसंवृततत्वं मणयश्च स्तम्भादिषु वियन्त एव । शङ्खाश्चित्रेषु स्वर्णशर्करास्थाने । कुट्टिमादौ स्वर्णलेपः । प्रकारान्तरेण जलादिवर्णने तु कवेर्न्यूनता दोषः । मम तु विभक्तिपरिणामेनैषामेव सभायामप्यन्वयान्न दोषः एतेन वसिष्ठो जलम्, तिमिनागौ भरतशत्रुघ्नौ, मण्यादयोऽमात्यपौरजानपदा इति कतकोक्तमपास्तम् । दशरथसुतशोभिता सभा पुरा सदशरथा सभेव बभाविति योजना । पितृसमानाकारत्वात्पुत्रस्येदानीमपि सदशरथेवेत्युत्प्रेक्षा, पुरा यथेत्यंशे उपमेति तयोरत्र संसृष्टिः॥ १६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽयोध्याकाण्डे एकाशीतितमः सर्गः ॥८१॥

रा० टी०-ह्रद इति । तिमिनागसंवृतः तिमिभिः शतयोजनविस्तीर्णमत्स्यैः नागैर्जलगजैश्च संवृतः मणिशङ्खशर्करः मणिभिर्मुक्तादिभिश्च शङ्खाः शर्करा यस्मिन् सः । तत्र शर्कराः सुवर्णखनिमृत्तिका इति भट्टाः स्तिमितजलः ह्रदः समुद्रइव दशरथसुतेन शोभिता सा सभा पुरा पूर्वं सदशरथा दशरथसहितेव बभूव ॥ १६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ-
अयोध्याकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

गो० टी०-ह्रद इति । शर्करा शब्देनात्र स्थूलवालुका उच्यन्ते ह्रदश्च समुद्रसमीपस्थः तिमिशङ्खादिसाहचर्यात् अत्र स्तिमितजलेन वसिष्ठस्य तिमिनागाभ्यां भरतशत्रुघ्नयोर्मण्यादिभिरमात्यादीनां च साम्यम् ॥ १६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-
ऽयोध्याकाण्डव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

१] ति० टी०-प्रग्रहा प्रकृष्टैर्वसिष्ठादिभिर्ग्रहः परिग्रहोऽधिष्ठानं यस्यां सा, निशापक्षे प्रकृष्टगुर्वादिग्रहवतीम् ॥ १ ॥

रा० टी०-भरतागमनकालिकं वृत्तमाह-तामित्यादिभिः । आर्यगणैः श्रेष्ठसमूहैः संपूर्णां प्रग्रहां प्रकृष्टाः ग्रहाः आग्रहवन्तो वसिष्ठादयो यस्यां तां सभां बुद्धिसंपन्नो भरतः पूर्णचन्द्रेण सहितां निशामिव ददर्श ॥ १ ॥

गो० टी०-तामिति । प्रग्रहां नियमवतीं, यद्वा शुक्रबृहस्पत्यादिप्रकृष्टग्रहयुक्तां तदा निशाविशेषणमिदम् ॥ १ ॥

२] ति० टी०-आर्याणां त्रैवर्णिकानाम् । आसनानि विशतामासनेषूपविशताम् ॥ २ ॥

रा० टी०-आसनानीति । यथान्यायं न्यायमनतिक्रम्य आसनानि विशतामार्याणां वस्त्राङ्गरागप्रभया वस्त्राणामङ्गरागाणां चन्दनसारादीनां प्रकाशेन सा सभोत्तमा द्योतिता ॥ २ ॥

गो० टी०-आसनानीति । आसनानि विशताम् आसनेषूपविशतामित्यर्थः ॥ २ ॥

३] ति० टी०-घनापाये शरदि ॥ ३ ॥

---

१ सुमहान्समपद्यतेति गो. पाठः । २ समुपपद्यतेति रा. पाठः । ३ बभौ यथेति गो. पाठः । ४ पूर्णचन्द्र इति गो. पाठः । ५ तदेति गो. पाठः ।

राज्ञस्तु प्रकृतीः सर्वाः स संप्रेक्ष्य[1] च धर्मवित् । इदं पुरोहितो वाक्यं भरतं मृदु चाब्रवीत् ॥ ४ ॥
तात राजा दशरथः स्वर्गतो धर्ममाचरन् । धनधान्यवतीं स्फीतां प्रदाय पृथिवीं तव ॥ ५ ॥
रामस्तथा सत्यवृत्तिः[2] सतां धर्ममनुस्मरन् । नाजहात्पितुरादेशं शशी ज्योत्स्नामिवोदितः[3] ॥ ६ ॥
पित्रा भ्रात्रा च ते दत्तं राज्यं निहतकण्टकम्[4] । तद्भुङ्क्ष्व मुदितामात्यः क्षिप्रमेवाभिषेचय[5] ॥ ७ ॥
उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केवलाः । कोट्यापरान्ताः सामुद्रा रत्नान्युपहरन्तु ते ॥ ८ ॥
तच्छ्रुत्वा भरतो वाक्यं शोकेनाभिपरिप्लुतः । जगाम मनसा रामं धर्मज्ञो धर्मकाङ्क्षया ॥ ९ ॥
सबाष्पकलया वाचा कलहंसस्वरो युवा । विललाप सभामध्ये जगर्ह च पुरोहितम् ॥ १० ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—सेति । सुरुचिरा अतिशोभावती सभा घनापाये शरदि शर्वरीव अदृश्यत ॥ ३ ॥

गो० टी०—सेति । घनापाये वर्षापगमे शरदीति यावत्, भरताभिषेकाय सर्वे अलंकृताः समागता इति भावः ॥ ३ ॥

४] ति० टी०—स वसिष्ठः संप्रेक्ष्य च चात्कृतानुमतिकांश्च कृत्वा ॥ ४ ॥

रा० टी०—राज्ञ इति । पुरोहितो वशिष्ठः भरतमब्रवीत् ॥ ४ ॥

गो० टी०—राज्ञ इति । प्रेक्ष्य संवादार्थमवलोक्य ॥ ४ ॥

५] ति० टी०—धर्मं सत्यपरिपालनरूपम् ॥ ५ ॥

रा० टी०—तद्वचनाकारमाह—तातेति । स्फीतां समृद्धां पृथ्वीं तव प्रदाय स्वः साकेतं गतः ॥ ५ ॥

गो० टी०—तातेति । तात वत्स ! धर्मं सत्यपरिपालनरूपं तव तुभ्यम् ॥ ५ ॥

६] ति० टी०—सतां धर्मम् 'जीवतो वाक्यकरणात्' इत्येवंरूपम् ॥ ६ ॥

रा० टी०—राम इति । सत्यवृत्तिः रामः पितुः आदेशमाज्ञां शशी ज्योत्स्नामिव न अजहात् तदाज्ञापरिपालनार्थमेव वनं गत इत्यर्थः ॥ ६ ॥

गो० टी०—राम इति । तथा पितृवत् सत्ये धृतिः प्रीतिर्यस्य स सत्यधृतिः 'धृङ् प्रीतौ' इतिधातोः स्त्रियां क्तिन्प्रत्ययः सतां पितृनिदेशवर्तिनां धर्मं पितृवचनपरिपालनरूपम् 'जीवतोर्वाक्यकरणात् प्रत्यब्दं भूरिभोजनात् । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥' इतिवचनात् ॥ ६ ॥

७] ति० टी०—निहतकण्टकं रामस्य वनवासदानात्तथा ॥ ७ ॥

रा० टी०—पित्रेति । निहतकण्टकं रिपुरहितं ते तुभ्यं पित्रा भ्रात्रा च दत्तं तद्राज्यं मुदितामात्यस्त्वं भुङ्क्ष्व अत एव क्षिप्रमभिषेचय स्वात्मानमिति शेषः ॥ ७ ॥

गो० टी०—पित्रेति । अभिषेचय आत्मानमिति शेषः ॥ ७ ॥

८] ति० टी०—उदीच्यादयस्तत्तद्दिशि प्रत्येकसिंहासनाधीश्वरा ये च केवलाः सिंहासनरहिताः चात्प्राच्या अपरान्ता द्वीपवासिनः सामुद्राः पोतवणिजः कोट्योऽसंख्यातानि रत्नानि हरन्तु । 'कोट्योऽपरान्ताः' इति पाठान्तरम् । कोट्यो रत्नान्यनेककोटिसंख्यरत्नानि, यद्वा परान्तास्तत्तद्दिगन्तवासिनः, सामुद्राः समुद्रद्वीपवासिनः ॥ ८ ॥

रा० टी०—अभिषेचनप्रयोजनमाह—उदीच्या इति । उदीच्यादिदेशभवाः केवलाः उदीच्यादिदेशानवच्छिन्नाः स्वर्गपातालवासिन इत्यर्थः न परः अन्योऽन्तः वेदकर्मविध्वंसकः येभ्यः ते सामुद्राः समुद्रमध्यवासिनश्च कोट्या अनन्तसंख्यया युक्तानि रत्नानि ते उपहरन्तु ॥ ८ ॥

गो० टी०—उदीच्या इति । प्राच्या इत्यपि सिद्धं केवलाः सिंहासनादिरहिता इत्यपरान्तादिविशेषणम् अपरान्ताः अपरान्तदेशवासिनो यवनाः कोट्या कोटिसंख्यया उपलक्षितानि रत्नानि सामुद्राः समुद्रद्वीपवासिनः ॥ ८ ॥

९] ति० टी०—धर्मज्ञो ज्येष्ठाभिषेकरूपधर्मज्ञः धर्मकाङ्क्षया ज्येष्ठानुवर्तनरूपधर्मलिप्सया मनसा जगाम सस्मार ॥ ९ ॥

रा० टी०—तदिति । तत्पुरोहितभाषितं वाक्यं शोकेनाभिपरिप्लुतो भरतः धर्मकाङ्क्षया रामसेवाभिलाषया रामं मनसा जगाम रामं सस्मारेत्यर्थः ॥ ९ ॥

गो० टी०—तदिति । धर्मज्ञः कुलक्रमागतज्येष्ठाभिषेचनरूपधर्मज्ञः धर्मकाङ्क्षया ज्येष्ठानुवर्तनरूपधर्मलिप्सया रामं मनसा जगाम सस्मारेत्यर्थः ॥ ९ ॥

१०] ति० टी०—जगर्ह सर्वज्ञोऽपि कथमेवमनुचिते मां प्रवर्तयसीत्युक्तवानित्यर्थः ॥ १० ॥

रा० टी०—स इति । सबाष्पकलया बाष्पकलासहितया वाचा उपलक्षितः कलहंसस्वरो युवा भरतः विललाप पुरोहितं जगर्ह च ॥ १० ॥

गो० टी०—स इति । बाष्पकलया अधर्मस्मरणात् रामस्मरणाद्वा बाष्पेणाव्यक्तया कलहंसस्वर इत्यनेन अभिनिवेशविशेषो द्योत्यते युवेत्यनेन भोगकालेऽपि भोगोपकरणजिहासा चित्रमिति ऋषिः स्तौति । सभामध्ये जगर्ह नियमातिक्रमं रहसि बोधयेदिति नियमोऽपि भग्नः अतिक्रूरमधर्मं नियुक्तवानिति दुःखपारवश्यात् रहःसदोविभागविस्मरणेन गर्हितवान् । पुरोहितं जगर्ह सम्यक्कृत्वयास्य कुलस्य भावि हितमवेक्षितमिति निनिन्द सभामध्ये बहवः समेत्य ममैकस्य पारतन्त्र्यं किमपजिहीर्षन्ति सभामध्ये किमवनेऽपि मद्वनं मुष्णन्ति ॥ १० ॥

१ समग्राः प्रेक्ष्येति गो. पाठः । २ सत्यधृतिरिति गो. पाठः । ३ अभिहरन्त्विति गो. पाठः । ४ रामे इति रा. पाठः । ५ ऽभिलाषेणेति युक्तं भाति ।

चरितब्रह्मचर्यस्य विद्यास्नातस्य धीमतः । धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥ ११ ॥
कथं दशरथाज्जातो भवेद्राज्यापहारकः । राज्यं चाहं च रामस्य धर्मं वक्तुमिहार्हसि ॥ १२ ॥
ज्येष्ठः श्रेष्ठश्च धर्मात्मा दिलीपनहुषोपमः । लब्धुमर्हति काकुत्स्थो राज्यं दशरथो यथा ॥ १३ ॥
अनार्यजुष्टमस्वर्ग्यं कुर्यां पापमहं यदि । इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥ १४ ॥
यद्धि मात्रा कृतं पापं नाहं तदपि रोचये । इहस्थो वनदुर्गस्थं नमस्यामि कृताञ्जलिः ॥ १५ ॥
राममेवानुगच्छामि स राजा द्विपदां वरः । त्रयाणामपि लोकानां राघवो राज्यमर्हति ॥ १६ ॥
तद्वाक्यं धर्मसंयुक्तं श्रुत्वा सर्वे सभासदः । हर्षान्मुमुचुरश्रूणि रामे निहितचेतसः ॥ १७ ॥

११] ति० टी०—विद्यास्नातस्य सर्वविद्यानन्तरभाविस्नानयुतस्य रामस्य मद्विधश्चरितब्रह्मचर्यादिः ॥ ११ ॥

रा० टी०—तत्प्रकारमाह—चरितेति । चरितमाचरितं ब्रह्मचर्यं येन विद्यास्नातस्य निखिलविद्याकुशलस्य धर्मे पितृप्रतिज्ञापालने प्रयतमानस्य रामस्य राज्यं मद्विधः मत्सदृशः ज्ञातेरित्यर्थः, को हरेत् ॥ ११ ॥

गो० टी०—चरितेति । चरितब्रह्मचर्यस्य अनुष्ठितगुरुकुलवासस्य विद्यास्नातस्य 'वेदमधीत्य स्नायात्' इतिस्मृतिप्रक्रियया निखिलवेदाध्ययनानन्तरभाविस्नानकर्मयुक्तस्य धीमतस्तदर्थज्ञस्य धर्मे प्रयतमानस्य तदर्थानुष्ठानवतः मद्विधः शास्त्रज्ञो मादृशः ॥ ११ ॥

१२-१४] ति० टी०—रामस्य स्वमिति शेषः । हे भगवन्! एवं विज्ञाय धर्मं न्याय्यं वक्तुमिह सभायामर्हसि नेदृशमन्याय्यमित्यर्थः ॥ १२-१४ ॥

रा० टी०—कथमिति । दशरथाज्जातः पुरुषः राज्यापहारकः कथं भवेत् न कथंचिदित्यर्थः । राज्यकरणे स्वानौचित्यं बोधयति—राज्यमहं च रामस्य अतस्त्वं धर्मं रामराज्यकरणोपायं वक्तुमर्हसि ॥ १२ ॥

गो० टी०—मद्विध इत्येतद्विवृणोति—कथमित्यादिना । रामविरहोत्तरक्षणे मृतस्य कुक्षौ जातोऽहं कथं तत्त्यक्तं राज्यं परिगृह्णीयां, मत्स्वरूपपर्यालोचनयापि नाहं राज्यार्ह इत्याह—राज्यं चेति । शेषवस्तुष्वेकमेकस्य किमीष्टे प्रत्युत राज्यं वा किमिति मां नेष्टे राज्यं चाहं च रामस्य राज्यमपि रामसंबन्धि अहमपि च रामसंबन्धी उभयमपि रामशेषमित्यर्थः । धर्मं वक्तुमिहार्हसि लोके स्वपित्रादिकं निगृह्य स्वयं राज्यस्य कर्तारः सन्ति तदेतद्व्यक्तावपि भवतीति मा मंस्थाः इह मद्विषये मत्प्रकृतिं ज्ञात्वा धर्मं वक्तुमर्हसि धर्मं पाल्यत्वपालकत्वरूपं वक्तुमर्हसि, रामशेषत्वाविशेषे एकं शेषं कथमपरं रक्षेत् तथा सति राज्यमेव मां किमिति न रक्षेदिति भावः । नन्वु रत्नपेटिकयोर्द्वयोः शेषत्वाविशेषेऽपि एकं रक्ष्यमपरं रक्षकं च दृष्टं तद्वदस्त्विति चेन्न, तत्र हि पेटिका कुञ्चिकादिव्यापारेण स्वामिना रक्षकत्वेन विनियुक्ता नाहमेवं रामेण विनियुक्तः यथास्वैकधार्यमपि रत्नमवसरे पेटिकास्थं करोति तद्वत्स्वेनैव पाल्यमपि राज्यमस्माभिर्यावच्छक्ति प्रसादितोऽपि अनवसरतया रामो यदा मदर्थानं कुर्यात्तदा तदहितशङ्कितस्तत्परतन्त्रः पेटिकावत् यावत्तदागमनं रक्षेयम् अतस्तन्निवर्तनप्रयत्न एव सर्वथा कार्यः प्रथमतो वरनिर्बन्धादिकृता राज्यस्यास्मदीयत्वबुद्धिः रामसमक्षं गत्वा परिहरणीयेति भावः॥१२॥

रा० टी०—ज्येष्ठ इति । काकुत्स्थः ककुत्स्थवंशोद्भवो रामः राज्यं लब्धुं दशरथ इव अर्हति ॥ १३ ॥

गो० टी०—वक्तव्यं धर्ममाह—ज्येष्ठ इत्यादिना । दिलीपनहुषशब्दौ चन्द्रसूर्यवंशश्रेष्ठराजोपलक्षणार्थौ ॥ १३ ॥

रा० टी०—अनार्येति । अनार्यैः क्षुद्रैः जुष्टं सेवितमस्वर्ग्यं सुखनिवर्तकं पापं यदि अहं कुर्यां तर्हि इक्ष्वाकूणां कुलपांसनः कुलदूषक इत्यर्थः, अहं भवेयम् ॥ १४ ॥

गो० टी०—अनार्येति । इक्ष्वाकूणां लोके तत्संबन्धिनि जने ॥ १४ ॥

१५] ति० टी०—नन्वु त्वन्मात्राप्रयासेन राज्यसंपादनादस्माभिरेवमुक्तमत आह—यद्धीति । वनदुर्गस्थं वनरूपदुर्गस्थम् ॥ १५ ॥

रा० टी०—नन्वु भवन्मात्रानुमत्या मयोच्यते इत्यत आह—यदिति । मात्रा यत् कृतं संपादितं पापं रामवियोगहेतुकदुःखप्राप्तिजनितापरार्धं तत्र रोचये अत एव इहस्थोऽपि अहं वनदुर्गस्थं रामं नमस्यामि ॥ १५ ॥

गो० टी०—यद्धीति । अनेनाप्राप्तभाषणश्रवणपापस्य प्रायश्चित्तमनुष्ठितम् ॥ १५ ॥

१६] ति० टी०—द्विपदां मनुष्याणां वरः श्रेष्ठो राजा अस्य राज्यस्येति शेषः ॥ १६ ॥

रा० टी०—राममिति । अहं राममेव अनुगच्छामि । तत्र हेतुः—द्विपदां वरः परमपुरुषः त्रयाणां लोकानां राजा नियन्ता रामः एव राज्यं राज्याभिषेकमर्हति ॥ १६ ॥

गो० टी०—राममिति । द्वौ पादौ येषां ते द्विपदः "संख्यासुपूर्वस्य" इति लोपः समासान्तः, अतः 'पादः पत्' इति भस्यत्वे पदादेशः, तेषां पुरुषाणामित्यर्थः ॥ १६ ॥

१७] ति० टी०—मध्ये कविवाक्यम्—तद्वाक्यमिति॥१७

रा० टी०—तदिति । तद्भरतोक्तं वाक्यं श्रुत्वा रामे निहितचेतसः रामनिमग्नचित्ताः सर्वे सभासदः हर्षाद्भरतवाक्यश्रवणजनितानन्दादश्रूणि मुमुचुः ॥ १७ ॥

यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् । वने तत्रैव वत्स्यामि यथार्यो लक्ष्मणस्तथा ॥ १८ ॥
सर्वोपायं तु वर्तिष्ये विनिवर्तयितुं बलात् । समक्षमार्यमिश्राणां साधूनां गुणवर्तिनाम् ॥ १९ ॥
विष्टिकर्मान्तिकाः सर्वे मार्गशोधकदक्षकाः । प्रस्थापिता मया पूर्वं यात्रा च मम रोचते ॥ २० ॥
एवमुक्त्वा तु धर्मात्मा भरतो भ्रातृवत्सलः । समीपस्थमुवाचेदं सुमन्त्रं मन्त्रकोविदम् ॥ २१ ॥
तूर्णमुत्थाय गच्छ त्वं सुमन्त्र मम शासनात् । यात्रामाज्ञापय क्षिप्रं बलं चैव समानय ॥ २२ ॥
एवमुक्तः सुमन्त्रस्तु भरतेन महात्मना । प्रहृष्टः सोऽदिशत्सर्वं यथासंदिष्टमिष्टवत् ॥ २३ ॥
ताः प्रहृष्टाः प्रकृतयो बलाध्यक्षा बलस्य च । श्रुत्वा यात्रां समाज्ञप्तां राघवस्य निवर्तने ॥ २४ ॥
ततो योधाङ्गनाः सर्वा भर्तॄन्सर्वान्गृहे गृहे । यात्रागमनमाज्ञाय त्वरयन्ति स्म हर्षिताः ॥ २५ ॥
ते हयैर्गोरथैः शीघ्रं स्यन्दनैश्च मनोजवैः । सह योधिद्बलाध्यक्षा बलं सर्वमचोदयन् ॥ २६ ॥

गो० टी०–मध्ये कविवाक्यम्–तद्वाक्यमिति । सभाद्य सीदन्तीति सभासदः सभ्याः ॥ १७ ॥

१८] ति० टी०–सर्वथा स्वस्य राज्यचिन्ता नास्तीति प्रतिपादकं पुनर्भरतवाक्यम्–यदि त्विति ॥ १८ ॥

रा० टी०–पुनर्भरतवाक्यमाह–यदीति । आर्यं रामं विनिवर्तयितुमानेतुं यदि न शक्ष्यामि तर्हि तत्र रामाधिष्ठितवने एव वत्स्यामि ॥ १८ ॥

गो० टी०–यदीति । कनिष्ठे लक्ष्मणे आर्यशब्दप्रयोगो ज्येष्ठानुवर्तनरूपधर्मनिरतत्वात् यथार्यो लक्ष्मणस्तथाहं लक्ष्मणश्रेत्यर्थः ॥ १८ ॥

१९] ति० टी०–आर्याक्षैवर्णिकास्ते च ते मिश्राः पूज्यास्तेषां युष्माकं समक्षमित्यन्वयः ॥ १९ ॥

रा० टी०–सर्वेति । साधूनां वैषम्यरहितानां गुणवर्तिनामार्यैर्भवद्भिर्मिश्राणां संयुक्तानां सभासदां भवतां समक्षं विनिवर्तयितुं सर्वोपायं स्वबुद्धिविषयीभूतानिखिलोपायजातं वर्तिष्ये करिष्यामि ॥ १९ ॥

गो० टी०–सर्वोपायमिति । सर्वोपायं वर्तिष्ये सर्वोपायमिति क्रियाविशेषणं सर्वोपायैर्यत्नं करिष्य इत्यर्थः । आर्यमिश्राणां सदस्यानाम् 'आर्यमिश्राः पारिषदाः सदस्याः सामवायिकाः' इति सज्जनः । भवद्भिरागन्तव्यमित्यर्थादुक्तं भवति ॥ १९ ॥

२०–२२] ति० टी०–विष्टयो भृतिं विना कर्मकराः । कर्मान्तिका उक्ताः ॥ २०–२२ ॥

रा० टी०–विष्टीति । मार्गशोधकदक्षकाः मार्गशोधनचतुराः विष्टिकर्मान्तिकाः विष्टयः भृतिप्राप्तिमन्तरा कर्मकर्तारः कर्मान्तिकास्तदितरभृत्याश्च मया पूर्वमेव प्रस्थापिताः अतो मम यात्रैव रोचते ॥ २० ॥

रा० टी०–एवमिति । भ्रातृवत्सलो भरतः एवमुक्त्वा मन्त्रकोविदं संमतिदाननिपुणं सुमन्त्रमुवाच ॥ २१ ॥

रा० टी०–वचनाकारमाह–तूर्णमिति । हे सुमन्त्र ! मम शासनात्त्वं तूर्णं गच्छ । गमनप्रयोजनमाह–यात्रां रामानयनोद्देश्यकमदूमनहेतुकतत्तद्दूमनमाज्ञापय अत एव बलं सेनां क्षिप्रं समानय प्रस्थापय ॥ २२ ॥

गो० टी०–विष्टिकर्मान्तिका इति । विष्टयो भृतिमन्तरेण जनपदेभ्यः समानीताः कर्मकराः कर्मान्तिकाः कर्मान्ते भृतिग्रहीतारः, मार्गशोधकरक्षका इति विष्ठ्यादिविशेषणं प्रस्थापिता मया पूर्वमित्यभिधानात् वसिष्ठः शिबिरकरणनियोगमजानन्नभिषेकप्रस्तावं कृतवानित्यवगम्यते ॥ २०–२२ ॥

२३] ति० टी०–अदिशदाज्ञापयति स्म । इष्टवदिष्टार्हम् इष्टानुरूपमिति यावत् ॥ २३ ॥

रा० टी०–एवमिति । भरतेन एवमुक्तः सुमन्त्रः इष्टवत् स्वेच्छाविषयीभूतं सर्वं यथासंदिष्टमाज्ञामनतिक्रम्य अदिशदकथयत् ॥ २३ ॥

गो० टी०–एवमिति । इष्टवत् इष्टार्हम् इष्टानुरूपमिति यावत् ॥ २३ ॥

२४] ति० टी०–निवर्तते निवर्तननिमित्तं बलस्य यात्रां समाज्ञप्तां श्रुत्वा प्रकृतयो बलाध्यक्षाश्च प्रहृष्टा इत्यन्वयः ॥२४॥

रा० टी०–ता इति । राघवस्य निवर्तने निवर्तननिमित्तं समाज्ञप्तां बलस्य सेनायाः यात्रां श्रुत्वा ताः प्रकृतयः प्रजाः बलाध्यक्षाश्च प्रहृष्टा अभवन्निति शेषः ॥ २४ ॥

गो० टी०–ता इति । ताः प्रकृतयः पौरश्रेणयः 'राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च' इत्यमरः । बलाध्यक्षाः सेनापतयश्च राघवस्य निवर्तने निवर्तननिमित्तं समाज्ञप्तां बलस्य सैन्यस्य यात्रां श्रुत्वा प्रहृष्टाः आसन्निति शेषः ॥२४॥

२५] ति० टी०–यात्रागमनं रामयात्रार्थं गमनम् ॥ २५ ॥

रा० टी०–तत इति । ततः प्राप्तहर्षाद्धेतोः यात्रागमनं यात्रया भरतादिकर्तृकगमनेन आगमनं रामकर्तृकनिवर्तनमाज्ञाय गृहे गृहे स्वस्वगृहे सर्वान्भर्तॄन् योधाङ्गनाः त्वरयन्ति स्म॥२५॥

गो० टी०–तत इति । यात्रागमनं यात्राया आगमनं सिद्धिं यात्रारूपगमनमिति वा ॥ २५ ॥

२६] ति० टी०–गोरथैः शकटैरित्यर्थः ॥ २६ ॥

---

१ रक्षका इति गो. पाठः । २ दृष्टस्तदादिशदिति गो. पाठः । ३ शीघ्रैरिति गो. पाठः । ४ महाजवैरिति गो. पाठः । ५ योधैरिति गो. पाठः ।

सज्जं तु तद्बलं दृष्ट्वा भरतो गुरुसंनिधौ । रथं मे त्वरयस्वेति सुमन्त्रं पार्श्वतोऽब्रवीत् ॥ २७ ॥
भरतस्य तु तस्याज्ञां परिगृह्य[1] प्रहर्षितः । रथं गृहीत्वोपययौ[2] युक्तं परमवाजिभिः ॥ २८ ॥
स राघवः सत्यधृतिः प्रतापवान्ब्रुवन्सुयुक्तं दृढसत्यविक्रमः ।
गुरुं महारण्यगतं यशस्विनं प्रसादयिष्यन्भरतोऽब्रवीत्तदा ॥ २९ ॥
तूर्णं त्वमुत्थाय[3] सुमन्त्र गच्छ बलस्य योगाय बलप्रधानान् ।
आनेतुमिच्छामि हि तं वनस्थं प्रसाद्य रामं जगतो हिताय ॥ ३० ॥
स सूतपुत्रो भरतेन सम्यगाज्ञापितः संपरिपूर्णकामः ।
शशास सर्वान्प्रकृतिप्रधानान्बलस्य मुख्यांश्च सुहृज्जनं च ॥ ३१ ॥
ततः समुत्थाय कुले कुले ते राजन्यवैश्या वृषलाश्च विप्राः ।
अयूयुजन्नुष्ट्ररथान्खरांश्च नागान्हयांश्चैव कुलप्रसूतान् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

रा०टी०–ते इति । हयैरश्वैः गोरथैः शकटैः मनोजवैः स्यन्दनैश्च योधैश्च सह सहितं सर्वं बलं बलाध्यक्षाः शीघ्रमचोदयन् २६

गो० टी०–त इति । गोरथैः वृषभयुक्तरथैः शकटैरित्यर्थः बलं सर्वमित्यवयवावयविनोर्भेदनिर्देशः ॥ २६ ॥

२७-२८] ति० टी०–सज्जं गमनाय संनद्धम् । गुरुर्वसिष्ठः ॥ २७ ॥ २८ ॥

रा० टी०–सज्जमिति । तत्स्वकीयं बलं सज्जं दृष्ट्वा गुहसन्निधौ स्थितो भरतः पार्श्वतः पार्श्वे स्थितं सुमन्त्रं मे रथं त्वरयस्वेत्यब्रवीत् ॥ २७ ॥

रा० टी०–भरतस्येति । तस्य भरतस्य आज्ञां परिगृह्य प्रहर्षितः सुमन्त्रः परमवाजिभिर्युक्तं रथं गृहीत्वा उपययौ भरतसमीपं प्राप ॥ २८ ॥

गो० टी०–सज्जमिति । सज्जं संनद्धं गुरुसंनिधाविति यत्तज्ञानकरणार्थमुक्तम् ॥ २७ ॥ २८ ॥

२९] ति० टी०–गुरुं रामं प्रसादयिष्यन्निवृत्तये ॥ २९ ॥

रा० टी०–स इति । सत्यधृतिः सत्ये प्रारम्भपरिसमापने रामाभिषेके इत्यर्थः, धृतिर्दार्ढ्यं यस्य दृढसत्यविक्रमः दृढौ अपरिचाल्यौ सत्यविक्रमौ यस्य स राघवो भरतः सुयुक्तं वचो ब्रुवन्सन्महारण्यगतं गुरुं रामं प्रसादयिष्यंश्च अब्रवीत् ॥ २९ ॥

गो० टी०–उक्तमर्थं पुनः संग्रहेण दर्शयति–स इत्यादिना । सत्यधृतिः अप्रच्युतधैर्यः सुयुक्तं ब्रुवन् गुरुं प्रसादयिष्यन् उचितवचनेन रामं प्रीणयिष्यन्नित्यर्थः ॥ २९ ॥

३०] ति० टी०–बलस्य योगाय बलसंमेलनाय । बलप्रधानान् आज्ञापयेति शेषः ॥ ३० ॥

रा० टी०–वचनाकारमाह–तूर्णमिति । हे सुमन्त्र ! बलस्य सैन्यस्य योगाय गमनार्थं परस्परं यथोचितसंबन्धाय संबन्धं कारयितुं बलप्रधानान्सेनाधीशान्गच्छ वनस्थं रामं तूर्णमानेतुमहमिच्छामि ॥ ३० ॥

गो० टी०–तूर्णमिति । बलस्य योगाय बलस्य सन्नहनाय बलस्य संगतये वा 'योगः सन्नहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । बलप्रधानान् गच्छ प्रधानशब्दः पुंलिङ्गोऽप्यस्ति ॥ ३० ॥ ३१ ॥

३१] ति० टी०–संपरिपूर्णकामस्तस्यापि रामदर्शने उत्कटेच्छत्वात् ॥ ३१ ॥

रा० टी०–स इति । भरतेनाज्ञापितः अत एव संपरिपूर्णकामः सूतपुत्रः सुमन्त्रः प्रकृतिप्रधानान् प्रजामुख्यान्बलस्य सैन्यस्य मुख्यानधीशांश्च शशास भरताज्ञापनं श्रावयामासेत्यर्थः॥३१॥

३२] ति० टी०–कुले कुले गृहे गृहे 'कुलं जनपदे गृहे' कुलप्रसूतानुत्तमान् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

रा० टी०–तत इति । ततः भरताज्ञापनश्रवणानन्तरं कुले कुले प्रतिगृहे वियमानाः राजन्यादयः उष्ट्रादीनयूयुजन् तत्र कुलप्रसूतानित्यस्य अत्युत्तमानित्यर्थः ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

गो० टी०–तत इति । वृषलाः शूद्राः कुले कुले गृहे गृहे 'कुलं जनपदे गृहे' इत्यमरः । अयूयुजन् सज्जानकुर्वन् कुलप्रसूतान् उत्तमानित्यर्थः ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने द्व्यशीतितमः सर्गः ॥ ८२ ॥

---

१ प्रतिगृह्य चेति गो. पाठः । २ गृहीत्वा प्रययाविति गो. पाठः । ३ समुत्थायेति गो. पाठः ।

त्र्यशीतितमः सर्गः ।

प्रभाते पुरोहितशिल्पिसेनापौरादिपरिवृतो भरतः पुरान्निर्गत्योल्लङ्घ्य दूराध्वानं गुहाधिष्ठितशृङ्गिवेरपुरे गङ्गातीरमनुप्राप्य पितृक्रियार्थं परिजनविश्रान्तये च सेनां संनिवेश्योवास ।

ततः समुत्थितः कल्यमास्थाय स्यन्दनोत्तमम् । प्रययौ भरतः शीघ्रं रामदर्शनकाम्यया ॥ १ ॥
अग्रतः प्रययुस्तस्य सर्वे मन्त्रिपुरोहिताः । अधिरुह्य हयैर्युक्तान्रथान्सूर्यरथोपमान् ॥ २ ॥
नवनागसहस्राणि कल्पितानि यथाविधि । अन्वयुर्भरतं यान्तमिक्ष्वाकुकुलनन्दनम् ॥ ३ ॥
षष्टी रथसहस्राणि धन्विनो विविधायुधाः । अन्वयुर्भरतं यान्तं राजपुत्रं यशस्विनम् ॥ ४ ॥
शतं सहस्राण्यश्वानां समारूढानि राघवम् । अन्वयुर्भरतं यान्तं राजपुत्रं यशस्विनम् ॥ ५ ॥
कैकेयी च सुमित्रा च कौसल्या च यशस्विनी । रामानयनसंतुष्टा ययुर्यानेन भास्वता ॥ ६ ॥
प्रयाताश्चार्यसंघाता रामं द्रष्टुं सलक्ष्मणम् । तस्यैव च कथाश्चित्राः कुर्वाणा हृष्टमानसाः ॥ ७ ॥
मेघश्यामं महाबाहुं स्थिरसत्त्वं दृढव्रतम् । कदा द्रक्ष्यामहे रामं जगतः शोकनाशनम् ॥ ८ ॥
दृष्ट एव हि नः शोकमपनेष्यति राघवः । तमः सर्वस्य लोकस्य समुद्यन्निव भास्करः ॥ ९ ॥

१-२] ति० टी०-कल्यं प्रातःकाले ॥ १ ॥ २ ॥

रा० टी०-यात्रासामग्रीसंपत्त्यनन्तरकालिकवृत्तमाह-तत इति । कल्यं प्रातःकाले स्यन्दनोत्तममास्थाय भरतः प्रययौ ॥ १ ॥

रा० टी०-अग्रत इति । सर्वे मन्त्रिपुरोहिताः रथानधिरुह्य तस्य भरतस्य अग्रतः अग्रे प्रययुः ॥ २ ॥

गो० टी०-तत इति । काल्यम् अहर्मुखम् 'प्रत्यूषोऽहर्मुखं काल्यम्' इत्यमरः । प्राप्येति शेषः ॥ १ ॥ २ ॥

३-४] ति० टी०-यथाविधिकल्पितानि गजसंनहनोक्तविधिना कृतसंनाहानि ॥ ३ ॥ ४ ॥

रा० टी०-सैन्यसंख्यां बोधयन्नाह-नवेति । यथाविधि यथोचितं कल्पितानि क्रमेण संनिवेशितानि नागसहस्राणि नवनवसहस्रसंख्याकगजाः भरतमन्वयुः अनुजग्मुः ॥ ३ ॥

गो० टी०-नवनागसहस्राणीति । यथाविधि कल्पितानि भरतनियोगमनतिक्रम्य कल्पितानि नवनागसहस्राणीत्यनेन पुरस्थगजेषु नवनागसहस्रमात्रं प्रयाणे कल्पितमित्यवगम्यते ॥ ३ ॥

रा० टी०-षष्टिरिति । रथसहस्राणि षष्टिः षष्टिसहस्रसंख्याकरथाः विविधायुधाः अनेकविधायुधविशिष्टाः धन्विनश्च अन्वयुः ॥ ४ ॥

गो० टी०-षष्टिरिति । धन्विनो विविधायुधाश्चेत्यनेन योधा उक्ताः ॥ ४ ॥

५] ति० टी०-समारूढानि सादिभिरिति शेषः ॥ ५ ॥

रा० टी०-शतमिति । समारूढानि अश्ववारैर्विशिष्टानि अश्वानां शतं सहस्राणि शतसहस्रसंख्याकाश्वाः अन्वयुः ॥५॥

गो० टी०-शतमिति । समारूढानि सादिभिरिति शेषः॥५॥

६] ति० टी०-कैकेयी च स्वकृतेः पुत्रं प्रत्यहिततया जातत्वान्मया किं कृतमिति खिन्ना पुनः प्रकृतिमापन्ना हर्षेण ययौ अत एव मध्यमत्वेऽप्यादौ तदुल्लेखः। यानेनेत्येकवचनं प्रत्येकापेक्षया सौहार्दादेकयानेनैव तिसृणां गमनं वा ॥ ६ ॥

रा० टी०-कैकेयीति । रामानयनसंतुष्टाः रामानयनहेतुकप्राप्तसंतोषाः केकय्यादयो ययुः । आदौ केकय्युपादानं तत्संतोषस्यातिशयद्योतनाय तेन तस्याः रामविषयकभीत्यतिशयः सूचितः ॥ ६ ॥

गो० टी०-कैकेयीति । अग्रतो गमनं पश्चात्तापातिशयात्, यानेनेत्येकवचनं प्रत्येकापेक्षया ॥ ६ ॥

७-९] ति० टी०-आर्यसंघातास्त्रैवर्णिकसमूहाः ॥७-९ ॥

रा० टी०-प्रयाता इति । तस्य रामस्य विचित्राः कथाः कुर्वाणाः आर्यसंघाताः आर्याणां वशिष्ठादीनां संघाताः समूहाः प्रयाताः अभवन्निति शेषः ॥ ७ ॥

गो० टी०-प्रयाता इति । आर्यसंघाताः त्रैवर्णिकसंघाः तस्यैव कथाः तत्संबन्धिवार्ताः ॥ ७ ॥

रा० टी०-कथाप्रकारं बोधयन्नाह-मेघेत्यादिद्वाभ्याम् । जगतः शोकनाशनं रामं कदा द्रक्ष्यामहे ॥ ८ ॥

गो० टी०-ता एवाह-मेघेत्यादिना । मेघश्यामं दूरस्थितत्वेऽपि स्पष्टुमशक्यं सौन्दर्यमुच्यते घर्माभितप्ताः पर्जन्यमितिवत् मेघश्यामं दर्शनमात्रेण सर्वसंतापहरं महाबाहुमायताश्च सृष्टताश्रेति श्लुकम् । महाबाहुं तादृशसौन्दर्यानुभवदानविषयौदार्ययुक्तं महाबाहुं तादृशसौन्दर्यभोगप्रदानसमर्थं रामामिन्दीवरश्यामं सर्वशत्रुनिबर्हणमितिवत् स्थिरसत्त्वं स्थिरव्यवसायं 'द्रव्यासूयव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । 'स्थिरचित्तम्'

---

१ काल्यमिति गो. पाठः । २ काङ्क्षयेति गो. पाठः । ३ पुरोधस इति गो. पाठः । ४ सत्यसंधजितेन्द्रियमिति गो. पाठः । ५ संहृष्ट इति गो. पाठः ।

इत्येवं कथयन्तस्ते संप्रहृष्टाः कथाः शुभाः । परिष्वजानाश्चान्योन्यं ययुर्नागरिकास्तदा ॥ १० ॥
ये च तत्रापरे सर्वे संमता ये च नैगमाः । रामं प्रतियययुर्हृष्टाः सर्वाः प्रकृतयः शुभाः ॥ ११ ॥
मणिकाराश्च ये केचित्कुम्भकाराश्च शोभनाः । सूत्रकर्मविशेषज्ञा ये च शस्त्रोपजीविनः ॥ १२ ॥
मायूरकाः क्राकचिका वेधका रोचकास्तथा । दन्तकाराः सुधाकारा ये च गन्धोपजीविनः ॥ १३ ॥

इति च पाठः आश्रितप्रातिकूल्येनाप्यविकृतमनस्कं दृढव्रतम् अन्तरङ्गैरन्यप्रकम्प्याश्रितरक्षणदीक्षं कदा द्रक्ष्यामहे रामं तन्मुखावलोकनमात्रं लभ्यते चेत् कैकेयीवचनजनिततापाः सर्वेऽपि निवर्तेरन् जगतः शोकनाशनं तस्मिन्सर्वलोकशोकनिवर्तके सति कथं वयं शोकाकुलाः स्याम तदीयसर्वलोकशोकनिवर्तकत्वस्य अस्मच्छोकस्य च कः सबन्धः मा शुच इत्युक्तवतोऽप्यस्यातिशय उक्तः ॥ ८ ॥

रा० टी०–दर्शने फलमाह–दृष्ट इति । नोऽस्माकं दृष्ट एव राघवः उद्यन् उदयं प्राप्नुवन् भास्करः सर्वलोकस्य तमोऽन्धकारमिव नः शोकमपनेष्यति। न इत्युभयान्वयि पूर्वत्र संबन्धसामान्यविवक्षया षष्ठी ॥ ९ ॥

गो० टी०–दृष्ट इति । दृष्ट एव रामः सन्निहितश्चेत्स मन्दस्मितो मा भूत् कटाक्षपूर्वकं किंचित् प्रियवचनं च मावोचत् अस्माभिश्च न यत्नः कार्यः किं तु दूरे दर्शनमात्रेणास्मच्छोकाः सर्वे नश्येयुः । तम इत्यादि । यथोद्यन् आदित्यो दूरस्थितोऽपि सकललोकान्धकारं निवर्तयति ॥ ९ ॥

१०] ति० टी०–परिष्वजाना परिष्वजमानाः नगरे चरन्तीति नागरिकाः " चरति " इति ठक् ॥ १० ॥

रा० टी०–इतीति। इति एवंप्रकारेण शुभाः कथाः कथयन्तः अत एवान्योन्यं परिष्वजानाः नागरिकाः अयोध्यावासिनो जनाः ययुः ॥ १० ॥

गो० टी०–इतीति । परिष्वजानाः परिष्वजमानाः नगरे चरन्तीति नागरिकाः "चरति" इति ठक् ॥ १० ॥

११] ति० टी–तत्र नगरे संमताः प्रसिद्धाः, नैगमा वणिजः, प्रकृतयः श्रेणयः ॥ ११ ॥

रा० टी०–य इति । तत्रायोध्यायां ये नैगमाः वणिजः संमताः भरतेनाज्ञप्ता इत्यर्थः, ते अपरे अनाज्ञप्ताश्च प्रकृतयः प्रजाश्च रामं प्रति ययुः ॥ ११ ॥

गो० टी०–य इति । तत्र नगरे ये रामस्य संमताः ये च नैगमाः वणिजः ते सर्वे सर्वाः प्रकृतयः पौरश्रेणयश्च रामं प्रति ययुः ॥ ११ ॥

१२] ति० टी०–श्रेणीर्विविच्याह–मणिकारा इति । शाणादौ मणिशोधकाः, सूत्रकर्मविशेषज्ञास्तन्तुवायाः, शस्त्रोपजीविनः शस्त्रनिर्माणोपजीविनः ॥ १२ ॥

रा० टी०–मणिकारा इति । ये मणिकाराः शाणादिना मणीनां शोधकाः ते च कुम्भकाराश्च सूत्रकर्मविषयकविशेषज्ञानवन्तस्तन्तुवायादयः ये शस्त्रोपजीविनः शस्त्रनिर्माणादिना प्राप्तजीविकावन्तस्ते च ॥ १२ ॥

गो० टी०–ताः प्रपञ्चयति–मणीत्यादिना ।अत्र यच्छब्दरहितस्थले सोऽवधेयः। मणिकाराः पद्मरागादिमणिसंस्कारकाः, कुम्भकाराः कुलालाः शोभनाः स्वकार्यदक्षा इति यावत्। सूत्रकर्मकृतः तन्तुवायादयः, शस्त्रोपजीविनः शस्त्रकारकाः, मायूरकाः मयूरपिच्छैश्छत्रव्यजनादिकारिणः, क्राकचिकाः क्रकचैः करपत्रैश्चन्दनादिदारुदलनकारिणः 'ककचोऽस्त्री करपत्रम्' इत्यमरः। रोचकाः दन्तकुड्यवेदिकादिषु कान्त्युत्पादकाः, वेधकाः दारुरत्नादिरन्ध्रकारिणः, दन्तकाराः दन्तैः पुत्रिकापीठशिबिकादिकारकाः, सुधाकाराः प्रासादतलकुड्यादिषु सुधालेपनकर्मकराः, गन्धोपजीविनः चन्दनकस्तूरीकर्पूरकुङ्कुमादिगन्धद्रव्यविक्रयजीविनः, सुवर्णकाराः प्रसिद्धाः, कम्बलधावकाः कम्बलशोधकाः, क्षापकोच्छादकाः क्षापकास्तैलाभ्यङ्गादिस्नानकारिणः उच्छादकाः अङ्गमर्दकाः 'उच्छादनं समुल्लेखोद्वाहनोद्वर्तनेषु च' इति विश्वः। धूपकाः, गृहादिषु धूपवासकाः शौण्डिकाः मद्यकराः 'शुण्डा करिकरे मद्ये' इति वैजयन्ती । रजकाः निर्णेजकाः 'निर्णेजकः स्याद्रजकः' इत्यमरः । तुन्नवायाः सौचिकाः 'तुन्नवायस्तु सौचिकः' इत्यमरः। ग्रामघोषमहत्तराः ग्राममहत्तराः घोषमहत्तराश्च महत्तराः प्रधानभूताः 'घोष आभीरपल्ली स्यात्' इत्यमरः । शैलूषाः भूमिकाधारिणः स्त्रीजीविनो वा अत एव सहस्त्रीभिरित्युक्तम् 'शैलालिनस्तु शैलूषा जायाजीवाः' इत्यमरः। कैवर्ताः धीवराः 'कैवर्ते दाशधीवरौ' इत्यमरः । ते सर्वे ययुरित्यन्वयः ॥ १२–१९ ॥

१३] ति० टी०–मायूरका लीलामयूरग्राहिणः इदमुपलक्षणं शुकादिकग्राहिणाम्, यद्वा मयूरपिच्छैश्छत्रादिव्यञ्जनकारिणः, क्रकचः करपत्रं तेन जीवन्ति ते क्राकचिकाः, वेधका मणिशुक्तादिवेधकर्तारः, रोचकाः काचकुप्यादिकर्तार इति कतकः। दन्तकारा गजदन्तादिभिः समुद्गकादिकर्तारो दन्तलेखकाश्च, सुधाकाराः सुधालेपकाराः, गन्धोपजीविनो गन्धद्रव्यविक्रयिकाः ॥ १३ ॥

रा० टी०–मायूरकाः मयूरपिच्छरचितव्यजनादिना प्राप्तजीविकावन्तः, क्राकचिकाः ककचाः करपत्राणि चन्दनादिचूर्णकारणीभूततक्षशस्त्रविशेषास्तैर्जीवन्ति ये ते 'ककचोऽस्त्रीकरपत्रं स्यात्' इत्यमरः । वेधकाः मणिशुक्तादिछिद्रकारकाः, रोचकाः स्वक्रियाकौशलेन गृहादिषु कान्त्युत्पादकाः, दन्तकाराः गजदन्तोपादानककार्यनिष्पादकाः, सुधाकाराः प्रासादादिलेपनकारणीभूतपाषाणादिभस्मकारकाः, गन्धोपजीविनः सुगन्धद्रव्यक्रयविक्रयकर्तारः ॥ १३ ॥

१ जना इति गो. पाठः । २ तथेति गो. पाठः । ३ कृतश्चैवेति गो. पाठः । ४ तथेति गो. पाठः ।

सुवर्णकाराः प्रख्यातास्तथा कम्बलकारकाः । स्नापकोष्णोदका[1] वैद्या धूपका[3]ः शौण्डिकास्तथा॥१४॥
रजकास्तुन्नवायाश्च ग्रामघोषमहत्तराः । शैलूषाश्च सह स्त्रीभिर्[4]यान्ति कैवर्तकास्तथा ॥ १५ ॥
समाहिता वेदविदो ब्राह्मणा वृत्तसंमताः । गोरथैर्भरतं यान्तमनुजग्मुः सहस्रशः ॥ १६ ॥
सुवेषाः शुद्धवसनास्ताम्रमृष्टानुलेपिनः[5] । सर्वे ते [6]विमलैर्यानैः शनैर्भरतमन्वयुः ॥ १७ ॥
प्रहृष्टमुदिता सेना सान्वयात्कैकयीसुतम् । भ्रातुरानयने यान्तं भरतं भ्रातृवत्सलम् ॥ १८ ॥
ते गत्वा दूरमध्वानं रथयानाश्वकुञ्जरैः । समासेदुस्ततो गङ्गां शृङ्गवेरपुरं[8] प्रति ॥ १९ ॥
यत्र रामसखा[9] वीरो गुहो ज्ञातिगणैर्वृतः । निवसत्यप्रमादेन देशं तं परिपालयन् ॥ २० ॥
उपेत्य तीरं गङ्गायाश्चक्रवाकैरलंकृतम् । व्यवतिष्ठत[10] सा सेना भरतस्यानुयायिनी ॥ २१ ॥
निरीक्ष्यानुत्थितां[11] सेनां तां च गङ्गां शिवोदकाम् । भरतः सचिवान्सर्वानब्रवीद्वाक्यकोविदः ॥ २२ ॥

१४] ति० टी०–स्नापका उष्णोदकस्नापकाः, उष्णोदका अङ्गमर्दकाः । ' उष्णोदकं समुल्लेखोद्वाहनोद्वर्तनेषु च ' । धूपका धूपक्रियया जीविनः, शौण्डिका मद्यकृतः, ' शुण्डा करिकरे मद्ये ' ॥ १४ ॥

रा० टी०–प्रख्याताः प्रसिद्धाः सुवर्णकाराः, कम्बलकारकाश्च स्नापकाः उष्णोदकादिना स्ननिर्वाहकाः, उष्णोदकाः अङ्गनिपीडकाः ते च ते चेति द्वन्द्वः । 'उष्णोदकं समुल्लेखोद्वाहनोद्वर्तनेषु च' इति कोशः । किंच स्नापकाः स्नानसाधकाः, उष्णोदकाः उदकोष्णकर्तारः ' स्नापकोच्छादकाः ' इति भूषणपाठः । उच्छादकाः अङ्गमर्दका इति तव्याख्या वैद्याश्च धूपिकाः धूपक्रियाजनितजीविकावन्तः, शौण्डिकाः मद्यनिर्माणकर्तारः ' शुण्डा करिकरे मद्ये ' इति वैजयन्ती ॥ १४ ॥

१५] ति० टी०–तुन्नवायाः सूच्या सीवनकर्तारः, ग्रामे घोषे च वर्तमाना महत्तराः शैलूषा नटाः, कैवर्तकाः ' कैवर्तकारवाः ' इति पाठे कारवाः कर्मारा: ॥ १५ ॥

रा० टी०–रजकाः वस्त्रप्रक्षालनजीविकावन्तः, तुन्नवायाः सूच्या सीवनजीविकावन्तः ' तुन्नवायस्तु सौचिकः ' इत्यमरः । ग्रामघोषमहत्तराः ग्रामघोषयोर्महत्तराः वृत्तदर्धीशा इत्यर्थः । तत्र घोष आभीरपल्ली, स्त्रीभिः सह सहिताः शैलूषा नटाः कैवर्तकाः धीवराश्च यान्ति ययुः । श्लोकचतुष्टयमेकान्वयि ' शैलूषो नटविल्वयोः ' इति मेदिनी ' कैवर्ते दाशधीवरौ ' इत्यमरः ॥ १५ ॥

१६] ति० टी०–गोरथैः शकटैः ॥ १६ ॥

रा० टी०–समाहिता इति । समाहिताः रामावेशितचित्ताः वृत्तसंमताः वृत्तं वर्तनं संमतं सच्छास्त्रानुकूलं येषां ते सहस्रशो ब्राह्मणाः गोरथैर्भरतमनुजग्मुः ॥ १६ ॥

गो० टी०–समाहिता इति । समाहिताः योगिनः गोरथैष्टपभयुक्तरथैः शकटैरिति यावत् ॥ १६ ॥

१७] ति० टी०–गोरोचनकुङ्कुमादिसंबन्धात्ताम्रवर्णं मृष्टं संपूर्णमनुलेपोऽनुलेपनं येषां ते ॥ १७ ॥

रा० टी०–सुवेषा इति । ताम्रमृष्टानुलेपिनः ताम्रेण रक्तवर्णेन मृष्टं संयुक्तं यदनुलेपनं तद्वन्तः सर्वे ते अयोध्यावासिनः भरतमन्वयुः ॥ १७ ॥

गो० टी०–सुवेषा इति । ताम्रमृष्टानुलेपनाः रक्तवर्णसंपूर्णाङ्गरागाः ॥ १७ ॥

१८] ति० टी०–प्रहर्षः कायिकरोमाञ्चादिरूपः मोदो मानसः ॥ १८ ॥

रा० टी०–प्रहृष्टेति । प्रहृष्टेन भरतहर्षेण मुदिता प्रहृष्टा सा सेना भरतमन्वयात् ॥ १८ ॥

गो० टी०–प्रहृष्टमुदितेति । प्रहर्षः कायिको रोमाञ्चादिः प्रमोदो मानसो हर्षः आनयने आनयननिमित्तम् ॥१८॥

१९] ति टी०–शृङ्गवेरपुरं प्रति शृङ्गवेरपुर इत्यर्थः॥१९॥

रा० टी०–ते इति । ते भरतादयः रथादिभिः दूरमध्वानं गत्वा शृङ्गवेरपुरं प्रति तत्समीपे गङ्गां समासेदुः ॥ १९ ॥

गो० टी०–त इति । शृङ्गिवेरपुरं प्रति दूरमध्वानं गत्वा गङ्गां समासेदुरिति संबन्धः, यद्वा शृङ्गिवेरपुरं प्रतीति लक्षणे कर्मप्रवचनीयः शृङ्गिवेरपुर इत्यर्थः॥ १९ ॥

२०–२१] ति० टी०–अप्रमादेन सावधानतया॥२०॥२१॥

रा० टी०–तत्प्रकारमाह–यत्रेति । ज्ञातिगणैः ज्ञातिसमूहैः वृतः गुहः अप्रमादेन प्रमादरहितत्वेन परिपालयन् रक्षन्सन् यत्र देशे निवसति तं देशमुपेत्य प्राप्य चक्रवाकैरलंकृतं गङ्गायास्तीरं भरतस्यानुयायिनी सा सेना व्यवातिष्ठत । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०–यत्रेति । अप्रमादेन सावधानतया रामविरोध्यागमनवारणपर इत्यर्थः । तत्र देशे विद्यमानं शृङ्गिवेरपुरं प्रतीति पूर्वेणान्वयः ॥ २० ॥

गो० टी०–उपेत्येति। व्यवातिष्ठत व्यवस्थिताभूत् २१॥२२

२२] ति० टी०–अनुत्थितां गमनेऽनुद्योगाम् ॥ २२ ॥

रा० टी०–निरीक्ष्येति । अनुत्थितां गङ्गातीरे संस्थिता-

१ भावका इति गो. पाठः । २ स्नापकोच्छादका इति गो. पाठः । ३ धूपिका इति रा. पाठः । ४ ययुरिति गो. पाठः । ५ लेपना इति गो. पाठः । ६ विनियैरिति गो. पाठः । ७ यान्तमिति गो. रा. पाठः । ८ शृङ्गिवेरेति गो. पाठः । ९ रामसख इति गो. पाठः । १० व्यवातिष्ठतेति गो. रा. पाठः । ११ ऽनुगतामिति गो. पाठः ।

निवेशयत मे सैन्यमभिप्रायेण सर्वतः । विश्रान्ताः प्रतरिष्यामः श्व इमां सागरंगमाम् ॥ २३ ॥
दातुं च तावदिच्छामि स्वर्गतस्य महीपतेः । और्ध्वदेहनिमित्तार्थमवतीर्योदकं नदीम् ॥ २४ ॥
तस्यैवं ब्रुवतोऽमात्यास्तथेत्युक्त्वा समाहिताः । न्यवेशयंस्तांश्छन्देन स्वेन स्वेन पृथक्पृथक् ॥ २५ ॥
निवेश्य गङ्गामनु तां महानदीं चमूं विधानैः परिवर्हशोभिनीम् ।
उवास रामस्य तदा महात्मनो विचिन्तमानो भरतो निवर्तनम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

चतुरशीतितमः सर्गः ।

सेनानुगत्वाद्धरते रामहिंसाविषयकं दोषमाशङ्क्य गुहस्तत्तरणप्रतिरोधमीहमानो दाशान्नौरक्षणे विनियोज्य स्वयं भरतभावजिज्ञासुस्तत्समीपं ययौ । स्वोपाहृतफलमूलादिभि कृतातिथ्यं विश्रान्तं गतश्रममेनं पुरतः प्रयान्तमनुमेने ।

ततो निविष्टां ध्वजिनीं गङ्गामन्वाश्रितां नदीम् । निषादराजो दृष्ट्वैव ज्ञातीन्सं परितोऽब्रवीत् ॥ १ ॥

मित्यर्थः, तां सेनां शिवोदकां मङ्गलप्रदोदकविशिष्टां गङ्गां निरीक्ष्य भरतः सचिवानब्रवीत् ॥ २२ ॥

२३] ति० टी०–अथ विश्रान्ताः श्वः प्रतरिष्यामः, इत्यभिप्रायेणेति मदभिप्रायज्ञापनेन निवेशयतेत्यर्थः ॥ २३ ॥

रा० टी०–वचनाकारमाह–निवेशयतेति । अभिप्रायेण तत्तदिच्छया सर्वतः चतुर्दिक्षु मे सैन्यं निवेशयत । तत्प्रयोजनमाह–इदानीं विश्रान्ताः गतश्रमाः वयं श्वः प्रातः इमां प्रसिद्धां नदीं गङ्गां प्रतरिष्यामः प्रतरिताः स्म ॥ २३ ॥

गो० टी०–निवेशयतेति । अभिप्रायेण तत्तदिच्छया इदानीं विश्रान्ताः श्वो नदीं प्रतरिष्याम इति संबन्धः ॥ २३ ॥

२४] ति० टी०–और्ध्वदेहनिमित्तार्थम् एतच्छरीरपातोत्तरकालिकदेहभवसुखप्रयोजनायेत्यर्थः । यद्वा एतद्देहपातादूर्ध्वं जातदेहो निमित्तं यस्य परलोकस्य स ऊर्ध्वदेहनिमित्तः परलोकः स्वार्थिकोऽण् तदर्थमित्यर्थः । मध्ये मिलितनयन्तरे एवमनुक्तया गङ्गायास्तर्पणेन पितृस्वर्गप्राप्तिकरत्वं सूचितम् ॥ २४ ॥

रा० टी०–तत्र स्थितौ प्रयोजनान्तरमाह–दातुमिति । नदीं गङ्गामवतीर्य स्वः सर्वपरं लोकं साकेतं गतस्य प्राप्तस्य महीपतेः पितुः और्ध्वदेहनिमित्तार्थमौर्ध्वदेहानामूर्ध्वगतशरीराणां निमित्तमर्थः प्रार्थना यस्य तदुदकं दातुमिच्छामि ॥ २४ ॥

गो० टी०–दातुमिति । और्ध्वदेहनिमितार्थम् ऊर्ध्वदेहभवसुखप्रयोजनायेत्यर्थः, नदीमवतीर्य पितुरौर्ध्वदेहनिमित्तार्थमुदकं दातुमिच्छामीत्यन्वयः ॥ २४ ॥

२५] ति० टी०–स्वेन स्वेन छन्देन स्वस्वेच्छया ॥ २५ ॥

रा० टी०–तस्येति । ब्रुवतस्तस्य भरतस्य एवं वचनं तथेत्युक्त्वा समाहिताः सचिवास्तां सेनां स्वेन स्वेन छन्देन स्वस्वेच्छया पृथक् पृथक् न्यवेशयन् ॥ २५ ॥

गो० टी०–तस्येति । छन्देन इच्छया 'छन्दः श्रुतीच्छापथेषु' इति वैजयन्ती ॥ २५ ॥

२६] ति० टी०–गङ्गामनु गङ्गां लक्षीकृत्येत्यर्थः । परिवर्हो यात्रोपयुक्तपटवेश्माद्युपकरणजातम् । विधानैर्वासव्यवस्थाकल्पनैः रामस्य निवर्तनं विचिन्तमानः चिन्तयमान इत्यर्थः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

रा० टी०–निवेश्येति । परिवर्हशोभिनीं परिवर्हैः यात्रोपयोगिपटवेश्माद्युपकरणजातैः शोभते तच्छीलिनीं चमूं सेनां विधानैः यथोचितस्थापनादिविधिभिः महानदीं गङ्गामनु निवेश्य महात्मनो रामस्य निवर्तनमयोध्यागमनं विचिन्तमानः चिन्तयमानो भरतः उवास 'तथोपकरणं प्रोक्तं परिवर्हः परिच्छदः' इति हलायुधः ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

गो० टी०–निवेश्येति । गङ्गामनु निवेश्य गङ्गामनुसृत्य निवेश्य गङ्गाकूलानुसारेण निवेश्येति यावत् विधानैस्तत्तज्जातिव्यवस्थाकल्पनादिभिः परिवर्हशोभिनीं परिवर्हां यात्रोपयुक्तपटवेश्माद्युपकरणम् 'तथोपकरणं प्रोक्तं परिवर्हः परिच्छदे' इति हलायुधः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

१] ति० टी०–गङ्गामनु आश्रिताम्, निविष्टां क्वचित्कार्येऽभिनिवेशवतीम् ॥ १ ॥

रा० टी०–ससैन्यभरतस्थित्यानन्तरकालिकं वृत्तमाह–तत इत्यादिभिः । निविष्टां गङ्गातीरे संस्थितामत एव गङ्गामन्वाश्रितां सेवमानां ध्वजिनीं भरतसेनां दृष्ट्वैव परितो वियमानान् ज्ञातीन् निषादराजोऽब्रवीत् ॥ १ ॥

गो० टी०–तत इत्यादि । गङ्गामन्वाश्रितां प्राप्तामत एव निविष्टां कृतनिवेशां ध्वजिनीं सेनां दृष्ट्वा संत्वरितः ससंभ्रमः॥१॥

---

१ इदानीमिमां नदीमिति गो. पाठः । २ संत्वरित इति गो. पाठः ।

महतीयमितः सेना सागराभा प्रदृश्यते । नास्यान्तमवगच्छामि मनसापि विचिन्तयन् ॥ २ ॥
यदा नु खलु दुर्बुद्धिर्भरतः स्वयमागतः । स एष हि महाकायः कोविदारध्वजो रथे ॥ ३ ॥
बन्धयिष्यति वा पाशैरथ वास्मान्वधिष्यति । अनु दाशरथिं रामं पित्रा राज्याद्विवासितम् ॥ ४ ॥
संपन्नां श्रियमन्विच्छंस्तस्य राज्ञः सुदुर्लभाम् । भरतः कैकयीपुत्रो हन्तुं समधिगच्छति ॥ ५ ॥
भर्ता चैव सखा चैव रामो दाशरथिर्मम । तस्यार्थकामाः संनद्धा गङ्गानूपेऽत्र तिष्ठत ॥ ६ ॥
तिष्ठन्तु सर्वदाशाश्च गङ्गामन्वाश्रिता नदीम् । बलयुक्ता नदीरक्षा मांसमूलफलाशनाः ॥ ७ ॥
नावां शतानां पञ्चानां कैवर्तानां शतं शतम् । संनद्धानां तथा यूनां तिष्ठन्तित्यभ्यचोदयत् ॥ ८ ॥

२] ति० टी०–इत इह गङ्गातीरे । नास्या अन्तमित्यर्थे संधिरार्षः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–महतीति । सागराभा समुद्रसदृशी महती इयं सेना इतः अस्मादेव स्थानात्प्रदृश्यते अत एव अस्य सैन्यस्य मनसापि अन्तं निवर्तकं चिन्तयन्सत्र अवगच्छामि निश्चिनोमि ॥ २ ॥

गो० टी०–महतीति । इतः इह शृङ्गिवेरपुरे अस्य सेनारूपवस्तुनः चिन्तयन्नहं मनसापि नास्यान्तमधिगच्छामीति संबन्धः ॥ २ ॥

३] ति० टी०–यदा नु खलु यस्मादेतोर्दुर्बुद्धिर्भरतः स्वयमागतस्ततो महती सेना प्रदृश्यत इत्यन्वयः, रामपीडार्थं प्रवृत्त इत्याशयेन दुर्बुद्धितावादः । भरतागमनचिह्नमाह–स इति । महाकायो महाप्रमाण इक्ष्वाकुकुलचिह्नभूतः कोविदारध्वजो रथे दृश्यते, अतो भरत एवायमिति भावः ॥ ३ ॥

रा० टी०–नन्वत्र किं निश्चयाभावेनेत्यत आह–यदेति । महाकायः उन्नतशरीरः रथे कोविदारध्वजः कोविदारसदृशः ध्वजो यस्य स स्वयमागतः एष भरतः यदा खलु दुर्बुद्धिः रामसंप्रदानकद्रोहवानित्यर्थः, तदा पित्रा विवासितं राममनुविधमानानस्मान्वधिष्यति पाशैर्बन्धयिष्यति वा । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–यथेति । सः इक्ष्वाकुकुलक्रमागतः कोविदारध्वजः रथे दृश्यते हि यस्मात् अतो भरतः स्वयमागतः यथा तु खलु ध्रुवमित्यर्थः, कोविदारध्वजः दुर्बुद्धिरित्यनेन भरतो रामद्रोहाकाङ्क्षया आगच्छतीति शङ्कितवानिति गम्यते ॥ ३ ॥

४] ति० टी०–नन्वायातु भरतः, किमस्माकमत आह–बन्धयिष्यतीति । स्वामात्यैरिति शेषः, वधिष्यतीति वा । अनु ततः पश्चादामं वधिष्यति इति मन्ये इति शेषः ॥ ४ ॥

गो० टी०–तदेव स्थापयिष्यति–बन्धयिष्यतीत्यादिना । दाशानस्मान् बन्धयिष्यति अथवा वधिष्यति हनिष्यति हनो ल्युटि वधादेश आर्षः । अथ अथवा दाशरथिं ज्ञातिभूतमिति भावः विवासितं दुर्बलमित्यर्थः, संपन्नाम् अप्रच्युतां रामगमने हि भीः प्रच्युता स्यात् कैकेयीपुत्र इति दुष्प्रकृतित्वे हेतुः तस्य राज्ञः राजत्वार्हस्य रामस्य सुदुर्लभाम् ॥ ४ ॥ ५ ॥

५] ति० टी०–नन्वत्र रामवधेऽस्य किं फलमत आह–संपन्नामिति । संपूर्णामित्यर्थः सार्वकालिकीमिति यावत्, तस्य राज्ञो रामस्य सुदुर्लभां तस्मिञ्जीवति दुष्प्रापाम् अतो रामं हन्तुं समधिगच्छति बुद्धिं प्राप्नोति ॥ ५ ॥

रा० टी०–द्वोहे स्वोहितहेतुं वदन्नाह–संपन्नामिति । संपन्नां श्रियमन्विच्छन् भरतः हन्तुं समुपगच्छति राममित्रवर्गानिति शेषः ॥ ५ ॥

६] ति० टी०–नन्वेवमपि तव का भीतिरत आह–भर्तेत्यादि । एवं च तत्पक्षत्वादस्माकं भीतिरिति भावः । अस्माभिश्च सख्यित्वादेव रामेष्टं कर्तव्यम्, अतो नास्माभिरेते गङ्गातारयितव्याः, अतो यूयं तस्य रामस्यार्थकामाः प्रयोजनेच्छवः संनद्धा अत्र गङ्गानूपे मत्संनिधौ तिष्ठत ॥ ६ ॥

रा० टी०–नन्वत ततः किमित्यत आह–भर्तेति । मम भर्त्रादिः राम एव एतेन वयमपि तदिष्टया इति सूचितम् । रामानुयायित्वादस्माभिरपि तदुपकृतिः कर्तव्येति बोधयन्नाह–तस्य रामस्य अर्थकामाः प्रयोजनसिद्धिविषयकेच्छावन्तः अत एव सन्नद्धाः धृतकवचाः यूयं गङ्गानूपे गङ्गातीरे तिष्ठत ॥ ६ ॥

गो० टी०–किमतोऽभवत् इत्यत्राह–भर्तेति । अर्थकामा अर्थेच्छवः यूयमिति शेषः, अनूपे तीरे ॥ ६ ॥

७] ति० टी०–सर्वे मामका दाशास्तु गङ्गां नदीमेवान्वाश्रिताः, नदीरक्षा नदीतरणमार्गविघ्नवन्तो मांसमूलफलाशना एतद्भीत्या तीरे आगन्तुमशक्यतया नावारोपितमांसाद्यशना बलवन्तः सन्तस्तिष्ठन्तु ॥ ७ ॥

रा० टी०–स्थितिप्रयोजनं वदन्नाह–तिष्ठन्त्विति । बलयुक्ताः सेनासहिताः नदीरक्षाः सेनातरणवारणादिना नदीरक्षणकर्तारः अत एव गङ्गामन्वाश्रिताः सर्वे दाशाः धीवराः भवन्तः तिष्ठन्तु ॥ ७ ॥

गो० टी०–तिष्ठन्त्विति । सर्वे दाशाश्च गङ्गामन्वाश्रिताः सन्तः बलयुक्ताः सेनायुक्ताः नदीरक्षाः नदीतरणमार्गं रक्षन्तः मांसमूलफलाशनाः नावारोपितमांसाद्यशनाः तिष्ठन्तु ॥ ७ ॥

८] ति० टी०–बलवत्तामेवाह–नावामिति । पञ्चशतसंख्याकनावां प्रत्येकं संनद्धानां युद्धसंनाहवतां यूनां युद्धार्हाणां कैवर्तानां शतं शतमारुह्य तिष्ठन्त्वित्यभ्यचोदयत् ॥ ८ ॥

१ अधिगच्छामीति गो.पाठः । २ यथा त्विति गो. पाठः । ३ दाशानथेति गो. पाठः । ४ अथेति गो. पाठः । ५ समुपगच्छतीति रा. पाठः । ६ सर्वे इति गो. पाठः ।

यदि तुष्टस्तु भरतो रामस्येह भविष्यति । इयं स्वस्तिमती सेना गङ्गामद्य तरिष्यति ॥ ९ ॥
इत्युक्त्वोपायनं गृह्य मत्स्यमांसमधूनि च । अभिचक्राम भरतं निषादाधिपतिर्गुहः ॥ १० ॥
तमायान्तं तु संप्रेक्ष्य सूतपुत्रः प्रतापवान् । भरतायाचचक्षेऽथ समयज्ञो विनीतवत् ॥ ११ ॥
एष ज्ञातिसहस्रेण स्थपतिः परिवारितः । कुशलो दण्डकारण्ये वृद्धो भ्रातुश्च ते सखा ॥ १२ ॥
तस्मात्पश्यतु काकुत्स्थ त्वां निषादाधिपो गुहः । असंशयं विजानीते यत्र तौ रामलक्ष्मणौ ॥ १३ ॥
एतत्तु वचनं श्रुत्वा सुमन्त्राद्भरतः शुभम् । उवाच वचनं शीघ्रं गुहः पश्यतु मामिति ॥ १४ ॥
लब्ध्वानुज्ञां संप्रहृष्टो ज्ञातिभिः परिवारितः । आगम्य भरतं प्रह्वो गुहो वचनमब्रवीत् ॥ १५ ॥
निष्कुटश्चैव देशोऽयं वञ्चिताश्चापि ते वयम् । निवेदयाम ते सर्वं स्वके दाशगृहे वस ॥ १६ ॥

रा० टी०–तरणवारणप्रकारमाह–नावामिति । पञ्चानां शतानां पञ्चशतसंख्याकानां नावामुपरि संनद्धानां यूनां कैवर्तानां शतं शतं तिष्ठतु गङ्गादक्षिणकूले इति शेषः, इति अभ्यचोदयत् गुह इति शेषः । एतेन नौकालाभाभावेन तरणप्रतिबन्धोऽर्थतः सेत्स्यतीति सूचितम् ॥ ८ ॥

गो० टी०–नावामित्यादि । पञ्चानां शतानां नावामेकैकस्या नावः कैवर्तानां शतं शतं तिष्ठन्तु शतं शतं कैवर्ताः तिष्ठन्त्वित्यर्थः ॥ ८ ॥

९] ति० टी०–एवं स्थितैरपि युद्धे त्वरा न कार्येत्याह–यदीति । यदि रामविषये तुष्टस्तदेयं सेना स्वस्तिमती तरिष्यति अन्यथा नौकासु स्थित्वा एतान्निहन्म इति भावः । 'यदादुष्टः' इति पाठेऽदुष्ट इति च्छेदः ॥ ९ ॥

रा० टी०–ननु नावोऽपि दूरदेशं नेतव्या इत्यत आह–यदीति । इह अस्मिन्समये भरतः यदि रामस्य तुष्टस्तोषको भविष्यति तदा स्वस्तिमती इयं तदीया सेना अद्यैव तरिष्यति तेन नावो दूरं प्रनेतव्या इति व्यञ्जितम् ॥ ९ ॥

गो० टी०–यदेति । रामस्य तुष्टः रामविषयतुष्टः 'यदादुष्टः' इति पाठे अदुष्ट इति पदच्छेदः स्वस्तिमतीति अन्यथा हन्तव्येति भावः ॥ ९ ॥

१०–११] ति० टी०–अभिचक्राम दर्शनार्थम् ॥१०॥११॥

रा० टी०–इतीति । इत्युक्त्वा मत्स्यादीनि गृहीत्वा भरतमभिचक्राम जगाम तत्र मत्स्यः दैन्यनिवर्तकवायुमान् औषधिविशेषः । तथाहि मदो दैन्यस्य सो नाशः तद्वान् अः वायुर्यस्य सः 'अः कृष्णः शंकरो ब्रह्मा शक्रः सोमोऽनिलोऽनलः' इति मात्रिका । मांसं राजभोग्यवस्तुविशेषः अस्य तत्त्वमद्यपदमेव वक्ष्यते मधु पुष्परसः ॥ १० ॥

रा० टी०–तमिति । समयज्ञो विनीतवान् सूतपुत्रः सुमन्त्रः भरताय आचचक्षे कथयामास ॥ ११ ॥

गो० टी०–इतीति । उपायनं कौशेयादि, मांसं मृगाणाम् ॥ १० ॥ ११ ॥

१२] ति० टी०–स्थपतिः प्रभुः । दण्डकारण्ये कुशलो निग्रहानुग्रहसमर्थश्चारैस्तत्रस्यवृत्तान्तज्ञः ॥ १२ ॥

१३–१५] ति० टी०–अपि चानेन प्रयोजनमस्तीत्याह–असंशयमिति ॥ १३–१५ ॥

रा० टी०–तत्प्रकारमाह–एष इति । ज्ञातिसहस्रेण परिवारितः युक्तः स्थपतिः अधीशः दण्डकारण्ये कुशलः तद्विषयकविशेषज्ञानवान् एषः गुहः ते भ्रातुः रामस्य सखा तस्माद्धेतोर्गुहः त्वां पश्यतु प्रतीहारैर्निवारितो न स्यादित्यर्थः । यत्र तौ रामलक्ष्मणौ तं देशमसंशयं यथा स्यात्तथा विजानीते । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

रा० टी०–एतदिति । भरतः एतत् शुभं वचनं श्रुत्वा गुहः मां शीघ्रं पश्यतु कश्चिन्न निवारयत्वित्यर्थः, इति वचनमुवाच ॥ १४ ॥

गो० टी०–एष इति । स्थपतिः प्रभुः दण्डकारण्ये कुशलः तत्र संचरणसमर्थ इत्यर्थः । विजानीते तं देशमित्यर्थः ॥१२–१४॥

रा० टी०–लब्ध्वेति । अनुज्ञामाज्ञां लब्ध्वा संप्रहृष्टो गुहः प्रह्वः कृताशिरोनतिः सन्नागम्य वचनमब्रवीत् ॥ १५ ॥

गो० टी०–लब्ध्वेति । प्रह्वः कृतप्रणामः ॥ १५ ॥

१६] ति० टी०–अयं देशो निष्कुटो गृहारामकल्पः । वयं वञ्चिताः प्रस्थानसमयेऽप्रेषितनियोगदेशत्वात् । इयमुपचारोक्तिः सर्वं राज्यं ते निवेदयाम, वयं त्वदीयाः, अतः स्वीयदाशगृहे वस ॥ १६ ॥

रा० टी०–वचनाकारमाह–निष्कुट इति । निष्कुटः गृहारामतुल्यः भवद्भोगयोग्य इत्यर्थः, अयं देशोऽस्तीति शेषः । ते त्वत्सेवका वयं तु वञ्चिताः स्वानवधानतया प्रलम्भिताः । एतेन प्रत्युद्गमनकरणाभावप्रयुक्तः पश्चात्तापस्तस्य सूचितः । सेवकोचितमाह–सर्वं वृत्तजातं ते निवेदयाम अतः स्वके स्वकीये दाशगृहे अस्मदधिष्ठितभवने वस ॥ १६ ॥

गो० टी०–निष्कुट इति । अयं देशः मदधिष्ठितवनप्रदेशः ते निष्कुटः गृहारामभूतः 'गृहारामस्तु निष्कुटः' इत्यमरः । त्वद्भोगयोग्य इति यावत् । वयं च वञ्चिताः अत्र गमनानिवेदनेन

---

१ यदेति गो. पाठः । २ सेयमिति गो. पाठः । ३ विनयज्ञ इति गो. पाठः । ४ विनीतवानिति रा. पाठः । ५ लब्ध्वाभ्यनुज्ञां संहृष्ट इति गो. पाठः । ६ निवेदयामस्ते सर्वं इति गो. पाठः । ७ दासकुले इति गो. पाठः ।

अस्ति मूलफलं चैतन्निषादैः स्वयमर्जितम् । आर्द्रं शुष्कं यथा मांसं वन्यं चोच्चावचं तथा ॥ १७ ॥
आशंसे स्वाशिता सेना वत्स्यत्येनां विभावरीम् । अर्चितो विविधैः कामैः श्वः ससैन्यो गमिष्यसि ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

पञ्चाशीतितमः सर्गः ।

प्रस्थितो भरतो गुहं संश्लाघ्य भरद्वाजाश्रमप्रापकं पन्थानं पप्रच्छ । सानुगोऽहं ते मार्गं दर्शयामीति प्रतिज्ञाय स्वाशङ्कां निवेद्य भरतं प्रति रामविषयकं तदभिप्रायं पप्रच्छाभीक्ष्णं शोचन्तं च तमासायं समाश्वासयत् ।

एवमुक्तस्तु भरतो निषादाधिपतिं गुहम् । प्रत्युवाच महाप्राज्ञो वाक्यं हेत्वर्थसंहितम् ॥ १ ॥
ऊर्जितः खलु ते कामः कृतो मम गुरोः सखे । यो मे त्वमीदृशीं सेनामभ्यर्चयितुमिच्छसि ॥ २ ॥
इत्युक्त्वा स महातेजा गुहं वचनमुत्तमम् । अब्रवीद्भरतः श्रीमान्पन्थानं दर्शयन्पुनः ॥ ३ ॥

वञ्चिता इत्यर्थः, निवेदने हि प्रत्युद्गमनादिकं कर्तुं शक्यमिति भावः। सर्वे वयं ते त्वदीया इत्यर्थः अतः स्वके दासकुले दासगृहे वसेति निवेदयामः विज्ञापयामः पूर्वं गङ्गामासाद्येति गङ्गापर्यन्तमार्गकरणेऽपि अद्य मनुष्यप्रेरणाभावात्त्वदागमनं न ज्ञातवानस्मीति गुहेनोच्यते ॥ १६ ॥

१७] ति० टी०–वन्यं नीवारश्यामाकादि ॥ १७ ॥

रा० टी०–अस्तीति । निषादैः स्वयमर्जितं वन्यं वनोद्भवम् उच्चावचमार्द्रं शुष्कं च एतन्मूलफलं मांसं राजभोग्यं वस्तु विशेषश्च अस्ति एतत्स्वीकुर्वित्यर्थः 'मांसं स्यादामिषे क्लीबम्' इति मेदिनीकोशेन मांसशब्दस्यामिषार्थकत्वमवगतम् । आमिषशब्दस्य भोग्यवस्तुपरत्वं तु 'भोग्यवस्तुनि संभोगेऽप्युत्कोचे पललेऽपि च' इति तत्कोशादेवेति बोध्यम् ॥ १७ ॥

गो० टी०–अस्तीति । वन्यं नीवारश्यामाकप्रियङ्ग्वादिधान्यम् आसंशे प्रार्थयामि । स्वाशिता सुष्ठु भोजिता ॥१७॥१८॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

१८] ति० टी०–स्वाशिता सुष्ठु भोजिता वत्स्यतीत्याशंसे प्रार्थये । 'वसत्वेनाम्' इति पाठान्तरम् तत्राशंसे इति पुनरुक्तम् ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

रा० टी०–आशंसे इति । स्वाशिता सुभोजिता सेना एनां विभावरीं रात्रिं वसतु विविधैः कामैः अस्मन्मनोरथैरर्चितः ससैन्यस्त्वं श्वः प्रातर्गमिष्यसि गन्तासि ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

१] ति० टी०–एवमिति । हेत्वर्थसंहितं हेत्वर्थाभ्यामुपपत्तियोजनाभ्यां संयुक्तम् ॥ १ ॥

रा० टी०–निषादप्रार्थनानन्तरकालिकं वृत्तमाह–एवमित्यादिभिः । एवमुक्तो भरतः हेत्वर्थसंहितं हेतुरुपपत्तिः । अर्थः प्रयोजनं ताभ्यां संहितं युक्तं वाक्यं प्रत्युवाच ॥ १ ॥

गो० टी०–एवमिति । हेत्वर्थसंहितम् उपपत्तिप्रयोजनाभ्यां युक्तम् ॥ १ ॥

२] ति० टी०–ऊर्जितो महांस्तेऽयं कामः कामनाविषयो मत्सत्कारो मम कृत एव खलु । कथं तत्राह–यो मे इति । तव श्रद्धयैव सर्वं कृतमित्यर्थः ॥ २ ॥

रा० टी०–वाक्याकारमाह–ऊर्जित इति । यस्त्वमीदृशीं महतीं सेनामभ्यर्चयितुमिच्छसि तेन ते त्वया ऊर्जितः महान् कामः स्वेच्छाविषयीभूतसत्कारः कृतः अतः परं न किंचित्कर्तव्यमस्तीत्यर्थः ॥ २ ॥

गो० टी०–ऊर्जित इति । स्वस्य रामविषयभक्तिं द्योतयितुं मम गुरोः सखे इत्युक्तं यस्त्वमेक एव ईदृशीमपरिच्छिन्नां सेनामभ्यर्चितुमिच्छसि तस्य ते ऊर्जितः अभिवृद्धः कामः अर्चनामनोरथः कृतः खलु कृत एव, तवाराधनेनैव वयमर्चिता इति भावः ॥ २ ॥

३] ति० टी०–पन्थानं दर्शयन्गन्तव्यपथि संमुखं हस्तं कुर्वन्पुनः पुनरब्रवीदित्यन्वयः । आदरेण वारंवारं कथनम् । 'गुहं वचनमुत्तमम्' 'निषादाधिपतिं पुनः' इति द्वितीयचतुर्थपादौ पाठान्तरे ॥ ३ ॥

रा० टी०–इतीति । स महातेजाः भरतः इत्युक्त्वा पन्थानं स्वगन्तव्यमार्गं दर्शयन्नङ्गुल्या बोधयन्पृच्छन्नित्यर्थः, पुनरब्रवीत् ॥ ३ ॥

गो० टी०–इतीति । महातेजा इति गाम्भीर्यद्योतनम् उत्तममित्यनेनार्चनोपयोगमात्रेण तुष्टत्वकथनादवाप्तसमस्तकामत्वमुक्तम्, श्रीमानिति तात्कालिक हर्षः ॥ ३ ॥

१ मूलं फलं चैवेति गो. पाठः । २ समुपाहृतमिति गो. पाठः । ३ च मांसं शुष्कं चेति गो. पाठः । ४ तथेति रा. पाठः । ५ महदिति गो. पाठः । ६ वत्स्यतीमामिति गो. वसत्वेनामिति रा. पाठः । ७ एकोऽभ्यर्चितुमिति गो. पाठः । ८ स्थिति गो. पाठः । ९ निषादाधिपतिमिति गो. पाठः ।

कतरेण गमिष्यामि भरद्वाजाश्रमं पथा । गहनोऽयं भृशं देशो गङ्गानूपो दुरत्ययः ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः । अब्रवीत्प्राञ्जलिर्भूत्वा गुहो गहनगोचरः ॥ ५ ॥
दाशास्त्वनुगमिष्यन्ति देशज्ञाः सुसमाहिताः । अहं चानुगमिष्यामि राजपुत्र महाबल ॥ ६ ॥
कच्चिन्न दुष्टो व्रजसि रामस्याक्लिष्टकर्मणः । इयं ते महती सेना शङ्कां जनयतीव मे ॥ ७ ॥
तमेवमभिभाषन्तमाकाश इव निर्मलः । भरतः श्लक्ष्णया वाचा गुहं वचनमब्रवीत् ॥ ८ ॥
मा भूत्स कालो यत्कष्टं न मां शङ्कितुमर्हसि । राघवः स हि मे भ्राता ज्येष्ठः पितृसमो मतः ॥ ९ ॥
तं निवर्तयितुं यामि काकुत्स्थं वनवासिनम् । बुद्धिरन्या न मे कार्या गुह सत्यं ब्रवीमि ते ॥ १० ॥
स तु संहृष्टवदनः श्रुत्वा भरतभाषितम् । पुनरेवाब्रवीद्वाक्यं भरतं प्रति हर्षितः ॥ ११ ॥
धन्यस्त्वं न त्वया तुल्यं पश्यामि जगतीतले । अयत्नादागतं राज्यं यस्त्वं त्यक्तुमिहेच्छसि ॥ १२ ॥

४] ति० टी०–कतरेण पथा । गहनो दुष्प्रवेशः ॥ ४ ॥

रा० टी०–तत्प्रकारमाह–कतरेणेति । भरद्वाजाश्रमं कतरेण मार्गेण गमिष्यामि अयं गङ्गानूपः गङ्गातीरदेशः गहनः दुःखैर्निर्विडः अत एव दुरत्ययः मार्गमन्तरा गन्तुमशक्यः । कतरेणेत्यनेन द्वौ मार्गौ दृश्यमानाविति सूचितम् ॥ ४ ॥

गो० टी०–कतरेणेति कतरेण केन मार्गेण भृशं गहनः अत्यन्तदुष्प्रवेशः अनूपो देशः जलप्रायो देशः 'जलप्रायमनूपं स्यात्' इत्यमरः ॥ ४ ॥

५] ति० टी०–गहनगोचरो गहनं वनं गोचरो देशो यस्य सः ॥ ५ ॥

रा० टी०–तस्येति । राजपुत्रस्य भरतस्य वचनं श्रुत्वा गहनगोचरः वनाभिज्ञः गुहः अब्रवीत् ॥ ५ ॥

गो० टी०–तस्येति । गहनं काननं गोचरः संचारप्रदेशो यस्य सः गहनगोचरः 'गहनं काननं वनम्' इत्यमरः ॥५॥

६] ति० टी०–दाशास्त्विति । अतो गहनविषया न काचिच्छङ्केति भावः ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–दाशा इति । देशज्ञाः सुसमाहिताः एकाग्रचित्ताः दाशाः धीवराः अनुगमिष्यन्ति अहं चानुगमिष्यामि त्वामिति शेषः, एतेन मार्गप्रभस्य न प्रयोजनमिति सूचितम् ॥ ६ ॥

गो० टी०–दाशा इति । अहमनुगमिष्यामि अतो न मार्गविषयविचारः कर्तव्य इति भावः ॥ ६ ॥

७] ति० टी०–अपि त्वक्लिष्टकर्मणो रामस्य विषये दुष्टो दुष्टभावो न व्रजसि कच्चिदद्रोहं कर्तुं न व्रजसि कच्चिदित्यर्थः। नन्वु का ते दोषशङ्का तत्राह–इयं ते इति । रामसंदर्शनमात्राय गमने एतावत्सेनाया व्यर्थत्वान्मम संदेह इति भावः ॥ ७ ॥

रा० टी०–कच्चिदिति । अक्लिष्टकर्मणो रामस्य दुष्टः दूषकः सन् कच्चिन्न व्रजसि कच्चिदिति शङ्कायाम् । नन्वु कुत एवमाशङ्कसे इत्यत आह–महती अतिप्रष्टव्या इयं ते सेना शङ्कां जनयति ॥ ७ ॥

गो० टी०–कच्चिदिति । न दुष्टः अदुष्टः सप्तम्येति समासः, रामस्य रामविषये अदुष्टो व्रजसि कच्चित् दुष्टो न व्रजसि कच्चिदिति वा संबन्धः। अक्लिष्टकर्मण इत्यनेन निरपायत्वमुक्तम्। शङ्काप्रसक्तौ हेतुमाह–इयमिति। अनुकूलो व्रजसि चेत् सेना व्यर्थेति भावः । इवशब्दः शङ्काया ईषत्त्वं द्योतयति ॥७॥

८] ति० टी०–आकाश इवेत्युपमया त्रैकालिकमलसंबन्धाभावो दर्शितः ॥ ८ ॥

रा० टी०–तमिति । एवमभिभाषन्तं तं गुहमाकाश इव निर्मलः सर्वकालं दोषसंसर्गरहितः भरतः अब्रवीत् ॥ ८ ॥

गो० टी०–तमिति । आकाश इव निर्मल इत्यनेन तच्छङ्कितदोषस्य तत्र प्रसक्तिरेव नास्तीत्युच्यते आकाशे हि पङ्कानुलेपे स तत्र न प्रसज्जति किंतु स्वहस्त एव मलिनो भवति । श्लक्ष्णया स्वस्मिन्दोषालेपेऽप्यक्रोधया ॥ ८ ॥

९] ति० टी०–यत्र काले कष्टं त्वदाशङ्कितं रामद्रोहरूपं जायते स कालो मा भूत् हि यतो राघवो ज्येष्ठो भ्राता पितृसमः, अतो मां शङ्कितुं नार्हसि ॥ ९ ॥

रा० टी०–मेति । यस्मिन् काले कष्टं त्वदाशङ्काम्पदीभूतदुःखमूलं भ्रातृद्रोह इत्यर्थः, स कालो मा भूत्। विरोधायोग्यतां बोधयन्नाह–ज्येष्ठो मे भ्राता राघवो रामः मम पितृसमः, एतेन तत्र विरोधाशङ्का कदाचिन्न कर्तव्येति सूचितम् ॥ ९ ॥

गो० टी०–मा भूदिति । यद् यस्मिन् काले कष्टं त्वया आशङ्कितं कष्टं जायते स कालो मा भूत् कलिकाले हि तादृशप्रसङ्गः अतो मां शङ्कितुं नार्हसि । तत्र हेतुः–राघव इत्यादि । न ते कार्या त्वया न कार्या ॥ ९ ॥ १० ॥

१०–१२] ति० टी०–तदेवाह—तमिति । मे मयि । 'न ते कार्या' इति पाठान्तरम् ॥ १०–१२ ॥

रा० टी०–नन्वु किमर्थं गमनमित्यत आह–तमिति । वनवासिनं तं रामं निवर्तयितुं यामि ते तुभ्यं सत्यं ब्रवीमि अतः अन्या विरोधविषयिणी बुद्धिर्न कार्या ॥ १० ॥

रा० टी०–स इति । भरतभाषितं श्रुत्वा संहृष्टवदनः स गुहः भरतं पुनरब्रवीत् ॥ ११ ॥

---

१ गुहेति गो. पाठः । २ वाक्यमिति गो. पाठः । ३ त्वान्विति गो. पाठः । ४ धन्विन इति गो. पाठः । ५ त्वाऽनिति गो. पाठः । ६ यत्र इति गो. पाठः । ७ मेति रा. पाठः । ८ ते इति गो. पाठः ।

शाश्वती खलु ते कीर्तिर्लोकाननु चरिष्यति । यस्त्वं कृच्छ्रगतं रामं प्रत्यानयितुमिच्छसि ॥ १३ ॥
एवं संभाषमाणस्य गुहस्य भरतं तदा । बभौ नष्टप्रभः सूर्यो रजनी चाभ्यवर्तत ॥ १४ ॥
संनिवेश्य स तां सेनां गुहेन परितोषितः । शत्रुघ्नेन समं श्रीमाञ्छयनं पुनरागमत् ॥ १५ ॥
रामचिन्तामयः शोको भरतस्य महात्मनः । उपस्थितो ह्यनर्हस्य धर्मप्रेक्ष्यस्य तादृशः ॥ १६ ॥
अन्तर्दाहेन दहनः संतापयति राघवम् । वनदाहाग्निसंतप्तं गूढोऽग्निरिव पादपम् ॥ १७ ॥
प्रसृतः सर्वगात्रेभ्यः स्वेदं शोकाग्निसंभवम् । यथा सूर्याग्निसंतप्तो हिमवान्प्रसृतो हिमम् ॥ १८ ॥
ध्याननिर्दरशैलेन विनिःश्वसितधातुना । दैन्यपादपसंघेन शोकायासाधिशृङ्गिणा ॥ १९ ॥
प्रमोहानन्तसत्त्वेन संतापौषधिवेणुना । आक्रान्तो दुःखशैलेन मज्जता कैकयीसुतः ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–धन्य इति । यस्त्वमयत्नात्प्रयत्नमन्तरा आगतं पित्राज्ञया प्राप्तं राज्यं त्यक्तुमिच्छसि स त्वं धन्यः त्वया तुल्यं सदृशं जगतीतले न पश्यामि ॥१२॥

गो० टी०–स त्विति । संहृष्टवदनः प्रसन्नवदन इत्यर्थः, हर्षितः संजातहर्षः ॥ ११ ॥ १२ ॥

१३] ति० टी०–चरिष्यति प्रचरिष्यति ॥ १३ ॥

रा० टी०–शाश्वतीति । यस्त्वं कृच्छ्रगतं वनवासजनितक्लेशवन्तं रामं प्रत्यानयितुं प्रत्यानेतुमिच्छसि तस्य ते शाश्वती कीर्तिः लोकाननुचरिष्यति ॥ १३ ॥

गो० टी०–शाश्वतीति । कृच्छ्रगतं व्यसनगतं प्रत्यानयितुं प्रत्यानेतुम् इङार्थः ॥ १३ ॥

१४] ति० टी०–नष्टप्रभो मन्दीभूतरश्मिः ॥ १४ ॥

रा० टी०–एवमिति । भरतमेवं संभाषमाणस्य गुहस्य संबन्धी सूर्यः नष्टप्रभः सन् बभौ अत एव रजनी रात्रिः अभ्यवर्तत । सूर्ये गुहसंबन्धस्तु तात्कालिकपरिदृश्यमानत्वरूपः यदि तु "षष्ठी चानादरे" इति षष्ठी तदा नैवं संबन्धकल्पना ॥ १४ ॥

गो० टी०–एवमिति । संभाषमाणस्य संभाषमाणे सति नष्टप्रभः अदृष्टप्रभः ॥ १४ ॥

१५] ति० टी०–'गुहेन परिरक्षितः' इति पाठे परिहृतचोरबाध इत्यर्थः ॥ १५ ॥

रा० टी०–सामिति । गुहेन परितोषितः भरतः तां सेनां संनिवेश्य संनिवेशयितुमाज्ञाप्य शत्रुघ्नेन समं शयनमागमत्॥१५॥

गो० टी०–संनिवेश्येति । शयनं पुनरागमदिति अत्र पुनःशब्देन गुहागमनात्पूर्वं श्रान्तः शयने स्थित इति गम्यते 'सम्युपागमत्' इति वा पाठः । पुनः परितोषित इति वा संबन्धः, वाक्यालंकारो वा ॥ १५ ॥

१६] ति० टी०–अनर्हस्य दुःखानर्हस्य । धर्मप्रेक्ष्यस्य धर्मदृष्टेः तादृशो वागगोचरः उपस्थितः प्राप्तः ॥ १६ ॥

रा० टी०–रामेति । धर्मप्रेक्षस्य धर्ममात्रदृष्टेः अत एव अनर्हस्य शोकायोग्यस्य महात्मनो भरतस्य तादृशः अतिदुःसहः रामचिन्तामयः रामचिन्ताप्रचुरः शोकः उपस्थितः ॥१६॥

गो० टी०–रामचिन्तामय इति । अनर्हस्य गर्भैश्वर्येण शोकानर्हस्य महात्मनः महाधीरस्यापि धर्मप्रेक्षस्य शोकमूलपापशून्यस्य तादृशः अवाङ्मनसगोचरः भ्रातृभक्तस्येति भरतविशेषणं वा ॥ १६ ॥

१७] ति० टी०–दहनः शोकाग्निः राघवं भरतं वनदाहकोऽग्निर्वनदाहाग्निर्दावाग्निस्तेन संतप्तं शुष्कम् । गूढोऽग्निः कोटरसंसक्तोऽग्निः ॥ १७ ॥

रा० टी०–अन्तरिति । दहनः शोकवह्निर्दाहेन शोकाग्निना संतप्तं राघवं भरतमन्तः संतापयति, तत्र दृष्टान्तः वनदाहाग्निना वनदाहकवह्निना संतप्तं पादपं वृक्षं गूढः कोटरादौ केनचित्प्रक्षिप्तः अग्निरिव, अत्र वनदाहकाग्निस्थानापन्नो दशरथशोको बोध्यः ॥ १७ ॥

गो० टी०–अन्तर्दाहेनेति । दहनः शोकाग्निः अन्तर्दाहेन चिन्ताग्निना तप्तं राघवं भरतं संतापयति सम्यक् ग्लपयति स्म, वनदाहाभिसंतप्तं वनदाहेन पर्यन्तवनाग्निरूष्मणा संतप्तं शुष्कं पादपं गूढोऽग्निरिव कोटराग्निरिव अन्तरारभ्य बहिर्दहत् अन्तस्थोऽप्यात्मा दह्यते अदाह्यत्वं केवलाग्नेर्हि ॥ १७ ॥

१८] ति०टी०–स्वेदं प्रसृतः कर्तरि निष्ठा गत्यर्थत्वात्॥१८॥

रा० टी०–प्रसृत इति । सर्वगात्रेभ्यः शोकाग्निसंभवं स्वेदं प्रसृतः प्रस्रावयामास, भरत इति शेषः कर्तरि निष्ठा । तत्र दृष्टान्तः सूर्याग्निसंतप्तो हिमं प्रसृतो हिमवान् यथा ॥ १८ ॥

गो० टी०–प्रसृत इति । शोकाग्निसंभवं स्वेदं प्रसृतः भरत इति शेषः 'स्वेदः शोकाग्निसंभवः' इति पाठस्तु न दृष्टान्तानुरूपः स्वेदं प्रसृतः हिमं प्रसृत इत्यत्र गत्यर्थत्वात् कर्तरि क्तः ॥ १८ ॥

१९] ति० टी०–दुःखे पर्वतरूपकम् । रामविषयध्यानान्येव निर्दरशैला विदारणरहितशिलासमूहा यस्मिन्, निःशेषतो दीर्णशिलासमूहा यस्मिन्निति वा । विनिःश्वसितमेव गैरिकादिधातुर्यस्मिन्, श्वासस्पर्केण भूषणानामन्यवर्णजननात् । दैन्यं करुणानां स्वस्वविषयप्रवृत्तिवैमुख्यं स एव पादपसंघो यस्मिन् । शोकजा आयासाश्चित्तश्रान्तयस्ता एवाध्यधिरूढानि शृङ्गाणि तद्वता ॥ १९ ॥

२०] ति० टी०–प्रमोहा एवानन्तसत्त्वानि वन्यप्राणिनो

१ संहृष्ट इति गो. पाठः । २ प्रेक्षस्येति गो. रा. पाठः । ३ ऽभिसंतप्तमिति गो. पाठः । ४ प्रसृत इति रा. पाठः । ५ सूर्यांशुसंतप्त इति गो. पाठः । ६ महतेति गो. रा. पाठः ।

विनिःश्वसन्वै भृशदुर्मनास्ततः प्रमूढसंज्ञः परमापदं गतः ।
शमं न लेभे हृदयज्वरार्दितो नरर्षभो यूथहतो यथर्षभः ॥ २१ ॥
गुहेन सार्धं भरतः समागतो महानुभावः सजनः समाहितः ।
सुदुर्मनास्तं भरतं तदा पुनः शनैः समाश्वासयदग्रजं प्रति ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

षडशीतितमः सर्गः ।

गुहो भरतं प्रति रामस्य तत्रत्यरामनिवासं तन्निद्रासमये स्वस्य लक्ष्मणेन सह वृत्तं संवादं च निवेद्य प्रातः सीतातृतीयौ तौ जटाः संग्रथ्य गङ्गामुत्तीर्य भरद्वाजाश्रमं प्रस्थिताविति तं न्यवेदीत् ।

आचचक्षेऽथ सद्भावं लक्ष्मणस्य महात्मनः । भरतायाप्रमेयाय गुहो गहनगोचरः ॥ १ ॥

यस्मिंस्तेन । संतापोऽन्तर्बहिःकरणसंताप एव ओषधयो वेणवश्च यस्मिन् । मज्जता मग्नं कुर्वता सकरणग्राममात्मानमधो नयता एवंभूतेन दुःखरूपशैलेनाक्रान्तः अभूदिति शेषः ॥२०॥

रा० टी०—वियोगदुःखस्य पर्वतरूपकत्वं वर्णयन्नाह—ध्यानेति द्वाभ्याम् । ध्यानमुत्कण्ठापूर्वकरामस्मरणमेव निर्दरशैलः निश्छिद्रप्रस्तरो यस्मिँस्तेन विनिःश्वसितमुच्छ्वास एव धातुगैरिकादिर्यस्मिँस्तेन, दैन्यं दीनता एव पादपसंघः वृक्षसमूहो यस्मिँस्तेन, शोकायासः शोकजनितखेद एव अधि अधिरूढं श्रृङ्गं तद्वता, प्रमोहा एव अनन्तसत्त्वानि व्याघ्रादयो यस्मिन् तेन, संतापा एव ओषधिवेणवो यस्मिन् तेन, महता अतिप्रवृद्धेन दुःखशैलेन दुःखपर्वतेन आक्रान्तः कैकेयीसुतः अभवदिति शेषः । 'मज्जता' इति भट्टपाठः मग्नं कुर्वतेति तव्याख्या । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०—भरतस्य दुःखं शैलत्वेन रूपयति—ध्यानेत्यादिना । ध्याननिर्दरशैलेन दरो गर्तस्तस्मान्निर्गतं निर्दरं शिलानां समूहः शैलं रामविषयध्यानमेव निर्दरशैलं यस्मिँस्तेन ध्यानस्य निरन्तरत्वेन दरीविदीर्णशिलापङ्क्तिसाम्यं, विविधं निःश्वसितं विनिःश्वसितं तदेव धातुर्यस्मिन् विविधत्वसाम्यात् दैन्यं करुणानां स्वस्वविषयप्रवृत्तिवैशद्यरूप्यं तस्य पादपसाम्यमबोधरूपतया शोकायासाधिरुढ्क्ष्णा शोकादय एव श्रृङ्गिणः कृष्णसारादयो यस्मिँस्तेन यद्वा शोकायासादिभिः श्रृङ्गिणा श्रृङ्गवता दृढत्वसाम्यात्,प्रमोहानन्तसत्त्वेन प्रमोहा एवाऽनन्तानि सत्त्वानि जन्तवो यस्मिँस्तेन 'द्रव्याश्रव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । प्राणभयशङ्काकरत्वात् संतापौषधिवेणुना संतापा एव ओषधयो वेणवश्च—यस्मिँस्तेन ओषधिवेणुसाम्यं दुष्प्रवेशत्वात् आक्रान्तः अभूदिति शेषः महता अतिगुरुणा 'मज्जता' इतिपाठे मज्जता अवयवेषु प्रविशता ॥ १९ ॥ २० ॥

२१] ति० टी०—प्रकर्षेण मूढा संज्ञा चेतना यस्य । यूथहतो यूथभ्रष्टः ॥ २१ ॥

रा० टी०—विनिःश्वसन्निति । ततः तस्माद्दुःखपर्वताद्धेतोः भृशदुर्मनाः अत एव प्रमूढसंज्ञः प्रमूढा विवेकरहिता संज्ञा बुद्धिर्यस्य सः अत एव परमापदमत्यापत्तिं गतः प्राप्तः अत एव हृदयज्वरेण आर्तः पीडितः नरर्षभो भरतः विनिःश्वसन्सन् शमं शान्तिं न लेभे, तत्र दृष्टान्तः यूथहतः यूथच्युतः ऋषभो वृषभ इव 'यूथगतः' इति भूषणपाठः । यूथगतः यूथाद्गतः यूथाद्भ्रष्ट इत्यर्थः, इति तव्याख्या ॥ २१ ॥

गो० टी०—विनिःश्वसन्निति । विनिःश्वसन् चिन्तातिरेकेण श्वासं कुर्वन् भृशदुर्मनाः अत्यन्तकलुषहृदयः प्रमूढा नष्टा संज्ञा यस्य सः प्रभूढसंज्ञः अत एव परमापदं मरणायार्थसंपत्तिरूपां मूर्छां गतः शमं ज्वरशान्तिम् अयूथगतः यूथाद्भ्रष्ट इत्यर्थः 'यूथहतः' इति पाठे हतयूथ इत्यर्थः ॥ २१ ॥

२२] ति० टी०—समाहित एकाग्रचित्तः, सजनः सपरिवारः, गुहेन सार्धं समागतो मिलितो भरतोऽग्रजं प्रति सुदुर्मना बभूव । तादृशं तं भरतं गुहः पुनराश्वासयत् ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

रा० टी०—गुहेनेति । गुहेन सार्धं समागतः आलिङ्गितो यो भरतः अग्रजं प्रति दुर्मनाः तं भरतं सजनः स्वजनसहितः समाहितः एकाग्रचित्तः गुहः शनैः पुनः समाश्वासयत् ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

गो० टी०—अथ गुहः समागत इत्याह—गुहेनेति । सजनसपरिवारः समाहितः एकाग्रचित्तो भरतः गुहेन सार्धं सह समागतः संगतः अथ गुहः सुदुर्मनाः भरतक्लेशदर्शनेन भरतादपि भृशं दुर्मनाः सन् भरतम् अग्रजं प्रति अग्रजं लक्ष्यीकृत्य समाश्वासयत् ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चाशीतितमः सर्गः ॥ ८५ ॥

१] ति० टी०—सद्भावं ज्येष्ठानुवर्तनरूपं साधुत्वम् ॥ १ ॥

---

१ गत इति गो. पाठः । २ गुह इति गो. पाठः ।

तं जाग्रतं गुणैर्युक्तं वरचापेषुधारिणम् । भ्रातृगुप्त्यर्थमत्यन्तमहं लक्ष्मणमब्रुवम् ॥ २ ॥
इयं तात सुखा शय्या त्वदर्थमुपकल्पिता । प्रत्याश्वसिहि शेष्वास्यां सुखं राघवनन्दन ॥ ३ ॥
उचितोऽयं जनः सर्वो दुःखानां त्वं सुखोचितः । धर्मात्मंस्तस्य गुप्त्यर्थं जागरिष्यामहे वयम् ॥ ४ ॥
नहि रामात्प्रियतरो ममास्ति भुवि कश्चन । मोत्सुको भूर्ब्रवीम्येतदथ सत्यं तवाग्रतः ॥ ५ ॥
अस्य प्रसादादाशंसे लोकेऽस्मिन्सुमहद्यशः । धर्मावाप्तिं च विपुलामर्थकामौ च केवलौ ॥ ६ ॥
सोऽहं प्रियसखं रामं शयानं सह सीतया । रक्षिष्यामि धनुष्पाणिः सर्वैः स्वैर्ज्ञातिभिः सह॥ ७ ॥
नहि मेऽविदितं किंचिद्वनेऽस्मिंश्चरतः सदा । चतुरङ्गं ह्यपि बलं प्रसहेम वयं युधि ॥ ८ ॥
एवमस्माभिरुक्तेन लक्ष्मणेन महात्मना । अनुनीता वयं सर्वे धर्ममेवानुपश्यता ॥ ९ ॥
कथं दाशरथौ भूमौ शयाने सह सीतया । शक्या निद्रा मया लब्धुं जीवितानि सुखानि वा॥ १० ॥
यो न देवासुरैः सर्वैः शक्यः प्रसहितुं युधि । तं पश्य गुह संविष्टं तृणेषु सह सीतया ॥ ११ ॥
महता तपसा लब्धो विविधैश्च परिश्रमैः । एको दशरथस्यैष पुत्रः सदृशलक्षणः ॥ १२ ॥
अस्मिन्प्रव्राजिते राजा न चिरं वर्तयिष्यति । विधवा मेदिनी नूनं क्षिप्रमेव भविष्यति ॥ १३ ॥
विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः । निर्घोषो विरतो नूनमद्य राजनिवेशने ॥ १४ ॥

रा० टी०–आश्वासनप्रकारमाह–आचचक्ष इत्यादिभिः। अथ भरतदुर्मनस्त्वप्राप्त्यनन्तरं महात्मनो लक्ष्मणस्य सद्भावं ज्येष्ठानुवर्तनरूपसत्त्वभावं गुहः भरताय आचचक्षे ॥ १ ॥

गो० टी०–आचचक्ष इत्यादि । अथ आश्वासनानन्तरं सद्भावं ज्येष्ठानुवर्तनरूपं समीचीनस्वभावम् । आचचक्ष इत्यादि भगवद्विषयोपदेशे नूतनपुरातनविभागो नास्ति देशिकावकारः सादरः श्रोतार इत्याह आर्ङीषदर्थे स्ववागिन्द्रियविषयमेवावदत् नतु कात्स्न्र्येन। अथ भरतस्वभावज्ञानानन्तरं सद्भावं बाल्यात्प्रभृति स्निग्ध इति सत्ताख्यातं स्वभावं लक्ष्मणस्य महात्मनः पयोधिं पाणिना परिच्छेत्तुमुद्युक्तः भरतायाप्रमेयाय एतादृशस्योपदेष्टेति नास्ति गुहो गहनगोचरः वन्यवृक्षादितारतम्यमात्रज्ञः एतादृशस्वभावमविज्ञातवान्, यद्वा रामविरहेण कुत्रचित् कुत्रे स्थितः तदेशीयागमने सङ्कथाय निर्गतः॥ १ ॥

२] ति० टी०–तदेवाह–तमिति । भ्रातृगुप्त्यर्थं जाग्रतं विनिद्रं गुणैः स्नेहसौशील्यादिगुणैः क्षत्रगुणैश्च युक्तम् ॥ २ ॥

रा० टी०–तत्कथनप्रकारमाह–तमिति । गुणैः सेवानुकूलधर्मैः युक्तं भ्रातृगुप्त्यर्थं भ्रातुः रक्षायै वरचापेषुधारिणं जाग्रतं तं लक्ष्मणमहमब्रुवम् । 'शरचापासिधारिणम्' इति भूषणपाठः एकहस्ते शरयुक्तचापमपरहस्तेन असिं च दधानमिति तद्व्याख्या॥२॥

गो० टी०–भरतस्य रामविषयस्नेहमभिवर्धयितुं लक्ष्मणस्य ज्येष्ठानुवर्तनरूपं पूर्ववृत्तान्तमाह–तं जाग्रतमित्यादिना । भ्रातृगुप्त्यर्थमत्यन्तं जाग्रतं शरचापासिधारिणम् एकहस्ते शरयुक्तचापम् अपरहस्ते असिं च दधानमित्यर्थः, गुणैर्भ्रातृभक्त्यादिगुणैर्युक्तम् ॥ २ ॥ ३ ॥

३] ति० टी०–इयं तातेत्यादिरुक्तानुवादः पूर्वमेव व्याख्यातः ॥ ३ ॥

रा० टी०–तद्वचनप्रकारमाह–इयमित्यादिभिः । इयमित्यारभ्य परिदेवयमानस्येत्येतत्पर्यन्तं श्लोकाः न व्याख्यायन्ते एकपञ्चाशत्तमे सर्गे गुहलक्ष्मणसंवादे प्राय एतदानुपूर्वीकत्वेनैव पठितत्वादिति तद्व्याख्यानेनैवैषां व्याख्यानं बोध्यम् ॥३ ॥

४–२५] ति० टी०–तस्य रामस्य ॥ ४–२५ ॥

पञ्चविंशतिश्लोका अत्र सर्गे ।

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

रा० टी०–उचित इति ॥ ४ ॥

गो० टी०–उचित इति । तस्य रामस्य ॥ ४ ॥

रा० टी०–नहीति । रामात्प्रियतरो मम कश्चन न अतः उत्सुकः जागरणविषयकौत्सुक्यविशिष्टः मा भूः ॥ ९–२३ ॥

गो० टी०–नहीति । मोत्सुको भूः अस्यां रात्रौ रामरक्षणौत्सुक्यं मा कृथा इत्यर्थः, एतद्रक्षणं प्रति तवाग्रतः असत्यं ब्रवीम्यपि ब्रवीमि किं न ब्रवीम्येवेत्यर्थः ॥ ५ ॥

गो० टी०–स्वस्यैहिकमामुष्मिकं च फलं रामायत्तमित्याह–अस्येत्यादिना । धर्मावाप्तिम् आमुष्मिकफलसाधनसिद्धिं केवलां न्यायप्राप्तामिति यावत् ॥ ६ ॥ ७ ॥

गो० टी०–नेति । मे विदितमित्यत्र अविदितमिति पदच्छेदः ॥ ८–११ ॥

गो० टी०–महतेति । तपसा अनशनेन परिश्रमैः यज्ञादिभिरित्यर्थः एकः मुख्यः 'एके मुख्यान्यकेवलाः' इत्यमरः॥१२॥

गो० टी०–प्रव्राजनकालिकदशरथदशां स्मरन्नाह–अस्मिन्निति । वर्तयिष्यति जीविष्यति ॥ १३ ॥

गो० टी०–विनद्येति। सुमहानादं विनद्य कृत्वेत्यर्थः, अद्य स्त्रियः उपरता इति मन्ये इत्युपस्कार्यं निवेशनं निवेशनं च॥१४॥

---

१ शरचापासीति गो. पाठः । २ ऽप्यसत्यमिति गो. ऽऽमेति रा. पाठः । ३ अर्थावाप्तिं च केवलामिति गो. पाठः । ४ जीवितं वेति गो. पाठः । ५ निर्घोषोपरतमिति गो. पाठः । ६ निवेशनमिति गो. पाठः ।

कौसल्या चैव राजा च तथैव जननी मम । नाशंसे यदि ते सर्वे जीवेयुः शर्वरीमिमाम् ॥ १५ ॥
जीवेदपि च मे माता शत्रुघ्नस्यान्ववेक्षया । दुःखिता या [1]हि कौसल्या वीरसूर्विनशिष्यति॥ १६ ॥
अतिक्रान्तमतिक्रान्तमनवाप्य मनोरथम् । राज्ये राममनिक्षिप्य पिता मे विनशिष्यति ॥ १७ ॥
सिद्धार्थाः पितरं वृत्तं तस्मिन्काले ह्युपस्थिते । प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति भूमिपम् ॥ १८ ॥
रम्यचत्वरसंस्थानां सुविभक्तमहापथाम् । हर्म्यप्रासादसंपन्नां सर्वरत्नविभूषिताम् ॥ १९ ॥
गजाश्वरथसंबाधां तूर्यनादविनादिताम् । सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलाम् ॥ २० ॥
आरामोद्यानसंपूर्णां समाजोत्सवशालिनीम् । सुखिता विचरिष्यन्ति राजधानीं पितुर्मम ॥ २१ ॥
अपि सत्यप्रतिज्ञेन सार्धं कुशलिना वयम् । निवृत्ते समये ह्यस्मिन्सुखिताः प्रविशेमहि ॥ २२ ॥
परिदेवयमानस्य तस्यैवं [2]हि महात्मनः । तिष्ठतो राजपुत्रस्य शर्वरी सात्यवर्तत ॥ २३ ॥
प्रभाते विमले सूर्ये कारयित्वा जटा उभौ । अस्मिन्भागीरथीतीरे सुखं संतारितौ मया ॥ २४ ॥
जटाधरौ तौ द्रुमचीरवाससौ महाबलौ कुञ्जरयूथपोपमौ ।
वरेषुधीचापधरौ परंतपौ [3]व्यपेक्षमाणौ सह सीतया गतौ ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

सप्ताशीतितमः सर्गः ।

गुहमुखाच्छ्रुतरामलक्ष्मणजटाधारणो भरतः शोकाकुलत्वान्मुह्यन्भूमौ पपात । तस्य शोककारणत्वेन रामादिविपच्छङ्किनीं कौसल्यां प्रति तत्त्वनिवेदनेन समाश्वास्य रामवृत्तं वर्णयितुं गुहं प्रैरयत् । लक्ष्मणरचितकुशमयशयनीये रामनिद्रादिकं निवेद्य तद्रक्षणार्थं स्वस्य लक्ष्मणेन समं जागरादि न्यवेदीत् ।

गुहस्य वचनं श्रुत्वा भरतो भृशमप्रियम् । ध्यानं जगाम तत्रैव यत्र तच्छ्रुतमप्रियम् ॥ १ ॥

गो० टी०–कौसल्येति । सर्वं ते जीवेयुरिति नाशंसे यदि जीवेयुरिमां शर्वरीमेवेति संबन्धः ॥ १५ ॥

गो० टी०–जीवेदिति । शत्रुघ्नस्यान्ववेक्षया शत्रुघ्नसंबन्ध्यवेक्षणेच्छया वीरसूः कौसल्या दुःखितेति यत् अतो विनशिष्यति 'दुःखिता या तु' इति पाठः समीचीनः तत्पक्षे या दुःखिता वीरसूः कौसल्या सा तु विनशिष्यत्येवेत्यर्थः ॥ १६ ॥

गो० टी०–अतिक्रान्तमिति । अतिक्रान्तमतिक्रान्तं सर्वं प्रयोजनमतीतेत्यर्थः ॥ १७ ॥

गो० टी०–सिद्धार्था इति। वृत्तमतीतं मृतमिति यावत्१८

गो० टी०–रम्यचत्वरसंस्थानामित्यादि । हर्म्यप्रासादसंपन्नां हर्म्याणि धनिनां गृहाणि प्रासादा देवानां राज्ञां च गृहाणि तैः संपन्नां समृद्धां सर्वरत्नविभूषितां सर्वैः श्रेष्ठवस्तुभिरलंकृतां तूर्यनादविनादितां तूर्यस्य नृत्यगीतादिकस्य नादेन विनादितां—हर्म्यादिषु कृतप्रतिध्वनिमित्यर्थः, सर्वकल्याणैः सर्वमङ्गलैः संपूर्णां सर्वोत्सवैः संपूर्णां वा, आरामोद्यानसंपूर्णाम् आरामाः उपवनानि उद्यानानि राज्ञामसाधारणवनानि तैः समृद्धां समाजोत्सवशालिनीम् उत्सवसमूहशालिनीम् ॥ १९–२१ ॥

गो० टी०–अपीति । सत्यप्रतिज्ञेन तीर्णवनवासप्रतिज्ञेन रामेण प्रविशेमहि पुरीमिति शेषः ॥ २२ ॥

गो० टी०–परिदेवयमानस्येति । तिष्ठतो राजपुत्रस्य राजपुत्रसंबन्धिनी शर्वरी अत्यवर्तत निरन्तरपरिदेवनेन रात्रिं यापितवानित्यर्थः ॥ २३ ॥ २४ ॥

रा० टी०–प्रभात इति । प्रभाते प्रातःकाले विमले अन्धकारनिवर्तके सूर्ये सूर्योदयकाले इत्यर्थः । उभौ रामलक्ष्मणौ जटाः कारयित्वा मया सुखं संतारितौ गङ्गापारं प्रापितौ ॥ २४ ॥

रा० टी०–जटेति । जटाधरौ धृतजटौ द्रुमचीरवाससौ वरेषुचापासिधरौ व्यपेक्षमाणौ इतस्ततोऽवलोकयन्तौ सीतया सह गतौ ॥ २५ ॥

इति श्रीवाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

गो० टी०–जटाधराविति [4] व्यवेक्षमाणौ सर्वतो दत्तावधानौ ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

१]ति० टी०–भृशमप्रियं जटाधारणरूपम् । यत्र तत्रैव

---

१ स्विति गो. पाठः । २ स्विति गो. पाठः । ३ चापासिधराविति गो. रा. पाठः । ४ व्यवेक्षेति गो. पाठः ।

सुकुमारो महासत्त्वः सिंहस्कन्धो महाभुजः । पुण्डरीकविशालाक्षस्तरुणः प्रियदर्शनः ॥ २ ॥
प्रत्याश्वस्य मुहूर्तं तु कालं परमदुर्मनाः । ससाद[1] सहसा तोत्रै[2]र्हृदि विद्ध इव द्विपः ॥ ३ ॥
भरतं मूर्छितं दृष्ट्वा विवर्णवदनो गुहः । बभूव व्यथितस्तत्र भूमिकम्पे यथा द्रुमः ॥ ४ ॥
तदवस्थं तु भरतं शत्रुघ्नोऽनन्तरस्थितः । परिष्वज्य रुरोदोच्चैर्विसंज्ञः शोककर्शितः ॥ ५ ॥
ततः सर्वाः समापेतुर्मातरो भरतस्य ताः । उपवासकृशा दीना भर्तृव्यसनकर्शिताः ॥ ६ ॥
ताश्च तं पतितं भूमौ रुदत्यः[4] पर्यवारयन् । कौसल्या त्वनुसृत्यैनं[5] दुर्मनाः परिषस्वजे ॥ ७ ॥
वत्सला स्वं यथा वत्समुपगुह्य[6] तपस्विनी । परिपप्रच्छ भरतं रुदती शोकलालसा ॥ ८ ॥
पुत्र व्याधिर्न ते कच्चिच्छरीरं प्रैति[7] बाधते । अस्य राजकुलस्याद्य त्वदधीनं[8] हि जीवितम् ॥ ९ ॥
त्वां दृष्ट्वा पुत्र जीवामि रामे सभ्रातृके गते । वृत्ते दशरथे राज्ञि नाथ एकस्त्वमद्य नः ॥ १० ॥

यत्र क्षण इत्यर्थः । ध्यानं जगाम स्वाभिलषितकार्यसंकटं जातमिति चिन्तां प्रापेत्यर्थः ॥ १ ॥

रा० टी०–गुहवचनश्रवणानन्तरकालिकं भरतदृत्तमाह–गुहस्येत्यादिभिः । अप्रियं दुःखसूचकजटाधारणादिवाचकपदवत्तया प्रीतिविषयत्वाभाववद्गुहस्य वचनं भृशं श्रुत्वा यत्र यस्मिन् रामविषये अप्रियं श्रुतं तत्र तस्मिन् विषये एव ध्यानं चिन्तां जगाम, यत्र स्थले श्रुतं तत्रैव ध्यानं जगामेति वा ॥१॥

गो० टी०–गुहस्येति । यत्रतत्रैव यत्र क्षणे अप्रियं श्रुतं तत्रैवेत्यर्थः, यद्वा यत्र विषये अप्रियं श्रुतं तत्रैव ध्यानं जगाम स्वाभिलषितकार्यसंकटं जातमिति चिन्तापारवश्यं प्राप्त इत्यर्थः ॥ १ ॥

२] ति० टी०–सुकुमारत्वादिगुणेन जटादिकं धृतम् अतो निष्टप्तिर्दुर्लभेति चिन्तां जगाम ॥ २ ॥

३–४] ति० टी०–ततो मूहूर्तं कालं परमदुर्मनाः परमखिन्नः प्रत्याश्वस्य पुनश्च सहसा दुःखवेगेन ससादावशोऽभूत् । तोत्रैरङ्कुशैः, हृदि हृदयदेशे ॥ ३ ॥ ४ ॥

रा० टी०–सुकुमार इति । सुकुमारत्वादिविशिष्टो भरतः मुहूर्तं कालं प्रत्याश्वस्य चित्तस्वास्थ्यं प्राप्य सहसा दुर्मनाः सन् तोत्रैरङ्कुशैर्विद्धो द्विपो गज इव ससाद अतिदुःखं प्राप । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

रा० टी०–भरतमिति । भरतं मूर्छितं दृष्ट्वा भूमिकम्पे द्रुम इव व्यथितः अत एव विवर्णवदनः विपरीतवर्णविशिष्टमुखवान् गुहोऽभवत् ॥ ४ ॥

गो० टी०–सुकुमार इत्यादि श्लोकद्वयमेकान्वयम् । प्रत्याश्वस्य मुहूर्तं कालं परमदुर्मनाः सन् सहसा पपात । 'ससाद' इति वा पाठः सुकुमार इत्यादिना तदवस्थानार्हत्वमुच्यते ॥ २ ॥ ३ ॥

५–६] ति० टी०–तदवस्थमचेतनावस्थम् । अनन्तरस्थितः समीपस्थितः ॥ ५ ॥ ६ ॥

रा० टी०–तदवस्थमिति । अनन्तरस्थितः समीपस्थितिमान् शत्रुघ्नः तदवस्थं सा अतिदुःखविशिष्टा अवस्था स्थितिर्यस्य तं भरतं परिष्वज्य शोककर्शितः अत एव विसंज्ञः कर्तव्यविषयकविवेकरहितः सन् उच्चैः रुरोद ॥ ५ ॥

रा० टी०–तत इति । ततः शत्रुघ्ररोदनश्रवणानन्तरं भर्तृव्यसनकर्शिताः अत एव दीनाः क्षीणचित्ताः अत एव उपवासकृशाः सर्वा भरतस्य मातरः समापेतुः भरतस्य समीपं प्राप्तुः ॥ ६ ॥

गो० टी०–तदवस्थमिति । अन्तरस्थितः निरन्तरं समीपे स्थितः ॥ ४ ॥ ५ ॥

७] ति० टी०–अनुसृत्य समीपं प्राप्य ॥ ७ ॥

रा० टी०–ता इति । ताः भरतमातरः रुदन्त्यः सत्यः भूमौ पतितं तं भरतं पर्यवारयन् परिवृत्य अतिष्ठन् कौसल्या तु एनं भरतमनुसृत्य उत्थाप्य परिषस्वजे ॥ ७ ॥

गो० टी०–ता इति । अनुसृत्य समीपं प्राप्य ॥ ६ ॥

८] ति० टी०–स्वं वत्सं स्वपुत्रं यथा तथोपगुह्य ॥ ८ ॥

रा० टी०–वत्सलेति । वत्सला धेनुः स्वं वत्समिव उपगुह्य शोकलालसा शोकव्याप्ता तपस्विनी अतिविचारशीला कौसल्या भरतं परिपप्रच्छ ॥ ८ ॥

गो० टी०–वत्सलेति । उपगुह्य परिष्वज्य ॥ ७ ॥

९–१०] ति० टी०–व्याधिः पित्तप्रकोपादिलक्षणो भ्रममूर्छादिः ॥ ९ ॥ १० ॥

रा० टी०–प्रश्नाकारमाह–पुत्रेति । हे पुत्र ! ते शरीरं व्याधिस्तु कश्चित्र बाधते अस्य राजकुलस्य जीवितं स्थितिः त्वदधीनम् ॥ ९ ॥

रा० टी०–तदेव भङ्ग्यरेणाह–त्वामिति । हे पुत्र ! राज्ञि वृत्ते साकेतं प्राप्ते सति सभ्रातृके रामे गते वनं प्राप्ते सति एकस्त्वमेव नोऽस्माकं नाथः ॥ १० ॥

गो० टी०–पुत्रेति । नहि भरतस्य व्याधिश्चातुर्थिकः अपि तु रामविरह एव रामविरहः ते शरीरं बाधते कश्चिदित्यर्थः । अद्येति । रामो वनं गतः चक्रवर्ती तु संस्थितः अतस्त्वमेवे-

---

१ पपातेति गो. पाठः । २ ह्यतीति गो. पाठः । ३ श्लोकोऽयं गो. नास्ति । ४ रुदन्त्य इति गो. रा. पाठः । ५ गूह्येति गो. रा. पाठः । ६ रुदन्तीति गो. रा. पाठः । ७ परीति गो. पाठः । ८ चेति गो. पाठः ।

कच्चिन्न लक्ष्मणे पुत्र श्रुतं ते किंचिदप्रियम् । पुत्रे वा ह्येकपुत्रायाः सहभार्ये वनं गते ॥ ११ ॥
स मुहूर्तं समाश्वस्य[1] रुदन्नेव महायशाः । कौसल्यां परिसान्त्व्येदं गुहं वचनमब्रवीत् ॥ १२ ॥
भ्राता मे क्वावसद्रात्रिं[2] क्व सीता क्व च लक्ष्मणः । अस्वपच्छयने कस्मिन्किं भुक्त्वा गुह शंस मे ॥ १३ ॥
सोऽब्रवीद्धरतं हृष्टो निषादाधिपतिर्गुहः । यद्विधं प्रतिपेदे च रामे प्रियहितेऽतिथौ ॥ १४ ॥
अन्नमुच्चावचं भक्ष्याः फलानि विविधानि च । रामायाभ्यवहारार्थं बहुशोऽपहृतं मया ॥ १५ ॥
तत्सर्वं प्रत्यनुज्ञासीद्रामः सत्यपराक्रमः । न [6]हि तत्प्रत्यगृह्णात्स क्षत्रधर्ममनुस्मरन् ॥ १६ ॥
नह्यस्माभिः प्रतिग्राह्यं सखे देयं तु सर्वदा । इति तेन वयं [7]सर्वे अनुनीता महात्मना ॥ १७ ॥

दानीमस्माकं रक्षक इति नार्थः । किंतु रामो भवतो मुखवैवर्ण्यं दृष्ट्वा न पुनरनागतो भवेत् अवश्यमागमिष्यतीत्येतदवेक्ष्य वयं जीवामः भवान्नास्तीति श्रुतं चेत् क इमां दिशमवलोकयेत्॥८॥९॥

११] ति० टी०–धर्ममूर्छादेः कारणान्तरं पृच्छति–कच्चिदिति। अप्रियं प्राणात्ययरूपम् एकपुत्रायाः ममेति शेषः॥११॥

रा० टी०–शोकहेतुं पृच्छति–कच्चिदिति । वनं गते लक्ष्मणे एकपुत्राया मम सहभार्ये पुत्रे वा किंचिदप्रियं कच्चिन्न श्रुतम्, किंच हे पुत्र! सहभार्ये भार्यासहिते वनं गते एकपुत्राया मम पुत्रे पुत्रसमीपे विद्यमाने लक्ष्मणे किंचिदप्रियं कच्चिन्न श्रुतम् ॥ ११ ॥

गो० टी०–कच्चिदिति । लक्ष्मणे विषये ते त्वया एकपुत्रायाः ममेति शेषः ॥ १० ॥

१२–१३]ति०टी०–मुहूर्तं विसंज्ञः सन्पश्चात्समाश्वस्येत्यर्थः, परिसान्त्व्य त्वच्छङ्कितं किमपि नास्ति, किं तु तयोर्जटाधारणश्रवणजदुःखेन मूर्छितोऽस्मीत्युक्त्वा ॥ १२ ॥ १३ ॥

रा० टी०–स इति । सः कौसल्यया प्रतिबोधितो भरतः मुहूर्तं रुदन्नेव समाश्वास्य स्वास्थ्यं प्राप्य कौसल्यां परिसान्त्व्य इदं वचनमब्रवीत् ॥ १२ ॥

रा० टी०–वचनाकारमाह–भ्रातेति । रात्रिं मे भ्राता क्व अवसत् किं भुक्त्वा कस्मिन् शयने अस्वपत् इति मे शंस कथय ॥ १३ ॥

गो० टी०–स इति । परिसान्त्व्य त्वच्छङ्कितं किमपि न भवेदिति वदन् परिसान्त्व्येत्यर्थः ॥ ११ ॥ १२ ॥

१४] ति० टी०–हृष्टो लक्ष्मणवद्भरतस्यापि पूर्णभ्रातृभक्तिदर्शनेन तुष्टः यद्विधं यादृशं व्यवहारं रामे प्रतिपेदे कृतवांस्तमब्रवीद्रामकृतं चेत्यन्वयः ॥ १४ ॥

रा० टी०–स इति । सः भरतेन पृष्टः अत एव हृष्टः निषादाधिपतिर्गुहः प्रियहिते प्रियः स्वविषयकप्रीतिमान् हितः स्वप्रीतिविषयीभूतः स एव स इति कर्मधारयः तस्मिन्नतिथौ रामे यद्विधं यादृशं सेवनं प्रतिपेदे प्राप चकारेत्यर्थः, तादृशमब्रवीत् ॥ १४ ॥

गो० टी०–स इति । गुहः हृष्टः रामवृत्तान्तकीर्तनस्यावकाशं लब्ध इति संजातहर्षः सन् रामे यद्विधं यादृशमुपचारादिकं प्रतिपेदे अकरोदिति यावत् तदब्रवीत्, चकारेण रामकृतं समुच्चीयते ॥ १३ ॥

१५] ति० टी०–तमेवाह–अन्नमित्यादि ॥ १५ ॥

रा० टी०–सेवाकारमाह–अन्नमिति । उच्चावचमनेकविधमन्नमोदनं भक्ष्या अपूपादयः बहुशः फलमूलानि च अभ्यवहारार्थं रामाय मयापहृतं प्रापितम् ॥ १५ ॥

गो० टी०–अन्नमिति । उच्चावचं नानाविधमित्यर्थः भक्षाः भक्षणीयानि अपूपादीनि अभ्यवहारार्थं भोजनार्थं बहु चेति अन्यच्च बहु चोष्यलेह्यादिकमुपाहृतम् ॥ १४ ॥

१६] ति० टी०–प्रत्यनुज्ञासीन्मदनुग्रहार्थं केवलमङ्गीकृत्य पुनर्मह्यमेव दत्तवान् । क्षत्रधर्ममप्रतिग्रहरूपम् । न प्रत्यगृह्णादभ्यवहाराय न स्वीकृतवान् ॥ १६ ॥

रा० टी०–तदिति । क्षत्रधर्मं क्षतो यमदूतकर्तृकहिंसनात् त्रायते स्वसंगिजनं रक्षतीति क्षत्रं भागीरथीतीरं तत्र यो धर्मः अन्यदीयवस्तुग्रहणान्निवृत्तिः तम्, किंच क्षत्राणामुपदेशद्वारा संसारदुःखादक्षकाणां मनुप्रभृतीनामुक्तो यो धर्मः भागीरथीतीरे अन्यदीयवस्तुग्रहणान्निवृत्तिः तमनुस्मरन् बोधयन् सन् तदन्नादिकं सर्वं प्रत्यनुज्ञासीत् न भक्षयिष्यामीति प्रतिज्ञां कृतवान् अतः तन्मदुपहृतमन्नादिकं न प्रत्यगृह्णात् ॥ १६ ॥

गो० टी०–तत्सर्वमिति । रामः तत्र प्रत्यगृह्णात् किंतु तत्सर्वं प्रत्यनुज्ञासीत् प्रत्यन्वज्ञासीत् पुनर्नीयतामित्यनुज्ञातवान् क्षत्रधर्मं दानमेव क्षत्रधर्मः न त्वादानमिति अत्र हीनजातिपरिग्रहत्वात्तत्प्रख्यानम् ऋषिभ्यस्तु स्वीकरिष्यतीत्याहुः ॥ १६॥

१७] ति० टी०–तमेव धर्ममाह—नहीति । नन्वेवं भरद्वाजादिदत्ताङ्गीकारः कथमिति चेन्न, मधुपर्कादिना राजपूजाया ब्राह्मणं प्रति विधानेन तदत्ताङ्गीकारस्य स्वाभ्युदयफलकत्वेन च तस्य युक्तत्वात् गुहस्य निषादत्वेन राजपूजानधिकारात् अस्वदेश्यत्वेन करग्रहणायोग्यत्वाच्च तदीयानङ्गीकार इति न दोषः । यद्यपि गुहस्य तत्त्वज्ञत्वे नास्त्येव भगवत्पूजाधिकारस्तथापि व्रतस्थत्वात्तदभोजनमिति तत्त्वम् ॥ १७ ॥

रा० टी०–अन्नादिग्रहणाभावबोधकं रामवचनमाह–न हीति । हे सखे ! सर्वदा गङ्गातीरप्राप्तिकाले देयं वस्तु अत्रा-

---

१ त्विति गो. पाठः । २ समाश्वास्येति रा. पाठः । ३ रात्राविति गो. पाठः । ४ भक्षा इति गो. पाठः । ५ फलमूलानि चैव हीति रा. पाठः । ६ त्विति गो. पाठः । ७ राजन्निति गो. पाठः ।

लक्ष्मणेन यदानीतं पीतं वारि महात्मना । औपवास्यं[1] तदाऽकार्षीद्राघवः सह सीतया ॥ १८ ॥
ततस्तु जलशेषेण लक्ष्मणोऽप्यकरोत्तदा । वाग्यतास्ते त्रयः संध्यां समुपासन्त[3] संहिताः ॥ १९ ॥
सौमित्रिस्तु ततः पश्चादकरोत्स्वास्तरं शुभम् । स्वयमानीय बर्हींषि क्षिप्रं राघवकारणात् ॥ २० ॥
तस्मिन्समाविशद्रामः स्वास्तरे सह सीतया । प्रक्षाल्य च तयोः पादौ व्यपाक्रामत्[4]सलक्ष्मणः[5]॥ २१ ॥
एतत्तदिङ्गुदीमूलमिदमेव च तत्तृणम् । अस्मिन्रामश्च सीता च रात्रिं तां शयितावुभौ[6] ॥ २२ ॥
नियम्य पृष्ठे तु तलाङ्गुलित्रवाञ्शरैः सुपूर्णाविषुधी परंतपः ।
महद्धनुः सज्जमुपोह्य लक्ष्मणो निशामतिष्ठत्परितोऽस्य केवलम् ॥ २३ ॥

दिकमस्माभिर्न प्रतिग्राह्यं दीयते एवेत्यर्थः, इति अनेन प्रकारेण तेन महात्मना रामेण सर्वे वयमनुनीताः प्रत्युक्ताः ॥१७॥

गो० टी०–प्रत्यनुज्ञाने हेतुमाह–नेत्यादिना । इत्यनुनीता वयमित्यनेन स्वाङ्घ्रिभक्ताग्रेसरगुहसमर्पितफलादेर्भक्तिपूतत्वेन शबरीविदुरादिन्यायेन परमभागवततया स्वीकार्यत्वेऽपि स्वप्रियतमपितृमातृप्रमुखबहुजनविश्लेषदुःखप्राग्भारानुभवजनितवैमनस्येन पुण्यनदीतीरे उपवासचिकीर्षया च गुहसमर्पितं न प्रतिजग्राह राम इति च गुहेनापि विदितमिति गम्यते ॥ १६ ॥

१८] ति० टी०–औपवास्यमुपवासं स्वार्थे ष्यञ् ॥ १८ ॥

रा० टी०–लक्ष्मणेति । लक्ष्मणेन यद्वारि आनीतं तदेव महात्मना रामेण पीतमतः उपवासं तीर्थविधिप्रयुक्तभोजनाभावमेवाकार्षीत् क्षत्रधर्ममप्रतिग्रहरूपमिति भट्टाद्युक्तिस्तु चिन्त्या शबर्यादिफलानामग्रहणापत्तेः भरद्वाजाश्रमस्य तु तदानीमपि प्रवाहादूरवर्तित्वान्न तदीयवस्तुनो निषेधविषयतेति दिक् ॥१८॥

गो० टी०–लक्ष्मणेनेति । औपवास्यम् उपवासं स्वार्थे ष्यञ् ॥ १७ ॥

१९] ति० टी०–अकरोत् पानक्रियामिति शेषः । त्रयः सुमन्त्रेण सहिताः समाहितचित्ताः ॥ १९ ॥

रा० टी०–तत इति । ततः सीतारामजलपानानन्तरं जलशेषेण रामकर्तृकपानोर्वरितजलेन लक्ष्मणोऽपि अकरोत्, तीर्थविधिमिति शेषः । संहिताः सहिताः वाग्यताः त्रयो रामादयः संध्यां समुपासत ॥ १९ ॥

गो० टी०–तत इति । जलशेषेण रामपीतजलशेषेण अकरोत्पानमिति शेषः । वाग्यताः नियतवाचः सीताया अपि संध्यायां ध्यानजपादिकमस्त्येव संहिताः समाहिताः । ननु पूर्वं पुरोवादे ततश्चीरोत्तरासङ्गः संध्यामन्वास्य पश्चिमाम् । जलमेवादे भोज्यं लक्ष्मणेनाहृतं स्वयम् ॥ इत्युक्तं कथमत्रानुवादे प्रथमं जलादानं पश्चात्संध्योपासनं चोच्यते सत्यं तथैव क्रमः इह तु गुहानीतान्नानङ्गीकारे किं भुक्तवान् राम इत्याकाङ्क्षायां लक्ष्मणेन यद्वार्यानीतं तत्पीतमिति प्रसङ्गसंगत्या जलपानं प्रथममुक्त्वाऽथ संध्योपासनमुक्तमिति न दोषः ॥ १८ ॥

२०] ति० टी०–ततः पश्चात्संध्यावन्दनोत्तरम् । बर्हींषि दर्भान्, स्वास्तरं शयनम् ॥ २० ॥

रा० टी०–सौमित्रिरिति । ततः पश्चात्संध्योपासनानन्तरं सौमित्रिः लक्ष्मणः क्षिप्रं बर्हींषि दर्भादीनानीय राघवकारणात् राघवहेतोः स्वास्तरं शोभनमास्तरणमकरोत् ॥ २० ॥

गो० टी०–सौमित्रिरिति । ततः पश्चात् वारिपानानन्तरं स्वयं बर्हींषि कुशान् ' बर्हिर्नाग्नौ न ना कुशे ' इति वैजयन्ती । क्षिप्रमानीय राघवकारणात् राघवनिमित्तं शुभं पवित्रं स्वास्तरं सुष्ठु आस्तीर्णं शयनमिति यावत् अकरोत् कृतवान् ॥ १९ ॥

२१–२२] ति० टी०–व्यपाक्रामत् शयनप्रदेशाद्बहिर्दूरमिति शेषः ॥ २१ ॥ २२ ॥

रा० टी०–तस्मिन्निति । तस्मिन् लक्ष्मणेन कृते स्वास्तरे सीतया सह रामः समाविशत् तयोः सीतारामयोः पादौ प्रक्षाल्य लक्ष्मणः व्यपाक्रामत् रामशयनात् किंचिद्दूरं प्राप्य अतिष्ठत् ॥ २१ ॥

गो० टी०–तस्मिन्निति । पादौ प्रक्षाल्य गङ्गातीरगमनकृतपङ्कशोधनं कृत्वेत्यर्थः, इदं च रामस्य स्वहस्ताभ्यां सीतायास्तूदकप्रदानेनेति बोध्यम् । अपचक्राम शयनकाले समीपवर्तनस्यानुचितत्वात् दूरे स्थितः ॥ २० ॥

रा० टी०–एतदिति । तदिङ्गुद्याः वृक्षविशेषस्य मूलमेतदेव तत् तृणमिदमेव । ननु किमेतत्कथनेनेत्यत आह–अस्मिन् इङ्गुदीमूलस्थतृणास्तरणे तां रात्रिमुभौ रामः सीता च शयितौ ॥ २२ ॥

गो० टी०–एतदिति । शयितौ "गत्यर्थाकर्मकश्लिषशीङ्" इत्यादिना कर्तरि निष्ठा ॥ २१ ॥

२३] ति० टी०–इषुधी तूणे बद्धा तलयोः करतलयोरङ्गुलित्राणवान् सज्जं धनुरुपोह्य धृत्वास्य परितो भ्रमन्नतिष्ठत् केवलं निद्रारहितः ॥ २३ ॥

रा० टी०–नियम्येति । तलाङ्गुलित्रवान् तलं ज्याघातवारणमङ्गुलित्रमङ्गुलित्राणं तदुभयविशिष्टः परंतपो लक्ष्मणः शरैर्बाणैः पूर्णौ इषुधी तूणीरौ पृष्ठे पश्चाद्भागे नियम्य बद्धा सज्यं ज्यासहितं महद्धनुः उपोह्य संधार्य अस्य सीतारामस्य परितश्चतुर्दिक्षु केवलं सहायान्तरानाकाङ्क्षन् यथा स्यात्तथा निशां रात्रिमतिष्ठत् " कालाध्वनोः–" इति विहिता द्वितीया 'तले ज्याघातवारणम्' इत्यमरः ॥ २३ ॥

१ समानीतं पीत्वा वारि महात्मना इति गो. पाठः । २ उपवासमिति रा. पाठः । ३ समुपासतेति गो. रा. पाठः । ४ पादावपचक्रामेति गो. पाठः । ५ वस्मिन्निति गो. पाठः ।

ततस्त्वहं चोत्तमबाणचापभृत्स्थितोऽभवं तत्र स यत्र लक्ष्मणः ।
अतन्द्रितैर्ज्ञातिभिरात्तकार्मुकैर्महेन्द्रकल्पं परिपालयं तदा ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

अष्टाशीतितमः सर्गः ।

कौसल्यादीन्प्रति रामोपभुक्तकुशमयशयनीयं प्रदर्श्य संस्मृततद्भैभवो भरतस्तं परिशोचन्नात्मोपलम्भनपूर्वकं लक्ष्मणादीन्प्रशस्य रामं निवर्तयितुं बहुशः प्रयतमानोऽपि रामेण तदनङ्गीकारादद्यारभ्याहं जटाधारी रामप्रतिनिधित्वेन वन एव निवत्स्यामीति प्रतिज्ञे ।

तच्छ्रुत्वा निपुणं सर्वं भरतः सह मन्त्रिभिः । इङ्गुदीमूलमागम्य रामशय्यामवैक्षत ॥ १ ॥
अब्रवीज्जननीः सर्वा इह तेन महात्मनः । शर्वरी शयिता भूमाविदमस्य विमर्दितम् ॥ २ ॥
महाराजकुलीनेन महाभागेन धीमता । जातो दशरथेनोर्व्यां न रामः स्वप्तुमर्हति ॥ ३ ॥
अजिनोत्तरसंस्तीर्णे वरास्तरणसंचये । शयित्वा पुरुषव्याघ्रः कथं शेते महीतले ॥ ४ ॥

गो० टी०–नियम्येति । पृष्ठे पश्चाद्भाग इषुधी तूणीरद्वयं नियम्य बद्धा शराणां सव्यापसव्यप्रयोगार्थमिषुधिद्वयधारणमस्ति तलाङ्गुलित्रवान् 'तलं ज्याघातवारणम्' इत्यमरः । उपोह्य धृत्वा अस्य परितो तिष्ठत् सर्वतो रक्षणार्थं प्रदक्षिणं चचारेत्यर्थः, निशां निशायाम् अत्यन्तसंयोगे द्वितीया, केवलमित्यनेन शयननिद्राराहित्यं लक्ष्मणस्योच्यते ॥ २२ ॥

२४] ति० टी०–परिपालयं पर्यपालयम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

रा० टी०–तत इति । ततः लक्ष्मणसेवादर्शनानन्तरं यत्र लक्ष्मणस्तत्र उत्तमबाणचापभृत् अतन्द्रितैः निद्रारहितैः आत्तकार्मुकैः गृहीतधनुर्भिः ज्ञातिभिरुपलक्षितोऽहं महेन्द्रकल्पं रामं परिपालयन् रक्षन् सन् स्थितः अभवम् ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

गो० टी०–तत इति । अहं चोत्तमबाणचापभृत् एको भ्राता नगरात् वनानि निरगमयत् अयमपरः सुप्तोऽसदृशायां क्रियमपि कुर्यादिति शङ्कया सज्जायुधः सन्यत्र यत्र स लक्ष्मणः स्थितः तत्र तत्र स्थितोऽभवं प्रतिपदं तमनुसृतवानभवमित्यर्थः । अतन्द्रिभिर्जातिभिरात्तकार्मुकैः मम परिकराश्च अयं वनचरो निषादजातीयः रामे किंचित्करिष्यति चेद् एनं च प्रहराम इति सावधाना मां प्रतिपदमन्वसरन्नित्यर्थः । एवमस्थाने भयशङ्किभिः कृतं वस्तुतः स न केनचित्परिभाव्य इत्याह–महेन्द्रकल्पमिति ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने सप्ताशीतितमः सर्गः ॥ ८७ ॥

१] ति० टी०–तदिति ॥ १ ॥

रा० टी०–निषादवचनश्रवणानन्तरकालिकं भरतवृत्तान्तमाह–तदित्यादिभिः । निपुणं सुयुक्तं तन्निषादभाषितं सर्वं श्रुत्वा मन्त्रिभिः सह भरतः इङ्गुदीमूलमागम्य रामशय्यामवैक्षत ॥ १ ॥

गो० टी०–तदित्यादिश्लोकद्वयमेकं वाक्यम् । निपुणं सावधानमित्यर्थः, तेन रामेण इह भूमौ शर्वरी शयिता शर्वर्यां शयनं कृतं निष्ठया अधिकरणत्वस्याभिहितत्वाच्छर्वरीशब्दात् प्रथमा इदमेषामासितमितिवत् इदमस्य विमर्दितमित्यत्राप्यधिकरणे निष्ठा "कस्य च वर्तमाने" इति कर्तरि षष्ठी । अस्मिन्नेतत्कर्तृकं विमर्दनमित्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०–इह भूमौ शर्वरी शयिता अधिकरणे निष्ठा, एतद्देशावच्छिन्नशयनाधिकरणं शर्वरीत्यर्थः । इदमस्य विमर्दितम् अङ्गानामिति शेषः, विमर्दनाधिकरणमित्यर्थः॥२॥

रा० टी०–अब्रवीदिति । इह अस्यां भूमावेव महात्मनस्तस्य रामस्य शर्वरी रात्रिः शयिता अधिकरणे निष्ठा अत एव कर्तरि षष्ठी, अस्य विमर्दितं शयनमिदमेव ॥ २ ॥

३] ति० टी०–उक्तविशेषणेन दशरथेन हेतुना जातो नोर्व्यां स्वप्तुमर्हति ॥ ३ ॥

रा० टी०–तादृशशयनस्यानौचित्यं बोधयन्नाह–महाराजेति । महाराजकुलीनेन महाराजकुलोद्भवेन दशरथेन जातः प्रादुर्भूतो रामः उर्व्यां प्रासादपर्यङ्कादिरहितभूमौ स्वप्तुं नार्हति ॥ ३ ॥

गो० टी०–महाभागेति । महाभागेन महानुभावेन दशरथेनेति पञ्चम्यर्थे तृतीया ॥ ३ ॥

४] ति० टी०–अजिनेन राजार्हकन्दलीचर्मवादिमृगाजिनविशेषरूपेणोत्तरेण मञ्चोत्तरच्छदेन संस्तीर्णे तानि चाजिनानि शीतोष्णयोरुष्णशीते । वरास्तरणानां कार्पासवस्त्ररत्नकम्बलाद्यास्तरणानां संचयः समूहो यत्र पर्यङ्के, शीतकाल औष्ण्यार्थं तद्बाहुल्यम् ॥ ४ ॥

१ धृदिति गो. पाठः । २ अतन्द्रिभिरिति गो. पाठः । ३ पालयंस्तदेति गो. पाठः । ४ अवेक्ष्य तामिति गो. पाठः । ५ तेन महात्मनेति गो. पाठः । ६ भागेति गो.पाठः ।

प्रासादाग्रविमानेषु वलभीषु च सर्वदा । हैमराजतभौमेषु वरास्तरणशालिषु ॥ ५ ॥
पुष्पसंचयचित्रेषु चन्दनागुरुगन्धिषु । पाण्डुराभ्रप्रकाशेषु शुकसंघरुतेषु च ॥ ६ ॥
प्रासादवरवर्येषु शीतवत्सु सुगन्धिषु । उषित्वा मेरुकल्पेषु कृतकाञ्चनभित्तिषु ॥ ७ ॥
गीतवादित्रनिर्घोषैर्वराभरणनिःस्वनैः । मृदङ्गवरशब्दैश्च सततं प्रतिबोधितः ॥ ८ ॥
वन्दिभिर्वन्दितः काले बहुभिः सूतमागधैः । गाथाभिरनुरूपाभिः स्तुतिभिश्च परंतपः ॥ ९ ॥
अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा । मुह्यते खलु मे भावः स्वप्नोऽयमिति मे मतिः ॥ १० ॥

रा० टी०–अजिनेति । अजिनोत्तरसंस्तीर्णे अजिनं राजोत्तरास्तरणयोग्यातिमृदु मृगविशेषचर्म उत्तरश्चोत्तरास्तरणं तेन संस्तीर्णे आच्छादिते वराणां बहुमूल्यानामास्तरणानां संचयो यस्मिंस्तस्मिन् पर्यङ्के शयित्वा महीतले कथं शेते अनुचितमेतदित्यर्थः ॥ ४ ॥

गो० टी०–अजिनोत्तरसंस्तीर्णे इति । अजिनोत्तरसंस्तीर्णे अजिनरूपोत्तरच्छदेन संस्तीर्णे अजिनशब्देन ' कदलीकन्दलीचीनश्चमूरुप्रियकावपि । समूरुश्चेति हरिणा अमी अजिनयोनयः ' इत्युक्तकदल्याद्यजिनं विवक्षितं वरास्तरणसंचये वराणि अमूल्यानि आस्तरणानि येषु पर्यङ्केषु तेषां संचये समूहे पर्यङ्कानां बहुत्वं शीतोष्णादि कालोचितान्तर्गृहशिरोगृहादिबाहुल्यात्, यद्वा मार्दवातिशयायानेकास्तरणत्वम् अतिमृदुत्वादजिनस्योपर्यास्तरणत्वम् ॥ ४ ॥

५] ति० टी०–प्रासादाग्रविमानेषु विमानाकारप्रासादाग्रगृहेषु वलभी कूटागारम् हैमानि राजतानि च भौमानि भूतलानि येषु ॥ ५ ॥

रा० टी०–प्रासादेति । हैमानि हेमनिर्मितानि राजतानि रजतनिर्मितानि भौमानि भूतलानि येषु वराणां बहुमूल्यानामास्तरणानां शालिषु आश्रयेषु प्रासादाग्रविमानेषु प्रासादाकारोत्तमविमानेषु वलभीषु कूटागारेषु च ॥ ५ ॥

गो० टी०–प्रासादाग्रविमानेष्वित्यादि । प्रासादाग्रविमानेषु विमानतुल्यप्रासादशिखरेषु वलभीषु कूटागारेषु 'कूटागारे तु वलभी' इति वैजयन्ती । हैमराजतभौमेषु हैमानि राजतानि भौमानि भूतलानि येषु ते, वरास्तरणशालिषु चित्रकम्बलादिशालिषु पुष्पसंचयचित्रेषु चित्रपुष्पसमूहेषु चन्दनागरुगन्धिषु चन्दनागरुधूपगन्धिषु पाण्डुराभ्रप्रकाशेषु तद्वद्धवलेषु शुकसंघरुतेषु शुकसमूहनादवत्सु अर्शआदित्वादच् मत्वर्थीयः । प्रासादवरवर्येषु प्रासादवराणामुत्तमेषु शीतवत्सु शैत्यवत्सु 'शीतं गुणे तद्वत्' इत्यमरः । सुगन्धिषु घनसारादिभिरिति शेषः, उषित्वा शयित्वेत्यर्थः उपरि प्रतिबोधोक्तेः मेरुतुल्यत्वे हेतुः–कृतकाञ्चनभित्तिष्विति । गीतवादित्रनिर्घोषैः गीतैस्तदनुगुणवीणादिरवैः वराभरणनिस्वनैः परिचारिकापाणिचरणनूपुरकङ्कणाद्याभरणसितैः मृदङ्गवरशब्दैः मर्दलविशेषध्वनिभिश्च सततं प्रतिबोधितः अथ प्रबोधनानन्तरं काले प्रातःकाले बान्दिभिः कर्दृभिः सूतमागधैश्च गाथाभिः गद्यविशेषैः । पाठभेदः पद्यविशेषैः स्तुतिभिः स्तोत्रप्रबन्धैश्च वन्दितः स्तुतः ' वदि अभिवादनस्तुत्योः ' इति धातुः परंतपः अन्यराजशिक्षणपरो रामः । पाठभेदः अथ राज्यशिक्षणपरो रामः कथं भूमौ केवलायां शेते कथं नापदरवैः प्रतिबोध्यते कथमेकाकी तिष्ठतीति चोपस्कार्यं गम्यमानत्वादप्रयोगः 'यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा । यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ॥' इत्यादिवत् ॥ ८–९ ॥

६] ति० टी०–शुकसंघरुतेषु तद्वतवत्सु ॥ ६ ॥

रा० टी०–पुष्पाणां संचयेन समूहेन चित्राणि तेषु चन्दनागरूणां गन्धो येषु पाण्डुराभ्रवत्प्रकाशो येषां तेषु शुकसंघानां रुताः शब्दा येषु तेषु ॥ ६ ॥

७] ति० टी०–प्रासादवराणां प्रासादश्रेष्ठानां मध्ये वर्येषु श्रेष्ठेषु तेषूषित्वा कथं भूमौ शेत इति संबन्धः ॥ ७ ॥

रा० टी०–शीतवत्सु यथेच्छं स्वाभाविकशैत्ययुक्तेषु सुगन्धिषु स्वाभाविकगन्धविशिष्टेषु मेरुकल्पेषु सुमेरुसदृशेषु कृताः काञ्चनभित्तयो येषु प्रासादवरवर्येषु अत्युत्तमप्रासादेषु च उषित्वा ॥ ७ ॥

८–९] ति० टी०–वराभरणानां परिचारिकान्पुरायाभरणानां निःस्वनैर्गीतादिशब्दैः स्तुतिभिश्च प्रतिबोध्यमानः कथं भूमौ केवलं शेत इति संबन्धः ॥ ८–९ ॥

रा० टी०–वराभरणानां परिचारिकायाभरणानां निःस्वनाः शब्दाः येषु तैर्गीतवादित्रनिर्घोषैः मृदङ्गवरशब्दैश्च प्रतिबोधितः ॥ ८ ॥

रा० टी०–काले बन्दिभिर्बहुभिः सूतमागधैश्च अनुरूपाभिः योग्याभिः गाथाभिः प्रबन्धैः स्तुतिभिर्वंशप्रशंसावचनैश्च वन्दितः परंतपो रामः भूमौ कथं शेते इत्यनुकर्षः । पद्यानामेकत्रान्वयः ॥ ९ ॥

१०] ति० टी०–इदं रामस्य भूशयनम् । लोकेऽत्यजनेषु तन्मध्ये तन्मुखाच्छ्रुतमप्यश्रद्धेयमेव । तदेव विवृणोति–मा मां सत्यं न प्रतिभाति । तस्मादेतद्विषये भावोऽन्तःकरणं मुह्यते, मम मोह इत्यर्थः । अथवा स्वप्नोऽयं भवितुमर्हतीति मतिः । स्वप्ने असंभावितमपि संभाव्यते ॥ १० ॥

रा० टी०–अश्रद्धेयमिति । इदं रामभूशयनं मा मां सत्यं

१ अगर्वीति गो. रा. पाठः ।

न नूनं दैवतं किंचित्कालेन बलवत्तरम् । यत्र दाशरथी रामो भूमावेवमशेत सः ॥ ११ ॥
यस्मिन्विदेहराजस्य सुता च प्रियदर्शना । दयिता शयिता भूमौ स्नुषा दशरथस्य च ॥ १२ ॥
इयं शय्या मम भ्रातुरिदमावर्तितं शुभम् । स्थण्डिले कठिने सर्वं गात्रैर्विमृदितं तृणम् ॥ १३ ॥
मन्ये साभरणा सुप्ता सीतास्मिञ्शयने शुभा । तत्र तत्र हि दृश्यन्ते सक्ताः कनकबिन्दवः ॥ १४ ॥
उत्तरीयमिहासक्तं सुव्यक्तं सीतया तदा । तथा ह्येते प्रकाशन्ते सक्ताः कौशेयतन्तवः ॥ १५ ॥
मन्ये भर्तुः सुखा शय्या येन बाला तपस्विनी । सुकुमारी सती दुःखं न विजानाति मैथिली ॥ १६ ॥
हा हतोऽस्मि नृशंसोऽस्मि यत्सभार्यः कृते मम । ईदृशीं राघवः शय्यामधिशेते ह्यनाथवत् ॥ १७ ॥
सार्वभौमकुले जातः सर्वलोकसुखावहः । सर्वप्रियकरस्त्यक्त्वा राज्यं प्रियमनुत्तमम् ॥ १८ ॥
कथमिन्दीवरश्यामो रक्ताक्षः प्रियदर्शनः । सुखभागी न दुःखार्हः शयितो भुवि राघवः ॥ १९ ॥

न प्रतिभाति अत एव अश्रद्धेयमत एव भावो मम मनः सुप्यते श्रुत्वेति शेषः, अतः अयं स्वप्नः इति मे मतिर्निश्चयः एतेन रामस्य नित्यं सर्वसामग्रीपूर्णत्वं व्यक्तं तेन अघटितघटनापटीयस्त्वं व्यक्तम् ॥ १० ॥

गो० टी०–अश्रद्धेयमिति । इदं रामस्य तृणशय्याशयनादिकम् अश्रद्धेयं लोके पश्यामि 'लोकृ दर्शने' इति धातुः। तत्र हेतुमाह–न सत्यमिति । किं च मे भावः हृदयं सुप्यते खलु सुप्यति किंतु रामस्य भूमिशयनश्रवणादिकं भ्रमो वेत्यर्थः, अथवा अयं पूर्वोक्तश्रवणं स्वप्नापेक्षया पुंलिङ्गत्वं स्वप्न इति मे मतिः मतं सिद्धान्त इत्यर्थः कथमन्यथा सर्वमिदमसंभाव्यं संभाव्यत इति भावः ॥ १० ॥

११] ति० टी०–कालेन कालतो बलवत्तरं किंचित्किमपि दैवतं नास्तीति नूनं मन्ये । यत्र काले प्राप्ते सति रामोऽपि भूमावशेत ॥ ११ ॥

रा० टी०–सत्यत्वमङ्गीकृत्याह–नेति । कालेन कालात्परमात्मेच्छाया बलवत्तरं किंचिद्दैवतं न यत्र यस्मिन् सति रामो भूमौ अशेत ॥ ११ ॥

गो० टी०–नेति । कालेन कालात् दैवतं बलवत्तरं न नूनं काल एव बलीयानित्यर्थः, यत्र यस्मात् दाशरथिः दशरथपुत्रोऽपि भूमावेव शयीत तस्मादित्यर्थः ॥ ११ ॥

१२–१३] ति० टी०–यस्मिन्काले दशरथदयिता प्रिया स्नुषा भूमौ शयिता ततो न बलवत्किंचित् ॥ १२ ॥ १३ ॥

रा० टी०–यस्मिन्निति । यस्मिन्परमात्मेच्छारूपकाले सति दशरथस्य स्नुषा सीता भूमौ शयिता ॥ १२ ॥

गो० टी०–विदेहराजस्येति । प्रियदर्शना अतदर्हेत्यर्थः दयिता रामस्य प्राणेभ्योऽपि प्रेयसी शयिता शयितवती कर्तरि क्तः इन्तेति शेषः ॥ १२ ॥

रा० टी०–इयमिति । मम भ्रातुः इयं शय्या इदमावर्तितमावर्तनचिह्नम् । चिह्नमेवाह–कठिने स्थण्डिले विद्यमानं तृणं गात्रैर्विमृदितं क्षुण्णम् ॥ १३ ॥

गो० टी०–इयमिति । पश्चिमार्तितं पतिवर्तनं स्वापकाले श्रमातिशयादितस्ततः शरीरपरिवर्तनपदम् । परिवर्तनज्ञापकमाह–स्थण्डिल इति । स्थण्डिले भूतले कठिनस्थलत्वात् गात्रैः विमृदितं क्षुण्णं तृणम् इदमित्यनुषङ्गः ॥ १३ ॥

१४–१५] ति० टी०–कनकबिन्दवो भूषणावयवकनकशकलानीति कतकः ॥ १४ ॥ १५ ॥

रा० टी०–मन्य इति । अस्मिन् शयने साभरणाः आभरणसहिता सीता सुप्ता इत्यहं मन्ये हि यतः तत्र तत्र शयनस्य प्रदेशे प्रदेशे कनकबिन्दवः कनकाभरणानि सक्ताः रेषारूपेण संलग्ना दृश्यन्ते ॥ १४ ॥

गो० टी०–मन्य इति । साभरणा सुप्ता मार्गश्रमादाभरणमनुन्मुच्य सुप्तवती शयनोत्तमे भर्तृशय्यात्वादितरतल्पेभ्यः श्रेष्ठतमे । साभरणा सुप्तेत्यत्र सूचकमाह–तत्र तत्रेति । तत्र तत्र तृणेषु सक्ताः कनकबिन्दवः जाम्बूनदाभरणनिर्गलिताः सूक्ष्मरेणवः ॥ १४ ॥

रा० टी०–उत्तरीयमिति । इह असक्तं पतितमुत्तरीयं सीतया सुव्यक्तं धृतमित्यर्थः, हि यतः सक्ताः तृणादिषु संलग्नाः एते कौशेयतन्तवः तथा धारणानुमापकतया प्रकाशन्ते । यदि तु आसक्तमिति छेदः तदा संस्थापितमित्यर्थः अस्मिन्नर्थे सुव्यक्तमित्यस्य फुटमित्यर्थः ॥ १५ ॥

गो० टी०–उत्तरीयमिति । इह कुशाग्रेषु आसक्तम् इदमासज्जनं सुव्यक्तं सीतया सीतायाः ॥ १५ ॥

१६] ति० टी०–भर्तुः शय्या कोमला वा कठिना वा स्त्रीणां सुखैव मन्ये, यतः–सुकुमारीत्यादि ॥ १६ ॥

रा० टी०–मन्ये इति । भर्तुः रामस्य शय्या सुखा अतिसुखप्रदा इत्यहं मन्ये । तत्र गमकमाह–येन सुखेन हेतुना सुकुमारी अपि सीता दुःखं प्रवासजनितखेदं न विजानाति ॥ १६ ॥

गो० टी०–मन्य इति । या कापि भर्तुः शय्या पतिव्रतायाः सुखेति मन्ये यतः सुकुमारी मैथिली सती पतिव्रता अस्मिन्नपि शयने शयिता दुःखं न जानाति ॥ १६ ॥

१७–१९] ति० टी०–मम कृते कैकेयीप्रवृत्तेः स्वानुमतिराहित्येऽपि स्वमुद्दिश्य जातत्वादिति भावः ॥ १७–१९ ॥

---

१ एव शयीतेति गो. पाठः । २ विदेहराजस्य सुता सीतेति गो. पाठः । ३ हि परिवर्तितमिति गो. पाठः । ४ शयनोत्तम इति गो. पाठः । ५ सर्वलोकस्य संमत इति गो. पाठः । ६ सर्वलोकप्रिय इति गो. पाठः । ७ सुखमिति गो. पाठः ।

धन्यः खलु महाभागो लक्ष्मणः शुभलक्षणः । भ्रातरं विषमे काले यो राममनुवर्तते ॥ २० ॥
सिद्धार्था खलु वैदेही पतिं यानुगता वनम् । वयं संशयिताः सर्वे हीनास्तेन महात्मना ॥ २१ ॥
अकर्णधारा पृथिवी शून्येव प्रतिभाति [1]मे । गते दशरथे स्वर्गं रामे चारण्यमाश्रिते ॥ २२ ॥
न च प्रार्थयते कश्चिन्मनसापि वसुंधराम् । वने निवसतस्तस्य बाहुवीर्याभिरक्षिताम् ॥ २३ ॥
शून्यसंवरणारक्षामयन्त्रितहयद्विपाम् । [2]अनावृतपुरद्वारां राजधानीमरक्षिताम् ॥ २४ ॥
अप्रहृष्टबलां [3]शून्यां विषमस्थामनावृताम् । शत्रवो नाभिमन्यन्ते [4]भक्ष्यान्विषकृतानिव ॥ २५ ॥
अद्यप्रभृति भूमौ तु शयिष्येऽहं तृणेषु वा । फलमूलाशनो नित्यं जटाचीराणि धारयन् ॥ २६ ॥

रा० टी०–हेति । यद् यस्य मम संबन्धिनः कृते प्रयत्ने सति अनाथवद् नाथत्वाभाववानिव ईदृशीं शय्यामधिशेते सोऽहं हतोऽस्मि नृशंसः क्रूरोऽस्मि हा अतिकष्टमेतद् ॥ १७ ॥

गो० टी०–हाहन्तेति । हाहन्तेत्येकनिपातः खेदार्थः अहं नृशंसोऽस्मि निर्दयोऽस्मि मम कृते मन्निमित्तं कृते इत्यव्ययम् ॥ १७ ॥

रा० टी०–कष्टहेतुं वदन्नाह–सार्वभौमेति । सर्वप्रियकरः इन्दीवरश्यामो रामः राज्यं त्यक्त्वा भुवि कथं शयितः । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०–जन्मना शक्तिमत्तया प्रजारञ्जकत्वेन शरीरलक्षणेन च राज्यार्हो रामः कथमेतादृशीं दुर्दशां प्राप्त इति खिद्यते–सार्वभौमकुले जात इत्यादिना श्लोकद्वयेन ॥ १८–१९ ॥

२०] ति० टी०–विषमे काले संकटकाले ॥ २० ॥

रा० टी०–धन्य इति । विषमे अननुकूले काले यो लक्ष्मणः राममनुवर्तते स धन्यः ॥ २० ॥

गो० टी०–धन्य इति । विषमे काले संकटे काले ॥२०॥

२१] ति०टी०–या पतिमनु अनुसृत्य वनं गता सा सिद्धार्था वयं संशयिता रामसेवाविषयसंशयमापन्नाः कालान्तरप्रार्थनीयसेवत्वात्, इदानीमस्मत्सेवानुमतौ संशयादिति भावः ॥ २१ ॥

रा० टी०–सिद्धार्थेति । या अवनं सर्वरक्षकं पतिमनुगता सा वैदेही सिद्धार्था सिद्धाः अर्थाः प्रयोजनानि यस्याः सा तेन सीतापतिना महात्मना हीनाः वयं संशयिताः प्राप्तसंशयाः अतो न सिद्धार्था इत्यर्थः ॥ २१ ॥

गो० टी०–सिद्धार्थेति । पतिमनु पतिमनुसृत्य वनं गतेति संबन्धः संशयिताः अस्मत्सेवां रामोऽङ्गीकरिष्यति नवेति संशयिताः ॥ २१ ॥

२२] ति० टी०–अकर्णधारा नौरिव शून्या प्रवृत्तिशून्या ॥ २२ ॥

रा० टी०–अकर्णेति । अकर्णधारा कर्णधाररहिता नौरिव पृथिवी शून्या प्रतिभाति नौरित्यध्याहृतम् ॥ २२ ॥

गो० टी०–अकर्णधारेति । अकर्णधारा प्रधानपुरुषरहितेति यावद् अत एव शून्येव प्रतिभाति ॥ २२ ॥

२३] ति० टी०–कश्चिन्मादृशः ॥ २३ ॥

रा० टी०–न चेति । तस्य रामस्य बाहुवीर्येण अभिरक्षितां वसुन्धरां पृथ्वीं कश्चिदस्मदादिः मनसापि न प्रार्थयते पृथिवीं पालयेयमिति कथंचिदपि नेच्छामीत्यर्थः ॥ २३ ॥

गो० टी०–अनायकत्वे कथं राज्यं निरुपद्रवं तत्राह–नचेति । कश्चित् सामन्तः न प्रार्थयते आक्रमितुं नेच्छति॥२३॥

२४] ति० टी०–शून्यसंवरणारक्षां संवरणानां प्राकाराणामासमन्तादक्षया शून्यां हीनाम् । अनावृतत्वं रक्षकाभावात् ॥ २४ ॥

२५] ति० टी०–अप्रहृष्टं बलं यस्याम् अत एव शून्यां क्षीणबलां नाभिमन्यन्ते स्वीकर्तुं नेच्छन्ति अत्र तद्बाहुवीर्यरक्षितत्वं हेतुः ॥ २५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–शून्येति । शून्या अभावप्रतियोगिनी संवरणस्य प्राकारस्य आसमन्तात् रक्षा यस्यां ताम् अयन्त्रिताः अनियमिताः हयद्विपाः यस्यां न आवृतानि पुरद्वाराणि यस्यास्तां न प्रहृष्टानि बलानि नैन्यानि यस्यामत एव न्यूनां क्षीणामत एव विषमस्थां विषमाणामनवस्थितचित्तानां स्थः स्थितिर्यस्यामत एव अनावृतां बाह्यावरणरहितामरक्षितामिदानीं रामकर्तृकरक्षारहितां राजधानीमयोध्यां विषकृतान् भक्ष्यानिव शत्रवो नाभिमन्यन्ते स्वीकर्तुं नेच्छन्ति तेन रामस्य प्रतापातिशयः सूचितः । श्लोकद्वयमेकान्वयि॥२४॥२५॥

गो० टी०–रामवीर्यं विना रक्षकान्तरशून्यत्वमाह–शून्यसंवरणेत्यादि । शून्यसंवरणारक्षाम् अविद्यमानप्राकाररक्षकाम्, यद्वा शून्यसंवरणः गुप्तिरहितः आरक्षः गुल्मस्थानं यस्याः सा तथा अयन्त्रिताः रक्षकाणां रामपारवश्येन तैरबद्धाः हयद्विपाः यस्यास्ताम् अपावृतानि अपिहितानि पुरद्वाराणि यस्यास्ताम् अप्रहृष्टबलत्वमरक्षितत्वे हेतुः न्यूनां साधनविहीनां विषमस्थां दुर्दशापन्नाम् अनावृतां बाह्यरक्षकरहितां नाभिमन्यन्ते अभिभवितुं न स्मरन्ति । भक्ष्यान् अपूपादीन् विषैः विषमिश्रैः कृतान् ॥ २४ ॥ २५ ॥

२६] ति० टी०–अतस्तमेव राज्यार्हमानेष्यामि, यदि स व्रतभङ्गः कथं कार्य इति वदेत्तदा तत्प्रतिनिधितयाहं व्रतमद्यास्थे इत्याह—अद्येत्यादि ॥ २६ ॥

१ मेति गो. पाठः । २ अपावृतेति गो. पाठः । ३ न्यूनामिति गो. रा. पाठः । ४ भक्ष्यानिति गो. पाठः । ५ खिद्यते इति युक्तं भाति ।

तस्याहमुत्तरं कालं निवत्स्यामि सुखं वने । तत्प्रतिश्रुतमार्यस्य नैव मिथ्या भविष्यति ॥ २७ ॥
वसन्त भ्रातुरर्थाय शत्रुघ्नो मानुवत्स्यति । लक्ष्मणेन सहायोध्यामार्यो मे पालयिष्यति ॥ २८ ॥
अभिषेक्ष्यन्ति काकुत्स्थमयोध्यायां द्विजातयः । अपि मे देवताः कुर्युरिमं सत्यं मनोरथम् ॥ २९ ॥
प्रसाद्यमानः शिरसा मया स्वयं बहुप्रकारं यदि नैव प्रपत्स्यते ।
ततोऽनुवत्स्यामि चिराय राघवं वनेचरं नार्हति मामुपेक्षितुम् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

एकोननवतितमः सर्गः ।

प्रातर्भरतमनुगतेन गुहेनादिष्टदाशैर्नावादिभिः प्रतीरं प्रापितान्स्वानुयायिनः प्रयागवने संनिवेश्य भरद्वाजं दिदृक्षुर्भरतो वसिष्ठादिभिः सह तदाश्रमं प्रतस्थे ।

व्युष्य रात्रिं तु तत्रैव गङ्गाकूले स राघवः । कौल्यमुत्थाय शत्रुघ्नमिदं वचनमब्रवीत् ॥ १ ॥
शत्रुघ्नोत्थाय किं शेषे निषादाधिपतिं गुहम् । शीघ्रमानय भद्रं ते तारयिष्यति वाहिनीम् ॥ २ ॥

रा० टी०–अद्येति । अद्यप्रभृति इतः कालादारभ्य भूमौ विद्यमानेषु तृणेष्वेव अहं शयिष्ये ॥ २६ ॥

गो० टी०–उक्तसर्वानर्थस्य आत्ममूलकतया तत्प्रायश्चित्तमाह–अद्येत्यादि । श्लोकद्वयमेकान्वयम् । तं प्रतिश्रवं तां प्रतिज्ञाम् आमुच्य स्वस्मिन्नासज्य तस्यार्थं रामार्थमित्यर्थः. उत्तरं कालं चतुर्दशवर्षात्मके काले रामानुष्ठितव्यतिरिक्तोत्तरकालं वने वत्स्यामि मिथ्या न भविष्यति प्रतिज्ञेति शेषः॥२६–२८

२७] ति० टी०–तस्य व्रतसंकल्पं स्वयं गृहीत्वा तत्परिपालनार्थमुत्तरं कालं चतुर्दशवर्षपर्यन्तमहं वने वत्स्यामि । एवं सति नार्यस्य तत्प्रतिश्रुतं मिथ्या भविष्यति ॥ २७ ॥

रा० टी०–तत्प्रयोजनमाह–तस्येति । तस्य रामस्य प्रतिनिधिरहमुत्तरं कालं सुखं वने वत्स्यामि । तत्फलमाह–तत्प्रसिद्धमार्यस्य प्रतिश्रुतं प्रतिज्ञातं मिथ्या नैव भविष्यति ॥२७॥

२८–२९] ति० टी०–वसन्तमिति ॥ २८–२९ ॥

रा० टी०–वसन्तमिति । भ्रातुः अर्थाय आगमनप्रयोजनाय वसन्तं मां शत्रुघ्नोऽनुवत्स्यति आर्यो रामः अयोध्यां पालयिष्यति पालयिता ॥ २८ ॥

रा० टी०–अभीति । काकुत्स्थं राममभिषेक्ष्यन्ति इमं मे मनोरथं देवाः सत्यं कुर्युरपि । अपिः संभावनायाम् ॥ २९ ॥

गो० टी०–अभिषेक्ष्यन्तीति । देवताः इमं मनोरथं सत्यं कुर्युरपि । संभावनायामपिशब्दः ॥ २९ ॥

३०] ति० टी०–प्रसाद्येति । प्रपत्स्यते निवृत्तिविषये प्रसादमिति शेषः, उपेक्षितुं नार्हति भक्तवत्सलत्वादिति भावः ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

रा० टी०–प्रसाद्यमान इति । बहुप्रकारं शिरसा मया प्रसाद्यमानो रामः यदि न प्रपत्स्यते अयोध्यां प्राप्स्यति तदा वने चिराय बहुकालं राघवमनुवत्स्यामि तत्र हेतुः चिरं मामुपेक्षितुं नार्हति ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

गो० टी०–प्रसाद्यमान इति । शिरसा प्रणामपूर्वकं स्वयं नतु मन्त्रिमुखेन नाभिपत्स्यते नाङ्गीकरिष्यति प्रसादमिति शेषः, ततस्तदा वने वसन् राघवमनुवत्स्यामि तदनुचरो भवामि । अनुचरणं वा कथमङ्गीकरिष्यतीत्याह–नार्हति मामुपेक्षितुमिति मां भ्रातरं शिष्यं दासमित्यर्थः ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्यानेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

१–२] ति० टी०–व्युष्योषित्वा । कौल्यमुषःकाले उषःपर्यायो कल्यकाल्यावुभावपीति ज्ञायते ॥ १ ॥ २ ॥

रा० टी०–रात्रिनिवासानन्तरकालिकं वृत्तान्तमाह–व्युष्येत्यादिभिः । तत्र गङ्गाकूले एव राघवो भरतः रात्रिं व्युष्य उषित्वा कल्यं प्रातरुत्थाय शत्रुघ्नमब्रवीत् ॥ १ ॥

गो० टी०–व्युष्येति । व्युष्य उषित्वा रात्रिं रात्रौ तत्रैव यत्र रामोऽशयिष्ट तत्रैव कौल्यं प्रत्यूषः 'प्रत्यूषोऽहर्मुखंकाल्यम्' इत्यमरः । तस्मिन्नित्यर्थः ॥ १ ॥

रा० टी०–तद्वचनाकारमाह–शत्रुघ्नेति । हे शत्रुघ्न ! त्वं किं शेषे उत्तिष्ठेत्यर्थः । तत्प्रयोजनमाह–उत्थाय गुहं शीघ्रमानय । तस्य प्रयोजनमाह–वाहिनीं गङ्गां तारयिष्यति ॥२॥

गो० टी०–शत्रुघ्नेति । शत्रुघ्न भद्रं त इति सान्त्वोक्तिः । वाहिनीं गङ्गाम् अस्मानित्यर्थसिद्धम् ॥ २ ॥

१ तस्यार्थमिति गो. पाठः । २ तं प्रतिश्रवमामुच्य नास्येति गो. पाठः । ३ सह त्वार्यो व्ययोध्यामिति गो. पाठः । ४ नाभीति गो. पाठः । ५ वसन्निति गो. पाठः । ६ भरतः कौल्यमुत्थाय शत्रुघ्नमिदमिति गो. कल्यमिति रा. पाठः । ७ उत्तिष्ठेति गो. पाठः ।

जागर्मि नाहं स्वपिमि तथैवार्यं विचिन्तयन् । इत्येवमब्रवीद्भ्राता शत्रुघ्नो [2]विप्रचोदितः ॥ ३ ॥
इति संवदतोरेवमन्योन्यं नरसिंहयोः । आगम्य प्राञ्जलिः काले गुहो [3]वैचनमब्रवीत् ॥ ४ ॥
कच्चित्सुखं नदीतीरेऽवात्सीः काकुत्स्थ शर्वरीम् । कच्चिच्च सहसैन्यस्य [4]तव नित्यमनामयम् ॥ ५ ॥
गुहस्य तत्तु वचनं श्रुत्वा स्नेहादुदीरितम् । रामस्यानुवशो वाक्यं भरतोऽपीदमब्रवीत् ॥ ६ ॥
सुखा नः शर्वरी [5]धीमन्पूजिताश्चापि ते वयम् । गङ्गां तु नौभिर्बह्वीभिर्दाशाः संतारयन्तु नः ॥ ७ ॥
ततो गुहः संत्वरितः [6]श्रुत्वा भरतशासनम् । प्रतिप्रविश्य नगरं तं ज्ञातिजनमब्रवीत् ॥ ८ ॥
उत्तिष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा । नावः [7]समुपकर्षध्वं तारयिष्यामि वाहिनीम् ॥ ९ ॥
ते तथोक्ताः समुत्थाय त्वरिता राजशासनात् । पञ्च नावां [8]शतान्येव समानिन्युः समन्ततः ॥ १० ॥
अन्याः स्वस्तिकविज्ञेया महाघण्टाधराधराः । शोभमानाः [9]पताकिन्यो युक्तवाहाः सुसंहताः ॥ [10] ॥

३-४] ति० टी०-आर्यं विचिन्तयन्नहमपि यथा त्वं तथैव जागर्मि न स्वपिमीत्येवमब्रवीदित्यन्वयः ॥ ३ ॥ ४ ॥

रा० टी०-जागर्मीति । विप्रचोदितः भरतेन प्रेरितः भ्राता शत्रुघ्नस्तथैव भवत्सदृशम् आर्यं रामं विचिन्तयन्सन् जागर्मि न स्वपिमि इत्येवं वचोऽब्रवीत् ॥ ३ ॥

गो० टी०-जागर्मीति । नाहं स्वपिमि जागर्मीति भ्रात्रा प्रचोदितः शत्रुघ्नोऽपि तमेवार्थं यस्त्वया चिन्त्यते तमेवार्थं विचिन्तयन् सन् अहमपि जागर्मि न स्वपिमि इत्येवमब्रवीत् 'तथैव' इतिपाठे यथा त्वं तथैवाहमार्यं विचिन्तयन्नित्यर्थः । चरमपर्वनिष्ठस्य प्रथमपर्वाभिनिवेशस्तत्प्रीत्यर्थतयेति व्यञ्जितं तदवस्थं तु भरतं शत्रुघ्नोऽनन्तरस्थित इति हि पूर्वमप्युक्तम् ॥३॥

रा० टी०-इतीति । नरसिंहयोः पुरुषश्रेष्ठयोः भरतशत्रुघ्नयोः एवमनेन प्रकारेण अन्योन्यं संवदतोः सतोः प्राञ्जलिः गुहः आगम्य इति इदं वचनमब्रवीत् ॥ ४ ॥

गो० टी०-इतीति । संवदतोः सतोः काले गमनोचितकाले ॥ ४ ॥

५] ति० टी०-शर्वरीमवात्सीः अत्यन्तसंयोगे द्वितीया॥५॥

रा० टी०-तद्वचनाकारमाह-कच्चिदिति । हे काकुत्स्थ भरत! नदीतीरे सुखं कच्चित् अवात्सीः सहसैन्यस्य तव कच्चित्नित्यमनामयं रोगादिराहित्यम् । कच्चिदिति प्रश्ने ॥ ५ ॥

गो० टी०-कच्चिदिति । शर्वरीं तावत् शर्वर्या साकल्येन 'यावत्तावच्च साकल्ये' इत्यमरः । सहसैन्यस्य ते सेनासहितस्य तव सर्वसमुपकरणम् अनामयं निरुपद्रवम् ॥ ५ ॥

६] ति० टी०-रामस्यानुवशो रामाधीनः ॥ ६ ॥

रा० टी०-गुहस्येति । स्नेहादुदीरितमुच्चारितं गुहस्य इदं वचनं श्रुत्वा रामस्य अनुवशः अनुचरः भरतोऽपि इदं वचनमब्रवीत् ॥ ६ ॥

गो० टी०-गुहस्येति । रामस्यानुवशः रामायत्तः ॥ ६ ॥

७] ति० टी०-ते त्वया पूजिताः ॥ ७ ॥

रा० टी०-तद्वचनाकारमाह-सुखेति । हे धीमन्! ये वयं सुपूजिताः तेषां नः अस्माकं शर्वरी रात्रिः सुखाऽभवदिति शेषः, बह्वीभिः नौभिः दाशाः कैवर्तकाः गङ्गां नः संतारयन्तु ॥ ७ ॥

गो० टी०-सुखेति । सुखा सुखावहा जातेति शेषः, राजन्निति रामभक्ततया स्तौति ते त्वया ॥ ७ ॥

८-९] ति० टी०-प्रतिप्रविश्य ततो निवृत्तिपूर्वकं प्रविश्य ॥ ८ ॥ ९ ॥

रा० टी०-तत इति । गुहः भरतशासनं श्रुत्वा ततः संतारणहेतोः नगरं प्रति प्रविश्य तं ज्ञातिजनमब्रवीत् ॥ ८ ॥

गो० टी०-तत इति । प्रतिप्रविश्य पुनः प्रविश्य ॥ ८ ॥

रा० टी०-तद्वचनाकारमाह-उत्तिष्ठतेति । उत्तिष्ठत प्रबुध्यध्वं यूयमिति शेषः । नावः नौकाः समुपकर्षध्वं वाहिनीं गङ्गां तारयिष्यामि भरतसेनामिति शेषः ॥ ९ ॥

गो० टी०-उत्तिष्ठतेति । प्रबुध्यध्वम् उत्तिष्ठतेति क्रमः तारयिष्यामेत्यत्र विसर्गलोप आर्षः । 'तारयिष्यामि' इति च पाठः ॥ ९ ॥

१०] ति० टी०-नावां पञ्चशतानि समानिन्युः ॥ १० ॥

रा० टी०-ते इति । तथोक्तास्ते कैवर्तकाः राजशासनात् त्वरिताः सन्तः नावां पञ्चशतानि स्वस्तिकविज्ञेयाः स्वस्तिकेन नाम्ना राजनौकाबोधकचिह्नविशेषेण वा विज्ञेयो विज्ञानं यासां ताः महाघण्टाधराः बृहद्घण्टाविशिष्टाः पुरुषास्तान् आसमंतात्भावेन धरन्ति ताः पताकिन्यः पताकाविशिष्टाः युक्तवाहाः युक्ताः वाहाः वाहकाः यासु ताः सुसंहताः दृढबन्धनादियुक्ताः शोभमानाः अन्याः ताभ्यो विलक्षणाश्च नावः समानिन्युः । 'युक्तवाता' इति पाठान्तरम् । श्लोकद्वयमेकान्वयि ॥१०॥११॥

गो० टी०-त इति । नावां पञ्चशतानीत्यन्वयः, समन्ततः सर्वावतारेभ्यः ॥ १० ॥

११] ति० टी०-अन्याः पञ्चशतनौकाभ्योऽन्याः

१ तमेवेति गो. पाठः । २ भ्रात्रेति गो. पाठः । ३ ऽपीति गो. पाठः । ४ भरतमिति गो. पाठः । ५ ते इति गो. पाठः । ६ तावत्सर्वमिति गो. पाठः । ७ राजन्निति गो. पाठः । ८ त्वरितमिति गो पाठः । ९ समनुकर्षध्वं तारयिष्यामेति गो. पाठः । १० आश्रिति गो. पाठः । ११ पताकाभिर्युक्ता वाता इति गो. वाता इति रा. पाठः ।

ततः स्वस्तिकविज्ञेयां पाण्डुकम्बलसंवृताम् । सनन्दिघोषां कल्याणीं गुहो नावमुपाहरत् ॥ १२ ॥
तामारुरोह भरतः शत्रुघ्नश्च महाबलः । कौसल्या च सुमित्रा च याश्चान्या राजयोषितः ॥ १३ ॥
पुरोहितश्च तत्पूर्वं गुरवो ब्राह्मणाश्च ये । अनन्तरं राजदारास्तथैव शकटापणाः ॥ १४ ॥
आवासमादीपयतां तीर्थं चाप्यवगाहताम् । भाण्डानि चाददानानां घोषस्तु दिवमस्पृशत् ॥ १५ ॥
पताकिन्यस्तु ता नावः स्वयं दाशैरधिष्ठिताः । वहन्त्यो जनमारूढं तदा संपेतुराशुगाः ॥ १६ ॥
नारीणामभिपूर्णास्तु काश्चित्काश्चित्तु वाजिनाम् । काश्चित्तत्र वहन्ति स्म यानयुग्यं महाधनम् ॥ १७ ॥

स्वस्तिकविज्ञेयाः स्वस्तिकाख्यया लोकप्रसिद्धा राजार्हनौभेदाः महाघण्टां धारयन्ति ता महाघण्टाधराः पताकास्ता धारयन्तीत्यर्थः । शोभमानाः स्वर्णादिरूपितचित्रैः शोभमानाः पताकिन्यो बह्वरित्रवत्यः अरित्रं नावाकर्षणदण्डः युक्तवाहा नौवहने नाविकवत्यः । 'युक्तवाताः' इति पाठे युक्तगतयः सुसंहता दृढसंधिबन्धाः ॥ ११ ॥

गो० टी०–अन्या इति । अन्याः क्षुद्राभ्यः पञ्चशतनौभ्यः अन्याः स्वस्तिकविज्ञेयाः 'स्वस्तिकः सर्वतोभद्रः' इत्युक्तस्वस्तिकाख्यरचनाविशेषविशिष्टतया निर्मितत्वात् स्वस्तिका इति विज्ञेयाः ताश्च नौद्वयसंघटनेन संपद्यन्ते चतुर्षु कोणेषु महाघण्टाधराः वराः राजार्हतया श्रेष्ठाः शोभमानाः कनकरूपितत्वया शोभमानाः युक्तवाताः फलककुड्यकरणेन मध्ये मध्ये गवाक्षनिर्माणेन च महावातनिवारणादुचितवाताः सुसंहताः राजरोहणस्थानत्वेनायसकीलादिभिर्दृढसंधिबन्धाः अत्रापि नाव आनिन्युरित्युत्कृष्यते ॥ ११ ॥

१२–१३] ति० टी०–सनन्दिघोषामुपरिप्रतिष्ठितमङ्गलवादित्रघोषसहितां ततः इतरस्वस्तिकाभ्यो विलक्षणां स्वस्तिकाख्यां पाण्डुकम्बलो राजास्तरणकम्बलस्तद्वतीं राजार्हां नावं गुहः स्वयमेवोपाहरत् ॥ १२ ॥ १३ ॥

रा० टी०–तत इति । ततः सर्वनौकासमानयनानन्तरं पाण्डुकम्बलेन राजोचितास्तरणीभूतकम्बलविशेषेण संवृतां सनन्दिघोषां सनन्दी आनन्दजनकः घोषो यस्यां तां स्वस्तिकविज्ञेयां नावमुपाहरत् ॥ १२ ॥

रा० टी०–तामिति । तां स्वस्तिकाख्यां नावं भरतादिः आरुरोह ॥ १३ ॥

गो० टी०–तत इति । ततः तासु स्वस्तिकविज्ञेयादिषु मध्ये पाण्डुकम्बलेन संवृताम् आच्छन्नतलप्रदेशां सनन्दिघोषां हर्षजनककिङ्किण्यादिघोषयुक्तां कल्याणीं शोभनाम् ॥ १२ ॥

गो० टी०–भरतशत्रुघ्नव्यतिरिक्तानामन्यासु नौष्वारोहणक्रममाह–कौसल्येत्यादिना । राजयोषितः आगता इति शेषः, तत्पूर्वं तासां पूर्वं पुरोहितो गुरवो ब्राह्मणाश्च ये आगतास्ते आरुरुहुः, अनन्तरं राजदाराः कौसल्यादयः आरुरुहुः तथैव शकटापणाः शकटाश्चापणस्थपदार्थाश्चारुरुहुः, एतदारोहणं कर्तृद्वारा ॥ १३ ॥

१४] ति० टी०–तत्पूर्वं समातृकभरतारोहात्पूर्वमनन्तरं तेषां तासां चानन्तरम् । राजदारा अनुचरप्रमुखियः । शकटान्यापणाः पण्यानीतरनौष्वारोपिता इति शेषः ॥ १४ ॥

रा० टी०–पुरोहित इति । तत्पूर्वं भरतसहितकौशल्यारोहणात्पूर्वस्मिन्काले पुरोहितो वशिष्ठः गुरवः महान्तः ब्राह्मणाश्च ये सन्ति तेऽप्यारुरुहुः । अनन्तरं भरतसहितकौशल्यारोहणादव्यवहितोत्तरकाले राजदाराः राजकुलस्त्रियः आरुरुहुः, तथा तदनन्तरं शकटापणाः शकटाः आपणाः आपणसामग्र्यश्च आरुरुहुः ॥ १४ ॥

१५] ति० टी०–आवासमुषितावासमादीपयतामग्निसात्कुर्वताम् अयं सेनाधर्मः । तीर्थं नद्यवतारमवगाहतामहमहमिकया विशताम्, भाण्डान्युपकरणानि ॥ १५ ॥

रा० टी०–आवासमिति । आवासं निवासस्थानमादीपयतां वस्तुनिरीक्षणार्थं महादीपादिना प्रकाशं कुर्वतां तीर्थं गङ्गामवगाहतां च भाण्डानि पाकसाधनानि आददानानां गृह्णतां च घोषः शब्दस्तु दिवं स्वर्गमस्पृशत् ॥ १५ ॥

गो० टी०–आवासमिति । आवासं सेनानिवेशम् आदीपयतामग्निना ज्वलयतां राजभटा हि निर्गमनकाले श्रीसमागमार्थमावासं दहन्तीति प्रसिद्धिः । तीर्थम् अवतरणप्रदेशम् अवगाहतां नावारोहणार्थमहमहमिकया आगच्छतामित्यर्थः, स्नानं कुर्वतामिति वा, भाण्डानि उपकरणानि आददानानां मदीयमिदं मदीयमिदमिति त्वरया स्वीकुर्वतां जनानां घोषः त्रिदिवमस्पृशत् महान् घोषो जात इत्यर्थः ॥ १५ ॥

१६] ति० टी०–आशुगाः शीघ्राः ॥ १६ ॥

रा० टी०–पताकिन्य इति । दाशैर्धीवरैः अधिष्ठितास्ताः भरतादिभिरारूढा आशुगाः पताकिन्यो नावस्तु वहन्त्यः सत्यः जनं भरतादिं स्वयं संपेतुः अनायासेन उत्तारयामासुरित्यर्थः ॥ १६ ॥

गो० टी०–पताकिन्य इति । पताकिन्यः वाय्वाकर्षणार्पकृतपताकाः स्वयं संपेतुः आशुगत्वेन दाशाधिष्ठानमात्रेणानायासेन जग्मुरित्यर्थः ॥ १६ ॥

१७] ति० टी०–नारीणामित्यादौ तृतीयार्थस्य शेषत्वविवक्षायां षष्ठी नारीभिः पूर्णा इत्यार्थः । यानानि शकटादीनि, युग्या अश्वाश्वतरबलीवर्दाद्याः । महाधनं बहुमूल्यम् यद्वा महाधनं जीवाजीवरूपनानाप्रकारम् ॥ १७ ॥

१ त्रिदिवमिति गो. पाठः । २ चेति गो. पाठः । ३ अत्रेति गो. पाठः । ४ युग्यमहाधनमिति रा. पाठः ।

तास्तु गत्वा परं तीरमवरोप्य च तं जनम् । निवृत्ता काण्डचित्राणि क्रियन्ते दाशबन्धुभिः ॥ १८ ॥
सवैजयन्तास्तु गजा गजारोहैः प्रचोदिताः । तरन्तः स्म प्रकाशन्ते सपक्षा इव पर्वताः ॥ १९ ॥
नावश्चारुरुहुस्त्वन्ये प्लवैस्तेरुस्तथापरे । अन्ये कुम्भघटैस्तेरुरन्ये तेरुश्च बाहुभिः ॥ २० ॥
सा पुण्या ध्वजिनी गङ्गां दाशैः संतारिता स्वयम् । मैत्रे मुहूर्ते प्रययौ प्रयागवनमुत्तमम् ॥ २१ ॥
आश्वासयित्वा च चमूं महात्मा निवेशयित्वा च यथोपजोषम् ।
द्रष्टुं भरद्वाजमृषिप्रवर्यं ऋत्विक्सदस्यैरवृतः प्रतस्थे ॥ २२ ॥

रा० टी०—नारीणामिति । काश्चिन्नावस्तु नारीणां नारीभिः अभिपूर्णाः काश्चित्तु वाजिनामभिपूर्णाः काश्चित्तु महाधनं बहुधनविशिष्टं यानयुग्यं यानानि रथादीनि युग्यानि अश्वबलीवर्दादयस्तेषां समाहारस्तत् वहन्ति स्म ॥ १७ ॥

गो० टी०—संप्रति ता नावः कीदृग्विधा इत्यपेक्षायामाह—नारीणामित्यादि । नारीणामभिपूर्णाः नारीभिरभिपूर्णाः वाजिनामभिपूर्णाः आरोहणार्हवाजिभिरभिपूर्णाः "दध्नः पूर्णः" इति महाभाष्यकारवचनप्रामाण्यात् पूर्णशब्दयोगे पूरणगुणेत्यादिना षष्ठी तृतीयार्थे षष्ठी वा । यानयुग्यं यानानि रथशकटादीनि युग्यानि अश्वतरबलीवर्दादीनि सर्वो द्वन्द्वो विभाषकयैकवद्भवतीत्येकवद्भावः महाधनं बहुमूल्यम् 'बहुमूल्यं महाधनम्' इत्यमरः ॥ १६ ॥

१८] ति० टी०—तं जनमवरोप्य निवृत्ताः नावः समरुह्य दाशबन्धुभिः क्रीडार्थं काण्डचित्राणि काण्डे जले चित्राणि चित्रगमनानि लघुत्वात्क्रियन्ते स्मेत्यर्थः । 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः ॥ १८ ॥

रा० टी०—ता इति । परं तीरं गत्वा तं स्वेषु स्थितं जनमवरोप्य निवृत्तास्ताः भरताधिष्ठिताः नावः दाशबन्धुभिः काण्डचित्राणि काण्डे जले चित्राणि खेलनोपस्करणानि क्रियन्ते 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः॥१८॥

गो० टी०—ता इति । काण्डचित्राणि काण्डे वारिणि चित्राणि चित्रगमनानि क्रियन्ते अक्रियन्त "काण्डोऽस्त्रीदण्डबाणार्ववर्गावसरवारिषु" इत्यमरः । दाशबन्धुभिः दाशाभासैः दासस्य गुहस्य बन्धुभिरिति वा भावाभावकृतलाघवातिशयेन निवर्तनकाङ्क्षिकदाशलीलोच्यते ॥ १७ ॥

१९] ति० टी०—सवैजयन्ताः सध्वजाः ॥ १९ ॥

रा० टी०—सेति । गजारोहैः प्रचोदिताः प्रेरिताः सवैजयन्ताः ध्वजसहितास्तरन्तो गजाः सपक्षाः पर्वता इव प्रकाशन्ते स्म ॥ १९ ॥

गो० टी०—सवैजयन्ता इति । सवैजयन्ताः सपताकाः सगृहा वा राजानो हि गजोपरि गृहाणि निर्माय गच्छन्ति तरन्तः प्लवन्तः 'तॄ प्लवनतरणयोः' । सध्वजाः सगमनाः 'ध्वज गतौ' जङ्गमपर्वता इव प्रकाशन्ते इत्यर्थः ॥ १८ ॥

२०] ति० टी०—प्लवा वेणुतृणादिनिर्मिताः । कुम्भा महान्तः, घटाः स्वल्पा विपरीतं वा ॥ २० ॥

रा० टी०—तरणप्रकारमेवाह—नाव इति । अन्ये बहवः नावमारुरुहुः अपरे प्लवैः वेणुतृणादिनिर्मितैस्तेरुः अन्ये कुम्भघटैः घटयुक्तघटैस्तेरुः अन्ये बाहुभिस्तेरुः ॥ २० ॥

गो० टी०—नाव इति । नावः क्षुद्रनावः प्लवैस्तृणकाष्ठनिर्मितैः कुम्भघटैः कुम्भरूपघटैः सूक्ष्मवदना घटाः कुम्भाः ते हि तरणसाधनानि न घटमात्रं, बाहुभिः केवलबाहुभिः ॥ १९ ॥

२१] ति० टी०—मैत्रे मुहूर्ते उदयात्तृतीयमुहूर्ते । नाडीद्वयं मुहूर्तः 'रौद्रः सार्पस्तथा मैत्रः पैत्रो वासव एव च । आर्यो वैश्यस्तथा ब्राह्मः प्राजो रौद्रोऽग्निरेव च ॥ ऐन्द्रोऽथ निर्ऋतिश्चैव वारुणो यमसाधकौ । एते क्रमेण विज्ञेया मुहूर्ता दश पञ्च च ॥' इत्युक्तेः ॥ २१ ॥

रा० टी०—सेति । पुण्या नित्यं वसिष्ठादिसंसर्गेण पूता दाशैः कैवर्तकैः स्वयं गङ्गां संतारिता ध्वजिनी सा सेना मैत्रे मैत्रसंज्ञके मुहूर्ते सूर्योदयात्तृतीये घटिकाद्वयात्मके उत्तमं प्रयागवनं प्रययौ, एतेन मुहूर्तद्वयेन गङ्गासंतरणमिति सूचितम । 'रौद्रः सार्पस्तथा मैत्रो पौत्रो वासव एव च । आर्यो वैश्यस्तथा ब्राह्मः प्राजो रौद्रोऽग्निरेव च । ऐन्द्रोऽथ निर्ऋतिश्चैव वारुणो यमसायकौ । एते क्रमेण विज्ञेया मुहूर्ता दश पञ्च च॥' इति वचनमिति ॥ २१ ॥

गो० टी०—सेति । पुण्या गङ्गास्नानादिना पूता ध्वजिनी सेना स्वयं नतु परप्रेरणेन मैत्रे मुहूर्ते दिवसस्य पञ्चदशभागेषु घटिकाद्वयात्मके तृतीये मुहूर्ते 'द्वे तु नाड्यौ मुहूर्तोऽस्त्री' इति वैजयन्ती । मुहूर्तसंख्योक्ता बृहस्पतिना—'रौद्रः सार्पस्तथा मैत्रः पैत्रो वासव एव च । आप्यो वैश्यस्तथा ब्राह्मप्राजेशैन्द्रास्तथैव च ॥ ऐन्द्राग्नो नैर्ऋतश्चैव वारुणार्यमणो भगी । एतेऽह्नि क्रमशो ज्ञेया मुहूर्ता दश पञ्च च॥' इति।पाठभेदः तस्य मैत्रनामत्वं विन्ध्यमाधवीये प्रोक्तं यथा 'आर्द्रोरगमित्रमघावसुजलविश्वाभिजिद्विरिञ्चैन्द्राः। ऐन्द्राग्नमूलवरुणार्यमभगयुक्ता दिवा मुहूर्ताः स्युः॥' इति ॥ मैत्रे मुहूर्ते तारिता सती प्रयागवनं ययावित्यन्वयः घटिकाषट्क एव गङ्गातरणमिति भावः, यद्वा मैत्रे प्रयागवनं ययावित्यन्वयः तत्रातित्वेन निरवधिकभोगलाभात् मुहूर्तविशेषोक्तिः ॥ २० ॥

२२] ति० टी०—यथोपजोषं यथासुखमाश्वासयित्वा विश्राम्य निवेशयित्वा प्रयागवने स्थापयित्वा ॥ २२ ॥

१ स्मेति गो. पाठः । २ गजारोहप्रचोदिता इति गो. पाठः । ३ सध्वजा इति गो. रा. पाठः । ४ चान्ये इति गो. पाठः । ५ गङ्गेति गो. पाठः । ७ प्लवैरिति गो. रा. पाठः । ८ कृतः सन्निति गो. पाठः ।

स ब्राह्मणस्याश्रममभ्युपेत्य महात्मनो देवपुरोहितस्य ।
ददर्श रम्योटजवृक्षदेशं महद्वनं विप्रवरस्य रम्यम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोनन्नवतितमः सर्गः ॥ ८९ ॥

नवतितमः सर्गः ।

आश्रमाद्बहिः क्रोशमात्रे भरतः सेनां संस्थाप्य तत्समीपं प्राप । वसिष्ठभरद्वाजयोः परस्परसत्कारसमनन्तरं कृतपादाभिवन्दानं रतं कुशलप्रश्नपूर्वकं कस्ते रामविषयकोऽभिप्राय इति प्रश्ने खिद्यमानो भरतो राममयोध्यां निनीषुरहं तद्वसतिं जिज्ञास इति ब्रुवन्तं भरतं चित्रकूटगिरौ स्थितं रामं श्वःप्रभाते द्रष्टुमर्हसीति भरद्वाजः समादिदेश ।

भरद्वाजाश्रमं गत्वा क्रोशादेव नरर्षभः । जैनं सर्वमवस्थाप्य जगाम सह मन्त्रिभिः ॥ १ ॥
पद्भ्यामेव तु धर्मज्ञो न्यस्तशस्त्रपरिच्छदः । वसानो वाससी क्षौमे पुरोधाय पुरोहितम् ॥ २ ॥

रा० टी०–आश्वासयित्वेति । महात्मा भरतः चमूं सेनामाश्वासयित्वा आश्वास्य यथोपजोषं यथासुखं निवेशयित्वा निवेश्य प्रस्थाप्य ऋषिप्रवर्यं भरद्वाजं द्रष्टुं प्रतस्थे 'तूष्णीमथें सुखे जोषम्' इति वैजयन्ती ॥ २२ ॥

गो० टी०–आश्वासयित्वेति । आश्वासयित्वा सान्त्वयित्वा यथोपजोषं यथासुखम् 'तूष्णीमथें सुखे जोषम्' इति वैजयन्ती । ऋषिप्रवर्यम् ऋषिश्रेष्ठम् पाठभेदः 'आश्वासयित्वा' इति महात्मा महामतिः स्वयं खिन्नोऽपि अखिन्न इव पराश्वासनपरः भरतः राज्यभरणदक्षः भरत इति राज्यस्य भरणादिति सहस्रानीकवचनात्, चमूं महाजनम् अविशेषेण आश्वासयित्वा महानायासो वो जात इति प्रियोक्तिभिः सान्त्वयित्वा यथोपजोषं यथासुखं निवेशयित्वा यत्र प्रदेशे तेषां सुखं भवति तत्र प्रदेशे तान्निवेशयित्वा प्रवर्षं प्रकृष्टवर्षं बहुवयस्कमिति यावत् "भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास तं ह जीर्णं स्थविरं शयानम्" इति श्रुतेः एतेन वयोवृद्धत्वमुक्तम् । ज्ञानवृद्धत्वमाह–ऋषिमिति । 'ऋष दर्शने' इति धातुः भरद्वाजम् "बृहतो भरद्वाजः" इति श्रुतिप्रसिद्धं द्रष्टुं दर्शनपूर्वकमभिवन्दितुं तादृशस्य ऋषेर्विना तवेषद्दर्शनीयत्वेन ऋत्विग्भिर्वसिष्ठादिभिः वृतः सन् प्रतस्थे पद्भ्यामेव जगाम ॥ २१ ॥

२३] ति० टी०–देवपुरोहितस्य । भरद्वाजो श्रुतथ्यभार्यायां ममतायां बृहस्पतेर्जात इति पुराणे प्रसिद्धम् । तं च भर्तृभिया त्यक्तुकामां ममतां देवा ऊचुः—'उतथ्यस्य क्षेत्रजत्वेन बृहस्पतेरौरसत्वेन भरद्वाजानामसुं भर' इति । तस्माद्भरद्वाज इति तस्य नाम ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

रा० टी०–स इति । स भरतः महात्मनो देवपुरोहितस्य उतथ्यभार्यायां बृहस्पतिजनितत्वेन देवपुरोहितत्वं प्राप्तस्य विप्रवरस्य साङ्गवेदाभ्यासिश्रेष्ठस्य ब्राह्मणस्य परब्रह्मवेदितुः भरद्वाजस्य आश्रममभ्युपेत्य प्राप्य रम्योटजवृक्षदेशं रम्यपर्णशालासहितवृक्षसामीप्यविशिष्टं रम्यं महद्वनं ददर्श ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

गो० टी०–स ब्राह्मणस्येति । ब्राह्मणस्य ब्रह्म वेदः तदधीते ब्राह्मणः "तदधीते तद्वेद" इत्यण्प्रत्ययः अधीतबहुवेदस्येत्यर्थः । "भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास" इत्यादिना काठके तथाभिधानात् महात्मनो महाज्ञानस्य देवपुरोहितस्य बृहस्पतिपुत्रत्वेन देवपुरोहितत्वम् 'आत्मा वै पुत्रनामासि' इतिन्यायात् भरद्वाजो ममताख्यायाश्चोचथ्यभार्यायां बृहस्पतेर्जात इति भागवते प्रसिद्धम् । आश्रममभ्युपेत्य आश्रममुद्दिश्य गत्वा प्रथमं तस्य महद्वनं ददर्श । पाठभेदः स इति ब्राह्मणस्य ब्रह्म परमात्मानं वेत्तीति ब्राह्मणः "तदधीते तद्वेद" इत्यण्प्रत्ययः । उत्तरसर्गरीत्या समाधिबलेन समस्तवस्त्वाद्यानज्ञमस्येत्यर्थः, यद्वा "ब्रह्मबृहस्पतिः" इति श्रुत्या ब्रह्मणो बृहस्पतेरपत्यं ब्राह्मणस्तस्य महात्मनः महास्वभावस्य अचिन्त्यशक्तेरित्यर्थः, देवपुरोहितस्य देवपुरोहितपुत्रत्वात् "आत्मा वै पुत्रनामासि" इति श्रुतेः विप्रवरस्य निरवधिकवेदाध्ययनसंपन्नस्य जन्मना जायते शूद्रः कर्मणा जायते द्विजः । वेदाभ्यासेन विप्रत्वं ब्रह्म जानाति ब्राह्मणः ॥' इत्यादिस्मृतेः । श्रुतिश्चास्य निरवधिकवेदाध्ययनसंपत्तिं दर्शयति–"भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमनेन कुर्या इति ब्रह्मचर्यमेवैनेन चरेयमिति होवाच" इत्यादिना । आश्रममभ्युपेत्य प्राप्य रम्योटजवृक्षखण्डरमणीयपर्णशालाप्रान्तवर्तिवृक्षसमूहयुक्तं रम्यं स्वत एव मनोज्ञप्रदेशं महत् स्वसेनानिवेशक्षमं वनं ददर्श ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोननवतितमः सर्गः ॥ ८९ ॥

१] ति० टी०–जगाम द्रष्टुमिति शेषः । अवस्थाप्य आश्रमोपरोधनिवृत्तय इति शेषः ॥ १ ॥

२] ति० टी०– पद्भ्यामिति विनयप्रदर्शनार्थम् ॥ २ ॥

१ द्रष्टेति गो. पाठः । २ वनमिति गो. पाठः । ३ हीति गो. पाठः । ४ पुरोधसमिति गो. पाठः ।

ततः संदर्शने तस्य भरद्वाजस्य राघवः । मन्त्रिणस्तानवस्थाप्य जगामानुपुरोहितम् ॥ ३ ॥
वसिष्ठमथ दृष्ट्वैव भरद्वाजो महातपाः । संचचालासनात्तूर्णं शिष्यानर्घ्यमिति ब्रुवन् ॥ ४ ॥
समागम्य वसिष्ठेन भरतेनाभिवादितः । अबुध्यत महातेजाः सुतं दशरथस्य तम् ॥ ५ ॥
ताभ्यामर्घ्यं च पाद्यं च दत्त्वा पश्चात्फलानि च । आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले ॥ ६ ॥
अयोध्यायां बले कोशे मित्रेष्वपि च मन्त्रिषु । जानन्दशरथं वृत्तं न राजानमुदाहरत् ॥ ७ ॥
वसिष्ठो भरतश्चैनं पप्रच्छतुरनामयम् । शरीरेऽग्निषु [1]शिष्येषु वृक्षेषु मृगपक्षिषु ॥ ८ ॥
तथेति तु प्रतिज्ञाय भरद्वाजो महायशाः । भरतं प्रत्युवाचेदं राघवस्नेहबन्धनात् ॥ ९ ॥
किमिहागमने कार्यं तव राज्यं प्रशासतः । एतदाचक्ष्व सर्वं मे न हि मे शुध्यते मनः ॥ १० ॥

रा० टी०–भरद्वाजाश्रमगमनप्रकारं वर्णयन्नाह–भरद्वाजेत्यादिभिः । क्रोशात्क्रोशपरिमितभूमेः भरद्वाजाश्रमं गत्वा ज्ञात्वा दृष्ट्वेत्यर्थः, सर्वं जनमवस्थाप्य न्यस्तशस्त्रपरिच्छदः न्यस्ताः परित्यक्ताः शस्त्रपरिच्छदाः येन सः क्षौमे वाससी वसानः धर्मज्ञो भरतः पुरोहितं वसिष्ठं पुरोधाय अग्रे कृत्वा मन्त्रिभिः सह पद्भ्यामेव जगाम । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–भरद्वाजाश्रममित्यादि । श्लोकद्वयमेकान्वयम् । क्रोशादेव क्रोशात्पूर्वमेव क्रोशमात्रव्यवहितदेश इत्यर्थः, न्यस्तशस्त्रपरिच्छदः परिच्छदः आभरणादिकं भृङ्गारादयुपकरणजातं च वसानो वाससी क्षौमे भरद्वाजसेवार्थमुष्णीषकञ्चुकादिकमपहाय परिधानमुत्तरीयं च धृत्वा गत इत्यर्थः । ननु पूर्वं जटाचीराणि धारयन्नित्युक्तं जटिलं चीरवसनमिति च वक्ष्यति कथमत्र क्षौमवाससस्त्वमुच्यते नैष दोषः पूर्वं प्रतिज्ञामात्रं कृतं भरद्वाजाश्रमात्परं जटाधारणमिति पुरोधाय पुरस्कृत्य ॥१॥२॥

३] ति० टी०–ततः संदर्शने आश्रमप्रवेशानन्तरमृषिदर्शनावसरे अनुपुरोहितं पुरोहितस्य पश्चात् ॥ ३ ॥

रा० टी०–तत इति । ततः आश्रमसमीपप्राप्त्यनन्तरं राघवो भरतः तान्सहागतान्मन्त्रिणः अवस्थाप्य संस्थाप्य अनुपुरोहितं पुरोहितस्य वसिष्ठस्य पश्चात्तस्य भरद्वाजस्य संदर्शने संदर्शनार्थं जगाम 'हर्षवान् दर्शने तस्य' इति भूषणपाठः ॥ ३ ॥

गो० टी०–तत इति । संदर्शने दूरादर्शने राघवः रघुवंशवृत्ताभिज्ञः अनुपुरोहितं पुरोहितस्य पश्चात् अनोः पश्चादर्थेऽव्ययीभावः ॥ ३ ॥

४] ति० टी०–शिष्यान्प्रति अर्घ्यमानयतेति ब्रुवन् ॥४॥

रा० टी०–वसिष्ठमिति । अथ स्वाश्रमागमनानन्तरं वसिष्ठं दृष्ट्वैव अर्घ्यं तूर्णमानयेति शिष्यान् ब्रुवन्सन् तूर्णमासनात्संचचाल । तूर्णमित्युभयान्वयि, आनयेति शेषः ॥ ४ ॥

गो० टी०–वसिष्ठमिति । संचचाल उदतिष्ठत् अर्घ्यम् आनयतेति शेषः ॥ ४ ॥

५] ति० टी०–अबुध्यत वसिष्ठेन सहागमनादिति शेषः॥५॥

रा० टी०–समागम्येति । भरतेन अभिवादितः महातेजाः भरद्वाजः वसिष्ठेन समागम्य परस्परं नमस्कारपूर्वकमालिङ्ग्य तं भरतं दशरथस्य सुतमबुध्यत ॥ ५ ॥

गो० टी०–समागम्येति । सवयस्कत्वान्नमस्काराभावः अबुध्यतेति वसिष्ठसाहचर्यादिति भावः ॥ ५ ॥

६] ति० टी०–ताभ्यां वसिष्ठभरताभ्याम् । आनुपूर्व्यात्क्रमेण प्रथमं ब्राह्मणस्य पश्चात्क्षत्रियस्य कुले गृहे ॥ ६ ॥

रा० टी०–ताभ्यामिति । ताभ्यां गुरुशिष्याभ्यामर्घ्यं पाद्यं च पश्चात्फलानि च आनुपूर्व्यात् क्रमशो दत्त्वा धर्मज्ञो भरद्वाजः कुले उभयोर्वंशे अयोध्यादिषु च कुशलं पप्रच्छ, दशरथं वृत्तं साकेतभोगे प्रवृत्तं जानन्सन् नोदाहरदपृच्छत् । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०–ताभ्यामिति । आनुपूर्व्यात् प्रधानक्रमात् धर्मज्ञः पूजाक्रमधर्मज्ञः, कुले गृहे ॥ ६ ॥

७] ति० टी०–वृत्तमतीतम् अत एव राजानं नोदाहरद्राजकुशलं न पृष्टवान् ॥ ७ ॥

गो० टी०–अयोध्यायामिति । वृत्तमतीतं मृतमिति यावत् नोदाहरत् तत्प्रसङ्गमेव न कृतवान् ॥ ७ ॥

८] ति० टी०–शरीरादित्रयस्य यथायोगं तपःसाधनत्वात्तदनामयप्रश्नः, मृगपक्षिणामभयावस्थानद्वारा धर्मसाधनत्वाच्छिष्यवत्प्रियत्वाच्च तदनामयप्रश्नः ॥ ८ ॥

रा० टी०–वसिष्ठ इति । वसिष्ठो भरतश्च एनं भरद्वाजं शरीरादिषु अनामयं कुशलं पप्रच्छतुः ॥ ८ ॥

गो० टी०–तपोधनानां शरीराग्न्यादेः तपःसाधनत्वान्मृगपक्ष्यादीनामाश्रमवासित्वेन शिष्यवत्प्रीतिविषयत्वाच्च तद्विषयः प्रश्नः कृत इत्याह–वसिष्ठ इत्यादिना ॥ ८ ॥

९] ति० टी०–तथेति प्रतिज्ञायानामयमित्युक्त्वा राघवो रामः ॥ ९ ॥

रा० टी०–तथेति । महायशाः भरद्वाजस्तथा कुशलमस्तीति प्रतिज्ञाय उक्त्वा राघवस्नेहबन्धनात् राघवे रामे स्नेहबन्धनात्स्नेहानुवृत्तेर्हेतोः भरतमिदं प्रत्युवाच ॥ ९ ॥

गो० टी०–तथेति । तथेति तत्प्रतिज्ञाय सर्वत्र तत्पृष्टमनामयमङ्गीकृत्य राघवस्नेहबन्धनात् राघवविषये स्नेहानुबन्धनात् नतु भरते दोषदर्शनात् ॥ ९ ॥

१०] ति० टी०–न शुध्यते न विश्वसिति ॥ १० ॥

१ पक्षिष्विति रा. पाठः । २ वृक्षेषु मृगेष्वपि च पाक्षष्विति रा. पाठः । ३ तदिति गो. पाठः । ४ तपा इति गो. पाठः ।

सुषुवे यममित्रघ्नं कौसल्याऽऽनन्दवर्धनम् । भ्रात्रा सह सभार्यो यश्चिरं प्रव्राजितो वनम् ॥ ११ ॥
नियुक्तः स्त्रीनिमित्तेन[1] पित्रा योऽसौ महायशाः । वनवासी भवेतीह समाः किल चतुर्दश ॥ १२ ॥
कच्चिन्न तस्यापापस्य पापं कर्तुमिहेच्छसि । अकण्टकं भोक्तुमना राज्यं तस्यानुजस्य च ॥ १३ ॥
एवमुक्तो भरद्वाजं भरतः प्रत्युवाच ह । पर्यश्रुनयनो दुःखाद्वाचा संसज्जमानया ॥ १४ ॥
हतोऽस्मि यदि मामेवं भगवानैपि[2] मन्यते । मत्तो न दोषमाशङ्के[3] मैवं मामनुशाधि हि ॥ १५ ॥
न चैतदिष्टं माता मे यदवोचन्मदन्तरे । नाहमेतेन तुष्टश्च न तद्वचनमाददे ॥ १६ ॥
अहं तु तं नरव्याघ्रमुपयातः प्रसादकः । प्रतिनेतुमयोध्यायां[4] पादौ चास्याभिवदितुम् ॥ १७ ॥

रा० टी०—तत्प्रतिवचनाकारमाह—किमिति । राज्यं प्रशाससत्त्व इहागमने कार्यं प्रयोजनं किम् एतन्मत्पृष्टं सर्वमाचक्ष्व । तत्र हेतुः मे मनो न शुध्यते प्रयोजनशङ्कातो न निवर्तते ॥ १० ॥

गो० टी०—किमिति । न शुध्यते शुद्धिं न प्राप्नोति न विश्वसितीति यावत् ॥ १० ॥

११] ति० टी०—अविश्वासबीजमाह—सुषुवे इति । कौसल्या यं सुषुवे । चिरं चिरकालमुद्दिश्य प्रव्राजितः ॥११॥

रा० टी०—शुद्ध्यभावे हेतुं वदन्नाह—सुषुव इति । आनन्दवर्धनममित्रघ्नं यं रामं कौसल्या सुषुवे जनयामास यश्च रामो वनं प्रव्राजितः साक्षात्परंपरया वा युष्माभिरिति शेषः, एतेन भवत्स अकार्यकर्मकारित्वं प्रतीयते इति सूचितम् ॥११॥

गो० टी०—सुषुव इत्यादि । श्लोकत्रयमेकान्वयम् । नन्दवर्धनम् आनन्दवर्धनं चिरं प्रव्राजितः चिरकालमुद्दिश्य प्रव्राजितः यः एतादृशः तस्य रामस्य राज्यमकण्टकं भोक्तुमनाः अपापस्य तस्यानुजस्य च पापं कर्तुं नेच्छसि कच्चिदिति संबन्धः ॥ ११–१३ ॥

१२] ति० टी०—वनवासी भवेति नियुक्तः ॥ १२ ॥

१३] ति० टी०—इह वने तस्य रामस्य तस्यानुजस्य लक्ष्मणस्य च पापं कर्तुमिहेच्छसीत्यन्वयः । तत्र हेतुः—अकण्टकमसपत्नम् ॥ १३ ॥

रा० टी०—नियुक्त इति । स्त्रीनिमित्तेन स्त्रीहेतोः चतुर्दशसमाः वर्षाणि वनवासी भवेति पित्रा योऽसौ महायशा रामो नियुक्तस्तस्य अपापस्य पापनिवर्तकस्य रामस्य तस्यानुजस्य लक्ष्मणस्य वा पापमपराधं कर्तुमिह राज्यं भोक्तुमनास्त्वं नेच्छसि कचित् । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

१४] ति० टी०—पर्यश्रुनयनः परिप्लुतनयनः संसज्जमानया स्खलन्त्या ॥ १४ ॥

रा० टी०—एवमिति । एवमुक्तः भरतः अत एव दुःखात् संभावितरामापराधजनितक्लेशात् पर्यश्रुनयनः सन् संसज्जमानया रामविषयकासक्तिविशिष्टया वाचा भरद्वाजं प्रत्युवाच ॥ १४ ॥

गो० टी०—एवमिति । पर्यश्रुनयनः परिप्लुताश्रुनयनः संसज्जमानया स्खलन्त्या ॥ १४ ॥

१५] ति० टी०—मामेवं पापप्रसक्तं यदि भगवान्सर्वज्ञो मन्यते तदा हतोऽस्मि व्यर्थजन्मास्मि । दोषं प्रव्राजनदोषं मत्तो मदूपनिमित्ततो नेत्यहमाशङ्के स्वानुभवतो जानामि अतो मामेवं मानुशाधि मैवं कर्णकठोरं ब्रूहि ॥ १५ ॥

रा० टी०—तद्वचनाकारमाह—हत इति । भगवान् ज्ञानवैश्वर्यवान् यदि एवमभिमन्यते जानाति तर्हि अहं हतः निहतप्रायः । तत्र हेतुः—मत्तो मद्धेतोः दोषं कंचित् रामापराधं नाशङ्के न पश्यामीत्यर्थः, अत एव मा अनुशाधि कथयेत्यर्थः ॥१५॥

गो० टी०—हत इति । हतोऽस्मि व्यर्थजन्मास्मि भगवानपि भूतभविष्यद्वर्तमानज्ञोऽपीत्यर्थः, मत्तः मत्सकाशात् मयि दोषं नाशङ्के नोत्प्रेक्षे मत्कृतो दोषो नास्तीति संदेहोऽपि मे नास्तीत्यर्थः, अभावादिति भावः । अतो मामेवं नानुशाधि एवं कर्णारुन्तुदं वक्तुं नार्हसि ॥ १५ ॥

१६] ति० टी०—ननु कथमपलापः क्रियतेऽत आह—न चेति । मदन्तरे मद्विषये । यत्तु मया विनेत्यर्थ इति तन्न, अन्तरेणेत्यव्ययस्यैव तदर्थत्वात्, मम त्ववसरवाची अन्तरशब्द इति न दोषः । यन्मे मातावोचन्मदभिषेकरामवनवासादि तन्मे नेष्टम् । तदेव विवृणोति—नाहमिति । एतेन मातृकृतव्यापारेण । न च तद्वचममाददेऽङ्गीकरोमि इदानीमपीति शेषः ॥१६॥

रा० टी०—ननु त्वन्मातृहेतुकप्रव्राजनस्य प्रसिद्धत्वात्तवानुमतिः प्रतीयत इत्यत आह—नेति । मदन्तरे मम अन्तरं दूरगमनं यस्मिन् काले तस्मिन् मे माता यदवोचत् रामप्रव्राजनार्थमकथयत् एतेन तद्वचनेन अहं न तुष्टः अत एव तद्वचनं न आददे समीचीनत्वेन स्वीकरोमि ॥ १६ ॥

गो० टी०—मातृकृतं त्वत्कृतमेवेत्याशङ्क्याह—नेति । मदन्तरे मदसंनिधौ नाददे नाङ्गीकृतवानस्मि ॥ १६ ॥

१७] ति० टी०—अथ स्वागमनकारणमाह—अहं त्विति । प्रसादक उपयातः प्रसादयितुमागत इत्यर्थः ॥ १७ ॥

रा० टी०—स्वागमनप्रयोजनमाह—अहमिति । अहं तु नरव्याघ्रं रामं प्रसादकः प्रसादयितुमयोध्यायां प्रति नेतुं च अभिवन्दितुं च उपयातः प्राप्तः ॥ १७ ॥

गो० टी०—अहमिति । प्रसादकः प्रसादयितुम् "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इति ण्वुल् ॥ १७ ॥

१ स्त्रीनियुक्तेनेति गो. पाठः । २ अभिमन्यत इति रा. पाठः । ३ नैवमिति गो. पाठः । ४ अयोध्यां चेति गो. पाठः । ५ तस्येति गो. पाठः ।

[1]तं मामेवंगतं मत्वा प्रसादं कर्तुमर्हसि । शंस मे [2]भगवन्रामः क्व संप्रति महीपतिः ॥ १८ ॥
वसिष्ठादिभिर्ऋत्विग्भिर्याचितो भगवांस्ततः । उवाच तं भरद्वाजः प्रसादाद्धरतं वचः ॥ १९ ॥
स्वय्येतत्पुरुषव्याघ्र युक्तं राघववंशजे । गुरुवृत्तिर्दमश्चैव साधूनां चानुयायिता ॥ २० ॥
जाने चैतन्मनस्थं ते दृढीकरणमस्त्विति[3] । अपृच्छं त्वां तवार्त्थं कीर्तिं समभिवर्धयन् ॥ २१ ॥
जाने च रामं धर्मज्ञं ससीतं सहलक्ष्मणम् । [4]अयं वसति ते भ्राता चित्रकूटे महागिरौ ॥ २२ ॥
श्वस्तु मन्तासि तं देशं वसाद्य सह मन्त्रिभिः । एतं मे कुरु सुप्राज्ञ कामं कामार्थकोविद ॥ २३ ॥
ततस्तथेत्येवमुदारदर्शनः प्रतीतरूपो भरतोऽब्रवीद्वचः ।
चकार बुद्धिं च तदाश्रमे तदा निशानिवासाय नराधिपात्मजः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवतितमः सर्गः ॥ ९० ॥

१८] ति० टी०–एवंगतमेवंबुद्धिम् । क्व संप्रति कस्मिन्प्रदेशे ॥ १८ ॥

रा० टी०–तमिति । एवमनेन प्रकारेण गतं प्राप्तं मां मत्वा प्रसादं प्रीतिं कर्तुमर्हसि अतः संप्रति इदानीं रामः क्व अस्तीति शेषः, शंस कथय ॥ १८ ॥

गो० टी०–त्वमिति । एवंगतमेवं बुद्धा प्राप्तं महीपतिः वर्तत इति शेषः ॥ १८ ॥

१९] ति० टी०–याचितो भरताय प्रसन्नो भवेति प्रार्थितः, प्रसादात्प्रसादं प्राप्य ॥ १९ ॥

रा० टी०–वशिष्ठादिभिरिति । वशिष्ठादिभिः याचितः अस्य नापराधः अतोऽस्मिन् प्रसादं कुर्वित्यादिना प्रार्थितः भरद्वाजः प्रसादात् प्रीतेः भरतमुवाच ॥ १९ ॥

गो० टी०–वसिष्ठादिभिरिति । याचितः भरताय प्रसन्नो भवेति प्रार्थितः प्रसादादुवाच प्रसादं प्राप्योवाच ल्यब्लोपे पञ्चमी ॥ १९ ॥

२०] ति० टी०–एतदुक्तरूपं वचस्त्वयि युक्तं तवोचितम् । तदेव समर्थयति–गुर्विति । गुरुवृत्तिर्गुरुसेवा यतो गुरुसेवादित्रयं राघववंशजे प्रायो दृष्टमिति शेषः, यद्वा एतत्त्रयं त्वयि युक्तमित्यन्वयः ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–त्वयीति । गुरुवृत्तिः पित्रादिसेवा, दमः दुष्टदमनं, साधूनामनुयायिता अनुवर्तनमेतत्त्रयं त्वयि युक्तमुचितम् ॥ २० ॥

गो० टी०–त्वयीति । गुरुवृत्तिर्ज्येष्ठानुवर्तनं दम इन्द्रियनिग्रहः राज्याकोलत्वमिति यावत् साधूनां चानुयायिता सचित्तानुवर्तनम् इत्येतत्त्रयं त्वयि युक्तमित्यन्वयः ॥ २० ॥

२१] ति० टी०–दृढीकरणमन्यथाभावानिवृत्तिः । बहुनामध्ये उक्तो अर्थो नान्यथा कर्तुं शक्यते । गुरुरयप्रयोजनमाह–कीर्तिं समभिवर्धयन् असर्वज्ञजनं प्रतीति शेषः । हेतौ शतृ कीर्त्यभिवृद्धिहेतवेऽपृच्छमित्यर्थः ॥ २१ ॥

रा०टी०–जाने इति । ते तव मनःस्थं एतदाश्रमानुकूलवर्तनमहं जाने तस्यैव दृढीकरणमस्तु इति हेतोः तव कीर्तिं समभिवर्धयन् सन् अत्यर्थमत्यन्तं त्वामपृच्छम् ॥ २१ ॥

गो० टी०–जान इति । जाने योगप्रभावेनेति शेषः, दृढीकरणमस्त्वित्यपृच्छं स्थूणानिखननन्यायेन दृढीकर्तुमपृच्छमित्यर्थः । कीर्तिं रामविषयसौभ्रात्रजनितां समभिवर्धयन् "कृञ्णहेत्वोः क्रियायाः" इति हेत्वर्थे शतृप्रत्ययः ॥ २१ ॥

२२] ति० टी०–अथ रामः क्वेति प्रश्नस्योत्तरमाह–जाने चेति ॥ २२ ॥

रा० टी०–जाने इति । रामादिकं तत्स्थितिं जाने । नन्वं तर्हि बोधयेत्यत आह–अयं मद्धृदयस्थः चित्रकूटे वसति ॥२२॥

गो० टी०–जान इति । रामं जाने देशविशेषे स्थितं रामं जान इत्यर्थः ॥ २२ ॥

२३] ति० टी०–एतमद्यवासरूपम् । कामार्थकोविद वाञ्छितार्थप्रदानसमर्थ ! ॥ २३ ॥

रा० टी०–श्व इति । श्वः प्रातः काले तं देशं गन्तासि अतः अद्य वस एतं कामं मनोरथं कुरु पूरय, कामार्थकोविद इच्छाविषयीभूतार्थज्ञातः ! ॥ २३ ॥

गो० टी०–श्व इति । काममभीष्टं कामार्थकोविद ! काङ्क्षितार्थप्रदानदक्षेत्यर्थः ॥ २३ ॥

२४] ति० टी०–प्रतीतरूपः प्रसिद्धयशाः ' रूपं यशस्याभिरूप्ये वर्णे चैव निरूपणे ' इति कोशात् । तदाश्रमे भरद्वाजाश्रमे ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवतितमः सर्गः ॥ ९० ॥

रा० टी०–तत इति । ततः भरद्वाजोक्तिश्रवणानन्तरमुदारं भरद्वाजौदार्यं पश्यति सः प्रतीतरूपः प्रसिद्धं बोधितं रूपं रामानुयायित्वरूपस्वरूपं येन स भरतः तथेत्येवं वचोऽब्रवीत् अत एव महाश्रमे निशानिवासाय बुद्धिं निश्चयं चकार ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ अयोध्याकाण्डे नवतितमः सर्गः ॥ ९० ॥

---

१ त्वमिति गो. पाठः । २ भगवानिति रा. पाठः । ३ त्वा तवेति गो. पाठः । ४ असाविति गो. पाठः । ५ महाश्रमे इति रा. पाठः ।

एकनवतितमः सर्गः।

सेनापरिजनयुताय भरताय तपःसिद्धैश्चर्येण भरद्वाजेन विहितं सकलपृथ्वीपतिनापि विधातुमशक्यमातिथ्यं वर्ण्यते।

कृतबुद्धिं निवासाय तत्रैव स मुनिस्तदा। भरतं केकयीपुत्रमातिथ्येन न्यमन्त्रयत् ॥ १ ॥
अब्रवीद्भरतस्त्वेनं नन्विदं भवता कृतम्। पाद्यमर्घ्यमथातिथ्यं वने यदुपपद्यते ॥ २ ॥
अथोवाच भरद्वाजो भरतं प्रहसन्निव। जाने त्वां प्रीतिसंयुक्तं तुष्येस्त्वं येनकेनचित् ॥ ३ ॥
सेनायास्तु तवैवास्याः कर्तुमिच्छामि भोजनम्। मम प्रीतिर्यथारूपा त्वमर्हो मनुजर्षभ ॥ ४ ॥
किमर्थं चापि निक्षिप्य दूरे बलमिहागतः। कस्मान्नेहोपयातोऽसि सबलः पुरुषर्षभ ॥ ५ ॥
भरतः प्रत्युवाचेदं प्राञ्जलिस्तं तपोधनम्। न सैन्येनोपयातोऽस्मि भगवन्भगवद्भयात् ॥ ६ ॥
राज्ञा हि भगवन्नित्यं राजपुत्रेण वा तथा। यत्नतः परिहर्तव्या विषयेषु तपस्विनः ॥ ७ ॥

गो० टी०—तत इति। प्रतीतरूपः प्रसिद्धकीर्तिः 'रूपं यशस्याभिरूप्ये वर्णे चैव निरूपणे' इति निघण्टुः। यद्वा प्रतीतरूपः प्रकर्षेण हृष्टः प्रशंसायां रूपप् चकार बुद्धिं चेति नबुक्तिरन्या बुद्धिरन्येति भावः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने नवतितमः सर्गः ॥ ९० ॥

१] ति० टी०—कृतबुद्धिं कृतनिश्चयम्। आतिथ्येन विशिष्टभोजनोपेतातिथिसत्काररूपहेतुना फलमपि हेतुः ॥ १ ॥

रा० टी०—भरद्वाजप्रभावं वर्णयन्नाह—कृतेति। निवासाय कृतबुद्धिं कृतनिश्चयं भरतं तत्र तस्मिन् समये एव भरद्वाज आतिथ्येन अतिथ्युचितसत्कारवचनेन न्यमन्त्रयत्र्यर्थयोजयत् ॥ १ ॥

गो० टी०—कृतबुद्धिमिति। तत्रैवाश्रमे निवासाय कृतबुद्धिं निश्चितबुद्धिं भरतं स मुनिः आतिथ्येन भोजनपर्यन्तातिथिसत्काराय न्यमन्त्रयत् प्रार्थयामास ॥ १ ॥

२] ति० टी०—वने यदुपपद्यते तेनातिथ्यं कृतं नन्वित्यब्रवीदित्यन्वयः ॥ २ ॥

रा० टी०—अब्रवीदिति। वने यत् उपपद्यते युज्यते तेन पाद्यादिरूपमातिथ्यं भवता कृतमिति भरतः एनं निमन्त्रयितारं भरद्वाजमब्रवीत्, एतेन इतःपरं निमन्त्रणं न कर्तव्यमिति ध्वनितम् ॥ २ ॥

गो० टी०—अब्रवीदिति। वने यत्फलमूलादिकमुपपद्यते लभ्यते तेन तापसाहारेणातिथ्यं कृतम्, ननु एतावन्मात्रेण तुष्टोऽस्मिति भावः ॥ २ ॥

३] ति० टी०—वनवासित्वेन दरिद्रित्वादेतदधिकातिथ्यकरणेऽसामर्थ्यं मन्यत इत्याशयेन प्रहसन्निवेति। येनकेनचिदपि तुष्येस्तुष्टो भवेरिति मन्ये वन्येनाप्यातिथ्येन प्रीतियुक्त इति जाने ३

रा० टी०—अथ इति। अथ भरतोक्तिश्रवणानन्तरं प्रहसन्निव भरद्वाजः भरतमुवाच। तद्वचनाकारमाह—यतः त्वं येनकेनचित्तुष्येः अतः प्रीतिसंयुक्तं मद्विषयकप्रीतिमन्तं त्वां जाने॥३॥

गो० टी०—अथेति। प्रहसन्निव प्रहासावेदकानुभावयुक्त इत्यर्थः, मुनिरितः परं किं करिष्यतीति भरताशयज्ञानेन हासः। त्वां प्रीतिसंयुक्तं मद्विषये संतुष्टं जाने अत एवकेनचिदुपचारेण तुष्येः तुष्टो भवेः ॥ ३ ॥

४] ति० टी०—अथापि—सेनाया इत्यादि। मम प्रीतिर्यथारूपा ममेच्छा यादृशी तथारूपां तां त्वमर्होऽसि अङ्गीकर्तुमिति शेषः ॥ ४ ॥

रा० टी०—नन्वं तर्हि किमर्थं निमन्त्रणमित्यत आह—सेनाया इति। तवास्याः सेनायाः सेनाकर्तृकं भोजनमिच्छामि अतः अयथारूपा यादृशी मम प्रीतिः तादृश्याः प्रीतेस्त्वमर्हः योग्योऽसि ॥ ४ ॥

गो० टी०—सेनाया इति। भुज्यत इति भोजनमन्नम् अत्रादौ तथापीत्युपस्कार्यं तथापि मम प्रीतिर्यथारूपा यादृशप्रकारा तथा त्वमर्हः त्वं तथा प्रीतो भवितुमर्हं इत्यर्थः, तथाऽनुमन्तुमर्हसीत्यर्थो वा ॥ ४ ॥

५] ति० टी०—बलं दूरे निक्षिप्यैकाकी किमर्थमागतः। अयमेवार्थो व्यतिरेकमुखेन दर्श्यते—कस्मादिति ॥ ५ ॥

रा० टी०—किमिति। बलं सेनां दूरे किमर्थं निक्षिप्य इहागतः सबलः ससैन्यः कस्मान्न इह उपयातः प्राप्तोऽसि ॥५॥

गो० टी०—किमर्थमिति। उक्तमेवार्थं व्यतिरेकमुखेनाप्याह—कस्मादित्यादिना ॥ ५ ॥

६] ति० टी०—अत्रोत्तरमाह—भरत इति। भगवद्भयाद्भगवदाश्रमपीडाप्रसङ्गभयादित्यर्थः ॥ ६ ॥

रा० टी०—भरत इति। प्राञ्जलिर्भरतः तपोधनं भरद्वाजं प्रत्युवाच। तत्प्रतिवचनाकारमाह—हे भगवन्! भगवतो भवतो भयात् सैन्येन सह न उपयातोऽस्मि ॥ ६ ॥

गो० टी०—भरत इति। भगवद्भयात् भवान्कुप्येदिति भयात् ॥ ६ ॥

७] ति० टी०—विषयेषु देशेषु परिहर्तव्यास्तदाश्रमवर्तिवृक्षोदकादिबाधाप्रसङ्गनिमित्तमनुपरोध्याः ॥ ७ ॥

रा० टी०—राज्ञेति। हे भगवन्! तपस्विनः विषयेषु

१ एतस्या इति गो. पाठः। २ मनुजाधिपेति गो. पाठः। ३ ससैन्य इति गो. पाठः। ४ सदेति गो. पाठः।

वाजिमुख्या मनुष्याश्च मत्ताश्च वरवारणाः । प्रच्छाद्य भगवन्भूमिं महतीमनुयान्ति माम् ॥ ८ ॥
ते वृक्षानुदकं भूमिमाश्रमेषूटजांस्तथा । न हिंस्युरिति तेनाहमेक एवागतस्ततः ॥ ९ ॥
आनीयतामितः सेनेत्याज्ञप्तः परमर्षिणा । तथानुचक्रे भरतः सेनायाः समुपागमम् ॥ १० ॥
अग्निशालां प्रविश्याथ पीत्वापः परिमृज्य च । आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत् ॥ ११ ॥
आह्वये विश्वकर्माणमहं त्वष्टारमेव च । आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥ १२ ॥
आह्वये लोकपालांस्त्रीन्देवाञ्शक्रपुरोगमान् । आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥ १३ ॥
प्राक्स्रोतसश्च या नद्यस्तिर्यक्स्रोतस एव च । पृथिव्यामन्तरिक्षे च समायान्त्वद्य सर्वशः ॥ १४ ॥
अन्याः स्रवन्तु मैरेयं सुरामन्याः सुनिष्ठिताम् । अपराश्चोदकं शीतमिक्षुकाण्डरसोपमम् ॥ १५ ॥

तत्समीपवर्तिदेशेषु राज्ञा तत्पुत्रेण वा यत्नतः परिहर्तव्याः त्यक्तव्याः उपद्रवा इति शेषः, एतेनोपद्रवभीतेरेव सैन्यं नात्रानीतमिति सूचितम् ॥ ७ ॥

गो० टी०–राज्ञेति । विषयेषु तपस्विनः स्वकीयदेशेषु वर्तमाना ऋषयः यत्नतः परिहर्तव्याः ससैन्येन तत्समीपं न गन्तव्यमित्यर्थः ॥ ७ ॥

८–९] ति० टी०–तदेवाह–वाजीत्यादि ॥ ८–९ ॥

रा० टी०–उपद्रवहेतुभूतानाह–वाजीति । वाजिमुख्याः अश्वश्रेष्ठाः मनुष्याश्च वरवारणाः श्रेष्ठगजाश्च महतीं भूमिं प्रच्छाद्य संरुध्य मामनुयान्ति ॥ ८ ॥

रा० टी०–त इति । ते वाज्यादयः वृक्षान् भवत्संरक्षितत्वरून् उदकं जलं च भूमिं लेपनादिविशिष्टपृथिवीं च उटजान् पर्णशालाश्च न हिंस्युः दृषयेयुस्तेन हेतुना ततः स्थापितसैन्यादिस्थलात् एकः उपद्रवहेतुभिः रहित आगतः । इतिश्चार्थः, एकशब्दः केवलार्थकः, तेन वशिष्ठस्य सहागमनेऽपि न विरोधः॥९॥

गो० टी०–कोपनिमित्तमाह–वाजिमुख्या इत्यादिना । उटजान् पर्णशालाः ॥ ८ ॥ ९ ॥

१०] ति० टी०–परमर्षिणा श्रुतभरतवचसा समुपागमं समीपानयनम् ॥ १० ॥

रा० टी०–आनीयतामिति । सेना इतः अस्मिन् स्थले आनीयतामित्यनेन प्रकारेण परमर्षिणा आज्ञप्तो भरतः सेनायाः समुपागममानयनमनुचक्रे ॥ १० ॥

गो० टी०–आनीयतामिति । ततः सेनानिवेशस्थलात् इतः इह समुपागमं समानयनम् ॥ १० ॥

११] ति० टी०–पीत्वापः परिमृज्येति हृदयंगमाभिर्द्विरोष्ठौ परिमृज्येत्सकृदाचम्येत्युक्तरीत्याऽऽचम्य आतिथ्यक्रियाहेतोरातिथ्यसंपादननिमित्तम्, विश्वकर्मा सृष्टिकर्तृविशेषः॥११॥

रा० टी०–सुनिष्टप्तमाह–अग्नीति । अग्निशालां प्रविश्य अपः जलानि पीत्वा त्रिराचम्येत्यर्थः, परिमृज्य यथाविधि मार्जनं कृत्वा च आतिथ्यकर्मिकायाः क्रियायाः हेतोः विश्वकर्माणमाह्वयत् ॥ ११ ॥

गो० टी०–अग्निशालामिति । अग्निशालाप्रवेशः पावनत्वार्थः देवतासंनिधानस्थलत्वात् , अपः पीत्वा त्रिरिति शेषः "त्रिराचामेत्" इति श्रुतेः । परिमृज्य आस्यं द्विरिति शेषः "द्विः परिमृज्य" इतिश्रुतेः , चकारेण सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमारभ्य इत्युक्तसंग्रहः । अनेन सर्वकर्माङ्गमाचमनमिति दर्शितं क्रियाहेतोः करणनिमित्तम् ॥ ११ ॥

१२] ति० टी०–आह्वानप्रकारमाह–आह्वये इति । त्वष्टारं तक्षणादिव्यापारोपेतं विश्वकर्माणम्, संविधीयतां विश्वकर्मसाध्यगृहादि सर्वं सिद्धं क्रियताम् ॥ १२ ॥

रा० टी०–आह्वानप्रकारमाह–आह्वय इति । त्वष्टारं तक्षकर्मसमर्थं विश्वकर्माणम् आह्वये, आह्वाने हेतुः अहम् आतिथ्यं कर्तुमिच्छामि । तत्र आतिथ्यकर्मणि संविधीयतां तन्निर्वाहकसामग्री संप्राप्यतामित्यर्थः ॥ १२ ॥

गो० टी०–आह्वानमन्त्रमाह–आह्वय इत्यादिना । आह्वय इत्यात्मनेपदमार्षम् । विश्वकर्मा सर्वशिल्पकर्ता त्वष्टा तु तक्षणेन गृहादिनिर्माता, यद्वा त्वष्टारमेव चेत्यवधारणेनान्यविश्वकर्मा मयो व्यावर्त्यते तत्रातिथ्यनिमित्तं संविधीयतां गृहादिसंविधानं क्रियताम् ॥ १२ ॥

१३] ति० टी०–त्रीन्यमवरुणकुबेरानिति तीर्थः । कार्यविशेषेष्वेषामपि नियोगो बोध्यः ॥ १३ ॥

रा० टी०–आह्वये इति । शक्रपुरोगमान् इन्द्रमुख्यान् लोकपालान् त्रीन् यमवरुणकुबेरान् देवान् आह्वये तदुपसंविज्ञानो बहुव्रीहिः ॥ १३ ॥

गो० टी०–वक्ष्यमाणान्नपानादिरक्षणाय लोकपालानाह्वयति–आह्वय इति । शक्रमुखान् इन्द्रप्रधानान् शक्रस्य पृथक् निर्देशात् त्रीन् लोकपालान् यमवरुणकुबेरान् देवानित्यग्रादय उच्यन्ते, संविधीयतां पालनं क्रियताम् ॥ १३ ॥

१४] ति० टी०–अन्तरिक्षे नदी आकाशगङ्गा ॥ १४ ॥

रा० टी०–प्रागिति । पृथिव्यामन्तरिक्षे च याः प्राक्स्रोतसः पूर्वाभिमुखप्रवाहाः याः तिर्यक्स्रोतसः पश्चिमाभिमुखवाहिन्यश्च नद्यस्ताः सर्वशः अद्य समायान्तु ॥ १४ ॥

गो० टी०–सर्वा नदीर्द्वेधा विभज्याह्वयति–प्राक्स्रोतस इति । सह युगपत् ॥ १४ ॥

१५] ति० टी०–तासां कृत्यमाह–अन्या इति । मैरेयं

---

१ समागत इति गो. पाठः । २ तत्स्थिति गो. पाठः । ३ मुखांस्तथेति गो. पाठः । ४ प्रत्यगिति गो. पाठः ।

आह्वये देवगन्धर्वान्विश्वावसुहहाहुहून् । तथैवाप्सरसो [1]देवगन्धर्वैश्चापि सर्वशः ॥ १६ ॥
घृताचीमथ विश्वाचीं मिश्रकेशीमलंबुषाम् । नागदत्तां च हेमां च [2]सोमामद्रिकृतस्थलीम् ॥ १७ ॥
शक्रं याश्चोपतिष्ठन्ति ब्रह्माणं याश्च [3]भामिनीः । सर्वास्तुम्बुरुणा सार्धमाह्वये सपरिच्छदाः ॥ १८ ॥
वनं कुरुषु यद्दिव्यं वासोभूषणपत्रवत् । दिव्यनारीफलं शश्वत्तत्कौबेरमिहैव [4]तु ॥ १९ ॥
इह मे भगवान्सोमो विधत्तामन्नमुत्तमम् । भक्ष्यं भोज्यं च [5]चोष्यं च लेह्यं च विविधं बहु ॥ २० ॥

मद्यभेदो धात्रीधातकीप्रभृतिनिर्मितः । सुरा गौडी माध्वी पैष्टी चेति त्रिविधा । सुनिष्ठितां सुनिष्पादिताम् । इक्षुकाण्डरसोपमं तद्वन्मधुरम् ॥ १६ ॥

रा० टी०—तदागमने प्रयोजनमाह—अन्या इति । अन्याः कादिचन्मैरेयमन्याः सुनिष्ठितां सुनिष्पादितां सुरामपराः अन्याः इक्षुकाण्डरसोपमं शीतमुदकं जलं स्रवन्तु ॥ १५ ॥

गो० टी०—तासां कर्तव्यमाह—अन्या इति । अन्याः काश्चन मैरेयं मिरादेशे भवं खर्जूरादिहेतुकं मद्यविशेषं, सुराम् 'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा' इत्युक्तां त्रिविधां सुरां सुनिष्ठितां सुनिष्पादिताम् इक्षुकाण्डरसोपमं काण्डो वर्गः ॥ १५ ॥

१६-१७] ति० टी०—हहा हाहाः छन्दोवशाद्ध्र स्वपाठः ॥ १६ ॥ १७ ॥

रा० टी०—आह्वये इति । देवगन्धर्वान् देवानां गन्धर्वान् विश्वावसुहहाहुहूंश्च त्रयाणां द्वन्द्वः । हहाहुहूनित्यत्र ह्रस्वश्छान्दसः एतन्नामकावन्यौ वा, देवीर्देवसंबन्धिनीः गन्धर्वीर्गन्धर्वसंबन्धिनीश्च सर्वशः अप्सरसः आह्वये ॥ १६ ॥

गो० टी०—गानार्थमाह्वयति—आह्वय इति । देवगन्धर्वान् मनुष्यगन्धर्वभिन्नान् हहाहुहूरिति छान्दसो ह्रस्वः । अप्सरसां द्वैविध्यमाह—देवीर्गन्धर्वीरिति । देवीः देवजातीः गन्धर्वीः गन्धर्वजातीः अत एव "एते वै गन्धर्वाप्सरसां ग्रहाः" इति श्रौतप्रयोगः ॥ १६ ॥

रा० टी०—प्रधानाप्सरसां नामानि निर्दिशन्नाह—घृताचीमिति । घृताचीप्रभृतीराह्वये इति पूर्वेणान्वयः ॥ १७ ॥

गो० टी०—आवश्यकत्वेन प्रधानाप्सरसो विशिष्याह्वयति—घृताचीमित्यादिना । घृतवदज्यते पूज्यत इति घृताची विश्वैः समस्तैः अज्यत इति विश्वाची मिश्रकेशीं निरन्तरकेशीं श्रेष्ठकेशीं वा, बुसेभ्योऽलमलम्बुसां बुसा बुधाः देवाः वर्णविपर्ययः नागानां दन्ता इव शुभाः दन्ताः यस्यास्तां नागदन्तां हेमां हेमवर्णां पुनश्च 'हेमाम्' इति पाठे पूर्वोक्तहेमापेक्षया अस्या व्यावृत्तिमाह । अद्रिकृतस्थलामिति अद्रौ महेन्द्रे मयेन कृतनिवासां स्वयं प्रभाबिलस्थामित्यर्थः 'हिमाम्' इति पाठे हिमवच्छीतलाङ्गीं, यद्वा हिममस्यास्तीति हिमा अद्रिकृतस्थला चान्या एवमेतान्यन्वर्थनामानि ॥ १७ ॥

१८] ति० टी०—सपरिच्छदाः सालंकाराः नृत्यगीतापेक्षितपरिकरोपेताश्च । 'ब्राह्मणम्' इति पाठे बृहस्पतिं या उपतिष्ठन्तीत्यनुकर्षः इति कतकः ताः सर्वा भामिनीराह्वये इति संबन्धः ॥ १८ ॥

रा० टी०—शक्रमिति । याः शक्रमुपतिष्ठन्ति याश्च ब्रह्माणमुपतिष्ठन्ति ताः तुम्बुरुणा स्वशिक्षकेन सार्धं विद्यमानाः सपरिच्छदाः सामग्रीसहिता भामिनीः स्त्रियः आह्वये ॥ १८ ॥

गो० टी०—शक्रमिति । शक्रं या उपतिष्ठन्ति रम्भोर्वशीमेनकादयः ब्रह्माणं चतुर्मुखं तल्लोकेऽप्यप्सरसः सन्ति "तं पञ्चशतान्यप्सरसां प्रति धावन्ति" इति श्रुतेः इदं च मतान्तरमनुसृत्योक्तं, तुम्बुरुणा तासां गानशिक्षकेण सपरिच्छदाः नृत्यगीतायुपकरणसहिताः सालंकारा वा ॥ १८ ॥

१९-२०] ति० टी०—कुरुषूत्तरकुरुषु यद्दिव्यं वनं चैत्ररथाख्यम् । दिव्यत्वोपपादकं वासोभूषणान्येव पत्राणि यद्वर्तिनक्षाणां तत् । दिव्यनार्य एव फलानि यत्र तत् । इहैव तु इह वने एवागच्छत्विति शेषः । 'इहैतु वै' इति पाठान्तरम् तदेवताधिष्ठानादिदमेव वनं तथा भवत्वित्यर्थः ॥ १९ ॥ २० ॥

रा० टी०—वनमिति । वासो भूषणपत्रवत् वासांसि च भूषणानि च तान्येव पत्राणि तद्वत्, दिव्यनार्य एव फलानि यस्य तत् कुरुषु उत्तरकुरुषु विद्यमानं यद्दिव्यं वनं चैत्ररथसंज्ञकमित्यर्थः, तत्कौबेरं वनमिहैव आगच्छतु इति शेषः ॥ १९ ॥

गो० टी०—भोगोपकरणान्याह्वय भोगस्थानान्याह्वयति—वनमिति । वनं चैत्ररथाख्यं तच्चोत्तरकुरुदेशे वर्तते दिव्यं देवार्हं वासोभूषणान्येव पत्राण्यस्मिन्सन्तीति वासोभूषणपत्रवत् शश्वत् सर्वदा दिव्यनार्य एव फलानि यस्मिँस्तत् तथा एवंभूतं यत्कौबेरमस्ति तत् इह वने एतु आगच्छतु उत्तरदिक्पालत्वेन कुबेराधिष्ठितत्वात् कौबेरमित्युक्तम् इयं च कुबेरं प्रत्येवोक्तिः नदीनामिव वनस्याह्वानं तदधिष्ठातृदेवताद्वारा ॥ १९ ॥

रा० टी०—इहेति। उत्तममन्नं विविधमनेकविधं बहुभक्ष्यादिकं च विचित्राणि माल्यानि पुष्पाणि पादपप्रच्युतानि वृक्षेभ्यः पतितानि सुरादीनि च विविधानि पेयानि मांसानि राजभोग्यवस्तूनि च भगवान् सोमः चन्द्रः इह मे विधत्तां प्रापयत्वित्यर्थः । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०—एवं कुबेरं प्रत्युक्त्वा अन्नपतिं चन्द्रं प्रत्याह—

१ देवीर्गन्धर्वीरिति गो. रा. पाठः । २ बुसामिति गो. पाठः । ३ हिमा……स्थलामिति गो. पाठः । ४ मोषित इति गो. पाठः । ५ एतु चेति गो. पाठः । ६ चूष्यमिति रा. पाठः ।

विचित्राणि च माल्यानि पादपप्रच्युतानि च । सुरादीनि च पेयानि मांसानि विविधानि च ॥ २१ ॥
एवं समाधिना युक्तस्तेजसाऽप्रतिमेन च । [1]शिक्षास्वरसमायुक्तं [2]सुव्रतश्चाब्रवीन्मुनिः ॥ २२ ॥
मनसा ध्यायतस्तस्य प्राङ्मुखस्य कृताञ्जलेः । आजग्मुस्तानि सर्वाणि दैवतानि पृथक्पृथक् ॥ २३ ॥
मलयं दर्दुरं चैव ततः स्वेदनुदोऽनिलः । उपस्पृश्य ववौ युक्त्या सुप्रियात्मा [3]सुखं शिवः ॥ २४ ॥
ततोऽभ्यवर्षन्त घना दिव्याः कुसुमवृष्टयः । देवदुन्दुभिघोषश्च दिक्षु सर्वासु शुश्रुवे ॥ २५ ॥
प्रववुश्चोत्तमा वाता ननृतुश्चाप्सरोगणाः । प्रजगुर्देवगन्धर्वा वीणाः प्रमुमुचुः स्वरान् ॥ २६ ॥

इहेति । मे मन्निमित्तं भगवान् माहात्म्यवान् सोम ओषधीनामधिपतिश्चन्द्रः उत्तममन्नं विधत्तां संपादयतु । अन्नं चतुर्विधत्वेन विशेषयति–भक्ष्यमित्यादि । भक्ष्यं खाद्यमपूपादि, भोज्यम् ओदनादि, चोष्यं शुष्कादि लेह्यं रसायनादि विविधम् एकैकमनेकविधं तदपि बहु अनल्पम् ॥ २० ॥

२१] ति० टी०–पादपप्रच्युतानि वृक्षेभ्यः स्वयं जातानि ॥ २१ ॥

गो० टी०–विचित्राणीति । पादपप्रच्युतानि नवानीति भावः ॥ २१ ॥

२२] ति० टी०–शिक्षास्वरसमायुक्तं शिक्षाप्रतिपाद्यवर्णोच्चारणलक्षणोपेतम् , तथा व्याकरणोपदिश्यमानप्रकृतिप्रत्ययस्वरोपेतम् । स्वरेत्युपलक्षणम् ' एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति ' इत्युक्तेः । समाधितेजस्तपोभिर्युक्त एवंगुणोपेतमाह्वानवाक्यमब्रवीदित्यर्थः । महर्षेस्तपोबलात्स्वर्गे कामधुक्त्वेन प्रसिद्धादपि वचनादिहैव सर्वं सिद्धमिति भावः ॥ २२ ॥

रा० टी०–एवमिति । समाधिना चित्तैकाग्र्येण युक्तः अप्रतिमेन उपमारहितेन तेजसा च युक्तः सुव्रतो मुनिः शिक्षास्वरसमायुक्तं शिक्षया शिक्षाप्रतिपादितोच्चारणविधिना स्वरेण व्याकरणप्रतिपादितप्रकृत्यादिनिष्ठोदात्तादिना समायुक्तं यथा स्यात्तथा ब्रुनिरब्रवीत् ॥ २२ ॥

गो० टी०–एवमाह्वाने शक्तिविशेषं दर्शयति–एवमित्यादिना । समाधिना योगेन तपसा ज्ञानेन, यद्वा अनशनादिकायक्लेशरूपेण अत एव तेजसा अनागमे दण्डनसामर्थ्येन च युक्तः मुनिः शीक्षास्वरसमायुक्तं शिक्ष्यन्ते उपदिश्यन्ते वर्णस्वरादयोऽनयेति शीक्षा छान्दसो दीर्घः शीक्षाप्रतिपाद्यस्वरयुक्तमिति क्रियाविशेषणम् "[4]दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति स्वरापराधस्य प्रत्यवायहेतुत्वश्रवणात्, एवम् आह्वये विश्वकर्माणमित्यारभ्योक्तरीत्या अब्रवीत् आह्वानमन्त्रानजपदित्यर्थः ॥ २२ ॥

२३] ति० टी०–मनसा ध्यायतो मनसा ध्यानपूर्वककृताह्वानस्य तान्याहूतानि ॥ २३ ॥

रा० टी०–मनसेति । ध्यायतस्तस्य मुनेः अग्रे इति शेषः, सर्वाणि दैवतानि देवाः पृथक् पृथगाजग्मुः ॥ २३ ॥

गो० टी०–मनसेति । मनसा अनन्यपरेणेत्यर्थः, ध्यायतः निरन्तरं चिन्तयतः प्राङ्मुखस्येत्यदृष्टविशेषार्थं कृताञ्जलेरिति आह्वानमुद्रोक्ता तानि पूर्वोक्तानि दैवतानि विश्वकर्मादीनि मुनिदृष्टिविषयत्वाय पृथक् पृथक् आजग्मुः ॥ २३ ॥

२४] ति० टी०–मलयदर्दुरौ चन्दनपर्वतौ उपस्पृश्य स्पृष्ट्वा युक्त्या यथोचितवृत्त्या शैत्यमान्द्यसौरभयोगेन सुप्रियात्मा सुप्रियस्वरूपः अत एव शिवः सुखद ईदृशोऽनिलः सुखं ववौ ॥ २४ ॥

रा० टी०–आगतानां तेषां कृत्यमाह–मलयमित्यादिभिः । ततः आगमनानन्तरं मलयं तदभिधं दर्दुरं तदभिधं च चन्दनपर्वतं युक्त्या उपस्पृश्य स्वेदनुदः स्वेदस्य निवर्तकः सुप्रियः सर्वेषामतिप्रीतिविषयीभूतः आत्मा प्रयत्नो यस्य शिवः कल्याणप्रदोऽनिलो वायुः सुखं ववौ ॥ २४ ॥

गो० टी०–मलयमिति । मलयश्चन्दनालयः दर्दुरस्तत्समीपस्थश्चन्दनोत्पत्तिस्थानभूतो गिरिः तदुभयं चोपस्पृश्य सुप्रियात्मा सुप्रियस्वभावः सुगन्ध इत्यर्थः, अत एव सुखः सुखकरः शिवः शीतलः युक्त्या अङ्गस्पर्शेन स्वेदनुदः स्वेदनिवर्तकः "इगुपधज्ञा–" इत्यादिना कप्रत्ययः अनिलः वायुः ततः गिरिद्वयाद्ववौ इन्द्रायाह्वानेन वाय्वाह्वानमर्थसिद्धम् ॥२४॥

२५] ति० टी०–घना मेघाः ॥ २५

रा० टी०–तत इति । ततः अनन्तरं घनाः मेघाः अभ्यवर्षन्त दिव्याः देवकृताः कुसुमवृष्टयश्च अभ्यवर्तन्तेति शेषः, सर्वासु दिक्षु देवदुन्दुभिघोषश्च शुश्रुवे घनशब्दस्य निरन्तरार्थकत्वे तु घना इति कुसुमवृष्टिविशेषणम् अस्मिन्पक्षे अभ्यवर्षन्तेत्यस्यैव अभ्यवर्तन्तेत्यर्थः ' घनं निरन्तरं सान्द्रम् ' इत्यमरः ॥ २५ ॥

गो० टी०–तत इति । घनाः निरन्तराः 'घनं निरन्तरं सान्द्रम्' इत्यमरः । पुष्पवृष्टयोऽभ्यवर्तन्त आसन्नित्यर्थः ॥२५॥

२६] ति० टी०–वीणा वाद्यमाना इति शेषः । स्वरान्षड्जादीन् ॥ २६ ॥

रा० टी०–प्रववुरिति । उत्तमाः अनुकूलाः वाताः प्रीत्यतिशयेन विविधजनव्यजनसंभूतपवनाः प्रववुः चेलुः अत एव पूर्वेण न पौनरुक्त्यं देवगन्धर्वाः प्रजगुः वीणाः स्वरान् षड्जादीन् प्रमुमुचुः ॥ २६ ॥

१ शीक्षेति गो. पाठः । २ तपसेति गो. पाठः । ३ सुख इति गो. पाठः । ४ऽवर्तन्तेति गो. पाठः ।

स शब्दो द्यां च भूमिं च प्राणिनां श्रवणानि च । विवेशोच्चावचः श्लक्ष्णः समो लयगुणान्वितः ॥ २७ ॥
तस्मिन्नेवंगते शब्दे दिव्ये श्रोत्रसुखे नृणाम् । ददर्श भारतं सैन्यं विधानं विश्वकर्मणः ॥ २८ ॥
बभूव हि समा भूमिः समन्तात्पञ्चयोजनम् । शाद्वलैर्बहुभिश्छन्ना नीलवैदूर्यसंनिभैः ॥ २९ ॥
तस्मिन्बिल्वाः कपित्थाश्च पनसा बीजपूरकाः । आमलक्यो बभूवुश्च चूताश्च फलभूषिताः ॥ ३० ॥
उत्तरेभ्यः कुरुभ्यश्च वनं दिव्योपभोगवत् । आजगाम नदी सौम्या तीरजैर्बहुभिर्वृता ॥ ३१ ॥
चतुःशालानि शुभ्राणि शालाश्च गजवाजिनाम् । हर्म्यप्रासादसंयुक्ततोरणानि शुभानि च ॥ ३२ ॥
सितमेघनिभं चापि राजवेश्म सुतोरणम् । शुक्लमाल्यकृताकारं दिव्यगन्धसमुक्षितम् ॥ ३३ ॥

गो० टी०—प्रववुरिति । प्रववुश्चोत्तमा वाता इति पूर्वोक्तस्यैवाविच्छेद उच्यते । वीणाः प्रमुमुचुः स्वरान् वीणाशब्देन वीणावन्तो लक्ष्यन्ते तदेकपरत्वव्यञ्जनाय स्वरान्मुमुचुः उत्पादयामासुः, असिच्छिनत्तीतिवत् करणे कर्तृत्वोपचारो वा॥२६॥

२७] ति० टी०—लयो नृत्तगीताङ्गतताल्प्रमाणम्॥२७॥

रा० टी०—स इति । समः समविशिष्टः लयगुणान्वितः लयाः नृत्यगीताङ्गकूलतालप्रमाणानि तैर्युक्तः उच्चावचः यथोचितमूर्ध्वाधोगतिविशिष्टः सः गन्धर्वगानादिशब्दः द्यां दिवं भूमिं च श्रवणानि च विवेश ॥ २७ ॥

गो० टी०—स शब्द इति । स शब्दः द्यां च भूमिं चाधिवसतामिति शेषः, प्राणिनां श्रवणानि श्रोत्राणि विवेश । स शब्दः कीदृशः उच्चारितः वीणादिभिरुत्पादितः श्लक्ष्णः कोमलसमः निषादादिषु क्वचित् औत्कण्ठ्यरहितः मन्द्रमध्यमतारश्रुतिसाम्ययुक्तो वा लयगुणान्वितः लयो नाम नृत्यगीतवाद्यानामेककालविरामः स एव गुणस्तेनान्वितः ॥ २७ ॥

२८] ति० टी०—भरतस्येदं भारतं सैन्यं विश्वकर्मणो विधानं ददर्श ॥ २८ ॥

रा० टी०—तस्मिन्निति । दिव्ये देवसंबन्धिनि श्रोत्रसुखे कर्णसुखप्रदे एवमनेन प्रकारेण तस्मिन् शब्दे गते प्राप्ते सति भारतं भरतसंबन्धि सैन्यं विश्वकर्मणो विधानं रचनां ददर्श॥२८॥

गो० टी०—तस्मिन्निति । अनेन गन्धर्वाप्सरसामागमनमात्रं सूचितं, विधानं निर्माणं तच्च प्रपञ्चयिष्यति—चतुःशालानीत्यादिना ॥ २८ ॥

२९] ति० टी०—तदेव विधानं दर्शयति—बभूवेत्यादि । छन्ना बभूवेत्यन्वयः । शाद्वलं कोमलतृणमत्र ॥ २९ ॥

रा० टी०—विधानमेवाह—बभूवेत्यादिभिः । समन्ताच्चतुर्दिक्षु नीलवैदूर्यसंनिभैः बहुभिः शाद्वलैः कोमलतृणैः छन्ना भूमिः पञ्चयोजनं विंशतिक्रोशं समा बभूव ॥ २९ ॥

गो० टी०—देवताकृत्यमाह—बभूवेति । शाद्वलैर्बालतृणवत्प्रदेशैः छन्ना व्याप्ता नीलवैदूर्यसंनिभैः इन्द्रनीलवैदूर्याभ्यां तुल्यैः ॥ २९ ॥

३०] ति० टी०—तस्मिन्पञ्चयोजनमिते देशे फलभूषिताः कपित्थादयो बभूवुरित्यन्वयः ॥ ३० ॥

रा० टी०—तस्मिन्निति । फलभूषिताः फलैः शोभिताः बिल्वादयस्तस्मिन् पञ्चयोजनात्मकप्रदेशे बभूवुः अजायन्त॥३०॥

गो० टी०—तस्मिन्निति । तस्मिन् भूप्रदेशे बीजपूरकाः मातुलुङ्गकाः फलान्येव भूषणानि येषां ते फलभूषणा इति सर्ववृक्षविशेषणम् 'आमलक्यो बभूवुः' इति पाठः ॥ ३० ॥

३१] ति० टी०—वनं चैत्ररथम् नदी जातावेकवचनम् तीरजैर्वृक्षैः ॥ ३१ ॥

रा० टी०—उत्तरेभ्य इति। दिव्योपभोगवत् देवसंबन्ध्युपभोगविशिष्टं वनं तीरजैर्वृक्षैर्वृता सौम्या रम्या नदी च उत्तरेभ्यः कुरुभ्यः आजगाम ॥ ३१ ॥

गो० टी०—उत्तरेभ्य इति । वनमाङ्गतं कौबेरवनं दिव्योपभोगवत् दिव्योपभोगार्हम् । नदीति जात्येकवचनं तीरजैः वृक्षैरिति शेषः॥ ३१ ॥

३२] ति० टी०—चतुःशालानि शुभ्राणि गृहाणि जातानीति शेषः तथा गजादीनां शालाश्च जाताः तोरणानि पुरद्वाराणि ॥ ३२ ॥

रा० टी०—चतुरिति । शतुश्शालानि शालाचतुष्टयविशिष्टानि हर्म्यप्रासादसंयुक्तानि तोरणानि येषु तानि अत एव शुभ्राणि शोभनानि गृहाणि गजवाजिनां शालाश्च अजायन्तेति शेषः ॥ ३२ ॥

गो० टी०—चतुःशालानीति । चतुःशालानि संजवनानि 'चतुःशालं संजवनम्' इति हलायुधः । आजग्मुरिति विपरिणामः । तोरणानि बन्धनमालाः 'बन्धी बन्धनमाला तु तोरणं परिकीर्तितम्' इति हलायुधः । 'वन्दनमाले' इतिपाठान्तरम्॥३२॥

३३] ति० टी०—सितमेघनिभं सुधालेपेन, शुक्लमाल्यैः कृत आकारो यस्य, दिव्यैर्गन्धैर्गन्धवज्जलैरुक्षितं सिक्तम् ॥३३॥

रा० टी०—सितेति । सितमेघसदृशं सुतोरणं शोभनतोरणविशिष्टं शुक्लमाल्यैः श्वेतपुष्पैः कृता आकारा भूषणानि यस्मिन् दिव्यगन्धैः सम्युक्षितं सिक्तम् ॥ ३३ ॥

गो० टी०—सितमेघेत्यारभ्य धौतनिर्मलभाजनमित्यन्तमेकं वाक्यम् । आजगामेति क्रिया द्रष्टव्या सितमेघनिभं सुधालेपनबलत्वात् दिव्यमाल्यकृताकारं दिव्यमालाभिः कृता-

१ उच्चारित इति गो. पाठः । २ उपरते इति गो. पाठः । ३ श्रोत्रसुखे इति गो. पाठः । ४ योजनेति गो. पाठः । ५ Sथ जम्बूश्च बभूवुः फलभूषणा इति गो. पाठः । ६ दिव्येति गो. पाठः । ७ संबाधा इति गो. पाठः । ८ दिव्येति गो. पाठः ।

चतुरस्रमसंबाधं शयनासनयानवत् । दिव्यैः सर्वरसैर्युक्तं दिव्यभोजनवस्त्रवत् ॥ ३४ ॥
उपकल्पितसर्वान्नं धौतनिर्मलभाजनम् । कृत्स्नसर्वासनं श्रीमत्स्वास्तीर्णशयनोत्तमम् ॥ ३५ ॥
प्रविवेश महाबाहुरनुज्ञातो महर्षिणा । वेश्म तद्रत्नसंपूर्णं भरतः कैकयीसुतः ॥ ३६ ॥
अनुजग्मुश्च [1]ते सर्वे मन्त्रिणः सपुरोहिताः । बभूवुश्च मुदा युक्तास्तं दृष्ट्वा वेश्मसंविधिम् ॥ ३७ ॥
तत्र राजासनं दिव्यं व्यजनं छत्रमेव च । भरतो मन्त्रिभिः सार्धमभ्यवर्तत राजवत् ॥ ३८ ॥
आसनं पूजयामास रामायाभिप्रणम्य च । बालव्यजनमादाय न्यषीदत्सचिवासने ॥ ३९ ॥
आनुपूर्व्यान्निषेदुश्च सर्वे मन्त्रिपुरोहिताः । ततः सेनापतिः पश्चात्प्रशास्ता च [2]न्यषीदत ॥ ४० ॥
ततस्तत्र मुहूर्तेन नद्यः पायसकर्दमाः । उपातिष्ठन्त भरतं भरद्वाजस्य शासनात् ॥ ४१ ॥

लंकारं दिव्यगन्धैर्दिव्यचन्दनैः समुक्षितं सिक्तं चतुरस्रं चतुष्कोणम् असंबाधं विशालं शयनासनयानवत् यानं शिबिकादि रसैः शर्करादिभिः दिव्यभोजनवस्त्रवत् दिव्यभोजनानि सूक्ष्मशाल्यन्नादीनि दिव्यवस्त्राणि सूक्ष्मवस्त्राणि उपकल्पितानि सर्वान्नानि नानाविधापूपादीनि यस्मिँस्तत् धौतनिर्मलभाजनं धौतत्वेन निर्मलानि भाजनानि यस्मिँस्तत्तथा ॥ ३३ ॥ ३४ ॥

३४] ति० टी०—यानं शिबिकादि ॥ ३४ ॥

रा० टी०—चतुरस्रं चतुःकोणमसंबाधं जनबाधारहितं विशालमित्यर्थः, शयनासनयानवत् शयनासनयानविशिष्टं दिव्यैः सर्वरसैर्युक्तं विशिष्टं दिव्यभोजनवस्त्रवत् उपकल्पितानि सर्वान्नानि यस्मिन् तत् धौतानि शुद्धानि निर्मलभाजनानि येषु तत् कृत्स्नानि सर्वाणि अनेकविधानि आसनानि येषु तत् श्रीमत् सकलसंपत्तिविशिष्टं स्वास्तीर्णाः समुपकल्पिताः शयनोत्तमाः उत्तमपर्यङ्काः येषु तत् राजवेश्म अजायतेति शेषः । श्लोकत्रयमेकान्वयि ॥ ३४ ॥ ३६ ॥

३५–३६] ति० टी०—धौतत्वेन प्रक्षालितत्वेन निर्मलानि भाजनानि यस्मिन् ॥ ३५ ॥ ३६ ॥

गो० टी०—कृत्स्नसर्वासनमिति । कृत्स्नसर्वासनमित्यत्र स्नानभोजनाद्यासनान्युच्यन्ते, शयनासनेत्यत्र राजासनं तत्साहचर्याच्छयनं च महाशयनं स्वास्तीर्णशयनोत्तममित्यत्र निद्रार्थशयनम् । तत्र भरतस्य प्रवेशमाह—प्रविवेशेति । महाबाहुरित्यनेन तदर्हत्वमुच्यते केकयीसुत इत्यनेन केकयीदत्तराज्येऽप्यनादरः किमत्र आदरं करिष्यतीति द्योत्यते महर्षिणा भरद्वाजेन ॥ ३५ ॥

३७] ति० टी०—वेश्मसंविधिं वेश्मसंविधानम् ॥ ३७ ॥

रा० टी०—प्रविवेशेति । रत्नसंपूर्णं वेश्म राजगृहं महर्षिणा अनुज्ञातः कैकेयीसुतो भरतः प्रविवेश सपुरोहिताः पुरोहितसहिताः मन्त्रिणश्च अनुजग्मुः तं विलक्षणं वेश्मसंविधिं तत्क्षणवेश्मनिर्माणं दृष्ट्वा मुदा हर्षेण युक्ताश्च बभूवुः । श्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

गो० टी०—अनुजग्मुरिति । वेश्मसंविधिं वेश्मसंविधानम् ॥ ३६ ॥

३८] ति० टी०—राजासनं सिंहासनं राजवद्राजयोग्यं तदभ्यवर्तत प्रदक्षिणीकृतवान् ॥ ३८ ॥

रा० टी०—तत्रेति । राजवत् राजयोग्यताविशिष्टं तत्र तस्मिन् गृहे विद्यमानं दिव्यं राजासनं व्यजनं च छत्रं च भरतः अभ्यवर्तत प्रदक्षिणामकरोत् ॥ ३८ ॥

गो० टी०—तत्रेति । राजासनं राजार्हासनम् अभ्यवर्तत अभितोऽवर्तिष्ट प्रदक्षिणं कृतवानिति यावत्, राजवत् राजतुल्यं रामभिवेत्यर्थः ॥ ३७ ॥

३९] ति० टी०—न तु तत्रोपविष्ट इत्याह—आसनं पूजयामासेति । रामचन्द्रीयमेतदिति बुद्ध्या रामाय प्रणम्यासनोपरि प्रतिष्ठितं रामं ध्यात्वेति शेषः । बालव्यजनमादाय रामसेवाशेषतयेति शेषः । सचिवासने सचिवार्थकृत्रासने सिंहासनाधस्तले । अत्रेदं बोध्यम्—भरतेन वाचोक्तमपि राज्यानभिलाषं लोका न श्रद्दध्युः, अतः क्रिययापि सर्वलोकप्रत्यायनाय महर्षिणा तपोव्ययेनापीदृशमातिथ्यकरणम् । किं च पुष्पादिभिः पूजेवेयमपि क्रिया विष्णोरंशभूतभरततुष्टये इति तत्करणम् । किं च भरतं प्रति त्वं दुष्टबुद्ध्याऽऽगतोऽसि किम् इति प्रभे तस्य ऋषेरसर्वज्ञत्वासामर्थ्यादिशङ्कावारणाय स्वसामर्थ्यदर्शनम् । अपि च भगवदेकचित्तानां स्वर्गसुखमिहापि भवतीति भगवद्रामप्रीतिमाहात्म्यं प्रदर्शयितुं तद्दर्शनेन च तेषां तत्राधिकां प्रीतिमुत्पादयितुं तथाकरणं मुनेरिति दिक् ॥ ३९ ॥

रा० टी०—आसनमिति । रामाय अभिप्रणम्य बालव्यजनमादाय गृहीत्वा आसनं पूजयामास रामयोग्यमिदमिति बुद्ध्या आनर्च सचिवासने अमात्योचितासने न्यषीदच्च ॥ ३९ ॥

गो० टी०—आसनमिति । आसनं पूजयामासेत्यत्र राजवदित्यनुकर्षः । रामायासनोपरि स्थितत्वेन भाविताय बालव्यजनमादाय स्वशेषत्वाद्गुणतयेति भावः । सचिवासने सचिवार्थकृते आसने सिंहासनाधःप्रदेशस्थ इत्यर्थः ॥ ३८ ॥

४०–४१] ति० टी०—आनुपूर्व्यायथोचितोपवेशनप्रकारेण प्रशास्ता शिबिररक्षकः ॥ ४० ॥ ४१ ॥

रा० टी०—आनुपूर्व्यादिति । मन्त्रिपुरोहिताः आनुपूर्व्या-

---

१ तमिति गो० पाठः । २ निषेदुरिति गो० पाठः ।

आसामुभयतः कूलं पाण्डुमृत्तिकलेपनाः । रम्याश्चावसथा दिव्या ब्राह्मणस्य प्रसादजाः ॥ ४२ ॥
तेनैव च मुहूर्तेन दिव्याभरणभूषिताः । आगुर्विंशतिसाहस्रा ब्रह्मणा प्रहिताः स्त्रियः ॥ ४३ ॥
सुवर्णमणिमुक्तेन प्रवालेन च शोभिताः । आगुर्विंशतिसाहस्राः कुबेरप्रहिताः स्त्रियः ॥ ४४ ॥
याभिर्गृहीतः पुरुषः सोन्माद इव लक्ष्यते । आगुर्विंशतिसाहस्रा नन्दनादप्सरोगणाः ॥ ४५ ॥
नारदस्तुम्बुरुर्गोपः पैभया सूर्यवर्चसः । एते गन्धर्वराजानो भरतस्याग्रतो जगुः ॥ ४६ ॥
अलम्बुषा मिश्रकेशी पुण्डरीकाथ वामना । उपानृत्यन्त भरतं भरद्वाजस्य शासनात् ॥ ४७ ॥
यानि माल्यानि देवेषु यानि चैत्ररथे वने । प्रयागे तान्यदृश्यन्त भरद्वाजस्य तेजसा ॥ ४८ ॥
बिल्वा मार्दङ्गिका आसञ्शम्याग्राहा विभीतकाः । अश्वत्था नर्तकाश्चासन्भरद्वाजस्य तेजसा ॥ ४९ ॥

क्रमशः निषेदुः ततः सेनापतिः न्यषीदत् पश्चात् प्रशास्ता तद्धरक्षकश्च न्यषीदत ॥ ४० ॥

गो० टी०–आनुपूर्व्यादिति । सेनापतिः दण्डनायकः प्रशास्ता शिबिरनियन्ता ॥ ३९ ॥

रा० टी०–तत इति । तत्र तद्गृहसमीपे पायसा एव कर्दमाः यावद्ध ताः नद्यः मुहूर्तेन घटिकाद्वयेन भरतमुपातिष्ठन्त ॥ ४१ ॥

गो० टी०–तत इति । मुहूर्तेन अल्पकालेन ॥ ४० ॥

४२] ति० टी०–उभयतः कूलमुभयोः कूलयोः पाण्डुमृत्तिकालेपनाः सुधालिप्ताः ब्राह्मणस्य भरद्वाजस्य ॥ ४२ ॥

रा० टी०–आसामिति । ब्राह्मणस्य भरद्वाजस्य प्रसादजाः अतिप्रीत्योत्पादिताः आसां नदीनामुभयतःकूलं कूलद्वये पाण्डुमृत्तिकामिः लेपनं येषां ते आवसथाः गृहाणि बभूवुरिति शेषः ॥ ४२ ॥

गो० टी०–तासामिति । उभयतः कूलम् उभयोः कूलयोरित्यर्थः, पाण्डुमृत्तिकलेपनाः सुधालिप्ता इत्यर्थः "ङ्यापोः–" इति ह्रस्वः ब्रह्मणः भरद्वाजस्य उपातिष्ठन्तेत्येतदनुषज्यते ॥४१॥

४३] ति० टी०–आगुरागतवत्यः ॥ ४३ ॥

रा० टी०–तेनेति । तेनैव तस्मिन्नेवेत्यर्थः, मुहूर्तेन मुहूर्ते दिव्यैराभरणैर्भूषिताः ब्रह्मणा प्रहिताः भरद्वाजेन प्रापिताः विंशतिसाहस्राः स्त्रियः आगुः आजग्मुः ॥ ४३ ॥

गो० टी०–तेनेति । आगुराजग्मुः सहस्रमेव साहस्रं ब्रह्मणा चतुर्मुखेन स्त्रियः अप्सरसः ॥ ४२ ॥

४४] ति० टी०–सुवर्णमणिमुक्तेनेति समाहारद्वन्द्वः॥४४॥

रा० टी०–सुवर्णेति । सुवर्णादित्रयेण समाहारद्वन्द्वः प्रवालेन च शोभिताः आगुः ॥ ४४ ॥

गो० टी०–सुवर्णमणिमुक्तेनेति । सुवर्णमणिमुक्तेन सुवर्णानि सुवर्णमयाभरणानि मणयो रत्नानि मुक्ताश्च सुवर्णमणिमुक्तं तेन "जातिरप्राणिनाम्" इति एकवद्भावः ॥ ४३ ॥

४५] ति० टी०–गृहीतो दर्शनादिनात्मवशीकृतः सोन्मादः उद्भूतसंतोषसहित इत्यर्थः । नन्दनमिन्द्रवनम् ॥४५॥

रा० टी०–याभिरिति । याभिः अप्सरोभिः गृहीतः स्वीकृतः पुरुषः सोन्मादः उन्मादसहित इव लक्ष्यते तन्मात्रनिरतो भवतीत्यर्थः, तद्भिन्नं निखिलं तुच्छवत्पश्यतीति तात्पर्यं ता अप्सरोगणाः नन्दनान्नन्दनवनादागुः ॥ ४५ ॥

गो० टी०–याभिरिति । गृहीत आलिङ्गितः याभिः यैरित्यर्थः, एतदर्थस्य पूर्वेण वान्वयः । कुबेरप्रहिताः गन्धर्वाप्सरसः तथाहि श्रुतिः "गन्धर्वाप्सरसो वा एतमुन्मादयन्ति । य उन्मादयतीति याभिर्गृहीताः पुरुषाः सोन्मादा इति होच्यते" इति च पाठः तदा उच्यते श्रुत्येति शेषः । हेति प्रसिद्धौ ॥ ४४ ॥

४६–४७] ति० टी०–नारदादयो गन्धर्वराजाः कान्त्या सूर्यसमा ययुः ॥ ४६ ॥ ४७ ॥

रा० टी०–नारद इति । प्रभया कान्त्या सूर्यवर्चसः सूर्यतेजस्तुल्यतेजोविशिष्टाः एते नारदादयो गन्धर्वराजानः गन्धर्वराजाः अग्रतः अग्रे जगुः ॥ ४६ ॥

गो० टी०–नारद इति । नारदो ब्रह्मपुत्रादन्यः तुम्बुरुसाहचर्यात् स हि पर्वतसहचरः आह्वानसमये तुम्बुरुणेत्यस्योपलक्षणार्थत्वात् गन्धर्वराजान इति टजभाव आर्षः ॥ ४६ ॥

रा० टी०–अलम्बुसेति । अलम्बुसादयः भरतमुपानृत्यन्त ॥ ४७ ॥

गो० टी०–अलम्बुसेति । भरतमुपानृत्यन् भरतमुद्दिश्याधिकमनृत्यन् "उपोधिके च" इति कर्मप्रवचनीयसंज्ञा । अत्र भरद्वाजस्य शासनादुपानृत्यन्नित्यनेन भरतस्य रामे वृत्तिविशेषमातिथ्यव्याजेन परीक्षितवानृषिरिति गम्यते ॥ ४६ ॥

४८] ति० टी०–प्रयागे प्रयागक्षेत्रे ॥ ४८ ॥

रा० टी०–यानीति । तानि माल्यानि प्रयागे अदृश्यन्त४८

गो० टी०–एवं भरतस्य रामशेषतयैवावस्थानं नतु भोगलौल्येनेत्युक्त्वा सेनाभोगं प्रपञ्चयति–यानीत्यादिना । देवेषु देवोद्यानेषु नन्दनादिष्वित्यर्थः, चैत्ररथस्य पूर्वं कुरुदेशस्थत्वेनोक्तेरिदं चैत्ररथं तद्वोध्यं, प्रयागे प्रयागस्थितभरद्वाजाश्रमवनक्षेत्रेष्वित्यर्थः, तेजसा प्रभावेन ॥ ४७ ॥

४९] ति० टी०–बिल्वा बिल्ववृक्षाः मार्दङ्गिका मृदङ्गवादककरूपधराः, एवं विभीतकाः शम्याख्यतालग्राहकाः 'वह्नौ तालविशेषे च शमे तालक्रियान्तरे । शम्या यज्ञायुधे' इति॥४९॥

१ तासामिति गो. पाठः । २ ब्रह्मणास्त्विति गो. पाठः । ३ प्रवरा इति गो. पाठः । ४ नृत्यंस्त्विति गो. पाठः । ५ शासनादिति गो. पाठः ।

ततः सरलतालाश्च तिलकाः सैतमालकाः । प्रहृष्टास्तत्र संपेतुः कुब्जा भूत्वाथ वामनाः ॥ ५० ॥
[1]शिंशपामलकी जैम्ब्वूर्याश्चान्याः [2]कानने लताः । [मालती मल्लिका जातिर्याश्चान्याः कानने लताः]
प्रमदाविग्रहं कृत्वा भरद्वाजाश्रमेऽ[3]वसन् ॥ ॥ ५१ ॥
[4]सुरां सुरापाः पिबत पायसं च बुभुक्षिताः । मांसानि च सुमेध्यानि भक्ष्यन्तां [5]यो यदिच्छति॥५२॥
[6]उच्छोद्य स्नापयन्ति स्म नदीतीरेषु वल्गुषु । अप्येकमेकं[7][10] पुरुषं प्रमदाः सप्त चाष्ट च ॥ ५३ ॥
संवाहन्त्यः समापेतुर्नार्यो [8][9]विपुललोचनाः । परिमृज्य [11]तदान्योन्यं पाययन्ति वराङ्गनाः ॥ ५४ ॥
हयान्गजान्खरानुष्ट्रांस्तथैव सुरभेः सुतान् । अभोजयन्वाहनपास्तेषां भोज्यं यथाविधि ॥ ५५ ॥

रा० टी०–बिल्वा इति । बिल्वाः बिल्वतरवः मार्दङ्गिका मृदङ्गवादकाः आसन् बभूवुः । शम्यास्तदभिधतरवः ग्राहाः तालानां ग्राहकाः आसन् , विभीतकाः अश्वत्थाश्च नर्तका आसन् ॥ ४९ ॥

गो० टी०–आद्यतानां भरतशेषत्वेन विनियोगात् सैनिकानां नर्तकादीनि दर्शयति–बिल्वा इति । बिल्वाः बिल्ववृक्षाः मार्दङ्गिकाः मृदङ्गवादकाः "तदस्य शिल्पम्" इति ठक् । आसन् तद्भूपास्तत्कार्यकारिणोऽभवन्नित्यर्थः । विभीतकाः कलिवृक्षाः शम्याग्राहास्तालग्राहका आसन् 'शम्या यज्ञायुधे ताले मशके च क्रियान्तरे' इति वैजयन्ती । भरते चोक्तम् 'वह्नितालशम्यातालक्रिया' इति ॥ ४८ ॥

५०] ति० टी०–सरलो देवदारुविशेषः ॥ ५० ॥

रा० टी०–तत इति । सरलतालाः सरलाः देवदारवस्तालाः तालवृक्षाः सतमालकाः तमालकसहिताः तिलकाः तिलकवृक्षाः हृष्टाः सन्तः कुब्जाः वामनाश्च भूत्वा संपेतुः ॥ ५० ॥

गो० टी०–तत इति । सरलाः देवदारुविशेषाः तालाः प्रसिद्धाः तिलकाः क्षुरकनामका वृक्षाः नक्तमालकाः करञ्जनाम्न्या वृक्षाः कुब्जाः स्थगुमन्तः वामना ह्रस्वाः संपेतुः संपन्नाः ॥ ४९ ॥

५१] ति० टी०–शिंशपादयो ये स्त्रीलिङ्गशब्दवाच्या वृक्षाः लता मल्लिकामालत्यादयः स्त्रीनेस्तपोमाहात्म्यादेव वृक्षादीनां तत्तद्रूपतापत्तिः पुनर्लतादिरूपप्रत्यापत्तिश्चेति मन्तव्यम् ॥५१॥

रा० टी०–शिंशपेति । शिंशपादयः प्रमदाविग्रहं कृत्वा भरद्वाजाश्रमे अवसन् ॥ ५१ ॥

गो० टी०–अथ स्त्रीलिङ्गवृक्षाणां स्त्रीभावपरिग्रहमाह–शिंशुपेत्यादि । सार्धश्लोकद्वयमेकान्वयम् । शिंशुपादयः प्रमदाविग्रहं कृत्वा यावदिच्छथ तावद्भक्ष्यन्तामित्यवदन्निति संबन्धः। सुरापाः हे सुरापानप्रवृत्ताः! इमाः सुराः पिबत हे बुभुक्षिताः पायसपानेच्छवः इदं पायसं भक्ष्यतामिति वचनविपरिणामेनाह्वयन्ति । सुमेध्यानि परिशुद्धानि ॥ ५०–५१ ॥

५२] ति० टी०–तत्र प्रमदारूपं धृत्वा किं कुर्युस्तदाह–सुरामिति । एवमूचुरिति शेषः ॥ ५२ ॥

रा० टी०–सुरामिति । हे सुरापाः ! यूयं सुरां पिबत हे बुभुक्षिताः ! यावदिच्छथ तावत्पायसं पिबत खादत मांसानि भक्ष्यन्तामिति परस्परमवदन्निति शेषः ॥ ५२ ॥

५३] ति टी०–उच्छोद्योद्वर्तनं कृत्वा एकमेकं पुरुषम् । अत्र "एकं बहुव्रीहिवत्" इति बहुव्रीहिवद्भावाभाव आर्षः॥५३॥

रा० टी०–उच्छोद्येति । वल्गुषु नदीतीरेषु एकमेकपुरुषं प्रत्येकं पुरुषं सप्त अष्ट च प्रमदाः उच्छोद्य उद्वर्तनं कृत्वा स्नापयन्ति स्म एकमेकपुरुषमित्यत्र " एकं बहुव्रीहिवत् " इति बहुव्रीहिवद्भावाभाव आर्षः इति भट्टाः ॥ ५३ ॥

गो० टी०–उच्छाद्येति । उच्छाद्य उद्वर्तनं कृत्वा 'उद्वर्तनोच्छादने द्वे' इत्यमरः तैलादिना शरीरमर्दनं कृत्वेत्यर्थः, वल्गुषु रम्येषु एकमेकमिति "एकं बहुव्रीहिवत्" इति बहुव्रीहिवद्भावाभाव आर्षः । संवाहन्त्यः संवाहयन्त्यः पादसंवाहनं कुर्वन्त्यः परिमृज्य जलार्द्रमङ्गं वस्त्रादिना परिमृज्य अलंकृत्येति वार्थः, अन्योन्यं रहसि पाययन्ति सुरा इति शेषः ॥ ५२ ॥ ५३ ॥

५४] ति० टी०–संवाहन्त्यः पादसंवाहनादि कुर्वत्यः । परिमृज्य जलार्द्रमङ्गं वस्त्रादिना परिमृज्यालंकृत्य च पाययन्ति मध्वादिकमिति शेषः॥ ५४ ॥

रा० टी०–संवाहन्त्य इति । संवाहन्त्यः पादसंवाहनं कारयन्त्यो विपुललोचनाः वराङ्गनाः वराः अङ्गना परिचारिकाः यासां ताः नार्यः समापेतुः नद्यामिति शेषः । तदा स्नानोत्तरकाले अन्योन्यं परिमृज्य जलार्द्रमङ्गं वस्त्रैरिति शेषः । अन्योन्यं पाययन्ति मध्वादीति शेषः ॥ ५४ ॥

५५] ति० टी०–सुरभेः सुता वृषभाः । तेषां हयादीनां भोज्यं तांस्तत्तत्पालका अभोजयन्नित्यर्थः ॥ ५५ ॥

रा० टी०–हयानिति । वाहनपाः हयादिपालकास्तेषां हयादीनां भोज्यं हयादीन् यथाविधि अभोजयन् ॥ ५५ ॥

गो० टी०–हयानिति । वाहनपाः ऋषिप्रभावसिद्धा वाहनपाः वाहनरक्षकाः तेषां हयादीनां यथाविधि यथायोग्यं भोज्यं तत्तद्वाहनानुगुणं भोज्यमित्यर्थः, हयादीन् अभोजयन् ण्यन्तत्वाद्विकर्मकत्वं सुरभेः सुतान् वृषभान् ॥ ५४ ॥

१ नक्तेति गो. पाठः । २ शिंशुपेति गो. पाठः । ३ जम्ब्वोमिति गो. पाठः । ४ काननेषु ता इति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ ऽवदन्निति गो. पाठः । ७ सुरा इति गो. पाठः । ८ यावदिच्छथेति गो. रा. पाठः । ९ उच्छाद्येति गो. पाठः । १० एकपुरुषमिति रा. पाठः । ११ तेषेति गो. पाठः ।

इक्षूंश्च मधुलाजांश्च भोजयन्ति स्म वाहनान् । इक्ष्वाकुवरयोधानां चोदयन्तो महाबलाः ॥ ५६ ॥
नाश्वबन्धोऽश्वमाजानान्न गजं कुञ्जरग्रहः । मत्तप्रमत्तमुदिता सा चमूस्तत्र संबभौ ॥ ५७ ॥
तर्पिताः सर्वकामैश्च रक्तचन्दनरूषिताः । अप्सरोगणसंयुक्ताः सैन्या वाचमुदीरयन् ॥ ५८ ॥
नैवायोध्यां गमिष्यामो न गमिष्याम दण्डकान् । कुशलं भरतस्यास्तु रामस्यास्तु तथा सुखम् ॥ ५९ ॥
इति पादातयोधाश्च हस्त्यश्वारोहबन्धकाः । अनाथास्तं विधिं लब्ध्वा वाचमेतामुदीरयन् ॥ ६० ॥
संप्रहृष्टा विनेदुस्ते नरास्तत्र सहस्रशः । भरतस्यानुयातारः स्वर्गोऽयमिति चाब्रुवन् ॥ ६१ ॥
नृत्यन्तश्च हसन्तश्च गायन्तश्चैव सैनिकाः । समन्तात्परिधावन्तो माल्योपेताः सहस्रशः ॥ ६२ ॥
ततो भुक्तवतां तेषां तदन्नममृतोपमम् । दिव्यानुदीक्ष्य भक्ष्यांस्तानभवद्भक्षणे मतिः ॥ ६३ ॥

५६] ति० टी०–इक्ष्वाकुवरयोधानां वाहनानि चोदयन्तो भक्षणाय प्रेरयन्तः । तानिक्ष्वादीन्भोजयन्ति स्म ॥ ५६ ॥

रा० टी०–तद्भोज्यपदार्थान् विशिष्य निर्दिशन्नाह–इक्षूनिति । इक्ष्वाकुवरयोधानां वाहनानि हयादीनि चोदयन्तः भक्षणाय प्रेरयन्तः महाबलाः अश्वादिपालकाः इक्ष्वादीन् भोजयन्ति स्म ॥ ५६ ॥

गो० टी०–इक्षूनिति । महाबला ऋषिप्रभावसिद्धवाहनपाः इक्ष्वाकुवरयोधानां वाहनान् वाहनानि इक्षून् मधुलाजान् मधुमिश्रलाजान् "भक्ष्येण मिश्रीकरणम्" इति समासः चोदयन्तः भक्षणार्थं प्रेरयन्तः सन्तः भोजयन्ति स्म ॥ ५६ ॥

५७] ति० टी०–मत्ता मदकरद्रव्यसेवया, प्रमत्ता मधुपानेन कार्याकार्यविवेकशून्या, मुदिता रक्तचन्दनरूषादिभोगेन ॥५७॥

रा० टी०–नेति । तत्र मादकरसादिपानानन्तरसमये मत्तप्रमत्तमुदिताः मत्तेन मादकरसादिपानेन प्रमत्ताः कार्याकार्यविवेकरहिता एव मुदिता यस्यां सा चमूः संबभौ, अत एव अश्वबन्धः अश्वानां बन्धकः अश्वं न आजानात् कुञ्जरग्रहः हस्तिपालकः गजं हस्तिनं नाजानात् ॥ ५७ ॥

गो० टी०–नेति । अश्वं बध्नातीत्यश्वबन्धः अश्वग्राहकः नाजानात् न ज्ञातवान् । तत्र हेतुमाह–मत्तेति । मदकरद्रव्यसेवया मत्ताः प्रमत्ताः मधुपानादिना कार्याकार्यविवेकशून्याः मुदिताः रक्तचन्दनादिभोगातिशयेन हृष्टाः तत्र तदा ॥ ५६ ॥

५८] ति० टी०–सैन्याः सेनासमवेताः उदीरयन्तुदैरयन् ५८

रा० टी०–तर्पिता इति । सर्वकामैः निखिलेप्सितैः । किंच सर्वेषां कामाः मनोरथाः येषु तैर्भक्ष्यादिभिः तर्पिताः अप्सरोगणैः संयुक्ताः सैन्याः सैन्यसंबन्धिनः जनाः वाचं प्रमत्तोचितवचनमुदीरयन् उदैरयन् ॥ ५८ ॥

गो० टी०–तर्पिता इति । अप्सरोगणाः वनलताभूताः न स्वाद्वताः तासां भरतवेश्माप्रवेशकथनात्, सैन्याः सेनायां समवेताः उदैरयन् उक्तवन्तः ॥ ५७ ॥

५९] ति० टी०–तां वाचमाह–नैवेति । न गमिष्यामेत्यार्षः सलोपः । भरतस्य कुशलमस्तु यत्संगत्या भूमौ स्वर्गसुखलाभः ॥ ५९ ॥

६०] ति० टी०–हस्त्यश्वारोहास्तद्बन्धकाश्च पादातरूपयोधाः चेन रथिकसंग्रहः । तं विधिं तादृशसत्कारम् अनाथा अपरतन्त्रा इवेत्यर्थ इति कतकः अयाचका इत्यर्थ इत्यन्ये । वक्तृणामतिहर्षयुक्ततया कवेरपि वर्णनीयमयीभावात्पुनरुक्तिर्न दोषाय ॥ ६० ॥

रा० टी०–तद्वचनाकारं बोधयन्नाह–नैवेति । तद्विधिं सत्काररीतिं लब्ध्वा प्राप्य अनाथाः मादकरसादिपानहेतुकनाथाभाववत्त्वेन आत्मनो मन्यमानाः पादातयोधाः पादैः अतन्ति गच्छन्ति ते ते एव योधाः बन्धकाश्च न गमिष्याम न गमिष्यामः इति एतां वाचमुदीरयन्तुदैरयन् । श्लोकद्वयमेकान्वयि ॥ ५९ ॥ ६० ॥

गो० टी०–उदीरणप्रकारमाह–नेत्यादिना । न गमिष्याम इत्यत्र विसर्गलोपश्छान्दसः । भरतस्य कुशलमस्तु भरतो यथा तथा त्वा तिष्ठत्वित्यर्थः, एवं रामस्येत्यत्रापि। पादाभ्यामतन्तीति पादाताः 'अत सातत्यगमने' इति धातुः ते च ते योधाश्च पादातयोधाः चकारादथिकसमुच्चयः हस्त्यश्वानामारोहाः सादिनः हस्त्यादिबन्धकास्तद्भृत्याः तं विधिं सत्कारं लब्ध्वा अनाथाः स्वामिरहिताः स्वतन्त्रा इति यावत् नैवायोध्यामित्येतां वाचमुदैरयन्निति संबन्धः ॥ ५८ ॥ ५९ ॥

६१–६२]ति०टी०–विनादः प्रहृष्टानां शब्दविशेषः६१॥६२

रा० टी०–संप्रहृष्टा इति । तत्र भरतसैन्ये हस्तिनामश्वानां च आरोहा आरोहकाः सहस्रशो भरतस्यानुयातारो नराः संप्रहृष्टा वयमतितुष्टा इति विनेदुः स्वर्गोऽयमित्यब्रुवंश्च॥६१॥

रा० टी०–नृत्यन्त इति । माल्योपेताः सहस्रशः सैनिकाः समन्तात्परिधावन्ति ॥ ६२ ॥

गो० टी०–संप्रहृष्टा इति । विनेदुः जगर्जुः ॥६०॥६१॥

६३] ति० टी०–अभवद्भक्षणे मतिः क्लमानामपि भक्ष्यसौष्ठवात्पुनराकाङ्क्षाऽभूदित्यर्थः ॥ ६३ ॥

रा० टी०–तत इति । अमृतोपमं तदन्नं भुक्तवतां तेषां

१ चोदयन्त्य इति रा. पाठः । २ ते इति गो. पाठः । ३ उदैरयन्निति गो. पाठः । ४ नृत्यन्ति स्म हसन्ति स्म गायन्ति स्मेति गो. पाठः । ५ श्रावन्तीति गो. रा. पाठः ।

प्रेष्याश्चेव्यश्च वध्वश्च बलस्थाश्चापि सर्वशः । बभूवुस्ते भृशं प्रीताः सर्वे चाहतवाससः ॥ ६४ ॥
कुञ्जराश्च खरोष्ट्राश्च गोश्वाश्च मृगपक्षिणः । बभूवुः सुभृतास्तत्र नातो ह्यन्यमकल्पयम् ॥ ६५ ॥
नाशुक्लवासास्तत्रासीत्क्षुधितो मलिनोऽपि वा । रजसा ध्वस्तकेशो वा नरः कश्चिददृश्यत ॥ ६६ ॥
आजैश्चापि च वाराहैर्निष्ठानवरसंचयैः । फलनिर्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः ॥ ६७ ॥
पुष्पध्वजवतीः पूर्णाः शुक्लस्यान्नस्य चाभितः । ददृशुर्विस्मितास्तत्र नरा लौहीः सहस्रशः ॥ ६८ ॥
बभूवुर्वनपार्श्वेषु कूपाः पायसकर्दमाः । ताश्च कामदुघा गावो द्रुमाश्चासन्मधुश्च्युतः ॥ ६९ ॥

सैनिकानां दिव्यान् भक्ष्यान्दृष्ट्वेक्ष्य भक्षणे मतिः अभवत्। तृप्तानामपीच्छोत्पादकत्वेन भक्ष्याणामतिमनोहरत्वं व्यक्तम् ॥ ६३ ॥

गो० टी०–तत इति । तदन्नं पूर्वोक्तभक्ष्यादिचतुर्विधान्नम् भक्षणे पुनर्भक्षणे मतिरभवत् भक्ष्यसौष्ठवादिति भावः ॥ ६२ ॥

६४] ति० टी०–प्रेष्याः सेवकाः, चेट्यो दास्यः, बलस्थाः सेनास्थाः, अहतवाससो नूतनवस्त्रपरीधानाः ॥ ६४ ॥

रा० टी०–प्रेष्या इति । अहतवाससः नवीनवस्त्रधारिणस्ते सर्वे प्रेष्या भृत्याः चेट्यः दास्यः बलस्थाः सैन्यनिवासिन्यः सर्वशो वध्वश्च भृशमत्यन्तं प्रीता बभूवुः ॥ ६४ ॥

गो० टी०–प्रेष्या इति । प्रेष्याः परिचारकाः चेट्यो दास्यः वध्वो योधाङ्गनाः बले सेनायां तिष्ठन्तीति बलस्थाः सर्वविशेषणमेतत् अहतवाससः नूतनवस्त्राः, यद्वा आहतवाससः निर्णिक्तवाससः ॥ ६३ ॥

६५–६६] ति० टी०–अतो मुनिदत्तादन्यपदार्थं नाकल्पयन् नाभुञ्जन्नित्यर्थः । ' नान्यो ह्यन्यमकल्पयत् ' इति पाठे हिरप्यर्थे । अन्योऽपि सेनामन्तर्गतोऽपि मार्गस्थः प्रसङ्गात्तद्देशमागतः अन्यमृषिकल्पितादन्यं पदार्थं नाकल्पयन्न भुक्तवानित्यर्थः, अनेनात्याधिक्यं सामग्र्याः सूचितम् ॥६५॥६६॥

रा० टी०–कुञ्जरा इति । तत्र तस्मिन्समये कुञ्जरादयोऽपि सुभृताः अत्यन्तं पोषिताः अतो हेतोः अतः अस्माद्भक्ष्यादेः अन्यं कंचन पदार्थं न अकल्पयन् अवाञ्छन् सर्वेषां सर्वमनोरथपूर्तिरभवदिति तात्पर्यम् ॥ ६५ ॥

रा० टी०–नेति । तत्र भरद्वाजाश्रमे कश्चिन्नरः अशुक्लवासाः शुक्लवस्त्ररहितः क्षुधितः क्षुधाविशिष्टो वा मलिनः शरीरादिमालिन्याविशिष्टो वा रजसा धूल्या ध्वस्तकेशः पराभूतकेशविशिष्टो वा नासीत्, अत एव नादृश्यत । नकार उभयान्वयी । यः कश्चित् अशुक्लवासा अदृश्यत दृश्येत स नासीत् इत्यार्थे तु न नकारालक्तिः ॥ ६६ ॥

गो० टी०–कुञ्जरा इति । खरसहितोष्ट्रा खरोष्ट्राः मृगपक्षिणः क्रीडार्थं सैनिकैरानीताः सुभृताः सुपुष्टा वा तत्र सेनायाम् अन्यः अन्यं नाकल्पयत् ऋषिकृतव्यतिरिक्तम् अन्नादिकं नाकरोदित्यर्थः ॥ ६४ ॥ ६५ ॥

६७–६८] ति० टी०–' निष्ठानं व्यञ्जनं ज्ञेयम् ' इति हलायुधः । आम्रादिफलसंबन्धिकथितरससिद्धैरित्याजादिविशेषणं गन्धरसान्वितैरिति च । ' वार्याप्पीडे क्वाथरसे निर्यूहो नागदन्तके ' इति वैजयन्ती । एतैराजादिभिः पूर्णा लौहीः स्वर्णरजतादिपात्रीर्ददृशुरित्यन्वयः । लोहशब्दः पञ्चलोहसाधारणः । पात्रीणां विशेषणं शोभार्थम् । कल्पितपुष्पध्वजयुक्ता अभितः शुक्लस्यान्नस्यौदनस्य च पूर्णाः पात्रीर्ददृशुः ॥ ६७ ॥ ६८ ॥

रा० टी०–सैन्यान्तर्गतभक्ष्यादिभक्ष्याणि निर्दिशन्नाह–आजैरिति । फलनिर्यूहसंसिद्धैः फलानामाम्रादीनां निर्यूहाः क्वाथीकृतरसाः तैः संसिद्धैः साधितैः आजैः छागमांसैः वाराहैर्वराहमांसैः निष्ठानवरसंचयैः निष्ठानवराणां व्यञ्जनश्रेष्ठानां संचयाः तैश्च गन्धरसान्वितैः सुगन्धरसविशिष्टैः सूपैः मौद्गादिभिश्च शुक्लस्य स्वच्छस्य अन्नस्य ओदनस्य ओदनेन च पूर्णाः पुष्पध्वजवतीः पुष्पनिर्मितध्वजविशिष्टाः सहस्रशः लौहीः सुवर्णादिपात्रीः नराः ददृशुः । श्लोकद्वयमेकान्वयि । ' निष्ठानं व्यञ्जनं ज्ञेयम् ' इति हलायुधः । 'वार्याप्पीडे क्वाथरसे निर्यूहो नागदन्तके ' इति वैजयन्ती ॥ ६७ ॥ ६८ ॥

गो० टी०–आजैरित्यादि । श्लोकद्वयमेकान्वयम् । आजैः अजमांसैः वाराहैः वराहमांसैः निष्ठानवरसंचयैः व्यञ्जनश्रेष्ठसमूहैः ' निष्ठानं व्यञ्जनं स्मृतम् ' इति हलायुधः । फलनिर्यूहसंसिद्धैः सम्यङ्निष्पन्नफलयुक्तशर्करादिक्वाथरसैः 'द्वार्याप्पीडे क्वाथरसे निर्यूहो नागदन्तके' इति वैजयन्ती । सूपैः मुद्गादकीचणकादिसूपैः गन्धरसान्वितैः पाकभेदोत्थगन्धरसयुक्तैः पुष्पध्वजवतीः अलंकारार्थपरिकल्पितपुष्पशिल्पवतीः । शुक्लस्यान्नस्य पूर्णाः शुक्लेनान्नेन च पूर्णाः लौहीः लोहमयपात्रीः सर्वलोहेषु प्रधानत्वात् सुवर्णमत्र लोहशब्देनोच्यते ॥ ६६ ॥ ६७ ॥

६९] ति० टी०–वनपार्श्वेषु चैत्ररथवनवत्प्रतिभासमानवनप्रदेशेषु पञ्चयोजनमितेषु तत्रत्याः कूपाः पायसकर्दमा बभूवुः । तत्रत्या गावश्च कामदुघा बभूवुः ॥ ६९ ॥

रा० टी०–बभूवुरिति । पायसा एव कर्दमा येषु ते कूपाः वनपार्श्वेषु बभूवुः ताः तत्र स्थिताः गावः कामदुघाः इच्छाविषयीभूतपदार्थदात्र्यः आसन् द्रुमाश्च मधुच्युतः आसन् ॥ ६९ ॥

गो० टी०–बभूवुरिति । पायसान्येव कर्दमानि येषु ते तथोक्तास्ताः गावः पूर्वमेव वनचर्याः कामदुघाः यावदभीष्टक्षीरपूरकाः आसन् "दुहः कब्घश्च" मधूच्युतः मधुस्राविणः । पाठान्तरं मधुश्च्युतः मधुस्राविणः ॥ ६८ ॥

१ च सहस्रश इति गो. पाठः । २ दृष्ट्वा इति गो. पाठः । ३ निर्व्यूहेति गो. पाठः । ४ स्रुत इति गो. च्युत इति रा. पाठः । ५ गो. पुस्तके निर्व्यूहशब्दस्य दृष्टत्वात्स एव युक्तः क्रोशेषु तथा दृष्टत्वादिति भाति ।

वाप्यो मैरेयपूर्णाश्च मृष्टमांसचयैर्वृताः । प्रतप्तपैठरैश्चापि मार्गमायूरकौक्कुटैः ॥ ७० ॥
पात्रीणां च सहस्राणि स्थालीनां नियुतानि च । न्यर्बुदानि च पात्राणि शातकुम्भमयानि च ॥ ७१ ॥
स्थाल्यः कुम्भ्यः करम्भ्यश्च दधिपूर्णाः सुसंस्कृताः । यौवनस्थस्य गौरस्य कपित्थस्य सुगन्धिनः ॥ ७२ ॥
हृदाः पूर्णा रसालस्य दध्नः श्वेतस्य चापरे । बभूवुः पायसश्चान्ये शर्कराणां च संचयाः ॥ ७३ ॥
कल्कांश्चूर्णकषायांश्च स्नानानि विविधानि च । ददृशुर्भाजनस्थानि तीर्थेषु सरितां नराः ॥ ७४ ॥

७०] ति० टी०–निषादादिबलतृप्त्यर्थं प्रतापमात्रेण संस्कार्याः प्रतप्तास्तथा पिठरः कपालं तेषु संस्कृताः पक्वाः पैठरास्तैर्मृगादिसंबन्धिमांसचयैर्वृताः ॥ ७० ॥

रा० टी०–गजादिभक्ष्याणि निर्दिशन्नाह–वाप्य इति । मैरेयपूर्णाः मद्यपूरिताः मार्गमायूरकौक्कुटैः मृगमयूरकुक्कुटशरीरजनितैः मृष्टमांसचयैः स्वच्छमांसप्रसमूहैः प्रतप्तपैठरैः प्रतप्तपिठरसंस्कृतैः पिष्टैश्च वृताः वाप्यः आसन्निति शेषः, प्रतप्तपैठरैरित्यस्य मृष्टमांसचयविशेषणत्वं वा 'पिठरः कुण्ड उच्यते' इति हलायुधः ॥ ७० ॥

गो० टी०–वाप्य इति । अत्रासन्नित्यनुषज्यते । प्रतप्तपिठरैः प्रतप्तपिठरसंस्कृतैः "संस्कृतं भक्षाः" इत्यण् तस्य लुक् । पिठराः कुण्डानि 'उखा स्थाली चरुः कुम्भी पिठरः कुण्डमुच्यते' इति हलायुधः । मार्गमायूरकौक्कुटैः मृगमयूरकुक्कुटमांसैः ॥६९॥

७१] ति० टी०–पात्रीणामन्नाधाराणां स्थालीनां व्यञ्जनस्थालीनाम् । पात्राणि भोजनपात्राणीति कतकः । पात्राणां हस्तप्रक्षालनाद्युपयुक्तानां, स्थालीनां क्षुद्रजनपानपात्राणामिति तीर्थः ७१

रा० टी०–पात्रीणामिति । शातकुम्भमयानि सुवर्णनिर्मितानि पात्रीणामन्नस्थापनयोग्याल्पपात्राणां सहस्राणि स्थालीनां व्यञ्जनपात्राणां नियुतानि लक्षाणि पात्राणि भोजनपात्राणि न्यर्बुदानि शतकोट्यः ॥ ७१ ॥

गो० टी०–पात्रीणामित्यारभ्य संचया इत्यन्तमेकं वाक्यम् । पात्रीणाम् अन्नधानकुम्भीनां स्थालीनां व्यञ्जनपात्राणां नियुतानि लक्षाणि न्यर्बुदानि दशकोट्यः पात्राणि भोजनपात्राणि अमत्राणीति यावत् दधिपूर्णा इति स्थाल्यादित्रयविशेषणं, स्थाल्यः पिठराः कुम्भ्यः क्षुद्रकुम्भाः करम्भ्यः विशालास्यगुरुस्थाल्यः करम्भ्यः कर्कर्यः इत्याहुः सुसंस्कृताः दधिसंस्कारकशुष्क्यादियुक्ताः यौवनस्थस्य नातिनवतनस्य नातिपुराणस्येत्यर्थः । मथनानन्तरं यामान्तरितस्येत्यर्थः कपित्थस्य कपित्थपरिमलयुक्ततक्रस्येत्यर्थः 'तक्रं कपित्थं मथितम्' इति वैजयन्ती । गौरस्य शुभ्रस्य रसालस्य तक्रविशेषस्य ' अपक्वतक्रं सव्योषं चतुर्जातं गुडार्द्रकम् । सजीरकं रसालं स्यान्मञ्जिका शिखरिण्यपि' इति वैजयन्ती । सव्योषं शुण्ठीपिप्पलीमरीचियुक्तं चतुर्जातगुडार्द्रकं चतुर्जातैः एलालवङ्गकक्कोलनागपुष्पैः गुडेन शर्करया आर्द्रकेण च युक्तं कपित्थेन पूर्णा अपरे ह्रदा बभूवुः । रसालेन पूर्णा अपरे ह्रदा बभूवुः । दध्ना पूर्णाश्चापरे ह्रदा अन्ये पायसेन पूर्णाः 'पायसस्यान्ये' इति पाठः सर्वत्र तृतीयार्थे षष्ठी । तद्भक्षणार्थं शर्करायाः संचयाः राशयश्च बभूवुरित्यर्थः 'शर्करायावसंचयाः' इति च पाठः शर्करामिश्रयवविकारापूपसंचया इत्यर्थः ॥ ७०–७२ ॥

७२] ति० टी०–कुम्भ्यः स्थाल्यो जलपानपात्रविशेषाः । करम्भ्यो दधिमन्थनपात्राणि । यौवनस्थस्य मथनोत्तरं यामान्तरितस्य सुपक्वस्य च केशरादिसंबन्धाद्गौरस्य पीतवर्णस्य ' पीतो गौरो हरिद्राभः' । कपित्थस्य तक्रस्य सुगन्धिनस्तादृशद्रव्यसंयुक्तस्य ॥ ७२ ॥

७३] ति० टी०–ह्रदाः पूर्णा इति पूर्वान्वयि । तथा रसालस्य तक्रविशेषस्य । 'अपक्वतक्रं सव्योषं चतुर्जातं गुडार्द्रकम् । सजीरकं रसालं स्यान्मञ्जिका शिखरिण्यपि ' इति वैजयन्ती । तक्रमत्र निर्जलम् । व्योषं शुण्ठीमरीचिपिप्पल्यः । चतुर्जातम् ' त्रिगन्धमेलात्वकपत्रैश्चतुर्जातं सकेसरैः' इति शार्ङ्गधरे । पत्रं तेजपत्रम्, गुडः खण्डशर्करा, आर्द्रकं प्रसिद्धं, तस्य च पूर्णा ह्रदाः । श्वेतस्य दध्नश्चापरे पयसोऽन्ये पूर्णा ह्रदा इत्यनुषङ्गः । शर्कराणां च संचया राशयः ॥ ७३ ॥

रा० टी०–स्थाल्यः कुम्भ्यः जलपात्रविशेषाः सुसंस्कृताः अग्निप्रतापनादिरूपसंस्कारयुक्ताः दधिपूर्णाः करम्भ्यः दधिमन्थनपात्राणि यौवनस्थस्य नातिनवीनस्य नातिजीर्णस्य मन्थनानन्तरं यामं स्थितस्येत्यर्थः, गौरस्य केशरादिसंसर्गात् पीतवर्णस्य सुगन्धिनः सुगन्धविशिष्टस्य कपित्थस्य तक्रस्य तक्रेण पूर्णाः ह्रदाः अपरे रसालस्य जीरकादिमिश्रिताः पक्वतक्रविशेषस्य पूर्णाः अपरे श्वेतस्य दध्नः पूर्णाः अन्ये पयसः पूर्णाः अन्ये शर्कराणां सम्यक् चयो येषु ते च ह्रदाः बभूवुः 'तक्रं कपित्थम् ' इति वैजयन्ती ' पीतो गौरो हरिद्राभः ' इति कोशः । कपित्थस्येत्यादिसंबन्धसामान्ये षष्ठी । श्लोकद्वयमेकान्वयि ॥ ७२ ॥ ७३ ॥

७४] ति० टी०–कल्कानामामलकादीनाम् । चूर्णकषायान्सुरभिचूर्णानि । ' कषायोऽथ सुरभौ लोहितेऽपि च' । चूर्णकषाया नलदादिचूर्णक्वथितकषाया इति कतकः । स्नानानि स्नानार्थान्युष्णोदकानि तदर्थान्यन्यद्रव्याणि च । सरितां तीर्थेषु स्नानघट्टेषु ॥ ७४ ॥

रा० टी०–कल्कानिति । कल्कान् आमलक्यादिकषायान् चूर्णकषायान् लाजाचूर्णादिकल्कान् सरितां तीर्थेषु स्नानार्हघट्टेषु विद्यमानानि भाजनस्थानि विविधानि स्नानानि स्नानसाधकानि उष्णजलादीनीत्यर्थः, नरा ददृशुः ॥ ७४ ॥

१ पिठरैरिति गो. पाठः । २ पायसस्येति गो. पाठः । ३ शर्करायां इति गो. पाठः ।

शुक्लानंशुमतश्चापि दन्तधावनसंचयान् । शुक्लांश्चन्दनकल्कांश्च समुद्गेष्ववतिष्ठतः ॥ ७५ ॥
दर्पणान्परिमृष्टांश्च वाससां चापि संचयान् । पादुकोपानहं चैव युग्मान्यत्र सहस्रशः ॥ ७६ ॥
आञ्जनीः कङ्कतान्कूर्चांश्छत्राणि च धनूंषि च । मर्मत्राणानि चित्राणि शयनान्यासनानि च ॥ ७७ ॥
प्रतिपानहृदान्पूर्णान्खरोष्ट्रगजवाजिनाम् । अवगाह्य सुतीर्थांश्च हृदान्सोत्पलपुष्करान् ॥
आकाशवर्णप्रतिमान्स्वच्छतोयान्सुखाप्लवान् ॥ ॥ ७८ ॥
नीलवैदूर्यवर्णांश्च मृदून्यवससंचयान् । [४]निर्वापार्थं पशूनां ते ददृशुस्तत्र सर्वशः ॥ ७९ ॥
व्यस्मयन्त मनुष्यास्ते स्वप्नकल्पं तदद्भुतम् । दृष्ट्वातिथ्यं कृतं तावद्भरद्वाजमहर्षिणा ॥ ८० ॥
इत्येवं रममाणानां देवानामिव नन्दने । भरद्वाजाश्रमे रम्ये सा रात्रिर्व्यत्यवर्तत ॥ ८१ ॥

गो० टी०–कल्कानिति । कल्कान् आमलक्यादिकल्कान् चूर्णकषायान् चूर्णानि माषादिचूर्णानि कषायाः क्वथितानि ज्ञान्त्येभिरिति ज्ञानानि तैलोष्णोदकादीनि भाजनस्थानि कटाहादिमहापात्रस्थानि तीर्थेषु अवतारेषु ॥ ७३ ॥

७५] ति० टी०–शुक्लान्निर्मलानंशुमतोऽग्रे कूर्चवतो दन्तधावनानामपामार्गादिकाष्ठानां संचयान् । चन्दनकल्कान्घृष्टचन्दनाद् सम्मुद्गेषु संपुटेषु ददृशुरिति संबन्धः ॥ ७५ ॥

रा० टी०–शुक्लानिति । शुक्लान् स्वच्छान् अंशुमतः अग्रे कूर्चविशिष्टान् दन्तधावनसंचयान् दन्तधावनानां समूहान् सम्मुद्गेषु संपुटेषु अवतिष्ठतः चन्दनकल्कान् घृष्टचन्दनानि च ददृशुः ॥ ७५ ॥

गो० टी०–शुक्लानिति । शुक्लान् निर्मलान् अंशुमतः कूर्चवतः दन्तधावनसंचयान् दन्तकाष्ठसमूहान् । ज्ञानानन्तरमलंकारोपकरणानि दर्शयति–शुक्लानिति । चन्दनकल्कान् चन्दनपङ्कान् सम्मुद्गेषु संपुटकेषु 'सम्मुदूकः संपुटकः' इत्यमरः । अवतिष्ठतः वर्तमानान् परिमृष्टान् निर्मलीकृतान् पादुकाः दारुनिर्मिताः उपानहश्चर्मनिर्मिताः युग्मानि द्वन्द्वानि आञ्जनीः अञ्जनयुक्ताः करण्डिकाः कङ्कतान् केशमार्जनान् 'कङ्कतः केशमार्जनम्' इति निघण्टुः । कूर्चान् ज्ञानाद्युपयुक्तासनानि श्मश्रुप्रसाधकान् वा, शस्त्राणि योधैरलंकारार्थं धार्याणि मर्मत्राणानि कवचादीनि प्रतिपानहृदान् यानग्रहणानन्तरं भुक्तजीर्णार्थं पानार्हहृदान् अवगाह्य सुतीर्थान् अवगाहनयोग्यावतारप्रदेशयुक्तान् सोत्पलपुष्करान् उत्पलमिन्दीवरं पुष्करं पद्मम् आकाशवर्णप्रतिमान् आकाशवन्निर्मलानित्यर्थः, सुखप्लवान सुखेन प्लवः स्नानं येषु तथोक्तान् यवससंचयान् तृणसमूहान् 'यवसं तृणमर्जुनम्' इत्यमरः । पशूनां निर्वापार्थान् पशुभ्यो विभाजनार्थान् ॥ ७४–७९ ॥

७६] ति० टी०–पादुकोपानहं पादुका दार्वादिनिर्मिताः उपानहश्चर्मादिकृताः समाहारे द्वन्द्वसमासान्तः ॥ ७६ ॥

रा० टी०–दर्पणानिति । परिमृष्टान् परिमार्जनं प्राप्तान् दर्पणान् वाससां वस्त्राणां संचयांश्च युग्मानि द्वन्द्वानि सहस्रशः पादुकोपानहं पादुकोपानहानि तत्र पादुका काष्ठादिनिर्मितं उपानच्चर्मादिनिर्मितं पादत्राणमिति विवेकः ॥ ७६ ॥

७७] ति०टी०–आञ्जनीरञ्जनयुक्तकरण्डिकाः, कङ्कतान्केशमार्जनानि कूर्चान्श्मश्रुप्रसाधकान्,मर्मत्राणानि कवचानि॥७७॥

रा० टी०–आञ्जनीः साञ्जनकरण्डिकाः कङ्कतान् केशमार्जनान् 'कङ्कतः केशमार्जनम्' इत्यमरः कूर्चान् श्मश्रुशोधकान् मर्मत्राणानि कवचप्रभृतीनि चित्राणि विचित्राणि शयनानि आसनानि च ॥ ७७ ॥

७८]ति०टी०–भुक्तजरणार्थं यत्पीयते तत्प्रतिपानम्। खरादीनामवगाहनयोग्यसुखावतारान्पद्मोत्पलसहितान्हृदान्ददृशुरिति संबन्धः । आकाशेत्याद्यर्धं पूर्वान्वायि । उपाधिविशेषानीलवर्णानित्यर्थः । सुखेनाप्लवः स्नानं येषु तान् ॥ ७८ ॥

रा० टी०–पूर्णान् प्रतिपानानां भुक्तपरिपाचकपेयक्षारादीनां हृदान् अवगाह्यानि अवगाहनार्हाणि सुतीर्थानि सुघट्टाः येषु तान् सोत्पलपुष्करान् उत्पलपुष्करसहितान् ॥ ७८ ॥

७९] ति० टी०–यवसं तृणम् । निर्वापार्थं भक्षणार्थम् ॥ ७९ ॥

रा० टी०–आकाशवर्णप्रतिमान् नीलवर्णविशिष्टत्वेन प्रतीयमानान् स्वच्छतोयान् निर्मलतोयविशिष्टान् सुखप्लवान् सुतरान् हृदांश्च पशूनां निर्वापार्थं भक्षणार्थं यवससंचयान् तृणसमूहांश्च सर्वशः ते सैनिकाः अत्र भरद्वाजाश्रमे ददृशुः । सार्धपद्यानामेकत्रान्वयः ॥ ७९ ॥

८०–८१] ति० टी०–स्वप्नकल्पं मर्त्यदुर्लभं द्राग्युत्पन्नविचित्रपदार्थत्वात् ॥ ८० ॥ ८१ ॥

रा० टी०–व्यस्मयन्तेति । मनुष्याः स्वप्नसदृशमद्भुतं यथा स्यात्तथा कृतमातिथ्यं दृष्ट्वा व्यस्मयन्त । अर्धद्वयमेकान्वयि ॥ ८० ॥

रा० टी०–इतीति । भरद्वाजाश्रमे रममाणानां रात्रिर्व्यत्यवर्तत ॥ ८१ ॥

गो० टी०–व्यस्मयन्तेति । स्वप्नकल्पत्वोक्तिरयत्नसिद्धत्वात् अपूर्वत्वात् आश्चर्यत्वाच्च तादृक् वाचामभूमिम् । भरतस्य भरताय ॥ ८० ॥ ८१ ॥

---

१ उपानद्दामिति गो. पाठः । २ चेति गो. पाठः । ३ सुखप्लवानिति गो. रा. पाठः । ४ निर्वापार्थानिति गो. पाठः । ५ तादृग्भरतस्येति गो. पाठः ।

प्रतिजग्मुश्च ताः सर्वा गन्धर्वाश्च यथागतम् । भरद्वाजमनुज्ञाप्य ताश्च सर्वा वराङ्गनाः ॥ ८२ ॥
तथैव मत्ता मदिरोत्कटा नरास्तथैव दिव्यागुरुचन्दनोक्षिताः ।
तथैव दिव्या विविधाः स्रगुत्तमाः पृथग्विकीर्णा मनुजैः प्रमर्दिताः ॥ ८३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

द्विनवतितमः सर्गः ।

भरतेन साञ्जलिबन्धं चित्रकूटमार्गं प्रति पृष्टो भरद्वाजस्तं प्रत्यध्वानं प्रदर्श्य वन्द्यमानानां तिसृणां मातृणां नामधेयान्यपृच्छत । भरतोऽप्येकैकस्याश्चरितपूर्वकं तानि निवेद्य सेनां संनाह्य परिजनसहितश्चित्रकूटं प्रतस्थे ।

ततस्तां रजनीं व्युष्य भरतः सपरिच्छदः । कृतातिथ्यो भरद्वाजं कामादभिजगाम ह ॥ १ ॥
तमृषिः पुरुषव्याघ्रं [3]प्रेक्ष्य प्राञ्जलिमागतम् । हुताग्निहोत्रो भरतं भरद्वाजोऽभ्यभाषत ॥ २ ॥
कच्चिदत्र सुखा रात्रिस्तवास्माद्विषये गता । समग्रस्ते जनः कच्चिदातिथ्ये शंस मेऽनघ ॥ ३ ॥
तमुवाचाञ्जलिं कृत्वा भरतोऽभिप्रणम्य च । आश्रमादुपनिष्क्रान्तमृषिमुत्तमतेजसम् ॥ ४ ॥

८२] ति० टी०–ताः सर्वा अप्सरसः । अनुज्ञाप्य दत्तानुमतिकं कृत्वा ॥ ८२ ॥

रा० टी०–प्रतिजग्मुरिति । भरद्वाजमनुज्ञाप्य तदाज्ञां गृहीत्वा नद्यादयो यथागतं जग्मुः ॥ ८२ ॥

गो० टी०–प्रतिजग्मुरिति । अनुज्ञाप्य अनुज्ञां कारयित्वा ८२ ·

८३] ति० टी०–स्वप्नादिवदेतदृषिकृतमातिथ्यं मिथ्या नेति दर्शयति—तथैवेति । मत्ता दृप्ता मदिरया उत्कटाः प्रमत्ताः । ' मत्ते शौण्डोत्कटक्षीबाः ' तथैव अनुभवकाल इव वर्तन्त इति शेषः । स्रक्षूत्तमाः स्रगुत्तमा उपभोगवशात्प्रकीर्णाः प्रमर्दिताश्च ॥ ८३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

रा० टी०–तथैवेति । मदिरोत्कटा मदिरामत्ताः नराः तथैव अनुभवसमय इव मत्ताः एकाकारतया अवर्तन्त इत्यर्थः । मनुजैः विकीर्णाः प्रक्षिप्ता अपि स्रगुत्तमाः तथैवासन्निति शेषः, म्लानतां न प्रापुरित्यर्थः ॥ ८३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

गो० टी०–इदं चातिथ्यकरणमैन्द्रजालिकवन्न मिथ्येत्याह–तथैवेति । मत्ताः तृप्ताः भोगैस्तृप्ताः मदिरोत्कटाश्च मद्येन मत्ताश्च 'मत्ते शौण्डोत्कटक्षीबाः' इत्यमरः । तथैव अनुभवकाल इवावर्तिषतेत्यर्थः प्रमर्दिताः प्रकीर्णाश्च भोग्यवशादिति भावः । पृथक् पूर्वस्रग्भ्यो विलक्षणाः ॥ ८३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

१–२] ति० टी०–व्युष्योषित्वा सपरिच्छदः सपरिवारः, कामादाप्तिकामात् ॥ १ ॥ २ ॥

रा० टी०–रात्रिनिवासानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । कृतमातिथ्यं यस्य स सपरिच्छदः परिकरसहितः भरतः तां भरद्वाजाश्रमे प्राप्तां रजनीं व्युष्य कामात् रामसमीपगमनविषयकेच्छाया हेतोः भरद्वाजमभिजगाम ॥ १ ॥

रा० टी०–तमिति । पुरुषव्याघ्रं भरतमागतं प्रेक्ष्य हुताग्निहोत्रो भरद्वाजः अभ्यभाषत ॥ २ ॥

गो० टी०–ततस्तानित्यादि । व्युष्य विशेषेणोषित्वा सपरिच्छदः सपरिवारः । 'परिवारः परिकरः परिष्कन्दः परिग्रहः । तथोपकरणं प्रोक्तं परिवर्हः परिच्छदः' इति हलायुधः । कामात् रामप्राप्तीच्छया ॥ १ ॥ २ ॥

३] ति० टी०–अस्मद्विषयेऽस्मदाश्रमे सुखा सुखरूपा आतिथ्ये ते जनः समग्रः सम्यक्तृप्तिकः अभूदिति शेषः । अनेन हि तप एव महत्सर्वेष्टसाधनं न तु राज्यादीति ऋषिणा बोधितो भरतः ॥ ३ ॥

रा० टी०–तदभिभाषणमेवाह–कच्चिदिति । अस्मद्विषये अस्माकमाश्रमे गता व्यतीता रात्रिः तव सुखा सुखप्रदा कच्चित् ते जनः मे आतिथ्ये समग्रः सम्यक् सत्कृतः कच्चित् अभवदिति शेषः, इति शंस कथय ॥ ३ ॥

गो० टी०–कच्चिदिति । अस्मद्विषये अस्मदाश्रमे रात्रिः सुखा गता कच्चिदित्यन्वयः । आतिथ्ये विषये समग्रः संपूर्णस्तृप्त इति यावत् । अनयेत्यनेन पूर्वं भरताशयपरीक्षणार्थमेवातिथ्यकरणमिति द्योतितं रामविषयभक्त्यभावे भोगप्रवणः स्यादिति हृदयम् ॥ ३ ॥

४] ति० टी०–जनसमूहस्य बहुत्वात्सर्वेषां स्वदर्शनेन कृतकृत्यत्वायाश्रमान्निष्क्रान्तमृषिमुवाच ॥ ४ ॥

रा० टी०–तमिति । आश्रमादुपनिष्क्रान्तं स्वसमीपे प्राप्तं तं भरद्वाजं भरत उवाच ॥ ४ ॥

१ नद्य-इति गो. पाठः । २ प्रकीर्णा इति गो. पाठः । ३ प्राञ्जलिं प्रेक्ष्य चेति गो. पाठः । ४ अभीति गो. पाठः ।

सुखोषितोऽस्मि भगवन्समग्रबलवाहनः । बलवत्तर्पितश्चाहं बलवान्भगवंस्त्वया ॥ ५ ॥
अपेतक्लमसंतापाः सुभिक्षाः सुप्रतिश्रयाः । अपि प्रेष्यानुपादाय सर्वे स्म सुसुखोषिताः ॥ ६ ॥
आमन्त्रयेऽहं भगवन्कामं त्वामृषिसत्तम । समीपं प्रस्थितं भ्रातुर्मैत्रेणेक्षस्व चक्षुषा ॥ ७ ॥
आश्रमं तस्य धर्मज्ञ धार्मिकस्य महात्मनः । आचक्ष्व कतमो मार्गः कियानिति च शंस मे ॥ ८ ॥
इति पृष्टस्तु भरतं भ्रातुर्दर्शनलालसम् । प्रत्युवाच महातेजा भरद्वाजो महातपाः ॥ ९ ॥
भरतार्धतृतीयेषु योजनेष्वजने वने । चित्रकूटगिरिस्तत्र रम्यनिर्दरकाननः ॥ १० ॥
उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी । पुष्पितद्रुमसंछन्ना रम्यपुष्पितकानना ॥ ११ ॥

गो० टी०–तर्पितेति । अभिनिष्क्रान्तमित्यनेन कौसल्यादिसर्वजनदर्शनार्थं भरतागमनकाल एव बहिर्निर्गतवानृषिरिति व्यञ्जितम् ॥ ४ ॥

५] ति० टी०–बलवदत्यन्तम् । बलवान्सेनासहितः ॥५॥

रा० टी०–तद्वचनाकारमाह–सुखेति । सामात्यः अमात्यसहितः समग्रबलवाहनः समस्तबलवाहनवान् अहं सर्वकामैर्बलवदत्यन्तं तर्पितः अत एव सुखोषितः ससुखमुषितोऽस्मि ॥५॥

गो० टी०–सुखोषितोऽस्मीति । बलवत्तर्पितः अतीव तर्पितः किमुतातीव बलवत् 'स्वति सुष्ठु च निर्भरे' इति वैजयन्ती ॥ ५ ॥

६] ति० टी०–क्लमो ग्लानिः, संतापो देहौष्ण्यम्, अपि प्रेष्यानुपादाय प्रेष्यानप्यादाय तैरपि सहेत्यर्थः । सुभिक्षाः सुसमृद्धान्नपानाः सुप्रतिश्रयाः शोभनावासाः ॥ ६ ॥

रा० टी०–अपेतेति । प्रेष्यान् भृत्यवर्गानपि उपादाय आरभ्य सुभक्ष्याः प्राप्तशोभनभक्ष्यवन्तः सुप्रतिश्रयाः प्राप्तशोभनवासस्थानाः अत एव अपेतक्लमसंतापाः अपेताः निवृत्ताः क्लमाः ग्लानयः संतापाः अध्वश्रमजनितदेहक्लेशाः येषां ते अत एव सुसुखोषिताः सुसुखं सुखपूर्वमुषितं यैः ते सर्वे वयं स्म स्मः ॥ ६ ॥

गो० टी०–अपेतेति । क्लमो ग्लानिः संतापो देहौष्ण्यम् अपि प्रेष्यानुपादाय प्रेष्यानपि आरभ्य सुभिक्षाः समृद्धान्नपानाः सुप्रतिश्रयाः शोभनस्थानाः शोभनगृहा इति यावत् 'स्थाने गोष्ठ्यां सत्रयागे प्रत्याहारे प्रतिश्रयः' इति वैजयन्ती ॥ ६ ॥

७] ति० टी०–आमन्त्रये पृच्छामि काममधिकं मैत्रेण स्निग्धेन ॥ ७ ॥

रा० टी०–आमन्त्रये इति । हे ऋषिसत्तम! त्वामहमामन्त्रये प्रार्थयामि । प्रार्थनमेवाह–भ्रातुः समीपं प्रस्थितं मां मैत्रेण स्नेहयुक्तेन चक्षुषा ईक्षस्व गन्तुमाज्ञापयेत्यर्थः ॥ ७ ॥

गो० टी०–आमन्त्रय इति । कामं यथेष्टम् 'कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम्' इत्यमरः । हे भगवन्! त्वामामन्त्रये आपृच्छे, भ्रातुः समीपं कामं प्रस्थितं मां त्वं मैत्रेण मित्रसंबन्धिना चक्षुषा ईक्षस्व ॥ ७ ॥

८–९] ति० टी०–तस्य रामस्य कियान्कियदूरदेशे कतमस्तस्य मार्ग इति शंस ॥ ८ ॥ ९ ॥

रा० टी०–आश्रममिति । धार्मिकस्य तस्य रामस्य आश्रममाचक्ष्व यत्रास्ति तं देशं कथयेत्यर्थः, मार्गः तदाश्रमप्रापकः पन्थाः कतमः एषां मध्ये क इत्यर्थः, कियान् कियत्क्रोशमितः इति च मे शंस ॥ ८ ॥

गो० टी०–आश्रममिति । धर्मेण योगजधर्मेण जानातीति धर्मज्ञ योगप्रभावाविदितसर्ववृत्तान्तेत्यर्थः । धार्मिकस्य पितृवचनपरिपालनरूपं धर्ममाचरतः महात्मनः महाधैर्यस्य तस्य रामस्याश्रममाचक्ष्व स चाश्रमः कियान् कियदूरतः तस्य मार्गः कतम इति पृच्छते मे मह्यं शंसेति योजना ॥ ८ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण पृष्टो भरद्वाजः भ्रातुर्दर्शनलालसं भरतं प्रत्युवाच ॥ ९ ॥

गो० टी०–इतीति । महातपाः अत एव महातेजाः सर्वज्ञानसमर्थ इत्यर्थः, रामाश्रमप्रदेशाभिज्ञेषु गुहज्ञातिषु विद्यमानेषु मुनिं प्रति प्रश्नस्तस्य पूजार्थम् ॥ ९ ॥

१०] ति० टी०–अर्धतृतीययोजनेषु सार्धयोजनद्वयेऽतीते इत्यर्थः । निदरा विदीर्णाः पाषाणाः, वर्तत इति शेषः ॥ १० ॥

रा० टी०–तत्प्रतिवचनाकारमाह–भरतेति । अर्धतृतीयेषु अर्धमेव तृतीयं यस्मिन् सार्धद्वयमित्यर्थः, तस्यैकशेषेण कपिञ्जलाधिकरणन्यायात् सार्धसप्तेत्यर्थः, तेषु योजनेषु चित्रकूटगिरिस्तत्र गिरौ विद्यमाने अजने दुर्जनरहिते वने रम्याणि निर्झरकाननानि यस्मिन् स चित्रकूटगिरिरस्ति तस्य गिरेः उत्तरं पार्श्वमासाद्य प्राप्य पुष्पितद्रुमैः संछन्ना रम्याणि पुष्पितकाननानि यस्याः सा मन्दाकिनी नदी अस्ति । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०–भरतेति । अर्धतृतीयेष्विति अर्धं तृतीयं येषां तेष्वर्धतृतीयेषु सार्धयोजनद्वितय इत्यर्थः, अतीतेष्विति शेषः । अजने मुनिव्यतिरिक्तग्राम्यजनरहिते वने तत्र प्रसिद्धो गिरिः वर्तत इति शेषः ॥ १० ॥

११] ति० टी०–मन्दाकिनी तदाख्या काचिन्नदी चित्रकूटोत्तरपार्श्वं प्राप्य तिष्ठतीति शेषः ॥ ११ ॥

गो० टी०–उत्तरमिति । तस्य गिरेरुत्तरं पार्श्वमासाद्य

१ तर्पितः सर्वकामैश्च सामात्यो बलवदिति गो. रा. पाठः । २ सुभक्ष्या इति रा. पाठः । ३ कूटो गिरिरिति गो. पाठः । ४ निर्झरेति रा.पाठः ।

अनन्तरं तत्सरितश्चित्रकूटं च पर्वतम् । तयोः पर्णकुटीं तात तत्र तौ वसतो ध्रुवम् ॥ १२ ॥
दक्षिणेन चैं मार्गेण सव्यदक्षिणमेव चें । गजवाजिसमाकीर्णां वाहिनीं वाहिनीपते ॥ १३ ॥
वाहयस्व महाभाग ततो द्रक्ष्यसि राघवम् । प्रयाणमिति चैं श्रुत्वा राजराजस्य योषितः ॥ १४ ॥
हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन् । वेपमाना कृशा दीना सह देव्या सुमित्रया ॥ १५ ॥
कौसल्या तत्र जग्राह कराभ्यां चरणौ मुनेः । असमृद्धेन कामेन सर्वलोकस्य गर्हिता ॥ १६ ॥
कैकेयी तैंत्र जग्राह चरणौ सव्यपत्रपा । तं प्रदक्षिणमागम्य भगवन्तं महामुनिम् ॥ १७ ॥
अदूराद्भरतस्यैव तस्थौ दीनमनास्तदा । तत्र पप्रच्छ भरतं भरद्वाजो महामुनिः ॥ १८ ॥

स्थिता मन्दाकिनी नाम काचिन्नदी भवतीति शेषः. द्रुमाः काननभित्तयः ॥ ११ ॥

१२] ति० टी०–तस्या अनन्तरं तत्परपार्श्वे चित्रकूटं पर्वतं तयो रामलक्ष्मणयोः पर्णकुटीं च द्रक्ष्यसि तत्र पर्वते वसतः ध्रुवं निश्चयेन ॥ १२ ॥

रा० टी०–अनन्तरमिति । तत्सरितो मन्दाकिन्याः अनन्तरं समीपे यश्चित्रकूटः पर्वतः तत्र तयोः सीतारामयोः पर्णकुटी पर्णशाला तत्र तस्यां तौ सीतारामौ ध्रुवं वसतः 'चित्रकूटम्' इति द्वितीयान्तपाठे चित्रकूटं प्राप्येत्यर्थः ॥ १२ ॥

गो० टी०–अनन्तरमिति । तत्सरितो मन्दाकिन्याः अनन्तरं समीपे चित्रकूटस्तिष्ठति ननु व्यवहितपार्श्वे तयोः सरिद्वियोर्मध्ये पर्णकुटी पर्णशाला कृता तत्र वसतः ध्रुवं योगप्रभावेन जानामीत्यर्थः ॥ १२ ॥

१३] ति० टी०–दक्षिणेनैव मार्गेण यमुनाया दक्षिणतीरमार्गेणैव गत्वा किंचिदूरं ततः पश्चात्सव्यदक्षिणं तस्य मार्गस्य शाखामार्गयोः सव्यभागवर्ती यो दक्षिणदिग्गामी मार्गोऽस्ति तं मार्गं वाहिनीं वाहयस्व, न त्वन्यं शाखामार्गं तस्याल्पत्वाद्वनमार्गत्वाच्च ॥ १३ ॥

रा० टी०–पृष्टमार्गमुपदिशति–दक्षिणेनेति । दक्षिणेन यमुनोत्तरकूलवर्तिना मार्गेण किंचिदूरं गत्वेति शेषः सव्यदक्षिणं यमुनामुल्लङ्घ्य नैर्ऋत्यकोणं वाहिनीं सेनां वाहयस्व, हे वाहिनीपते सेनाधीश ! हे महाभाग ! ततः तादृग्गमनाद्राघवं द्रक्ष्यसि । सार्धश्लोक एकान्वयी ॥ १३ ॥

गो० टी०–दक्षिणेनेति । अस्मादाश्रमात् दक्षिणेन मार्गेण किंचिदूरं गत्वा ततः सव्यदक्षिणं नैर्ऋतदिग्भागो यथा भवति तथा वाहिनीं वाहयस्व किंचिदूरं दक्षिण एको मार्गः ततः शाखामार्गेण नैर्ऋतदिग्भागगामिना गन्तव्यमिति भावः । कान्तारमार्गस्य सूक्ष्मत्वाद्यथायोग्यं मार्गस्य वामतो दक्षिणतश्च विरलप्रदेशे वाहिनीं प्रापयस्वेत्यर्थं इत्यप्याहुः ॥ १३ ॥

१४] ति० टी०–राजराजस्य दशरथस्य ॥ १४ ॥

रा० टी०–प्रयाणमिति । प्रयाणमिति शब्दं श्रुत्वैव यानार्हाः वेपमानाः सुमित्रया सह राजराजस्य योषितः यानानि हित्वा त्यक्त्वा ब्राह्मणं भरद्वाजं पर्यवारयन् पर्यवेष्टयन्त । सार्धश्लोक एकान्वयी ॥ १४ ॥ १५ ॥

गो० टी०–प्रयाणमिति । इति उक्तप्रकारेण तत्प्रयाणं प्रस्थानं श्रुत्वा राजराजस्य महाराजस्य दशरथस्य योषितः कौसल्याद्याः यानार्हाः यानत्यागानर्हा अपि यानानि त्यक्त्वा ब्राह्मणं ब्रह्मविदं भरद्वाजं पर्यवारयन् वन्दनायेति शेषः ॥ १४ ॥

१५] ति० टी०–ब्राह्मणं भरद्वाजं पर्यवारयन् नमस्कारार्थं स्त्रिय इति शेषः । वेपमानत्वादिगुणविशिष्टा कौसल्या ॥ १५ ॥

गो० टी०–वेपमानेति । वेपमाना वार्धक्यादृषिदर्शनाच्च कृशा दीना रामविरहादिति शेषः ॥ १५ ॥

१६] ति० टी–असमृद्धेन फलसमृद्धिरहितेन कामेन मनोरथेनोपलक्षिता इत्यादि कैकेयीविशेषणम् ॥ १६ ॥

रा० टी०–कौसल्येति । तत्र तस्मिन्समये मुनेः चरणौ असमृद्धेन अपरिपूर्णेन कामेन रामराज्याभिषेकेच्छयोपलक्षिता कौसल्या मुनेः चरणौ जग्राह सर्वलोकस्य गर्हिता रक्षिकात्वेन स्वीकारकर्त्री सव्यपत्रपा सव्यं कौसल्यावामभागं पाति सव्यपा त्रपते इति त्रपा स्वस्य रामविवासनहेतुत्वस्मृत्या किंचिल्लज्जावती सा एव सेति कर्मधारयः कैकेयी च चरणौ जग्राह तदाचरणग्रहणोत्तरकाले तं मुनिं प्रदक्षिणमागम्य दीनमनाः कैकेयी भरतस्यैव अदूरात्समीपे तस्थौ । सार्धश्लोकद्वयं संमिलितान्वयि ॥ १६ ॥ १७ ॥

गो० टी०–असमृद्धेनेति । असमृद्धेन अपूर्णेन फलापर्यवसायिनेति यावत् कामेन मनोरथेन उपलक्षितेति शेषः, लोकस्य गर्हिता लोकेन गर्हिता सव्यपत्रपा सलज्जा रामविवासनहेतुत्वात् ॥ १६ ॥

१७] ति० टी०–सव्यपत्रपा अत एव सलज्जा ॥ १७ ॥

गो० टी०–लज्जावशादेव कौसल्यादिभिः सह मुनेः पुरतः स्थातुमशक्ता प्रदक्षिणव्याजेन भरतं गतेत्याह–तमित्यादिना । दीनमनाः कैकेयी ॥ १७ ॥

१८] ति० टी०–दीनमनाः अप्राप्तमनोरथत्वात् कैकेयीति विशेष्यम् ॥ १८ ॥

रा० टी०–तत्रेति । हे राघव भरत ! तव मातृणां

१ कूटश्च पर्वत इति गो. रा. पाठः । २ कुटीति गो. रा. पाठः । ३ एवेति गो. पाठः । ४ वेति गो. पाठः । ५ रथेति गो. पाठः । ६ तदिति गो. पाठः । ७ तस्येति गो. पाठः । ८ तत इति गो. पाठः । ९ दृढव्रत इति गो. पाठः ।

विशेषं ज्ञातुमिच्छामि मातॄणां तव राघव । एवमुक्तस्तु भरतो भरद्वाजेन धार्मिकः ॥ १९ ॥
उवाच प्राञ्जलिर्भूत्वा वाक्यं वचनकोविदः । यामिमां भगवन्दीनां शोकानशनकर्शिताम् ॥ २० ॥
पितुर्हि महिषीं देवीं देवतामिव पश्यसि । एषा तं पुरुषव्याघ्रं सिंहविक्रान्तगामिनम् ॥ २१ ॥
कौसल्या सुषुवे रामं धातारमदितिर्यथा । अस्या वामभुजं श्लिष्टा या सा तिष्ठति दुर्मनाः ॥२२॥
ईयं सुमित्रा दुःखार्ता देवी राज्ञश्च मध्यमा । कर्णिकारस्य शाखेव शीर्णपुष्पा वनान्तरे ॥ २३ ॥
एतस्यास्तौ सुतौ देव्याः कुमारौ देववर्णिनौ । उभौ लक्ष्मणशत्रुघ्नौ वीरौ सत्यपराक्रमौ ॥ २४ ॥
यस्याः कृते नरव्याघ्रौ जीवनाशमितो गतौ । राजा पुत्रविहीनश्च स्वर्गं दशरथो गतः ॥ २५ ॥
क्रोधनामकृतप्रज्ञां दृप्तां सुभगमानिनीम् । ऐश्वर्यकामां कैकेयीमनार्यामार्यरूपिणीम् ॥ २६ ॥

विशेषं ज्येष्ठत्वादिना न्यूनाधिकभावं ज्ञातुमिच्छामि । भरतं भरद्वाजः पप्रच्छ । अर्धद्वयमेकान्वयि ॥ १८ ॥

गो० टी०–तत इति । दृढव्रत इत्यनेन सर्वज्ञत्वं लक्ष्यते सर्वज्ञोऽपि कैकेयीशिक्षार्थं पप्रच्छेत्यर्थः विशेषं संज्ञासंज्ञिसंबन्धादिविशेषम् इतिकरणमध्याहृत्य इति पप्रच्छेत्यन्वयः ॥ १८ ॥

१९] ति०टी०–विशेषं तत्तन्नामरूपम् ॥ १९ ॥

रा० टी०–एवमिति । भरद्वाजेन एवमुक्तो भरतः प्राञ्जलिर्भूत्वा उवाच ॥ १९ ॥

गो० टी०–एवमिति । धार्मिकः सत्यवादीत्यर्थः, वचनकोविदः वचने पण्डितः भरद्वाजवचनतात्पर्यज्ञ इत्यर्थः, भरतमुखेन मातॄणां स्वभावविशेषप्रतिपादनं हि मुनेराशयः ॥ १९ ॥

२०] ति० टी०–शोकानशनकर्शितां शोकवशप्राप्तानशनेन कृशीकृताम् ॥ २० ॥

२१] ति० टी०–यां पश्यसि एषेत्यन्वयः । सिंहवद्विक्रान्तगमनशीलम् ॥ २१ ॥

रा० टी०–तदाकारमाह–यामिति । शोकानशनकर्शितां शोकहेतुकभोजनाभावहेतुककृशताविशिष्टामत एव दीनां क्षीणचित्तां देवतामिव यां महिषीं पश्यसि सा एषा कौशल्या धातारमदितिरिव पुरुषव्याघ्रं रामं सुषुवे । अर्धचतुष्टयमेकान्वयि ॥ २०–२२ ॥

गो० टी०–यामिति । शोकानशनकर्शितां शोकानशनाभ्यां कर्शितां देवतामिव धर्मदेवतामिव सिंहविक्रान्तगामिनं सिंहवद्विक्रान्तं विक्रमयुक्तं यथा भवति तथा गामिनं गमनशीलं धातारं विष्णुम् एव धाता विधाता चेति वक्ष्यमाणत्वात् सर्वगुणसंपन्ना राममाता एषा कौसल्येत्यर्थः ॥ २० ॥ २१ ॥

२२] ति० टी०–धातारमुपेन्द्रम् ॥ २२ ॥

२३] ति० टी–कर्णिकारो वृक्षविशेषः ॥ २३ ॥

रा० टी०–अस्या इति । वनान्तरे शीर्णपुष्पा कर्णिकारस्य शाखेव अस्याः कौशल्यायाः वामभुजं श्लिष्टा दुर्मनाः या तिष्ठति सा इयं राज्ञो मध्यमा देवी सुमित्रा । सार्धश्लोक एकान्वयी ॥ २३ ॥

गो० टी०–अस्या इति । वामभुजं श्लिष्टा कौसल्याया वेपमानाङ्गत्वात्तद्धारणार्थं तद्रामभुजमवधृत्य स्थितेत्यर्थः दुर्मनाः दुःखितमनाः, दुर्मनस्त्वे दृष्टान्तः कर्णिकारस्येति शीर्णपुष्पा म्लानपुष्पा । एतस्या इति । एतस्या इत्यत्र उक्तगुणसंपन्नयोर्लक्ष्मणशत्रुघ्नयोर्मातेयमिति बोध्यं देववर्णिनौ अश्विनीदेवतुल्यौ ॥ २२ ॥ २३ ॥

२४] ति० टी०–देववर्णिनौ देवतुल्यरूपौ ॥ २४ ॥

रा० टी०–एतस्या इति । एतस्याः सुमित्रायाः देववर्णिनौ देववर्णसदृशवर्णविशिष्टौ उभौ लक्ष्मणशत्रुघ्नौ तौ प्रसिद्धौ सुतौ स्तः इति शेषः ॥ २४ ॥

२५] ति० टी–यस्याः कैकेय्या जीवनाशं गतौ तादृशापदं प्राप्तौ ॥ २५ ॥

रा० टी०–यस्या इति । यस्याः कृते प्रयत्ने सति नरव्याघ्रौ रामलक्ष्मणौ जीवनाशं जीवस्य प्रजापालनस्य नाशमभावं गतौ प्राप्तौ अत एव राजा दशरथः पुत्रविहीनः श्रेष्ठपुत्ररहितः सन् स्वर्गं साकेतं गतः ॥ २५ ॥

गो० टी०–यस्या इति । जीवनाशं राक्षसभूयिष्ठं दण्डकारण्यं प्रति विवासनात् जीवस्य जीवनस्य नाशम् इत इह वने कुध्यतीति क्रोधना कर्तरि ल्युट् । अकृतप्रज्ञाम् अशिक्षितबुद्धिं सुभगमानिनीं सुभगां सुन्दरीमात्मानं मन्यत इति सुभगमानिनी तां वस्तुतोऽनार्याम् आर्यरूपिणीमार्यवद्व्यासमानाम् यतोमूलं यत्कारणकम् आत्मनो मम ॥ २४–२६ ॥

२६] ति० टी०–दृप्तां गर्वितां अकृतप्रज्ञामशिक्षितबुद्धिम् आर्यरूपिणीं सतीमिव प्रतिभासमानाम् ॥ २६ ॥

रा० टी०–क्रोधनामेति । क्रोधे नाम प्रसिद्धिर्यस्याः सा क्रोधनामा मन्थरा तस्यां कृता स्थापिता प्रज्ञा बुद्धिर्यया ताम्, मन्थरानुकूलवर्तिनीमित्यर्थः । दृप्तामहमतीव राजप्रियेति गर्वविशिष्टां राजातिप्रीतिविषयीभूतामित्यर्थः, अत एव सुभगमानिनीं शुभगानां राज्ञः स्वशुभप्राप्तीच्छावतां कर्तॄणां मानः पूजास्ति अस्यास्तामत एव ऐश्वर्यैः कामयते शोभते सा तामार्यरूपिणीं प्रशस्तरूपविशिष्टां तत्त्ववेतृसत्कृतिनिरतां वा नृशंसां रामवियोगहेतुत्वेन गृभिः कथ्यमानां पापनिश्चयां पापे स्वहेतु-

---

१ एषेति गो. पाठः । २ अर्धमेतत् गो. नास्ति ।

ममैतां मातरं विद्धि नृशंसां पापनिश्चयाम् । यतोमूलं हि पश्यामि व्यसनं महदात्मनः ॥ २७ ॥
इत्युक्त्वा नरशार्दूलो बाष्पगद्गदया गिरा । [1]विनिःश्वस्य स ताम्राक्षः क्रुद्धो नाग इव [2]श्वसन्॥२८॥
भरद्वाजो महर्षिस्तं ब्रुवन्तं भरतं [3]तदा । प्रत्युवाच महाबुद्धिरिदं वचनमर्थवित् [4] ॥ २९ ॥
न दोषेणावगन्तव्या कैकेयी भरत त्वया । रामप्रव्राजनं ह्येतत्सुखोदर्कं भविष्यति ॥ ३० ॥
देवानां दानवानां च ऋषीणां भावितात्मनाम् । हितमेव भविष्यद्धि रामप्रव्राजनादिह ॥ ३१ ॥
अभिवाद्य तु संसिद्धः कृत्वा चैनं प्रदक्षिणम् । आमन्त्र्य भरतः सैन्यं युज्यतामिति चाब्रवीत् ॥३२॥
ततो वाजिरथान्युक्त्वा दिव्यान्हेमविभूषितान् । अध्यारोहत्प्रयाणार्थं बहून्बहुविधो जनः ॥ ३३ ॥
गजकन्या गजाश्चैव हेमकक्ष्याः पताकिनः । जीमूता इव घर्मान्ते सघोषाः संप्रतस्थिरे ॥ ३४ ॥
विविधान्यपि यानानि महान्ति च लघूनि च । प्रययुः सुमहार्हाणि पादैरपि पदातयः ॥ ३५ ॥

कवियोदुःखदानरूपापराधे निश्चयो यस्यास्तां यतो यस्याः अमूलमकारणकमात्मनो व्यसनमनवस्थितिं पश्यामि तामनार्यां कनिष्ठामेतां कैकेयीं मम मातरं विद्धि जानीहि । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

२७–२९] ति० टी०–यतो मूलं यन्मूलम् ॥ २७–२९ ॥

रा० टी०–इतीति । नरशार्दूलो भरतः बाष्पगद्गदया वियोगहेतुभूतमन्थरास्मृतिजनिताश्रुद्गमहेतुकगद्गदात्वविशिष्टया गिरा इति अनेन प्रकारेण उक्त्वा ताम्राक्षः सन् क्रुद्धो नाग इव निश्वास ॥ २८ ॥

गो० टी०–इतीति । बाष्पगद्गदया रामविवासस्मरणजबाष्पेण गद्गदया स्खलन्त्या गिरा इत्युक्त्वा नागः सर्पः॥२७॥

रा० टी०–भरद्वाज इति । तं ब्रुवन्तं भरतं महाबुद्धिः अत एव अर्थवित् सर्वपदार्थवेत्ता भरद्वाजः भरतं प्रत्युवाच ॥ २९ ॥

गो० टी०–भरद्वाज इति । तथा ब्रुवन्तमित्यन्वयः । महाबुद्धिः भाविज्ञः, अर्थवत् प्रयोजनवत् ॥ २८ ॥

३०] ति० टी०–दोषेण दुष्टकृत्यकर्तृत्वेन । सुखोदर्कं देवानामृषीणां च सुखफलम् ॥ ३० ॥

रा० टी०–तद्वचनाकारमाह–नेति । हे भरत ! दोषेण अकालकप्रव्राजननिजनितापराधेन विशिष्टा कैकेयी त्वया नावगन्तव्या तस्यां दोषबुद्धिर्न कर्तव्येत्यर्थः । तत्र हेतुः–एतद्रामप्रव्राजनं सुखोदर्कं सुखप्रवर्धकं भविष्यति ॥ ३० ॥

गो० टी०–नेति । दोषेण दोषवत्तया नावगन्तव्या तस्याः देवप्रेरितत्वादित्यभिप्रायः । तत्र हेतुमाह–रामेति । सुखोदर्कं सुखोत्तरम् अतीतानागतवर्तमानज्ञो महर्षिर्भाविरावणवधादिकं हृदि निधाय देवादीनां सुखोदर्कं भविष्यतीत्युक्तवान्॥२९॥३०॥

३१] ति० टी०–तदेवाह–देवानामित्यादि । भविष्यदिति ज्ञानन्तम् जानीहीति शेषः । एवं देवादिकृतोऽयं मन्थराद्वारा कैकेय्या बुद्धिमोह इति भावः, अत एव नैषा दोषभागिति बोध्यं देवादीनां सुखदत्वात् ॥ ३१ ॥

रा० टी०–नन्व प्रव्राजनस्य कथं सुखप्रवर्धकत्वमित्यत आह–देवानामिति । रामप्रव्राजनाद्धविष्यत्प्राप्स्यदेवादीनां हितमेव अवेहीति शेषः । भावितात्मनामित्यस्य भावितः परिशीलितः आत्मा परमात्मा यैस्तेषामित्यर्थः ॥ ३१ ॥

३२–३३] ति० टी०–संसिद्धः प्राप्ताशीर्वादरूपाद्युग्रहः । स्वमातृकृत्यस्य ज्ञातिहितावहत्वाच्च युज्यतां गमनाय संनह्यताम् ॥ ३२ ॥ ३३ ॥

रा० टी०–अभिवाद्येति । संसिद्धः रामस्थितिनिश्चयरूपसिद्धिं प्राप्तो भरतः आमन्त्र्य भरद्वाजाज्ञां गृहीत्वा सैन्यं युज्यतामित्यब्रवीत् ॥ ३२ ॥

गो० टी०–अभिवाद्येति । संसिद्धः लब्धाशीर्वादः आमन्त्र्य आपृछ्य युज्यतां गमनाय संनह्यतामिति स्वसैन्यमचोदयत् ॥ ३१ ॥

रा० टी०–तत इति । ततः भरताज्ञापनानन्तरं हेमविभूषितां बहून्वाजिरथान् प्रयाणार्थं युक्त्वा बहुविधो जनः अध्यारोहत् ॥ ३३ ॥

गो० टी०–तत इति । वाजिरथान् वाजिनो रथांश्च युक्त्वा संनह्य 'युक्तान्' इति पाठे सज्जीकृतान् प्रयाणार्थी प्रयाणकाङ्क्षी ॥ ३२ ॥

३४] ति० टी०–गजकन्याः करेणवः सघोषा घण्टाघोषसहिताः ॥ ३४ ॥

रा० टी०–गजेति । हेमकक्ष्याः पताकिनः पताकाविशिष्टाः गजकन्याः करेणवः गजाश्च घर्मान्ते ग्रीष्मापाये जीमूता मेघा इव संप्रतस्थिरे ॥ ३४ ॥

गो० टी०–गजकन्या इति । गजकन्याः करेणवः हेमकक्ष्याः हेममयबन्धनरज्जवः सघोषाः घण्टाघोषयुक्ताः पताकिन इत्यत्र "पुमान् स्त्रिया" इत्येकशेषः ॥ ३३ ॥

३५] ति० टी०–सुमहार्हाणि यानान्यारुह्य तद्योग्याः प्रययुः, पदातयस्तु पादैरेव प्रययुः ॥ ३५ ॥

रा० टी०–विविधानीति । सुमहार्हाणि अतिबहुमूल्या-

---

१ स निश्वासेति गो. निश्वास स इति रा. पाठः । २ अतक्रुदिति रा. पाठः । ३ तथेति गो. पाठः । ४ अर्थवदिति गो. पाठः । ५ मचोदयदिति गो. पाठः । ६ परिष्कृतानिति गो. पाठः । ७ अर्थीति गो. पाठः । ८ एवेति गो. पाठः ।

अथ यानप्रवेकैस्तु कौसल्याप्रमुखाः स्त्रियः । रामदर्शनकाङ्क्षिण्यः प्रययुर्मुदितास्तदा ॥ ३६ ॥
चन्द्रार्कतरुणाभासां नियुक्तां शिबिकां शुभाम् । आस्थाय प्रययौ श्रीमान्भरतः सपरिच्छदः ॥३७॥
सा प्रयाता महासेना गजवाजिसमाकुला । दक्षिणां दिशमावृत्य महामेघ इवोत्थितः ॥ ३८ ॥
वनानि च व्यतिक्रम्य जुष्टानि मृगपक्षिभिः । गङ्गायाः परवेलायां गिरिष्वथ नदीष्वपि ॥ ३९ ॥
सा संप्रहृष्टद्विपवाजियूथा वित्रासयन्ती मृगपक्षिसंघान् ।
महद्वनं तत्प्रविगाहमाना रराज सेना भरतस्य तत्र ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

त्रिनवतितमः सर्गः ।

सैन्यपरिजनैश्चित्रकूटं प्राप्तो भरतो भरद्वाजोक्तलक्षणैस्तं चित्रकूटं निर्धार्य तत्र रामाश्रमान्वेषणे सैनिकान्व्ययोजयत् । विचिन्वन्तस्ते नातिदूरे दृष्ट्वा धूमलिङ्गेन तत्रैव रामवसतिं निश्चित्यु रथ सेनां संस्थाप्य भरतो वसिष्ठादिभिः सममेतद्देशागमननिश्चयं चक्रे ।

तया महत्या यायिन्या ध्वजिन्या वनवासिनः । अर्दिता यूथपा मत्ताः सयूथाः संप्रदुद्रुवुः ॥ १ ॥
ऋक्षाः पृषतमुख्याश्च रुरवश्च समन्ततः । दृश्यन्ते वनवाटेषु गिरिष्वपि नदीषु च ॥ २ ॥

नि विविधानि अनेकप्रकाराणि महान्ति लघूनि च यानानि ययुः पदातयश्च पादैर्ययुः ॥ ३६ ॥

गो० टी०–विविधानीति । प्रययुरित्यत्र सादिन आरुह्येति शेषः, यद्वा यानानीति तत्स्था लक्ष्यन्ते पदातयः पादैरेव ययुः यानैः समं ययुरिति भावः॥ ३४ ॥

३६] **ति० टी०**–यानप्रवेकैर्यानोत्तमैः ॥ ३६ ॥

रा० टी०–अथेति । तदा तस्मिन् काले रामदर्शनकाङ्क्षिण्यः कौशल्याप्रमुखाः स्त्रियः यानप्रवेकैरुत्तमयानैः अथ ययुः मङ्गलगमनं चक्रुः ॥ ३६ ॥

गो० टी०–अथेति । यानप्रवेकैर्यानोत्तमैः 'प्रवेकानुत्तमोत्तमाः' इत्यमरः ॥ ३६ ॥

३७–३८] **ति० टी०**–चन्द्रार्कतरुणाभासां तरुणचन्द्रार्कसदृशीं क्वचिद्भागे स्फटिकादिनिर्मितां क्वचिद्भागे पद्मरागादिनिर्मितामिति यावत्। नियुक्ताम् वाहकैरिति शेषः ॥ ३७ ॥ ३८ ॥

रा० टी०–चन्द्रार्केति । चन्द्रार्कतरुणाभासां तरुणचन्द्रार्कदीप्तिसदृशदीप्तिमतीं नियुक्तां वाहकैर्गृहीतां शुभां शिबिकामास्थाय सपरिच्छदः सामग्रीसहितो भरतः ययौ ॥ ३७ ॥

गो० टी०–चन्द्रार्केति । चन्द्रार्कतरुणाभासामिति । चन्द्रार्कतरुणाभासां तरुणचन्द्रार्ककान्तिं नियुक्तां वसिष्ठादिभिराप्तैः सपरिच्छदः सपरिवारः ॥ ३६ ॥

रा० टी०–सेति । प्रयाता सा महासेना दक्षिणां दिशमाश्रित्य वर्त्तितो महामेघ इवासीदिति शेषः ॥ ३८ ॥

गो० टी०–सेत्यादिश्लोकद्वयमेकं वाक्यम् । गङ्गायाः दक्षिणवाहिन्याः परवेलायां पश्चिमभागे स्थितेति शेषः, महासेना वनानि व्यतिक्रम्य गिरिषु नदीषु च विश्रम्येति शेषः, वर्त्तितो मेघ इव दक्षिणां दिशमाश्रित्य प्रयातेति संबन्धः, यद्वा महासेना गिरिषु नदीषु च वनानि व्यतिक्रम्येति वा अन्वयः ॥३७॥३८॥

३९] **ति० टी०**–गङ्गायाः परवेलायां पश्चिमतीरस्थिता सेना गिरिषु नदीषु च वर्तमानवनान्यतिक्रम्य प्रयाता बभूवेति शेषः ॥ ३९ ॥

रा० टी०–वनानीति । गङ्गायाः परवेलायां परतेरि वियमानेषु गिरिषु गिरिसमीपे नदीषु नदीसमीपे वियमानानि मृगपक्षिभिर्जुष्टानि वनानि व्यतिक्रम्य संप्रहृष्टाः द्विपवाजिनां यूथाः यस्यां सा मृगपक्षिसंघान् वित्रासयन्ती भरतस्य सेना रराज शुशुभे । श्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशीरोमणावयोध्याकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

४०] **ति० टी०**–सेति ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

गो० टी०–सेति । तत्र तदेत्यर्थः ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने द्विनवतितमः सर्गः ॥ ९२ ॥

१] **ति० टी०**–यायिन्या गच्छन्त्या । यूथपा यूथनाथाः॥१॥

रा० टी०–यात्राकालिकं वृत्तान्तमाह–तयेत्यादिभिः । यायिन्या गमनशीलया तया ध्वजिन्या सेनया अर्दिताः पीडिताः अत एव मत्ताः दैन्यं प्राप्ताः सयूथाः यूथसहिताः वनवासिनो यूथपाः गजप्रभृतयः संप्रदुद्रुवुः ॥ १ ॥

गो० टी०–तयेत्यादि । यायिन्या गच्छन्त्या अर्दिताः पीडिताः यूथपाः गजादियूथनाथाः 'यूथनाथस्तु यूथपः' इत्यमरः॥१॥

२] **ति० टी०**–पृषताः सबिन्दवः रुरवोऽबिन्दवः अर्दिता दृश्यन्त इत्यर्थः ॥ २ ॥

१ रयेति गो. पाठः । २ अपि नदीषु चेति गो. पाठः । ३ योधेति गो. पाठः । ४ प्रतीति गो. पाठः । ५ संघा इति गो. पाठः । ६ राजीव्वित्ति गो. रा. पाठः ।

स संप्रतस्थे धर्मात्मा प्रीतो दशरथात्मजः । वृतो महत्या नादिन्या सेनया चतुरङ्गया ॥ ३ ॥
सागरौघनिभा सेना भरतस्य महात्मनः । महीं संछादयामास प्रावृषि द्यामिवाम्बुदः ॥ ४ ॥
तुरङ्गौघैरवतता वारणैश्च महाबलैः । अनालक्ष्या चिरं कालं तस्मिन्काले बभूव सा ॥ ५ ॥
स गत्वा दूरमध्वानं संपरिश्रान्तवाहनः । उवाच वचनं श्रीमान् वसिष्ठं मन्त्रिणां वरम् ॥ ६ ॥
यादृशं लक्ष्यते रूपं यथा चैव मया श्रुतम् । व्यक्तं प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ॥ ७ ॥
अयं गिरिश्चित्रकूटस्तथा मन्दाकिनी नदी । एतत्प्रकाशते दूरान्नीलमेघनिभं वनम् ॥ ८ ॥
गिरेः सानूनि रम्याणि चित्रकूटस्य संप्रति । वारणैरवमृद्यन्ते मामकैः पर्वतोपमैः ॥ ९ ॥
मुञ्चन्ति कुसुमान्येते नगाः पर्वतसानुषु । नीला इवातपापाये तोयं तोयधरा घनाः ॥ १० ॥
किंनराचरितं देशं पश्य शत्रुघ्न पर्वते । हयैः समन्तादाकीर्णं मकरैरिव सागरम् ॥ ११ ॥

रा० टी०–ऋक्षा इति । ऋक्षादयः वनराज्यादिषु समन्ततो दृश्यन्ते, तत्र ऋक्षाः भल्लूकाः पृषताः बिन्दुसहिताः रुरवस्तद्रहिताः ॥ २ ॥

गो० टी०–ऋक्षा इति । पृषतसंघाः बिन्दुमन्मृगसंघाः, ऋक्षाः भल्लूकाः, रुरवो बिन्दुरहिताः स्थूलकायाः विकटश्रृङ्गा मृगाः दृश्यन्ते अदृश्यन्त । वनराजीष्वित्यादिना अपूर्वमनुष्यादिदर्शनेन स्तब्धेक्षणाः स्थिता इत्युच्यन्ते ॥ २ ॥

३–४] ति० टी०–नादिन्या घोषवत्या ॥ ३ ॥ ४ ॥

रा० टी०–स इति । प्रीतः रामनिवासश्रुतिहेतुकप्रीतिविशिष्टः नादिन्या नादविशिष्टया सेनया वृतो भरतः संप्रतस्थे ॥ ३ ॥

गो० टी०–स इति । नादिन्या रथघोषहेषितबृंहितादिभिरिति शेषः ३ ॥

रा० टी०–सागरेति । सागरौघनिभा सागरौघसदृशी महात्मनो भरतस्य सेना प्रावृषि वर्षर्तौ द्यामम्बुदो मेघ इव महीं संछादयामास ॥ ४ ॥

गो० टी०–सागरौघेति । द्यामाकाशम् ॥ ४ ॥

५] ति० टी०–तस्मिन्काले मार्गगमनकाले । सा मही॥५॥

रा० टी०–तुरङ्गेति । तुरङ्गौघैरश्वसमूहैः महाबलैर्वारणैर्गजैश्च अवतता विस्तृता सा सेना तस्मिन्काले चिरंकालमनालक्ष्या लक्षयितुमशक्या बभूव ॥ ५ ॥

गो० टी०–तुरङ्गौघैरिति । अवतता निरन्तरा तस्मिन्काले गमनकाले चिरकालमित्यत्वेन कदाचिल्लक्ष्यत इति गम्यते ॥ ५ ॥

६] ति० टी०–मन्त्रिणां मन्त्रविदां वरं श्रेष्ठम् ॥ ६ ॥

रा० टी०–स इति । स भरतः दूरमध्वानं गत्वा मन्त्रिणां वरं श्रेष्ठं वशिष्ठमुवाच ॥ ६ ॥

गो० टी०–स इति । मन्त्रिणां मन्त्रविदां, यद्वा औचित्यान्मन्त्रशब्दः कार्यविचारे वर्तते ॥ ६ ॥

७] ति० टी०–भरद्वाजो यं देशं चित्रकूटं यादृशमब्रवीत् यथा चास्माभिः श्रुतं तथैवास्य देशस्य रूपं लक्ष्यते, तस्माद्व्यक्तं तं देशं प्राप्ताः स्म । छान्दसो विसर्गलोपः ॥ ७ ॥

रा० टी०–यादृशमिति । यं देशं चित्रकूटं यादृशं यादृशरूपविशिष्टं भरद्वाजोऽब्रवीत् मया च श्रुतं तादृशमेव रूपमत्र लक्ष्यते अतस्तं व्यक्तं चित्रकूटं वयं प्राप्ताः स्मः ॥ ७ ॥

गो० टी०–यादृशमिति । अस्य देशस्य यादृशं रूपं लक्ष्यते मन्दाकिनीचित्रकूटमध्यवर्तित्वरूपं मया च यथा येन प्रकारेण श्रुतं भरद्वाजात् तथा दृश्यत इति शेषः ॥ ७ ॥

८] ति० टी०–प्राप्तिमेव विवृणोति–अयमिति ॥ ८ ॥

रा० टी०–अयमिति । यतः नीलमेघनिभं नीलमेघसदृशमेतद्वनं दूरात्प्रकाशते अतः अयमेव चित्रकूटो गिरिः मन्दाकिनी तदभिधा नदी इयमेव, एतेनेदमेव रूपं भरद्वाजेन बोधितमिति सूचितम् ॥ ८ ॥

गो० टी०–तदेवाह–अयमित्यादिना । अयं पुरोवर्ती गिरिश्चित्रकूटो भवति तथेयं मन्दाकिनी भवति एतद् अनयोर्मध्यवर्ति वनं नीलमेघनिभं प्रकाशते ॥ ८ ॥

९] ति० टी०–अवमृद्यन्ते पीड्यन्ते ॥ ९ ॥

रा० टी०–गिरेरिति । चित्रकूटस्य गिरेः सानूनि मामकैर्वारणैर्गजैः अवमृद्यन्ते पीड्यन्ते ॥ ९ ॥

गो० टी०–अथ तदेशप्राप्तिं दर्शयति–गिरेः सानूनीति । सानूनि एतानीति सिद्धम् अवमृद्यन्ते भज्यन्ते ॥ ९ ॥

१०–११] ति० टी०–अत एवैते नगा वृक्षा गजानामाघातेन चलितशाखाः पर्वतसानुषु कुसुमानि मुञ्चन्ति ॥ १० ॥११॥

रा० टी०–मुञ्चन्तीति । एते नीलाः नगाः वृक्षाः पर्वतसानुषु कुसुमानि मुञ्चन्ति, तत्र दृष्टान्तः आतपापाये तोयधराः घनाः तोयमिव ॥ १० ॥

गो० टी०–अथ रामनिवासत्वेन भोग्यतावृद्ध्या तद्वनं भ्रातरं प्रति वर्णयति–मुञ्चन्तीत्यादि । एते बकुला इत्यर्थः, आतपापाये घर्मान्ते वर्षाकाल इति यावत् तोयधरा इति नीलत्वे हेतुः ॥ १० ॥

१ भूरिति गो. पाठः । २ यात्वेति गो. पाठः । ३ स्विर्ति गो. पाठः । ४ भरत इति गो. पाठः । ५ इयमिति गो. पाठः । ६ पर्वतमिति गो. पाठः । ७ भृगैरिति गो. पाठः ।

एते मृगगणा भान्ति शीघ्रवेगाः प्रचोदिताः । वायुप्रविद्धाः[1] शरदि मेघजाला इवाम्बरे ॥ १२ ॥
कुर्वन्ति कुसुमापीडाञ्छिरःसु सुरभीनमी । मेघप्रकाशैः फलकैर्दाक्षिणात्या नरा यथा ॥ १३ ॥
निष्कूजमिव भूत्वेदं वनं घोरप्रदर्शनम् । अयोध्येव जनाकीर्णा संप्रति प्रतिभाति मे[3] ॥ १४ ॥
खुरैरुदीरितो रेणुर्दिवं प्रच्छाद्य तिष्ठति । तं वहत्यनिलः शीघ्रं कुर्वन्निव मम प्रियम् ॥ १५ ॥
स्यन्दनांस्तुरगोपेतान्सूतमुख्यैरधिष्ठितान् । एतान्संपततः शीघ्रं पश्य शत्रुघ्न कानने ॥ १६ ॥
एतान्वित्रासितान्पश्य बर्हिणः प्रियदर्शनान् । ऐवमापततः शैलमधिवासं पतत्रिणाम्[5] ॥ १७ ॥
अतिमात्रमयं देशो मनोज्ञः प्रतिभाति [3]मे । तापसानां निवासोऽयं व्यक्तं स्वर्गपथोऽनघ[6] ॥ १८ ॥

रा० टी०–किन्नरेति । हे शत्रुघ्न ! मकरैराकीर्णं सागरमिव हयैराकीर्णं किन्नराचरितं देशं पश्य ॥ ११ ॥

गो० टी०–किंनराचरितमिति । किन्नराचरितं देशं किंनराचरितदेशरूपं पर्वतम् ॥ ११ ॥

१२] ति० टी०–प्रचोदिताः सैनिकैः । वायुप्रविद्धाः वायुप्रेरिताः मेघजाला मेघसमूहाः । 'मेघराज्यः' इति पाठान्तरम् ॥ १२ ॥

रा० टी०–एते इति । प्रचोदिताः सेनाजनैः प्रेरिताः प्रचालिता इत्यर्थः, अत एव शीघ्रवेगाः एते मृगगणाः भान्ति, तत्र दृष्टान्तः शरदि वायुप्रविद्धाः वायुना प्रचालिताः अम्बरे आकाशे मेघजाला इव ॥ १२ ॥

गो० टी०–एत इति । प्रचोदिताः सैनिकैरिति शेषः प्रविद्धा प्रेरितेति यावत् ॥ १२ ॥

१३] ति० टी०–अमी भटा मेघप्रकाशैः फलकैः शस्त्रनिवारणचर्मभिरुपलक्षिता दाक्षिणात्या नरा इव शिरःसु कुसुमापीडान्कुसुमनिर्मितभूषणविशेषान्कुर्वन्ति धारयन्तीति तीर्थः । अमी दृष्टा निबिडप्रत्यग्रपलाशभूयिष्ठतया मेघवदवभासमानैः फलकैर्महास्कन्धशाखाभिरुपलक्षिता दाक्षिणात्या दक्षिणदिग्भवाः शशिप्रभान्सुरभीन्कुसुमापीडान्स्तबकशेखरान्कुर्वन्ति । 'दाक्षिणात्याः शशिप्रभान्' इति पाठ इति कतकः ॥ १३ ॥

रा० टी०–कुर्वन्तीति । अमी सैनिकाः तरवो वा शिरःसु सुरभीन् सुगन्धवतः कुसुमापीडान् कृष्णपुष्पनिर्मितभूषणविशेषान् कुसुमगुच्छान्वा कुर्वन्ति धारयन्तीत्यर्थः, तत्र दृष्टान्तः मेघप्रकाशैः मेघसंकाशैः फलकैः खड्गादिप्रहारनिवारकचर्मभिः उपलक्षिताः दाक्षिणात्याः नरा यथा ॥ १३ ॥

गो० टी०–कुर्वन्तीति । अमी भटाः मेघप्रकाशैः फलकैः केशबन्धविशेषैः वनसंचारार्थं कल्पितैरुपलक्षिताः सन्तः दाक्षिणात्या नरा यथा दाक्षिणात्या नरा इव शिरःसु कुसुमापीडान् कुर्वन्ति 'आपीडशेखरोत्तंसावतंसाः शिरसि स्रजः' इति हलायुधः । दाक्षिणात्या हि केशाद्वहृत्य बद्धा कुसुमापीडैरलंकुर्वन्ति ॥१३॥

१४] ति० टी०–इदं वनं पूर्वं निष्कूजं जनशब्दरहितम्, अत एव घोरदर्शनं भूत्वा सांप्रतमस्मदागमने जनाकीर्णायोध्येव भाति । पाठान्तरे जनाकीर्णमिदं वनमयोध्येव भाति ॥ १४ ॥

रा० टी०–निष्कूजमिति । निष्कूजं शब्दरहितमत एव घोरं प्रदर्शनं यस्य तदिदं वनं संप्रति जनाकीर्णं भूत्वा अयोध्येव मे प्रतिभाति ॥ १४ ॥

गो० टी०–निष्कूजमिति । घोरप्रदर्शनं क्रूरदर्शनमिदं वनं पुरा तिष्कूजमिव भूत्वा निर्जनं भूत्वेति यावत् संप्रति जनाकीर्णा अयोध्या सौम्यनगरीव मा मां प्रति भाति ॥१४॥

१५] ति० टी०–वहत्यपनयति । मम प्रियं कुर्वन्निव चित्रकूटदर्शनेन निरोधनिवर्तकत्वादिति भावः ॥ १५ ॥

रा० टी०–खुरैरिति । खुरैः अश्वादिशफैः उदीरितो यो रेणुः दिवं प्रच्छाद्य तिष्ठति तं रेणुं मम प्रियं कुर्वन्निव अनिलः वायुः शीघ्रं वहति अन्यत्र प्रापयति ॥ १५ ॥

गो० टी०–खुरैरिति । हयादिखुरैरुदीरित उत्थापितो रेणुर्दिवं प्रच्छाद्य तिष्ठति वहति द्रुतमपनयति कुर्वन्निव मम प्रियं रामाश्रमदर्शनप्रदानादिति भावः । अनेनावगम्यते रामाश्रमवर्णनं तदधिष्ठितत्वेन प्रीतिहेतुत्वादिति ॥ १५ ॥

१६–१७] ति० टी०–संपततो गच्छतः ॥ १६ ॥ १७ ॥

रा० टी०–स्यन्दनानिति । तुरगोपेतान् अश्वैर्युक्तान् शीघ्रं संपततो गच्छतः एतान् स्यन्दनान् रथान् त्वं पश्य ॥ १६ ॥

गो० टी०–वक्ष्यमाणत्रासहेतुत्वेनाह–स्यन्दनानिति । सूतमुख्यैः सारथिमुख्यैः संपततः रामदर्शनकुतूहलेन सम्यग्गच्छतः ॥ १६ ॥

रा० टी०–एतानिति । प्रियदर्शनान् एतान् बर्हिणो मयूरान्वित्रासितान्सेनादर्शनहेतुकत्रासविशिष्टान्पश्य, एवं शीघ्रमापततः पतत्रिणः पक्षिणः अधिवासं निवासाश्रयं शैलं पश्य ॥१७॥

गो० टी०–एतानिति । वित्रासितान् रथैरिति शेषः, बर्हिणः मयूरान् एतं शैलं पतत्रिणः प्रशस्तपक्षानिति बर्हिविशेषणम् ॥ १७ ॥

१८] ति० टी०–व्यक्तं स्पष्टम् । स्वर्गपथः स्वर्गप्रदेशः ॥१८॥

रा० टी०–अतीति । अयं देशः अतिमात्रमतीव मनोज्ञो रमणीयः मे प्रतिभाति, तत्र हेतुः यतोऽयं तापसानां निवासः अत एव स्वर्गपथः स्वर्गतुल्यः व्यक्तं प्रस्फुटमेतत् ॥ १८ ॥

गो० टी०–अतिमात्रमिति । अतिमात्रं मनोज्ञ इति

१ प्रविद्धेति गो. पाठः । २ राजिरिति गो. पाठः । ३ मेति गो. पाठः । ४ एतमाविशतः शीघ्रमिति गो. पाठः । ५ पतत्रिण इति गो. रा. पाठः । ६ यथेति गो. पाठः ।

मृगा मृगीभिः सहिता बहवः पृषता वने । मनोज्ञरूपा लक्ष्यन्ते कुसुमैरिव चित्रिताः ॥ १९ ॥
साधु सैन्याः प्रतिष्ठन्तां विचिन्वन्तु च काननम् । यथा तौ पुरुषव्याघ्रौ दृश्येते रामलक्ष्मणौ ॥ २० ॥
भरतस्य वचः श्रुत्वा पुरुषाः शस्त्रपाणयः । विविशुस्तद्वनं शूरा धूमाग्रं ददृशुस्ततः ॥ २१ ॥
ते समालोक्य धूमाग्रमूचुर्भरतमागताः । नामनुष्ये भवत्यग्निर्व्यक्तमत्रैव राघवौ ॥ २२ ॥
अथ नात्र नरव्याघ्रौ राजपुत्रौ परंतपौ । अन्ये रामोपमाः सन्ति व्यक्तमत्र तपस्विनः ॥ २३ ॥
तच्छ्रुत्वा भरतस्तेषां वचनं साधुसंमतम् । सैन्यानुवाच सर्वांस्तानमित्रबलमर्दनः ॥ २४ ॥
यत्ता भवन्तस्तिष्ठन्तु नेतो गन्तव्यमग्रतः । अहमेव गमिष्यामि सुमन्त्रो धृतिरेव च ॥ २५ ॥
एवमुक्तास्ततः सैन्यास्तत्र तस्थुः समन्ततः । भरतो यत्र धूमाग्रं तत्र दृष्टिं समादधत् ॥ २६ ॥

संबन्धः अत एव स्वर्गपथो यथा स्वर्गप्रदेश इव मा मां प्रति भाति ॥ १८ ॥

१९] ति० टी०–पृषतानां सबिन्दुत्वात्कुसुमैश्चित्रिता इवेत्युक्तिः ॥ १९ ॥

रा० टी०–मृगा इति । मृगीभिः सहिताः मनोज्ञरूपाः पृषताः सबिन्दवो मृगाः कुसुमैः चित्रिता इव लक्ष्यन्ते ॥ १९ ॥

गो० टी०–मृगा इति । पृषताः बिन्दुमृगाः ॥ १९ ॥

२०] ति० टी०–साधु यथोचितं प्रतिष्ठन्तां गच्छन्तु । गमनफलं विचिन्वन्त्वित्यादि ॥ २० ॥

रा० टी०–साध्विति । सैन्याः साधु यथा स्यात्तथा प्रतिष्ठन्तां काननं वनं विचिन्वन्तु च । तत्प्रयोजनमाह–यथा पुरुषव्याघ्रौ रामलक्ष्मणौ दृश्येते ॥ २० ॥

गो० टी०–साध्विति । साधुसैन्या उचिताः सैनिकाः 'साधुः स्त्रिपूचिते सौम्ये सज्जने वार्धुषौ पुमान्' इति वैजयन्ती । प्रतिष्ठन्तां गच्छन्त्वित्यर्थः, दृश्येते दृश्येयातां लकारव्यत्यय आर्षः ॥ २० ॥ २१ ॥

२१] ति० टी०–धूमाग्रं धूमशिखां तेन वह्निमत्तमाय तत्संपादकत्वेन राघवावनुमाय भरतमूचुः ॥ २१ ॥

रा० टी०–भरतस्येति । भरतस्य वचः श्रुत्वा शस्त्रपाणयः पुरुषाः तद्वनं विविशुः, ततोऽनन्तरं दूराद्धूमाग्रं ददृशुः ॥ २१ ॥

२२] ति० टी०–नामनुष्ये वनदाहाभावविशिष्टतया प्रत्यक्षं दृश्यमाने इति शेषः । तस्मान्मनुष्यकारणकवह्न्ययनुपपत्त्या अत्रैव राघवाविति जानीमः ॥ २२ ॥

रा० टी०–ते इति । ते वनप्रवेशनकर्तारः पुरुषाः धूमाग्रं समालोक्य भरतमागताः प्राप्ताः सन्तः ऊचुः । तद्वचनाकारमाह–अमनुष्ये मनुष्यरहिते देशे अग्निर्न भवति एतादृशवने इति शेषः, तेन धूमलिङ्गकानुमानेन वह्निरस्माभिर्निश्चित इति ध्वनितमतः राघवौ अत्रैव इति व्यक्तमस्माभिर्निश्चितम् । एतेन तस्मिन् वने दावाभावः सूचितः तेन जलाधिक्यं व्यञ्जितम् ॥ २२ ॥

गो० टी०–ते इति । धूमाग्रं धूमशिखाम् अमनुष्ये मनुष्यरहिते देशे अग्निः धूमरेखाविशेषनिश्चितः न भवति अत्र अत्रैव वह्निमत्प्रदेशे राघवौ स्तः व्यक्तं ध्रुवम् ॥ २२ ॥

२३] ति० टी०–राजभीत्या निश्चयेन तथा वक्तुमशक्नुवन्तः पक्षान्तरमाहुः–अथेति । अत्र न द्वौ तथाप्यन्ये तपस्विनोऽत्र भविष्यन्ति तन्मुखात्तद्वासस्थानलाभो भविष्यतीति भावः ॥ २३ ॥

रा० टी०–इदमनुमानं जनसामान्यबोधकमिति द्योतयन्नाह–अथेति । अथ यदि नरव्याघ्रौ न तर्हि रामोपमा अन्ये तपस्विनः सन्ति, रामोपमा इत्यनेन तद्वननिवासस्य असमर्थजनाशक्यत्वं व्यञ्जितमेतेनात्र रामस्याभावेऽपि रामनिवासस्थलनिश्चयोऽवश्यं भविष्यतीति सूचितम् ॥ २३ ॥

गो० टी०–अथेति । अथ यदि न स्त इत्यर्थः तपस्विनः सन्ति ते प्रष्टव्या इति भावः ॥ २३ ॥

२४] ति० टी०–साधुसंमतं न्यायवित्संमतं तेषां वचनं श्रुत्वा तत्र प्रदेशे रामावस्थितिं निश्चित्य सर्वान्सैन्यानुवाच ॥ २४ ॥

रा० टी०–तदिति । अमित्रबलमर्दनः शत्रुसेनानिषूदनो भरत उवाच ॥ २४ ॥

गो० टी०–तदिति । साधुसंमतं साधूनां न्यायविदां संमतम् अमित्रबलमर्दनः अमोघशासन इति यावत् ॥ २४ ॥

२५–२६] ति० टी०–वचनमाह–यत्ता इति । यत्ताः सावधानाः, कोलाहलमकुर्वन्तः । धृतिरित्यशोकमन्त्रिणो नामान्तरम् ॥ २५ ॥ २६ ॥

रा० टी०–तद्वचनाकारमाह–यत्ता इति । यत्ताः सावधानाः भवन्तस्तिष्ठन्तु इतः अस्मात् स्थानात् अग्रतोऽग्रे न गन्तव्यमहमेव गमिष्यामि ॥ २५ ॥

रा० टी०–एवमिति । सैन्याः समन्ततः चतुर्दिक्षु तस्थुः भरतस्तु यत्र धूमाग्रं तत्र दृष्टिं समादधत् समस्थापयत् ॥ २६ ॥

गो० टी०–यत्ता इति । यत्ताः निःशब्दा इतः अस्माद्देशात् परम् अग्रतः भवद्भिर्न गन्तव्यम् अहमेव राजद्य मन्त्रिषु सुमन्त्र एव ऋत्विक्षु गुरुर्वसिष्ठ एव 'धृतिः' इति पाठे सुमन्त्र एवोच्यते ॥ २५ ॥ २६ ॥

---

१ कानने इति गो. पाठः । २ एतावति रा. पाठः । ३ धूमं चेति गो. पाठः । ४ मन्य इति गो. पाठः । ५ चेदमब्रवीदिति रा. पाठः । ६ गुरुरिति गो. पाठः । ७ सर्वे इति गो. पाठः । ८ समादधादिति गो. पाठः ।

व्यवस्थिता या भरतेन सा चमूर्निरीक्षमाणापि च भूमिमग्रतः ।
बभूव हृष्टा न चिरेण जानती प्रियस्य रामस्य समागमं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

चतुर्नवतितमः सर्गः ।

स्वचित्तं प्रसादयन्वैदेह्याः प्रियं चाकाङ्क्षन्रामस्तत्तद्विशेषं निर्दिशंश्चित्रकूटं वर्णयति ।

दीर्घकालोषितस्तस्मिन्गिरौ गिरिवरप्रियः । वैदेह्याः प्रियमाकाङ्क्षन्स्वं च चित्तं विलोभयन् ॥ १ ॥
अथ दाशरथिश्चित्रं चित्रकूटमदर्शयत् । भार्याममरसंकाशः शचीमिव पुरंदरः ॥ २ ॥
न राज्यभ्रंशनं भद्रे न सुहृद्भिर्विनाभवः । मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम् ॥ ३ ॥
पश्येममचलं भद्रे नानाद्विजगणायुतम् । शिखरैः खमिवोद्विद्धैर्धातुमद्भिर्विभूषितम् ॥ ४ ॥

२७] ति० टी०–अपि च या चमूर्भरतेन व्यवस्थिता भरतेन व्यवस्थापिता सा वासाय अग्रतो भूमिं निरीक्षमाणा न चिरेण शीघ्रम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

रा० टी०–व्यवस्थितेति । या चमूः भरतेन व्यवस्थिता व्यवस्थापिता सा चमूः अग्रतः भूमिं धूमधूमवद्देशं निरीक्षमाणा अत एव रामस्य समागमं न चिरेण झटिति जानती सती हृष्टा बभूव ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

गो० टी०–व्यवस्थितेति । अग्रतो धूमं निरीक्षमाणापि च अनेन रामदर्शनत्वरातिशयः सूच्यते व्यवस्थिता भरतेन व्यवस्थापितेत्यर्थः, भरतेन हेतुना व्यवस्थिता वा सा चमूः प्रियस्य रामस्य न चिरेण अचिरेण समागमं जानती सती तदा व्यवस्थाकलिऽपि हृष्टा बभूव 'जानकीप्रियस्य' इति च पाठः॥ २७॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने त्रिणवतितमः सर्गः ॥ ९३ ॥

१-२] ति० टी०–अथ कविस्तत्रस्थितरामवृत्तान्तं वर्णयति–दीर्घेत्यादि । प्रियं संतोषमाकाङ्क्षन्निच्छन्स्वानुरोधेन घोरं वनमागतायाश्चित्तखेदस्योपशमनीयतया चित्रकूटरामणीयकदर्शनेन तच्चित्तमुपलालयन्स्वं च चित्तं वनवासादिक्लिष्टं तथा कुर्वंश्चित्रकूटमदर्शयदित्यन्वयः ॥ १ ॥ २ ॥

रा० टी०–रामवृत्तान्तमाह–दीर्घेत्यादिभिः । गिरिवरप्रियः अत एव तस्मिन् चित्रकूटे गिरौ दीर्घकालोषितः त्रीन् मासान् उषितः अमरसंकाशः दाशरथिः रामः वैदेह्याः प्रियं प्रीतिमाकाङ्क्षन् स्वं चित्तं च विलोभयन् वनवासे नियोजयन् सन् चित्रमनेकविधाश्चर्यविशिष्टं चित्रकूटं शचीं पुरन्दर इव भार्यामदर्शयत् । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–एवमेतावत्पर्यन्तं भरतकथां प्रस्तुत्य रामस्य चित्रकूटप्रवेशानन्तरदिनेषु विहारतारतम्याभावात् भरतप्राप्तिदिनसंभूतविहारविशेषान् वर्णयति–दीर्घकाले इत्यादिना सर्गद्वयेन । आदौ श्लोकद्वयमेकान्वयम् । अथ प्रातःकर्तव्यकर्माद्यनुष्ठानानन्तरं तस्मिन् गिरौ चिरपरिचयेऽपि वैलक्षण्यातिशयादपूर्ववद्भासमाने दीर्घकालोषितः मासमात्रमुषितोऽपि गिरिवनप्रियः 'नवं नवं प्रीतिरहो करोति' इत्युक्तरीत्या गिरिवनयोः नवनवत्वापादकप्रीतिकः वैदेह्याः प्रियेण सहैव वनदर्शनकुतूहलायाः प्रियं प्रीतिमाकाङ्क्षन् तद्द्वारा स्वचित्तं च विलोभयन् प्रीणयन् अमरसंकाशः कुत्रापि निर्भय इत्यर्थः, दाशरथिः रामः चित्रमन्वर्थं चित्रकूटं भार्यां सर्वात्मना भरणीयां सीतां शचीं पुरन्दर इव अदर्शयत् "गतिबुद्धि-" इत्यादिना द्विकर्मकत्वम् ॥ १ ॥ २ ॥

३] ति० टी०–विनाभवो विनावस्थानं मे मनो न बाधत इत्यन्वयः । दृष्ट्वा स्थितस्येति शेषः ॥ ३ ॥

रा० टी०–दर्शनप्रकारं बोधयन्नाह–नेति । हे भद्रे ! राज्यभ्रंशनं राज्यत्यागः गिरिं दृष्ट्वा विद्यमानस्य मे मनो न बाधते सुहृद्भिर्विनाभवः स्थितिश्च न बाधते ॥ ३ ॥

गो० टी०–नेति । राज्यात् भक्तजनपूर्णात् विनाभवो विनावस्थानम् अप् छान्दसः, दृष्ट्वा स्थितस्येति शेषः, मनो न बाधते न दुःखाकरोतीत्यर्थः, अयोध्यावासिजनविरहजः खेदः सर्वो निवृत्त इति भावः ॥ ३ ॥

४] ति० टी०–खमिवोद्विद्धैः शीलितादिवत्कर्तरि निष्ठा खस्य वेधकैरित्यर्थः, अभ्रंलिहैरिति यावत् ॥ ४ ॥

रा० टी०–पश्येति । नानाद्विजगणैः आयुतं व्याप्तं खमाकाशमुद्विद्धैः छिद्रकारकैरिव धातुमद्भिः अनेकधातुविशिष्टैः शिखरैर्विभूषितमिममचलं पर्वतं पश्य ॥ ४ ॥

गो० टी०–स्वचित्तविलोभनमुक्त्वा मैथिलीप्रियकरणं दर्शयति–पश्येति । खमाकाशम् उद्विद्धैरिव स्थितैः विद्धोत्थितैरिव स्थितैः अभ्रंलिहैरिति यावत्, कर्तरि निष्ठा ॥ ४ ॥

१ धूमस्थित गो. पाठः । २ वनेति गो. पाठः ।

केचिद्रजतसंकाशाः केचित्क्षतजसंनिभाः । पीतमाञ्जिष्ठवर्णाश्च केचिन्मणिवरप्रभाः ॥ ५ ॥
पुष्पार्ककेतकाभाश्च केचिज्ज्योतीरसप्रभाः । विराजन्तेऽचलेन्द्रस्य देशा धातुविभूषिताः ॥ ६ ॥
नानामृगगणैर्द्वीपितरक्षुक्षगणैर्वृतः[1] । अदुष्टैर्भात्ययं शैलो बहुपक्षिसमाकुलः[2] ॥ ७ ॥
आम्रजम्ब्वसनैर्लोध्रैः प्रियालैः पनसैर्धवैः । अङ्कोलैर्भव्यतिनिशैर्बिल्वतिन्दुकवेणुभिः ॥ ८ ॥
काश्मर्यारिष्टवरणैर्मधूकैस्तिलकैरपि[3] । बदर्यामलकैर्नीपैर्वेत्रधन्वनबीजकैः[4] ॥ ९ ॥
पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः[5] । एवमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥ १० ॥
शैलप्रस्थेषु रम्येषु पश्यमान्कामहर्षणान् । किंनरान्द्वन्द्वशो भद्रे रममाणान्मनस्विनः ॥ ११ ॥
शाखावसक्तान्वङ्गांश्च प्रवराण्यम्बराणि च । पश्य विद्याधरस्त्रीणां क्रीडोद्देशान्मनोरमान् ॥ १२ ॥
जलप्रपातैरुद्भेदैर्निष्पन्दैश्च क्वचित्क्वचित् । स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः ॥ १३ ॥

५] ति०टी०–क्षतजं रुधिरम् । पीतवर्णा माञ्जिष्ठवर्णाश्च ५

६] ति० टी०–पुष्पः पुष्परागः, अर्कः स्फटिकः, केतकानि केतकपुष्पाणि, ज्योतिर्नक्षत्रम्, रसः पारदरसः ॥ ६ ॥

रा० टी०–केचिदिति । क्षतजसंनिभाः रुधिरारुण्यसदृशारुण्यविशिष्टाः केचित्पीतमाञ्जिष्ठवर्णाः पीतमाञ्जिष्ठसदृशवर्णवन्तः मणिवरप्रभाः इन्द्रनीलमणिप्रभासदृशप्रभावन्तः केचित् पुष्पार्ककेतकाभाः पुष्पः पुष्परागः अर्कः स्फटिकः 'अर्कः स्फटिकसूर्ययोः' इत्यमरः । केतकानि केतकपुष्पाणि तत्सदृशाः केचिज्ज्योतीरसप्रभाः ज्योतींषि तारागणाः रसः पारदः तादृशप्रभावन्तः धातुविभूषिताः अचलेन्द्रस्य देशाः प्रदेशाः विराजन्ते । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–केचिदिति । धातुविभूषिताः नानाधात्वलंकृता अत एवाचलेन्द्रस्य चित्रकूटस्य केचिदेशाः रजतसंकाशाः अत्यन्तशुभ्राः केचित् क्षतजसंकाशाः रुधिरसदृशवर्णाः मणिवरप्रभाः इन्द्रनीलप्रभाः पुष्पार्ककेतकाभाः पुष्पः पुष्परागः अर्कः स्फटिकः 'अर्कः स्फटिकसूर्ययोः' इत्यमरः । केतकाभाः ईषत्पाण्डुराः ज्योतीरसप्रभाः ज्योतींषि तारा: ज्वाला वा 'ज्योतिस्तारार्चिभाज्वालादृक्पुत्रार्थाध्वराग्निषु' इति वैजयन्ती । रसः पारदः श्वेतवर्णावान्तरभेदा उच्यन्ते ॥ ५ ॥ ६ ॥

७] ति० टी०–द्वीपी महाव्याघ्रः, तरक्षुः क्षुद्रव्याघ्रः, अदुष्टैस्तपस्विवैभवाहिंसादिदोषरहितैः ॥ ७ ॥

रा० टी०–नानेति । अदुष्टैर्दुष्टतात्यागिभिः, तत्र द्वीपिनो महाव्याघ्राः तरक्षवः क्षुद्रव्याघ्रास्तेषां गणैः समूहैश्च वृतः अयं शैलो भाति ॥ ७ ॥

गो० टी०–नानामृगगणेति । द्वीपी महाव्याघ्रः तरक्षुः क्षुद्रव्याघ्रः अदुष्टैर्जनिजनसंनिधानेन शान्ततया हिंसादिदोषरहितैः ॥ ७ ॥

८] ति० टी०–असनः पीतसारः, प्रियालो राजादनम्, धवाङ्कोलभव्यतिनिशा वृक्षविशेषाः ॥ ८ ॥

९] ति० टी०–अरिष्टो निम्बः, धन्वन इन्द्रयवः, बीजप्रचुरफलविशेषा दाडिमादयः ॥ ९ ॥

१०] ति० टी०–पुष्यति वर्धयति ॥ १० ॥

रा०टी०–आम्रेति । पुष्पवद्भिः पुष्पविशिष्टैः फलोपेतैः फलयुक्तैः छायावद्भिः अतिशयछायाविशिष्टैः अत एव मनोरमैः आम्रादिभिः एवमादिभिरन्यैरपि आकीर्णः व्याप्तः अयं गिरिः श्रियं पुष्यति वर्धयतीत्यर्थः । तत्राम्रजम्ब्वौ प्रसिद्धौ असनः पीतशाकः, प्रियालः राजादनः, अङ्कोलादयो वृक्षविशेषाः । श्लोकत्रयमेकान्वयि ॥ ८–१० ॥

गो० टी०–आम्रेत्यादि । असनैः पीतसालैः, लोध्रैः तिरीटैः, प्रियालैः राजादनैः, अङ्कोलैः भव्यैः न्युब्जैः, तिनिशैः स्यन्दनै बिल्वैः तिन्दुकैः कालस्कन्धैः, वेणुभिः वंशैः, काश्मरीभिः मधुपर्णिकाख्यैर्वृक्षैः, अरिष्टैः निम्बैः, वरुणैः तिक्तशाकैः, मधूकैः गुडपुष्पैः, तिलकैः क्षुरकैः, बदरीभिः आमलकैः, नीपैः कदम्बैः, वेत्रैः, धन्वनैः इन्द्रवृक्षैः, बीजकैः बीजप्रचुरफलैः दाडिमैः, पुष्पवद्भिरित्यादि सर्ववृक्षविशेषणं पुष्यति वर्धयति ॥ ८–१० ॥

११] ति० टी०–कामहर्षणान् देशानिति शेषः, तत्र रममाणान्किन्नरान्पश्य ॥ ११ ॥

रा० टी०–शैलेति । रम्येषु शैलप्रस्थेषु शैलप्रस्तरेषु कामहर्षणान् यथेच्छं हर्षविशिष्टान् द्वन्द्वशो रममाणान् किन्नरान्पश्य ॥ ११ ॥

गो० टी०–शैलप्रस्थेष्विति । रोमहर्षणान् दर्शनमात्रतः पुलककरान् द्वन्द्वशः स्त्रीपुरुषौ द्वौ द्वावित्यर्थः, मनस्विनः अन्योन्यबद्धमनस्कान् ॥ ११ ॥

१२] ति० टी०–खङ्गान् किन्नराणामिति शेषः, तथा विद्याधरीणां क्रीडोद्देशान्पश्य तासां शाखावसक्तान्यम्बराणि च पश्य ॥ १२ ॥

रा० टी०–शाखेति । शाखावसक्तान् शाखाश्रितान् खड्गान् विद्याधराणामसीन् विद्याधरस्त्रीणां प्रवराण्यम्बराणि च मनोरमान् क्रीडोद्देशान् विहारदेशांश्च पश्य ॥ १२ ॥

गो० टी०–शाखावसक्तानिति । खड्गादीनि विद्याधराणामेव, विद्याधराः देवयोनिविशेषाः ॥ १२ ॥

१३] ति० टी०–जलप्रपातैरुद्भवप्रदेशात्पतद्भिर्जलप्रवाहै-

१ गणद्वीपीति गो. पाठः । २ युत इति गो. पाठः । ३ काश्मर्यरिष्टवरुणैरिति गो. वरुणैरिति रा. पाठः । ४ तथेति गो. पाठः । ५ रोमेति गो. पाठः ।

गुहासमीरणो गन्धान्नानापुष्पभवान्बहून् । घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत् ॥ १४ ॥
यदीह शरदोऽनेकास्त्वया सार्धमनिन्दिते । लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधर्षति ॥ १५ ॥
बहुपुष्पफले रम्ये नानाद्विजगणायुते । विचित्रशिखरे ह्यस्मिन्रतवानस्मि भामिनि ॥ १६ ॥
अनेन वनवासेन मम प्राप्तं फलद्वयम् । पितुश्चानृण्यता धर्मे भरतस्य प्रियं तथा ॥ १७ ॥
वैदेहि रमसे कच्चिच्चित्रकूटे मया सह । पश्यन्ती विविधान्भावान्मनोवाक्कायसंमतान् ॥ १८ ॥
इदमेवामृतं प्राहू राज्ञि राजर्षयः परे । वनवासं भवार्थाय प्रेत्य मे प्रपितामहाः ॥ १९ ॥

रुद्भैर्दैर्भुवस्तुद्भिश्च निर्गतैर्निष्पन्दैरल्पनिर्झरैः स्रवद्भिरित्युभयविशेषणं प्रवहद्भिरित्यर्थकम् ॥ १३ ॥

रा० टी०–जलेति । स्रवद्भिः वहद्भिः जलप्रपातैः उन्नतदेशादधोदेशे निपतितैर्महानिर्झरैरित्यर्थः, उद्भैः भुवस्तुद्भिः निर्गच्छद्भिः निष्यन्दैरल्पनिर्झरैश्चोपलक्षितः अयं शैलः स्रवन्मदो द्विप इव भाति ॥ १३ ॥

गो० टी०–जलप्रपातैरिति । जलप्रपातैः निर्झरैः उद्भैर्दैर्भुवस्तुद्भिश्च निर्गतैः स्रवद्भिरिति सर्वविशेषणम् ॥ १३ ॥

१४] ति० टी०–गुहासमीरणो गुहाद्वारप्रवृत्तः समीरणः घ्राणतर्पणं कुर्वाण इति शेषः । अभ्येत्य प्राप्य ॥ १४ ॥

रा० टी०–गुहेति । नानापुष्पभवान् गन्धानभ्येत्य प्राप्य गुहासमीरणो गुहासंबन्धी वायुः घ्राणतर्पणं यथा स्यात्तथा कं नरं न प्रहर्षयेत्प्रहर्षयेदेवेत्यर्थः ॥ १४ ॥

गो० टी०–गुहासमीरण इति । घ्राणतर्पणमिति क्रियाविशेषणम् ॥ १४ ॥

१५] ति० टी०–शरदः संवत्सरान् ॥ १५ ॥

रा० टी०–यदीति । अनेकाः शरदो वर्षाणि वत्स्यामि तदापि मां शोको न प्रधर्षयति ॥ १५ ॥

गो० टी०–यदीति । हे अनिन्दिते सर्वाङ्गसुन्दरि ! इह वने अनेकाः शरदः संवत्सरान् त्वया लक्ष्मणेन कैङ्कर्यलक्ष्मीवता च सार्धं यदि वत्स्यामि तदा मां शोकः नगरत्यागजं दुःखं न प्रधक्ष्यति न पीडयिष्यतीत्यर्थः, अत्र यदीत्युक्त्या भाविविवासः सूच्यते ॥ १५ ॥

१६] ति० टी०–रतवान्रतिमान् रतिः प्रीतिः ॥ १६ ॥

रा० टी०–तत्र हेतुमाह–बह्विति । विचित्राणि शिखराणि यस्य तस्मिन् अस्मिन् चित्रकूटे रतवानतिप्रीतिमानस्मि ॥ १६ ॥

गो० टी०–बहुपुष्पफल इति । घ्राणरसनचक्षुस्त्वक्श्रोत्रप्रीतिकरेऽस्मिन्वने रतवानस्मि प्रीतियुक्तोऽस्मि भामिनि ! [illegible] ॥ १६ ॥

१७] ति० टी०–धर्मे सत्यपालनलक्षणे ॥ १७ ॥

रा० टी०–अनेनेति । अनेन संप्रति प्राप्तेन वनवासेन फलद्वयं प्राप्तम् । तदेवाह–धर्मे निरतस्य पितुः आनृण्यता ऋणराहित्यं भरतस्य प्रियं भरतविषयकातिप्रीतिश्च ॥ १७ ॥

गो० टी०–न केवलं दुःखस्य लाभः किंतु पित्रानृण्यबन्धुहर्षावपीत्याह–अनेनेति । फलद्वयमेवाह–पितुरिति । धर्मे विषये पितुः अनृण्यं तद्वाक्यकरणमित्यर्थः, भरतस्य प्रियं च भरतस्य भाविस्वकैङ्कर्यमिति भावः ॥ १७ ॥

१८] ति० टी०–मनोवाक्कायसंमतांस्तत्प्रियान्वर्णने वाक्प्रियता । भावाः पदार्थाः । 'संयता' इति पाठे सम्यक्नियमितकरणत्रयेत्यर्थः । 'संयताः' इति बहुवचनान्तपाठे भावानित्यस्य विशेषणम् । लिङ्व्यत्यय आर्ष इति तीर्थः । तत्र न कंचियुक्तमर्थं पश्यामः ॥ १८ ॥

रा० टी०–वैदेहीति । मनोवाक्कायसंमतान्मनआयत्तकुलान् विविधान् भावान् पदार्थान् पश्यन्ती त्वं रमसे कच्चित् १८

गो० टी०–एवं स्वप्रीतिमुक्त्वा सीताप्रीतिं पृच्छति–वैदेहीत्यादिना। वैदेहि! भोगोपोद्घातकेलीचुलकितभगवद्वैश्वरूप्यानुभावां त्वां जानासि किं मया भोगस्रोतसि त्वां प्रधानीकुर्वन्तं मां जानासि । पाठभेदः मया भोगस्रोतसि त्वामप्रधानीकुर्वन्तं मां जानासि किं चित्रकूटे भोगस्थानसौभाग्यमपि वाङ्मनसाविषयं जानासि । तटस्थोद्दीपनविभावानप्याह–पश्यन्तीति । मनोवाक्कायायाः संयताः यैस्तान् स्ववशीकृतजनमनोवाक्कायानित्यर्थः 'मनोवाक्कायसंयता' इति पाठे संनियमितकरणत्रयेत्यर्थः । विविधान् मलयानिलकोकिलालापभ्रमरझङ्कारपुष्पहासप्रभृतिभेदान् भावान् विभावान् पश्यन्ती रमसे कच्चित्, यद्वा भावान् किन्नरमृगादीनां चेष्टाः 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु' इति वैजयन्ती ॥ १८ ॥

१९] ति० टी०–इदमेव नियमसहितं वनेऽवस्थानमेव अमृतं प्राहुर्मोक्षसाधनं प्राहुः । मे प्रपितामहा मन्वादयः । वनवासे प्रेत्यैतच्छरीरत्यागोत्तरं भवार्थाय भवः शिवो हिरण्यगर्भस्तल्लोकप्राप्तिरूपायार्थाय प्रयोजनायाहुरित्येके । अन्ये तु संसारक्लेशनिवृत्तये इति कतको व्याचष्टे ॥ १९ ॥

रा० टी०–वनवासस्योत्तमत्वे शिष्टाचारं प्रमाणयन्नाह–इदमिति । हे राज्ञि ! भवार्थाय लोककल्याणाय प्रवृत्ता इति शेषः, परे उत्कृष्टाः राजर्षयो मे प्रपितामहाः मनुप्रभृतयः प्रेत्य विचार्य इदं सनियमं वनवासममृतं प्राहुः । सर्वनाम्नाहुरेश्यविधेयान्यतरलिङ्कतेति नियमात् क्लीबता ॥ १९ ॥

गो० टी०–न केवलमयं वनवासो भोगाय आमुष्मिकसाधकश्चेत्याह–इदमिति । वनवासं वनवासरूपम् इदम् अमृ-

१ प्रधक्ष्यतीति गो. पाठः ।

शिलाः शैलस्य शोभन्ते विशालाः शतशोऽभितः । बहुला बहुलैर्वर्णैर्नीलपीतसितारुणैः ॥ २० ॥
निशि भान्त्यचलेन्द्रस्य हुताशनशिखा इव । ओषध्यः स्वप्रभालक्ष्म्या भ्राजमानाः सहस्रशः॥२१ ॥
केचित्क्षयनिभा देशाः केचिदुद्यानसंनिभाः । केचिदेकशिला भान्ति पर्वतस्यास्य भामिनि ॥ २२ ॥
भित्त्वेव वसुधां भाति चित्रकूटः समुत्थितः । चित्रकूटस्य कूटोऽयं दृश्यते सर्वतः शुभः ॥ २३ ॥
कुष्ठस्थगरपुंनागभूर्जपत्रोत्तरच्छदान् । कामिनां स्वास्तरान्पश्य कुशेशयदलायुतान् ॥ २४ ॥
मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः । कामिभिर्वनिते पश्य फलानि विविधानि च ॥ २५ ॥
वस्त्रौकसारां नलिनीमतीत्यैवोत्तरान्कुरून् । पर्वतश्चित्रकूटोऽसौ बहुमूलफलोदकः ॥ २६ ॥

तम् अमृतवद्भोग्यं वस्तु मे प्रपितामहाः मत्पितृवंश्याः परे पूर्वे राजर्षयः प्रेत्य प्रारब्धशरीरवियोगं प्राप्य भवार्थाय संसारविनाशायेत्यर्थः, तमसे दीपो मशकार्थो धूम इत्यादिवन्निर्देशः प्राहुः प्रोचुः । यद्वा इदमिति लिङ्गव्यत्यय आर्षः इदम् इमं वनवासं वानप्रस्थोचितनियमसहितं वनवासम् अमृतं प्राहुः मोक्षसाधनं प्राहुः 'अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे च धन्वन्तरिसुवर्णयोः' इति वैजयन्ती । प्रेत्य भवार्थाय देवादिदेहान्तरपरिग्रहरूपप्रयोजनाय च प्राहुः। रघुवंश्याः राजर्षयः वानप्रस्थोचितं वनवासं स्वर्गसाधनम् अपवर्गसाधनं च प्राहुरित्युक्तं भवति ॥ १९ ॥

२०] ति० टी०–अभित इति पदम् ॥ २० ॥

रा० टी०–शिला इति । अभितः चतुर्दिक्षु विशालाः विस्तीर्णाः बहुलाः अनेकविधाः नीलादिभिर्बहुलैर्वर्णैरुपलक्षिताः शैलस्य शतशः बहवः शिलाः शोभन्ते ॥ २० ॥

गो० टी०–शिला इति। विशालाः विपुलाः बहुलैः उल्बणैः नीलादिभिर्वर्णैरुपलक्षिताः बहुलाः बहुविधाः शैलस्य चित्रकूटस्य शिलाः शतशः अभितः शोभन्ते ॥ २० ॥

२१] ति० टी०–अचलेन्द्रसंबन्ध्योषध्यः स्वकान्तिसंपदा शोभमाना अग्निशिखा इव निशि भान्ति ॥ २१ ॥

रा० टी०–निशीति । स्वप्रभालक्ष्म्या स्वकान्तिसंपत्त्या भ्राजमानाः सहस्रशः ओषध्यः निशि हुताशनशिखा इव भान्ति२१

गो० टी०–निशीति । अचलेन्द्रस्य ओषध्यः महौषधयः स्वप्रभालक्ष्म्याः प्रभालक्ष्मस्वस्वरूपाः अत एव भ्राजमानाः भासमानाः निशि सहस्रशो भान्ति ॥ २१ ॥

२२] ति० टी०–क्षयनिभा गृहसदृशाः अतिनिबिडबहुपलाशवृक्षकत्वात् उद्यानसंनिभाश्चम्पकमालत्यादिबाहुल्यात् एकशिला अनेकजनावस्थानक्षमैकशिलायुक्ताः ॥ २२ ॥

रा० टी०–केचिदिति । अस्य पर्वतस्य केचिदेशाः प्रदेशाः क्षयनिभाः भवनसदृशाः केचिदुद्यानसंनिभाः कृत्रिमपुष्पवाटिकासदृशाः केचिदेकशिलाः केवलप्रस्तरवन्तश्च भान्ति ॥ २२ ॥

गो० टी०–केचिदिति । अस्य पर्वतस्य देशाः केचित्क्षयनिभाः गृहसदृशाः 'धिष्ण्यं धाम निकेतनं च सदनं वस्त्यं च वास्तु क्षयः' इतिहलायुधः बहुगुहावत्त्वादिति भावः । उद्यानसंनिभाः बहुलतावृक्षवत्त्वात् एकशिलाः शिलाभेदरहिताः॥२२॥२३॥

२३ ति० टी०–कूटोऽग्रभागः ॥ २३ ॥

रा० टी०–भित्त्वेति । वसुधां पृथ्वीं भित्त्वा इव समुत्थितः चित्रकूटो भाति अयं कूटःशृङ्गं च सर्वतः शुभो दृश्यते॥२३॥

२४ ति० टि०–कुष्ठमुत्पलमिति तीर्थः । स्थगरः पुत्रजीवकः, भूर्जो भूर्जपत्रवृक्षः, एतेषां पत्राण्युत्तरच्छदा येषां तान्कामिनां स्वास्तरानास्तरणानि कुशेशयं पद्मं तद्दलैरासमन्तायुतान्पश्य ॥ २४ ॥

रा० टी०–कुष्ठेति । कुष्ठस्थगरपुन्नागभूर्जपत्राणि उत्तरच्छदाः उत्तरास्तरणानि येषां तान्कुशेशयदलायुतान् कमलच्छदविशिष्टान् कामिनां स्वास्तरान् शोभनास्तरणानि पश्य । तत्र कुष्ठमुत्पलमिति तीर्थः स्थगरः पुत्रजीविकः । किंच कुशेशयदलायुतान् कुष्ठादीनामुत्तरच्छदान् श्रेष्ठपत्राणि कामिनां स्वास्तरान्पश्य ॥ २४ ॥

गो० टी०–कुष्ठेति। कुष्ठं पारिभाव्यम् 'व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम्' इत्यमरः । पुन्नागपुष्पाणि स्थगराणि पुत्रकसंज्ञिकवृक्षविशेषपुष्पाणि भूर्जपत्राणि भूर्जवृक्षत्वचः एतानि उत्तरच्छदाः उपर्यास्तरणानि येषां तान् कुशेशयदलायुतान् पद्मदलव्याप्तान् स्वास्तरान् शयनानीत्यर्थः ॥ २४ ॥

२५] ति० टि०–फलानि भुक्तानीति शेषः ॥ २५ ॥

रा० टी०–मृदिता इति । कमलस्रजः कामिभिर्मृदिताः प्रमर्दिताः अपविद्धाः त्यक्ताश्च दृश्यन्ते विविधानि फलानि पश्य ॥ २५ ॥

गो० टी०–मृदिता इति । मृदिताः कृतमर्दनाः घ्राणादिभोगेन म्लाना इत्यर्थः, अपविद्धास्त्यक्ताः । फलानीत्यत्रापि मृदितान्यपविद्धानीति योज्यम् ॥ २५ ॥

२६] ति० टि०–वस्त्रौकसारा कुबेरनगरी, नलिनी शक्रनगरी 'वस्त्रौकसारा श्रीदस्य शक्रस्य नलिनी पुरी' इति हरिः । अतीत्य शोभते इति शेषेणान्वयः ॥ २६ ॥

रा० टी०–वस्त्रेति। वस्त्रौकसारां कुबेरनगरीं नलिनीमिन्द्रनगरीमुत्तरान् कुरूंश्च अतीत्य अतिक्रम्य असौ चित्रकूटः पर्वतः वर्तते नगरद्वयसङ्गात्प्यधिकं सुखमत्रेति तात्पर्यम् ॥२६॥

---

१ मत्येतीवेति गो. पाठः ।

इमं तु कालं वनिते विजह्विवांस्त्वया च सीते सह लक्ष्मणेन ।
रतिं प्रपत्स्ये कुलधर्मवर्धिनीं सतां पथि स्वैर्नियमैः परैः स्थितः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

पञ्चनवतितमः सर्गः ।

मैथिलीप्रियकामेन रामेण तत्तद्विशेषप्रदर्शनपूर्वककृतं मन्दाकिनीवर्णनम् ।

अथ शैलाद्विनिष्क्रम्य मैथिलीं कोशलेश्वरः । अदर्शयच्छुभजलां रम्यां मन्दाकिनीं नदीम् ॥ १ ॥
अब्रवीच्च वरारोहां चन्द्रचारुनिभाननाम् । विदेहराजस्य सुतां रामो राजीवलोचनः ॥ २ ॥
विचित्रपुलिनां रम्यां हंससारससेविताम् । कुसुमैरुपसंपन्नां पश्य मन्दाकिनीं नदीम् ॥ ३ ॥
नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः । राजन्तीं राजराजस्य नलिनीमिव सर्वतः ॥ ४ ॥
मृगयूथनिपीतानि कलुषाम्भांसि सांप्रतम् । तीर्थानि रमणीयानि रतिं संजनयन्ति मे ॥ ५ ॥
जटाजिनधराः काले वल्कलोत्तरवाससः । ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥ ६ ॥

गो० टी०–वस्त्वौकसारामिति । वस्त्वौकसारा पूर्वदिगवस्थिता शक्रपुरी 'वस्त्वौकसारा शक्रस्य पूर्वस्यां दिशि संस्थिता' इति विष्णुपुराणवचनात्, यद्वा वस्त्वौकसारा कुबेरपुरी 'पुरी वस्त्वौकसारा स्याद्विमानं पुष्पकोऽस्त्रियाम्' इति यादवः। नलिनीं मानससरसीं सौगन्धिकाख्यसरसीं वा अत्येतीव रमणीयतया अतिक्रामतीव ॥ २६ ॥

२७] ति० टी०–हे वनिते सीते ! परैः श्रेष्ठैः स्वैः स्वीयैर्नियमैः सह सतां पथि स्थितः सन् इमं कालं चतुर्दशवर्षमितं त्वया लक्ष्मणेन च सह विजह्विवान्प्राप्तविहारो यदि भाविष्यामि तदा कुलधर्मवर्धिनीं रतिं सौख्यं प्रपत्स्ये प्राप्स्यामि ॥ २७ ॥

अष्टाविंशतिश्लोका अत्रेति कतकः ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

रा० टी०–इममिति । हे वनिते ! परैः उत्कृष्टैः स्वैर्नियमैरुपलक्षितः अत एव सतां पथि स्थितोऽहमिमं चतुर्दशवर्षप्रमितं कालं यदि विजह्विवान् विहारवान् तदा कुलधर्मवर्धिनीं रतिं प्रपत्स्ये ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

गो० टी०–इममिति । हे वनिते सीते ! परैः श्रेष्ठैः नियमैः सतां राजर्षीणां पथि स्थितः सन् इमं कालं चतुर्दशसमासंमितं कालं त्वया लक्ष्मणेन च सह इह चित्रकूटे विजह्विवान् विहृतवान् विपूर्वाद्धरतेर्लिटः क्वसुरादेशः पश्चात्कुलधर्मवर्धनीं कुलधर्मः प्रजापालनं तद्वर्धनीं रतिं राज्यसुखं प्रपत्स्ये ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

१] ति० टी०–अथ नदीप्रदर्शनेनोपलालयति–अथेति॥१॥

रा० टी०–शैलविनिष्क्रमणानन्तरकालिकरामोक्तिं वर्णयितुमाह–अथेति । अथ शैलशोभाप्रदर्शनानन्तरं कोशलेश्वरो रामः शैलाद्विनिष्क्रम्य निर्गत्य मन्दाकिनीमदर्शयत् ॥ १ ॥

गो० टी०–एवं वनगिरिप्रदर्शनेनोपलाल्य नदीप्रदर्शनेनापि लालयति–अथेत्यादिना ॥ १ ॥

२] ति० टी०–वरारोहामुत्तमस्त्रीम् ॥ २ ॥

रा० टी०–अब्रवीदिति । वरोऽद्भुतः आरोहः प्रादुर्भावो यस्यास्तां विदेहराजस्य सुतां रामोऽब्रवीत् ॥ २ ॥

गो० टी०–अब्रवीदिति । वचने हेतुः तत्सौन्दर्यमित्याशयेनोक्तम्–वरारोहामित्यादि । वरारोहाम् आरुरुक्षत इति आरोहो जघनं गुरुजघनामित्यर्थः चारुचन्द्रनिभाननामित्यनेन रतिरमणनिदर्शितवनगिरिविलोकनकुतूहलविकसितवदनत्वमुक्तम् । राजीवलोचनः विस्मयोत्फुल्लनयन इत्यर्थः ॥ २ ॥

३] ति० टी०–कुसुमैः पद्मादिभिः ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–विचित्रेति । विचित्राणि पुलिनानि यस्यां तां हंसादिसेवितां कुसुमैः पुष्पैः उपसंपन्नां युक्तां तीररुहैः तीरजनितैः पुष्पफलद्रुमैः सर्वतो वृतां राजराजस्य कुबेरस्य नलिनीं सौगन्धिकसरसीमिव दशरथस्य सरयूमिव वा राजन्तीं मन्दाकिनीं नदीं पश्य । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–विचित्रेति । पुलिनस्य विचित्रत्वं नवोत्पालंकृतत्वात् । सारसाः हंसविशेषाः अत्र वस्तुना पृथुजघनकलत्वपुरस्सुन्दरकरपदवदनवती भवतीव भातीत्यलंकारध्वनिः ॥ ३ ॥

४] ति० टी०–पुष्पफलपुष्टैर्द्रुमैस्तीरभवै राजन्तीं शोभमानाम् । राजराजः कुबेरस्तस्य नलिनी सौगन्धिकाख्या ॥ ४ ॥

गो० टी०–नानाविधैरिति । राजराजस्य कुबेरस्य नलिनीं सौगन्धिकसरसीम् ॥ ४ ॥

५–६]ति०टी०–तीर्थान्यवतारमार्गाः। रतिं प्रीतिम्॥५॥६॥

१ वर्धनीमिति गो. पाठः ।

आदित्यमुपतिष्ठन्ते नियमाद्ऊर्ध्वबाहवः । एते परे विशालाक्षि मुनयः संशितव्रताः ॥ ७ ॥
मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः । पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीम् ॥ ८ ॥
क्वचिन्मणिनिकाशोदां क्वचित्पुलिनशालिनीम् । क्वचित्सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥ ९ ॥
निर्धूतान्वायुना पश्य विततान्पुष्पसंचयान् । पोप्लूयमानानपरान्पश्य त्वं तनुमध्यमे ॥ १० ॥
पश्यैतद्वल्गुवचसो रथाङ्गाह्वयना द्विजाः । अधिरोहन्ति कल्याणि निष्कूजन्तः शुभा गिरः ॥ ११ ॥
दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने । अधिकं पुरवासाच्च मन्ये तव च दर्शनात् ॥ १२ ॥
विधूतकल्मषैः सिद्धैस्तपोदमशमान्वितैः । नित्यविक्षोभितजलां विगाहस्व मया सह ॥ १३ ॥

रा० टी०–मृगेति । मृगयूथैर्निपीतानि अत एव कलुषाणि अम्भांसि येषु तानि अत एव रमणीयानि तीर्थानि अवताराध्वानः मे रतिं संजनयन्ति ॥ ६ ॥

गो० टी०–मृगयूथेति । मृगयूथनिपीतानि अत एव कलुषाणि रमणीयानि कुङ्कुमरसाभानि अम्भांसि येषु तानि तीर्थानि अवतारः रतिम् अवगाहनविषयां प्रीतिम् ॥ ६ ॥

रा० टी०–जटेति । जटाजिनधराः जटाश्च अजिनानि मृगत्वचश्च तेषां धराः धारकाः वल्कलान्येवोत्तरवासांसि येषां ते ऋषयः काले मन्दाकिनीमवगाहन्ते ॥ ६ ॥

गो० टी०–जटेति । काले स्वनियमोचितकाले अवगाहन्ते मज्जन्ति । प्रिये इत्यन्यत्र दृष्टिर्निवार्यते ॥ ६ ॥

७] ति० टी०–उपतिष्ठते मन्त्ररुपस्थानं कुर्वते । एते परे मुनयः प्रकाशन्ते जपपरा इति शेषः ॥ ७ ॥

रा० टी०–आदित्यमिति । हे विशालाक्षि ! नियमात् शास्त्रोक्तनियोगाद्धेतोः ऊर्ध्वबाहवः परे पूर्वोक्तात् भिन्ना संशितव्रताः मुनयः आदित्यमुपतिष्ठन्ते ॥ ७ ॥

गो० टी०–आदित्यमिति । उपतिष्ठन्ते "उपान्मन्त्रकरणे" इत्यात्मनेपदम् । नियमाद्धेतोः परे पूर्वोक्तमुनिभ्योऽन्ये संशितव्रताः तीक्ष्णनियमाः ॥ ७ ॥

८] ति० टी०–प्रनृत्त इव नृत्तं कर्तुमुपक्रान्त इव अत एव पुष्पाञ्जलिकरणं पादपैः ॥ ८ ॥

रा० टी०–मारुतेति । मारुतेन वायुना उद्धूतानि शिखराणि शिखाः येषां तैः अत एव नदीमभितः सर्वतः पुष्पपत्राणि सृजद्भिः विसृजद्भिः पादपैर्वृक्षैः उपलक्षितः पर्वतः प्रवृत्तः नृत्यप्रारम्भं वा आस्तेति(?)शेषः ॥ ८ ॥

गो० टी०–मारुतोद्धूतशिखरैरिति । मारुतोद्धूतशिखरैः वायुकम्पितशाखैः पुष्पाणि सृजद्भिः मुञ्चद्भिः पादपैः प्रनृत्त इव नृत्यं कर्तुमुद्युक्त इव आदिकर्मणि क्तः लोके हि नृत्तोद्युक्तः पुष्पाणि परिविकीर्य हस्तौ चालयति तद्वदित्युत्प्रेक्षा ॥ ८ ॥

९] ति० टी०–मणिनिकाशं मुक्तानिकाशमुदकं यस्यास्ताम् ॥ ९ ॥

रा० टी०–क्वचिदिति । क्वचित् कस्मिंश्चित्प्रदेशे मणिनिकाशोदां मुक्तासदृशजलां क्वचित् पुलिनशालिनीं पुलिनाश्रयाम् अगाधजलवत्तया नीलजलात्वेन प्रतीयमानामित्यर्थः, क्वचित् सिद्धजनैः आकीर्णां व्याप्तां मन्दाकिनीं पश्य ॥ ९ ॥

गो० टी०–क्वचिदिति । मणिनिकाशोदां मुक्तामणिनिभजलाम् उदकस्योदभाव आर्षः क्वचित्तीरे सिद्धजनेनावगाहनोद्युक्तेनावकीर्णाम् एतेन श्वेतवसना पृथुजघना काम्बुकाठता नारी द्योत्यते ॥ ९ ॥

१०] ति० टी०–अम्भसि पोप्लूयमानान्पुनः पुनः प्लवमानान्पुष्पसंचयान्पश्य । 'पश्येहाचलमध्यमे' इति पाठः कृशत्वाचलनाशक्तमध्यवतीत्यर्थ इति कतकः ॥ १० ॥

रा० टी०–निर्धूतानिति । वायुना निर्धूतानत एव विततान् नद्युभयकूले व्याप्तान् पुष्पसंचयान् त्वं पश्य अपरान् त्वं पश्य भिन्नान् पोप्लूयमानान् पुनः पुनर्जले प्लवमानान् त्वं पश्य१०

गो० टी०–निर्धूतानिति । वायुना निर्धूतान् विततान् तीरे व्याप्तान् पुष्पसंचयान्पश्य, जलमध्यगान् पोप्लूयमानान् भृशं पुनः पुनर्वा प्लवमानान् अपरान् पुष्पसंचयांश्च त्वं पश्य । प्रियदृतार्धगलितवसना नारीव लक्ष्यत इति व्यङ्ग्यम् ॥ १० ॥

११] ति० टी०–रथाङ्गाह्वयनाश्चक्रवाकाः रथाङ्गं तद्वाचकः शब्दो आह्वयने नामनि येषामिति विग्रहः । अधिरोहन्ति पुलिनानीति शेषः ॥ ११ ॥

रा० टी०–पश्येति । वल्गुवचसः मनोहरवाचः अत एव शुभाः गिरः निष्कूजन्तः रथाङ्गाह्वयनाः रथाङ्गम् आह्वयनं संज्ञा येषां ते चक्रवाका द्विजाः पक्षिणः अधिरोहन्ति पुलिनमिति शेषः, त्वं पश्य ॥ ११ ॥

गो० टी०–तानिति । वल्गुवचसः रत्यर्थाह्वानकालिकरम्यवचसः शुभाः गिरः विकूजन्तः रतिकालिकस्वरान् कुर्वन्तः रथाङ्गाह्वयनाश्चक्राह्वयाः द्विजाश्चक्रवाकाः तान् पुष्पसंचयान् अधिरोहन्ति शयनमारोहन्तीत्यर्थः । अनेन चक्रवाकरतिर्दर्शिता ॥ ११ ॥

१२–१३] ति० टी०–तव दर्शनाच्चाधिकमधिकमुत्सवावहम् ॥ १२ ॥ १३ ॥

१ जलमध्यगानिति गो. पाठः । २ तांश्चातिवल्गुवचस इति गो. पाठः । ३ विकूजन्त इति गो. पाठः । ४ कलुषैरिति गो. पाठः ।

सखीवच्च विगाहस्व सीते मन्दाकिनीं नदीम् । कमलान्यवमज्जन्ती पुष्कराणि च भामिनि ॥ १४ ॥
त्वं पौरजनवद्व्यालानयोध्यामिव पर्वतम् । मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् ॥ १५ ॥
लक्ष्मणश्चैव धर्मात्मा मन्निदेशे व्यवस्थितः । त्वं चानुकूला वैदेहि प्रीतिं जनयती मम ॥ १६ ॥
उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः । नायोध्यायै न राज्याय स्पृहये चैत्वया सह ॥ १७ ॥
इमां हि रम्यां गजयूथलोडितां निपीततोयां गजसिंहवानरैः ।
सुपुष्पितां पुष्पभरैरलंकृतां न सोऽस्ति यः स्यान्न गतक्लमः सुखी ॥ १८ ॥

रा० टी०–दर्शनमिति । हे शोभने ! चित्रकूटस्य मन्दाकिन्याश्च दर्शनं तव दर्शनात् एकान्ते निरन्तरं समावलोकाद्धेतोः पुरवासात् अयोध्यावाससुखात् अधिकं मन्ये ॥ १२ ॥

गो० टी०–दर्शनमिति । हे शोभने निर्मत्सरे ! चित्रकूटस्य दर्शनं पुरवासाधिकं चित्रकूटवासः पुरवासादप्यधिकसुखावहः एकान्तभोगस्थानत्वादिति भावः । मन्दाकिन्या दर्शनं तव दर्शनादप्यधिकसुखकरम् उद्दीपनत्वादिति भावः ॥ १२ ॥

रा० टी०–विधूतेति । तपोदमसमन्वितैः तपआदियुक्तैः अत एव विधूतकल्मषैः सिद्धैः नित्यविक्षोभितजलां नित्यं विक्षोभितमवगाहितं जलं यस्यास्तां मन्दाकिनीं मया सह विगाहस्व ॥ १३ ॥

गो० टी०–विधूतकल्मषैरिति । तपोदमशमान्वितैः अत एव विधूतकल्मषैः निष्पापैः सिद्धैः सिद्धसाधननिष्ठैः नित्यविक्षोभितजलां सदा तत्स्नानेन तत्पादरेणुधन्यां मन्दाकिनीं मया सह विगाहस्व मामप्रधानीकृत्य जलक्रीडारसमनुभवेत्यर्थः नित्यविक्षोभितजलामित्यनेन जलक्रीडोपकरणकुसुम्भादिसामग्री दर्शिता ॥ १३ ॥

१४–१६] ति० टी०–सखीवत् मन्दाकिन्या इति शेषः । कमलपुष्करैः रक्तसितपद्मैः तान्यवमज्जन्ती प्रक्षिपन्ती ॥ १४–१६ ॥

रा० टी०–सखीवदिति । हे सीते ! कमलानि रक्तपद्मानि पुष्कराणि सितपद्मानि च अवमज्जन्ती जले निमज्जयन्ती सती सखीवत् विद्यमानां मन्दाकिनीं नदीं त्वं विगाहस्व । निमज्जयन्तीत्यनेन तत्रत्यजलस्य कमलाद्याधस्त्वं ध्वनितम् ॥ १४ ॥

गो० टी०–सखीवदिति । सरय्वा यथा सलिलमवगाहसे तथा मया सह विगाहस्व कमलानि रक्ताब्जानि पुष्कराणि सिताम्भोजानि अवमज्जन्ती अवमज्जयन्ती स्तनजघनाघातजनिततरङ्गैरिति भावः । यद्वा तव वदनकान्तिनिर्जिततया लज्जया अवमज्जयन्ती वेत्युत्प्रेक्षा ॥ १४ ॥

रा० टी०–त्वमिति । व्यालान् वनचरान् पौरजनवत् मन्यस्व अयोध्यामिव पर्वतं मन्यस्व सरयूमिव मन्दाकिनीं मन्यस्व ॥ १५ ॥

गो० टी०–त्वमिति । त्वं व्यालान् वनचरजन्तून् पौरजनवत्पश्य पौरजनप्रीतिं व्यालेषु कुर्वित्यर्थः, एवमुत्तरत्रापि अतः पौरजनायनवलोकनक्लेशो न कार्य इति भावः ॥ १५ ॥

रा० टी०–लक्ष्मण इति । मन्निदेशे आज्ञायां व्यवस्थितः संस्थितः लक्ष्मणः अनुकूला त्वं च मम प्रीतिं जनयथः ॥ १६ ॥

गो० टी०–लक्ष्मण इति । सौधात्रम् अनुकूलभार्यत्वं च सौख्यरसायनमिति भावः ॥ १६ ॥

१७] ति० टी०–उपस्पृशन् स्नानं कुर्वन् ॥ १७ ॥

रा० टी०–उपस्पृशन्निति । त्वया सह त्रिषवणं त्रिकालमुपस्पृशन् स्नानं कुर्वन्सन् मधुमूलफलाशनोऽहमयोध्यायै राज्याय च न स्पृहये ॥ १७ ॥

गो० टी०–उपस्पृशन्निति । हे वैदेहि ! त्वया सह त्रिषवणं त्रिसंध्यम् उपस्पृशन् स्नानं कुर्वन् मधुमूलफलाशनोऽहमयोध्यायै न स्पृहये राज्याय च न स्पृहये "स्पृहेरीप्सितः" इति संप्रदानसंज्ञा ॥ १७ ॥

१८] ति० टी०–सुपुष्पितां सुपुष्पितवनान्तामवगाह्य यः सुखी न स्यात्स नास्तीत्यन्वयः ॥ १८ ॥

रा० टी०–इमामिति । गजयूथलोडितां गजयूथैः लोडितां गजादिभिः पीततोयां सुपुष्पितां शोभनपुष्पविशिष्टतरुमतीम् अत एव पुष्पभरैः अलंकृतामिमां रम्यां मन्दाकिनीमवगाह्य गतक्लमः निवृत्तग्लानिः अत एव सुखी परमानन्दविशिष्टः यो न स्यात् स जनो नास्ति ॥ १८ ॥

गो० टी०–इमामिति । इमां मन्दाकिनीं मृगयूथशालिनीं 'मृगयूथलोलिताम्' इति च पाठः गजसिंहवानरैः आश्रममहिम्ना शान्तवैरैरित्यर्थः । निपीततोयामिति पापहरत्वमुक्तं, पुष्पभरैः दृष्टैः अनेनोद्दीपनत्वमुक्तम्, उपस्पृशन्नित्यनुषज्यते यः अगतक्लमः सुखी न स्यात्स नास्ति सर्वोऽप्यत्र ज्ञात्वा गतक्लमो भवतीत्यर्थः ॥ १८ ॥

१ अपीति गो. पाठः । २ जनयथ इति गो. रा. पाठः । ३ ऽद्येति गो. पाठः । ४ मृगयूथशालिनीमिति गो. पाठः । ५ पुष्पितैरिति गो. पाठः । ६ रैरिति गो. पाठः । ७ स्यादगतक्लम इति गो. पाठः ।

इतीव रामो बहुसंगतं वचः प्रियासहायः सरितं प्रति ब्रुवन् ।
चचार रम्यं नयनाञ्जनप्रभं स चित्रकूटं रघुवंशवर्धनः ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

---

१ इतः परं प्रक्षिप्तोऽयं सर्गो दृश्यते ।

वैदेह्या समं विहरमाणो रामः कदाचन चित्रकूटाधित्यकास्थकन्दरं प्रविश्य स्वाङ्कशायिन्याः सीतायाः फालपट्टके मनःशिलापङ्कतिलकं विधाय केसरादिकुसुमैर्धम्मिल्लमलंकृत्य स्वाश्रमं ययौ । रामचोदिता सीता लक्ष्मणानीतमृगमांसैर्भूतेभ्यो बलिं विधायावशिष्टं ताभ्यां पर्यवेषयदथावशिष्टं काकेभ्यो रक्षन्त्यास्तस्याः कश्चित्काकस्तनान्तरं प्राप्य पीडां जनयामास । तद्विलोक्य क्रुद्धो रामस्तस्मिन्नेषीकास्त्रं मुमोच । अथ कुत्राप्यलब्धशरणत्वात्पादमूलमेवागतस्य तस्यैकाक्षि संछिद्य तं ररक्ष ।

रामस्तु नलिनीं रम्यां चित्रकूटं च पर्वतम् । उत्तरे तु गिरेः पादे चित्रकूटस्य राघवः ॥ १ ॥
ददर्श कन्दरं रम्यं शिलाधातुसमन्वितम् । सुखप्रसेकैस्तरुभिः पुष्पभारावलम्बिभिः ॥ २ ॥
संवृतं च रहस्यं च मत्तद्विजगणायुतम् । तद्दृष्ट्वा सर्वभूतानां मनोदृष्टिहरं वनम् ॥ ३ ॥
उवाच सीतां काकुत्स्थो वनदर्शनविस्मितः । वैदेहि रमते चक्षुस्तवास्मिन्गिरिकन्दरे ॥ ४ ॥
परिश्रमविघातार्थं साधु तावदिहास्यताम् । त्वदर्थमिह विन्यस्ता त्वियं श्लक्ष्णसमा शिला ॥ ५ ॥
यस्याः पार्श्वे तरुः पुष्पैः प्रविष्ट इव केसरैः । राघवेणैवमुक्ता सा सीता प्रकृतिदक्षिणा ॥ ६ ॥
उवाच प्रणयस्निग्धमिदं श्लक्ष्णतरं वचः । अवश्यकार्यं वचनं तव मे रघुनन्दन ॥ ७ ॥
बहुशो भ्रमितश्चाद्य तव चैवं मनोरथः । एवमुक्त्वा वरारोहा शिलां तामुपसर्प ह ॥ ८ ॥
सह भर्त्राऽनवद्याङ्गी रन्तुकामा मनस्विनी । तामेवं ब्रुवतीं सीतां रामो वचनमब्रवीत् ॥ ९ ॥
रम्यं पश्यसि भूतार्थं वनं पुष्पितपादपम् । पश्य देवि गिरौ रम्ये रम्यपुष्पाङ्कितानिमान् ॥ १० ॥
गजदन्तक्षतान्वृक्षान्पश्य निर्यासवर्षिणः । झिल्लिकाविरुतैर्दीर्घैं रुदन्तीव समन्ततः ॥ ११ ॥
पुत्रप्रियोऽसौ शकुनिः पुत्रपुत्रेति भाषते । मधुरां करुणां वाचं पुरेव जननी मम ॥ १२ ॥
विहगो भृङ्गराजोऽयं शालस्कन्धसमास्थितः । संगीतमिव कुर्वाणः कोकिलेनावकूजति ॥ १३ ॥
अयं वा बालकः शङ्के कोकिलानां विहङ्गमः । सुखबद्धमसंबद्धं तथा ह्येष प्रभाषते ॥ १४ ॥
एषा कुसुमिता नूनं पुष्पभारानता लता । दृश्यते मामिवात्यर्थं श्रमादेवि त्वमाश्रिता ॥ १५ ॥
एवमुक्ता प्रियस्याङ्के मैथिली प्रियभाषिणी । भूयस्तरां त्वनिन्द्याङ्गी समारोहत भामिनी ॥ १६ ॥
अङ्के तु परिवर्तन्ती सीता सुरसुतोपमा । हर्षयामास रामस्य मनो मनसिजार्पितम् ॥ १७ ॥
स निघृष्याङ्गुलिं रामो धौते मनःशिलोच्चये । चकार तिलकं तस्या ललाटे रुचिरं तदा ॥ १८ ॥
बालार्कसमवर्णेन तेजसा गिरिधातुना । चकासे विनिविष्टेन ससंध्येव निशा सिता ॥ १९ ॥
केसरस्य च पुष्पाणि करेणामृद्य राघवः । अलकं पूरयामास मैथिल्याः प्रीतमानसः ॥ २० ॥
अभिरम्य तदा तस्यां शिलायां रघुनन्दनः । अन्वीयमानो वैदेह्या देशमन्यं जगाम ह ॥ २१ ॥

१९] ति० टी०—सरितं प्रति सरितं वर्णयन् । नयनयोग्याञ्जनवन्नीलप्रभम् ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

रा० टी०—इतीति । प्रियासहायः प्रियैव सहायो यस्य स रामः इतीव एतादृशं बहु अनेकविधं संगतं समीचीनं सरितं प्रति सरित्संबन्धि वचः ब्रुवन्सन्नयनाञ्जनप्रभं नीलवर्णविशिष्टमित्यर्थः, चित्रकूटं चचार ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

गो० टी०—इतीति । प्रियासहायो रामः सरितं प्रति सरिद्विषये संगतं प्रसक्ताद्यप्रसक्तं बहु वचो ब्रुवन् सन् नयनाञ्जनप्रभं नयनयोग्याञ्जनकान्तिं तद्वन्नीलमित्यर्थः, चित्रकूटं चचार चित्रकूटप्रान्ते चचारेत्यर्थः, एतेन पुनः पुरवासनिस्पृहत्वद्योतनाय रामस्य वनवासनिर्भरत्वमुक्तम् ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने पञ्चनवतितमः सर्गः ॥ ९५ ॥

विचरन्ती तदा सीता ददर्श हरियूथपम् । वने बहुमृगाकीर्णे वित्रस्ता राममाश्लिषत् ॥ २२ ॥
रामस्तां परिरब्धाङ्गीं परिरभ्य महाभुजः । सान्त्वयामास वामोरूमवभर्त्स्यार्थ वानरम् ॥ २३ ॥
मनःशिलायास्तिलकः सीतायाः सोऽथ वक्षसि । समदृश्यत संक्रान्तो रामस्य विपुलौजसः ॥ २४ ॥
प्रजहास तदा सीता गते वानरपुंगवे । दृष्ट्वा भर्तरि संक्रान्तमपाङ्गं समनःशिलम् ॥ २५ ॥
नातिदूरे त्वशोकानां प्रदीप्तमिव काननम् । ददर्श पुष्पस्तबकैस्तर्जद्भिरिव वानरैः ॥ २६ ॥
वैदेही त्वब्रवीद्राममशोककुसुमार्थिनी । वयं तदभिगच्छामो वनमिक्ष्वाकुनन्दन ॥ २७ ॥
तस्याः प्रिये स्थितो रामो देव्या दिव्यार्थरूपया । सहितस्तदशोकानां विशोकः प्रययौ वनम् ॥ २८ ॥
तदशोकवनं रामः सभार्यो व्यचरत्तदा । गिरिपुत्र्या पिनाकीव सह हैमवतं वनम् ॥ २९ ॥
तावन्योन्यमशोकस्य पुष्पैः पल्लवधारिभिः । समलंचक्रतुरुभौ कामिनौ नीललोहितौ ॥ ३० ॥
आबद्धवनमालौ तौ कृतापीडावतंसकौ । भार्यापती तावचलं शोभयांचक्रतुर्भृशम् ॥ ३१ ॥
एवं स विविधान्देशान्दर्शयित्वा प्रियां प्रियः । आजगामाश्रमपदं सुसंश्लिष्टमलंकृतम् ॥ ३२ ॥
प्रत्युज्जगाम तं भ्राता लक्ष्मणो गुरुवत्सलः । दर्शयन्विविधं धर्मं सौमित्रिः सुकृतं तदा ॥ ३३ ॥
शुद्धबाणहतांस्तत्र मेध्यान्कृष्णमृगान्दश । राशीकृताञ्शुष्यमाणानन्यान्कांश्चन कांश्चन ॥ ३४ ॥
तद्दृष्ट्वा कर्म सौमित्रेर्भ्राता प्रीतोऽभवत्तदा । क्रियन्तां बलयश्चेति रामः सीतामथान्वशात् ॥ ३५ ॥
अग्रं प्रदाय भूतेभ्यः सीताथ वरवर्णिनी । तयोरुपददद्भ्रात्रोर्मधु मांसं च तद्गृशम् ॥ ३६ ॥
तयोस्तुष्टिमथोत्पाद्य वीरयोः कृतशौचयोः । विधिवज्ज्ञानकी पश्चाच्चक्रे सा प्राणधारणम् ॥ ३७ ॥
शिष्टं मांसं निकृष्टं यच्छोषणायावकल्पितम् । तद्रामवचनात्सीता काकेभ्यः पर्यरक्षत ॥ ३८ ॥
तां ददर्श तदा भर्ता काकेनायासितां दृढम् । यस्या हारान्तरचरः कमचारी विहंगमः ॥ ३९ ॥
काकेनारोप्यमानां तां सा मुमोह तदातुरम् । सा चुकोपानवद्याङ्गी भर्तृप्रणयदर्पिता ॥ ४० ॥
इतश्चेतश्च तां काको वारयन्तीं पुनः पुनः । पक्षतुण्डनखाग्रैश्च कोपयामास कोपनाम् ॥ ४१ ॥
तस्याः प्रस्फुरमाणौष्ठं भ्रुकुटीपुटसूचितम् । मुखमालोक्य काकुत्स्थस्तं काकं प्रत्यषेधयत् ॥ ४२ ॥
स धृष्टमानो विहगो रामवाक्यमचिन्तयन् । सीतामभिपपातैव ततश्चुक्रोध राघवः ॥ ४३ ॥
सोऽभिमन्त्र्य शरैषीकामैषीकास्त्रेण वीर्यवान् । काकं तमभिसंधाय ससर्ज पुरुषर्षभः ॥ ४४ ॥
स तेनाभिद्रुतः काकस्त्रींल्लोकान्पर्यगात्ततः । देवैर्दत्तवरः पक्षी हारान्तरचरो लघुः ॥ ४५ ॥
यत्र यत्रागमत्काकस्तत्र तत्र ददर्श ह । इषीकां भूतसंकाशां स रामं पुनरागमत् ॥ ४६ ॥
स मूर्ध्ना न्यपतत्काको राघवस्य महात्मनः । सीतायास्तत्र पश्यन्त्या मानुषीमैरयद्गिरम् ॥ ४७ ॥
प्रसादं कुरु मे राम प्राणैः सामन्यमस्तु मे । अस्त्रस्यास्य प्रभावेण शरणं न लभे क्वचित् ॥ ४८ ॥
तं काकमब्रवीद्रामः पादयोः शिरसा गतम् । सानुक्रोशतया धीमानिदं वचनमर्थवत् ॥ ४९ ॥
मया रोषपरीतेन सीताप्रियहितार्थिना । अस्त्रमेतत्समाधाय त्वद्बधायाभिमन्त्रितम् ॥ ५० ॥
यत्तु मे चरणौ मूर्ध्ना गतस्त्वं जीवितेप्सया । अत्रास्त्यवेक्षा त्वयि मे रक्ष्यो हि शरणागतः ॥ ५१ ॥
अमोघं क्रियतामस्त्रमेकमङ्गं परित्यज । किमङ्गं शातयतु ते शरैषीका ब्रवीहि मे ॥ ५२ ॥
एतावद्धि मया शक्यं तव कर्तुं प्रियं खग । एकाङ्गहीनं ह्यस्त्रेण जीवितं मरणाद्वरम् ॥ ५३ ॥
एवमुक्तस्तु रामेण संप्रधार्य स वायसः । अभ्यगच्छद्दयोरक्ष्णस्त्यागमेकस्य पण्डितः ॥ ५४ ॥
सोऽब्रवीद्राघवं काको नेत्रमेकं त्यजाम्यहम् । एकनेत्रोऽपि जीवेऽहं त्वत्प्रसादान्नराधिप ॥ ५५ ॥
रामानुज्ञातमस्त्रं तत्काकस्य नयनेऽपतत् । वैदेही विस्मिता तत्र काकस्य नयने हते ॥ ५६ ॥
निपत्य शिरसा काको जगामाशु यथेप्सितम् । लक्ष्मणानुचरो रामश्चकारानन्तरक्रियाः ॥ ५७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे प्रक्षिप्तः सर्गः ।

षण्णवतितमः सर्गः ।

चित्रकूटरम्यसानुनि वैदेह्या समं विहरमाणो रामोऽकस्मात्सूर्यालोकरोधि रजो दृष्ट्वा महान्तं कोलाहलं च श्रुत्वा कुत एतदिति जिज्ञासुना तेन प्रेषितो लक्ष्मण आकाशचुम्बि वृक्षाग्रमारुह्य कोविदारध्वजाङ्कितनायकं सेनासमूहमवलोक्यास्माञ्जिघांसुः प्राप्तोऽयं भरतो मया हन्यत इति संरम्भसंभ्रान्तो रामं बभाषे ।

तां तदा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम् । निषसाद गिरिप्रस्थे सीतां मांसेन छन्दयन् ॥ १ ॥
इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना । एवमास्ते स धर्मात्मा सीतया सह राघवः ॥ २ ॥
तथा तत्रासतस्तस्य भरतस्योपयायिनः । सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभस्पृशौ ॥ ३ ॥
एतस्मिन्नन्तरे त्रस्ताः शब्देन महता ततः । अर्दिता यूथपा मत्ताः स्वयूथाद्दुद्रुवुर्दिशः ॥ ४ ॥
स तं सैन्यसमुद्भूतं शब्दं शुश्राव राघवः । तांश्च विप्रद्रुतान्सर्वान्यूथपानन्ववैक्षत ॥ ५ ॥
तांश्च [2]विप्रद्रुतान्दृष्ट्वा तं च श्रुत्वा [3]महास्वनम् । उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम् ॥ ६ ॥
हन्त लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया । भीमस्तनितगम्भीरं तुमुलः श्रूयते स्वनः ॥ ७ ॥

१] ति० टी०–मांसेन छन्दयन्मांसविशेषप्रदर्शनेन लालयन्सान्त्वयन् गिरिनिम्नगां मन्दाकिनीम् ॥ १ ॥

रा० टी०–मन्दाकिनीदर्शनानन्तरकालिकं वृत्तान्तमाह–तामित्यादिभिः । गिरिनिम्नगां तां मन्दाकिनीं मैथिलीं दर्शयित्वा मांसेन तापसोपभोग्यफलादिना सीतां छन्दयन् तत्प्रीतिमुत्पादयन् सन् गिरिप्रस्थे पर्वतैकशिलायां निषसाद ॥ १ ॥

गो० टी०–एवं प्रासङ्गिकमुक्त्वा प्रकृतमनुसरति–तामित्यादिना । गिरिनिम्नगां गिरिनदीं मांसेन छन्दयन् वशीकुर्वन् 'वशाभिप्राययोश्छन्दः' इति वैजयन्ती ॥ १ ॥

२] ति० टी०–तेन लालनप्रकारमाह–इदमिति । एवमित्यस्य ब्रुवन्निति शेषः ॥ २ ॥

रा० टी०–छन्दनप्रकारं निरूपयन्नाह–इदमिति । इदं फलं मेध्यं शुद्धमत एव इदमग्निना निष्टप्तमेवमुक्त्वा सीतया सह धर्मात्मा राघवः आस्ते ॥ २ ॥

गो० टी०–वशीकरणप्रकारमाह–इदमित्यादिना । इदं मांसं मेध्यं शुद्धं निर्मलमिति यावत् स्वादु रसवत् निष्टप्तं प्रतप्तम् इदंशब्देन स्वभुक्तशेषमिति गम्यते एवमास्ते एवं ब्रुवन्नास्त इत्यर्थः ॥ २ ॥

३] ति० टी०–आसतो गिरिप्रदेश आसीनस्य उपयायिनो रामसमीप आगच्छतो भरतस्य सैन्यरेणुः सैन्यशब्दश्च प्रादुरास्तां प्रादुर्बभूवतुः ॥ ३ ॥

रा० टी०–तथेति । तत्र शैलप्रस्थे तथा तेन प्रकारेण आसतः तिष्ठतस्तस्य रामस्य समीपे उपयायिनः रामसमीपमागच्छतः भरतस्य नभस्पृशौ सैन्यरेणुः शब्दः सैन्यस्वनश्च प्रादुरास्ताम् ॥ ३ ॥

गो० टी०–तथेति । तथा उक्तरीत्या तत्र गिरिप्रस्थे तस्य आसतः तस्मिन्नासीने सति सैन्यरेणुः शब्दः सैन्यशब्दश्चोभौ नभस्स्पृशौ सन्तौ प्रादुरास्ताम् ॥ ३ ॥

४] ति० टी०–एतस्मिन्नन्तरे सेनाशब्दप्रवृत्तिसमये ॥४॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे सैन्यरेणुशब्दप्रादुर्भावसमये ततः महता सेनाशब्देन अर्दिताः मनोव्यथां प्राप्ताः सयूथाः यूथसहिताः मत्ताः यूथपाः दिशः दुद्रुवुः ॥ ४ ॥

गो० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे अस्मिन् शब्दश्रवणसमये ततस्तेन ॥ ४ ॥

५] ति० टी०–स राघवो रामः । सैन्यसमुद्भूतं तदुत्पादितम् ॥ ५ ॥

रा० टी०–स इति । सैन्यसमुद्भूतं तं शब्दं राघवो रामः शुश्राव विद्रुतांस्तान्यूथपानन्ववैक्षत अवालोकत च ॥ ५ ॥

गो० टी०–स इति । सैन्यसमुद्भूतं सैन्योत्पादितम् ॥५॥

६] ति० टी०–'स निस्वनम्' इति पाठे स इति पदम्॥६॥

रा० टी०–तानिति । विप्रद्रुतान् तान्यूथपान्दृष्ट्वा तं महास्वनं च श्रुत्वा रामः दीप्ततेजसं लक्ष्मणमुवाच ॥ ६ ॥

गो० टी०–तानिति । दीप्ततेजसमित्यनेन वक्ष्यमाणावेक्षणक्षमत्वमुच्यते ॥ ६ ॥

७] ति० टी०–भीमं भयंकरं यत्स्तनितं मेघशब्दस्तद्वद्गम्भीरं यथा भवति तथा योऽयं स्वनः श्रूयतेऽस्य कारणं पश्येति योजना ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह–हन्तेति । हे लक्ष्मण ! कौसल्या सुप्रजास्त्वमिह पश्य । नन्वहं किं पश्यामि इत्यत आह–भीमं भयंकरं स्तनितं मेघशब्दः तद्वद्गम्भीरं यथा स्यात्तथा तुमुलः स्वनः त्वया हन्त श्रूयते एतेन एतच्छब्दकारणं त्वया निश्चीयतामिति सूचितम् ॥ ७ ॥

गो० टी०–हन्तेति व्यायतायामव्ययं वाक्यारम्भे वा । 'वाक्यारम्भेऽनुकम्पायां हन्त हर्षविषादयोः' इति वैजयन्ती । पश्य वृक्षमारुह्य प्रेक्षस्व सुमित्रा सुप्रजास्त्वया त्वया सुमित्रा सत्सुत्रेति सान्त्वोक्तिः भीमस्तनितगम्भीरः भयंकरमेघनिर्घोषवद्गम्भी-

१ तथेति गो. पाठः । २ विद्रवत इति गो. पाठः । ३ च निःस्वनमिति गो. पाठः । ४ गम्भीर इति गो. पाठः ।

गजयूथानि वारण्ये महिषा वा महावने । वित्रासिता मृगाः सिंहैः सहसा प्रद्रुता दिशः ॥ ८ ॥
राजा वा राजपुत्रो वा मृगयामटते वने । अन्यद्वा श्वापदं किंचित्सौमित्रे ज्ञातुमर्हसि ॥ ९ ॥
सुदुश्चरो गिरिश्चायं पक्षिणामपि लक्ष्मण । सर्वमेतद्यथातत्त्वमेभिज्ञातुमिहार्हसि ॥ १० ॥
स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् । प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमवैक्षत ॥ ११ ॥
उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम् । गजाश्वरथसंबाधां यत्तैर्युक्तां पदातिभिः ॥ १२ ॥
तामश्वरथसंपूर्णां रथध्वजविभूषिताम् । शशंस सेनां रामाय वचनं चेदमब्रवीत् ॥ १३ ॥
अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् । सज्जं कुरुष्व चापं च शरांश्च कवचं तथा ॥ १४ ॥

रः 'महीस्तनितगम्भीरः' इतिपाठे भूकम्पजनितशब्दवद्गम्भीर इत्यर्थः ॥ ७ ॥

८] ति० टी०–यत्सहसा मृगाः प्रद्रुता दिशस्तस्य कारणम् । तथा सिंहैर्वित्रासितानि गजयूथानि वा, अथ तैर्वित्रासिता महिषा वा दिशः प्रद्रुतास्तत्कारणं च पश्य । वा शब्दौ चार्थे ॥ ८ ॥

रा० टी०–शब्दस्य भयंकरत्वे हेतुं वदन्नाह–गजेति । महावने सिंहैर्वित्रासिता इव गजयूथप्रभृतयः अरण्ये अस्मिन्वने दिशः प्रद्रुताः एको वा इवार्थे एतेन सकारणकमेवेदमिति सूचितम् ॥ ८ ॥

गो० टी०–गजयूथानीति । मृगा इत्यत्रापि वाशब्दः संबन्धनीयः ॥ ८ ॥

९–१०] ति०टी०–तत्कारणमुन्नयन्स्वयमाह–राजा वेति । राजादिर्मृगयामटते ज्ञातुमर्हसि । अन्यद्वा श्वापदं दुष्टजन्तुः वनं क्षोभयतीति शेषः ॥ ९ ॥ १० ॥

रा० टी०–कारणमेव बोधयन्नाह–राजेति । राजा मृगयामटते राजपुत्रो वा अटते अन्यत्किंचिच्छ्वापदं वा हे सौमित्रे ! एतत्सर्वं ज्ञातुं निश्चेतुं त्वमर्हसि ॥ ९ ॥

गो० टी०–राजेति । राजमात्रः राजतुल्यः कश्चिन्मृगयामुद्दिश्य अटते आत्मनेपदमार्षं श्वापदं व्याघ्रादिहिंस्रपशुः नपुंसकत्वमार्षम् 'व्याघ्रादयो वनचराः पशवः श्वापदा मताः' इति हलायुधः । अन्यो वा यः कश्चित् श्वापदः अटत इति संबन्धः ॥९॥

रा० टी०–कश्चिन्महान् प्रबलोऽयमागत इति सूचयन्नाह–सुदुश्चर इति । हे लक्ष्मण ! पक्षिणां देशान्तरवर्तिखगानामपि अयं गिरिः सुदुश्चरः किंच अयं गिरिः पक्षिणां सहायसुक्तानामपि सुदुश्चरः स्वतन्त्रतया चरितुमशक्यः अत एतत्सर्वं यथातत्त्वं याथार्थ्यमनतिक्रम्य विज्ञातुं निश्चेतुं त्वमर्हसि ॥ १० ॥

गो० टी०–सुदुश्चर इति । अयं गिरिः पक्षिणामपि सुदुश्चरो वर्तते पक्षिसंचारोऽपीदानीं नास्तीत्यर्थः, सर्वमेतत्पूर्वोक्तकारणेष्वन्यतमं ज्ञातुमर्हसीत्यर्थः ॥ १० ॥

११] ति० टी०–साल० इत्यः ॥ ११ ॥

रा० टी०–स इति । सः रामेणानुज्ञातः संत्वरितो लक्ष्मणः पुष्पितं शालं वृक्षविशेषमारुह्य दिशः प्रेक्षमाणः सन् पूर्वां दिशमवैक्षत ॥ ११ ॥

गो० टी०–स इति । पुष्पितमित्यनेन विरलपत्रतया नावारकत्वमुक्तं सर्वा दिशः प्रेक्षमाणः सामान्येन प्रेक्षमाणः सन् पूर्वां दिशमुदैक्षत सविशेषमलोकयत् ॥ ११ ॥

१२] ति० टी०–यत्तैः सज्जैः ॥ १२ ॥

रा० टी०–उदङ्मुख इति । प्रेक्षमाणः गजादिभिः संबाधां निबिडां यत्नैः अतिप्रयत्नैः पदातिभिः युक्तां महतीं चमूं ददर्श ॥ १२ ॥

गो० टी०–तत्र हेतुदर्शनमाह–उदङ्मुख इत्यादिना । यत्तैः सन्नद्धैः ॥ १२ ॥

१३] ति० टी०–सेनां शशंस सेनां श्रुतशब्दकारणमुक्तवान् ॥ १३ ॥

रा० टी०–तामिति । अश्वादिभिः संपूर्णां रथध्वजविभूषितां तां सेनां रामाय शशंस महती सेनेयमिति कथयामास इदं वचनं चाब्रवीत् ॥ १३ ॥

गो० टी०–तामिति । रथध्वजविभूषितां रथवद्ध्वजैरलंकृताम् ॥ १३ ॥

१४] ति० टी०–अग्निं संशमयतु परसेनादर्शनजक्षोभकालिकोऽयं व्यापारः सर्वजनसिद्धः । गुहामन्तर्गृहं, शरांश्च गृहाणेति शेषः ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–अग्निमिति । अग्निमभ्याकारसेनाक्षोभमार्यो भवान् संशमयतु । संशमनप्रकारमाह–सीता गुहां भजतां प्राप्नोतु चापं सज्यं ज्यासहितं कुरुष्व शरान् कवचं च गृहाणेति शेषः ॥ १४ ॥

गो० टी०–अग्निमिति । अग्निं संशमयतु अन्यथा धूमानुसारेणागच्छेत्सेनेति भावः । सज्यं ज्यया मौर्व्या सहितं कुरुष्व शरांश्च कवचं तथा शरांश्च कवचं च गृहाणेति शेषः, यद्वा कुरुष्वेत्यनुषङ्गः करोतेः क्रियासामान्यवाचित्वात् औचित्येन शरान् गृहाण कवचं धारयेत्यर्थः ॥ १४ ॥

---

१ मात्र इति गो. पाठः । २ अचिराज्ज्ञातुमर्हसीति गो. पाठः । ३ उदैक्षतेति गो. पाठः । ४ रथाश्वगजेति गो. पाठः । ५ गजेति गो. पाठः । ६ सज्यमिति गो. रा. पाठः ।

तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह । अङ्गावेक्षस्व सौमित्रे कस्येमां मन्यसे चमूम् ॥ १५ ॥
एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् । दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥ १६ ॥
संपन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम् । आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः ॥ १७ ॥
एष वै सुमहाञ्छ्रीमान्विटपी संप्रकाशते । विराजत्युज्ज्वलस्कन्धः कोविदारध्वजो रथे ॥ १८ ॥
भजन्त्येते यथाकाममश्वानारुह्य शीघ्रगान् । एते भ्राजन्ति संहृष्टा गजानारुह्य सादिनः ॥ १९ ॥
गृहीतधनुषावावां गिरिं वीर श्रयावहे । अथवेहैव तिष्ठावः संनद्धावुद्यतायुधौ ॥ २० ॥
अपि नौ वशमागच्छेत्कोविदारध्वजो रणे । अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ॥ २१ ॥

१५] ति० टी०–तं युद्धसंनाहवादिनं रामो विमृश्यकारित्वादाह–अङ्गेति । यामिमां चमूं भयहेतुं मन्यसे सा कस्येत्यवेक्षस्वेत्यर्थः ॥ १५ ॥

रा० टी०–तमिति । पुरुषव्याघ्रो रामः लक्ष्मणं प्रत्युवाच । तद्वचनाकारमाह–हे अङ्ग हे सौमित्रे ! इमां चमूं कस्य मन्यसे न कस्यापि मन्ये इति चेदवेक्षस्व अवधारय ॥ १५ ॥

गो टी०–तमिति । तमेवं समीक्ष्य वदन्तं पुरुषव्याघ्रः समीक्ष्यकारीति भावः । अङ्गेति संबोधने । अवेक्षस्व ध्वजचिह्नेन सम्यगवलोकय इमां त्वया दृष्टां चमूं कस्येति मन्यसे वदेति शेषः ॥ १५ ॥

१६] ति० टी०–रुषितः क्रुद्धः ॥ १६ ॥

रा० टी०–एवमिति । रामेण एवमुक्तो लक्ष्मणस्तां सेनां सेनाहेतुकभीतिं रुषितो दाहक इत्यर्थः, पावक इव दिधक्षन्सन् यथा यथावत् अब्रवीत् सेनाशब्दः अर्शआद्यजन्तः ॥ १६ ॥

गो० टी०–एवमिति । रुषितः कुपितः कर्तरि क्तः पावको यथा वह्नितुल्यः ॥ १६ ॥

१७] ति० टी०–अभिषेचनं राज्यं प्राप्य । संपन्नमकण्टकम् ॥ १७ ॥

रा० टी०–तद्वचनाकारमाह–संपन्नमिति । प्राप्य त्वामयोध्यां प्रापय्य राज्यं संपन्नं संपत्तिविशिष्टमिच्छन् अभिषेचनं भवतोऽभिषेकं च इच्छन्नावामासमन्तादिन्द्रियशोषकं भवद्वियोगजनितशोकमित्यर्थः, हन्तुं दूरीकर्तुं कैकेय्याः सुतो भरतः समभ्येति आगच्छति । आवामित्यत्र शोषणार्थक 'ओवै' धातो रूपम् ॥ १७ ॥

गो० टी०–संपन्नमिति । कैकेय्याः सुतः तत्सुतत्वेन क्रूरप्रकृतिः भरतः अभिषेचनं प्राप्य कैकेयीवराद्यरोधेनाभिषिक्तः तावताप्यतृप्तः संपन्नं समृद्धं निष्कण्टकमिति यावत् राज्यमिच्छन् सन् तदंशभागिनौ आवां हन्तुं समभ्येति ॥ १७ ॥

१८] ति० टी०–तच्चिह्नमाह–एष इति । य एष वृक्षो महान्संप्रकाशते तत्समीपे तं लक्ष्मीकृत्य रथे कोविदारध्वजो विराजते ॥ १८ ॥

रा० टी०–तत्र ज्ञापकमाह–एष इति । एषः महान् अत्युन्नतः श्रीमान् पुष्पफलादिसंपन्नः विटपी वृक्षः संप्रकाशते तत्र विद्यमाने रथे उज्ज्वलस्कन्धकोविदारध्वजः विराजति । वैशब्दस्तत्रार्थे । एतेन भरतसेनैवेवेति सूचितम् ॥ १८ ॥

गो० टी०–भरतागमने किं चिह्नमित्यत्राह–एष इति । विटपी ध्वजचिह्नीभूतो वृक्षः प्रकाशते स्पष्टं दृश्यते । तमेव विशिनष्टि–विराजतीति । उद्गतस्कन्धः उन्नतस्कन्धः उन्नतस्कन्धत्वं लिखितवृक्षद्वारा, कोविदारध्वजः कोविदारवृक्षयुक्तो ध्वजः॥१८॥

१९] ति० टी०–भजन्त्येतदेशमागच्छन्ति । सादिनो गृहीतसादिचिह्ना गजारोहाः ॥ १९ ॥

रा० टी०–भजन्तीति । सादिनः अश्वारोहाः एते शीघ्रगानश्वान् यथाकाममारुह्य भजन्ति अस्मिन् स्थाने तिष्ठन्तीत्यर्थः, एते सादिनो गजारोहा गजान् आरुह्य संहृष्टाः सन्तो भजन्ति तेऽपि तत्रैव तिष्ठन्तीत्यर्थः ॥ १९ ॥

गो० टी०–भजन्तीति । एते अश्वारोहाः अश्वानारुह्य भजन्ति इमं देशं प्राप्नुवन्तीत्यर्थः, सादिनः गजारोहाः ॥ १९ ॥

२०] ति० टी०–अतः–गृहीतधनुषाविति ॥ २० ॥

रा० टी०–इदानीं भरतान्यसत्वे स्वकर्तव्यं प्रार्थयन्नाह–गृहीतेति । हे वीर ! गृहीतधनुषावावां गिरिं श्रयावहे अथवा सन्नद्धौ धृतकवचौ उद्यतायुधौ आवामिहैव तिष्ठावः यथेच्छमाज्ञापयेत्यर्थः ॥ २० ॥

गो० टी०–गृहीतधनुषाविति । दुर्गे स्थित्वा युद्धार्थं गिरेः श्रयणम् ॥ २० ॥

२१] ति० टी०–अपि नौ वशमागच्छेदिति कामप्रवेदने लिङ् । महद्व्यसनं त्वया प्राप्तमित्युत्तरेणान्वयः ॥ २१ ॥

रा० टी०–नन्वायुधधारणादेः किं प्रयोजनमित्यत आह–अपीति । विदारः सज्जनहृदयविदारको ध्वजो यस्य स कः कस्यचित्संबन्धीत्यर्थः, रथः रणे नौ आवयोः वशमागच्छेत् यत्कृते यत्प्रयत्ने सति महद्व्यसनं रहस्यसंभाषणभङ्गजनितदुःखं त्वया सीतया च संप्राप्तमत एव मयापि संप्राप्तं यन्निमित्तं यद्राज्यसंबधकारणाच्छाश्वताद् निरन्तरभोग्याद् राज्याद् भवान् च्युतः इह प्राप्तः तं भरतं पृथ्वीभारविस्तारकं किंच भीः भयमस्ति अस्मिन् कर्मणि तत्र रतं रतिर्यस्य तं सत्पुरुषेभ्योऽतिभयप्रदातारमित्यर्थः, राक्षसं द्रक्ष्याम द्रक्ष्यामः । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

१ उद्गतेति गो. पाठः । २ धनुषौ चावामिति गो. पाठः । ३ श्रयावहै इति गो. पाठः । ४ द्रक्ष्यामेति रा. पाठः ।

त्वया राघव संप्राप्तं सीतया च मया तथा । यन्निमित्तं भवान्राज्याच्च्युतो राघव शाश्वतात्॥ २२ ॥
संप्राप्तोऽयमरिर्वीर भरतो वध्य एव [1]हि । भरतस्य वधे दोषं नाहं पश्यामि राघव ॥ २३ ॥
पूर्वापकारिणं हत्वा न ह्यधर्मेण युज्यते । पूर्वापकारी भरतस्त्यागे [2]धर्मश्च राघव ॥ २४ ॥
एतस्मिन्निहते कृत्स्नामनुशाधि [3]वसुंधराम् । अद्य पुत्रं हतं संख्ये कैकेयी राज्यकामुका ॥ २५ ॥
मया पश्येत्सुदुःखार्ता हस्तिभिर्भिन्नमिव द्रुमम् । कैकेयीं च वधिष्यामि सानुबन्धां सबान्धवाम्॥ २६ ॥
कलुषेणाद्य महता मेदिनी परिमुच्यताम् । अद्येमं संयतं क्रोधमसत्कारं च मानद ॥ २७ ॥
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् । अद्यैवं चित्रकूटस्य काननं निशितैः शरैः ॥ २८ ॥
[4]छिन्दञ्छत्रुशरीराणि करिष्ये शोणितोक्षितम् । शरैर्निर्भिन्नहृदयान्कुञ्जरांस्तुरगांस्तथा ॥ २९ ॥

गो० टी०–अपीति । अपिः कामप्रवेदने नौ आवयोः॥२१॥

गो० टी०–अपि द्रक्ष्यामीत्यारभ्य श्लोकः ॥ २२ ॥

२२] ति० टी०–यन्निमित्तं यस्माद्धेतोः ॥ २२ ॥

गो० टी०–यन्निमित्तमिति । यन्निमित्तं यस्माद्धरताद्धेतोः ॥ २३ ॥

२३] ति० टी०–वध्यत्वेऽयमेव हेतुः ॥ २३ ॥

रा० टी०–दर्शने प्रयोजनमाह–समिति । भरतः इह मद्भ्रमनजनितभारावादि अरिः राक्षसादिः संप्राप्तः तर्हि स वध्य एव । नन्वब्रह्मचर्ये स्थितत्वात् कथमस्मत्कर्तृको वध इत्यत आह–हे राघव ! भरतस्य पृथ्वीभारविस्तारकस्य अपराधिनो जनस्य वधे अहं दोषं न पश्यामि ॥ २३ ॥

गो० टी०– भरतस्येति । त्यागे वधे ॥ २४ ॥

२४] ति० टी०–त्यागे वधे ॥ २४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–पूर्वेति । पूर्वापकारिणं पौर्वकालिकापकारविशिष्टं हत्वा अधर्मेण न युज्यते अधर्मः ते न प्राप्नोतीत्यर्थः । एतस्य पूर्वापकारित्वं तु मुन्यादिवधादिकर्तृत्वेन । नन्वेवधादिकर्तृत्वं प्रधानस्यैवेति सर्वं न पूर्वापराधिन इति तद्वधोऽनुचित एव तद्वधाभावे कथं तदधिपतेर्वधः इत्यत आह–पूर्वापकारिणः [5]इं कामं भरतः पालयतः पुरुषस्यापि त्यागे वधाकरणे अधर्मः एतेन राक्षससैन्यं चेन्निहन्तव्यमेवेति सूचितम् ॥ २४ ॥

गो० टी०–पूर्वापकारीति । अपकारश्च न प्रामादिक इत्याह–त्यक्तधर्म इति ॥ २५ ॥

२५] ति० टी०–संख्ये युद्धे मया पश्येदित्युत्तरेणान्वयः 'मृधमास्कन्दनं संख्यं समीकं सांपरायिकम्' ॥ २५ ॥

रा० टी०–एतस्मिन्निति । हस्तिभिर्भिन्नं द्रुममिव यथा स्यात्तथा एतस्मिन् राक्षससैन्ये निहते सति कृत्स्नां वसुन्धरामनुशाधि पालय अथ ससैन्यराक्षसवधोत्तरकाले राजि स्वकर्तृकपालनजनितदीप्तौ अकामुका इच्छारहिता अत एव दुःखार्ता राज्यपालकाभावहेतुकदुःखवती कैकेयी संख्ये सम्यक् ख्याः ख्यातिर्यस्य तस्मिन् सेवकोचितज्ञाने विद्यमानं तं पुत्रं भरतं मया सहैव पश्येत् एतेन ससैन्यराक्षसवधे वनवासस्य न प्रयोजनमिति व्यञ्जितम् । हशब्द एवार्थे। सार्धश्लोक एकान्वयी॥२५॥

गो० टी०–अद्येति । संख्ये युद्धे 'मृधमास्कन्दनं संख्यम्। इत्यमरः ॥ २६ ॥

२६] ति० टी०–सानुबन्धां सकुञ्जाम् ॥ २६ ॥

रा० टी०–नन्वनिवासमन्तरा मन्थरायाः संतोषो न भवितेत्यत आह–कैकेयीमिति । सानुबन्धामाद्यहविशिष्टां सबान्धवां तद्भान्धवसहितां कैकेयीं मन्थरामहं वधिष्यामि तदा गृहं निवर्तयिष्यामीत्यर्थः ॥ २६ ॥

गो० टी०–कैकेयीमिति । वधिष्यामि हन्तेर्वधादेश आर्षः सानुबन्धां मन्थरायानुबन्धसहितां कलुषेण पापेन ' कलुषं दुरितैनोघमंहोदुरितदुष्कृतम् ' इत्यमरः ॥ २७ ॥

२७–२९] ति० टी०–कलुषेण पापेन कैकेयीरूपेण असत्कारं कैकेयीकृतम् ॥ २७–२९ ॥

रा० टी०–राक्षसवधोऽवश्यं कर्तव्य इति बोधयन्नाह–कलुषेणेति । कलुषेण पापेन मेदिनी पृथ्वी परिमुच्यताम्। अर्धं पृथक्। भवदाज्ञामात्रेणैव सर्वं सेत्स्यतीति बोधयन्नाह–अद्येति । हे मानद! असत्कारमसदपि कारयति तं किंच न सत्कारः रिपुसत्कृतिर्येन तं, किंच असतां कारो विनाशो येन तं संयतं निरोधितमिमं क्रोधं शत्रुसैन्येषु मोक्ष्यामि, तत्र दृष्टान्तः कक्षेषु हुताशनं वह्निमिव । अर्धद्वयमेकान्वयि ॥ २७ ॥

गो०टी०–अद्येति । संयतं स्तम्भितम् असत्कारं तिरस्कारं मोक्ष्यामि तत्कार्यं करिष्यामीत्यर्थः, शरव्याजेन मोक्ष्यामीति वार्थः । कक्षेषु शुष्कगुल्मेषु, मानदेत्यनेन मानं मा च्छैत्सीरित्युच्यते ॥ २८ ॥

रा० टी०–अद्येति । निशितैः शरैः शत्रुशरीराणि छिन्दन् सन् चित्रकूटस्य काननं शोणितोक्षितं कुञ्जरान् तुरगांश्च शरैर्निर्भिन्नहृदयान् करिष्ये ॥ २८॥ २९ ॥

गो० टी०–अद्यैतदिति । शत्रुशरीराणि भिन्दन् एतत् काननं शोणितोक्षितं करिष्य इत्यन्वयः ॥ २९ ॥ ३० ॥

१ मे इति गो. पाठः । २ कारिणां त्यागे नह्यधर्मो विधीयत इति गो. पाठः । ३ त्यक्ताधर्मं इति गो. पाठः । ४ भग्नमिति गो. पाठः । ५ एतदिति गो. पाठः । ६ भिन्दन्निति गो. पाठः ।

श्वापदाः परिकर्षन्तु नरांश्च निहतान्मया । शराणां धनुषश्चाहमनृणोऽस्मिन्महावने ॥
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

सप्तनवतितमः सर्गः ।

भरतमुद्दिश्य संरब्धं लक्ष्मणं प्रति भरतनाशने दोषं प्रदर्श्य तच्छुद्धभावकथनेन रामो लक्ष्मणं सान्त्वयति । रामोक्तश्रवणेन स्वात्मनि लज्जमानो लक्ष्मणो वृक्षादवरुह्य वचनान्तरव्याजेनापत्रपां जुगोप । रामाश्रमोपसर्गं परिजिहीर्षुणा भरतेनादिष्टा सेना चित्रकूटाभित एव निविष्टोवास ।

सुसंरब्धं तु भरतं लक्ष्मणं क्रोधमूर्छितम् । रामस्तु परिसान्त्व्याथ वचनं चेदमब्रवीत् ॥ १ ॥
किमत्र धनुषा कार्यमसिना वा सचर्मणा । महाबले महोत्साहे भरते स्वयमागते ॥ २ ॥
पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमाहवे । किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥ ३ ॥
यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् । नाहं तत्प्रतिगृह्णीयां भैक्ष्यान्विषकृतानिव ॥ ४ ॥

३०] ति० टी०–भरतलक्ष्मणयोः समतया रामोपकरणत्वाल्लक्ष्मणस्य भरतविषय एवं वादः रामस्य तूभयोरपि स्वोपकरणत्वात्र क्वापि क्रोध इति तत्त्वमत्र ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

रा० टी०–श्वापदा इति । मया निहतान्नरान् नरसदृशान् राक्षसानित्यर्थः, श्वापदाः श्रृगालादयः परिकर्षन्तु अहं तु अस्मिन् महावने ससैन्यं सैन्यसहितं भरतं भीर्भयमस्ति अस्मिन्कर्मणि तत्र रतं रतिर्यस्य तं सत्पुरुषेभ्योऽतिभयप्रदातारं राक्षसगणमित्यर्थः, हत्वा शराणां धनुषश्च अनृणः ऋणरहितो भविष्यामि । सार्धश्लोक एकान्वयी ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

गो० टी०–शराणामिति । अहं यतः पूर्वं तत्र तत्र युद्धे शराणां धनुषश्च विषये अनृणः ऋणरहितः शत्रुकलेवराहारदानेन परिहृतऋणः स्वयं युद्धे क्वाप्यपराजितः शत्रुजयैकशील इत्यर्थः, अतः अस्मीत्यहमर्थेऽव्ययम् अस्मि अहं महाभृषे भाविन्यपि युद्धे ससैन्यं भरतं हत्वा अनृण इत्यनुकर्षः अनृणो भविष्यामीत्यन्वयः वनवासात्पूर्वमपि शम्बरशतजयादिप्रतिपादनात् तत्र लक्ष्मणस्यापि सहभावावश्यंभावाद्युद्धसंभवः अस्मीति क्रियापदं वा तदा अभवमित्यर्थः यतः अनृणोऽभवमित्यर्थः त्वयापि मद्वीर्यं ज्ञातपूर्वमित्यर्थः ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

१] ति० टी०–अथ तत्क्रोधमपनयति भगवान्सर्वभूतभावज्ञस्तदागमनप्रयोजनकथनेन–सुसंरब्धमिति । भरतं प्रति सुसंरब्धमत्यन्तयुद्धोद्योगवन्तम् ॥ १ ॥

रा० टी०–रामोक्तिं वर्णयितुमुपक्रमते–सुसंरब्धमिति । भरतमवलोक्य सुसंरब्धं शत्रुध्नमाद्युद्धोद्योगवन्तमत एव क्रोधमूर्छितं लक्ष्मणं परिसान्त्व्य इदं वचनमब्रवीत् ॥ १ ॥

गो० टी०–अथ कुपितपरिसान्त्वनं सप्तनवतितमे–सुसंरब्धमित्यादि । पूर्वं सुसंरब्धं सुतरां प्रीतं 'संरम्भः प्रणयेऽपि च' इत्यमरः । अथ तु तद्वैलक्ष्ण्येन क्रोधमूर्च्छितं, यद्वा क्रोधमूर्च्छितत्वादेव सुसंरब्धं क्रोधकार्ययुद्धौन्मुख्ययुक्तं, तत्र हेतुः सपत्नीपुत्रत्वमित्याह–सौमित्रिमिति । यद्वा सुमित्रापुत्रत्वस्मारणपूर्वकमुक्तवानिति द्योत्यते रामस्तु इदं वचनं रामादन्यैर्वक्तुमशक्यमिति भावः ॥ १ ॥

२] ति० टी०–अत्र भरतविषये ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–किमिति । अत्र अस्मिन्समये धनुरादिना किं कार्यम् । नतु शत्रुनिवारणार्थमपेक्षितमित्यत आह–महोत्साहः अस्मद्दर्शनविषयकौत्सुक्यविशिष्टः महाबलो भरत एव स्वयमागतः एवेन शब्दागमनव्यवच्छेदः ॥ २ ॥

गो० टी०–किमिति । अत्र इदानीं परिदृष्टे महेष्वासे उचितविषयशरसंधातरि, तत्र हेतुः महाप्राज्ञ इति । स्वयं पुरुषप्रेरणं विना आगते भरते विषये धनुरादिभिः किं कार्यं न किमपीत्यर्थः । महाप्राज्ञो भरतोऽपि यदि धनुर्गृहीत्वा स्वयमागतः तदा किमस्माकं युद्धोद्योगेनेति भावः ॥ २ ॥

३] ति० टी०–पितुः सत्यं पालयिष्यामीति प्रतिज्ञाय सापवादेन पित्रा भरताय दत्तं रामोऽपहृतवानित्येवंरूपापवादसहितेन ॥ ३ ॥

रा० टी०–नन्वेवं चेद्राज्यपरिपालनार्थमयोध्यागमनोद्योगः कर्तव्य इत्यत आह–पितुरिति । आहवे राक्षससंग्रामार्थं पितुः सत्यं चतुर्दशवर्षपरिमितवनवासबोधकवाक्यं प्रतिश्रुत्य करिष्यामीति प्रतिज्ञाय सापवादेन निन्दासहितेन राज्येन

१ सौमित्रिमिति गो.पाठः। २ महेष्वासे महाप्राज्ञे इति गो. महाबलो महोत्साहो भरतः स्वयमागत इति रा.पाठः। ३ आगतमिति गो.पाठः। ४ भक्ष्यानिति गो.पाठः।

धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण । इच्छामि भवतामर्थे एतत्प्रतिशृणोमि ते ॥ ५ ॥
भ्रातॄणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण । राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥ ६ ॥
नेयं मम मही सौम्य दुर्लभा सागराम्बरा । नहीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ॥ ७ ॥
यद्विना भरतं त्वां च शत्रुघ्नं वापि मानद । भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी ॥ ८ ॥
मन्येऽहमागतोऽयोध्यां भरतो भ्रातृवत्सलः । मम प्राणैः प्रियतरः कुलधर्ममनुस्मरन् ॥ ९ ॥
श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् । जानक्या सहितं वीर त्वया च पुरुषोत्तम ॥ १० ॥
स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः । द्रष्टुमभ्यागतो ह्येष भरतो नान्यथाऽऽगतः ॥ ११ ॥

इदानीं राज्यग्रहणेन हत्वा निवर्त्य च भरतं किं करिष्यामि सापवादपुरुषस्य स्वजनादिप्राप्तिरपि दुःखदैवेति तात्पर्यम् ॥३॥

गो० टी०-तत्र युक्तिमाह-पितुरिति । सापवादेन पित्रा भरताय दत्तं राज्यं रामस्तं हत्वा गृहीतवान् इत्येवंरूपेणापवादेन युक्तम् ॥ ३ ॥

४] ति० टी०-क्षये नाशे कृत इति शेषः ॥ ४ ॥

रा० टी०-यदिति । बान्धवानां मित्राणां वा क्षये तदीयत्वेन स्वीकारिते राज्यादौ यद्द्रव्यं भवेत् उत्पद्येत तदहं न प्रतिगृह्णीयां, तत्र दृष्टान्तः विषकृतान् विषमिश्रितान् भक्ष्यानिव ऐतेनेदानीं राज्यग्रहणे दत्तापहारदोषोऽप्यापतिष्यतीति सूचितम् ॥ ४ ॥

गो० टी०-युक्त्यन्तरमाह-यदिति । बान्धवादीनां क्षये नाशे लब्धं यद्धनं तन्न गृह्णीयां नेच्छेयमित्यर्थः । विषकृतान्विषमिश्रद्रव्यकृतान् भक्षान् अपूपादीनिव ॥ ४ ॥

५] ति० टी०-एतदुक्तार्थजातमुद्दिश्य प्रतिश्रृणोमि प्रतिजाने ॥ ५ ॥

रा० टी०-वस्तुतस्तु स्वार्थं किंचिन्न स्वीकुर्म इत्याह-धर्ममिति । भवतामर्थे एव धर्मादिकमिच्छामि एतत्प्रतिश्रृणोमि प्रतिजानामि ॥ ५ ॥

गो० टी०-धर्ममिति । अर्थं पृथिवीभिन्नं रत्नादिकं भवतां भ्रातॄणामर्थे भवन्निमित्तमित्यर्थः । एतत् उक्तरूपं प्रतिश्रृणोमि नातिवर्ते इत्यर्थः ॥ ५ ॥

६] ति० टी०-तमेवार्थं शपथेन द्रढयति-भ्रातॄणामिति । संग्रहार्थं सम्यक्पालनार्थम् अत एव तेषां सुखार्थं च ॥ ६ ॥

रा० टी०-तदेव द्रढयन् भङ्ग्यन्तरेणाह-भ्रातॄणामिति । संग्रहार्थं स्वसमीपस्थापनार्थं सुखार्थं च राज्यमिच्छामि सत्येन सत्यस्वेन बोधनार्थमायुधमालभे शपथविधिना स्पृशामि ॥ ६ ॥

गो० टी०-भ्रातॄणामिति । संग्रहार्थं धनसंचयार्थं सुखार्थं तत्सुखार्थं तत्तदभिमतवस्तुप्रदानेन तत्प्रीत्यर्थमित्यर्थः । अपिना तद्बुद्धिः सङ्कुचीयते राज्यमपि बहुच्छिद्रत्वेन अपरिग्राह्यतया ममानिष्टमपि आलभे स्पृशामि स्पृष्ट्वा शप इत्यर्थः । सत्येनेति मदुक्तं यथा सत्यं भवति तथा आयुधं स्पृशामीत्यर्थः ॥ ६ ॥

७-८] ति० टी०-दुर्लभेति नापि तु सुलभैव, किं तु तां नेच्छामि । शक्रत्वमपि नेच्छेयम्, इमां महीमेव नेच्छामीति नेत्यर्थः ॥ ७ ॥ ८ ॥

रा० टी०-नेति । इयं मही शक्रत्वं च मम दुर्लभा दुर्लभं च न यत् यस्मै इच्छेयं तत्तस्मै दद्यामित्यर्थः, तथापि अधर्मेण हेतुना नेच्छेयं यथेच्छं दातुमिति शेषः । दुर्लभेति लिङ्गविपरिणामेनान्यत्राप्यन्वेति ॥ ७ ॥

गो० टी०-नेति । नेच्छेयम् इमामिति शेषः ॥ ७ ॥

रा० टी०-भरतादिपरिपालनमेव नित्यं ममेप्सितमिति बोधयन्नाह-यदिति । यत्किंचित्सुखं भरतादीन् विना भरतादिसंबन्धशून्यं सत् भवेत् प्राप्तियोग्यतां प्राप्नुयात्तत्सुखं शिखी वह्निः भस्म कुरुताम् ॥ ८ ॥

गो० टी०-यदिति । शिखी अग्निः भरतादिसुखाननुगुणं यत्सुखं तदग्निर्भस्मीकरोतां न तन्मम ग्राह्यमित्यर्थः ॥ ८ ॥

९-११] ति० टी०-मन्येऽहमिति । द्रष्टुमभ्यागत इति मन्ये इत्यन्वयः । आगतः मातुलगृहादिति शेषः । कुलधर्मं ज्येष्ठस्य राज्यमित्येवंरूपम् ॥ ९-११ ॥

रा० टी०-मन्य इति । अयोध्यामागतः स्नेहेनाक्रान्तहृदयो भरतः मां प्रव्राजितं श्रुत्वा शोकेनाकुलितेन्द्रियः सन् मां द्रष्टुमागतः इत्यहं मन्ये निश्चिनोमि, एतेनानयनार्थकत्वमपि तस्य सूचितम् । ननु आनयनार्थमागतस्य भरतस्येप्सितभङ्गे बलात्कारेणाप्यानेष्यतीति सावधानतया भवितव्यमित्यत आह-अन्यथा बलात्कारेण मां नेतुमागतः । श्लोकत्रयमेकान्वयि ॥ ९-११ ॥

गो० टी०-एवं लक्ष्मणचित्तानुसारेण परिहृत्य वस्तुतस्त्वमाह-मन्य इत्यादि । श्लोकत्रयमेकान्वयम् । द्रष्टुमभ्यागतो ह्येष भरतो नान्यथाऽऽगत इति मन्ये इत्यन्वयः अयोध्यामागतः मातुलगृहादिति शेषः भ्रातृवत्सलः भ्रातृषु वत्सलः स्नेही कुलधर्मं ज्येष्ठस्य राज्यपरिपालनरूपं स्नेहेन मद्विषयप्रीत्या आक्रान्तहृदयः तत्परवश इत्यर्थः, शोकेन मद्विवासजनितदुःखेन आकुलितेन्द्रियः व्याकुलहृदयः अन्यथा मद्विरोधितया नागतः ॥ ९-११ ॥

१ ह्येति गो. पाठः । २ प्राणादिति गो. पाठः । ३ पुरुषधर्मेति गो. पाठः ।

अम्बां च कैकयीं रुष्य भरतश्चाप्रियं वदन् । प्रसाद्य पितरं श्रीमान्राज्यं मे दातुमागतः ॥ १२ ॥
प्राप्तकालं यथैषोऽस्मान्भरतो द्रष्टुमर्हति । अस्मासु मनसाप्येष नाहितं किंचिदाचरेत् ॥ १३ ॥
विप्रियं कृतपूर्वं ते भरतेन कदा नु किम् । ईदृशं वा भयं तेऽद्य भरतं यद्विशङ्कसे ॥ १४ ॥
नहि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः । अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥ १५ ॥
कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि । भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥ १६ ॥
यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे । वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥ १७ ॥
उच्यमानो हि भरतो मया लक्ष्मण तद्वचः । राज्यमस्मै प्रयच्छेति बाढमित्येव मंस्यते ॥ १८ ॥

१२] ति० टी०—रुष्य तद्विषयरोषं कृत्वेत्यर्थः । प्रसाद्य त्वदत्तं राज्यं मया प्राप्तम्, तन्मया रामाय दीयते, अतो न ते सत्यधर्मदोष इति तदनुमन्यस्वेति प्रसाद्य ॥ १२ ॥

रा० टी०—भरतस्नेहमेव दृढीकुर्वन्नाह—अम्बामिति । अप्रियं रामप्रव्राजनं मम प्रीतिविरोधीति वदन् सन् कैकेयीमम्बां रुष्य प्रव्राजनहेतुत्वेन किंचित्परुषमुक्त्वेत्यर्थः, अपितरं पितृरहितं मां प्रसादी प्रसादनशीलः सन् मे राज्यं दातुमागतः ॥ १२ ॥

गो० टी०—अम्बामिति । रुष्य संरुष्य ॥ १२ ॥

१३] ति० टी०—यथैष भरतस्तथा एतत्कर्तृकमस्मद्दर्शनयोग्यत्वं प्राप्तकालमुचितम् ॥ १३ ॥

रा० टी०—प्राप्तेति । प्राप्तः कालः अनेकविधोपदेशो यस्मात्तं मां प्राप्तेति शेषः, यथा यथावत् अस्मान् द्रष्टुमर्हति अस्माच्च मनसापि अप्रियं बलात्कारेणायोध्यानयनं नाचरेत्, प्राप्तं कालं प्राप्तोपदेशो यथा भवति तथेति क्रियाविशेषणं वा १३

गो० टी०—प्राप्तकालमिति । एषः भरतः अस्मान् द्रष्टुमिच्छतीति यदेतत् प्राप्तकालं कालोचितमित्यर्थः ॥ १३ ॥

१४] ति० टी०—कृतपूर्वं यदद्य भरतं शङ्कसे ईदृशं वा भयं भयजनकं वाक्यं कृतपूर्वमुक्तपूर्वं वा यदद्य भरतं शङ्कसे इत्यन्वयः ॥ १४ ॥

रा० टी०—विप्रियमिति । यस्माद्बलात्कारानयनाद्धेतोः अभयं भयनिवर्तकं मदीयत्वं विशङ्कसे तदीदृशं विप्रियं बलात्कारकरणं कदाचु कदापि भरतेन कृतपूर्वं किं नेत्यर्थः ॥१४॥

गो० टी०—विप्रियमिति । ते तुभ्यं भरतेन कदाचु कदाचित् विप्रियं कृतपूर्वं किम् ईदृशं भयं वा त्वदुक्तसदृशं भयजनकवाक्यं वा कृतपूर्वं किम् उक्तपूर्वं किं यस्त्वमद्य अत्राथें अत्रस्थाने वा भरतं शङ्कस इति योजना ॥ १४ ॥

१५] ति० टी०—अतस्ते त्वया भरतोऽप्रियं निष्ठुरं न वाच्यः, यतो भरतस्याप्रिये अप्रियवचने कृते उक्ते अहमप्यप्रियमुक्तः स्यां त्वया ॥ १५ ॥

रा० टी०—नहीति । निष्ठुरं परुषमप्रियं प्रियविरोधि वचः त्वया भरतो न वाच्यः । तत्र हेतुः—भरतस्य अप्रिये त्वत्कर्तृकाप्रियाचरणे कृते वचनेनापि संपादिते सति अहमप्रियं त्वद्विषयकप्रीत्यभाववान् स्याम् ॥ १५ ॥

गो० टी०—नहीति । त इति "कृत्यानां कर्तरि वा" इति षष्ठी । ते त्वया भरतः निष्ठुरम् अप्रियं च वचः न वाच्यः भरतस्य अप्रिये अप्रियवचने कृते उक्ते सति अहं हि अहमेवाप्रियमुक्तः स्यामिति संबन्धः स्वाश्रितविषये कृतापचारः स्वस्मिन्नेव कृत इति भगवदभिप्रायोऽनेन गम्यते ॥ १५ ॥

१६] ति० टी०—आत्मनः प्राणं प्राणसमं भ्रातरमित्यन्वयः ॥ १६ ॥

रा० टी०—भरतविरोधस्यायोग्यत्वं बोधयन्नाह—कथमिति । प्राणं प्राणवत्प्रियं पितरं पुत्राः कथं हन्युः दुरुक्त्या ताडयेयुः, भ्राता भ्रातरं वा कथं हन्यात्र संभवतीत्यर्थः ॥ १६ ॥

गो० टी०—पूर्वं दशरथो वध्यतामित्युक्तम् इदानीं भरतो वध्यत इति इत उपरि तूष्णीमवस्थाने कार्यहानिर्भविष्यतीति भयात् तां रौद्रीं बुद्धिं नियम्य निवर्तयति—कथं न्वित्यादिना । प्राणं प्राणभूतम् ॥ १६ ॥

१७] ति० टी०—इमां वाचं भरतवधविषयां प्रदीयतामिति वक्ष्यामीत्यन्वयः ॥ १७ ॥

रा० टी०—यदीति । यदि राज्यस्य हेतोः इमां सावधानभवनार्थिकामहितां वाचं प्रभाषसे तदा भरतं दृष्ट्वा अस्मै लक्ष्मणाय राज्यं प्रदीयतामिति भरतं वक्ष्यामि ॥ १७ ॥

गो० टी०—यदीति । यदि राज्यस्य हेतोः त्वम् इमां भरतहिंसारूपां वाचं प्रभाषसे तर्हि वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयतां, प्रदीयतामित्यनन्तरमितिकरणं द्रष्टव्यम् ॥१७॥

१८] ति० टी०—नन्वु त्वदुक्तेऽपि स न दद्यात्तत्राह—उच्यमान इति । प्रयच्छेत्युच्यमान इत्यर्थः, राज्यलिप्सा चेत्तदेव दापयिष्यामि, किं भ्रातृवधेनेत्याशयः ॥ १८ ॥

रा० टी०—नन्वु ततः किमित्यत आह—उच्यमान इति । अस्मै लक्ष्मणाय राज्यं प्रयच्छ देहि इति वचः मया उच्यमानो भरतः बाढमङ्गीकृतमित्येव मंस्यते क्षिप्रं दास्यतीत्यर्थः, एतेन अप्रियं नैव वक्तव्यमिति सूचितम् ॥ १८ ॥

गो० टी०—उच्यमान इति । भरतः अस्मै राज्यं प्रयच्छे-

१ परुषं चेति गो. पाठः । २ यादेति गो. पाठः । ३ इच्छतीति गो. पाठः । ४ नाप्रियमिति गो. पाठः । ५ योऽत्र शङ्कसे इति गो. पाठः । ६ ऽपीति गो. पाठः । ७ तत्त्वत इति गो. पाठः । ८ प्राप्येति भाति ।

तथोक्तो धर्मशीलेन भ्रात्रा तस्य हिते रतः । लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥ १९ ॥
तद्वाक्यं लक्ष्मणः श्रुत्वा व्रीडितः प्रत्युवाच ह । त्वां मन्ये द्रष्टुमायातः पिता दशरथः स्वयम् ॥ २० ॥
व्रीडितं लक्ष्मणं दृष्ट्वा राघवः प्रत्युवाच ह । एष मन्ये महाबाहुरिहास्मान्द्रष्टुमागतः ॥ २१ ॥
अथवा नौ ध्रुवं मन्ये मन्यमानः सुखोचितौ । वनवासमनुध्याय गृहाय प्रतिनेष्यति ॥ २२ ॥
इमां चाप्येष वैदेहीमत्यन्तसुखसेविनीम् । पिता मे राघवः श्रीमान्वनादादाय यास्यति ॥ २३ ॥
एतौ तौ संप्रकाशेते गोत्रवन्तौ मनोरमौ । वायुवेगसमौ वीरौ जवनौ तुरगोत्तमौ ॥ २४ ॥
स एष सुमहाकायः कम्पते वाहिनीमुखे । नागः शत्रुंजयो नाम वृद्धस्तातस्य धीमतः ॥ २५ ॥

ति मया उच्यमानोऽपि अहृदयमुक्तोऽपि तत्त्वतः बाढमिति वक्ष्यत्येव तथा दास्यामीति वक्ष्यत्येवेत्यर्थः । एवकारेण तस्य पुनर्निवृत्त्यभाव उच्यते ॥ १८ ॥

१९] ति० टी०—लज्जया गात्राणि प्रविवेशेव अत्यन्तसंकुचितोऽभूदित्यर्थः । तस्य रामस्य हिते रतः ॥ १९ ॥

रा० टी०—तथेति । धर्मशीलेन भ्रात्रा तथोक्तः लक्ष्मणः लज्जया स्वानि गात्राणि प्रविवेश इव अत्याकुञ्चितस्वशरीरः सन् तस्थावित्यर्थः, एतेन सेनालिङ्गकानुमानेन भरते लक्ष्मणशङ्का जातेति ध्वनितम् ॥ १९ ॥

गो० टी०—तथेति । तस्य रामस्य हिते रतः नतु स्वार्थपरः अत एव मङ्गलाशासनपरत्वात् अस्थाने भयशङ्कया तथोक्तवानिति गम्यते गात्राणि अवयवान् प्रविवेशेव लज्जातिशयेनात्यन्तसंकुचितगात्रोऽभूदित्यर्थः ॥ १९ ॥

२०] ति० टी०—एवमनुचितोक्तिलज्जापरिहारायोचितं वाक्यमाह—तदिति । भरतप्रसङ्गस्तु त्वदाशयपरिज्ञानायैव केवलमन्यस्त इत्याशयः ॥ २० ॥

टी०—तदिति । लक्ष्मणः तद्वाक्यं श्रुत्वा व्रीडितः सन् प्रत्युवाच, तद्वचनाकारमाह—त्वां द्रष्टुं पिता दशरथः एव स्वयमायातः इति भरतमहं मन्ये, एतेन अप्रियं प्रवदिष्यामीति सूचितम् ॥ २० ॥

गो० टी०—तद्वाक्यमिति । व्रीडया प्रसङ्गान्तरं प्रस्तौति—त्वामिति । लोके स्वोक्तिभङ्गेन व्रीडितः पुरुषः प्रस्तावान्तरं हि वदति आयात इति मन्य इत्यन्वयः ॥ २० ॥

२१] ति० टी०—एवं पितृप्रसङ्गो लक्ष्मणस्य व्रीडापरिहारमूल इति ज्ञात्वा तदेवानुकुर्वन्नाह—व्रीडितमिति । एष लक्ष्मणप्रस्तावितः पिता ॥ २१ ॥

रा० टी०—व्रीडितमिति । राघवो रामः प्रत्युवाच व्रीडादूरीकारकवचनमुवाचेत्यर्थः । तत्प्रवचनाकारमाह—अस्मान्द्रष्टुमागतः एष भरतः महाबाहुर्दशरथः सत्कारार्हत्वेन दशरथसदृशः इति मन्ये तेनोचितमेव त्वयोक्तमिति सूचितम् २१

गो० टी०—भावज्ञो रामोऽपि औचित्येन लक्ष्मणकृतप्रस्तावं व्रीडाकम्पनाद्य प्रपञ्चयामासेत्याह—व्रीडितमिति । तदेवोच्यते—एष इत्यादिना ॥ २१ ॥

२२] ति० टी०—नौ सुखोचितौ मन्यमानः वनवासमनुध्याय कष्टं विचिन्त्य ॥ २२ ॥

रा० टी०—अथेति । नौ आवां सुखोचितौ मन्यमानः भरतः वनवासं वनवासक्लेशमनुध्याय संचिन्त्य गृहाय अथ प्रतिनेष्यति माङ्गलिकानयनानुकूलव्यापारं करिष्यति इत्यहं मन्ये२२

गो० टी०—नाविति द्विवचनं प्राधान्यात् मन्यमानः स्मरन् वनवासं वनवासक्लेशम् अनुध्याय अनुचिन्त्य ॥ २२ ॥

२३] ति० टी०—इमां सीताम् ॥ २३ ॥

रा० टी०—इमामिति । एषः भरतः मे वैदेहीं पिता इव आदाय आनयनानुकूलव्यापारं कृत्वा यास्यति । चशब्द इवार्थे॥२३॥

गो० टी०—इमामिति । अत्यन्तेत्यनेन तन्मात्रनयने हेतुरुक्तः ॥ २३ ॥

२४] ति० टी०—गोत्रवन्तौ प्रशस्तनामानौ प्रशस्तकुलौ वा । 'गात्रवन्तौ' इति पाठे प्रशस्तशरीरौ जवनौ वेगवन्तौ॥२४॥

रा०टी०—भरतशत्रुघ्नागमनचिह्नं बोधयन्नाह—एताविति । गोत्रवन्तौ प्रशस्तकुलौ वायुवेगसमौ वायुवेगसदृशवेगवन्तौ जवनौ जं मृत्युञ्जयत्वं वनतो रचयतः तौ स्वारोहकमृत्युप्रहारकलक्षणवन्तावित्यर्थः, अत एव न पौनरुक्त्यम्, एतौ तुरगोत्तमौ संप्रकाशेते 'जो ना मृत्युञ्जये जन्यां तातमात्रे जनार्दने' इति मेदिनी ॥ २४ ॥

गो० टी०—गोत्रवन्तौ प्रशस्तनामानौ यद्वा प्रशस्तकुलप्रसूतौ 'गोत्रं नाम्नि कुलेऽपि च' इति वैजयन्ती । वायुवेगसमौ वेगेन वायुसमावित्यर्थः । तुरगोत्तमौ राजोपवाह्यौ ॥ २४ ॥

२५] ति० टी०—पितुरागमने चिह्नान्तरमाह—स एष इति । कम्पते चलत्यागच्छति । अयं शत्रुंजयो रामेण सुयज्ञाय दत्तादन्य एव अत एव तातस्य शत्रुंजय इत्युक्तम् ॥२५॥

रा० टी०—इदानीं राजागमनचिह्नं बोधयन्नाह—स इति । सुमहाकायः अतिबृहच्छरीरः वृद्धः वयोधिकः शत्रुञ्जयो नाम तातस्य नागो हस्ती वाहिनीमुखे सेनाग्रे कम्पते शनैश्चलति राजाप्यागच्छतीत्यनुमीयते इति तात्पर्यम् ॥ २५ ॥

गो० टी०—स एष इति । कम्पते 'कपि चलने' इति धातुः मत्तगजस्वभावोऽयं वृद्धः उन्नतः धीमतः गजपरिपालनज्ञस्य तातस्य नागः शत्रुंजयः नतु मया सुयज्ञाय दत्तो मातुलालब्धशत्रुंजय इत्यर्थः, लोकसत्कृतं लोकोत्तरमित्यर्थः ॥ २५ ॥

१ वेति गो. पाठः । २ वीरेति गो. पाठः ।

न तु पश्यामि तच्छत्रं पाण्डुरं लोकविश्रुतम् । पितुर्दिव्यं महाभाग संशयो भवतीह मे ॥ २६ ॥
वृक्षाग्रादवरोह त्वं कुरु लक्ष्मण मद्वचः । इतीव रामो धर्मात्मा सौमित्रिं तमुवाच ह ॥ २७ ॥
अवतीर्य तु सालाग्रात्तस्मात्स समितिंजयः । लक्ष्मणः प्राञ्जलिर्भूत्वा तस्थौ रामस्य पार्श्वतः ॥२८॥
भरतेनाथ संदिष्टा संमर्दो न भवेदिति । समन्तात्तस्य शैलस्य सेना वासमकल्पयत् ॥ २९ ॥
अध्यर्धमिक्ष्वाकुचमूर्योजनं पर्वतस्य हि । पार्श्वे न्यविशदावृत्य गजवाजिनराकुला ॥ ३० ॥
सा चित्रकूटे भरतेन सेना धर्मं पुरस्कृत्य विधूय दर्पम् ।
प्रसादनार्थं रघुनन्दनस्य विरोचते नीतिमता प्रणीता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

अष्टनवतितमः सर्गः ।

रामदर्शनेऽत्युत्कमना भरतः सपरिवारो गुहशत्रुघ्नौ रामाश्रमान्वेषणे नियोज्यात्युत्कत्वात्स्वयमप्यमात्यसहितस्तदेवोपक्रममाणो रामसाहचर्यात्सीतालक्ष्मणयोर्धन्यत्वं भावयन्स्वयमपि तदनुचरत्वेन पादचार्येवाटन्कंचित्सालमूलमुपागतस्तद्वर्तिधूमलिङ्गेन मानुषवसतिमनुमायैतादृक्कान्तारेऽन्येषां वसतिं निषिध्य रामाश्रम एवायमित्युत्कण्ठयाऽग्रतः ससार ।

निवेश्य सेनां तु विभुः पद्भ्यां पादवतां वरः । अभिगन्तुं स काकुत्स्थमियेष गुरुवर्तकम् ॥ १ ॥

२६] ति० टी०—इह छत्रविषये ॥ २६ ॥

रा० टी०—इदानीं राजानागमनचिह्नं बोधयन्नाह—नेति । लोकविश्रुतं सर्वत्र प्रसिद्धं पाण्डुरं तद्दिव्यं पितुः छत्रं न पश्यामि अत इह अस्मिन् विरुद्धदर्शनद्वये मे अतीव संशयो भवति॥२६॥

गो० टी०—इह पितरि विषये संशयो भवतीह मे इति राघवः प्रत्युवाचेति पूर्वेणान्वयः ॥ २६ ॥

२७] ति० टी०—इतीवेत्येव सौमित्रिं वृक्षाग्रस्थितम् । अथ वृक्षावरोहणमाज्ञापयति—वृक्षाग्रादिति । मद्वचः कुरु शङ्कां विहाय मद्वचसा सालावरोहणं कुर्वित्यर्थः ॥ २७ ॥

रा० टी०—वृक्षेति । हे लक्ष्मण ! वृक्षाग्रादवरोह इतीव इति वचः रामः सौमित्रिमुवाच ॥ २७ ॥

गो० टी०—वृक्षाग्रादिति । मद्वचः भरतविषये शान्तो भवेति मत्सूचितं वचः प्रथममर्धमुत्तरार्धेन योजनीयम् ॥ २७ ॥

२८] ति० टी०—अवतीर्येति । रामाज्ञयेत्यादिः ॥२८॥

रा० टी०—अवतीर्येति । शालाग्रादवतीर्य समितिंजयः संग्रामजेता लक्ष्मणः रामस्य पार्श्वतः पार्श्वे तस्थौ ॥ २८ ॥

गो० टी०—अवतीर्येति । समितिं परसैन्यं जयतीति समितिंजयः "संज्ञायां भृतृवृजिधारिसहितपिदमः" इत्यत्र योगविभागेन खच् डुमागमश्च । सन्नद्ध इति यावत्, पार्श्वतः भ्रातर्यस्थाने भयशङ्कयेति भावः ॥ २८ ॥

२९] ति० टी०—रामाश्रमस्य संमर्दो न भवेदिति संदिष्टा आज्ञप्ता सेना शैलस्य समन्तादूरभागे वासमकल्पयत् ॥ २९ ॥

रा० टी०—भरतेनेति । संमर्दः बाधा न भवेदिति भरतेनादिष्टा सेना शैलस्य समन्ताद्वासमकल्पयत् ॥ २९ ॥

गो० टी०—भरतेनेति । संमर्दः रामाश्रमस्य पीडा न भवेदिति भरतेन संदिष्टा आज्ञप्ता सेना तस्य शैलस्य समन्तात् नतु तदाश्रमसमीपे ॥ २९ ॥

३०] ति० टी०—अध्यर्धं सार्धयोजनम् ॥ ३० ॥

रा० टी०—अध्यर्धमिति । पर्वतस्य पार्श्वे अध्यर्धं योजनं षट्षट्क्रोशानावृत्य गजवाजिरथाकुला इक्ष्वाकुचमूः न्यविशत्३०

गो० टी०—अध्यर्धमिति । अधिकमर्धं यस्मिन् तत् अध्यर्धं योजनं सार्धयोजनमित्यर्थः पर्वतस्य पार्श्वे आवृत्य न्यविशत् मण्डलाकारेण स्थिता ॥ ३० ॥

३१] ति० टी०—धर्मं पुरस्कृत्य दर्पं विधूय प्रणीता शिक्षिता सेना ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

रा० टी०—सेति । धर्मं पुरस्कृत्य प्रवर्त्य दर्पं भटादीनां गर्वं विधूय त्याजयित्वा नीतिमता भरतेन प्रणीता शिक्षिता सा सेना चित्रकूटे रघुनन्दनस्य रामस्य प्रसादनार्थं विरोचते३१

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

गो० टी०—सेति । चित्रकूटे चित्रकूटसमीपे नीतिमता सेनयोपरोधे रामस्य प्रसादो न स्यादिति नीतिज्ञेन भरतेन धर्मं पुरस्कृत्य विनीतवेषेण राजाभिमन्तव्य इति धर्ममग्रतस्कृत्य दर्पं विधूय स्थितेन रघुनन्दनस्य प्रसादनार्थं प्रणीता, आनीता सा सेना विराजते भाति स्म ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने सप्तनवतितमः सर्गः ॥९७॥

१] ति० टी०—पादवतां चरप्राणिनां वरः श्रेष्ठो विभुर्भरतः गुरुवर्तकं गुरुशुश्रूषापरम् ॥ १ ॥

१ सत्कृतमिति गो. पाठः । २ बाहो इति गो. पाठः । ३ सेति गो. पाठः । ४ रथेति गो. पाठः । ५ विराजते इति गो. पाठः ।

निविष्टमात्रे सैन्ये तु यथोद्देशं विनीतवत् । भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत् ॥ २ ॥
क्षिप्रं वनमिदं सौम्य नरसंघैः समन्ततः । लुब्धैश्च सहितैरेभिस्त्वमन्वेषितुमर्हसि ॥ ३ ॥
गुहो ज्ञातिसहस्रेण शरचापासिपाणिना । समन्वेषतु काकुत्स्थावस्मिन्परिवृतः स्वयम् ॥ ४ ॥
अमात्यैः सह पौरैश्च गुरुभिश्च द्विजातिभिः । सैह सर्वं चरिष्यामि पद्भ्यां परिवृतः स्वयम् ॥ ५ ॥
यावन्न रामं द्रक्ष्यामि लक्ष्मणं वा महाबलम् । वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति ॥ ६ ॥
यावन्न चन्द्रसंकाशं तँद्रक्ष्यामि शुभाननम् । भ्रातुः पद्मविशालाक्षं न मे शान्तिर्भविष्यति ॥ ७ ॥
"सिद्धार्थः खलु सौमित्रिर्यश्चन्द्रविमलोपमम् । मुखं पश्यति रामस्य राजीवाक्षं महाद्युति ॥ ८ ॥
यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसा प्रँग्रहीष्यामि न मे शान्तिर्भविष्यति ॥ ९ ॥
यावन्न राज्ये राज्यार्हः पितृपैतामहे स्थितः । अभिषिक्तो जलक्लिन्नो न मे शान्तिर्भविष्यति ॥ १० ॥
कृतकृत्या महाभागा वैदेही जनकात्मजा । भर्तारं सागरान्तायाः पृथिव्या यानुगच्छति ॥ ११ ॥
सुँशुभश्चित्रकूटोऽसौ गिरिर्राजसमो गिरिः । यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने ॥ १२ ॥

रा० टी०–भरतवृत्तान्तमाह–निवेश्येति । पादवतां वरः द्विपदानां श्रेष्ठः भरतः सेनां निवेश्य यथोचितं संस्थाप्य गुरुवर्तकं पितृवचनपरिपालकं राममभिगन्तुमियेष ॥ १ ॥

गो० टी०–अथ भरतस्य रामप्राप्तिरष्टनवतितमे सर्गे–निवेश्येत्यादि । गुरुवर्तकं गुरुवचनानुवर्तकम् ॥ १ ॥ २ ॥

२] ति० टी०–यथोद्देशमनुक्रस्यानुक्रदिशि वास इति स्वाम्युपदिष्टप्रदेशमनतिक्रम्य निविष्टे सैन्ये इत्यर्थः । विनीतवद्विनीताहें ॥ २ ॥

रा० टी०–निविष्टेति । यथोद्देशं भरतोपदेशमनतिक्रम्य सैन्ये निविष्टमात्रे सति भरतः शत्रुघ्नमब्रवीत् ॥ २ ॥

३] ति० टी०–लुब्धा निषादाः । एभिरासन्नैर्गुहभृत्यैः॥३॥

रा० टी०–तद्वचनाकारमाह–क्षिप्रमिति । लुब्धैः निषादैः सहितैरेभिर्नरसंघैः स्वभृत्यसमूहैः इदं वनं क्षिप्रमन्वेषितुमर्हसि ॥ ३ ॥

गो० टी०–क्षिप्रमिति । लुब्धैः व्याधैः ॥ ३ ॥ ४ ॥

४] ति० टी०–ज्ञातिसहस्रेण परिवृत इत्यन्वयः ॥ ४ ॥

रा० टी०–गुह इति । ज्ञातिसहस्रेण परिवृतो गुहः अस्मिन्वने काकुत्स्थौ रामलक्ष्मणौ समन्वेषतु ॥ ४ ॥

५–६] ति०टी०–चरिष्यामि अहमन्वेषयन्निति शेषः । पौरैः सह वर्तमानैरमात्यैर्द्विजातिभिः सह वर्तमानैर्गुरुभिश्च परिवृतः ॥ ५ ॥ ६ ॥

रा० टी०–अमात्यैरिति । अमात्यादिभिः परिवृतः स्वयमहं सर्वं वनं चरिष्यामि ॥ ५ ॥

गो० टी०–अमात्यैरिति । अमात्यैः सह पौरैः सह गुरुभिः द्विजातिभिश्च परिवृतः पद्भ्यां सर्वं वनं चरिष्यामीति संबन्धः ॥ ५ ॥

रा० टी०–यावदिति । यावन्न द्रक्ष्यामि तावत्कालं मे शान्तिर्न भविष्यति ॥ ६ ॥

गो० टी०–यावदिति । शान्तिः दुःखशान्तिः भङ्गलं वा । 'शान्तिः प्रशममङ्गले' इति वैजयन्ती ॥ ६ ॥ ७ ॥

७] ति० टी०–शुभाननमिति कर्मधारयः । शान्तिर्दुःखशान्तिः ॥ ७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–यावदिति । चन्द्रसंकाशं चन्द्रसदृशम् ॥ ७ ॥

८] ति० टी०–चन्द्रविमलोपमं विमलचन्द्रसदृशम् ॥८॥

रा० टी०–सिद्धार्थ इति । यः सौमित्रिर्लक्ष्मणः रामस्य मुखं पश्यति स सिद्धार्थः ॥ १० ॥

गो० टी०–सिद्धार्थ इति । चन्द्रविमलोपमं निर्मलचन्द्रसदृशम् ॥ १० ॥

९–११] ति० टी०–पार्थिवव्यञ्जनं रेखाध्वजकुलिशातपत्रादि । तावन्मे न शान्तिरित्यन्वयः ॥ ९–११ ॥

रा० टी०–यावदिति । पार्थिवव्यञ्जनान्वितौ पार्थिवव्यञ्जनैः पार्थिवचिह्नैः रेखाध्वजकुलिशातपत्रादिभिः अन्वितौ भ्रातुश्चरणौ यावच्छिरसा न प्रग्रहीष्यामि तावच्छान्तिर्न भविष्यति॥८॥

रा० टी०–यावदिति । यावन्नाभिषिक्तः तावच्छान्तिर्न॥९॥

गो० टी०–यावदिति । पार्थिवव्यञ्जनान्वितौ वज्रध्वजारविन्दाङ्कुशसुधाकलशादिमहाराजलक्षणयुक्तौ चरणौ यावन्न शिरसा धारयिष्यामि तावत्पर्यन्तं मे शान्तिर्न भविष्यति यदा रामः स्वयोग्यसिंहासनाधिराज्यमौलिं धृत्वा मम योग्यं श्रीपादाख्यमौलिं ददाति तदा मे सकलदुःखशान्तिर्भविष्यतीति भावः ॥ ८ ॥ ९ ॥

रा० टी०–कृतकृत्येति । या वैदेही सागरान्तायाः पृथिव्याः भर्तारमनुगच्छति सा कृतकृत्या कृतार्था ॥ ११ ॥

गो० टी०–कृतकृत्येति । महाकुलप्रसूता वैदेही महाभागा महाभाग्यवती कृतकृत्या कृतार्था च । तत्फलं तद्धेतुं चाह–भर्तारमिति । पृथिव्या भर्तारमित्यन्वयः ॥ ११ ॥

१२] ति० टी०–गिरिराजसमो हिमवत्सदृशः ॥ १२ ॥

१ धारिणेति गो. पाठः । २ वनमिति गो. पाठः । ३ द्रक्ष्यामि शुभमाननमिति गो. पाठः । ४ पलाशाक्षमिति गो. पाठः । ५ श्लोकोऽयमेकादशस्थं स्थाने गो. रा. पाठे । ६ धारयिष्यामीति गो. पाठः । ७ सुभग इति गो. पाठः । ८ राजोपम इति गो. पाठः ।

कृतकार्यमिदं दुर्गवनं व्यालनिषेवितम् । यदध्यास्ते महाराजो रामः शस्त्रभृतां वरः ॥ १३ ॥
एवमुक्त्वा महाबाहुर्भरतः पुरुषर्षभः । पद्भ्यामेव महातेजा प्रविवेश महद्वनम् ॥ १४ ॥
स तानि द्रुमजालानि जातानि गिरिसानुषु । पुष्पिताग्राणि मध्येन जगाम वदतां वरः ॥ १५ ॥
स गिरेश्चित्रकूटस्य सालमारुह्य सत्वरम् । रामाश्रमगतस्याग्नेर्ददर्श ध्वजमुच्छ्रितम् ॥ १६ ॥
तं दृष्ट्वा भरतः श्रीमान्मुमोद सहबान्धवः । अत्र राम इति ज्ञात्वा गतः पारमिवाम्भसः ॥ १७ ॥
स चित्रकूटे तु गिरौ निशम्य रामाश्रमं पुण्यजनोपपन्नम् ।
गुहेन सार्धं त्वरितो जगाम पुनर्निवेश्यैव चमूं महात्मा ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

रा० टी०–स्विति । यस्मिन् काकुत्स्थो रामो वसति सोऽसौ चित्रकूटः सुशुभः अत्यन्तं शुभकारकः ॥ १२ ॥

गो० टी०–सुभग इति । असौ चित्रकूटः सुभगः भाग्यशाली गिरिराजोपमश्च गिरिराजोपमः हिमवत्पर्वतसदृशः नन्दने नन्दयतीति नन्दनं चैत्ररथं सुभग इत्यादि सुभगः प्रदेशान्तरेभ्योऽतिरमणीयः सुभगः सर्वेषामुद्देश्यतमः अत्र हेतुः यस्मिन्नित्युत्तरार्धे वक्ष्यति । चित्रकूटः स्वभावतोऽपि रमणीयः असौ गिरिः अयोध्यां परित्यज्यापि रामेण आदरणीयः, यद्वा गिरिराजोपमः गिरिराजोऽत्र श्रीनिवासासन्निध्यस्थानभूतो वेङ्कटाचलः, तत्र उभयत्र हेतुमाह–यस्मिन्निति । काकुत्स्थः अयोध्याधिपतिः स्वदेशं विहाय अपरिचिते यस्मिन् वसति तत्रानुरूपं दृष्टान्तमाह–कुबेर इति । चैत्ररथवासयोग्यः कुबेरः इन्द्रोद्याने नन्दन इव, यद्वा स्वगृहं विहाय स्वगृहोद्याने विहरमाणो वैश्रवण इव वसतीत्यर्थः । इक्ष्वाकूणामियं भूमिः सशैलवनकानना इत्युक्तेश्चित्रकूटोऽपि रामविषयो हि नन्दनोपमानेन रामस्य चित्रकूटे भोग्यताप्रकर्ष उच्यते । काकुत्स्थः ककुत्स्थकुलोद्भवः यथा स्वकुलमकृतार्थयत् तथा स्ववासस्थलमप्यकृतार्थयदिति भावः, यद्वा कुबेर इव नन्दने भूवाचकेन कुशब्देन जगदुपलक्ष्यते बेरं शरीरं कुबेरो जगच्छरीरः परमात्मा नन्दन इव वैकुण्ठनन्दनवन इव ॥ १२ ॥

१३–१४] ति० टी०–कृतकार्यं कृतार्थम् स्थावरत्वमोचकरामपादरजोव्याप्ततयेति भावः । दुर्गं दुष्प्रवेशम् । व्यालाः सर्पाः ॥ १३ ॥ १४ ॥

रा० टी०–कृतेति । यन्महाराजो रामः अध्यास्ते तदिदं वनं कृतकार्यम् ॥ १३ ॥

गो० टी०–कृतकार्यमिति । कृतकार्यं कृतार्थं दुर्गं दुष्प्रवेशं व्यालनिषेवितं दुष्टसर्पाश्रितम् । कृतकृत्यत्वे हेतुः–यदित्यादि । वनं दुर्गमिति स्थलस्वभावेन वासानर्हत्वमुक्तं, महातेजा इत्यादिना रामवैभवापेक्षयापि वासानर्हत्वमुच्यते ॥ १३ ॥

रा० टी०–एवमिति । महाबाहुर्भरतः एवमुक्त्वा पद्भ्यामेव महद्वनं प्रविवेश ॥ १४ ॥

गो० टी०–एवमिति । महातेजा इत्यादिना पद्भ्यां गमनानर्हत्वमुच्यते ॥ १४ ॥

१५] ति० टी०–मध्येनेत्येनवन्तम् तयोगे तानीति द्वितीया । द्रुमजालानां मध्ये इत्यर्थः ॥ १५ ॥

रा० टी०–स इति । गिरिसानुषु जातानि द्रुमजालानि द्रुमसमूहान् मध्येन वदतां वरो भरतः जगाम ॥ १५ ॥

गो० टी०–स इति । द्रुमजालानि मध्येन द्रुमजालानां मध्येनेत्यर्थः, मध्यशब्दस्य दिग्वाचित्वात् "एनपा द्वितीया" इति द्वितीया । वदतां वर इत्यनेन रामसन्निधौ वक्तव्यविशेषं चिन्तयन्नेव जगामेत्युक्तम् ॥ १५ ॥

१६] ति० टी०–अग्नेर्ध्वजं धूमम् । 'रामाश्रमगतस्यान्ते' इति पाठे तदाश्रमगतस्य सालस्यान्ते उपरि बद्धमुच्छ्रितं ध्वजं कोविदारध्वजं दृष्ट्वेत्यर्थः । धूमदर्शनस्य पूर्वमेव जातत्वेन तस्यानिर्णायकत्वादिति कतकः ॥ १६ ॥

रा० टी०–स इति । स भरतः चित्रकूटस्य सालं वृक्षविशेषमारुह्य रामाश्रमगतस्य अग्नेर्ध्वजं धूमं ददर्श ॥ १६ ॥

गो० टी०–स इति । अग्नेर्ध्वजं धूमं पूर्वं धूमादर्शनम् अधुना समीपत्वात्तन्मूलदर्शनमिति न पुनरुक्तिः ॥ १६ ॥

१७] ति० टी०–तं ध्वजम् ॥ १७ ॥

रा० टी०–तमिति । तं धूमं दृष्ट्वा अत्रैव राम इति ज्ञात्वा अम्भसोऽगाधजलस्य पारं गत इव मुमोद ॥ १७ ॥

गो० टी०–तमिति । मुमोह मोहसदृशं पारवश्यं प्राप 'मुमोद' इति च पाठः अम्भसः समुद्रस्य पारं गत इव अभूदिति शेषः ॥ १७ ॥

१८] ति० टी०–पुण्यजनास्तपस्विनः । पुनर्निवेश्यान्वेषणनियोजितामपि चमूं स्थापयित्वा । गुहेनेति प्रधानजनोपलक्षणम् ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

रा० टी०–स इति । स भरतः पुण्यजनैर्महात्माभिः उपपन्नं

१ दुर्गमिति गो. रा. पाठः । २ महातेजा इति गो. पाठः । ३ महातेजा इति गो. पाठः । ४ महाबाहुरिति गो. पाठः । ५ आसाद्य पुष्पितमिति गो. पाठः । ६ मुमोहेति गो. पाठः ।

नवनवतितमः सर्गः ।

मातृरानेतुं वसिष्ठं संदिशन्प्रचलन्भरतस्तत्तदाश्रमलिङ्गानि शत्रुघ्नाय दर्शयन्पर्णशालामाससाद । रामादीन्दृष्ट्वा तेषां पादाभिवादने प्रयतमानोऽपि भरतस्तापसवेषदर्शनेन बाष्पाकुलनयनोऽबन्धुरेऽपि स्खलन्पपात । अभिवादयमानौ भरतशत्रुघ्नौ रामः समालिलिङ्ग । सुमन्त्रगुहरामलक्ष्मणाः समाजग्मुः ।

निविष्टायां तु सेनायामुत्सुको भरतस्ततः । जगाम भ्रातरं द्रष्टुं शत्रुघ्नमनुदर्शयन् ॥ १ ॥
ऋषिं वसिष्ठं संदिश्य मातृर्मे शीघ्रमानय । इति त्वरितमग्रे स जगाम गुरुवत्सलः ॥ २ ॥
सुमन्त्रस्त्वपि शत्रुघ्नमदूरादन्वपद्यत । रामदर्शनजस्तर्षो भरतस्येव तस्य च ॥ ३ ॥
गच्छन्नेवाथ भरतस्तापसालयसंस्थिताम् । भ्रातुः पर्णकुटीं श्रीमानुटजं च ददर्श ह ॥ ४ ॥

सेवितं रामाश्रमं निशम्य चमूमन्वेषणार्थं सहागतसैन्यं पुनर्निवेश्य संस्थाप्य गुहेन सार्धं त्वरितः सन् जगाम ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामयणशिरोमणावयोध्याकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

गो० टी०–स इति । निशम्य दृष्ट्वा दीर्घाभाव आर्षः, तत्समीपस्थजनेभ्यः श्रुत्वेति वार्थः अत एव पुण्यजनोपपन्नमित्युच्यते । गुहेनेति प्रधानजनोपलक्षणपरं चमूं पुनर्निवेश्य अन्वेषणार्थमागतां चमूमपि स्थापयित्वा महात्मा दृढाध्यवसायः ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्यानेऽष्टनवतितमः सर्गः ॥ ९८ ॥

१] **ति० टी०**–निविष्टायामिति । शत्रुघ्नमिति प्रतियोगे द्वितीया । शत्रुघ्नस्य रामाश्रमप्रत्यासत्तिंचिह्नादि दर्शयन्नित्यर्थः ॥ १ ॥

रा० टी०–सेनासंनिवेशानन्तरकालिकं वृत्तान्तमाह—निविष्टायामिति । सेनायां निविष्टायां संस्थापितायां सत्यामुत्सुकः भ्रातृदर्शनविषयकौत्साहवान् भरतः शत्रुघ्नमनुदर्शयन् भ्रातरं द्रष्टुं जगाम " दृशेश्च " इति कर्मत्वं शत्रुघ्नस्य ॥ १ ॥

गो० टी०–अथ भरतस्य रामसंगम एकोनशततमे–निविष्टायामित्यादि । निविष्टायां सेनायां स्वयं तत्र क्षणं निविष्टः सन् उत्सुकः साभिलाषः शत्रुघ्नमनुदर्शयन् अद्यः कर्मप्रवचनीयः शत्रुघ्नस्य रामाश्रमसामीप्यचिह्नानि प्रदर्शयन् जगाम ॥ १ ॥

२] **ति० टी०**–आनयेति संदिश्य स्वयं त्वरितः सन्नग्रे जगाम न तु मातृः प्रतीक्ष्य स्थित इत्यर्थः ॥ २ ॥

रा० टी०–ऋषिमिति । मे मातृः शीघ्रमानयेति वसिष्ठं संदिश्य संप्रार्थ्य गुरुवत्सलः रामविषयकातिप्रीतिमान् स भरतः त्वरितमग्रे जगाम ॥ २ ॥

गो० टी०–ऋषिमिति । मातृर्मे शीघ्रमानयेति ऋषिं वसिष्ठं संदिश्य जगामेत्यन्वयः, अनेन रामावासं निश्चित्य पश्चादानेष्यामीति धिया महासेनानिवेशे मातृर्निवेशितवानिति गम्यते ॥ २ ॥

३] **ति० टी०**–रामदर्शनजस्तर्षो रामदर्शनमुद्दिश्य जनितोऽभिलाषः । स भरतवत्तस्य च शत्रुघ्नस्य सुमन्त्रस्य च । अतः शत्रुघ्नं भरतमनुधावन्तमदूरात्तत्समीपं यथा भवति तथान्वपद्यतान्वधावत् ॥ ३ ॥

रा० टी०–सुमन्त्र इति । शत्रुघ्नमदूराच्छत्रुघ्नसमीपवर्तित्वं यथा भवति तथा सुमन्त्रोऽप्यन्ववर्तत, तत्र हेतुः–रामदर्शनजः ईप्सितरामदर्शनजनितः तर्षोऽत्यभिलाषः भरतस्येव तस्य सुमन्त्रस्याप्यस्तीति शेषः । चोऽप्यर्थे ॥ ३ ॥

गो० टी०–तत्पश्चात् शत्रुघ्नः तत्पश्चात्सुमन्त्रश्च गत इत्याह–सुमन्त्र इति । सुमन्त्रोऽप्यदूरात् समीपे शत्रुघ्नमन्वपद्यत अन्वगच्छत् । तत्र हेतुमाह–रामेति । रामदर्शनजस्तर्षः रामदर्शनमुद्दिश्य जनितोऽभिलाषः 'कामोऽभिलाषस्तर्षश्च' इत्यमरः । तस्य शत्रुघ्नस्य चकारात् सुमन्त्रस्य चास्ति हीत्यर्थः । सुमन्त्रस्य त्वरितागमनाद्भरिष्ठ एव मात्रानयने नियुक्त इत्यावेदितम् ॥ ३ ॥

४] **ति० टी०**–तापसानामालयैः सह संस्थिताम्, यद्वा तापसालयसमानसंस्थानां पर्णकुटीं पर्णप्राधान्येन निर्मितां कुटीं शालाम् । इयं दर्शनार्थमागततपस्व्यादिसंव्यवहारप्रयोजना उटजबहिःस्था, उटजं सभित्तिकवाटं दारुबद्धं गृहं सीतानिवेशार्थं कृतम् ॥ ४ ॥

रा० टी०–गच्छन्निति । गच्छन्नेव भरतस्तापसालयसंस्थितां तापसकुटीमध्ये वर्तिनीं भ्रातुः पर्णकुटीं पत्रप्रचुरशालामुटजं गृहान्तर्वर्ति काष्ठादिनिर्मितोन्नतस्थानविशेषं च ददर्श॥४॥

गो० टी०–गच्छन्निति । तापसालयसंस्थितां तापसालयानां मध्ये स्थितां तापसालयसमानसंस्थानामिति वार्थः पर्णकुटीं अग्न्यगारभूतां पर्णशालाम् उटजं दिदृक्षया समागतैः तापसैः सह सुखावस्थानार्थमुपकल्पितां पर्णशालां, यद्वा भ्रातुः पर्णकुटीं सीतया सह शयनार्थं निर्मितां पर्णशालां श्रीमान् तादात्विकप्रीतिजनितकान्तिमान् उटजं दिवावस्थानार्थं कल्पितं

---

१ तदेति गो. पाठः । २ अन्ववर्ततेति रा. पाठः ।

शालायास्त्वग्रतस्तस्या ददर्श भरतस्तदा । काष्ठानि चावभग्नानि पुष्पाण्यैपचितानि च ॥ ५ ॥
स लक्ष्मणस्य रामस्य ददर्शाश्रममेयुषः । कृतं वृक्षेष्वभिज्ञानं कुशचीरैः क्वचित्क्वचित् ॥ ६ ॥
ददर्श भवने तस्मिन्महतः संचयान्कृतान् । मृगाणां महिषाणां च करीषैः शीतकारणात् ॥ ७ ॥
गच्छन्नेव महाबाहुर्द्युतिमान्भरतस्तदा । शत्रुघ्नं चाब्रवीद्धृष्टस्तानमात्यांश्च सर्वशः ॥ ८ ॥
मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् । नातिदूरे हि मन्येऽहं नदीं मन्दाकिनीमितः ॥ ९ ॥
उच्चैर्बद्धानि चीराणि लक्ष्मणेन भवेदयम् । अभिज्ञानकृतः पन्था विकाले गन्तुमिच्छता ॥ १० ॥
ईदृशेदात्तदन्तानां कुञ्जराणां तरस्विनाम् । शैलपार्श्वे परिक्रान्तमन्योन्यमभिगर्जताम् ॥ ११ ॥

पर्णमण्डपं, यद्वा पर्णशालां महाशालाम् उटजं तन्मध्यवर्ति सदाद्यस्थानास्थानं, तथैव वक्ष्यति ददर्श महतीमित्यादिना ददर्श चिह्नैरुत्प्रेक्षितवान् ॥ ४ ॥

५] ति० टी०–तस्याः शालायाः पर्णकुटीसंज्ञायाः । अवभग्नानि होमार्थमपचितानि बल्यर्थं संपादितानि ॥ ५ ॥

रा० टी०–शालाया इति । अवभग्नानि हवनोपयोगितया छिन्नानि काष्ठानि अपचितानि पूजाङ्गत्वेन संपादितानि पुष्पाणि च शालाया अग्रतः अग्रे ददर्श ॥ ५ ॥

गो० टी०–चिह्नान्येवाह–शालाया इत्यादिना । काष्ठानि रात्रौ प्रकाशाय ज्वलनीयानि, पुष्पाणि पूजार्थानि ॥ ५ ॥

६] ति० टी०–एयुषः आङ्पूर्वादिणः क्वसुः । कुशैर्वल्कलैश्च मार्गपरिज्ञानार्थं कृतमभिज्ञानं चिह्नं ददर्श ॥ ६ ॥

रा० टी०–स इति । आश्रममेयुषः नदीसमीपादिदेशाद्गमनकर्तुः लक्ष्मणस्य रामस्य च कृतं कुशचीरैः दर्भैः पटखण्डैश्च वृक्षेषु क्वचित्क्वचित्कस्यांचित्कस्यांचिच्छाखायां कृतमभिज्ञानं मार्गबोधकचिह्नं ददर्श ॥ ६ ॥

गो० टी०–स लक्ष्मणस्येति । ईयुषः जलाशयादाश्रमं गच्छतो रामस्य "उपेयिवाननाश्वानश्चानश्च" इत्यत्र नात्रोपसर्गस्तन्त्रम् अन्योपसर्गपूर्वान्निरुपसर्गाच्च भवत्येवेति वृत्तिकृतोक्तत्वाद्वृपसर्गपूर्वादिणः क्वसुः कुशादिभिः कृतम् अभिज्ञानं चिह्नम् अन्योन्यस्य गमनागमनपरिज्ञानार्थं कृतं चिह्नं ददर्श ॥ ६ ॥

७] ति० टी०–शीतकारणाच्छीतनिवृत्तिकारणात्तद्रूपप्रयोजनार्थं मृगादीनां करीषैः कृतान्संचयान्ददर्श । चैत्रशुक्लदशम्यां प्रस्थानेन तत्र काले वैशाखान्तमपरराते शीतस्य जायमानत्वात् ॥ ७ ॥

रा० टी०–ददर्शेति । तस्मिन्प्रत्यक्षीभूते भवने पर्णशालासमीपे शीतकारणाच्छीतनिवारणहेतोः मृगाणां महिषाणां च करीषैः कृतान् संचयान् ददर्श 'गोविट् गोमयमस्त्रियाम् । तत्तुशुष्कं करीषोऽस्त्री ' इत्यमरः ॥ ७ ॥

गो० टी०–ददर्श चेति । करीषैः कृतान् संचयानित्यन्वयः, शीतकारणात् शीतनिवारणार्थम् ॥ ७ ॥

८] ति० टी०–एवमेतान्पदार्थान्पश्यन्गच्छन्नेव शत्रुघ्नमब्रवीत् ॥ ८ ॥

रा० टी०–गच्छन्निति । तदा रामस्थितिबोधकचिह्नादिदर्शनोत्तरकाले हृष्टो महाबाहुर्भरतः शत्रुघ्नं सर्वशोऽमात्यांश्च अब्रवीत्। सर्वश इत्यनेन सुमन्त्रातिरिक्तानामप्यागमनं सूचितम्॥८॥

गो० टी०–गच्छन्निति । अमात्यान् सुमन्त्रं बहुवचनं पूजार्थं, यद्वा अनेनैवावगम्यते अन्येऽप्यमात्याः सुमन्त्रेण सहागता इति ॥ ८ ॥

९] ति०टी०–मन्दाकिनीमित इति। आश्रम इति शेषः॥९॥

रा० टी०–तद्वचनाकारमाह–मन्ये इति । यं देशं भरद्वाजोऽब्रवीत् तं देशं वयं प्राप्ताः स्म इति मन्ये असाधारणलक्षणैर्निश्चिनोमि अत एव इतः अस्मात्स्थानान्नातिदूरे समीप एवेत्यर्थः, मन्दाकिनीं नदीं मन्ये निश्चिनोमि ॥ ९ ॥

गो० टी०–मन्य इति । इतः अस्मात्प्रदेशात् मन्दाकिनीं नातिदूरे मन्ये प्रत्यासन्नां मन्य इत्यर्थः, अतः यं देशं भरद्वाजोऽब्रवीत् तं देशं प्राप्ताः स्मेति मन्ये । प्राप्ताः स्मेत्येव वक्तव्ये मन्य इत्युक्त्या अयमर्थोऽवगम्यते–कैकेय्या राजन्नित्याद्भुतस्य भाग्यहीनस्य मे नेयं तदेशप्राप्तिर्भवितुमर्हति किंतु भ्रमस्वप्नादिष्वन्यतमोऽयमिति ॥ ९ ॥

१०] ति० टी०– यत उच्चैर्बद्धानि चीराणि तस्माद्विकाले मार्गस्य स्पष्टदर्शनायोग्ये काले जलाहरणार्थं गन्तुमिच्छता लक्ष्मणेनाभिज्ञानकृतः कृताभिज्ञान आश्रमपन्था अयमेव भवेत् ॥ १० ॥

रा० टी०–लक्षणान्येवाह–उच्चैरिति । यतः उच्चैः अत्युन्नतवृक्षप्रदेशे बद्धानि चीराणि लक्ष्यन्त इति शेषः अतः विकाले अन्धकारादिसमये गन्तुं जलाद्याहरणार्थमिति शेषः, इच्छता लक्ष्मणेन अभिज्ञानकृतः लक्ष्मणकर्तृकचिह्नज्ञाप्यः पन्थाः रामाश्रमप्रापको मार्गः अयं भवेत् ॥ १० ॥

गो० टी०–उच्चैरिति । उच्चैर्बद्धानि चीराणि उन्नतप्रदेशे चीराणि बद्धानि दृश्यन्ते तस्मादयं पन्थाः विकाले अकाले सायंकालादौ गन्तुमिच्छता फलमूलजलादिसंग्रहणार्थं गन्तुमिच्छता लक्ष्मणेनाभिज्ञानकृतः कृताभिज्ञानो भवेत् अतोऽनेनैवास्माभिर्गन्तव्यमिति भावः ॥ १० ॥

११] ति० टी०–अभिज्ञानकरणकारणं वनमार्गं दर्शयति–इतश्चेति । 'इदं च' इति पाठान्तरम् । उदात्तदन्तान

---

१ उपचितानीति गो. पाठः । २ ईयुष इति गो. पाठः । ३ च वने इति गो पाठः । ४ इदमिति गो. रा. पाठः ।

यमेवाधातुमिच्छन्ति तापसाः सततं वने । तस्यासौ दृश्यते धूमः संकुलः कृष्णवर्त्मनः ॥ १२ ॥
अत्राहं पुरुषव्याघ्रं गुरुसत्कारकारिणम् । आर्यं द्रक्ष्यामि संहृष्टं महर्षिमिव राघवम् ॥ १३ ॥
अथ गत्वा मुहूर्तं तु चित्रकूटं स राघवः । मन्दाकिनीमनु प्राप्तस्तं जनं चेदमब्रवीत् ॥ १४ ॥
जगत्यां पुरुषव्याघ्र आस्ते वीरासने रतः । जनेन्द्रो निर्जनं प्राप्य धिङ्मे जन्म सजीवितम् ॥ १५ ॥
मत्कृते व्यसनं प्राप्तो लोकनाथो महाद्युतिः । सर्वान्कामान्परित्यज्य वने वसति राघवः ॥ १६ ॥

महादन्तानाम् । परिक्रान्तं परिक्रमणं स्यात् गमनमार्ग इति यावत् । तत्र गमननिर्देश्यर्थं चेदमभिज्ञानकारणमिति भावः॥११॥

रा०टी०–इदमिति । इदमुदात्तदन्तानां महादन्तविशिष्टानां तरस्विनामत एव अन्योन्यमभिगर्जतां गजानां परिक्रान्तं परिक्रमणं मार्ग इत्यर्थः ॥ ११ ॥

गो० टी०–मार्गचिह्नकरणं गजपदमर्दनक्लिष्टत्वेन दुर्शनादित्याशयेनाह–इदं चेति । उदात्तदन्तानां महादन्तानाम् 'महत्युदात्त उच्चोक्तौ' इति वैजयन्ती । तरस्विनां वेगवताम् अन्योन्यमभिगर्जताम् अन्योन्यं प्रति गर्जताम् गजानां शैलपार्श्वे परिक्रान्तमिदं परिक्रमणस्थानमिदम् "क्तोऽधिकरणे च-"इत्यधिकरणे क्तः इदमेषामासितमित्यादिवत्, अस्मिन्मार्गे कुञ्जराः परिक्रान्ता इत्यर्थः । अन्योन्यकोपातिशयेन वेगादन्तादन्तिप्रहारं कुर्वतामाश्रमप्रवेशस्याशक्यत्वादाश्रमप्रान्तगमनमाश्रमप्रदेशं सूचयतीत्यर्थः ॥ ११ ॥

१२–१३] ति० टी०–तापसा वने यमाधातुं सायंप्रातर्होमार्थमिच्छन्ति तस्यायं दृश्यते धूमः ॥ १२ ॥ १३ ॥

रा० टी०–यमिति । यं सततमाधातुं विधिना संस्थापयितुं तापसा इच्छन्ति तस्य कृष्णवर्त्मनो वह्नेः असौ धूमो दृश्यते 'कृष्णवर्त्मा पुमानग्नौ दुराचारे विधुन्तुदे' इति मेदिनी ॥ १२ ॥

गो० टी०–रामाश्रमस्यात्यन्तसन्निहितत्वज्ञापकं धूमबाहुल्यं दर्शयति–यमिति । तापसाः यमग्निमाधातुमिच्छन्ति सायंप्रातर्होमार्थं सर्वदा रक्षितुमिच्छन्ति तस्य कृष्णवर्त्मनः संकुलोऽसौ धूमो दृश्यते पचनाग्नेर्होमाग्नेश्च व्यावृत्तं संततस्थायिगार्हपत्याग्निं दर्शयितुं संकुलशब्दः अतिनिबिड इत्यर्थः । पचने ज्वालानां होमे च शरोऽङ्गाराणामपेक्षितत्वान्न तदा धूमनिबिडसंभव इति भावः । अनेन रामस्याग्न्याधानाभावाच्छ्रौताग्निरत्र नोच्यते किंतु धार्यः स्मार्ताग्निः यदि हि तस्य त्रेताग्निः स्यात्तदा रामः कमलपत्राक्षः पुरोधसमथाब्रवीत् । अग्निहोत्रं व्रजत्वग्ये सर्पिर्ज्वलितपावकम् इतिचरमयात्रायामग्निहोत्रपुरस्कारश्रवणाद्वनयात्रायामपि तथा दृश्येत अनुसरन्तोऽपि हि पौरवृद्धाः साग्नय एव समागता इत्युच्यन्ते । किंच दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिम् । कुरङ्गशृङ्गपाणिं च पश्यन्ती त्वां भजाम्यहम् इति सीतामनोरथश्रवणाद्राज्याभिषेकात्पूर्वं न यज्ञोऽनुष्ठित इति गम्यते ततोऽयमग्निर्गृह्याग्निरेव । न च तस्यात्यानयनं न पूर्वमुक्तमिति वाच्यं, तस्यात्मसमारोपणेनानेतुं शक्यत्वात्[1]। न च आत्मसमारोपणेऽपि सायंप्रातर्होमः कार्यः स तु नोक्तः प्रत्युत तमसातीरे गङ्गाकूले वटमूले भरद्वाजाश्रमे यमुनातटे च संध्यावन्दनमेवोक्तम् अत्र च श्लोके तापसवनशब्दाभ्यां वने तापसानां शीतनिवारणप्रकाशकरणकन्दमूलादिपचनसाधनतया संग्राह्य एवाग्निरुच्यत इति वक्तुं शक्यते आधातुं संग्रहीतुमित्यर्थः । अतोऽयमग्निः पचनार्थ एव न तु धार्यः स्मार्ताग्निरिति चेन्न, प्रागुदक्प्रवणां वेदिं विशालां दीप्तपावकामिति वक्ष्यमाणविरोधात् । नह्यसंस्कृताग्नेर्वेदिसंबन्धः प्रसिद्धः प्रागुदक्प्रवणत्वादि वेदिलक्षणं चोच्यमानं वेदिं तत्स्थमग्निं च संस्कृताववगमयति यद्येवं कथं तर्हि सायंप्रातर्होमावचनमिति चेन्न श्लोकं स्वच्छन्दगामिना मुनिना असत्यामिच्छायामसति च फले पुनः पुनर्वक्तव्यं वक्ष्यति तु उपरिष्टात् सुतीक्ष्णाश्रमे–अथ तेऽग्निं सुरांश्चैव वैदेही रामलक्ष्मणौ । काल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः । सुतीक्ष्णमभिगम्यैवमिदं वचनमब्रुवन् ॥ इति । अत्रानुदितहोमपक्षेण उदयात्पूर्वमग्निकार्यवचनादग्निमित्येकवचनाच्च औपासनं सम्यगुक्तमिति, एवमेव सर्वत्र द्रष्टव्यमिति । अत्र चाग्निकार्ये रामस्य साक्षात्प्रधानकर्तृत्वेन सीतायाः सहभावेन प्रणयनादिना च लक्ष्मणस्य समिदादिसंपादनरूपसहकारित्वेन चान्वय इति ज्ञेयम् । तपस्विशरणे वन इत्यनेनातिसंकटदेशेऽपि यथावदनुष्ठानश्रद्धाविशेष उच्यते अतश्चतुर्दशसु वनवाससंवत्सरेषु सीताहरणपर्यन्तं रामस्य चित्रकूटादिपञ्चवट्यन्तेषु प्रदेशेषु यत्र माससंवत्सरादिवासेन चिरकालावस्थानं तत्र बहिः स्मार्तनित्याग्निधारणम् अन्यत्रात्मनि समिधि वा समारोप्य होमकालेऽवरोप्य सायंप्रातरौपासनामिति दिक् । अस्मिन् श्लोके च तापसा यमाधातुमिच्छन्तीत्यस्यार्थश्च वर्णितः तेन च रामाश्रमचिह्नत्ववत्पावनत्वमप्युक्तं भवति ॥ १२ ॥

रा० टी०–अत्रेति । पुरुषव्याघ्रं पुरुषश्रेष्ठं गुरुसत्कारकारिणमतिसत्कारकरणशीलं महर्षिमिव राघवं रामं द्रक्ष्यामि॥१३॥

गो० टी०–अत्रेति । गुरुसंस्कारकारिणं गुरुसंस्कारः श्रेष्ठसंस्कारः मन्त्रोपदेशादिस्तत्कारिणम् ॥ १३ ॥

१४] ति० टी०–स राघवो भरतो मन्दाकिनीमनु चित्रकूटं प्राप्त इत्यन्वयः । तं जनममात्यादिजनम् ॥ १४ ॥

रा० टी०–अथेति । अथ एवं विचारकरणादनन्तरं मन्दाकिनीमनुप्राप्तो राघवो भरतः चित्रकूटं मुहूर्तं मुहूर्तेन गत्वा तममात्यादिजनमिदमब्रवीत् ॥ १४ ॥

गो० टी०–अथेति । राघवः भरतः तं जनं सहागतं शत्रुघ्नादिकम् ॥ १४ ॥

१५–१६] ति० टी०–वीरासने योगिनामासने॥१५॥१६॥

१ संस्कारेति गो. पाठः । २ अत्वेति रा. पाठः ।

इति लोकसमाकुष्टः[1] पादेष्वद्य प्रसादयन् । रामं तस्य पतिष्यामि सीतायाः लक्ष्मणस्य च ॥ १७ ॥
एवं स विलपंस्तस्मिन्वने दशरथात्मजः । ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् ॥ १८ ॥
सालतालाश्वकर्णानां पर्णैर्बहुभिरावृताम् । विशालां मृदुविस्तीर्णां[2] कुशैर्वेदिमिवाध्वरे ॥ १९ ॥
शक्रायुधनिकाशैश्च कार्मुकैर्भारसाधनैः । रुक्मपृष्ठैर्महासारैः शोभितां शत्रुबाधकैः ॥ २० ॥
अर्करश्मिप्रतीकाशैर्घोरैस्तूणगतैः[3] शरैः । शोभितां दीप्तवदनैः सर्पैर्भोगवतीमिव ॥ २१ ॥
महारजतवासोभ्यामसिभ्यां च विराजिताम् । रुक्मबिन्दुविचित्राभ्यां चर्मभ्यां चापि शोभिताम्॥२२॥

रा० टी०—तद्वचनाकारमाह—जगत्यामिति । जनेन्द्रो रामः निर्जनं जनरहित्यं प्राप्य वीरासने रतः कृतवीरासन इत्यर्थः, जगत्यां राजोचितासनरहितभूमौ आस्ते अतः सजीवितं जीवितसहितं मे जन्म धिक् ॥ १५ ॥

गो० टी०—जगत्यामित्यादि । जगत्यां भूमौ वीरासने दक्षिणजानुपरिन्यस्तवामपादतयावस्थाने धिङ् मे जन्म सजीवितमिति मे जन्म प्राणनं च धिगित्यर्थः ॥ १५ ॥

रा० टी०—नन्वं तव कोऽपराधो यदात्मानं धिक्करोषीत्यत आह—मदिति । लोकनाथो महाद्युतिः यो राघवः सर्वान् कामान् परित्यज्य वने वसति सः मत्कृते मत्प्रयत्ने मत्कर्तृकमातुलगृहप्राप्तौ सत्यामित्यर्थः, व्यसनं वननिवासक्लेशं प्राप्तः एतेन मत्कर्तृकस्थितौ तत्प्रव्राजनं न स्यादिति सूचितं तेन चिरं कालमन्यत्र स्थितिमत्त्वेन ममैवापराध इति ध्वनितम् ॥ १६ ॥

गो० टी०—मत्कृत इति । मत्कृते व्यसनं प्राप्तः कैकेय्या मम राज्यप्रापणकृते राज्यभंशरूपव्यसनं प्राप्तः इति लोकसमाकुष्टः एवंप्रकारेण लोकैरपवादं प्रापितः प्रसादयन् प्रसादनाद्धेतोः लक्ष्मणस्य चेति तस्य कनिष्ठत्वेऽपि कार्यगौरवात्पादपतनम् यदि मया प्रसाद्यमाने रामे लक्ष्मणः कैकेयीकृतापकारं मय्यारोप्य मा प्रसीदेति रामं निरुन्ध्यात्तर्हि लक्ष्मणस्यापि पादयोर्निपत्य तमपि प्रसादयिष्यामि, यदि रामप्रसादनरूपं कार्यं केवलं सुसाधितं भवेत् तदानीं कनिष्ठपादपतनं दोषायेति भरतहृदयम् । पाठभेदः 'सीतायाश्च पुनः पुनः' इतिपाठः । 'सीताया लक्ष्मणस्य च' इति पाठे रामभक्तत्वेन वयो नादृतमिति बोध्यम् 'न परीक्ष्य वयो वन्द्या' इति स्मरणात् ॥ १६ ॥ १७ ॥

१७–१८] ति० टी०—इति लोकेन समाकुष्टो निन्दितो यस्मादतो मे जन्म धिक् । सोऽहमेतदपयशःपरिहाराय रामं प्रसादयन्रामप्रसादहेतवे तस्य रामस्य पादेषु पूजायां बहुवचनम् सीताया लक्ष्मणस्य च पादयोः पतिष्यामि । स्वापराधप्रसादनाय कनीयःस्वपि प्रणामो लोकप्रसिद्ध इति कतकः । अन्यस्तु श्रद्धाजाड्यात् 'सीतायाश्च पुनः पुनः' इति पाठं कल्पयति ॥ १७ ॥ १८ ॥

रा० टी०—इतीति । इति अनेन प्रकारेण लोको विचारः तेन समाकुष्टः व्याकुलचित्तोऽहं रामं प्रसादयन्लँक्ष्मणस्य सन्निधौ तस्य रामस्य सीतायाश्च पादेषु अद्य पतिष्यामि लक्ष्मणस्य सन्निधावित्यनेन मदतिप्रार्थनादर्शनं तस्मिन्नप्यार्द्रचित्तत्वं जनयिष्यतीति व्यञ्जितम् ॥ १७ ॥

रा० टी०—एवमिति । एवं विलपन् दशरथात्मजो भरतः महतीं विशालां पुण्यां पुण्यप्रापिकां मनोरमां पर्णशालां ददर्श १८

गो० टी०—एवमित्यारभ्य गुहामिवेत्यन्तमेकं वाक्यम् । सालोऽश्वकर्णादन्यो वृक्षः अश्वकर्णः सर्जतरुः तालो मृदुपर्णः श्रीतालः कार्मुकैरिति बहुवचनादभ्यासयोग्यं कार्मुकान्तरमस्तीति गम्यते । भारसाधनैः गुर्ववयवैः, यद्वा अतिगुरुतररणकार्यसाधनभूतैः, यद्वा भारो धनुष्परिमाणविशेषः । यथोक्तं धनुर्वेदे ईशानसंहितायाम् ' भारं पलशतं विदुः ' तेन भारेण चापानां प्रमाणमुपलभ्यत इति, रुक्मपृष्ठैः कनकान्तर्लिप्तपृष्ठप्रदेशैः महासारैः महास्थिरांशैः ' सारो बले स्थिरांशे च ' इत्यमरः । भोगवती सर्पनगरी महारजतवासोभ्यां स्वर्णमयकोशाभ्यां रुक्मबिन्दुविचित्राभ्यां शोभाविशेषाय मध्ये मध्ये शिल्पिनिर्मितकनकबिन्दुविचित्राभ्याम् । पाठभेदः आत्मबिन्दुविचित्राभ्यां व्याघ्रचर्मकृततया स्वाभाविकनानावर्णबिन्दुविचित्राभ्यां चर्मभ्यां खेटकाभ्याम् 'खेटकं फलकं चर्म' इति हलायुधः । गोधाङ्गुलित्रैः ' गोधा ज्याघातवारणम् ' अङ्गुलित्रमङ्गुलित्राणम् उपलक्षणे तृतीया शोभितामित्यनुकर्षो वा, अनाधृष्याम् अप्रधृष्याम् ॥ १८–२३ ॥

१९] ति० टी०—साला वटपलाशादिदृढविशालपर्णवन्तो वृक्षाः । अश्वकर्णो वृक्षविशेषः ॥ १९ ॥

२०] ति० टी०—भारसाधनैरतिगुरुकार्यसाधनैः । 'सारो बले स्थिरांशे च' ॥ २० ॥

रा० टी०—शालेति । शालतालाश्वकर्णानां सालादिवृक्षविशेषाणां बहुभिः विपुलैः पर्णैः पत्रैः प्रावृतामध्वरे यज्ञे विशालां विपुलस्थलवतीं वेदीमिव कुशैर्मृदुविस्तीर्णां शक्रायुधनिकाशैः शक्रधनुस्सदृशैः भारसाधनैः गुर्ववयवविशिष्टैः रुक्मपृष्ठैः सुवर्णपृष्ठविशिष्टैर्महासारैः अतिपुष्टैः शत्रुबाधकैः कार्मुकैर्धनुर्भिः शोभिताम् ॥ १९ ॥ २० ॥

२१] ति० टी०—भोगवती नागलोकः ॥ २१ ॥

रा० टी०—अर्करश्मिप्रतीकाशैः सूर्यकिरणसदृशैर्घोरैर्भयंकरैः शरैः दीप्तवदनैः सर्पैर्भोगवतीमिव शोभिताम् ॥ २१ ॥

२२] ति० टी०—महारजतवासोभ्यां स्वर्णमयकोशाभ्याम् । चर्म फलकम् ॥ २२ ॥

१ आकुष्ट इति रा. पाठः । २ मृदुभिरिति गो. पाठः । ३ तूणिगतैरिति गो. पाठः ।

गोधाङ्गुलित्रैरासक्तैश्चित्रकाञ्चनभूषितैः । अरिसंघैरनाधृष्यां मृगैः सिंहगुहामिव ॥ २३ ॥
प्रागुदक्प्रवणां वेदिं विशालां दीप्तपावकाम् । ददर्श भरतस्तत्र पुण्यां रामनिवेशने ॥ २४ ॥
निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम् । उटजे राममासीनं जटामण्डलधारिणम् ॥ २५ ॥
कृष्णाजिनधरं तं तु चीरवल्कलवाससम् । ददर्श राममासीनमभितः पावकोपमम् ॥ २६ ॥
सिंहस्कन्धं महाबाहुं पुण्डरीकनिभेक्षणम् । पृथिव्याः सागरान्ताया भर्तारं धर्मचारिणम् ॥ २७ ॥
उपविष्टं महाबाहुं ब्रह्माणमिव शाश्वतम् । स्थण्डिले दर्भसंस्तीर्णे सीतया लक्ष्मणेन च ॥ २८ ॥
तं दृष्ट्वा भरतः श्रीमान्दुःखमोहपरिप्लुतः । अभ्यधावत धर्मात्मा भरतः केकयीसुतः ॥ २९ ॥
दृष्ट्वैव विललापार्तो बाष्पसंदिग्धया गिरा । अशक्नुवन्धारयितुं धैर्याद्वचनमब्रुवन् ॥ ३० ॥

रा० टी०–महाराजतवासोभ्यां स्वर्णमयकोशविशिष्टाभ्यामसिभ्यां खड्गाभ्यां विराजितां रुक्मबिन्दुभिः स्वर्णपुष्पैर्विचित्राभ्यां चर्मभ्यां च शोभिताम् ॥ २२ ॥

२३] ति० टी०–काञ्चनभूषितैर्गोधाङ्गुलित्रैः उपलक्षितामिति शेषः । सिंहगुहामिव पर्णशालां ददर्शेत्यन्वयः ॥ २३ ॥

रा० टी०–चित्रकाञ्चनभूषितैः आसक्तैः संस्थापितैः गोधाङ्गुलित्रैर्मृगैः सिंहगुहामिव अरिसंघैः अनाधृष्याम् ॥ २३ ॥

२४] ति० टी–प्रागुदक्प्रवणामीशानभागे निम्नाम् ॥२४॥

रा० टी०–प्रागुदक्प्रवणामीशानदिग्भागे निम्नां दीप्तः पावको यस्यां तां पुण्यां वेदीं तत्र प्रसिद्धे रामनिवेशने पर्णशालायां भरतो ददर्श । षण्णामेकत्रान्वयः ॥ २४ ॥

गो० टी०–प्रागुदक्प्रवणामिति । प्रागुदक्प्रवणां प्रागुदग्भागे क्रमनिम्नाम् 'प्रवणो दक्षिणे प्रह्वे क्रमनिम्ने चतुष्पथे' इति वैजयन्ती । तत्र रामनिवेशने पूर्वोक्तपर्णशालायामित्यर्थः ॥२४॥

२५] ति० टी०–निरीक्ष्येति । अग्रिमिति शेषः । गुरुं रामं ददर्श । कृष्णाजिनेत्यायुच्यमानविशेषणं रामम् ॥ २५ ॥

रा० टी०–निरीक्ष्येति । निरीक्ष्य अवलोक्य पर्णशालामिति शेषः, उटजे काष्ठादिनिर्मितोन्नतस्थानविशेषे आसीनं गुरुं रामं ददर्श ॥ २५ ॥

गो० टी०–निरीक्ष्येति । जटामण्डलधारित्ववैलक्षण्येन निश्चयार्थं मुहूर्तं निरीक्ष्य तेजोविशेषेण सामान्येन स्वगुरुं ज्ञातवानित्यर्थः । अस्मिन् श्लोके उत्तरार्धे जटामण्डलधारिणमित्यत्र णकारो गायत्र्याः सप्तमाक्षरं षट्सहस्रं श्लोका गताः॥२५॥

२६–२७] ति० टी–अभितः समीपे ददर्श ॥ २६ ॥ २७ ॥

२८] ति० टी०–शाश्वतं ब्रह्माणं हिरण्यगर्भम् ॥ २८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—कृष्णेति । पावकोपमं रामं ददर्श ॥ २६ ॥

रा० टी०–सिंहेति । सागरान्तायाः पृथिव्याः भर्तारं प्रकटतयापि रक्षकं दर्भैः कुशैः संस्तीर्णे स्थण्डिले शाश्वतं नित्यं ब्रह्माणमिव उपविष्टं तं रामं भरतो दृष्ट्वा दुःखमोहपरिप्लुतः सन् अभ्यधावत द्रुतमगच्छत् । श्लोकत्रयमेकान्वयि ॥ २७–२९ ॥

गो० टी०–विशेषतो दर्शनमाह–तं त्वित्यादिना । महाहवसनोपेतस्य इदानीं ततो वैलक्षण्यमाह–तं त्विति । तदेव वैलक्षण्यं दर्शयति–कृष्णाजिनधरमिति । कृष्णाजिनधरम् उत्तरीयतया कृष्णाजिनधरम् अधराम्बरत्वेन चीरवल्कलवाससं कृष्णाजिनधरं चीरवल्कलवाससं पूर्वस्माच्छोभाविशेषयुक्तं रामं वल्कलादिधारणेऽप्यपरावर्तमानं रामणीयकमुच्यते आसीनं किंचिदासनमास्थायात्मानं ध्यायन्तम् अभितः पावकोपमं तादृशतपोविशेषेण समन्तात्तेजःपरिप्लुतं, यद्वा 'नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा' इत्युक्तरीत्या विद्युल्लेखामध्यवर्तिनीलतोयदमिव स्थितमित्यर्थः, यद्वा विरोधिनामनभिभवनीयमित्यर्थः, यद्वा उटजे राममासीनम् अयोध्यास्थितसमाजापेक्षया अल्पतरापीयं सभा महती जाता कुतः अभितः पावकोपमं तत्सभायां समीपस्थस्य भातुरपि अत्र समीपमागन्तुं न शक्यते नहि ज्वलत्यनले कस्यापि समीपमागन्तुं शक्यम्, यद्वा उटजे राममित्यत्र रामं श्यामम् अधो रामौ सावित्रावित्यत्र तथा प्रयोगात्, यद्वा पावकोपमं दुर्दर्शमित्यर्थः । अत एव पूर्वश्लोके निरीक्ष्य स मुहूर्तमित्युक्तं ब्रह्मापेक्षयास्य वैलक्षण्यमुच्यते–शाश्वतमिति स्थण्डिले भूमौ ॥ २६–२८ ॥

२९] ति० टी०–अभ्यधावत धावन्निव त्वरया जगाम । अत्र भरतस्यैव कवेरपि वर्णनीयमयीभावेनातिहर्षाविष्टत्वादत्र प्रकरणे द्विरुक्तिर्न दोषाय ॥ २९ ॥

गो० टी०–तमिति । द्वितीयो भरतशब्द उत्तरश्लोकेन संबध्यते ॥ २९ ॥

३०] ति० टी०–दृष्ट्वैव दर्शनमात्रेणैवार्तः खिन्नः सन् तां चार्तिं धैर्याद्धारयितुमशक्नुवन् अत एव बाष्पसंदिग्धवर्णया गिरा वागिन्द्रियेण वचनमब्रुवन्नव्यक्तं वदन्विललाप ॥ ३० ॥

रा० टी०–दृष्ट्वेति । दृष्ट्वैव आर्तः सेवकादिरहितरामदर्शनजनितखेदं प्राप्तो भरतः धैर्याद्धारयितुं खेदं निवारयितुमशक्नुवन् अत एव वचनं व्यक्तवाचमब्रुवन् सन् बाष्पसंदिग्धया गद्गदाक्षरयेत्यर्थः, गिरा विललाप ॥ ३० ॥

गो० टी०–दृष्ट्वेति । दृष्ट्वैव दर्शनमात्रेणेत्यर्थः । आर्तः

१ चित्रैरिति गो. पाठः । २ तं तु कृष्णेति गो. पाठः । ३/शोकेति गो. पाठः । ४ धारयितुमिति गो. पाठः । ५ अब्रवीदिति गो. पाठः ।

यः संसदि प्रकृतिभिर्भवेद्युक्त उपासितुम् । वन्यैर्मृगैरुपासीनः सोऽयमास्ते ममाग्रजः ॥ ३१ ॥
वासोभिर्बहुसाहस्रैर्यो महात्मा पुरोचितः । मृगाजिने सोऽयमिह प्रवस्ते धर्ममाचरन् ॥ ३२ ॥
आधारयद्यो विविधाश्चित्राः सुमनसः सदा । सोऽयं जटाभारमिमं सहते राघवः कथम् ॥ ३३ ॥
यस्य यज्ञैर्यथादिष्टैर्युक्तो धर्मस्य संचयः । शरीरक्लेशसंभूतं स धर्मं परिमार्गते ॥ ३४ ॥
चन्दनेन महार्हेण यस्याङ्गमुपसेवितम् । मलेन तस्याङ्गमिदं कथमार्यस्य सेव्यते ॥ ३५ ॥
मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः । धिग्जीवितं नृशंसस्य मम लोकविगर्हितम् ॥ ३६ ॥
इत्येवं विलपन्दीनः प्रस्विन्नमुखपङ्कजः । पादावप्राप्य रामस्य पपात भरतो रुदन् ॥ ३७ ॥
दुःखाभितप्तो भरतो राजपुत्रो महाबलः । उक्त्वार्येति सकृदीनं पुनर्नोवाच किंचन ॥ ३८ ॥
बाष्पैः पिहितकण्ठश्च प्रेक्ष्य रामं यशस्विनम् । आर्येत्येवाभिसंक्रुश्य व्याहर्तुं नाशकत्ततः ॥ ३९ ॥
शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन् । तावुभौ च समालिङ्ग्य रामोऽप्यश्रूण्यवर्तयत् ॥ ४० ॥
ततः सुमन्त्रेण गुहेन चैव समीयतू राजसुतावरण्ये ।
दिवाकरश्चैव निशाकरश्च यथाम्बरे शुक्रबृहस्पतिभ्याम् ॥ ४१ ॥

खिन्नः तामार्तिं धारयितुमशक्नुवन् बाष्पसंदिग्धया शोकोष्मणा संदिग्धवर्णया गिरा उपलक्षितः ॥ ३० ॥

३१] ति० टी०–विलापप्रकारमाह—यः संसदीति॥३१॥

रा० टी०–विलापाकारमाह–य इत्यादिभिः । यः रामः संसदि राजादिसेवितसभायां प्रकृतिभिः प्रजाभिः उपासितुं सेवितुं युक्तो भवेत् सः वन्यैः मृगैरुपासीन आस्ते ॥ ३१ ॥

गो० टी०–य इति । संसदि सभायां युक्तः अर्हः ॥ ३१ ॥

३२–३३] ति० टी०–बहुसहस्रद्रव्यमूल्यैर्वासोभिरलंकर्तुं यः पुरे उचितः स मृगाजिनेऽन्तरीयोत्तरीयरूपे मृगचर्मणी प्रवस्ते धर्मं पितृवचनपरिपालनरूपम् ॥ ३२ ॥ ३३ ॥

रा० टी०–वासोभिरिति । यः बहुसाहस्रैरसंख्यातैर्वासोभिरुचितः स मृगाजिने प्रवस्ते ॥ ३२ ॥

रा० टी०–अधारयदिति । यः विविधाः चित्राः सुमनसः स्रजः पुरा अधारयत् सः राघवः इमं जटाभारं कथं सहते॥३३॥

गो० टी०–वासोभिरिति । बहुसाहस्रैः बहुसहस्रमूल्यैः उचितः अलंकर्तुमिति शेषः, षष्ठ्यर्थे तृतीया वा । मृगाजिने मृगचर्मणी प्रवस्ते आच्छादयति ॥ ३२ ॥ ३३ ॥

३४] ति० टी०–यथादिष्टैर्यथाविहितैर्ऋत्विक्क्लेशसाध्यैर्यस्य धर्मसंचयो युक्तः स स्वशरीरक्लेशेन संभृतमुत्पन्नं धर्मं मार्गते॥३४॥

रा० टी०–यस्येति । यथादिष्टैः विधिवदनुष्ठितैः यस्य यज्ञैः धर्मसंचयो युक्तः योग्यः सः शरीरक्लेशसंभूतं धर्मं परिमार्गते ३४

गो० टी०–यस्येति । यथोदिष्टैर्यथाविहितैः 'यथादृष्टैः' इतिपाठे शास्त्रेष्विति शेषः । युक्तः योग्यः ॥ ३४–३८ ॥

३५–३६] ति० टी०–मलेन दण्डवन्निषण्णावयवमात्रान्मलस्थितिरङ्गे ॥ ३५ ॥ ३६ ॥

रा० टी०–चन्दनेनेति । महार्हेण अतिप्रशंसनीयेन चन्दनेन यस्याङ्गमुपसेवितं तस्याङ्गं मलेन कथं सेव्यते ॥ ३५ ॥

रा० टी०–यदिति । अहमेव निमित्तं यस्मिन् तदुःखं रामः प्राप्तः अतः नृशंसस्य मम लोकविगर्हितं जीवितं धिक् ॥३६॥

३७] ति० टी०–पादावप्राप्येति दुःखातिशयवशात् ॥ ३७॥

रा० टी०–इतीति । प्रस्विन्नमुखपङ्कजो भरतः इत्येवं विलपन्सन् रामस्य पादौ अप्राप्य रुदन् सन् पपात ॥ ३७ ॥

३८] ति० टी०–तत एव पुनर्नोवाच ॥ ३८ ॥

रा० टी०–दुःखेति । दीनं यथा स्यात्तथा हे आर्येति ! सकृदुक्त्वा पुनः किंचन नोवाच ॥ ३८ ॥

३९-४०]ति०टी०–ततो बाष्पावरुद्धकण्ठत्वात् ॥३९॥४०॥

रा० टी०–वचनाभावे हेतुं वदन्नाह–बाष्पैरिति । रामं प्रेक्ष्य बाष्पैः पिहितकण्ठो भरतो व्याहर्तुं वक्तुं नाशकत् ॥३९॥

रा० टी०–शत्रुघ्न इति । शत्रुघ्नो रुदन् सन् ववन्दे, उभौ तौ शत्रुघ्नरामौ समालिङ्ग्य अतिष्ठतामिति शेषः, रामोऽपि अश्रूणि अवर्तयत् अत्यजत् ॥ ४० ॥

गो० टी०–वक्तुमशक्तत्वे हेतुमाह–बाष्पापिहितकण्ठ इत्यादिना । बाष्पापिहितकण्ठः बाष्पनिरुद्धकण्ठः ॥ ३९ ॥४०॥

४१] ति० टी०–राजसुतौ रामलक्ष्मणौ ॥ ४१ ॥

रा० टी०–तत इति । राजसुतौ रामलक्ष्मणौ सुमन्त्रेण गुहेन च समीयतुः आलिङ्गितुः, तत्र दृष्टान्तः अम्बरे आकाशे दिवाकरो निशाकरश्च शुक्रबृहस्पतिभ्यां यथा ॥ ४१ ॥

गो० टी०–तत इति । राजसुतौ रामलक्ष्मणौ ॥ ४१ ॥

---

१ अधारयदिति गो. पाठः । २ स्रज इति रा. पाठः । ३ वहत इति गो. पाठः । ४ यथोद्दिष्टैरिति गो. पाठः । ५ यन्निमित्तमिति रा. पाठः । ६ बाष्पापिहितेति गो. पाठः । ७ तदेति गो. पाठः । ८ स इति गो. पाठः । ९ रामश्चाश्रूणीति गो. पाठः ।

तान्पार्थिवान्वारणयूथपार्हान्समागतांस्तत्र महत्यरण्ये ।
वनौकसस्ते[2] ऽभिसमीक्ष्य सर्वे त्वश्रूण्यमुञ्चन्प्रविहाय हर्षम् ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवनवतितमः सर्गः ॥ ९९ ॥

शततमः सर्गः ।

रामो भरतं स्वाङ्क आनीय पित्रादीनां कुशलप्रश्नापदेशेन दण्डनीतिं शिक्षयति ।

जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि । ददर्श रामो दुर्दर्शं[4] युगान्ते भास्करं यथा ॥ १ ॥
कथंचिदभिविज्ञाय विवर्णवदनं कृशम् । भ्रातरं भरतं रामः परिजग्राह पाणिना[5] ॥ २ ॥
आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च राघवम्[6] । अङ्के भरतमारोप्य पर्यपृच्छत[7] सादरम् ॥ ३ ॥

४२] ति० टी०–अश्रूण्यमुञ्चन्प्रविहाय हर्षम् । पूर्वं तद्दर्शनजसंतोषः, पश्चात्तद्दुःखदर्शनजदुःखादश्रुपाताश्च ॥ ४२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवनवतितमः सर्गः ॥ ९९ ॥

रा० टी०–तानिति । महत्यरण्ये समागतान्वारणयूथपार्हांस्तारामादीन् पार्थिवान् राजपुत्रान् वनौकसः समीक्ष्य हर्षं दर्शनजनितानन्दं प्रविहाय संत्यज्य अश्रूणि अमुञ्चन्॥४२॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणाववयोध्याकाण्डे नवनवतितमः सर्गः ॥ ९९ ॥

गो० टी०–तानिति । तान् तादृशसुखयुक्तान् समागतान् संगतान् ॥ ४२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

१–२] ति० टी०–जटिलमिति । अथप्रभृति भूमौ तु शयिष्ये, जटाचीराणि धारयन् इत्यष्टाशीतितमे भरतोक्तेर्भरतस्य जटिलत्वम् । यद्यपि नवतितमे सर्गे वसानो वाससी क्षौमे इति भरद्वाजदर्शनवेलायां श्रूयते, तथापि गुहग्रामे प्रतिज्ञातस्य भरद्वाजाश्रमनिर्गमनानन्तरं धारणमिति न विरोधः । युगान्ते भास्करं यथेति भुवि पतितमिति शेषः ॥ १ ॥ २ ॥

रा० टी०–रामोक्तिं वर्णयितुमुपक्रमते–जटिलमिति । जटिलं रामवृत्तान्तश्रवणोत्तरकाले धृतजटं चीरवसनं युगान्ते भास्करमिव भुवि पतितं प्राञ्जलिं भरतं रामो ददर्श ॥ १ ॥

गो० टी०–दर्शनमात्रेण भरतो राज्यं पालयतीति कृत्वा राज्यनीतिं पृच्छति शततमे–जटिलमिति । यद्वा अथ भगवान् रामः प्रभव्याजेन राज्यरक्षणनीतिप्रकारान् शिक्षयति पश्चाद्दशरथात्ययश्रवणभरतस्थण्डिलशयनादिव्यापारेण तदुपदेशावकाशाभावात्–जटिलमित्यादि । जटिलं समीचीनमालिका दृष्टा चेदियं भरतस्य केशार्हेत्येवं दशरथो वदति स एव जटां बद्धा तिष्ठतीति रामो विस्मयते, चीरवसनं श्लाघ्यचीनाम्बरं दृष्टं चेद्बालस्य भरतस्य वसनार्हमिदमिति पिता वदति स एवेदानीं वल्कलधारी तिष्ठति, प्राञ्जलिं पिता याचनापूर्वकं दिशति चेत् यः स्वीकरोति सः स तं स्वाभिमतस्य स्वयमर्थी भवति, पतितं भुवि अङ्के भरतमारोप्येति स्थितिर्न लब्धा कुशमशय्यापि कठिनीभवेदिति मत्वा उत्सङ्गे एव पित्रा शायितः स संप्रति स्थले पतितः, ददर्श रामो दुर्दर्शं दत्तां दृष्टिमनाकृष्य स्थितस्य रामस्य दर्शनायोग्यतया स्थितं, यद्वा दुर्दर्शं जटिलत्वादिवेषेण ज्ञेहितजनस्य दुष्प्रेक्षं दुर्दर्शं दुःखेन द्रष्टुं योग्यं कृच्छ्रेणाप्यभिज्ञातुमयोग्यमिति यावत् युगान्ते भास्करं यथा न केवलं रामस्य सर्वस्यापि जनस्य दुर्दर्शतया स्थितमिति भावः, यद्वा युगान्ते भास्करं यथा युगान्ते भुवि पतितं भास्करमिव स्थितमनेन पूर्ववन्महत्तरतेजोराहित्यं तादृशावस्थानर्हत्वं च व्यज्यते । पाठभेदः युगान्ते भुवि पतितं भास्करं यथेत्यनेन महत्तरतेजोराशित्वं तादृशावस्थानर्हत्वं चोच्यते । नन्वयं गङ्गातीरे अद्यप्रभृति भूमौ तु शयिष्येऽहं तृणेषु वा । फलमूलाशनो नित्यं जटाचीराणि धारयन्निति जटावल्कलधारणं प्रतिज्ञातं पुनर्नवतितमे भरद्वाजदर्शनसमये वसानो वाससी क्षौमे इति क्षौमवस्त्रं धृतवानित्युच्यते अत्र तु जटिलं चीरवसनमिति सिद्धवदुच्यते कथमेतत् संगच्छत इति चेदाहुः–प्रतिज्ञाया रात्रौ कृतत्वादपरेद्युर्भरद्वाजदर्शनानन्तरं जटावल्कले धृतवानित्यविरोध इति, अयं च परिहारः पुरैवास्माभिः प्रतिपादितः ॥ १ ॥

रा० टी०–कथंचिदिति । विवर्णवदनं वियोगदुःखातिशयेन प्राप्तविवर्णताविशिष्टसुखविशिष्टं कृशं भ्रातरं भरतं कथंचित् अनुमानादिना अभिविज्ञाय पाणिना जग्राह ॥ २ ॥

गो० टी०–कथंचिदिति । कथंचिदभिविज्ञातत्वे हेतुद्वयं विवर्णवदनं कृशमिति ॥ २ ॥ ३ ॥

३] ति० टी०–'पर्यपृच्छत्समाहितः' इति पाठे समाहितः कुशलप्रश्नद्वारा धर्मबोधने सावधानचित्तः ॥ ३ ॥

१ यूथपाभानिति गो. पाठः । २ ऽपीति गो. पाठः । ३ ऽप्यश्रूणीति गो. पाठः । ४ भरतामिति रा. पाठः । ५ बाहुनेति गो. पाठः । ६ राघव इति गो. पाठः । ७ पर्यपृच्छत्समाहित इति गो. पाठः ।

क्व नु तेऽभूत्पिता तात यदरण्यं त्वमागतः । न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि ॥ ४ ॥
चिरस्य बत पश्यामि दूराद्भरतमागतम् । दुष्प्रतीकमरण्येऽस्मिन्किं तात वनमागतः ॥ ५ ॥
कच्चिन्नु धरते तात राजा यत्त्वमिहागतः । कच्चिन्न दीनः सहसा राजा लोकान्तरं गतः ॥ ६ ॥
कच्चित्सौम्य न ते राज्यं भ्रष्टं बालस्य शाश्वतम् । कच्चिच्छुश्रूषसे तात [2]पितुः सत्यपराक्रम ॥ ७ ॥
कच्चिद्दशरथो राजा कुशली सत्यसंगरः । राजसूयाश्वमेधानामाहर्ता [3]धर्मनिश्चितः ॥ ८ ॥
स कच्चिद्ब्राह्मणो विद्वान्धर्मनित्यो महाद्युतिः । इक्ष्वाकूणामुपाध्यायो यथावत्तात पूज्यते ॥ ९ ॥

रा० टी०–आघ्रायेति । राघवं भरतं मूर्ध्नि आघ्राय अङ्के आरोप्य सादरं पर्यपृच्छत ॥ ३ ॥

४] ति० टी०–हे तात! ते पिता क्वाभूत् इह परत्र वेत्यर्थः, कुत एवं संशयस्तत्राह—न हीति । जीवतस्तस्य सेवां हित्वेति शेषः, नार्हसि मदसंनिधौ तवैव पितृशुश्रूषाया अवश्यकर्तव्यत्वादिति भावः ॥ ४ ॥

रा० टी०–प्रभाकारमाह–क्वेत्यादिभिः । हे तात! ते पिता क्व अभूत् प्राप्नोत् यत् येन हेतुना त्वमरण्यमागतः । प्रश्ने हेतुमाह–जीवतः प्रजाः पालयतः तस्य राज्ञः हित्वा वनमागन्तुं नार्हसि संबन्धसामान्यविवक्षया षष्ठी, एतेन पिता ध्रुवं लोकान्तरं गत इति स्वनिश्चयः सूचितः ॥ ४ ॥

गो० टी०–अतिदुःखितस्य भरतस्य दुःखमपनेतुं प्रभव्याजेन धर्मोपदिशति–क्व न्वित्यादि । ते पिता क्व न्वभूत इति प्रश्नभङ्ग्या लोकान्तरं गतः किमिति सिध्यति । तत्र हेतुः–यदिति । तदुपपादयति–नहीति । जीवतः जीवति अनादरे षष्ठी वनं नागन्तुमर्हसि शुश्रूषणपरत्वादिति भावः, यद्वा तस्य त्वद्विरहासहिष्णुत्वादिति रामस्य प्रश्नान्तरसंबन्धदर्शनेन भरतो नोत्तरमुक्तवानिति बोध्यम् ॥ ४ ॥

५] ति० टी०–दूरान्मातामहदेशाच्चिरस्यागतं भरतं पश्यामि । बतेति हर्षे । दुष्प्रतीकमिति भरतविशेषणं वनविशेषणं च । आर्ये कार्श्यवैवर्ण्यादिना दुर्ज्ञेयताकारम्, वनमपि भीषणतया । तथा ईदृशं वनं किमागतः किमागमनप्रयोजनमीदृशारण्ये इत्यर्थः, अरण्यं गजादुपभोग्यम् तद्धर्ति वनमाम्रादियुतं मनुष्यभोग्यम् ॥ ५ ॥

रा० टी०–चिरस्येति । दूरात् अतिदूरदेशस्थितमातुलगृहादागतं दुष्प्रतीकं ज्ञानाभावप्रापककृशत्वादिप्रतीत्या दुरवयवं भरतं त्वां चिरस्य बहुकालानन्तरं पश्यामि हे तात ! अस्मिन् अरण्ये गजादिसेवितमहावने विद्यमानं वनमाम्रादिदक्षसमूहं किं किमर्थमागतः 'अङ्गं प्रतीकोऽवयवः' इत्यमरः ॥ ५ ॥

गो० टी०–चिरस्येति । बतेत्यद्भुते 'खेदानुकम्पासंतोषविस्मयामन्त्रणे बत' इत्यमरः । दूरात् दूरावस्थितकेकयनगरात् दुष्प्रतीकं वैवर्ण्यादिना दुर्ज्ञेयावयवम् 'अङ्गं प्रतीकोऽवयवः' इत्यमरः । किं किमर्थम् ॥ ५ ॥

६] ति०टी०–अथ भरतागमनं राजाज्ञया वा स्याद्राजमरणे दुःखाद्वा । तत्राद्यमुपन्यस्यति–कच्चिन्नित्यादि । धरते प्राणान्धारयति अथवा लोकान्तरं गतः यत्त्वमिहागत इत्यनुकर्षः ॥ ६ ॥

रा० टी०–कच्चिदिति । यत् यं त्यक्त्वेति शेषः, त्वमिहागतः सः राजा धरते प्रजाः पाल्यत्वेन स्वीकरोति कच्चित् राजा दीनः सँल्लोकान्तरं न गतः कच्चित् ॥ ६ ॥

गो० टी०–अस्मिन्नरण्ये तव किं प्रयोजनम् । प्रयोजनं द्वेधा संभवति राजनि जीवति तदाज्ञया मम दर्शनं, राजनि मृते स्वबाल्येन बलवद्भिरुपहृतराज्यत्वं वा, आद्यमाह–कच्चिदिति। धारयत इति प्राणानिति शेषः । यस्मात्त्वमिहागतः तस्माद्राजा प्राणान् धारयते कच्चित् राजा जीवति चेत् त्वामत्रागच्छन्तं न सहेतेति भावः । 'कच्चिन्न धरते' इति पाठान्तरं तदा देहं धारयितुं न शक्नोति कच्चिदित्यर्थः ॥ ६ ॥

७] ति० टी०–अन्त्यमेव पक्षमवलम्ब्याह–न ते राज्यं भ्रष्टमिति । मूलप्रभोरत्ययात्प्राप्तभ्रंशकम् अनिश्चयाल्लोकप्रतारणाय वा । पुनर्जीवनपक्षमवलम्ब्याह–कच्चिच्छुश्रूषस इति ॥ ७ ॥

रा० टी०–कच्चिदिति । शाश्वतं सार्वकालिकं बालस्य ते तव राज्यं भ्रष्टं न कच्चित्, हे सत्यपराक्रम ! हे तात ! पितुः शुश्रूषसे कच्चित् कर्मणः शेषत्वविवक्षया षष्ठी ॥ ७ ॥

गो० टी०–द्वितीयं पक्षं प्रश्नद्वयेन दर्शयति–कच्चिदित्यादि । राज्यं भ्रष्टं न कच्चित् प्रजानुरागो विद्यते कच्चिदित्यर्थः ॥ ७ ॥

गो० टी०–कच्चिच्छुश्रूषस इति । पितृशुश्रूषाऽनादरेण किमागतोऽसीति पक्षान्तरम् ॥ ८ ॥

८] ति०टी०–धर्मनिश्चितो धर्मे निश्चितं निश्चयो यस्य सः॥८॥

रा० टी०–कच्चिदिति । सत्यसङ्गरः निष्कपटयोद्धा राजसूयाश्वमेधानामाहर्ता कर्ता धर्मे निश्चितं निश्चयो यस्य सः राजा कुशली कच्चित् ॥ ८ ॥

गो० टी०–अथ राज्ञः आरोग्यं पृच्छति–कच्चिद्दशरथ इति । कुशली अनामयः राज्ञो व्याधिपरिभूतत्वात् तत्कथनाय किमागतोऽसीति पक्षान्तरम्, सत्यसङ्गरः सत्यप्रतिज्ञः सत्यप्रतिज्ञां प्रेक्ष्य पश्चात्तापेन किमकुशलं प्राप्त इति हार्दो भावः । कच्चिदिति आहर्ता संपादयिता कर्तेति यावत् धर्मे निश्चयो यस्य स धर्मनिश्चयः ॥ ९ ॥

९] ति० टी०–उपाध्यायो वसिष्ठः ॥ ९ ॥

१ कच्चिद्धार्यते इति गो. पाठः । २ पितरं सत्यविक्रममिति गो. पाठः । ३ निश्चय इति गो. पाठः ।

तात कच्चिच्च कौसल्या सुमित्रा च प्रजावती । सुखिनी कच्चिदार्या च देवी नन्दति कैकयी ॥ १० ॥
कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः । अनसूयुरनुद्रष्टा सत्कृतस्ते पुरोहितः ॥ ११ ॥
कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः । हुतं च होष्यमाणं च काले वेदयते सदा ॥ १२ ॥
कच्चिद्देवान्पितॄन्भृत्यान्गुरून्पितृसमानपि । वृद्धांश्च तात वैद्यांश्च ब्राह्मणांश्चाभिमन्यसे ॥ १३ ॥
इष्वस्त्रवरसंपन्नमर्थशास्त्रविशारदम् । सुधन्वानमुपाध्यायं कच्चित्त्वं तात मन्यसे ॥ १४ ॥
कच्चिदात्मसमाः शूराः श्रुतवन्तो जितेन्द्रियाः । कुलीनाश्चेङ्गितज्ञाश्च कृतास्ते तात मन्त्रिणः ॥ १५ ॥

रा० टी०–स इति । धर्मनित्यः धर्मः नित्यो यस्य स नित्यं धर्मविशिष्ट इत्यर्थः, विद्वान् निखिलनिगमागमज्ञाता ब्राह्मणः कृतपरब्रह्मसाक्षात्कारः ब्रह्मपुत्रो वा स वसिष्ठः यथावत् पूज्यते, त्वयेति शेषः ॥ ९ ॥

गो० टी०–स कच्चिदिति । सः प्रसिद्धः ब्राह्मणः ब्रह्मवित् "तदधीते तद्वेद" इत्यण् । विद्वान् सर्ववियाच्च कुशलः धर्मनित्यः ज्ञानानुगुणमनुष्ठातेत्यर्थः, महायुतिः तत्कृतब्रह्मचर्यसंयुक्तः इक्ष्वाकूणामुपाध्यायः कुलगुरुः वसिष्ठः यथावत् यथापूर्वं तातवत्संपूज्यते बहु मन्यते ॥ १० ॥

१०] ति० टी०–नन्दति मद्वनवासत्वद्राज्यलाभाभ्यामिति व्याख्येयम् ॥ १० ॥

रा० टी०–तातेति । हे तात ! कौसल्यादिः सुखिनी कच्चित् ॥ १० ॥

गो० टी०–सा तातेति । सा पूर्वं दुःखिततया अनुभूता कौसल्या सुखिनी कच्चित् प्रजावती सुप्रजाः सुमित्रा च सुखिनी कच्चिदित्यन्वयः । आर्येति स्वमातुरपि बहुमानोक्तिः, कैकेयी नन्दति कच्चित् राज्यलाभेनेति शेषः ॥ ११ ॥

११] ति० टी०–कुलपुत्रो महाकुलप्रसूतस्ते पुरोहितस्तावकसकलहितकृत्यानुष्ठाता । एतेन वसिष्ठपुत्रः कश्चिदुक्तः ॥११॥

रा० टी०–कच्चिदिति । विनयसंपन्नः विनीतियुक्तः कुलपुत्रः शुद्धकुलप्रसूतः अनसूयुःअसूयारहितः अनुद्रष्टा सकलसत्कर्मनिपुणः ते तव सवयस्कः पुरोहितः वसिष्ठपुत्रः सत्कृतः कच्चित् सवयस्क इति षष्ठीमहिम्ना लब्धम् ॥ ११ ॥

गो० टी०–कच्चिद्विनयसंपन्न इति । विनयसंपन्नः निरहंकारः कुलपुत्रः सत्कुलप्रसूतः बहुश्रुतमवधारणं यस्य स तथा अनसूयुः छान्दस उप्रत्ययः । अनुद्रष्टा वसिष्ठोपदिष्टानामुपद्रष्टा ते पुरोहित इत्यनेन रामस्य सुयज्ञ इव भरतस्यापि प्रातिस्विकः कश्चित्पुरोहितोऽस्तीति गम्यते सुयज्ञ एवोच्यत इत्यप्याहुः । सत्कृतः पूजितः कच्चिदित्यन्वयः । अनेन पुरोहितः सदा सत्कर्तव्य इति शिक्षितमेवञ्चरत्रापि योजनीयम् ॥ १२ ॥

१२] ति० टी०–विधिज्ञः सकलहोमविधिज्ञः युक्तो नियुक्तः, काले होमकाले वेदयते हुतं होष्यमाणं चाग्निम् ॥ १२ ॥

रा० टी०–कच्चिदिति । विधिज्ञो हवनविधिज्ञाता मतिमान् प्रशस्तबुद्धिः ऋजुःसरलस्वभावः अग्निकार्येषु ते त्वया युक्तो नियुक्तः पुरोहितः हुतं होष्यमाणं च वह्निं काले यथोचितसमये वेदयते यथाविधि चेतयते ॥ १२ ॥

गो० टी०–'पितृव्यपुत्रे सापत्ने परनारीसुतेषु च । विवाहदानयज्ञादौ परिवेदो न दूषणम्' इति स्मरणाद्भ्रातुरेष्वधिवेदनदोषाभावाद्यज्ञोऽपि कृत इत्यारोप्य पृच्छति–कच्चिदग्निष्विति । अथवा अग्निषु अग्निकार्येषु युक्तः सावधानः नियुक्तो वा अग्निशुश्रूषणपर इत्यर्थः, विधिज्ञः अग्निहोत्रावश्यमेधान्तः सकलयागविधिज्ञः मतिमान् ऊहापोहादिकल्पनचतुरः ऋजुप्रत्यक्षपरोक्षयोरेकरूपानुष्ठानवान् एकरूपकरणत्रय इति वार्थः, पुरोहित इति शेषः । काले तत्तद्धोमकाले वेदयते तुभ्यं ज्ञापयति कश्चित् ॥ १३ ॥

१३] ति० टी०–वैद्या विद्यासु सर्वासु निपुणास्तान्ब्राह्मणानभिमन्यसे बहु मन्यसे, ब्राह्मणसामान्यविषयः प्रश्नोऽग्रे भविष्यति, यद्वा वैद्यांश्चिकित्साप्रवीणान्ब्राह्मणानित्यर्थः । "अपूतो ह्येष मेध्यो योऽभिषज्यति" इति श्रुत्युक्तनिन्दा तु शास्त्रानभिज्ञचिकित्साप्रवृत्तपरा । शास्त्राभिज्ञस्य भैषज्यं महते पुण्याय । तज्जीविकापरो वा निषेध इति दिक् ॥ १३ ॥

रा० टी०–कच्चिदिति । देवादीनभिमन्यसे कच्चित्॥१३॥

गो० टी०–कच्चिद्देवानिति । अभिमन्यसे बहु मन्यसे देवेषु बहुमतिर्यज्ञादिभिराराधनं पितृषु मातृषु च वचनकरणशुश्रूषणे 'भृत्यान्' इति पाठे तत्र बहुमतिर्दानं गुरुष्वनुवर्तनाभिमतकरणादि पितृसमेषु ज्ञातिष्वर्थदानं वृद्धादिषु नमस्कारादि वृद्धाः ज्ञानशीलवयोभिः विद्या येषां सन्तीति वैद्याः विद्वांसस्तान् ब्राह्मणान् ब्रह्मविदः, यद्वा वैद्यान् भिषजः तेषां बहुमतिश्च धनादिना परितोषणं, ब्राह्मणानिति जातिमात्रपरो वा तदा विद्याशीलादिकमपरीक्ष्य ब्राह्मणत्वमात्रेण यथायोग्यं बहुमानं विवक्षितम् ॥ १३ ॥

१४–१५] ति० टी०–इषुरमन्त्रो बाणप्रयोगः, अस्त्रं समन्त्रः सः । वरशब्द उभयसंबद्धः । अर्थशास्त्रं राजनीतिशास्त्रं तत्र विशारदं पण्डितं सुधन्वानं तन्नामानमुपाध्यायं धनुर्वेदाचार्यम् ॥ १४ ॥ १५ ॥

रा० टी०–इष्विति । इष्वस्त्रवरसंपन्नमिषुषु अस्त्रवरेषु च संपन्नं तद्विषयकातिज्ञानवन्तमर्थशास्त्रविशारदं राजनीतिप्र-

१ सा तात कच्चिदिति गो० पाठः । २ मातृरिति गो० पाठः ।

मन्त्रो विजयमूलं हि राज्ञां भवति राघव । सुसंवृतो मन्त्रिधुरैरमात्यैः शास्त्रकोविदैः ॥ १६ ॥
कच्चिन्निद्रावशं [2]नैषि कच्चित्कालेऽवबुध्यसे । कच्चिच्चापररात्रेषु चिन्तयस्यर्थनैपुणम् ॥ १७ ॥
कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह । कच्चित्ते मन्त्रितो मन्त्रो राष्ट्रं न परिधावति ॥ १८ ॥
कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम् । क्षिप्रमारभसे कर्म न दीर्घयसि राघव ॥ १९ ॥
कच्चिन्नु सुकृतान्येव कृतरूपाणि वा पुनः । [3]विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः॥ २० ॥
कच्चिन्न तर्कैर्युक्त्या वा ये चाप्यपरिकीर्तिताः । त्वया वा तव वामात्यैर्बुध्यते तात मन्त्रितम् ॥ २१ ॥

तिपादकेषु निपुणं सुधन्वानं तन्नामकमुपाध्यायं मन्यसे कचित् । अस्त्रवरशब्देनैवेषूणां ग्रहणे सिद्धे पुनरिषूपादानं तद्विषयकज्ञानवत्ताया अतिशयत्वप्रतिपादनाय ॥ १४ ॥

गो० टी०–इष्वस्त्रवरसंपन्नमिति । इषवः अमन्त्रका बाणाः अस्त्राणि समन्त्रकाः, वरशब्दः प्रत्येकमभिसंबध्यते अर्थशास्त्रं नीतिशास्त्रं सुधन्वानं सुधन्वनामकम् उपाध्यायं धनुर्वेदाचार्यं मन्यसे बहु मन्यसे ॥ १६ ॥

रा० टी०–कच्चिदिति । आत्मसमाः स्वसदृशाः शूराः शौर्यविशिष्टाः श्रुतवन्तो बहुश्रुताः इङ्गितज्ञाः कथनमन्तराप्यभिप्रायविज्ञातारः मन्त्रिणः ते त्वया कृताः संपादिताः कच्चित् १५

गो० टी०–कच्चिदात्मसमा इति । आत्मसमाः विश्वसनीया इति यावत्, शूराः धीरा इति यावत्, श्रुतवन्तः नीतिशास्त्रज्ञाः 'श्रुतं शास्त्रावधृतयोः' इत्यमरः, जितेन्द्रियाः परैरलोभनीया इति यावत्, कुलीनाः प्रामाणिककुलोत्पन्नाः ते त्वया ॥ १६ ॥

१६] ति० टी०–मन्त्रिधुरैर्मन्त्रिश्रेष्ठैः शास्त्रकोविदैर्नीतिशास्त्रज्ञैः सुसंवृतः सुतरां गुप्तः ॥ १६ ॥

रा० टी०–मन्त्रिसंपादने प्रयोजनं वदन्नाह–मन्त्र इति । हे राघव ! मन्त्रः राज्ञां विजयमूलं भवति अतो मन्त्रिधुरैः मन्त्रिनिपुणैः अमात्यैः सुसंवृतो भवति राजेति शेषः ॥ १६ ॥

गो० टी०–एतादृशमन्त्रिकरणे किं कारणं तत्राह–मन्त्र इति । सुसंवृतः सुतरां गुप्तः शास्त्रकोविदैः नीतिशास्त्रनिपुणैः मन्त्रधुरैरमात्यैः सुसंवृतो मन्त्रो हि विजयमूलं भवतीत्यन्वयः ॥ १७ ॥

१७] ति० टी०–अर्थनैपुणमर्थप्राप्त्युपायम् ॥ १७ ॥

रा० टी०–कच्चिदिति । निद्रावशं न एषि प्राप्नोषि, काले यथोचितसमये अवबुध्यसे जागर्षि अपररात्रेषु रात्रिपरभागेषु अर्थनैपुण्यमर्थसंपादनरीतिं चिन्तयसि विचारयसि॥१७॥

गो० टी०–कच्चिन्निद्रावशमिति । अर्थनैपुणम् अर्थविषयसामर्थ्यमिति यावत् ॥ १८ ॥

१८] ति० टी०–नैकः एकेन मन्त्रे क्रियमाणे स्वकार्याभिनिवेशेन गुणागुणयोर्याथार्थ्यग्रहणं न सिध्यति, बहुभिर्मन्त्रणे प्रथममैकमत्यमेव न घटेत, मन्त्रभेदश्च भवेदिति भावः । राष्ट्रं न परिधावति लोकैर्न ज्ञायत इत्यर्थः ॥ १८ ॥

रा० टी०–कच्चिदिति । नैकः न एकः स्वान्यसाधारणजनो यस्य स त्वं मन्त्रयसे बहुभिः सह न मन्त्रयसे अत एव ते मन्त्रितो मन्त्रः राष्ट्रं न परिधावति अन्ये न जानन्तीत्यर्थः ॥ १८ ॥

गो० टी०–कच्चिन्मन्त्रयस इति । एको न मन्त्रयसे कचित् एकेन मन्त्रे क्रियमाणे तस्य कुत्रचिदभिनिवेशेन गुणागुणयोर्याथार्थ्यग्रहणं न सिध्येदिति भावः । बहुभिः सह न मन्त्रयसे कचित्, बहुभिः सह मन्त्रणेऽपि प्रथमं तावदैकमत्यं न घटते मन्त्रभेदश्च भवेदिति भावः । राष्ट्रं जनपदं न परिधावति न व्याप्नोति पूर्वं मन्त्रसंवरणमन्यहेतुतयोक्तम्। अत्र तु स्वतन्त्रतयोच्यत इति न पुनरुक्तिः ॥ १९ ॥

१९] ति० टी०–लघुमूलमल्पयत्नसाध्यम्, महोदयं महाफलम्, न दीर्घयसि न विलम्बयसि ॥ १९ ॥

रा० टी०–कच्चिदिति । अर्थं स्वार्थं विनिश्चित्य लघुमूलमल्पयत्नसाध्यं महोदयं महाफलकं कर्म क्षिप्रमारभसे दीर्घयसि विलम्बयसि तु न ॥ १९ ॥

गो० टी०–कच्चिदर्थमिति । लघुमूलं लघुसाधनं महोदयं महाफलम् अर्थं कार्यं विनिश्चित्य क्षिप्रमारभसे कचित् न दीर्घयसि [4]न विलम्बसे कचित् एवमन्वयव्यतिरेकाभ्यामुक्तम् 'क्षिप्रमक्रियमाणस्य कालः पिबति तत्फलम्' इति भावः ॥२०॥

२०] ति० टी०–पार्थिवाः सामन्तास्ते मन्त्रितानि सर्वकार्याणि सुकृतानि निष्पन्नान्येव कृतरूपाणि कृतकल्पानि वा विदन्ति, न कर्तव्यानि भावित्वेनेत्यर्थः ॥ २० ॥

रा० टी०–कच्चिदिति । कृतरूपाणि प्रारम्भविषयीभूतानीत्यर्थः, ते तव सर्वकार्याणि सुकृतानि सुनिष्पादितान्येव पार्थिवाः खण्डमण्डलेश्वराः विदुः कर्तव्यानि कर्तुं योग्यानि करिष्यमाणानीत्यर्थः, न विदुः कच्चित् ॥ २० ॥

गो० टी०–कच्चित्ते सुकृतानीति । पार्थिवाः सामन्तनृपाः ते सर्वकार्याणि मन्त्रितसर्वकार्याणि सुकृतान्येव सुनिष्पन्नान्येव विदुः कचित् कृतरूपाणि कृतप्रायाणि वा क्षिप्रमेव फलोन्मुखानीति यावत्, कर्तव्यानि न विदुः मन्त्रेण कर्तव्यतया निश्चितानि करणात् पूर्वं न विदुरित्यर्थः ॥ २१ ॥

२१] ति० टी०–ये त्वदीया मन्त्रास्त्वदमात्यैश्चापरिकीर्तिता अपि युक्त्यर्थापरया तर्कैस्तत्साध्यैरनुमानैर्वा यद्वा

१ मन्त्रधरैरिति गो.पाठः । २ नैषीरिति गो.पाठः। ३ प्रबुध्यस इति गो.पाठः। ४ कर्तुमिति गो.पाठः। ५ त इति गो. पाठः। ६ तदसमिति पाठः श्रूयते।

कच्चित्सहस्रैर्मूर्खाणामेकमिच्छासि पण्डितम् । पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत् ॥ २२ ॥
सहस्राण्यपि मूर्खाणां यद्युपास्ते महीपतिः । अथवाप्ययुतान्येव नास्ति तेषु सहायता ॥ २३ ॥
एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः । राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ॥ २४ ॥
कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः । जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः ॥ २५ ॥
अमात्यानुपधातीतान्पितृपैतामहाञ्शुचीन् । श्रेष्ठाञ्छ्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु ॥ २६ ॥

तर्कास्तत्कारणानुमापकाः, युक्तयः साक्षात्तदनुमापिकाः परैर्न बुध्यन्ते किल। किं च परकृतं मन्त्रितं त्वया त्वदमात्यैर्वा बुध्यते किल ॥ २१ ॥

रा० टी०–कच्चिदिति। अपरिकीर्तिता अकथिता अपि ये तव मन्त्रास्ते तर्कैर्युक्त्या वा न बुध्यन्ते परैरिति शेषः, मन्त्रितमन्यमन्त्रविषयीभूतं त्वया तवामात्यैर्वा बुध्यते, बुध्यते इत्यस्य वचनविपरिणामेनान्यत्राप्यन्वयः ॥ २१ ॥

गो० टी०–कच्चिन्नेति। मन्त्रितं कार्यं त्वया वा तवामात्यैर्वा हेतुभिस्तर्कैः ऊहैः युक्त्या वा अनुमानेन वा ये चाप्यपरिकीर्तिताः अनुक्ता इङ्गितादयः तैर्वा न बुध्यते कश्चित् परैरिति शेषः, भवान् भवदीयामात्याश्च मन्त्रितार्थविषयपराभ्यूह्यस्थानानि सूक्ष्माण्यपि स्थगयन्ति कश्चिदित्यर्थः ॥ २२ ॥

२२] ति० टी०–सहस्रैः त्यक्तैरपीति शेषः। पण्डितपरिग्रहे हेतुमाह–पण्डित इति। अर्थकृच्छ्रेष्वर्थसंकटेषु निःश्रेयसं कुर्यात्। अव्यभिचरितनिस्तारोपायबोधनेनेति शेषः ॥२२॥

रा०टी०–कच्चिदिति। मूर्खाणां सहस्रैः सहस्राणि परित्यज्येति शेषः, एकं पण्डितमिच्छसि। ननु किमेतेनेत्यत आह–अर्थकृच्छ्रेषु अर्थसंकटेषु प्राप्तेषु सत्सु पण्डितो महत् निःश्रेयसं कल्याणं कुर्यात् ॥ २२ ॥

गो० टी०–कच्चित्सहस्रादिति। मूर्खाणां सहस्रात् मूर्खसहस्रं परित्यज्यापि त्यक्तोपे पञ्चमी पण्डितं विमृश्यकारिणमेकमिच्छसि कश्चित्। पण्डितपरिग्रहे हेतुमाह–पण्डित इति। अर्थकृच्छ्रेषु कार्यसंकटेषु। पाठान्तरम् अर्थकृच्छ्रेषु अर्थसंकटेषु महन्निःश्रेयसं महदैश्वर्यं प्रापयेदित्यर्थः। पाठान्तरं महन्निःश्रेयसम् अव्यभिचारितफलसाधनोपायं कुर्यात् उपदिशेदित्यर्थः ॥ २३ ॥

२३] ति० टी०–सहायता सहायकार्यक्षमता ॥ २३ ॥

रा० टी०–सहस्राणीति। मूर्खाणां सहस्राणि अथवा अयुतानि दशसहस्राणि महीपतिः यद्युपास्ते तदापि तेषु उपासितेषु सहायता साहाय्यकर्तृत्वं नास्ति, एतेन मूर्खजनेष्वतिस्नेहो न कार्य इति ध्वनितम् ॥ २३ ॥

गो० टी०–एवमन्वयेनोपपाद्य व्यतिरेकमुखेनोपपादयति–सहस्राणीति। उपास्ते आश्रयति संगृह्णातीत्यर्थः। नास्तीत्यस्मात्पूर्वं तथापीत्युपस्कार्यम् सहायता मन्त्रोपायसहायत्वम् ॥ २३ ॥

२४] ति० टी०–विचक्षणोऽभ्यस्तनीतिशास्त्रः ॥ २४ ॥

रा० टी०–एक इति। मेधावी शास्त्रसंस्कारजनितमेधाविशिष्टः अत एव विचक्षणः नीतिनिपुणः एको ऽप्यमात्यः महतीं श्रियं प्रापयेत् ॥ २४ ॥

गो० टी०–पण्डितशब्दार्थं विवृण्वन्नाह–एक इति। मेधाऽस्यास्तीति मेधावी "अस्मायामेधास्रजो विनिः" इति विनिः। झटिति परोपन्यस्तार्थग्रहणपटुरित्यर्थः। शूरः स्थिरबुद्धिः, दक्षः विचारसमर्थः, विचक्षणः अभ्यस्तनीतिशास्त्रः॥२५॥

२५] ति० टी०–मुख्या महान्तः ॥ २५ ॥

रा० टी०–कच्चिदिति। महदादिषु कर्मसु मुख्यादयः भृत्याः क्रमेणैव योजिताः। तत्र मुख्या महान्तः जघन्याः निकृष्टाः, एतेन विपरीतयोजना न कर्तव्येति सूचितम् ॥ २५ ॥

गो० टी०–कच्चिन्मुख्या इति। मुख्याः भृत्याः महत्सु मुख्येष्वेव कार्येषु वचनपरिवेषणादिषु कश्चिन्नियोजिताः न तु हीनेषु कार्येषु, मध्यमाः जात्यादिना मध्यमा भृत्याः मध्यमेष्वेव कार्येषु शय्यासनानयनादिषु नियोजिताः न तूत्तमाधमकार्येषु, जघन्याः जात्यादिहीनाः भृत्याः जघन्येष्वेव कार्येषु पादप्रक्षालनपादुकानयनपादसंवाहनादिषु नियोजिताः न तूत्तममध्यमेषु कार्येषु योजिताः कश्चित्, अन्यथा महद्वैशसं भवेदिति भावः ॥ २६ ॥

२६] ति० टी०–उपधा उत्कोचस्तमतीतांस्तद्ग्राहिणः, यद्वोपाधिप्रयुक्तसंश्रयरहितान् अत एव पितृपैतामहान् शुचीन्बाह्यान्तरेन्द्रियशुद्धान् ॥ २६ ॥

रा० टी०–अमात्यानिति। उपधातीतान् उपधा सुपरीक्षा अतीता व्यतीता येषां तान् सुपरीक्षितानित्यर्थः, शुचीन् कापट्यरहितान् अमात्यान् श्रेष्ठेषु कर्मसु त्वं नियोजयसि कश्चित् 'उपधा सुपरीक्षा स्यात्' इति वैजयन्ती। उपधा उत्कोचः तमतीतान् तद्ग्राहिण इति भट्टाः ॥ २६ ॥

गो० टी०–भृत्येषट्कं न्यायममात्येषु अतिदिशति–अमात्यानिति। उपधातीतान् स्वव्यतिरिक्तेष्वर्थायुपाधिरहितान्, यद्वा सुपरीक्षातीतान् 'उपधा सुपरीक्षा स्यात्' इति वैजयन्ती। श्लाघ्यवस्त्राभरणादिकं पुरुषमुखेन संप्रेष्य अन्तःपुरप्रेषितं परराजप्रेषितमिति प्रलोभ्य परीक्षां कुर्वन्ति राजानः तामतीतानित्यर्थः। पितृपैतामहान् कुलक्रमागतान् शुचीन् करणत्रयशुद्धियुक्तान् ॥ २७ ॥

---

१ सहस्रादिति गो. पाठः। २ राजमात्रमिति गो. पाठः। ३ त्विति गो. पाठः। ४ कर्मस्विति गो. पाठः।

कच्चिन्नोग्रेण दण्डेन भृशमुद्वेजिताः प्रजाः । राष्ट्रे तवावजानन्ति मन्त्रिणः कैकयीसुत ॥ २७ ॥
कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा । उग्रात्प्रतिग्रहीतारं कामयानमिव स्त्रियः ॥ २८ ॥
उपायकुशलं वैद्यं भृत्यं संदूषणे रतम् । शूरमैश्वर्यकामं च यो हन्ति न स हन्यते ॥ २९ ॥
कच्चिद्धृष्टश्च शूरश्च धृतिमान्मतिमाञ्शुचिः । कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ॥ ३० ॥
बलवन्तश्च कच्चित्ते मुख्या युद्धविशारदाः । दृष्टापदाना विक्रान्तास्त्वया सत्कृत्य मानिताः॥ ३१ ॥

२७] ति० टी०–उद्वेजिताः प्रजा मन्त्रिणश्च राष्ट्रे तव त्वां नावजानन्ति नावमन्यन्ते ॥ २७ ॥

रा० टी०–कच्चिदिति । उग्रेण शास्त्रातिवर्तिना दण्डेन उद्वेजिताः भयं प्रापिताः प्रजाः मन्त्रिणो वा तव त्वामनुजानन्ति अवमन्यन्ते न कच्चित् ॥ २७ ॥

गो० टी०–कच्चिन्नोग्रेणेति । तव उग्रेण दण्डेन उद्वेजितप्रजं पीडितप्रजायुक्तं राष्ट्रं राज्यं मन्त्रिणः नानुजानन्ति नानुमन्यन्ते कच्चित्, राजानं त्वानुग्रदण्डात् निवर्तयन्ति कचिदित्यर्थः ॥ २८ ॥

२८] ति० टी०–याजकाः किंचित्पापानुसंधानेन पतितमिव त्वामयाज्योऽयमिति मत्वा नावजानन्ति किल । तत्र दृष्टान्तः—उग्रेत्यादि । स्त्रियः कुलस्त्रियः उग्राख्यहीनजातीयस्त्रीप्रतिग्रहीतारम् । तां च कामयानं कामयमानं तस्यामत्यन्तासक्तं यथावजनन्तीत्यर्थ इति कतकः । 'उग्रप्रति–' इति पाठः उग्रेण कर्मणा बलात्कारादिना प्रतिग्रहीतारं कामयानं कामुकं स्त्रिय इव याजकाः पतितमिव च नावजानन्ति प्रजा इति शेषः । प्रजातिक्रमणमुग्रकरग्रहणं च त्वयि नास्ति कचिदिति भाव इति तीर्थः । परे तु–उग्रप्रतिग्रहीतारम् उग्रः शिवस्तत्प्रतिग्रहीतारमल्पपुंस्त्वम्, तत्प्रतिग्रहीतुरीदृशपण्ढतायाः कर्मविपाकशास्त्रे उक्तेरित्याहुः ॥ २८ ॥

रा० टी०–कच्चिदिति । याजकाः पतितं सुरापानादिना यागानर्हमिव त्वां नावजानन्ति कचित् । तत्र दृष्टान्तः–उग्रप्रतिग्रहीतारं हीनजातिस्त्रीस्वीकारकारिणमत एव कामयानं कामयमानं तत्रैवासक्तमित्यर्थः, जनं स्त्रियः पाणिगृहीत्य इव॥२८॥

गो० टी०–कच्चित्त्वामिति । उग्रप्रतिग्रहीतारमित्युपमानोपमेययोः साधारणविशेषणम् ।उग्रेण दण्डोपायेनादण्डयेभ्यो धनग्रहणं कुर्वन्तं त्वाम् उग्रप्रतिग्रहीतारम् उग्रेण दुर्जनेन धनप्रतिग्रहीतारं पतितं यष्टुकामं पतितं याजका ऋत्विज इव उग्रेण कर्मणा बलात्कारेण प्रतिग्रहीतारं कामयानं पुरुषं स्त्रिय इव वचनाज्जानन्ति कचित्, प्रजा इति शेषः । प्रजावमानहेतुभूतं न्यायातिक्रमेण उग्रकरग्रहणं त्वयि नास्ति कचिदिति भावः॥२९॥

२९] ति० टी०–उपायकुशलं सामाद्युपायचतुरम् । वैद्यं विद्याविदं राजनीतिशास्त्रज्ञं भृत्यं संदूषणे रतं येन केनापि हेतुनाऽऽप्तभृत्यविघटने रतं शूरं मरणनिर्भयं ऐश्वर्यकामं राज्याभिलाषिणं यो न हन्ति स हन्यते वध्यते इत्यर्थः इति तीर्थः । उपायकुशलं राज्ञः सकाशादर्थग्रहणार्थं व्याधिवर्धनोपायकुशलं वैद्यं भिषजं स्वामिसंदूषणे रतं भृत्यं सेवकं च राजानमपेच्छिय तदैश्वर्यकामं शूरं सेवकरूपं प्रभुं च यो न हन्ति स राजा तैरेव भिषजादिभिर्हन्यते इत्यर्थं कतक आह ॥ २९ ॥

रा० टी०–उपायेति । ऐश्वर्यकामं स्वातन्त्र्येण राजैश्वर्यभोगेच्छावन्तमत एव भृत्यसंदूषणे भृत्यचित्तचालकयत्ने रतमुपायेषु रोगप्रवर्तननिवर्तनयत्नेषु कुशलं निपुणं शूरं वैद्यं भिषजं यो न हन्ति स हन्यते तेन वैद्येनेति शेषः ॥ २९ ॥

गो० टी०–उपायकुशलमिति । उपायेषु सामाद्युपायेषु कुशलं निपुणं वैद्यं कणिकौक्कुटिलनीतिविद्याविदम् । पाठान्तरं चाणक्याद्युक्तकुटिलनीतिशास्त्रविदं भृत्यसंदूषणे रतम् अन्तरङ्गभृत्यानां संदूषणे असद्दोषोद्घाटनेन तद्विघटने रतं शूरं राजहिंसनेऽपि निर्भयम् ऐश्वर्यकामं क्रमेण राजैश्वर्याक्रमणकामं च पुरुषं यो न हन्ति स राजा तेनैव वध्यते राज्याद्भ्रष्टो भवतीत्यर्थः । एवंविधः पुरुषः त्वत्सन्निधौ न वर्तते कच्चिदित्यर्थः ॥ ३० ॥

३०] ति० टी०–शूराः परयोधाभिभवनसमर्थाः, धृतिमान्विपदि प्रशस्तधैर्यः, दक्षश्चतुरः ॥ ३० ॥

रा० टी०–कच्चिदिति । हृष्टः युद्धोत्साहविशिष्टः धृतिमान् धैर्यवान् अनुरक्तः स्वविषयकानुरागविशिष्टः दक्षः सामदानादिसमर्थः सेनापतिः कृतः कचित् ॥ ३० ॥

गो० टी०–संग्राह्यसेनापतिगुणानाह–कच्चिद्धृष्ट इति । हृष्यतीति हृष्टः राजकृतसत्कारेण संतुष्टः, यद्वा धृष्ट इतिच्छेदः धृष्टः व्यवहारेषु प्रगल्भः शूरः परनिग्रहपरः मतिमान् तत्तत्समयानुगुणस्वपरसेनाव्यूहतद्भेदनसेनानयनादिचतुरबुद्धियुक्तः धृतिमान् विपदि प्रशस्तधैर्यः शुचिः बाह्याभ्यन्तरशुद्धियुक्तः, यद्वा शुचिः स्वामिनि सविश्वासः कुलीनः सत्कुलप्रसूतः अनुरक्तः स्वस्मिन्निरवधिकप्रीतिमान् दक्षः कार्यकुशलः एवंविधः सेनापतिः कृतः कचित्, तादृशं पूर्वसेनापतिं विहायातादृशमन्यं न परिगृहीतवानसि कचिदित्यर्थः ॥ ३१ ॥

३१] ति० टी०–मुख्या गणमुख्याः, दृष्टापदाना दृष्टं द्वित्रिवारानुभूतमपदानं पूर्ववृत्तं पौरुषं येषां ते विक्रान्ताः शूराः३१

रा० टी०–बलवन्त इति । दृष्टापदानाः दृष्टानि पूर्वं बहुवारमनुभूतानि अपदानानि वृत्तानि येषां ते विक्रान्ताः स्वसमीपं प्राप्ताः बलवन्तः सत्कृत्य वचनसत्कारं कृत्वा मानिताः वस्त्राभरणादिदानेन संतोषिताः ॥ ३१ ॥

गो० टी०–बलवन्त इति । बलवन्तः अत्यन्तबलाः ते प्रसिद्धाः मुख्याः गुणमुख्याः युद्धविशारदाः युद्धे समर्थाः दृष्ट

१ उद्वेजितप्रजमिति गो. पाठः । २ राष्ट्रं तवान्विति गो. पाठः । ३ अन्विति रा. पाठः । ४ उग्रप्रतीति गो. रा. पाठः । ५ वध्यत इति गो. पाठः ।

कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम् । संप्राप्तकालं दातव्यं ददासि न विलम्बसे ॥ ३२ ॥
कालातिक्रमणे ह्येव भक्तवेतनयोर्भृताः । भर्तुरप्यतिकुप्यन्ति सोऽनर्थः सुमहान्कृतः ॥ ३३ ॥
कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः । कच्चित्प्राणांस्तवार्थेषु संत्यजन्ति समाहिताः ॥ ३४ ॥
कच्चिज्ज्ञानपदो विद्वान्दक्षिणः प्रतिभानवान् । यथोक्तवादी दूतस्ते कृतो भरत पण्डितः ॥ ३५ ॥
कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च । त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारणैः ॥ ३६ ॥

साक्षात्कृतम् अपदानं पूर्ववृत्तं पौरुषं येषां ते तथोक्ताः विक्रान्ताः शूराः 'शूरो वीरश्च विक्रान्ते' इत्यमरः । सत्कृत्य मानिताः पारितोषिकदानपूर्वकं श्लाघिताः कच्चित् ॥ ३२ ॥

३२] ति० टी०–भक्तं दैनंदिनदेयान्नम्, वेतनं प्रतिमासदेयम् ॥ ३२ ॥

रा० टी०–कच्चिदिति । संप्राप्तः कालो दानसमयो यस्य तत् अत एव दातव्यं द्रुतं देयं बलस्य सैन्यजनस्य भक्तं प्रतिदिनं देयमन्नादिकं वेतनं च यथोचितं ददासि विलम्बसे तु न ॥ ३२ ॥

गो० टी०–कच्चिद्बलस्येति । बलस्य सैन्यस्य संप्राप्तकालं कालप्राप्तं दातव्यं तत्तत्काले देयं भक्तमन्नं वेतनं प्रतिमासं देयां भृतिं च यथोचितं तत्तत्कार्योचितं ददासि न विलम्बयसे कच्चित् कालातिक्रमणं विना ददासि कच्चित् ॥३२॥

३३] ति० टी०–भृता भृतिर्जीविनो भृत्याः ॥ ३३ ॥

रा० टी०–विलम्बे दोषमाह–कालेति । भृताः भृतिजीवनवन्तो भृत्या भक्तवेतनयोः नियुक्तान्नभृत्योः कालातिक्रमणे सति भर्तुः भर्त्रे अतिकुप्यन्ति स कोपः सुमहान् अनर्थः अर्थविघातकः स्मृतः ॥ ३३ ॥

गो० टी०–विलम्बे दोषमाह–कालातिक्रमणादिति । भृत्याः भृतिजीविनः भटा इति यावत्, भर्तुः कुप्यन्ति भर्तारं प्रति कुप्यन्ति दुष्यन्ति कोपेन विकृता भवन्ति स विकारः सुमहाननर्थः स्मृतः अनर्थकरो भवेदित्यर्थः ॥ ३४ ॥

३४] ति० टी०–कुलपुत्रा ज्ञातयः। प्रधानतः प्रधानाः॥३४॥

रा० टी०–कच्चिदिति । प्रधानतः प्रधानाः कुलपुत्राः तव कुलप्रसूताः त्वामनुरक्ताः त्वद्विषयकानुरागवन्तः सन्तीति शेषः, अत एव तवार्थेषु प्रयोजनेषु समाहिताः सन्तः प्राणान् संत्यजन्ति त्यागानुकूल्यापारानुकूलकृतिमन्तो भवन्तीत्यर्थः ॥ ३४ ॥

गो० टी०–कच्चित्सर्व इति । कुलपुत्राः क्षत्रियकुलप्रसूताः ज्ञातय इति वा प्रधानतः प्रधानाः सार्वविभक्तिकस्तसिः ॥ ३५ ॥

३५] ति० टी०–प्रतिभानवान्प्रत्युत्पन्नमतिः यथोक्तवादी यथोक्तसंदेशप्रतिसंदेशवक्ता पण्डितः परिच्छेत्ता 'दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टाज्ञं शुचिं दक्षं कुलोद्भवम् ॥' इति मनुः ॥ ३५ ॥

रा० टी०–कच्चिदिति । विद्वान् नीतिज्ञः दक्षिणः चतुरः प्रतिभानवान् विस्मृतिरहितः पण्डितः सदसत्कार्यविवेकी अत एव यथोक्तवादी संदेशप्रतिसंदेशयोर्यथोक्तं वक्ता दूतस्ते त्वया कृतः ॥ ३५ ॥

गो० टी०–कच्चिज्ज्ञानपद इति । जानपदः स्वजनपदभवः परजनपदभवश्चेत्पक्षपातमाचरेत् विद्वान् पराभिप्रायज्ञः दक्षिणः समर्थः प्रतिभानवान् प्रत्युत्पन्नमतिः परोक्तस्याविलम्बमुचितोत्तरज्ञ इति यावत्, यथोक्तवादी उक्तमनतिक्रम्य संदेशप्रतिसंदेशवदनशीलः कार्योपयोगितया बहुमुखं व्याहरन्नपि स्वाम्युक्तमजहदेव व्यवहर्तेति यावत्, पण्डितः परिच्छेत्ता 'परिच्छेदो हि पाण्डित्यम्' इत्युक्तेः ॥ ३६ ॥

३६] ति० टी०–कच्चिदष्टादशेति । तानि च–मन्त्री, पुरोहितः, युवराजा, सेनापतिः, दौवारिकः, अन्तःपुराधिकृतः, बन्धनागाराधिकृतः, धनाध्यक्षः, राजाज्ञया आज्ञाप्येषु वक्ता, प्राड्विवाकसंज्ञो व्यवहारप्रष्टा, धर्मासनाधिकृतः, व्यवहारनिर्णेता सभ्याख्यः, सेनाया जीवितभृतिदानाध्यक्षः, कर्मान्ते वेतनग्राहिणः, नगराध्यक्षः, राष्ट्रान्तःपालः अयमेवाटविकः, दुष्टानां दण्डनाधिकारी, जलगिरिवनस्थलदुर्गपालाः, एतान्येव स्वपक्षे मन्त्रिपुरोहितयुवराजान्हित्वा च पञ्चदश। एकैकस्मिन्विषये त्रिभिस्त्रिभिरभिज्ञातैः परस्परमितरैश्चाभिज्ञातैरेतान्यष्टादश तीर्थानि वेत्सि कच्चित्। ' योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादर्शनेष्वपि ॥' इति । स्वदेशेऽप्येतैर्न्यायतो व्यवहारः प्रवर्त्यते न वेति विचारणीयं परदेशे चेति भावः ॥ ३६ ॥

रा० टी०–कच्चिदिति । अविज्ञातैः परस्परमन्यैर्वा ज्ञानरहितैः त्रिभिस्त्रिभिः एकैकस्मिन्विषये नियुक्तैरिति शेषः, चारणैः चारैः अन्येषु अन्यराजसमीपेषु अष्टादशतीर्थानि मन्त्र्यादीनि स्वपक्षे स्वसमीपे दशपञ्च मन्त्रिपुरोहितयुवराजान् संत्यज्य दशपञ्चसंख्याकानि तीर्थानि त्वं वेत्सि परीक्षया जानासि कच्चित् । मन्त्र्यादयस्तु १ मन्त्री, २ पुरोहितः, ३ युवराजः, ४ सेनापतिः, ५ दौवारिकः, ६ अन्तःपुराधिकृतः, ७ बन्धनागाराधिकृतः, ८ धनाध्यक्षः, ९ राजाज्ञाया आज्ञाप्येषु वक्ता, १० प्राड्विवाकसंज्ञो व्यवहारप्रष्टा, ११ धर्मासनाधिकृतः, १२ व्यवहारनिर्णेता सभ्याख्यः, १३ सेनायां जीवितभृतिदानाध्यक्षः, १४ कर्मान्ते वेतनग्राही, १५ नगराध्यक्षः,

१ क्रमणाच्चैवेति गो. पाठः । २ भर्तुः कुप्यन्ति दुष्यन्तीति गो.पाठः । ३ स्मृत इति गो.रा.पाठः । ४ चारकैरिति गो.पाठः । ५ राज इति युक्तं भाति ।

कच्चिद्व्यपास्तानहितान्प्रतियातांश्च सर्वदा । दुर्बलाननवज्ञाय वर्तसे रिपुसूदन ॥ ३७ ॥
कच्चिन्न लोकायतिकान्ब्राह्मणांस्तात सेवसे । अनर्थकुशला ह्येते बालाः पण्डितमानिनः ॥ ३८ ॥

१६ राष्ट्रान्तःपालः अयमेवाटविकः, १७ दुष्टानां दण्डनाधिकारी, १८ जलगिरिवनदुर्गस्थलपालः इति । 'योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादर्शनेष्वपि' इति कोशः ॥ ३६ ॥

गो० टी०–कच्चिदष्टादशान्येष्विति । अन्येषु परपक्षेषु अष्टादशतीर्थानि स्वपक्षे पञ्चदश तीर्थानि च अविज्ञातैः परस्परमन्यैश्चाविज्ञातैः विज्ञातत्वे तेषां सांकेतिकव्यवहारः प्रादुष्यात् एकस्मिन् तीर्थे त्रिभिस्त्रिभिः चारकैः वेषान्तरधारिभिश्चारैः कृत्रिमार्थे कप्रत्ययः । वेत्सि कच्चित् एतानि न्यायतोऽन्यायतो वा प्रवर्तन्त इति जानासि कच्चिदित्यर्थः । तानीमानि अष्टादशनीतिशास्त्रोक्तानि तीर्थानि मन्त्रिपुरोहितयुवराजसेनापतिदौवारिकान्तर्वंशिककारागाराधिकृतार्थसंचयकृतकार्यनियोजकप्राड्विवाकसेनानायकनगराध्यक्षकर्मान्तिकसभ्यधर्माध्यक्षदण्डपालदुर्गपालराष्ट्रान्तपालाः । एष्वेव मन्त्रिपुरोहितयुवराजव्यतिरिक्तानि स्वपक्षे पञ्चदश तीर्थानि । मन्त्रिपुरोहितयुवराजसेनापतयः प्रसिद्धाः, दौवारिकः अन्तःपुरादिद्वाररक्षणाधिकृतजननिर्वाहकः, अन्तर्वंशिकः अन्तःपुरकार्यनिर्वाहकः, कारागारम् अपराधिनां बन्धनगृहं तत्राधिकृतः कारागाराधिकृतः, अर्थसंचयकृत् धनाध्यक्षः, कार्यनियोजकः राजाज्ञायाः बहिः प्रचारकर्ता, प्राड्विवाकः व्यवहारप्रष्टा, तल्लक्षणमुक्तम्–'विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च । प्रियपूर्वं प्रावदति प्राड्विवाकस्ततः स्मृतः' इति । सेनानायकः सेनायाः भृतिजीवनादिदानाध्यक्षः, नगराध्यक्षः रात्रौ नगरशोधननगरद्वारप्राकारादिरक्षणसंविधानादिकर्ता, कर्मान्तिकः कार्यान्ते वेतनग्राहिणां सैनिकव्यतिरिक्तानां सर्वेषां राज्ञः सकाशात् एकधा स्वयं वेतनं गृहीत्वा प्रत्येकं तथो दापयति सः, सभ्यः प्रतिदिनं सभालंकरणराजमन्त्रिप्रभृतिसमुचितासनविधानसभ्यानयनासभ्यनिरोधनयथोचितनिवेशनसभानिःशब्दीकरणसभारक्षणादिविधायिजननिर्वाहकः, धर्माध्यक्षः दायभागादिविषये विवादं कुर्वतां विवादपदविशोधनपूर्वकं यथाधर्मशास्त्रं विवादशमनकर्ता, दण्डपालः परस्वापहरणाद्यपराधकारिणां राजाज्ञाप्रकारेण करशिरश्छेदादिविधायिजननियोजकः, दुर्गपालः गिरिजलवनादिदुर्गसंततरक्षकजननिर्वाहकः, राष्ट्रान्तपालः स्वराष्ट्रसीमान्ते सर्वासु दिक्षु परराजाक्रमणादिनिवारणाय सदा तद्रक्षणं कुर्वतां निर्वाहकः, स्वकीयमन्त्रिपुरोहितयुवराजा न परीक्ष्याः तेषां सदा स्वसमीपवर्तित्वेन तत्स्वभावस्य स्वेनैव ज्ञातत्वात्, तथोक्तं नीतिशास्त्रे–'चारान्विचारयेत्तीर्थैश्चात्मनश्च परस्य च । पाषण्डादीनविज्ञातानन्योन्यमितरैरपि ॥ मन्त्रिणं युवराजं च हित्वा स्वेषु पुरोहितम्' इति । स्वेषु मन्त्रिणं युवराजं पुरोहितं च हित्वेत्यन्वयः । एषां तीर्थशब्दवाच्यत्वमुक्तं हलायुधे–'योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यादर्शनेष्वपि' इति ॥ ३७ ॥

३७] ति० टी०–व्यपास्तान्निष्कासितान् प्रतियातान्पुनरागतान् दुर्बलान्दुर्बलानपि अनवज्ञायेति दुर्बलोऽयमहितः किमस्माकं करिष्यतीत्युपेक्षां न करोषि कच्चित् ॥ ३७ ॥

रा० टी०–कच्चिदिति । व्यपास्तान् देशविशेषात् निष्काशितान् अत एव दुर्बलान् प्रतियातान् पुनः स्वदेशं कथंचित्प्राप्तान् अहितान् शत्रून् अवज्ञाय अतिदुर्बलत्वान्न कंचिदपकारं कर्तुं समर्था इमे इति बुद्ध्या अनुपेक्ष्य वर्तसे कच्चित् ॥ ३७ ॥

गो० टी०–कच्चिच्चव्यपास्तानिर्ति । व्यपास्तान् निष्कासितान् प्रतियातान् पुनरागतान् अहितान् शत्रून् दुर्बलाननवज्ञाय वर्तसे कच्चित् दुर्बला इत्यवज्ञां कृत्वा न वर्तसे कच्चिदिति भावः । प्रतियानमवष्टम्भमन्तरेण न संभवतीति मत्वा तेषु सावधानतया स्थातव्यमिति भावः ॥ ३८ ॥

३८] ति० टी०–लोकायतिकांश्चार्वाकमतानुचारिणः प्रत्यक्षमात्रप्रमाणकान् अपरे लोकायतिकाः शुष्कतर्कवादुकाः । ब्राह्मणत्वेऽपि तदपरिग्रहे हेतुमाह–अनर्थेति । परलोकतत्साधनाभावरूपानर्थप्रतिपादनकुशलाः अत एव बाला अज्ञाः वेदज्ञसंनिधाविति शेषः, पण्डितमानिनः स्वयूथ्येष्वेव केवलमात्मनः पण्डितान्मन्यन्ते नान्यत्र ॥ ३८ ॥

रा० टी०–कच्चिदिति । ब्राह्मणान् ब्राह्मणकुलोत्पन्नान् अपि लोकायतिकान् प्रत्यक्षमात्रप्रमाणकान् शुष्कतर्कवादिनश्च तदुपलक्षितचार्वाकबौद्धादीनपि न सेवसे कच्चित् । तत्सेवने दोषमाह–बालाः परलोकविषयकज्ञानाभाववन्तः पण्डितमानिनः पण्डितंमन्याः एते लोकायतिकप्रभृतयः अनर्थकुशलाः अनर्थे सर्वार्थविघातके परमार्थबुद्धिनिवर्तने कुशलाः निपुणाः सन्तीति शेषः ॥ ३८ ॥

गो० टी०–कच्चिन्न लोकायतिकानिति । लोकायतिकान् लोकेष्वायतं विस्तृतं लोकायतं प्रत्यक्षप्रमाणं, यद्वा लोकायतशब्दाभ्यां प्रत्यक्षमनुमानं चोच्यते लोक्यते साक्षात्क्रियतेऽनेनेति लोकः प्रत्यक्षप्रमाणम् आसमन्ताद्व्याप्य धूमादिसमीपवर्ती वह्न्यादिर्यत्र यते गृह्यतेऽनेनेति आयतमनुमानं तदेषामस्तीति लोकायतिकाः "अत इनिठनौ" इति ठन्प्रत्ययः । नास्तिका बौद्धचार्वाकादयः तान् ब्राह्मणान् न सेवसे कच्चित् । असेवायां हेतुमाह–अनर्थेति । अर्थेषु तत्त्वार्थेषु कुशलाः यथावज्ज्ञानवन्तः ते न भवन्तीत्यनर्थकुशलाः, यद्वा अनर्थः धर्मानुष्ठानश्रद्धावैकल्यं तन्मूलकसज्जनबहिष्कारनरकपतनादिः तत्र कुशलाः दुर्बोधनेन तत्संपादका इत्यर्थः, बालाः

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः । बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते ॥ ३९ ॥
वीरैरध्युषितां पूर्वमस्माकं तात पूर्वकैः । सत्यनामां दृढद्वारां हस्त्यश्वरथसंकुलाम् ॥ ४० ॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वकर्मनिरतैः सदा । जितेन्द्रियैर्महोत्साहैर्दृष्टतामार्यैः सहस्रशः ॥ ४१ ॥
प्रासादैर्विविधाकारैर्दृष्टतां[1] वैद्यजनाकुलाम् । कचित्सुमुदितां[2] स्फीतामयोध्यां परिरक्षसे ॥ ४२ ॥
कचिच्चैत्यशतैर्जुष्टः[3] मुनिविष्टजनाकुलः । देवस्थानैः प्रपाभिश्च तटाकैश्चोपशोभितः ॥ ४३ ॥
प्रहृष्टनरनारीकः समाजोत्सवशोभितः । सुकृष्टसीमापशुमान्हिंसाभिरभिवर्जितः ॥ ४४ ॥
अदेवमातृको रम्यः श्वापदैः परिवर्जितः । परित्यक्तो भयैः सर्वैः खनिभिश्चोपशोभितः॥ ४५ ॥
विवर्जितो नरैः पापैर्मम पूर्वैः सुरक्षितः । कच्चिज्जनपदः स्फीतः सुखं वसति राघव ॥ ४६ ॥

तत्त्वज्ञानविरोध्यज्ञानयुक्ताः अथ च पण्डितमानिनः अपण्डितः मात्मानं पण्डितं मन्वानाः एते अनर्थकुशला हि ॥ ३९ ॥

३९] ति० टी०–द्वितीयश्लोकायतानां त्यागे हेतुमाह–धर्मेत्यादि । मुख्येषु मुख्यप्रमाणभूतेषु । आन्वीक्षिकी तर्कविद्या । शुष्कतर्कविद्याजनितां बुद्धिमवलम्ब्य निरर्थं निष्प्रयोजनं वदन्ति । "यथात्मनो ज्ञानाश्रयत्वमीशो जगन्निमित्तकारणं नित्यज्ञानादिगुणकश्च" इत्यादिश्रुतिविरुद्धवादाभिप्रायमिदम् ३९॥

रा० टी०–अनर्थकुशलत्वं प्रकटयन्नाह–धर्मेति । मुख्येषु प्रमाणप्रधानेषु धर्मशास्त्रेषु विद्यमानेषु सत्सु दुर्बुधाः वेदविरुद्धज्ञानवन्तस्ते लोकायतिकादयः आन्वीक्षिकीं शुष्कतर्कजनितां बुद्धिं प्राप्य निरर्थं परमार्थशून्यं प्रवदन्ति । एतेन स्वहिताकाङ्क्षिभिः बौद्धादिसंसर्गः दूरतः परिहर्तव्य इति सूचितम् ॥ ३९ ॥

गो० टी०–अनर्थकुशलत्वमेवोपपादयति–धर्मशास्त्रेष्विति । दुर्बुधाः वेदमार्गविपरीतबुद्धयः ते मुख्येषु तामसस्मृतिपुराणादिव्यावृत्तेषु सात्त्विकमहर्षिप्रणीतेषु सज्जनादरणीयेषु धर्मशास्त्रेषु धर्मप्रमापकशास्त्रेषु विद्यमानेषु तत्तत्संप्रदायपरंपरया पठ्यमानेषु सत्सु आन्वीक्षिकीं बुद्धिं प्राप्य शुष्कतर्कविद्यां बुद्धिमास्थाय निरर्थं निष्प्रयोजनं प्रवदन्ति 'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इति स्मृतेः ॥ ४० ॥

४०] ति० टी०–सत्यनामामयोध्येत्यन्वर्थनामाम् ॥ ४०॥

४१] ति० टी–आर्यैरुक्तत्रैवर्णिकैः ॥ ४१ ॥

४२] ति० टी०–सम्मुदितां सिद्धाम्, स्फीतां समृद्धाम्॥४२॥

रा० टी०–वीरैरिति । हे तात! अस्माकं पूर्वकैः वीरैः पूर्वमध्युषितामधिष्ठितां दृढद्वारां दृढानि द्वाराणि यस्यास्तां हस्त्यश्वरथसंकुलां हस्त्यादिव्याप्तां स्वकर्मनिरतैः जितानि इन्द्रियाणि यैस्तैः महोत्साहैः दुःखास्पृष्टत्वेनात्युत्साहविशिष्टैः अत एव आर्यैः श्रेष्ठैः सहस्रशो ब्राह्मणादिभिः दृष्टतां विविधाकारैः अनेकविधाकारविशिष्टैः प्रासादैर्दृष्टतां वैद्यजनैः वैद्यानां जनकैर्मुख्यभिषग्भिरित्यर्थः, आकुलां व्याप्तां सम्मुदितां सम्यगुदितं स्वकल्याणार्थमुच्चारणं यस्यास्तां सत्यनामां सत्यमन्वर्थं नाम यस्यास्तां स्फीतामतिसमृद्धामयोध्यां परिरक्षसे कचित् । श्लोकत्रयमेकान्वयि सत्यनामामित्यत्र "डाबुभाभ्यां–" इति डाप् ॥४०–४२॥

गो०टी०–वीरैरित्यादिश्लोकत्रयमेकं वाक्यम् । अयोध्यां सत्यनामां परिरक्षसि कचित् सत्यनामाम् "डाबुभाभ्यामन्यतरस्याम्" इति डाप् । अयोध्येति नाम सत्यं यथा भवति तथा रक्षसि कचिदित्यर्थः । सत्यनामात्वमूलम्–वीरैरध्युषितामित्यादि । तत्फलानि सत्यनामात्वादीनि आर्यैः पूज्यैः । तत्र हेतवः स्वकर्मनिरतत्वादयः । वैद्यजनाकुलां वैद्यजनाः विद्वज्जनाः तैराकुलां सम्मुदितां सुसंतुष्टजनामित्यर्थः । स्फीतां समृद्धाम् ॥४१–४३॥

४३] ति० टी०–चैत्यशतैरश्वमेधान्तयागानेकचयनप्रदेशैः 'कचिच्चैत्यशतैः' इति पाठः । मुनिविष्टैः मुप्रतिष्ठितैर्जनैराकुलां निबिडः ॥ ४३ ॥

४४] ति०टी०–'प्रभिन्ननरनारीकः' इति पाठे प्रभेदः संतोषः। सुकृष्टाः सीमास्तत्तत्क्षेत्रप्रान्तदेशाः पशवश्च यस्मिन्स तथा॥४४॥

४५] ति० टी०–अदेवमातृक इति । नदीमातृक इत्यर्थः । 'नद्यम्बुजीवनो देशो नदीमातृक उच्यते । वृष्टिनिष्पाद्यसस्यस्तु विज्ञेयो देवमातृकः॥' इति । खनिः स्वर्णरत्नाद्याकरः ईदृशो जनपदः सर्वैर्भयैः परित्यक्तः कचिदस्ति ॥ ४५ ॥

४६] ति० टी०–स च सुखं वसति कचिदित्यर्थः ॥४६॥

रा० टी०–कच्चिदिति । चैत्यशतैः शतशोऽग्निचयनैः अनेकविधयागैरित्यर्थः, जुष्टः सेवितः प्रीतो वा मुनिविष्टजनैः मुनिविष्टाः सर्वत्र प्रविष्टबुद्धय एव जनास्तैः आकुलः व्याप्तः देवस्थानादिभिरुपशोभितः तत्र प्रपाः पानीयशालाः 'प्रपा पानीयशाला स्यात्' इति हलायुधः । प्रहृष्टाः नरनार्यो यस्मिन् सः समाजोत्सवशोभितः समाजेषु सभासु य उत्सवास्तैः शोभितः सुकृष्टाः विदारिताः सीमा यैस्ते एव पशवः तद्वान् हिंसाभिः अभिवर्जितो रहितः अदेवमातृकः वृष्टिनिष्पाद्यसस्यविशिष्टदेशभिन्नः नद्यम्बुजीवन इत्यर्थः, 'नद्यम्बुजीवनो देशो नदीमातृक उच्यते । वृष्टिनिष्पाद्यसस्यस्तु विज्ञेयो देवमातृकः' इति हलायुधः । रम्यः रमणीयः श्वापदैः क्रूरजन्तुभिः

---

१ सुमुदितामिति गो. पाठः । २ रक्षसीति गो. पाठः । ३ चित्येति गो. पाठः । ४ परिवर्जित इति गो. पाठः ।

कच्चित्ते दयिताः सर्वे कृषिगोरक्ष्यजीविनः । वार्तायां सांप्रतं तात लोकोऽयं सुखमेधते ॥ ४७ ॥
तेषां गुप्तिपरीहारैः कच्चित्ते भरणं कृतम् । रक्ष्या हि राज्ञा धर्मेण सर्वे विषयवासिनः ॥ ४८ ॥
कच्चित्स्त्रियः सान्त्वयसे कच्चित्तास्ते सुरक्षिताः। कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे ॥ ४९ ॥
कच्चिन्नागवनं गुप्तं कच्चित्ते सन्ति धेनुकाः । कच्चिन्न गणिकाश्वानां कुञ्जराणां च तृप्यसि ॥ ५० ॥

परिवर्जितः सर्वैर्भयैः परित्यक्तः खनिभिः स्वर्णाद्याकरैः उपशोभितः पापैः पापविशिष्टैः नरैः विवर्जितः स्फीतः स्वच्छः जनपदः कोशलदेशः सुखं वसति ' खनिः स्त्रियामाकरः स्यात् ' इत्यमरः । श्लोकचतुष्टयमेकान्वयि ॥ ४३–४६ ॥

गो० टी०–कच्चिच्चित्यशतैरित्यादिश्लोकचतुष्टयमेकं वाक्यम्। 'चित्यशतैः' 'चैत्यशतैः' इति च पाठः अभयत्रापि अश्वमेधान्तमहायज्ञचयनप्रदेशसमूहैरित्यर्थः।सुनिविष्टजनाकुलः सुप्रतिष्ठितजनव्याप्तः सुप्रतिष्ठितत्वं च राजन्यत्वसुदृष्ट्यारोग्यादिदेशगुणाकृष्टचित्ततया देशान्तरजिगमिषाराहित्येन तत्रैवासक्तत्वं, देवस्थानैः देवालयैः प्रपाभिः पानीयशालाभिः मार्गप्रवर्तिताभिरिति शेषः, 'प्रपा पानीयशालिका' इत्यमरः । तटाकैः तस्यादिष्टद्विनिमित्तैः महाजलाशयैः समाजोत्सवशोभितः समाजैः धर्मनिर्णयार्थसभाभिः, यद्वा नदीतटाकादितीरवनेषु समस्तवस्तुविक्रयसौकर्याय निखिलजनविदिततया कृतवारसंकेतैः कृतापणो वणिजां समूहः समाज इत्युच्यते, यद्वा समाजयुक्तोत्सवशोभितः । सुकृष्टसीमा आकृष्टा ईषत्कृष्टा च भूमिर्न तत्रास्तीत्यर्थः, यद्वा सर्वदा सुकृष्टप्रायसीमा अकृष्टपच्यभूमियुक्त इत्यर्थः । पशुमान् गवाजादिपशुसमृद्धः हिंसाभिः ईतिभिः षड्भिः 'अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः खगाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः' इत्युक्ताभिः परिवर्जितः, यद्वा परस्परहिंसारहित इत्यर्थः । अदेवमातृकः देवमातृकदेशरहितः वृष्ट्येकनिष्पाद्यसस्यकदेशरहितः इत्यर्थः, सरयूतीरस्थत्वेन सर्वतो नदीमातृक इति यावत् । 'नद्यम्बुजीवनो देशो नदीमातृक उच्यते । वृष्टिनिष्पाद्यसस्यस्तु विज्ञेयो देवमातृकः' इति हलायुधः । रम्यः आरामादिशोभितत्वेन रमणीयः श्वापदैः व्याघ्रादिहिंस्रपशुभिः परिवर्जितः भयैः सर्वैः भयहेतुभिश्चोरादिभिः सर्वैः परित्यक्तः परितस्त्यक्तः तत्समीपदेशेऽपि चोरादिभयं नास्तीत्यर्थः । खनिभिः रत्नसुवर्णरजताद्याकरैः 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः । पुनः कच्चिच्छब्देन प्रतिविशेषणं प्रश्न इति गम्यते 'आद्यन्तयोः प्रयुक्तोऽयं कुतो नान्वेति मध्यतः । प्रष्टव्यतायां तुल्यायां केनार्षंजरतीक्रमः ॥ आदरातिशयोऽनेन श्रीमत्कोसलगोचरः । गम्यते रघुनाथस्य सुक्तिर्येनापिपीलिकम्' ॥ ४४–४७ ॥

४७] ति० टी०–कृषिगोरक्ष्यजीविनो वैश्याः वार्तां 'कृषिगोरक्ष्यवाणिज्यकेयं वार्तेत्युदाहृतम्' तत्र सांप्रतं वर्तन्ते इति शेषः । लोको जीवलोकः कृष्यादौ स्थितः सुखमेधते कचित् ॥ ४७ ॥

रा० टी०–कच्चिदिति । ते दयिताः प्रियाः कृषिगोरक्षजीविनः वैश्याः वार्तायां कृषिगोरक्षवाणिज्यकुसीदात्मिकायां वर्तन्ते इति शेषः, संश्रितो यदाश्रितः अयं लोकः सुखमेधते॥४७॥

गो० टी०–कच्चित्ते दयिता इति । कृषिगोरक्षजीविनः वैश्याः दयिताः कचित् अर्थसंपादनद्वारा अभिमताः वार्तायां क्रयविक्रयात्मकवाणिज्ये सति ' वार्ता वागिङ्गितोदन्तवाणिज्यादिषु वर्तते' इति वैजयन्ती । संश्रितो लोकः त्वत्संश्रितो जनः सुखमेधते हि ॥ ४८ ॥

४८] ति० टी०–गुप्तिपरीहारैः गुप्तिरिष्टप्रापणम्, परीहारोऽनिष्टपरिहारः, तैः । तेषां कृष्यादिजीविनां भरणं कृतं कचिदिति तीर्थः । 'गुप्तपरीहारैः' इति पाठः गुप्त्यर्थनियुक्तै राजमनुष्यैः क्रियमाणतस्करादयनर्थपरिहारैस्ते त्वया भरणं कृतं कचिदिति कतकः ॥ ४८ ॥

रा० टी०–तेषामिति । तेषां वैश्यानां गुप्तिपरीहारैः गुप्तयः इष्टप्रापणानि परीहाराः अनिष्टनिवारणानि तैर्भरणं रक्षणं कच्चित्ते कृतं हि यतः विषयवासिनः स्वदेशवर्तिनः सर्वे जनाः राज्ञा धर्मेण रक्ष्याः ॥ ४८ ॥

गो० टी०–तेषामिति । गुप्तिपरीहारैः इष्टप्रापणानिष्टनिवारणैः ते त्वया तेषां भरणं पोषणं कृतं कचित् । तस्यावर्जनीयत्वमाह–रक्ष्या हीति ॥ ४९ ॥

४९] ति० टी०–ताः स्त्रियः सुरक्षिताः, त्वयेत्यर्थः । न श्रद्दधास्यासामिति वचनादिकं वास्तवमिति शेषः, गुह्यमप्रकाश्यवृत्तान्तमिष्टेति मत्वा न भाषसे कचित् ॥ ४९ ॥

रा० टी०–कच्चिदिति । स्त्रियः स्वभार्याः सान्त्वयसे कचित् ताः स्त्रियः ते त्वया सुरक्षिताः आसां स्त्रीणां न श्रद्दधासि अतिविश्वासं करोषि कचित् अत एव गुह्यमप्राकाश्यं न भाषसे कचित् ॥ ४९ ॥

गो० टी०–कच्चित्स्त्रिय इति । स्त्रियः स्वस्त्रियः सान्त्वयसि तदनुकूलतया वर्तसे, सुरक्षिताः अन्यपुरुषसंभाषणादिभ्य इति शेषः । आसां स्त्रीणां वचनमिति शेषः, न श्रद्दधासि आदरेण यथार्थबुद्ध्या न शृणोषीत्यर्थः । गुह्यं न भाषसे ताभ्य इति शेषः, स्त्रीणामतिचञ्चलमतित्वेन रहस्यभेदप्रसङ्गादिति भावः ॥ ५० ॥

५०] ति० टी०–नागवनं गजोत्पत्तिस्थानभूतं वनम् । धेनुका धेनवः स्वार्थे कः। गणिकाः करिण्यः ' वेश्याकरिण्योर्गणिका' करिण्यादिसंपादनविषये तृप्तिं नाप्नोषि कचित् ॥५०॥

रा० टी०–कच्चिदिति । नागवनं गजसेव्यारण्यं गुप्तं

१ संश्रित इति गो. रा. पाठः । २ ह्रीति गो. पाठः । ३ सान्त्वयसीति गो. पाठः । ४ चेति गो. पाठः । ५ इष्टा इति युक्तं भाति ।

कच्चिदर्शयसे नित्यं मानुषाणां विभूषितम् । उत्थायोत्थाय पूर्वाह्णे राजपुत्र महापथे ॥ ५१ ॥
कच्चिन्न सर्वे कर्मान्ताः प्रत्यक्षास्तेऽविशङ्कया । सर्वे वा पुनरुत्सृष्टा मध्यमे वात्र कारणम् ॥ ५२ ॥
कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः । यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥ ५३ ॥
आयस्ते विपुलः कच्चित्कच्चिदल्पतरो व्ययः । अपात्रेषु न ते कच्चित्कोशो गच्छति राघव ॥ ५४ ॥
देवतार्थे च पित्रर्थे ब्राह्मणाभ्यागतेषु च । योधेषु मित्रवर्गेषु कच्चिद्गच्छति ते व्ययः ॥ ५५ ॥
कच्चिदार्योऽपि शुद्धात्मा क्षारितश्चोपकर्मणा । अदृष्टः शास्त्रकुशलैर्न लोभाद्ध्यस्यते शुचिः ॥ ५६ ॥

छेदकेभ्यः रक्षितं कच्चित्, धेनुकाः धेनवः सन्ति कुशलिन्य इति शेषः, स्वार्थेकः। गणिकाश्चानां करिणी तुरङ्गमानां कुञ्जराणां च कच्चिन्न तृप्यसि एतत्संपादने तृप्तिं न प्राप्नोषि ' वेश्याकरिण्योर्गणिका ' इति वैजयन्ती ॥ ५० ॥

गो० टी०–कच्चिन्नागवनमिति । नागवनं गजोत्पत्तिस्थानभूतं वनं तदरक्षणे परैर्गजग्रहणप्रसङ्ग इति भावः। धेनुकाः गजग्रहणसाधनभूताः करिण्यः 'करिणी धेनुका वशा' इत्यमरः। गणिकाश्चानां गणिकाः करिण्यः ' वेश्या करिण्योर्गणिका' इति वैजयन्ती । गणिकाश्चाश्चाश्च गणिकाश्चाः तेषां गणिकाश्चानां कुञ्जराणां च न तृप्यसि कचित् तत्संपादनविषये तृप्तिं न प्राप्नोषि कचिदित्यर्थः। "पूरणगुण–" इत्यादिना समासप्रतिषेधेन सूचिता षष्ठी ॥ ५१ ॥

५१] ति० टी०–भूषितम् सभायां स्थित्वात्मानमिति शेषः, तथा महापथे चात्मानं दर्शयसे ॥ ५१ ॥

रा० टी०–कच्चिदिति । मानुषाणां मानुषैः भृत्यवर्गैरित्यर्थः, विभूषितमलंकृतमात्मानमिति शेषः, पूर्वाह्णे उत्थायोत्थाय महापथे राजमार्गे दर्शयसे कचित् प्रतिदिनं दर्शनेन प्रजानां संतोषातिशयो भवतीति सूचितम् ॥ ५१ ॥

गो० टी०–कच्चिद्दर्शयस इति । विभूषितम् आत्मानमिति शेषः, महापथे सभायामिति यावत्, प्रातः सभायां स्थित्वा मनुष्याणां विभूषितमात्मानं दर्शयसे कचिदिति संबन्धः अन्यथा राजारोग्ये तेषां शङ्का स्यादिति भावः॥५२॥

५२–५३] ति० टी०–कर्मान्ताः कर्मकरा अविशङ्कया निर्भयतया ते प्रत्यक्षा न किल । वाथवा सर्वे ते उत्सृष्टाः परित्यक्तदर्शना न । अत्र कर्मकरविषये मध्यमे वनातिदर्शनादर्शनयोर्मध्यरीत्या करणमेव कारणमर्थप्राप्तिकारणम् ॥ ५२ ॥ ५३ ॥

रा० टी०–कच्चिदिति । सर्वे कर्मान्ताः कर्मसु नियुक्ताः अविशङ्कया शङ्काराहित्येन ते प्रत्यक्षाः अतिसमीपवर्तिनस्तु न वा अथवा सर्वे ते उत्सृष्टाः अतिदूरं प्रापितास्तु न मध्यभाग एव संस्थाप्या इत्यर्थः । तत्र हेतुः–अत्र अतिनिकटादिषु मध्यं मध्यस्थितिरेव कारणं प्रयोजनसाधकम् ॥ ५२ ॥

गो० टी०–कच्चिन्न सर्वे इति । कर्मान्ताः कर्मान्तिकाः कर्मकरा इति यावत्, अविशङ्कया ते न प्रत्यक्षाः कचित् निर्भयतया त्वत्सन्निधिं प्राप्ता न कचिदित्यर्थः । अथवा ते सर्वे पुनः उत्सृष्टा न कचित् दर्शनाप्रदानेन परित्यक्ता न कचिदित्यर्थः । अविशङ्कया प्रवेशे अवज्ञादिकं संभवेत् दर्शनाभावे कार्यहानिः स्यात् अतः अत्र कर्मान्तिकविषये मध्यमेव कारणम् अतिदर्शनादर्शनयोर्मध्यमरीत्याश्रयणमेवार्थसिद्धिकारणम् अतिदर्शने दूतानां तेषां स्वामिन्यनादरः स्यात् अत्यदर्शने स्वकार्यविज्ञापनावसरालाभात्किमनेनेति कोपः स्यात् राजकार्यहानिश्च तस्मात्यथोचितसमये दर्शनप्रदानमेवोचितमिति भावः ॥ ५३ ॥

रा० टी०–कच्चिदिति । सर्वाणि दुर्गाणि धनादिभिः यन्त्रैः शतघ्न्यादिभिश्च शिल्पिधनुर्धरैः क्रियाकुशलधनुर्धारिभिश्च पूर्णानि सन्तीति शेषः ॥ ५३ ॥

गो० टी०–कच्चित्सर्वाणीति । दुर्गाणि औदकपार्वतवार्क्षैरिणधान्वनानि धनधान्यायुधोदकैः यन्त्रैः शिल्पिभिर्धनुर्धरैश्च परिपूर्णानि कचित् । अत्र कामन्दकः ' औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा । जलान्नायुधयन्त्राढ्यं वीरयोधैरधिष्ठितम् । गुप्तिप्रधानमाचार्या दुर्गं समनुमेनिरे' इति ॥ ५४ ॥

५४] ति० टी०–आयो धनागमः व्ययो भोगबलरक्षार्थं त्यागः, अपात्रेषु नटगायकादिषु ॥ ५४ ॥

रा० टी०–आय इति । आयो धनागमः विपुलः अधिकः कचिद्व्ययः भोगार्थं त्यागः अल्पतरः आयापेक्षया न्यूनः कचित्, अपात्रेषु दानानर्हेषु ते कोशः न गच्छति अपात्रेभ्यो न ददासीत्यर्थः ॥ ५४ ॥

गो० टी०–आय इति । आयः धनागमः कोशः संचितधनम् अपात्रेषु नटविटगायकेषु न गच्छति कचित् तेभ्योऽपरिमितं न देयमिति भावः ॥ ५५ ॥

५५] ति० टी०–अभ्यागतोऽतिथिर्यः कचित् । व्ययः आयान्न्यून इति शेषः ॥ ५५ ॥

रा० टी०–देवतेति । देवतार्थादौ ते व्ययः त्यागाश्रयीभूतद्रव्यं गच्छति प्राप्नोति कचित् ॥ ५५ ॥

गो० टी०–धनव्ययस्योचितविषयमाह–तदेवार्थ इत्यादिना ॥ ५६ ॥

५६] ति० टी०–आर्यः साधुः शुद्धात्मापि सन्नपकर्मणा

१ मनुष्याणामिति गो. पाठः । २ परीति गो. पाठः । ३ चोरेति गो. पाठः । ४ अपृष्ट इति गो. पाठः । ५ वध्यत इति गो. पाठः ।

गृहीतश्चैव पृष्टश्च काले दृष्टः सकारणः । कच्चिन्न मुच्यते चोरो धनलोभान्नरर्षभ ॥ ५७ ॥
व्यसने कच्चिदाढ्यस्य दुर्बलस्य च राघव । अर्थं विरागाः पश्यन्ति तवामात्या बहुश्रुताः ॥ ५८ ॥
यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि राघव । तानि पुत्रपशून्घ्नन्ति प्रीत्यर्थमनुशासतः ॥ ५९ ॥
कच्चिद्वृद्धांश्च बालांश्च [2]वैद्यान्मुख्यांश्च राघव । दानेन मनसा वाचा त्रिभिरेतैर्बुभूषसे ॥ ६० ॥
कच्चिद्गुरुंश्च वृद्धांश्च तापसान्देवतातिथीन् । चैत्यांश्च सर्वान्सिद्धार्थान्ब्राह्मणांश्च नमस्यसि ॥ ६१ ॥

स्तेयागम्यागमनादिदोषेण क्षारितोऽभिशस्तः शास्त्रकुशलैर्धर्मशास्त्रकुशलैरदृष्ट एवानिर्णीतदोष एव लोभाद्धनलोभाच्छुचिरपि न बध्यते न दण्ड्यते कचित् ॥ ५६ ॥

रा० टी०—कच्चिदिति। अपकर्मणा स्तेयादिदोषेण आक्षारितः मिथ्याभिशस्तः किंच क्षारितस्त्यक्तः अत एव शास्त्रकुशलैः अदृष्टः अदृष्टपापकः अत एव शुद्धात्मा शुद्धमनस्कः अत एव शुचिः अत एव आर्यः श्रेष्ठः लोभाद्बध्यते तु न 'आक्षारितोऽभिशस्तः स्यात्' इत्यमरः ॥ ५६ ॥

गो० टी०—कच्चिदार्य इति । विशुद्धात्मा विशुद्धस्वभावः शुचिः करणत्रयशुद्धियुक्तः आर्यः सज्जनः यदृच्छया चोरकर्मणा आक्षारितः अभिशस्तः 'आक्षारितः क्षारितोऽभिशस्ते' इत्यमरः। शास्त्रकुशलैः अदृष्टः प्रश्नेन अशोधितः सन् लोभाद्धनलोभान्न बध्यते कचित् ॥ ५७ ॥

५७] ति० टी०—गृहीतः पालकैर्धनस्वामिना वा सकारणो दृष्टश्चोरत्वेन ग्रहणकारणैर्युक्तो दृष्टः पृष्टः प्रश्नेनापि निश्चितचौर्यः धनलोभाच्चोरेणैवोत्कोचतया दीयमानधनलोभात्पालकैर्न मुच्यते कचित् ॥ ५७ ॥

रा० टी०—गृहीत इति । काले चुरासमये दृष्टः वस्तुस्वामिनाऽवलोकितः अत एव सकारणः बन्धनकारणविशिष्टः अत एव गृहीतः चोरोचितबन्धनेन बद्धः पृष्टः प्रश्नेनाप्यवधारितचौर्यः चोरः धनलोभाच्चोराद्धनलाभवाञ्छया मुच्यते तु न कचित् ॥ ५७ ॥

गो० टी०—गृहीत इति । पृष्टः प्रश्नैः शोधितः काले कालविशेषे दृष्टः सकारणः चौर्यलब्धद्रव्यवत्तया वा दृष्टः लोभात् मुषितं धनं तव दास्यामीति तद्दत्तधनलोभात् न मुच्यते कचित् ॥ ५८ ॥

५८] ति० टी०—आढ्यस्य धनिकस्य दुर्बलस्य दरिद्रस्य च व्यसने विवादरूपसंकटे राजकीयैकानिवर्त्ये प्राप्ते तवामात्या विरागाः सन्तो विगतधनरागाः सन्तोऽर्थं तयोर्व्यवहारं पश्यन्ति कचित् ॥ ५८ ॥

रा० टी०—व्यसन इति । आढ्यस्य प्रचुरद्रव्यवतः दुर्बलस्य द्रव्यरहितत्वेन बलरहितस्य व्यसने परस्परनिमित्तकदुःखप्राप्तिहेतुकविवादे सति बहुश्रुताः तवामात्याः विरागाः आकोचविषयकानुरागरहिताः सन्तः अर्थं यथार्थं पश्यन्ति कचित् ॥ ५८ ॥

गो० टी०—व्यसन इति । आढ्यस्य दुर्गतस्य दरिद्रस्य च व्यसने विवादरूपसंकटे प्राप्ते अर्थं व्यवहारम् 'अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु' इति वैजयन्ती । विरागाः विगतधनरागाः पश्यन्ति परीक्षन्ते कचित् ॥ ५९ ॥

५९] ति० टी०—मिथ्याभिशस्तानां राज्ञा विचार्यानिवर्तितमिथ्याभियोगानां प्रजानां यान्यश्रूणि पतन्ति । 'पादन्यासानि' इति पाठान्तरम् । तदा जायन्ते इति शेषः, आर्षं नपुंसकत्वम् । तानि प्रीत्यर्थं राज्यभोगजप्रीतिमात्रार्थं राज्यमनुशासतो राज्ञः पुत्रादीन्घ्नन्ति ॥ ५९ ॥

रा० टी०—मृषाभिशंसने दोषमाह—यानीति । हे राघव! मिथ्याभिशस्तानां दोषवत्त्वाभावेऽपि दोषवत्तया कथितानां जनानां यानि अस्राणि अश्रूणि पतन्ति तानि प्रीत्यर्थमेकत्र प्रीतिसंपादनार्थम् अनुशासतः पुरुषस्य पुत्रपशून् पुत्रान् पशूंश्च घ्नन्ति विनाशयन्ति ॥ ५९ ॥

गो० टी०—यानीति । मिथ्याभिशस्तानां राज्ञाम् अविचार्य प्रवर्तितमिथ्याभियोगानां प्रजानां यानि अस्राणि अश्रूणि पतन्ति तानि प्रीत्यर्थमनुशासतः राज्ये न्यायान्यायावविचार्य केवलभोगार्थं राज्यं कुर्वत इत्यर्थः ॥ ६० ॥

६०] ति० टी०—वैद्या भिषजः। दानमभिमतवस्तुनः मनःस्नेहयुतम् वाक्सान्त्वयुता, एतैस्त्रिभिः प्रत्येकं बुभूषसे प्राप्तुमिच्छसि वशीकर्तुमिच्छसि संभावयितुमिच्छसि वा कचित् ॥ ६० ॥

रा० टी०—कच्चिदिति। दानेन ईप्सितप्रापणेन मनसा अभिलाषातिशयेन वाचा मृदुवचनेन च एभिः त्रिभिः वृद्धादीन् बुभूषसे प्राप्तुमिच्छसि कचित् ॥ ६० ॥

गो० टी०—कच्चिद्वृद्धानिति । दानेन अभिमतवस्तुप्रदानेन मनसा स्नेहेन वाचा सान्त्ववचनेन एतैस्त्रिभिर्बुभूषसे प्राप्तुमिच्छसि वशीकर्तुमिच्छसि कचिदिति यावत् । भू प्राप्तावात्मनेपदीति गणपाठे पठितत्वादात्मनेपदी ॥ ६१ ॥

६१] ति० टी०—चैत्यांश्चतुष्पथस्थमहावृक्षान्देवतावासभूतान् सिद्धार्थान्विधायावृत्ततपोभिः कृतार्थितजन्मनो ब्राह्मणान् ६१

रा० टी०—कच्चिदिति। गुर्वादीन् नमस्यसि कचित् तत्र चैत्याः अग्निचयनस्य स्थलानि सिद्धः अर्थो येभ्यस्तानिति बहुव्रीहिः ॥ ६१ ॥

गो० टी०—कच्चिद्गुरूनिति । चैत्यान् देवतावासभूत-

१ अस्राणीति गो. पाठः । २ वैद्यमख्यानिति गो. पाठः ।

कच्चिदर्थेन वा धर्ममर्थं धर्मेण वा पुनः । उभौ वा प्रीतिलोभेन कामेन[1] न विबाधसे ॥ ६२ ॥
कच्चिदर्थं च कामं च धर्मं च जयतां वर । विभज्य काले कालज्ञ सर्वान्वरद सेवसे ॥ ६३ ॥
कच्चित्ते ब्राह्मणः[2] शर्म सर्वशास्त्रार्थकोविदः[3] । आशंसते[4] महाप्राज्ञ पौरजानपदैः सह ॥ ६४ ॥
नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् । अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तिताम् ॥ ६५ ॥
एकचिन्तनमर्थानामनर्थज्ञैश्च मन्त्रणम् । निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम् ॥ ६६ ॥

चतुष्पथस्थमहावृक्षान् सिद्धार्थान् निष्पन्नप्रयोजनान् यागादिना लब्धाभ्युदयिकप्रयोजनानिति यावत् ॥ ६२ ॥

६२] ति० टि०–कच्चिदर्थेनेति । धर्मार्जनयोग्यपूर्वाह्णेऽर्थार्जनेन धर्मबाधः, तथा तद्योग्यमध्याह्ने धर्मार्जनेन तद्बाधः, प्रीतिलोभेन कामेन विषयसंतोषलोभरूपेण कामेन तदुभयकालसेवितेन तयोर्बाध इति तीर्थः । अर्थप्राप्तिरूपेण हेतुना धर्मं न बाधसे धर्मं हित्वार्थं न गृह्णासीत्यर्थः । धर्मेण धर्मप्राप्तिहेतुनार्थं कुटुम्बनिर्वाहापेक्षितमर्थं न बाधसे, उभयमपि विषयसंतोषलोभेन गणिकाद्यासक्त्या बाधसे नेत्यर्थ इति कतकः॥६२॥

रा० टी०–कच्चिदिति । अर्थेन धर्मोचितब्राह्मयमुहूर्तादौ द्रव्यादिप्रयत्नेन धर्मं धर्मेण द्रव्याद्यर्जनकाले धर्मचिन्तनेन अर्थं वा प्रीतिलोभेन प्रीत्या लोभो विमोहनं यस्मिंस्तेन कामेन धर्मार्थार्जनसमये कामसेवनेन उभौ धर्मार्थौ वा कच्चिन्न विबाधसे ॥६२॥

गो० टी०–कच्चिदर्थेनेति । अर्थेन धर्मं न बाधसे कच्चित् धर्मार्जनयोग्ये पूर्वाह्णे अर्थार्जनं कृत्वा धर्मं न बाधसे कच्चिदित्यर्थः । धर्मेणार्थं न बाधसे अर्थार्जनयोग्ये अपराह्णे धर्मार्जनं कृत्वा अर्थं न नाशयसि कच्चिदित्यर्थः । प्रीतिलोभेन सुखाभिलाषेण हेतुना कामेन सायंकालविहितेन कामेन उभौ वा न बाधसे कच्चित्, यद्वा अर्थेन हेतुना धर्मं न बाधसे कच्चित्, धर्मं हित्वा अर्थं न गृह्णासीत्यर्थः । तथा धर्मेण हेतुना कुटुम्बनिर्वाहायपेक्षितमर्थं न बाधसे धर्मार्थोभावापि प्रीतिलोभेन सुखेच्छया कामेन च हेतुना न बाधसे गणिकाविसक्तावुभयमपि हि नश्यति ॥ ६३ ॥

६३] ति० टी०–विभज्य सेवसे । काले पूर्वाह्णतदुत्तरकालसार्धयामोत्तररात्रिरूपेण क्रमेण धर्मार्थकामसेवाकाले॥६३॥

रा० टी०–कच्चिदिति । सर्वानर्थादीन् त्रीन् काले तत्तत्सेवनोचितसमये विभज्य सेवसे कच्चित् ॥ ६३ ॥

गो० टी०–उक्तमर्थं सविशेषमाह–कच्चिदिति । अर्थं च धर्मं च कामं च सर्वान् काले विभज्य सेवसे–प्रातर्दानादिधर्मकालः, तदनन्तरम् आस्थान्यां राज्यविचारणार्थकालः, रात्रौ कामकाल इत्येवं विभज्य सेवस इत्यर्थः । जयतां वर ! तेषां कालान्तरे प्रवृत्तिनिवर्तनसमर्थेत्यर्थः ॥ ६४ ॥

६४] ति० टी०–शर्म सुखमाशंसते प्रार्थयते ॥ ६४ ॥

रा० टी०–कच्चिदिति । पौरादिभिः सह सर्वशास्त्रार्थकोविदा ब्राह्मणास्ते शर्म कल्याणमाशंसन्ते कच्चित् ॥ ६४ ॥

गो० टी०–कच्चित्त इति । शर्म सुखम् आशंसन्ते प्रार्थयन्ते ॥ ६५ ॥

६५] ति० टी०–'प्रमादोऽनवधानता' 'दीर्घसूत्रश्चिरक्रियः' तद्भावः अवश्यकर्तव्यस्य विचारादिना कालविलम्बनम् । ज्ञानवतां विदुषामदर्शनम्, आलस्यं नित्यकृत्यालस्यम्, पञ्चवृत्तितां चक्षुरादिपञ्चेन्द्रियपरवशताम् ॥ ६५ ॥

रा० टी०–नास्तिक्यमिति । नास्तिक्यं परलोको नास्तीति वादमनृतं लोभादिना मिथ्याभाषणं क्रोधं ब्राह्मणसंप्रदानकं कोपानुचितान्यसंप्रदानकं वा यागादौ सर्वसंप्रदानकं वा कोपं श्रमादमनवधानतां दीर्घसूत्रतां चिरक्रियत्वं ज्ञानवतां परमार्थविषयकज्ञानिनामदर्शनं कामाद्यासक्त्या दर्शनाभावमालस्यं पञ्चवृत्तितां चक्षुरादिपञ्चेंद्रियवशत्वम् 'दीर्घसूत्रश्चिरक्रियः' इत्यमरः ॥ ६५ ॥

गो० टी०–नास्तिक्यमित्यादि । नास्ति परलोक इति मतिर्यस्य स नास्तिकः " अस्ति नास्ति दिष्टं मतिः" इति ठञ् तस्य भावः नास्तिक्यम् अनृतमसत्यवचनं क्रोधं मातापित्राचार्यब्राह्मणदुर्बलादिषु कृतापराधेष्वपि तद्विषयकं क्रोधं प्रमादम् अनवधानत्वं दीर्घसूत्रतां चिरक्रियत्वं 'दीर्घसूत्रश्चिरक्रियः' इत्यमरः । ज्ञानवतां सज्जनानाम् अदर्शनं दर्शनाकरणं ज्ञानिनां दर्शनं हि निखिलश्रेयोमूलम् आलस्यं मदकरवस्तुसेवाजनितं कार्यापटुकरणकत्वमित्यर्थः । पञ्चवृत्तितां पञ्चेन्द्रियपरवशताम् अर्थानामेकचिन्तनं राज्यकार्याणां मन्त्र्यनादरेण स्वयमेक एव स्थित्वा पर्यालोचनम् अनर्थज्ञैः विपरीतार्थदर्शिभिः मङ्गलस्य प्रातर्दर्पणाद्यवलोकनस्य अप्रयोगम् अननुष्ठानम् 'मङ्गलाद्यप्रयोगम्' इति पाठे अमङ्गलाचरणमित्यर्थः । सर्वतः प्रत्युत्थानं नीचस्यानीचस्याप्यागमने प्रत्युत्थानमित्यर्थः, यद्वा सर्वदिगवस्थितशत्रूद्देशेन युगपद्दण्डयात्रामिति वा एतांश्चतुर्दशेत्येनेन अन्येषामपि बहूनां दोषाणां विद्यमानत्वं तेषु सर्वेषूक्तानामवश्यहेयत्वं च ज्ञायते ॥ ६६–६८ ॥

६६] ति० टी०–अर्थानां राज्यप्रयोजनानामेकेन चिन्तनम् । अनर्थज्ञैर्विपरीतदर्शिभिः । निश्चितानां मन्त्रिभिः सह कर्तव्यत्वेन निश्चितानामनारम्भम् ॥ ६६ ॥

रा० टी०–अर्थानां राजनिर्वाहकवस्तूनामेकचिन्तनमेकेन द्वितीयराहित्येन चिन्तनं विचारमनर्थज्ञैः विरुद्धार्थबोधकजनैः मन्त्रणं संमतिकरणं निश्चितानां सःकर्तव्यत्वेन निश्चयं प्राप्तानां

१ च नेति गो. पाठः । २ ब्राह्मणा इति गो. रा. पाठः । ३ कोविद्रा इति गो. रा. पाठः । ४ आशंसन्त इति गो. रा. पाठः ।

भैङ्गलाद्यप्रयोगं च प्रत्युत्थानं च सर्वतः । कञ्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश ॥ ६७ ॥
दशपञ्चचतुर्वर्गान्सप्तवर्गं च तत्त्वतः । अष्टवर्गं त्रिवर्गं च विद्यास्तिस्रश्च राघव ॥ ६८ ॥
इन्द्रियाणां जयं बुद्ध्या षाड्गुण्यं दैवमानुषम् । कृत्यं विंशतिवर्गं च तथा प्रकृतिमण्डलम् ॥ ६९ ॥
यात्रादण्डविधानं च द्वियोनी संधिविग्रहौ । कच्चिदेतान्महाप्राज्ञ यथावदनुमन्यसे ॥ ७० ॥

कार्याणामनारम्भं मन्त्रस्य मन्त्रविषयीभूतार्थस्य अपरिरक्षणं परिरक्षणाभावं प्रकटनमित्यर्थः ॥ ६६ ॥

६७] ति० टी०—मङ्गलस्यादौ प्रातःकालेऽप्रयोगमननुष्ठानम् । सर्वतः प्रत्युत्थानं सर्वदिगवस्थितरिपूद्देशेन युगपद्दण्डयात्रामित्यर्थ इति तीर्थः । कंचन प्रत्युत्थानायोग्यं पुरुषमुद्दिश्यापि प्रभावमुक्त्वा चापल्यादासनाचलनमित्यर्थ इति कतकः ॥६७॥

रा० टी०—मङ्गलाद्यप्रयोगं मङ्गलानां माङ्गलिकशब्दानामादौ कार्यप्रारम्भसमये अप्रयोगं सर्वतः नीचेभ्योऽपि प्रत्युत्थानमेतान् चतुर्दश राजदोषान् वर्जयसि कचित् । श्लोकत्रयमेकान्वयि 'मङ्गलातिप्रयोगम्' इति भूषणपाठः ॥ ६७ ॥

६८] ति० टी०—दशवर्गादीन्बुद्ध्या यथावदनुमन्यसे । तेषु त्याज्यांशमुपादेयांशं च ज्ञात्वाऽनुजानासीति तृतीयस्थेन संबन्धः। दशवर्गस्तु—'मृगयाक्षा दिवास्वापः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥' इति मनुक्तः । तौर्यत्रिकं नृत्यगीतवाद्यम् , वृथाट्या वृथापर्यटनम् । पञ्चवर्गस्तु—'औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा । इति दुर्गं पञ्चविधं पञ्चवर्ग उदाहृतः ॥ ' ईरिणं सर्वसस्यशून्यप्रदेशः । तत्संबन्धिदुर्गमैरिणं तस्यापि परैर्गन्तुमशक्यत्वात् । धान्वनमुष्णकाले दुर्गं भवति । चतुर्वर्गस्तु—'साम दानं च भेदश्च दण्डश्चेति चतुर्गुणः' । सप्तवर्गस्तु—'स्वाम्यमात्यश्च राष्ट्रं च दुर्गकोशौ बलं सुहृत् । परस्परोपकारीदं राज्यं सप्ताङ्गमुच्यते ॥' अष्टवर्गस्तु—'पैशुन्यं साहसं द्रोहमीर्ष्यासूयार्थदूषणम् । वाग्दण्डयोश्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः, इति । कृषिवाणिज्यदुर्गसेतुकुञ्जरबन्धनखन्याकरकरादानशून्यनिवेशनान्यष्टवर्ग इति तीर्थः । त्रिवर्गो धर्मार्थकामाः, उत्साहप्रभुमन्त्रशक्तित्रयं वा । तिस्रो विद्यास्त्रयी वार्ता दण्डनीतिः । त्रयी वेदत्रयी , वार्ता कृष्यादि , दण्डनीतिर्नीतिशास्त्रम् ॥ ६८ ॥

६९] ति० टी०—इन्द्रियाणां जयं जयोपायम् । स च योगाभ्यास एव । षाड्गुण्यं षड्गुणाः । ' संधिर्नो विग्रहो यानमासनं द्वैधमाश्रयः' इति । द्वैधं शत्रुवर्ग्याणामुपजापः । दैवमानुषम् दैवं मानुषं च व्यसनमित्यर्थः । 'हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा' इत्येतद्दैवम् । मरको मरणनिमित्तं मार्यादिः । मानुषं तु—'आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च व्यसनं मानुषं त्विदम् ' इति । आयुक्तकाः अधिकारिणः । कृत्यं तु—'अलब्धवेतनो लुब्धो मानी चाप्यवमानितः । कुद्धश्च कोपितोऽकस्मात्तथा भीतश्च भीषितः । भेद्याः शत्रौ त चत्वारो नृपकृत्यमिदं स्मृतम्' विंशतिवर्गस्तु असंधेयोऽविग्राह्य एव । स च—'बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसंयुतः ॥ अदेशस्थो बहुरिपुर्युक्तो कालेन यश्च वै । सत्यधर्मैरतश्चैव विंशतिः पुरुषा अमी । एतैः संधिं न कुर्वीत विगृह्णीयात्तु केवलम् ॥' इति । कतकस्तु—राज्यस्त्रीस्थानदेशानां ज्ञातिधनयोश्च यस्यापहारस्ते षट्, मदमानदेशपीडावन्तस्त्रयः, ज्ञानार्थशक्तिधर्माणां येषां विघातस्ते चत्वारः, दैवचिन्तकः, रिपुमित्रावमन्तारौ, बन्धुविनाशनं यस्य, लोकानुग्रहरहितः, दूषितमण्डलः, एकार्थाभिनिवेशित्वं यस्य, एते विंशतिः पुरुषा इत्याह । प्रकृतयश्च मण्डलं च प्रकृतिमण्डलम् । प्रकृतिवर्गस्तु—'अमात्यो राष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः । एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः ॥' इति। मण्डलं द्वादशराजमण्डलम् । तत्र विजिगीषुर्मध्ये । ' अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । मित्रारिमित्रमित्रं च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥' आसारौ पार्ष्णिग्राहासाराक्रन्दासाराविति । आसारपृष्ठभागस्थौ मध्यमोदासीनाविति 'अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोर्न्यस्तयोर्निग्रहे प्रभुः ॥' इति । 'मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः ॥' इति ॥ ६९ ॥

७०] ति० टी०—यात्रा यानम् । तच्च पञ्चविधम्—'विगृह्य संधाय तथा संभूयाथ प्रसङ्गतः । उपेक्ष्य चेति निपुणैर्यानं पञ्चविधं स्मृतम् ॥' बलवत्तया पार्ष्णिग्राहादिभिर्विगृह्यान्यत्र शत्रौ यानं विगृह्ययानम्, तैः संधायान्यत्र यानं संधाययानम्, सामन्तैः सह यानं संभूययानम्, अन्योद्देशेन यात्राप्रसङ्गमुत्पाद्यान्यं प्रति यानं प्रसङ्गयानम्, बलवत्तया शत्रुमुपेक्ष्य तस्य मित्रेषु यानमुपेक्ष्ययानम्,दण्डविधानं दण्डः सेना तद्विधानं व्यूहरचनाभेदः। 'दण्डो धर्मे मानभेदे लकुटे मदसैन्ययोः'। 'द्वियोनी संधिविग्रहौ' इति । संधिविग्रहयानेत्यादिषड्गुणानां मध्ये संधिविग्रहौ द्वयोर्योनी । तत्र द्वैधीभावसमाश्रयौ संधियोनिकौ यानासने विग्रहयोनिके इति भेदः । तत्र द्वैधीभावो नाम—'बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितम् ॥' इति । अरिभिः पीड्यमानस्य बलवदाश्रयणं समाश्रयः । कालप्रतीक्षया तूष्णीमवस्थानमासनम् ॥ ७० ॥

१ भङ्गलस्याप्रयोगमिति गो. पाठः । २ बुद्ध्वेति गो. रा. पाठः । ३ धर्मारत इति भाति शिरोमणिभूषणयोस्तथोपलब्धेः ।

रा० टी०–दशेति । दशपञ्चचतुर्वर्गान् दशवर्गान् पञ्चवर्गान् चतुर्वर्गांश्च सप्तवर्गादिकं च तिस्रो विद्याश्च इन्द्रियाणां जयं जयोपायं च दैवं दैवकृतं व्यसनं मानुषं मनुष्यकृतं च व्यसनं कृत्यं नृपकृत्यं च विंशतिवर्गं च प्रकृतिमण्डलं पञ्चप्रकृतीश्च द्वादशमण्डलानि च यात्रादण्डविधानं यात्राविधानं दण्डविधानं च द्वियोनी सन्धिविग्रहौ च एतान् प्रसिद्धान् बुद्धा यथावत् अनुमन्यसे कांश्चिदुपादेयत्वेन कांश्चित् हेयत्वेन चावबुध्यसे । दशवर्गास्तु–'मृगयाऽक्षा २ दिवास्वप्नः ३ परीवादः ४ स्त्रियो ५ मदः। ६ तौर्यत्रिकं ९ वृथाट्या १० च कामजो दशको गणः ॥' इति मनुनोक्तः तत्र तौर्यत्रिकमतिनृत्यगीतवाद्यम् । वृथाट्या अकारणकपर्यटनम् । पञ्चवर्गास्तु–'औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा । इति दुर्गं पञ्चविधं पञ्चवर्ग उदाहृतः' इति मनुः । तत्र इरिणं सर्वसस्यशून्यप्रदेशः तत्संबन्धिदुर्गमैरिणं तस्यापि परैरगन्तुमशक्यत्वेन दुर्गत्वमक्षतम् । चतुर्वर्गस्तु–'साम दानं च भेदश्च दण्डश्चेति चतुर्गणः' इति कामन्दकीये । सप्तवर्गस्तु 'स्वाम्यमात्यश्च राष्ट्रं च दुर्गकोशौ बलं सुहृत् । परस्परोपकारीदं राज्यं सप्ताङ्गमुच्यते ' इति । अष्टवर्गस्तु 'पैशून्यं साहसं द्रोहमीर्ष्यासूयार्थदूषणम् । वाक्पारुष्यं च कोपजोऽपि गणोऽष्टकः' इति । कामन्दकस्तु ' कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरकरादानं शून्यानां च निवेशनम् । अष्टवर्गमिमं साधुः स्वस्थवृत्तिर्न लोपयेत् ' इति । त्रिवर्गो धर्मार्थकामाः, प्रभुशक्तिरुत्साहशक्तिर्मन्त्रशक्तिश्चेति वा । तिस्रो विद्यास्तु त्रयी वार्ता दण्डनीतिरिति, तत्र त्रयी वेदत्रयी वार्ता कृष्यादिचतुष्टयं नीतिर्दण्डनिर्णायकशास्त्रम् । षड्गुणास्तु ' सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ' इति । तत्र द्वैधं शत्रुवर्ग्याणां दूरीकरणम् । दैवकृतव्यसनं तु–'हुताशनो जलं व्याधिर्दुर्भिक्षो मरकस्तथा' इति । तत्र मरको मरणनिमित्तं महामार्यादि, मानुषं तु–'आयुक्तकेभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च व्यसनं मानुषं त्विदम् ॥' इति । तत्र आयुक्तकाः अधिकारिणः । कृत्यं तु–'अलब्धवेतनो लुब्धो मानी चाप्यवमानितः । कुद्धश्च कोपितोऽकस्मात्तथाभीतश्च भीषितः । भेद्याः शत्रौ च चत्वारो नृपकृत्यमिदं स्मृतम् ॥' इति कामन्दकः । विंशतिवर्गस्तु–' बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भारुजनको लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतः बलव्यसनसंयुतः ॥ अदेशस्थो बहुरिपुर्युक्तो कालेन यश्च सः । सत्यधर्मोरतश्चैव विंशतिः पुरुषा अमी । एतैः सख्यं न कुर्वीत विगृह्णीयात्तु केवलम् ॥' इति कामन्दकप्रदिष्टाः । प्रकृतयस्तु–' अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः । एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः' इति कामन्दकोक्तेः । मण्डलानि द्वादशात्मकानि तत्र मध्ये विजिगीषुः ' अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । मित्रारिमित्रमित्रं च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥ अत्र आसाराविति द्विवचनान्तेन तयोर्द्वैविध्यम् पार्ष्णिग्राहासार आक्रन्दासारश्च । आसारपृष्ठभागस्थौ मध्यमोदासीनौ । तथाहि ' अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोर्व्यस्तयोर्निग्रहे प्रभुः ' इति । ' मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः ' इति । यात्राविधानं पञ्चविधं, तथाहि'–विगृह्य संधाय तथा संभूयाथ प्रसङ्गतः । उपेक्ष्यश्चेति निपुणैर्यानं पञ्चविधं स्मृतम् ॥' इति । तत्र बलवत्तया पार्ष्णिग्राहादिभिर्विगृह्य शत्रन्तरे गमनं विगृह्य यानं, तैः संधिं कृत्वाऽन्यत्र गमनं संधाय यानम्, सामन्तैः सह गमनं संभूय यानम्, अन्योद्देशेन यात्रोद्योगं कृत्वा अन्यं प्रति गमनं प्रसङ्गतो यानम्, अतिप्रौढतया शत्रुमुपेक्ष्य तन्मित्रं प्रति गमनमुपेक्ष्य यानम् । दण्डविधानम् दण्डः सैन्यं तद्विधानं व्यूहरचनया तत्संस्थापनम् । ' दण्डो धर्मे मानभेदे लकुटे मदसैन्ययोः ' इति कोशः । द्वियोनी द्विहेतुकौ संधिविग्रहाविति । ' संधिर्ना विग्रहो यानम् ' इत्यादिना षड्गुणानां मध्ये यद्यप्युक्तौ तथापि षड्गुणान्तःपातिनौ द्वैधीभावसमाश्रयपरावितिभेदः तत्र द्वैधीभावो नाम 'बलिनोद्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितम् ॥' इति । अरिभिः पीड्यमानस्य बलवदाश्रयणं समाश्रयः । कालप्रतीक्षया तूष्णीमवस्थानमासनम् । श्लोकत्रयमेकान्वयि ॥ ६८–७० ॥

गो० टी०–दशेत्यादि । दशवर्गादिकान् बुद्धा यथावदनुमन्यसे कांचित् दशवर्गादिकान् त्याज्यत्वेनोपादेयत्वेन च ज्ञात्वा यथावदनुतिष्ठसि कंचिदिति वाक्यार्थः । पूर्वोक्तसंग्रहोपदेशः । दशवर्गस्तावत् 'मृगयाक्षो दिवास्वापः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥' इति मनुनोक्तः । तौर्यत्रिकं नृत्यगीतवाद्यं, वृथाट्या वृथापर्यटनम् । कामन्दकस्तु प्रकारान्तरेण लोभक्रोधालस्यासत्यवचनत्वप्रमादभीरुत्वास्थिरत्वमौढ्यानवमन्तृत्वानि दशवर्ग इत्याशयेनाह–'लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः। मूढोऽनयोऽवमन्ता च सुखच्छेद्यो रिपुर्मतः ॥' इति। पञ्चवर्गः पञ्चदुर्गाणि, तथाह मनुः–'औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा । शस्तं प्रशस्तमतिभिर्दुर्गं दुर्गोपचिन्तकैः ॥' इति । यद्वा पञ्चवर्गः पञ्चविधवैराणि, अत्रापि कामन्दकः–'सापत्नं वस्तुजं जीर्जं वाग्जातमपराधजम्। वैरप्रभेदनिपुणैर्वैरं पञ्चविधं स्मृतम्' इति। चतुर्वर्गः सामदानभेददण्डाः, यथाकामन्दकीये–'साम दानं च भेदश्च दण्डश्चेति चतुर्विधम्' इति, यद्वा चतुर्विधमित्राणि वा, यथाह कामन्दकः–' औरसं तंतुसंबन्धं तथा वंशक्रमागतम् । रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ॥' इति । यद्वा धनानां न्यायार्जनादिधर्मचतुष्टयं वा, तदपि तत्रैवोक्तम् 'न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा। सत्पात्रे प्रतिपत्तिश्च राज्यवृत्तं चतुर्विधम् ॥' इति । सप्तवर्गः स्वाम्यमात्यादिः, यथोक्तम्'स्वाम्यमात्याश्च राष्ट्रं च दुर्ग

१ उपेक्ष्य चेति युक्तम्, उत्तरग्रन्थानुरोधाल्लक्ष्यप्रक्रमाद्वा तथोपलब्धेश्च । २ लक्षित इति भवणे ।

कोशो बलं सुहृत् । परस्परोपकारीदं राज्यं सप्राङ्गमुच्यते' इति। यद्वा स्वपक्षस्थजनावान्तरभेदसप्तकं वा, यथाह–'निजोऽथ मैत्रश्च समाश्रितश्च सुबन्धुजः कार्यसमुद्भवश्च । भृत्यो गृहीतो विविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति' इति । यद्वा प्रधानव्यूहाः सप्त वा सप्तवर्गः, यथा–'श्येनः सूची च वज्रश्च शकटो मकरस्तथा । दण्डाख्यः पद्मनामा च व्यूहाः सप्त प्रधानतः' इति । अष्टवर्गमाह कामन्दकः–'कृषिवाणिज्यदुर्गाणि सेतुः कुञ्जरबन्धनम् । खन्याकरः करादानं शून्यानां च निवेशनम् । अष्टवर्गमिमं साधु स्वस्थचित्तो न लोपयेत्' इति । यद्वा पैशुन्याष्टकं वा अष्टवर्गः । यथा–पैशुन्यं साहसं द्रोहमीर्ष्यासूयार्थदूषणम् । वाग्दण्डयोश्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः' इति । ईर्ष्या क्षान्त्यभावः क्षान्तिविरोधी वा कश्चिद्गुणः अज्ञदुर्बलकृतापराधासहिष्णुत्वमिति यावत्, असूया तु गुणेष्वपि दोषारोपः, वाक्पारुष्यं दण्डपारुष्यं च गुणद्वयम् । अथ त्रिवर्गः धर्मार्थकामाः, यद्वा उत्साहप्रभुत्वमन्त्रशक्तयस्त्रिवर्गः, यद्वा परेषां क्षयस्थानवृद्धयः 'क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्' इत्यमरः । यद्वा अशक्यसमुदयमादिकार्यव्यसनत्रयं वा । यथाह कामन्दकः–'वस्तुष्वशक्येषु समुद्यमश्च शक्येषु मोहादसमुद्यमश्च । शक्येष्वकालेषु समुद्यमश्च त्रिधैव कार्यं व्यसनं वदन्ति' इति । तिस्रो विद्या त्रयीवार्तादण्डनीतयः आन्वीक्षिकी त्रयीवार्ता दण्डनीतिश्चेति विद्यायाश्चतुर्विधत्वेऽपि आन्वीक्षिक्यात्मव्यामन्तर्भावः तथाह कामन्दकः–'त्रयी वार्तादण्डनीतिरिति विद्या हि मानवाः । त्रय्या एव विशेषोऽयमियमान्वीक्षिकी मता' इति । त्रयी वेदः वार्ता कृषिगोरक्षवाणिज्यं दण्डनीतिर्नीतिशास्त्रम् इन्द्रियाणां जयं जयोपायं षड्गुणा एव षाड्गुण्यं स्वार्थे ष्यञ् ते च संधिविग्रहयानासनद्वैधीभावसमाश्रयाः देवमानुषं देवमनुष्येभ्य आगतं व्यसनमित्यर्थः । दैवं मानुषं च व्यसनं प्रत्येकं पञ्चविधं, यथाह कामन्दकीये–'हुताशनो जलं व्याधिर्दुर्भिक्षं मरणं तथा । इति पञ्चविधं दैवं मानुषं व्यसनं परम् ॥ आयुक्तकेभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च व्यसनं पञ्चधा भवेत्' इति । आयुक्तकाः अधिकारिणः कृत्यम् अलब्धवेतनावमानितकोपितभीषितेषु शत्रुसंबन्धिष्वभिमतवस्तुप्रदानेन कर्तव्यं भेदनम् । अत्राप्याह कामन्दकः–'अलब्धवेतनो लुब्धो मानी चाप्यवमानितः । क्रुद्धश्च कोपितोऽकस्मात्तथा भीतश्च भीषितः । यथाभिलषितैः कामैर्भिन्यादेतांश्चतुर्विधान्' इति । असंधेयाः विग्राह्याः बालवृद्धादयो विंशतिविधाः प्रतिपक्षनृपतयो विंशतिवर्ग इत्युच्यते । यथाह कामन्दकीये–'बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः ॥ अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च सः । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ एतैः संधिं न कुर्वीत विगृह्णीयात्तु केवलम्' इति । ज्ञातिबहिष्कृतः बन्धुजनबहिष्कृतः, भीरवः जनाः मन्त्रिसेनापतियोधाः यस्य सः भीरुजनकः, एवमेव लुब्धजन इत्यत्रापि । लुब्धाः अत्यन्तधनाशापराः, दैवोपहतकः महर्षिशापाद्यभिहतः, दैवचिन्तकः दैवमेव सर्वं कुर्यादिति मत्वा पुरुषव्यापारमकुर्वाणः, बलव्यसनं सेनाविलयः, अदेशस्थः प्रोषितः, अकालेन युक्तः क्रूरग्रहदशाभागादियुक्तः, यद्वा विग्रहकारणभूतो राज्यापहारादिर्वा विंशतिवर्गः । अत्र च कामन्दकः–'राज्यस्त्रीस्थानदेशानां ज्ञातीनां च धनस्य च । अपहारो मदो मानः पीडा वैषयिकी तथा ॥ ज्ञानार्थशक्तिधर्माणां विघातो दैवमेव च । मित्रार्थयोश्चावमानस्तथा बन्धुविनाशनम् ॥ भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् । एकार्थाभिनिवेशित्वमिति विग्रहयोनयः' इति । अत्रापहारशब्दः पूर्वैः षड्भिः संबध्यते वैषयिकी पीडा विषयपारवश्यं, विघातशब्दो ज्ञानादिभिश्चतुर्भिरन्वेति दैवशब्देन देवा इन्द्रादय उच्यन्ते तेषां विरोध्यपि विग्राह्यः यथा दशरथस्य इन्द्रविरोधी शम्बरः । मित्रार्थयोरित्यत्र मित्रं मित्रार्थस्तदनुबन्धी चेत्यर्थः, यद्वा मित्रं मित्रस्यार्थः तद्धनम् अर्थस्यावमानो हरणमेव भूतानुग्रहविच्छेदः लोकानुग्रहराहित्यं, मण्डलदूषणं मण्डलशब्देन स्वमन्त्रिसेनापतिसुहृदादिरुच्यते तस्य दूषणं तद्विघटनम् एकार्थाभिनिवेशित्वं स्वाभिमतविषयाभिलाषित्वं प्रकृतयश्च मण्डलं च प्रकृतिमण्डलं, प्रकृतयस्तावत् 'अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः । एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः' इति कामन्दकोक्ताः मण्डलं द्वादशविधराजात्मकं मध्यतो विजिगीषुः तस्य शत्रुः मित्रं शत्रोर्मित्रं मित्रमित्रं शत्रुमित्रमित्रं चेति पुरोवर्तिनः पञ्च, पार्ष्णिग्राहः आक्रन्दः पार्ष्णिग्राहासारः आक्रन्दासारश्चेति पृष्ठभागस्थाश्चत्वारः, पार्श्वस्थो मध्यमः तेषां बहिरवस्थित उदासीनश्चेति । तथा च कामन्दकः–'संपन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः । जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः ॥ अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । तथारिमित्रमित्रं च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरः । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोर्व्यस्तयोर्निग्रहे प्रभुः ॥ मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः' इति । अत्र शत्रुमित्रशब्दौ पुरस्तादव्यवहितानन्तरराष्ट्राधिपतिमेकव्यवहितानन्तरराष्ट्राधिपतिं च क्रमेण वदतः पार्ष्णिग्राहाक्रन्दशब्दावपि पृष्ठतस्तादृशौ क्रमेण वदतः न तु प्रसिद्धशत्रुमित्रपरौ 'विषयानन्तरो राजा शत्रुर्मित्रमतः परम् । उदासीनः परतरः पार्ष्णिग्राहस्तु पृष्ठतः' इत्यमरः । आसारः सुहृद्बलम् 'आसारः स्यान्मित्रबले' इति रत्नमाला । मध्यमशब्देन च अरिविजिगीषोर्व्यस्तयोः समस्तयोश्च निग्रहानुग्रहसमर्थः पार्श्वदेशस्थः कश्चिदुक्तेभ्योऽन्यो राजोच्यते न तु मध्यवर्ती । उदासीनशब्देन च एतेषां सर्वेषामपि व्यस्तानां समस्तानां च निग्रहानुग्रहसमर्थः कश्चिद्विप्रकृष्टदेशस्थो राजो-

१ विजिगीष्वोरिति युक्तं व्यस्तयोरिति विशेषणात् इति भाति ।

मन्त्रिभिस्त्वं यथोद्दिष्टं चतुर्भिस्त्रिभिरेव वा । कच्चित्समस्तैर्व्यस्तैश्च मन्त्रं मन्त्रयसे बुध ॥ ७१ ॥
कच्चित्ते सफला वेदाः कच्चित्ते सफलाः क्रियाः । कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ॥ ७२ ॥
कच्चिदेषैव ते बुद्धिर्यथोक्ता मम राघव । आयुष्या च यशस्या च धर्मकामार्थसंहिता ॥ ७३ ॥
यां वृत्तिं वर्तते तातो यां च नः प्रपितामहः । तां वृत्तिं वर्तसे कच्चिद्या च सत्पथगा शुभा ॥ ७४ ॥

क्यते । यात्रादण्डविधानं यात्रा यानं दण्डस्य सैन्यस्य विधानं संविधानं व्यूहभेदविधानं, यद्वा दण्डः शत्रुनिरसनं तस्य विधानं प्रकारः यात्रा च दण्डविधानं च यात्रादण्डविधानम् । प्रकृतिमण्डलमित्यत्रापि चैकवद्भावः । सेनाव्यूहभेदाः पूर्वमुक्ताः शत्रुनिरसनप्रकाराश्च स्फुटाः सुज्ञेया इति यात्राशब्दितं यानं प्रदर्श्यते । तच्च पञ्चविधं बलातिशयेन पार्ष्णिग्राहादिभिर्विगृह्य शत्रूद्देशेन यानं विगृह्ययानं, पार्ष्णिग्राहादिभिः संधिं कृत्वा शत्रूद्देशेन यानं संधाययानं, सामन्तैः समेत्य यानं संभूययानम्, अन्योद्देशेन यात्राप्रसङ्गमुत्पाद्य अन्यं प्रति यानं प्रसङ्गतो यानम्, अन्यप्रसङ्गं कृत्वा बलवत्तया तमुपेक्ष्य तन्मित्रोद्देशेन यानमुपेक्ष्य यानमिति । यथा कामन्दकीये–'विगृह्य संधाय तथा संभूयाथ प्रसङ्गतः । उपेक्ष्य चेति निपुणैर्यानं पञ्चविधं स्मृतम्' इति । द्वियोनीं इति संधिविग्रहयानासनद्वैधीभावसमाश्रयाः । षड्गुणाः पृथक्पृथक्प्रतिपादिताः इदानीं द्वैगुण्यमतावलम्बनेन यानादीन् संधिविग्रहयोरन्तर्भाव्य वदति–यानासने विग्रहस्य स्वरूपं, द्वैधीभावसमाश्रयौ संधेरूपं, तत्र विजिगीषोररिं प्रति यात्रा यानं तयोर्मिथः प्रतिबद्धशक्त्योः कालप्रतीक्षया तूष्णीमवस्थानमासनं दुर्बलस्य प्रबलयोर्द्वितयोर्वाचिकमात्मसमर्पणं द्वैधीभावः । तथाह–'बलिनोर्द्वितयोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः' इति । अरिणा पीड्यमानस्य बलवदाश्रयणं समाश्रयः इति विवेकः । तदुक्तं कामन्दकेन–'यानासने विग्रहस्य रूपं सद्भिरिति स्मृतम् । संधेश्च संधिमार्गज्ञैर्द्वैधीभावसमाश्रयौ' इति । एतान् पूर्वोक्तान् यथावदनुमन्यसे अनुतिष्ठसि कच्चिदित्यर्थः, उक्तदशवर्गादीनां तत्त्वं ज्ञात्वा हेयान् जहासि ग्राह्यान् गृह्णासि कच्चिदिति यावत् ॥ ६९–७१ ॥

७१] ति० टी०–यथोद्दिष्टं नीतिशास्त्रोक्तमन्त्रविचारमार्गमनतिक्रम्येत्यर्थः । 'यथोद्दिष्टैः' इति पाठे मन्त्रिलक्षणलक्षितैरित्यर्थः । व्यस्तैरेकैकशः । एवं हि तत्तन्मनःपरिज्ञानं भवति । त्रिभिश्चतुर्भिरित्यनेन बहुभिर्नैकेनेति सूचितम् ॥ ७१ ॥

रा० टी०–मन्त्रिभिरिति । यथोद्दिष्टं शास्त्रमनतिक्रम्य समस्तैर्मिलितैः व्यस्तैरमिलितैश्च चतुर्भिः त्रिभिर्वा मन्त्रिभिर्मन्त्रं संमर्तिं मन्त्रयसे करोषि ॥ ७१ ॥

गो० टी०–मन्त्रिभिरिति । यथोद्दिष्टैः शास्त्रोक्तमन्त्रिलक्षणलक्षितैः 'यथोदिष्टाम्' इतिपाठे नीतिशास्त्रोक्तमन्त्रविचारमार्गमनतिक्रम्येत्यर्थः । बहुभिर्मन्त्रकरणे मन्त्रभिन्नत्वसंभवादैकमत्याभावाच्च चतुर्भिस्त्रिभिरेव वा इत्युक्तं व्यस्तैस्तत्तन्मतं परिज्ञाय समस्तैश्चतुर्भिस्त्रिभिर्वा परिगणितैर्मन्त्रिभिः मिथः रहसि मन्त्रं मन्त्रयसे कच्चित् ॥ ७२ ॥

७२] ति० टी०–वेदाः सफलास्तद्विहितकर्मप्रवृत्त्या । क्रिया राजकार्याणि तत्तदुद्देश्यफलयुक्तानि । यद्वा क्रियाः संपादितधनादीनि क्रियास्तेषां सफलत्वं च दानभोगाभ्याम् । दाराणां सफलत्वं धर्मरतिप्रजाभिः । श्रुतसाफल्यं विनीतत्वम् ॥ ७२ ॥

रा० टी०–कच्चिदिति । वेदा अधीतसामादयः सफलाः तदनुष्ठानादिरूपफलसहिताः कच्चित् ते क्रिया अनुष्ठानानि सफलाः महत्समागमरूपफलसहिताः कच्चित्, दाराः सफलाः सत्पुत्रादिरूपफलसहिताः श्रुतं शास्त्रश्रवणं सफलं विनम्रताप्रापणरूपफलसहितं कच्चित् ॥ ७२ ॥

गो० टी०–राज्ञामवश्यं संपादनीयानर्थान् पृच्छति–कच्चित्ते सफला वेदा इति । ते वेदाः त्वदधीता वेदाः सफलाः कच्चित् अग्निहोत्राद्यनुष्ठानेन सफलीकृताः कच्चित् क्रियन्ते साध्यन्त इति क्रियाः धनानि धनानि त्वत्संपादितानि दानभोगाभ्यां सफलीकृतानि कच्चित् ते दाराः सफलाः कच्चित् रतिपुत्राभ्यां सफलाः कच्चित् ते श्रुतं शास्त्रश्रवणं सफलं कच्चित् शीलवृत्ताभ्यां सफलं कच्चित् तथाच महाभारते–'अग्निहोत्रफलावेदाः दत्तभुक्तफलं धनम् । रतिपुत्रफला दाराः शीलवृत्तफलं श्रुतम्' इति ॥ ७३ ॥

७३] ति० टी०–उक्ता एषा बुद्धिर्यथा मम तथैव तवापि वर्तते कच्चित् । 'कच्चिदेष्वेव' इति पाठान्तरम् ॥ ७३ ॥

रा० टी०–कच्चिदिति । उक्ता कथिता एषा बुद्धिर्निश्चयः यथा मम तथा ते तवापि अस्तीति शेषः ॥ ७३ ॥

गो० टी०–कच्चिदेषैवेति । आयुष्या यशस्या धर्मकामार्थसंहिता उक्ता एषा बुद्धिर्मम यथा तथैव तव वर्तते कच्चित् ॥ ७४ ॥

७४] ति० टी०–सत्पथगा शिष्टानुष्ठानमार्गगा ॥ ७४ ॥

रा० टी०–यामिति । या सत्पथगा सत्पथैर्महात्मभिः सेव्या अत एव शुभा शुभमूलम् अत एव यामेव नः प्रपितामहाः वर्तन्ते अत एव यामेव तातो वर्तते तां वृत्तिं कच्चिद्वर्तसे ॥ ७४ ॥

गो० टी०–अथ उक्तानुक्तं सकलं संग्रहेण दर्शयति–यामित्यादिना । वृत्तिमाचरन् वर्तते अवर्तिष्ट, यद्वा दशरथमरणस्याज्ञातत्वाद्वर्तत इत्याशीः । पितामहस्य अजस्य

१ यथोद्दिष्टैरिति गो. पाठः । २ मिथ इति गो. पाठः । ३ मह्या इति गो. सा. पाठः ।

कच्चित्स्वादुकृतं भोज्यमेको नाश्नासि राघव । कच्चिदाशंसमानेभ्यो मित्रेभ्यः संप्रयच्छसि ॥ ७५ ॥
राजा तु धर्मेण हि पालयित्वा महीपतिर्दण्डधरः प्रजानाम् ।
अवाप्य कृत्स्नां वसुधां यथावदितश्च्युतः स्वर्गमुपैति विद्वान् ॥ ७६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे शततमः सर्गः ॥ १०० ॥

ऐकाधिकशततमः सर्गः ।

कस्मात्त्वं राज्यं विहाय तापसवेषेण वनं प्रविष्ट इति भरतं प्रति रामः पप्रच्छाथ मातरं कुत्सयन्भरतस्तं प्रति राज्याङ्गीकारायार्थयते । रामस्तु पित्राज्ञाया अवश्यपालनीयत्वात्तदाज्ञायाः पूर्वांशरूपवनवासस्य मयाऽवश्यं स्वीकृतत्वादवशिष्टंराज्यपालनरूपांशस्वीकरणं तेऽवश्यकर्तव्यमिति तं तत्राग्रहेण नियुङ्क्ते ।

तं तु रामः समाज्ञाय भ्रातरं गुरुवत्सलम् । लक्ष्मणेन सह भ्रात्रा प्रष्टुं समुपचक्रमे ॥ १ ॥
किमेतदिच्छेयमहं श्रोतुं प्रव्याहृतं त्वया । यस्मात्त्वमागतो देशमिमं चीरजटाजिनी ॥ २ ॥
यन्निमित्तमिमं देशं कृष्णाजिनजटाधरः । हित्वा राज्यं प्रविष्टस्त्वं तत्सर्वं वक्तुमर्हसि ॥ ३ ॥

चिरं राज्यपरिपालनाभावात् प्रपितामहा इत्युक्तं प्रपितामहाः प्रपितामहप्रभृतयः यथा सप्तमीशौण्डैरित्यत्र शौण्डादिभिरिति वृत्तिकारः । अत्र अवर्तन्तेत्यध्याहार्यं पित्रायत्तदुष्टितस्यानदुष्टाने प्राप्ते आह–या च सत्पथगा शुभा इति सत्पथगा सन्मार्गानुसारिणी शुभा अनिन्दिता ॥ ७५ ॥

७५] ति० टी०–स्वादुकृतं स्वादुतया कृतं सिद्धम् । आशंसमानेभ्यः स्नेहवृद्ध्यपेक्षयेच्छद्भ्यः मित्रेभ्यः स्निग्धेभ्यः ॥ ७५ ॥

रा० टी०–कच्चिदिति । स्वादुकृतं स्वादुपूर्णं भोज्यम् एको नाभ्नासि कच्चित् । आशंसमानेभ्यः प्रशंसापूर्वकमिच्छद्भ्यः मित्रेभ्यः संप्रयच्छसि ॥ ७५ ॥

गो० टी०–कच्चिदिति । स्वादुकृतं मधुरतया सिद्धम् आशंसमानेभ्यः धनमिति शेषः ॥ ७६ ॥

७६] ति० टी०–महीपती राजा क्षत्रियः इतश्च्युत एतद्देहलोकाभ्याम् ॥ ७६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽशततमः सर्गः ॥ १०० ॥

रा० टी०–राजेति । राजा सर्वत्र प्रकाशमानेन धर्मेणोपलक्षितः प्रजानां दण्डधरो महीपतिः कृत्स्नां सकलां वसुधामवाप्य संप्राप्य यथावत् पालयित्वा इतो लोकाच्च्युतो गतोऽपि स्वर्गमुपैति ॥ ७६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे शततमः सर्गः ॥ १०० ॥

गो० टी०–एवमाचरतो राज्ञ ऐहिकामुष्मिकफले दर्शयति–राजा त्वित्यादिना । तुशब्देन राजवैलक्षण्यमुच्यते हिः प्रसिद्धौ पालयित्वा महीमिति शेषः । महामतिः उक्तनीतिधर्मज्ञः दण्डधरः युक्तदण्डधरः यथावत् पूर्वराजवत् इतः अस्माल्लोकाच्च्युतः प्रारब्धकर्मावसाने मृत इत्यर्थः । विद्वान् शरीरभिन्नात्मज्ञानवान् ॥ ७६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने शततमः सर्गः ॥ १०० ॥

१] ति० टी०–एवं कच्चित्प्रभानन्तरं स्वस्य राजत्वाभावं सूचयितुं तदुत्तरमग्रयच्छन्तं भरतं प्रति रामेणागमनप्रयोजनप्रश्नः–तं त्विति । समाज्ञाय कुशलप्रश्नव्याजेन सर्वधर्मान्ज्ञापयित्वा, यद्वा प्राप्तराज्यपरित्यागेन जटादिधारणेन गुरौ स्वस्मिन्भक्तियुक्तं ज्ञात्वा ॥ १ ॥

रा० टी०–रामस्यैव वचनान्तराण्याह–तमित्यादिभिः । तं स्वसमीपे प्राप्तं भरतं गुरुवत्सलं गुरुविषयकातिप्रीतिमन्तं समाज्ञाय स्वस्थतया स्थितं ज्ञात्वा भ्रात्रा लक्ष्मणेन सह रामः प्रष्टुं समुपचक्रमे ॥ १ ॥

गो० टी०–अथ रामभरतयोरुक्तिप्रत्युक्ती चतुरुत्तरशततमे–तं त्वित्यादिना । गुरुवत्सलं गुरौ स्वस्मिन् भक्तं समाज्ञाय ज्ञात्वा प्राप्तराज्यपरित्यागेन जटावल्कलधारणादिना च स्वस्मिन् भक्तियुक्तं ज्ञात्वेत्यर्थः 'समाइवास्य' इति पाठे प्रियवचनादिभिः सम्यगाश्वास्येत्यर्थः ॥ १ ॥

२.] ति० टी०–यस्मात्त्वमिमं देशं चीरजटाजिनी भूत्वाऽऽगतोऽसि तस्मादेवंरूपेणागमनं किंकारणकमिति त्वया प्रस्पष्टं व्याहृतं श्रोतुमहमिच्छेयम् ॥ २ ॥

रा० टी०–प्रश्नाकारमाह–किमिति । यस्मात्कारणाच्चीरजटाजिनी चीरजटाजिनविशिष्टस्त्वमिमं देशमागतः प्राप्तः तस्मादेतोस्त्वया प्रव्याहृतं कथितमेतत्किम् किमपि कारणमहं श्रोतुमिच्छेयम् ॥ २ ॥

गो० टी०–किमिति । यस्मात् कारणात् त्वं चीरजटाजिनी सन् इमं देशमागतः एतद् एतत्कारणं किम् अहं त्वया प्रव्याहृतं श्रोतुमिच्छेयं श्रोतुमिच्छामि न तु जहेयेति भावः॥ २॥

३] ति० टी०–एतस्यैव श्लोकस्य व्याख्यानम्–यदिति॥ ३॥

१ महामतिरिति गो. पाठः । २ सर्गोऽयं गो. रा. पाठे शताधिकचतुर्थतयाऽवतिष्ठते किंतु मूलस्य तिलकानुरोधित्वादस्माभिरस्तदृष्टिकोटूस्यानैव निवेश्यते । ३ किमिति गो. पाठः ।

इत्युक्तः केकयापुत्रः काकुत्स्थेन महात्मना । प्रगृह्य बलवद्भूयः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ४ ॥
आर्य तातः परित्यज्य कृत्वा कर्म सुदुष्करम् । गतः स्वर्गं महाबाहुः पुत्रशोकाभिपीडितः ॥ ५ ॥
स्त्रिया नियुक्तः कैकेय्या मम मात्रा परंतप । चकार सा महत्पापमिदमात्मयशोहरम् ॥ ६ ॥
सा राज्यफलमप्राप्य विधवा शोककर्शिता । पतिष्यति महाघोरे नरके जननी मम ॥ ७ ॥
तस्य मे दासभूतस्य प्रसादं कर्तुमर्हसि । अभिषिञ्चस्व चाद्यैव राज्येन मघवानिव ॥ ८ ॥
इमाः प्रकृतयः सर्वा विधवा मातरश्च याः । त्वत्सकाशमनुप्राप्ताः प्रसादं कर्तुमर्हसि ॥ ९ ॥
तथानुपूर्व्या युक्तश्च युक्तं चात्मनि मानद । राज्यं प्राप्नुहि धर्मेण सकामान्सुहृदः कुरु ॥ १० ॥
भवत्वविधवा भूमिः समग्रा पतिना त्वया । शशिना विमलेनेव शारदी रजनी यथा ॥ ११ ॥
एभिश्च सचिवैः सार्धं शिरसा याचितो मया । भ्रातुः शिष्यस्य दासस्य प्रसादं कर्तुमर्हसि ॥ १२ ॥

रा०टी०—यदिति । कृष्णाजिनजटाधरः सन् राज्यं हित्वा इमं देशं यन्निमित्तं यदर्थं त्वं प्रविष्टस्तत्सर्वं वक्तुमर्हसि ॥ ३ ॥

गो० टी०—एवमुक्तेऽपि शोकेन तूष्णीं स्थितं पुनः पृच्छति—किं निमित्तमित्यादिश्लोकद्वयेन । काकुत्स्थेन बलवत्प्रगृह्य गाढं परिष्वज्य तत्सर्वं वक्तुमर्हसीति भूय उक्तः कैकेयीपुत्रः प्राञ्जलिर्वाक्यमब्रवीदित्यन्वयः ॥ ३ ॥ ४ ॥

४] ति० टी०—प्रगृह्य बलवत् यथा तथा शोकं निगृह्येत्यर्थः ॥ ४ ॥

रा० टी०—इतीति । महात्मना काकुत्स्थेन रामेण बलवत्प्रगृह्य भरतमालिङ्ग्य भूयः अत्यन्तमुक्तः कैकेयीपुत्रो भरतः प्राञ्जलिः सन् इति इदं वाक्यमब्रवीत् ॥ ४ ॥

५] ति० टी०—पूर्वपृष्टमेवार्थं क्व नु तेऽभूत्पितेत्येवंरूपं भङ्ग्यन्तरेण पुनः पृष्टं ज्ञात्वा तदुत्तरमाह—आर्येति । परित्यज्य अस्मान्सर्वानिमं च लोकमिति शेषः । 'आर्यं परित्यज्य' इति पाठे विवास्येत्यर्थः । सुदुष्करं कर्म ज्येष्ठार्हं राज्यं कनिष्ठसात्कृत्वा ॥ ५ ॥

रा० टी०—तद्वचनाकारमाह—आर्येति । हे आर्य ! स्त्रिया मत्पत्न्या प्रार्थितयेति शेषः, मम मात्रा कैकेय्या नियुक्तः प्रार्थितस्तातः सुदुष्करं कर्तुमशक्यं कर्म कृत्वा त्वां प्रव्राज्येत्यर्थः, पुत्रशोकाभिपीडितः सन् परित्यज्य प्रकटायोध्यामिति शेषः, स्वर्गमप्रकटसाकेतं गतः अतः सा कैकेयी आत्मयशोहरं त्वत्प्रव्राजनकर्त्रीत्वेन इयं रामस्य अतिप्रियेति स्वयशोविध्वंसकमिदं महत्पापं चकार । स्त्रिया प्रार्थितयेत्यनेन मन्थरामाण्डव्योरतिप्रीतिः सूचिता तेन माण्डवीकर्तृकमेवेदं सर्वमिति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—आर्यमिति । सुदुष्करं कर्म कृत्वा ज्येष्ठार्हं राज्यं श्रीनियोगात् कनिष्ठसात्कृत्येत्यर्थः । आर्यं त्वां परित्यज्य विवास्य ॥ ५ ॥

६–७] ति० टी०—मम मात्रा कैकेय्या नियुक्त इति पूर्वश्लोकान्वयि सा चकारेत्यन्वयः ; 'सुमहत्' इति पाठे सेत्यध्याहारः ॥ ६ ॥ ७ ॥

गो० टी०—स्त्रियेति । सुमहत्पापं सुपुत्रस्य वने प्रव्राजनरूपम् ॥ ६ ॥

रा० टी०—सेति । सा कृतरामप्रव्राजना कैकेयी राज्यफलं राज्ये फलं स्वयशोनिष्पत्तिमप्राप्य विधवा पतिसांनिध्यरहिता अत एव शोककर्शिता सती महाघोरे नरके नरोचारितनिन्दाशब्दे पतिष्यति अपतत् लङ्पात्तभविष्यत्स्यावविक्षा ॥ ७ ॥

गो० टी०—सेति । सा एवंरूपपापप्रेरणकर्त्री ॥ ७ ॥

८] ति० टी०—एवं पितृमरणे श्रुते तदुचितकृत्ये कृते ततःपरं यद्वक्तव्यं तत्संक्षेपेणाधुनैव ब्रूते भरतः—तस्य म इति । कैकेयीपुत्रत्वात्प्राप्तापवादस्य । राज्येन राज्यनिमित्तम् ॥ ८ ॥

रा० टी०—तस्येति । दासभूतस्य मम प्रसादं कर्तुमर्हसि । तदुपायमाह—अद्यैव मघवानिव अभिषिञ्चस्व अभिषेचय आत्मानमिति शेषः ॥ ८ ॥

गो० टी०—तस्येति । तस्य कैकेयीसंबन्धात् प्राप्तापवादस्येत्यर्थः राज्येन हेतुना ॥ ८ ॥ ९ ॥

९] ति० टी०—यस्मान्मातरो वयं च सर्वे त्वत्प्रसादनार्थमागताः ॥ ९ ॥

रा० टी०—इमा इति । विधवाः स्वामिरहिताः याः प्रकृतयः प्रजाः मातरश्च त्वत्सकाशं त्वत्समीपं प्राप्तास्तासां प्रसादं कर्तुं त्वमर्हसि ॥ ९ ॥

१०] ति० टी०—यतश्च त्वमानुपूर्व्या ज्येष्ठत्वलक्षणया युक्तो यतश्चात्मनि त्वयि अभिषेचनं युक्तं तस्माद्धर्मेण राज्यं प्राप्नुहि ॥ १० ॥

रा० टी०—तथेति । यतस्तथा अभिषेचनयोग्यया आनुपूर्व्या आनुपूर्वीघटकप्रथमत्वेन त्वं युक्तः अतः आत्मनि युक्तं धर्मेण राज्यं आप्नुहि अत एव सुहृदः सकामान् कुरु ॥ १० ॥

गो० टी०—तदानुपूर्व्येति । आनुपूर्व्या युक्तं ज्येष्ठानुक्रमेण संगतम् आत्मनि युक्तं च भरणसमर्थे त्वय्येव प्राप्तम् ॥ १० ॥

११–१२] ति० टी०—रजनी यथा तादृशी भूमिः शशिनेव त्वया युताऽविधवा भवत्वित्यन्वयः । पतिनेत्यार्षम् । 'विमलेनेह' इति पाठान्तरम् ॥ ११ ॥ १२ ॥

१ आर्यमिति गो. पाठः । २ स्त्रिति गो. पाठः । ३ निरय इति गो. पाठः । ४ तदेति गो. पाठः । ५ युक्तं चेति गो. पाठः ।

तदिदं शाश्वतं पित्र्यं सर्वं सचिवमण्डलम् । पूजितं पुरुषव्याघ्र नातिक्रमितुमर्हसि ॥ १३ ॥
एवमुक्त्वा महाबाहुः सबाष्पः कैकयीसुतः । रामस्य शिरसा पादौ जग्राह भरतः पुनः ॥ १४ ॥
तं मत्तमिव मातङ्गं निःश्वसन्तं पुनः पुनः । भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥ १५ ॥
कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः । राज्यहेतोः कथं पापमाचरेन्मद्विधो जनः ॥ १६ ॥
न दोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन । न चापि जननीं बाल्यात्त्वं विगर्हितुमर्हसि ॥ १७ ॥
कामकारो महाप्राज्ञ गुरूणां सर्वदानघ । उपपन्नेषु दारेषु पुत्रेषु च विधीयते ॥ १८ ॥
वयमस्य यथा लोके संख्याताः सौम्य साधुभिः। भार्याः पुत्राश्च शिष्याश्च त्वमँपि ज्ञातुमर्हसि ॥ १९ ॥

रा० टी०–भवत्विति । समग्रा संपूर्णा भूमिः अविधवा धवराहित्यरहिता पतिना त्वया भवतु, तत्र दृष्टान्तः शशिना रजनी रात्रिरिव ॥ ११ ॥

गो० टी०–भवत्विति । पतिनेति नाभाव आर्षः । रजनी यथा रजनीव भूमिः शशिनेव त्वया अविधवा भवतु ॥ ११ ॥

रा० टी०–एभिरिति । मया शिरसा याचितस्त्वं भ्रातृत्वादिविशिष्टस्य मम प्रसादं कर्तुमर्हसि ॥ १२ ॥

गो० टी०–एभिश्चेति । ममैकस्य शोकाश्रुपातमसहमानः कथमेषामश्रूणि सहिष्यत इति मत्वा युद्धाय संनद्धैरिव रथगजतुरगपदातिभिः सार्धमागतोऽस्मि सचिवैः मम हि याचनमुपेक्ष्यमस्मद्राज्यनिर्वाहकैःपूजनीयैः सचिवैर्याचितं तवानतिक्रमणीयं हि याचितः ममाग्रतः स्थितिरेवालं तव कार्यकरणाय किं पुनर्याचनेऽपि कृते शिरसा याचितः शिरसा याचतस्तस्य वचनं न कृतं मयेति खलु तव हृदयमनुशेते मया एतावत्पर्यन्तं त्वमेव मां याचित्वा मम मनोरथं पूरितवानसि भ्रातुः किमर्थं याचितव्यं तवानुजो न भवामि किं शिष्यस्य अनुजो भूत्वा भवता सह किमंशमाक् तिष्ठामि मन्त्रसंबन्धोऽपि त्वत्तः खलु दासस्य शिष्यो भूत्वा क्रयविक्रयार्हो न भवामि किम् अतः प्रसादं कर्तुमर्हसि उक्तैरमोघैः हेतुभिर्मम याच्ञां सफलां कुरुष्व ॥ १२ ॥

१३–१४] ति० टी०–शाश्वतं परंपराप्राप्तं सचिवमण्डलं तत्प्रार्थनं पूर्वं सदा पूजितं सफलं कृतं तदिदानीमतिक्रमितुं नार्हसि ॥ १३ ॥ १४ ॥

रा० टी०–तदिति । शाश्वतं कुलपरंपराप्राप्तं पूजितं सत्कृतं पित्र्यं पितृसंबन्धि सर्वं सचिवमण्डलमतिक्रमितुमुल्लङ्घितुं नार्हसि ॥ १३ ॥

गो० टी०–एभिश्च सचिवैरित्यस्य विवक्षितं दर्शयति–तदिति । तत्पुरस्तर्वतनदशायामसन्निहितमिदम् इदानीं सन्निहितं शाश्वतं सनातनं परंपराप्राप्तमिति यावत्, पूजितं पूजार्हं प्रकृतीनां[1] मन्त्रिप्रभृतीनां मण्डलं समूहं नातिक्रमितुमर्हसि तद्वचनं नातिक्रमणीयमित्यर्थः ॥ १३ ॥

रा० टी०–एवमिति । महाबाहुः भरतः एवमुक्त्वा रामस्य पादौ शिरसा पुनर्जग्राह ॥ १४ ॥

गो० टी०–एवमिति । महाबाहुः प्रसारितबाहुरिति यावत् कैकेयीसुतः मातुर्दोषादियमवस्थेति भावः । पुनरिति पूर्वं याचितवान् ततः शरणागतिमकरोदित्यर्थः ॥ १४ ॥१५॥

१५] ति० टी०–मत्तमथाप्यकस्मात्प्राप्तदुःखेन निःश्वसन्तं मातङ्गमिव स्थितं भरतमित्यन्वयः[2] ॥ १५ ॥

रा० टी०–तमिति । मत्तं मातङ्गं गजमिव निश्वसन्तं भरतं परिष्वज्य इदमब्रवीत् ॥ १५ ॥

१६] ति० टी०–पापं पित्राज्ञाभङ्गरूपम् ॥ १६ ॥

रा० टी०–तद्वचनाकारमाह–कुलीन इति । कुलीनः सत्कुले प्रादुर्भूतः अत एव सत्त्वसंपन्नः शुद्धसत्त्वगुणयुक्तः अत एव तेजस्वी चरितानि व्रतानि येन सः त्वद्विधः त्वत्सदृशो जनः राज्यहेतोः राज्यार्थं पापं कथमाचरेत् कथमपि नेत्यर्थः, यदि त्वत्सदृशो नाचरेत्तर्हि त्वं नाचरेः इति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः । एतेन त्वयि राज्याकाङ्क्षा नास्तीत्यस्माभिर्ज्ञातमिति सूचितम् ॥ १६ ॥

गो० टी०–कुलीन इति । कुलीनः महाकुलप्रसूतः सत्त्वसंपन्नः सत्त्वगुणसंपन्नः पापं ज्येष्ठविषयप्रातिकूल्यरूपम् ॥१६॥

१७] ति० टी०–बाल्यादज्ञानात् ॥ १७ ॥

रा० टी०–नेति । हे अरिसूदन! सूक्ष्ममपि दोषं त्वयि न पश्यामि अतो बाल्यान्मात्रभिप्रायाविज्ञानाद्धेतोः जननीं विगर्हितुं निन्दितुं नार्हसि । एतेन तद्विगर्हणे त्वयि दोषः स्यादिति सूचितम् ॥ १७ ॥

गो० टी०–न दोषमिति । बाल्यात् अज्ञानादित्यर्थः ॥१७॥

१८] ति० टी०–कथं कैकेयीगर्हणमज्ञानमूलं तत्राह–कामकार इति । स्वच्छन्दाचरणमित्यर्थः, स्वेच्छया नियोजनमिति यावत् । गुरूणां पित्रादीनाम् उपपन्नेषु संमतेषु दारेषु पुत्रेषु च कामकारो विधीयत इति संबन्धः ॥ १८ ॥

रा० टी०–तद्गर्हाभावे हेतुं वदन्नाह–कामकार इति । हे अनघ ! उपपन्नेषु स्वसंमतेषु दारेषु पुत्रेषु च गुरूणां कामकारः स्वेच्छया वर्तनं विधीयते शास्त्रेणेति शेषः, एतेन पित्रादयः कथंचिदपि न दूष्या इति ध्वनितम् ॥ १८ ॥

गो० टी०–कामकार इति । कामकारः स्वच्छन्दकरणम् उपपन्नेषु शिष्यदासादिषु ॥ १८ ॥

१९] ति० टी०–ततः किमत आह–वयमिति । भार्याः

१ प्रकृतीति गो. पाठः । २ विधिवदिति गो. पाठः । ३ त्वदिति गो. रा. पाठः । ४ अन्विति गो. पाठः ।

वने वा चीरवसनं सौम्य कृष्णाजिनाम्बरम् । राज्ये वापि महाराजो मां वासयितुमीश्वरः ॥ २० ॥
यावत्पितरि धर्मज्ञ गौरवं लोकसत्कृते । तावद्धर्मकृतां श्रेष्ठ जनन्यामपि गौरवम् ॥ २१ ॥
एताभ्यां धर्मशीलाभ्यां वनं गच्छेति राघव । मातापितृभ्यामुक्तोऽहं कथमन्यत्समाचरे ॥ २२ ॥
त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृतम् । वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥ २३ ॥
एवमुक्त्वा महाराजो विभागं लोकसंनिधौ । व्यादिश्य च महाराजो दिवं दशरथो गतः ॥ २४ ॥
स च प्रमाणं धर्मात्मा राजा लोकगुरुस्तव । पित्रा दत्तं यथाभागमुपभोक्तुं त्वमर्हसि ॥ २५ ॥
[चतुर्दश समाः सौम्य दण्डकारण्यमाश्रितः । उपभोक्ष्ये त्वहं दत्तं भागं पित्रा महात्मना ॥]
यदब्रवीन्मां नरलोकसत्कृतः पिता महात्मा विबुधाधिपोपमः ।
तदेव मन्ये परमात्मनो हितं न सर्वलोकेश्वरभावमव्ययम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकाधिकशततमः सर्गः ॥ १०१ ॥

पुत्राः शिष्याश्च लोके साधुभिर्यथा समाख्याता इच्छाविनियोगार्हतया तथास्य राज्ञो वयं सर्वे इति त्वमपि ज्ञातुमर्हसि॥१९॥

रा० टी०–वयमिति । यथा येन प्रकारेण लोके भार्यादयः साधुभिः धर्मज्ञैः संख्याताः गुर्वधीनत्वेन कथिताः तथा अस्य पितुः वयमपि संख्याता इति ज्ञातुमर्हसि ॥ १९ ॥

गो० टी०–वयमिति । लोके भार्यादयः साधुभिर्यथा संख्याताः नियाम्यत्वेन परिगणिताः वयमपि तथा दशरथस्येति त्वं ज्ञातुमर्हसि । अत्रनिरर्थकः ॥ १९ ॥

२०] ति० टी०–प्रकृते किं तत्राह–वने इत्यादि ॥२०॥

रा० टी०–वन इति । चीरवसनादिविशिष्टं मां वने राज्ये वा आवासयितुं महाराज एव ईश्वरः समर्थः ॥ २० ॥

गो० टी०–वन इति । चीरं द्रुमवल्कलं वसनमुत्तरीयं यस्य तं कृष्णाजिनम् अम्बरं मधशाम्बरं यस्य तम् ईश्वरः नियन्ता ॥ २० ॥

२१] ति० टी०–प्रकृतमम्बागर्हाभावमुपसंहरति–यावदिति । तावत्तावत्परिमाणकमित्यर्थः, अतः कैकेय्या अप्यस्मन्नियोजने तथैवाधिकार इति भावः ॥ २१ ॥

रा० टी०–तथैव जनन्यपि मन्तव्येति बोधयन्नाह–यावदिति । यावत् गौरवं गुरुत्वं पितरि तावत् जनन्यामपि वर्तते इति शेषः ॥ २१ ॥

गो० टी०–यावदिति । पितरि यावत् यत्परिमाणकं गौरवं जनन्यामपि तावत् तत्परिमाणकं गौरवं कर्तव्यमिति शेषः । यत्तच्छब्दाभ्याम् " यत्तदेतेभ्यः परिमाणे वतुप् " इति वतुप् ॥ २१ ॥

२२] ति० टी०–समाचरे समाचरिष्यामि ॥ २२ ॥

रा० टी०–एताभ्यामिति । एताभ्यां मातापितृभ्यां वनं गच्छेति उक्तोऽहमन्यत्तद्विरुद्धं कथं समाचरे ॥ २२ ॥

गो० टी०–फलितमाह–एताभ्यामिति । समाचरे समाचरामि कथं समाचराणीत्यर्थः ॥ २२–२४ ॥

२३] ति० टी०–त्वया राज्यं प्राप्तव्यम् मया दण्डके वस्तव्यम् ॥ २३ ॥

२४] ति० टी०–एवं विभागं लोकसंनिधौ मन्त्रिपुरोहितादिजनसंनिधावुक्त्वा तानेवं विभागं कुरुतेति व्यादिश्य च आज्ञाप्य च दिवं गत इत्यन्वयः ॥ २४ ॥

रा० टी०–त्वयेति । त्वया भरतेन अयोध्यायां राज्यं प्राप्तव्यं मया रामेण अरण्ये वस्तव्यमेवं विभागं विभागबोधकं वाक्यमुक्त्वा केकयीसन्निधौ प्रतिज्ञायेत्यर्थः, लोकसंनिधौ व्यादिश्य मामाज्ञाप्य च महातेजाः महाराजो दशरथः दिवं ब्रह्मादिस्तुत्यमप्रकटसाकेतं गतः । श्लोकद्वयमेकान्वयि॥२३॥ २४॥

२५] ति० टी०–यथाभागं पितृकल्पितचतुर्दशवर्षपर्यन्तम् अनेन तदनन्तरमहं भोक्ष्यामीति सूचितम् । मात्रापि चतुर्दशवर्षपर्यन्तं वनवास एव दृतः न तु सर्वथा मे राज्यत्यागः पित्रापि तावदेवानुमतमिति भावः ॥ २५ ॥

रा० टी०–स इति । लोकगुरुः स प्रसिद्धो राजा तव प्रमाणमतः पित्रा दत्तं भागं यथा यथावत् उपभोक्तमर्हसि ॥ २५ ॥

रा० टी०–चतुर्दशेति । चतुर्दश समाः वर्षाणि अरण्यमाश्रितोऽत एव यत् तद्विषयकयत्नवानहं पित्रा दत्तं भागमुपभोक्ष्ये ॥ २६ ॥

गो० टी०–स चेति । पित्रा दत्तं भागं यथा यथावत् उपभोक्तुमित्यन्वयः ॥ २५ ॥ २६ ॥

२६] ति० टी०–पिता महात्मा ब्रह्मणा तुल्यः । अव्ययं सर्वलोकेश्वरत्वं ब्रह्मत्वं पित्रनुमतमिति शेषः । नहि तमित्यन्वयः । नन्वं पितृमरणश्रवणोत्तरं शोकमुल्लङ्घ्याभिषेकप्रत्या-

---

१ धर्मज्ञ इति गो. पाठः । २ सत्कृतमिति गो. पाठः । ३ भूतामिति गो. पाठः । ४ कृत्वेति गो. पाठः । ५ तेजा इति गो. पाठः । ६ श्लोकोऽयमधिको गो. रा. पाठे । ७ च यद्दत्तमिति रा. पाठः । ८ अप्यहमिति गो. पाठः ।

द्व्युत्तरशततमः सर्गः ।

अग्रजसेवारूपधर्माद्भ्रष्टस्य किं मे राज्येन, त्वामनुचिन्तयन्नेव तातः स्वर्गतोऽतस्तत्प्रीत्यै कुरुष्वोदकमभिषेचयात्मान कृतनिवापावेवावामभ्यागताविति भरतो रामं प्रार्थयते ।

रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह । किं मे धर्माद्विहीनस्य राजधर्मः करिष्यति ॥ १ ॥
शाश्वतोऽयं सदा धर्मः स्थितोऽस्मासु नरर्षभ । ज्येष्ठे पुत्रे स्थिते राजा न कनीयान्भवेन्नृपः ॥ २ ॥

ख्यानमेव कृत इति चेच्छृणु । भरतस्याभिषेककरणप्रत्याशावारणाय कैकेय्या लोकानां चान्यथासंभावनावारणाय शोककालेऽपि धैर्यमवलम्ब्य तत्करणं शोककालेऽप्येवं धैर्यं कर्तव्यमिति लोकोपदेशायेति मम प्रतिभाति । तीर्थस्तु—पूर्वं न स्वर्गं गतो मृतकल्पो विधवास्तत्कल्पा इत्यर्थं मरणं मरणनिश्चयाभावेन राज्यस्वीकारायैव राजानं मृतकल्पं वदतीति बुद्ध्या शोककारणपूर्वकमभिषेकप्रत्याख्यानं कृतवान् । स्ववाक्ये दिवं गत इत्यत्राप्येवमेवेत्याह । कृतकस्तु—गतः स्वर्गमिति भरतेनोक्तेऽपि पितृमरणोचितसर्वकार्यकरणे कृते भरतस्तस्य मे इत्याह कवान् । कविस्तु संक्षेपेणादावुक्त्वाग्रे विस्तरेण वदतीति भावः कवेः स्वभाव इत्याह ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीयआदिकाव्येऽयोध्याकाण्डे एकाधिकशततमः सर्गः ॥१०१॥

रा० टी०—यदिति । नरलोकसत्कृतः महात्मा पिता यन्मामब्रवीत्तदेवाहं हितं मन्ये अव्ययं विनाशरहितं सर्वलोकेश्वरभावं सर्वलोकेश्वरत्वं तु न हितं मन्ये ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुरधिकशततमः सर्गः ॥ १०४ ॥

गो० टी०—यदिति । परमात्मनो हितम् आत्मनः परं हितम् ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥१०४॥

१] ति० टी०—अथ भरतः पितृवृत्तान्तप्रश्नोत्तरमुक्त्वा कविस्प्रश्नोत्तरमाह—रामस्येति । धर्माद्राज्यायोग्यत्वेन राजधर्माद्राज्याद्विहीनस्य त्वत्पृष्टराजधर्मो मे क्षोपयुक्तः अनुपनीतयागवत् अतोऽनवसरदुःस्थो मयि कविरादिप्रश्न इति भावः ॥ १ ॥

रा० टी०—रामवचनश्रवणानन्तरकालिकं भरतवृत्तान्तमाह—रामस्येति । भरतः प्रत्युवाच तत्प्रतिवचनमेवाह धर्मात्त्वत्कुलोचितरीतेः विहीनस्य मे राजधर्मः राजधर्मोपदेशः किं करिष्यति धर्माचरणरहितेनृपदेशो निरर्थक इति तात्पर्यम् ॥१॥

गो० टी०—रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच हेत्यादि । अयं सर्ग एवात्र ज्ञेयनीयः । 'तं तु रामः समाश्वास्य भ्रातरं गुरुवत्सलम्' इत्यादिसर्गस्तु लेखकैः प्रमादाल्लिखितः तस्योक्तप्रश्नोत्तरत्वाभावात् अत्र भरतोच्यमानपितृमरणश्रवणानन्तरं रामस्य दुःखितत्वाश्रवणात् अत्र महेश्वरतीर्थेन सर्गपौर्वापर्यवैपरीत्यमनालोच्य स्वदृष्टकोशमात्रप्रामाण्येन तं तु रामः समाश्वास्येत्यादिकं सर्गमेवैकोत्तरशततमं मन्वानेन तत्सर्गव्याख्यानान्ते तत्रत्यार्थविरोधमालोच्यैव आक्षेपपरिहारावुक्तौ ननु 'आर्यं तातः परित्यज्य कृत्वा कर्म सुदुष्करम् । गतः स्वर्गं महाबाहुः पुत्रशोकाभिपीडितः' इति । 'इमाः प्रकृतयः सर्वा विधवा मातरश्च याः । त्वत्सकाशमनुप्राप्ताः' इति च भरतेनोक्ते रामस्तदानीमशोचन् तदुच्छ्रयाभिषेकप्रत्याख्यानमेव किमिति कृतवान् नैष दोषः तस्मिन् भरतवाक्यप्रबन्धे पितृमरणमानुषङ्गिकत्वेनोक्तं राज्यस्वीकरणमेव प्राधान्येनोक्तम् अतो रामस्तु देवं मन्यते । पिता पुत्रशोकेन मृतकल्पो न पुनर्जीविष्यतीति मृत इत्युच्यते मातरश्च विधवाकल्पा इति विधवा इत्युच्यन्ते अनेन ममाभिषेचनमेव प्राधान्येनोच्यत इति अशोचन्नभिषेकप्रत्याख्यानं कृतवान् स्ववाक्ये पितृमरणानुवादस्य चायमेवार्थ इति । अत्रायं परिहारो न युज्यते यदि च पिता मृतकल्पत्वेन मृत इत्युच्यत इति रामो गृह्णीयात् तदा व्यादिश्य च महातेजा दिवं दशरथो गत इति नानुवदेत् । यस्तु स्वाशयं स्वयमेवैवमिति वदति तस्यान्येन गत्यन्तरे सति तद्विरुद्धाभिप्रायकल्पनं कथं कर्तुं शक्यम् अतोऽनेनैवानुवादेन रामेण पिता मृत इत्येव गृहीतमिति भाति किं च प्रकृतीनां मातॄणां च समागमनात्पूर्वम् 'इमाः प्रकृतयः सर्वा विधवाः मातरश्च याः । त्वत्सकाशमनुप्राप्ताः प्रसादं कर्तुमर्हसि' इत्यकुल्यादिनिर्देशानुपपत्तेश्च । अतः तं तु रामः समाश्वास्येत्यादिसर्गः वसिष्ठं पुरतः कृत्वेति द्व्युत्तरशततमसर्गानन्तरं चतुरुत्तरशततमसर्गस्त्वेन लेखनीयः पठनीयश्च तथा चेत्सर्गतः स्यात् अतोऽत्र रामस्य वचनं श्रुत्वेत्ययं सर्ग एव व्याख्यायते रामस्य वचनं श्रुत्वेत्यादि । धर्मात् त्वत्सेवारूपसुकृत्यधर्मात्, यद्वा धर्मात् त्वदुक्तराजधर्मानुष्ठानहेतुभूतराजभावात् राजधर्मः त्वदुक्तनीतिस्थः ॥ १ ॥

२] ति० टी०—कृतस्ते उक्तवर्गाभावोऽत आह—शाश्वत इति । शाश्वतः कुलक्रमागतः अस्मास्वस्मत्पूर्वेषु सदा सर्वदा । 'यथा' इति पाठे यथाशास्त्रं स्थितः प्रतिष्ठितः । अयं कस्तत्राह—ज्येष्ठे इति । एवं च कनीयस्त्वान्मे न राजत्वमिति भावः ॥२॥

---

१ ज्येष्ठपुत्र इति गो. पाठः । २ राजाऽस्मिति गो. पाठः ।

स समृद्धां मया सार्धमयोध्यां गच्छ राघव । अभिषेचय चात्मानं कुलस्यास्य भवाय नः ॥ ३ ॥
राजानं मानुषं प्राहुर्दैवत्वे संमतो मम । यस्य धर्मार्थसहितं वृत्तमाहुरमानुषम् ॥ ४ ॥
केकयस्थे च मयि तु त्वयि चारण्यमाश्रिते । [1]धीमान्स्वर्गं गतो राजा याय[2]जूकः सतां मतः ॥ ५ ॥
निष्क्रान्तमात्रे भवति सहसीते सलक्ष्मणे । दुःखशोकाभिभूतस्तु राजा त्रिदिवमभ्यगात् ॥ ६ ॥
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः । अहं चायं च शत्रुघ्नः पूर्वमेव कृतोदकौ ॥ ७ ॥
प्रियेण [3]किल दत्तं हि पितृलोकेषु राघव । [4]अक्षय्यं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ॥ ८ ॥
त्वामेव शोचंस्तव दर्शनेप्सुस्त्वय्येव सक्तामनिवर्त्य बुद्धिम् ।
त्वया विहीनस्तव शोकरुग्णस्त्वां संस्मरन्नेव गतः पिता ते ॥ ९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

रा० टी०–धर्मच्युतिमेवोपपादयन्नाह–शाश्वत इति । ज्येष्ठपुत्रे स्थिते सति कनीयान् कनिष्ठः नृपो न भवेत् इति शाश्वतः सार्वकालिकः अयं धर्मः अस्माच्च अस्मत्पूर्वजेषु सदा नित्यं स्थितः ॥ २ ॥

गो० टी०–कुतस्ते राजभावाभाव इत्यत्राह–शाश्वत इति । अस्माच्च अस्मत्पूर्वेषु ॥ २ ॥

३] ति० टी०–यदेवमतः–स इति । गच्छागच्छ, भवाभ्युदयाय ॥ ३ ॥

रा० टी०–नन्वकथं तस्य धर्मस्य स्थितिरित्यत आह–स इति । नोऽस्माकमस्य कुलस्य कुलधर्मस्य भवाय स्थित्यै मया सह अयोध्यां गच्छ आत्मानं च अभिषेचय ॥ ३ ॥

गो० टी०–सस[5]मृद्धामिति । भवाय भद्राय 'भवो भद्रे हरे प्राप्तौ सत्तासंसारजन्मसु' इति वैजयन्ती ॥ ३ ॥

४] ति० टी०–नन्वेवत्वप्रापकं तपो विहाय किं मे राज्येन तत्राह–राजानमिति । सर्वे जना यद्यपि राजानं मानुषं प्राहुस्तथापि मम स देवत्वे संमतः । तत्र हेतुमाह–यस्येति । अमानुषं मनुष्येऽसंभावितमित्यर्थः ॥ ४ ॥

रा० टी०–नन्वेवं महाराजस्य वियमानत्वे कथमेवं प्रार्थनेत्यत आह–राजानमिति । यं मानुषं राजानं प्राहुः यस्य धर्मार्थसहितं वृत्तं दृष्टान्तममानुषं प्राहुः स मत्पिता देवत्वे नित्यप्रमोदे संमतः प्राप्त इत्यर्थः ॥ ४ ॥

गो० टी०–न सर्वेषामयं राजत्वमित्याह–राजानमिति । प्राहुः प्राकृता जना इति शेषः, स राजा मम देवत्वेन संमत इत्यर्थः ॥ ४ ॥

५–६] ति० टी०–उक्तमपि राजमरणं रामेण विषयान्तरोत्तरदानादश्रुतमिव मत्वा पुनस्तदेवाह–केकयस्थे इति । सतां मतः सद्भिः पूज्यमानः ॥ ५ ॥ ६ ॥

रा० टी०–नन्वस्वाभाविकनिस्वप्रणीतविशिष्टस्य तस्य किमिदमुच्यते इत्यत आह–केकयस्थ इति । मयि केकयस्थे केकयराजवेश्मस्थे सति त्वयि च अरण्यमाश्रिते सति यायजूकः अश्वमेधादियागकर्ता सतां मतः इष्टः धीमान् राजा स्वर्गमप्रकटसाकेतं गतः प्राप्तः ॥ ५ ॥

गो० टी०–एवं सन्निहितानीति प्रश्नस्योत्तरमुक्त्वा प्राथमिकराजविषयप्रश्नस्योत्तरमाह–केकयस्थ इति । यायजूक इज्याशीलः 'इज्याशीलो यायजूकः' इत्यमरः ॥ ५ ॥

रा० टी०–गमने हेतुं वदन्नाह–निष्क्रान्तेति । सहसीते सीतासहिते भवति निष्क्रान्ते सति दुःखशोकाभिभूतो राजा त्रिदिवं ब्रह्मादित्रयस्तुत्यमप्रकटसाकेतमभ्यगात् ॥ ६ ॥

गो० टी०–मन्निर्गमनानन्तरं कतिदिवसेषु राजा दिवं गत इत्यत्राह–निष्क्रान्तमात्र इति ॥ ६ ॥ ७ ॥

७] ति० टी०–कृतोदकाविति । कृतसपिण्डीकरणान्तसर्वक्रियौ ॥ ७ ॥

रा० टी०–उत्तिष्ठेति । हे पुरुषव्याघ्र! पितुः लोकान्तरप्राप्तपित्रुद्देश्यकमुदकदानं क्रियताम् । अहं शत्रुघ्नश्च पूर्वमेव कृतोदकौ, एतेन आवाभ्यां न कर्तव्यमिति सूचितम् ॥ ७ ॥

८] ति० टी०–तर्हि किं कृतकरणेनेत्यत आह–प्रियेणेति । भवान्प्रियः ज्येष्ठत्वादिति भावः ॥ ८ ॥

रा० टी०–उदककक्रियाकरणे प्रयोजनमाह–प्रियेणेति । हे राघव! प्रियेण प्रीतिविशिष्टेन पुत्रेण दत्तमुदकादिकं पितृलोके पित्राद्यभिमानिदेवविशेषसंनिधौ अक्षयं विनाशरहितं भवति इति आहुः तत्त्वज्ञा इति शेषः । दानयोग्यत्वं प्रतिपादयति हि यतः भवान् पितुः प्रियः ॥ ८ ॥

गो० टी०–भवद्भ्यां दत्ते किं मयापि दातव्यमित्यत्राह–प्रियेणेति ॥ ८ ॥

९] ति० टी०–प्रकारान्तरेणापि प्रियत्वमेवोपपादयति–त्वामेवेति । तव शोकरुग्ण इत्यनेन स्वच्छोक एव तदवसादहेतुरिति दर्शितम् ॥ ९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

१ दिवमार्ष इति गो. पाठः । २ खल्विति गो. पाठः । ३ अक्षय्यमिति गो. पाठः । ४ अस्तमित इति गो. पाठः ।

द्व्युत्तरशततमः सर्गः ।

पितुः स्वर्गतिश्रवणात्संमूर्छितोऽतो भरतादिभिः सलिलसेकाद्युपचारैर्निराकृतमूर्छो रामो बहुधा पर्यदेवीत् । ततो भरतादिभिः कृतसमाश्वासः सीतामाश्वास्य गङ्गामुपेत्योदकं निवापं च निर्वर्त्योटजं प्राप । रुदतां तेषामाक्रोशमवधार्य सैनिकाः समीपमीयुः । रामस्तान् यथार्हं संमेने ।

तां श्रुत्वा करुणां वाचं पितुर्मरणसंहिताम् । राघवो भरतेनोक्तां बभूव गतचेतनः ॥ १ ॥
तं तु वज्रमिवोत्सृष्टमाहवे दानवारिणा । वाग्वज्रं भरतेनोक्तममनोज्ञं परंतपः ॥ २ ॥
प्रगृह्य रामो बाहू वै पुष्पिताङ्ग इव द्रुमः । वने परशुना कृत्तस्तथा भुवि पपात ह ॥ ३ ॥
तथा हि पतितं रामं जगत्यां जगतीपतिम् । कूलघातपरिश्रान्तं प्रसुप्तमिव कुञ्जरम् ॥ ४ ॥
भ्रातरस्ते महेष्वासं सर्वतः शोककर्शितम् । रुदन्तः सह वैदेह्या सिषिचुः सलिलेन वै ॥ ५ ॥
स तु संज्ञां पुनर्लब्ध्वा नेत्राभ्यामश्रुमुत्सृजन् । उपाक्रामत काकुत्स्थः कृपणं बहु भाषितुम् ॥ ६ ॥
स रामः स्वर्गतं श्रुत्वा पितरं पृथिवीपतिम् । उवाच भरतं वाक्यं धर्मात्मा धर्मसंहितम् ॥ ७ ॥
किं करिष्याम्ययोध्यायां ताते दिष्टां गतिं गते । कस्तां राजवराद्धीनामयोध्यां पालयिष्यति ॥ ८ ॥

रा० टी०–प्रियत्वमेवोपपादयन्नाह–त्वामिति । तव दर्शनेप्सुः त्वद्दर्शनविषयकेच्छावान् ते पिता त्वामेव स्मरन् त्वामेव शोचंश्च सन् त्वय्येव सक्तां बुद्धिमनिवर्त्य गतः ॥ ९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

गो० टी०–प्रियत्वमेव दर्शयति–त्वामेवेति । रुग्णः पीडित इति यावत् ॥ ९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने अयोध्याकाण्डव्याख्याने एकोत्तरशततमः सर्गः ॥१०१॥

१] ति० टी०–करुणां शोकावहाम् ॥ १ ॥

रा० टी०–भरतवचनश्रवणानन्तरकालिकं रामवृत्तान्तमाह–तामित्यादिभिः । मरणसंहितामन्यागम्यलोकान्तरगमनकर्तृत्वेन मरणसदृशगमनसंयुक्तामत एव करुणां शोकप्रापिकां भरतेनोक्तां तां वाचं श्रुत्वा राघवो रामः गतचेतनः तिरोहितचैतन्यो बभूव ॥ १ ॥

गो० टी०–तामित्यादि । करुणां शोकावहां यद्वा अकरुणां करुणारहितां क्रूरामिति यावत् ॥ १ ॥

२] ति० टी०–तं भरतोक्तं वाग्वज्रं रण इन्द्रोत्सृष्टवज्रतुल्यं श्रुत्वा ॥ २ ॥

रा० टी०–तमिति । आहवे संग्रामे दानवारिणा इन्द्रेणोत्सृष्टं वज्रमिव भरतेनोक्तममनोज्ञं वाग्वज्रं श्रुत्वेति शेषः । बाहू प्रगृह्य शिरसि कृत्वा परशुना कृतः विदारितः पुष्पिताङ्गो द्रुमो यथा तथा भुवि पपात । श्लोकद्वयमेकान्वयि ॥२॥३॥

गो० टी०–तं त्वित्यादिश्लोकद्वयमेकं वाक्यम् । दानवारिणा इन्द्रेण बाहू प्रगृह्य पाणिना पाणिं निष्पीड्य उद्धृत्य वा वाग्वज्रमित्यस्य पूर्वश्लोकादनुषक्तेन श्रुत्वेत्यनेनान्वयः ॥२॥३॥

३–४] ति० टी०–बाहू प्रगृह्यातिशिथिलौ कृत्वोद्धृत्य वा निष्पीड्य वा भुवि पपात । भरतादिदर्शनेन हर्षात्पुष्पिताङ्गद्रुमसादृश्यम् ॥ ३ ॥ ४ ॥

५] ति० टी०–सिषिचुर्मोहशान्तये सर्वगात्राणि जलेन सिषिचुः ॥ ५ ॥

रा० टी०–तथेति । कूलघातेन कूलविदारणेन परिश्रान्तमत एव सुप्तं कुञ्जरमित महेष्वासं शोककर्शितमत एव जगत्यां पतितं रामं वैदेह्या सह रुदन्तो भ्रातरः सलिलेन मोहापमार्जकजलेन सिषिचुः । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–तथेत्यादिश्लोकद्वयम् । कूलघातेन मदेन दन्तकण्डूत्या च कृतेन कूलप्रदारेण परिश्रान्तम् अत एव प्रसुप्तं कुञ्जरमिव स्थितं मूर्च्छितमित्यर्थः, सलिलेन सर्वतः सिषिचुः सर्वगात्राणि मोहशान्तये सिक्तवन्तः यतः "अमृतं वा आपस्तस्माद्विरिक्तान्तमभिषिञ्चन्ति" इति श्रुतिरपि हि वदति ॥ ४ ॥ ५ ॥

६–७] ति० टी०–कृपणं भाषितुम् लोकानुसारेण विलपितुमित्यर्थः ॥ ६ ॥ ७ ॥

रा० टी०–स इति । स जलेन सिक्तो रामः पुनः संज्ञां लब्ध्वा अस्रमश्रु उत्सृजन् सन् बहु अधिकं कृपणं भाषितुमुपाक्रामत ॥ ६ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–स इति । पितरं स्वर्गतमप्रकटसाकेतं प्राप्तं श्रुत्वा भरतमुवाच ॥ ७ ॥

गो० टी०–स त्विति । उपाक्रामत उपाक्रमत दीर्घ आर्षः ॥ ६ ॥ ७ ॥

८] ति०–टी०–दिष्टां गतिं दैवकल्पितां गतिं स्वसुकृतातिसृष्टां वा ॥ ८ ॥

रा० टी०–तद्वचनाकारमाह–किमिति । दिष्टामतिभा-

---

१ पुष्पिताग्रो यथेति गो. पाठः । २ आस्रमिति गो. अस्रमिति रा. पाठः ।

किं नु तस्य मया कार्यं दुर्जातेन महात्मनः । यो मृतो मम शोकेन मे मया न च संस्कृतः ॥ ९ ॥
अहो भरत सिद्धार्थो येन राजा त्वयानघ । शत्रुघ्नेन च सर्वेषु प्रेतकृत्येषु सत्कृतः ॥ १० ॥
निष्प्रधानामनेकाग्रां नरेन्द्रेण विना कृताम् । निवृत्तवनवासोऽपि नायोध्यां गन्तुमुत्सहे ॥ ११ ॥
समाप्तवनवासं मामयोध्यायां परंतप । कोऽनुशासिष्यति पुनस्तातेऽस्मिंल्लोकान्तरे गते ॥ १२ ॥
पुरा प्रेक्ष्य सुवृत्तं मां पिता यान्याह सान्त्वयन् । वाक्यानि तानि श्रोष्यामि कुतः कर्णसुखान्यहम् ॥ १३ ॥
एवमुक्त्वाथ भरतं भार्यामभ्येत्य राघवः । उवाच शोकसंतप्तः पूर्णचन्द्रनिभाननाम् ॥ १४ ॥
सीते मृतस्ते श्वशुरः पितृहीनोऽसि लक्ष्मण । भरतो दुःखमाचष्टे स्वर्गतिं पृथिवीपतेः ॥ १५ ॥
ततो बहुगुणं तेषां बाष्पं नेत्रेष्वजायत । तथा ब्रुवति काकुत्स्थे कुमाराणां यशस्विनाम् ॥ १६ ॥
ततस्ते भ्रातरः सर्वे भृशमाश्वास्य दुःखितम् । अब्रुवञ्जगतीभर्तुः क्रियतामुदकं पितुः ॥ १७ ॥
सा सीता स्वर्गतं श्रुत्वा श्वशुरं तं महानृपम् । नेत्राभ्यामश्रुपूर्णाभ्यां नैनं शशाकेक्षितुं प्रियम् ॥ १८ ॥
सान्त्वयित्वा तु तां रामो रुदतीं जनकात्मजाम् । उवाच लक्ष्मणं तत्र दुःखितो दुःखितं वचः ॥ १९ ॥

ग्यलभ्यां गतिं ताते गते सति अयोध्यायां किं करिष्यामि राजवराद्धीनां तामयोध्यां कः पालयिष्यति ॥ ८ ॥

गो० टी०–किमिति । दिष्टं कालकल्पितम् 'कालो दिष्टोऽप्यनेहापि' इत्यमरः । यद्वा दिष्टं दैवकल्पितम् 'दैवं दिष्टं भागधेयम्' इत्यमरः । राजवरात् तृतीयार्थे पञ्चमी । पाठान्तरं किं करिष्यामीत्यस्य भावमुद्घाटयति–राजवरेति राजवराधीनां तद्रक्षणाधीनामित्यर्थः ॥ ८ ॥

९] ति० टी०–दुर्जातेन वृथाजन्मना ॥ ९ ॥

रा० टी०–किमिति । दुर्जातेन दुःखेन पितृकर्तृकाति-यागादिना जातं जनिर्यस्य तेन मया महात्मनस्तस्य पितुः किं कार्यम् । यः पिता मम शोकेन अमृतः लोकान्तरगमनकर्तृत्वेन मृतसदृशः सः मया न संस्कृतः यात्राकाले मत्कर्तृकसंस्कारं न प्राप्तः ॥ ९ ॥

गो० टी०–पितृमरणहेतुभूतत्वात्तत्संस्कारानुपयोगाच्चात्मानं विगर्हते–किं नु तस्येति ॥ ९ ॥

१०] ति० टी०–सत्कृतः संस्कारकर्मणा पूजितः ॥ १० ॥

रा० टी०–अहो इति । शत्रुघ्नेन सहितेन येन त्वया सर्वेषु प्रेतकृत्येषु प्रेतेषु लोकान्तरं गतेषु यानि कृत्यानि पुत्रैः कर्तव्यानि तेषु राजा सत्कृतः स त्वं धन्योऽसि ॥ १० ॥

गो० टी०–अहो इति । अनघ पुत्रमन्त्ये तु कर्मणी-त्युक्तपितृसंस्काररूपभाग्यविघटकपापरहित ! अहं हि तादृश-पापवानिति भावः । येन कारणेन त्वया शत्रुघ्नेन च सर्वेषु प्रेतकृत्येषु प्राप्तेषु राजा सत्कृतः ॥ १० ॥

११] ति० टी०–निष्प्रधानां प्रधानहीनामत एवानेकाग्रां बहुनायकाम् । अत्रोभयत्र हेतुः नरेन्द्रेण विना कृतामिति ॥ ११ ॥

रा० टी०–निरिति । नरेन्द्रेण विनाकृतामत एव निष्प्र-धानां प्रधानरहितामत एव अनेकाग्रां स्वास्थ्यरहितामयोध्यां गन्तुं निवृत्तवनवासोऽपि नोत्सहे ॥ ११ ॥

गो० टी०–निष्प्रधानामिति । एकाग्रा अनाकुला 'अनाकुलेऽपि चैकाग्रः' इत्यमरः । सा न भवतीत्यनेकाग्रा तामाकुलामिति यावत् ॥ ११ ॥

१२] ति० टी०–अनुशासिष्यति हिताहितविषयप्रवृत्ति-निवृत्ती कारयिष्यति ॥ १२ ॥

रा० टी०–समाप्तेति । ताते लोकान्तरं गते सति समा-प्तवनवासं मामयोध्यायां कः अनुशासिष्यति ॥ १२ ॥

गो० टी०–समाप्तवनवासमिति । शासिष्यति कार्येषु नियोक्ष्यतीत्यर्थः ॥ १२ ॥

१३] ति० टी०–सुवृत्तं शोभननियोगाचरणम् । कुतः पुरुषात् ॥ १३ ॥

रा० टी०–पुरेति । सुवृत्तं शोभनवृत्तिमन्तं मां प्रेक्ष्य सान्त्वयन् शान्तिं शिक्षयन् सन् कर्णसुखानि यानि वाक्यानि पिता आह तानि पुनः कुतः कस्मात् श्रोष्यामि ॥ १३ ॥

गो० टी०–पुरेति । सुवृत्तं शोभनं नियोगाचरणरूपं वृत्तं यस्य तं कुतः कस्मात्पुरुषात् ॥ १३ ॥

१४] ति० टी०–अभ्येत्याभिमुखो भूत्वा ॥ १४ ॥

रा० टी०–एवमिति । भरत एवमुक्त्वा भार्यामभ्येत्य अभिमुखो भूत्वा शोकसंतप्तो राघवो रामः उवाच ॥ १४ ॥

गो० टी०–एवमिति । अभ्येत्य अभिमुखो भूत्वा । सीत इति । दुःखमित्येतत् क्रियाविशेषणम् इत्युवाचेति पूर्वेणान्वयः ॥ १४–१६ ॥

१५–१६] ति० टी०–स्वर्गतिरूपं दुःखम् ॥ १५ ॥ १६ ॥

रा० टी०–तद्वचनाकारमाह–सीते इति । हे सीते ! ते श्वशुरः अमृतो लोकान्तरगमनकर्तृत्वेन मृतसदृशः हे लक्ष्मण ! त्वं पितृहीनोऽसि । तज्ज्ञापकहेतुमाह पृथिवीपतेः स्वर्गतिं भरतः दुःखं यथा भवति तथा आचष्टे कथयति ॥ १५ ॥

रा० टी०–तत इति । काकुत्स्थे रामे तथा ब्रुवति सति कुमाराणामेषां लक्ष्मणादीनां नेत्रेषु बहुगुणमत्यधिकं बाष्प-मश्रु अजायत ॥ १६ ॥

१७–१९] ति० टी०–क्रियतामित्यब्रुवन् ॥ १७–१९ ॥

१ मया चापि नेति गो. पाठः । २ लोकान्तरमिति गो. रा. पाठः । ३ पित्रेति गो. पाठः । ४ स्वर्गतं पृथिवीपतेरिति गो. पाठः । ५ बाष्प इति गो. पाठः । ६ श्वशुरं श्रुत्वा स्वर्गे कृतमिति गो. रा पाठः । ७ भ्रातृनेत्रेभ्यो पीतीमिति गो. पाठः । ८ रुदन्तीमिति गो. पाठः ।

आनयेङ्गुदिपिण्याकं चीरमाहर चोत्तरम् । जलक्रियार्थं तातस्य गमिष्यामि महात्मनः ॥ २० ॥
सीता पुरस्ताद्व्रजतु त्वमेनामभितो व्रज । अहं पश्चाद्गमिष्यामि गतिर्ह्येषा सुदारुणा ॥ २१ ॥
ततो नित्यानुगस्तेषां विदितात्मा महामतिः । मृदुर्दान्तश्च कान्तश्च रामे च दृढभक्तिमान् ॥ २२ ॥
सुमन्त्रस्तैर्नृपसुतैः सार्धमाश्वास्य राघवम् । अवतारयदालम्ब्य नदीं मन्दाकिनीं शिवाम् ॥ २३ ॥
ते सुतीर्था ततः कृच्छ्रादुपगम्य यशस्विनः । नदीं मन्दाकिनीं रम्यां सदा पुष्पितकाननाम् ॥ २४ ॥
शीघ्रस्रोतसमासाद्य तीर्थं शिवमकर्दमम् । सिषिचुस्तूदकं राज्ञे तत्तत्र एतद्भवत्विति ॥ २५ ॥

रा० टी०—तत इति । ततः रामोक्तिश्रवणानन्तरं सर्वे भ्रातरः भृशमत्यन्तं राघवं राममाश्वास्य पितुः उदकक्षुदकक्रिया क्रियतामित्यब्रुवन् ॥ १७ ॥

रा० टी०—सेति । नृपं श्वशुरं स्वर्गलोकगतं स्वः स्वर्गे गीयते स्तूयते इति स्वर्गः स एव लोको प्रकटसाकेतस्तं गतं प्राप्तं श्रुत्वा अश्रुपूर्णाभ्यां नेत्राभ्यां प्रियं पतिम् ईक्षितुं द्रष्टुं न शशाक ॥ १८ ॥

रा० टी०—सान्त्वयित्वेति । रुदतीं तां जनकात्मजां सान्त्वयित्वा दुःखितो रामः दुःखितं वचः लक्ष्मणमुवाच । दुःखितमिति लक्ष्मणविशेषणं वा ॥ १९ ॥

गो० टी०—तत इति । क्रियतामित्यत्रेतिकरणं द्रष्टव्यम् ॥ १७–१९ ॥

२०] ति० टी०—इङ्गुदिपिण्याकं तपस्विभोज्यतापसतरुफलपिण्याकम् अनिःसारिततैलं पिष्ट्वा चूर्णीकृतमिङ्गुदीबीजमत्र पिण्याकत्वेनोपचर्यते निःसारिततसारस्य तस्य निषिद्धत्वात् । उत्तरमुत्तमं नवीनं चीरम् ॥ २० ॥

रा० टी०—तद्वचनाकारमाह—आनयेति । इङ्गुदिपिण्याकं तापसोपभोग्येङ्गुदिफलसारांशमुत्तरं चीरं च आनय महात्मनस्तातस्य जलक्रियार्थं गमिष्यामि ॥ २० ॥

गो० टी०—आनयेति । इङ्गुदिपिण्याकं तपस्विभोज्यं तापसतरुबीजपिण्याकम् अनिःसारिततैलं पिष्ट्वा चूर्णीकृत्य पिण्डीकृतमिङ्गुदीबीजमेव पिण्याकत्वेनोपचर्यते 'इङ्गुदी तापसतरुः' इत्यमरः । चीरं वास उदकदानार्थम् । पाठभेदः चीरं ज्ञानार्थं परिधानम् उत्तरम् उत्तरीयं च ॥ २० ॥

२१] ति० टी०—अभितः पश्चात् । एषा गतिः सुदारुणा शोकादिकालिकी । तदुक्तम्—'सर्वे कनिष्ठप्रथमा इतरे तु स्त्रियोऽग्रतः' इत्याशौचज्ञानप्रकरणे ॥ २१ ॥

रा० टी०—गमनप्रकारं बोधयन्नाह—सीतेति । पुरस्ताद् अग्रे सीता व्रजतु एनां सीतामभितः समीपतः पश्चादित्यर्थः, त्वं व्रज पश्चादहं गमिष्यामि हि यतः एषा गतिर्गमनं सुदारुणा शोकहेतुत्वेन क्रूरा । तथा च सूत्रम् 'सर्वे कनिष्ठप्रथमाद्यपूर्वा इतरे तु स्त्रियोऽग्रतः' इति ॥ २१ ॥

गो० टी०—सीतेति । अभितः पश्चात् "अभितः परितः—" इत्यादिना एनामिति द्वितीया सुदारुणा सुतरां दुःसहा गतिः दुखिनां गतिः एषा हि ज्ञानार्थं श्रीबालपुरःसरा खल्वित्यर्थः । तथा च सूत्रम् 'सर्वे कनिष्ठप्रथमा अनुपूर्वं इतरे स्त्रियोऽग्रे' इति ॥ २१ ॥

२२] ति० टी०—नित्यानुगः कुलक्रमादागतानुचरः । विदितात्मा ज्ञातात्मस्वरूपः । तेषां कुमाराणाम् ॥ २२ ॥

२३] ति० टी०—अवतारयदवातारयत् ॥ २३ ॥

रा० टी०—तत इति । ततः रामोक्तिश्रवणानन्तरं तेषां इक्ष्वाकूणां नित्यानुगः नित्यानुचरः विदितात्मा विदितः प्रख्यातः आत्मा स्वरूपं यस्य सः मृदुः सरलस्वभावः दान्तः नियमितोभयकरणः कान्तस्तेजस्वी रामे दृढभक्तिमाँश्च सुमन्त्रः नृपसुतैर्भरतादिभिः सह राघवं रामम् आश्वास्य आलम्ब्य रामबाहुं गृहीत्वेत्यर्थः, शिवां नित्यकल्याणस्वरूपां मन्दाकिनीमुद्दिश्य अवतारयत् अवातारयत् । श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०—तत इति । नित्यानुगः कुलक्रमानुगतानुचरः विदितात्मा ज्ञातात्मस्वरूपः ॥ २२ ॥ २३ ॥

२४] ति० टी०—ते सीतादयः ॥ २४ ॥

२५] ति० टी०—अकर्दमं तीर्थमवतारमार्गम् । ततं एतद्भवत्वित्युच्चार्य सिषिचुर्ददुः । ततेत्येतत्पितुर्नामगोत्ररूपोपलक्षणं बोध्यम् । संबोधने प्लुतकरणादसंधिः । केचित्तु—ततेत्युक्तौ नामाद्युच्चारणस्य न प्रयोजनमस्मादेवाचारादित्याहुः ॥ २५ ॥

रा० टी०—ते इति । सुतीर्था शोभनज्ञानमार्गविशिष्टां शीघ्रस्रोतसं शीघ्रप्रवाहवतीं मन्दाकिनीं नदीं यशस्विनस्ते सीताप्रभृतयः कृच्छ्रादुपगम्य प्राप्य तत्र अकर्दमं कर्दमरहितं शिवं कल्याणप्रदं तीर्थम् ऋषिभिः सेवितम् उदकमासाद्य गृहीत्वेत्यर्थः, तत हे तात! एतज्जलं भवतु त्वत्सन्निधौ तिष्ठतु इतिवचनेन सिषिचुः । ततेति नामगोत्रयोरप्युपलक्षणमिति न न्यूनता । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०—ते इति । ते सीतालक्ष्मणरामाः स्त्रियोऽपि उदकं दिशन्तीति शास्त्रसिद्धम् । शीघ्रस्रोतसं नदीमुपागम्य अकर्दमं तीर्थम् अवतारप्रदेशमासाद्य तत हे तात! ते तुभ्यमेतद्भवत्वित्युच्चार्य उदकं सिषिचुः ददुरित्यर्थः । ज्ञानमर्थोऽस्यिदं सीतायाः ज्ञानमात्रेऽन्वयो वा । कृच्छ्रादित्यनेन तेषां दुःखातिशयात् स्खलितगमनमुच्यते, सुतीर्थामित्यनेन पुण्यतीर्थत्वमु-

१ शान्तश्चेति गो. पाठः । २ तत्रैतत्ते भवत्विति गो. पाठः ।

प्रगृह्य तु महीपालो जलापूरितमञ्जलिम् । दिशं याम्यामभिमुखो रुदन्वचनमब्रवीत् ॥ २६ ॥
एतत्ते राजशार्दूल विमलं तोयमक्षयम् । पितृलोकागतस्याद्य मदत्तमुपतिष्ठतु ॥ २७ ॥
ततो मन्दाकिनीतीरं प्रत्युत्तीर्य स राघवः । पितुश्चकार तेजस्वी निर्वापं भ्रातृभिः सह ॥ २८ ॥
ऐङ्गुदं बदरैर्मिश्रं पिण्याकं दर्भसंस्तरे । न्यस्य रामः सुदुःखार्तो रुदन्वचनमब्रवीत् ॥ २९ ॥
इदं भुङ्क्ष्व महाराज प्रीतो यदशना वयम् । यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥ ३० ॥
ततस्तेनैव मार्गेण प्रत्युत्तीर्य सरित्तटात् । आरुरोह नरव्याघ्रो रम्यसानुं महीधरम् ॥ ३१ ॥
ततः पर्णकुटीद्वारमासाद्य जगतीपतिः । परिजग्राह पाणिभ्यामुभौ भरतलक्ष्मणौ ॥ ३२ ॥
तेषां तु रुदतां शब्दात्प्रतिशब्दोऽभवद्गिरौ । भ्रातॄणां सह वैदेह्या सिंहानां नर्दतामिव ॥ ३३ ॥

कम्, उपगम्येत्यनेन नदीतीरेऽपि कंचित्कालं रोदनाचार उक्तः, यशस्विन इत्यनेन शास्त्रातिक्रम उक्तः, रम्यामित्यनेन दुःखशान्तिहेतुत्वमुक्तं, पुष्पितकाननामित्यनेन उदकदानसमाप्तिपर्यन्तमनातपत्वमुक्तं, शीघ्रस्रोतसमित्यनेन स्नानकाले स्रोतोऽभिमुखत्वमुक्तं, शिवं शुद्धम् अकर्दमं तीर्थमासाद्येत्यनेन तीरे सेचनमुक्तम् ॥ २४ ॥ २५ ॥

२६-२७] ति० टी०-एतदेव विवृणोति-प्रगृह्येति । याम्यां दक्षिणाम् । यस्त्वाधुनिकनिबन्धेषु सुमन्तुनाम्ना लिखितं वचनं क्षत्रियाणामुदङ्मुखजलदानबोधकं तन्निर्मूलम् एतदाचारविरोधात् निकृष्टक्षत्रियपरं वा । रुदन्नित्यनेन पित्रादिविषये रोदने न निषेध इति सूचितम् ॥ २६ ॥ २७ ॥

रा० टी०-प्रगृह्येति । महीपालो रामोऽब्रवीत् ॥ २६ ॥

गो० टी०-दानप्रकारमाह-प्रगृह्येत्यादिना ॥ २६ ॥

रा० टी०-तदाकारमाह-एतदिति । अक्षयं ध्वंसाप्रतियोगि एतत् मदत्तं ते तव उपतिष्ठतु ॥ २७ ॥

गो० टी०-दानमन्त्रमाह-एतदित्यादिना ॥ २७ ॥

२८] ति० टी०-प्रत्युत्तीर्य तीरमागत्य निर्वापं चकार पिण्डं ददौ । न च यदाकदाचित्पितुर्मरणश्रवणे पुत्रस्य दशाहाशौचतायाः स्मृतिषूक्तत्वेन कथं कृतक्रियस्य पितुः प्रथमदिन एव पिण्डदानमिति वाच्यम् तस्याः स्मृतेः क्षत्रियेतरविषयत्वात्कलिविषयत्वाद्वा न दोषः ॥ २८ ॥

रा० टी०-तत इति । ततः जलप्रदानानन्तरं भ्रातृभिः सह राघवो रामः मन्दाकिनीतीरं प्रत्युत्तीर्य समागत्य पितुर्निर्वापं पिण्डदानं चकार । न च पितृमरणश्रवणे दशाहाशौचस्य स्मृतिषु नियमितत्वात् श्रवणदिने एव पिण्डप्रदानादिकमनुचितमिति वाच्यम्, अशौचस्य शरीरदाहविषयत्वेनादोषात् । एवमधिकारिनिरूपणमपि विगतदेहविषयकमिति न भरतकर्तृकपिण्डदानस्यानुपपत्तिः । राज्ञो यथा सशरीरगमनं तथाऽवोचाम । 'मन्दाकिनीतीरात्' इति भूषणपाठः तत्र तीरात् जलप्रदानदेशादित्यर्थः ॥ २८ ॥

गो० टी०-तत इति । भ्रातृभिः सह मन्दाकिनीतीरात् प्रत्युत्तीर्य पितुर्निर्वापं पिण्डप्रदानं चकार मन्दाकिनीतीरात्समुत्तीर्येत्युदकदानदेशात् किंचित्प्रदेशान्तरगमनवचनात् सपिण्डीकरणमेव कृतमित्यवगम्यते दशाहात्यये उदकदानं विना पिण्डदानस्याचोदितत्वात् उदकसेचनवत् कनिष्ठेन लक्ष्मणेन पिण्डदानाद्युक्तेश्च ॥ २८-३२ ॥

२९]ति०टी०-ऐङ्गुदमिङ्गुदीबीजसंबन्धि । बदरैर्बदरफलैः २९

रा० टी०-तत्प्रकारमाह-ऐङ्गुदमिति । बदरैः बदरफलपिष्टैः मिश्रम् ऐङ्गुदम् इङ्गुदीफलसंबन्धि पिण्याकं पिष्टं दर्भसँस्तरे कुशास्तरणे न्यस्य रामः अब्रवीत् ॥ २९ ॥

३०] ति० टी०-ननु राज्ञे कथं पिण्याकपिण्डदानं तत्राह-यदशना इति । यदशना इत्यस्य तदशना अस्मत्पितर इति शेषः तत्र सामान्येनार्थान्तरन्यासमाह-यदन्न इति ॥ ३० ॥

रा० टी०-तद्वचनाकारमाह-इदमिति । हे महाराज ! यतो वयं यदशनाः यत् पिण्याकमेव अशनं येषामतः तत् इदं पिण्याकं भुङ्क्ष्व । ननु महाराजाय मह्यं कथमिदं ददासीत्यत आह-पुरुषः यदन्नः यद्भक्ष्यको भवति तस्य देवता अपि तदन्नाः भवन्ति । अक्षराधिक्यं छन्दसां वैलक्षण्यद्योतनाय ॥ ३० ॥

३१-३२] ति० टी०-प्रत्युत्तीर्य पराकृत्य ॥ ३१॥३२ ॥

रा० टी०-तत इति । ततः पिण्डदानानन्तरं तेन आगमनसाधकेनैव मार्गेण सरित्तटात् प्रत्युत्तीर्य रम्यसानुं मनोहरशिखरवन्तं महीधरं चित्रकूटमारुरोह ॥ ३१ ॥

रा० टी०-तत इति । ततः आरोहणानन्तरं पर्णकुटीद्वारमासाद्य प्राप्य पाणिभ्यामुभौ भरतलक्ष्मणौ परिजग्राह ग्रहणपूर्वकं रोदनं चकार शत्रुघ्नस्य भरतेऽन्तर्भावान्न पृथगुक्तिः ॥ ३२ ॥

३३] ति० टी०-प्रतिशब्दः प्रतिध्वनिः । 'प्रतिश्रुत्वा' इति पाठेऽप्ययमेवार्थः ॥ ३३ ॥

रा० टी०-तेषामिति । नर्दतां सिंहानामिव वैदेह्या सह रुदतां भ्रातॄणां प्रतिशब्दः प्रतिध्वनिः गिरौ अभवत् ॥ ३३ ॥

गो० टी०-तेषामिति । प्रतिश्रुत्कः प्रतिध्वनिः ॥ ३३ ॥

---

१ चेति गो. पाठः । २ जलपूरितमिति गो. पाठः । ३ तीरादिति गो. पाठः । ४ बदरामिश्रमिति गो. पाठः । ५ नदीति गो. पाठः । ६ बाहुभ्यामिति गो. पाठः । ७ श्रुत्क इति गो. पाठः ।

महाबलानां रुदतां कुर्वतामुदकं पितुः । विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः ॥ ३४ ॥
अब्रुवंश्चापि रामेण भरतः संगतो ध्रुवम् । तेषामेव महाञ्शब्दः शोचतां पितरं मृतम् ॥ ३५ ॥
अथ वाहान्परित्यज्य तं सर्वेऽभिमुखाः स्वनम् । अभ्येकमनसो जग्मुर्यथास्थानं प्रधाविताः ॥ ३६ ॥
हयैरन्ये गजैरन्ये रथैरन्ये स्वलंकृतैः । सुकुमारास्तथैवान्ये पद्भिरेव नरा ययुः ॥ ३७ ॥
आचिरप्रोषितं रामं चिरविप्रोषितं यथा । द्रष्टुकामो जनः सर्वो जगाम सहसाश्रमम् ॥ ३८ ॥
भ्रातॄणां त्वरितास्ते तु द्रष्टुकामाः समागमम् । ययुर्बहुविधैर्यानैः खुरनेमिसमाकुलैः ॥ ३९ ॥
सा भूमिर्बहुभिर्यानै रथनेमिसमाहता । मुमोच तुमुलं शब्दं द्यौरिवाभ्रसमागमे ॥ ४० ॥
तेन वित्रासिता नागाः करेणुपरिवारिताः । आवासयन्तो गन्धेन जग्मुरन्यद्वनं ततः ॥ ४१ ॥
वराहमृगसिंहाश्च महिषाः शूमरास्तथा । व्याघ्रगोकर्णगवया वित्रेसुः पृषतैः सह ॥ ४२ ॥

३४] ति० टी०–त्रस्ताः का विपत्प्रादुरभूदिति भीताः॥३४॥

३५] ति० टी०–ततो निश्चित्याब्रुवन्निति ॥ ३५ ॥

रा० टी०–महाबलानामिति । पितुः उदकं कुर्वतां रुदतां महाबलानां तुमुलं शब्दं विज्ञाय त्रस्ताः भरतसैनिकाः भरतः रामेण ध्रुवं संगतः संमिलितः मृतं मृतसदृशं पितरं शोचतां तेषां रामादीनामेव महान् शब्द इत्यब्रुवन्। श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०–महाबलानामित्यादि । श्लोकद्वयमेकं वाक्यम् । त्रस्ताः किं भविष्यतीति धिया उद्विग्नाः, उद्वेगानन्तरं निश्चित्य वदन्ति स्मेत्याह–अब्रुवन्निश्चित्यादिना । मृतं पितरमुद्दिश्येति शेषः ॥ ३४ ॥ ३५ ॥

३६]ति० टी०–स्वनमभिमुखाः स्वनोत्पत्तिदिशमभिमुखाः यथास्थानं यथोचितं प्रधावितास्त्वरिता गच्छन्ति स्म ॥ ३६ ॥

रा० टी०–अथेति । अथ प्रतिध्वनिश्रवणानन्तरमेकमनसः समानहृदयाः सर्वे सैनिकाः वाहान् परित्यज्य स्वनं प्रातध्वनिमभिमुखाः सन्तः यथास्थानं यथोचितं प्रधाविताः सन्तः जग्मुः ॥ ३६ ॥

गो० टी०–अथेति । स्वनमभिमुखाः स्वनोत्पत्तिदिगभिमुखा इत्यर्थः । यथास्थानं शब्दोत्पत्तिप्रदेशमनतिक्रम्य प्रधाविताः शीघ्रगतियुक्ताः ॥ ३६ ॥

३७] ति० टी०–कैस्तत्राह–हयैरित्यादि । सुकुमारा इति पूर्वान्वयि । अन्ये तेभ्यो भिन्नाः ॥ ३७ ॥

रा० टी०–हयैरिति । अन्ये सुकुमाराः हयादिभिर्ययुः अन्ये पद्भिरेव ययुः ॥ ३७ ॥

गो० टी०–हयैरिति । सुकुमारा इति हयैरित्यादिभिरुक्तानां त्रयाणां विशेषणं सुकुमारत्वाभावे दुःखितं रामं प्रति पद्भ्यामेव गन्तव्यत्वात् ॥ ३७ ॥ ३८ ॥

३८] ति० टी०–आश्रममिति पदम् ॥ ३८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अचिरेति। अचिरप्रोषितमल्पकालकप्रवासविशिष्टं रामं चिरविप्रोषितमिव द्रष्टुकामः सर्वो जनः जगाम ॥ ३८ ॥

३९] ति० टी०–खुरसमाकुलयानाः पश्चादयः, नेमिसमाकुलानि रथशकटादीनि ॥ ३९ ॥

रा० टी०–सयानगमनकर्तॄणां वृत्तमाह–भ्रातॄणामिति । भ्रातॄणां रामादीनां समागमं परस्परं संमेलनं द्रष्टुकामास्ते बहवो भरतसैनिकाः खुरनेमिसमाकुलैः खुरसमाकुलाः अश्वादयः नेमिसमाकुलाः रथादयः तैर्विविधैर्यानैः त्वरिताः सन्तो ययुः ३९

गो० टी०–भ्रातॄणामिति । एषां यानैर्गमनं दर्शनत्वरया ययुर्बहुविधैर्यानैः 'खुरनेमिसमाहता' इति पाठः। 'ययुर्बहुविधैर्युक्तैः' इति पाठे युक्तैः सज्जैः यानैरिति शेषः ॥ ३९ ॥ ४० ॥

४०] ति० टी०–समाहता अभिहता आक्रान्तेति यावत् ॥ ४० ॥

रा० टी०–सेति । बहुभिर्यानैरुपलक्षिता अत एव खुरनेमिसमाहता सा भरतसेनाधिष्ठिता भूमिः अत्र समागमे द्यौरिव तुमुलं शब्दं मुमोच चकार ॥ ४० ॥

४१] ति० टी०–तेन शब्देन, गन्धेनावासयन्तो मदगन्धेन दिङ्मुखानि सुरभीकुर्वन्तः ॥ ४१ ॥

रा० टी०–तेनेति । तेन तुमुलशब्देन वित्रासिताः करेणुभिः हस्तिनीभिः परिवारिता युक्ताः नागाः गजाः गन्धेन स्वच्युतमदजनितामोदेन आवासयन्तः सन्तः ततस्तस्माद्वनादन्यद्वनं जग्मुः ॥ ४१ ॥

गो० टी०–तेनेति । आवासयन्तः मदगन्धेनावासयन्तः एतेन वनगजानामपि रामदर्शनहर्षो द्योत्यते ॥ ४१ ॥

४२] ति० टी०–गोकर्णशूमरौ मृगविशेषौ ॥ ४२ ॥

रा० टी०–वराहेति । वराहादयः वित्रेसुः तत्र शूमरगोकर्णौ मृगविशेषौ ॥ ४२ ॥

गो० टी०–वराहेति । गोकर्णः गोरिव कर्णौ यस्य स गोकर्णः महापृषतविशेषः ॥ ४२ ॥

१ वासामिति गो. पाठः । २ तत्रेति गो. पाठः । ३ खुरेति गो. पाठः । ४ वृक्ष संघाश्चेति गो. पाठः । ५ सर्पवानरा इति गो. पाठः ।

रथाङ्गहंसानत्यूहाः प्लवाः कारण्डवाः परे । तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः ४३ ॥
तेन शब्देन वित्रस्तैराकाशं पक्षिभिर्वृतम् । मनुष्यैरावृता भूमिरुभयं प्रबभौ तदा ॥ ४४ ॥
ततस्तं पुरुषव्याघ्रं यशस्विनमकल्मषम् । आसीनं स्थण्डिले रामं ददर्श सहसा जनः ॥ ४५ ॥
विगर्हमाणः कैकेयीं मन्थरासहितामपि । अभिगम्य जनो रामं बाष्पपूर्णमुखोऽभवत् ॥ ४६ ॥
तान्नरान्बाष्पपूर्णाक्षान्समीक्ष्याथ सुदुःखितान् । पर्यष्वजत धर्मज्ञः पितृवन्मातृवच्च सः ॥ ४७ ॥
स तत्र कांश्चित्परिषस्वजे नरान्नराश्च केचित्तु तमभ्यवादयन् ।
चकार सर्वान्सवयस्यबान्धवान्यथार्हमासाद्य तदा नृपात्मजः ॥ ४८ ॥
ततः स तेषां रुदतां महात्मनां भुवं च खं चानुविनादयन्स्वनः ।
गुहागिरीणां च दिशश्च संततं मृदङ्गघोषप्रतिमो विशुश्रुवे ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

चतुरुत्तरशततमः सर्गः ।

कौसल्यादियुतो वसिष्ठो रामाश्रमं प्रतस्थे । मध्येमार्गमनुगङ्गातीरं दक्षिणाग्रदर्भेषु दशरथाय रामन्यस्तमिङ्गुदिपिण्याकं सपत्नीभ्यः प्रदर्श्य कौसल्या राजानं परिशोचति । आश्रमगताः कौसल्यादयो रामं ददृशुः । रामलक्ष्मणौ तत्पादावभ्यवादयताम् । स्वपादाभिवादिनीं सीतां कौसल्या परिशोचति । वसिष्ठचरणावभिवाद्य रामः समुपाविशत् । मन्त्रियुतो भरतोऽपि तत्समीप उपाविशत ।

वसिष्ठः पुरतः कृत्वा दारान्दशरथस्य च । अभिचक्राम तं देशं रामदर्शनतर्षितः ॥ १ ॥

४३-४६] ति० टी०-रथाङ्गश्चक्रवाकः, नत्यूहो जलकुक्कुटः, प्लवा बकविशेषाः ॥ ४३-४६ ॥

रा० टी०-रथाङ्गेति । रथाङ्गः चक्रवाकः, नत्यूहः जलकुक्कुटः, प्लवाः स्थूलबकविशेषाः ॥ ४३ ॥

रा० टी०-तेनेति । तेन शब्देन वित्रस्तैस्त्रासविशिष्टैः पक्षिभिः आकाशं वृतं मनुष्यैर्भूमिरावृता इति हेतोः उभयं प्रबभौ ॥ ४४ ॥

रा० टी०-तत इति । अकल्मषं कल्मषनिवर्तकं स्थण्डिले आसीनं रामं जनः ददर्श ॥ ४५ ॥

गो० टी०-रथाङ्गेति । नत्यूहाः जलरङ्कवः 'नत्यूहो जलरङ्कुः स्यात्' इति हलायुधः । प्लवाः स्थूलबकविशेषाः ॥४३-४५॥

रा० टी०-विगर्हमाण इति । मन्थरासहितां कैकेयीं विगर्हमाणः जनः राममभिगम्य रामसंमुखं प्राप्य बाष्पपूर्णमुखोऽभवत् । अत्र विगर्हणे स्त्रिकी नष्ट इत्यादाविव विशेषणांशे पर्यवसन्नमत एवोत्तरत्र रामाभिमुखं संगच्छते ॥ ४६ ॥

गो० टी०-विगर्हमाण इति । सहितः अन्योन्य संगतः ॥ ४६ ॥ ४७ ॥

४७] ति०टी०-पर्यष्वजत परिष्वङ्क्ष्योग्यानिति शेषः ॥४७॥

रा० टी०-तानिति । तानागतान् सुदुःखितान् नरान् समीक्ष्य धर्मज्ञो रामः पर्यष्वजत ॥ ४७ ॥

४८] ति० टी०-तदेवाह-स तत्रेति ॥ ४८ ॥

रा० टी०-स इति । स रामः तत्र तस्मिन् समये कांश्चिन्नरान् परिषस्वजे केचिन्नरास्तु तं राममभ्यवादयन् तदा तस्मिन् समये नृपात्मजो रामः सर्वान् समासाद्य प्राप्य यथार्हं यथोचितसत्कारं चकार ॥ ४८ ॥

गो० टी०-स इति । चकार संमानमिति शेषः॥४८॥४९॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

४९] ति० टी०-अनुविनादयन्प्रतिध्वनयन् ॥ ४९ ॥

अत्र कतकरीत्या श्लोकद्वयं गतम् ॥

इति श्रीरामाभिरामे श्रीरार्षाये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

रा० टी०-तत इति । तेषां समागतानां रुदतां महात्मनामयोध्यावासिनां स्वनः भवादिकमनुविनादयन् सन् मृदङ्गघोषप्रतिमः मृदङ्गघोषसदृशः विशुश्रुवे श्रवणविषयीभूतो बभूव ॥ ४९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्व्यधिकशततमः सर्गः ॥१०२॥

१] ति० टी०-दशरथस्य दारानित्यन्वयः । तर्षितः साभिलाषः ॥ १ ॥

रा० टी०-राममातृणां वृत्तान्तं वर्णयन्नाह-वसिष्ठ इ-

---

१ रथाङ्गसाह्वा नत्यूहा हंसाः कारण्डवाः प्लवा इति गो. पाठः । २ अरिंदममिति गो. पाठः । ३ सहितो मन्थरामयीति गो. पाठः । ४ स तत्रेति गो. पाठः । ५ निनादयन्निति गो. पाठः । ६ प्रशुश्रुवे इति गो. पाठः । ७ कर्षित इति रा. पाठः ।

राजपत्न्यश्च गच्छन्त्यो मन्दं मन्दाकिनीं प्रति । ददृशुस्तत्र तत्तीर्थं रामलक्ष्मणसेवितम् ॥ २ ॥
कौसल्या बाष्पपूर्णेन मुखेन परिशुष्यता । सुमित्रामब्रवीदीनां याश्चान्या राजयोषितः ॥ ३ ॥
इदं तेषामनाथानां क्लिष्टमक्लिष्टकर्मणाम् । वने प्राक्कलनं तीर्थं ये ते निर्विषयीकृताः ॥ ४ ॥
इतः सुमित्रे पुत्रस्ते सदा जलमतन्द्रितः । स्वयं हरति सौमित्रिर्मम पुत्रस्य कारणात् ॥ ५ ॥
जघन्यमपि ते पुत्रः कृतवान्न तु गर्हितः । भ्रातुर्यदर्थरहितं सर्वं तद्गर्हितं गुणैः ॥ ६ ॥
अद्यायमपि ते पुत्रः क्लेशानामतथोचितः । नीचानर्थसमाचारं सज्जं कर्म प्रमुञ्चतु ॥ ७ ॥

त्यादिभिः । रामदर्शनतर्षितः वसिष्ठः दशरथस्य दारान् पुरतः अग्रे कृत्वा तं रामाधिष्ठितं देशमभिचक्राम ययौ ॥ १ ॥

गो० टी०—अथ मातृसमागमस्त्युत्तरशततमे—वसिष्ठ इति। रामदर्शनतर्षितः रामदर्शने संजाताभिलाषस्तर्षः' इत्यमरः ॥ १–३ ॥

२–३] ति० टी०—तीर्थमवतारमार्गम् ॥ २ ॥ ३ ॥

रा० टी०—राजपत्न्य इति । तत्र तस्मिन् समये गच्छन्त्यो राजपत्न्यः मन्दाकिनीं प्रति मन्दाकिनीसमीपे रामलक्ष्मणसेवितं तीर्थं स्नानादियोग्यं घट्टं ददृशुः ॥ २ ॥

रा० टी०—कौसल्येति । बाष्पपूर्णेन परिशुष्यता मुखेन उपलक्षिता कौशल्या सुमित्रामन्याश्च राजयोषितः अब्रवीत्॥३॥

४–५] ति० टी०—ये ते प्रसिद्धा रामादयो निर्विषयीकृता राज्यान्निष्काशितास्तेषां वने वसताम् । प्राक्कलनम् बहुव्रीहीरयम् । प्रथमपरिग्रहवत् । तीर्थं पुण्यतीर्थम् । गङ्गायमुनापरपारभवमिदमेव । 'प्राक्केवलम्' इति पाठ आधुनिककल्पितः नापि तत्रार्थसामञ्जस्यमिति कतकः । 'तत्रापि' पाठे प्राक्परिगृहीतमिति शेषः, प्राक्परिगृहीतं तीर्थं जलानयनादिव्यवहारोपयोगी मार्गः । इदमेवेति केवलं निश्चितमित्यर्थो वक्तुं शक्यः । ' केवलं निश्चिते क्लीबं वाच्यवच्चैककृत्वयोः ' इति ॥ ४ ॥ ६ ॥

रा० टी०—तद्वचनाकारमाह—इदमिति । ये रामादयो निर्विषयीकृताः अयोध्यादेशरहितत्वं प्रापिताः अनाथानामक्लिष्टकर्मणां सरलस्वभावानां तेषाम् अते विस्तृते वने प्राक्कालनं प्राक् पूर्वं कालनं प्राप्तिर्यस्मिन् तत्पौर्वकालिकप्राप्त्याश्रयीभूतं क्लिष्टं दुर्गममिदं तीर्थं राजते इति शेषः । ' प्राक्केवलम् ' इति पाठ आधुनिककल्पितः नापि तत्रार्थसामञ्जस्यमिति कतकः तत्रापि पाठे प्राक्परिगृहीतमिति शेषः, प्राक्परिगृहीतं तीर्थं जलानयनादिव्यहारोपयोगी मार्गः । इदमेवेति केवलं निश्चितमित्यर्थो वक्तुं शक्यः। 'केवलं निश्चिते क्लीबं वाच्यवच्चैककृत्वयोः' इति भट्टाः ॥ ४ ॥

रा० टी०—इत इति । हे सुमित्रे! इतः अस्मादेव मार्गादतन्द्रितः तन्द्रारहितः सौमित्रिः मम पुत्रस्य कारणाद्धेतोः स्वयं जलं हरति ॥ ५ ॥

गो० टी०—इदं तेषामिति । ते प्रसिद्धाः रामाद्यः ये प्राक् निर्विषयीकृताः राज्यान्निष्कासिताः वने तेषां क्लिष्टमुपमर्दितम् इदं तीर्थमवतरणं केवलं निश्चितम् 'केवलं निश्चिते क्लीबे वाच्यवत्त्वेककृत्वयोः' इति वैजयन्ती ॥ ४ ॥ ६ ॥

६] ति० टी०—जघन्यं हीनमपि जलाहरणादिकं ते पुत्रः कृतवानथाप्यसौ न गर्हितः । कुतस्तत्राह—गुणैर्ज्येष्ठत्वसौभ्रात्रधार्मिकत्वादिभिर्विशिष्टस्य भ्रातुर्यदर्थरहितं प्रयोजनरहितं तदेव गर्हितं भवति । तीर्थस्तु—भ्रातुर्यदर्थसहितं प्रयोजनसहितम् तद्गुणैः प्रयोजनैर्विहितं कल्पितं तत्सर्वगुणफलकमित्यर्थसहितम् । 'विहितम्' इति पाठे चाह ॥ ६ ॥

रा० टी०—जघन्यमिति । जघन्यं नीचोचितमपि जलाहरणादि कर्म कृतवान् ते पुत्रः नैव गर्हितः कैश्चिन्निन्दितः, तत्र हेतुः भ्रातुः अर्थरहितं यत् तदेव सर्वं गुणैः गुणवद्भिः गर्हितं निन्दितं भवति ॥ ६ ॥

गो० टी०—जघन्यमिति । जघन्यं हीनं जलाहरणादि कर्मकृतवानपि न गर्हितः । कुत इत्यत्राह—भ्रातुरिति । भ्रातुर्ज्येष्ठभ्रातुः अर्थसहितं प्रयोजनसहितं यत्कर्म तत्सर्वगुणैर्विहितं 'ज्येष्ठभ्राता पितृसमः' इति वचनात् पितृशुश्रूषावत् गुणाय कल्पत इत्यर्थः ॥ ६ ॥

७] ति० टी०—क्लेशानामनुभूयमानानां तथा यथाद्यभवच्छुचितो नेत्यतथोचितस्तेऽयं पुत्रो नीचार्हो योऽनर्थो दुःखजनकः समाचारोऽनुष्ठानं यस्मिंस्तत्तथा सज्जं प्रस्तुतं यथोक्तं कर्म मुञ्चतु । रामस्य प्रत्यावर्तिष्यमाणत्वादिति भावः । एकः शत्रुघ्नस्तु भरतसङ्गादेतत्कर्म न करोत्येवायमपि मुञ्चत्विति अपेरर्थः ॥ ७ ॥

रा० टी०—अद्येति । क्लेशानामतथोचितः क्लेशप्राप्त्ययोग्यः अयं ते पुत्रः अद्य इदानीं सज्जं प्रसक्तं नीचानर्थसमाचारं नीचं नीचयोग्यमनर्थस्य प्रतिष्ठारूपार्थविरोधिनः स्वसेवायाः स्वेनैव करणस्य समाचारः प्राप्तिर्यस्मिँस्तत् कर्म प्रमुञ्चतु, एतेन रामोऽयोध्यां गमिष्यतीति सूचितम् । ' नीचानर्थसमाचारान्' इति भूषणपाठः ॥ ७ ॥

गो० टी०—अद्यायमिति । क्लेशानामतथोचितः इदानीं यादृशक्लेशानुभवस्तादृशक्लेशानामनुचितः ते अयं पुत्रः नीचानर्थसमाचारं निकृष्टदुःखप्रचुरसमाचारसहितं सज्जम् उद्युक्तं कर्म अद्य प्रमुञ्चत्वपि । अपेश्चन्दः संभावनायाम् 'अपिः संभावनाप्रभगर्हाशङ्कासमुच्चये' इति वैजयन्ती । भरतप्रार्थनया रामेण

---

१ दीनेति गो. सा. पाठः । २ प्राक्केवलमिति गो. प्राक्कालनमिति रा. पाठः । ३ सहितमिति गो. पाठः । ४ विहितमिति गो. पाठः ।

दक्षिणाग्रेषु दर्भेषु सा ददर्श महीतले । पितुरिङ्गुदिपिण्याकं न्यस्तमायतलोचना ॥ ८ ॥
तं भूमौ पितुरार्तेन न्यस्तं रामेण वीक्ष्य सा । उवाच देवी कौसल्या सर्वा दशरथस्त्रियः ॥ ९ ॥
इदमिक्ष्वाकुनाथस्य राघवस्य महात्मनः । राघवेण पितुर्दत्तं पश्यतैतद्यथाविधि ॥ १० ॥
तस्य देवसमानस्य पार्थिवस्य महात्मनः । नैतदौपयिकं मन्ये भुक्तभोगस्य भोजनम् ॥ ११ ॥
चतुरन्तां महीं भुक्त्वा महेन्द्रसदृशो भुवि । कथमिङ्गुदिपिण्याकं स भुङ्क्ते वसुधाधिपः ॥ १२ ॥
अतो दुःखतरं लोके न किंचित्प्रतिभाति [२]मे । यत्र रामः पितुर्दद्यादिङ्गुदीक्षोदमृद्धिमान् ॥ १३ ॥
रामेणेङ्गुदिपिण्याकं पितुर्दत्तं समीक्ष्य मे । कथं दुःखेन हृदयं न स्फोटति सहस्रधा ॥ १४ ॥
श्रुतिस्तु खल्वियं सत्या लौकिकी प्रतिभाति [२]मे । यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥ १५ ॥
एवमार्तां सपत्न्यस्ता जग्मुराश्वस्य तां तदा । ददृशुश्चाश्रमे रामं स्वर्गच्युतमिवामरम् ॥ १६ ॥
[३]तं भोगैः संपरित्यक्तं रामं संप्रेक्ष्य मातरः । आर्ता मुमुचुरश्रूणि सस्वरं शोककर्शिताः ॥ १७ ॥
तासां रामः समुत्थाय जग्राह [४]चरणाम्बुजान् । मातॄणां मनुजव्याघ्रः सर्वासां सत्यसंगरः ॥ १८ ॥

स्वराज्ये स्वीकृते लक्ष्मणस्य नीचकर्मप्रमोचनं संभवेदिति भावः ॥ ७ ॥

८] ति० टी०—न्यस्तं रामेण ॥ ८ ॥

रा० टी०—दक्षिणेति । महीतले पृथिव्यां दक्षिणाग्रेषु दर्भेषु कुशेषु न्यस्तं संस्थापितमिङ्गुदिपिण्याकमायतलोचना कौसल्या ददर्श ॥ ८ ॥

गो० टी०—दक्षिणाग्रेष्विति । पितुरिति चतुर्थ्यर्थे षष्ठी ॥ ८–१० ॥

९–१०] ति० टी०—स्त्रियः प्रतीति शेषः ॥ ९ ॥ १० ॥

रा० टी०—तमिति । आर्तेन रामेण पितुः पित्रे भूमौ न्यस्तं विधिना संस्थापितं तं पिण्याकं वीक्ष्य सा कौसल्या देवी सर्वाः दशरथस्त्रिय उवाच ॥ ९ ॥

रा० टी०—तद्वचनाकारमाह—इदमिति । राघवस्य रघुकुलप्रसूतस्य इक्ष्वाकुनाथस्य महात्मनः पितुः राघवेण रामेण यथाविधि दत्तमेतत्पिण्याकं पश्य ॥ १० ॥

११] ति० टी०—औपयिकमुचितं न भवतीति मन्ये । तत्र हेतुः—भुक्तभोगस्येति भुक्ता भोगा येन तस्य ॥ ११ ॥

रा० टी०—तस्येति । भुक्तभोगस्य देवसमानस्य तस्य पार्थिवस्य औपयिकं युक्तं भोजनमेतत् पिण्याकं न मन्ये॥११॥

गो० टी०—तस्येति । औपयिकं प्राप्तम् 'युक्तं स्यादुचितं न्याय्यं प्राप्तमौपयिकं तथा' इति हलायुधः ॥ ११ ॥ १२ ॥

१२] ति० टी०—चतुरन्तां चतुःसमुद्रावसानाम् ॥ १२ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—चतुरिति । चतुरन्तां चतुःसागरपर्यन्तां महीं भुक्त्वा संपाल्य महेन्द्रसदृशो बहुधाधिपो भुवि स्थितमिङ्गुदिपिण्याकं कथं भुङ्क्ते ॥ १२ ॥

१३] ति० टी०—क्षोदं पिष्टम् ॥ १३ ॥

रा० टी०—अत इति । ऋद्धिमान् सकलसंपत्तिविशिष्टो रामः यत्र यस्मिन् समये इङ्गुदीक्षोदमिङ्गुदीपिष्टं पितुर्दद्यात् तस्मिन् समये अत एतद्दानदर्शनजनितदुःखात् दुःखतरमधिकं दुःखं मे किंचित्र प्रतिभाति ॥ १३ ॥

गो० टी०—अत इति । राज्यैश्वर्ययोग्यतया ऋद्धिमान् इत्युक्तिः ॥ १३ ॥

१४] ति० टी०—न स्फोटति न स्फुटति न विशीर्णं भवति १४

रा० टी०—रामेणेति । रामेण दत्तं पितुः पिण्याकं समीक्ष्य जातेन दुःखेन मे हृदयं सहस्रधा कथं न स्फोटति स्फुटति ॥ १४ ॥

गो० टी०—रामेणेति । स्फोटति स्फुटति ॥ १४ ॥

१५] ति० टी०—श्रुतिरित्याद्याश्वासनप्रकारः । सत्या सत्यार्था लौकिकी लोकविदिता लोकप्रसिद्धा ॥ १५ ॥

रा० टी०—श्रुतिरिति । 'यदन्नः यद्भक्ष्यकः पुरुषो भवति तदन्नास्तद्भक्ष्यकास्तस्य देवताः भवन्ति' इति लौकिकी लोकप्रसिद्धा श्रुतिस्तु मे सत्या प्रतिभाति ॥ १५ ॥

गो० टी०—श्रुतिरिति । सत्या सत्यार्था लौकिकी लोकविदिता लोकप्रसिद्धेति यावत् । देवता इति श्रुतिः सत्येत्यन्वयः ॥ १५–१८ ॥

१६–१८] ति० टी०—एवं श्रुतिस्त्वित्यादिप्रकारेण १६–१८

रा० टी०—एवमिति । एवमार्तां दुःखितां तां कौसल्यां सपत्न्यः आश्वास्य जग्मुः आश्रमे पर्णशालायां स्वर्गच्युतममरं देवविशेषमिव रामं ददृशुश्च ॥ १६ ॥

रा० टी०—तमिति । भोगैः संपरित्यक्तं तं राममार्तां मातरः संप्रेक्ष्य सस्वरं यथा स्यात्तथा अश्रूणि मुमुचुः ॥ १७ ॥

रा० टी०—तासामिति । सत्यसंगरः सत्यप्रतिज्ञो रामस्तासां स्वसमीपे प्राप्तानां मातॄणां चरणाम्बुजान् चरणकमलानि जग्राह ॥ १८ ॥

---

१ बिभुरिति गो. पाठः । २ मेति गो. पाठः । ३ सर्वंभोगैरिति गो. पाठ. । ४ चरणाञ्छुभानिति गो. पाठः ।

ताः पाणिभिः सुखस्पर्शैर्मृद्वङ्गुलितलैः शुभैः । प्रममार्ज रजः पृष्ठाद्रामस्यायतलोचनाः ॥ १९ ॥
सौमित्रिरपि ताः सर्वा मातॄः संप्रेक्ष्य दुःखितः । अभ्यवादयदासक्तं शनै रामादनन्तरम् ॥ २० ॥
यथा रामे तथा तस्मिन्सर्वा वृत्तिरे स्त्रियः । वृत्तिं दशरथाज्जाते लक्ष्मणे शुभलक्षणे ॥ २१ ॥
सीतापि चरणांस्तासामुपसंगृह्य[1] दुःखिता । श्वश्रूणामश्रुपूर्णाक्षी संबभूवाग्रतः[2] स्थिता ॥ २२ ॥
तां परिष्वज्य दुःखार्ता माता दुहितरं यथा । वनवासकृतां[3] दीनां कौसल्या वाक्यमब्रवीत् ॥ २३ ॥
[4]वैदेहराजन्यसुता स्नुषा दशरथस्य च । रामपत्नी कथं दुःखं संप्राप्ता [5]विजने वने ॥ २४ ॥
पद्ममातपसंतप्तं परिक्लिष्टमिवोत्पलम् । काञ्चनं रजसा ध्वस्तं क्लिष्टं चन्द्रमिवाम्बुदैः ॥ २५ ॥
मुखं ते प्रेक्ष्य मां शोको दहत्यग्निरिवाश्रयम् । भृशं मनसि वैदेहि व्यसनारणिसंभवः ॥ २६ ॥
ब्रुवन्त्यामेवमार्तायां जनन्यां भरताग्रजः । पादावासाद्य जग्राह वसिष्ठस्य च[6] राघवः ॥ २७ ॥
पुरोहितस्याग्निसमस्य तस्य[7] वै बृहस्पतेरिन्द्र इवामराधिपः ।
प्रगृह्य पादौ सुसमृद्धतेजसः सहैव[8] तेनोपविवेश राघवः ॥ २८ ॥
ततो जघन्यं सहितैः स्वमन्त्रिभिः पुरप्रधानैश्च तथैव सैनिकैः ।
जनेन धर्मज्ञतमेन धर्मवानुपोपविष्टो भरतस्तदाग्रजम् ॥ २९ ॥

१९] ति० टी०–पृष्ठात्पृष्ठदेशात् 'पृष्ठं तु चरमं तनोः' ॥१९॥

रा० टी०–ता इति । सुखः स्पर्शो येषां तैः मृदूनि अङ्गुलितलानि येषां तैः शुभैः पाणिभिः आयतलोचनास्ता मातरः रामस्य पृष्ठात्पृष्ठप्रदेशाद्रजः धूलीं प्रममार्जुः ॥ १९ ॥

गो० टी०–ता इति । 'रामस्यायतलोचना' इति पाठः १९

२०] ति० टी०–आसक्तम् भावे निष्ठा । स्नेहसङ्गोपेतम् २०

रा० टी०–सौमित्रिरिति । मातॄः संप्रेक्ष्य दुःखितः सौमित्रिः रामादनन्तरमासक्तमासक्तिविशिष्टं यथा भवति तथा शनैः अभ्यवादयत् ॥ २० ॥

गो० टी०–सौमित्रिरपीति । असक्तम् अविरतम् 'अविरतमनवरतम् 'स्यादेकार्थमनारतमसक्तमपि'इति हलायुधः२०

२१] ति० टी०–वृत्तिरे वर्तितवत्यः ॥ २१ ॥

रा० टी०–यथेति । यथा रामे वृत्तिं पृष्ठात् रजोमार्जनादि वृत्तिरे चक्रुस्तथा दशरथाज्जाते अस्मिन् लक्ष्मणे वृत्तिरे॥२१॥

गो० टी०–यथेति । वृत्तिरे चक्रुरित्यर्थः ॥ २१–२४ ॥

२२] ति० टी०–उपसंगृह्य स्पृष्ट्वा ॥ २२ ॥

रा० टी०–सीतेति । दुःखिता अश्रुपूर्णाक्षी सीताऽपि तासां श्वश्रूणां चरणान् उपसंगृह्य अग्रतः स्थिता संबभूव ॥ २२ ॥

२३–२४] ति० टी०–वनेत्यादि । वनवासकृतदीनत्ववतीमिति यावत् ॥ २३ ॥ २४ ॥

रा० टी०–तामिति । वनवासे कृतं प्रयत्नो यस्यास्तामत एव दीनां क्षीणत्वेन प्रतीयमानां दुःखार्तां तां सीतां माता दुहितरमिव परिष्वज्य कौशल्या वाक्यमब्रवीत् ॥ २३ ॥

रा० टी०–तद्वचनाकारमाह–विदेहेति । विजने वने रामपत्नी दुःखं कथं संप्राप्ता अत्र कारणं न पश्याम इत्यर्थः ॥ २४ ॥

२५] ति० टी०–परिक्लिष्टं परिमृदितमुत्पलं रक्तोत्पलं ध्वस्तमभिभूतम् ॥ २५ ॥

रा० टी०–पद्ममिति । आतपेन घर्मेण संतप्तं पद्ममिव परिक्लिष्टं मर्दितमुत्पलं रक्तकमलमिव रजसा ध्वस्तं पराभूतं व्याप्तमित्यर्थः 'काञ्चनमिव अम्बुदैः मेघैः क्लिष्टं चन्द्रमिव ते मुखं प्रेक्ष्य स्थितां मां व्यसनारणिसंभवः व्यसनेन संघर्षणेन विशिष्टा याऽरणिस्तस्मात्संभवो यस्य स वह्निः आश्रयमरणिमिव मनसि वियमानः शोको दहति । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०–पद्ममित्यादि । ते मुखं प्रेक्ष्य स्थितामिति शेषः, मां मनसि स्थितः सन्निति शेषः, आश्रयमाश्रयभूतं काष्ठादिकम् ॥ २५–२८ ॥

२६–२८] ति० टी०–ते मुखं प्रेक्ष्य स्थितामिति शेषः । मनसि संक्रान्तो व्यसनारणिसंभवः शोकोऽग्निराश्रयं गृहमिव काष्ठानीव वा मां दहति । 'आश्रयम्' इति पाठेऽप्याश्रयो गृहमेव आश्रय्यतेऽत्रेति व्युत्पत्तेः ॥ २६–२८ ॥

रा० टी०–ब्रुवत्यामिति । जनन्यामेवं ब्रुवत्यां सत्यां भरताग्रजो राघवो रामः आसाद्य वसिष्ठसमीपं प्राप्य वसिष्ठस्य पादौ जग्राह ॥ २७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–पुरोहितस्येति । बृहस्पतेः पादौ अमराधिप इन्द्र इव अग्निसमस्य पुरोहितस्य वशिष्ठस्य पादौ प्रगृह्य राघवो रामः तेन वशिष्ठेन सहैवोपविवेश ॥ २८ ॥

२९] ति०टी०–तत इति। वसिष्ठसमीपवेशनानन्तरं जघन्यं जघनभागं पृष्ठभागमाश्रितः सन्नुपोपविष्टो बभूवेत्यन्वयः ॥ २९ ॥

१ सेति गो. पाठः । २ कृशामिति गो. पाठः । ३ विदेहराजस्येति गो. पाठः । ४ निर्जने इति गो. पाठः । ५ ब्रुवत्यामिति रा. पाठः । ६ स इति गो. पाठः । ७ वै तदेति गो. पाठः । ८ सहैवेति गो. पाठः ।

उपोपविष्टस्तु तदातिवीर्यवांस्तपस्विवेषेण समीक्ष्य राघवम् ।
श्रिया ज्वलन्तं भरतः कृताञ्जलिर्यथा महेन्द्रः प्रयतः प्रजापतिम् ॥ ३० ॥
किमेष वाक्यं भरतोऽद्य राघवं प्रणम्य सत्कृत्य च साधु वक्ष्यति ।
इतीव तस्यार्यजनस्य तत्त्वतो बभूव कौतूहलमुत्तमं तदा ॥ ३१ ॥
स राघवः सत्यधृतिश्च लक्ष्मणो महानुभावो भरतश्च धार्मिकः ।
वृता[2]ः सुहृद्भिश्च [3]विरेजिरेऽध्वरे यथा सदस्यैः सहितास्त्रयोऽग्नयः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

पञ्चोत्तरशततमः सर्गः ।

पित्रा मह्यं वितीर्णमपि राज्यमहं कैकेय्यनुमत्यैव तुभ्यं ददे तत्स्वीकारेण मामनुगृह्णीष्वेति भरतो राममभ्यर्थयते । रामवनगमने स्वात्मनो हेतुत्वमारोप्य बलवत्प्रताम्यन्तं भरतमाश्वास्य राज्यभारे नियोजयन् रामो बहुधावष्टभ्नाति ।

ततः पुरुषसिंहानां वृतानां तैः सुहृद्गणैः । शोचतामेव रजनी दुःखेन व्यत्यवर्तत ॥ १ ॥
रजन्यां सुप्रभातायां भ्रातरस्ते सुहृद्वृताः । मन्दाकिन्यां हुतं जप्यं कृत्वा राममुपागमन् ॥ २ ॥
तूष्णीं ते समुपासीना न कश्चित्किंचिदब्रवीत् । भरतस्तु सुहृन्मध्ये रामं वचनमब्रवीत् ॥ ३ ॥

रा० टी०–तत इति । ततः रामोपवेशनानन्तरं धर्मवान् स भरतः हितादिभिः सह जघन्यं निम्नदेशमवलोक्य तदाग्रजमग्रजासनमुपोपविष्टः ॥ २९ ॥

गो० टी०–तत इति । ततो जघन्यं वसिष्ठरामोपवेशानन्तरमुपोपविष्टः "प्रसमुपोदः पादपूरणे" इति द्विर्वचनम्॥२९॥

३०] ति० टी०–उपोपविष्ट इत्यादि जनाभिप्रायानुभाषणम् ॥ ३० ॥

रा० टी०–उपोपविष्ट इति । उपोपविष्टः रामासनसमीपे स्थितः अतिवीर्यवान् भरतः राघवं रामं तपस्विवेषेण वीक्ष्य प्रजापतिं प्रति महेन्द्र इव कृताञ्जलिर्बभूवेति शेषः ॥३०॥

गो० टी०–उपोपविष्ट इति । कृताञ्जलिः अभूदिति शेषः ३०

३१] ति० टी०–किमिति । किं साधु वक्ष्यति वदिष्यतीति योजना ॥ ३१ ॥

रा० टी०–किमिति । राघवं प्रणम्य सत्कृत्य वियमानो भरतः अथ किं वक्ष्यति इतीव एवंरूपं कौतूहलं हर्षविशेषः तस्य आर्यस्य जनस्य हृदि तत्त्वतो बभूव ॥ ३१ ॥

गो० टी०–किमिति । इतीवेत्यत्र इवशब्दो वाक्यालंकारे ॥ ३१ ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

३२] ति० टी०–त्रयोऽग्नयः शत्रुघ्नस्याप्राधान्येन परिहरणात् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुरुत्तरशततमः सर्गः ॥१०४॥

रा० टी०–स इति । राघवो रामः सत्यधृतिर्लक्ष्मणश्च भरतश्च सुहृद्भिर्विरेजिरे, तत्र दृष्टान्तः अध्वरे यागे सदस्यैः सहितास्त्रयोऽग्नय इव ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

१] ति० टी०–पूर्वसर्गान्तोक्तरीत्या सुहृद्गणवृत्तत्वम् । शोचतां पितृमरणदुःखेन ॥ १ ॥

रा० टी०–भरतोक्तिं वर्णयितुमुपक्रमते–तत इति । सुहृद्गणैर्वृतानां शोचतां रामानयनोपायं चिन्तयतामित्यर्थः, पुरुषसिंहानां भरतादीनां दुःखेनैव रजनी रात्रिर्व्यत्यवर्तत ॥१॥

गो टी०–अथ पुनर्भरतस्य कैकेयीनिर्बन्धकृतपितृनियोगपरिहारोचितवचनपूर्वकं प्रार्थनं रामस्य च तत्समाश्वासनं तत्त्वोपदेशेनेत्येतत्पञ्चोत्तरशततमे–ततः पुरुषसिंहानामित्यादि ॥ १ ॥

२–३] ति० टी०–मन्दाकिन्यां तत्तीरे हुतं प्रातरौपासनहोमम् जप्यं गायत्रीजपम् । 'द्वारम्' इति पाठे उटजद्वारमित्यर्थ इति केचित् तन्न, उत्तरसर्गे मन्दाकिनीतीरे राममुवाचेत्युक्तेः तस्मात् 'रामम्' इति पाठो रामाधिष्ठितनदीतीरमित्यर्थ उचितः ॥ २ ॥ ३ ॥

रा० टी०–रजन्यामिति । रजन्यां सुप्रभातायां सत्यां सुहृद्वृतास्ते भ्रातरो भरतादयः मन्दाकिन्यां तत्समीपे हुतं जप्यं जपं च कृत्वा राममुपागमन् रामसमीपं प्राप्तुः ॥ २ ॥

रा० टी०–तूष्णीमिति । यतस्ते रामादयस्तूष्णीमुपा-

१ तथा स इति गो. पाठः । २ हृता इति गो. पाठः । ३ विरेजुरिति गो. पाठः ।

सान्त्विता मामिका माता दत्तं राज्यमिदं मम । तद्ददामि तवैवाहं भुङ्क्ष्व राज्यमकण्टकम् ॥ ४ ॥
महतेवाम्बुवेगेन भिन्नः सेतुर्जलागमे । दुरावरं त्वदन्येन राज्यखण्डमिदं महत् ॥ ५ ॥
गतिं खर इवाश्वस्य तार्क्ष्यस्येव पतत्रिणः । अनुगन्तुं न शक्तिर्मे गतिं तव महीपते ॥ ६ ॥
सुजीवं नित्यशस्तस्य यः परैरुपजीव्यते । राम तेन तु दुर्जीवं यः परानुपजीवति ॥ ७ ॥
यथा तु रोपितो वृक्षः पुरुषेण विवर्धितः । ह्रस्वकेन दुरारोहो रूढस्कन्धो महाद्रुमः ॥ ८ ॥
स यदा पुष्पितो भूत्वा फलानि न विदर्शयेत् । स तां नानुभवेत्प्रीतिं यस्य हेतोः प्ररोपितः ॥ ९ ॥
एषोपमा महाबाहो तदर्थं वेत्तुमर्हसि । यत्र त्वमस्मान्नृषभो भर्ता भृत्यान्न शाधि हि ॥ १० ॥

सीनाः अतः कश्चित्पुरुषः किंचिदपि नाब्रवीत् भरतस्तु अब्रवीत् ॥ ३ ॥

गो० टी०—रजन्यामिति । हुतं होमम् ॥ २ ॥ ३ ॥

४] ति० टी०—माता कैकेयी प्रथमं राज्ञा राज्यदानेन सान्त्विता कृताश्वासा, अनन्तरं तया ममेदं राज्यं दत्तम् । तद्राज्यमकण्टकमुक्तप्रकारेण पितृवचनस्यापि परिपालनात्प्रत्यूहरहितम् ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—सान्त्विते॒ति । येन त्वया मामिका माता सान्त्विता मम मह्यं यत् राज्यं च दत्तं तस्य तव तुभ्यं तत् राज्यं ददामि अतः अकण्टकं कण्टकरहितमिदं राज्यं भुङ्क्ष्व ॥ ४ ॥

गो० टी०—दत्तमन्यथयितुमशक्तोऽहमिति रामो वदेदिति मत्वा तस्य परिहारानुगुणं वचनमाह—सान्त्विते॒ति । ममेयं मामिका शैषिकोऽण् "तवकममकावेकवचने" इत्यणसन्नियोगेनास्मच्छब्दस्य ममकादेशः आदिवृद्धिश्च प्रत्ययस्थादित्यत्र मामकनरकयोरुपसंख्यानात् ककारात्पूर्वस्याकारस्य इकारः । मातृविरोधे न स्वीकुर्यादिति मत्वाह—सान्त्विते॒ति । दत्तस्यान्यथाकरणमनुचितमिति रामो वदेदिति परिहरति—दत्तमिति । 'त्रय एवाधनाः' इति न्यायेन दासस्य स्वं त्वदीयमिति ददामीत्यर्थः ॥ ४ ॥

५] ति० टी०—जलागमे वर्षाकालेऽम्बुवेगेन भिन्नः सेतुरिव इदं महदयोध्यादेशीयं राज्यखण्डं भरतखण्डाख्यं राज्यं त्वदन्येन दुरावरमावरितुमशक्यम् ॥ ५ ॥

रा० टी०—नन्वयमेव कृतो न भुज्यते इत्यत आह—महतेति । जलागमे वर्षागमकाले अम्बुवेगेन भिन्नः सेतुरिव राजिशोभितमखण्डम् खण्डरहितं राज्यानां खण्डानि यस्मिन्निति वा महदिदं राज्यं त्वदन्येन मयेत्यर्थः, दुरावरं ग्रहीतुमशक्यम् ॥ ५ ॥

गो० टी०—त्वमेव राज्यं रक्षेत्याशङ्क्याह—महतेति । जलागमे वर्षाकाले दुरावारम् आवरितुमशक्यं राज्यखण्डं नवखण्डेषु भरतखण्डाख्यं राज्यं कोसलराज्यखण्डं वा ॥ ५ ॥

६] ति० टी०—नन्वया वीरेण सुरक्ष्यमेतत्तत्राह—गतिमिति । अश्वगतिमनुगन्तुं खरो यथा न शक्तः तार्क्ष्यगत्यनुगमने यथेतरपक्षिणोऽशक्ताः तथा तव गतिं त्वदीयां राज्यपालनशक्तिमनुगन्तुं मे न शक्तिः । इवशब्दो यथार्थे निपातानामनेकार्थत्वात् ॥ ६ ॥

रा० टी०—तदेव दृष्टान्तान्तराभ्यामाह—गतिमिति । अश्वस्य गतिं गमनं खरो गर्दभ इव तार्क्ष्यस्य गरुडस्य गतिं पतत्रिणः बकादय इव तव गतिं सामर्थ्यमित्यर्थः, अनुगन्तुं प्राप्तुं मे शक्तिर्न ॥ ६ ॥

गो० टी०—राज्यस्य दुरावारत्वमुक्त्वा स्वस्याशक्तिमाह—गतिमिति । खरेत्यविभक्तिकनिर्देशः खरस्येत्यर्थः प्रकृतिभाव आर्षः पतत्रिणः पक्षिमात्रस्य, अश्वस्य गतिमनुगन्तुं खरस्य यथा न शक्तिः गरुडस्य गतिमनुगन्तुं केवलपक्षिणो यथा च शक्तिर्नास्ति तथेत्यर्थः ॥ ६ ॥

७] ति० टी०—यः परैर्नित्यश उपजीव्यते तस्य सुजीवं शोभनं जीवनमित्यर्थः । भावघञन्तं क्लीबमपि क्वचित् 'घञ्जपाः पुंसि' इति तु प्रायिकमिति बोध्यम् । तस्येत्यर्थे तेनेत्यार्षम् । दुर्जीवं दुःखं जीवनं तस्मात्तव राज्यकरणमेवोचितमिति भावः ॥ ७ ॥

रा० टी०—नन्वस्य राज्यस्य मम किं प्रयोजनमित्यत आह—सुजीवमिति । यः राजा परैः जनैः उपजीव्यते सेव्यते तस्य सुजीवं शोभनां स्थितिमवेहि यो राजा तु परानुपजीवति तेन तस्य दुर्जीवं दुःखं जीवनमवेहि तस्येत्यर्थे तेनेत्यार्षमिति भट्टाः 'सुजीवन्' इति भूषणपाठः ॥ ७ ॥

गो० टी०—तव शक्तिर्नास्ति चेदन्यः कश्चिद्राज्यं रक्षत्वित्यत्राह—सुजीवमिति । नित्यशः नित्यम् ॥ ७ ॥

८–१०] ति० टी०—लोकरक्षणार्थं दशरथेनोत्पाद्य वर्धितः सकलगुणसंपन्नो यदि लोकरक्षणं न करिष्यसि तदा व्यर्थस्तत्प्रयास इत्यसमर्थमुपमानप्रदर्शनमुखेनाह—यथा त्विति । यथा वृक्षः फलार्थिना पुंसा रोपितः कृतबीजावापोऽनन्तरं शनैर्वर्धितः । तत्र बुद्ध्यतिशयमाह—ह्रस्वकेन वामनेन दुरारोहोऽत एव रूढस्कन्धो महाद्रुमोऽपि पुष्पितो भूत्वा यदा फलानि न दर्शयति तदा स तदारोपकः पुमान्यस्य फलस्य हेतोः स द्रुमः प्रभावित उत्पादितः स तां प्रीतिं स्वाभिमतफलप्राप्तिजां प्रीतिं नानुभवेत्, तथा त्वमिति एषोपमा त्वयि भवति । यत्र रक्षणकाले वृषभः श्रेष्ठस्त्वं भर्ता पालनसमर्थोऽस्मान्भृत्यान्न शाधि न

१ दुरावारमिति गो. पाठः । २ सुजीवन्निति गो. पाठः । ३ तमर्थमिति गो. पाठः । ४ यदीति गो. पाठः ।

श्रेणयस्त्वां महाराज पश्यन्त्वग्र्याश्च सर्वशः । प्रतपन्तमिवादित्यं राज्यस्थितमरिंदमम् ॥ ११ ॥
तथा तु याने काकुत्स्थ मत्ता नर्दन्तु कुञ्जराः । अन्तःपुरगता नार्यो नन्दन्तु सुसमाहिताः ॥ १२ ॥
तस्य साध्वनुमन्यन्त नागरा विविधा जनाः । भरतस्य वचः श्रुत्वा रामं प्रत्ययुयाचतः ॥ १३ ॥
तमेवं दुःखितं प्रेक्ष्य विलपन्तं यशस्विनम् । रामः कृतात्मा भरतं समाश्वासयदात्मवान् ॥ १४ ॥
नात्मनः कामकारो हि पुरुषोऽयमनीश्वरः । इतश्चेतरतश्चैनं कृतान्तः परिकर्षति ॥ १५ ॥

शिक्षयसि, अतस्तदर्थं तस्या उपमाया अर्थं राजप्रयासानर्थक्यरूपं वेत्तुमर्हसि ॥ ८–१० ॥

रा० टी०–इदानीं तव वनागमनमनुचितमिति बोधयन्नाह–यथेति । यो वृक्षः पुरुषेण फलाभिकाङ्क्षिणा जनेन रोपितः आरोपितः पश्चाद्विवर्धितः अत एव हस्वकेन वामनेन दुरारोहो जातः स एव रुदस्कन्धो महाद्रुमः यदा पुष्पितो भूत्वा फलानि न विदर्शयेत् तदा स वृक्षारोपको जनः यस्य हेतोः प्ररोपितस्तस्याभावादिति शेषः, तां वृक्षविषयिणीं प्रीतिं नानुभवेत् यत्र यस्मिन् काले वृषभः सर्वश्रेष्ठः भर्ता त्वमस्मान्भृत्यान्न शाधि तदा एषा तव उपमा हे महाबाहो! तत् तस्मादेतोस्तदर्थं राज्यरूपार्थं वेत्तुं लब्धुमर्हसि । श्लोकत्रयमेकान्वयि ।' वृषभः श्रेष्ठवृषयोः ' इति मेदिनी ॥ ८–१० ॥

गो० टी०–उचितं च त्वद्रक्षणमेवेत्याह–यथेत्यादिना । श्लोकत्रयमेकान्वयम् । यथात्विति निपातसमुदायोऽयमुदाहरणोपक्रमद्योतनार्थः केनचित्पुरुषेण रोपितः बीजावापेनोत्पादितः यो वृक्षः पुनः संवर्धितः हस्वकेन वामनेन दुरारोहः क्रमेण रूढस्कन्धः महाद्रुमो जातः स यथा पुष्पितो भूत्वा फलानि न विदर्शयेत् स रोपयिता यस्य फलस्य हेतोः हेतुना तं वृक्षं रोपितवान् तां फलविषयिणीं प्रीतिं नानुभवेत् विनयेन प्रत्येकं वक्तुमशक्तः समुदायरूपेण दर्शयति भर्ता त्वमस्मान् भृत्यान् न शाधि यदि एषोपमेति पूर्वोक्तमर्थजातमुपमा उपमाशब्दापेक्षया स्त्रीलिङ्गत्वं रोपयिता अभिरूढो वृक्षः पुष्पदर्शनं फलादर्शनं चोपमेत्यर्थः, तमर्थमुपमेयमर्थजातं वेत्तुमर्हसि भावज्ञानकुशलः खल्वसीत्यर्थः । रोपयितुर्दशरथ उपमेयः वर्धितमहावृक्षस्य भवान् पुष्पदर्शनस्याभिषेचनौन्मुख्यं फलानुभवस्य भवतो राज्यापरिपालनमित्येतत् सर्वं त्वं जानासीत्यर्थः । एवत्सर्वं महाबाहो इत्यनेन सूचितम् ॥ ८–१० ॥

११–१२] ति० टी०–श्रेणयो नानाजातीयसंघाः अग्र्याः प्रधानाः ॥ ११ ॥ १२ ॥

रा० टी०–स्वाभिलाषं प्रार्थयते–श्रेणय इति । अग्र्याः श्रेष्ठाः श्रेणयः नानाविधजनाः प्रतपन्तमादित्यमिव राज्यस्थितं त्वां पश्यन्तु ॥ ११ ॥

रा० टी०–तवेति । हे काकुत्स्थ ! तवानुयाने त्वत्कर्तृकायोध्यागमने कुञ्जराः मत्ताः सन्तो नर्दन्तु सुसमाहिताः अन्तःपुरचरा नार्यो नन्दन्तु ॥ १२ ॥

गो० टी०–श्रेणय इति । श्रेणयः पौरश्रेणयः अग्र्याः प्रधानाः ॥ ११–१३ ॥

१३] ति० टी०–तस्य वचः साध्वित्यनुमन्यन्तेति योजना अन्वमन्यन्तेत्यर्थः ॥ १३ ॥

रा० टी०–तस्येति । विविधाः नागराः जनाः रामं प्रत्ययुयाचतः प्रार्थयतस्तस्य भरतस्य वचः श्रुत्वा साधु समीचीनमनुमन्यन्त अन्वमन्यन्त ॥ १३ ॥

१४] ति० टी–दुःखितं प्रेक्ष्य दुःखेनैवं वक्तीत्यालोच्य कृतात्मा शिक्षितबुद्धिः, आत्मवान्धीरः ॥ १४ ॥

रा० टी०–तमिति । एवं विलपन्तं कथयन्तं दुःखितं भरतं प्रेक्ष्य आत्मवान् अतिधैर्यवान् कृतात्मा कृतः आत्मा वनगमनाय प्रयत्नो येन स रामः भरतं समाश्वासयत् ॥ १४ ॥

गो० टी०–तमिति । दुःखितं स्वप्रार्थनानङ्गीकारेण दुःखितं विलपन्तं मम हेतोरार्यविवासनं पितुर्मरणमित्यादि जातमिति प्रलपन्तं कृतात्मा सुशिक्षितबुद्धिः धैर्यवान् वा॥१४॥

१५] ति० टी०–आश्वासनप्रकारो–नात्मन इति । आत्मनो जीवस्य कामकारः स्वेच्छया यत्किंचित्प्रवर्तनसामर्थ्यं न नास्ति, हि यतोऽयं पुरुषो जीवः ईश्वर ईश्वरवत्स्वातन्त्र्यरहितः, तस्मादेनमितश्चास्मादेहाच्च लोकाच्चेतरतः परस्मादेहाच्च लोकाच्च कृतान्तः कालोऽन्तर्यामिरूपः कर्मानुरूपं कर्षति, एवं च मम वनवासे न राजा नापि कैकेयी कारणं किंतु देवादीनामदृष्टमित्यान्तरो भावः ॥ १५ ॥

रा० टी०–आश्वासनप्रकारमाह–नात्मन इत्यादिभिः । आत्मनः जीवस्य कामकारः स्वेच्छावर्तनं नास्ति हि यतः अयं पुरुषो जीवः अनीश्वरः स्वेच्छावर्तने असमर्थः अत एवं इतोऽस्माल्लोकादितरतः स्वर्गादेश एनं जीवं कृतान्तः कालः परिकर्षति ॥ १५ ॥

गो० टी०–कैकेयीप्रेरितो राजा भवांश्च न मद्वनवासहेतुः किं तु दैवमेवेति तत्त्वदृष्ट्या भरतं दुःखाभिवर्तयितुमुपक्रमते–नात्मनः इत्यादि । आत्मनः पुरुषस्य कामकारः ऐच्छिकव्यापारो नास्ति यतोऽयं पुरुषः अनीश्वरः अस्वतन्त्र इत्यर्थः । इतश्च एतस्मादेशादेशान्तरम् इतरतः अन्यदेशाच्च एनं देशं कृतान्तः स्वतन्त्रदैवमेत्र परिकर्षति आकर्षति 'दैवे कृतान्तः सिद्धान्ते यमाकुशलकर्मणोः' इति वैजयन्ती । यथोक्तं भगवता गीताचार्येण–'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ' इति ॥ १५ ॥

---

१ राज्ये इति गो. पाठः । २ तवान्विति रा. पाठः । ३ इत्यमन्यन्तेति गो. पाठः । ४ ऽस्तीति गो. पाठः ।

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ १६ ॥
यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् । एवं नरस्य जातस्य नान्यत्र मरणाद्भयम् ॥ १७ ॥
यथाऽऽगारं दृढस्थूणं जीर्णं भूत्वोपसीदति[1] । तथावसीदन्ति[2] नरा जरामृत्युवशंगताः ॥ १८ ॥
अत्येति रजनी या तु सा न प्रतिनिवर्तते । यात्येव यमुना पूर्णं[3] समुद्रमुदकार्णवम्[4] ॥ १९ ॥
अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह[5] । आयूंषि क्षपयन्त्याशु ग्रीष्मे जलमिवांशवः[6] ॥ २० ॥
आत्मानमनुशोच त्वं किमन्यमनुशोचसि । आयुस्तु हीयते यस्य स्थितस्यार्धं गतस्य च ॥ २१ ॥

१६] ति० टी०–इदानीं राजमरणशोकावकाशोऽपि नास्तीत्याह–सर्वे इति । निचयाः संग्रहा नाशान्ताः समुच्छ्रया विभवादिकृतमौन्नत्यम्, तस्मान्नश्वरत्वेन निश्चिते कः शोक इति भावः १६

रा० टी०–सर्वे इति । सर्वे निचयाः संगृहीताः क्षयान्ताः क्षयेण विनाशेन अन्तः अभावो येषां ते, समुच्छ्रयाः उन्नतप्रदेशाः पतनान्ताः पतनेन अधस्खलनेन अन्तः येषां ते, संयोगाः विप्रयोगान्ताः विप्रयोगेन वियोगेन अन्तो येषां ते सन्तीति शेषः, जीवितं जीवनं मरणान्तं मरणेन प्राणवियोगेन अन्तो यस्य तत् अस्तीति शेषः । एतेन जीवप्रारब्धानुसार्येव सुखादीति सूचितं तेन स्वत्कर्तृकवनगमने प्रजानां सुखं न भवितेति न वक्तव्यमिति व्यञ्जितम् ॥ १६ ॥

गो० टी०–अपरिहरणीयवस्तुस्वभावपर्यालोचनायां पितृमरणेनापि शोकस्यावकाशो नास्तीत्यनुमर्थमाह–सर्व इति । निचयाः धनसंचयाः सर्वे बहुशः संपादिता अपि क्षयान्ताः क्षयपर्यवसायिनः चोरेण कामेन राज्ञा वा नश्यन्तीत्यर्थः । समुच्छ्रयाः अत्यन्तसमुन्नता अपि पतनान्ताः अत्युन्नतपदस्थिताः ब्रह्मेन्द्रादयोऽपि स्वस्वाधिकारसमाप्तिदशायां तत्पदभ्रंशपर्यवसायिन इति यावत् । संयोगाः पुत्रमित्रकलत्रादिसंबन्धा अपि विप्रयोगान्ताः विरहपर्यवसायिनः जीवितं च उत्कृष्टजीवनमपि मरणान्तम् अपरिहार्यमरणाधीनभङ्गशालीत्यर्थः । पितृमरणशोकेनैवमुच्यते भरतेनेत्यारोप्य तदपनोदनं कृतमस्मिन् श्लोके पादत्रयोक्तार्थत्रयं दृष्टान्तार्थं तुरीयपादश्च दार्ष्टान्तिकं दशरथमरणमभिप्रैति अतः अपरिहार्यकालकृतत्वात् पितृमरणमपि न शोचनीयमिति भावः ॥ १६ ॥

१७] ति० टी०–यथा फलानां पतनमशक्यपरिहारम् एवं मरणमपि तथा तस्मान्नृपस्य तस्य न शोच्यता ॥ १७ ॥

रा० टी०–मुख्यं दुःखं मरणदुःखमिति तस्यैव प्रतिक्रिया विचारणीयेति बोधयन्नाह–यथेति । यथा पक्वानां फलानां तालादिजन्यानां पतनात् अन्यत्र अन्यस्मिन् काले भयं काकादिपक्षिभक्षणभीतिर्नास्ति तथा जातस्य नरस्य मरणात् मर्त्यलोकादन्यत्र भयं नास्ति एतेन मर्त्यलोकादन्यत्र नयने यत्नः कर्तव्य इति सूचितम् ॥ १७ ॥

गो० टी०–प्रथमश्लोके वनगमनं न मया स्वतन्त्रेण कृतमपि त्वीश्वरकृतमित्युक्तं, द्वितीयश्लोके दशरथमरणं च कालकृतमतस्तत्रापि न शोचनीयमित्युक्तम् । अथ द्वितीयश्लोकोक्तं सदृष्टान्तं प्रपञ्चयति–यथेत्यादिना ॥ १७ ॥ १८ ॥

१८]ति०टी०– तदेव दृष्टान्तान्तरेणोपपादयति–यथेति १८

रा० टी०–अस्मिन् लोके प्राकृतानां मृत्युरवश्यं भावीति बोधयन्नाह–यथेति । दृढं स्थूलं यस्मिंस्तदागारं गृहं स्थूणा जीर्णं भूत्वा उपसीदति विनश्यति तथा जरामृत्युवशं गताः नरा अवसीदन्ति ॥ १८ ॥

१९] ति० टी०–अतीतरजन्यप्रतिनिवृत्तौ दृष्टान्तो यमुना यात्येव न प्रतिनिवर्तत इत्यर्थः । उदकार्णवमित्यत्रोदकपदमधिकम् ॥ १९ ॥

रा० टी०–मृत्युग्रस्तस्य पुनर्न निवृत्तिरित्यत्र दृष्टान्तमाह–अतीति । या रजनी रात्रिः अत्येति सा न प्रतिनिवर्तते एवं मृत्युना ग्रस्तस्य पुनर्न निवृत्तिरित्यर्थः । मृत्योरनिवार्यत्वे दृष्टान्तमाह–पूर्णमुदकैः परिपूरितमुदकार्णवमुदकसमुद्रं यमुना यात्येव एवं मृत्युरपि प्राकृतजनं प्राप्नोत्येवेत्यर्थः ॥ १९ ॥

गो० टी०–अत्येतीति । समुद्रस्योदकाकुलत्वविशेषणं यमुनायाः सर्वथा अनिवर्त्यत्वाय ॥ १९ ॥

२०] ति० टी०–गच्छन्तीति शत्रन्तम् । अंशवो रविकिरणाः । 'आशये' इति पाठे जलाशय इत्यर्थः ॥ २० ॥

रा० टी०–कालगतिर्दुर्लक्ष्येति बोधयन्नाह–अहोरात्राणीति । गच्छन्ति गमनकर्तृणि अहोरात्राणि ग्रीष्मे अंशवः सूर्यकिरणाः जलमिव सर्वेषां प्राणिनामायूंषि क्षपयन्ति विनाशयन्ति ॥ २० ॥

गो० टी०–अहोरात्राणीति । गच्छन्तीति प्रथमा बहुवचनमहोरात्रविशेषणम् अंशवः सूर्यस्येति शेषः ॥ २० ॥

२१] ति० टी०–यदेवमतस्त्वमात्मानं प्रति अनुशोच मृत्युर्दुर्वार आयाति का मे गतिरिहाभूदिति चिन्तय । अन्यं राजानं तदेव शोच्यत्वमाह–आयुरिति । आयुस्तु यस्य, यस्य कस्यापि हीयत इत्यर्थः ॥ २१ ॥

रा० टी०–प्राकृतानां दुःखानि निवर्तनीयानीति बोधयन्नाह–आत्मानमिति । स्थितस्य कदाचिदिहलोके विद्यमानस्य गतस्य कदाचिदेवलोकं प्राप्तस्य च यस्य प्राकृतज-

१ भूत्वावसीदतीति गो. पाठः । २ तथैव सीदन्तीति गो. पाठः । ३ पूर्णेति गो. पाठः । ४ ऽऽकुलमिति गो. पाठः । ५ ते इति गो. पाठः । ६ चेति गो. पाठः ।

सहैव मृत्युर्व्रजति सह मृत्युर्निषीदति । गत्वा सुदीर्घमध्वानं सह मृत्युर्निवर्तते ॥ २२ ॥
गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः । जरया पुरुषो जीर्णः किं हि कृत्वा प्रभावयेत् ॥ २३ ॥
नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमितेऽहनि । आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयम् ॥ २४ ॥
हृष्यन्त्यृतुमुखं दृष्ट्वा नवं नवमिवागतम् । ऋतूनां परिवर्तेन प्राणिनां प्राणसंक्षयः ॥ २५ ॥
यथा काष्ठं च काष्ठं च समेयातां महार्णवे । समेत्य तु व्यपेयातां कालमासाद्य कंचन ॥ २६ ॥
एवं भार्याश्च पुत्राश्च ज्ञातयश्च वसूनि च । समेत्य व्यवधावन्ति ध्रुवो ह्येषां विनाभवः ॥ २७ ॥
नात्र कश्चिद्यथाभावं प्राणी समतिवर्तते । तेन तस्मिन्न सामर्थ्यं प्रेतस्यास्त्यनुशोचतः ॥ २८ ॥

नस्य आयुः हीयते तमात्मानं शरीरिणमनुशोच तदुःखनिवर्तकत्वं कुर्वित्यर्थः, अन्यं प्राकृतविलक्षणं मां किं किमर्थमनुशोचसि ॥ २१ ॥

गो० टी०-शोकविषयं निर्धारयति-आत्मानमिति । आयुस्ते यतो हीयते अतः परलोकचिन्तामेव कुर्वित्यर्थः ॥२१॥

२२] ति० टी०-तदेवाह-सहेति । मृत्युः सह व्रजति सह निषीदति सह गत्वा सह निवर्तते अन्तर्यामिण एव मृत्युरूपत्वात् अतोऽपरिहार्यः स इति भावः ॥ २२ ॥

रा० टी०-सहेति । मृत्युः सहैव व्रजति गच्छति सहैव निषीदति तिष्ठति सहैव दीर्घं विरजापर्यन्तं संलग्नमध्वानं गत्वा निवर्तते विरजापारं न गच्छतीत्यर्थः, एतेन लोकानां विरजापारप्राप्त्युपायः कर्तव्य इति व्यञ्जितम् ॥ २२ ॥

गो० टी०-मृत्युः सर्वथा दुष्परिहर इत्याह-सहैवेति॥२२॥

२३] ति० टी०-वलयो जराकृताः । किं हि कृत्वा किं बलं प्राप्य प्रभावयेत्प्रभुत्वं भावयेत्, यद्वा किं कृत्वा कमुपायं कृत्वा एतत्सर्वपरिहारे समर्थो भवेदित्यर्थः ॥ २३ ॥

रा० टी०-गात्रेष्विति । यस्य गात्रेषु शरीरेषु वलयः जराकृताकारविशेषाः प्राप्ताः अत एव शिरोरुहाः केशाः श्वेताः स जरया जीर्णः पुरुषः किं कृत्वा प्रभावयेत् मृत्युनिवर्तने समर्थो भवेत्, एतेन अस्मत्प्रयत्नमन्तरा मृत्युनिवृत्तिर्न भवितेति सूचितम् ॥ २३ ॥

गो० टी०-कालान्तरे तथैव करिष्यामीत्याह-गात्रेष्वित्यादिना । तस्मात् बाल्य एव आत्मज्ञानाय यतेतेत्युक्तं भवति किं हि कृत्वा पूर्वोक्तोपद्रवपरिहारत्वेन कमुपायं कृत्वा आत्मानं प्रभुं कुर्यादित्यर्थः ॥ २३ ॥

२४] ति० टी०-आयुःक्षयकारकत्वेनानिष्टसाधनत्वेऽपि यदाविष्टसाधनत्वबुद्ध्यातिमूढा मनुष्या इत्याह-नन्दन्तीति२४

रा० टी०-नन्दन्तीति । आदित्ये उदिते सति केचित् नन्दन्ति केचित् अस्तमिते नन्दन्ति मनुष्याः जनाः आत्मनो जीवितक्षयमुदितमस्तमितं च नावबुध्यन्ते ॥ २४ ॥

गो० टी०-बाल्येऽपि पुरुषाणां विवेको दुर्लभ इत्याह-नन्दन्तीत्यादिना । आदित्ये उदिते नन्दन्ति अर्थार्जनकालोऽयमागत इति, रवौ अस्तमितेऽपि नन्दन्ति कामोपभोगकालोऽयमागत इति, आत्मनो जीवितक्षयं नावबुध्यन्ते सच्छिद्रघटे गृहीतं जलमिव प्रतिक्षणमायुः क्षीयत इति न जानन्ति । जीवितकाल एव परलोकहितं कर्तुं नेच्छन्तीत्यर्थः ॥ २४ ॥

२५] ति० टी०-नवं नवमिवेतः प्रागप्राप्तमिव । ऋतुमुखमृतुप्रारम्भः, परिवर्तः पुनः पुनः प्राप्तिः, तं दृष्ट्वा हृष्यन्ति न जानन्ति तत्परिवर्तनेन प्राणिनां नाश इतीत्यन्वयः । 'आत्मसुखम्' इति पाठे स्वस्वाभिमुखमृतूनां परिवर्तं दृष्ट्वा हृष्यन्तीत्यर्थः ॥ २५ ॥

रा० टी०-हृष्यन्तीति । येषाम् ऋतूनां परिवर्तेन परिवर्तनेन प्राणिनां प्राणसंक्षयो भवति तदागतं नवं नवमृतुमुखं दृष्ट्वा हृष्यन्ति एतेन लोकानां स्वाहिताज्ञत्वं सूचितम् ॥ २५ ॥

गो० टी०-हृष्यन्तीति । तत्तदृत्वागमनं दृष्ट्वा नानाभोगहेतुरिति हृष्यन्ति, प्रत्युत ऋत्वागमोऽनर्थहेतुरित्याह-ऋतूनां परिवर्तेनेति ॥ २५ ॥

२६] ति० टी०-काष्ठं काष्ठं पोतद्वयम् ॥ २६ ॥

२७] ति० टी०-विनाभवः विप्रयोग इति यावत् ॥ २७ ॥

रा० टी०-यथेति । कंचन कालमासाद्य प्राप्य महार्णवे यथा काष्ठं च काष्ठं च काष्ठद्वयमित्यर्थः, समेयातामेकीभूय वर्तेयातां समेत्य तु कंचित्कालमासाद्य व्यपेयातां वियुज्येयाताम् एवं भार्यादयः समेत्य संयुज्य व्यवधावन्ति वियुज्यन्ते अतः एषां भार्यादीनां विनाभवः वियोगः ध्रुवः निश्चितः । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०-श्लिष्टानां विश्लेषस्यावश्यं भावित्वात्तदपि न शोचनीयमित्यभिप्रायेणाह-यथा काष्ठमिति श्लोकद्वयेन । विनाभवः वियोगः ॥ २६ ॥ २७ ॥

२८] ति० टी०-अत्र संसारे कश्चिदपि प्राणी यथाभावं यथाप्राप्तं स्वभावं मृतिजनिलक्षणं न समतिवर्तते न लङ्घयति, तेन हेतुना प्रेतस्य संबन्धसामान्ये षष्ठी । प्रेतमनुशोचतोऽस्य तस्मिन्स्वीयप्रेतभावनिवर्तने सामर्थ्यं नास्ति ॥ २८ ॥

रा० टी०-नेति । अत्र अस्मिन् संसारे यथाभावं यथाकालप्राप्तं सुखदुःखादिकं कश्चित् प्राणी न समतिवर्तते उल्लङ्घते तेन तस्मिन्नुल्लङ्घने प्रेतस्य प्रयतमानस्येत्यर्थः, अनुशो-

१ रवाविति गो. पाठः । २ चेति गो. पाठः । ३ धनानीति गो. पाठः । ४ ऽभीति गो. पाठः ।

यथा हि सार्थं गच्छन्तं ब्रूयात्कश्चित्पथि स्थितः । अहमप्यागमिष्यामि पृष्ठतो भवतामिति ॥ २९ ॥
एवं पूर्वैर्गतो मार्गः [1]पैतृपितामहैर्ध्रुवः । तमापन्नः कथं शोचेद्यस्य नास्ति व्यतिक्रमः ॥ ३० ॥
वयसः पतमानस्य स्रोतसो वानिवर्तिनः । आत्मा सुखे नियोक्तव्यः सुखभाजः प्रजाः स्मृताः ३१ ॥
धर्मात्मा सुशुभैः कृत्स्नैः क्रतुभिश्चाप्तदक्षिणैः । [धूतपापो गतः स्वर्गं पिता नः पृथिवीपतिः ॥
भृत्यानां भरणात्सम्यक्प्रजानां परिपालनात् । अर्थादानाच्च धर्मेण पिता नस्त्रिदिवं गतः ॥
कर्मभिस्तु शुभैरिष्टैः क्रतुभिश्चाप्तदक्षिणैः । स्वर्गं दशरथः प्राप्तः पिता नः पृथिवीपतिः ॥
इष्ट्वा बहुविधैर्यज्ञैर्भोगांश्चावाप्य पुष्कलान् । उत्तमं चायुरासाद्य स्वर्गतः पृथिवीपतिः ॥
आयुरुत्तममासाद्य भोगानपि च राघवः । न स शोच्यः पिता तात स्वर्गतः सत्कृतः सताम् ॥ ३२ ॥

चतः पुरुषस्य सामर्थ्यं न विद्यते तेन ते एव शोच्या इति ध्वनितम् ॥ २८ ॥

गो० टी०—नात्रेति । अस्मिंल्लोके कश्चिदपि प्राणी यथा भावं न समभिवर्तते यथाभिलाषं बन्धुभिः सह न वर्तते तेन कारणेन प्रेतस्य मृतस्य हेतोः अनुशोचतः पुरुषस्य तस्मिन्मरणनिवारणे सामर्थ्यं नास्ति । पाठान्तरम् अस्मिन् बद्धलोके कश्चिदपि ब्रह्मादिस्तम्बपर्यन्तेषु कोऽपि जन्तुः यथाभावं यथाभिलाषम् अप्रतिहतसंकल्पतयेत्यर्थः । न समभिवर्तते कश्चिदित्यनेन मानुषापेक्षया चिरकालवर्तिनां शक्त्यतिशयभाजामपि ब्रह्मादीनामधिकारावसाने मरणं दुर्निवारमेवेत्याशयः । तेन एवमप्रतिहतसंकल्पत्वाभावेन प्रेतस्य मृतस्य हेतोः अनुशोचतः पुरुषस्य तस्मिन्मरणनिवारणे सामर्थ्यं नास्ति अतः ब्रह्मादीनामप्यपरिहार्ये शोकं विहाय सर्वानर्थनिवृत्तये प्रयतेतेति भावः ॥ २८ ॥

२९] ति० टी०—पूर्वगतिसमानगतित्वे दृष्टान्तः—यथेति । पुरतो गच्छन्तं सार्थं पथि स्थितः पथिकः ॥ २९ ॥

३०] ति० टी०—उक्तायां लोकस्थितेः प्रकृतोपयोगमाह—एवमिति । पैतृपितामहैः । वृद्धिरार्षी । पितृपैतामहैरित्यर्थः । ' पितृपैतामहः ' इति पाठे तत्संबन्धी मार्ग इत्यर्थः, ध्रुवोऽवश्यं प्राप्यः । यस्य मार्गस्य व्यतिक्रमो लङ्घनं नास्ति तमापन्नः स्वयमपि तं प्राप्तः पित्रादीन्कथं शोचेत् ॥ ३० ॥

रा० टी०—यथेति । यथा गच्छन्तं सार्थं वणिक्समूहं भवतां पृष्ठतः अहमप्यागमिष्यामि इति पथि स्थितः कश्चित् ब्रूयात् कथनपूर्वकं गच्छेत् एवं यस्य व्यतिक्रमो व्यत्ययः नास्ति पूर्वैः पितृपैतामहैः गतो यो मार्गः तं मार्गमापन्नः प्राप्तः स पुरुषः कथं शोचेत् ' सार्थो वणिक्समूहे स्यादपि संघातमात्रके ' इति मेदिनी । श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०—यथेत्यादिश्लोकद्वयम् । गच्छन्तं सार्थं पथिकसमूहं पथि स्थितः पुरुषो यथा अहमप्यागमिष्यामीति ब्रूयादनुगच्छति च एवं पूर्वैर्वैद्यैः गतः प्राप्तो मार्गः पितृपैतामहः पितृपितामहसंबन्धी तैरपि प्राप्त इति यावत् । ध्रुवः पुत्रादिभिरपि गन्तव्यत्वेन निश्चितः ॥ २९ ॥ ३० ॥

३१] ति० टी०—स्रोतसो वा गङ्गादिप्रवाहस्येवानिवर्तिनः प्रत्यावृत्तिरहितस्य पतमानस्य गच्छतो वयसः नाशं दृष्ट्वेति शेषः, आत्मा सुखे तत्साधने धर्मे नियोक्तव्यः । कुतः यतः प्रजाः सुखभाजः सुखसाधननिमित्तजन्मभाजः स्मृताः ॥ ३१ ॥

रा० टी०—वयस इति । स्रोतसः नदीप्रवाहस्य वा इव अनिवर्तिनः पतमानस्य वयसः कौमारादेः संबन्धी आत्मा सुखे तत्साधनीभूतधर्मे नियोक्तव्यः राज्ञा उपदेष्टव्य इत्यर्थः, अत एव प्रजाः सुखभाजः स्मृताः ॥ ३१ ॥

गो० टी०—उक्तमर्थमनुसंहरति—वयस इत्यादिना । "यस्य च भावेन भावलक्षणम्" इत्यर्थे सप्तम्यर्थे षष्ठी । वाशब्द इवार्थः अनिवर्तिनि स्रोतसीव वयसि पतमाने अनिवर्तितया गच्छति सति आत्मा सुखे सुखहेतौ धर्मे नियोक्तव्यः परलोकहितचिन्तयेति शेषः । यतः प्रजाः सुखभाजः धर्मसाध्यसुखासक्ताः स्मृता इति योज्यम् ॥ ३१ ॥

३२] ति० टी०—यदेवमतः—धर्मात्मेति । उपसंहरति—न स इति । सतां सत्कृतः सद्भिः पूज्यमानः ॥ ३२ ॥

रा० टी०—प्राकृतानां दुःखस्य राजनिवार्यत्वेन तद्विषयकशोकानर्हत्वमुपपाद्य प्राकृतविलक्षणानां तु दुःखास्पृष्टत्वेन तद्विषयकशोकस्याप्यनर्हत्वमुपपादयन्नाह—धर्मेति । हे तात ! अशुभैः अशुनि इन्द्रियाणि शुभानि दिव्यानि येषु तैः किंच शुभैः प्राकृतविलक्षणैरित्यर्थः कृत्स्नैः सकलैः अवयवैः प्राप्तदक्षिणैः क्रतुभिश्च सहितः सतां सत्कृतः यो धर्मात्मा मम पिता स्वः सर्वलोकपरं लोकं साकेतं गतः प्राप्तः स न शोच्यः ॥ ३२ ॥

गो० टी०—एवं लोकस्थितिः अस्मत्पितरं प्रति तु न शोकगन्धोऽपि कार्य इत्याशयेनाह—धर्मात्मेत्यादिना ॥ ३२ ॥

रा० टी०—तदेव भरतवन्तरेणाह—भृत्यानामिति । भृत्यादीनां भरणादिभ्यः आज्ञाप्य नः पिता त्रिदिवं त्रिभिर्वज्ञा-

१ पितृपैतामह इति गो. महैरिति रा. पाठः । २ स शुभैरिति गो. पाठः । ३ श्लोकचतुष्टयमेतदधिकं गो. पाठे । ४ श्लोकोऽयमधिको द्वात्रिंशादुत्तरः रा. पाठे ।

स जीर्णमानुषं देहं परित्यज्य पिता हि नः । दैवीमृद्धिमनुप्राप्तो ब्रह्मलोकविहारिणीम् ॥ ३३ ॥
तं तु नैवंविधः कश्चित्प्राज्ञः शोचितुमर्हति । त्वद्विधो मद्विधश्चापि श्रुतवान्बुद्धिमत्तरः ॥ ३४ ॥
एते बहुविधाः शोका विलापरुदिते तदा । वर्जनीया हि धीरेण सर्वावस्थासु धीमता ॥ ३५ ॥
स स्वस्थो भव मा शोको यात्वा चावस तां पुरीम् । तथा पित्रा नियुक्तोऽसि वशिना वदतां वर ॥ ३६ ॥
यत्राहमपि तेनैव नियुक्तः पुण्यकर्मणा । तत्रैवाहं करिष्यामि पितुरार्यस्य शासनम् ॥ ३७ ॥
न मया शासनं तस्य त्यक्तुं न्याय्यमरिंदम । स त्वयापि सदा मान्यः स वै बन्धुः स नः पिता ॥ ३८ ॥
तद्वचः पितुरेवाहं संमतं धर्मचारिणाम् । कर्मणा पालयिष्यामि वनवासेन राघव ॥ ३९ ॥
धार्मिकेणानृशंसेन नरेण गुरुवर्तिना । भवितव्यं नरव्याघ्र परलोकं जिगीषता ॥ ४० ॥

दिभिः दिवं स्तुत्यमप्रकल्पाकेतं गतः शरीरेण सह प्राप्तः अतो न शोच्य इत्यनुकृष्यते ॥ ३३ ॥

गो० टी०—भृत्यानामिति । धर्मेण अर्थादानात् धर्मेण करादिग्रहणात् ॥ ३३ ॥

गो० टी०—कर्मभिरिति । इष्टैः जनानां स्वस्य चाभिमतैः शुभैः कर्मभिः महापथेषु तटाकनिर्माणादिभिः ॥ ३४ ॥ ३५ ॥

गो० टी०—आयुरिति । उत्तमं तत्पूर्वराजायुरपेक्षया अधिकतमम् आयुः भोगानपि चासाद्य स्वर्गतः सतां सत्कृतः स पिता न शोच्य इति अन्वयः ॥ ३६ ॥

३३] ति० टि०—ब्रह्मलोकविहारिणीं तल्लोके विहारार्हां दैवीमृद्धिं देवसंबन्धिनीं तपआदिसमृद्धिम् ॥ ३३ ॥

रा० टी०—नन्वेवं सशरीरं लोकान्तरं गतेऽपि एतदाद्यैश्वर्यत्यागहेतुकः शोकः कार्य एवेत्यत आह—स इति । जीर्णं बहुकालं भुक्तं मानुषं प्राकृतमनुष्यसंबन्धिनं देहमैश्वर्यर्द्धिं परित्यज्य ब्रह्मलोकविहारिणीं ब्रह्मादीनां लोकेषु विहारयति प्रापयति तच्छीलां यथेच्छं सर्वलोकगमनसंपादिकामित्यर्थः, दैवीं प्राकृतविलक्षणाम् ऋद्धिं संपत्तिमनुप्राप्तः ॥ ३४ ॥

गो० टी०—स जीर्णमिति । दैवीमृद्धिं देवसंबन्धिसंपदं दिव्यदेहादिलाभरूपामित्यर्थः ॥ ३७ ॥

३४] ति० टी०—श्रुतवानधीतात्मविद्यः । ' तद्विधो यद्विधश्चापि ' इति पाठे श्रुतवान्बुद्धिमत्तरश्च यद्विधोऽसि तद्विधो भवान्न शोचितुमर्हतीत्यर्थे इति तीर्थः । ब्रह्मलोकं प्राप्तस्यात्यन्तं शोकोऽनुचित इति भावः ॥ ३४ ॥

रा० टी०—तमिति । तं प्राकृतविलक्षणसंपत्तिविशिष्टं राजानमेवंविधः राजसदृशः कश्चित् प्राज्ञः त्वद्विधो मद्विधश्च श्रुतवान् शास्त्रज्ञः बुद्धिमत्तरः शोचितुं नार्हति ॥ ३५ ॥

गो० टी०—तं त्विति । एवंविधः प्राज्ञ इति भरतगुणं प्रत्यक्षेण निर्दिशति । एवंविध इत्युक्तमुद्घाटयति—तद्विध इति । श्रुतवान् बुद्धिमत्तरश्च यद्विधोऽसि तद्विध इत्यर्थः ॥ ३४ ॥

३५] ति० टी०—बहुविधा दशरथमरणमद्विवासनादिविषयभेदेन बहुप्रकाराः । शोको मानसो विलापरुदिते तत्कार्ये ३६

रा० टी०—वस्तुतस्तु शोकमात्रपरित्यागः कर्तव्य इति बोधयन्नाह—एते इति । विविधाः शोकाः वर्जनीयाः विलापरुदिते च वर्जनीये, वर्जनीया इत्यस्य लिङ्गवचनविपरिणामेनान्यत्राप्यन्वयः ॥ ३६ ॥

गो० टी०—एत इति । बहुविधाः दशरथमरणमद्विवासनादिभेदेन बहुप्रकाराः विलापरुदिते प्रलापाश्रुमोचने च वर्जनीये इति विपरिणामेनान्वयः ॥ ३९ ॥

३६] ति० टी०—स्वस्थः शोकरहितः । मा शोकः त्वां परिभवत्विति शेषः । यात्वा गत्वा तां पुरीमयोध्यामावस । कुत एवं नियोगस्तत्राह—तथेति । वशिना सत्यवशवता सत्याधीनत्ववता ॥ ३६ ॥

रा० टी०—स इति । यतः वशिना स्वतन्त्रेण पित्रा त्वं तथा नियुक्तोऽसि अतः स्वस्थो भव शोकः मा न प्राप्नोतु इति शेषः, अत एव तां पित्राज्ञप्तां पुरीमयोध्यां यात्वा प्राप्य स त्वमावस ॥ ३७ ॥

गो० टी०—मद्विवासनं त्वयापि मान्यमित्याह—स स्वस्थ इत्यादिना । यात्वा गत्वा तां पुरीम् आवस अधितिष्ठ ॥ ४० ॥

३७] ति० टी०—यत्र यस्मिन्कृत्ये तत्रैव प्रयुक्तः सन्निति शेषः ॥ ३७ ॥

रा० टी०—यत्रेति । यत्र यस्मिन् वनवासरूपे कर्मणि पुण्यकर्मणा पित्रा नियुक्तः तत्रैव स्थितोऽहं पितुरनुशासनं करिष्यामि ॥ ३८ ॥

गो० टी०—यत्रेति । यत्र वनरूपे स्थाने ॥ ४१—४४ ॥

३८] ति० टी०—त्यागस्यान्याय्यत्वे हेतुः—सदा मान्य इत्यादि ॥ ३८ ॥

रा० टी०—नेति । त्वया मयाऽपि तस्य शासनं त्यक्तुं न शक्यं, तत्र हेतुः सदा मान्यः पूजनीयः ॥ ३९ ॥

३९] ति० टी०—कर्मणा तदुचितव्यापारेण ॥ ३९ ॥

रा० टी०—तदिति । धर्मचारिणां संमतं तत्पितुर्वचः वनवासेन कर्मणा पालयिष्यामि ॥ ४० ॥

४०] ति० टी०—नरेण ' नृपेण ' इति पाठः क्षत्रियेणे-

१ जीर्णमिति गो. पाठः । २ तद्विधो यद्विध इति गो. पाठः । ३ तथेति गो. पाठः । ४ऽशोचीरिति गो. पाठः । ५ तावेति गो. पाठः । ६ मान्यमिति गो. पाठः । ७ चारिण इति गो. पाठः ।

आत्मानमनुतिष्ठ त्वं स्वभावेन नरर्षभ । निशाम्य तु शुभं वृत्तं पितुर्दशरथस्य नः ॥ ४१ ॥
इत्येवमुक्त्वा वचनं महात्मा पितुर्निदेशप्रतिपालनार्थम् ।
यवीयसं भ्रातरमर्थवच्च प्रभुर्मुहूर्ताद्विरराम रामः ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

षडुत्तरशततमः सर्गः ।

सहेतूपन्यासं समर्थ्य रामं प्रति राज्यस्वीकारेऽभ्यर्थयमानो भरतः प्रार्थनानङ्गीकारेऽहमपि नैव निवर्ते किंतु वन एव निवस्यामीति प्रतिजानीते । पितृवचःपरिरक्षणे साग्रहतया भरतवचने शिथिलं रामं कौसल्यादयस्तदङ्गीकारे प्रार्थयन्ते ।

एवमुक्त्वा तु विरते रामे वचनमर्थवत् । ततो मन्दाकिनीतीरे रामं प्रकृतिवत्सलम् ॥ १ ॥
उवाच भरतश्चित्रं धार्मिको धार्मिकं वचः । को हि स्यादीदृशो लोके यादृशस्त्वमरिंदम् ॥ २ ॥
न त्वां प्रव्यथयेद्दुःखं प्रीतिर्वा न प्रहर्षयेत् । संमतश्चापि वृद्धानां तांश्च पृच्छसि संशयान् ॥ ३ ॥
यथा मृतस्तथा जीवन्यथासति तथा सति । यस्यैष बुद्धिलाभः स्यात्परितप्येत केन सः ॥ ४ ॥

त्यर्थ इति कतकः । परलोकं जिगीषता धार्मिकत्वादिस्वभाववता भवितव्यम् ॥ ४० ॥

रा० टी०–तत्र हेतुमाह–धार्मिकेणेति । परलोकं जिगीषता धार्मिकेण पुरुषेण गुरुवर्तिना पित्राद्याज्ञानुसरणेन भवितव्यम् ॥ ४१ ॥

४१–४२] ति० टी०–नः पितुर्वृत्तं शुभं निशाम्य पर्यालोच्य तेन स उत्तमां गतिं गत इति ज्ञात्वा त्वं स्वभावेन धार्मिकत्वादिलक्षणेनोपलक्षितः आत्मानमात्मनः परलोकहितमद्यतिष्ठ चिन्तयेत्यर्थः ॥ ४१ ॥ ४२ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चोत्तरशततमः सर्गः ॥१०५॥

रा० टी०–आत्मानमिति । नः पितुः दशरथस्य शुभं वृत्तं सत्यप्रतिज्ञत्वमित्यर्थः, निशाम्य संस्मृत्य आत्मानं स्वमनः स्वभावे पालकत्वरूपराजधर्मे अनुतिष्ठ संस्थापय ॥४२॥

गो० टी०–आत्मानमिति । स्वभावेनात्मानमनुतिष्ठ राजभावेन भवन्तं योजयेत्यर्थः, निशाम्य दृष्ट्वा ज्ञात्वेति यावत्॥४१॥

रा० टी०–इतीति । महात्मा रामः पितुः निदेशप्रतिपालनार्थमेवमर्थवद्वचनं यवीयसं यवीयांसं कनिष्ठं भ्रातरं मुहूर्तादुक्त्वा विरराम ॥ ४३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चाधिकशततमः सर्गः ॥ १०५ ॥

गो० टी०–इतीति । यवीयसं यवीयांसम् ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

१] ति० टी०–अथ भरतः क्षात्रधर्मावष्टम्भेन रामप्रत्यावर्त्तिं प्रार्थयते–एवमुक्त्वेति ॥ १ ॥

२] ति० टी०–चित्रशक्तियुक्तिविशेषोपपन्नत्वाल्लोकस्य विस्मयजनकम् । को हि स्यात् न कोऽपीत्यर्थः । यादृशो यादृशमाहात्म्यवान् ॥ २ ॥

रा० टी०–भरतवृत्तान्तं वर्णयन्नाह–एवमित्यादिभिः । एवमर्थवद्वचः उक्त्वा रामे विरते निवृत्ते सति प्रकृतिवत्सलं रामं धार्मिको भरतः धार्मिकं धर्मसहितं चित्रम् अनेकविधयुक्तिविशिष्टं वचः उवाच । तद्वचनाकारमाह–हे अरिन्दम ! यादृशः यादृशगुणविशिष्टस्त्वमसि ईदृशः लोके भुवने कः स्यात् न कोऽपीत्यर्थः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–अथ रामं प्रति भरतस्य श्लाघ्यतरोचितोत्तरं षट्शततमे–एवमुक्त्वेत्यादि । अस्मिन् सर्गे श्लोकव्यत्यासः सर्गभेदश्च दृश्यते तच्छ्रद्धये क्रमेण व्याख्यिते–एवमुक्त्वा त्विति । निरुत्तरमुक्तवन्तं रामं प्रति मुखान्तरेण उत्तरस्योच्यमानत्वाच्चित्रमित्युक्तम् ॥ १ ॥ २ ॥

३] ति० टी०–वृद्धानां संमतोऽपि धर्मविषये रामवदेव वर्तितव्यमिति दृष्टान्तभूतोऽपि लोकमर्यादामनुसरंस्तान्वृद्धान्संशयान्संशयास्पदधर्मान्पृच्छसि एवं च सर्वज्ञातृकामस्त्वत्त्व न दुःखमिति भावः ॥ ३ ॥

रा० टी०–नेति । दुःखं दुःखभवनं त्वां न प्रव्यथयेत् न वा प्रीतिः प्रीतिवचनं प्रहर्षयेत् तथापि वृद्धानां संमतस्त्वं तान् वृद्धान् संशयान् पृच्छसि, एतेन मर्यादापालनार्थमेव तव प्रश्न इति सूचितम् ॥ ३ ॥

गो० टी०–संमत इति । वृद्धानां त्रैविद्यवृद्धानां संमतः सर्वज्ञत्वेन संमतः तथापि तान् संशयान् पृच्छसीति संबन्धः३

४] ति० टी०–यथा मृतस्तथा जीवन् अस्य यथा जीवंस्तथा मृत इति वाक्यशेष आर्षिको बोध्यः । यथा मृतस्त्यक्तदेहः आत्मा देहपुत्रादिभिरसंबद्धस्तथा जीवनपि तैरसंबद्धः । नित्य-

१ असीति गो० पाठः ।

परावरज्ञो यश्च स्याद्यथा त्वं मनुजाधिप । स एव व्यसनं प्राप्य न विषीदितुमर्हति ॥ ५ ॥
अमरोपमसत्त्वस्त्वं महात्मा सत्यसंगरः । सर्वज्ञः सर्वदर्शी च बुद्धिमांश्चासि राघव ॥ ६ ॥
न त्वामेवंगुणैर्युक्तं प्रभवाभवकोविदम् । अविषह्यतमं दुःखमासादयितुमर्हति ॥ ७ ॥
प्रोषिते मयि यत्पापं मात्रा मत्कारणात्कृतम् । क्षुद्रया तदनिष्टं मे प्रसीदतु भवान्मम ॥ ८ ॥
धर्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम् । हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम्॥ ९ ॥
कथं दशरथाज्जातः शुभाभिजनकर्मणः । जानन्धर्ममधर्मं च कुर्यां कर्म जुगुप्सितम् ॥ १० ॥

शुचिसुखचिदात्मनो नित्याशुचिदुःखजडेन देहेन तदीयश्वासंबन्धात् । यथा च जीवन्स्वकर्मानुरूपं संसरति तथा मृतोऽपि स्वकर्मानुरूपं परत्र । किंच यथा जीवन्सर्वैः संबद्धस्तथा मृतोऽपि सर्वात्मत्वादस्य । किंच यथाऽसति अविद्यमाने न रागो जायते तथा सति विद्यमानेऽपि रागो न युक्तः। यथा वा सति साधौ द्वेषो न युक्तस्तथाऽसति असाधावपि द्वेषो न युक्तः । किंच यथाऽसति प्रपञ्चेऽनुरागस्तथा सति ब्रह्मणि युक्तः । किंच सति ब्रह्मणि तन्निष्ठितस्य यथा न बन्धो मुक्तिश्च भवति तथा लोकसंग्रहार्थमसन्निष्ठस्यापि न बन्धो मुक्तिश्च भवति । यस्य त्वादृशस्य एष उक्तार्थविषयको बुद्धिलाभः स्यात्स राजयोगी केन परितप्येत न केनापि हेतुनेत्यर्थः ॥ ४ ॥

रा० टी०—यथेति । यथा मृतः लोकान्तरं प्राप्तः तथा जीवन् इह लोके स्थितोऽपि यथा सति सत्पुरुषे यथाऽपराधदण्डस्तथा असति असत्पुरुषेऽपि यस्य एष बुद्धिलाभः स्यात् स केन हेतुना परितप्यते न केनापीत्यर्थः ॥ ४ ॥

गो० टी०—पितृवियोगादिजनितदुःखेन मया कथितमिति हि भवतोक्तं मम तादृशदुःखप्रसङ्ग एव नास्तीत्याह—यथा मृत इति । मृतः पुरुषो यथा द्वेषविषयो न भवति जीवन्नपि तथा, यथा असति तथा सति अविद्यमाने वस्तुनि यथा रागो नास्ति विद्यमाने वस्तुन्यपि तथा इत्येष बुद्धिलाभो यस्य स केन हेतुना परितप्येत न केनापीत्यर्थः, भवदुक्तप्रकारेण मम दुःखलेशोऽपि नास्तीति भावः ॥ ४ ॥

५] ति० टी०—परावरज्ञः सप्रपञ्चात्मतत्त्वज्ञः । विषीदितुमित्यार्षम् विषत्तुमित्यर्थः ॥ ५ ॥

रा० टी०—परावरज्ञ इति । हे मनुजाधिप ! यथा त्वं परावरज्ञः निखिलतत्त्वज्ञः तथा यः स्यात् सः पुरुषः एवं व्यसनं दुःखं प्राप्यापि विषीदितुं विषत्तुं नार्हति ॥ ५ ॥

गो० टी०—किमर्थं तर्हि शोकमूलवचनं त्वयोक्तमित्याशङ्क्य भवद्व्यसनासहतयेत्याह—परावरज्ञ इति । यः परावरज्ञः त्रिकालज्ञः आत्मानात्मज्ञो वा परमात्मजीवात्मस्वरूपज्ञो वा सः एवं व्यसनं प्राप्यापि व्यथितुं नार्हति तथा त्वमपीति संबन्धः । अथापि तव राज्यभंशवनवासरूपव्यसनं त्वद्विश्लेषं चाहं कथं सहेयेति भावः ॥ ५ ॥

६] ति० टी०—अमर ईश्वरः स यथा शुद्धसत्त्वोपाधिस्तद्वच्छुद्धसत्त्वप्रधानः । अत्रोपमाशब्दप्रयोगो लोकप्रतारणाद सत्त्वोपाधिरीश्वरस्त्वमेवेति भावः । सर्वज्ञः सर्वविषयकज्ञानरूपोपाधिवृत्तिमान्, सर्वदर्शी सर्वसाक्षी बुद्धिमान्सर्वबुद्धिप्रवर्तकः अन्तर्यामीति यावत् ॥ ६ ॥

रा० टी०—अमर इति । राघव हे राम ! अमरोपमसत्त्वः देवतुल्यपराक्रमः महात्मा सर्वपूज्यस्वरूपः सत्यसङ्गरः सत्यवक्ता सर्वज्ञः निखिलज्ञाता सर्वदर्शी सर्वनियन्ता बुद्धिमान् अतिशयबुद्धिविशिष्टस्त्वमसि ॥ ६ ॥

गो० टी०—अमरेति । अमरोपमेति पृथक्पदं, सत्त्वः सत्त्वगुणसंपन्नः अर्शआद्यच् स्वाश्रितानां सत्त्वगुणकार्यतत्त्वज्ञानप्रवर्तकत्वाद्वा सत्त्व इत्युच्यते " सत्त्वस्यैष प्रवर्तकः" इति हि श्रुतिः । महात्मा महाधैर्यः अत एव सत्यसंगरः सत्यप्रतिज्ञः सर्वज्ञ इत्यादिभिर्भिन्नभिन्नभूतवर्तमानभावियावद्वस्तुज्ञानवत्त्वमुक्तम् ॥ ६ ॥

७] ति० टी०—प्रभवाभवकोविदं भूतानामुत्पत्तिनाशज्ञम्। आसादयितुमवसादयितुम् । एवं च त्वामेवंविधं यद्यपि दुःखं न पीडयति तथापि मादृशं पीडयत्येवेति स्वस्थो भव । मा शोक इत्यस्योत्तरमेतत्पर्यन्तम् ॥ ७ ॥

रा० टी०—नेति । एवं पूर्वोक्तैः गुणैर्युक्तमत एव प्रभवाभवकोविदं प्रवृत्तिनिवृत्तिकारणतत्त्वज्ञाननिपुणं त्वाम् विषह्यतममन्यैरसह्यमपि दुःखमासादयितुमाक्रमितुं नार्हति ॥ ७ ॥

गो० टी०—न त्वामिति । प्रभवाभवकोविदम् उत्पत्तिविनाशज्ञमित्यर्थः, भूतानामिति शेषः । अविषह्यतममपि अस्मदादीनामिति शेषः, दुःखं राज्यभंशवनवासादिहेतुकं नासादयितुमर्हति नाभिभवितुमर्हति ॥ ७ ॥ ८ ॥

८] ति० टी०—मत्कारणान्मद्राज्यनिमित्ततो मेऽनिष्टं मदसंमतमेव अतो भवान्प्रसीदतु । मदीयं राज्यं परिगृह्यात्विति यावत् ॥ ८ ॥

रा० टी०—प्रोषिते इति । मत्कारणात् मदभावहेतोः क्षुद्रया मातृसदृशीत्वेन माननीयया मन्थरया यत्पापं कृतं तत् मे अनिष्टम् ईप्सितं न अतः मम भवान् प्रसीदतु । अयं मातृशब्द आचारक्लिन्नतप्रकृतिककर्तृक्लिन्नः ॥ ८ ॥

९-१०] ति० टी०—धर्मबन्धेन धर्मरूपेण बन्धनेन । इहेदृ-

१ तथेति गो. पाठः । २ एवमिति गो. पाठः । ३ शुद्धाभीति गो. पाठः । ४ अधर्मिष्ठमिति गो. पाठः ।

गुरुः क्रियावान्वृद्धश्च राजा प्रेतः पितेति च । तातं न परिगर्हेऽहं दैवतं चेति संसदि ॥ ११ ॥
को हि धर्मार्थयोर्हीनमीदृशं कर्म किल्बिषम् । [2]स्त्रियः प्रियचिकीर्षुः सन्कुर्याद्धर्मज्ञ धर्मवित्॥ १२ ॥
अन्तकाले हि भूतानि मुह्यन्तीति पुरा श्रुतिः । राज्ञैवं कुर्वता लोके [3]प्रत्यक्षा सा श्रुतिः कृता ॥ १३ ॥
साध्वर्थमभिसंधाय क्रोधान्मोहाच्च साहसात् । तातस्य यदतिक्रान्तं प्रत्याहरतु तद्भवान् ॥ १४ ॥
पितुर्हि [4]समतिक्रान्तं पुत्रो यः साधु मन्यते । तदपत्यं मतं लोके विपरीतमतोऽन्यथा ॥ १५ ॥
तदपत्यं भवानस्तु मा भवान्दुष्कृतं पितुः । [5]एति यत्तत्कृतं कर्म [6]लोको धीरविगर्हितम् ॥ १६ ॥

शापराधविषये इमां सर्वान्तर्यामिणस्तव द्वेषिणीम् अत एव दण्डार्हाम् ॥ ९ ॥ १० ॥

रा० टी०–धर्मेति । धर्मबन्धेन स्त्री न हन्तव्येति वचनरूपबन्धनेन बद्धोऽस्मि अत एव पापकारिणीं पापकर्मप्रयोजिकामत एव दण्डार्हां मातरं मातृसदृशीं मन्थरां तीव्रेण दण्डेन न हन्मि ॥ ९ ॥

गो० टी०–धर्मबन्धेनेति । धर्मबन्धेन धर्मपाशेन ॥९॥

रा० टी०–कथमिति । शुभाभिजनकर्मणः शुभे अभिजनकर्मणी यस्य तस्माद्दशरथाज्जातः अत एव धर्मधर्मं च जानन् अहं जुगुप्सितं कर्म कथं कुर्याम् ॥ १० ॥

गो० टी०–कथमिति । जुगुप्सितं लोकगर्हितम् ॥१०॥

११] ति० टी०–मातृवत्पितापत्न्याप्यकारीत्याह—गुरुरिति । क्रियावान्कृतश्रेष्ठक्रतुः । प्रेतः सञ्श्राद्धादौ ॥ ११ ॥

रा० टी०–गुरुरिति । क्रियावान् निखिलविहितक्रियाविशिष्टः वृद्धः ज्ञानवयोभ्यामधिकः अत एव गुरुःपूजनीय इत्यर्थः, प्रेतः लोकान्तरं प्राप्तः यो राजा पिता तं दैवतं तातं संसदि सभायामहं न गर्हे ॥ ११ ॥

गो० टी०–गुरुरिति । क्रियावान् यज्ञादिक्रियावान् संसदि सभायाम् ॥ ११ ॥

१२] ति० टी०–एवं गुरुत्वातिहेतुभिर्यत्पत्न्यहं न परिगर्हे तथापि वस्तुतो गर्ह्य एवेत्याह—को हीति । को हि धर्मवित् धर्मार्थयोर्हीनं ताभ्यां हीनं कामप्रधानम् ॥ १२ ॥

रा० टी–नन्वत्र किं गर्हणीयमित्यत आह–क इति । किल्बिषं सर्वजनदुःखहेतुत्वेन पापरूपमत एव जुगुप्सितं सुजनैर्निन्दितमत एव हीनं त्यक्तव्यमीदृशं प्रतिज्ञाताभिषेकनिवृत्तिरूपं प्रियपुत्रप्रव्राजनरूपं कर्म धर्मार्थयोः हेतोः स्त्रियाः प्रियं चिकीर्षुः सन् धर्मविद् धर्मरचनाशीलः कः पुरुषः कुर्यात् न कोऽपीत्यर्थः । इत्थेन राज्याभिषेकनिवर्तनं नोचितमिति सूचितम् ॥ १२ ॥

गो० टी०–क इति । धर्मार्थयोर्हीनं धर्मार्थाभ्यां हीनं कामप्रधानमिति यावत् ॥ १२ ॥

१३] ति० टी०–अन्तकाले मृतिकाले मुह्यन्ति विपरीतबुद्धिं प्राप्नुवन्ति । पुरा श्रुतिः पुरातनी गाथा प्रत्यक्षा सत्या १३

रा० टी०–अन्तेति । अन्तकाले लोकान्तरगमनसमये भूतानि प्राणिनो मुह्यन्ति इति पुरा पौर्वकालिकी या श्रुतिः श्रवणविषयीभूतवाक्यं सा श्रुतिः एवं विवेकराहित्यहेतुकाभिषेकनिवृत्तिं कुर्वता राज्ञा प्रत्यक्षा कृता ॥ १३ ॥

गो० टी०–अन्तकाल इति । अन्तकाले विनाशकाले मुह्यन्ति मोहं प्राप्नुवन्ति विपरीतबुद्धिं प्राप्नुवन्तीति यावत् पुरा श्रुतिः पुरातनी गाथेत्यर्थः ॥ १३ ॥

१४] ति० टी०–क्रोधाद्विषमयैव पास्यामीत्युक्तिसूचिः तात् कैकेयीक्रोधात् तत्क्रोधभयादिति यावत्, मोहात्कैकेयीविषयात् साहसादविमृश्यकारित्वात् तातस्य यदतिक्रान्तम् भावे निष्ठा ज्येष्ठाभिषेकलक्षणसाध्वर्थाननुष्ठानं तत्साध्वर्थमभिसंधाय राजोक्तार्थेषु कतमस्य साधुत्वमिति विचार्य प्रत्याहरतु निवर्तयतु ॥ १४ ॥

रा० टी०–साध्विति । क्रोधात् कैकेयीकोपभयात् मोहात् चित्तविक्षेपाद्वा साहसात् विचाराभावाद्वा अर्थमभिसंधाय अर्थबुद्धिं कृत्वा तातस्य यदतिक्रान्तमभिषेकातिक्रमणं तद्भवान्प्रत्याहरतु निवर्तयतु ॥ १४ ॥

गो० टी०–साध्वर्थमिति । क्रोधात् विषमयैव पास्यामीत्युक्तकैकेयीक्रोधात् मोहात् कैकेयीविषयमोहात् साहसात् साहसकरणात् अविमृश्यकारित्वादिति यावत्, तातस्य यदतिक्रान्तं यद्मर्यातिक्रमणं तत्साध्वर्थमभिसंधाय समीचीनार्थं स्मृत्वा भवान् प्रत्याहरतु निवर्तयतु ॥ १४ ॥

१५] ति० टी०–तदेवोपपादयति–पितुर्हीति। अतिक्रान्तमतिक्रमस्तं साधु मन्यते तद्वैपरीत्याचरणेन साधु यथा तथा संपादयति–तदपत्यं मतमपतनहेतुत्वादपत्यशब्दवाच्यम् ॥१५॥

रा० टी०–पितुरिति । पितुः समतिक्रान्तं साधुपथात्प्रच्युतिं यः साधु मन्यते बोधयति तत्प्रच्युतिं तिरवर्तयतीत्यर्थः, तदेवापत्यं लोके मतमतो विपरीतं साधु न मन्यते इत्यर्थः, तर्हि अन्यथा अपत्यं न भवतीत्यर्थः ॥ १५ ॥

गो० टी०–पितुरिति । साधु मन्यते साधु कर्तुं मन्यत इत्यर्थः । तदपत्यं मतं पितुरपतनहेतुत्वात्तदेवापत्यत्वेन संमतम् ॥ १५ ॥

16] ति० टी०–अपत्यमस्तु अन्वर्थापत्यमस्तु । मा भवान्दुष्कृतं पितुः अनुमन्यतामिति शेषः । तदेवाह–

१ गर्ह्यमिति गो. पाठः । २ स्त्रियाः प्रियमिति गो. रा. पाठ । ३ प्रत्यक्षमिति गो. पाठः । ४ यदतीति गो. पाठः । ५ अभिपद्येति गो. पाठः । ६ लोके इति गो. रा. पाठः ।

कैकेयीं मां च तातं च सुहृदो बान्धवांश्च नः । पौरजानपदान्सर्वांस्त्रातुं सर्वमिदं भवान् ॥ १७ ॥
क्व चारण्यं क्व च क्षात्रं क्व जटाः क्व च पालनम् । ईदृशं व्याहतं कर्म न भवान्कर्तुमर्हति ॥ १८ ॥
एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम् । येन शक्यं महाप्राज्ञ प्रजानां परिपालनम् ॥ १९ ॥
कश्च प्रत्यक्षमुत्सृज्य संशयस्थमलक्षणम् । आयतिस्थं चरेद्धर्मं क्षत्रबन्धुरनिश्चितम् ॥ २० ॥
अथ क्लेशजमेव त्वं धर्मं चरितुमिच्छसि । धर्मेण चतुरो वर्णान्पालयन्क्लेशमाप्नुहि ॥ २१ ॥
चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमुत्तमम् । आहुर्धर्मज्ञ धर्मज्ञास्तं कथं त्यक्तुमिच्छसि ॥ २२ ॥

अतीति । यत्तत्कृतं दशरथकृतं कर्म तदति धर्ममतिक्रम्य प्रवृत्तम् अत एव लोके धीरैर्विगर्हितम् अतस्तदनुमननमनुचितमिति पितृवचसः परिपालयत्वे युक्तं धर्मवदभिषेकवचनमेव परिपालयेति व्यङ्ग्यम् ॥ १६ ॥

रा० टी०—तदिति । यतः अतियत् अतिप्रयत्नवान् भवान् तदपत्यम् अतः धीरविगर्हितं धीरैर्निन्दितं यत् पितुः कृतं निष्पादितं दुष्कृतं कर्तुमनर्हं कर्म तद्वान् मास्तु न स्थापयतु अभिषेकं कारयत्वित्यर्थः । अन्तर्भावितणिजर्थोऽस्तिः॥१६॥

गो० टी०—तदिति । तदपत्यं भवानस्तु तादृशमपत्यमस्तु नाभिपत्ता प्राप्तुं नार्हतीत्यर्थः ॥ १६-१८ ॥

१७] ति० टी०—सर्वांस्त्रातुमिदं सर्वं मदुक्तं भवाननुमन्यतामिति भावः ॥ १७ ॥

रा० टी०—कैकेयीमिति । कैकेय्यादीन् त्रातुमर्हतीति शेषः ॥ १७ ॥

१८] ति० टी०—पितृकृतवनवासस्य गर्हितत्वमेवाह—क्वेति ॥ १८ ॥

रा० टी०—वनवासस्यायोग्यतां वर्णयन्नाह—क्वेति । क्व अरण्यं क्व च क्षात्रं क्व जटाः पालनं क्व च द्वयोर्द्वन्द्वयोः परस्परं संयोगः न संभवतीत्यर्थः, अतः व्याहतं विरुद्धम् ईदृशं संयोजनरूपं कर्म कर्तुं भवान्नार्हति ॥ १८ ॥

१९] ति० टी०—ननु वानप्रस्थाश्रमः क्षत्रियस्याप्यस्ति तत्राह—एष हीति । येनाभिषेचनेन पालनं तद्रूपधर्मसंपादनं प्रथम आयो धर्म इत्यर्थः । एवं च स आश्रमो राज्यपरिपालनोत्तरं वार्धके उचितो नापि स मुख्यो धर्म इति भावः॥१९॥

रा० टी०—ननु वानप्रस्थधर्मस्य क्षत्रियाणां विहितत्वात्कथं विरोध इत्यत आह—एष इति । हे महाप्राज्ञ! येन धर्मेण प्रजानां परिपालनं शक्यं स एव अभिषेचनं धर्मः प्रथमः पूर्वं विहितः, अतेन पूर्वप्राप्तधर्मस्य परित्यागोऽनुचित इति सूचितम् ॥ १९ ॥

गो० टी०—तापसधर्मावलम्बनं क्षत्रियाणामप्यस्तीत्याशङ्क्याह—एष हीत्यादिना ॥ १९ ॥

२०] ति० टी०—तस्याप्रुत्यत्वमेव दर्शयति—कश्चेति। प्रत्यक्षं प्रत्यक्षसुखसाधनं धर्मं प्रजापालनरूपमुत्सृज्य संशयस्थमप्रत्यक्षत्वात्को हि तद्वेद यथमुष्मिंल्लोकेऽस्ति वा न वेति श्रुत्याभिमीय मानसं देहास्पदम् अलक्षणमसुखलक्षणम् आयतिस्थमुत्तरवयःप्राप्यम् अनिश्चितमनित्यानुष्ठानम् । नहि प्रजापालनवत्क्षत्रियस्य नित्यप्राप्तोऽयं धर्मः नित्यत्वे तद्रहितदशरथादेः पापित्वप्रसङ्गः । तं क्षत्रबन्धुः क्षत्राणां बन्धुरिति समासेन क्षत्रियकुलसंमत इत्यर्थः । निन्दायां बन्धुच्प्रत्ययान्तस्तु निन्यक्षत्रियादिवाचीति कतकः । कश्चेत् न कोऽपीत्यर्थः । अन्ये तु—क्षत्रबन्धुरपि निन्यक्षत्रियोऽपि राज्यानर्होऽपीदृशं धर्मं न चरेत्, किं पुनर्वाच्यं राज्याधिकारीत्यर्थमाहुः ॥ २० ॥

रा० टी०—वस्तुतस्तु अयमेव धर्मः क्षत्रियैः कर्तव्य एवेति बोधयन्नाह—क इति । प्रत्यक्षं शास्त्रतो लोकतश्च पूर्वं प्राप्तिमत्त्वेन प्रत्यक्षसुखरूपफलप्रापकत्वेन चेन्द्रियविषयीभूतं पालनरूपं धर्ममुत्सृज्य त्यक्त्वा आयतिस्थमुत्तरकालभावि अत एव अलक्षणं न लक्षयति सुखं साक्षादनुभावयति अत एव अनिश्चितमेतस्मिन् काले एतत्सुखं भविष्यतीति निश्चयरहितमत एव संशयस्थं संशयविषयीभूतं धर्मं कः क्षत्रबन्धुश्चरेत् न कोऽपीत्यर्थः। तथा च श्रुतिः "को हि तद्वेद यथमुष्मिँल्लोके अस्ति न वा" इति ॥ २० ॥

गो० टी०—क इति । प्रत्यक्षं परिदृश्यमानत्यागभोगयुक्तं धर्मं परलोकश्रेयःसाधनं प्रजापालनरूपं धर्ममुत्सृज्य संशयस्थमप्रत्यक्षमङ्गलोपादिसंभावनया संशयितफलसिद्धिकमित्यर्थः, अलक्षणं लक्षणरहितं क्रियाशक्तिरूपं वेति दुर्निरूपमित्यर्थः, आयतिस्थं कालान्तरभाविफलम् अनिश्चितं क्षत्रियेण प्रथममिदमनुष्ठेयमिति केनापि प्रमाणेनानिश्चितं तापसधर्मं कः क्षत्रियः चरेत् न कोऽपीत्यर्थः ॥ २० ॥

२१] ति० टी०—ननु शरीरक्लेशसाध्यधर्म एवान्तरङ्गस्तत्राह—अथेति । पक्षान्तरेऽथेतिशब्दः ॥ २१ ॥

रा० टी०—ननु शरीरक्लेशदानमुत्कृष्टो धर्म इत्यत आह—अथेति । क्लेशजं शरीरक्लेशजनितमेव धर्मं चरितुं कर्तुं यदीच्छसि तर्हि धर्मेण चतुरो वर्णान् पालयन् वाचाद्वारीकृत्य रक्षन् क्लेशं शरीरखेदमाप्नुहि ॥ २१ ॥

गो० टी०—अथ क्लेशजमेव त्वं धर्मं चरितुमिच्छसि तथापि चातुर्वर्ण्यपालनतत्तद्धर्मस्थापनादिक्लेशयुक्तत्वाद्राज्यपालनमेवाचरेत्याह—अथेति ॥ २१ ॥

२२] ति० टी०—नन्वत्रमत्वेन श्रुतत्वात्तदाश्रमकरण

१ त्रातिति गो० पाठः । २ आश्रममिति गो० रा० पाठः । ३ प्राहुरिति गो० पाठः ।

श्रुतेन बालः स्थानेन जन्मना भवतो ह्यहम् । स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥ २३ ॥
हीनबुद्धिगुणो बालो हीनस्थानेन चाप्यहम् । भवता च विनाभूतो न वर्तयितुमुत्सहे ॥ २४ ॥
इदं निखिलमैष्यग्र्यं राज्यं पित्र्यमकण्टकम् । अनुशाधि स्वधर्मेण धर्मज्ञः सह बान्धवैः ॥ २५ ॥
इहैव त्वाभिषिञ्चन्तु सर्वाः प्रकृतयः सह । ऋत्विजः सवसिष्ठाश्च मन्त्रविन्मन्त्रकोविदाः॥ २६ ॥
अभिषिक्तस्त्वमस्माभिरयोध्यां पालने व्रज । विजित्य तरसा लोकान्मरुद्भिरिव वासवः ॥ २७ ॥
ऋणानि त्रीण्यपाकुर्वन्दुर्हृदः साधु निर्दहन् । सुहृदस्तर्पयन्कामैस्त्वमेवात्रानुशाधि माम् ॥ २८ ॥
अद्यार्य मुदिताः सन्तु सुहृदस्तेऽभिषेचने । अद्य भीताः पलायन्तु दुष्प्रदास्ते दिशो दश ॥ २९ ॥
आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ । अद्य तत्रभवन्तं च पितरं रक्ष किल्बिषात् ॥ ३० ॥

युक्तमत आह–चतुर्णामिति । सर्वेषां गृहस्थपाल्यत्वादिति भावः ॥ २२ ॥

रा० टी०–चतुर्णामिति । हे धर्मज्ञ ! चतुर्णामाश्रामाणां मध्ये गार्हस्थ्यं श्रेष्ठं त्रयाणामाश्रयीभूतत्वात्प्रधानमाश्रममाहुः तमाश्रमं त्यक्तुं कथमिच्छसि न त्यक्तव्य इत्यर्थः। 'श्रेष्ठमाश्रमम्' इति पाठः ॥ २२ ॥

गो० टी०–सर्वाश्रमधर्मापेक्षया श्रेष्ठतमो गार्हस्थ्यधर्मः कथं त्यज्यत इत्याह–चतुर्णामिति ॥ २२ ॥

२३] ति० टी०–श्रुतेन विद्यया बालोऽवरः जन्मना तत्संपाद्येन स्थानेन कनिष्ठभ्रातृत्वेन च बालः ॥ २३ ॥

रा० टी०–नन्वं त्वयैव पाल्यतामित्यत आह–श्रुतेनेति। जन्मना अवरकालप्रादुर्भूत्या अत एव स्थानेन उचितनिम्नदेशस्थित्या च श्रुतेन विद्यया च भवतो बालः अवरो यः सोऽहं भवति तिष्ठति सति भूमिं कथं पालयिष्यामि ॥ २३ ॥

गो० टी०–स्वशक्त्यापि भवतैव राज्यं पालयितव्यमित्याह–श्रुतेनेति । श्रुतेन विद्यया स्थानेन पदेन प्राप्तिक्रमेणेति यावत् ॥ २३ ॥

२४–२५] ति० टी०–हीनो बुद्धिगुणः सत्त्वं यस्य सः तेन हीनसत्त्वगुण इत्यर्थः । हीनस्थानेन चोपलक्षितः अत एव बालः त्वया विना वर्तयितुं जीवितुमपि नोत्सहे किं पुना राज्यं पालयितुमित्यर्थः ॥ २४ ॥ २५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–हीनेति। हीनाः त्वद्बुद्धिगुणेभ्यः अवराः बुद्धिगुणाः यस्य सः अत एव हीनस्थानेन निम्नदेशस्थित्या उपलक्षितः भवता विनाभूतो रहितश्च बालोऽहं वर्तयितुं प्रजाः पालयितुं नोत्सहे ॥ २४ ॥

रा० टी०–इदमिति । अकण्टकं विघ्नरहितम् अग्र्यं पौर्वकालिकं निखिलम् इदं पित्र्यं राज्यं स्वधर्मेण अनुशाधि पालय ॥ २५ ॥

गो० टी०–कथमेवमुच्यते बालत्वस्य ममापि तुल्यत्वात् भवदपेक्षया अहं कियान्हृद इत्यत आह–हीनेति । हीनबुद्धिगुणः सद्गुणबुद्धिरहितः वर्तयितुं स्थातुं भवता विना तूष्णीं स्थातुमपि नोत्सहे किं पुना राज्यं कर्तुमिति भावः॥२४॥२५॥

२६] ति०टी०–सह संभूय मन्त्रविदिति संबोधनम्॥२६॥

रा० टी०–इहेति। हे मन्त्रवित्! सवसिष्ठाः वसिष्ठसहिताः ऋत्विजः प्रकृतयश्च सह एकीभूय इहैव त्वामभिषिञ्चन्तु ॥२६॥

गो० टी०–इहेति । सह संभूय ॥ २६ ॥

२७] ति० टी०–पालने राज्यपरिपालननिमित्तम् । तरसा बलेन । लोकान्शत्रुलोकान्मरुद्भिरिवास्माभिः सह वासव इव त्वं विजित्य तां पालयेति शेषः ॥ २७ ॥

रा० टी०–अभिषिक्त इति । अस्माभिरभिषिक्तस्त्वं तरसा वेगेन लोकान् विजित्य मरुद्भिर्देवैः सहितः वासव इन्द्र इव पालने पालनार्थम् अयोध्यां व्रज ॥ २७ ॥

गो० टी०–अभिषिक्त इति। विजित्य स्थित इति शेषः, मरुद्भिर्देवैः ॥ २७ ॥

२८] ति० टी०–ऋणानीति " जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते " इति श्रुतौ ब्राह्मणपदसमुपलक्षणमिति भावः । अत्रायोध्यायां स्थित्वेति शेषः ॥ २८ ॥

रा० टी०–ऋणानीति । त्रीणि ऋणानि देवऋणादीनि अपाकुर्वन् मोचयन् सन् दुर्हृदः दुष्टहृदयान् निर्दहन् सुहृदः कामैस्तदिच्छाविषयीभूतपदार्थैस्तर्पयन् सन् त्वमेवात्रायोध्यायां मामनुशाधि शिक्षय ॥ २८ ॥

गो टी०–रामं राज्याङ्गीकरणाय प्रोत्साहयति–ऋणानीत्यादिना । दुर्हृदः शत्रून् ॥ २८ ॥ २९ ॥

२९] ति० टी०–दुष्प्रदा दुःखप्रदाः ॥ २९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अद्येति । हे आर्य ! ते अभिषेचने सुहृदः मुदिताः सन्तु ये दुःप्रदाः दुःखदानमनस्काः ते भीताः सन्तः पलायन्तु ॥ २९ ॥

३०] ति०टी०–आक्रोशं निन्दाम् । तत्रभवन्तं पूज्यम्३०

रा० टी०–आक्रोशमिति। हे पुरुषर्षभ ! मम मातुश्च आक्रोशं जनापवादं प्रमृज्य तत्रभवन्तं पूज्यं पितरं किल्बिषात्पश्चात्तापात्रक्ष ॥ ३० ॥

---

१ अनायमिति गो. पाठः । २ धर्मज्ञेति गो. पाठः । ३ मन्त्रविदिति गो. पाठः । ४ पलायन्तां दुर्हृदस्ते इति गो. पाठः ।

शिरसा त्वाभियाचेऽहं कुरुष्व करुणां मयि । बान्धवेषु च सर्वेषु भूतेष्विव महेश्वरः ॥ ३१ ॥
अथवा पृष्ठतः कृत्वा वनमेव भवानितः । गमिष्यति गमिष्यामि भवता सार्धमप्यहम् ॥ ३२ ॥
तथाभिरामो भरतेन ताम्यता प्रसाद्यमानः शिरसा महीपतिः ।
न चैव चक्रे गमनाय सत्त्ववान्मतिं पितुस्तद्वचने प्रतिष्ठितः ॥ ३३ ॥
तदद्भुतं स्थैर्यमवेक्ष्य राघवे समं जनो हर्षमवाप दुःखितः ।
न यात्ययोध्यामिति दुःखितोऽभवत्स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितः ॥ ३४ ॥
तमृत्विजो नैगमयूथवल्लभास्तथा विसंज्ञाश्रुकलाश्च मातरः ।
तथा ब्रुवाणं भरतं प्रतुष्टुवुः प्रणम्य रामं च ययाचिरे सह ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

गो० टी०—आक्रोशमिति । आक्रोशं शापम् 'शाप आक्रोश आक्षेप' इति हलायुधः । जनकर्तृकमिति शेषः । तत्रभवन्तं पूज्यं तत्रभवानत्रभवानिति शब्दौ वृद्धैः पूज्येते ॥ ३० ॥

३१] ति० टी०—त्वा त्वाम् । मयि बान्धवेषु च करुणां कुर्विति संबन्धः ॥ ३१ ॥

रा० टी०—शिरसेति । शिरसा नम्रीभूतमूर्ध्ना त्वा त्वामभियाचे प्रार्थये भूतेषु महेश्वरो महादेव इव करुणां दयां कुरुष्व ३१

गो० टी०—शिरसेति । मयि बान्धवेषु च करुणां कुर्विति संबन्धः । महेश्वरो विष्णुः । 'यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परः स महेश्वरः' इति । पूर्वप्रकृतदहरविद्याकरणमन्त्रप्रणवप्रकृतिभूताकारवाच्यो महेश्वर इत्युक्तेः । दहरोपास्यश्चापहतपाप्मत्वादिगुणकः "पुरुषोत्तमः स उत्तमः पुरुषः" इति तत्समानप्रकरणे छान्दोग्ये श्रवणात् अपहतपाप्मत्वं च रुद्रस्य नास्ति अनपहतपाप्मा वा अहमस्मीति रुद्रेणैवोक्तेः । भूतसंहाराधिकृतस्य रुद्रस्य भूतेषु करुणा च गगनकुसुमतुल्या अतः "स एकाकी न रमेत न ततो विजुगुप्सितः" इत्यादि श्रुतिस्मृत्यादिभिः सुप्रसिद्धापारकारुण्यवात्सल्यादिगुणगणः पुरुषोत्तम एव महेश्वर इति दिक् ॥ ३१ ॥ ३२ ॥

३२] ति० टी०—पृष्ठतः कृत्वा तिरस्कृत्य । मत्प्रार्थनामिति शेषः । इतोऽपि वनमेव जनसंबाधभयेनास्माद्वनादपि वनान्तरमित्यर्थः ॥ ३२ ॥

रा० टी०—अथवेति । अथवा यदि पृष्ठतः कृत्वा मत्प्रार्थनां तिरस्कृत्य इतो अस्मादेव वनमेव भवान् गमिष्यति तदा भवता सार्धम् अहमपि गमिष्यामि ॥ ३२ ॥

३३] ति० टी०—ताम्यता ग्लायता गमनाय अयोध्यां प्रतीति शेषः ॥ ३३ ॥

रा० टी०—तथेति । ताम्यता ग्लानिं प्राप्नुवता भरतेन तथा तेन प्रकारेण प्रसाद्यमानः पितुस्तद्वचने तदाज्ञाविषयीभूतवनवासे प्रतिष्ठितः कृतनिश्चयः रामः गमनाय मतिं नैव चक्रे ३३

गो० टी०—तथेति । गमनाय अयोध्यां प्रतीति शेषः । तद्वचने तस्मिन् वचने ॥ ३३ ॥

३४] ति० टी०—तत्स्थैर्यं पितृवचनस्थितिस्थैर्यम् । दुःखहर्षयोर्युगपत्प्रवृत्तौ निमित्तं स्वयमेव व्याकरोति कविः—न यातीति ॥ ३४ ॥

रा० टी०—तदिति । अद्भुतं प्राकृतविलक्षणं स्थैर्यं सत्ये व्यवस्थितिं राघवे अवेक्ष्य दुःखितो जनः समं दुःखेन सहितं हर्षमवाप । तदेव विवृण्वन् आयोध्यां न याति इति हेतोः दुःखितः स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितश्चाभवत् जन इति शेषः ॥ ३४ ॥

गो० टी०—तदद्भुतमिति । समं युगपत् ॥ ३४ ॥

३५] ति० टी०—नैगमाः पुरे भवाः 'निगमो निश्चये वेदे पुरे पथि वणिक्पथे' इति । तद्यूथवल्लभास्तद्गणमुख्याः । विसंज्ञा विचित्ताश्च ता अश्रुकला अश्रुप्रचुराश्च ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय-
आदिकाव्येऽयोध्याकाण्डे षडुत्तरशततमः सर्गः ॥१०६॥

रा० टी०—तमिति । ऋत्विगादयः विसंज्ञा एव अश्रुकला मातरश्च सह एककालावच्छेदेनैव तथा ब्रुवाणं भरतं प्रतुष्टुवुः प्रशशंसुः तं रामं प्रणम्य चकारेण यथोचितं प्रत्यभिवाद्य सह-भरतप्रार्थनासमानकाले ययाचिरे प्रार्थयामासुः । तत्र नैगमाः पुरवासिनः 'निगमो निश्चये वेदे पुरे पथि वणिक्पथे' इति वैजयन्ती । यूथवल्लभा मन्त्र्यादिगणस्वामिनः प्रणम्य एव रामं स्तमिति कर्मधारयो वा ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामयणशिरोम-
णावयोध्याकाण्डे षडधिकशततमः सर्गः ॥१०६॥

गो० टी०—तामिति । नैगमयूथवल्लभाः निगमः पुरं तत्र भवाः नैगमाः । 'निगमो निश्चये वेदे पुरे पथि वणिक्पथे' इति वैजयन्ती । यूथवल्लभा गणमुख्याः विसंज्ञाश्रुकलाः विगतसंज्ञाः अश्रुक्लिन्नाश्चेत्यर्थः ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-
ऽयोध्याकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

---

१ अथेतदिति गो. पाठः । २ तथाहीति गो. पाठः । ३ व्यवस्थित इति गो. पाठ । ४ तदेति गो. पाठः ।

सप्तोत्तरशततमः सर्गः ।

स्वस्मै दशरथकृतराज्यदाने कैकेय्यां तस्य कामासक्तिं मन्वानं भरतं राज्यदाने कन्याशुल्कं प्रत्युपकृतं चेत्युभयोर्हेतुत्वं दशरथे दोषसंसर्गशून्यत्वं च प्रदर्श्य पुत्रशब्दनिर्वचनेन पितृत्तारणमेव पुत्रेतिकर्तव्यमतस्तदादिष्टं राज्यमेवानुशाधीति रामस्तं प्रवर्तयति ।

पुनरेवं ब्रुवाणं तं भरतं लक्ष्मणाग्रजः । प्रत्युवाच ततः श्रीमान्ज्ञातिमध्ये सुसत्कृतः ॥ १ ॥
उपपन्नमिदं वाक्यं यस्त्वमेवमभाषथाः । जातः पुत्रो दशरथात्कैकेय्यां राजसत्तमात् ॥ २ ॥
पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् । मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ॥ ३ ॥
देवासुरे च संग्रामे जनन्यै तव पार्थिवः । संप्रहृष्टो ददौ राजा वरमाराधितः प्रभुः ॥ ४ ॥
ततः सा संप्रतिश्राव्य तव माता यशस्विनी । अयाचत नरश्रेष्ठं द्वौ वरौ वरवर्णिनी ॥ ५ ॥
तव राज्यं नरव्याघ्र मम प्रव्राजनं तथा । तैच्च राजा तथा तस्यै नियुक्तः प्रददौ वरम् ॥ ६ ॥

१] ति० टी०–रामो राजनियोगपालनमेव परमो धर्मो बहूनां सुखसाधनत्वादित्याशयेनावददित्याह–पुनरिति ॥१॥

रा० टी०–भरतवचनश्रवणानन्तरकालिकरामोक्तिं वर्णयन्नाह–पुनरित्यादिभिः । ज्ञातिमध्ये सुसत्कृतो रामः एवं ब्रुवाणं भरतं प्रत्युवाच ॥ १ ॥

गो० टी०–पुनरित्यादि–अभिसत्कृतः भरतेन स्तोत्रादिना सम्यगभिपूजितः ॥ १ ॥ २ ॥

२] ति० टी०–इदमुक्तवाक्यम् उपपन्नं युक्तिमत् । तत्र हेतुः–जात इत्यादि ॥ २ ॥

रा० टी०–तदाकारमाह–उपपन्नमित्यादिभिः । राजसत्तमात् राजश्रेष्ठात् दशरथात् जातस्त्वं यत् वाक्यम् अभाषथाः तत् उपपन्नं युक्तमेव ॥ २ ॥

३] ति० टी०–इदानीं त्वया राज्यस्य मया वनवासस्य चाकरणे राज्ञः प्रतिज्ञाहानिकृतो महानधर्म इत्याह–पुरेति । तव पुत्र्यां जनिष्यते तस्मै राज्यं दास्यामीति प्रतिज्ञातवानित्यर्थः ॥ ३ ॥

रा० टी०–नन्वेवं मदुक्तस्योपपन्नत्वे तथैव क्रियतामित्यत आह–पुरेत्यादिभिः । हे भ्रातः! नः पिता ते मातरं समुद्वहन् सन् राज्यशुल्कं तव पुत्र्यां यः पुत्रो भविता तस्मै राज्यं दातास्मीति मूल्यं ते मातामहे मातामहसन्निधौ समाश्रौषीत् प्रतिज्ञामकरोत् ॥ ३ ॥

गो० टी०–काममोहेन पित्रा कृतमिति पितरं निन्दन्तं भरतं प्रति रामो मोहहेतुप्रसक्तिरेव नास्तीति दुष्परिहरं हेत्वन्तरमाह–पुरेत्यादिना । राज्यशुल्कं समाश्रौषीत् तव पुत्रिकायां यो जनिष्यते तस्मै राज्यं दास्यामीति प्रतिज्ञां कृतवान् ॥ ३ ॥

४] ति० टी०–नन्वेवं 'ऊढायां नर्मविवाहे च हृत्यर्थे प्राणसंकटे । गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥' इति स्मृतेः कौसल्यायां विद्यमानायां कैकेयीविवाहस्य नर्मविवाहत्वात्तत्प्रतिज्ञाहानिर्न दोषायेत्यत आह–देवासुरे चेति । देवासुरे तत्संबन्धिनि । एवं चोपकारप्रत्युपकाररूपत्वादेतदनृते महान्दोष इति भावः । वरं वरद्वयम् ॥ ४ ॥

रा० टी०–देवेति । देवासुरे सङ्ग्रामे च तव जनन्यै संप्रहृष्टः राजा अत्यनुरागवान् पार्थिवः नः पिता वरं वरद्वयं ददौ ॥४॥

गो० टी०–दैवासुर इति । दैवासुरे देवासुरसंबन्धिनि वरं वरद्वयम् ॥ ४ ॥

५] ति० टी०–ततो हेतोः संप्रतिश्राव्य प्रतिज्ञां कारयित्वा ॥ ५ ॥

रा० टी०–तत इति । ततः वरद्वयप्रदानाद्धेतोः सा यशस्विनी वरवर्णिनी विलक्षणगौराङ्गी किंच वरदानदृत्तान्तवर्णनकर्त्री तव माता संप्रतिश्राव्यं संस्मार्य किंच पूर्वदत्तं वरद्वयमिदानीमवश्यं ददामीति प्रतिज्ञां कारयित्वा नरश्रेष्ठं राजानं तव राज्यं मम प्रव्राजनं च द्वौ वरौ अयाचत वरं निपुत्रस्तया प्रार्थितो राजा तस्यै तव मात्रे प्रददौ । श्लोकद्वयमेकान्वयि । जात्यभिप्रायेणैकवचनम् ॥ ५ ॥ ६ ॥

गो० टी०–तत इति । तव माता संप्रतिश्राव्य शपथं कारयित्वा ततः द्वौ वरौ अयाचतेति संबन्धः ॥ ५ ॥

६] ति० टी०–याचनप्रकारमाह–तवेति । नियुक्तो वरबन्धेन नियोजितः । तद्वरं तद्रूपवरम् ॥ ६ ॥

गो० टी०–याच्ञाप्रकारमाह–तवेत्यादिना । नन्वेवं कैकेयी स्वोद्वाहकाले कन्याशुल्कत्वेन भरतस्य प्राप्तं राज्यं वरविषयत्वेन कथमयाचत, उच्यते बाल्यदृत्तान्तत्वाच्चिरकालान्तरितत्वाच्च सन्निहितं वरद्वयमेव याचितवतीति न दोषः । मध्ये प्राप्तस्यापि वरद्वयस्य किं न स्मरसि कैकेयीति मन्थरया स्मारितत्वात् चिरकालदृत्तान्तस्य विस्मरणमुपपन्नमेव । नन्वेवं दशरथ उद्वाहकाले कैकेयीपित्राय प्रतिश्रुतं राज्यं रामाय दातुं कथमनुयुक्तवान् सत्यम् 'उद्वाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे । विप्रस्य चार्थेऽप्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि' इति न्यायेन दोषाभावं हृदि निधाय तथा कृतवानिति न दोषः केकयोऽपि रामगुणानुविद्धतया राज्यं न

१ ऽभीति गो. पाठः । २ यत्त्वमिति गो. पाठः । ३ दैवासुरे इति गो. पाठः । ४ तौ चेति गो. पाठः । ५ तदेति गो. पाठः । ६ वरानिति गो. पाठः ।

तन पित्राहमप्यत्र नियुक्तः पुरुषर्षभ । चतुर्दश वने वासं वर्षाणि वरदानिकम् ॥ ७ ॥
सोऽहं वनमिदं प्राप्तो निर्जनं लक्ष्मणान्वितः । सीतया चाप्रतिद्वन्द्वः सत्यवादे स्थितः पितुः ॥ ८ ॥
भवानपि तथेत्येव पितरं सत्यवादिनम् । कर्तुमर्हसि राजेन्द्र क्षिप्रमेवाभिषिञ्चनात् ॥ ९ ॥
ऋणान्मोचय राजानं मत्कृते भरत प्रभुम् । पितरं त्राहि धर्मज्ञ मातरं चाभिनन्दय ॥ १० ॥
श्रूयते धीमता तात श्रुतिर्गीता यशस्विना । गयेन यजमानेन गयेष्वेव पितॄन्प्रति ॥ ११ ॥
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्तः पितॄन्यः पाति सर्वतः ॥ १२ ॥
एष्टव्या बहवः पुत्रा गुणवन्तो बहुश्रुताः । तेषां वै समवेतानामपि कश्चिद्गयां व्रजेत् ॥ १३ ॥

हित्राय याचितवान् रामोऽपि सुमन्त्रादिभ्य इदं रहस्यं तवान् अत एव हि ते श्रुत्वन्तोऽनुमान्य स्थितवन्त इति व्यम् ॥ ६ ॥

७] ति० टी०—अत्र दण्डकारण्ये वने चतुर्दश वर्षाणि दानिकं वरदाननिमित्तकं वासं नियुक्तः तं प्रति प्रेरित र्थः । अत्रायमप्यर्थः—देवेभ्यो महत्तवरदाननिमित्तकम् अन्त- मिणा तथा प्रेरणात् अत एवात्र दण्डकारण्ये एतत्प्रसङ्गेनैव प्रयोजननिष्पत्तेरिति ॥ ७ ॥

रा० टी०—तेनेति । तेन हेतुना अत्र अस्मिन् दण्डका- ण्ये वने वरदानिकं वरदानहेतुकं चतुर्दश वर्षाणि वा संप्रति त्राऽहं नियुक्तः ॥ ७ ॥

गो० टी०—तेनेति । तेन कैकेय्यै प्रतिश्रुतराज्येन अत्र । दण्डकारण्ये वरदानिकं वरदाननिमित्तकं वासं नियुक्त इति न्धः ॥ ७ ॥

८] ति० टी०—नन्वु वने रक्षआदिभ्यो नानादुःखसंभाव- यतोऽप्रतिद्वन्द्व इति । समाधिकबलशून्यहीनः सर्वेऽपि मत्तो नबला एवेति न तद्भयावकाश इति व्यङ्ग्योऽर्थः, आपाततस्तु प्रतिद्वन्द्वः स्पर्धारहितः इति ॥ ८ ॥

रा० टी०—स इति । सः पित्राज्ञप्तः पितुः सत्यवादं स्थितः प्रतिद्वन्द्वः शीतोष्णादिव्यवहारहितोऽहमिदं वनं प्राप्तः ॥ ८ ॥

गो० टी०—स इति । अप्रतिद्वन्द्वः केनापि वारयितुम- श्य इति यावत् ॥ ८ ॥ ९ ॥

९] ति० टी०—तथेत्येव तथैवेति पितृनियुक्त एवेति । र्हसीत्यार्षम् । 'अर्हति' इति पाठान्तरम् अत एव संबोधनं जेन्द्रेति ॥ ९ ॥

रा० टी०—भवानपीति । अभिषेचनात् अभिषेचनेन स्वकर्तृ- राज्यपालनेन राजेन्द्र पितरं सत्यवादिनं कर्तुं भवान् क्षिप्रं क्षिप्रमेवार्हति ॥ ९ ॥

१०] ति० टी०—ऋणात्कैकेयीसंबन्ध्यृणात् । मत्कृते त्प्रीत्यर्थम् । त्राहीत्यार्षम् । अभिनन्दय न तु निन्दय कृतस्यार्थस्य बहूपकारकत्वादिति व्यङ्ग्यम् ॥ १० ॥

रा० टी०—ऋणादिति । हे भरत ! मत्कृते मन्नियोगे सति राजानं पितरं ऋणान्मातृसंबन्ध्यावश्यदेयात् मोचय अत एव मातरमभिनन्दय पितरं त्राहि सत्यप्रतिज्ञत्वपालन- नया रक्ष च । त्राहीत्यत्रात्मनेपदाभावः संज्ञापूर्वकविधेरनि- त्यत्वात्, व्याख्यानान्तरं च चक्रिरेऽन्यत्रेत्यत्रत्यमनोरमायुक्त- दिशाऽवगन्तव्यम् ॥ १० ॥

गो० टी०—ऋणादिति । ऋणान्मोचय राजानं स्वाभि- षेचनेन कैकेय्या ऋणाद्राजानं मोचयेत्यर्थः ॥ १० ॥

११] ति० टी०—स्वोक्तस्यावश्यकत्वे संमतिमाह—श्रूयते इति । गयेषु गयाप्रदेशेषु यजमानेन यागं कुर्वता पितॄन्प्रति पितृप्रीतिमुद्दिश्य ॥ ११ ॥

रा० टी०—पितृवचनपालनस्यावश्यकत्वे शिष्टाचारं प्रमा- णयन्नाह—श्रूयत इत्यादिभिः । गयेषु गयाभिधतीर्थप्रदेशेषु यजमानेन यागं कुर्वता गयेन तदभिधराजेन पितॄन्प्रति गीता कथिता श्रुतिः प्रमाणिकात्वेन वेदसदृशवचनविशेषः श्रूयते॥११॥

गो० टी०—स्वोक्तार्थस्यावश्यकर्तव्यत्वे संमतिमाह—श्रूय- त इत्यादिना । गयेन गयाख्येन गयेषु गयाख्येषु प्रदेशेषु ११

१२] ति० टी०—तां श्रुतिमाह—पुन्नाम्न इति । पुरिति नरकनाम त्रायतेः कः प्रत्ययः । व्युत्पद्यन्तरमाह—पितॄनिति । पितॄन्पाति इत्यर्थे पुत्रस्य पृषोदरादित्वात्साधुत्वम् । प्रितॄनुद्दि- श्य कृतेष्टापूर्तादिना स्वर्लोकप्रापणेन तेषां रक्षणमित्याहुः १२

रा० टी०—नन्वु का सा श्रुतिरित्यत आह—पुन्नाम्न इति । यस्मादेतोः पुन्नाम्नस्तदभिधात् नरकात् पितरं यः सुतत्रायते तस्मादेतोः स पुत्र इति प्रोक्तः संज्ञां प्राप्तः अत एव पितॄन् सर्वतः पाति रक्षति ॥ १२ ॥

गो० टी०—पुन्नाम्न इति । पुन्नाम्नो नरकात्रायत इति पुत्रः पितॄन् पाति तदुद्देशकृतेष्टापूर्तादिना स्वर्लोकं प्रापय्य रक्षतीत्यर्थः ॥ १२ ॥

१३] ति० टी०—गयां पितृस्वर्गसाधनं गयाक्षेत्रम् । एषा च पितॄणां परलोकसाधनं पुत्रेणावश्यं कार्यमित्यर्थे संमतिः १३

रा० टी०—एष्टव्या इति । गुणवन्तः सौशील्यादिगुण- विशिष्टाः बहुश्रुताः अनेकशास्त्रसंपन्नाः बहवः पुत्राः एष्टव्या

१ अर्हतीति गो. रा. पाठः । २ अभिषेचनादिति गो. रा. पाठः । ३ चापि धर्मज्ञमिति गो. पाठः । ४ हि पुरेति गो. पाठः । ५ यशस्विनीति पाठः । ६ यत्पाति वा सुत इति गो. पाठः ।

एवं राजर्षयः सर्वे प्रतीता रघुनन्दन । तस्मात्त्राहि नरश्रेष्ठ पितरं नरकात्प्रभो ॥ १४ ॥
अयोध्यां गच्छ भरत प्रकृतीरुपरञ्जय । शत्रुघ्नसहितो वीर सह सर्वैर्द्विजातिभिः ॥ १५ ॥
प्रवेक्ष्ये दण्डकारण्यमहमप्यविलम्बयन् । आभ्यां तु सहितो वीर वैदेह्या लक्ष्मणेन च ॥ १६ ॥
त्वं राजा भरत भव स्वयं नराणां वन्यानामहमपि राजराण्मृगाणाम् ।
गच्छ त्वं पुरवरमद्य संप्रहृष्टः संहृष्टस्त्वहमपि दण्डकान्प्रवेक्ष्ये ॥ १७ ॥
छायां ते दिनकरभाः प्रबाधमानं वर्षत्रं भरत करोतु मूर्ध्नि शीताम् ।
एतेषामहमपि काननद्रुमाणां छायां तामतिशयनीं शनैः श्रयिष्ये ॥ १८ ॥
शत्रुघ्नस्त्वतुलमतिस्तु ते सहायः सौमित्रिर्मम विदितः प्रधानमित्रम् ।
चत्वारस्तनयवरा वयं नरेन्द्रं सत्यस्थं भरत चराम मा विषीद ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

अष्टोत्तरशततमः सर्गः ।

रामेणाऽऽकुण्ठितवचसि भरते रामे राज्येप्सामुत्पिपादयिषुः कृतनास्तिकमतानुवादो जाबालिनामा महर्षिस्तस्मै राज्योपभोगं रोचयते।

आश्वासयन्तं भरतं जाबालिर्ब्राह्मणोत्तमः । उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः ॥ १ ॥

अभिकाङ्क्षणीयाः । तत्प्रयोजनमाह–समवेतानां प्राप्तानां तेषां पुत्राणां मध्ये कश्चित्पुत्रो गयां व्रजेत् ॥ १३ ॥

गो० टी०–एष्टव्या इति । एष्टव्याः काङ्क्षितव्याः ॥१३॥

१४–१६] ति० टी०–एवं पितृपरलोकसाधनम् १४–१६

रा० टी०–एवमिति । हे रघुनन्दन ! यतः सर्वे राजर्षय एवं प्रतीताः विश्वासं प्राप्तास्तस्माद्धेतोः पितरं नरकात् जनापवादशब्दात् त्राहि ॥ १४ ॥

रा० टी०–रक्षणप्रकारमाह–अयोध्यामिति । अयोध्यां गच्छ प्रकृतीः प्रजा उपरञ्जय पालयेत्यर्थः ॥ १५ ॥

रा० टी०–प्रवेक्ष्य इति । अहमपि अविलम्बयन् सन् दण्डकारण्यं प्रवेक्ष्ये ॥ १६ ॥

गो० टी०–एवमिति । एवमुक्तप्रकारेण प्रतीताः निश्चितवन्तः ॥ १४–१६ ॥

१७] ति० टी०–वन्यानामिति अनेन भाविवानरराजाधिपत्यादि सूचितम् ॥ १७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–त्वमिति द्वाभ्याम् । हे भरत! त्वं नराणां राजा भव राजराट् राजराजोऽप्यहं मृगाणां राजा भवामीति शेषः, अतः संप्रहृष्टस्त्वं पुरवरमयोध्यां गच्छ अहमपि दण्डकान् प्रवेक्ष्ये ॥ १७ ॥

गो० टी०–त्वमिति । मृगाणां राजराट् भवान्नमि मृगाणां रक्षकः सिंहकश्च भवामीत्यर्थः । अत्र मृगशब्देन तत्तुल्या म्लेच्छा लक्ष्यन्ते, यद्वा भाविसुग्रीवरक्षनवालिवधादीनां बीजन्यासोऽयम ॥ १७ ॥

१८] ति० टी०–दिनकरभा इति द्वितीयाबहुवचनम् । वर्षत्रं छत्रम् । शीतां छायामित्यन्वयः ॥ १८ ॥

रा० टी०–छायामिति । हे भरत ! दिनकरभाः सूर्यतेजांसि प्रबाधमानं पराभावयमानं वर्षत्रं छत्रं ते मूर्ध्नि शीतां छायां करोतु, एतेषां काननद्रुमाणां तां शीतामतिशयनीं निबिडां छायामहमपि श्रयिष्ये ॥ १८ ॥

गो० टी०–छायां त इति । वर्षत्रं छत्रम् 'छत्री श्रयिष्य' इति पाठः ॥ १८ ॥

१९] ति० टी०–सौमित्रिर्लक्ष्मणः । चराम विधौ कोट् संपादयामेत्यर्थः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्ताधिकशततमः सर्गः॥१०७॥

रा० टी०–शत्रुघ्न इति । अतुलमतिः शत्रुघ्नस्ते तव सहायोऽस्तु, विदितः प्रसिद्धः सौमित्रिः मम प्रधानमित्रमस्तु, अतः हे भरत ! चत्वारस्तनयवराः पुत्रोत्तमाः वयं नरेन्द्रं पितरं सत्यस्थं सत्यप्रतिज्ञत्वं चराम प्रापयाम अतः मा विषीद ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

गो० टी०–शत्रुघ्न इति । चराम करवामेत्यर्थः ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने सप्तोत्तरशततमः सर्गः ॥१०७॥

१] ति० टी०–भरताश्वासनं कुर्वन्तं रामं धर्मापेतं धर्ममार्गविरुद्धं लोकायतिकमतावलम्बनमिति यावत्, वचः उवाचेत्यन्वयः ॥ १ ॥

रा० टी०–रामकर्तृकाश्वासनानन्तरकालिकं वृत्तान्तमाह–

१ राजनन्देनेति गो.पाठः । २ अन्विति गो.पाठः । ३ राजन्निति गो.पाठः । ४ शयिमीं सुश्रीति गो.पाठः । ५ कुशलमतिरिति गो.पाठः । ६ विषादमिति गो.पाठः ।

साधु राघव मा भूत्ते बुद्धिरेवं निरर्थिका । प्राकृतस्य नरस्येव ह्यार्यबुद्धेस्तपस्विनः ॥ २ ॥
कः कस्य पुरुषो बन्धुः किमाप्यं कस्य केनचित् । एको हि जायते जन्तुरेक एव विनश्यति ॥ ३ ॥
तस्मान्माता पिता चेति राम सज्जेत यो नरः । उन्मत्त इव स ज्ञेयो नास्ति कश्चिद्धि कस्यचित्॥ ४ ॥
यथा ग्रामान्तरं गच्छन्नरः कश्चिद्बहिर्वसेत् । उत्सृज्य च तमावासं प्रतिष्ठेतापरेऽहनि ॥ ५ ॥
एवमेव मनुष्याणां पिता माता गृहं वसु । आवासमात्रं काकुत्स्थ सज्जन्ते नात्र सज्जनाः॥ ६ ॥
पित्र्यं राज्यं समुत्सृज्य स नार्हसि नरोत्तम । आस्थातुं कापथं दुःखं विषमं बहुकण्टकम् ॥ ७ ॥
समृद्धायामयोध्यायामात्मानमभिषेचय । एकवेणीधरा हि त्वां नगरी संप्रतीक्षते ॥ ८ ॥
राजभोगाननुभवन्महार्हान्पार्थिवात्मज । विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥ ९ ॥

आश्वासयन्तमित्यादिभिः । भरतमाश्वासयन्तं रामं धर्मापेतं वेदोक्तधर्मरहितमिदं वचः ब्राह्मणोत्तमः जाबालिरुवाच॥१॥

गो० टी०–एवं रामेणोक्ते निरुत्तरतया स्थितं भरतमालोक्य हितपरतया जाबालिश्चार्वाकमतमाश्रित्योत्तरमाह अष्टोत्तरशततमे–आश्वासयन्तमित्यादिना । ब्राह्मणोत्तम इत्यनेन वक्ष्यमाणं नास्तिकवचनमहृदयमिति द्योत्यते, धर्मापेतं वैदिकधर्मापेतम् ॥ १ ॥

२] ति० टी०–साधु सम्यग्युक्तिमदिदं वच इति पूर्वान्वय्येतत् । इदंशब्दार्थो राघवेत्यादि । प्राकृतस्य पामरस्य नरस्येव निरर्थिका एवं बुद्धिः पितृवचः पालनीयमित्येवंरूपा आर्यबुद्धेस्तपस्विनस्ते मा भूत् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–साध्वित्यादिभिः । हे राघव ! आर्यबुद्धेः प्रशस्तबुद्धिमतः तपस्विनः कर्मनिरतस्य प्राकृतस्य नरस्य निरर्थिका परमार्थरहिता बुद्धिरिव एवं इयं ते बुद्धिः साधु यथा स्यात्तथा मा भूत्, प्राकृतस्येवेत्युक्त्या रामस्य प्राकृतविलक्षणत्वं सूचितम् ॥ २ ॥

गो० टी०–साध्विति । बुद्धिः साधु मा भूत् सम्यक् निवर्त्यतामित्यर्थः ॥ २ ॥

३] ति० टी०–कुतो मा भूदित्यत्र पितापुत्रसंबन्धस्यैव मिथ्यात्वादित्याह–क इति । कस्य पुरुषस्य केनचित्संबन्धात् किमाप्यं किं प्राप्यं न किमपीत्यर्थः, संबन्धाभावादिति भावः । संबन्धाभावे हेतुमाह–एको हीति ॥ ३ ॥

रा० टी०–तद्बुद्धेर्निरर्थकत्वं बोधयन्नाह–क इति । यतः जन्तुः एक एव जायते उत्पद्यते एकः पुत्रादिरहित एव विनश्यति अतः कः पुरुषः कस्य बन्धुः अनुरागवान् केनचित्पुरुषेण कस्य पुरुषस्य किं वस्तु प्राप्यं स्वकीयत्वेन प्राप्यं केनचित्कस्यचित्संबन्धाभावात्सर्वं निरर्थकमित्यर्थः ॥ ३ ॥

गो० टी०–क इति । कस्य पुरुषस्य केनचित्साधनेन किमाप्यं न किमपीत्यर्थः ॥ ३ ॥ ४ ॥

४–५] ति० टी०–यः सज्जेत स उन्मत्त इव ज्ञेयः ॥४॥५॥

६] ति० टी०–आवासमात्रं पान्थानामिव अतो नात्र सज्जनाः सज्जन्ते ॥ ६ ॥

रा० टी०–तस्मादिति । तस्मात्संबन्धाभावाद्धेतोः इयं मम माता अयं च मत्पिता इति बुद्ध्या यः सज्जेत आसक्तो भवेत् सः उन्मत्त इव ज्ञेयः यतः कस्यचित् संबन्धी कश्चिन्नास्ति ॥ ४ ॥

रा० टी०–यथेति । यथा ग्रामान्तरं गच्छन् कश्चिन्नरः बहिः वसेत् अपरे अहनि तमावासमुत्सृज्य परित्यज्य प्रतिष्ठेत अन्यत्र गच्छेत् एवं मनुष्याणां पित्रादिः आवासमात्रं मार्गगृहसदृशम् अतः अत्र पित्रादिषु सज्जनाः न सज्जन्ते। श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–यथेत्यादि । आवासमात्रमिति मार्गस्थसत्रशालायां विश्रमार्थं क्षणं निवासेऽपि तद्विसृज्य गच्छतः पथिकस्य तच्चिन्तानवृत्तिवत् यावत्संश्लेषमेव मातापित्रादयोऽनुवर्तनीयाः विश्लेषे तत्स्मृतिरपि विफला किमुत तत्प्रीत्यर्थकार्याचरणमिति भावः ॥ ५ ॥ ६ ॥

७] ति० टी०–पित्र्यं राज्यमित्यास्तिकमतावलम्बिरामाभिप्रायेणोक्तिः। कापथं वनमार्गम् आस्तिकसेव्यं मार्गं च॥७॥

रा० टी०–पित्र्यमिति । सः ज्ञाततत्त्वस्त्वं राज्यं समुत्सृज्य बहुकण्टकं विषमं निम्नोन्नतविशिष्टमत एव दुःखं दुःखप्रदं कुपथं कुत्सितमार्गमास्थातुं त्वं नार्हसि ॥ ७ ॥

गो० टी०–पित्र्यमिति । रामाभिप्रायेणेदं परप्रतीत्या परो बोधनीय इति न्यायात् कापथं कुत्सितमार्गं दुःखं दुःखप्रदं विषमं यौवनानुचितं बहुकण्टकम् अनेकोपद्रवसहितम् । कापथमित्यनेनानुचितवानप्रस्थमार्ग एवोच्यते ॥ ७ ॥

८–९] ति० टी०–एकवेणीधरत्वं विरहिणीलक्षणम् । त्वा त्वाम् ॥ ८ ॥ ९ ॥

रा० टी०–समृद्धायामिति । आत्मानमभिषेचय हि यतः नगरी अयोध्या एकवेणीधरा सती त्वां संप्रतीक्षते, एकवेणीधरात्वं प्रोषितभर्तृकाया लक्षणं तेनायोध्यानिष्ठोऽत्यनुरागः सूचितः ॥ ८ ॥

रा० टी०–राजभोगानिति । महार्हान् अतिप्रशंसनी-

---

१ मनस्विन इति गो. पाठः । २ यदेक इति गो. पाठः । ३ कश्चित्कश्चिदिति गो. पाठः । ४ परित्यज्येति गो. रा. पाठः । ५ त्वामिति गो. रा. पाठः ।

न ते कश्चिदशरथस्त्वं च तस्य न कश्चन । अन्यो राजा त्वमन्यस्तु तस्मात्कुरु यदुच्यते ॥ १० ॥
बीजमात्रं पिता जन्तोः शुक्रं शोणितमेव च । संयुक्तमृतुमन्मात्रा पुरुषस्येह जन्म तत् ॥ ११ ॥
गतः स नृपतिस्तत्र गन्तव्यं यत्र तेन वै । प्रवृत्तिरेषा भूतानां त्वं तु मिथ्या विहन्यसे ॥ १२ ॥
अर्थधर्मपरा ये ये तांस्ताञ्शोचामि नेतरान् । ते हि दुःखमिह प्राप्य विनाशं प्रेत्य लेभिरे ॥ १३ ॥
अष्टकापितृदेवत्यमित्ययं प्रसृतो जनः । अस्यस्योपद्रवं पश्य मृतो हि किमशिष्यति ॥ १४ ॥

यान् राजभोगान् अनुभवन् सन् त्रिविष्टपे स्वर्गे शक्र इव अयोध्यायां विहर ॥ ९ ॥

गो० टी०—समृद्धायामिति । एकवेणीधरा व्रतपरायणेत्यर्थः, नगरी तदधिदेवता ॥ ८ ॥ ९ ॥

१०] ति० टी०—उक्तं संबन्धाभावमुपसंहरति—न ते इति । मिथ्यापितृवचनाभिनिवेशं मुक्त्वा राज्यं कुर्विति यदुच्यते तत्कुरु । अन्यस्त्वज्जनकादन्यः संप्रति राजा । एवं क्षणभङ्गवादेनान्यत्वं गूढाशयतयोक्तम् । नन्वेवमपि तत्संतानविविष्टतया कश्चित्संबन्धो भवेत्, अन्यथा पितरं विनापि पुत्रोत्पत्तिः स्यादिति चेन्न, तावतापि निमित्तकारणत्वमेव नोपादानत्वम्, तेन यूकालिक्षादेरिव तवापि तेन न कश्चित्संबन्ध इत्याशयः ॥ १० ॥

रा० टी०—नन्वु पित्रा वनवासाय नियुक्तत्वात्कथमेवं शक्यमित्यत आह—नेति । तस्मात्संबन्धाभावाद्धेतोः यन्मयोच्यते तत्कुरु ॥ १० ॥

गो० टी०—न ते कश्चिदिति । यदुच्यते मयेति शेषः ॥ १० ॥

११] ति० टी०—बीजमात्रं निमित्तकारणमात्रम् । मात्रपदेनोपादानत्वव्यावृत्तिः । तर्ह्युपादानं किं तत्राह—ऋतुमन्मात्रेति ऋतुमत्या मात्रेत्यर्थे पुंवद्भावः । यत्तादृश्या मात्रा गर्भे धृतं संयुक्तं परस्परमिलितं शुक्रं शोणितं च तदिह लोके पुरुषस्य शरीरस्य जन्मोपादानकारणं भवतीत्यर्थः । एवं च शुक्रशोणितयोगादाकृष्टपञ्चभूतसमूह एव पुरुषश्चेतनो न तस्य केनचित्संबन्ध इत्याशयः ॥ ११ ॥

रा० टी०—नन्वेतद्देहस्य पितुरुपादानत्वात् कथं संबन्धाभाव इत्यत आह—बीजेति । यतः ऋतुमती चासौ माता च तया संयुक्तं संयोजितं यत् शुक्रं शोणितं च ततस्मादेवास्य इह जन्म, एतेन शुक्रशोणितयोरुपादानत्वं सूचितं पिता बीजमात्रहेतुरेव न तूपादानमित्यर्थः ॥ ११ ॥

गो० टी०—बीजमात्रमिति । पिता जन्तोर्बीजमात्रम् अल्पकारणं प्रधानकारणं तु ऋतुमन्मात्रा संयुक्तं धृतं शुक्रं रुधिरमेव च शुक्रशोणितमेव तत् शुक्रशोणितं पुरुषस्य जन्मकारणम् ॥ ११ ॥

१२] ति० टी०—गत इति । यत्र येषु भूतेषु गन्तव्यं तत्र तेषु गतो लयं प्राप्तः त्वमपि तथैव लयं प्राप्स्यसीति स्थिरस्य कस्यचिदभावात्कः केन संबन्ध इति भावः । उक्ता एषा भूतसमूहरूपस्य तेषु लयप्राप्तिरूपा प्रवृत्तिर्मर्त्यानां स्वभावप्राप्तेति शेषः, अतस्त्वं मिथ्या विहन्यसे राज्यरूपात्पुरुषार्थादिति शेषः ॥ १२ ॥

रा० टी०—नन्वु निमित्तत्वेऽपि संबन्धाभावोऽनुपपन्न इत्यत आह—गत इति । यत्र तेन नृपतिना गन्तव्यं तत्र गतः एतेन एकस्य संबन्धिनो नष्टात्वात्संबन्धोऽपि नष्ट इत्यर्थः, अतः यया पितृत्वादिविषयिण्या प्रवृत्त्या त्वं मिथ्या विहन्यसे पराभाव्यसे सा एषा प्रवृत्तिः भूतानां प्राकृतजन्तूनाम्, एतेन तवायं त्यागो नोचित इति सूचितम् ॥ १२ ॥

गो० टी०—गत इति । तेन नृपेण यत्र येषु गन्तव्यं स नृपतिस्तत्र गतः पञ्चभूतेषु लयं प्राप्त इत्यर्थः, पञ्चभूतमयत्वान्नरपतिशरीरस्य तदतिरिक्तस्य आत्मनोऽभावात् मर्त्यानां मरणशीलानामेषा प्रवृत्तिरयं स्वभाव इत्यर्थः, त्वं तु मिथ्या विहन्यसे मिथ्याभूतेन संबन्धेन पीड्यसे ॥ १२ ॥

१३] ति० टी०—नन्वर्थविघातेऽपि धर्मो मे भविष्यतीत्याह—अर्थेत्यादि । अर्थे प्रत्यक्षसिद्धपुरुषार्थे प्राप्ते तं परित्यज्य ये ये आस्तिका धर्मपरास्तांस्ताञ्शोचामि धर्मफलभोक्तुरभावादिति भावः । तदेवाह—ते हीति । प्रेत्यान्तसमयं प्राप्य विनाशं भेजिरे, न त्वत्रोपार्जितधर्मस्य तत्रावस्थितिरस्ति । 'प्राप्य विनाशं प्रतिपेदिरे' इति पाठान्तरम् ॥ १३ ॥

रा० टी०—अर्थेति । ये ये पुरुषाः अर्थधर्मपराः अर्थधर्मयोरुभयोः कृतश्रमास्तांस्तान् शोचामि तच्छ्रमाणां निरर्थकत्वात्पश्चात्तापं करोमीत्यर्थः । निरर्थकत्वमेवोपपादयति—ते कृतश्रमा जनाः इहास्मिन् भोगसमये दुःखं सत्कर्मश्रमजनितखेदं प्राप्य विनाशं स्वविध्वंसं लेभिरे, एतेन भोगे चिकीर्षोर्विनाशस्यावश्यकत्वात् श्रमस्यैव तेषां लाभ इति सूचितम् ॥ १३ ॥

गो० टी०—अर्थधर्मपरा इति । अर्थधर्मपराः प्रत्यक्षसौख्यं विहाय केवलार्थसंपादनपराः धर्मपराश्च इतरान् केवलप्रत्यक्षसुखानभवपरान् । अर्थधर्मपरविषयशोकहेतुमाह—ते हीति । प्रेत्यापि विनाशं दुःखं भेजिर इति संबन्धः ॥ १३ ॥

१४] ति० टी०—नन्वेवं श्राद्धाद्याचारासंगतिस्तत्राह—अष्टकेति । तत्तदि यत्पितृदेवत्यं श्राद्धकर्मेति तत्र प्रसृतः प्रवृत्तोऽयं जनस्तस्यास्य स्वभोगसाधनस्योपद्रवं नाशं केवलं करोति पश्य विचारय । तामेव विचार्यां युक्तिमाह—मृतो हीति ॥ १४ ॥

रा० टी०—धर्मपराणामज्ञानं बोधयन्नाह—अष्टकेति ।

१ स इति गो. पाठः। २ शुक्रं रुधिरमिति गो. पाठः। ३ मर्त्यानामिति गो.पाठः। ४ भेजिरे इति गो. पाठः। ५ दैवत्यमिति गो.रा.पाठः ।

यदि भुक्तमिहान्येन देहमन्यस्य गच्छति । दद्यात्प्रवसतां श्राद्धं न तत्पथ्यशनं भवेत् ॥ १५ ॥
दानसंवनना ह्येते ग्रन्था मेधाविभिः कृताः । यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज ॥ १६ ॥
स नास्ति परमित्येतत्कुरु बुद्धिं महामते । प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु ॥ १७ ॥
सतां बुद्धिं पुरस्कृत्य सर्वलोकनिदर्शिनीम् । राज्यं सं त्वं निगृह्णीष्व भरतेन प्रसादितः ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

अष्टका तदुपलक्षितश्राद्धकर्मजातं पितृदैवत्यं पितृभोक्तृकमित्यर्थः । इति बुद्ध्या प्रसृतः श्राद्धकर्मणि प्रवृत्तो जनः अन्नस्य जीवद्भोग्यस्य उपद्रवं विनाशं करोति हि यतः मृतः ध्वंसप्रतियोगी जनः किं कथमशिष्यति, एतेन मृतानामपि भोगकर्तृत्वे ध्वंसप्रतियोगिभिर्घटादिभिरपि जलाहरणादिक्रिया प्रसज्येत इति सूचितम् ॥ १४ ॥

गो० टी०—धर्मस्याफलत्वे स्थालीपुलाकन्यायेन किंचिदुदाहरणमाह—अष्टका पितृदैवत्यमिति । अयं जनः अष्टका अष्टकाश्राद्धं पितृदैवत्यं प्रतिसांवत्सरिकमिति यत्कर्म कर्तुमिति शेषः, प्रसृतः प्रवृत्तः अत्र तत्सर्वमिति शेषः, अन्नस्य उपद्रवं क्षयं पश्य तत्सर्वं स्वभोज्यान्नस्य निरर्थकक्षयहेतुम् आलोचयेत्यर्थः । तत्र हेतुमाह—मृतो हि किमशिष्यतीति ॥ १४ ॥

१५] ति० टी०—नन्वेतैरन्नाभोजनेऽपि तदुद्देशेन दत्तं लोकान्तरे तत्पतिष्ठतीत्येतमर्थं भोक्तृभावेन दूषितमपि युक्त्यन्तरेण दूषयति—यदीति । प्रवसतान्तद्देशं कृत्वा श्राद्धं दद्यात् प्राप्तकाले लिङ् । तदानमेवोचितमित्यर्थः । न तु तत्पथ्यमशनं तस्मै दीयमानं पथ्यशनं पाथेयं न्याय्यं भवेत् । भारवहनेन दुःखदत्वादिति भावः एतेनैव न्यायेन देवार्थदानमपि व्यर्थमित्युपपादितम् ॥ १५ ॥

रा० टी०—पितृदेश्यकपिण्डदानादेवैयर्थ्यमुपपाद्य तदुद्देश्यकब्राह्मणभोजनस्यापि वैयर्थ्यमुपपादयन्नाह—यदीति । यदि अन्येन भुक्तमन्नमन्यस्य देहं गच्छति प्राप्नोति तदा प्रवसतां प्रवसतः विदेशं प्राप्तानुद्दिश्य श्राद्धं श्रद्धया निष्पादितमन्नं दद्यात् ब्राह्मणान्भोजयेदित्यर्थः, तद्ब्राह्मणभुक्तं प्रवसतां पथ्यशनं न भवेत् भवेदेवेत्यर्थः । प्रवसतामित्युभयान्वयि ॥ १५ ॥

गो० टी०—उक्तमेवार्थं तर्कमुखेन द्रढयति—यदीति । अन्येन भुक्तमन्नमन्यस्य देहं गच्छति यदि तर्हि प्रवसतः श्राद्धं दद्यात् पथि गच्छन्तमुद्दिश्य भोजयेत् तत् अन्यभुक्तमन्नं पथ्यशनं भवेत् पथिकस्य पाथेयं भवेत् न चैवं दृश्यते अतः श्राद्धादिकं मृतस्याशनं न भवतीति भावः ॥ १५ ॥

१६] ति० टी०—एवं वैदिकाचारं प्रदूष्य तत्प्रतिपादकागमाप्रामाण्यमाह—दानेति । यजस्व देवपूजां कुरु, देहि अन्नादिदानम्, दीक्षस्व यागार्थम्, तपश्चान्द्रायणादि, संत्यज प्रव्रजेत्येवं परा वेदादयो ग्रन्था दानसंवनना दानाय वशीकरणोपायभूता मेधाविभिर्वार्तादिना जीवने क्लेशं पश्यद्भिः पामरप्रतारणायानायासेन धनग्रहणाय कृताः अतो न ते प्रमाणमिति भावः ॥ १६ ॥

रा० टी०—नन्वेवं श्राद्धादेर्वैयर्थ्ये तत्र शास्त्राणि कथं प्रवृत्तानीत्यत आह—दानेति । यजस्व संत्यज धनादि दत्त्वा गृहत्यागं कुरु, एते दानसंवनना दानरचनावन्तो ग्रन्थाः मेधाविभिः बुद्धिमद्भिः कृताः धनप्राप्त्यर्थं रचिताः ॥ १६ ॥

गो० टी०—एवमेकत्र वैदिककर्मणि फलव्यभिचारदर्शनात्सर्वत्रापि वैदिके न फलप्रसक्तिरित्याह—दानसंवनना इत्यादिना । दानसंवननाः दानाय वशीकरणोपायाः 'संवननं कर्मणा वशीकरणम्' इति हलायुधः । मेधाविभिः परद्रव्यग्रहणकुशलबुद्धिभिः यजस्व देवताराधनं कुरुष्व, संत्यज अर्थैषणादीन् सम्यक् त्यज । अत्रेतिकरणं द्रष्टव्यं यजस्वेत्यादिरूपा ग्रन्थाः मेधाविभिः कृता इत्यन्वयः ॥ १६ ॥

१७] ति० टी०—परमैहिकात्परं परलोकप्रयोजनं किंचिद्धर्माख्यं नास्तीति बुद्धिं कुरु । परोक्षमनुमानशब्दादिगम्यं पृष्ठतः कुरु त्यज ॥ १७ ॥

रा० टी०—स इति । हे महामते ! सः ज्ञाततत्त्वस्त्वं परमितोऽन्यद् भोग्यं नास्ति इति बुद्धिं कुरु अतः यदेतत् प्रत्यक्षं राज्यसुखं तदातिष्ठ गृहाणेत्यर्थः, परोक्षं प्रत्यक्षभिन्नं पृष्ठतः कुरु त्यजेत्यर्थः ॥ १७ ॥

गो० टी०—स इति । सः पितृवचनं परिपालनीयमिति मन्यमानः स त्वं परं परलोकानुभाव्यं यत्प्रत्यक्षं प्रत्यक्षसिद्धं राज्यभोगादिकं तदाऽऽतिष्ठ प्रतिगृह्णीष्व परोक्षं परोक्षसुखफलकं पितृवचनपरिपालनादिकम् ॥ १७ ॥

१८] ति० टी०—सतां प्रत्यक्षसिद्धस्यैव सत्यत्वं वदताम् । त एव साधवो न तु शब्दप्रमाणकादेः सत्यत्वं वदन्त इति भावः । भिन्ने पदे वा । स त्वं ताम्रकामित्यर्थो वा । सर्वलोकनिदर्शिनीं सर्वलोकसंमतामित्यर्थः ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

रा० टी०—उपसंहरन्नाह—सतामिति । सर्वलोकनिदर्शिनीं सर्वजनबोधनशीलां सतां प्रत्यक्षैकप्रमाणवादिसज्जनानां बुद्धिज्ञानं पुरस्कृत्य आश्रित्य भरतेन प्रसादितस्त्वं राज्यं निगृह्णीष्व ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टाधिकशततमः सर्गः ॥ १०८ ॥

---

१ प्रवसत इति गो. पाठः । २ इत्येवेति गो. पाठः । ३ त्वं प्रतीति गो. पाठः ।

नवोत्तरशततमः सर्गः ।

जाबाल्युक्ताचारस्य धर्मरूपाधर्मत्वादनादेयत्वं प्रतिपादयन्तं रामं नास्तिकवादपरिग्रहे कारणं निवेद्य जाबालिः क्षमां याचते ।

जाबालेस्तु वचः श्रुत्वा रामः सत्यपराक्रमः । उवाच परया सूक्त्या बुद्ध्या विप्रतिपन्नया ॥ १ ॥
भवान्मे प्रियकामार्थं वचनं यदिहोक्तवान् । अकार्यं कार्यसंकाशमपथ्यं पथ्यसंनिभम् ॥ २ ॥
निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः । मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥ ३ ॥
कुलीनमकुलीनं वा वीरं पुरुषमानिनम् । चारित्रमेव व्याख्याति शुचिं वा यदि वाशुचिम् ४ ॥
अनार्यस्त्वार्यसंस्थानः शौचाद्धीनस्तथा शुचिः । लक्षण्यवदलक्षण्यो दुःशीलः शीलवानिव ॥ ५ ॥

गो० टी०—स इति । तां बुद्धिं प्रत्यक्षादन्यत् नास्तीति बुद्धिं सर्वलोकनिदर्शिनीं सर्वजनसंमतामित्यर्थः ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्यानेऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

१] ति० टी०—तदेतत्खण्डयति रामः—जाबालेरिति । सत्यपराक्रमः सत्यप्रधानः पराक्रमो यस्य सः । 'सत्यात्मनां वरः' इति पाठे सत्यस्वभावानां श्रेष्ठ इत्यर्थः । विप्रतिपन्नया जाबाल्युक्तार्थे प्रतिपत्तिरहितया बुद्ध्या युक्तः सन् उक्त्या वेदलक्षणसुवचनालम्बनेनोवाच ॥ १ ॥

रा० टी०—जाबालिवचनश्रवणानन्तरकालिकरामवचनं वर्णयन्नाह—जाबालेरित्यादिभिः । जाबालेः वचः श्रुत्वा विप्रतिपन्नया चालयितुमशक्यया सूक्त्या वेदसंमतार्थवचनकारणीभूतया अत एव परया शुद्ध्योपलक्षितो रामः उवाच ॥ १ ॥

गो० टी०—अथ जाबालिमतनिरासपूर्वकं वैदिकमतस्थापनं नवोत्तरशततमे सर्गे—जाबालेरित्यादिना । सत्यात्मनां सत्यशुद्धीनां भक्त्या वैदिकधर्मश्रद्धया अविपन्नया जाबालिवचनैः सांदृष्टिकैरप्यचलितया ॥ १ ॥

२] ति० टी०—प्रियकामार्थं प्रीतिहेतुकामभोगसंपादनार्थम् अकार्यं परमार्थतः कर्तुमनर्हं कार्यसंकाशं प्रमाणाभासयुक्तत्वात् । अपथ्यं दुःखोदर्कम् ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—भवानित्यादिभिः । मे प्रियकामार्थं मत्प्रीतीच्छया इह अस्मिन् काले यद्वचनं भवान् उक्तवान् तद्वचनमकार्यं कर्तुमनर्हमपि कार्यसंकाशं कर्तुमर्हमिव प्रकाशते अपथ्यमहितमपि पथ्यसन्निभं पथ्यवत्प्रकाशते ॥ २ ॥

गो० टी०—भवानिति । प्रियकामार्थं प्रियविषयेच्छासिद्ध्यर्थं यद्वचनमुक्तवान् तत् कार्यसंकाशं कार्यवत्प्रतीयमानमकार्यं पथ्यसंमितं पथ्यवदवभासमानमपथ्यं दुःखोदर्कमिति यावत्, एवं वचनं दूषितम् ॥ २ ॥

३] ति० टी०—निर्मर्यादं उत्पथवर्ती भिन्नचारित्रदर्शनः साधुसंमतचारित्रप्रतिपादकशास्त्राद्विपरीतव्यवहारप्रतिपादकलोकायतिकादिशास्त्रप्रसक्तः सत्सु मानं पूजां न लभते ॥ ३ ॥

रा० टी०—निर्मर्यादं इति । निर्मर्यादः त्यक्तवेदमार्गः अत एव भिन्नचारित्रदर्शनः वेदोक्ताचारप्रतियोगिकभेदविशिष्टाचारदर्शकः अत एव पापाचारसमन्वितः पापाचरणविशिष्टः पुरुषः सत्सु सज्जनसमाजेषु मानं सत्कारं न लभते एतेन भवदुक्तिः सज्जनैस्तिरस्कृतेति सूचितम् ॥ ३ ॥

गो० टी०—अथ वक्तारं दूषयति—निर्मर्याद इत्यादिना । निर्मर्यादः मर्यादारहितः अत एव पापाचारसमन्वितः तत्र हेतुः भिन्नचारित्रदर्शन इति दर्शनं मतं वेदविहिताद् भिन्नाचारप्रतिपादकमतप्रवर्तक इत्यर्थः, एवंभूतः पुरुषः सत्सु मानं पूजां न लभते प्रत्युत निन्दामेव लभत इत्यर्थः ॥ ३ ॥

४] ति० टी०—इदानीं वेदोक्ताचार एव पुंसामिहामुत्र समानहेतुरित्याह—कुलीनमिति । पुरुषमानिनम् अधीरमिति यावत्, चारित्रं वेदानुमताचारः, तत्संपन्नः सन्कुलीनत्वादिरूयातिं ख्यापयति—असंपन्नश्चाकुलीनत्वादिति भावः ॥ ४ ॥

रा० टी०—वेदमर्यादास्वीकारे प्रयोजनान्तरमाह—कुलीनमिति । कुलीनं शोभनकुलोत्पन्नत्वमकुलीनं तद्विपरीतं वा वीरं शौर्यं पुरुषमानिनं तद्रहितत्वं वा शुचिं पवित्रत्वम् अशुचिं तद्विपरीतं वा चारित्रम् आचरणमेव व्याख्याति बोधयति विहिताचरणशीले सुकुलोपन्नत्वादिप्रतीतिः तदशीले तद्विपरीतप्रतीतिराचरणादेवेति तात्पर्यम्, एतेन वेदमर्यादात्यागे सांकर्यं प्रसज्जतेति सूचितम् ॥ ४ ॥

गो० टी०—पापाचारत्वे किं प्रमाणमित्याशङ्क्य तदुक्तिरेव प्रमाणमित्याह—कुलीनमित्यादिना । पुरुषमानिनम् अतिधीरमित्यर्थः । चारित्रम् उक्तरूपाचारः ॥ ४ ॥

५] ति० टी०—किं च स्वसंमताचाराङ्गीकारे सर्वथानर्थप्राप्तिरेवेत्याह—अनार्य इत्यादि । आर्यसंस्थानस्तत्सदृशः शुचिः शुचिरिव भासमान इति शेषः, लक्षण्यवल्लक्षणयुक्तवद्भासमानो भवति स्वदुक्ताचारन्यवहर्तेति शेषः ॥ ५ ॥

रा० टी०—सांकर्यमेव प्रदर्शयन्नाह—अनार्य इति । अनार्यो नीचः आर्यसंस्थानः श्रेष्ठसदृशः स्यात्, शौचाद्धीनः रहितः शुचिः स्यात्, अलक्षण्यो लक्षणहीनः लक्षण्यवत् लक्षणयुक्तवत् स्यात्, दुःशीलः शीलरहितः शीलवानिव स्यात् ॥ ५ ॥

गो० टी०—एतादृशपुरुषोपदेशश्रवणे स्वस्यानर्थं दर्श-

१ सत्यात्मनां वर इति गो. पाठः । २ भक्त्या स्वबुद्ध्या चाविपन्नयेति गो. पाठः । ३ संमितमिति गो. पाठः । ४ संकाश इति गो. पाठः ।

अधर्मं धर्मवेषेण यद्यहं लोकसंकरम् । अभिपत्स्ये शुभं हित्वा [2]क्रियां विधिविवर्जिताम्॥६॥
कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः । बहु [3]मन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥ ७ ॥
कस्य [4]यास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयाम् । अनया वर्तमानोऽहं [5] वृत्त्या हीनप्रतिज्ञया ॥ ८ ॥
कामवृत्तोऽन्वयं लोकः कृत्स्नः समुपवर्तते । यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः॥ ९ ॥
सत्यमेवानृशंसं च राजवृत्तं सनातनम् । तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः॥१०॥

यति श्लोकत्रयेण—अनार्य इत्यादिना। अनार्य एव सन्नार्यसंकाशः शौचाद्धीन एव सन् शुचिरेव लक्ष्यवत् शिष्टलक्षणयुक्ततुल्य एव सन् अलक्ष्यः लक्ष्यणहीनः शीलवानिव सन् दुःशीलः अहं शुभं हित्वा शुभसाधनं वैदिकधर्मं हित्वा लोकसंकरं लोकसंकरकारकं क्रियाविधिविवर्जितं वैदिकक्रियया वेदविधिना च वर्जितमिमं त्वदुक्तमधर्मं धर्मवेषेण धर्मत्वेनाभिपत्स्ये स्वीकरिष्यामि यदि दुर्वृत्तं मां चेतयानः ज्ञानवान् कः पुरुषः लोके बहु मंस्यति न कोऽपीत्यर्थः॥ ६--७ ॥

६] ति० टी०—यद्यहं त्वदुपदिष्टं लोकसंकरकारकमधर्ममार्गं धर्मवेषेण युक्तोऽभिपत्स्ये, तदा विधिविवर्जितां श्रुत्याद्युक्तविधानरहितां क्रियां कृत्वा तत एव शुभं हित्वाशुभं प्राप्नुयामिति शेषः ॥ ६ ॥

रा० टी०—अधर्ममिति। लोकसंकरं लोकसांकर्यहेतुमधर्मं धर्मविरुद्धं धर्मवेषेण धर्मत्वरूपेण यत् यदि अभिपत्स्ये स्वीकरिष्यामि तर्हि शुभं वेदबोधितत्वेन मङ्गलप्रदं कर्म हित्वा विधिविवर्जितां वेदोक्तहीनां क्रियामभिपत्स्ये प्राप्स्यामि ॥ ६ ॥

७] ति० टी०—तामेवाशुभप्राप्तिं दर्शयति—कश्चेतयान इति । चेतन इत्यर्थः, लोकदूषणं परलोकदूषणमार्गालम्बनम् ॥ ७ ॥

रा० टी०—नन्वेवं स्वतःसिद्धनित्यसर्वसंपत्तिविशिष्टस्य तव फलाभिकाङ्क्षाराहित्यात् वेदविरुद्धाचरणेऽपि का क्षतिरित्यत आह—कश्चेति। कार्याकार्यविचक्षणः कर्तव्याकर्तव्यविषयकविवेकविशिष्टः इत्यर्थः, कः पुरुषः दुर्वृत्तं वेदविरुद्धवृत्तिविशिष्टमत एव लोकदूषणं प्रवृत्तिजनकविरुद्धस्वाचरणदर्शनेन सर्वजनदूषकं मां बहु मन्येत न कोऽपीत्यर्थः ॥ ७ ॥

८] ति० टी०—अनया त्वदुपदिष्टया वृत्त्या हीना सत्यपरिपालनविषयिणी प्रतिज्ञा यस्यां तया वर्तमानः केन साधनेन स्वर्गमाप्नुयां न केनापि। किं चेदं त्वदुपदिष्टं वृत्तं कस्य किंसंबन्धि अहं यास्यामि यत्पित्रादिषु न कस्यापि। पित्रादिवृत्तानुसरणमेव च 'येनास्य पितरो याताः' इति श्रुत्याविहितमिति भावः ॥ ८ ॥

रा० टी०—नन्वेवं किं बहुमाननेनेत्यत आह—कस्येति । हीनप्रतिज्ञया हीना निकृष्टा प्रतिज्ञा यस्यां तया अनया वृत्त्या वर्तमानोऽहं वृत्तं स्वधर्मच्युतिरूपदुष्टान्तं कस्य यास्यामि प्राप्स्यामि कथयिष्यामीत्यर्थः, केन कर्मणा उपलक्षितं जनं स्वर्गमाप्नुयां प्राप्नुयाम् 'दास्यामि' इति भूषणपाठः ॥ ८ ॥

गो० टी०—न केवलं बहुमानहानिः परलोकहानिश्चेत्याह—कस्येत्यादिना । अहं हीनप्रतिज्ञया वनवासप्रतिज्ञारहितया अनया वृत्त्या परैर्मे पृष्ठतः क्रियेति त्वदुक्तया वृत्त्या वर्तमानः सन् वृत्तं त्वदुक्ताचरणं कस्य धास्यामि आधास्यामि उपदेक्ष्यामीत्यर्थः। 'दास्यामि' इति पाठान्तरं केन वा साधनेन स्वर्गमाप्नुयामिति योजना ॥ ८ ॥

९] ति० टी०—किं च त्वदुपदिष्टमार्गे तिष्ठन्नहं प्रथमतः कामवृत्तो यथेष्टचारी स्याम् । तदनु अयं कृत्स्नो लोकस्तथा समुपवर्तते इत्यर्थः । एवं निबन्धे कारणमाह—यद्वृत्ता इति ॥ ९ ॥

रा० टी०—नन्वेवं ताभ्यामपि भवतो न हानिरिति तदाशङ्कां मनसि निधाय मम दुर्मार्गवर्तित्वे सर्वेषां तद्वर्त्मिष्यतीत्याह—कामेति । अनु मत्कामवृत्तिदर्शनानन्तरं कृत्स्नः अयं लोकः कामवृत्तः यथेष्टाचरणः समुपवर्तते भविष्यति, तत्र हेतुः यद्वृत्ताः यादृशवृत्तिविशिष्टाः राजानः तद्वृत्ताः तादृशवृत्तिविशिष्टाः प्रजाः सन्ति ॥ ९ ॥

गो० टी०—स्वदुक्ताचरणे सर्वलोकस्यापि परलोकहानिः स्यादित्याह—कामवृत्त इत्यादिना ॥ ९ ॥

१०] ति० टी०—तस्मात्त्वदुपदिष्टस्य मार्गस्य सर्वलोकनाशकत्वेन शास्त्रीयमार्गालम्बनमेवोचितमित्याह—सत्यमिति। अनृशंसं भूतानुकम्पाप्रधानं सनातनमनादिशास्त्रसिद्धं राजवृत्तं च सत्यमेव सत्यवचनमेव मुख्यो राजाचार इत्यर्थः, यतो राजवृत्तं सत्यात्मकम्, तस्मात्तेषां राज्यमपि सत्यात्मकं सत्यैकप्रतिष्ठितम् । न केवलं राज्यमेव, अपि तु सर्वोऽपि लोकः सत्ये प्रतिष्ठितः ॥ १० ॥

रा० टी०—धर्मप्रवृत्तौ राजैव निमित्तमिति बोधयन्नाह—सत्यमिति। सत्यमनृशंसं क्रूरताराहित्यं च सनातनं सार्वकालिकं राजवृत्तं राजभिराचरितं तस्माद्धेतोः राज्यं सत्यात्मकं सत्यप्रचुरमत एव लोको जनः सत्ये सत्यप्राप्तौ सत्येव प्रतिष्ठितः प्रतिष्ठावान् भवति ॥ १० ॥

गो० टी०—सत्यप्रशंसापूर्वकं सत्यनिष्ठां दर्शयन् सत्यपरत्वरूपस्वमतं स्थापयति—सत्यमेवेत्यादिना । अनृशंसं भूतानुकम्पाप्रधानं सनातनं च राजवृत्तं सत्यमेव सत्यरूपमेव

१ यदीममिति गो. पाठः । २ क्रियाविधिविवर्जितमिति गो. पाठः । ३ मंस्यतीति गो. पाठः । ४ धास्यामीति गो. पाठः । ५ हीति गो. पाठः । ६ त्वयमिति गो. पाठः ।

ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे । सत्यवादी हि लोकेऽस्मिन्परं गच्छति चाक्षयम् ॥ ११ ॥
उद्विजन्ते यथा सर्पान्नरादनृतवादिनः । धर्मः सत्यपरो लोके मूलं सर्वस्य चोच्यते ॥ १२ ॥
सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः । सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥ १३ ॥
दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च । वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत् ॥ १४ ॥
एकः पालयते लोकमेकः पालयते कुलम् । मज्जत्येको हि निरय एकः स्वर्गे महीयते ॥ १५ ॥
सोऽहं पितुर्निदेशं तु किमर्थं नानुपालये । सत्यप्रतिश्रवः सत्यं सत्येन समयीकृतम् ॥ १६ ॥

तस्माद्राजवृत्तस्य सत्यरूपत्वात् राज्यं राज्यस्थजनजातं सत्यात्मकं सत्यरूपं सत्यप्रधानमिति यावत्. लोक इति जात्येकवचनम् ॥ १० ॥

११] ति० टी०–सत्यमेव हि मेनिरे सत्यलोकान्तसकललोकप्रदमिति शेषः । परमक्षयं ब्रह्मलोकम् ॥ ११ ॥

रा० टी०–ऋषय इति । ऋषयो देवाश्च सत्यमेव मेनिरे श्रेयःप्रापकत्वेन स्वीचक्रुः । तत्र हेतुः अस्मिंल्लोके सत्यवादी पुरुषः अक्षयं विनाशरहितं परं लोकं गच्छति ॥ ११ ॥

गो० टी०–ऋषय इति । मेनिरे उत्कृष्टमिति शेषः परमं क्षयं परमं धाम 'धिष्ण्यं धाम निकेतनं च सदनं वस्त्यं च वास्तु क्षयः' इति वैजयन्ती ॥ ११ ॥

१२] ति० टी०–अनृतवादिनो नरात्तथोद्विजन्ते यथा सर्पात् । सत्यं परं श्रेष्ठं यस्य स धर्मःसर्वस्य मूलमुच्यते॥ १२॥

रा० टी०–उद्विजन्त इति । सर्वे जनाः यथा सर्पादुद्विजन्ते निभ्यति तथा अनृतवादिनः मिथ्याकथनशीलात् उद्विजन्ते एतेनानृतवादः सर्वपापमूलमिति सूचितम् । लोके धर्मः सत्यपरः सत्येनैव पूर्यते पूर्णो भवति अतः सर्वस्य धर्मस्य मूलं सत्यमुच्यते ॥ १२ ॥

गो० टी०–उद्विजन्त इति । उद्विजन्ते जना इति शेषः १२

१३] ति० टी०–लोके ईश्वरः सत्यमेव सत्यपदवाच्य इति प्रसिद्ध इत्यर्थः । तथा सद्धिराश्रितो धर्मः सत्ये सत्यपदवाच्ये ईश्वरे प्रतिष्ठितः आदौ तस्यैव धर्मोपदेष्टृत्वादित्यर्थः । 'सत्ये पद्मा प्रतिष्ठिता' इति पाठान्तरम् पद्मा लक्ष्मीः । सत्यमूलानि सर्वाणीत्यनेन जगदुपादानप्रवर्तकत्वेन सर्वाधिष्ठानत्वेन च तस्सिद्धिर्दर्शिता । तस्यैव तत्त्वे हेतुमाह–सत्यात्परं पदं नास्ति । अनेन तदितरस्य सर्वस्य मिथ्यात्वमचेतनत्वं च दर्शितम् । एतेन चेतनानधिष्ठिता मायैव जगदुपादानकारणमिति निरस्तं चेतनाधिष्ठानं विना तत्परिणामासंभवात् तस्याः परिणामित्वेन मिथ्यात्वेन चेतनाधिष्ठानत्वासंभवाच्च ॥ १३ ॥

रा० टी०–सत्यमिति । सर्वाणि कर्माणि सत्यमूलानि भवन्ति अत एव धर्मः सदा नित्यं सत्ये एवाश्रितः अतः सत्यमेव लोके ईश्वरः अतः सत्यात्परमन्यत् पदमाश्रयो नास्ति ॥ १३ ॥

गो० टी०–सत्यमिति । ईश्वरः नियन्ता व्यवस्थापक इति यावत् ॥ १३ ॥

१४] ति० टी०–एवं नास्तिकं प्रतीश्वरं प्रसाध्य वेदप्रामाण्यं साधयति–दत्तमित्यादि । दत्तादीनि प्रतिपादयन्तो वेदाः सत्यप्रतिष्ठानाः सत्यादीश्वराच्छ्वासप्रश्वासवदाविर्भूता इति वक्तृदोषशङ्काकलङ्करहितत्वेन तत्प्रतिपादितदानादीनां फलसंवाददर्शनेन च सर्वत्राप्रामाण्यशङ्कारहिताः किं तु स्वतः प्रमाणभूता एवेति भावः । तस्मात्सत्यस्येश्वरवाचकवाच्यत्वेन तदभेदात् सत्यपरः सत्यपालनतत्परो भवेदित्यर्थः ॥ १४ ॥

रा० टी०–दत्तमिति । दत्तादिकं वेदाश्च सत्यप्रतिष्ठानाः सत्येन प्रतिष्ठानं प्रतिष्ठा येषां ते तस्मात् सत्यपरः सत्यनिष्ठः भवेत् कल्याणाभिलाषी जन इति शेषः ॥ १४ ॥

गो० टी०–दत्तमिति । सत्यप्रतिष्ठानाः सत्याधाराः सत्यप्रतिष्ठानानीति विपरिणम्य पूर्वार्धेन योज्यम् ॥ १४ ॥

१५] ति० टी०–वेदोक्तधर्माधर्मफलस्य प्रत्यक्षमनुभूयमानत्वेन तत्प्रामाण्यं सिद्धमित्याह–एक इति । लोकं राज्यम् , कुलं स्वकुलमात्रम् । एतेन पालनसाधनधर्मफलतारतम्यस्य वेदोक्तस्यानुभवो दर्शितः । निरयोऽत्र दुःखं स्वर्गश्च सुखम् तेन धर्माधर्मफलानुभवो दर्शितः ॥ १५ ॥

रा० टी०–कर्मणां सफलत्वे प्रमाणमाह–एक इति । एकः कश्चित् निरये नरके मज्जति एकः स्वर्गे महीयते पूज्यते एतेन विचित्रकर्मणां विचित्रफलप्रापकत्वादिदं सर्वं सङ्गच्छत इति सूचितम् ॥ १५ ॥

गो० टी०–प्रस्तुतसत्यनिष्णातस्य ऐहिकामुष्मिकफलं तद्रहितस्य निरयप्राप्तिं च दर्शयति–एक इत्यादिना ॥ १५ ॥

१६] ति० टी०–सोऽहमुक्तरीत्या एवं विवेकवानित्यर्थः । ननु जीवशतया पितृकृते नियोगे किमियता निर्बन्धनेन तत्राह–सत्येति । यतो मे पिता सत्यप्रतिभवः सत्यप्रतिज्ञः स्वप्रतिज्ञातसत्याङ्गीकारवान्समयी सदाचारवान् अतस्तेन सत्येन सत्यपरिपालनेन हेतुना सत्यमेव मां प्रतिकृतम् उक्तमित्यर्थः १६

रा० टी०–स इति । सः ज्ञातकर्मफलतत्त्वोऽहं पितुर्निर्देशमाज्ञां किमर्थं नानुपालये समयी सदाचारसंपन्नो राजा यतः सत्यप्रतिभवः सत्यप्रतिज्ञः अतः सत्येन सत्यपरिपालनहेतुना

१ परमं गच्छति क्षयमिति गो. पाठः । २ स्वर्गस्थेति गो. पाठः । ३ सत्यं पद्माश्रिता सदेति गो. पाठः । ४ नियोगमिति गो. पाठः ।

नैव लोभान्न मोहाद्वा न चाज्ञानात्तमोन्वितः । सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः ॥ १७ ॥
असत्यसंधस्य सतश्चलस्यास्थिरचेतसः । नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम् ॥ १८ ॥
प्रत्यगात्ममिमं धर्मं सत्यं पश्याम्यहं ध्रुवम् । भारः सत्पुरुषैश्चीर्णस्तदर्थमभिनन्यते ॥ १९ ॥
क्षात्रं धर्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितम् । क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः ॥ २० ॥
कायेन कुरुते पापं मनसा संप्रधार्य तत् । अनृतं जिह्वया चाह त्रिविधं कर्म पातकम् ॥ २१ ॥

सत्यमेव कृतमाज्ञापितमित्यर्थः । एतेन धर्मपरिपालनमेव प्राव्राजनहेतुरिति सूचितम् ॥ १६ ॥

गो० टी०–स इत्यादि । सत्यप्रतिश्रवः सत्यसंधः ॥१६॥

१७] ति० टी०–अतो लोभाद्राज्यस्य, मोहादुक्तस्य विस्मरणात् प्रतिज्ञात्यागे दोषस्याज्ञानाद्वा त्वदुक्तवाक्याच्छ्राद्धादावश्रद्धारूपतमोयुक्तो वा । पूर्वं सत्यप्रतिश्रवः शपथपूर्वकं कृतप्रतिज्ञः सन्नैव भेत्स्यामि न भेत्स्यामि न च भेत्स्यामीति त्रिवारोक्त्या सर्वथा दार्ढ्यं सूचितम् ॥ १७ ॥

रा० टी०–नैवेति । यतोऽहं सत्यप्रतिश्रवः अतः तमोन्वितः तमोरूपेण त्वयान्वितः प्रेरितोऽपि सन् लोभादिना गुरोः पितुः सत्यस्य सेतुं मर्यादां न भेत्स्यामि । नन्वत्रयोक्त्या सत्यत्यागविषयिणी वार्ता पुनर्न वक्तव्येति सूचितम् ॥ १७ ॥

गो० टी०–नैवेति । लोभात् राज्यलोभात् मोहात् विप्रलम्भवाक्यजनितचित्तविभ्रमात् अज्ञानात् तमोन्वितः तमोगुणयुक्तः सत्यस्य करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे इत्यस्य सत्यवचनस्य सेतुं मर्यादाम् ॥ १७ ॥

१८] ति० ति०–एवं सत्ये दृढस्थितौ हेतुमाह—असत्यसंधस्य प्रतिज्ञाविषयसत्यहीनस्य चलस्य चञ्चलस्वभावस्य । तस्यैव विवरणम्–अस्थिरेत्यादि । ईदृशस्य सतः एतैर्गुणैर्युक्तस्य देवादयो हव्यकव्यादि न गृह्णन्तीति नः श्रुतम् ॥१८॥

रा० टी०–सत्यप्रतिज्ञात्यागे दोषमाह–असत्येति । असत्यसंधस्य निवृत्तसत्यप्रतिज्ञत्वस्य अत एव चलस्य धर्माच्युतस्य अत एव अस्थिरचेतसः चञ्चलचित्तस्य सतो विद्यमानस्य जनस्य हव्यकव्यादीनि न प्रतीच्छन्ति गृह्णन्तीत्यर्थः, इति नोऽस्माभिः श्रुतम् ॥ १८ ॥

गो० टी०–असत्यसंधस्येति । चलस्य चलस्वभावस्य प्रतीच्छन्ति हव्यकव्यादिकमिति शेषः, नः अस्माभिः श्रुतम् ॥१८॥

१९] ति० ति०–प्रत्यगात्मनो जीवाद्उद्दिश्य प्रवृत्तमित्यर्थे प्रत्यगात्ममित्यार्षत्वात्साधुः । इमं सत्यं सत्यपालनरूपं धर्ममहं ध्रुवं सर्वधर्मेषु श्रेष्ठ्यं पश्यामि । अयं भारो वनवासे जटावल्कलादिभारः सत्यपालनरूपो वा पूर्वैः सत्पुरुषैराचीर्णस्तदर्थं मयाप्यभिनन्यत आद्रियते ॥ १९ ॥

रा० टी०–प्रत्यगिति । सत्यं सत्यरूपमिमं धर्मं प्रत्यगात्मं सर्वात्मविहितं पश्यामि भरो जटादिभरः सत्पुरुषैः चीर्णः कृतः तदर्थं तस्माद्धेतोः अभिनन्यते मयेति शेषः ॥ १९ ॥

गो० टी०–प्रत्यगात्ममिति । अहं सत्यं सत्यरूपमिमं धर्मं प्रत्यगात्मं स्वयं पश्यामि आत्मानं प्रत्यविनाभूतत्वेन प्रवृत्तं पश्यामीत्यर्थः । सत्पुरुषाचीर्णः सत्पुरुषैराचरितः संपादित इति यावत्, भारः जटावल्कलादिभारः तदर्थं सत्यरूपधर्मार्थम् अभिमन्यते अभिमतो भवति ॥ १९ ॥

२०] ति० टी०–नन्वु स्वधर्मो राज्यपालनमेव किमिति नाभिनन्यते तत्राह–क्षात्रमिति । धर्मसंहितं धर्मवत्प्रतिभासमानं वस्तुतोऽधर्मं क्षुद्रादिभिः सेवितमीदृशं क्षात्रधर्मं पित्राज्ञाभङ्गेन राज्यकरणरूपमहं त्यक्ष्ये न तु न्याय्यं क्षात्रधर्ममिति भावः ॥ २० ॥

रा० टी०–नन्वु पालनस्य क्षत्रियधर्मत्वे स एव हठादपि कुतो न स्वीक्रियते इत्यत आह–क्षात्रमिति । अधर्मं विरुद्धधर्मेण गृहीतं पापकर्मभिः क्षुद्रादिभिः सेवितं धर्मसंहितं धर्मत्वेन प्रतीयमानं क्षात्रधर्ममहं त्यक्ष्ये, एतेन पित्राज्ञापनमन्तरा हठाद्राज्यग्रहणमधर्म एवेति सूचितम् ॥ २० ॥

गो० टी०–पूर्वैराचरितं सत्यं परित्यज्य त्वदुक्तरीत्या राज्यं नाङ्गीकरिष्यामीत्याह–क्षात्रमित्यादिना । अधर्मम् अधर्मप्रचुरं धर्मसंहितं धर्मलेशसहितम् अधर्मप्रचुरधर्मलेशयुक्तक्षत्रियधर्ममहं त्यक्ष्य इत्यर्थः ॥ २० ॥ २१ ॥

२१] ति० टी०–अस्य पापस्य शरीरसाध्यत्वेऽपि कायिकवाचिकमानसिकसकलपापप्रसक्तिरित्याह–कायेनेति । आदौ मनसा एवं कर्म करिष्य इति तत्पापं संप्रधार्य ततो जिह्वया ऋतं धर्मजनकं ततो भिन्नमनृतं तत्कर्म कर्तव्यत्वेन जिह्वया तत्सहायभूतेषु पुरुषेष्वाह, ततः कायेन कुरुते, अतः पापं कर्म क्रियारूपम् । पापं त्रिविधं कायिकवाचिकमानसिकरूपत्रिविधजनकमित्यर्थः । तेन कायिकं पापं बहुदुःखजनकमिति भावः । कलौ तु पापसंकल्पादितो न दोष इत्युक्तं भागवते–‘ नाद्यद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् । कुशलान्याशु तिष्ठन्ति नेतराणि कृतानि यत् ॥’ सम्राट् परीक्षित्। सारमाह–कुशलानि पुण्यान्याशु संकल्पमात्रात्सिध्यन्ति, यथा मानसपूजा । इतराणि पापानि संकल्पमात्रान्न फलन्ति । यथतस्तानि कृतान्येव फलन्तीति तदर्थः ॥ २१ ॥

रा० टी०–त्रिविधानामपि पापकर्मणामेवं राज्यकरणे प्रवृत्तिर्भविष्यतीति बोधयितुं कर्मणां विभागमाह–कायेनेति । कायेन यत्पापं कुरुते तज्जिह्वया अनृतं यत् आह तच्च मनसा

१ ह्यज्ञानादिति गो. पाठः । २ स्वयमिति गो. पाठः । ३ भर इति रा. पाठः । ४ सत्पुरुषाचीर्ण इति गो. पाठः । ५ मन्यत इति गो. पाठः । ६ चेति गो. पाठः ।

भूमिः कीर्तिर्यशो लक्ष्मीः पुरुषं प्रार्थयन्ति हि । सत्यं समनुवर्तन्ते सत्यमेव भजेत्ततः ॥ २२ ॥
श्रेष्ठं ह्यनार्यमेव स्याद्यद्भवानवधार्य माम् । आह युक्तिकरैर्वाक्यैरिदं भद्रं कुरुष्व ह ॥ २३ ॥
कथं ह्यहं प्रतिज्ञाय वनवासमिमं गुरोः । भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः ॥ २४ ॥
स्थिरा मया प्रतिज्ञाता प्रतिज्ञा गुरुसंनिधौ । प्रहृष्टमानसा देवी कैकेयी चाभवत्तदा ॥ २५ ॥
वनवासं वसन्नेव शुचिर्नियतभोजनः । मूलपुष्पफलैः पुण्यैः पितॄन्देवांश्च तर्पयन् ॥ २६ ॥
संतुष्टपञ्चवर्गोऽहं लोकयात्रां प्रवाहये । अकुहः श्रद्दधानः सन्कार्याकार्यविचक्षणः ॥ २७ ॥
कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् । अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः ॥ २८ ॥

असंप्रधार्य अनिश्चित्यैव यत्करुते दुर्मार्गे धावतीत्यर्थः, तच्च पापमतः पातकं त्रिविधं मनोवाक्कायत्रितयसंबन्धित्वात् त्रिप्रकारकमेतेन सत्यप्रतिज्ञत्वत्यागपूर्वकैतद्राज्यकरणे त्रिविधपापसंबन्धो भविष्यतीति सूचितम् ॥ २१ ॥

२२] ति० टी०—अथ सत्यस्य सर्वार्थसाधनत्वमाह—भूमिरिति । प्रार्थयन्तीति सत्यवन्तमिति शेषः । समनुवर्तन्ते इति शिष्टा इति शेषः । यदेवं ततः सत्यमेव भजेदित्यर्थः ॥ २२॥

रा० टी०—भूमिरिति । भूम्यादयः सत्यविशिष्टं पुरुषं प्रार्थयन्ति सत्यविशिष्टमित्यध्याहृतमतः सत्यं समनुवर्तन्ते सेवन्ते महान्त इति शेषः, ततस्तस्माद्धेतोः सत्यमेव भजेत् सर्वो जन इति शेषः ॥ २२ ॥

गो० टी०—भूमिरिति । कीर्तिः वितरणजनिता प्रथा यशः पौरुषनिबन्धनं पुरुषं करणत्रयेण सत्यनिष्णातम् अनुपश्यन्ति अनुसृत्य पश्यन्ति अनुव्रजन्तीति यावत् ॥ २२ ॥

२३] ति० टी०—यद्भवानवधार्य युक्तत्वेन निश्चित्य मां प्रति युक्तिरेव करः करणं येषां तैर्वाक्यैरिदं भद्रं राज्यं ह निश्चयेन कुरुष्व स्वीकुरुष्वेति श्रेष्ठं हि श्रेष्ठमिवाह तदनार्यमन्याय्यमेव स्याद्भवेत् ॥ २३ ॥

रा० टी०—श्रेष्ठमिति। युक्तिकरैः शुष्कतर्कसंपादितैर्वाक्यैर्भद्रं कल्याणकरमिदं राज्यं त्वं कुरुष्व इति भवान् यच्छ्रेष्ठं वचोऽवधार्य निश्चित्य मामाह तदनार्यमेव स्यात् ॥ २३ ॥

गो० टी०—श्रेष्ठमिति । श्रेष्ठमित्यवधार्य निश्चित्य इदं भद्रं कुरुष्वेति भवान् युक्तिकरैर्वाक्यैः यदाह तदनार्यमेव स्यात् ॥ २३ ॥

२४] ति० टी०—अनार्यत्वमेव दर्शयन् 'राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादितः' इत्यस्योत्तरमाह—कथमिति । गुरोः पुरत इमं गुर्वाज्ञां गुरोर्वचो हित्वेत्यन्वयः ॥ २४ ॥

रा० टी०—तद्वचनस्यानार्यत्वं द्योतयन्नाह—कथमिति । गुरोः पितुः अग्रे वनवासं प्रतिज्ञाय गुरोर्वचो हित्वा भरतस्य वचः कथं करिष्यामि ॥ २४ ॥

गो० टी०—प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुर्वित्यन्तस्य जाबालिवाक्यजातस्योत्तरमभिधाय राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादित इत्यस्याप्युत्तरमाह—कथमित्यादिना ॥२४॥

२५] ति० टी०—कैकेयी चेति । एवं च तस्या हर्षदस्य पुनरहर्षदत्वमत्यन्तमनुचितमिति भावः ॥ २५ ॥

रा० टी०—वनवासत्यागस्यानौचित्यमेव द्रढयन्नाह—स्थिरेति । गुरुसंनिधौ राजसमीपे स्थिरा निश्चला प्रतिज्ञा मया प्रतिज्ञाता कृता तदा देवी कैकेयी प्रहृष्टमानसा अभवत् ॥२५॥

गो० टी०—स्थिरेति । प्रतिज्ञा प्रतिज्ञाता कृतेत्यर्थः॥२५॥

२६] ति० टी०—तर्पयन् प्रतिज्ञां पालयिष्यामीमि शेषः२६

२७] ति० टी०—संतुष्टपञ्चवर्गो मूलादिभिस्तुष्टपञ्चेन्द्रियवर्गः लोकयात्रां पितृवचनपालनव्यवहारं प्रवाहये प्रवाहरूपेण प्रवर्तयामीत्यर्थः । अकुहोऽकपटशीलः श्रद्दधानः आस्तिकः॥२७॥

रा० टी०—वनवासमिति । वनवासं वसन् कुर्वन् पित्रादींस्तर्पयन् श्रद्दधानश्च सन् मूलादिभिर्नियतभोजनः अत एव संतुष्टपञ्चवर्गः संतुष्टः पञ्चवर्गः पञ्चेन्द्रियगणो यस्य सः किंच संतुष्टेन संतोषेण पञ्चौ व्यक्तौ वर्गौ सीताऽलक्ष्मणौ यस्य स शुचिः अकुहः कापट्यसंसर्गरहितः कार्याकार्यविचक्षणः कर्तव्याकर्तव्यविषयकनिश्चयविशिष्टोऽहं लोकयात्रां स्वजनमर्यादां प्रवाहये निर्वाहयामि । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०—वनवासमित्यादि । श्लोकद्वयमेकं वाक्यम् । वनवासं वसन् कुर्वन्नित्यर्थः, नियतभोजनः नियतव्याहारः संतुष्टपञ्चवर्गः परितुष्टपञ्चेन्द्रियवर्गः लोकयात्रां पितृवचनपरिपालनरूपलोकवर्तनम् । 'गमने वर्तने यात्रा' इति वैजयन्ती । अकुहः अकृत्रिमः ॥ २६ ॥ २७ ॥

२८] ति० टी०—शुभकरणे हेतुः—अग्निरित्यादि । यच्छुभं कर्म कर्तव्यं तेषां शुभकर्मणां तत्तल्लोकप्राप्तिः फलमिति भावः २८

रा० टी०—नन्वेवं नित्यपुरुषाणां कर्मफलं संसर्गित्वाभावेन कर्मफलानां का गतिरित्यत आह—कर्मेति । इमां कर्मभूमिं प्राप्य यच्छुभं कर्म तत्कर्तव्यं, कर्मणां फलभागिनस्तु अग्न्यादयो भवन्तीति शेषः ॥ २८ ॥

गो० टी०—अष्टकोदाहरणेन वैदिककर्मणां निष्फलत्वं यदुक्तं तत्र परिहारमाह—कर्मभूमिमित्यादिना । यत् शुभं कर्म तत्कर्तव्यं जनैरिति शेषः । तत्र फलप्रदातॄन् दर्शयति—अग्निरित्यादि । कर्मणां कर्मभूमिकृतस्वस्वकर्मणां फलभागिनः अग्नित्वादिफलं प्राप्नवन्तः ॥ २८ ॥

१ स्वर्गस्थं चानु पश्यन्ति सत्यमेव भजेत तदिति गो. पाठः । २ गुराविति गो. पाठः ३ प्रहृष्यमाणा सेति गो. पाठः । ४ मूलैः पुष्पैरिति गो. पाठः । ५ प्रवर्तय इति गो. पाठः ।

शतं क्रतूनामाहृत्य देवराट् त्रिदिवं गतः । तपांस्युग्राणि चास्थाय दिवं प्राप्ता महर्षयः ॥ २९ ॥
अमृष्यमाणः पुनरुग्रतेजा निशम्य तन्नास्तिकवाक्यहेतुम् ।
अथाब्रवीत्तं नृपतेस्तनूजो विगर्हमाणो वचनानि तस्य ॥ ३० ॥
सत्यं च धर्मं च पराक्रमं च भूतानुकम्पां प्रियवादितां च ।
द्विजातिदेवातिथिपूजनं च पन्थानमाहुस्त्रिदिवस्य सन्तः ॥ ३१ ॥
तेनैवमाज्ञाय यथावदर्थमेकोदयं संप्रतिपद्य विप्राः ।
धर्मं चरन्तः सकलं यथावत्काङ्क्षन्ति लोकागममप्रमत्ताः ॥ ३२ ॥
निन्दाम्यहं कर्म कृतं पितुस्तद्यस्त्वामगृह्णाद्विषमस्थबुद्धिम् ।
बुद्ध्यानयैवंविधया चरन्तं सुनास्तिकं धर्मपथादपेतम् ॥ ३३ ॥

२९] ति० टी०–शतमिति । अनेन पूर्वोक्तं समर्थितम् अतीतानागतशक्रेन्द्रादीनां तत्तत्फलानुभवेन तत्तद्भेदभागप्रामाण्यं दर्शितं च ॥ २९ ॥

रा० टी०–कर्मणां सफलत्वे शिष्टाचारं प्रमाणयन्नाह–शतमिति । क्रतूनां यागानां शतमाहृत्य कृत्वा देवराट् इन्द्रः सन् त्रिदिवं स्वर्गं गतः महर्षयः दिवं प्राप्ताः ॥ २९ ॥

गो० टी०–शतमिति। क्रतूनां शतम् आहृत्य कृत्वेत्यर्थः, प्रवासिनं प्रति श्राद्धकरणविधेरभावात् विहितस्थले कुत्रापि न व्यभिचार इति भावः ॥ २९॥

३०] ति० टी०–नास्तिकवाक्यहेतुं नास्ति परलोक इति वचनोपपादकम् ' यदि भुक्तमिहान्येन ' इत्यायुक्तशुष्कतर्करूपम् अमृष्यमाणः जाबालिमिति शेषः । तस्य जाबालेः अनेन नास्तिकवृत्तयो ब्राह्मणा अपि राज्ञोऽवश्यं वाग्दण्डेन दण्ड्या इति सूचितम् ॥ ३० ॥

रा० टी०–अमृष्यमाण इति । उग्रतेजाः नृपतेस्तनूजो रामस्तं जाबालिनोक्तं नास्तिकवाक्यहेतुं निशम्य तस्य वचनानि अमृष्यमाणः अत एव विगर्हमाणः निन्दयन् सन् तं जाबालिं पुनरब्रवीत् ॥ ३० ॥

गो० टी०–अमृष्यमाण इति । नास्तिकवाक्यहेतुं 'यदि भुक्तमिहान्येन देहमन्यस्य गच्छति । दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत्' इत्यादि नास्तिकवाक्यरूपतर्कं विगर्हमाणः मनसि विगर्हमाणः ॥ ३० ॥ ३१ ॥

३१] ति० टी०–पराक्रमश्चान्द्रायण्यादि तपः । यत इमानि त्रिदिवस्य पन्थानमाहुः सन्तः ॥ ३१ ॥

रा० टी०–तद्वचनाकारमाह–सत्यमिति । सन्तः सत्यादीनि त्रिदिवस्य पन्थानमाहुः, एतेन त्वदुक्तकर्मनिष्फलवादः सज्जनविरुद्ध इति सूचितम् ॥ ३१ ॥

३२] ति० टी०–यतश्च तेन सद्वचनेनैवमर्थमेकोदयं शुरुयफलवन्तं यथावदाज्ञाय श्रुत्वा संप्रतिपद्य श्रुत्यनुकूलतर्कैर्निर्णीय तं धर्ममप्रमत्ताः सावधाना यथावच्चरन्तो लोकागमं तत्तल्लोकप्राप्तिं काङ्क्षन्ति ॥ ३२ ॥

रा० टी०–तेनेति । तेन कर्मणां सफलत्वेन हेतुना अर्थं कर्मनिर्वाहकपदार्थं यथावत् आज्ञाय एकोदयं परस्परं संमतिं संप्रतिपद्य प्राप्य सकलं साङ्गं धर्मं यथावत् चरन्तः विप्राः लोकागमं स्वाभिमतलोकप्राप्तिं काङ्क्षन्ति ॥ ३२ ॥

गो० टी०–तेनेति । तेन हेतुना विप्राः एवमर्थं यथावत् आज्ञाय ज्ञात्वा एकोदयं संप्रतिपद्य ऐककण्ठ्यं प्राप्य सकलं धर्मं स्वस्ववर्णाश्रमोचितधर्मम् अप्रमत्ताः सावधानाः यथावच्चरन्तः अनुतिष्ठन्तः लोकागमं स्वर्गादिलोकप्राप्तिं काङ्क्षन्तीति ॥ ३२ ॥

३३] ति० टी०–अतः–तेनेन्दामीति । अनयानुपदोक्तया एवंविधया प्रत्यक्षैकप्रमाणवादिचार्वाकमतानुसारिण्या चरन्तं लोकनाशायाटन्तम् अत एव नास्तिकत्वादिगुणयुक्तं विषमस्थबुद्धिमवैदिकदुर्मार्गप्रतिष्ठितबुद्धिं त्वां यो मे पिताऽगृह्णाद्याजकत्वेनाङ्गीकृतवांस्तत्पितुः कर्म निन्दामि ॥ ३३ ॥

रा० टी०–निन्दामीति । विषमस्थबुद्धिं वेदविरुद्धविषयकनिश्चयवन्तमनया कर्मनिवारिकया बुद्ध्या एवं चरन्तमत एव सुनास्तिकं परलोकाभावविषयकनिश्चयवन्तमत एव धर्मपथादपेतं च्युतं त्वां मत्पिता यत् अगृह्णात् तत् पितुः कृतं कर्म निन्दामि इदं न शोभनं कृतमिति वदामीत्यर्थः, एतेन यत्सम्बन्धादन्यस्य निन्दा तस्य निन्देति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो व्यक्तः ॥ ३३ ॥

गो० टी०–निन्दामीति । विषमस्थबुद्धिम् अवैदिकमार्गनिष्णातबुद्धिम् अनया बुद्ध्या चरन्तं चार्वाकमतानुसारिणीं बुद्धिं परान् प्रत्युपदिश्याचरन्तमित्यर्थः, सुनास्तिकं परलोको नास्तीति बुद्धियुक्तं सुशब्देन वैदिकवत् स्थित्वा चार्वाकमतप्रवर्तक इत्युच्यते । निन्दामि वैदिककर्मभ्यो बहिष्करोमि ॥ ३३ ॥

१ यात्रा इति गो. पाठः ।

यथा हि चोरः स तथा हि बुद्धस्तथागतं नास्तिकमत्र विद्धि ।
तस्माद्धि यः शक्यतमः प्रजानां[1] सै नास्तिकेनाभिमुखो बुधः स्यात् ॥ ३४ ॥
त्वत्तो जनाः पूर्वतरे[3] द्विजाश्च शुभानि कर्माणि बहूनि चक्रुः ।
[4]छित्त्वा सदेमं च परं च लोकं तस्माद्विजाः स्वस्ति कृतं हुतं च ॥ ३५ ॥
धर्मे रताः सत्पुरुषैः समेतास्तेजस्विनो दानगुणप्रधानाः ।
अहिंसका वीतमलाश्च लोके भवन्ति पूज्या मुनयः प्रधानाः ॥ ३६ ॥
इति ब्रुवन्तं वचनं सदोषं[5] रामं महात्मानमदीनसत्त्वम् ।
उवाच पथ्यं पुनरास्तिकं च सत्यं वचः सानुनयं च विप्रः ॥ ३७ ॥

३४] ति० टी०–बौद्धादयो राज्ञश्चोरवदण्ड्या इत्याह–यथा हीति । बुद्धो बुद्धमतानुसारी तथा चोरवदण्ड्य इति हि प्रसिद्धम् । नास्तिकं चार्वाकं तथागतं तत्सदृशं चोरवदण्ड्यं विद्धि । नास्तिकविशेषस्तथागतः तमपि चोरवदण्ड्यमिति शेष इत्यन्ये । वेदप्रामाण्यापहर्तृत्वेन तेषामपि चोरत्वात् । हि निश्चयेन तस्मात्प्रजानामनुग्रहाय राज्ञा चोरवदेव दण्डयितुं शक्यतमो यः स चोरवदेव दण्ड्यः दण्डायोग्ये तु बुधो ब्राह्मणो नास्तिकेऽभिमुखो न स्यात् तत्संभाषणादि न कुर्वीतेत्यर्थः, तुल्यन्यायादण्डासमर्थो ब्राह्मणोऽपि तद्विमुखः स्यादिति सूचितम् ॥ ३४ ॥

रा० टी०–यथेति । यथा चोरः तथैव बुद्धः चोरवत् बुद्धो दण्ड्य इत्यर्थः । अत्र अस्मिन् चोरसादृश्ये वियमानं तथागतं लोकायतिकं नास्तिकं चार्वाकं च विद्धि जानीहि एतावपि चोरवदण्ड्यावित्यर्थः, तस्माद्धेतोः प्रजानां मध्ये यः शक्यतमः दण्डदाने अत्यन्तं समर्थः स एव बुद्धः नास्तिकेन बौद्धादिना अभिमुखः स्यात्, एतेन यो दण्डदाने असमर्थः स नास्तिकं दूरतः परिवर्जयेदिति सूचितम् ॥ ३४ ॥

गो० टी०–प्रत्यक्षैकप्रमाणवादी यदि कश्चिद्राज्ये स्यात् सोऽपि बहिष्करणीय इत्याह–यथेत्यादिना । चोरो यथा निराकरणीयः स वेदबाह्यत्वेन प्रसिद्धोऽपि तथाहि तथैव अत्र अस्मिन् लोके नास्तिकं चार्वाकं तथागतं बुद्धतुल्यं विद्धि तस्माद्यः प्रजानां शङ्क्यतमः अवैदिकत्वेन शङ्कनीयः तेन नास्तिकेन बुधोऽभिमुखो न स्यात् ॥ ३४ ॥

३५] ति० टी०–अथ वेदोक्तधर्मे शिष्टाचारं प्रमाणयति–यतः त्वत्तोऽन्ये इति शेषः, त्वदन्ये द्विजाः जनाः पूर्वतरे श्रेष्ठाः । आर्षमिदम् । 'यदा' इति पाठे नाध्याहारापेक्षा तस्यैव यत इत्यर्थकत्वात् । बहूनि शुभानि चक्रुः इमं लोकं परं च लोकं छित्त्वा ऐहिकामुष्मिकफलकामनां त्यक्त्वापि वेदोक्तोऽयं धर्मं इत्येतावतैव कर्माणि चक्रुरिति तात्पर्यम् । तस्माद्ये द्विजाः स्वस्ति अहिंसा सत्यादिकम्, कृतं तपोदानपरोपकारादि, हुतं यज्ञादि कुर्वते वेदप्रामाण्यादेव ॥ ३५ ॥

रा० टी०–कर्माचरणे शिष्टाचारं प्रमाणयन्नाह–त्वत्त इति । त्वत्तः पूर्वतरे द्विजा जनाः सर्वे द्विजा इत्यर्थः, शुभानि कर्माणि चक्रुस्तस्मात्कर्माचरणस्यावश्यकत्वाद्धेतोः इमं परं च लोकं छित्त्वा सर्वलोकविषयकाभिलाषं त्यक्त्वेत्यर्थः, वियमानाः द्विजाः स्वस्तिकृतं कल्याणोत्पादकं हुतं यागं चक्रारेण सत्यसंभाषणादि च चक्रुः, एतेन नास्तिकमतस्याधुनिकत्वं सूचितम् ॥ ३५ ॥

गो० टी०–ऐहिकामुष्मिकफलसाधने धर्मे शिष्टाचारं प्रमाणयति–त्वत्त इत्यादिना । त्वत्तः पूर्वतरे पुरातनाश्च वराश्च ज्ञानतः श्रेष्ठाश्च जनाः बहूनि शुभानि कर्माणि चक्रुः ते इमं परं च लोकं जित्वा सदा वर्तन्त इति शेषः । सदा वर्तमानत्वं च ग्रहनक्षत्रादिरूपेण दृश्यमानत्वात् "सुकृतां वा एतानि ज्योतींष्यपि यन्नक्षत्राणि" इति श्रुतेः । तस्मात् कर्मानुष्ठानस्यैहिकामुष्मिकसकलफलसाधनत्वात् द्विजाः स्वस्तिमङ्गलात्मकं कर्म हुतं यज्ञादिकृतं च तपोदानादिकं च कुर्वन्तीति शेषः । एवं प्रत्यक्षमेव न प्रमाणं तदतिरिक्तानां वेदानामपि प्रमाणत्वात् तत्त्वं च तेषां महाजनपरिग्रहात् । स चापौरुषेयत्वेन तच्चाविच्छिन्नसंप्रदायत्वे सति अस्मर्यमाणकर्तृकत्वात् वैदिकानि च कर्माणि सफलानि अग्निरविसोमनक्षत्रेन्द्रादिफलभोगस्याबाधितप्रत्यक्षसिद्धत्वात् । अन्यकृतभोजनस्य पथिकाशनत्वाभावस्तु अदर्शनादविहितत्वाच्चेत्युक्तम् ॥३५॥३६॥

३६] ति० टी०–तथा धर्मे रता निष्ठावन्तो ये ते प्रधानाः श्रेष्ठा मुनयो वसिष्ठाद्या ऋषयः पूज्या भवन्ति लोके न त्वादृशा इत्यर्थः ॥ ३६ ॥

रा० टी०–धर्मे इति । सत्पुरुषैः समेताः सहिताः तेजस्विनः दानगुणप्रधानाः अतिदानशीलाः अहिंसकाः हिंसारहिता वीतमलाः मलसंसर्गरहिताः प्रधानाः वसिष्ठादयो मुनयः लोके पूज्याः भवन्ति कर्माचरणस्य निरर्थकत्वे कर्मप्रवर्तकमुनीनां वञ्चकत्वापत्त्या पूज्यत्वं न स्यादिति तात्पर्यम् ॥ ३६ ॥

३७] ति० टी०–इति धिक्कृतो जाबालिः स्वविषयकोपशमनायाह–इतीति । पथ्यं परमार्थम् ॥ ३७ ॥

रा० टी०–इतीति । महात्मानं सर्वपूज्यस्वरूपमदीनसत्त्वं दैन्यसंसर्गशून्यमिति सरोषं[5] ब्रुवन्तं रामं सानुनयमनुनयसहितं

१ शक्त्यतम इति गो. पाठः । २ नेति गो. पाठः । ३ वरा इति गो. पाठः । ४ जित्वेति गो. पाठः । ५ सरोषमिति गो. पाठः । ६ तथ्यमिति गो. पाठः ।

न नास्तिकानां वचनं ब्रवीम्यहं न नास्तिकोऽहं न च नास्ति किंचन ।
समीक्ष्य कालं पुनरास्तिकोऽभवं भवेय काले पुनरेव नास्तिकः ॥ ३८ ॥
स चापि कालोऽयमुपागतः शनैर्यथा मया नास्तिकवागुदीरिता ।
निवर्तनार्थं तव राम कारणात्प्रसादनार्थं च मयैतदीरितम् ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवोत्तरशततमः सर्गः ॥ १०९ ॥

दशोत्तरशततमः सर्गः ।

जाबालये रुष्टं रामं परिसान्त्वयन्वसिष्ठ आब्रह्मणं दशरथावधेर्ज्येष्ठेनैव राज्यकरणात्त्वमेव ज्येष्ठो योग्यश्चातोऽभिषेचयात्मानमिति प्रवर्तयति ।

क्रुद्धमाज्ञाय रामं तु वसिष्ठः प्रत्युवाच ह । जाबालिरपि जानीते लोकस्यास्य गतागतिम् ॥ १ ॥

पथ्यं लोकोपकारकं सत्यं कापट्यरहितमास्तिकं वचः विप्रः पुनरुवाच ॥ ३७ ॥

गो० टी०—इति ब्रुवन्तमिति तथ्यं यथार्थं सत्यं सद्भ्यो हितम् ॥ ३७ ॥

३८] ति० टी०—तदेवाह—नेति । किंच न परलोकादि नास्तीति न, किं त्वस्त्येव । कालं पारलौकिकव्यवहारकालम् । काले लौकिकव्यवहारकाले । एवं च सर्वमतज्ञेन कालविशेषेऽन्यथावाग्व्यवहारेऽपि न तस्य नास्तिकत्वं भवतीति भावः३८

रा० टी०—तद्वचनाकारमाह—नेति । अहं नास्तिकानां वचनं ब्रवीमि नास्तिको नाहं, तत्र हेतुः यतः किंचन परलोकादिकं नास्तीति न सर्वमस्त्येवेत्यर्थः । इति कालं महात्मोपदेशं पुनः पुनः समीक्ष्य विचार्य आस्तिकोऽभवम् एतेन मयि नास्तिकत्वप्राप्तिशङ्का न कर्तव्येति सूचितम् । ननु किमर्थं नास्तिकवचनमुच्चारितवानित्यत आह—काले अयोध्याकर्मकभवद्गमनार्थं नास्तिकः नास्तिकवचनवक्ता भवेय ॥ ३८ ॥

गो० टी०—धर्मसंकटे प्राप्ते सर्वमतज्ञेन विदुषा यत्किंचिन्मतमवलम्ब्यापि तस्य परिहरणीयत्वात् महतो राज्यस्यानायकत्वरूपसंकटपरिहाराय त्वां निवर्तयितुं मया नास्तिकमतमुपन्यस्तं नत्वहं वस्तुतो नास्तिक इत्याह—न नास्तिकानामित्यादिना । किंच न परलोकादिकं नास्तीति न अस्त्येव समीक्ष्य कालं पुनरास्तिकोऽभवं यदा वादिनान्येन नास्तिकमतमवलम्ब्यते तं कालं समीक्ष्य अहं पुनरास्तिकमतमवलम्ब्यभवम् अन्यैर्वादिभिर्नास्तिकमतमवलम्ब्य कुतर्कोद्घाटने तदानीमहमेव त्वदुक्तरीत्या शतशस्तत्खण्डनमकार्षमित्यर्थः । तर्हीदानीं नास्तिकमतं कुतोऽवलम्बितवानसीत्यत्राह—भवेय काले पुनरेव नास्तिक इति । तादृशोऽहमेव पुनः काले धर्मसंकटकाले नास्तिको भवेय धर्मसंकटकालप्रयुक्तोऽयं मम नास्तिकवाद इत्यर्थः । भवेयेत्यनेन इतः परमपि कस्मिंश्चिद्धर्मसंकटकाले नास्तियतमवलम्बनीयमेव न च तावता वस्तुतो नास्तिकत्वं मम भवेदिति भावः ॥ ३८ ॥

३९] ति० टी०—स चापि कालः लौकिकव्यवहारप्रयोजन इत्यर्थः । तत्प्रयोजनमाह—निवर्तनार्थमिति । निवर्तनरूपं प्रयोजनमुद्दिश्य कारणात्त्वदीयास्तिकत्वातिशयस्य लोकेतिप्रसिद्धिसंपादनरूपकारणान्नास्तिकवागुक्ता तादृशीं वाणीं श्रुत्वा क्रुद्धस्य तव प्रसादनार्थं चैतन्न नास्तिकानामित्याद्युदीरितम् ॥ ३९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे नवोत्तरशततमः सर्गः ॥१०९॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—स इति । यतः सः अयोध्यागमनयोग्यः अयं काल उपागतः प्राप्तः अतः कारणात् यत्नतः तव प्रसादनार्थं निवर्तनार्थं च ईरितं सकम्पं नास्तिकवाक् शनैर्मयोदीरिता । एतदिति सामान्ये नपुंसकम् ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे नवोत्तरशततमः सर्गः ॥ १०९ ॥

गो० टी०—तादृशधर्मसंकटकाल एवायमित्याह—स चापीति । एवमपि परमवैदिकस्य तव न युक्तमेतादृशं वचनमित्याशङ्क्याह—निवर्तनार्थमित्यादिना । निवर्तनार्थं तव निवृत्तिज्ञापनार्थं तव वेदमार्गादविचाल्यत्वस्य लोकानां प्रकटीकरणार्थमित्यर्थः, कारणात् भरतकारणात् भरतमुखोल्लासाय तव प्रसादनार्थं चेत्यर्थः ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने नवोत्तरशततमः सर्गः ॥ १०९ ॥

१] ति० टी०—अथ वसिष्ठो भगवतो जाबालिविषयकोपनाटनं शमयितुमभिषेकस्वीकारशपथतया ब्रह्माणमारभ्य ज्येष्ठाभिषेकरूपं कुलाचारं कथयति—क्रुद्धमित्यादि । गतागतिं परलोकगमनं ततः पुनरिहागतिं च, अनेनास्तिकतामूलं जाबालयुक्तौ ॥ १ ॥

रा० टी०—रामजाबालिवचनश्रवणानन्तरकालिकां वशिष्ठोक्तिमाह—क्रुद्धमित्यादिभिः । क्रुद्धं नास्तिकवचनश्रवणहेतु-

१ स्थिति गो. पाठः । २ तमिति गो. पाठः ।

निवर्तयितुकामस्तु त्वामेतद्वाक्यमब्रवीत् । इमां लोकसमुत्पत्तिं लोकनाथ निबोध मे ॥ २ ॥
सर्वं सलिलमेवासीत्पृथिवी तत्र निर्मिता । ततः समभवद्ब्रह्मा स्वयंभूर्दैवतैः सह ॥ ३ ॥
स वराहस्ततो भूत्वा प्रोज्जहार वसुंधराम् । असृजच्च जगत्सर्वं सह पुत्रैः कृतात्मभिः ॥ ४ ॥
आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः । तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥ ५ ॥
विवस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्वयम् । स तु प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥ ६ ॥
यस्येयं प्रथमं दत्ता समृद्धा मनुना मही । तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ ७ ॥

ककोपविशिष्टं राममाज्ञाय वसिष्ठ उवाच । तद्वचनाकारमाह–अस्य लोकस्य गतागतिं गमनागमनं जाबालिरपि जानीते, एतेन जाबालिर्न नास्तिक इति व्यञ्जितम् ॥ १ ॥

गो० टी०–अथ वसिष्ठो जाबालिवचनयाथार्थ्यप्रदर्शनेन तद्विषयकोपं निवर्त्य स्वाभिमतं ज्येष्ठस्यैव राज्यार्हतारूपं निवर्तनोपायं प्रतिपादयति–क्रुद्धमित्यादिना । लोकस्य जनस्य गतं गमनं भावे निष्ठा परलोकप्राप्तिं तत इहागतिं च जानीते नासौ नास्तिक इत्यर्थः । निवर्तनार्थमिति तदुक्तमपि सत्यमित्याह–निवर्तयितुकाम इत्यादिना । ज्येष्ठस्यैव राज्यार्हतां वक्तुमारभते–इमामित्यादि । लोकनाथ! तवैव तत्प्रत्यक्षं हीति भावः ॥ १–३ ॥

२] ति० टी०–लोकनाथेत्यनेन लोकनाथावतारत्वं ध्वनयति ॥ २ ॥

रा० टी०–नन्वेतद्वचनज्ञापिततन्नास्तिकत्वं कथं निवर्तयसीत्यत आह–निवर्तयितुमिति । त्वां निवर्तयितुकामः एतद्वाक्यमब्रवीत् हे लोकनाथ! इमां लोकसमुत्पत्तिं मे निबोध जानीहि ॥ २ ॥

३] ति० टी०–सर्वमिति । पूर्वाहान्तेऽपहृतं सर्वं जगत्पराह्णादौ सलिलमेव सविग्रहहिरण्यगर्भात्मनावस्थितमभूत् । तत्र सलिलान्तः पृथिवी निर्मिता सलिलरूपेण भगवता स्वेच्छया ब्रह्मा विराड्रूपो दैवतैः सहाग्निर्वाग्भूत्वा मुखं प्राविशदित्यायुपदिष्टरीत्या ॥ ३ ॥

रा० टी०–उत्पत्तिप्रकारमाह–सर्वमिति । पूर्वं सृष्टेः पूर्वस्मिन्काले सर्वं सलिलमेवासीत् आत्मकार्यभूताकाशकार्यभूतवायुकार्यभूताग्निकारणकं सलिलमसृजदित्यर्थः । तत्र तस्मिन्सलिले पृथिवी निर्मिता तत्प्रकाशपरब्रह्मणेति शेषः, ततः तत् परब्रह्मैव दैवतैः इन्द्रियाण्यधिष्ठातृदेवैः सह स्वयंभूर्ब्रह्मा समभवत् । अयं भावः, उत्पत्तिकारणीभूतरजोगुणधारणेन परब्रह्मैव ब्रह्मेति संज्ञां प्राप्नोत् तदनन्तरं स ब्रह्मा देवान् असृजदिति॥३॥

४] ति० टी०–ततः स त्रिमूर्तेर्विराजो विष्ण्वात्मकोऽग्रो वराहरूपो भूत्वा वसुंधरां प्रोज्जहार । तस्यैव विराजो रजःप्रधानः सृष्टिव्यापारवानंशो ब्रह्मा इति व्यवह्रियमाणः सर्वं जगत्पुत्रैः सह निजानुग्रहप्राप्तसृष्ट्यादिशक्तिमद्भिर्देवादिभिः सहासृजत् ॥ ४ ॥

रा० टी०–स इति । सः परब्रह्मशब्दवाच्यः ततः पालनहेतोः वसुंधरां जलान्तर्वर्तिपृथ्वीं वराहो भूत्वा प्रोज्जहार, अनन्तरं कृतात्मभिः कृतप्रयत्नैः पुत्रैः सह सर्वं जगत् असृजत् ब्रह्मेति शेषः ॥ ४ ॥

गो० टी०–असृजदिति । आकाशप्रभव इत्यत्राकाशशब्दः परब्रह्मपरः " आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इति श्रुतेः । इत्थमेवाव्यक्तप्रभवो ब्रह्मेति बालकाण्डोक्तमपि शाश्वतः प्रवाहरूपेण नित्यः, नित्यः इतरापेक्षया चिरकालस्थायी अन्यथा आकाशप्रभव इति विरुध्यते अव्ययः तस्मात् स्थानात्तस्य मोक्षसिद्धेः ॥ ४ ॥ ५ ॥

५] ति० टी०–नन्वसावेव सर्वादिर्नेत्याह–आकाशप्रभव इति । आकाशपदेन कारणोपाधिकं ब्रह्मेश्वराख्यम् । ब्रह्मेति त्रिमूर्तेर्ग्रहणम् । अस्मिन्शाश्वतत्वनित्यत्वाव्ययत्वान्यापेक्षिकाणि । तस्माद्विराजो ब्रह्मणः ॥ ५ ॥

रा० टी०–तत्सर्जनप्रकारमाह–आकाशेत्यादिभिः । शाश्वतः सार्वकालिकः अत एव नित्यः ध्वंसाप्रतियोगी अत एव अव्ययः विकारशून्यः आकाशात् आकाशब्रह्मणः प्रभवो यस्य सः यो ब्रह्मा परमपुरुषेच्छामात्रेण गृहीतरजोगुणहेतुकः लब्धब्रह्मसंज्ञं प्रकाशब्रह्मेत्यर्थः । तस्मान्मरीचिः संजज्ञे मरीचेः सुतः कश्यपः संजज्ञे अत एव ' सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैः ' इतिभागवतैनैकवाक्यता । तत्र प्रकाशब्रह्मणः परपुरुषत्वं प्रकाशेपरपुरुषतादात्म्यादिति नानुपपत्तिः, आकाशशब्दस्य परब्रह्मत्वं तु "आकाशो ह वै एतयोः नामरूपयोर्निर्वहिता" इत्यादिश्रुतौ प्रसिद्धम् । निर्णीतं चैतद्विस्तरेण " आकाशस्तल्लिङ्गात् " इतिसूत्रे भाष्ये ॥ ५ ॥

६] ति० टी०–तत्र मन्वन्ता मानसी सृष्टिः । मनोः क्षेत्रे इक्ष्वाकुः ॥ ६ ॥

रा० टी०–विवस्वानिति । कश्यपात् विवस्वान् सूर्यः जज्ञे वैवस्वतः विवस्वत्पुत्रः मनुः जज्ञे स मनुः पूर्वं प्रजापतिः मनोः सुतः इक्ष्वाकुः ॥ ६ ॥

गो० टी०–विवस्वानिति । वैवस्वतः विवस्वत्संबन्धी । तस्येक्ष्वाकुवंशकूटस्थत्वं च दर्शयति–स त्वित्यादिना । मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयमिति तस्यायोध्यानिर्मातृत्वोक्तिः॥ ६–११ ॥

७] ति० टी०–तस्य साक्षात्क्षत्रियत्वात्समृद्धा चतुःसमुद्रवसना मही सर्वा भूर्दत्ता पित्रा मनुनेति शेषः ॥ ७ ॥

१ उक्त्वानिति गो० पाठः । २ काश्यप इति गो० पाठः । ३ सुत इति गो० पाठः ।

इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरित्येव विश्रुतः । कुक्षेरथात्मजो वीर विकुक्षिरुदपद्यत ॥ ८ ॥
विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् । बाणस्य च महाबाहुरनरण्यो महातपाः ॥ ९ ॥
नानावृष्टिर्बभूवास्मिन्न दुर्भिक्षः सतां वरे । अनरण्ये महाराजे तस्करो वापि कश्चन ॥ १० ॥
अनरण्यान्महाराज पृथू राजा बभूव ह । तस्मात्पृथोर्महातेजास्त्रिशङ्कुरुदपद्यत ॥ ११ ॥
स सत्यवचनाद्वीरः सशरीरो दिवं गतः । त्रिशङ्कोरभवत्सूनुर्धुन्धुमारो महायशाः ॥ १२ ॥
धुन्धुमारान्महातेजा युवनाश्वो व्यजायत । युवनाश्वसुतः श्रीमान्मांधाता समपद्यत ॥ १३ ॥
मांधातुस्तु महातेजाः सुसंधिरुदपद्यत । सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् ॥ १४ ॥
यशस्वी ध्रुवसंधेस्तु भरतो रिपुसूदनः । भरतात्तु महाबाहोरसितो नाम जायत ॥ १५ ॥
यस्यैते प्रतिराजान उदपद्यन्त शत्रवः । हैहयास्तालजङ्घाश्च शूराश्च शशबिन्दवः ॥ १६ ॥
तांस्तु सर्वान्प्रतिव्यूह्य युद्धे राजा प्रवासितः । स च शैलवरे रम्ये बभूवाभिरतो मुनिः ॥ १७ ॥

रा० टी०-यस्येति । यस्य यस्मै इक्ष्वाकवे प्रथमं पूर्वं समृद्धा मही मनुना दत्ता तमिक्ष्वाकुमयोध्यायां पूर्वकं प्रथमं राजानं विद्धि ॥ ७ ॥

८-९] ति० टी०-विश्रुतः प्रसिद्धः ॥ ८ ॥ ९ ॥

रा० टी०-इक्ष्वाकोरिति । इक्ष्वाकोः सुतः कुक्षिः इत्येव नाम्ना विश्रुतो विख्यातः, कुक्षेः आत्मजः विकुक्षिः उदपद्यत॥८॥

रा० टी०-विकुक्षेरिति । विकुक्षेस्तु बाणः उदपद्यत, बाणस्य च अनरण्यः उदपद्यतेति शेषः ॥ ९ ॥

१०-११] ति० टी०-सतां वरे श्रेष्ठेऽस्मिन्ननरण्ये राज्यं कुर्वति नानावृष्टिर्न तन्मूलो वा दुर्भिक्षः ॥ १० ॥ ११ ॥

रा० टी०-नेति । सतां वरे महतां स्वीकारकर्तरि अस्मिन् अनरण्ये महाराजे सति अनावृष्टिः दुर्भिक्षश्च न बभूव कश्चन तस्करश्च न बभूव ॥ १० ॥

रा० टी०-अनरण्यादिति । हे महाराज! अनरण्यात् पृथू राजा बभूव । तस्मात्पृथोः त्रिशङ्कुः उदपद्यत ॥ ११ ॥

१२] ति० टी०-स त्रिशङ्कुः सत्यवचनात्स्वीयाद्भगवतो विश्वामित्रस्य सत्यप्रतिज्ञानाच्च ॥ १२ ॥

रा० टी०-स इति । स त्रिशङ्कुः सत्यवचनात् विश्वामित्रसत्यप्रतिज्ञानात् दिवं गतः । त्रिशङ्कोः धुन्धुमारः सुतः प्राभवत् ॥ १२ ॥

गो० टी०-त्रिशङ्कोरिति । युवनाश्व एव महातेजाः महातेजःप्रभावेन महाबलधुन्धुनामकासुरमारणाद्धुन्धुमारसंज्ञामलभतेत्यर्थः ॥ १२ ॥ १३ ॥

१३] ति० टी०-धुन्धुमाराद्युवनाश्च इति । त्रिशङ्कुसुतो युवनाश्च इत्यन्यत्र श्रूयमाणं कल्पान्तरविषयम्, यद्वान्यत्र त्रिशङ्कुसुत इत्यस्य तत्पौत्र इत्यर्थः ॥ १३ ॥

रा० टी०-धुन्धुमारादिति । धुन्धुमाराद् युवनाश्वो व्यजायत, युवनाश्वसुतः मांधाता समपद्यत ॥ १३ ॥

१४-१५] ति० टी०-पुत्रौ द्वाविति । तत्र ध्रुवसंधिर्ज्येष्ठः । तत्पुत्रावलम्बनेनायेऽयोध्याराज्यपरम्परावचनेन ज्येष्ठस्यैवाभिषेक इति सूचितम् ॥ १४ ॥ १५ ॥

रा० टी०-मान्धातुरिति । मान्धातुः सुसन्धिः उदपद्यत, सुसन्धेः ध्रुवसंधिः प्रसेनजित् द्वौ पुत्रौ उदपद्येताम् ॥ १४ ॥

गो० टी०-सुसन्धेरिति । ज्येष्ठस्य ध्रुवसन्धेः वंशकथनाज्ज्येष्ठस्यैव राज्ये स्थापितत्वमुक्तम् ॥ १४ ॥

रा० टी०-यशस्वीति । ध्रुवसंधेस्तु भरतोऽजायत, भरतात्तु असितो नाम जायत अजयत अडभावस्तु आगमशास्त्रस्यानित्यत्वात् ॥ १५ ॥

गो० टी०-भरतादिति । जायतेत्यत्राडभावः अनित्यत्वात् प्रतिराजानः सामन्ताः शत्रवः उदपद्यन्त आसन्नित्यर्थः, हैहयाद्यास्तत्तद्देशाधिपतयः ॥ १५ ॥

१६] ति० टी०-यस्यासितस्य एते प्रतिशत्रव उदपद्यन्त सोऽभवदित्यन्वयः ॥ १६ ॥

रा० टी०-यस्येति । यस्य असितस्य हैहयाद्याः चत्वारो राजानः प्रतिशत्रवः उदपद्यन्त, सोऽसितः तान् हैहयादीन् युद्धे प्रतिव्यूह्य स्वसैन्येनाहत्य विद्यमानोऽपि राजा पित्रा प्रवासितः शत्रुबाहुल्याद् पराजयशङ्कया विवासितः अत एव रम्ये शैलवरे अभिरतः सन् मुनिः परमात्ममननशीलो बभूव । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

१७] ति० टी०-तान्हैहयादिचतुर्विधशत्रून् युद्धे स्वसैन्यं प्रतिव्यूह्यावस्थितोऽपि शत्रुबाहुल्यात्तज्जयोऽशक्य इति बुद्ध्या प्रवासितः संजातप्रवासो बभूव । शत्रुजयोद्देशेन हिमवद्गिरिं तपसे जगामेत्यन्वयः ॥ १७ ॥

गो० टी०-तानिति । प्रतिव्यूह्य युद्धं कृत्वा राजा अ-

१ ऐवेति गो. पाठः । २ वीरः इति गो. रा. पाठः । ३ यशा इति गो. रा. पाठः । ४ दुर्भिक्षमिति गो. पाठः । ५ नापीति गो. पाठः । ६ बाहुरिति गो. पाठः । ७ महाराज इति गो. पाठः । ८ धुन्धुमार इति गो. पाठः । ९ शशिरिति गो. पाठः ।

द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः । तत्र चैका महाभागा भार्गवं देववर्चसम् ॥ १८ ॥
ववन्दे पद्मपत्राक्षी काङ्क्षिणी पुत्रमुत्तमम् । एका गर्भविनाशाय सपत्न्यै गरलं ददौ ॥ १९ ॥
भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः । तमृषिं साभ्युपागम्य कालिन्दी त्वभ्यवादयत् ॥ २० ॥
स तामभ्यवदद्धीमान् वरेप्सुं पुत्रजन्मनि । पुत्रस्ते भविता देवि महात्मा लोकविश्रुतः ॥ २१ ॥
धार्मिकश्च सुभीमश्च वंशकर्तारिसूदनः । श्रुत्वा प्रदक्षिणं कृत्वा मुनिं तमनुमान्य च ॥ २२ ॥
पद्मपत्रसमानाक्षं पद्मगर्भसमप्रभम् । ततः सा गृहमागम्य पत्नी पुत्रमजायत ॥ २३ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया । गरेण सह तेनैव तस्मात्स सगरोऽभवत् ॥ २४ ॥
स राजा सगरो नाम यः समुद्रमखानयत् । इष्ट्वा पर्वणि वेगेन त्रासयान इमाः प्रजाः ॥ २५ ॥
असमञ्जस्तु पुत्रोऽभूत्सगरस्येति नः श्रुतम् । जीवन्नेव स पित्रा तु निरस्तः पापकर्मकृत् ॥ २६ ॥
अंशुमानपि पुत्रोऽभूदसमञ्जस्य वीर्यवान् । दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः ॥ २७ ॥
भगीरथात्ककुत्स्थश्च काकुत्स्था येन तु स्मृताः । ककुत्स्थस्य तु पुत्रोऽभूद्रघुर्येन तु राघवाः ॥ २८ ॥
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः । कल्माषपादः सौदास इत्येवं प्रथितो भुवि ॥ २९ ॥

सितः शैलवरे हिमवति रम्ये निर्भयतया स्थातुं योग्ये मुनिः सत्तमैरतो बभूव अन्यथा तस्मादपि शैलात्प्रवासयेयुरिति भावः ॥ १६ ॥

१८–२३] ति० टी०–इति श्रुतिः प्रसिद्धिः। तत्र चेत्यादि बालकाण्डे व्याख्यातप्रायम् ॥ १८–२३ ॥

रा० टी०–द्वे इति । अस्य असितस्य द्वे भार्ये गर्भिण्यौ बभूवतुः । तत्र तयोर्मध्ये एका भार्या उत्तमं पुत्रं काङ्क्षिणी सती देववर्चसं भार्गवं च्यवनं ववन्दे वन्दनपूर्वकपुत्ररक्षां संप्रार्थ्य स्वगृहे तस्थावित्यर्थः । एका परा गर्भविनाशाय सपत्न्यै गरं विषं ददौ इति श्रुतिः श्रवणम् । श्लोकद्वयमेकान्वयि॥१८॥१९॥

रा० टी०–भार्गव इति । च्यवनो नाम भार्गवः हिमवन्तमुपाश्रितः प्राप्तः संजातसपत्नीकर्तृकगरदाना असितभार्या कालिन्दी तमृषिं च्यवनमभ्युपागम्य अभ्यवादयत् ॥ २० ॥

गो० टी०–द्वे इति । श्रूयत इति श्रुतिः जनवाद इत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०–स इति । सः कालिन्द्या अभिवादितः अत एव प्रीतः च्यवनः पुत्रजन्मनि पुत्रजन्मार्थं वरेप्सुं कालिन्दीं हे देवि ! लोकविश्रुतः धार्मिकत्वादिगुणविशिष्टः महात्मा ते पुत्रो भविता इति अभ्यवदत् । सार्धश्लोक एकान्वयी ॥ २१ ॥

गो० टी०–स इति । सः अभिवादनप्रसन्नो विप्रः पुत्रजन्मनि विषये वरेप्सुं तामभ्यवदत् उवाच, महात्मा महामतिः लोकविश्रुतः सर्वलोकप्रसिद्धः पुत्रो भवितेत्यभ्यवददित्यन्वयः१९

रा० टी०–श्रुत्वेति । श्रुत्वा च्यवनोक्तमाकर्ण्य पद्मपत्रसमानाक्षं तं मुनिमनुमान्य संपूज्य प्रदक्षिणं कृत्वा च ततः मुनिसमीपाद्गृहमागम्य पत्नी असितस्य स्त्री पुत्रमजायत अजनयत् ॥ २२ ॥ २३ ॥

गो० टी०–कृत्वेति । सा देवी तमृषिमनुमान्य संपूज्य ततो गृहमागम्य पद्मपत्रसमानाक्षं पद्मगर्भसमप्रभं पुत्रं व्यजायत व्यजीजनत् ॥ २० ॥ २१ ॥

२४] ति० टी०–तेनैव सह जात इति शेषः ॥ २४ ॥

रा० टी०–सपत्न्येति । यः गरः गर्भजिघांसया सपत्न्या दत्तः तेन गरेण सहैव जात इति शेषः, तस्माद्धेतोः सः गरसहितजन्मा सगरः सगरनामा अभवत् ॥ २४ ॥

२५–२७] ति० टी०–अखानयत् स्वपुत्रैरिति शेषः । इष्ट्वा दीक्षितो भूत्वा वेगेन खननवेगेन त्रासयान उद्वेजयन् २५–२७

रा० टी०–स इति । यः पर्वणि इष्ट्वा दीक्षां गृहीत्वा वेगेन खननशब्दतरसा इमाः प्रजास्त्रासयन् सन् यः सगरः समुद्रमखानयत् स्वपुत्रैरिति शेषः, तस्य सगरस्य असमञ्जः पुत्रोऽभूत् इति नः श्रुतं, सः असमञ्जः पापकर्मकृत् इव पित्रा निरस्तः परित्यक्तः । एव इवार्थे । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

रा० टी०–अंशुमानिति । असमञ्जस्य अंशुमान् पुत्रोऽभूत्, अंशुमतः पुत्रो दिलीपोऽभूत्, दिलीपस्य भगीरथोऽभूत् २७

गो० टी०–स राजेति । यः इष्ट्वा दीक्षां कृत्वा पर्वणि वेगेन अम्बुवेगेन इमाः प्रजाः त्रासयन्तं समुद्रमखानयत् ॥२२॥

गो० टी०–असमञ्ज इति । नः श्रुतम् अस्माभिः श्रुतमित्यर्थः ॥ २३–२६ ॥

२८] ति० टी०–येन कूटस्थेन ककुत्स्थेन । येन रघुणा राघवपदवाच्याः ॥ २८ ॥

रा० टी०–भगीरथादिति । भगीरथात्ककुत्स्थोऽभूत् येन तद्वंशाः काकुत्स्थाः स्मृताः । ककुत्स्थस्य पुत्रो रघुरभूत् येन राघवाः स्मृताः ॥ २८ ॥

२९] ति० टी०–रघोः पुत्रः प्रवृद्धादिनामचतुष्टयेन प्रसिद्धः ॥ २९ ॥

१ एतदाद्यर्धद्वयं गो० नास्ति । २ सगरमिति गो० तु गरमिति रा० पाठः । ३ समुपेति गो० पाठः । ४ विप्र इति गो० पाठः । ५ सुशील इति गो० पाठः । ६ कृत्वा प्रदक्षिणं हृष्टेति गो० पाठः । ७ देवी पुत्रं व्यजायतेति गो० पाठः । ८ जातः स इति गो० पाठः । ९ त्रासयन्तमिति गो० पाठः । १० स्मिति गो० पाठः । ११ विश्रुताः इति गो० रा० पाठः । १२ ककुत्स्थस्य चेति गो० रा० पाठः ।

कल्माषपादपुत्रोऽभूच्छङ्खणस्त्विति नः श्रुतम् । यस्तु तद्वीर्यमासाद्य सहसैन्यो व्यनीनशत् ॥ ३० ॥
शङ्खणस्य तु पुत्रोऽभूच्छूरः श्रीमान्सुदर्शनः । सुदर्शनस्याग्निवर्ण अग्निवर्णस्य शीघ्रगः ॥ ३१ ॥
शीघ्रगस्य मरुः पुत्रो मरोः पुत्रः प्रशुश्रुवः । प्रशुश्रुवस्य पुत्रोऽभूदम्बरीषो महामतिः ॥ ३२ ॥
अम्बरीषस्य पुत्रोऽभून्नहुषः सत्यविक्रमः । नहुषस्य च नाभागः पुत्रः परमधार्मिकः ॥ ३३ ॥
अजश्च सुव्रतश्चैव नाभागस्य सुतावुभौ । अजस्य चैव धर्मात्मा राजा दशरथः सुतः ॥ ३४ ॥
तस्य ज्येष्ठोऽसि दायादो राम इत्यभिविश्रुतः । तद्गृहाण स्वकं राज्यमवेक्ष्स्वं जगन्नृप ॥ ३५ ॥
इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः । पूर्वजे नावरः पुत्रो ज्येष्ठो राजाऽभिषिच्यते ॥ ३६ ॥
स राघवाणां कुलधर्ममात्मनः सनातनं नाद्य विहन्तुमर्हसि ।
प्रभूतरत्नामनुशाधि मेदिनीं प्रभूतराष्ट्रां पितृवन्महायशाः ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥

रा० टी०–रघोरिति । रघोः पुत्रस्तु प्रवृद्धादिनामचतुष्टयवान् प्रथितः प्रसिद्धोऽभवत् ॥ २९ ॥

३०–३३] ति० टी०–कल्माषपादपुत्रः शङ्खणनामा । यः शङ्खणस्तु तत्प्रसिद्धं वीर्यं पराक्रमं युद्धे प्राप्य दैवात्सहसैन्यो व्यनीनशन्नष्टोऽभूत् । स्वार्थे णिरिति कतकः । तीर्थस्तु–यः शङ्खणस्तद्वीर्यं वसिष्ठवीर्यमासाद्य तच्छापादाक्षसत्वं प्राप्य कल्माषपादो राक्षसभावेन स्वसैन्यं स्वपुत्रं शङ्खणं च भक्षितवानिति कथेत्याह ॥ ३०–३३ ॥

रा० टी०–कल्माषेति । कल्माषपादपुत्रः शङ्खणोऽभूत् यः शङ्खणः तद्वीर्यं वसिष्ठशापवीर्यजनितराक्षसत्वमासाद्य प्राप्य सहसैन्यः व्यनीनशत् विनाशं प्राप्नोत्, राक्षसानां विवेकाभावेन स्वसैन्यमप्यभक्षयदित्यर्थः, इति नः श्रुतम् ॥ ३० ॥

रा० टी०–शङ्खणस्येति । शङ्खणस्य पुत्रः सुदर्शनोऽभूत्, सुदर्शनस्य अग्निवर्णः अग्निवर्णस्य शीघ्रगः अभूत् ॥ ३१ ॥

रा० टी०–शीघ्रगस्येति । शीघ्रगस्य मरुः मरोः प्रशुश्रवः, प्रशुश्रवस्य पुत्रः अम्बरीषः अभूत् ॥ ३२ ॥

रा० टी०–अम्बरीषस्येति । अम्बरीषस्य पुत्रो नहुषोऽभूत्, नहुषस्य नाभागः पुत्रोऽभूत् ॥ ३३ ॥

गो० टी०–कल्माषपादेति । तद्वीर्यं वसिष्ठशापाद्राक्षसत्वं प्राप्तस्य कल्माषपादस्य पराक्रममासाद्य व्यनीनशत् विनाशं प्राप्नवानित्यर्थः, राक्षसत्वात् कल्माषपादेन स्वपुत्र एव विनाशित इत्यर्थः ॥ २७–३१ ॥

३४] ति० टी०–अजो नाभागज्येष्ठपुत्रः ॥ ३४ ॥

रा० टी०–अज इति । अजः सुव्रतश्च उभौ नाभागस्य सुतौ, अजस्य सुतो राजा दशरथः ॥ ३४ ॥

३५] ति० टी०–दायादः सुतः ' दायादौ सुतबान्धवौ ' तत्तस्मात्स्वकं राज्यं गृहाण ॥ ३५ ॥

रा० टी०–तस्येति । तस्य दशरथस्य राम इत्यभिविश्रुतः ज्येष्ठः दायादः सुतः यतस्त्वमसि अतः स्वकं ज्येष्ठस्यैव परंपराप्राप्तत्वेन स्वकीयं राज्यं गृहाण जगत् तद्व्यवहारमवेक्षस्व च ' दायादौ सुतबान्धवौ ' इत्यमरः ॥ ३५ ॥

गो० टी०–तस्येति । दायादः सुतः ' दायादौ सुतबान्धवौ ' इत्यमरः ॥ ३२ ॥

३६] ति० टी०–पूर्वजे विद्यमानेऽवरः कनिष्ठो नाभिषिच्यते, अपि तु ज्येष्ठ एवाभिषिच्यते ॥ ३६ ॥

रा० टी०–इक्ष्वाकूणामिति । सर्वेषामिक्ष्वाकूणां पूर्वजः ज्येष्ठ एव राजा भवति । पूर्वजे विद्यमाने सति अवरः गुणैर्न्यूनः अज्येष्ठः कनिष्ठः राजा राज्ञा राजा राजत्वेन वा नाभिषिच्यते ॥ ३६ ॥

गो० टी०–इक्ष्वाकूणामिति । पूर्वजे विद्यमाने अपरः कनिष्ठपुत्रो राज्ये नाभिषिच्यते किंतु ज्येष्ठ एवेत्यन्वयः ॥ ३३ ॥

३७] ति० टी०–कुलधर्मं कुलक्रमागतं ज्येष्ठाभिषेकधर्मं विहन्तुं नार्हसि । प्रभूतराष्ट्रां प्रभूतावान्तरदेशाम् ॥ ३७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥

रा० टी०–स इति । राघवाणां संबन्धी स त्वमात्मनः कुलधर्मं विहातुं त्यक्तुं नार्हसि अतः प्रभूतरत्नामनेकविधरत्नविशिष्टां प्रभूतराष्ट्रां बहुदेशविशिष्टां मेदिनीं पितृवत् अनुशाधि ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे दशाधिकशततमः सर्गः ॥ ११० ॥

गो० टी०–स राघवाणामिति । स त्वमात्मनः संबन्धिनां राघवाणां सनातनं परंपरयाऽऽगतं कुलधर्मं ज्येष्ठाभिषेचनरूपम् अद्य भवन्तमारभ्य न विहन्तुमर्हसि । अन्येन रक्षितुं

---

१ विश्रुत इति गो. पाठः । २ चेति गो. रा. पाठः । ३ प्रशुश्रुक इति गो. प्रशुश्रव इति रा. पाठः । ४ प्रशुश्रुकस्येति गो. प्रशुश्रवस्येति रा. पाठः । ५ श्रुतिरिति गो. पाठः । ६ स्वजनं नृपेति गो. पाठः । ७ राज्येऽभीति गो. पाठः । ८ यश इति गो. पाठः ।

एकदशोत्तरशततमः सर्गः।

पितुरपि मातुराचार्यस्य चाधिकपूज्यत्वं प्रतिपादयन्वसिष्ठस्तदनुरोधेनाश्रितपरिपालनसिद्ध्यर्थं च भरतप्रार्थनां सफलयितुं राममचोदयत्। रामस्तु आचार्यापित्रोरेवाभ्यर्हितत्त्वं समर्थयंस्तद्वचसश्च पूर्वमेवाङ्गीकृतत्वाच्चानतिक्रमणीयत्वं निरणैषीत्। एवं निरुत्तरीकृतो भरतः प्रायोपवेशार्थं कुशासनं तस्तार। रामस्तस्य क्षात्रधर्ममबहिष्कृतत्वं प्रत्यपादयत्तर्हि त्वदङ्गीकृतवनवासं प्रतिनिधिभूतोऽहं पूरय इतिब्रुवन्तं भरतमसामर्थ्यमेव प्रतिनिधेर्विषयस्तदविषयोऽहं निन्द्यः स्यामतो गच्छायोध्यां प्रतिज्ञापूर्तिसमनन्तरमेवाहमयोध्यां प्रवेक्ष्य इति प्रतिज्ञाय पर्यसान्त्वयत्।

वसिष्ठः स तदा राममुक्त्वा राजपुरोहितः। अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः॥ १॥
पुरुषस्येह जातस्य भवन्ति गुरवः सदा। आचार्यश्चैव काकुत्स्थ पिता माता च राघव॥ २॥
पिता ह्येनं जनयति पुरुषं पुरुषर्षभ। प्रज्ञां ददाति चाचार्यस्तस्मात्स गुरुरुच्यते॥ ३॥
स तेऽहं पितुराचार्यस्तव चैव परंतप। मम त्वं वचनं कुर्वन्नातिवर्तेः सतां गतिम्॥ ४॥
इमा हि ते परिषदो ज्ञातयश्च नृपास्तथा। एषु तात चरन्धर्मं नातिवर्तेः सतां गतिम्॥ ५॥
वृद्धाया धर्मशीलाया मातुर्नार्हस्यवर्तितुम्। अस्या हि वचनं कुर्वन्नातिवर्तेः सतां गतिम्॥ ६॥

चाशक्यमित्याह–प्रभूतेति। रत्नानि श्रेष्ठवस्तूनि प्रभूतराष्ट्रां बहुविधावान्तरजनपदयुक्ताम्॥ ३४॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने दशोत्तरशततमः सर्गः॥ ११०॥

१] ति० टी०–मनुमारभ्य त्वत्पर्यन्तं ज्येष्ठेनैव राज्यं पाल्यते इति न्यायेन निवर्त्यमानस्यापि तदनङ्गीकारमालोच्य पितृवचनादपि मद्वचनं गरीय इति वाक्यमुपक्रमते–वसिष्ठ इति॥ १॥

रा० टी०–वशिष्ठस्य वचनान्तरं वर्णयितुमाह–वसिष्ठ इति। राजपुरोहितो वसिष्ठः राममुक्त्वा धर्मसँयुक्तमपरं वचः अब्रवीत्॥ १॥

गो० टी०–अथ रामनिवर्तनोपायान् पुनरुपन्यस्य निरस्यति एकादशोत्तरशततमे–वसिष्ठस्त्विति॥ १॥

२] ति० टी०–गुरव उपास्याः॥ २॥

रा० टी०–तद्वचनाकारमाह–पुरुषस्येति। जातस्य पुरुषस्य आचार्यादयस्त्रयो गुरवो भवन्ति॥ २॥

गो० टी०–एवं कुलधर्मोपपादनेऽपि सर्वं तत् पितृनियोगव्यतिरिक्तविषयमिति मत्वा तूष्णीं स्थितस्य रामस्याशयं जानन् वसिष्ठः पुनर्निवर्तनहेत्वन्तरमाह–पुरुषस्येत्यादिना॥२॥

३] ति० टी०–जनयति शरीरमात्रेण प्रज्ञां ददाति। उपनयनसंस्कारपूर्वं वेदविषयां प्रज्ञां ददाति। तस्मादाचार्य एव गुरुसमवाये गुरुरुच्यते। तदुक्तमापस्तम्बेन–"आचार्यः श्रेष्ठो गुरूणां स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयतः शीर्यत्स्वभावं सर्वयोनिसुलभं प्राकृतं मलजं शरीरम्" इति॥ ३॥

रा० टी०–गुरूणां कर्माणि विभजन्नाह–पितेति। पिता हिशब्देन माता एनं पुरुषं जनयति उत्पादयति, आचार्यः प्रज्ञां ददाति तस्माद्धेतोः सः पितृप्रभृतिः गुरुरुच्यते॥ ३॥

गो० टी०–पितेति मातुरप्युपलक्षणं शरीरमेव मातापितरौ जनयत इत्यर्थः, तस्मात्प्रज्ञादानात् गुरुः मातापितृभ्यां गरीयानित्यर्थः "स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म" इति वचनादिति भावः॥ ३॥ ४॥

४] ति० टी०–नातिवर्तेर्नातिवर्तेथाः सद्गतिधर्मो न भवतीत्यर्थः॥ ४॥

रा० टी०–स इति। सोऽहं पितुः दशरथस्य तव च आचार्यः अतः मम वचनं कुर्वन्सन् सतां गतिं सज्जनमार्गं त्वं नातिवर्तेः उल्लङ्घयेथाः॥ ४॥

५] ति० टी०–परिषदस्त्वत्संबन्धिन्यः श्रेणयः, ज्ञातयो बान्धवाः, नृपाः सेवकनृपाः, एषु रक्षारूपं धर्मं चरन्नतिष्ठन्नित्यर्थः॥ ५॥

रा० टी०–इमा इति। इमास्ते परिषदः प्रजाः ज्ञातयश्च नृपाः खण्डमण्डलेश्वराश्च एषु धर्मं यथा स्यात्तथा चरन् तत्तत्प्रार्थनां स्वीकुर्वन्नित्यर्थः, एष त्वं नातिवर्तेः॥ ५॥

गो० टी०–इमा इति। परिषदः ब्राह्मणसमूहाः श्रेणयः पौरजनाः द्विजाः क्षत्रियाः वैश्याश्च ते त्वत्संबन्धिनः येषु विषये धर्मं परिपालनरूपं चरन् सतां गतिं सतां पूर्वेषां राज्ञां मार्गं नातिवर्तेः नातिवर्तेथाः॥ ५॥

६] ति० टी०–मातुः शुश्रूषणे वचनकरणे चावर्तितुं नार्हसीत्यर्थः 'पितुः शतगुणं माता गौरवेणातिरिच्यते' इति स्मृतेरित्याशयः॥ ६॥

रा० टी०–वृद्धाया इति। मातुः शुश्रूषणमिति शेषः, अवर्तयितुम् अप्रवर्तयितुं नार्हसि अस्याः वचनं कुर्वन्सन् सतां गतिं नातिवर्तेः॥ ६॥

---

१ त्विति गो. पाठः। २ त्रय इति गो. पाठः। ३ श्रेणयश्च द्विजा इति गो. पाठः। ४ त्विति गो. पाठः।

भरतस्य वचः कुर्वन्याचमानस्य राघव । आत्मानं नातिवर्तेस्त्वं सत्यधर्मपराक्रम ॥ ७ ॥
एवं मधुरमुक्तः स गुरुणा राघवः स्वयम् । प्रत्युवाच समासीनं वसिष्ठं पुरुषर्षभः ॥ ८ ॥
यन्मातापितरौ वृत्तं तनये कुरुतः सदा । न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतम् ॥ ९ ॥
यथाशक्तिप्रदानेन स्वापनोच्छादनेन च । नित्यं च प्रियवादेन तथा संवर्धनेन च ॥ १० ॥
स हि राजा दशरथः पिता जनयिता मम । आज्ञापयन्मां यत्तस्य न तन्मिथ्या भविष्यति ॥ ११ ॥
एवमुक्तेन रामेण भरतः प्रत्यनन्तरम् । उवाच विपुलोरस्कः सूतं परमदुर्मनाः ॥ १२ ॥
इह तु स्थण्डिले शीघ्रं कुशानास्तर सारथे । आर्यं प्रत्युपवेक्ष्यामि यावन्मे संप्रसीदति ॥ १३ ॥

गो० टी०—वृद्धाया इति । अवर्तितुं शुश्रूषामकर्तुं नार्हसि अस्यास्तु 'पितुः शतगुणं माता' इत्युक्तायाः ॥ ६ ॥

७–८] ति० टी०—आत्मानं त्वां प्रति राज्यप्रत्यर्पणपूर्वं प्रतिनिवृत्तिं याचमानस्य भरतस्य वचः कुर्वन्नित्यर्थः ॥ ७ ॥८॥

रा० टी०—भरतस्येति । हे सत्यधर्मपराक्रम ! आत्मानं त्वां याचमानस्य प्रार्थयतो भरतस्य वचस्त्वं नातिवर्तेः ॥ ७ ॥

रा० टी०—एवमिति । एवमनेन प्रकारेण मधुरं यथा स्यात्तथा गुरुणा उक्तः स रामः समासीनं वशिष्ठं प्रत्युवाच ॥८॥

गो० टी०—भरतस्येति । सान्त्विता मामिका मातेत्यादिप्रार्थयमानस्य आत्मानम् आत्मभूतं भरतं नातिवर्तेथा इत्युदारधीः सत्यधर्मनिष्णातत्वस्वभावमित्यपरे स्वसाधारणधर्मत्वादाश्रितपारतन्त्र्यं नातिवर्तेथा इत्याचार्याः स एव हि सर्वेश्वरस्य स्वभावः स्वतःसिद्धः । सत्यधर्मपराक्रमोति दृष्टान्तार्थं यथा सत्यवचनमनतिक्रमणीयं यथा च धर्मो नातिक्रमणीयः तथा आश्रितपारतन्त्र्यमपीत्यर्थः, सत्यधर्मयोः पराक्रमः अनुष्ठानशरत्वं यस्येति बहुव्रीहिः ॥ ७ ॥ ८ ॥

९] ति० टी०—मातापितरौ यद्वृत्तं तनये कुरुतो यादृशं पुत्रस्योपकारं कुरुतस्ताभ्यां कृतमुपकाररूपं वस्तु यत्तन्न सुप्रतिकरम् अशक्यप्रत्युपकारमित्यर्थः ॥ ९ ॥

१०] ति० टी०—तदेवाह—यथाशक्तिप्रदानेन बालस्य जीवनार्थं पदार्थभोजनशक्त्यनुरोधतः क्षीरान्नादिप्रदानेन । उच्छादनमुद्वर्तनं तिलपिष्टादिना, संवर्धनं क्रीडनम्, एतैर्यत्ताभ्यां कृतं तन्न सुप्रतिकरमित्यन्वयः ॥ १० ॥

रा० टी०—तद्वचनाकारमाह—यदिति । तनये पुत्रे यद्वृत्तं सेवामित्यर्थः, मातापितरौ कुरुतः तत् सुप्रतिकरं न, तस्य प्रत्युपकृतिर्नास्तीत्यर्थः । तदेव विशदयन्नाह—मात्रा पित्रा च यथाशक्ति शक्तिमनतिक्रम्य प्रदानेन भोजनादिप्रापणेन स्वापनोच्छादनेन स्वापनं शयनप्रवर्तनमुच्छादनं तैलादिना अङ्गप्रमर्दनं ताभ्यां नित्यं प्रियवादेन प्रियवचनेन च संवर्धनेन संवेष्टयुपाकरणेन च यत्कृतं तत् न सुप्रतिकरम् । न सुप्रतिकरमित्युभयान्वयि । श्लोकद्वयं संमिलितान्वयि ॥ ९ ॥ १० ॥

गो० टी०—सति धर्मिणि धर्मोऽस्त्यन्त इति न्यायेन सर्वधर्मसंपादनबीजभूतशरीरोत्पादकत्वात् अत्यन्ताज्ञानदशायामपि सर्वप्रकारसंरक्षणेन बहुविधोपकारकत्वाच्चाचार्यवचनादपि पितृवचनमवश्यं कर्तव्यम् अत एव "मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव" इतिचरमपर्वण्याचार्य उपात्त इत्यभिप्रायेणाह—यन्मातेत्यादिना श्लोकद्वयेन । तनयेन तनयसंपादननिमित्तं यद्वृत्तं व्रतोपवासदेवताराधनादिकं कुरुतः तन्न सुप्रतिकरं सुतरामशक्यप्रत्युपक्रियं मात्रा पित्रा च उत्पत्त्यनन्तरं यथाशक्तिप्रदानेन स्तन्यान्नादिप्रदानेन स्नापनोत्सादनेन नित्यं प्रियवादेन सदा संवर्धनेन च यत्कृतं तच्च न सुप्रतिकरम् ॥९॥१०॥

११] ति० टी०—जनयितोत्पादकः पिता, न तु गौणः पिता यदाज्ञापयद्वनवासरूपम् । एवं च भवदाज्ञातः पूर्वं तेनाज्ञादानान्मया चावश्यमिति प्रतिज्ञानात् भवदाज्ञयापि तदन्यथाकरणमधुनात्यन्तमनुचितमिति भावः ॥ ११ ॥

रा० टी०—स इति । मम जनयिता प्रकटनहेतुः अत एव पिता राजा दशरथः यस्माद्धेतोः माम् आज्ञापयत् भवदाज्ञातः पूर्वमेव न्ययोजयत्तस्माद्धेतोस्तस्य राज्ञः नियोजनं मिथ्या न भविष्यति ॥ ११ ॥

गो० टी०—स हीति । जनयिता पितेति गौणपितृव्यादृत्तिः आज्ञातम् प्रतिज्ञातम् एवं प्रथमं प्रतिज्ञातत्वात् मातृवचनं भातृवचनं च कर्तुं नार्हामीति भावः ॥ ११ ॥

१२] ति० टी०—प्रत्यनन्तरं समीपवर्तिनम् ॥ १२ ॥

रा० टी०—एवमिति । रामेण एवमुक्ते सति विपुलोरस्कः विशालवक्षाः परमदुर्मनाः भरतः प्रत्यनन्तरं समीपवर्तिनं सूतमुवाच ॥ १२ ॥

गो० टी०—एवमिति । प्रत्यनन्तरं समीपस्थं परमोदारः सान्त्विता मामिकेत्यादिना दत्तराज्यनिर्वाहकः ॥ १२ ॥

१३] ति० टी०—आर्यं प्रत्युपवेक्ष्यामि आर्यमुद्दिश्य प्रत्युपवेशनकर्म करिष्ये इत्यर्थः । तत्रोपरोद्धव्यस्य गृहद्वारसमीपे कुशेषु यावत्कार्यसिद्धि निराहारतयावगुण्ठितानन्यैकपार्श्वेनैव पार्श्वान्तरपरिवृत्तिराहित्येन शयनमिति ॥ १३ ॥

रा० टी०—तद्वचनाकारमाह—इहेति । हे सारथे ! इह स्थण्डिले भूमिविशेषे कुशान् शीघ्रमास्तर । तत्प्रयोजनमाह आर्य

१ स्त्रिति गो. पाठः । २ स्नापनोत्सादनेनेति गो. पाठः । ३ आज्ञातं यन्मयेति गो. पाठः । ४ उक्तस्त्विति गो. पाठः । ५ परमोदार इति गो. पाठः । ६ मे इति गो. पाठः । ७ नेति गो. पाठः ।

निराहारो निरालोको धनहीनो यथा द्विजः । शेये पुरस्ताच्छालायां यावन्मां प्रतियास्यति ॥ १४ ॥
स तु राममवेक्षन्तं सुमन्त्रं प्रेक्ष्य दुर्मनाः । कुशोत्तरमुपस्थाप्य भूमावेवास्थितः स्वयम् ॥ १५ ॥
तमुवाच महातेजा रामो राजर्षिसत्तमः । किं मां भरत कुर्वाणं तात प्रत्युपवेक्ष्यसे ॥ १६ ॥
ब्राह्मणो ह्येकपार्श्वेन नरान्रोद्धुमिहार्हति । न तु मूर्धाभिषिक्तानां विधिः प्रत्युपवेशने ॥ १७ ॥
उत्तिष्ठ नरशार्दूलं हित्वैतद्दारुणं व्रतम् । पुरवर्यामितः क्षिप्रमयोध्यां याहि राघव ॥ १८ ॥
आसीनस्त्वेव भरतः पौरजानपदं जनम् । उवाच सर्वतः प्रेक्ष्य किमार्यं नानुशासथ ॥ १९ ॥
ते तदोचुर्महात्मानं पौरजानपदा जनाः । काकुत्स्थमभिजानीमः सम्यग्वदति राघवः ॥ २० ॥

प्रति रामस्तदिश्य यावन्मे न प्रसीदति तावत् प्रत्युपवेक्ष्यामि कुशास्तरणभूमौ संस्थास्यामि ॥ १३ ॥

गो० टी०–इहेति । इह स्थण्डिले भूमौ कुशानास्तर आस्तृणीहि पावनत्वार्थमित्यर्थः, अत एव वक्ष्यति कुशानास्तीर्य राघव इति । प्रत्युपवेक्ष्यामि प्रतिरोत्स्यामीत्यर्थः ॥ १३ ॥

१४] ति० टी०–एतदुत्तरम्–निराहारः इत्यादि पद्यं प्रक्षिप्तमिति कतकस्वरसः । धनहीनोऽधमर्णेन धनहीनः कृतो द्विज उत्तमर्णो यथा स्वधनग्रहणायाधमर्णद्वारि शेते तद्वदहं शये यावन्मां मद्वचनमङ्गीकृत्य प्रतियास्यत्ययोध्यामित्यर्थस्तस्य ॥ १४ ॥

रा० टी०–प्रत्युपस्थितिप्रकारमाह–निराहार इति । निराहारः आहाररहितः निरालोकः दीपादिप्रकाशरहितोऽहं शालायां पुरस्ताद्धनहीनो द्विज इव यावन्न प्रतियास्यति अयोध्यां गमिष्यति तावच्छये शयनं करोमि ॥ १४ ॥

गो० टी०–प्रत्युपवेशप्रकारमाह–अनाहार इति । निरालोकः अवकुण्ठिताननः धनहीनः वृद्ध्यर्थम् ऋणप्रदानार्थिनः शेष्ये शयिष्ये इडभाव आर्षः ॥ १४ ॥

१५] ति० टी०–स तु भरतो राममवेक्षन्तं प्रतीक्षमाणं सुमन्त्रं प्रेक्ष्य तदनुरोधात्कुशानयने विलम्बमानमिति यावत्, कुशोत्तरं कुशास्तरणं स्वयमेवोपस्थाप्यास्तीर्य भूमावेवास्थितः, प्रत्युपवेशनमनुष्ठितवानित्यर्थः ॥ १५ ॥

रा० टी०–स इति । दुर्मनाः स भरतः राममवेक्षन्तं कुशास्तरणकरणाय रामाज्ञां संप्रतीच्छन्तं सुमन्त्रं प्रेक्ष्य अवलोक्य कुशोत्तरं भूमौ स्वयमुपस्थाप्य संस्तीर्य आस्थितः ॥ १५ ॥

गो० टी०–स त्विति । राममवेक्षन्तं रामाज्ञां काङ्क्षन्तमित्यर्थः, कुशोत्तरं कुशास्तरणम् उपस्थाप्य आनीय स्वयमेवास्तरत् आस्तृणात् शयनं कृतवानित्यर्थः ॥ १५ ॥

१६] ति टी०–किं कुर्वाणं किमन्याय्यं कुर्वाणम् ॥१६॥

रा० टी०–तमिति । राजर्षिसत्तमो रामस्तं भरतमुवाच । तद्वचनाकारमाह–हे भरत ! किमपकरणमिति शेषः, कुर्वाणं मामुद्दिश्य प्रत्युपवेक्ष्यसे मया न किंचिदपकृतमिति तात्पर्यं तेन प्रत्युपवेशनमनुचितमिति सूचितम् ॥ १६ ॥

गो० टी०–तामिति । किं कुर्वाणं किमपकारं कुर्वाणं तात इति सान्त्वनार्थमुक्तम् ॥ १६ ॥

१७] ति० टी०–ब्राह्मणः धनादिना वियोजित इति शेषः, एकपार्श्वेनेति प्रत्युपवेशधर्मोपलक्षणम् अनेन क्षत्रियाणामेतत्करणे प्रायश्चित्तमिति सूचितम् ॥ १७ ॥

रा० टी०–ब्राह्मण इति । एकपार्श्वेन एकपार्श्वशयनादिना नरान् स्वापकारिजनान् रोद्धुमपकृतेर्निवर्तयितुं ब्राह्मण एवार्हति अतः मूर्धाभिषिक्तानां राजन्यानां प्रत्युपवेशने न विधिः, एतेन विधिविरुद्धकरणे त्वां पापं प्राप्स्यतीति बोधितम् ॥१७॥

गो० टी०–ब्राह्मण इति । एकपार्श्वेन एकपार्श्वशयनेन मूर्धाभिषिक्तानामभिषिक्तक्षत्रियाणाम् ॥ १७ ॥ १८ ॥

१८] ति० टी०–तस्मादुत्तिष्ठेति ॥ १८ ॥

रा० टी०–पापस्पर्शाभावे उपायं वदन्नाह–उत्तिष्ठेति । नरशार्दूल ! एतदुक्तं दारुणं व्रतं हित्वा इतोऽस्माद्वनात् पुरवर्यां पुरश्रेष्ठामयोध्यां क्षिप्रं याहि ॥ १८ ॥

१९] ति० टी०–आसीन एव प्रत्युपविष्ट एव । नानुशासथ नानुशिष्टेत्यर्थः, इत्युवाचेत्यन्वयः ॥ १९ ॥

रा० टी०–आसीन इति । आसीन एव भरतः सर्वतः चतुर्दिक्षु प्रेक्ष्य अवलोक्य यूयमार्यं रामं किं किमर्थं नानुशासथ इति पौरजानपदं जनमुवाच ॥ १९ ॥

गो० टी०–आसीन इति । नानुशासथेत्यत्र इति करणं बोध्यम् ॥ १९ ॥

२०] ति० टी०–काकुत्स्थं रामं प्रति राघवो भवान्भरतः सम्यग्वदतीति जानीमः ॥ २० ॥

रा० टी०–त इति । ते भरतेन प्रबोधिताः जनाः काकुत्स्थं रामं राघवो भवान् सम्यग्वदति इति तथं जानीम इति महात्मानं भरतमूचुः ॥ २० ॥

गो० टी०–त इति । काकुत्स्थं राममभिजानीमः अभितो जानीमः सत्यसंधं जानीम इत्यर्थः ॥ २० ॥

१ अनाहार इति गो. पाठः । २ शेष्य इति गो. पाठः । ३ शालाया इति गो. पाठः । ४ नेति गो. रा. पाठः । ५ आस्तरेति गो. पाठः । ६ उपवेक्ष्यसीति गो. पाठः । ७ किमर्थमिति रा. पाठः । ८ तमूचुरिति गो. पाठः ।

एषोऽपि हि महाभागः पितुर्वचसि तिष्ठति । अत एव न शक्ताः स्म व्यावर्तयितुमञ्जसा ॥ २१ ॥
तेषामाज्ञाय वचनं रामो वचनमब्रवीत् । एवं निबोध वचनं सुहृदां धर्मचक्षुषाम् ॥ २२ ॥
एतच्चैवोभयं श्रुत्वा सम्यक्संपश्य राघव । उत्तिष्ठ त्वं महाबाहो मां च स्पृश तथोदकम् ॥ २३ ॥
अथोत्थाय जलं स्पृष्ट्वा भरतो वाक्यमब्रवीत् । शृण्वन्तु मे परिषदो मन्त्रिणः शृणुयुस्तथा ॥ २४ ॥
न याचे पितरं राज्यं नानुशासामि मातरम् । एवं परमधर्मज्ञं नानुजानामि राघवम् ॥ २५ ॥
यदि त्ववश्यं वस्तव्यं कर्तव्यं च पितुर्वचः । अहमेव निवत्स्यामि चतुर्दश वने समाः ॥ २६ ॥
धर्मात्मा तस्य सत्येन भ्रातुर्वाक्येन विस्मितः । उवाच रामः संप्रेक्ष्य पौरजानपदं जनम् ॥ २७ ॥
विक्रीतमाहितं क्रीतं यत्पित्रा जीवता मम । न तल्लोपयितुं शक्यं मया वा भरतेन वा ॥ २८ ॥

२१] ति० टी०–एषोऽपि महाभागो रामः पितुर्वचसि तिष्ठति तदपि सम्यगेव । यदेवमत एवेत्यर्थः । अत्र भगवता स्वव्यावर्तननिश्चयेनागतानामपि पौरादीनामन्तर्यामिविधया स्वानुकूलवचनप्रयोगः कारितः भरतस्य तु यशःख्यापनाय ज्येष्ठे कनिष्ठेनैवं वर्तितव्यमिति लोकव्यवहारबोधनाय च तथा प्रवर्तनमिति प्रतिभाति ॥ २१ ॥

रा० टी०–नन्वु मम वचनस्य सम्यक्त्वे रामः कथं न भवद्भिः बोध्यते इत्यत्र आहुः–एष इति । महाभागः एष रामोऽपि पितुर्वचसि आज्ञायां तिष्ठति अत एव व्यावर्तयितुं निवर्तयितुं न शक्ताः स्मः ॥ २१ ॥

गो० टी०–सम्यग्वदतीत्येतदुपपादयति–एष इत्यादिना। अञ्जसा शीघ्रं व्यावर्तयितुं न शक्ताः स्म इति तं भरतमूचुरित्यन्वयः ॥ २१ ॥ २२ ॥

२२] ति० टी०–रामो वचनमब्रवीदिति भरतं प्रतीति शेषः । धर्मचक्षुषां धर्मदर्शिनां निबोध शृणु ॥ २२ ॥

रा० टी०–तेषामिति । तेषां पौरजनानां वचनमाज्ञाय रामोऽब्रवीत् भरतमिति शेषः । तद्वचनाकारमाह–धर्मचक्षुषां सुहृदामेवं वचनं निबोध जानीहि ॥ २२ ॥

२३] ति० टी०–उभयं त्वद्विषयं मद्विषयं च वचनं श्रुत्वा संपश्य विचारय । विचारेणापि कर्तव्यं निश्चेतुमशक्तश्चेन्मयोक्तं कुरु इति शेषः । तत्स्वोक्तमाह–उत्तिष्ठेति । क्षत्रियाविहितप्रत्युपवेशनप्रायश्चित्तमाह–मां च स्पृश तथोदकम् । उदकस्पर्श आचमनार्थः ॥ २३ ॥

रा० टी०–वचनाकारमाह–एतदिति । राघव हे भरत! एतत्पौरजनैः मया चोच्चारितमुभयं श्रुत्वा सम्यक् संपश्य द्वयोर्वचनयोः साम्यं निश्चिनु तस्मात् हे महाबाहो! त्वमुत्तिष्ठ माञ्चदकं च स्पृश, एतेन अविहितप्रत्युपवेशनस्य प्रायश्चित्तं जलादिस्पर्श इति प्रबोधितम् ॥ २३ ॥

गो० टी०–एतदिति । एतदुभयं मद्वचनं पौरजनवचनं चेत्यर्थः । सम्यक्संपश्य कर्तव्यं सम्यक्निरूपय मां च स्पृश तथोदकमिति क्षत्रियाविहितप्रत्युपवेशनप्रायश्चित्तार्थमित्यर्थः, वसिष्ठादिषु विद्यमानेषु स्वस्पर्शनेविधेः इतः परमेवंविधं न क्रियत इति शपथार्थं जलं स्पृष्ट्वा मां स्पृशेत्यपि सिद्धम् ॥ २३ ॥

२४] ति० टी०–परिषदः सभ्याः ॥ २४ ॥

रा० टी०–अथेति । अथ प्रायश्चित्तोपदेशरूपरामवचनश्रवणानन्तरं भरतः उत्थाय जलं तदुपलक्षितरामं च स्पृष्ट्वा वाक्यमब्रवीत् । तद्वचनाकारमाह–परिषदादयो यूयं मद्वचनं शृण्वन्तु, तत्र परिषदः सभ्याः श्रेणयः प्रजासमूहाः ॥ २४ ॥

गो० टी०–अथेत्यादि । न याचे न याचितवान् नानुशासामि नानुशासिम एवं कुर्विति नानुशिष्टवानस्मीत्यर्थः, नानुजानामि वनवासाय नानुज्ञातवानस्मीत्यर्थः ॥ २४ ॥ २५ ॥

२५] ति० टी०–न याचे न याचितवान् । नानुशासामि नानुशिष्टवान् शबार्थः । नानुजानामि वनवासायेति शेषः । 'नाभिजानामि' इति पाठे वनवासोद्युक्तमिति शेषः ॥ २५ ॥

रा० टी०–तद्वचनाकारमाह–नेति । पितरं पितुः राज्यं नानुयाचे अन्वयार्च्चे, मातरं नानुशासामि अन्वशासं परमधर्मज्ञं राघवं रामं नानुजानामि वनवासायानुमतिं नाकार्षम्, एतेन स्वापराधाभावः सूचितः ॥ २५ ॥

२६] ति० टी०–अहमेव प्रतिनिधित्वेनेति शेषः ॥२६॥

रा० टी०–तात्कालिकं स्वकर्तव्यं बोधयन्नाह–यदीति । यदि पितुर्वचः अवश्यं कर्तव्यमत एव वने अवश्यं वस्तव्यं तर्हि अहमेव वने निवत्स्यामि रामप्रतिनिधिभूतत्वेन वनवासं करिष्यामि ॥ २६ ॥

गो० टी०–यदीति। अवश्यं पितुर्वचः कर्तव्यं वने वस्तव्यं चेति यदि मन्यसे तर्हि अहमेव त्वत्प्रतिनिधित्वेन वने वत्स्यामि त्वं तु मत्प्रतिनिधित्वेनाऽयोध्यां पालय एवं च सत्युभाभ्यां सम्यक्पितृवचनं कृतं भवेदिति भावः, इति भरतो वाक्यमब्रवीदित्यन्वयः ॥ २६ ॥ २७ ॥

२७] ति० टी०–तस्य भ्रातुर्भरतस्य ॥ २७ ॥

रा० टी०–धर्मात्मेति । सत्येन भ्रातुः भरतेन वाक्येन विस्मितः धर्मात्मा रामः संप्रेक्ष्य निश्चित्य पौरजानपदं जनमुवाच ॥ २७ ॥

२८] ति० टी०–यज्जीवता पित्रा विक्रीतं मूल्यं गृहीत्वा

१ स्मः इति गो. पाठः । २ श्रेणय इति गो.-रा. पाठः । ३ तच्चेनेति गो. पाठः ।

उपाधिर्न मया कार्यो वनवासे जुगुप्सितः । युक्तमुक्तं च कैकेय्या पित्रा मे सुकृतं कृतम् ॥ २९ ॥
जानामि भरतं क्षान्तं गुरुसत्कारकारिणम् । सर्वमेवात्र कल्याणं सत्यसंधे महात्मनि ॥ ३० ॥
अनेन धर्मशीलेन वनात्प्रत्यागतः पुनः । भ्रात्रा सह भविष्यामि पृथिव्याः पतिरुत्तमः ॥ ३१ ॥
वृतो राजा हि कैकेय्या मया तद्वचनं कृतम् । अनृतान्मोचयानेन पितरं तं महीपतिम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे एकादशोत्तरशततमः सर्गः ॥ १११ ॥

द्वादशाधिकशततमः सर्गः ।

रामभरतयोर्वचःशुश्रूषवो व्योमाजिरगता वसुदस्तत्संवादं प्राशंसन् । पितुरानृण्यकामो रामः स्वकर्तव्यं निश्चित्य स्वावासाभिमुखोऽभूत्तथा रामनिवर्तने निरस्तोपायो भरतो राज्यरक्षणे स्वासामर्थ्यं कथयन्रामं प्रार्थयते । तेन स्वप्रतिज्ञाया दुस्त्यजत्वे उक्ते हैमपादुकायुगुलं रामाग्रे विन्यस्य तत्र पादोपन्यासं ययाचे । रामस्तदनुष्ठाय तत्पादयुगुलं भरताय ददावथ वनवासपूर्तिसमनन्तरदिने त्वदनागमनेऽहमग्निं प्रवेष्टेति भरतः प्रतिजज्ञे । रामस्तदुररीकुर्वन्ननुजावाश्लिष्य यथार्हं सकलजनान् संमानपूर्वं गमनेऽनुज्ञाप्य स्वोटजं प्राविशत् ।

तमप्रतिमतेजोभ्यां भ्रातृभ्यां रोमहर्षणम् । विस्मिताः संगमं प्रेक्ष्य समुपेता महर्षयः ॥ १ ॥

दत्तम्, आहितमाधिरूपेण न्यस्तम्, क्रीतं मूल्यं दत्त्वा गृहीतम् । एवं चेदं राज्यं कैकेय्यै आधिरूपेण दत्तं विक्रीतं वेति भावः ॥ २८ ॥

रा० टी०—तद्वचनाकारमाह—विक्रीतमिति । जीवता पालयता मम पित्रा यद्विक्रीतं मूल्यं गृहीत्वा कस्मैचिद्दत्तमाहितं न्यासरूपतया संस्थापितं क्रीतं मूल्यं दत्त्वा स्वीकृतं तन्मया भरतेन वा लोपयितुमन्यथा कर्तुं न शक्यमेतेन तुल्यन्यायात्प्रीतिदत्तमप्यन्यथा कर्तुं न शक्यते इति ध्वनितम् २८

गो० टी०—विक्रीतमिति । आहितमाधिरूपेण न्यस्तं विक्रयस्त्यागः क्रयः स्वीकार इति भेदः मह्यं वनवासं दत्त्वा तन्मूल्यत्वेन राज्यं स्वीकृतवान्, यद्वा मम वनवासमाधिं कृत्वा तव राज्यं दापितवान् तल्लोपयितुं न शक्यमित्यर्थः ॥ २८ ॥

२९] ति० टी०—उपाधिः प्रतिनिधिः । जुगुप्सितत्वं च स्वस्य तत्समर्थत्वात् । असमर्थे हि कर्तरि स विहितः । उक्तौ कृतौ च युक्तत्वं वररूपकृणापाकरणार्थत्वाद्बहूपकारकत्वाच्च । अतस्तस्या मातुस्तस्य पितुश्च वचनमवश्यमेव कार्यमिति शेषः, अयुक्तवादित्वे हि 'गुरोरप्यवलिप्तस्य' इत्यादिन्यायविषयत्वं स्यादिति भावः ॥ २९ ॥

रा० टी०—नन्वु प्रतिनिधिकरणे तद्वचनत्यागो न भवतीत्यत आह—उपाधिरिति । यतः युक्तं मम योग्यं कैकेय्या उक्तमतः एवं पित्रा सुकृतमङ्गीकृतमतः जुगुप्सितः असामर्थ्यसूचकत्वेन निन्दितः उपाधिः प्रतिनिधिः मया न कार्यः ॥२९॥

गो० टी०—वारुणस्नानाशक्तस्य मान्त्रस्नानवदशक्तस्यैव प्रतिनिधित्वीकार अहं तु वनवासे शक्तः अतः प्रतिनिधाचरणं न पितृऋणमोचनमित्याह—उपाधिरित्यादिना । उपधिः प्रतिनिधिरित्यर्थः, मया शक्तेन जुगुप्सितः हीनकल्पत्वेन निन्दितः 'हीनकल्पं न सेवेत पुरुषो विभवे सति' इति वचनादिति भावः । कैकेय्या युक्तं योग्यमेवोक्तं पित्रा च सुकृतं धर्म्यं कृतम् आवाभ्यां तदकरणे हीनकल्पकरणे च पितुरनृतं स्यात् ॥ २९–३१ ॥

३०–३१] ति० टी०—अत्र भरते सर्वमेव कल्याणं राज्यपरिपालनादिरूपं संभावयामीति शेषः ॥ ३० ॥ ३१ ॥

रा० टी०—भरतस्य राज्ययोग्यतां बोधयन्नाह—जानामीति । क्षान्तं क्षमाशीलं गुरुसत्कारकारिणं अतिसत्कारकरणशीलं भरतमहं जानामि अत एव सत्यसंधे सत्यप्रतिज्ञे अत्र अस्मिन् भरते सर्वं कल्याणमेव, एतेन राज्यपरिपालनस्य क्षतिर्न भवितेति सूचितम् ॥ ३० ॥

रा० टी०—अनेनेति । वनात्पुनः प्रत्यागतोऽहं धर्मशीलेन भ्रात्रा भरतेन सह पृथिव्याः उत्तमः पतिर्भविष्यामि ॥ ३१ ॥

३२] ति० टी०—तद्वचनं कैकेयीवचनं मोचयानेन मोचयमानेन । एवं मदुक्तकरणेन त्वमपि पितरमनृतान्मोचयेति ध्वनितम् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्ड एकादशोत्तरशततमः सर्गः॥१११॥

रा० टी०—वृत इति । राजा कैकेय्या दृतः वरदायकत्वेन स्वीकृतः मया च तद्वचनं कृतं स्वीकृतमतः अनेन त्वत्कर्तृकराज्यपरिपालनेन मत्कर्तृकवनवाससंमतिदानेन च पितरमनृतात् मृषासंसर्गात् मोचय ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकादशाधिकशततमः सर्गः ॥ १११ ॥

गो० टी०—वृत इति । पितरम् अनेन राज्यपरिपालनेन अनृतात् मोचयेत्यर्थः ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्यानेऽयोध्याकाण्डव्याख्याने एकादशोत्तरशततमः सर्गः ॥१११॥

१] ति० टी०—भ्रातृभ्यामित्यार्षं तृतीया भ्रातोः संगम-

१ समवेता इति गो. पाठः ।

अन्तर्हिता मुनिगणाः स्थिताश्च परमर्षयः । तौ भ्रातरौ महाभागौ काकुत्स्थौ प्रशशंसिरे ॥ २ ॥
सदार्यौ राजपुत्रौ द्वौ धर्मज्ञौ धर्मविक्रमौ । श्रुत्वा वयं हि संभाषामुभयोः स्पृहयामहे ॥ ३ ॥
ततस्तृषिगणाः क्षिप्रं दशग्रीववधैषिणः । भरतं राजशार्दूलमित्यूचुः संगता वचः ॥ ४ ॥
कुले जात महाप्राज्ञ महावृत्त महायशः । ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे ॥ ५ ॥
सदानृणमिमं रामं वयमिच्छामहे पितुः । अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः ॥ ६ ॥
एतावदुक्त्वा वचनं गन्धर्वाः समहर्षयः । राजर्षयश्चैव तथा सर्वे स्वां स्वां गतिं गताः ॥ ७ ॥
ह्लादितस्तेन वाक्येन शुशुभे शुभदर्शनः । रामः संहृष्टवदनस्तानृषीनभ्यपूजयत् ॥ ८ ॥
त्रस्तगात्रस्तु भरतः स वाचा सज्जमानया । कृताञ्जलिरिदं वाक्यं राघवं पुनरब्रवीत् ॥ ९ ॥

मित्यर्थः । संगमं प्रेक्ष्य विस्मिता इत्यन्वयः । सशुपेताः स्वार्थ-रावणवधसंपत्तये तत्र स्थले समवेता महर्षयो नारदाद्याः ॥१॥

रा० टी०–रामवचनानन्तरकालिकवृत्तमाह–तमित्यादि-भिः । अप्रतिमतेजोभ्यामुपमारहिततेजोविशिष्टाभ्यां भ्रातृ-भ्यां जातं संगमं प्रेक्ष्य सशुपेताः तत्र प्राप्ता महर्षयः विस्मिता आसन्निति शेषः ॥ १ ॥

गो० टी०–अथ भरतस्य समाधानं कृत्वा प्रस्थापनं द्वादशोत्तरशततमे–तमित्यादि । भ्रातृभ्यां संगमं भ्रातृभ्य-मन्योन्यसौहार्देन कृतं संगमं प्रेक्ष्य विस्मिता अभूवन्निति शेषः ॥ १ ॥

२] ति० टी०–अन्तर्हितास्तयोः संगमं द्रष्टुमागता अदृ-श्यरूपा आकाशस्थाः ॥ २ ॥

रा० टी०–अन्तर्हिता इति । अन्तर्हिताः शक्तिविशेषे-णालक्षितस्वरूपाः मुनिगणाः स्थिताः प्रत्यक्षतो विद्यमानाश्च परमर्षयश्च काकुत्स्थौ भ्रातरौ प्रशशंसिरे ॥ २ ॥

गो० टी०–अन्तर्हिता इति । अन्तर्हिताः पूर्वमेवान्त-र्धानं प्राप्ताः ऋषिगणाः राजर्षिगणाः सिद्धाः देवजातिविशेषाः परमर्षयः देवर्षयः । इदमुत्तरत्र एतावदुक्त्वा वचनं गन्धर्वाः समहर्षयः । राजर्षयश्चैवेत्यत्र व्यक्तीभविष्यति ॥ २ ॥

३] ति० टी०–धर्मविक्रमौ धर्ममार्गवर्तिनौ । उभयोः संभाषां संभाषणं श्रुत्वोभाभ्यां स्पृहयामहे प्रीता भवामः, यद्वा तादृशसंभाषणं श्रोतुं पुनः पुनर्वाञ्छामहे इति ॥ ३ ॥

रा० टी०–प्रशंसाकारमाह–सदेति । धर्मविक्रमौ धर्मप्र-वर्तकौ यौ द्वौ राजपुत्रौ तयोरुभयोः संभाषां परस्परं संभाषणं श्रुत्वा वयं सदा स्पृहयामहे पुनः पुनः श्रोतुं वाञ्छामः ॥ ३ ॥

गो० टी०–स धन्य इति । धर्मविक्रमौ धर्मशूरौ वयम्-भयोः संभाषां श्रुत्वा स्पृहयामहे पुनः पुनः श्रोतुं वाञ्छाम इत्यर्थः, वयं ययोरुभयोः संभाषां श्रुत्वा स्पृहयामहे तादृशौ धर्मज्ञौ धर्मविक्रमौ द्वौ पुत्रौ यस्य स धन्य इत्यन्वयः ॥ ३ ॥

४] ति० टी०–संगता ऐकमत्यं प्राप्ताः ॥ ४ ॥

रा० टी०–तत इति । ततः मुनिकर्तृकप्रशंसानन्तरं दशग्रीवस्य रावणस्य वधैषिणः वधविषयकेच्छावन्तः संगताः ऋषिगणाः भरतमित्यूचुः ॥ ४ ॥

गो० टी०–तत इति । संगताः ऐककण्ठ्यं प्राप्ताः ॥ ४ ॥

५] ति० टी०–पितरं यद्यवेक्षसे पितुः सुखं यदीच्छसी-त्यर्थः ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह–कुले इति । पितरं पितृ-सुखं यद्यवेक्षसे वाञ्छसि तर्हि रामस्य वाक्यं ग्राह्यम् ॥ ५ ॥

गो० टी०–कुल इति । पितरं यद्यवेक्षसे पितरं सुखा-स्थितं यदि मन्यस इत्यर्थः ॥ ५–८ ॥

६–७] ति० टी०–सदानृणं सता स्वकृतसमीचीनानु-ष्ठानेन सर्वतोऽनृणमित्यर्थः । अनृणत्वात् रामप्रतिज्ञयेति शेषः, यदि राम इदानीं विपरीतं कुर्यात्प्रतिनिधिद्वारा वानुतिष्ठे-त्तदा ते पितुः पुनः स्वर्गाद्भ्रंश एवेति ध्वनिः ॥ ६ ॥ ७ ॥

रा० टी०–सदेति । यतः कैकेय्याः अनृणत्वात् अनृणत्वं प्राप्य केकय्यै वरं दत्त्वेत्यर्थः, दशरथः स्वर्गं गतः अतः रामं सदा वनवासक्लेशेनापि पितुरनृणम् ऋणनिवर्तकं वयमिच्छामहे एतेन रामकर्तृकवनवासमन्तरा राज्ञोऽभिलाषपूर्तिर्न भविष्य-तीति सूचितम्, तेन रावणवधार्थमेव राज्ञा रामः प्रेषित इति व्यञ्जितम् ॥ ६ ॥

रा० टी०–एतावदिति । एतावद्वचनमुक्त्वा समहर्षयः महर्षिसहिताः गन्धर्वाः राजर्षयश्च स्वां स्वां गतिं स्थानं गताः प्राप्ताः ॥ ७ ॥

८] ति० टी०–अभ्यपूजयत् सत्यज्ञां धर्मतो रक्षित-वन्त इत्युक्तवानित्यर्थः ॥ ८ ॥

रा० टी०–ह्लादित इति । तेन ऋषिगणोक्तेन वाक्येन ह्लादितः सुखं प्राप्तः अत एव संहृष्टवदनः रामः तान् ऋषीन् अभ्यपूजयत् ॥ ८ ॥

९] ति० टी०–त्रस्तगात्र उद्विग्नगात्रः । ' स्रस्त ' इति पाठान्तरम् ॥ ९ ॥

रा० टी०–त्रस्तेति । सज्जमानया रामकर्तृकवनवास-विषयकासक्तिसंपादिकया वाचा त्रस्तगात्रः शिथिलशरीरः कृताञ्जलिर्भरतः इदं वाक्यं पुनरब्रवीत् ॥ ९ ॥

---

१ स्रस्तेति गो. पाठः । २ सिद्धा इति गो. पाठः । ३ महात्मानाविति गो. पाठः । ४ तदेति गो. पाठः । ५ शुभेनेति गो. पाठः ।

राम धर्ममिमं प्रेक्ष्य कुलधर्मानुसंततम् । कर्तुमर्हसि काकुत्स्थ मम मातुश्च याचनाम् ॥ १० ॥
रक्षितुं सुमहद्राज्यमहमेकस्तु नोत्सहे । पौरजानपदांश्चापि रक्तान्रञ्जयितुं तदा ॥ ११ ॥
ज्ञातयश्चापि योधाश्च मित्राणि सुहृदश्च नः । त्वामेव हि प्रतीक्षन्ते पर्जन्यमिव कर्षकाः ॥ १२ ॥
इदं राज्यं महाप्राज्ञ स्थापय प्रतिपद्य हि । शक्तिमान्सि हि काकुत्स्थ लोकस्य परिपालने ॥ १३ ॥
एवमुक्त्वापतद्भ्रातुः पादयोर्भरतस्तदा । भृशं संप्रार्थयामास राघवेऽतिप्रियं वदन् ॥ १४ ॥
तमङ्के भ्रातरं कृत्वा रामो वचनमब्रवीत् । श्यामं नलिनपत्राक्षं मत्तहंसस्वरः स्वयम् ॥ १५ ॥
आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या । भृशमुत्सहसे तात रक्षितुं पृथिवीमपि ॥ १६ ॥

गो० टी०—त्रस्तगात्र इति । सज्जमानया स्खलन्त्या स्वमनोरथस्य सर्वथा असिद्धत्वात् शिथिलगात्रत्वं सज्जमानवाक्त्वं च ॥ ९ ॥

१०] ति० टी०—राम इमं धर्मं ज्येष्ठस्य राज्यमित्येवंरूपं कुले कुलधर्मबुद्ध्याऽनुसंततं संबद्धम् । 'धर्ममथ प्रेक्ष्य कालधर्मांश्च संततम्' इति पाठे धर्मशब्दस्य । अथाथवा कालधर्मान्कालकृतस्वशक्तिमन्निष्ठतदभावलक्षणान्प्रेक्ष्य विचार्य मम मातुः कौसल्यायाश्च याचनां कर्तुमर्हसि ॥ १० ॥

रा० टी०—तद्वाक्याकारमाह—रामेति । हे राम ! कुलधर्मानुसंततं कुलस्य धर्मानुसंततं धर्मबुद्ध्याऽनुष्ठितमिमं प्रजापालनरूपं धर्मं प्रेक्ष्य विचार्य मम मातुः कौशल्यादेश्च याचनं याचितं कर्तुं स्वीकर्तुमर्हसि ॥ १० ॥

गो० टी०—राजधर्ममिति । राजधर्मं राज्यपरिपालनधर्मं कुलधर्मानुसंततिं ज्येष्ठाभिषेकरूपकुलधर्मस्यानुस्मृतिम् १०॥११

११] ति० टी०—अथ कालकृतां स्वस्य रक्षणाशक्तिं दर्शयति—रक्षितुमिति । एकोऽसहायः, रक्तानद्यरक्तान् ॥ ११ ॥

रा० टी०—नन्वयं पालनार्थं त्वन्नियुक्त एवेत्यत आह—रक्षितुमिति । सुमहद्राज्यं रक्षितुमेकस्त्वत्सहाय्यरहितोऽहं नोत्सहे अत एव रक्तान् त्वद्विषयकानुरागविशिष्टान् पौरजानपदान् रञ्जयितुं च नोत्सहे ॥ ११ ॥

१२] ति० टी०—हि यतस्त्वामेव प्रतीक्षन्ते ॥ १२ ॥

रा० टी०—ज्ञातय इति । ज्ञात्यादयः पर्जन्यं कर्षका इव त्वामेव प्रतीक्षन्ते, एतेन त्वमेव राज्यं परिपालयेति सूचितम् ॥ १२ ॥

गो० टी०—ज्ञातय इति । सुहृदः शोभनहृदयाः पर्जन्यं रसदद्भम् इन्द्रं वा । 'पर्जन्यो रसदद्भेन्द्रौ' इत्यमरः॥१२॥१३॥

१३] ति० टी०—अत इदं राज्यं प्रतिपद्य स्वीकृत्य कस्मिंश्चित्स्थापय हि । हिर्वाक्यालंकारे हि यतः स त्वदत्तराज्यो लोकपालने शक्तिमान्भवति । 'शक्तिमानसि' इति पाठेऽयं मदीय इति स्वीकारमात्रेण लोकस्य समस्तस्य पालने शक्तिमानसि । रामस्य राज्यमित्येतावल्लोकपरिपालनेऽपेक्षितसहायतयेत्यर्थः ॥ १३ ॥

रा० टी०—नन्वयं वनवासे नियुक्तेन मया कथं राज्यपरिपालनमित्यत आह—इदमिति । हे काकुत्स्थ ! लोकस्य परिपालने शक्तिमान् त्वं प्रतिपद्य अयोध्यां प्राप्य इदं राज्यं स्थापय यथायोग्यं मन्त्र्यादीन् नियुज्य पालयेत्यर्थः, एतेन यथायोग्यं नियोगानन्तरं वने समागन्तव्यमिति सूचितम् ॥ १३ ॥

१४] ति० टी०—एवमुक्तप्रकारम् ॥ १४ ॥

रा० टी०—एवमिति । भरतः एवमुक्त्वा भ्रातुः पादयोः अपतद्, हे राघव ! इति प्रियं वचो वदन् सन् भृशं संप्रार्थयामास च ॥ १४ ॥

गो० टी०—एवं स्वबुद्धिशक्त्युपन्यस्तोपायान्तरवैफल्यदर्शनेन गत्यन्तराभावाद् भरतो राममेव प्रपद्यते—इत्युक्त्वेति ॥ १४ ॥

१५] ति० टी०—स्वयमङ्के कृत्वेत्यन्वयः ॥ १५ ॥

रा० टी०—तमिति । नलिनपत्राक्षं भरतमङ्के कृत्वा मत्तहंसस्वरः रामः वचनमब्रवीत् ॥ १५ ॥

गो० टी०—तमङ्के इति । स्वप्रपदनस्यामोघत्वाद् तदानीं पूर्वकृतदेवसंघशरणागतिफलप्रदानप्रदृप्तबुकूलपितृवचनपरिपालनावरुद्धावसरतया तन्निर्वर्तनानन्तरं फलप्रदित्सुस्तावद्विलम्बसहनाय सान्त्वपूर्वमङ्कमारोपयति । रामादिव्यदेहसंस्पर्शकृतपुष्ट्यतिशयद्योतनाय श्याममित्यादिविशेषणं मत्तहंसस्वरत्वमादरातिशयं द्योतयति । किं च स्वररामणीयकेन पूर्वदेहसंभूतावस्थासूचकेन सदा त्वत्करपुष्करहंसभूतमपि मां कथं वियोजयितुमिच्छसीति च सूच्यते । स्वयमङ्के कृत्वेत्यन्वयः॥१५॥

१६] ति० टी०—इयं बुद्धिर्मद्वनवासविरोधिनी स्वीयत्वेनाङ्गीकृत्य स्थापनविषया आगता जाता सा स्वजा स्वाभाविकी, गुरुसेवया प्राप्तो यो विनयः शिक्षा तज्जन्या च इतरा च सर्वा दुष्टेति भावः । अथ या त्वया स्वस्यास्यशक्तिरुक्ता पालने सा नास्त्येवेत्याह—भृशमिति ॥ १६ ॥

रा० टी०—तद्वनाचकारमाह—आगतेति । वैनयिकी पित्रादिसेवाजनितविनयजन्या स्वजा स्वं स्वकीयधर्मं प्रजापालनमित्यर्थः, जनयति उत्पादयति सा या त्वन्नागता प्राप्ता इयं बुद्धिः तया बुद्ध्या पृथिवीं रक्षितुं स्वं भृशमुत्सहसे एतेन

१ राजधर्ममन्विति गो. पाठः । २ संततमिति गो. पाठः । ३ याचनमिति रा. पाठः । ४ तथेति गो. पाठः । ५ ह्रीति गो. पाठः । ६ प्रतिकाङ्क्षन्त इति गो. पाठः । ७ असीति गो. पाठः । ८ इत्युक्त्वा न्यपतदिति गो. पाठः । ९ राममेव प्रियंवद इति गो. पाठः । १० स्वरमिति गो. पाठः ।

अमात्यैश्च सुहृद्भिश्च बुद्धिमद्भिश्च मन्त्रिभिः । सर्वकार्याणि संमन्त्र्य महान्त्यपि हि कारय ॥ १७ ॥
लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् । अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥ १८ ॥
कामाद्वा तात लोभाद्वा मात्रा तुभ्यमिदं कृतम् । न तन्मनसि कर्तव्यं वर्तितव्यं च मातृवत् ॥ १९ ॥
एवं ब्रुवाणं भरतः कौसल्यासुतमब्रवीत् । तेजसादित्यसंकाशं प्रतिपच्चन्द्रदर्शनम् ॥ २० ॥
अधिरोहार्यपादाभ्यां पादुके हेमभूषिते । एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥ २१ ॥
सोऽधिरुह्य नरव्याघ्रः पादुके व्यवमुच्य च । प्रायच्छत्सुमहातेजा भरताय महात्मने ॥ २२ ॥

मत्कर्तृकायोध्यागमनं न प्रार्थनीयमिति सूचितं तेनायोध्यागमने निरन्तरवनवासविषयकप्रतिज्ञाहानिर्भवितेति सूचितम् १६

गो० टी०–आगतेति । स्वजा सहजा वैनयिकी विनयो गुरुशिक्षा ततः प्राप्ता इयत्तभयाकारा बुद्धिः त्वामागता त्वां पूर्वमेव प्राप्नवती अतो भृशमुत्सहसे शक्नोषि ॥ १६ ॥

१७] ति० टी०–अमात्याः प्रधानमन्त्रिणः, मन्त्रिण उपमन्त्रिणः, कारय राजाज्ञयेति शेषः ॥ १७ ॥

रा० टी०–अमात्यैरिति । महान्त्यपि सर्वकार्याणि अमात्यादिभिः संमन्त्र्य कारय ॥ १७ ॥

गो० टी०–अमात्यैरिति । अमात्यैः प्रधानसचिवैः मन्त्रिभिः उपमन्त्रिभिः ॥ १७ ॥

१८] ति० टी०–अथ मातृयाचनयापीदानीं पराङ्मुखीकर्तुमशक्येत्याह—लक्ष्मीरित्यादि । पितुः प्रतिज्ञां न त्यजेयमिति शेषः ॥ १८ ॥

रा० टी०–मत्प्रतिनिवर्तनप्रार्थना व्यर्थेति बोधयन्नाह–लक्ष्मीरिति । चन्द्रात् पूर्णचन्द्रमसः लक्ष्मीः शोभा अपेयात् रात्रौ अपगच्छेत्, हिमवान् हिमं त्यजेत्, सागरो वेलां स्वमर्यादामतीयात् उल्लङ्घेत, अहं तु पितुः प्रतिज्ञां नातीयाम् । अतीयादित्यस्य पुरुषविपरिणामेनोत्तरत्राप्यन्वयः योग्यतया तुरध्याहृतः ॥ १८ ॥

गो० टी०–मया देवर्षिसंघैश्च पुनः पुनरुच्यमानोऽप्ययं निर्वर्तनेच्छां न त्यजेदिति तदिच्छा सवासना त्याजयितव्येति स्वप्रतिज्ञादार्ढ्यं दर्शयति–लक्ष्मीरित्यादिना । न प्रतिज्ञामतीयामिति शेषः ॥ १८ ॥

१९] ति० टी०–कामात्स्वदृतस्नेहात् लोभात्स्वराज्येन राज्यकरणलोभात् तुभ्यं मात्रा तव मात्रा षष्ठ्यर्थे आर्षी चतुर्थी, यदिदं कृतं तत्तवानिष्टमप्यनिष्टमिति मनसि न कर्तव्यं मदाज्ञयेति शेषः, अतस्तस्यां मातृवदेव वर्तितव्यं शुश्रूषितव्यम् । "तदर्हम्" इति वतिः । कामादेवानामिच्छातः लोभाद्वा लोभादेव तेषां देवलोकराज्यलोभात् तव मात्रा देवैरेव मन्थराद्वारा इदं कृतं कारितमिति गूढोऽर्थः । शेषं प्राग्वत् ॥ १९ ॥

रा० टी०–कामादिति । तात हे भ्रातः ! कामान्मन्थरेच्छातः लोभात् अतिशयोविषयकेच्छातिशयाद्वा तुभ्यं त्वदर्थं यन्मात्रा कृतं तन्मनसि न कर्तव्यं न स्मर्तव्यमित्यर्थः, अत एव मातृवत् मातृस्नेहवत् वर्तितव्यं मातरि पूर्ववदेव स्नेहः कर्तव्य इत्यर्थः ॥ १९ ॥

गो० टी०–स्त्रियाः कामकृतत्वात्त्यक्तुमियं प्रतिज्ञेत्याशङ्क्याह–कामादित्यादिना । कामाद्विषयस्नेहाल्लोभात्तद्वाजेन राज्यकरणलोभान्मातृवन्मातरीव ॥ १९ ॥

२०] ति० टी०–प्रतिपच्चन्द्रदर्शनमित्यनेन तद्वदादरणीयदर्शनत्वं वर्धिष्णुत्वं चिरमदर्शनं च सूचितम् ॥ २० ॥

रा० टी०–एवमिति । एवं ब्रुवाणं आदित्यसंकाशं कौशल्यासुतं रामं भरतोऽब्रवीत् ॥ २० ॥

गो० टी०–एवमिति । तेजसादित्यसंकाशमित्यनेनानिवर्त्यप्रतिज्ञत्वमुच्यते प्रतिपच्चन्द्रदर्शनमित्यनेन क्रमेण राज्ये पूर्णप्रतिष्ठत्वं सर्वैरपि पूज्यत्वं च द्योत्यते ॥ २० ॥

२१] ति० टी०–एते उटजसंनिहिते । अधिरोहेत्यनेन भद्रासनस्थानीयपादुकयोः प्रतिनिधिभूतयोरारोहणेन राज्यप्रतिपत्तिः कारिता । एषा च प्रार्थना वसिष्ठनियोगानन्तरं बोध्या भरद्वाजं प्रति ' एते प्रयच्छ संहृष्टः पादुके हेमभूषिते ' इति वसिष्ठोक्तित्वेन वक्ष्यमाणत्वात् । प्रतिनिधित्वमेवाह–एते हीत्यादिना ॥ २१ ॥

रा० टी०–तद्वचनाकारमाह–अधीति । हे आर्य ! हेमविभूषिते एते स्वसंनिधौ संस्थापिते पादुके पादाभ्यां त्वमधिरोह । तत्प्रयोजनमाह–एते पादाधिरोहणास्पदीभूते पादुके सर्वलोकस्य योगक्षेमं विधास्यतः, विधास्यत इत्यनेन पादुकयोश्चेतनात्वं ध्वनितं तेन तयोः प्राकृतविलक्षणात्वं सूचितम् । एते इति शब्दाद्वयोभयान्वयि ॥ २१ ॥

गो० टी०–अथ मध्यस्थेनोभयोर्हितपरेण वसिष्ठेन नियुक्तो भरतः प्रार्थयते–अधिरोहेत्यादिना । अत एव भरद्वाजं प्रति भरतो वसिष्ठोक्तिमद्यवदिष्यति ऐते प्रयच्छ संहृष्टः पादुके हेमभूषिते इति ॥ २१ ॥

२२] ति० टी०–स रामः पादुके अधिरुह्य व्यवमुच्य पुनस्ततोऽवरुह्य भरताय प्रायच्छत् एतेन प्रतिनिधिदानद्वारा राज्यरक्षानियोगः कृतः । प्रतिपथ स्थापयेति चिरं भरतप्रार्थनं च साधितम् । अधिरोहणेन शक्तिविशेषस्य तत्र स्थापनम् यदर्शनेन सर्वज्ञत्वसंपत्तिरिति बोध्यम् । तदुक्तं पाद्मे–' ज्ञात्वा तदाज्ञां ताभ्यां च भरतः क्षितिमन्वशात् ' इति । ताभ्यां

---

१ सुमहात्यपीति गो. पाठः । २ ह्यवरुह्येति गो. पाठः ।

स्वैपादुके संप्रणम्य रामं वचनमब्रवीत् । चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् ॥ २३ ॥
फलमूलाशनो वीर भवेयं रघुनन्दन । तवागमनमाकाङ्क्षन्वसन्वै नगराद्बहिः ॥ २४ ॥
तव पादुकयोर्न्यस्य[1] राज्यतन्त्रं[2] परंपर । चतुर्दशे हि संपूर्णे वर्षेऽहनि रघूत्तम ॥ २५ ॥
न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् । तथेति च प्रतिज्ञाय तं परिष्वज्य सादरम् ॥ २६ ॥
शत्रुघ्नं च परिष्वज्य वैचनं[3] चेदमब्रवीत् । मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति ॥ २७ ॥
मया च सीतया चैव शप्तोऽसि रघुनन्दन[4] । इत्युक्त्वाऽश्रुपरीताक्षो भ्रातरं विससर्ज ह ॥ २८ ॥

स पादुके ते भरतः स्वलंकृते[5] महोज्ज्वले संपरिगृह्य[6] धर्मवित् ।
प्रदक्षिणं चैव चकार राघवं चकार चैवोत्तमनागमूर्धनि[7] ॥ २९ ॥
अथानुपूर्व्या प्रतिपूज्य तं जनं गुरूंश्च मन्त्रीन्प्रकृतीस्तथानुजौ[8] ।
व्यसर्जयद्राघववंशवर्धनः स्थितः स्वधर्मे हिमवानिवाचलः[9] ॥ ३० ॥
तं मातरो बाष्पगृहीतकण्ठ्यो दुःखेन नामन्त्रयितुं हि शेकुः ।
स चैव मातॄरभिवाद्य सर्वा रुदन्कुटीं स्वां प्रविवेश रामः[10] ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वादशाधिकशततमः सर्गः ॥ ११२ ॥

पादुकाभ्यां तद्दर्शनमात्रेणेदृशे विषये भगवत एवमाज्ञेति ज्ञात्वा तथा व्यवहारमकरोदित्यर्थः । भरतस्तु पाञ्चजन्यावतारत्वादाच्छादितसार्वज्ञ्य इत्यनेन सूचितम् । भगवत्स्पर्शेनाचेतनेऽपि सार्वज्ञ्यदानशक्तिमत्त्वमिति भगवन्माहात्म्यातिशयद्वारा रामस्येश्वरत्वं च सूचितम् ॥ २२ ॥

रा० टी०–स इति । स भरतेन प्रार्थितो नरव्याघ्रो रामः पादुके अधिरुह्य व्यवस्रुच्य च महात्मने भरताय प्रायच्छत्[11] २२

गो० टी०–अथ रामः स्वप्रतिज्ञां भरतकृतप्रपत्तिं च निर्वहन् तथा करोति–स इति । प्रायच्छद्ददाणेत्यन्ववयुङ्क्त ॥ २२ ॥

२३–२४] ति० टी०–जटाचीरधर इत्यादिना राज्यकृतभोगाभावः सूचितः ॥ २३ ॥ २४ ॥

रा० टी०–स इति । स भरतः पादुके संप्रणम्य अब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह–चतुर्दशेति । हे वीर ! अहं चतुर्दश वर्षाणि तवागमनमाकाङ्क्षन् नगराद्बहिरेव वसंश्च सन् जटाचीरधरः फलमूलाशनो भवेयम् । सार्धश्लोक एकान्वयी ॥ २३ ॥ २४ ॥

गो० टी०–स इत्यादि । सार्धश्लोकत्रयमेकान्वयम् । चतुर्दशे वर्षे संपूर्णे सति अहनि उत्तरवर्षादिमदिने प्रवेक्ष्यामीत्यन्ते इतिकरणम् इत्यब्रवीदिति पूर्वेणान्वयः ॥ २३–३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

२५–२७] ति० टी०–राज्यतन्त्रं राज्यव्यापारं न्यस्य स्वद्बुद्ध्या विनिवेश्य । चतुर्दशे वर्षे संपूर्णे पञ्चदशवर्षात्यदिवसे यदि त्वां न द्रक्ष्यामि तदाग्निं प्रवेक्ष्यामि ॥ २५–२७ ॥

रा० टी०–तवेति । हे परंतप ! राज्यतन्त्रं राज्यभारं तव पादुकयोर्न्यस्य समर्प्य विद्यमानोऽहं चतुर्दशे वर्षे संपूर्णे सति अहनि तदुत्तरे दिवसे यदि त्वां न द्रक्ष्यामि तर्हि हुताशनं वह्निं प्रवेक्ष्यामि 'न्यस्तराजतन्त्रः' इति पाठान्तरम् । सार्धश्लोक एकान्वयी ॥ २९ ॥

रा० टी०–तथेति । तथा इति प्रतिज्ञाय चतुर्दशवर्षान्ते आगमिष्यामीति प्रतिज्ञां कृत्वेत्यर्थः, तं भरतं परिष्वज्य अब्रवीत् ॥ २६ ॥

रा० टी०–तद्वचनाकारमाह–मातरमिति । मातरं कैकेयीं रक्ष तां प्रति रोषं मा कुरु मया सीतया च त्वं शप्तः एतदर्थं कारितशपथोऽसि इत्युक्त्वा अश्रुपरीताक्षो रामः भ्रातरं विससर्ज प्रेषयामास ॥ २७ ॥ २८ ॥

२८] ति० टी०–शप्तोऽसि रोषाकरणायेति शेषः ॥ २८ ॥

२९–३०] ति० टी०–संपरिगृह्य शिरसेति शेषः । उत्तमनागमूर्धनि राजोपवाह्यगजमस्तके तत्कालाभिषिक्तराजाधिरोहणयोग्येति शेषः । सर्वलोकप्रख्यापनार्थमेतद् ॥ २९ ॥ ३० ॥

रा० टी०–स इति । भरतः स्वलंकृते शोभनालंकारविशिष्टे महोज्ज्वले पादुके प्रदक्षिणं चकार उत्तमनागमूर्धनि राजारोहणयोग्यगजशिरसि पादुके चकार संस्थापयामास, पादुके इत्युभयान्वयि ॥ २९ ॥

रा० टी०–उपसंहरन्नाह–अथेति । आनुपूर्व्या यथोचितक्रमेण जनादीन् प्रतिपूज्य यथोचितं सत्कृत्य स्वधर्मे हिमवान् इव अचलः स्थितः राघववंशवर्धनो रामः अथ व्यसर्जयत् समङ्गलं यापयामास ॥ ३० ॥

३१] ति० टी०–सर्वाः सकैकेयीकाः अनेन कैकेय्या दोषराहित्यं सूचितम् । रुदन् रुदन्निव ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

---

१ स पादुके इति गो. रा. पाठः । २ न्यस्तराज्यतन्त्र इति गो. पाठः । ३ भरतमिति गो पाठः । ४ सत्तमेति गो. पाठः । ५ प्रतापवान्स्वलंकृते संपरिपूज्येति गो. पाठः । ६ मन्त्रिप्रकृतीरिति गो. पाठः । ७ स्थिर इति गो. पाठः । ८ स्वेवेति गो. पाठः ।

त्रयोदशाधिकशततमः सर्गः ।

वसिष्ठादिभिः समग्रयोध्यां प्रति निवृत्तो भरतोऽन्तरा भरद्वाजमभिवाद्य चित्रकूटवृत्तवृत्तान्तं निवेदयन्नुपलब्धरामपादुकाद्यं निवेद्याग्रे प्रवृत्तः परिजनयुतो गङ्गायमुने उत्तीर्य शृङ्गवेरतः प्रातिष्ठन्दृष्ट्वायोध्यः सुमन्त्रं प्रति तस्याः कान्तिराहित्यं दर्शयति ।

ततः शिरसि कृत्वा तु पादुके भरतस्तदा । आरुरोह रथं हृष्टः शत्रुघ्नसहितस्तदा ॥ १ ॥
वसिष्ठो वामदेवश्च जाबालिश्च दृढव्रतः । अग्रतः प्रययुः सर्वे मन्त्रिणो मन्त्रपूजिताः ॥ २ ॥
मन्दाकिनीं नदीं रम्यां प्राङ्मुखास्ते ययुस्तदा । प्रदक्षिणं च कुर्वाणाश्चित्रकूटं महागिरिम् ॥ ३ ॥
पश्यन्धातुसहस्राणि रम्याणि विविधानि च । प्रययौ तस्य पार्श्वेन ससैन्यो भरतस्तदा ॥ ४ ॥
अदूराच्चित्रकूटस्य ददर्श भरतस्तदा । आश्रमं यत्र स मुनिर्भरद्वाजः कृतालयः ॥ ५ ॥
स तमाश्रममागम्य भरद्वाजस्य वीर्यवान् । अवतीर्य रथात्पादौ ववन्दे कुलनन्दनः ॥ ६ ॥
ततो हृष्टो भरद्वाजो भरतं वाक्यमब्रवीत् । अपि कृत्यं कृतं तात रामेण च समागतम् ॥ ७ ॥
एवमुक्तः स तु ततो भरद्वाजेन धीमता । प्रत्युवाच भरद्वाजं भरतो धर्मवत्सलः ॥ ८ ॥

रा० टी०–तमिति । दुःखेन बाष्पगृहीतकण्ठः मातरः तं राममामन्त्रयितुं कस्मिंश्चिद्विषये नियोजयितुं न शेकुः स रामस्तु सर्वाः मातृः अभिवाद्य प्रणम्य रुदन् स्वगमनाभावेन रोदयन् सन् स्वां कुटीं प्रविवेश ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे द्वादशाधिकशततमः सर्गः ॥ ११२ ॥

१] ति० टी०–तत इति । पूर्वं सर्वलोकज्ञानाय गजमस्तके स्थापयित्वा पुनः सादरं तत आदाय स्वमस्तके कृत्वेत्यर्थः, यद्वा शिरसीत्यस्य गजशिरसीत्येवार्थः ॥ १ ॥

रा० टी०–रामकर्तृकस्वकुटीप्रवेशानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । ततः पादुकास्थापितशत्रुंजयगजात् पादुके आहृत्येति शेषः, शिरसि स्वमूर्धनि कृत्वा संस्थाप्य हृष्टो भरतः रथमारुरोह ॥ १ ॥

गो० टी०–अथ भरतस्यायोध्याप्रवेशः त्रयोदशोत्तरशततमे–तत इत्यादि । पादुके शिरसि कृत्वा शत्रुंजयमूर्ध्नि निक्षिप्ते पादुके सादरमादाय स्वमूर्ध्न्याधायेत्यर्थः ॥ १ ॥

२] ति० टी०–मन्त्रे गाढकार्यविचारे निश्चेतृत्वेन पूजिता इत्यर्थः ॥ २ ॥

रा० टी०–वसिष्ठ इति । मन्त्रपूजिता मन्त्रैः सत्कृताः वसिष्ठादयः अग्रतः प्रययुः ॥ २ ॥

गो० टी०–वसिष्ठ इति । मन्त्रपूजिताः अमोघकार्यविचारनैपुण्यात्पूजिताः ॥ २ ॥

३] ति० टी०–मन्दाकिनीं चित्रकूटोत्तरपार्श्ववर्तिनीम् । प्रदक्षिणमिति । उत्तरपार्श्वस्थां मन्दाकिनीं प्राप्य प्राङ्मुखतया गमनात्तिर्यङ् तस्य प्रदक्षिणकरणम् ॥ ३ ॥

रा० टी०–मन्दाकिनीमिति । मन्दाकिनीं नदीं चित्रकूटं गिरिं च प्रदक्षिणं कुर्वाणाः प्राङ्मुखास्ते भरतादयो ययुः ॥ ३ ॥

गो० टी०–मन्दाकिनीमिति । सीतारामयोर्जलक्रीडादिभिः रम्यां मन्दाकिनीं रामनिवासत्वेन महाप्रभावं चित्रकूटं गिरिं च प्रदक्षिणं कुर्वाणाः सन्तः प्राङ्मुखा ययुः ॥ ३ ॥

४] ति० टी०–पार्श्वेनोत्तरपार्श्वेन ॥ ४ ॥

रा० टी०–गमनमेव भङ्ग्यन्तरेणाह–पश्यन्निति । विविधानि अनेकप्रकाराणि रम्याणि मनोहराणि धातुसहस्राणि पश्यन् सन् तस्य गिरेः चित्रकूटस्य पार्श्वेन ससैन्यो भरतः प्रययौ ॥ ४ ॥

गो० टी०–पश्यन्निति । द्रुतगतिं विहाय नानाधातून् दृग्भ्यां पिबन्निव पश्यन् तस्य चित्रकूटस्य पार्श्वेन ययौ ॥ ४ ॥

५–६] ति० टी०–यत्र यमुनादक्षिणकूले अत एव चित्रकूटस्यादूरात् । अनेन यमुनादक्षिणतटेऽपि क्वचिद्भरद्वाजाश्रम इति ज्ञायते अत एवाग्रे भरद्वाजामन्त्रणोत्तरं ततस्ते यमुनां तीर्त्वेति वक्ष्यति संप्रति तत्र स्थितिस्तु रामभरतयोः संवादं शिष्यद्वारा झटिति श्रोतुमिति बोध्यम् ॥ ५ ॥ ६ ॥

रा० टी०–अदूरादिति । यत्र भरद्वाजो मुनिः कृतालयः कृतस्थितिः तमाश्रमं चित्रकूटस्य अदूरात्समीपतः भरतो ददर्श, एतेन भरतरथस्य भरद्वाजाश्रमस्य च अत्युन्नतत्वं व्यञ्जितम् ॥ ५ ॥

गो० टी०–अदूरादिति । चित्रकूटसौन्दर्यदर्शनाकृष्टचित्ततया अदूरादिव भासमानम् ॥ ५ ॥

रा० टी०–स इति । स कुलनन्दनो भरतः भरद्वाजस्य आश्रममागम्य प्राप्य रथात् अवतीर्य भरद्वाजस्य पादौ ववन्दे ॥ ६ ॥

गो० टी०–स इति । भरद्वाजस्य पादौ ववन्द इत्यन्वयः ॥ ६ ॥

७–८] ति० टी०–कृत्यं कर्तव्यं कृतमपि अपिः प्रश्ने । कृत्यमेवाह—रामेण चेति ॥ ७ ॥ ८ ॥

रा० टी०–तत इति । ततः भरतप्रणामानन्तरं हृष्टो भर-

१ शत्रुघ्नेन समन्वित इति गो. पाठः । २ बुद्धिमानिति गो. पाठः । ३ भरतस्तदेति गो. पाठः । ४ भ्रातृवत्सल इति गो. पाठः ।

स याच्यमानो गुरुणा मया च दृढविक्रमः । राघवः परमप्रीतो वसिष्ठं वाक्यमब्रवीत् ॥ ९ ॥
पितुः प्रतिज्ञां तामेव पालयिष्यामि तत्त्वतः । चतुर्दश हि वर्षाणि या प्रतिज्ञा पितुर्मम ॥ १० ॥
एवमुक्तो महाप्राज्ञो वसिष्ठः प्रत्युवाच ह । वाक्यज्ञो वाक्यकुशलं राघवं वचनं महत् ॥ ११ ॥
एते प्रयच्छ संहृष्टः पादुके हेमभूषिते । अयोध्यायां महाप्राज्ञ योगक्षेमकरौ भव ॥ १२ ॥
एवमुक्तो वसिष्ठेन राघवः प्राङ्मुखः स्थितः । पादुके [2]हेमविकृते मम राज्याय [3]ते ददौ ॥ १३ ॥
निवृत्ताऽहमनुज्ञातो रामेण सुमहात्मना । अयोध्यामेव गच्छामि गृहीत्वा पादुके शुभे ॥ १४ ॥
एतच्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः । भरद्वाजः शुभतरं मुनिर्वाक्यमुदाहरत् ॥ १५ ॥
नैतच्चित्रं नरव्याघ्रे शीलवृत्तविदां वरे । यदार्ये त्वयि तिष्ठेत्तु निन्नोत्सृष्टमिवोदकम् ॥ १६ ॥
अनृणः स महाबाहुः पिता दशरथस्तव । यस्य त्वमीदृशः पुत्रो धर्मात्मा धर्मवत्सलः ॥ १७ ॥

द्वाजः हे तात ! कृत्यं कर्तव्यं रामेण समागतं समागमनं कृतं निष्पादितमपि इति वाक्यं भरतमब्रवीत् । अपिः प्रश्ने ॥ ७ ॥

रा० टी०–एवमिति । भरद्वाजेन एवमुक्तः स भरतः तं प्रत्युवाच ॥ ८ ॥

गो० टी०–तत इति । अपिशब्दः प्रश्ने रामेण किं समागतं संगतं भवता रामेण कृत्यं भवत्प्रयोजनं किं कृतमित्यर्थः॥७॥८॥

९-१०] ति० टी०–गुरुणा वसिष्ठेन मात्रा च परमप्रीतः सत्यपरिपालनविषये इति शेषः । या कैकेयीनिमित्तं मम पितुः प्रतिज्ञा चतुर्दशवर्षाणि रामेण वने वस्तव्यमिति, तामेव पितुः प्रतिज्ञां पालयिष्यामीति संबन्धः ॥ ९ ॥ १० ॥

रा० टी०–तत्प्रतिवचनाकारमाह–स इति । गुरुणा मया च याच्यमानः दृढविक्रमः स रामः वसिष्ठं वाक्यमब्रवीत् ॥ ९॥

रा० टी०–तद्वचनाकारमाह–पितुरिति । मम पितुः या प्रतिज्ञा तां पितुः प्रतिज्ञां तत्त्वतः पालयिष्याम्येव ॥ १० ॥

गो० टी०–स इति । गुरुणा वसिष्ठेन । पितुरिति । चतुर्दशवर्षाणि वने वस्तव्यमिति कैकेयीनिमित्तं कृता पितुर्या प्रतिज्ञास्ति तामेव पितुः प्रतिज्ञां तत्त्वतः पालयिष्यामीत्यब्रवीदिति संबन्धः ॥ ९ ॥ १० ॥

११] ति० टी०–एवमुक्तः रामेणेति शेषः ॥ ११ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण उक्तः रामेण प्रार्थितः वाक्यज्ञो वसिष्ठः राघवं रामं प्रत्युवाच ॥ ११ ॥

गो० टी०–एवमित्यादि । हेमभूषिते इत्यनेन रामाय प्रीत्या समर्पयितुमभिनवतया निर्माय नगरात् भरतेनानीते इति गम्यते । योगक्षेमकरे अपूर्ववस्तुलाभो योगः, लब्धस्य परिपालनं क्षेमः, एते पादुके प्रयच्छेति वसिष्ठः प्रत्युवाच हेति संबन्धः ॥ ११–१५ ॥

१२] ति० टी०–प्रयच्छ प्रतिनिधित्वेनेति शेषः । अप्राप्तप्राप्तियोगः, प्राप्तस्य परिपालनं क्षेमः, तत्करौ भवेति । एतद्वारा भरते सार्वज्ञ्यसंपादनेनेति शेषः ॥ १२ ॥

रा० टी०–तत्प्रतिवचनाकारमाह–एते इति । हे महाप्राज्ञ ! संहृष्टस्त्वं हेमभूषिते एते पादुके प्रयच्छ भरताय देहि, अयोध्यायां योगक्षेमकरो भव पादुकाद्वारेति शेषः, तत्र अलब्धलाभो योगः, लब्धस्य परिपालनं क्षेमः ॥ १२ ॥

१३–१५] ति० टी०–हेमविकृते हेम्ना विचित्रतया कृते । मम राज्याय मम राज्यरक्षाशक्त्यनुग्रहार्थमित्यर्थः ॥१३–१५॥

रा० टी०–एवमिति । वसिष्ठेन एवमुक्तः प्राङ्मुखः पूर्वाभिमुखं स्थितः राघवो रामः हेमविकृते पादुके मम राज्याय ददौ । न च पूर्वं भरतप्रार्थनया रामकर्तृकपादुकादानस्योक्तत्वेनेदं विरुद्धमिति वाच्यं, "गुरावीश्वरत्वबुद्ध्या कर्तृत्वं करणत्वं च" इत्यादिश्रुत्या कर्तृत्वस्य ईश्वरे पर्यवसन्नत्वेन वसिष्ठस्यैव मुख्यकर्तृत्वेनादोषात् ॥ १३ ॥

रा० टी०–निवृत्त इति । रामेण अनुज्ञातो पादुके गृहीत्वा अयोध्यामेव गच्छामि ॥ १४ ॥

रा० टी०–एतदिति । भरतस्य एतद्वाक्यं श्रुत्वा भरद्वाजो मुनिः शुभतरं वाक्यमुदाहरत् ॥ १५ ॥

१६–१७] ति० टी०–यदार्यं शोभनचरित्रं त्वयि तिष्ठेदिति यत्तदुत्सृष्टमुदकं निन्ने तिष्ठेदितिवत्र चित्रम । निन्नेति लुप्तसप्तम्यन्तम् ॥ १६ ॥ १७ ॥

रा० टी०–तद्वाक्याकारमाह–नेति । शीलवृत्तविदां वरे श्रेष्ठे नरव्याघ्रे त्वयि निन्नोत्सृष्टं निम्नदेशे तडागादौ स्थापितमुदकमिव यदार्यमार्यानुवर्तनं तिष्ठेत् तत् एतत् चित्रं न 'निन्ने सृष्टम्' इति भूषणपाठः ॥ १६ ॥

गो० टी०–नैतदिति । आर्यं ज्येष्ठानुवर्तनरूपं श्रेयः निन्ने तटाकादौ सृष्टं घृतम् । ॥ १६ ॥

रा० टी०–अनृण इति । यस्य त्वमीदृशो धर्मात्मा पुत्रः स तव पिता दशरथः अनृणः ऋणविनिर्मुक्तः आसीदिति शेषः ॥ १७ ॥

गो० टी०–" प्रजामनुप्रजायसे तदुते मर्त्यामृतम् "

१ करे त्वेति गो. पाठः । २ अधिरुह्यैत इति गो. पाठः । ३ त्वै इति गो. पाठः । ४ उवाच तामिति गो. पाठः । ५ व्याघ्र शीलवृत्तवतां वरेति गो. पाठः । ६ निन्ने सृष्टमिति गो. पाठः । ७ अमृत इति गो. पाठः । ८ धर्मश्च इति गो. पाठः ।

तमृषिं तु महाप्राज्ञमुक्तवाक्यं कृताञ्जलिः । आमन्त्रयितुमारेभे चरणावुपगृह्य च ॥ १८ ॥
ततः प्रदक्षिणं कृत्वा भरद्वाजं पुनः पुनः । भरतस्तु ययौ श्रीमानयोध्यां सह मन्त्रिभिः ॥ १९ ॥
यानैश्च शकटैश्चैव हयैर्नागैश्च सा चमूः । पुनर्निवृत्ता विस्तीर्णा भरतस्यानुयायिनी ॥ २० ॥
ततस्ते यमुनां दिव्यां नदीं तीर्त्वोर्मिमालिनीम् । ददृशुस्तां पुनः सर्वे गङ्गां शिवजलां नदीम् ॥ २१ ॥
तां रम्यजलसंपूर्णां संतीर्य सहबान्धवः । शृङ्गवेरपुरं रम्यं प्रविवेश ससैनिकः ॥ २२ ॥
शृङ्गवेरपुराद्भूय अयोध्यां संददर्श ह । अयोध्यां तु तदा दृष्ट्वा पित्रा भ्रात्रा विवर्जिताम् २३ ॥
भरतो दुःखसंतप्तः सारथिं चेदमब्रवीत् । सारथे पश्य विध्वस्ता अयोध्या न प्रकाशते ॥ २४ ॥
निराकारा निरानन्दा दीना प्रतिहतस्वना ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

इति श्रुत्युक्तरीत्या सत्पुत्रलाभान्मृतोऽपि दशरथः अमृत इत्याह–अमृत इति ॥ १७ ॥

१८–२०] ति० टी०–उक्तवाक्यम् उक्तरीत्येति शेषः । आमन्त्रयितुमारेभे आमन्त्रणं कृतवान् ॥ १८–२० ॥

रा० टी०–तमिति । महाप्राज्ञमुक्तवाक्यं तमृषिं भरद्वाजं चरणावुपगृह्य आमन्त्रयितुं गमनाय प्रार्थयितुं कृताञ्जलिः भरत आरेभे ॥ १८ ॥

गो० टी०–तमिति । आमन्त्रयितुमारेभे विनयेनामन्त्रणोद्युक्त इव स्थित इत्यर्थः ॥ १८ ॥

रा० टी०–तत इति । ततः भरद्वाजाज्ञापनानन्तरं भरद्वाजं पुनः पुनः प्रदक्षिणं कृत्वा मन्त्रिभिः सह भरतः अयोध्यां ययौ ॥ १९ ॥

गो० टी०–तत इति । ततस्तदनुज्ञानन्तरम् अत्र पुनः पुनरित्यनेन एकं प्रदक्षिणं न कार्यमित्युक्तम् । प्रदक्षिणविशेषणेन प्रणामस्तु सकृदेवेत्युक्तं भवतीत्याचार्याः । केचित्तु एकहस्तप्रणामैकप्रदक्षिणयोरिव एकप्रणामस्यापि निषिद्धत्वात् पुनः पुनरिति विशेषणस्यात्रार्थिके वा पूर्वश्लोकोक्ताभिवादनबललब्धे वा प्रणामेऽप्यन्वयेन न कोऽपि विरोध इत्याहुः । अयोध्यामुद्दिश्य ययावित्यन्वयः ॥ १९ ॥

रा० टी०–भरतगमनमुक्त्वा भरतसैन्यगमनप्रकारमाह–यानैरिति । विस्तीर्णा अनुयायिनी पश्चाद्गमनशीला यानादिभिः उपलक्षिता भरतस्य सा चमूः पुनर्निवृत्ता चित्रकूटात् पराङ्मुखी बभूवेति शेषः ॥ २० ॥

गो० टी०–भरतस्यैव सेनायाश्चित्रकूटान्निवृत्तिमाह–यानैरिति ॥ २० ॥

२१–२२] ति० टी०–यमुनां तीर्त्वा गङ्गां ददृशुरिति । यमुनां तीर्त्वा तस्मिन्नेव दिने भरद्वाजं दृष्ट्वा गङ्गां ददृशुरित्यर्थ इति कश्चित्, तत्तु पूर्वोक्तरीत्यासामञ्जस्याद्देयम् । जलस्य शिवत्वं रम्यत्वं च दर्शनमात्रेण सकलपापापहन्तृत्वं मधुरत्वं च ॥ २१ ॥ २२ ॥

रा० टी०–तत इति । ते सर्वे भरतसैनिकाः ऊर्मिमालिनीं लहरीसमूहविशिष्टां दिव्यां यमुनां नदीं तीर्त्वा शिवजलामूर्मिमालिनीं दिव्यां गङ्गानदीं पुनर्ददृशुः । विशेषणान्युभयान्वयीनि ॥ २१ ॥

रा० टी०–तामिति । सहबान्धवः शत्रुघ्नसहितः ससैनिकः सेनासहितो भरतः रम्यजलसंपूर्णां तां गङ्गां संतीर्य रम्यं शृङ्गवेरपुरं प्रविवेश ॥ २२ ॥

गो० टी०–भरतमनुसृत्य सेनाद्वयानप्रकारमाह–तत इति । यमुनां तीर्त्वा गच्छन्तस्ते सर्वे गङ्गां ददृशुरिति संबन्धः ॥ २१–२४ ॥

२३] ति० टी०–शृङ्गवेरपुरादिति निर्गत्येति शेषः ॥ २३ ॥

रा० टी०–शृङ्गेति । शृङ्गवेरपुरात् आगत्य अयोध्यां भूयः संददर्श । पित्रादिवर्जितामयोध्यां दृष्ट्वा तु दुःखसंतप्तो भरतः सारथिमब्रवीत् । सार्धश्लोक एकान्वयी ॥ २३ ॥

२४] ति० टी०–विध्वस्ता विध्वस्तशोभा, निराकारा निरलंकारा ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

रा० टी०–तद्वचनाकारमाह–सारथे इति । हे सारथे ! विध्वस्ता तिरोहितशोभा अत एव निराकारा निर्गतः आकारः शुभाकारो यस्याः सा निरानन्दा आनन्दरहिता दीना क्षीणात्वेन प्रतीयमाना प्रतिहतस्वना निवृत्तशब्दा अयोध्या न प्रकाशते इति पश्य । अर्धद्वयमेकान्वयि ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

---

१ महात्मानमिति गो. पाठः । २ शृङ्गिवेरेति गो. पाठः । ३ भूयस्त्वयोध्यामिति गो. पाठः । ४ च तत इति गो. पाठः । ५ साऽयोध्येति गो. पाठः । ६ स्वरेति गो. पाठः ।

चतुर्दशाधिकशततमः सर्गः ।

बहुनिदर्शनैरयोध्यायाः कान्तिराहित्यं वाल्मीकिर्वर्णयति । प्रविष्टो भरतः सुमन्त्रं प्रत्ययोध्यायाः हतकान्तित्वं वर्णयन्नेव दुःखित मनाः पितुर्वेश्म प्रविवेश ।

स्निग्धगम्भीरघोषेण स्यन्दनेनोपयान्प्रभुः । अयोध्यां भरतः क्षिप्रं प्रविवेश महायशाः ॥ १ ॥
बिडालोलूकचरितामालीननरवारणाम् । तिमिराभ्याहतां कालीमप्रकाशां निशामिव ॥ २ ॥
राहुशत्रोः प्रियां पत्नीं श्रिया प्रज्वलितप्रभाम् । ग्रहेणाभ्युदितेनैकां रोहिणीमिव पीडिताम् ॥ ३ ॥
अल्पोष्णक्षुब्धसलिलां धर्मतप्तविहंगमाम् । लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥ ४ ॥
विधूमामिव हेमाभां शिखामग्नेः समुत्थिताम् । हविरभ्युक्षितां पश्चाच्छिखां विप्रलयं गताम् ॥ ५ ॥
विध्वस्तकवचां रुग्णगजवाजिरथध्वजाम् । हतप्रवीरामापन्नां चमूमिव महाहवे ॥ ६ ॥
सफेनां सस्वनां भूत्वा सागरस्य समुत्थिताम् । प्रशान्तमारुतोद्धूतां जलोर्मिमिव निःस्वनाम् ॥ ७ ॥

गो० टी०—सारथ इति । निराकारा निर्गतशोभनाकारा ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने त्रयोदशोत्तरशततमः सर्गः ॥११३॥

१] ति० टी०—उपयान्नुपगच्छन् ॥ १ ॥

रा० टी०—भरतकर्तृकनगरप्रवेशं वर्णयन्नाह—स्निग्धेति । स्निग्धः स्नेहोत्पादकः गम्भीरो घोषो यस्य तेन स्यन्दनेन रथेन प्रभुर्महायशाः भरतः अयोध्यामुपयान् उपगच्छन् सन् क्षिप्रं प्रविवेश ॥ १ ॥

गो० टी०—पूर्वसर्गान्तिमश्लोकोक्तं विस्तरेण दर्शयति चतुर्दशोत्तरशततमे—स्निग्धगम्भीरघोषेणेत्यादि । उपयान् समीपमागच्छन् ॥ १ ॥

२] ति० टी०—बिडालादिभिश्चरितां तत्संचारवतीम् । आ समन्ताल्लीनानि श्लिष्टानि लग्नानि नराणां वारणानि कवाटानि यस्याम्, तिमिरेणालक्ष्यतां प्राप्ताम् अत एव कालीं तत एवाप्रकाशां निशामिव स्थितामयोध्यां प्रविवेशेत्यन्वयः ॥ २ ॥

रा० टी०—अयोध्यामेव विशिनष्टि—बिडालेत्यादिभिः । बिडालाश्च उलूकाश्च तैश्चरिताम्, आलीनानि पिहितानि नरचारणानि नराणां चारणानि मुखानि यस्यां तां, किंच आलीनानि निहत्तानि नराणां प्रतीहाराणां चारणानि निवारणानि यस्यां सा तामप्रकाशां चन्द्रादिप्रकाशरहितां निशामिव तिमिराभ्याहतामन्धकारव्याप्तामत एव कालीं कालवर्णात्वेन प्रतीताम् ॥ २ ॥

गो० टी०—बिडालेति । कालीं कृष्णपक्षसंबन्धिनीम् ॥२॥

३] ति० टी०—राहुशत्रोश्चन्द्रस्य श्रिया दिव्यैश्वर्येण युक्तामत एव प्रज्वलितप्रभाम् अभ्युदितेन ग्रहेण राहुणा पीडितभर्तृकामत एवैकामसहायां रोहिणीमिव स्थिताम् ॥ ३ ॥

४] ति० टी०—आतपवशादल्पोष्णं क्षुब्धं कलुषं च सलिलं यस्यास्ताम् । झषो मत्स्यविशेषः, झुब्धेत्यार्षम् ॥ ४ ॥

रा० टी०—राहुरिति । अभ्युदितेन अभ्युदयकालं प्राप्तेन ग्रहेण राहुणा पीडितां निपीडितपतिकामत एव एकां सहायरहितामत एव श्रिया अनेकविधसंपत्त्या अप्रज्वलिता प्रभा दीप्तिर्यस्यास्तां राहुशत्रोः चन्द्रमसः प्रियां पत्नीं रोहिणीमिव अल्पोष्णक्षुब्धसलिलामल्पमल्पत्वविशिष्टमत एव उष्णं घर्मेण तप्तमत एव क्षुब्धं प्राप्तक्षोभं सलिलं जलं यस्यास्तामत एव घर्मेण तप्ता विहङ्गमाः पक्षिणो यस्यास्तामत एव लीनाः कर्दमादौ निगूढाः मीना झषा ग्राहाः यस्यास्ताम्, झषो मीनजातिविशेष इति न पौनरुक्त्यमत एव कृशां कृशत्वविशिष्टां गिरिनदीमिव ॥ ३ ॥ ४ ॥

गो० टी०—राहुशत्रोरिति । राहुशत्रोश्चन्द्रस्य ॥ ३ ॥ ४ ॥

५–६] ति० टी०—विधूमामत एव हेमाभामग्नेः सञ्जत्थितां शिखामिव पूर्वं रामस्थितिसमये जाज्वल्यमानरूपतया स्थितां पश्चाद्रामविवासनकाले हविरभ्युक्षितां पयोहोमीयपयःसिक्तामत एव विप्रलयं गतां शिखामिव स्थिताम् । 'अध्वराग्नेः सञ्जत्थिताम्' इति पाठो बहुसंमतस्तत्राप्यर्थः प्राग्वदेव, शिखामित्यस्य चाद्यत्तिः ॥ ५ ॥ ६ ॥

रा० टी०—विधूमामिति । पूर्वं विधूमां धूमरहितामत एव हेमाभां स्वर्णसदृशीमग्नेः सञ्जत्थितां शिखां शिखासदृशीमपि पश्चात् हविरभ्युक्षितां देवतोद्देश्यकपयसा सिक्तामत एव विप्रलयं गतां शिखां ज्वालामिव ॥ ५ ॥

रा० टी०—महाहवे महासंग्रामे विध्वस्तकवचां विध्वस्ताः कवचा योधानां वर्माणि यस्यां, रुग्णाः भग्नाः गजवाजिरथध्वजाः यस्यामत एव हतप्रवीरामत एव आपन्नामापदं प्राप्तां चमूमिव ॥ ६ ॥

गो० टी०—विधूमामिति । हविरभ्युक्षितां दध्यादिहविषा अभ्युक्षितां शिखां प्रवर्ग्योत्थितज्वालाम् ॥ ५–७ ॥

७] ति० टी०—सञ्जत्थितां प्रबलमारुतेन सञ्जत्थिताम्,

१ चारणामिति रा. पाठः । २ अभ्युत्थितेनेति गो. पाठः । ३ धर्मोत्तप्तेति गो. पाठः । ४ अध्वराग्नेरिति गो. पाठः । ५ सफेनां सस्वनेति गो. पाठः । ६ उद्घातामिति गो. पाठः ।

त्यक्तां यज्ञायुधैः सर्वैरभिरूपैश्च याजकैः । सुत्याकाले सुनिर्वृत्ते वेदिं गतरवामिव ॥ ८ ॥
गोष्ठमध्ये स्थितामार्तामचरन्तीं नवं तृणम् । गोवृषेण परित्यक्तां गवां पत्नीमिवोत्सुकाम् ॥ ९ ॥
प्रभाकराद्यैः सुस्निग्धैः प्रज्वलद्भिरिवोत्तमैः । वियुक्तां माणिभिर्जात्यैर्नवां मुक्तावलीमिव ॥ १० ॥
सहसाचरितां स्थानान्महीं पुण्यक्षयोद्गताम् । संहतद्युतिविस्तारां तारामिव दिवश्युताम् ॥ ११ ॥
पुष्पनद्धां वसन्तान्ते मत्तभ्रमरशालिनीम् । द्रुतदावाग्निविप्लुष्टां क्रान्तां वनलतामिव ॥ १२ ॥
संमूढनिगमां संवीं संक्षिप्तविपणापणाम् । प्रच्छन्नशशिनक्षत्रां द्यामिवाम्बुधरैर्युताम् ॥ १३ ॥
क्षीणपानोत्तमैर्भग्नैः शरावैरभिसंवृताम् । हतशौण्डामिव ध्वस्तां पानभूमिमसंस्कृताम् ॥ १४ ॥

अत एव सफेनां सस्वनामूर्मिमिव भूत्वा तत्सदृशं रूपं प्राप्य पश्चात्प्रशान्तमारुतेनोदल्पं धूतां कम्पितामत एव निःस्वनां सागरस्य जलोर्मिमिव स्थिताम् ॥ ७ ॥

रा० टी०–समुत्थितां प्रबलवायुना समुद्भूतां सफेनां फेनसहितात्वं सस्वनां स्वनसहितात्वं च भूत्वा प्राप्य पश्चात्प्रशान्तेन मारुतेन वायुना उद्भूतामल्पं चलितामत एव निस्वनां स्वनरहितां सागरस्य समुद्रस्य जलोर्मिमिव ॥ ७ ॥

८] ति० टी०–यज्ञायुधैः स्फ्यादिभिः । अभिरूपैः प्रशस्तैः । सुत्याकाले यागकाले । निवृत्ते समाप्ते सति ॥ ८ ॥

रा० टी०–सुत्याकाले सुनिर्वृत्ते समाप्ते सतीत्यर्थः, याजकैः अभिरूपैः रमणीयैः सर्वैः यज्ञायुधैः स्रुवादिभिस्त्यक्तामपवर्जितां गतरवां निवृत्तशब्दां वेदिमिव ॥ ८ ॥

गो० टी०–त्यक्तामिति । यज्ञायुधैः स्फ्यादिभिः सुत्याकाले सुत्यादिवसे ॥ ८ ॥

९] ति० टी०–गोष्ठे व्रजं तत्र स्थिताम् । गोवृषेण श्रेष्ठगवां वृषभेण, यद्वा गवां प्रियेण वृषेण त्यक्तामत एवार्तां तत्रोत्सुकां नवं तृणमचरन्तीमभक्षयन्तीं गवां तरुणवृषाणां पत्नीमिव स्थिताम् । ' गवां पङ्क्तिमिव ' इति पाठान्तरम् । पत्नीमित्यस्य पङ्क्तिमित्यर्थं तीर्थं आह, तच्चिन्त्यम् ॥ ९ ॥

रा० टी०–गोवृषेण श्रेष्ठवृषभेण परित्यक्तामाभीरादिभिः पृथक्कृतामत एव आर्तामत एव तृणमचरन्तीं गोष्ठे स्थितां निरुद्धामुत्सुकां गवां पत्नीमिव ॥ ९ ॥

गो० टी०–गोष्ठमध्य इति । अचरन्तीमभक्षयन्तीम् ॥९॥

१०] ति० टी०–प्रभाकराद्यैः पद्मरागाद्यैः । स्फटिकादयैरिति कतकोक्तं तु न युक्तम् ॥ १० ॥

रा० टी०–अभिजात्यैः उत्तमजातिभिः सुस्निग्धैः अतिस्नेहोत्पादकैः प्रज्वलद्भिरेव उत्तमैः प्रभाकराद्यैः पद्मरागादिभिर्मणिभिर्वियुक्तां नवां मुक्तावलीमिव ॥ १० ॥

गो० टी०–प्रभाकराद्यैरिति । प्रभाकराद्यैः पद्मरागाद्यैः ॥ १० ॥ ११ ॥

११] ति० टी०–स्थानात्सहसा चरितां चलिताम् । पुण्यक्षयेति लुप्तसप्तम्यन्तम्, पुण्यक्षये सति महीं प्राप्ताम्, संहतो द्युतिविस्तारो यस्यास्ताम् ॥ ११ ॥

रा० टी०–चरितां भुक्तभोगाम् पुण्यक्षये स्थानात् दिवः च्युतामत एव महीमुद्गतां प्राप्तामत एव सुसंहतद्युतिविस्तारां तारामिव ॥ ११ ॥

१२] ति० टी०–द्रुतदावाग्निविप्लुष्टां वेगवद्दावाग्निना व्याप्ताम् ॥ १२ ॥

रा० टी०–पुष्पनद्धाम् पुष्पैर्ग्रथितामत एव मत्तभ्रमरशालिनीं पश्चात् द्रुतदावाग्निना विप्लुष्टामत एव क्रान्तां नष्टहर्षां लतामिव ॥ १२ ॥

गो० टी०–पुष्पनद्धामिति । वसन्तान्ते ग्रीष्मे द्रुतदावाग्निविप्लुष्टां वेगवद्दावाग्निना ईषद्दग्धाम् ॥ १२ ॥

१३] ति० टी०–संमूढाः शोकाकुलचित्ता निगमा वणिजो यस्याम्, यद्वा संमूढो जनसंचाररहितो निगमः पन्था यस्याम्, ' निगमो निश्चये वेदे पुरे पथि वणिक्पथे ' । संक्षिप्ता विपणापणाः पण्यवीथयोऽस्याम् ॥ १३ ॥

रा० टी०–संमूढाः निगमा वणिजो यस्यामत एव संक्षिप्ताः अल्पाः विपणापणाः यस्यामत एव अम्बुधरैर्मेघैर्युताः मत एव प्रच्छन्नशशिनक्षत्रां द्यामिव ॥ १३ ॥

गो० टी०–संमूढनिगमामिति । संमूढनिगमां जनसंचाररहितमार्गाम् । ' निगमो निश्चये वेदे पुरे पथि वणिक्पथे ' इति वैजयन्ती । संक्षिप्ताविपणापणां संकुचितविक्रयां संकुचितनिषद्यां च ॥ १३ ॥

१४] ति० टी०–क्षीणपानोत्तमैः क्षीणमद्यैः । भग्नैः शरावैः संवृताम् । हतशौण्डां हतमद्यपाम् ॥ १४ ॥

रा० टी०–क्षीणेति । क्षीणानि पानोत्तमानि येषां तैः भग्नैः शरावैः अभिसंवृतां हताः शौण्डाः पानकर्तारो यस्यामत एव ध्वस्तामसंस्कृतां पानभूमिमिव ॥ १४ ॥

गो० टी०–क्षीणपानोत्तमैरिति । क्षीणपानोत्तमैः क्षीणमद्यपूर्णैः शरावैः चषकाकारैः हतशौण्डां हतमत्तजनाम् आकाशेऽनावृतप्रदेशे ॥ १४ ॥

१ वीति गो. पाठः । २ पत्तिमिति गो. पाठः । ३ विमुक्तामिति रा. पाठः । ४ क्षयाद्गत मिति गो. पाठः । ५ नादितामिति गो. पाठः । ६ स्तब्धामिति गो. पाठः । ७ भिन्नैरिति गो. पाठः । ८ आकाशे इति गो. पाठः ।

वृक्णभूमितलां निम्नां वृक्णपात्रैः समावृताम् । उपयुक्तोदकां भग्नां प्रपां निपतितामिव ॥ १५ ॥
विपुलां विततां चैव युक्तपाशां तरस्विनाम् । भूमौ बाणैर्विनिकृतां पतितां ज्यामिवायुधात् ॥ १६ ॥
सहसा युद्धशौण्डेन हयारोहेण वाहिताम् ।
[[1]निक्षिप्तभाण्डामुत्सृष्टां किशोरीमिव दुर्बलाम् । शुष्कतोयां महामत्स्यैः कूर्मैश्च बहुभिर्वृताम् ॥
प्रभिन्नतटविस्तीर्णां वापीमिव हृतोत्पलाम् । पुरुषस्याप्रहृष्टस्य प्रतिषिद्धानुलेपनाम् ॥
संतप्तामिव शोकेन गात्रयष्टिमभूषणाम् । प्रावृषि प्रविगाढायां प्रविष्टस्याभ्रमण्डलम् ॥
प्रच्छन्नां नीलजीमूतैर्भास्करस्य प्रभामिव ।] [[3]निहतां प्रतिसैन्येन वडवामिव पातिताम् ॥ १७ ॥
भरतस्तु रथस्थः सञ्श्रीमान्दशरथात्मजः । वाहयन्तं रथश्रेष्ठं सारथिं वाक्यमब्रवीत् ॥ १८ ॥
किं नु खल्वद्य गम्भीरो मूर्च्छितो न निशाम्यते । यथापुरमयोध्यायां गीतवादित्रनिःस्वनः ॥ १९ ॥
वारुणीमदगन्धश्च माल्यगन्धश्च मूर्छितः । चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥ २० ॥
यानप्रवरघोषश्च सुस्निग्धहयनिःस्वनः । प्रमत्तगजनादश्च महांश्च रथनिस्वनः ॥ २१ ॥
नेदानीं श्रूयते पुर्यामस्यां रामे विवासिते । चन्दनागुरुगन्धाश्च महार्हाश्च वनस्रजः ॥ २२ ॥
गते रामे हि तरुणा संतप्ता नोपभुञ्जते । बहिर्यात्रां न गच्छन्ति चित्रमाल्यधरा नराः ॥ २३ ॥

१५] ति० टी०–वृक्णेति । वृक्णं विदीर्णं भूमितलं यस्याः अत एव भग्नामत एव निम्नां ध्वस्तौन्नत्यां वृक्णपात्रैः समावृतासुपयुक्तोदकां समाप्तसलिलां निपतितां पिपासया विपतितजनां प्रपामिव ॥ १५ ॥

गो० टी०–वृक्णभूमितलामिति । वृक्णभूमितलां विदीर्णभूमितलां वृक्णपात्रैः भिन्नपात्रैः ॥ १५ ॥

१६] ति० टी०–विपुलां विशालाम्, विततां धनुष्यातताम्, युक्तपाशां धनुष्कोट्योर्ज्यावन्धनार्थपाशयुताम्, तरस्विनां बाणैर्विनिकृतां छिन्नाम्, आयुधाद्धनुषः पतितां ॥ १६ ॥

रा० टी०–विपुलामिति । विपुलां विस्तीर्णां विततां चापे संयोजितां युक्तपाशां चापकोट्योर्ज्याबन्धनप्रयोजकीभूतरज्जुविशिष्टां तरस्विनां बाणैर्विनिष्कृत्तां छिन्नामत एव आयुधात् धनुषः भूमौ पतितां ज्यामिव ॥ १६ ॥

गो० टी०–विपुलामिति । विततां अटनीद्वयव्याप्ताम् आरोपितामिति यावत्, युक्तपाशां युक्तरज्जुं तरस्विनां वीराणां बाणैः विनिष्कृत्तां छिन्नामिति यावत्, आयुधाद्धनुषः ॥ १६ ॥

१७–१८] ति० टी०–सहसा बलात्कारेण वाहितां प्रधावितां, प्रतिसैन्येन निहतामत एव पातिताम् ॥ १७ ॥ १८ ॥

रा० टी०–सहसेति । युद्धशौण्डेन युद्धकुशलेन हयारोहेण वाहितां द्रुतं चालितां प्रतिसैन्येन शत्रुसेनया निहतामत एव पतितां वडवामिव अयोध्यां प्रविवेशेति पूर्वेणान्वयः ॥ १७ ॥

रा० टी०–भरत इति । रथस्थो भरतस्तु रथश्रेष्ठं वाहयन्तं सारथिमब्रवीत् ॥ १८ ॥

गो० टी०–सहसेति । युद्धशौण्डेन आहवसमर्थेन निक्षिप्तभाण्डाम् अवरोपितभूषाम् उत्सृष्टाम् वाहनानर्हां किशोरीं बालवडवाम् ॥ १७–१९ ॥

गो० टी०–प्रावृषीति । प्रविगाढायां प्रवृद्धायां भास्करस्य प्रभामिव स्थिताम् उक्तविशेषणविशिष्टामयोध्यां प्रविवेशेति पूर्वेणान्वयः ॥ २० ॥ २१ ॥

१९] ति० टी०–यथापुरं यथापूर्वं न निशाम्यते खलु अत्र किं कुर्म इति योजना ॥ १९ ॥

रा० टी०–तद्वचनाकर्णनमाह–किमिति । गम्भीरः निविडः मूर्छितः प्रवृद्धो गीतवादित्रनिःस्वनः यथापुरं पूर्ववत् अयोध्यायां न निशाम्यते किं कुत्सितमेतत् नु नित्यर्थः ॥ १९ ॥

गो० टी०–किं न्विति । किं नु खलु अहो कष्टं जातमित्यर्थः ॥ २२ ॥

२०–२३] ति० टी०–मदकरो गन्धो मदगन्धः मूर्छितो व्याप्तः ॥ २०–२३ ॥

रा० टी०–वारुणीति । समन्ततो मूर्छितः सर्वत्र व्याप्तः वारुणी वरुणप्रेषिता औषधिविशेषः तस्या मदगन्धः मादकः सुगन्धः माल्यगन्धः पुष्पसुगन्धश्च चन्दनादेर्गन्धश्च न प्रवाति॥२०॥

रा० टी०–यानेति । यानप्रवरघोषः यानप्रवरस्य उत्तमरथादेर्घोषः सुस्निग्धः सुस्नेहोत्पादक एव हयस्वनः प्रमत्तगजानां महान्नादश्च रथानां रथिनां स्वनश्च अस्यां पुर्यामिदानीं न श्रूयते । सार्धश्लोक एकान्वयी ॥ २१ ॥

रा० टी०–चन्दनेति । चन्दनादिगन्धान् महार्हाः नवस्रजो नवीनमालाश्च संतप्ताः घर्मादिजनितितापविशिष्टास्तरुणाः युवानो जनाः नोपभुञ्जते न सेवन्ते, चित्रमाल्यधरा नरा अपि बहिर्यात्रां न गच्छन्ति ॥ २२ ॥ २३ ॥

१ निष्कृत्तामिति गो. पाठः । २ श्लोकत्रयं सार्धमेतदधिकं गो. पाठे । ३ अर्धमेतत् गो. नास्ति । ४ निशाम्यत इति गो. पाठः । ५ पतितागर्विति गो. अगर्विति रा. पाठः । ६ स्निग्धश्चेति गो. पाठः । ७ अगर्वेति गो. रा. पाठः । ८ नवेति गो. पाठः ।

नोत्सवाः संप्रवर्तन्ते रामशोकार्दिते पुरे । सा हि नूनं मम भ्रात्रा पुरस्यास्य द्युतिर्गता ॥ २४ ॥
नहि राजत्ययोध्येयं सासारेवार्जुनी क्षपा । कदा नु खलु मे भ्राता महोत्सव इवागतः ॥ २५ ॥
जनयिष्यत्ययोध्यायां हर्षं ग्रीष्म इवाम्बुदः । तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः ॥ २६ ॥
संपतद्भिरयोध्यायां नाभिभान्ति महापथाः । इति ब्रुवन्सारथिना दुःखितो भरतस्तदा ॥ २७ ॥
अयोध्यां संप्रविश्यैव विवेश वसतिं पितुः । तेन हीनां नरेन्द्रेण सिंहहीनां गुहामिव ॥ २८ ॥
तदा तदन्तःपुरमुज्झितप्रभं सुरैरिवोत्कृष्टमभास्करं दिनम् ।
निरीक्ष्य सर्वत्र विभक्तमात्मवान्मुमोच बाष्पं भरतः सुदुःखितः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्दशाधिकशततमः सर्गः ॥ ११४ ॥

गो० टी०–वारुणीमदगन्ध इति । वारुणीमदगन्धः वारुण्याः मदोत्पादको गन्ध इत्यर्थः ॥ २३–२६ ॥

२४] ति० टी०– मम भ्रात्रा सहेति शेषः ॥ २४ ॥

रा० टी०–नेति । रामशोकार्दिते रामशोकपीडिते पुरे उत्सवाः न प्रवर्तन्ते । तत्र हेतुः–अस्य पुरस्य सा पौर्वकालिकी द्युतिः मम भ्रात्रा रामेण सह गता ॥ २४ ॥

गो० टी०–सहेति । सासारा वेगवद्वृष्टिसहिता ' आसारः स्यात्प्रसरणे वेगवृष्टौ सुहृद्बले ' इति वैजयन्ती । अर्जुनी शुक्लपक्षसंबन्धिनी ॥ २७ ॥

२५] ति० टी०–अर्जुनी शारदी शुक्लपक्षसंबन्धिनी वा, सासारा वेगवद्वृष्टिधारासहिता, महोत्सव इव ग्रीष्मेऽम्बुद इव च २६

रा० टी०–नहीति । सासारा वेगवद्वृष्टिविशिष्टा आर्जुनी शुक्लपक्षसंबन्धिनी क्षपा रात्रिरिव इयमयोध्या नैव राजति ' आसारः स्यात्प्रसरणे वेगवृष्टौ सुहृद्बले ' इति वैजयन्ती । अर्धं पृथक्–कदेति । अयोध्यामेवागतो मे भ्राता रामः ग्रीष्मे महोत्सवः अत्युत्सवहेतुः अम्बुदो मेघ इव हर्षं कदा जनयिष्यत्येव । इव एवार्थे अर्थद्वयमेकान्वयि ॥ २५ ॥

गो० टी०–कदा न्विति । महोत्सवः ग्रीष्मे अम्बुद इव च अयोध्यायां कदा मे भ्राता हर्षं जनयिष्यतीति संबन्धः ॥२८॥

२६–२८] ति० टी०–उन्नतगामिभिः संतोषादुद्गतगामिभिः ॥ २६–२८ ॥

रा० टी०–तरुणैरिति । उन्नतगामिभिर्गर्वेणोच्चगमनकर्तृभिरित्यर्थः, चारुवेषैस्तरुणैः अयोध्यायां संपतद्भिः आगच्छद्भिर्नरैः महापथाः राजमार्गाः नाभिभान्ति ॥ २६ ॥

गो० टी०–तरुणैरिति । उन्नतगामिभिः सगर्वगमनैरित्यर्थः, महापथाः राजमार्गाः ॥ २९ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण ब्रुवन् सारथिना सह दुःखितो भरतः अयोध्यां संप्रविश्य सिंहहीनां गुहामिव नरेन्द्रेण हीनां पितुः वसतिं गृहं विवेश ॥२७॥२८॥

गो०टी०–एवमिति । 'एवं बहुविधं जल्पन्'इति पाठः॥२०॥

२९] ति० टी०–सुरैरुत्कृष्टं कृतशोकमभास्करं दिनमिव । एवं हि श्रूयते—पुरा देवासुरे युद्धेऽसुरैर्देवाः पराजिताः राहुणा च भानुः पातितः तदा दिवारात्रिविभागरहिते काले स्वस्वलोकाद्ब्रह्मलोकं गतैर्देवैः प्रार्थितस्य ब्रह्मणो नियोगादत्रिः सप्तरात्रं सूर्याधिपत्यं चकारेति तीर्थः । देवैरुत्कृष्टं भास्करहीनं दिनं कविकल्पितमत्रोपमानमिति कतकः । विभक्तं विगतसंस्कारम् । भक्तं सेवितं संस्कृतं तद्भिन्नमिति यावत् ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे चतुर्दशोत्तरशततमः सर्गः ॥११४॥

रा० टी०–तदेति । उज्झितप्रभं त्यक्तशोभमत एव सुरैरुत्कुष्टं शोककर्मीभूतमभास्करं भास्कररहितं दिनमिव विभक्तं मार्जनादिसेवारहितं तत् अन्तःपुरं सर्वत्र निरीक्ष्य सुदुःखितः आत्मवान् अतिधैर्यविशिष्टो भरतः बाष्पमश्रु मुमोच । अत्रेयं पुराणप्रसिद्धिः–पुरा देवासुरसङ्गामे असुरैः देवाः पराजिताः भानुश्च राहुणा पातितस्तदा दिवारात्रिविभागाभावात् स्वलोकाद्ब्रह्मलोकं गतैर्देवैः प्रार्थितस्य ब्रह्मणो नियोगात् सप्तरात्रं सूर्यकार्यमत्रिश्चकारेति तेनाभास्करदिनस्य नाप्रसिद्धिः । अभास्करमित्यस्य अकालकघनाद्याच्छिन्नत्वेन भास्करदर्शनरहितमित्यर्थे तु न शङ्कान्तरे ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे चतुर्दशाधिकशततमः सर्गः ॥ ११४ ॥

गो० टी०–तदेति । सुरैरुत्सृष्टमभास्करं दिनमिव उज्झितप्रभम् अन्तःपुरं निरीक्ष्येति संबन्धः । विविक्तं विजनम् 'विविक्तौ पूतविजनौ' इत्यमरः । पुरा किल देवासुरयुद्धे असुरैर्देवाः पराजिताः स्वर्भानुना च भानुः पातितस्तदानीं कियान् कालो दिवारात्रिविभागरहितोऽभूत् । ततःपरं ब्रह्मनियोगादत्रिः स्वतेजसा सप्तरात्रं सूर्याधिपत्यं चकारेति पौराणिकी कथा । 'अग्निः स्वतेजसा' इति पाठान्तरम् ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने चतुर्दशोत्तरशततमः सर्गः ॥११४॥

---

१ सहेति गो. पाठः । २ एवं बहुविधं जल्पन्निति पादत्रयस्थाने गो. पाठे । ३ उत्सृष्टमिति गो. पाठः । ४ सर्वं तु विविक्तमिति गो. पाठः

पञ्चदशाधिकशततमः सर्गः।

भरतः स्वमातॄरयोध्यां प्रवेश्य वसिष्ठानुमतः शत्रुघ्नादिभिः सह नन्दिग्रामं प्राप्तः पादुकायुगलं राज्येऽभिषिच्य स्वयं मुनिवेषधारी तदुपरि छत्रं बिभ्राणो राष्ट्रं प्रशशास।

ततो निक्षिप्य मातॄस्तौ अयोध्यायां दृढव्रतः। भरतः शोकसंतप्तो गुरूनिदमथाब्रवीत् ॥ १ ॥
नन्दिग्रामं गमिष्यामि सर्वानामन्त्रयेऽत्र वः। तत्र दुःखमिदं सर्वं सहिष्ये राघवं विना ॥ २ ॥
गतश्चाहो दिवं राजा वनस्थः स गुरुर्मम। रामं प्रतीक्षे राज्याय स हि राजा महायशाः ॥ ३ ॥
एतच्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः। अब्रुवन्मन्त्रिणः सर्वे वसिष्ठश्च पुरोहितः ॥ ४ ॥
सुभृशं श्लाघनीयं च यदुक्तं भरत त्वया। वचनं भ्रातृवात्सल्यादनुरूपं तवैव तत् ॥ ५ ॥
नित्यं ते बन्धुलुब्धस्य तिष्ठतो भ्रातृसौहृदे। मार्गमार्यं प्रपन्नस्य नानुमन्येत कः पुमान् ॥ ६ ॥
मन्त्रिणां वचनं श्रुत्वा यथाभिलषितं प्रियम्। अब्रवीत्सारथिं वाक्यं रथो मे युज्यतामिति ॥ ७ ॥
प्रहृष्टवदनः सर्वा मातॄः समभिभाष्य च। आरुरोह रथं श्रीमाञ्शत्रुघ्नेन समन्वितः ॥ ८ ॥
आरुह्य तौ रथं क्षिप्रं शत्रुघ्नभरतावुभौ। ययतुः परमप्रीतौ वृतौ मन्त्रिपुरोहितैः ॥ ९ ॥
अग्रतो गुरवः सर्वे वसिष्ठप्रमुखा द्विजाः। प्रययुः प्राङ्मुखाः सर्वे नन्दिग्रामो यतो भवेत् ॥ १० ॥

१] ति० टी०—तत इति ॥ १ ॥

रा० टी०—भरतकर्तृकगृहप्रवेशानन्तरकालिकं वृत्तान्तमाह—तत इत्यादिभिः। ततः गृहप्रवेशानन्तरं ताः सहगताः मातॄः अयोध्यायां निक्षिप्य संस्थाप्य दृढव्रतः अनिवार्यसंकल्पः शोकसंतप्तो भरतः गुरून् वशिष्ठप्रभृतीन् अथाब्रवीत् समकृत्यमुच्चारयामास ॥ १ ॥

गो० टी०—अथ भरतस्य नन्दिग्रामे स्थित्वा राज्यपरिपाकनं पञ्चदशोत्तरशततमे—तत इत्यादिना ॥ १ ॥

२] ति० टी०—अत्रायोध्यायाम्। तेन सहागमनकारितं राघवं विना दुःखं पितृभ्रातृवियोगजं दुःखमिति यावत् ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—नन्दिग्राममिति। अहं नन्दिग्रामं गमिष्यामि अत्र अस्मिन् विषये वो युष्मान् आमन्त्रये प्रार्थयामि, तदनुमनाय भवदाज्ञां याच्छामीत्यर्थः। गमने प्रयोजनमाह—तत्र नन्दिग्रामे राघवं रामं विना गतोऽहमिदमनुभूयमानं सर्वं दुःखं सहिष्ये ॥ २ ॥

गो० टी०—नान्दिग्राममिति। राघवं विना दुःखं राघवं विना प्राप्तं दुःखम् ॥ २—४ ॥

३—५] ति० टी०—तदेवाह—गतश्चेति ॥ ३—५ ॥

रा० टी०—दुःखहेतुं वदन्नाह—गत इति। राजा दिवं ब्रह्मादिस्तुतं साकेतं गतः, गुरुः ममातीव पूज्यः स रामः वनस्थोऽस्तीति शेषः, अतः राज्याय राज्यं प्राप्तुं रामं प्रतीक्षे यतः महायशाः स राम एव राजा ॥ ३ ॥

रा० टी०—एतदिति। महात्मनो भरतस्य एतच्छुभं वाक्यं श्रुत्वा सर्वे मन्त्रिणः पुरोहितो वसिष्ठश्च अब्रुवन् ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—सुभृशमिति। हे भरत! भ्रातृवात्सल्यात् यत् त्वयोक्तं तत् इदं तवैव अनुरूपमतः सुभृशमत्यन्तं श्लाघनीयम्। एतेनेदं गमनमस्माकमनुमतमिति सूचितम् ॥ ५ ॥

गो० टी०—सुभृशमिति। 'सुभृशं श्लाघनीयं च' इति पाठः 'सदृशम्' इति पाठे कुलस्य सदृशमित्यर्थः ॥ ५ ॥

६] ति० टी०—बन्धुलुब्धस्य बन्धुजनपरिपाकनेऽधिकस्पृहावतः। आर्यं श्रेष्ठम् नानुमन्येत त्वद्वचनमिति शेषः ॥ ६ ॥

रा० टी०—सर्वानुमतौ हेतुं वदन्नाह—नित्यमिति। बन्धुलुब्धस्य बन्धुप्राप्तिविषयकातीच्छावतः अत एव भ्रातृसौहृदे भ्रातृसौहार्दसंपादने तिष्ठतः अत एव आर्यमत्युत्तमं मार्गं पन्थानं प्रपन्नस्य प्राप्तस्य ते तव आर्यं मार्गं कः पुमान् नानुमन्येत सर्वोऽपि अनुमन्येतेत्यर्थः, मार्गमित्युभयान्वयि ॥ ६ ॥

गो० टी०—नित्यमिति। नानुमन्येत वचनमिति शेषः ६॥७॥

७—९] ति० टी०—यथाभिलषितं स्वाभिलषितमनतिक्रम्य प्रवृत्तम् ॥ ७—९ ॥

रा० टी०—मन्त्रिणामिति। यथाभिलषितमभिलषितमनतिक्रम्य प्रियं मन्त्रिणां वचनं श्रुत्वा मे रथो युज्यतामिति वाक्यं सारथिमब्रवीत् ॥ ७ ॥

रा० टी०—प्रहृष्टेति। प्रहृष्टवदनो भरतः मातॄः समभिभाष्य समभिभाषणपूर्वकाज्ञां गृहीत्वा रथमारुरोह ॥ ८ ॥

रा० टी०—आरुह्येति। क्षिप्रं शीघ्रं रथमारुह्य मन्त्रिपुरोहितैर्वृतौ उभौ शत्रुघ्नभरतौ ययतुः ॥ ९ ॥

गो० टी०—प्रहृष्टवदन इति सम्यक् ॥ ८ ॥ ९ ॥

१०] ति० टी०—नन्दिग्रामो यतो भवेत्तेन मार्गेण स प्राप्तो भवेत्तेन ययुः ॥ १० ॥

१ स इति गो० पाठः। २ ऽवेति गो० पाठः। ३ ह्वीति गो० पाठः। ४ चेति गो० पाठः। ५ वाथ स इति गो० पाठः। ६ चेति गो० पाठः। ७ शीघ्रमिति गो० पाठः। ८ त्तेति गो० पाठः। ९ ऽभवदिति गो० पाठः।

बलं च तदनाहूतं गजाश्वरथसंकुलम् । प्रययौ भरते याते सर्वे च पुरवासिनः ॥ ११ ॥
रथस्थः स तु धर्मात्मा भरतो भ्रातृवत्सलः । नन्दिग्रामं ययौ तूर्णं शिरस्यादाय पादुके ॥ १२ ॥
भरतस्तु ततः क्षिप्रं नन्दिग्रामं प्रविश्य सः । अवतीर्य रथात्तूर्णं गुरूनिदमभाषत ॥ १३ ॥
एतद्राज्यं मम भ्रात्रा दत्तं संन्यासमुत्तमम् । योगक्षेमवहे चेमे पादुके हेमभूषिते ॥ १४ ॥
भरतः शिरसा कृत्वा संन्यासं पादुके ततः । अब्रवीद्दुःखसंतप्तः सर्वं प्रकृतिमण्डलम् ॥ १५ ॥
छत्रं धारयत क्षिप्रमार्यपादाविमौ मतौ । आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम ॥ १६ ॥
भ्रात्रा तु मयि संन्यासो निक्षिप्तः सौहृदादयम् । तमिमं पालयिष्यामि राघवागमनं प्रति ॥ १७ ॥
क्षिप्रं संयोजयित्वा तु राघवस्य पुनः स्वयम् । चरणौ तौ तु रामस्य द्रक्ष्यामि सहपादुकौ ॥ १८ ॥

रा० टी०–गमनप्रकारमाह–अग्रत इति । वसिष्ठप्रमुखा गुरवः सर्वे द्विजाश्च प्राङ्मुखाः सन्तः यतः येन मार्गेण सर्वे नन्दिग्रामः सर्वेषां कामानाम् प्राप्तिर्यस्मात् स एव नन्दिग्रामः भवेत् प्राप्तुयादित्यर्थः, तेन प्रयुः ॥ १० ॥

गो० टी०–अग्रतो गुरवस्तत्र नन्दिग्रामो यतोऽभवत् इति पाठः ॥ १०–१२ ॥

११–१३]ति०टी०–तदनाहूतं भरतेनाकृताह्वानमपि११-१३

रा० टी०–बलमिति । अनाहूतमपि गजादिसंकुलं बलं सैन्यं प्रययौ पुरवासिनश्च प्रययुः ॥ ११ ॥

रा० टी०–रथस्थ इति । शिरसि पादुके आदाय रथस्थो भरतस्तूर्णं ययौ ॥ १२ ॥

रा० टी०–भरत इति । स भरतः क्षिप्रं नन्दिग्रामं प्रविश्य रथादवतीर्य गुरूनिदमभाषत ॥ १३ ॥

गो० टी०–नन्दिग्रामं ययौ तूर्णं शिरस्याधाय पादुके इत्यतःपरं ' ततस्तु भरतः क्षिप्रं नन्दिग्रामं प्रविश्य सः । अवतीर्य रथात्तूर्णं गुरूनिदमुवाच ह ' इति श्लोकः ॥ १३ ॥

१४] ति० टी०–एतदयोध्याराज्यं मम भ्रात्रा संन्यासवत्समीचीनवस्तुनिक्षेपवन्मयि दत्तं स्थापितम् । कालान्तरे ग्रहणाय विश्वस्तपुरुषे रक्षणार्थं वस्तुस्थापनं न्यासो निक्षेप इति च । न्यासस्यापि राज्यस्य रक्षणं भगवत्पादुकाधीनमेव न मदधीनमित्याह–योगेत्यादि । इत्युवाचेति पूर्वेणान्वयः ॥ १४ ॥

रा० टी०–तद्भाषणप्रकारमाह–एतदिति । यत् एतत् उत्तमं राज्यं संन्यासं यथा स्यात्तथा भ्रात्रा दत्तं तस्य राज्यस्य योगक्षेमवहे हेमभूषिते इमे पादुके एव ॥ १४ ॥

गो० टी०–मातृवरव्याजेन पित्रा दत्तं राज्यं भरतः करोतीति जनवादो मा भूदिति धिया वदति–एतदित्यादिना । संन्यासवत् सम्यक् निक्षिप्तद्रव्यमिव अनेनान्यूनतया प्रत्यर्पणीयत्वं ध्वन्यते । निक्षेपवद्दत्तस्य राज्यस्य रक्षणादिस्वात्तन्न्यमपि स्वस्य नास्तीति दर्शयति–योगक्षेमवहे चेति ॥१४॥

१५] ति० टी०–पादुके संन्यासं पादुकात्मकं सद्वस्तुन्यासम्, ' वेदाः प्रमाणम् ' इति वत्साधु । शिरसा कृत्वा प्रणम्येति यावत् ॥ १५ ॥

रा० टी०–भरत इति । पादुके उद्दिश्य संन्यासं राज्यसमर्पणं शिरसा प्रणतमूर्ध्नोपलक्षितो भरतः कृत्वा सर्वं प्रकृतिमण्डलं प्रजासमूहमब्रवीत् ॥ १५ ॥

गो० टी०–भरत इति । संन्यासं पादुके स्वप्रतिनिधित्वेन न्यस्ते पादुके ॥ १५ ॥

१६]ति० टी०–इमौ पादुकारूपावार्यपादाविति । पादशब्दः पूजावाची । विधेयाभिप्रायेण चेमाविति पुंलिङ्गनिर्देशः । ' शैत्यं हि यत्सा प्रकृतिर्जलस्य ' इति तत्परमपूज्यरामभावनाविषये इमे पादुके इत्यर्थः । राज्येऽपेक्षितो मम गुरोर्धर्मव्यवहारोऽनयोरेव स्थितः, अत आभ्यां पादुकाभ्यां छत्रं धारयत । एतत्संनिधानादेव तत्तद्व्यवहारे धर्मव्यवहारांशज्ञानं ममेति भावः ॥ १६ ॥

रा० टी०–तद्वचनाकारमाह—छत्रमिति । यतः इमौ पादुकारूपपदार्थौ आर्यपादावभिमतौ रामपादत्वेन स्वीकृतौ अतः छत्रं तदुपलक्षितचामरादि च धारयत पादुकयोरुपरीति शेषः, तत्र हेतुः आभ्यां मम गुरोः रामस्य पादुकाभ्यामेव राज्ये धर्मः स्थितः स्थापितः अन्तर्भावितणिजर्थः ॥ १६ ॥

गो० टी०–छत्रमिति । छत्रमित्येतच्चामरादीनामुपलक्षणम् अत एव धारयतेति बहुवचनम् । आर्यपादाभेदभावनया पादुकयोरिमाविति पुंलिङ्गनिर्देशः । पादुकाभ्यामिति हेतौ तृतीया ॥१६॥

१७] ति० टी०–अयं राज्यरूपः संन्यासो निक्षेपो निक्षिप्तः राघवागमनं प्रति तावत्पर्यन्तम् ॥ १७ ॥

रा० टी०–भ्रात्रेति । सौहृदादेतोः भ्रात्रा मयि निक्षिप्तः संस्थापितः अयं पादुकारूपपदार्थः संन्यासः भ्रातृप्रतिनिधिभूत इत्यर्थः, अतः तमिमं पादुकारूपपदार्थं राघवागमनं प्रति रामागमननिमित्तं पालयिष्यामि सेविष्ये ॥ १७ ॥

गो० टी०–भ्रात्रेति । अयं संन्यासः पादुकारूपप्रतिनिधिः । पालयिष्यामि रक्षिष्यामि ॥ १७ ॥ १८ ॥

१८] ति० टी०–संयोजयित्वा चरणयोः पादुके ॥ १८ ॥

१ हीति गो. पाठः । २ आधायेति गो. पाठः । ३ उवाच हेति गो. पाठः । ४ वत्स्वयमिति गो. पाठः ।

ततो निक्षिप्तभारोऽहं राघवेण समागतः । निवेद्य गुरवे राज्यं भजिष्ये गुरुवर्तिताम् ॥ १९ ॥
राघवाय च संन्यासं दत्त्वेमे वरपादुके । राज्यं चेदमयोध्यां च धूतपापो भवाम्यहम् ॥ २० ॥
[अभिषिक्ते तु काकुत्स्थे प्रहृष्टमुदिते जने । प्रीतिर्मम यशश्चैव भवेद्राज्याच्चतुर्गुणम् ॥
एवं तु विलपन्दीनो भरतः स महायशाः । नन्दिग्रामेऽकरोद्राज्यं दुःखितो मन्त्रिभिः सह ॥]
स वल्कलजटाधारी मुनिवेषधरः प्रभुः । नन्दिग्रामेऽवसद्वीरः ससैन्यो भरतस्तदा ॥ २१ ॥
[रामागमनमाकाङ्क्षन्भरतो भ्रातृवत्सलः । भ्रातुर्वचनकारी च प्रतिज्ञापारगस्तथा ॥
पादुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तदा ।]
सवालव्यजनं छत्रं धारयामास स स्वयम् । भरतः शासनं सर्वं पादुकाभ्यां निवेदयन् ॥ २२ ॥
ततस्तु भरतः श्रीमानभिषिच्यार्यपादुके । तदधीनस्तदा राज्यं कारयामास सर्वदा ॥ २३ ॥
तदा हि यत्कार्यमुपैति किंचिदुपायनं चोपहृतं महार्हम् ।
स पादुकाभ्यां प्रथमं निवेद्य चकार पश्चाद्भरतो यथावत् ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

रा० टी०–क्षिप्रमिति । राघवस्य चरणयोः पादुके इति शेषः । संयोजयित्वा संयोज्य सहपादुकौ मत्संयोजितपादुकासहितौ तौ रामस्य चरणौ पुनर्द्रक्ष्यामि ॥ १८ ॥

१९–२०] ति० टी०–समागतो मिलितः । निवेद्य प्रत्यर्प्य । गुरुवर्तितां गुरूचितशुश्रूषाम् ॥ १९ ॥ २० ॥

रा० टी०–तत इति । राघवेण समागतोऽहं गुरवे रामाय राज्यं निवेद्य समर्प्य ततः समर्पणात् निक्षिप्तभारः सन् गुरुवर्तितां गुरुसेवां भजिष्ये करिष्यामि ॥ १९ ॥

गो० टी०–तत इति । राघवेण समागतः संगतः गुरवे राज्यं निवेद्य रामाय राज्यं प्रत्यर्प्य ततः गुरुवृत्तितां भजिष्ये पितरीव शुश्रूषां करिष्यामीत्यर्थः ॥ १९ ॥

रा० टी०–राघवायेति । संन्यासं न्यासत्वेन मयि संस्थापितं राज्यमयोध्यां च पादुके च राघवाय दत्त्वा धूतपापः निवृत्तवियोगजनितदुःखोऽहं भवामि भवितास्मि ॥ २० ॥

गो० टी०–राघवायेति । धूतपाप इत्यत्र पापशब्देन कैकेयीनिमित्तमयश उच्यते ॥ २० ॥

गो० टी०–अभिषिक्ते इति । प्रहृष्टमुदिते प्रहृष्टः पुलकितगात्रः मुदितः संजातमानसहर्षः ॥ २१–२३ ॥

२१] ति० टी०–अवसद्वीरो धीमान् ॥ २१ ॥

रा० टी०–स इति । वल्कलजटाधारी मुनिवेषधरः स भरतः नन्दिग्रामेऽवसत् ॥ २१ ॥

गो० टी०–रामागमनमाकाङ्क्षन्नित्यादि । पादुकाभ्यां न्यवेदयत् विज्ञापयामास ॥ २४ ॥ २५ ॥

२२] ति० टी०–वालव्यजनेन सहितं छत्रम् । स भरतः सर्वं शासनं ताभ्यां निवेदयन्नुक्तविशेषणं छत्रं स्वयमेव धारयामास ॥ २२ ॥

रा० टी०–सेति । सर्वं शासनं पादुकाभ्यां निवेदयन् तदनुसारेण कुर्वन्सन्नित्यर्थः । भरतः सवालव्यजनं वालव्यजनसहितं छत्रं स्वयं धारयामास पादुकयोरुपरीति शेषः । न्यवेदयत् । इति भूषणपाठः ॥ २२ ॥

२३] ति० टी०–आर्यपादुके अभिषिच्य तयो राज्याभिषेकं कृत्वा तदधीनः पादुकाधीनः ॥ २३ ॥

रा० टी०–तत इति । ततः नन्दिग्रामस्थितिकालादनन्तरम् आर्यपादुके अभिषिच्य आर्यपादुकयोः राज्याभिषेकं कृत्वेत्यर्थः, सर्वदा तदधीनः पादुकायत्तो भरतः राज्यं कारयामास ॥ २३ ॥

गो० टी०–ततस्त्विति । आर्यपादुके अभिषिच्य राज्याभिषेकमार्यपादुकयोः कृत्वेत्यर्थः, तदधीनः पादुकापरतन्त्रः ॥ २६ ॥

२४] ति० टी०–यत्कार्यं राज्यविषयम् । पश्चाद्यथावत्कोशागारस्थमुपायनं चकार, प्रजान्यायकार्यं च यथावच्छास्त्रानतिक्रमेण चकार ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

रा० टी०–तदेति । तदा पादुकायत्तपालनसमये यत्किंचित्कार्यमुपैति तदुपहृतं केनचित्प्रापितमुपायनं च प्रथमं पादुकाभ्यां निवेद्य पश्चात् यथावत् यथायोग्यं भरतश्चकार विनियोजयामासेत्यर्थः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

गो० टी०–तदेति । तदा पादुके पुरस्कृत्य राज्यपालनसमये । उपायनम् उपहारः 'उपायनमुपग्राह्यमुपहारः' इत्यमरः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

---

१ वृत्तितामिति गो. पाठः । २ चेति गो. पाठः । ३ एतदादि श्लोकद्वयमधिकं गो. पाठे । ४ वरि इति गो. रा. पाठः । ५ सार्धश्लोकोऽयमधिको गो. पाठे । ६ अर्धमेतत् गो. नास्ति ।

षोडशाधिकशततमः सर्गः ।

इङ्गितज्ञेन रामेण सहचरमुनिकुलमाश्रमान्तरं जिगमिषुं विलोक्य जिगमिषाकारणं प्रति पृष्टो कुलपतिः खरादिराक्षसेभ्यः संप्राप्तं दुःसहोपद्रवं तत्कारणत्वेन उपन्यस्य सगणोऽन्यत्र गमनेऽभ्यनुज्ञामयाचत कृतानुज्ञश्च रामः सबहुमानं तान्विसृज्य स्वाश्रमं प्रविवेश ।

प्रतियाते तु भरते वसन्रामस्तदा वने । लक्षयामास सोद्वेगमथौत्सुक्यं तपस्विनाम् ॥ १ ॥
ये तत्र चित्रकूटस्य पुरस्तात्तापसाश्रमे । राममाश्रित्य निरतास्तानलक्षयदुत्सुकान् ॥ २ ॥
नयनैर्भ्रुकुटीभिश्च रामं निर्दिश्य शङ्किताः । अन्योन्यमुपजल्पन्तः शनैश्चक्रुर्मिथः कथाः ॥ ३ ॥
तेषामौत्सुक्यमालक्ष्य रामस्त्वात्मनि शङ्कत । कृताञ्जलिरुवाचेदमृषिं कुलपतिं ततः ॥ ४ ॥

१] ति० टी०–सोद्वेगं सभयम् । औत्सुक्यमाश्रमान्तरगमनौत्सुक्यम् ॥ १ ॥

रा० टी०–भरतवृत्तान्तमुक्त्वा चित्रकूटस्थरामवृत्तान्तं वर्णयन्नाह–प्रतीति । भरते प्रतियाते सति तपोवने वसन् रामः सोद्वेगं भयसहितं तपस्विनामौत्सुक्यं किंचिद्वक्तव्यविषयकोत्सुकतां लक्षयामास ॥ १ ॥

गो० टी०–अथ रामस्य चित्रकूटान्निर्गमनं षोडशोत्तरशततमे–प्रतिप्रयाते इत्यादि । सोद्वेगं सभयम् औत्सुक्यम् आश्रमान्तरगमनाभिलाषं लक्षयामास इङ्गिताकारादिभिरिति शेषः ॥ १ ॥

२] ति० टी०–पुरस्तात्पूर्वं ये तापसाः । चित्रकूटस्याश्रमे । संनिधिरार्षः । राममाश्रित्य निरता नितरां रताः सानन्दास्तानुत्सुकानलक्षयत् । अत्रेदं बोध्यम्—चैत्रशुक्लदशम्यां पुष्ये रामवनप्रस्थानम् , ततः पूर्णिमायामर्धरात्रे दशरथमरणम् , ततः पक्षेण भरतागमनमयोध्यायाम् , तत और्ध्वदेहिकेन पक्षो गतः । एवं वैशाखे गते ज्येष्ठे भरतस्य चित्रकूटं प्रति प्रस्थानम् , अग्रे वर्षाकाले संनिहिते सति कार्तिक्यन्तं चित्रकूटे वासो रामस्य , तदनन्तरं तापसौत्सुक्यलक्षणम् न तु भरतनिवृत्त्यनन्तरमेवैतदिति । अत एव पाद्मे भरतस्यायोध्यां प्रतिनिवृत्त्यनन्तरमुक्तम्— ' राघवश्चित्रकूटाद्रौ सानुजोऽरमत स्त्रिया । कदाचिदङ्के वैदेह्या निद्राणे रघुनन्दने ॥ ऐन्द्रः काकः समागम्य जानक्यां वीक्ष्य कामुकः । विददार नखैस्तीक्ष्णैः पीनोन्नतपयोधरम् ॥ तदृष्ट्वा राघवः क्रुद्धः क्रुशं जग्राह पाणिना । ब्राह्मेणास्त्रेण संयोज्य चिक्षेप ध्वाङ्क्षमारणे ॥ तं दृष्ट्वा घोरसंकाशं ज्वलत्कालानलोपमम् । दृष्ट्वा काकः प्रदुद्राव निनदन्दारुणस्वनम् ॥ वायसस्त्रिषु लोकेषु बभ्राम भयपीडितः । यत्र यत्र ययौ काकः शरणार्थी च वायसः॥ तत्र तत्र तदस्त्रं तु प्रविवेश भयावहम् । ब्रह्माणमिन्द्रं रुद्रं मां शरणार्थी जगाम सः ॥ तं दृष्ट्वा वायसं भीतं देवता न ररक्षिम । न शक्ताः स्म वयं त्रातुं राघवाज्ञाद्वयंकरात् ॥ इत्यब्रूम महादेवा अन्यथार्थं दहेच्च नः । पुनश्चागाद्विधिं काको दयया विधिराह तम् ॥ भो भो बलिभुजां श्रेष्ठ तमेव शरणं व्रज । स एव रक्षकः श्रीशः शरणागतवत्सलः ॥ इत्युक्तः सोऽथ बलिभुग्ब्रह्मणा रघुनन्दनम् । उपेत्य सहसा भूमौ निपपात भयातुरः ॥ प्राणसंशयमापन्नं दृष्ट्वा सीता तु वायसम् । त्राहि त्राहीति भर्तारमुवाच दयिता विभुम् ॥ तच्छिरः पादपोस्तस्य युयुजे चाथ जानकी । तमुत्थाप्य करेणाथ कृपापीयूषसागरः ॥ ररक्षासौ निजास्त्राय तदेकाक्षि ददौ तदा । वायसोऽपि प्रणम्यैनं त्वा सीतायै राघवाय च ॥ स्वलोकं प्रययौ हृष्टो राघवेणाभिपालितः । ततो रामो महातेजा वैदेह्या लक्ष्मणेन च ॥ उवाच चित्रकूटाद्रौ स्तूयमानो महर्षिभिः ॥' इति ॥ २ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–य इति । पुरस्तात् पूर्वं तत्र तस्मिन् चित्रकूटस्य तापसाश्रमे राममाश्रित्य ये निरताः नितरां प्रीतिं प्राप्तास्तान् उत्सुकान् किंचिद्वक्तव्यविषयकौत्सुक्यविशिष्टान् अलक्षयत् अबुध्यत ॥ २ ॥

गो० टी०–य इति । पुरस्तात् पूर्वं चित्रकूटस्य तापसाश्रमे राममाश्रित्य ये निरतास्तानुत्सुकान् गमनोत्सुकान् अलक्षयत् राम इत्यनुषङ्गः ॥ २ ॥

३] ति० टी०–कथमलक्षयत्तत्राह—नयनैरित्यादि । निर्दिश्य प्रदर्श्य शङ्किता रामः किं मंस्यत इति भीताः नयनादिभिः प्रदर्श्यान्योन्यमुपजल्पन्त आद्रियन्तः शनैरुपांशु कथाश्चक्रुः । अयं राम इह सस्त्रीक आस्ते, राक्षसाश्चैतद्वेषेणेह संचरन्तोऽस्मान्बाधन्ते, अतोऽन्यत्र गन्तव्यमित्येवंरूपाः कथाश्चक्रुः ॥ ३ ॥

रा० टी०–बोधनहेतुं दर्शयन्नाह–नयनैरिति । शङ्किताः किंचिद्धेतुकशङ्कां प्राप्ताः मुनयः नयनादिभिः रामं निर्दिश्य शनैः अन्योन्यं जल्पन्तः मिथः परस्परं कथाः चक्रुः ॥ ३ ॥

गो० टी०–नयनैरिति । रामं निर्दिश्य प्रदर्श्य मिथः रहस्ये । ' मिथोऽन्योन्यरहस्ययोः ' इति वैजयन्ती ॥ ३ ॥

४] ति० टी०–शङ्कत अशङ्कतेत्यर्थः । एतदाश्रमत्यागकारणमात्मनिष्ठं दोषमशङ्कतेत्यर्थः अत एव कृताञ्जलिः सन्कुलपतिमृषिसंघस्वामिनमाश्रममस्वामिनं वा । ' कुलमन्वयसंघातगृहोत्पत्त्याश्रमेषु च ' ॥ ४ ॥

रा० टी०–तेषामिति । तेषामौत्सुक्यं किंचिद्वक्तव्य-

१ प्रयाते भरत इति गो. पाठः । २ तपोवन इति गो. पाठः । ३ शङ्कित इति गो. रा. पाठः ।

न कच्चिद्भगवन्किंचित्पूर्ववृत्तमिदं मयि । दृश्यते विकृतं येन विक्रियन्ते तपस्विनः ॥ ५ ॥
प्रमादाच्चरितं किंचित्कच्चिन्नावरजस्य मे । लक्ष्मणस्यर्षिभिर्दृष्टं नानुरूपं महात्मनः ॥ ६ ॥
कच्चिच्छुश्रूषमाणा वः शुश्रूषणपरा मयि । प्रमदाभ्युचितां वृत्तिं सीता युक्तां न वर्तते ॥ ७ ॥
अर्षिर्जरया वृद्धस्तपसा च जरां गतः । वेपमान इवोवाच रामं भूतदयापरम् ॥ ८ ॥
कुतः कल्याणसत्त्वायाः कल्याणाभिरतेः सदा । चलनं तात वैदेह्यास्तपस्विषु विशेषतः ॥ ९ ॥
त्वन्निमित्तमिदं तावत्तापसान्प्रति वर्तते । रक्षोभ्यस्तेन संविग्नाः कथयन्ति मिथः कथाः ॥ १० ॥
रावणावरजः कश्चित्खरो नामेह राक्षसः । उत्पाट्य तापसान्सर्वाञ्जनस्थाननिवासिनः ॥ ११ ॥
धृष्टश्च जितकाशी च नृशंसः पुरुषादकः । अवलिप्तश्च पापश्च त्वां च तात न मृष्यते ॥ १२ ॥

विषयकौत्सुक्यतामालक्ष्य ज्ञात्वा आत्मनि शङ्कितः आत्मोद्देश्यकनिदर्शनेन प्राप्तस्वात्मविषयकशङ्कः रामः कृताञ्जलिः सन् कुलपतिं संघाधीशम् ऋषिं वाल्मीकिमुवाच । 'शङ्कते' इति भट्टपाठः अशङ्कतेति तद्व्याख्या ॥ ४ ॥

गो० टी०—तेषामिति । आत्मनि शङ्कितः स्वस्मिन् संजातशङ्कः ॥ ४ ॥

५] ति० टी०—मयि पूर्ववृत्तं पूर्वराजवृत्तं न दृश्यते कश्चित् विकृतं वा दृश्यते कश्चित् येन तपस्विविक्रियारूपं किंचित्कारणकं भवति तन्निवेदयतु भवानिति शेषः ॥ ५ ॥

रा० टी०—तद्वचनाकारमाह—नेति । हे भगवन्! येन कारणेन तपस्विनो विक्रियन्ते विकारं लभन्ते तदिदं विकृतं विकारकारणं किंचित्पूर्ववृत्तं मयि न दृश्यते कश्चित् ॥ ५ ॥

गो० टी०—न कच्चिदिति। हे भगवन्! मयि पूर्ववृत्तं विकृतं न दृश्यते कश्चित् येन तपस्विनो विक्रियन्ते इदं किंचित् किमिदमित्यर्थः ॥ ५ ॥

६] ति० टी०—अवरजस्य लक्ष्मणस्य नानुरूपं चरितमयुक्ताचरणं प्रमादाज्जातं किंचिदृषिभिर्न दृष्टं कश्चित् ॥ ६ ॥

रा० टी०—प्रमादादिति । मे अवरजस्य कनिष्ठस्य लक्ष्मणस्य प्रमादादनवधानतः महात्मनो नानुरूपमननुरूपं किंचिच्चरितं कृतम् । ऋषिभिर्न दृष्टं कश्चित् ॥ ६ ॥

गो० टी०—प्रमादादिति । प्रमादात् अनवधानात् मे अवरजस्य लक्ष्मणस्य आत्मनो नानुरूपमिव किंचिच्चरितम् ऋषिभिर्दृष्टं न कश्चिदित्यन्वयः ॥ ६ ॥ ७ ॥

७] ति० टी०—वः शुश्रूषमाणा अर्घ्यपाद्यादिना युष्मान्सेवमाना अधुना मच्छुश्रूषातिरोधात्प्रमदोचितां युष्याच्च युक्तां वृत्तिं शुश्रूषाविषयां सीता न वर्तते कश्चित् ॥ ७ ॥

रा० टी०—कच्चिदिति । मयि शुश्रूषणपरा सीता वो युष्मान् शुश्रूषमाणा सती प्रमदाभ्युचितां जीजनविहितां युक्तां भवत्सु योग्या वृत्तिं वर्तते प्रवर्तयति न कश्चित् ॥ ७ ॥

८] ति० टी०—तपसा च वृद्ध इत्यद्वकर्षः । वेपमान इव कथं वा रामो मंस्यत इति कम्पः जरया वा कम्पः । इव एवार्थे ॥ ८ ॥

रा० टी०—अथेति । अथ रामवचनश्रवणानन्तरं जरया अवस्थाविशेषेण अदृढोऽपि तपसा जरां गत इव वेपमानः ऋषिः भूतदयापरं रामम् उवाच ॥ ८ ॥

गो० टी०—अथेति । तापसा च जरां गतः सुदीर्घतपा इत्यर्थः ॥ ८ ॥

९] ति० टी०—सत्त्वं स्वभावः ॥ ९ ॥

रा० टी०—तद्वचनाकारमाह—कुत इति । कल्याणसत्त्वायाः कल्याणस्वभावायाः अत एव सदा नित्यं कल्याणाभिरतेः कल्याणमनस्कायाः वैदेह्याः विशेषतः तत्त्वतः तपस्विषु चलनं प्रकृतित्यागः कुतः किंनिमित्तकः ॥ ९ ॥

गो० टी०—कुत इति । कल्याणसत्त्वायाः कल्याणस्वभावायाः 'सत्त्वोऽस्त्री जन्तुषु क्लीबेऽध्यवसाये पराक्रमे । आत्मभावे पिशाचादौ द्रव्ये सत्तास्वभावयोः' इति वैजयन्ती ॥ ९ ॥

१०] ति० टी०—त्वन्निमित्तं त्वत्तो हेतोः । इदं भयं रक्षोभ्यः समागतमिति भावः ॥ १० ॥

रा० टी०—नन्वं किमर्थमृषीणां मदुद्देश्यकप्रदर्शनमित्यत आह—त्वदिति । त्वमेव निमित्तं कारणं यस्मिन् तत् रक्षोभ्यः समुपस्थितमिदं भयं तापसान् प्रति वर्तते तेन संविग्ना ऋषयः मिथः परस्परं कथाः कथयन्ति ॥ १० ॥

गो० टी०—त्वन्निमित्तमिति । त्वन्निमित्तं त्वत्तो हेतोः रक्षोभ्यः समागतम् इदं वक्ष्यमाणमुपद्रवजातं तापसान् प्रति वर्तते तेन रक्षःसंजातोपद्रवेण संविग्नाः तापसाः मिथः रहसि कथाः रक्षोविषयिणीः तदुपद्रवविषयिणीश्च कथयन्ति ॥ १० ॥

११] ति० टी०—कथं तत्राह—रावणेति । उत्पाट्य संपीड्य ॥ ११ ॥

१२] ति० टी०—जितकाशी जिताह्वो जितभयो वा त्वां च न मृष्यते पीडयितुमिच्छति ॥ १२ ॥

रा० टी०—भयहेतुं वर्णयन्नाह—रावणेत्यादिभिः । रावणावरजः खरो नाम राक्षसः धृष्टादिश्च त्वां न मृष्यते त्व-

---

१ इवेति गो. पाठः । २ प्रमादेति गो. पाठः । ३ युक्तमिति गो. पाठः । ४ तथेति गो. पाठः । ५ निकेतनानिति गो. पाठः ।

त्वं यदाप्रभृति ह्यस्मिन्नाश्रमे तात वर्तसे । तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥ १३ ॥
दर्शयन्ति हि बीभत्सैः क्रूरैर्भीषणकैरपि । नानारूपैर्विरूपैश्च रूपैरसुखदर्शनैः ॥ १४ ॥
अप्रशस्तैरशुचिभिः संप्रयुज्य च तापसान् । प्रतिघ्नन्त्यपरान्क्षिप्रमनार्याः पुरतः स्थितान् ॥ १५ ॥
तेषु तेष्वाश्रमस्थानेष्वबुद्धमवलीय च । रमन्ते तापसांस्तत्र नाशयन्तोऽल्पचेतसः ॥ १६ ॥
अवक्षिपन्ति स्रुग्भाण्डानग्नीन्सिञ्चन्ति वारिणा । कलशांश्च प्रमर्दन्ति हवने समुपस्थिते ॥ १७ ॥
तैर्दुरात्मभिराविष्टानाश्रमान्प्रजिहासवः । गमनायान्यदेशस्य चोदयन्त्यृषयोऽद्य माम् ॥ १८ ॥
तत्पुरा राम शारीरीमुपहिंसां तपस्विषु । दर्शयन्ति हि दुष्टास्ते त्यक्ष्याम इममाश्रमम् ॥ १९ ॥
बहुमूलफलं चित्रमविदूरादितो वनम् । अभ्यस्याश्रममेवाहं श्रयिष्ये सगणः पुनः ॥ २० ॥

स्थितिं न सहते अतः जनस्थाननिवासिनः सर्वान् तापसान् उत्पाट्य संपीड्य प्रवर्तते इति शेषः एतेनास्मान् भवदनुयायिनो जानन्तीति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ११ ॥१२॥

गो० टी०–ता एवाह–रावणावरज इत्यादिना । श्लोकद्वयमेकं वाक्यम् । उत्पाट्य उत्खाय निष्कास्येति यावत् जितेन जयेन काशते प्रकाशते इति जितकाशी यद्वा जिताहवः–जितकाशी जिताहवः' इति हलायुधः ॥ ११ ॥ १२ ॥

१३] ति० टी०–विप्रकुर्वन्त्यपकुर्वन्ति ॥ १३ ॥

रा० टी०–त्वमिति । यदाप्रभृति यत्कालादारभ्य अस्मिन्नाश्रमे त्वं वर्तसे तदाप्रभृति रक्षांसि विप्रकुर्वन्ति ॥ १३ ॥

गो० टी०–त्वमिति । विप्रकुर्वन्ति अपकुर्वन्ति ॥ १३ ॥

१४] ति० टी०–तमपकारं दर्शयति—दर्शयन्तीति । बीभत्सैर्जुगुप्सितरूपैरात्मानं दर्शयन्तीत्यन्वयः ॥ १४ ॥

रा० टी०–विप्रकारप्रकारमाह–दर्शयन्तीति । बीभत्सैः निन्दितैः क्रूरैः क्रूरभाषणादिभिः भीषणकैः भयोत्पादकैः नानारूपैः व्याघ्रादिस्वरूपैः असुखदर्शनैः सुखनिवर्तकदर्शनविशिष्टैः विरूपैः विगतनासिकादिभिः रूपैः स्वरूपैः दर्शयन्ति आत्मानमिति शेषः ॥ १४ ॥

गो० टी०–दर्शयन्तीति । बीभत्सैर्जुगुप्सितैः क्रूरैः भीषणकैः भयंकरैः नानारूपैः अनेकप्रकारैः विरूपैः लोकविलक्षणसंस्थानैः विकृतदर्शनैः विकृतदृष्टिभिः रूपैः शरीरैः दर्शयन्ति भयमिति शेषः ॥ १४ ॥

१५] ति० टी०–अप्रशस्तैः पापजनकैरशुचिभिः पदार्थैस्तापसान्संप्रयुज्य विप्रकुर्वन्ति । अपरानपि मृदून्प्रतिघ्नन्त्यपि पीडयन्त्यपि ॥ १५ ॥

रा० टी०–अप्रशस्तैरिति । अनार्याः राक्षसाः अप्रशस्तैः प्राशस्त्यनिवर्तकैः अशुचिभिः मद्यादिभिः पुरतः स्थितान् अपरान् तापसान् संप्रयुज्य संयोज्य प्रतिघ्नन्ति ॥ १५ ॥

गो० टी०–अप्रशस्तैरिति । अप्रशस्तैः अशुभैः अशुचिभिः अशुचिद्रव्यैः संप्रयोज्य ॥ १५ ॥

१६] ति० टी०–अबुद्धमविदितं यथा भवति तथा निद्रादाववलीय च निर्भयमाश्लिष्य च तदालिङ्गनेनाल्पचेतसो विचेतसस्तापसान्नाशयन्तो रमन्ते ॥ १६ ॥

रा० टी०–तेष्विति । तेषु आश्रमस्थानेषु अबुद्धमज्ञातं यथा स्यात्तथा अवलीय निलीय अल्पचेतसः अल्पज्ञान् तापसान् नाशयन्तो रमन्ते राक्षसा इति शेषः ॥ १६ ॥

गो० टी०–तेषु तेष्विति । अबुद्धमविदितं यथा भवति तथा अवलीय निलीय रमन्ते विहरन्ति अल्पचेतसः क्षुद्रबुद्धयः ॥ १६ ॥

१७] ति० टी०–स्रुग्भाण्डान्स्रुगादियज्ञसंभारानवक्षिपन्त्यवस्कन्दयन्ति । कलशानुदकपात्राणि । प्रमर्दो भङ्गः । हवने होमकर्मणि समुपस्थिते प्रवृत्ते ॥ १७ ॥

रा० टी०–अवेति । हवने हवनकाले समुपस्थिते सति स्रुग्भाण्डान् स्रुगादियागसामग्रीः अवक्षिपन्ति अग्नीन् वारिणा सिञ्चन्ति कलशान्प्रमर्दन्ति भिन्दन्ति ॥ १७ ॥

गो० टी०–अपक्षिपन्तीति । हवने समुपस्थिते होमकर्मणि प्रवृत्ते ॥ १७ ॥

१८] ति० टी०–प्रजिहासवः परित्यक्तुमिच्छवो मिथो मिलिताः ॥ १८ ॥

रा० टी०–तैरिति । दुरात्मभिः आविष्टान् दूषितानित्यर्थः आश्रमान् प्रजिहासवस्त्यक्तुमिच्छवः ऋषयः अन्यदेशस्य गमनाय मां चोदयन्ति प्रेरयन्ति ॥ १८ ॥

गो० टी०–तैरिति । प्रजिहासवः प्रकर्षेण हातुमिच्छवः ॥ १८ ॥

१९] ति० टी०–शारीरीमुपहिंसां प्राणवियोगरूपां पुरा दर्शयन्ति दर्शयिष्यन्ति, अत इममाश्रमं त्यक्ष्यामः ॥ १९ ॥

रा० टी०–तदिति । हे राम पुरा । अस्मिन् वने पूर्णास्ते राक्षसाः शारीरीं शरीरसंबन्धिनीं हिंसां तपस्विषु दर्शयन्ति ततस्तस्माद्धेतोः इममाश्रमं त्यक्ष्यामः ॥ १९ ॥

गो० टी०–तदिति । पुरा दर्शयन्ति दर्शयिष्यन्ति "यावत्पुरानिपातयोर्लट्" इति लट् ॥ १९ ॥ २० ॥

२०] ति० टी०–अभ्यस्य न विद्यते श्वः संचयो यस्य

१ विकृतदर्शनैरिति गो. पाठः । २ स्थिता इति गो. पाठः । ३ प्रमृद्नन्तीति गो. पाठः । ४ आमृष्टानिति गो. पाठः । ५ शारीरामिति गो. पाठः । ६ पुराणाश्रममिति गो. पाठः ।

खरस्त्वय्यपि चायुक्तं पुरा राम प्रवर्तते । सहास्माभिरितो गच्छ यदि बुद्धिः प्रवर्तते ॥ २१ ॥
सकलत्रस्य संदेहो नित्यं युक्तस्य राघव । समर्थस्यापि सहितो वासो दुःखमिहाद्य ते ॥ २२ ॥
इत्युक्तवन्तं रामस्तं राजपुत्रस्तपस्विनम् । न शशाकोत्तरैर्वाक्यैरवर्तुं समुत्सुकम् ॥ २३ ॥
अभिनन्द्य समापृच्छ्य समाधाय च राघवम् । स जगामाश्रमं त्यक्त्वा कुलैः कुलपतिः सह ॥ २४ ॥
रामः संसाध्य ऋषिगणमनुगमनादेशात्तस्मात्कुलपतिमभिवाद्य ऋषिम् ।
सम्यक्प्रीतैस्तैरनुमत उपदिष्टार्थः पुण्यं वासाय स्वनिलयमुपसंपेदे ॥ २५ ॥
आश्रममृषिविरहितं प्रभुः क्षणमपि न जहौ स राघवः ।
राघवं हि सततमनुगतास्तापसाश्चरितैर्षे धृतगुणाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षोडशाधिकशततमः सर्गः ॥ ११६ ॥

तस्य महर्षेः पृषोदरादित्वात्साधु । एतेन रक्षोभयनिवारणक्षमत्वं तस्य दर्शितम् ॥ २० ॥

रा० टी०—बल्विति । बहुमूलफलमितोऽविदूरान्निकटे अस्य ऋषेः आश्रमं सगणोऽहं श्रयिष्ये एतेनाप्यृषेः रक्षणसामर्थ्यं ध्वनितम् ॥ २० ॥

२१-२२] ति० टी०—पुरा प्रवर्ततेऽप्रवर्तयिष्यति । अतस्तव नित्ययुक्तस्यापि सदा सावधानस्यापि रक्षोनिग्रहे समर्थस्यापि सकलत्रस्यापि हेतुगर्भमेतद् इहाश्रमे संदेहवानेव वासः अर्थाच्चाद्य । दुःखो दुःखजनकः अतस्तवाप्यत्रावस्थानमनुचितमिति व्यङ्ग्यम्, अतस्त्वमपि सहास्माभिरितो गच्छेत्यन्वयः ॥ २१ ॥ २२ ॥

रा० टी०—खर इति । हे राम ! खरो राक्षसः त्वय्यपि अयुक्तमयोग्यं कर्म पुरा त्वत्संनिधौ राक्षसपूर्त्या प्रवर्तते प्रवर्तयिष्यति अतः अस्माभिः सह इतो गच्छ यदि बुद्धिर्गमननिश्चयः प्रवर्तते ॥ २१ ॥

गो० टी०—खर इति । अयुक्तमिति क्रियाविशेषणं पुरा प्रवर्तते प्रवर्तिष्यते ॥ २१ ॥

रा० टी०—सेति । नित्यं युक्तस्य समर्थस्यापि सतस्तव अथ इह वासः संदेहः संदेहास्पदीभूतः अत एव दुःखं दुःखप्रदः ॥ २२ ॥

गो० टी०—सकलत्रस्येति । संदेहः संदेहजनकः यत्तस्य संनद्धस्य दुःखं दुःखहेतुः ॥ २२ ॥

२३] ति० टी०—अवबद्धुम् । अहं रक्षांसि निवारयिष्यामि, मा भैष्ट, इत्यादिवचनैर्निवारयितुं न शशाक । तत्र हेतुः—सत्सुत्सुकमिति । कार्यशेषस्य स्वीयान्यदेशगमनसाध्यत्वाच्च ॥ २३ ॥

रा० टी०—इतीति । इत्युक्तवन्तं सद्वत्सुकं तपस्विनमवबद्धुं निरोद्धुं न शशाक ॥ २३ ॥

गो० टी०—इतीति । उत्तरैर्वाक्यैरवरोद्धुं न शशाक मयि वर्तमाने युष्माकं का भीतिः अहमेव परितो रक्षामीत्युत्तरवाक्यैर्निरोद्धुं न शशाक ॥ २३ ॥

२४] ति० टी०—अभिनन्द्य स्तुत्वा, समाधाय स्ववियोगखिन्नं समाश्वास्य । कुलैर्ऋषिसंघैः ॥ २४ ॥

रा० टी०—अभीति । राघवमभिनन्द्य प्रशस्य समाश्वास्य समाश्वासनं कृत्वा समाधाय चित्ते निधाय आश्रमं त्यक्त्वा कुलैः ऋषिसमूहैः सह स कुलपतिः जगाम ॥ २४ ॥

गो० टी०—अभिनन्द्येति । कुलैः ऋषिसंघातैः 'कुलं संघातवंशयोः' इति वैजयन्ती ॥ २४ ॥

२५] ति० टी०—रामस्तस्मादेशादपयान्तमृषिगणमनुगमनादनुव्रजनेन संसाध्य प्रस्थाप्य कुलपतिमृषिमभिवाद्य सम्यक्प्रीतैस्तैरनुमतः कृतानुमतिक उपदिष्टार्थो रक्षःसंदेहादत्रावस्थानमनुचितमिति कृतोपदेशः पुण्यं स्वनिलयं स्ववासायोपसंपेदे ॥ २५ ॥

रा० टी०—राम इति । अनुगमनात् अनुव्रजनात् ऋषिगणं कुलपतिं च संसाध्य प्रसाद्य अभिवाद्य च तैः प्रीतैः अनुमतः आज्ञप्तः उपदिष्टार्थः ज्ञाततत्त्वो रामः पुण्यं स्वनिलयं वासाय उपसंपेदे जगाम ॥ २५ ॥

गो० टी०—राम इति । रामः ऋषिगणं तस्मादेशात् आश्रमप्रदेशात् अनुगमनात् संसाध्य प्रस्थाप्य कुलपतिमभिवाद्य तैरुपदिष्टार्थः उपदिष्टप्रयोजनः सन् वासाय पुण्यं स्वनिलयम् उपसंपेदे इति संबन्धः ॥ २५ ॥

२६] ति० टी०—क्षणमपि न जहौ सीतारक्षणार्थमिति भावः । आर्षमृषिसंबन्धि चरितं श्रुतं यस्य तादृशे राघवे धृतगुणा निश्चितनिजरक्षासामर्थ्यगुणाः केचित्तापसाः सततं निरन्तरं राघवमनुगता हि अनुगता एव नाश्रमान्तरं जग्मुः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे षोडशाधिकशततमः सर्गः ॥ ११६ ॥

---

१ तातेति गो. पाठः । २ यत्तस्येति गो. पाठः । ३ वसत इति गो. हि सत इति रा. पाठः । ४ रोद्धुं समुत्सुक इति गो. पाठः । ५ तृप्तीति गो. पाठः । ६ विजह्राविति गौ. पाठः । ७ चर्षीति रा. पाठः । ८ चरितधृतगुणा इति गो. पाठः ।

सप्तदशाधिकशततमः सर्गः ।

दोषबाहुल्यात्चित्रकूटवासादुद्विग्नो रामस्ततः प्रस्थायात्र्याश्रमं प्राप्तस्तमभ्यवादयताथात्रिरनसूयातपःप्रभावं प्रस्तुत्य तस्याः सकाशे सीतां प्रेषयितुं प्राचोदयत्तथा रामेणाज्ञप्तां प्राप्याभिवादयमानां सीतां सत्कृत्यानसूया पातिव्रत्यधर्ममुपादिदेश ।

राघवस्त्वेवमेतेषु सर्वेष्वनुविचिन्तयन् । न तत्रारोचयद्वासं कारणैर्बहुभिस्तदा ॥ १ ॥
इह मे भरतो दृष्टो मातरश्च सनागराः । सा च मे स्मृतिरन्वेति तान्नित्यमनुशोचतः ॥ २ ॥
स्कन्धावारनिवेशेन तेन तस्य महात्मनः । हयहस्तिकरीषैश्च उपमर्दः कृतो भृशम् ॥ ३ ॥
तस्मादन्यत्र गैच्छाम इति संचिन्त्य राघवः । प्रातिष्ठत स वैदेह्या लक्ष्मणेन च संगतः ॥ ४ ॥
सोऽत्रेराश्रममासाद्य तं ववन्दे महायशाः । तं चापि भगवानत्रिः पुत्रवत्प्रत्यपद्यत ॥ ५ ॥
स्वयमातिथ्यमादिश्य सर्वमस्य सुसत्कृतम् । सौमित्रिं च महाभागं सीतां च समसान्त्वयत् ॥ ६ ॥

रा० टी०—आश्रममिति । ऋषिविरहितमाश्रमं राघवः क्षणमपि न जहौ । ऋषिचरिते रामे धृतगुणाः समर्पितमनसस्तापसाः राघवं सततमनुगताः मनसा प्राप्ताः ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे षोडशाधिकशततमः सर्गः ॥ ११६ ॥

गो० टी०—आश्रममिति । राघवः ऋषिविरहितमप्याश्रमं क्षणं न विजहौ मुनिस्नेह्यतया तदैव त्याज्यमप्याश्रमं मुनिविषयप्रेम्णा क्षणं न त्यक्तवानित्यर्थः । आर्षचरितधृतगुणाः रामस्यार्षचरित्रेण संचितगुणाः हि यस्मात्कारणात्तापसाः रामगतास्तस्मात् तत्प्रेम्णा क्षणं न जहाविति । दृष्टं तु श्लोकद्वयस्यापि चिन्त्यम् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

१] ति०टी०—अनुविचिन्तयन्वक्ष्यमाणलक्षणमुपपादयन्॥१॥

रा० टी०—ऋषिगमनानन्तरकालिकं रामवृत्तान्तमाह—राघव इत्यादिभिः । सर्वेषु ऋषिषु अपयातेषु सत्सु चिन्तयन् राघवः बहुभिः कारणैः तत्र वासं न अरोचयत् ॥ १ ॥

गो० टी०—अथ रामस्याश्र्याश्रमप्रवेशः सप्तदशोत्तरशततमे—राघव इत्यादिना ॥ १ ॥

२] ति० टी०—तमेवाह—इहेति । मे मया संबन्धसामान्ये षष्ठी । सा मे स्मृतिर्मां नित्यमनुशोचतस्तानन्वेति विषयीकरोति, एवं च तादृशतत्स्मरणेन ममापि शोको वर्धत इति भावः ॥ २ ॥

रा० टी०—कारणान्येवाह—इहेति । इह अस्मिन् स्थाने मे ये भरतादयो दृष्टाः तान् नित्यमनुशोचतो मे सा तद्विषया स्मृतिः अन्वेति निरन्तरं प्राप्नोति ॥ २ ॥

गो० टी०—बहुकारणान्येवाह—इह म इत्यादिना ॥ २ ॥

३-४] ति० टी०—राजधानीतो निर्गतायाः सेनाया निवासस्थानं स्कन्धावारः । तस्य भरतस्य तेन पुरतो दृश्यमानेन, अनेन स्मृत्युद्बोधकमुक्तम् । उपमर्दो भूमेरशुचिता ॥३-४॥

रा० टी०—स्कन्धेति । महात्मनस्तस्य भरतस्य स्कन्धावारनिवेशेन स्कन्धावारः सेनासमूहस्तस्य निवेशेन निवासेन हेतुना हयहस्तिकरीषैः भृशमत्यन्तम् उपमर्दः भूमेरशुद्धिरित्यर्थः कृतः ॥ ३ ॥

गो० टी०—स्कन्धावारनिवेशेनेति । स्कन्धावारनिवेशेन सेनानिवेशेन करीषैश्च उपमर्द इत्यत्र वाक्यसंहिताया अनित्यत्वान्न संधिकार्यम् । 'पदेषु संहिता नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते' इतिवचनात् ॥ ३ ॥

रा० टी०—तस्मादिति । तस्माद्धेतोः अन्यत्र गच्छामि इति संचिन्त्य वैदेह्या लक्ष्मणेन च संगतः स रामः प्रातिष्ठत प्रस्थानमकरोत् ॥ ४ ॥

गो० टी०—तस्मादिति । प्रातिष्ठत प्रस्थितः ॥ ४ ॥ ५ ॥

५] ति० टी०—स रामः तमत्रिं तमपि जगत्कारणमपि रामं लोकव्यवहारानुसरणेन पुत्रवदङ्गीचकारालिङ्गनमूर्धाघ्राणादिभिः ॥ ५ ॥

रा० टी०—स इति । स कृतप्रस्थानो रामः अत्रेः आश्रममासाद्य तमत्रिं ववन्दे, भगवान् अत्रिरपि तं रामं पुत्रवत् पुत्रमिव प्रत्यपद्यत प्राप्नोत् ॥ ५ ॥

६] ति० टी०—स्वयमादिश्य विज्ञाप्यास्य सर्वमातिथ्यं सुसत्कृतं कृत्वा समसान्त्वयत्प्रीतियुक्तेन चक्षुषाऽपश्यत् ॥ ६ ॥

रा० टी०—स्वयमिति । अस्य रामस्य आतिथ्यं सुसत्कृतं यथा स्यात्तथा आदिश्य संपाद्य सौमित्रिं सीतां च समसान्त्वयत् वचनैरतोषयत ॥ ६ ॥

गो० टी०—स्वयमिति । आतिथ्यमादिश्य आतिथ्यं कृत्वा ॥ ६ ॥

१ अत्रेति गो. पाठः । २ तपस्विष्विति गो. पाठः । ३ गच्छामीति रा. पाठः । ४ भागामिति गो. पाठः ।

पत्नीं च तेमनुप्राप्तां वृद्धामामन्त्र्य सत्कृताम्। सान्त्वयामास धर्मज्ञः सर्वभूतहिते रतः॥ ७॥
अनसूयां महाभागां तापसीं धर्मचारिणीम्। प्रतिगृह्णीष्व वैदेहीमब्रवीदृषिसत्तमः॥ ८॥
रामाय चाचचक्षे तां तापसीं धर्मचारिणीम्। दश वर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम्॥ ९॥
यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता। उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता॥ १०॥
दश वर्षसहस्राणि यया तप्तं महत्तपः। अनसूयाव्रतैस्तैस्तैः प्रत्यूहाश्च निर्बर्हिताः॥ ११॥
देवकार्यनिमित्तं च यया संत्वरमाणया। दशरात्रं कृता रात्रिः सेयं मातेव तेऽनघ॥ १२॥
तामिमां सर्वभूतानां नमस्कार्यां तपस्विनीम्। अभिगच्छतु वैदेही वृद्धामक्रोधनां सदा॥ १३॥
एवं ब्रुवाणं तमृषिं तथेत्युक्त्वा स राघवः। सीतामालोक्य धर्मज्ञामिदं वचनमब्रवीत्॥ १४॥

७-८] ति० टी०-तं देशमनुप्राप्तां वृद्धां पत्नीमनसूयानाम्नीं तापसीत्वादिगुणयुक्तां वाचा सत्कृतां सर्वैः सत्कृतां वामन्त्र्य संबोध्य सान्त्वयामास प्रीत्या सीतां दर्शयामास अनन्तरं वैदेहीं प्रतिगृह्णीष्वेत्यब्रवीदित्यर्थः॥ ७॥ ८॥

रा० टी०-पत्नीमिति। तमत्रिसमीपमनुप्राप्तामत एव आमन्त्र्य संबोध्य सत्कृतामत्रिणा प्राप्तसत्कारां महाभागामतिशयभाग्यवतीं तापसीं परमात्मविचारनिरतामत एव धर्मचारिणीं विहितकर्माचरणशीलां वृद्धामनसूयां पत्नीं सर्वभूतहिते रतः धर्मज्ञः अत्रिः सान्त्वयामास सान्त्वनवचनैः संतोषयामासेत्यर्थः, वैदेहीं प्रतिगृह्णीष्व आलिङ्गनं कुरु इत्यब्रवीच्च। श्लोकद्वयमेकान्वयि॥ ७॥ ८॥

गो० टी०-पत्नीमिति। सत्कृतां सर्वैः सत्कृताम्॥ ७॥

गो० टी०-अनसूयामिति। प्रतिगृह्णीष्वेत्यत्र इतिकरणं द्रष्टव्यम्॥ ८॥

९] ति० टी०-तामाचचक्षे तद्वैभवं कथितवान्। तदेव दर्शयति-दशेत्यादि॥ ९॥

१०] ति० टी०-मूलफले ऋषीणां जीवनायेति शेषः। जाह्नवी गङ्गा च प्रवर्तिता दशवर्षमनावृष्ट्या भूमेर्निर्जलत्वात्तेषां ज्ञानार्थं मन्त्रसिद्धिवैभवेनावाहिता स्वाश्रमे इति शेषः॥ १०॥

११] ति० टी०-अनसूयाव्रतैस्तत्कृतैर्व्रतैः। प्रत्यूहा ऋषीणां तपोविघ्नाः॥ ११॥

रा० टी०-रामायेति। अथ तापसीं धर्मचारिणीं तामनसूयां रामाय आचचक्षे तत्प्रभावं कथयामासेत्यर्थः। कथनप्रकारमाह-निरन्तरं दशवर्षाणि अनावृष्ट्या वृष्ट्यभावेन लोके दग्धे सति यया मूलफले सृष्टे मुनिकर्तृकभोजनार्थं स्वतपोबलेन उत्पादयामास, जाह्नवी जह्नुप्रादुर्भूता गङ्गा प्रवर्तिता मुनीनां स्नानपानार्थं स्वसमीपं प्रापिता, यया च दशवर्षसहस्राणि महत्तप्तप्तमत एव अनसूयाव्रतैः प्रत्यूहाः ऋषीणां तपोविघ्नाः निर्बर्हिताः दूरीकृताः, यया च देवकार्यनिमित्तं देवकार्यार्थं दशरात्रं रात्रिः एकनिशा कृता, सा उग्रेण तपसा युक्ता नियमैश्चालंकृता इयं तव माता इव पूजनीयेति शेषः। तथा च पौराणिकी गाथा-काचिद् ऋषिपत्नी अनसूयासखी दशाहाभ्यन्तरे प्रातर्विधवा भवेति माण्डव्यऋषिणा शप्ता ततः प्रातरेव मा भूदिति तत्सख्या प्रतिशापे दत्ते प्रातःकालमनुपलभ्य व्याकुलैः देवैः प्रार्थितयाऽनसूयया दशरात्रावधिकालमेकरात्रित्वेन प्रकल्प्य स्वसख्या वैधव्यं परिहृत्य देवकार्यं चकारेति। श्लोकचतुष्टयमेकान्वयि॥ ९-१२॥

गो० टी०-दशवर्षाणीत्यारभ्य सेयं मातेव तेनऽवेत्यन्तमेकं वाक्यम्। दशवर्षाण्यनावृष्ट्या लोके दग्धे सति यया स्वतपोमहिम्ना निरन्तरं मूलफले सृष्टे जाह्नवी च प्रवर्तिता, यया दशवर्षसहस्राणि महत्तपस्तप्तं कृतं, यया व्रतैः कृच्छ्रचान्द्रायणादिभिः प्रत्यूहास्तपोविघ्नाश्च निवर्तिताः निरस्ताः, देवकार्यनिमित्तं संत्वरमाणया यया दशरात्रमेका रात्रिश्च कृता दशरात्रावधिकः कालः एकरात्रत्वेन कृत इत्यर्थः। इयं कथा पुराणेषु द्रष्टव्या। उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता सेयमनसूया ते मातेव मातृवत्पूजनीयेत्यर्थः॥ ९-११॥

१२] ति० टी०-देवकार्यनिमित्तमिति। माण्डव्यऋषिणा 'प्रातर्विधवा भव' इति कस्यांचिदृषिपत्न्यामनसूयासख्यां शप्तायां 'प्रातरेव मा भूत्' इति तया प्रतिशापे दत्ते तत्प्रतिशापेन व्याकुलैर्देवैः प्रार्थितानसूया दशरात्रावधिकालमेकरात्रित्वेन कृत्वा देवकार्यं कृतवती, सख्या वैधव्यं च परिहृतवतीति गाथेति कतकः। सेयं मातेव ते पूज्येति शेषः॥ १२॥

१३-१४] ति० टी०-अभिगच्छतु दर्शनार्थमिति शेषः। नन्वेषा अल्पवयस्त्वेन व्यवहारानभिज्ञत्वात्कथंचिद्व्यवहारे स्खलनेऽनर्थः स्यादत आह-अक्रोधनां सदेति॥ १३॥ १४॥

रा० टी०-तामिति। तां वर्णितप्रभावामत एव सर्वभूतानां नमस्कार्यां वृद्धां सदा नित्यमक्रोधनां तपस्विनीमिमामनसूयां वैदेही अभिगच्छतु पादवन्दनार्थं प्राप्नोतु॥ १३॥

रा० टी०-एवमिति। एवं ब्रुवाणम् ऋषिं तथेत्युक्त्वा राघवः सीतामवलोक्य इदमब्रवीत्॥ १४॥

गो० टी०-तामित्यादि। या कर्मभिरनन्यसदृक्यैः परा-

१ समन्विति गो. पाठः। २ स्नातेति गो. पाठः। ३ निवर्तिता इति गो. पाठः। ४ यशस्विनीमिति गो. पाठः। ५ उवाचेति गो. पाठः। ६ उत्तममिति गो. पाठः।

राजपुत्रि श्रुतं त्वेतन्मुनेरस्य समीरितम् । श्रेयोर्थमात्मनः शीघ्रमभिगच्छ तपस्विनीम् ॥ १५ ॥
अनसूयेति या लोके कर्मभिः ख्यातिमागता । तां शीघ्रमभिगच्छ त्वमभिगम्यां तपस्विनीम् ॥ १६ ॥
सीता त्वेतद्वचः श्रुत्वा राघवस्य यशस्विनी । तामत्रिपत्नीं धर्मज्ञामभिचक्राम मैथिली ॥ १७ ॥
शिथिलां वलितां वृद्धां जरापाण्डुरमूर्धजाम् । सततं वेपमानाङ्गीं प्रवाते कदलीमिव ॥ १८ ॥
तां तु सीता महाभागामनसूयां पतिव्रताम् । अभ्यवादयदव्यग्रा स्वं नाम समुदाहरत् ॥ १९ ॥
अभिवाद्य च वैदेही तापसीं तां दमान्विताम् । बद्धाञ्जलिपुटा हृष्टा पर्यपृच्छदनामयम् ॥ २० ॥
ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणीम् । सान्त्वयन्त्यब्रवीद्वृद्धा दिष्ट्या धर्ममवेक्षसे ॥ २१ ॥
त्यक्त्वा ज्ञातिजनं सीते मानवृद्धिं च मानिनि । अवरुद्धं वने रामं दिष्ट्या त्वमनुगच्छसि ॥ २२ ॥
नगरस्थो वनस्थो वा शुभो वा यदि वाशुभः । यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः २३ ॥
दुःशीलः कामवृत्तो वा धनैर्वा परिवर्जितः । स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥ २४ ॥

तुग्रहार्थतपोविशेषैः अनसूया असूयारहितेति लोके ख्यातिमागता, यद्वा कर्मभिः पातिव्रत्यवर्धकैः अन्याभिः कर्तुमशक्यैः पतिरक्षणादिकर्मभिः अनसूया अस्पर्धनीयमाहात्म्ययुक्तत्वादसूयितुमशक्या इति लोके ख्यातिमागता तामिमां वैदेही अनुगच्छत्विति संबन्धः ॥ १२–१६ ॥

१५] ति० टी०–अस्य मुनेः समीरितं वचनं यतः श्रुतम् अत आत्मनः श्रेयोऽर्थमित्यादि ॥ १६ ॥

रा० टी०–तद्वचनाकारमाह–राजेति । हे राजपुत्रि ! यतः अस्य मुनेरेतं समीरितमस्माभिः श्रुतमतः आत्मनः श्रेयोऽर्थं तपस्विनीं शीघ्रमभिगच्छ ॥ १६ ॥

१६–१७] ति० टी०–तामनसूयेत्यन्वर्थनाम्नीम् , अभिगम्याम् अक्रोधनत्वात् ॥ १६ ॥ १७ ॥

१८] ति० टी०–शिथिलां श्लथसंधिबन्धाम्, वलितां संजातवलिम् , वृद्धामिति सर्वोपपादकं विशेषणम् । प्रवाते कदलीमिव वेपमानाङ्गीं स्थिताम् ॥ १८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अनसूयेति । कर्मभिः अन्याशक्यक्रियाभिः अनसूयेति या लोके ख्यातिमागता तामभिगम्यामभिगन्तुं योग्यां शीघ्रमभिगच्छ ॥ १६ ॥

रा० टी०–सीतेति । राघवस्य तद्वचः सीता श्रुत्वैव शिथिलां शिथिलशरीरां वलितां वलीभूतचर्मविशिष्टां प्रवाते अतिवाते कदलीमिव वेपमानाङ्गीमत्रिपत्नीमनसूयामभिचक्राम । श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

१९] ति० टी०–सद्भदाहरत् अभिवादनमाकृत्वेनेति शेषः१९

रा० टी०–तामिति । तामनसूयामव्यग्रा ९ । अभ्यवादयत् स्वं नाम च समुदाहरत् प्रणामविधित्वेनोच्चारयामास॥१९॥

गो० टी०–शिथिलामित्यादि । श्लोकद्वयमेकान्वयम् । शिथिलां श्लथसंधिबन्धावयवसंनिवेशां, वलितां संजातवलिकाम् ॥ १६ ॥ १७ ॥

२०] ति० टी०–अनामयमिति तपस्विनां स्वायत्तकुशलतयाऽऽरोग्यप्रश्न एवोचित इति भावः ॥ २० ॥

रा० टी०–अभिवाद्येति । तापसीं तामनसूयामभिवाद्य प्रणम्य बद्धाञ्जलिपुटा वैदेही अनामयं कुशलं पर्यपृच्छत् ॥२०॥

गो० टी०–अभिवाद्येति । अनामयम् आरोग्यम् 'अनामयं स्यादारोग्यम्' इत्यमरः ॥ १८ ॥

२१] ति० टी०–धर्मचारिणीं भर्तृसमानधर्मचारिणीम् । दिष्ट्या दैवयोगेन ॥ २१ ॥

रा० टी०–तत इति । धर्मचारिणीं महाभागां सीतां दृष्ट्वा त्वं धर्ममवेक्षसे विचारयसि दिष्ट्या भाग्यमेतत् इति सान्त्वयन्ती अनसूया अब्रवीत् ॥ २१ ॥

गो० टी०–तत इति । दिष्ट्या भाग्येन धर्ममवेक्षसे पातिव्रत्यधर्ममवधानेन समीक्षसे ज्ञातिजनं बन्धुजनं मानमहंकारं वने अवरुद्धं चतुर्दश वर्षाणि वने वस्तव्यमिति पित्रा नियुक्तं सर्वत्रयोग्यं सर्वावस्थासु रक्षणसमर्थं कामवक्तव्यहृदयाः कामविषयवक्तव्यहृदयाः कामरूपार्थाभिलाषिण्य इति यावत् , यद्वा मदनविधेयहृदयाः भर्तॄनाथाः भर्तॄणां नाथभूताः भर्तृनियामिका इत्यर्थः, यद्वा भर्तारं नाथन्ते याचन्त इति तथा परपुरुषकाङ्क्षिण्य इत्यर्थः ॥ १९–२६ ॥

२२] ति० टी०–मानं राजसुताहं कथं वनं गच्छेयमित्येवंरूपम् । वनेऽवरुद्धं वनवासे पित्रा नियुक्तम् ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–त्यक्त्वेति । हे सीते ! ज्ञातिजनं मानवृद्धिं च त्यक्त्वा वने अवरुद्धं नियुक्तं रामं यत् त्वमनुगच्छसि दिष्ट्या भाग्यमेतत् ॥ २२ ॥

२३] ति० टी०–शुभोऽनुकूलः, अशुभः प्रतिकूलः, प्रियो लौकिकालौकिकनिमित्ततोऽप्रियत्वानास्पदम् ॥ २३ ॥

रा० टी०–तत्र हेतुमाह–नगरस्थ इति । यासां स्त्रीणां भर्ता प्रियः तासामेव महोदयाः महान् उदयो येषां ते लोकाः भवन्तीति शेषः ॥ २३ ॥

२४] ति० टी०–आर्यस्वभावः पूज्यस्वभावः ॥ २४ ॥

---

१ अर्धमेतच्चतुर्दशश्लोकात्पूर्वं गो. पाठे । २ अर्धमेतत् गो. नास्ति । ३ द्वितीयेष इति गो. पाठः । ४ कदली यथेति गो. पाठः । ५ स्वनामेति गो. पाठः । ६ आनेन्दितामिति गो. दयान्वितामिति रा. पाठः । ७ धृष्टेति गो. पाठः । ८ भामिन्नीति गो. पाठः । ९ पापो वा यदि वा शुभ इति गो. पाठः ।

नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् । सर्वत्र योग्यं वैदेहि तपःकृतमिवाव्ययम् ॥ २५ ॥
न त्वेवमेनुगच्छन्ति गुणदोषमसत्स्त्रियः । कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः ॥ २६ ॥
प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि । अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥ २७ ॥
त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः । स्त्रियः स्वर्गे चरिष्यन्ति यथा पुण्यकृतस्तथा ॥ २८ ॥
तदेवमे तं त्वमनुव्रता सती पतिप्रधाना समयानुवर्तिनी ।
भव स्वभर्तुः सहधर्मचारिणी यशश्च धर्मं च ततः समाप्स्यसि ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डे सप्तदशाधिकशततमः सर्गः ॥ ११७ ॥

अष्टादशाधिकशततमः सर्गः ।

सीताऽनसूयां प्रति रामगुणान्संकथय्य स्वस्य तेन सह निरुपचरिताचारं कथयन्ती यदि निर्गुणोऽपि भर्ता स्त्रीणां सेव्यः किं गुणविशिष्ट इति निगमयति । तथा मात्राद्युपदेशेन ज्ञातपतिव्रताधर्मत्वं बोधयन्ती तदनुगुणं तदुपदेशं श्लाघते । अनुसूया स्वतपःसमृद्धिं संस्मार्याभीष्टवरणे सीतां छन्दयति, प्रतुष्टा चानिच्छन्त्या अपि दिव्यमाल्याभरणानि ददौ । अनसूयया पृष्टा सीता तस्यै स्वस्वयंवरवृत्तं प्रतिपादयति ।

सा त्वेवमुक्ता वैदेही त्वनसूयानसूयया । प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे ॥ १ ॥

रा० टी०-दुःशील इति । दुःशीलत्वाद्यन्यतमगुणविशिष्टोऽपि पतिः आर्यस्वभावानां सात्त्विकप्रकृतीनां स्त्रीणां परमं दैवतम् ॥ २४ ॥

२५] ति० टी०-अतो विशिष्टं भर्तुर्विशिष्टम् बान्धवमिष्टबन्धुम् । सर्वत्र योग्यमिहामुत्र चेष्टसाधनतया भजनयोग्यं तपःकृतम् भावे निष्ठा तपोऽनुष्ठानमिति यावत् ॥ २५ ॥

रा० टी०-नेति । अतः परमुः विशिष्टमधिकं बान्धवं विमृशन्ती विचारयन्ती अहं न पश्यामि । तत्र हेतुः अव्ययम् अविनाशि तपःकृतं तपसा संपादितं फलमिव सर्वत्र सर्वावस्थासु योग्यं सुखदाने उचितं पतिमवेहीति शेषः । एतेन पतिसेवैव गुणस्तस्यागो दोष इति सूचितम् ॥ २५ ॥

२६] ति० टी०-याः कामवक्तव्यहृदयाः कामाधीनहृदयाः 'वृद्ध्याधीनौ तु वक्तव्यौ' भर्तृनाथा भर्तृणां नाथभूतान्तनियन्त्र्यः, यद्वा भर्तॄन्भोगार्थं नाथन्ते याचन्ते ताः चरन्ति स्वेच्छया इतस्ततो यान्ति ॥ २६ ॥

रा० टी०-न त्विति । कामवक्तव्यहृदयाः कामः वक्तव्यो यस्मिन् तत् हृदयं यासां ताः । किंच कामस्य वक्तव्यमधीनं हृदयं यासां ताः । 'गर्ध्याधीनौ तु वक्तव्यौ' इत्यमरः । अत एव भर्तृनाथाः भर्तृणामपि नियामिकाः याः अस्वतन्त्र्यः चरन्ति ताः एवं गुणदोषं वैवावगच्छन्ति जानन्ति ॥ २६ ॥

२७] ति० टी०-तद्विधा उक्तनिकृष्टगुणवत्यः ॥ २७ ॥

रा० टी०-प्राप्नुवन्तीति । अकार्यस्य परमार्थविरोधिनः कामस्य वशमापन्नाः प्राप्ता अत एव तद्विधाः स्वपतिपारतन्त्र्यरहिताः याः स्त्रियस्ताः धर्मभ्रंशमयशश्च प्राप्नुवन्ति ॥ २७ ॥

२८] ति० टी०-दृष्टो लोकः परोऽवरश्च याभिस्ताः ॥ २८ ॥

रा० टी०-त्वद्विधा इति । दृष्टाः ज्ञाता लोकपरावराः उत्तममध्यमधर्मा याभिस्ताः अत एव गुणैर्युक्ताः पत्यनुकूलवर्तनरूपगुणविशिष्टाः त्वद्विधाः त्वत्सदृशाः स्त्रियः यथा पुण्यकृतः पुरुषास्तथा स्वर्गे चरिष्यन्ति चरन्ति ॥ २८ ॥

२९] ति० टी०-समय आचारः ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीयआदिकाव्येऽयोध्याकाण्डे सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

रा० टी०-तदिति । पतिः प्रधानो यस्याः सा समयानुवर्तिनी यथाकालमनुवर्तनशीला एतं पतिसेवारूपधर्ममनुव्रता स्वीकारकर्त्री त्वं स्वभर्तुः सहधर्मचारिणी भव ततस्तस्मात् यशो धर्मं च समाप्स्यसि प्राप्स्यसि ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे सप्तदशाधिकशततमः सर्गः ॥ ११७ ॥

गो० टी०-समयानुवर्तिनी 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । भर्तुः सहधर्मचारिणी भवस्व भव । आर्षत्वात्सनेपदं ततः भर्तुः सहधर्मचारिणीत्वेन यशश्च धर्मं च काकान्तराद्वाभाव्यद्वारसाधनमदृष्टं च समाप्स्यसि, यद्वा भर्तुः सहधर्मचारिणी इदंभूता त्वं ततः भर्तुः सहधर्मचारिणीत्वरूपहेतोः यशश्च भवस्व प्राप्नुहीत्यर्थः । धर्मं च समाप्स्यसि भू प्राप्तावात्मनेपदीतिगणपाठात् प्राप्त्यर्थस्य भवतेरात्मनेपदं पातिव्रत्यधर्मेण सर्वैः श्लाघां प्राप्य काकान्तरे तज्जन्यादृष्टद्वारा निरतिशयं श्रेयः समवाप्स्यसीत्यर्थः । इति धर्मचारिण्यनसूया सीतामब्रवीदिति संबन्धः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

१] ति० टी०-अनयाऽसूयारहिता । अनसूयायाम्वर्णतज्जन्या । वचोऽनसूयायाः ॥ १ ॥

१ त्वेनमिति गो. पाठः । २ अवगच्छन्तीति गो. रा. पाठः । ३ धर्मकृत इति गो. पाठः । ४ एनमिति गो. पाठः । ५ अज्ञानमिति गो. पाठः ।

नैतदाश्चर्यमार्यायां यन्मां त्वमनुभाषसे । विदितं तु ममाप्येतद्यथा नार्याः पतिर्गुरुः ॥ २ ॥
यद्यप्येष भवेद्भर्ता ऽनार्यो वृत्तिवर्जितः । अद्वैधमत्र वर्तव्यं तथाप्येष मया भवेत् ॥ ३ ॥
किं पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः । स्थिरानुरागो धर्मात्मा मातृवत्पितृवत्प्रियः ॥ ४ ॥
यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः । तामेव नृपनारीणामन्यासामपि वर्तते ॥ ५ ॥
सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः । मातृवद्वर्तते वीरो मानमुत्सृज्य धर्मवित् ॥ ६ ॥
आगच्छन्त्याश्च विजनं वनमेवं भयावहम् । समाहितं ३हि मे श्रुत्वा हृदये यँत्स्थिरं मम ॥ ७ ॥
पाणिग्रदानकाले च यत्पुरा त्वग्निसंनिधौ । ४अनुशिष्टं जनन्या मे वाक्यं तदपि मे धृतम् ॥ ८ ॥

रा० टी०—अनसूयावचनश्रवणानन्तरकालिकं सीताहृत्तान्तं वर्णयन्नाह—सेति । अनसूयया अत्रिपत्न्या एवमुक्ता अनसूया नित्यमसूयारहिता वैदेही सा सीता वचः अनसूयावचनं प्रतिपूज्य मन्दं प्रवक्तुमुपचक्रमे ॥ १ ॥

गो० टी०—अथ सीतानसूयासंवादोऽष्टादशोत्तरशततमे—सेति । अनसूया असूयारहिता पातिव्रत्यधर्मोपदेशं गुणत्वेन गृहीतवतीत्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०—अनुभाषसे शिक्षयसि । नार्या गुरुः पतिरिति यैथा भवत्योपदिष्टमेतद्विदितमेतद्विषयकं ज्ञानं ममापि ॥ २ ॥

रा० टी०—तत्प्रवचनाकारमाह—नेति । यन्मां त्वमनुभाषसे तदेतदार्यायां सकलसद्धर्माश्रयत्वेन श्रेष्ठायां त्वयि आश्चर्यं न, नार्याः पतिरेव गुरुः एतन्ममापि यथावत् विदितम् ॥ २ ॥

३] ति० टी०—तदेव दर्शयति—यद्यपीति । एष भर्ता यद्यप्यनार्यः पूज्यचरित्रहीनो वृत्तिवर्जितो जीवनरहितो दरिद्रश्च भवेत्, तथापि मया मद्विधयात्र भर्तर्यद्वैधं प्रकारद्वयरहितं यथा भवति तथा वर्तव्यं वर्तितव्यम् प्रीतिप्रकारेणैव वर्तितव्यमित्यर्थः ॥ ३ ॥

रा० टी०—स्वविदितमेवाह—यद्यपीति । अनार्यः गुणैर्हीनः अत एव वृत्तिवर्जितः यथोचितवर्तनरहितः एष भर्ता यद्यपि भवेत् तथापि मया कल्याणशीलया स्त्रिया अत्र अस्मिन् पत्यौ अद्वैधं सेव्यत्वविषयकद्वैधीभावराहित्यं यथा स्यात्तथा वर्तव्यं वर्तितव्यं आगमशास्त्रानित्यत्वादिदंभावः एष एव धर्मः भवेत् क्षीणामिति शेषः । 'उपचर्तव्यः' इति भूषणपाठः॥३॥

गो० टी०—यद्यपीति । अद्वैधं द्वैधीभावरहितमुपचर्तव्यः गुणवत्त्वनिर्गुणत्वभेदं विहाय सम्यगुपचरणीय इत्यर्थः, मातृवत्प्रियः प्रियपरत्वात् पितृवत्प्रियः अत्यन्तहितपरत्वेन ॥३॥४॥

४] ति० टी०—गुणश्लाघ्यत्वादिविशिष्टे सा वृत्तिरिति किं पुनर्वक्तव्यम् । मातृवत्पितृवत्प्रियः मयीति शेषः । प्रियः प्रीतिमान् ममेति वा शेषः, प्रीतिविषय इत्यर्थः । 'मातृवर्ती पितृप्रियः' इति पाठे मातृवर्ती मातृसेवारतः पितुः प्रीतिविषय इत्यर्थ इति तीर्थः ॥ ४ ॥

रा० टी०—किमिति । गुणाः श्लाघ्याः प्रशंसनीयाः यस्य सः सानुक्रोशः दयासहितः जितेन्द्रियः नियामितोभयकरणः स्थिरः ध्वंसाप्रतियोगी अनुरागो यस्य सः पतिः सेव्यश्चेत् किम् ॥ ४ ॥

५] ति० टी०—अन्यासामपि नृपनारीणां क्षमित्रादीनां विषयेऽपीत्यर्थः । तथान्यासामपि विषये मदतिरिक्तस्त्रीमात्रविषयेऽपि तामेव वृत्तिं कुरुत इत्यर्थः । नृपनारीणामित्यनेनैव क्षमित्रादीनां लाभादित्यन्ये ॥ ५ ॥

रा० टी०—रामगुणान्वर्णयन्ती आह—यामिति । महाबलो रामः यां वृत्तिमनुवृत्तिं प्रीतिमित्यर्थः, कौसल्यायां मुख्यमातरि वर्तते वर्तयति करोतीत्यर्थः, तामेव वृत्तिमन्यासामपि नृपनारीणां नृपनारीषु वर्तते ॥ ५ ॥

गो० टी०—यामिति । नृपनारीणां सप्तम्यर्थे षष्ठी ॥५॥६॥

६] ति० टी०—नृपेण दशरथेन मानमहं महाप्रभुरित्यभिमानं त्यक्त्वेत्यर्थः । अन्यमते उक्तार्थे सत्यत्वप्रत्यायनायैतदुक्तिरिति बोध्यम् ॥ ६ ॥

रा० टी०—सकृदिति । नृपेण दशरथेन सकृदपि दृष्टासु भोग्यास्वबुद्ध्याऽवलोकिताासु स्त्रीषु नृपवत्सलो रामः मानमुत्सृज्य मातृवत् मातरीव वर्तते ॥ ६ ॥

७] ति० टी०—यन्मे श्रुत्वा समाहितं त्वदुक्तार्थकमेव वाक्यं शिक्षितम्, तन्मे हृदि स्थिरं वर्तते ॥ ७ ॥

रा० टी०—आगच्छन्त्या इति । एवं भयावहं विजनं वनमागच्छन्त्याः मम श्रुत्वा यत् पत्यनुसरणं समाहितमुपदिष्टं तन्मे हृदये स्थिरम्, एतेन स एव धर्मो भवत्या अप्युपदिष्ट इति सूचितम् ॥ ७ ॥

गो० टी०—आगच्छन्त्या इति । श्रुत्वा कौसल्यया यत्पातिव्रत्यधर्माचरणं समाहितमुपदिष्टमित्यर्थः ॥ ७—९ ॥

८] ति० टी०—तदपि मे धृतं मात्रनुशासनमपि मे हृद्गतमेवास्ति ॥ ८ ॥

रा० टी०—पाणीति । पाणिग्रदानकाले अग्निसंनिधौ मे जनन्या यद्वाक्यमनुशिष्टं शिक्षितम् तदपि मे धृतं स्थिरीकृतम् ॥ ८ ॥

१ ममार्थे कृत्वेति गो. पाठः । २ उपचर्तव्य इति गो. पाठः । ३ मे श्रुत्वा चेति गो. पाठः । ४ तद्धृतं महदिति गो. पाठः । ५ अनुशिष्टा जनन्याऽसीति गो. पाठः ।

नै विस्मृतं तु मे सर्वं वाक्यैः स्वैर्धर्मचारिणि । पतिशुश्रूषणान्नार्यास्तपो नान्यद्विधीयते ॥ ९ ॥
सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते । तथावृत्तिश्च याता त्वं पतिशुश्रूषया दिवम् ॥ १० ॥
वरिष्ठा सर्वनारीणामेषा च दिवि देवता । रोहिणी न विना चन्द्रं मुहूर्तमपि दृश्यते ॥ ११ ॥
एवंविधाश्च प्रवराः स्त्रियो भर्तृदृढव्रताः । देवलोके महीयन्ते पुण्येन स्वेन कर्मणा ॥ १२ ॥
ततोऽनसूया संहृष्टा श्रुत्वोक्तं सीतया वचः । शिरस्याघ्राय चोवाच मैथिलीं हर्षयन्त्युत ॥ १३ ॥
नियमैर्विविधैराप्तं तपो हि महदस्ति मे । तत्संश्रित्य बलं सीते छन्दये त्वां शुचिव्रते ॥ १४ ॥
उपपन्नं च युक्तं च वचनं तव मैथिलि । प्रीता चास्म्युचितां सीते करवाणि प्रियं च किम् १५॥
तस्यास्तद्वचनं श्रुत्वा विस्मिता मन्दविस्मया । कृतमित्यब्रवीत्सीता तपोबलसमन्विताम् ॥ १६ ॥
सा त्वेवमुक्ता धर्मज्ञा तया प्रीततराऽभवत । सफलं च प्रहर्षं ते हन्त सीते करोम्यहम् ॥ १७ ॥

९] ति० टी०—यच्च स्वैरात्मीयैर्बन्धुवर्गैः पतिशुश्रूषणादिप्रकारैर्बोधितमर्थजातं तच्च मे न विस्मृतं त्वित्यर्थः ॥ ९ ॥

रा० टी०—नवीकृतमिति । हे धर्मचारिणि ! ते वाक्यैः तवोपदिष्टवचनैः सर्वं श्रुत्वानुपदिष्टं नवीकृतं नवीनतां प्रापितमतः नार्याः पतिशुश्रूषणात् अन्यत् तपो न विधीयते इति मे निश्चयोऽस्तीति शेषः, पूर्वार्धेन 'विस्मृतं तु मे सर्वं वाक्यैः स्वैः' इति भट्टपाठः ॥ ९ ॥

१०] ति० टी०—सावित्री सत्यवतः स्त्री । तथावृत्तिः सावित्रीसमानवृत्तिः । त्वमनसूया । यातेत्युक्तिः पातिव्रत्यमहिम्ना स्वर्गस्य हस्तगतत्वादिति तीर्थः । तपोर्थमिह वर्तमानापि पतिसेवया मूर्त्यन्तरेण दिवं यातेत्यर्थ इति कतकः ॥ १० ॥

रा० टी०—पतिशुश्रूषायां सदाचारं प्रमाणयन्ती आह—सावित्रीति । सावित्री सत्यवतो भार्या पतिशुश्रूषां कृत्वा स्वर्गे महीयते पूज्यते तथावृत्तिः सावित्रीवृत्तिसदृशवृत्तिर्विशिष्टा त्वं पतिशुश्रूषया दिवं समस्तसिद्धिप्राप्तिजनितातिप्रमोदं याता प्राप्ता ॥ १० ॥

गो० टी०—सावित्रीति । तथावृत्तिस्त्वं च दिवं यातेत्युक्तिः पातिव्रत्यतपोमाहात्म्येन स्वर्गस्य हस्तगतत्वात् ॥१०॥११॥

११] ति० टी०—रोहिणी विना चन्द्रं मुहूर्तमपि न दृश्यते पूर्वकृतपतिशुश्रूषावशादेव पतिसाहित्यं प्राप्तमिति भावः ॥११॥

रा० टी०—वरिष्ठेति । सर्वनारीणां वरिष्ठा पत्यतिशुश्रूषाकर्त्रीत्वेन श्रेष्ठा एषा रोहिणी देवता चन्द्रं स्वपतिं विना मुहूर्तमपि न दृश्यते ॥ ११ ॥

१२] ति० टी०—प्रवराः स्त्रियोऽरुन्धत्यादयः ॥ १२ ॥

रा० टी०—उपसंहरन्ती आह—एवमिति । एवंविधाः भर्तृदृढव्रता अत एव प्रवराः श्रेष्ठाः अरुन्धत्यादय इत्यर्थः, स्वेन स्वकीयेन पुण्येन कर्मणा पत्यनुव्रतनेन देवलोके महीयन्ते पूज्यन्ते ॥ १२ ॥

गो० टी०—एवंविधा इति । भर्तृदृढव्रता अतिसंकटदशायामपि भर्तृविषयदृढव्रतयुक्ताः ॥ १२ ॥ १३ ॥

१३] ति० टी०—हर्षयन्त्युत हर्षयन्त्यपीत्यर्थः । 'उताप्यर्थविकल्पयोः' ॥ १३ ॥

रा० टी०—तत इति । ततः सीताकथनानन्तरं सीतयोक्तं वचः श्रुत्वा संहृष्टा अनसूया मैथिलीं शिरसि आघ्राय हर्षयन्ती सती उवाच ॥ १३ ॥

१४-१५] ति० टी०—तद्बलं संश्रित्याश्रित्य छन्दये वरं वृणीष्वेति प्रार्थयामि ॥ १४ ॥ १५ ॥

रा० टी०—तद्वचनाकारमाह—नियमैरिति । विविधैः अनेकप्रकारैः नियमैः प्राणायामादिविधिभिः महत् बहु तपः तद्बलं मया आप्तं प्राप्तं तन्मेऽस्ति तत् बलं संश्रित्य हे सीते ! त्वां छन्दये वरं याचस्वेति प्रार्थये ॥ १४ ॥

रा० टी०—उपपन्नमिति । हे मैथिलि ! उपपन्नं श्रवणं प्राप्तं तव वचनं युक्तमुचितमतोऽहं प्रीतास्मि अतस्तेऽहं किं प्रियं करवाणि तदुच्यतां याच्यतामित्यर्थः ॥ १५ ॥

गो० टी०—नियमैरिति । छन्दये वरं वृणीष्वेति प्रार्थये ॥ १४ ॥ १५ ॥

१६] ति० टी०—विस्मिता जाताश्चर्या । अहो तपसो माहात्म्यं यन्ममापि वरदाने सामर्थ्यम् । मन्दविस्मया मन्दस्मिता, कृतं भवत्या अनुग्रहेणैव सर्वं मे पूर्णं न किंचित्कर्तव्यमस्तीति भावः ॥ १६ ॥

रा० टी०—तस्या इति । तस्या अनसूयायात्तद्वचनं श्रुत्वा अविस्मिता तदैश्वर्यविषयकविस्मयरहिता मन्दविस्मया ईषद्धासविशिष्टा सीता तपोबलसमन्वितामनसूयां कृतं त्वदनुग्रहेणैव सर्वं संपादितमित्यर्थः, इत्यब्रवीत् ॥ १६ ॥

गो० टी०—तस्या इति । मन्दविस्मया मन्दस्मितेत्यर्थः ॥ १६ ॥

१७] ति० टी०—तया लोभरहितवाचा । प्रहर्षं लोभराहित्यजं स्वनिष्ठम् । ते त्वद्विषयम् ॥ १७ ॥

रा० टी०—सेति । तया सीतया एवमनेन प्रकारेण उक्ता सा अनसूया प्रीततरा प्रीतिप्रापिका अभवत् । प्रीतिप्राप-

१ नवीकृतं च तदिति गो. नवीकृतं चेति रा. पाठः । २ ते इति गो. रा. पाठः । ३ स्मिते इति गो. पाठः । ४ मनोज्ञं चेति गो. पाठः । ५ उचितं किं ते इति गो. वच्यतामिति रा. पाठः । ६ ब्रवीहि मे इति गो. पाठः । ७ प्रीतिरेति रा. पाठः ।

इदं दिव्यं वरं माल्यं वस्त्रमाभरणानि च । अङ्गरागं च वैदेहि महार्हमनुलेपनम् ॥ १८ ॥
मया दत्तमिदं सीते तव गात्राणि शोभयेत् । अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति ॥ १९ ॥
अङ्गरागेण दिव्येन लिप्ताङ्गी जनकात्मजे । शोभयिष्यसि भर्तारं यथा श्रीर्विष्णुमव्ययम् ॥ २० ॥
सा वस्त्रमङ्गरागं च भूषणानि स्रजस्तथा । मैथिली प्रतिजग्राह प्रीतिदानमनुत्तमम् ॥ २१ ॥
प्रतिगृह्य च तत्सीता प्रीतिदानं यशस्विनी । श्लिष्टाञ्जलिपुटा धीरा समुपास्त तपोधनाम् ॥ २२ ॥
तथा सीतामुपासीनामनसूया दृढव्रता । वचनं प्रष्टुमारेभे कैथां कांचिदनुप्रियाम् ॥ २३ ॥
स्वयंवरे किल प्राप्ता त्वमनेन यशस्विना । राघवेणेति मे सीते कथा श्रुतिमुपागता ॥ २४ ॥
तां कथां श्रोतुमिच्छामि विस्तरेण च मैथिलि । यथाभूतं च कार्त्स्न्येन तन्मे त्वं वक्तुमर्हसि ॥ २५ ॥
एवमुक्ता तु सा सीता तापसीं धर्मचारिणीम् । श्रूयतामिति चोक्त्वा वै कथयामास तां कथाम् ॥ २६ ॥
मिथिलाधिपतिर्वीरो जनको नाम धर्मवित् । क्षत्रकर्मण्यभिरतो न्यायतः शास्ति मेदिनीम् ॥ २७ ॥

णमेवाह–हे सीते ! ते प्रहर्षं लोभराहित्यसूचितस्वनिष्ठस्वतः सिद्धनित्यप्रमोदं सफलं फलसहितमहं करोमि ॥ १७ ॥

गो० टी०–सेति । प्रहर्षं ते तुभ्यं सफलं करोमि करिष्यामि अङ्गरागः कुङ्कुमहरिचन्दनादिः, अनुलेपनं कर्पूरागरुकस्तूरीप्रभृतिपरिमलमिलितम्, अनरूपं स्वद्वात्रानुरूपम्, असंक्लिष्टम् अबाधितशोभमित्यर्थः, भर्तारं शोभयिष्यसीत्यन्ते इत्यब्रवीदेत्यध्याहारः । सा अनसूया प्रीततराऽभवत् शोभयिष्यसीत्यब्रवीदेति संबन्धः ॥ १७–२२ ॥

१८] ति० टी०–अङ्गरागः उद्वर्तनेनाङ्गानि रञ्जयतीत्यङ्गरागः केशरचन्दनादिजः, अनुलेपनं तु 'कर्पूरागुरुकस्तूरीकङ्कोलैर्यक्षकर्दमः' इत्युक्तप्रकारो दिव्यगन्धद्रव्यकल्क इति तीर्थः । कतकस्तु–अङ्गरागमङ्गरञ्जनकरमनुलेपनं दिव्यगन्धद्रव्यकल्कमित्यर्थ इत्याह, इदमेव युक्तम् ॥ १८ ॥

१९] ति० टी०–शोभयेच्छोभयिष्यति । अनुरूपं त्वदुचितं नित्यमेवासंक्लिष्टमुपभोगेऽप्यशुचित्वमुदितत्वादिदोषरहितं भविष्यति ॥ १९ ॥

रा० टी०–फलमेवाह–इदमिति । मया दत्तमिदं माल्यादि तव गात्राणि शोभयेदिदं माल्यादि अनुरूपं तवैव योग्यमत एव असंक्लिष्टं बाधारहितं संनित्यमेव भविष्यति स्थास्यति तत्राङ्गरागः मिश्रकेशरचन्दनादिः अनुलेपनं कर्पूरकस्तूर्यादि । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

२०] ति० टी०–शोभयिष्यसीत्यनेन स्वत्पूजया भर्तुरपि पूजा कृतेति सूचितम् ॥ २० ॥

रा० टी०–अङ्गरागेणेति । हे जनकात्मजे ! दिव्येन अङ्गरागेण लिप्ताङ्गी त्वं श्रीर्विष्णुमिव भर्तारं शोभयिष्यसि । किंच श्रीः लक्ष्मीः स्वमव्ययं विकारशून्यं विष्णुं स्वप्रकाशद्वारा सर्वत्र पूर्णं भर्तारं स्वपतिं यथा यथावत् शोभयिष्यसि शोभां प्रापयिष्यति ॥ २० ॥

२१] ति० टी०–क्षत्रियत्वात्प्रतिग्रहानधिकारेण प्रीतिदानमित्युक्तम् । लक्ष्म्युद्देशेन ब्राह्मणादिभ्यो दत्तमक्षयं चेत्साक्षाल्लक्ष्म्यै प्रीत्या दत्तं तथेति किं वक्तव्यमिति देव्यै तदानमनसूयाया इति बोध्यम् ॥ २१ ॥

रा० टी०–सेति । सा अनसूयया प्रार्थिता मैथिली अनुत्तमं प्रीतिदानं वस्त्रादि जग्राह । प्रीतिदानमित्यनेन प्रतिषिद्धप्रतिग्रहाणां क्षत्रियाणामपि ग्रहणार्हत्वं सूचितम् ॥ २१ ॥

२२] ति० टी०–श्लिष्टाञ्जलिपुटा रचिताञ्जलिपुटा॥२२॥

रा० टी०–प्रतीति । यशस्विनी सीता तमनसूयासमर्पितं प्रीतिदानं प्रतिगृह्य श्लिष्टाञ्जलिपुटा प्रणयसूचकबद्धयुगलकरा सती तपोधनामनसूयां समुपास्त ॥ २२ ॥

२३] ति० टी०–अन्वनन्तरं प्रियां कांचित्कथां श्रोतुकामा वचनं प्रष्टुमारेभे ॥ २३ ॥

रा० टी०–तथेति । वचनं सीतोक्तिं श्रोतुकामेति शेषः । दृढव्रता अनसूया अनुप्रियां प्रतिक्षणं प्रीतिविषयीभूतां कांचित्कथां प्रष्टुमारेभे ॥ २३ ॥

गो० टी०–तथेति । प्रियकथामनुप्रियां कथामुद्दिश्य सीतां प्रष्टुं वचनमारेभे वचनं वक्तुमारेभे इत्यर्थः ॥ २३ ॥

२४]ति० टी०–अनेन रामेण, श्रुतिं मम श्रोत्रपथम्॥२४॥

रा० टी०–प्रभाकारमाह–स्वयंवर इति । हे सीते ! अनेन यशस्विना राघवेण स्वयंवरे त्वं प्राप्तेति या कथा मे श्रुतिं श्रवणमुपागता प्राप्ता तां कथां विस्तरेण श्रोतुमिच्छामि, तत् तस्माद्धेतोः यथाभूतं यथाजातं कार्त्स्न्येन मे वक्तुमर्हसि २४॥२५

गो० टी०–स्वयंवर इति । श्रुतिमुपागता श्रुतिपथं प्राप्ता ॥ २४–२७ ॥

२५-२७] ति० टी०–विस्तरेण च विस्तरेणैव ॥२५-२७॥

रा० टी०–एवमिति । एवमुक्ता पृष्टा सा सीता भूयतामित्युक्त्या तामनसूयया पृष्टां कथां कथयामास ॥ २६ ॥

---

१ चान्विति गो. पाठः । २ तत्रेति गो. पाठः । ३ कांचित्प्रियकथामन्विति गो. पाठः । ४ ऽनुभूतमिति गो. पाठः । ५-तां तत इति गो. पाठः । ६ धर्मे ह्यमीति गो. पाठः ।

तस्य लाङ्गलहस्तस्य कृषतः क्षेत्रमण्डलम् । अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता ॥ २८ ॥
स मां दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः । पांसुगुण्ठितसर्वाङ्गीं विस्मितो जनकोऽभवत् ॥ २९ ॥
अनपत्येन च स्नेहादङ्कमारोप्य च स्वयम् । ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः ॥ ३० ॥
अन्तरिक्षे च वागुक्ता प्रतिमामानुषी किल । एवमेतन्नरपते धर्मेण तनया तव ॥ ३१ ॥
ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः । अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः ॥ ३२ ॥
दत्ता चास्मीष्टवदेव्यै ज्येष्ठायै पुण्यकर्मणे । तया संभाविता चास्मि स्निग्धया मातृसौहृदात् ३३ ॥
पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता । चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः ॥ ३४ ॥

रा० टी०–तत्कथनाकारमाह–मिथिलेत्यादिभिः । जनको नाम जनकनामा मिथिलाधिपतिः न्यायतः मेदिनीं पृथ्वीं शास्ति पालयति ॥ २७ ॥

२८] ति० टी०–क्षेत्रमण्डलं यज्ञयोग्यक्षेत्रम्, चयनप्रकरणे "षड्वेन कृषति" इति श्रुतेः । कृषतस्तस्य पुरो जगतीं भुवं भित्त्वोत्थिता एतावन्मात्रेणाहं नृपतेर्जनकस्य सुता ॥ २८ ॥

रा० टी०–तस्येति । क्षेत्रमण्डलं यागोपयोगि क्षेत्रं कृषतः लाङ्गलहस्तस्य यथाशास्त्रं गृहीतहलविशिष्टकरविशिष्टस्य तस्य जनकस्य अग्रे जगतीं भित्त्वाहमुत्थिता अतोऽहं नृपतेः सुता २८

गो० टी०–तस्येति । कर्षतः "षड्वेन कृषति" इति श्रुत्या शोधनं कुर्वतः क्षेत्रमण्डलं यागोपयोगिक्षेत्रं चयनस्थानमित्यर्थः२८

२९] ति० टी०–मुष्टिविक्षेपतत्परः "या जाता ओषधयो देवेभ्यः" इत्यादिमन्त्रोक्तप्रकारेणोपधिमुष्टिविकिरणतत्पर इति तीर्थः । निम्नोन्नतसमीकरणाय मृत्तिकामुष्टिविक्षेपतत्पर इति कतकः ॥ २९ ॥

रा० टी०–स इति । मुष्टिविक्षेपतत्परः "या जाता ओषधयो देवेभ्यः" इत्यादिमन्त्रोक्तविधिना मुष्टिगतौषधिप्रक्षेपणशीलः स नरपतिर्जनकः पांसुगुण्ठितसर्वाङ्गीं धूलीव्याप्तशरीरां मां दृष्ट्वा विस्मितोऽभवत् ॥ २९ ॥

गो० टी०–स इति । मुष्टिविक्षेपतत्परः "या जाता ओषधयः" इति चतुर्दशभिरोषधीर्वपति इत्युक्तप्रकारेण ओषधिमुष्टिविकिरणतत्परः ॥ २९ ॥

३०] ति० टी०–अत्र चौ स्वर्थे ॥ ३० ॥

रा० टी०–अनपत्येनेति । अनपत्येन अपत्यान्तररहितेन राज्ञा स्नेहात् अङ्कमारोप्य मामिति शेषः, मम इयं तनयेत्युक्त्वा मयि स्नेहः अत्यनुरागः निपातितः कृतः ॥ ३० ॥

गो० टी०–अनपत्येन चेति । अनपत्येन च तेन जनेहान्मामङ्कमारोप्य इयं मम तनयेति चोक्त्वा स्नेहो मयि निपातितः अङ्कम् उत्सङ्गम् ॥ ३० ॥

३१] ति० टी०–प्रतिमामानुषी प्रतिमया स्वरूपेण मानुषी मनुष्यवाकुल्या वागन्तरिक्षे उक्ता । तां वाचमाह—एवमिति । एतन्ममेयं तनयेत्येतत् । एवमर्थवदेव । यतो हे नरपते ! धर्मेण न्यायेनैषा त्वत्क्षेत्रजातत्वात्तव तनयैव ॥ ३१ ॥

रा० टी०–अन्तरिक्ष इति । अन्तरिक्षे आकाशे अप्रतिमा उच्चारयितृस्वरूपरहिता अमानुषी मानुषवाक्सदृशी वाक् उक्ता प्रादुर्भूता । तदाकारमाह–एतद्भवदुक्तमेवं समीचीनमित्यर्थः, यतः धर्मेण तव तनया ॥ ३१ ॥

गो० टी०–अन्तरिक्ष इति । मां प्रति मानुदिश्य 'एवमेतन्नरपते धर्मेण तनया तव' इति अन्तरिक्षे अमानुषी वागुक्ता, यद्वा वागुक्ता प्रतिमेत्यत्र अप्रतिमेति च्छित्वा वाग्विशेषणतया वा योज्यम् ॥ ३१ ॥ ३२ ॥

३२] ति० टी०–मामवाप्य यज्ञभूमेरिति शेषः, मल्लाभोत्तरं तस्य महती संमृद्धिर्जातेति भावः ॥ ३२ ॥

रा० टी०–तत इति । ततः मत्प्राप्तेः प्रहृष्टः प्राप्तहर्षः धर्मात्मा मिथिलाधिपः मिथिलापालयिता नराधिपो राजा मे पिता मामवाप्य विपुलामृद्धिमवाप्तः ॥ ३२ ॥

३३] ति० टी०–इष्टवदेव्यै इष्टायै देव्यै राज्ञ्यै इष्टमिति भावे क्तः, इष्टमिच्छा तद्वत्यै विषयतासंबन्धेनेत्यक्षरार्थः । आर्षं वा साधुत्वमुक्तार्थं । यद्वा संतानेच्छावत्यै देव्यै इत्यर्थः पुण्यकर्मणे इति देवीविशेषणम् । तृतीयान्तः पाठः क्वचित् । संभाविता संवर्धिता ॥ ३३ ॥

रा० टी०–दत्तेति । पुण्यकर्मणे पुण्यकर्मविशिष्टायै ज्येष्ठायै इष्टवदेव्यै अत्यभिमतपत्न्यै अहं दत्तास्मि । स्निग्धया स्नेहविशिष्टया तया मातृसौहृदान्मातृचितसौहार्दात् संभाविता संवितास्मि ॥ ३३ ॥

गो० टी०–दत्तेति । इष्टवदेव्यै इच्छावत्यै पुण्यकर्मणा अनवरतयज्ञादिकर्मयुक्तेन जनकेन संभाविता संवर्धितेत्यर्थः३३

३४] ति०टी०–पतिसंयोगसुलभं पाणिग्रहणोचितम्॥३४॥

रा० टी०–पतीति । पतिसंयोगसुलभं पतिसंयोगः सुलभः सुलब्धव्यो यस्मिन् तन्मे वयो दृष्ट्वा वित्तनाशात् अर्जितवित्तस्यादर्शनात् अधन इव दीनो मे पिता चिन्तामभ्यगमत् ॥३४॥

गो० टी०–पतिसंयोगसुलभमिति । पतिसंयोगे सति सुलभम् अन्यथा दुर्लभमित्यर्थः । पतिसंयोगं विना स्थातुमशक्ययौवनावस्थावदित्यर्थः ॥ ३४ ॥

१ कर्षत इति गो. पाठः । २ कुण्ठितेति गो. पाठः । ३ कर्मणेति गो. पाठः ।

सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् । प्रधर्षणमवाप्नोति शक्रेणापि समो भुवि ॥ ३५ ॥
तां धर्षणामदूरस्थां संदृश्यात्मनि पार्थिवः । चिन्तार्णवगतः पारं नाससादाप्लवो यथा ॥ ३६ ॥
अयोनिजां हि मां ज्ञात्वा नाध्यगच्छत्स चिन्तयन् । सदृशं चाभिरूपं च महीपालः पतिं मम ॥ ३७ ॥
तस्य बुद्धिरियं जाता चिन्तयानस्य संततम् । स्वयंवरं तनूजायाः करिष्यामीति धर्मतः ॥ ३८ ॥
महायज्ञे तदा तस्य वरुणेन महात्मना । दत्तं धनुर्वरं प्रीत्या तूणी चाक्षय्यसायकौ ॥ ३९ ॥
असंचाल्यं मनुष्यैश्च यत्नेनापि च गौरवात् । तन्न शक्ता नमयितुं स्वप्नेष्वपि नराधिपाः ॥ ४० ॥
तद्धनुः प्राप्य मे पित्रा व्याहृतं सत्यवादिना । समवाये नरेन्द्राणां पूर्वमामन्त्र्य पार्थिवान् ॥ ४१ ॥
इदं च धनुरुद्यम्य सज्यं यः कुरुते नरः । तस्य मे दुहिता भार्या भविष्यति न संशयः ॥ ४२ ॥
तच्च दृष्ट्वा धनुःश्रेष्ठं गौरवाद्गिरिसंनिभम् । अभिवाद्य नृपा जग्मुरशक्तास्तस्य तोलने ॥ ४३ ॥
सुदीर्घस्य तु कालस्य राघवोऽयं महाद्युतिः । विश्वामित्रेण सहितो यज्ञं द्रष्टुं समागतः ॥ ४४ ॥
लक्ष्मणेन सह भ्रात्रा रामः सत्यपराक्रमः । विश्वामित्रस्तु धर्मात्मा मम पित्रा सुपूजितः ॥ ४५ ॥

३५] ति० टी०—सदृशादपकृष्टाच्च वरवर्गजनात्कन्यायाः पिता इन्द्रसमोऽपि भुवि स्थितो लोके प्रधर्षणमसंमानादिरूपं क्लेशमाप्नोति किमुताधिकादिति शेषः ॥ ३५ ॥

रा० टी०—सदृशादिति । शक्रेण समोऽपि कन्यापिता सदृशात् कुलादिना स्वतुल्याद्वरपित्रादेः अपकृष्टात् वरमातुलादेश्च जनात् प्रधर्षणमनादरणमवाप्नोति ॥ ३५ ॥

गो० टी०—सदृशादिति । प्रधर्षणां तिरस्क्रियाम् ॥३५॥

३६] ति० टी०—अदूरस्थां निकटप्राप्तां धर्षणां कन्यानिमित्ततिरस्क्रियामात्मनि संदृश्य संभाव्य । प्लवः पोतः ॥३६॥

रा० टी०—तामिति । अदूरस्थां निश्चितोत्तरकालभाविनीमित्यर्थः । तां वरपित्रादिकृतां धर्षणां तिरस्कृतिमात्मनि संदृश्य निश्चित्य अप्लवः प्लवरहित इव चिन्तार्णवगतः चिन्तासमुद्रे निमग्नः पार्थिवः पारं न आससाद प्राप ॥ ३६ ॥

गो० टी०—तामिति । अप्लवः प्लवरहितः ॥ ३६ ॥

३७-३८] ति० टी०—सदृशं कुलविद्यादिना, अभिरूपं वयःसौन्दर्यादिना, वरमिति शेषः ॥ ३७ ॥ ३८ ॥

रा० टी०—अयोनिजामिति । अयोनिजां मां ज्ञात्वा सदृशमयोनिजत्वादिना तुल्यमनुरूपं प्रादुर्भूतवयःसौन्दर्यादिना च तुल्यं पतिं चिन्तयन् सन् स मत्पिता नाध्यगच्छत् निश्चयं न प्राप्नोत् ॥ ३७ ॥

रा० टी०—तस्येति । सन्ततं निरन्तरं चिन्तयानस्य तस्य मत्पितुः तनूजायाः धर्मतः स्वयंवरं करिष्यामि इति इयं बुद्धिर्निश्चयो जाता ॥ ३८ ॥

गो० टी०—अयोनिजामिति । सदृशम् अभिजनवृत्तादिना तुल्यम् अनुरूपं प्रादुर्भूतयौवनाप्रतिमरूपलावण्यादिना योग्यम् ॥ ३७ ॥ ३८ ॥

३९] ति० टी०—महायज्ञे दक्षयज्ञे । तस्य मत्पितृपूर्वजस्य देवरातस्य । तदा शत्रुजयसमर्थधनुर्लाभाय तपःकरणकाले । दक्षयज्ञे हि शिवेन पीडिता देवाः शिवं संप्रार्थ्य धनुर्याचितवन्तः स च देवेभ्यो दत्तोक्तवान् इदं देवरातायदीयतामिति, ततो देवैर्वरुणद्वारा देवरातायदत्तम् । यद्वा म्रियते सर्वदेवैरिति व्युत्पत्त्या वरुणः शिव एव ॥ ३९ ॥

रा० टी०—स्वयंवरप्रकारमाह—महायज्ञ इति । तदा तस्मिन् महायज्ञे दक्षकर्तृकमहायागसमये महात्मना वरुणेन वरुणद्वारा शिवाज्ञापितदैवतैः धनुर्वरं दत्तम् । देवराजनामकनिमिज्येष्टपुत्रायेति शेषः । अक्षयसायकौ तूणी च दत्तौ किंच वरुणेन उः शंभुश्चासौ अरुणो लोहितश्च वरुणः तेन स्वभागाकल्पनजनितकोपहेतुकारुण्यविशिष्टशिवेनेत्यर्थः । धनुर्वरं दत्तं देवैर्दापितम् ॥ ३९ ॥

गो० टी०—महायज्ञ इति । वरुणेन दत्तं वरुणेनातिसहकारिणा दत्तम् ॥ ३९-४१ ॥

४०-४१] ति० टी०—गौरवाद्गौरवत्वात् ॥ ४० ॥ ४१ ॥

रा० टी०—असंचाल्यमिति । गौरवात् अतिगुरुत्वाद्धेतोः यत्नेनापि मनुष्यैः असंचाल्यं यद्धनुस्तद्धनुर्नमयितुं नराधिपाः स्वप्नेष्वपि न शक्ताः ॥ ४० ॥

रा० टी०—तदिति । तद्धनुः प्राप्य पूर्वं पार्थिवान् आमन्त्र्य आमन्त्रणेन स्वस्थानं प्रापय्येत्यर्थः । नरेन्द्राणां समवाये समूहे इदं धनुः उद्यम्य यो नरः सज्यं कुरुते तस्य नरस्य भार्या मम दुहिता भविष्यति इति सत्यवादिना मे पित्रा व्याहृतं कथितम् । श्लोकद्वयमेकान्वयि ॥ ४१ ॥ ४२ ॥

४२] ति० टी०—न संशय इति पित्रा व्याहृतमिति पूर्वेण संबन्धः ॥ ४२ ॥

गो० टी०—इदमिति । भविष्यति न संशय इत्यत्र इतिकरणं द्रष्टव्यम् ॥ ४२ ॥

४३-४५] ति० टी०—तोलने चालने । अभिवाद्य नमस्कृत्य ॥ ४३-४५ ॥

---

१ दृष्ट्वा चेति गो. पाठः । २ वीति गो. पाठः । ३ अन्विति गो. रा. पाठः । ४ धीमत इति गो. पाठः । ५ अक्षयेति गो. पाठः ।

प्रोवाच पितरं तत्र राघवौ रामलक्ष्मणौ । सुतौ दशरथस्येमौ धनुर्दर्शनकाङ्क्षिणौ ॥ ४६ ॥
[धनुर्दर्शय रामाय राजपुत्राय दैविकम् ।]
इत्युक्तस्तेन विप्रेण तद्धनुः समुपानयत् । तद्धनुर्दर्शयामास राजपुत्राय दैविकम् ॥ ४७ ॥
निमेषान्तरमात्रेण तदानम्य महाबलः । ज्यां समारोप्य झटिति पूरयामास वीर्यवान् ॥ ४८ ॥
तेनापूरयता वेगान्मध्ये भग्नं द्विधा धनुः । तस्य शब्दोऽभवद्भीमः पतितस्याशनेर्यथा ॥ ४९ ॥
ततोऽहं तत्र रामाय पित्रा सत्याभिसंधिना । उद्यता दातुमुद्यम्य जलभाजनमुत्तमम् ॥ ५० ॥
दीयमानां न तु तदा प्रतिजग्राह राघवः । अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः ॥ ५१ ॥
ततः श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् । मम पित्रा त्वहं दत्ता रामाय विदितात्मने ॥ ५२ ॥
मम चैवानुजा साध्वी ऊर्मिला शुभदर्शना । भार्यार्थे लक्ष्मणस्यापि दत्ता पित्रा मम स्वयम् ॥ ५३ ॥
एवं दत्तास्मि रामाय तथा तस्मिन्स्वयंवरे । अनुरक्तास्मि धर्मेण पतिं वीर्यवतां वरम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टादशाधिकशततमः सर्गः ॥ ११८ ॥

रा० टी०–तदिति । गिरिसंनिभं तद्धनुःश्रेष्ठं दृष्ट्वा गौरवाद्धेतोः तस्य तोलने इयत्ताकरणे अशक्ताः नृपा अभिवाद्य प्रणम्य जग्मुः ॥ ४३ ॥

रा० टी०–सुदीर्घस्येति । विश्वामित्रेण सहितः अयं महाद्युतिः राघवः सुदीर्घस्य कालस्य गते सतीति शेषः, यज्ञं द्रष्टुं समागतः ॥ ४४ ॥

रा० टी०–लक्ष्मणेनेति । लक्ष्मणेन सह रामः मम पित्रा सुपूजित आसीदिति शेषः । धर्मात्मा सुपूजितो विश्वामित्रस्तु धनुर्दर्शनकाङ्क्षिणौ दशरथस्य सुतौ रामलक्ष्मणौ इमौ इति हेतोः रामाय दैविकं दिव्यं धनुः दर्शय इति तत्र तस्मिन् समये पितरं प्रोवाच । सार्धश्लोकद्वयमेकान्वयि ॥४५॥ ४६ ॥

गो० टी०–तदिति । तोलने चालने ॥ ४३–५० ॥

४६–४७] ति० टी०–इमौ धनुर्दर्शनकाङ्क्षिणौ । अतो रामाय दैविकं देवदत्तं धनुर्दर्शयेति विश्वामित्रः पितरं प्रोवाचेति संबन्धः ॥ ४६ ॥ ४७ ॥

रा० टी०–इतीति । विप्रेण तेन विश्वामित्रेण इत्युक्तः पिता तद्धनुः सज्जपानयत् प्रापयत् दर्शयामासेत्यर्थः ॥ ४७ ॥

४८–४९] ति० टी०–पूरयामास सज्यं कृत्वा कृष्टवान् ॥ ४८ ॥ ४९ ॥

रा० टी०–निमेषान्तरेति । महाबलो वीर्यवान् अतिप्रभाववान् रामः तद् धनुर्निमेषान्तरमात्रेण आनम्य झटिति ज्यां धनुः समारोप्य पूरयामास आचकर्ष 'वीर्यं शुक्रे प्रभावे च तेजस्सामर्थ्ययोरपि' इति मेदिनी ॥ ४८ ॥

रा० टी०–तेनेति । वेगात्पूरयता तेन रामेण धनुः मध्ये द्विधा भग्नं भञ्जितं पतितस्य धनुषः अशनेरिव भीमः शब्दोऽभवत् ॥ ४९ ॥

५०] ति० टी०–उत्तमं जलभाजनमुद्यम्य पित्राहं रामाय दातुमुद्यतेति संबन्धः ॥ ५० ॥

रा० टी०–तत इति । ततः धनुर्भङ्गानन्तरं सत्याभिसंधिना सत्यप्रतिज्ञेन पित्रा उत्तमं जलभाजनमुद्यम्य गृहीत्वा रामाय दातुमुद्यता स्वसमीपं प्रापिता ॥ ५० ॥

५१–५४] ति० टी०–छन्दमभिप्रायम् ॥ ५१–५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽयोध्याकाण्डेऽष्टादशाधिकशततमः सर्गः॥११८॥

रा० टी०–दीयमानामिति । तदा तस्मिन् काले अयोध्याधिपतेः दशरथस्य छन्दमभिप्रायमविज्ञाय दीयमानां मां राघवो न प्रतिजग्राह, एतेन पितुरनुमत्यनन्तरं गृहीतास्मीति सूचितम् ॥ ५१ ॥

रा० टी०–तत इति । ततः रामकर्तृकप्रतिग्रहाभावानन्तरं दशरथं मम श्वशुरमामन्त्र्य विदितात्मने रामायाहं दत्ता ॥ ५२ ॥

रा० टी०–ममेति । ममानुजा ऊर्मिला लक्ष्मणस्य भार्यार्थे दत्ता ॥ ५३ ॥

रा० टी०–उपसंहरन्ती आह–एवमिति । एवमुक्तप्रकारेण स्वयंवरे रामाय अहं दत्तास्मि अत एव वीर्यवतां प्रभावविशिष्टानां वरं श्रेष्ठं पतिमहं धर्मेण अनुरक्तास्मि ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डेऽष्टादशाधिकशततमः सर्गः ॥ ११८ ॥

गो० टी०–दीयमानामिति । छन्दमभिप्रायम् । 'वञ्चाभिप्राययोश्छन्दः' इति वैजयन्ती ॥ ५१ ॥ ५२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्यानेऽष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

---

१ अर्धमेतदधिकं गो. रा. पाठे । २ अर्धमेतद् गो. रा. नास्ति । ३ स वीर्यवानिति गा. पाठः । ४ वीर्यवदिति गो. पाठः । ५ तेन पूरयतेति गो. रा. पाठः । ६ इवेति गो. पाठः । ७ निश्चितेति गो. पाठः । ८ प्रियदर्शनेति गो. पाठः । ९ तदेति गो. पाठः ।

एकोनविंशत्यधिकशततमः सर्गः ।

संप्राप्तसायंकालमुपश्लोकयन्त्यनसूया स्वदत्ताभरणैर्विभूषिताङ्गीं वैदेहीं रामान्तिकं प्रैषीत् । दिव्याभरणभासुरां सीतां विलोक्य विस्मयमानं रामं सीताऽनसूयावृत्तं निवेद्य तस्यास्तदुपागमं न्यवेदीत् । तापसैरर्चितो रामस्तत्र तद्रात्रिमुषित्वा प्रातः पुरोगमनाय मुनिगणं पप्रच्छ । स्वेभ्यो जातं राक्षसोपद्रवं निवेदयन्तस्ते तेषां निधनं प्रार्थयेरंस्तथा मुनिदर्शितपथेन त्रयस्ते दण्डकां प्राविशन् ।

अनसूया तु धर्मज्ञा श्रुत्वा तां महतीं कथाम् । पर्यष्वजत बाहुभ्यां शिरस्याघ्राय मैथिलीम्॥ १ ॥
व्यक्ताक्षरपदं चित्रं भाषितं मधुरं त्वया । यथा स्वयंवरं वृत्तं तत्सर्वं च श्रुतं मया ॥ २ ॥
रमेयं[1] कथया ते तु दृढं मधुरभाषिणि । रविरस्तगतः श्रीमानुपोह्य[2] रजनीं शुभाम्[3] ॥ ३ ॥
दिवसं परिकीर्णानामाहारार्थं पतत्रिणाम्[4] । संध्याकाले निलीनानां निद्रार्थं श्रूयते ध्वनिः॥ ४ ॥
एते चाप्यभिषेकार्द्रा मुनयः कलशोद्यताः । सहिता उपवर्तन्ते सलिलाप्लुतवल्कलाः ॥ ५ ॥
अग्निहोत्रे च ऋषिणा[5] हुते च विधिपूर्वकम् । कपोताङ्गारुणो धूमो दृश्यते पवनोद्धतः ॥ ६ ॥
अल्पपर्णा हि तरवो घनीभूताः समन्ततः । विप्रकृष्टेन्द्रिये देशे न प्रकाशन्ति वै दिशः ॥ ७ ॥
रजनीचरसत्त्वानि प्रचरन्ति समन्ततः । तपोवनमृगा ह्येते वेदितीर्थेषु शेरते ॥ ८ ॥

१] ति० टी०–अनसूयेति ॥ १ ॥

रा० टी०–सीतावचनश्रवणानन्तरकालिकमनसूयावृत्तमाह–अनसूयेत्यादिभिः । धर्मज्ञा अनसूया तु तां सीताविवाहसंबन्धिनीं महतीं कथां श्रुत्वा मैथिलीं शिरसि आघ्राय बाहुभ्यां पर्यष्वजत आलिङ्गयत् आलिङ्गनपूर्वकमुवाचेत्यर्थः ॥ १ ॥

गो० टी०–अथाऽऽश्रमे रजनीमुषित्वा प्रातर्निर्गम एकोनविंशत्युत्तरशततमे–अनसूयेत्यादि ॥ १ ॥ २ ॥

२] ति० टी०–स्वयंवरं वृत्तं स्वयंवरो वृत्तः अर्घ्यादिः स्वयंवरः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–व्यक्तेति । व्यक्तानि स्फुटानि अक्षराणि पदानि च यस्मिन् तच्चित्रं बहुविधव्यञ्जनाविशिष्टं मधुरं मनोहरं यथास्वयंवरं स्वयंवरमनतिक्रम्य यत् त्वया भाषितं तद्वृत्तं वृत्तान्तं सर्वं मया श्रुतम् ॥ २ ॥

३] ति० टी०–उपोह्य समीपं प्रापय्य ॥ ३ ॥

रा० टी०–रमेयेति । हे मधुरभाषिणि ! ते तव कथया दृढं यथा स्यात्तथा रमेय विहरेय श्रीमान् रविस्तु रजनीमुपोह्य समीपं प्रापय्य अस्तं गतः ॥ ३ ॥

गो० टी०–रविरित्यादि । उपोह्य समीपं प्रापय्य स्वसंचाराद्विमुक्तं प्रदेशं प्रापय्येत्यर्थः ॥ ३ ॥

४] ति० टी०–दिवसं व्याप्याहारार्थं परितः कीर्णानां संचरताम् निलीनानां निलीयमानानाम् ॥ ४ ॥

रा० टी०–दिवसमिति । दिवसं दिनं संप्राप्य आहारार्थं परिकीर्णानां चतुर्दिक्षु गतानां संध्याकाले प्राप्ते सति निद्रार्थं निलीनानां स्वस्वावासस्थानेषु स्थितानां पतत्रिणां पक्षिणां ध्वनिः श्रूयते ॥ ४ ॥

५] ति० टी०–कलशोद्यता उद्यतकलशाः सहिताः परस्परं मिलिताः ॥ ५ ॥

रा० टी०–एते इति । कलशोद्यताः गृहीतकलशाः अभिषेकार्द्राः स्नानहेतुकार्द्रत्वविशिष्टाः अत एव सलिलेन जलेन आप्लुतानि व्याप्तानि वल्कलानि येषां ते सहिताः परस्परं मिलिताः मुनयः उपवर्तन्ते समीपे दृश्यन्ते इत्यर्थः ॥ ५ ॥

गो० टी०–एत इति । कलशोद्यताः उद्यतकलशाः ॥ ४ ॥

६] ति० टी०–कपोताङ्गवत्पारावतकण्ठवदरुणो मेचकः । 'श्यामे रक्तेऽरुणोऽर्के च' ॥ ६ ॥

रा० टी०–ऋषीणामिति । विधिपूर्वकं हुतेषु ऋषीणामग्निहोत्रेषु पवनोद्धतः वायुना समृद्धः कपोताङ्गारुणः पारावतकण्ठारुण्यसदृशारुण्यविशिष्टः धूमः दृश्यते । अरुणत्वं चाव्यक्तरागत्वम् , तथा च मेदिनी 'अरुणोऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथौ' इति ॥ ६ ॥

गो० टी०–ऋषीणामिति । कपोताङ्गारुणः कपोतकन्धरावदव्यक्तरागः 'अव्यक्तरागस्त्वरुणः' इत्यमरः ॥ ६ ॥

७] ति० टी०–अल्पपर्णा अपि तरवस्तमसाव्यक्तपर्णान्तरत्वाद्घनीभूता इव । विप्रकृष्टेन्द्रिये देशे इन्द्रियविप्रकृष्टे दूरे देश इत्यर्थः, न प्रकाशन्ति न प्रकाशन्ते ॥ ७ ॥

रा० टी०–अल्पेति । विप्रकृष्टानि दूरवर्तीनि इन्द्रियाणि यस्मात्तस्मिन् देशे समन्ततो विद्यमानाः अल्पपर्णा अपि तरवः घनीभूताः तमसा प्रौढत्वं प्राप्ताः दृश्यन्ते इति शेषः , अत एव दिशो न प्रकाशन्ति प्रकाशन्ते ॥ ७ ॥

गो० टी०–अल्पपर्णा इति । विप्रकृष्टेऽपि देशे अल्पपर्णाः ये तरवस्तेऽपि समन्ततः घनीभूता हि अव्यक्तपर्णान्तरालत्वात् सान्द्रीभूता इव । तत्र हेतुमाह–न प्रकाशन्ति वै दिश इति ॥ ६ ॥

८] ति० टी०–वेदितीर्थेष्वग्निहोत्रवेदिसंबन्धात्पुण्यक्षेत्ररूपाश्रमप्रदेशेषु तीर्थशब्दः पुण्यक्षेत्रवाची ॥ ८ ॥

---

१ इति गो. पाठः । २ रमेऽहमिति गो. रमेयेति रा. पाठः । ३ शिवामिति गो. पाठः । ४ प्रतीति गो. पाठः । ५ ऋषीणामग्निहोत्रेषु हुतेष्विति गो. रा. पाठः

संप्रवृत्ता निशा सीते नक्षत्रसमलंकृता । ज्योत्स्नापावरणश्चन्द्रो दृश्यतेऽभ्युदितोऽम्बरे ॥ ९ ॥
गम्यतामनुजानामि रामस्यानुचरी भव । कथयन्त्या हि मधुरं त्वयाहमपि तोषिता ॥ १० ॥
अलंकुरु च तावत्त्वं प्रत्यक्षं मम मैथिलि । प्रीतिं जनय मे वत्से दिव्यालंकारशोभिनी ॥ ११ ॥
सा तदा समलंकृत्य सीता सुरसुतोपमा । प्रणम्य शिरसा पादौ रामं त्वभिमुखी ययौ ॥ १२ ॥
तथा तु भूषितां सीतां ददर्श वदतां वरः । राघवः प्रीतिदानेन तपस्विन्या जहर्ष च ॥ १३ ॥
न्यवेदयत्ततः सर्वं सीता रामाय मैथिली । प्रीतिदानं तपस्विन्या वसनाभरणस्रजाम् ॥ १४ ॥
प्रहृष्टस्त्वभवद्रामो लक्ष्मणश्च महारथः । मैथिल्याः सत्क्रियां दृष्ट्वा मानुषेषु सुदुर्लभाम् ॥ १५ ॥
ततः स शर्वरीं प्रीतः पुण्यां शशिनिभाननाम् । अर्चितस्तापसैः सर्वैरुवास रघुनन्दनः ॥ १६ ॥
तस्यां रात्र्यां व्यतीतायामभिषिच्य हुताग्निकान् । आपृच्छेतां नरव्याघ्रौ तापसान्वनगोचरान् ॥ १७ ॥

रा० टी०–रजनीति । रजनीचरसत्त्वानि निशाचराः समन्ततः प्रचरन्ति । एते तपोवनमृगाः वेदितीर्थेषु पावनवेदिषु शेरते ' तीर्थमन्त्रायुपाध्यायशास्त्रेष्वम्भसि पावने । पात्रोपधावतरणेषु ' इति वैजयन्ती ॥ ८ ॥

गो० टी०–रजनीचरेति । वेऽदितीर्थेषु वेद्यवतरणप्रदेशेषु ' तीर्थं मन्त्रायुपाध्यायशास्त्रेष्वम्भसि पावने । पात्रोपधावतरणेषु ' इति वैजयन्ती ॥ ७ ॥ ८ ॥

९] ति० टी०–चन्द्रो दृश्यते इत्यनेन कार्तिक्युत्तरं प्रतिपदि यात्रेति सूचितम् ॥ ९ ॥

रा० टी०–संप्रवृत्तेति । हे सीते! नक्षत्रसमलंकृता निशा संप्रवृत्ता अत एव ज्योत्स्नापावरणः चन्द्रिकारूपावरणविशिष्टः अभ्युदितश्चन्द्रः अम्बरे आकाशे दृश्यते ॥ ९ ॥

१०] ति० टी०–अनुचरी भव शुश्रूषुर्भव ॥ १० ॥

रा० टी०–गम्यतामिति । अहमनुजानामि आज्ञापयामि त्वया गम्यताम् । तत्प्रयोजनमाह–रामस्य अनुचरी भव हि यतः मधुरं कथयन्त्या त्वयाहं तोषिता ॥ १० ॥

गो० टी०–गम्यतामिति । अनुजानामि अनुमतिं करोमि ' अनुचरी भव ' इति पाठः ॥ ९ ॥

११–१३] ति० टी०–अलंकुरु आत्मानमिति शेषः । प्रीतिं जनय अलंकृत्य दिव्यस्वस्वरूपानुभावेनेनेति शेषः ११–१३

रा० टी०–अलमिति । हे मैथिलि ! दिव्यालंकारशोभिनि हे दिव्यालंकारशोभादायिनि मम प्रत्यक्षमलंकुरु महत्तवत्कालंकारादीनि धारयेत्यर्थः । तत्प्रयोजनमाह–प्रीतिं मे जनय अलंकृतात्मदर्शनेन मत्प्रीतिमुत्पादयेत्यर्थः ॥ ११ ॥

रा० टी०–सेति । तदा अनसूयाज्ञापनकाले सुरसुतोपमा सा सीता समलंकृत्य पादौ अनसूयाचरणौ शिरसा प्रणम्य राममभिमुखी सती ययौ ॥ १२ ॥

रा० टी०–तथेति । तपस्विन्याः प्रीतिदानेन भूषितां सीतां राघवो ददर्श जहर्ष च ॥ १३ ॥

गो० टी०–अलंकुर्विति । अलंकुरु आत्मानमिति शेषः ॥ १०–१२ ॥

१४] ति० टी०–सर्वं न्यवेदयदित्यस्यैव प्रपञ्चः—प्रीतिदानमित्यादि । अत्र कर्मणि ल्युट् ॥ १४ ॥

रा० टी०–न्यवेदयदिति । ततः रामदर्शनानन्तरं मैथिली सीता तपस्विन्या वसनाभरणस्रजां प्रीतिदानं सर्वं सकारणं रामाय न्यवेदयत् । ' वसनाभरणस्रजम् ' इति भूषणपाठः तत्पक्षे प्रीतिदानमित्यत्र कर्मणि ल्युट् ॥ १४ ॥

गो० टी०–न्यवेदयदिति । प्रीत्या दीयत इति प्रीतिदानं कर्मणि ल्युट् वसनाभरणस्रजां समाहारो वसनाभरणस्रजम् " द्वन्द्वाच्चुदषहान्तात्समाहारे " इति समासान्तष्टच् । ' वसनाभरणस्रजाम् ' इतिपाठे प्रीतिदानमिति भावे ल्युट्॥१३–१५॥

१५] ति० टी०–मानुषेषु मनुष्यलोकेषु ॥ १५ ॥

रा० टी०–प्रहृष्ट इति । मानुषेषु सुदुर्लभामलभ्यां मैथिल्याः सत्क्रियामनसूयाकर्तृकसत्कारं दृष्ट्वा रामो लक्ष्मणश्च प्रहृष्टोऽभवत् ॥ १५ ॥

१६] ति० टी०–पुण्यामनसूयया पुण्यया कृतालंकारां सीतां दृष्ट्वा शर्वरीमुवास ॥ १६ ॥

रा० टी०–तत इति । ततः सीतासत्कृतिदर्शनानन्तरं तापसैः अर्चितः प्रीतः स रघुनन्दनो रामः पुण्यामनसूयासमर्पितपुण्यालंकारादिविशिष्टां शशिनिभाननां सीतां दृष्ट्वा शर्वरीं रात्रिमुवास ॥ १६ ॥

१७] ति० टी०–आपृच्छेताम् । वनान्तरगमनार्थमिति शेषः ॥ १७ ॥

रा० टी०–तस्यामिति । तस्यां वासाधिकरणीभूतायां रात्र्यां व्यतीतायां नरव्याघ्रौ रामलक्ष्मणौ अभिषिच्य स्नात्वा हुता अग्नयो यैस्तान् वनगोचरान् तापसान् अपृच्छेतां प्रार्थयेतां वनान्तरगमनायेति शेषः ॥ १७ ॥

गो० टी०–तस्यामिति । अभिषिच्य हुताग्निकान् स्नात्वा कृतहोमान् ॥ १६ ॥

१ स्रजमिति गो. पाठः । २ अपृच्छेतामिति रा. पाठः ।

तावूचुस्ते वनचरास्तापसा धर्मचारिणः । वनस्य तस्य संचारं राक्षसैः समभिप्लुतम् ॥ १८ ॥
रक्षांसि पुरुषादानि नानारूपाणि राघव । वसन्त्यस्मिन्महारण्ये व्यालाश्च रुधिराशनाः ॥ १९ ॥
उच्छिष्टं वा प्रमत्तं वा तापसं ब्रह्मचारिणम् । अदन्त्यस्मिन्महारण्ये तान्निवारय राघव ॥ २० ॥
एष पन्था महर्षीणां फलान्याहरतां वने । अनेन तु वनं दुर्गं गन्तुं राघव ते क्षमम् ॥ २१ ॥
इतीरितः प्राञ्जलिभिस्तपस्विभिर्द्विजैः कृतस्वस्त्ययनः परंतपः ।
वनं सभार्यः प्रविवेश राघवः सलक्ष्मणः सूर्य इवाभ्रमण्डलम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽयोध्याकाण्ड एकोनविंशाधिकशततमः सर्गः ॥ ११९ ॥

१८] ति० टी०–संचारं देशम् । द्वाद्विरार्षी । समभिप्लुतं सम्यगुपद्रुतम् ॥ १८ ॥

रा० टी०–ताविति । ते रामलक्ष्मणाभ्यां पृष्टाः धर्मचारिणस्तापसाः तस्य वनस्य संचारं देशं राक्षसैः समभिप्लुतं व्याप्तं तौ रामलक्ष्मणावूचुः संचारशब्दः स्वार्थाणन्तः ॥ १८ ॥

गो० टी०–ताविति । वनस्य संचारं कन्दमूलफलाद्याहरणार्थं संचारं राक्षसैः समभिप्लुतं सम्यक् उपद्रुतमूचुः ॥१७॥

१९] ति० टी०–व्याला हिंस्रपशवः । 'सर्पो हिंस्रः-पशुर्व्यालः' इत्यमरः ॥ १९ ॥

रा० टी०–व्यापनप्रकारं वदन्नाह–रक्षांसीति । हे राघव ! नानारूपाणि अनेकवेषधराणि पुरुषादानि पुरुषभक्षणशीलानि रक्षांसि रुधिराशनाः व्यालाः सर्पाः हिंस्रपशवश्च अस्मिन् महारण्ये वसन्ति 'सर्पो हिंस्रपशुर्व्यालः पुंसि श्वापदसर्पयोः' इत्यमरः उभयार्थलाभस्त्वेकशेषत्वात् ॥ १९ ॥

गो० टी०–रक्षांसीति । व्याला हिंस्रपशवः । 'सर्पहिंस्रपशू व्यालौ' इत्यमरः ॥ १८–२० ॥

२०] ति० टी०–उच्छिष्टमशुचिम् । प्रमत्तमसावधानम् । तान्रक्षोव्याघ्रान् ॥ २० ॥

रा० टी०–नन्वं किं तद्वासेनेत्यत आह–उच्छिष्टमिति । उच्छिष्टमुच्छिष्टस्पर्शादिना शुद्धिरहितमित्यर्थः । प्रमत्तमनवधानं वा तापसं ब्रह्मचारिणं च अस्मिन् महारण्ये अदन्ति तान् निवारय तद्वाक्षसत्वं निवर्तयेत्यर्थः ॥ २० ॥

२१] ति० टी०–क्षमं युक्तम् ॥ २१ ॥

रा० टी०–एष इति । वने फलान्याहरताम् ऋषीणाम् एषः पन्थाः हे राघव ! अनेनैव पथा दुर्गं वनं गन्तुं ते क्षमञ्चितम् ॥ २१ ॥

२२] ति० टी०–इतीरित एवमुपदिष्टमार्गः । कृतस्वस्त्ययनः कृतमङ्गलाशीर्वादः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीयआदिकाव्येऽयोध्याकाण्ड एकोनविंशाधिकशततमः सर्गः ॥ ११९ ॥

रा० टी०–इतीति । प्राञ्जलिभिः प्रणयसूचकबद्धयुगुलकरैस्तपस्विभिर्द्विजैः इत्यनेन प्रकारेण ईरितः कथितः यात्रायै आज्ञापित इत्यर्थः, अत एव कृतस्वस्त्ययनः कृतं स्वस्त्ययनं यस्मै सः सभार्यः सलक्ष्मणः परंतपो राघवो रामः अभ्रमण्डलं सूर्य इव वनं प्रविवेश ॥ २२ ॥


स्वस्ति श्रीरघुनाथपादकमलद्वन्द्वप्रसादाद्वरो-
ऽयोध्याया हि शिरोमणिः समभवत्पूर्णस्त्रिवेणीतटे ।
स्वान्तध्वान्तनिवर्तनद्युमणिको रामायणस्थः सतां
वेद्यः श्रौतपथः शुभार्थनिचयः श्रीरामसंतोषकः ॥ १ ॥
नमो रामाय सीतायै लक्ष्मणाय हनूमते ।
यत्कृपालेशमात्रेण विघ्नवाद्याः प्रभवन्ति हि ॥ २ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावयोध्याकाण्डे एकोनविंशाधिकशततमः सर्गः ॥११९॥

गो० टी०–इतीवेति । तैः प्राञ्जलिभिः तपस्विभिः द्विजैः कृतस्वस्त्ययनः कृतमङ्गलाशीर्वचनः ॥ २१ ॥

इत्थं श्रीमच्छठारेश्वरणसरसिजद्वन्द्वनिर्द्वन्द्वसेवा-
निर्धूताशेषमोहो निरुपमधिषणः कौशिकानां कुलेन्दुः ।
गोविन्दार्यो निवार्य प्रतिकथकगजस्तोमपञ्चास्यरूप-
टीकां पीताम्बराख्यां व्यतनुत विपुलां साधु साकेतकाण्डे ॥१॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे पीताम्बराख्याने-ऽयोध्याकाण्डव्याख्याने एकोनविंशोत्तरशततमः सर्गः ॥११९॥



इति श्रीमद्वाल्मीकिरामायणेऽयोध्याकाण्डं समाप्तम् ।

इति शिवम्

Parimal Sanskrit Series No 11

RAMAYAṆA OF VĀLMĪKI

WITH THE COMMENTARIES
TILAKA OF RĀMA, RĀMĀYAṆAŚIROMAṆI OF
ŚIVASAHĀYA AND BHŪṢAṆA OF GOVINDARĀJA

EDITED BY

SHASTRI SHRINIVASA KATTI MUDHOLAKARA

INCLUDES AN EXHAUSTIVE INTRODUCTION
IN SANSKRIT AND INDEX OF VERSES

by

SATKARI MUKHOPADHYAYA

Vol. III

ARANYAKĀṆḌA

Sole Distributors :
MEHARCHAND LACHHMANDAS
ORIENTAL BOOKSELLERS & PUBLISHERS
DARYAGANJ, NEW DELHI-110 002

Published by
PARIMAL PUBLICATIONS
Publishers & Booksellers
33/17 Shakti Nagar
Delhi-110 007 (India)

© Parimal Publications

1983

Price : **Rs. 170**

Printed by :
A. K. Distributors,
at Delux Offset Printers,
Delhi-110 035.

परिमल संस्कृत ग्रन्थमाला संख्या-११

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रा मा य ण म्

रामप्रणीतरामायणतिलक—शिवसहायप्रणीत
रामायणशिरोमणि—गोविन्दराजप्रणीत-
रामायणभूषणेति-टीकात्रयेणोपस्कृतम् ।

तच्च

कट्टी श्रीनिवासशास्त्रिभिः

सशोधितं पाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्

तथा

श्रीसातकडिमुखोपाध्यायशर्मणा

विनिर्मितया विशदभूमिकया श्लोकानुक्रमण्या च
सनाथीकृतम् ।

तृतीयो भागः

[अरण्यकाण्डम्]

परिमल पब्लिकेशन्स

दिल्ली — अहमदाबाद

प्रकाशक :

परिमल पब्लिकेशन्स

३३/१७ शक्तिनगर

दिल्ली-११०००७

(भारत)

अधिकृत विक्रेता :

मेहरचन्द लछमनदास

प्रकाशक एवं पुस्तक-विक्रेता

१ अन्सारी रोड, दरियागंज

नई दिल्ली-११०००२ (भारत)

१९८३

मूल्य : रु० १७०

मुद्रक :

ए० के० डिस्ट्रीब्यूटर्स, द्वारा

डीलक्स आफसेट प्रिंटर्स

दिल्ली-११००३५

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिप्रणीतं

रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीये(भूषणे)ति-

टीकात्रयसमलंकृतम् ।

अरण्यकाण्डम् ।

प्रथमः सर्गः ।

कथां विस्तारयन्वाल्मीकिस्तापसाश्रमालंकृतं दण्डकारण्यमुपश्लोकयति । तत्रत्यतापसाः संप्राप्तं राममर्घ्यादिना संपूज्य प्रणामादिभिस्तोषयन्तः स्वरक्षणमर्थयमानाः प्रशशंसुः ।

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् । रामो ददर्श दुर्धर्षस्तापसाश्रममण्डलम् ॥ १ ॥

तिलकटीका ।

१] अथ ऋषिदर्शितवर्त्मना रामस्य दण्डकारण्यप्रवेशमाह—प्रविश्येति । ऋषिदर्शितवर्त्मनेति शेषः, दण्डकारण्यं तत्संज्ञकं महारण्यं दण्डकस्य राज्ञो देशः [illegible]कोपवशादरण्यमभूत् । ततः प्रभृति दण्डकारण्यसंज्ञा तस्य । प्रायेण महाराष्ट्रदेशोऽयम् । आत्मवान्स्वायत्तचित्तः, दुर्धर्षो द्विषद्भिरप्रधृष्यः । 'दुर्धर्षम्' इति पाठे रक्षोपुतत्वादशक्यप्रवेशमित्यर्थः, मण्डलं समूहः ॥१॥

रामायणशिरोमणिः ।

सदा सीतारामं परममभिरामं श्रुतिदृशां
मुनीनां संसेव्यं विविधवनवासैकमनसम् ।
नमामः सौमित्रिं रघुपतिपदाब्जैकनिरतं
प्रयागं तीर्थानां नृपतिमिव [illegible]तिचरणम् ॥ १ ॥
इभमन्तं वन्दे सकलसुखवन्तं सुरहतं
सदा संखेलन्तं पवनतनयं रामहृदयम् ।
उदारं संवन्दे [illegible]रचरणकमलानि सततं
यतः संप्राप्तव्याः सकलपुरुषार्थाः सुमनसाम् ॥ २ ॥
वाल्मीकिरामायणकाण्डयुग्मे
कृत्वासु टीकां शुभवेणिकातटे ।
आरण्यकाण्डस्य करोमि सेव्यं
रामायणार्थं हि शिरोमणिं मुदा ॥ ३ ॥
यद्दर्शनाद्रामपदारविन्दे
भक्तिः परा स्यात्सकलार्थमूलम् ।
विष्ण्वादिवन्द्येऽखिलविघ्ननघ्ने
स्वतेजसा द्योतितसूर्यचन्द्रे ॥ ४ ॥
सीतारामसमारम्भां शुकाचार्यादिमध्यगाम् ।
[illegible]र्यन्तां वन्दे गुरुपरंपराम् ॥ ५ ॥

रामकर्तृकदण्डकारण्यप्रवेशं वदन् तद्धेतुमाह—प्रविश्येति । दण्डकारण्यं दण्डकारण्यसंज्ञकं महदेव अरण्यं वनं प्रविश्य दुर्धर्षैः धर्षयितुमशक्यो रामस्तु तापसाश्रममण्डलं तापसानां परमात्मविचारशीलानामाश्रममण्डलं पर्णशालासमूहं ददर्श । तत्संज्ञायां निमित्तं तु दण्डकाभिधराजस्य देशः [illegible]कोपवशादरण्यत्वं प्राप्त इति । 'दुर्धर्षम्' इतिपाठे रक्षोपुतत्वादशक्यप्रवेशमित्यर्थ इति भट्टाः ॥ १ ॥

भूषणटीका ।

वात्स्यश्रीशठकोपदेशिकवरश्रीपादरेणवश्रये-
दृब्धा निर्मलया गिरीक्ष्य बहुधा वल्मीकजन्माश्रयम् ।

कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् । यथा प्रदीप्तं दुर्दर्शं गगने सूर्यमण्डलम् ॥ २ ॥
शरण्यं सर्वभूतानां सुसंमृष्टाजिरं सदा । मृगैर्बहुभिराकीर्णं पक्षिसंघैः समावृतम् ॥ ३ ॥
पूजितं चोपनृत्तं च नित्यमप्सरसां गणैः । विशालैरग्निशरणैः सुग्भाण्डैरजिनैः कुशैः ॥ ४ ॥
समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम् । आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैर्वृतम् ॥ ५ ॥
बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम् । पुष्पैश्चान्यैः परिक्षिप्तं पद्मिन्या च सपद्मया ॥ ६ ॥

श्रीमत्कौशिकवंशसागरमणिर्गोविन्दराजाङ्घ्रयो
व्याचक्षेऽहमरण्यकाण्डमधुना पश्यन्तु निर्मत्सराः ॥ १ ॥
श्रीविष्णोरंशजस्य दक्षा पीताम्बरं महत् ।
अर्पये परया लक्ष्म्या राजन्तीं रत्नमेखलाम् ॥ २ ॥

एवं पूर्वस्मिन् काण्डे जगज्जन्मादिकारणस्य वेदान्तवेद्यस्य ब्रह्मणो निरस्तसमस्तावियत्वं नित्यानन्दपरिपूर्णत्वं निखिलान्तर्यामित्वं निरतिशयौज्ज्वल्यं निरुपमधर्मप्रवर्तकत्वमित्याद्यनन्तकल्याणगुणजातमुपवर्णितम् । संप्रति सज्जनसंरक्षणरूपं धर्मविशेषमभिधातुमारण्यकाण्ड आरभ्यते । यद्वा पूर्वकाण्डे पितृवचनपरिपालनरूपो धर्मः सङ्क्षिप्तोऽतोऽस्य इति प्राधान्येन दर्शितम् । अथ सज्जनसंरक्षणरूपं धर्मविशेषं प्रतिपादयितुमारण्यकाण्ड आरभ्यते—प्रविश्येत्यादि । तुशब्दः पूर्वारण्यवैलक्षण्यं द्योतयति । महारण्यम् इतरदुरवगाहं दण्डकारण्यं दण्डकस्य राज्ञोऽरण्यं शुक्रशापादरण्यभूतं जनपदं प्रविश्य आत्मवान् धैर्यवान् दुरवगाहमहागहनप्रवेशेऽप्यजनितभयलेश इत्यर्थः । तत्र हेतुमाह—दुर्धर्ष इति हिंसादिभिरप्रधृष्य इत्यर्थः । रामः तापसानां तपस्विनाम् आश्रममण्डलम् आश्रमसमूहम् । 'तपोवने मठे ब्रह्मचर्यादाश्रमोऽस्त्रियाम्' इति वाणः । ददर्श ॥ १ ॥

२] ति० टी०—आश्रममण्डलं वर्णयति—कुशेति । परिक्षिप्तं व्याप्तम् । ब्राह्मी लक्ष्मीर्ब्रह्मविद्याभ्यासजनितस्तेजोविशेषः तत्समाहृतत्वादेव गगने प्रदीप्तं दुर्दर्शं रक्षआदिभिर्दुरुपलक्ष्यं सूर्यमण्डलं यथा तथा भुवि स्थितम् ॥ २ ॥

रा० टी०—मण्डलमेव विशेषयन्नाह—कुशेत्यादिभिः । कुशचीराणि परिक्षिप्तानि यस्मिंस्तं कुशचीराणां परिक्षिप्तं परिक्षेपो यस्मिन् तमिति वा ब्राह्म्या ब्रह्मसंबन्धिन्या लक्ष्म्या ब्रह्मविद्यावैदुष्यैः, समाहृतं सम्पन्नयुक्तमत एव दुर्दर्शं गगने सूर्यमण्डलमिव प्रदीप्तं प्रकाशितं शरण्यमिति सर्वभूतानां शरण्यं स्थित्यर्हं सुसंमृष्टानि अजिराणि अङ्गनानि येषु तं मृगैः आकीर्णं व्याप्तं पक्षिणां संघैः समूहैः समाहृतम् ॥२॥३॥

गो० टी०—अभिगम्यत्वायाश्रममण्डलं वर्णयति—कुशेत्यादिभिः सार्धसप्तश्लोकैः । कुशैः यज्ञार्थमाहृतैः चीरैः स्नानानन्तरमातपे परिशोषणार्थं क्षितौवल्कलैश्च परिक्षिप्तं व्याप्तं ब्रह्म वेदः तत्संबन्धिनी वेदाध्ययनतदर्थानुष्ठानजन्येत्यर्थः, तया लक्ष्म्या श्रिया समाहृतं समन्तादाहृतम् अत एव गगने दीप्तं गगनमध्यस्थमित्यर्थः, दुर्दर्शं सूर्यमण्डलं यथा तथाऽवस्थितमित्यर्थः, तद्वद्रक्षोभिरनभिभवनीयम् । उदयास्तमययोर्हि सूर्यस्य मन्देहाख्यरक्षोभिराक्रमणं नतु मध्याह्ने ॥ २ ॥

३] ति० टी०—शरण्यं वासायार्हं सर्वत्राणार्हं च । सुसंमृष्टाजिरमलंकृतप्राङ्गणम् ॥ ३ ॥

गो० टी०—अत एव शरण्यं शरणार्हम् "तदर्हति" इति यत्प्रत्ययः । सहजवैरप्रयुक्तवध्यघातुकभावाभावेन सर्वप्राणिनां वरणीयमित्यर्थः, रक्षोभ्यो भीतानां वासार्हं वा 'शरणं गृहरक्षित्रोः' इत्यमरः । सदा सुसंमृष्टाजिरं सदा सम्यक् संमृष्टाङ्गणम् 'अङ्गणं चत्वराजिरे' इत्यमरः । सर्वभूतशरण्यत्वं प्रपञ्चयति—मृगैरिति ॥ ३ ॥

४] ति० टी०—अप्सरसां गणैरुपनृत्तमुप समीपे कृतनर्तनम् अतिमनोरमदेशत्वात् । अत एव तैः पूजितं च । अग्निशरणैरग्निहोत्रगृहैः स्रुगादिभिर्यज्ञोपकरणैश्च शोभितम् ॥ ४ ॥

रा० टी०—पूजितमिति । अप्सरसां गणैः समूहैः पूजितं शंसितमत एव उपनृत्तं समीपे संपादितनर्तनं विशालैर्विस्तीर्णैः अग्निशरणैर्यागशालाभिः सुग्भाण्डैः यागसामग्रीभूतसुग्भिः पात्रैश्च अजिनैः मृगादित्वग्भिः ॥ ४ ॥

गो० टी०—प्रनृत्तं प्रकृष्टनृत्तवत् अर्शआद्यच् बहुश्रीहिर्वा । अतिरमणीयप्रदेशत्वादेवतासान्निध्याद्वा नर्तनम् अत एव पूजितम् अग्निशरणैः अग्निहोत्रगृहैः सुक्सुक्खानि भाण्डानि यज्ञपात्राणि सुग्भाण्डानि स्फ्यश्च कपालानि चेत्याद्याभातानि तैः । 'वणिङ्मूलधने पात्रे भाण्डम्' इति वैजयन्ती । कुशैः परिस्तरणार्थैः कुशचीरेत्यत्र संगृहीतकुशोक्तिः ॥ ४ ॥

५] ति० टी०—आरण्यैररण्यभवैः ॥ ५ ॥

रा० टी०—समिदादिभिश्च शोभितमारण्यैः अरण्यजनितैर्हेतं युक्तम् ॥ ५ ॥

गो० टी०—अरण्ये भवैः आरण्यैः ॥ ५ ॥

६] ति० टी०—बलिहोमार्चितं वैश्वदेवहोमबलिहरणैः सत्कृतं, ब्रह्मघोषो वेदघोषस्तेन निनादितं संजातनिनादम् । पद्मिनी सरः, सपद्मया पद्मपुष्पयुक्तया ॥ ६ ॥

रा० टी०—बलिहोमार्चितं बलिभिः उपहारैः होमैश्च अर्चितं पुण्यं दर्शनमात्रेण पुण्यजनकं ब्रह्मघोषेण वैदिकशब्दोच्चारणशब्देन निनादितं शब्दितमन्यैः चित्रकूटवनवर्तिपुष्पविलक्षणैः पुष्पैः परिक्षिप्तं सपद्मया पद्मसहितया पद्मिन्या सरस्या अर्चितं युक्तम् ॥ ६ ॥

गो० टी०—बलिभिः भूतबलिप्रभृतिभिः होमैर्वैश्वदेवादिहो-

१ च प्रनृत्तमिति गो. पाठः । २ क्वचीति गो. पाठः ।

फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः । सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्युतम् ॥ ७ ॥
पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः । तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम् ॥ ८ ॥
ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितम् । तैर्दृष्टा राघवः श्रीमांस्तापसाश्रममण्डलम् ॥ ९ ॥
अभ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः । दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः ॥ १० ॥
अभिजग्मुस्तदा प्रीता वैदेहीं च यशस्विनीम् । ते तु सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणम् ॥ ११ ॥
लक्ष्मणं चैव दृष्ट्वा तु वैदेहीं च यशस्विनीम् । मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन्दृढव्रताः ॥ १२ ॥
रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम् । ददृशुर्विस्मिताकारा रामस्य वनवासिनः ॥ १३ ॥

मैश्च अर्चितं सत्कृतं ब्रह्मघोषैर्वेदघोषैः निनादितं संजाततिनादं पुष्पैः देवपूजार्थस्रुपश्चितैः तपश्चर्या पत्नसहितया पत्निन्या सरस्या ॥ ६ ॥

७] ति० टी०—पुराणैर्ऋषिभिः ॥ ७ ॥

रा० टी०—फलमूलाशनैः फलमूलमात्रभोजनैः दान्तैः नियमितोभयकरणैः चीरकृष्णाजिनाम्बरैः चीराणि क्षुद्रपटाः कृष्णाजिनानि च तान्येवाम्बराणि येषां तैः सूर्यवैश्वानराभैः सूर्याग्निसदृशैः पुराणैः चिरन्तनैर्ऋषिभिर्युतम् ॥ ७ ॥

गो० टी०—ऋषिभि तारतम्यप्रदर्शनार्थं सूर्यवैश्वानराभैरित्युपमानद्वयं पुराणैर्ऋषिभिः ॥ ७ ॥

८] ति० टी०—ब्रह्मभवनं ब्रह्मलोकः, ब्रह्मघोषो वेदघोषः ॥ ८ ॥

रा० टी०—नियताहारैः नियमिताहारवद्भिः पुण्यैः परमर्षिभिः शोभितमत एव ब्रह्मभवनप्रख्यं ब्रह्मलोकसदृशं ब्रह्मघोषैः परमात्मपर्यवसानकशब्दैः निनादितम् ब्रह्मविद्भिः परमात्मबोधनतत्परैः महाभागैः ब्राह्मणैरुपशोभितम् तत्तापसाश्रममण्डलमस्तीति शेषः, तत्तापसाश्रममण्डलं श्रीमान् रामः महद्धनुर्विज्यं कृत्वा अभ्यगच्छत् । सार्धश्लोकाष्टकमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—परमर्षिभिः उक्तमुनीनामपि पूजनीयैः तद्प्रसिद्धं ब्रह्मभवनप्रख्यं ब्रह्मलोकतुल्यप्रसिद्धिकं ब्रह्मघोषैः कर्मकाण्डिकवेदमन्त्रघोषैः निनादितं ब्रह्मविद्भिः परब्रह्मज्ञानिभिः महाभागैः महाभाग्यैः 'भागो रूपार्थके प्रोक्तो भागधेयैकदेशयोः, इति विश्वः । एतादृशं तापसाश्रममण्डलं ददर्शेति पूर्वेणान्वयः ॥ ८ ॥

९] ति० टी०—ब्रह्मविद्भिः सर्वत्र ब्रह्मज्ञानप्रत्यक्षज्ञानवद्भिः । ब्राह्मणैरुक्तलक्षणैरन्यार्थब्राह्मणैस्तादृशैरित्यर्थः । ब्रह्मभवनप्रख्यत्वमाश्रमस्य ॥ ९ ॥

गो० टी०—स इति । विज्यं विसृष्टज्यौर्वीकं कृत्वा विनीतवेषप्रवेदयत्वादाश्रमाणामाश्रमसुगपदादिभवनिर्देशार्थं च विज्यकरणम्, अभ्यगच्छत् अभिजग्मुरभूत् गतः ॥ ९ ॥

१०—१२] ति० टी०—विज्यमवरोपितगुणम् आश्रमनतिमगादिभ्रान्तिनिर्देशार्थमिति भावः । दिव्यज्ञानोपपन्ना आदिगुर्ब्रह्मतारो रामो रावणादीन्हनिष्यतीत्येवं ज्ञानदृष्ट्यास्ते रामं सीतां च, लक्ष्मणं च, दृष्ट्वा प्रीता अभिजग्मुरभिमुख्येन जग्मुः । उद्यन्तं सोममिव तद्वत्प्रियदर्शनम् "सोमोऽस्माकं ब्राह्मणानां राजा" इति श्रुतेः । स्वकुलरक्षकसोमराजामिव स्वरक्षकं धर्मचारिणं रामं दृष्ट्वा लक्ष्मणं यशस्विनीं पातिव्रत्यशोभवतीं रक्षःकुलसंहारजयशोभवतीं च सीतां दृष्ट्वा अत एवायं रक्षणप्रार्थनोपपद्यते । मङ्गलान्याशीर्वादान्प्रत्यगृह्णन्संरक्षकेष्टदेवताबुद्ध्या प्रतिगृहीतवन्तः ॥ १०—१२ ॥

रा० टी०—दिव्येति । दिव्यज्ञानोपपन्नास्ते महर्षयः रामं वैदेहीं च दृष्ट्वा प्रीताः सन्तः अभिजग्मुः तत्संङ्गमं प्राप्तुः । अर्धद्वयमेकान्वयि ॥ १० ॥

गो० टी०—दिव्येति । दिव्यं लोकविलक्षणं ज्ञानं तेन उपपन्ना युक्ताः अतीतानागतज्ञानवन्त इत्यर्थः, रामोऽयं रावणवधार्थमवतीर्णो विष्णुः सीता लक्ष्मीः लक्ष्मणश्च तदंश इति विज्ञाततदवतारहस्या इति यावत् ॥ १० ॥

रा० टी०—त इति । ते ऋषयः उद्यन्तं सोमं चन्द्रमसमिव धर्मचारिणं रामं लक्ष्मणं च वैदेहीं दृष्ट्वा मङ्गलानि मङ्गलप्रापकवाक्यानि प्रयुञ्जानाः सन्तः प्रत्यगृह्णन् स्वसेव्यत्वेन स्वीचक्रुः ॥ ११ ॥ १२ ॥

गो० टी०—ते तमित्यादि । सार्धश्लोक एकान्वयः । ते निकायाः तं राक्षसनिवासाद्दूरीर्णं रामम् उद्यन्तं सोममिव स्थितम् अन्धकारनिवर्तनप्रवृत्तं चन्द्रमिव स्थितम्, यद्वा उद्यन्तं सोममिव प्रतिपच्चन्द्रमिवार्चनीयम्, यद्वा वनराज्यन्तःप्रादुर्भवत्तया मेघाद्ततमिन्दुमिव स्थितं धर्मचारिणं दृष्ट्वा स्वार्चयमाणधर्मारण्यं साक्षात्कृत्य, यद्वा इतः पूर्वं धर्मवीर्येण पश्यन्ति संप्रति चक्षुषा साक्षात्कुर्वन्तीत्यर्थः । तथा लक्ष्मणं च वैदेहीं च दृष्ट्वा मङ्गलानि प्रयुञ्जानाः स्वार्थेतिरक्ताम्बर्थनात् प्रागेव मङ्गलानि प्रयुञ्जानाः रामस्य सौन्दर्यसौकुमार्यादिकं दृष्ट्वा रक्षोभूयिष्ठेऽत्र वने किं भविष्यतीति व्याकुलहृदयतया तस्मै विरोधिनिरसनवचनानि प्रयुञ्जानाः दृढव्रताः आश्रयणीयतद्वचनानि माः सन्तः प्रत्यगृह्णन् प्रतिगृहीतवन्तः, प्रस्तुत्यानुरूपप्रदानानुपचारम् [illegible]त्यर्थः ॥ ११ ॥ १२ ॥

१३] ति० टी०—रूपसंहननम् 'अन्यत्रापि दृश्यते' इत्यनुसारेण प्रेक्षणीयैर्विभूषणैः । येन भूषितवद्भासि तद्भूषणमिति कथ्यते ॥

---

१ कृतमिति गो. पाठः । २ स दृष्ट्वेति गो. ते दृष्ट्वेति रा. पाठः । ३ अभ्यगच्छंस्तमेति गो. पाठः । ४ तमिति गो. पाठः । ५ चारिणं इति गो. पाठः ।

वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव । आश्चर्यभूतान्ददृशुः सर्वे ते वनवासिनः ॥ १४ ॥
अत्रैनं हि महाभागाः सर्वभूतहिते रताः । अतिथिं पर्णशालायां राघवं संन्यवेशयन् ॥ १५ ॥
ततो रामस्य सत्कृत्य विधिना पावकोपमाः । आजह्रुस्ते महाभागाः सलिलं धर्मचारिणः ॥ १६ ॥
मङ्गलानि प्रयुञ्जाना मुदा परमया युताः । मूलं पुष्पं फलं सर्वमाश्रमं च महात्मनः ॥ १७ ॥

इति लक्षितं रूपं तद्युक्तं संहननमापादकेशं सुश्लिष्टसंबन्धः । 'अङ्गप्रत्यङ्गकानां च संनिवेशे यथोचितम् । सुश्लिष्टसंधिबन्धो यस्तत्सौन्दर्यमिहोच्यते ॥' इत्युक्तलक्षणं सौन्दर्यम् । लक्ष्मीं कान्तिलावण्यम् । 'मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु लावण्यं तन्निगद्यते ॥' सौकुमार्यं परचित्तग्राहितालक्षणं मार्दवं वा । विस्मितानामद्भुतवस्तुदर्शनवतां य आकारो मुखप्रसादविस्फारितेक्षणत्वादिरूपस्तथाविधाकाराः । विस्मितचित्ता इति यावत् वनवासिन इति रामविशेषणम् । तादृशस्यापीदृशं रूपादीत्याश्चर्यम् ॥ १३ ॥

रा० टी०—रूपेति । रामस्य रूपसंहननं प्राकृतविलक्षणरूपसन्निवेशं लक्ष्मीं शोभासंपत्तिं सौकुमार्यं सुकुमारतां सुवेषतां शोभनवेषं विस्मिताकाराः विलक्षणाकारविषयकविस्मयवन्तः वनवासिनो ददृशुः, आकारे विस्मिताः विस्मिताकारा राजदन्तादित्वात् परत्वम् ॥ १३ ॥

गो० टी०—मङ्गलाशासननिमित्तं सौन्दर्यसौकुमार्यादिकमाह—रूपेति । रूपस्य शरीरस्य संहननं समः समविभक्ताङ्ग इत्युक्तावयवसंस्थानविशेषं लक्ष्मीं समुदायशोभां सौकुमार्यं पुष्पहासतुल्यकोमलतां सुवेषतां शोभनलावण्यवत्तां लावण्यस्वरूपमुक्तम् 'मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते' इति । विस्मितानामाकारा इवाकारा येषां ते विस्मिताकाराः विस्मयावेदकस्वमुखप्रसादफुल्लनेत्रत्वादियुक्ता इत्यर्थः, वनवासिनः विकारहेतौ सत्यप्यविकृतचित्ता इत्यर्थः, वनवासिनोऽपि विस्मिताकाराः सन्तः रामस्य रूपसंहननादिकं ददृशुः । अभेदेन प्रत्ययद्योतनार्थं चकाराप्रयोगः, यद्वा अभूषणेऽपि भूषितवद्भासमानत्वं रूपम् । तथोक्तम्—'अङ्गान्यभूषितान्येव वलयाद्यैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपमिति कथ्यते' इति । संहननं सौन्दर्यं तदप्युक्तम्—'अङ्गप्रत्यङ्गकानां यः संनिवेशो यथोचितः । सुश्लिष्टसन्धिबन्धः स्यात्तत्सौन्दर्यमिहोच्यते' इति । लक्ष्मीं लावण्यं तत्रोक्तं पूर्वमेव सौकुमार्यमप्युक्तमेव । सुवेषताम् उचितप्रकारसंपन्नत्वम् ॥ १३ ॥

१४] ति० टी०—तदेवाह—वैदेहीमिति । अनिमेषैर्निमेषरहितैः । आश्चर्यभूतान्रूपादिभिर्विस्मयप्रापकान्सर्वे ते वनवासिन ऋषयो मुन्यादयश्च । तद्दर्शनानन्दविच्छेदभयेन च निमेषराहित्यम् ॥ १४ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—वैदेहीमिति । आश्चर्यभूतान्विलक्षणरूपादिभिः॥ वैदेह्यादीननिमिषैः निमेषरहितैरिव नेत्रैः सर्वे वनवासिनः ददृशुः ॥ १४ ॥

गो० टी०—एतं न्यायं सीतालक्ष्मणयोरप्यतिदेष्टुमाह—वैदेहीमिति । सर्वे वनचारिणः आश्चर्यभूतान् अदृष्टपूर्वतया आश्चर्यावहान् वैदेहीं लक्ष्मणं रामं च दिव्यरूपदर्शनजनितानन्दभङ्गभीरुतया विस्मयविस्फारितेक्षणतया च सर्वथा निर्निमेषैरिव स्थितैर्नेत्रैरुपलक्षिताः सन्तः ददृशुः । अनेन पूर्वश्लोके विस्मिताकारा इत्येतद्विवृतम् ॥ १४ ॥

१५] ति० टी०—अत्राश्रममण्डले । अतिथिं न्यायतः पूजार्हम् । पर्णशालायां प्रातिस्विक्याम् ॥ १५ ॥

रा० टी०—अत्रेति । महाभागा ऋषयः अत्र प्रसिद्धायां पर्णशालायामतिथिं रामं संन्यवेशयन् ॥ १५ ॥

गो० टी०—अत्रेति । अत्र आश्रममण्डले महाभागाः महाभाग्याः ऋषयः सर्वभूतहिते रतम् अतिथिं न्यायतः पूजार्हम् एनं राघवं पर्णशालायां स्वस्वपर्णशालायां सन्न्यवेशयन् स्थापयामासुः ॥ १५ ॥

१६] ति० टी०—रामस्य सत्कृत्येति कर्मणः शेषत्वविवक्षायां षष्ठी । भवदर्शनादिभिर्वयं धन्या इत्यादिप्रियवचनैः सत्कृत्य सलिलं सलिलादिपूजाद्रव्यमाजह्रुः रामपूजार्थमिति शेषः ॥ १६ ॥

रा० टी०—तत इति । ततः पर्णशालाप्रापणानन्तरं पावकोपमा ऋषयः धर्मचारिणो रामस्य विधिना सत्कृत्य सलिलमर्घ्यादिसाधनीभूतजलम् आजह्रुः आनिन्युः ॥ १६ ॥

गो० टी०—तत इति । रामस्य सत्कृत्येति षष्ठ्यार्षी "न लोकाव्ययनिष्ठा—" इदिना निषेधात् । सत्कृत्य सत्कारं कृत्वा कुशलप्रश्नादिकं कृत्वेत्यर्थः । पावकोपमा इत्यनेन रामस्य पवित्राणां पवित्रत्वमुक्तम् । धर्मचारिण इत्यनेन सत्कारस्य धर्माचरणफलत्वमुक्तम् । महाभागा इति सुकृतपरिपाक उच्यते । सलिलम् अर्घ्यादुचितम् आजह्रुः ॥ १६ ॥

१७] ति० टी०—आश्रमं च स्ववासस्थानभूतम् ॥ १७ ॥

रा० टी०—मङ्गलानीति । परमया अत्युत्कृष्टया मुदा हर्षेण मङ्गलानि प्रयुञ्जानाः धर्मज्ञाः ऋषयः मूलादिकं निवेदयित्वा प्राञ्जलयः सन्तः अब्रुवन् आर्षो व्यत्ययभावः । सार्धश्लोक एकान्वयी ॥ १७ ॥

गो० टी०—मूलमिति । धर्मज्ञाः शेषिणि शेषवृत्तिरूपधर्मज्ञाः प्राञ्जलयः प्रकृष्टाञ्जलयः मूर्ध्नि कृताञ्जलय इत्यर्थः, महात्मनः शेषिणो रामस्य वन्यं मूलादिकमाश्रमं च निवेदयित्वा इमानि भवदीयानि यथेष्टं विनियुङ्क्ष्वेति निवेद्य ततोऽब्रुवन् ॥ १७ ॥

१ रतमिति गो. पाठः । २ ब्रह्मचारिण इति रा. पाठः । ३ अर्धमेतत् गो. नास्ति ।

निवेदयित्वा धर्मज्ञास्ते तु प्राञ्जलयोऽब्रुवन्। धर्मपालो जनस्यास्य शरण्यश्च महायशाः ॥ १८ ॥
पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः। इन्द्रस्यैवं चतुर्भागः प्रजा रक्षति राघवः ॥ १९ ॥
राजा तस्माद्वरान्भोगान्[1]मान्यान्भुङ्क्ते[4] नमस्कृतः। ते वयं भवता रक्ष्या भवद्विषयवासिनः।
नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः। ॥ २० ॥
न्यस्तदण्डा वयं राजञ्जितक्रोधा जितेन्द्रियाः। रक्षणीयास्त्वया शश्वद्गर्भभूतास्तपोधनाः ॥ २१ ॥

१८] ति० टी०—प्राञ्जलयः निजकुलदेवतावतारत्वात् अन्यथा हि क्षत्रिये ब्राह्मणाञ्जलिकरणस्यानौचित्यं स्यात् ॥ १८ ॥

रा० टी०—तद्वचनाकारमाह—धर्मेति। हे राघव ! धर्मपालः परमधर्मरक्षकः अत एव अस्य एतल्लोकस्थस्य जनस्येन्द्रस्य तदुपलक्षितोर्ध्वलोकस्थस्य च ब्रह्मादिश्वस्य वा शरण्यः शरणे हितः अत एव महायशाः समातिशयरहितयशोविशिष्टः अत एव पूजनीयः सर्वैकर्तृकपूजायोग्यः अत एव मान्यः सर्वप्रकारेण सत्करणीयः अत एव गुरुः सर्वश्रेष्ठः अत एव चतुर्भागः चतुर्णाम् अर्थधर्मकाममोक्षाणां भागः आश्रितकर्तृकसेवा यस्मात् सः दण्डधरः खलनिग्रहकर्ता राजा नित्यराजत्वविशिष्टः भवान् प्रजाः रक्षत्येव ॥ १८ ॥ १९ ॥

गो० टी०—धर्मपाल इति। धर्मपालः वर्णाश्रमधर्मपालकः अस्य आर्तस्य मुनिजनस्य शरण्यः शरणार्हः पूजनीयश्च देवताबुद्ध्या अर्चनार्हः मान्यः राजबुद्ध्या बहुमानार्हः। मान्यत्वे हेतुः राजा दण्डधर इति, पूजनीयत्वे हेतुर्गुरुरिति, दण्डस्य निग्रहस्य धरः कर्ता ॥ १८ ॥

१९] ति० टी०—पूजनीयो देवताबुद्ध्या पालकत्वेन गुरुत्वाद्वा। मान्यो राजबुद्ध्या सत्कारार्हः। तदेवाह—राजेत्यादि। दण्डधरो दुष्टनिग्रहकर्ता। सर्वलोकप्रसिद्धं पूजाहेतुमाह—इन्द्रस्येति। इन्द्रस्याशेषयागपूज्यस्य चतुर्भागश्चतुर्थोंऽशः, यद्वा इन्द्रस्य परमात्मनो विष्णोश्चतुर्थोंऽशः। एवकारेण न यस्यकस्यापि देवतासामान्यस्येति सूचितम् ॥ १९ ॥

गो० टी०—पूज्यत्वे हेत्वन्तरमाह—इन्द्रस्येहेति। इह भूस्वर्गे इन्द्रस्य चतुर्भागः चतुर्थांशः राजा प्रजा रक्षति तस्माद्धेतोः वरान् श्रेष्ठान् भोगान् भुङ्क्ते अतो भवति। इन्द्रस्येति लोकपालान्तराणामुपलक्षणम् 'अष्टाभिर्लोकपालानां मात्राभिः कल्पितो नृपः' इति वचनात्। वस्तुतस्तु इन्द्रशब्दोऽयं परमात्मपरः 'इदि परमैश्वर्ये' इतिधातोस्तत्रैव प्रयुज्यमानत्वात् "इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रौतप्रयोगाच्च। इन्द्रस्य परमात्मनः चतुर्भागः चतुर्थांशः तदवतारभूते व्यक्तिचतुष्टये एकव्यक्तिभूतः भवान् भोगान् भुङ्क्ते इत्यर्थः। पूर्वापरश्लोकानुगुण्याच्चायमेवार्थः नान्यस्यै ऋषयः प्राञ्जलयो भवन्ति नचाश्रमं निवेदयन्ति नापि गर्हाभूतत्वं वदन्ति ॥ १९ ॥

२०] ति० टी०—नमस्कृतः लोकैरिति शेषः। एवं राजमात्रस्याप्येवंविधत्वे साक्षाद्भगवतस्तवैवंविधत्वमिति किमु वक्तव्यमिति ध्वनिः। ते वयमृषयः। रक्ष्यत्वे हेतुः—भवद्विषयवासिन इति। विषयो देशः। सार्वभौमत्वादण्डकारण्यमपि तवेश एवेति भावः। विष्ण्ववतारत्वात्सर्वो देशस्तवैवेति गूढोऽभिप्रायः। नन्वनस्थेन बलहीनेन मया कथं भवन्तो रक्ष्यास्तत्राह—नगरस्थ इति। नगरमयोध्या। त्वं नो राजा रक्षकः राजा जनेश्वर इत्याभ्यामिहामुत्र च त्वमेव रक्षकः सर्वशक्तिसंपन्नस्य नगरवनवासाभ्यामुपचयापचययोरभावादिति ध्वनितम् ॥ २० ॥

रा० टी०—राजेति। तस्माद्ब्रह्मादेरपि गुरुत्वाद्धेतोः नमस्कृतो राजा भवान् वरान् भोगान् भुङ्क्ते अत एव भवद्विषयवासिनस्ते वयं भवता रक्ष्याः ॥ २० ॥

गो० टी०—भवता रक्ष्यत्वे त्वदेशवासित्वमेव निष्प्रमादो हेतुः नोपासनादिकमित्याह—ते वयमिति। ते वयम् आर्ता वयं भवता रक्ष्याः आर्तरक्षणदीक्षितेन त्वया रक्षितुमर्हाः। किं पासनबलेनवक्ष्यते नेत्याह—भवद्विषयवासिन इति। भवद्देशवासित्वमेव भवद्रक्ष्यत्वे हेतुः नान्यः। तत्र प्रमादादिसंभवात् देशवासित्वे तदभावादिति भावः। भवतु तथैव रक्षिष्यामः यदा रक्षणप्रदेशे स्थास्याम इत्यत्राह—नगरस्थ इति। नगरस्थः सिंहासनस्थो वा वनस्थः तद्रहितो वा त्वं स्वतःसिद्धसर्वशक्तिकः निरुपाधिकसर्वशेषी च त्वं नः अस्माकं राजा रक्षकः। तत्र हेतुमाह—जनेश्वर इति निरुपाधिकसर्वशेषीत्यर्थः ॥ २० ॥

२१] ति० टी०—नन्वेते महाप्रभावानां कुतो रक्षकान्तरापेक्षेत्यत आह—न्यस्तेति। त्यक्तभूतनिग्रहाः। तत्र हेतुर्जितक्रोधाः तपोनाशभयात्। अतो रक्षितव्याः। गर्भभूताः यथा मातुर्गर्भे प्राप्तो जीवो मात्रा रक्ष्यते तद्वद्रक्ष्या इत्यर्थः ॥ २१ ॥

रा० टी०—नन्वहमपि भवत्सदृशो वनस्थ इति किं रक्षणप्रार्थनयेत्यत आह—नगरस्थ इति। जनेश्वरः सर्वजननियन्ता त्वं नगरस्थो वनस्थो वा नो राजा। नन्वेते भवन्तोऽतितेजस्विनः कुतो न आत्मरक्षां कुर्वन्तीत्यत आह—हे राजन्! वयं न्यस्तदण्डाः त्यक्तनिग्रहाः ॥ २१ ॥

गो० टी०—नन्वेते भवन्त एव तपःप्रभावेन स्वरक्षणक्षमा इत्यत्राह—न्यस्तेति। न्यस्तः त्यक्तो दण्डो यैस्ते न्यस्तदण्डाः शापतो निग्रहकरणरहिता इत्यर्थः। तत्र हेतुः—जितक्रोधा इति तपोनाशभीत्या त्यक्तक्रोधा इत्यर्थः। तत्रापि हेतुः—जितेन्द्रिया इति इन्द्रियजयेन कामाद्यभिभवाभावात्तदभीतिरहिता इत्यर्थः। वस्तुतस्तु स्वसामर्थ्ये सत्यपि स्वरूपविरोधान्नास्मा-

१ तत इति गो. पाठः। २ त्वमिति गो. पाठः। ३ इहेति गो. पाठः। ४ भुङ्क्ते लोकेति गो. पाठः। ५ रक्षितव्या इति गो. पाठः।

एवमुक्त्वा फलैर्मूलैः पुष्पैरन्यैश्च राघवम् । वन्यैश्च विविधाहारैः सलक्ष्मणमपूजयन् ॥ २२ ॥
तथान्ये तापसाः सिद्धा रामं वैश्वानरोपमाः । न्यायवृत्ता यथान्यायं तर्पयामासुरीश्वरम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

स्वीकृतमौनसत्कृता रामः सीतालक्ष्मणाभ्यां वनं प्रविशन्विराधाख्यं घोरं रक्षो ददर्श । प्राप्त तत्सीतामपहृत्य तौ विगर्ज्य च तयोर्वधं प्रतिजज्ञे । निशाचराक्रान्तत्वाच्चकितां सीता विलोक्य कैकेयीमुपालभ्य शोचति रामे लक्ष्मणो विराधवध प्रतिजज्ञे ।

कृतातिथ्योऽथ रामस्तु सूर्यस्योदयनं प्रति । आमन्त्र्य स मुनीन्सर्वान्वनमेवान्वगाहत ॥ १ ॥
नानामृगगणाकीर्णमृक्षशार्दूलसेवितम् । ध्वस्तवृक्षलतागुल्मं दुर्दर्शसलिलाशयम् ॥ २ ॥

भिरस्मद्रक्षणङ्कृतमित्याहुः—त्वया रक्षितव्या इति अनन्याईश्वरत्वा इत्यर्थः । गर्भभूताः प्रजातुल्याः अनेनानन्याईशेषत्वङ्कृतम् । ध्रुवमिति काकाक्षिन्यायेनोभयत्राप्यन्वेति तेनानन्याईशेषत्वानन्यशरणत्वयोः स्वाभाविकत्वङ्कृतम् । तथापि साधनं विना रक्षणेतिप्रसङ्गः स्यादित्यत्राहुः—तपोधना इति । तपोऽत्र न्यासनिक्षेपापरपर्यायः "तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः" इति श्रुतेः । प्रपद्येकधना वयमित्यर्थः । अस्मत्कृतां प्रपत्तिं व्याजीकृत्यास्मान् रक्षेत्यर्थः, रक्षणमत्र मोक्षप्रापणमेव खरादिभ्यश्चाणस्य शरभङ्गाश्रमवासिभिर्वक्ष्यमाणत्वात् । इमे तु श्रुतयो मोक्षैकपराः ॥ २१ ॥

२२] ति० टी०—अन्यैर्नीवारादिभिर्विविधाहारैः । सलक्ष्मणमित्यनेन लक्ष्मणस्याप्याहारभङ्गेण स्पष्टङ्कृतम् ॥ २२ ॥

रा० टी०—रक्षणीया इति । गर्भभूताः मात्रेकरक्ष्यपुत्रतुल्या इत्यर्थः, तपोधनास्त्वया शश्वद्रक्षणीयाः एवमुक्त्वा फलादिभिः वन्यैर्वनोद्भवैः अन्यैः फलाद्यतिरिक्तैः विविधाहारैः नीवारादिभिः सलक्ष्मणं लक्ष्मणसहितं राममपूजयन् । सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०—अतस्तेषां प्रपन्नानां यथोचितमेकैकप्रवृत्तिं दर्शयति—एवमित्यादि । ऋषयः एवमुक्त्वा सलक्ष्मणराघवं वन्यैः पुष्पैः फलादिभिश्चापूजयन् । राघवमित्यनेन सीतापूजनमप्यर्थसिद्धं मिथुनत्वेपि तस्यैव स्वरूपत्वात् प्रभाप्रभावन्यायेन तयोरपृथग्भावात् । अन्यैः संकल्पसिद्धैः विविधाहारैः सूदानादिभिः ॥ २२ ॥

२३] ति० टी०—अन्ये सिद्धाः संकल्पसिद्धाः । न्याय्यो धर्मस्तद्वत्कृतं वृत्तं चरित्रं येषां ते । यथान्यायमीश्वराईपदार्थोपस्थापनेनेश्वरं तर्पयामासुः ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०—तथेति । वैश्वानरोपमाः अग्निसदृशाः न्यायवृत्ता न्यायमार्गावलम्बिनः सिद्धाः प्राप्तसकलसिद्धयः अन्ये तापसाः ईश्वरं सर्वनियन्तारं रामं यथान्यायं यथोचितं तर्पयामासुः ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे प्रथमः सर्गः ॥ १ ॥

गो० टी०—तथान्य इति । सिद्धाः सिद्धसाधननिष्ठाः न्यायवृत्ताः न्यायाद्गुणव्यापाराः स्वरूपानुरूपकैङ्कर्यवृत्तस्य इत्यर्थः । वैश्वानरोपमाः अस्पृष्टविरोधिनः स्वरूपविरुद्धनिषिद्धकाम्यकर्मान्तरत्यागिन इत्यर्थः, अन्ये पूर्वेभ्यो विलक्षणाः तापसाः काम्यकर्मानुष्ठायिन इत्यर्थः, ईश्वरं परमशेषिणं रामं यथान्यायं यथोचितं स्तुतिप्रणामादिभिस्तर्पयामासुरित्यर्थः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

१] ति०टी०—उदयनं प्रति उदयकाले अन्वगाहत प्राविशत्[1]

रा० टी०—रामवृत्तान्तमाह—कृतातिथ्य इत्यादिभिः । कृतातिथ्यो रामस्तु सूर्यस्य उदयनं प्रति उदयकाले सर्वान् मुनीन् आमन्त्र्य आपृच्छ्य वनमेव अन्वगाहत ॥ १ ॥

गो० टी०—एवं प्रथमसर्गेण सिद्धसाधननिष्ठानां मुमुक्षूणां मुनीनां तदीयपर्यन्तं विशिष्टविषयैकैङ्कर्यं प्रतिपाद्य स्वरत्नधार्थिमुनिजनशरणागतिं वक्ष्यन् शरण्यत्वोपयोगिसामर्थ्यं विराधवधकथनमुखेन बोधयितुमुपक्रमते—कृतातिथ्य इत्यादिना । अत एव संक्षेपे विराधं राक्षसं हत्वा शरभङ्गं ददर्श हेत्यत्र विराधवधोपहारत्वेन शरभङ्गं दृष्टवानिति व्याख्यातम् । कृतातिथ्य इति । तुलस्यादेन अभ्यादिकृतातिथ्याद्यैलक्षण्यमुक्तम् । अनन्यप्रयोजनदत्तं हि भगवतः परमभोग्यं पत्रं पुष्पमित्यादि । अथशब्दः कृत्स्नवाची कात्स्न्येन कृतातिथ्य इत्यर्थः, भक्तैर्यत् किंचिदुत्तमपि तत् सर्वातिथ्यत्वेन हि भगवान् स्वीकरोति । सूर्यस्योदयनं प्रतीति कर्मप्रवचनीययोगे द्वितीया "कर्मणेप्सितमभूताख्यान—" इत्यादिना प्रतेः कर्मप्रवचनीयत्वम् । उदयनं प्रति उदयकाले प्रातःस्नानादिकमावसान इत्यर्थः । वनमेवान्वगाहत नच तत्र स्थातुमेच्छदित्यर्थः ॥ १ ॥

२] ति० टी०—ध्वस्तवृक्षलतागुल्मं विराधसंभाव्यत्वादिति शेषः । दुर्दर्शसलिलाशयमृक्षादेर्वशादेव ॥ २ ॥

---

[1] ऋक्षशार्दूलेति गो. पाठः ।

निष्कूजमानशकुनि झिल्लिकागणनादितम् । लक्ष्मणानुचरो रामो वनमध्यं ददर्श ह ॥ ३ ॥
सीतया सह काकुत्स्थस्तस्मिन्घोरमृगायुते । ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ॥ ४ ॥
गंभीराक्षं महावक्त्रं विकटं [४]विकटोदरम् । बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ॥ ५ ॥
वसानं चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितम् । त्रासनं सर्वभूतानां व्यादितास्यमिवान्तकम् ॥ ६ ॥
त्रीन्सिंहांश्चतुरो व्याघ्रान्द्वौ वृकौ पृषतान्दश । सविषाणं वसादिग्धं गजस्य च शिरो महत् ॥ ७ ॥
अवसज्यायसे शूले विनदन्तं महास्वनम् । स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम् ॥ ८ ॥
अभ्यधावत्सुसंक्रुद्धः प्रजाः काल इवान्तकः । स कृत्वा भैरवं नादं चालयन्निव मेदिनीम् ॥ ९ ॥

३] ति० टी०–निष्कूजमानाः शकुनयो यत्र तत् । विराधभयादेवं झिल्लिकागणमात्रशब्दयुतं वनमध्यं ददर्शेति संबन्धः ३

रा० टी०–नानेति । मृगगणैः आकीर्णं व्याप्तम् ऋक्षादिभिः सेवितं ध्वस्ताः राक्षसातिसंचारेण परिमर्दिताः वृक्षादयो यस्मिन् दुर्दर्शाः राक्षसातिसंचारवशाद्दृष्टुमशक्याः सलिलाशयाः कूपादयो यस्मिन् तं, निष्कूजाः राक्षसभिया शब्दरहिताः नानाशकुनाः अनेकविधपक्षिणः यस्मिन् । अदन्तोऽपि शकुनशब्दः तथाहि ' शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ' इत्यमरसिंहः । झिल्लिकानां गणैर्नादितं वनमध्यं लक्ष्मणानुचरः लक्ष्मणः अनुचरो यस्य स रामः ददर्श । झिल्लिकागणनादितमित्यनेन झिल्लिकाशब्दस्य राक्षसप्रियत्वं सूचितम् । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–नानाशकुनगणेत्यादि । श्लोकद्वयमेकान्वयम् । ध्वस्तवृक्षलतागुल्मं तुङ्गकठिनविराधदेहसंपर्कादिति भावः । दुर्दर्शसलिलाशयमित्यत्राप्ययमेव हेतुः । निष्कूजनानाशकुनि निःशब्दनानाविधपक्षिकं सदूरस्थीयमानोऽपि पक्षी तस्माद्भिया निःशब्दं लीयत इति भावः । झिल्लिकागणनादितं झिल्लिकाभिस्तु दुर्दर्शत्वात् सर्वदा शब्द्यत इत्यर्थः । नानेत्यादि सर्वं वनमध्यविशेषणम् ॥ २ ॥ ३ ॥

४] ति० टी०–घोरमृगास्तरक्ष्वादयः पुरुषादं राक्षसम् ॥ ४ ॥

रा० टी०–सीतयेति । घोरमृगाः व्याघ्रादयस्तैः आयुते व्याप्ते तस्मिन् वने काकुत्स्थो रामः गिरिशृङ्गाभं पर्वतशृङ्गसदृशं गभीराक्षं गभीरे अन्धकूपसदृशे अक्षिणी यस्य, विकटं विशालशरीरं, विकटोदरं विशालोदरविशिष्टं बीभत्सं कुत्सितावयवत्वेन कुत्सितं विषमं निम्नोन्नतावयवसंस्थानं दीर्घमत्युन्नतशरीरं विकृतं नानाविकारविशिष्टशरीरविशिष्टमत एव घोरं भयंकरं दर्शनं यस्य ॥ ४ ॥ ५ ॥

गो० टी०–सीतया सहेत्यादि । सार्धश्लोकचतुष्टयमेकान्वयम् । घोरमृगास्तरक्ष्वादयः पुरुषानत्ति भक्षयतीति पुरुषादः पचाद्यच् राक्षसमित्यर्थः । महास्वनं वृहत्कण्ठध्वनिकम् ॥ ४ ॥

५] ति० टी०–गभीराक्षं महाकूपवदगाधचक्षुषम्, विकटं विशालं, बीभत्सं कुत्सितं, विषमं निम्नोन्नतसंस्थानं, विकृतं वक्त्र[५]–[६]अत एव घोरदर्शनम् ॥ ५ ॥

गो० टी०–गम्भीराक्षं निम्नाक्षं, महावक्त्रं पृथुतरमुखं, विकटं विशालं, विषमोदरं निम्नोन्नतोदरं, बीभत्सं मांसरुधिरालिप्तशरीरतया कुत्सितं, विषमं न्यूनाधिकावयवं, विकृतम् उक्तप्रकारेण विकृतवेषम् अत एव घोरदर्शनम् ॥ ५ ॥

६] ति० टी०–वसा मांसान्तर्गतस्नेहः । व्यादितास्यं व्यात्तास्यमित्यर्थः ॥ ६ ॥

रा० टी०–वसार्द्रं वसा मांसान्तर्गतपूयं तेन आर्द्रं वैयाघ्रं व्याघ्रसंबन्धि चर्म वसानं रुधिरोक्षितं स्वनिहतव्याघ्रशरीरोत्थितरुधिरसिक्तमत एव सर्वभूतानां त्रासनं भयप्रदमन्तकमिव व्यादितास्यं प्रसारितमुखम् ॥ ६ ॥

गो० टी०–वसा मांसं तया आर्द्रं, रुधिरोक्षितं रक्तसिक्तं, व्यादितास्यं व्यात्तास्यम् । आर्षं इट् ॥ ६ ॥

७] ति० टी०–पृषता बिन्दुयुक्ता मृगाः ॥ ७ ॥

रा० टी०–सिंहांश्चीन् व्याघ्रान् चतुरः वृकौ द्वौ पृषतान् मृगविशेषान्दश सविषाणं दन्तसहितं वसादिग्धं पूयव्याप्तं गजस्य हस्तिनः महत् बृहच्छिरश्च आयसे लोहनिर्मिते शूले अवसज्य विद्धा महास्वनं यथा स्यात्तथा विनदन्तं महास्वनं महाश्वभिः अत्युच्छ्रितश्वासैः अनिति तं महाश्वासवन्तमित्यर्थः, पुरुषादं राक्षसं ददर्श । सार्धश्लोकचतुष्टयमेकान्वयि ॥ ७ ॥

गो० टी०–त्रीनित्यादि । भक्षणार्थमिति शेषः । पृषतान् बिन्दुमृगान् आयसे अयोमये शूले अवसज्य प्रोतान् कृत्वा महास्वनं यथा भवति तथा विनदन्तं निनादं कुर्वन्तम् ॥ ७ ॥

८] ति० टी०–भक्षणार्थं सिंहादीनायसे शूलेऽवसज्य महास्वनं यथा तथा विनदन्तम् ॥ ८ ॥

रा० टी०–स इति । स विराधः रामादीन्दृष्ट्वा क्रुद्धः सन् काले संहारसमये अन्तकः कालः प्रजा इव अभ्यधावत् । अर्धद्वयमेकान्वयि ॥ ८ ॥

गो० टी०–स इति । काले संहारकाले प्रजा उद्दिश्य अन्तको यथा धावति तथा अभ्यधावत् ॥ ८ ॥

९] ति० टी०–काले युगान्तकाले क्रुद्धोऽन्तकः प्रजा अभि उद्दिश्य यथा धावति तथाभ्यधावत् ॥ ९ ॥

रा० टी०–स इति । स विराधः मेदिनीं पृथ्वीं चालयन्निव अङ्गेन शीघ्रगत्या वैदेहीमपकृष्य स्वस्कन्धयोः संस्थाप्य अब्रवीत् ॥ ९ ॥

१ नानेति गो. नानाशकुनमिति रा. पाठः । २ गत इति गो. पाठः । ३ गम्भीरेति गो. पाठः । ४ विषमेति गो. पाठः । ५ धावत संक्रुद्ध इति गो. पाठः

अङ्केनादाय वैदेहीमपक्रम्य तदाब्रवीत् । युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ ॥ १० ॥
प्रविष्टौ दण्डकारण्यं शरचापासिपाणिनौ । कथं तापसयोर्वां च वासः प्रमदया सह ॥ ११ ॥
अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ । अहं वनमिदं दुर्गं विराधो नाम राक्षसः ॥ १२ ॥
चरामि सायुधो नित्यमृषिमांसानि भक्षयन् । इयं नारी वरारोहा मम भार्या भविष्यति ॥ १३ ॥
युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे । तस्यैवं ब्रुवतो दुष्टं विराधस्य दुरात्मनः ॥ १४ ॥
श्रुत्वा सगर्वितं वाक्यं संभ्रान्ता जनकात्मजा । सीता प्रवेपितोद्वेगात्प्रवाते कदली यथा ॥ १५ ॥
तां दृष्ट्वा राघवः सीतां विराधाङ्कगतां शुभाम् । अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता ॥ १६ ॥
पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसंभवाम् । मम भार्यां शुभाचारां विराधाङ्के प्रवेशिताम् ॥ १७ ॥

गो० टी०–स इति । अङ्केन कटिप्रदेशेन ॥ ९ ॥

१०] ति० टी०–अङ्केन कटिप्रदेशेन । सभार्यौ भार्याशब्दो योषिन्मात्रवाची एकया योषिता सहितौ, यद्वा विराधस्येदं निन्दोक्तिरूपमेव वाक्यम् ॥ १० ॥

रा० टी०–तद्वचनाकारमाह–युवामिति । जटाचीरधरौ युवां यतः सभार्यौ स्त्रीसहितौ दण्डकारण्यं प्रविष्टौ अतः क्षीणजीवितौ ॥ १० ॥

गो० टी०–युवामित्यादि । सभार्याविति भार्याशब्दो योषिन्मात्रवाचीत्येके वदन्ति । अन्ये तु यथा प्राणभृत उपदधातीत्यत्र प्राणभृच्छब्दः प्राणभृदप्राणभृत्साधारणः । यथा च ऋतं पिबन्तावित्यत्र पानकर्त्रकर्तृसाधारणो जीवेश्वरयोः पिबच्छब्दप्रयोगः तथा छत्रिन्यायेनात्रापि सभार्याविति युक्तमित्याहुः । तथापि ध्वनिदोषो वर्जनीयः । वस्तुतस्तु द्वयोरेका भार्यास्तीति दुर्बुद्धिनैवमुक्तमिति सम्यक् । क्षीणजीवितौ मद्धस्ते पतनादिति भावः, यद्वा क्षीणजिवितौ प्रविष्टौ क्षीणजीवितत्वादेव प्रविष्टौ । अत्र प्रविष्टानां जीवितं दुर्लभमिति भावः ॥ १० ॥

११] ति० टी०–तदेवाह–कथमिति । प्रमदयैकया सह द्वयोर्वासः कथं चेत्यन्वयः ॥ ११ ॥

रा० टी०–ननु स्त्रीसहितत्वे को दोष इत्यत आह–कथमिति । तापसयोः तपस्विवेषयोः वां युवयोः प्रमदया एकस्त्रिया सह वासः कथं, एतेन भवन्तौ पापिनाविति तदुक्तिः सूचिता ॥ ११ ॥

गो० टी०–वस्तुतो विपरीताचारौ युवां मम वध्यावेवेत्याशयेनाह–कथमिति । वां युवयोः प्रमदया सह वासश्च कथं विरुद्ध इत्यर्थः । नच वाहेति निषेधेऽपि वामादेश आर्षः । कथंशब्दोक्तं विवृणोति–अधर्मेति । मुनिदूषकौ मुनिवेषविरुद्धशरचापासिधारणादिति भावः, अत एव पापौ ॥ ११ ॥

१२–१३] ति० टी०–अत एवाह–अधर्मचारिणौ । मुनिदूषकौ मुनिवेषविरुद्धशरचापासिधारणादेकभार्यारक्तत्वाच्च अत एव पापौ । तयोर्भीत्युत्पादनाय विराधः स्वयमेव स्वस्वरूपमाह–अहमिति ॥ १२ ॥ १३ ॥

रा० टी०–अधर्मेति । अधर्मचारिणौ एकस्त्रीसहितत्वेन धर्मविरुद्धाचरणौ अत एव मुनिदूषकौ पापौ युवां कौ । अथ पृथक् । ननु त्वं कोऽसीत्यत आह–अहमिति । विराधो नाम राक्षसोऽहं मुनिमांसानि भक्षयन् सन् इदं दुर्गं वनं चरामि अतः वरारोहा वरः अत्युत्कृष्टः आरोहः मम स्कन्धयोरारोहणं यस्याः सा इयं नारी मम भार्या मत्पोष्या भविष्यति, एतेन सीतायां तस्य सेव्यत्वबुद्धिः संजातेति ध्वनितम् । पापयोः युवयोस्तु रुधिरं मृधे संग्रामे पास्यामि । अर्धचतुष्टयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०–अहमित्यादि । मृधे युद्धे ॥ १२ ॥ १३ ॥

१४] ति० टी०–मृधे युद्धे ॥ १४ ॥

१५] ति० टी०–सगर्वितम् भावे निष्ठा सगर्वमिति यावत् । उद्वेगाद्भयात् ॥ १५ ॥

रा० टी०–तस्येति । एवं दुष्टं वचो ब्रुवतः तस्य विराधस्य सगर्वितं गर्वसहितं वाक्यं श्रुत्वा जनकात्मजा सीता संभ्रान्ता भयं प्राप्ता अत एव प्रवाते महावाते कदलीव उद्वेगात्प्रवेपिता जातकम्पाऽसीदिति शेषः ॥ १४ ॥ १५ ॥

गो० टी०–तस्येत्यादि । सगर्वितं सगर्वं भावे निष्ठा । उद्वेगात् भयात् ॥ १४ ॥ १५ ॥

१६] ति० टी०–परिशुष्यता शोकसंकुचितेन मुखेनोपलक्षित इव ॥ १६ ॥

रा० टी०–तामिति । विराधाङ्कगतां विराधस्य अङ्केन शीघ्रगत्या हेतुभूतया गतां तत्स्कन्धयोः प्राप्तां शुभां तां सीतां दृष्ट्वा परिशुष्यता मुखेनोपलक्षितो राघवो रामः लक्ष्मणमब्रवीत् ॥ १६ ॥

गो० टी०–तामिति । परिशुष्यता शोकसंकुचितेन मुखेन उपलक्षितः ॥ १६ ॥ १७ ॥

१७] ति० टी०–प्रवेशिताम् विराधेनेति शेषः ॥ १७ ॥

रा० टी०–तद्वचनाकारमाह–पश्येति । विराधाङ्के प्रवेशितां विराधाङ्कस्य विराधशीघ्रगमनस्य या ईः ख्यातिः तया

---

१ तेन इति गो. पाठः । २ चारिणाविति गो. पाठः । ३ प्रावेपतेति गो. पाठः ।

अत्यन्तसुखसंवृद्धां राजपुत्रीं यशस्विनीम् । यदभिप्रेतमस्माासु प्रियं वरवृतं च यत् ॥ १८ ॥
कैकेयास्तु सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण । या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी ॥ १९ ॥
ययाहं सर्वभूतानां प्रियः प्रस्थापितो वनम् । अद्येदानीं सकामा सा या माता मध्यमा मम ॥ २० ॥
परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति मे । पितुर्विनाशात्सौमित्रे स्वराज्यहरणात्तथा ॥ २१ ॥
इति ब्रुवति काकुत्स्थे बाष्पशोकपरिप्लुतः । अब्रवील्लक्ष्मणः क्रुद्धो नाग इव श्वसन् ॥ २२ ॥
अनाथ इव भूतानां नाथस्त्वं वासवोपमः । मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे ॥ २३ ॥

प्रवेशितां स्कन्धयोः संस्थापितां नरेन्द्रस्य जनकस्य आत्मसंभवामत एव अत्यन्तसुखसंवृद्धामत्यन्तसुखेन संवृद्धां योषितमित्यर्थः, राजपुत्रीं राजातिशोभावती एव पुत्री तां शुभाचारां मम भार्यां पश्य । सार्धश्लोक एकान्वयी ॥ १७ ॥

१८-१९] ति० टी०—अस्माच्च विषये यदुःखं कैकेय्या वने संपादनीयतयाभिप्रेतं यत्स्वस्य प्रियं वरवृतं च तत्क्षिप्रमद्यैव सुसंवृत्तं सिद्धम् या पुत्रार्थे पुत्रप्रयोजननिमित्तं राज्येन राज्याभिषेकमात्रेण न तुष्यति दीर्घदर्शिनी अस्मन्नाशेन स्वपुत्रस्य चिरं राज्यं पश्यन्ती ॥ १८ ॥ १९ ॥

रा० टी०—यदिति । हे लक्ष्मण ! दीर्घदर्शिनी अतिज्ञानवती या पुत्रार्थे मदर्थेऽपि राज्ये न तुष्यति तस्याः कैकेय्याः अस्माच्च यस्माद्राक्षसवधाद्धेतोः अभिप्रेतं यत् राज्याभिषेकनिवर्तनरूपं वरवृतं वरस्वीकारः तदद्यैव सुसंवृत्तं सुसंपन्नमित्यर्थः, एतेन राक्षसवधार्थमेव तत्कर्तृकं मम प्रव्राजनमिति ध्वनितम् ॥ १८ ॥ १९ ॥

गो० टी०—यदिति । कैकेय्याः अस्माच्च विषये यदभिप्रेतं योऽभिप्रायः यच्च प्रियं वरवृतं वरव्याजेन वृतं तदद्यैव सुसंपन्नं फलितम् ॥ १८ ॥

गो० टी०—अभिप्रेतशब्दोक्तं सूक्ष्मेक्षिकया विवृणोति—या न तुष्यतीति । दीर्घदर्शिन्या कैकेय्या अस्मद्व्यसनं पूर्वमेव यदि न चिन्तितं स्यात्तर्हि पुत्रार्थं राज्यमेव वरयेत् । नतु मत्प्रवासनं मत्प्रवासनवरणादवगम्यते अयं वनं गतश्चेत् सीतापि गच्छेत्, सा च राक्षसादिभिरपहियेत, तेन रामोऽपि व्यसनं महत्प्राप्नुयात्, ततश्च महत्पुत्रस्य राज्यं निष्कण्टकं स्यादिति कैकेयी नूनममन्यतेति भावः । पुत्रार्थे पुत्रप्रयोजननिमित्तम् । माता मम मध्यमेति यद्यपि पूर्वं मम माता कनीयसीत्युक्तं तथापि महिषीत्रयापेक्षया कनीयसीत्यं सर्वदशरथपत्न्यपेक्षया मध्यमात्वं त्रिशतं पञ्चाशच्च दशरथपत्न्यः सन्तीति पूर्वमेवोक्तम् । अथ अस्मिन् दिवसे इदानीम् अस्मिन् क्षणे॥१९॥२०॥

२०] ति० टी०—यया दीर्घदर्शिन्या सर्वभूतहितोऽहं वनमपि प्रस्थापितः पितृराज्यदाढ्यार्थं या मे मध्यमा माता कौसल्यातः कनिष्ठत्वात्सुमित्रातो ज्येष्ठत्वात्साद्य दिवस इदानीमस्मिन्काले सकामा जाता । कौसल्यापेक्षया कनिष्ठत्वात्पूर्वं यवीयसीत्युक्तिरपि नासंगता । तीर्थस्तु—कौसल्यासुमित्राभ्यां कनीयसी, इतरदशरथपत्नीभ्यो ज्येष्ठेत्याह । भगवतोऽपीदृशोक्तिस्तु लक्ष्मणोत्साहवर्धनायेति शेषः ॥ २० ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—ययेति । यया सर्वभूतानां प्रियोऽहं वनं प्रस्थापितः या च मध्यमा मम माता सा अद्यास्मिन्दिने इदानीं राक्षसवधसमये सकामा पूर्णमनोरथा भविष्यतीति शेषः ॥ २० ॥

२१] ति० टी०—तदर्थमेव पुनरप्याह—परेति । पितुर्मरणात्स्वराज्यहरणादधिकदुःखजनको वैदेहीपरस्पर्शः इतोऽधिकं दुःखजनकं तु न मे किंचिदिति दुःखातिशयो व्यक्तयः ॥ २१ ॥

रा० टी०—अयं राक्षसोऽवश्यं वधयोग्य इति बोधयन्नाह—परेति । वैदेह्याः परस्पर्शात् राक्षसस्पर्शनान्मे यथा दुःखतरमस्ति तथा पितुर्विनाशाल्लोकान्तरगमनकर्तृत्वेन दर्शनाभावात् स्वराज्यहरणाच्च दुःखतरं नास्ति ॥ २१ ॥

गो० टी०—किं ते तादृशं व्यसनं तत्राह—परस्पर्शादिति । वैदेह्याः परस्पर्शाद्यथा दुःखतरम् अस्तिदुःखं पितृवियोगाद्राज्यहरणाच्च तथा दुःखं नास्तीति योजना ॥ २१ ॥

२२] ति० टी०—बाष्पशोकाभ्यां नेत्रचित्तगताभ्यां परिप्लुतो व्याप्तस्तथा क्रुद्धः कैकेयीं प्रति विराधं प्रति च रुद्धो नाग इव अहितुण्डिकेन मन्त्ररुद्धः पेटीरुद्धो वा सर्प इवेत्यर्थः, श्वसन्रामविपाददर्शनेन ॥ २२ ॥

रा० टी०—इतीति । काकुत्स्थे रामे इति ब्रुवति सति बाष्पशोकपरिप्लुतो लक्ष्मणः अब्रवीत् ॥ २२ ॥

गो० टी०—इतीति । रुद्धः मन्त्रगणनिरुद्धः नागः सर्पः श्वसन् रामशोकदर्शनादिति भावः ॥ २२ ॥

२३] ति० टी०—अनाथ इव नाथापेक्षः प्राणी नाथरहितः सन्यथा शोचति तद्वत् । कीदृशस्त्वम् भूतानां सर्वजीवानां नाथभ्राता तेन तस्य नाथनिरपेक्षत्वं ध्वनितम्, तदुपपादकमेव वासवोपम इत्यपि । मया प्रेष्येण युक्त इति शेषः ॥ २३ ॥

रा० टी०—तद्वचनाकारमाह—अनाथ इति । भूतानां सर्वजन्तूनां नाथः नियन्ता वासवः इन्द्रः उपमा उपमेयो यस्य प्रेष्येण भृत्येन मया उपलक्षितस्त्वमनाथः नाथत्वाभाववानिव किमर्थं परितप्यसे परितापो न कार्य इत्यर्थः ॥ २३ ॥

गो० टी०—अनाथ इवेति । वासवोपमो भूतानां नाथः सन् अनाथ इव नाथसापेक्षो नर इव विशिष्य मया प्रेष्येण

१ सुसंपन्नमिति गो. पाठः । २ हित इति गो. पाठः । ३ वियोगादिति गो. पाठः । ४ प्लुते इति गो. पाठः ।

शरेण निहतस्याद्य मया क्रुद्धेन रक्षसः । विराधस्य गतासोर्हि मही पास्यति शोणितम् ॥ २४ ॥
राज्यकामो मम क्रोधो भरते यो बभूव ह । तं विराधे विमोक्ष्यामि वज्री वज्रमिवाचले ॥ २५ ॥
मम भुजबलवेगवेगितः पततु शरोऽस्य महान्महोरसि ।
व्यपनयतु तनोश्च जीवितं पततु ततश्च महीं विघूर्णितः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

तद्रक्षःपृष्टे रामे स्वात्मनः क्षत्रोत्पन्नत्वात्पराभिभविष्णुत्वं कथयत्यात्मनः कुलनामनी कथयन्विराधः सीतां विमुच्य पलायेतां भवन्ताविति ब्रुवन्रामबाणाभिहतः सीतामवरोप्य तावेव स्कन्धेकृत्वा वनमगाहत ।

[इत्युक्त्वा लक्ष्मणः श्रीमान्विराधे प्रहसन्निव । को भवान्वनमभ्येत्य चरिष्यसि यथासुखम् ॥]
अथोवाच पुनर्वाक्यं विराधः पूरयन्वनम् । पृच्छतो मम हि ब्रूतं कौ युवां क गमिष्यथः ॥ १ ॥

सहितोऽपि किमर्थं परितप्यसे । वासतवार्थस्तु भूतानां सर्वलोकानां नाथः वासव उपमीयतेऽनेनेति वासवोपमः त्वमनाथ इव नाथभिन्न इव किमर्थं परितप्यसे, एवमेव तत्त्वं जगुः । यथा विश्वामित्रः—अहं वेद्मि महात्मानमिति । यथाच परशुरामः—'त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः' इति । एवमृषयोऽपि ॥ २३ ॥

२४] ति० टी०—किं त्वया शक्यं तत्राह—शरेणेति॥२४॥

रा० टी०—परितापस्याकर्तव्यत्वे हेतुमाह—शरेणेति । क्रुद्धेन मया शरेण निहतस्य अत एव गतासोः गतप्राणस्य विराधस्य रक्षसः शोणितं रुधिरं मही पास्यति ॥ २४ ॥

गो० टी०—प्रेष्येण त्वया किं क्रियत इत्यत्राह—शरेणेति२४

२५] ति० टी०—विराधे मोक्ष्यामि भरतेन राज्यकामनायाः प्रदर्शितत्वात्तमुपेक्ष्य ॥ २५ ॥

रा० टी०—राज्येति । राज्यकामे हेत्वाभासमूलकानुमानिकराज्यकामनाविशिष्टे भरते यः क्रोधो बभूव तं क्रोधं वज्री इन्द्रः वज्रमचले पर्वते इव विराधे विमोक्ष्यामि ॥ २५ ॥

गो० टी०—राज्यकाम इति । कैकेय्याः भरतार्थं राज्यकाङ्क्षित्वात् भरतस्यापि राज्यकामत्वं तं विराधे विमोक्ष्यामीति शरणागते भरते दुर्विमोचत्वादिति भावः । ननु भरतकैकेयीभ्यामज्ञानात् प्रवासनं कारितं पुनरागन्तव्यमिति क्षमापणस्य कृतत्वात् कुतः पुनः रामलक्ष्मणाभ्यां तत्र राज्यापरित्यमत्स्यर्यते, उच्यते—अनन्तरं तथा अनुज्ञानेऽपि पूर्वं कैकेय्या तथा चिन्तितत्वात्तस्य चावश्यकर्तव्यत्वाद्दुःखकाले तावित्तनं तथापि व्यसनकालेऽपि परदोषोद्घाटनं सत्पुरुषानुचितं रामप्रकृतिविरुद्धं च मत्तप्रमत्तकुपितानां भावज्ञानं बुधमिति न्यायेन दोषदर्शनमेव रामस्य हार्दं तदुपेक्षकत्वं त्वभिनवमात्रमिति स्यात् । अत्रोच्यते व्यसनकाले लोको वाच्यमवाच्यं च न जानातीत्यनुमर्षं व्यजयितुमेवमुक्तमिति ॥ २५ ॥

२६] ति० टी०—भुजबलवेगेन धनुराकर्षणवेगेन वेगितः आहितवेगो महीं पततु विराध इति शेषः । विघूर्णितः संजातभ्रमणः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०—ममेति । मम भुजबलवेगेन वेगितः प्राप्तवेगः मम महान् शरः अस्य विराधस्य महोरसि पततु अत एव तनोः जीवितं जीवनं व्यपनयतु दूरीकरोतु ततः तस्माद्धेतोः विघूर्णितः सन् महीं पततु ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे द्वितीयः सर्गः ॥ २ ॥

गो० टी०—ममेति । भुजबलवेगेन धनुराकर्षणवेगेन वेगितः आनीतवेगः, इतजन्तो वा । विघूर्णितः संजातभ्रमणः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

१] ति० टी०—अथेति । वनं पूरयन्नित्यस्य शब्देनेति शेषः । युवयोः स्वरूपं पृच्छते मह्यं ब्रूतम् लोण्मध्यमद्विवचनम् । प्रभप्रकारः—कावित्यादि ॥ १ ॥

रा० टी०—विराधं ज्ञातुकामस्य लक्ष्मणस्योक्तिमाह—इतीति । श्रीमान् लक्ष्मणः इति वचः उक्त्वा रामं प्रतीति शेषः, वनमभ्येत्य प्राप्य यथासुखं यः चरिष्यति चरति स भवान् कः इति वचः प्रहसन्निव विराधमाहेति शेषः ॥ १ ॥

रा० टी०—अथेति । अथ लक्ष्मणवचनश्रवणानन्तरं विराधः पुनर्वाक्यमुवाच । तद्वचनाकारमाह—युवां कौ किं जात्यादि क्व च गमिष्यथः इति पृच्छतो मम ब्रूतम् ॥ २ ॥

गो० टी०—अथ विराधाद्ग्रहाय तदाकर्षणं तृतीये—अथोवाचेत्यादि । पूरयन् शब्देनेति शेषः । आत्मानं [4] स्वरूप

---

१ व्यवसथस्थिति गो. पाठः । २ स इति गो. पाठः । ३ श्लोकोऽयमधिकः रा. पाठे । ४ आत्मानं पृच्छते इति गो. पाठः ।

तमुवाच ततो रामो राक्षसं ज्वलिताननम् । पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः ॥ २ ॥
क्षत्रियौ वृत्तसंपन्नौ विद्धि नौ वनगोचरौ । त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान् ॥ ३ ॥
तमुवाच विराधस्तु रामं सत्यपराक्रमम् । हन्त वक्ष्यामि ते राजन्निबोध मम राघव ॥ ४ ॥
पुत्रः किल जवस्याहं माता मम शतह्रदा । विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ॥ ५ ॥
तपसा चाभिसंप्राप्ता ब्रह्मणो हि प्रसादजा । शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च ॥ ६ ॥
उत्सृज्य प्रमदामेनामनपेक्षौ यथागतम् । त्वरमाणौ पलायेथां न वां जीवितमाददे ॥ ७ ॥
तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः । राक्षसं विकृताकारं विराधं पापचेतसम् ॥ ८ ॥

पृच्छते मह्यमिति शेषः । त्वामिति लोण्मध्यमपुरुषद्विवचनम् । प्रश्नप्रकारमाह–कावितीति ॥ १ ॥

२] ति० टी०–ज्वलिताननं राक्षसत्वान्मुखनिःसृताग्निज्वालया आत्मन इक्ष्वाकुसंबन्धि कुलमुवाचेत्यर्थः ॥ २ ॥

रा० टी०–तमिति । ततः राक्षसवचःश्रवणानन्तरं पृच्छन्तं राक्षसं सुमहातेजाः रामः उवाच । तद्वचनाकारमाह–आत्मनो मम इक्ष्वाकुकुलं विद्धि अत एव वृत्तसंपन्नौ स्वकुलोचितवृत्तविशिष्टौ अत एव वनगोचरौ वनं प्राप्तौ क्षत्रियौ नौ आवां विद्धि जानीहि यस्त्वं दण्डकान् चरसि तं त्वां तु वेदितुं ज्ञातुमिच्छावः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–तमिति । राक्षसत्वेन प्रकृत्या ज्वलिताननमिति भयहेतूक्तिः । आत्मनः संबन्धि इक्ष्वाकुकुलमुवाचेत्यन्वयः इक्ष्वाकुवंश्यदशरथपुत्रावावां पितृवचनाद्वनं गमिष्याव इत्युवाचेत्यर्थः ॥ २ ॥

३] ति० टी०–क्षत्रियौ इक्ष्वाकुवंशजाविति शेषः । वनगोचरौ बहुव्रीहिः । कुतश्चिद्धेतोरिति शेषः ॥ ३ ॥

गो० टी०–अधर्मचारिणो पापाविति पूर्वोक्तविराधवचनस्यानुवादमाह–क्षत्रियौ वृत्तसंपन्नाविति । त्वामिति । कस्य पुत्रः किंप्रभाव इति ज्ञातुमिच्छामीत्यर्थः । अहं वनमिदं दुर्गं विराधो नाम राक्षस इति नामजात्योः पूर्वमुक्तत्वान्न तद्विषयोऽयं प्रश्नः ॥ ३ ॥

४] ति० टी०–निबोध मम वचनान्मम स्वरूपमिति शेषः ॥ ४ ॥

रा० टी०–तमिति । विराधस्तु हे राजन् ! अहं वक्ष्यामि त्वं निबोध शृणु इति तं पृच्छन्तं राममुवाच ॥ ५ ॥

गो० टी०–तमिति । हन्तेति । स्वाभिप्रायकीर्तनोद्योगजगर्वेण मम मत्तः मे स्वरूपमिति शेषः, निबोधस्तुवाचेत्यन्वयः ॥ ४ ॥

५] ति० टी०–जवस्य जवनाम्नः ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह–पुत्र इति । जवस्य जवाभिधस्य अहं पुत्रः शतह्रदा तदभिधा मम माता सर्वराक्षसाः विराधमिति मामाहुः ॥ ६ ॥

गो० टी०–पुत्रः किलेति । विराधः विगताराधनः दुराराध्य इत्यन्वर्थसंज्ञः राक्षसाः सजातीयाः सजातीयैः कृतं नामेदं न तु मातापितृभ्यामिति भावः ॥ ५ ॥

६] ति० टी०–लोके प्राणिलोके शस्त्रेण शस्त्रसामान्येन किं च अच्छेद्याभेद्यत्वं प्राणवियोजनाय छेदभेदाशक्यत्वं च प्राप्तमित्यर्थः ॥ ६ ॥

रा० टी०–तपसेति । तपसा हेतुभूतेन ब्रह्मणः प्रसादजा शस्त्रेण अवध्यता वध्यत्वाभावं संप्राप्ता अच्छेद्याभेद्यत्वं च प्राप्तं तत्राच्छेद्यत्वमवयवद्वैधीभवनाभावः, अभेद्यत्वं शरीरे व्रणप्राप्त्यभावः, वस्तुतस्तु छेत्तुमर्हेण प्राकृतशस्त्रेणेत्यर्थः, अभेद्यत्वं विदारणाभावं च प्राप्तमित्यर्थः, अत एव वक्ष्यमाणरामशस्त्रकरणकभेदनं संगच्छते तेषां प्राकृतभिन्नत्वात् ॥ ७ ॥

गो० टी०–तपसा चापीति । चापि किंच तपसा साधनेन ब्रह्मणः प्रसादजा शस्त्रेणावध्यता अमारणीयता प्राप्ता अच्छेद्याभेद्यत्वं च प्राप्तं प्राणवियोजनहेतुखण्डनविदारणनार्हत्वं च प्राप्तमित्यर्थः ॥ ६ ॥

७–८] ति० टी०–यदेवमतः–उत्सृज्येत्यादि । अनपेक्षौ प्रमदाशया युद्धाशया च रहितौ वां युवयोः ॥ ७ ॥ ८ ॥

रा० टी०–राममस्तात्स्ववधकामस्तं कोपयन्नाह–उत्सृज्येति । एनां प्रमदां स्वस्त्रियमुत्सृज्य त्यक्त्वा अनपेक्षौ एतत्प्राप्तिविषयकेच्छारहितौ त्वरमाणौ युवां यथागतमागतं मार्गमनतिक्रम्य पलायेथाम् । तत्र हेतुः–वां युवयोर्जीवितं जीवनमहं न आददे गृह्णामि ॥ ८ ॥

गो० टी०–उत्सृज्येति । अनपेक्षौ अपेक्षायां मरणं ध्रुवमिति भावः । त्वरमाणौ मन्दगमने मे मनश्चलेदिति भावः । न वां जीवितमाददे उत्तमप्रमदारत्नप्रापणादिति भावः ॥ ७ ॥

रा० टी०–तमिति । कोपसंरक्तलोचनः कोपेन दुष्टस्वदूरीकरणाय स्वीकृतकोपाभासेन संरक्ते लोचने यस्य स रामः पापचेतसं जन्मप्रभृतिपापकरणशीलं विकृताकारं विराधमिदं प्रत्युवाच ॥ ९ ॥

गो० टी०–तमिति । तमु एवं परुषं वदन्तं परुषवचनादेव हेतोः कोपसंरक्तलोचनः विकृताकारं विकृताकारमपि पापे सीताहरणे चेतो यस्य तम् ॥ ८ ॥

१ जवस्येति गो. पाठः । २ चापि मे इति गो. पाठः ।

क्षुद्र धिक्त्वां तु हीनार्थं मृत्युमन्वेषसे ध्रुवम् । रणे प्राप्स्यसि संतिष्ठ न मे जीवन्विमोक्ष्यसे ॥ ९ ॥
ततः सज्यं धनुः कृत्वा रामः सुनिशिताञ्शरान् । सुशीघ्रमभिसंधाय राक्षसं निजघान ह ॥ १० ॥
धनुषा ज्यागुणवता सप्त बाणान्मुमोच ह । रुक्मपुङ्खान्महावेगान्सुपर्णानिलतुल्यगान् ॥ ११ ॥
ते शरीरं विराधस्य भित्त्वा बर्हिणवाससः । निपेतुः शोणितादिग्धा धरण्यां पावकोपमाः ॥ १२ ॥
स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः । अभ्यद्रवत्सुसंक्रुद्धस्तदा रामं सलक्ष्मणम् ॥ १३ ॥
स विनद्य महानादं शूलं शक्रध्वजोपमम् । प्रगृह्याशोभत तदा व्यात्ताननइवान्तकः ॥ १४ ॥
अथ तौ भ्रातरौ दीप्तं शरवर्षं ववर्षतुः । विराधे राक्षसे तस्मिन्कालान्तकयमोपमे ॥ १५ ॥

९] ति० टी०—हीनार्थं परदारस्पर्शलक्षणहीनकर्मकरम् अत एव त्वां धिक् । मृत्युमन्वेषसे ध्रुवम् उक्तदुष्कर्मकरणादेति शेषः तं च मृत्युं रणे सम्यक्प्राप्स्यसि तिष्ठ क्षणमिति शेषः ॥ ९ ॥

रा० टी०—तत्प्रतिवचनाकारमाह—क्षुद्रेति । हे क्षुद्र ! हीनार्थ हीनः त्यक्तः अर्थः पुरुषार्थो येन तं त्वां धिक् यस्त्वं मृत्युमन्वेषसे स त्वं रणे मृत्युं ध्रुवं प्राप्स्यसि मे मया जीवन् त्वं न विमोक्ष्यसे अत एव रणे संतिष्ठ ॥ १० ॥

गो० टी०—क्षुद्रेति । क्षुद्रे हीनजाते धिक्कारे हेतुरयं हीनार्थम् उत्तमाङ्गनाभिलाषरूपहीनप्रयोजनमिति यावत्, मृत्युम् अन्वेषणहेतुं मरणं संप्राप्स्यसे अन्वेषणं सफलं भविष्यतीत्यर्थः । तदा किंचिदुपेक्षया गन्तुमुद्युक्तं प्रत्याह—तिष्ठेति । गमनं च दुर्लभमित्याह—नेति । मे पुरत इति शेषः ॥ ९ ॥

१०] ति० टी०—अभिसंधाय धनुषीति शेषः ॥ १० ॥

रा० टी०—तत इति । ततः स्वोक्त्यनन्तरं धनुः सज्यं ज्यासहितं कृत्वा सुनिशितानत्यन्ततीक्ष्णान् शरानभिसंधाय धनुःसंधान् कृत्वा राक्षसं निजघान ॥ ११ ॥

गो० टी०—तत इति । राक्षसं प्रति शरान् निजघान अमुञ्चत् । 'हन हिंसागत्योः' इति धातुः ॥ १० ॥

११] ति० टी०—ज्यागुणवता ज्यारूपरज्जुमता ज्याशब्दवतेति वा सुपर्णानिलाभ्यां तुल्यं गच्छन्ति तान् ॥ ११ ॥

रा० टी०—तत्प्रकारमाह—धनुषेति । रुक्मपुङ्खान् स्वर्णपुङ्खविशिष्टान् महावेगान् सुपर्णानिलतुल्यगान् सुपर्णानिलौ तुल्यं स्वसादृश्यं गच्छन्ति प्रापयन्ति तान् सप्त बाणान् ज्यागुणवता ज्यारज्जुविशिष्टेन धनुषा मुमोच ॥ १२ ॥

गो० टी०—पुनः शरान् विशिनष्टि—धनुषेति । ज्यारूपो गुणो रज्जुः तद्वता महावेगान् अत एव सुपर्णानिलाभ्यां तुल्यं गच्छन्तीति तथोक्तान् ॥ ११ ॥

१२] ति० टी०—बर्हिणवाससो बर्हिणो मयूरस्तत्संबन्धिबर्हवासस इत्यर्थः । शोणितादिग्धा रक्तलिप्ताः ॥ १२ ॥

रा० टी०—त इति । बर्हिणवाससः बर्हिणा मयूराः तत्संबन्धिपिच्छानीत्यर्थः, तान्येव वासांसि येषां ते सप्त बाणाः विराधस्य शरीरं भित्त्वा शोणितादिग्धाः शोणितेन रुधिरेण आदिग्धा व्याप्ताः अत एव पावकोपमाः सन्तः धरण्यां निपेतुः ॥ १२ ॥

गो० टी०—त इति । बर्हिणवाससः इति स्वार्थे इनच् बर्हिणवाससः बर्हपत्रा इत्यर्थः । शोणितेन आदिग्धाः ईषल्लिप्ताः रक्तोद्गमात्पूर्वमेव शरीरान्निर्गमादिति भावः । पावकोपमा इति भूस्थतृणादिदहनादग्निसाम्यसिद्धिः ॥ १२ ॥

१३] ति टी०—स विद्धोऽपि रामबाणताडितोऽपि वरदानमाहात्म्यादगतासुर्यथामात्रेण वैदेहीं हित्वा शूलमुद्यम्याभ्यद्रवत् ॥ १३ ॥

रा० टी०—स इति । विद्धः बाणैः छिद्रितः अत एव सुसंक्रुद्धः स राक्षसः वैदेहीं न्यस्य धरण्यां संस्थाप्य सलक्ष्मणं राममभ्यद्रवत् ॥ १४ ॥

गो० टी०—स इति । विद्धः बाणवेधजनितवेदनातिशयवान् न्यस्य भूमौ निक्षिप्य ॥ १३ ॥

१४] ति० टी०—महानादं विनद्य कृत्वा शक्रध्वजोपमं दैर्घ्येण स्थौल्येन च व्यात्ताननो विवृतानन: ॥ १४ ॥

रा० टी०—स इति । व्यात्ताननः प्रसारितवदनः स विराधः महानादं यथा स्यात्तथा विनद्य शक्रध्वजोपमं शूलं प्रगृह्य अन्तकः काल इव अशोभत ॥ १५ ॥

गो० टी०—स इति । महान् नादः प्रतिध्वनिर्यस्मिंस्तथा भवति तथा विनद्य शक्रध्वजोपमं तद्वदुन्नतं व्यात्ताननः विवृतास्यः अनेन प्रसारितजिह्वात्वं लक्ष्यते शूलोपमेयतालाभाय ॥ १४ ॥

१५] ति० टी०—कालान्तकयमाः प्राणतद्वमनःसंहारप्रधानाः संहाररुद्रस्य मूर्तयस्तत्सदृशे ॥ १५ ॥

रा० टी०—अथेति । कालान्तकयमोपमे अन्तको मृत्युः कालस्तन्निमित्तं यमस्तन्नियन्ता तैरुपमा यस्य, किंच कालः प्राप्तः अन्तको यस्य स एव यमोपमः तस्मिन् विराधे राक्षसे भ्रातरौ रामलक्ष्मणौ दीप्तं शरवर्षं ववर्षतुः वहृषतुः ॥ १६ ॥

गो० टी०—अथेति । अथ सीतानिक्षेपानन्तरं यथेष्टं बाणमोचनार्हत्वादीप्तं पूर्वबाणेभ्यस्तेजस्विनं शरवर्षं शरसमूहम् उभाभ्यामपि मोचनीयत्वे हेतवः राक्षस इत्यादिविशेषणानि । कालान्तकयमोपमे काले संहारकाले अन्तको नाशको यो यमस्तुल्ये ॥ १५ ॥

१ गमिष्यसीति गो० पाठः ।

स प्रहस्य महारौद्रः स्थित्वाजृम्भत राक्षसः । जृम्भमाणस्य ते बाणाः कायाभिष्पेतुराशुगाः ॥ १६ ॥
स्पर्शात्तु वरदानेन प्राणान्संरोध्य राक्षसः । विराधः शूलमुद्यम्य राघवावभ्यधावत ॥ १७ ॥
तच्छूलं वज्रसंकाशं गगने ज्वलनोपमम् । द्वाभ्यां शराभ्यां चिच्छेद रामः शस्त्रभृतां वरः ॥ १८ ॥
तद्रामविशिखैश्छिन्नं शूलं तस्यापतद्भुवि । पपाताशनिना च्छिन्नं मेरोरिव शिलातलम् ॥ १९ ॥
तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पाविवोद्यतौ । तूर्णमापेततुस्तस्य तदा प्रहरतां बलात् ॥ २० ॥
स वध्यमानः सुभृशं भुजाभ्यां परिगृह्य तौ । अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत ॥ २१ ॥
तस्याभिप्रायमाज्ञाय रामो लक्ष्मणमब्रवीत् । वहत्वयमलं तावत्पथानेन तु राक्षसः ॥ २२ ॥
यथा चेच्छति सौमित्रे तथा वहतु राक्षसः । अयमेव हि नः पन्था येन याति निशाचरः ॥ २३ ॥
स तु स्वबलवीर्येण समुत्क्षिप्य निशाचरः । बालाविव स्कन्धगतौ चकारातिबलोद्धतः ॥ २४ ॥
तावारोप्य ततः स्कन्धं राघवौ रजनीचरः । विराधो विनदन्घोरं जगामाभिमुखो वनम् ॥ २५ ॥

१६] ति० टी०–प्रहस्य शस्त्रावध्ये मयि वृथैषां बाणपात इति हासः । ते बाणा रामलक्ष्मणविसृष्टा जृम्भणेन शरीरलग्ना अपि कायान्निर्जग्मुः । आशुगाः शीघ्रगा इत्यर्थे केवलं यौगिकम् ॥ १६ ॥

रा० टी०–स इति । महारौद्रः अतिभयंकरः राक्षसः स विराधः स्थित्वा प्रहस्य च अजृम्भत । जृम्भमाणस्य तस्य कायात् शरीरात् आशुगाः रामलक्ष्मणसंचालितबाणाः निष्पेतुः १६

गो० टी०–स इति । प्रहस्य किमेतैर्मशकप्रायैरिति हसित्वा अजृम्भत गात्रविनाममकरोत् । बाणाः काये किंचिल्लग्नाः आशु गच्छन्तीत्याशुगाः आशुगा अपीत्यर्थः, निष्पेतुः जगलुः १६

१७] ति० टी०–स्पर्शात्तु वरदानेन वरदानसंबन्धादित्यर्थः । संरोध्य धृत्वा परमदुःखं प्राप्तोऽपीति शेषः ॥ १७ ॥

रा० टी०–स्पर्शादिति । वरदानेन हेतुना स्पर्शात् रामबाणसंबन्धादपि प्राणान् संरोध्य विराधः शूलमुद्यम्य राघवावभ्यधावत ॥ १८ ॥

गो० टी०–स्पर्शादिति । वरदानेन स्पर्शात्संबन्धात् प्राणान् प्राणवायून् संरोध्य हृदये समूह्य बलं कृत्वेत्यर्थः ॥ १७ ॥

१८] ति० टी०–तच्छूलं करस्थशूलभागमेवेति शेषः । गगने ज्वलनोपमं शिखाभागावच्छेदेनेति भावः ॥ १८ ॥

रा० टी०–तदिति । वज्रसंकाशं वज्रसदृशं ज्वलनेन वह्निना उपमा यस्य तच्छूलं द्वाभ्यां शराभ्यां रामश्चिच्छेद ॥ १९ ॥

गो० टी०–तदिति । तद् हस्तस्थं गगने ज्वलनः आकाशस्थाग्निः तदुपमामित्यभूतोपमा ॥ १८ ॥

१९] ति० टी०–अशनिर्वज्रम् ॥ १९ ॥

रा० टी०–तदिति । रामविशिखैः रामबाणैः छिन्नं तस्य विराधस्य पातितं चालितं शूलमपि अशनिना वज्रेण छिन्नं मेरोः शिलातलमिव भुवि पपात 'तस्यापि पातितम्' इति पाठः ॥ २० ॥

गो० टी०–तदिति । अशनिना वज्रेण ॥ १९ ॥

२०] ति० टी०–तदा पतनकाल एव प्रहरतामित्यर्थः ॥ २० ॥

रा० टी०–ताविति । उद्यतौ युद्धोद्युक्तौ तौ रामलक्ष्मणौ कृष्णसर्पाविव खड्गौ उद्यम्य तस्य राक्षसस्य समीपे तूर्णमापेततुः । तदा आपतनकाले बलात्प्रहरतां प्राहरताम् ॥ २१ ॥

गो० टी०–ताविति । प्रहरतां प्राहरताम् ॥ २० ॥

२१] ति० टी०–भुजाभ्यां परिगृह्य एकैकेनैकैकम् ॥ २१ ॥

रा० टी०–स इति । सुभृशमत्यन्तं वध्यमानः स राक्षसः अप्रकम्प्यौ एतौ रामलक्ष्मणौ भुजाभ्यां परिगृह्य उत्थाप्य प्रस्थातुं दुर्गप्रदेशं नेतुमैच्छत् ॥ २२ ॥

गो० टी०–स इति । अप्रकम्प्यौ चालयितुमप्यशक्यौ किं पुनः परिग्रहीतुमिति कविः परिहसति । रौद्रः रौद्राकृतिः अप्रकम्प्यत्वे हेतुः–नरव्याघ्राविति नरव्याघ्रौ पुरुषोत्तमौ ॥ २१ ॥

२२] ति० टी०–तस्याभिप्रायं काननान्तर्नयनविषयम् ॥ २२ ॥

रा० टी०–तस्येति । तस्य राक्षसस्य अभिप्रायमाज्ञाय रामोऽब्रवीत् । तद्वचनाकारमाह–अयं राक्षसः अनेन यथा अलं यथेच्छं वहतु ॥ २३ ॥

गो० टी०–तस्येति । अभिप्रायं वनान्तर्नयनेच्छां वहतु नौ प्रापयतु अनेन आवाभ्यां गन्तव्येन पथा वहतु, अथवा यथेच्छति येन मार्गेण गन्तुमिच्छति तथा वहतु उभयथापि न दोष इति भावः । तत्र हेतुमाह–अयमिति । नः वनमध्यगमनेच्छूनामस्माकम् ॥ २२ ॥ २३ ॥

२३] ति० टी०–यथेच्छति तथा वहतु यथास्येष्टं भवति तथा वहतु अनेन निर्भयत्वं दर्शितम् । तत्र हेतुमाह–अयमेवेति ॥ २३ ॥

रा० टी०–नन्वेतद्वहने यात्राविलम्बो भविष्यतीत्यत आह–यथेति । हे सौमित्रे ! यथा इच्छति तथा राक्षसो वहतु । तत्र हेतुः–येन यथा अयं निशाचरो याति स एव नोऽस्माकं पन्थाः ॥ २४ ॥

२४–२५] ति० टी०–स्कन्धगतौ चकार स्कन्धावारोपयामास ॥ २४ ॥ २५ ॥

१ विशिखच्छिन्नमिति गो. पाठः । २ तस्य करादिति गो. पाठः । ३ सर्पोपमौ शुभाविति गो. पाठः । ४ आपतत इति गो. पाठः । ५ बाहुभ्यां परिरभ्येति गो. पाठः । ६ बलौ तत इति गो. पाठः । ७ विनदन्निति गो. पाठः ।

वनं महामेघनिभं प्रविष्टो द्रुमैर्महद्भिर्विविधैरुपेतम् ।
नानाविधैः पक्षिकुलैर्विचित्रं शिवायुतं व्यालमृगैर्विकीर्णम् ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ।

राघवावपहृत्य निर्यान्ति विराध दृष्ट्वा सीतायां विक्लोशन्त्या विराधहनने प्रयतमाना-भ्यामेताभ्या छिन्नेऽपि तद्बाहुयुगलेऽम्रियमाण तं दृष्ट्वा रामस्तद्विंसने जीवतस्तस्य निखननमेवोपायं निश्चित्य पादेन कण्ठमाक्रमते तावत्स्मृतपूर्वजन्मवृत्तः स राम प्रणम्य निवेदित-पूर्ववृत्तः शरभङ्गऋषेराश्रम गन्तु प्रैरयत्स्वयमपि गर्तं ययाच । लक्ष्मणोत्खातगर्ते रामस्तमपूरयदथो ते तद्वने सुखमूषुः ।

ह्रियमाणौ तु काकुत्स्थौ दृष्ट्वा सीता रघूत्तमौ । उच्चैः स्वरेण चुक्रोश प्रगृह्य सुमहाभुजौ ॥ १ ॥
एष दाशरथी रामः सत्यवाञ्छीलवाञ्शुचिः । रक्षसा रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ २ ॥
मांमृक्षा भक्षयिष्यन्ति शार्दूलद्वीपिनस्तथा । मां हरोत्सृज काकुत्स्थौ नमस्ते राक्षसोत्तम ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ । वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ ४ ॥

रा० टी०-स इति । अतिबलोद्धतः स निशाचरः स्वबलवीर्येण बलेन शौर्येण च सम्रुत्क्षिप्य उत्थाप्य बालाविव स्कन्धगतौ चकार ॥ २५ ॥

रा० टी०-ताविति । रजनीचरो विराधः तौ रामलक्ष्मणौ आरोप्य घोरं विनदन् सन् वनमभिमुखो जगाम॥ २६॥

गो० टी०-स त्विति । अतिबलौ रामलक्ष्मणौ सम्रुत्क्षिप्य बालाविव स्कन्धगतौ चकार तयोरिच्छावशादिति भावः ॥ २४ ॥ २५ ॥

२६] ति० टी०-शिवायुतं शिवाभिर्युतम् ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०-वनमिति । विविधैर्द्रुमैरुपेतं युक्तं पक्षिकुलैः पक्षिसंघैर्विचित्रं शिवाभिर्युतं व्यालमृगैर्विकीर्णं युक्तं महामेघनिभं वनं प्रविष्टः ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे तृतीयः सर्गः ॥ ३ ॥

गो० टी०-इमावपि स्वाभीष्टवनं प्रविष्टावित्याशयेना-वनमिति । शिवाः शृगालविशेषाः ताभिर्युतं व्यालमृगैः दुष्टमृगैः 'दुष्टे द्विपे श्वापदे च व्यालः पुंसि सठेऽपि च' इति वाणः । अत्र सर्गे भगवतः स्वायत्तसकलप्रवृत्तिकत्वं महाभयहेतावपि निर्भयत्वं च दर्शितम् । अस्मिन् सर्गे षड्विंशतिश्लोकाः ॥२६॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०-सुमहान्तौ स्वभुजौ प्रगृह्योच्च ॥ १ ॥

रा० टी०-रामलक्ष्मणहरणानन्तरकालिकं सीताहृत्तान्तमाह-ह्रियमाणाविति । रघूत्तमौ ह्रियमाणौ दृष्ट्वा सुमहाभुजौ सुमहान्तौ स्वबाहू प्रगृह्य सम्रुत्थाप्य उच्चैः स्वरेण चुक्रोश, सुमहाभुजौ काकुत्स्थौ प्रगृह्य ह्रियमाणौ दृष्ट्वा चुक्रोशेत्यन्वयो वा ॥ १ ॥

गो० टी०-अथ परमपुरुषवहनफलं प्रकृतमुपक्रमते-ह्रियमाणावित्यादि । चुक्रोश रामस्यातिमानुषं चरित्रमवगच्छन्त्यपि स्नेहातिशयेन व्याकुला रुरोदेत्यर्थः ॥ १ ॥

२] ति० टी०-क्रोशनप्रकारमाह-एष इति ॥ २ ॥

रा० टी०-क्रोशनाकारमाह-एष इति । सहलक्ष्मण एष रामः रौद्ररूपेण रक्षसा ह्रियते ॥ २ ॥

गो० टी०-एष इति । सत्यवान् सत्यवचनवान् शीलवान् सदाचारसंपन्नः शुचिः ऋजुबुद्धिः ॥ २ ॥

३] ति० टी०-शार्दूलद्वीपिनः सबिन्दुबिन्दुव्याघ्राः । मां हरते नम इत्युक्ती रामलक्ष्मणयोः प्रेमातिशयत्वात् ॥ ३ ॥

रा० टी०-मामिति । मां हृकाः शार्दूलद्वीपिनो वा भक्षयिष्यन्ति । तत्र शार्दूलाः सबिन्दवो व्याघ्राः द्वीपिनस्तु बिन्दुरहिता इति भेदः । तत्र सहायान्तरान्यदृष्ट्वाह-हे राक्षसोत्तम ! मां काकुत्स्थौ च हर उत्सृज वा ते नमः । काकुत्स्थहरणस्य सिद्धत्वेऽपि स्वहरणस्याभावादेकस्यत्वेऽपि द्वयं नास्तीति प्रतीतेः न प्रार्थनानुपपत्तिः ॥ ३ ॥

गो० टी०-एवं दैवं प्रत्याकुश्य विराधं प्रत्याह-मामिति । हृकाः ईहामृगाः 'कोकस्त्वीहामृगो हृकः' इत्यमरः । शार्दूला महाव्याघ्राः द्वीपिनः अल्पव्याघ्राः 'व्याघ्रो मृगारिः शार्दूलो हिंस्रास्रशित्रकामृगात् । चण्डश्चाल्पस्त्वयं द्वीपी' इति वैजयन्ती । नमस्त इत्येवं चुक्रोशेति पूर्वेणान्वयः ॥ ३ ॥ ४ ॥

४] ति० टी०-वेगं त्वराम् ॥ ४ ॥

रा० टी०-तस्या इति । तस्या वैदेह्याः तद्वचनं श्रुत्वा वीरौ रामलक्ष्मणौ दुरात्मनस्तस्य विराधस्य वधे वेगं शीघ्रतां प्रचक्रतुः ॥ ४ ॥

१ शतैरिति गो. पाठः । २ तौ दृष्ट्वा वैदेहीं रामलक्ष्मणाविति गो. पाठः । ३ सुभुजौ भुजाविति गो. पाठः । ४ हृका इति गो. रा. पाठः ५ शार्दूला इति गो. पाठः । ६ हरोत्सृज्येति गो. पाठः ।

तस्य रौद्रस्य सौमित्रिः सव्यं बाहुं बभञ्ज ह । रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ ५ ॥
स भग्नबाहुः संविग्नः पेपाताशु[1] विमूर्छितः । धरण्यां मेघसंकाशो वज्रभिन्न इवाचलः ॥ ६ ॥
मुष्टिभिर्बाहुभिः पद्भिः[2] सूदयन्तौ तु राक्षसम् । उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः[3]॥ ७ ॥
स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः । निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः ॥ ८ ॥
तं प्रेक्ष्य रामः सुभृशमवध्यमचलोपमम् । भयेष्वभयदः श्रीमानिदं वचनमब्रवीत् ॥ ९ ॥
तपसा पुरुषव्याघ्र राक्षसोऽयं न शक्यते । शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे ॥ १० ॥
कुञ्जरस्येव[4] रौद्रस्य राक्षसस्यास्य लक्ष्मण । वनेऽस्मिन्सुमहच्छ्भ्रं खन्यतां रौद्रवर्चसः[5] ॥ ११ ॥
इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति । तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ १२ ॥
तच्छ्रुत्वा राघवेणोक्तं राक्षसः प्रश्रितं वचः । इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम् ॥ १३ ॥
हतोऽ[4]हं पुरुषव्याघ्र शक्रतुल्यबलेन वै । मया तु पूर्वं त्वं मोहान्न ज्ञातः पुंरुषर्षभ[5] ॥ १४ ॥

५] ति० टी०—बाहुं बभञ्ज । नैतावतापि प्राणहानिरिति न वरदानविरोधः । अभेद्याच्छेद्यत्वं च प्राणनाशक्षमावयवविशेषपरं बोध्यम् । बभञ्ज मुष्टिप्रहारेणेति शेषः । अभेद्याच्छेद्यत्ववरस्तु शस्त्रकरणकतद्विषय इत्यन्ये ॥ ५ ॥

रा० टी०—वधप्रकारमाह—तस्येति । रौद्रस्य भयंकरस्य राक्षसः सव्यं वामं बाहुं सौमित्रिः बभञ्ज, रामस्तु दक्षिणं बाहुं बभञ्ज ॥ ५ ॥

गो० टी०—तस्येति । सव्यमिति नतु विराधादाने कबन्धादाने च लक्ष्मणः सव्यं रामः दक्षिणं भुजमच्छिनदित्यविशेषेणोच्यते किमत्र नियामकमिति चेत् उच्यते सर्वदा लक्ष्मणो रामस्य दक्षिणपार्श्व एव तिष्ठति अतो गृह्णन् दक्षिणेन रामं सव्येन लक्ष्मणं वागृह्णादित्यविरोधः । तरसा बलेन ॥ ५ ॥

६] ति० टी०—संविग्नः खिन्नः ॥ ६ ॥

रा० टी०—स इति । भग्नबाहुः मेघसंकाशः स विराधः मूर्छितः सन् वज्रभिन्न. अचलः पर्वत इव धरण्यां पपात ॥ ६ ॥

गो० टी०—स इति । संविग्नः भीतः ॥ ६ ॥

७] ति० टी०—सूदयन्तौ हिंसन्तौ ॥ ७ ॥

रा० टी०—मुष्टिभिरिति । मुष्ट्यादिभिः सूदयन्तौ ताडयन्तौ रामलक्ष्मणौ उद्यम्योद्यम्य उत्थाप्योत्थाप्य एनं राक्षसं स्थण्डिले निष्पिपेषतुः संचूर्णयामासतुः ॥ ७ ॥

गो० टी०—मुष्टिभिरिति । बहुवचनमादरार्थं उद्यम्योद्यम्य सूदयन्तौ मुष्ट्यादिकमुद्धृत्योद्धृत्य प्रहरन्तौ स्थण्डिले भूतले ॥ ७ ॥ ८ ॥

८] ति० टी०—न ममार वरदानबलादिति भावः ॥ ८ ॥

रा० टी०—स इति । बहुभिर्बाणैः विद्धः खड्गाभ्यां परिक्षतश्च बहुधा अनेकवारं भूमौ निष्पिष्टश्च स राक्षसः राक्षसत्वसहितः स विराधो न ममार ॥ ८ ॥

९] ति० टी०—भयेषु भयकालेषु अभयदः स्वगुणादिश्रवणस्मरणकीर्तनादिना ॥ ९ ॥

रा० टी०—तामिति । अवध्यं तं विराधं सुभृशमत्यन्तं प्रेक्ष्य भयेषु अभयदः श्रीमान् रामः इदमब्रवीत् ॥ ९ ॥

गो० टी०—तमिति । भयेष्वभयदः शापापायकरणाय प्रसन्न इत्युच्यते ॥ ९ ॥

१०-११]ति०टी०—निखनावहे भूमौ गर्तं पातयावहे१०-११

रा० टी०—तद्वचनाकारमाह—तपसेति । पुरुषव्याघ्र हे लक्ष्मण ! अयं राक्षसः तपसा हेतुभूतेन युधि शस्त्रेण निर्जेतुं न शक्यते अतः राक्षसं राक्षसपातनार्थं निखनावहे भूमिमिति शेषः ॥ १० ॥

गो० टी०—तपसेति । शस्त्रेण शस्त्रादिभिः निखनावहे भूमौ निक्षिपेव ॥ १० ॥

रा० टी०—कुञ्जरस्येति । रौद्रस्य भयंकरस्य कुञ्जरस्य इव रौद्रवर्चसः भयकारितेजोयुक्तस्य अस्य राक्षसस्य पातनार्थमस्मिन् वने सुमहत् अतिविशालं श्वभ्रं गर्तः खन्यताम् ॥ ११ ॥

गो० टी०—कुञ्जरस्येत्यादिश्लोकद्वयम् । वैपुल्यं विधाय निम्नतां विधत्ते—प्रदरः खन्यतामिति प्रकृष्टोदरः प्रदरः २३॥२४॥

१२] ति० टी०—प्रदरो गर्तः कण्ठ आक्रम्य गयमिव१२

रा० टी०—इतीति । इति अनेन प्रकारेण प्रदरः खन्यतामिति लक्ष्मणं राम उक्त्वा पादेन कण्ठे विराधमाक्रम्य एकीकृत्य बद्ध्वेत्यर्थः तस्थौ ॥ १२ ॥

१३]ति० टी०—प्रश्रितं शापान्तकालप्राप्तेः प्रश्रयप्राप्तिः१३

रा० टी०—तदिति । राघवेण रामेण उक्तं तद्वचः श्रुत्वा राक्षसो विराधः प्रसृतं नम्रीभूतमिदं वचः काकुत्स्थं प्रोवाच ॥ १३ ॥

गो० टी०—तदिति । प्रश्रितं विनयान्वितं यथा तथा प्रोवाचेत्यन्वयः ॥ ११ ॥

१४] ति० टी०—प्रदरकरणरूपप्राणान्तव्यापारात्पूर्वं रामस्त्वमिति न ज्ञातः ॥ १४ ॥

रा० टी०—तद्वचनाकारमाह—हत इति । हे पुरुषव्याघ्र !

१ निपपाताशु राक्षस इति गो. पाठः । २ जानुभिरिति गो. पाठः । ३ एतदादिश्लोकद्वयं गो. नास्ति । ४ ऽस्मीति गो. पाठः ।५ पुरुषर्षभः इति गो.पाठः ।

कौसल्या सुप्रजास्तात रामस्त्वं विदितो मया । वैदेही च महाभागा लक्ष्मणश्च महायशाः ॥ १५ ॥
अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुम् । तुम्बुरुर्नाम गन्धर्वः शप्तो वैश्रवणेन [1]हि ॥ १६ ॥
प्रसाद्यमानश्च मया सोऽब्रवीन्मां महायशाः । यदा दाशरथी रामस्त्वां वधिष्यति संयुगे ॥ १७ ॥
तदा प्रकृतिमापन्नो भवान्स्वर्गं गमिष्यति । अनुपस्थीयमानो मां [2]स कुद्धो व्याजहार ह ॥ १८ ॥
इति वैश्रवणो राजा रम्भासक्तमुवाच ह । तव प्रसादान्मुक्तोऽहं [3]मभिशापात्सुदारुणात् ॥ १९ ॥
भुवनं स्वं गमिष्यामि स्वस्ति वोऽस्तु परंतप । इतो वसति धर्मात्मा शरभङ्गः प्रतापवान् ॥ २० ॥
अध्यर्धयोजने तात महर्षिः सूर्यसंनिभः । तं क्षिप्रमभिगच्छ त्वं स ते श्रेयो [4]ऽभिधास्यति ॥ २१ ॥
अवटे चापि मां राम [5]निक्षिप्य कुशली व्रज । रक्षसां गतसत्त्वानामेष धर्मः सनातनः ॥ २२ ॥

शक्रः तुल्यबलो यस्य तेन भवताहं हतः । अर्धं पृथक् । तत्र हेतुं वक्तुमाह–मोहादविवेकात्पूर्वं मया त्वं न ज्ञातः इदानीं तु कौशल्यासुप्रजाः कौशल्यायाः प्रादुर्भूतरामस्त्वं मया विदितः ज्ञातः वैदेही लक्ष्मणश्च विदितौ। सार्धश्लोक एकान्वयी १४॥१५

गो० टी०–रामपादस्पर्शेन प्रत्यभिजानन्नाह–हत इत्यादि । त्वयेति शेषः । पुरुषर्षभः पुरुषोत्तमस्त्वं रामत्वेनावतीर्ण इति न ज्ञात इत्यर्थः ॥ १२ ॥

१५] ति० टी०–इदानीं कथं ते ज्ञानं तत्राह–कौसल्येत्यादि । त्वया कौसल्यासुप्रजा इति त्वं विदितः कौसल्यापुत्र इति ज्ञातोऽसीत्यर्थः । एवं च कौसल्यायामीश्वरोऽवतीर्णो वैदेही च लक्ष्मीर्लक्ष्मणश्च तवांश इति सूचितम् ॥ १५ ॥

गो० टी०–ज्ञानप्रकारमाह–कौसल्येति । तात सर्वलोकजनक त्वं कौसल्यायाः सुप्रजाः " नित्यंमसिच् प्रजामेधयोः" इत्यसिच् । इति विदितोऽसि महाभागा श्रीर्वैदेहीत्यत्रगता अयं च त्वदंशभूतो महायशाः त्वदनुवर्तनजकीर्तिमान् लक्ष्मण इति विदितः ॥ १३ ॥

१६–१७] ति० टी०–एवंज्ञाने कारणमाह–अभिशापादिति । तुम्बुरुरहं वैश्रवणेन शप्तः, तस्माच्छापाद्राक्षसीं तनुं प्रविष्टः, अतो मे ज्ञानशक्तिरस्तीत्यर्थः ॥ १६ ॥ १७ ॥

१८] ति० टी०–प्रकृतिं गान्धर्वीम् । प्रकृतक्रोधकारणमाह–अनुपस्थीयमानोऽवसरेष्वसेव्यमानः । व्याजहारेत्यस्य राक्षसीं तनुं प्रविशेतीति शेषः ॥ १८ ॥

रा० टी०–ननु किं ज्ञानेनेत्यतः स्ववृत्तमाह–अभीति । वैश्रवणेन शप्तः प्राप्तशापः तुम्बुरुः तदभिधो गन्धर्वोऽहमभिशापादेतोः घोरां राक्षसीं तनुं प्रविष्टोऽस्मीति शेषः ॥ १६ ॥

गो० टी०–एतावत्पर्यन्तं कृतो न ज्ञातवानसीत्यत्राह–अपीति । अपिर्गर्हायाम् । कस्य केन शाप इत्यत्राह–तुम्बुरुरित्यादि । अहमिति शेषः ॥ १४ ॥

रा० टी०–प्रसाद्येति । मया प्रसाद्यमानः महायशाः स वैश्रवणः माम् अब्रवीत् । तद्वचनाकारमाह–यदेति । संयुगे संग्रामे दाशरथिः दशरथपुत्रो रामः यदा त्वां वधिष्यति तदा प्रकृतिं स्वभावमापन्नः प्राप्तो भवान् स्वर्गं स्वर्गलोकं गमिष्यति इति अनुपस्थीयमानः समये असेव्यमानः अत एव क्रुद्धः सः पश्चान्मया प्रसाद्यमानः सन् व्याजहार । श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–प्रसाद्यमान इत्यादि । उपकारस्मृत्योपश्लोकयति–महायशा इति । प्रकृतिं स्वरूपम् । शापनिमित्तमाह–अनुपस्थीयमान इति । रम्भासक्तं माम् अनुपस्थीयमानः अवसरे मया असेव्यमानः अत एव संक्रुद्धः राजा अस्मत्स्वामी वैश्रवणः इति उक्तप्रकारेण राक्षसो भवेति व्याजहार, पुनर्मया प्रसाद्यमान इत्यब्रवीच्च, उक्तप्रकारेण शापावसानं चोवाचेति योजना ॥ १५ ॥ १६ ॥

१९] ति० टी०–अनुपस्थाने कारणमाह–इतीति । उक्तं शापं तत्प्रतीकारं चोवाचेत्यर्थः । शापमुक्तिकालज्ञानजानन्दपारवश्यात्पुनरुक्तिर्न दोषाय 'रम्भासक्तं पुरानघ' इति पाठे पुनरुक्त्यभाव एव ॥ १९ ॥

रा० टी०–उपसंहरन्नाह–इतीति । रम्भासक्तं मां वैश्रवणो राजा इत्यनेन प्रकारेण उवाच । सुदारुणादतिघोराद् शापात् इह अस्मिन्समये तव प्रसादान्मुक्तोऽहं स्वं भवनं गमिष्यामि वः स्वस्त्यस्तु । सार्धश्लोक एकान्वयि ॥ १९ ॥

गो० टी०–तवेति । स्वं भुवनं स्वर्गलोकम् । उपकारस्मृत्या मङ्गलमाशास्ते–स्वस्ति व इति ॥ १७ ॥

२०] ति० टी०–स्वं भुवनं स्वं लोकम् 'भवनम्' इति पाठान्तरम् ॥ २० ॥

२१] ति० टी०–अध्यर्धयोजने सार्धयोजने ॥ २१ ॥

रा० टी०–इत इति । धर्मात्मा सूर्यसन्निभः महर्षिः शरभङ्गः इत अस्मात्स्थानात् अध्यर्धयोजने सार्धयोजने वसति तं शरभङ्गं त्वं शीघ्रमभिगच्छ स शरभङ्गस्ते श्रेयः स्वदीप्सितकल्याणं विधास्यति ॥ २० ॥ २१ ॥

गो० टी०–वाचि कैङ्कर्यमातनोति–इत इते । प्रतापवान् महातपाः अधिकमर्घं यस्य तदध्यर्धं तच्च तद्योजनं च तस्मिन् सार्धयोजन इत्यर्थः, क्षिप्रं तदग्निप्रवेशात्पूर्वं ते त्वत्तः श्रेयः श्रद्धालोकं विधास्यति पोषयिष्यति, यद्वा ते श्रेयः निवासस्थानप्रवेशनादिकम् ॥ १८ ॥ १९ ॥

२२] ति० टी०–गतसत्त्वानां गतप्राणानाम् सनातनः परंपराप्राप्तः अत एव कलिराक्षसेषु यवनेष्वेतद्धर्मप्रवृत्तिः ॥ २२ ॥

१ हेति गो. पाठः । २ संक्रुद्ध इति रा. पाठः । ३ इहेति रा. पाठः । ४ विधास्यतीति रा. पाठः । ५ प्रक्षिप्येति गो. पाठः ।

अवटे ये निधीयन्ते तेषां लोकाः सनातनाः । वधमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः ॥ २३ ॥
बभूव स्वर्गसंप्राप्तो न्यस्तदेहो मलाबलः । तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह ॥ २४ ॥
कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण । वनेऽस्मिन्सुमहाञ्श्वभ्रः खन्यतां रौद्रकर्मणः ॥ २५ ॥
इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति । तस्यौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ २६ ॥
ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम् । अखनत्पार्श्वतस्तस्य विराधस्य महात्मनः ॥ २७ ॥
तं मुक्तकण्ठमुत्क्षिप्य शङ्कुकर्णं महास्वनम् । विराधं प्राक्षिपच्छ्वभ्रे नदन्तं भैरवस्वनम् ॥ २८ ॥
तमाहवे दारुणमाशुविक्रमौ स्थिरावुभौ संयति रामलक्ष्मणौ ।
मुदान्वितौ चिक्षिपतुर्भयावहं नदन्तमुत्क्षिप्य बलेन राक्षसम् ॥ २९ ॥

रा० टी०—अवटे इति । हे राम ! गतसत्त्वानां रक्षसां सनातनो धर्मः एषः अवटे निक्षेपः अतः अवटे गर्ते मां निक्षिप्य कुशली त्वं व्रज ॥ २२ ॥

गो० टी०—अवट इति । अवटे श्वभ्रे कुशली आर्तत्राणरूपकुशलयुक्तः गतसत्त्वानां गतासूनाम् ' द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ' इत्यमरः । एषः अवटप्रक्षेपः । अस्य धर्मस्य फलमाह—अवट इति ॥ २० ॥

२३] ति० टी०—उक्तमेव विवृणोति—अवटे इति ॥२३॥

रा० टी०—तद्धर्मस्य सफलत्वं बोधयन्नाह—अवट इति । अवटे गर्ते ये राक्षसाः निधीयन्ते तेषां राक्षसानां सनातनाः नित्या लोकाः भवन्तीति शेषः । अर्धं पृथक्-एवमिति । शरपीडितो विराधः एवं काकुत्स्थमुक्त्वा न्यस्तदेहः त्यक्तराक्षसशरीरः सन् स्वर्गसंप्राप्तो बभूव । अर्धद्वयमेकान्वयि ॥२३॥

गो० टी०—एवमिति । स्वर्गसंप्राप्तः संप्राप्तप्राय इत्यर्थः, खननानन्तरं स्वर्गप्राप्तेः ॥ २१ ॥ २२ ॥

२४] ति० टी०—न्यस्तदेहोऽवटनिक्षिप्तदेहः स्वर्गसंप्राप्तः संप्राप्तस्वर्ग इत्यर्थः । बभूव तथा भवितुश्चयतो बभूवेत्यर्थः । यद्वा बभूवेत्यत्रेन संक्षिप्ततयोक्तस्य विस्तरमाह—तच्छ्रुत्वेति । अवटनिक्षेपेण स्वर्गप्राप्तिं श्रुत्वा ॥ २४ ॥

२५] ति० टी०—कुञ्जरस्येव मृतकुञ्जरस्य निखननार्थमिवेत्यर्थः । खन्यतामिति शीघ्रमिति शेषः, मया तर्कितस्यैतन्मरणोपायस्यानेनापि कथनानिभिततेन शीघ्रता कार्येत्याशयः ॥२५॥

रा० टी०—तदिति । तद्विराधोद्गारितं वाक्यं श्रुत्वा लक्ष्मणं व्यादिदेश आज्ञापयामास । तत्प्रकारमाह—हे लक्ष्मण ! रौद्रस्य कुञ्जरस्य इव रौद्रकर्मणः अस्य राक्षसस्य निपातायेति शेषः, अस्मिन् वने सुमहत् श्वभ्रं गर्तः खन्यताम् ॥२४॥२५॥

२६] ति० टी०—पादेन कण्ठ आक्रम्य तस्यौ श्वभ्राद्रूपरिक्षिप्तनम्यात्तूरणार्थम् ॥ २६ ॥

रा० टी०—इतीति । इति अनेन प्रकारेण प्रदरो गर्तः खन्यताम् इति वचनं लक्ष्मणमुक्त्वा पादेन चरणेन विराधं कण्ठे आक्रम्य रामस्तस्थौ ॥ २६ ॥

२७] ति० टी०—विराधस्य महात्मनः । महात्मनो महाशरीरस्य गन्धर्वत्वप्रत्यापत्त्यभिप्रायेण रामस्वरूपज्ञानाभिप्रायेण च कविना महात्मन इति प्रयुक्तं वा ॥ २७ ॥

रा० टी०—तत इति । ततः रामाज्ञाश्रवणानन्तरं खनित्रमादाय विराधस्य पार्श्वतः पार्श्वे उत्तमं तत्क्षेपणयोग्यं श्वभ्रं गर्तं लक्ष्मणोऽखनत् ॥ २७ ॥

गो० टी०—तत इति । उत्तमम् अतिनिम्नं महात्मनः महाकायस्य ॥ २६ ॥

२८] ति० टी०—मुक्तकण्ठं श्वभ्रे क्षेपणार्थं रामेण मुक्तकण्ठाक्रमणम् शङ्कुवत्कठिनकर्णम् उत्क्षिप्य चालयित्वा महास्वनत्वादेव भैरवस्वनत्वं यथा तथा धन्योऽहमतिधन्योऽहमिति नदन्तं श्वभ्रे प्राक्षिपत् ॥ २८ ॥

रा० टी०—तमिति । मुक्तकण्ठं मुक्तः प्रक्षेपणार्थं रामचरणाक्रमणात्यक्तः कण्ठो यस्य तं शङ्कुवदचलायमानौ कर्णौ यस्य तं महास्वनं महाद्भिः ऊर्ध्वोच्छ्वासैः अनिति जीवति तमासन्नमरणमित्यर्थः, अत एव भैरवस्वनं भयंकरशब्दं नदन्तं कुर्वन्तं विराधं श्वभ्रे स्वकृतत्राते प्राक्षिपत् ॥ २८ ॥

गो० टी०—तमिति । मुक्तकण्ठं कण्ठाक्रमणरहितम् अत एव महास्वनं शङ्कुकर्णं शङ्कुः कीलं तत्सदृशकर्णं गर्दभाकारं वा । ' शङ्कुकर्णौ गर्दभोष्ट्रौ ' इति बाणः । भैरवस्वनं भयंकरप्रतिध्वानं यथा भवति तथा नदन्तं महास्वनमित्यत्र स्वभावोक्तिः । अत्रोच्चारणरूपकार्योक्तिरिति भिदा ॥ २६ ॥

२९] ति० टी०—आशुविक्रमौ क्षिप्रकारिणौ संयति स्थिरौ दृढचित्तौ आहवे निर्जितं बलेनोत्क्षिप्य संचाल्य गर्ते चिक्षिपतुः॥२९॥

रा० टी०—तदेव सर्वं संक्षिप्य भङ्ग्यन्तरेणाह—तमित्यादिभिः । संयति संग्रामे स्थिरौ अचलितचित्तौ आशुविक्रमौ मुदान्वितौ उभौ रामलक्ष्मणौ दारुणं नदन्तमत एव भयावहं राक्षसं तं विराधमाहवे सङ्ग्रामे उत्क्षिप्य ऊर्ध्वं क्षिप्त्वा चिक्षिपतुः पृथिव्यामिति शेषः ॥ २९ ॥

गो० टी०—समस्तमुक्तमेवार्थं वृत्तान्तरेण संगृह्णाति—तमाहव इत्यादिना । संयति युद्धे स्थिरौ ॥ २७ ॥

१ सुमहच्छ्वभ्रमिति गो. रा. पाठः । २ निक्षिप्येति गो. पाठः । ३ बिले क्षिति गो. पाठः ।

अवध्यतां प्रेक्ष्य महासुरस्य तौ क्षितेन शस्त्रेण तदा नरर्षभौ ।
समर्थ्य चात्यर्थविशारदावुभौ बिले विराधस्य वधं प्रचक्रतुः ॥ ३० ॥
स्वयं विराधेन हि मृत्युमात्मनः प्रसह्य रामेण यथार्थमीप्सितः ।
निवेदितः काननचारिणा स्वयं न मे वधः शस्त्रकृतो भवेदिति ॥ ३१ ॥
तदेव रामेण निशम्य भाषितं कृता मतिस्तस्य बिलप्रवेशने ।
बिलं च [2]तेनातिबलेन रक्षसा प्रवेश्यमानेन वनं विनादितम् ॥ ३२ ॥
प्रहृष्टरूपाविव रामलक्ष्मणौ विराधमुर्व्यां [3]प्रदरे निपात्य तम् ।
ननन्दतुर्वीतभयौ महावने शिलाभिरन्तर्दधतुश्च राक्षसम् ॥ ३३ ॥
ततस्तु तौ काञ्चनचित्रकार्मुकौ निहत्य रक्षः परिगृह्य मैथिलीम् ।
विजह्रतुस्तौ मुदितौ महावने दिवि स्थितौ चन्द्रदिवाकराविव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुर्थः सर्गः ॥ ४ ॥

३०] ति० टी०–अवध्यतां शस्त्रेणावध्यतां प्रेक्ष्य । ' अवध्यताम् ' इति पाठेऽप्यवध्यतामित्येवार्थः । प्रेक्ष्य विचार्य समर्थ्य बिलं संपाद्य तत्र बिले वधं प्रचक्रतुः मृत्युरूपेणेति शेषः ॥ ३० ॥

रा० टी०–अवध्यतामिति । क्षितेन तीक्ष्णेन शस्त्रेण महाबलस्य विराधस्य अवध्यतां प्रेक्ष्य दृष्ट्वा नरर्षभौ अत्यर्थविशारदौ अत्यर्थमत्यन्तं विशारदौ निपुणावुभौ रामलक्ष्मणौ समर्थ्य अतिक्षनेन बिलं संपाद्य बिले पातयित्वा वधं प्रचक्रतुः ॥ ३० ॥

गो० टी०–बिलप्रवेशनिमित्तमाह–अवध्यतामिति । महाबलस्य इत्यायबलस्य दृष्टस्य समर्थ्य अयमेवास्य वधोपाय इति निश्चित्य ॥ २८ ॥

३१] ति० टी०–उक्तमेवार्थं[1]पदं रति–स्वयमिति । यथार्थं स्वप्रयोजनोचितम् रामेण कर्त्रा प्रसह्य स्वयं स्वस्य यो मृत्युरीप्सितस्तत्तमात्मनो मृत्युं प्रसह्योद्दिश्य । ' प्रपद्य ' इति पाठेऽप्यवमेवार्थः । काननचारिणा विराधेन मे वधः शस्त्रकृतो न भवेदिति निवेदितोऽभूदाम इति शेषः ॥ ३१ ॥

रा० टी०–नन्वरणयत्वान्तराणि हित्वा गर्ते निपातः किमर्थं कृत इत्यत आह–स्वयमिति । काननचारिणा वनविहरणशीलेन रामेण स्वयमीप्सितः वधः विराधकल्याणकारकावेशः ननवात्मनः मृत्युं प्रसह्य सहित्वा संपाद्येत्यर्थः शस्त्रकृतः शस्त्रव्यापाराभ्यां वधो न इत्यसमर्थो विराधेन स्वयं यथार्थं निवेदितः कथितः ॥ ३१ ॥

गो० टी०–न केवलं स्वनिश्चयः विराधेन चानन्तरे तथोक्तित्वाह–स्वयमिति । काननचारिणा रामेण प्रसह्य बलात्कृत्य आत्मनो वधार्थं स्वयमीप्सितः मृत्युः बिलप्रवेशकवधोपायः न मे वधः शस्त्रकृतो भवेदित्युपायान्तरं प्रतिक्षिप्य स्वयं निवेदितः कथितो इति योजना ॥ २९ ॥

३२] ति० टी०–तदेव भाषितं विराधोक्तं शस्त्रेण मे न मृत्युरित्येवंरूपम् ॥ ३२ ॥

रा० टी०–तदिति । तद्भाषितं निशम्य श्रुत्वा बिलप्रवेशने मतिः रामेण कृता बिलं प्रवेश्यमानेन रक्षसा वनं सर्वं काननं विनादितं शब्दितम् ॥ ३२ ॥

गो० टी०–तदेवेति । रामेण तद्भाषितमेव निशम्य तस्य विराधस्य बिलप्रवेशने मतिः कृता रामेण शस्त्रेण बिलं प्रवेश्यमानेन रक्षसा वनं विनादितमिति योजना ॥ ३० ॥

३३] ति० टी०–प्रहृष्टरूपाविव इवशब्द एवार्थे ॥ ३३ ॥

रा० टी०–प्रहृष्टेति । प्रहृष्टरूपौ दृष्ट्वा प्रमोदप्राप्तरूपं ययोस्तौ वीतभयौ रामलक्ष्मणौ तं विराधं राक्षसं महावने उर्व्यां प्रदरे गर्ते एव निपात्य शिलाभिरन्तर्दधतुः ननन्दतुश्च । इवशब्द एवार्थे ॥ ३३ ॥

गो० टी०–प्रहृष्टेति । प्रहृष्टरूपौ पुलकितशरीरौ वस्तुतो वैलोक्यावनयार्थं स्तः किंतु तज्जटनमात्रमिति इवशब्देन सूचयति ॥ ३१ ॥

३४] ति० टी०–दिवि स्थितौ चन्द्रदिवाकराविव महावने विजह्रतुः । नीलत्वाद्विशालत्वाच्च वनस्याकाशसादृश्यम् एवापि [illegible] वत्कलजटपौ सूर्यवत्प्रतापयुतौ ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०–तत इति । काञ्चनचित्रकार्मुकौ काञ्चनेन द्रवीभूतसुवर्णेन चित्रे कार्मुके यद्यौ ययोस्तौ रामलक्ष्मणौ रक्षो विराधं निहत्य मैथिलीं परिगृह्य ततः तस्यां दिवि स्थितौ तौ अमुतो चन्द्रदिवाकराविव विजह्रतुः ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुर्थः सर्गः ॥ ४ ॥

---

१ वधार्थमिति गो. पाठः । २ रामेणेति गो पाठः । ३ उर्व्यां प्रदरं निहत्य नाविति गो. पाठः ।

पञ्चमः सर्गः ।

विराधवनाच्छरभङ्गाश्रमं प्राप्तो रामः शरभङ्गेण संभाषमाणं वह्निणं विलोक्य लक्ष्मणं प्रति तं निर्दिशंस्तत्रैवावस्थातुं संदिश्येन्द्रत्वेनेन्द्रत्वं जिज्ञासुः स्वयं तदभ्याशं प्रपेदेऽथ रामसंदर्शनस्यानवसरं मन्वान इन्द्रः शरभङ्गमामन्त्र्य स्वरगात् । ससीतालक्ष्मणो रामः शरभङ्गमभिवायेन्द्रागमकारणमपृच्छच्छरभङ्गस्तन्निवेद्य सुतीक्ष्णदर्शनं रोचयञ्छरीरमग्निसात्कृत्य ब्रह्मलोकं प्रपेदे ।

हत्वा तु तं भीमबलं विराधं राक्षसं वने । ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान्॥ १ ॥
अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् । कष्टं वनमिदं दुर्गं न च स्मो वनगोचराः ॥ २ ॥
अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम् । आश्रमं शरभङ्गस्य राघवोऽभिजगाम ह ॥ ३ ॥
तस्य देवप्रभावस्य तपसा भावितात्मनः । समीपे शरभङ्गस्य ददर्श महदद्भुतम् ॥ ४ ॥
विभ्राजमानं वपुषा सूर्यवैश्वानरप्रभम् । [१ illegible] विबुधानुगम् ॥ ५ ॥
असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् । [२ illegible] [३ illegible] ॥ ६ ॥

गो० टी०–तत इति । पत्नीसहितस्य रामस्य तद्धितस्य परतन्त्रस्य लक्ष्मणस्य चोपमानमाह—चन्द्रदिवाकराविवेति ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

१] ति० टी०–समाश्वास्य समाश्वस्यैव । विराधाद्गीतामिवेति शेषः ॥ १ ॥

रा० टी०–विराधवधानन्तरकार्यिकं रामदत्तान्तमाहत्वेत्यादिभिः । भीमबलं विराधं ततः तस्मिन् वने हत्वा सीतां परिष्वज्य आलिङ्ग्य समाश्वास्य च वीर्यवान् रामः भ्रातरं लक्ष्मणमब्रवीत् । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–एवं विराधवनवासिसुहृद्बन्धुनिजनशरणागतेराद्यचक्रिकफलभूतं विराधवधमभिधाय शरादिवधफलशरभङ्गाश्रमवासिस्वनिजनशरणागतिं दर्शयिष्यन् तदुचितसौकर्यदर्शनाय शरभङ्गाश्रमवनगमनं दर्शयति पञ्चमे–हत्वेत्यादि । परिष्वज्य समाश्वास्य चेति विराधाङ्गस्पर्शजभयदुःखव्रीडाश्वास्यर्थमिति भावः ॥ १ ॥

२] ति० टी०–इदं वनं कष्टं पीडाजनकं दुर्गं विषमं क्रमणायोग्यं च वयं चेतः पूर्वं कदापि वनगोचरा न स्मः कदापीदृशं वनं न दृष्टं यस्मात् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–कष्टमिति । यतः वयं वनगोचरा वनम[illegible] न स्मः अतः दुर्गं गमनायोग्यमिदं वनं कष्टं दुःखसंपादकमतः तपोधनं शरभङ्गं शीघ्रमभिगच्छामहे इत्यभिधायेति शेषः, शरभङ्गस्य आश्रमं [illegible] ॥२॥३॥

गो० टी०–कष्टं कृच्छ्रं गहनं वा "कृच्छ्रगहनयोः कषः" इत्यनिप्रत्ययः । अत एव दुर्गं विषमं विषमायोग्यमित्यर्थः ॥२॥

३] ति० टी०–अतः शीघ्रं शरभङ्गं गच्छामहे गच्छाम इत्यर्थः । इत्यब्रवीत्येति शेषः ॥ ३ ॥

गो० टी०–आश्रममिति । तस्य [illegible] देवप्रभावस्य तपसा साधनेन भावितात्मनः साक्षात्कृतपरब्रह्मणः "तपसा ब्रह्म विजिज्ञासस्व" इति श्रुतेः ॥ ३ ॥

४] ति० टी०–भावितः शुद्धः आत्मा यस्य तस्य समीपे महदद्भुतं ददर्श ॥ ४ ॥

रा० टी०–तस्येति । तपसा [illegible] भावितः साक्षात्कारतां प्राप्तः आत्मा परमात्मा येन तस्य अत एव देवप्रभावस्य देवकर्तृकोत्कण्ठापूर्वकस्मरणविषयीभूतस्य शरभङ्गस्य समीपे महदद्भुतं ददर्श ॥ ४ ॥

गो० टी०–समीप इत्यादि । महदद्भुतं महदाश्चर्यभूतं किमपि वस्तु विभ्राजमानं वपुषा भ्राजमानवपुषमित्यर्थः, वैश्वानराः सूर्यातिरिक्ततेजांसि सूर्यादितेजःसदृशोपमित्यर्थः॥४॥

५] ति० टी०–तदेवाह–विभ्राजमानमिति । वपुषा वपुःकान्त्या विबुधाद्यगं देवाद्युचरम्, बहुव्रीहिः ॥ ५ ॥

रा० टी०–अद्भुतत्वं प्रकटयन्नाह–विभ्राजमानमित्यादिभिः । वपुषा स्वशरीरकान्त्या आकाशे विभ्राजमानमत एव सूर्यवैश्वानरप्रभं सूर्याग्निसदृशं विबुधाः देवाः अद्यगाः अद्युचरा यस्य तं रथप्रवरं रथश्रेष्ठमारूढं वह्नामसंस्पृशन्तं क्षुप्रभाभरणं शोभनप्रभाविशिष्टाभरणविभ्रिष्टं विगतं निरस्तं रजं यस्मात्तदेव अम्बरं तद्धारिणम्, अदन्तोऽपि रजशब्दः द्विरुपादौ प्रसिद्धः, तद्विधैः तत्सदृशैः बहुभिः महात्मभिः पूज्यमानं विबुधेश्वरमिन्द्रं ददर्श । सार्धश्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–अवरुह्येति । ततः किंचित्समीपगमनानन्तरं रथोत्क्रान्तं रथतटादवरुह्य वह्नामसंस्पृशन्तम् अभूमिस्पर्शस्य देवत्वभावत्वा[illegible] सकाशे समीपे विबुधाद्यगं विबुधा अद्यगाः यस्य तं विबुधेश्वरमि[illegible] ददर्श ॥ ५ ॥

६] ति० टी०–वह्नामसंस्पृशन्तं रथावरुह्यापीति शेषः, विबुधेश्वरं शक्रम् अतिशयप्रभावदाभरणं [illegible] र्यं चारु वीर्यं यस्य तम् ॥ ६ ॥

गो० टी०–क्षुप्रभेति । क्षुप्रभाभ्रावरणानि यस्य तं देवं

---

१ नरोपममिति गो. पाठः । २ अवरुह्य रथोत्सङ्गात्सकाशे इति गो. पाठः । ३ स्थिति गो. रा. पाठः । ४ विरजाम्बरेति रा. पाठः ।

तद्विधैरेव बहुभिः पूज्यमानं महात्मभिः । [1]हरितैर्वाजिभिर्युक्तमन्तरिक्षगतं रथम् ॥ ७ ॥
ददर्शादूरतस्तस्य तरुणादित्यसंनिभम् । पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसंनिभम् ॥ ८ ॥
अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् । चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने ॥ ९ ॥
गृहीते वरनारीभ्यां धूयमाने च मूर्धनि । गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ॥ १० ॥
अन्तरिक्षगतं देवं [3]गीर्भिरभ्याभिरीडियन् । सह संभाषमाणे तु शरभङ्गेन वासवे ॥ ११ ॥
दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् । रामोऽथ रथमुद्दिश्य [5]भ्रातुर्दर्शयताद्भुतम् ॥ १२ ॥
अर्चिष्मन्तं श्रिया जुष्टमद्भुतं पश्य लक्ष्मण । प्रतपन्तमिवादित्यमन्तरिक्षगतं रथम् ॥ १३ ॥
ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः । अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम् ॥ १४ ॥
इमे च पुरुषव्याघ्र ये तिष्ठन्त्यभितो [6]दिशम् । शतं शतं कुण्डलिनो युवानः खड्गपाणयः ॥ १५ ॥
विस्तीर्णविपुलोरस्काः परिघायतबाहवः । शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः ॥ १६ ॥

देदीप्यमानं विरजो निर्मलमम्बरं धर्तुं शीलमस्यास्तीति विरजोम्बरधारिणं तद्विधैः इन्द्रतुल्याकारैः ददर्शेत्यन्वयः ॥ ६ ॥

७] ति० टी०—तद्विधैस्तद्विधाभरणादिभिः हरितैः श्यामवर्णैस्तादृशं रथं च ददर्श ॥ ७ ॥

रा० टी०—हरितैरिति । हरितैः हरितवर्णविशिष्टैः वाजिभिर्युक्तं तरुणादित्यसंनिभं मध्याह्नसूर्यसदृशं पाण्डुराभ्रघनप्रख्यं पाण्डुराभ्रवत् घनप्रख्या निबिडा कान्तिर्यस्य तम् । चन्द्रमण्डलसंनिभं चन्द्रमण्डलाकृतिमन्तरिक्षगतमन्तरिक्षे संस्थितं तस्य इन्द्रस्य रथमदूरतः निकटे ददर्श । अर्थवत्त्रयमेकान्वयि॥७॥८॥

गो० टी०—हरिभिरिति । हरिभिः श्यामैः, यद्वा वाजिभिः वेगवद्भिः हरिभिः अश्वैः तस्य इन्द्रस्य ॥ ७ ॥

८] ति० टी०—पाण्डुराभ्रस्येव घना अधिका प्रख्या कान्तिर्यस्य तत् ॥ ८ ॥

गो० टी०—पाण्डुराभ्रस्येव घना अधिका प्रख्या कान्तिर्यस्य तदिति द्वैत्ये दृष्टान्तः चन्द्रमण्डलसन्निभमिति वृत्ततायां, चित्रमाल्यैर्लम्बमानकुसुमसरैः उपशोभितम् ॥ ८ ॥

९–११] ति० टी०—चामरव्यजने वालव्यजने रुक्मं स्वर्णम्, महाधने रत्नखचितत्वाद् बहुमूल्ये ॥ ९–११ ॥

रा० टी०—अपश्यदिति । चित्रमाल्योपशोभितं चित्रैः स्वर्णादिनिर्मितत्वेन विचित्रैः पुष्पैः उपशोभितं विमलं छत्रमपश्यदग्र्ये अत्युत्तमे रुक्मदण्डे स्वर्णदण्डविशिष्टे महाधने बहुमूल्यके वरनारीभ्यां गृहीते मूर्धनि धूयमाने चामरव्यजने च अपश्यत् । सार्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०—चामरेति । चामरव्यजने चामररूपव्यजने महाधने बहुमूल्ये मूर्नि तस्येति शेषः । अपश्यदित्यद्वयन्वयः ॥९॥

रा० टी०—गन्धर्वेति । शरभङ्गेन सह वासवे इन्द्रे प्रतिभाषणे सति गन्धर्वादयः अद्भ्याभिः उत्कृष्टाभिः गीर्भिः अन्तरिक्षगतं देवमिन्द्रमीडिरे ॥ १० ॥ ११ ॥

गो० टी०—गन्धर्वेति । ईडिरे तुष्टुवुः, ईडमानानपश्यदित्यर्थः ॥ १० ॥

रा० टी०—सहेति । शरभङ्गेन सह वासवे संभाषमाणे सति तत्र शरभङ्गसमीपे शतक्रतुं दृष्ट्वा रामोऽभिरामप्रदो रामः भ्रातुर्भ्रातरमुद्दिश्य संबोध्य रथं दर्शयत अदर्शयत् लक्ष्मणमब्रवीत् च ॥ १२ ॥

गो० टी०—सहेत्यादिसार्धः श्लोक एकान्वयः । तत्र तदानीं राम इति पदस्याप्राप्तिः क्रियाभेदात् अतो न पुनरुक्तिः । उद्दिश्य हस्तेन निर्दिश्य शरभङ्गेन साकं वासवे संभाषमाणे सति तत्र समये रामः शतक्रतुं दृष्ट्वा तदीयरथं रामः लक्ष्मणाय उद्दिश्य प्रदर्शयन् सन् अथ लक्ष्मणमब्रवीदिति योजना ॥ ११ ॥ १२ ॥

१२–१३] ति० टी०—उक्तलक्षणे वासवे शरभङ्गेन संभाषमाणे तु तं शतक्रतुं दृष्ट्वा ज्ञात्वा रामोऽब्रवीत् । उक्तस्यैव प्रपञ्चः—रामोऽथेति । उद्दिश्य हस्तेन निर्दिश्य दर्शयत अदर्शयतेत्यर्थः ॥ १२ ॥ १३ ॥

रा० टी०—तद्वचनाकारमाह—अर्चिष्मन्तमिति । हे लक्ष्मण ! अर्चिष्मन्तं प्रकाशवन्तं श्रिया संपत्त्या जुष्टं सेवितमन्तरिक्षगतं प्रतपन्तमादित्यमिव अद्भुतं रथं पश्य ॥ १३ ॥

गो० टी०—अर्चिष्मन्तमिति । अर्चिष्मन्तं सतेजस्कं श्रिया कान्त्या ॥ १३ ॥

१४] ति० टी०—पुरु बहु यथा तथा यज्वभिराहूयते यागायेति पुरुहूतः नोऽस्माभिः ॥ १४ ॥

रा० टी०—ये इति । पुरुहूतस्य बहुयागकर्तुः शक्रस्य हरयो हरितः ये दिव्याः हयाः अश्वाः पुरा पूर्वं श्रुताः ते अन्तरिक्षगता इमे एव ॥ १४ ॥

गो० टी०—य इति । पुरुहूतस्य यज्वभिर्बहुभिः हूतस्य नः अस्माभिः इमे हरितवर्णाः हरयः अश्वाः ते, यद्वा त इमे शक्रस्य हरय इत्यन्वयः ॥ १४ ॥

१५] ति० टी०—शतं शतम् अष्टदिक्षिति शेषः । शतशब्दोऽनन्तवाची ॥ १५ ॥

१६] ति० टी०—विस्तीर्णविपुलकान्यतिशयेन विशालकान्यु-

---

१ हरिभिरिति गो. पाठः । २ चन्द्रमिति गो. पाठः । ३ वाग्भिरभ्याभिरीडिरे इति गो. पाठः । ४ ईडिरे इति रा. पाठः । ५ भङ्गेणेति गो. पाठः । ६ लक्ष्मणाय प्रदर्शयन्निति गो. पाठः । ७ व्याघ्रा इति गो. पाठः । ८ रथमिति गो. पाठः ।

उरोदेशेषु सर्वेषां हारा ज्वलनसंनिभाः । रूपं बिभ्रति सौमित्रे पञ्चविंशतिवार्षिकम् ॥ १७ ॥
एतद्धि किल देवानां वयो भवति नित्यदा । यथेमे पुरुषव्याघ्रा दृश्यन्ते प्रियदर्शनाः ॥ १८ ॥
इहैव सह वैदेह्या मुहूर्तं तिष्ठ लक्ष्मण । यावज्जानाम्यहं व्यक्तं क एष द्युतिमान्रथे ॥ १९ ॥
तमेवमुक्त्वा सौमित्रिमिहैव स्थीयतामिति । अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति ॥ २० ॥
ततः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः । शरभङ्गमनुज्ञाप्य विबुधानिदमब्रवीत् ॥ २१ ॥
इहोपयात्यसौ रामो यावन्मां नाभिभाषते । निष्ठां नयत तावत्तु ततो मां द्रष्टुमर्हति ॥ २२ ॥

रांसि येषां ते भायता दीर्घाः शोणांशूनि शोणप्रभानि वसनानि येषाम् ' [illegible] ' इति पाठे पद्मरागसदृशवसना इत्यर्थः । ' शोणांशु–' इत्येव प्राचीनः पाठ इति कतकः ॥ १६ ॥

रा० टी०–इमे इति । खड्गपाणयः विस्तीर्णविपुलानि अतिविशालानीत्यर्थः, विपुलशब्दस्य मांसलार्थकत्वे विस्तीर्णमांसलानीत्यर्थः उरांसि येषां ते, परिघवत् आयता दीर्घा बाहवो येषां ते, शोणांशूनि शोणप्रभानि वसनानि येषां ते अभितो दिक्षं चतुर्दिक्षु कुण्डलिनो युवानः इमे शतं शतं ये तिष्ठन्ति ते सर्वे व्याघ्रा इव दुरासदा लक्ष्यन्ते इति शेषः । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–इमे खेत्यादि श्लोकद्वयमेकं वाक्यम् । शतं शतमिति प्रतिदिशमिति शेषः । विस्तीर्णविपुलोरस्काः अत्यन्तविशालोरस्काः शोणांशुवसनाः रक्तकान्तियुक्तवस्त्राः एवंभूता ये इमे तिष्ठन्तीत्वन्वयः येषां सर्वेषाञ्चतुरोदेशेषु हाराः [illegible] अग्निवच्छुक्लभास्वराः दृश्यन्ते रूपमित्यत्रापि ये इत्यध्याहार्यम् । पञ्चविंशतिवर्षाः परिमाणमस्य पञ्चविंशतिवार्षिकं "तदस्य परिमाणम्" इति ठक् "वर्षस्याभविष्यति" इत्युत्तरपदवृद्धिः । एवंभूतं रूपं शरीरं ये बिभ्रति "अदभ्यस्तात्" इत्यादेशः । पञ्चविंशतिवार्षिकमिति यौवनावस्थोच्यते ' कौमारं स्यात्पञ्चदशाद्यौवनं तु ततः परम् ' इत्युक्तेः त इमे शूरा इत्यध्याहार्यम् ॥ १५–१७ ॥

१७] ति० टी०–ज्वलनसंनिभा दीप्तिमात्रेण ॥ १७ ॥

रा० टी०–उर इति । ज्वलनसंनिभाः वह्निसदृशा हाराः सर्वेषाञ्चतुरोदेशेषु विद्यन्ते इति शेषः, हे सौमित्रे ! पञ्चविंशतिवार्षिकं वयः सर्वे इमे बिभ्रति धारयन्ति ॥ १७ ॥

१८] ति० टी०–एतद्धि पञ्चविंशतिवर्षप्रमाणकम् नित्यदेत्यर्थम् ये इमे देवा यथा [illegible] दृश्यन्ते एतद्देवानां नित्यदा वय इति पूर्वेण संबन्धः ॥ १८ ॥

रा० टी०–एतदिति । यथा येन वयसा इमे पुरुषव्याघ्राः दृश्यन्ते तदेतत् पञ्चविंशतिवार्षिकं वयो देवानां भवति एतेनेमे देवा एवेति सूचितम् ॥ १८ ॥

गो० टी०–तत्र युक्तिमाह–एतद्धीति । एतत् पञ्चविंशतिवार्षिकं वयः शरीरावस्था देवानां नित्यदा भवति । नित्यदेति निपातः, किलेति प्रसिद्धौ। यथेमे वसनाभरणादिभिश्चारुदर्शनाः तथा किल देवा इति योजना ॥ १८ ॥

१९] ति० टी०–यावज्जानामि ज्ञास्यामि तावत्तिष्ठेत्यन्वयः । क एष रथे इन्द्रत्वेनानुमितोऽपि प्रमाणान्तरेणापि ज्ञातव्य इत्यर्थः ॥ १९ ॥

रा० टी०–इहेति । हे लक्ष्मण! रथे द्युतिमानेषः कः एतत् यावदहं जानामि तावन्मुहूर्तं त्वं तिष्ठ ॥ १९ ॥

गो० टी०–इहैवेत्यादि । रथे इत्यनेन तदानीं रामं दृष्ट्वा रथमारूढ इत्यवगम्यते । यावज्जानामि ज्ञास्यामि "यावत्पुरानिपातयोर्लट्" इति लट् । व्यक्तम् अनुमितिं विना स्पष्टं प्रत्यक्षेण ज्ञास्यामीत्यर्थः । विरहासहिष्णुतया अनुव्रजन्तं लक्ष्मणं पुनः प्रदिश्य जगामेत्याह–तमेवमिति ॥१९ ॥ २० ॥

२०] ति० टी०–उक्तानुवादपूर्वं व्यापारान्तरोपदेशः–तमेवमित्यादि । इहैव स्थीयतामिति एवमुक्त्वेत्यर्थः ॥ २० ॥

रा० टी०–तमिति । इहैव स्थीयतामित्येवं तं सौमित्रिमुक्त्वा शरभङ्गाश्रमं प्रति काकुत्स्थोऽभिचक्राम ॥ २० ॥

२१] ति० टी०–अनुज्ञाप्य गमनाय कृतानुमतिकं कृत्वा ॥ २१ ॥

रा० टी०–तत इति । समभिगच्छन्तं राममभिप्रेक्ष्य शरभङ्गमनुज्ञाप्य गमनायाज्ञां गृहीत्वा विबुधान् देवानिदमब्रवीत् ॥ २१ ॥

गो० टी०–तत इति । अनुप्राप्य एकान्तवचनश्रवणाय समीपमागत्य विविक्ते रहसि वक्ष्यमाणस्थानेगोप्त्वा· ॥२१॥

२२] ति० टी०–यावदसौ मां नाभिभाषते तावन्मां निष्ठां स्थानान्तरं स्वर्गं वा नयत मया सह गच्छत । ततो वनचारित्वादेतोर्मां मामद्रष्टुमर्हति द्रष्टुं नार्हतीत्यर्थः । अ इति निषेधार्थमव्ययं पृथक्पदम् । विपर्ययेव स्थितमेव वैभवस्य दर्शनमनुचितमित्यर्थः ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–इहेति । यो राम इहोपयाति सोऽसौ यावन्मां नाभिभाषते तावदेव निष्ठां स्थानान्तरं मां नयत । तत्र हेतुः मा मामद्रष्टुमर्हति द्रष्टुं नार्हतीत्यर्थः निषेधार्थकोऽयमकारः ॥ २२ ॥

गो० टी० [illegible] । असौ रामः इह मत्समीपे उपयाति उपयानसौ यावति काले मां नाभिभाषते तावत्स्वप्रतिज्ञां निष्ठां समाप्तिं नयतु ' निष्ठा निष्पत्तिनाशान्ताः ' इत्यमरः । मया असंभाष्यमाण एव स्वप्रतिज्ञां निर्वर्तयतु मया

१ प्राप्य विविक्त इदमिति गो. पाठः ।

जितवन्तं कृतार्थं [1]हि तदाहमचिरादिमम् । कर्म ह्यनेन कर्तव्यं महदन्यैः सुदुष्करम् ॥ २३ ॥
[[2]निष्पादयित्वा तत्कर्म ततो मां द्रष्टुमर्हति ।]
[3]अथ वज्री तमामन्त्र्य मानयित्वा च तापसम् । रथेन [4]हरियुक्तेन ययौ दिवमरिंदमः ॥ २४ ॥
प्रयाते तु सहस्राक्षे राघवः सपरिच्छदः । अग्निहोत्रमुपासीनं [5]शरभङ्गमुपागमत् ॥ २५ ॥
तस्य पादौ च संगृह्य रामः सीता च लक्ष्मणः । निषेदुर्[6]स्तदनुज्ञाता लब्धवासा निमन्त्रिताः ॥ २६ ॥
ततः शक्रोपयानं तु पर्यपृ[7]च्छत राघवः । शरभङ्गश्च तत्सर्वं राघवाय न्यवेदयत् ॥ २७ ॥
मामेष वरदो राम ब्रह्मलोकं [8]निनीषति । जितमुग्रेण तपसा दुष्प्रापमकृतात्मभिः ॥ २८ ॥

संभाषणेऽस्य देवत्वप्रकटनं स्यादिति भावः । संभाषणाभावेऽपि दर्शनमस्त्वित्यत आह—तत इति । ततः स्वप्रतिज्ञानिशानयनानन्तरं मां द्रष्टुमर्हति स मां पश्यतु ॥ २२ ॥

२३] ति० टी०—कृतार्थं निस्तीर्णविपदम् जितवन्तम् रावणमिति शेषः । तदा वैभवयुक्तमिमं द्रक्ष्यामीति शेषः । कृतकस्त्वेतत्पदं प्रविष्टमित्याह तद्रूपेण, मद्दीक्षया व्याख्याने सर्वसामञ्जस्यात् । रामो यावन्मां नाभिभाषते तावत्कर्मणो रावणवधस्य निष्ठां समाप्तिं नयत । ततो मां द्रष्टुमर्हति । अन्यैः सुदुष्करं महत्कर्म तेन कर्तव्यमस्ति रावणवधरूपम्, अतस्तत्करणेन कृतार्थं कृतदेवप्रयोजनं रावणजयिनं द्रष्टास्मि इति तीर्थव्याख्याने । संप्रत्यदर्शनहेतुस्तु पूर्वोक्त एवोपरितो बोध्यः ॥ २२ ॥

रा० टी०—नन्वतिभाग्यलभ्यं रामदर्शनं तत्स्यज्यते इत्यत आह—जितवन्तमिति । अन्यैः एतद्भिन्नैः सुदुष्करं कर्तुमशक्यं कर्म राक्षसजयरूपं कर्तव्यमतः जितवन्तं कृतरावणवधमित्यर्थः, अत एव कृतार्थं साधितात्मत्प्रयोजनमिमं राममचिराच्छीघ्रमहं द्रष्टास्मीति शेषः, एतेन रामसंभाषणे सति रावणः कोपं कर्तेतीन्द्रस्य भीतिर्व्यञ्जिता ॥ २२ ॥

गो० टी०—भवान् तं पश्यत्वित्यत्र —जितवन्तमिति। रावणं जितवन्तम् अत एव कृतार्थं कृतदेवप्रयोजनम् इममहमचिराद्रक्ष्या द्रष्टास्मि । दर्शनसंभाषणाभ्यां देवत्वप्रकटने का हानिरित्यत्राह—कर्मेति । हि यस्मादन्यैर्देवैर्दुष्करं महत्कर्म रावणवधादिकम् अनेन मानुषवेषेण कर्तव्यं तस्मादित्यर्थः॥ २२ ॥

२४] ति० टी०—अथ वज्रीति । देवैराकारोत्तरं तं तापसं शरभङ्गमामन्त्र्य मानयित्वा संपूज्य च दिवं ययौ॥२४॥

रा० टी०—अथेति। वज्री इन्द्रस्तं शरभङ्गमामन्त्र्य गमनाय संप्राप्यं मानयित्वा संपूज्य च हरियुक्तेन रथेन दिवं ययौ॥२४॥

गो० टी०—इतीति। इति उक्तप्रकारेण तापसं तापसवेषं मानयित्वा बहुमान्य तं शरभङ्गमामन्त्र्य हरियुक्तेन अश्वयुक्तेन रथेन दिवं ययौ ॥ २४ ॥

२५] ति० टी०—सपरिच्छदः जीवात्सहितः ॥ २५ ॥

रा० टी०—प्रयाते इति । सहस्राक्षे प्रयाते सति सपरिच्छदः सीतालक्ष्मणसहितः राघवो रामः शरभङ्गमुपागमत् ॥ २५ ॥

गो० टी०—प्रयाते त्विति । रामागमनयोगकाल एवेन्द्रस्य प्रयातत्वात् सपरिच्छदं जीवात्मरूपपरिवारसहितं यथा भवति तथा अग्निहोत्रं वह्निम् उपासीनं तत्र प्रवेशार्थमुपविशन्तं शरभङ्गमुपागमत् ॥ २५ ॥

२६] ति० टी०—पादौ संगृह्य राम ईश्वरोऽपि ब्राह्मणा एवं पूज्या इत्यन्याक्षिप्तयितुमेवं चकार । तदनुज्ञाता आसनावस्थानाय कृतानुमतिकाः अत एव लब्धवासा लब्धवासस्थानाः निमन्त्रिता भोजनार्थम् तादृशा निषेदुः ॥ २६ ॥

रा० टी०—तस्येति । तस्य शरभङ्गस्य पादौ संगृह्य संस्तुत्य तदनुज्ञाताः शरभङ्गेनानुज्ञाताः लब्धवासाः प्राप्तवासस्थानाः निमन्त्रिता रामादयः निषेदुः ॥ २६ ॥

गो० टी०—तस्येति । तमनुज्ञाताः आसनाय कृतानुमतिकाः लब्धवासाः सुनिता लब्धासनाः ततो निमन्त्रिताः सत्कृताश्च सन्तः निषेदुः ॥ २६ ॥

२७] ति० टी०—शक्रोपयानमिन्द्रागमनप्रयोजनम् ॥२७॥

रा० टी०—तत इति । ततः स्थितक्षणान्तरं शक्रोपयानं शक्रस्य इन्द्रस्य उपयानमागमनं यस्मै प्रयोजनाय तत् राघवः पर्यपृच्छत् तत् सर्वमिन्द्रागमनप्रयोजनादि न्यवेदयत् शरभङ्गः ॥ २७ ॥

गो० टी०—तत इति । शक्रोपयानं —न्द्रागमनकारणमिति-तम् ॥ २७ ॥

२८] ति० टी०—तत्कथनप्रकारेण —मामेष इति । उग्रेण तपसा मया जितं ब्रह्मलोकमेष वरद इन्द्रो ब्रह्मलोका मां निनीषति, यद्वा देवेन्द्रवेषधारी ब्रह्मैवायम् अकृतात्मभिरनङ्गीकृतभगवदुपासनैः ॥ २८ ॥

रा० टी०—तत्कथनप्रकारेण —मामिति । अकृतात्मभिः न कृतः परमात्मनि समर्पितः आत्मा मनो यैस्तैर्दुष्प्रापं प्राप्तुमशक्यमुग्रेण महता तपसा परमात्मविचारेण जितं प्राप्तुं शक्यमित्यर्थः, ब्रह्मलोकं वरदः एष इन्द्रो मां निनीषति नेतुमिच्छति ॥ २८ ॥

गो० टी०—कथं न्यवेदयदित्यत्र —मामिति । सर्वेषां वरं ददातीति वरदः एष इन्द्रः मां ब्रह्मलोकं निनीषति नेतुमिच्छति ब्रह्मत्वेनेति शेषः ॥ २८ ॥

---

१ च ब्रह्मवादिनि गो. पाठः । २ अर्धमेतत्पदिकं गो. पाठे । ३ इतीति गो. पाठः । ४ हरीति गो. पाठः । ५ छन्दसीति गो. पाठः । ६ समनुज्ञात इति गो. पाठः । ७ पृच्छत इति गो. रा. पाठः ।

अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः । ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिम् ॥ २९ ॥
त्वयाहं पुरुषव्याघ्र धार्मिकेण महात्मना । समागम्य गमिष्यामि त्रिदिवं चावरं परम् ॥ ३० ॥
अक्षया नरशार्दूल जिता लोका मया शुभाः । ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामकान् ॥ ३१ ॥
एवमुक्तो नरव्याघ्रः सर्वशास्त्रविशारदः । ऋषिणा शरभङ्गेन राघवो वाक्यमब्रवीत् ॥ ३२ ॥
अहमेवाहरिष्यामि सर्वान्लोकान्महामुने । आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ ३३ ॥
राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै । शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद्वचः ॥ ३४ ॥

२९] ति० टी०—तर्हि किमिति विलम्बितं तत्राह—अहमिति । ज्ञात्वा योगचक्षुषा न गच्छामि योगसिद्धया स्वेच्छया देहत्यागाच्चां प्रियातिथिमतिप्रियमतिथिम् ॥ २९ ॥

रा० टी०—नन्वं तेन सहैव कुतो न गतो भवानित्यत आह—अहमिति । हे नरव्याघ्र! अदूरतः निकटे वर्तमानं प्रियातिथिं त्वां ज्ञात्वा अदृष्ट्वा भवदर्शनमकृत्वा ब्रह्मलोकं न गच्छामि अगमम् एतेन रामविषयकप्रेमातिशयः शरभङ्गस्य सूचितः ॥ २९ ॥

गो० टी०—तर्हि किमर्थं न गतोऽसीत्यत्राह—अहमिति । हे नरव्याघ्र! अदूरतो वर्तमानं मनसि सदा सन्निहितं त्वां योगतो ज्ञात्वा प्रियातिथिं त्वामदृष्ट्वा त्वदनुभवानन्दं विहाय ब्रह्मलोकम् 'आब्रह्मभवनाल्लोकाः पुनरावर्तिनः' इत्युक्तलोकं न गच्छामि ॥ २९ ॥

३०] ति० टी०—त्वया समागम्य त्वत्समागमश्च सकृदपि संवृत्त एतावत्कालपर्यन्ताद्यष्ठितोपासनातोऽधिकफलद इति भावः त्रिदिवमवरं परं च, परो ब्रह्मलोकः ॥ ३० ॥

रा० टी०—त्वयेति । हे पुरुषव्याघ्र! धार्मिकेण महात्मना त्वया समागम्य अवरं त्रिदिवं स्वर्गं परं ब्रह्मलोकं च गमिष्यामि ॥ ३० ॥

गो० टी०—तर्हि केन साधनेन कं लोकं गमिष्यसीत्यत्राह—त्वयेति । धार्मिकेण [illegible]रूपेण स्वार्थे ठक्, महात्मना सत्यसंकल्पेन त्वया समागम्य त्वत्कटाक्षविषयो भूत्वा देवसेवितं यत्र पूर्वे साध्याः सन्ति देवा इत्युक्तरीत्या नित्यसूरिसेवितं त्रिदिवं त्रिपाद्विभूतिं ब्रह्मलोकादुत्कृष्टं गमिष्यामि ब्रह्मलोकं न गच्छामि त्रिदिवं गमिष्यामीत्यनेनायमर्थोऽवगम्यते ॥ ३० ॥

३१-३२] ति० टी०—समागमस्य यथाऽधिकफलता भवति तथा करोति—अक्षया इति । के ते लोकास्तत्राह—ब्राह्मया इति । उभयत्र घ्यञ् आर्षः । ब्रह्मलोका नाकपृष्ठलोकाश्च जिता मामकास्तान्प्रगृह्णीष्व स्वकृतत्वेनाङ्गीकुरुष्व । अनेन सर्वकर्मणां भगवदर्पणमकरोदिति सूचितम् । ' कामतोऽकामतो वापि यत्करोमि शुभाशुभम् । तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम् ॥ नाहं कर्ता सर्वमेतद्भवैव कुरुते तथा । एतद्ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥ ' इति कौर्मोक्तिः । भगवत्यर्पितधर्माणामनन्तफलत्वं गीतादिषु स्पष्टमेव [illegible]त्वात् ॥ ३१ ॥ ३२ ॥

रा० टी०—अक्षया इति । हे नरशार्दूल ! अक्षयाः क्षयरहिता नाकपृष्ठ्याः स्वर्गाः ब्राह्मया ब्रह्मसंबन्धिनश्च शुभाः लोका ये जिताः भवत्कृपया स्वप्राप्तियोग्याः कृताः तान् मामकाँल्लोकान् त्वं प्रतिगृह्णीष्व स्वकीयत्वेन जानीहि, एतेन तल्लोके रघुनाथागमनं प्रार्थितमिति सूचितम् ॥ ३१ ॥

रा० टी०—एवमिति । शरभङ्गेन ऋषिणा एवमुक्तो राघवः वाक्यमब्रवीत् ॥ ३२ ॥

गो० टी०—क्रमेण तथा भविष्यति आर्जितकर्मफलानि प्रथममनुभवेत्यत आह—अक्षया इति । ब्राह्मयाः ब्रह्मलोकभवाः नाकपृष्ठ्याः स्वर्गलोकभवाः अक्षयावधिरकालस्थायिनः ये लोकाः भोगभूमयः मया आर्जिताः तान् मामकान् प्रतिगृह्णीष्व मत्कृतानि सर्वाणि सुकृतानि त्वदर्पितानि सन्त्विति भावः । सर्वत्रातिथिसत्कारः प्रातीतिकोऽर्थः । कर्मणां भगवदर्पणं नाम फलसङ्कल्पागकर्तृत्वत्यागपूर्वकं भगवत्कैङ्कर्यतयाऽनुष्ठानम् ॥ ३१ ॥ ३२ ॥

३३-३४] ति० टी०—अहमेवेति । तपसेत्यर्थः स्वेष्टप्रतिग्रहे नाहमधिकारीत्यापाततोऽर्थः, वास्तवस्तु ऋषेः परमभक्तस्यानुग्रहाय तदर्पितधर्माङ्गीकारमाह भगवान्—अहमेवेति । मयि न्यासत्वेन स्थापितानिमांस्त्वदर्जितान्सर्वाँल्लोकांस्तुभ्यमहमेवाहरिष्यामि प्रापयिष्यामीत्युक्त्वेतरजनाप्रतारणायाह—आवासं त्विति । प्रदिष्टमुपदिष्टम् ॥ ३३ ॥ ३४ ॥

रा० टी०—तद्वचनाकारमाह—अहमिति । हे महाभुजे ! प्रदिष्टं भवदाज्ञा यदि स्यात्तदा सर्वान् भवदीप्सितान् लोकान् इहैव अहमाहरिष्यामि प्रापयिष्यामि । तत्र हेतुः—यतः इह कानने आवासमहमिच्छामि ॥ ३३ ॥

गो० टी०—तदिदमङ्गीकुर्वन् तस्य वाग्विकैङ्कर्यं नियमयति—अहमेवेति । आहरिष्याम्येव स्वीकरिष्याम्येव सर्वलोकान् त्वया मय्यर्पितान् इह कानने प्रदिष्टं त्वया निर्दिष्टम्, आवासं त्विच्छामि तुभ्यन्देन त्वदभिमतदेश एव वास इत्युच्यते । सा कथमीति न चाकथमीति भुवि स्थाऽऽयोध्येति नाभ्यास्यत इत्यादिकमिहानुसंधेयम् ॥ ३३ ॥

रा० टी०—राघवेणेति । शक्रः तुल्यबलो यस्य तेन राघवेण एवमुक्तः शरभङ्गः पुनरब्रीत् ॥ ३४ ॥

गो० टी० [illegible]जीते । महाप्राज्ञ इत्यनेन मृगरूपमारीचनिरसनं मनसि कृतवानिति सूचयति ॥ ३४ ॥

१ देवसेवितमिति गो. पाठः । २ भङ्गेणेति गो. पाठः । ३ सर्वलोकानिति गो. पाठः ।

इह राम महातेजाः सुतीक्ष्णो नाम धार्मिकः । वसत्यरण्ये [1]नियतः स ते श्रेयो विधास्यति ॥ ३५ ॥
[सुतीक्ष्णमभिगच्छ त्वं शुचौ देशे तपस्विनम् । रमणीये वनोद्देशे स ते वासं विधास्यति ॥]
इमां मन्दाकिनीं राम प्रतिस्रोतामनुव्रज । नदीं पुष्पोडुपवहां [2]ततस्तत्र गमिष्यसि ॥ ३६ ॥
एष पन्था नरव्याघ्र मुहूर्तं पश्य तात माम् । यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥ ३७ ॥
ततोऽग्निं [3]स समाधाय हुत्वा चाज्येन मन्त्रवत् । शरभङ्गो महातेजाः प्रविवेश हुताशनम् ॥ ३८ ॥
तस्य रोमाणि केशांश्च [4]तदा वह्निर्महात्मनः । जीर्णां त्वचं [5]तदस्थीनि यच्च मांसं च शोणितम्॥ ३९ ॥
[रामस्तु विस्मितो भ्रात्रा भार्यया च सहात्मवान् ।]
स च पावकसंकाशः कुमारः समपद्यत । उत्थायाग्निचयात्तस्माच्छरभङ्गो व्यरोचत ॥ ४० ॥
स लोकानाहिताग्नीनामृषीणां च महात्मनाम् । देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ॥ ४१ ॥

३५] ति० टी०—इहारण्ये वसति। अदूरे इति शेषः॥३५॥

रा० टी०—तद्वचनानन्तरमाह—इहेति । हे राम ! सुतीक्ष्णो नाम सुतीक्ष्णाभिधः धार्मिकः इहारण्ये नियतो वसति स सुतीक्ष्णः ते श्रेयः स्वदभिलषितकल्याणं विधास्यति । एतेन मम स्थितियोग्यता इह नास्तीति सूचितं तेन अहमागच्छामीतीन्द्रागमने प्रतिज्ञातमिति सूचितम् तेन ऋषेः परमधर्मत्वं सूचितम् ॥ ३५ ॥

गो० टी०—इहेति । धार्मिकः धर्मचारी धर्मात्मा धर्मबुद्धिः वसति अदूर इति शेषः ॥ ३५ ॥ ३६ ॥

३६] ति० टी०—प्रतिस्रोताम् आवन्तत्वमार्षम् । मन्दाकिनीं तामिव पुण्यां तन्नामिकां वा चित्रकूटस्थेयमेव प्रतिस्रोतसं कृत्वा व्रज । पूर्ववाहिन्यां पुरुषेण पश्चिमाभिमुखतया गमने प्रतिस्रोतस्त्वं भवति । पुष्पवल्लघु उडुपवहा उडुपं प्लवः पुष्पसमूहवहामिति वा ॥ ३६ ॥

रा० टी०—तत्र गमनाय मार्गमुपदिशति—इमामिति । पुष्पोडुपवहां प्लवसदृशपुष्पप्रवाहयुक्तां प्रतिस्रोतां देवादिभिः प्रतिस्रोतस्त्वं प्रापिनां पश्चिमाभिमुखं वाहितामित्यर्थः, आवन्तत्वमार्षमिति भट्टाः । इमां मन्दाकिनीं तदवयवभूतात्पधारां नदीमनुगच्छेति शेषः । ततः तदनुगमनात्तत्र सुतीक्ष्णाश्रमे गमिष्यसि ॥ ३६ ॥

गो० टी०—इमामिति । मन्दाकिनीशब्दः पुण्यनदीमात्रे मुनिभिरुपचर्यते अत एव चित्रकूटेऽप्युक्तं प्रतिस्रोतामिति । टीकार्थः । प्रतिस्रोतसं कृत्वाऽनुसृत्य व्रज नद्यां पूर्ववाहिन्यां पुरुषेण पश्चिमाभिमुखतया गमने प्रतिस्रोतस्त्वं भवति । पुष्पोडुपवहाम् उडुपः प्लवः उडुपाकारपुष्पचयावहामित्यर्थः, नदीं तत्र तत्र गमिष्यसीत्यनेन क्वचिन्नदीतीरे क्वचिद्वयवहिते च मार्ग इत्युच्यते ॥ ३७ ॥

३७] ति० टी०—एष पन्था इति मार्गोपदेशः । अथ ऋषिर्भगवत्प्राप्तेस्तत्क्षणोत्तरं दत्त्वा स्वाभीष्टं भगवन्तं प्रार्थयते—मुहूर्तं तात पश्य माम् । अयं कृतार्थो भवत्वित्यभिध्यानपूर्वकं कटाक्षेणेति शेषः । तातेति गुरुं जगज्जनकेत्यर्थमपि गात्राणि गात्रावयवान् ॥ ३७ ॥

रा० टी०—एष इति । एष नदीतट एव पन्थाः सुतीक्ष्णाश्रमप्रापको मार्गः जीर्णां त्वचमुरगः सर्प इव गात्राणि यावज्जहामि त्यजामि तावत्कालं त्वं मां पश्य, किंच तावत्कालं त्वं पश्य । नन्वं किमर्थमवलोक इत्यत आह—एष भवदवलोक एव पन्थाः परमकल्याणप्रापकमार्गः ॥ ३७ ॥

गो० टी०—एष पन्था इति । अनयोक्त्या सुतीक्ष्णाश्रममार्गो हस्तेन निर्दिश्यते । अथ मुनिः स्वदेहत्यागकाले रामसन्निधानमर्थयते—मुहूर्तं पश्य तात मामिति । तात सर्वलोकजनक ! ॥ ३८ ॥

३८] ति० टी०—ततोऽग्निं स इति । 'वृद्धः शौचक्रियाशुद्धः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥' इत्युक्तेऽग्निप्रवेशेऽन्येष्टिमार्गेणाग्निं समाधाय मन्त्रवत्तदुक्तमन्त्रैर्हुत्वा चाग्निप्रवेशोक्तमन्त्रैरुपनिषदुक्तैः प्रविवेश ॥३८॥

रा० टी०—तत इति । ततः रामस्त्विदृगेवमकप्रार्थनानन्तरमग्निं समाधाय मन्त्रवत् यथा स्यात्तथा आज्येन हुत्वा शरभङ्गः हुताशनं विवेश ॥ ३८ ॥

गो० टी०—तत इति । मन्त्रवित् ब्रह्ममेधमन्त्रवित् शरभङ्गः अग्निं समाधाय परिस्तरणादिभिरलंकृत्य आज्येन ब्रह्ममेधमन्त्रैर्हुत्वा हुताशनं प्रविवेश । अत्र विधिः—' यद्युत्सर्प्स्यन्स तदाबाध्यौ ब्रह्ममेधानलं व्रजेत् । नाभिवक्षात्समानीयोरोप्य यथास्थलम् । संस्कारयेत् ' इति ॥ ३९–४१ ॥

३९] ति० टी०—तस्येति । तस्य शरभङ्गस्य रोमादीनि वह्निर्दिदाहेति शेषः ॥ ३९ ॥

रा० टी०—तस्येति । तस्य शरभङ्गस्य रोमप्रभृतीनि वह्निरदहदिति शेषः ॥ ३९ ॥

४०] ति० टी०—स्वर्गारोहणार्थं दिव्यशरीरपरिग्रहः, अग्निप्रवेशस्य पूर्वकृतोपासनस्य च फलभूतमाह—स चेति ॥ ४० ॥

रा० टी०—स इति। स शरभङ्गः अग्निचयादुत्थाय पावकसंकाशः कुमारः समपद्यत अभवत्, व्यरोचत अशोभत च॥४०॥

४१] ति० टी०—आहिताग्निलोकाः "कर्मणा पितृलोकः" इति

१ नियमेति गो. पाठः। २ श्लोकोऽयमधिकः गो. पाठे। ३ तत्र तत्रेति गो. पाठः। ४ स्विति गो. पाठः। ५ विदिति गो. पाठः। ६ ददाहास्थीनि गो. पाठः। ७ तत्रेति गो. रा. पाठः। ८ अर्धमेतदधिकं गो. पाठे।

स पुण्यकर्मा भुवने द्विजर्षभः पितामहं सानुचरं ददर्श ह ।
पितामहश्चापि समीक्ष्य तं द्विजं ननन्द सुस्वागतमित्युवाच ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ।

रक्षःपीडां परिजिहीर्षवो मुनयः सुतीक्ष्णाश्रमे रामं राजधर्ममुपदिश्य रक्षोवधमयाचन्नथ तेभ्यो वितीर्णाभयो रामः सुतीक्ष्णाश्रमं प्रतस्थे ।

शरभङ्गे दिवं प्राप्ते मुनिसङ्घाः समागताः । अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥ १ ॥
वैखानसा बालखिल्याः संप्रक्षाला मरीचिपाः । अश्मकुट्टाश्च बहवः पत्राहाराश्च तापसाः ॥ २ ॥

श्रुताश्चन्द्रप्रदक्षिणाः ऋषिलोका "विषया देवलोकः" इति श्रुताः सूर्यप्रदक्षिणाः । देवानामाजानदेवानां ब्रह्मविष्णुरुद्राणां च लोकाः, यान्ध्रुवः प्रदक्षिणं करोति । ततो ब्रह्मलोकं तुर्यं व्यरोहत्तारूढवान् ॥ ४१ ॥

रा० टी०—स इति । स शरभङ्गः आहिताग्न्यादीनां लोकान्व्यतिक्रम्य ब्रह्मलोकं सच्चिदानन्दपुरं साकेतमित्यर्थः, व्यरोहत प्राप्नोत् ॥ ४१ ॥

गो० टी०—अथास्य देवयानमार्गेण ब्रह्मलोकप्राप्तिं दर्शयति—स चेत्यादिना । कुमारलक्षणमुक्तं रत्नाकरे 'बालोऽथ पञ्चदशभिर्विंशद्भिस्तु कुमारकः' इति । "ब्रह्मलोकं तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षड्दक्षिणेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसा विद्युतं तत्पुरुषो मानवः स एनान् ब्रह्म गमयति" इत्युक्तं ब्रह्मात्मकं लोकम् ॥ ४२ ॥ ४३ ॥

४२] ति० टी०—पितामहं ब्रह्मादित्रयसमष्टिरूपम् ॥ ४२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वामीकीय आदिकाव्येऽरण्यकाण्डे पञ्चमः सर्गः ॥ ५ ॥

रा० टी०—स इति । पुण्यकर्मा स शरभङ्गः सानुचरं पितामहं ब्रह्माणं ददर्श पितामहोऽपि तं समीक्ष्य ननन्द स्वागतमित्युवाच च ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चमः सर्गः ॥ ५ ॥

गो० टी०—स इति । अत्र पितामहशब्दोऽपि सविग्रहपरमात्मपरः । सर्वमिदं शरभङ्गस्य रामसाक्षिध्यप्रतीक्षया व्यज्यते ॥ ४४ ॥

अस्मिन् सर्गे चतुश्चत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

१] ति० टी०—मुनिसंघा दण्डकारण्यवासिनः समागता मिलिता अभ्यगच्छन्त स्वरक्षणप्रार्थनार्थमिति शेषः ॥ १ ॥

रा० टी०—शरभङ्गस्वर्गमनानन्तरकालिकं वृत्तान्तमाह—शरभङ्ग इत्यादिभिः । शरभङ्गे दिवं प्राप्ते सति समागताः शरभङ्गदर्शनार्थं प्राप्ता मुनिसङ्घाः ज्वलिततेजसं राममभ्यगच्छन्त संमुखं प्राप्नुवन् ॥ १ ॥

गो० टी०—एवं स्वरवधार्थिमुनिजनशरणागतिं वक्तुं तदुपयोगितया रामस्य समर्थकारुणिकत्वमुक्त्वा अथ तच्छरणागतिं वक्तुमुपक्रमते—शरभङ्ग इत्यादि । शरभङ्गे दिवं यात इति कालप्रदर्शनं सुतीक्ष्णादीनां वियमानत्वात् । समागताः संमिलिताः ॥ १ ॥

२] ति० टी०—वैखानसा इति । " ये नखास्ते वैखानसा ये बालास्ते बालखिल्याः " इति श्रुतेः प्रजापतेर्नखलोमजाः । संप्रक्षाला भगवतः पादप्रक्षालनजा महर्षयः, अश्वस्तनिकाः संप्रक्षाला इत्यन्ये मरीचिपा रविचन्द्रान्यतररश्मिकिरणजीवनाः, अश्मकुट्टा अपक्वकुट्टितान्नभक्षकाः ॥ २ ॥

रा० टी०—वैखानसा इति । वैखानसाः प्रजापतिनखसंजाताः, बालखिल्याः प्रजापतिलोमजाः " ये नखास्ते वैखानसाः ये बालास्ते बालखिल्याः " इति श्रुतिः । ये तत्र बालाः केशाः संप्रक्षालाः परमात्मनश्चरणप्रक्षालनजाताः, मरीचिपाः किरणपानशालाः, अश्मकुट्टाः अश्मकुट्टितपानभोजनाः आमान्नभक्षका इत्यर्थः, पत्राहाराः पत्रमात्राहारनिरताः, बहवो दन्तोलूखलिनः दन्ता एव उलूखलानि तद्वन्तः उन्मज्जकाः कण्ठपरिमितजले स्थितिरूपतपोनिरताः, गात्रशय्याः गात्रावयवानि व्याघ्रचर्मादीनि शय्या येषां ते, अशय्याः आस्तरणरहितस्थितिमन्तः, अनवकाशिकाः अहर्दिवं कर्मनिरतत्वादवकाशरहिताः ॥ ३ ॥

गो० टी०—वैखानसा इत्यादि । "ये नखाः ते वैखानसाः ये बालास्ते बालखिल्याः" इत्युक्तरीत्या भगवन्नखरोमजाता ऋषयः, सदा शरीरं संप्रक्षालयन्तीति संप्रक्षालाः, मरीचीन्सूर्यादिकिरणान् सदा पिबन्तीति मरीचिपाः सदान्तः किरणान् प्रवेशयन्तो विद्युतास्या इत्यर्थः, अश्मभिरात्मशरीराणि कुट्टयन्तीत्यश्मकुट्टाः, पत्राहाराः पर्णाशनाः ॥ २ ॥

---

१ भवने इति गो. पाठः । २ हेति गो. पाठः । ३ धार्मिका इति गो. पाठः ।

दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे । गात्रशय्या अशय्याश्च तथैवानवकाशिकाः ॥ ३ ॥
मुनयः सलिलाहारा वायुभक्षास्तथापरे । आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ॥ ४ ॥
तथोर्ध्ववासिनो दान्तास्तथाऽऽर्द्रपटवाससः । सजपाश्च तपोनिष्ठास्तथा पञ्चतपोन्विताः ॥ ५ ॥
सर्वे ब्राह्म्या श्रिया युक्ता दृढयोगसमाहिताः । शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः ॥ ६ ॥
अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरम् । ऊचुः परमधर्मज्ञमृषिसंघाः समागताः ॥ ७ ॥
त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महारथः । प्रधानश्चापि नाथश्च देवानां मघवानिव ॥ ८ ॥
विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च । पितृव्रतत्वं सत्यं च त्वयि धर्मश्च पुष्कलः ॥ ९ ॥

३] ति० टी०—दन्तोलूखलिनो दन्तातिरिक्तावहननसाधनरहिताः उन्मज्जकाः कण्ठदघ्ने जले स्थित्वा तपःकुर्वन्तः, गात्रशय्या अनास्तरणशायिनः, अशय्या निद्राहीनाः, अनवकाशिका एकपादस्य स्थित्यवकाशदानरहिताः एकपादस्थितिमन्त इति यावत् ॥ ३ ॥

गो० टी०—दन्ता एवोलूखलं तदेषामस्तीति दन्तोलूखलिनः दन्तैरेव व्रीह्यादितुषनिर्मोकं कृत्वा भक्षयन्त इत्यर्थः, उन्मज्जकाः शिरोमात्रमुद्धृत्य सदा जलावगाढाः गात्रमेव शय्या येषां ते गात्रशय्याः उरसि पृष्ठेतयोर्वा शिरः कृत्वा शयाना इत्यर्थः, अतो न स्थण्डिलशायिन इत्यनेन पुनरुक्तिः । अशय्याः अनम्रगात्रा इत्यर्थः, अभावकाशकाः वर्षवातातपादिप्रत्यनाकृतदेश एव वर्तमानाः ॥ ३ ॥

४] ति० टी०—आकाशनिलया अनाकृतप्रदेशस्थायिनः, स्थण्डिलशायिन उपलिप्तानास्तीर्णस्थलशयनाः ॥ ४ ॥

रा० टी०—मुनयः वेदतात्पर्यमननशीलाः, सलिलाहाराः जलमात्राहारवन्तः, वायुभक्षाः वायुमात्रभक्षकाः, आकाशनिलयाः अनावृतदेशनिवासिनः, स्थण्डिलशायिनः भूमिमात्रशयनाः ॥ ४ ॥

गो० टी०—सलिलाहाराः सलिलमात्राहाराः वायुभक्षाः वायुमात्रभक्षाः, आकाशे वृक्षाग्रादौ निलीयन्त इत्याकाशनिलयाः, स्थण्डिले कुशादास्तृतभूतले शेरत इति स्थण्डिलशायिनः ॥ ४ ॥

५] ति० टी०—ऊर्ध्ववासिनो गिरिशिखरायूर्ध्वप्रदेशे नित्यं वासशीलिनः 'व्रतोपवासिनः' इति पाठस्तु चिन्त्यः तस्य साधारणधर्मत्वादिति कतकः । आर्द्रपटवाससो नित्यमार्द्रवस्त्रवसनशीलाः, सजपाः सदा जपपराः, तपोनिष्ठाः सदा स्वाध्यायाध्ययनशीलाः "[illegible] हि स्वाध्यायः" इत्युक्तेः, पञ्चतपोन्विता ग्रीष्मे पञ्चाग्निमध्यस्थाः ॥ ५ ॥

रा० टी०—ऊर्ध्ववासिनः शतशिखरादिमात्रस्थितिमन्तः, दान्ता निर्मितकरणाः, आर्द्रपटवाससः आर्द्रदिवं जले स्थितत्वात् [illegible] वसानाः, सजपाः जपशीलाः, तपोनिष्ठाः परमात्मविचारनिरताः, पञ्चतपोन्विताः ग्रीष्मे पञ्चाग्निमध्ये स्थिताः ॥ ५ ॥

गो० टी०—व्रतोपवासिनः व्रतोपवासनिरताः सर्वाहारशून्या इत्यर्थः । आर्द्रपटवाससः आर्द्रपटवसनशीलाः, सजपाः सदा जपशीलाः, तपोनिष्ठाः "स्वाध्यायमधीते तप एव तप्यते तपो हि स्वाध्यायः" इत्युक्तसदास्वाध्यायपारायणरूपतपोनिष्ठाः, पञ्चतपोन्विताः ग्रीष्मे पञ्चाग्निमध्यस्थाः ॥ ५ ॥

६-७] ति० टी०—ब्राह्म्या श्रिया ब्रह्मविद्यानुष्ठानजनितब्रह्मवर्चसेन दृढयोगसमाहिता योगैकाग्र्यचित्ताः ॥ ६ ॥ ७ ॥

रा० टी०—ब्राह्म्या श्रिया परमात्मोपासनजनितशोभया युक्ताः, दृढः परिपक्वो यो योगः परमात्मस्मरणं तेन समाहिताः एकाग्रचित्ताश्च तापसाः शरभङ्गाश्रमे राममभिजग्मुः । श्लोकपञ्चकमेकान्वयि ॥ ६ ॥

गो० टी०—ब्राह्म्या श्रिया ब्रह्मविद्यानुष्ठानजनितब्रह्मवर्चसेन दृढः परिपक्वः योगो यमनियमाद्यष्टाङ्गयोगो येषां ते दृढयोगाः समाहिताः योगैकाग्र्यचित्ताः एवंभूतास्तापसा राममभिजग्मुरित्यन्वयः । मुनिवैविध्योक्तिर्दर्शनीयत्वाय । अत्राभिजग्मुरित्यनेन शरणागतिरुक्ता ॥ ६ ॥

रा० टी०—अभीति । समागता ऋषिसंघाः परमधर्मज्ञमत एव धर्मभृतां वरं स्वीकारकर्तारं राममभिगम्य संभ्रमं प्राप्य ऊचुः ॥ ७ ॥

गो० टी०—अभिगम्येत्यादि ॥ ७ ॥

८] ति० टी०—किमूचुस्तदाह—त्वमिति । इक्ष्वाकुकुलस्य पृथिव्याश्च येन सकलत्रैलोक्यस्येति गम्यम् । प्रधानत्वेन जगदारणकर्तृत्वं नाथत्वेन पालकत्वं गर्भितम्, देवानां मघवानिव ॥ ८ ॥

रा० टी०—तद्वचनाकारमाह—त्वमिति । अस्य इक्ष्वाकुकुलस्य पृथिव्याः सकलचक्रवर्तिनश्चापि देवानां मघवानिव प्रधानः पालकः नाथः स्वामी च त्वमसीति शेषः ॥ ८ ॥

गो० टी०—इक्ष्वाकुकुलस्य प्रधानः पृथिव्याश्च नाथः । प्रथमे दृष्टान्तः—देवानामिति । यथा देवेन्द्र इति चक्रस्य नाम तथा [illegible] पतिरिति तव नामेत्यर्थः ॥ ८ ॥

९] ति० टी०—यशसा विक्रमेण च श्रुतः प्रसिद्धः तेन कर्त्रेत्येति शेषः । पि[illegible]नजनकत्वं व्रतं यस्य तद्भावः सत्यं सत्य-

१ अशय्यकाशका इति गो. पाठः । २ व्रतोपवासिन इति गो. पाठः । ३ तपोनिष्ठा इति गो. पाठः । ४ जुह्वा इत्यौष्ण इति गो. पाठः । ५ हित इति गो. पाठः । ६ रक्षेति गो. पाठः । ७ असीति गो. पाठः । ८ मघवेति गो. पाठः ।

त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम् । अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि ॥ १० ॥
अधर्मः सुमहान्नाथ भवेत्तस्य तु भूपतेः । यो हरेद्बलिषड्भागं न च रक्षति पुत्रवत् ॥ ११ ॥
युञ्जानः स्वानिव प्राणान्प्राणैरिष्टान्सुतानिव । नित्ययुक्तः सदा रक्षन्सर्वान्विषयवासिनः ॥ १२ ॥
प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम् । ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते ॥ १३ ॥
यत्करोति परं धर्मं मुनिर्मूलफलाशनः । तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण रक्षतः ॥ १४ ॥

वचनं च त्वयि तिष्ठतीति शेषः । किं च त्वयि स्मृते धर्मश्च पुष्कलः अङ्गहीनोऽपि सकलाङ्गपूर्णो भवतीत्यर्थः । ' प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । तद्विष्णोः स्मरणादेव संपूर्णं स्यादिति श्रुतिः ' इति स्मृतेः ॥ ९ ॥

रा० टी०–विश्रुत इति । यस्त्वं यशसा विक्रमेण च त्रिषु ऊर्ध्वाधोमध्यसंस्थितिषु लोकेषु विश्रुतः ख्यातः तस्मिन् त्वयि पितृव्रतत्वं पितृप्रतिज्ञापालकत्वं सत्यं च पुष्कलोऽत्यधिको धर्मश्चास्तीति शेषः ॥ ९ ॥

गो० टी०–विश्रुत इति । यशसा शरभङ्गानुग्रहकीर्त्या विक्रमेण विराधनिरसनेन च त्रिषु लोकेषु भूर्भुवःसुवर्लोकेषु विश्रुतः प्रसिद्धः पितृभक्तिस्त्वयि पुष्कला तद्वचनेन लब्धस्यापि राज्यस्य त्यागात्, सत्यं सत्यवचनं च त्वयि पुष्कलं भरतप्रार्थनयापि प्रतिज्ञातस्याभञ्जनात्, धर्मश्च त्वयि पुष्कलः शरभङ्गानुग्रहात् ॥ ९ ॥

१०] ति० टी०–धर्मज्ञं शरणागतरक्षणरूपधर्मज्ञम्, धर्मवत्सलं धर्मानुष्ठातृप्रियम् त्वामासाद्य शरणं प्राप्यार्थित्वादर्थिभावेन यत्कूरमपि वक्ष्यामस्तत्क्षन्तुमर्हसीति योजना । यद्यपि ' सत्त्वं कार्यवतां पुंसामलमेवावयतः स्थितिः ' इति न्यायेन त्वदपेऽवस्थानमेव सकलमनोरथपूरकत्वात्तः कार्यसाधनम् तथाप्यार्त्यतिशयेन किंचिद्वक्ष्यमाणं क्षन्तव्यमिति भावः ॥१०॥

रा० टी०–त्वामिति । महात्मानं त्वामासाद्य प्राप्य अर्थित्वात्प्रयोजनतन्त्रत्वा- वक्ष्यामः तन्नोऽस्माकं वचनं क्षन्तुमर्हसि, एतेनार्थिनां वक्तव्यावक्तव्यविवेको न भवतीति सूचितम् ॥ १० ॥

गो० टी०–त्वामिति । धर्मज्ञं धर्मवत्सलमित्युक्ताशयवान्। अर्थिनो याचकास्तेषां भावोऽर्थित्वं याच्ञेत्यर्थः । सा च रक्षोनिरसनविषया तया त्वां किंचिद्वक्ष्यामः तत् क्षन्तुमर्हसि आर्ततया त्वदभ्यगमनमेव कार्यसाधनम् आर्त्यतिशयेन विज्ञापनं तु क्षमस्वेत्यर्थः, एतेन उपायत्वाध्यवसाय एव चेतनस्य कृत्यं प्रार्थनं तु न कर्तव्यं हठात् कृतेऽपि क्षमापणं कर्तव्यमित्युक्तं भवति ॥ १० ॥

११] ति० टी०–जगद्रक्षणतत्परस्य विनापि कथनं स्वरक्षणेऽपि प्रवृत्तिरस्त्येव, तथाप्यार्त्यतिशयेन लोकरीत्या राजधर्मं बोधयन्ति–अधर्म इति । न च रक्षति विषयवासिन इत्यपकृष्यते । बलिषड्भागं करभागरूपं षष्ठांशम्, बह्वा बलये पूजार्थे दत्तं षड्भागं षष्ठांशम् प्रजाभिः स्वानिष्टपरिहारायेत्यर्थः ॥११॥

रा० टी०–तद्वचनाकारमाह–अधर्म इत्यादिभिः । हे नाथ ! यो भूपतिः बलिषड्भागं प्रजासमर्पितोपहारभूतषष्ठांशं हरेत् गृह्णीयात् प्रजास्तु पुत्रवन्नैव रक्षति तस्य भूपतेर्महानधर्मो भवति । प्रजा इति शेषः ॥ ११ ॥

गो० टी०–स्वविषये रामेण रक्षणं स्वाभाविकमिति दर्शयिष्यन्तः औपाधिकलौकिकराजरक्षणप्रकारं दर्शयन्ति–अधर्मस्त्वित्यादिना । यः प्रजाभ्यो बलिषड्भागं हरति हृत्वा च ताः न रक्षति तस्य महानधर्मः । बलिः करः 'भागधेयः करो बलिः' इत्यमरः । षष्ठो भागः षड्भागः लुप्तपूरणो निर्देशः बलिश्चासौ षड्भागश्च बलिषड्भागः ॥ ११ ॥

१२] ति० टी०–अथ रक्षणेऽभ्युदयमाहुः–युञ्जान इति । युञ्जानः प्रजारक्षणे यतमानः सर्वान्देशवासिनः स्वान्प्राणानिव प्राणैरिष्टान्प्राणेभ्योऽप्यधिकप्रियान्सुतानिव नित्ययुक्तः सदा सावधानो रक्षन् ॥ १२ ॥

१३] ति० टी०–इह शाश्वतीम् । अस्यैव विवरणम्–बहुवार्षिकीं कीर्तिमैहिकीमामुष्मिकं च ब्रह्मलोकरूपं फलं प्राप्नोति । तदाहुः–ब्रह्मण इति ॥ १३ ॥

रा० टी०–युञ्जान इति । स्वान्प्राणान् सर्वेन्द्रियाणि युञ्जानः प्रजारक्षणे नियोजयन् नित्ययुक्तः सदैकाग्रचित्तः यः पुरुषः प्राणैरिव इष्टान्वाञ्छितान्सुतान् इव सर्वान् विषयवासिनः रक्षन् सन् आस्ते इति शेषः, सः पुरुषः बहुवार्षिकीं भरतायनेकसप्तर्षिवर्षिणीं शाश्वतीं नित्यां कीर्तिं प्राप्नोति, ब्रह्मणः स्थानमासाद्य प्राप्य तत्रापि महीयते पूज्यते च । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०–एवमरक्षणे प्रत्यवायमुक्त्वा रक्षणेऽभ्युदयमाहुः–युञ्जान इति । युञ्जानो यतमानः नित्ययुक्तो नित्यावहितः सर्वान् स्वविषयवासिनः स्वकीयान् प्राणानिव प्राणैः प्राणेभ्योऽपि इष्टान् सुतानिव च यो रक्षति स महीपतिः बहुवार्षिकीं बहुकालस्थायिनीं शाश्वतीम् अक्षुण्णाम्। 'भृशादिभ्यो भुवि च्वौ च हुः' इति णाचः । भवार्थेऽण् ततो ङीप् । कीर्तिं प्राप्नोति । ब्रह्मणः स्थानमासाद्य तत्र ब्रह्मणा महीयते पूज्यते च ॥१२॥१३॥

१४] ति० टी०–ननु षष्ठांशग्रहात्प्रजारक्षणावश्यकत्वेऽपि वनवासिरक्षणं कुतस्तत्राह–यदिति । यदिति सामान्ये नपुंसकम् । प्रजा वानप्रस्थप्रजाः चतुर्भागभक्तुर्वांश इदमुपलक्षणं षड्भागस्यापि तत्रोपवासिभिराहारधर्मत्वेन भागप्राप्तेः तेन धर्मषड्भाग[illegible]

१ तु महांस्तातेति गो. पाठः । २ महीपतेरिति गो. पाठः ।

सोऽयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् । त्वंनाथो नाथवद्राम राक्षसैर्हन्यते भृशम् ॥ १५ ॥
एहि पश्य शरीराणि मुनीनां भावितात्मनाम् । हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने ॥ १६ ॥
पम्पानदीनिवासानामनुमन्दाकिनीमपि । चित्रकूटालयानां च क्रियते कदनं महत् ॥ १७ ॥
एवं वयं न मृष्यामो विप्रकारं तपस्विनाम् । क्रियमाणं वने घोरं रक्षोभिर्भीमकर्मभिः ॥ १८ ॥
ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः । परिपालय नो राम वध्यमानान्निशाचरैः ॥ १९ ॥
परा त्वत्तो गतिर्वीर पृथिव्यां नोपपद्यते । परिपालय नः सर्वान्राक्षसेभ्यो नृपात्मज ॥ २० ॥

भवफलाद्यशनवतो धर्माच्चतुर्थो भागः तदन्नभोजनादिपुष्टाद्भधर्मात्स्वं राज्ञः 'अन्नप्रदातुस्तस्यार्धं कर्तुश्चार्धं न संशयः' इति स्मृतेरिति बोध्यम् ॥ १४ ॥

रा० टी०—नन्वं बलिहरणहेतुकैव रक्षा चेत् अदण्डानाम् ऋषीणां रक्षा कथं स्यादित्यत आह—यदिति । मूलफलाशनो मुनिः यत्परं धर्मं करोति तत्र तस्मिन्धर्मेण प्रजा रक्षतो राज्ञः चतुर्भागः चतुर्थांशोऽस्तीति शेषः, एतेन ऋषिभ्योऽपि राजा स्वांशं प्राप्नोत्येवेति सूचितम् ॥ १४ ॥

गो० टी०—यस्तु करप्रदानासमर्थो मुनिजनस्तद्रक्षणं कुत इत्यत्राह—यदिति । यद्धर्मं तत्र धर्मे राज्ञः चतुर्भागः चतुर्थांशो भवति ॥ १४ ॥

१५] ति० टी०—अथ विवक्षितमर्थमाहुः—सोऽयमिति । ब्राह्मणभूयिष्ठ इत्यनेन क्षत्रवैश्यवानप्रस्थसत्तापि तत्र बोधिता । त्वं नाथो रक्षको यस्य स त्वंनाथः सोऽप्यनाथवद्[1]हन्यते अतस्त्वादृक्षस्योपेक्षानुचितेति भावः ॥ १५ ॥

रा० टी०—स इति । ब्राह्मणभूयिष्ठः ब्राह्मणा भूयिष्ठा अधिका यस्मिन् सोऽयं त्वंनाथो वानप्रस्थगणः राक्षसैर्भृशं हन्यते तेन ते निवारणीया इति सूचितम् ॥ १५ ॥

गो० टी०—एवं धर्मांय प्रजारक्षकस्य फलभुक्त्वा धर्मानपेक्षे रामे शरणागतिरेव रक्षणहेतुरित्याहुः—सोऽयमित्यादिना । सः पूर्वोक्तवैखानसादिरूपः ब्राह्मणाः भूयिष्ठाः अधिकाः यस्मिन् स ब्राह्मणभूयिष्ठः क्षत्रियवैश्यवानप्रस्थसंभवात् ब्राह्मणभूयिष्ठ इत्युक्तम्, यद्वा ब्राह्मणाः ब्रह्मविदः "तदधीते तद्वेद" इत्यण् वानप्रस्थानां तृतीयाश्रमिणां गणः त्वं नाथो यस्यासौ त्वंनाथः अनाथवद्[1]हन्यते ॥ १५ ॥

१६] ति० टी०—स्ववचसो नित्यत्वपरिरक्षायाहुः—एहीति । मुनयो मननशीलाः भावितात्मानो निदिध्यासननिष्ठाः शरीराणि केवलं हत्वा त्वक्कानि बहुप्रकारैरङ्गप्रत्यङ्गच्छेदनादिभिः ॥ १६ ॥

रा० टी०—उक्तार्थे दृढविश्वासार्थमाह—एहीति । भावितात्मनां स्वस्वकर्मविचारेण बहुधा अनेकधा हतानां बहूनां मुनीनां शरीराणि त्वं पश्य अत एव एहि अत्रागच्छ ॥ १६ ॥

गो० टी०—बाधामेव दर्शयन्ति—एहीत्यादिना । दूरे सम्यक् न दृश्यत इत्यत एहि पश्येत्युक्तम् । भावितात्मनां ध्यातात्मनां बहुधा छेदनभेदनभक्षणादिभिः ॥ १६ ॥

१ बाध्यते इति गो० पाठः ।

१७] ति० टी०—सकलदण्डकारण्यपीडामाहुः—पम्पेत्यादि । पम्पा च नद्यश्च तत्र निवासो येषां तेषाम् पम्पारूपा नदी वा । अनुमन्दाकिनीमपीति अनुर्लक्षणे कर्मप्रवचनीयः मन्दाकिन्या अत्रत्यपुण्यनद्यास्तीरवासिनाम् मन्दाकिन्या विस्तीर्णप्रवाहत्वाद्दुरवगाहतया पृथगुक्तौ राघवाख्याने ॥ १७ ॥

रा० टी०—उपदृतदेशं बोधयन्नाह—पम्पेति । पम्पानदीनिवासानां पम्पा सरः, नदी तत्समीपवर्तिनी तयोर्निवासो येषां तेषामनुमन्दाकिनीं चित्रकूटालयानां च मुनीनां महत्कदनं पीडा क्रियते राक्षसैरिति शेषः ॥ १७ ॥

गो० टी०—हतानां बहुनामित्युक्तं विवृणोति—पम्पेति । अनुमन्दाकिनीमपीति अनुर्लक्षणे कर्मप्रवचनीयः । मन्दाकिनीं शरभङ्गाश्रमवाहिनीं मन्दाकिन्यास्तटवासिनामित्यर्थः, कदनं हिंसा ॥ १७ ॥

१८] ति० टी०—विप्रकारं दुःखं न मृष्यामः सोढुमशक्ताः ॥ १८ ॥

रा० टी०—एवमिति । एवमनेन प्रकारेण भीमकर्मभिः रक्षोभिः क्रियमाणं विप्रकारं विहिंसनं वयं न मृष्यामः सोढुं समर्था न भविष्याम इत्यर्थः ॥ १८ ॥

गो० टी०—शरीराण्युपेक्ष्य तपस्यतां किं हिंसाभयेनेत्याशङ्क्य न वयं स्वशरीरपीडातो भीताः किंतु महत्त्वं गर्हयन्त्र क्रियमाणं कदनं न मृष्याम इत्याहुः—एवमिति । विप्रकारं निकारम् 'निकारो विप्रकारः स्यात्' इत्यमरः । स्वजनपीडा दुःसहेति भावः ॥ १८ ॥

१९] ति० टी०—शरण्यं रक्षणसमर्थम् । शरणार्थं रक्षणार्थम् ॥ १९ ॥

रा० टी०—तत इति । ततः अतिदुःखादेतोः शरण्यं शरणहितं त्वां शरणार्थं रक्षणार्थं वयं समुपस्थिताः अतः निशाचरैर्वध्यमानान् नोऽस्मान् परिपालय ॥ १९ ॥

गो० टी०—तत इति । शरणार्थं रक्षणार्थं समुपस्थिताः प्रपन्नाः "गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः ॥ १९ ॥

२०] ति० टी०—त्वत्तः परा गतिस्त्वदन्यत्राता ॥ २० ॥

रा० टी०—त्वया अवश्यं रक्ष्या इत्यत्र हेतुं वदन्नाह—परेति । हे वीर ! त्वत्तः परा अन्या गतिराश्रयो न अतः राक्षसेभ्यः परिपालय ॥ २० ॥

एतच्छ्रुत्वा तु काकुत्स्थस्तापसानां तपस्विनाम् । इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः ॥ २१ ॥
नैवमर्हथ मां वक्तुमाज्ञाप्योऽहं तपस्विनाम् । केवलेन स्वकार्येण प्रवेष्टव्यं वनं मया ॥ २२ ॥
विप्रकारमपाकर्तुं राक्षसैर्भवतामिमम् । पितुस्तु निर्देशकरः प्रविष्टोऽहमिदं वनम् ॥ २३ ॥
भवतामर्थसिद्ध्यर्थमागतोऽहं यदृच्छया । तस्य मेऽयं वने वासो भविष्यति महाफलः ॥ २४ ॥
तपस्विनां रणे शत्रून्हन्तुमिच्छामि राक्षसान् । पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ २५ ॥
दत्त्वा वैरं चापि तपोधनानां धर्मे धृतात्मा सह लक्ष्मणेन ।
तपोधनैश्चापि सहायदत्तः सुतीक्ष्णमेवाभिजगाम वीरः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०—परेति । त्वत्तः परा अन्या गतिः उपायः नोपपद्यते । पृथिव्यामिति सर्वभुवनोपलक्षणम् । तथा च श्रुतिः "नान्यः पन्था अयनाय विद्यते" इति । इत्यूचुरिति पूर्वेणान्वयः ॥ २० ॥

२१] ति० टी०—तपस्विनां तपोबलयुतानां तापसानामृषीणाम् ॥ २१ ॥

रा० टी०—एतदिति । काकुत्स्थो रामः तपस्विनां तपःप्रभावयुक्तानां तापसानामृषीणामेतद्वचः श्रुत्वा इदं प्रोवाच॥२१॥

गो० टी०—एतदिति । तपस्विनां प्रशस्ततपसां तापसानां मुनीनाम् ॥ २१ ॥

२२-२३] ति० टी०—तदेवाह—नैवामिति । एवमुक्तं प्रार्थनारूपं वचः आज्ञाप्यः शिष्यादिरिवेदं कुर्वीति शिक्षणीयः केवलेनोपाध्यान्तररहितेन स्वकार्येण पितृवचनपरिपालनात्मकेन हेतुना मयावश्यं वनं प्रवेष्टव्यमेव स च मे वनप्रवेशो राक्षसैः क्रियमाणं भवतामिमं विप्रकारमपाकर्तुमपि भविष्यतीत्यर्थ इति तीर्थकतकौ भवच्छब्दहननं केवलं मदीयमेव कार्यं बहुधर्मोपचयजनकत्वान्ममेदृष्टसाधनमेव । यद्यपि स्वविप्रकारनाशे भवन्तः समर्था एव तथापि मम धर्मोपचयायैवैषा भवदीया मम प्रेरणेति भावः । अन्वयस्त्वत्र स्फुट एवेत्यन्ये । किं च पित्राज्ञापरिपालनार्थमिदं वनं प्रविष्ट एवास्मि । प्रविष्टे च मयि सोऽर्थोऽवश्यं भाव्य एवेति भवतामेवं प्रार्थनमनवसरमिति भावः ॥ २२ ॥ २३ ॥

रा० टी०—तद्वचनमेवाह—नैवमिति । तपस्विनां भवतां स्वकार्येण हेतुना योऽहमाज्ञाप्यस्तं मामेवं प्रार्थनावचनेन वक्तुं यूयं नार्हथ केवलेन कापट्यरहितेन मया तु राक्षसैः भवतां विप्रकारं विहिंसनमपाकर्तुं दूरीकर्तुं वनं राक्षससेवितकाननं प्रवेष्टव्यम् "उभयप्राप्तौ कर्मणि" इति नियमात् कर्तरि षष्ठी । सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०—नैवामिति । शरणागतस्यैवाज्ञप्तोऽहं परिपालयेत्यादिकं वक्तुं नार्हथ केवलेनात्मकार्येण केवलात्मप्रयोजनत्वेन राक्षसैः क्रियमाणं भवतामिमं विप्रकारम् अपाकर्तुं निवर्तयितुं मया वनं प्रवेष्टव्यं प्रविष्टम् । "तयोरेव कृत्यक्तखलर्थाः" इति कर्मणि तव्यप्रत्ययः । स्वतो मत्प्रयोजनरूपं भवद्विरोधिनिरसनं कर्तुमेवेदं वनं प्रविष्टोऽस्मीत्यर्थः । शेषभूतरक्षणस्य शेषिप्रयोजनत्वादिति भावः । ॥ २२ ॥

रा० टी०—पितुरिति । पितुर्निर्देशकरः योऽहमिदं वनं प्रविष्टः सोऽहं भवतामर्थसिद्ध्यर्थं यदृच्छया आगतः भवतां समीपं प्राप्तः अत एव तस्य भवत्समीपं प्राप्तस्य मेऽयं वने वासः महाफलः भविष्यति ॥ २३ ॥ २४ ॥

गो० टी०—पितृवाक्यपरिपालनाय वनं प्रविष्टोऽसीति किंवदन्त्याः का गतिरित्यत्राह—पितुरिति । अहं भवतामर्थसिद्ध्यर्थमागतोऽस्मि यदृच्छया दैवगत्या पितुर्निर्देशकरः वनमिदं प्रविष्टोऽस्मि । पितृवाक्यकरणव्याजेन भवदर्थसिद्ध्यर्थमेवागतोऽस्मीति भावः ॥ २३ ॥

२४-२५] ति० टी०—तदेवाह—भवतामिति । यदृच्छया आगत एवाहं भवतामर्थसिद्ध्यर्थमपि भविष्यान्येवेति शेषः । पितुस्त्वित्यनेनोक्त एवार्थः कविना श्लोकान्तरेण वर्ण्यते । इयमपि शैली कवेरिति कृतकृतीर्थौ यतः शत्रून्हन्तुमिच्छामि, अतस्तस्य यदृच्छया वनमागतस्य मेऽयं वनवासो महाफलो भविष्यतीति स्वगतो विचारः । अथ ऋषिवैर्याय प्रकाशं प्रतिजानीते—पश्यन्त्विति । सर्वथा हनिष्यामीति यावत् ॥ २४ ॥ २५ ॥

गो० टी०—तस्येति । भवत्कार्यार्थमेवागतस्य मे वने वासो महाफलो भविष्यति ॥ २४ ॥

रा० टी०—तपस्विनामिति । तपस्विनां शत्रून् राक्षसान् रणे हन्तुमहमिच्छामि अतः सभ्रातुर्मे वीर्यमृषयः पश्यन्तु॥२५॥

गो० टी०—तदेव फलमाह—तपस्विनामिति । तपस्विनां शत्रून् रणे हन्तुमिच्छामि इतीदं प्रोवाचेत्यन्वयः ॥ २५ ॥

२६] ति० टी०—वरमुक्तवचनात्मना । धर्मे धृतात्मा धर्मे स्थितचित्तः आर्यं पूज्यं दत्तं यस्य सः तपोधनैः सह सुतीक्ष्णमभिजगाम ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षष्ठः सर्गः ॥ ६ ॥

---

१ ऽऽत्मकार्येणेति गो. पाठः । २ भानिलामिमामिति गो. पाठः । ३ ऽभयमिति गो. पाठः ४ सभाज्यवृत्त इति गो. पाठः । ५ तेनाधनावश्यं भाव्यमिति युक्तं भाति ।

सप्तमः सर्गः ।

सीतालक्ष्मणयुतः सुतीक्ष्णाश्रमं प्राप्तो रामो मुनिनाभिवाद्यैनदाश्रमनिवासविषयकं स्वकामं न्यवेदयत् । मृगलाभेन विना नास्ति कोऽप्यत्रोपसर्गः सुख निवसन्युक्तोऽपि तदुपसर्ग परिजिहासुः, कंचित्कालमेव तस्थौ ।

रामस्तु सहितो भ्रात्रा सीतया च परंतपः । सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः ॥ १ ॥
स गत्वा दूरमध्वानं नदीस्तीर्त्वा बहूदकाः । ददर्श [1]विमलं शैलं [2]मेहामेरुमिवोन्नतम् ॥ २ ॥
ततस्तदिक्ष्वाकुवरौ सततं विविधैर्द्रुमैः । काननं तौ विविशतुः सीतया सह राघवौ ॥ ३ ॥
प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम् । ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥ ४ ॥
तत्र तापसमासीनं मलपङ्कजधारिणम् । रामः सुतीक्ष्णं विधिवत्तपोधनमभाषत ॥ ५ ॥
रामोऽहमस्मि भगवन्भवन्तं द्रष्टुमागतः । तन्माभिवद धर्मज्ञ महर्षे सत्यविक्रम ॥ ६ ॥

रा० टी०—दृत्वेति । धर्मे धृतात्मा आर्यदत्तः आर्यकृतवेश्मचलमित्यर्थः, दत्तं दानं यस्य सः वीरो रामः लक्ष्मणेन सह तपोधनानां वरं दत्वा तपोधनैश्च सह सुतीक्ष्णमभिजगाम ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०—दृत्वेति । अभयमिति छेदः । धृतात्मा निश्चलमनाः तपोधनैः ऋषिभिश्च सभाज्यदत्तः पूज्याचारः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति० टी०—द्विजैः प्रार्थनार्थमागतैर्वानप्रस्थैः ॥ १ ॥

रा० टी०—रामस्तान्तमा—राम इत्यादिभिः । भ्रात्रा सीतया च सहितो रामः सुतीक्ष्णस्य आश्रमपदं श्रमनिवर्तकं स्थानं जगाम ॥ १ ॥

गो० टी०—अथ सुतीक्ष्णाभ्यर्थनया मृगरूपमारीचादिदुराचरणनिरासः सप्तमे—रामस्त्वित्यादि । आश्रमपदम् उदिश्येति शेषः । तैर्द्विजैः वैखानसादिभिः ॥ १ ॥

२-४] ति० टी०—विमलं पवित्रम् 'महामेघमिव' इति पाठे स्थितमिति शेषः, नैल्यस्थौल्याभ्यां सादृश्यम् । उन्नतमिति स्वरूपकथनम् ॥ २-४ ॥

रा० टी०—स इति । स रामः दूरमध्वानं गत्वा बहूदकाः नदीः तीर्त्वा महामेरुमिवोन्नतं शैलं ददर्श ॥ २ ॥

गो० टी०—स इति । अदूरमिति छेदः । पूर्वं शरभङ्गेन इह राम महातेजा इति सुतीक्ष्णाश्रमस्था रत्नोक्तेः । नदीरितिबहुवचनमेकस्या एव मन्दाकिन्याः बहुप्रदेशेष्वाहरणा । बहूदका विपुलौघैकाः नौतार्यत्वादुक्तेः । शैलं शैलसंबन्धि वनं काननमित्यर्थवादात् । "तत्येदम्" इत्यण् । महामेघमिवेति श्यामिकावाक्यपमा ॥ २ ॥

रा० टी०—तत इति । ततः पर्वतदर्शनानन्तरं विविधैर्द्रुमैः सन्ततं व्याप्तं तत्काननं वनं राघवौ विविशतुः ॥ ३ ॥

गो० टी०—तत इति । द्रुमैः संततं व्याप्तम् इक्ष्वाकुवरौ राघवाविति भयथा धैर्यमूलोक्तिः ॥ ३ ॥

रा० टी०—प्रविष्ट इति । बहवः पुष्पफलद्रुमाः यस्मिन् तत्काननं प्रविष्टो राघवः चीरमालापरिष्कृतं खण्डपटसमूहयुक्तमाश्रममेकान्ते ददर्श ॥ ४ ॥

गो० टी०—प्रविष्ट इति । चीरमालया वल्कलपङ्क्त्या परिष्कृतमलंकृतम् ॥ ४ ॥

५] ति० टी०—अत्र ' ततस्तदिक्ष्वाकुवरौ ' इत्यादिश्लोकत्रयं प्रक्षिप्तमिति कतकः मलपङ्कजधारिणं मलस्य सर्वावस्था शान्तये पङ्कजे पद्मासने स्थित्वा धारणशीलम्, यद्वा पङ्कजे हृदयपङ्कजे धारिणमीश्वरयाथात्म्यधारणशालिनम् इति कतकः, तीर्थस्तु—' मलपङ्कजटाधरम् ' इति पठित्वा मलमुद्वर्तनादिसंस्काराभावाच्छरीरजं पङ्को वनसंचाराच्छरीरजश्च इति भेद इत्याह । विधिवदुपगम्येति शेषः ॥ ५ ॥

रा० टी०—तत्रेति । तत्र तस्मिन् आश्रमे मलपङ्कजधारिणं मस्य परमात्मनो लः पूर्वं ग्रहणं यस्मिन् तदेव पङ्कजं कमलं तद्धारिणं तत्राश्रमे आसीनं तपोधनं सुतीक्ष्णं रामो विधिवदभाषत ॥ ६ ॥

गो० टी०—तत्रेति । मलपङ्कजजटाधरं नित्यनिश्चलतपोयोगेन वा वार्धक्येन वा मलपङ्कजटानां धरं विधिवत् क्रमवद्यथा भवति तथा अभाषत । मीलितनयनत्वेन स्वाभिवादनापरिज्ञानात् भाषणम् ॥ ६ ॥

६] ति० टी०—तन्माभिवदेति । मा इति मान्न उक्तया गौरवशीलत्वेन वाच्यव्यवहाराभावादेवं प्रार्थना । सत्यविक्रम ! अक्षततपःस्वभाव ॥ ६ ॥

रा० टी०—तद्भाषणप्रकारमाह—राम इति । भवन्तं द्रष्टुमागतः प्राप्तो रामोऽहमस्मि तत्तस्मादेतोः मा मामभिवद सम्यक् ब्रूहि ॥ ६ ॥

१ विपुलमिति गो. पाठः । २ महामेघमिति गो. पाठः । ३ जटाधरमिति गो. पाठः । ४ वृद्धमिति गो पाठः । ५ त्वमिति गो. पाठः ।

स निरीक्ष्य ततो धीरो रामं धर्मभृतां वरम् । समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत् ॥ ७ ॥
स्वागतं [1]ते रघुश्रेष्ठ राम सत्यभृतां वर । आश्रमोऽयं त्वयाक्रान्तः सनाथ इव सांप्रतम् ॥ ८ ॥
प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः । देवलोकमितो वीर देहं त्यक्त्वा महीतले ॥ ९ ॥
चित्रकूटमुपादाय राज्यभ्रष्टोऽसि मे श्रुतः । इहोपयातः काकुत्स्थ देवराजः शतक्रतुः ॥ १० ॥
उपागम्य च [2]मे देवो महादेवः सुरेश्वरः । सर्वाँल्लोकाञ्जितानाह मम पुण्येन कर्मणा ॥ ११ ॥
तेषु देवर्षिजुष्टेषु जितेषु तपसा मया । मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥ १२ ॥
तमुग्रतपसं दीप्तं महर्षिं सत्यवादिनम् । प्रत्युवाचात्मवान्रामो ब्रह्माणमिव वासवः ॥ १३ ॥

गो० टी०—रामोऽहमिति । मा अभिवादयन्त मामभिवद प्रत्यभिवादनं कुरु । सत्यविक्रम अमोघतपःप्रभाव ॥६॥७॥

७] ति० टी०—स निरीक्ष्येति । उक्तवचनात्समाश्वितो व्युत्थाय । रामं दृष्ट्वेत्यर्थः ॥ ७ ॥

रा० टी०—स इति । ततो रामवचनश्रवणानन्तरं स सुतीक्ष्णः रामं निरीक्ष्य बाहुभ्यां समाश्लिष्य च अब्रवीत् ॥७॥

८] ति० टी०—सनाथ इव सस्वामिक इव । अत्रायमाश्रमो ब्रह्मचर्याद्याश्रमव्यवहार्योऽयं देहस्त्वया जीवरूपेणाक्रान्तोऽपि सांप्रतमथ बहिश्चक्षुषाऽनुभवन्सनाथ इव मायया सच्चिदानन्दस्यैवैवं शरीररूपेण प्रतिभासमानस्येदृशस्य स्वदृपस्य दर्शनेन चित्तशुद्ध्या पूर्वं जीवाभेदेनाहमिति प्रतीत्या गृहीतम्य तद्वैलक्षण्येनेदानीं [illegible] इवेन ज्ञानानामप्यतिरिक्तत्वाभावः सूचित इति ध्वनिः ॥ ८ ॥

गो० टी०—तद्वचनाकारमाह—स्वागतमिति । हे रघुश्रेष्ठ ! ते स्वागतम् । तत्र हेतुः—यतस्त्वया अयमाश्रमः समाक्रान्तः तस्मात्त्वांप्रतमिदानीं सनाथ इवास्मीति शेषः । इदानीं सनाथ इवेत्युक्त्या सर्वकालं स्वसनाथत्वं व्यञ्जितम् ॥ ८ ॥

गो० टी०—स्वागतमिति । सनाथ इव सनाथ एव, यद्वा सर्वदा त्वया सनाथत्वेऽपि पामराणां सनाथत्वप्रतिभेदानीं जातेत्यर्थः ॥ ८ ॥

९] ति० टी०—अतस्त्वां प्रतीक्षमाण इति । त्वां स्वात्मभूतम् महायश इति संबोधनम् । देवलोकं देवस्य ब्रह्मणो लोकम् ॥ ९ ॥

रा० टी०—प्रतीक्षमाण इति । हे महायशः! त्वां प्रतीक्षमाण एवाहं देहं त्यक्त्वा देवलोकं नारोहे ॥ ९ ॥

गो० टी०—स्वस्य मोक्षापेक्षां व्यञ्जयति—प्रतीक्षमाण इति । त्वामेव प्रतीक्षमाणः प्रतिपालयन् त्वदागमनं काङ्क्षमाण इत्यर्थः, देवलोकं नारोहे तत्यान्तरायो मैत्रेयदेवेन्द्रत्वादिकं फलमिति तस्य मोक्षविरोधित्वादिति भावः ॥ ९ ॥

१०] ति० टी०—नन्वत्र मदागमनसंभावना तत्राह—चित्रेति । यदा राज्यभ्रष्टश्चित्रकूटमुपादाय प्राप्य स्थितोऽसि तदाप्रभृति मे मया श्रुतोऽसि । आश्रमोऽयमित्यस्य व्युत्पत्तौ—चित्रं विचित्रफलहेतुकूटं दुरवगाहत्वात्संसारं प्राप्य राज्यभ्रष्टो विषासंसर्गेण स्वाराज्यान्नित्यशुद्धबुद्धमुक्तस्वरूपाद्भ्रष्टस्तयोगात्संसारं प्राप्तस्त्वमेव मया श्रुतिवाक्येभ्यः श्रुतोऽसि अतस्तत्प्रतीक्षया न देवलोकं गत इति व्यङ्ग्योऽर्थः । नन्विदानीं क्व ते देवलोकारोहणप्रसक्तिस्तत्राह—इहेति । शरभङ्गाद्ज्ञानानन्तरमिहाप्यागत इत्यर्थः ॥ १० ॥

रा० टी०—नन्वत्र त्वया मदागमनं कथं ज्ञातमित्यत आह—चित्रकूटमिति । राज्यभ्रष्टः त्यक्तराज्यस्त्वं चित्रकूटमुपादाय प्राप्य स्थितस्त्वं मया श्रुतोऽसि । नन्वत्र कस्माद् श्रुत इत्यत आह—देवराट् इन्द्र इहोपयातः, एतेन तस्मादेव श्रुतमिति ध्वनितम् ॥ १० ॥

गो० टी०—मदागमनं कुतोऽवगतं तत्राह—चित्रकूटमिति । चित्रकूटमुपादाय चित्रकूटगमनमारभ्य राज्याद्भ्रष्टः प्रच्युत इति मे मया श्रुतोऽसि ॥ १० ॥

११] ति० टी०—पुण्येन कर्मणा जितानित्यनेन श्रवणसंपत्तावपि निदिध्यासनसंपत्त्यभावोऽस्योक्तः । पूजावचनेषु पौनरुक्त्यं न दोषाय, देवादिपदानां प्रवृत्तिनिमित्तभेदस्य स्पष्टत्वान्न पौनरुक्त्यमिति केचित् ॥ ११ ॥

रा० टी०—नन्वत्र स किमर्थमागत इत्यत आह—उपागम्येति । मे देवो मम पूज्यः सुरेश्वरः उपागम्य प्राप्य मम पुण्येन कर्मणा सर्वान् लोकान् जितान् मदधीनान् आह॥११॥

गो० टी०—स्वर्गारोहणस्य कः प्रसङ्ग इत्यत्राह—इहेति । उपयातः शरभङ्गार्थमागतः माङ्गपागम्याह। तर्हि तादृशमहाफलं किमिति त्यक्तवानसीत्युक्त तारतम्यज्ञानादिति भावः॥११–१४॥

१२–१३] ति० टी०—अथ सर्वं पुण्यमनन्तफलत्वाय भगवत्यर्पयति—तेष्विति ॥ १२ ॥ १३ ॥

रा० टी०—तेष्विति । मया तपसा जितेषु देवर्षिजुष्टेषु देवर्षिभिः सेवितेषु लोकेषु मत्प्रसादाद् मत्प्रीतिमुपलभ्य त्वं विहरस्व ॥ १२ ॥

रा० टी०—तमिति । उग्रं तपो यस्य तमत एव संदीप्तमतिप्रकाशवन्तं सत्यवादिनं तं महर्षिं ब्रह्माणं वासव इव रामः प्रत्युवाच ॥ १३ ॥

---

१ खलु ते वीर राम धर्मभृतामिति गो. पाठः । २ मामिति गो. पाठः । ३ तपसा युक्तमिति गो. पाठः । ४ काश्यप इति गो. पाठः ।

अहमेवाहरिष्यामि स्वयं लोकान्महामुने । आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १४ ॥
भवान्सर्वत्र कुशलः सर्वभूतहिते रतः । आख्यातं शरभङ्गेन गौतमेन महात्मना ॥ १५ ॥
एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः । अब्रवीन्मधुरं वाक्यं हर्षेण महता युतः ॥ १६ ॥
अयमेवाश्रमो राम गुणवान्दृश्यतामिति । ऋषिसङ्घानुचरितः सदा मूलफलैर्युतः ॥ १७ ॥
इममाश्रममागम्य मृगसङ्घा महीयसः । अहत्वा प्रतिगच्छन्ति लोभयित्वाऽकुतोभयाः ॥ १८ ॥
नान्यो दोषो भवेदत्र मृगेभ्योऽन्यत्र विद्धि वै । तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः ॥ १९ ॥
उवाच वचनं धीरो विगृह्य सशरं धनुः । तानहं सुमहाभाग मृगसङ्घान्समागतान् ॥ २० ॥

१४] ति० टी०–अहमेवेति । तपसेत्यर्थः । त्वत्तः प्रतिग्रहे नाहमधिकारीति आपाततोऽर्थः वास्तवस्तु तत्त्वपुण्याङ्कारेणानुगृह्णाति भगवान्–अहमेवेति । न्यासत्वेन त्वया स्थापितं तुभ्यं प्रापयिष्यामि अहमेवेत्यनेन सर्वकर्मफलदाता सर्वोपासनास्वहमेवेति सूचितम् । अथ लोकदृष्टेरतर्जनप्रतारणायावासमिति प्रदिष्टम् । त्वयेति शेषः ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–अहमिति । हे महामुने ! प्रदिष्टं भवदाज्ञा यदि स्यात्तदा इति शेषः, लोकान् भवत्पोर्जितस्वर्गादीन् इहैव हरिष्यामि प्रापयिष्यामि । तत्र हेतुः–अतः इह आवासं त्वया सह निवासमहमिच्छामि ॥ १४ ॥

१५–१६] ति० टी०–गौतमेन गौतमगोत्रेण शरभङ्गेन सर्वत्र इह परत्र च कुशल इत्याख्यातम् । एवं ज्ञानभिक्षोऽहमित्युत्तरं दातुमशक्यमित्याशयः ॥ १५ ॥ १६ ॥

रा० टी०–सहवासे हेतुमाह–भवानिति । सर्वत्र वेदेषु यज्ञेषु च कुशलो निपुणः इति गौतमेन गौतमगोत्रेण महात्मना शरभङ्गेन आख्यातं कथितम् ॥ १५ ॥

गो० टी०–भवानिति । गौतमेन गोतमवंश्येन ॥ १५ ॥

रा० टी०–एवमिति । रामेण एवमुक्तः अत एव महता हर्षेण युतः लोकविश्रुतः प्रख्यातो महर्षिः सुतीक्ष्णः मधुरं वाक्यमब्रवीत् ॥ १६ ॥

गो० टी०–एवमिति । हर्षेण महता श्रुतः मोक्षानुग्रहेण परमानन्दभरितः ॥ १६ ॥ १७ ॥

१७] ति० टी०–अयमेवास्मदीयः ॥ १७ ॥

रा० टी०–तद्वचनाकारमाह–अयमिति । हे राम ! ऋषिसंघानामनुचरितमनुचरणं यस्मिन् सः अयमाश्रमो गुणवान् इति अतः अयमेव रम्यताम् ॥ १७ ॥

१८] ति० टी०–अनेन गुणमुक्त्वा दोषमाह––इममिति । इममाश्रमं दण्डकारण्याश्रमं महीयसोऽतिशयितमहत्त्वतोऽपि अहत्वा हननमकृत्वा लोभयित्वा रूपकान्तिगतिविशेषैश्चित्तलोभं कृत्वा गच्छन्तीत्यर्थः । अनेन भावी मा रीरक्षदन्तः सूचितः । अकुतोभयास्ते इव ॥ १८ ॥

रा० टी०–मृगानुपद्रवकारिणो ज्ञात्वाऽयं न हन्याद् नापि विभेतु चेति कृपातिवात्सल्याभ्यामुपेतो मुनिर्मृगहत्तमाह–इममिति । महीयसः अतिमहान्तः अकुतोभयाः मृगसंघाः इममाश्रममागम्य अहत्वा ऋषिभ्यः पीडामप्रदाय लोभयित्वा स्वरूपगत्यादिविशेषैः चित्तवैचित्र्यमुत्पाद्य प्रतिगच्छन्ति ॥ १८ ॥

गो० टी०–गुणमुक्त्वा दोषमाह निरसनीयत्वाभिप्रायेण–इममिति । आश्रमं तपोवनम् अविद्यमानं कुतोऽपि भयं येषां ते अकुतोभयाः सन्तः अटित्वा इतस्ततः परिप्लुत्य लोभयित्वा समाधिभङ्गं जनयित्वा विक्षिपन्तीति शेषः । प्रतिगच्छन्ति प्रतियान्ति अत्र वने मृगेभ्योऽन्यत्र मृगान् विनान्यो दोषो न भवेदिति विद्धि मृगप्रलोभनरूपदोषादन्यो दोषोऽत्र नास्तीत्यवेहीत्यर्थः । इति वाक्यमब्रवीदिति पूर्वेण संबन्धः ॥ १८ ॥

१९–२०] ति० टी०–अत्र दण्डकारण्ये नान्यो दोषो भवेत् । अत्रेत्यस्यैव विवरणम्–मृगेभ्योऽन्यत्र विद्धि वै इति । मृगेभ्योऽन्यत्र न भवमिति विद्धीत्यर्थः । दण्डकारण्याभिप्रायेण बहुपुष्कं तदाश्रममात्राभिप्रायं परिकल्प्य रामोऽवादीदित्याह । तच्छ्रुत्वा मृगेभ्यो भयविषयं वचनम् ॥ १९ ॥ २० ॥

रा० टी०–नेति । अन्यत्र इव अत्र मृगेभ्यः मृगलोभनेभ्यः अन्यो दोषो न भवेत् इति विद्धि जानीहि तेन त्वया न भेतव्यं न वा हन्तव्या इति सूचितम् । न हि सौन्दर्यादिना लोभोत्पादनेन वधार्हा इति तात्पर्यम् । अथ पृथक्–तदिति । लक्ष्मणाग्रजो रामः तस्य महर्षेः सुतीक्ष्णस्य तद्वचनं श्रुत्वा सशरं शरसहितं धनुः विगृह्य उत्थाप्य वचनमुवाच ॥ १९ ॥

गो० टी०–तच्छ्रुत्वेति । तत् मृगभयविषयकं वचनं विकृष्य सशरं धनुरिति स्वात्मा [illegible]–हन्यामिति । प्राप्तकाले लिङ् । वधकाले प्राप्ते सकलमृगहननं कुर्यामित्यर्थः । प्राप्तकालश्च तदर्थनकालः ॥ १९ ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–तानिति । समागतान् तान् क्रूरान् मृगसंघान् निशितशरेण आशुतपर्वणा शरेण हन्याम् । अर्धद्वयमेकान्वयि ॥ २० ॥

---

१ ध्रुव इरिष्यामीति गो. पाठः । २ आख्यात इति गो पाठः । ३ प्लुत इति गो. पाठः । ४ इहेति गो. पाठः । ५ फलान्वित इति गो. पाठः । ६ महात्मन इति गो. पाठः । ७ अटित्वेति गो. पाठः । ८ विकृष्येति गो. पाठः ।

हन्यां निशितधारेण शरेणानतपर्वणा । भवांस्तत्राभिभाज्येत किं स्यात्कृच्छ्रतरं ततः ॥ २१ ॥
एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये । तमेवमुक्त्वोपरमं रामः संध्यामुपागमत् ॥ २२ ॥
अन्वास्य पश्चिमां संध्यां तत्र वासमकल्पयत् । सुतीक्ष्णस्याश्रमे रम्ये सीतया लक्ष्मणेन च ॥ २३ ॥
ततः शुभं तापसयोग्यमन्नं स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ।
ताभ्यां सुसत्कृत्य ददौ महात्मा संध्यानिवृत्तौ रजनीं समीक्ष्य ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

प्रातः कृताह्निकमुखविधौ रामः सुतीक्ष्णं प्रति स्वीयां दण्डकादिदिक्षां न्यवेदयत्तेनानुज्ञातश्च तं प्रदक्षिणीकृत्य प्रतस्थे ।

रामस्तु सहसौमित्रिः सुतीक्ष्णेनाभिपूजितः । परिणाम्य निशां तत्र प्रभाते प्रत्यबुध्यत ॥ १ ॥

२१] ति० टी०—हन्याम् प्राप्तकालं लिङ् । प्राप्तमृगहननं कुर्याम् । परं त्वेवं कृत्वात्र स्थातुमशक्यमित्याह—भवानिति । तत्र मृगसंवधे भवान्मयाभिषज्येत अभिपङ्गः पराभवः, कृतपराभवो यो भवेत्ततः परं मे कृच्छ्रतरं किं स्यात् न किमपि ॥ २१ ॥

रा० टी०—तत्र हेतुः—यत्र यत्कृदुपद्रवे भवान् अभिषज्येत पीड्येत ततः कृच्छ्रतरं क्लेशाधिक्यं किं स्यात्, एतेन मुनीनां स्वदेहतवस्तदाश्रयां हन्तव्या एवेति रामाभिप्रायः सूचितः ॥ २१ ॥

गो० टी०—तत्र हननमिह स्थित्वा न कर्तुं शक्यमित्याह—भवानिति । तत्र मृगसंवधविषये भवान् मया अभिषज्येत अभिभूयेत । अभिपूर्वात् षञ्जेः कर्मणि लिङ् । 'अभिषङ्गः परिभवे सङ्गाक्रोशनयोरपि' इति वाणः । तादृशमृगहनने मया त्वं कृतापराधो भवेः आश्रमसंबन्धित्वादिति भावः । ततः किमित्यत्राह—किं स्यात्कृच्छ्रतरं तत इति । ततः भवदभितापात् कृच्छ्रतरं कष्टतरं किं न किमपीत्यर्थः । तस्मादेतस्मिन्नाश्रमे चिरं तद्दर्शनपर्यन्तं वासं न समर्थये नेच्छामि इह वासे मृगसंवधपीडां सोढ्वा स्थातव्यम् । हत्वावस्थाने स्वाश्रममृगाणां स्वसन्निधौ हनने तव वैमनस्यं स्यात् । तच्च ममानिष्टम् अतोऽन्यत्र स्वदसन्निधाने मृगान् हनिष्यामीत्यर्थः, इत्युवाचेति पूर्वेणान्वयः ॥ २१ ॥

२२-२३] ति० टी०—यदेवमतः—एतस्मिन्निति । चिरं चिरकालं वासं न समर्थये नेच्छामि । मृगसंवधं विना स्थातुमशक्यं तद्वधेन च भवतां पीडेत्याशयः । उपरमञ्जपरम्य क्वचित् 'उपरम्य' इत्येव पाठः । संध्यामुपागमत्संध्यां वन्दितुमुपागतवान् ॥ २२ ॥ २३ ॥

रा० टी०—मृगकर्मकवधवचनश्रवणानन्तरं तूष्णींभावादिना मृगवधस्य मुनेरनभिप्रेतत्वं विशयाह—एतस्मिन्निति । एतस्मिन् मृगोपद्रुते आश्रमे चिरं वासं न समर्थये । उपरमतिनिवृत्तचित्तं तं महर्षिमेवमुक्त्वा रामः संध्यामुपागमत् संध्याकालः प्राप्तोदित्यर्थः ॥ २२ ॥

रा० टी०—अन्वास्येति ॥ पश्चिमां संध्यामन्वास्य विधिवदुपास्य तत्र सुतीक्ष्णस्य आश्रमे वासमकल्पयत् ॥ २३ ॥

गो० टी०—तमिति । वरदमित्यनेन मुनिस्तथैवाज्ञातवानिति गम्यते । सन्ध्यामुपागमत् सन्ध्यामुद्दिश्य सरस्तीरं गतवानित्यर्थः । पश्चिमां सन्ध्यामन्वास्य अत्यन्तसंयोगे द्वितीया । यावत्सन्ध्यं जलतीरे जपन् स्थित्वेत्यर्थः । तत्राश्रमे वासमकल्पयदित्यनेन प्रातर्जिगमिषा जातेति व्यज्यते । अन्यत्र गत्वा मृगनिरासश्च रावणं प्रति मारीचाद्ववादवगन्तव्यः ॥ २२ ॥ २३ ॥

२४] ति०—टी०—संध्यानिवृत्तौ रजनीमभ्यवहारार्हां समीक्ष्येति यावत् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा० टी०—तत इति । संध्यानिवृत्तौ सत्यां रजनीं रात्रिं समीक्ष्य महात्मा सुतीक्ष्णः तापसयोग्यमन्नं पुरुषर्षभाभ्यां ताभ्यां रामलक्ष्मणाभ्यां सुसत्कृत्य ददौ ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तमः सर्गः ॥ ७ ॥

गो० टी०—तत इति । शुभं भक्त्युपनीतत्वेन पावनं तापसभोज्यं फलमूलादि अन्नम् अदनीयं स्वयं नतु शिष्यमुखेन सुसत्कृत्य अर्घ्यपाद्यादिना संपूज्य महात्मा तत्र परमपुरुषस्य ज्ञानवान् सन्ध्यानिवृत्तौ सन्ध्याकर्मावसाने रजनीमवेक्ष्य ददौ रजनीभक्ष्याहसारं ददावित्यर्थः । सीता तु रामभुक्तशेषं भुक्तवतीत्याशयः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

१] ति० टी०—परिणाम्यातिवाह्य ॥ १ ॥

१ अशनिवर्षसेति गो. पाठः । २ उक्त्वा वरदमिति गो. उक्तोपरममिति रा. पाठः । ३ भोज्यमिति गो. पाठः । ४ अवेक्ष्येति गो. पाठः ।

उत्थाय चै यथाकालं राघवः सह सीतया । उपस्पृश्य सुशीतेन [3]तोयेनोत्पलगन्धिना ॥ २ ॥
अथ तेऽग्निं सुरांश्चैव वैदेही रामलक्ष्मणौ । काल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ ३ ॥
उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः । सुतीक्ष्णमभिगम्येदं श्लक्ष्णं वचनमब्रुवन् ॥ ४ ॥
सुखोषिताः स्म भगवंस्त्वया पूज्येन पूजिताः । आपृच्छामः प्रयास्यामो मुनयस्त्वरयन्ति नः ॥ ५ ॥
त्वरामहे वयं द्रष्टुं कृत्स्नमाश्रममण्डलम् । ऋषीणां पुण्यशीलानां दण्डकारण्यवासिनाम् ॥ ६ ॥
अभ्यनुज्ञातुमिच्छामः सहैभिर्मुनिपुंगवैः । धर्मनित्यैस्तपोदान्तैर्विशिखैरिव पावकैः ॥ ७ ॥
अविषह्यातपो यावत्सूर्यो नातिविराजते । अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः ॥ ८ ॥
तावदिच्छामहे गन्तुमित्युक्त्वा चरणौ मुनेः । ववन्दे सहसौमित्रिः सीतया सह राघवः ॥ ९ ॥
तौ संस्पृशन्तौ चरणावुत्थाप्य मुनिपुंगवः । गाढमाश्लिष्य सस्नेहमिदं वचनमब्रवीत् ॥ १० ॥

रा० टी०—सुतीक्ष्णकृतसत्कारानन्तरकालिकं रामवृत्तान्तमाह—राम इति । सुतीक्ष्णेनाभिपूजितो रामस्तु तत्र सुतीक्ष्णाश्रमे निशां परिणाम्य शयित्वा प्रभाते प्रत्यबुध्यत ॥ १ ॥

गो० टी०—अथ सुतीक्ष्णानुज्ञया रामस्याश्रममण्डलं प्रति प्रस्थानमष्टमे—रामस्त्वित्यादि । परिणाम्य अतिवाह्य प्रभाते उषःकाले ॥ १ ॥

२] ति० टी०—उपस्पृश्य स्नात्वा । उत्पलगन्धिनोत्पलगन्धवता ॥ २ ॥

रा० टी०—उत्थायेति । सीतया सह राघवः यथाकालमुत्थाय उत्पलगन्धिना तोयेन उपस्पृश्य स्नात्वा अवर्ततेति शेषः । ' उपास्पृशत् ' इति भूषणपाठः तत्पक्षे क्रियाशेषस्य न प्रयोजनम् ॥ २ ॥

गो० टी०—उत्थायेति । सह सीतयेत्यनेन पूर्वमेव सौमित्रिः स्नात इति व्यज्यते । उपास्पृशत् स्नातवान् 'स्नानाचान्त्योरुपस्पर्शः' इति वाणः । सुशीतेनेत्युष्णोदकव्यावृत्तिः उत्पलगन्धिनेत्यनेन तटाकस्नानं सूच्यते ॥ २ ॥

३–६] ति० टी०—काल्यं यथाकालप्राप्तमित्यभ्यर्चनक्रियाविशेषणम् ॥ ३–६ ॥

रा० टी०—अथेति । काल्ये प्रातःकाल्ये वने वैदेह्यादयः अग्निं सुरांश्च विधिवदभ्यर्च्य उदयन्तं दिनकरं दृष्ट्वा सुतीक्ष्णमभिगम्य तत्संमुखे प्राप्य अब्रुवन् । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—अथेति । अग्निमित्येकवचनेन एकाग्नित्वावगमान्न त्रेताग्नित्वमिति गम्यते । सुरान् नारायणम् । सह पत्न्या विमलाक्ष्या नारायणस्योपागमदित्ययोध्याकाण्डोक्तेः । परिवारार्पणया बहुवचनम् । काल्यं यथाकालप्राप्तं यथा तथा देवाद्यनुगुणपूजाकथनाय तपस्विशरण इत्युक्तम् । उदयन्तम् उद्यन्तम् अनेन होमानन्तरमादित्योपस्थानोक्त्या अनुदितहोमपक्षसूचनात् कात्यायनसूत्रक्रमेण राघवाणामनुज्ञानमिति गम्यते ॥ ३ ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—सुखेति । पूज्येन सर्वैः पूजनीयेन त्वया पूजिताः सत्कृताः सुखोषिताः सुखं निवासिता वयम् आपृच्छामः गमनाय प्रार्थयामः, तत्र हेतुः मुनयो नोऽस्मांस्त्वरयन्ति अतः प्रयास्यामः ॥ ५ ॥

रा० टी०—त्वरामहे इति । पुण्यशीलानामृषीणां कृत्स्नमाश्रममण्डलं द्रष्टुं वयं त्वरामहे ॥ ६ ॥

गो० टी०—सुखोषिता इत्यादित्रिश्लोक्येकान्वया । आपृच्छामः आपृच्छामहे परस्मैपदमार्षम् । अभ्यनुज्ञातुमिति भावे तुमुन् । त्वत्कर्तृकं गमनानुज्ञानं प्रार्थयामहे इत्यर्थः । मुनयः सहवासयोग्या इत्याह—धर्मनित्यैरित्यादि । धर्मनित्यैर्नित्यधर्मैः तपोभिर्दान्तैः निगृहीतेन्द्रियैः तपो हीन्द्रियनिग्रहहेतुः विशिखैः विगतज्वालैः 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः । गुप्तमाहात्म्यैरित्यर्थः ॥ ५–७ ॥

७] ति० टी०—अभ्यनुज्ञातुमिति भावे तुमुन् । गमनानुज्ञानं प्रार्थयामः । विशिखैर्विधूमैः ॥ ७ ॥

रा० टी०—अभीति । विशिखैर्धूमरहितैः पावकैरिव एभिर्मुनिपुङ्गवैः सह अभ्यनुज्ञातुं त्वदाज्ञां ग्रहीतुमिच्छामः ॥ ७ ॥

८–१०] ति० टी०—अविषह्यातपः सोढुमशक्यातपो यावन्नात एवातिविराजते तावद्गन्तुमिच्छाम इत्यन्वयः । अमार्गेणान्यायेनागतां लक्ष्मीमैश्वर्यं प्राप्यान्वयवर्जितोऽन्वयः संबन्धस्तद्विवर्जितः, गुरुसाधुजनसेवारहितो दुष्प्रभुरिवाकुलज इव वा यावदविषह्यप्रतापो न ततः पूर्वं गन्तुमिच्छाम इत्यर्थः ॥ ८–१० ॥

रा० टी०—अयमेवाज्ञापनकाल इति बोधयन्नाह—अविषह्येति । अमार्गेण अन्यायेन आगतां लक्ष्मीं संपत्तिं प्राप्य अन्वयवर्जितः पूर्वं नित्यं लक्ष्मीसंबन्धशून्यः पुरुष इव अविषह्यातपः न विषह्यः आतपो यस्य स सूर्यो यावन्नातिविराजते तपतीत्यर्थः, तावदेव गन्तुमिच्छामहे इत्युक्त्वा मुनेः चरणौ ववन्दे । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

रा० टी०—ताविति । चरणौ संस्पृशन्तौ तौ रामलक्ष्मणौ उत्थाप्य गाढमाश्लिष्य सस्नेहमिदं वचनमब्रवीत् ॥ १० ॥

१ त्रिति गो. पाठः । २ उपास्पृशदिति गो. पाठः । ३ जलेनेति गो. पाठः । ४ आलिङ्ग्येति गो. पाठः ।

अरिष्टं गच्छ पन्थानं राम सौमित्रिणा सह । सीतया चानया सार्धं छाययेवानुवृत्तया ॥ ११ ॥
पश्याश्रमपदं रम्यं दण्डकारण्यवासिनाम् । एषां तपस्विनां वीर तपसा भावितात्मनाम् ॥ १२ ॥
सुप्राज्यफलमूलानि पुष्पितानि वनानि च । प्रशस्तमृगयूथानि शान्तपक्षिगणानि च ॥ १३ ॥
फुल्लपङ्कजखण्डानि प्रसन्नसलिलानि च । कारण्डवविकीर्णानि तटाकानि सरांसि च ॥ १४ ॥
द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च । रमणीयान्यरण्यानि मयूराभिरुतानि च ॥ १५ ॥
गम्यतां वत्स सौमित्रे भवानपि च गच्छतु । आगन्तव्यं च ते दृष्ट्वा पुनरेवाश्रमं प्रति ॥ १६ ॥
एवमुक्तस्तथेत्युक्त्वा काकुत्स्थः सहलक्ष्मणः । प्रदक्षिणं मुनिं कृत्वा प्रस्थातुमुपचक्रमे ॥ १७ ॥
ततः शुभतरे तूणी धनुषी चायतेक्षणा । ददौ सीता तयोर्भ्रात्रोः खड्गौ च विमलौ ततः ॥ १८ ॥
आबध्य च शुभे तूणी चापे चादाय सस्वने । निष्क्रान्तावाश्रमाद्गन्तुमुभौ तौ रामलक्ष्मणौ ॥ १९ ॥
शीघ्रं तौ रूपसंपन्नावनुज्ञातौ महर्षिणा । प्रस्थितौ धृतचापासी सीतया सह राघवौ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टमः सर्गः ॥ ८ ॥

गो० टी०–अविषह्येत्यादि । सूर्यः अविषह्यातपः असह्यातपः सन् यावन्नातिविराजते नात्यन्तमुद्गच्छति कथमिव अमार्गेणान्यायेनागतां लक्ष्मीम् ऐश्वर्यं प्राप्य अन्वयवर्जितः साधुसमागमवर्जितो दुष्प्रभुरिवाविषह्यातप इत्यन्वयः । तावदिच्छामहे गन्तुमित्यनेन रावणवधत्वरा व्यज्यते । अतो न हीनोपमादोषोऽपि ॥ ८–१० ॥

११] ति० टी०–अरिष्टं निरुपद्रवम् ॥ ११ ॥

रा० टी०–तद्वचनाकारमाह–अरिष्टमित्यादिभिः । छायया इव अनुवृत्तया अनुवर्तनशीलया सीतया सार्धमरिष्टं विघ्नरहितं पन्थानं त्वं गच्छ ॥ ११ ॥

गो० टी०–अरिष्टम् अनुपद्रवं रिषेः "तीषसह–" इति भावे निष्ठा । अनेनापि रावणविजयाभ्युपज्ञा सूच्यते ॥ ११ ॥

१२] ति० टी०–आश्रमपदमिति । जातावेकवचनम्॥१२॥

रा० टी०–पश्येति । तपसा परमात्मविचारेण भावितः परिशीलितः आत्मा परमात्मा यैस्तेषां दण्डकारण्यवासिनामाश्रमपदं श्रमनिवर्तकं स्थानं पश्य ॥ १२ ॥

गो०टी०–तपोवनपदार्थान् कृतार्थयितुमाह–पश्येत्यादि१२

१३] ति० टी०–उक्तविशेषणविशिष्टानि वनानि सरांसि च द्रक्ष्यस इत्यन्वयः । शान्तपक्षिगणत्वं परस्परविरोधाभावात्१३

रा०टी०–सुप्राज्येति। सुप्राज्यानि बहुलानि फलमूलानि येषु तानि प्रशस्तमृगयूथानि प्रशस्तमृगसमूहविशिष्टानि वनानि १३

गो० टी०–स प्राज्येति । प्राज्यम् अदभ्रम् । 'प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ' इत्यमरः ॥ १३ ॥

१४–१५]ति०टी०–कारण्डवैर्विकीर्णानि व्याप्तानि१४-१५

रा० टी०–प्रसन्नानि स्वच्छानि सलिलानि जलानि येषां तानि कारण्डववविकीर्णानि कारण्डवैर्जलकुक्कुटैः विकीर्णानि व्याप्तानि तटाकानि च सरांसि च । अत्र स्रोतोरहितानि तटाकानि तरसहितानि सरांसीति न पौनरुक्त्यम् ॥ १४ ॥

गो० टी०–कारण्डवो जलकुक्कुटः 'मदुः कारण्डवः प्लवः इत्यमरः ॥ १४ ॥

रा० टी०–गिरिप्रस्रवणानि गिरिनिर्झरान् च मयूराभिरुतानि रमणीयान्यरण्यानि च द्रक्ष्यसे। श्लोकत्रयमेकान्वयि॥१६॥

गो० टी०–रमणीयत्वादिना विशेषयितुं पुनरप्याह–रमणीयानीति । मयूराणामभिरुतानि येषु तानि गम्यतां त्वयेति शेषः। भवानिति राम उच्यते आश्रमं प्रतीति शेषः ॥ १५–१७ ॥

१६–१७] ति० टी०–ते त्वया सकलऋषीणामाश्रमान्दृष्ट्वा पुनरपि ममाश्रमं प्रत्यागन्तव्यमित्यर्थः ॥ १६ ॥ १७ ॥

रा० टी०–गम्यतामिति । तमुक्तसमूहं दृष्ट्वा आश्रमं प्रति पुनरागन्तव्यम् ॥ १६ ॥

रा०टी०–एवमिति । एवमुक्तः सुतीक्ष्णेनोपदिष्टः काकुत्स्थो रामः तथेत्युक्त्वा मुनिं प्रदक्षिणं कृत्वा प्रस्थातुमुपचक्रमे॥१७॥

१८] ति० टी०–ततो धनुरादिदानानन्तरं विमलौ निशितौ खड्गौ च ददौ ॥ १८ ॥

रा० टी०–तत इति । ततः प्रस्थानोपक्रमोत्तरकाले शुभतरे तूणी बाणसहितेइषुधी धनुषी च खड्गौ च ततः तस्मिन्स्थले सीता भ्रात्रोर्भ्रातृभ्यां ददौ ॥ १८ ॥

गो० टी०–तत इति। ततः प्रस्थानोपक्रमानन्तरं विमलौ तत इति ततः धनुरादिदानानन्तरमित्यर्थः । ततः शुभतरे इत्यादिना अयमर्थोऽवगम्यते आश्रमप्रवेशे किमस्माकमायुधैरिति मन्यमाना सीता आयुधानि मुनिगृहे कुत्रचिन्निहितवती । अथ अमार्गेणेत्यादिरामवाक्येन अरिष्टं गच्छेत्यादिमुनिवाक्येन च तयोर्हृदयं विदित्वा स्वयमेवादाय पुनर्दत्तवतीति । अत एवोत्तरसर्गे स्वाशयं वक्ष्यति ॥ १८–२० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्यानेऽष्टमः सर्गः ॥ ८ ॥

१९–२०]ति०टी०–चापे चापशब्दो द्विलिङ्गः॥१९॥२०॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टमः सर्गः ॥ ८ ॥

---

१ स प्राज्येति गो. पाठः । २ षण्डानीति रा. पाठः । ३ त्वया तातेति गो. पाठः । ४ ममेति गो. पाठः ५ चापौ चादाय सस्वनाविति गो. पाठः । ६ श्रीमन्ताविति गो. पाठः । ७ दीप्यमानौ स्वतेजसेति गो. पाठः । ८ चापौ ताविति गो. पाठः ।

नवमः सर्गः ।

प्रोद्यतायुधमुत्साहिनं राम दृष्ट्वा हिंसातो निविवर्तयिषुः सीता खड्गधारणात्तपसो विभ्रंश्य प्राप्तनरकं कंचिन्मुनिं निदर्शनीकृत्य सत्यधर्मविचारणे प्रेरयति ।

सुतीक्ष्णेनाभ्यनुज्ञातं प्रस्थितं रघुनन्दनम् । हृद्यया स्निग्धया वाचा भर्तारमिदमब्रवीत् ॥ १ ॥
अधर्मं तु सुसूक्ष्मेण विधिना प्राप्यते महान् । निवृत्तेन च शक्योऽयं व्यसनात्कामजादिह ॥ २ ॥
त्रीण्येव व्यसनान्यद्य कामजानि भवन्त्युत । मिथ्यावाक्यं तु परमं तस्माद्गुरुतरावुभौ ॥ ३ ॥
परदाराभिगमनं विना वैरं च रौद्रता । मिथ्यावाक्यं न ते भूतं न भविष्यति राघव ॥ ४ ॥

रा० टी०—आबध्येति । तूणी आबध्य सत्वने चापे च आदाय गन्तुमाश्रमादुभौ निष्क्रान्तौ ॥ १९ ॥

रा० टी०—क्षीघ्रमिति । धृतचापासी रामलक्ष्मणौ महर्षिणा क्षीघ्रमाज्ञप्तौ ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोभूषणारण्यकाण्डेऽष्टमः सर्गः ॥ ८ ॥

१] ति० टी०—राक्षसवधप्रतिज्ञां पुनरुक्तां कारयितुं तेजोवृद्ध्यर्थं च राक्षसवधमापाततो निषेधन्ती सीताऽब्रवीत् । सीतेति शेषः । हृद्यया युक्तिमत्त्वेन हृदयंगमया, स्निग्धया स्नेहप्रदत्तया ॥ १ ॥

रा० टी०—प्रस्थानानन्तरकालिकं सीतोक्तं वर्णयन्नाह—सुतीक्ष्णेनेति । प्रस्थितं रघुनन्दनं भर्तारं हृद्यया मनोहरया स्निग्धया मधुरया वाचा इदमब्रवीत्, सीतेति शेषः ॥ १ ॥

गो० टी०—अथ सीता वीरपत्नीत्वेन धनुर्दुष्टिग्रहणविशेषेण सायुधतया सन्नद्धं पतिमालोक्य यदि त्वं सायुधो राक्षसभूयिष्ठे देशे प्रविष्टः स्याः तर्हि तैः साकं विरोधः स्यात्, तेनावयोर्विश्लेषः स्यात्, तेन भवतो महान् क्लेशः स्यात्, अतो निधायायुधं वनेऽस्माभिर्गन्तव्यमित्याह नवमे—सुतीक्ष्णेनेत्यादि । अभ्यनुज्ञातम् अरिष्टं गच्छ पन्थानमिति रावणवधाभिप्रायेणाऽनुज्ञातं हृद्यया युक्तियुक्तत्वेन हृदयंगमया स्निग्धया स्नेहप्रदत्तया । अनेन वक्ष्यमाणवचने स्नेह एव मूलमित्युक्तम् । रामेण ऋषिभ्यः प्रतिज्ञाकरणं रामप्रतिज्ञायाः दुरावरत्वं च बहुशो दृष्टवत्यपि राक्षसैर्वैरे भर्तुः स्वविरहद्वारा महान् क्लेशो भवेदिति प्रेमान्धतया तथोक्तवतीति भावः ॥ १ ॥

२] ति० टी०—अधर्ममिति । यद्यपि भवान्महान्महापुरुषोऽथापि सुसूक्ष्मेण विधिना सूक्ष्मेण मार्गेण विचारणे सति भवानधर्मं तु प्राप्यते प्राप्नोति । छान्दसः श्यन् । अतिदुर्बलमृगवधप्रतिज्ञया वनप्रवेशे सतीत्यर्थः । वर्तमानसामीप्ये लट् । अयमधर्मस्तु कामजाद्व्यसनाद्विनिवृत्तेन त्वया निवर्तयितुं शक्यः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—य इति । सुसूक्ष्मेण अतिविचारलभ्येन विधिना यो महान् धर्मः प्राप्यते स धर्मनिवृत्तेन पापाचरणाद्विरतेन पुरुषेण कामजाद्व्यसनाच्छक्यः रक्षितुमिति शेषः । 'अधर्मं तु सुसूक्ष्मेण विधिना प्राप्यते महान्' इति भट्टपाठः ॥ २ ॥

गो० टी०—किं तदुक्तं तत्राह—अयं धर्म इति । महानयं धर्मः त्वयाऽनुष्ठीयमानो मुनिधर्मः सुसूक्ष्मेण विधिना मार्गेण विचारेण प्राप्यते धर्मकामैरिति शेषः । सूक्ष्मविधिमेवाह—निवृत्तेनेति । इह वने कामजात् इच्छाकृताद्व्यसनान्निवृत्तेन पुरुषेणायं धर्मः शक्यः संपाद्यः । व्यसनमिति जात्येकवचनम् ॥२॥

३] ति० टी०—किं तत्कामजं व्यसनं कथ्यमधर्मो यस्तन्निवृत्त्या निवर्तनीय इत्याशङ्क्यायाह—त्रीण्येवेति । कानि त्रीणीत्यतः—मिथ्येति । स्वदेहकीपुत्रादिरागवशान्मिथ्यावाक्यप्रवृत्तिः पुंसस्तत्परमकं व्यसनस्वरूपं तदनन्तरं ततोऽपि गुरुतरावत्यन्तगुरुव्यसनभूतौ ॥ ३ ॥

रा० टी०—व्यसनमेव निरूपयन्त्याह—त्रीणीति । कामजानि इच्छाजनितानि व्यसनानि त्रीण्येव भवन्ति । तत्स्वरूपमाह—परमं परा अत्युत्कृष्टा मा अर्थाभावेऽपि मनोहारिका संपत्तिर्यस्मिंस्तन्मिथ्यावाक्यमेकं व्यसनं, तस्मादपि गुरुतरौ उभौ वक्ष्यमाणौ ॥ ३ ॥

गो० टी०—किं तद्व्यसनं तत्राह—त्रीण्येवेति । अत्र लोके उत अत्यर्थं कामजानि रागकृतानि त्रीण्येव व्यसनानि भवन्ति । कानि तानि त्रीणीत्यत्राह—मिथ्या[1]वाक्यमित्यादि । मिथ्या वाक्यं परमकं प्रथममित्यर्थः, सर्वेभ्यो व्यसनेभ्यः श्रेष्ठमित्यर्थः, स्वार्थे कः । तस्मादपि व्यसनात् गुरुतरावुभौ व्यसनविशेषौ, तावाह—परदारेत्यादि[2] । परदाराभिगमनं परदाराभिमर्शनं वैरं विना रौद्रता हिंसकता चेति ॥ ३ ॥

४] ति० टी०—कौ तौ तत्राह—परदारेति । विना वैरं रौद्रता रौद्रभावावलम्बनं मृगाणामत्यन्तदुर्बलत्वेन तेषु वैरप्रसक्त्यभावादिति भावः । एवं व्यसनत्रयं निरूप्य प्रकृतेऽधर्मप्राप्तिपरिहाराय व्यसनं परिशेषयितुमाह—मिथ्येति ॥ ४ ॥

रा० टी०—तावेव द्वौ वयन्त्याह—परेति । परदारैः अन्यस्त्रीभिः अभिगमनं संगमः वैरं विना रौद्रता क्रूरकर्मकारित्वं

१ अयं धर्म इति गो. यो धर्म इति रा. पाठः । २ अत्रेति गो. पाठः । ३ परमकमिति गो. पाठः ।

कुतोऽभिलषणं स्त्रीणां परेषां धर्मनाशनम् । तव नास्ति मनुष्येन्द्र न चाभूत्ते कदाचन ॥ ५ ॥
मनस्यपि तथा राम न चैतद्विद्यते क्वचित् । स्वदारनिरतैश्चैव नित्यमेव नृपात्मज ॥ ६ ॥
धर्मिष्ठः सत्यसंधश्च पितुर्निर्देशकारकः । [सैत्यसंध महाभाग श्रीमाँल्लक्ष्मणपूर्वज ।]
त्वयि धर्मश्च सत्यं च त्वयि सर्वं प्रतिष्ठितम् ॥ ७ ॥
तच्च सर्वं महाबाहो शक्यं वोढुं जितेन्द्रियैः । तव वश्येन्द्रियत्वं च भूतानां शुभदर्शन ॥ ८ ॥
तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम् । निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितम् ॥ ९ ॥

च। तत्र व्यसनद्वयस्यासंभवमाह–हे राघव! ते वाक्यं मिथ्या न भूतमत एव न भविष्यति ॥ ४ ॥

गो० टी०–एवं सामान्येन व्यसनरूपमुक्त्वा प्रकृते परिहार्यत्वेन वक्तव्यं व्यसनं दर्शयितुमितरपरिशेषमाह–मिथ्येत्यादिना। अत्र भूतभविष्यतोर्वर्तमानस्यान्तर्भावः। कुत इति परेषां संबन्धिनीनां स्त्रीणां धर्मनाशनमधर्मकरं च अभिलाषणमभिलाषः कुतः असंभावित इत्यर्थः। धर्मनाशनशब्देन गुरुतरशब्दोक्तातिशयो दर्शितः। मिथ्यावाक्यमधर्मकरम् इदमुभयकरमिति भावः ॥ ४ ॥

५] ति० टी०–परदाराभिमर्शनमपि त्वयि नास्तीत्याह–कुत इति। कुतोऽपि हेतोरित्यर्थकं, कुत इति पूर्वान्वयि। धर्मनाशनं परेषां स्त्रीणामभिलषणं तत्पूर्वकं तत्स्पर्शादि तव नास्ति वर्तमानकाले नाभूत्पूर्वं च ततः परं न भविष्यति च ॥ ५ ॥

रा० टी०–कुत इति। परेषामन्येषां स्त्रीणां धर्मनाशनमभिलषणं मनस्यपि कुतः कस्मादपि हेतोः कदाचन क्वचित्कस्मिँश्चिद्देशे तव नाभूत् न वास्ति न विद्यते भविष्यति वर्तमानसामीप्य इति भविष्यति लट् अत एव हे! नृपात्मज त्वं नित्यमेव स्वदारनिरतः। श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–कुत इत्यादिना परदाराभिलाष एव नास्ति कुतस्तदभिगमनमित्युक्तं कालत्रयेऽपि तदभाव इति विशेषयति–तवेति। मनुष्येन्द्रेति हेतुगर्भं संबोधनं तव परदाराभिलाषणमिदानीं नास्ति कदाचन ते तन्नाभूत् हे राम। एतत् अभिलाषणं ते क्वचित्स्वन्दरेष्वपि परदारेषु मनसा संकल्पेनापि न विद्यते। अनेन भविष्यत्कालेऽपि नास्तीत्युक्तम्। तथेति समुच्चये चोऽवधारणे ॥ ५ ॥

६] ति० टी०–किंबहुना मनस्यप्येतन्न विद्यते। अनेनेच्छाया अपि निरासः। तस्यैवोपपादनम्–स्वदारेति ॥ ६ ॥

गो०टी०–उक्तव्यसनद्वयाभावे बहून् हेतून् दर्शयति–स्वदारेत्यादिना। हे नृपात्मज! त्वं नित्यमेव स्वदारनिरतः धर्मिष्ठश्च अत एव सत्यसन्धः सत्यप्रतिज्ञः तत्र निदर्शनं पितुर्निर्देशकारकः ६

७] ति० टी०–यतस्त्वं धर्मिष्ठत्वादिगुणः, अतस्त्वयि धर्मः प्रतिष्ठितः सर्वं सत्यं च त्वयि प्रतिष्ठितम् ॥ ७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–धर्मिष्ठ इति। धर्मिष्ठः वेदोक्तनिखिलधर्मविशिष्टः अत एव सत्यसंधश्चासीति शेषः, अत एव पितुर्निर्देशकारकोऽसि अत एव सर्वं साङ्गं त्वयि धर्मः त्वयि सत्यं च प्रतिष्ठितम् ॥ ७ ॥

गो० टी०–उक्तानुवादपूर्वकं भर्तारं स्तौति–सत्यसन्धेति। महाभाग महाधर्मन्! श्रीमन् निरवधिकैश्वर्य! लक्ष्मणपूर्वज वैराग्ये लक्ष्मणादप्यधिक! त्वयि सत्यं प्रतिष्ठितम्, धर्मश्च प्रतिष्ठितः, अन्यत्सर्वमैश्वर्यवैराग्यादिकं च त्वयि प्रतिष्ठितं सुस्थिरम् ॥७॥

८] ति० टी०–ननूक्तव्यसने मयि न भविष्यत इति कथं तव निर्णयोऽत आह—तच्चेति। वोढुं शक्यमप्येऽपि तत्परिपालनं कर्तुं शक्यं यतस्तत्परिपालनकारणं जितेन्द्रियत्वं त्वय्यस्ति, अतो न भविष्यत इति निर्णयः ॥ ८ ॥

रा० टी०–ननूक्तयोर्व्यसनयोरसत्वमपि कथं निश्चितमित्यत आह–तदिति। हे महाबाहो! जितेन्द्रियैः पुरुषैः सर्वं साङ्गं तत्पूर्वोक्तं सत्यं धर्मश्च वोढुं नित्यं धारयितुं शक्यम्। ननु मयि कथं वश्येन्द्रियत्वनिश्चय इत्यत आह–तव तु भूतानां चिन्तकानां पुरुषाणां वश्येन्द्रियत्वं वश्यानि इन्द्रियाणि येषां तत्वं, एतेन यदि त्वच्चिन्तनकर्तॄणां वश्येन्द्रियत्वं तर्हि तव वश्येन्द्रियत्वं किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः, तेन वश्येन्द्रियत्वं विना व्यसनाभावस्यात्यन्ताभावः सूचितः॥८॥

गो० टी०–तृतीयव्यसनसद्भावं वक्तुमुक्तव्यसनद्वयाभावं स्वानुभवसिद्धत्वेन द्रढयति–तच्चेति। हे महाबाहो! जितेन्द्रियैः धर्तुं शक्यं तत्पूर्वोक्तं धर्मिष्ठत्वादिकं सर्वं तव वश्येन्द्रियत्वं च जानामि शुभदर्शन! तत्सद्भावे तव दर्शनमेव प्रमाणम् "रूपमेवास्यै तन्महिमानं व्याचष्टे" इति श्रुतेः ॥ ८ ॥

९] ति० टी०–तृतीयं तु व्यसनं प्रसक्तमित्याह–तृतीयमिति। यन्मोहान्निर्वैरं परप्राणाभिहिंसनं क्रियते तदिदं रौद्राख्यं मृगयारूपं तृतीयं व्यसनं ते तच्च तत्तु तत्सदृशं तु समुपस्थितम्। राक्षसैः स्वापराधाकरणान्निर्वैरत्वमस्येति बोध्यम्॥९॥

रा० टी०–तृतीयव्यसनस्य प्रसक्तिं दर्शयन्ती आह–तृतीयमिति। यद्रौद्रं भयंकरं निर्वैरं निर्गतं वैरं यस्मिन् तत्परप्राणाभिहिंसनं तृतीयं व्यसनं मोहादविवेकाज्जनैः क्रियते तदिदं व्यसनं ते समुपस्थितं प्रसङ्गात्प्राप्तम् ॥ ९ ॥

गो० टी०–एवं व्यसनद्वयरहितेन त्वया तृतीयव्यसनमपि

१ लाषणमिति गो. पाठः। २ त्वं चेति गो. पाठः। ३ अर्धमेतदधिकं गो. पाठे। ४ सत्यमिति रा. पाठः। ५ धर्तुमिति गो. पाठः। ६ जानामीति गो. पाठः।

प्रतिज्ञातस्त्वया वीर दण्डकारण्यवासिनाम् । ऋषीणां रक्षणार्थाय वधः संयति रक्षसाम् ॥ १० ॥
एतन्निमित्तं वैदेहि दण्डका इति विश्रुतम् । प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः ॥ ११ ॥
ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः । त्वद्वृत्तं चिन्तयन्त्या वै भवेन्निःश्रेयसं हितम् ॥ १२ ॥
नहि मे रोचते वीर गमनं दण्डकान्प्रति । कारणं तत्र वक्ष्यामि वदन्त्याः शृणुतां मम ॥ १३ ॥
त्वं हि बाणधनुष्पाणिर्भ्रात्रा सह वनं गतः । दृष्ट्वा वनचरान्सर्वान्कच्चित्कुर्याः शरव्ययम् ॥ १४ ॥
क्षत्रियाणामिह धनुर्हुताशस्येन्धनानि च । समीपतः स्थितं तेजोबलमुच्छ्रयते भृशम् ॥ १५ ॥

कथंचित्परिहर्तव्यमित्याशयेनाह–तृतीयमिति । निर्वैरं यथा भवति तथा परप्राणाभिहिंसनरूपं यदिदं रौद्रं रौद्राख्यं तृतीयं महद्व्यसनं पामरैः क्रियते तच्च तत्तु ते सम्प्रस्थितं त्वया कर्तुमयुक्तमित्यर्थः ॥ ९ ॥

१०] ति० टी०–कृतोऽस्याधर्मस्य मम प्राप्तिरत आह–प्रतिज्ञात इति ॥ १० ॥

रा० टी०–तत्प्राप्तिमुपपादयन्ती आह–प्रतिज्ञात इति । हे वीर! ऋषीणां रक्षणार्थाय संयति संग्रामे रक्षसां वधः प्रतिज्ञातः एतन्निमित्तमेव दण्डका इति नाम्ना विश्रुतं ख्यातं वनं भ्रात्रा सह प्रस्थितः । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०–कथमयुक्तमित्याह–प्रतिज्ञात इति ॥ १० ॥

११] ति टी ०–नन्वयं प्रतिज्ञामात्रेण कथमधर्मप्राप्तिस्तत्राह–एतदिति । प्रतिज्ञातरक्षोवधार्थमित्यर्थः । दण्डका इति विश्रुतं प्रसिद्धम् वनमित्यर्थः । प्रस्थितेन त्वया पूर्वप्रतिज्ञातत्वात्तत्कर्तव्यमेवेति तत्प्रसक्तिरिति भावः ॥ ११ ॥

गो० टी०–न केवलमृष्यभ्यर्थनया प्रतिज्ञातं प्रथमसंकल्पश्च तव तथैवेत्याह–तन्निमित्तमिति । दण्डका इति विश्रुतं वनं प्रति त्वं भ्रात्रा सह धृतबाणशरासनः सन् प्रस्थितः केवलेनात्मकार्येणेत्यादिना भवतैवोक्तत्वादिति भावः ॥ ११ ॥

१२] ति० टी०–ततो हेतोस्त्वां प्रस्थितं दृष्ट्वा त्वद्वृत्तं सत्यप्रतिज्ञत्वरूपं चरितं दृष्ट्वा तव निःश्रेयसं पारलौकिकं सुखं हितमिहलोकसुखं चिन्तयन्त्या. मम मनश्चिन्ताकुलं भवेद्भवति रक्षसां बलवत्त्वेन तेभ्योऽनिष्टसंभावनयैहिकसुखभङ्गोऽपि संभावित इति भावः ॥ १२ ॥

रा० टी०–तत इति । ततः प्रतिज्ञाकरणानन्तरं प्रस्थितं त्वां दृष्ट्वा मम मनः चिन्ताकुलमभवदिति शेषः, अतस्त्वद्वृत्तं राक्षसवधप्रतिज्ञावृत्तान्तं चिन्तयन्त्या मम हितं निःश्रेयसं कल्याणं भवेत्, मत्प्रार्थनां स्वीकुर्वित्यर्थः । एतेन राक्षसमात्रवधप्रतिज्ञाभवणात् अनपराधिविभीषणादिवधविषयकसंशयो जात इति व्युत्पादितम् । नच 'तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान्' इति प्रतिज्ञावाक्ये तपस्विशत्रुत्वविशिष्टराक्षसवधप्रतिज्ञा [illegible] सिद्धेवेति संशयस्य नावकाश इति वाच्यम्, शत्रुत्वावृत्त्वादेः शत्रुत्वाभासस्य संशयबीजत्वात् । नच प्रतिज्ञावाक्ये रण इति सप्तम्यन्तस्योपादानात् रणे आगतान् राक्षसान् हन्तुमिच्छामीत्यर्थात् कथं विभीषणादिसंग्रहसंशय इति वाच्यम्, रणे विद्यमानोऽहं हन्तुमिच्छामीत्यर्थस्यापि संभवात् विभीषणानुयायिनामपि बहूनां रावणाधीनत्वात् रणागमनसंभवाच्च यत्नविशेषमन्तरा विभीषणागमनस्यापि दुर्वारत्वाच्चेति दिक् ॥ १२ ॥

गो० टी०–ततः किमित्यत्राह–ततस्त्वामिति । प्रस्थितं त्वां दृष्ट्वा त्वद्वृत्तं सत्यप्रतिज्ञत्वस्वदारैकनिरतत्वादिकं च दृष्ट्वा त्वन्निःश्रेयसं तव सौख्यं हितं तत्साधनं च चिन्तयन्त्या मम मनश्चिन्ताकुलं भवेद्वै भवति हि भवान् सत्यप्रतिज्ञत्वेन रक्षोवधान्न निवर्तेत निर्वैरं परहिंसनं च न करोपि यस्य कस्यचिद्वैरमूलस्य करणे तदहमेव स्यां, मद्विरहं च स्वमेकदारव्रतनिरतः न सोढुमर्हसि अतः कथमिदं संपत्स्यत इति भावः ॥ १२ ॥

१३] ति० टी०–यदेवमतः–नहि मे इति । कारणं तद्गमनारुचौ । ममेति सकाशादिति शेषः ॥ १३ ॥

रा० टी०–तदेव बोधयितुकामाह–नेति । हे वीर! दण्डकान् प्रति गमनं मे न रोचते । तत्र कारणं वक्ष्यामि वदन्त्याः मम शृणुताम् ॥ १३ ॥

गो० टी०–तर्हि क उपायस्ते प्रतिभातीत्यपेक्षायां रामपक्षस्यैव स्वपक्षत्वात्तत्पक्षं स्थूणानिखननन्यायेन द्रढयितुं पक्षान्तरमाह–नहीति । मम मतः ॥ १३ ॥

१४] ति० टी०–हि यतस्त्वं वनं गतः सर्वान्वनचरान्राक्षसान्दृष्ट्वा शरव्ययं कच्चित्कुर्याः करिष्यसि । इदमेव हिंसालक्षणाधर्मप्राप्तौ कारणम् ॥ १४ ॥

रा० टी०–तद्वचनप्रकारमाह–त्वमिति । बाणधनुष्पाणिः भ्रात्रा सह त्वं वनं दण्डकारण्यं गतः प्राप्तः । नन्वत्र को दोष इत्यत्र आह–सर्वान् वनचरान् दृष्ट्वा कच्चित् कदाचित् राक्षसवधप्रतिज्ञास्मरणसमये इत्यर्थः, शरव्ययं शरेण व्ययमनपराधिराक्षसवधं त्वं कुर्याः चेत्तन्मे न रोचते इति शेषः, एतेन तत्र कर्तव्यमिति ध्वनितम् ॥ ॥ १४ ॥

गो० टी०–त्वं हीति । शरव्ययं शरमोक्षं कच्चिदिति कामप्रवेदने ॥ १४ ॥

१५] ति० टी०–शरमोक्षमकृत्वाऽवस्थानं स्वशक्तयमित्याह–क्षत्रियाणामिति । समीपतः स्थितं पञ्चत्वसमीपस्थितं तस्य पुंसस्तेजोवर्कं तेजस आधिक्यं करोति । यथ वह्नेस्तेजस आधिक्यमिन्धनानि कुर्वते ॥ १५ ॥

---

१ च वनमिति गो० पाठः ।

पुरा किल महाबाहो तपस्वी सत्यवाञ्शुचिः । कस्मिंश्चिदभवत्पुण्ये वने रतमृगद्विजे ॥ १६ ॥
तस्यैव तपसो विघ्नं कर्तुमिन्द्रः शचीपतिः । खड्गपाणिरथागच्छदाश्रमं भटरूपधृक् ॥ १७ ॥
तस्मिंस्तदाश्रमपदे निहितः खड्ग उत्तमः । स न्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः ॥ १८ ॥
तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः । वने तु विचरत्येव रक्षन्प्रत्ययमात्मनः ॥ १९ ॥
यत्र गच्छत्युपादातुं मूलानि च फलानि च । न विना याति तं खड्गं न्यासरक्षणतत्परः ॥ २० ॥
नित्यं शस्त्रं परिवहन्क्रमेण स तपोधनः । चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयम् ॥ २१ ॥
ततः स रौद्राभिरतः प्रमत्तोऽधर्मकर्षितः । तस्य शस्त्रस्य संवासाज्जगाम नरकं मुनिः ॥ २२ ॥
एवमेतत्पुरावृत्तं शस्त्रसंयोगकारणम् । अग्निसंयोगवद्धेतुः शस्त्रसंयोग उच्यते ॥ २३ ॥

रा० टी०—नन्वेवं शस्त्रधारिणां प्रायो विवेकध्वंसान्मृगयादिष्विवानपराधिवधेऽपि को दोष इत्यत आह—क्षत्रियाणामिति । क्षत्रियाणां समीपतः स्थितं पतुः हुताशस्य वह्नेः समीपतः स्थितानि इन्धनानि च भृशमत्यन्तं तेजोबलं तेजसः इतरप्रतापस्य बलमाच्छादकतेज एव उच्छ्रयते वर्धयति नतु विवेकं विनाशयतीत्यर्थः, एतेन शस्त्रग्रहणात् क्षत्रियेतराणामेव विवेकध्वंस इति सूचितम् ॥ १६ ॥

गो० टी०—तर्हि गरव्ययं न करोमीत्यत्राह—क्षत्रियाणामिति । क्षत्रियाणां समीपतः स्थितं पतुः तेजोरूपं बलं भृशं उच्छ्रयते वर्धयति, हुताशस्य समीपस्थितानीन्धनानि च तेजोबलमुच्छ्रयन्ते । दृष्टान्तालंकारः ॥ १६ ॥

१६] ति० टी०—अत्रेतिहासमाह—पुरेति । रतमृगद्विजे इति रूपवान्तमृगपक्षिके तपस्तेप इति शेषः ॥ १६ ॥

रा० टी०—तत्रेतिहासं कथयन्ती आह—पुरेति । रतमृगद्विजे रताः मृगाः द्विजाः पक्षिणश्च यस्मिन् तस्मिन् कस्मिंश्चिद्वने पुरा पूर्वं सत्यवान् तपस्वी शुचिर्ब्रह्मचर्यादिसंपन्नोऽभवत् ॥ १६ ॥

गो० टी०—उक्तार्थे ऐतिह्यमाह—पुरेत्यादि । रतमृगद्विजे संतुष्टमृगपक्षिके तपस्वी कश्चिदभवदित्यन्वयः ॥ १६ ॥ १७ ॥

१७] ति० टी०—भटो योधः ॥ १७ ॥

रा० टी०—तस्येति । तस्य सत्यवतः तपसो विघ्नमेव कर्तुं भटरूपधृक् खड्गपाणिः शचीपतिरिन्द्रस्तस्याश्रममगच्छत् ॥ १७ ॥

१८] ति० टी०—तदा तस्मिन्नाश्रमे पुण्ये तपसि तिष्ठतस्तस्य मुनेः शेषे षष्ठी । तस्मै मुनये स खड्गो न्यासविधिना कालान्तरे आदानाय रक्षणार्थं स्थापककर्मणा ॥ १८ ॥

रा० टी०—तस्मिन्निति । तस्मिन्प्रसिद्धे तदाश्रमपदे तस्य ऋषेः आश्रमपदे आसमन्ताद्भावेन अ न श्रमो यस्मिन् तदेव पदं स्थानं तस्मिन् पुण्ये तपसि तिष्ठतः सत्यवतः सन्यासविधिना इमं स्वकीयं खड्गं समयान्तरे गृहीतास्मीति नियोगं कृत्वेत्यर्थः, उत्तमः खड्गः दत्तः इन्द्रेणेति शेषः । अत एव निहितः स्वसमीपे संस्थापितः सत्यवतेति शेषः, संबन्धसामान्यविवक्षया षष्ठी ॥ १८ ॥

गो० टी०—तस्मिन्निति । स इति खड्गविशेषणं न्यासविधिना न्यासप्रकारेण । 'राजचोरादिकभयादायादानां च वञ्चनात् । स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्तितः' इत्युक्तो न्यासः तिष्ठतः तस्येति शेषः । चतुर्थ्यर्थे षष्ठी ॥ १८ ॥

१९] ति० टी०—आत्मनः प्रत्ययं विश्वासं रक्षन्नेव विचरति ॥ १९ ॥

रा० टी०—स इति । तच्छस्त्रमनुप्राप्य आत्मनः प्रत्ययं विश्वासं रक्षन् न्यासरक्षणतत्परः स सत्यवान् वने विहरति १९

गो० टी०—स इति । आत्मनः प्रत्ययं विश्वासस्थापितं वस्तु 'प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु' इत्यमरः । रक्षन्नेव विचरति व्यचरत् ॥ १९ ॥

२०] ति० टी०—तदेव दर्शयति—यत्रेति ॥ २० ॥

रा० टी०—यत्रेति । यत्र यदा मूलानि उपादातुं ग्रहीतुं गच्छति तदा तं खड्गं विना न याति ॥ २० ॥

गो० टी०—एतदेवोपपादयति—यत्रेति ॥ २० ॥

२१] ति० टी०—परिवहन्नरक्षणेऽधर्मं कलङ्कं च पश्यंस्तपसि निश्चयरूपां स्वां बुद्धिं त्यक्त्वा रौद्रीं बुद्धिं चकार ॥ २१ ॥

रा० टी०—नित्यमिति । शस्त्रं नित्यं परिवहन् स तपोधनः क्रमेण तपसि निश्चयं त्यक्त्वा स्वां बुद्धिं रौद्रां जनभयदात्रीं चकार ॥ २१ ॥

गो० टी०—नित्यमिति । परिवहन् रक्षन् रौद्रीं हिंसापरां स्वां शस्त्रधार्यसाधारणाम् ॥ २१ ॥

२२] ति० टी०—रौद्राभिरतो रौद्रकर्मणि प्रीतिमान् अधर्मेण कर्षितो हीनधर्मः कृतः । संवासाद्धारणात् ॥ २२ ॥

रा० टी०—तत इति । ततोऽनन्तरं शस्त्रस्य संवासाद्धेतोः रौद्राभिरतः भयंकरकर्मनिरतः अत एव धर्मकर्षितः दूरीकृतधर्मः स सत्यवान् मुनिः नरकं जगाम ॥ २२ ॥

गो० टी०—तत इति । रौद्रे हिंसारूपकर्मणि अधर्मेण कर्षितः पीडितः संवासात्संपर्कात् ॥ २२ ॥

२३] ति० टी०—शस्त्रसंयोगकारणमिति बहुव्रीहिः । अग्निसंयोगो यथा काष्ठानां विकारहेतुः तच्छस्त्रसंयोगः क्षत्रियो विकारहेतुः ॥ २३ ॥

१ वाक्शुचिरिति गो. पाठः । २ निशित इति गो. पाठः । ३ तमिति गो. पाठः । ४ विहरतीति रा. पाठः । ५ रौद्रेऽभिरत इति गो. पाठः ।

स्नेहाच्च बहुमानाच्च स्मारये त्वां तु शिक्षये । न कथंचन सा कार्या गृहीतधनुषा त्वया ॥ २४ ॥
बुद्धिर्वैरं विना हन्तुं राक्षसान्दण्डकाश्रितान् । अपराधं विना हन्तुं लोको वीर न मंस्यते ॥ २५ ॥
क्षत्रियाणां तु वीराणां वनेषु नियतात्मनाम् । धनुषा कार्यमेतावदार्तानामभिरक्षणम् ॥ २६ ॥
क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च । व्याविद्धमिदमस्माभिर्देशधर्मस्तु पूज्यताम् ॥ २७ ॥
कैदर्यकलुषा बुद्धिर्जायते शस्त्रसेवनात् । पुनर्गत्वा त्वयोध्यायां क्षत्रधर्मं चरिष्यसि ॥ २८ ॥

रा० टी०—एवमिति । शस्त्रसंयोगः कारणं यस्मिन् तद्वृत्तं वृत्तान्तमेतन्निरूपितमित्यर्थः । एवं शस्त्रसंयोगः अग्निसंयोगवद्धेतुसंयुक्तक्षत्रियेतरविनाशे कारणमुच्यते ॥ २३ ॥

गो० टी०—एवमिति । शस्त्रसंयोगकारणं पुरावृत्तम् इक्ष्वाकुमिति शेषः ॥ २३ ॥

गो० टी०—पुरावृत्तफलितमर्थमाह—अग्नीति । अग्निसंयोगो यथा वस्तुनो विकारहेतुः एवं, शस्त्रसंयोगोऽपि शस्त्रिणो विकारहेतुर्भवति । स्नेहात् त्वद्विषयस्नेहात् बहुमानात् मद्विषये त्वत्कृतबहुमानात् स्मारये भवद्विज्ञातार्थमेव स्मारयामि न शिक्षये नापूर्वमर्थमुपदिशामि ॥ २४ ॥

२४] ति० टी०—स्नेहाद्भवद्विषयाद्बहुमानात्त्वत्कर्तृकान्मद्विषयात् । किंच बहुमानो नाम मदीयोऽयं भर्तेत्येवमभिमानः । स्मारये पुरावृत्तमिति शेषः । अत्र स्नेहो हेतुः बहुमानाच्च त्वां तु शिक्षये इत्यर्थः । तदेव शिक्षणं करोति—न कथंचनेति । यत्तु तीर्थः 'स्मारये त्वां न शिक्षये' इति पठति व्याचष्टे च तत्तु उत्तरवाक्ये करिष्यमाणशिक्षणेन व्याहतमिति कतकः ॥ २४ ॥

रा० टी०—स्नेहादिति । स्नेहात्त्वद्विषयकाद्बहुरागाद्धेतोः बहुमानादतिसत्कारं प्रापय्य त्वां स्मारये न शिक्षये अतः गृहीतधनुषा त्वया सा अनपराधिहिंसा कथंचन न कार्या ॥२४॥

गो० टी०—न कथंचनेति । गृहीतधनुषा त्वया वैरं विना राक्षसान् हन्तुं सा रौद्री बुद्धिः कथंचन केनापि प्रकारेण न कार्या न कर्तुं योग्या त्वत्प्रकृत्यनन्तगुणत्वादिति भावः । इयं बुद्धिर्मत्प्रकृतेरप्यनन्तगुणेत्याह—अपराधमिति । लोकान् प्राणिनः ॥ २५ ॥

२५] ति० टी०—सा केत्यत्राह—बुद्धिरिति । अस्यैव प्रपञ्चः—अपराधं विनेति । हन्तुम् राक्षसानिति शेषः । न मंस्यते तत्र यत्नमौचित्येनेति शेषः । 'लोकान्वीर न कामये' इति पाठे लोकान्हन्तुं नेच्छामि, राक्षसवदितरप्राणिवधस्याप्येवं तति प्रसङ्गादिति भावः ॥ २५ ॥

रा० टी०—बुद्धिरिति । वैरं विना राक्षसान् हन्तुं बुद्धिर्न कार्येति शेषः । तत्र हेतुः—हे वीर ! अपराधं विना हन्तुं न मंस्यते प्रशस्तत्वेन न निश्चेष्यति कश्चिद्विद्वानिति शेषः ॥ २५ ॥

२६] ति० टी०—नन्वस्मदपराधाकरणेऽप्यार्तत्राणनिजनरक्षणार्थमेव तेषां वधोऽस्त्वित्यत आह—क्षत्रियाणामिति । क्षत्रियाणां क्षत्रधर्मार्हपदप्रतिष्ठितानाम् अत एव वीराणा राज्यरक्षणशेषतया युद्धादिप्रवृत्तिमतामेतावद्धनुषा कार्यं यद्वनेषु वसतां नियतात्मनामार्तानामभिरक्षणम् ॥ २६ ॥

रा० टी०—नन्वु धनुर्धारणं किमर्थमित्यत आह—क्षत्रियाणामिति । नियतात्मनां नियमितान्तःकरणानां क्षत्रियाणां धनुषा आर्तानामभिरक्षणं दुष्टभर्त्सनादिना रक्षाकार्यम्, एतेन तस्या दयालुतातिशयः सूचितः ॥ २६ ॥

गो० टी०—यद्येवं तर्हि क्षत्रियधर्मो धनुर्धारणं निरवकाशं स्यादित्याशङ्क्याह—क्षत्रियाणां त्विति । वीराणां क्षत्रियाणां धनुषा कार्यं कर्तव्यं वनेषु निरतात्मनाम् आर्तानां पीडितानां रक्षणं बाधकोत्सारणमित्येतावदेव । तुरवधारणे ॥ २६ ॥

२७] ति० टी०—अस्माकं तु नात्राप्यधिकार इत्याह—क्व चेति । क्षात्रं दुष्टवधादि, तपो जटावल्कलादिधारणपूर्वकमस्माभिरिदानीमनुतिष्ठासितमिदम् व्याविद्धं परस्परव्याहतम् तस्मादेशधर्मस्तपोवनधर्मस्तु पूज्यतां सेव्यताम् ॥ २७ ॥

रा० टी०—निवृत्तानां तु प्राकृतक्षत्रियाणामपि शस्त्रधारणमनुचितमित्याह—क्व चेति । क्षात्रं क्षत्रियसंबन्धि शस्त्रं क्व तपश्च क्व इदं धर्मद्वयस्वीकारः व्याविद्धं विरुद्धमस्माभिर्निश्चीयते इति शेषः । अतो देशधर्मः प्राकृतविलक्षणाऽयोध्योचितरीतिः सद्वारकाद्वारकपालनं युज्यतां क्रियताम् ॥ २७ ॥

गो० टी०—नन्वु रक्षणार्थं वा धनुर्धार्यमेवेत्याशङ्क्य तदपि नेदानीमुचितं किंतु राजपालनकाल इत्याह—क्व चेत्यादिना । क्षात्रं क्षत्रधर्मः किंशब्दाभ्यां गम्यमानमर्थमाह—व्याविद्धमिदमिति । शस्त्रवने क्षात्रतपसी च परस्परविरुद्धमिदमस्माभिर्न पूज्यतां किंतु देशधर्मस्तपोवनधर्मः पूज्यतां क्षात्रधर्मे विहाय वनवाससपश्चरणे एव क्रियेतामित्यर्थः ॥ २७ ॥

२८] ति० टी०—यतः शस्त्रसेवनात्कदर्याणां कृपणानामिव कलुषा बुद्धिर्जायते धर्मोद्बोधनविरोधिनी, अतः शस्त्रसेवनं वने न कर्तव्यमिति ध्वनिः । नन्वु क्षत्रियस्य मम युद्धमेव धर्मोऽत्र आह—पुनरिति । स एव तस्य देशः कालश्चेत्यर्थः ॥ २८ ॥

रा० टी०—प्राकृतानां तपश्चरणसमये शस्त्रधारणे दोषमाह—कदर्येति । शस्त्रसेवनादसमये शस्त्रधारणात् कदर्यकलुषा कृपणकलुषबुद्धिसदृशी बुद्धिर्जायते यथाल्पस्यापि धनस्य रक्षणे कृपणानां चित्तवृत्तिः तथा निवृत्तानामपि स्यादिति तात्पर्यम् ।

१ स्नेहेति गो. रा. पाठः । २ लोकान्…कामये इति गो. लोके इति रा. पाठः । ३ तदर्थेति गो. पाठः ।

अक्षया तु भवेत्प्रीतिः श्वश्रूश्वशुरयोर्मम । यदि राज्यं हि संन्यस्य भवेस्त्वं निरतो मुनिः॥ २९ ॥
धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखम् । धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥ ३० ॥
आत्मानं नियमैस्तैस्तैः कर्षयित्वा प्रयत्नतः । प्राप्यते निपुणैर्धर्मो न सुखाल्लभते सुखम् ॥ ३१ ॥
नित्यं शुचिमतिः सौम्य चर धर्मं तपोवने । सर्वं तु विदितं तुभ्यं त्रैलोक्यामपि तत्त्वतः ॥ ३२ ॥
स्त्रीचापलादेतदुपाहृतं मे धर्मं च वक्तुं तव कः समर्थः ।
विचार्य बुद्ध्या तु सहानुजेन यद्रोचते तत्कुरु माचिरेण ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे नवमः सर्गः ॥ ९ ॥

नन्वद्य मया त्विदानीं न किंचित् स्मर्यत इत्यत आह–हे क्षत्र ! क्षतात्त्रातः अयोध्यायां गत्वा धर्मं चरिष्यसि साक्षात् परंपरया चोपदेक्ष्यसि इदानीं चोपदेशयोग्यजनासन्निधानात्र स्मर्यत इति तात्पर्यम् ॥ २८ ॥

गो० टी०–व्यत्ययो वा किं न स्यादित्यत्राह–**तदार्येति** । तर्हि वर्णधर्मो लुप्येतेत्यत्राह–**पुनरिति** ॥ २८ ॥

२९] ति० टी०–शस्त्रसेवनविनिषेधमेव द्रढयति–**अक्षयेति** । यदि राज्यं त्यक्त्वा वने निरतस्त्वं मुनिर्निवृत्तिर्भवेस्तदा मम श्वश्रूश्वशुरयोरक्षया प्रीतिर्भवेत् । श्वशुरस्य वनवासोचितधर्मानुष्ठानेन स्वर्गलाभजा प्रीतिः श्वश्वास्तु युद्धादिराहित्येन सुखवासजा प्रीतिरिति बोध्यम् ॥ २९ ॥

रा० टी०–नन्वद्य निवृत्तमार्गस्यैव श्रेष्ठत्वेऽस्माभिरपि स एव स्वीक्रियतामित्यत आह–**अक्षयेति** । त्वं यदि राज्यं संन्यस्य त्यक्त्वापि मुनिः रक्षामननशीलः सन् निरतः रक्षणे प्रवृत्तो भवेः तदा मम श्वश्रूश्वशुरयो रक्षया प्रीतिर्भवेत् ॥ २९ ॥

गो० टी०–तपोमात्रकरणे फलान्तरमप्याह–**अक्षयेति** । त्वया सर्वदा क्षत्रधर्मं त्यक्त्वा मुनिवृत्तिराश्रयतामित्याह–**अक्षयेति** । तुः समुच्चये अकल्पा बुद्धिश्च ते भवेदित्यर्थः । श्वश्रूश्वशुरयोः कैकेयीदशरथयोः "श्वशुरः श्वश्वा" इत्येकशेषाभाव आर्षः॥२९॥

३०] ति० टी०–हिंसालक्षणस्याधर्मत्वान्मुनिधर्मानुष्ठानमेवोचितमित्याह–**धर्मादिति** । धर्मादहिंसाप्रधानात् ॥३०॥

रा० टी०–नन्वद्य निवृत्तिरेव श्रेष्ठा चेत्तत्स्वीकारादेव तयोरधिका प्रीतिर्भविष्यतीत्यत आह–**धर्मादिति** । धर्मात्कालोचितस्वस्वोचितानुष्ठानादर्थः प्रभवति तस्मादेव सुखं प्रभवते अतः इदं जगत् धर्मसारं धर्म एव सारो यस्मिन् तत्, एतेन निखिलाधीशेन रक्षैव कर्तव्येति सूचितम् ॥ ३० ॥

गो० टी०–केवलधर्मानुष्ठानस्य सर्वश्रेयोमूलत्वमाह–**धर्मादित्यादिना** । सर्वं मुक्तिमपि ज्ञानद्वारा लभत इत्यर्थः ॥३०॥

३१] ति० टी०–सर्वथा धर्म एव संपाद्य इत्याह–**आत्मानमिति** । आत्मानम् स्थूलदेहद्वयमित्यर्थः । निपुणैः समर्थैः । सुखं सुखसाधनो धर्मः ॥ ३१ ॥

रा० टी०–धर्म एव महात्मनां प्रवृत्तिरिति बोधयन्ती आह–**आत्मानमिति** । तैस्तैर्वनस्थोचितैर्नियमैरात्मानं मनः प्रयत्नतः विचारेण कर्षयित्वा स्थिरीकृत्येत्यर्थः, निपुणैः पुरुषैर्धर्मः प्राप्यते तस्मादेव सुखं लभत इत्यर्थः, सुखात्सुखाभासोपायभूतात्कर्तव्याचरणात्सुखं न लभते ॥ ३१ ॥

गो० टी०–धर्मार्थज्ञानप्रकारमाह–**आत्मानमिति**। नियमैश्चान्द्रायणादिव्रतैः आत्मानं शरीरम् ॥ ३१ ॥

३२] ति० टी०–उपसंहरति—**नित्यमिति** । त्रैलोक्यमपि त्रिलोकवर्तिप्रजापुरुषार्थपुरुषार्थतत्साधनकलाप इत्यर्थः । तुभ्यं त्वया ॥ ३२ ॥

रा० टी०–**नित्यमिति** । शुचिमतिः अनपराधिहिंसादरहितचित्तः त्वं धर्मं चर। नन्वद्य को धर्म इत्यत आह–तुभ्यं तव सर्वं तत्त्वतो विदितं तेन स्वोचितं विचार्य कुर्विति व्यञ्जितम् ॥३२॥

गो० टी०–**नित्यमिति** । त्रैलोक्यं त्रिलोकभवं पुरुषार्थतत्साधनतदङ्गकलापम् ॥ ३२ ॥

३३] ति० टी०–अथ विनयेन क्षमापयति—**स्त्रीति** । मा चिरेण विलम्बो मास्त्वित्यर्थः । अत्रेदं गूढं सीतातात्पर्यम्–यदि सकलरक्षःक्षयेण सकलत्रिभुवनवर्त्यार्तरक्षणमनपराधिपीडां विहाय कर्तुं शक्यं तदा क्षात्रधर्मं चर, नो चेच्छुद्धतपोधर्मं चरेति ' धनुषा कार्यमेतावदार्तानामभिरक्षणम् ' इत्यनेनेदं ध्वनितम् । ' क्षत्रियाणां तु वीराणां वनेषु नियतात्मनाम् ' इति पूर्वार्धस्य वनेष्वपि वसतां क्षत्रियाणां वीराणामुत्तरार्धोक्तमावश्यकमिति गूढतात्पर्यम् ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽरण्यकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०–नन्वेवं चेत्त्वया किमर्थमुच्यते इत्यत आह–**स्त्रीति** । स्त्रीचापलात्स्त्रीनिष्ठस्वाभाविकचापल्याद्धेतोः एतदुपाहृतं कथितं तव धर्मं वक्तुं कः समर्थः न कोऽपीत्यर्थः, अतः यद्रोचते तत्कुरु चिरेण मा विलम्बो न कार्यः ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे नवमः सर्गः ॥ ९ ॥

गो० टी०–**स्त्रीचापलादिति** । स्त्रीचापलात् स्त्रीत्वप्रयुक्त-

---

१ परित्यज्येति गो. पाठः । २ लभ्यत इति गो. पाठः । ३ स्त्रीति गो. पाठः । ४ नपुंसकमनपुंसकेनेत्यादन्यतरस्यामित्यनुवृत्यशानमूलकमिदम् ।

दशमः सर्गः ।

शरणागतमुनिजनरक्षार्थं रक्षोवधस्य प्रतिज्ञातत्वात्प्रतिज्ञातस्य चावश्यं निर्वहणीयत्वादावश्यकमेतदिति रामः समर्थयति ।

वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया । श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाथ जानकीम् ॥ १ ॥
हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः । कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे ॥ २ ॥
किं नु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः । क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति ॥ ३ ॥
ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः । मां सीते स्वयमागम्य शरण्यं शरणं गताः ॥ ४ ॥
वसन्तः कालकालेषु वने मूलफलाशनाः । न लभन्ते सुखं भीरु राक्षसैः क्रूरकर्मभिः ॥ ५ ॥
[कालेकाले च निरता नियमैर्विविधैर्वने ।]
भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः । ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः ॥ ६ ॥

चापलात् मे मया मा चिरेण विचारस्य विलम्बो मा भूत् । अत्र सार्धत्रयस्त्रिंशच्छ्लोकाः ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

१] ति० टी०—एवं युद्धस्यापाततः सीतया धर्मत्वं प्रतिपादितं तद्वाक्याविरोधेनैव धर्मस्त्वं प्रतिपादयति रामः—वाक्यमिति । 'संवर्धितः' इति पाठे संवर्धिततेजाः । 'धर्मस्थितः' इति पाठान्तरम् ॥ १ ॥

रा० टी०—सीतावचनश्रवणानन्तरकालिकरामप्रत्युक्तिं वर्णयितुमाह—वाक्यमिति । भर्तृभक्तया भर्तृसेवापरायणया वैदेह्या व्याहृतं कथितं श्रुत्वा रामः प्रत्युवाच ह ॥ १ ॥

गो० टी०—एवं रामः सत्यप्रतिज्ञः निर्वैरं च रक्षोवधं न करिष्यति तथा च मद्वियोगेन रक्षोवधेन भवितव्यं मद्विरहं च न सहिष्यते संकटमिदमुपस्थितमित्याकुलचित्ता वैदेही पतिप्रेमान्धा रक्षोवधान्निवर्तयितुमुपक्रान्ता । रामस्तु सीताविरहं सोढ्वापि तन्मूलवैरेण रक्षांसि निहत्य प्रतिज्ञा निर्वोढव्येति समाधत्ते दशमे—वाक्यमेतत्त्वित्यादि । भर्तृभक्तयेत्यनेन भर्तृप्रेमपारवश्येन पूर्वमुक्तमिति ज्ञायते । धर्मे स्थित इत्यनेन सीताविरहक्लेशमङ्गीकृत्यापि प्रतिश्रुतनिर्वहणपरता द्योत्यते । यद्यपि खरवध एव दण्डकारण्यवासिभिरर्थितो रामेण प्रतिज्ञातश्च तथापि खरवधो रावणवधमूलमिति खरवधद्वारा रावणवधोऽप्यर्थित एवेति सीतयोक्तमुपपन्नम् ॥ १ ॥

२] ति० टी०—कुलं व्यपदिशन्त्या 'क्षत्रियाणां तु वीराणाम्' इत्यादिना क्षत्रियकुलधर्मं बोधयन्त्या ॥ २ ॥

रा० टी०—तत्प्रतिवचनाकारमाह—हितमिति । स्निग्धया मद्विषयकस्नेहयुक्तया कुलं कुलोचितं धर्मं व्यपदिशन्त्या कथयन्त्या त्वया सदृशं स्वयोग्यमित्यर्थः, इदं वचः हितमुक्तम् ॥२॥

गो० टी०—हितमिति । स्निग्धया अनुरक्तया कुलं व्यपदिशन्त्या स्वमहाकुलीनत्वं प्रख्यापयन्त्या त्वया सदृशम् अनुरागकुलसदृशं हितमुक्तम् । हितोक्तौ हेतुर्धर्मज्ञ इति, कुलव्यपदेशे हेतुर्जनकात्मज इति ॥ २ ॥

३] ति० टी०—अत्रोत्तरमहं किं नु वक्ष्यामि । त्वयैवोत्तरं दत्तमित्यर्थः । इदंशब्दार्थः—क्षत्रियैरिति । रक्षकाभावकृत आर्तानां शब्दो मा भूदित्यर्थं क्षत्रियैश्चापो धार्यत इत्येवोऽर्थो यद्यपि कार्यमेतावदार्तानामभिरक्षणमिति वाक्येनोक्त इति शेषः ३

रा० टी०—किमिति । यतः आर्तशब्दो न भवेदिति हेतोः क्षत्रियैश्चापो धार्यते इति एतदर्थबोधकं वचस्त्वयैवोक्तमतः किं नु वक्ष्यामि एतेन मत्कर्म त्वत्संमतिविषयीभूतमेवेति सूचितम् ॥ ३ ॥

गो० टी०—किं त्विति । यदि मया हितमुक्तं तर्हि तथैव क्रियतामिति चेत्तत्र वक्ष्यामि, तदेवाह—त्वयैवेति । 'क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति' इदं वचनं त्वयैवोक्तं खलु मुनयश्चार्ताः तस्मात्तद्विरोधिवधः कर्तव्य एवेति भावः ॥ ३ ॥

४] ति० टी०—स्वद्वचनस्यायमेवानुष्ठानकाल इत्याह—ते चेति । संशितव्रताः तीक्ष्णव्रतवन्तः । स्वयमागम्य शरणं गता इत्यनेन नाहं गर्वादिदोषेण रक्षोवधार्थं प्रवर्ते, किंत्वस्मच्छरणागतेषु वैरेण ममापि वैरमर्थादायातामिति निर्वैरं वधप्रवृत्तिर्न मे इत्युक्तम् ॥ ४ ॥

रा० टी०—आर्तशब्दवरं समर्थयन्नाह—ते इति । संशितव्रताः तीक्ष्णव्रतवन्तः शरणं राक्षसकर्तृकहिंसनं गताः प्राप्ताः अत एव आर्ताः पीडिताः दण्डकारण्ये निवासिनो मुनयः शरण्यं शरणहितं मां स्वयमागम्य प्राप्य प्रार्थयन्तेति शेषः । 'शरणं गृहरक्षित्रोर्वधरक्षणयोरपि' इति मेदिनी ॥ ४ ॥

गो० टी०—नन्वकं विरोध्युत्सारणेनार्तरक्षणं कर्तव्यं न तु निरपराधवध इत्याशङ्क्याह तेषां शरणागतत्वेन मत्प्राणभूतत्वात्तेष्वपराधो मदपराध इत्याशयेनाह—मामित्यादि । अत्रत्यविशेषणैरात्मनः शरणागतपक्षपातं स्फोरयति ॥ ४ ॥ ६ ॥

५-६] ति० टी०—कालकालेषु सर्वकालेष्वित्यर्थः । राक्षसैरित्यस्य वध्यमाना इति शेषः ॥ ५ ॥ ६ ॥

---

१ मैथिलीमिति गो. पाठः । २ त्विति गो. पाठः । ३ शरण्या इति गो. पाठः । ४ वसन्तो धर्मनिरता इति गो. पाठः । ५ भीता इति गो. पाठः । ६ अर्धमेतदधिकं गो. पाठे ।

अस्मानभ्यवपद्यते[1] मामूचुर्द्विजसत्तमाः । मया तु वचनं श्रुत्वा तेषामेवं मुखाच्युतम् ॥ ७ ॥
कृत्वा वैचनशुश्रूषां[2] वाक्यमेतदुदाहृतम् । प्रसीदन्तु भवन्तो मेऽह्रीरेषा तु[3] ममातुला ॥ ८ ॥
यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः[4] । किं करोमीति च मया व्याहृतं द्विजसंनिधौ ॥ ९ ॥
सर्वैरेवं[5] समागम्य वाग्ियं समुदाहृता । राक्षसैर्दण्डकारण्ये बहुभिः कामरूपिभिः ॥ १० ॥
अर्दिताः स्म भृशं राम भवान्नस्तत्र रक्षतु । होमकाले तु[6] संप्राप्ते पर्वकालेषु चानघ ॥ ११ ॥
धर्षयन्ति स्म दुर्धर्षा राक्षसाः पिशिताशनाः । राक्षसैर्धर्षितानां च तापसानां तपस्विनाम् ॥ १२ ॥
गतिं मृगयमाणानां भवान्नः परमा गतिः । कामं तपःप्रभावेण[7] शक्ता हन्तुं निशाचरान् ॥ १३ ॥
चिरार्जितं न चेच्छामस्तपः खण्डयितुं[8] वयम् । बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव ॥ १४ ॥

रा० टी०–वसन्त इति । कालकालेषु सर्वकालेष्वित्यर्थः वसन्तो मुनयः करकर्मभिः राक्षसैः सुखं न लभन्ते ॥ ६ ॥

रा० टी०–सुखलाभे हेतुं वदन्नाह–भक्ष्यन्त इति । नरमांसोपजीविभिः राक्षसैर्दण्डकारण्यवासिनस्ते प्रसिद्धाः मुनयो भक्ष्यन्ते अत एव एते भक्ष्यमाणा आसन्नभक्षणा द्विजसत्तमाः अस्मान् अभ्यवपद्य रक्ष इति मामूचु अभ्यवपद्येत्यत्र संज्ञापूर्वकविधेरनित्यत्वादात्मनेपदाभावः । 'अभ्यवपद्यन्ते' इति भूषणपाठः । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०–काले काल इति । काले काले सर्वकालेष्वित्यर्थ ॥ ६ ॥

गो० टी०–त इति । अभ्यवपद्येति आत्मनेपदमार्षं परस्मैपदम् । अभ्यवपत्तिः आत्मग्रहः ॥ ७ ॥

७] ति० टी०–अभ्यवपद्यात्मगृहाणेति मामूचुः । पद्यतेरार्षं परस्मैपदम् । एवं रक्षेत्येवं तेषां मुखाच्च्युतं वचनं श्रुत्वाः ॥ ७ ॥

रा० टी०–मयेति । तेषां मुनीनां मुखाच्च्युतं वचनं श्रुत्वा वचनशुश्रूषां वचनेन सत्कृतिं कृत्वा च एतद्वाक्यमुदाहृतं कथितम् ॥ ७ ॥

गो० टी०–मयेति । चरणशुश्रूषां पादवन्दनम् ॥ ८ ॥

८] ति० टी०–वचनशुश्रूषां वचनानुपालनलक्षणशुश्रूषां कृत्वा मनसि कृत्वेत्यर्थः ' चरणशुश्रूषाम् ' इत्यपि पाठः । यदीदृशैरुपस्थितैरस्माभी रक्षणार्थमुपस्थैरुपस्थितः रक्षणार्थमिति शेषः । एषा ममाह्रीरकीर्तिः, अतः प्रसीदन्त्वित्यर्थः । तीर्थस्तु–एषा मम ह्रीः, अतः प्रसीदन्त्विति व्याचष्टे ॥ ८ ॥

९] ति० टी०–किं करोमि किं करवाणीत्यर्थः । लोडर्थे लडार्षः ॥ ९ ॥

रा० टी०–तद्वचनाकारमाह–प्रसीदन्त्विति । उपस्थेयैः अस्माभिः स्तुत्यैः ईदृशैः तपआदिसंपन्नैः विप्रैः भवद्भिः यदहमुपस्थितः स्तुतः तस्माद्धेतोः अतुला तोलयितुमशक्या एषा मम ह्रीः लज्जा प्राप्तोदिति शेषः अतो मे भवन्तः प्रसीदन्तु इति किं करोमि करवाणीति द्विजसंनिधौ मया व्याहृतं कथितम् ॥ ९ ॥

गो० टी०–प्रसीदन्त्विति । प्रसीदन्तु मदपचारं क्षमन्ताम् । ह्रीः लज्जा अतुला अधिका । अत्र हेतुमाह–यदिति । उपस्थेयैरभिगन्तव्यैः उपस्थितः अभिगतः । किं करोमीति लोडर्थे लट् किं करवाणीत्यर्थः ॥ ९ ॥

१०] ति० टी०–सर्वैः एवं मयोक्तैस्तैः सर्वैरित्यर्थः ॥ १० ॥

रा० टी०–सर्वैरिति । सर्वैर्ऋषिभिः समागम्य इयं वाक् समुदाहृता । तद्वचनाकारमाह–कामरूपिभिः स्वेच्छितरूपधारणसमर्थैः बहुभिः राक्षसैः दण्डकारण्ये वयं भृशमर्दिताः पीडिताः स्म स्मः । आर्षः सलोपः अतः नोऽस्मान् भवान् रक्षतु ॥ १० ॥

गो० टी०–सर्वैरित्यादि । अर्दिताः पीडिताः तत्र तेभ्यः रक्षत्विति । अभ्यवपद्येत्यत्र सामान्येनात्मग्रहः प्रार्थितः । इह तु तद्विशेषे पृष्टे विशेष उक्तः ॥ १० ॥ ११ ॥

११] ति० टी०–स्म स्मः । तत्र रक्षःपीडाविषये । रक्षत्विति भवच्छब्दयोगात्प्रथमपुरुषः । पर्वकालेषु दर्शपूर्णमासेष्टिकालेषु ॥ ११ ॥

रा० टी०–होमेति । होमकाले संप्राप्ते सति पर्वकालेषु दर्शपौर्णमासादिषु पिशिताशनाः रुधिरभोजनाः दुराधर्षाः धर्षयितुमशक्याः राक्षसाः मां धर्षयन्ति स्म ॥ ११ ॥

गो० टी०–न केवलं पीडयन्ति यज्ञविघ्नं च कुर्वन्तीत्याहुः–होमेति । यज्ञविघ्नकरं हन्यामिति मद्भोजननिवर्तनात् कः परोपराध इति सीतायै सूचयितुमिदमन्वादितम् । होमकालेषु अग्निहोत्रकालेषु सर्वकालेषु दर्शपौर्णमासादियज्ञकालेषु धर्षयन्ति अभिधावन्ति ॥ १२ ॥

१२] ति० टी०–धर्षयन्त्यभिभवन्ति ॥ १२ ॥

रा० टी०–राक्षसैरिति । राक्षसैः धर्षितानां पराभिभूतानामत एव गतिं भयनिवर्तकमाश्रयं मृगयमाणानां तपस्विनां परमात्मविचारशीलानां तापसानां वेदज्ञानसंपन्नानां नोऽस्माकं परमा गतिः अभयाश्रयः भवानेव ॥ १२ ॥

१३–१४] ति० टी–गतिं त्रातारम् ॥ १३ ॥ १४ ॥

१ पद्येतेति गो. पाठः । २ चरणेति गो. पाठः । ३ ह्रीति गो. पाठः । ४ एतैरिति गो. पाठः । ५ वृद्धमिति गो. पाठः । ६ पु संप्राप्ता इति गो. पाठः । ७ स्विति गो. पाठः । ८ प्रभावेनेति गो. पाठः ।

[1]तेन शापं न मुञ्चामो भक्ष्यमाणाश्च राक्षसैः । तदर्द्यमानान्रक्षोभिर्दण्डकारण्यवासिभिः ॥ १५ ॥
रक्षकस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने । मया चैतद्वचः श्रुत्वा कात्स्न्र्येन परिपालनम् ॥ १६ ॥
ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे । संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम् ॥ १७ ॥
मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा । अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ॥ १८ ॥
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः । तदवश्यं मया कार्यमृषीणां परिपालनम् ॥ १९ ॥
अनुक्तेनापि वैदेहि प्रतिज्ञाय कथं पुनः । मम स्नेहाच्च सौहार्दादिदमुक्तं त्वया वचः ॥ २० ॥

रा० टी०—नन्वेवं समर्थैर्भवद्भिः राक्षसनिवारणं कृतो न क्रियते इत्यत आहुः—काममिति । तपःप्रभावेण निशाचरान् हन्तुं काममत्यन्तं शक्ताः अपि वयं तथापि चिरार्जितं तपः खण्डयितुं नाशयितुं वयं नेच्छामः एतेन तपस्विकर्तृकहिंसादिकर्मारम्भे तत्तपो नश्यतीति सूचितम् ॥ १३ ॥

रा० टी०—तपसो विध्वंसनं नोचितमिति बोधयन्त आहुः—बह्विति । यतः तपो बहुविघ्नमत एव दुश्चरं तेन हेतुना राक्षसैः भक्ष्यमाणा अपि वयं शापं न मुञ्चामः ॥ १४ ॥

गो० टी०—गतिं रक्षकं मृगयमाणानाम् अन्वेषयताम्॥१३॥

गो० टी०—परमशब्दव्यवच्छेद्यं दर्शयति—काममिति॥१४॥

गो० टी०—उक्तं विवृणोति—बह्विति ॥ १५ ॥

१५] ति० टी०—तेनातिक्लेशार्जिततपोव्ययभयेन ॥ १५ ॥

रा० टी०—तदिति । यतो वयं त्वन्नाथाः त्वमेव नाथो येषां ते तत्तस्माद्धेतो रक्षोभिः अर्द्यमानान् अस्मान् ज्ञात्वेति शेषः । भ्रात्रा सह रक्षकः त्वं भवेति शेषः ॥ १६ ॥

गो० टी०—उपसंहरति—तदिति । त्वन्नाथा इति बहुव्रीहिः इयं वाक् सम्प्रदाक्षतेति पूर्वेणान्वयः ॥ १६ ॥

१६] ति० टी०—रक्षकस्त्वम् भवेति शेषः । त्वन्नाथास्त्वं नाथो येषां ते कात्स्न्र्येन कृत्स्नरक्षःपीडानिवर्तनेन ॥१६॥

रा० टी०—मयेति । हे जनकात्मजे ! एतद्वचो मया श्रुत्वा कात्स्न्र्येन ऋषीणां परिपालनं संश्रुतं प्रतिज्ञातम् ॥ १६ ॥

गो० टी०—मयेति । कात्स्न्र्येन परिपालनं [illegible]-श्नोवधपर्यन्तपरिपालनं संश्रुतं प्रतिज्ञातं मदाश्रितविरोधि[illegible]ो मद्विरोधित्वात् मद्भोजनविघातकत्वाच्चेत्यर्थः ॥ १७ ॥

१७] ति० टी०—चतुर्दशवर्षपर्यन्तं पित्राज्ञया राज्यत्यागेऽप्यहे राज्यसम्बन्धस्यावश्य[illegible]णेऽस्त्येवाधिकारः । किं च क्षत्रजातेरेवात्राधिकारः, न तु राज्यपदस्थस्यैवेति तात्पर्यम् । संश्रुतं प्रतिज्ञातम् जीवमानो जीवन् प्रतिश्रवं प्रतिज्ञाम् ॥ १७ ॥

रा० टी०—संश्रुत्येति । मुनीनामग्रे संश्रुत्य प्रतिज्ञाय जीवमानः जीवेन सकलपालनेन मानः सत्कारो यस्य सोऽहं प्रतिश्रवं प्रतिज्ञामन्यथा प्रतिज्ञाविरुद्धमनपराधिनोऽपि वधमित्यर्थः, कर्तुं न शक्ष्यामि हि यतः सत्यं मे सदा इष्टमीसिप्तं सदेत्यनेन स्वाभाविको धर्मस्त्यक्तुं न शक्यते इति सूचितम् ॥ १७ ॥

गो० टी०—संश्रुत्येति । जीवमानः जीवन् प्रतिश्रवं प्रतिज्ञाम् अन्यथा कर्तुं न शक्ष्यामि । तत्र हेतुः—सत्यमिष्टमिति सत्यं सत्यवचनम् ॥ १८ ॥

१८] ति० टी०—न शक्ष्यामीत्यत्र हेतुः—सत्यमिष्टमित्यादि ॥ १८ ॥

रा० टी०—प्रतिज्ञात्याजनयत्नः कदापि न कर्तव्य इति बोधयन्नाह—अपीति । प्रतिज्ञां संश्रुत्य कृत्वा न जह्यां ब्राह्मणेभ्यो ब्राह्मणार्थं संश्रुत्य तु विशेषतो न जह्याम् ॥ १८ ॥

गो० टी०—तर्ह्यावयोर्विश्लेषो दुर्विषहः स्यात्तत्राह—अप्यहमिति । 'आत्मानं सर्वदा रक्षेद्दारैरपि धनैरपि' इत्युक्तं जीवितमपि जह्याम् । 'भ्राता स्वा मूर्तिरात्मनः' इत्युक्तं लक्ष्मणमपि जह्याम् । "अर्धो वा एष आत्मनः यत्पत्नी" इत्युक्ताम् जह्यामिति किमाश्चर्यं संश्रुत्य यस्मै कस्मैचित् यत्किंचित् प्रतिज्ञाय तां प्रतिज्ञां न जह्यां ब्राह्मणेभ्यः ब्रह्मविद्भ्यः कृतां प्रतिज्ञां विशेषतो न जह्याम् ॥ १९ ॥

१९] ति० टी०—यस्मै कस्मै अपि प्रतिज्ञा प्रतिज्ञाय न जह्याम् किं पुनर्ब्राह्मणेभ्य इत्यर्थः ॥ १९ ॥

रा० टी०—तदिति । तत् उक्तहेतोः अनुक्तेन रक्षणप्रतिज्ञारहितेनापि मया ऋषीणां परिपालनमवश्यं कार्यं कर्तव्यं यदि अनुक्तेनापि कर्तव्यं तर्हि प्रतिज्ञाय कार्यमिति कथं किं वक्तव्यम् । कथमिति किमर्थं ॥ १९ ॥

गो० टी०—तदिति । अनुक्तेनापीति ऋषिभिरिति शेषः । उक्तरीत्या रक्षसां मदपराधित्वेन तद्वधस्य मत्कार्यत्वादिति भावः ॥ २० ॥

२०] ति० टी०—अनुक्तेनापि ऋषिभिरिति कार्यमिति च शेषः । प्रतिज्ञाय कथं पुनर्न कार्यमिति शेषः । स्नेहः प्रीतिः, सौहार्दं शोभनहृदयता, प्रीतौ सत्यामपि तादृशहृदयत्वाभाव एवमनुशासनादर्शनादुभयमुक्तम् ॥ २० ॥

रा० टी०—आनुमानिकानिष्टविज्ञापनशङ्काजनितसीताभीतिं निवारयन्नाह—ममेति । मम स्नेहात् मद्विषयकातिप्रीतेः सौहार्दात् सरलस्वभावाच्च हेतोः कुलस्य सदृशं तव चानुरूपं सदृशं ममेदं वचस्त्वयोक्तमतोऽहं परितुष्टोऽस्मि हि यतः अनिष्टः अनीप्सितः न अनुशिष्यते ममेष्ट एव भवत्यानुशिष्ट इत्यर्थः । अत एव सधर्मचारिणी सहधर्माचरणशीला त्वं मे प्राणे-

१ तच्छापं न प्रमुञ्चाम इति रा० पाठः । २ रक्ष नस्त्वमिति गो० पाठः । ३ तु किमिति गो० पाठः । ४ ऽनघे इति गो० पाठः ।

परितुष्टोऽस्म्यहं सीते न ह्यनिष्टोऽनुशास्यते । सदृशं चानुरूपं च कुलस्य तव [1]शोभने ॥
सधर्मचारिणी मे त्वं प्राणेभ्योऽपि गरीयसी ॥ २१ ॥
इत्येवमुक्त्वा वचनं महात्मा सीतां प्रियां मैथिलराजपुत्रीम् ।
रामो धनुष्मान्सह लक्ष्मणेन जगाम रम्याणि तपोवनानि ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ।

दण्डकां प्रक्रामन्दाशरथिः पद्मपलाशलोचनस्त्रि तीर्थं आतोद्यवादकादर्शनेऽप्यन्तर्जले मञ्जुशिञ्जितयुतकाकलीमाकर्ण्य किमेतदिति कंचनमुनिं पृच्छञ्श्रुत्वंश्च तद्वृत्तमग्रतः प्रस्थितः प्राममुनिमण्डलः प्रत्याश्रमं त्रिचतुर्मासनिवासेन दशवत्सरानतीत्य पुनः सुतीक्ष्णाश्रमं प्राप्तोऽगस्त्यदर्शनोत्कस्तं प्रत्यागस्त्याश्रमप्रापकमार्गं पप्रच्छोषित्वा चैकां रात्रिमुपदिष्टमार्गो वानपीन्वलोपाख्यानं लक्ष्मणाय कथयन्नगस्त्यभ्रातुराश्रमं प्राप्तस्तमभिवाद्योषित्वा चैकां वसतिं प्रस्थितो विन्ध्यनिरोधकमगस्त्यप्रभाव श्रावयन्नाश्रमान्तिकं प्राप्तः स्वागमनं मुनये निविवेदयिषुर्लक्ष्मणं प्रेषयति ।

अग्रतः प्रययौ रामः सीता मध्ये [2]सुशोभना । पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह ॥ १ ॥
तौ पश्यमानौ विविधाञ्शैलप्रस्थान्वनानि च । नदीश्च विविधा रम्या जग्मतुः सह सीतया ॥ २ ॥
[3]सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः । सरांसि च सपद्मानि [4]युतानि जलजैः खगैः ॥ ३ ॥

म्योऽपि गरीयसी असीति शेषः, एतेन संसर्गप्राप्तानपराधिवधस्त्वयापि यत्नतस्त्याजनीय इति सूचितम् । तेन लङ्कागमनाय सीतामाज्ञापयामासेति ध्वनितम् । नहि लङ्कागमनमन्तरा संग्रामाय विभीषणस्य रावणसहगमनं निवारणार्हमिति तात्पर्यम् । अर्धचतुष्टयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०—एवं वदन्त्यास्तव हृदयं च जानामीत्याह—ममेति। मम त्वयि स्नेहात् तव मयि सौहार्दाच्चोक्तं विरहो दुःसहो भविष्यतीत्युक्तमित्यर्थः । अनिष्टः अप्रियः पुरुषः ॥ २१ ॥

२१-२२] ति० टी०—न ह्यनिष्टोऽनुशास्यते यस्मिन्यस्य प्रीतिर्नास्ति नासावनुशिष्यते हितं नोपदिश्यत इत्यर्थः। सदृशं तवेदृश्य त्वदुक्तं वच इति शेषः । कुलस्यानुरूपम् ॥ २१ ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे दशमः सर्गः ॥ १० ॥

रा० टी०—इतीति । रामः एवं वचनं सीताम्उक्त्वा रम्याणि तपोवनानि जगाम ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०—सदृशमिति । तव आत्मनः सदृशं तव कुलस्य चानुरूपमिदं वचः धर्मप्राधान्योक्तिस्त्वत्कुलानुरूपा । ' कर्मणैव हि संसिद्धिमास्थिता जनकादयः ' इति हि त्वत्कुलपद्धतिः । सापराधेष्वपि निरपराधोक्तिस्तव सदृशी ' पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम । कार्यं करुणमार्येण न कश्चिन्नापराध्यति' इति हि तव प्रकृतिः । तथापि त्वं मे प्राणेभ्यो गरीयस्यपि सधर्मचारिणी भव मया यो धर्मः संकल्पितस्तत्रैव त्वयापि संकल्पयितव्यमिति भावः ॥ २२ ॥

गो० टी०—इत्येवमिति । महात्मा महाधृतिः प्रियां मैथिलराजपुत्रीम् इतीति उक्तधर्मद्वयानुवादः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

१-२] ति० टी०—अग्रत इति ॥ १ ॥ २॥

३] ति० टी०—जलजाः खगा दात्यूहादयः ॥ ३ ॥

रा० टी०—रामगमनप्रकारं वर्णयन्नाह—अग्रत इति। अग्रतः अग्रे रामः प्रययौ मध्ये सुशोभना सीता पृष्ठतस्तु लक्ष्मणोऽनुजगाम ॥ १ ॥

गो० टी०—अथ कर्माणि सापायानि रामसेवैका निरपायेति दर्शयितुं माण्डकर्णिवृत्तान्तप्रकटनपूर्वकं सकलमुनिजनाश्रममण्डलसंचरणमेकादशे—अग्रत इत्यादि । अनेन श्लोकेन प्रणवार्थ उक्तः, तौ पश्यमानावित्यादिना नारायणपदार्थः, माण्डकर्णिवृत्तान्ते नम इत्यस्यार्थः, ततः परं विरोधिनिवृत्तिः सूच्यते, एवं मूलमन्त्रार्थानुसंधानमेव परमा गतिरित्युच्यते ॥ १ ॥

रा० टी०—ताविति । विविधाननेकप्रकारान् शैलादीन् नदीपुलिनचारिणः नदीपुलिनेषु विहरणशीलान् सारसांश्च चक्रवाकांश्च जलजैः जलजातैः खगैः पक्षिभिः युतानि सपद्मानि कमलसहितानि सरांसि च यूथबद्धान् स्वस्वयूथेषु संबद्धान् पृषतान् सबिन्दुमृगांश्च मदोन्मत्तान् विषाणिनः प्रशस्तशृङ्गविशिष्टान् महिषांश्च वराहांश्च द्रुमवैरिणः वृक्षोन्मूलकान् गजांश्च पश्यमानौ पश्यन्तौ तौ रामलक्ष्मणौ सीतया सह जग्मतुः । तत्र प्रस्थः शिखरम् ' क्लुः प्रस्थः सानुरक्षियाम् ' इत्यमरः । श्लोकत्रयमेकान्वयि ॥ २-४ ॥

१ शिष्यत इति गो. रा. पाठः । २ चात्मन इति गो. पाठः । ३ सुमध्यमेति गो. पाठः । ४ युक्तानीति गो. पाठः ।

यूथबन्धांश्च पृषता मदोन्मत्तान्विषाणिनः । महिषांश्च वराहांश्च गजांश्च द्रुमवैरिणः ॥ ४ ॥
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे । ददृशुः सहिता रम्यं तटाकं योजनायतम् ॥ ५ ॥
पद्मपुष्करसंबाधं गजयूथैरलंकृतम् । सारसैर्हंसकादम्बैः संकुलं जलजातिभिः ॥ ६ ॥
प्रसन्नसलिले रम्ये तस्मिन्सरसि शुश्रुवे । गीतवादित्रनिर्घोषो न तु कश्चन दृश्यते ॥ ७ ॥
ततः कौतूहलाद्रामो लक्ष्मणश्च महारथः । मुनिं धर्मभृतं नाम पृष्टुं समुपचक्रमे ॥ ८ ॥
इदमत्यद्भुतं श्रुत्वा सर्वेषां नो महामुने । कौतूहलं महज्जातं किमिदं साधु कथ्यताम् ॥ ९ ॥
[वक्तव्यं यदि चेद्विप्र नातिगुह्यमपि प्रभो ।]
तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा । प्रभावं सरसः क्षिप्रमाख्यातुमुपचक्रमे ॥ १० ॥
इदं पञ्चाप्सरो नाम तटाकं सार्वकालिकम् । निर्मितं तपसा राम मुनिना माण्डकर्णिना ॥ ११ ॥
स हि तेपे तपस्तीव्रं माण्डकर्णिर्महामुनिः । दशवर्षसहस्राणि वायुभक्षो जलाश्रये ॥ १२ ॥

गो० टी०–तावित्यादि । पश्यमानौ पश्यन्तौ शैलप्रस्थान् शैकसान्नि सारसान् हंसविशेषान् पुलिनं सैकतं जलजैः खगैः जलपक्षिभिः ॥ २ ॥ ३ ॥

४] ति० टी०–यूथबन्धान्यूथरूपेण संबद्धान् पृषतामिति षष्ठी । विषाणिनो महिषानित्यन्वयः ॥ ४ ॥

गो० टी०–यूथबद्धान् यूथतया बद्धान् समूहीभूतानित्यर्थः, पृषतान् बिन्दुमृगान् विषाणिन इति महिषादिविशेषणं नागान् गजान् ॥ ४ ॥

५] ति० टी०–दिवाकरे लम्बमाने सायाह्न इत्यर्थः । योजनायतं चतुर्दिक्षु योजनायतम् ॥ ५ ॥

६] ति० टी०–पद्मपुष्करसंबाधं पद्मानि रक्तानि पुष्करं पुण्डरीकं तैः संबाधः संमर्दो यस्मिंस्तं पद्मानां पुष्करे जले संबाधो नैबिड्यं यत्र तमिति कतकः गजयूथैरलंकृतम् तीरे जले चेति शेषः । हंसा राजहंसाः, कादम्बाः कलहंसाः, जलजातिभिर्जले जातिर्जन्म येषां तैर्मत्स्यादिभिः ॥ ६ ॥

रा० टी०–त इति । सहिताः सहचारिणः ते रामादयः दूरमध्वानं गत्वा दिवाकरे सूर्ये लम्बमाने अस्तं गच्छति सति पद्मपुष्करसंबाधं पद्मै रक्तकमलैः पुष्करैः पुण्डरीकैश्च संबाधं निबिडं राजयूथैः अलंकृतं शोभितं सारसैः पक्षिविशेषैः हंसकादम्बैः हंसैः राजहंसैः कादम्बैः कलहंसैश्च जले जातिर्जन्म येषां तैर्मत्स्यादिभिश्च संकुलं योजनायतं क्रोशचतुष्टयविस्तृतं रम्यं तटाकं सरः ददृशुः । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–ते गत्वेति । लम्बमाने अस्तमयोन्मुखे योजनायतं चतुर्दिक्षु योजनप्रमाणविस्तारं पद्मपुष्करसंबाधं पद्मैः पुष्करैः सपैश्च संबाधं निबिडम् 'वाद्यभाण्डमुखे सर्पे कारण्डे पुष्करं स्मृतम्' इति विश्वः । सारसैः 'सारसो मैथुने कामी गोनर्दः पुष्कराह्वयः' इत्युक्तैः हंसैः राजहंसैः कादम्बैः 'कदम्बः कलहंसश्च हंसः स्याद्धूसरच्छदः' इत्युक्तैः ॥ ५ ॥ ६ ॥

७] ति० टी०–गीतवादित्रनिर्घोषो गीतोपेतवाद्यशब्दः न तु कश्चनेति गीतादिकर्तेत्यर्थः ॥ ७ ॥

रा० टी०–प्रसन्नेति । प्रसन्नं सलिलं यस्मिन् तस्मिन् रम्ये सरसि गीतवादित्रनिर्घोषः गीतवादित्रयोः शब्दः शुश्रुवे, दृश्यते तु कश्चिन्न रामादिभिरिति शेषः ॥ ७ ॥

गो० टी०–प्रसन्नसलिल इति । गीतेति । गीतानि षड्जादिस्वरनिबद्धप्रबन्धाः वादित्राणि ततघनसुषिरानद्धभेदेन चतुर्विधानि तेषां निर्घोषः । अत्र यादवः 'वादित्रं वादितं वाद्यमातोद्यं तच्चतुर्विधम् । ततं वीणादिकं वाद्यं तालंतु विततं घनम् । वंशादिकं तु सुषिरमानद्धं मुरजादिकम्' इति । कश्चन वादयिता न दृश्यते नादृश्यत ॥ ७ ॥

८–१०] ति० टी०–धर्मभृतं नाम धर्मभृत्संज्ञकं धर्मभृन्नामकं वा शरणागतेष्वनुयायिष्वेकम् ॥ ८–१० ॥

रा० टी०–तत इति । ततः तच्छब्दश्रवणानन्तरं कौतूहलादाश्चर्याद्धेतोः रामो लक्ष्मणश्च धर्मभृतं धर्मभृत्संज्ञकं मुनिं प्रष्टुं समुपचक्रमे ॥ ८ ॥

रा० टी०–इदमिति । अद्भुतमिदमुच्चारयितुरदर्शनरहितशब्दजातं श्रुत्वा सर्वेषां नो मनसि महत्कौतूहलं जातमतः इदं शब्दजातं किं किंनिमित्तकमिति साधु यथा स्यात्तथा कथ्यताम् ॥ ९ ॥

गो० टी०–तत इत्यादि । धर्मभृतं सहागतेषु मुनिष्वन्यतमं कथ्यतामित्येवं प्रष्टुं समुपचक्रम इत्यन्वयः ॥ ८–१० ॥

रा० टी०–तेनेति । तेन राघवेण एवमुक्तः धर्मात्मा मुनिः सरसः प्रभावमाख्यातुमुपचक्रमे ॥ १० ॥

गो० टी०–तेनेति । प्रभवम् उत्पत्तिं कृत्स्नं गीतवादित्रमूलं चेत्यर्थः ॥ ११ ॥

११–१२] ति० टी०–पञ्चाप्सरसां क्रीडासाधनत्वात्पञ्चाप्सरोनामत्वेन प्रसिद्धम् सर्वकालोदकपूर्त्यादिगुणकं सार्वकालिकम् ॥ ११ ॥ १२ ॥

---

१ बद्धांश्च पृक्तानिति गो. रा. पाठः । २ नागांश्चेति गो. पाठः । ३ चारिभिरिति गो. पाठः । ४ बल इति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ प्रभवमिति गो. पाठः । ७ कृत्स्नमिति गो. पाठः । ८ ऽऽश्रय इति गो. पाठः ।

ततः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः । अब्रुवन्वचनं सर्वे परस्परसमागताः ॥ १३ ॥
अस्माकं कस्यचित्स्थानमेष प्रार्थयते मुनिः । इति संविग्नमनसः सर्वे तत्र दिवौकसः ॥ १४ ॥
ततः कर्तुं तपोविघ्नं सर्वदेवैर्नियोजिताः । प्रधानाप्सरसः पञ्च विद्युच्चलितवर्चसः ॥ १५ ॥
अप्सरोभिरसंख्याभिर्मुनिर्दृष्टपरावरः । नीतो मदनवश्यत्वं देवानां कार्यसिद्धये ॥ १६ ॥
ताश्चैवाप्सरसः पञ्च मुनेः पत्नीत्वमागताः । तटाके निर्मितं तासां तस्मिन्नन्तर्हितं गृहम् ॥ १७ ॥
तत्रैवाप्सरसः पञ्च निवसन्त्यो यथासुखम् । रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम् ॥ १८ ॥
तासां संक्रीडमानानामेष वादित्रनिःस्वनः । श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥ १९ ॥
आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः । राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥ २० ॥

रा० टी०—तदाख्यानप्रकारमाह—इदमिति । सार्वकालिकं सार्वकालिकजलविशिष्टं माण्डकर्णिना तदभिधेन मुनिना तपसा हेतुभूतेन निर्मितं पञ्चाप्सरो नाम पञ्चाप्सरोभिर्युक्तमिदं तटाकमवेहीति शेषः ॥ ११ ॥

गो० टी०—इदमित्यादि । पञ्चाप्सरःक्रीडासाधनत्वात् पञ्चाप्सरो नाम । सार्वकालिकं सर्वकाले भवम् "कालाठञ्" उभयपदवृद्धिः सर्वस्मिन्नपि काले अद्यत्वदित्यर्थः ॥ १२ ॥

रा० टी०—तन्निर्माणप्रकारमाह—स इत्यादिभिः । स प्रसिद्धः माण्डकर्णिर्महामुनिः दशवर्षसहस्राणि वायुभक्षः सन् जलाशये तीव्रं तपस्तेपे ॥ १२ ॥

गो० टी०—उक्तार्थं इतिहासमाह—स हीत्यादिना । जलाशयः स्वनिर्मिततटाकजलावगाढः ॥ १३ ॥

१३] ति० टी०—अग्निरूपपुरोगमसहिताः साग्निपुरोगमाः सर्वे प्रव्यथिता अभूवन् । ततः सर्वेऽब्रुवन्नित्यर्थः ॥ १३ ॥

रा० टी०—तत इति । ततस्तपश्चरणाद्धेतोः प्रव्यथिता अत एव परस्परसमागताः साग्निपुरोगमाः अग्निपुरोगमसहिताः सर्वे ते देवाः वचनमब्रुवन् परस्परमिति शेषः ॥ १३ ॥

गो० टी०—साग्निपुरोगमाः अग्निना पुरःसरेण सहिताः । क्रियाभेदात्सर्वशब्दाप्तिः ॥ १४ ॥

१४] ति० टी०—इति संविग्नमनसः अभूवन्निति शेषः॥१४॥

रा० टी०—तद्वचनाकारमाह—अस्माकमिति । एषः मुनिः अस्माकं मध्ये कस्यचित्स्थानं प्रार्थयते इति परस्परवचनेन तत्र तस्मिन् समये सर्वे दिवौकसः संविग्नमनसः आसन्निति शेषः ॥ १४ ॥

गो० टी०—अस्माकं मध्ये संविग्नमनसः भीतमनस्काः ॥१५॥

१५] ति० टी०—तत उद्विग्नसर्वदेवैस्तपोविघ्नाय नियुक्ताः विद्युच्चलितवर्चसश्चलितविद्युत्कान्तयः । प्रधानाप्सरसः पञ्चेत्यनेन तत्परिवारभूतान्यप्सरा ध्वनिता ता आगता इति शेषः ॥ १५ ॥

रा० टी०—तत इति । ततः मनःसंविग्नत्वप्राप्तिहेतोः तपोविघ्नं कर्तुं विद्युच्चलितवर्चसः प्रधानाः पञ्चाप्सरसः सर्वैर्देवैर्नियोजिताः ॥ १५ ॥

गो० टी०—तत्र तदा विद्युच्चलितवर्चसः विद्युत इव तरलतेजसः चलितविद्युद्वर्चस इति वार्थः ॥ १६ ॥

१६] ति० टी०—दृष्टपरावरो दृष्टैहिकपारलौकिकधर्माधर्मः ॥ १६ ॥

रा० टी०—अप्सरोभिरिति । दृष्टपरावरः दृष्टे परावरे उपनिषत्प्रसिद्धपरावरविषये येन स मुनिः ताभिः देवनियोजिताभिः अप्सरोभिः देवानां कार्यसिद्धये मदनवश्यत्वं नीतः प्रापितः ॥ १६ ॥

गो० टी०—दृष्टपरावरः दृष्टपरमात्मजीवस्वरूपः ॥१७॥१८॥

१७] ति० टी०—निर्मितं तेनैव मुनिना क्रीडार्थमिति शेषः१७

रा० टी०—मदनवश्यत्वप्रकारमाह—ता इति । ताः अप्सरसः मुनेः पत्नीत्वमागताः प्राप्ताः अत एव तस्मिन् तटाके तासां पत्नीनामन्तर्हितं गृहं निर्मितम् ॥ १७ ॥

१८]ति०टी०—तत्रैव निर्मिते गृहे तपोयोगो यौवने हेतुः१८

रा० टी०—तत्रेति । तत्र मुनिनिर्मितभवने निवसन्त्योऽप्सरसः तपोयोगात् यौवनमास्थितं मुनिं रमयन्ति ॥ १८ ॥

गो० टी०—तपोयोगात् तपोरूपोपायात् यौवनमास्थितम् 'योगः सन्नहनोपायध्यानसंगतियुक्तिषु' इत्यमरः॥ १९ ॥

१९] ति० टी०—भूषणोन्मिश्रो वलयादिभूषणध्वनिमिश्रः ॥ १९ ॥

रा० टी०—तासामिति । संक्रीडमानानां तासां भूषणोन्मिश्रः भूषणशब्दसंयुक्तः मनोहरः एषः वादित्रनिस्वनः वीणादिशब्दः श्रूयते ॥ १९ ॥

गो० टी०—संक्रीडमानानामिति "क्रीडोनुसंपरिभ्यश्च" इत्यात्मनेपदम् । भूषणोन्मिश्रः भूषणघोषोन्मिश्रः वादित्रनिःस्वनविशेषणं भूषणोन्मिश्रो वादित्रनिःस्वनो गीतशब्दश्च श्रूयत इत्यन्वयः२०

२०] ति० टी०—वचनं तदर्थमाश्चर्यमिति प्रतिजग्राह ॥ २० ॥

रा० टी०—आश्चर्यमिति । भावितात्मनः परिशीलितपरमात्मनस्तस्य ऋषेः एतद्वचनं श्रुत्वा आश्चर्यमिति राघवः प्रतिजग्राह मेने ॥ २० ॥

१ ते त्रिदिवौकस इति गो. ते चेति रा. पाठः । २ तत्रेति गो. पाठः । ३ मुराणामिति गो. पाठः । ४ अस्मिन्निति गो. पाठः ।

एवं कथयमानः स ददर्शाश्रममण्डलम् । कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतम् ॥ २१ ॥
प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः । [उवास मुनिभिः सर्वैः पूज्यमानो महायशाः]
तदा तस्मिन्स काकुत्स्थः श्रीमत्याश्रममण्डले ॥ २२ ॥
उषित्वा सु सुखं तत्र पूज्यमानो महर्षिभिः । जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम् ॥ २३ ॥
येषामुषितवान्पूर्वं सकाशे स महास्त्रवित् । क्वचित्परिदशान्मासानेकसंवत्सरं क्वचित् ॥ २४ ॥
क्वचिच्च चतुरो मासान्पञ्च षट् च परान्क्वचित् । अपरत्राधिकान्मासानध्यर्धमधिकं क्वचित् ॥ २५ ॥
त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखम् । तत्र संवसतस्तस्य मुनीनामाश्रमेषु वै ॥ २६ ॥

गो० टी०—एतत् पूर्वोक्तं वचनम्-आश्चर्यमिति । प्रतिजग्राह शुतवान् ॥ २१ ॥

२१] ति० टी०—एवं कथयमान आश्चर्यमित्येवं कथयन्ब्राह्म्या लक्ष्म्या ब्रह्मविद्यानुष्ठानजलक्ष्म्या ब्रह्मवर्चसेनेति यावत् ॥ २१ ॥

रा० टी०—एवमिति । एवमाश्चर्यमिति कथयमानः वदन् स रामः कुशचीरपरिक्षिप्तं कुशैः चीरैः खण्डपटैश्च परिक्षिप्तमित्ततः पतितं ब्राह्म्या ब्राह्मणसंबन्धिन्या लक्ष्म्या वेदपाठादिसंपत्त्या समावृतमाश्रममण्डलं ददर्श 'कथयमानस्य' इति भूषणपाठः कथयमाने इति तद्व्याख्या ॥ २१ ॥

गो० टी०—एवमिति । कथयमानस्य कथयमाने तस्मिन्सुनौ । 'कथयमानः स' इति पाठे एवं संभाषमाणः स रामः ब्राह्म्या ब्राह्मणसंबन्धिन्या लक्ष्म्या समृद्धया ब्राह्मणसंपूर्णमित्यर्थः । आश्रममण्डलं ददर्श राघव इत्यनुषङ्गः ॥ २२ ॥

२२] ति० टी०—प्रविश्याश्रममण्डलमित्यनुषङ्गः आश्रममण्डले उवासेति शेषः ॥ २२ ॥

रा० टी०—प्रविश्येति । आश्रममण्डलं प्रविश्य सर्वैर्मुनिभिः पूज्यमानो राघवः उवास आश्रममण्डलमित्यनुकृष्यते २२

गो० टी०—प्रविश्येति । आश्रममण्डलमित्यनुषज्यते । सर्वैस्तदाश्रमवासिभिः पूज्यमानः स्वस्वाश्रमे अर्घ्यादिना अर्च्यमानः ॥ २२ ॥

गो० टी०—कियन्तं कालं तत्रोवासेत्यपेक्षायां कालपरिमाणं वक्तुं रामस्याश्रमवासप्रकारं दर्शयति—तथेत्यादिश्लोकद्वयेन । तथा उक्तप्रकारेण तस्मिन्नाश्रममण्डले सुखमुषित्वा तत्र पूज्यमानः स राम इत्युक्तानुवादः येषां सकाशे पूर्वमुषितवान् तेषामाश्रमान् पर्यायेण द्वितीयपर्यायेण च जगाम। एवमाश्रमवासप्रकारः—एकवारं सर्वेषामाश्रमान् गत्वा पुनरपि तेषामेवाश्रमान् जगामेति वाक्यार्थः । महास्त्रविदित्यनेन तत्रत्यराक्षसोपद्रवपरिहाराय पुनर्गमनमिति सूचयति । वक्ष्यति हि मारीचः- ' तेन मुक्तास्त्रयो बाणाः ' इत्यारभ्य ' पराक्रमज्ञौ रामस्य शरो दृष्टभयः पुरा । सङ्क्रान्तस्ततो मुक्तस्तावुभौ राक्षसौ हतौ' इति । एतदर्थमेव सुतीक्ष्णेनात्र गमनमनुज्ञातम् ऋषिभिः कारितं च ॥ २४ ॥

२३] ति० टी०—तद्वासप्रकारमाह—उषित्वेति । एकस्याश्रमे इति शेषः । अथ पर्यायेण सर्वेषामाश्रमाञ्जगाम ॥ २३ ॥

रा० टी०—तदेति । तस्मिन् श्रीमत्याश्रममण्डले महर्षिभिः सह काकुत्स्थो रामः स सुखमुषित्वा पर्यायेण तेषां तदाश्रमस्वाम्यतिरिक्तानां तपस्विनामाश्रमान् जगाम । सार्धश्लोक एकान्वयी ॥ २३ ॥

२४] ति० टी०—किं च येषामृषीणामाश्रमे पूर्वमुषितवान्पुनरपि तेषामाश्रमाञ्जगाम तद्रक्ष्यतिशयात् यथा सुतीक्ष्णाश्रमे पुनरागमनम्। एकत्र वासाभावादेवाह—क्वचिदिति । परिदशान्दशत्वसंख्यां परिगतान्। दशसंख्यान्मासानित्यर्थः २४

२५-२६] ति टी०—परान्वर्षतोऽधिकान् एवमधिकानित्याद्यपि ॥ २५ ॥ २६ ॥

रा० टी०—येषामिति। महास्त्रवित् स रामः येषां मुनीनां सकाशे समीपे पूर्वमुषितवान् तेषामपि सकाशे क्वचित् परिदशान् दशसमीपवर्तिनः नवैकादश वेत्यर्थः । मासान् क्वचिदेकसंवत्सरं क्वचिच्च चतुरो मासान् क्वचित्पञ्च मासान् क्वचित् षण्मासान् क्वचित् परान् षण्मासतोऽधिकान् सप्तमासानित्यर्थः। अपरत्र अधिकान् सप्तमासतः आधिक्यविशिष्टान् मासान् अष्टमासानित्यर्थः। क्वचित् अध्यर्धं मासार्धाधिकं त्रीन्मासानष्टमासांश्च राघवः सुखं न्यवसत्। सार्धश्लोकद्वयमेकान्वयि २४-२६

गो० टी०—पूर्वमुषितवानित्युक्तवासक्रमं दर्शयति—' क्वचित्परिदशान् मासानेकं संवत्सरं क्वचित्। क्वचिच्च चतुरो मासान् पञ्च षट् चापरान् क्वचित्॥ अपरत्राधिकं मासादध्यर्धमधिकं क्वचित्। त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखम्' इति । राघवो रामः क्वचिदाश्रमे परिदशान् परिगताः दश येषां ते परिदशाः "संख्ययाव्यया—" इत्यादिना बहुव्रीहिसमासः "बहुव्रीहौ संख्येयेडजबहुगणात्" इति ङच् समासान्तः। तान् मासान् त्रयोदशमासानित्यर्थः "अत्यन्तसंयोगे द्वितीया" । सुखं यथा भवति तथा न्यवसत् । क्वचिदाश्रमे एकं संवत्सरं सुखं न्यवसत् क्वचिदाश्रमे चतुरो मासान् सुखं न्यवसत् क्वचित् पञ्च मासान् क्वचित् षण्मासान् क्वचिदपरान् षड्भ्योऽन्यान् सप्त मासान् सुखं न्यवसत् । 'पञ्च षट् च तथा क्वचित्' इति पाठे तथा पुनः क्वचित् षण्मासा-

१ मानस्येति गो. पाठः । २ अर्धमेतदधिकं गो. पाठे । ३ तथेति गो. पाठः । ४ त्विति गो. पाठः । ५ एकमिति गो. पाठः । ६ अपरानिति गो. पाठः । ७ ऽधिकं मासादध्यर्धमिति गो. पाठः । ८ तथेति गो. पाठः ।

रमतश्चानुकूल्येन ययुः संवत्सरा दश । परिसृत्य च धर्मज्ञो राघवः सह सीतया ॥ २७ ॥
सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह । स तमाश्रममागम्य मुनिभिः परिपूजितः ॥ २८ ॥
तत्रापि न्यवसद्रामः किंचित्कालमरिन्दमः । अथाश्रमस्थो विनयात्कदाचित्तं महामुनिम्॥ २९ ॥
उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् । अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः ॥ ३० ॥
वसतीति मया नित्यं कथाः कथयतां श्रुतम् । न तु जानामि तं देशं वनस्यास्य महत्तया ॥ ३१ ॥
कुत्राश्रमपदं रम्यं महर्षेस्तस्य धीमतः । प्रसादार्थं भगवतः सानुजः सह सीतया ॥ ३२ ॥
अगस्त्यमभिगच्छेयमभिवादयितुं मुनिम् । मनोरथो महानेष हृदि संपरिवर्तते ॥ ३३ ॥

नित्यर्थः । परिदशानित्यत्र चतुर्दशमासानित्यर्थः । अपरत्राश्रमे मासादधिकं सुखं न्यवसत् अधिकशब्देनात्र मासचतुर्थांशो विवक्षितः एकमासं मासपादं चेत्यर्थः । 'अपरत्राधिकं मासम्' इति पाठे मासम् अधिकं तत्पादं चेत्यर्थः । अपिशब्दः सर्वत्र मासानुकर्षणार्थः । क्वचिदाश्रमे अर्धमधिकं च न्यवसत् पादोनमासमित्यर्थः । तथा चैतदव्यवहितपूर्वाश्रमवासादिनैर्द्वौ मासौ संवृत्तौ एकत्र सपादमासः अपरत्र पादोनमास इत्याहत्य मासद्वयसंभवात् । 'अध्यर्धमधिकं क्वचित्' इतिपाठे अध्यर्धम् अर्धाधिकम् अर्धमासाधिकमित्यर्थः । अधिकं पूर्वोक्तपादमासात्मकाधिकं तथा च त्रिपादमासमित्यर्थः । क्वचित् त्रीन् मासान् न्यवसत् क्वचिदष्टमासान् न्यवसत् एवं षष्टिः मासाः सिद्धाः । केचिदाहुः परिदशान् दशाधिकानिति वक्ष्यमाणेष्वेवेह स्थानेष्वन्वेति । तथाचायमर्थः एवं संवत्सरं क्वचिदित्यत्र द्वाविंशतिमासानित्यर्थः । क्वचिच्च चतुरो मासानित्यत्र चतुर्दश मासानित्यर्थः । पञ्च-षट् चापरान् क्वचिदित्यत्र क्वचित् पञ्चदश मासान् क्वचित् षोडश मासानित्यर्थः । अपरानधिकं मासादप्यर्धमधिकं क्वचिदित्यत्र प्रथमाधिकशब्दोऽर्धमासरूपाधिकांशपरः तथा च अपरान् परिदशान् मासान् अधिकं चेत्यन्वये अर्धाधिकदशमासानित्यर्थः । मासादप्यर्धमित्यादेरयमर्थः क्वचित्परिदशान् मासान् तदुपरि मासादधिकमर्धमपि चेति, तथा च अर्धाधिकैकादशमासानित्यर्थः । त्रीन् मासान् अष्टमासांश्चेत्यत्र त्रयोदश मासान् अष्टादश मासांश्चेत्यर्थः । तथाच विंशत्युत्तरशतमासा उक्ता इति तस्मिन् पद्ये प्राथमिकक्वचित्पदमासपदानर्थक्यं पूर्वग्रन्थविरोध इत्यादि द्रष्टव्यम् ॥ २९–२७ ॥

रा० टी०–तत्रेति । तत्र तेषु मुनीनामाश्रमेषु संवसतः आनुकूल्येन रमतश्च तस्य रामस्य दश संवत्सरा वर्षाणि ययुः२७

गो० टी०–तथाचाश्रममण्डले दश संवत्सराः संवृत्ता इत्याह–तथा संवसत इति । इयमेवाश्रमवाससंख्या पूर्वापरसंख्या तु किष्किन्धाकाण्डे वक्ष्यते ॥ २८ ॥

२७] ति० टी०–रमतो रममाणस्य । परिसृत्य सर्वमुन्याश्रमानटित्वा । 'परिहृत्य' इति पाठान्तरम् । 'प्रतिश्रुत्य' इति पाठ्यः पाठः ॥ २७ ॥

रा० टी०–परीति । धर्मज्ञो राघवः परिहृत्य मुनीनामाश्रमेषु गत्वा सुतीक्ष्णस्याश्रमपदं पुनराजगाम ॥ २८ ॥

गो० टी०–परिवृत्येति । परिहृत्य एवमाश्रमं सर्वं परिक्रम्य ॥ २९–३१ ॥

२८–२९] ति० टी०–यतः पुनरागन्तव्यमिति प्रतिज्ञाय गतः अतः पुनराजगामेत्यर्थः ॥ २८ ॥ २९ ॥

रा० टी०–स इति । अरिन्दमः सः रामः तं सुतीक्ष्णसंबन्धिनमाश्रममागम्य तत्रापि मुनिभिः सह परिपूजितः सन् कंचित्कालं न्यवसत् ॥ २९ ॥

रा० टी०–अथेति । अथ निवासानन्तरं महामुनिं तं सुतीक्ष्णमुपासीनः आश्रमस्थो रामः सुतीक्ष्णमिदमब्रवीत् ॥३०॥

३०] ति० टी०–उपासीनः समीपस्थः ॥ ३० ॥

रा० टी०–तद्वचनाकारमाह–अस्मिन्निति । हे भगवन् ! अस्मिन् अरण्ये मुनिसत्तमोऽगस्त्यो नित्यं वसतीति कथाः कथयतां कथयतश्च श्रुतमस्य वनस्य महत्तया तमगस्त्याधिष्ठितं देशं न जानामि । सार्धश्लोक एकान्वयी ॥ ३१ ॥

गो० टी०–अस्मिन्निति । कथाः नानाकथाः कथयतां कथयतश्च ॥ ३२ ॥

३१–३३] ति० टी०–कथाः कथयतां सकाशादिति शेषः ॥ ३१–३३ ॥

रा० टी०–कुत्रेति । धीमतः महर्षेः तस्य अगस्त्यस्य आश्रमपदं कुत्र कस्मिन्प्रदेशे अस्तीति शेषः, तद्वदेत्यर्थः । अर्धं पृथक् । नन्वत्र किमर्थमयं प्रश्न इत्यत आह–प्रसादेति । भगवतः अगस्त्यस्य प्रसादार्थमस्मद्विषयकप्रीत्युत्पत्त्यर्थमगस्त्यं मुनिमभिवादयितुमहमभिगच्छेयम् ॥ ३२ ॥ ३३ ॥

गो० टी०–तत्र वने अगस्त्यमभिवादयितुमभिगच्छेयमित्यन्वयः ॥ ३३ ॥ ३४ ॥

रा० टी०–मनोरथ इति । यत् प्रयत्नवान् अहं मुनिवरं स्वयं शुश्रूषेयम् : महान्मनोरथः हृदि अस्मद्धृदये स-रिवर्तते३४

गो० टी०–मनोरथ इति । तं मुनिवरं शुश्रूषेयमिति यत् एष मनोरथः आभिलाषो मे हृदि परिवर्तत इत्यन्वयः । शुश्रूषेयमिति परस्मैपदमार्षम् ॥ ३९ ॥ ३६ ॥

१ वृत्येति गो. रा. पाठः । २ ऽऽश्रमं श्रीमानिति गो पाठः । ३ आसाथेति गो. पाठः । ४ प्रतीति गो. पाठः । ५ ऽऽश्रममिदं पुण्यामिति गो. पाठः । ६ प्रसादानन्तरमिति गो. पाठः । ७ मे वनि गो. पाठः ।

यदहं तं मुनिवरं शुश्रूषेयमपि स्वयम् । इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ॥ ३४ ॥
सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम् । अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम् ॥ ३५ ॥
अगस्त्यमभिगच्छेति सीतया सह राघव । दिष्ट्या त्विदानीमर्थेऽस्मिन्स्वयमेव ब्रवीषि माम् ३६ ॥
अयमाख्यामि ते राम यत्रागस्त्यो महामुनिः । योजनान्याश्रमात्तात याहि चत्वारि वै ततः ॥
दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातुराश्रमः ॥ ३७ ॥
स्थलीप्रायवनोद्देशे पिप्पलीवनशोभिते । बहुपुष्पफले रम्ये नानाविहंगनादिते ॥ ३८ ॥
पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाशयाः । हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ ३९ ॥
तत्रैकां रजनीं व्युष्य प्रभाते राम गम्यताम् । दक्षिणां दिशमास्थाय वनखण्डस्य पार्श्वतः ॥ ४० ॥
तत्रागस्त्याश्रमपदं गत्वा योजनमन्तरम् । रमणीये वनोद्देशे बहुपादपशोभिते ॥ ४१ ॥
रंस्यते तत्र वैदेही लक्ष्मणश्च त्वया सह । स हि रम्यो वनोद्देशो बहुपादपसंयुतः ॥ ४२ ॥
यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम् । अद्यैव गमने बुद्धिं रोचयस्व महामते ॥ ४३ ॥

३४-३५] ति० टी०-मनोरथाभिनयः-यदहमित्यादि ॥ ३४ ॥ ३५ ॥

रा० टी०-इतीति । धर्मात्मनो रामस्य इति वचः श्रुत्वा प्रीतः सुतीक्ष्णो मुनिः दशरथात्मजं प्रत्युवाच ॥ ३५ ॥

रा० टी०-तत्प्रतिवचनमाह-अहमिति । हे राघव ! सीतया सह अगस्त्यं त्वमभिगच्छ एतदेव त्वामहमपि वक्तुकामः ॥ ३६ ॥

गो० टी०-अहमिति । अगस्त्यमभिगच्छेत्येतद्वक्तुकामोऽस्मीत्यन्वयः ॥ ३७ ॥ ३८ ॥

३६] ति० टी०-एतच्छब्दार्थः-अगस्त्यमित्यादि । अस्मिन्नर्थे मदुपदिदिक्षितार्थे ॥ ३६ ॥

रा० टी०-दिष्ट्येति । अस्मिन् मदीप्सिते अर्थे अगस्त्यदर्शने यत् स्वयमेव मां ब्रवीषि तद्दिष्ट्या अतिभाग्यम् । अतः यत्रागस्त्यो मुनिः तं देशमयमहमाख्यामि ॥ ३७ ॥

३७] ति० टी०-' योजनाद्याश्रमादस्मादभि चत्वारि वै ततः ' इति कृतकपाठेऽस्मादाश्रमाद्योजनादभि अधिकं चत्वारि योजनानीत्यर्थः, दक्षिणेन गन्तव्यानीति ततस्तद्भ्रातुराश्रम इत्यर्थः । पाठान्तरे तु चतुर्योजनोत्तरमिति स्पष्ट एवार्थः ॥३७॥

रा० टी०-तदाख्यानप्रकारमाह-योजनानीति । हे तात! आश्रमादस्मात्स्थानादक्षिणेन पथा चत्वारि योजनानि याहि ततोऽनन्तरं श्रीमान्महानगस्त्यभ्रातुराश्रमः स्थलीप्राये स्थलीम् अकृत्रिमभूमित्वं प्रैति प्राप्नोति तस्मिन् । किंच स्थल्याः अकृत्रिमभूमेः प्रायः नित्यं स्थितिर्यस्मिन् तस्मिन् पिप्पलीनां वनैः सद्भिः शोभिते बहूनि पुष्पफलानि यस्मिन् तस्मिन् नानाविहगनादिते वनोद्देशे अस्तीति शेषः । श्लोकद्वयमेकान्वयि ३८॥३९

गो० टी०-योजनानीति । अस्मादाश्रमादक्षिणेन तथेति इस्तेन निर्देशः । चत्वारि योजनानि अभियाहीति शेषः । ततस्तत्र अगस्त्यभ्रातुराश्रमो वर्तते आश्रमादक्षिणेनेत्यत्र " एनपा द्वितीया " इति द्वितीयाभाव आर्षः ॥ ३९ ॥

३८-३९] ति० टी०-तदाश्रमचिह्नं स्थलीप्रायवनोद्देशत्वादि ॥ ३८ ॥ ३९ ॥

रा० टी०-पद्मिन्य इति । तत्र तस्मिन्वनोद्देशे हंसकारण्डवाकीर्णाः हंसैः राजहंसैः कारण्डवैः जलकुक्कुटैः आकीर्णाः व्याप्ताः चक्रवाकोपशोभिताः प्रसन्नसलिलाशयाः सन्तीति शेषः । तत्र तेषु सलिलाशयेषु विविधा अनेकप्रकाराः पद्मिन्यः सन्ति ४०

गो० टी०-स्थलीति । स्थलीप्राये स्थलीप्रचुरे कारण्डवाः सारसाः तत्रागस्त्यभ्रात्राश्रमे रजनीं व्युष्य रात्रिमतिवाह्य वनषण्डस्य वनसमूहस्य पार्श्वतः दक्षिणां दिशम् आस्थाय उद्दिश्य निर्वणदेशे योजनमन्तरं योजनायकाशं गत्वा अगस्त्याश्रमपदं गम्यतामित्यन्वयः ॥ ४०-४५ ॥

४०-४३] ति० टी०-तत्रागस्त्यभ्रात्राश्रमे । इध्मवाहेत्यस्य नाम । ' अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् । यस्यां दृढव्रतो जात इध्मवाहात्मजो मुनिः ॥' इति भागवतं तु देवराज सुतोत्पत्तिरिति न्यायेनेत्येके । दक्षिणां दिशमायोजनमन्तरमवकाशं गत्वा तत्रागस्त्याश्रमं द्रक्ष्यसि ॥४०-४३॥

रा० टी०-तत्रेति । तत्र अगस्त्यभ्रातुराश्रमे एकां रजनीं व्युष्य संस्थाय प्रभाते प्रातःकाले वनखण्डस्य पार्श्वतः दक्षिणं दिशमास्थाय गम्यताम् ॥ ४१ ॥

रा० टी०-तत्रेति । तत्र तस्मिन्मार्गे योजनमन्तरं देशं गत्वा अगस्त्याश्रमपदमस्तीति शेषः ॥ ४२ ॥

रा० टी०-रंस्यते इति । यतः बहुपादपशोभितः अत एव रम्यः वनोद्देशोऽस्ति अतः त्वया सह वैदेही लक्ष्मणश्च तत्र वनोद्देशे रंस्यते विहरिष्यति ॥ ४३ ॥

१ महर्षिति गो. पाठः । २ वत्सेति गो. पाठः । ३ अस्मात्तात्येति गो. पाठः । ४ प्राये इति गो. रा. पाठः । ५ शकुनीति गो. पाठः । ६ सलिलाः त्रिवा इति गो. पाठः । ७ षण्डस्येति गो. पाठः । ८ संवृते इति गो. पाठः । ९ संकुल इति गो. पाठः । १० अत्र इति गो. पाठः ।

इति रामो मुनेः श्रुत्वा सह भ्रात्राऽभिवाद्य च । प्रतस्थेऽगस्त्यमुद्दिश्य सानुगः सह सीतया ॥ ४४ ॥
पश्यन्वनानि [1]चित्राणि पर्वतांश्चाभ्रसंनिभान् । सरांसि सरितश्चैव पथि मार्गवशानुगान् [2] ॥ ४५ ॥
सुतीक्ष्णेनोपदिष्टेन गत्वा तेन [3]पथा सुखम् । इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ॥ ४६ ॥
एतदेवाश्रमपदं नूनं तस्य महात्मनः । अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥ ४७ ॥
यथा हीमे वनस्यास्य ज्ञाताः पथि सहस्रशः । संनताः फलभारेण पुष्पभारेण च द्रुमाः ॥ ४८ ॥
पिप्पलीनां च पक्वानां वनादस्मादुपागतः । गन्धोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥ ४९ ॥
तत्र तत्र च दृश्यन्ते संक्षिप्ताः काष्ठसंचयाः । लूनाश्च [4]परिदृश्यन्ते दर्भा वैदूर्यवर्चसः ॥ ५० ॥
एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम् । पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ॥ ५१ ॥
विविक्तेषु च [5]तीर्थेषु कृतस्नाना द्विजातयः । [6]पुण्योपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः [7] ॥ ५२ ॥
ततः सुतीक्ष्णवचनं यथा सौम्य मया श्रुतम् । अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति ॥ ५३ ॥

रा० टी०—यदीति । हे महामते! अगस्त्यं द्रष्टुं यदि बुद्धिर्निश्चयः कृता तदा अद्यैव गमने बुद्धिं रोचयस्व कुरु ॥४४॥

४४] ति० टी०—मुनेः श्रुत्वेति वचनमिति शेषः ॥ ४४ ॥

रा० टी०—इतीति । मुनेः सुतीक्ष्णस्य इति वचः श्रुत्वा अभिवाद्य मुनिं प्रणम्य अगस्त्यमुद्दिश्य सीतया सह प्रतस्थे ४५

गो० टी०—इतीति । इति एवंप्रकारेण मुनेः सकाशाच्छ्रुत्वा ॥ ४६ ॥

४५–४७] ति० टी०—मार्गवशानुगान्मन्मार्गवशात्प्राप्तान् ॥ ४५–४७ ॥

रा० टी०—पश्यन्निति । मार्गवशानुगान्मार्गवशेन प्राप्तान् वनादीन् पश्यन् सुतीक्ष्णेन उपदिष्टेन बोधितेन तेन मार्गेण यथासुखं गत्वा परमसंहृष्टो रामः लक्ष्मणमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ ४६ ॥ ४७ ॥

गो० टी०—पश्यन्निति । अभ्रसन्निभान् मेघसन्निभान् मार्गवशानुगाः मार्गवशेनानुगम्यमानाः । राम इति पूर्वश्लोकादनुकृष्यते ॥ ४७ ॥ ४८ ॥

रा० टी०—तद्वाक्याकारमाह—एतदिति । पुण्यकर्मणः अगस्त्यस्य भ्रातुरेव एतदाश्रमपदं दृश्यते ॥ ४८ ॥

गो० टी०—एतदिति । नूनमिति वितर्के यदाश्रमपदं दृश्यते एतन्मुनेर्नूनमित्यन्वयः ॥ ४९ ॥

४८] ति० टी०—ननमेतदेवेत्यत्र हेतुमाह—यथा हीति । यथा यादृशचिह्नवत्तया वनं श्रुतं तथैवास्य फलभारेण पुष्पभारेण संनताः सहस्रशो द्रुमा ज्ञाता ज्ञायमाना वर्तन्ते ॥ ४८ ॥

रा० टी०—तत्र हेतुमाह—यथेति । यथा येन प्रकारेण अस्य अगस्त्यभ्रातृस्वामिकस्य वनस्य लक्षणसमूहा इति शेषः, ज्ञाताः सुतीक्ष्णोक्त्या निश्चिताः तथैव दृश्यन्त इति शेषः । लक्षणसमूहानेवाह—फलभारेण पुष्पभारेण च संनताः पथि सहस्रशो द्रुमाः सन्तीति शेषः ॥ ४९ ॥

गो० टी०—उक्तेऽर्थे हेतुमाह—यथा हीति । यथा हि मे पथि चिह्नतया वनं श्रुतं तथैवास्य वनस्य फलभारेण पुष्पभारेण च सन्नताः द्रुमाः सहस्रशो मया ज्ञाताः ज्ञायमाना वर्तन्ते ॥ ५० ॥

४९–५०] ति० टी०—असाधारणलिङ्गानुभवमप्याह—पिप्पलीनामिति । पिप्पलीफलानामित्यर्थः । कटुकोदयः कटुकरससंबन्ध्युदयः ॥ ४९ ॥ ५० ॥

रा० टी०—पिप्पलीनामिति । कटुकोदयः कटुकस्य कटुरसस्य उदयो यस्मिन् पवनोत्क्षिप्तः वायुना विकीर्णः पक्वानां परिपाकविशिष्टानां पिप्पलीनामयं गन्धः अस्माद्वनादुपागतः ॥ ५० ॥

रा० टी०—तत्रेति । तत्र तत्र च वनप्रदेशे संक्षिप्ताः परित्यक्ताः लूनाः छिन्नाः वैदूर्यवर्चसः दर्भाश्च दृश्यन्ते ॥ ५१ ॥

गो० टी०—असाधारणोपदिष्टलिङ्गं चानुभूयत इत्याह—पिप्पलीनामित्यादि । पक्वानां पिप्पलीनामिति तत्फलानामित्यर्थः । कटुकस्य कटुरसस्य उदयोऽभिव्यक्तिरनुमानिकी येन स तथा गन्धः उपागतः ॥ ५१ ॥ ५२ ॥

५१] ति० टी०—कृष्णाभ्रं नीलाभ्रं शिखरं पर्वतशिखरं चोपमा यस्य ॥ ५१ ॥

रा० टी०—एतदिति । कृष्णाभ्रशिखरोपमं कृष्णमेघसदृशपर्वतश्रृङ्गसदृशं वनमध्यस्थमाश्रमस्थस्य पावकस्य यागाग्नेर्धूमाग्रं संप्रदृश्यते ॥ ५२ ॥

गो० टी०—एतच्चेति । कृष्णाभ्रशिखरोपमं नीलमेघाग्रोपमम् ॥ ५३ ॥

५२–५३] ति० टी०—विविक्तेषु निर्मलेष्वेकान्तेषु च स्वयमेवार्जितैः देवपूजार्थमिति शेषः ॥ ५२ ॥ ५३ ॥

रा० टी०—विविक्तेष्विति । विविक्तेषु स्वच्छेषु तीर्थेषु पुण्यजलेषु कृतस्नाना द्विजातयः स्वयमर्जितैः कुसुमैः पुष्पोप-

१ रम्याणीति गो. पाठः । २ नुगा इति गो. पाठः । ३ यथासुखमिति रा. पाठः । ४ पथीति गो. पाठः । ५ तीरेष्विति गो. पाठः । ६ पुष्पोपहारमिति गो. रा. पाठः । ७ आर्जितैरिति गो. पाठः । ८ तत्सुतीक्ष्णस्येति गो. पाठ ।

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया । यस्य भ्रात्रा कृतेयं दिक्शरण्या पुण्यकर्मणा ॥ ५४ ॥
इहैकदा किल क्रूरो वातापिरपि चेल्वलः । भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५५ ॥
धारयन्ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् । आमन्त्रयति विप्रान्सं श्राद्धमुद्दिश्य निर्घृणः ॥ ५६ ॥
भ्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणम् । तान्द्विजान्भोजयामास श्राद्धदृष्टेन कर्मणा ॥ ५७ ॥
ततो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत् । वातापे निष्क्रमस्वेति स्वरेण महता वदन् ॥ ५८ ॥
ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन् । भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत् ५९॥
ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः । विनाशितानि संहत्य नित्यशः पिशिताशनैः ॥ ६० ॥
अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा । अनुभूय किल श्राद्धे भक्षितः स महासुरः ॥ ६१ ॥

हारं देवोद्देश्यकपुष्पबलिं कुर्वन्ति । एतेन इमान्येव आश्रमबोधकचिह्नानि सतीक्ष्णेन उपदिष्टानीति सूचितम् ॥ ५३ ॥

गो० टी०–विविक्तेष्विति । विविक्तेषु पूतेषु 'विविक्तौ पूतविजनौ' इत्यमरः । उपहारं पुष्पबलिं स्वयमार्जितैः 'समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्' इति स्मरणात् ॥५४॥

रा० टी०–उपसंहरन्नाह–तत इति । हे सौम्य ! ततः तदाश्रमबोधकं यथा येन प्रकारेण सतीक्ष्णस्य वचनं श्रुतं तथैव दृश्यत इति शेषः । अतः यस्य भ्रात्राऽगस्त्येन लोकानां हितकाम्यया तरसा वेगेन मृत्युम् ऋषीणां मारकं निगृह्य इयं दिक् शरण्या शरणहिता कृता तस्य अगस्त्यस्य भ्रातुः आश्रमः एष एव भविष्यतीति निश्चिनोमीति शेषः । श्लोकद्वयमेकान्वयि ॥ ५४ ॥

गो० टी०–तादिति । नूनं निश्चये 'नूनं तर्के विनिश्चये' इत्यमरः ॥ ५५ ॥

५४] ति० टी०–मृत्युं तत्तुल्यं दैत्यम् शरण्या वासयोग्या लोकानाम् ॥ ५४ ॥

गो० टी०–मृत्युं वातापिल्वलनिमित्तकं मरणं हितकाम्यया हितेच्छया इयं दिक् दक्षिणा दिक् शरण्या संश्रयितुं योग्या॥५६॥

५५] ति० टी०–क्रौञ्चौ मृत्युतुल्योऽसुरो योऽगस्त्येन निगृहीतो लोकरक्षणायेत्यतस्तदाख्यायिकामाह–इहेति वने इत्यर्थः । एकदा कस्मिंश्चित्पूर्वकाले ॥ ५५ ॥

रा० टी०–मृत्युनिग्रहणप्रकारमाह–इहेति । क्रूरौ ब्राह्मणघ्नौ महासुरौ वातापिरिल्वलश्च भ्रातरौ एकदा कस्मिंश्चित्समये इह आस्ताम् ॥ ५५ ॥

गो० टी०–अस्मिन्नर्थे आख्यायिकामाह–इहेत्यादिना ५७

५६] ति० टी०–ब्रह्मणकं ब्राह्मणस्य इदमेषम् संस्कृतं वदन् ब्राह्मणवानिति शेषः । एतदुभयं विश्वासार्थम् ॥ ५६ ॥

रा० टी०–धारयन्निति । ब्राह्मणं ब्राह्मणसंबन्धिरूपं धारयन् संस्कृतं व्याकरणसंस्कारविशिष्टं वचनं वदन् उच्चारयन् निर्घृणः निर्दयः स इल्वलः श्राद्धमुद्दिश्य विप्रान् आमन्त्रयति आमन्त्रयत ॥ ५६ ॥

गो० टी०–धारयन्निति । संस्कृतं व्याकरणसंस्कारवतीं वाचं वदन् ॥ ५८ ॥

५७–५८] ति० टी०–संस्कृतं कृत्वा श्राद्धोचितपाकसंस्कारसंस्कृतं कृत्वा ॥ ५७ ॥ ५८ ॥

रा० टी०–भ्रातरमिति । मेषरूपिणं धृतमेषरूपं भ्रातरं तं वातापिं संस्कृतं श्राद्धोचितसंस्कारविशिष्टं कृत्वा तानामन्त्रितान्द्विजान् श्राद्धदृष्टेन श्राद्धविहितेन कर्मणा भोजयामास ५७

गो० टी०–भ्रातरमिति । संस्कृतं श्राद्धोचितपाकसंस्काररसंस्कृतं कृत्वा शास्त्रदृष्टेन श्राद्धकल्पावगतेन ॥ ५९ ॥

रा० टी०–तत इति । ततः श्राद्धविधिपरिकल्पितमेषरूपराक्षसकर्मकभोजनानन्तरं भुक्तवतां भुक्तवत्सु कृतमेषभोजनानां तेषां विप्राणां संमुखे स्थित इल्वलः हे वातापे ! निष्क्रमस्व ब्राह्मणोदरेभ्यः अत्रागच्छ इति स्वरेण वदन् सन् अब्रवीत् ॥ ५८ ॥

गो० टी०–तत इति । भुक्तवतां भुक्तवत्सु वदन्नब्रवीत् व्यक्तमब्रवीत् ॥ ६० ॥

५९] ति० टी०–मेषवन्नदन् मृतसंजीवनीवैभवादुदरान्तरिति शेषः । विनिष्पतद्विनिर्गतवान् आत्मभाव आर्षः ॥ ५९ ॥

रा० टी०–तत इति । ततः इल्वलोच्चारणानन्तरं भ्रातुरिल्वलस्य वचः श्रुत्वा मेषवन्नदन् वातापिः ब्राह्मणानां शरीराणि भित्त्वा भित्त्वा विनिष्पतत् । आगमशास्त्रस्यानित्यत्वादुद्भावः ॥ ५९ ॥

गो० टी०–तत इति । व्यनिष्पतत् विनिरपतत् ॥ ६१ ॥

६०] ति० टी०–संहत्य संघीभूय ॥ ६० ॥

रा० टी०–ब्राह्मणानामिति । कामरूपिभिः यथेप्सितरूपधारणसमर्थैः पिशिताशनैः रुधिरभोजनैः राक्षसैः संहत्य एकत्र प्रापय्य ब्राह्मणानां सहस्राणि सहस्रं ब्राह्मणाः नित्यशो विनाशितानि ॥ ६० ॥

गो० टी०–ब्राह्मणानामिति । तैरिति बहुवचनं परिवारापेक्षया संहत्य बहुत्वं ज्ञात्वा यावत् ॥ ६२ ॥

६१] ति० टी०–प्रार्थितेन प्रार्थितावरद्वयसंहारेण मह-

---

१ स्मेति गो. पाठः । २ भ्रातृवच इति रा. पाठः ।

ततः संपन्नमित्युक्त्वा दत्त्वा हैस्तेऽवनेजनम् । भ्रातरं निष्क्रमस्वेति ईल्वलः समभाषत ॥ ६२ ॥
स तैदाभाषमाणं तु भ्रातरं विप्रघातिनम् । अब्रवीत्प्रहसन्धीमानगस्त्यो मुनिसत्तमः ॥ ६३ ॥
कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः । भ्रातुर्स्तु मेषरूपस्य गतस्य यमसादनम् ॥ ६४ ॥
अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रितम् । प्रधर्षयितुमारेभे मुनिं क्रोधाग्निशाचरः ॥ ६५ ॥
सोऽभ्यद्रवद्द्विजेन्द्रं तं मुनिना दीप्ततेजसा । चक्षुषाऽनलकल्पेन निर्दग्धो निधनं गतः ॥ ६६ ॥
तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः । विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम् ॥ ६७ ॥
एवं कथयमानस्य तस्य सौमित्रिणा सह । रामस्यास्तं गतः सूर्यः संध्याकालोऽभ्यवर्तत ॥ ६८ ॥
उपास्य पश्चिमां संध्यां सह भ्रात्रा यथाविधि । प्रविवेशाश्रमपदं तमृषिं चाभ्यवादयत् ॥ ६९ ॥
सम्यक्प्रतिगृहीतस्तु मुनिना तेन राघवः । न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ॥ ७० ॥
तस्यां रात्र्यां व्यतीतायामुदिते रविमण्डले । भ्रातरं तमगस्त्यस्य आमन्त्रयत राघवः ॥ ७१ ॥
अभिवादये त्वां भगवन्सुखमस्म्युषितो निशाम् । आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ॥ ७२ ॥
गम्यतामिति तेनोक्तो जगाम रघुनन्दनः । यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७३ ॥

र्षिणागस्त्येन श्राद्धे श्राद्धान्नमनुभूय भक्षितः सोऽसुरो वातापिः ॥ ६१ ॥

रा० टी०–अगस्त्येनेति । तदा तस्मिन्काले देवैः प्रार्थितेन महर्षिणाऽगस्त्येन श्राद्धे अनुभूय तत्कृतनिमन्त्रणं लब्ध्वा महासुरो वातापिर्भक्षितः ॥ ६१ ॥

गो० टी०–अगस्त्येनेति । अनुभूय श्राद्धचरणादिकमनुभूय ॥ ६३ ॥

६२] ति० टी०–तत इल्वलः श्राद्धान्ते संपन्नमित्युक्त्वा हस्तोदकं दत्त्वा भ्रातरं निष्क्रमस्वेत्यभ्यभाषत ॥ ६२ ॥

रा० टी०–तत इति । ततः श्राद्धान्ते संपन्नं श्राद्धसमापकमंपूर्णमिति वचनमुक्त्वा इस्तेऽवनेजनं दत्त्वा निष्क्रमस्वेति भ्रातरमिल्वलः समभाषत ॥ ६२ ॥

गो० टी०–तत इति । ततः श्राद्धान्ते संपन्नमित्युक्त्वा ततो हस्तोदकं च दत्त्वा ॥ ६४ ॥ ६६ ॥

६३-६४] ति०टी०–मया जीर्णस्य भुक्तस्येति शेषः६३-६४

रा० टी०–स इति । विप्रघातिनं भ्रातरं भाषमाणमिल्वलं धीमान् मुनिसत्तमः सोऽगस्त्यः प्रहसन्नब्रवीत् ॥ ६३ ॥

रा० टी०–तद्वचनाकारमाह–कुत इति । मया जीर्णस्य चिरकालिकभोजनात् मलादित्वेन परिणतस्य यमसादनं गतस्य मम गृहप्राप्तचैतन्यांशस्य मेषरूपस्य रक्षसस्तव भ्रातुः निष्क्रमितु शक्तिः कुतः केन हेतुना स्यादिति शेषः ॥ ६४ ॥

६५] ति० टी०–प्रधर्षयितुं हिंसितुम् ॥ ६५ ॥

रा० टी०–अथेति । अथ अगस्त्यरूपनानन्तरं भ्रातुः निधनसंश्रितं मरणबोधकं वचः श्रुत्वा मुनिं प्रधर्षयितुं निशाचरः क्रोधादारेभे उद्योगं चकार ॥ ६५ ॥

गो० टी०–अथेति । निधनसंश्रयं नाशविषयं प्रधर्षयितुं हिंसितुम् ॥ ६७ ॥

६६–७१] ति० टी०–चक्षुषा चक्षुर्वीक्षणेन । अनलकल्पेनाग्नितुल्येन ॥ ६६–७१ ॥

रा० टी०–स इति । स इल्वलः द्विजेन्द्रं तमगस्त्यमभ्यद्रवत् दीप्ततेजसा मुनिना तु अनलकल्पेन चक्षुषा निर्दग्धः इल्वल इति शेषः । अत एव निधनं मरणं गतः प्राप्तः ॥६६॥

गो० टी०–स इति । अनलकल्पेन अग्निसदृशेन ॥ ६८ ॥

रा० टी०–तस्येति । विप्रानुकम्पया विप्रविषयकदयया येन इदं दुष्करं कर्म कृतं तस्यागस्त्यस्य भ्रातुः तटाकवनशोभितः अयमाश्रमः ॥६७॥

गो० टी०–तस्येति । विप्रानुकम्पया विप्रेष्वनुकम्पया ॥ ६९–७१ ॥

रा० टी०–एवमिति । सौमित्रिणा सह एवं कथयमानस्य रामस्य सूर्योऽस्तं गतः अत एव संध्याकालोऽभ्यवर्तत प्राप्नोत् ॥ ६८ ॥

रा० टी०–उपास्येति । यथाविधि संध्यामुपास्य आश्रमपदं प्रविवेश, ऋषिं तमगस्त्यभातरमभ्यवादयच्च ॥ ६९ ॥

रा० टी०–सम्यगिति । तेन अगस्त्यभात्रा मुनिना तु सम्यक् प्रतिगृहीतः सत्कृत्य स्वीकृतो रामस्तु मूलफलानि प्राश्य एकां निशां न्यवसत ॥ ७० ॥

गो० टी०–सम्यगिति । प्रतिगृहीतः प्रत्युद्गतः प्राश्य भुक्त्वा ॥ ७२ ॥ ७३ ॥

रा० टी०–तस्यामिति । रविमण्डले उदिते सति अगस्त्यस्य भ्रातरं राघवः आमन्त्रयत अपृच्छत् ॥ ७१ ॥

७२–७३] ति० टी०–अभिवादये त्वेति पादे नवाक्षरस्वमार्षम् ॥ ७२ ॥ ७३ ॥

---

१ हस्तोदकं तत इति गो. पाठः । २ चेल्वलः सोऽभ्यभाषतेति गो. पाठः । ३ तं तथा भाषमाणमिति गो. पाठः । ४ ते इति गो. पाठः । ५ संश्रयमिति गो. पाठः । ६ऽभिद्रवन्मुनिश्रेष्ठमिति गो. पाठः । ७ सोऽभीति गो. पाठः । ८ विमले सूर्यमण्डल इति गो. पाठः । ९ ह्यामन्त्रयतेति गो. पाठः । १० त्वामिति रा. पाठः । ११ अध्युषित इति गो. पाठः ।

[1]नीवारान्पनसान्[2]साला[3]न्बभ्रुलां[4]स्तिनिशांस्तथा । चिरिबिल्वान्मधूकांश्च बिल्वां[5]श्च तिन्दुकान्॥ ७४ ॥
पुष्पितान्पुष्पिताग्राभिर्लताभिरुपशोभितान् । ददर्श रामः शतशस्तत्र कान्तारपादपान ॥ ७५ ॥
हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान् । मत्तैः शकुनिसंघैश्च शतशः प्रतिनादितान ॥ ७६ ॥
ततोऽब्रवीत्समीपस्थं रामो राजीवलोचनः । पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७७ ॥
स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः । आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥ ७८ ॥
अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा । आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ७९ ॥
प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः । प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ८० ॥
[6]निगृह्य तरसा मृत्युं लोकानां हितकाम्यया । दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ॥ ८१ ॥
तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः । दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते ॥ ८२ ॥
यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा । तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८३ ॥

रा० टी०–तत्प्रकारमाह–आमन्त्रय इति । अग्रजं ते गुरुं द्रष्टुं गच्छामि अतः त्वामामन्त्रये । तेन ऋषिणा गम्यतामित्युक्तो रघुनन्दनो यथोदिष्टेन मार्गेण तद्वनमवलोकयन् सन् जगाम । सार्धश्लोक एकान्वयी ॥ ७२ ॥

गो० टी०–अभिवादय इति । अत्र वर्णाधिक्यमार्षम् ७४

गो० टी०–गम्यतामिति । यथोदिष्टेन श्रुतीक्ष्णोक्तेन ७५

७४–७७] ति० टी०–नीवारा जलकदम्बा वञ्जुलोऽशोकः तिनिशो धवः चिरिबिल्वो नक्तमालः ॥ ७४–७७ ॥

रा० टी०–नीवारानिति । पुष्पिताग्राभिः पुष्पविशिष्टाग्रभागविशिष्टाभिः लताभिरुपशोभितान् शतशः हस्तिहस्तैः शुण्डादण्डैर्विमृदितान् शकुनिसंघैः पक्षिसमूहैः प्रतिनादितांश्च शतशः कान्तारपादपान् वनवृक्षान् रामो ददर्श । तत्र नीवाराः जलकदम्बाः, वञ्जुला अशोकाः, तिनिशा धवाः, चिरिबिल्वा नक्तमालाः । श्लोकद्वयमेकान्वयि ॥ ७३–७५ ॥

रा० टी०–तत इति । ततः पादपदर्शनानन्तरं लक्ष्मणं सुचिह्नानां वर्धनं वृद्धिर्यस्मिँस्तं लक्ष्मणं रामोऽब्रवीत् ॥ ७६ ॥

गो० टी०–नीवारानिति । नीवारान् जलकदम्बान् वञ्जुलान् बकुलान् । 'बकुलो वञ्जुलो शोकः' इत्यमरः । तिनिशान् नेमिवृक्षान् धवान् चिरिबिल्वान् नक्तमालान् 'करञ्जः स्यान्नक्तमालः प्रकीर्यश्चिरिबिल्वकः' इति वैजयन्ती । मधूकान् मधुद्रुमाख्यवृक्षान् तिन्दुकान् स्फूर्जकाख्यान् वृक्षान् ॥७६–७९॥

७८] ति० टी०–यथा श्रुतास्तथा स्निग्धपत्रा वृक्षा दृश्यन्ते इति शेषः । अतो निकट आश्रमः ॥ ७८ ॥

रा० टी०–तद्वचनाकारमाह–स्निग्धेति । वृक्षाः यथा यथावत् स्निग्धपत्राः मृगद्विजास्तु यथावत् क्षान्ताः दृश्यन्ते इति शेषः । अतो महर्षेरगस्त्यस्याश्रमो नातिदूरस्थोऽस्तीति शेषः । एतेन इदमेवाश्रमलक्षणमगस्त्यभ्रात्रा बोधितमिति सूचितम् ॥ ७७ ॥

गो० टी०–स्निग्धेति । स्निग्धपत्राः आश्रमवासिभिः रक्षितत्वेन सरसपत्राः क्षान्ताः शान्ताः यथा येन प्रकारेण तथा तेन प्रकारेण आश्रमो नातिदूरस्थ इति मन्ये ॥ ८० ॥

७९] ति० टी०–अगं विन्ध्यं स्तम्भयतीत्यगस्त्यः पृषोदरादिः । स्वेन कर्मणा विन्ध्यस्तम्भनकर्मणा परिश्रान्तश्रमापहन्ता ॥ ७९ ॥

रा० टी०–अगस्त्य इति । यः स्वेन कर्मणा अगस्त्य इति विख्यातः तस्य परिश्रान्तानां श्रमं खेदमपहन्ति सः, प्राज्यैः अधिकैः धूमैः यागधूमैः आकुलं व्याप्तं वनं यस्य सः, चीरमालाभिः परिष्कृतः नानाशकुनिभिः पक्षिभिर्नादितः आश्रमः दृश्यते । श्लोकद्वयमेकान्वयि । अग इति स्याः विन्ध्याद्रौ शब्दो नामेति यावत् यस्मात् ॥ ७८ ॥ ७९ ॥

गो० टी०–अगस्त्य इति । स्वेन कर्मणा विन्ध्यस्तम्भनरूपेण अगस्त्य इति विख्यातः अगं स्तम्भयतीत्यगस्त्यः इति व्युत्पत्तेः परिश्रान्तानां श्रममपहन्तीति परिश्रान्तश्रमापहः प्राज्यैर्बहुभिर्धूमैराकुलं वनं यस्य सः ॥ ८१ ॥ ८२ ॥

८०–८१] ति० टी०–प्राज्यैर्भूरिभिर्धूमैः पाकयज्ञधूमैराकुलं वनं यस्मिन् ॥ ८० ॥ ८१ ॥

रा० टी०–निगृह्येति । मृत्युं निगृह्य दूरीकृत्य दक्षिणा दिक् येन शरण्या कृता अत एव यस्य प्रभावात् दक्षिणा दिक् तस्स्थो जनः राक्षसैर्दृश्यते भुज्यते तु न तस्येदमाश्रमपदम् ॥८०॥८१॥

८२] ति० टी०–यस्य प्रभावाद्राक्षसैरियमगस्त्याश्रमप्रदेशवर्तिनी दक्षिणा दिग्दृश्यते केवलम् त्रासान्महर्षिभीत्या नोपभुज्यते न स्वदेशत्वेनाङ्गीक्रियत इत्यर्थः ॥ ८२ ॥

गो० टी०– तस्येति । त्रासात् दृश्यते न तु प्राचीनकाल इवोपभुज्यते ॥ ८३ ॥

८३] ति० टी०–निर्वैराः प्राणिषु वैररहिताः प्रशान्तास्त्यक्तक्रूरकर्माणः ॥ ८३ ॥

---

१ निवारानिति गो. रा. पाठः । २ तालांस्तिमिशान्वञ्जुलान्धवानिति गो. पाठः । ३ तिनशानिति रा. पाठः । ४ अपीति गो. पाठः । ५ च प्रणादितानिति गो. पाठः । ६ श्लोकोऽयं नास्ति गो. पाठे ।

नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा । प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८४ ॥
मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः । संदेशं पालयंस्तस्य विन्ध्यशैलो न वर्धते ॥ ८५ ॥
अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः । अगस्त्यस्याश्रमः श्रीमान्विनीतमृगसेवितः ॥ ८६ ॥
एष लोकार्चितः साधुर्हिते [3]नित्यं रतः सताम् । अस्मानधिगतानेष श्रेयसा योजयिष्यति ॥ ८७ ॥
आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् । शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो ॥ ८८ ॥
अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । अगस्त्यं [4]नियताहाराः सततं पर्युपासते ॥ ८९ ॥
नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः । नृशंसः पापवृत्तो वा मुनिरेष तथाविधः ॥ ९० ॥
अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह । वसन्ति नियताहारा धर्ममाराधयिष्णवः ॥ ९१ ॥

८४] ति० टी०–भगवतोऽगस्त्यस्य महिम्ना प्रदक्षिणा एतदाश्रमावच्छेदेन निर्वैरत्वादिसंपादनसमर्था क्रूरकर्मभी रक्षोभिर्दुर्धर्षा, अतो नाम्ना च नाम्नापि संपूर्णा दिगेव दक्षिणेति त्रिषु लोकेषु प्रथिता ॥ ८४ ॥

रा० टी०–यदेति । यदाप्रभृति यत्कालादारभ्य पुण्यकर्मणा अगस्त्येन इयं दिगाक्रान्ता तदाप्रभृति रजनीचराः निर्वैराः सन्तः प्रशान्ताः ॥ ८२ ॥

रा० टी०–नाम्नेति । इयं दक्षिणा दिक् भगवतोऽगस्त्यस्य नाम्नैव क्रूरकर्मभिः राक्षसैर्दुर्धर्षा अत एव प्रदक्षिणा अतिक्रूरवती प्रथिता ख्याता ॥ ८३ ॥

गो० टी०–यदाप्रभृतीति । अगस्त्यागमनाद् प्रभृति दिक् अगस्त्याश्रमप्रदेशः अन्यथा पूर्वोक्तविराधादिराक्षसोपद्रवो विरुध्येत । यद्वा दिक् सर्वापि विराधादयोऽप्यगस्त्यागमनप्रभृति मन्दोपद्रवा एव अशुचितादशायामेव मुनिमांसभक्षणम् । निर्वैराः वैरप्रवर्तनाशकाः प्रशान्ताः प्रशान्तवद्वर्तमानाः । अत एवेयं दक्षिणा दिक् नाम्ना भगवतोऽगस्त्यस्य दिगिति प्रसिद्धेत्युच्यते ॥ ८४ ॥ ८५ ॥

८५–८६] ति० टी०–मेरुस्पर्धया भास्करमार्गं निरोद्धुं वर्धितुकामोऽप्यचलो विन्ध्यस्तस्यागस्त्यस्य संदेशं मदागमनपर्यन्तं मा वर्धस्वेत्येवमाज्ञां पालयन्न वर्धते । अद्यापीति शेषः ॥ ८५ ॥ ८६ ॥

रा० टी०–तस्य प्रभावान्तरमाह–मार्गमिति । अचलोत्तमो विन्ध्यशैलः भास्करस्य मार्गं निरोद्धुं तस्यागस्त्यस्य संदेशं सततं पालयन् सन् न वर्धते । यमत्राप्यधिका–सूर्यमार्गमितुं वर्धमानोऽगस्त्यशिष्यो विन्ध्यो गुरूद्देश्यकनित्यसाष्टाङ्गप्रणामसमये देवप्रार्थितागस्त्येन शिष्यद्वारा यावन्मदागमं प्रणमन् भूमावेव पतेत्याज्ञाप्य तदारभ्य स्वयं दक्षिणस्यां दिश्येवातिष्ठदिति ॥ ८४ ॥

रा० टी०–अयमिति । विनीतमृगसेवितः अयमगस्त्यस्याश्रमः ॥ ८६ ॥

गो० टी०–मार्गमिति । निरतः उद्युक्तः वर्धमान इत्यर्थः । न वर्धते अद्यापीति शेषः ॥ ८६ ॥ ८७ ॥

८७] ति० टी०–अधिगतान्स्वाश्रमं प्राप्ताञ्छ्रेयसा योजयिष्यति । दिव्यशस्त्रादिदानेनेति गूढोऽभिसंधिः ॥ ८७ ॥

रा० टी०–एष इति । सतां हिते नित्यं रतः एषोऽगस्त्यः अधिगतान् प्राप्तानस्मान् श्रेयसा कल्याणवचनेन योजयिष्यति आशीर्वचनमुच्चारयिष्यतीत्यर्थः ॥ ८६ ॥

रा० टी०–आराधयिष्याभीति । अगस्त्यमहमाराधयिष्यामि वनवासस्य शेषमवशिष्टं वत्स्यामि एतदाज्ञयेति शेषः ॥ ८७ ॥

गो० टी०–एष इति । सतां हिते साधुः नित्यरतश्च शेषं चेति प्रभो इत्युक्तिः लक्ष्मणस्यापि राजपुत्रत्वात् । 'प्रभोः' इति पाठे प्रभोरगस्त्यस्य नियोगादिति शेषः ॥ ८८ ॥ ८९ ॥

८८–८९] ति० टी०–प्रभो! शुश्रूषणसमर्थेत्यर्थः ॥ ८८ ॥ ८९ ॥

रा० टी०–अत्रेति । गन्धर्वादयः नियताहाराः सन्तः अगस्त्यं पर्युपासते ॥ ८८ ॥

गो० टी०–अत्रेति । देवाः वक्ष्यमाणाः पूज्यातिथिः ९०

९०] ति० टी०–क्रूरो निर्दयः शठो गूढविप्रियकृत् नृशंसो घातुकः तथाविधो दुर्वृत्तालहिष्णुः ॥ ९० ॥

रा० टी०–स्थानप्रभावमाह–नेति । मृषावादादिः अत्र अस्मिन्नाश्रमे न जीवेत् । तत्र हेतुः–एष मुनिस्तथाविधः निषिद्धकर्मासहिष्णुः ॥ ८९ ॥

गो० टी०–नात्रेति । क्रूरः निर्दयः । 'क्रूरौ कठिननिर्दयौ' इत्यमरः । शठः गूढविप्रियकृत् नृशंसः घातुकः कामेन वृत्तं यस्य सः कामवृत्तः स्वैरवृत्त एष मुनिः अगस्त्यः तथाविधः मृषावादाद्यनर्हः ॥ ९१ ॥

९१] ति० टी०–पतगा गरुडादयः धर्मं स्वर्गादिजन ९१ ॥

रा० टी०–अत्रेति । अत्र अस्मिन्नाश्रमे धर्ममधिकफलकं कर्म आराधयिष्णवः साधयितुमिच्छवः देवादयः वसन्ति ॥ ९० ॥

गो० टी०–अत्रेति । देवाः वक्ष्यमाणशस्त्रादिभिज्ञाः पतगैः गरुडजातिभिः आराधयिष्णवः आराधयन्तः छान्दस इष्णुच् ९२

१ निरत इति गो. पाठः । २ जनेति गो. पाठः । ३ नित्यरत इति गो. पाठः । ४ नियताहारमिति गो. पाठः । ५ कामवृत्त इति गो पाठः ।

अत्र सिद्धा महात्मानो विमानैः सूर्यसंनिभैः । त्यक्त्वा देहान्नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९२ ॥
यक्षत्वममरत्वं च राज्यानि विविधानि च । अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शुभैः ॥ ९३ ॥
आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः । निवेदयेह मां प्राप्तमृषये सह सीतया ॥ ९४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ।

लक्ष्मणेन रामागमनं निवेदयितुं चोदितस्तत्याज्ञाशिष्येणानुमन्यूत्तर स्वगुरोः सीतालक्ष्मणाभ्यां सह प्रवेशितो रामो ब्रह्मादिस्थानान्यालोकयन्शिष्यमभ्यागच्छतोऽगस्त्यस्य पादावग्रहीदगस्त्योऽप्यातिथ्यं विधायेन्द्रदत्तेनैष्णवधनुराद्यायुधानि दत्त्वा रामायाभिमतमेतदुक्त्वा मया तपःप्रभावेन यथापुरं रामणीयकमाद्यापुना रक्षस्तस्तं मुनिकुलं प्रभावेण मोक्ष्यति प्रार्थयत ।

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः । अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ १ ॥
राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली । रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया ॥ २ ॥
लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः । अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ॥ ३ ॥
ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् । द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४ ॥

९२] ति० टी०-अत्राश्रमे सिद्धाः तपस्विति शेषः । नवैर्दिव्यैर्देहैः ॥ ९२ ॥

रा० टी०-अत्रेति । अत्र सिद्धादयः देहांस्त्यक्त्वा नवैर्दिव्यैर्देहैः स्वर्यांताः ॥ ९२ ॥

गो० टी०-अत्रेति । सिद्धास्तपःसिद्धाः नवैः दिव्यैः ॥९२॥

९३-९४] ति० टी०-अत्राश्रमे भूतैः प्राणिभिः कर्तृभिः शुभैः सत्कर्मभिराराधिता देवादय आश्रममाहात्म्यादल्पकालेनैव राज्यादीनि प्रयच्छन्तीत्यर्थः ॥ ९३ ॥ ९४ ॥

इति श्रीरामानिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकादशः सर्गः ॥११॥

रा० टी०-यक्षत्वमिति । अत्र अस्मिन्नाश्रमे शुभैः कर्मभिः आराधिताः पूजिताः देवाः यक्षत्वादीनि प्रयच्छन्ति ॥९३॥

गो० टी०-यक्षत्वमिति । भूतैः प्राणिभिः देवाः ब्रह्मादयः अगस्त्योपासनकृतनित्यसन्निध्यादिति भावः । शुभैः सत्कर्मभिरतैः ॥ ९४ ॥

रा० टी०-आगता इति । हे सौमित्रे ! आश्रमपदं वयमागताः स्म अतः त्वमग्रतः पूर्वं प्रविश, इह प्राप्तं मां ऋषये निवेदय बोधय ॥ ९३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकादशः सर्गः ॥ ११ ॥

गो० टी०-आगता इति । सीतया सह प्राप्तमित्यन्वयः । अनेन रावणवधोत्तुक्तत्वं द्योतयति ॥ ९५ ॥

अत्र चतुर्नवतिश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

१-३] ति० टी०-हितः शुभकारी अनुकूलस्तदिच्छावशवर्ती पूज्यविषयानुरागो भक्तिमत्तद्वान्भक्तः । यदीति संभावनायाम् । बहुदिनं वने वासादस्मच्छ्रवणं तवापि संभावितमित्यर्थः॥१-३॥

रा० टी०-लक्ष्मणाज्ञापनानन्तरकालिकं वृत्तान्तमाह-स इत्यादिभिः । स लक्ष्मणः अश्रमपदं श्रमनिवर्तकं स्थानं प्रविश्य अगस्त्यशिष्यमासाद्य पाद्य एतद्वाक्यमुवाच ॥ १ ॥

गो० टी०-रुद्रस्यापूज्यत्वमाह-स्व प्रविश्येत्यादि॥१॥२॥

रा० टी०-तद्वचनाकारमाह-राजेति । दशरथो नाम यो राजा तस्य ज्येष्ठः सुतो बली रामः सीतया भार्यया सह मुनिं द्रष्टुं प्राप्तः ॥ २ ॥

रा० टी०-ननु त्वं कोऽसीत्यत्र आह-लक्ष्मणो नाम तस्य रामस्य अवरजो भ्राता अहं यदि कदाचित् श्रोत्रं रामकथाप्रसङ्गेन श्रवणपथमागतः प्राप्तः स्यामिति शेषः ॥ ३ ॥

गो० टी०-हितः हितकारी अनुकूलः प्रियकरः । प्रियहितकरत्वे हेतुः-भक्त इति भक्तः प्रीतिमान् । यदीति संभावनायाम् अहं रामश्च ते श्रुतौ भवेवित्यर्थः । अग्रजत्वादिविशेषणानि रामेण तुल्यप्रतिपत्तिवारणाय ॥ ३ ॥

४] ति० टी०-भगवन्तं द्रष्टुमिच्छामहे, अतो दर्शनार्थमागता इति निवेद्यतामित्यर्थः ॥ ४ ॥

रा० टी०-ते इति । ते रामादयो वयं पितृशासनादत्युग्रं वनं प्रविष्टास्ते वयं भगवन्तं द्रष्टुमिच्छामहे अतः निवेद्यतामुदं वृत्तमुच्यतां गुरुसन्निधाविति शेषः ॥ ४ ॥

गो० टी०-निवेद्यताम् अस्मदर्शनेच्छेति शेषः । एतद्वाक्यमुवाचेति पूर्वेणान्वयः । ते वयमित्यस्मिन् श्लोके यमिति गायत्र्या अष्टमाक्षरं सप्तसहस्रसंख्याकाः श्लोका गताः ॥ ४ ॥

---

१ त्यक्तदेहा इति गो. पाठः ।

तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः । तथेत्युक्त्वाऽग्निशरणं प्रविवेश निवेदितुम् ॥ ५ ॥
स प्रविश्य मुनिश्रेष्ठं तमसा दुष्प्रधर्षणम् । कृताञ्जलिरुवाचेदं रागागमनमञ्जसा ॥ ६ ॥
यथोक्तं लक्ष्मणेनैव शिष्योऽगस्त्यस्य संमतः । पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च ॥ ७ ॥
प्रविष्टावाश्रमपदं सीतया सह भार्यया । द्रष्टुं भवन्तमायातौ शुश्रूषार्थमरिंदमौ ॥ ८ ॥
यदत्रानन्तरं तत्त्वमाज्ञापयितुमर्हसि । ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम् ॥ ९ ॥
वैदेहीं च महाभागामिदं वचनमब्रवीत् । दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः ॥ १० ॥
मनसा काङ्क्षितं ह्यस्य मयाप्यागमनं प्रति । गम्यतां सत्कृतो रामः सभार्यः सहलक्ष्मणः ॥ ११ ॥
प्रवेश्यतां समीपं मे किमसौ न प्रवेशितः । एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना ॥ १२ ॥
अभिवाद्याब्रवीच्छिष्यस्तथेति नियताञ्जलिः । तदा निष्क्रम्य संभ्रान्तः शिष्यो लक्ष्मणमब्रवीत् ॥ १३ ॥
कोऽसौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयम् । ततो गत्वाऽऽश्रमपदं शिष्येण सह लक्ष्मणः ॥ १४ ॥

५] ति०टी०—अग्निशरणमग्निहोत्रगृहं निवेदितुं निवेदयितुम् ५

रा० टी०—तस्येति । तपोधनोऽगस्त्यशिष्यस्तस्य लक्ष्मणस्य तद्वचनं श्रुत्वा तथेत्युक्त्वा अग्निशरणमग्निगृहं यागशालामित्यर्थः, प्रविवेश ॥ ५ ॥

गो० टी०—तस्येति । अग्निशरणम् अग्निगृहम् ॥ ५ ॥

६] ति० टी०—अञ्जसा शीघ्रम् ॥ ६ ॥

रा० टी०— स इति । सोऽगस्त्यशिष्यः प्रविश्य यागशालां गत्वा दुष्प्रधर्षणं मुनिश्रेष्ठमगस्त्यस्य संमतः शिष्यः इदं रामागमनं लक्ष्मणेन यथोक्तमञ्जसा शीघ्रमुवाच । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी० स इति । अञ्जसा आशु यथेष्टमित्यस्य उवाचेत्यनेनान्वयः । संमतः शिष्येषु मान्यत्वेन संमतः ॥ ६ ॥

७] ति० टी०—संमत इष्टः ॥ ७ ॥

८] ति० टी०—द्रष्टुं तदनन्तरं किंयत्कार्यं शुश्रूषार्थं सेवार्थं चागतौ ॥ ८ ॥

रा० टी०—तद्वचनाकारमाह—पुत्राविति । भवन्तं द्रष्टुं शुश्रूषार्थं च तौ आयातौ रामो लक्ष्मणश्च दशरथस्य पुत्रौ आश्रमपदं प्रविष्टौ ॥ ७ ॥ ८ ॥

गो० टी०—पुत्रावित्यादि । शुश्रूषार्थं सेवार्थं चेत्यर्थः । यदत्रेति । अत्र अस्मिन् रामे विषये अनन्तरं तदागमनानन्तरं यद्वक्तव्यं तत्त्वं तस्य भावं प्रकारम् आज्ञापयितुमर्हसि ॥७—९॥

९] ति० टी०—अनन्तरं तत्त्वं वक्तव्यतत्त्वमुपश्रुत्य भगवदागमनभवणानन्दमनुभूयेत्यर्थ इति तीर्थः ॥ ९ ॥

रा० टी०—यदिति । अत्र रामादिविषये यत्तत्त्वं निर्णीतमित्यर्थः । तदनन्तरं शीघ्रमाज्ञापयितुमर्हसि । अर्थं पृथक्—तत इति । रामं प्राप्तं वैदेहीं च प्राप्तां शिष्यान् उपश्रुत्य इदं वचनमब्रवीत् ॥ ९ ॥

१०] ति० टी०—मां द्रष्टुं समागत इति तदिष्ट्या मम भाग्येन किं चान्तर्भावितण्यर्थः दृष्टिः मामात्मानं दर्शयितुं यद्वने वसतश्चिरस्य चिरकालस्य गमनेऽप्यागतस्तदिष्ट्या मद्भाग्येनेत्यर्थः ॥ १० ॥

रा० टी०—तद्वचनाकारमाह—दिष्ट्येति । चिरस्य बहुकालान्मां द्रष्टुमद्य समुपागतः दिष्ट्या भाग्यमेतत् । तत्र हेतुः—यतः अस्य आगमनं प्रति मयाऽपि मनसा आकाङ्क्षितम् ॥१०॥

गो० टी०—दिष्ट्येत्यादि । दिष्ट्या यदृच्छया चिरस्य चिरात् प्रतीक्षाकाङ्क्षितमित्यन्वयः । प्रतिवीप्सायाम् । सत्कृतः सत्काराहः किंचासौ न प्रवेशितः कृतो विलम्बित इत्यर्थः ॥ १०॥११॥

११] ति० टी०—तदेवाह—मनसेति । एतदागमनमुद्दिश्य काङ्क्षितम् इच्छा कृतेति यावत् । सत्कृतः आचारोपचारव्यवहारैरित्यर्थः ॥ ११ ॥

रा० टी०—गम्यतामिति । गम्यतां रामः प्रवेश्यतां मम समीपमयं किं किमर्थं न प्रवेशितः मामपृष्ट्वेति शेषः ॥११॥

१२] ति० टी०—किमसौ न प्रवेशितः कस्मादेतोर्विलम्बः कृत इत्यर्थः ॥ १२ ॥

रा० टी०—एवमिति । मुनिना एवमुक्तः शिष्यः अभिवाद्य प्रणम्य तथेति अब्रवीत् ॥ १२ ॥

गो० टी०—एवमुक्त इति । अभिवाद्येति । विलम्बकरणापचारनिवृत्त्यर्थं वन्दनम् अत एव संभ्रान्त इति वक्ष्यति ॥ १२—१४ ॥

१३] ति० टी०—अभिवादनागमननियोगप्रयुक्तं पुनरभिवादनं कृत्वा तथेत्यनयामीत्येवम् ॥ १३ ॥

रा० टी०—तदेति । तदा गुर्वाज्ञापनकाले निष्क्रम्य यागशालायाः निःसृत्य संभ्रान्तः आदृतः शिष्यः असौ रामः कः मुनिं द्रष्टुमेतु आगच्छतु प्रविशतु इति लक्ष्मणमब्रवीत् ॥ १३ ॥

१४] ति० टी०—स्वयं प्रविशतु भगवताऽवगतवृत्तान्तस्वाभास्य शिष्यमुखापेक्षेति भावः । आश्रमपदमाश्रमप्रान्तदेशम् ॥ १४ ॥

रा० टी०—तत इति । शिष्येण सह लक्ष्मणः आश्रम-

१ चासाविति गो. अथमिति रा. पाठः । २ तत इति गो. पाठः । ३ जेति गो. पाठः ।

दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम् । तं शिष्यः प्रश्रितं[1] वाक्यमगस्त्यवचनं ब्रुवन् ॥ १५ ॥
प्रावेशयद्यथान्यायं सत्कारार्हं सुसत्कृतम् । प्रविवेश ततो रामः सीतया सह लक्ष्मणः ॥ १६ ॥
प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन् । स तत्र ब्रह्मणः स्थानमग्नेः स्थानं तथैव च ॥ १७ ॥
विष्णोः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः । सोमस्थानं भगस्थानं स्थानं कौबेरमेव च ॥ १८ ॥
धातुर्विधातुः स्थानं[2] च वायोः स्थानं तथैव च । स्थानं[3] च पाशहस्तस्य वरुणस्य महात्मनः[4] ॥ १९ ॥
स्थानं तथैव गायत्र्या वसूनां स्थानमेव च । स्थानं च नागराजस्य गरुडस्थानमेव च ॥ २० ॥
कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति । ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ॥ २१ ॥
तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसम्[5] । अब्रवीद्वचनं वीरो लक्ष्मणं लक्ष्मिवर्धनम् ॥ २२ ॥

पदमाश्रमप्रान्तदेशं गत्वा काकुत्स्थं दर्शयामास । शिष्यमिति प्रयोज्यमाक्षिप्यते ॥ १४ ॥

१५] ति० टी०—लक्ष्मणः काकुत्स्थं रामं प्रदर्शयामास शिष्यमिति शेषः । तं दृष्टं रामं शिष्योऽगस्त्यवचनमुच्यत इति वचनमगस्त्योक्तं वाक्यं प्रश्रितं प्रीतियुक्तं ब्रुवन्प्रावेशयदित्यन्वयः ॥ १५ ॥

रा० टी०—तमिति । अगस्त्यस्य वचनं संदेशो यस्मिन् तत् प्रश्रितं नम्रीभूतं वाक्यं ब्रुवन् सन् सत्कारार्हं तं रामं सुसत्कृतं यथा स्यात्तथा यथान्यायं प्रावेशयत् ॥ १५ ॥

गो० टी०—तमिति । अगस्त्येनोच्यत इत्यगस्त्यवचनम् अगस्त्योक्तमित्यर्थः । सुसत्कृतं सविनयवाक्येन बहुमतम् ॥१५॥

१६] ति० टी०—सुसत्कृतं पाद्यार्घ्यादिभिरग्रे गत्या मार्गप्रदर्शनेन च सत्कृतम् ॥ १६ ॥

रा० टी०—प्रविवेशेति । प्रशान्तहरिणैः आकीर्णं व्याप्तमाश्रममवलोकयन् सन् सीतया सह रामः प्रविवेश ॥१६॥

गो० टी०—प्रविवेशेति । आश्रमं मुनिगृहम् ॥ १६ ॥

१७] ति० टी०—अगस्त्याश्रमस्थदेवतास्थानदर्शनमाह—स तत्रेति । तत्राश्रमे स रामः ब्रह्मणो हिरण्यगर्भस्य कल्पितं स्थानम् । अग्निरत्र रुद्रः ॥ १७ ॥

१८] ति० टी०—भगः स्थूलमण्डलाभिमानी ॥ १८ ॥

१९] ति० टी०—धाता कार्यप्रजापतिः विधाता विश्वकर्मेति कतकः ॥ १९ ॥

२०] ति० टी०—गायत्रीति सरस्वतीसावित्र्योरप्युपलक्षणम् ॥ २० ॥

रा० टी०—स इति । तत्र अगस्त्याश्रमे ब्रह्मादीनां स्थानानि स रामः पश्यति अपश्यत् । तत्राग्निशब्देन शंभुरुच्यते । अत एव ब्रह्मविष्णुवाचकशब्दयोरन्तरा पाठः । धातावियातारौ प्रजापतिविशेषौ । गायत्रीशब्देनोपलक्षणविधया सावित्रीसरस्वत्योरपि ग्रहणमिति भट्टसंमतिः । श्लोकचतुष्टयमेकान्वयि ॥ १७–२० ॥

गो० टी०—अयं तत्र देवपूजागृहाण्यपश्यदित्याह—स तत्रेत्यादि । तत्र अगस्त्यगृहे ब्रह्मणः चतुर्मुखस्य अग्नेः पावकस्य तथैव चेति निपातसमुदायः समुच्चये । भगो देवताविशेषः पाशहस्तस्येत्यादिविशेषणानि तत्र मुनेरगस्त्यस्य भक्तिविशेषद्योतनार्थम् । इमे ब्रह्मादयः पूर्वसर्गे फलप्रदत्वेनोक्ताः अन्ये अगस्त्योपासकत्वेनोक्ताः एते ब्रह्माग्निविष्णुमहेन्द्रविवस्वत्सोमभगकुबेरधातृविधातृवाय्वनन्तगायत्रीवसुवरुणकार्तिकेयधर्माख्याः सप्तदश देवाः । यो वै सप्तदशमित्यत्रवाक्योक्तसप्तदशाक्षरदेवताः यायजूकेन मुनिना पूजार्थं प्रतिष्ठिता इति बोध्यम् । अत्र पूज्यदैवतेषु रुद्रस्यात्रुपादानादपूज्यत्वमुक्तम् । अधुना जनैः कैश्चित् पूज्यमानता तु तामसशास्त्रानुरोधेनेति बोध्यम् । ननु 'विष्णोः स्थानं महेशस्य' इति पाठात् । स्थानानुक्त्यसंभव इति चेत् तदा पूर्वं रामेण 'अगस्त्यं नियताहारं सततं पर्युपासते' इत्युक्तावपि स्थाननिर्देशे उपास्योपासकयोरुभयोरपि निर्देशो न विरुध्यते । यद्वा उपासनं समीपावस्थानं नत्वाराधनं धर्ममाराधयिष्णव इत्युक्तेः धर्मस्याराधनं परिपालनमेव ॥ १७–२० ॥

२१] ति० टी०—एषां स्थानानि पश्यतीत्यन्वयः । एतेन पूजास्थाने एतावतां देवानां पूजावश्यकीति सूचितम् । अभिनिष्पतत् अडभाव आर्षः, अभ्युत्थानं कृतवानित्यर्थः ॥ २१ ॥

रा० टी०—तत इति । ततः रामालिङ्गनहेतोः मुनिरपि अभिनिष्पतत् आगमशास्त्रस्यानित्यत्वादडभावः । मुनीनां मध्ये दीप्ततेजसं तमगस्त्यं रामो ददर्श ॥ २१ ॥

गो० टी०—तत इति । अभिनिष्पतत् अभ्युत्थानं कृतवान् अडभाव आर्षः । मुनीनामग्रतः स्थितमिति शेषः ॥ २१ ॥

२२] ति० टी०—मुनीनामग्रतः स्थितमिति शेषः । ईदृशं तमगस्त्यं ददर्शेत्यन्वयः ॥ २२ ॥

रा० टी०—अब्रवीदिति । वीरो रामः लक्ष्मणमब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह—बहिरिति । हे लक्ष्मण! अगस्त्यऋषिः औदार्येण तपोजनिततेजोविशेषोत्कर्षेण बहिर्निष्क्रामति अतः तपसां निदानं कारणमवगच्छामि जानामि ऋषिमिति शेषः ॥ २२ ॥

---

१ प्रश्रित इति गो. पाठः । २ स्थाने इति गो. पाठः । ३ एतदाद्यर्धत्रयं व्यत्यस्तं गो. पाठे । ४ अनन्तस्य महात्मनः इति गो. पाठः । ५ दीप्ततेजसामिति गो. पाठः ।

बाढमित्येवमुक्त्वा तु लक्ष्मणे भगवानृषिः । औदार्येणावगच्छामि [1]निधानं तपसामिदम् ॥ २३ ॥
एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसम् । [2]जग्राहापततस्तस्य पादौ च रघुनन्दनः ॥ २४ ॥
अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः । सीतया सह वैदेह्या तदा रामः सलक्ष्मणः ॥ २५ ॥
प्रतिगृह्य च काकुत्स्थमर्चयित्वाऽऽसनोदकैः । कुशलप्रश्नमुक्त्वा च [3]आस्यतामिति सोऽब्रवीत् ॥२६॥
अग्निं हुत्वा प्रदायार्घ्यमतिथिन्प्रतिपूज्य च । वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २७ ॥
प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुंगवः । उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २८ ॥
[अग्निं हुत्वा प्रदायार्घ्यमतिथिं प्रतिपूजयेत् ।]
अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् । दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥ २९ ॥
राजा सर्वस्य लोकस्य धर्मचारी महारथः । पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रियातिथिः ॥ ३० ॥
एवमुक्त्वा फलैर्मूलैः [5]पुष्पैश्चान्यैश्च राघवम् । पूजयित्वा यथाकामं [6]ततोऽगस्त्यस्तमब्रवीत् ॥ ३१ ॥

गो० टी०–अब्रवीदित्यादि ॥ २२ ॥

२३] ति० टी०–औदार्येण तेजोविशेषजनितौग्र्येन॥२३॥

गो० टी०–औदार्येण तेजोविशेषरूपौन्नत्येन इममवगच्छामि अगस्त्यत्वेनेति शेषः । इति वचनमब्रवीदित्यन्वयः ॥ २३ ॥

२४] ति० टी०–एवमगस्त्यमुक्त्वा लक्ष्मणं प्रति बोधयित्वा आपतत आश्रमादागच्छतस्तस्य ऋषेः पादौ जग्राह । हस्ताभ्यां मूर्ध्ना च पादौ स्पृष्ट्वा नमश्चकारेत्यर्थः ॥ २४ ॥

रा० टी०–एवमिति । महाबाहू रघुनन्दनो रामः अगस्त्यमवमुक्त्वा आपततः आगच्छतः तस्य पादौ जग्राह॥ २३ ॥

गो० टी०–एवमिति । अगस्त्यम् उद्दिश्येति शेषः ॥२४॥

२५] ति० टी०–योगरूढिभ्यां रामशब्दद्वयापौनरुक्त्यम् ॥ २५ ॥

रा० टी०–अभिवाद्येति । तदा मुनिसङ्गमकाले धर्मात्मा आरामः सर्वाभिरामदाता रामः अभिवाद्य तस्थौ ॥२४॥

गो० टी०–अभिवाद्येति । रामः अभिवाद्य रामस्तस्थावित्यन्वयः ॥ २५ ॥

२६] ति० टी०–प्रतिगृह्य उत्थापनपूर्वकमालिङ्गयेत्यर्थः २६

रा० टी०–प्रतीति । काकुत्स्थं रामं प्रतिगृह्य हस्तेन गृहीत्वा आसनोदकैः अर्चयित्वा कुशलप्रश्नं तद्बोधकवाक्यं चोक्त्वा सोऽगस्त्यः आस्यतामित्यब्रवीत् ॥ २६ ॥

गो० टी०–प्रतिजग्राहेति । प्रतिजग्राह अतिथित्वेनेति शेषः । उदकानि पाद्यानि ॥ २६ ॥

२७] ति० टी०–अर्चनस्यैव विस्तरापदेशः–अग्निमिति। वैश्वदेवहोमं कृत्वेत्यर्थः । अतिथीन्रामादीन् ॥ २७ ॥

रा० टी०–अर्चनप्रकारमाह–अग्निमिति । अग्निं वैश्वदेवविधिप्राप्तवह्निं हुत्वा अर्घ्यम् अर्घजलं प्रदाय अतिथीन् प्रतिपूज्य वानप्रस्थेन वानप्रस्थोचितेन धर्मेण विधिना भोजनं ददौ ॥२६॥

गो० टी०–अग्निमिति । तस्मिन्नासीने अग्निं हुत्वा वैश्वदेवं कृत्वा तेभ्यः अर्घ्यं दत्त्वा अतिथीन् तान् प्रतिपूज्य आचमनीयपुष्पादिभिः पूजयित्वा वानप्रस्थेन धर्मेण सिद्धं भोजनं कन्दमूलादिकं ददौ ॥ २७ ॥

२८] ति० टी०–आसीनं पश्चादासीनमित्यर्थ इति प्राञ्चः। मम तु भाति–प्रथममिति भोजनं ददावित्यनेनान्वेति। अथोपविश्य अतिथिपूजाव्यग्रतया तावत्पर्यन्तमनुपवेशनमिति ॥२८॥

रा० टी०–भोजनानन्तरकालिकवृत्तान्तमाह–प्रथममिति। प्रथमं रामोपवेशनात्पूर्वं धर्मज्ञो मुनिपुङ्गवः उपविश्य आसीनं पश्चात् स्थितिमन्तं राममुवाच ॥ २७ ॥

गो० टी०–प्रथममिति । स्वयं प्रथममुपविश्य आसीनं राममुवाच ॥ २८ ॥

२९] ति० टी०–एवं क्षत्रियपूजाद्युचितेत्याशङ्क्य समाधित्सुः प्रकृतं धर्ममुवाचेत्याह–अन्यथेति । अन्यथा समुदाचरन् एवमतिथिपूजनमकुर्वन्नित्यर्थः । दुःसाक्षी कूटसाक्षी एवं च प्रत्यवायपरिहारायैवमतिथिपूजाऽवश्यकीत्याशयः ॥ २९ ॥

रा० टी०–तद्वचनाकारमाह–अन्यथेति । हे काकुत्स्थ ! अन्यथा सत्कृतिविधिविपरीतं समुदाचरन् कुर्वन् तपस्वी परे लोके दुःसाक्षी अन्यथा वस्तुनिर्णेतेव परे लोके स्वानि मांसानि भक्षयेत् ॥ २८ ॥

गो० टी०–अग्निमिति । अयं रामव्याजेन सीतां प्रत्युपदेशः । धर्मकोविदमित्युक्तस्य रामस्य हि नेदं वक्तव्यम् । अत एव सीता रावणं सत्करिष्यति । अन्यथा समुदाचरन् होममतिथिसत्कारं चाकुर्वन्नित्यर्थः । दुःसाक्षी कूटसाक्षी ॥२९॥

३०–३१] ति० टी०–स्वदधिकोऽतिथिश्च नास्तीत्याह–राजेति । सर्वलोकरक्षाराजा सर्वलोकनियन्तृत्वेनेश्वरत्वं गर्भितम् । धर्मचारी धर्माचरणेन तत्प्रवर्तकः इदृशस्त्वं प्रियातिथिः सन्प्राप्तः, अतः पूजनीयो मान्यश्च मान्यत्वेनेतः परं त्वमेवास्माकमाराधनीय इति सूचितम् ॥ ३० ॥ ३१ ॥

रा० टी०–राजेति । यतः सर्वस्य लोकस्य राजा अत एव पूजनीयो मान्यश्च प्रियातिथिर्भवान् प्राप्तः ॥ २९ ॥

---

१ एष इति गो. पाठः । २ निदानमिति रा. पाठः । ३ इममिति गो. पाठः । ४ जग्राह परमप्रीतस्तस्य पादौ परंतप इति गो. पाठः । ५ जग्राहेति गो. पाठः । ६ ह्यास्यतामिति चेति गो. पाठः । ७ अर्धमेतदधिकं गो. पाठे। ८ पुष्पैरन्यैश्चेति गो. पाठः । ९ पुनरेव तत इति गो. पाठः। १० राज इति युक्तं भाति।

इदं दिव्यं महच्चापं हेमवज्रविभूषितम् । वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥ ३२ ॥
अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः । दत्तो मे महेन्द्रेण तूणी चाक्षय्यसायकौ ॥ ३३ ॥
संपूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः । महाराजतकोशोऽयमसिर्हेमविभूषितः ॥ ३४ ॥
अनेन धनुषा राम हत्वा संख्ये महासुरान् । आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम् ॥ ३५ ॥
तदनुत्तमं च तूणी च शरं खड्गं च मानद । जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३६ ॥
एवमुक्त्वा महातेजाः समस्तं तद्वरायुधम् । दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।

श्रीशु स्त्रीत्यादिदशसाधारण्यर्थे तेनेत्या निष्कलङ्कत्वादिरूप निर्दिशन्नगस्त्यस्तां प्रशंसति । सीतागोचितस्थानाजिज्ञासुना रामेण पृष्टोऽगस्त्यः पञ्चवटी निवासार्थं निर्दिशति । रामस्तथामन्त्र्य सीतालक्ष्मणाभ्यां पञ्चवटीं प्रति प्रतस्थे ।

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण ! अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ १ ॥

गो० टी०- भवांस्तु विशिष्टातिथिरित्याह-राजेति । राजार्हे स्पष्टोऽर्थः । तत्रार्थरत् " सर्वस्य लोकस्य भुवनस्य राजा स्वामी पति विश्वस्य " इति श्रुते । " अत एव लोकस्य पूजनीयः कर्मभेदाराध्यः इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः " इति श्रुतेः मान्यः सुकृते योगिभिश्चिन्त्यः प्रियातिथिः लौकिकातिथिभ्यो विलक्षणः एवमुक्त्वेति पूर्वेणान्वयः ॥ ३० ॥

रा० टी०-एवमिति । एवमुक्त्वा फलादिभिः पूजयित्वा च ततः तस्मिन् समये अगस्त्यस्तं राममब्रवीत् ॥ ३० ॥

गो० टी०-एवमिति । पुनः फलादिदानं सीतायाः ॥ ३१ ॥ ३२

३२] ति० टी०-हेम्ना वज्रेण च भूषितम् । वैष्णवमिति । परशुरामाद्गृहीत्वा वरुणहस्ते दत्तं यद्रामेण तदेव वरुणादादाय महेन्द्रोऽगस्त्ये निक्षिप्तवानिति कतकः । योगेन महेन्द्रपदेनात्र वरुण एवेत्यन्ये ॥ ३२ ॥

रा० टी०-तद्वचनावतारमाह-इदमिति । हेमवज्रविभूषितं हेनाभिर्वज्रैश्च विभूषितं विश्वकर्मणा निर्मितमिदं महच्चापं धनुरस्तीति शेषः ॥ ३१ ॥

गो० टी०-वैष्णवमिति । परशुरामात् गृहीत्वा वरुणहस्ते दत्तं रामेण तदेव वरुणः स्वर्गादित्यमभिहित इति भगस्त्यहस्ते निक्षिप्तवानित्यवगम्यते । वैष्णवशब्दप्रत्यभिज्ञानात् । ब्रह्मदत्तः ब्रह्मणा दत्तः अयमिति शेषः । तूणी इमाविति शेषः, महाराजतं सुवर्णं तन्मयः कोशः खड्गपिधानं यस्य सः महाराजतकोशः बालरामायणे ऐन्द्रं भगसनमिति इन्द्रदत्तत्वोक्तिश्छन्दिन्यायात् । धनुषा धनुरादिना शरं खड्गं च वैष्णवाविति शेषः । वज्रं वज्रधरो यथेत्यनेन तावकं त्वमेव गृहाणेत्युक्तम् । एवमुक्त्वा ततः पुनरेव इत्यब्रवीदित्यन्वयः ॥ ३३-३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

३३] ति० टी०-ब्रह्मणा दत्तौ ब्रह्मदत्ततदाख्यश्च तूणी चेति चेन धनुःशरयोरभयोरिन्द्रदत्तत्वं गम्यते ॥ ३३ ॥

रा० टी०-अमोघ इति । अमोघः फलरहितप्रहारश्चान्यः सूर्यसंकाशः ब्रह्मदत्तः शरोत्तम उत्तमबाणः महेन्द्रेण दत्तौ अक्षयसायकौ ज्वलद्भिः पावकैरिव निशितैः तीक्ष्णैर्बाणैः संपूर्णौ तूणी च सन्तीति शेषः । साधर्म्यलोक एकान्वयी ॥ ३२ ॥ ३३ ॥

३४-३५] ति० टी०-महाराजतं सुवर्णम्-हेमविभूषितो मुष्टिदेशे ॥ ३४ ॥ ३५ ॥

रा० टी०-महाराजतेति । महाराजतेन सुवर्णनिर्मितमुष्टिविशेषेण युक्तः कोशो यस्य स हेमविभूषितोपमश्चाऽसिरस्तीति शेषः । अर्धं पृथक् । धनुषः प्रभावमाह-अनेनेति । संख्ये संग्रामे अनेन धनुषा महासुरान् हत्वा पुरा पूर्वं दिवौकसां देवानां श्रियं विष्णुराजहार ॥ ३४ ॥

३६] ति० टी०-वज्रं वज्रधरो यथेत्यनेन त्वदीयमेव त्वया स्वीक्रियत इति ध्वनितम् ॥ ३६ ॥

रा० टी०-तदिति । जयाय जयं लब्धुं वज्रं वज्रधर इन्द्र इव धनुरादीनि प्रतिगृह्णीष्व ॥ ३६ ॥

३७] ति० टी०-वरायुधं वरस्य विष्णोरायुधं च ॥ ३७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वादशः सर्गः ॥ १२ ॥

रा० टी०-एवमिति । महातेजा अगस्त्यः समस्तं तद्वरायुधं रामाय दत्त्वा पुनरब्रवीत् ॥ ३६ ॥

इति श्रीमद्गोविन्दराजविरचिते रामायणभूषणे रामायणशिरोमणावारण्यकाण्डे द्वादशः सर्गः ॥ १२ ॥

१] ति० टी०-राम ! प्रीतोऽस्मि, लक्ष्मण ! त्वयि च परि-

१ रत्नेति गो. पाठः । २ दत्ताविति गो. रा. पाठः । ३ चाक्षयेति गो. रा. पाठः । ४ रजतेति गो. रा. पाठः । ५ तूणीरिति गो. पाठः ।

अध्वश्रमेण वा खेदो बाधते प्रचुरश्रमः । व्यक्तमुत्कण्ठते वापि मैथिली जनकात्मजा ॥ २ ॥
एषा च सुकुमारी च [3]खेदैश्च न विमानिता । प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ ३ ॥
यत्रैषः रमते राम इह सीता तथा कुरु । दुष्करं कृतवत्येषा वने त्वामभिगच्छती ॥ ४ ॥
एषा हि प्रकृतिः स्त्रीणामा सृष्टे रघुनन्दन । समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च ॥ ५ ॥
शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा । गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ६ ॥
इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता । श्लाघ्या च व्यपदेश्या च यथा [6]देवेष्वरुन्धती ॥ ७ ॥

तुष्टोऽस्मि । रामसेवातत्परत्वेन परितोषः । भगवद्विषयगीतैरेव भक्तित्वेन त्वद्भक्तोऽहमिति ध्वनितम् । स्थ इति अस्तेर्लटि मध्यमपुरुषद्विवचनम् ॥ १ ॥

रा० टी०—अगस्त्यवचनाकारमाह—रामेत्यादिभिः । हे राम! हे लक्ष्मण! सीतया सह मामभिवादयितुं यद्युवां प्राप्तौ स्थ तस्मादेतोः परितुष्टः प्राप्तसंतोषोऽस्मि अतः प्रीतः त्वद्विषयकप्रीतिमानस्मि ॥ १ ॥

गो० टी०—एतादृशस्थले सर्गविच्छित्तिर्नास्तीति प्रतीयते कथाया अपर्यवसानात् । अथ खरवधायागस्त्येनानुज्ञातस्य रामस्य पञ्चवटीं प्रति गमाय त्रयोदशे—रामेत्यादि । ते इत्यस्य लक्ष्मणेत्यत्राप्यन्वयः ॥ १ ॥

२] ति० टी०—अध्वश्रमेणाध्वगमनादिप्रयुक्तखेदादिकार्यकारी श्रमः खेदो दुःखम् प्रचुरश्रमस्तजं दुःखं बाधते मैथिलीमिति शेषः, अत एवेयं व्यक्तमुत्कण्ठते । क्वचिद्विश्रान्तये इति शेषः ॥ २ ॥

रा० टी०—अध्वेति । अध्वश्रमेण अध्वगमनेन प्रचुरः श्रमो यस्मिन्नधिकश्रमजनित इत्यर्थः, खेदः वां युवां बाधते व्यक्तं स्फुटमेतत् । यदि युवामेव बाधते तर्हि मैथिलीं बाधते इति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः । अत एव जनकात्मजा मैथिली उत्कण्ठते अतीच्छति श्रमनिवर्तनायेति शेषः ॥ २ ॥

गो० टी०—अध्वेति । अध्वश्रमेण मार्गायासेन प्रचुरः श्रमः भ्रमजलं येन सः प्रचुरश्रमः खेदः वां बाधते उत्कण्ठते विश्रान्तिमभिलषति । अनेनास्याः श्रमातिशय उच्यते । जनकात्मजेति सौकुमार्यातिशयोक्तिः ॥ २ ॥

३–४] ति० टी०—न विमानिता इतः प्राक्तदापि न पीडिता खेदैः खेदजनकैः । 'दुःखैः इति पाठान्तरम् । प्राज्यदोषं प्रभूतदोषम् ॥ ३ ॥ ४ ॥

रा० टी०—एषेति । दुःखैर्न विमानिता इतः पूर्वं दुःखकृत्काश्रयाभावावती सुकुमारी एषा सीता भर्तृस्नेहप्रचोदिता सती प्राज्यदोषं विपुलदोषविशिष्टं वनं प्राप्ता ॥ ३ ॥

रा० टी०—यत्रेति । राम! वने त्वामभिगच्छती अत एव दुष्करं कर्तुमशक्यं कर्म कृतवती एषा विश्रान्तिमिच्छती एषा सीता यथा इह रमते तथा कुरु ॥ ४ ॥

गो० टी०—एषेति । एषा सुकुमार्येषि प्राज्यदोषं बहुदोषं वनं प्राप्ता दुःखैर्न विमानिता न परिभूता च । तत्र हेतुर्भर्तृस्नेहप्रचोदितेति । इह आश्रमे ॥ ३ ॥ ४ ॥

५] ति० टी०—दुष्करकरणप्रतिपादनशेषतया लोकव्यवहारमाह—एषेति । आ सृष्टेः सृष्टिमारभ्य समस्थं धनधान्यादियुक्तया सम्यगवस्थितं विषमस्थं दरिद्रत्वरोगादिग्रस्तम् ॥ ५ ॥

रा० टी०—सीतां प्राकृतविलक्षणां द्योतितुं प्राकृतस्त्रीणां लक्षणमाह—एषेति । समस्थं संपत्तिमन्तं पुरुषं स्त्रियो अनुरज्यन्ति स्वानुरागविषयं कुर्वन्ति विषमस्थं विपत्तिमन्तं त्यजन्ति च, आसृष्टेः सृष्टिमारभ्य स्त्रीणामेषा प्रकृतिः ॥ ५ ॥

गो० टी०—एषा हीति । प्रकृतिः स्वभावः आसृष्टेः जगत्सृष्टिमारभ्य समस्थं सुस्थं प्रति विषमस्थं दुर्दशापन्नम् ॥ ५ ॥

६] ति० टी०—एकत्रानवस्थानाद्विद्युतां चाञ्चल्यमनुगच्छन्ति । बहुकालागतस्नेहबन्धच्छेदेन शस्त्रैतैक्ष्ण्यानुगमः । नित्यकार्यकरणे वास्यादिशैघ्र्यानुगमः ॥ ६ ॥

रा० टी०—शतह्रदानामिति । शतह्रदानां विद्युतां लोलत्वमस्थिरत्वाच्चाञ्चल्यं शस्त्राणां खड्गादीनां तीक्ष्णतां तैक्ष्ण्यं च गरुडानिलयोः शैघ्र्यं च योषितोऽनुगच्छन्ति ॥ ६ ॥

गो० टी०—शतह्रदानामिति । शतह्रदानां विद्युतां लोलत्वं चञ्चलत्वम् अनुगच्छन्ति चञ्चलचित्तत्वादिति भावः । शस्त्राणां तीक्ष्णतां क्रौर्यम् अनुगच्छन्ति बहुकालागतस्नेहबन्धच्छेदनादिति भावः । गरुडानिलयोः शैघ्र्यम् अनुगच्छन्ति अविच्छेदेन कार्यकरणादिति भावः ॥ ६ ॥

७] ति० टी०—श्लाघ्या दोषरहित्यपूर्वकं गुणसंपदा साद्भिः प्रशंसनीया व्यपदेश्या पातिव्रतास्वग्रगण्या ॥ ७ ॥

रा० टी०—इयमिति । इयं भवतो भार्या तु एतैः दोषैः विवर्जिता नित्यं रहिता अत एव श्लाघ्या स्तोतुमर्हा अत एव व्यपदेश्या पतिव्रतानामग्रे गणनीया अत एव यथा इयं तथा देवेषु अरुन्धती ॥ ७ ॥

१ चापीति गो. पाठः । २ हीति गो. पाठः । ३ दुःखैश्चेति गो. रा. पाठः । ४ अन्विति गो. पाठः । ५ रज्यन्तीति गो. रा. पाठः । ६ देवी ह्यरुन्धतीति गो. पाठः । ७ दारिभेति युक्तं भाति । ८ द्योतयितुमिति भाति ।

अलंकृतोऽयं देशश्च यत्र सौमित्रिणा सह । वैदेह्या चानया राम वत्स्यसि त्वमरिंदम ॥ ८ ॥
एवमुक्तस्तु मुनिना राघवः संयताञ्जलिः । उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम् ॥ ९ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगवः । गुणैः सभ्रातृभार्यस्य गुरुर्नः परितुष्यति ॥ १० ॥
किं तु व्यादिश मे देशं सोदकं बहुकाननम् । यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम् ॥ ११ ॥
ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितम् । ध्यात्वा मुहूर्तं धर्मात्मा ततोवाच वचः शुभम्॥ १२ ॥
इतो द्वियोजने तात बहुमूलफलोदकः । देशो बहुमृगः श्रीमान्पञ्चवट्यभिविश्रुतः ॥ १३ ॥
तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह । रंस्व त्वं पितुर्वाक्यं यथोक्तमनुपालयन् ॥ १४ ॥
[कालोऽयं गतभूयिष्ठो यः कालस्तव राघव । समयो यो नरेन्द्रेण कृतो दशरथेन ते ॥
तीर्णप्रतिज्ञः काकुत्स्थ सुखं राज्ये निवत्स्यसि । धन्यस्ते जनको राम स राजा रघुनन्दन ॥
यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ।]
विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ । तपसश्च प्रभावेण स्नेहाद्दशरथस्य च ॥ १५ ॥
हृदयस्थं च ते च्छन्दो विज्ञातं तपसा मया । इह वासं प्रतिज्ञाय मया सह तपोवने ॥ १६ ॥

गो० टी०–एवं लौकिकस्त्रीणां दुष्टस्वभावमुक्त्वा सीतायास्तद्वैलक्षण्यमाह–इयं त्विति । न केवलं दोषरहिता श्लाघ्या सद्भिः प्रशंसनीया च व्यपदेश्या पतिव्रतास्वग्रगण्या । एवं सीताप्रशंसनं वक्ष्यमाणदेवचन्दीमोचनोत्साहनाय ॥ ७ ॥

८–१०] ति० टी०–अयं देशो मदाश्रमरूप आगमनमात्रणालंकृतः । हे राम! यत्र देश इतःपरं वत्स्यसि सोऽलंकृतो भविष्यतीति किं वक्तव्यमित्यर्थः ॥ ८–१०॥

रा० टी०–अलमिति । हे राम ! यत्र वैदेह्या सह निवत्स्यसि सोऽयं देशः अलंकृतो भविष्यतीति शेषः ॥ ८ ॥

गो० टी०–अलंकृतोऽयमिति । अयं देशः आश्रमप्रदेशः, यद्वा भूलोकः वत्स्यसि दश वर्षसहस्राणि दश वर्षशतानि च॥८॥

रा० टी०–एवमिति । मुनिना एवमुक्तः संयताञ्जलिः राघवः प्रसृतम् अवनतविशिष्टं वाक्यमुवाच ॥ ९ ॥

रा० टी०–तद्वाक्याकारमाह–धन्य इति । यस्य मे गुणैः नो अस्माकं गुरुर्भवान् परितुष्यति सोऽहमनुगृहीतोऽस्मि भवतेति शेषः, अत एव धन्योऽस्मि ॥ १० ॥

गो० टी०–एवमिति । संयताञ्जलिः बद्धाञ्जलिः॥९॥१०॥

११ ति० टी०–किं तु किंचिद्वक्तव्यमस्तीत्यर्थः । व्यादिश बोधय आश्रमपदं वासस्थानम् । निरतः प्रीतः ॥ ११ ॥

रा० टी०–किमिति । यत्र अश्रमपदं श्रमनिवर्तकं स्थानं कृत्वा निरतः सन् सुखं वसेयं तं बहुकाननम् अधिकवनविशिष्टं सोदकं किं कंचिद्देशं व्यादिश कथय किमिति सामान्ये नपुंसकम् ॥ ११ ॥

गो० टी०–किं त्विति । निरतः एकाग्रः ॥ ११ ॥

१२] ति० टी०–ध्यात्वा वासोचितं देशमिति शेषः । तत उवाचेत्यर्थे संधिरार्षः ॥ १२ ॥

रा० टी०–तत इति । ततः रामकथनानन्तरं रामस्य भाषितं श्रुत्वा ततः तस्मिँस्थले मुहूर्तं ध्यात्वा संचिन्त्य मुनिश्रेष्ठः शुभं वचः अब्रवीत् ॥ १२ ॥

गो० टी०–तत इति । ध्यात्वा भाविकार्योचितदेशं ध्यात्वा धीरः धीमान् निश्चितकार्योचितदेश इत्यर्थः । धीरतरम् अतिनिश्चितं वचः ॥ १२ ॥

१३–१४ ति० टी०–तत्र पञ्चवटसमूहसत्त्वात्पञ्चवटीति नाम्नाऽभिविश्रुतः प्रसिद्धः ॥ १३ ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–इत इति । हे तात ! बहुमूलफलोदकः बहुमृगः पञ्चवट्यभिविश्रुतः पञ्चवटीति नाम्ना प्रसिद्धः श्रीमान् देशः इतो द्वियोजने अस्तीति शेषः ॥ १३ ॥

रा० टी०–तत्रेति । तत्र पञ्चवट्यभिधे देशे अश्रमपदं कृत्वा रमस्व, यथोक्तं पितुर्वाक्यमनुपालय च ॥ १४ ॥

गो० टी०–इत इति । पञ्चानां वटानां समाहारः पञ्चवटी तद्युक्तदेशो लक्षणया पञ्चवटीत्युच्यते । पञ्चवटीत्यभिविश्रुतो देश इत्यन्वयः ॥ १३–१६ ॥

१५] ति० टी०–एष वृत्तान्तः पितृवचनपरिपालनाय वनवासरूपः तव स्नेहात्तपसः प्रभावेण च विदितः नह्यविज्ञातवृत्तान्तं तपसा ज्ञातुं यतते कश्चित् । दशरथस्य च वृत्तान्तः कैकेयीवशत्वप्राणत्यागादिरूपस्तत एव मे विदितः ॥ १५ ॥

रा० टी०–विदित इति । हे अनघ ! तव दशरथस्य च स्नेहाद्धेतोः सर्वो ह्येष वृत्तान्तः सकारणं भवदागमनं मया तपःप्रभावेण विदितः ध्यानेन सर्वं ज्ञातमित्यर्थः ॥ १५ ॥

गो० टी०–मम पितृवाक्यपरिपालनप्रकारः कथं ज्ञात इत्यत्राह–विदित इति । तपःप्रभावेन पर्यालोचनकरणे निमित्तमाह–स्नेहादिति ॥ १७ ॥

१६] ति० टी०–यदिह वासं प्रतिज्ञाय 'आराधयि-

---

१ स इति गो. पाठः । २ वरद इति गो. पाठः । ३ तद्वच इति गो. पाठः । ४ धीरो धीरतरं वच इति गो. पाठः । ५ रंस्यसे इति गो. पाठः । ६ पाल्येति रा. पाठः । ७ सार्धश्लोकयुगुलमधिकं गो. पाठे । ८ प्रभावेनेति गो. पाठः । ९ हृदयस्थ इति गो. पाठः । १० विज्ञात इति गो. पाठः ।

अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति । स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते ॥ १७ ॥
स देशः श्लाघनीयश्च नातिदूरे च राघव । गोदावर्याः समीपे च मैथिली तत्र रंस्यते ॥ १८ ॥
प्राज्यमूलफलैश्चैव नानाद्विजगणैर्युतः । विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च ॥ १९ ॥
भवानपि सदाचारः शक्तश्च परिरक्षणे । अपि चात्र वसन्राम तापसान्पालयिष्यसि ॥ २० ॥
एतदालक्ष्यते वीर मधूकानां महावनम् । उत्तरेणास्य गन्तव्यं न्यग्रोधमपि गच्छता ॥ २१ ॥
ततः स्थलमुपारुह्य पर्वतस्याविदूरतः । ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः ॥ २२ ॥
अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह । सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम् ॥ २३ ॥
तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ । तमाश्रमं पञ्चवटीं जग्मतुः सह सीतया ॥ २४ ॥

प्याम्यत्राहमगस्त्यं तं महान्तमिम् । शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो ॥' इत्यनेन मम समीपे इह मदाश्रमे वासं प्रतिज्ञाय पुनर्मां प्रति व्यादिश मे वासमित्येतद्वदसि तन्मूलं ते हृदयस्थं छन्दोऽभिप्रायो मया ज्ञातम् । अत्रावस्थाने प्रतिज्ञातराक्षसवधनिर्वाहो न भवति, अत्र राक्षसागमनाभावादित्येवंरूप इति भावः ॥ १६ ॥

रा० टी०—नन्वत्र स्वसमीपदेशे एव मां कुतो न निवासयसीत्यत आह—हृदयस्थमिति । यस्माद्राक्षसवधाभिप्रायात् मया सह तपोवने वासं प्रतिज्ञाय आगतोऽसीति शेषः, तद्धृदयस्थं ते छन्दोऽभिप्रायो मया ज्ञातम्, अत एव पञ्चवटीं गच्छेति त्वामहं ब्रूमि ब्रवीमि । सोऽपि वनोद्देशो रम्यः अतस्तत्र मैथिली रंस्यते एतेनात्र स्थितौ राक्षसवधरूपत्वदभिप्रेतस्य सिद्धिर्न भविष्यतीति सूचितं तेन तत्र राक्षससंचाराभावो बोधितः । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०—हृदयेति । छन्दोऽभिप्रायः 'अभिप्रायवशौ छन्दौ' इत्यमरः । खरादिवधसंकल्प इत्यर्थः, तपसा आलोचनेनैतन्मूलत्वद्वचनभङ्ग्या चेत्यर्थः । अलंकृतोऽयं देशश्चेति ममेह वासे प्रस्तुते किंतु व्यादिश मे देशमिति त्वदुक्त्या चेत्यर्थः । अभिप्रायवेदनकार्यमाह—इहेति । यस्मात्त्वदभिप्रायो मया विदित अतो हेतोः इह तपोवने मया सह वासं प्रतिज्ञाय अनुज्ञाय तदनन्तरमेव त्वं पञ्चवटीं गच्छेति ब्रूमि ब्रवीमि । अनित्यमागमशासनमिति ईडभावः ॥ १८ ॥ १९ ॥

१७-१८ ति० टी०—अतस्त्वदभिप्रायज्ञानात्त्वां पञ्चवटीं गच्छेति ब्रूमि ब्रवीमि । न तु शिष्टव्यवहारोचितमपीह तिष्ठेति ब्रवीमीत्यर्थः । तद्वनार्थवादमाह—स हीति ॥ १७ ॥ १८ ॥

रा० टी०—नन्वत्र गमने भवन्निकटवासाभावप्रयुक्तमस्प्रीतिज्ञहानिर्भविष्यतीत्यत आह—स इति । स देशो नातिदूरे निकटे एवेत्यर्थः, श्लाघनीयश्च गोदावर्याः समीपेऽस्तीति शेषः, अतस्तत्र मैथिली रंस्यते । एतेन तत्र वासे सर्वस्य प्रतिज्ञाविषयीभूतस्य सिद्धिर्भवितेति ध्वनितम् ॥ १८ ॥

गो० टी०—स हीत्यादि । आयुतः व्याप्तः विविक्तः विजनः ॥ २० ॥ २१ ॥

१९] ति० टी०—विविक्त एकान्तः पुण्यः पुण्यजनकः रम्यो दृष्टिमनसोः ॥ १९ ॥

रा० टी०—प्राज्येति । यः प्राज्यमूलफलत्वादिगुणविशिष्टोऽयं पञ्चवटीदेशः अत्र निवसन् परिरक्षणे शक्तः सदाचारो भवान् तापसान् पालयिष्यति । श्लोकद्वयमेकान्वयि ॥१९॥२०॥

२०] ति० टी०—परिरक्षणे शक्तः तापसानामिति शेषः । भवानपीत्यनेन स्वस्यापि तापसरक्षणे सामर्थ्यबोधनेन स्वाश्रमे रक्षसामपीडा सूचिता । अत्र पञ्चवट्याश्रमे पालयिष्यसि प्रतिज्ञातपालननिर्वाहं करिष्यसि ॥ २० ॥

गो० टी०—भवानिति । परिरक्षणे तापसानामिति शेषः । अत्र पञ्चवट्याश्रमे ॥ २२ ॥

२१] ति० टी०—अस्य मधूकवनस्योत्तरेणेत्यर्थः । न्यग्रोधं तदुपलक्षितमाश्रमं गच्छता ॥ २१ ॥

रा० टी०—तत्प्रापकमार्गं बोधयन्नाह—एतदिति । हे वीर! न्यग्रोधं मार्गचिह्नभूतवटवृक्षमपि गच्छता त्वया मधूकानामेतन्महावनं यदा लक्ष्यते तस्यापि उत्तरेण गन्तव्यम् ॥ २१ ॥

गो० टी०—एतदिति । उत्तरेणेति अस्य मधूकवनस्य न्यग्रोधमभिगच्छता उत्तरेण मार्गेण गन्तव्यम् इदं मधूकवनं गत्वा तदुत्तरेण मार्गेण गन्तव्यं स मार्गो न्यग्रोधं प्रापयतीत्यर्थः २३

२२] ति० टी०—स्थलं निर्वृतं देशमुपारुह्य प्राप्य कस्यचित्पर्वतस्याविदूरतः समीपतः पञ्चवटीत्येव ख्यातो देशः ॥२२॥

रा० टी०—तत इति । ततोऽनन्तरं स्थलं समभूमिमुपारुह्य प्राप्य पर्वतस्य अदूरतो निकटे पञ्चवटीत्येव नाम्ना ख्यातः अस्तीति शेषः ॥ २२ ॥

गो० टी०—ततो न्यग्रोधात्परतः स्थलं निर्वृतप्रदेशं किंचिदुन्नतमुपारुह्य गमने कश्चित्पर्वतो दृश्यते तस्याविदूरतः पञ्चवटीति ख्यातः पञ्चवटवृक्षेण प्रसिद्धः नित्यपुष्पितकाननत्वेन ज्ञातुं योग्यश्चाश्रमो दृश्यत इत्यर्थः ॥ २४ ॥

२३-२४] ति० टी०—सत्कृत्य प्रदक्षिणनमस्कारादिभिः ॥ २३ ॥ २४ ॥

---

१ फलश्चैवेति गो. रा. पाठः । २ गणायुत इति गो. रा. पाठः । ३ सदारश्चेति गो. पाठः । ४ पालयिष्यतीति रा. पाठः । ५ महद्वनमिति गो. पाठः । ६ अगीति गो. पाठः । ७ तदाश्रमादिति गो. पाठः ।

गृहीतचापौ तु नराधिपात्मजौ विषक्ततूणी[1] समरेष्वकातरौ ।
यथोपदिष्टेन पथा महर्षिणा प्रजग्मतुः पञ्चवटीं समाहितौ ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ।

पञ्चवटीं प्रस्थितो रामोऽन्तरा वटस्कन्धोपविष्टं विशालं पक्षिणं दृष्ट्वा कस्त्वमित्यपृच्छत् । स प्रसन्नतः काश्यपीं सृष्टिमनुवर्ण्यात्मनोऽरुणपुत्रत्वं ख्यापयन्दशरथेन सौहार्दादहं ते साहाय्यकं चरेय यथानुमन्यते भवानित्यब्रवीत्प्रसन्नो रामस्य परिष्वज्य तेन सम पञ्चवटीं प्रपेदे ।

अथ पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः । आससाद महाकायं गृध्रं भीमपराक्रमम् ॥ १ ॥
तं दृष्ट्वा तौ महाभागौ वनस्थं रामलक्ष्मणौ[2] । मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति[3] ॥ २ ॥
ततो मधुरया वाचा सौम्यया प्रीणयन्निव[4] । उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः[5] ॥ ३ ॥
स तं पितृसखं मत्वा पूजयामास राघवः । स तस्य कुलमन्वग्रमथ पप्रच्छ नाम च ॥ ४ ॥
रामस्य वचनं श्रुत्वा कुलमात्मानमेव च[6] । आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवम्[7] ॥ ५ ॥

रा० टी०—अगस्त्येनेति । एवमुक्तो रामः ऋषिं सत्कृत्य आमन्त्रयामास गमनाय प्रार्थयामास ॥ २३ ॥

रा० टी०—ताविति । तेन ऋषिणा अभ्यनुज्ञातौ तौ रामलक्ष्मणौ पञ्चवटीमाश्रमं जग्मतुः ॥ २४ ॥

गो० टी०—अगस्त्येनेति । सत्कृत्य प्रदक्षिणनमस्काराभ्यामिति शेषः ॥ २५ ॥ २६ ॥

२५] ति० टी०—विषक्ते तूणी ययोस्तौ । पूर्वपदे पुंवत्त्वम् ॥ २५ ॥

इति श्रीराघाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽरण्यकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०—गृहीतेति । गृहीते चापे धनुषी याभ्यां विषक्ततूणी विषक्ते संसक्ते तूणी इषुधी ययोस्तौ समरेषु अकातरौ कातर्यविरोधिनौ समाहितौ रामलक्ष्मणौ महर्षिणा यथोपदिष्टेन पथा मार्गेण पञ्चवटीं प्रजग्मतुः ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०—गृहीतचापाविति । विषक्ततूणौ बद्धतूणीरौ अकारान्तोऽपि तूणशब्दः । महर्षिणा यथोपदिष्टेन पथेत्यन्वयः । समाहितौ एकाग्रौ ॥ २७ ॥

अस्मिन् सर्गे सार्धसप्तविंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने
आरण्यकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

१] ति० टी०—अन्तरा मध्ये ॥ १ ॥

रा० टी०—पञ्चवटीप्रस्थानानन्तरकालिकं वृत्तान्तमाह—अथेत्यादिभिः । पञ्चवटीं गच्छन् रघुनन्दनः अन्तरा मध्ये महाकायं गृध्रमथाससाद समकूलं प्राप ॥ १ ॥

गो० टी०—अथ गृध्रराजसमागमश्चतुर्दशे—अथ पञ्चवटीमित्यादि ॥ १ ॥

२] ति० टी०—तं पक्षिणं राक्षसं मेनाते विज्ञातवन्तौ तं राक्षसं ब्रुवाणौ परस्परं कथयन्तौ को भवानिति पप्रच्छ ब्रुवाणो वेति शेषः ॥ २ ॥

रा० टी०—तमिति । वनस्थं महाकायमत एव राक्षसं राक्षसत्वेन प्रतीयमानं तं जटायुषं दृष्ट्वा महाभागौ रामलक्ष्मणौ पक्षिं पक्षिणं मेनाते को भवानिति विशेषं ब्रुवाणौ अभवतां चेति शेषः ॥ २ ॥

गो० टी०—तमिति । वटस्थम् अगस्त्योपदिष्टवटस्थं पक्षिभिते छान्दसं रूपं को भवानिति ब्रुवाणौ सन्तौ राक्षसं मेनाते राक्षसं भत्वा को भवानित्यब्रूतामित्यर्थः ॥ २ ॥

३-४] ति० टी०—आत्मनः पितुः श्रीरामस्य तव पितुरित्यर्थः ॥ ३ ॥ ४ ॥

रा० टी०—स इति । सः ताभ्यां पृष्टः पक्षी हे वत्स ! आत्मनः स्वस्य पितुः वयस्यं सखायं मां विद्धि जानीहि इति मधुरया वाचा प्रीणयन् तर्पयन्निव उवाच । इव एवार्थे ॥ ३ ॥

गो० टी०—स ताविति । सौम्यया सौजन्यपरया प्रीणयन्निवेति इवशब्द एवकारार्थः । आत्मन इत्यन्ते इतिकरणं द्रष्टव्यम् आत्मनो रामस्य ॥ ३ ॥

रा० टी०—स इति । तं पक्षिणं पितृसखं मत्वा राघवः पूजयामास । अथ अनन्तरमन्वग्रं यथा स्यात्तथा तस्य कुलं नाम च पप्रच्छ ॥ ४ ॥

गो० टी०—स तमिति । स्पष्टम् ॥ ५ ॥

५] ति० टी०—वचनम् वंशनामप्रश्नविषयकं वचनमित्य-

१ तूणाविति गो. पाठः । २ वटस्थमिति गो. पाठः । ३ स ताविति गो.-रा. पाठः । ४ सर्वभूतसमुद्भवमिति गो. पाठः । ५ कुलमात्मानमेव चेति गो. पाठः ।

पूर्वकाले महाबाहो ये प्रजापतयोऽभवन् । तान्मे निगदतः सर्वानादितः शृणु राघव ॥ ६ ॥
कर्दमः प्रथमस्तेषां [1]विकृतस्तदनन्तरम् । शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥ ७ ॥
स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः । पुलस्त्यश्चाङ्गिराश्चैव प्रचेता[2] पुलहस्तथा ॥ ८ ॥
दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव । [3]कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः ॥ ९ ॥
प्रजापतेस्तु दक्षस्य बभूवुरिति [4]विश्रुताः । षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ १० ॥
[5]कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः । अदितिं च दितिं चैव [6]दनूमपि च कालकाम् ॥ ११ ॥
ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि । तास्तु कन्यास्ततः प्रीतः [7]कश्यपः पुनरब्रवीत् ॥ १२ ॥
पुत्रांस्त्रैलोक्यभर्तॄन्वै जनयिष्यथ मत्समान् । अदितिस्तन्मना राम दितिश्च [8]दनुरेव च ॥ १३ ॥
[9]कालका च महाबाहो शेषास्त्वमनसोऽभवन् । अदित्यां जज्ञिरे देवाद्वयस्त्रिंशदरिंदम ॥ १४ ॥

र्थैः । स्वोत्पत्तिकथनप्रसङ्गात्सर्वभूतसङ्भवमाचचक्ष इत्यर्थः । आत्मानमात्मनाम चेत्यर्थः ॥ ६ ॥

रा० टी०–रामस्येति । रामस्य वचनं श्रुत्वा कुलमात्मानं च द्विजः पक्षी तस्मै रामाय आचचक्षे अत एव सर्वभूतसङ्भवमुत्पत्तिप्रकारं चाचचक्षे ॥ ६ ॥

गो० टी०–रामस्येति । द्विजः आत्मानम् आत्मनाम ॥ ६ ॥

६] ति० टी०–पूर्वकाले ब्रह्मणोऽहरादिकाले तान्प्रजापतीन् ॥ ६ ॥

रा० टी०–उत्पत्तिवचनप्रकारमाह–पूर्वेत्यादिभिः । हे महाबाहो ! पूर्वकाले ब्रह्मणः प्रातःसमये ये प्रजापतयः अभवन् तान् निगदतो मे आदितः शृणु ॥ ६ ॥

गो० टी०–स्वोत्पत्तिं कथयिष्यन् प्रसङ्गादादौ सर्वभूतसङ्भवमाह–पूर्वकाल इत्यादि ॥ ६ ॥

७–९] ति० टी०–कर्दमाद्याः सप्तदश प्रजापतयो बभूवुः ॥ ७–९ ॥

रा० टी०–कर्दम इति । तेषां प्रजापतीनां प्रथमः पौर्वकालिकः कर्दमः तदभिधः तदनन्तरो द्वितीय इत्यर्थः विकृतः, तदभिधः तृतीयः शेषः, चतुर्थः संश्रयः, पञ्चमो बहुपुत्रः, षष्ठः स्थाणुः, सप्तमो मरीचिः, अष्टमोऽत्रिः, नवमः क्रतुः, दशमः पुलस्त्यः, एकादशोऽङ्गिराः, द्वादशः प्रचेताः, त्रयोदशः पुलहः, चतुर्दशो दक्षः, पञ्चदशो विवस्वान्, षोडशोऽरिष्टनेमिः, सप्तदशः पश्चिमः, पश्चाज्जातः कश्यपः आसीत् । श्लोकत्रयमेकान्वयि ॥ ७–९ ॥

गो० टी०–कर्दम इत्यादि । अरिष्टनेमिरिति काश्यपविशेषणम् ॥ ७–१० ॥

१०] ति० टी०–दक्षस्य षष्टिर्दुहितरो बभूवुरित्यन्वयः । महायश इति रामसंबुद्धिः ॥ १० ॥

रा० टी०–प्रजापतेरिति । हे राम ! हे महायशः ! दक्षस्य प्रजापतेस्तु षष्टिर्दुहितरः कन्याः बभूवुरिति अतः विख्याता बभूवुः ॥ १० ॥

११–१३] ति० टी०–दक्षकन्यानां कश्यपपत्नीनां नामान्याह–अदितिमित्यादि । अष्टावित्युपलक्षणम् कश्यपाय त्रयोदशेत्यन्यत्रोक्तेः, वक्ष्यमाणसंतानोपयोगिन्योऽष्टाविति वा ॥ ११–१३ ॥

रा० टी०–कश्यप इति । तासां दुहितॄणां मध्ये अदित्याद्याः अष्टौ दुहितॄः कश्यपः प्रतिजग्राह । यद्यपि कश्यपाय त्रयोदशेति भागवतेनेदं विरुध्यते तथापि वक्ष्यमाणवंशोपयोगित्वेनाष्टावेवात्र विवक्षिता इति न तद्विरोधः । सार्धश्लोक एकान्वयी ॥ ११ ॥

गो० टी०–काश्यप इति । तासां दुहितॄणां मध्ये सुमध्यमाः अष्टौ कन्याः प्रतिजग्राह पर्यणैषीत् ॥ ११ ॥

रा० टी०–ता इति । मत्समान् त्रैलोक्यभर्तॄन् त्रिलोकीभरणसमर्थान् पुत्रान् जनयिष्यथ इति ता अष्टौ कन्याः दक्षसुताः प्रीतः कश्यपः पुनरब्रवीत् ॥ १२ ॥

गो० टी०–तास्त्विति । त्रैलोक्यभर्तॄन् त्रैलोक्यरक्षणक्षमान् ॥ १२ ॥

रा० टी०–अदितिरिति । अदितिप्रभृतिः तन्मनाः कश्यपोक्तिविषयकप्रीतिमती अभवत् शेषास्तु अमनसः तदुक्तिविषयकप्रीत्यभाववत्योऽभवन् । एतेन तासां पुत्रेषु न प्रीतिरिति ध्वनितम् अत एवासां कन्यैव वंशो वक्ष्यते ॥ १३ ॥

गो० टी०–अदितिरिति । तन्मनाः तद्वचनदत्तावधानाः । कालिका चेत्यत्र चकारेण मतुरप्युच्यते तन्मना इति दितिकालिकामतुनामापि विशेषणम् चतसः प्रौढपुत्रोत्पादनमनसोऽभवन् चतसो नाभवन्नित्यर्थः ॥ १३ ॥

१४] ति० टी०–तन्मनास्तत्सदृक्पुत्राभिलाषवती । इदं दितिदनुकालकानां विशेषणम् । अमनसस्तथा मनोरथहीनाः । तत्फलं तासां कन्यासंतानं वक्ष्यति ॥ १४ ॥

रा० टी०–अदित्यामिति । आदित्यादयश्चयश्चिंशदेता अदित्यां जज्ञिरे तत्रादित्या द्वादश वसवोऽष्टौ रुद्रा एकादश अश्विनौ द्वौ ॥ १४ ॥

---

१ विश्रुत इति गो. पाठः । २ तर इति गो. रा. पाठः । ३ काश्यप इति गो. पाठः । ४ विश्रुतमिति गो. पाठः । ५ दनुमप्यथ कालिकामिति गो. पाठः । ६ मनुजर्षभेति गो. पाठः । ७ कालिकेति गो. पाठः ।

आदित्या वसवो रुद्रा [1]अश्विनौ च परंतप । दितिस्त्वजनयत्पुत्रान्दैत्यांस्तात यशस्विनः ॥ १५ ॥
तेषामियं वसुमती पुराऽऽसीत्सवनार्णवा । दनुस्त्वजनयत्पुत्रमश्वग्रीवमरिंदम ॥ १६ ॥
नरकं कालकं चैव कालकापि व्यजायत । क्रौञ्चीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम्॥१७॥
ताम्रा तु सुषुवे कन्याः पञ्चैता लोकविश्रुताः । उलूकाञ्जनयत्क्रौञ्ची भासी भासान्व्यजायत॥ १८ ॥
श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः । धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ॥ १९ ॥
चक्रवाकांश्च भद्रं ते विजज्ञे सापि भामिनी । शुकी नतां विजज्ञे तु [3]नतायां विनता सुता ॥ २० ॥
दश क्रोधवशा राम विजज्ञेऽप्यात्मसंभवाः । मृगीं च [4]मृगमन्दां च हरीं भद्रमदामपि ॥ २१ ॥
मातङ्गीमथ शार्दूलीं श्वेतां च सुरभीं तथा । सर्वलक्षणसंपन्नां सुरसां कद्रुकामपि ॥ २२ ॥
अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम । ऋक्षाश्च मृगमन्दायाः सृमराश्चमरास्तथा ॥ २३ ॥
ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम् । तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः ॥ २४ ॥
हर्यश्च हरयोऽपत्यं वानराश्च तपस्विनः । [7]गोलाङ्गूलाश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान॥ २५ ॥
मातङ्ग्यास्त्वथ मातङ्गा अपत्यं मनुजर्षभ । दिशागजं तु काकुत्स्थ श्वेता [8]व्यजनयत्सुतान्॥ २६ ॥
ततो दुहितरौ राम सुरभि[9]र्देव्यजायत । रोहिणीं नाम भद्रं ते गन्धर्वीं च यशस्विनीम् ॥ २७ ॥

गो० टी०–भर्तृवचनादरानादरफले दर्शयति–अदित्यामित्यादिना । द्वादशादित्याः अष्टौ वसवः एकादश रुद्राः अश्विनौ द्वौ एवं त्रयस्त्रिंशत् ॥ १४ ॥

१५] ति० टी०–अश्विनौ चेत्यन्तान्त्रयस्त्रिंशत् ॥ १५॥

रा० टी०–दितिरिति । हे तात ! दितिस्तु यशस्विनः दैत्यान् पुत्रान् अजनयत् इयं सवनार्णवा मही पुरा तेषामेवासीत् ॥ १५ ॥

गो० टी०–दितिस्त्विति । तेषां दितिपुत्राणाम् ॥१६-१७॥

१६–१७] ति० टी०–तेषां दितिपुत्राणाम् वनैरर्णवैश्च सहिता सवनार्णवा ॥ १६ ॥ १७ ॥

रा० टी०–दनुरिति । दनुस्तु अश्वग्रीवं पुत्रमजनयत्, नरकं कालकं च कालकापि व्यजायत अजनयत् ॥ १६ ॥

रा० टी०–क्रौञ्चीमिति । ताम्रा तु लोकविश्रुताः क्रौञ्च्याद्याः पञ्च कन्याः सुषुवे ॥ १७ ॥

१८–१९] ति० टी०–क्रौञ्चयादिसंतानमाह–उलूकानिति ॥ १८ ॥ १९ ॥

रा० टी०–ताम्राश्चतावंशमाह–उलूकानिति । क्रौञ्ची उलूकान् अजनयत् पक्षिविशेषान् व्यजायत अजनयत् । श्येनी तु सुतेजसः श्येनान् गृध्रांश्च व्यजायत ॥ १८ ॥

रा० टी०–धृतराष्ट्रीति । धृतराष्ट्री सा भामिनी तु सर्वशः हंसान् राजहंसान् कलहंसांश्च चक्रवाकांश्च विजज्ञे । श्रवणे रूढ्युत्पादनायाह ते भद्रं कल्याणम् । हे राम ! इति श्रूयतां च शेषः ॥ १९ ॥

गो० टी०–ताम्रावंशं प्रपञ्चयति–उलूकानित्यादिना । जनयदित्यत्र आगमशास्त्रस्यानित्यतया नाडागमः। अप्रसक्तकृत्तान्तानादरप्रतिषेधाय मध्ये भद्रं ते इत्युक्तिः। सा भामिनीति धृतराष्ट्रीविशेषणम् शुकी ताम्रापुत्री । विजज्ञे एवमादयोऽन्तर्भावितण्यर्थाः शब्दाः ॥ १८–२० ॥

२०] ति० टी०–संबोधननाम मध्ये मध्ये भद्रं ते इति प्रयोगः । हे राम ! ते भद्रमस्तु । श्रूयतामिति शेषः ॥ २० ॥

रा० टी०–शुकीति । शुकी तु नतां विजज्ञे । नतायास्तु विनता सुता अभवदिति शेषः ॥ २० ॥

२१–२२] ति० टी०–क्रोधवशा कश्यपपत्नी तस्या दशापत्यान्याह—मृगीं चेति ॥ २१ ॥ २२ ॥

रा० टी०–कश्यपात्रियाः ताम्रायाः सुतावंशशुक्त्वा ताम्रासपत्नीवंशमाह–दशेति । क्रोधवशा तु मृग्याद्याः दशात्मसंभवाः सुताः विजज्ञे । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०–दशेति । क्रोधवशा काश्यपपत्नी ॥२१॥२२॥

२३–२४] ति० टी०–सृमराः श्यामकेशपुच्छाः, चमराः श्वेतकेशपुच्छा इति भेदः ॥ २३ ॥ २५ ॥

रा० टी०–क्रोधवशासुतावंशमाह–अपत्यमिति । हे नरवरोत्तम ! सर्वे मृगाः मृग्याः क्रोधवशासुताया अपत्यम् । मृगमन्दायास्तु ऋक्षाः सृमराश्चमराश्च अपत्यम् ॥ २३ ॥

रा०टी०–तत इति । भद्रमदा तु इरावतीं नाम सुतां जज्ञे । तस्या इरावत्यास्तु लोकनाथः सर्वैरीप्सितः महागज ऐरावतः पुत्रो जज्ञे ॥ २४ ॥

गो०टी०–अपत्यमिति जात्येकवचनम् । सृमराः स्त्रीणां केशसहार्योपयुक्तविनीलदीर्घवालाः मृगाः, चमराः चामरकृताः, हरयः सिंहाः, मातङ्गाः गजाः ॥ २३–२६ ॥

२५–२७] ति० टी०–हरयः सिंहाः । गोलाङ्गूला इति पूर्वान्वयि ॥ २५–२७ ॥

---

१ ह्यश्विनाविति गो. पाठः । २ ऽपीति गो. पाठः । ३ नतायां इति गो. रा. पाठः । ४ ह्यात्मसंभवा इति गो. पाठः । ५ अर्धमिदं ततस्तु इत्यस्मात्पूर्वं गो. पाठे । ६ तस्त्विन इति गो. पाठः । ७ गोलाङ्गूलांश्चेति गो. पाठः । ८ अर्धमिदं गोलाङ्गूलानित्यस्मात्प्राक् गो. पाठे । ९ ऽप्यजनयदिति गो. पाठः । १० सुतामिति रा. पाठः । ११ द्वे इति गो. रा. पाठः ।

रोहिण्यजनयद्गावो गन्धर्वी वाजिनः सुतान् । सुरसाऽजनयन्नागान्राम कद्रूश्च पन्नगान् ॥ २८ ॥
मनुर्मनुष्याञ्जनयत्कश्यपस्य महात्मनः । ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्च मनुजर्षभ ॥ २९ ॥
मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा । ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुतिः॥ ३० ॥
सर्वान्पुण्यफलान्वृक्षाननलापि व्यजायत । विनता च शुकीपौत्री कद्रूश्च सुरसास्वसा ॥ ३१ ॥
कद्रूर्नागसहस्रं तु विजज्ञे धरणीधरान् । द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ॥ ३२ ॥
तस्माज्जातोऽहमरुणात्संपातिश्च ममाग्रजः । जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम ॥ ३३ ॥
सोऽहं वाससहायस्ते भविष्यामि यदीच्छसि । [इदं दुर्गं हि कान्तारं मृगराक्षससेवितम् ।]
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ॥ ३४ ॥
जटायुषं तु प्रतिपूज्य राघवो मुदा परिष्वज्य च संनतोऽभवत् ।
पितुर्हि शुश्राव सखित्वमात्मवाञ्जटायुषा संकथितं पुनः पुनः ॥ ३५ ॥

रा० टी०—हर्या इति । हर्या अपत्यं तु हरयः सिंहाः तपस्विनो विचारशीला वानराश्च । शार्दूली तु गोलाङ्गूलान् व्याघ्रांश्च सुतानजनयत् ॥ २५ ॥

रा० टी०—मातङ्ग्या इति । मातङ्ग्यास्तु मातङ्गाः गजा अपत्यम् । हे काकुत्स्थ ! दिशागजं सुतं तु श्वेता अजनयत्॥२६॥

रा० टी०—तत इति । सुरभिः रोहिणीं गन्धर्वा च द्वे दुहितरौ व्यजायत ॥ २७ ॥

गो० टी०—गोलाङ्गूलाः अत्यन्तदीर्घलाङ्गूलाः मर्कटजातिविशेषाः 'रोहिण्यजनयद्गावो वै' इति पाठः । नागाः बहुफणाः सर्पाः, पन्नगाः केवलसर्पाः ॥ २६–२८ ॥

२८] ति० टी०—गावः गा इत्यर्थः । नागा बहुफणाः सर्पाः, तदन्ये पन्नगा इति तीर्थः । निर्विषा नागाः, तदन्ये पन्नगा इति कतकः ॥ २८ ॥

रा० टी०—रोहिणीति । रोहिणी गावः गाः अजनयत् । गन्धर्वी तु वाजिनोऽश्वान् सुतानजनयत् । सुरसा तु नागान् अजनयत् । कद्रूस्तु पन्नगान् अजनयत् ॥ २८ ॥

२९] ति० टी०—जनयत् अजनयदित्यर्थः ॥ २९ ॥

रा० टी०—कोधवंशावंशमुक्त्वा तत्सपत्नीवंशमाह—मनुरिति । कश्यपस्य भी मनुस्तु ब्राह्मणादीन् चतुरो मनुष्यानजनयत् ॥ २९ ॥

गो० टी०—मनुरिति । मनुः काश्यपपत्नी पुण्यफलान् चारुफलान् । 'पुण्यं तु चारु' इत्यमरः विषवृक्षनिम्बादयोऽपि महौषधत्वेन पुण्यफला एव 'पिण्डफलान्' इति पाठे पिण्डाकारफलानीत्यर्थः । प्रायिकं चैतदिति बोध्यम् ॥ २९ ॥

३०] ति० टी०—उरसो बाहुमध्यात् । क्वचित्तु 'बाहुभ्याम्' इति पाठः ॥ ३० ॥

रा० टी०—मुखत इति । मुखादिभ्यः क्रमशो ब्राह्मणादयो जाताः इति एवंप्रतिपादिका श्रुतिः ॥ ३० ॥

३१] ति० टी०—अनलापि व्यजायतेत्यनेन कश्यपस्याष्टानामपि पत्नीनां संतानान्युक्त्वा स्ववंशप्रदर्शनायाह—विनता चेत्यादि । शुकीपौत्री शुकीपुत्री नता तस्या विनता पुत्रीत्यर्थः । सुरसा कद्रूश्च नाम्ना श्रुते ॥ ३१ ॥

रा० टी०—सर्वानिति । अनला तु पुण्यफलान् वृक्षान् व्यजायत । विनता तु शुकीपौत्री शुकी ताम्रायाः कश्यपपत्नियाः पुत्री तत्पुत्री नता तत्पुत्री विनतेत्यर्थः । कद्रूश्च सुरसाश्रुता वर्णितेति शेषः ॥ ३१ ॥

गो० टी०—एवं प्रासङ्गिकं परिसमाप्य स्वकुलमवतारयति—विनता चेति । अत्र कद्रूा उपादानं स्वप्रतिपक्षकुलत्वेनेति केचित् । वस्तुतस्तु धरणीधरशेषजनकत्वेन स्वकुलतुल्यत्वं वक्तुं कद्रूर्नागं सहस्रास्यं विजज्ञे धरणीधरमित्युक्तं श्येनीपुत्रमिति इयं च श्येनी पूर्वोक्ताया अन्या, यद्वा काश्यपश्रुता श्यनीमाता काश्यपस्य पञ्चमोऽरुणः पिता काश्यपप्रजापतिः कूटस्थ इति स्वीयवंशप्रभावो निवेदितः । विधिनिषेधयोस्तिर्यङ्क्ष्वभावान्न मातृपुत्रयोरेकवंश्यत्वादिदोषः । अयं च सृष्टिक्रमो वैवस्वतमन्वन्तरप्रकारः अतो न पुराणान्तरविरोधः ॥ ३०–३२ ॥

३२] ति० टी०—नागसहस्रम् पन्नगसहस्रमित्यर्थः । अतो नोक्तेन विरोधः ॥ ३२ ॥

रा० टी०—कद्रूरिति । कद्रूस्तु धरणीधरनागसहस्रं विजज्ञे 'सुरसाऽजनयन्नागान् रामकद्रूश्च पन्नगान्' इति पूर्वोक्तेन तु न विरोधः सुरसाया धरणीधरनामातिरिक्तनागोत्पादिकात्वेन विरोधाभावात्। विनतायास्तु गरुडोऽरुणश्च द्वौ पुत्रौ॥३२॥

३३] ति० टी०—श्येनीपुत्रमिति । नन्वाम्रापुत्र्यौ शुकीश्येन्यौ सा श्येनी शुकीपौत्रीपुत्रस्यारुणस्य कथं भार्येति चेत्, तत्संतानपरम्परापतिता अन्यैषा श्येनीत्यदोषः, विधिनिषेधयोर्मनुष्याधिकारत्वाद्वा ॥ ३३ ॥

रा० टी०—तस्मादिति । तस्मादरुणादहं जातः, संपातिस्तु मम अग्रजो ज्येष्ठभ्राता, श्येनीपुत्रं मां तु जटायुरिति विद्धि ॥ ३३ ॥

३४–३५] ति० टी०—वाससहायो वासस्थाने सीतार-

१ वै इति गो. पाठः । २ राम पुत्रान्यशस्विन इति गो. पाठः । ३ श्लोकोऽयं गो. नास्ति । ४ नागं सहस्रास्यं……धरमिति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ तमिति गो. पाठः ।

स तत्र सीतां परिदाय मैथिलीं सहैव तेनाऽतिबलेन पक्षिणा ।
जगाम तां पञ्चवटीं सलक्ष्मणो रिपून्दिधक्षन्सै वनानि पालयन् ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ।

रामादिष्टो लक्ष्मणः पञ्चवटयामनुगोदातीरमुटज निर्ममौ । दृष्ट्वा तद्रामणीयकं लक्ष्मणं श्लाघमानेन रामेण सह सीतया तत्र सुखमूषे

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् । उवाच लैक्ष्मणं रामो भ्रातरं दीप्ततेजसम् ॥ १ ॥
आगताः स्म यथोदिष्टं ४यं देशं मुनिरब्रवीत् । अयं पञ्चवटीदेशः सौम्य पुष्पितकाननः ॥ २ ॥
सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि । आश्रमः कतरस्मिन्नो देशे भवति संमतः ॥ ३ ॥

क्षणे सहायभूतः यदीच्छसि उक्तार्थमिति शेषः । तदेवाह—सीतामिति । त्वयि याते मृगयार्थम् ॥ ३४ ॥ ३६ ॥

रा० टी०—स इति । सः तव पितुः सखा अहं यदि त्वमिच्छसि तर्हि ते सहायो भविष्यामि । ततस्तंभवमाह—सलक्ष्मणे त्वयि याते कन्दमूलार्थं क्वचिद्गते सति सीतां रक्षिष्ये एतेन जटायुषः त्रिकालज्ञत्वं सूचितम् ॥ ३४ ॥

गो० टी०—सोऽहमिति । वासस्सहायः वासस्थले सीतायाः रक्षणे सहाय इत्यर्थः । यदीच्छसि उक्तार्थमिति शेषः । सहायापेक्षत्वे हेतुमाह—इदमिति । याते मृगयार्थमिति शेषः॥ ३३ ॥

रा० टी०—जटायुषमिति । जटायुषं प्रतिपूज्य परिष्वज्य च राघवः संनतः प्रसृतोऽभवत्, जटायुषा संकथितं पितुः सख्यित्वं तु पुनः पुनः शुश्राव च ॥ ३५ ॥

गो० टी०—जटायुषमिति । सत्रतौ हेतुमाह—पितुर्हीति ॥ ३४ ॥

३६] ति० टी०—परिदाय रक्षणार्थं जटायुषे इति शेषः। ' परिधाय ' इति पाठे परिवार्येत्यर्थः ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

रा० टी०—स इति । स राघवः मैथिलीं सीतां परिधाय जटायुषः परिपाल्यत्वेन स्वीकृत्य अतिबलेन पक्षिणा तेन जटायुषा सह रिपून् अनलः वह्निः शलभान् सपतङ्गानिव दिधक्षन् तां प्रसिद्धां पञ्चवटीं जगाम । 'दिधक्षन् शलभानिवानलः' इति पाठः ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

गो० टी०—स तत्रेति । सीतां तत्र परिदाय रक्षणाय जटायुषं कृत्वेत्यर्थः । "यमाय त्वा परिददाम्यसावन्तकाय त्वा परिददाम्यसौ" इत्यादौ तथा प्रयोगात् शलभानिवानल इत्यनेन लीलया विरोध्युन्मूलनाभिप्रायोऽवगम्यते ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्दशः सर्गः ॥१४॥

१] ति० टी०—' व्यालः श्वापदसर्पयोः ' इति कोशः । मृगा हरिणादयः ॥ १ ॥

रा० टी०—पञ्चवटीगमनानन्तरकालिकं वृत्तान्तमाह—तत इत्यादिभिः । ततः जटायुषः संमेलनानन्तरं नानाव्यालमृगैः आयुतां व्याप्तां पञ्चवटीं गत्वा रामः लक्ष्मणमुवाच ॥ १ ॥

गो० टी०—अथ शेषभूतरक्षोऽभिभवैकदुर्घमेव कर्तव्यमिति दर्शयति पञ्चदशे—तत इत्यादि । सौमित्रिं रामं दक्षरथं विद्धीत्यादि सुमित्रायियोगेन रामैकदुर्घोयुक्तं दीप्ततेजसं दैकदुर्घोचितदेशलाभेन संतुष्टमित्यर्थः । व्यालाः दुष्टसर्पाः ॥ १ ॥

२] ति० टी०—यं देशं मुनिरब्रवीत्, यथोदिष्टं तं देशमागताः स्मेत्यन्वयः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—आगता इति । महर्षिणा अगस्त्येन यदिष्टं बोधितमिमं देशं यथा यथावत् आगताः प्राप्ताः स्म, हे सौम्य ! पुष्पितकाननः अयमेव पञ्चवटीदेशः ॥ २ ॥

गो० टी०—आगता इति । यथोदिष्टम् अगस्त्योक्तक्रमेण आगताः स्म यं देशं मुनिरब्रवीत् सोऽयं पञ्चवटीदेश इत्यर्थः॥२॥

३] ति० टी०—दृष्टिरार्यतामित्यर्थः । निपुण आश्रमोचितदेशज्ञान इति शेषः । संमतः सीतायाः इति शेषः॥३॥

रा० टी०—सर्वत इति । यतः त्वं निपुणः निखिलकार्यकुशलः अतः कानने अस्मिन्वने सर्वतः दृष्टिः आर्यताम् प्रसार्यताम् । तत्प्रयोजनमाह—संमतः स्वस्तंमतिविषयीभूतः नोऽस्माकमाश्रमः कतरस्मिन् कस्मिन्देशे भवतु ॥ ३ ॥

गो० टी०—सर्वत इति । सर्वत्र कानने त्वया दृष्टिरार्यतां सर्वं काननमवलोक्यतामित्यर्थः । हिरैतौ, असीति त्वमित्यर्थे निपातः । यस्मात्त्वमाश्रमोचितस्थलपरिज्ञाने निपुणः तस्मा-

---

१ परिधायेति रा.पाठः। २ शलभानिवानल इति गो.रा.पाठः। ३ भ्रातरं रामः सौमित्रिमिति गो.पाठः। ४ अमुं देशं महर्षिणेति गो. इमं देशं महर्षिणेति रा.पाठः।

रमते यत्र वैदेही त्वमहं चैव लक्ष्मण । तादृशो दृश्यतां देशः संनिकृष्टजलाशयः ॥ ४ ॥
वनरामण्यकं यत्र जलरामण्यकं तथा । संनिकृष्टं च यस्मिंस्तु समित्पुष्पकुशोदकम् ॥ ५ ॥
एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः । सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥ ६ ॥
परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते । स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७ ॥
सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः । विमृशन्रोचयामास देशं सर्वगुणान्वितम् ॥ ८ ॥
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि । हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ९ ॥
अयं देशः समः श्रीमान्पुष्पितैस्तरुभिर्वृतः । इहाश्रमपदं रम्यं यथावत्कर्तुमर्हसि ॥ १० ॥
इयमादित्यसंकाशैः पद्मैः सुरभिगन्धिभिः । अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता ॥ ११ ॥

त्कृतरस्मिन् प्रदेशे सर्वेषां नः संमत आश्रमो भवतीति सर्वत्र कानने दृष्टिश्चार्यतामित्यर्थः ॥ ३ ॥

४] ति० टी०–तदेवाह—रमत इति । त्वं रमसे, अहं रमे इत्यर्थः ॥ ४ ॥

रा० टी०–रमते इति । यत्र वैदेह्यादिः रमते यत्र देशे वनरामण्यकं वनरमणीयत्वं जलरामण्यकं च यस्मिंश्च समित्पुष्पकुशोदकं संनिकृष्टं तादृशो देशः दृश्यतामवलोकनपूर्वकनिश्चयः क्रियताम् । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–सर्वसंमतत्वमुपपादयति–रमत इति । त्वं रमस इति शेषः । अहं रमे इति शेषः । सर्वरतिहेतुमाह–संनिकृष्टेति ॥ ४ ॥

५] ति० टी०–वनरामण्यकं वनस्य रमणीयत्वम् ॥ ५ ॥

गो० टी०–तदेव विवृणोति–वनेति । रामण्यकं रमणीयता "योपधाद्गुरूपोत्तमाद्वुञ्" इति वुञि प्राप्ते ईकारलोपश्छान्दस इति बोध्यम् । वनस्य रमणीयता चूतपुन्नागादिमिश्रत्वं स्थलस्य रमणीयता निम्नोन्नतत्वरहितकोमलासिकतामयत्वम् । समिदिति "जातिरप्राणिनाम्" इत्येकवद्भावः । वनरामण्यकं कुसुमाभिलाषिण्याः सीताया रतिहेतुः, स्थलरामण्यकं सुखशयनादिकाङ्क्षिणो रामस्य, सन्निकृष्टसमिदादिमत्त्वं शुश्रूषमाणस्य सौमित्रेः॥५॥

६] ति० टी०–संयताञ्जलिर्बद्धाञ्जलिः ॥ ६ ॥

रा० टी०–एवमिति । सीतासमक्षं सीतासंमुखे रामेण एवमुक्तो लक्ष्मणः इदमब्रवीत् ॥ ६ ॥

गो० टी०–एवं स्वसौख्यमप्युक्तवतो रामस्य वचनमसहमानः सौमित्रिः सीतायास्तव च यः प्रदेशो रमणीयः स एवान्वेष्यः न तु मे सौकर्यावह इत्याह–एवमिति । सीतासमक्षमिति पुरुषकारसान्निध्योक्तिः ॥ ६ ॥

७] ति० टी०–हे काकुत्स्थ! त्वयि स्थिते विद्यमाने वर्षशतमप्यहं परवानेव त्वदधीन एव न कदाचिदपि मे स्वातन्त्र्यमित्यर्थः । स्वयं तु स्वमयं रुचिरो देश इति विचार्य तत्र रुचिरे देशे क्रियतामिति वद ॥ ७ ॥

रा० टी०–परवानिति । त्वयि स्थिते सति अहं परवानस्मि अतः स्वयमेव रुचिरे देशे क्रियतां पर्णशालेति शेषः, इति वर्षशतमनेकसंवत्सरविस्तारकं मां वद । सुप्रीत इति लक्ष्मणस्य तेन वाक्येन सुप्रीतः रामः सर्वगुणान्वितं देशं विमृशन् विचारयन् सन् रोचयामास लक्ष्मणं बोधयामास ॥ ७ ॥ ८ ॥

गो० टी०–परवानिति । परवानस्मि ममास्मिता तवास्मितावत्र भवति पारतन्त्र्यैकवेषा ममास्मितेति भावः । काकुत्स्थ इदं च पारतन्त्र्यं न परत्वावस्थायामेव किंत्ववतारावस्थायामपीत्यर्थः । इदं च पारतन्त्र्यं कियत्कालं तत्राह–त्वयि वर्षशतं स्थित इति शतशब्दः आनन्त्यवचनः सार्वकालिकं मम पारतन्त्र्यमिति भावः । एवं पारतन्त्र्यस्यैव मत्स्वरूपत्वेन तदनुकूलतया त्वया आज्ञापनं कर्तव्यमित्याह–स्वयमिति । स्वयं रुचिरे देशे तवैव रमणीये प्रदेशे आश्रमः क्रियतामिति मां वद ॥ ७ ॥

८] ति० टी०–विमृशन्पर्यालोचयन् ॥ ८ ॥

गो० टी०–सुप्रीत इति । विमृशन् पर्यालोचयन् देशं कंचिदिति शेषः ॥ ८ ॥

९–१०] ति० टी०–हस्तेन स्वहस्तेन हस्ते लक्ष्मणस्य हस्ते, लक्ष्मणं गृहीत्वेत्यर्थः । अनेन स्नेहाधिक्यमन्तरङ्गत्वं स्वामित्वं च दर्शितम् ॥ ९ ॥ १० ॥

रा० टी०–बोधनप्रकारमाह–स इति । स रामः सौमित्रिं हस्तेन हस्ते गृहीत्वा आश्रमकर्मणि रुचिरं रमणीयं तं देशमाक्रम्य प्राप्य इदमब्रवीत् ॥ ९ ॥

गो० टी०–स तमिति । आक्रम्य स्वीयत्वेनाभिमन्य आश्रमकर्मणि आश्रमनिमित्तं हस्तौ कृताञ्जलिकौ स्वहस्तेन गृहीत्वाऽब्रवीत् स्नेहातिशयकृतानुभावो हस्तग्रहणम् ॥ ९ ॥

रा० टी०–तद्वचनाकारमाह–अयमिति । समः निम्नोन्नतरहितः श्रीमान् तापसयोग्यसंपत्तिविशिष्टः अयं देशोऽस्तीति शेषः, अतः इह अस्मिन्देशे अश्रमपदं श्रमनिवर्तकं स्थानं यथावत्कर्तुमर्हसि ॥ १० ॥

गो० टी०–अयमिति । समः समतलः पुष्पितैः संजातपुष्पैः यथावत् यथायोग्यम् ॥ १० ॥

११] ति० टी०–आदित्यसंकाशैः तद्वदुज्ज्वलैरिति शेषः । पद्मशोभिता पद्मश्रिया शोभायुक्ता ॥ ११ ॥

---

१ स्थलेति गो.पाठः । २ यत्र स्यादिति गो पाठः । ३ महात्मन इति गो.पाठः । ४ हस्तानिति गो. पाठः । ५ सौम्येति गो.पाठः । ६ अभिमत्येति युक्तं भाति ।

यथाख्यातमगस्त्येन मुनिना भावितात्मना । इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥ १२ ॥
सकारण्डवाकीर्णा चक्रवाकोपशोभिता । नातिदूरे न चासन्ने मृगयूथनिपीडिता ॥ १३ ॥
मयूरनादिता रम्याः प्रांशवो बहुकंदराः । दृश्यन्ते गिरयः सौम्याः फुल्लैस्तरुभिरावृताः ॥ १४ ॥
सौवर्णैः राजतैस्ताम्रैर्देशे देशे तथा शुभैः । गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १५ ॥
सालैस्तालैस्तमालैश्च खर्जूरैः पनसैर्द्रुमैः । नीवारैस्तिनिशैश्चैव पुंनागैश्चोपशोभिताः ॥ १६ ॥
चूतैरशोकैस्तिलकैः केतकैरपि चम्पकैः । पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः ॥ १७ ॥
स्यन्दनैश्चन्दनैर्नीपैः पनसैर्लकुचैरपि । धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥ १८ ॥
इदं पुण्यमिदं रम्यमिदं बहुमृगद्विजम् । इह वत्स्याम सौमित्रे सार्धमेतेन पक्षिणा ॥ १९ ॥
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा । अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ २० ॥

रा० टी०—इयमिति । आदित्यसंकाशैः सूर्यसदृशैः रक्तैरित्यर्थः, सुरभिगन्धिभिः शोभनगन्धविशिष्टैः पद्मैः रम्या पद्मशोभिता नीलकमलादिभिः शोभिता पद्मिनी सरसी अदूरे निकटे दृश्यते ॥ ११ ॥

गो० टी०—इयमिति । आदित्यसंकाशैः आदित्यविकसितैः तद्वदुज्ज्वलैर्वा । 'तुलसीकाननं यत्र यत्र पद्मवनानि च । वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः' इत्युक्तरीत्या नित्यसन्निहितहरिभिरिति वा सुरभिगन्धिभिः सौम्यगन्धयुक्तैः "गन्धस्य—" इत्यादिना इकारोन्तादेशः । 'सुरभिर्मधुमांसे स्याद्वसन्ते तावपि त्रिषु । सौम्ये सुगन्धौ क्षीरेऽम्बाम् ' इति दर्पणः । सर्वगन्धः सर्वरस इत्युक्तरीत्या सुरभिणा हरिणा गन्धिभिः गन्धवद्भिरिति वा । पद्मिनी गोदावरीसंबन्धिनी पुष्करिणी पद्मया शोभिता पद्मशोभिता "ऽथापोः संज्ञाछन्दसोर्बहुलम् " इति ह्रस्वः हरिसान्निध्येन तन्नित्यानपायिन्या श्रिया च युक्तेत्यर्थः । अनेन श्लोकेन वासयोग्यत्वमुक्तम् ॥ ११ ॥

१२] ति० टी०—यथाऽऽख्यातं तथेयं गोदावरी दृश्यत इत्यर्थः ॥ १२ ॥

रा० टी०—यथेति । पुष्पितैः तरुभिः वृता हंसकारण्डवाकीर्णा हंसैः राजहंसैः कारण्डवैः जलकुक्कुटैः आकीर्णा चक्रवाकैरुपशोभिता मृगयूथनिपीडिता पानार्थमृगसमूहैर्निषिक्ता इयं गोदावरी अगस्त्येन मुनिना यथाख्यातं तदुक्तमनतिक्रम्य रम्या नातिदूरे नच आसन्ने अतिनिकटे दृश्यते । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०—यथाख्यातमित्यादि । अगस्त्येन यथाऽऽख्यातं तथेयं गोदावरी दृश्यत इत्यनुषङ्गः ॥ १२ ॥

१३] ति० टी०—मृगयूथैः पानार्थमागतैर्निपीडिता निषिक्तेति यावत् ॥ १३ ॥

गो० टी०—नातिदूरेण चासन्न इति । अस्या गोदावर्या गिरिभिरन्वयः काकाक्षिन्यायात् । मृगेत्यादि गिरिविशेषणम् । मयूरनादिताः मयूरनादयुक्ताः इतच् प्रत्ययः । प्रांशवः उन्नताः बहुकन्दराः विपुलगुहाः ' दरी तु कन्दरो वा स्त्री देवखातबिले गुहा ' इत्यमरः । फुल्लैः विकसितपुष्पैः "अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः" इति निपातितः ॥ १३ ॥ १४ ॥

१४] ति० टी०—प्रांशव उन्नताः । फुल्लैर्विकासितपुष्पवद्भिः ॥ १४ ॥

रा० टी०—मयूरेति । मयूरनादिता मयूरशब्दविशिष्टा फुल्लैः तरुभिः आवृताः प्रांशवो अत्युन्नता बहुकन्दरा अनेकविधगुहाविशिष्टाः अत एव रम्या गिरयो दृश्यन्ते ॥ १४ ॥ १५ ॥

१५] ति० टी०—सौवर्णैः सुवर्णाभैः परमभक्तिभिर्गवाक्षिता गजा इव भक्तिभिर्गवाक्षाकारनीलपीतादिवर्णरचनारूपालंकारैरलंकृताः ॥ १५ ॥

गो० टी०—सौवर्णैरिति । देशे देशे नानादेशे वर्तमानैः सुवर्णादिसदृशैः धातुभिः परिणतत्वदृशासंक्रान्तैः गैरिकैः । ' धातवो गिरिसंभवाः ' इत्यमरः । उपलक्षिताः गजाः परमभक्तिभिः उत्कृष्टैरेवालंकारैः गवाक्षिताः संजातगवाक्षा इवाभान्ति गजानां हि गवाक्षाकाराः भक्तीः कुर्वन्ति ॥ १५ ॥

१६-१८] ति० टी०—साला आम्रविशेषाः ॥ १६-१८ ॥

रा० टी०—सालैरिति । सालादिभिर्वृक्षविशेषैरुपशोभिताः चूतादिभिः वृक्षविशेषैश्चावृताः स्यन्दनादिभिश्च वृक्षविशेषैरावृता गिरयः सन्तीति शेषः । श्लोकत्रयमेकान्वयि ॥ १६-१८ ॥

गो० टी०—प्रीत्यतिशयेन वनं वर्णयति—सालैरित्यादिना । सालैः सर्जकाख्यैर्वृक्षैः, तमालैः कालस्कन्धाख्यैः, खर्जूरैः खर्जूरवृक्षैः, पनसैः, आम्रकैः रसालभेदैः, नितारैः जलकदम्बैः, तिमिशैः नेमिद्रुमैः, पुन्नागैः तिलकैः क्षुरकवृक्षैः, गुल्माः जातिप्रभृतयः, लताः माधवीप्रभृतयः, स्यन्दनैः तिमिशभेदैः, नीपैः स्थलकदम्बकैः, पर्णासैः करिञ्जराख्यैः, लिकुचैः धवैः अश्वकर्णैः खदिरैः शमीभिः किंशुकैः पलाशैः, पाटलैः अत्र पूर्वश्लोकाद् गिरयो दृश्यन्त इत्यनुषक्तपदान्वयमन्वयः ॥ १६-१८ ॥

१९-२०] ति० टी०—इदं स्थलम् । पक्षिणा जटायुषा ॥ १९ ॥ २० ॥

१ दूरेण चेति गो. पाठः । २ निषिक्तेति गो. पाठः । ३ सौम्येति गो. पाठः । ४ च धातुभिरिति गो. पाठः । ५ खर्जूरपनसाम्रकैरिति गो. पाठः । ६ निम्बैरिस्तिमिशैरिति गो. रा. पाठः । ७ पर्णासैरिति गो. पाठः । ८ कर्णैरिति रा. पाठः । ९ मेध्यमिति गो. पाठः ।

पर्णशालां सुविपुलां तत्र [1]संघातमृत्तिकाम् । सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम्॥ २१ ॥
शमीशाखाभिरास्तीर्य दृढपाशावपाशिताम् । कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥ २२ ॥
समीकृततलां रम्यां चकार [3]सुमहाबलः । निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमम् ॥ २३ ॥
स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा । स्नात्वा पद्मानि चादाय सफलः पुनरागतः ॥ २४ ॥
ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि । दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २५ ॥
स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया । राघवः पर्णशालायां हर्षमाहारयत्परम् [4]॥ २६ ॥
सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा । अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २७ ॥
प्रीतोऽस्मि ते महत्कर्म त्वया कृतमिदं प्रभो । प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २८ ॥

रा० टी०–इदमिति । इदं पुण्यं दर्शनमात्रेण पुण्यसंपादकमिदमेव रम्यं रमणीयमिदं बहुमृगद्विजं बहवो मृगाः द्विजाः पक्षिणश्च यस्मिन् तत् अतः हे सौमित्रे ! पक्षिणा एतेन जटायुषा सार्धमिहाश्रमे वत्स्यामः ॥ १९ ॥

गो० टी०–इदमिति । पुण्यं पुण्यप्रदं मेध्यं पवित्रम् एतेन अस्माभिः सहागतेन पक्षिणा जटायुषा ॥ १९ ॥

रा० टी०–एवमिति । रामेण एवमुक्तः परवीरहा लक्ष्मणः अचिरेण शीघ्रं भ्रातुराश्रमं चकार ॥ २० ॥

गो० टी०–एवमिति । परवीरहेति क्विप् छान्दसः । आश्रमम् अङ्गणादिविस्तारवदाश्रमप्रदेशम् ॥ २० ॥

२१] ति० टी०–संघाता मृत्तिका यस्यां सा दीर्घैर्मस्करैर्वेणुभिः कृतवंशां कृतवंशकार्याम् ॥ २१ ॥

२२] ति० टी०–आस्तीर्येति तिर्यग्वंशपरिक्षेपोपरीति शेषः । दृढपाशावपाशितां दृढबन्धनबद्धाम् ॥ २२ ॥

२३] ति० टी०–तलं भूतलम् । राघवस्यार्थे निवासमेकान्तभूतं चकारेति शेषः ॥ २३ ॥

रा० टी०–आश्रमकरणप्रकारमाह–पर्णशालामित्यादिभिः । सुविपुलामतिविशालां सङ्घातमृत्तिकां सङ्घाता भित्तिरूपेण सम्यूहं प्राप्ता मृत्तिका यस्यां तां सुस्तम्भां शोभनस्तम्भविशिष्टां दीर्घैः विस्तारविशिष्टैः मस्करैर्वेणुभिः कृतवंशां कृतः वंशः वंशकार्यं यस्यां तां शमीशाखाभिः शमीशाखाः आस्तीर्य तिर्यक्पतितवंशोपरि संस्थाप्य दृढपाशावपाशितां दृढपाशैः अशिथिलरज्जुभिः अवपाशितां बद्धां कुशादिभिः सुपरिच्छादितां कृतशोभनाच्छादनां समीकृततलां समीकृतं निम्नोन्नतत्वाभावराहित्यं प्राप्तं तलमङ्गणं यस्यां तां सुशोभनामत एव रम्यां रन्तुं योग्यां पर्णशालां तत्र राघवस्यार्थे राघवस्थित्यर्थं प्रेक्षणीयं द्रष्टुं योग्यमनुत्तममत्युत्तमं निवासं च सुमहाबलो लक्ष्मणश्चकार । श्लोकत्रयमेकान्वयि ॥ २१–२३ ॥

गो० टी०–पर्णशालामित्यादि । तत्र आश्रम पर्णशालाम् दृढजं संघातमृत्तिकां भित्तिकृतमृत्तिकामित्यर्थः । मस्करैः वेणुभिः "मस्करमस्करिणौ वेणुपरिव्राजकयोः" इति निपातनात्साधुः । कृतवंशां कृतगृहोर्ध्वकाष्ठाम् 'वंशस्तु पृष्ठास्थि गृहोर्ध्वकाष्ठे वेणौ गुणे कुले' इति वैजयन्ती । वेणुमयस्तम्भोपरि प्रसारिततिर्यक्काष्ठामित्यर्थः । शमीशाखाभिरास्तीर्य तिर्यग्वेणूपरि शमीशाखाभिरास्तीर्य दृढपाशावपाशितां दृढवल्कलादिकृतपाशैरवपाशितां संजातपाशां तिर्यग्वंशैः सह शमीशाखाः दृढं बद्धेत्यर्थः, कुशकाशशरैः कुशादिरूपैः पर्णैः सुपरिच्छादितां सुशोभनं रमणीयं यथा तथा परिच्छादितां पर्णशालारूपं निवासं चकारेत्यन्वयः ॥ २१–२३ ॥

२४] ति० टी०–स गत्वेति । एवं संपादनानन्तरमिति शेषः । सफलो मार्गस्थवृक्षेभ्यो गृहीतफलः ॥ २४ ॥

रा० टी०–स इति । सः निर्मितपर्णशालः लक्ष्मणः गोदावरीं नदीं गत्वा स्नात्वा पद्मानि च आदाय सफलः फलसहितः सन् पुनरागतः ॥ २४ ॥

गो० टी०–स इति । सफलः फलानि चादायेत्यर्थः ॥२४॥

२५] ति० टी०–कृत्वा स्वयमेवेति शेषः । शान्तिं वास्तुशान्तिम् ॥ २५ ॥

रा० टी०–तत इति । ततः पुष्पायानयनानन्तरं पुष्पबलिं शान्तिं च यथाविधि कृत्वा कृतं सुसंपन्नं तदाश्रमपदं स लक्ष्मणो रामाय दर्शयामास ॥ २५ ॥

गो० टी०–तत इति । पुष्पबलिं वास्तुपूजां शान्तिम् आभ्युदयिकीं क्रियां यथाविधि वास्तुकल्पानुसारेण ॥ २५ ॥

२६–२७] ति० टी०–आहारयत्प्राप्तवान् ॥ २६ ॥२७॥

रा० टी०–स इति। स राघवः कृतं सुसंपन्नं सौम्यं समाश्रमं दृष्ट्वा पर्णशालायां परं हर्षमानन्दमाहारयत् प्राप्नोत् ॥२६॥

गो० टी०–स तमिति । पर्णशालायां विषये हर्षमाहारयत् संतोषं प्राप्तवानित्यर्थः ॥ २६ ॥

रा० टी०–सुसंहृष्ट इति । तदा कृतपर्णशालादर्शनसमये सुसंहृष्टो रामः बाहुभ्यां लक्ष्मणं गाढं परिष्वज्य अतिस्निग्धमिदं वचोऽब्रवीत् ॥ २७ ॥

गो० टी०–सुसंहृष्ट इति । अतिस्निग्धं च गाढं चेति परिष्वङ्गक्रियाविशेषणम् ॥ २७ ॥

२८] ति० टी०–ईदृशे महति कर्मणि दातुं प्रदेयोऽत्यर्थमुचितः यन्निमित्तं यत्प्रदेयनिमित्तं ते मया परिष्वङ्गः कृतः अन्यस्य देयस्याभावात् ॥ २८ ॥

१ संघातेति गो. पाठः । २ लघुविक्रम इति गो. पाठः । ३ भृशमिति गो. पाठः । ४ आरिंदमेति रा. पाठः ।

भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण । त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ २९
एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः । तस्मिन्देशे बहुफले न्यवसत्स सुखं सुखी ॥ ३० ॥
कंचित्कालं स धर्मात्मा सीतया लक्ष्मणेन च । अन्वास्यमानो न्यवसत्स्वर्गलोके यथामरः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।

उषसि गोदावर्यां स्नातुकामो लक्ष्मणः सीतारामाभ्यां प्रचलन्पर्यागत हेमन्त समयं स्मृतभरतवृत्तः कैकेयीमुपालभते । तदसहमानो रामस्त प्रतिषिध्य भरतं प्रशंसति । गोदातीरमनुगतास्ते स्नात्वोपातिष्ठन् ।

वसतस्तस्य तु सुखं राघवस्य महात्मनः । शरद्व्यपाये हेमन्तऋतुरिष्टः प्रवर्तत ॥ १ ॥
स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः । प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–प्रीत इति । हे अरिन्दम ! यन्निमित्तं यस्माद्धेतोः त्वया महत्कर्म कृतं तस्मात्ते प्रीतोऽस्मि अत एव प्रदेयः प्रीत्युत्पत्तिकाले दातुं योग्यः परिष्वङ्गः आलिङ्गनं कृतः देयवस्तुप्रतिनिधिभूतमिदमालिङ्गनमित्यर्थः ॥२८॥

गो० टी०–प्रीत इति । हे प्रभो समर्थ ! त्वया इदं महत्कर्म कृतम् अतस्ते प्रीतोऽस्मि यन्निमित्तं यदाश्रमनिर्माणनिमित्तं प्रदेयः पारितोषिकोऽस्ति तन्निमित्तं मया परिष्वङ्गः कृतः आश्चर्यभूतपर्णशालानिर्माणस्य उचितपारितोषिकान्तराभावात् परिष्वङ्गमेव दत्तवानस्मीत्यर्थः ॥ २८ ॥

२९–३१] ति० टी०–भावोऽभिप्रायः कृतमुपकारः न संवृत्तो न भूतः, किंतु जीवत्येव । पितृवदेव त्वया परिपालनादिति भावः ॥ २९–३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०–भावज्ञेनेति । भावज्ञेन अभिप्रायवेदित्रा कृतज्ञेन उपकारज्ञेन धर्मज्ञेन च पुत्रेण राजसुतेन हेतुभूतेन त्वया धर्मात्मा पिता न संवृत्तः किंचित्कार्यार्थं संस्मृतः, एतेन सकलं कार्यं त्वया साधितमिति सूचितम् ॥ २९ ॥

गो० टी०–भावज्ञेनेति । भावज्ञेन मच्चित्तज्ञेन सीतया सह रहसि स्थातुं मम स्थलं रचयेति रामो न वदेत् किंतु मनसि कुर्यादिति तदपि ज्ञातवतेत्यर्थः, कृतज्ञेन चिरमपुत्रेण दशरथेन स्वस्मिन्नादरातिशयायेन क्रमेण चन्द्रतारावलालोचनपूर्वकं गृहं निर्मापितं तेन क्रमेण तत्कृतप्रकारज्ञेनेत्यर्थः, धर्मज्ञेन स्वयं राजपुत्रोऽपि स्वोचितस्थलमकृत्वा यथा रामः संतुष्यति तथैव मया स्थातव्यमित्येवंविधधर्मज्ञेन त्वया पुत्रेण पुत्राभो नरकात्त्रायत इति पुत्रः तातो मदभिमतासिद्धिरेव स्वस्य निरय इत्यभिमेने मदभिमतकरणेन तस्य निरयनिस्तारकेण त्वयेत्यर्थः । धर्मात्मा स्वयं यावज्जीवं मदभीष्टमेव कृत्वा स्वचरमकालेऽपि मदभिमतकरणा त्वां स्थापितवान् पानीयशालाप्रवर्तकवत् मम पिता न संवृत्तः किंतु त्वमेव त्वन्मुखेन पित्रा मम सर्वाभिलषितपरिपूरणात् अहं सर्वं करिष्यामीति हि त्वयोक्तमिति भावः ॥ २९ ॥

रा० टी०–एवमिति । लक्ष्मिवर्धनो वशी[1] सकलवशकर्ता राघवः एवमुक्त्वा बहुफले देशे सखुखं यथा स्यात्तथा न्यवसत् ३०

रा० टी०–तदेव भङ्ग्यन्तरेणाह–कञ्चिदिति । सीतया लक्ष्मणेन च अन्वास्यमानः धर्मात्मा रामः कंचित्कालं न्यवसत् । स राम इव स्वर्गे लोके अमरो देवराजो न्यवसत् ॥३१॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो०टी०–एवमिति । वशी विषयचापलरहितः॥३०॥३१॥

अत्र एकत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

१–२] ति० टी०–अथ कविः शूर्पणखादर्शनं वर्णुं कामोद्दीपकं हेमन्तं वर्णयति लक्ष्मणमुखेन–वसत इति । पञ्चवट्यामिति शेषः । इष्टः रामस्येति शेषः । कामिनां च शरद्व्यपाये शरदृतुगमने हेमन्तऋतुरिति "ऋत्यक·" इति संध्यभावः भिन्नपदत्वं वा ॥ १ ॥ २ ॥

रा० टी०–पञ्चवट्यां निवसतो रामस्य वृत्तान्तरं वर्णयन्नाह–वसत इत्यादिभिः । सुखं वसतः पञ्चवट्यां निवसतः महात्मनो रामस्य शरद्व्यपाये शरदृतोरपगमे इष्टः ईप्सितः हेमन्तः ऋतुः प्रवर्तते प्रावर्तत ॥ १ ॥

गो० टी०–अथ शूर्पणखादर्शनायनर्थसूचकतया हेमन्तवर्णनं प्रस्तौति–वसत इत्यादि । इष्टः तपस्विनां तपःसाधनायेष्टः रामस्य तु खरादिराक्षसवधविजयमूलशूर्पणखागमनहेतुतयेष्टः ॥ १ ॥

१ वशीति गो. रा. पाठः । २ प्रवर्तते इति गो. रा. पाठः ।

प्रह्वः कलशहस्तस्तु सीतया सह वीर्यवान् । पृष्ठतोऽनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् ॥ ३ ॥
अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद । अलंकृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥
नीहारपरुषो लोकः पृथिवी सस्यमालिनी । जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५ ॥
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः । कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥
प्राज्यकामा जनपदाः संपन्नतरगोरसाः । विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥ ७ ॥
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् । विहीनतिलकेव स्त्री नोत्तरा प्रतिभाति ॥ ८ ॥
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सांप्रतम् । यथार्थनामा सुव्यक्तं हिमवान्हिमवान्गिरिः ॥ ९ ॥

रा० टी०—स इति । स रघुनन्दनः कदाचित्कस्मिंश्चित् समये शर्वर्यां प्रभातायां सत्यामभिषेकार्थं स्नानार्थं गोदावरीं नदीं प्रययौ ॥ २ ॥

गो० टी०—स इति । प्रभातायां विरामोन्मुखायाम् ॥३॥

३] ति० टी०—पृष्ठतः रामस्येति शेषः ॥ ३ ॥

रा० टी०—प्रह्व इति । प्रह्वः कृतनमस्कारः भ्राता सौमित्रिः सीतया सह पृष्ठतो अनुव्रजन् इदमब्रवीत् ॥ ३ ॥

४] ति० टी०—येन हेमन्तेन शुभोऽयं संवत्सरः सुपक्वसस्यादिसंपत्त्या अलंकृत इवाभाति ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—अयमित्यादिभिः । हे प्रियंवद! येन कालेन संवत्सरोऽलंकृतः पक्वसस्यादिना प्राप्ताऽलंकार इवाभाति सोऽयं ते प्रियः शुभः कालः संप्राप्तः ॥ ४ ॥

गो० टी०—अयमिति । येन हेमन्तेन ॥ ४ ॥

५] ति० टी०—हेमन्तधर्मानाह—नीहारेण परुषः कठिनस्पर्शशरीरः । वज्रादिस्पर्शसहशरीर इति कश्चित् । जलान्युपभोगः शैत्यातिशयात् सुभग इष्टः ॥ ५ ॥

रा० टी०—हेमन्तगुणानाह—नीहारेति । हेमन्त इति शेषः, लोको जनः नीहारेण परुषः कठिनस्पर्शविशिष्टशरीरः रूक्षशरीर इति कश्चित्, पृथिवी सस्यशालिनी सस्यैः शोभितेत्यर्थः । जलानि अनुपभोग्यानि शैत्यातिशयेनातिभोग्यत्वरहितानि हव्यवाहनो वह्निः सुभगोऽतिप्रिय इत्यर्थः ॥ ५ ॥

गो० टी०—नीहारेति । लोको जनः नीहारेण हिमेन परुषः परुषत्वक् सर्वत्र भवतीति शेषः । स्वभावोक्तिरलंकारः 'स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्' इति लक्षणात् ॥ ५ ॥

६] ति० टी०—काले आग्रयणानुष्ठानकाले नवाग्रयणपूजाभिर्नवान्नप्राशनाय यदाग्रयणाख्यं कर्म तदुपपूजाभिः पितॄन्देवांश्च संतर्प्य कृताग्रयणकाः सन्तो विगतकल्मषा अभवन् ॥६॥

रा० टी०—नवेति । कृतानि पूर्वकालेषु संपादितानि आग्रयणानि यैः ते सन्तः काले नवाऽऽग्रयणपूजाभिः पितृदेवता अभ्यर्च्य विगतकल्मषा भासन्निति शेषः ॥ ६ ॥

गो० टी०—नवेति । काले आग्रयणकर्मानुष्ठानकाले आग्रयणं नाम कश्चिद्वैदिकोऽयं नवान्नधान्यभोजनस्यादावनुष्ठेयः । तदुक्तमापस्तम्बेन—"नानिष्ट्वाऽऽग्रयणेनाहिताग्निर्नवस्य धान्यस्य भीयाद्व्रीहीणां यवानां श्यामाकानामग्रे पाकस्य यजेत" इति । आग्रयणरूपपूजाभिः पितृदेवता अभ्यर्च्य कृताग्रयणकाः नतु कृताग्रयणप्रतिनिधय इत्यर्थः ॥ ६ ॥

७] ति० टी०—प्राज्यं भूरि यथा भवति तथा संपन्नोऽन्नप्राप्तिविषयः कामो येषां ते प्राज्यकामाः संपन्नतरगोरसा बहुलतरक्षीरादयो जनपदाः भवन्तीति शेषः । तथाभूतेषु जनपदेषु यात्रार्थं दर्शनार्थम् ॥ ७ ॥

रा० टी०—प्राज्येति । प्राज्यकामाः प्राप्तसकलेप्सिताः संपन्नतरगोरसाः गोरसैः संपन्ना इत्यर्थः, जनपदा भवन्तीति शेषः । पात्रार्थं प्रजारक्षानिर्वाहार्थं, विजिगीषवो महीपाला विचरन्ति ॥ ७ ॥

गो० टी०—प्राज्यकामा इति । प्राज्यकामाः बहुलकामोद्रेकाः 'प्राज्यमदर्भं बहुलम्' इत्यमरः । जनपदाः जनपदस्थाः यात्रायां युद्धयात्रायाम् आस्था येषां ते यात्रास्थाः ॥ ७ ॥

८] ति० टी०—अन्तकसेवितां दिशं दक्षिणाम् ॥ ८ ॥

रा० टी०—सेवमाने इति । अन्तकसेवितां यमराजाधिष्ठितां दिशं दक्षिणामित्यर्थः, सूर्ये दृढमत्यन्तं सेवमाने सति उत्तरा दिक् विहीनतिलका सिन्दूरादिरहिता स्त्री इव न प्रकाशते ॥ ८ ॥

गो० टी०—सेवमाने इति । अन्तकसेवितां दक्षिणामित्यर्थः । अत्रोत्प्रेक्षालंकारेण दक्षिणा दिक् सतिलकेव प्रकाशत इत्युत्प्रेक्षा व्यज्यते ॥ ८ ॥

९] ति० टी०—प्रकृत्या स्वभावेन हिमकोशैर्घनीभूतहिमसमूहैराढ्यो हिमवानिति सांप्रतं यतो दूरसूर्योऽतः सुव्यक्तं प्रकटं हिमवान्तन्हिमवानिति यथार्थनामा भवति ॥ ९ ॥

रा० टी०—प्रकृत्येति । प्रकृत्या स्वभावेन हिमकोशाढ्यः हिमकोशैः कोशवत् घनीभूतहिमैः आढ्यः हिमवान् गिरिः सांप्रतम् अस्मिन्काले दूरसूर्यः सन् सुव्यक्तं यथा स्यात्तथा हिमवानिति यथार्थनामा अभवत् सूर्यस्य दूरस्थत्वात् हिमद्रवाभावेन घनीभूतहिमविशिष्टो भवतीत्यर्थः ॥ ९ ॥

गो० टी०—प्रकृत्येति । प्रकृत्या स्वभावेन हिमकोशैः घनीभूतहिमैः आढ्यः संपूर्णः सांप्रतं दक्षिणायने दूरसूर्यः अत एव हिमवान् अधिकहिमः भूमार्थे मतुप् । हिमवान् गिरिः यथार्थ-

१ तमिति गो. पाठः । २ शालिनीति गो. रा. पाठः । ३ यात्रास्था इति गो. पाठः ।

भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण । त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ २९
एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः । तस्मिन्देशे बहुफले न्यवसत्स सुखं सुखी ॥ ३० ॥
कंचित्कालं स धर्मात्मा सीतया लक्ष्मणेन च । अन्वास्यमानो न्यवसत्स्वर्गलोके यथामरः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।

उषसि गोदावर्यां स्नातुकामो लक्ष्मणः सीतारामाभ्यां प्रचलन्पर्यागतं हेमन्त संवर्ण्य स्मृतभरतवृत्तः कैकेयीमुपालभते । तदसहमानो रामस्त प्रतिषिध्य भरतं प्रशंसति । गोदातीरमनुगतास्ते स्नात्वोपातिष्ठन् ।

वसतस्तस्य तु सुखं राघवस्य महात्मनः । शरद्व्यपाये हेमन्तऋतुरिष्टः प्रवर्तत ॥ १ ॥
स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः । प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–प्रीत इति । हे अरिन्दम ! यन्निमित्तं यस्माद्धेतोः त्वया महत्कर्म कृतं तस्मात्ते प्रीतोऽस्मि अत एव प्रदेयः प्रीत्युत्पत्तिकाले दातुं योग्यः परिष्वङ्गः आलिङ्गनं कृतः देयवस्तुप्रतिनिधिभूतमिदमालिङ्गनमित्यर्थः ॥२८॥

गो० टी०–प्रीत इति । हे प्रभो समर्थ ! त्वया इदं महत्कर्म कृतम् अतस्ते प्रीतोऽस्मि यन्निमित्तं यदाश्रमनिर्माणनिमित्तं प्रदेयः पारितोषिकोऽस्ति तन्निमित्तं मया परिष्वङ्गः कृतः आश्चर्यभूतपर्णशालानिर्माणस्य उचितपारितोषिकान्तरानावात् परिष्वङ्गमेव दत्तवानस्मीत्यर्थः ॥ २८ ॥

२९–३१] ति० टी०–भावोऽभिप्रायः कृतघ्नोपकारः न संवृत्तो न भूतः, किंतु जीवत्येव । पितृवदेव त्वया परिपालनादिति भावः ॥ २९–३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०–भावज्ञेनेति । भावज्ञेन अभिप्रायवेदित्रा कृतज्ञेन उपकारज्ञेन धर्मज्ञेन च पुत्रेण राजघ्नतेन हेतुभूतेन त्वया धर्मात्मा पिता न संवृत्तः किंचित्कार्यार्थं संस्मृतः, एतेन सकलं कार्यं त्वया साधितमिति सूचितम् ॥ २९ ॥

गो० टी०–भावज्ञेनेति । भावज्ञेन मच्चित्तज्ञेन सीतया सह रहसि स्थातुं मम स्थलं रचयेति रामो न वदेत् किंतु मनसि कुर्यादिति तदपि ज्ञातवतेत्यर्थः, कृतज्ञेन चिरमपुत्रेण दशरथेन स्वस्मिन्नादरातिशयायेन क्रमेण चन्द्रतारावलालोचनपूर्वकं गृहं निर्मापितं तेन क्रमेण तत्कृतप्रकारज्ञेनेत्यर्थः, धर्मज्ञेन स्वयं राजपुत्रोऽपि स्वोचितस्थलमकृत्वा यथा रामः संतप्यति तथैव मया स्थातव्यमित्येवंविधधर्मज्ञेन त्वया पुत्रेण पुन्नाम्नो नरकात्त्रायत इति पुत्रः तातो मदभिमतासिद्धिरेव स्वस्य निरय इत्यभिमेने मदभिमतकरणेन तस्य निरयनिस्तारकेण त्वयेत्यर्थः । धर्मात्मा स्वयं यावज्जीवं मदभीष्टमेव कृत्वा स्वचरमकालेऽपि मदभिमतकरणा त्वां स्थापितवान् पापीयशालाप्रवर्तकवत् मम पिता न संवृत्तः किंतु त्वमेव त्वन्मुखेन पित्रा मम सर्वाभिलषितपरिपूरणात् अहं सर्वं करिष्यामीति हि त्वयोक्तमिति भावः ॥ २९ ॥

रा० टी०–एवमिति । लक्ष्मिवर्धनो वशी सकलवशकर्ता राघवः एवमुक्त्वा बहुफले देशे ससुखं यथा स्यात्तथा न्यवसत् ३०

रा० टी०–तदेव भङ्ग्यन्तरेणाह–कञ्चिदिति । सीतया लक्ष्मणेन च अन्वास्यमानः धर्मात्मा रामः कंचित्कालं न्यवसत् । स राम इव स्वर्गे लोके अमरो देवराजो न्यवसत् ॥३१॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो०टी०–एवमिति । वशी विषयचापलरहितः॥३०॥३१॥

अत्र एकत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

१–२] ति० टी०–अथ कविः शरत्पर्णशालादर्शनं वक्तुं कामोद्दीपकं हेमन्तं वर्णयति लक्ष्मणमुखेन—वसत इति । पञ्चवट्यामिति शेषः । इष्टः रामस्येति शेषः । कामिनां च शरद्व्यपाये शरदृतुगमने हेमन्तऋतुरिति "ऋत्यक·" इति संध्यभावः भिन्नपदत्वं वा ॥ १ ॥ २ ॥

रा० टी०–पञ्चवट्यां निवसतो रामस्य वृत्तान्तरं वर्णयन्नाह—वसत इत्यादिभिः । सुखं वसतः पञ्चवट्यां निवसतः महात्मनो रामस्य शरद्व्यपाये शरदृतोरपगमे इष्टः ईप्सितः हेमन्तः ऋतुः प्रवर्तते प्रावर्तत ॥ १ ॥

गो० टी०–अथ भाविशरत्पर्णशालादर्शनायनर्थसूचकतया हेमन्तवर्णनं प्रस्तौति–वसत इत्यादि । इष्टः तपस्विनां तपःसाधनायेष्टः रामस्य तु खरादिराक्षसवधविजयमूलशरत्पर्णशालागमनहेतुतयेष्टः ॥ १ ॥

१ वशीति गो. रा. पाठः । २ प्रवर्तते इति गो. रा. पाठः ।

प्रह्वः कलशहस्तस्तु सीतया सह वीर्यवान् । पृष्ठतोऽनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् ॥ ३ ॥
अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद । अलंकृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥
नीहारपरुषो लोकः पृथिवी सस्यमालिनी । जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५ ॥
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः । कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥
प्राज्यकामा जनपदाः संपन्नतरगोरसाः । विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥ ७ ॥
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् । विहीनतिलकेव स्त्री नोत्तरा प्रतिभाति ते ॥ ८ ॥
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सांप्रतम् । यथार्थनामा सुव्यक्तं हिमवान्हिमवान्गिरिः ॥ ९ ॥

रा० टी०—स इति । स रघुनन्दनः कदाचित्कस्मिंश्चित् समये शर्वर्यां प्रभातायां सत्यामभिषेकार्थं स्नानार्थं गोदावरीं नदीं प्रययौ ॥ २ ॥

गो० टी०—स इति । प्रभातायां विरामोन्मुखायाम् ॥३॥

३] ति० टी०—पृष्ठतः रामस्येति शेषः ॥ ३ ॥

रा० टी०—प्रह्व इति । प्रह्वः कृतनमस्कारः भ्राता सौमित्रिः सीतया सह पृष्ठतो अनुव्रजन् इदमब्रवीत् ॥ ३ ॥

४] ति० टी०—येन हेमन्तेन शुभोऽयं संवत्सरः सुपक्वसस्यादिसंपत्त्या अलंकृत इवाभाति ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—अयमित्यादिभिः । हे प्रियंवद! येन कालेन संवत्सरोऽलंकृतः पक्वसस्यादिना प्राप्तालंकार इवाभाति सोऽयं ते प्रियः शुभः कालः संप्राप्तः ॥ ४ ॥

गो० टी०—अयमिति । येन हेमन्तेन ॥ ४ ॥

५] ति० टी०—हेमन्तधर्मानाह—नीहारेण परुषः कठिनस्पर्शशरीरः । वज्रादिस्पर्शसहशरीर इति कश्चित् । जलान्युपभोगः शैत्यातिशयात् सुभग इष्टः ॥ ५ ॥

रा० टी०—हेमन्तगुणानाह—नीहारेति । हेमन्त इति शेषः, लोको जनः नीहारेण परुषः कठिनस्पर्शविशिष्टशरीरः रूक्षशरीर इति कश्चित्, पृथिवी सस्यशालिनी सस्यैः शोभितेत्यर्थः । जलानि अनुपभोग्यानि शैत्यातिशयेनातिभोग्यत्वरहितानि हव्यवाहनो वह्निः सुभगोऽतिप्रिय इत्यर्थः ॥ ५ ॥

गो० टी०—नीहारेति । लोको जनः नीहारेण हिमेन परुषः परुषत्वक् सर्वत्र भवतीति शेषः । स्वभावोक्तिरलंकारः 'स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्' इति लक्षणात् ॥ ५ ॥

६] ति० टी०—काल आग्रयणानुष्ठानकाले नवाग्रयणपूजाभिर्नवान्नप्राशनाय यदाग्रयणाख्यं कर्म तद्रूपपूजाभिः पितॄन्देवांश्च संतर्प्य कृताग्रयणकाः सन्तो विगतकल्मषा अभवन् ॥६॥

रा० टी०—नवेति । कृतानि पूर्वकालेषु संपादितानि आग्रयणानि यैः ते सन्तः काले नवाऽऽग्रयणपूजाभिः पितृदेवता अभ्यर्च्य विगतकल्मषा आसन्निति शेषः ॥ ६ ॥

गो० टी०—नवेति । काले आग्रयणकर्मानुष्ठानकाले आग्रयणं नाम कश्चिद्वैदिकयज्ञो नूतनधान्यभोजनस्यादावनुष्ठेयः । तदुक्तमापस्तम्बेन—"नानिष्ट्वाऽऽग्रयणेनाहिताग्निर्नवस्य धान्यस्याभियाद्व्रीहीणां यवानां श्यामाकानामग्रे पाकस्य यजेत" इति । आग्रयणरूपपूजाभिः पितृदेवता अभ्यर्च्य कृताग्रयणकाः नतु कृताग्रयणप्रतिनिधय इत्यर्थः ॥ ६ ॥

७] ति० टी०—प्राज्यं भूरि यथा भवति तथा संपन्नोऽन्नप्राप्तिविषयः कामो येषां ते प्राज्यकामाः संपन्नतरगोरसा बहुलतरक्षीरादयो जनपदाः भवन्तीति शेषः । तथाभूतेषु जनपदेषु यात्रार्थं दर्शनार्थम् ॥ ७ ॥

रा० टी०—प्राज्येति । प्राज्यकामाः प्राप्तसकलेप्सितताः संपन्नतरगोरसाः गोरसैः संपन्ना इत्यर्थः, जनपदा भवन्तीति शेषः । यात्रार्थं प्रजारक्षानिर्वाहार्थं, विजिगीषवो महीपाला विचरन्ति ॥ ७ ॥

गो० टी०—प्राज्यकामा इति । प्राज्यकामाः बहुलकामोद्रेकाः 'प्राज्यमदभ्रं बहुलम्' इत्यमरः । जनपदाः जनपदस्थाः यात्रायां युद्धयात्रायाम् आस्था येषां ते यात्रास्थाः ॥ ७ ॥

८] ति० टी०—अन्तकसेवितां दिशं दक्षिणाम् ॥ ८ ॥

रा० टी०—सेवमाने इति । अन्तकसेवितां यमराजाधिष्ठितां दिशं दक्षिणामित्यर्थः, सूर्ये दृढमत्यन्तं सेवमाने सति उत्तरा दिक् विहीनतिलका सिन्दूरादिरहिता स्त्री इव न प्रकाशते ॥ ८ ॥

गो० टी०—सेवमाने इति । अन्तकसेवितां दक्षिणामित्यर्थः । अत्रोत्प्रेक्षालंकारेण दक्षिणा दिक् सतिलकेव प्रकाशत इत्युत्प्रेक्षा व्यज्यते ॥ ८ ॥

९] ति० टी०—प्रकृत्या स्वभावेन हिमकोशैर्घनीभूतहिमसमूहैराढ्यो हिमवानिति सांप्रतं यतो दूरसूर्योऽतः सुव्यक्तं प्रकटं हिमवान्तन्हिमवानिति यथार्थनामा भवति ॥ ९ ॥

रा० टी०—प्रकृत्येति । प्रकृत्या स्वभावेन हिमकोशाढ्यः हिमकोशैः कोशवत् घनीभूतहिमैः आढ्यः हिमवान् गिरिः सांप्रतम् अस्मिन्काले दूरसूर्यः सन् सुव्यक्तं यथा स्यात्तथा हिमवानिति यथार्थनामा अभवत् सूर्यस्य दूरस्थत्वात् हिमद्रवाभावेन घनीभूतहिमविशेषो भवतीत्यर्थः ॥ ९ ॥

गो० टी०—प्रकृत्येति । प्रकृत्या स्वभावेन हिमकोशैः घनीभूतहिमैः आढ्यः संपूर्णः सांप्रतं दक्षिणायने दूरसूर्यः अत एव हिमवान् अधिकहिमः भूमार्थे मतुप् । हिमवान् गिरिः यथार्थ-

१ तमिति गो. पाठः । २ शालिनीति गो. रा. पाठः । ३ यात्रास्था इति गो. पाठः ।

अत्यन्तसुखसंचारा मध्याह्ने स्पर्शतः सुखाः । दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥ १० ॥
मृदुसूर्याः सनीहाराः पटुशीताः समाहिताः । शून्यारण्या हिमध्वस्ता दिवसा भान्ति सांप्रतम्॥ ११ ॥
निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः । शीतवृद्धतरायामास्त्रियामा यान्ति सांप्रतम् ॥ १२ ॥
रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः । निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३ ॥
ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते । सीतेव चातपश्यामा लक्ष्यते न च शोभते ॥ १४ ॥

नामा भवति सुव्यक्तमित्युत्प्रेक्षाव्यङ्गकं निरुक्तिश्चालंकारः 'निरुक्तियोगतो नाम्नामन्वर्थत्वप्रकल्पनम्' इति लक्षणात् ॥ ९ ॥

१०] ति० टी०–मध्याह्ने सुखः संचारो येषु ते यथा मध्याह्ने स्पर्शत आतपस्पर्शतः सुखजनकाः अत एव सुभगादित्याः सुसेव्यादित्याः छायाः सलिलानि च दुर्भगान्यसेव्यानि येषु ॥ १० ॥

रा० टी०–अत्यन्तेति । मध्याह्ने अत्यन्तसुखः अतिशयप्रदः संचारो येषु ते स्पर्शतः मध्याह्नातपस्पर्शात् सुखं येषु अत एव सुभगादित्याः सुभगः सुसेव्यः आदित्यो येषु अत एव छायासलिलदुर्भगाः छाया च सलिलानि च दुर्भगानि असेव्यानि येषु ते दिवसाः दिनानि अभवन्निति शेषः ॥ १० ॥

गो० टी०–अत्यन्तेति । मध्याह्ने स्पर्शतः उष्णस्पर्शतः सुखाः सुखकराः अत एव तदानीम् अत्यन्तसुखसंचाराः सुभगादित्याः दर्शनयोग्यादित्याः छायासलिलदुर्भगाः दुर्भगच्छायासलिलाः आहितान्यादित्वात्परनिपातः अतिशतिच्छायासलिला इत्यर्थः, भवन्तीति शेषः । स्वभावोक्तिरलंकारः ॥ १० ॥

११] ति० टी०–नीहारः सूर्यावरकं हिमम् मृदुसूर्या ईषदुष्णसूर्याः पटुशीताः शून्यारण्याः हिमनाशितपर्णत्वात् हिमध्वस्ता हिमध्वस्तपङ्कजाः ॥ ११ ॥

रा० टी०–मृदुेति । मृदुसूर्याः मृदुः सहनयोग्योष्णविशिष्टः सूर्यो येषु अत एव सनीहाराः हिमसहिताः अत एव पटुशीताः पटुः समर्थः शीतः शैत्यं येषु अत एव हिमैर्ध्वस्ताः ध्वंसकर्मीभूता जना येषु ते अत एव शून्यानि हिमध्वस्तत्वेन कोमलपत्रादिरहितानि अरण्यानि वनानि येषु ते समारुताः पवनसहिता दिवसाः सांप्रतं भान्ति ॥ ११ ॥

गो० टी०–मृदुेति । मृदुसूर्याः अकूरसूर्याः पटुशीताः प्रबलशीताः शून्यारण्याः आरण्या वनचराः तैः शून्याः आवरणरहितत्वेन शीतपीडिताः न बहिः संचरन्तीत्यर्थः । हिमध्वस्ताः हिमध्वस्तजनवन्तः शैत्येन पीण्डीभूतशरीरजना इत्यर्थः। अनेन राक्षसकृतसार्वत्रिकपीडा द्योतिता ॥ ११ ॥

१२] ति० टी०–निवृत्ताकाशशयना निवृत्तानावृतप्रदेशशयनाः पुष्यनीताः पुष्यनक्षत्रबोधितरात्रिकालपरिमाणाः, हिमारुणा हिमधूसराः । कपोतवर्णेऽप्यरुणशब्दः शीतं वृद्धतरं यासु ताः आयामा दैर्घ्यवत्यस्त्रियः रात्रयः ॥ १२ ॥

रा० टी०–निवृत्तानि आकाशे अनावृतदेशे शयनानि यासु पुष्यानीताः पुष्यनक्षत्रज्ञापिननिशाकालपरिमाणाः हिमैः अरुणाः धूसराः अत एव शीतं वृद्धतरं यासु ता एव आयामाः दैर्घ्यविशिष्टाः त्रियामा रात्रयः सांप्रतं यान्ति गच्छन्ति ॥१२॥

गो० टी०–निवृत्तेति। निवृत्ताकाशशयनाः निवृत्तचन्द्रशालाद्यनावृतप्रदेशशयनाः पुष्यनीताः पुष्यनक्षत्रयुक्ता पौर्णमासी पुष्यं तेन नीताः तत्प्रधाना इत्यर्थः, यद्वा पुष्यः पुष्यमासः तेन नीताः पुष्यमाससन्निहिता इत्यर्थः, हिमारुणाः हिमधूसराः शीताः शीतवाताः वृद्धतरा यामाः चतुर्विंशतिघटिकायुक्तत्वेनातिवृद्धतरविस्ताराः त्रियामाः रात्रयः दिनान्ते अर्धयामस्य दिनादावर्धयामस्य च दिनशेषत्वात् अनेन स्वर्गलोकोपद्रवः तामसराक्षसवृद्धिः सज्जनक्षयः कल्यनुसारिता चोक्ता । पुष्यः कलिः ॥ १२ ॥

१३] ति० टी०–रवौ संक्रान्तं सौभाग्यं सुभगत्वसुपभोग्यस्वरूपं यस्य सः । तुषारधूसरमण्डलो निःश्वासान्धो निःश्वासमलिन आदर्श इव न प्रकाशते ॥ १३ ॥

रा० टी०–रवीति । रवौ संक्रान्तं संप्राप्तं सौभाग्यं सेव्यत्वरूपसुभगत्वं यस्य सः तुषारैर्हिमकणैः अरुणं धूसरं मण्डलं यस्य स चन्द्रमाः निःश्वासेन अन्धः आदर्शो दर्पण इव न प्रकाशते ॥ १३ ॥

गो० टी०–रवीति । मन्दरश्मित्वेन संक्रान्तं संप्रवृत्तं सौभाग्यं भोग्यत्वं यस्य सः सूर्ये स्वसौभाग्यं दत्तवानित्यर्थः, तुषारैः हिमशीकरैः अरुणं रक्तं मण्डलं यस्य हिमशीकरावरणेन चन्द्रसूर्यमण्डलयोरारुण्यं प्रत्यक्षसिद्धम् । निःश्वासेन अन्धः अप्रकाशः आदर्शः दर्पणमिव उपमालंकारः अनेन रावणापहृतसर्वस्वस्य मलिनाकृतेरिन्द्रस्यावस्थोक्ता ॥ १३ ॥

१४] ति० टी०–आतपश्यामा आतपेन वैवर्ण्यं प्राप्ता सीतेव लक्ष्यते सत्तामात्रेण न तु शोभत इत्यर्थः ॥ १४ ॥

रा० टी०–ज्योत्स्नेति । आतपश्यामा घर्मसंबन्धजनितश्यामत्वविशिष्टा सीता यथा लक्ष्यते न शोभते तथा तुषारमलिना ज्योत्स्ना पौर्णमास्यां लक्ष्यते न राजते ॥ १४ ॥

गो० टी०–ज्योत्स्नेति । ज्योत्स्नी चान्द्रिकयाऽन्विता रात्रिः तुषारमलिना सती पौर्णमास्यामपि न राजते न शोभते एवंभूता सा आतपश्यामा आतपापहृतवर्णा सीतेव लक्ष्यते किंतु सीतावन्न शोभते व्यतिरेकालंकारः 'व्यतिरेको विशेषश्चेदुपमानोपमेययोः' इति तल्लक्षणम् । अनेन सीतायां भावि-

१ सनीहारा इति गो. रा. पाठः । २ मारुता इति गो. रा. पाठः । ३ ज्योत्स्नीति गो. पाठः । ४ त्विति गो. पाठः । ५ नपुंसकमत्र युक्तं भाति ।

प्रकृत्या शीतलस्पर्शो हिमविद्धश्च सांप्रतम् । प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५ ॥
बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च । शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः॥ १६ ॥
खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः । शोभन्ते किंचिदालम्बाः शालयः कनकप्रभाः ॥ १७ ॥
मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः । दूरमभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते ॥ १८ ॥
आग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः । संसक्तः किंचिदापाण्डुरातपः शोभते क्षितौ ॥ १९ ॥
अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला । वनानां शोभते भूमिर्निविष्टतरुणातपा ॥ २० ॥

रावणाभिभवः तेनापि सुरनारीजनबन्दीमोक्षणार्थत्वेनातिशयश्च व्यज्यते ॥ १४ ॥

१५] ति० टी०–प्रकृत्या शीतलस्पर्शः पश्चिमदिग्वायुः सांप्रतं हिमविद्धत्वात्काले प्रातःकाले द्विगुणशीतलः ॥ १५ ॥

रा० टी०–प्रकृत्येति । प्रकृत्या स्वभावेन शीतलस्पर्शः शैत्यस्पर्शविशिष्टः पश्चिमो वायुः सांप्रतं काले अस्मिन् समये हिमविद्धः सन् द्विगुणशीतलः स्वाभाविकशैत्यात् द्विगुणितशैत्यविशिष्टः सन् प्रवाति ॥ १५ ॥

गो० टी०–प्रकृत्येति । प्रकृत्या शीतलस्पर्शः वायौ शीतस्पर्श एव स्वभावः उष्णः स्पर्शस्त्वागन्तुक इति हृदयं, सांप्रतं हेमन्ते हिमविद्धः हिमसृक्तः काले प्रातःकाले द्विगुणशीतलः द्विरावृत्त्या शीतलः । 'अथो गुणः । रूपादौ सदभिज्ञिन्योरावृत्तीन्द्रियतन्तुषु । संख्यादावापि सत्त्वादौ त्यागादावुपसर्जनः' इति रत्नमाला । पश्चिमो वायुः पश्चिमदिग्वायुः, अनेन स्वभावतः करुणाशीलस्य अवतारकाले देवप्रार्थनोत्तम्भितकृपस्य पुनर्शून्याश्रमे द्विगुणितकरुणस्य रामस्य व्यापारः सूचितः ॥ १५ ॥

१६] ति० टी०–बाष्प ऊष्मा तेन छन्नान्यरण्यानि प्रातःकाले कूपोदकादिष्विव वनादप्यूष्मा प्रादुर्भवतीत्यनुभवप्रमाणकमिति तीर्थः । यवगोधूमाण्डुरेष्ववश्यायबिन्दुदर्शनाद्वृक्षेषु च तद्दर्शनाद्बाष्पच्छन्नानि बाष्पो नेत्रजलेऽपीत्यन्ये ॥१६॥

रा० टी०–बाष्पेति । यवगोधूमवन्ति यवगोधूमविशिष्टानि बाष्पच्छन्नानि बाष्पेण ऊष्महिमसंबन्धजनितधूमाभासेन छन्नानि नदद्भिः क्रौञ्चसारसैः उपलक्षितानि अरण्यानि वनानि सूर्ये अभ्युदिते सति शोभन्ते ॥ १६ ॥

गो० टी०–बाष्पेति । बाष्पैः ऊष्मभिः छन्नानि यथा कूपोदकेभ्यो निर्गच्छन्तो धूमाकारा बाष्पाः अनेन रामसमागमानन्तरभाव्याश्रमसमृद्धिरुच्यते, बाष्पशब्देन रामकृपोच्यते यवेत्यादिना तपःसमृद्धिः, नदद्भिरिति वेदघोषः ॥ १६ ॥

१७] ति० टी०–खर्जूरपुष्पाकृतित्वं प्रलम्बत्वेन पीतत्वेन च किंचिदालम्बाः किंचिन्नम्राः । कनकप्रभाः परिणतत्वात् ॥ १७ ॥

रा० टी०–खर्जूरेति । खर्जूरपुष्पाकृतिभिः खर्जूरपुष्पसदृशाः पीतप्रलम्बा इत्यर्थः, आकृतयो येषां तैः पूर्णतण्डुलैः पूर्णाः तण्डुला येषु तैः शिरोभिः किंचिदालम्बाः किंचिन्नताः कनकप्रभाः शालयः शोभन्ते ॥ १७ ॥

गो० टी०–खर्जूरेति । खर्जूरपुष्पाकृतिभिः तद्वत्पिशङ्गवर्णैः शिरोभिः कणिशैः कनकप्रभाः परिपक्वनालपत्रत्वात्कनकवर्णाः, अनेन मुद्राः अपि जटाभरितशिरोभिस्त्वां प्रणमन्तीति द्योतितम् ॥ १७ ॥

१८] ति० टी०–नीहारो हिमातिशयरूपो वृक्षपर्वतादर्शनसंपादनक्षमस्तत्संवृतैरुपसर्पद्भिर्मयूखैरुपलक्षितः शशाङ्कसदृश इत्यर्थः ॥ १८ ॥

रा० टी०–मयूखैरिति । हिमनीहारसंवृतैः हिमैर्नीहारैश्च संवृतैराच्छादितैः उपसर्पद्भिः चलद्भिः मयूखैः किरणैः उपलक्षितः दूरमुदितः सूर्यः शशाङ्कश्चन्द्र इव लक्ष्यते ॥ १८ ॥

गो० टी०–मयूखैरिति । हिमनीहारैः शीतलनीहारैः संवृताः तैः, अनेन बहुकालं समागतोऽपि राक्षसप्रभाभिभूततेजस्को सूदुरिव किमर्थं वर्तस इत्यर्थः सूच्यते ॥ १८ ॥

१९] ति० टी०–आग्राह्यवीर्य ईषद्ग्राह्यौष्ण्यः स्पर्शतः सुखः सुखस्पर्शः ॥ १९ ॥

रा० टी०–अग्राह्येति । पूर्वाह्णेन ग्राह्यं ज्ञातुं शक्यं वीर्यं यस्य सः मध्याह्ने स्पर्शतः स्पर्शेन सुखं यस्य सः अत एव संरक्तः अनुरागविषयीभूतः किंचिदापाण्डुः किंचित् पाण्डुरवर्णविशिष्टः आतपः क्षितौ पृथिव्यां शोभते ॥ १९ ॥

गो० टी०–अग्राह्येति । पूर्वाह्णे अग्राह्यवीर्यः अग्राह्यौष्ण्यः चन्द्रिकायमाणो वर्तत इत्यर्थः । ईषदर्थे वा नञ् अनुदरा कन्येतिवत् । तदुक्तम् 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः' इति । मध्याह्ने स्पर्शतः स्पर्शेन सुखः सुखकरः किंचित्संरक्तः किंचिदापाण्डुश्च, अनेनापि राक्षसाक्रमेऽप्यपराक्रमत्वमनुचितमिति गम्यते ॥१९॥

२०] ति० टी०–अवश्यायो हिमविन्दुः ॥ २० ॥

रा० टी०–अवश्यायेति । अवश्यायनिपातेन पतितनीहारकणेन किंचित्प्रक्लिन्नानि आर्द्रीभूतानि शाद्वलानि घासा यस्यां सा, निविष्टः प्रविष्टः तरुणातपो यस्यां सा, वनानां भूमिः शोभते ॥ २० ॥

गो० टी०–अवश्यायेति । अवश्यायः हिमं शाद्वलः शष्पप्रचुरा भूमिः "नडशादाड्वलच्" इति वलच्। अनेन राक्षसाभिभवकृतमुनिजनरोदनं रामकृपाप्रवृत्तिश्चोच्यते ॥ २० ॥

१ आनम्रा इति गो. पाठः । २ अभ्युदित इति गो. पाठः । ३ अग्राह्येति गो. रा. पाठः । ४ संरक्त इति गो. रा. पाठः ।

स्पृशन्सुविपुलं शीतमुदकं द्विरदः सुखम् । अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् ॥ २१ ॥
एते हि समुपासीना विहगा जलचारिणः । नावगाहन्ति सलिलमप्रगल्भा इवाहवम् ॥ २२ ॥
अवश्यायतमोनद्धा नीहारतमसावृताः । प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २३ ॥
बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः । हिमार्द्रवालुकास्तीरैः सरितो भान्ति सांप्रतम् ॥ २४ ॥
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च । शैत्यादगाग्रस्थमपि प्रायेण रसवज्जलम् ॥ २५ ॥
जरार्झरितैः पत्रैः शीर्णकेसरकर्णिकैः । नालशेषा हिमध्वस्ता न भान्ति कमलाकराः । २६ ॥
अस्मिँस्तु पुरुषव्याघ्र काले दुःखसमन्वितः । तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २७ ॥
त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून् । तपस्वी नियताहारः शेते शीते महीतले ॥ २८ ॥
सोऽपि वेलामिमां नूनमभिषेकार्थमुद्यतः । वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूं नदीम् ॥ २९ ॥
अत्यन्तसुखसंवृद्धः सुकुमारो हिमार्दितः । कथं त्वपररात्रेषु सरयूमवगाहते ॥ ३० ॥

२१] ति० टी०–प्रतिसंहरते करं दुस्पर्शशत्यवशादिति भावः ॥ २१ ॥

रा० टी०–स्पृशन्निति । सुविपुलमत्यन्तं शीतमुदकमत्यन्ततृषितः पिपासावान् वन्यो द्विरदो हस्ती सुखमुद्दिश्य स्पृशन्नपि करं शुण्डादण्डं प्रतिसंहरते निवर्तयति ॥ २१ ॥

गो० टी०–स्पृशन्निति । प्रतिसंहरते अतिदुःसहशैत्यवत्त्वादिति भावः । अनेनेन्द्रस्य राज्यभोगाभिलाषिणोऽपि तद्धोगभीरुत्वं सूचितम् ॥ २१ ॥

२२] ति० टी०–सङ्गपासीना जलसमीपदेशमिति शेषः । नावगाहन्ति नावगाहन्ते ॥ २२ ॥

रा० टी०–एते इति । सङ्गपासीना जलसमीपदेशवर्तिनः जलचारिणोऽपि विहगा अप्रगल्भाः भीरवो जना आहवं संग्राममिव सलिलं जलं नावगाहन्ति अवगाहन्ते ॥ २२ ॥

गो० टी०–एते हीति । सङ्गपासीनाः जलमिति शेषः । अनेन मुनीनां समाधिभङ्गो द्योत्यते । अप्रगल्भाः अधृष्टाः, आहवं युद्धम् ॥ २२ ॥

२३] ति० टी०–अवश्यायतमोभ्यां नद्धा रात्रौ नीहारतमसाऽऽवृताः प्रत्यूषे ॥ २३ ॥

रा० टी०–अवश्यायेति । अवश्यायेन हिमबिन्दुना तमसा च नद्धाः संबद्धा रात्राविति शेषः, नीहारतमसा नीहाररूपान्धकारेण आवृताः प्रातःकाले इति शेषः, तत्रान्यान्धकाराभावात् पौनरुक्त्याच्च कर्मधारय एव अत एव विपुष्पाः पुष्पाभावविशिष्टाः वनराजयः प्रसुप्ता इव लक्ष्यन्ते यदि च सूर्यतेजसो मन्दीभूतत्वेनान्धकारोऽपि स्वीक्रियते तदा न शेषप्रयोजनमिति दिक् ॥ २३ ॥

गो० टी०–अवश्यायेति । अवश्यायः हिमसलिलं स एव तमः तेन नद्धाः बद्धाः अनेन निश्चलत्वं लक्ष्यते हिमक्लिन्ना हि लता निश्चलीभवन्ति । नीहारः अजलवर्षिमहाहिमं तदेव तमः तेनावृताः अनेन प्रच्छादनपटाच्छन्नत्वं व्यज्यते विपुष्पा इत्यनेन निर्मीलिताक्षत्वमुक्तम् । अनेन वनवासिनां दैन्यातिशय उक्तः । अत्रोत्प्रेक्षालंकारः ॥ २३ ॥

२४] ति० टी०–बाष्पो धूम ऊष्मा वा ॥ २४ ॥

रा० टी०–बाष्पेति । बाष्पैर्धूमाभासैः संछन्नानि सलिलानि यासां ताः अत एव रुतेन शब्देनैव विज्ञेयाः सारसा यासु ताः सरितः सांप्रतमस्मिन् काले हिमार्द्रवालुकैः हिमेन आर्द्रा वालुका येषां तैः तीरैः भान्ति प्रकाशन्ते ॥ २४ ॥

गो० टी०–बाष्पेति । रुतं शब्दः हिमार्द्रवालुकैः हिमसिक्तसिकतैः अनेनापि ऋषिजनदैन्यमेव द्योत्यते ॥ २४ ॥

२५] ति० टी०–अगाग्रस्थं पर्वताग्रस्थम् ॥ २५ ॥

रा० टी०–तुषारेति । तुषारस्य हिमस्य पतनात् भास्करस्य मृदुत्वाच्च हेतोः शैत्यात् हेतुभूतात् अगाग्रस्थं पर्वताग्रवर्त्यपि जलं प्रायेण रसवत् स्वादुविशिष्टमित्यर्थः, प्रायेणेत्यनेन विषदष्टादिसमभिव्याहृतस्य तदभावत्वं ध्वनितम् ॥ २५ ॥

गो० टी०–तुषारेति । तुषारः हिमम् अगाग्रस्थमपि निर्मलशिलातलस्थमपि रसवत् विषवत् 'रसो रागे विषे द्रव्ये श्रृङ्गारादौ पराक्रमे' इति वाणः । शैत्यातिशयेन विषवदनुपादेयं भवतीत्यर्थः । एतेन राक्षसप्रकोपात् भवतश्चानुयोगान्मुनिमनो दुःखितं भवतीति द्योत्यते ॥ २५ ॥

२६–३०] ति० टी०–जरया कालकृतया झर्झरितानि घूर्णनानि येषां तैः शीर्णानि केसराणि कर्णिकानि च येषां तैः ॥ २६–३० ॥

रा० टी०–जरेति । जरया कालकृतान्तिमावस्थया जर्जरितैः विवर्णतां प्राप्तैः शीर्णकेशरकर्णिकैः शीर्णाः केशरकर्णिका येषु तैः पत्रैः उपलक्षिताः हिमध्वस्ताः अत एव नालशेषा नालमात्रावशिष्टाः कमलाकराः न भान्ति ॥ २६ ॥

गो० टी०–जरेति । जरया चिरप्ररूढतया जर्झरितैः वि-

१ स्पृशति गो. पाठः । २ न विगाहन्तीति गो. पाठः । ३ वालुकैस्तीरैरिति गो. पाठः । ४ जर्झरितैः पत्रैरिति गो. जर्जरितैरिति रा. पाठः । ५ नालशेषैर्हिमध्वस्तैरिति गो. पाठः । ६ व्याघ्रः इति गो. पाठः । ७ सरयूनदीमिति गो. पाठः ८ सुखोचित इति गो. पाठः । ९ त्वपरेति गो. पाठः । १० अयं श्लोकः एव युक्त इति भाति ।

पद्मपत्रेक्षणः श्यामः श्रीमान्निरुदरो महान्। धर्मज्ञः सत्यवादी च ह्रीनिषेधो जितेन्द्रियः ॥ ३१ ॥
प्रियाभिभाषी मधुरो दीर्घबाहुररिन्दमः। संत्यज्य विविधान्सौख्यानार्यं सर्वात्मना श्रितः॥३२ ॥
जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना। वनस्थमपि तापस्ये यस्त्वामनुविधीयते ॥ ३३ ॥
न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति। ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः ॥ ३४ ॥

वर्णैः जीर्णकेसरकर्णिकैः शिथिलकिञ्जल्ककर्णिकैः पद्मैर्न भान्ति स्पष्टं व्यङ्ग्यम् ॥ २६ ॥

रा० टी०–अस्मिन्निति। हे पुरुषव्याघ्र! दुःखसमन्वितः भवद्वियोगजनितदुःखाक्रान्तः धर्मात्मा भरतः त्वद्भक्त्या पुरे नन्दिग्रामे अस्मिन् समये तपश्चरति ॥ २७ ॥

गो० टी०–एवमृषिपीडातिशयेऽपि रामस्य राक्षसवधानुद्यमनुक्त्वा भरतस्य त्वदागमनव्यसनित्वात्तद्दर्शनकालोऽपि सन्निहित इत्याशयेनाह–अस्मिन्नित्यादिना। दुःखसमन्वितः त्वद्विरहादिति शेषः ॥ २७ ॥

रा० टी०–तदाकारमाह–त्यक्त्वेति। राज्यादिकं त्यक्त्वा नियताहारः सन् शीते महीतले शेते ॥ २८ ॥

गो० टी०–त्यक्त्वेति। राज्यं राजत्वं प्रभुत्वमित्यर्थः। मानं राजपुत्रोऽहमित्यभिमानं भोगान्[2] स्रक्चन्दनवनितादीन् बहूनित्यपरित्याज्यत्वमुच्यते। तपस्वी तपस्विचिह्नजटादिमान् नियताहारः फलमूलाद्यशनः। शीत इत्यनेनावरणराहित्यमुच्यते, महीतल इत्यनेन खट्वादिराहित्यम् ॥ २८ ॥

रा० टी०–स इति। अभिषेकार्थमुद्यतः स भरतोऽपि इमां वेलां समयं प्राप्य प्रकृतिभिर्वृतः सन् सरयूं नदीं नित्यं प्रयाति नूनं निश्चितमेतत् ॥ २९ ॥

गो० टी०–सोऽपीति। वेलां प्राप्येति शेषः। प्रकृतिभिरिति उपभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलमिति वक्ष्यमाणरीत्या भरतभक्त्या त्वद्भक्त्या च भरतमनुसरन्तीभिरित्यर्थः॥ २९ ॥

रा० टी०–अत्यन्तेति। अत्यन्तसुखेन संवृद्धः निरवधिकसुखवानित्यर्थः, अत एव सुकुमारो भरतः हिमार्दितः सन् अपररात्रेषु सरयूं कथमवगाहते ॥ ३० ॥

गो० टी०–अत्यन्तेति। अत्यन्तसुखसंवृद्धः राज्ञा उपलालितत्वात् सुखसंवृद्धः स्वयापि लालितत्वादत्यन्तसुखसंवृद्धः सुकुमारः भवतोऽपि दृश्यवेक्षणासहसौकुमार्यः सुखोचितः त्वया सह वस्तुं योग्यः नतु त्वद्वियोगार्हः। कथं तु आत्मौपम्येन मन्यते स्वस्य रामविरहाभावेन शैत्यानुभवः तस्य रामतापात् उपतप्तोदका नद्य इत्युक्तरीत्या नदीनामपि रामविरहेणोष्णत्वाच्च शैत्यप्रसक्तिरेव नास्ति। अपररात्रेषु यथा नववैधव्याः स्त्रियः मनुष्यसंचाराद् पूर्वमेव मनुष्यसुखमनवलोकयन्त्यो गच्छन्ति तथायमपि कैकेयीपुत्रोऽयम् एतन्निमित्त एवानर्थ इति जना वक्ष्यन्तीति भीत्या अपररात्रेष्वेव गच्छति सरयूमवगाहते निर्वेदातिशयेनातित्वरितगामिनीमपि सरयूं निर्भयोऽवगाहते अवगाहते जले निमग्नश्चेन्मनुष्यादातव्यो भवति॥ ३०॥

३१] ति० टी०–निरुदरोऽनुद्विग्नः ह्रिया परनारीविषये निषेधश्चक्षुरादीन्द्रियनिवर्तनं यस्य सः तत्र हेतुर्जितेन्द्रियत्वम् ॥ ३१ ॥

३२] ति० टी०–सौख्यान्सौख्यसाधनान् आर्यं त्वां सर्वात्मना श्रितः त्वत्सदृशव्यवहारवान् सर्वात्मना इतरव्यासङ्गत्यागपूर्वकं त्वद्विषयमननादिमानित्यर्थ इति कतकः ॥३२॥

रा० टी०–पद्मेति। पद्मपत्रेक्षणत्वादिधर्मविशिष्टो भरतः विविधान् सौख्यान् सन्त्यज्य आर्यं त्वां सर्वात्मना सर्वप्रयत्नेन आश्रितः। श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

गो० टी०–पद्मेत्यादि। निरुदरः अनुद्विग्नः ह्रीनिषेधः ह्रिया लज्जया निषेधः अकृत्येभ्यो निवर्तनं यस्य सः मधुरः मधुरवाक् सुन्दरो वा आर्यं ज्येष्ठं त्वां सर्वात्मना करणत्रयेण श्रितः ॥ ३१ ॥ ३२ ॥

३३] ति० टी०–स्वर्गो जित एव स्वाधीनः कृतः। यतो वनस्थमपि त्वां तापस्ये तापसधर्मे स्थित्वा अनुविधीयतेऽनुकरोति सेवत इत्यर्थः। धीङो दैवादिकस्य रूपम् ॥३३॥

रा० टी०–जित इति। वनस्थमपि त्वां तापस्ये स्थितो यो भरतस्त्वामनुविधीयते अनुविदधाति अनुसरति तेन तव भ्रात्रा भरतेन स्वर्गो जितः ॥ ३३ ॥

गो० टी०–जित इति। स्वर्गः रामप्राप्त्यन्तरायभूतः स्वर्गः जितः तिरस्कृतः वनस्थमपि त्वां तापस्ये तापसकर्मविषये अनुविधीयते अनुकरोति इयन्नार्षः ॥ ३३ ॥

३४] ति० टी०–द्विपदा मनुष्याः पित्र्यं स्वभावं नानुवर्तन्ते, किं तु मातृकं स्वभावमनुवर्तन्त इति प्रसिद्धो लोकवादो भरतेनान्यथा कृतः पितृस्वभाव एवाङ्गीकृतः, न मातुरित्यर्थः ॥ ३४ ॥

रा० टी०–नेति। द्विपदा मनुष्याः पित्र्यं पितृधर्मं मातृकं मातृधर्मं च नानुवर्तन्ते इति ख्यातः प्रसिद्धः लोकप्रवादः अज्ञजनोक्तिः भरतेन अन्यथा अप्रामाणिकः कृतः प्रकटितः ॥३४॥

गो० टी०–एवं प्रतिज्ञातराक्षसवधे विलम्बः कृतः भरतक्लेशेन तत्रापि शीघ्रं गन्तव्यम् अतः किमत्र कृत्यमिति सूचयित्वा सर्वस्यानर्थस्य मूलभूता कैकेयीत्याशयेनाह–न पित्र्यमित्यादिश्लोकद्वयेन। पित्र्यं पितृस्वभावं द्वे पदे येषां ते द्विपदाः मनुष्याः अन्यथाकृतः पितृस्वभाव एवानुकृतो न मातृस्वभाव इत्यर्थः। भर्तेति। साधुशब्दस्य भर्तरि भरते चान्वयः। तातृणीति पूर्वं कैकेय्युक्तस्मरणम् ॥ ३४ ॥ ३५ ॥

१ वीरः इ यामो निरुदर इति गो. पाठः। २ भोगानिति गो. पाठः।

भर्ता दशरथो यस्याः साधुश्च भरतः सुतः । कथं नु साम्बा कैकेयी तादृशी क्रूरदर्शिनी ॥ ३५ ॥
इत्येवं लक्ष्मणे वाक्यं स्नेहाद्ब्रुवति धार्मिके । परिवादं जनन्यास्तमसहन्राघवोऽब्रवीत् ॥ ३६ ॥
न तेऽम्बा मध्यमा तात गर्हितव्या कदाचन । तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ॥ ३७ ॥
निश्चितैवं हि मे बुद्धिर्वनवासे दृढव्रता । भरतस्नेहसंतप्ता बालिशीक्रियते पुनः ॥ ३८ ॥
संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च । हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ॥ ३९ ॥
कदा ह्यहं समेष्यामि भरतेन महात्मना । शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन ॥ ४० ॥
इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीम् । चक्रेऽभिषेकं काकुत्स्थः सानुजः सह सीतया ॥ ४१ ॥
तर्पयित्वाथ सलिलैस्तैः पितॄन्दैवतानपि । स्तुवन्ति स्मोदितं सूर्यं देवताश्च तथानघाः ॥ ४२ ॥

३५] ति० टी०–भरतं स्तुत्वा कैकेयीं निन्दति–भर्तेत्यादि ॥ ३५ ॥

रा० टी०–भर्तेति । यस्याः भर्ता दशरथः साधुर्भरतो यस्याः सुतः सा तादृशी साध्वी अम्बा कैकेयी क्रूरदर्शिनी क्रूरकर्मबोधनकर्त्री कथं केन हेतुना अभवदिति शेषः ॥ ३५ ॥

३६] ति० टी०–स्नेहाद्भरतरामयोः स्नेहात् ॥ ३६ ॥

रा० टी०–इतीति । लक्ष्मणे इत्येवं वाक्यं वदति सति तं लक्ष्मणोक्त्या बोधितं जनन्याः परिवादं दुर्यशः असहमानो राघवो रामः अब्रवीत् ॥ ३६ ॥

गो० टी०–इत्येवमिति । अनेन लक्ष्मणः प्रत्यूषे रामस्य ससीतस्य सरःस्नानादिक्लेशमालोक्य सुदुःखिततया कैकेयीं निन्दितुमुपक्रम्य झटिति निन्दायां क्रियमाणायां रामः कुप्येदिति प्रथमं हेमन्तस्वभावं प्रस्तुत्य तत्प्रसङ्गेन भरतमुपक्षिप्य कैकेयीं निन्दति स्मेति गम्यते। स्नेहात् रामस्नेहात् परिवादम् अपवादम् असहन् असहमानः ॥ ३६ ॥

३७] ति० टी०–न गर्हितव्या दैवकृतत्वात्तद्बुद्धेः । तामेव पूर्वोक्तामेव ॥ ३७ ॥

रा० टी०–तद्वचनाकारमाह–नेति । हे तात! मध्यमा अम्बा ते तव कथंचन न गर्हितव्या तया गर्हितं कर्म किंचिन्न कृतमिति तात्पर्यम् । अतः इक्ष्वाकुनाथस्य पितुः भरतस्य च कथां कुरु निश्चितेति वनवासे दृढव्रता निश्चिता निश्चयात्मिका मे बुद्धिः भरतस्नेहसंतप्ता सती बालिशीक्रियते शिथिलसंकल्पा क्रियत इत्यर्थः, स्वदुक्तिजनितस्मरणेनेति शेषः ॥ ३७ ॥ ३८ ॥

गो० टी०–न त इति । मध्यमा सर्वदशरथपत्न्यपेक्षया कथंचन प्रासङ्गिककथायामपि मध्यमाम्बेति स्वाभिमानद्योतनाय इक्ष्वाकुनाथस्य राजनि स्वर्गं गते अस्मासु च वनं गतेषु पूर्वतरास्मत्कुलमर्यादास्थापकस्य ॥ ३७ ॥

३८] ति० टी०–बालिशीक्रियते गुणाश्रयस्य भरतस्य वियोगमसहमाना चाञ्चल्यं प्राप्नोतीत्यर्थः ॥ ३८ ॥

गो० टी०–निश्चितेति । वनवासे निश्चिता दृढव्रतापि मे बुद्धिः भरते स्नेहसंतप्ता सती बालिशीक्रियते बालबुद्धिरिव भवति असंपूर्णेऽपि वनवासकाले तद्दर्शने संजातकुतूहला भवतीत्यर्थः ॥ ३८ ॥

३९] ति० टी०–स्नेहमेव प्रकाशयति–संस्मरामीति । प्रियाण्यपि केनचिदुच्यमानानि कर्णकठोराणि भवन्तीति मधुराणीति हृद्यानि मन्त्रवत्परहृदयबन्धनानि । सामान्यतो माधुर्यमुक्त्वातिशयेनाह–अमृतकल्पानीति अत एव मनःप्रह्लादनानि ३९

रा० टी०–संस्मरामीति । प्रियाणि प्रीत्युत्पादकानि मधुराणि कोमलाक्षरविशिष्टानि हृद्यानि मनोहराणि अत एव अमृतकल्पानि अत एव मनःप्रह्लादनानि मनसः सुखकराणि अस्य भरतस्य वाक्यानि संस्मरामि ॥ ३९ ॥

गो० टी०–स्नेहमेव प्रकाशयति–संस्मरामीत्यादिना । लोके कैश्चिदुक्तानि वाक्यानि प्रियाण्यपि कर्णकठोराणि भवन्तीति तद्व्युदासायाह–मधुराणीति हृद्यानि हृदयादनपेतानि अमृतकल्पानि शुभोदर्काणि इदानीमपि मनःप्रह्लादनानि ॥३९॥

४०–४२] ति० टी०–त्वयेत्यस्य सहित इति शेषः॥४०-४२॥

रा० टी०–कदेति । भरतादिना सह कदा समेष्यामि संस्थास्यामि एकसख्येऽपि द्वयं नास्तीति न्यायोऽत्राद्यसूत्रः॥४०॥

गो० टी०–कदेति । भरतसाहित्याभावेन विद्यमानाभ्यां सीतालक्ष्मणाभ्यामपि विरहितमात्मानं मन्यते, भरतस्नेहातिशयप्रकारोऽयम् ॥ ४० ॥

रा० टी०–इतीति । इत्येवं विलपन् विविधं कथयन् गोदावरीं प्राप्य अभिषेकं स्नानं चक्रे ॥ ४१ ॥

गो० टी०–इत्येवमिति । इत्येवं विलपन् भरतस्नेहकृतानि बहूनि वाक्यानि जल्पन्नित्यर्थः । अभिषेकं स्नानम् ॥४१॥

रा० टी०–तर्पयित्वेति । सलिलैः पितॄन् दैवतानि च तर्पयित्वा उदितं सूर्यं दैवतांश्च स्तुवन्ति स्म अनघा रामादयः॥४२॥

गो० टी०–तर्पयित्वेति । ऋषितर्पणस्याप्युपलक्षणं स्तुवन्ति स्म उपतस्थिरे "मित्रस्य–" इत्यादिमन्त्रैः, सीता स्वमन्त्रेण, देवताः संध्यादिदेवताः ॥ ४२ ॥

१ शीलेनेति गो. पाठः । २ ब्रुवतीति गो. पाठः । ३ कथंचनेति गो. रा. पाठः । ४ ऽपीति गो. पाठः । ५ त्वहमिति गो. पाठः । ६ ते इति गो. पाठः । ७ दैवतानि चेति गो. रा. पाठः । ८ समाहिता इति गो. पाठः ।

कृताभिषेकः स रराज रामः सीताद्वितीयः सह लक्ष्मणेन ।
कृताभिषेकस्त्वगराजपुत्र्या रुद्रः सनन्दिर्भगवानिवेशः ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ।

स्नात्वोपास्य संध्यां गोदातीरान्निवृत्त्योटजमागतं रामं शूर्पणखोपेत्य कस्त्वमिहोपयात इति पृच्छति । रामः स्वे कुलनामनी संश्राव्य तामपि तदेव पप्रच्छ । कथितकुलनामा सा कामाकुला सत्येतौ सीतालक्ष्मणावधुनैव चर्वयामि त्वं मां भार्यात्वे वृणिति गर्ध्यते ।

कृताभिषेको रामस्तु सीता सौमित्रिरेव च । तस्माद्गोदावरीतीरात्तेऽ जग्मुः स्वमाश्रमम् ॥ १ ॥
आश्रमं तमुपागम्य राघवः सहलक्ष्मणः । कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत् ॥ २ ॥
उवास सुखितस्तत्र पूज्यमानो महर्षिभिः । स रामः पर्णशालायामासीनः सह सीतया ॥ ३ ॥
विरराज महाबाहुश्चित्रया चन्द्रमा इव । लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ॥ ४ ॥
तदासीनस्य रामस्य कथासंसक्तचेतसः । तं देशं राक्षसी काचिदाजगाम यदृच्छया ॥ ५ ॥

४३] ति० टी०–रुद्रोपमया संहाराविष्टचित्तत्वं दर्शयति ॥ ४३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०–कृतेति । सीता द्वितीया यस्य स लक्ष्मणेन सह कृताभिषेकः कृतस्नानो राम इव अगराजपुत्र्या पार्वत्या सह कृताभिषेकः सनन्दिर्नन्दिसहितः ईशः शिवो रराज ॥४३॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षोडशः सर्गः ॥ १६ ॥

गो० टी०–कृताभिषेक इति । रुद्रः सनन्दीत्युपमया दुष्प्रधर्षत्वमुच्यते रुद्रः सविष्णुर्भगवानिवेश इति न क्वचिदपि कोशे दृश्यते कश्चिद्दृश्यत इत्याह तदा अभूतोपमेति युक्तमिति ज्ञेयम् ॥ ४३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

१] ति० टी०–ततोऽवगाहनोत्तरम् ॥ १ ॥

रा० टी०–अभिषेकानन्तरकालिकं रामादिवृत्तान्तमाह–कृताभिषेक इत्यादिभिः । ततः स्नानोत्तरकाले गोदावरीतीरात् स्वमाश्रमं रामादयो जग्मुः ॥ १ ॥

गो० टी०–एवं रामतपोविशेषद्योतनाय हेमन्तं प्रथमं प्रदर्शयन्नुपवर्ण्य ततश्चिषु संवत्सरेष्वतीतेषु कदाचिच्चैत्रमासे प्रसक्तं भाविसकलराक्षसवधनिदानत्वेन शूर्पणखावृत्तान्तमनुपक्षिपति सप्तदशे–कृताभिषेक इत्यादि । ततः अभिषेकानन्तरभाविकृत्यानन्तरम् आश्रमं तपोवनम् 'तपोवने मठे ब्रह्मचर्यादावाश्रमोऽस्त्रियाम्' इति वाणः ॥ १ ॥

२–३] ति० टी०–पौर्वाह्णिक प्रातःकालिकं, पर्णशालां वाल्माम् ॥ २ ॥ ३ ॥

रा० टी०–आश्रममिति । राघवः पौर्वाह्णिकं कर्म कृत्वा आश्रमं तमुपागम्य पर्णशालामुपागमत् प्राविशत् ॥ २ ॥

गो० टी०–आश्रममिति । पूर्वाह्णे भवं पौर्वाह्णिकं ब्रह्मयज्ञादि नित्याग्निकृत्यम् अनुदितहोमत्वेन तस्य सूर्योपस्थानानन्तरभावित्वाभावात् । पर्णशालामुपागमत् आश्रमे पर्णशालातो बहिरेव कर्तव्यमनुष्ठाय वासस्थानमगमदित्यर्थः ॥ २ ॥

रा० टी०–उवासेति । लक्ष्मणेन सह सीतया च सह आसीनः महर्षिभिः पूज्यमानः महाबाहुः सुखितः स रामः तत्र पर्णशालायामुवास चित्रया तदभिधतारया चन्द्रमा इव विरराज च कथाश्चकार च । श्लोकद्वयं संमिलितान्वयि ॥ ३ ॥४॥

गो० टी०–उवासेति । कथाः पुराणेतिहासकथाः चकार बभाषेत्यर्थः । तथा चोक्तं धातुवृत्तौ 'करोतिरभूतप्रादुर्भावे वर्तते अश्मानमितः कुरु पादं जले कुरु यः प्रथमः शकलः परापतेत् स स्वरुः कार्यः चोरंकारमाक्रोशति' इत्यादौ अवस्थापननिर्मलीकरणोपादानोच्चारणादौ प्रयोगात् चौरंकारमित्यत्र चोरशब्दस्तुषार्थेत्यर्थः, नञ्त्र चोरः क्रियते अर्थनिर्देशस्तूपलक्षणमिति ॥ ३ ॥

गो० टी०–स राम इति । चित्रया चित्रानक्षत्रेण चित्रापौर्णमास्यामिति भावः ॥ ४ ॥

४–५] ति० टी०–चित्रया चित्रानक्षत्रेण ॥ ४ ॥ ५ ॥

रा० टी०–तदेति । तदा तस्मिन् काले कथासंसक्तचेतसः आसीनस्य रामस्य तं देशं पर्णशालां काचित् राक्षसी यदृच्छया जगाम ॥ ५ ॥

गो० टी०–तथेति । रामस्यासीनस्य रामे आसीने ॥५॥

१ ऽभिषेको गिरिराजेति गो. पाठः । २ नन्दीति गो. पाठः । ३ एतदाद्यर्धत्रयं व्यत्यस्तं गो. पाठे । ४ तथेति गो. पाठः ।

सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः । भगिनी राममासाद्य ददर्श त्रिदशोपमम् ॥ ६ ॥
[[1]सिंहोरस्कं महाबाहुं पद्मपत्रनिभेक्षणम् । आजानुबाहुं दीप्तास्यमतीवप्रियदर्शनम् ॥]
[2]दीप्तास्यं च महाबाहुं पद्मपत्रायतेक्षणम् । गजविक्रान्तगमनं जटामण्डलधारिणम् ॥ ७ ॥
सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् । राममिन्दीवरश्यामं कन्दर्पसदृशप्रभम् ॥ ८ ॥
बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता । सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ॥ ९ ॥
विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा । [3]प्रियरूपं विरूपा सा सुस्वरं भैरवस्वना ॥ १० ॥
तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी । न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ॥ ११ ॥
शरीरजसमाविष्टा राक्षसी राममब्रवीत् । जटी तापसवेषेण सभार्यः शरचापधृक् ॥ १२ ॥
आगतस्त्वमिमं देशं कथं राक्षससेवितम् । किमागमनकृत्यं ते तत्त्वमाख्यातुमर्हसि ॥ १३ ॥
एवमुक्तस्तु राक्षस्या शूर्पणख्या परंतपः । ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १४ ॥
[अनृतं नहि रामस्य कदाचिदपि संमतम् । विशेषेणाश्रमस्थस्य समीपे स्त्रीजनस्य च ॥]
आसीदशरथो नाम राजा त्रिदशविक्रमः । तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः ॥ १५ ॥
भ्रातायं लक्ष्मणो नाम यवीयान्मामनुव्रतः । इयं भार्या च वैदेही मम सीतेति विश्रुता ॥ १६ ॥

६] ति० टी०–शूर्पणखा " नखमुखात्संज्ञायाम् " इति ङीषोऽभावः ॥ ६ ॥

रा० टी०–सेति । शूर्पणखा नाम दशग्रीवस्य रक्षसः सा प्रसिद्धा भगिनी राममासाद्य ददर्श ॥ ६ ॥

गो० टी०–राक्षसीमृषिविशेषयति–सेति । राममासाद्य ददर्श रामं दृष्ट्वा आससादेत्यर्थः, समानकर्तृकत्वमात्रे ल्यप् ॥ ६ ॥

७] ति० टी०–दीप्तास्यं कान्तिमन्मुखं गजस्येव मन्दतया विक्रान्तं गमनं यस्य ॥ ७ ॥

रा० टी०–दीप्तास्यमिति । दीप्तं प्रकाशितमास्यं मुखं यस्य गजस्य विक्रान्तं गमनमिव गमनं यस्य तम् ॥ ७ ॥

गो० टी०–सिंहोरस्कमित्यादि । सिंहोरस्कं सिंहशब्दः श्रेष्ठवाची विशालोरस्कमित्यर्थः । महासत्त्वं महाबलं पार्थिवव्यञ्जनानि राजलक्षणानि कामकृतमोहहेतवो विशेषणानि ॥ ७-९ ॥

८] ति० टी०–व्यञ्जनं लक्षणम् ॥ ८ ॥

रा० टी०–महासत्त्वं समातिशयरहितबलविशिष्टं पार्थिवव्यञ्जनानि महाराजलक्षणानि तैरन्वितं युक्तमिन्द्र उपमा उपमेयं यस्य तं रामं दृष्ट्वा राक्षसी शूर्पणखा काममोहिता बभूव । सार्धश्लोकद्वयमेकान्वयि ॥ ८ ॥

९–१०] ति० टी०–सुमुखमित्यादि । विषमालंकारोऽत्र ॥ ९ ॥ १० ॥

रा० टी०–सुमुखमिति । सुमुखं शोभनवदनवन्तं वृत्तं सूक्ष्मं मध्यं यस्य तम् ॥ ९ ॥

रा० टी०–प्रियरूपं सर्वप्रीतिविषयीभूतरूपविशिष्टम् ॥ १० ॥

गो० टी०–तत्यास्तस्मिन् मनःप्रवृत्तिं मुनिः परिहसति–सुमुखमित्यादिना । वृत्तमध्यं तनुमध्यं विरूपाक्षी विकटनेत्री सुकेशं नीलकेशं प्रीतिरूपं प्रियरूपं प्रीयत इति प्रीतिः विरूपा विकटरूपा सुस्वरं स्निग्धगम्भीरस्वरं तरुणं युवानं सौम्यं चेत्यर्थः, दारुणेति प्रतियोगिनिर्देशात् दक्षिणम् ऋजुभाषिणं वामभाषिणी वक्रभाषिणी न्यायवृत्तम् उचिताचारं शरीरजो मन्मथः ॥ १०–१२ ॥

११] ति० टी०–दारुणा अदारुणमिति शेषः । दक्षिणं शुभाषिणं वामभाषिणी दुष्टभाषिणी ॥ ११ ॥

रा० टी०–दक्षिणं शोभनभाषणकुशलं न्याय्यं न्याय्यविशिष्टं वृत्तं वर्तनं यस्य त प्रियं सर्वप्रीतिविषयीभूतदर्शनवन्तं राममभिरामदातारं रामं दुर्मुखा दुष्टमुखादिविशिष्टा राक्षसी शूर्पणखा शरीरजसमाविष्टा कामप्रविष्टा सती अब्रवीत् ॥ ११ ॥

१२] ति० टी०–शरीरजः कामः ॥ १२ ॥

१३] ति० टी०–तत्त्वं यथा तथाऽऽख्यातुमर्हसि ॥ १३ ॥

रा० टी०–तदाकारमाह–जटीत्यादिभिः । तापसवेषेणोपलक्षितः अत एव जटी त्वं राक्षससेवितमिमं देशं कथं केन हेतुना आगतोऽसि ते आगमनकृत्यमागमनेन साध्यं च किमस्ति तत् त्वमाख्यातुमर्हसि । सार्धश्लोक एकान्वयी ॥ १२ ॥ १३ ॥

गो० टी०–जटीति । तापसरूपेण जटी, काम्यकरूपेण सभार्यः, क्षत्रियरूपेण शरचापधृत् । राक्षससेवितम् एतद्रूपासद्भिः सेवितमित्यर्थः ॥ १३ ॥

१४–१६] ति० टी–शूर्पनख्येति यौगिकम् । ऋजुबुद्धितया तयैव ॥ १४–१६ ॥

रा० टी०–एवमिति । शूर्पणख्या एवमुक्तः परन्तपो रामः ऋजुबुद्धितया सरलस्वभावेनेत्यर्थः, आख्यातुमुपचक्रमे ॥ १४ ॥

१ श्लोकोऽयमधिकः गो. पाठे । २ अर्धमेतत् गो. नास्ति । ३ प्रीतिरूपमिति गो. पाठः । ४ स्वरेति गो. पाठः । ५ नाक्यमिति गो. पाठः । ६ रूपेणेति गो. पाठः । ७ भुदिति गो. पाठः । ८ श्लोकोऽयमधिकः गो. पाठे । ९ अत्र ङीषोऽभावः साधुरिति भाति ।

नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः । धर्मार्थं धर्मकाङ्क्षी च वनं वस्तुमिहागतः ॥ १७ ॥
त्वां तु वेदितुमिच्छामि कस्य त्वं कासि कस्य वा । त्वं हि तावन्मनोज्ञाङ्गी राक्षसी प्रतिभासि मे ॥ १८ ॥
इह वा किंनिमित्तं त्वमागता ब्रूहि तत्त्वतः । साऽब्रवीद्वचनं श्रुत्वा राक्षसी मदनार्दिता ॥ १९ ॥
श्रूयतां राम तत्त्वार्थं वक्ष्यामि वचनं मम । अहं शूर्पणखा नाम राक्षसी कामरूपिणी ॥ २० ॥
अरण्यं विचरामीदमेका सर्वभयंकरा । रावणो नाम मे भ्राता यदि ते श्रोत्रमागतः ॥ २१ ॥
वीरो विश्रवसः पुत्रो यदि ते श्रोत्रमागतः । प्रहृद्धनिद्रश्च सदा कुम्भकर्णो महाबलः ॥ २२ ॥
विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः । प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥ २३ ॥
तानहं समतिक्रान्ता राम त्वापूर्वदर्शनात् । समुपेतास्मि भावेन भर्तारं पुरुषोत्तमम् ॥ २४ ॥

रा० टी०—तदाख्यानमेवाह—आसीदित्यादिभिः । त्रिदशेषु देवेषु विक्रमः प्रसिद्धः पराक्रमो यस्य स दशरथो नाम आसीत् । अग्रजो ज्येष्ठः जनैः श्रुतः प्रख्यातः रामो नाम तस्य दशरथस्य पुत्रोऽहमस्मि ॥ १६ ॥

रा० टी०—भ्रातेति । यवीयान् कनिष्ठः लक्ष्मणो नामायं भ्राता मामनुव्रतः मदनुचरणशील इत्यर्थः । सीतेति नाम्ना विश्रुता ख्याता इयं वैदेही मम भार्या ॥ १६ ॥

गो० टी०—एवमिति । शूर्पनख्येति छान्दसो दीर्घणत्वाभावौ । ऋजुबुद्धितया कुटिलेष्वप्यकुटिलबुद्धितया आश्रमस्थस्य तपोवनस्थस्य ॥ १५–१६ ॥

गो० टी०—आसीदित्यादि । यवीयान् कनिष्ठः अनुव्रतः अनुसरणं व्रतं यस्य सः ॥ १६ ॥ १७ ॥

गो० टी०—वैदेही विदेहराजपुत्री मातुः कैकेय्याः यन्त्रितः नियतः चोदित इति यावत् ॥ १८ ॥

१७] ति० टी०—नियोगादाज्ञाबलाद्यन्त्रितो नियतः । धर्मकाङ्क्षी पितृवाक्यनिर्वहणरूपधर्माभिलाषी धर्मार्थं तस्यैव धर्मस्य परिपालनाय ॥ १७ ॥

रा० टी०—नियोगादिति । नरेन्द्रस्य पितुर्मातुश्च धर्मार्थं नियोगात् आज्ञातः अत एव यन्त्रितः एकाग्रचित्तो धर्मकाङ्क्षी अहं वनं वस्तुमिहागतः ॥ १७ ॥

गो० टी०—धर्मकाङ्क्षी पितृवाक्यपालनरूपधर्मकाङ्क्षी धर्मार्थं तपोरूपधर्मसिद्ध्यर्थं वनं वस्तुं यन्त्रितः सन्निहागत इत्यन्वयः। कासीति नामजातिप्रभः कस्येति पित्रादिविषयः प्रभः ॥ १९ ॥

१८] ति० टी०—कस्य त्वं कन्येति शेषः । कासि किंनामासि कस्य वंशजेति शेषः । राक्षसी एवं मनोज्ञाङ्गत्वस्य कामरूपत्वं विनाऽसंभवात् कामरूपत्वं च राक्षसीत्वं विना नेति भावः ॥ १८ ॥

रा० टी०—त्वामिति । त्वं कस्य कन्यासि कासि किंनामासि कस्य भार्यासीति त्वां वेदितुं ज्ञातुमिच्छामि । नन्वत्वमेव स्वबुद्ध्या मां जानीहीत्यत आह—मनोज्ञाङ्गी राक्षसानां मनोहारिणी राक्षसी त्वं मे प्रतिभासि सामान्यतो मया ज्ञातमिति सूचितं तेन विशेषं ब्रूहीति ध्वनितम् ॥ १८ ॥

गो० टी०—न हीति । तावत्कात्स्न्येन मनोज्ञाङ्गी न भवसि मां प्रति राक्षसीति प्रतिभासि । यद्वा राक्षससेवित इति तद्वचनात् राक्षसीत्वमित्याशङ्क्य परिहरति—मनोज्ञाङ्गी त्वं राक्षसीति न प्रतिभासीति रामदर्शनकाले तथारूपं कृतवती कामरूपत्वात् । दुर्मुखीत्यादिकं वास्तवाभिप्रायेण मुनिनोक्तमिति शेयम् ॥ २० ॥

१९–२०] ति० टी०—मदनार्दिता रामदर्शनादिति शेषः ॥ १९ ॥ २० ॥

रा० टी०—इहेति । इह मत्समीपे किंनिमित्तं त्वमागता इति तत्त्वतो ब्रूहि वचनमिति रामवाक्यं श्रुत्वा मदनार्दिता सा राक्षसी अब्रवीत् ॥ १९ ॥

गो० टी०—सेति । तत्त्वार्थं परमार्थम् ॥ २१ ॥

रा० टी०—तद्वचनाकारमाह—श्रूयतामिति । हे राम ! तत्त्वार्थमहं वक्ष्यामि अतो मम वचनं श्रूयताम् । तद्वचनाकारमाह—कामरूपिणी ईप्सितरूपधारणसमर्था शूर्पणखा नाम राक्षसी अहमस्मि ॥ २० ॥

गो० टी०—अहमिति । कामरूपिणी इतोऽप्यधिकरूपधारणे समर्था सर्वभयंकरेति वक्ष्यमाणरतिप्रतिबन्धकनिवारणक्षमतोक्ता ॥ २२ ॥

२१] ति० टी०—यदि ते श्रोत्रमागतः प्रायः श्रुत एव भविष्यतीति भावः ॥ २१ ॥

रा० टी०—अरण्यमिति । एका सहायान्तररहिता सर्वभयङ्करा अहं इदमरण्यं विचरामि यदि कदाचित् राक्षसकथाप्रसङ्गे ते श्रोत्रं श्रवणपथमागतः रावणो नाम मे भ्राता ॥२१॥

गो० टी०—कासीति प्रभस्योत्तरमुक्त्वा कस्येत्यस्य प्रभस्योत्तरमाह—रावण इत्यादिना ॥ २३ ॥

२२–२३] ति० टी०—सदा प्रहृद्धनिद्र इत्यन्वयः । भ्रातरौ खरदूषणौ। विभीषणवन्निशिरा अराक्षसस्वभावत्वान्नोक्तः२२॥२३

२४] ति० टी०—तान्रावणादीन्वीर्येण समतिक्रान्ता

१ कथ्यतामिति गो. पाठः । २ नेति गो. पाठः । ३ राक्षसी राक्षसापि इति ख. वलंत्याराक्षसेश्वर इति गो. पाठः । ४ सोऽयमिति ख. पाठः । ५ एतदाद्यर्धं व्यत्यस्ते रा. पाठे ।

अहं प्रभावसंपन्ना स्वच्छन्दबलगामिनी । चिराय भव भर्ता मे सीतया किं करिष्यसि ॥ २५ ॥
विकृता च विरूपा च न [1]सेयं सदृशी तव । अहमेवानुरूपा ते भार्यारूपेण पश्य माम् ॥ २६ ॥
इमां विरूपामसतीं करालां निर्णतोदरीम् । अनेन सह ते भ्रात्रा भक्षयिष्यामि मानुषीम् ॥ २७ ॥
ततः पर्वतशृङ्गाणि वनानि विविधानि च । पश्यन्सह मया [2]कामी दण्डकान्विचरिष्यसि ॥ २८ ॥
इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणाम् । इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तदशः सर्गः ॥ १७ ॥

ततोऽधिका, अतस्तान्समतिक्रान्ता त्वदभिसरणे तन्निमित्तभयरहितेत्यादृत्या योज्यम् । हे राम ! त्वा त्वां पूर्वदर्शनात्प्रथमदर्शनक्षणमारभ्य यद्वा पूर्वदर्शनादेवादिष्टितः प्रागदृष्टदिव्यत्वद्रूपदर्शनादेतोर्भावेन त्वां पुरुषोत्तमं भर्तारं सर्वजगतां भर्तारं सम्पेताऽस्मि ॥ २४ ॥

रा० टी०—धर्मात्मा नित्यं धर्मबुद्धिः अत एव राक्षसचेष्टितः राक्षसाचरणो न विभीषणोऽपि मे भ्राता, महाबलः प्रदृढनिद्रः नित्यं शयनशीलः कुम्भकर्णोऽपि मे भ्राता । श्लोकद्वयमेकान्वयि ॥ २२ ॥

रा० टी०—प्रख्यातेति । रणे प्रख्यातवीर्यौ खरदूषणौ च मम भ्रातरौ । अर्धं पृथक्—तानिति । तान् रावणादीन् समतिक्रान्ता तेभ्योऽपि बलवतीत्यर्थः, अहं अपूर्वदर्शनादेतोः भावेनातिप्रेम्णा पुरुषोत्तमं त्वा त्वां भर्तारं कर्तुं सम्पेतास्मि॥२३॥

गो० टी०—कुम्भकर्णश्च मे भ्रातेत्यन्वयः । विभीषणस्तु तस्य विशेषोऽस्ति सोऽपि मे भ्रातेत्यर्थः । तं विशेषमाह—धर्मात्मेति । धर्मात्मा धर्मस्वभावः राक्षसचेष्टितो न जन्मना राक्षसोऽपि न राक्षसव्यापार इत्यर्थः ॥ २४ ॥

गो० टी०—एतदेशागमने निमित्तमाह—प्रख्यातेति । खरदूषणौ जनस्थानस्थाविति शेषः । एवं भ्रातृकथनेन रामस्य स्वपरिग्रहे भीतिर्मा भूदित्यत आह—तानहमिति । अतिक्रान्ता अतिक्रम्य वर्तमाना स्वच्छन्दचारिणीत्यर्थः । त्वा त्वां पूर्वदर्शनात् प्रथमदर्शनमारभ्य अपूर्वदर्शनादिति वा छेदः देवदानवमर्त्येष्वितः पूर्वमदृष्टत्वद्रूपदर्शनादेतोः भावेन हृदयेन रत्याख्यभावेन वा भर्तारं सम्पेतास्मि । तत्र हेतुः पुरुषोत्तममिति॥२३॥

२५] ति० टी०—प्रभावसंपन्ना प्रकृष्टेन भावेन शक्त्यतिशयेन संपन्ना, यद्वा प्रभावेण शक्त्यतिशयेन संपन्ना अत एव स्वच्छन्देन स्वेच्छया बलेन च सर्वलोकगमनशीला । यदेवमतः—चिरायेति ॥ २५ ॥

रा० टी०—अहमिति । प्रभावेण अतितेजसा संपन्ना अत एव स्वच्छन्दबलगामिनी स्वच्छन्दं स्वाधीनं यद्बलं तेन गन्तुं शीला यतोऽहमस्मि अतः चिराय बहुकालपर्यन्तं मे भर्ता भव सीतया किं फलं करिष्यसि ॥ २५ ॥

गो० टी०—सीतायां विद्यमानायां किं त्वयेत्यत्राह—अहमिति । स्वच्छन्दबलगामिनी स्वेच्छानुगुणबलगमना च ॥२५॥

२६] ति० टी०—आत्मनो देवयोनिभेदत्वेनाभिमतग्रहणसामर्थ्याभिमानेन स्वस्मिन्रामप्रवृत्तये सीतादूषणमाह—विकृता चेति । विकृता मायास्वरूपतया परिणामाख्यविकारवती विरूपा नानारूपोपावच्यकार्यकारिणी अत एव शुद्धश्रुक्तस्वभावस्य तव न सदृशीति परमार्थः यथाश्रुतार्थस्तु स्पष्ट एव । अहमेवानुरूपा उभयोरपि मायाधिष्ठातृत्वादित्यर्थः ॥ २६ ॥

रा० टी०—नन्वं सीतया कथं न सुखमित्यत आह—विकृतेति । यत इयं सीता विकृता अनेकविकारविशिष्टा विरूपा सुन्दररूपाभाववती अतः तव सदृशी योग्या न, अहं तु ते अनुरूपा योग्या अतः मां भार्यारूपेण स्वभार्यात्वेन पश्य जानीहि ॥ २६ ॥

गो० टी०—सीतां निन्दति—विकृता चेति । विकृतेति विषमशरीरत्वमुच्यते । करालां विकृताम् ' कराको दन्तुरे तुङ्गे विशाले विकृतेऽपि च ' इति वैजयन्ती ॥ २७ ॥

२७–२९] ति० टी०—वैरूप्यमेवाह—निर्णतोदरीमत्यन्तनिम्नोदरीम् । असतीं स्वपुरुषस्य दुस्तरानेकसंसारदुःखदत्वात् । कार्यरूपेण सतीं च त्वया सह प्रौढ्या निर्मनुष्ये वने आगमनाभासतीं सतीं हि मुद्धानां भक्ष्यादीनां सविध एव पातिव्रत्यरक्षणाय तिष्ठेदित्याशयः ॥ २७–२९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽरण्यकाण्डे सप्तदशः सर्गः ॥ १७ ॥

रा० टी०—नन्वं सीतायाः का गतिरित्यत्र आह—इमामिति । विरूपां मदीप्सितरूपविहीनामसतीं साध्वीत्वेन अविद्यमानामिव अत एव करालां पतनभीरुत्वादिकां निर्णतोदरीमतुन्दिलीं मानुषीमिमामनेन ते भ्रात्रा सह भक्षयिष्यामि ॥ २६ ॥

गो० टी०—निर्णतं निरतिशयेन नतं निम्नमुदरं यस्याः सा निर्णतोदरी ॥ २८ ॥ २९ ॥

रा० टी०—तत इति । ततः मत्स्वीकारानन्तरं विविधानि पर्वतशृङ्गाणि वनानि च पश्यन् त्वं मया सह कामी त्वं दण्डकान् विचरिष्यसि ॥ २७ ॥

रा० टी०—इतीति । इति एवंप्रकारेण उक्तः काकुत्स्थो रामः प्रहस्य मदिरेक्षणामाघूर्णितनयनां शूर्पणखामिदं वक्तुमारेभे ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तदशः सर्गः ॥ १७ ॥

---

१ चेयमिति गो० पाठः । २ कान्तेति गो० पाठः ।

अष्टादशः सर्गः ।

रामः स्वस्यापरिग्रहे हेतुमुपन्यस्य शूर्पणखां प्रति लक्ष्मणेन परिग्रहं रोचयन्प्रेरयत्तथा प्राप्ता लक्ष्मणोऽपि युक्त्या न्यवर्तयत्ततः पुनश्च रामसमेत्य परिग्रहमभ्यर्थ्य वैदेहीभक्षणोद्यतायास्तस्या रामचोदितो लक्ष्मणः कर्णनासं चिच्छेद तेन रुदती सा खरान्तिकमयात् ।

तां तु शूर्पणखां रामः कामपाशावपाशिताम् । स्वेच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥ १ ॥
कृतदारोऽस्मि भवति भार्येयं दयिता मम । त्वद्विधानां तु नारीणां सुदुःखा सपत्नता ॥ २ ॥
अनुजस्त्वेष मे भ्राता शीलवान्प्रियदर्शनः । श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३ ॥
अपूर्वी भार्यया चार्थी तरुणः प्रियदर्शनः । अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति ॥ ४ ॥

गो० टी०–इतीति । तां मदिरेक्षणां मदयति दर्पयतीति मदिरं तादृशमीक्षणं यस्यास्ताम् 'मददर्पशोभनयोः' इत्यस्माद्धातोः "इषिमदि–"इत्यादिना किरच् प्रत्ययः ॥ ३० ॥

अत्र सार्धत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

१] ति० टी०–तामिति । कामपाशेनावपाशितां संजातपाशबन्धाम् । 'स्वेच्छावा' इति पाठे परिहासविनोदेनेत्यर्थः । अत एव स्मितपूर्वमिति तीर्थः । 'स्वच्छन्दाम्' इति पाठे युक्तः । स्वेच्छाचारिणीमित्यर्थः ॥ १ ॥

रा० टी०–रामोऽपि वर्णयन्नाह–तामिति । कामपाशावपाशितां कामरूपपाशबद्धां तां शूर्पणखां स्वेच्छया स्वाधीनया श्लक्ष्णया मनोरमया वाचा स्मितपूर्वं यथा स्यात्तथाऽब्रवीत् माकूलिकवचनमुच्चारयामास 'स्वच्छया' इति पाठान्तरम् ॥ १ ॥

गो० टी०–अथ खरक्रोधहेतुः शूर्पणखाविरूपकरणमष्टादशे–तत इत्यादि । ततः तत्र पर्णशालायाम् अथ शूर्पणखावचनानन्तरं स्वच्छया स्पष्टार्थया श्लक्ष्णया मृदुया काम एव पाशः तेनावपाशितां संजातपाशां बद्धामित्यर्थः ॥ १ ॥

२] ति० टी०–कृतदार ऊढभार्यः भवतीति संबुद्धिः । इयं भार्या मम दयिता संनिहिता चेति शेषः । सपत्नता सपत्नुता पत्युर्भार्यान्तरं हि भार्यान्तरस्य शत्रुभूतं भवति, सपत्नीत्वादित्यमिति वार्थः । अगुणवचनत्वेऽप्यर्थः पुंवद्भावः । सपत्नीशब्दश्च सपत्नप्रकृतिकोऽपि भर्तृद्वितीयभार्यायामेव रूढ इति ध्येयम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–कृतेति । हे भवति ! अहं कृतदारः कृताः स्वीकृता दाराः येन सोऽस्मि । नन्वियं तु मया भक्ष्यते इत्यत आह–इयं भार्या मे दयिता अतिप्रिया एतेन न भक्षणीयेति सूचितम् । नन्वहं मया सह इयमपि तिष्ठतु इत्यत आह–त्वद्विधानां नारीणां सपत्नता शत्रुत्वं सुदुःखावहा, एतेन सहस्थित्या शत्रुत्वं भवितैवेति सूचितम् ॥ २ ॥

गो० टी०–कृतेति । कृतदारः स्वीकृतभार्यः करोतेरनेकार्थत्वात् । अस्मीत्यहमित्यस्मिन्नर्थे निपातः । भवतीति शूर्पणखायाः संबोधनम् । इष्टात्वेन स्वकर्तुमनर्हेत्याह–दयितेति । तर्हि 'तुल्योऽनेकत्र दक्षिणः' इत्युक्तदक्षिणो भवेत्याशङ्क्याह–त्वद्विधानामिति । सुदुःखा सुतरां दुःखकरी सपत्न्या सहिता सपत्नी तस्या भावः सपत्नता "त्वतलोर्गुणवचनस्य" इति पुंवद्भावः गुणत्वं चास्य न शुक्लतादिवत् किंतु कठिणत्वमित्यादिवत् द्रव्यत्वव्याप्तिः अतः सपत्नीसाहित्यरूपगुणवचनत्वात् पुंवद्भावः ॥ २ ॥

३] ति० टी०–अकृतदारोऽकृतपरदारपरिग्रह इति, वानुनामनेकार्थत्वादसंनिहितदार इति वा हृदिस्थोऽर्थः । नहि रामो मिथ्या ब्रूते । परिहासादौ [illegible] न दोष इत्यनेन सूच्यते इति वयम् । एवमुत्तरत्रापि ॥ ३ ॥

रा० टी०–नन्वहं मम का गतिरित्यत आह–अनुज इति । शीलवान् प्रशस्तशीलः प्रियदर्शनः प्रीत्युत्पादकदर्शनवान् श्रीमान् सकलसंपत्तिविशिष्टः वीर्यवान् अतिपराक्रमवान् तरुण एव मे अनुजो भ्राता लक्ष्मणः अकृतदारः न कृताः वने स्वीकृताः दाराः येन सः अत एव अपूर्वीं पूर्वभार्याभाववान् अत एव भार्यया अर्थी प्रयोजनवान् च यदि भविष्यति तदा अस्य रूपस्य अनुरूपो भर्ता भविष्यति, भविष्यतीत्यावर्तते ॥३॥४॥

गो० टी०–अनुजस्त्वित्यादि । अकृतदारः असहकृतदार इत्यर्थः । 'न वितथा परिहासकथास्वपि' इत्युक्तेः अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचनेत्युक्तेश्च अकृतदार इति नार्थः ॥ ३ ॥

४] ति० टी०–अपूर्वीं इतः प्राग्भार्यासङ्गानभिज्ञः, अत एव भार्ययार्थी प्रयोजनवान् । आन्तराशयस्तु–इतः पूर्वं परभार्यासङ्गानभिज्ञो भार्ययार्थी स्वभार्यार्थीति अस्य ते रूपस्यानुरूपो भविष्यति [illegible] करिष्यतीति शेषः ॥ ४ ॥

गो० टी०–अपूर्वीति । पूर्वं भार्यासङ्गं ज्ञातमनेन पूर्वी "पूर्वादिनिः" इति इनिः, न पूर्वी अपूर्वी चिरादज्ञातभार्यासङ्ग इत्यर्थः । अत एव भार्यया अर्थी प्रयोजनवान् इदं वचनद्वयं स्वभार्यावि[illegible]न प्रवृत्तम्, अनुरूपश्च ते भर्तेत्यत्र अभर्तेति च्छेदेनान्तराशयः रूपस्यास्य कुत्सितस्य रूपस्येत्यर्थः ॥४॥

---

१ तत इति गो. पाठः । २ स्वच्छेति गो. पाठः ।

एनं भज विशालाक्षि भर्तारं भ्रातरं मम । असपत्ना वरारोहे मेरुमर्कप्रभा यथा ॥ ५ ॥
इति रामेण सा प्रोक्ता राक्षसी काममोहिता । विसृज्य रामं सहसा ततो लक्ष्मणमब्रवीत् ॥ ६ ॥
अस्य रूपस्य ते युक्ता भार्याहं वरवर्णिनी । मया सह सुखं सर्वान्दण्डकान्विचरिष्यसि ॥ ७ ॥
एवमुक्तस्तु सौमित्री राक्षस्या वाक्यकोविदः । ततः शूर्पनखीं स्मित्वा लक्ष्मणो युक्तमब्रवीत् ॥ ८ ॥
कथं दासस्य मे दासी भार्या भवितुमिच्छसि । सोऽहमार्येण परवान्भ्रात्रा कमलवर्णिनी ॥ ९ ॥
समृद्धार्थस्य सिद्धार्था मुदितामलवर्णिनी । आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी ॥ १० ॥
एतां विरूपामसतीं करालां निर्णतोदरीम् । भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ११ ॥
को हि रूपमिदं श्रेष्ठं संत्यज्य वरवर्णिनि । मानुषीषु वरारोहे कुर्याद्भावं विचक्षणः ॥ १२ ॥
इति सा लक्ष्मणेनोक्ता कराला निर्णतोदरी । मन्यते तद्वचः सत्यं परिहासाविचक्षणा ॥ १३ ॥
सा रामं पर्णशालायामुपविष्टं परंतपम् । सीतया सह दुर्धर्षमब्रवीत्काममोहिता ॥ १४ ॥
इमां विरूपामसतीं करालां निर्णतोदरीम् । वृद्धां भार्यामवष्टभ्य न मां त्वं बहु मन्यसे ॥ १५ ॥

५–७] ति० टी०–भर्तारमेनं भजेत्यन्वयः । भर्तृत्वेन सेवस्वेति यावत् । असपत्ना सांप्रतमिति शेषः । अर्कप्रभा मेरुं यथा भजति तथा एवंविधोऽपि वादो रामस्य त्वं प्रति काममोहतः प्राप्तायाः प्राग्धिक्कारे दुःखं मा भूदित्याहुः ॥५–७॥

रा० टी०–एनमिति । हे विशालाक्षि ! हे वरारोहे ! एनं मे भ्रातरं मेरुमर्कप्रभा इव असपत्ना असपत्नेन सती भर्तारं भज कुरु ॥ ६ ॥

रा० टी०–इतीति । इति रामेण प्रोक्ता काममोहिता राक्षसी रामं विसृज्य त्यक्त्वा लक्ष्मणमब्रवीत् ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–अस्येति । वरवर्णिनी मनोहरवर्णविशिष्टा अहं अस्य ते रूपस्य युक्ता योग्या अस्मीति शेषः, अतः मया सह सर्वान्दण्डकान् सुखं विचरिष्यसि ॥७॥

गो० टी०–विशालाक्षी वर्तुलतया विशालाक्षीत्वमपि गम्यते । अर्कप्रभा मेरुं यथा भजति तथेत्यन्वयः । अर्कप्रभा मेरुं प्राप्ता यथा निवर्तते तथेत्यप्यर्थः । एवं रामो दयालुतया स्वस्मिन् काममोहेन प्राप्तायाः क्रियाः सहसा धिक्कारेण दुःखं मा भूदिति परिहासकथां प्रवर्तयामास ॥ ६–७ ॥

८] ति० टी०–शूर्पनखीमिति शूद्रयौगिकम् ॥ ८ ॥

रा० टी०–एवमिति । राक्षस्या एवमुक्तः वाक्यकोविदः सौमित्रिः स्मित्वा संस्मित्य शूर्पनखीमब्रवीत् । शूर्पनखीमित्यत्र शूद्रयौगिकत्वस्वीकारात् णत्वाभावङीत्रिषेधाभावौ ॥ ८ ॥

गो० टी०–एवमिति । शूर्प इव नखो यस्याः सा शूर्पनखी संज्ञाया अविवक्षितत्वात् " स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् " इति ङीष् असंज्ञात्वादेव "पूर्वपदात्संज्ञाया–" इति णत्वाभावः॥८

९–१०] ति० टी०–दासस्य मे भार्या भूत्वा कथं दासी भवितुमिच्छसीति योजना । परवान्पराधीनः । कमलवर्णिनी रक्तकमलसदृशवर्णवती ॥ ९ ॥ १० ॥

रा० टी०–तद्वचनाकारमाह–कथमिति । हे कमलवर्णिनि ! दासस्य मे दासी भार्या भवितुं त्वं कथमिच्छसि । नन्वहं कथं दासत्वं त्वयीत्यत आह–आर्येण ज्येष्ठेन भ्रात्रा हेतुभूतेन अहं परवान् परवशोऽस्मि ॥ ९ ॥

गो०टी०–कथामिति । दासस्य मे भार्या भूत्वा कथं दासी भवितुमिच्छसि । कस्य दासस्त्वमित्यत्राह–सोऽहमिति । अहमार्येण ज्येष्ठेन भ्रात्रा परवान् नाथवान् 'दूरानास्तोत्तमाः पराः' इत्यमरः । तस्य दासोऽहमित्यर्थः । अकमलवर्णिनीत्यपि च्छेदः९

रा० टी०–नन्विति । समृद्धार्थस्य सकलैश्वर्यसंपन्नस्य आर्यस्य यवीयसी कनिष्ठा भार्या सिद्धार्था मुदिता सती त्वं भव ॥ १० ॥

गो० टी०–समृद्धार्थस्येति । सिद्धार्था सिद्धनिष्टतिः ' अर्थोऽभिधेयरैवस्तुप्रयोजननिष्टासु ' इत्यमरः । अमुदिता मलवर्णिनीत्यपि यवीयसी कनिष्ठा हीना च ॥ १० ॥

११–१२] ति० टी०–एतामिति । परमार्थस्तु–विशिष्टरूपां विरूपां त्रैलोक्यसुन्दरीम् । असतीं न विद्यतेऽन्या सती यस्यास्ताम् करालामवयवसंनिवेशैर्युक्तैर्निम्नोन्नताम् निर्णतोदरीं तनुमध्याम् । अर्थान्तरमपि प्रागुक्तरीत्या द्रष्टव्यम् । वृद्धां ज्ञानवृद्धाम्, अनादिं च ॥ ११ ॥ १२ ॥

रा० टी०–एतामिति । वृद्धां चिरकालं सेवितामेतां भार्यां परित्यज्य त्वामेव भजिष्यति । अत्रासंभवाद्विपरीतलक्षणा बोध्या, त्वद्वृद्धयेति शेषो वा ॥ ११ ॥

गो० टी०–सीतायां विद्यमानायां कथं मां परिग्रहीष्यतीत्यत्राह–एनामिति । एतादृशावस्थां त्वामेव परित्यज्य सीतां भजिष्यतीति हार्दोऽर्थः । असतीम् अप्रशस्तामिति सीतापक्षे अतो न पुरःस्फूर्तिकदोषः । करालां दन्तुरां निर्णतं निरतिशयम् उदरं यस्यास्ताम् ॥ ११ ॥

रा० टी०–क इति । इदं श्रेष्ठं रूपं संत्यज्य मानुषीषु स्त्रीषु को विचक्षणः भावं प्रेमाणं कुर्यात् ॥ १२ ॥

गो० टी०–को हीति । विपरीतलक्षणा ॥ १२ ॥

१३–१५] ति० टी०–कराला दारुणा । परिहासाविचक्षणा तत्तद्वाक्ये परिहासत्वज्ञानरहिता ॥ १३–१५ ॥

१ नि इति ह्रस्वः गो. रा. पाठे । २ एनामिति गो. पाठः । ३ तथ्यमिति गो. पाठः । ४ एनामिति गो. पाठः ।

अद्येमां भक्षयिष्यामि पश्यतस्त मानुषीम् । त्वया सह चरिष्यामि निःसपत्ना यथासुखम् ॥ १६ ॥
इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा । अभ्यगच्छत्सुसंक्रुद्धा महोल्का रोहिणीमिव ॥ १७ ॥
तां मृत्युपाशप्रतिमामापतन्तीं महाबलः । [2]निगृह्य रामः कुपितस्ततो लक्ष्मणमब्रवीत् ॥ १८ ॥
क्रूरैरनार्यैः सौमित्रे परिहासः कथंचन । न कार्यः पश्य वैदेहीं कथंचित्सौम्य जीवतीम् ॥ १९ ॥
इमां विरूपामसतीमातिमत्तां महोदरीम् । राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि ॥ २० ॥
इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्य पश्यतः । उद्धृत्य खड्गं चिच्छेद कर्णनासे महाबलः ॥ २१ ॥
[4]निकृत्तकर्णा तु विस्वरं सा विनद्य च । यथागतं प्रदुद्राव घोरा शूर्पणखा वनम् ॥ २२ ॥
सा विरूपा महाघोरा राक्षसी शोणितोक्षिता । ननाद विविधान्नादान्यथा प्रावृषि तोयदः ॥ २३ ॥

रा० टी०–इतीति । इति लक्ष्मणेनोक्ता परिहासाविचक्षणा परिहासविषयकनैपुण्याभाववती सा शूर्पणखा एतल्लक्ष्मणोक्तपरिहासबोधकं वचनं सत्यं मन्यते अमन्यत ॥ १३ ॥

गो० टी०–इतीति । परिहासाविचक्षणा परिहासानभिज्ञा ॥ १३ ॥

रा० टी०–सेति । सा लक्ष्मणेन प्रत्युक्ता शूर्पणखा सीतया सह उपविष्टं दुर्धर्षं राममब्रवीत् ॥ १४ ॥

गो० टी०–सेति । पर्णशालामित्यनेन लक्ष्मणो बहिरेव स्थित इति गम्यते ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–इमामिति । इमां भार्यामवष्टभ्य आश्रित्य मां त्वं न बहु मन्यसे अतः तव पश्यतः मानुषीमिमां भक्षयिष्यामि, अनन्तरं निःसपत्ना सपत्नरहिता अहं त्वया सह चरिष्यामि । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–एनामिति । अवष्टभ्य अवलम्ब्य ॥ १५ ॥

१६–१७] ति० टी०–पश्यतस्तव पश्यन्तं त्वामनादृत्य ॥ १६ ॥ १७ ॥

गो० टी०–अद्येति । पश्यतः तव त्वयि पश्यति निःसपत्ना निष्प्रतिबन्धिका ॥ १६ ॥

रा० टी०–इतीति । अलातसदृशेक्षणा अलातचक्रसदृशनेत्रा सुसंक्रुद्धा शूर्पणखा इति वचः उक्त्वा मृगशावाक्षीं मृगबालनेत्रसदृशनेत्रां सीतां महोल्का पतितोत्पातविशेषः । रोहिणीमिव अभ्यगच्छत् ॥ १७ ॥

गो० टी०–इतीति । अलातसदृशेक्षणा निर्ज्वालकाष्ठाग्नितुल्येक्षणा उल्का निर्गतज्वाला सा चोत्पातकालभाविनी प्रकृते विवक्षिता ॥ १७ ॥

१८] ति० टी०–निगृह्य वाचेति शेषः ॥ १८ ॥

रा० टी०–तामिति । मृत्युपाशप्रतिमां मृत्युपाशसदृशीम् आपतन्तीं तां शूर्पणखां महाबलो रामः प्रगृह्य लक्ष्मणमब्रवीत् ॥ १८ ॥

गो० टी०–तामिति । निगृह्य हुंकारेण प्रतिषिद्ध्य ॥ १८ ॥

१९] ति० टी०–अनार्यैः परिहासो न कथमपि कार्य इत्यत्रानुभवं प्रमाणयति–पश्य वैदेहीं भक्षयितुमुद्युक्ता अस्मत्कृतपरिहासदोषादिति शेषः । इदं परिहासेनाप्यनृतवचनं सत्यनिष्ठस्य रामस्य सर्वानर्थमूलं मूलाविद्यायां मायायां बीजावेशमूलं चेति कतकः । हे सौम्य ! कथंचिज्जीवतीमेवैनां रक्षोकान्वयि ॥ १९ ॥

रा० टी०–तद्वचनाकारमाह–क्रूरैरिति । अनार्यैः क्षुद्रैः सह परिहासः कथंचन न कार्यः कथंचिज्जीवतीं वैदेहीं पश्य ॥ १९ ॥

गो० टी०–क्रूरैरिति । अनार्यैः दुर्जनैः कथंचिज्जीवतीं शूर्पणखायाः कौर्यमालोक्य कथंचित् स्वास्थ्यमापन्नाम् ॥ १९ ॥

२०] ति० टी०–इमां स्वतो विरूपां विरूपय । पार्श्वस्थित इति शेषः ॥ २० ॥

रा० टी०–इमामिति । मत्तामिमां राक्षसीं विरूपयितुं विरूपां कर्तुमर्हसि, एतेन विरूपकरणहेतुकशोकप्राप्त्या कामदर्पध्वंसो भविष्यतीति सूचितम् ॥ २० ॥

गो० टी०–इमामिति । पूर्वमेव विरूपां [3]नविरूपयेति भावः । एतावत्पर्यन्तमपराधाभावात्तूष्णीं स्थितम् अथ सीताक्रमणव्याजेनेमां विरूपयेत्यर्थः ॥ २० ॥

२१–२२] ति० टी०–कर्णनासे [4]खड्गेनैकत्वाभावः ॥ २१ ॥ २२ ॥

रा० टी०–इतीति । इत्युक्तो लक्ष्मणः खड्गमसिमुद्धृत्य अस्या राक्षस्याः कर्णनासे रामस्य पश्यतः चिच्छेद ॥ २१ ॥

गो० टी०–इत्युक्त इति । तस्याः कर्णनासमित्यन्वयः प्राप्यकृत्वोदेकवद्भावः । रामे बद्धभावाया अपि शूर्पणखायास्तदीयापचारेण हानिर्जातेत्यनुसंधेयम् ॥ २१ ॥

रा० टी०–निकृत्तेति । निकृत्तं छिन्नं कर्णनासं यस्याः सा शूर्पणखा तु विस्वरं यथा स्यात्तथा विनद्य यथागतं प्रदुद्राव पलायांचक्रे ॥ २२ ॥

गो० टी०–निकृत्तेति । यथागतम् आगतमार्गमनतिक्रम्य वनं प्रदुद्रावेति संबन्धः ॥ २२ ॥

२३] ति० टी०–विविधान्नादान्ननाद चकारेत्यर्थः ॥ २३ ॥

रा० टी०–प्रद्रवप्रकारमाह–सेति । शोणितोक्षिता रुधि-

१ अभ्यधावदिति गो. पाठः । २ प्रगृह्येति रा. पाठः । ३ पार्श्वस्थ इति गो. पाठः । ४ कर्णनासमिति गो. पाठः ।

सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना । प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् ॥ २४ ॥
ततस्तु सा राक्षससङ्घसंवृतं खरं जनस्थानगतं विरूपिता ।
उपेत्य तं भ्रातरमुग्रतेजसं पपात भूमौ गगनाद्यथाऽशनिः ॥ २५ ॥
ततः सभार्यं भयमोहमूर्छिता सलक्ष्मणं राघवमागतं वनम् ।
विरूपणं चात्मनि शोणितोक्षिता शशंस सर्वं भगिनी खरस्य सा ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ।

कुतस्ते वैरूप्यमिति खरपृष्टा शूर्पणखा रामप्रेरितलक्ष्मण तदापादक निर्दिदेशात. क्रुद्धेन तन्निधांसुना खरेण प्रेषितैश्च तुर्दशरक्षोवी रैः समं रामाश्रममभिप्रतस्थे ।

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम् । भगिनीं क्रोधसंतप्तः खरः पप्रच्छ राक्षसः ॥ १ ॥

रसिक्ता महाघोरा राक्षसी सा शूर्पणखा प्रावृषि तोयदो मेघ इव विविधान्नादान् ननाद ॥ २३ ॥

गो० टी०–सेति । शोणितोक्षिता रक्तेन सिक्ता नादान्-नाद नादान् चकारेत्यर्थः । ओदनपाकं पचतीतिवत् । प्रावृषि वर्षाकाले ॥ २३ ॥

२४] ति० टी०–प्रगृह्येत्यस्य ॥ २४ ॥

रा० टी०–सेति । रुधिरं बहुधा विक्षरन्ती विकिरन्ती बाहू प्रगृह्य गर्जन्ती घोरदर्शना सा शूर्पणखा महावनं प्रविवेश॥२४॥

गो० टी०–सा विक्षरन्तीति । विक्षरन्ती स्रवन्ती रुधिरं रक्तं प्रगृह्य उद्यम्य ॥ २४ ॥

२५] ति० टी०–अशनिरिव गगनाद्भूमौ पपात ॥२५॥

रा० टी०–तत इति । राक्षससंघैः राक्षसानां समूहैः संवृतं संयुक्तं जनस्थानगतं जनस्थाने रावणेन नियोजितम् उग्रतेजसं भ्रातरं खरमुपेत्य विरूपिता कर्णनासच्छेदेन विरूपं प्रापिता शूर्पणखा गगनात् अशनिर्वज्र इव भूमौ पपात ॥२५॥

गो० टी०–ततस्त्विति । तं रामवध्यत्वेन प्रसिद्धं यथाऽशनिः अशनिरिव गगनात् भूमौ पपात ॥ २५ ॥

२६] ति० टी०–अथास्याः खरं प्रति स्वदुस्तान्तकथनं कविः संक्षिप्याह–तत इति । भयजनितमोहेन विसंज्ञतया मूर्छिता म्लाना राघवं वनमागतं अशंस, आत्मविरूपणं च अशंस । अत्रेदं बोध्यम् स्रवद्गगनानन्तरं पुनः क्षतीक्ष्णाश्रमगमनं रामस्य । तत्र च वर्षाकालोपगमपर्यन्तं स्थित्वा किंचिच्छिष्टे एकादशेऽब्दास्त्याश्रमगमनम् । ततो वर्षाकालारम्भे पञ्चवट्यां वासः 'मयूरनादिता रम्या' इति तत्रोक्तेः । एवं वसतस्तस्य खरदूषणपाये हेमन्तर्तुः प्रविष्ट इत्युक्तेरत्र द्वादशवर्षपूर्तिः 'पञ्चमे पञ्चमे वर्षे द्वौ द्वावधिकमासकौ' इत्युक्तेर्मार्गशीर्षादिकादश्यां त्रयोदशाब्दम्भः । अत एव पाद्मे क्रमम्–' तत्र तु द्वादशाब्दानि रामस्य अतिचक्रमुः । कस्मिंश्चिदथ काले तु राक्षसी कामरूपिणी । तत्र शूर्पणखा मेजे राघवं रावणानुजा ॥' इति केचित् । अन्ये तु–त्रयोदशे किंचिदवशिष्टे शूर्पणखागमनम्, ततो माघे सीताहरणमित्याहुः । भारते युधिष्ठिरवनवासस्याधिकमासं गृहीत्वा-र्वागेव समाप्तेः । 'पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः । एषामभ्यधिका मासाः पञ्च च द्वादश क्षपाः । त्रयोदशानां वर्षाणामिति मे वर्तते मतिः' इति भीष्मेणोक्तत्वात्तदीत्यापि तथैवोचितमिति पूर्वव्याख्यैव युक्तेति मम भाति । यत्तु ' तत्र त्रयोदशाब्दानि रामस्य अतिचक्रमुः' इति पाद्मे पाठः क्वचित्, तत्रापि प्रवेशमात्रेण तदतिक्रमस्यवहारः । यथान्ये तु वादिना-मर्धावस्थितौ तद्व्यवहार इति बोध्यम् । प्रचुरस्तु 'द्वादशाब्दानि' इत्येव पाठः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०–तत इति । ततः भूमिपातानन्तरं भयमोह-मूर्च्छिता भयमोहेन भयहेतुकाविवेकेन मूर्छिता म्लाना शोणितोक्षिता रुधिरसिक्ता खरस्य भगिनी सा शूर्पणखा सभार्यं सलक्ष्मणं राघवं रामं वनमागतं प्राप्तश्रुत्वा आत्मनि विरूपणं सर्वं वृत्तान्तं च अशंस ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

गो० टी०–उत्तरसर्गार्थमेकेन संगृह्णाति–ततः सभार्यमिति । भयजो मोहो भयमोहः निःसंज्ञता तेन मूर्छिता म्लाना राघवं वनमागतं अशंस आत्मविरूपणं च सर्वं अशंस समूलं अशंसेत्यर्थः । खरस्य भगिनी सपत्नी भ्रातृवधत्वान्मातृष्वसेयत्वाद्वेति पूर्वंवदुपपादितम् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्यानेऽष्टादशः सर्गः ॥ १८ ॥

१] ति० टी०–अथ पूर्वसर्गान्ते संक्षिप्ततया कथितार्थस्यैव विस्तारः–तामिति ॥ १ ॥

---

१ उग्रदर्शनमिति गो. पाठः ।

उत्तिष्ठ तावदाख्याहि प्रमोहं जहि संभ्रमम् । व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता ॥ २ ॥
कः कृष्णसर्पमासीनमाशीविषमनागसम् । तुदत्यभिसमापन्नमङ्कुल्यग्रेण लीलया ॥ ३ ॥
कालपाशं समासज्य कण्ठे मोहान्न बुध्यते । यस्त्वामद्य समासाद्य पीतवान्विषमुत्तमम् ॥ ४ ॥
बलविक्रमसंपन्ना कामगा कामरूपिणी । इमामवस्थां नीता त्वं केनान्तकसमागता ॥ ५ ॥
देवगन्धर्वभूतानामृषीणां च महात्मनाम् । कोऽयमेवं महावीर्यस्त्वां विरूपां चकार ह ॥ ६ ॥
नहि पश्याम्यहं लोके यः कुर्यान्मम विप्रियम् । अमरेषु सहस्राक्षं महेन्द्रं पाकशासनम् ॥ ७ ॥
अद्याहं मार्गणैः प्राणानादास्ये जीवितान्तगैः । सलिले क्षीरमासक्तं निष्पिबन्निव सारसः ॥ ८ ॥

रा० टी०—शूर्पणखाशंसनप्रकारं वर्णयितुमाह—तामित्यादिभिः । तथा विरूपां छिन्नकर्णनासिकामित्यर्थः, अत एव शोणितोक्षितां पतितां तां भगिनीं दृष्ट्वा क्रोधसंतप्तः खरो राक्षसः पप्रच्छ ॥ १ ॥

गो० टी०—अथ खरवधमूलभूतः खरक्रोध उच्यते एकोनविंशे—तामित्यादि । भगिनीं ज्येष्ठाम् 'अत्तिका भगिनी ज्येष्ठा' इत्यमरः ॥ १ ॥

२] ति० टी०—प्रमोहो विसंज्ञता, संभ्रमश्चित्ताप्रतिष्ठानम् । एवंरूपा अतिप्रसिद्धसौन्दर्यां त्वं केन विरूपितेत्यन्वयः ॥ २ ॥

रा० टी०—तत्प्रभप्रकारमाह—उत्तिष्ठेति । संभ्रमं भयं प्रमोहं मूर्च्छां च जहि त्यज उत्तिष्ठ, रूपा प्रशस्तरूपविशिष्टा त्वं केनैवं विरूपितेति व्यक्तमाख्याहि ॥ २ ॥

गो० टी०—उत्तिष्ठेति । प्रमोहो विसंज्ञता, संभ्रमश्चित्ताप्रतिष्ठा एवंरूपा यथा भवसि तथा विरूपितेत्यर्थः ॥ २ ॥

३] ति० टी०—आशिषि दंष्ट्रायां विषं यस्य तं पृषोदरादित्वात्साधुः। अभिसमापन्नमभिमुखे स्थितं तुदति व्यथयति॥३॥

रा० टी०—स्वस्मिन् कृष्णसर्पत्वमारोप्याह—क इति । आशीविषं दंष्ट्राविषसंयुक्तमनागसमनपराधिनमासीनमभिसमापन्नं संमुखे प्राप्तं कृष्णसर्पमङ्कुल्यग्रेण लीलया कस्तुदति व्यथयति ॥ ३ ॥

गो० टी०—उत्तरकाल एवापकर्तुरनिष्टावाप्तिं सूचयन् पृच्छति—क इति । कृष्णे त्वमोघविषत्वम्बुनाथ आसीनं निश्चलमित्यर्थः । आशिषि दंष्ट्रायां विषं यस्येति सर्पविशेषणं पृषोदरादित्वात्सकारलोपः 'आशीरदंष्ट्रायां प्रियवाक्याभिषङ्गयोः' इति निघण्टुः । 'कालान्तोऽन्वाशीशब्दोऽस्ति तुदति व्यथयति अभिसमापन्नम् आभिमुख्येनागतमिति शीघ्रप्रतीकारमूलम् अङ्कुल्यग्रेण लीलयेति प्रभावानभिज्ञत्वोक्तिः । अनेन स्वस्य लीलया सद्यः प्रतीकारसामर्थ्यं द्योतितम् ॥ ३ ॥

४] ति० टी०—उत्तमं विषं त्वद्विरूपतालक्षणम् ॥ ४ ॥

रा० टी०—कर्णनासिकोच्छेदे कालपाशत्वं विषपानत्वं चारोप्याह—कालेति । यस्त्वां समासाद्य उत्तमं विषं पीतवान् स कालपाशं कण्ठे समासज्य मोहान् न बुध्यते ॥ ४ ॥

गो० टी०—पुनरपि स्वमहिमानं प्रकटयन् शूर्पणखां चाभाषयन् पृच्छति—कः कालेति । यः कण्ठे कालपाशं मृत्युपाशम् आसज्य आबध्य न बुध्यते उत्तरक्षणे स्वमरणं न जानातीत्यर्थः, यश्च त्वाम् आसाद्य प्राप्य उत्तमं विषं कालकूटं पीतवान् स क इत्यन्वयः । अत्र आसादनशब्देन विरूपकरणमुच्यते त्वदासादनरूपं विषमित्यर्थः ॥ ४ ॥

५] ति० टी०—अन्तकसमा त्वं कस्य समीपं गता येनेमामवस्थां नीता, अन्तकसमा त्वं केनेमामवस्थां नीता सती अत्रागतेत्यर्थो वा ॥ ५ ॥

रा० टी०—बलेति । बलविक्रमसंपन्ना बलेन विक्रमेणाभिचलनसामर्थ्येन संपन्ना अत एव कामगा यथेच्छं विहरणशीला अन्तकसमागता कालसमत्वं प्राप्ता त्वमिमामवस्थां केन नीता ॥ ५ ॥

गो० टी०—अथ विस्मयेन पृच्छति—बलेति । इतो गता त्वं केनेमामवस्थां नीतेत्यन्वयः ॥ ५ ॥

६] ति० टी०—महात्मनां मध्ये इति शेषः ॥ ६ ॥

रा० टी०—देवेति । देवादीनां मध्ये यो महावीर्यस्त्वां विरूपां चकार स कः तं बोधयेत्यर्थः ॥ ६ ॥

गो० टी०—देवेत्यादि । निर्धारणे षष्ठी देवादीनां मध्ये अयम् एतादृशकार्यकर्ता कः एवं विरूपां चकार ॥ ६ ॥

७] ति० टी०—महेन्द्रमिति । सहस्राक्षत्वपाकशासनत्वे विशेषणे महेन्द्रमित्यस्यान्तरेणेति शेषः । पश्यामीत्यत्र तमित्यध्याहारः । मनुष्यादीनां तु स्वाप्रियकरणे संभावनैव नेति भावः । क्वचित्तु 'अन्तरेण सहस्राक्षम्' इत्येव पाठः ॥ ७ ॥

रा० टी०—नहीति । यो मम विप्रियं कुर्यात् तममरेषु सहस्राक्षं सहस्रनयनमिन्द्रं परमैश्वर्यवन्तं पाकशासनमपि न पश्यामि अन्येषां का गणनेति तात्पर्यम् ॥ ७ ॥

गो० टी०—स्वनिश्चयमाह—न हीति । अत्र तमित्यध्याहार्यं तस्य गर्वविशेषद्योतनाय इन्द्रस्य विशेषणद्वयम् ॥ ७ ॥

८] ति० टी०—जीवितस्यान्तं गमयन्ति प्रापयन्ति तैः तृषया निष्पिबन्सारसो हंसो यथा सलिल आसक्तं क्षीरमादत्ते एवं प्राणानादास्ये इत्यर्थः ॥ ८ ॥

रा० टी०—अद्येति । जीवितान्तगैः जीवनान्तं प्रापयितृभिः मार्गणैर्बाणैः प्राणान् आदास्ये अपराधिन इति शेषः ।

१ कः कालपाशमासज्येति गो. पाठः । २ अन्तरेणेति गो. पाठः । ३ अन्तकैरिति गो. पाठः । ४ एतदमरकोशश्लोके हेतुश्चिन्त्यः ।

निहतस्य मया संख्ये शरसंकृत्तमर्मणः । सफेनं रुधिरं कस्य मेदिनी पातुमिच्छति ॥ ९ ॥
कस्य पत्ररथाः कायान्मांसमुत्कृत्य संगताः । प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥ १० ॥
तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः । मयाऽपकृष्टं कृपणं शक्तास्त्रातुं महाहवे ॥ ११ ॥
उपलभ्य शनैः संज्ञां तं मे शंसितुमर्हसि । येन त्वं दुर्विनीतेन वने विक्रम्य निर्जिता ॥ १२ ॥
इति भ्रातुर्वचः श्रुत्वा क्रुद्धस्य च विशेषतः । ततः शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत् ॥ १३ ॥
तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ । पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १४ ॥
फलमूलाशनौ दान्तौ तापसौ ब्रह्मचारिणौ । पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ ॥ १५ ॥

तत्र दृष्टान्तः सलिले जले आसक्तं मिलितं क्षीरं निष्पिबन् सारसो हंस इव ॥ ८ ॥

गो० टी०–अद्येति । प्राणान् तस्येति शेषः । जीवितान्तकैः शत्रुजीवितविनाशकरैः मार्गणैः बाणैः सारसः हंसविशेषः ॥ ८ ॥

९] ति० टी०–शरैः संकृत्तानि मर्माणि यस्य तस्य कण्ठकर्तनकालिकं सफेनमित्युपलक्षणम् । दीर्घधारं सोष्णं च ॥ ९ ॥

रा० टी०–निहतस्येति । सङ्ख्ये सङ्ग्रामे मया निहतस्य अत एव शरसंकृत्तमर्मणः कस्य सफेनं रुधिरं मेदिनी पृथ्वी पातुमिच्छति ॥ ९ ॥

गो० टी०–निहतस्येति । संख्ये युद्धे शरसंकृत्तमर्मणः बाणच्छिन्नमर्मस्थलस्य सफेनं प्राणवायुनिर्गमनकालिकफेनसहितम् रक्तं रक्तवर्णम् अचिरप्रवृत्तत्वमनेनोच्यते । मेदिनी भूमिः ॥ ९ ॥

१०–११] ति० टी०–संगता मिलिताः पत्ररथाः पक्षिणः ॥ १० ॥ ११ ॥

रा० टी०–कस्येति । मया रणे निहतस्य कस्य कायात् मांसमुत्कृत्य निष्कृष्य प्रहृष्टाः संगताः संमिलिताः पत्ररथाः पक्षिणो भक्षयिष्यन्ति ॥ १० ॥

गो० टी०–कस्येति । पत्ररथाः पक्षिणः कायात् देहात् उत्कृत्य उच्छिद्य संगताः संघशः समवेताः ॥ १० ॥

रा० टी०–मदपराधिनो ध्रुवं विध्वंसो भवितेति बोधयन्नाह–तमिति । मया अपकृष्टं हिंसितत्वेन विवक्षितं कृपणं तन्मदपराधिनं महाहवे महासंग्रामे देवादयस्त्रातुं न शक्ताः ॥ ११ ॥

गो० टी०–तमिति । मया आहवे अपकृष्टम् आकृष्टम् इहेति युद्धसन्निधानोक्तिः ॥ ११ ॥

१२–१३] ति० टी०–विक्रम्य शौर्यं कृत्वा ॥ १२ ॥ १३ ॥

रा० टी०–तत्क्षणकर्तव्यमाह–उपलभ्येति । शनैः संज्ञां बोधमुपलभ्य येन दुर्विनीतेन विक्रम्य विक्रमं कृत्वा त्वं निर्जितासि तं मे मह्यं शंसितुमर्हसि ॥ १२ ॥

गो० टी०–उपलभ्येति । उपलभ्य प्राप्य दुर्विनीतेन दुर्जनेन विक्रम्य शौर्यं कृत्वा ॥ १२ ॥

रा० टी०–इतीति । विशेषतः क्रुद्धस्य भ्रातुरिति वचः श्रुत्वा शूर्पणखा सबाष्पं साश्रु वाक्यमब्रवीत् ॥ १३ ॥

गो० टी०–इतीति । विशेषतः अतिशयेन क्रुद्धस्य कृतक्रोधस्य ॥ १३ ॥

१४–१५] ति० टी०–श्रीरामचन्द्रे दोषाणामभावादुणोत्कर्ष्यैव तं बोधयति–तरुणावित्यादि व्याख्यातप्रायम् १४-१५

रा० टी०–तद्वचनाकारमाह–तरुणाविति । तरुणत्वादिविशिष्टौ दशरथस्य पुत्रौ रामलक्ष्मणौ भ्रातरौ आस्तामेतौ देवौ वा दानवौ वेति तर्कयितुं नोत्सहे तर्केण निश्चेतुं सामर्थ्यं नास्तीत्यर्थः, तेन तयोः प्राकृतविलक्षणत्वं सूचितम् । श्लोकत्रयमेकान्वयि ॥ १४–१६ ॥

गो० टी०–तरुणाविति । ननु व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपितेति पृच्छन्तं खरं प्रति पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणाविति एव वक्तव्ये तरुणाविति रामादिसौन्दर्यादिकं किमर्थं कथयतीति चेत्, अस्या वैरूप्ये जातेऽपि वैराग्याजननात् काममोहातिशयेन भ्रात्रादिसन्निधानेऽपि हृद्गतमेवोक्तवती अनुकूलानां प्रतिकूलानां च रामं दृष्टवतामयमेव स्वभावः अत एव यानि रामस्य चिह्नानीति पृष्टवतीं सीतां प्रति त्रिस्थिरश्लिष्टलम्बश्रेति वक्तव्ये रामः कमलपत्राक्षः सर्वसत्त्वमनोहर इत्येवमाह हनुमान् । यद्वा छद्मप्रमत्तकुपितानां भावज्ञानं दृष्टमिति न्यायेन कर्णनासाछेदेन प्रमत्ता कुपिता च शूर्पणखा हृद्गतमेवाह । तरुणौ कामिनीनां प्रथमाकर्षकं वय एव हि अतस्तदुच्यते परस्परपरिहासकरणेनोभयत्र भावबन्धाविशेषाद्विवक्षनम् । वयसा तुल्यत्वेऽपि रूपे किमनयोस्तारतम्यमस्ति नेत्याह–रूपसंपन्नौ रूपं सौन्दर्यं तेन संपन्नौ समृद्धौ इतरेषां कामादीनां रूपमात्र्यां भिक्षित्वा संपादयितव्यमिति मन्यमानावित्यर्थः । यद्वा रूपसंपन्नौ संपन्नरूपौ आहितात्र्यादित्वात्परनिपातः तेन उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठतीति न्यायं विहाय रूपदाक्षिण्यसंपन्नः प्रसूत इत्युक्तरीत्या धार्मिणा सहैवोत्पन्नरूपावित्यर्थः । वयोरूपसत्त्वेऽपि किं कठिनस्पर्शौ नेत्याह–सुकुमारौ परुषतरभवच्छरीरवन्न भवत्यनयोः शरीरं किंतु पुष्पहासवत्सुकुमारौ । एवं सौकुमार्यसत्त्वेऽपि रतिवैयात्त्ये किं श्रा-

---

१ रक्तं मेदिनी कस्य पास्यतीति गो. पाठः । २ इहाहवे इति गो. पाठः । ३ धर्मचारिणाविति गो. रा. पाठः ।

गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ । देवौ वा दानवावेतौ न तर्कायेतुमुत्सहे ॥ १६ ॥
तरुणी रूपसंपन्ना सर्वाभरणभूषिता । दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा ॥ १७ ॥
ताभ्यामुभाभ्यां संभूय प्रमदामधिकृत्य ताम् । इमामवस्थां नीताऽहं यथाऽनाथाऽसती तथा ॥ १८ ॥
तस्याश्चानृजुवृत्तायास्तयोश्च हतयोरहम् । सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ १९ ॥
एष मे प्रथमः कामः कृतस्तत्र त्वया भवेत् । तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥ २० ॥

न्तौ स्यातां नेत्याह—महाबलौ रामस्तु सीतया सार्धं विजहार बहूनृतूनित्यायुक्तरीत्यानेकर्तुषु विहरणेऽपि श्रमलवरहितौ । एवं सप्तुदायशोभासंपन्नत्वेऽपि किमवयवशोभाश्च वैकल्यं नेत्याह—पुण्डरीकविशालाक्षौ संरक्तनयना घोरा इत्युक्तरीत्या त्वादृशनयनवन्न भवति तत्रयनमित्यर्थः । पुण्डरीकं सिताम्भोजं तमोगुणोद्रेकेण निद्राकषायितत्वं रजोगुणोद्रेकेण संरक्तत्वं वा नास्ति किंतु सर्वदा सत्त्वप्रसन्ननयनावित्यर्थः । न केवलमेवावयवशोभातिशयः चीरकृष्णाजिनाम्बरौ ' किमिव हि मधुराणां मण्डनं नाकृतीनाम्' इत्युक्तरीत्या वल्कलाजिनधारणेऽप्यतिरमणीयौ । यद्वा कोऽयमेवं महावीर्य इति भीतं प्रति तयोर्दुर्बलत्वमुच्यते तरुणौ ऊनषोडशवर्ष इत्यायुक्तरीत्या युद्धायोग्यौ । यद्वा 'यौवने विषयैषिणाम्' इत्यायुक्तरीत्या विषयप्रावण्येन युद्धभीतौ रूपसंपन्नौ 'कन्या कामयते रूपम्' इत्युक्तरीत्या वनिताजनवशीकरणाय शरीरसुद्वासयन्तौ न पौरुषसंपन्नौ सुकुमारौ श्रीमत्पुत्रतया संपत्कुमारौ अतो भवदायुधप्रहारासहौ महाबलौ विपरीतलक्षणया द्वावेतौ दुर्बलौ ससैन्यस्य भवतो न पर्याप्ताविति यद्वा सुकुमारतराबलासहितौ युद्धविरोधिकलत्रसहितत्वान्न युद्धार्हौ । पुण्डरीकविशालाक्षौ तयोर्युद्धासामर्थ्यं यद्वैरूप्यकरणानन्तरं किं भविष्यतीति भीत्या शुक्लीभूतलोचनतया चावगम्यते । चीरकृष्णाजिनाम्बरौ परिधानसंपादनस्याप्यशक्तौ तत्राप्येकरूपोत्तरीयरहितौ चीरकृष्णाजिनाम्बरौ स्थावरतिर्यग्भ्यां याचित्वा लब्धे अम्बरे बिभ्राणौ । यद्वा स्वस्य प्रोत्साहनाय तयोर्बलातिशय उच्यते—तरुणाविति । तरुणौ जयोत्साहयोग्यवयस्कौ रूपसंपन्नौ 'सिंहोरस्कं महाबाहुम्' इत्युक्तरीत्या युद्धाभावेऽपि दर्शनमात्रेण परहृदयकम्पजनकशरीरौ । सुकुमारौ लीलयैव सर्वसंहरणक्षमौ महाबलौ मनोबलबाहुबलोपायबलसंपन्नौ पुण्डरीकविशालाक्षौ वैरिषु गौरवबुद्धिमूलककालुष्यरहिततया विमलनेत्रौ, अनेन शत्रुदर्शनकृतक्षोभराहित्यमुच्यते । चीरकृष्णाजिनाम्बरौ सदा बद्धवसनतया युद्धसन्नद्धावित्यर्थः । एवमुत्तरत्रापि योज्यम् ॥ १४ ॥ १५ ॥

१६–१७] ति० टी०—देवौ वेति । यद्यपि दशरथपुत्राविति तत्सकाशाच्छ्रुतम्, अथाप्यमानुषचारित्र्यदर्शनादनिश्चय इति भावः ॥ १६ ॥ १७ ॥

गो० टी०—पुनरपि हृदये परिवर्तमानं तत्सौन्दर्यमाह—गन्धर्वेति । देवाविति यद्यपि दशरथसुताविति श्रुतं तथापि तत्प्रभावदर्शनेन तदसत्यमेवोक्तमिति मन्य इति भावः ॥ १६ ॥

रा० टी०—तरुणीति । तरुणी तारुण्यविशिष्टा अत एव रूपसंपन्ना सुमध्यमा नारी तत्राश्रमे तयोर्भ्रात्रोर्मध्ये मया दृष्टा ॥ १७ ॥

गो० टी०—तरुणीति । तत्र आश्रमे ॥ १७ ॥

१८] ति० टी०—तां प्रमदामधिकृत्य निमित्तीकृत्य ताभ्यामुभाभ्यां संभूयैकनियोगादपरेणेमामवस्थां नीता यथाऽनाथाऽसती कुलटा तथेत्यन्वयः ॥ १८ ॥

रा० टी०—ताभ्यामिति । उभाभ्यां ताभ्यां भ्रातृभ्यां संभूय एकत्र स्थित्वा तां प्रमदामधिकृत्य अबला अनाथा रक्षकरहिता असती पुंश्चली यथा तथाहमिमामवस्थां नीतास्मि ॥ १८ ॥

गो० टी०—ताभ्यामिति । प्रमदाम् अधिकृत्य निमित्तीकृत्य उभाभ्यां संभूय ऐकमत्यं प्राप्य इमामवस्थां नीतास्मि यथा अनाथा असती कुलटा नीयते तथा नीतास्मीति योजना ॥ १८ ॥

१९] ति० टी०—तस्या हताया इति विपरिणामः । रुधिरं पातुमिच्छामीत्यनेन स्वस्यास्तत्कामुकीत्वशङ्कां वारयति ॥ १९ ॥

रा० टी०—तस्या इति । अनृजुवृत्तायाः दुर्जनवृत्तान्तायाः रणमूर्धनि हतायास्तस्या हतयोः तयोश्च सफेनं रुधिरं पातुमहमिच्छामि । हतयोरित्यस्य लिङ्गवचनविपरिणामेनान्वयप्रापणमन्वयः ॥ १९ ॥

गो० टी०—तस्याश्चेति । अनृजुवृत्तायाः कुटिलवृत्तायाः अनेन तत्प्रेरणेनैव मां तौ विरूपितवन्तावित्यन्यथेति गम्यते । रणमूर्धनि हतयोरित्यन्वयः । सीतायां रणमूर्धनि गमनासंभवाद्धतायां इति विपरिणामो न युक्तः अन्यथा अशक्यत्वाद्रणमूर्धनीत्युक्तम् ॥ १९ ॥

२०] ति० टी०—उक्तमेवार्थमुत्कटेच्छाद्योतनाय पुनराह—एष इति ॥ २० ॥

रा० टी०—अभिलाषातिशयात्पुनस्तदेव भङ्ग्यन्तरेणाह—एष इति । आहवे रुधिरं पिबेयं एषः प्रथमो मुख्यो मे कामोऽभिलाषस्त्वया कृतो भवेत् कुर्विस्यर्थः ॥ २० ॥

गो० टी०—अवश्यकर्तव्यत्वाय पुनरप्याह—एष इति ।

१ मानुषौ वा तावितिं गो. पाठ. । २ तातेति गो. पाठः ।

इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् । व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥ २१ ॥
मानुषौ शस्त्रसंपन्नौ चीरकृष्णाजिनाम्बरौ । प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह ॥ २२ ॥
तौ हत्वा तां च दुर्वृत्तामुपावर्तितुमर्हथ । इयं च भगिनी तेषां रुधिरं मम पास्यति ॥ २३ ॥
मनोरथोऽयमिष्टोऽस्या भगिन्या मम राक्षसाः । शीघ्रं संपाद्यतां गत्वा तौ प्रमथ्य स्वतेजसा ॥ २४ ॥
युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे । इयं प्रहृष्टा मुदिता रुधिरं युधि पास्यति ॥ २५ ॥
इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश । तत्र जग्मुस्तया सार्धं घना वातेरिता इव ॥ २६ ॥

[तैस्तु ते तं समुद्यतेजसं तथापि तीक्ष्णप्रदरा निशाचराः ।
न शेकुरेनं सहसा प्रमर्दितुं वनद्विपा दीप्तमिवाग्निमुत्थितम् ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

प्रथमः श्रेष्ठः कामः अभिलाषः 'प्रथमौ प्रवरादिमौ' इति वैजयन्ती । तातेति पितृवज्ज्येष्ठसंबोधनम् ॥ २० ॥

२१-२२] ति० टी०-चतुर्दशेति । प्रभुतया रामे मानुषबुद्धया च सेनारहितानामेव चतुर्दशानां प्रेषणम् । यद्यपि 'याज्ञवल्क्यसुता राजंस्त्रयो वै लोकविश्रुताः । चन्द्रकान्तमहामेघविजया ब्राह्मणोत्तमाः॥ खरश्च दूषणश्चैव त्रिशिरा ब्रह्मवित्तमाः। आसंस्तेषां च शिष्याश्च चतुर्दश सहस्रधा । ' इति शान्तिधर्मे भीष्मोक्तेरग्रे तेषां शिवशापेन राक्षसत्वं दाशरथेर्विष्णोर्हस्तेन शापमोक्षश्रोक्तः, तथापि शापप्रभावादेव राक्षसयोनित्वाद्भगवद्रूपाज्ञानमादौ प्राणवियोगकाले च शापान्तं स्मृत्वा तत्स्वरूपज्ञानात्स्वस्वरूपप्राप्तिः । ब्रह्मवित्तमा इत्यत्र ब्रह्म वेद इत्याद्युक्तः ॥ २१ ॥ २२ ॥

रा० टी०-इतीति । इति अनेन प्रकारेण तस्यां ब्रुवाणायां सत्यामन्तकोपमान् कालसदृशान् महाबलान् चतुर्दश राक्षसान् क्रुद्धः खरो व्यादिदेश आज्ञापयामास ॥ २१ ॥

गो० टी०-इतीति । चतुर्दशेति चतुर्दशसहस्राध्यक्षानित्यर्थः ॥ २१ ॥

रा० टी०-तत्प्रकारमाह-मानुषाविति । घोरं दण्डकारण्यं शस्त्रसंपन्नौ मानुषौ प्रमदया सह प्रविष्टौ ॥ २२ ॥

गो० टी०-मानुषावित्यादि ॥ २२ ॥

२३-२५] ति० टी०-मम भगिनीयं तेषां रुधिरं पास्यतीत्यन्वयः । अत्र रुधिरं मम पास्यतीति विपरीतार्थापत्तिरूपेण तेषां संनिधानप्रयुक्तो बुद्धिमोहः सूचितः कविना ॥२३-२५॥

रा० टी०-ताविति । तौ मानुषौ हत्वा दुर्वृत्तां तां प्रमदामुपावर्तितुं हन्तुमर्हथ । तत्प्रयोजनमाह-इयं मम भगिनी तेषां रुधिरं पास्यति ॥ २३ ॥

रा० टी०-मनोरथ इति । हे राक्षसाः ! मम भगिन्या अयमिष्टो मनोरथः शीघ्रं संपाद्यताम् ॥ २४ ॥

रा० टी०-युष्माभिरिति । उभौ तौ भ्रातरौ रणे निहतौ दृष्ट्वा प्रहृष्टा संतुष्टा मुदिता आनन्दं प्राप्ता इयं मम भगिनी रुधिरं पास्यति ॥ २५ ॥

गो० टी०-दुर्वृत्तां भगिनीवैरूप्यमूलत्वा॰ अपावर्तितुम् आनेतुं तां चेति चकारेण तावपीत्युच्यते । आनयनप्रयोजनमाह-इयं चेति । अस्या अयं मनोरथः मम चायमिष्टः संमत इत्यर्थः । प्रमथ्य हत्वा ॥ २३ ॥ २४ ॥

२६] ति० टी०-वातनुन्ना मेघा इव जग्मुरिति संबन्धः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्ड एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०-इतीति । इति अनेन प्रकारेण प्रतिसमादिष्टाः ते चतुर्दश राक्षसाः तया तद्भगिन्या सार्धं वातेरिताः पवनप्रवाहिता घना इव जग्मुः ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

गो० टी०-इतीति । तयोर्मार्गं प्रदर्शयन्त्येति शेषः । इयं खरेणाप्रेरितापि गतेति बोध्यम् ॥ २६ ॥

गो० टी०-तत इति । प्रदराः बाणाः 'प्रदरा भल्लनाराचबाणाः' इत्यमरः । तथा तीक्ष्णप्रदरा अपीति बोध्यम् । तमेनमित्यन्वयः । उत्थितं राक्षसान् दृष्ट्वा अभिद्रुतमुद्गतमिति रामविशेषणम् । उत्तरसर्गसंग्रहोऽयं श्लोकः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

---

१ अपावर्तितुमिति गो. पाठः । २ तौ च ··· स्वेन तेजसेति गो. पाठः । ३ श्लोकोऽयं गो. नास्ति । ४ क्येति गो. पाठः । ५ श्लोकोऽवमधिको गो. पाठे ।

विंशः सर्गः ।

शूर्पणखया समानीतान् राक्षसान्विलोकयन् रामः सीतारक्षणे लक्ष्मणं नियोज्य सज्जीकृतधनुः स्वनामकुले सम्भाव्य चेज्जिजीविषा निवर्तध्वमित्यब्रवीत्तदनादृत्य युध्यमानांश्च जघान । शूर्पणखा खरान्तिकमेत्य राक्षसवधं शशंस ।

ततः शूर्पणखा घोरा राघवाश्रममागता । राक्षसानाचचक्षे तौ भ्रातरौ सह सीतया ॥ १ ॥
ते रामं पर्णशालायामुपविष्टं महाबलम् । ददृशुः सीतया सार्धं लक्ष्मणेनापि सेवितम् ॥ २ ॥
तां दृष्ट्वा राघवः श्रीमानागतांस्तांश्च राक्षसान् । अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ ३ ॥
मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः । इमानस्या वधिष्यामि पदवीमागतानिह ॥ ४ ॥
वाक्यमेतत्ततः श्रुत्वा रामस्य विदितात्मनः । तथेति लक्ष्मणो वाक्यं राघवस्य प्रपूजयन् ॥ ५ ॥
राघवोऽपि महच्चापं चामीकरविभूषितम् । चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६ ॥
पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ । प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ ७ ॥
फलमूलाशनौ दान्तौ तापसौ ब्रह्मचारिणौ । वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ॥ ८ ॥
युष्मान्पापात्मकान्हन्तुं विप्रकारान्भवे । ऋषीणां तु नियोगेन संप्राप्तः सशरासनः ॥ ९ ॥

१–३] ति० टी०–तत इति । सह सीतया वर्तमानाविति शेषः ॥ १–३ ॥

रा० टी०–खरप्रेषितचतुर्दशराक्षसागमनानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । ततः चतुर्दशराक्षसागमनानन्तरं राघवाश्रममागता प्राप्ता शूर्पणखा सीतया सह भ्रातरौ रामलक्ष्मणौ राक्षसान् राक्षसेभ्यः आचचक्षे कथयामास ॥१॥

रा० टी०–ते इति । ते शूर्पणखया बोधिताः राक्षसाः पर्णशालायामुपविष्टं रामं ददृशुः ॥ २ ॥

रा० टी०–तामिति । श्रीमान् राघवो रामः आगतां तां शूर्पणखां तानागतान् राक्षसांश्च दृष्ट्वा लक्ष्मणमब्रवीत् ॥ ३ ॥

गो० टी०–अथ चतुर्दशराक्षसवधो विंशे–ततः शूर्पणखेत्यादि ॥ १–३ ॥

४–५] ति० टी०–प्रत्यनन्तरः प्रत्यासन्नः पालक इति यावत् । अस्याः पदवीं मार्गम् अस्याः पक्षपातेनास्मद्बधार्थमागतानिति यावत् ॥ ४ ॥५ ॥

रा० टी०–तद्वचनाकारमाह–मुहूर्तमिति । हे सौमित्रे ! सीतायाः प्रत्यनन्तरः रक्षणार्थं समीपवर्ती मुहूर्तं भव । तत्प्रयोजनमाह–अस्या राक्षस्याः पदवीं मार्गमागतान् तत्सहायत्वेन प्राप्तान् इमान् राक्षसान् इह अस्मिन्काले वधिष्यामि॥४॥

गो० टी०–मुहूर्तमिति । प्रत्यनन्तरः प्रत्यासन्नः रक्षक इति यावत् । अस्याः पदवीमागतानित्यन्वयः ॥ ४ ॥

रा० टी०–वाक्यमिति । विदितात्मनो रामस्य एतत् कथितं वाक्यं श्रुत्वा लक्ष्मणः रामस्य वाक्यं तथेति प्रत्यपूजयत् ॥ ५ ॥

गो० टी०–वाक्यमिति । प्रत्यपूजयत् परिपालितवान्॥५॥

६–७] ति० टी०–चामीकरं स्वर्णम् ॥ ६ ॥ ७ ॥

८] ति० टी०–उपहिंसथ यूयम् अस्मानिति शेषः ॥ ८ ॥

रा० टी०–राघव इति । राघवो रामः चामीकरविभूषितं महच्चापं सज्यं ज्यासहितं चकार रक्षांसि अब्रवीच्च ॥ ६ ॥

गो० टी०–राघवोऽपीति । चामीकरं स्वर्णम् ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–पुत्राविति । दुश्चरं दण्डकावनं प्रविष्टौ अत एव दण्डकारण्ये वसन्तौ दशरथस्य पुत्रौ आवां किमर्थमुपहिंसथ, एतेन अनपराधिकर्मकहिंसनं न युक्तमिति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०–स्वस्य कपटवेषत्वं परिहरन्नाह–पुत्राविति । आवां किमर्थमुपहिंसथ ॥ ७ ॥ ८ ॥

९] ति० टी०–अनपकारिणामस्माकं हिंसार्थया युष्मत्प्रवृत्त्या युष्मद्बधार्थमस्मदपेक्षितनिमित्तं संपन्नमित्याह–युष्मानिति । विप्रकारान्भवकृतपीडारूपान्निमित्ताज्जातनियोगेन युष्मान्हन्तुं सशरासनोऽहं संप्राप्तः संप्राप्तनिमित्तः, यद्वा विप्रकारानित्यशेषात्यजन्तम् अस्मास्वस्मदीयेषु च वृथा वैरवतो युष्मानित्यर्थः ॥ ९ ॥

रा० टी०–नन्वस्मदपराधादर्भनेऽपि त्वया किमर्थं धनुः सज्जीकृतमित्यत आह–युष्मानिति । विप्रकारात् युष्मत्कृतानेकविधब्राह्मणापराधात् हेतोः ऋषीणां नियोगेन ऋषिकर्तृकभवद्बधनियोजनेन पापात्मकान् युष्मान् हन्तुं सशरासनः शरासनसहितोऽहं संप्राप्तः ॥ ९ ॥

गो० टी०–प्रत्युत युष्मानेवाहं हन्तुमागत इत्याह–युष्मानिति । विप्रकारान् हिंसकान् भवतां प्रथमप्रवृत्तिमाकाङ्क्षन् स्थितोऽस्मीत्यर्थः ॥ ९ ॥

---

१ राक्षसामिति गो. पाठः । २ वैदेह्या लक्ष्मणेन चेति गो. पाठः । ३ आगतां तां च राक्षसीमिति गो. पाठः । ४ रामस्य प्रत्यपूजयदिति गो. रा. पाठः । ५ धर्मचारिणाविति गो. रा. पाठः । ६ प्राप्तोऽहं सशरायुध इति गो. पाठः ।

तिष्ठतैवात्र संतुष्टा नोपावर्तितुमर्हथ । यदि प्राणैरिहार्थो[1] वो निवर्तध्वं निशाचराः ॥ १० ॥
तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश । ऊचुर्वाचं सुसंक्रुद्धा ब्रह्मघ्नाः शूलपाणयः ॥ ११ ॥
[2]संरक्तनयना घोरा रामं संरक्तलोचनम् । परुषा मधुराभाषं हृष्टा दृष्टपराक्रमम् ॥ १२ ॥
क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः । त्वमेव हास्यसे प्राणान्[3]सद्योऽस्माभिर्हतो युधि ॥ १३ ॥
का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि । अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे[4] ॥ १४ ॥
एभिर्बाहुप्रयुक्तैश्च परिघैः शूलपट्टिशैः । प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥ १५ ॥
इत्येवमुक्त्वा संरब्धा राक्षसास्ते चतुर्दश । उद्यतायुधनिस्त्रिंशा राममेवाभिदुद्रुवुः ॥ १६ ॥
चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् । तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश ॥ १७ ॥
तावद्भिरेव चिच्छेद शरैः काञ्चनभूषितैः[6] । ततः पश्यन्महातेजा नाराचान्सूर्यसंनिभान्[7] ॥ १८ ॥

१०] ति० टी०–अतः संतुष्टा मत्तः प्राप्तयुद्धसंतोषा यूयमत्र तिष्ठतैव नोपावर्तितुमर्हथ । ‘ उपसर्पितुम् ’ इति पाठेऽप्ययमेवार्थः । इहार्थः इहलोके देहे चेत्यर्थः ॥ १० ॥

रा० टी०–नन्विममेव भवदपराधं ज्ञात्वा वयं युद्धे प्रवृत्ता इत्यत आह–तिष्ठतेति । अत्र संग्रामे यदि संतुष्टाः यूयं तर्हि तिष्ठत उपसर्पितुं पलायितुं नार्हथ यदि च इह लोके वो युष्माकं प्राणैरर्थः प्रयोजनं तर्हि निवर्तध्वम् । यदीत्युभयान्वयि ॥१०॥

गो० टी०–तिष्ठतैवेति । अत्रैव संतुष्टाः अभीता इति यावत् । तिष्ठत नोपावर्तितुमर्हथेति मा पलायध्वमित्यर्थः । यदि वा प्राणैः अर्थः प्रयोजनं प्राणापेक्षास्ति चेन्निवर्तध्वमित्यर्थः॥१०॥

११] ति० टी०–ब्रह्मघ्ना इत्यार्षः ॥ ११ ॥

रा० टी०–तस्येति । तस्य रामस्य तद्वचनं श्रुत्वा संक्रुद्धाः ब्रह्मघ्नाः संरक्तनयनाः रामवचनश्रवणजनितकोपहेतुकारुण्यविशिष्टनेत्रवन्तः घोराः क्रूराः परुषाः रूक्षस्वभावाः ते खरप्रेषिताः चतुर्दश राक्षसाः संरक्तनयनं स्वाभाविकारुण्यविशिष्टनयनविशिष्टं, मधुराभाषं मधुरमाभाषणं यस्य तं, दृष्टपराक्रमं दृष्टः स्वबुद्ध्या इयत्तीकृतः पराक्रमः राक्षसबलं येन तं राममूचुः । एतेन अदृष्टपराक्रममिति छेदः सन्धिरार्ष इति भट्टोक्तिश्चिन्त्या । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–तस्येति । ब्रह्मघ्नाः ब्राह्मणघ्नाः ॥ ११ ॥

१२–१३] ति० टी०–अदृष्टपराक्रममिति छेदः । संधिरार्षः ॥ १२ ॥ १३ ॥

रा० टी०–तद्वचनाकारमाह–क्रोधमिति । सुमहात्मनो नोऽस्माकं भर्तुः स्वामिनः खरस्य क्रोधमुत्पाद्य अस्माभिर्युधि हतस्त्वं प्राणान् सद्यः हास्यसे एव ॥ १३ ॥

गो० टी०–क्रोधमित्यादि ॥ १२ ॥

१४–१७] ति० टी०–स्थातुमपि का ते शक्तिरिति योजना ॥ १४–१७ ॥

रा० टी०–नन्वहं युद्धे जयपराजययोरीश्वराधीनत्वात्कथं ममैव हतिरुच्यते इत्यत आह–केति । रणमूर्धनि महासंग्रामे बहूनामस्माकमग्रतः स्थातुमेकस्य तव का शक्तिः नैवेत्यर्थः । आहवे योद्धुं नैवेति किंतु वक्तव्यम् , एतेन काव्यार्थापत्त्यलंकारेण द्रुतं त्वया पलायितव्यमिति सूचितम् ॥ १४ ॥

गो० टी०–का हीति । शक्तिः बलम् ‘ शक्तिर्बले प्रभावादौ ’ इति विश्वः ॥ १३ ॥

रा० टी०–विपक्षे दोषमाह–एभिरिति । बाहुप्रयुक्तैः अस्मद्बाहुभ्यः प्रक्षिप्तैः परिघादिभिः करपीडितं करेण दृढं गृहीतं धनुः वीर्यं च प्राणांश्च त्यक्ष्यसि ॥ १५ ॥

गो०टी०–एहीति।परिघैः गदाभेदैः पट्टिशैः असिभेदैः॥१५॥

रा० टी०–इतीति । संरब्धाः प्राप्तयुद्धविषयकावेशाः अत एव उद्यतायुधनिस्त्रिंशाः उद्यतानि आयुधानि निस्त्रिंशाः खड्गाश्च येषां ते राक्षसाः राममेवमुक्त्वा अभिदुद्रुवुः । खड्गस्य आयुधत्वेऽपि पृथगुपादानं गोबलीवर्दन्यायेन वैशिष्ट्यबोधनाय ॥ १६ ॥

रा० टी०–चिक्षिपुरिति । दुर्जयं जेतुमशक्यं राघवं प्रति तानि उद्यतानि शूलानि चिक्षिपुः । काकुत्स्थो रामस्तु समस्तानि युगपदागतानि चतुर्दश शूलानि तावद्भिः चतुर्दशसंख्यापरिच्छिन्नैः काञ्चनभूषितैः शरैः चिच्छेद । सार्धश्लोक एकान्वयी ॥ १७ ॥

गो०टी०–इतीति।तानि शूलपाणय इति पूर्वमुक्तानि१५-१६

१८] ति० टी०–तावद्भिश्चतुर्दशरक्षोविसृष्टचतुर्दशशूलसंख्याकैः ॥ १८ ॥

रा० टी०–तत इति । ततः पश्चात् शूलच्छेदानन्तरं परमक्रुद्धः महातेजाः रामः शिलाशितान् बाणोपलसंस्कृतान् सूर्यसंनिभान् चतुर्दश नाराचान् बाणान् जग्राह । अर्धद्वयमेकान्वयि ॥ १८ ॥

गो० टी०–तत इति । नाराचान् अफलकान् बाणान् शिलाशितान् शिलास्वपि शितान् शिलानिर्भेदक्षमानित्यर्थः शाणोपलसंनिघृष्टानित्यप्याहुः ॥ १७ ॥

---

१ वेति गो. रा. पाठः । २ श्लोकोऽयं गो. नास्ति । ३ अथेति गो. पाठः । ४ न इति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ भूषणैरिति गो. पाठः । ७ पश्चादिति गो. रा. पाठः ।

जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान् । गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान् ॥ १९ ॥
मुमोच राघवो बाणान्वज्रानिव शतक्रतुः [रुक्मपुङ्खाश्च विशिखा दीप्ता हेमविभूषिताः] ॥
ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिरप्लुताः ॥ २० ॥
विनिष्पेतुस्तदा भूमौ वल्मीकादिव पन्नगाः । [४]तैर्भग्नहृदया भूमौ [५]भिन्नमूला इव द्रुमाः ॥ २१ ॥
निपेतुः [६]शोणितस्नाता विकृता विगतासवः । तान्भूमौ पतितान्दृष्ट्वा राक्षसी क्रोधमूर्छिता ॥ २२ ॥
[पैरित्रस्ता पुनस्तत्र व्यसृजद्भैरवस्वनान् । सा नदन्ती पुनर्नादं जवाच्छूर्पणखा पुनः ॥]
[८]उपगम्य खरं सा तु किंचित्संशुष्कशोणिता । पपात पुनरेवार्ता सनिर्यासेव वल्लरी ॥ २३ ॥
भ्रातुः समीपे शोकार्ता ससर्ज निनदं महत् । सस्वरं मुमुचे बाष्पं [१०]विवर्णवदना तदा ॥ २४ ॥
निपातितान्प्रेक्ष्य रणे तु राक्षसान्प्रधाविता शूर्पणखा पुनस्ततः ।
वधं च तेषां निखिलेन रक्षसां शशंस सर्वं भगिनी खरस्य सा ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे विंशतितमः सर्गः ॥ २० ॥

१९-२०]ति०टी०-शिलाशिताञ्शाणोपलनिघृष्टान्१९-२०

रा० टी०-गृहीत्वेति । धनुः गृहीत्वा आयम्य शरैः संयोज्य राक्षसान् लक्ष्यानुद्दिश्य राघवो रामः वज्रान् शतक्रतुरिव मुमोच ॥ १९ ॥

गो० टी०-गृहीत्वेति । लक्ष्यान् वेध्यान् वज्रानित्यभूतोपमा ॥ १८ ॥

रा० टी०-ते इति । ते रामसृष्टाः शराः वेगात् रक्षसां वक्षांसि भित्त्वा रुधिरप्लुताः सन्तः वल्मीकात्पन्नगाः कृष्ण सर्पा इव विनिष्पेतुः ॥ २० ॥

गो० टी०-रुक्मपुङ्खा इति । न्यमज्जन्त न्यमज्जन्त चेत्यर्थः ॥ १९ ॥

२१-२२] ति० टी०-विनिष्पेतुर्विनिष्पत्य च निममज्जुः । वल्मीकाद्वल्मीकं प्राप्य पन्नगा इव निमग्ना इत्यर्थः ॥२१॥२२॥

रा० टी०-तैरिति । तैः रामबाणैः भग्नहृदयाः अत एव शोणितस्नाताः रुधिरालिप्ताः अत एव विगतासवः गतप्राणास्ते राक्षसाः छिन्नमूला द्रुमा इव भूमौ विनिष्पेतुः ॥ २१ ॥

गो० टी०-त इति । विकृताः विरूपाः, विगतासवः विगतप्राणाः ॥ २० ॥

रा० टी०-तानिति । भूमौ पतितांस्तान् राक्षसान् दृष्ट्वा क्रोधमूर्छिता किंचित् संशुष्कशोणिता सा राक्षसी खरसमीपमागम्य प्राप्य सनिर्यासा निर्याससहिता वल्लरी लता इव पुनः पपात ॥ २२ ॥ २३ ॥

गो० टी०-तानिति । भैरवस्वनान् भयंकरशब्दान् ॥२१॥

२३-२४] ति० टी०-नासाकर्णक्षतांशे किंचित्संशुष्कशोणितत्वात्सानिर्यासा वल्लरीव ॥ २३ ॥ २४ ॥

रा० टी०-भ्रातुरिति । तदा पतनसमये विवर्णवदना विकृतमुखी शोकार्ता राक्षसी सस्वरं बाष्पमश्रु मुमोच महत् निनदं शब्दं च ससर्ज चकार ॥ २४ ॥

गो० टी०-सेति । महानादं नदन्ती कुर्वन्तीत्यर्थः । निर्यासक्षतप्रसृतरक्षरसः, सक्लकीकताविशेषः ॥ २२-२४ ॥

२५] ति० टी०-उत्तरसर्गार्थस्य संक्षेपतः कथनम् ॥२५॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे विंशतितमः सर्गः ॥२०॥

रा० टी०-निपातितानिति । रणे निपातितान् रामबाणहतान् राक्षसान् प्रेक्ष्य प्रधाविता प्रद्रुता खरस्य भगिनी शूर्पणखा तेषां रक्षसां निखिलेन साकल्येन वधं सर्वं तत्रत्यवृत्तं च शशंस ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे विंशतितमः सर्गः ॥ २० ॥

गो० टी०-पुनः सर्गार्थं संक्षेपेणाह-निपातितानिति । दृश्य दृष्ट्वा ॥ २५ ॥

अस्मिन् सर्गे पञ्चविंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

---

१ एतदार्धं गो. अधिकम् । २ रुधिराप्लुता इति गो. पाठः । ३ न्यमज्यन्ताशनिस्वना इति गो. पाठः । ४ ते भिन्नहृदया भूमौ इति गो. पाठः । ५ छिन्नमूला इति गो. रा. पाठः । ६ शोणितार्द्रांग इति गो. पाठः । ७ श्लोकोऽयमधिकः गो. पाठे । ८ उपागम्येति रा. पाठः । ९ मुहुरिति गो. पाठः । १० विषण्णवदनेति गो. पाठः । ११ मुखीति युक्तं भाति ।

एकविंशः सर्गः ।

प्रत्यागत्याऽऽक्रोशन्तीं शूर्पणखां खरो रोदनकारणं पृच्छति । साऽपि प्रेषितराक्षसानां नाशमुक्त्वा खरं युद्धाय प्रोत्सायति ।

स पुनः पतितां दृष्ट्वा क्रोधाच्छूर्पणखां पुनः । उवाच व्यक्तया वाचा तामनर्थार्थमागताम् ॥ १ ॥
मया त्विदानीं शूरास्ते राक्षसाः [2]पिशिताशनाः । त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः ॥ २ ॥
भक्ताश्चैवानुरक्ताश्च हिताश्च मम नित्यशः । [3]हन्यमाना न हन्यन्ते न न कुर्युर्वचो मम ॥ ३ ॥
किमेतच्छ्रोतुमिच्छामि कारणं यत्कृते [4]पुनः । हा नाथेति विनर्दन्ती सर्पवच्चेष्टसे क्षितौ ॥ ४ ॥
अनाथवत्किमिति [5]किं नु नाथे मयि स्थिते ! उत्तिष्ठोत्तिष्ठ मा [6]मैवं वैक्लव्यं त्यज्यतामिति ॥ ५ ॥
इत्येवमुक्ता दुर्धर्षा खरेण परिसान्त्विता । विमृज्य नयने सास्रे खरं भ्रातरमब्रवीत् ॥ ६ ॥
अस्मीदानीमहं प्राप्ता हृतश्रवणनासिका । शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता ॥ ७ ॥
प्रेषिताश्च त्वया शूरा राक्षसास्ते चतुर्दश । निहन्तुं राघवं [7]घोरं मत्प्रियार्थं सलक्ष्मणम् ॥ ८ ॥
ते तु रामेण सामर्षाः शूलपट्टिशपाणयः । समरे निहताः सर्वे सायकैर्मर्मभेदिभिः ॥ ९ ॥
तान्भूमौ पतितान्दृष्ट्वा क्षणेनैव महाँ[8]जैवान् । रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम ॥ १० ॥

१-२] ति० टी०-अनर्थार्थं स्वकुलस्येति शेषः ॥ १॥ २ ॥

रा० टी०-शूर्पणखापुनःपतनानन्तरकालिकं वृत्तान्तमाह-स इति । अनर्थार्थं राक्षसकुलानर्थसिद्ध्यर्थं पुनरागतां पतितां शूर्पणखां दृष्ट्वा क्रोधाद् व्यक्तया वाचा स खरः उवाच ॥ १ ॥

रा० टी०-तद्वचनाकारमाह-मयेति । पिशिताशनाः रुधिरमक्षाः शूरा राक्षसाः त्वत्प्रियार्थमिदानीमेव विनिर्दिष्टाः पुनः किमर्थं रुद्यते त्वयेति शेषः ॥ २ ॥

गो० टी०-अथ खरप्रोत्साहनमेकविंशे-स पुनरित्यादि । अनर्थार्थं सर्वराक्षसविनाशार्थम् ॥ १ ॥ २ ॥

३] ति० टी०-भक्ता अत एव मय्यनुरक्ता अत एव मम हिताः परैर्हन्यमाना अपि ये न हन्यन्ते न हन्तुं शक्यन्ते । मम वचो न कुर्युरिति च न तत्किमर्थं रुद्यत इत्यर्थः ॥ ३ ॥

रा० टी०-तत्कर्तृकानिष्टसंभावना तु नास्तीति बोधयन्नाह-भक्ता इति । अनुरक्ताः मद्विषयकानुरागवन्तः अत एव मम हिताः नित्यशो भक्ताः मत्सेवानिरताः राक्षसाः रिपुभिः हन्यमानाः अपि न हन्यन्ते, एतेन तत्कर्मकवधशङ्का नास्तीति सूचितम् । मम वचो न कुर्युरिति न एतेन तद्गमनाभावशङ्का नास्तीति व्यक्तम् ॥ ३ ॥

गो० टी०-भक्ता इति । भक्ताः विश्वासभाजः, हिताः हितपराः, न कुर्युरिति न किंतु कुर्युरेवेत्यर्थः ॥ ३ ॥

४-६] ति० टी०-यत्कृते यच्छोकनिमित्तम् ॥ ४-६ ॥

रा० टी०-किमिति । यत्कृते यदर्थं हा नाथेति विनर्दन्ती सती सर्पवत् क्षितौ चेष्टसे तदेतत् किमनिर्वचनीयं कारणं श्रोतुमिच्छामि ॥ ४ ॥

गो० टी०-किमिति । किमेतदिति विस्मये यत्कृते यस्य कृते कृत इत्यव्ययं यन्निमित्तं लुठसि तस्य कारणं श्रोतुमिच्छामीत्यन्वयः ॥ ४ ॥

रा० टी०-अनाथवदिति । मयि नाथे स्थिते सति अनाथवत् त्वं किं विलपसि नु अनुचितमेतत् इति हेतोः एवं मा मा न विलपेत्यर्थः, वैक्लव्यं स्त्यज्यताम् अतः उत्तिष्ठोत्तिष्ठ॥५॥

गो० टी०-अनाथवदिति । विलपसीति किमिति शेषः । वैक्लव्यं कातर्यम् इह मत्समीपे ॥ ६ ॥

रा० टी०-इतीति । खरेण इत्येवमुक्ता अत एव परिसान्त्विता सान्त्वं प्रापिता दुर्धर्षा शूर्पणखा सास्रे अश्रुसहिते नेत्रे विमृज्य भ्रातरं खरमब्रवीत् ॥ ६ ॥

गो० टी०-इतीति । दुर्धर्षा दुःसाध्या ॥ ६ ॥

७-९] ति० टी०-अहमिदानीं पूर्वं त्वत्समीपं प्राप्तास्मि त्वया च परिसान्त्वितास्मि । शूराश्च मदर्थं प्रेषितास्तद्वृत्तान्तं वक्ष्यामीति ॥ ७-९ ॥

रा० टी०-तद्वचनाकारमाह-अस्मीति । शोणितौघपरिक्लिन्नाहं त्वया परिसान्त्विताऽस्मि ॥ ७ ॥

रा० टी०-प्रेषिता इति । घोराः क्रूराः सामर्षाः अपराधासहनसहिताः शूलादिपाणयः शूरा ये राक्षसाः मत्प्रियार्थं सलक्ष्मणं रामं हन्तुं प्रेषितास्ते सर्वे मर्मभेदिभिः सायकैः रामबाणैः समरे निहताः । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०-[illegible] ॥७-१०॥

१०] ति० टी०-क्षणेनैव न तु चिरकालयुद्धपूर्वमित्यर्थः । रामस्य च महत्कर्म दृष्ट्वेत्यन्वयः ॥ १० ॥

---

१ खर इति गो. पाठः । २ रुधिराशना इति गो. पाठः । ३ हन्तोऽपि न निहन्तव्या इति गो. पाठः । ४ लुठसीति गो. पाठः । ५ नाथे तु मयि संस्थिते इति गो. पाठः । ६ मैवंगति गो. पाठः । ७ इहेति गो. पाठः । ८ हतेति गो. पाठः । ९ वीरेति गो. पाठः । १० क्रोधादिति गो. घोरा इति रा. पाठः । ११ बलानिति गो. पाठः ।

सैास्मि भीता समुद्विग्ना विषण्णा च निशाचर। शरणं त्वां पुनः प्राप्ता सर्वतो भयदर्शिनी ॥ ११ ॥
विषादनक्राध्युषिते परित्रासोर्मिमालिनि। किं मां न त्रायसे मग्नां विपुले शोकसागरे ॥ १२ ॥
एते च निहता भूमौ रामेण निशितैः शरैः। ये च मे पदवीं प्राप्ता राक्षसाः पिशिताशनाः ॥ १३ ॥
मयि ते यद्यनुक्रोशो यदि रक्षःसु तेषु च। रामेण यदि शक्तिस्ते तेजो वास्ति निशाचर ॥ १४ ॥
दण्डकारण्यनिलयं जहि राक्षसकण्टकम्। यदि रामममित्रघ्नं न त्वमद्य वधिष्यसि ॥ १५ ॥
तव चैवाग्रतः प्राणांस्त्यक्ष्यामि निरपत्रपा। बुद्ध्याहमनुपश्यामि न त्वं रामस्य संयुगे ॥ १६ ॥
स्थातुं प्रतिमुखे शक्तः सबलोऽपि महारणे। शूरमानी न शूरस्त्वं मिथ्यारोपितविक्रमः ॥ १७ ॥
अपयाहि जनस्थानात्त्वरितः सहबान्धवः। जहि त्वं समरे मूढान्यथा तु कुलपांसन ॥ १८ ॥
मानुषौ तौ न शक्नोषि हन्तुं वै रामलक्ष्मणौ। निःसत्त्वस्याल्पवीर्यस्य वासस्ते कीदृशस्त्विह ॥ १९ ॥

रा० टी०—तानिति। महाजवान् अतिवेगांस्तान् भूमौ पतितान् राक्षसान् रामस्य महत्कर्म अतिधैर्यबाणप्रक्षेपणादि च दृष्ट्वा मम महान् त्रासोऽभवत् ॥ १० ॥

११-१२] ति० टी०—भीता अत एव सम्बुद्विग्ना कम्पमाना अत एत विषण्णा दुःखिता, सर्वतो भयदर्शिनी सर्वतो रामप्रतिभासनात् ॥ ११ ॥ १२ ॥

रा० टी०—सेति। हे निशाचर! सा दृष्टरामपराक्रमाहं भीतास्मि अत एव सम्बुद्विग्ना उद्विग्नचित्ता अत एव विषण्णा उदासीनचित्ता सर्वतः सर्वप्रदेशेषु भयदर्शिनी अहं शरणं रक्षकं त्वां पुनः प्राप्तास्मि। अस्मीत्यभयान्वयि ॥ ११ ॥

गो० टी०—अहमस्मीति। सम्बुद्विग्ना भीता, विषण्णा दुःखिता। सर्वतो भयदर्शिनी सर्वत्र रामप्रतिभासवतीति भावः ११

रा० टी०—विषादेति। विषाद एव नक्रो मकरस्तेन अध्युषिते सेविते परित्रास एव ऊर्मिमाला तरङ्गसमूहस्तद्वति विपुले विशाले शोकसागरे मग्नं मां किं न त्रायसे ॥ १२ ॥

गो० टी०—विषादेति। नक्रो ग्राहः ॥ १२ ॥

१३] ति० टी०—ये च मे पदवीं प्राप्तास्त एते भूमौ स्थितेन पदातिना रामेण हताः ॥ १३ ॥

रा० टी०—एते इति। ये राक्षसाः मे पदवीं मार्गं प्राप्ताः मया सह गता इत्यर्थः, ते रामेण निहताः ॥ १३ ॥

गो० टी०—क्रोधभीतिभ्यां पूर्वोक्तं विस्मृत्य पुनराह—एते चेति ॥ १३ ॥

१४-१५] ति०टी०—यदि ते शक्तिः योद्धुमिति शेषः १४॥१५

रा० टी०—मयीति। मयि तेषु राक्षस्सु च यदि ते अनुक्रोशो दया यदि च रामेण सह योद्धुमिति शेषः, शक्तिः तेजः शौर्यं चास्ति तदा दण्डकारण्यं निलयो निवासो यस्य तं राक्षसकण्टकं रामं जहि। सार्धश्लोक एकान्वयी ॥ १४ ॥

गो० टी०—मयीति। अनुक्रोशो दया शक्तिरिति तुल्येति शेषः ॥ १४ ॥

रा० टी०—यदीति। अमित्रघ्नममित्रमर्दनं रामं यदि न वधिष्यसि तदा निरपत्रपाहं तवाग्रे प्राणांस्त्यक्ष्यामि ॥ १५ ॥

गो० टी०—यदीति। निरपत्रपा निर्लज्जा कृतकर्णनासात्वात् इति भावः ॥ १५ ॥

१६] ति० टी०—निरपत्रपा छिन्नकर्णनासिकत्वात्। स्वस्य क्रोधोत्पत्त्यर्थमाह—बुद्ध्येति ॥ १६ ॥

रा० टी०—युद्धाय तत्क्रोधमुत्पादयन्ती आह—बुद्ध्येति। सबलः ससैन्योऽपि त्वं संयुगे संग्रामे रामस्य प्रतिमुखे संमुखे स्थातुं न शक्त इति बुद्धया ज्ञानचक्षुषाऽहं पश्यामि अत एव शूरमानी त्वं महारणे शूरो न दृश्यसे इति शेषः, अत एव मिथ्याऽऽरोपितः अभिनिवेशितः विक्रमः स्वस्मिन् पराक्रमो येन सोऽसि। सार्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

गो० टी०—बुद्ध्येति। प्रतिमुखे अग्रे सबलः ससैन्यः ॥१६॥

१७] ति० टी०—सबलोऽपि चतुरङ्गबलोपेतोऽपि महारणे इत्युत्तरान्वयि। मिथ्या मृषैव स्वस्मिन्नारोपितो विक्रमो येन १७

गो० टी०—शूरमानीति। मिथ्येति मिथ्यावचोभिरित्यर्थः, आरोपितविक्रमः कल्पितपराक्रमः ॥ १७ ॥ १८ ॥

१८] ति० टी०—अतस्त्वं सहबान्धवस्त्वरितो जनस्थानादपयाहि निर्गच्छ समरे तौ त्वं जहि हे कुलपांसन! अन्यथा तु ॥ १८ ॥

रा० टी०—नन्वं कथं मयि शूरत्वं स्यादित्यत आह—अपेति। सहबान्धवस्त्वं जनस्थानात् त्वरितः सत्वरमपयाहि एतत्स्थानान्निर्गच्छ। समरे तावेतौ जहि हे मूढ! हे कुलपांसन! अन्यथा यदि तौ मानुषौ हन्तुं न शक्नोषि तर्हि निस्सत्त्वस्य निर्बलस्य अल्पवीर्यस्य अल्पप्रभावस्य तव इह वने वासः कीदृशः न भविष्यतीत्यर्थः। श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

१९] ति० टी०—तदेव व्याचष्टे—मानुषाविति। तौ

१ अहमस्मीति गो. पाठः। २ ऽपीति गो. पाठः। ३ अर्धमेतन्निःसत्त्वस्येत्यस्मात्पूर्वं गो. पाठे। ४ रामं ममामित्रमिति गो. पाठः। ५ च महात्मन इति गो. पाठः। ६ अर्धमेतन्निःसत्त्वस्येत्यर्धोत्तरं गो. पाठे। ७ दण्डकारण्यनिलयं जहि तमिति गो. पाठः। ८ वाविति गो. पाठः। ९ ताविति गो. पाठः।

रामतेजोभिभूतो हि त्वं क्षिप्रं विनशिष्यसि । स हि तेजःसमायुक्तो रामो दशरथात्मजः ॥ २० ॥
भ्राता चास्य महावीर्यो येन चास्मि विरूपिता । एवं विलप्य बहुशो राक्षसी प्रदरोदरी ॥ २१ ॥
भ्रातुः समीपे शोकार्ता नष्टसंज्ञा बभूव ह । कराभ्यामुदरं हत्वा रुरोद भृशदुःखिता ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ।

शूर्पणखां समाश्वास्य खरो दूषणं प्रति सेनां संनाहयितुमादिश्यानायितरथमधिरोहंश्चतुर्दशसहस्रराक्षससंमनया युद्धाय प्रतिष्ठते ।

एवमाधर्षितः शूरः शूर्पनख्या खरस्ततः । उवाच रक्षसां मध्ये खरः खरतरं वचः ॥ १ ॥
तवापमानप्रभवः क्रोधोऽयमतुलो मम । न शक्यते धारयितुं लवणाम्भ इवोल्बणम् ॥ २ ॥
न रामं गणये वीर्यान्मानुषं क्षीणजीवितम् । आत्मदुश्चरितैः प्राणान्हतो योऽद्य विमोक्ष्यते ॥ ३ ॥
बाष्पः संधार्यतामेष संभ्रमश्च विमुच्यताम् । अहं रामं सह भ्रात्रा नयामि यमसादनम् ॥ ४ ॥

हन्तुं यदि न शक्नोषि तदा निर्वीर्यस्वादिगुणस्य ते इह कीदृशो वासः जुगुप्सित एवेत्यर्थः ॥ १९ ॥

गो० टी०-निःसत्त्वस्येति । कीदृश इति अत्यन्तायोग्य इत्यर्थः ॥ १९-२१ ॥

२०] ति० टी०-तामेव शङ्कां द्रढयति-रामतेज इति २०

रा० टी०-वासाभावे कारणमाह-रामेति । रामतेजोभिभूतः रामतेजसा पराभूतस्त्वं क्षिप्रं विनशिष्यसि विनङ्क्ष्यसि । तत्र हेतुः दशरथात्मजः तेजस्समायुक्तोऽस्ति येनाहं विरूपितास्मि सोऽस्य रामस्य भ्राता महावीर्योऽस्ति । सार्धश्लोक एकान्वयी ॥ २० ॥

२१-२२] ति० टी०-प्रदरोदरी निम्नोदरी ॥ २१ ॥२२॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्ड एकविंशः सर्गः ॥ २१ ॥

रा० टी०-एवमिति । प्रदरोदरी निम्नोदरविशिष्टा राक्षसी एवं बहुशो विलप्य भ्रातुः समीपे नष्टसंज्ञा विध्वस्तविवेका बभूव अत एव कराभ्यामुदरं हत्वा रुरोद ॥ २१ ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकविंशतितमः सर्गः ॥ २१ ॥

गो० टी०-एवमिति । विततोदरी प्रहारार्थं विस्तृतोदरी २२

अत्र द्वाविंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

१] ति० टी०-आधर्षितः कोपादवमानितः । खरस्तीक्ष्णगुणः खरतरं तीक्ष्णतरम् ॥ १ ॥

रा० टी०-शूर्पणखारोदनानन्तरकालिकं वृत्तान्तमाह-एवमित्यादिभिः । शूर्पणख्या एवमाधर्षितः दुरुक्त्या तिरस्कृतः खरः खलत्वविशिष्टः रलयोरैक्यात् लस्य रत्वम् शूरः खरनामा राक्षसः खरतरमतितीक्ष्णं वचः रक्षसां मध्ये उवाच ॥ १ ॥

गो० टी०-अथ खरस्य युद्धोद्योगो द्वाविंशे-एवमित्यादि । आधर्षितः अवमानितः खरः दारुणः, खरतरं परुषतरम् ॥ १ ॥

२] ति० टी०-तवापमानेत्यस्य त्वत्कृतापमानेत्यर्थः । धारयितुम् आत्मनीति शेषः । ममेति मय्यर्थे संबन्धे षष्ठी । लवणाम्भ इवोल्बणम् व्रण इति शेषः । व्रणे निक्षिप्तं लवणयुक्तमम्भ इव धारयितुं न शक्यत इत्यर्थ इति तीर्थः । लवणाम्भो लवणसमुद्राम्भ इवेत्यर्थ इति कतकः ॥ २ ॥

रा० टी०-तद्वचनाकारमाह-तवेति । तवापमानप्रभवः अतुलोऽयं मम क्रोधः धारयितुं नियन्तुं न शक्यते । तत्र दृष्टान्तः लवणाम्भः लवणसमुद्रः उल्बणं पर्वोत्थितं स्ववेगमिव ॥ २ ॥

गो० टी०-तवेति । लवणाम्भः लवणसमुद्राम्भः उत्थितं पर्वण्युल्बणम् ॥ २ ॥

३] ति० टी०-आत्मदुश्चरितैस्त्वद्विरूपकरणरूपैः स्वयं हत एव मदर्शनात्प्राणान्मोक्ष्यते तं रामं न गणये इत्यन्वयः । वीर्यात्स्वपराक्रमात् ॥ ३ ॥

रा० टी०-योति । यः आत्मदुश्चरितैः स्वकृतत्वद्विरूपकरणादिरूपापराधैर्हतः प्राणान्विमोक्ष्यते तं क्षीणजीवितं मानुषं रामं वीर्यात् स्वातिपराक्रमाद्धेतोः अहं न गणये ॥ ३ ॥

गो० टी०-न राममिति । य आत्मदुश्चरितैरेव हतः सन् अथ प्राणान् विमोक्ष्यति तं रामं न गणये ॥ ३ ॥

४] ति० टी०-संभ्रमो भयम् ॥ ४ ॥

रा० टी०-बाष्प इति । एषः बाष्पः अश्रु संधार्यतां निरुध्यतां संभ्रमो भयं च विमुच्यताम् । तत्र हेतुः भ्रात्रा सह रामं यमसादनं यमगृहं नयामि ॥ ४ ॥

---

१ विततोदरीति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ तवेति गो. पाठः । ४ अवेति गो. पाठः । ५ इवोत्थितमिति गो. पाठः । ६ मोक्ष्यतीति गो. पाठः । ७ क्षिप्यतामिति गो. पाठः ।

परश्वधहतस्याद्य मन्दप्राणस्य भूतले । रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि ॥ ५ ॥
[1]संप्रहृष्टा वचः श्रुत्वा खरस्य वदनाच्युतम् । प्रशशंस पुनर्मौख्याद्भ्रातरं रक्षसां वरम् ॥ ६ ॥
तया परुषितः पूर्वं पुनरेव प्रशंसितः । अब्रवीद्दूषणं नाम खरः सेनापतिं तदा ॥ ७ ॥
चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम् । रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम् ॥ ८ ॥
नीलजीमूतवर्णानां [[3]घोराणां क्रूरकर्मणाम्] लोकहिंसाविहारिणाम्।[[4]बलिनामुग्रतेजसाम् ॥
तेषां शार्दूलदर्पाणां महास्यानां महौजसाम्] सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय ॥ ९ ॥
उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च ।शरांश्च चित्रान्खड्गांश्च शक्तीश्च विविधाः शिताः॥ १० ॥
अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम् । वधार्थं दुर्विनीतस्य रामस्य रणकोविद ॥ ११ ॥
इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम् । सदश्वैः शबलैर्युक्तमाचचक्षेऽथ दूषणः ॥ १२ ॥
तं मेरुशिखराकारं तप्तकाञ्चनभूषणम् । हेमचक्रमसंबाधं वैदूर्यमयकूबरम् ॥ १३ ॥

गो० टी०–बाष्प इति । संहियतां निवर्त्यतां सदनमेव सादनम् ॥ ४ ॥

५] ति० टी०–परश्वधहतस्येति । परश्वधस्तस्य मुख्यमायुधमित्यनेन ज्ञायते । रुधिरं रक्तम्, रक्तवर्णमित्यर्थः॥५॥

रा० टी०–परश्वधेति । हे राक्षसि ! परश्वधहतस्य अत एव मन्दप्राणस्य गतजीवितस्य अत एव भूतले पतितस्येति शेषः, रामस्य रक्तमरुणमुष्णं रुधिरं पास्यसि ॥ ५ ॥

गो० टी०–परश्वधेति । परश्वधः कुठारः मन्दप्राणस्य अल्पप्राणस्य औष्ण्यार्थमिदमुक्तं रक्तवर्णत्वार्थं च ॥ ५ ॥

६] ति० टी०–मौख्यादव्यवस्थितचित्ततालक्षणात् । पुनः प्रशशंस च, त्वत्समो वीरो नास्तीत्येवमादि ॥ ६ ॥

रा० टी०–संप्रहृष्टेति । मौख्यात् स्वाज्ञानात् खरस्य वदनान्मुखात् च्युतं कथितं वचः श्रुत्वा रक्षसां वरं भ्रातरं पुनः प्रशशंस, शूर्पणखेति शेषः ॥ ६ ॥

गो० टी०–सेति । मौख्यात् अव्यवस्थितचित्ततया पुनः प्रशशंस ॥ ६ ॥

७] ति० टी०–तदेवाह–तयेति ॥ ७ ॥

रा०टी०–तयेति । तया शूर्पणखया पूर्वं परुषितः परुषमुक्तः पुनः प्रशंसितः खरः दूषणं नाम सेनापतिमब्रवीत् ॥ ७ ॥

गो० टी०–अस्त्रमर्थं विशदयति–तयेति ॥ ७ ॥

८–१०] ति० टी०–यानि लोकानां प्राणिनां हिंसैवासाधारण्येन विहारः क्रीडा, येषां रक्षसां चतुर्दश सहस्राणि वर्तन्ते, तेषां सर्वोद्योगं सर्वप्रकारेणोद्योगं चतुरङ्गबलोपेततया सर्वायुधसामग्रीसमेततया चोद्योगं कारय ॥ ८–१० ॥

रा० टी०–तद्वचनाकारमाह–चतुर्दशेति । मम चित्तानुवर्तिनां भीमवेगानां भयोत्पादकवेगविशिष्टानां समरेषु अनिवर्तिनां निवर्तनाभावविशिष्टानां नीलजीमूतवर्णानां नीला एव जीमूताः मेघाः तादृशवर्णविशिष्टानां लोकहिंसाविहारिणां लोकहिंसया विहरणशीलानामुदीर्णानां पूर्णोत्साहवतां रक्षसां चतुर्दश सहस्राणि चतुर्दशसहस्रसंख्याकराक्षसानित्यर्थः । सर्वोद्योगं सर्वप्रकारेण उद्योगं पूर्वोक्तचतुरङ्गबलसामग्रीसंपादनं, किंच सर्वेषां चतुरङ्गबलानामुद्योगं प्रस्थानप्रयत्नं कारय " हृकोः–" इति कर्मत्वम् । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०–चतुर्दशेत्यादिश्लोकत्रयमेकं वाक्यम् । चतुर्दश सहस्राणि सन्तीति शेषः । घोराणां घोररूपाणां लोकहिंसाविहाराणां जनपदैकलोलानां महास्यानां विकृतमुखानामिति यावत् । उर्दार्णानां गर्वितानां सर्वोद्योगं सर्वप्रकारेरुद्योगं सर्वायुधवाहनादिभिरुद्योगमित्यर्थः ॥ ८–१० ॥

रा० टी०–उपेति । मे रथादीनि क्षिप्रमुपस्थापय ॥१०॥

गो०टी०–उपस्थापयेति । शक्तीः आयुधविशेषान्॥११॥

११] ति० टी०–पौलस्त्यानां राक्षसानामग्रे रामस्य वधार्थं निर्यातुमिच्छामीत्यन्वयः ॥ ११ ॥

रा० टी०–अग्र इति । रामस्य वधार्थं महात्मनां पौलस्त्यानां राक्षसानामग्रे रणकोविदोऽहं निर्यातुमिच्छामि ॥ ११ ॥

गो० टी०–अग्र इति । पौलस्त्यानां पुलस्त्यवंश्यानामग्रे रणकोविदोऽहं गन्तुमिच्छामीत्यन्वयः । रामस्य रणज्ञत्वात् पौलस्त्यानां वधार्थमिति दैवी वाक् भाविसूचनी ॥ १२ ॥

१२] ति० टी०–शबलैश्चित्रवर्णैः आचचक्षे उपस्थितमिति शेषः ॥ १२ ॥

रा० टी०–इतीति । तस्य खरस्य इति वचः श्रुत्वा दूषणः शबलैः चित्रवर्णविशिष्टैः सदश्वैः युक्तं सूर्यवर्णं महारथं तत्समीपं प्रापयेति शेषः, आचचक्षे कथयामास ॥ १२ ॥

गो० टी०–इतीति । शबलैः नानावर्णैः । ' शबलेताश्च कर्बुरे' इत्यमरः । महारथं सदश्वैर्युक्तमाचचक्षे–इत्यन्वयः ॥ १३ ॥

१३] ति० टी०–वैदूर्यमयौ कूबरौ युगंधरौ यस्य तम् असंबाधं विशालम् ॥ १३ ॥

रा० टी०–तमिति । मेरुशिखराकारं मेरुशिखरसदृशं तप्तकाञ्चनभूषणं तप्तकाञ्चनमयानि भूषणानि यस्य तं हेमचक्रं

---

१ संयुगे इति गो. पाठः । २ सेति गो. पाठः । ३ पादोऽयमधिकः गो. पाठे । ४ विहाराणामिति गो. पाठः । ५ पादत्रयमेतदधिकं गो. पाठे । ६ कोविदः इति गो. ग. पाठः ।

मत्स्यैः पुष्पैर्द्रुमैः शैलैश्चन्द्रकान्तैश्च काञ्चनैः । माङ्गल्यैः पक्षिसंघैश्च ताराभिश्च समावृतम् ॥ १४ ॥
ध्वजनिस्त्रिंशसंपन्नं किङ्किणीवरभूषितम् । मदश्वयुक्तं सोऽमर्षादारुरोह खरस्तदा ॥ १५ ॥
[निशाम्य तु रथस्थं तं राक्षसा भीमविक्रमाः । तस्थुः संपरिवार्यैनं दूषणं च महाबलम् ॥]
खरस्तु तन्महत्सैन्यं रथचर्मायुधध्वजम् । निर्यातेत्यब्रवीत्प्रेक्ष्यं दूषणः सर्वराक्षसान ॥ १६ ॥
ततस्तद्राक्षसं सैन्यं घोरचर्मायुधध्वजम् । निर्जगाम जनस्थानान्महानादं महाजवम् ॥ १७ ॥
मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च परश्वधैः । खड्गैश्चक्रैः रथैस्थैश्च भ्राजमानैः सतोमरैः ॥ १८ ॥
शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः । गदासिमुसलैर्वज्रैर्गृहीतैर्भीमदर्शनैः ॥ १९ ॥
राक्षसानां सुघोराणां सहस्राणि चतुर्दश । निर्यातानि जनस्थानात्खरचित्तानुवर्तिनाम् ॥ २० ॥
तांस्तु निर्धावतो दृष्ट्वा राक्षसान्भीमदर्शनान् । खरस्यार्थे रथः किंचिज्जगाम तदनन्तरम् ॥ २१ ॥
ततस्ताञ्छबलान्भास्तप्तकाञ्चनभूषितान् । खरस्य मतमाज्ञाय सारथिः पर्यचोदयत् ॥ २२ ॥

सुवर्णनिर्मितचर्मावशिष्टमसंबाधं विशालं वैदूर्यमयकूबरं वैदूर्यमयौ कूबरौ युगंधरौ यस्य तम् ॥ १३ ॥

गो० टी०-तमित्यादि । तप्तकाञ्चनम् परिशुद्धकाञ्चनम् असंबाधं विस्तीर्णं कूबरः युगंधरः । 'कूबरस्तु युगंधरः' इत्यमरः ॥ १४ ॥

१४] ति० टी०-माङ्गल्यैर्मङ्गलमलंकारस्तत्प्रयोजनैः । काञ्चनैरिति मत्स्यादिसर्वान्वयि ॥ १४ ॥

रा० टी०-काञ्चनैः सुवर्णनिर्मितैः मत्स्यादिभि. समावृतं माङ्गल्यैः मङ्गलहेतुभिः ॥ १४ ॥

गो० टी०-मत्स्यैरित्यादि । मङ्गलैः मङ्गलावहैः अलंकारकरैरित्यर्थः, काञ्चनैः काञ्चनविकारैः इदं विशेषणद्वयं मत्स्यादिसर्वविशेषणम् । निस्त्रिंशः असिः ॥ १५-१८ ॥

१५] ति० टी०-किंकिणी क्षुद्रघण्टिका । अमर्षात्क्रोधात् ॥ १५ ॥

रा० टी०-ध्वजेति । ध्वजैः निस्त्रिंशैः खड्गादिभिश्च संपन्नं किङ्किणी क्षुद्रघण्टिका तद्रवेण भूषितं सदश्वैर्युक्तं रथं खरः सामर्षात् अमर्षसहितात् क्रोधात् आरुरोह ॥ १५ ॥

१६] ति० टी०-तन्महत्सैन्यं प्रेक्ष्य तत्प्रतिनिर्यातेत्यब्रवीत् । दूषणः दूषणश्रेष्ठ्यर्थः ॥ १६ ॥

रा टी०-खर इति । खरो दूषणश्च रथादिविशिष्टं सैन्यं सर्वराक्षसांश्च प्रेक्ष्य निर्यातेत्यब्रवीत् ॥ १६ ॥

१७] ति० टी०-तत उभयनियोगानन्तरं राक्षसं रक्षसामिदम ॥ १७ ॥

रा० टी०-तत इति । राक्षसं रक्षःसंबन्धि मुद्गरादिभिरुपलक्षितं सैन्यं जनस्थानान्निर्जगाम । तत्र अतिमात्रैरित्यस्य महद्भिरित्यर्थः । श्लोकत्रयमेकान्वयि ॥ १७-१९ ॥

गो० टी०-तत इति । राक्षसं राक्षससंबन्धि ॥ १९ ॥

१८-२०] ति० टी०-मुद्गरादय आयुधविशेषाः । वज्रैर्वज्राकारैरष्टास्रैरायुधैः ॥ १८-२० ॥

रा० टी०-राक्षसानामिति । राक्षसानां चतुर्दश सहस्राणि जनस्थानात् निर्यातानि ॥ २० ॥

गो० टी०-मुद्गरैरित्यादि । मुद्गरः लोहमयगदा पट्टिशः पट्टयामिति द्रमिडनामयुक्त आयुधविशेषः, तोमरः वल्लयमिति द्रमिडनामयुक्तः, शक्तिः ईट्टीति द्रमिडनामकः, परिघः कुण्डान्तर्द्वीति द्रमिडनामा । अतिमात्रैः महद्भिः वज्रैः अष्टास्रैरायुधैः ॥ २०-२२ ॥

२१] ति० टी०-खरस्य रथोऽपि सेनास्थानात्किंचिदनन्तरं सर्वसेनानिर्याणं किंचित्कालं प्रतीक्ष्य जगामेत्यर्थः॥२१॥

रा० टी०-तानिति । निर्धावतस्तान् राक्षसान् दृष्ट्वा आस्थितस्य खरस्य रथोऽपि किंचित्तदनन्तरं सान्निध्यं यथा स्यात्तथा जगाम ॥ २१ ॥

गो० टी०-तांस्त्विति । किंचिज्जगाम सेनासंमर्दादिति भावः, खरानुज्ञाभावाद्वा ॥ २३ ॥

२२] ति० टी०-मतमाज्ञायाभीष्टं ज्ञात्वा ॥ २२ ॥

रा० टी०-रथगमनप्रकारमाह-तत इति । ततः ससैन्यराक्षसगमनानन्तरं खरस्य मतं गमनाभिप्रायमाज्ञाय शबलान् चित्रवर्णविशिष्टान् अश्वान् सारथिः पर्यचोदयत् ॥ २२ ॥

गो० टी०-तत इति । मतं संमतं यात्राभिप्रायमिति यावत् ॥ २४ ॥

---

१ सूर्यैरिति गो. रा. पाठः । २ मङ्गलैरिति गो पाठः । ३ अभिसंवृतमिति गो. पाठः । ४ कविराजितमिति गो. रवेति रा. पाठः । ५ सामर्षादिति रा. पाठः । ६ रथमिति गो रा. पाठः । ७ श्लोकोऽयमधिकः गो. पाठे । ८ तान्महेष्वासान्वीरवर्मायुधध्वजानिति गो. पाठः । ९ वर्मेति रा.पाठः । १० हृष्टो रथस्थ इति गो. पाठः । ११ च हस्तस्थैरिति गो. पाठः । १२ चेति गो. पाठः । १३ अभिद्रुत इति गो. पाठः । १४ विक्रमानिति गो.पाठः । १५ अपीति गो. पाठः । १६ मतिमिति गो. पाठः । १७ सममिति गो. पाठः ।

[1]संचोदितो रथः शीघ्रं खरस्य रिपुघातिनः । शब्देनापूरयामास दिशः सैन्यादिशस्तथा ॥ २३ ॥
प्रवृद्धमन्युस्तु खरः खरस्वरो रिपोर्वधार्थं त्वरितो यथान्तकः ।
अचूचुदत्सारथिमुन्नदन्पुनर्[2]महाबलो मेघ इवाश्मवर्षवान् ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ।

रणयात्रासमयसमुद्भूतदुर्निमित्तारिष्टादीनि विलोकयन्नप्युत्साहादविगणयन्नेव खरो दूषणादिकैः सममग्रे प्रतस्थे ।

तैत्प्रयातं बलं घोरमशिवं शोणितोदकम् । अभ्यवर्षन्महाँघोरस्तुमुलो गर्दभारुणः ॥ १ ॥
निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः । समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥
श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् । अलातचक्रप्रतिमं प्रतिगृह्य दिवाकरम् ॥ ३ ॥
ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम् । समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥

२३-२४] ति० टी०-संचोदित इत्यादि श्लोकद्वयं कतकसंख्यारीत्या प्रक्षिप्तम् ॥ २३ ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०-समिति । रिपुघातिनः खरस्य शीघ्रं संचोदितः स रथः दिशः प्रदिशश्च शब्देन स्वनिर्घोषेण आपूरयामास ॥ २३ ॥

गो० टी०-स चोदित इति । शब्देन नेमिघोषेण प्रदिशः विदिशः । ॥ २३ ॥

रा० टी०-प्रवृद्धेति । प्रवृद्धमन्युः अतिक्रोधवान् अत एव खरस्वरः तीक्ष्णस्वरवान् रिपोर्वधार्थं त्वरितः खरः अन्तक इव अश्मवर्षवान् उपलवर्षणशीलः उन्नदन् मेघ इव च सारथिं पुनः अचूचुदत् ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०-प्रवृद्धमन्युरिति । महाबलः अश्मामारुतः 'अश्मावातो महाबलः' इति निघण्टुः । तद्वान् "अर्श आद्यच्" अश्मामारुतप्रेरित इत्यर्थः । महानिल इत्यपि पाठः । अश्मवर्षवान् अश्मवर्षोयुक्त इत्यर्थः, घनम् उपरितनमेघम् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१] ति० टी०-अथ खरप्रस्थाने उत्पातवर्णनम्-शोणितसहितमुदकम् । प्रयातं प्रस्थितं गर्दभारुणो धूसरः तुमुलस्तुमुलशब्दः, अभ्यवर्षत् मेघ इति शेषः ॥ १ ॥

रा० टी०-ससैन्यखरनिर्गमानन्तरकालिकं वृत्तान्तमाह-तदित्यादिभिः । महाघोरः अतिभयंकरः तुमुलः तुमुलशब्दकारी गर्दभारुणः गर्दभनिभारुण्यसदृशारुण्यवान् मेघ इति शेषः, घोरं भयंकरं प्रयातं तद्बलं खरसैन्यमित्येति शेषः, अशिवममङ्गलं शोणितोदकमरुणजलं शोणितमेवोदकं वा अभ्यवर्षत् अरुणो धूसरः 'अभ्यक्तरागस्त्वरुणः' इत्यमरः ॥ १ ॥

गो० टी०-अथ युद्धाय प्रयातस्य खरस्य उत्पातवर्णनं त्रयोविंशे-तस्मिन् यात इत्यादि । अशिवम् अशुभावहं शोणितोदकं रक्तवर्णजलं तुमुलः संकुलः गर्दभारुणः गर्दभवद्धूसरः ॥ १ ॥

२] ति० टी०-रथयुक्ता रथे युक्ताः पुष्पचिते पुष्पयुते अनेन [illegible] ॥ २ ॥

रा० टी०-उत्पातान्तरमाह-निपेतुरिति । महाजवाः अतिवेगाः रथयुक्तास्तस्य तुरगा अश्वाः समे निम्नोन्नतरवरहिते पुष्पचिते पुष्पैरास्तृते राजमार्गे देशे यदृच्छया निपेतुः ॥ २ ॥

गो० टी०-निपेतुरिति । निपेतुः स्खलिताः रथयुक्ताः रथे बद्धाः पुष्पचिते पुष्पैः निबिडे यदृच्छया दैवगत्या ॥ २ ॥

३-४] ति० टी०-रुधिरो रक्तवर्णः पर्यन्तः प्रान्तभागो यस्य अलातचक्रप्रतिमं तद्वद्वर्तुलं दिवाकरं प्रतिगृह्य सूर्यमण्डलेनात्यन्तं संबध्य ॥ ३ ॥ ४ ॥

रा० टी०-उत्पातान्तरमाह-श्यामामिति । श्यामं श्यामवर्णविशिष्टं रुधिरपर्यन्तं रुधिरो रक्तवर्णविशिष्टः पर्यन्तः प्रान्तभागो यस्य तत् अलातचक्रप्रतिमं वर्तुलाकारत्वेन अलातचक्रसदृशं परिवेषणं दिवाकरं सूर्यमण्डलं प्रतिगृह्य प्राप्य बभूव ॥ ३ ॥

गो० टी०-सूर्यपरिवेषमाह-श्यामामिति । सर्वत्र श्यामं पर्यन्ते प्रान्ते रुधिरं रुधिरवर्णम् । अलातचक्रप्रतिमामिति ह्रस्वत्वमुच्यते परिवेषणं परिवेषः परिगृह्य परितो व्याप्य ॥ ३ ॥

रा० टी०-चतुर्थमुत्पातमाह-तत इति । हेमदण्डं सुवर्ण-

---

१ स इति गो. पाठः । २ चेति गो. पाठः । ३ घनमिति गो. पाठः । ४ तस्मिन्यात जनस्थानादिति गो. पाठः । ५ मेघ इति गो. पाठः ।

जनस्थानसमीपे चै समाक्रम्य खरस्वनाः । विस्वरान्विविधान्नादान्मांसादान्मृगपक्षिणः ॥ ५ ॥
व्याजहुर्रभिदीप्तायां दिशि वै भैरवस्वनम् । अशिवं यातुधानानां शिवा घोरा महास्वनाः ॥ ६ ॥
प्रभिन्नगजसंकाशास्तोयशोणितधारिणः । आकाशं तदनाकाशं चक्रुर्भीमाम्बुवाहकाः ॥ ७ ॥
बभूव तिमिरं घोरमुद्धतं रोमहर्षणम् । दिशो वा भैदिशो वापि सुव्यक्तं न चकाशिरे ॥ ८ ॥
क्षतजार्द्रसवर्णाभा संध्या कालं विना बभौ । खरं चाभिमुखं नेदुस्तदा १०घोरा मृगाः खगाः ॥ ९ ॥
कङ्कगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः । नित्यं शिवकरा युद्धे शिवा घोरनिदर्शनाः ॥ १० ॥
नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः । कबन्धः परिघाभासो दृश्यते भास्करान्तिके ॥ ११ ॥

दण्डविशिष्टं सशुच्छ्रितमसुप्तं ध्वजमुपागम्य प्राप्य समाक्रम्य संनमय्य महाकायो गृध्रः तस्थौ ॥ ४ ॥

गो० टी०–तत इति । सशुच्छ्रितमसुप्तं ध्वजमुपागम्य समाक्रम्य परिक्रम्य तस्थौ ॥ ४ ॥

५] ति० टी०–खरस्वनाः परुषशब्दाः ॥ ५ ॥

रा०टी०–पञ्चमं षष्ठं चोत्पातमाह–जनेति । जनस्थानसमीपे समाक्रम्य प्राप्य खरस्वनाः भयंकरशब्दविशिष्टाः मांसादाः मृगपक्षिणः विविधान् अनेकप्रकारान् विस्वरान् विरुद्धस्वरत्वविशिष्टान् नादान् व्याजहुः अभिदीप्तायां सूर्यसंयुक्तायां दिशि यातुधानानां राक्षसानामशिवं शिवनिवर्तकं भैरवस्वनं शिवाः शृगालस्त्रियश्च व्याजहुः । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–जनस्थानेति । खरस्वनाः परुषस्वनाः विस्वरान् विकृतस्वरान् मांसमदन्तीति मांसादाः ॥ ५ ॥

६] ति० टी०–अभिदीप्तायां रवियुक्तायाम् ' विवस्वदाप्ता भवति प्रदीप्ता ' इति वसन्तराजोक्तेः । शिवा यातुधानानामशिवमशुभं व्याज : ॥ ६ ॥

गो० टी०–व्याजहुरिति । प्रदीप्तायां दिशि सूर्यसन्निहितदिशीत्यर्थः । शिवाः शृगालाः घोराः ज्वालामुखाः ॥ ६ ॥

७] ति० टी०–' प्रभिन्नगज–' इति पाठे मत्तगजेत्यर्थः । 'प्रभिन्नगिरि' इति पाठे गैरिकादिधातुस्राविण इत्यर्थः । तोयमिव शोणितं धरन्ति । अनाकाशमप्रकाशम् ॥ ७ ॥

रा० टी०–प्रथमोत्पातस्यैवाकारभेदेन भेदं प्रकल्प्य सप्तमसुत्पातमाह–प्रभिन्नेति । प्रभिन्नगजसंकाशाः मत्तगजतुल्याः तोयशोणितधारिणः अरुणजलधारणशीलाः भीमाम्बुवाहकाः भयंकरमेघाः आकाशमनाकाशमवकाशरहितं प्रकाशरहितं वा चक्रुः अत एव उद्धतमतिप्रवृद्धं घोरं भयोत्पादकमत एव रोमहर्षणं तिमिरमन्धकारो बभूव अत एव दिशः प्रदिशश्च सुव्यक्तं सुस्फुटं न चकाशिरे अत एव क्षतजार्द्रसवर्णाभा रुधिरक्लिन्नसमानवर्णप्रकाशा धौरिति शेषः, संध्याकालं विनापि बभौ । सार्धश्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०–प्रभिन्नेति । प्रभिन्नाः इन्द्रच्छिन्नपक्षाः तोयशोणितधारिणः शोणिततोयधारिणः पर्वनिपातः । अनाकाशम अप्रकाशं छिन्नमिति यावत्, बलाहकाः मेघाः ॥ ७ ॥

८] ति० टी०–उद्धतं सान्द्रम् ॥ ८ ॥

गो० टी०–बभूवेति । उद्धतं सान्द्रम् ॥ ८ ॥

९] ति० टी०–क्षतजार्द्रसवर्णाभा रुधिरार्द्रवस्त्रादिसमानवर्णा संध्येति विशेष्यम् कालं विना बभौ । मेघेष्वपि शेषः ॥ ९ ॥

रा० टी०–अष्टममुत्पातमाह–खरमिति । घोराः मृगाः व्याघ्रादयः खगा उलूकादयः खरमभिमुखे नेदुः ॥ ९ ॥

गो० टी०–क्षतजेति । क्षतजार्द्रसवर्णाभा क्षतजेन रक्तेनार्द्रं संसिक्तं यत् पटादिकं तत्तुल्याभा कालं विना स्वकालं विना संध्या बभौ मेघेष्वपीति शेषः । खरस्येति । पूर्वं सूर्याधिष्ठितदिशि शिवारुतयुक्तम् अधुना खरस्याभिमुखमुच्यते । घोरमृगाः श्वापदादयः, कङ्काः स्थूलकाया भयंकराः मृतपशुनरादिभक्षणशीलाः पक्षिविशेषाः ॥ ९ ॥

१०–११] ति० टी०–युद्धे नित्यमशिवकरा अशुभशंसिन्यः शिवा घोरनिदर्शना भयदर्शिकाः खरबलस्य चाभिमुखं नेदुः । पूर्वं दिगभिमुखं शिवाशब्द उक्तः इदानीं खरसैन्याभिमुखत्वेनेति भेदः । परिघाभासः परिघ आयुधविशेषस्तत्सदृशः कबन्धो धूमकेतुरिति तीर्थः ॥ १० ॥ ११ ॥

रा० टी०–नवममुत्पातमाह–कङ्केति । भयशंसिनः कङ्कादयः अभिमुखे चुक्रुशुः । दशममुत्पातमाह–नित्येति । युद्धे नित्याशिवकराः नित्यममङ्गलप्रदर्शनवत्य इत्यर्थः, अत एव घोरनिदर्शनाः भयंकरदर्शनवत्यः शिवाः शृगालस्त्रियः ज्वालोद्गारिभिर्ज्वालोद्गरणशीलैः आननैः बलस्य सैन्यस्य अभिमुखं नेदुः । पूर्वं सूर्यदिगभिमुखं शिवानाद उक्तः इदानीं सैन्याभिमुखमिति न पौनरुक्त्यम् ॥ १० ॥

गो० टी०–सेनाभिमुखशिवारुतमाह–नित्येति । युद्धे नित्यमशुभकराः अशुभशंसिनः घोरनिदर्शनाः घोरफलकनिदर्शनाः शिवाः गोमायवः । ' स्त्रियां शिवाभूरिमायगोमायुमृगधूर्तकाः ' इत्यमरः । ज्वालामुद्गिरन्तीति ज्वालोद्गारीणि तैः आननैः उपलक्षणे तृतीया ॥ १० ॥

---

१ तु समागम्येति गो. पाठः । २ चक्रुर्मांसादा इति गो. मांसादा इति रा. पाठः । ३ च प्रदीप्तायामिति गो. पाठः । ४ गिरीति गो. पाठः । ५ भीमा बलाहका इति गो. पाठः । ६ विदिश इति गो. पाठः । ७ न च व्यक्तमिति गो. पाठः । ८ खरस्याभिमुखा इति गो. पाठः । ९ अभिमुखे इति रा. पाठः । १० घोरमृगा इति गो. पाठः । ११ अशुभकरा इति गो. पाठः ।

जग्राह सूर्यं स्वर्भानुरपर्वाणि महाग्रहः । प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ॥ १२ ॥
उत्पेतुश्च विना रात्रिं तारा: खद्योतसप्रभाः । संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः ॥ १३ ॥
तस्मिन्क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः । उद्धूतश्च विना वातं रेणुर्जलधरारुणः ॥ १४ ॥
चीचीकूचीति वाश्यन्तो बभूवुस्तत्र सारिकाः । उल्काश्चापि सनिर्घोषा निपेतुर्घोरदर्शनाः ॥ १५ ॥
प्रचचाल मही चापि सशैलवनकानना । खरस्य च रथस्थस्य नर्दमानस्य धीमतः ॥ १६ ॥
प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत । सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः ॥ १७ ॥
ललाटे च रुजो जाता न च मोहान्न्यवर्तत । तान्समीक्ष्य महोत्पातानुत्थितान्रोमहर्षणान् ॥ १८ ॥
अब्रवीद्राक्षसान्सर्वान्प्रहसन्स खरस्तदा । महोत्पातानिमान्सर्वानुत्थितान्घोरदर्शनान् ॥ १९ ॥
[न चिन्तयाम्यहं वीर्याद्बलवान्दुर्बलानिव । तारा अपि शरैस्तीक्ष्णैः पातयेयं नभस्तलात् ॥ २० ॥

रा० टी०—एकादशमुत्पातमाह—कबन्ध इति । परिघाभासः परिघसदृशः कबन्धः छिन्नशिराः पुरुषः भास्करान्तिके सूर्यसमीपे दृश्यते ॥ ११ ॥

गो० टी०—कबन्ध इति । परिघवत् परिघायुधवदाभासत इति परिघाभासः कबन्धः शिरःशून्यमनुष्यकायः भास्करान्तिके सूर्यस्य समीपे दृश्यते अदृश्यत । तथोक्तं कामन्दकीये—'सूर्यदृष्टकबन्धादिरकस्मान्मृदवाहनः' इति । कबन्धाकारमेघखण्ड इति यावत् । महानाग्रहो यस्य स महाग्रहः स्वर्भानुः राहुः अपर्वणि प्रतिपदर्शसंधिः पर्व तस्मादन्यस्मिन्नपि काले सूर्यं जग्राह । तदाह वराहमिहिरः—' अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः ' इति ॥ ११ ॥

१२] ति० टी०—शीघ्रं प्रचण्डं यथा भवति तथेत्यर्थः । संमुख इति शेषः ॥ १२ ॥

रा० टी०—द्वादशं त्रयोदशं चोत्पातमाह—जग्राहेति । अपर्वणि पर्वाभावविशिष्टदिवसेऽपि सूर्यं स्वर्भानुः राहुर्जग्राह मारुतो वायुः शीघ्रं प्रवाति अत एव दिवाकरो निष्प्रभोऽभूत् ॥ १२ ॥

गो० टी०—प्रवातीति । प्रवाति प्रतिकूलो वाति उत्पेतुः प्रचकाशिरे खद्योतसप्रभाः ज्योतिरिङ्गणसमानकान्तयः ॥ १२ ॥

१३] ति० टी०—खद्योतसप्रभत्वं निस्तेजस्कत्वेन चाञ्चल्येन च ॥ १३ ॥

रा० टी०—त्रयोदशं चतुर्दशं चाह—उत्पेतुरिति । खद्योतसप्रभाः खद्योतसमानकान्तयस्ताराः रात्रिं विनापि उत्पेतुः शुष्कपङ्कजाः शुष्कानि पङ्कजानि यासां ताः अत एव संलीनमीनविहगाः संलीनाः पङ्कादिष्वासक्ता मीनविहगाः यासां ताः नलिन्यः सरस्यो बभूवुरिति शेषः ॥ १३ ॥

गो० टी०—संलीनेति । संलीनाः जलान्तर्गताः पुष्पफलैर्विना बभूवुः गलितपुष्पादिका बभूवुरित्यर्थः ॥ १३ ॥

१४] ति० टी०—विना पुष्पफलैः पुष्पादिरहिता बभूवुरित्यर्थः । उद्धूत उत्क्षिप्तः जलधरारुणो धूसरः ॥ १४ ॥

रा०टी०—पञ्चदशं षोडशं चोत्पातमाह—तस्मिन्निति । द्रुमाः वृक्षाः पुष्पफलैर्विना बभूवुः वातं विनापि जलधरारुणः धूसरवर्णविशिष्ट इत्यर्थः, रेणुः उद्धूतो बभूव ॥ १४ ॥

गो० टी०—उद्धूत इति । उद्धूतः उत्क्षिप्तः जलधरारुणः मेघवद्धूसरः वीचीकूचीति शब्दानुकारः वाश्यन्त्यः शब्दं कुर्वत्यः ॥ १४ ॥

१५-१६] ति० टी०—चीचीकूचीति शब्दानुकरणं वाश्यन्तः आर्षम् । न तु शिक्षितं शब्दमित्यर्थः ॥ १५ ॥ १६ ॥

रा० टी०—सप्तदशमष्टादशं चाह—चीति । सारिकाः चीचीकूचीति वाश्यन्तः चीचीति च कूचीति च शब्दं कुर्वत्यो बभूवुः । अनुकरणमेतत् वाश्यन्त इत्यार्षम् । सनिर्घोषाः निर्घोषसहिता अत एव घोरदर्शना उल्काश्च निपेतुः ॥ १५ ॥

गो० टी०—उल्का इति । उल्कानिर्घातौ ज्योतिर्वायुविशेषौ । अत्र वराहमिहिरः—' उल्का शिरसि विशाला निपतन्ती वर्धते तनुप्रभया । पवनाभिहता गगनादवनौ च यदा समापतति । भवति तदा निर्घातः स च पापो दीर्घखगविरुतः' इति ॥ १५ ॥

रा० टी०—एकोनविंशतितममुत्पातमाह—प्रेति । नर्दमानस्य खरस्य संबन्धिनी सशैलवनकानना मही चचाल । वनकाननयोः निबिडानिबिडत्वेन भेदात् न पौनरुक्त्यम् ॥ १६ ॥

गो० टी०—खरस्येति । अवसज्जत अवासज्जत गद्गदकण्ठतया प्रतिबद्धोऽभूदित्यर्थः ॥ १६ ॥

१७] ति० टी०—सव्यो वामः । स्वरश्चावसज्जत हीनोऽभूदित्यर्थः ॥ १७ ॥

रा० टी०—विंशतितमादित्रयमाह—अस्य खरस्य सव्यो वामः भुजः प्राकम्पत, स्वरश्च अवसज्जत हीनोऽभवत्, सर्वतः पश्यमानस्य अस्य दृष्टिः साश्रा अश्रुसहिता संपद्यते भवति ॥ १७ ॥

गो० टी०—सास्रेति । रुजा पीडा 'क्लीरुजा चोपतापरोगव्याधिगदामयाः' इत्यमरः । मोहात् अज्ञानात् न न्यवर्तत एवमनेकदुर्निमित्तदर्शनेऽपि युद्धगमनान्न न्यवर्ततेत्यर्थः ॥ १७ ॥

१८-२०] ति० टी०—तान्तुत्पातानुत्थितान्समीक्ष्यापि मोहान्न न्यवर्तत युद्धयात्राया इति शेषः ॥ १८-२० ॥

१ वीचीति गो. पाठः । २ वाश्यन्त्य इति गो पाठः । ३ शारिका इति गो. पाठः । ४ सर्वेति गो. पाठः । ५ रुजेति गो. रा. पाठः । ६ स इति गो. पाठः ।७ पातयामि नभस्थलादिति गो. पाठः ।

मृत्युं मरणधर्मेण संक्रुद्धो योजयाम्यहम् । राघवं तं बलोत्सिक्तं भ्रातरं चापि लक्ष्मणम् ॥ २१ ॥
अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे । यन्निमित्तं[1] तु रामस्य लक्ष्मणस्य विपर्ययः ॥ २२ ॥
सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः । न क्वचित्प्राप्तपूर्वो मे संयुगेषु पराजयः ॥ २३ ॥
युष्माकमेतत्प्रत्यक्षं नानृतं कथयाम्यहम् । देवराजमपि क्रुद्धो मत्तैरावतगामिनम् ॥ २४ ॥
वज्रहस्तं रणे हन्यां किं पुनस्तौ च मानवौ । सा तस्य गर्जितं श्रुत्वा राक्षसानां महाचमूः ॥ २५ ॥
प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता । समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः ॥ २६ ॥
ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः । समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः ॥ २७ ॥
स्वस्ति गोब्राह्मणेभ्यस्तु लोकानां ये च संमताः । जयतां राघवो युद्धे पौलस्त्यान्रजनीचरान् ॥ २८ ॥
चक्रहस्तो यथा[10] विष्णुः सर्वानसुरसैन्यहान् । एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः ॥ २९ ॥
जातकौतूहलास्तत्र विमानस्थाश्च देवताः । ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम् ॥ ३० ॥

रा० टी०—त्रयोविंशतितममाह—ललाट इति । ललाटे रुजा पीडा जाता तान् उदितान् प्राप्तान् महोत्पातान् समीक्ष्यापि मोहात् अविवेकात् न न्यवर्तत ॥ १८ ॥

गो० टी०—तानिति । उत्थितान् उद्भूतान् रोमहर्षणान् रोमाञ्चकरान् भयजनकानित्यर्थः । तदुक्तम् साहित्यचिन्तामणौ—'उल्कानिपातनिर्घातव्यालव्याघ्रादिदर्शनैः । उत्पन्नः सहसा चित्तविक्षोभत्रास इष्यते ॥ नेत्रसंमीलनोत्कम्पगात्रसंकोचगद्गदैः । वैवर्ण्यस्वेदरोमाञ्चस्तम्भाद्यैरनुभाव्यते' इति । प्रहसन्नित्यनेन गर्वः सूच्यते ॥ १८ ॥

रा० टी०—अब्रवीदिति । प्रहसन् सन् सर्वान् राक्षसान् अब्रवीत् । तद्वचनाकारमाह—दुर्बलान् इमान् महोत्पातान् वीर्याद् स्वप्रभावातिशयाद्धेतोः न चिन्तयामि । सार्धश्लोक एकान्वयी ॥ १९ ॥

रा० टी०—स्वप्रभावातिशयमेवाह—तारा इति । नभस्तलात्तारा अपि शरैः पातयेयम् ॥ २० ॥

गो० टी०—तत्कार्यप्रतिज्ञामाह—महोत्पातानिति । तथा चोक्तं चिन्तामणौ—' कुलरूपवयोविद्याबलैश्वर्यधनादिभिः । यो भवेदात्मनः श्लाघा स गर्व इति कथ्यते । उद्भावावेक्षणावज्ञाप्रतिज्ञातिर्भवेदिह' । इति दुर्बलानिव पुरुषान् ॥ १९ ॥ २० ॥

२१] ति० टी०—बलोत्सिक्तं बलाधिकम् ॥ २१ ॥

रा० टी०—मृत्युमिति । संक्रुद्धोऽहं मृत्युमपि मरणधर्मेण योजयामि विध्वंसयामीत्यर्थः, अतः बलोत्सिक्तमतिबलं राघवमहत्वा उपावर्तितुं निवर्तितुं न उत्सहे ॥ २१ ॥

गो० टी०—राघवमिति । उत्सिक्तं गर्वितम् ॥ २१–२९ ॥

२२–२३] ति० टी०—यन्निमित्तं शूर्पणखानिमित्तं विपर्ययः क्रूरबुद्धिरूपः ॥ २२ ॥ २३ ॥

रा० टी०—यदिति । यन्निमित्तं यच्छूर्पणखाहेतोः रामस्य लक्ष्मणस्य च विपर्ययः विरूपकरणसूचितमतिवैपरीत्यवर्तनं सा मे भगिनी तयोः रुधिरं पीत्वा सकामाऽस्तु ॥ २२ ॥

रा० टी०—नेति । संयुगेषु संग्रामेषु पराजयः क्वचित्प्राप्तपूर्वः दृष्टपूर्वो न एतद्युष्माकं प्रत्यक्षम्, अनृतं मिथ्या अहं न कथयामि ॥ २३ ॥

२४–२६] ति० टी०—एतन्मम पराजयाभावरूपं वस्तु ॥ २४–२६ ॥

२७] ति० टी०—पुण्यकर्मणः पुण्यकर्माण इत्यर्थे आर्षम् ॥ २७ ॥

रा० टी०—देवेति । क्रुद्धोऽहं देवराजमपि हन्यां मानवौ किम् ॥ २४ ॥

रा० टी०—सेति । मृत्युपाशावपाशिता मृत्युपाशवद्धा सा राक्षसानां महाचमूस्तस्य स्वरस्य गर्जितं श्रुत्वा अतुलं प्रहर्षं लेभे ॥ २६ ॥

रा० टी०—समेयुरिति । युद्धदर्शनकाङ्क्षिणः पुण्यकर्मणः पुण्यकर्माणः सहिताः सर्वहितास्ते ऋष्यादयः समेयुः संघशः प्रापुः, समेत्य प्राप्य ऊचुश्च । पुण्यकर्मण इत्यत्र संज्ञापूर्वकविधेरनित्यत्वादीर्घाभावः । अर्धत्रयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०—समीयुरिति । समीयुः सङ्गताः सहिताः लोकहितपराः पुण्यकर्मणः पुण्यकर्माणः दीर्घाभाव आर्षः ॥ २६ ॥ २७ ॥

२८–३०] ति० टी०—ये लोकानां संमता गोब्राह्मणव्यतिरिक्तास्तेभ्य स्वस्तीत्यर्थः ॥ २८–३० ॥

रा० टी०—तद्वचनाकारमाह—स्वस्तीति । ये लोकसंमताः लोकोचितास्तेभ्यो गोब्राह्मणेभ्यः स्वस्त्यस्तु पौलस्त्यान् राक्षसान् अक्षरसत्तमः विष्णुरिव राघवो जयताम् । सार्धश्लोक एकान्वयी ॥ २८ ॥

रा० टी०—एतदिति । एतदन्यच्च ब्रुवाणाः परमर्षयः विमानस्था देवताश्च गतायुषां राक्षसानां वाहिनीं सेनां ददृशुः ॥ २९–३० ॥

१ चास्येति गो. पाठः । २ एतदार्षत्वेनार्थव्यत्ययात्सः गो. पाठे । ३ निमित्तस्त्विति गो. पाठः । ४ वाहिनामिति गो. पाठः । ५ कुमानुषाविति गो. पाठः । ६ राक्षसस्त्वेति गो. पाठः । ७ ऽस्त्विति गो. पाठः । ८ ऽभिसंगता इति गो.पाठः । ९ संख्ये इति गो. पाठः । १० युद्धे इति गो. पाठः । ** तस्मानिति गो. पाठः ।

रथेन तु खरो वेगात्[1]सैन्यस्याग्राद्विनिःसृतः । [[2]तं दृष्ट्वा राक्षसं भूयो राक्षसाश्च विनिःसृताः ।]
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ॥ ३१ ॥
दुर्जयः करवीराक्षः परुषः कालकार्मुकः । [4]हेममाली महामाली [5]सर्पास्यो रुधिराशनः ॥ ३२ ॥
द्वादशैते महावीर्यास्[6]तस्थुरभितः खरम् । महाकपालः स्थूलाक्षः [7]प्रमाथस्त्रिशिरास्तथा ।
चत्वार एते [8]सेनाग्रे दूषणं पृष्ठतोऽन्वयुः ॥ ३३ ॥
सा भीमवेगा समराभिकाङ्क्षिणी[9] सुदारुणा राक्षसवीरसेना ।
तौ राजपुत्रौ सहसाभ्युपेता[10] माला ग्रहाणामिव चन्द्रसूर्यौ ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ।

खराभिगमनकालिकदुर्निमित्तानि दक्षिणबाहुस्फुरणादिना स्वस्य जयप्राप्तिं च *लक्ष्मणाय शंसन् रामस्तं सीतया सह गुहां प्रवेशयितुमादिशत् । रामसमर दिदृक्षुषु देवगन्धर्वादिषु गगनाङ्गणसंप्राप्तेषु संनद्धं खरबलं राममभिगच्छति ।

आश्रमं प्रतियाते तु खरे खरपराक्रमे । तानै[11]त्पातिकान्रामः सह भ्रात्रा ददर्श ह ॥ १ ॥
तानुत्पातान्महाघोरान्[12]रोमो दृष्ट्वाऽत्यमर्षणः । प्रजानामहितान्दृष्ट्वा वाक्यं लक्ष्मणमब्रवीत् ॥ २ ॥

गो० टी०—स्वस्तीत्यादि । लोकानामभिसंगता इति ये लोकानाम् अभिसंगताः अनुकूलाः तेभ्योऽपि स्वस्त्यस्त्वित्यर्थः । जयतां जयतु आर्षम् आत्मनेपदम् । संख्ये युद्धे चक्रहस्तो विष्णुः वाहिनीं सेनां गतायुषां गन्तुमुद्युक्तायुषाम् एतत् स्वस्तीत्यादिवाक्यम् अन्यच्च राघवजयविषयकं वाक्यं ब्रुवाणाः परमर्षयः विमानस्था देवताश्च जातकौतूहलाः सन्तः राक्षसानां वाहिनीं ददृशुरिति संबन्धः ॥ २८–३० ॥

३१–३३] ति० टी०—सैन्यस्याग्राद्विनिःसृतः पूर्वं सैन्यसंबद्ध एव तदग्रभागे स्थितः, इदानीं तु सेना बहुदूरे पृष्ठतस्त्यक्त्वा स्वयमेवाग्रे गत इत्यर्थः । श्येनगाम्यादयो द्वादश खरामात्याः ॥ ३१–३३ ॥

रा० टी०—रथेनेति । खरो रथेन सैन्यस्याग्राद्विनिःसृतः । अर्धं पृथक्—श्येनेति । श्येनादयो द्वादश खरामात्याः खरमभितः प्रतस्थुः ॥ ३१ ॥ ३२ ॥

रा० टी०—महाकपाल इति । महाकपालादयश्चत्वारः दूषणं पृष्ठतोऽन्वयुः ॥ ३३ ॥

गो० टी०—रथेनेति । वेगात् रथवेगात् विनिःसृतः गतः ३१

गो० टी०—श्येनेत्यादि । श्येनगाम्यादयो द्वादश खरामात्याः ॥ ३२–३४ ॥

३४] ति० टी०—सा सेना । तौ राजपुत्रौ । सहसा तत्क्षणमेवाभ्युपेतेत्यन्वयः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०—सेति । समराभिकाङ्क्षिणी राक्षसवीरसेना सूर्यचन्द्रमसौ ग्रहाणां मालेव तौ राजपुत्रौ सहसा अभ्युपेता ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

गो० टी०—सेति । समराभिकामा युद्धेच्छुः ग्रहाणामङ्गारकादीनाम् ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

१] ति० टी०—औत्पातिकान् उत्पातान्, स्वार्थे ठक् ॥ १ ॥

रा० टी०—ससैन्यखरप्राप्तानन्तरकालिकं वृत्तान्तमाह—आश्रममित्यादिभिः । खरपराक्रमे उग्रपराक्रमविशिष्टे खरे आश्रमं प्रति याते प्राप्ते सति तान् राक्षसैरवलोकितान् औत्पातिकान् उत्पातान् स्वार्थे ठक् भ्रात्रा सह रामो ददर्श ॥ १ ॥

गो० टी०—अथ रामस्य युद्धसन्नाहश्चतुर्विंशे—आश्रममित्यादि । औत्पातिकानिति स्वार्थे ठक् ॥ १ ॥ २ ॥

२] ति० टी०—अत्यमर्षणोऽत्यन्तस्वस्थचित्तः प्रजानां प्रकृतत्वाद्राक्षसा एवात्र प्रजाः ॥ २ ॥

रा० टी०—तानिति । अत्यमर्षणः असहिष्णुः रामः प्रजानां दशरथराज्यनिवासिराक्षसानां किंच प्रकर्षेण जो मृत्युरयो येषां तेषां राक्षसानाम् अहितान् घोरान् उत्पातान् दृष्ट्वा अवलोक्य दृष्ट्वा विचार्य च लक्ष्मणमब्रवीत् ‘ जो ना मृत्युरये जन्यां तातमात्रे जनार्दने ’ इति मेदिनी ॥ २ ॥

---

१ उग्रसैन्य इति गो. पाठः । २ अधर्मेणतदधिकं गो. पाठे । ३ पृथुश्यामाविति रा. पाठः । ४ मुख इति रा. पाठः । ५ मेघमालीति गो. रा. पाठः । ६ वरास्य इति रा. पाठः । ७ प्रमाथीति गो. प्रमाथिरिति रा. पाठः । ८ सेनान्य इति गो. पाठः । ९ वयुरिति गो. पाठः । १० कामा महाबलेति गो. पाठः । ११ उत्पातिकानिति गो. पाठः । १२ उत्थितान् रोमहर्षणानिति गो. पाठः ।

इमान्पश्य महाबाहो सर्वभूतापहारिणः । समुत्थितान्महोत्पातान्संहर्तुं सर्वराक्षसान् ॥ ३ ॥
अमी रुधिरधारास्तु [1]विसृजन्ते खरस्वनाः । व्योम्नि मेघा विवर्तन्ते पुरुषा गर्दभारुणाः ॥ ४ ॥
सधूमाश्च शराः सर्वे मम युद्धाभिनन्दिताः । रुक्मपृष्ठानि चापानि विचेष्टन्ते [2]विचक्षण ॥ ५ ॥
यादृशा इह कूजन्ति पक्षिणो वनचारिणः । अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च ॥ ६ ॥
संप्रहारस्तु सुमहान्भविष्यति न संशयः । अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ ७ ॥
संनिकर्षे तु नः शूर जयं शत्रोः पराजयम् । [3]सुप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते ॥ ८ ॥
उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मण । निष्प्रभं वदनं तेषां भवत्यायुःपरिक्षयः ॥ ९ ॥
रक्षसां नर्दतां घोरः श्रूयते [4]ऽयं महाध्वनिः । आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः ॥ १० ॥

३-४] ति० टी०-सर्वभूतापहारिणस्तत्सूचकान्प्रकृते सर्वराक्षसान् । संहर्तुं तत्संहारं सूचयितुम् ॥ ३ ॥ ४ ॥

रा० टी०-तद्वचनाकारमाह-इमानिति । हे महाबाहो ! सर्वभूतापहारिणो राक्षसान् संहर्तुं समुत्थितानिमान् महोत्पातान् त्वं पश्य ॥ ३ ॥

गो० टी०-इमानिति । सर्वभूतापहारिणः सर्वभूतापहारसूचकान् प्रकृते तु सर्वराक्षसान् संहर्तुमुद्यतानिति योजना ॥ ३ ॥

रा० टी०-अमी इति । गर्दभारुणाः गर्दभोन्द्रारुण्यसदृशारुण्यवन्तः ये मेघाः व्योम्नि विवर्तन्ते ते खरस्वनाः सन्तः रुधिरधाराः विसृजन्ति ॥ ४ ॥

गो० टी०-अमी इति । रुधिरमय्यो धाराः येषां ते रुधिरधाराः खरस्वनान् घोरस्तनितानि विवर्तन्ते संचरन्ति ॥ ४ ॥

५] ति० टी०-राक्षसानां दुर्निमित्तान्युक्त्वा स्वस्य जयसूचकान्याह—सधूमा इति । उत्पातवशाद्धूमसंवृद्धाः मम युद्धेऽभिनन्द आनन्दो येषां संजातस्तादृशाः अत एव विचेष्टन्ते तूणीरेषु चलन्ति स्वगतानन्दस्य शरेष्वपचारः चापानि च विचेष्टन्ते स्वाधिष्ठातृदेवतासांनिध्यात्स्फुरज्ज्यानि भवन्ति ॥ ५ ॥

रा० टी०-राक्षसविनाशहेतुभूतानुत्पातानुक्त्वा स्वविजयसूचकशकुनान्याह—सेति । सधूमाः राक्षसाशुभसूचकप्रभूतधूमसंवृद्धाः सर्वे मम शराः युद्धाभिनन्दिताः युद्धाय अभिनन्दिताः प्राप्तानन्दाः लक्ष्यन्ते इति शेषः, रुक्मपृष्ठानि स्वर्णभूषितपृष्ठविशिष्टानि चापानि धनूंषि विचेष्टन्ते आकृष्टज्याभिः संबद्धुमिच्छन्ति ॥ ५ ॥

गो० टी०-सधूमा इति । प्रतापानलोद्युक्ता इति भावः । अत एव मम युद्धाभिनन्दिनः रुक्मपृष्ठानि स्वर्णमयपृष्ठानि चापानि धनूंषि । 'अथाज्ञियां धनुश्चापौ' इत्यमरः । विचेष्टन्ते चलन्ति युद्धसन्नद्धानि भवन्तीत्यर्थः । आत्मनश्चापद्वयं लक्ष्मणस्यैकमिति बहुवचनम् ॥ ५ ॥

६] ति०टी०-अयत आसन्नदेशकाले नो भयं जीवितसंशयश्च प्राप्तः । अभयं प्राप्तं चादृष्टराणां जीवितस्य संशयः प्राप्त इत्यर्थ इति तीर्थः ॥ ६ ॥

रा० टी०-यादृशा इति । यादृशा ये प्रसिद्धा वनचारिणः पक्षिणः इहास्मिन्समये कूजन्ति तैरग्रतो भविष्यत् नो अभयं प्राप्तं जीवितस्य राक्षसानां जीवनस्य संशयश्च प्राप्तः, प्राप्तमिति लिङ्गविपरिणामेनान्यत्राप्यन्वेति ॥ ६ ॥

गो० टी०-यादृशा इति । यादृशाः प्रसिद्धाः पूर्वं कृतसंवादा इत्यर्थः । अग्रतः अव्यवहितोत्तरकाले नो भयमिति लुवाक् ॥ ६ ॥

७] ति० टी०-संप्रहारो रणः । एवं भयेष्वपि स्वस्याभ्युदयसूचकं निमित्तमाह—अयमिति । स्फुरमाणः स्फुरन् । दक्षिण इति शेषः । तीर्थव्याख्याने जयसूचकान्तरमांहति व्याख्ययेम् ॥ ७ ॥

रा० टी०-समिति । मुहुर्मुहुः स्फुरमाणोऽयं मे बाहुः सुमहान्संप्रहारः स्वकर्तृकसंप्रहरणं भविष्यति अत्र संशया न इति संनिकर्षे समीपे नोऽस्माकं जयं विजयं शत्रोः पराजयं चाख्याति बोधयति तव वक्त्रं सुप्रभं प्रसन्नं च लक्ष्यते, एतेन तवापि विजयो भविष्यतीति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८

गो० टी०-संप्रहार इति । सुमहान् संप्रहारः युद्धं, बाहुः दक्षिणः, संनिकर्षे अव्यवहितोत्तरकाले ॥ ७ ॥

८]ति०टी०-संनिकर्षे आसन्नकालेऽयमित्यादेराख्यातीत्यनेनान्वयः । तवाप्यङ्गं शुभसूचकमित्याह—सुप्रभमिति ॥ ८ ॥

गो० टी०-स्वसुखप्रसादादेः स्वयं द्रष्टुमशक्यत्वेन स्वसमानसुखे लक्ष्मणे निदर्शयति—सुप्रभमिति । सुखप्रसादफलं व्यतिरेकमुखेनाह—उद्यतानामिति ॥ ८—१० ॥

९-१०] ति० टी०-येषां च वदनं निष्प्रभं भवति तेषामायुःक्षयो भवति वर्तमानसामीप्ये लट् नैवमस्माकमिति शेषः । येषामायुःक्षयो भवति तेषां वदनं निष्प्रभमिति व्याख्याने बीजं चिन्त्यम् ॥ ९ ॥ १० ॥

रा० टी०-विपक्षे दोषमाह-उद्यतानामिति । युद्धार्थमुद्यतानां येषां वदनं मुखं निष्प्रभं भवति तेषामायुःपरिक्षयो भवति ॥ ९ ॥

रा० टी०-रक्षसामिति । नर्दतां रक्षसां राक्षसानां

१ विसृजन्तः खरस्वनानिति गो. पाठः । २ नन्दिन इति गो. पाठः । ३ च लक्ष्मण इति गो. रा. पाठः । ४ सप्रभमिति गो. पाठः । ५ युद्धार्थं इति रा. पाठः । ६ चेति गो. पाठः ।

अनागतविधानं तु कर्तव्यं शुभमिच्छता । आपदा शङ्कमानेन पुरुषेण विपश्चिता ॥ ११ ॥
तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः । गुहामाश्रय शैलस्य दुर्गां पादपसंकुलाम् ॥ १२ ॥
प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया । शापितो मम पादाभ्यां गम्यतां वत्स मा चिरम्॥ १३ ॥
त्वं हि शूरश्च बलवान्हन्या एतान्न संशयः । स्वयं निहन्तुमिच्छामि सर्वानेव निशाचरान्॥ १४ ॥
एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया । शरानादाय चापं च गुहां दुर्गां समाश्रयत् ॥ १५ ॥
तस्मिन्प्रविष्टे तु गुहां लक्ष्मणे सह सीतया । हन्त निर्युक्तमित्युक्त्वा रामः कवचमाविशत् ॥ १६ ॥
स तेनाग्निनिकाशेन कवचेन विभूषितः । बभूव रामस्तिमिरे महानग्निरिवोत्थितः ॥ १७ ॥
स चापमुद्यम्य महच्छरानादाय वीर्यवान् । संबभूवास्थितस्तत्र ज्यास्वनैः पूरयन्दिशः ॥ १८ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः । समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षया ॥ १९ ॥

राक्षसैराहतानां भेरीणां च घोरोऽयं महाध्वनिः श्रूयते, एतेन तेषां युद्धोद्योग इदानीमेवास्तीति सूचितम् ॥ १० ॥

११] ति० टी०—अनागतस्याजिगमिषितस्यानिष्टस्य विधानं प्रतिविधानं परिहारः ॥ ११ ॥

रा० टी०—अनागतेति । आपदं शङ्कमानेन आपद्विषयशङ्कावता शुभं स्वकल्याणमिच्छता पुरुषेण अनागतविधानम् अनागतस्य प्राप्स्यमानस्य आपन्मात्रस्य विधानं प्रतीकारः कर्तव्यम् ॥ ११ ॥

गो० टी०—अनागतेति । आपदं निमित्तवशाच्छङ्कमानेन शुभम् आपत्परिहारम् इच्छता विपश्चिता दूरदर्शिना पुरुषेण अनागतविधानम् अनागतस्य भाविनोऽनर्थस्य विधानं प्रतिविधानं कर्तव्यम् ॥ ११

१२] ति० टी०—आश्रमं हित्वा शैलस्य दुर्गामितरैरगन्तुमशक्यां गुहामाश्रय ॥ १२ ॥

रा० टी०—तस्मादिति । तस्मादुक्तहेतोः वैदेहीं गृहीत्वा शरपाणिर्धनुर्धरस्त्वं पादपसंकुलां दुष्प्रवेशामत एव दुर्गां दुर्गमां शैलस्य गुहामाश्रय ॥ १२ ॥

गो० टी०—तस्मादिति । गृहीत्वा रक्ष्यत्वेन गृहीत्वा पादपसंकुलां दुष्प्रवेशाम् ॥ १२ ॥

१३] ति० टी०—इदं वाक्यं मयोच्यमानं त्वया प्रतिकूलितुं विपरीतं कर्तुं नेच्छामि । भिन्नकर्तृके तुमुन्नार्थः ! उक्तं कुर्वित्यर्थः, मा चिरमविलम्बेन ॥ १३ ॥

रा० टी०—प्रतीति । इदं मद्वाक्यं त्वया प्रतिकूलयितुमन्यथा कर्तुमहं नेच्छामि समानकर्तृकत्वाभावे तुमुन्नार्थः, उद्यतं त्वामित्यध्याहारो वा । अत एव मम पादाभ्यां शापितः कृतशपथस्त्वं गम्यतां गच्छ असीति त्वयेति च शेषो वा किंच मम पादाभ्यां शापितः कृतशपथवता त्वया गम्यताम् इत्यन्तप्रकृतिकतृतीयान्तात्तसिः ॥ १३ ॥

गो० टी०—अहमेव योत्स्यामीति वक्तुमुद्यतं प्रत्याह—प्रतिकूलितुमिति । इदं वाक्यं प्रतिकूलितुं नेच्छामि मया शापितोऽसीति वक्तव्ये मम पादाभ्यामित्युक्तिर्लक्ष्मणव्यवहाराहसारेण ॥ १३ ॥

१४-१५] ति० टी०—त्वं हीति । अनेनासामर्थ्यान्मां वारयतीति शङ्का निराकृता । स्वयमिति । तथैव शापोद्धारस्य सत्त्वादिति भावः ॥ १४ ॥ १५ ॥

रा० टी०—नन्वेतत्कर्मकहनने ममापि सामर्थ्यमस्तीत्यत आह—त्वमिति । त्वमेतान् हन्याः अत्र संशयो न तथापि एतान् स्वयमागतान् सर्वान्निशाचरान् अहमेव हन्तुमिच्छामि ॥ १४ ॥

गो० टी०—त्वन्निवर्तनं न त्वदशक्त्या किंतु मुनिभ्यः प्रतिज्ञातान्मयैव तद्वधः कर्तव्य इत्याशयेनाह—त्वं हीति ॥ १४ ॥

रा० टी०—एवमिति । एवमुक्तो लक्ष्मणः शरान् चापं चादाय सीतया सह गुहां समाश्रयत् ॥ १५ ॥

गो० टी०—एवमिति । दुर्गाम् अन्यैर्दुरासदाम् ॥ १५ ॥

१६] ति० टी०—हन्तेति हर्षे । निर्युक्तं शीघ्रमस्मदुक्तं निर्व्यूढमित्युक्त्वा कवचमाविशद्धृतवान् ॥१६ ॥

रा० टी०—तस्मिन्निति । लक्ष्मणे गुहां प्रविष्टे सति निर्युक्तं मदुक्तं झटित्यनुष्ठितं हन्त अतिहर्षोऽयमित्युक्त्वा रामः कवचमाविशत् दधार ॥ १६ ॥

गो० टी०—तस्मिन्निति । हन्तेति हर्षे निर्युक्तं निश्चयेन उपायश्चिन्तित इत्यर्थः । 'योगः सन्नहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । आविशत् प्राविशत् अधारयदित्यर्थः ॥ १६ ॥

१७] ति० टी०—नानारत्नकान्त्याऽग्निसादृश्यं कवचे॥१७॥

रा० टी०—स इति । अग्निनिकाशेन वह्निसदृशेन कवचेन विभूषितो रामः तिमिरे अन्धकारे उत्थितो महानग्निरिव बभूव ॥ १७ ॥

गो० टी०—स तेनेति । अत्रोपमालंकारेण क्षणेन रक्षःक्षयो ध्वन्यते ॥ १७ ॥ १८ ॥

१८-१९] ति० टी०—संबभूवास्थितः सम्यगास्थितो बभूवेत्यर्थः ॥ १८ ॥ १९ ॥

१ आपदमिति गो. रा. पाठः । २ हन्या होतानिति गो. पाठः । ३ त्विति गो. पाठः । ४ विधूमोऽग्निरिति गो. पाठः । ५ बभूवावस्थित इति गो. ठः । ६ काङ्क्षिण इति गो. पाठः । ७ परस्मैपदमयुक्तमिति भाति ।

ऋषयश्च महात्मानो लोके ब्रह्मर्षिसत्तमाः । समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः॥ २० ॥
स्वस्ति गोब्राह्मणानां च लोकानां चेति संस्थिताः । जयतां राघवो युद्धे पौलस्त्यान्रजनीचरान ॥ २१ ॥
चक्रहस्तो यथा युद्धे सर्वानसुरपुंगवान् । एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परम् ॥ २२ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥ २३ ॥
इति राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः । जातकौतूहलास्तस्थुर्विमानस्थाश्च देवताः ॥ २४ ॥
आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् । दृष्ट्वा सर्वाणि भूतानि भयाद्विव्यथिरे तदा ॥ २५ ॥
रूपमप्रतिमं तस्य रामस्याक्लिष्टकर्मणः । बभूव रूपं क्रुद्धस्य रुद्रस्येव महात्मनः ॥ २६ ॥
इति संभाष्यमाणे तु देवगन्धर्वचारणैः । ततो गम्भीरनिर्ह्रादं घोरचर्मायुधध्वजम् ॥ २७ ॥
अनीकं यातुधानानां समन्तात्प्रत्यदृश्यत । वीरालापान्विसृजतामन्योन्यमभिगच्छताम् ॥ २८ ॥

२०] ति० टी०–लोके ब्रह्मर्षिसत्तमाः । त्रैलोक्येऽपि ब्रह्मर्षित्वेन प्रसिद्धा इत्यर्थः । पुण्यकर्मणः पुण्यकर्माणः अदीर्घत्वमार्षम् ॥ २० ॥

रा० टी०–स इति । महत् चापमुद्यम्य शरानादाय वीर्यवान् स रामः ज्यास्वनैः दिशः पूरयन् सन् तत्रास्थितः संबभूव ॥ १८ ॥

रा० टी०–तत इति । देवादयस्तत्र समेयुः समेत्य ऊचुश्च । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–ततो देवा इत्यादि । पूर्वसर्गं समागमनमुक्तम् अत्र सन्निधानम् । चारणाः देवजातिविशेषाः लोके त्रैलोक्ये ब्रह्मर्षिसत्तमाः भृग्वादयः पुण्यकर्मणः पुण्यकर्माणः ॥ १९॥२०॥

२१–२२] ति० टी०–गोब्राह्मणानामिति षष्ठी चतुर्थ्यर्थे आर्षी तेभ्य इत्यर्थः । 'लोकानां येऽभिसंगता' इति पाठे लोकानां लोकपालानां संगताः । हविर्दोमादिद्वारोपकारका इत्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–स्वस्तीति ॥ २१ ॥

रा० टी०–चक्रेति ॥ २२ ॥

गो० टी०–स्वस्तीत्यादि । लोकानां येऽभिसंगता इति । ये लोकानामभिसंगताः अनुकूलाः तेभ्योऽपि स्वस्त्यस्त्वित्यर्थः । देवादयः समेत्य स्वस्तीत्याचूचुः त एवैवमुक्त्वा कथं युद्धं भविष्यतीत्यन्तं पुनः प्रोचुरिति संबन्धः ॥ २१–२२ ॥

२३] ति० टी०–धर्मात्मा अच्छाय्योधीत्यर्थः ॥ २३ ॥

रा० टी०–तद्वचनाकारमाह–चतुर्दशेति । रक्षसां चतुर्दशसहस्राणि सन्तीति शेषः, धर्मात्मा रामस्तु एक एवेति युद्धं कथं भविष्यति ॥ २३ ॥

२४] ति० टी०–सगणा विद्याधरादिदशदेवयोनिगणसहिताः । इतीत्यस्य वदन्त इति शेषः ॥ २४ ॥

रा० टी०–इतीति । इति अनेन हेतुना जातकौतूहलाः सन्तो राजर्ष्यादयस्तस्थुः ॥ २४ ॥

गो० टी०–इतीति । राजर्षयः देवत्वं प्राप्ताः यद्वा यानप्रस्थीभूताः सगणा. सपरिकराः ॥ २४ ॥

२५] ति० टी०–तेजसा वैष्णवेन क्षात्रेण एतेन सहजस्वभावो भगवतो ब्राह्म एव क्षात्रस्तु स्वेच्छया कार्याय भगवता स्वीक्रियत इति सूचितम् ॥ २५ ॥

रा० टी०–आविष्टमिति । तेजसा समाधिकरहितप्रतापेन आविष्टं संयुक्तं संग्रामार्थं स्थितं रामं दृष्ट्वा सर्वाणि भूतानि भयात् अनुमितरामपरिश्रमजनितभीतेः विव्यथिरे ॥ २५ ॥

गो० टी०–आविष्टमिति । संग्रामशिरसि युद्धाग्रे ॥२५॥

२६] ति०टी०–रुद्रस्य रूपमिव रामस्य रूपमप्रतिमम् २६

रा० टी०–रूपमिति । न क्लिष्टं कस्मैचित् खेदप्रदं कर्म व्यापारो यस्य तस्य रामस्य अप्रतिमम् उपमारहितमपि रूपं महात्मनः क्रुद्धस्य रुद्रस्य रूपमिव बभूवेति वाक्ये देवगन्धर्वचारणैः संभाष्यमाणे सति गम्भीरनिर्ह्रादं गम्भीरनिर्ह्रादविशिष्टं घोराणि चर्मायुधध्वजानि यस्मिन् तत् यातुधानानां रक्षसामनीकं सैन्यं समन्तात् सर्वदिग्भ्यः ततः रामाधिष्ठितस्थानं समपद्यत । सार्धश्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०–रूपमिति । रामस्य रूपं रुद्रस्य रूपमिव बभूव २६

२७] ति० टी०–इति वाक्ये संभाषमाणे स्तिरित्यर्थः॥२७॥

गो० टी०–तत इति । निर्ह्रादः शब्दः, वर्म कवचम्, अनीकं सेना ॥ २७ ॥

२८] ति० टी०–अन्योन्यमभिगच्छताम् । एवं युद्धं कर्तव्यमिति च बोधनार्थमिति शेषः ॥ २८ ॥

रा० टी०–वीरेति । वीरालापान् वीरसूचकमहाशब्दान् विसृजताम् अन्योन्यं परस्परमभिगच्छताम् ॥ २८ ॥

गो० टी०–सिंहनादमित्यादि । अन्योऽन्यमभिगर्जताम् अहमेव शत्रुं हनिष्यामीति जल्पतामित्यर्थः । विस्फारयतां ज्याशब्दं कुर्वताम् अभीक्ष्णशः भृशं जृम्भतां जृम्भमाणानां मदेनोद्गच्छतामित्यर्थः, विप्रघुष्टस्वनानां घोषो गुञ्जनाख्यध्व-

---

१ अन्योन्यमिति गो. पाठः । २ ब्राह्मणेभ्योऽस्त्विति गो. पाठः । ३ येऽभिसंगता इति गो. पाठः । ४ पिनाकिन इति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ वर्मेति गो. पाठः । ७ अदृश्यतेति गो. पाठः । ८ सिंहनादमिति गो. पाठः । ९ गर्जतामिति गो. पाठः ।

चापानि विस्फारयतां जृम्भता चाप्यभीक्ष्णशः । विप्रघुष्टस्वनानां च दुन्दुभींश्चापि निघ्नताम् ॥ २९ ॥
तेषां सुविपुलः शब्दः पूरयामास तद्वनम् । तेन शब्देन वित्रस्तास्त्रासिता वनचारिणः ॥ ३० ॥
दुद्रुवुर्यत्र निःशब्दं पृष्ठतो नावलोकयन् । तेऽभ्यानीकं महावेगं रामं समनुवर्तत ॥ ३१ ॥
धृतनानाप्रहरणं गम्भीरं सागरोपमम् । रामोऽपि चारयंश्चक्षुः सर्वतो रणपण्डितः ॥ ३२ ॥
ददर्श खरसैन्यं तद्युद्धायाभिमुखो गतः । वितत्य च धनुर्भीमं तूण्याश्चोद्धृत्य सायकान् ॥ ३३ ॥
क्रोधमाहारयत्तीव्रं वधार्थं सर्वरक्षसाम् । दुष्प्रेक्ष्यश्चाभवत्क्रुद्धो युगान्ताग्निरिव ज्वलन् ॥ ३४ ॥
तं दृष्ट्वा तेजसाविष्टं प्राव्यथन्वनदेवताः । तस्य रौद्रस्य रूपं तु रामस्य ददृशे तदा ॥
दक्षस्येव क्रतुं हन्तुमुद्यतस्य पिनाकिनः ॥ ३५ ॥
[आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् । दृष्ट्वा सर्वाणि भूतानि भयार्तानि प्रदुद्रुवुः] ॥
तत्कार्मुकैराभरणैः[13] रथैश्च तद्भीमभिश्चाग्निसमानवर्णैः ।
बभूव सैन्यं पिशिताशनानां सूर्योदये नीलमिवाभ्रजालम् ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

निर्विशेषः ' घोषो गुल्मनमज्ञने ' इति वैजयन्ती । भावे निष्ठा तद्रूपस्वनवतामित्यर्थः ॥ २८ ॥ २९ ॥

२९-३०] ति० टी०—जृम्भतां देहममतारहित्येन युद्धप्रवृत्तये मादकद्रव्यस्वीकारजं जृम्भणम् अभीक्ष्णशः पुनः-पुनः । 'पुनः पुनः' इत्येव पाठः विप्रघुष्टोऽतिशयेन कृतः स्वनो यैस्तेषाम् ॥ २९ ॥ ३० ॥

रा० टी०—चापानि विस्फारयताम् अभीक्ष्णशः प्रतिक्षणं जृम्भतां विप्रघुष्टस्वनानाम् अतिहर्षसूचकशब्दवतां दुन्दुभीः अभिनिघ्नतां तेषां राक्षसानां सुविपुलोऽतिविशालः शब्दः तद्वनं पूरयामास । अर्धचतुष्टयमेकान्वयि ॥ २९ ॥

रा० टी०—तेनेति । तेन शब्देन वित्रस्ताः वनचारिणः तद्वनमात्रनिवसनशीलाः श्वापदा हिंसका व्याघ्रप्रभृतयः यत्र निःशब्दं शब्दाभावस्तं देशं दुद्रुवुः पृष्ठतस्त्यक्तदिग्भागान् न अवलोकयन् अवालोकयन् ॥ ३० ॥

गो० टी०—तेनेति । श्वापदाः हिंस्रा व्याघ्रादयः यत्र निःशब्दं शब्दाभावः । "अव्ययं विभक्ति-" इत्यादिना अव्ययी-भावः । तं देशं दुद्रुवुरित्यन्वयः । पृष्ठतः पश्चाद्भागम् ॥ ३० ॥

३१-३३] ति० टी०—यत्र निःशब्दं शब्दाभावस्तं देशं दुद्रुवुः । पृष्ठतो नावलोकयन् भीतिवशादिति शेषः ॥ ३१-३३ ॥

३४] ति० टी०—सर्वरक्षसां वधार्थं सर्वरक्षोवधद्वारत्वा-दस्य युद्धस्येति भावः । क्रोधमाहारयत्प्राप्तवान् ॥ ३४ ॥

रा० टी०—तदिति । धृतनानाप्रहरणम् उद्यतानेकविधायु-धविशिष्टं गम्भीरम् अत एव सागरोपमं महावेगं तदनीकं सैन्यम् रामं समन्ववर्तत रामं समन्ववर्तत ॥ ३१ ॥

गो० टी०—तत्स्थिति । सम्मुपसर्पत सम्मुपासर्पत् गम्भी-रम् इतरदुक्तप्रवेशम् ॥ ३१ ॥

रा० टी०—राम इति । रणपण्डितः रणकर्मनिपुणो रामो-ऽपि सर्वतः चक्षुः चारयन् उद्यतं धृतकवचादियुद्धाभिमुखं युद्धाय अभिमुखं संमुखं प्राप्तं तत् खरस्वामिकं सैन्यं ददर्श ॥ ३२ ॥

गो० टी०—रामोऽपीति । उत्थितम् उद्युक्तम् ॥ ३२ ॥

रा० टी०—वितत्येति । भीमं धनुर्वितत्य आकृष्य तूण्योः सायकान् बाणान् उद्धृत्य सर्वरक्षसां युद्धप्राप्तनिखिलराक्षसानां वधार्थं राक्षसत्वनिहत्यर्थं तीव्रं क्रोधमाहारयत् स्वीचकार अत एव क्रुद्धः स्वीकृतकोपाभासो रामः युगान्ताग्निरिव ज्व-लन् सन् दुष्प्रेक्ष्यः द्रष्टुमशक्योऽभवत् ॥ ३३ ॥ ३४ ॥

गो० टी०—वितत्येति । वितत्य किञ्चिद्भ्राणविसर्पणं कृत्वेत्यर्थः 'विततं संहितस्येषोः किंचिदेव विसर्पणम्' इति वैजयन्ती । तूण्योः पृष्ठपार्श्वद्वयबद्धयोः आहारयदित्यनेन करु-णामूर्तिरप्याश्रितकण्टकोद्धारणाय क्रोधमारोपयामासेति गम्य-ते । भीमं धनुरुद्धृत्य तूण्योः शरांश्चोद्धृत्य वितत्य सर्वरक्षसां वधार्थं क्रोधमाहारयदित्यन्वयः ॥ ३३ ॥ ३४ ॥

३५] ति० टी०—प्राव्यथन्प्राव्यथन्त ॥ ३५ ॥

रा० टी०—तमिति । तेजसा आविष्टं प्रकटीकृतकिंचित्स्व-तेजसं तं रामं दृष्ट्वा वनदेवताः प्राव्यथन् प्राद्रवन् । अर्धं पृथक्-तस्येति । रुष्टस्य रामस्य रूपं तु दक्षस्य क्रतुं हन्तुमुद्यतस्य पिनाकिनो महादेवस्य रूपमिव ददृशे राक्षसैरिति शेषः ॥ ३५ ॥

गो० टी०—तस्येति । दक्षस्येति क्रोधातिशयमात्रे दृष्टान्तः ॥ ३५ ॥ ३६ ॥

३६] ति० टी०—नीलाभ्रजालस्थानीया राक्षसाः सूर्यो-दयः सूर्यकिरणस्थानीयः कार्मुकादिसंबन्धः ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

---

१ दुन्दुभीरिति रा. पाठः । २ सुतुमुल इति गो. पाठः । ३ श्वापदा इति गो. रा. पाठाः । ४ न व्यलोकयन्निति गो. पाठः । ५ तत्स्वनीकमिति गो. पाठः । ६ सम्मुपसर्पतेति गो. पाठः । ७ युद्धाभिमुखमुत्थितमिति गो. युद्धाभिमुखमुपस्थितमिति रा. पाठः । ८ तूण्योरिति गो. रा. पाठः । ९ दुष्प्रेक्षः स इति गो.पाठः। १० प्राद्रवन्निति गो.पाठः। ११ क्रुद्धस्येति गो.पाठः। १२ श्लोकोऽयमधिकः गो. पाठे । १३ ध्वजैश्च तैरिति गो.पाठः। १४ वृन्दमिति गो पाठः।

पञ्चविंशः सर्गः ।

खरसैन्येन संभूतो रामस्य तुमुलाहवः प्रस्तूयते ।

अवष्टब्धधनुं रामं क्रुद्धं [1]तं रिपुघातिनम् । ददर्शाश्रममागम्य खरः सह पुरःसरैः ॥ १ ॥
तं दृष्ट्वा [2]सगुणं चापमुद्यम्य खरनिःस्वनम् । रामस्याभिमुखं सूतं चोद्यतामित्यचोदयत् ॥ २ ॥
स खरस्याज्ञया सूतस्तुरगान्समचोदयत । यत्र रामो महाबाहुरेको धुन्वन्धनुः स्थितः ॥ ३ ॥
तं तु निष्पतितं दृष्ट्वा सर्वतो रजनीचराः । [3]मुञ्चमाना महानादं सचिवाः पर्यवारयन् ॥ ४ ॥
स तेषां यातुधानानां मध्ये रथगतः खरः । बभूव मध्ये ताराणां लोहिताङ्ग इवोद्गतः ॥ ५ ॥
ततः शरसहस्रेण राममप्रतिमौजसम् । अर्दयित्वा महानादं ननाद समरे खरः ॥ ६ ॥
ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः । रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम् ॥ ७ ॥
मुद्गरैः [4]पट्टिशैः शूलैः प्रासैः खड्गैः परश्वधैः । राक्षसाः समरे शूरं निजघ्नू रोषतत्पराः ॥ ८ ॥

रा० टी०–तदिति । तत् तस्य कार्मुकादिभिः पिशिताशनानां सैन्यं सूर्योदये नीलमभ्रजालं मेघसमूह इव बभूव ॥२६॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

गो टी०–तदिति । कवचसूर्यकिरणयोः साम्यं नौलाभाणां रक्षसां च कार्मुकवत्त्वं च ध्वजवत्त्वं तुल्यं मेघे उत्पातध्वजसंभवात् ॥ ३७ ॥

अत्र सार्धसप्तत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्विंशः सर्गः ॥२४॥

१] ति० टी०–उकारान्तोऽपि धनुःशब्दो धनुर्वाचकः अवष्टब्धमवलम्बितं धनुर्येन तम् ॥ १ ॥

रा० टी०–खरवृत्तान्तमाह–अवष्टब्धेति । अवष्टब्धः सम्यग् गृहीतः धनुश्चापं येन स तं क्रुद्धं रिपुघातिनं रामपुरस्सरैः सह खरः आश्रममागम्य ददर्श उकारान्तधनुश्शब्दोऽपि धनुःपर्यायः ॥ १ ॥

गो० टी०–तुमुलयुद्धं पञ्चविंशे–अवष्टब्धेत्यादि । धन्यत इति धनुः । धन धान्य इत्यस्माद्धातोः " भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः" इत्यौणादिकमूत्रेण उप्रत्ययः । धनुषां च धनुं विदुः, ' धनुरिवाजनि वक्रः ' इति कविकाव्यप्रयोगश्च ॥ १ ॥

२–३] ति० टी०–रामस्याभिमुखं रथश्चोद्यतामिति सूतमचोदयत् ॥ २ ॥ ३ ॥

रा० टी०–तमिति । रामं दृष्ट्वा सगुणं ज्यासहितं खरनिःस्वनं रूक्षशब्दविशिष्टं चापमुद्यम्य रामस्याभिमुखं चोद्यतां प्राप्यतामित्यर्थः, रथ इति शेषः इति सूतमचोदयत् प्रैरयत् ॥ २ ॥

रा० टी०–स इति । यत्र स्थले एको रामः धनुर्धुन्वन् सन् स्थितस्तत्र खरस्याज्ञया सूतस्तुरगान् समचोदयत् ॥ ३ ॥

गो० टी०–तमिति । चोद्यतामिति रथ इति शेषः ॥२॥३॥

४] ति० टी०–सचिवाः श्येनगाम्यादयः ॥ ४ ॥

रा० टी०–तमिति । तं खरं रामसंनिधिं प्राप्तं दृष्ट्वा महानादं मुञ्चमानाः रजनीचराः सचिवाः श्येनगाम्यादयः सर्वतः पर्यवारयन् अवेष्टयन् ॥ ४ ॥

गो० टी०–तं त्विति । निष्पतितं युद्धोन्मुखं सचिवाः श्येनगाम्यादयः ॥ ४ ॥

५] ति० टी०–लोहिताङ्गो भौमः स इव क्रोधेनास्यापि रक्ताङ्गत्वात् ॥ ५ ॥

रा० टी०–स इति । यातुधानानां मध्ये रथगतः खरः ताराणां मध्ये उत्थितो लोहिताङ्गो भौम इव बभूव ॥ ५ ॥

गो० टी०–स इति । लोहिताङ्गः अङ्गारकः ॥ ५ ॥

६–८] ति० टी०–अर्दयित्वाऽर्दयित्वेव ॥ ६–८ ॥

रा० टी०–तत इति । ततः रामसमीपागमनानन्तरसमये शरसहस्रेण राममर्दयित्वा खरो महानादं ननाद ॥ ६ ॥

गो० टी०–तत इति । अर्दयित्वा पीडयित्वा महानादं ननाद चकारेत्यर्थः ॥ ६ ॥

रा० टी०–तत इति । ततः खरकर्तृकहननानन्तरं भीमधन्वानं तं रामं सर्वे निशाचराः नानाविधैः शस्त्रैरभ्यवर्षन्त ॥७॥

गो० टी०–ततस्तमिति । भीमधन्वानं धनुषश्चेत्यनङ् समासान्तः । शस्त्रैः आयुधैः । ' शस्त्रमायुधलोहयोः ' इत्यमरः ॥ ७ ॥

रा० टी०–तत्प्रकारमाह–मुद्गरैरिति । रोषतत्पराः राक्षसाः समरे शूरं रामं मुद्गरादिभिर्निजघ्नुः ॥ ८ ॥

गो० टी०–मुद्गरैरिति । मुद्गरैः स्थूलगदाभिः प्रासैः कुन्तैः रोषतत्पराः क्रोधपरवशाः ॥ ८ ॥

---

१ चेति गो. पाठः । २ सशरमिति गो. पाठः । ३ नर्दमाना इति गो. पाठः । ४ उद्यत इति गो. उत्थित इति रा. पाठः । ५ पट्टिशैरिति गो. पाठः । ६ राममिति गो. पाठः ।

ते बलाहकसंकाशा महाकाया महाबलाः । अभ्यधावन्त काकुत्स्थं रथैर्वाजिभिरेव च ॥ ९ ॥
गर्जंतः पर्वतकूटाभं रामं युद्धे जिघांसवः । ते रामे शरवर्षाणि व्यसृजन्रक्षसां गणाः ॥ १० ॥
शैलेन्द्रमिव धाराभिर्वर्षमाणा महाघनाः । सर्वैः परिवृतो रामो राक्षसैः क्रूरदर्शनैः ॥ ११ ॥
तिथिष्विव महादेवो वृतः पारिषदां गणैः । तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ॥ १२ ॥
प्रतिजग्राह विशिखैर्नद्योघानिव सागरः । स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे ॥ १३ ॥
रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः । स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः ॥ १४ ॥
बभूव रामः संध्याभ्रैर्दिवाकर इवावृतः । विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ॥ १५ ॥
एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम् । ततो रामस्तु संक्रुद्धो मण्डलीकृतकार्मुकः ॥ १६ ॥
ससर्ज निशितान्बाणाञ्छतशोऽथ सहस्रशः । दुरावारान्दुर्विषहान्कालपाशोपमान्रणे ॥ १७ ॥
मुमोच लीलया कङ्कपत्रान्काञ्चनभूषणान् । ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ॥ १८ ॥

९-११] ति० टी०-बलाहका मेघाः ॥ ९-११ ॥

रा० टी०-ते इति । बलाहकसंकाशाः मेघसदृशास्ते राक्षसाः रथैर्वाजिभिश्च काकुत्स्थमभ्यधावन्त ॥ ९ ॥

गो० टी०-त इति । बलाहकसंकाशाः मेघतुल्याः कूटं श्रृङ्गम् अभ्यधावन्त आभिमुख्येनाधावन्त ॥ ९ ॥

रा० टी०-गर्जैरिति । पर्वतकूटाभैर्गिरिशिखरसदृशैर्गर्जैरुपलक्षिताः रामं जिघांसवः शैलेन्द्रं सुमेरुं जलधाराभिर्वर्षमाणा महाघना इव ते रक्षसां गणाः रामे शरवर्षाणि व्यसृजन् । सार्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०-ते राम इति । शैलेन्द्रमिवेत्युपमानेन रामस्य निर्दुःखत्वमुक्तम् ॥ १० ॥

रा० टी०-सर्वैरिति । तिथिषु प्रदोषरात्रिषु परिषदां गणैर्वृतो महादेव इव क्रूरदर्शनैः सर्वैः राक्षसैः परिवृतो रामोऽभवदिति शेषः ॥ ११ ॥

गो० टी०-स तैरित्याद्यर्धमेकान्वयम् ॥ ११ ॥

१२] ति० टी०-तिथिषु प्रदोषतिथिषु । पारिषदां नुडभाव आर्षः ॥ १२ ॥

रा० टी०-तानीति । यातुधानैर्मुक्तानि शस्त्राणि राघवः नद्योघान् नदीप्रवाहान् सागर इव विशिखैर्बाणैर्जग्राह ॥१२॥

गो० टी०-तानीति । विशिखैः बाणैः प्रतिजग्राह प्रतिरुरोध नद्योघान् नदीप्रवाहान् ॥ १२ ॥

१३] ति० टी०-प्रतिजग्राह तानि शस्त्राणि स्वशरैरवरुरोध । नद्योघा नदीप्रवाहाः ॥ १३ ॥

रा० टी०-स इति । भिन्नगात्रः भिन्नं प्राकृतविलक्षणं गात्रं शरीरं यस्य स रामस्तैः राक्षसप्रक्षिप्तैः प्रहरणैः शस्त्रास्त्रैर्न विव्यथे । तत्र दृष्टान्तः प्रदीप्तैः बहुभिर्वज्रैरचलः पर्वत इव ॥ १३ ॥

गो० टी०-स तैरिति । वज्रैः अशनिभिः ॥ १३ ॥

१४] ति० टी०-वज्रैरिव महाचल इत्यनेन लेशतोऽपि व्यथाभावः । स विद्धः अनेन दृष्टणां किंचिद्घृणित्वं सूचयति । आदिग्ध आलिप्तः ॥ १४ ॥

रा० टी०-स इति । सर्वगात्रेषु विद्धः शस्त्रास्त्रैस्ताडितः क्षतजादिग्धः स्वीकृतकोपाभासहेतुकारुण्यविशिष्टत्वेन रुधिरेवलिप्त इव राघवो रामः संध्याभ्रैरावृतः दिवाकर इव बभूव ॥१४॥

गो० टी०-स विद्ध इति । क्षतजादिग्धः रुधिरालिप्तः ॥ १४ ॥

१५-१६] ति० टी०-अत एव देवादयो विषेदुः॥१५॥१६॥

रा० टी०-विषेदुरिति । एकं रामं बहुभिः सहस्रैः राक्षसैः समावृतं दृष्ट्वा देवादयो विषेदुः ॥ १६ ॥

गो० टी०-विषेदुरिति । बहुभिः सहस्रैः चतुर्दशसहस्रैः१६

रा० टी०-तत इति । ततः देवादिप्राप्तविषादानन्तरं मण्डलीकृतं कार्मुकं येन स रामः निशितान् अतितीक्ष्णान् दुरावारान् आवारयितुमशक्यान् दुर्विषहान् बाणान् ससर्ज तूणीरान्निस्सारयामास ॥ १६ ॥ १७ ॥

गो० टी०-तत इति । मण्डलीकृतकार्मुकः आकर्णाकर्षणेन मण्डलाकारीकृतधनुः विशिखान् बाणान् अर्धचन्द्राग्रबाणान् प्रथमं शतशः अनन्तरं सहस्रशः स निर्विभेदेति योजना॥ १६॥

१७] ति० टी०-दुरावारानशक्यनिवारणान् दुर्विषहान् अतिपीडाजनकानिति यावत् ॥ १७ ॥

गो० टी०-दुरावारान् इति । दुरावारान् वारयितुमशक्यान् दुर्विषहान् दुःसहान् कालदण्डोपमान् यमदण्डतुल्यान् अजिह्मगान् अवक्रगामिनः अस्खलितलक्ष्यकानित्यर्थः । कङ्कपत्रान् बाणान् 'कङ्कपत्रशरमार्गणबाणाः' इति हलायुधः ॥ १७ ॥

१८] ति० टी०-कङ्कपत्रांस्तयुतशरान् लीलयेति युगपत्सकलप्रपञ्चसंहारस्वरूपस्यैतावन्मात्रं लीलैवेति नाश्चर्यायेति भावः ॥ १८ ॥

रा० टी०-मुमोचेति । अजिह्मगान् अकुटिलगतीन् कङ्कपत्रान् कङ्कपत्रविशिष्टान् शरान् रामो लीलया मुमोच ।

१ महानादा महौजस इति गो.पाठः । २ बलाहका इति गो.पाठः । ३ स तैः···घो रै राघवो रक्षसां गणैरिति गो.पाठः । ४ अर्धमेतत् गो.नास्ति । ५ परिषदामिति रा. पाठः । ६ विशिखानिति गो.पाठः । ७ दण्डेति गो.पाठः । ८ रामः कङ्कपत्रानजिह्मगानिति गो.रा. पाठः । ९ रुधिर लिप्त इति भाति ।

आददू रक्षसां प्राणान्पाशाः कालकृता इव । भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ॥ १९ ॥
अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः । असंख्येयास्तु रामस्य सायकाश्चापमण्डलात् ॥ २० ॥
विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः । तैर्धनूंषि ध्वजाग्राणि चर्माणि कवचानि च ॥ २१ ॥
बाहून्सहस्ताभरणानूरून्करिकरोपमान् । चिच्छेद रामः समरे शतशोऽथ सहस्रशः ॥ २२ ॥
हयान्काञ्चनसंनाहान्रथयुक्तान्ससारथीन् । गजांश्च सगजारोहान्सहयान्सादिनस्तदा ॥ २३ ॥
[3]चिच्छिदुर्बिभिदुश्चैव रामबाणा गुणच्युताः । पदातीन्समरे हत्वा [4]अनयद्यमसादनम् ॥ २४ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः । भीममार्तस्वरं चक्रुश्छिद्यमाना निशाचराः ॥ २५ ॥
तत्सैन्यं विविधैर्बाणैरर्दितं मर्मभेदिभिः । न रामेण सुखं लेभे शुष्कं वनमिवाग्निना ॥ २६ ॥
केचिद्भीमबलाः शूराः प्रासाञ्शूलान्परश्वधान् । [7]चिक्षिपुः परमक्रुद्धा रामाय रजनीचराः ॥ २७ ॥
[8]तेषां बाणैर्महाबाहुः शस्त्राण्यावार्य वीर्यवान् । जहार समरे प्राणांश्चिच्छेद च शिरोधरान् ॥ २८ ॥

अर्धं पृथक्–ते इति । शत्रुसैन्येषु रामेण मुक्तास्ते शराः काल-कृताः पाशा इव रक्षसां प्राणान् आददुः ॥ १८ ॥

गो० टी०–ते शरा इति । प्राणानाददुः अमारयन्नित्यर्थः । कालकृताः यमप्रयुक्ता इत्यर्थः ॥ १८ ॥

१९] ति० टी०–रुधिराप्लुतास्तत्सिक्ताः ॥ १९ ॥

रा० टी०–भित्त्वेति । तान् लक्ष्यीभूतान् राक्षसदेहान् भित्त्वा रुधिराप्लुता दीप्ताग्निसमतेजसस्ते शराः अन्तरिक्षगताः सन्तो रेजुः ॥ १९ ॥

गो० टी०–भित्त्वेति । रुधिराप्लुता इति विशेषणं दीप्ताग्न्युपमानोत्थम् ॥ १९ ॥

२०] ति० टी०–अत एव दीप्ताग्निसमतेजसः चापमण्डलात् संधानमोचनवैचित्र्यान्मण्डलाकारता चापस्य ॥ २० ॥

रा० टी०–असंख्येया इति । रक्षःप्राणापहारिणः अतीवोग्राः असंख्येयाः रामस्य सायकाः चापमण्डलात् विनिष्पेतुः॥२०॥

गो० टी०–असंख्येया इति । सायकाः बाणाः ॥२०॥

२१] ति० टी०–चर्माणि फलकान् ॥ २१ ॥

रा० टी०–तैरिति । तैः स्वप्रक्षिप्तैर्बाणैः शतशः सहस्रशः बाहवादीनि समरे रामः चिच्छेद ॥ २१ ॥ २२ ॥

गो० टी०–तैरित्याद्यर्धत्रयमेकं वाक्यम् । वर्माणि कवचानि ॥ २१ ॥

२२-२३] ति० टी०–सहस्ताभरणान्साङ्गदान्॥२२॥२३॥

२४] ति० टी०–छेदभेदौ द्वैधीभावविदारणरूपौ । पदातीन्हत्वा यमगृहंमप्रापयदित्यन्वयः ॥ २४ ॥

रा० टी०–हयानिति । काञ्चनसंनाहान् काञ्चनसंनाहविशिष्टान् रथयुक्तान् ससारथीन् सारथिसहितान् सगजारोहान् गजारोहसहितान् सहयान् हयसहितान् सादिनोऽश्वारोहांश्च पदातींश्च गुणच्युता रामबाणाः चिच्छिदुः बिभिदुश्च जघ्नुरित्यर्थः । हत्वा यमसादनम् एनां सर्वसंपत्तीनाम् अमः नित्यं प्रापयति स्मैस्तदेव सादनं गृहं यस्मैस्तं नित्यलोकमनयत् श्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–हयानिति । काञ्चनसंनाहान् काञ्चनाभरणान् रथयुक्तान् रथवद्वान् सगजारोहान् सानिषादान् सादिनः अश्वारोहान् सदनमेव सादनं स्वार्थे अण् ॥ २२ ॥ २३ ॥

२५-२७] ति० टी०–नालीका मुखमात्रायःसंयुक्ताः, नाराचाः सर्वत आयसाः, विकर्णिनोऽप्याकुशा उद्धारे प्राणहराः ॥ २५-२७ ॥

रा० टी०–तत इति । नालीकादिभिः छिद्यमानाः निशाचराः आर्तस्वरं चक्रुः । तत्र नालीकाः लोहसंयुक्तमुखमात्राः, नाराचाः सर्वतो लोहमयाः, विकर्णिनः उद्धारे प्राणहराः अग्राकुशाः ॥ २५ ॥

गो० टी०–तत इति । नालीकाः नालमात्रशराः नाराचाः आयसशराः विकर्णिनः कर्णशराः । भीममिति क्रियाविशेषणम् ॥ २४ ॥

रा० टी०–तादिति । मर्मभेदिभिः मर्मभेदनशीलैः विविधैर्बाणैः अग्निना शुष्कं वनमिव रामेण अर्दितं तत्सैन्यं सुखं न लेभे ॥ २६ ॥

गो० टी०–तत्सैन्यमिति । रामेण कर्त्रा बाणैः अर्दितं पीडितं तत्सैन्यं सुखं दुःखनिवृत्तिम् अग्निना अर्दितं शुष्कं वनमिव न लेभे ॥ २६ ॥

रा० टी०–केचिदिति । परमक्रुद्धाः केचित् रजनीचराः रामाय शूलादीन्निक्षिप्तुः ॥ २७ ॥

गो० टी०–केचिदिति । परमायुधानिति शूलादिविशेषणम् ॥ २६ ॥

२८] ति० टी०–आवार्य वारितानि कृत्वा ॥ २८ ॥

रा० टी०–तेषामिति । महाबाहुः रामस्तेषां [9]बाणैः

---

१ वर्माणि च शिरांसीति गो. पाठः । २ तथेति गो. पाठः । ३ अर्धमेतत् गो. नास्ति । ४ ह्यनयदिति गो. पाठः । ५ भिद्यमाना इति गो. पाठः । ६ शूलान्खड्गानिति गो. पाठः । ७ रामस्याभिमुखं गत्वा चिक्षिपुः परमायुधानिति गो. पाठः । ८ तानीति गो. पाठः । ९ गृहं प्रापयदिति युक्तं भाति ।

ते छिन्नशिरसः पेतुश्छिन्नचर्मशरासनाः । सुपर्णवातवि[2]क्षिप्ता जगत्यां पादपा यथा ॥ २९ ॥
अवशिष्टाश्च ये तत्र विषण्णास्ते[3] निशाचराः । खरमेवाभ्यधावन्त शरणार्थं शरार्दिताः ॥ ३० ॥
तान्सर्वान्धनुरादाय समाश्वास्य च दूषणः । अभ्यधावत्सुसंक्रुद्धः क्रुद्धं क्रुद्ध इवान्तकः ॥ ३१ ॥
निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः । राममेवाभ्यधावन्त सालतालशिलायुधाः ॥ ३२ ॥
शूलमुद्गरहस्ताश्च पाँशहस्ता महाबलाः । सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे ॥ ३३ ॥
द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः । तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ॥ ३४ ॥
रामस्यास्य महाघोरं पुनस्तेषां च रक्षसाम् । ते समन्तादभिक्रुद्धा राघवं पुनरार्दयन् ॥ ३५ ॥
तैर्ततः सर्वा दिशो दृष्ट्वा प्रदिशश्च समावृताः । राक्षसैः सैर्वतः प्राप्तैः शरवर्षाभिरावृतः ॥ ३६ ॥
स कृत्वा भैरवं नादमस्त्रं परमभास्वरम् । समयोजयद्गान्धर्वं राक्षसेषु महाबलः ॥ ३७ ॥
ततः शरसहस्राणि निर्ययुश्चापमण्डलात् । सर्वा दश दिशो बाणैरापूर्यन्त समागतैः ॥ ३८ ॥

आवार्य तेषां रक्षसां शिरोधरान् चिच्छेद अत एव प्राणान् जहार ॥ २८ ॥

गो० टी०–तानीति । आवार्य निवार्य शिरोधरानिति पुंलिङ्गत्वमार्ष शिरोधरांश्चिच्छेद प्राणान् जहारेति क्रमः॥ २७ ॥

२९] ति० टी०–सुपर्णवातेन गरुडपक्षवातेनामृतहरणयुद्धे विक्षिप्ता भग्नाः पादपा नन्दनस्थाः कल्पवृक्षादयो यथा तद्वत् । समग्रालंकारयुतशरीरत्वाद्वृक्षस्तनानां कल्पवृक्षादिसाम्यमिति कतकः ॥ २९ ॥

रा० टी०–ते इति । छिन्नशिरसः छिन्नचर्मशरासनास्ते राक्षसाः सुपर्णवातनिःक्षिप्ताः गरुडवाताभिहताः पादपा वृक्षा इव जगत्यां पेतुः । अमृतहरणसमये नन्दनवाटिकावृक्षाः गरुडेनोत्पाटिता इति पुराणप्रसिद्धिः ॥ २९ ॥

गो० टी०–त इति । सुपर्णो गरुडः तस्य वातेन पक्षानिलेन विक्षिप्ताः उन्मूलिताः जगत्यां भुवि ॥ २८ ॥

३०] ति० टी०–अवशिष्टा हतावशिष्टाः ॥ ३० ॥

रा० टी०–अवशिष्टा इति । ये निशाचरास्तत्र तस्मिन् समये अवशिष्टास्तेऽपि शरार्दिताः शरोऽस्मान् हनिष्यतीति पीडिताः सन्तः शरणार्थं रक्षणार्थं खरमेव अभ्यधावन्त ॥३०॥

गो० टी०–अवशिष्टा इति । तत्र सैन्येषु अवशिष्टाः हतावशिष्टाः विषण्णाः दुःखिताः शरणार्थं रक्षणार्थमिति यावत् ॥ २९ ॥

३१] ति० टी०–तान्सर्वान्शरणार्थिनः क्रुद्धं रामं क्रुद्धोऽन्तक इवाभ्यधावत् ॥ ३१ ॥

रा० टी०–तानिति । तान् समाश्वास्य धनुः आदाय दूषणः क्रुद्धोऽन्तक इव सञ्जक्रुद्धः सन् क्रुद्धं राममभ्यधावत्॥३१॥

गो० टी०–तानिति । आदाय खरसमीपगमनान्निवर्त्य अन्तकः खरपराजितो यमः ॥ ३० ॥

३२–३५] ति० टी०–दूषणाश्रयेण दूषणाश्रयबलेन निर्भयाः ॥ ३२–३५ ॥

रा० टी०–निवृत्ता इति । दूषणाश्रयनिर्भयाः दूषणरूपाश्रयेण विगतभया अत एव निवृत्ताः सर्वे राक्षसाः शालायायुधाः सन्तः राममेव अभ्यधावन्त ॥ ३२ ॥

गो० टी०–निवृत्ता इति । निवृत्ताः युद्धान्निवृत्ताः दूषणरूपाश्रयेण निर्भयाः सन्तः अभ्यधावन्त अभिमुखमाजग्मुः प्रायशो नष्टायुधत्वात्सालतालेत्यायुक्तम् ॥ ३१ ॥

रा० टी०–शूलेति । संयुगे संग्रामे शरवर्षाणि सृजन्तः कुर्वन्तः द्रुमवर्षाणि शिलावर्षाणि च मुञ्चन्तः महाबला राक्षसा आसन्निति शेषः, अतस्तत् युद्धमद्भुतं बभूव । श्लोकद्वयमेकान्वयि ॥ ३३ ॥ ३४ ॥

गो० टी०–शूलेत्यादि । शस्त्रवर्षाणि शरभिन्नायुधवर्षाणीत्यर्थः । सृजन्त इति आसन्निति शेषः ॥ ३२ ॥

गो० टी०–तदिति । रामस्य रक्षसां च तुमुलं संकुलं महाघोरम् अत एव रोमहर्षणं भयातिरेकेण रोमाञ्चजनकम् अत एवाद्भुतं तद्युद्धं पुनरपि बभूव ॥ ३३ ॥

रा० टी०–रामस्येति । रामस्य अस्य दूषणस्य च पुनः रक्षसां च महत् घोरं युद्धमभवत् । अभिक्रुद्धास्ते राक्षसाः राघवं समन्तात् आर्दयन् ॥ ३५ ॥

गो० टी०–त इत्यर्धमेकं वाक्यम् । अभ्ययुः आवव्रुः ३४

३६–३८] ति० टी०–ततः सर्वा दिशः प्रदिशश्चावृता दृष्ट्वा स रामो भैरवं नादं कृत्वा सर्वतः प्राप्तै राक्षसैः शरवर्षाभिः शरवृष्टिभिरावृतः कालोचितं परमभास्वरं गान्धर्वमस्त्रं राक्षसेषु राक्षसविषये समयोजयत् । धनुरित्यर्थः ॥ ३६–३८ ॥

रा० टी०–तत इति । सर्वतः प्राप्तैः राक्षसैः समावृता दिशः प्रदिशश्च दृष्ट्वा शरवर्षाभिरावृतो महाबलो रामः भैरवं

१ वर्मेति गो. रा. पाठः । २ निःक्षिप्ता इति रा.पाठः । ३ चेति गो. पाठः । ४ अर्दिता इति गो. रा. पाठः । ५ पुनरिति गो. पाठः । ६ अभ्यधावत काकुत्स्थ क्रुद्धो रुद्रमिति गो. पाठः । ७ चापेति गो. पाठः । ८ रामस्य चेति गो. पाठः । ९ अभ्ययुरिति गो. अर्दयन्निति रा. पाठः । १० तैश्चेति गो. पाठः । ११ उद्यतप्राप्तैः शरवर्षाभिर्निपतिभिरिति गो. पाठः । १२ संयोजयनेति गो. पाठः । १३ आवार्यन्तेति गो. पाठः ।

नाददानं शरान्घोरान्विमुञ्चन्तं शरोत्तमान् । विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः ॥ ३९ ॥
शरान्धकारमाकाशमावृणोत्सादिवाकरम् । बभूवावस्थितो रामः प्रेक्षिपन्निव तान्छरान् ॥ ४० ॥
युगपत्पतमानैश्च युगपच्च हतैर्भृशम् । युगपत्पतितैश्चैव विकीर्णा वसुधाऽभवत् ॥ ४१ ॥
निहताः पतिताः क्षीणाश्छिन्ना भिन्ना विदारिताः । तत्र तत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः ॥ ४२ ॥
सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैर्बाहुभिस्तथा । ऊरुभिर्बाहुभिश्छिन्नैर्नानारूपैर्विभूषणैः ॥ ४३ ॥
हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः । चामरव्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि ॥ ४४ ॥
रामेण बाणाभिहतैर्विच्छिन्नैः शूलपट्टिशैः । [खण्डैः खण्डीकृतैः प्रासैर्विकीर्णैश्च परश्वधैः ।
चूर्णिताभिः शिलाभिश्च शरैश्चित्रैरनेकशः ।] विच्छिन्नैः समरे भूमिर्विस्तीर्णाऽभूद्भयंकरा ॥ ४५ ॥

नादं कृत्वा गान्धर्वं परमभास्वरमस्त्रं राक्षसेषु समयोजयत् । श्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

गो० टी०—इदमनुवदन्नाह—तैश्चेत्यादि श्लोकद्वयमेकं वाक्यम् । महाबलः स रामः दिशः प्रदिशश्च तैरार्दिताः दृष्ट्वा भैरवं भयंकरं नादं कृत्वा राक्षसेषु राक्षसनिमित्तं गान्धर्वमस्त्रं धनुषि संयोज्यास्त्रं समयोजयत् शरवर्षाभिवर्षिभिः शरवर्षकारिभिरित्यर्थः ॥ ३६ ॥ ३६ ॥

रा० टी०—तत इति । ततः संयोजनानन्तरं चापमण्डलात् शरसहस्राणि निर्ययुः अत एव समागतैर्बाणैः सर्वा दशदिश आपूर्यन्त । अत्र दशशब्दोपादानेनैव सर्वदिशो ग्रहणे सिद्धे पुनः सर्वशब्दोपादानमवान्तरदेशव्याप्तिपरिग्रहाय ॥ ३८ ॥

गो० टी०—तत इति । चापमण्डलात् संहितगान्धर्वास्त्रात् आकर्षणातिशयेन मण्डलीकृताच्चापान्निर्ययुः समागतैस्तैर्बाणैर्दश दिशः सर्वाः अन्यूनाः अवार्यन्त ॥ ३७ ॥

३९] ति० टी०—नाददानमिति । अतिशैघ्र्यवशाच्छरग्रहणमोचने न पश्यन्ति, किं तु विकर्षमाणमेव धनुः पश्यन्ति ॥ ३९ ॥

रा० टी०—नेति । घोरान् शरोत्तमान् शरान् आददानं गृह्णन्तं शरार्दिताः राक्षसाः न पश्यन्ति ॥ ३९ ॥

गो० टी०—नाददानमिति । राक्षसा रामस्य शरादानकर्षणमोचनानि नापश्यन् किंतु स्वहिंसनमेवापश्यन्निति क्रियाप्रधानो निर्देशः । यद्यपि गान्धर्वास्त्रप्रयोगे विचित्रबाणनिर्गमोऽस्ति तदस्मिन् श्लोके नोच्यते किंतु तदनन्तरभाविकेवलशरमोक्ष इति ज्ञेयम् ॥ ३८ ॥

४०] ति० टी०—दिवाकरसहितमाकाशं कर्म शरान्धकारं कर्तृ आवृणोत् । अन्धकारोऽत्रियाम् । प्रक्षिपन्निव भूयो भूयः प्रक्षिपन्नेवेत्यर्थः । इवशब्द एवार्थे ॥ ४० ॥

रा० टी०—शरेति । शरान्धकारं शररूपोऽन्धकारः सदिवाकरमाकाशमावृणोत् अवस्थितः स्वास्थ्येन स्थितो रामः प्रक्षिपन्निव बभूव प्रक्षिपन्नेवेत्यनेन अभिप्रायविज्ञानमात्रेण स्वतश्चलन्तीति सूचितं, तेन रामबाणानां चेतनत्वं सूचितम् ॥४०॥

गो० टी०—शरान्धकारमिति । अन्धकारमिति क्लीवत्वमार्षं प्रवमन् उद्गिरन् ॥ ३९ ॥

४१] ति० टी०—विकीर्णा कृताच्छादना । 'विस्तीर्णा' इति पाठेऽप्ययमेवार्थः ॥ ४१ ॥

रा० टी०—युगपदिति । युगपत् पतमानैः एककालावच्छेदेन वर्तमानकालिकपतनाश्रयैः एवमन्यत्रापि वसुधा विकीर्णा व्याप्ता अभवत् ॥ ४१ ॥

गो० टी०—युगपच्छरनिर्गमः सम्प्रत्यपेक्ष्यते—युगपदिति । पतमानैः पतद्भिः एककाले शरहतैः एककाले भूमौ पतद्भिः एककाले पतितैश्च राक्षसैः वसुधा विकीर्णा व्याप्ताऽभवदिति युगपच्छरनिर्गमनकार्योक्तिः ॥ ४० ॥

४२] ति० टी०—निहताः सद्योहताः, पतिताः पातानन्तरं मृताः, क्षीणाः कण्ठगतप्राणाः । छिन्नभिन्नौ व्याख्यातौ ॥ ४२ ॥

रा० टी०—निहता इति । सहस्रशो राक्षसा निहतत्वादिविशिष्टाः दृश्यन्ते ॥ ४२ ॥

गो० टी०—अथ हिंसावैचित्र्यमाह—निहता इति । निहताः केवलं प्रहताः पतिताः अशनिपात इव भयेन भूमौ पतिताः क्षीणाः कण्ठगतप्राणाः छिन्नाः द्विधा कृताः भिन्नाः खण्डितावयवाः विदारिताः नृसिंहेन हिरण्यवदानाभिकण्ठद्विरशरीराः । तत्र तत्रेत्यनेन कश्चिद्विद्धः कश्चिद्विदारितः पुनः कश्चित् भिन्न इत्येवं विचित्रशववस्त्वमुक्तम् ॥ ४१ ॥

४३-४४] ति० टी०—विभूषणैरुपलक्षिताः राक्षसा इति शेषः ॥ ४३ ॥ ४४ ॥

४५] ति० टी०—विच्छिन्नैर्विशेषतश्छिन्नैश्चामरादिभिर्विशेषतश्छिन्नैः शूलपट्टिशैश्चेत्यर्थः ॥ ४५ ॥

रा० टी०—रामेण बाणाभिहतैः सोष्णीषैः उत्तमाङ्गैः शिरोभिः साङ्गदैः अङ्गदसहितैर्बाहुभिः । छिन्नैरूरुभिर्बाहुभिश्च छिन्नैः इत्यादिभिश्च छिन्नैः शूलपट्टिशैश्च विस्तीर्णा भूमिः भयंकराऽभूत् ॥ ४३-४५ ॥

गो० टी०—चित्रवधं दर्शयति—[illegible] ।

---

१ न मुञ्चन्तं शिलीमुखानिति गो. पाठः । २ प्रवमन्निति गो. पाठः । ३ जानुभिरिति गो. पाठः । ४ रूपविभूषणैरिति गो. पाठः । ५ रामस्येति गो. पाठः । ६ विचित्रैरिति गो. पाठः । ७ श्लोकोऽयमधिकः गो. पाठे । ८ विकीर्णेति गो. पाठः ।

तान्दृष्ट्वा निहतान्सर्वे राक्षसाः परमातुराः । न तत्र चलितुं शक्ता रामं परपुरंजयम् ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ।

स्वसेनाक्षयात्कुपितो दूषणः पञ्चसाहस्रराक्षसै राममभियाति । रामेण सेनापतित्रयसहितदूषणे निहते द्वादशभिः सेनाध्यक्षैर्युतः खरो राममभियाति तेषामपि च सैनिकानां नाशे स्वयमेव राममभिपतति ।

दूषणस्तु स्वकं सैन्यं हन्यमानं विलोक्य च । संदिदेश महाबाहुर्भीमवेगान्दुरासदान् ॥ १ ॥
राक्षसान्पञ्चसाहस्रान्समरेष्वनिवर्तिनः । ते शूलैः पट्टिशैः खड्गैः शिलावर्षैर्दुमैरपि ॥ २ ॥
शरवर्षैरविच्छिन्नं वर्षन्तस्तं समन्ततः । तद्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ ३ ॥
प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः । प्रतिगृह्य च तद्वर्षं निमीलित इवर्षभः ॥ ४ ॥
रामः क्रोधं परं लेभे वधार्थं सर्वरक्षसाम् । ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ॥ ५ ॥
शरैरभ्यकिरत्सैन्यं सर्वतः सहदूषणम् । ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ॥ ६ ॥

सोष्णीषैः शिरोवेष्टनवद्भिः उत्तमाङ्गैः केवलशिरोभिः नानारूपविभूषणैरित्यूरुजानूनां विशेषणं साधोरुकेरूरुभिः सकटकैर्जानुभिश्चेत्यर्थः । अनेकशो भिन्नैरिति हयादित्रयविशेषणं, विच्छिन्नैरिति चामरादिसर्वविशेषणं, विचित्रैरिति शूलादिविशेषणं, नानाविधैरिति चामरादिविशेषणं, पूर्वोक्तैरेतैर्विकीर्णा अत एव भयंकराऽभूदिति योजना । एतावता ग्रन्थेन रामशरप्रभावातिशयो दर्शितः ॥ ४२–४५ ॥

अस्मिन् सर्गे पञ्चचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

४६] ति० टी०–रामं चलितुं रामं प्रति संभ्रमं गन्तुम् ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामायेरामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०–तानिति । निहतान् दृष्ट्वा सर्वे उर्वरिता राक्षसाः परमातुराः सन्तः रामं चलितुं न शक्ता बभूवुरिति शेषः ॥४६॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

१] ति० टी०–दूषणस्त्विति ॥ १ ॥

रा० टी०–सैन्यहननानन्तरकालिकं वृत्तान्तमाह–दूषण इत्यादिभिः । स्वसैन्यं हन्यमानं दूषणो विलोक्य दुरासदान् आसादितुमशक्यान् समरेषु अनिवर्तिनः पञ्चसाहस्रान् राक्षसान् संदिदेश । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–अथ दूषणप्रद्रुतसर्वसैन्यविनाशः षड्विंशे–दूषणस्त्वित्याद्यर्धत्रयमेकं वाक्यम् । निरीक्ष्य चेति खिन्नश्चेत्यर्थः भीमवेगान् भयंकरधावनान् अत एव दुरासदान् । पञ्चसाहस्रानित्यनेन पञ्चसाहस्री पूर्वं हतेति व्यज्यते॥१॥

२–३] ति० टी०–पञ्चसाहस्रान्स्वसैन्यरूपान् ॥२॥३॥

रा० टी०–ते इति । ते राक्षसाः शूलादिभिः समन्ततः अविच्छिन्नं निरन्तरं तं रामं ववर्षुः ॥ २ ॥

गो० टी०–त इति । तं रामम् ॥ २ ॥

रा० टी०–तदिति । प्राणहरं तद्रुमादीनां वर्षं धर्मात्मा राघवस्तीक्ष्णसायकैः प्रतिजग्राह ॥ ३ ॥

गो० टी०–स इति । प्राणहरम् अन्येषामिति शेषः प्रतिजग्राह प्रतिरुरोध धर्मात्मेत्यनेन कूटयोधित्वव्युदासः ॥ ३ ॥

४–६] ति० टी०–प्रतिजग्राह रुरोध । निमीलितो वर्षधारया निमीलिताक्षः ॥ ४–६ ॥

रा० टी०–प्रतीति । निमीलितः निमीलितनयनः ऋषभः सर्वश्रेष्ठो रामः सर्वरक्षसां वधार्थं परं क्रोधमिव लेभे । इवेन तस्य राक्षसदुष्टत्वनिवर्तकत्वात्कृपालुत्वं सूचितम् ॥ ४ ॥

गो० टी०–प्रतिगृह्येति । निमीलित इवर्षभ इत्यनेन शरवर्षेऽपि निर्ग्रंथत्वमनायासत्वं च द्योत्यते ॥ ४ ॥

रा० टी०–तत इति । तेजसा प्रदीप्तः क्रोधसमाविष्ट इव रामः सहदूषणं दूषणसहितं सैन्यं शरैः सर्वतः अभ्यकिरत्॥५॥

रा० टी०–तत इति । शत्रुदूषणः क्रुद्धो दूषणः अग्निकल्पैः शरैस्तं राघवं समवारयत् ॥ ६ ॥

गो० टी०–तत इति । क्रोधसमाविष्ट इति राम इति शेषः, प्रदीप्त इव तेजसेति तेजोपुञ्जत्वेन प्रदीप्त इव स्थित इत्यर्थः । सहदूषणं दूषणसहितं दूषणः खरस्य सेनापतिः ॥ ५ ॥ ६ ॥

---

१ श्लोकोऽयं गो० नास्ति । २ ववृषुरिति गो० पाठः । ३ सद्रुमाणामिति गो० पाठः । ४ भेजे इति गो० पाठः । ५ अवाकिरदिति गो० पाठः ।

शरैरशनिकल्पैस्तं राघवं समवारयत् । ततो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः ॥ ७ ॥
चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान् । हत्वा चाश्वान्शरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः ॥ ८ ॥
शिरो जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि । स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ ९ ॥
जग्राह गिरिशृङ्गाभं परिघं रोमहर्षणम् । वेष्टितं काञ्चनैः पट्टैर्देवसैन्याभिमर्दनम् ॥ १० ॥
आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम् । वज्राशनिसमस्पर्शं परगोपुरदारणम् ॥ ११ ॥
तं महोरगसंकाशं प्रगृह्य परिघं रणे । दूषणोऽभ्यपतद्रामं क्रूरकर्मा निशाचरः ॥ १२ ॥
तस्याभिपतमानस्य दूषणस्य च राघवः । द्वाभ्यां शराभ्यां चिच्छेद महस्ताभरणौ भुजौ ॥ १३ ॥
भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि । परिघश्छिन्नहस्तस्य शक्रध्वज इवाग्रतः ॥ १४ ॥
कराभ्यां च विकीर्णाभ्यां पपात भुवि दूषणः । विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः ॥ १५ ॥
दृष्ट्वा तं पतितं भूमौ दूषणं निहतं रणे । साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १६ ॥

७-८] ति० टी०-क्षुरेण क्षुरधारेण शरेण ॥ ७ ॥ ८ ॥

रा० टी०-तत इति । ततः दूषणशरसंवारणानन्तरं सुसंक्रुद्धो रामः क्षुरेण क्षुरधारेण बाणेन अस्य महद्धनुः चतुर्भिर्बाणैश्चतुरो हयांश्च चिच्छेद ॥ ७ ॥

गो० टी०-तत इति। चतुर्भिरिति शरैरित्यनुषङ्गः ॥ ७ ॥

रा० टी०-हत्वेति । तीक्ष्णैः शरैः अश्वान् हत्वा अर्धचन्द्रेण सारथेः शिरो जहार त्रिभिर्बाणैः तत् रक्षो दूषणं वक्षसि विव्याध ॥ ८ ॥

गो० टी०-हत्वेति । तद्रक्षः दूषणं वक्षसि विव्याधेति संबन्धः ॥ ८ ॥

९-१०] ति० टी०-तद्रक्षः कर्म व्यधने रामः कर्ता॥९॥१०॥

११-१३] ति० टी०-परेषां शत्रूणां वसयांक्षितं सिक्तम् । शत्रूणां गाव इन्द्रियाणि तेषां पुरं शरीरं तस्य दारणं विदारणम्, यद्वा तेषां पुरद्वारविदारकम् ॥ ११-१३ ॥

रा० टी०-स इति । विरथः स दूषणः गिरिशृङ्गाभं परिघं जग्राह ॥ ९ ॥

रा० टी०-वेष्टितमिति । काञ्चनैः स्वर्णमयैः पट्टैर्बन्धनैर्वेष्टितं तीक्ष्णैरायसैर्लोहनिर्मितैः शङ्कुभिः कीर्णं परवसोक्षितं परवसया शत्रुमेदसा उक्षितं सिक्तं परगोपुरदारणं शत्रुपुरद्वारविदारकं महोरगसंकाशं तं परिघं प्रगृह्य दूषणो राममभ्यपतत् । सार्धश्लोकद्वयमेकान्वयि ॥ १०-१२ ॥

गो० टी०-स इति । पौरतो हन्यतेऽनेनेति परिघः तं पट्टैः बन्धनैः परवसोक्षितं शत्रुमेदःसिक्तम् । 'हन्मेदस्तु वपा वसा' इत्यमरः । वज्राशनिसमस्पर्शं वज्रं वज्राकूयरत्नम् । अशनिः वज्रायुधं तदुभयसदृशकाठिन्यं परगोपुरदारणं परेषां शत्रूणां यत् गोपुरं पुरद्वारं तस्य दारणं भेदकम् । 'पुरद्वारं तु गोपुरम्' इत्यमरः ॥ ९-१२ ॥

रा० टी०-तस्येति । अभिपतमानस्य दूषणस्य सहस्ताभरणौ हस्ताभरणसहितौ भुजौ द्वाभ्यां शराभ्यां राघवः चिच्छेद ॥ १३ ॥

गो० टी०-तस्येति। अभिपतमानस्य अभिपततः सहस्ताभरणावित्यनेन शौर्यविरुद्धत्वं लक्ष्यते ॥ १३ ॥

१४] ति० टी०-हस्तच्छेदानन्तरं भ्रष्टो घूर्णनेन स्थानाद्भ्रष्टः तथा छिन्नहस्तस्य परिघः पपात ॥ १४ ॥

रा० टी०-भ्रष्ट इति । भ्रष्टः आघूर्णनेन स्खलितः तस्य महाकायः रणभूर्धनि संग्राममध्ये पपात, छिन्नहस्तस्य परिघस्तु शक्रध्वज इव अग्रतः पपात ॥ १४ ॥

गो० टी०-भ्रष्ट इति । रणभूर्धनि छिन्नहस्तस्य तस्य दूषणस्य भ्रष्टः हस्ताच्च्युतः महाकायः महाप्रमाणः परिघः शक्रध्वज इवाग्रतः पपातेत्यन्वयः ॥ १४ ॥

१५-१६] ति० टी०-विकीर्णाभ्यां विक्षिप्ताभ्यां भुजाभ्यामुपलक्षितो दूषणश्च पपात विगतासुरिति शेषः। विषाणाभ्यां दन्ताभ्याम् ॥ १५ ॥ १६ ॥

रा० टी०-पतनमेव भङ्ग्यन्तरेणाह-कराभ्यामिति । विकीर्णाभ्यां प्रक्षिप्ताभ्यां कराभ्यामुपलक्षितो दूषणः विशीर्णाभ्यां पतिताभ्यां दन्ताभ्यामुपलक्षितो मनस्वी महागज इव भुवि पपात ॥ १५ ॥

गो० टी०-स इति । कराभ्यां सह पपातेत्यन्वयः । मनस्वी धीरः ॥ १५ ॥

रा० टी०-दृष्ट्वेति । रणे निहतं दूषणं दृष्ट्वा सर्वभूतानि काकुत्स्थं रामं साधु साध्विति अपूजयन् ॥ १६ ॥

गो० टी०-तमिति । अपूजयन् अस्तुवन् ॥ १६ ॥

१ अवाकिरदिति गो. पाठः । २ सैन्यप्रमर्दनमिति गो. पाठः । ३ स इति गो. रा. पाठः । ४ स कराभ्यामिति गो. पाठः ।

एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः । संहत्याभ्यद्रवन्रामं मृत्युपाशावपाशिताः ॥ १७ ॥
महाकपालः स्थूलाक्षः प्रमाथी च महाबलः । महाकपालो विपुलं शूलमुद्यम्य राक्षसः ॥ १८ ॥
स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम् । दृष्ट्वैवापततस्तांस्तु राघवः सायकैः शितैः ॥ १९ ॥
तीक्ष्णाग्रैः प्रतिजग्राह संप्राप्तानतिथीनिव । महाकपालस्य शिरश्चिच्छेद रघुनन्दनः ॥ २० ॥
असंख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् । स्थूलाक्षस्याक्षिणी स्थूले पूरयामास सायकैः ॥ २१ ॥
स पपात हतो भूमौ विटपीव महाद्रुमः । दूषणस्यानुगान्पञ्चसाहस्रान्क्रुपितः क्षणात् ॥ २२ ॥
हत्वा तु पञ्चसाहस्रैरनयद्यमसादनम् । दूषणं निहतं श्रुत्वा तस्य चैव पदानुगान् ॥ २३ ॥
व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान्महाबलान् । अयं विनिहतः संख्ये दूषणः सपदानुगः ॥ २४ ॥
महत्या सेनया सार्धं युद्ध्वा रामं कुमानुषम् । शस्त्रैर्नानाविधाकारैर्हनध्वं सर्वराक्षसाः ॥ २५ ॥
एवमुक्त्वा खरः क्रुद्धो राममेवाभिदुद्रुवे । श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहंगमः ॥ २६ ॥
दुर्जयः करवीराक्षः परुषः कालकार्मुकः । [7]हेममाली महामाली सर्पास्यो रुधिराशनः ॥ २७ ॥
द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः । राममेवाभ्यधावन्त विसृजन्तः शरोत्तमान् ॥ २८ ॥
ततः पावकसंकाशैर्हेमवज्रविभूषितैः । जघान शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ २९ ॥
ते रुक्मपुङ्खा विशिखाः सधूमा इव पावकाः । निजघ्नुस्तानि रक्षांसि वज्रा इव महाद्रुमान् ॥ ३० ॥

१७-२२] ति० टी०-संहत्य मिलित्वा । मृत्युपाशेनावपाशिता बद्धाः ॥ १७-२२ ॥

रा० टी०-एतस्मिन्निति । अन्तरे समये मृत्युपाशावपाशिताः आसन्नमृत्यव इत्यर्थः, क्रुद्धाः महाकपालादयः त्रयः सेनाग्रयायिनः संहत्य एकीभूय रामम् अभ्यद्रवन् । सार्धश्लोक एकान्वयी ॥ १७ ॥

रा० टी०-त्रयाणामभिद्रवणप्रकारमाह-महाकपाल इति। महाकपालः शूलमुद्यम्य, स्थूलाक्षः पट्टिशं, प्रमाथी परश्वधं च गृह्य गृहीत्वा अद्रवन्निति शेषः । अर्धद्वयमेकान्वयि ॥ १८ ॥

गो० टी०-एतस्मिन्निति । त्रीनेवाह-महाकपाल इति । कः किमायुधं गृहीत्वाऽभ्यद्रवदित्यत्राह-महाकपाल इति ॥ १७ ॥ १८ ॥

रा० टी०-दृष्ट्वेति । आपततस्तान् दृष्ट्वा राघवस्तु तीक्ष्णाग्रैः शितैः सायकैः संप्राप्तान् अतिथीनिव प्रतिजग्राह॥१९॥

गो० टी०-दृष्ट्वेति । शितैः शाणोल्लीढैः प्रतिजग्राह तेषु बाणानर्पयामासेत्यर्थः। यथा गृहं प्राप्तानतिथीनुपचारैः प्रतिगृह्णाति तथेत्यर्थः ॥ १९ ॥

रा० टी०-महाकपालस्येति । असंख्येयैः अतिद्रुतगमनत्वेन संख्यातुमशक्यैः बाणौघैः महाकपालस्य शिरः चिच्छेद, प्रमाथिनं तु प्रममाथ स्थूलाक्षस्य अक्षिणी तु सायकैः पूरयामास ॥ २० ॥ २१ ॥

रा० टी०-स इति । सः सेनाग्रयायिसमूहः विटपी बहुशाखावान् महाद्रुम इव भूमौ पपात । अर्धं पृथक्-दूषणस्येति । पञ्चसाहस्रान् दूषणस्यानुगान् क्षणात् हत्वा तान् पञ्चसाहस्रान् यमसादनं सकलसंपत्तिविशिष्टलोकविशेषमनयत् 'हत्वा तान् पञ्चसाहस्रान्' इति पाठः ॥ २२ ॥

गो० टी०-प्रतिजग्राहेत्युक्तं विवृणोति-महाकपालस्येत्यादिना । प्रममाथ चूर्णीचकारेत्यर्थः । चूर्णशरीरत्वे दृष्टान्ततयोक्तं विटपीति ॥ २०-२२ ॥

२३-२४] ति० टी०-पञ्चसाहस्रान्पञ्चसाहस्रैरित्यनेन भगवतोऽमोघेषुत्वं सूचितम् ॥ २३ ॥ २४ ॥

२५-३०] ति० टी०-हनध्वमित्यार्षम् ॥ २५-३० ॥

रा० टी०-दूषणमिति । दूषणं तस्य पदानुगांश्च निहतं श्रुत्वा क्रुद्धः खरः महाबलान् सेनाध्यक्षान् व्यादिदेश ॥ २३ ॥

रा० टी०-व्यादेशप्रकारमाह-अयमिति । सपदानुगः सानुचरः अयं दूषणः निहतः अतः हे सर्वराक्षसाः! महत्या सेनया सार्धं युद्ध्वा रामेणेति शेषः कुमानुषं रामं हनध्वं गणकार्यस्यानित्वान्न शपो लुक् ॥ २४ ॥ २५ ॥

गो० टी०-अयमिति । हनध्वं व्रत ॥ २४ ॥ २५ ॥

रा० टी०-एवमिति । क्रुद्धः खरः एवमुक्त्वा राममेव अभिदुद्रुवे । अर्धं पृथक्-श्येनेति । ससैन्यकाः श्येनगाम्यादयः द्वादश बलाध्यक्षाः शरोत्तमान् विसृजन्तो राममेव अभ्यधावन्त । सार्धश्लोकद्वयमेकान्वयि ॥ २६-२८ ॥

गो० टी०-सेनाध्यक्षानेवाह-श्येनगामीत्यादिना २६-२८

रा० टी०-तत इति । ततः ससैन्यबलाध्यक्षसहितखरपतनानन्तरं हेमवज्रविभूषितैः सायकैः सैन्यस्य शेषं तेजस्वी रामो जघान ॥ २९ ॥

१ तूर्णमिति गो. पाठः । २ परमेषुमिरिति गो. पाठः । ३ एतदर्धार्धं व्यत्यस्तं गो. पाठे । ४ शाणोल्लीढैरिति गो. पाठः । ५ बाणौघैरिति गो. पाठः । ६ हन्ध्वेति गो. पाठः । ७ मेघेति गो. पाठः ।

रक्षसां तु शतं रामः शतेनैकेन कर्णिना । सहस्रं तु सहस्रेण जघान रणमूर्धनि ॥ ३१ ॥
तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः । निपेतुः शोणितादिग्धा धरण्यां रजनीचराः ॥ ३२ ॥
तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः । [2]विस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव ॥ ३३ ॥
[3]तत्क्षणे तु महाघोरं वनं निहतराक्षसम् । बभूव निरयप्रख्यं मांसशोणितकर्दमम् ॥ ३४ ॥
चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् । हतान्येकेन रामेण मानुषेण पदातिना ॥ ३५ ॥
तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः । राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ ३६ ॥
शेषा हता महावीर्या राक्षसा रणमूर्धनि । घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ॥ ३७ ॥

ततस्तु तद्भीमबलं महाहवे समीक्ष्य धर्मेण हतं बलीयसा ।
रथेन रामं महता खरस्ततः समाससादेन्द्र इवोद्यताशनिः ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षड्विंशः सर्गः ॥ २६ ॥

गो० टी०–तत इति । वज्रं वज्रमणिः तेजस्वी राम इति शेषः ॥ २९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–त इति । वज्रा महादुमानिव रुक्मपुङ्खास्ते विशिखा रामबाणाः तानि अभिपतितानि रक्षांसि निजघ्नुः ॥ ३० ॥

गो० टी०–त इति । सधूमा इत्यनेन दहनोन्मुखत्वं व्यञ्जयत इत्यङ्गारावस्थाम्याहुक्तिः । वज्रा इवेति वज्रमणिया-निस्त्रिंशयलिङ्गो वज्रशब्दः ॥ ३० ॥

३१] ति० टी०–शतमेकेन शतेन तत्संख्याकेन कर्णिना बाणविशेषेण । एवं सहस्रं सहस्रेण ॥ ३१ ।

रा० टी०–हननप्रकारमाह–रक्षसामिति । एकेन शतेन कर्णिना रक्षसां शतं रक्षसां सहस्रं तु सहस्रेण रणमूर्धनि जघान ॥ ३१ ॥

गो० टी०–रक्षसामिति । कर्णिना कर्णाकारशरीरेण ॥ ३१ ॥

३२] ति० टी०–शोणितादिग्धाः शोणितलिप्ताः ॥ ३२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–तैरिति । तैः रामबाणैर्भिन्नवर्माभरणाः अत एव शोणितादिग्धाः शोणितव्याप्ताः रजनीचराः धरण्यां निपेतुः ॥ ३२ ॥

गो० टी०–तैरिति । छिन्नं खण्डितं भिन्नं विदारितम् । आदिग्धाः आलिप्ताः ॥ ३२ ॥

३३–३४] ति० टी०–विस्तीर्णा विशेषेण छन्ना महावेदिरभवदिति शेषः ॥ ३३ ॥ ३४ ॥

रा० टी०–तैरिति । शुष्का ग्रन्थिरहिताः केशाः येषां तैः पतितैः राक्षसैः कृत्स्ना बहुभा कुशैर्विस्तीर्णा महावेदिरिव विस्तीर्णा अभवदिति शेषः ॥ ३३ ॥

गो० टी०–तैर्मुक्तेति । रणाग्रपतितत्वातिशयात्कुशव्याप्तोक्तिः ॥ ३३ ॥

रा० टी०–तत्क्षण इति । निहतराक्षसं निहता राक्षसा यस्मिंतत् अत एव मांसशोणितकर्दमं मांसशोणितरूपकर्दमविशिष्टं वनं तत्क्षणे तस्मिन् समये निरयप्रख्यं नरकसदृशं बभूव ॥ ३४ ॥

गो० टी०–क्षणेनेति । निरयप्रख्यं नरकतुल्यं मांसशोणितैः कृतः कर्दमः पङ्को यस्य तत्तथा ॥ ३४ ॥

३५] ति० टी०–माहवेण माहवत्वेनापि ॥ ३५ ॥

रा० टी०–रामप्रभावस्याश्चर्यत्वमाह–चतुर्दशेति । रक्षसां चतुर्दश सहस्राणि एकेन रामेण हतानि ॥ ३५ ॥

गो० टी०–चतुर्दशेति । माहवेण ऋजुना पदातिना वाहनरहितेनेत्यद्भुतोक्तिः ॥ ३५ ॥

३६–३७] ति० टी०–त्रिशिराश्चैवेति । स्वस्वयूथपतिना सहेति शेषः ॥ ३६ ॥ ३७ ॥

रा० टी०–तस्येति । सर्वस्य घातकसहितस्यापीत्यर्थः, शेषः अवशिष्टः खरः त्रिशिराः रिपुसूदनो रामश्च ॥ ३६ ॥

रा० टी०–शेषा इति । शेषाः एतत्त्रितयातिरिक्ताः लक्ष्मणस्याग्रजेन हताः ॥ ३७ ॥

गो० टी०–तस्येत्यादि । सैन्यस्य युद्धप्रवृत्तस्य अतो रामस्यापि तत्रान्तर्भावः खरादित्रयं शेषः अवशिष्टांश इत्यर्थः । शेषाः सर्वे राक्षसा हता इत्यन्वयः । महासत्त्वा इत्यादिविशेषणैर्महारथा एव हताः क्षुद्राः केचन भीरवो न हता इति गम्यते । अत एवोत्तरसर्गे हतशेषा इति वक्ष्यति । लक्ष्मणस्याग्रजेनेति रामस्य विष्ण्वर्धांशभाक्त्वेनाधिकबलत्वोक्तिः ॥ ३६ ॥ ३७ ॥

३८] ति० टी०–उद्यताशनिरुद्यतवज्रः ॥ ३८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षड्विंशः सर्गः ॥ २६ ॥

---

१ चेति गो० पाठः । २ आस्तीर्णेति गो० पाठः । ३ क्षणेन त्विति गो० पाठः । ४ महासत्त्वा इति गो० पाठः । ५ रामेणेति गो० पाठः । ६ तत्रेति गो० पाठः ।

सप्तविंशः सर्गः ।

राममभियान्तं खरं विनिवर्त्य रामवधं प्रतिज्ञाय प्राप्ते त्रिशिरासे रामेण निहते खरो राममभिययौ ।

खरं तु रामाभिमुखं प्रयान्तं वाहिनीपतिः । राक्षसस्त्रिशिरा नाम संनिपत्येदमब्रवीत् ॥ १ ॥
मां नियोजय विक्रान्तं त्वं निवर्तस्व साहसात् । पश्य रामं महाबाहुं संयुगे विनिपातितम् ॥ २ ॥
प्रतिजानामि ते सत्यमायुधं चाहमालभे । यथा रामं वधिष्यामि वधार्हं सर्वरक्षसाम् ॥ ३ ॥
अहं वास्य रणे मृत्युरेष वा समरे मम । विनिवर्त्य रणोत्साहं मुहूर्तं प्राश्निको भव ॥ ४ ॥
प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि । मयि वा निहते रामं संयुगाय प्रयास्यसि ॥ ५ ॥
खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः । गच्छ युध्येत्यनुज्ञातो राघवाभिमुखो ययौ ॥ ६ ॥
त्रिशिरास्तु रथेनैव वाजियुक्तेन भास्वता । अभ्यद्रवद्रणे रामं त्रिशृङ्ग इव पर्वतः ॥ ७ ॥

रा० टी०–तत इति । ततः स्वसैन्यविध्वंसनानन्तरं भीमबलं भयंकरस्वसैन्यं बलीयसा रामेण धर्मेण हतं समीक्ष्य महता रथेन उद्यताशनिरिन्द्र इव खरः रामं समाससाद॥३८॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चविंशः सर्गः ॥ २६ ॥

गो० टी०–तनस्त्विति । भीमबलं भीमसैन्यम् उद्यताशनिः उद्यतवज्रः ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

१] ति० टी०–खरमिति । संनिपत्य त्वरया तत्समीपमागम्य ॥ १ ॥

रा० टी०–त्रितयावशेषानन्तरकालिकं वृत्तान्तमाह–खरमित्यादिभिः । वाहिनीपतिः सेनाधीशः त्रिशिरा नाम राक्षसः रामाभिमुखं प्रयान्तं खरं दृष्ट्वा संनिपत्य तत्समीपं प्राप्य इदमब्रवीत् ॥ १ ॥

गो० टी०–त्रिशिरःशिरसां छेददृष्टान्तेन स्वसेवितानाम् ।
दुःखत्रयनिहन्तारं लक्ष्मणाग्रजमाश्रये ॥

खरं त्वित्यादि । वाहिनीपतिः सेनापतिः संनिपत्य समीपमागत्येत्यर्थः ॥ १ ॥

२] ति० टी०–विनिपातितं मयेति शेषः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–मामिति । विक्रान्तमति विक्रमविशिष्टं मां नियोजय युद्धे इति शेषः, त्वं साहसात् सहसाप्रवृत्तगमनात् त्वं निवर्तस्व रामं विनिपातितं पश्य ॥ २ ॥

गो० टी०–मामिति । साहसात् युद्धाभिमुख्यलक्षणात् विनिपातितमिति मयेति शेषः ॥ २ ॥

३] ति० टी०–आलभे स्पृशामि । यथा वधिष्यामि तथा प्रयतिष्ये इति शेषः । सर्वरक्षसां वधार्हं सर्वरक्षसां वध्यमित्यर्थः ॥ ३ ॥

रा० टी०–प्रतीति । ते तवाये अहं सत्यं प्रतिजानामि आयुधं चालभे आयुधशपथं करोमीत्यर्थः, सर्वरक्षसां वधार्हं संमिलितनिखिलराक्षसकर्तृकवधयोग्यं रामं यथा यथावद्वधिष्यामि ॥ ३ ॥

गो० टी०–प्रतिजानामीति । आलभे स्पृशामि । प्रतिज्ञाप्रकारमाह–यथेति । सर्वरक्षसां सर्वरक्षोभिः ॥ ३ ॥

४] ति० टी०–'अहं वा समरे' इति पाठे मृत्युरित्यस्यास्येति शेषः । 'रणोत्साहात्' इति पाठे ततो मनो निवर्त्येत्यर्थः। प्राश्निको मध्यस्थः उभयपुद्गलाक्षीत्यर्थः ॥ ४ ॥

रा० टी०–जयपराजययोः परमात्मायत्तत्वेन निश्चयाभावादाह–अहमिति । अस्य रामस्य मृत्युर्विनाशकः अहं वा एष रामो वा मम मृत्युः, एतेन पलायितो न भविष्यामीति सूचितम् । अतः रणोत्साहं तात्कालिकपुद्गोत्कटेच्छां निवर्त्य मुहूर्तं प्राश्निकः मध्यस्थो भव सांशितया युद्धं पश्येत्यर्थः ॥ ४ ॥

गो० टी०–अहं वेति । मृत्युः मारयिता प्राश्निकः जयापजयनिर्णायकः ॥ ४ ॥

५] ति० टी०–संयुगाय संयुगं कर्तुम् ॥ ५ ॥

रा० टी०–युद्धदर्शनानन्तरकालिकं तत्कर्तव्यमाह–प्रहृष्ट इति । संयुगाय संग्रामाय प्रयास्यसि ॥ ५ ॥

गो० टी०–प्रहृष्ट इति । प्रहृष्टे गर्विते संयुगाय युद्धं कर्तुम् "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी ॥ ५ ॥

६–७] ति० टी०–मृत्युलोभान्मृत्युकृतपुद्गलोभात् । मृत्युसमये रक्षःप्रकृतिविपर्ययात्तस्य भगवत्तत्त्वं ज्ञात्वा तद्दत्तमृत्युलोभादित्यर्थश्च । युध्य युद्धं कुरुष्व । अनुज्ञातः खरेणेति शेषः ॥ ६ ॥ ७ ॥

रा० टी०–खर इति । मृत्युलोभात् मृत्युनिवृत्तिविषयकोत्कटेच्छातः किं च मृत्युलोभात् मृत्युविषयकाविवेकात् अस्य मृत्युर्न भविष्यतीति भ्रमादित्यर्थः, त्रिशिरसा प्रसादितः प्रसन्नचित्तः खरः अभवदिति शेषः, अत एव गच्छ युध्य युद्धं कुरु इत्यभिज्ञातः त्रिशिराः इति शेषः, राघवाभिमुखः सन् ययौ ॥ ६ ॥

१ कृत्य रणोत्साहादिति गो. पाठः । २ प्रहृष्टे इति गो. पाठः । ३ हास्यसीति गो. पाठः । ४ उपयास्यसीति गो. पाठः । ५ चेति गो. पाठः

शरधारासमूहान्स महामेघ इवोत्सृजन् । व्यसृजत्सदृशं नादं जलार्द्रस्येव दुन्दुभेः ॥ ८ ॥
आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः । धनुषा प्रतिजग्राह विधुन्वन्सायकान्शितान् ॥ ९ ॥
स संप्रहारस्तुमुलो रामत्रिशिरसोस्तदा । संबभूवातिबलिनोः सिंहकुञ्जरयोरिव ॥ १० ॥
ततस्त्रिशिरसा बाणैर्ललाटे ताडितस्त्रिभिः । अमर्षी कुपितो रामः संरब्ध इदमब्रवीत् ॥ ११ ॥
अहो विक्रमशूरस्य राक्षसस्येदृशं बलम् । पुष्पैरिव शरैर्योऽहं ललाटेऽस्मि परिक्षतः ॥ १२ ॥
ममापि प्रतिगृह्णीष्व शरांश्चापगुणाच्युतान् । एवमुक्तस्तु संरब्धः शरानाशीविषोपमान् ॥ १३ ॥
त्रिशिरोवक्षसि क्रुद्धो निजघान चतुर्दश । चतुर्भिस्तुरगानस्य शरैः संनतपर्वभिः ॥ १४ ॥
न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः । अष्टभिः सायकैः सूतं रथोपस्थे न्यपातयत् ॥ १५ ॥
रामश्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम् । ततो हतरथात्तस्मादुत्पतन्तं निशाचरम् ॥ १६ ॥

गो० टी०–खर इति । मृत्युलोभात् मृत्युना कृतो लोभो युद्धलोभस्तस्मात् प्रसादितः निवर्तित इति यावत् । युध्य युद्धं कुरु अनुज्ञातः खरेणेति शेषः, त्रिशिरा इति सिद्धम् ॥ ६ ॥

रा० टी०–त्रिशिरा इति । भास्वता प्रकाशमानेन वाजियुक्तेन रथेनोपलक्षितशिखरः पर्वत इव त्रिशिराः रामम् अभ्यद्रवत् ॥ ७ ॥

गो० टी०–त्रिशिराश्चेति । चकारो न समुच्चयार्थः॥७॥

८–११] ति० टी०–जलार्द्रस्येति । अनेन नादवैपरीत्येन मृत्युसांनिध्यं सूचितम् ॥ ८–११ ॥

रा० टी०–शरेति । स त्रिशिराः महामेघ इव शरधारासमूहान् उत्सृजंस्त्यजन् सन् जलार्द्रस्य दुन्दुभेः सदृशमेव नादं व्यसृजत् । इवशब्द एवार्थे ॥ ८ ॥

गो० टी०–शरधारेति । शरा एव धाराः आसाराः तासां समूहान् । जलार्द्रस्येति दुन्दुभिशब्दः पुंलिङ्गः । 'भेरी स्त्री दुन्दुभिः पुमान् ' इत्युक्तेः । दुन्दुभेः दुन्दुभिनादस्य जलार्द्रस्येत्यनेनास्य हीनस्वरत्वमुक्तम् ॥ ८ ॥

रा० टी०–आगच्छन्तमिति । त्रिशिरसम् आगच्छन्तं प्रेक्ष्य धनुषा सह शितान् सायकान् विधुन्वन् सन् राघवः प्रतिजग्राह ॥ ९ ॥

गो० टी०–आगच्छन्तमिति । धनुषा सायकान् विधून्वन् कम्पयन् मुञ्चन्निति यावत् ॥ ९ ॥

रा० टी०–स इति । तदा उभयोः समागमे सति अतिबलिनोः रामत्रिशिरसोः सिंहकुञ्जरयोरिव तुमुलः संप्रहारः संबभूव ॥ १० ॥

गो० टी०–स इति । संप्रहारो युद्धम् ॥ १० ॥

रा० टी०–तत इति । ततः समागमनानन्तरं त्रिभिर्बाणैः त्रिशिरसा ललाटे ताडितः अमर्षी ऋष्यपरायासहनशीलः अत एव कुपितः स्वीकृतकोपाभासो रामः संरब्धः राक्षसकोपोत्पादकः सन् इदमब्रवीत् । संरब्ध इत्यत्र अन्तर्भावितणिजर्थः कर्तरि निष्ठा तु कर्माविवक्षयाऽकर्मकत्वात् ॥ ११ ॥

गो० टी०–तत इति । संरब्धं सकोपमित्यर्थः । लोके कश्चित्कुपितोऽपि वचनेन कोपं न प्रकटयति अयं तु प्रकटयतीति भावः ॥ ११ ॥

१२–१३] ति० टी०–अहो इत्यादि व्यङ्ग्योक्तिः । पुष्पैरिव परिक्षत इत्यनेन त्वगपि न विदेत्याशयः ॥ १२ ॥ १३ ॥

रा० टी०–तद्वचनाकारमाह–अहो इति । यस्य राक्षसस्य शरैः पुष्पैरिव ललाटेऽहं परिक्षतो हतोऽस्मि तस्य विक्रमशूरस्य परपराभवविषयकशौर्यविशिष्टस्य राक्षसस्य ईदृशं बलम् अहो आश्चर्यम् एतेन राक्षसानां परमात्मपराभवशक्तिमत्त्वे तन्निहतबाणस्य पुष्पवत्त्वं न स्यादिति सूचितं तेन तव पराक्रमो नास्तीति सूचितम् ॥ १२ ॥

रा० टी०–ममेति । चापगुणात् ज्यातः च्युतान् ममापि शरान् प्रतिगृह्णीष्व एवमुक्त्वा सुसंरब्धः सञ्जुत्पादितराक्षसकोपः क्रुद्धः स्वीकृतकोपाभासो रामः आशीविषोपमान् चतुर्दश शरान् त्रिशिरसो वक्षसि निजघान । सार्धश्लोक एकान्वयी ॥ १३ ॥

गो० टी०–अहो इत्यादिव्यङ्ग्योक्तिः । विक्रमः पराभिभवनं तत्र शूरस्य समर्थस्येत्यर्थः । ईदृशमित्यस्यैव विवरणम्–पुष्पैरिवेत्यर्धम् । ललाटे स्वललाटे ललाटे स्वल्पापिक्षतिर्बाधिका भवति सापि नास्तीति सूचयितुं पुष्पतौल्यम् । चापगुणः चापमौर्वी एवमिति संरब्धः सन्नेवमुक्त्वा क्रुद्धो निजघानेत्यन्वयः ॥ १२ ॥ १३ ॥

१४–१५] ति० टी०–वाजिनस्तुरगान् वेगवतोऽश्वानित्यर्थः ॥ १४ ॥ १५ ॥

रा० टी०–चतुर्भिरिति । संनतानि पर्वाणि येषां तैश्चतुर्भिः शरैः अस्य त्रिशिरसः वाजिनः अतिवेगयुक्तान् चतुरस्तुरगांस्तेजस्वी रामः न्यपातयत अष्टाभिः सायकैः रथोपस्थे सूतं न्यपातयत् ॥ १४ ॥ १५ ॥

गो० टी०–चतुर्भिरिति । सन्नतपर्वभिः ऋजुपर्वभिः वाजिनः वेगवतः ॥ १४ ॥

गो० टी०–अष्टभिरिति । रथोपस्थे रथोपरिभागे॥१५॥

१६] ति० टी०–हतरथादहतहयसारथिकाद्रथात् ॥ १६ ॥

---

१ स्त्रिति गो. पाठः । २ महानिति गो. पाठः । ३ बभूवातीवेति गो. पाठः । ४ संरब्धमिति गो. पाठः । ५ यस्येति गो. पाठः । ६ गुणच्युतानिति गो. पाठः । ७ उक्त्वा सुसंरब्ध इति रा. पाठः । ८ अष्टाभिरिति रा. पाठः । ९ रथोपस्थादिति गोः पाठः ।

[1]चिच्छेद रामस्तं बाणैर्हृदये सोऽभवज्जडः । सायकैश्चाप्रमेयात्मा सौमर्षात्तस्य रक्षसः ॥ १७ ॥
शिरांस्यपातयत्त्रीणि वेगवद्भिस्त्रिभिः शरैः । सधूमशोणितोद्गारी रामबाणाभिपीडितः ॥ १८ ॥
न्यपतत्पतितैः पूर्वं समरस्थो निशाचरः । हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः ॥ १९ ॥
द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव । तान्खरो द्रवतो दृष्ट्वा निवर्त्य रुषितस्त्वरन् ॥
राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा ॥ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।

खरेण रामधनुर्गुणे निकृत्तेऽगस्त्यदत्तचापं दधानो रामः खर विरथीचकार । रथभङ्गाद्रदा परिगृह्यावनिमवतीर्णे खरे व्योमयानस्था वुसदो रामशिरसि कुसुमानि वर्षन्तो जयघोषैः प्रतुष्टुवुः ।

निहतं दूषणं दृष्ट्वा रणे त्रिशिरसा सह । खरस्याप्यभवत्त्रासो दृष्ट्वा रामस्य विक्रमम् ॥ १ ॥
स दृष्ट्वा राक्षसं सैन्यमविषह्यं महाबलम् । हतमेकेन रामेण दूषणस्त्रिशिरा अपि ॥ २ ॥
तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः । आससाद खरो रामं नमुचिर्वासवं यथा ॥ ३ ॥
विकृष्य बलवच्चापं नाराचान्रक्तभोजनान् । खरश्चिक्षेप रामाय क्रुद्धानाशीविषानिव ॥ ४ ॥

रा० टी०–राम इति । सद्यच्छिन्नं ध्वजं बाणेन रामः चिच्छेद । अर्धं पृथक्—तत इति । ततोऽनन्तरं हतरथात् तस्मात् उत्पतन्तं तं निशाचरं बाणैः हृदये रामः चिच्छेद अत एव स त्रिशिराः जडः जडसदृशः अभवत् ॥ १६ ॥

गो० टी०–तत इति । हतरथात् हतहयसारथिकरथात् हृदये वक्षसि बिभेदेत्यन्वयः । जडः निश्चेष्टः ॥ १६ ॥ १७ ॥

१७–१८]ति०टी०–जडः आयुधपरिग्रह इति शेषः१७–१८

रा० टी०–सायकैरिति । अप्रमेयात्मा इयत्तारहितधैर्यादिः रामः शरैरुपलक्षितस्य तस्य रक्षसः त्रीणि शिरांसि त्रिभिः सायकैः अपातयत् ॥ १७ ॥

रा० टी०–सेति । रामबाणाभिपीडितः अत एव सधूमशोणितोद्गारी धूमसहितरुधिरोद्गरणशीलः समरस्थः पूर्वपतितैः पतितशरकृतव्रणैरुपलक्षितो निशाचरः न्यपतत् ॥ १८ ॥

गो० टी०–स इति । पूर्वं पतितैः शिरोभिः हेतुभिः स्वयं न्यपतत् ॥ १८ ॥

१९–२१] ति० टी०–पूर्वं पतितैः शिरोभिरुपलक्षितः पश्चान्न्यपतत् । 'चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम्' इति सेनोद्योगे खरोक्तश्चतुर्दश सहस्राणि हतानि खरत्रिशिरसावेवावशिष्टाविति पूर्वसर्गान्ते उक्तेहैतशेषाश्चिवर्त्योति अत्रत्योक्तश्चतुर्दशसहस्रं यूथपा अत्रेति ज्ञायते । हतशेषा इति तु खरीयमूलबलाभिप्रायं बोध्यम् ॥ १९–२१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०–हतेति । ततः त्रिशिरोवधानन्तरं हतशेषाः भग्नाः छिन्नाङ्गुलिप्रभृतयः राक्षसाः व्याघ्रत्रस्ता मृगा इव खरसंश्रयाः सन्तः द्रवन्ति स्म अत एव न तिष्ठन्ति स्म । अर्धचतुष्टयमेकान्वयि ॥ १९ ॥

रा० टी०–तानिति । द्रवतस्तान् राक्षसान् दृष्ट्वा रुषितः प्राप्तरोषः खरः त्वरन् सन् निवर्त्य राहुः चन्द्रमसमिव राममेवाभिदुद्राव ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो०टी०–हतशेषा इति । खरसंश्रयाः खरसेवकाः१९–२०

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

१] ति० टी०–निहतमिति ॥ १ ॥

रा० टी०–त्रिशिरोविध्वंसानन्तरकालिकं वृत्तान्तमाह–निहतमित्यादिभिः । त्रिशिरसा सह रणे निहतं दूषणं दृष्ट्वा अत एव रामस्य विक्रमम् अनियतपराक्रमं च दृष्ट्वा खरस्यापि त्रासः स्वसहितस्वकुलविध्वंसजानितोद्वेगः अभवत् ॥ १ ॥

गो० टी०–महामोहसहायस्य दर्पस्याश्रयनिग्रहम् ।
व्यङ्क्तुं खरोपकरणं हन्तारं राममाश्रये ॥

निहतमित्यादि । निहतं दूषणं दृष्ट्वा रामस्य विक्रमं च दृष्ट्वा स्थितस्य खरस्य त्रासोऽभवदिति योजना ॥ १ ॥

२]ति०टी०–रक्षसामिदं राक्षसं सैन्यं हतं दृष्ट्वेत्यन्वयः॥२॥

३–४] ति० टी०–हतभूयिष्ठमल्पावशेषम् ॥ ३ ॥ ४ ॥

१ बिभेदेति गो. पाठः । २ सम्पर्धस्तस्येति गो. पाठः । ३ राम इति गो. पाठः । ४ शितैरिति गो. पाठः । ५ स्वशिरोभिरिति गो. पाठः । ६ ऽन्याग्रेति गो. रा. पाठः । ७ स्वयमिति गो. पाठः । ८ त्रिशिरोदूषणावपीति गो. पाठः ।

ज्यां विधुन्वन्सुबहुशः शिक्षयास्त्राणि दर्शयन् । चचार समरे मार्गाञ्शरैरथ गतः खरः ॥ ५ ॥
स सर्वाश्च दिशो बाणैः प्रदिशश्च महारथः । पूरयामास तं दृष्ट्वा रामोऽपि सुमहद्धनुः ॥ ६ ॥
स सायकैर्दुर्विषहैर्विस्फुलिङ्गैरिवाग्निभिः । नभश्चकाराविवरं पर्जन्य इव वृष्टिभिः ॥ ७ ॥
तद्बभूव शितैर्बाणैः खररामविसर्जितैः । पर्याकाशमनाकाशं सर्वतः शरसंकुलम् ॥ ८ ॥
शरजालावृतः सूर्यो न तदा स्म प्रकाशते । अन्योन्यवधसंरम्भादुभयोः संप्रयुध्यताः ॥ ९ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः । आजघान रणे रामं तोत्रैरिव महाद्विपम् ॥ १० ॥
तं रथस्थं धनुष्पाणिं राक्षसं पर्यवस्थितम् । ददृशुः सर्वभूतानि पाशहस्तमिवान्तकम् ॥ ११ ॥
हन्तारं सर्वसैन्यस्य पौरुषे पर्यवस्थितम् । परिश्रान्तं महासत्त्वं मेने रामं खरस्तदा ॥ १२ ॥
तं सिंहमिव विक्रान्तं सिंहविक्रान्तगामिनम् । दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा ॥ १३ ॥
ततः, सूर्यनिकाशेन रथेन महता खरः । आससादाथ तं रामं पतङ्ग इव पावकम् ॥ १४ ॥

रा० टी०-स इति । अविषह्यं परैः सोढुमशक्यं महाबलं राक्षससैन्यम् एकेन रामेण हतं दृष्ट्वा त्रिशिरोदूषणावपि हतौ दृष्ट्वा तद्बलं त्रिशिरोदूषणयोः सैन्यं च हतभूयिष्ठं हताः भूयिष्ठाः बलवन्तो यस्मिँस्तत्प्रेक्ष्य विमनाः खरो राक्षसः नष्टचिर्वासवमिव आससाद । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०-स इष्टुति । रक्षसां संबन्धि राक्षसं त्रिशिरोदूषणौ हतावित्यनुषङ्गः । बलं सैन्यं हतभूयिष्ठं हतप्रवरराक्षसं चतुर्दशसहस्रसंख्याकाः प्रधाना हताः अवशिष्टं सैन्यं प्रेक्ष्येत्यर्थः । विमनाः विगतगर्वावस्थं मनो यस्य स तथा ॥ २ ॥ ३ ॥

रा० टी०-विकृष्येति । बलवत् अतिदृढं चापं विकृष्य कुद्धान् आशीविषानिव रक्तभोजनान्नाराचान् बाणविशेषान् रामाय खरश्चिक्षेप ॥ ४ ॥

गो० टी०-विकृष्येति । बलवदत्यन्तं नाराचान् ' प्रक्ष्वेडनास्तु नाराचाः ' इत्यमरः । रक्तभोजनानिति रक्तरञ्जितत्वेन रक्तभोजनत्वव्यपदेशः आशीविषानिव सर्पानिव स्थितान् ॥ ४ ॥

५-६] ति० टी०-शिक्षया धनुर्विद्याभ्यासेन मार्गाञ्शरसंधानक्षेपणादिप्रकारभेदान्दर्शयन्रथस्थः खरः समरे चचार अनेकविधरथसंचरणैः ॥ ५ ॥ ६ ॥

रा० टी०-ज्यामिति । सुबहुशोऽनेकवारं ज्यां विधुन्वन् सन् शिक्षया गुरुगृहीतधनुर्विद्याभ्यासेन अस्त्राणि दर्शयन् रथगतः खरः समरे मार्गान् चचार ॥ ५ ॥

गो० टी०-ज्यामिति । शिक्षया धनुर्वेदशिक्षापाटवेन ज्यां विधुन्वन् अस्त्राणि दर्शयन् अस्त्रप्रयोगपाटवं दर्शयन्नित्यर्थः, समरे खरैः मार्गान् नानाप्रकारांश्चकार ॥ ५ ॥

रा० टी०-स इति । स खरः दिशः प्रदिशश्च बाणैः पूरयामास तं तादृक्क्रियाविधिं खरं दृष्ट्वा रामोऽपि सुमहद् धनुर्जग्राहेति शेषः ॥ ६ ॥

गो० टी०-स इति । स रामोऽपि तं दृष्ट्वा बाणैः सुमहद्धनुः सर्वा दिशः प्रदिशश्च पूरयामासेत्यन्वयः ॥ ६ ॥

७] ति० टी०-स रामः नभ आकाशमविवरं गतरन्ध्रं चकार ॥ ७ ॥

रा० टी०-स इति । सः गृहीतचापो रामः विस्फुलिङ्गैः विस्फुलिङ्गाकारैः अग्निभिरिव दुर्विषहैः सायकैः वृष्टिभिः पर्जन्य इव नभः आकाशम् आववरं विवराभाववत् चकार ॥ ७ ॥

गो० टी०-स सायकैरिति । सः रामः अविवरं निरन्ध्रम् ॥ ७ ॥

८-११] ति० टी०-पर्याकाशं परितो विद्यमानमाकाशमनाकाशं निरवकाशं बभूव ॥ ८-११ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-तदिति । खररामविसर्जितैः बाणैः पर्याकाशं सर्वत्र विद्यमानमवकाशवदाकाशं शरसंकुलं सत् अनाकाशम् अवकाशरहितत्वेनाकाशरहितं बभूव॥८॥

गो० टी०-तदिति । पर्याकाशं परितः स्थितमाकाशं खररामयोश्चतुःपार्श्वस्थमाकाशमित्यर्थः, सर्वतः सर्वत्र अनाकाशम् अनवकाशं बभूव ॥ ८ ॥

रा० टी०-शरेति । अन्योन्यवधाय संरम्भः कोपस्तस्मात् हेतोर्युध्यतोरुभयोः शरजालावृतः सूर्योऽभवदिति शेषः, अत एव तदा न प्रकाशते स्म ॥ ९ ॥

गो० टी०-शरजालेति । संरम्भात् कोपात् ' संरम्भः संभ्रमे कोपे ' इत्यमरः । उभयोः शरजालावृत इत्यन्वयः ॥ ९ ॥

रा० टी०-तत इति । नालीकादिभिः बाणविशेषैस्तोत्रैर्महाद्विपमिव रणे राममाजघान ॥ १० ॥

रा० टी०-तमिति । रथस्थं पर्यवस्थितं राक्षसं पाशहस्तमन्तकमिव सर्वभूतानि ददृशुः ॥ ११ ॥

गो० टी०-तत इति । तोत्रैः गजशिक्षणयष्टिभिः॥१०॥११॥

१२-१४] ति० टी०-सर्वसैन्यस्य हन्तारं रामं खरः

१ धून्वन्निति गो पाठः । २ खर इति गो. पाठः । ३ रणे इति गो. पाठः ।

ततोऽस्य सशरं चापं मुष्टिदेशे महात्मनः । खरश्चिच्छेद रामस्य दर्शयन्हस्तलाघवम् ॥ १५ ॥
स पुनस्त्वपरान्सप्त शरानादाय मर्मणि । निजघान रणे क्रुद्धः शक्राशनिसमप्रभान् ॥ १६ ॥
ततः शरसहस्रेण राममप्रतिमौजसम् । अर्दयित्वा महानादं ननाद समरे खरः ॥ १७ ॥
ततस्तत्प्रहतं बाणैः खरमुक्तैः सुपर्वभिः । पपात कवचं भूमौ रामस्यादित्यवर्चसम् ॥ १८ ॥
स शरैरर्पितः क्रुद्धः सर्वगात्रेषु राघवः । रराज समरे रामो विधूमोऽग्निरिव ज्वलन् ॥ १९ ॥
ततो गम्भीरनिर्ह्रादं रामः शत्रुनिबर्हणः । चकारान्ताय स रिपोः सज्यमन्यन्महद्धनुः ॥ २० ॥
सुमहद्वैष्णवं यत्तदतिसृष्टं महर्षिणा । वरं तद्धनुरुद्यम्य खरं समभिधावतः ॥ २१ ॥
ततः कनकपुङ्खैस्तु शरैः संनतपर्वभिः । चिच्छेद रामः संक्रुद्धः खरस्य समरे ध्वजम् ॥ २२ ॥

परिश्रान्तं मेने । अनेनायं प्रहारावसर इति खरबोधः सूचितः । अत एवानुपदं तेन रामधनुपश्छेदः ॥ १२–१४ ॥

रा० टी०–हन्तारमिति । तदा स्वबाणप्रक्षेपणसमये सर्वसैन्यस्य हन्तारं महासत्त्वमतिबलवन्तं पौरुषे परमपुरुषत्वे पर्यवस्थितं रामं खरः परिश्रान्तं मेने, एतेन खरस्याज्ञानं सूचितम् ॥ १२ ॥

गो० टी०–हन्तारमिति । खरः सर्वसैन्यहननपरिश्रान्तमपि रामं पौरुषे पर्यवस्थितं महासत्त्वं मेने, यद्वा उक्तविशेषणं रामं परिश्रान्तं मेने ॥ १२ ॥

रा० टी०–तमिति । सिंहमिव विक्रान्तं सिंहवद्विक्रमविशिष्टं सिंहविक्रान्तवत् सिंहगमनवदुच्छ्रितं तच्छीलं तं खरं दृष्ट्वा सिंहः क्षुद्रमृगमिव दृष्ट्वा रामो नोद्विजते ॥ १३ ॥

गो०टी०–तमिति । नोद्विजते नाचलत् क्षुद्रमृगं शशम्॥१३॥

रा० टी०–तत इति । सूर्यनिकाशेन सूर्यवत्प्रतिभासमानेन महता रथेनोपलक्षितः खरः पतङ्गः पावकमिव खरो रामम् आससाद ॥ १४ ॥

गो० टी०–तत इति । पतङ्ग इत्यनेन अमृत्वा अनिष्टनिरुच्यते ॥ १४ ॥

१५] ति० टी०–मुष्टिदेशे धनुर्ग्रहणप्रदेशोपरिदेशे ॥ १५ ॥

रा० टी०–तत इति । अस्य रामस्य सशरं शरसहितं चापं खरो हस्तलाघवं दर्शयन् सन् मुष्टिदेशे चिच्छेद, एतेन तद्धनोऽदिव्यत्वं सूचितम् यदि तु वस्तुतस्तु चिच्छेदेत्यस्य द्विधाभवनानुकूलव्यापारं चकारेत्यर्थः, नहि व्यापारमात्रेण फलसिद्धिः सार्वत्रिकीत्यत्र फलसिद्धेरैश्वरभावात् चापस्य दिव्यत्वमक्षतमेव ॥ १५ ॥

गो० टी०–ततोऽस्येति । मुष्टिदेशे मुष्टिबन्धनसमीपदेशे महात्मन इत्यनेन मुष्टिदेशे पततो बाणस्य परिहरणसामर्थ्यं व्यज्यते । लाघवं शैघ्र्यं चिच्छेद रामस्य किंचिच्छ्रान्तत्वेनानवधानादिति भावः ॥ १५ ॥

१६–१७] ति० टी०–स खरः मर्मणि कवचबन्धसंधिषु ॥ १६ ॥ १७ ॥

रा० टी०–स इति । स खरः शक्राशनिसमप्रभान् अपरान् सप्त शरानादाय वर्मणि कवचे जघान ॥ १६ ॥

गो० टी०–पाणिलाघवमेवाह–स पुनरित्यादिना । वर्मणि निजघान अवदारयति स्म ॥ १६ ॥

रा० टी०–तत इति । अप्रतिमौजसम् अनुपमपराक्रमं रामं शरसहस्रेण अर्दयित्वा खरो महानादं ननाद ॥ १७ ॥

गो० टी०–तत इति । आदित्यवर्चस इत्यनेन कवचपतनानन्तरं प्रकाशमानतेजोविशेष उच्यते ॥ १७ ॥ १८ ॥

१८] ति० टी०–प्रहतं कवचं पपात ॥ १८ ॥

रा० टी०–तत इति । खरमुक्तैर्बाणैः प्रहतं ताडिताश्रयत्वेनेच्छाविषयीभूतमादित्यवर्चसं तत् रामकवचं भूमौ पपात ताडितस्वसंस्पर्शजनितरामखेदसंभावनया बाणसंबन्धात्पूर्वमेव रामशरीरान्निःसृत्य खरप्रक्षिप्तबाणान् गृहीत्वा पृथिव्यामतिष्ठदित्यर्थः ॥ १८ ॥

१९–२०] ति० टी०–शरैरर्पितः संक्षतः कृतः ॥१९॥२०॥

रा० टी०–स इति । शरैः सर्वगात्रेषु अर्दितः प्राप्तः क्रुद्धो रामः विधूमोऽग्निरिव ज्वलन् सन् समरे रराज ॥ १९ ॥

गो० टी०–स शरैरिति । अर्पितः संयुक्तः विधूम इत्यनेन ज्वालाधिक्यमुच्यते ॥ १९ ॥

रा० टी०–तत इति । ततः खरकृतप्रहारानन्तरं शत्रुनिबर्हणः स रामः रिपोरन्ताय निर्ह्रादं शब्दविशेषम् अन्यद्धनुः सज्यं चकार ॥ २० ॥

गो० टी०–तत इति । गम्भीरनिर्ह्रादं गम्भीरध्वनिकं धनुः रिपोरन्ताय नाशाय सज्यं चकारेत्यन्वयः ॥ २० ॥

२१–२२] ति० टी०–महर्षिणाऽगस्त्येन अतिसृष्टं दत्तम्, वरं श्रेष्ठम् ॥ २१ ॥ २२ ॥

रा० टी०–सुमहदिति । यद् वैष्णवं विष्णुसंस्कृतं सुमहत् धनुः महर्षिणा अगस्त्येन अतिसृष्टं दत्तं तद्वरं धनुरुद्यम्य खरं समभिधावत राम इति शेषः । अगस्त्येन दत्तमित्यनेन महत्तचापेनैव खरो हन्तव्य इत्यगस्त्यप्रार्थना सूचिता तेनागस्त्यस्याप्यनेन कश्चिदपराधः कृत इति सूचितम् ॥ २१ ॥

---

१ पाणीति गो. पाठः । २ वर्मणीति गो. रा. पाठः । ३ खर इति गो. पाठः । ४ सप्तदशाष्टादशयोः गो. पाठव्यत्यासः । ५ वर्चस इति गो. पाठः । ६ धावतेति गो. रा. पाठः । ७ इदम् ' सज्यमन्यन्महद्धनुः ' इति विंशतितमपद्यान्त्यपादार्धविरुद्धम् ।

स दर्शनीयो बहुधा [1]विच्छिन्नः काञ्चनो ध्वजः । जगाम धरणीं सूर्यो देवतानामिवाज्ञया ॥ २३ ॥
तं चतुर्भिः खरः क्रुद्धो रामं गात्रेषु मार्गणैः । विव्याध हृदि मर्मज्ञो मातङ्गमिव तोयदैः ॥ २४ ॥
स रामो बहुभिर्बाणैः खरकार्मुकनिःसृतैः । विद्धो रुधिरसिक्ताङ्गो बभूव रुषितो भृशम् ॥ २५ ॥
स धनुर्धन्विनां श्रेष्ठः [3]संगृह्य परमाहवे । मुमोच परमेष्वासः षट् शरानभिलक्षितान् ॥ २६ ॥
शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्पयत् । त्रिभिश्चन्द्रार्धवक्त्रैश्च वक्षस्यभिजघान ह ॥ २७ ॥
ततः पश्चान्महातेजा नाराचान्भास्करोपमान् । जघान राक्षसं क्रुद्धस्त्रयोदश [6]शिलाशितान् ॥ २८ ॥
रथस्य युगमेकेन चतुर्भिः शबलान्हयान् । षष्ठेन च शिरः संख्ये [7]चिच्छेद खरसारथेः ॥ २९ ॥
त्रिभिस्त्रिवेणून्बलवान्द्वाभ्यामक्षं महाबलः । द्वादशेन तु बाणेन खरस्य सशरं धनुः ॥ ३० ॥
छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव । त्रयोदशेनेन्द्रसमो विभेद समरे खरम् ॥ ३१ ॥
प्रभग्नधन्वा विरथो हताश्वो हतसारथिः । गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥ ३२ ॥

गो० टी०–सुमहदिति । यत्तदिति प्रसिद्धयतिशयवाची महर्षिणा अगस्त्येन अतिसृष्टं दत्तं समभिधावत समभ्यधावत ॥ २१ ॥

रा० टी०–तत इति । कनकपुङ्खैः शरैः खरस्य ध्वजं संक्रुद्धो रामः चिच्छेद ॥ २२ ॥

गो० टी०–तत इति । सव्रतपर्वभिः ऋजुपर्वभिः ॥ २२ ॥

२३–२५] ति० टी०–देवतानामाज्ञया सूर्य इवेति कविकल्पितोपमानिकोपमेयम् ॥ २३–२५ ॥

रा० टी०–स इति । बहुधा बहुप्रकारं विच्छिन्नः दर्शनीयः काञ्चनो ध्वजः देवतानामाज्ञया सूर्य इव धरणीं जगाम । अस्याप्रसिद्धत्वे अभूतोपमात्वम् ॥ २३ ॥

गो० टी०–स इति । दर्शनीयः रम्यः आज्ञया शापेन उत्प्रेक्षेयम् ॥ २३ ॥

रा० टी०–तमिति । क्रुद्धः खरः तं रामं तोमरैर्मातङ्गं गजमिव मार्गणैर्बाणैः हृदि विव्याध ॥ २४ ॥

रा० टी०–स इति । खरकार्मुकनिःसृतैः खरचापच्युतैर्बहुभिर्बाणैः विद्धस्ताडितः रुधिरसिक्ताङ्गः निहतानेकराक्षसशरीरजनितशोणितोक्षितो रामः भृशं रुषितो बभूव ॥ २५ ॥

गो० टी०–तमिति । मातङ्गं गजं तोमरैः गजशिक्षादण्डैः चतुर्भिरित्यत्र वीप्सा बोध्या बहुभिरित्यनुवादात् ॥ २४ ॥ २५ ॥

२६] ति० टी०–अभिलक्षितानभिलक्षितविषयान् ॥ २६ ॥

रा० टी०–स इति । धन्विनां श्रेष्ठः परमेष्वासः गृहीतपरमचापः स रामः अभिलक्षितान् लक्ष्योद्देश्यत्वेन बोधितान् षट् शरान् मुमोच ॥ २६ ॥

गो० टी०–स धनुरिति । परमेष्वासः उत्कृष्टशरासनः अभिलक्षितान् प्रसिद्धान् ॥ २६ ॥

२७] ति० टी०–तानेव विषयानाह—शिरस्येकेनेत्यादि ॥ २७ ॥

रा० टी०–तत्प्रकारमाह–शिरसीति । एकेन बाणेन शिरसि द्वाभ्यां बाह्वोः अताडयत्, चन्द्रार्धवक्त्रैः त्रिभिः बाणैः वक्षसि अभिजघान ॥ २७ ॥

गो० टी०–षण्णां विनियोगप्रकारमाह-शिरसीत्यादिना । द्वाभ्यामिति बाह्वोरिति एकैकस्य बाहोरेकैकेनेत्यर्थः । चन्द्रार्धवक्त्रैः अर्धचन्द्राकारमुखैरित्यर्थः ॥ २७ ॥

२८] ति० टी०–भास्करोपमानित्यस्य गृहीत्वेति शेषः ॥ २८ ॥

रा० टी०–तत इति । ततः पश्चात् षड्बाणप्रक्षेपानन्तरं महातेजाः रामः भास्करोपमान् त्रयोदश नाराचान् राक्षसं जघान ॥ २८ ॥

गो० टी०–तत इति । त्रयोदश नाराचान् समाददे इत्यन्वयः । अन्तिमपादे त्रयोदश शरान् शितानिति पाठे मुमोचेति क्रियाध्याहार्या ॥ २८ ॥

२९] ति० टी०–उपात्तत्रयोदशानां विनियोगमाह—रथस्येत्यादि ॥ २९ ॥

रा० टी०–तत्प्रकारमाह–रथस्येति । एकेन बाणेन रथस्य युगं रथाङ्गं यद्यपि ' युगो रथहलाधङ्गे ' इतिकोशात् युगेनैव रथाङ्गग्रहणे सिद्धे रथस्येति निरर्थकं तथापि स्पष्टत इतराङ्ग्याहृत्तये तदुपात्तम् । अन्वयस्तु विशेषणाविवक्षया चतुर्भिः शबलान् चित्रान् हयान् षष्ठेन च सारथेः शिरः चिच्छेद ॥ २९ ॥

गो० टी०–त्रयोदशानां विनियोगमाह–ततोऽस्येत्यादिना । छित्त्वेत्युत्तरत्र स्थिता क्रिया सर्वत्र संबध्यते । त्रिवेणुनाम रथसुखस्थो युगाधारदण्डः प्रहसन्निव लीलयेत्यर्थः ॥ २९–३१ ॥

३०] ति० टी०–त्रिवेणुनाम रथसुखस्थो युगाधारदण्डः ॥ ३० ॥

३१–३२] ति० टी०–प्रहसन्निव लीलयैव विभेद खरं हृदीति शेषमाह कतकः ॥ ३१ ॥ ३२ ॥

रा० टी०–त्रिभिरिति । त्रिभिः त्रिवेणून् रथसुखस्थ-

---

१ विकीर्णः काञ्चनध्वज इति गो.पाठः । २ तोमरैरिति गो.रा.पाठः । ३ प्रगृह्येति गो. पाठः । ४ अर्दयदिति गो. अताडयदिति रा.पाठः । ५ जिघांसुरिति गो. पाठः । ६ समादद्दे इति गो. पाठः । ७ ततोऽस्येति गो. पाठः । ८ चतुर इति गो. पाठः । ९ खरस्य रथसारथेरिति गो. पाठः । १० शरमिति गो. पाठः ।

तत्कर्म रामस्य महारथस्य समेत्य देवाश्च महर्षयश्च ।
अपूजयन्प्राञ्जलयः प्रहृष्टास्तदा विमानाग्गताः समेताः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।

खरहृतेन सवीरवादमाक्षिप्तखरेण विमुक्ता गदां राम उद्यम्यैव सवीरनादं चिच्छेद ।

खरं तु विरथं रामो गदापाणिमवस्थितम् । मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥
गजाश्वरथसंबाधे बले महति तिष्ठता । कृतं [1]ते दारुणं कर्म सर्वलोकजुगुप्सितम् ॥ २ ॥
उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् । त्रयाणामपि लोकानामीश्वरोऽपि न तिष्ठति ॥ ३ ॥
कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर । तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ४ ॥

युगान्तारदण्डं द्वाभ्याम् अक्षं चक्रान्तारं द्वादशेन तु खरस्य सकरं करसहितं धनुः छित्त्वा वज्रनिकाशेन वज्रसदृशेन त्रयोदशेन इन्द्रसमो राघवः खरं विभेद । श्लोकद्वयमेकान्वयि ॥३०॥३१॥

रा० टी०–प्रभग्नेति । प्रभग्नं धनुर्यस्य स खरः अवप्लुत्य भग्नरथाद्बहिरागत्य गदापाणिः सन् भूमौ तस्थौ ॥ ३२ ॥

गो० टी०–प्रभग्नेति । अवप्लुत्य स्थात् सम्यक्प्लुत्य ॥३२॥

३२] ति० टी०–महारथस्य पूज्यस्य तत्कर्म दृष्ट्वेति शेषः, अपूजयन् नमस्कारस्तुत्यादिभिस्तमतोषयन्नित्यर्थः ॥३३॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

रा० टी०–तदिति । विमानाग्रगता देवाः समेताः समदृश्यो महर्षयश्च प्राञ्जलयः प्रहृष्टाः सन्तः समेत्य तत् अद्भुतं रामस्य कर्म अपूजयन् प्राशंसन् ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डेऽष्टाविंशतितमः सर्गः ॥ २८ ॥

गो० टी०–तदिति । तत्कर्म खरभङ्गकर्म अपूजयन् अस्तुवन् समेत्य समूहीभूय समेताः आगताः ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्यानेऽष्टाविंशः सर्गः ॥ २८ ॥

१] ति० टी०–मृदुपूर्वं न्यायमवलम्ब्य मृदूक्तिपूर्वम् । परुषं परुषार्थकम् ॥ १ ॥

रा० टी०–खरस्यादिच्छेदनानन्तरकालिकं वृत्तान्तमाह–खरमित्यादिभिः । गदापाणिमवस्थितं खरं महातेजाः रामः परुषं रूक्षत्वेन प्रतिभासमानं मृदुपूर्वं मृदु मृदुत्वं पूर्वमिव यस्मिन् तत् वाक्यमब्रवीत् ॥ १ ॥

गो० टी०–अहंकारस्य हीनस्य व्यक्तां शक्तिमिव स्थिताम् ।
गदां खरस्य निर्भिद्य राजन्तं राममाश्रये ॥

सर्वसाधनवैकल्येन खरस्यानुकूल्यमपि भवेदिति तच्चित्तपरीक्षार्थमाह–खरं न्वित्यादिना । मृदुपूर्वं न्यायावलम्बनेनोक्तं परुषं मर्मोद्घाटनरूपत्वात् ॥ १ ॥

२] ति० टी०–त्वत्कृतान्यायेनायं तव नाश इत्याह–गजेत्यादि । बले तिष्ठता बलविषयस्वामित्वेन तिष्ठता, ईदृशेन यदारुणं कर्म कृतं भवति तत्सर्वं लोकनिन्द्यं भवति ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–गजेति । गजाश्वरथसंबाधे गजादिभिः संकुले महति बले तिष्ठता त्वया सर्वलोकजुगुप्सितं सर्वलोकैर्निन्दितं दारुणं क्रूरं कर्म कृतम् ॥ २ ॥

गो०टी०–गजाश्वेति । तिष्ठता अधिपतित्वेन तिष्ठतेत्यर्थः २

३] ति० टी०–एवंविधकर्मकर्तुर्नेह सुखमित्याह–उद्वेजनीय इति उद्वेजक इत्यर्थः । नृशंसो घातुकः क्रूर एवंगुणक ईश्वरोऽपि न तिष्ठति न चिरं तिष्ठति ॥ ३ ॥

रा० टी०–नन्वेतेन कर्मणा किं भवितेत्यत आह–उद्विजेति । भूतानां जन्तूनामुद्वेजनीयः भयप्रदः अत एव नृशंसः क्रूरकर्मा अत एव पापकर्मकृत् जन्तुः त्रयाणां लोकानामीश्वरोऽपि न तिष्ठति । एतेन यदि लोकेश्वरस्य पापकृतो न स्थितिस्तर्हि तव नेति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो व्यक्तः ॥ ३ ॥

गो० टी०–मृदुपूर्वत्वसिद्धये लोकन्यायमाह–उद्वेजनीय इति । उद्वेजनीयः उद्वेजकः नृशंसो घातुकः एवंविधो लोकानामीश्वरोऽपि न तिष्ठति न जीवेत् किंपुनर्भवादृश इति भावः॥३॥

४] ति० टी०–तदेवाह–कर्मेत्यादि । सर्वजनो हन्ति अकृतापकारोऽपि हन्ति स सर्ववध्य इति यावत् ॥ ४ ॥

रा० टी०–कर्मेति । हे क्षणदाचर ! क्षणदासु रात्रिषु चरति तत्संबोधनम् लोकविरुद्धं तीक्ष्णं कर्म कुर्वाणं जनम् आगतं गृहे प्राप्तं दुष्टं सर्पमिव सर्वजनो हन्ति ॥ ४ ॥

गो०टी०–कर्मेति । सर्वजन इति दयालुरपीति भावः॥४॥

१ स्विति गो. पाठः ।

लोभात्पापानि कुर्वाणः कामाद्वा यो न बुध्यते । हृष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव ॥ ५ ॥
वसतो दण्डकारण्ये तापसान्धर्मचारिणः । किं नु हत्वा महाभागान्फलं प्राप्स्यसि राक्षस॥ ६ ॥
न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः । ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूला इव द्रुमाः ॥ ७ ॥
अवश्यं लभते कर्ता फलं पापस्य कर्मणः । घोरं पर्यागते काले द्रुमः पुष्पमिवार्तवम् ॥ ८ ॥
न चिरात्प्राप्यते लोके पापानां कर्मणां फलम् । सविषाणामिवान्नानां भुक्तानां क्षणदाचर ॥ ९ ॥
पापमाचरतां घोरं लोकस्याप्रियमिच्छताम् । अहमासादितो राजा प्राणान्हन्तुं निशाचर ॥ १० ॥
अद्य भित्त्वा मया मुक्ताः शराः काञ्चनभूषणाः । विदार्य पिपतिष्यन्ति वल्मीकमिव पन्नगाः ॥ ११ ॥

५] ति० टी०—अप्राप्तप्राप्तीच्छा कामः, प्राप्ताधिकेच्छा लोभः । तस्य पापस्यान्तं स्वनाशरूपं परिपाकं पश्यति पापफलमनुभवतीत्यर्थः । करका वर्षोपलास्तानत्ति करकात्सा ब्राह्मणी रक्तपुच्छिकेव रक्तपुच्छिकायाः करका विषम् तन्निगरणमात्रेण तन्मृत्युरिति प्रसिद्धिः सा यथा स्वानर्थमपश्यन्ती तद्भुङ्क्ते भोजनोत्तरं तन्नाशं लोकः पश्यति एवं यः कर्मकरणकाले नाशकमिदमिति न बुध्यते तस्य तत्कर्मप्राप्तमन्तं नाशं लोको हृष्टः सन्पश्यतीत्यर्थ इति कतकः ॥ ५ ॥

रा० टी०—लोभादिति । लोभात् अविवेकात् कामात् शरीरपोषणाद्युत्कटेच्छातो वा पापानि पापकर्माणि हिंसादीनि कुर्वाणः अत एव हृष्टः यो न बुध्यते परपीडादि ज्ञात्वा न निवर्तते स जन्तुस्तस्य कर्मणः अन्तं फलं पश्यति प्राप्नोति । किंच तस्य कर्मणः कर्ता स जन्तुः अन्तं स्वविध्वंसं पश्यति । तत्र दृष्टान्तः—ब्राह्मणी रक्तपुच्छिका करकात् वर्षोपलात् तद्भक्षणादिवेत्यर्थः, वर्षोपलं रक्तपुच्छिकाया विषमिति प्रसिद्धम्॥५॥

गो० टी०—लोभादिति । लोभात् लब्धस्य त्यागासहिष्णुतया कामात् अपूर्वलाभेच्छया न बुध्यते न पश्चात्तापं करोतीत्यर्थः । भ्रष्टः ऐश्वर्यात् भ्रष्टः तस्य कर्मणः अन्तं फलं पश्यति अनुभवति कथमिव करकात् ब्राह्मणीव करकाः वर्षोपलाः । 'वर्षोपलस्तु करका' इत्यमरः । तानत्तीति करकात् ब्राह्मणी रक्तपुच्छिका 'ब्राह्मणी रक्तपुच्छिका' इति निघण्टुः । तस्यास्तद्भक्षणं विषभक्षणवन्मारकमिति प्रसिद्धिः यथा ब्राह्मणी स्वमारकं कर्म स्वयमेव करोति तथा त्वमपीत्यर्थः ॥ ५ ॥

६] ति० टी०—ततः किं तत्राह—वसत इति । किं नु फलमत्रे प्राप्स्यसि तन्न विद्म इति शेषः ॥ ६ ॥

रा० टी०—नन्वहं किं क्रूरं कर्म मया कृतमित्यत आह—वसत इति । दण्डकारण्ये वसतो धर्मचारिणस्तापसान् हत्वा किं नु फलं सुभोगं प्राप्स्यसि नेत्यर्थः ॥ ६ ॥

गो० टी०—किं पापं मया कृतमित्यत्राह—वसत इति॥६॥

७] ति० टी०—इदं तु प्रत्यक्षमित्याह—नेति । पापकर्माणः पूर्वपुण्येनैश्वर्यं प्राप्यापि न चिरं तिष्ठन्ति ॥ ७ ॥

रा० टी०—नेति । पापकर्माणः पुरुषाः ऐश्वर्यं कस्यचित्सुकर्मणः फलभूतसंपदं प्राप्य चिरं न तिष्ठन्ति, तत्र दृष्टान्तः शीर्णमूलाः द्रुमा वृक्षा इव ॥ ७ ॥

गो० टी०—ननु तर्हि कथं पापिनोऽपि बहवो जीवन्तीत्यत्राह—न चिरमिति । केवलपापिनो जन्मान्तरे फलं भुञ्जते क्रूरास्तु पुण्यलेशेन ऐश्वर्यं प्राप्यापि न चिरं तिष्ठन्ति क्षिप्रमेव विनश्यन्तीत्यर्थः ॥ ७ ॥

८-९] ति० टी०—काले पापानुभवकाले । घोरं दुःखरूपफलम् ॥ ८ ॥ ९ ॥

रा० टी०—अवश्यमिति । पापस्य कर्मणः कर्ता काले पर्यागते प्राप्ते सति घोरं फलमवश्यं लभते, तत्र दृष्टान्तः आर्तवम् ऋतुप्राप्तं पुष्पं द्रुम इव ॥ ८ ॥

गो० टी०—अवश्यमिति । पापस्य कर्ता जन्तुः काले प्राप्ते अवश्यं घोरं दुःखरूपं फलं लभते ऋतुलक्षणे काले पर्यागते प्राप्ते आर्तवं तत्तदृतुप्राप्तं पुष्पमिव ॥ ८ ॥

रा० टी०—नेति । पापानां पापजनकानां कर्मणाम् अत्युग्रक्रियाणां फलं विपत्तिः चिरात्र प्राप्यते झटित्येव प्राप्यत इत्यर्थः, तत्र दृष्टान्तः भुक्तानां सविषाणाम् अन्नानामिव ॥ ९ ॥

गो० टी०—नचिरादिति । नचिरादित्येकं पदम् अविलम्बेनेत्यर्थः । अत्र पुरुष इति शेषः, पापानाम् अत्युत्कटानामित्यर्थः ॥ ९ ॥

१०] ति० टी०—घोरं कर्मणः फलं भवतीति शेषः । अतो हेतोरहं राजा दुष्टनिग्रहाधिकारी । हे निशाचर ! रक्षसां प्राणान्हन्तुमासादितः ऋषिभिरिति शेषः, त्वयेति वा । 'राजा' इति पाठे राज्ञा दशरथेनासादितो नियुक्त इत्यर्थ इति तीर्थः ॥ १० ॥

रा० टी०—नन्वहं यो यत्कर्म करिष्यति स तत्फलं प्राप्नोत्येवेति त्वदुक्तिर्व्यर्थेवेत्यत आह—पापमिति । लोकस्य अप्रियमिच्छतामत एव पापमाचरतां जनानां प्राणान्हन्तुं राज्ञा पित्रा अहमासादितः वनं प्रापितः । राजेति पाठेऽपि क्विबन्तत्वेन स एवार्थः ॥ १० ॥

गो० टी०—एवं मृदुपूर्वमुक्त्वा परुषमाह—पापमित्यादिना। आसादितः प्राप्तोऽस्मि आगमने हेतुमाह—राज्ञेति॥१०॥

११] ति० टी०—अद्य मया मुक्ता बाणास्त्वद्वपुर्भित्त्वा

१ भ्रष्ट इति गो. पाठः । २ जन्तुरिति गो. पाठः । ३ द्रुमा इति गो.पाठः । ४ राज्ञेति गो. रा. पाठः। ५ हि त्वामिति गो.पाठः। ६ निपतिष्यन्तीति गो. अतिपतिष्यन्तीति रा. पाठः ।

ये त्वया दण्डकारण्ये भक्षिता धर्मचारिणः । तानद्य निहतः संख्ये ससैन्योऽनुगमिष्यसि ॥ १२ ॥
अद्य त्वां [1]निहतं बाणैः पश्यन्तु परमर्षयः । निरयस्थं विमानस्था ये त्वया [2]निहताः पुरा ॥ १३ ॥
प्रहरस्वैं यथाकामं कुरु यत्नं कुलाधम । अद्य ते पातयिष्यामि शिरस्तालफलं यथा ॥ १४ ॥
एवमुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः । प्रत्युवाच ततो रामं प्रहसन्क्रोधमूर्छितः ॥ १५ ॥
प्राकृतान्राक्षसान्हत्वा युद्धे दशरथात्मज । आत्मना कथमात्मानमप्रशस्यं प्रशंससि ॥ १६ ॥
विक्रान्ता बलवन्तो वा ये भवन्ति नरर्षभाः । कथयन्ति न ते किंचित्तेजसा चातिगर्विताः ॥ १७ ॥
प्राकृतास्त्वकृतात्मानो लोके क्षत्रियपांसनाः । निरर्थकं विकत्थन्ते यथा राम विकत्थसे ॥ १८ ॥
कुलं व्यपदिशन्वीरः समरे कोऽभिधास्यति । मृत्युकाले तुं संप्राप्ते स्वयमप्रस्तवे स्तवम् ॥ १९ ॥

भूमिं विदार्यातिपतिष्यन्ति भुवमतिक्रम्य पतिष्यन्ति पातालं गमिष्यन्तीति यावत् ॥ ११ ॥

रा० टी०—अद्येति । काञ्चनभूषणाः मया मुक्ताः शराः भित्त्वा त्वदेहं छित्त्वा भुवं विदार्य च वल्मीकं पन्नगा इव अतिपतिष्यन्ति प्रवेक्ष्यन्ति भुवमिति शेषः ॥ ११ ॥

गो० टी०—अद्य हीति । मया मुक्ताः शराः त्वां विदार्य निपतिष्यन्ति प्रवेक्ष्यन्ति यथा पन्नगाः सर्पाः वल्मीकं प्रविशन्ति तथा ॥ ११ ॥

१२] ति० टी०—अत्र ऋष्यनुगमनं प्राणनाशमात्रेण अत एव निरयस्थमिति वक्ष्यति ॥ १२ ॥

रा० टी०—ये इति । दण्डकारण्ये ये धर्मचारिणस्त्वया भक्षितास्तांस्तत्सदृशं मरणं मया निहतः सन्ननुगमिष्यसि प्राप्स्यसि ॥ १२ ॥

गो० टी०—ये त्वयेति । ताननुगमिष्यसीति पापिनामपि समरे इतानां स्वर्गसंभवादिति भावः ॥ १२ ॥

१३] ति० टी०—निरयस्थमिति । ननु भगवता हतस्य मृतिसमये भगवद्दर्शनवतः कथं निरयस्थत्वमिति चेन्न, अत्युग्रस्य ब्रह्मवधकर्मणः फलस्यावश्यं भोक्तव्यत्वेनादौ भगवदिच्छयैव निरयभोगपूर्वमुत्तमपदप्राप्तेः सत्त्वेनादोषात् ॥ १३ ॥

रा० टी०—अद्येति । ये त्वया निहतास्ते विमानस्थाः परमर्षयः बाणैर्निहतं निरयस्थं निर्गतः अयः पुनरिहलोके पुत्रपौत्रादिदर्शनार्थं गमनं यस्मात् तल्लोकविशेषस्थं त्वां पश्यन्तु ॥ १३ ॥

गो० टी०—अद्य त्वामिति । निरयस्थं नरकसदृशं दुःखं भूमौ पतित्वाऽनुभवन्तमित्यर्थः ॥ १३ ॥

१४–१६] ति० टी०—कुलाधम कुलेनाधम ॥ १४–१६ ॥

रा० टी०—प्रहरस्वेति । हे कुलाधम ! ते शिरस्तालफलमिव पातयिष्यामि अतः यथाकामं त्वं प्रहरस्व यत्नं स्ववधाभावप्रयत्नं कामं यथेच्छं कुरु, अनवधानतया इतोऽस्मीति न वक्तव्यमिति तात्पर्यम् ॥ १४ ॥

रा० टी०—एवमिति । रामेण एवमुक्तः क्रुद्धः अत एव क्रोधमूर्च्छितः स्वरः प्रहसन् सन् रामं प्रत्युवाच ॥ १५ ॥

गो० टी०—प्रहरेति । तालफलं यथेत्यनेनानायासोक्तिः ॥ १४ ॥ १५ ॥

रा० टी०—तत्प्रतिवचनाकारमाह—प्राकृतानिति । हे दशरथात्मज ! प्राकृतान् राक्षसान् हत्वा आत्मना स्वेनैव अप्रशस्यमात्मानं कथं प्रशंससि ॥ १६ ॥

गो० टी०—प्राकृतानिति । आत्मना स्वयमेव ॥ १६ ॥

१७] ति० टी०—गर्विता अति न कथयन्तीत्यन्वयः ॥ १७ ॥

रा० टी०—विक्रान्ता इति । विक्रान्ता कामचारगमनाः बलवन्तश्च तेजसा च अतिगर्विताः ये नरर्षभास्ते किंचित् स्वमहत्त्वसूचकं वाक्यं न कथयन्ति ॥ १७ ॥

गो० टी०—विक्रान्ता इति । तेजसा प्रतापेन ॥ १७ ॥

१८] ति० टी०—अकृतात्मानः कल्मषचित्ताः ॥ १८ ॥

रा० टी०—प्राकृता इति । हे राम ! यथा त्वं निरर्थकं विकत्थसे तथा अकृतात्मानः अजितमनसः प्राकृताः क्षत्रियपांसनाः विकत्थन्ते, एतेन त्वयैवं न वक्तव्यमिति सूचितम् तेन रामस्य प्राकृतविलक्षणत्वं ध्वनितम् ॥ १८ ॥

गो० टी०—प्राकृता इति । प्राकृताः क्षुद्राः अकृतात्मानः अप्रतिष्ठितधृतयः क्षत्रियपांसनाः क्षत्रियाधमाः निरर्थकं निष्प्रयोजनं यथा तथा विकत्थन्ते श्लाघन्ते ॥ १८ ॥

१९] ति० टी०—कुलमं व्यपदिशन्कुलीनत्वं प्रकटयन्मृत्युकाले तत्तुल्ययुद्धकाले संप्राप्ते अप्रस्तवेऽप्रस्तावे धर्मभाव आर्षः स्वस्तवरूपं वचनं कोऽभिधास्यति न कोऽपीत्यर्थः । 'अहमासादितो राजा' इति रामोक्तेरिदमुक्तवान् ॥ १९ ॥

रा० टी०—कुलमिति । मृत्युकाले मृत्युसंशयप्रापके समरे प्राप्ते सति अप्रस्तवे प्रस्तावाभावे कुलं स्वकुलवैभवं व्यपदिशन् सन् स्तवं स्वस्तुतिवचनं कोऽभिधास्यति कथयिष्यति ॥ १९ ॥

गो० टी०—कुलमिति । कुलं व्यपदिशन् आत्मनो महाकुल-

---

१ पतितमिति गो. पाठः । २ हिंसिता इति गो पाठः । ३ त्वमिति गो. पाठः । ४ खर इति गो. पाठः । ५ स्वेनेति गो. पाठः । ६ होति गो. पाठः ।

सर्वथा तु लघुत्वं ते कत्थनेन विदर्शितम् । सुवर्णप्रतिरूपेण तप्तेनेव कुशाग्निना ॥ २० ॥
न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम् । धराधरमिवाकम्प्यं पर्वतं धातुभिश्चितम् ॥ २१ ॥
पर्याप्तोऽहं गदापाणिर्हन्तुं प्राणान्रणे तव । त्रयाणामपि लोकानां पाशहस्त इवान्तकः ॥ २२ ॥
कामं बह्वपि वक्तव्यं त्वयि वक्ष्यामि न त्वहम् । अस्तं प्राप्नोति सविता युद्धविघ्नस्ततो भवेत् ॥ २३ ॥
चतुर्दश सहस्राणि राक्षसानां हतानि ते । त्वद्विनाशात्करोम्यद्य तेषामश्रुप्रमार्जनम् ॥ २४ ॥

प्रस्तुतत्वं प्रकटयन् को वीरः मृत्युकाले संप्राप्ते अप्रस्तवे अनवसरे स्वयं स्तवमभिधास्यतीत्यन्वयः ॥ १९ ॥

२०] ति० टी०–कत्थनेन प्राकृतेन ते त्वया सर्वथैवात्मनो लघुत्वं दर्शितम् । यथा सुवर्णतुल्यरूपेण पित्तलेन कुशाग्निना स्वर्णादिशोधनाग्निना तप्तेन यथा स्वस्य कृष्णवर्णत्वरूपं लाघवं दर्शितं भवति तद्वत्तापात्पूर्वं हि तत्र स्वर्णताबुद्धिः सा तापे यथा नश्यति तथा त्वया स्वास्मिन्स्थिता प्राक्शूरत्वबुद्धिः कत्थनेनापहृतेत्यर्थः । 'तुषाग्निना' इति पाठान्तरम् ॥ २० ॥

रा० टी०–सर्वथेति । कत्थनेन स्वश्लाघया ते लघुत्वं सर्वथा विदर्शितं बोधितम्, तत्र दृष्टान्तः कुशाग्निना स्वर्णशोधकाग्निना तप्तेन सुवर्णप्रतिरूपेण पित्तलेनेव तद्बुद्धितापेन तस्य कृष्णरूपत्वं भवतीति प्रसिद्धम् । यथा तापात्पूर्वं सूक्ष्मविचारमन्तरा पित्तले स्वर्णबुद्धिरुत्पद्यते तापेन तु विनश्यति तथा स्वश्लाघावचनोच्चारणात्पूर्वं त्वच्छूरत्वविषयिणी बुद्धिर्ममोत्पन्ना त्वत्कर्तृकस्वश्लाघाकत्थनेन तु सा विनष्टेत्यर्थः ॥ २० ॥

गो० टी०–सर्वथैव लघुत्वं ते कत्थनेन विदर्शितम् । सुवर्णप्रतिरूपेण तप्तेनेव कुशाग्निना, इति । ते कत्थनेन लघुत्वमल्पत्वं सर्वथैव स्पष्टमेव विदर्शितं यथा तप्तेन अत एव सुवर्णसदृशेन कुशाग्निना कुशं दर्भमाश्रितेनाग्निना लघुत्वं विदर्श्यते तद्वत् यथा तृणाग्निः सुवर्णतुल्यतया भासमानोऽपि ज्वलन्नप्युत्तरकाले दाहकार्यकरो न भवति तथा कत्थनेन वीरवत् भासमानोऽपि पुरुषः उत्तरकाले लघुरेव भविष्यतीत्यर्थः । शीघ्रं ज्वलन् तृणाग्निः यथा सद्यः शान्तो न दग्धुमीष्टे तथा कत्थमानः पुरुषः स्वकत्थनानुरूपं कार्यं न करोतीति सिद्धमिति ॥ २० ॥

२१] ति० टी०–अयमेव ते कत्थने हेतुरित्याह–न त्विति । गदाधरं मां यतो न पश्यसि सारतो न जानासि अतो विकत्थसे इत्यन्वयः । धराधरमिति पर्वतविशेषणम् तेन कुलाचलसादृश्यबोधनम् ॥ २१ ॥

रा० टी०–श्लाघाकरणे हेतुमाह–नेति । धातुभिः स्वर्णादिभिश्चितं प्रसिद्धम् अकम्प्यं कम्पयितुमशक्यं धराधरं पृथ्वीभारकं पर्वतं कुलाचलमिव तिष्ठन्तं गदाधरं मां त्वं न पश्यसि तत्त्वतो न जानासि, एतेन तत्त्वतो मत्कर्मकज्ञाने त्वयि स्वश्लाघाबुद्धिर्नैवोत्पद्येत इति सूचितम् ॥ २१ ॥

गो० टी०–न त्विति । इह तव पुरतः तिष्ठन्तं निश्चलतया स्थितं गदाधरं शत्रुरक्तोक्षितगदावन्तं मां सर्वनिर्वाहकं पर्वतमिवाकम्प्यं न पश्यसि अत एवैवं कत्थस इति भावः ॥ २१ ॥

२२] ति० टी०–स्वकं सारं दर्शयति–पर्याप्त इति । गदापाणिरिति गदाहस्त इत्यर्थः । तव त्रयाणां लोकानां चेत्यर्थः ॥ २२ ॥

रा० टी०–ननु यज्ज्ञानेन मयि स्वश्लाघाबुद्धिर्नोत्पद्येत तत्किं त्वय्यस्तीत्यत आह–पर्याप्त इति । गदापाणिरहं तव प्राणान् त्रयाणां लोकानां च प्राणान् हन्तुं पाशहस्तोऽन्तक इव पर्याप्तोऽस्मीति शेषः ॥ २२ ॥

गो० टी०–पर्याप्त इति । गदापाणिरहं पाशहस्तोऽन्तक इव तव त्रयाणां लोकानामपि प्राणान् हन्तुं पर्याप्तः समर्थ इति योजना ॥ २२ ॥

२३] ति० टी०–यद्यपि त्वद्विषये कामं बहु वक्तव्यमस्ति, अथाप्यहं न वक्ष्यामि त्वद्बलघुत्वापतेः । हेत्वन्तरमप्याह–अस्तमिति ॥ २३ ॥

रा० टी०–काममिति । यद्यपि त्वयि त्वद्विषये कामं यथा स्यात्तथा बहु वक्तव्यमस्ति तथापि अहं न वक्ष्यामि । तत्र हेतुः–सविता सूर्योऽस्तं प्राप्नोति ततोऽस्ते सति युद्धविघ्नो भवेत् एतेन रात्रौ राक्षसानां बलवर्धनस्य प्रसिद्धत्वान्निशि युद्धे अल्पबलेन रामेण साकं युद्धं प्रवृत्तमिति ममोपहासास्पदत्वं स्यादिति सूचितम् ॥ २३ ॥

गो० टी०–काममिति । त्वयि आत्मश्लाघिनि विषये कामं यद्यपि बहु पारुष्यं वक्तव्यमस्ति तथापि तत्र वक्ष्यामि । कुतः हि यस्मात् सविता अस्तं गच्छेत्[1] ततः अस्तमयेन युद्धविघ्नो भवेत् यद्यपि स्वस्य रात्रिर्बलायैव तथापि राज्यशक्तमनुष्यवधे स्वस्य न कापि कीर्तिरिति स्वरहृदयम् ॥ २३ ॥

२४] ति० टी०–यानि ते त्वया हतानि तेषां तत्सम्बन्धिस्त्रीपुत्रादीनामश्रुप्रमार्जनं करिष्यामि त्वद्विनाशात्स्वन्मरणात् ॥ २४ ॥

रा० टी०–चतुर्दशेति । यानि रक्षसां चतुर्दश सहस्राणि त्वया निहतानि तेषां रक्षसामश्रुप्रमार्जनं संतापनाशमित्यर्थः, त्वद्विनाशात्करोमि ॥ २४ ॥

गो० टी०–चतुर्दशेति । ते त्वया एष इत्यव्यवधानोक्तिः तेषां तद्बन्धूनामित्यर्थः, यद्वा तद्वधप्रतिक्रियां करिष्यामीत्यत्र हृदयम् ॥ २४ ॥

---

१ गच्छेदीति गो. पाठः । २ एष इति गो. पाठः ।

इत्युक्त्वा परमक्रुद्धः सै गदां पैरमाङ्गदाम् । खरश्चिक्षेप रामाय प्रदीप्तामशनिं यथा ॥ २५ ॥
खरबाहुप्रमुक्ता सा प्रदीप्ता महती गदा । भस्म वृक्षांश्च गुल्मांश्च कृत्वाऽगात्तत्समीपतः ॥ २६ ॥
तामापतन्तीं मैहतीं मृत्युपाशोपमां गदाम् । अन्तरिक्षगतां रामश्चिच्छेद बहुधा शरैः ॥ २७ ॥
सा विशीर्णा शरैर्भिन्ना पपात धरणीतले । गदा मन्त्रौषधिबलैर्व्यालीव विनिपातिता ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ।

रामेण सवीरत्वादमधिक्षिप्तः खरस्तज्जिघांसया निरायुधोऽपि वृक्षमेव तदुपरि चिक्षेप। रामो वृक्षमुपर्येव विच्छिद्य स्वबद्धुधिरमभियान्तं खरमुरसि शरार्पणेन जघान । खरनिधनतुष्टा देवर्षयः सपुष्पवर्षं रामं तुष्टुवुः । लक्ष्मणेन सह गुहामुखान्निसृता सीता सानन्दं राम परिषस्वजे ।

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः । स्मयमान ईदं वाक्यं संरब्धमिदमब्रवीत् ॥ १ ॥
एतत्ते बलसर्वस्वं दर्शितं राक्षसाधम । शक्तिहीनतरो मत्तो वृथा त्वमुपगर्जसि ॥ २ ॥
एषा बाणविनिर्भिन्ना गदा भूमितलं गता । अभिधानप्रगल्भस्य तव प्रत्ययघातिनी ॥ ३ ॥
यत्त्वयोक्तं विनष्टानामिदमश्रुप्रमार्जनम् । राक्षसानां करोमीति मिथ्या तदपि ते वचः ॥ ४ ॥
नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः । प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ ५ ॥
अद्य ते १०भिन्नकण्ठस्य फेनबुद्बुदभूषितम् । विदारितस्य मद्बाणैर्महीं पास्यति शोणितम् ॥ ६ ॥

२५] ति० टी०—परमा अङ्गदाः कनकवलयानि यस्यास्तां प्रसिद्धां हस्तस्थां गदां चिक्षेप ॥ २५ ॥

रा० टी०—इतीति । इत्युक्त्वा परमक्रुद्धः खरः परमाङ्गदां परमाः अङ्गदाः कनकवलयानि यस्यास्तां प्रसिद्धां गदामशनिमिव चिक्षेप ॥ २५ ॥

गो० टी०—इतीति । परमाङ्गदः गदाप्रहारसामर्थ्यविरुद्धयुक्त इत्यर्थः । अशनिं वज्रम् ॥ २५ ॥

२६–२७] ति० टी०—भस्म कृत्वा स्वज्वालयेति शेषः । तत्समीपतो रामसमीपतः ॥ २६ ॥ २७ ॥

रा० टी०—खरेति । खरबाहुप्रमुक्ता प्रदीप्ता सा महती गदा वृक्षान् गुल्मांश्च भस्म कृत्वा तत्समीपतः रामसंनिधौ अगात् २६॥

रा० टी०—तामिति । मृत्युपाशोपममापतन्तीमाकाशगतां तां महतीं गदां रामः बहुधा बहुप्रकारं शरैः चिच्छेद ॥ २७ ॥

गो० टी०—खरेति । भस्म कृत्वा तत्समीपमगादित्यन्वयः। समीपत इति सार्वविभक्तिकस्तसिः ॥ २६ ॥ २७ ॥

२८] ति० टी०—मन्त्रादिबलैर्विनिपातिता व्यालीव॥२८॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

रा० टी०—सेति । शरैः रामबाणैः विशीर्णा हता अत एव भिन्ना विदीर्णा सा गदा मन्त्रौषधिबलैर्निपातिता व्यालीव धरणीतले पपात ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

गो० टी०—सेति । व्याली पन्नगी ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥२९॥

१] ति० टी०—भित्त्वेति ॥ १ ॥

रा० टी०—खरगदाभेदनानन्तरकालिकं वृत्तान्तमाह—भित्त्वेति । धर्मवत्सलो राघवस्तां खरप्रक्षिप्तां गदां शरैः भित्त्वा स्मयमानः सन् संरब्धं कोपसूचकमिदं वाक्यं खरमब्रवीत्॥१॥

गो० टी०—निरस्तनिखलालम्बमहंकारमिव स्थितम् ।
खरं निहत्य साधूनां सुखावहमहं भजे ॥

भित्त्वा त्वित्यादि । धर्मवत्सल इत्यनेन निरायुधवधोचुचित इति श्रीरामोऽमन्यतेति गम्यते । स्मयमानः परिहसन्नित्यर्थः, संरब्धं भ्रान्तमिति खरविशेषणम् ' संरम्भः संभ्रमे कोपे ' इत्यमरः ॥ १ ॥ २ ॥

२] ति० टी०—लब्धावसरो भगवांस्त्वयैव कत्थनं कृतमित्याह—एतदिति । शक्तिहीनतरः शक्त्या हीनतरः ॥ २ ॥

रा० टी०—एतदिति । हे राक्षसाधम ! ते एतत् बलसर्वस्वं दर्शितं त्वयैवेति शेषः, शक्तिहीनतरस्त्वं मत्तो वृथा उपगर्जसि स्वप्राबल्यं कथयसि ॥ २ ॥

३–६] ति० टी०—अभिधाने केवल प्रगल्भस्य तवानया शत्रुवधो भवत्येवेत्ययं यः प्रत्ययो विश्वासस्तस्य स्वनाशेन घातिका ॥ ३–६ ॥

१ तामिति गो. रा. पाठः । २ परमाङ्गद इति गो. पाठः । ३ ज्वलितामिति गो. पाठः । ४ भक्षेति गो. पाठः । ५ औषधेति गो. पाठः । ६ खरमिति गो. रा. पाठः । ७ अवेति गो. पाठः । ८ अरीति गो. पाठः । ९ अहमिति गो. पाठः । १० छिन्नेति गो. पाठः ।

पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः । स्वप्स्यसे गां समाश्लिष्य दुर्लभां प्रमदामिव ॥ ७ ॥
प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने । भविष्यन्ति शरण्यानां शरण्या दण्डका इमे ॥ ८ ॥
जनस्थाने हतस्थाने तव राक्षस मच्छरैः । निर्भया विचरिष्यन्ति सर्वतो मुनयो वने ॥ ९ ॥
अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः । बाष्पार्द्रवदना दीना भयादन्यभयावहाः ॥ १० ॥
अद्य शोकरसज्ञास्ता भविष्यन्ति [3]निरर्थिकाः । अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः ॥ ११ ॥
नृशंसशील क्षुद्रात्मन्नित्यं ब्राह्मणकण्टक । त्वत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः ॥ १२ ॥
तमेवमभिसंरब्धं ब्रुवाणं राघवं वने । खरो निर्भर्त्सयामास रोषात्खरतरस्वरः ॥ १३ ॥

रा० टी०–एषेति । अभिधानप्रगल्भस्य स्वप्राबल्यकथन धृष्टस्य तव एषा गदा बाणविनिर्भिन्ना अत एव तव प्रत्ययघातिनी प्रत्ययस्य परैरच्छेद्यातोऽनया शत्रुविध्वंसो भविष्यत्येवेति-विश्वासस्य घातिनी निवर्तिका सती भूमितलं गता प्राप्ता ॥३॥

रा० टी०–यदिति । यत् वचस्त्वया उक्तं तदपि वचः मिथ्या ॥ ४ ॥

गो० टी०–एषेति । अभिधाने वचसि प्रगल्भस्य धृष्टस्य प्रत्यरिघातिनीति वीप्सायां प्रतिः अरीनरीन् प्रतिघातिनी गदा ॥ ३ ॥ ४ ॥

रा० टी०–नीचस्येति । नीचस्य तव प्राणान् गरुत्मान् गरुडोऽमृतमिव अपहरिष्यामि ॥ ६ ॥

गो० टी०–नीचस्येति । नीचस्य केवलवाचाटकत्वेन क्षुद्रस्य क्षुद्रकीलस्य हीनस्वभावस्य मिथ्याकृत्तस्य असद्वृत्तस्य ॥ ६ ॥

रा० टी०–अद्येति । मद्बाणैर्विदारितस्य अत एव भिन्न-कण्ठस्य तव फेनबुद्बुदभूषितं फेनबुद्बुदाभ्यां शोभितं शोणितं मही पास्यति ॥ ६ ॥

गो० टी०–अद्येति । फेनबुद्बुदाभ्यां भूषितम् अलंकृतम् अनेन नूतनत्वमुक्तम् । विदारितस्य विदारितोदरस्य ॥ ६ ॥

७] ति० टी०–स्रस्तं स्थानादत एव भूमौ न्यस्तं भुज-द्वयं येन सः । गां भुवम् ॥ ७ ॥

रा० टी०–पांस्विति । पांसुरूषितसर्वाङ्गः धूलीव्याप्त-शरीरः स्रस्तं शरीरदेशाच्च्युतम् अत एव न्यस्तं भूमौ संस्था-पितं भुजद्वयं यस्य स त्वं दुर्लभां प्रमदामिव गां पृथ्वीं समा-श्लिष्य स्वप्स्यसे ॥ ७ ॥

गो० टी०–पांसुरूषितेति । रूषितं लिप्तं स्रस्तं यथा तथा भुवि न्यस्तं भुजद्वयं येन गां भूमिं समालिङ्ग्येत्यनेनावाङ्मूल-त्वमुच्यते ॥ ७ ॥

८] ति० टी०–प्रवृद्धनिद्रे प्रवृद्धदीर्घनिद्रे । शरण्याः सुख-वासभूताः । शरण्यानां तपोमहिम्ना सर्वजनशरण्यानाम् ॥ ८ ॥

रा० टी०–प्रवृद्धेति । प्रवृद्धा अतिदैर्घ्यं प्राप्ता निद्रा यस्य तस्मिन् राक्षसपांसने त्वयि शयिते सति इमे दण्डकाः दण्ड-कारण्यं शरण्यानां शरणे हितानां मुनीनां शरण्या भविष्यन्ति॥८॥

गो० टी०–प्रवृद्धेति । प्रवृद्धनिद्रे दीर्घनिद्रे अशरण्यानाम् ऋष्यादीनामगतीनां शरण्याः सुखावासभूताः ॥ ८ ॥

९] ति० टी०–हतस्थाने हतराक्षसवासे ॥ ९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–जनेति । हे राक्षस ! म च्छरैः हतं निकृत्तं स्थानं राक्षससंस्थितिर्यस्मात् तस्मिन् तव जन-स्थाने वने मुनयो विचरिष्यन्ति ॥ ९ ॥

गो० टी०–जनस्थान इति । हतस्थाने हतराक्षसावस्था-नसन्निवेशे ॥ ९ ॥

१०] ति० टी०–विप्रसरिष्यन्ति मद्भयेन जनस्थानात्पला-यिष्यन्तीत्यर्थः ॥ १० ॥

रा० टी०–अद्येति । याः अन्यभयावहाः राक्षस्यः ता अद्य हतबान्धवाः अत एव दीनाः बाष्पार्द्रवदनाः सत्यः भयात् विप्र-सरिष्यन्ति ॥ १० ॥

गो० टी०–अद्येति । पूर्वमन्यभयावहाः राक्षस्यः अद्य मद्भयात् जनस्थानात् विप्रसरिष्यन्ति पलायिष्यन्ते ॥ १० ॥

११] ति० टी०–शोकरसज्ञाः शोकस्थायिकरसज्ञाः । निर-र्थिका निःशेषतो नष्टोऽर्थः कामादिपुरुषार्थो यासां ताः । अनुरू-पकुलास्त्वत्सदृशदुर्वृत्तत्वादिगुणवत्कुलाः । ईदृशः पापकर्मा ॥११॥

रा० टी०–अद्येति । यासां पतिस्त्वमीदृशः स्वदुराचरणेन विध्वस्तस्ता अनुरूपकुलाः दुराचरणेन स्वकुलयोग्या राक्षस्यः निरर्थिकाः सत्यः शोकरसज्ञा भविष्यन्ति ॥ ११ ॥

गो० टी०–अद्य शोकेति । यासां त्वमीदृशः पापी पतिः ताः पत्न्यः अनुरूपकुलाः त्वत्सदृशदुर्वृत्ता इत्यर्थः, इतः पूर्वं शोकानभिज्ञा अपि अद्य शोकरसज्ञाः निरर्थकाः निर्गतकामपु-रुषार्थाः भविष्यन्ति ॥ ११ ॥

१२-१३] ति० टी०–अस्यैव विवरणम्–नृशंसेत्यादि शङ्कितैस्त्वद्भटेभ्यः । यद्यपि भगवत ईदृशेषु क्षुद्रेष्वेवं वादोऽनु-चितः, तथापि निरयस्थमिति स्वोक्तिं सत्यां कर्तुं मरणकाले क्रोधजनकतमोगुणोद्रेकस्य तामसगुणगतिसंपादकस्योद्भवायेति बोध्यम् ॥ १२ ॥ १३ ॥

रा० टी०–नृशंसेति । हे नृशंस ! त्वत्कृते त्वत्कर्मविध्वं-

१ आलिङ्ग्येति गो. पाठः । २ अशरण्यानामिति गो. पाठः । ३ निरर्थका इति गो. पाठः । ४ नीचेति गो. पाठः । ५ यत्कृते इति गो. पाठः । ६ रणे इति गो. पाठः । ७ स्वन इति गो. पाठः । ८ अत्रात्मनेपदं युक्तमिति भाति ।

दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः । वाच्यावाच्यं ततो हि त्वं मृत्योर्वश्यो न बुध्यसे ॥ १४ ॥
कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये । कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥ १५ ॥
एवमुक्त्वा ततो रामं संरुध्य भृकुटिं ततः । स ददर्श महासालमविदूरे निशाचरः ॥ १६ ॥
रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन् । स तमुत्पाटयामास संदष्टदशनच्छदम् ॥ १७ ॥
तं समुत्क्षिप्य बाहुभ्यां विनर्दित्वा महाबलः । राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥ १८ ॥
तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान् । रोषमाहारयत्तीव्रं निहन्तुं समरे खरम् ॥ १९ ॥
जातस्वेदस्ततो रामो रोषरक्तान्तलोचनः । निर्बिभेद सहस्रेण बाणानां समरे खरम् ॥ २० ॥

साय त्वत्प्रयत्ने सति शङ्कितैः मुनिभिः हविरग्नौ पात्यते, एतेन महानपराधो युष्माभिः कृत इति सूचितम् ॥ १२ ॥

रा० टी०–तमिति । एवं संरब्धं वचो ब्रुवाणं राघवं रोषात्खरतरस्वरः खरो निर्भर्त्सयामास ॥ १३ ॥

गो० टी०–ईदृश इत्युक्तं विवृणोति–नृशंसेति । नृशंस घातुक ! नीच वृत्ततो हीन ! क्षुद्रात्मन् क्षुद्रबुद्धे ! ब्राह्मणकण्टक ब्राह्मणशत्रो ! मुनिभिः यत्कृते यन्निमित्तं शङ्कितैः सद्भिः अग्नौ हविः पात्यते हविर्दानसमयेऽपि किमेतदपहरिष्यन्तीति भीता भवन्तीत्यर्थः ॥ १२ ॥ १३ ॥

१४] ति० टी०–ततो हि अवलिप्तत्वादेव । मृत्युवश्योऽपि वाच्यावाच्यं न जानीषे ॥ १४ ॥

रा० टी०–तत्प्रकारमाह–दृढमिति । त्वं दृढमत्यन्तमवलिप्तो गर्ववानसि अत एव भयेषु मरणभीतिषु प्राप्तेषु अपि निर्भयस्तत एव हेतोः मृत्योर्वश्यस्त्वं वाच्यावाच्यं न बुध्यसे ॥१४॥

गो० टी०–दृढमिति । अवलिप्तोऽसि गर्वितोऽसि दृढं निश्चितं ततः कारणात् भयेषु भयकारणेषु सत्स्वपि निर्भयोऽसि वाच्यं चावाच्यं च वाच्यावाच्यम् । " येषां च विरोधः शाश्वतिकः " इति द्वन्द्वैकवद्भावः । तस्मृत्युवश्यः सन् न बुध्यस इति योजना ॥ १४ ॥

१५] ति० टी०–परिक्षेपो बन्धः । निरस्तषडिन्द्रियाः सान्तःकरणचक्षुरादिपञ्चेन्द्रियैर्निरस्ता विनाशितस्वातन्त्र्याः । मृत्युकाले स्कुरितभगवद्रूपः । श्लेषेण स्वाविनयं क्षमापयति ? च–कालेति । अतस्त्वया मदुक्तयः क्षन्तव्या इति व्यङ्ग्यमित्यन्ये तेषां निरयस्थमिति भगवदुक्तेरसंगतिः स्पष्टैव ॥ १५ ॥

रा० टी०–मृत्युवशत्वमेव दृढयन्नाह–कालेति । ये पुरुषाः कालपाशपरिक्षिप्ता भवन्ति ते निरस्तषडिन्द्रियाः सन्तः कार्याकार्यं न जानन्ति । मनसोऽपीन्द्रियत्वमिति मतेन मनसः प्राधान्येन षडिन्द्रियाणां षट्त्वमिति नानुपपत्तिः ॥ १५ ॥

गो० टी०–उक्तमर्थं विशिष्य दर्शयति–कालेति । परिक्षिप्ताः बद्धाः निरस्तषडिन्द्रियाः निरस्तषडिन्द्रियव्यापाराः ॥१५॥

१६] ति० टी०–भृकुटिं संनिरुध्य संनिबध्य ॥ १६ ॥

रा० टी०–एवमिति । राममेवमुक्त्वा भृकुटीं संरुध्य संनिबध्य प्रहरणस्यार्थे प्रहारार्थं सर्वतोऽवलोकयन् पश्यन् स निशाचरः अविदूरे निकटे महासालं वृक्षविशेषं ददर्श । सार्धः श्लोक एकान्वयी ॥ १६ ॥

गो० टी०–एवमिति । भृकुटीं संरुध्य कृत्वेत्यर्थः । प्रहरणस्यार्थे आयुधार्थं सर्वतोऽवलोकयन् सन्नपि दूरे महासालं ददर्शेत्यन्वयः ॥ १६ ॥

१७] ति० टी०–प्रहरणमायुधं तदर्थे सर्वतः प्रसृतमिति शेषः । तादृशसालमवलोकयन्नित्यर्थः । दशनच्छदमधरम्, संदष्टदशनच्छदं यथा भवति तथा ॥ १७ ॥

रा० टी०–स इति । स खरः संदष्टदशनच्छदं यथा भवति तथा तं महाशालमुत्पाटयामास ॥ १७ ॥

गो० टी०–स इति । दशनच्छदम् अधरं संदश्य निपीड्य अनेन सालस्य दुर्ग्रहत्वमुक्तं बाहुभ्यामित्यनेन सालस्थौल्यमुक्तं विनयेत्यादिना जयाशोच्यते ॥ १७ ॥ १८ ॥

१८–१९] ति० टी०–समुत्क्षिप्य भ्रामयित्वा ? हतो मारितः ॥ १८ ॥ १९ ॥

रा० टी०–तमिति । महाबलः खरस्तं महासालं बाहुभ्यामुत्क्षिप्य ऊर्ध्वमुत्थाप्य विनर्दित्वा विनर्द च राममुद्दिश्य चिक्षेप त्वं हत इत्यब्रवीच्च ॥ १८ ॥

रा० टी०–तमिति । आपतन्तं तं समरे संग्रामे बाणौघैः छित्त्वा प्रतापवान् रामः खरं निहन्तुं तीव्रं रोषमाहारयत् ॥१९॥

गो० टी०–तमिति । रोषमिति सर्वसामग्रीविरहेऽप्याहुकूल्यलेशाभावादिति भावः ॥ १९ ॥

२०] ति० टी०–जातस्वेदः रोषादिति शेषः, न तु श्रमादिति । अयं रोषोऽपि भगवतारोपित एव नटवन्न तु वास्तवो बाहुबलस्थिरीकरणायेति बोध्यम् । रक्तवर्णेऽन्तभागेऽपाङ्गभागे लोचने यस्य सः । सहस्रेणानन्तेन ॥ २० ॥

रा० टी०–जात इति । ततस्तीव्ररोषस्वीकारानन्तरं रोषरक्तान्तलोचनः रोषेण रक्तेऽन्तलोचने लोचनान्तभागौ यस्य स जातस्वेदो रामः बाणानां सहस्रेण खरं निर्बिभेद ॥ २० ॥

गो० टी०–जातस्वेद इति । रोषाज्जातस्वेदः नतु श्रमात्, रक्तान्तलोचनः रक्तवर्णापाङ्गः ॥ २० ॥

१ मृत्युवश्य इति गो० पाठः । २ भ्रुकुटीमिति गो० भृकुटीमिति रा० पाठः । ३ संदश्येति गो० पाठः । ४ विनद्य चेति गो० पाठः । ५ रोषादिति गो० पाठः ।

तस्य बाणान्तराद्रक्तं बहु सुस्राव फेनिलम् । गिरेः प्रस्रवणस्येव धाराणां च परिस्रवः ॥ २१ ॥
[2]विकलः स [3]द्रुतो बाणैः खरो रामेण संयुगे । मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद्रुतम् ॥ २२ ॥
तमापतन्तं [4]संक्रुद्धं कृतास्त्रो रुधिरप्लुतम् । अपासर्पद्वि[5]त्रिपदं किंचित्त्वरितविक्रमः ॥ २३ ॥
ततः पावकसंकाशं वधाय समरे शरम् । खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम् ॥ २४ ॥
स तेनैवत्तं मघवता सुरराजेन धीमता । संदधे [6]च स धर्मात्मा मुमोच च खरं प्रति ॥ २५ ॥
स विमुक्तो महाबाणो निर्घातसमनिःस्वनः । रामेण धनुरायम्य खरस्योरसि चापतत् ॥ २६ ॥
स पपात खरो भूमौ दह्यमानः शराग्निना । रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथाऽन्धकः ॥ २७ ॥

२१] ति० टी०-बाणान्तराद्बाणक्षतविवरात्प्रस्रवणस्य प्रस्रवणाख्यस्य परिस्रवः प्रवाहः ॥ २१ ॥

रा० टी०-तस्येति । बाणान्तरात् बाणकृतव्रणान्तरालात् प्रस्रवणस्य तदभिधस्य गिरेः धाराणां परिस्रव इव फेनिलं रक्तं बहु सुस्राव ॥ २१ ॥

गो० टी०-तस्येति । बाणान्तरात् बाणक्षतविवरात् फेनिलं फेनवत् प्रस्रवणस्य प्रस्रवणाख्यस्य परिस्रवः प्रवाहः॥२१॥

२२] ति० टी०-विकलः परवशः कृतः न तु मृत इत्यर्थः। तदेवाह-मत्त इति ॥ २२ ॥

रा० टी०-विकल इति । रामेण बाणैः खरो विकलः कृतः अत एव रुधिरगन्धेन मत्तः स खरस्तं राममेव द्रुतमभ्यद्रवत् ॥ २२ ॥

गो० टी०-विह्वल इति । विह्वलः विक्लवः रुधिरगन्धेनोपलक्षितः ॥ २२ ॥

२३] ति० टी०-आपतन्तं बाणक्षेपावकाशो यथा न भवति तथोपर्यापतन्तं खरं दृष्ट्वाऽत्यासन्नौ धनुर्व्यापारो न स्यादिति स्वशरीरे तद्रुधिरपातभिया च द्वित्रीणि पदानि त्वरितपदन्यासो बाणं संदधदेव पृष्ठतोऽपासर्पत् । अनेन महाबलत्वं खरस्योक्तं नह्यन्यथा रामधनुश्छेदोऽनन्ततद्बाणसहनं वा सुशकम्। अत एवाग्रे तद्वधाय विशिष्य स्वशक्तिरूपवैष्णवबाणग्रहणम् २३॥

रा० टी०-तमिति । कृताक्षः कृतानि छिन्नानि अक्षाणि खरायुधानि येन स त्वरितविक्रमो रामः रुधिराप्लुतं संक्रुद्धमापतन्तं तं खरं प्रतिपदं तत्स्थानं प्रति किंचिदपासर्पत् बाणप्रहारयोग्यान्तरालाभायापासर्पयत् अन्तर्भावितणिजर्थः अन्यथा तच्छब्दार्थस्य कर्मत्वाप्राप्त्या तद्वाचकात् द्वितीयानापत्तेः पञ्चम्यापत्तेश्च दृष्ट्वेत्यस्याध्याहारे तु गौरवम् 'द्वित्रिपदम्' इति भट्टपाठः ॥ २३ ॥

गो० टी०-तमापतन्तमिति । संरब्धं संभ्रान्तं प्रतिपदम् अक्षमोक्षनप्रतिकूलं तं खरं किंचिदपासर्पत् पश्चादागतः तस्मादपासर्पदित्यर्थः । अपसर्पणनिमित्तमाह-कृताक्ष इति । सहितास्त्रत्वात् अक्षमोक्षनावकाशलाभायापासर्पदिति भावः । निमित्तान्तरमाह-रुधिराप्लुतमिति तत्स्पर्शवीभत्सनापसर्पणमित्यर्थः। यद्यपि रणे किंचिदपसर्पणं शरस्यायुक्तं तथापि सर्वतो बलवती अन्यथानुपपत्तिरिति न्यायेनापसर्पणं विना तत्संहारहेत्वलाभादपसर्पणं न दोष इति हृदयम् ॥ २३ ॥

२४] ति० टी०-ब्रह्मदण्डमिव ब्रह्मास्त्रमिवामोघम् ॥२४॥

रा० टी०-तत इति । ततस्तदपासर्पणानन्तरं रामः खरस्य वधाय अपरं ब्रह्मदण्डमिव पावकसंकाशं शरं जग्राह ॥२४॥

गो० टी०-तत इति । ततः बाणपातावसरलाभात् ब्रह्मदण्डं ब्रह्मशापम् ॥ २४ ॥

२५] ति० टी०-मघवता दत्तमगस्त्यद्वारा ॥ २५ ॥

रा० टी०-स इति । स रामः सुरराजेन मघवता दत्तं शरं संदधे स खरं प्रति मुमोच च ॥ २५ ॥

गो० टी०-स तमिति । धीमता भावज्ञेन दत्तम् अगस्त्यमुखेनेति शेषः ॥ २५ ॥

२६] ति० टी०-धनुरायम्य विसृष्टः स खरस्योरस्यपतदित्यन्वयः ॥ २६ ॥

रा० टी०-स इति । धनुरायम्य रामेण विसृष्टः निर्घातसमनिस्वनः महाबाणः खरस्य उरसि अपतत् ॥ २६ ॥

गो० टी०-स विमुक्त इति । रामेण धनुरायम्य आकृष्य विसृष्ट इत्यन्वयः ॥ २६ ॥

२७] ति० टी०-श्वेतारण्ये यथान्धकः । अन्धकासुरः श्वेतारण्ये रुद्रेण हत इति पुराणप्रसिद्धम् । रुद्रेणेवेति इवशब्दो वाक्यालंकारे । 'श्वेतारण्ये यथान्तकः' इति प्रचुरः पाठः तत्र कावेरीतीरवर्तिनि श्वेतारण्ये मार्कण्डेयाचिरजीवित्वायान्तकसंहारो रुद्रेण कृत इति तन्माहात्म्ये प्रसिद्धिः । कौर्मे तृतीयखण्डे श्वेतस्य राजर्षेः परमशैवस्य कालञ्जरे पर्वते तपस्यभिरतस्य मारणायागतस्यान्तकस्य शिवेन वामपादप्रहारेण संहारः कृत इति षट्त्रिंशेऽध्याये उक्तम् ॥ २७ ॥

रा० टी०-स इति । रुद्रेण विनिर्दग्धः श्वेतारण्येऽन्धक इव शराग्निना दह्यमानः खरः भूमौ पपात ॥ २७ ॥

गो० टी०-स इति । स खरः शराग्निना दह्यमानः सन् रुद्रेण रुद्रनेत्राग्निना दग्धोऽन्तक इव श्वेतारण्ये यथा श्वेतारण्य इव भूमौ पपात ॥ २७ ॥

१ तोयधारापरिस्रव इति गो. पाठः । २ विह्वल इति गो. पाठः । ३ संरब्धमिति गो. पाठः । ४ प्रतिपदमिति गो. पाठः । ५ तमिति गो. पाठः । ६ चापीति गो. पाठः । ७ अन्तक इति गो. पाठः ।

स वृत्र इव वज्रेण फेनेन नमुचिर्यथा । बलो वेन्द्राशनिहतो निपपात हतः खरः ॥ २८ ॥
एतस्मिन्नन्तरे देवाश्चारणैः सह संगताः । दुन्दुभींश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः ॥ २९ ॥
रामस्योपरि संहृष्टा ववर्षुर्विस्मितास्तदा । अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ॥ ३० ॥
चतुर्दश सहस्राणि रक्षसां कामरूपिणाम् । खरदूषणमुख्यानां निहतानि महामृधे ॥ ३१ ॥
अहो बत महत्कर्म रामस्य विदितात्मनः । अहो वीर्यमहो दार्ढ्यं विष्णोरिव हि दृश्यते ॥ ३२ ॥
इत्येवमुक्त्वा ते सर्वे ययुर्देवा यथागतम् । ततो राजर्षयः सर्वे संगताः परमर्षयः ॥ ३३ ॥
सभाज्य मुदिता रामं सागस्त्या इदमब्रुवन् । एतदर्थं महातेजा महेन्द्रः पाकशासनः ॥ ३४ ॥
शरभङ्गाश्रमं पुण्यमाजगाम पुरंदरः । आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ॥ ३५ ॥
एषां वधार्थं शत्रूणां रक्षसां पापकर्मणाम् । तदिदं नः कृतं कार्यं त्वया दशरथात्मज ॥ ३६ ॥
स्वधर्मं प्रचरिष्यन्ति दण्डकेषु महर्षयः । एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया ॥ ३७ ॥
गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमे सुखी । ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ॥ ३८ ॥
प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिपूजितः । तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ॥ ३९ ॥
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे । मुदा परमया युक्ता दृष्ट्वा रक्षोगणान्हतान्
रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा ॥ ४० ॥

२८-२९] ति० टी०—वज्रेण वृत्र इव फेनेन तदाच्छादितवज्रेण नमुचिरिव । न शुष्केण नार्द्रेणेति ब्रह्मणा तस्मै वरदानात् । अशनिहतो बलो वा वाशब्द इवार्थे बल इव । एवं च अन्तकादिवधस्य रुद्रेन्द्रातिरिक्तसाध्यत्ववत्खरवधस्य रामातिरिक्तसाध्यत्वं प्रकाशितं कविना ॥ २८ ॥ २९ ॥

रा० टी०—स इति । वज्रेण वृत्र इव फेनेन नमुचिरिव इन्द्राशनिहतो बलो वा इव हतो रामेण निहतः खरो निपपात आर्द्रशुष्काभ्यां तदननाभावस्य ब्रह्मवरेण सिद्धत्वात्फेनेन वध इत्यन्यत्र प्रपञ्चितम् ॥ २८ ॥

गो० टी०—स वृत्र इवेति । सः रामबाणेन हतः खरः अमोघबाणहतत्वज्ञापनाय प्रथमो दृष्टान्तः, लीलया हतत्वज्ञापनाय द्वितीयः, समर्थाधिष्ठितत्वज्ञापनाय तृतीयः, आर्द्राच्छुष्काभावाव्यत्वं नमुचेर्लब्धं तदर्थं फेनेन हतः बलो वेति वाशब्द इवार्थः । [illegible] हतम् ॥ २८ ॥

रा० टी०—एतस्मिन्निति । एतस्मिन् अन्तरे समये चारणैः सह संगताः संमिलिताः संहृष्टाः देवा दुन्दुभीन् अभिनिघ्नन्तः सन्तः रामस्योपरि समन्ततः पुष्पवर्षं ववृषुः । सार्धश्लोक एकान्वयी ॥ २९ ॥

३०-३२] ति० टी०—अर्धाधिकमुहूर्तेन किंचिदूनघटिकात्रयेण ॥ ३०-३२ ॥

रा० टी०—अर्धेति । अर्धाधिकमुहूर्तेन घटीत्रयेण खरदूषणमुख्यानां रक्षसां चतुर्दश सहस्राणि महामृधे रामेण निहतानि ॥ ३० ॥ ३१ ॥

रा० टी०—अहो इति । विदितात्मनो रामस्य आश्चर्यी[illegible] विष्णोः कर्मादित्रयं दृश्यते ॥ ३२ ॥

गो० टी०—रामं स्तुवन्ति—अर्धेत्यादिना । अर्धाधिकमुहूर्तेन घटिकात्रयेण दार्ढ्यं सर्वसंहारचातुर्यम् ॥ ३४-३६ ॥

३३] ति० टी०—राजर्षयो नहुषाद्याः । परमर्षयो भृग्वाद्याः ३३

रा० टी०—इतीति । सर्वे देवा इत्येवमुक्त्वा यथागतं ययुः । ततस्तदमनानन्तरं संगताः सर्वे सागस्त्याः राजर्षयः परमर्षयो ब्रह्मर्षयश्च रामं सभाज्य पूजयित्वा इदमब्रुवन् ॥ ३३ ॥

गो० टी०—तत इति । परमर्षयः सभाज्य संपूज्य ॥ ३९ ॥

३४-३६] ति० टी०—सभाज्य पूजयित्वा । एतदर्थं रक्षसां वधायैतद्देशवासनियोजनार्थम् । क्षणं स्थित्वा रामं प्रस्थाप्य भवद्भिर्बलोकाय प्रस्थातव्यमित्युक्त्वा शरभङ्गं प्रतीन्द्रो गत इत्याशयः ॥ ३४-३६ ॥

रा० टी०—तद्वचनाकारमाह—एतदर्थमिति । महेन्द्रोऽत्यैश्वर्यवान् पुरन्दरः त्रिपुरविदारकः पाकशासन इन्द्रः एतदर्थं स्वत्कर्तृकराक्षसवधप्रार्थनार्थं शरभङ्गाश्रममाजगाम अत एव एषां शत्रूणां रक्षसां वधार्थं महर्षिभिः उपायेन इमं देशं त्वमानीतः ॥ ३४ ॥ ३५ ॥

गो० टी०—एतदर्थमिति । एतदर्थम् एतद्वधाय ॥ ३० ॥

गो० टी० [illegible]—आनीत इति । उपायेन तत्तदाश्रमदर्शनव्याजेन ॥ ३१ ॥ ३२ ॥

रा० टी०—तदिति । तत् अस्माभिरीप्सितमिदं नः कार्यं त्वया कृतम् अतः दण्डकेषु महर्षयः स्वधर्मं प्रचरिष्यन्ति ॥ ३६ ॥

गो० टी०—तस्मिन्नित्यादित्रयमेकान्वयम् ॥ ३३ ॥

३७-४०] ति० टी०—एतस्मिन्नन्तरे देवानाम् ऋषीणां च निर्गममनसमये ॥ ३७-४० ॥

---

१ वज्रपुरिति गो. रा. पाठः । २ भीमकर्मणामिति गो. पाठः । ३ महाहवे इति गो. पाठः । ४ दार्ढ्यमिति गो. पाठः । ५ एतदाद्याश्चत्वारः श्लोका एतस्मिन्नन्तरे देवा इत्यस्मात्पूर्वं गो. पाठे । ६ इदं वचनमिति गो.पाठः । ७ क्रूराणामिति गो. पाठः । ८ सुखं धर्मेति गो. पाठः । ९ आममामिति गो. पाठः ।

ततस्तु तं राक्षससङ्घमर्दनं [1]संपूज्यमानं मुदितैर्महात्मभिः ।
पुनः परिष्वज्य मुदान्विताननां बभूव हृष्टा जनकात्मजा तदा ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०—एतस्मिन्निति । सीतया सह लक्ष्मणः गिरिदुर्गात् विनिष्क्रम्य आश्रमे स्वपर्णशालायां सुखी सन् संविवेश ॥ ३७ ॥

रा० टी०—तत इति । महर्षिभिः पूज्यमानो वीरो विजयी रामः आश्रमं प्रविवेश । ततोऽनन्तरं लक्ष्मणेनाभिपूजितोऽभवदिति शेषः ॥ ३८ ॥

गो० टी०—एतस्मिन्निति । अन्तरे अवसरे गिरिदुर्गात् गिरिदुर्गप्रदेशात् सुखी रामपराक्रमदर्शनजन्यसंतोषवान् ॥ ३७-३८ ॥

रा० टी०—तमिति । महर्षीणां सुखावहं भर्तारं तं रामं दृष्ट्वा हृष्टा बभूव अत एव परिषस्वजे ॥ ३९ ॥

गो० टी०—तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् । बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ चतुर्दशसहस्ररक्षोभिरयमेकाकी किं करिष्यतीत्युद्विग्ना सीता रामेण जिते वीरतारतम्याभिज्ञकुलप्रसूतनया सबहुमानं परिषस्वज इत्याह—तं दृष्ट्वा पूर्वं महासमरे अदृश्यतया स्थितम् इदानीं दृष्ट्वा तं दृष्ट्वा वीरव्रणेन विगलद्रुधिरेण रोमकूपोल्लसद्भिरपि घर्मपयःकणौघैः। कोदण्डदण्डमवलम्ब्य विनीय वर्म किंचित्परिश्रमभृतं प्रियमीक्षमाणा [2]सुखावहं दृष्ट्वा । तं दृष्ट्वा ततोद्धृतिजटामण्डलेन दृढबद्धकक्ष्यतया स्कन्धावलम्बितूणीरेण रणावसाननिर्वापितकोपाग्नितया प्रसन्नवदनेन सीतालक्ष्मणमार्गावलोकनेन पुनरपि किमागमिष्यन्ति राक्षसा इति दत्तावधानेन च लक्षितं दृष्ट्वा पूर्वं वीर इति श्रुतम् इदानीं निर्वर्तितवीरकृत्यं दृष्ट्वा । दर्शनप्रकारमाह—शत्रुहन्तारं हननव्यापारे कर्मभावः शत्रूणां स्वस्य तु कर्तृभाव एव हन्तारं हननव्यापार एव दृष्टः नतु शरसंधानादिव्यापार इत्यर्थः । शत्रुपदेन देवगन्धर्वादिसंघे सत्यपि शत्रूनेव तवानित्युच्यते । दुष्टनिग्रह उक्तः शिष्टपरिपालनमाह—महर्षीणां सुखावहं महर्षीणां तपोलेशेन हन्तुं सामर्थ्येऽपि रक्षकस्वरूपस्य रक्ष्यभूतस्वस्वरूपस्य च हानिर्मा भूदिति केवलं रक्षकव्यापारप्रतीक्षाणां रामप्रतिज्ञामेवावलोकयतां सुखावहम् । यद्वि पश्य शरीराणीत्युक्तदुःखगन्धं निवर्त्य सुखस्यैव प्रापकं बभूव बहुतरशत्रुगणाक्रमणाद्रामस्यैकाकितया च पूर्वं सत्तारहिता सीता संप्रति सत्तां लेभे जगत्प्राणस्य रामस्य सत्तालाभात् स्वयमपि सत्तामवाप । आत्मा वै पुरुषस्य दारा इत्युक्तरीत्या रामसत्तालाभात् स्वस्या अपि सत्ता जातेति भावः । यद्वा भूप्राप्तावित्यस्माद्विदि व्यत्ययेन परस्मैपदम् । भर्तारं विजयिनमालोक्य सरभसं गृहान्तरादागतेत्यर्थः । हृष्टा सति धर्मिणि धर्मा इति न्यायेन धर्मिलाभानन्तरं तद्धर्महर्षोऽभूदित्यर्थः । यद्वा आन्तरप्रीत्यङ्कुरोपमरोमाञ्चश्लिष्टेत्यर्थः । एवं शौर्यावलोकनप्रीतत्वे हेतुमाह—वैदेही मिथिलाधिपतिर्वीर इत्युक्तरीत्या वीरकुलप्रसूतत्वादित्यर्थः । भर्ता परिषस्वजे तादृशनिरवधिकप्रेमभारभरिततया स्वयमोलिलिं भर्तारं लोकभर्तारं सर्वलोकमातृत्वेन सर्वप्रजारक्षणं दृष्ट्वा परिषस्वजे आयुधक्षतव्रणेषु सुखोष्णाभ्यां स्तनाभ्यां पस्पर्श परिषस्वजे पर्याप्तं सस्वजे पश्चात् पुरस्तात् पार्श्वतः पस्पर्शेत्यर्थः । यद्यपि रणे अपलायमानस्य पृष्ठे शरपातप्रसङ्ग एव नास्ति तथापि सर्वतः समाहृत्य आयुधप्रक्षेपात् पृष्ठतोऽपि व्रणसंभवः बाणानां सम्यक् क्षिप्तानां पृष्ठतो निर्गमोऽपि संभवति महर्षीणां सुखावहं परिषस्वजे पुत्रविषये स्वभर्तृपक्षपरकरणे पुत्रवात्सल्यात् भर्तरि संतुष्टा भार्येव ऋषिजनसंरक्षणे प्रीता परिषस्वजे । रामं विना गुहागता सीता ततो निर्गत्य निरस्तसमस्तशत्रुं रामं परिषस्वज इत्यनेन हृदयगुहागतजीवः परतन्त्रः आचार्यसुखेन परमशेषिणं दृष्ट्वा तेन सकलविरोधिवर्गे निवर्तिते ततो निर्गत्य नित्यसन्निहितपरिषदार्सशेषिणमासाद्य तद्भोगपरिवाहमग्नबभूवेति ध्वन्यते ॥ ३९ ॥

रा० टी०—मुदेति । जनकात्मजा वैदेही रक्षोगणान् हतान् दृष्ट्वा अव्ययं चित्तविकाररहितं रामं च दृष्ट्वा तुतोष॥४०॥

गो० टी०—उक्तमेवार्थं विशदं दर्शयति द्वाभ्याम्—मुदेत्यादि ॥ ४० ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

४१] ति० टी०—हर्षातिशयात्पुनरालिङ्गनम् । इदं शरीरं प्रायः शिशिरार्थे ॥ ४१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०—उपसंहरन्नाह—तत इति । राक्षससङ्घमर्दनं अत एव महात्मभिः पूज्यमानं तं रामं मुदान्विताननां जनकात्मजा पुनः परिष्वज्य दृष्ट्वा अतिसंतुष्टा बभूव ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रिंशः सर्गः ॥ ३० ॥

---

१ सत्कार्यमाणमिति गो. पाठः । २ शशिप्रभाननेति गो. पाठः । ३ अत्रात्मनेपदमयुक्तमिति भाति ।

एकत्रिंशः सर्गः ।

अकम्पननामा रात्रिंचरो लङ्कामेत्य रामकृतराक्षसक्षपणं रावणं कथयति । ततो रामवधं प्रतिज्ञाय प्रस्थितं च दशमुखं रामपराक्रमं वर्णयन्सीताहरण तद्वधोपायत्वेन सूचयति । गृहीततच्छ्रुती रावणो मारीचाश्रम प्राप्तस्तं सीताहरणे साहाय्यं याचते । स तु रामप्रभाव प्रस्तावयन् तदजय्यत्व निश्चिन्वानो दशग्रीवं लङ्कां प्रति निवर्तयति ।

त्वरमाणस्ततो गत्वा जनस्थानादकम्पनः । प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ १ ॥
जनस्थानस्थिता राजन्राक्षसा बहवो हताः । खरश्च निहतः संख्ये कथंचिदहमागतः ॥ २ ॥
एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः । अकम्पनमुवाचेदं निर्दहन्निव तेजसा ॥ ३ ॥
[1]तेन भीमं जनस्थानं हतं मम परासुना । को हि सर्वेषु लोकेषु गतिं [2]नाधिगमिष्यति ॥ ४ ॥
न हि मे विप्रियं कृत्वा शक्यं मघवता सुखम् । प्राप्तुं वैश्रवणेनापि न यमेन [3]च विष्णुना ॥ ५ ॥
कालस्य चाप्यहं कालो दहेयमपि पावकम् । मृत्युं मरणधर्मेण [illegible] ॥ ६ ॥

१] ति० टी०–त्वरमाण इति । खरसङ्गामात्पलायितः शूर्पणखागमनात्पूर्वमेव लङ्कां प्रविश्येत्यर्थः । संपूर्ण दण्डकारण्यं जनस्थानपदवाच्यम् अतो गोदावरीतीराद्गतोऽपि जनस्थानाद्गत इत्युक्तः ॥ १ ॥

रा० टी०–ससैन्यसामात्यखरविध्वंसानन्तरकालिकं वृत्तान्तमाह–त्वरमाण इत्यादिभिः । अकम्पनः खरवधेन पलायितोऽकम्पनाभिधराक्षसस्त्वरमाणः सन् जनस्थानात् लङ्कां गत्वा वेगेन प्रविश्य च रावणमब्रवीत् ॥ १ ॥

गो० टी०–एवं शरणागतिमन्त्रविवरणरूपे श्रीरामायणे इयता ग्रन्थसंदर्भेण उत्तरखण्डार्थो विवृतः अद्यतनदशायां हि प्रथमखण्डार्थस्य प्राथम्यं व्युत्पत्तिदशायां तत्प्रकाशनेन फलानुसारेणोपायप्रवृत्तेः अतो द्वितीयखण्डार्थः प्रथमं विवृतः । तत्र बालकाण्डे प्रथमपदार्थभूतपुरुषकारयोगो दर्शितः । अयोध्याकाण्डे द्वितीयपदार्थभूतसौलभ्यादिगुणयोगः । आरण्यकाण्डे शूर्पणखागमनात् पूर्वभाविवृत्तान्तेन चतुर्थ्यर्थभूता किंकरतत्तिरुक्ता । ततः खरवधान्तवृत्तान्तेन चरमपदार्थभूता विरोधिनिवृत्तिरिति । अथ पूर्वखण्डार्थ उच्यते शास्त्रशेषेण । तत्र आरण्यकाण्डशेषेण विभीषणस्य पुरुषकारत्वमिष्यते, किष्किन्धाकाण्डेन नारायणपदार्थभूतं वात्सल्यं, सुन्दरकाण्डेन चरणशब्दोक्तदिव्यमङ्गलविग्रहवैशिष्ट्यं, रामः कमलपत्राक्ष इत्यादिना तथोक्तेः । युद्धकाण्डे शरणागतिः, उत्तरकाण्डे प्रपन्नचर्येति बोध्यम् । एवमानुषङ्किकसुनिजनशरणागतिफलं देवशरणागतिकार्यरावणवधाङ्गत्वेनोक्त्वा अथ तन्निमित्तभूतसीतापहाररूपबीजसञ्जातपक्षिपति–त्वरमाण इत्यादिना । संहृत्य सकलं लोकं पुनः सृष्टु च यः क्षमः तमहं शिरसा वन्द् जानकीप्राणनायकम् ॥ त्वरमाणः शूर्पणखागमनापेक्षयेति शेषः । अकम्पनो रावणचारः त्वरमाणो गत्वा वेगेनाब्रवीदित्यन्वयः ॥ १ ॥

२–३] ति० टी०–खरश्चेति । येन दूषणत्रिशिरसोः संग्रहः । कथंचिदहमागतः केवलं प्रेक्षकतया स्थितत्वाद्रामबाणाविषयीकृततयेत्याशयः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–जनस्थानेति । हे राजन् ! जनस्थानस्थिताः त्वया संस्थापिता बहवो राक्षसाः संख्ये संग्रामे हताः खरश्च चकारेणोपलक्षणतया वा दूषणश्च निहतः ॥ २ ॥

गो० टी०–जनस्थानेति । कथंचिदिति जीवेच्छारणेनेति भावः । अत एव शूर्पणखा वक्ष्यति ' एका कथंचिन्मुक्ताहं परिभूय महात्मना । जीवद्भिः शङ्कमानेन राघवेण महात्मना ' इति ॥ २ ॥

रा० टी०–एवमिति । एवमुक्तः अत एव क्रुद्धः अत एव संरक्तलोचनः दशग्रीवो रावणः तेजसा दहन्निव त्रिलोकीमिति शेषः, अकम्पनमब्रवीच्च ॥ ३ ॥

गो० टी०–एवमिति । क्रुद्धत्वं नारोपितमिति ज्ञापयितुं संरक्तलोचन इत्युक्तं कोपातिरेकं दृष्टान्तमुखेनाह–निर्दहन्निवेति ॥ ३ ॥

४–६] ति० टी०–भीमं सर्वलोकभयदं जनस्थानम् । परासुनेति क्रोधान्मूर्छणेत्यर्थं प्रयुक्तम् । गतिं स्थितिम् ॥ ४–६ ॥

रा० टी०–तद्वचनाकारमाह–केनेति । केन परासुना परागतप्राणेन किंच परवशप्राणेन किंचोत्कृष्टप्राणवता अतिदृष्टेनेत्यर्थः, भीमं जनस्थानं हतम् अत एव सर्वेषु लोकेषु गतिं स्थितिं को नाधिगमिष्यति प्राप्स्यति जनस्थानध्वंसिनो मृतिरवश्यं भविष्यतीत्यर्थः ॥ ४ ॥

रा० टी०–तत्र हेतुमाह–न हीति । मे विप्रियं कृत्वा इन्द्रादिनापि सुखं प्राप्तुं न शक्यम् ॥ ५ ॥

गो० टी०–केनेति । परागताः असवः प्राणाः यस्य तेन परासुनेति पुरुषभाषणमात्रम् । गम्यत इति गतिः स्थानम् ॥ ४ ॥ ५ ॥

रा० टी०–तत्रापि हेतुमाह–कालस्येति । कालस्यापि

१ केन रम्यमिति गो. पाठः । २ चेति गो. पाठः । ३ नेति गो. रा. पाठः ।

वातस्य तरसा वेगं निहन्तुमपि चोत्सहे । दहेयमपि संक्रुद्धस्तेजसाऽऽदित्यपावकौ ॥ ७ ॥
तथा क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः । भयात्संदिग्धया वाचा रावणं याचतेऽभयम् ॥ ८ ॥
दशग्रीवोऽभयं तस्मै प्रददौ रक्षसां वरः । स विस्रब्धोऽब्रवीद्वाक्यमसंदिग्धमकम्पनः ॥ ९ ॥
पुत्रो दशरथस्यास्ते सिंहसंहननो युवा । रामो नाम महास्कन्धो वृत्तायतमहाभुजः ॥ १० ॥
श्यामः पृथुयशाः श्रीमानतुल्यबलविक्रमः । हतस्तेन जनस्थाने खरश्च सहदूषणः ॥ ११ ॥
अकम्पनवचः श्रुत्वा रावणो राक्षसाधिपः । नागेन्द्र इव निःश्वस्य इदं वचनमब्रवीत् ॥ १२ ॥
स सुरेन्द्रेण संयुक्तो रामः सर्वामरैः सह । उपयातो जनस्थानं ब्रूहि कच्चिदकम्पन ॥ १३ ॥
रावणस्य पुनर्वाक्यं निशम्य तदकम्पनः । आचचक्षे बलं तस्य विक्रमं च महात्मनः ॥ १४ ॥
रामो नाम महातेजाः श्रेष्ठः सर्वधनुष्मताम् । दिव्यास्त्रगुणसंपन्नः परं धर्मं गतो युधि ॥ १५ ॥
तस्यानुरूपो बलवान्रक्ताक्षो दुन्दुभिस्वनः । कनीयाँल्लक्ष्मणो भ्राता राकाशशिनिभाननः ॥ १६ ॥

अहं कालो नियन्ता अत एव पावकमपि दहेयं मृत्युमपि मरणधर्मेण संयोजयितुमुत्सहे ॥ ६ ॥

गो० टी०–कालस्य चापीति । कालस्यापि काल इत्यत्रोपपत्तिमाह–मृत्युमिति ॥ ६ ॥

७] ति० टी०–निहन्तुं भङ्क्तुम् । आदित्यपावकौ उभावपि युगपदिति शेषः ॥ ७ ॥

रा० टी०–वातस्येति । तरसा स्ववेगेन वातस्य वेगं निहन्तुमुत्सहे संकुद्धोऽहम् आदित्यपावकौ दहेयम् ॥ ७ ॥

गो० टी०–दहेयमिति । आदित्यपावकौ परस्परसाहाय्येन संयुक्तावपीत्यर्थः, अतो न पुनरुक्तिः ॥ ७ ॥

८–९] ति० टी०–संदिग्धया संदिग्धाक्षरया । अभयमिति छेदः ॥ ८ ॥ ९ ॥

रा० टी०–तथेति । तथा तेन प्रकारेण क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः भयाद् रावणहेतुकभीतेर्हेतोः संदिग्धया शोभनमशोभनं वैतदितिसंदेहास्पदया वाचा अभयं दृढतरज्ञानाभावाद् संशयास्पदीभूतमदुक्तिहेतुको दण्डो भवता न कार्य इति भयाभावं रावणं याचते द्विकर्मकोऽयम् ॥ ८ ॥

रा० टी०–दशग्रीव इति । रक्षसां वरो दशग्रीवः तस्मै अकम्पनाय अभयं प्रददौ । विस्रब्धः अभयविषयकप्राप्तविश्वासोऽकम्पनः असंदिग्धं संदेहरहितं वाक्यमब्रवीत् ॥ ९ ॥

गो० टी०–तथेति । संदिग्धया संदिग्धाक्षरया याचते अयाचत अभयमिति छेदः ॥ ८–११ ॥

१०] ति० टी०–'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इति कोशः ॥ १० ॥

११] ति० टी०–अतुल्यं केनापि तुलानर्हं बलं विक्रमश्च यस्य सः । स दूषणः खरश्च हत इत्यन्वयः ॥ ११ ॥

रा० टी०–तद्वचनाकारमा –पुत्र इत्यादिभिः । सिंहसंहननः सिंहसदृशः सुन्दरावयवः महास्कन्धः पूज्यमानस्कन्धविशिष्टः वृत्तायतमहाभुजः वृत्तौ वर्तुलौ आयतौ दीर्घौ महाभुजौ यस्य सः पृथुयशाः महायशस्कः अतुल्यौ तोलयितुमशक्यो बलविक्रमौ यस्य सः युवा रामो नाम दशरथस्य पुत्र आस्ते तेन सह दूषणः खरः जनस्थाने हतः । श्लोकद्वयमेकान्वयि 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः ॥१०॥११॥

१२] ति० टी०–नागेन्द्रः सर्पश्रेष्ठः ॥ १२ ॥

रा० टी०–अकम्पनेति । अकम्पनवचः श्रुत्वा रावणः नागेन्द्र इव निःश्वस्य इदं वचनमब्रवीत् ॥ १२ ॥

गो० टी०–अकम्पनवच इति । नागेन्द्रः सर्पेन्द्रः ॥१२॥

१३–१४] ति० टी०–स रामः सर्वामरसहितेन्द्रेण जनस्थानं कच्चिदुपागत इत्यन्वयः ॥ १३ ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–स इति । सर्वामरैः सुरेन्द्रेण च सह स रामः जनस्थानमुपयातः कच्चित् हे अकम्पन ! ब्रूहि तत्त्वं वद, एतेन राममात्रकर्तृकखरादिवधस्यासंभवः सूचितः॥१३॥

रा० टी०–रावणस्येति । अकम्पनः तत् रावणस्य वाक्यं श्रुत्वा तस्य रामस्य बलं विक्रमं च आचचक्षे ॥ १४ ॥

गो० टी०–स सुरेन्द्रेणेति । स रामः [illegible] युक्तः सन् जनस्थानमुपयातः कच्चित् अन्यथा तस्यैतादृशसामर्थ्यं न युज्यत इति भावः ॥ १३ ॥ १४॥

१५] ति० टी०–परं धर्ममतिशयितं शौर्यम् ॥ १५ ॥

रा० टी०–तद्वचनाकारमाह–राम इत्यादिभिः । दिव्यास्त्रगुणसंपन्नो रामः युधि परममत्युत्कृष्टमन्यत्रादृष्टमित्यर्थः, धर्मं शौर्यं गतः प्राप्तः ॥ १५ ॥

गो० टी०–इन्द्रादिसहायानपेक्षो राम इत्याशयेनाह–रामो नामेत्यादिना । दिव्यास्त्रगुणसंपन्नः दिव्यास्त्रकृतातिशययुक्तः ॥ १५ ॥

१६] ति० टी०–राकाशशिनिभानन इति । राका पूर्णिमा । 'पूर्णे राका निशाकरे' इत्यमरः । पूर्णनिशाकरवदन इत्यर्थः ॥ १६ ॥

---

१ पतत्पूर्वार्द्धं व्यत्यस्तं गो. पाठे । २ अहमुत्सहे इति गो. रा. पाठः । ३ वृषस्कन्ध इति गो. पाठः । ४ वीर इति गो. पाठः । ५ हतं तेन जनस्थानमिति गो. पाठः । ६ पुरंदरसम इति गो. पाठः । ७ नाम भ्रातेति गो. पाठः ।

स तेन सह संयुक्तः पावकेनानिलो यथा । श्रीमान्राजवरस्तेन जनस्थानं निपातितम् ॥ १७ ॥
नैव देवा महात्मानो नात्र कार्या विचारणा । शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ॥ १८ ॥
सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान् । येन येन च गच्छन्ति राक्षसा भयकर्षिताः ॥ १९ ॥
तेन तेन स्म पश्यन्ति राममेवाग्रतः स्थितम् । इत्थं विनाशितं तेन जनस्थानं तवानघ ॥ २० ॥
अकम्पनवचः श्रुत्वा रावणो वाक्यमब्रवीत् । गमिष्यामि जनस्थानं रामं हन्तुं सलक्ष्मणम् ॥ २१ ॥
अथैवमुक्ते वचने प्रोवाचेदमकम्पनः । शृणु राजन्यथावृत्तं रामस्य बलपौरुषम् ॥ २२ ॥
असाध्यः कुपितो रामो विक्रमेण महायशाः । आपगायास्तु पूर्णाया वेगं परिहरेच्छरैः ॥ २३ ॥
सेताराग्रहनक्षत्रं नभश्चाप्यवसादयेत् । असौ रामस्तु सीदन्तीं श्रीमानभ्युद्धरेन्महीम् ॥ २४ ॥
भित्त्वा वेलां समुद्रस्य लोकानाप्लावयेद्विभुः । वेगं वापि समुद्रस्य वायुं वा विधमेच्छरैः ॥ २५ ॥

रा० टी०–तस्येति । तस्य रामस्यानुरूपः रक्ताक्षः दुन्दुभिस्वनः राकाशशिनिभाननः पूर्णिमाचन्द्रसदृशाननवान् कनीयान् लक्ष्मणो भ्राताऽस्तीति शेषः ॥ १६ ॥

गो० टी०–तस्येति । रक्ताक्षः रक्तरेखाञ्चितनयनः दुन्दुभिस्वनः दुन्दुभिवत् गम्भीरस्वनसंयुक्त इति वर्तत इति शेषः ॥ १६ ॥ १७ ॥

१७] ति० टी०–राजवरः राजराज इति यावत् ॥ १७ ॥

रा० टी०–स इति । संयुक्तोऽतिविचारवान् राजवरः स रामः तेन भ्रात्रा सह पावकेनानिल इवाऽस्तीति शेषः, तेन रामेण जनस्थानं निपातितम् ॥ १७ ॥

१८] ति० टी०–महात्मानो देवाः । नैवागता इति शेषः । रामेण तु न तु लक्ष्मणेनापीत्यर्थः ॥ १८ ॥

रा० टी०–नेति । महात्मानः देवाः तत्र नागता इति शेषः, अत्रास्मिन् विषये विचारणा विचारो न कार्या । अर्थं पृथक् । नन्वेकेन रामेण कथं ते राक्षसा हता इत्यत आह–शरा इति । रुक्मपुङ्खाः सुवर्णनिर्मितपुङ्खविशिष्टाः पतत्रिणः कङ्कपक्षविशिष्टाः रामेणोत्सृष्टाः शराः बाणाः पञ्चाननाः पञ्चमुखाः सर्पाः भूत्वा राक्षसान् भक्षयन्ति स्म ॥ १८ ॥

गो० टी०–नैव देवा इति । साहाय्यार्थमागता इति शेषः १८

१९–२१] ति० टी०–भयात्पलायनाय येन मार्गेण गच्छन्ति राक्षसास्तेन तेन मार्गेणागत्याग्रतः स्थितमेव रामं पश्यन्ति । अनेनाग्रन्ताकारताप्रदर्शनेन रामस्यापरिच्छिन्नशक्तित्वं च सूचितम् ॥ १९–२१ ॥

रा० टी०–येनेति । भयकर्षिताः रामबाणभयपीडिताः राक्षसाः येन येन मार्गेण गच्छन्ति तेन तेन मार्गेणाग्रतः स्थितं राममेव पश्यन्ति स्म इत्थमनेन प्रकारेण तव जनस्थानं तेन रामेण विनाशितम् ॥ १९ ॥ २० ॥

रा० टी०–अकम्पनेति । रावणः अकम्पनवचः श्रुत्वा सलक्ष्मणं रामं हन्तुं जनस्थानमहं गमिष्यामीति वाक्यमब्रवीत् ॥ २१ ॥

गो० टी०–शरा इति । पञ्चाननाः विस्तृताननाः भूत्वा भक्षयन्ति स्मेत्युत्प्रेक्षा ॥ १९ ॥

गो० टी०–येन येनेति । राक्षसाः भयकर्षिताः भयपीडिताः सन्तो येन येन मार्गेण गच्छन्ति तेन तेन मार्गेणाग्रतः स्थितं राममेव पश्यन्ति स्म । अत्र विशेषणसामर्थ्यादामदर्शनं भयकृतमिति व्यज्यते ॥ २० ॥ २१ ॥

२२] ति० टी०–बलं पराभिभवसामर्थ्यम् । पौरुषं महापुरुषकर्म । वृत्तं चरितम् । यथा यादृशं तत्सर्वं शृण्वित्यर्थः २२

रा० टी०–अथेति । एवमनेन प्रकारेण वचने उक्ते सति अकम्पनः इदं प्रोवाच । तद्वचनाकारमाह–राजन् हे रावण ! रामस्य बलपौरुषं यथावृत्तं वृत्तमनतिक्रम्य शृणु ॥ २२ ॥

गो० टी०–अथेति । यथावृत्तं परमार्थभूतमित्यर्थः ॥ २२ ॥

२३] ति० टी०–कुपितः कुपितोऽन्तक इव संहारे प्रवृत्तो रामः पराक्रमेण ततो निवर्तयितुमसाध्यः । ब्रह्मादिभिरपीति शेषः, परिहरेत्परावर्तयेत्, अनेन कृष्णबलभद्रावतारस्यापि सूचनम् ॥ २३ ॥

रा० टी०–असाध्य इति । महायशाः विक्रमेण कस्यचित्पौरुषेणासाध्यः नियमितुमशक्यः कुपितो रामः पूर्णायाः आपगायाः नद्याः वेगं शरैः परिहरेत् यथेच्छं वाहयेदित्यर्थः ॥ २३ ॥

गो० टी०–असाध्य इति । असाध्यः अनिवार्यः ॥ २३ ॥

२४] ति० टी०–नभोऽप्यवसादयेत्तारारहितं कुर्यात्, त्रिविक्रमावतार इव । महीमभ्युद्धरेत्, यज्ञवराह इव । शक्त्यर्थे एते लिङः ॥ २४ ॥

रा० टी०–सेति । असौ रामः सताराग्रहनक्षत्रं नभः अवसादयेत् यथेच्छं पीडयेत् सीदन्तीं महीं तु उद्धरेत् दुःखनिवर्तनेनेत्यर्थः ॥ २४ ॥

गो० टी०–सतारेति । ग्रहा नव ग्रहाः नक्षत्राणि सप्तविंशतिनक्षत्राणि तारास्तदन्यज्योतींषि अवसादयेत् विशीर्णं कुर्यात् मज्जन्तीं समुद्र इति शेषः ॥ २४ ॥

२५] ति० टी०–वेलां मर्यादामाप्लावयेत् प्रलयकाल इव ।

१ सतारमहेति गो. पाठः । २ मज्जन्तीमिति गो. पाठः ।

संहृत्य वा पुनर्लोकान्विक्रमेण महायशाः । शक्तः [1]श्रेष्ठः स पुरुषः स्रष्टुं पुनरपि प्रजाः ॥ २६ ॥
नहि रामो दशग्रीव शक्यो जेतुं [2]रणे त्वया । रक्षसां वापि लोकेन [3]सर्वगः पापजन्मभिरिव ॥ २७ ॥
न तं वध्यमहं मन्ये [4]सर्वैर्देवासुरैरपि । अयं तस्य वधोपायस्तन्ममैकमनाः शृणु ॥ २८ ॥
भार्या तस्योत्तमा लोके सीता नाम [5]सुमध्यमा । श्यामा समविभक्ताङ्गी स्त्रीरत्नं रत्नभूषिता ॥ २९ ॥
नैव देवी न गन्धर्वी नाप्सरा [6]न च पन्नगी । तुल्या सीमन्तिनी [7]तस्य मानुषी तु कुतो भवेत् ॥ ३० ॥
तस्यापहर भार्यां त्वं तं प्रमथ्य महावने । सीतया रहितो [8]रामो न चैव हि भविष्यति ॥ ३१ ॥
अरोचयत तद्वाक्यं रावणो राक्षसाधिपः । चिन्तयित्वा महाबाहुरकम्पनमुवाच ह ॥ ३२ ॥
बाढं [9]कल्यं गमिष्यामि [10]एकः सारथिना सह । आनेष्यामि च वैदेहीमिमां हृष्टो महापुरीम् ॥ ३३ ॥
[11]तदेवमुक्त्वा प्रययौ खरयुक्तेन रावणः । रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन् ॥ ३४ ॥

समुद्रस्य वेगं विधमेत् । समुद्रे सेतुबन्धनसामर्थ्यं दर्शितम् । वायुमित्युपलक्षणं भूतपञ्चकस्य ॥ २५ ॥

रा० टी०–भित्त्वेति । विभुः समर्थो रामः समुद्रस्य वेलां मर्यादां भित्त्वा लोकानाप्लावयेत् समुद्रस्य वेगं वायुं च शरैः विधमेत् दहेन्नाशयेदित्यर्थः ॥ २५ ॥

गो० टी०–भित्त्वेति । विप्लावयेत् सिञ्चेत् विधमेत् दहेत् ध्माशब्दाग्निसंयोगयोरिति धातोर्लिङि धमादेशः ॥ २५ ॥

२६] ति० टी०–संहृत्य पुनः स्रष्टुं शक्तः । अत्र पुनरपिशब्दाभ्यां सर्वसृष्टिसंहाराणां तदधीनत्वमुक्तम् । अनेन जगत्स्थितिसंहारकर्तृत्वमस्य व्युत्पाद्यम् । अकम्पनस्यापि भगवत्प्रसादादेवं ज्ञानम् ॥ २६ ॥

रा० टी०–संहृत्येति । महायशाः रामः विक्रमेण स्वपराक्रमेण लोकान् संहृत्य विनाश्य प्रजापतिरिव पुनः स्रष्टुं शक्तः समर्थः ॥ २६ ॥

गो० टी०–संहृत्येति । लोकान् भूरादीन् संहृत्य पुनः स्रष्टुं शक्तः इमाः प्रजाश्च संहृत्य पुनः स्रष्टुं शक्त इत्यर्थः ॥ २६ ॥

२७] ति० टी०–लोकेन समूहेन सहितेनापीति शेषः ॥ २७ ॥

रा० टी०–न हीति । हे दशग्रीव ! रक्षसां लोकेन समूहेन विशिष्टेनापि त्वया रामो जेतुं स्वाधीनीकर्तुं न शक्यः । तत्र दृष्टान्तः पापजनैः पापिजन्तुभिः स्वर्ग इव ॥ २७ ॥

गो० टी०–न हीति । लोकेन समूहेन ॥ २७ ॥

२८] ति० टी०–अपिना त्वयापि । एतेनेन्द्रजिन्निर्जितेन्द्रादिसाहाय्येऽपि तस्य जयोऽस्करः इति ध्वनितम् । ममेति मुखादिति शेषः ॥ २८ ॥

रा० टी०–न केवलं तव एवाजेयः किंतु सर्वेषामित्याह–नेति । सर्वैर्देवासुरैरपि तं रामं वध्यमहं न मन्ये तत्तस्मादेतोः योऽयं तस्य वधोपायस्तं मम मत्तः एकमनाः सन् शृणु ॥ २८ ॥

गो० टी०–न तमिति । मम मत्तः एकमनाः सावधानः २८

२९] ति० टी०–श्यामा यौवनमध्यस्था ॥ २९ ॥

रा० टी०–उपायमेवाह–भार्येति । सुमध्यमा शोभनकटिविशिष्टा श्यामा षोडशवार्षिकी समविभक्ताङ्गी समानि न्यूनाधिकरहितानि विभक्तानि असंश्लिष्टानि अङ्गानि करचरणादीनि यस्याः सा रत्नभूषिता लोके सर्वभुवने उत्तमा उद्गतः तमः आकाङ्क्षा यस्या रामातिरिक्तसर्वाकाङ्क्षारहिता स्त्रीरत्नं सर्वस्त्रीश्रेष्ठा सीता नाम भार्या अस्तीति शेषः, अत एव देव्यादिसीमन्तिनी स्त्री तस्या तुल्या न इति मानुषी मनुष्यस्त्री तुल्या कथं भवेत् । श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०–भार्येति । 'श्यामा यौवनमध्यस्था' इत्युत्पलः । समं यथा तथा विभक्तानि नेत्रकर्णाद्यङ्गानि यस्याः सा तथोक्ता स्त्रीरत्नं स्त्रीश्रेष्ठा अस्तीति शेषः ॥ २९ ॥

३० । ति० टी०–कुतो भवेत् तुल्येति शेषः ॥ ३० ॥

गो० टी०–नैवेति । देवी देवस्त्री "पुंयोगादाख्यायाम्" इति ङीष् एवमुत्तरत्रापि । अप्सराःशब्द एकवचनान्तोप्यऽस्ति । सीमन्तिनी स्त्री ॥ ३० ॥

३१] ति० टी०–तं रामं प्रमथ्य केनाप्युपायेनोच्चाट्येतीति यावत् । तस्य भार्यामपहर बलात्कारेण हर ॥ ३१ ॥

रा० टी०–तस्येति । तं रामं प्रमथ्य कथंचिदनवधानीकृत्य तस्य रामस्य भार्यां त्वमपहर । नन्वु तदपहरणेन किमित्यत आह–सीतया रहितो रामो नैव भविष्यति न जीवितेत्यर्थः ॥ ३१ ॥

गो० टी०–तस्येति । महावने प्रमथ्य विलोड्य येन केनाप्युपायेन रामं वञ्चयेत्यर्थः ॥ ३१ ॥

३२] ति० टी०–अरोचयतेष्टत्वेन ज्ञातवान् चिन्तयित्वा रामस्य सीतया सहानवस्थानोपायम् ॥ ३२ ॥

रा० टी०–अरोचयतेति । महाबाहुः रावणः चिन्तयित्वा तद्वधोपायं विचार्य तद्वाक्यम् अरोचयत स्वीचकार अत एव अकम्पनमुवाच । ह हेतौ ॥ ३२ ॥

गो० टी०–अरोचयतेति । चिन्तयित्वा रामोच्चाटनोपायमिति शेषः ॥ ३२ ॥

३३–३४] ति० टी०–कल्यं प्रातः मान्तमव्ययम् । इष्ट इति अकम्पनवाक्यं श्रुत्वा त्रेताग्नौ श्रीरामोऽवतरिष्य-

---

१ स पुरुषव्याघ्र इति गो. पाठः । २ त्वया युधीति गो. पाठः । ३ नापि दानवीति गो. पाठः । ४ तस्या मानुषीमिति गो. पाठः । ५ कामो रामो हास्यति जीवितमिति गो. पाठः । ६ कल्यमिति गो. पाठः । ७ श्लोक इति गो. पाठः । ८ आनयिष्यामीति गो. पाठः । ९ अथैवमिति गो. पाठः ।

स रथो राक्षसेन्द्रस्य नक्षत्रपथगो महान् । चन्क्रूर्यमाणः शुशुभे जलदे चन्द्रमा इव ॥ ३५ ॥
स दूरे चाश्रमं गत्वा ताटकेयमुपागमत् । मारीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः ॥ ३६ ॥
तं स्वयं पूजयित्वा तु आसनेनोदकेन च । अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ३७ ॥
कच्चित्सुकुशलं राजल्लोकानां राक्षसाधिप । आशङ्के नाधिजाने त्वं यतस्तूर्णमुपागतः ॥ ३८ ॥
एवमुक्तो महातेजा मारीचेन स रावणः । ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ३९ ॥

तीति सनत्कुमारवाक्यस्मरणाद्धृष्टः । तदेतदुत्तररामायणं स्पष्टम् । तत्र हि सनत्कुमारं प्रति विष्णुहस्तमृतानां का गतिरिति रावणेन पृष्टे तेन हतानां सल्लोकप्राप्तिरिति सनत्कुमारवचः श्रुत्वा 'एवं श्रुत्वा महाबाहू राक्षसेन्द्रः प्रतापवान् । त्वया सह विरोधेऽप्यचिन्तयामास राघव ॥ एतदर्थं महाबाहो रावणेन दुरात्मना । हृता जनकराजस्य हृता रामं महावने ॥' इत्युक्तमिति तीर्थः । उत्तमश्लोकाभो भविष्यतीति हृष्ट इत्यर्थ उचितः । श्रुतस्यापि तस्यार्थस्य नामसत्त्वेन विस्मरणात् । ते पथे तु न यथाश्रुतार्थे वक्ष्यमाणविष्णुपुराणविरोधात् । किं तु श्रीरामस्य स्वमृत्योरवतारं श्रुत्वा त्वया सह मृत्युविघातकविरोधेच्छुस्तां हृतवान् । तद्वियोगे तव मरणमित्याशयेनेति तयोरर्थ इत्यन्ये । वस्तुतस्त्वेतेषां श्लोकानां तद्वतां सर्गाणां च प्रक्षिप्तत्वान्न ते प्रमाणभूताः । अत एव ते सर्गाः कतकादिभिस्तीर्थैन च न व्याख्याताः । एतेन 'एतदर्थं महाबाहो रावणेन दुरात्मना । विज्ञायापहृता सीता त्वत्तो मरणकाङ्क्षया ॥' इति तत्र पाठो दृश्यते तत्र च स्वदुक्तार्थासंभव इत्यपास्तम् ॥ ३३ ॥ ३४ ॥

रा० टी०—तद्वचनाकारमाह—बाढमिति । बाढं तवोक्तमङ्गीकृतमित्यर्थः अत एव कार्यं प्रातः सारथिना सह एकः सजातीयान्तररहितो हृष्टोऽहं गमिष्यामि वैदेहीमिमां सीतां महापुरीं लङ्कामानेष्यामि च ॥ ३३ ॥

गो० टी०—बाढमिति । बाढमित्यङ्गीकारे कार्यं प्रातः ३३

रा० टी०—तदिति । तत् सीताहरणबोधकं वाक्यमेवमुक्त्वा रावणः सर्वाः दिशः प्रकाशयन् सन् खरयुक्तेन रथेन प्रययौ रामं संजगाम ॥ ३४ ॥

गो० टी०—अथेति । खराः अश्वतराः । तत्स्वरूपमुक्तमश्वशास्त्रे ' अश्वतृभ्यः समुत्पन्नास्तस्मादश्वतराः खराः । खरूक्षस्वरास्तीक्ष्णाः खरशीलाः खराङ्घ्रयः' इति ॥ ३४ ॥

३५] ति० टी०—चन्क्रूर्यमाणो भृशं चरन् । जलदसदृशं गगनं चन्द्रसदृशो रथः ॥ ३५ ॥

रा० टी०—स इति । नक्षत्रपथे स्वर्गे गीयते प्रशस्यते सः राक्षसेन्द्रस्य रावणस्य महान् रथः जलदे मेघे चन्क्रूर्यमाणः कुटिलं चरन् सन् चन्द्रमा इव शुशुभे ॥ ३५ ॥

गो० टी०—स रथ इति । नक्षत्रपथगः आकाशगः संचार्यमाणः प्रेर्यमाणः ॥ ३५ ॥

३६] ति० टी०—मारीचाश्रमम् । पूर्वं रामनिरस्तस्य दुःखात्तपःप्रवृत्तेरेवमुक्तिः । ताटकेयं ताटकापत्यम् ॥ ३६ ॥

रा० टी०—स इति । स रावणः मारीचाश्रमं गत्वा प्राप्य ताटकेयं ताटकासुतं मारीचमुपागमत् । अमानुषैः मानुषालभ्यैः भक्ष्यभोज्यैः करणैः मारीचेन कर्त्रा राजा रावणः अर्चित पूजितोऽभवदिति शेषः ॥ ३६ ॥

गो० टी०—स इति । ताटकेयं ताटकापुत्रं भक्ष्यभोज्यैः पेयखाद्यैः अमानुषैः मनुष्यलोकदुर्लभैः ॥ ३६ ॥

३७] ति० टी०—अर्थोपहितया किंप्रयोजनमत्रागमनमिति प्रयोजनयुक्तया ॥ ३७ ॥

रा० टी०—तमिति । आसनेन उदकेन च तं रावणं मारीचः स्वयं पूजयित्वा अर्थोपहितया सप्रयोजनया वाचा ऽब्रवीत् ॥ ३७ ॥

गो० टी०—तमिति । अर्थोपहितया अर्थेन प्रयोजनेन उपहितया विशिष्टया ॥ ३७ ॥

३८–३९] ति० टी०—कच्चित्सुकुशलमिति सामान्यप्रश्नः । लोकानां राक्षसलोकानाम् आशङ्के भयमिति शेषः । नाधिजाने क्षेममिति शेषः । यतस्त्वमेकाकी तूर्णमागतः ॥३८॥३९॥

रा० टी०—तद्वचनाकारमाह—कच्चिदिति । हे राजन्! हे राक्षसाधिप ! सुकुशलं कच्चिदस्तीति शेषः । नन्वु मत्कुशलविध्वंसकाभावात्कथमेवं प्रभ इत्यत आह—यतस्त्वं तूर्णमुपागतः अतः लोकानां भवज्जनानां सुकुशलं नाधिजाने निश्चिनोमि अत एव आशङ्के संशयं प्राप्नोमि, एतेनागमनप्रयोजनं वदेति सूचितम् ॥ ३८ ॥

गो० टी०—कच्चिदिति । हे राजन्! लोकानां राक्षसलोकानां राक्षसेश्वरेति समभिव्याहारादयमर्थो लभ्यते । सुकुशलं कच्चिदिति सामान्येन प्रश्नः अथ अथवा त्वं यतस्तूर्णमिहागतः ततः कारणात् किंचिदत्यहितमस्तीत्याशङ्के तद्विशिष्य न जाने महत्कार्यं विना भवतस्तूर्णमागमनं नोपपद्यत इति भावः । यद्वा लोकानां कच्चित् सुकुशलम् अथ अथवा तेषां कुशलं नेत्याशङ्के यतस्त्वं तूर्णमागतः न जाने तद्विशिष्य न जान इत्यर्थः ॥ ३८ ॥

रा० टी०—एवमिति । मारीचेन एवमुक्तः वाक्यकोविदः स रावणः ततः पश्चादिदमब्रवीत् ॥ ३९ ॥

१ संचार्यमाण इति गो. पाठः । २ मारीचाश्रमं प्राप्येति गो. मारीचाश्रममिति रा. पाठः । ३ राक्षसेश्वरेति गो. पाठः । ४ नाथ जाने इति गो. पाठः ।

आरक्षो मे हतस्तात रामेणाक्लिष्टकारिणा । जनस्थानमवध्यं तत्सर्वं युधि निपातितम् ॥ ४० ॥
तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे । राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत् ॥ ४१ ॥
आख्याता केन वा सीता मित्ररूपेण शत्रुणा । त्वया राक्षसशार्दूल को न नन्दति निन्दितः ॥ ४२ ॥
सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे । रक्षोलोकस्य सर्वस्य कः शृङ्गं छेत्तुमिच्छति ॥ ४३ ॥
प्रोत्साहयति यश्च त्वां स च शत्रुरसंशयम् । आशीविषमुखादंष्ट्रामुद्धर्तुं चेच्छति त्वया ॥ ४४ ॥
कर्मणाऽनेन केनासि कापथं प्रतिपादितः । सुखसुप्तस्य ते राजन्प्रहृतं केन मूर्धनि ॥ ४५ ॥
विशुद्धवंशाभिजनाग्रहस्ततेजोमदः संस्थितदोर्विषाणः ।
उदीक्षितुं रावण नेह युक्तः स संयुगे राघवगन्धहस्ती ॥ ४६ ॥

गो० टी०—एवमुक्त इति । ततः पश्चात् तद्वाक्यादनन्तरम् ॥ ३९ ॥

४०–४१] ति० टी०—आरक्षः समाजस्थानं जनस्थानाख्यम् । आरक्षोऽन्तपालः खरादिरित्यर्थं इत्यन्ये ॥४०॥४१॥

रा० टी०—तद्वचनाकारमाह—आरक्ष इति । मे आरक्षः सर्वतो रक्षणकर्ता खरादिरित्यर्थः, अक्लिष्टकर्मणा रामेण युधि हतः अत एव अवध्यं तत्सर्वं जनस्थानं निपातितम्॥४०॥

रा० टी०—तस्येति । तस्य रामस्य भार्यापहारणे भार्याया अपहरणे उद्युक्तस्येति शेषः, तस्य निपातितस्वसैन्यरक्षकस्य मे साचिव्यं सचिवकर्म साहाय्यमित्यर्थः, कुरु । अथ पृथक्—राक्षसेन्द्रस्य रावणस्य वचः वचनं श्रुत्वा मारीचो वाक्यमब्रवीत् ॥ ४१ ॥

गो० टी०—आरक्ष इति । आरक्षः अन्तपालः । उक्तमुपपादयति—जनस्थानमित्याद्यर्धेन । जनस्थानशब्देन तत्स्थो रक्षोगणो लक्ष्यते तत् प्रसिद्धं साचिव्यं साहाय्यं तस्य मे हतस्वजनस्य मे ॥ ४० ॥ ४१ ॥

४२] ति० टी०—सा सीता केनाख्याता हर्तव्यत्वेन कथिता। येन कथिता स मित्ररूपस्ते शत्रुः । त्वया दानादिना नन्दितः को न नन्दति । 'निन्दितः' इति पाठे निन्दितोऽवमानितः कस्त्वां न नन्दति न संतुष्यति । कुप्यतीति यावत् । त्वया तिरस्कृतस्तावकमैश्वर्यमसहमानः संस्त्वया सह कृत्रिममित्रभावं प्राप्तः संस्तवेदृशीं बुद्धिमुपदिशतीति भावः॥ ४२ ॥

रा० टी०—तद्वचनाकारमाह—आख्यातेत्यादिभिः । हे राक्षसशार्दूल ! मित्ररूपेण मित्ररूपसदृशरूपविशिष्टेन शत्रुणा केन सा सीता आख्याता हरणीयात्वेन कथिता त्वया नन्दितः संवर्धितः कः पुमान् न नन्दति स्ववर्धकं वर्धयितुमिच्छति॥४२॥

गो० टी०—आख्यातेत्यार्धत्रयमेकान्वयम् । यः सीतायाः आख्याता स मित्ररूपः शत्रुः यश्च तामानयेत्युपदेष्टा सः त्वया निन्दितः सन् तिरस्कृतः सन् त्वदैश्वर्यं न नन्दति तावुभौ मूढौ-त्यर्थः । ब्रवीहीत्यत्र ईडागमश्छान्दसः ॥ ४२ ॥

४३] ति० टी०—सीतामिहानयेति को ब्रवीति तं ब्रवीहि। ईडाभावः । शृङ्गमौन्नत्यम् ॥ ४३ ॥

रा० टी०—सीतामिति । सीताम् इह स्वगृहे आनयस्व इति कोऽब्रवीति अब्रूत " वर्तमानसामीप्ये " इति भूते लट् ब्रवीहि ईदृगुणावापौ सर्वस्य रक्षोलोकस्य राक्षसजनस्य शृङ्गं मुख्यं त्वां छेत्तुं क इच्छति ॥ ४३ ॥

गो० टी०—रक्षोलोकस्येत्यादि । शृङ्गं प्राधान्यम् 'शृङ्गं प्राधान्यसान्वोश्च' इत्यमरः । प्रोत्साहयति सीतानयनं प्रतीति शेषः, सच स एव ॥ ४३ ॥

४४] ति० टी०—स च शत्रुरसंशयमित्यत्र हेतुमाह—आशीविषेत्यादि च । यस्मात्त्वया प्रयोज्येनाशीविषमुखादंष्ट्रामुद्धर्तुमुद्धारयितुमिच्छति ॥ ४४ ॥

रा० टी०—प्रोत्साहयतीति । यस्त्वां प्रोत्साहयति सीतानयनविषयकोत्साहमुत्पादयति सः शत्रुस्तव रिपुरेव न संशयः अत्र संशयो न अत एव त्वया करणेन आशीविषमुखात् दंष्ट्राम् उद्धर्तुमिच्छति ॥ ४४ ॥

गो० टी०—आशीविषेति । आशीविषः सर्पविशेषः उद्धर्तुम् उद्धारयितुं क इति शेषः, तेन कर्मणा सीतापहारलक्षणकर्मणा कापथं कुमार्गम् । "ऋक्पूरब्धूः पथामानक्षे" इति समासान्तः अप्रत्ययः प्रतिपादितः । 'उपदिष्टोऽसि कर्मणा केन' इति पाठे केन पुरुषेण केन कर्मणा केनोपायेन कापथं प्रतिपादितोऽसीत्यन्वयः । मूर्ध्नि केन प्रहृतं केन प्रहारः कृतः दृष्टैव केन दुःखमुत्पादितमित्यर्थः ॥ ४४ ॥ ४५ ॥

४५] ति० टी०—केन शत्रुणानेन कर्मणा एतत्कर्मोपदेशेन कापथं नाशमार्गमिति यावत् । प्रहृतम् दृष्टैव दुःखमुत्पादितमित्यर्थः ॥ ४५ ॥

रा० टी०—कर्मणेति । अनेन अपहरणरूपेण कर्मणा कापथं कुत्सितमार्गं केन त्वं प्रतिपादितः उपदिष्टः प्रापित इत्यर्थः, हे राजन्! सुखसुप्तस्य ते मूर्धनि केन प्रहृतं ताडितं दुःखमुत्पादितमित्यर्थः ॥ ४५ ॥

४६] ति० टी०—राघवरूपो गन्धहस्ती । यस्य गन्धं समाघ्रायान्ये गजाः पलायन्ते स गन्धहस्ती मत्तगज उदीक्षितुमपीह देशे काले न युक्तः, किं पुनर्योद्धुमित्यर्थः । विशुद्धवंशेऽभिजनोऽभिजननमेवाग्रहस्तः शुण्डाग्रं

१ कर्मणेति गो. पाठः । २ सा सीतेति गो. सा सीतेति रा. पाठः । ३ निन्दित इति गो. पाठः । ४ कश्चित्त्वां स हि शत्रुरसंशय इति गो. पाठः । ५ शत्रुर्न संशय इति रा. पाठः ।

असौ रणान्तःस्थितिसंधिवालो विदग्धरक्षोमृगहा नृसिंहः ।
सुप्तस्त्वया बोधयितुं न शक्यः शराङ्गपूर्णो निशितासिदंष्ट्रः ॥ ४७ ॥
चापापहारे भुजवेगपङ्के शरोर्मिमाले सुमहाहवौघे ।
न रामपातालमुखेऽतिघोरे प्रस्कन्दितुं राक्षसराज युक्तम् ॥ ४८ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र लङ्कां प्रसन्नो भव साधु गच्छ ।
त्वं स्वेषु दारेषु रमस्व नित्यं रामः सभार्यो रमतां वनेषु ॥ ४९ ॥
एवमुक्तो दशग्रीवो मारीचेन स रावणः । न्यवर्तत पुरीं लङ्कां विवेश च गृहोत्तमम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

यस्य । तेजः प्रताप एव मदो यस्य सः । संस्थितौ समीचीनावस्थानौ दोषौ बाहू एव विषाणे दन्तौ यस्य ॥ ४६ ॥

रा० टी०–विशुद्धेति । हे रावण! विशुद्धवंशाभिजनः विशुद्धवंशोत्पन्नः त्वम् अग्रः श्रेष्ठः हस्तः शुण्डादण्डो यस्य सः तेज एव मदो यस्य सः संस्थितौ विन्यस्तौ दोषौ बाहू एव विषाणौ दन्तौ यस्य सः राघवगन्धहस्ती राघवरूपोत्कटमदविशिष्टो हस्ती उदीक्षितुमपराद्धुमित्यर्थः, न युक्तः ॥ ४६ ॥

गो० टी०–रामे कं गुणं दृष्ट्वैवं वदसीत्याशङ्क्याह–विशुद्धेति । अनेन रामस्य मत्तगजसमाधिरुच्यते विशुद्धवंशे अभिजनः अभिजननं तदेवाग्रहस्तो यस्य स तथा द्वयोरौन्नत्यकरत्वसाम्याद्रूपकं निरूढं तेजोमदः तेजः प्रताप एव मदो यस्य सः तेजोमदयोर्दुर्धर्षताहेतुत्वसाम्याद्रूपकोपपत्तिः उपरितनपदे संस्थितत्वसाम्याद्रूपकम् । संस्थितौ समीचीनसंस्थानवन्तौ दोषौ बाहू एव विषाणे यस्य सः राघव एव गन्धहस्ती मदगजः यस्य गन्धमात्रेणान्ये गजाः पलायन्ते स गन्धहस्तीत्युच्यते उदीक्षितुमपि इहास्मिन् देशे काले च न युक्तः ॥ ४६ ॥

४७] ति० टी०–रणान्तःस्थितिरूपा रणमध्यावस्थानरूपाः संधयो बालाश्च यस्य । विदग्धरक्षसां रणचतुराणां राक्षसमृगाणां हन्ता । शररूपैरङ्गैः पूर्णः ॥ ४७ ॥

रा० टी०–असाविति । रणान्तः रणमध्ये स्थितयो संधिः संधानमुत्सुकत्वम् एव वालो यस्य विदग्धानि रणचतुराणि रक्षांस्येव मृगास्तान् हन्ति सः शराङ्गपूर्णः शररूपाङ्गैर्व्याप्तः निशितस्तीक्ष्णोऽसिरेव दंष्ट्रा यस्य सः क्षमः त्वदपकारविषयकोद्योगरहितः नृसिंहः मनुष्यरूपः सिंहः असौ रामः बोधयितुं स्वापकारं कारयितुमित्यर्थः, न शक्यः ॥ ४७ ॥

गो० टी०–पुनरप्यतिशयं वक्तुं रामस्य सिंहसाम्यमाह–असाविति । रणान्तो रणाग्रं तत्र स्थितिर्नालीवावस्थानं सैव संधिवालो यस्य स तथा संदधातीति संधिः । "उपसर्गे घोः किः" इति किः । संधिभूतः लोमसंघभूत इत्यर्थः । वालो लाङ्गूलं यद्वा संधिर्मध्यः तद्वतो वालो लाङ्गूलं यस्य स तथेति वा सिंहस्य लाङ्गूलं क्रोधदशायां मध्योपरिप्रदेशे वर्तत इति प्रसिद्धिः । तस्य मृगाणां गर्वहेतुत्वेन रणाग्रस्थितिसाम्यम् । विदग्धानि पटूनि रक्षांस्येव मृगाः तान् हन्तीति तथा ब्रह्मादिव्यतिरिक्तेऽप्युपपदे प्रयोगानुसारात् क्विप् । शराङ्गपूर्णः शरा एवाङ्गानि नखाश्ववयवाः तैः पूर्णः निशितासिरेव दंष्ट्रे यस्य स तथा नृसिंहो नरश्रेष्ठः सिंह इत्यपि ध्वन्यते, यद्वा नृसिंह एव सिंह इत्येकशेषः, यद्वा विद्वन्मानसहंस इतिवत् श्लिष्टरूपकं, यद्वा नृसिंहो रामः पुरुषसिंह इति व्यङ्ग्यम् ॥ ४७ ॥

४८–५०] ति० टी०–चाप एवापहारः प्राणिप्राणापहारको ग्राहो यस्मिन् । भुजयोः शरग्रहणसंधानमोक्षविषयो वेग एव पङ्को यस्मिन्दुस्तरत्वात्तत्र । शरा [illegible] यस्मिन् । सुमहानाहव एव ओघो जलं यस्य तस्मिन् । राम एव पातालं पातालसदृशत्वात् मुखे वडवामुखरूपे । प्रस्कन्दितुं पतितुम् ॥ ४८–५० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

रा० टी०–चापेति । चाप एव अपहारः हिंसकजन्तुर्यस्मिन् भुजवेगपङ्के भुजवेग एव पङ्कः कर्दमो यस्मिन् शरा एव ऊर्मिमालास्तरङ्गसमूहा यस्मिन् तस्मिन् सुमहाहवः संग्राम एव ओघो गङ्गाजलवेगो यस्मिन् तस्मिन् अतिघोरे अतिभयङ्करे रामपातालमुखे प्रस्कन्दितुं संस्खलितुं न युक्तम् ॥ ४८ ॥

गो० टी०–सिंहाभिमुखगमनेऽपि देवादृष्टवैषम्यान्निर्गतिं शक्यं न तु राममाहवगमन इत्याशयेन रामस्य पातालसाम्यमाह–चापेति । चाप एवावहारो ग्राहो यस्मिन् स तथा । 'ग्राहोऽवहारः' इत्यमरः अनेन पतनकाल एव ग्रहणसामग्र्युक्ता । भुजवेगः शरमोक्षणवेगः स एव पङ्को यस्य स तथा अनेन मज्जने निर्गमयोग्यतोक्ता । शरा एवोर्मिमाला तरङ्गपङ्क्तिर्यस्य स तथा अनेन मज्जनसामग्र्युक्ता । सुमहानाहव एव ओघो जलपूरो यस्य स तथा अनेन दुस्तरत्वञ्च-

---

१ युक्त इति गो. पाठः । २ अवहारे इति गो. पाठः ।

द्वात्रिंशः सर्गः ।

खरादिवधेन प्रत्यक्षीकृतरामविक्रमाप्यशिथिलेर्ष्याकालुष्या शूर्पणखा लङ्कामेत्य रावणाय स्ववैरूप्य दर्शयति ।

ततः शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश । हतान्येकेन रामेण रक्षसां भीमकर्मणाम् ॥ १ ॥
दूषणं च खरं चैव हतं [2]त्रिशिरसं रणे । दृष्ट्वा पुनर्महाना[3]दान्ननाद जलदोपमा ॥ २ ॥
सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम् । जगाम परमोद्विग्ना लङ्कां रावणपालिताम् ॥ ३ ॥
सा ददर्श विमानाग्रे रावणं दीप्ततेजसम् । उपोपविष्टं सचिवै[4]रुद्भिरिव वासवम् ॥ ४ ॥
आसीनं सूर्यसंकाशे काञ्चने परमासने । रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम् ॥ ५ ॥
देवगन्धर्वभूतानामृषीणां च महात्मनाम् । अजेयं समरे घो[5]रं व्यात्ताननमिवान्तकम् ॥ ६ ॥

क्तम् । अतिघोरे राम एव पातालं महाबिलं तस्य मुखे मध्ये प्रस्कन्दितुं पतितुं न युक्तम् ॥ ४८ ॥

रा० टी०–प्रसीदेति । हे लङ्केश्वर ! त्वं प्रसीद अत एव लङ्कां प्रसन्नः प्रासादको भव अत एव साधु सुमार्गं गच्छ प्राप्नुहि । सुमार्गमेवाह–त्वं स्वेषु दारेषु नित्यं रमस्व सभार्यो रामः वनेषु रमताम्। प्रसन्न इत्यत्र अन्तर्भावितणिजर्थः पूर्वं कर्मणोऽविवक्षया " गत्यर्थ–"इति कर्तरि निष्ठा ॥ ४९ ॥

रा० टी०–एवमिति। मारीचेन एवमुक्तः स रावणः पुरीं लङ्कां न्यवर्तत प्रावर्तत गृहोत्तमं मुख्यं स्वगृहं विवेश च॥५०॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–एवं वस्तुस्थितिमुक्त्वा प्रेमातिशयेन पुनः पुनः सान्त्वयति–प्रसीदेति ॥ ४९ ॥ ५० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

१] ति० टी०–तत इति ॥ १ ॥

२–४] ति०टी०–महानादान्ननाद शोकादिति शेषः ॥२–४॥

रा० टी०–मारीचोपदिष्टरावणकर्तृकस्वगृहगमनानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । जलदोपमा शूर्पणखा एकेन रामेण रक्षसां चतुर्दशसहस्राणि हतानि दृष्ट्वा दूषणादिकं च हतं दृष्ट्वा ततस्तस्माद्धेतोः महानादं यथा भवति तथा ननाद शोकसूचकशब्दं चकार। श्लोकद्वयमेकान्वयि॥१॥२॥

गो० टी०–तपोबाहुबलोपेतं सर्वभूतभयंकरम् ।
यो हनिष्यति दुर्बुद्धिं रावणं सोऽस्तु मे सुदे ॥

ततः शूर्पणखीत्यादि । शूर्पणखीत्यार्षो ङीषादिः महानादमिति क्रियाविशेषणम् ॥ १ ॥ २ ॥

रा० टी०–सेति । सा शूर्पणखा अन्यैः सुदुष्करं रामस्य कृतं कर्म दृष्ट्वा रावणपालितां लङ्कां परमोद्विग्ना सती जगाम॥३॥

गो० टी०–सेति । कृतं कर्म पर्याप्तं कर्म परमोद्विग्ना अत्यन्तभीता ॥ ३ ॥

रा० टी०–सेति । सा शूर्पणखा मरुद्भिर्देवैरुपोपविष्टमिन्द्रमिव सचिवैः उपोपविष्टं दीप्ततेजसं रावणं विमानाग्रे ददर्श॥४॥

गो० टी०–सा ददर्शेत्यादि । विमानाग्रे पुष्पकविमानाग्रे उपोपविष्टम् उपोपेत्येकनिपातः उपनिविष्टमित्यर्थः मरुद्भिः देवैः रुक्मवेदिगतं हिरण्येष्टकाचितवेदिगतम् । तदुक्तमापस्तम्बेन–" सावित्रं स्वर्गकामश्चिन्वीत पञ्चाशीतिशतं हिरण्येष्टकाः " इत्यादिना । प्रभूतमाज्यं यस्य तं प्राज्यं प्रभूतेनाज्येन वर्धितमित्यर्थः, अत एव ज्वलन्तं विमर्देषु पृदेषु वज्राशनिकृतव्रणमित्यनेन तदवध्यत्वमुक्तम् उद्घृष्टम् उष्टेखनं भावे क्तः तेन जातो यः किणः तदङ्कितवक्षसं विंशद्भुजं विंशतिभुजं दर्शनीयपरिच्छदं दर्शनीयच्छत्रचामरादिकं स्निग्धवैडूर्यैः कान्तियुक्तवैडूर्यरत्नैः आभरणस्थैः संकाशं भासमानं सुभुजं दीर्घवृत्तभुजं विष्णुचक्रनिपातैरित्यत्र ताडितमित्यनुषज्यते क्षोभणं क्षोभकर्तारं योक्तारं प्रयोक्तारं यशेति उच्छेत्तारमित्यत्र उच्छाब्दवार्तिकमुक्तम् अत्र परयशश्चंसकत्वम्। भोगवतीं सर्पनगरीं पराजित्य बलात्कृत्येति यावत् नरवाहनं कुबेरं नलिनीं कुबेरस्य पुष्करिणीं नन्दनं वनम् इन्द्रोद्यानं देवोद्यानानि नन्दनवनादन्यानि उत्तिष्ठन्तौ उद्यन्तौ उपजहार पूजोपकरणानि चकार देवदानवेति देवादिभिः कर्तृभिः मृत्युतः मृत्योः षष्ठ्यर्थे तसिः अभयं भयाभावः अस्तीति गम्यमानत्वादप्रयोगः मनुष्यादृते मनुष्यं विना मनुष्यात्तु भयमस्तीत्यर्थः, मन्त्रैरिति अध्वरेषु यागेषु हविर्दानेषु सोमाभिषवशालासु मन्त्रैः प्रातरनुवाकप्रावस्तोत्रादिभिः करणैः द्विजातिभिः कर्तृभिः अभिप्लुतं क्षरितं सोमम् उपहन्ति होमकाले नाशयतीत्यर्थः । आमयशहरम् आमान् दक्षिणाकालं प्राप्तान् यज्ञान् हरतीति तथा कर्कशं निर्दीक्षिण्यं निरनुकोशं निर्दयं रावणं रावकं सा ददर्श महाबलमित्युपसंहारः । अतो न सर्गादिस्थेन ददर्शेतिपदेन पौनरुक्त्यम् ॥ ४–२१ ॥

५–६] ति० टी०–रुक्मवेदिं प्राप्तं हिरण्येष्टकचितां वेदिं प्राप्तम् । प्राज्यं भूर्याज्यहोमवन्तम् अत एव ज्वलन्तम् ॥५॥६॥

रा० टी०–रावणं वर्णयन्नाह–आसीनमित्यादिभिः । काञ्चने स्वर्णनिर्मिते सूर्यसंकाशे परमासने आसीनं रुक्मवेदिगतं

---

१ णखीति गो. पाठः । २ त्रिशिरसा सहेति गो. पाठः । ३ नादमिति गो. रा. पाठः । ४ यथेति गो. पाठः । ५ शूरमिति गो. पाठः ।

देवासुरविमर्देषु वज्राशनिकृतव्रणम् । ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम् ॥ ७ ॥
विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् । विशालवक्षसं वीरं राजलक्षणलक्षितम् ॥ ८ ॥
निद्धवैदूर्यसंकाशं तप्तकाञ्चनभूषणम् । सुभुजं शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९ ॥
विष्णुचक्रनिपातैश्च शतशो देवसंयुगे । अन्यैः शस्त्रैः प्रहारैश्च महायुद्धेषु ताडितम् ॥ १० ॥
आहताङ्गैः समस्तैस्तं देवप्रहरणैस्तदा । अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम् ॥ ११ ॥
क्षेप्तारं पर्वताग्राणां सुराणां च प्रमर्दनम् । उच्छेत्तारं च धर्माणां परदाराभिमर्शनम् ॥ १२ ॥
सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा । पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम् ॥ १३ ॥
तक्षकस्य प्रियां भार्यां पराजित्य जहार यः । कैलासं पर्वतं गत्वा विजित्य नरवाहनम् ॥ १४ ॥
विमानं पुष्पकं तस्य कामगं वै जहार यः । वनं चैत्ररथं दिव्यं नलिनीं नन्दनं वनम् ॥ १५ ॥
विनाशयति यः क्रोधादेवोद्यानानि वीर्यवान् । चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परंतपौ ॥ १६ ॥
निवारयति बाहुभ्यां यः शैलशिखरोपमः । दशवर्षसहस्राणि तपस्तप्त्वा महावने ॥ १७ ॥
पुरा स्वयंभुवे धीरः शिरांस्युपजहार यः । देवदानवगन्धर्वपिशाचपतगोरगैः ॥ १८ ॥

हिरण्मेष्टकाचितां वेदिप्राप्तां प्राज्यं बह्वाज्यहोमवन्तमत एव पावकमिव ज्वलन्तम् ॥ ६ ॥

रा० टी०–देवादीनां समरे अजेयं व्यात्ताननं प्रसारितवदनमन्तकमिव घोरं भयङ्करम् ॥ ६ ॥

७] ति० टी०–विमर्दो युद्धम् । वज्राशनिकृतव्रणमित्यनेन तदवध्यत्वमुक्तम् । ऐरावतदन्ताग्रैरुत्कृष्टं विलेखनं तेन जातो यः किणस्तद्धिक्तवक्षसम् ॥ ७ ॥

रा० टी०–देवासुरविमर्देषु देवरक्षःसङ्गामेषु वज्राशनिकृतव्रणं मणिविशेषसंलग्नाशनिकृतव्रणविशिष्टम् ऐरावतविषाणाग्रैः ऐरावतदन्ताग्रभागैः उत्कृष्टेन भेदनेन यः किणः दन्ताकारव्रणः तद्युक्तं वक्षो [1] तम् ॥ ७ ॥

८] ति० टी०–परिच्छदश्छत्रचामरालंकरणादीनि ॥ ८ ॥

रा० टी०–विंशद्भुजं विंशतिसंख्याकभुजविशिष्टं दशग्रीवं दशसंख्याकग्रीवाविशिष्टं दर्शनीयाः परिच्छदाः छत्रचामरादयो यस्य तम् ॥ ८ ॥

९–१०] ति० टी०–वैदूर्य श्यामरत्नम् श्याममित्यन्ये । स्वशरीरनद्धवैदूर्यकान्तिसदृशशरीरकान्तिमित्यर्थः । ' स्निग्धवैदूर्य–' इति पाठे बहुलम् ॥ ९ ॥ १० ॥

रा० टी०–नद्धम् आभरणतया शरीरे संलग्नं यत् वैदूर्यमणिविशेषः तत्संकाशं तद्वर्णसदृशवर्णविशिष्टं महास्यं बृहदाननविशिष्टम् । ' स्निग्धवैदूर्य–' इति पाठे बहुलमिति भट्टाः ॥९॥

रा० टी०–देवसंयुगे महायुद्धेषु विष्णुमात्रसङ्गामेषु च शतशो विष्णुचक्रनिपातैः अन्यैश्चक्रभिन्नैः शस्त्रप्रहारैश्च ताडितम्॥१०॥

११–१२ ति० टी०–क्षोभणं क्षोभकर्तारम् ॥ ११॥ १२ ॥

रा० टी०–समस्तैः देवप्रहरणैः देवानामायुधैः आहताङ्गम् आहतानि ताडितानि अङ्गानि यस्य तम्, अक्षोभ्याणां क्षोभयितुमशक्यानां समुद्राणां क्षोभणं क्षिप्रकारिणं झटिति सर्वकार्यप्रवर्तकम् ॥ ११ ॥

रा० टी०–धर्माणामुच्छेत्तारं निवर्तकमत एव परदाराभिमर्शनम् ॥ १२ ॥

१३–१४] ति० टी०–परदाराभिमर्शनं विवृणोति–पुरीमिति ॥ १३ ॥ १४ ॥

रा० टी०–सर्वदिव्यास्त्रयोक्तारं सर्वदिव्यास्त्राणां तत्प्रयोगाणां योक्तारं कर्तारम्, यः भोगवतीं नागस्वामिकां पुरीं गत्वा वासुकिं पराजित्य तक्षकस्य तक्षकं च पराजित्य तक्षकस्य प्रियां भार्यां जहार । तक्षकस्येत्युभयान्वयि ॥ १३ ॥

रा० टी०–कैलासं गत्वा नरवाहनं कुबेरं विजित्य कामगं तस्य पुष्पकं नाम विमानं यो जहार ॥ १४ ॥

१५] ति० टी०–नलिनीं चैत्ररथवनमध्यवर्तिनीं सरसीम् ॥ १५ ॥

रा० टी०–चैत्ररथं तत्संज्ञकं वनं कुबेरकाननं नलिनीं तदन्तर्वर्तिसरसीं च नन्दनं तत्संज्ञकं वनमिन्द्रकाननं च देवोद्यानानि च यो विनाशयति ॥ १५ ॥

१६–१७] ति० टी०–उत्तिष्ठन्तावुदयन्तौ ॥ १६ ॥१७॥

रा० टी०–चन्द्रेति । शैलशिखरोपमो यः उत्तिष्ठन्तौ चन्द्रसूर्यौ बाहुभ्यां निवारयति ॥ १६ ॥

रा० टी०–दशवर्षसहस्राणि तपस्तप्त्वा स्वयंभुवे ब्रह्मणे शिरांसि य उपजहार बलित्वेन प्रापयामास ॥ १७ ॥

१८] ति० टी०–उपजहारोपहारत्वेन दत्तवान् ॥ १८ ॥

---

१ उद्घुष्टेति गो. पाठः । २ शोभितमिति गो. पाठः । ३ स्निग्धेति गो. पाठः । ४ कुण्डलमिति गो. पाठः । ५ शस्त्रप्रहारैरिति गो. रा. पाठः । ६ आहताङ्गमिति गो.रा.पाठः ।७ चेति गो.पाठः ।८ तथेति गो.पाठः ।९ पर्वतेन्द्राणामिति गो. पाठः।१० प्राप्येति गो.पाठः।११ कैलासपर्वतमिति गो.पाठः।

अभयं यस्य सङ्ग्रामे मृत्युतो मानुषादृते । मन्त्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः ॥ १९ ॥
हविर्धानेषु यः सोममुपहन्ति महाबलः । प्राप्तयज्ञहरं[1] दुष्टं[2] ब्रह्मघ्नं क्रूरकारिणम्[3] ॥ २० ॥
कर्कशं निरनुक्रोशं प्रजानामहिते रतम् । रावणं सर्वभूतानां सर्वलोकभयावहम् ॥ २१ ॥
राक्षसी भ्रातरं क्रूरं[4] सा ददर्श महाबलम् । तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ॥ २२ ॥
आसने सूपविष्टं[5] तं काले कालमिवोद्यतम्[6] । राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम् ॥ २३ ॥
उपगम्याब्रवीद्भ्रातरं राक्षसी भयविह्वला[7] । रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम् ॥ २४ ॥
तमब्रवीदीप्तविशाललोचनं प्रदर्शयित्वा भयलोभमोहिता ।
सुदारुणं वाक्यमभीतचारिणी महात्मना शूर्पणखा विरूपिता ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ।

दाशरथिपराक्रमाश्रयं जनस्थानवृत्तं निवेदयन्ती शूर्पणखा रावणे राजगुणराहित्यमारोप्य सदःस्थं तमुपालभते ।

ततः शूर्पणखा दीप्ता रावणं लोकरावणम् । अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत् ॥ १ ॥

रा० टी०—मानुषात् नित्यनराकृतिपरमात्मनः कृते विना मृत्युतो मरणात् यस्याभयमत एव देवादिभिश्चाभयम् ॥ १८ ॥

१९] ति० टी०—यस्य सङ्ग्रामे मृत्युतोऽभयम् । मनुष्यातिरिक्ततो मरणभयहीन इत्यर्थः । मन्त्रैः प्रातरनुवाकयावस्तोत्रादिभिरभिष्टुतम् ॥ १९ ॥

रा० टी०—हविर्धानेषु सोमसवनकर्मविशिष्टेषु अध्वरेषु यागेषु द्विजातिभिः कर्तृभिः मन्त्रैरभिष्टुतं सोमं चन्द्रमसं यो महाबलः उपहन्ति तम् ॥ १९ ॥

२०] ति० टी०—सोमं हविर्धानेषु सोमाभिषवशालासूपहन्ति नाशयति । प्राप्तान्दक्षिणाकालं प्राप्तान्यज्ञान्हरति तम् ॥ २० ॥

२१]ति०टी०—सर्वभूतानां रावणमाक्रोशशब्दकारिणम्२१

रा० टी०—प्राप्तयज्ञहरम् आसन्नसमाप्तिकालिकयागावेध्वंसकमत एव क्रूरकारिणम् अत एव कर्कशम् अतिरूक्षम् अत एव निरनुक्रोशं दयारहितम् अत एव जनानामहिते रतम् अत एव सर्वलोकभयावहं क्रूरं भ्रातरं रावणं राक्षसी सा शूर्पणखा ददर्श । सार्धसप्तदशश्लोक एकान्वयी ॥ २० ॥ २१ ॥

२२] ति० टी०—राक्षसी शूर्पणखा ॥ २२ ॥

२३-२४] ति० टी०—काले प्रलयकाले पौलस्त्या राक्षसाः ॥ २३ ॥ २४ ॥

रा० टी०—तमिति । काले प्रलयसमये उद्यतं प्राप्तं प्रसिद्धं कालं महामृत्युमिव आसने सूपविष्टं राक्षसेन्द्रं मन्त्रिभिः परिवारितं तं रावणम् उपगम्याब्रवीत् । सार्धश्लोकद्वयमेकान्वयि ॥ २२-२४ ॥

गो० टी०—तमित्यादि । कालकालं मृत्योरपि मृत्युम् उद्यतम् उद्युक्तं पौलस्त्यानां कुलं नन्दयतीति तथा॥२२-२४॥

२५] ति० टी०—उपगम्याब्रवीदित्युक्तं तस्य विवरणम्—तमिति । प्रदर्शयित्वा स्वकं वैरूप्यमिति शेषः । भयं राक्षसवधेन रामजम् । लोभस्तत्सौन्दर्यात्तद्विषयस्ताभ्यां मोहिता । अभीतं यथा भवति तथा सर्वलोकेषु चरति तच्छीला ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—तमिति । दीप्ते प्रकाशिते विशाले लोचने यस्य तं रावणं भयलोभमोहिता भयेन राक्षसविनाशजनितभीत्या लोभेन अतिसुरतलालसोत्कटेच्छया च मोहिता कर्तव्यविषयकाविवेकं प्राप्ता अभीतचारिणी अभीताचरणशीला महात्मना विरूपिता शूर्पणखा प्रदर्शयित्वा रामकृतं स्ववैरूप्यं प्रदर्श्य सुदारुणं वाक्यमब्रवीत्॥२५॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

गो० टी०—पुनः सर्गान्ते संग्रहश्लोकः—तमिति । प्रदर्शयित्वा स्वकं वैरूप्यमिति शेषः । विरूपितेत्युक्तेः अभीततया सर्वपुरुषेषु सर्वलोके च चारोऽस्या अस्तीति सा ॥ २५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वात्रिंशः सर्गः॥ ३२ ॥

१] ति० टी०—तत इति ॥ १ ॥

---

१ आप्तयज्ञहरं क्रूरमिति गो. पाठः । २ दुष्टचारिणमिति गो.पाठः । ३ शूरमिति गो. पाठः । ४ च कालकालमिति गो. पाठः । ५ एतदाद्यर्धद्वयं व्यत्यस्तं गो. पाठे । ६ अभिगम्येति गो. पाठः । ७ मोहमूर्छितेति गो. पाठः ।

प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः । समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥ २ ॥
सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिम् । लुब्धं न बहु मन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३ ॥
स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः । स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥ ४ ॥
अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपम् । वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः ॥ ५ ॥
ये न रक्षन्ति विषयमस्वाधीनं नराधिपाः । ते न बुद्ध्या प्रकाशन्ते गिरयः सागरे यथा ॥ ६ ॥
आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः । अयुक्तचारश्चपलः कथं राजा भविष्यसि ॥ ७ ॥
त्वं तु बालस्वभावश्च बुद्धिहीनश्च राक्षस । ज्ञातव्यं तैन्न जानीषे कथं राजा भविष्यसि ॥ ८ ॥

रा टी०-संदर्भशुद्धये पुनस्तदेवाह-तत इति । दीना शूर्पणखा अमात्यमध्ये परुषं वाक्यमब्रवीत् ॥ १ ॥

गो० टी०-अमर्यादो भृशं मूर्खो वध्यो यस्य निशाचरः ।
तमहं नीतिसंपन्नं रघुनाथं समाश्रये ॥

ततः शूर्पणखेत्यादि । दीना रामपरिभूतत्वात् स्वपरिभवदर्शनेऽपि भ्रातुर्निश्चलतया संकुद्धा ॥ १ ॥

२] ति० टी०-कामभोगेषु प्रमत्तोऽतिशयप्रसक्तः । निरङ्कुशः सन्बोद्धव्यं नावबुध्यस इत्यन्वयः॥ २ ॥

रा० टी०-तद्वचनाकारमाह-प्रमत्त इति । कामभोगेषु प्रमत्तः प्रसक्तः अत एव निरङ्कुशः नीतिमर्यादारहितः अत एव स्वैरवृत्तः यथेष्टाचरणस्त्वं बोद्धव्यं ज्ञातव्यं समुत्पन्नं घोरं भयं नावबुध्यसे ॥ २ ॥

गो० टी०-प्रमत्त इति । कामभोगेषु स्वैरवृत्तः स्वतन्त्रः सदा कामपरवश इत्यर्थः, निरङ्कुशः कामभोग एव निष्प्रतिबन्धः घोरं भयं श्रुत्वतामपि भयंकरमित्यर्थः, बोद्धव्यं चारमुखेनेति शेषः ॥ २ ॥

३] ति० टी०-हेयोपादेयराजगुणानाह रावणस्य गुणहीनत्वं वक्तुम्-सक्तमिति । ग्राम्यभोगः स्त्र्यादिभोगः । तदेवाह-कामवृत्तमिति । कामचेष्टापरम् । लुब्धं भोगलोलुपम् । श्मशानाग्निमिव अस्पृश्यत्वेन सादृश्यम् ॥ ३ ॥

रा० टी०-सक्तमिति । ग्राम्येषु अनभिज्ञजनसंबन्धिषु भोगेषु स्त्र्यादिप्रसङ्गेषु सक्तम् अत एव कामवृत्तं यथेष्टाचरणं लुब्धं महीपतिं श्मशानाग्निमिव प्रजाः न बहुमन्यन्ते ॥ ३ ॥

गो० टी०-एवं कामवृत्तस्य संभावितां हानिं लोकरीत्या दर्शयति—सक्तमित्यादिना । ग्राम्येषु मैथुनादिषु कामवृत्तं यथेच्छव्यापारम् ॥ ३ ॥

४] ति० टी०-तैः कार्यैरनुष्ठितैः ॥ ४ ॥

रा० टी०-स्वयमिति । काले साधनसमये यः पार्थिवः कार्याणि स्वयं न अनुतिष्ठति साधयति स पार्थिवः राज्येन तैः कार्यैश्च सह विनश्यति नाशं प्राप्नोति ॥ ४ ॥

गो० टी०-स्वयमिति । कार्याणि पालनादीनि ॥ ४ ॥

५] ति० टी०-अयुक्तचारमनियोजितचारम् । दुर्दर्शमुचिते काले प्रजाभ्यो दर्शनदानरहितम् । अस्वाधीनं स्त्र्यादिपरतन्त्रम्[1]६

रा० टी०-अयुक्तेति । अयुक्तचारं न युक्ताः कार्येषु नियोजिताः चाराः येन तम् अत एव दुर्दर्शं दूरवृत्तदर्शनानर्हम् अस्वाधीनं भोगवशमित्यर्थः, नराधिपं नराः नदीपङ्कं द्विपा इव दूरात् वर्जयन्ति ॥ ६ ॥

गो० टी०-अयुक्तचारमिति । अयुक्तचारम् अनियोजितचारं दुर्दर्शम् उचितकाले सभायां प्रजादर्शनप्रदानरहितम् । अस्वाधीनं पत्न्यादिपरतन्त्रं परप्रत्ययनेयबुद्धिं वा पङ्केऽपि विशेषणद्वयं योज्यम् अयुक्तश्चारो यस्मिन् स्वस्य संचारकर्तुरधीनो न भवतीत्यर्थः ॥ ६ ॥

६] ति० टी०-विषयं देशम् । अस्वाधीनं स्वभिन्नाधीनम् । पूर्वं स्वाधीनं देशं पश्चात्परायत्तं ये न रक्षन्ति स्वाधीनीकरणेनेति शेषः, ते न प्रकाशन्ते सागरे मग्ना गिरय इव ॥ ६ ॥

रा० टी०-ये इति । ये नराधिपाः अस्वाधीनं स्वात्मवधानतया स्वाधीनरहितं विषयं देशं न रक्षन्ति ते सागरे निमग्ना इति शेषः, गिरय इव दृढ्या स्वसंपत्त्याधिक्येन न प्रकाशन्ते ॥ ६ ॥

गो० टी०-येन रक्षन्तीति । विषयं स्वराज्यं दृढ्या वर्तमानयाऽपीति शेषः ॥ ६ ॥

७-८] ति० टी०-आत्मवद्भिर्वशीकृतान्तर्बहिरिन्द्रियैः विगृह्य विरुध्य ॥ ७ ॥ ८ ॥

रा० टी०-आत्मेति । आत्मवद्भिः प्रशस्तयत्नविशिष्टैः देवादिभिः सह विगृह्य विग्रहं कृत्वा अयुक्तचारः चपलस्त्वं राजा कथं भविष्यसि ॥ ७ ॥

गो० टी०-आत्मवद्भिरिति । आत्मवद्भिः यत्नवद्भिः त्वत्प्रतीकारदत्तावधानैरित्यर्थः, चपलः विषयचपलः ॥ ७ ॥

रा० टी०-त्वमिति । हे राक्षस! यतस्त्वं हीनबुद्धिः अत एव बालस्वभावः अत एव ज्ञातव्यं न जानीषे अतः राजा कथं भविष्यसि ॥ ८ ॥

गो० टी०-उक्तमेवार्थं पुनरपि प्रलपति रावणस्याग्रहोत्पादनाय-त्वमित्यादिना । बालस्येव स्वभावो विवेकशून्यत्वं यस्य स तथा बुद्धिहीनः विवेकहेतुर्बुद्धिः तया हीनः ॥ ८ ॥

१ अस्वाधीना इति गो. पाठः । २ त्विति गो. पाठः ।

येषां चाराश्च कोशश्च नयश्च जयतां वर । अस्वाधीना नरेन्द्राणां प्राकृतैस्ते जनैः समाः ॥ ९ ॥
यस्मात्पश्यन्ति दूरस्थान्सर्वानर्थान्नराधिपाः । चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥ १० ॥
अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्युतैः । स्वजनं चैर्यतः स्थानं निहतं नावबुध्यसे ॥ ११ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । हतान्येकेन रामेण खरश्च सहदूषणः ॥ १२ ॥
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः । धर्षितं च जनस्थानं रामेणाक्लिष्टकारिणा ॥ १३ ॥
त्वं तु लुब्धः प्रमत्तश्च पराधीनश्च राक्षस । विषये स्वे समुत्पन्नं यद्भयं नावबुध्यसे ॥ १४ ॥
तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम् । व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम् ॥ १५ ॥
अतिमानिनमग्राह्यमात्मसंभावितं नरम् । क्रोधनं व्यसने हन्ति स्वजनोऽपि नराधिपम्॥ १६ ॥
नानुतिष्ठति कार्याणि भयेषु न बिभेति च । क्षिप्रं राज्याच्युतो दीनस्तृणैस्तुल्यो भवेदिह॥ १७ ॥
शुष्ककाष्ठैर्भवेत्कार्यं लोष्ठैरपि च पांसुभिः । न तु स्थानात्परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः॥ १८ ॥
उपभुक्तं यथा वासः स्रजो वा मृदिता यथा । एवं राज्यात्परिभ्रष्टः समर्थोऽपि निरर्थकः ॥ १९ ॥

९-१०] ति० टी०-प्राकृतै राजव्यवहारानर्हदासीनजनैः ॥ ९ ॥ १० ॥

रा० टी०-येषामिति । येषां नरेन्द्राणां चारादयः अस्वाधीनाः ते प्राकृतैर्जनैः साधारणप्रजाभिः समास्तुल्याः ॥९॥

गो० टी०-येषामिति । स्वपरराष्ट्रकार्याकार्यज्ञापकश्चारः कोशो धनसमृद्धिः नयो नीतिः प्राकृतैर्जनैः साधारणैर्जनैः ॥९॥

रा० टी०-यस्मादिति । नराधिपाः चारेण दूरस्थानर्थान् यस्माद्धेतोः पश्यन्ति तस्मात् राजानो दीर्घचक्षुषः उच्यन्ते॥१०॥

गो० टी०-चारप्रयोजनमाह-यस्मादिति ॥ १० ॥

११-१२] ति० टी०-स्वजनं स्वस्य जना यस्मिंस्तत् ॥ ११ ॥ १२ ॥

रा० टी०-चारायुक्तत्वे हेतुं वदन्ती आह-अयुक्तेति । प्राकृतैः प्रकृतिः स्वभाव एव येषां तैः शास्त्रसंस्काररहितैरित्यर्थः, सचिवैर्युतं त्वां मन्ये अत एव अयुक्तचारं मन्ये अत एव निहतं स्वजनं जनस्थानं च त्वं नावबुध्यसे ॥ ११ ॥

रा० टी०-चतुर्दशेति । रक्षसां चतुर्दश सहस्राणि एकेन रामेण हतानि ॥ १२ ॥

गो० टी०-एवं लोकरीत्योक्तं रावणं उपसंहरति-अयुक्तेत्यादिना । जनस्थानं जनस्थानस्थम् ॥ ११ ॥ १२ ॥

१३-१४]ति०टी०-कृतं क्षेमं येषु ते कृतक्षेमाः॥१३॥१४॥

रा० टी०-नन्वं किमर्थं राक्षसा निहता इत्यत आह-ऋषीणामिति । ऋषीणामभयं भयाभावः दत्तं प्रतिज्ञातमत एव दण्डकाः कृतक्षेमा आसन्निति शेषः, अत एव रामेण जनस्थानं धर्षितं विध्वंसितम् ॥ १३ ॥

गो० टी०-स्वजनवधादपि दुःसहं कार्यान्तरमाह-ऋषीणामिति ॥ १३ ॥

रा० टी०-त्वमिति । हे रावण ! प्रमत्तः अत एव लुब्धः अविवेकं प्राप्तः पराधीनः विषयभोगतन्त्रस्त्वं स्वे विषये देसमुत्पन्नं यद्भयं तन्नावबुध्यसे ॥ १४ ॥

गो० टी०-त्वमिति । लुब्धः चारादीनामभिमतप्रदाता ॥ १४ ॥

१५] ति० टी०-तीक्ष्णं स्वामात्यादिविषये तैक्ष्ण्यदिगुणविशिष्टम् । शठो गूढविप्रियकारी तादृशं राजानं सभूतानि भृत्यामात्यादिसर्वप्रजा नाभिधावन्ति तद्रक्षणाय प्रवर्तन्ते ॥ १५ ॥

रा० टी०-तीक्ष्णमिति । तीक्ष्णत्वादिधर्मविशिष्टं पार्थिवं राजानं व्यसने दुःखेऽपि सर्वभूतानि नाभिधावन्ति तक्षणोद्योगं न कुर्वन्तीत्यर्थः ॥ १५ ॥

गो० टी०-तीक्ष्णमिति । तीक्ष्णं क्रूरं शठं गूढविप्रियकारिणं व्यसने व्यसनकाले सर्वभूतानि भृत्यामात्यादी नाभिधावन्ति तद्रक्षणाय न प्रवर्तन्ते ॥ १५ ॥

१६] ति० टी०-अग्राह्यं स्वीयैरनुपसर्प्यम् । आसंभावितमात्मना स्वेनैव सभावितं बहुमानं प्राप्तम् । अक्रोधनस्थाने क्रोधवन्तम् ॥ १६ ॥

रा० टी०-अतीति । अतिमानिनं बहुगर्ववन्तमत अग्राह्यं सर्वैर्महद्भिरस्वीकरणीयमत एव आत्मसंभावितं स्वेस्वमहत्त्वादिना चिन्तितं क्रोधनं क्रोधयुक्तं नराधिपं व्यदुःखप्राप्तिसमये स्वजनोऽपि हन्ति ॥ १६ ॥

गो० टी०-अतिमानिनमिति । अग्राह्यं सद्भिरिति शेआत्मना स्वेनैव बहुमानं प्राप्तः सोऽयमात्मसंभावितः तं क्रोनम् अस्थाने क्रोधवन्तं व्यसने व्यसनकाले स्वजनोऽपि अत्यादिरपि ॥ १६ ॥

१७-१९] ति० टी०-नानुतिष्ठति यस्यामात्यादिस्वनोऽपीत्याकर्षः, स राज्याच्युतो भवेदित्यन्वयः ॥ १७-१९

१ चारश्चेति गो. रा. पाठः । २ वृतमिति गो. युतमिति रा. पाठः । ३ तु जनस्थानं हतं य इति गो. पाठः । ४ जनस्थानमिति रा. पाठः। ५ शृं गो. पाठः। ६ कर्मणेति गो. रा. पाठः । ७ रावणेति गो. रा. पाठः । ८ महीपतिमिति गो. पाठः । ९ भविष्यतीति गो. पाठः । १० शुकष्ठैरिति गो. पाठः ।

अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः । कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २० ॥
नयनाभ्यां प्रसुप्तो वा जागर्ति नयचक्षुषा । व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥ २१ ॥
त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः । यस्य तेऽविदितश्चारैः रक्षसां सुमहान्वधः ॥ २२ ॥
परावमन्ता विषयेषु सङ्गवान्न देशकालप्रविभागतत्त्ववित् ।
अयुक्तबुद्धिर्गुणदोषनिश्चये विपन्नराज्यो न चिराद्विपत्स्यते ॥ २३ ॥
इति स्वदोषान्परिकीर्तितांस्तया समीक्ष्य बुद्ध्या क्षणदाचरेश्वरः ।
धनेन दर्पेण बलेन चान्वितो विचिन्तयामास चिरं स रावणः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०–नेति । कार्याणि कर्तव्यस्वजनरक्षणानि यो नानुतिष्ठति न करोति अत एव भयेषु प्राप्तस्वजनभीतिषु न बिभेति स पुरुषः क्षिप्रं राज्याच्युतः अत एव तृणैः तुल्यो भवेत् सर्वानादरणीयः स्यादित्यर्थः ॥ १७ ॥

रा० टी०–शुष्केति । शुष्ककाष्ठैः लोष्टैश्च पांशुभिर्धूलीभिश्च कार्यं किंचित्प्रयोजनं भवेत् स्थानात्परिभ्रष्टैर्वस्त्वधाधिपैस्तु कार्यं किंचित्प्रयोजनं न स्यात् ॥ १८ ॥

गो० टी०–नानुतिष्ठतीति । भयेषु भयहेतुषु न बिभेति साशङ्को न वर्तत इत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०–उपभुक्तमिति । उपभुक्तं परिधृतं वासो वस्त्रं यथा निरर्थकमन्यप्रयोजनासाधकं, मृदिताः परिमर्दिताः स्रजो माला यथा निरर्थिकाः एवं समर्थोऽपि राज्यात्परिभ्रष्टो राजा निरर्थकः । निरर्थक इति लिङ्गवचनविपरिणामेनान्यत्राप्यन्वेति एकत्र शब्दोऽपरत्रार्थो वा ॥ १९ ॥

गो० टी०–उपभुक्तमिति । उपभुक्तवस्त्रादिदृष्टान्तः परेषामयोग्यत्वप्रदर्शनाय ॥ १९ ॥

२०] ति० टी०–सर्वज्ञः स्वपरसर्वेष्टतान्तज्ञः ॥ २० ॥

रा० टी०–अप्रमत्त इति । अप्रमत्तः अनवधानतारहितः विजितेन्द्रियश्च यो राजा स चिरं तिष्ठते तिष्ठति ॥ २० ॥

गो० टी०–अप्रमत्त इति । चिरं तिष्ठन्तत इत्यत्र आर्षमात्मनेपदम् ॥ २० ॥

२१] ति० टी०–प्रसुप्तो वा प्रसुप्तोऽपि । व्यक्तक्रोधप्रसादः फलदानेन ॥ २१ ॥

रा० टी०–नयनाभ्यामिति । यो राजा नयनाभ्यां प्रसुप्तः नयचक्षुषा जागर्ति स व्यक्तक्रोधप्रसादः व्यक्तौ दण्डदानाभ्यां प्रकटितौ क्रोधप्रसादौ यस्य सः जनैः चिरं पूज्यते ॥ २१ ॥

गो० टी०–नयनाभ्यामिति । जागर्ति अप्रमत्तो भवतीत्यर्थः ॥ २१ ॥

२२] ति० टी०–अविदितः येन त्वया न ज्ञात इत्यर्थः ॥२२॥

रा० टी०–त्वमिति । हे रावण ! रक्षसां सुमहान्वधः यस्य ते चारैरविदितः स त्वम् एतैः राजोचितैर्गुणैर्विवर्जितः अत एव दुर्बुद्धिरसीति शेषः ॥ २२ ॥

गो० टी०–त्वमिति । यस्य ते येन त्वया अविदित इति छेदः ॥ २२ ॥

२३] ति० टी०–परेषामवमन्ता केवलमवमन्तैव न तु तन्नाशविषयबुद्धिः, न चिरात्क्षिप्रं विपत्स्यसे आपदं प्राप्स्यसीत्यर्थः ॥ २३ ॥

रा० टी०–परेति । यो विषयेषु सङ्गवान् अत्यासक्तिविशिष्टः अत एव परावमन्ता सर्वानादरकारी अत एव देशकालप्रविभागतत्त्वविन्न अत एव गुणदोषनिश्चये अयुक्तबुद्धिः न युक्ता बुद्धिर्यस्य सः राजा त्वं न चिराद्विपन्नराज्यः सन् विपत्स्यसे ॥ २३ ॥

गो० टी०–सर्गार्थमेकेन संगृह्णाति–परेति । परावमन्ता शत्रुपूपेक्षावान् विषयेषु शब्दादिषु सङ्गतः सङ्गवान् नदेशकालप्रविभागतत्त्वविदित्येकं पदं नगनैकादिवन्नसमासः देशकालभेदातत्त्वज्ञ इत्यर्थः, गुणदोषनिश्चये विषये अयुक्तबुद्धिः अनियोजितबुद्धिः अप्रवृत्तबुद्धिरित्यर्थः, न चिराद् क्षिप्रं विपत्स्यसे आपदं प्राप्स्यसीत्यर्थः, त्वमिति शेषः ॥ २३ ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

२४] ति० टी०–धनेनाक्षयकोशेन, दर्पेण राजत्वाहंकारेण, बलेन प्राणबलेन चतुरङ्गबलेन च चिन्तयामास । मारीचः कलहं निवारयति, एषा कलहार्थं प्रोत्साहयति, किमत्र कर्तव्यमिति विचारयामासेत्यर्थः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०–इतीति । तया शूर्पणख्या इत्यनेन प्रकारेण परिकीर्तितान् बुद्ध्या समीक्ष्य विचार्य धनादिना अन्वितः क्षणदाचरेश्वरः रावणः चिरेण विचिन्तयामास ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

---

१ ऽपीति गो. पाठः । २ संगत इति गो. पाठः ।

चतुस्त्रिंशः सर्गः ।

रामानुबन्धीतिवृत्तं पृच्छन् रावणः शूर्पणखा प्रति तत्कृतकर्णनासच्छेदनकारणं पृच्छति । रामलक्ष्मणसीतागुणाननुवर्णयन्ती सा त्वदर्थं सीतामपहरन्त्यह लक्ष्मणेन विरूपिताऽतः शीघ्रं सीतामपहरेत्येन प्रोत्साहयति ।

ततः शूर्पणखां दृष्ट्वा ब्रुवतीं परुषं वचः । अमात्यमध्ये संक्रुद्धः परिपप्रच्छ रावणः ॥ १ ॥
कश्च रामः कथंवीर्यः किंरूपः किंपराक्रमः । किमर्थं दण्डकारण्यं प्रविष्टश्च सुदुस्तरम् ॥ २ ॥
आयुधं किं च रामस्य येन ते राक्षसा हताः । खरश्च निहतः संख्ये दूषणस्त्रिशिरास्तथा ॥ ३ ॥
तत्त्वं ब्रूहि मनोज्ञाङ्गि केन त्वं च विरूपिता । इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्छिता ॥ ४ ॥
ततो रामं यथान्यायमाख्यातुमुपचक्रमे । दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः ॥ ५ ॥
कन्दर्पसमरूपश्च रामो दशरथात्मजः । चक्रचापनिभं चापं विकृष्य कनकाङ्गदम् ॥ ६ ॥
दीप्तान्क्षिपति नाराचान्सर्पानिव महाविषान् । नाददानं शरान्घोरान्विमुञ्चन्तं महाबलम् ॥ ७ ॥
न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे । हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः ॥ ८ ॥
इन्द्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः । रक्षसां भीमवीर्याणां सहस्राणि चतुर्दश ॥ ९ ॥
निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना । अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ॥ १० ॥
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ ॥ ११ ॥

१-४] ति० टी०-तत इति ॥ १-४ ॥

रा० टी०-शूर्पणखावचनश्रवणानन्तरकालिकं वृत्तान्तमाह-तत इत्यादिभिः । ततः शूर्पणखावचनश्रवणानन्तरकाले अमात्यमध्ये परुषं वचो ब्रुवतीं शूर्पणखां दृष्ट्वा संक्रुद्धो रावणः परिपप्रच्छ ॥ १ ॥

रा० टी०-तत्प्रश्नाकारमाह-क इत्यादिभिः । रामः कः कस्य पुत्र इत्यर्थः, कथंवीर्यः कीदृक्तेजोविशिष्ट इत्यर्थः, किंरूपः कीदृक्रूपविशिष्टः, दण्डकारण्यं किमर्थं प्रविष्टः ॥ २ ॥

रा० टी०-आयुधमिति । येनायुधेन ते राक्षसाः हताः तत् रामस्यायुधं किम् ॥ ३ ॥

गो० टी०-परगोष्ठीप्रसिद्धानां गुणानामाकरो महान् ।
अनुजो यस्य सौमित्रिस्तमहं राममाश्रये ॥

तत इत्यादि । संक्रुद्धः शत्रुविषयेऽतीव क्रोधवान् कथंवीर्यः कीदृशवीर्यः येन खरदूषणत्रिशिरःप्रभृतयो राक्षसा निहतास्तादृशं तदीयमायुधं किं किंरूपम् इति परिपप्रच्छेति पूर्वेणान्वयः॥१-३॥

रा० टी०-तत्त्वमिति । हे मनोज्ञाङ्गि ! त्वं केन हेतुना विरूपिता तत्त्वं ब्रूहि । अथ पृथक्-इतीति । इत्युक्ता राक्षसी यथान्यायमाख्यातुं कथयितुमुपचक्रमे ॥ ४ ॥

गो० टी०-इतीति । स्पष्टम् ॥ ४ ॥

५]ति०टी०-किंरूप इत्यस्योत्तरम्-दीर्घबाहुरित्यादि५॥

रा० टी०-तदाख्यानमेवाह-दीर्घबाहुरित्यादिभिः । दीर्घबाहुः रामः कन्दर्पसमरूपो दशरथात्मजः दशरथपुत्रश्च । अनेन कः किंरूपश्चेत्यनयोरुत्तरम् ॥ ५ ॥

गो० टी०-रामानुजपरवशहृदयापि तदग्रजकृतमहोन्मादहेतुभूतं रामलावण्यं संग्रहेणाभिधत्ते-दीर्घबाहुरित्यादिना॥५॥

६-९] ति० टी०-कश्च राम इत्यस्योत्तरम्-दशरथात्मजः । कनकाङ्गदं कनकवलयभूषितं चापम् ॥ ६-९ ॥

रा० टी०-शक्रेति । कनकाङ्गदं स्वर्णवलयविशिष्टं चापं विकृष्य दीप्तान् महाविषान् सर्पानिव नाराचान् बाणविशेषान् क्षिपति ॥ ६ ॥

गो० टी०-शक्रेति । कनकाङ्गदं कनकमयपट्टबन्धम्॥६॥

रा० टी०-नेति । शरानाददानं विसृजन्तं कार्मुकं विकर्षन्तं रामं न पश्यामि अत एव अश्मवृष्टिभिः आहतम् उत्तमं सस्यमिव शरवृष्टिभिर्हन्यमानं तत्सैन्यं तु पश्यामि । अर्धचतुष्टयमेकान्वयि ॥ ७-९ ॥

गो० टी०-नाददानमिति । अत्रादानमोचनविकर्षणानि लक्ष्यन्ते वेगातिशयेनादानादिकं न पश्यामि किंतु हननमेवेति भावः । अश्मवृष्टिभिः करकामयवर्षैः ॥ ७ ॥ ८ ॥

रा० टी०-रक्षसामिति । एकेन रामेण रक्षसां चतुर्दशसहस्राणि सहदूषणः खरश्च निहतानि अत एव ऋषीणामभयं दत्तं दण्डकाश्च कृतक्षेमा अभवन्निति शेषः । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०-रक्षसामित्यादि । अर्धाधिकमुहूर्तेन घटिकात्रयेण ससैन्यः खरो हत इत्यर्थः ॥ ९ ॥ १० ॥

१०] ति० टी०-खरश्च सहदूषणो हत इत्यर्थः ॥ १० ॥

११] ति० टी०-किमर्थं दण्डकारण्यं प्रविष्ट इत्यस्योत्तरम्-ऋषीणामित्यादि ॥ ११ ॥

---

१ कुद्धामिति गो. पाठः । २ स दुरासदमिति गो. पाठः । ३ निहता येन राक्षसा इति गो. पाठः । ४ अर्धमेतद् गो. नास्ति । ५ तत्त्वमिति गो. पाठः । ६ न मुञ्चन्तं शिलीमुखानिति गो. पाठः । ७ रूपाणामिति गो. पाठः ।

एका कथंचिन्मुक्ताहं परिभूय महात्मना । स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥ १२ ॥
भ्राता चास्य महातेजा गुणतस्तुल्यविक्रमः । अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ १३ ॥
अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली । रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ १४ ॥
रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना । धर्मपत्नी प्रिया नित्यं भर्तुः प्रियहिते रता ॥ १५ ॥
सा सुकेशी सुनासोरूः सुरूपा च यशस्विनी । देवतेव वनस्यास्य राजते श्रीरिवापरा ॥ १६ ॥
तप्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा । सीता नाम वरारोहा वैदेही तनुमध्यमा ॥ १७ ॥
नैव देवी न गन्धर्वी न यक्षी न च किंनरी । तथारूपा मया नारी दृष्टपूर्वा महीतले ॥ १८ ॥
यस्य सीता भवेद्भार्या यं च हृष्टा परिष्वजेत् । अभिजीवेत्स सर्वेषु लोकेष्वपि पुरंदरात् ॥ १९ ॥
सा सुशीला वपुःश्लाघ्या रूपेणाप्रतिमा भुवि । तवानुरूपा भार्या सा त्वं च तस्याः पतिर्वरः ॥ २० ॥

१२–१३] ति० टी०–पूर्वतनं स्वदत्तं गोपायन्त्याह–एकेति । परिभूय नासाकर्णहीनां कृत्वा ॥ १२ ॥ १३ ॥

रा० टी०–एकेति । स्त्रीवधं शङ्कमानेन महात्मना रामेण एकाहं परिभूय कथंचिन्मुक्ता ॥ १२ ॥

गो० टी०–एकेति । स्त्रीवधं शङ्कमानेन स्त्रीवधो भविष्यतीति शङ्कमाननेत्यर्थः ॥ ११ ॥

रा० टी०–भ्रातेति । तुल्यविक्रमो महातेजा लक्ष्मणो नाम अस्य भ्राता गुणतः रामनिष्ठातिसौशील्यादेर्हेतोः अनुरक्तः रामविषयकात्यनुरागवान् भक्तः तत्सेवानिरतश्च ॥ १३ ॥

गो० टी०–भ्रातेति । अनुरक्तः अनुरागवान् भक्तः तत्कार्यभजनशीलः दक्षिणो बाहुरित्यनेन सर्वकार्यधुरंधरत्वमुक्तं प्राणत्वरूपणेन निरतिशयप्रेमास्पदत्वम् अनुरक्त इत्यस्य दृष्टान्तोऽयमिति न पुनरुक्तिः ॥ १२ ॥ १३ ॥

१४–१८] ति० टी०–रामस्य दक्षिणो बाहुरित्यनेन सर्वतत्कार्यधुरंधरत्वम् । बहिश्चरः प्राण इत्यनेन निरतिशयप्रेमास्पदत्वं सूच्यते ॥ १४–१८ ॥

रा० टी०–अमर्षीति । अमर्षी रामापराधासहनशीलः विक्रान्तः कामचारगमनवान् लक्ष्मण इति शेषः । रामस्य दक्षिणो बाहुरिव सर्वकार्यसाधक इत्यर्थः, बहिश्चरः प्राण इव अतिप्रिय इत्यर्थः ॥ १४ ॥

रा० टी०–रामस्येति । विशालाक्षी विशालनेत्रविशिष्टा भर्तुः प्रियहिते नित्यं रता अत एव भर्तुः नित्यं प्रिया सुकेशी शोभनकेशवती तप्तकाञ्चनवर्णाभा रक्तानि तुङ्गनखानि यस्याः सा तनुमध्यमा अस्य वनस्य अपरा श्रीरिव देवतेव च या राजते सा वरारोहा सीता नाम रामस्य धर्मपत्नी । श्लोकत्रयमेकान्वयि ॥ १५–१७ ॥

गो० टी०–रामस्येति । रामस्य प्रियाऽस्तीत्यन्वयः॥१४॥

गो० टी०–तां वर्णयति—सेत्यादिना । यशस्विनी उक्तरूपादिमत्त्वकीर्तिमती वनस्य देवतेव स्थिता श्रीरिव राजते तप्तकाञ्चनवर्णाभा तप्तकाञ्चनवर्णतुल्या आभा यस्याः सा वैदेही विदेहराजेन पुत्रीकृता ॥ १५ ॥ १६ ॥

रा० टी०–नेति । यथारूपा नारी सीता मया महीतले दृष्टपूर्वा दृष्टं दर्शनं पूर्वं यस्याः सा तथारूपा नारी दिव्यादिर्न ॥१८॥

गो० टी०–नैव देवीति । एवंरूपा देवी च न दृष्टपूर्वा गन्धर्वी च न दृष्टपूर्वा यक्षी च न दृष्टपूर्वा किन्नरी च न दृष्टपूर्वा एवंरूपा नारी महीतलेऽपि न दृष्टपूर्वा इत्यन्वयः । उत्तरार्धे महीतल इत्यनेन पूर्वार्धे स्वर्गलोक इति सिद्धं दिव्यादीनां तत्रैव वाससंभवात्, यद्वा महीतल इति सर्वलोकोपलक्षणम् ॥ १७ ॥

१९–२०] ति० टी०–यस्य सीता भार्या यं च हृष्टा परिष्वजेत्स एव सर्वेषु कालेषु लोकेषु च पुरंदरादप्यभ्यधिकं जीवेत् । तस्या लक्ष्म्यवतारत्वादिति व्यङ्ग्यम् ॥ १९ ॥ २० ॥

रा० टी०–यस्येति । सीता यस्य भार्या भवेत् अत एव हृष्टा सती यं परिष्वजेत् स पुरुषः सर्वेषु लोकेषु पुरन्दरादप्यधिकमभिजीवेत् ॥ १९ ॥

गो० टी०–यस्येति । परिष्वङ्गं विना भार्यात्वेन स्थिता चेत् सः सर्वेषु लोकेषु सर्वानपि लोकान् अतिजीवेत् अतीत्य जीवेत् सर्वलोकोत्तीर्णपरमसुखमयजीवन इत्यर्थः, परिष्वङ्गाभावेऽपि सदा सन्निधानादिसौख्यादिति भावः, भार्यात्वं विनापि यं सकृत् परिष्वजेत् सः पुरंदरादपि पुरंदरमपि अतिजीवेत् अतिशय्य जीवेत् ॥ १८ ॥

रा० टी०–सेति । सुशीला शोभनशीलवती वपुःश्लाघ्या वपुः श्लाघ्यं स्तुत्यं यस्याः सा रूपेण अप्रतिमा असदृशी सा सीता तव भार्या सा त्वद्भार्या प्रकाशिका अतः तस्याः वरः श्रेष्ठः पतिः पालको भव ॥ २० ॥

गो० टी०–सा सुशीलेति । वपुःश्लाघ्या वपुषा श्लाघ्या सर्वानवद्याङ्गीत्यर्थः ॥ १९ ॥

---

१ सुनासोरुरिति गो. पाठः । २ नैवंरूपेति गो. पाठः । ३ अनीति गो. पाठः । ४ स्थादिति गो. पाठः । ५ तथा पतिरिति गो. पाठः ।

ता तु विस्तीर्णजघनां पीनोत्तुङ्गपयोधराम् । भार्यार्थे तव तावानेतुमुद्यताहं वराननाम् ॥ २१ ॥
विरूपितास्मि क्रूरेण लक्ष्मणेन महाभुज । तां तु दृष्ट्वाद्य वैदेहीं पूर्णचन्द्रनिभाननाम् ॥ २२ ॥
मन्मथस्य शराणां च त्वं विधेयो भविष्यसि । यदि तस्यामभिप्रायो भार्यात्वे तव जायते ॥
शीघ्रमुद्क्रियतां पादो जयार्थमिह दक्षिणः । [कुरु प्रियं तथा तेषां रक्षसां राक्षसेश्वर ।
वधात्तस्य नृशंसस्य रामस्याश्रमवासिनः ॥ तं शरैर्निशितैर्हत्वा लक्ष्मणं च महारथम् ।
हतनाथां सुखं सीतां यथावदुपभोक्ष्यसि ॥] ॥ २३ ॥
रोचते यदि ते वाक्यं ममैतद्राक्षसेश्वर । क्रियतां निर्विशङ्केन वचनं मम रावण ॥ २४ ॥
विज्ञायैषामशक्तिं च क्रियतां च महाबल । सीता तावानवद्याङ्गी भार्यात्वे राक्षसेश्वर ॥ २५ ॥

निशम्य रामेण शरैरजिह्मगैर्हताञ्जनस्थानगतान्निशाचरान् ।
खरं च दृष्ट्वा निहतं च दूषणं त्वमद्य कृत्यं प्रतिपत्तुमर्हसि ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

२१-२२] ति० टी०—तावानेतुमुद्यताहमिति मृषावचो रावणसंतोषार्थम् ॥ २१ ॥ २२ ॥

रा० टी—केन त्वं च विरूपिता इत्यस्योत्तरं संकोचात्स्वविषयकप्रीत्युत्पत्तेश्च मृषावचनेनाह—तामिति । वरानना तां सीतां तव भार्यार्थे आनेतुमहमुद्यता अतः क्रूरेण लक्ष्मणेनाहं विरूपितास्मि । सार्धश्लोक एकान्वयी ॥ २१ ॥

रा०टी०—नन्वु किमर्थमेवं प्रयत्नस्त्वया कृत इत्यत आह—तामिति । तां वैदेहीं दृष्ट्वैव मन्मथस्य शराणां विधेयः लक्ष्यस्त्वं भविष्यसि नित्तरां चिन्तयिष्यसि एतेन तव प्रियार्थमेवायं यत्नः कृत इति सूचितम् ॥ २२ ॥

गो० टी०—तां त्विति । विस्तीर्णजघनां विशालजघनां तव चेत्यन्वयः ॥ २०—२४ ॥

२३-२४] ति० टी०—भार्यात्वे भार्यात्वेन संपादने ॥ २३ ॥ २४ ॥

रा० टी०—यदीति । तस्यां सीतायां भार्यात्वे भरणीयात्वेन स्वीकारे यदि तेऽभिप्राय इच्छाविशेषो जायते तर्हि इहास्मिन् क्षणे जयार्थं दक्षिणः पादः शीघ्रमुद्क्रियताम् ॥ २३ ॥

रा० टी०—रोचत इति । हे राक्षसेश्वर ! मम एतद्वाक्यं यदि ते रोचते तर्हि निर्विशङ्केन त्वया मम वचनं क्रियताम् ॥ २४ ॥

गो० टी०—रोचत इति । ते तुभ्यम् " रुच्यर्थानां प्रीयमाणः " इति चतुर्थी । निर्विशङ्केन त्वयेति शेषः ॥ २५ ॥

२५] ति टी०—एषां रामादीनामशक्तिं तेषां राज्यायभावाद्यकारात्तव शक्तिं च विज्ञाय सीता तव भार्यात्वे क्रियताम्, भार्यात्वे तद्व्यवहारे यथा विषयो भवति तथा क्रियताम् यत्यतामित्यर्थः ॥ २५ ॥

रा० टी०—विज्ञायेति । हे महाबल ! हे राक्षसेश्वर ! एषां राक्षसानामशक्तिं रामजयकारकशक्त्यभावं विज्ञाय अनवद्याङ्गी सीता तव भार्यात्वे भरणीयात्वे क्रियतां सीता ह्रियतामित्यर्थः, एतेन सीतापहरणे रामः प्राणान्न धारयितेति सूचितम् ॥ २५ ॥

गो० टी०—विज्ञायेति । आत्मशक्तिं स्वबलम् ' शक्तिर्बले प्रभावादौ ' इति विश्वः । विज्ञाय पर्यालोच्य बलात् पौरुषेण सीता भार्यार्थे ह्रियताम् ॥ २६ ॥

२६] ति० टी०—अथ कृत्यमेतत्कालोचितकृत्यं कर्तुं योग्यं तत्प्रतिपत्तुं निश्चित्य ज्ञात्वा प्रवर्तयितुमर्हसीत्यर्थः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०—निशम्येति । रामेण अजिह्मगैः शरैः हतान् जनस्थानगतान् निशाचरान् हतं खरं दूषणं च निशम्य श्रुत्वा अथ कृत्यं प्रतिपत्तुं निश्चेतुमर्हसि ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०—उक्तमर्थं सर्गान्ते पुनः संगृह्णाति—निशम्येति । प्रतिपत्तुं ज्ञातुम् ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

---

१ श्रोणीपय इति गो. पाठः । २ चेति गो. पाठः । ३ वै इति गो. पाठः । ४ श्लोकद्वयमेतदधिकं गो. पाठे । ५ इहास्मेति गो. पाठः । ६ ह्रियताम. बला बलादिति गो. पाठः । ७ सर्वानवद्येति गो. पाठः । ८ भार्यार्थं इति गो. पाठः । ९ वृद्धेति गो. पाठः । १० अत्रेति गो. पाठः ।

पञ्चत्रिंशः सर्गः ।

निश्चितसीतापहारः सूज्वलपरिच्छदपरिवारितो रथारूढ उत्साही रावणो दक्षिणसागरानूपान्यतिक्रामन्नमृताहरणोद्यतसुपर्णाधिष्ठानं सुभद्र नाम न्यग्रोधमवलोक्य मारीचाश्रमं प्राप । तेन कृतानिष्टः पृष्टश्च स्वागमनहेतुं निवेदितुमुपक्रमते ।

ततः शूर्पणखावाक्यं तच्छ्रुत्वा रोमहर्षणम् । सचिवानभ्यनुज्ञाय कार्यं बुद्ध्वा जगाम ह ॥ १ ॥
तत्कार्यमनुगम्यान्तर्यथावदुपलभ्य च । दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ २ ॥
इति कर्तव्यमित्येव कृत्वा निश्चयमात्मनः । स्थिरबुद्धिस्ततो रम्यां यानशालां जगाम ह ॥ ३ ॥
यानशालां ततो गत्वा प्रच्छन्नं राक्षसाधिपः । सूतं संचोदयामास रथः संयुज्यतामिति ॥ ४ ॥
एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः । रथं संयोजयामास तस्याभिमतमुत्तमम् ॥ ५ ॥
कामगं रथमास्थाय काञ्चनं रत्नभूषितम् । पिशाचवदनैर्युक्तं खरैः कनकभूषणैः ॥ ६ ॥

१] ति० टी०–तत इति 'शूर्प शोणितभाजनम्' । 'नख विदूषणे' इति धातुः । शूर्पेण शोणितभाजनेन यज्ञादि सात्त्विकयां नखयति विदूषयतीति शूर्पणखेति तीर्थः । शूर्पाकारनखवतीत्यर्थे संज्ञायां शूर्पणखा, अन्यत्र शूर्पणखीति परे । रोमहर्षणं शूर्पणखावाक्यस्य कामविकारजनकतया रोमाञ्चकरत्वं सचिवेभ्यस्तद्वाक्यस्य प्रतिपाद्यं कार्यं बुद्ध्वा तत्संमतिपूर्वकं तत्कर्तव्यत्वेन निर्धार्य तानभ्यनुज्ञाय दत्ताभ्यनुज्ञान्कृत्वा जगाम । मारीचाश्रममिति शेषः ॥ १ ॥

रा० टी०–शूर्पणखावचनश्रवणानन्तरकालिकं रावणवृत्तान्तमाह–तत इत्यादिभिः । ततः शूर्पणखाकथनोत्तरकाले रोमहर्षणं शूर्पणखावाक्यं श्रुत्वा कार्यं स्वकर्तव्यं बुद्ध्वा निश्चित्य सचिवान् अनुज्ञाय जगाम मारीचाश्रममिति शेषः ॥ १ ॥

गो० टी०–यद्वाहनस्य माहात्म्यं सर्वेषां विस्मयावहम् ।
अवतीर्णं रघोर्वंशे तमहं विष्णुमाश्रये ॥

ततः शूर्पणखावाक्यमित्यादि । रोमहर्षणं भयोत्पादकत्वेन रोमाञ्चकरं सचिवसुखेन कार्यं बुद्ध्वा तानभ्यनुज्ञाय विसृज्य ॥ १ ॥

२–३] ति० टी०–तत्कार्यं सीतापहाररूपम् । अन्तश्चित्ते अनुगम्योद्दिश्य दोषाणां गुणानां च स्वरूपं यथावदुपलभ्य सीतापहारे एतावन्तो गुणा इति निश्चित्य बलाबलं यथावत्संप्रधार्य इत्येवं कर्तव्यमित्यात्मनः स्वस्य निश्चयं कृत्वा अकम्पनशूर्पणखाभ्यामुक्तत्वात्सीताहरणमवश्यं कर्तव्यमिति निश्चित्य यानशालां जगाम ॥ २ ॥ ३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेण वदन्नाह–तदिति । तत् शूर्पणखाबोधितापहरणं कार्यमन्तर्मनसि अनुगम्य संस्थाप्य यथावदुपलभ्य विचार्य च तत्र दोषाणाम् 'अहो दुरन्ता बलवद्विरोधिता' इत्यादीनां गुणानां 'महात्मभिः सह विरोधोऽपि वरम्' इत्यादीनां बलाबलं प्रधार्य विचार्य महात्मभिर्विरोधमेवोत्कृष्टत्वेन स्वीकृत्येत्यर्थः, ततो हेतोः इति इदमपहरणं कर्तव्यमित्येव आत्मनो निश्चयं कृत्वा स्थिरबुद्धिः सन् रावणः रम्यां यानशालां यानस्थितिदेशं जगाम । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–तदित्यादिश्लोकद्वयमेकान्वयम् । अनुगम्य स्वयमनुसंधाय पर्यालोच्येत्यर्थः । यथावदुपलभ्य इदमित्थमिति निश्चित्य पुनरपि दार्ढ्याय गुणदोषप्राबल्यदौर्बल्यविषयचिन्तां निर्णयान्तां दर्शयति–दोषाणां चेति । इदमत्र संप्रधार्य स्वेन चिकीर्षितं सीतापहारलक्षणं कार्यं किं पौरुषेण सुकरम् आहोस्विच्चौर्येण कर्तव्यमिति कतरस्मिन् पक्षे दोषाल्पत्वं गुणभूयस्त्वमिति तत्र पौरुषेण कर्तुमशक्यं खरादियुद्धे रामस्याचिन्त्यपराक्रमत्वेन श्रुतत्वात् उपायपरिकल्पितचौर्याश्रयणे तादात्विकदोषा न लक्ष्यन्ते सीतारहितेन तद्वियुक्तेन रामेण कापि हानिर्न संभाव्यते तस्मादयमेव पक्षः सम्यगिति एवं निश्चित्य प्रावर्ततेत्यर्थः । स्थिरबुद्धिः निश्चलबुद्धिः यानशालाम् अश्वशालाम् ॥ २ ॥ ३ ॥

४–५] ति० टी०–दुष्टे कर्मणि प्रवृत्तौ दहादिनिरोधशङ्कया प्रच्छन्नं गुप्तम् ॥ ४ ॥ ५ ॥

रा० टी०–यानेति । प्रच्छन्नं यथा भवति तथा राक्षसाधिपः यानशालां गत्वा रथः संयुज्यतां संयोज्यतामिति सूतं संचोदयामास ॥ ४ ॥

रा० टी०–एवमिति । एवमुक्तो लघुविक्रमः सारथिः तस्य रावणस्याभिमतमिच्छाविषयीभूतमुत्तमं रथं संयोजयामास ॥ ५ ॥

गो० टी०–यानशालामिति । प्रच्छन्न इति प्रकाशश्चेद्वृद्धा मन्दोदर्यादयश्च वारयिष्यन्तीति भावः, यद्वा पौरुषं विहाय चौर्यमार्गाश्रयणं लज्जावहमिति प्रच्छन्नमार्गाश्रयणं यद्वा तत इत्यादि । सचिवान् तदानीं सभास्थितान् विसृज्य स्वयं कार्यं बुद्ध्येत्यर्थः । अत एव सचिवैः पर्यालोचनाभावात् प्रच्छन्न इत्युक्तम् । अत एव कुम्भकर्णादिभिरुच्यते । सचिवैरमन्त्रयित्वा कृतस्य कथमिदानीं प्रतीकार इति । खरलक्षणं पूर्वमुक्तम् ॥ ४—७ ॥

६] ति० टी०–देवयोनिभेदाः पिशाचाः, वदनभागे तत्सदृशैरित्यर्थः ॥ ६ ॥

१ स इति गो. पाठः । २ अथेति गो. पाठः । ३ प्रच्छन्न इति गो. पाठः । ४ योज्यतामिति गो. पाठः । ५ काञ्चनमिति गो. पाठः । ६ कामगमिति गो. पाठः । ७ काञ्चनेति गो. पाठः ।

मेघप्रतिमनादेन स तेन धनदानुजः । राक्षसाधिपतिः श्रीमान्ययौ नदनदीपतिम् ॥ ७ ॥
स श्वेतवालव्यजनः श्वेतच्छत्रो दशाननः । स्निग्धवैदूर्यसंकाशस्तप्तकाञ्चनभूषणः ॥ ८ ॥
दैशग्रीवो विंशतिभुजो दर्शनीयपरिच्छदः । त्रिदशारिर्मुनीन्द्रघ्नो दशशीर्ष इवाद्रिराट् ॥ ९ ॥
कामगं रथमास्थाय शुशुभे राक्षसाधिपः । विद्युन्मण्डलवान्मेघः सबलाक इवाम्बरे ॥ १० ॥
सशैलसागरानूपं वीर्यवानवलोकयन् । नानापुष्पफलैर्वृक्षैरनुकीर्णं सहस्रशः ॥ ११ ॥
शीतमङ्गलतोयाभिः पद्मिनीभिः समन्ततः । विशालैराश्रमपदैर्वेदिमद्भिरलंकृतम् ॥ १२ ॥
कदल्यटविसंशोभं नारिकेलोपशोभितम् । सालैस्तालैस्तमालैश्च तरुभिश्च सुपुष्पितैः ॥ १३ ॥
अत्यन्तनियताहारैः शोभितं परमर्षिभिः । नागैः सुपर्णैर्गन्धर्वैः किंनरैश्च सहस्रशः ॥ १४ ॥
जितकामैश्च सिद्धैश्च चारणैश्चोपशोभितम् । आजैर्वैखानसैर्मार्षैर्वालखिल्यैर्मरीचिपैः ॥ १५ ॥
दिव्यास्रगाभरणाभिर्दिव्यरूपाभिरावृतम् । क्रीडारतैर्विधिज्ञाभिरप्सरोभिः सहस्रशः ॥ १६ ॥

७-९] ति० टी०-नदनदीपतिः समुद्रः तं तीर्त्वा ययौ ॥ ७-९ ॥

१०] ति० टी०-विद्युत्स्थाने आभरणानि, मेघस्थाने रावणः, बलाकास्थाने छत्रम् ॥ १० ॥

रा० टी०-कामगमिति । पिशाचवदनैः पिशाचा देवयोनयः तत्सदृशमुखैः कनकभूषणैः खरैर्युक्तं रत्नभूषितं काञ्चनं कामगं रथमास्थाय राक्षसाधिपतिः धनदानुजो मेघप्रतिमवचनेनोपलक्षितो रावणः नदनदीपतिं समुद्रं ययौ । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

रा० टी०-स इति । श्वेतं शुक्लं वालानां चमरीपुच्छकेशानां व्यजनं यस्य सः श्वेतछत्रः शुक्लच्छत्रविशिष्टः दशाननः दशमुखविशिष्टः दर्शनीयपरिच्छदः दर्शनीयसामग्रीविशिष्टः मुनीन्द्रघ्नः मुनीन्द्राणां घातकः दशशीर्षादिराट्सदृशः राक्षसाधिपो रावणः कामगं रथमास्थाय अम्बरे आकाशे सबलाकः बकपङ्क्तिसहितः विद्युन्मण्डलवान्मेघ इव शुशुभे तत्र सुवर्णाभरणानां विद्युन्मण्डलोपमा छत्रस्य च बलाकोपमा रावणस्य च मेघोपमा । श्लोकत्रयमेकान्वयि ॥ ८-१० ॥

गो० टी०-स श्वेतवालव्यजन इत्यादि । विद्युत्स्थाने आभरणानि मेघस्थाने रावणः बलाकस्थाने अलंकृतरथः ॥ ८-१० ॥

११-१२] ति० टी०-शैलसहितसागरानूपं तत्कूलम् तस्यैव वर्णनं नानापुष्पैरित्यादिना ॥ ११ ॥ १२ ॥

रा० टी०-सेति । पुष्पादिभिरवकीर्णं व्याप्तम् ॥ ११ ॥

रा० टी०-शीतमङ्गलतोयाभिः पद्मिनीभिः सरसीभिः वेदिमद्भिः विशालैः आश्रमपदैश्च अलंकृतम् ॥ १२ ॥

गो० टी०-सशैलमित्यादि । सशैलं शैलसहितं सागरानूपं समुद्रतीरं मङ्गलतोयाभिः शुभजलाभिः पद्मिनीभिरिति समाहृतमित्यनुकर्षः । आदकिः मृषोपयुक्तधान्यरतम्बः सुपर्णैः गरुडैः अजैः अयोनिजैः वैखानसैः ब्रह्मनखजैः " ये नखास्ते वैखानसाः " इति श्रुतेः । मार्षैः मार्षगोत्रजैः वालखिल्यैः ब्रह्मवालजैः " ये वालास्ते वालखिल्याः " इति श्रुतेः । मरीचिपैः रविकिरणपानव्रतनिष्ठैः अमृताशिभिः देवैश्चेति शेषः, यद्वा ऋतामृताभ्यां जीवेतेत्युक्तायाचितलब्धाशिभिः । ' ऋतमुञ्छशिलं प्रोक्तममृतं स्यादयाचितम् ' इति मनुः । प्लवा जलकुक्कुटाः मण्डूका इत्यप्याहुः । वैडूर्यप्रस्तरं वैडूर्यमयाः प्रस्तराः शिलाः यस्मिन् तम् ' पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ' इत्यमरः । तपसा जितलोकानां पुरुषाणां विमानानीत्यन्वयः । अभिसंपतन् मार्गवशात् प्राप्नुवन् सशैलं नानापुष्पफलैर्वृक्षैरनुकीर्णमित्याख्याय सागरतेजसा स्निग्धमित्यन्तविशेषणविशिष्टं सागरानूपमवलोकयन् पाण्डुरस्वादिविशेषणविशिष्टानि तपसा जितलोकानां विमानान्यभिसंपतन् गन्धर्वाप्सरसो ददर्शेत्यन्वयः ॥ ११—२० ॥

१३] ति०टी०-कदल्यटविः कदलीवनं तेन शोभावत्॥१३॥

१४] ति० टी०-अत्यन्तमतिशयेन पर्णवातादिरूपो नियत आहारो येषां तैः ॥ १४ ॥

रा० टी०-कदल्यटविभिः कदलीवनैः संशोभा यस्य तम् सालादिभिः अत्यन्तनियताहारैः परमर्षिभिः नागादिभिश्चोपशोभितम् ॥ १३ ॥ १४ ॥

१५-१६] ति० टी०-अजो ब्रह्मा तत्पुत्रैर्वैखानसैरयोनिजैः प्रसिद्धैः । मार्षैर्मार्षसंज्ञकैः ॥ १५ ॥ १६ ॥

रा० टी०-जितकामैः सिद्धैः चारणैश्च आजैः अजस्य

---

१ कुण्डल इति गो. पाठः । २ विंशद्भुजो दशग्रीव इति गो. दशास्य इति रा. पाठः । ३ ईश्वर इति गो. पाठः । ४ ०शैलमिति गो. पाठः । ५ समाहृतमिति गो. पाठः । ६ कदल्यादकिसंबाधमिति गो. पाठः । ७ पुष्पितैस्तरुभिर्वृतामिति गो. पाठः । ८ एतदार्धचतुष्टयं व्यत्यस्तं गो. पाठे । ९ उपेति गो. पाठः । १० अजैरिति गो. पाठः । ११ रतीति गो. रसेति रा. पाठः ।

सेवितं देवपत्नीभिः श्रीमतीभिरुपासितम् । देवदानवसङ्घैश्च चरितं त्वमृताशिभिः ॥ १७ ॥
हंसकौञ्चप्लवाकीर्णं सारसैः संप्रसादितम् । वैदूर्यप्रस्तरं स्निग्धं सान्द्रं सागरतेजसा ॥ १८ ॥
पाण्डुराणि विशालानि दिव्यमाल्ययुतानि च । तूर्यगीताभिजुष्टानि विमानानि समन्ततः ॥ १९ ॥
तपसा जितलोकानां कामगान्यभिसंपतन् । गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः ॥ २० ॥
निर्यासरसमूलानां चन्दनानां सहस्रशः । वनानि पश्यन्सौम्यानि घ्राणतृप्तिकराणि च ॥ २१ ॥
अगुरूणां च मुख्यानां वनान्युपवनानि च । तक्कोलानां च जात्यानां फलानां च सुगन्धिनाम् ॥२२॥
पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च । मुक्तानां च समूहानि शुष्यमाणानि तीरतः ॥ २३ ॥
शैलानि प्रवरांश्चैव प्रवालनिचयांस्तथा । काञ्चनानि च शृङ्गाणि राजतानि तथैव च ॥ २४ ॥
प्रस्रवाणि मनोज्ञानि प्रसन्नान्यद्भुतानि च । धनधान्योपपन्नानि स्फीतैरावृतानि च ॥ २५ ॥
हस्त्यश्वरथगाढानि नगराणि विलोकयन् । तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम् ॥ २६ ॥

ब्रह्मण इमे तैः, किंच शरीरसंबन्धेनोत्पत्तिरहितैः मानसैरित्यर्थः, आकीर्णदर्थे । किंच स्वसिद्धयाऽनेकशरीरधारिभिः वैखानसैः ब्रह्मनखोत्पन्नैः श्रुतिश्च "ये नखास्ते वैखानसाः" इति मार्षैर्माषाभिधैः वालखिल्यैः ब्रह्मकेशजैः । तथा च श्रुतिः "ये वालास्ते वालखिल्याः" इति मरीचिपैः । किरणमात्रपानकर्तृभिश्च शोभितम् ॥ १६ ॥

रा० टी०-दिव्याभरणमाल्याभिः दिव्याभरणमाल्यविशिष्टाभिः क्रीडारसविधिज्ञाभिः क्रीडारसोत्पादननिपुणाभिः सहस्रशोऽप्सरोभिरावृतम् ॥ १६ ॥

१७] ति० टी०-अमृताशिभिरमृतभोजनैः ॥ १७ ॥

रा० टी०-श्रीमतीभिः देवपत्नीभिः सेवितमत एव उपासितं प्रकाशितं देवादिभिश्च वरितम् ॥ १७ ॥

१८-१९] ति० टी०-प्लवा मण्डूकाः । वैदूर्यप्रस्तरं वैदूर्यसदृशश्यामप्रस्तरम् । सागरतेजसा सागरोर्मिवैभवेन स्निग्धं सान्द्रं शीतलम् ॥ १८ ॥ १९ ॥

रा० टी०-हंसादिभिः आकीर्णं सारसैः संप्रसादितं संशोभितं वैदूर्यप्रस्तरं वैदूर्यसदृशश्यामप्रस्तरविशिष्टं सागरतेजसा स्निग्धम् अतिस्नेहोत्पादकं सान्द्रं चिक्कणं सशैलसागरापं शैलसहितसागरदेशम् ॥ १८ ॥

२०] ति० टी०-अभिसंपतन्नाच्छन्मार्गवशाद्विमानानि गन्धर्वाप्सरसश्च ददर्श ॥ २० ॥

रा० टी०-अभिसंपतन् गच्छन् अवलोकयंश्च सन् धनदानुजो रावणः पाण्डुराणि पाण्डुरवर्णविशिष्टानि विशालानि विस्तीर्णानि दिव्यमाल्ययुतानि तूर्यगीतैः अभिजुष्टानि सेवितानि तपसा जितलोकानां कामगानि समन्ततो विमानानि गन्धर्वाप्सरसश्च ददर्श । श्लोकदशकमेकान्वयि ॥ १९ ॥ २० ॥

२१] ति० टी०-निर्यासरूपरसयुक्तमूलानां चन्दनानामित्यर्थः । यद्वा निर्यासरसस्य मूलानामुपादानकारणानां गुग्गुलादिवृक्षाणां चन्दनानां च वनानि पश्यन् ॥ २१ ॥

२२-२३] ति० टी०-जात्यानामुत्तमानाम् । तक्कोलासुगन्धफला वृक्षविशेषास्तेषां वनानि पश्यन् ॥ २२ ॥ २३ ॥

रा० टी०-निर्यासेति । निर्यासरूपरसविशिष्टानि मूलानि येषां चन्दनानां सौम्यानि घ्राणतृप्तिकराणि सहस्रशो वनानि पश्यन् मुख्यानामगरूणां जात्यानामुत्तमानां फलिनां फलविशिष्टानां सुगन्धिनाम् अङ्कोलानां वृक्षविशेषाणां च वनान्युपवनानि ॥ २१ ॥ २२ ॥

रा० टी०-तमालस्य पुष्पाणि मरिचस्य गुल्मानि च तीरतः तीरे समूहानि समूहवन्ति शुष्यमाणानि मुक्तानि च ॥ २३ ॥

गो० टी०-निर्यासरसमूलानामित्यादिसार्धश्लोकषट्कमेकान्वयम् । निर्यासरसमूलानां हिङ्गुरूपनिर्यासरसयुक्तमूलानां मूलाख्यौषधीविशेषाणां मूलाख्यौषधीमूलाद्धिङ्गुरूपनिर्यासा उत्पद्यन्त इति प्रसिद्धिः । वनानि अकृत्रिमाणि उपवनानि कृत्रिमाणि तक्कोलानां गन्धद्रव्याणां जात्यानां जातिभवानां फलानां जातिफलानामित्यर्थः, सुगन्धिनाम् उपवनानीत्यन्वयः । गुल्मानि स्तम्बान् मरिचस्य मरीचस्य समूहानीति नपुंसकत्वमार्षं शुष्यमाणानि चिरसङ्कृतत्वेनानार्द्राणीत्यर्थः । तीरतः तीरे शैलानीति नपुंसकत्वमार्षं तथा प्रस्रवहृदशब्दयोः प्रस्तरं समूहं निचयं समूहं प्रस्रवाणि प्रस्रवणानि निर्झरानित्यर्थः । गाढानि निबिडानि एवं बहुधा सागरानुपवर्णनं पुनर्बहुदूरमार्गगमनप्रयासेन मारीचोपदेशान्निवर्त्याध्यवसायविशेषं व्यञ्जयितुम् ॥ २१—२६ ॥

२४] ति० टी०-शैलानि शिलासमूहान् ॥ २४ ॥

रा० टी०-शैलानि शिलाखण्डानि प्रवरान् श्रेष्ठान् प्रवालनिचयांश्च शृङ्गाणि च ॥ २४ ॥

२५] ति० टी०-प्रस्रवाणि निर्झराः ॥ २५ ॥

२६] ति० टी०-समं समभूतलं देशम् ॥ २६ ॥

१ श्रियावृतमिति गो. पाठः । २ स्निग्धमिति गो. पाठः । ३ पाण्डराणीति गो. पाठः । ४ अगर्विति गो. रा. पाठः । ५ अङ्कोलानामिति रा. पाठः । ६ फलिनामिति रा. पाठः । ७ मुक्तानीति रा. पाठः । ८ शङ्खानां प्रस्तरमिति गो. पाठः । ९ निचयमिति गो. निचया इति रा. पाठः । १० शैलानीति गो. पाठः । ११ च सर्वत्र इति गो. पाठः । १२ हृदानीति गो. रा. पाठः । १३ शोभितानीति गो. पाठः । १४ अवेति गो. पाठः.

[1]अनूपे सिन्धुराजस्य ददर्श त्रिदिवोपमम् । तत्रापश्यत्स मेघाभं न्यग्रोधं मुनिभिर्वृतम् ॥ २७ ॥
समन्ताद्यस्य ताः शाखाः शतयोजनमायताः । यस्य हस्तिनमादाय महाकायं च कच्छपम् ॥ २८ ॥
भक्षार्थं गरुडः शाखामाजगाम महाबलः । तस्य नां सहसा शाखां भारेण पतगोत्तमः ॥ २९ ॥
सुपर्णः पर्णबहुलां बभञ्जार्थं महाबलः । तत्र वैखानसा माषा वालखिल्या मरीचिपाः ॥ ३० ॥
[4]अजा बभूवुर्धूम्राश्च संगताः परमर्षयः । तेषां दयार्थं गरुडस्तां शाखां शतयोजनाम् ॥ ३१ ॥
[5]भग्नामादाय वेगेन तौ चोभौ गजकच्छपौ । एकपादेन धर्मात्मा भक्षयित्वा तदामिषम् ॥ ३२ ॥
निषादविषयं हत्वा शाखया पतगोत्तमः । प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन् ॥ ३३ ॥
स [6]तु तेन प्रहर्षेण द्विगुणीकृतविक्रमः । अमृतानयनार्थं वै चकार मतिमान्मतिम् ॥ ३४ ॥
अयोजालानि निर्मथ्य भित्त्वा रत्नगृहं [7]वरम् । महेन्द्रभवनाद्गुप्तमाजहारामृतं ततः ॥ ३५ ॥

रा० टी०—मनोज्ञानि रमणीयानि प्रस्रवणानि निर्झरान् हृदानि च धनधान्योपपन्नानि स्त्रीरत्नैराकुलानि हस्त्यश्वरथगादानि हस्त्यादिभिः संकुलानि नगराणि च विलोकयन् सर्वतः समं स्निग्धं मृदुसंस्पर्शं मारुतो यस्मिन् तं त्रिदिवोपमं स्वर्गतुल्यं सिन्धुराजस्य अन्यं देशं ददर्श। तत्र कूले मेघाभं मुनिभिर्वृतम् न्यग्रोधं स रावणोऽपश्यत्। श्लोकसप्तकमेकान्वयि ॥२६–२७॥

२७] ति० टी०—तत्र समुद्रान्ते ॥ २७ ॥

गो० टी०—यस्य वाहनप्रभावोऽप्यपरिच्छेद्यस्तेन रामेण विरुणद्धि । रावणो मूढ इति परिहसन्नाह—तत्रापश्यदित्यादिना । ताः प्रसिद्धाः ॥ २७ ॥

२८–३३] ति० टी०—यस्य दिव्यवटस्य । प्रसङ्गात्तन्माहात्म्यं कविराह—यस्येति षड्भिः श्लोकैः । गरुडोऽमृताहरणप्रस्तावे भक्षार्थं महाकायं गजं कच्छपं चादाय क्वचित्स्थित्वा भक्षणाय यस्य शाखां जगाम, गत्वा च यस्य शाखां भारेण बभञ्ज । तस्या भग्नशाखाया अधो वैखानसाद्या अनेके ऋषयः समागता बभूवुः । तेषां शाखापातेन नाशो मा भूदिति तां शाखां तौ गजकच्छपौ च महाबलत्वादादायान्यत्र जगाम । तदा गच्छन्नेव तौ शाखां चैकपादेन धृत्वान्तरिक्ष एव तदामिषं गजकच्छपरूपं भक्षयित्वा तया शाखया प्रक्षिप्तया निषादविषयं निषाददेशं हत्वा मुनींश्च वधान्मोक्षयित्वा प्रहर्षं लेभे ॥ २८–३३ ॥

रा० टी०—समन्तादिति । यस्य शाखाः समन्तात् शतयोजनमायताः सन्ति महाकायं हस्तिनं कच्छपं चादाय भक्षार्थं यस्य शाखां महाबलं गरुडः आजगाम पर्णबहुलां तस्य तां शाखां पतगोत्तमः सुपर्णः सहसा बभञ्ज । सार्धश्लोकद्वयमेकान्वयि ॥ २८ ॥ २९ ॥

गो० टी०—यस्येति । गरुडः महाकायं महाप्रमाणं हस्तिनं गजं कच्छपं चादाय यस्य शाखामाजगामेत्यन्वयः । भारेण बभञ्ज न तु यत्नेनेत्यर्थः । महागजकच्छपवहनाद् भारेण शाखा भग्नाऽभूदित्यर्थः ॥ २८ ॥ २९ ॥

रा० टी०—तत्रेति । तत्र न्यग्रोधे वैखानसादयः परमर्षयः संगताः बभूवुः ॥ ३० ॥

गो० टी०—तत्रेति । तत्र शाखाया अधःप्रदेशे ये सङ्गता मरीचिपाः रविकिरणपानव्रताः धूम्राः धूमपाः तेषां दयार्थं शाखापातेन पीडा माभूदिति तदनुग्रहार्थमित्यर्थः, एकपादेन आदाय अवष्टभ्येत्यर्थः, भक्षयित्वा आकाश एवेति शेषः ॥ ३० ॥ ३१ ॥

रा० टी०—तेषामिति । तेषां परमर्षीणां दयार्थं दयाहेतोः वेगेन भग्नां शतयोजनां तां शाखामुभौ गजकच्छपौ च धर्मात्मा गरुडः एकपादेनादाय तदामिषं भक्षयित्वा शाखया तत्प्रक्षेपेण निषादविषयं निषादेशं हत्वा महामुनीन् तच्छाखाधोवर्तिपरमर्षीन् मोक्षयित्वा अतुलं प्रहर्षं लेभे अर्धपञ्चकमेकान्वयि ॥ ३१–३३ ॥

गो० टी०—आमिषं गजकच्छपरूपं मांसं निषादविषयं निषादग्रामं शाखया हत्वा तानपि भक्षयित्वा महामुनीन् वैखानसादीन् निषादविषयस्थब्राह्मणान् वा निषादैः पीड्यमानान्वा तद्रक्षणार्थमेव तद्धननमिति भावः । तादृशशाखारूपप्रहरणलाभेन तदैव मुनिबाधकनिषाददेशं सर्वं हत्वा शिष्टपालनादुष्टनिग्रहाच्चातुलं प्रहर्षं लेभ इति भावः ॥ ३२ ॥ ३३ ॥

३४] ति० टी०—स तेनैव हर्षेणामिषभक्षणनिषादनाशनमुनिरक्षणजसंतोषेण ॥ ३४ ॥

रा० टी०—स इति । तेन स्वपुरुषार्थजन्येन प्रहर्षेण द्विगुणीकृतविक्रमः स गरुडः अमृतानयनार्थं मतिं चकार॥३४॥

गो० टी०—तेनैव भक्षणजन्येनेत्यर्थः । अयोजालानि अयोनिर्मितजालकानि निर्मथ्य ध्वंसयित्वा तदन्तर्वर्तिरत्नमयं गृहं भित्त्वा ततः तदन्तरे गुप्तममृतं महेन्द्रभवनादाजहार ॥ ३४ ॥ ३५ ॥

३५] ति० टी०—अयोजालान्ययःशृङ्खलनिर्मितजालानि रत्नमयगेहोपरि पक्षिप्रवेशपरिहारा बद्धानि बलान्निर्मथ्य छित्त्वा रत्नमयगृहं च भित्त्वा गुप्तममृतं महेन्द्रभवनादाजहार ॥ ३५ ॥

१ अनूपमिति गो. रा. पाठः । २ ऋषिभिरिति गो. पाठः । ३ चेति गो. पाठः । ४ अजा इति गो. पाठः । ५ जगामेति गो. पाठः । ६ तेनैवेति गो. पाठः । ७ मर्थं गृहमिति गो. पाठः ।

तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम् । नात्रा सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥ ३६ ॥
तं तु गत्वा परं पारं समुद्रस्य नदीपतेः । ददर्शाश्रममेकान्ते पुण्ये रम्ये वनान्तरे ॥ ३७ ॥
तत्र कृष्णाजिनधरं जटामण्डलधारिणम् । ददर्श नियताहारं मारीचं नाम राक्षसम् ॥ ३८ ॥
स रावणः समागम्य विधिवत्तेन रक्षसा । मारीचेनार्चितो राजा सर्वकामैरमानुषैः ॥ ३९ ॥
तं स्वयं पूजयित्वा च भोजनेनोदकेन च । अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ४० ॥
कच्चित्ते कुशलं राजल्लङ्कायां राक्षसेश्वर । केनार्थेन पुनस्त्वं वै तूर्णमेव इहागतः ॥ ४१ ॥
एवमुक्तो महातेजा मारीचेन स रावणः । ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ।

जनस्थानवृत्तं निवेदयन् रावणश्चिकीर्षितसीतापहरणे मारीच प्रति साहाय्यं याचतेऽथ रामवार्ताश्रवणमात्रेण त्रस्तविषण्णचेता मारीचो रावणाय हितमुपदेष्टुमुपक्रमते ।

मारीच श्रूयतां तात वचनं मम भाषतः । आर्तोऽस्मि मम चार्तस्य भवान्हि परमा गतिः ॥ १ ॥

रा० टी०–अमृतानयनप्रकारमाह–अथ इत्यादिभिः । अयोजालानि पक्षिप्रवेशाभावाय गृहोपरिक्षिप्तलोहरचितजालानि निर्मथ्य छित्त्वा वरं रत्नगृहम् अमृताधिकरणीभूतवेश्म भित्त्वा गुप्तं तत्र गोपितममृतं ततो महेन्द्रभवनात् आजहार ॥ ३५ ॥

३६–३८] ति० टी०–सुपर्णेन कृतं भग्नैकमहाशाखात्वरूपं लक्षणं यस्य तम् ॥ ३६ ॥ ३८ ॥

रा० टी०–तमिति । महापिंगगणैर्जुष्टं सेवितं सुपर्णकृतलक्षणं गरुडकृतशाखाभङ्गरूपलक्षणविशिष्टं नात्रा सुभद्रं सुभद्रनामानं तं न्यग्रोधं धनदानुजो रावणः ददर्श ॥ ३६ ॥

रा० टी०–तमिति । नदीपतेः समुद्रस्य परं पारं गत्वा रम्ये पुण्ये एकान्ते वनान्तरे वनमध्ये आश्रमं ददर्श ॥ ३७ ॥

गो० टी०–सुपर्णकृतलक्षणं सुपर्णेन गरुडेन कृतं भग्नैकशाखात्वरूपं लक्षणं चिह्नं यस्य ॥ ३६ ॥ ३७ ॥

रा० टी०–तत्रेति । तत्र आश्रमे नियताहारं मारीचं नाम राक्षसं ददर्श ॥ ३८ ॥

गो० टी०–तत्रेति । कृष्णाजिनेत्यादिना रामभक्ततया जनितवैराग्यचिह्नोक्तिः ॥ ३८ ॥

३९–४०] ति० टी०–सर्वकामैरभिलषितसर्वभोग्यवस्तुभिरर्चितो बभूवेति शेषः ॥ ३९ ॥ ४० ॥

रा० टी०–स इति । रक्षसा मारीचेन स रावणः विधिवत्समागम्य अमानुषैः मानुषालभ्यैः सर्वकामैः अर्चित आसीदिति शेषः ॥ ३९ ॥

रा० टी०–तमिति । भोजनेनोदकेन च स रावणं मारीचः स्वयं पूजयित्वा अर्थोपहितया प्रयोजनयुक्तया वाचा अब्रवीत् ४०

गो० टी०–स रावण इति । समागम्य मारीचं प्राप्य सर्वकामैः सर्वभोग्यवस्तुभिः अर्चितो बभूव ॥ ३९ ॥ ४० ॥

४१] ति० टी०–पूजोत्तरं कुशलं पृच्छति–कच्चिदिति ४१

रा० टी०–तद्वचनाकारमाह–कच्चिदिति । हे राक्षसेश्वर! लङ्कायां ते कुशलं कच्चित् केनार्थेन प्रयोजनेन पुनस्त्वं तूर्णमिहागतः ॥ ४१ ॥

गो० टी०–कच्चिदिति । एवं तूर्णम् एकाकितया शीघ्रम् ॥ ४१ ॥

४२] ति० टी०–इदमग्रिमसर्ववक्ष्यमाणम् ॥ ४२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०–एवमिति । मारीचेन एवमुक्तो महातेजाः स रावणः ततः पश्चात् तदुक्तेरनन्तरम् इदं वाक्यमब्रवीत् ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

गो० टी०–एवमिति । इदम् उत्तरसर्गे वक्ष्यमाणम् ॥ ४२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

१] ति० टी०–मारीचेति । तातेत्युपलालनेन कार्यं वदिष्यन्पूर्वं वृत्तं स्मारयति ॥ १ ॥

रा० टी०–रावणोक्तिप्रकारमाह–मारीचेत्यादिभिः । हे मारीच ! हे तात! भाषतो मम वचनं श्रूयताम् । तत्र हेतुः अहमार्तोऽस्मि आर्तस्य मम भवानेव परमा गतिः ॥ १ ॥

गो० टी०–महासमरमध्येऽपि गाम्भीर्यं यस्य निश्चलम् ।
तमहं शिरसा वन्दे जानकीप्राणवल्लभम् ॥

१ बल्कलेति गो. पाठः । २ खिति गो. पाठः । ३ स्खिति गो. पाठः । ४ तूर्णमेनमिति गो. पाठः । ५ तं खिति गो. पाठः ।

जानीषे त्वं जनस्थानं भ्राता यत्र खरो मम । दूषणश्च महाबाहुः स्वसा शूर्पणखा च मे ॥ २ ॥
त्रिशिराश्च महाबाहू राक्षसः पिशिताशनः । अन्ये च बहवः शूरा लब्धलक्षा निशाचराः ॥ ३ ॥
वसन्ति मन्नियोगेन अधिवासं च राक्षसाः । बाधमाना महारण्ये मुनीन्ये[4] धर्मचारिणः ॥ ४ ॥
चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् । शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनाम् ॥ ५ ॥
ते त्विदानीं जनस्थाने वसमाना महाबलाः । संगताः परमायत्ता रामेण सह संयुगे ॥ ६ ॥
नानाशस्त्रप्रहरणाः खरप्रमुखराक्षसाः । तेन संजातरोषेण रामेण रणमूर्धनि ॥ ७ ॥
अनुक्त्वा परुषं किंचिच्छरैर्व्यापारितं धनुः । चतुर्दशसहस्राणि रक्षसामुग्रतेजसाम् ॥ ८ ॥
निहतानि शरैर्दीप्तैर्मानुषेण पदातिना । खरश्च निहतः संख्ये दूषणश्च निपातितः ॥ ९ ॥
हत्वा त्रिशिरसं चापि निर्भया दण्डकाः कृताः । पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः ॥ १० ॥
स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः । अशीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेन्द्रियः ॥ ११ ॥

मारीचेत्यादि । भाषतः भाषमाणस्य ॥ १ ॥

२] ति० टी०–जानीषे इति । भ्रात्रादयो मन्नियोगाज्जनस्थानं प्राप्य वसन्तीति त्वं जानीषे किलेत्यन्वयः ॥ २ ॥

३] ति० टी०–लब्धलक्षा लब्धयुद्धोत्साहाः ॥ ३ ॥

४–५] ति० टी०–अथ तत्र स्थित्वा क्रियमाणं वृत्तं च जानीषे इत्याह अधिवासं चेति । मुनीन्बाधमाना बाधहेतवे हेतौ शानच् । अधिवासं च कुर्वन्ति मन्नियोगादिति शेषः । अधिवास उपद्रव इति कतकः । 'रतिवासम्' इति पाठे रतिवासं रत्या प्रीत्या वासो यत्र कर्मणि तथा ॥ ४ ॥ ५ ॥

रा० टी०–जानीष इति । यत्र खरादयः लब्धलक्षाः प्राप्तयुद्धोत्साहा अन्ये च बहवः शूराः महारण्ये ये धर्मचारिणः तान्मुनीन्बाधमानाः बाधयितुं मन्नियोगेनाधिवासं निरन्तरं वासं वसन्ति कुर्वन्ति तं जनस्थानं त्वं जानीषे । श्लोकत्रयमेकान्वयि ॥ २–४ ॥

रा० टी०–चतुर्दशेति । लब्धलक्षाणां प्राप्तयुद्धोत्साहानां खरचित्तानुवर्तिनां खरानुयायिनां येषां रक्षसां चतुर्दशसहस्राणि इदानीं जनस्थाने सन्तीति शेषः, ते वसमानाः वसन्तः महाबलाः नानाशस्त्रप्रहरणाः खरप्रमुखराक्षसाः परमायत्ताः सन्तः संयुगे रामेण सह संगताः तेन हेतुना संजातरोषेण मानुषेण पदातिना रामेण परुषमपि किंचिदनुक्त्वा तूष्णीमेवेत्यर्थः, शरैर्दीप्तैर्व्यापारितम् अत एव दीप्तैः शरै रक्षसां चतुर्दशसहस्राणि निहतानि खरश्च निहतो दूषणश्च निपातितः त्रिशिरसं च हत्वा दण्डका निर्भयाः कृताः । सार्धश्लोकपञ्चकमेकान्वयि ॥ ५–९ ॥

गो० टी०– कर्तव्यं वक्ष्यन् पूर्ववृत्तं स्मारयति–जानीष इत्यादिना । अनुवर्तिनामित्यन्तमेकं वाक्यम् । खरादयश्चतुर्दशसहस्राणि राक्षसाः जनस्थाने नित्यवासं यथा तथा वसन्तीति जानीष इत्यन्वयः । 'रतिवासम्' इति पाठे रत्या प्रीत्या वासो यस्मिन् कर्मणि ततथा ॥ २–५ ॥

६–७] ति० टी०–चतुर्दशसहस्राणि यानि सन्ति ते त्विदानीमित्यन्वयः । वसमाना वसन्तः रामेण संयुगे संगताः तेन सह समरमकार्षुरित्यर्थः । परमत्यर्थमायत्ताः संनद्धाः॥६॥७॥

८–९] ति० टी०–किंचिदपि परुषमनुक्त्वा शरैः शरमोक्षणव्यापारैर्व्यापारितं संजातव्यापारं कृतम् ॥ ८ ॥ ९ ॥

गो० टी०–ते त्विति । वसमानाः ताच्छील्ये शानच् । संयुगे रामेण सह संगताः रामेण सह युद्धमकुर्वन्नित्यर्थः । परम् अत्यन्तम् आयत्ताः सन्नद्धाः प्रहरणमायुधम् ॥ ६ ॥

गो० टी०–तेनेति । अनुक्त्वा परुषं किंचिदित्यनेन गाम्भीर्यं विवक्ष्यते व्यापारितं संधानमोक्षणव्यापारविशिष्टं कृतं संख्ये युद्धे । 'युद्धमायोधनम्' इत्यारभ्य 'मृधमास्कन्दनं संख्यम्' इत्यमरः ॥ ७–९ ॥

१०] ति० टी०–अथ भगिनीवैरूप्यं निष्कारणं मन्यमानः क्रोधादूषयति रामम्–पित्रेत्यादिना । क्षीणजीवितः निरपराधं स्त्रीवैरूप्यकरणादेव तथात्वं मन्यते ॥ १० ॥

रा० टी०–पित्रेति । क्षत्रियपांसनः क्षत्रियान् पाति रक्षति स एव असनः अतिप्रकाशवान् अशीलः संयुगे शीलरहितः अत एव कर्कशः अत एव तीक्ष्णः अमूर्खो वेदशास्त्रसंपन्न इत्यर्थः, अलुब्धः लोभरहितः जितेन्द्रियः ॥ १० ॥

गो० टी०–पित्रेत्यादि । कर्कशः कठिनहृदयः ॥१०॥११॥

११] ति० टी०–अत एवाशीलोऽजितेन्द्रियश्च अस्थाने क्रोधात् ॥ ११ ॥

रा० टी०–त्यक्तधर्मा त्यक्तः त्याजितो धर्मो राक्षसकर्म येन अत एव अधर्मात्मा राक्षसधर्मामनस्कः अत एव भूतानामस्मदादीनामहिते रतः अत एव तस्य सैन्यस्य हन्ता यो

---

१ स्थाने यथा भ्रातेति गो. पाठः । २ तेजा इति गो. पाठः । ३ नित्येति गो. पाठः । ४ वै इति गो. पाठः । ५ प्रहरणोपेता इति गो. पाठः । ६ तीक्ष्णैरिति गो. पाठः । ७ हतश्च त्रिशिरा इति गो. पाठः । ८ दुःशील इति गो. पाठः ।

त्यक्तधर्मा त्वधर्मात्मा भूतानामहिते रतः । येन वैरं विनाऽरण्ये सत्त्वमास्थाय केवलम् ॥ १२ ॥
कर्णनासापहारेण भगिनी मे विरूपिता । अस्य भार्यां जनस्थानात्सीतां सुरसुतोपमाम् ॥ १३ ॥
आनयिष्यामि विक्रम्य सहायस्तत्र मे भव । त्वया ह्यहं सहायेन पार्श्वस्थेन महाबल ॥ १४ ॥
भ्रातृभिश्च सुरान्सर्वान्नाहमत्राभिचिन्तये । तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस ॥ १५ ॥
वीर्ये युद्धे च दर्पे च नह्यस्ति सदृशस्तव । उपायतो महाञ्शूरो महामायाविशारदः ॥ १६ ॥
एतदर्थमहं प्राप्तस्त्वत्समीपं निशाचर । शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम ॥ १७ ॥
सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः । आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥ १८ ॥
त्वां तु निःसंशयं सीता दृष्ट्वा तु मृगरूपिणम् । गृह्यतामिति भर्तारं लक्ष्मणं चाभिधास्यति ॥ १९ ॥
ततस्तयोरपाये तु शून्ये सीतां यथासुखम् । निराबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव ॥ २० ॥
ततः पश्चात्सुखं रामे भार्याहरणकर्शिते । विस्रब्धं प्रहरिष्यामि कृतार्थेनान्तरात्मना ॥ २१ ॥
तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः । शुष्कं समभवद्वक्त्रं परित्रस्तो बभूव च ॥ २२ ॥

रामः स सभार्यः क्रुद्धेन पित्रा निरस्तः अत एव क्षीणजीवितः प्रजापालनरहितोऽस्तीति शेषः । श्लोकद्वयमेकान्वयि ॥ ११ ॥

१२–१४] ति० टी०–सत्त्वं बलमेव केवलमाश्रित्य न तु धर्मम् ॥ १२–१४ ॥

रा० टी०–येनेति । येन रामेण वैरं विना केवलमसत्त्वं प्राणिविरोधमास्थाय कर्णनासापहारेण मे भगिनी विरूपिता अस्य भार्यां विक्रम्य आनयिष्यामि आनेष्यामि तत्र त्वं सहायो भव । अर्धचतुष्टयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०–येनेति । सत्त्वं बलं केवलमाश्रित्य नतु धर्ममित्यर्थः । ' सत्त्वं बले च जन्तौ च ' इति विश्वः । आनयिष्यामि आनेष्यामि इडार्षः ॥ १२ ॥ १३ ॥

रा० टी०–त्वयेति । पार्श्वस्थेन सहायेन त्वया भ्रातृभिश्च सहायैः सर्वान् सुरान् अहं नात्तुचिन्तये न गणये । सहायशब्दः वचनविपरिणामेनान्यत्राप्यन्वेति ॥ १४ ॥

गो० टी०–त्वयेति । भ्रातृभिः कुम्भकर्णादिभिः समग्रान् संपूर्णान् नाभिचिन्तये न गणयामि ॥ १४ ॥

१५] ति० टी०–भ्रातृभिः कुम्भकर्णादिभिः । नाभिचिन्तये न गणयामि ॥ १५ ॥

१६] ति० टी०–उपायतः उपायेष्वित्यर्थः । तत्रैव हेतुगर्भं विशेषणम्—महामायेत्यादि ॥ १६ ॥

रा० टी०–तदिति । यतः वीर्यादौ ते सदृशो न अतः त्वं समर्थोऽसि तत् तस्माद्धेतोः उपायतः मत्कल्पितयत्नेषु महामायाविशारदस्त्वं मे सहायो भव ॥ १५ ॥ १६ ॥

गो० टी०–तत्सहायो भवेत्यादि । शृणु तत् कर्मेत्यत्र तदिति भिन्नं पदं प्रकृते कार्यसाहाय्ये यत्कर्म कार्यं कर्तव्यं तन्मम वचनाच्छृण्विति संबन्धः ॥ १५ ॥ १७ ॥

१७–१९] ति० टी०–मम साहाय्ये यत्कर्म त्वया कार्यं तत्कर्म शृण्वित्यन्वयः ॥ १७–१९ ॥

रा० टी०–एतदर्थमेव त्वत्समीपमहं प्राप्तः । नतु मया किं साहाय्यं कर्तव्यमित्यत आह–साहाय्ये साहाय्यार्थं यत्कर्म कार्यं कर्तव्यं तत् मे वचनात् शृणु ॥ १७ ॥

रा० टी०–तद्वचनाकारमाह–सौवर्ण इति । रजतबिन्दुभिः उपलक्षितः अत एव चित्रः सौवर्णो मृगो भूत्वा तस्य रामस्याश्रमे सीतायाः प्रमुखे संमुखे चर ॥ १८ ॥

गो० टी०–सौवर्ण इति । प्रमुखे अग्रे ॥ १८ ॥

रा० टी०–नतु किमनेनेत्यत आह–त्वामिति । मृगरूपिणं त्वां दृष्ट्वा गृह्यतामिति भर्तारं लक्ष्मणं च सीता निःसंशयमभिधास्यति ॥ १९ ॥

गो० टी०–त्वामिति । गृह्यतामिति अयमिति शेषः ॥ १९ ॥

२०] ति० टी०–अपायेऽपगमे ॥ २० ॥

रा० टी०–तत इति । ततः तस्मात्स्थानात् तयोः रामलक्ष्मणयोः अपाये अपगमे सति शून्ये रामलक्ष्मणरहितदेशे निराबाधः आबाधारहितोऽहं राहुश्चन्द्रप्रभामिव यथासुखं हरिष्यामि ॥ २० ॥

गो० टी०–तत इति । तयोः रामलक्ष्मणयोः अपाये अपगमे सति शून्ये प्रदेशे निराबाधः अप्रतिबन्धः ॥ २० ॥

२१] ति० टी०–ततः सुखं क्लेशरहितं यथा भवति तथा विस्रब्धं यथा भवति तथा च प्रहरिष्यामि ॥ २१ ॥

रा० टी०–तत इति । ततः पश्चात् भार्यापहरणकर्शिते विस्रब्धं यथा भवति तथाऽहं कृतार्थेन अन्तरात्मना मनसा सुखं प्रहरिष्यामि ॥ २१ ॥

गो० टी०–ततः पश्चादिति । विस्रब्धः निःशङ्कः अन्तरात्मना अन्तस्थधैर्येण ॥ २१ ॥

२२] ति० टी०–रामकथां रामप्रसङ्गं श्रुत्वा मारीचस्तो बभूव तेन त्रासेन च तस्य मुखं शुष्कमभवत् ॥ २२ ॥

१ धर्मो ह्यधर्मात्मेति गो. पाठः । २ आश्रित्येति गो. पाठः । ३ अपहरणादिति गो. पाठः । ४ तस्येति गो. पाठः । ५ सहेति रा. पाठः । ६ युद्धे समग्रांश्चेति गो. पाठः । ७ अन्विति रा. पाठः । ८ उपायश्च इति गो. पाठः । ९ सर्वेति गो. पाठः । १० विस्रब्ध इति गो. पाठः । ११ हेति गो. पाठः ।

ओष्ठौ परिलिहञ्शुष्कौ नेत्रैरनिमिषैरिव । मृतभूत इवार्तस्तु रावणं समुदैक्षत ॥ २३ ॥
स रावणं त्रस्तविषण्णचेता महावने रामपराक्रमज्ञः ।
कृताञ्जलिस्तत्त्वमुवाच वाक्यं हितं च तस्मै हितमात्मनश्च ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

सप्तत्रिंशः सर्गः ।

रावण प्रति सीतारामयोः प्रभावातिशयमनुवर्णयन्मारीचः सीताहरणं ते मरणमेवातस्ततो निवर्तस्वेति प्रार्थयते ।

तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः । प्रत्युवाच महातेजा मारीचो राक्षसेश्वरम् ॥ १ ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः । अप्रियस्य[1] च पथ्यस्य वक्ता[2] भोक्ता[3] च दुर्लभः ॥ २ ॥

रा० टी०–तस्येति । रामकथां श्रुत्वा परित्रस्तो बभूव मारीच इति शेषः, अत एव तस्य प्रसिद्धस्य महात्मनो मारीचस्य वक्त्रं शुष्कं समभवत् ॥ २२ ॥

गो० टी०–तस्येति । सः मारीचः रामकथां श्रुत्वा परित्रस्तो बभूव तेन त्रासेन तस्य वक्त्रं शुष्कं समभवदित्यन्वयः ॥ २२ ॥

२३] ति० टी०–चिन्तावशादनिमिषैरिव नेत्रैरुपलक्षित इति शेषः । मृतभूतो मृतप्रायः ॥ २३ ॥

रा० टी०–ओष्ठाविति । शुष्कौ ओष्ठौ परिलिहन् सन् अनिमिषैः निमेषरहितैरिव नेत्रैः मृतभूत इव आर्तो मारीचः रावणं समुदैक्षत ॥ २३ ॥

गो० टी०–भयकार्यान्तरमाह–ओष्ठाविति । शुष्कौ ओष्ठौ परिलिहन् सः अनिमिषैः निमेषरहितैः नेत्रैः नेत्रव्यापारैः मृतभूत इव मृतजन्तुरिवार्तः सन् रावणं समुदैक्षत ॥ २३ ॥

२४] ति० टी०–आत्मनो हितमित्यार्षी षष्ठी ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०–स इति । महावने रामपराक्रमज्ञः अत एव त्रस्तेन त्रासेन विषण्णं चेतो यस्य स मारीचः कृताञ्जलिः सन् तस्मै रावणाय हितम् आत्मनश्च हितं तत्त्वं वाक्यमुवाच ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

गो० टी०–उत्तरसर्गार्थं संगृह्णाति–स इति । त्रस्तविषण्णचेताः भीतदुःखितमनाः । तत्र हेतुः–रामपराक्रमज्ञ इति । पूर्वं दण्डकारण्ये यो रामपराक्रम आसीत् तज्ज्ञ इत्यर्थः । तस्मै रावणाय हितम् अनपायम् । "हितयोगे च" इति वार्तिकेन चतुर्थी ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

१] ति० टी०–तदिति ॥ १ ॥

रा० टी०–रावणवचनश्रवणानन्तरकालिकीं मारीचोक्तिं माह–तदित्यादिभिः । वाक्यविशारदो मारीचः राक्षसेन्द्रस्य रावणस्य तद्वाक्यं श्रुत्वा राक्षसेश्वरं रावणं प्रत्युवाच ॥ १ ॥

गो० टी०–सीतापतित्वसंभूतमप्रमेयं वहन्महः ।
समस्तापायरहितो रामो जयतु मे धनम् ॥
तच्छ्रुत्वेत्यादि ॥ १ ॥

२] ति० टी०–प्रियवादिनः स्वामिहिताहितविचारमपेक्ष्य राज्ञ आपातप्रियतया संतोषाय तत्कालमधुरवाक्यवक्तारः पुरुषाः सुलभाः । अपि तु अप्रियस्यापि तत्कालमप्रियतया प्रतीयमानस्यापि कालान्तरे पथ्यस्य वचसो वक्ता भृत्यस्तस्य च भोक्ताऽहितवत्प्रतिभासमानमपीदं पथ्यमेवेति ग्रहीता राजा विवेकी दुर्लभः । अतो मयोच्यमानमापाततोऽप्रियमिव भासमानमप्युदर्कं परमहितं शृण्विति शेषः ॥ २ ॥

रा० टी०–तत्प्रतिवचनाकारमाह–सुलभा इति । सततं निरन्तरं प्रियवादिनः स्वाम्यहितमिदमिति ज्ञात्वाऽपि तात्कालिकसंतोषाय हितमेवेदमिति प्रियवक्तारः पुरुषाः सुलभाः बहव सन्तीत्यर्थः, अप्रियस्य स्वामिप्रीत्यविषयीभूतस्य पथ्यस्य स्वामिहितस्य वचनस्य वक्ता राजकल्याणाय हितं कथयिता श्रोता तदनुमन्ता चेत्यर्थः, दुर्लभः अल्पोऽस्तीत्यर्थः । 'भोक्ता' इति पाठेऽप्ययमेवार्थः एतेन वक्ष्यमाणस्ववाक्यस्यापाततोऽप्रियत्वं तत्त्वतश्च प्रियत्वं सूचितम् ॥ २ ॥

गो० टी०–सुलभा इति । सततम् आपत्प्राप्तावपि प्रियवादिनः स्वामिहिताहितविमर्शमुपेक्ष्य केवलं स्वप्रयोजनाय यथेच्छावादशीलाः पुरुषाः सुलभाः राज्ञः अप्रियस्य तु अप्रियस्यापि तत्काले श्रवणकटुतया प्रतीयमानस्यापि कालान्तरे पथ्यस्य हितस्य शुभोदर्कस्येत्यर्थः, वचनस्य वक्ता भृत्यः तथाविधवचनस्य श्रोता च पथ्यभक्षणवन्ममेदं हितमिति ग्रहीता राजा च दुर्लभः अतो मयोच्यमानमप्रियमिव स्थितमपि परमहितमिति गृह्णाणेति भावः ॥ २ ॥

१ महाप्राज्ञ इति गो. पाठः । २ त्विति गो. पाठः । ३ श्रोतेति गो. रा. पाठः ।

न नूनं बुध्यसे रामं महावीर्यगुणोन्नतम् । अयुक्तचारश्चपलो महेन्द्रवरुणोपमम् ॥ ३ ॥
अपि स्वस्ति भवेत्तात सर्वेषामपि रक्षसाम् । अपि रामो न संक्रुद्धः कुर्याल्लोकान्निराक्षसान् ॥ ४ ॥
अपि ते जीवितान्ताय नोत्पन्ना जनकात्मजा । अपि सीतानिमित्तं च न भवेद्व्यसनं महत् ॥ ५ ॥
अपि त्वामीश्वरं प्राप्य कामवृत्तं निरङ्कुशम् । न विनश्येत्पुरी लङ्का त्वया सह सराक्षसा ॥ ६ ॥
त्वद्विधः कामवृत्तो हि दुःशीलः पापमन्त्रितः । आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥ ७ ॥
न च पित्रा परित्यक्तो नामर्यादः कथंचन । न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः ॥ ८ ॥
न च धर्मगुणैर्हीनः कौसल्यानन्दवर्धनः । न चैव तीक्ष्णो हि भूतानां सर्वभूतहिते रतः ॥ ९ ॥
वञ्चितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनम् । करिष्यामीति धर्मात्मा तैतः प्रव्रजितो वनम् ॥ १० ॥

३] ति० टी०—अबोधे हेतुः—अयुक्तचारत्वमनियुक्तचारत्वम् ॥ ३ ॥

रा० टी०—नन्वेतावता प्रकृते किमायातमित्यत आह—नेति। महेन्द्रवरुणोपमं महावीर्यम् अतिपराक्रमवन्तं गुणोन्नतं गुणैः समाधिकरहितसौशील्यादिभिः उन्नतं सर्वश्रेष्ठं रामं चपलः स्वस्थचित्तरहितः अत एव अयुक्तचारः न युक्ताः लोकवृत्तान्तज्ञानार्थं नियोजिताः चाराः प्रेष्या येन स त्वं न बुध्यसे तद्बलादिकं न जानासीत्यर्थः, ननं निश्चितमेतत्। एतेन तद्बलादिज्ञाने तद्विरोधविषया ते बुद्धिर्न स्यादिति सूचितम् ॥ ३ ॥

गो० टी०—पथ्यवचनमेवाह—न नूनमित्यादिना। अयुक्तचारः अनियोजितचारः चपलतया अयुक्तचारत्वाद्वा तद्वीर्यं सम्यक् न जानासीत्यर्थः ॥ ३ ॥

४–६] ति० टी०—एतदबोधकृतश्च तवानर्थो भावीत्याह—अपीति । रक्षसां स्वस्तीत्यार्षम् । अपि स्वस्ति भवेदपि क्षेमं संपद्येतापि किम् । तव दुर्बुद्धिनिवृत्तेति शेषः । तथा संकुद्धो रामो लोकमराक्षसं न कुर्यादपि किम् । एवमग्रेऽपि बोध्यम् ॥ ४–६ ॥

रा० टी०—तात्पर्यवृत्त्या रामवीर्यं वर्णयन्नाह—अपीत्यादिभिः। सर्वेषां रक्षसां त्वस्ति भवेत्। नन्वु किमर्थं स्वस्तिप्रार्थनेत्यत आह—संकुद्धः भवता संकोपितो रामः लोकान् अराक्षसान् राक्षसरहितान् न कुर्यात् ॥ ४ ॥

रा० टी०—अपीति । जनकात्मजा सीता ते जीवितान्ताय नोत्पन्ना। अपिः संभावनार्थकः। सीतानिमित्तं तवापहृतसीतार्थं महद्व्यसनं सर्वराक्षसमरणं न भवेत् ॥ ५ ॥

गो० टी०—अथैव निर्गत्य पुनरागमनान्नूनं न मे वचनं श्रोष्यतीति निश्चित्य रावणचापलेन संभावितानर्थानाह—अपीत्यादिना। अपिः संभावनायां काकुस्वरोऽपि द्रष्टव्यः। एवमुत्तरवाक्येष्वपि स्वरपर्यवसानेनार्थपरिच्छेदः कार्यः । रक्षसां सजातीयानां स्वस्ति भवेदपि आर्षी षष्ठी । अकार्यनिवृत्त्यर्थं तातेति संबोधनम् ॥ ४ ॥ ५ ॥

रा० टी०—अपीति । कामवृत्तं स्वेच्छाचरणशीलमत एव निरङ्कुशं शुभमन्यायाङ्कुशरहितम् ईश्वरं राजानं त्वां प्राप्य त्वया सह सराक्षसा पुरी लङ्का न विनश्येत् ॥ ६ ॥

गो० टी०—अपि त्वामिति । ईश्वरं स्वामिनं कामवृत्तं यथेच्छव्यापारं निरङ्कुशममर्यादम् ॥ ६ ॥

७] ति० टी०—पापमन्त्रितः पापैः सह कृतकर्तव्यार्थविचारः ॥ ७ ॥

रा० टी०—कामवृत्तत्वादिविशिष्टस्य दोषमाह—त्वादिति । त्वद्विधो दुर्मतिः अत एव पापमन्त्रितः अघकारकमन्त्रवान् स राजा आत्मादित्रयं हन्ति ॥ ७ ॥

गो० टी०—त्वद्विध इति । य इत्यध्याहार्यं पापं दुष्टं मन्त्रितं विचारो यस्य तम् ॥ ७ ॥

८] ति० टी०—एवं महावीर्यत्वं रामे प्रतिपाद्य रावणोक्तदूषणानि निराचष्टे—न च पित्रेत्यादि ॥ ८ ॥

९] ति० टी०—तैक्ष्ण्याभावे हेतुः—सर्वभूतहिते रतत्वम् ॥ ९ ॥

रा० टी०—आपाततोऽवगतार्थे एतस्याभिप्रायो मास्त्विति बोधयितुं स्वाज्ञानेनैव रामे दोष आरोपित इत्याह—नेति। धर्मगुणैर्हीनो न। श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—पित्रा निरस्त इत्यादिना पूर्वं रावणोक्तदूषणानि परिहरति—न चेत्यादिना। कौसल्यानन्दिवर्धन इति। आनन्दिरानन्दः "सर्वधातुभ्य इन्" इति इन् ॥ ८ ॥ ९ ॥

१०] ति० टी०—कैकेय्या वञ्चितं पितरं दृष्ट्वा तं सत्यवादिनं करिष्यामीति वनं स्वयमेव प्रव्रजितः, न तु किंचित्पापात्पित्रा प्रवासित इत्यर्थः ॥ १० ॥

रा० टी०—ननु पितृकर्तृकपरित्यागाभावे कथमत्र रामागमनमित्यत आह—वञ्चितमिति । पितरं सत्यवादिनं करिष्यामीति हेतोः ततोऽयोध्यानगरात् वनं प्रव्रजितः ॥ १० ॥

गो० टी०—वञ्चितमिति । कैकेय्या वञ्चितं पितरं दृष्ट्वा तं सत्यवादिनं करिष्यामीति स्वयं प्रव्रजितः गतः तातेति सान्त्वोक्तिः ॥ १० ॥

१ महावीर्य मिति गो. पाठः । २ भुवीति गो. पाठः । ३ लोकमराक्षसमिति गो. पाठः । ४ ममेति गो. पाठः । ५ नन्दीति गो. पाठः । ६ तीक्ष्णो न च भूतानां सर्वेषामहित इति गो. पाठः । ७ तातेति गो. पाठः ।

कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च । हित्वा राज्यं च भोगांश्च प्रविष्टे दण्डकावनम् ॥ ११ ॥
न रामः कर्कशस्तात नाविद्वान्नाजितेन्द्रियः । अनृतं नु श्रुतं चैव नैव त्वं वक्तुमर्हसि ॥ १२ ॥
रामो विग्रहवान्धर्मः साधुः सत्यपराक्रमः । राजा सर्वस्य लोकस्य देवानामिव वासवः ॥ १३ ॥
कथं नु तस्य वैदेहीं रक्षितां स्वेन तेजसा । ईच्छसे प्रसभं हर्तुं प्रभामिव विवस्वतः ॥ १४ ॥
शरार्चिषमनाधृष्यं चापखड्गेन्धनं रणे । रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि ॥ १५ ॥
धनुर्व्यादितदीप्तास्यं शरार्चिषममर्षणः । चापबाणधरं तीक्ष्णं शत्रुसेनापहारिणम् ॥ १६ ॥
राज्यं सुखं च संत्यज्य जीवितं चेष्टमात्मनः । नात्यासादयितुं तात रामान्तकमिहार्हसि ॥ १७ ॥
अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा । न त्वं समर्थस्तां हर्तुं रामचापाश्रयां वने ॥ १८ ॥

११] ति० टी०–कैकेय्याः प्रियस्य कामस्य मनोरथस्य पूरणार्थम् ॥ ११ ॥

रा० टी०–कैकेय्या इति । कैकेय्याः दशरथस्य च प्रियकामार्थं प्रियः प्रीतिविषयीभूतः कामः इच्छाविषयीभूतः स एव स इति कर्मधारयः तदर्थं राज्यं भोगांश्च त्यक्त्वा दण्डकावनं प्रविष्टः ॥ ११ ॥

गो० टी०–वनगमने हेत्वन्तरमाह–कैकेय्या इति । प्रियस्य कामः कामना स एवार्थो यस्मिन् कर्मणि ॥ ११ ॥

१२–१३] ति० टी०–अनृतं न श्रुतं चैवानृतप्रसङ्गमपि न जानाति । तेन तत्कथनं दूरापास्तमित्यर्थः । एवं वक्तुं रामं दुर्गुणं वक्तुम् ॥ १२–१३ ॥

रा० टी०–नेति । अनृतं मिथ्या न श्रुतम् रामे इति शेषः, अत एवं वक्तुं त्वं नार्हसि ॥ १२ ॥

गो० टी०–न राम इति । अनृतमिति । अनृतम् असत्यं दुःश्रुतं वैपरीत्येन श्रुतं च भवान् वक्तुं नार्हसीत्यन्वयः ॥ १२ ॥

रा० टी०–प्रातिभासिकरावणरोपितदुर्गुणान् प्रतिषिध्य गुणानाह–राम इति । सत्यपराक्रमः साधुः सर्वोपकारनिरतः विग्रहवान् प्राकृतविलक्षणावयवविशिष्टो धर्मो रामः देवानां वासव इव सर्वस्य लोकस्य भुवनस्य राजा ॥ १३ ॥

गो० टी०–राम इति । रामः विग्रहवान् मूर्तो धर्म एव तत्र दोषसंभावना कथंचिदपि न कार्येति भावः । यथा वासवो देवानां नायकस्तथा रामः सर्वेषां लोकानां नायक इत्यर्थः ॥ १३ ॥

१४] ति० टी०–अथ सीतापहारस्याशक्यत्वमाह–कथं न्विति । स्वेन तेजसा पातिव्रत्यवैभवेन किं च तस्य रामस्य स्वेन तेजसा सहजप्रतापेनेत्यर्थः ॥ १४ ॥

रा० टी०–कथमिति । स्वेन तेजसा रक्षितां तस्य रामस्य प्रियां वैदेहीं प्रसभं हठात् विवस्वतः सूर्यस्य प्रभामिव हर्तुं कथमिच्छसे इच्छसि ॥ १४ ॥

गो० टी०–कथमिति । स्वेन तेजसा पातिव्रत्यवैभवेन प्रसभं बलात्कृत्य ॥ १४ ॥

१५] ति० टी०–शरार्चिषं शरज्वालं खड्गचापपदेन तद्वत्तत्रत्यस्तद्रूपमिन्धनं यस्य ॥ १५ ॥

रा० टी०–शरेति । शरः अर्चिर्ज्वाला यस्मिन् तं चापखड्गा रिपूणां चापानि खड्गाश्च इन्धनानि यस्य तमनाधृष्यं दीप्तं रामाग्निं रणे सहसा प्रवेष्टुं त्वं नार्हसि ॥ १५ ॥

गो० टी०–शरार्चिषमिति । शरपदं खड्गधारायां अप्युपलक्षणं चापखड्गेन्धनमिति रूपणात् । सहसा साहसेन ॥ १५ ॥

१६] ति० टी०–रामेऽन्तकरूपकोपपादकविशेषणान्याह–धनुरिति । धनुरेव व्यादितं व्यात्तमिति यावत् । दीप्तं ज्वालादीप्तमास्यं यस्य रामरूपान्तकस्य । ज्वालादीप्तत्वमेव शरार्चिषमित्यनेनोक्तम् ॥ १६ ॥

१७] ति० टी०–अत्यासादयितुमत्यन्तं प्राप्तुम् ॥ १७ ॥

रा० टी०–रामेऽग्निरूपकत्वस्रुपपायान्तकरूपकत्वस्रुपपादयनाह–धनुरिति । धनुर्व्यादितं धनुषो व्यादानं दीप्तमास्यं यस्य शरः अर्चिः प्रकाशो यस्य तम् अमर्षणं चापबाणधरम् अत एव शत्रुसेनापहारिणं रामान्तकं राज्यादिकं संत्यज्य अत्यासादयितुम् अतिनिकटं प्राप्तुं त्वं नार्हसि, एतेन तत्र तथागमने ध्रुवं ते विध्वंसो भवितेति सूचितम् । श्लोकद्वयमेकान्वयि ॥ १६ ॥ ॥ १७ ॥

गो० टी०–धनुरित्यादि । श्लोकद्वयमेकान्वयम् । धनुरेव व्यादितदीप्तास्यं व्यादितं विवृतम् अत्यासादयितुम् अत्यन्तमासन्नो भवितुम् ॥ १६ ॥ १७ ॥

१८] ति० टी०–अप्रमेयं हि तत्तेज इत्यनेनावाङ्मानसगोचरत्वं ध्वनितम् । यस्य सेत्यनेन तस्या अपि तत्त्वं सूचितम् ॥ १८ ॥

रा० टी०–अप्रमेयमिति । यस्य रामस्य प्रिया जनकात्मजा तत्तेजोऽप्रमेयम् अतः रामचापाश्रयां तां हर्तुं त्वं न समर्थोऽसि ॥ १८ ॥

गो० टी०–अप्रमेयमिति । जनकात्मजा यस्य यत्संबन्धिनी तत्तेजः तस्य तेजः अप्रमेयम् अपरिच्छेद्यम् । श्रद्धया देवो देवत्वमश्नुत इत्युक्तरीत्या सीतासंबन्धेन रामस्यातिः

१ दुःश्रुतमिति गो. पाठः । २ मघवानिवेति गो. पाठः । ३ त्वमिति गो. पाठः । ४ इच्छसीति गो. पाठः । ५ अमर्षणमिति गो. रा. पाठः । ६ पाशधरं वीरमिति गो. पाठः । ७ शत्रुसैन्यप्रहारिणमिति गो. पाठः ।

तस्य [1]वै नरसिंहस्य सिंहोरस्कस्य भामिनी । प्राणेभ्योऽपि प्रियतरा भार्या नित्यमनुव्रता ॥ १९ ॥
न सा धर्षयितुं शक्या मैथिल्योजस्विनः प्रिया । दीप्तस्येव हुताशस्य शिखा सीता सुमध्यमा ॥ २० ॥
किमुद्यमं व्यर्थमिमं कृत्वा ते राक्षसाधिप । दृष्टश्चेत्त्वं रणे तेन तदन्तमुपजीवितम् ॥ २१ ॥
जीवितं च सुखं चैव राज्यं चैव सुदुर्लभम् । [यदीच्छसि [4]चिरं भोक्तुं मा कृथा रामविप्रियम् ।]
स सर्वैः सचिवैः सार्धं विभीषणपुरस्कृतैः ॥ २२ ॥
मन्त्रयित्वा स [5]धर्मिष्ठैः कृत्वा निश्चयमात्मनः । दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ २३ ॥
आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्त्वतः । [6]हितं हि तव निश्चित्य क्षमं त्वं कर्तुमर्हसि ॥ २४ ॥
अहं तु मन्ये तव न क्षमं रणे समागमं कोसलराजसूनुना ।
इदं हि भूयः शृणु वाक्यमुत्तमं क्षमं च युक्तं च निशाचराधिप ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

शय उक्तः । वने सावधानतया रक्षणीयप्रदेशे रामचापाश्रयामिति रामवैभवोक्तिः उभयथापि न हर्तुं शक्येत्यर्थः । जनकात्मजेति कुलप्रभावादपि न हर्तुं शक्येत्यर्थः ॥ १८ ॥ २० ॥

१९] ति० टी०—नरसिंहस्येत्यनेन हिरण्यकशिपुप्रभृतिहन्तायमेवेति सूचितम् । नित्यमनुव्रतेत्यनेन तस्यास्तच्छक्तित्वं सूचितम् ॥ १९ ॥

रा० टी०—तस्येति । सिंहोरस्कस्य नरसिंहस्य तस्य रामस्य नित्यमनुव्रता भामिनी अतिप्रकाशविशिष्टा भार्या सीता प्राणेभ्योऽपि प्रियतराऽस्तीति शेषः ॥ १९ ॥

२०] ति० टी०—न सेति । रजस्तमःप्रधानेन । त्वादृशेनेत्यर्थः ॥ २० ॥

रा० टी०—नेति । सुमध्यमा ओजस्विनो रामस्य प्रिया मैथिली मिथिलोद्भवा सा सीता दीप्तस्य हुताशस्य शिखेव धर्षयितुं न शक्या ॥ २० ॥

२१] ति० टी०—व्यर्थमिममुद्यमं कृत्वा ते न किमपि हितमित्यर्थः । तेन चेत्त्वं रणे दृष्टस्तदा तदन्तं तद्दर्शनावसानं तव जीवितमित्यर्थः ॥ २१ ॥

रा० टी०—किमिति । इमं त्वयोक्तम् उद्यमं सीतापहरणोद्योगं कृत्वा किं साध्यमिति शेषः, न किमपीत्यर्थः । तत्र हेतुः—तेन रामेण रणे त्वं दृष्टश्चेत् तदा तदन्तं तेन रणे रामदर्शनेन अन्तो विध्वंसो यस्य तत् उपजीवितं स्वजीवनं विद्धीति शेषः ॥ २१ ॥

गो० टी०—किमिति । व्यर्थमिममुद्यमं कृत्वा ते किं किं फलं प्राप्तव्यमित्यर्थः । तदन्तं दर्शनान्तम् ॥ २१ ॥

२२–२४] ति० टी०—जीवितमिति । जीवितायुद्दिश्य स त्वं विभीषणपुरोगमैर्धर्मिष्ठैर्मन्त्रयित्वा अनन्तरं निश्चयं कृत्वा दोषगुणबलाबलनिर्धारणविषयमात्मनो रामस्य च दोषगुणबलाबलं संप्रधार्य विचार्य तदनन्तरं स्वस्य रामस्य च बलं तत्त्वतो ज्ञात्वा निश्चित्य तव आत्मनो हितमिदमिति निश्चित्य यत्क्षमं तत्कर्तुमर्हसीत्यर्थः ॥ २२–२४ ॥

रा० टी०—जीवितमिति । सुदुर्लभं जीवितं रोगराहित्यादिना जीवनं सुखं पुत्रपौत्रादिहेतुकप्रमोदं च राज्यं च सुखं यथा भवति तथा भोक्तुमनुभवितुं यदीच्छसि तर्हि रामविप्रियं रामानिष्टं मा कृथाः ॥ २२ ॥

गो० टी०—न केवलं जीवितं सुखादिकं च दुर्लभमित्याह—जीवितं चेति ॥ २२ ॥

रा० टी०—स इति । धर्मिष्ठैः विभीषणपुरस्कृतैः सर्वैः सचिवैः सार्धं मन्त्रयित्वा आत्मनः स्वमनसः निश्चयं चाञ्चल्यराहित्यं कृत्वा दोषाणां दुष्टाचरणानां गुणानां शोभनाचरणानां च बलाबलं च संप्रधार्य सम्यग्ज्ञात्वा आत्मनो राघवस्य च बलं ज्ञात्वा तव आत्मनो हितं च निश्चित्य क्षमं क्षमां कर्तुं त्वमर्हसि, एतेन रावणबलस्य रामबलादल्पत्वं सूचितम् । सार्धश्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०—स इत्यादि । सार्धश्लोकद्वयमेकान्वयम् । स त्वमित्यन्वयः । क्षमं साधु ॥ २३–२४ ॥

२५] ति० टी०—सत्सचिवान्तर्गतस्य मम त्वेष निश्चय इत्याह—अहं त्विति । इदं वक्ष्यमाणम् ॥ २५ ॥

इति श्रीसमाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०—स्वसंमतिं बोधयन्नाह—अहमिति । कोसलराजसूनुना रामेण रणे समागमं क्षमं योग्यं न मन्ये इदं वक्ष्यमाणं युक्तं योग्यमत एव क्षमं सहनीयं च उत्तमं वाक्यं मद्वचनं शृणु । एकश्चकारो हेत्वर्थः ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

---

१ सेति गो. पाठः । २ तवेति गो. पाठः । ३ अर्धमेतदधिकं गो. रा. पाठे । ४ सुखमिति रा. पाठः । ५ पुरोगमैरिति गो. पाठः । ६ त्विति गो. पाठः । ७ हितादहितं वीति गो. पाठः ।

अष्टात्रिंशः सर्गः ।

मत्कृतोपसर्गमसहमानेन विश्वामित्रेणानीतेन रामेणाह सागराम्भसि सुदूरं प्रक्षिप्त इति रामप्रभाव वर्णयन्मारीचः सीतापहरण मिहासुत्रापि महानर्थकरमतस्ततो निवर्तस्वेति रावण प्रार्थयते ।

कदाचिदप्यहं वीर्यात्पर्यटन्पृथिवीमिमाम् । बलं नागसहस्रस्य धारयन्पर्वतोपमः ॥ १ ॥
नीलजीमूतसंकाशस्तप्तकाञ्चनकुण्डलः । भयं लोकस्य जनयन्किरीटी परिघायुधः ॥ २ ॥
व्यचरन्दण्डकारण्यमृषिमांसानि भक्षयन् । विश्वामित्रोऽथ धर्मात्मा मद्वित्रस्तो महामुनिः ॥ ३ ॥
स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत् । अयं रक्षतु मां रामः पर्वकाले समाहितः ॥ ४ ॥
मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर । इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ॥ ५ ॥
प्रत्युवाच महाभागं विश्वामित्रं महामुनिम् । ऊनद्वादशवर्षोऽयमकृतास्त्रश्च राघवः ॥ ६ ॥
कामं तु मम तत्सैन्यं मया सह गमिष्यति । बलेन चतुरङ्गेण स्वयमेत्य निशाचरम् ॥ ७ ॥
वधिष्यामि मुनिश्रेष्ठ शत्रुं तव यथेप्सितम् । एवमुक्तः स तु मुनी राजानमिदमब्रवीत् ॥ ८ ॥

गो० टी०–अधुना स्वबुद्धिं दर्शयति–अहं त्विति । युक्तं युक्तिसहितम् ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

१–२] ति० टी०–अथ स्वानुभवसिद्धं रामबलमाह–कदाचिदित्यादि । अहमपीति संबन्धः ॥ १ ॥ २ ॥

रा० टी०–मारीचवचनाकारमाह–कदाचिदित्यादिभिः। कदाचित् कस्मिंश्चित्समये पर्वतोपमः पर्वतसदृशः नीलजीमूतसंकाशः नीलमेघसदृशरूपवान् तप्तकाञ्चनकुण्डलः किरीटी किरीटविशिष्टः परिघायुधः परिघ आयुधं यस्य स नागसहस्रस्य बलं धारयन्नहं वीर्यात् हेतोः इमां पृथिवीं पर्यटन् लोकस्य भयं जनयन् ऋषिमांसानि भक्षयंश्च सन् दण्डकारण्यं व्यचरम् । सार्धश्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–आबाल्यसिद्धसहजशौर्यादिगुणशेवधिः ।
रघुनाथो महाप्रीत्या परिस्फुरतु सर्वतः ॥

तदुणजातं न युक्त्या कल्पयित्वोच्यते किं त्वनुभवसिद्धमित्याह–कदाचिदित्यादिना । सार्धश्लोकद्वयमेकान्वयम् । अहं व्यचरमित्यन्वयः । नागो गजः । भयजनने हेतुमाह–नीलेत्यादिना ॥ १ ॥ २ ॥

३] ति० टी०–मद्वित्रस्तः मत्तो वित्रस्त इत्यर्थः ॥ ३ ॥

रा० टी०–विश्वामित्र इति । मद्वित्रस्तः मत्तः प्राप्तत्रासः धर्मात्मा विश्वामित्रः नरेन्द्रं दशरथं स्वयं गत्वा इदमब्रवीत् ॥३॥

गो० टी०–विश्वामित्र इति । मदिति पञ्चमी ॥ ३ ॥

४–५] ति० टी०–पर्वकाले यागकाले ॥ ४–५ ॥

रा० टी०–विश्वामित्रवचनाकारमाह–अयमिति । हे नरेश्वर! मारीचात् मे घोरं भयं समुत्पन्नम् अतः पर्वकाले प्राप्ते सति समाहितः अयं रामः मां रक्षतु ॥ ४ ॥

रा० टी०–इतीति । एवमुक्तो धर्मात्मा राजा दशरथः विश्वामित्रमिति इदं प्रत्युवाच ॥ ५ ॥

गो० टी०–अद्येति । पर्वकाले यज्ञसत्राकाले ॥ ४ ॥५॥

६–८] ति० टी०–पञ्चदशवर्षोऽपि तथा दशरथेनानुदितोऽप्यत्यन्तबाल्यद्योतनायातिबालेनापीदृशं कृतं किमधुना वाच्यमिति रावणस्यात्यन्तभयाय मारीचेन तथा दशरथेनोक्त इत्यूनद्वादशवर्ष इत्युक्तम् । 'ऊनषोडशवर्षोऽयम्' इति पाठान्तरम् ॥ ६–८ ॥

रा० टी०–तत्प्रतिवचनाकारमाह–ऊनेति । अयं राघव ऊनद्वादशवर्षः किंचिन्मासोनषोडशवार्षिक इत्यर्थः, अयमर्थः द्वौ च द्वौ च द्वौ चेत्येकशेषेण लब्धः, अत्र बीजं तु बालकाण्डघटकीभूतोनषोडशवर्षो मे इतिपक्षे निरूपितम् अत एव अकृतास्त्रः अस्त्राभ्यासरहितोऽस्तीति शेषः, अतः मया सह ममैतत्सैन्यं कामं यथेच्छं गमिष्यति ॥ ६ ॥

रा० टी०–गमनप्रकारमाह–बलेनेति । चतुरङ्गेण बलेन स्वयमेत्य तव शत्रुं निशाचरं यथेप्सितं वधिष्यामि ॥ ७ ॥

गो० टी०–बाल इति । द्वादशवर्षः द्वादशवर्षवयस्कः । केचित्तु इदं रावणविभीषणयोर्कं वस्तुत ऊनषोडशवर्ष इत्युक्तमित्याहुः । कामं भृशं यत्सैन्यं तदित्यध्याहार्यम् ॥ ६ ॥ ७ ॥

रा० टी०–एवमिति । एवमुक्तो मुनिः राजानमब्रवीत् ॥८॥

गो० टी०–इतीति । रामादन्यत् बलं सैन्यं तस्य न पर्याप्तं न समर्थम् । दशरथस्य कोपो माभूदिति सान्त्वयति–देवतानामिति । आसीदिति । तव कृतं त्वया कृतं कर्म त्रिलोकेलोकत्रये आर्षत्वान्न ङीप् विदितं प्रसिद्धम् । यद्यपि महत्सैन्यमप्यस्तु तथापि तत्सर्वमिह तिष्ठतु प्रकृतकार्यासामर्थ्यादिति भावः ॥ ८ ॥ १२ ॥

---

१ अरण्ये इति गो. पाठः । २ अथेति गो. पाठः । ३ बाल इति गो. पाठः । ४ निशाचरानिति गो. पाठः । ५ शत्रुंस्ते मनसेप्सितानिति गो. पाठः । ६ इत्येवमुक्तः स इति गो. पाठः ।

रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः । देवतानामपि भवान्समरेष्वभिपालकः ॥ ९ ॥
आसीत्तव कृतं कर्म [1]त्रिलोकविदितं नृप । काममस्ति महत्सैन्यं तिष्ठत्विह परंतप ॥ १० ॥
बालोऽप्येष महातेजाः समर्थस्तस्य निग्रहे । गमिष्ये राममादाय स्वस्ति तेऽस्तु परंतप ॥ ११ ॥
इत्येवमुक्त्वा स मुनिस्तमादाय नृपात्मजम् । जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम् ॥ १२ ॥
तं तथा दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम् । बभूवोपस्थितो रामश्चित्रं विस्फारयन्धनुः ॥ १३ ॥
अजातव्यञ्जनः श्रीमान्बालः श्यामः शुभेक्षणः । एकवस्त्रधरो धन्वी शिखी कनकमालया ॥ १४ ॥
शोभयन्दण्डकारण्यं दीप्तेन स्वेन तेजसा । अदृश्यत तदा रामो बालचन्द्र इवोदितः ॥ १५ ॥
ततोऽहं मेघसंकाशस्तप्तकाञ्चनकुण्डलः । बली दत्तवरो दर्पादाजगामाश्रमान्तरम् ॥ १६ ॥
तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः । मां तु दृष्ट्वा धनुः सज्यमसंभ्रान्तश्चकार ह ॥ १७ ॥
अवजानन्न संमोहाद्बालोऽयमिति राघवम् । विश्वामित्रस्य तां वेदिमभ्यधावं कृतत्वरः ॥ १८ ॥

९-१२] ति० टी०—यद्यपि भवान्देवानामपि सहायकृदासीत् अन्यच्च तव त्वया कृतं कर्म त्रिलोकविदितं त्रिषु लोकेषु विदितं तथापि रामादन्यद्बलं तस्य रक्षसो न पर्याप्तम्, अतः कामं तव बलं यदस्ति तदत्रैव तिष्ठतु तदुपयोगाभावात् अत एव बालोऽपि यतस्तन्निग्रहसमर्थोऽतो देय एवेति शेषः ॥ ९-१२ ॥

रा० टी०—तद्वचनाकारमाह—रामादिति । यद्यपि समरेषु देवानामपि अभिपालकः साहाय्यकर्ता भवानासीत् अतस्तव कृतं कर्म त्रिलोकविदितं त्रिषु लोकेषु प्रसिद्धमासीत् तव सैन्यमपि महत् अतिप्रवृद्धमस्ति तथापि रामादन्यत् भिन्नं यत् लोके बलं नत् तस्य रक्षसः पर्याप्तं नास्ति अतः इहैव कामं यथेष्टं तिष्ठतु भवान् सैन्यं चेति शेषः । श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

रा० टी०—बाल इति । महातेजाः बालोऽपि एष रामः तस्य मारीचस्य निग्रहे समर्थः अतो राममादाय अहं गमिष्ये ते स्वस्त्यस्तु ॥ ११ ॥

रा० टी०—इतीति । स मुनिर्विश्वामित्रः एवमुक्त्वा नृपात्मजं राममादाय स्वमाश्रमं जगाम ॥ १२ ॥

१३] ति० टी०—उपस्थितो रामस्तद्रक्षणार्थं समीपं प्राप्तः सन् ॥ १३ ॥

रा० टी०—तमिति । दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितं तं विश्वामित्रं धनुर्विस्फारयन् सन् रामः उपस्थितो बभूव ॥ १३ ॥

गो० टी०—तामिति । रामः चित्रं धनुः विस्फारयन् नयन् सन् उपस्थितः रक्षणाय समीपं प्राप्तो बभूवेत्यर्थः ॥ १३ ॥

१४-१५] ति० टी०—अजातव्यञ्जनः श्मश्रुवादिपुंस्त्वचिह्नप्रादुर्भावहीन इत्यर्थः । एकवस्त्रधरो ब्रह्मचर्ये स्थितः । शिखी काकपक्षधरः । कनकमालयोपलक्षितः ॥ १४-१५ ॥

रा० टी०—अजातेति । अजातव्यञ्जनः न जातं व्यञ्जनं पुरुषाभिव्यञ्जकं श्मश्रुवादि यस्य सः एकवस्त्रधरः धन्वी धनुर्धरः शिखी प्रशस्तशिखावान् कनकमालया उपलक्षितः दीप्तेन स्वेन तेजसा दण्डकारण्यं शोभयन् सन् उदितो बालचन्द्र इव रामः अदृश्यत । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—अजातेत्यादि । श्लोकद्वयमेकान्वयम् । अजातव्यञ्जनः अनुत्पन्नयौवनलक्षणः एकवस्त्रधरः ब्रह्मचर्यव्रते स्थित इत्यर्थः । शिखी कुलोचितशिखायुक्तः ऋष्यादित्वादिनिः । कनकमालयेत्युपलक्षणे तृतीया । शोभयन् स्वकान्त्या व्याप्तं कुर्वन्नित्यर्थः । [illegible] विरोधिनिरसनोद्युक्तत्वं गम्यते । शत्रोरपि विग्रहवर्णनमाकर्षकतया ॥ १४ ॥ १५ ॥

१६] ति० टी०—आजगामेत्युत्तमपुरुषः । अत्र पारोक्ष्यार्थकलिटा दैवपारवश्यादेवाहमागतो न तु तदागमनं मम प्रत्यक्षमिति ध्वनयति, यद्वा बहुकालिकत्वेन विस्मृतत्वाद्वा तत्त्वारोपः । आर्षो वा लिट् । आश्रमान्तरमाश्रममध्यम् । दत्तवरो ब्रह्मदत्तदेवावध्यत्ववरः ॥ १६ ॥

रा० टी०—तत इति । ततः रामागमनानन्तरं मेघसंकाशः दत्तवरः दत्तः ब्रह्मणा संपादितः वरः देवावध्यत्वं यस्मै सोऽहम् आश्रमान्तरं विश्वामित्राश्रममध्यम् आजगाम अत्र लिट्प्रयोगः दैर्घकालिकत्वेन परोक्षत्वारोपात् ॥ १६ ॥

गो० टी०—तत इति । आजगामेत्युत्तमपुरुष॥१६॥१७॥

१७-१८]ति०टी०—प्रविष्टोऽहं तेन न दृष्ट इत्यन्वयः१७-१८

रा० टी०—तेनेति । तेन रामेण दृष्टः उद्यतायुधोऽहं सहसा प्रविष्टः मां दृष्ट्वैव असंभ्रान्तो रामः धनुः सज्यं चकार॥ १७॥

रा० टी०—अवेति । मोहात् स्वाज्ञानात् अयं बालः इति हेतोः राघवम् अवजानन् तिरस्कुर्वन् अहं विश्वामित्रस्य तां वेदिम् अभ्यधावम् ॥ १८ ॥

गो० टी०—अवजानन्निति। मोहात् अवजानन् तिरस्कुर्वन् ॥ १८ ॥

१ त्रिलोके इति गो. पाठः । २ अस्त्विति गो. पाठः । ३ तदेति गो. पाठः । ४ पद्मपत्रनिभेक्षण इति गो. पाठः । ५ तत इति गो. पाठः । ६ आजगाम तदाश्रममिति गो. पाठः । ७ स इति गो. पाठः । ८ अहमिति गो. रा. पाठः ।

तेन मुक्तस्ततो बाणः क्षितः शत्रुनिबर्हणः । तेनाहं ताडितः क्षिप्तः समुद्रे शतयोजने ॥ १९ ॥
नेच्छता तात मां हन्तुं तदा वीरेण रक्षितः । रामस्य शरवेगेन निरस्तो भ्रान्तचेतनः[2] ॥ २० ॥
पातितोऽहं तदा तेन गम्भीरे सागराम्भसि । प्राप्य संज्ञां चिरात्तात लङ्कां प्रति गतः पुरीम् ॥ २१ ॥
एवमस्मि तदा मुक्तः सहायास्ते[3] निपातिताः । अकृतास्त्रेण रामेण बालेनाक्लिष्टकर्मणा ॥ २२ ॥
तन्मया वार्यमाणस्तुं[4] यदि रामेण विग्रहम् । करिष्यस्यापदं घोरां क्षिप्रं प्राप्य न शिष्यसि ॥ २३ ॥
क्रीडारतिविधिज्ञानां समाजोत्सवदर्शिनाम्[5] । रक्षसां चैव संतापमनर्थं चाहरिष्यसि ॥ २४ ॥
हर्म्यप्रासादसंबाधां नानारत्नविभूषिताम्[6] । द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते ॥ २५ ॥
अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात्[7] । परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २६ ॥
दिव्यचन्दनदिग्धाङ्गान्दिव्याभरणभूषितान्[8] । द्रक्ष्यस्यभिहतान्भूमौ तव दोषात्तु राक्षसान् ॥ २७ ॥

१९] ति० टी०–शतयोजने तटात्तत्पर्यन्तदेशस्थिते समुद्रे क्षिप्तः ॥ १९ ॥

रा० टी०–तेनेति । ततः अभिधावनानन्तरं तेन रामेण शत्रुनिबर्हणः क्षितो बाणो मुक्तः तेन राममुक्तबाणेन ताडितोऽहं शतयोजने समुद्रे क्षिप्तः ॥ १९ ॥

गो० टी०– तेनेति । तेन रामेण बाणो मुक्तः मयि क्षिप्त इत्यर्थः ॥ १९ ॥

२०–२१] ति० टी०–नेच्छता निच्छता । एतच्च रक्षणं केवलं कृपाजन्यमिति मारीचाशयः । भाविकार्यार्थमिति वस्तुतत्त्वम् ॥ २० ॥ २१ ॥

रा० टी०–नेति । हे तात ! तदा तस्मिन्काले मां हन्तुं नेच्छता वीरेण रामेण अहं रक्षितः अत एव रामस्य शरवेगेन अचेतनोऽहं निरस्त एव 'सर्वं वाक्यं सावधारणं भवति' इतिन्यायेनैवकारलाभः तेन हननव्यवच्छेदः ॥ २० ॥

रा० टी०–पातित इति । तेन रामेण गम्भीरे सागराम्भसि पातितोऽहं चिरात् बहुकालतः संज्ञां विवेकं प्राप्य लङ्कां पुरीं प्रति गतः ॥ २१ ॥

गो० टी०–नेच्छतेति । नेच्छता अनिच्छता नञ्शब्दस्य सुप्सुपेति समासः । अनिच्छाहेतुर्न ज्ञायते स्वयं हन्तुं समर्थ एवेति भावः । अचेतनः निश्चेष्टः मूर्छितो वा ॥ २० ॥ २१ ॥

२२–२३] ति० टी०–ये मे सहाया अपरे गतास्ते निपातिता इत्यन्वयः ॥ २२ ॥ २३ ॥

रा० टी०–एवमिति । अकृतास्त्रेण रामेण एवमनेन प्रकारेणाहं मुक्तोऽस्मि ते प्रसिद्धाः सहाया ममानुगामिनो निपातिताः हताः ॥ २२ ॥

रा० टी०–यदिति । तत् रामप्रभावस्य दुरवगाह्यत्वाद्धेतोः मया वार्यमाणस्त्वं यदि रामेण विग्रहं वैरं करिष्यसि तदा क्षिप्रं घोरामापदं विपत्तिं प्राप्य नशिष्यसि नङ्क्ष्यसि ॥ २३ ॥

गो० टी०–एवमस्मीति । निपातिताः हताः ॥ २२ ॥ २३ ॥

२४–२५] ति० टी०–अनर्थं मरणरूपमाहरिष्यसि यत्नात्संपादयिष्यसि ॥ २४ ॥ २५ ॥

रा० टी०–आपत्तिस्वरूपमाह–क्रीडेति । क्रीडारत्योः लीलाभोगयोः विधिं क्रमं जानन्ति तेषां समाजोत्सवशालिनां समाजो रक्षसां सभाः तत्र य उत्सव आनन्दः तद्वतामनित्यं त्वत्सभासेविनामित्यर्थः, रक्षसां संतापो यस्मिन् तमनर्थं मरणम् आहरिष्यसि संपादयिष्यसि ॥ २४ ॥

गो० टी०–क्रीडेति । क्रीडा लीला रतिः भोगः तयोर्विधिः क्रमः तज्ज्ञानां तत्र सक्तानामित्यर्थः । समाजः सभा अनर्थं दुःखं संतापः तत्कार्यम् आहरिष्यसि यत्नेन संपादयिष्यसि ॥ २४ ॥

रा० टी०–हर्म्येति । हर्म्यप्रासादसंबाधां हर्म्यादिनिबिडां नानारत्नविभूषितां लङ्कां पुरीं मैथिलीकृते विनष्टां द्रक्ष्यसि ॥ २५ ॥

गो० टी०–हर्म्येति । 'हर्म्यादि धनिनां वासः प्रसादो देवभूभुजाम्' इत्यमरः । संबाधां निबिडां रत्नविभूषितां गृहद्वारादौ ॥ २५ ॥

२६–२७] ति० टी०–सकलदोषादप्रक्षःकुलमात्रस्य नाशः प्राप्नोतीत्याह—अकुर्वन्तोऽपीति । परपापैः परेषां पापात्मनां पापैर्निमित्तैः । नागह्रदे सर्पयुक्तह्रदे सर्पनिग्रहाय प्रविष्टेन राजप्रेरितधीवरादिना गरुडेन वा यथाप्रसक्तान्मत्स्या नश्यन्ति तद्वत् ॥ २६ ॥ २७ ॥

रा० टी०–नन्वेवं ममापराधेन अन्येषां कथं विनाश इत्यत आह–अकुर्वन्त इति । पापानि अकुर्वन्तः अत एव शुचयोऽपि पापसंश्रयात् पापिजनसंबन्धात् हेतोः परपापैः स्वसंबन्धिनागदोषैः हेतुभिः नागह्रदे नागविशिष्टह्रदे मत्स्याः नागविध्वंसोद्देश्यकागमनवत् गरुडादिनिहतमीना इव विनश्यन्ति २६

गो० टी०–स्वदोषेण सकलराक्षसक्षयो भविष्यतीति दर्शयिष्यन् तदर्थमसत्सङ्गदोषन्यायाकरङ्गपवर्णयति–अकुर्वन्तोऽपीति । शुचयः परिशुद्धाः अपापा इत्यर्थः । पापान्यकुर्वन्तो

---

१ त्वाहत इति गो. पाठः । २ ऽहमचेतन इति गो. पाठः । ३ त्विति गो. पाठः । ४ त्वमिति गो. रा. पाठः । ५ प्राप्स्यसि रावणेति गो. पाठः । ६ शालिनामिति गो. पाठः ।

हृतदारान्सदाराश्च दश विद्रवतो दिशः । हतशेषानशरणान्द्रक्ष्यसि त्वं निशाचरान् ॥ २८ ॥
शरजालपरिक्षिप्तामग्निज्वालासमावृताम् । प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वमसंशय[1] ॥ २९ ॥
परदाराभिमर्शात्तु नान्यत्पापतरं महत् । प्रमदानां सहस्राणि तव राजन्परिग्रहे[2] ॥ ३० ॥
भव स्वदारनिरतः स्वकुलं रक्ष राक्षसान्[3] । मानं वृद्धिं च राज्यं च जीवितं चेष्टमात्मनः[4] ॥ ३१ ॥
कलत्राणि च सौम्यानि मित्रवर्गं तथैव च । यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम्[5] ॥ ३२ ॥
निवार्यमाणः सुहृदा मया भृशं प्रसह्य सीतां यदि धर्षयिष्यसि ।
गमिष्यसि क्षीणबलः सबान्धवो यमक्षयं रामशरैरास्तजीवितः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ।

पूर्वं रामेण कृतवैरानुबन्धोऽहं तज्जिघांसया कृतमृगरूपेण मित्रद्वयेन कृतमृगरूपोऽनुगम्यमानो रामेण शरद्वयपाताद्विहतसहायः पलायमानः कथंचित्तृतीयशरतः प्रमुक्त इति वृत्तं तन्निवर्तनेच्छया प्रस्तुत्य युद्धेन क्षमया वा निस्तर वैरं न कदापि सीताहरणं चिन्तयेति मारीच उपदिशति ।

एवमस्मि तदा मुक्तः कथंचित्तेन संयुगे । इदानीमपि यद्वृत्तं तच्छृणुष्व यदुत्तरम् ॥ १ ॥

पि पापसंश्रयात् पापपुरुषसंसर्गात् परपापैर्विनश्यन्ति यथा नागह्रदे सर्पह्रदे नागनिघ्नाय प्रक्षिप्तेन मत्स्या अपि तत्सहवासाद्धन्यन्ते तद्वदित्यर्थः ॥ २६ ॥

रा० टी०–दिव्येति । दिव्यचन्दनदिग्धाङ्गान् चन्दनलिप्तशरीरान् तव दोषात् भूमौ अभिहतान् राक्षसान् द्रक्ष्यसि ॥ २७ ॥

गो० टी०–दिव्येति । तव दोषात्तु तव दोषादेव ॥ २७ ॥

२८–२९] ति० टी०–हृतदारान्परिहृतदारान् त्यक्तदारानिति यावत् ॥ २८ ॥ २९ ॥

रा० टी०–हृतेति । अशरणान् रक्षकहीनान् अत एव दशदिशो विद्रवतः हतशेषान् निशाचरान् त्वं द्रक्ष्यसि ॥ २८ ॥

गो० टी०– हृतेति । हृतदारान् त्यक्तदारान् अशरणान् रक्षकरहितान् ॥ २८ ॥

रा० टी०–शरेति । शरजालपरिक्षिप्तां शरसमूहव्याप्ताम् अग्निज्वालासमावृताम् अग्निज्वालायुक्तामत एव प्रदग्धभवनां लङ्कां द्रक्ष्यसि ॥ २९ ॥

गो० टी०–शरजालेति । प्रदग्धभवनां प्रकर्षेण दग्धगृहाम् ॥ २९ ॥

३०–३३] ति० टी०–तव परिग्रहेऽन्तःपुरे प्रमदानां सहस्राणि, अतस्तास्वेव रमस्व नान्यत्र मनो धेहीत्यर्थः ॥ ३०–३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०–पापेभ्यस्तं निवर्तयितुं रावणकृतपापरशातिमहत्त्वं द्योतयन्नाह–परेति । परदाराभिमर्शात् अन्यत् पापतरमपि महत् न । अर्धं पृथक्–प्रमदानामिति । हे राजन् ! तव परिग्रहे अन्तःपुरे प्रमदानां सहस्राणि सन्तीति शेषः, अतः स्वदारनिरतो भव अत एव स्वकुलं राक्षसांश्च रक्ष । अर्धद्वयमेकान्वयि ॥ ३० ॥

रा० टी०–मानमिति । मानादीन् यदि चिरं भोक्तुमिच्छसि तर्हि रामविप्रियं मा कृथाः ॥ ३१ ॥ ३२ ॥

गो० टी०–एवं दृष्टदोषमुपपाद्यादृष्टदोषं दर्शयति–परदारेति । ‘ परिग्रहः कलत्रे स्यात् ’ इति शाश्वतः । जात्याभिप्रायेणैकवचनं रामविप्रियं रामापराधम् ॥ ३०–३२ ॥

रा० टी०–निवार्यमाण इति । सुहृदा मया निवार्यमाणस्त्वं सीतां यदि प्रसह्य धर्षयिष्यसि अपहरिष्यसि तर्हि क्षीणबलः सबान्धवस्त्वं रामशरास्तजीवितः सन् यमक्षयं पुनरागमनरहितलोकं गमिष्यसि ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०–निवार्यमाण इति । प्रसह्य बलात्कृत्य मामनादृत्येत्यर्थः । रामशरेण आत्तम आकृष्टं नाशितमिति यावत् तादृशं जीवितं यस्य सः ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

१]ति०टी०–पुनः स्वाग्रहवासिद्धं रामहस्तमाह–एवमिति ।

१.न संशय इति गो. पाठः । २ परिग्रह इति गो. पाठः । ३ राक्षसेति गो. पाठः । ४ आत्तेति गो. पाठः । ५ निक्रमणमिति गो. पाठः ।

राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथाकृतः । सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावनें ॥ २ ॥
दीप्तजिह्वो महादंष्ट्रस्तीक्ष्णशृङ्गो महाबलः । व्यचरन्दण्डकारण्यं मांसभक्षो महामृगः ॥ ३ ॥
अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण । अत्यन्तघोरो व्यचरंस्तापसांस्तान्प्रधर्षयन् ॥ ४ ॥
निहत्य दण्डकारण्ये तापसान्धर्मचारिणः । रुधिराणि पिबँस्तेषां तन्मांसानि च भक्षयन् ॥ ५ ॥
ऋषिमांसाशनः क्रूरस्त्रासयन्वनगोचरान् । तँदा रुधिरमत्तोऽहं व्यँचरं दण्डकावनम् ॥ ६ ॥
तँदाहं दण्डकारण्ये विचरन्धर्मदूषकः । आसादयं तदा रामं तापसं धँर्ममाश्रितम् ॥ ७ ॥
वैदेहीं च महाभागां लक्ष्मणं च महारथम् । तापसं नियताहारं सर्वभूतहिते रतम् ॥ ८ ॥
सोऽहं वनगतं रामं परिभूय महाबलम् । तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ॥ ९ ॥
अभ्यधावं सुसंक्रुद्धस्तीक्ष्णशृङ्गो मृगाकृतिः । जिघांसुरकृतप्रज्ञस्तं प्रहारमनुस्मरन् ॥ १० ॥
तेन त्यक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः । विकृष्य सुमहच्चापं सुपर्णानिलतुल्यगाः ॥ ११ ॥

तदा विश्वामित्रयज्ञरक्षणसमये तेन कथंचिन्मुक्तोऽस्मि । इदानीं प्रौढावस्थायामपि यद्वृत्तं मद्विषयं यदुत्तरं यत्सर्वलोकोत्तरं तदतिरिक्ताश्चर्यं तच्छृणुष्व शृण्विति यावत् ॥ १ ॥

रा० टी०—रामवीर्यं वर्णयितुं मारीचः स्ववृत्तान्तरमाह—एवमित्यादिभिः । एवमुक्तप्रकारेण तेन रामेण कथंचिन्मुक्तो यद् यत्सर्वान् योऽहमस्मि तस्य मे उत्तरं लोकविलक्षणं यद्वृत्तं तच्छृणुष्व अहं वक्ष्मीत्यर्थः ॥ १ ॥

गो० टी०—अपराधविहीनेषु नापराधं करोति यः ।
दयालुं सर्वभूतेषु तमहं राममाश्रये ॥

एवमित्यादि । इदानीमपि प्रौढावस्थायामपि यद्वृत्तं मद्विषयमभूत् तत् निरुत्तरं शृणुष्व मध्ये वाक्यविच्छेदाकरणेन शृण्वित्यर्थः । 'यदुत्तरम्' इति पाठे यत्सर्वान्तोत्तरं तदतिरिक्ताश्चर्यं तदपि शृण्वित्यर्थः ॥ १ ॥

२] ति० टी०—पूर्वं तथा कृतः प्राणसंकटं प्रापितोऽप्यनिर्विण्णोऽप्राप्ततद्विषयप्रवृत्तिवैराग्यः । ताभ्यां मृगरूपाभ्यां सहितोऽहमपि मृगरूपः सन्प्रविष्ट इत्यन्वयः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—राक्षसाभ्यामिति । तथा कृतः प्राप्तरामशरप्रक्षेपोऽप्यहम् अनिर्विण्णः रामयुद्धेष्वप्राप्तवैराग्यः सन् मृगरूपाभ्यां द्वाभ्यां राक्षसाभ्यां सहितो मृगरूपोऽहं दण्डकावनं प्रविष्टः । महामृग इत्युत्तरग्रन्थस्वारस्यात् मृगरूपाभ्यामिति विभक्तिवचनावपरिणामेनान्यत्राप्यन्वेति॥२॥

गो० टी०—राक्षसाभ्यामिति । तथाकृतः उक्तरीत्या प्राणसंकटं प्रापितोऽपि अनिर्विण्णः निर्वेदरहितः निर्वेदो निष्फलत्वधीः अप्राप्ततद्विषयप्रवृत्तिवैराग्य इत्यर्थः ॥ २ ॥

३–५] ति० टी०—तदेवाह—दीप्तेति ॥ ३–५ ॥

६] ति० टी०—वनगोचरानृषीनन्यजीवांश्च ॥ ६ ॥

रा० टी०—दीप्तेति । दीप्तजिह्वत्वादिविशिष्टोऽहं दण्डकारण्यं व्यचरम् ॥ ३ ॥

रा० टी०—अग्नीति । अत्यन्तघोरोऽहं तापसान् प्रधर्षयन् सन् अग्निहोत्रादिषु व्यचरम् ॥ ४ ॥

रा० टी०—निहत्येति । तापसान् निहत्य तेषां रुधिराणि पिबन् मांसानि भक्षयंश्च अत एव वनगोचरान् त्रासयन् ऋषिमांसाशनः ऋषिमांसभक्षकः [illegible] दण्डकावनं व्यचरम् । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—दीप्तजिह्व इत्यादि । विशेषणत्रयेण निरपेक्षहननसाधनभूयस्त्वं विवक्ष्यते ॥ ३–७ ॥

७–९] ति० टी०—आसादयं प्राप्तवान् । तापसं धर्मं तापससंबन्धिधर्ममाश्रितम् ॥ ७–९ ॥

रा० टी०—तदेति । तदा तस्मिन् काले धर्मदूषकोऽहं दण्डकारण्ये विचरन् तापसं धर्मम् आश्रितं तदारामं तदः अमृतदाता आरामो विहारो यस्य तं रामम् आसादयम् अपीडयं च ॥ ७ ॥

रा० टी०—वैदेहीमिति । वैदेहीं लक्ष्मणं च तापसं महाबलं रामं च तापसोऽयम् इदानीं न युद्धनिपुण इत्यर्थः, इति ज्ञात्वा पूर्ववैरमनुस्मरन् सन् परिभूय अनादृत्य आसमिति शेषः । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—तापसमित्यादि । रामपराक्रमं जानन्नपि कथं तत्परिभवायोपक्रम इत्यत्राह—तापसोऽयमिति । ज्ञात्वेति तापसत्वादहिंसापरेण भवितव्यमिति विश्वस्येत्यर्थः । एवंविधदुर्व्यापारप्रयोजकं वैरस्मरणम् अकृता अप्रवर्तिता प्रज्ञा बुद्धिर्यस्य सः ॥ ८–१० ॥

१०–११] ति० टी०—अकृतप्रज्ञोऽकृतविचारः । तं प्रहारं पूर्वं रामदत्तप्रहारम् ॥ १० ॥ ११ ॥

रा० टी०—अभीति । तं प्रसिद्धप्रहारं रामबाणकृतप्रहारमनुस्मरन् सन् सुसंक्रुद्धः जिघांसुः राममिति शेषः, अकृतप्रज्ञः विचाररहितोऽहमभ्यधावम् ॥ १० ॥

---

१ वनमिति गो. रा. पाठः । २ कायस्तीक्ष्णदंष्ट्र इति गो. पाठः । ३ तथेति गो. पाठः । ४ तथेति गो. पाठः । ५ विचरन्धर्मदूषक इति गो. पाठः । ६ अर्धमेतद् गो. नास्ति । ७ धर्मचारिणमिति गो. पाठः । ८ हीति गो. पाठः । ९ मुक्त इति गो. पाठः । १० बलवदिति गो. पाठः । ११ निस्त्रा इति गो. पाठः ।

ते बाणा वज्रसंकाशाः सुघोरा रक्तभोजनाः । आजग्मुः सहिताः सर्वे त्रयः संनतपर्वणः ॥ १२ ॥
पराक्रमज्ञो रामस्य शठो दृष्टभयः पुरा । समुत्क्रान्तो मुक्तस्तावुभौ राक्षसौ हतौ ॥ १३ ॥
शरेण मुक्तो रामस्य कथंचित्प्राप्य जीवितम् । इह प्रव्राजितो युक्तस्तापसोऽहं समाहितः ॥ १४ ॥
वृक्षे वृक्षे हि पश्यामि चीरकृष्णाजिनाम्बरम् । गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥ १५ ॥
अपि रामसहस्राणि भीतः पश्यामि रावण । रामभूतमिदं सर्वमरण्यं प्रतिभाति मे ॥ १६ ॥
राममेव हि पश्यामि रहिते राक्षसेश्वर । दृष्ट्वा स्वप्नगतं राममुद्भ्रामीव चेतनः ॥ १७ ॥
रकारादीनि नामानि रामत्रस्तस्य रावण । रक्षांसि च रथाश्चैव विस्रासं जनयन्ति मे ॥ १८ ॥
अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमम् । बलिं वा नमुचिं वापि हन्याद्धि रघुनन्दनः ॥ १९ ॥

रा० टी०—तेनेति । सुमहच्चापं विकृष्य सुपर्वाणिलतुल्यगाः गरुडवायुसदृशवेगवन्तः शत्रुनिबर्हणाः रिपुध्वंसकाः शितास्रयो बाणाः तेन रामेण त्यक्ताः ॥ ११ ॥

१२] ति० टी०—संनतपर्वणः अदीर्घत्वमार्षम् ॥ १२ ॥

रा० टी०—त इति । वज्रसंकाशाः वज्रस्यापि प्रकाशकाः सुघोराः शत्रुभ्यो भयप्रदाः सन्नतपर्वणः सन्नतपर्वाणः सर्वे ते रामप्रयुक्ताश्रयो बाणाः सहिताः सन्तः आजग्मुः ॥ १२ ॥

गो० टी०—ते बाणा इति । सर्वे इति प्रयोगयौगपद्यार्थमुक्तं सन्नतपर्वणः सन्नतपर्वाणः ॥ ११ ॥

१३] ति० टी०—शठो गूढविप्रियकारी । दृष्टभयः रामादिति शेषः । समुत्क्रान्तः पलायितः ॥ १३ ॥

रा० टी०—पराक्रम इति । रामस्य पराक्रमज्ञः शठः अपराधं विनापि हननाय प्रवृत्तः पुरा दृष्टभयः दृष्टं भयं येन सोऽहं समुत्क्रान्तः पलायित आसमिति शेषः, ततः पलायनात् अहं मुक्तः तौ मया सह गतौ उभौ राक्षसौ हतौ पलायनान्मुक्त इत्यनेन पलायनपरं रामबाणो न हन्तीति सूचितं तेन तद्बाणस्यापि परमधर्मज्ञत्वं सूचितम् ॥ १३ ॥

गो० टी०—पराक्रमज्ञ इति । दृष्टं भयं येन करणेन स दृष्टभयः उद्भ्रान्तः पलाय्य गतः । मुक्त इति पलायितेषु रामबाणप्रवृत्तेरिति भावः । रामस्येति पदं काकाक्षिन्यायात् पूर्वोत्तरपदयोरन्वेति । यतः मया रामस्य शरः पुरा दृष्टभयः ततः रामस्य पराक्रमज्ञोऽहं समुद्भ्रान्तः सन् मुक्तः रामपराक्रमज्ञौ तावुभौ राक्षसौ तु हतावित्यन्वयः ॥ १३ ॥

१४–१६] ति० टी०—प्रव्राजितः परिव्राजितः कृतसकलदुर्वृत्तपरित्यागः । युक्तो योगाभ्यासरतः, अत एव तापसस्तपोनिष्ठः । समाहितः स्थिरान्तःकरणः ॥ १४–१६ ॥

रा० टी०—शरेणेति । रामस्य शरेण कथंचिन्मुक्तोऽहं जीवितं जीवनं प्राप्य इह प्रव्राजितः त्यक्तदुष्कृतकर्मा अत एव युक्तः योगक्रियानिरतः तापसः कृच्छ्रचान्द्रायणादिनिरतः अत एव समाहितः एकाग्रचित्तोऽहमस्मीति शेषः ॥ १४ ॥

गो० टी०—शरेणेति । प्रव्राजितः कृतसकलदुर्वृत्तपरित्याग इत्यर्थः । युक्तः उचिताचरणः तापसः तपोनिष्ठः समाहितः नियतमनस्कः ॥ १३ ॥

रा० टी०—स्वस्यातिरामभीतत्वं द्योतयन्नाह—वृक्षे इति । वृक्षे वृक्षे प्रतिवृक्षं चीरकृष्णाजिनाम्बरं चीरकृष्णाजिने अम्बरे यस्य तं गृहीतधनुषं रामं पाशहस्तमन्तकमिव पश्यामि ॥१५॥

गो० टी०—वृक्षे वृक्ष इति । 'हृदयान्नापयातोऽसि दिष्ट्या सर्वान्न दृश्यसे । रामभूतं जगदभूद्रामे राज्यं प्रशासति' इत्यादाविव शोकरागभयादिजनितनिरन्तरसंतन्यमानचिन्तासक्तस्य साक्षात्कारोपपत्तिः । भयस्योत्तरोत्तरभूमिकामिप्रायेण दर्शनस्याप्युत्तरोत्तरदशेत्यनुसंधेयम् ॥ १४ ॥

रा० टी०—अपीति । हे रावण ! रामसहस्राण्यपि भीतोऽहं पश्यामि अत एव इदं सर्वमरण्यं रामभूतं मे प्रतिभाति ॥ १६ ॥

गो० टी०—एकस्यैव रामस्य प्रतिवृक्षं गत्वा गत्वा दृश्यमानत्वमुच्यत इति भ्रमं वारयति—अपीति । न केवलं प्रतिवृक्षं किंतु सर्वत्र प्रदेश इत्याह—रामभूतमिति ॥ १६ ॥

१७] ति० टी०—रहिते रामरहितेऽपि वने उद्भ्रामामि भीतो भवामीव । चेतनः सुप्तौ नष्टचैतन्योऽपि तदर्शनवशाद्बद्धचैतन्यः प्रलपामीत्यर्थः ॥ १७ ॥

रा० टी०—राममिति । हे राक्षसेश्वर ! रहिते रामाभाववत्यपि देशे राममेव पश्यामि अत एव स्वप्नगतं रामं दृष्ट्वा चेतनः प्राप्तजाग्रच्चैतन्य इव उद्भ्रामामि अनेकविधभ्रान्तिं प्राप्नोमि ॥ १७ ॥

गो० टी०—नेदं रामस्य मायाकृतमित्याह—राममेवेति । रहिते रामरहिते प्रदेशे । न केवलं जाग्रदवस्थायामेव प्रतीतोऽयं किंतु स्वप्नावस्थायामपि—दृष्ट्वेति । उद्भ्रामामि भ्रान्तं प्रलापं करोमीत्यर्थः ॥ १६ ॥

१८–१९] ति० टी०—रकारादीनीति । एवं च साक्षादर्शने यत्रासः स वक्तुमशक्य इति भावः । तन्नामकदेवसत्त्वेऽपि नाम भयजनकम्, किं वक्तव्यं संपूर्णतन्नाम्नो भयजनकत्वमिति । 'स्थाने हृषीकेश तव प्रकीर्त्या' इति गीताश्लोकार्थोऽत्र व्यक्तः ॥ १८ ॥ १९ ॥

१ सुमुक्त इति गो. पाठः । २ शर इति गो. पाठः । ३ समुद्भ्रान्त इति गो. पाठः । ४ चेति गो. पाठः । ५ राक्षसाविति गो. पाठः । ६ विचेतन इति गो. पाठः । ७ त्रासं संजनयन्तीति गो. पाठः ।

यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा । स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः ॥ ५ ॥
अवश्यं तु मया तस्य संयुगे खरघातिनः । प्राणैः प्रियतरा सीता हर्तव्या तव संनिधौ ॥ ६ ॥
एवं मे निश्चिता बुद्धिर्हृदि मारीच [1]विद्यते । न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ७ ॥
दोषं गुणं वा संपृष्टस्त्वमेवं वक्तुमर्हसि । अपायं वा उपायं वा कार्यस्यास्य विनिश्चये ॥ ८ ॥
संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता । उद्यताञ्जलिना [2]राज्ञो य इच्छेद्भूतिमात्मनः ॥ ९ ॥
वाक्यमप्रतिकूलं तु मृदुपूर्वं शुभं हितम् । उपचारेण वक्तव्यो युक्तं च वसुधाधिपः ॥ १० ॥
सावमर्दं तु यद्वाक्यं[3]मथवा हितमुच्यते । नाभिनन्देत[4] तद्राजा [5]मानार्थी मानवर्जितम् ॥ ११ ॥
पञ्चरूपाणि राजानो धारयन्त्यमितौजसः । अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च ॥ १२ ॥

हेतुत्रयम्–पापेत्यादि । पापशीलत्वान्मूर्खत्वाद्विशेषतो मानुषत्वाच्च । तेन नाहं योद्धुमर्हः किंतु तद्भार्यापहरणमेव तदपकाराय प्रतिक्रियेति भावः ॥ ४ ॥

५] ति० टी०–तत्र मूर्खत्वमुपपादयति—य इति । प्राकृतमसारम् । स्त्री कैकेयी । एकपदे द्राक् ॥ ५ ॥

६–७] ति० टी०–संयुगे खरहन्तुरित्यन्वयः ॥ ६–७ ॥

रा० टी०–तन्मूर्खत्वमेवोपपादयन्नाह–य इति । प्राकृतं स्त्रीवाक्यं श्रुत्वा एकपदे तत्क्षणे एव सुहृदादीन् त्यक्त्वा यो वनं गतस्तस्य संयुगे खरघातिनो रामस्य प्राणैः प्रियतरा सीता मयाऽवश्यं हर्तव्या । प्राणैः प्रियतरेत्यनेन तद्दुःखार्थमेव सीताहरणमिति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–मूर्खत्वमुपपादयति–यदिति । प्राकृतम् असारं स्त्रीवाक्यं कैकेयीवाक्यम् एकपदे उत्तरक्षणे प्राणैः प्राणेभ्यः प्रियतरा तत्प्राणापहरणादपि वरं तत्स्त्रियोपहरणमिति भावः । तव सन्निधौ सति हर्तव्या त्वत्सन्निधिसुखेन हर्तव्येत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०–एवमिति । हे मारीच ! मे हृदि एवं निश्चिता या बुद्धिर्मेनं वर्तते सा बुद्धिः सेन्द्रैः इन्द्रसहितैः सुरासुरैरपि व्यावर्तयितुं न शक्या ॥ ७ ॥

गो० टी०–एवमिति । निश्चिता निश्चयरूपा सेन्द्रैः किं पुनस्त्वयेति भावः ॥ ७ ॥

८] ति० टी०–अपि चापृष्टोत्तरप्रलापस्तवासंगत इत्याह–दोषं गुणं वेति । कस्यचित्संदिग्धस्य कार्यस्य निश्चये निश्चयसिद्ध्यर्थमनुष्ठिते को गुणः, को दोषः, क उपायः, कोऽपायः, इति यदि पृष्टं स्यात्तदा एवं वक्तुमर्हसि गुणदोषादिक्रमित्यर्थः । मया तु निश्चिते कार्ये केवलं साहाय्ये नियुज्यसे, अतो न ते जल्पः संगत इति भावः ॥ ८ ॥

रा० टी०–दोषमिति । [6]अस्य चिकीर्षितस्य कार्यस्य विनिश्चये विनिश्चयार्थं गुणं वा दोषं वा अपायं तद्विघ्नध्वंसं वा उपायं तत्साधनं वा यदि त्वं पृष्टस्तदा एवं वक्तुमर्हसि एतेन तन्मया न पृष्टमिति सूचितं, तेन अपृष्टं न वक्तव्यमिति व्यञ्जितम् ॥ ८ ॥

गो० टी०–अपि चापृष्टोत्तरप्रलापस्तवासंगत इत्याह–दोषमिति । कार्यनिश्चये विषये को गुणदोषौ तत्साधने कावुपायाविति पृष्टश्चेदुत्तरं वक्तुमर्हसि नास्माकं तज्जिज्ञासा ततो नैवं वक्तुं युक्तमित्यर्थः ॥ ८ ॥

९] ति० टी०–पृष्टोत्तरमेव राजनि सचिवेन विनीतेन वाच्यमित्याह—संपृष्टेन त्विति । उद्यताञ्जलिनेत्यनेन विनीतता दर्शिता ॥ ९ ॥

रा० टी०–संपृष्टेनेति । राज्ञः सकाशात् यः आत्मनो भूतिमिच्छेत् तेन विपश्चिता उद्यताञ्जलिना सचिवेन संपृष्टेनैव वक्तव्यं पृष्टमेव उत्तरितव्यमित्यर्थः ॥ ९ ॥

गो० टी०–प्रसङ्गादाजसन्निधौ विज्ञापनप्रक्रियां दर्शयति–संपृष्टेनेत्यादिना । विपश्चिता विदुषा राजसेवाप्रकारज्ञेनेति यावत् । भूतिम् ऐश्वर्यम् ॥ ९ ॥

१०] ति० टी०–उपचारेण राजोत्युक्तमार्गेण युक्तम् ॥ १० ॥

रा० टी०–वाक्यमिति । अप्रतिकूलं प्रतिकूलरहितं मृदुपूर्वं शुभं मधुरवर्णविशिष्टं हितं पथ्यम् उपचारेण नीतिशिक्षया युक्तं वाक्यं वसुधाधिपो वक्तव्यः ॥ १० ॥

गो० टी०–एवं वक्तृगुणा उक्ताः अथ वचनप्रकारमाह–वाक्यमिति । उपचारेण युक्तं बहुमानेन पुरस्कृतं हितमप्युपचारपूर्वं वक्तव्यमित्यर्थः ॥ १० ॥

११] ति० टी०–सावमर्दं तु राजपृष्टावमर्दसहितम् । अथवा यद्यप्यर्थे । यद्यपि हितं तथापि नाभिनन्देत । त्वं त्वपृष्ट एव ममाहितमवमर्दसहितं मानहीनं वदसीत्यनुचितमिति भावः ॥ ११ ॥

रा० टी०–सेति । सावमर्दं राजपृष्टविधातकं मानवर्जितं वा हितमपि तद्वाक्यं मानार्थी राजा नाभिनन्देत ॥ ११ ॥

गो० टी०–प्रकारान्तरेण न वक्तव्यमित्याह–सावमर्दमिति । सावमर्दं तिरस्कारसहितम् ॥ ११ ॥

१२] ति० टी०–तत्र वक्तुरनिष्टमपीत्याह–पञ्चेति । के पञ्चेत्यत्राह—अग्नेरिति ॥ १२ ॥

रा० टी०–नन्वं किं तदभिनन्दनेनेत्यत आह–पञ्चेति ।

---

१ वर्तत इति गो. पाठः । २ राज्ञे इति गो. पाठः । ३ मारीचेति गो. पाठः । ४ नन्दतीति गो. पाठः । ५ मानार्ह इति गो. पाठः । ६ क्रिया इति युक्तमिति भाति ।

औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् । धारयन्ति महात्मानो राजानः क्षणदाचर ॥ १३ ॥
तस्मात्सर्वास्ववस्थासु मान्याः पूज्याश्च [1]नित्यदा। त्वं तु धर्ममविज्ञाय केवलं मोहमाश्रितः ॥ १४ ॥
अभ्यागतं तु [2]दौरात्म्यात्परुषं [3]वदसीदृशम् । गुणदोषौ न पृच्छामि [4]क्षेम्यं चात्मनि राक्षस ॥ १५ ॥
मयोक्तमपि चैतावत्त्वां [5]प्रत्यमितविक्रम । अस्मिंस्तु [6]सं भवान्कृत्ये साहाय्यं कर्तुमर्हसि ॥ १६ ॥
शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम । सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ॥ १७ ॥
आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर । प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ॥ १८ ॥
त्वां [7]हि मायामयं दृष्ट्वा काञ्चनं जातविस्मया । आनयैनमिति क्षिप्रं रामं वक्ष्यति मैथिली ॥ १९ ॥
अपक्रान्ते [8]चै काकुत्स्थे दूरं [9]गत्वाप्युदाहर [10]। हा सीते लक्ष्मणेत्येवं रामवाक्यानुरूपकम् ॥ २० ॥
तच्छ्रुत्वा रामपदवीं सीतया च प्रचोदितः । अनुगच्छति [11]संभ्रान्तं सौमित्रिरपि सौहृदात्॥ २१ ॥
अपक्रान्ते च काकुत्स्थे लक्ष्मणे च यथासुखम् । [12]औहरिष्यामि वैदेहीं सहस्राक्षः शचीमिव ॥ २२ ॥
एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ राक्षस । राज्यस्यार्धं [13]ददास्यामि मारीच तव सुव्रत ॥ २३ ॥

अमितौजसो राजानः अग्न्यादीनां पञ्चानां पञ्चरूपाणि धारयन्ति ॥ १२ ॥

गो० टी०-पञ्चेति । पञ्च रूपाणि अग्न्यादिपञ्चकस्य यानि रूपाणि तानि धारयन्तीत्यर्थः ॥ १२ ॥

१३] ति० टी०-कानि रूपाणि तत्राह क्रमेण-औष्ण्यमिति । औष्ण्यं तैक्ष्ण्यम् । सौम्यं दयार्द्रचित्तत्वम् । दण्डं दुष्टनिग्रहम् । एवं च तादृशे वक्तरि तीक्ष्णदण्डपात इत्याशयः॥१३॥

रा० टी०-तानि रूपाणि क्रमेणाह-औष्ण्यमिति । महात्मानो राजानः औष्ण्यादीनि धारयन्ति तत्रौष्ण्यं तीक्ष्णत्वं, विक्रमो बलातिशयः, सौम्यं कृपालुता, दण्डः दुष्टनिग्रहः, प्रसन्नता प्रसादः, एतेन राजा द्रोहिणोऽवश्यं विनाशयतीति सूचितम्॥१३॥

गो० टी०-तान्येवाह-औष्ण्यमिति । औष्ण्यं तैक्ष्ण्यं सौम्यम् आह्लादकरत्वं दण्डं दुष्टनिग्रहं मान्याः मनसा पूज्याः, पूज्याः वाचा बहुमन्तव्याः ॥ १३ ॥

१४] ति० टी०-धर्मं राजधर्मम् ॥ १४ ॥

रा० टी०-तस्मादिति । तस्मात् स्वकल्याणहेतोः सर्वास्ववस्थासु सर्वकालेषु पार्थिवा मान्याः पूज्याश्च । अर्धं पृथक्-त्वमिति । धर्मं सचिवकर्म अविज्ञाय केवलं मोहमज्ञानमाश्रितः त्वं तु दौरात्म्यात् दुष्टस्वभावत्वाद्धेतोः अभ्यागतं त्वत्संश्रयं प्राप्तं माम् ईदृशं परुषं वदसि ॥ १४ ॥

गो० टी०-सामान्यत उक्तमर्थं प्रकृते संगमयति-त्वं त्विति । धर्मं राजधर्मं मोहम् अज्ञानं दौरात्म्यात् दौर्जन्यात् ॥ १४ ॥

१५] ति० टी०-अभ्यागतमतिथिमित्यनेन पूज्यत्वातिशयं सूचयति-गुणदोषप्रश्ने किं मम हितमिति प्रश्ने वा ईदृशं वक्तुं युक्तम्, न चैतदेकमपि मया पृष्टमिति भावः ॥ १५ ॥

रा० टी०-नन्वं त्वया पृष्ट एवाहङ्कृत्वानित्यत आह-गुणेति । हे राक्षस ! हे अमितविक्रम ! गुणदोषौ मत्कर्तव्ये को गुणः कश्च दोष इति आत्मनि मयि क्षेमम् उचितं न वेति चेत्यहं न पृच्छामि किंतु अस्मिन् कृत्ये सभवान् सभः सभावान् राजा तद्वान् नित्यं राजसेवीत्यर्थः, त्वं साहाय्यं कर्तुमर्हसि एतावदेव त्वां प्रति मयोक्तम् ॥ १५ ॥ १६ ॥

गो० टी०-तर्हि कथं मया वक्तव्यमित्यत्राह-गुणेति । गुणदोषौ आत्मनि क्षेमं च न पृच्छामि किंतु संप्रति मया तव तुभ्यं मयोक्तमेतावत् ॥ १५ ॥

१६] ति० टी-अपि च अपि तु मया त्वां प्रत्येतावदेवोक्तम् । किं तत्राह—अस्मिन्सीतापहाररूपे कृत्ये स भवान्मया नियुक्तः साहाय्यं कर्तुमर्हसीति ॥ १६ ॥

गो० टी०-किंतदित्यत्राह-अस्मिन्निति । कृत्ये कार्ये शृण्विति साहाय्ये करणीये यत्कार्यं तद्वचनं तद्विषयं वचनं शृणु ॥ १६ ॥

१७-१९] ति० टी०-किं तन्मत्कर्तव्यं साहाय्यं तत्राह-शृण्विति । साहाय्ये मम वचनायत्कार्यं तत्कर्म शृण्विति संबन्धः ॥ १७-१९ ॥

रा० टी०-मदुक्तं साहाय्यं कर्म विस्मृतं चेत् पुनरुच्यते इत्याह-शृण्विति ॥ १७ ॥

रा० टी०-आश्रम इति ॥ १८ ॥

गो० टी०-सौवर्ण इति । प्रज्ञप्ते अये ॥ १७ ॥ १८ ।

रा० टी०-त्वामिति ॥ १९ ॥

गो० टी०-किं तस्य प्रयोजनं तत्राह-त्वामिति ॥ १९ ॥

२०-२३] ति० टी०-रामवाक्यानुरूपकं रामध्वनिसदृशध्वनियुक्तम् ॥ २०-२३ ॥

---

१ पार्थिवा इति गो. रा. पाठः । २ आस्थित इति गो. पाठः । ३ मामिति गो. पाठः । ४ वक्तुमिच्छसीति गो. पाठः । ५ क्षेममिति गो. रा. पाठः । ६ तव चैतावत्संप्रतीति गो. पाठः । ७ त्वं महाकृत्य इति गो. पाठः । ८ तु मायामृगमिति गो. पाठः । ९ एवमिति गो. पाठः । १० त्विति गो. पाठः । ११ यात्वा व्युदाहरेति गो. पाठः । १२ संभ्रान्त इति गो. पाठः । १३ आनयिष्यामीति गो. पाठः । १४ प्रयच्छामीति गो. पाठः ।

गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये । अहं त्वानुगमिष्यामि सरथो दण्डकावनम् ॥ २४ ॥
प्राप्य सीतामयुद्धेन वञ्चयित्वा तु राघवम् । लङ्कां प्रति गमिष्यामि कृतकार्यः सह त्वया ॥ २५ ॥
नो[1] चेत्करोषि मारीच हन्मि त्वामहमद्य वै । एतत्कार्यमवश्यं मे बलादपि करिष्यसि ॥
राज्ञो विप्रतिकूलस्थो न जातु सुखमेधते ॥ ॥ २६ ॥
आसाद्य तं जीवितसंशयस्ते मृत्युर्ध्रुवो ह्यद्य मया विरु[2]ध्यतः ।
एतद्यथावत्परिगण्य बुद्ध्या यदत्र पथ्यं कुरु तत्तथा त्वम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–अपक्रान्त इति । काकुत्स्थे रामे अपक्रान्ते सति हा सीते ! हा लक्ष्मणेत्येवम् एतद्रूपं रामवाक्यानुरूपकं रामवाक्यमेवेदमिति बोधकं वाक्यं दूरं गत्वा त्वमुदाहर ॥२०॥

गो० टी०–अपक्रान्त इति । अनुरूपकं स्वार्थे कप्रत्ययः ॥ २० ॥

रा० टी०–तदिति । तत् रामवाक्यानुरूपकं वाक्यं श्रुत्वा सीतया प्रचोदितः संभ्रान्तः सौमित्रिरपि सौहृदात् रामपदवीम् अनुगच्छति अनुगन्ता ॥ २१ ॥

गो० टी०–तदिति । पदवीं मार्गम् ॥ २१ ॥

रा० टी०–अपक्रान्त इति । अपक्रान्ते अपगते सति वैदेहीम् आहरिष्यामि ॥ २२ ॥

रा० टी०–तत्र दृष्टान्तः–एवमिति । एवम् इदं कार्यं कृत्वा निश्चित्य यथेष्टं गच्छ । तत्फलमाह–राज्यस्यार्धं स्वकीयमर्धं राज्यं प्रदास्यामि तुभ्यमिति शेषः ॥ २३ ॥

गो० टी०–अपक्रान्त इति । यथासुखं यत्नं विना २२॥२३

२४-२५] ति० टी०–शिवं मार्गं गच्छ सौम्यो भूत्वा प्रस्थितो भवेत्यर्थः । किं च शिवं मनोहरं मार्गं मृगरूपं गच्छ प्रामुहि ॥ २४ ॥ २५ ॥

रा० टी०–गच्छेति । हे सौम्य ! अस्य मदुक्तस्य कार्यस्य विवृद्धये सम्यक्सिद्धये इत्यर्थः, शिवं कल्याणकारकं मार्गं गच्छ त्वा त्वाम् अहमनुगमिष्यामि ॥ २४ ॥

रा० टी०–प्राप्येति । राघवं वञ्चयित्वा अयुद्धेन युद्धाभावेन सीतां प्राप्य आहृत्य कृतकार्योऽहं त्वया सह लङ्कां प्रति गमिष्यामि ॥ २५ ॥

गो० टी०–गच्छेति । मार्गं मृगसंबन्धिरूपं शिवं मनोहरं गच्छ प्रामुहि ॥ २४ ॥ २५ ॥

२६] ति० टी०–अथ राजत्वात्स्ववाक्याकरणे दण्डमाह–नो चेदिति । मद्वचनानुष्ठाने मरणमेवानुष्ठाने तु जीवनं मत्तो बहुधनादिप्राप्तिश्च । एवं प्रार्थनयाऽकरणे बलान्मद्धस्तेहतुकमरणभयात्त्वं च करिष्यस्येव ॥ २६ ॥

रा० टी०– नो इति । हे मारीच ! चेद्यदि त्वं नो करोषि मदुक्तं न करिष्यसि तर्हि अद्य अस्मिन्दिने एव त्वां हन्मि हनिष्यामि । अर्धं पृथक् । ननु अपराधमन्तरा हननमयुक्तमित्यत आह–एतदिति । एतदुक्तं मे कार्यं बलादपि करिष्यसि । अकरणे दोषमाह–राज्ञो विप्रतिकूलस्थः अननुकूलाचरणः जनः जातु कदाचिदपि सुखं न एधते ॥ २६ ॥

गो० टी०–न चेदिति । बलादपि करिष्यसि अनिच्छतात्वया सर्वथा अहमेतत्कार्यं कारयिष्यामीत्यर्थः । विपक्षे बाधकमाह–राज्ञ इति ॥ २६ ॥

२७] ति० टी०–रामात्पर्यायद्वये इव कदाचिज्जीवन संभाव्यत एव मद्वचनाकरणे तु सर्वथाऽस्य मृत्युरेवेत्याह–आसाद्येति । तं रामम् । संशयो न तु नाशनिश्चयः । एतन्मदुक्तवचनम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–ननु रामकर्तृकवधभिया न गमिष्यामीत्यत आह–आसाद्येति । तं राममासाद्य प्राप्य ते जीवितसंशयः तस्य बलवत्त्वे तव चापलायने वधः तवैव बलवत्त्वे पलायने वा वधाभावः मया विरुध्यतस्तु ते मृत्युर्ध्रुवः मद्बलवत्त्वस्य निश्चितत्वेन समीपस्थत्वात्पलायनानर्हत्वेन च मरणे न संशय इति तात्पर्यम् अतः बुद्ध्या एतत् मदुक्तं परिगण्य विचार्य अनयोर्मध्ये यत् पथ्यं हितं तत् तथा निश्चित्य कुरु ॥२७॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

गो० टी०–कार्यकरणाकरणयोर्गुणदोषौ दर्शयति–आसाद्येति । तं राममासाद्य मृगरूपेण प्राप्य जीवितस्य संशयः दैवाज्जीवितं लभ्येतापि मद्विरोधे तु जीवितहानिरेव स्यात् प्रतिगृह्य निश्चित्य अत्र कार्यद्वये यत्ते पथ्यं तत्कुरु मदुक्ताकरणे अवश्यं हननमित्यर्थः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

---

१ नेति गो. पाठः । २ विरुध्येति गो. पाठः । ३ प्रतिगृह्येति गो. पाठः ।

एकचत्वारिंशः सर्गः ।

धार्ष्ट्यान्मारीचः पुना रावणमुपालभमानः सीताहरणं महानर्थहेतुस्त्वयाऽऽदित इति परिशोचति ।

आज्ञप्तो रावणेनेत्थं प्रतिकूलं च रामवत् । अब्रवीत्परुषं वाक्यं [3]निःशङ्को राक्षसाधिपम् ॥ १ ॥
केनायमुपदिष्टस्ते विनाशः पापकर्मणा । सपुत्रस्य स[4]राज्यस्य सामात्यस्य निशाचर ॥ २ ॥
कस्त्वया सुखिना राजन्नाभिनन्दति पापकृत् । केनेदमुपदिष्टं ते मृत्युद्वारमुपायतः ॥ ३ ॥
शत्रवस्तव सुव्यक्तं हीनवीर्या [5]निशाचर । इच्छन्ति त्वां विनश्यन्तमुपरुद्धं बलीयसा ॥ ४ ॥
केनेदमुपदिष्टं ते क्षुद्रेणाहितबुद्धिना । यस्त्वामिच्छति नश्यन्तं स्वकृतेन निशाचर ॥ ५ ॥
वध्याः खलु न [6]वध्यन्ते सचिवास्तव रावण । ये त्वामुत्पथमारूढं न [7]निगृह्णन्ति सर्वशः ॥ ६ ॥
अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः । निग्राह्यः सर्वथा सद्भिः स [8]निग्राह्यो न गृह्यते ॥ ७ ॥

१] ति० टी०—राजवद्राजयोग्यं रावणेनाज्ञप्तो रामलक्ष्मणप्रतारणरूपं कार्यं प्रतिकूलमन्यथा वधं करिष्यामीत्येवं प्रतिकूलवाक्यसहितं यथाज्ञप्तो मृत्योर्निःशङ्को मारीचः परुषं शब्दतोऽर्थतश्च वाक्यमब्रवीत् ॥ १ ॥

रा० टी०—रावणपरुषवचनश्रवणानन्तरकालिकं मारीचवृत्तान्तमाह—आज्ञप्त इत्यादिभिः । इत्यनेन प्रकारेण रावणेन प्रतिकूलमाज्ञप्तो निःशङ्को रावणात् शङ्कारहितो मारीचो राजवत् परुषं वाक्यं राक्षसाधिपमब्रवीत् ॥ १ ॥

गो० टी०—येन सर्वात्मना वर्ज्यं प्रातिकूल्यं हितैषिणाम् ।
सर्वलोकानुकूलं तमाश्रये रघुनायकम् ॥

आज्ञप्त इत्यादि । अराजवत् यदा रामप्रातिकूल्ये प्रवृत्तस्तदैव राजत्वं गतमिति सूनेराशयः, यद्वा राजवत् राजार्हं "तदर्हम्" इत्यर्थीये वतिः, यद्वा राजवदिति पूर्वसर्गोक्तमौद्धत्यं लक्ष्यते वाक्यं वाक्यार्थोद्यानं मृगरूपमासाद्य त्वया गन्तव्यमित्येवंरूपं प्रतीत्यर्थः, यद्वा प्रतिकूलवाक्यम् आज्ञप्तः चोदितः उक्त इत्यर्थः ॥ १ ॥

२] ति० टी०—विनाशो विनाशोपायः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—केनेति । हे निशाचर ! पुत्रादिसहितस्य तव अयं सीतापहारो विनाशः विध्वंसोपायः केन पापकर्मणा उपदिष्टः ॥ २ ॥

गो० टी०—केनायमिति । विनाशः विनाशोपायः ॥ २ ॥

३] ति० टी०—सुखिना त्वया सहावस्थानमिति शेषः । को नाभिनन्दति केन पापकृता । उपायतः उपायव्याजेन ॥ ३ ॥

रा० टी०—क इति । सुखिना त्वया करणेन कः पापकृत् नाभिनन्दति अत एव हेतोः उपायतो मृत्युद्वारं केनोपदिष्टम् ॥ ३ ॥

गो० टी०—क इति । सुखिना त्वया अवस्थानमिति शेषः । मृत्युद्वारं मृत्युद्वारतुल्यमिदं कार्यम् उपायतः व्याजेन ॥ ३ ॥

४] ति० टी०—तथोपदेष्टारस्त्वत्तो हीनवीर्यास्तव शत्रवः ये त्वां त्वत्तो बलवत्तरेण शत्रुणोपरुद्धं विनश्यन्तं द्रष्टुमिच्छन्ति ॥ ४ ॥

रा० टी०—शत्रव इति । हे निशाचर ! हीनवीर्याः तव शत्रवः बलीयसा अतिबलवता शत्रुणोपरुद्धम् अत एव विनश्यन्तं त्वामिच्छन्ति ॥ ४ ॥

गो० टी०—शत्रव इति । बलीयसा रामेण उपरुद्धम् आक्रान्तम् अत एव विनश्यन्तं त्वामिच्छन्ति त्वद्विनाशं रामविरोधमुखेनेच्छन्तीत्यर्थः ॥ ४ ॥

५] ति० टी०—स्वकृतेन स्वनिर्मितविनाशोपायेन ॥ ५ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—केनेति । स्वकृतेन क्षुद्रेण कर्मणा विनश्यन्तं त्वां य इच्छति तेनाहितबुद्धिना केनेदमुपदिष्टम् ॥ ५ ॥

गो० टी०—न केवलं शत्रवः तत्रापि क्षुद्रा एवेदं कार्यमिच्छन्तीत्याह—केनेति । स्वकृतेन त्वत्कृताकृत्येन ॥ ५ ॥

६] ति० टी०—ये त्वामेवं कुपथमारूढं न निगृह्णन्ति न वारयन्त्यमात्यास्ते वध्या वधयोग्याः कुतस्त्वया न वध्यन्त इत्यर्थः ॥ ६ ॥

रा० टी०—ऽनुचितवधोपेक्षा ते न युक्तेति बोधयन्नाह—वध्या इति । उत्पथमारूढं त्वां ये न निगृह्णन्ति ते वध्याः सर्वशः सचिवा न वध्यन्ते खलु अनुचितमेतदित्यर्थः ॥ ६ ॥

गो० टी०—वध्या इति । ये उत्पथं लोकशास्त्रविरुद्धमार्गम् आरूढं प्रविष्टं त्वां न निगृह्णन्ति तस्मान्मार्गान्न निवर्तयन्ति ते सचिवाः वध्याः वधार्हाः ॥ ६ ॥

७] ति० टी०—तत्र नीतिशास्त्रमाह—अमात्यैरिति ॥ ७ ॥

रा० टी०—अमात्यैरिति । कामवृत्तः अत एव कापथमाश्रितो राजा सद्भिरमात्यैः निग्राह्यः स कापथमाश्रितः अत एव निग्राह्यस्त्वं न गृह्यसे ग्राह्यत्वेन न स्वीक्रियसे ॥ ७ ॥

गो० टी०—एतदुपयुक्तत्वेन सचिवकर्तव्यं दर्शयन् प्रकृते

---

१ ऽराजवद्राक्ष्यमिति गो. पाठः । २ निशाचर इति गो. पाठः । ३ मारीच इति गो. पाठः । ४ सराज्येति गो. पाठः । ५ निशाचरा इति गो. पाठः । ६ ऽहितबुद्धिनेति गो. पाठः । ७ हन्यन्त इति गो. पाठः । ८ न……निगृह्यस इति गो. पाठः ।

धर्ममर्थं च कामं च यशश्च जयतां वर । स्वामिप्रसादात्सचिवाः प्राप्नुवन्ति निशाचर ॥ ८ ॥
विपर्यये तु तत्सर्वं व्यर्थं भवति रावण । व्यसनं स्वामिवैगुण्यात्प्राप्नुवन्तीतरे जनाः ॥ ९ ॥
राजमूलो हि धर्मश्च यशश्च जयतां वर । तस्मात्सर्वास्ववस्थासु रक्षितव्या नराधिपाः ॥ १० ॥
राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर । न चातिप्रतिकूलेन नाविनीतेन राक्षस ॥ ११ ॥
ये तीक्ष्णमन्त्राः सचिवा भुज्यन्ते सह तेन वै । विषमेषु रथाः शीघ्रं मन्दसारथयो यथा ॥ १२ ॥
बहवः साधवो लोके युक्तधर्ममनुष्ठिताः । परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ १३ ॥
स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावणः । रक्ष्यमाणा न वर्धन्ते मृगा गोमायुना यथा ॥ १४ ॥
अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः । येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ १५ ॥

तदभावं चतुर्थपादेनाह–अमात्यैरिति । कापथं कुमार्गं नेत्राद्यः निवर्तनीयः ॥ ७ ॥

८] ति० टी०–कुतस्तैरेवमनुष्ठेयं तत्राह—धर्ममिति ॥ ८ ॥

रा० टी०–कापथमाश्रितो राजाऽवश्यं निग्राह्य इत्यत्र हेतुमाह–धर्ममिति । हे निशाचर ! सचिवाः स्वामिप्रसादाद् धर्मादीन् प्राप्नुवन्ति विपर्यये स्वामिप्रसादाभावे तु तत्सर्वं धर्मादिकं व्यर्थं भवति स्वामिवैगुण्यादेव इतरे जनाः व्यसनं दुःखं प्राप्नुवन्ति ॥ ८ ॥ ९ ॥

गो० टी०–धर्ममिति । स्वामिप्रसादात् स्वामिनः प्रसन्नभावात् स्वामिसाद्गुण्यादित्यर्थः ॥ ८ ॥

९–१०] ति० टी०–विपर्यये स्वामिवैगुण्ये । तत्र न केवलं तेषामेव व्यसनप्राप्तिः, किं तु सर्वजनानाम् । तदाह—इतरे जना इति । अपीति शेषः ॥ ९ ॥ १० ॥

गो० टी०–विपर्यय इति । विपर्यये स्वामिवैगुण्ये स्वामिवैगुण्याच्च केवलममात्या एव नश्यन्ति किंतु तदितरेऽपि जना इत्याह–व्यसनमिति ॥ ९ ॥

रा० टी०–राजेति । धर्मो यशश्च राजमूल एव तस्माद् हेतोः सर्वास्ववस्थासु नराधिपाः रक्षितव्याः ॥ १० ॥

गो० टी०–राजमूल इति । उक्तमर्थमुपसंहरति–तस्मादिति ॥ १० ॥

११] ति० टी०–तीक्ष्णेन क्रूरदण्डेन । प्रतिकूलेन स्वप्रकृतीनामिति शेषः ॥ ११ ॥

रा० टी०–राज्यमिति । हे निशाचर ! तीक्ष्णेन पुरुषेण राज्यं पालयितुं न शक्यम् अतिप्रतिकूलेन सर्वानिष्टकारकेन न अविनीतेन महात्मसु नम्रतारहितेन च न ॥ ११ ॥

गो० टी०–राज्यमिति । तीक्ष्णेन क्रूरदण्डेन प्रतिकूलेन प्रजाविरुद्धेन अविनीतेन इन्द्रियजयरहितेन 'विनयो ह्यिन्द्रियजयः' इति कामन्दकः ॥ ११ ॥

१२] ति० टी०–तीक्ष्णमन्त्रास्तीक्ष्णोपायप्रयोक्तारस्तेन तन्मन्त्रग्राहिणा राज्ञा सह भुज्यन्ते स्वसमतया स्थाप्यन्ते । मन्दो मन्दबुद्धिः सारथिर्येषां ते रथा यथा विषमे सारथिभिः सह नश्यन्ति तथा ते राजानो मन्त्रिभिः सह नश्यन्ति ॥ १२ ॥

रा० टी०–ये इति । ये सचिवास्तीक्ष्णमन्त्रास्तैक्ष्योपदेष्टारः तैः सचिवैः तेन राज्ञा सह भुज्यन्ते दुःखानीति शेषः । तत्र दृष्टान्तः–मन्दसारथयः मन्दः प्रज्ञाहीनः सारथिर्येषां ते रथाः विषमेषु उन्नतनिम्नप्रदेशेषु यथा ॥ १२ ॥

गो० टी०–य इति । तीक्ष्णमन्त्राः तीक्ष्णोपायप्रयोक्तारः तेन स्वमन्त्रग्राहिराज्ञा सह विषमे निम्नोन्नतप्रदेशे शीघ्रगास्तुरगाः मन्दसारथयः अपटुसारथयः सन्तः यथा सारथिना सह नश्यन्ति तथेत्यर्थः ॥ १२ ॥

१३] ति० टी०–युक्तधर्ममनुष्ठिता युक्तधर्मानुष्ठातारः । साधवो नीतिमार्गनिष्ठाः । सपरिच्छदाः सपरिजनाः ॥ १३ ॥

रा० टी०–बहव इति । अयं श्लोकः समनन्तरं व्याख्यातः ॥ १३ ॥

गो० टी०–उत्तरश्लोकवक्ष्यमाणस्य सामान्यन्यायं दर्शयति–बहव इति । साधवो धर्मज्ञाः युक्ताः नीतिमार्गनिष्ठाः धर्मम् अनुष्ठिताः अनुष्ठितवन्तः । "गत्यर्थाकर्मक–"इत्यादिना कर्तरि क्तः । सपरिच्छदाः सपरिवाराः ॥ १३ ॥

१४] ति० टी०–तीक्ष्णदण्डेन प्रजानां प्रतिकूलेन रक्ष्यमाणाः प्रजा न वर्धन्ते गोमायुना मृगघातकजीवेन रक्ष्यमाणा मृगा इव ॥ १४ ॥

रा० टी०–स्वामिनेति । प्रतिकूलेन अननुकूलाचरणशीलेन तीक्ष्णेन उग्रदण्डदात्रा स्वामिना रक्ष्यमाणा अपि प्रजाः गोमायुना हिंसकेन रक्ष्यमाणा मृगा इव न वर्धन्ते ॥ १४ ॥

गो० टी०–स्वामिनेति । गोमायुना क्रोष्ट्रा स हि मेषघातुक इति प्रसिद्धिः ॥ १४ ॥

१५] ति० टी०–ककशः क्रूरबुद्धिः कठिनश्च ॥ १५ ॥

रा० टी०–अवश्यमिति । हे रावण ! येषां त्वं राजा ते सर्वे राक्षसा अवश्यं विनशिष्यन्ति विनङ्क्ष्यन्ति ॥ १५ ॥

गो० टी०–अवश्यमिति । ककशः क्रूरबुद्धिः ॥ १५ ॥

---

१ जयतेति गो. पाठः । २ चापीति गो. पाठः । ३ भज्यन्त इति गो. पाठः । ४ तुरगाः शीघ्रा इति गो. पाठः । ५ युक्ता इति गो. पाठः । ६ रावणेति गो. रा. पाठः । ७ मेषा इति गो. पाठः ।

तदिदं काकतालीयं घोरमासादितं मया । अत्र[1] त्वं शोचनीयोऽसि ससैन्यो विनशिष्यसि ॥ १६ ॥
मां निहत्य तु रामोऽसावचिराच्चां वधिष्यति । अनेन कृतकृत्योऽस्मि म्रिये चापि[2]रिणा हतः ॥ १७ ॥
दर्शनादेव रामस्य हतं मामवधारय । आत्मानं च हतं विद्धि हत्वा सीतां सबान्धवम् ॥ १८ ॥
आनयिष्यसि चेत्सीतामाश्रमात्सहितो मया । नैव त्वमपि नाहं[3] वै नैव लङ्का न राक्षसाः ॥ १९ ॥
निवार्यमाणस्तु मया हितैषिणा न मृष्यसे वाक्यमिदं निशाचर ।
परेतकल्पा हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्धिरीरितम् ॥ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

१६] ति० टी०—तदिदं त्वत्तो मरणरूपं घोरं काकतालीयमाकस्मिकं मयाऽऽसादितं यद्यपि तथापि तत्प्रति न मया शोकः क्रियते 'जातस्य हि ध्रुवो मृत्युः' इति न्यायात्। तथापि त्वं ससैन्यो विनशिष्यसि यद्यत्रार्थे त्वं मया शोचनीयोऽसि ॥ १६ ॥

रा० टी०—तदिति। तत् भवद्दुर्वृत्तत्वात् हेतोः इदं घोरं दुःखमित्यर्थः, काकतालीयं काकतालीयन्यायेन अकस्मात् मया आसादितं प्राप्तम् अत्रास्मिन् दुर्वृत्ते ससैन्यस्त्वं विनशिष्यसि अतस्त्वं शोचनीयोऽसि ॥ १६ ॥

गो० टी०—तदिदमिति। काकतालीयं यादृच्छिकं घोरं भयंकरमिदं कृत्यम् मया आसादितं ततो नाहं शोच्यः नहि प्रमादविपन्नः शोच्य इति भावः। ससैन्यस्त्वं विनशिष्यसीत्यत्रैव कृत्ये त्वं मे शोचनीयः बुद्धिपूर्वकारी त्वमेव हि शोच्य इति भावः, यद्वा ससैन्यो विनशिष्यसीति यत् तदिदं काकतालीयं घोरं कार्यं त्वया आसादितम् अत्रैव मया त्वं शोचनीयः हन्त दैवान्महाननर्थो राज्ञ उपस्थित इति शोचामीत्यर्थः ॥ १६ ॥

१७] ति० टी०—नन्वहं मम मरणं कथं निश्चितं तत्राह—मामिति। मां निहत्य रामस्त्वां सबान्धवमचिराद्वधिष्यति। तस्मादुभयथापि मरणं निश्चितं त्वत्तो वा रामाद्वा। तत्रानेन वधेन कृतकृत्योऽस्मि। यन्मृधे रणेऽरिणा हतो म्रिये। राजतो बलान्मरणापेक्षया रणे क्षुतो मृत्योः स्वर्गदत्वादाद्यमृत्योरपमृत्युत्वेन दुर्मरणत्वेन शास्त्रे उक्ते राज्ञा मारितस्य शौचोदकदानाद्यभावश्रवणाद्रामतो मरणेन कृतकृत्योऽहमिति व्यक्तम्। ईदृशं ज्ञानं चास्य तपसा योगेन च शुद्धचित्तत्वादिति बोध्यम् ॥ १७ ॥

रा० टी०—मामिति। असौ रामः मां निहत्य अचिराद् क्षिप्रं त्वां वधिष्यति अनेन हेतुना अरिणा हतोऽप्यहं कृतकृत्योऽस्मि एतेन तव वधाभावे जीवलोकोपद्रवः स्याद् वधे तु निर्हतिरिति हेतुः सूचितः ॥ १७ ॥

गो० टी०—त्वयि विद्यमाने मम का हानिरित्यत्राह—मामिति। न चिरात्क्षणेनैव अहं न शोचनीय इत्यत्र हेतुमाह—अनेनेति। तवारिणा रामेण हतो म्रिये इति यत् अनेन हेतुना कृतकृत्योऽस्मि विश्वामित्रयागसंरक्षणप्रभृतिखरादिवधान्तातिमानुषचारित्राद्वस्मृतिकृताऽसाधारणमहिमस्फूर्त्या राघवं परमपुरुषं निश्चितवतो मम तत्करप्रापितमरणस्य परमपुरुषार्थत्वादिति भावः। तथोक्तं नृसिंहपुराणे—'रामादपि हि मर्तव्यं मर्तव्यं रावणादपि। उभयोरपि मर्तव्ये वरं रामान्न रावणात्' इति। यद्वा त्वत्तो निरुपाधिकवधाच्छतुहस्ताद्वधो निःश्रेयसकर इति भावः ॥ १७–१९ ॥

१८] ति० टी०—आत्मानं रावणम्। सबान्धवमात्मानमित्यन्वयः ॥ १८ ॥

रा० टी०—विध्वंसोऽवश्यं भावितेत्याह—दर्शनादिति। रामस्य दर्शनादेव मां हतमवधारय सीतां हत्वा तु सबान्धवमात्मानं हतं विद्धि ॥ १८ ॥

१९] ति० टी०—कदाचिद्यदि मया जीवता सहैव सीतामानयिष्यसि तदा पश्चादपि सर्ववधो निश्चित इत्यर्थः ॥ १९ ॥

रा० टी०—आनयिष्यसीति। मया सहितस्त्वं चेत् यदि सीतामानयिष्यसि आनेष्यसि तर्हि त्वदादयो न ॥ १९ ॥

२०] ति० टी०—न मृष्यसे प्रतिकूलबुद्ध्या न परिगृह्णासीत्यर्थः। परेतकल्पा मृतप्रायाः ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०—निवार्यमाण इति। हि यतः गतायुषः अत एव परेतकल्पाः[4] मरणाः नराः सुहृद्भिः ईरितं कथितं हितं वचो न गृह्णन्ति अत एव हितैषिणा मया निवार्यमाणस्त्वमिदं हितं वाक्यं न मृष्यसे सहसे ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०—उक्तमर्थं न्यायप्रदर्शनेन प्रतिपादयति—निवार्यमाण इति। हिहेतौ यस्मात् गतायुषो नराः हितं न गृह्णन्ति तस्माद्वाक्यमिदं न मृष्यसे न सहसे गतायुष्कत्वादितं व-

---

१ अत्रैव शोचनीयस्त्वमिति गो. पाठः। २ रामश्च न चिरादिति गो. पाठः। ३ यदरिणेति गो. पाठः। ४ उपचारेति गो. पाठः। ५ [illegible] गो. पाठः। ६ चेति गो. पाठः।

चत्वारिंशः सर्गः ।

उररीकृतरावणनिदेशो मारीचस्तेन सह रथमधिरुह्य रामाश्रमान्तिकं प्राप्तो मायया विचित्रमृगपरिग्रहमाचरन्नाश्रमाभ्यासे चिक्रीड । कुसुमचिचीषयाऽऽश्रमान्निर्गता वैदेही त ददर्श ॥

एवमुक्त्वा तु परुषं मारीचो रावणं ततः । गच्छावेत्यब्रवीद्दीनो भयाद्रात्रिंचरप्रभोः ॥ १ ॥
दृष्ट्वाहं पुनस्तेन शरचापासिधारिणा । मद्बधोद्यतशस्त्रेण निहतं जीवितं च मे ॥ २ ॥
नहि रामं पराक्रम्य जीवन्प्रतिनिवर्तते । वर्तते प्रतिरूपोऽसौ यमदण्डहतस्य ते ॥ ३ ॥
किं तु कर्तुं मया शक्यमेवं त्वयि दुरात्मनि । एष गच्छाम्यहं तात स्वस्ति तेऽस्तु निशाचर ॥ ४ ॥
प्रहृष्टस्त्वभवत्तेन वचनेन स राक्षसः । परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत् ॥ ५ ॥
एतच्छौटीर्ययुक्तं ते मच्छन्दवशवर्तिनः । इदानीमसि मारीचः पूर्वमन्यो हि राक्षसः ॥ ६ ॥

गृह्णासीत्यर्थः, परेतकल्पाः आसन्नमरणाः । ईषदसमाप्तौ कल्पप्प्रत्ययः ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥४१॥

१] ति० टी०–रात्रिंचरप्रभो रावणाद्यद्वयमधुनैव निन्द्यमरणरूपं तस्माद्गच्छावेत्यब्रवीत् । त्वमहं चेत्यर्थः ॥ १ ॥

रा० टी०–मारीचपरुषोक्त्यनन्तरकालिकं मारीचवृत्तान्तमाह–एवमित्यादिभिः । एवं परुषमुक्त्वा रात्रिंचरप्रभोः रावणस्य ततस्तस्मादुक्तात् भयात् भयवचनाद्धेतोः दीनः मारीचः आवां गच्छाव त्वया सह गमिष्यामीत्यर्थः, इति रावणमब्रवीत् ॥ १ ॥

गो० टी०–क्षणं क्षणार्धमपि वा वियोगो यस्य दुःखदः ।
तमहं शिरसा वन्दे जानकीप्राणवल्लभम् ॥

एवमित्यादि । भयात् रावणादधुनैव वधो भविष्यतीति भयात् ॥ १ ॥

२] ति० टी०–तथा वदन्नेव निजदुःखमप्याह–दृष्ट्वाहमिति । पुनर्यदाहं ते न दृष्टो भविष्यामि तदोच्यमानविशेषणेन रामेण जीवितं निहतं नष्टमेव । चकारात्तव च जीवितं नष्टम् ॥ २ ॥

रा० टी०–मारीचस्यैव वचनान्तराण्याह–दृष्ट इत्यादिभिः । मद्बधोद्यतशस्त्रेण मद्बधाय उद्यतं शस्त्रं यस्य तेन शरचापासिधारिणा रामेण च यदि पुनरहं दृष्टस्तदैव मे जीवितं चकारान्तरेण तवापि जीवितं निहतम् । एकश्चस्त्वर्थे ॥ २ ॥

गो० टी०–दीन इत्युक्तं दौस्थ्यमुपपादयति–दृष्ट इत्यादिना । यथहं तेन दृष्टः तदा मे जीवितं विनष्टमित्यन्वयः ॥२॥

३] ति० टी०–यमदण्डहतस्य तेऽसौ रामः प्रतिरूपो यमदण्डप्रतिरूपो वर्तते ॥ ३ ॥

रा० टी०–न हीति । यतः रामं पराक्रम्य जीवन् सन् कश्चिज्जनः न प्रतिवर्तते अतः असावहमित्यर्थः, यमदण्डहतस्य त्वदुराचरणानुमितरामबाणनिहतस्येत्यर्थः, ते प्रतिरूपः सदृशः वर्तते एतेन सर्वरक्षसां वधोऽवश्यं भवितेति सूचितं यदि तु असावित्यनेन राक्षससमुदायो गृह्येत तदा नेदं सूचनम् ॥ ३ ॥

गो० टी०–न हीति । वर्तत इति यमदण्डहतस्य ते प्रतिरूपः सदृशः असौ जनो वर्तते त्वमिवाहमपि यमदण्डहत इत्यर्थः ॥ ३–४ ॥

४] ति० टी०–अथाशक्यपरिहारमनर्थं शोचति–किं त्विति ॥ ४ ॥

रा० टी०–किमिति । त्वयि एवं दुरात्मनि सति मया किं कर्तुं शक्यं न किमपीत्यर्थः, अतः एषः प्राप्तस्त्वदाज्ञोऽहं गच्छामि ते स्वस्त्यस्तु ॥ ४ ॥

५] ति० टी०–तेन वचनेन गच्छामीति वचनेन । सुसंश्लिष्टं गाढम् ॥ ५ ॥

रा० टी०–प्रहृष्ट इति । राक्षसः स रावणः तेन मारीचोक्तेन वचनेन प्रहृष्टोऽभवत् अत एव सुसंश्लिष्टं गाढं परिष्वज्य इदमब्रवीत् ॥ ५ ॥

गो० टी०–प्रहृष्ट इति । सुसंश्लिष्टं दृढम् ॥ ५ ॥

६] ति० टी०–मच्छन्दवशवर्तिनः मदभिप्रायवशवर्तिनः शौटीर्य वीर्य तयुक्तम् एतद्वचो योग्यमिति शेषः । इदानीं मारीचोऽसि स्वप्रकृतिं प्राप्तोऽसि । पूर्वमन्यो हि राक्षसस्तदाविष्ट इति शेषः ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–एतदिति । मच्छन्दवशवर्तिनः मदभिप्रायानुकूलवर्तनशीलस्य ते एतत् वचः शौण्डीर्ययुक्तं त्वद्वीर्ययोग्यम् अत एव इदानीम् एतद्वचनकथनकाले त्वं मारीचोऽसि पूर्वं तु अन्यः साधारणो निशाचरः एतेन पूर्वं त्वं प्रकृतेश्च्युतः इदानीं च तां प्राप्तोऽसीति सूचितम् ॥६॥

गो० टी०–एतदिति । शौण्डीर्यं वीरत्वम् । "कुम्पुकुटि-

---

१ वचनमिति गो. पाठः । २ विनष्टमिति गो. पाठः । ३ नु शक्यं मया कर्तुमिति गो. न्विति रा. पाठः । ४ रावण इति गो. पाठः । ५ शौण्डीर्यमिति गो. रा. पाठः । ६ मच्छन्दादिव भाषितमिति गो. पाठः । ७ निशाचर इति गो. पाठः ।

आरुह्यतामयं शीघ्रं खगो रत्नविभूषितः । मया सह रथो युक्तः पिशाचवदनैः खरैः ॥ ७ ॥
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि । तां शून्ये प्रसभं सीतामानयिष्यामि मैथिलीम् ॥ ८ ॥
ततस्तथेत्युवाचैनं रावणं ताटकासुतः । ततो रावणमारीचौ विमानमिव तं रथम् ॥ ९ ॥
आरुह्याययतुः शीघ्रं तस्मादाश्रममण्डलात् । तथैव तत्र पश्यन्तौ पत्तनानि वनानि च ॥ १० ॥
गिरींश्च सरितः सर्वा राष्ट्राणि नगराणि च । समेत्य दण्डकारण्यं राघवस्याश्रमं ततः ॥ ११ ॥
ददर्श सहमारीचो रावणो राक्षसाधिपः । अवतीर्य रथात्तस्मात्ततः काञ्चनभूषणात् ॥ १२ ॥
हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत् । एतद्रामाश्रमपदं दृश्यते कदलीवृतम् ॥ १३ ॥
क्रियतां तत्सखे शीघ्रं यदर्थं वयमागताः । स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा ॥ १४ ॥
मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह । स तु रूपं समास्थाय महदद्भुतदर्शनम् ॥ १५ ॥

पटिशौण्डिभ्य ईरन्" इत्यौणादिकसूत्रेण शौण्डे गर्वे इत्यस्मादीरन् प्रत्ययः । 'शौण्डीरो वीरः' इति वृत्तिकारः 'शौण्डीरस्त्यागिवीरयोः', इति निघण्टुः तत्कर्म तद्भावो वा शौण्डीर्यं गुणवचनत्वात् ष्यञ् । शौण्डीर्ययुक्तमेतत्ते भाषितं मच्छन्दादिव मदभिप्रायादिव भाषितं मत्सदृशं भाषितमित्यर्थः । पूर्वमन्यो यः कश्चन निशाचरोऽपि विकृतभाषणात् इदानीं मारीचोऽसि मारीच इति लोकप्रसिद्धनामधेयानुरूपव्यापारोऽसि स्वप्रकृतिं प्राप्तोऽसीत्यर्थः ॥ ६ ॥

७] ति० टी०—खग आकाशगामी रथः ॥ ७ ॥

रा० टी०—आरुह्यतामिति । पिशाचवदनैः खरैः युक्तः खगः आकाशगामी रत्नविभूषितोऽयं रथः मया सह आरुह्यताम् ॥ ७ ॥

गो० टी०—आरुह्यतामिति । तथेति सम्मुचये खरैर्युक्तो रत्नविभूषितश्चेत्यर्थः ॥ ७–८ ॥

८–९] ति० टी०—शून्ये रामलक्ष्मणरहिते समये ॥८॥९॥

रा० टी०—तत्प्रयोजनमाह—प्रलोभयित्वेति । यथेष्टं वैदेहीं प्रलोभयित्वा प्रलोभ्य गन्तुमर्हसि एतेन त्वदाहरणार्थं सीतया प्रेषितौ रामलक्ष्मणौ त्वामनुगमिष्यत इति सूचितम् अत एव शून्ये रामलक्ष्मणरहितसमये सीताम् आनयिष्यामि आनेष्यामि ॥ ८ ॥

रा० टी०—तत इति । ततः रावणोक्तिश्रवणानन्तरं ताटकासुतो मारीचः तथेति रावणमुवाच । ततः तथेत्युक्त्यनन्तरं रावणमारीचौ विमानमिव रथमारुह्य तस्मादाश्रममण्डलात् शीघ्रं ययतुः । सार्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०—तत इति । तस्मात् मारीचीयात् ॥ ९ ॥

१०–१५] ति० टी०—आश्रममण्डलान्मारिचाश्रममण्डलादित्यर्थः । पत्तननगरयोरराजधानीराजधानीत्वेन भेदः । पत्तनशब्दोऽर्धर्चादिः ॥ १०–१६

रा० टी०—तथेति । तत्र तस्मिन् समये तथा रथारूढावेव पत्तनादीनि पश्यन्तौ मारीचरावणौ दण्डकारण्यं समेत्य तस्थतुरिति शेषः, ततोऽनन्तरं सहमारीचो रावणः राघवस्याश्रमं ददर्श । अर्धचतुष्टयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०—तथैवेति । तथैव रथारूढावेव सहैव स्थितावित्यर्थः पत्तनानि नगरविशेषान् नगाः वृक्षाः सन्त्येष्विति नगराणि उद्यानाकीर्णपुराणीत्यर्थः । "नगपांसुपाण्डुभ्यश्च" इति मत्वर्थीयो रप्रत्ययः । नगरपत्तनादिलक्षणमुक्तं वास्तुशास्त्रे-'ग्रामश्च नगरं चैव पत्तनं खर्वटं पुरम् । खेटकं कुसुमं चैव शिबिरं राजवासिकम् ॥ सेनामुखमितित्वेवं दशधा कीर्तितं बुधैः । विप्राणां च सभृत्यानां वासो ग्राम इतीरितः ॥ स एव विप्रैराकीर्णस्त्वग्रहार इति स्मृतः । कुटुम्बिभेदैरेकोनत्रिंशद्भिश्च समन्वितः ॥ अनेकनारीसंबद्धं नानाशिल्पिजनैर्वृतम् ॥ क्रयविक्रयकैः कीर्णं सर्वदेवैः समन्वितम् ॥ नगरं त्विति विख्यातं पत्तनं शृणु सांप्रतम् । द्वीपान्तरागतद्रव्यक्रयविक्रयकैर्युतम् ॥ पत्तनं त्वब्धितीरे स्यात्तयोर्मिश्रं तु खर्वटम् । क्रयविक्रयकैर्युक्तं नानाजातिसमन्वितम् ॥ तन्तुवायसमायुक्तं तत्पुरं त्विति कथ्यते । एतैरधिष्ठितं यत्तत् खेटकं परिकीर्तितम् ॥ तेषामेकान्तरेष्वेव वासः कुसुममुच्यते' इत्यादिना ॥ १०–११ ॥

रा० टी०—अवतीर्येति । काञ्चनभूषणात् ततस्तस्मात् रथादवतीर्य मारीचं हस्ते गृहीत्वा रावणोऽब्रवीत् ॥ १२ ॥

गो० टी०—अवतीर्येति । हस्ते गृहीत्वेत्यनेनावश्यकत्वं द्योत्यते ॥ १२ ॥

रा० टी०—तद्वचनाकारमाह—एतदिति । कदलीवृतं कदलीभिः शोभितं यत् दृश्यते तदेतद्रामाश्रमपदम् अतः यदर्थं वयमागताः तत् शीघ्रं क्रियताम् ॥ १३ ॥

रा०-टी०—रावणस्येति । स मारीचः रावणस्य वचः श्रुत्वा मृगो भूत्वा महत् प्रशंसनीयम् अद्भुतदर्शनं रूपं समास्थाय रामस्य आश्रमद्वारि विचचार । अर्धत्रयमेकान्वयि । क्वचित् 'सरावण' इति पाठस्तत्र स तु रूपमित्यत्र स इत्यनेन पौनरुक्त्यवारणाय सरावणस्य रावणत्वसहितस्य वच इत्यर्थो वाच्यः ॥ १४ ॥ १५ ॥

गो० टी०—एतदिति । यदर्थं यत्कार्यार्थं तत् कार्यं क्रियताम् आगमनप्रयोजननिर्वाहकं मृगरूपं भजस्वेत्यर्थः ॥ १३ ॥ १४ ॥

गो० टी०—संग्रहेणोक्तं विवृणोति—स त्वित्यादिना ।

---

१ रथ इति गो. पाठः । २ तथेति गो. पाठः । ३ अर्धमेतत् गो. नास्ति । ४ आरुह्य ययतुरिति गो. रा. पाठः । ५ रावणस्य वच इति रा. पाठः ।

मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः । रक्तपद्मोत्पलमुख इन्द्रनीलोत्पलश्रवाः ॥ १६ ॥
किंचिदभ्युन्नतग्रीव इन्द्रनीलनिभोदरः । [कुन्देन्दुवज्रसंकाशमुदरं चास्य भास्वरम् ।]
मधूकनिभपार्श्वश्च कञ्जकिञ्जल्कसंनिभः ॥ ॥१७॥
वैदूर्यसंकाशखुरस्तनुजङ्घः सुसंहतः । इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं विराजितः ॥ १८ ॥
मनोहरस्निग्धवर्णो रत्नैर्नानाविधैर्वृतः । क्षणेन राक्षसो जातो मृगः परमशोभनः ॥ १९ ॥
वनं प्रज्वलयन्रम्यं रामाश्रमपदं च तत् । मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः ॥ २० ॥
प्रलोभनार्थं वैदेह्या नानाधातुविचित्रितम् । विचरन्गच्छते सम्यक् शाद्वलानि समन्ततः ॥ २१ ॥
रौप्यैर्बिन्दुशतैश्चित्रं भूत्वा च प्रियनन्दनः । विटपीनां किसलयान्भक्षयन्विचचार ह ॥ २२ ॥

अद्भुतं विस्मयावहं दर्शनं यस्य तत्तथा मणिप्रवरः इन्द्रनीलः तत्तुल्ये शृङ्गाग्रे यस्य स तथा क्वचित्सिता क्वचिदसिता च मुखस्याकृतिः शोभा रेखा यस्य। "वर्णो वर्णेन" इति समानाधिकरणसमासः अवयवद्वारेण सितासितशब्दौ समुदाये वर्तमानौ समानाधिकरणौ भवतः । रक्तपद्मोत्पलमुखः मुखपुटयोरेको रक्तपद्मवर्णः अन्यस्तूत्पलवर्ण इत्यर्थः। इन्द्रनीलोत्पलश्रवाः श्रवसोरिन्द्रनीलसादृश्यं नीलभास्वररूपेण उत्पलसादृश्यं रूपेण इन्द्रनीलदलवदधरो यस्य स तथा। कुन्देति। अस्य मृगरूपस्य कुन्देन्दुवज्रसंकाशमुदरमासीत् तस्मात्तादृशोदर इति विपरिणमयितव्यम् अन्यथा पूर्वापरविरोधः । मधूकनिभपार्श्वः मधूकपुष्पसदृशपार्श्वः पार्श्वान्तरे हेमवर्णस्य वक्ष्यमाणत्वात्, पद्मकिञ्जल्कसन्निभः उक्तावयवव्यतिरिक्तपृष्ठसर्वप्रदेशे पद्मकेसरवर्णः सुसंहतः सुश्लिष्टसंधिबन्धः ऊर्ध्वं पुच्छोर्ध्वपार्श्वे इन्द्रायुधसवर्णेन इन्द्रधनुर्वन्नानावर्णेन पुच्छेनोपलक्षितः स्निग्धवर्ण इति पूर्वोक्तसर्ववर्णानां स्निग्धत्वं विशेषणम्। रत्नैः रत्नाकारबिन्दुभिः। उपसंहरति–क्षणेनेति। प्रज्वलयन् प्रकाशयन् मृगो जात इति पूर्वेणान्वयः॥ १६–१९ ॥

१६] ति० टी०–मणिप्रवरशृङ्गाग्र इन्द्रनीलरत्नाकारशृङ्गाग्रः। मणिशब्दः केवल इन्द्रनीले इति कविसमय इति कतकः। क्वचित्सिता क्वचिदसिता मुखस्याकृतिः शोभा यस्य सः । यदेवाह–रक्तपद्मोत्पलेति । उत्पलं नीलोत्पलम्। इन्द्रनीलवदुत्पलवच्छ्रवः श्रवणं यस्य सः ॥ १६ ॥

रा० टी०–तदूपमेव वर्णयन्नाह–मणीत्यादिभिः । मणिप्रवरशृङ्गाग्रः मणिप्रवरेण इन्द्रनीलमणिना युक्तं शृङ्गाग्रं यस्य सः मणिप्रवरशब्दः केवलेन्द्रनीले इति कविसमय इति कतकः। क्वचित् सिता शुक्ला क्वचित् असिता कृष्णा मुखाकृतिर्यस्य सः रक्तपद्मरुणकमलमुत्पलं नीलकमलं च तद्वत् मुखे मुखोभयभागौ यस्य सः इन्द्रं शोभायमानं यत् नीलोत्पलं तत्सदृशं श्रवः श्रवणं यस्य सः किं च इन्द्रनीलोत्पले इव श्रवसी यस्य सः तन्नन्द्रनीलो मणिविशेषः ॥ १६ ॥

१७] ति० टी०–मधूकपुष्पसदृशपार्श्वद्वयः । कञ्जं पद्मं तत्किञ्जल्कसदृशवर्णः ॥ १७ ॥

१८–१९] ति० टी०–सुसंहतः श्लिष्टसंधिबन्धः॥१८॥१९॥

रा० टी०–किंचित् अभ्युन्नता ग्रीवा यस्य सः इन्द्रनीलनिभः अधरो यस्य सः मधूकनिभौ मधूकपुष्पसदृशौ पार्श्वौ यस्य सः कञ्जकिञ्जल्कसन्निभः कमलकिञ्जल्कसदृशवर्णः ॥ १७ ॥

रा० टी०–वैदूर्यसंकाशौ खुरौ यस्य सः तनू सूक्ष्मे जङ्घे यस्य सः सुसंहतः श्लिष्टसंधिबन्धविशिष्टः इन्द्रायुधसवर्णेन इन्द्रायुधसदृशवर्णविशिष्टेन पुच्छेन ऊर्ध्वं विराजितः शोभितः ॥ १८ ॥

रा० टी०–मनोहरः हृदयापहारकः स्निग्धः स्नेहोत्पादकः वर्णो यस्य सः परमशोभनो मृगः क्षणेन राक्षसो मारीचो जातः । श्लोकचतुष्टयमेकान्वयि ॥ १९ ॥

२०] ति० टी०–प्रज्वलयन्प्रदीपयन् ॥ २० ॥

२१]ति०टी-शाद्वलानि विचरन्भक्षयन्गच्छते गच्छति॥२१॥

रा० टी०–वनमिति । वैदेह्याः प्रलोभनार्थं नानाधातुविचित्रितं मनोहरं दर्शनीयं रूपं कृत्वा रामस्य श्रमपदं यस्मिन् तत् रम्यं वनं प्रज्वलयन् शर्ष्प हरितृणं विचरन् भक्षयन् सन् शाद्वलानि घासयुक्तस्थलानि समन्ततो गच्छते गच्छति। श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०–मनोहरमित्यादिसार्धश्लोक एकान्वयः । धातुवर्णैः शाद्वलानि शादाः बालतृणानि 'शादो जम्बालशष्पयोः' इत्यमरः। तद्वन्ति स्थलानि शाद्वलानि । "नडशादाद्ड्वलच्" इति ड्वलच् प्रत्ययः विचरन् भक्षयन्। 'चर' गतिभक्षणयोः। गच्छते गच्छति ॥ २० ॥ २१ ॥

२२] ति० टी०–चित्रमिति क्रियाविशेषणम् । विटपीनामिति दीर्घ आर्षश्छन्दोनुरोधात् । 'भक्त्वादन्' इति पाठ आर्षोऽनुनासिकलोपः॥ २२॥

रा० टी०–रौप्यैरिति । रौप्यैः राजतैः बिन्दुशतैश्चित्रं यथा भवति तथा प्रियनन्दनो भूत्वा विटपीनां बिडपिनां वृक्षाणां किसलयान् नवीनपत्राणि भक्षयन् विचचार मारीच इति शेषः ॥ २२ ॥

---

१ अभ्युन्नतेति गो. रा. पाठः । २ नीलदलाधर इति गो. पाठः । ३ अर्धमेतदधिकं गो. पाठे । ४ पचोत्ति गो. पाठः । ५ विराजंतति गो. पाठः । ६ तस्मादिति गो. शर्ष्पमिति रा. पाठः । ७ रूप्यैर्बिन्दुशतैश्चित्र इति गो. पाठः । ८ दर्शन इति गो. पाठः । ९ भक्त्वाऽदन्निति गो. पाठः ।

कदलीगृहकं गत्वा कर्णिकारानितस्ततः । तेमाश्रमं मन्दगतिं सीतासंदर्शनं ततः ॥ २३ ॥
राजीवचित्रपृष्ठः स विरराज महामृगः । रामाश्रमपदाभ्याशे विचचार यथासुखम् ॥ २४ ॥
पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः । गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते ॥ २५ ॥
विक्रीडंश्च पुनर्भूमौ पुनरेव निषीदति । आश्रमद्वारमागम्य मृगयूथानि गच्छति ॥ २६ ॥
मृगयूथैरनुगतः पुनरेव निवर्तते । सीतादर्शनमाकाङ्क्षन्राक्षसो मृगतां गतः ॥ २७ ॥
परिभ्रमति चित्राणि मण्डलानि विनिष्पतन् । समुद्वीक्ष्य च सर्वे तं मृगा येऽन्ये वनेचराः ॥ २८ ॥
उपगम्य समाघ्राय विद्रवन्ति दिशो दश । राक्षसः सोऽपि तान्वन्यान्मृगान्मृगवधे रतः ॥ २९ ॥
प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन् । तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥ ३० ॥
कुसुमापचये व्यग्रा पादपानत्यवर्तत । कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ॥ ३१ ॥

गो० टी०–रूप्यैरिति । विटपीनामिति दीर्घश्छान्दसः किसलयान् पल्लवान् पुष्पिङ्कृत्वमार्षम् ॥ २२ ॥

२३–२५] ति० टी०–कदलीगृहं कदलीवाटिकाम् । कर्णिकारांस्तद्वनं च गत्वा त्यक्त्वा सीतासंदर्शनमपेक्ष्येतस्ततो मन्दगतिं समाश्रयन्विचचार विरराज च ॥ २३–२५ ॥

रा० टी०–कदलीति । ततो भक्षणपूर्वकविचरणानन्तरं कदलीगृहकं कदलीनां वनम् कर्णिकारान् वृक्षविशेषांश्च गत्वा सीतायाः संदर्शनं यस्मिन् तत् स्थलम् इतस्ततः समाश्रयन्सन् मन्दगतिः राजीवचित्रपृष्ठः महामृगो मारीचः रामाश्रमपदाभ्यासे रामाश्रमसमीपे यथासुखं विचचार विरराज च । श्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–कदलीति । कदलीगृहकं कृत्रिमकदलीमयगृहं तदनन्तरं कर्णिकारान् गत्वा ततः सीता संदृश्यतेऽस्मिन्सीतासंदर्शनम् अधिकरणे ल्युट्, सीतासंदर्शनयोग्यस्थानमित्यर्थः । तथेति सम्मतौ ! तदपि गत्वा मन्दगतिः सन् इतस्ततः समाश्रयत् ॥ २३ ॥

गो० टी०–राजीवेति । राजीवचित्रपृष्ठः राजीवकेसरवदाश्चर्यकरपृष्ठदेशः चित्रत्वं पूर्वस्माद्विशेषः । रामाश्रमपदाभ्याशे रामाश्रमस्थानसमीपे ॥ २४ ॥

रा० टी०–पुनरिति । पुनर्गत्वा स्थलान्तरमिति शेषः, निवृत्तः सन् विचचार मुहूर्तं पुनस्त्वरया गत्वा इतस्ततो द्रुतं भ्रान्त्वा पुनः प्रतिनिवर्तते ॥ २५ ॥

गो० टी०–पुनर्गत्वेति । पुनर्निवृत्तश्चेत्यन्वयः । निवृत्य गमनमुक्त्वा गत्वा निवर्तनमाह–गत्वेति ॥ २५ ॥

२६–२७] ति० टी०–मृगयूथानि गच्छति, तत्पृष्ठतो गच्छतीत्यर्थः ॥ २६ ॥ २७ ॥

रा० टी०–विक्रीडन्निति । विक्रीडन् सन् पुनर्निषीदति पुनराश्रमद्वारमागम्य मृगयूथानि गच्छति ॥ २६ ॥

गो० टी०–विक्रीडन्निति । एवं गमनागमनाभ्यां विक्रीडन् सन् पुनः क्वचित्तूष्णीं निषीदति ॥ २६ ॥

रा० टी०–मृगेति । मृगतां मृगत्वं गतः प्राप्तोऽत एव मृगयूथैरनुगतो राक्षसः सीतादर्शनमाकाङ्क्षन् सन् पुनरपि निवर्तते । एवोऽप्यर्थे ॥ २७ ॥

गो० टी०–मृगयूथैरित्यादि । विनिष्पतन् संचरन् ॥ २७ ॥

२८] ति० टी०–विनिष्पतन् प्रागल्भ्येन कुर्वन्नित्यर्थः ॥ २८ ॥

रा० टी०–परीति । विनिष्पतन् सीतासमीपमागच्छन् सन् चित्राणि मण्डलानि परिभ्रमति तं मृगमन्ये वनेचरा मृगाः समुद्वीक्ष्य उपगम्य तत्समीपं प्राप्य समाघ्राय दश दिशो विद्रवन्ति । सार्धश्लोक एकान्वयी ॥ २८ ॥

गो० टी०–समुद्वीक्ष्येति । समाघ्रायेति घ्राणेन विशेषं जानन्ति तिर्यञ्च इति प्रसिद्धिः ॥ २८ ॥

२९] ति० टी०–विद्रवन्ति अमृगत्वनिश्चयादिति शेषः ॥ २९ ॥

रा० टी०–राक्षस इति । मृगवधे रतोऽपि स राक्षसः भावस्य राक्षसस्वभावस्य प्रच्छादनार्थं तानाघ्राणकर्तॄन् वन्यान् मृगान् संस्पृशन्नपि न भक्षयति ॥ २९ ॥

गो० टी०–राक्षस इति । भावस्य क्रौर्यस्य प्रच्छादनार्थं मृगवधे रतोऽपि मृगान्न भक्षयति किंतु संस्पृशन्नारते ॥ २९ ॥

३०] ति० टी०–मृगवधे रतोऽपि भावस्य राक्षसस्य संछादनार्थं संस्पृशन्नपि मृगान्न भक्षयति ॥ ३० ॥

रा० टी०–तस्मिन्निति । कुसुमापचये पुष्पग्रहणे व्यग्रा शुभलोचना वैदेही तस्मिन् काले एव पादपान् अत्यवर्तत ॥ ३० ॥

गो० टी०–तस्मिन्निति । ततः आश्रमादभ्यवर्ततेत्यन्वयः ॥ ३० ॥

३१] ति० टी०–अपचयो ग्रहणम् । अत्राशोकचूतकुसुमानामपचयोक्त्या शिशिरान्तकालोऽयम् । 'गन्धवान्मुरभिर्मासो जातपुष्पफलद्रुमः' इति, 'संतापयति सौमित्रे शरश्चैत्रवनानिलः', इति च पम्पातीरे रामोक्तेश्च । किंचाग्रे द्वादशमासोत्तरं यत्पेषा मां नाशीकरोति तदैनां हन्मीति रावणप्रतिज्ञा । ततो द्रुमदर्शनकाले च तं प्रति सीतावाक्यम्–'वर्तते दशमो मासो द्वौ तु शेषौ द्रुवद्रुम, इति संगच्छते । माघशुक्ला-

१ समाश्रयन्मन्दगतिरिति गो. रा. पाठः । २ तथेति गो. पाठः । ३ विवर्तत इति गो. पाठः । ४ क्वचिदिति गो. पाठः । ५ ह्यन्य इति गो. पाठः । ६ अपचयव्यत्येति गो. पाठः । ७ अभ्यवर्ततेति गो. पाठः ।

कुसुमान्यपचिन्वन्ती चचार रुधिरानना । अनर्हा वैनवासस्य सा तं रत्नमयं मृगम् ॥ ३२ ॥
[illegible] ददर्श परमाङ्गना । [२]तं वै रुचिरदन्तोष्ठं रूप्यधातुतनूरुहम् ॥ ३३ ॥
विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत । स च तां रामदयितां पश्यन्मायामयो मृगः ॥ ३४ ॥
विचचार ततस्तत्र दीपयन्निव तद्वनम् । अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगम् ॥
विस्मयं परमं सीता जगाम जनकात्मजा ॥ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ।

चित्रमृगदर्शनेन प्राप्तोत्कण्ठा सीता रामलक्ष्मणावाहूय तं दर्शयति । क्वचिदपि चित्रमृगासभवादसौ न मृगः किंतु मारीचमायेयमिति लक्ष्मण आक्षिपति । सीताऽऽक्षेपं निवार्य तद्ग्रहणे तौ प्रेरयति । निश्चितमायिकत्वोऽपि रामोऽगस्त्येन वातापिरिवायं मेऽवश्यं वध्योऽत एनं निहत्याजिनमानेष्य इति प्रतिज्ञाय सीतारक्षणे लक्ष्मणं नियोजयति ।

सा तं संप्रेक्ष्य सुश्रोणी कुसुमानि [४]विचिन्वती । हेमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितम् ॥ १ ॥
प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी । भर्तारमपि चक्रन्द लक्ष्मणं चैव सायुधम् ॥ २ ॥
आहूयाहूय च पुनस्तं मृगं सांधु वीक्षते । आगच्छागच्छ शीघ्रं वै आर्यपुत्र सहानुज ॥ ३ ॥

ष्टम्यां हरणे हि मार्गशुक्लाष्टम्यां ततोऽर्वागेव वा दशमसमाप्त्या तस्य वर्तमानत्वोक्तिरसंगतैव स्यात् । तच्छुक्लपक्षान्ते हनुमतस्तदर्शनाद् ॥ ३१ ॥

रा० टी०—पुष्पग्रहणप्रकारमाह—कर्णिकारानिति । रुचिरानना सीता कुसुमानि अपचिन्वती सती कर्णिकारादीन् चचार ॥ ३१ ॥

गो० टी०—कर्णिकारानिति । मदिरम् आनन्दजनकम् ईक्षणं यस्याः सा मदिरेक्षणा । अनेन रुचिराननेत्यनेन च वक्ष्यमाणकार्योपयोग्युल्लासो द्योत्यते ॥ ३१ ॥

३२] ति० टी०—अनर्हा वनवासस्येत्यनेन नगरवासः सूचितः ॥ ३२ ॥

रा० टी०—अनर्हेति । वनवासस्य अनर्हा परमाङ्गना सा सीता शुक्लामणिविचित्राङ्गं रत्नमयं मृगं ददर्श ॥ ३२ ॥

गो० टी०—अनर्हेति । अरण्यवासस्यानर्हेत्यनेन सन्निहितत्रतसमाप्तिकालत्वकथनान्मृगग्रहणत्वरातिशयो द्योत्यते । रत्नमयं श्रेष्ठभूतं स्वार्थे मयट् । 'रत्नं स्वजातौ श्रेष्ठेऽपि' इत्यमरः । शुक्लामणिशब्देन तत्तुल्यबिन्दुमत्त्वमुक्तम् ॥ ३२ ॥

३३-३५] ति० टी०—रूप्यं रजतम्, धातवो गैरिकाद्याः, तत्तद्रूपोपेतम् ॥ ३३-३५ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रा० टी०—तमिति । रुचिरदन्तोष्ठी सीता रूप्यधातुतनूरुहं रूप्यैः रजतैर्धातुभिर्गैरिकादिभिश्च तुल्यास्तनूरुहा यस्य तं मृगं विस्मयोत्फुल्लनयना सती सस्नेहं समुदैक्षत सम्यगपश्यत् ॥ ३३ ॥

गो० टी०—सा तमिति । रुचिरदन्तोष्ठीत्यनेन कुतुकाद्भाव उक्तः । रूप्यं रजतं धातवः ताम्रगैरिकादयः तत्तुल्यतनूरुहम् 'तनूरुहं रोम लोम' इत्यमरः॥ ३३ ॥

रा० टी०—स इति । मायामयः स मृगः तां रामदयितां पश्यन् ततो दर्शनादेव हेतोः तद्वनं दीपयन्निव तत्र विचचार॥३४॥

रा० टी०—अदृष्टेति । अदृष्टपूर्वं दृष्टपूर्वैर्भिन्नं तं मृगं दृष्ट्वा सीता परमं विस्मयं जगाम ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणाशेरोमणावारण्यकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

गो० टी०—स चेति । दीपयन् प्रकाशयन् ॥ ३४ ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१] ति० टी०—सा तमिति ॥ १ ॥

२-३] ति० टी०—मृष्टहाटकं शुद्धं हेम तत्सदृशवर्णा । चक्रन्द आह्वाने रुदिः । चक्रन्देति रोदनार्थेन भाव्यशुभमिति सूचितं कविना ॥ २ ॥ ३ ॥

रा० टी०—मृगावलोकनानन्तरकालिकं सीताहृत्तान्तमाह—सेत्यादिभिः । कुसुमानि विचिन्वती सुश्रोणी मृष्टहाटकवर्णिनी प्रतप्तसुवर्णसदृशवर्णविशिष्टा अनवद्याङ्गी दोषसंसर्गरहिताङ्गविशिष्टा सा सीता हेमराजतवर्णाभ्यां सुवर्णरजतसदृशवर्ण-

---

१ ऽरण्यवासस्येति गो. पाठः । २ सा तं रुचिरदन्तोष्ठीति गो. रुचिरदन्तोष्ठीति रा. पाठः । ३ पुनश्चित्रमिति गो. पाठः । ४ अपचिन्वतीति गो. पाठः । ५ हेमेति गो. रा. पाठः । ६ अभीति गो. पाठः । ७ अर्पाति गो. पाठः । ८ श्लोकोऽयं गो. न दृश्यते । ९ चाभीति रा. पाठः ।

तावाहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ । वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम् ॥ ४ ॥
शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो वाक्यमब्रवीत् । तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥ ५ ॥
चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने । अनेन निहता राम राजानः कामरूपिणा ॥ ६ ॥
अस्य मायाविदो मायामृगरूपमिदं कृतम् । भानुमत्पुरुषव्याघ्र गन्धर्वपुरसंनिभम् ॥ ७ ॥
मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव । जगत्यां जगतीनाथ मायैषा हि न संशयः ॥ ८ ॥
एवं ब्रुवाणं काकुत्स्थं प्रतिवार्य शुचिस्मिता । उवाच सीता संहृष्टा छद्मना हृतचेतना ॥ ९ ॥
आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः । आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥ १० ॥
इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः । मृगाश्चरन्ति सहिताश्चमराः सृमरास्तथा ॥ ११ ॥
ऋक्षाः पृषतसङ्घाश्च वानराः किंनरास्तथा । विहरन्ति महाबाहो रूपश्रेष्ठा महाबलाः ॥ १२ ॥

विशिष्टाभ्यां पार्श्वाभ्याम् उपशोभितं मृगं संप्रेक्ष्य प्रहृष्टा सती भर्तारं लक्ष्मणं च चक्रन्द आजुहाव । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

रा० टी०—आह्वयेति । आगच्छागच्छेत्याहूय तं मृगं पुनरभिवीक्षते ॥ ३ ॥

गो० टी०—सीतायास्त्वेकनाथायाः पूरयिष्यन् मनोरथम् ।
मायामृगं योऽनुययौ श्रीरामं तमुपास्महे ॥

सा तमित्यादि । हैमराजतवर्णाभ्यामित्यनेन द्वयोः पार्श्वयोर्वर्णभेद उच्यते । मृष्टं शुद्धं हाटकं सुवर्णं तस्य वर्णोऽस्या अस्तीति तथा 'स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्' इत्यमरः । अभिचक्रन्द उच्चैराह्वयत् 'क्रदि आह्वाने रोदने च' इति धातुः । सायुधमित्यनेनायुधेन सहागन्तव्यमित्युक्तमिति गम्यते ॥ १–४ ॥

४–५] ति० टी०—तावाहूतौ सीतयेति शेषः ॥ ४ ॥ ५ ॥

रा० टी०—ताविति । वैदेह्या आहूतौ तं सीताधिष्ठितदेशं वीक्षमाणौ रामलक्ष्मणौ मृगं ददृशतुः ॥ ४ ॥

रा० टी०—शङ्कमान इति । तं मृगं दृष्ट्वा शङ्कमानो लक्ष्मणः वाक्यमब्रवीत् । तद्वचनाकारमाह—एनं मृगं तं प्रसिद्धं मारीचं राक्षसमेवाहं मन्ये ॥ ५ ॥

६] ति० टी०—मृगयां चरन्तस्तां कुर्वन्तः । उपाधिना मृगरूपच्छलेन ॥ ६ ॥

रा० टी०—चरन्त इति । हे राम ! पापेन पापकर्मनिरतेन कामरूपिणा अनेन राक्षसेन कर्त्रा उपाधिना कपटरूपेण मृगयां चरन्तः राजानः निहताः ॥ ६ ॥

गो० टी०—चरन्त इति । मृगयां चरन्तः मृगयार्थं पर्यटन्तो राजानः अनेन पापेन मृगरूपोपाधिना निमित्तेन हताः ॥ ५ ॥

७] ति० टी०—अस्य मायाविदो माया या श्रुता सा मृगरूपमिदं कृतम् मायैव मृगरूपेण परिणतेत्यर्थः । भानुमत्प्रकाशयुतं गन्धर्वपुरसंनिभम् ॥ ७ ॥

रा० टी०—अस्येति । हे पुरुषव्याघ्र ! भानुमत् प्रकाशविशिष्टं कृतं निष्पादितं गन्धर्वपुरसंनिभम् इदं मृगरूपं मायाविदः मायानां वेदितुः अस्य मारीचस्य मायैव ॥ ७ ॥

गो० टी०—अस्येति । मायां वेत्तीति मायाविद् अस्य मायैव मृगरूपं कृतं मृगाकारेण परिणतं भानुमत् प्रकाशवत् गन्धर्वपुरं नानाविधविस्मयनीयाकारसंस्थानं क्षणभङ्गुरमभं तत्सभिभं तद्वद्विस्मयनीयमित्यर्थः । जगत्यां भूमौ ॥ ६ ॥ ७ ॥

८] ति० टी०—नास्ति एवम्प्रकारेणकमृगासंभवात् ॥ ८ ॥

रा० टी०—नन्वं कथं त्वं वेत्सीत्यत आह—मृग इति । हे जगतीनाथ ! एवंविधो रत्नविचित्रः मृगो जगत्यां नास्ति अतः एषा मायैव संशयो न ॥ ८ ॥

९] ति० टी०—काकुत्स्थं लक्ष्मणं प्रतिवार्य नायं राक्षसः, अपि तु चित्रमृगः । नैतद्ग्रहणविघ्नस्त्वया कार्य इत्युक्त्येत्यर्थः । छद्मना वञ्चनेन हृतचेतना सेव ॥ ९ ॥

रा० टी०—एवमिति । छद्मना तत्कपटरूपेण आहृता प्रापिता चेतना बुद्ध्यन्तरं यया सा संहृष्टा शुचिस्मिता सीता एवं ब्रुवाणं लक्ष्मणं प्रतिवार्य काकुत्स्थं रामब्रुवाच, अनेन सीतायाः लीलाप्रियात्वं मर्यादापालकत्वं वा सूचितम् ॥ ९ ॥

गो० टी०—एवमिति । काकुत्स्थं प्रतिवार्य निवर्त्य उवाच राममिति शेषः । तत्र हेतुश्रमेणेति । हृतचेतना हृतप्रज्ञा ॥ ८ ॥

१०] ति० टी०—नोऽस्माकम् । अयोध्यागमनोत्तरम् । तत्र सख्यभिप्रायेण बहुवचनम् ॥ १० ॥

रा० टी०—तद्वचनाकारमाह—आर्येति । हे आर्यपुत्र असौ अभिरामो मृगः मे मनो हरति अतः एनम् आनय । तत्प्रयोजनमाह—नोऽस्माकं क्रीडार्थं भविष्यति ॥ १० ॥

गो० टी०—आर्यपुत्रेति । नो भविष्यति नः भविष्यति च भविष्यतीत्यपि वाग्दोषः ॥ ९ ॥

११-१२] ति० टी०—सृमरश्चमरौ कृष्णगुल्फपुच्छौ ॥ ११ ॥ १२ ॥

रा० टी०—नन्वं बहूनां मृगाणामिह सख्यात्कृतोऽस्मिन्नेव स्पृहेत्यत आह—इहेति । अस्माकम् इह आश्रमपदे यद्यपि

---

१ तयेति गो. पाठः । २ राममिति गो. पाठः । ३ राजन्निति गो. पाठः । ४ चर्मणेति गो. पाठः । ५ मनोहरा इति गो. पाठः । ६ पादानकेति भाति ।

न चान्यः सदृशो राजन्दृष्टः पूर्वं मृगो मया । तेजसा क्षमया दीप्त्या यथायं मृगसत्तमः ॥ १३ ॥
नानावर्णविचित्राङ्गो रत्नभूतो ममाग्रतः । द्योतयन्वनमव्यग्रं द्योतते शशिसंनिभः ॥ १४ ॥
अहो रूपमहो लक्ष्मीः स्वरसंपच्च शोभना । मृगोऽद्भुतो विचित्राङ्गो हृदयं हरतीव मे ॥ १५ ॥
यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव । आश्चर्यभूतं भवति विस्मयं जनयिष्यति ॥ १६ ॥
समाप्तवनवासानां राज्यस्थानां च नः पुनः । अन्तःपुरे विभूषार्थो मृग एष भविष्यति ॥ १७ ॥
भरतस्यार्यपुत्रस्य श्वश्रूणां मम च प्रभो । मृगरूपमिदं दिव्यं विस्मयं जनयिष्यति ॥ १८ ॥
जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः । अजिनं नरशार्दूल रुचिरं तु भविष्यति ॥ १९ ॥
निहतस्यास्य सत्त्वस्य जाम्बूनदमयत्वचि । शष्पबृस्यां विनीतायामिच्छाम्यहमुपासितुम् ॥ २० ॥

पुष्पदर्शनाः सहिताः संघीभूताः मृगाश्चरन्ति रूपश्रेष्ठाः महाबलाः चमरादयश्च विहरन्ति तथापि तेजआदिना उपलक्षितो यथा अयं मृगसत्तमः पूर्वः प्रथमो मया दृष्टः तादृशः अन्यो मृगो न दृष्टः एतेन सर्वोत्तमत्वादस्मिन् स्पृहेति सूचितम् । श्लोकत्रयमेकान्वयि ॥ ११–१३ ॥

गो० टी०–इहेत्यादि । सहिताः संघीभूताः सृमराः व्यालमृगाः 'सृमरः स्याद्व्यालमृगः' इति वैजयन्ती । चमराः चामरमृगाः, ऋक्षाः भल्लुकाः, पृषताः बिन्दुमृगाः, किन्नराः मृगविशेषाः ॥ १० ॥ ११ ॥

१३] ति० टी०–अन्यः सदृश एतत्सदृशोऽन्य इत्यर्थः । तेजसा विचित्रगतिसामर्थ्येन । क्षमया सौम्यभावेन । दीप्त्या दहकान्त्या ॥ १३ ॥

गो० टी०–न चास्येति । तेजसा वर्णेन क्षमया अत्वरया दीप्त्या शारीरप्रकाशेन यथायं मृगो दृश्यते तथा तेजआदिभिः अस्य सदृशो मृगो न दृष्टपूर्वः पुरा भाविकालेऽपि न दृश्यत इति शेषः । 'स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा' इत्यमरः ॥ १२ ॥

१४] ति० टी०–शशिसंनिभत्वेनाह्लादकत्वम् ॥ १४ ॥

रा० टी०–नानेति । नानावर्णैर्विचित्राण्यङ्गानि यस्य सः रत्नबिन्दुभिः समन्वितो व्याप्तः शशिसंनिभोऽयं मृगः वनं द्योतयन् सन् अव्यग्रं यथा स्यात् तथा द्योतते प्रकाशते ॥१४॥

गो० टी०–नानावर्णेति । समाचितः व्याप्तः अव्यग्रं समग्रं यथा तथा शोभते शशिसदृशः आनन्दकरत्वेन शशिसाम्यम् ॥ १३ ॥

१५] ति० टी०–स्वरसंपद्धनिसमृद्धिः ॥ १५ ॥

रा० टी०–अहो इति । अस्य रूपं लक्ष्मीश्च अहो आश्चर्यम् शोभना स्वरसंपच्च अहो अतो मृगभूतः मृगत्वं प्राप्तः विचित्रः असौ मे हृदयं हरतीव ॥ १५ ॥

गो० टी०–अहो इति । रूपं वर्णः लक्ष्मीः कान्तिः । कान्त्यादपूर्वकं मनोहरत्वमाह–मृग इति । अतो न पूर्वार्थेन पुनरुक्तता ॥ १४ ॥

१६–१८] ति०टी०–तव ग्रहणं त्वत्कर्तृकग्रहणम् । जीवतो ग्रहणमाश्चर्यभूतं भवति यतोऽतो विस्मयं जनयिष्यति॥१६–१८॥

रा० टी०–यदीति । जीवन्नेव मृगः यदि तव ग्रहणम् अभ्येति तदा आश्चर्यभूतं भवति अत एव विस्मयं सर्वेषामाश्चर्यं जनयिष्यति ॥ १६ ॥

रा० टी०–समाप्तेति । समाप्तः वनवासः वनवासावधियेषां तेषामत एव राज्यस्थानां नोऽस्माकमन्तःपुरेऽपि भूषार्थ एष मृगो भविष्यति ॥ १७ ॥

गो०टी०–यदीति । श्लोकद्वयमेकान्वयम् । तव ग्रहणं त्वत्कर्तृकग्रहणं कर्तरि षष्ठी । तदा एष मृगः आश्चर्यभूतम् अस्माकं विस्मयावहं सत्त्वं भवति इदानीमिति शेषः । समाप्तवनवासानाम् अत एव पुनः राज्यस्थानां च नः विस्मयं जनयिष्यति किंच अन्तःपुरविभूषार्थोऽपि भविष्यति ॥ १५॥ १६ ॥

रा० टी०–भरतस्येति । दिव्यं दिव्यत्वेन प्रतीयमानम् इदं मृगरूपम् आर्यपुत्रस्य भरतस्य श्वश्रूणां मम च विस्मयं जनयिष्यति ॥ १८ ॥

गो० टी०–भरतस्येति । आर्यपुत्रस्य तव श्वश्रूणां मम श्वश्रूणां चेति योजना । मृगरूपं प्रशस्तमृगः प्रशंसायां रूपप् प्रत्ययः । मृगस्य रूपं वा ॥ १७ ॥

१९] ति० टी०–हतोऽपि यदि ते ग्रहणं प्राप्नोति तदापि मे प्रयोजनमित्याह–अजिनमिति ॥ १९ ॥

रा० टी०–जीवन्निति । मृगसत्तमः जीवन् सन् ते ग्रहणं न अभ्येति तर्हि रुचिरमजिनं चर्म तु किं भविष्यति ॥ १९ ॥

गो० टी०–जीवतः अग्रहणेऽपि प्रयोजनमाह–जीवन्निति । अजिनं चर्म रुचिरं प्रियम् ॥ १८ ॥

२०] ति० टी०–शष्पबृस्यां बालतृणपरिकल्पिततापसासने विनीतायां प्रसारितायामस्य जाम्बूनदमयत्वच्युपासितुं त्वत्समीपे स्थातुमिच्छामि । यद्वा भगवदुपासनां कर्तुमित्यर्थः२०

रा० टी०–निहतस्येति । निहतस्य क्रूरतावशात् त्यक्तप्राणस्य अस्य मृगरूपस्य सत्त्वस्य जाम्बूनदमयत्वचि सत्यां शष्पबृस्यां कोमलतृणरचिततापसोचितासने विनीतायां प्रसा-

---

१ अस्येति गो. पाठः । २ दृष्टपूर्वो मृगः पुरेति गो: दृष्टः पूर्वौ मृगो मयेति रा. पाठः । ३ रत्नबिन्दुसमाचित इति गो. समान्वेत इति रा. पाठः । ४ शोभत इति गो. पाठः । ५ पुरविभूषार्थं इति गो. पुरेऽपीति रा. पाठः । ६ व्यक्तमिति गो. पाठः । ७ मे इति गो. पाठः ।

कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् । वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम ॥ २१ ॥
तेन काञ्चनरोम्णा तु मणिप्रवरशृङ्गिणा । तरुणादित्यवर्णेन नक्षत्रपथवर्चसा ॥ २२ ॥
बभूव राघवस्यापि मनो विस्मयमागतम् । इति सीतावचः श्रुत्वा दृष्ट्वा च मृगमद्भुतम् ॥ २३ ॥
लोभितस्तेन रूपेण सीतया च प्रचोदितः । उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः ॥ २४ ॥
पश्य लक्ष्मण वैदेह्याः स्पृहामुल्लसितामिमाम् । रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति ॥ २५ ॥
न वने नन्दनोद्देशे न चैत्ररथसंश्रये । कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित्समो मृगः ॥२६॥

रितायां जाम्बूनदमयत्वचि सुवर्णमयसदृशचर्मणि उपासितुं त्वया सह स्थातुमिच्छामि मृगमयत्वचेत्यावर्तते अत एव न सत्यसंकल्पात्वहानिः ॥ २० ॥

गो० टी०–प्रियत्वमेव विवृणोति–निहतस्येति । जाम्बूनदमयत्वचि स्वर्णसदृशत्वचि शष्पबृस्यां बालतृणैः कृतायां बृस्यां मध्यमपदलोपिसमासः । 'त्रतिनामासनं बृसी' इत्यमरः । तस्यां विनीतायाम् आस्तृतायाम् उक्तरूपत्वचि उपासितुं स्थातुम् इच्छामि त्वया सहेति शेषः ॥ १९ ॥

२१] ति० टी०–इदं कामेन स्वप्रयोजनेच्छया पतिनियोजनरूपं रौद्रम्, अत एव स्त्रीणामसदृशं कैकेयीवदिति मम निर्णीतं तथाप्यस्य सत्त्वस्य वपुषा मम विस्मयो जनित इति जातकौतुकनिवृत्त्यर्थमनुचितमपि करोतीति शेषः ॥ २१ ॥

रा० टी०–कामेति । कामवृत्तं स्वेच्छाविषयीभूतम् इदं मत्प्रेरितं रौद्रं कर्म यद्यपि स्त्रीणामसदृशमनुचितं मतं तथापि अस्य सत्त्वस्य वपुषा आश्चर्यमयरूपविशिष्टशरीरेण मम विस्मयो जनितः एतेन विस्मयनिवृत्तेः मत्कर्तृकप्रेरणमन्तरा सिद्धयभावेन इदं प्रेरणं प्रवृत्तमिति सूचितम् ॥ २१ ॥

गो० टी०–अथ सविनयमाह–कामवृत्तमिति । रौद्रं घोरम् इदं कामवृत्तं भर्तृप्रेरणरूपस्वेच्छाव्यापारः स्त्रीणाम् असदृशम् अयुक्तं कैकेयीवत् तथाप्यस्य सत्त्वस्य तु वपुषा विलक्षणदेहेन मम विस्मयो जनितः ममात्यन्तं कुतूहलं वर्तते आनयेति वक्तुमप्ययुक्तम् अतः तवापि कुतूहलमस्ति चेत्तथा क्रियतामिति भावः । अनेन पूर्वमानयेति प्रमादादुक्तस्य क्षमापणं कृतम् ॥ २० ॥

२२] ति० टी०–'काञ्चनरूपेण' इति पाठे रूपेण मृगेण । 'रूपं मृगेऽपि विज्ञेयम्' इति हलायुधः । नक्षत्रसदृशनानाविन्दूपलक्षितत्वात्तत्पथसदृशेन ॥ २२ ॥

रा० टी०–तेनेति । काञ्चनरोम्णा स्वर्णमयरोमविशिष्टेन मणिप्रवरशृङ्गिणा इन्द्रनीलमणिसदृशश्रृङ्गविशिष्टेन तरुणादित्यवर्णेन तरुणादित्यवर्णवत् वर्णो वर्णनयोग्यता यस्मिन् अतिप्रकाशमानेनेत्यर्थः, नक्षत्रपथवर्चसा नक्षत्रपथवद्वर्चः बहुबिन्दुजनितविचित्रतेजो यस्य तेन मृगेण राघवस्यापि मनः विस्मयमहो एतद्धाश्चर्यमित्याश्चर्यमागतम् । सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०– न केवलं स्त्रीपारवश्येन कृतवान् किंतु स्वविस्मयेनापीत्याह–तेनेत्यादिना । मणिप्रवरो नीलरत्नं काञ्चनवर्णरोमत्वात् बालसूर्यवर्णत्वं नक्षत्रपथः छायापथः तत्तुल्यवर्चसा नक्षत्रसदृशबिन्दूपलक्षितत्वाद् आगतं प्राप्तम् ॥ २१ ॥

२३] ति० टी०–राघवस्यापि संभावितासंभावितवस्तुतत्त्वनिरूपणकुशलमतेरपि मनो विस्मयमागतं प्राप्तं तदिव बभूव । भवितव्यतायाः प्राबल्यात् ॥ २३ ॥

२४] ति० टी०–तदेवाह–लोभित इति ॥ २४ ॥

रा० टी०–इतीति । सीतावचः श्रुत्वा अद्भुतं मृगं दृष्ट्वा च सीतया प्रचोदितस्तेन मृगनिष्टेन रूपेण लोभितः यशःप्रख्यातिरूपलोभं प्रापितः हृष्टो राघवो रामः भ्रातरं लक्ष्मणमुवाच ॥ २३ ॥ २४ ॥

गो० टी०–एवमित्यादि । रूपेण मृगेण 'रूपं मृगेऽपि विज्ञेयम्' इति हलायुधः ॥ २२ ॥ २३ ॥

२५] ति० टी०–रूपेणालौकिकविचित्रस्वरूपेण श्रेष्ठः । सर्वश्रेष्ठरूपेण हेतुना । अयैष मृगो न भविष्यति न जीविष्यति जीवनमस्य न संभावितमित्यर्थः । प्रायेण मृगत्वमत्र न संभावितमित्यर्थ इति कतकः ॥ २५ ॥

रा० टी०–तद्वचनाकारमाह–पश्येत्यादिभिः । हे लक्ष्मण ! उल्लसितां प्रकाशं प्राप्तां वैदेह्याः स्पृहां पश्य । ननु कथमेवमस्मिन्नेव मृगे स्पृहा जातेत्यत आह–रूपश्रेष्ठतया यः कश्चिन्मृगः अस्य समो भवेत् स एव बुद्धिस्थो मृगः नन्दनादौ न भविष्यति पृथिव्यां कुतः एतेनापूर्वदर्शनमेव स्पृहामुदपादयदिति व्यञ्जितम् । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६॥

गो० टी०–पश्येति । सीतास्पृहा युक्तेति भावः । तत्र हेतुमाह–रूपेति । मृगेषु श्रेष्ठतया रूपेण श्रेष्ठतया वा एष मृगः एतादृशमृगः अथ वनवासे न भविष्यति न सेत्स्यति दुर्लभ इत्यर्थः ॥ २४ ॥

२६] ति० टी०–नन्दन इत्युद्देशः कीर्तनं यस्य तत्र वने चैत्ररथसंश्रये तदाख्ये वनेऽपि न योऽस्य कश्चित्समो मृगः स पृथिव्यामस्ति इति कुतः संभाव्यते इत्यर्थः ॥ २६ ॥

गो० टी०–न केवलमत्र देशान्तरेऽपि दुर्लभ इत्याह–न वन इति । नन्दन इत्युद्देशः कीर्तनं यस्य तस्मिन् वने चैत्ररथसंश्रये चैत्ररथाख्ये वने च न भविष्यतीत्यन्वयः पृथिव्यां कुतो हेतोर्भविष्यति ॥ २६ ॥

१ तरुणा दित्येति गो. पाठः । २ एवमिति गो. पाठः । ३ तं दृष्ट्वेति गो. पाठः । ४ स्पृहां मृगतामिति गो. पाठः ।

प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः । शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः ॥ २७ ॥
पश्यास्य जृम्भमाणस्य दीप्ताभ्यग्निशिखोपमाम् । जिह्वां मुखान्निःसरन्तीं मेघादिव शतह्रदाम् ॥ २८ ॥
मसारगल्वर्कमुखः शङ्खमुक्तानिभोदरः । कस्य नामेनिरूप्योऽसौ न मनो लोभयेन्मृगः ॥ २९ ॥
कस्य रूपमिदं दृष्ट्वा जाम्बूनदमयप्रभम् । नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत् ॥ ३० ॥
मांसहेतोरपि मृगान्विहारार्थं च धन्विनः । घ्नन्ति लक्ष्मण राजानो मृगयायां महावने ॥ ३१ ॥
धनानि व्यवसायेन विर्चीयन्ते महावने । धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ ३२ ॥
तत्सारमखिलं नृणां धनं निचयवर्धनम् । मनसा चिन्तितं सर्वं यथा शुक्रस्य लक्ष्मण ॥ ३३ ॥

२७] ति० टी०–तदेवाह–प्रतिलोमेत्यादि । कनकबिन्दुभिः सहिता रोमराजय इत्यन्वयः ॥ २७ ॥

रा० टी०–रूपश्रेष्ठत्वमाह–प्रतीति । प्रतिलोमाः तिर्यग्गामिन्यः अनुलोमाः ऋजुगामिन्यः रुचिराः कनकबिन्दुभिश्चित्राः रोमराजयः मृगमाश्रित्य शोभन्ते ॥ २७ ॥

गो० टी०–प्रतिलोमेति । प्रतिलोमाः निर्यग्भूताः अनुलोमाः अनुकूलाः रोमराजयश्च मृगमाश्रित्य दृश्यन्ते चित्राः आश्रयभूताः कनकबिन्दवः कनकवर्णबिन्दवश्च मृगमाश्रित्य शोभन्ते ॥ २६ ॥

२८] ति० टी०–शतह्रदा विद्युत् ॥ २८ ॥

रा० टी०–पश्येति । दीप्तां दीप्तिविशिष्टामत एव अग्निशिखोपमां मेघात् शतह्रदां विद्युतमिव जृम्भमाणस्यास्य मृगस्य मुखान्निस्तरन्तीं जिह्वां पश्य ॥ २८ ॥

गो० टी०–पश्येति । शतह्रदां तडितम् ॥ २७ ॥

२९–३०] ति०टी०–'मसारगल्वर्कमुखः शङ्खमुक्तानिभोदरः' इति पाठे मसार इन्द्रनीलस्तस्य गल्वर्कश्चषकस्तदाकारास्यसंपुट इत्यर्थ इति तीर्थः । अनिरूप्य इदमित्थमिति निरूपयितुमशक्यः । पाठान्तरे यस्येत्यादि ॥ २९ ॥ ३० ॥

रा० टी०–मसारेति । मसारगल्वर्कमुखः मसारः इन्द्रनीलः तस्य गल्वर्कः पानपात्रं तद्वन्मुखं यस्य शङ्खमुक्तानिभः शङ्खमुक्ताभ्यां सदृशमुदरं यस्य सः अनिरूप्यः कथमिदं रूपं प्राप्तमिति निरूपयितुमशक्यः असौ मृगः नाम प्रसिद्धं कस्य मनो न लोभयेत् ॥ २९ ॥

गो० टी०–मसारेति । मसारः इन्द्रनीलः गल्वर्कः चषकः । 'गल्वर्कश्चाद्भुतर्षभ्र तर्षकश्चषकः स्मृतः' इति हलायुधः । इन्द्रनीलनिर्मितचषकाकारमुखसंपुट इत्यर्थः । अभिरूपः सुन्दरः ॥ २८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–कस्येति । जाम्बूनदमयप्रभं सुवर्णमयी प्रभा यस्य नानारत्नमयं दिव्यं क्रीडायोग्यम् इदं रूपं दृष्ट्वा कस्य मनो विस्मयं न व्रजेत् व्रजेदेवेत्यर्थः, एतेनैतत्प्राप्यानुकूलव्यापारः कर्तव्य इति सूचितम् ॥ ३० ॥

गो० टी०–कस्येति । रूपं मृगं जाम्बूनदमयेति स्वार्थे मयट् । नानारत्नमयं नानाबिन्दुप्रचुरम् ॥ २९ ॥

३१] ति० टी०–मांसहेतोरपि विहारार्थं च घ्नन्ति, किं पुनरेवंविधत्वग्लाभार्थमिति भावः ॥ ३१ ॥

रा० टी०–नन्वयमायासे किमर्थमेवं विचार इत्यत आह–मांसेति । मांसहेतोः राजभोग्यवस्तुप्राप्त्यर्थं च धन्विनो राजानः मृगयायां महावने मृगान् घ्नन्ति एतेनैतत्प्रयत्ने द्वयोर्लाभो भवितेति ध्वनितम् ॥ ३१ ॥

गो० टी०–मांसेति । मांसहेतोरपि विनोदार्थं च राजानो मृगान् घ्नन्ति किं पुनरेवंविधविचित्रत्वत्सुलाभहेतोरिति भावः ॥ ३० ॥

३२] ति० टी०–महावने राजभिरिति शेषः । व्यवसायेन मृगवधोद्यमेन । धनानि विचीयन्ते संगृह्यन्ते । नन्वतो वने धनं तत्राह—धातव इति । मणिरत्नं सुवर्णं च येषु तादृशा धातवः । वज्रादिमणिसुवर्णादियुक्तास्ताम्रादिधातव इति यावत् ॥ ३२ ॥

रा० टी०–नन्वेतन्मृगरूपं महद्धनम् एतच्च वन एव संभवति तस्मादिदं व्यवसायेन स्वीकर्तव्यमित्यभिप्रायेणाह–धनानीति । मणिरत्नं मणिश्रेष्ठं सुवर्णं च मणिरत्नसुवर्णे ते येषु ते इति मणिरत्नसुवर्णिनः मणयः सुवर्णानि च धातुषु भवन्तीति प्रसिद्धिः । तथाभूता विविधा धातवश्च धनानि करिमस्तकमुक्ताप्रभृतीनि महावने व्यवसायेन मृगयोद्योगेन राजभिः विचीयन्ते संगृह्यन्ते । यद्वा धनानि व्यवसायेन मृगयोद्योगेन महावने विचीयन्ते । नन्वतो वने धनसंग्रहप्रसक्तिरित्यत्राह–धातव इति । यस्मादुक्तरूपा विविधा धातवः सन्ति तस्मादित्यर्थः ॥ ३१ ॥

३३] ति० टी०–निचयवर्धनं कोशवर्धनं तद्वन्यं धनं नृणां सारमतिप्रशस्तं भवति । शुक्रं ब्रह्म "स पर्यगाच्छुक्र-

१ गल्वर्केति गो. रा. पाठः । २ अभिरूप इति गो. पाठः । ३ मयं प्रभो इति गो. पाठः ।

अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् । तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याः सुलक्ष्मण ॥ ३४ ॥
एतस्य मृगरत्नस्य परार्ध्ये काञ्चनत्वचि । उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ ३५ ॥
न कादली न प्रियका न प्रवेणी न चाविकी । भवेदेतस्य सदृशी स्पर्शेऽनेनेति मे मतिः ॥ ३६ ॥
एष चैव मृगः श्रीमान्यश्च दिव्यो नभश्चरः । उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ ३७ ॥

मकायमत्रणम् " इति श्रुतेः । एवं च शुक्रस्य ब्रह्मलोकं प्राप्तस्य तद्रूपमापन्नस्य मनसा चिन्तितं सर्वं संकल्पमात्रसिद्धं सर्वं भोग्यवस्तु यथा सर्वस्मात्सारतरं तद्वत् ॥ ३३ ॥

रा० टी०—तत्र हेतुमाह—तदिति। निचयवर्धनं कोशवृद्धिकारकं धनं नृणां सारं बलं तत्तस्माद्धनाद्धेतोः मनसा चिन्तितं सर्वं शुक्रस्य दैत्याचार्यस्येव त्यक्तप्राकृतबन्धस्य पुरुषस्येव वा भवतीति शेषः,। शुक्रशब्दस्य शुक्तपरत्वम् " सपर्यगाच्छुक्रमकायमव्रणम् " इत्यादिश्रुतिषु प्रसिद्धम् ॥ ३३ ॥

गो० टी०—तत्सारमिति। तेषां धनानां सारं श्रेष्ठभूतम् अखिलं धनं नृणां निचयवर्धनं कोशवर्धनं भवेत् किमिव शुक्रस्य मनसा चिन्तितं संकल्पितं वस्तुजातं तथैवाविर्भूय निचयवर्धनं यथा तद्वदित्यर्थः । यद्वा नृणं मनसा चिन्तितं कथामनोरथकल्पितं सर्वं धनं यथा शुक्रस्य कोशं पूरयति तथेत्यर्थः । तदुक्तमुद्योगपर्वणि—'मनुष्येभ्यः समादत्ते शुक्रश्चिन्ताजितं धनम्' इति । यद्वा नृणां राजादिधनिनां कोशवर्धनं तत् वन्यं धनं सारं भवति जानपदधनादपि वन्यं धनं सारम् अतिप्रशस्तं भवति अपूर्वत्वात् अतो निष्टप्तवनवासैरस्माभिर्वनादपूर्वधनतया पुरीं नेतुमयं ग्रहीतव्य इति भावः ॥ ३२ ॥

३४] ति० टी०—नन्वं तथापि विचार्य कर्तव्यं तत्राह—अर्थीति। अर्थ्यार्थापेक्षः पुमान्येनार्थकृत्येनार्थनिमित्तेन कर्तव्येन कर्मणा तत्सौन्दर्यादाक्षिप्तहृदयोऽविचारयन्नेव व्रजति सत्संपादनार्थं तमेवार्थ्यां अर्थसंपादनचतुरा अर्थशास्त्रज्ञा अर्थमर्थपदवाच्यमाहुः ॥ ३४ ॥

रा० टी०—नन्वं कोऽयमिति निश्चित्य गन्तव्यमित्यत आह—अर्थीति । येनार्थकृत्येन अर्थसाधककर्मणा अविचारयन् अल्पविचारं कुर्वन् अर्थी जनः संव्रजति तमर्थशास्त्रज्ञाः नीतिनिपुणाः अत एव अर्थ्याः अर्थसाधनचतुराः अर्थमर्थसाधकं प्राहुः ॥ ३४ ॥

गो० टी०—अस्त्वेवम् अथापि विचार्य कार्यमिति चेत्तत्राह—अर्थीति। अर्थी असन्निहितार्थापेक्षी "अर्थाद्यासन्निहिते" इति इनिप्रत्ययः । सः येन अर्थकृत्येन अर्थकार्येण हेतुना अविचारयन् संव्रजति सम्यगाच्छति यद्वस्तुसौन्दर्यजातोपकारलोभेन पुरुषस्तत्साधने व्यग्रः प्रवर्तते तमेवार्थं प्राहुः । अर्थशास्त्रज्ञाः नीतिशास्त्रज्ञाः अर्थ्या अर्थोदनपेताश्च । "[1] र्थाभिज्ञार्थशालिनोः" इत्यजयः । "धर्मपथ्यर्थन्यायादनपेते" इति [2] यः ।

यस्य गुणप्रीतः पुरुषः अभिनिविशते स एवार्थ इति नीतिशास्त्रज्ञा अर्थवन्तश्चाहुः । अयं च तथाविध इति भावः ॥ ३३॥

३५] ति० टी०—अतोऽविचारितैवात्र प्रवृत्तिरित्याह—एतस्येति। अत्र विचारो न कर्तव्यः एतन्मूलेन महतोऽर्थस्य सिद्धिरिति गूढतात्पर्यम् ॥ ३५ ॥

रा० टी०—एतस्येति । एतस्य मृगरत्नस्य मृगश्रेष्ठस्य परार्धे अत्युत्तमे काञ्चनत्वचि सत्यां वैदेही उपवेक्ष्यति उपवेष्टुमिच्छति ॥ ३५ ॥

गो० टी०—एवं प्रयत्नसंपाद्यं वस्त्वयमेव मृग इत्यभिप्रायेणाह—एतस्येति । मृगरत्नस्य मृगश्रेष्ठस्य परार्ध्ये श्लाघ्ये काञ्चनत्वचि काञ्चनसदृशत्वचि पुल्लिङ्गत्वमार्षम् ॥ ३४ ॥

३६] ति० टी०—अस्य परार्ध्यत्वमेव दर्शयति—नेति। कदल्या इयं त्वक्कादली । मृदूचकर्कुरनीलाग्ररोमा मृगविशेषः कदली । प्रियकी मृदूचमसृणघनरोमयुक्तो मृगः प्रियकस्तस्येयं प्रियकी । प्रवेणी अजविशेषसंबन्धिनी । आविकी अवित्वक् । प्रत्येकं नञुक्तिः सर्वथा सादृश्याभाववोधनाय । अनेनैतदीयत्वचा ॥ ३६ ॥

रा० टी०—तत्र हेतुमाह—नेति । स्पर्शने स्पर्शे एतस्य मृगत्वचः सदृशी कादली मृगविशेषत्वक् न प्रियकी च न प्रवेणी च न प्रियक्यादयोऽपि मृगविशेषत्वक्परा:। तथा च वैजयन्ती—" कदली तु बिले शेते मृगी रूक्षोचकर्कुरैः । नीलाग्रैर्लोमभिर्युक्ता सा विंशत्यङ्गुलायता । प्रियकी रोमभिर्युक्ता मृदूचमसृणैर्घनैः " इति एतस्येति सामान्ये नपुंसकम् एतच्छब्देन मृगस्यैव परामर्शे कादल्यादिशब्दैर्मृगीविशेषाणामेव ग्रहणे च एतच्छब्दस्य पुल्लिङ्गत्वमिति दिक् ॥ ३६ ॥

गो० टी०—परार्ध्यत्वं विवृणोति—नेति। कदल्येव कादलीमृगविशेषः। तल्लक्षणमुक्तं वैजयन्त्याम्—'कदली तु बिले शेते मृदुसूक्ष्मोचकर्कुरैः। नीलाग्रैर्लोमभिर्युक्ता सा विंशत्यङ्गुलायता। प्रियकी लोमभिर्युक्ता मृदुश्च मसृणैर्घनैः' इति। प्रवेणी आस्तरणविशेषः मृगविशेषो वा अविरेव अविकः " अवेः कः " इति स्वार्थे कप्रत्ययः। तस्येयमाविकी तल्लोमनिर्मिता शाटीत्यर्थः। स्पर्शनेन मार्दवेन ॥ ३६ ॥

३७] ति० टी०—यश्च नभश्चरो मृगो मृगशिरोनक्षत्ररूपः। तदेवाह—तारामृगेति ॥ ३७ ॥

रा० टी०—एष इति । श्रीमानेषः मृगः यश्च नभश्चरो दिव्यः उभौ एतौ तारामृगमहीमृगौ दिव्यौ क्रीडायोग्यौ एतेन तयोर्द्वयोरेव परस्परमुपमानोपमेयभावः सूचितः॥ ३७ ॥

१ चेति गो. त्रिति रा. पाठः । २ स्पर्शने नेति गो. रा. पाठः ।

यदि वायं तथा यन्मा भवेद्वदसि लक्ष्मण । मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया ॥ ३८ ॥
एतेन हि नृशंसेन मारीचेनाकृतात्मना । वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः ॥ ३९ ॥
उत्थाय बहवो येन मृगयायां जनाधिपाः । निहताः परमेष्वासास्तस्माद्वध्यस्त्वयं मृगः ॥ ४० ॥
पुरस्तादिह वातापिः परिभूय तपस्विनः । उदरस्थो द्विजान्हन्ति स्वगर्भोऽश्वतरीमिव ॥ ४१ ॥
स कदाचिच्चिराल्लोके आससाद महामुनिम् । अगस्त्यं तेजसा युक्तं भैक्ष्यस्तस्य बभूव ह ॥ ४२ ॥
समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तम् । उत्स्मयित्वा तु भगवान्वातापिमिदमब्रवीत् ॥ ४३ ॥
त्वयाविगण्य वातापे परिभूतार्श्च तेजसा । जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥ ४४ ॥
तद्रक्षो न भवेदेव वातापिरिव लक्ष्मण । मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियम् ॥ ४५ ॥

गो० टी०—एष इति । दिव्यः श्लाघ्यः नभश्चरो मृगः मृगशीर्षः दिव्यौ शोभमानौ ॥ ३६ ॥

३८-३९] ति० टी०—अथ लक्ष्मणमतमङ्गीकृत्यापि प्रवृत्तिमाह—यदि वेति । राक्षसमायैषा न मृग इति यथा मां वदसि । यदि वा तथैवैष भवेत्तथाप्यस्य वधो मया कर्तव्य एव राक्षसवधस्य प्रतिज्ञातत्वात् ॥ ३८ ॥ ३९ ॥

रा० टी०—नन्वयं कपटमृगो न वास्तव इत्यत आह—यदीति । एषा राक्षसस्य माया इति मां यत्त्वं वदसि अतः यदि अयं तथा राक्षसो भवेत् तर्हि अस्य वधो मया कर्तव्यः ॥ ३८ ॥

गो० टी०—एवं सीतामतमङ्गीकृत्य प्रवृत्तिरुक्ता । अथ लक्ष्मणमतमङ्गीकृत्याह—यदि वेति । मायैषा राक्षसस्येति यन्मां वदसि तथायं यदि वा भवेत् एवमप्यस्य वधो मया कार्यः ॥ ३७ ॥

रा० टी०—तत्र हेतुमाह—एतेनेति । यतः एतेन मारीचेन पूर्वं मुनिपुङ्गवा हिंसिताः अनेन मृगयायां परमेष्वासाः बहवो जनाधिपाश्च निहतास्तस्मादयं मृगो वध्यः । श्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

गो० टी०—हनने हेतुत्वेन तदीयदोरात्म्यमाविष्करोति—एतेन हीति । नृशंसेन घातुकेन अकृतात्मना दुष्टभावेन ॥३८॥

४०] ति० टी०—उत्थाय प्रादुर्भूयोत्प्लुत्य वा ॥ ४० ॥

गो० टी०—उत्थायेति । उत्थाय प्रादुर्भूय ॥ ३९ ॥

४१-४२] ति० टी०—पुरस्तात्पूर्वमिह दण्डकारण्ये । 'स्वगर्भोऽश्वतरीमिव' इति । अश्वतरी स्वगर्भेण म्रियत इति प्रसिद्धिः । अश्वतरी गर्दभादश्वायाश्चोत्पन्नेति तीर्थः । अश्वतरी कर्कटीति परे । वृश्चिक इति कतकः । अत्राद्यव्याख्यैव ज्यायसी । तस्या गर्भस्योदरपाटनं विना न निःसरणमिति सर्वजनप्रसिद्धेः ॥ ४१ ॥ ४२ ॥

रा० टी०—मायाविनोत्साऽवध्यं विधातो भवितेति बोधयन् इतिहासमाह—पुरस्तादिति । पुरस्तात्पूर्वम् इह अस्मिन् वने वातापिः तपस्विनो द्विजान् परिभूय अनादृत्य उदरस्थः पूर्ववर्णितकपटेनोदरनिवासी सन् तपस्विनो द्विजान् हन्ति अहन् तत्र दृष्टान्तः स्वगर्भः अश्वतरीं गर्दभादश्वायाश्चोत्पन्नामिव प्रसिद्धश्वाश्वतरीणां गर्भस्य मातुदरविदारणपूर्वकोत्पादः ॥ ४१ ॥

गो० टी०—पूर्वोक्तमपि वातापिवृत्तान्तं मारीचस्य मायाव्यापारे दृष्टान्तत्वेनाह—पुरस्तादिति । पुरस्तात् पूर्वस्मिन्काले इह दण्डकारण्ये अश्वतरी नाम गर्दभादश्वायाश्चोत्पन्नेति वृत्तिकारः 'गोखरोऽश्वतरी मतः' इति हलायुधः । तत्स्वरूपमुक्तं शालिहोत्रीये—'खररूक्षस्वरास्तीक्ष्णाः खरशीलाः खराक्रयः' इति । तामश्वतरीं स्वगर्भो यथा हन्ति तथायमपि गर्भस्थो द्विजान् हन्ति । अश्वतरी वृश्चिकेत्यप्याहुः ॥ ४० ॥

रा० टी०—स इति । स वातापिः महाशुनिमगस्त्यमाससाद प्राप तस्य मुनेः स राक्षसः भक्ष्यो बभूव ॥ ४२ ॥

गो० टी०—स इति । भक्षः आहारः ॥ ४१ ॥

४३] ति० टी०—समुत्थाने श्राद्धान्ते । तद्रूपं राक्षसं रूपम् । उत्स्मयित्वेषद्धसित्वा ॥ ४३ ॥

रा० टी०—समुत्थान इति । समुत्थाने श्राद्धावसाने तद्रूपं राक्षसरूपं कर्तुकामं राक्षसरूपत्वेनोदरं विदार्य निस्सरणकाममित्यर्थः समीक्ष्य ज्ञात्वा उत्स्मयित्वा उत्स्मित्य भगवानगस्त्यो वातापिमिदमब्रवीत् ॥ ४३ ॥

गो० टी०—समुत्थान इति । समुत्थाने श्राद्धान्ते तद्रूपं रक्षोरूपम् उत्स्मयित्वा ईषत्स्मित्वा त्यबभाव आर्षः ॥ ४२ ॥

४४] ति० टी०—अविगण्याविचार्य पापम् । तस्माद्विजपरिभवजपापेन । जरां जीर्णताम् ॥ ४४ ॥

रा० टी०—तद्वचनाकारमाह—त्वयेति । हे वातापे अविगण्य अविगणय्य अनादृत्य द्विजश्रेष्ठाः परिभूताः विनाशिता इत्यर्थः, तस्माद्धेतोः जरां जीर्णतां गतः प्राप्तोऽसि ॥ ४४ ॥

गो० टी०—त्वयेति । अविगण्य अविचार्य पापमिति शेषः । जीवलोके भूलोके जरां जीर्णताम् इति वातापिमब्रवीदिति पूर्वेणान्वयः ॥ ४३ ॥

४५] ति० टी०—यो मारीचो मद्विधमतिमन्येतातिकामेत्तद्रक्षोऽपि मारीचाख्यं वातापिरिव न भवेदेव न जीवेदेव ॥४५॥

रा० टी०—तदिति । हे लक्ष्मण मद्विधं मत्सदृशं योऽ-

---

१ ऽनेनेति रा. पाठः । २ लोभादिति गो. पाठः । ३ भक्ष इति गो. पाठः । ४ स्त्रेति गो. पाठः । ५ तदेतन्न भवेद्रक्ष इति गो. पाठः ।

भवेद्धतोऽयं वातापिरगस्त्येनेव मां गतः । इह त्वं भव संनद्धो यन्त्रितो रक्ष मैथिलीम् ॥ ४६ ॥
अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन । अहमेनं वधिष्यामि ग्रहीष्याम्यथवा मृगम् ॥ ४७ ॥
यावद्गच्छामि सौमित्रे मृगमानयितुं द्रुतम् । पश्य लक्ष्मण [3]वैदेह्या मृगत्वचि [4]गतां स्पृहाम् ॥ ४८ ॥
त्वचा प्रधानया ह्येष मृगोऽद्य न भविष्यति । अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया ॥ ४९ ॥
यावत्पृषतमेकेन सायकेन निहन्म्यहम् । हत्वैतच्चर्म [5]आदाय शीघ्रमेष्यामि लक्ष्मण ॥ ५० ॥
प्रदक्षिणेनातिबलेन पक्षिणा जटायुषा बुद्धिमता च लक्ष्मण ।
भवाप्रमत्तः [6]प्रतिगृह्य मैथिलीं प्रतिक्षणं सर्वत एव शङ्कितः ॥ ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

तिमन्येत अतिक्रमेत् सः तद्रक्षो वातापिरिव न भवेत् म्रियेतेत्यर्थः ॥ ४५ ॥

गो० टी०—तदिति । रक्षःशब्दाभिप्रायेण नपुंसकत्वम् । अतिमन्येत अतिक्रामेत् । भवेदिति । मां गत इति । अगस्त्यो यथा अजरूपं वातापिं लोकहितार्थं नाशितवान् तथाहमपि मृगरूपमेनं हनिष्यामीत्यर्थः ॥ ४४ ॥

४६] ति० टी०—उक्तमेवार्थं पुनराह दार्ढ्याय—भवेदिति । मा मां गतः प्राप्तो मारीचोऽगस्त्येन वातापिरिव मया हतो भवेत् भविष्यतीत्यर्थः । संनद्धो धनुःकवचादियुक्तः । यन्त्रितो यत्नवान्व्यापारान्तरहीनः ॥ ४६ ॥

रा० टी०—भवेदिति । यतोऽगस्त्येन वातापिरिव मां गतः अयं राक्षसो हतो भवेत् अतः इह त्वं सन्नद्धो भव यन्त्रितो नियोजितस्त्वं मैथिलीं रक्ष च ॥ ४६ ॥

गो० टी०—इहेति । सन्नद्धः धनुःकवचादिसन्नाहयुक्तः यान्त्रितः व्याक्षेपान्तररहितः । अस्यामिति । अस्माकं यत्कृत्यमावश्यकं तत् सर्वमस्यामायत्तम् एतद्रक्षणप्रधानमित्यर्थः । एतन्मूलतया रावणवधादिकं कर्तव्यम् । इयं हि पूर्वं वेदवतीभावे तथा संकल्पितवतीत्यपि सूचयति ॥ ४५ ॥

४७] ति० टी०—अस्माकं यत्कृत्यमावश्यकं कर्तव्यं तदस्यामेतद्रक्षणविषय आयत्तं स्थितम् । तन्मुख्यकृत्ये त्वं सावधानस्तिष्ठ । स्वकर्तव्यमाह—अहमिति । अत्र पूर्वश्लोकचतुर्थचरणश्लेषेणायन्त्रितो यत्नरणया हीनोऽतियत्नरहितः सीतां रक्ष । अस्माकं कृत्यमवतारग्रहणप्रयोजनं तदस्यामायत्तमनयैव साधनीयमित्यपि सूचितम् ॥ ४७ ॥

रा० टी०—अस्यामिति । अस्माकं यत् कृत्यं तत् अस्यां मैथिल्यामायत्तम् एतदधीनमित्यर्थः, अतः एनं मृगं ग्रहीष्यामि वधिष्यामि वा ॥ ४७ ॥

गो० टी०—अहमिति । यावद्गच्छामि गमिष्यामि "यावत्पुरानिपातयोः—" इति भविष्यदर्थे लट् ॥ ४६ ॥

४८] ति० टी०—यावद्गच्छामि गमिष्यामीत्यर्थः । आनयितुमानेतुम् । तत्र हेतुः—पश्येति ॥ ४८ ॥

रा०टी०—यावदिति । मृगमानयितुम् आनेतुं यावद्गच्छामि तावत् मृगत्वचि गतस्पृहां वैदेहीं पश्य रक्षेत्यर्थः ॥ ४८ ॥

गो० टी०—पश्येति । गतस्पृहां प्राप्तस्पृहां प्रधानया प्रधानप्रयोजनभूतया न भविष्यति मरिष्यतीत्यर्थः । अत्र सीताप्रार्थितमेव प्रधानप्रयोजनम् अन्यदानुषङ्गिकमित्यर्थः ॥ ४७ ॥

४९] ति० टी०—प्रधानया सर्वोत्तमया न भविष्यति न जीविष्यति । अनेन जीवतो ग्रहणमसाधकमिति दर्शितम् । ते त्वया सीतया सहेति शेषः । अनया प्रेरिते कर्तव्ये चेत्यध्यर्थः ४९

रा० टी०—त्वचेति । प्रधानया मायामय्या त्वचोपलक्षित एष मृगोऽद्य न भविष्यति विनङ्क्ष्यतीत्यर्थः, अतो यावत्पृषतं हन्मि तावत् सीतया सीतारक्षणहेतुना अप्रमत्तेन त्वया भाव्यम् । सार्धश्लोक एकान्वयी ॥ ४९ ॥

गो० टी०—अप्रमत्तेनेति । सीतया हेतुभूतया आश्रमस्थेन ते त्वया अप्रमत्तेन भाव्यम् आश्रमस्थोऽप्रमत्तः सन् सीतारक्षणं कुर्वित्यर्थः । पृषतं मृगम् ॥ ४८ ॥ ४९ ॥

५०] ति० टी०—यावदिति । तावदप्रमत्तेन भाव्यमित्यन्वयः ॥ ५० ॥

रा० टी०—हत्वेति । हत्वा मृगं निहत्य चर्म तद्विषयकस्पृहामादाय छित्त्वा निवर्त्येत्यर्थः । अवखण्डनार्थकदो रूपम् शीघ्रमेष्यामि ॥ ५० ॥

५१] ति० टी०—प्रदक्षिणेन समर्थेन । सर्वतः सर्वदिग्वर्तिरक्षोऽरेभ्यः ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०—प्रदक्षिणेनेति । प्रदक्षिणेन सानुकूलेन जटायुषा सह मैथिलीं परिगृह्य प्रतिक्षणं शङ्कितः सन् अप्रमत्तो भव ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०—प्रदक्षिणेनेति । प्रदक्षिणेन अत्यन्तसमर्थेन

---

१ मामिति गो. रा. पाठः । २ अपि वेति गो. पाठः । ३ वैदेह्यामिति गो. पाठः । ४ गतस्पृहामिति गो. रा. पाठः । ५ चादायेति गो. पाठः । ६ परिगृह्येति गो. पाठः ।

चतुश्चत्वारिंशः सर्गः ।

मृगमनुधावन्धनुष्पाणी रामो मृगेण मायागत्या वञ्चितत्वात्प्राप्तकोपस्त जघान । म्रियमाणो मारीचो मायारूप परित्यज्य प्राप्तनिजरूप: हा सीते हा लक्ष्मणेत्युच्चैश्चुक्रोश । तदवधारयन्राम: सीतालक्ष्मणयोर्दुरवस्थासंभावनया प्राप्तविपाद: स्वाश्रममभिन्यवर्तत ।

तथा तु तं समुद्दिश्य भ्रातरं रघुनन्दनः । धारासिं महातेजाः जाम्बूनदमयत्सरुम् ॥ १ ॥
ततस्त्रिविनतं चापमादायात्मविभूषणम् । आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः ॥ २ ॥
तं वैन्यराजो राजेन्द्रमापतन्तं निरीक्ष्य वै । बभूवान्तर्हितस्त्रासात्पुनः संदर्शनेऽभवत् ॥ ३ ॥
बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः । तं स्म पश्यति रूपेण द्योतयन्तमिवाग्रतः ॥ ४ ॥
अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने । अतिवृत्तमिवोत्पाल्लोभयानं कदाचन ॥ ५ ॥
शङ्कितं तु समुद्भान्तमुत्पतन्तमिवाम्बरम् । दृश्यमानमदृश्यं च वनोद्देशेषु केषुचित् ॥ ६ ॥

जटायुषेति सहार्थे तृतीया "दृढो यूना—" इति ज्ञापकात् । मैथिलीं परिगृह्य स्ववशीकृत्य सर्वतः शङ्कित एव प्रतिक्षणमतिशङ्कयेवाप्रमत्तो भवेत्यन्वयः ॥ ५० ॥

अत्र पञ्चाशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

१] ति० टी०—त्सरुः खड्गयष्टिः ॥ १ ॥

रा० टी०—लक्ष्मणाज्ञापनानन्तरकालिकं रामवृत्तान्तमाह—तथेत्यादिभिः । तथा उक्तप्रकारेण भ्रातरं लक्ष्मणं समादिश्य आज्ञाप्य रघुनन्दनो रामः जाम्बूनदमयः त्सरुः मुष्टिर्यस्मिंस्तमसिं खड्गं दधार ॥ १ ॥

गो० टी०—अजानन्निव यो मायामृगं कार्यान्तरैकदृक् ।
अनुसृत्य जघानाशु तं लीलामानुषं भजे ॥

अथ मारीचवधः—तथा त्वित्यादिना । त्सरुः खड्गयष्टिः । 'त्सरुः खड्गादियष्टिः स्यात्' इत्यमरः ॥ १ ॥

२] ति० टी०—मध्ये स्थलत्रये विनतं त्रिविनतम् । आत्मविभूषणम् चापस्य वीरालंकारत्वात् । आत्मविभूषणमित्यनेनागस्त्यदत्तं वैष्णवमिति सूचितम् । कलापौ तूणीरौ॥ २॥

रा० टी०—तत इति । ततः खड्गधारणानन्तरं त्रिविनतं त्रिषु स्थलेषु विनतम् अवनतं किंच त्रयो ब्रह्मविष्णुमहेश्वराः विनताः नम्रीभूताः कृतप्रणामा इत्यर्थः यस्मै तम् आत्मविभूषणं चापमादाय द्वौ कलापौ तूणीरे आबध्य उद्ग्रविक्रमः महापराक्रमवान् रामो जगाम 'कलापो भूषणे बर्हे तूणीरे संहतेऽपि च' इत्यमरः ॥ २ ॥

गो० टी०—तत इति । व्यवनतं त्रिषु स्थलेष्ववनतं शार्ङ्गमित्यर्थः । आत्मविभूषणम् आत्मालंकारं कलापौ द्वौ द्वौ तूणीरौ 'कलापो भूषणे बर्हे तूणीरे संहतेऽपि च' इत्यमरः ॥ २ ॥

३] टी० ति०—वन्यराजो वन्यानां मृगाणां राजा विचित्रमृगत्वात् । पुनः संदर्शने दृष्टिविषये ॥ ३ ॥

रा० टी०—तमिति । आपतन्तं राजेन्द्र राजराजं तं रामं वन्यराजः वन्येषु मृगेषु राजते शोभते स मारीचः निरीक्ष्य त्रासात् रामभयात् अन्तर्हितो बभूव पुनः त्रासात् रावणभयात् संदर्शने अभवत् ॥ ३ ॥

गो० टी०—तमिति । वञ्चयानः वञ्चयमानः अनित्यो मृगागमः । संदर्शने दृष्टिविषये अभवत् स्थितः । बद्धेति । यतः यस्मिन् प्रदेशे मृगो वर्तते तत्र प्रदुद्राव ॥ ३ ॥

४] ति० टी०—रूपेण स्वरूपेणाग्रतो द्योतयन्तं द्योतमानमिव स्थितम् ॥ ४ ॥

रा० टी०—बद्धेति । बद्धासिर्गृहीतखड्गो रामः धनुरादाय यतः यत्र मृगस्तं देशं प्रदुद्राव अत एव रूपेण स्वस्वरूपकान्त्या अग्रतो द्योतयन्तमिव तं मृगं पश्यति स्म ॥ ४ ॥

गो० टी०—तमित्यादि । श्लोकत्रयमेकं वाक्यम् । रूपेण कान्त्या अग्रे द्योतमानमिव स्थितम् इषोः पातात् अतिवृत्तम् अतिक्रान्तं शङ्कितमिवेत्यन्वयः । धनुष्पाणिं दृष्ट्वा शङ्कितमिवेत्यनेन धनुष्पाणिदर्शनादन्यमृगाणामिवास्य शोको न भवतीतीवशब्दः प्रयुज्यते, यद्वा रामाद्भयं शङ्कमानं सत् उत्पतन्तमिव स्थितं वस्तुतस्तत्राप्यदर्शनादिति भावः । लोभयानं हस्तप्राप्तमिव दृश्यमानमित्यर्थः । दृश्यभीनामिति केषुचिद्दृश्यमानम् केषुचिददृश्यम् अत एव छिन्नाभ्रैः संवीतं व्याप्तं चन्द्रमण्डलमिव स्थितं शारदमिति मेघशकलसंभावनार्थमुक्तम् ॥ ४ ॥ ६ ॥

५] ति० टी०—अतिवृत्तमतिक्रान्तम् । कदाचन लोभयानं हस्तप्राप्तमिव दृश्यमानम् ॥ ५ ॥

रा० टी०—अवेक्ष्येति । इषोः बाणस्य पातात् पातशङ्कातः अतिवृत्तं भीतमित्यर्थः, अत एव धावन्तं कदाचन रावणवचनस्मरणकाले लोभयानं हस्तग्रहणयोग्यतया दृश्यमानं मृगम् अवेक्ष्यावेक्ष्यास्तेति शेषः ॥ ५ ॥

६] ति० टी०—शङ्कितम् इषुपातादिति शेषः । वनोद्देशेषु क्वचिदृश्यमानं क्वचिददृश्यमानम् ॥ ६ ॥

रा० टी०—शङ्कितमिति । शङ्कितं रामबाणपातसंभावन-

---

१ समादिश्येति गो. पाठः । २ बबन्धेति गो. पाठः । ३ ततस्त्र्यवनतमिति गो. पाठः । ४ वञ्चयान इति गो. पाठः । ५ द्योतमानमिति गो. पाठः । ६ पाणिमिति गो. पाठः । ७ इषोः पातादिति गो. रा. पाठः । ८ अम्बरे इति गो. पाठः ।

छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् । मुहूर्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥ ७ ॥
दर्शनादर्शनेनैव सोऽपाकर्षत राघवम् । स दूरमाश्रमस्यास्य मारीचो मृगतां गतः ॥ ८ ॥
आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः । अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले ॥ ९ ॥
स तमुन्मादयामास मृगरूपो निशाचरः । मृगैः परिवृतोऽन्यैर्दूरात्प्रत्यदृश्यत ॥ १० ॥
ग्रहीतुकामं दृष्ट्वा तं पुनरेवाभ्यधावत । तत्क्षणादेव संत्रासात्पुनरन्तर्हितोऽभवत् ॥ ११ ॥
पुनरेव ततो दूरादृक्षखण्डाद्विनिःसृतः । दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ॥ १२ ॥
भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः । सूर्यरश्मिप्रतीकाशं ज्वलन्तमरिमर्दनम् ॥ १३ ॥
संधाय सुदृढं चापे विकृष्य बलवद्बली । तमेव मृगमुद्दिश्य ज्वलन्तमिव पन्नगम् ॥ १४ ॥
मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितम् । स तं भृशं मृगरूपस्य विनिर्भिद्य शरोत्तमः ॥ १५ ॥
मारीचस्यैव हृदयं विभेदाशनिसंनिभः । तालमात्रमथोत्प्लुत्य न्यपतत्स मृगातुरः ॥ १६ ॥
व्यनदद्भैरवं नादं धरण्यामल्पजीवितः । म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम् ॥ १७ ॥

या प्राप्तशङ्कम् अत एव समुद्भ्रान्तं भीतम् अत एव अम्बरमाकाशमुत्पतन्तमुलङ्घयन्तमिव केषुचित् वनोद्देशेषु दृश्यमानं केषुचिददृश्यं च अत एव छिन्नाभ्रैः अभ्रखण्डैः संवीतमाच्छन्नं चन्द्रमण्डलमिव मुहूर्तादेव निकटे मुहुर्दूरे मुहूर्तादूरात्प्रकाशते॥६॥७॥

७] ति० टी०–छिन्नाभ्रसंवीतचन्द्रसादृश्योपपादकमुक्तार्धम् ॥ ७ ॥

गो० टी०–मुहूर्तादिति । समीपे मुहूर्तात् मुहूर्तं ददृशे दूरात् दूरं मुहुः प्रकाशते अतः एवम् उक्तरीत्या दर्शनादर्शनात् दर्शनादर्शनाभ्यां सुदूरमपाकर्षत आकृष्टवान् ॥ ७ ॥ ८ ॥

८] ति० टी०–दर्शनादर्शनेनेति द्वन्द्वैकवद्भावः । स मृगतां गतो मारीचः अस्याश्रमस्य दूरं गत इत्यर्थः ॥ ८ ॥

रा० टी०–दर्शनेति । मृगतां मृगत्वं गतः प्राप्तः स मारीचः दर्शनादर्शनेनैव अस्य रामसंबन्धिनः आश्रमस्य सदूरं दूरत्वविशिष्टं यथा भवति तथा राघवं राममपाकर्षत ॥ ८ ॥

९] ति० टी०–तेन दर्शनादर्शनेन विलोभ्य मोहयता मारीचेन मोहितो वञ्चितो विवशस्त्वग्लोभपरवश इव सुतरां छायामाश्रित्यावतस्थे ॥ ९ ॥

रा० टी०–आसीदिति । अविवशः क्रोधादिवशभिन्नः तेन मोहितः शब्दोच्चारणमात्रेणैव हितकारी काकुत्स्थो रामः तेन कुद्धः कुद्धत्वेन प्रतीयमान आसीत्। अथ अतः सुश्रान्तः दूरदेशमागमनेन सुश्रान्तत्वेन प्रतीयमानो रामः शाद्वले घासविशिष्टदेशे छायाम् आश्रित्य अवतस्थे ॥ ९ ॥

गो० टी०–आसीदिति । विवशः कुतूहलपरवशः मोहितः वञ्चितः ॥ ९ ॥

१०–१२] ति० टी०–उन्मादयामास बहुदूरधावनेन चित्तविभ्रमं चकार ॥ १०–१२ ॥

रा० टी०–स इति । अन्यैः मृगैः परिवृतः मृगरूपः स निशाचरः अदूरात् प्रत्यदृश्यत अत एव तं राममुन्मादयामास धान्यनुकूलव्यापारं चकार ॥ १० ॥

रा० टी०–ग्रहीतुमिति । ग्रहीतुकामं तं रामं दृष्ट्वा अभ्यधावत संत्रासात् ग्रहणभयात् क्षणादेव पुनरन्तर्हितोऽभवत् ॥११॥

गो० टी०–स इति । उन्मादयामासेति उन्मादश्चित्तविभ्रमः बहुदूराकर्षणेन चित्तमोहं चकारेत्यर्थः ॥ १० ॥ ११ ॥

रा० टी०–पुनरिति । ततः तस्मात् स्थानात् दूरात् दूरे विद्यमानात् ऋक्षखण्डात्पुनर्विनिःसृतं मृगं दृष्ट्वा हन्तुं कृतनिश्चयो राघवो रामः सूर्यरश्मिप्रतीकाशं ज्वलन्तं पन्नगमिव ज्वलन्तं ब्रह्मविनिर्मितं ब्रह्मणा सृष्टमस्त्रं शरमुद्धृत्य दृढे चापे संधाय विकृष्य च ज्वलितं तमेव मृगमुद्दिश्य मुमोच, अत एव शरोत्तमः दीप्तं मृगरूपस्य मारीचस्य शरीरं विनिर्भिद्य हृदयं विभेद । सार्धश्लोकचतुष्टयमेकान्वयि ॥ १२–१५ ॥

गो० टी०–पुनरेवेति । भूयः अत्यर्थं कुपितोऽभूत्॥ १२ ॥

१३–१४] ति० टी०–भूयः कुपित इत्यन्वयः॥१३॥१४॥

गो० टी०–सूर्येत्यादिश्लोकद्वयमेकं वाक्यम् ॥ १३ ॥१४॥

१५] ति० टी०–ब्रह्मविनिर्मितमस्त्रं ब्रह्मास्त्रं ब्रह्मदत्तबाणं च। मृगरूपसदृशरूपस्य मायाकृतरूपे यक्षवत्प्रविश्य स्थितस्य ॥१५॥

गो० टी०–शरीरमिति । प्रथमं मृगरूपस्य शरीरं विनिर्भिद्य ततः मारीचस्य हृदयं तदन्तर्वर्तिस्वशरीरं विभेद॥१५॥

१६–१७] ति० टी०–मारीचस्यैव हृदयम्, न तु तत्कृतमायामृगाकारमात्रस्य । तालमात्रमुत्प्लुत्य । शरवेगकृतवेधादिति शेषः ॥ १६ ॥ १७ ॥

रा० टी०–तालेति । अथ बाणकर्तृकभेदानन्तरं तालमात्रमुत्प्लुत्य न्यपतत् ॥ १६ ॥

---

१ दर्शनादर्शनादेवमिति गो. पाठः । २ सुदूरमिति गो. पाठः । ३ संभ्रान्त इति गो. पाठः । ४ वन्यैरिति गो. पाठः । ५ दृष्ट्वैनमिति गो. पाठः । ६ षण्ड्राद्विनिःसृतमिति गो. पाठः । ७ अरिमर्दन इति गो. पाठः । ८ सुदृढे इति गो. स दृढे इति रा. पाठः । ९ श्वसन्तमिति गो.पाठः । १० शरीरमिति गो. पाठः । ११ शरातुर इति गो. पाठः । १२ विनदन्निति गो. पाठः । १३ एतदादिचरणद्वयं गो. नास्ति ।

स्मृत्वा तद्वचनं रक्षो दध्यौ केन तु लक्ष्मणम् । इह प्रस्थापयेत्सीता नां शून्ये रावणो हरेत् ॥ १८ ॥
स प्राप्तकालमाज्ञाय चकार च ततः स्वनम् । सदृशं राघवस्येव हा सीते लक्ष्मणेति च ॥ १९ ॥
तेन मर्मणि निर्विद्धं शरेणानुपमेन हि । मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमास्थितः ॥ २० ॥
चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् । [ततो विचित्रकेयूरः सर्वाभरणभूषितः ।
हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥] तं दृष्ट्वा पतितं भूमौ राक्षसं भीमदर्शनम् ॥ २१ ॥
रामो रुधिरसिक्ताङ्गं चेष्टमानं महीतले । जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ २२ ॥
मारीचस्य तु मायैषा पूर्वोक्ता लक्ष्मणेन तु । तत्तथा ह्यभवच्चाद्य मारीचोऽयं मया हतः ॥ २३ ॥
हा सीते लक्ष्मणेत्येवमाक्रुश्य तु महास्वनम् । ममार राक्षसः सोऽयं श्रुत्वा सीता कथं भवेत् ॥ २४ ॥
लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति । इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ २५ ॥
तत्र रामं भयं तीव्रमाविवेश विषादजम् । राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वनम् ॥ २६ ॥

गो० टी०–तालमात्रमिति । तालमात्रं तालप्रमाणम् । "प्रमाणे द्वयसच्" इत्यादिना प्रमाणे मात्रच् ॥ १६ ॥

रा० टी०–व्यनदादिति । अल्पजीवितः अत एव म्रियमाणो मारीचः भैरवं नादं धरण्यां व्यनदत् कृत्रिमां तनुं जहौ च ॥ १७ ॥

गो० टी०–म्रियमाण इति । सीता केनोपायेन लक्ष्मणमिह प्रस्थापयेत् केनोपायेन रावणस्तां हरेदिति दध्यौ चिन्तयामास ॥ १७ ॥

१८] ति० टी०–तद्वचनं रावणवचनम् । दध्यौ ध्यानं कृतवान् । केन मत्कृतेनोपायेन सीता लक्ष्मणं प्रस्थापयेत्तां च शून्ये रावणो हरेदिति दध्यौ ॥ १८ ॥

रा० टी०–स्मृत्वेति । रक्षो मारीचः तत् रावणोक्तं वचनं स्मृत्वा केन कीदृशानुकृतशब्देन सीता लक्ष्मणमिह प्रस्थापयेत् तां सीतां शून्ये रावणो हरेत् इति दध्यौ चिन्तनपूर्वकनिश्चयं चकार ॥ १८ ॥

१९] ति०टी०–प्राप्तकालमाज्ञाय रावणोक्तमुपायमेव युक्तं मत्वा ॥ १९ ॥

रा० टी०–स इति । स मारीचः प्राप्तकालमाज्ञाय ज्ञात्वा हा सीते हा लक्ष्मणेति च राघवस्य सदृशमेव स्वनं चकार ॥ १९ ॥

गो० टी०–स इति । प्राप्तकालं कालप्राप्तं कालोचितमर्थम् आज्ञाय निश्चित्य ॥ १८–२२ ॥

२०] ति० टी०–मर्मणि प्राणस्थाने । राक्षस इदं राक्षसरूपमास्थितः । पूर्वोक्तं शब्दं चक्र इत्यन्वयः ॥ २० ॥

रा० टी०–तेनेति । अनुपमेन शरेण तेन रामेण मर्मणि निर्विद्धमत एव मृगरूपं त्यक्त्वा राक्षसं रूपमास्थितो मारीचः जीवितं त्यजन् सन् सुमहाकायं चक्रे । सार्धश्लोक एकान्वयी २०

२१–२२] ति० टी०–सुमहाकायो महाशरीरम् ॥ २१ ॥ २२ ॥

रा० टी०–तमिति । भूमौ पतितं रुधिरसिक्ताङ्गं महीतले चेष्टमानं तं राक्षसं दृष्ट्वा लक्ष्मणस्य वचः स्मरन् सन् रामो मनसा सीतां जगाम । सार्धश्लोक एकान्वयी ॥ २१ ॥ २२ ॥

२३] ति०टी०–लक्ष्मणवच एवाह–मारीचस्य त्विति २३ ॥

रा० टी०–लक्ष्मणवच एवाह–मारीचस्येति । एषा मारीचस्य माया या लक्ष्मणेन पूर्वोक्ता तत्तथैव अभवत् । अत एव मया मारीचो हतः तदिति सामान्ये नपुंसकम् ॥ २३ ॥

गो० टी०–मारीचस्यैवेति । मायैषेत्यत्र इतिकरणं चौध्यम् ॥ २३ ॥

२४] ति० टी०–सीता कथं भवेत् । किमधैर्यं नाटयित्वा लक्ष्मणं प्रेषयेदुत धीरा भवेदित्यर्थः ॥ २४ ॥

२५] ति० टी०–कामवस्थाम अधैर्यादिति शेषः । हृष्टतनूरुहत्वासादिव रोमाञ्चिततनुः । वस्तुत एतन्मूलेन सर्वकार्यनिष्पत्तिरिति हर्षाद्रोमाञ्चिततनुः ॥ २५ ॥

रा० टी०–हेति । हा सीते इत्यादिमहास्वनमाकुश्य सोऽयं राक्षसो ममार । श्रुत्वा मारीचोक्तमिति शेषः, सीता महाबाहुर्लक्ष्मणश्च कथं भवेत् तिष्ठेत् कामवस्थां च गमिष्यति इति संचिन्त्य धर्मात्मा रामः हृष्टतनूरुहः स्नेहात्पुलकितगात्रोऽभवदिति शेषः । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–हा सीत इत्यादि । हृष्टतनूरुहः भयात्पुलकितः अभूदिति शेषः ॥ २४ ॥ २५ ॥

२६] ति० टी०–तत्र नटवद्भगवान्मनुष्यरूपत्वाद्भयशोकादिमत्त्वं नाटयतीति कविरपि सर्वलोकवेषं तथैवाह–तत्र रामं भयमिति । तात्त्विकमर्थं तु हृष्टतनूरुह इति हृष्टपदेन प्रागेव ध्वनितवान् ॥ २६ ॥

रा० टी०–तत्रेति । मृगरूपं राक्षसं हत्वा तत्स्वनं च श्रुत्वा वियमानं रामं विषादजं सीतावियोगजनितं तीव्रं भयमाविवेश ॥ २६ ॥

गो० टी०–तत्रेति । विषादजं विषादोत्थं विषादो भविष्यतीत्युत्पन्नम् ॥ २६ ॥

१ स्वरमिति गो० पाठः । २ एवेति गो० पाठः । ३ निर्विद्ध इति गो० पाठः । ४ चेति गो० पाठः । ५ आत्मन इति गो० पाठः । ६ कायमिति रा० पाठः । ७ एतदाद्यर्धद्वयमधिकम् गो० पाठे । ८ घोरदर्शनमिति गो० पाठः । ९ वेष्टमानमिति गो० पाठः । १० एवेति गो० पाठः । ११ पूर्वोक्तमिति गो० पाठः । १२ चेति गो० पाठः ।

निहत्य पृषतं चान्यं मांसमादाय राघवः । त्वरमाणो जनस्थानं ससाराभिमुखं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ।

रामस्वरमनुकुर्वतो मारीचस्य हा सीते लक्ष्मणेत्येवमाक्रोशं श्रुत्वा वञ्चिता सीता रामविपदमाशङ्कमाना तद्रक्षणाय लक्ष्मणं प्रेषयति । नाथ राघवाक्रोशो राक्षसमायेयं मा बिभीहीति वदन्तं लक्ष्मणं सीता दुःश्रवं श्रावयति तेनाविद्धो लक्ष्मणः सीतां प्रणम्य शब्दमनुलक्षीकृत्य प्रतस्थे ।

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने । उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम् ॥ १ ॥
नहि मे जीवितं स्थाने हृदयं वावतिष्ठते[1] । क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥ २ ॥
आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि । तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम् ॥ ३ ॥
रक्षसां वशमापन्नं सिंहानामिव गोवृषम् । न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ॥ ४ ॥

गो० टी०–राक्षसमित्यादि । हत्वा मरणानुकूलव्यापारं कृत्वा ततस्तदुक्तं स्वरं श्रुत्वा त्वरमाणो रामः जनस्थानं जनस्थानस्थस्वाश्रमसुदिश्याभिमुखः सन् ससार ययौ ॥ २७ ॥

अत्र सार्धसप्तविंशतिश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

२७] ति० टी०–पृषतं मृगम् । जनस्थानमभिमुखं जनस्थानवर्तिनिजाश्रमाभिमुखम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रा० टी०–निहत्येति । अन्यं लोकविलक्षणं मृगं मारीचं हत्वा मांसं तापसोपभोग्यफलादिकमादाय त्वरमाणः सन् अभिमुखं जनस्थानं ससार जगाम ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

१] ति० टी०–अथ सीता रामविपद्यशोकनाटनेन लक्ष्मणमुद्वासयति—आर्तेति । भर्तुः स्वरेण सदृशं स्वरम् भर्तुः स्वर इत्येव ज्ञात्वेत्यर्थः ॥ १ ॥

रा० टी०–मारीचवधानन्तरकालिकं रामवृत्तान्तमुक्त्वा सीतावृत्तान्तमाह–आर्तेत्यादिभिः । भर्तुर्भर्तृस्वरस्य सदृशं तमार्तस्वरं विज्ञाय त्वं गच्छ राघवं जानीहि क्वास्तीति बुध्यस्व इति सीता लक्ष्मणमुवाच । भर्तुः सदृशमित्युक्त्या नेदं रामवचः इति सीतया ज्ञातमिति सूचितम्, जानीहीत्युक्त्या केन कथमेवं शब्दः कृत इति तद्विषयिणी जिज्ञासा सूचिता ॥ १ ॥

गो० टी०–अस्थाने भयशङ्किन्या जानक्यापि सुहृज्जनम् ।
धिक्कृत्य चिन्तितं रामं नित्यापूर्वमहं भजे ॥

आर्तस्वरं त्वित्यादि । भर्तुः भर्तुः स्वरस्य ॥ १ ॥

२–३] ति० टी०–क्रोशतो रामस्य ॥ २ ॥ ३ ॥

रा० टी०–सीतावचनान्तराण्याह–न हीति । क्रोशतः मां त्वां च आह्वयतः परमार्तस्य कस्यचिच्छब्दो मया भृशं श्रुतः अतः मे जीवितं प्राणाः हृदयं मनश्च स्थाने स्वस्वदेशे नैवावतिष्ठते एतेन सीतायाः दयालुतातिशयः सूचितः ॥ २ ॥

रा० टी०–आक्रन्दमानमिति । शरणैषिणं स्वरक्षाकामं सिंहानां गोवृषमिव रक्षसां वशमापन्नम् अत एव आक्रन्दमानं तं जनं भ्रातरं च क्षिप्रं त्वं त्रातुमर्हसि अतः भ्रातरम् भ्रातरमभिधावेत्युक्त्या तदद्यमत्स्यैवं आक्रन्दमानजनस्य रक्षा कर्तव्येति सूचितम् रक्षसां वशमापन्नमित्यनेन रावणप्रेरणयैव मारीचोऽत्रागत इति सूचितम् तेन तस्यात्रागमने स्वातन्त्र्याभावो व्यञ्जितः, रामं त्रातुमर्हसीत्युक्त्या दूरगमनेन तद्विषयः संशय उत्पन्न इति व्यञ्जितं तेन तत्र स्नेहातिशयो ध्वनितः सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०–न हीति । हृदयं मनः जीवितं प्राणः वाशब्दः सम्भवे स्थाने स्वस्थाने मोहो जायत इति भावः । शरणैषिणं रक्षकार्थिनं गोवृषमिति सामान्यविशेषयोः प्रयोगः करिकलभवत् । इति सीता लक्ष्मणमुवाचेति संबन्धः ॥ २ ॥ ३ ॥

४] ति० टी०–आज्ञाय शासनम् । 'अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया' इत्युक्तमनुचिन्त्येत्यर्थः ॥ ४ ॥

रा० टी०–नेति । भ्रातुः शासनमाज्ञाय तथोक्तो लक्ष्मणस्तु न जगाम ॥ ४ ॥

गो० टी०–न जगामेति । शासनम् अप्रमत्तेन ते भाव्यमित्याद्युक्तम् ॥ ४ ॥

१ मुख इति गो. पाठः । २ अवतिष्ठतीति गो. पाठः ।

तमुवाच ततस्तत्र क्षुभिता जनकात्मजा । सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ॥ ५ ॥
यस्त्वमस्यामवस्थायां भ्रातरं नाभिपद्यसे । इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते ॥ ६ ॥
लोभात्तु मत्कृते नूनं नानुगच्छसि राघवम् । व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ॥ ७ ॥
तेन तिष्ठसि विस्रब्धं तमपश्यन्महाद्युतिम् । किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ॥ ८ ॥
कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः । एवं ब्रुवाणां वैदेहीं वाष्पशोकसमन्विताम् ॥ ९ ॥
अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूमिव । पन्नगासुरगन्धर्वदेवदानवराक्षसैः ॥ १० ॥
अशक्यस्तव वैदेहि भर्ता जेतुं न संशयः । देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु ॥ ११ ॥
राक्षसेषु पिशाचेषु किंनरेषु मृगेषु च । दानवेषु च घोरेषु न स विद्येत शोभने ॥ १२ ॥

५] ति० टी०—क्षुभिता क्षुभितेव । शत्रुवच्छत्रुयोग्यवृत्तः ॥ ५ ॥

रा० टी०—तमिति । ततः लक्ष्मणगमनाभावाद्धेतोः क्षुभिता जनकात्मजा तं लक्ष्मणमुवाच लक्ष्मणप्रेषणहेतुकतद्भयोत्पादकवचनमुच्चारयामास । अर्धं पृथक् । तद्वचनाकारमाह—हे सौमित्रे ! यत् यस्मात् हेतोः अस्यां सहायरहितायाम् अवस्थायां भ्रातरं त्वं नाभिपत्स्यसे अतः मित्ररूपेण भ्रातुः शत्रुवदसि । अर्धद्वयमेकान्वयि । यद्वा इदमप्यर्धं पृथक्—तथाहि भ्रातुः मित्ररूपेण हेतुना त्वमपि शत्रुवद्रामशत्रुत्वापन्नराक्षससशत्रुतुल्योऽसि शत्रुभिन्नेऽपि शत्रुत्वबुद्धेर्लोके प्रसिद्धत्वादिति तात्पर्यम्, एतेन यदि रामसमीपे त्वं न गमिष्यसि तर्हि एकाकिनं त्वामवलोक्य तच्छत्रव इहाप्यापतिष्यन्तीति व्यञ्जितं तेन एकत्रैव द्वाभ्यां स्थातव्यमिति ध्वनितम् ॥ ५ ॥

गो० टी०—सौमित्र इति । मित्ररूपेणोपलक्षितः रूपेण मित्रसदृशः क्रियया शत्रुतुल्योऽसीत्यर्थः । शात्रवक्रियां दर्शयति—यस्त्वमिति ॥ ५ ॥

६–७] ति० टी०—तदेवाह—यस्त्वमिति । नाभिपद्यसे न प्राप्तो भवसि । मत्कृते मत्परिग्रहार्थम् ॥ ६ ॥ ७ ॥

रा० टी०—यदिति । यत् यस्मात् हेतोः विनशी रिपुसदृशः त्वम् अस्यां सहायरहितायामवस्थायां भ्रातरं रामं नाभिपत्स्यसे तस्मात् हेतोः हे लक्ष्मण ! मत्कृते मद्रक्षार्थम् अन्तं स्वविनाशमिच्छसीत्यनुमीयते इति शेषः, एतेन अस्मिन् समये रामसमीपगमनमन्तरा ते महत्पापकीर्तिर्भवितेति व्यञ्जितम् ॥ ६ ॥

रा० टी०—लोभादिति । मत्कृते मद्रक्षार्थं यो लोभः मयि गते इमां को रक्षिष्यतीति वैचित्यं तस्मात् हेतोः राघवं नानुगच्छसि चेत् तर्हि ते अप्रियं व्यसनमपवादरूपदुःखं, भ्रातरि ते स्नेहो नास्तीति चाहं मन्ये ॥ ७ ॥

गो० टी०—इच्छसीति । इच्छायां हेतुमाह—मत्कृत इति मत्परिग्रहार्थमित्यर्थः । दार्ढ्याय पुनराह—लोभादिति । लोभो मद्भामेच्छा ॥ ६ ॥ ७ ॥

८–९] ति० टी०—विस्रब्धं विश्वस्तं यथा तथा । 'विश्रब्धः' इति पाठान्तरम् । त्वद्रक्षणं विहाय कथं गच्छामीत्यत्राह—किं हीति । यो रामः प्रधानं यस्य स यत्प्रधानस्त्वमिहागतस्तस्मिन्रामे संशयमापन्ने सति मया तिष्ठन्त्या त्वद्रक्षणेन जीवन्त्या किं कर्तव्यं भवेत् तदभावे मरणमेव श्रेयः, तयेन केनापि भवतु रक्षसा वान्येन जन्तुना वा स्वतो वह्निप्रवेशादिना वेति भावः । अत्रायं ध्वनिः—राक्षससंहारप्रधानकार्यकरणायागतस्य तव त्वद्भ्रातुर्वा तस्मिन्कार्ये इह मदवस्थित्या संशयमापन्ने इह जीवन्त्या मया किं कार्यं भवत् । सर्वत्रोत्पत्तिस्थितिसंहारेषु तव भ्रातुरहमेव सहकारिणी प्रकृतश्च संहारोऽत्र मत्स्थित्या न निवर्तत इति ॥ ८ ॥ ९ ॥

रा० टी०—नन्वं त्वद्रक्षणार्थं स्थितवति मयि भ्रातृस्नेहाभाववियया बुद्धिः कथमित्यत आह—तेनेति । येन मद्रक्षणीयात्वेन हेतुना महाद्युतिं राममपश्यन् विस्रब्धं यथा भवति तथा त्वं तिष्ठसि तेन रक्षणीयात्वेनोपलक्षितया इह स्थित्या मया यत्प्रधानः यो राम एव प्रधानो यस्य स त्वमागतः तस्मिन् रामे संशयमापन्ने सति किं कर्तव्यं भवेत् न किमपीत्यर्थः । सार्धश्लोक एकान्वयी ॥ ८ ॥

रा० टी०—एवमिति । मृगवधूमिव त्रस्तामत एव बाष्पशोकसमन्वितां एवं ब्रुवाणां वैदेहीं लक्ष्मणोऽब्रवीत् । अर्धद्वयमेकान्वयी ॥ ९ ॥

गो० टी०—त्वद्रक्षणं विहाय कथं गमिष्यामीत्यत्राह—किं हीति । यो रामः प्रधानं यस्य सः यत्प्रधानः त्वमिहागतः तस्मिन् रामे संशयं प्राणसंशयमापन्ने सति इहाश्रमपदे तिष्ठन्त्या मया किं कार्यं न किमपीत्यर्थः ॥ ८–१२ ॥

१०–११] ति० टी०—एवं बोधिततत्त्वोऽपि मानुष्यनाटनेन लोकव्यवहारानुसारात्लक्ष्मणोऽवददित्याह—अब्रवीदिति ॥ १० ॥ ११ ॥

१२] ति० टी०—न स विद्येत नश्येदेवेत्यर्थः ॥ १२ ॥

रा० टी०—तद्वचनाकारमाह—पन्नगेति । हे वैदेहि ! तव भर्ता पन्नगादिभिर्जेतुमशक्यः न संशयः अत्र संदेहो न ॥ १० ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—देवीति । हे देवि ! वासवोपमं रामं समरे यः प्रतियुध्येत सः देवादिषु न विद्येत

१ कुपितेति गो. पाठः । २ यदिति रा. पाठः । ३ पत्स्यसे इति गो. रा. पाठः । ४ लोभान्ममेति गो. पाठः । ५ विस्रब्ध इति गो. पाठः । ६ परिप्लुतामिति गो. पाठः । ७ मानुषेति गो. पाठः ।

यो रामं प्रतियुध्येत समरे वासवोपमम् । अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि ॥ १३ ॥
न त्वामस्मिन्वने हातुमुत्सहे राघवं विना । अनिवार्यं बलं तस्य बलैर्बलवतामपि ॥ १४ ॥
त्रिभिर्लोकैः समुदितैः सेश्वरैः सामरैरपि । हृदयं निर्दृतं तेऽस्तु संतापस्त्यज्यतां तव ॥ १५ ॥
आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम् । न सु तस्य स्वरो व्यक्तं न काश्चिदपि दैवतः ॥ १६ ॥
गन्धर्वनगरप्रख्या माया तस्य च रक्षसः । न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना ॥ १७ ॥
रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे । कृतवैराश्च कल्याणि वयमेतैर्निशाचरैः ॥ १८ ॥
खरस्य निधने देवि जनस्थानवधं प्रति । राक्षसा विविधा वाचो व्याहरन्ति महावने ॥ १९ ॥

अतः रामः समरे अवध्यः अतः एवं वक्तुं त्वं नार्हसि । अर्धपञ्चकमेकान्वयि ॥ ११–१३ ॥

१३] ति० टी०–न स विषेतेत्युक्तम्, तत्र स कस्तत्राह—यो राममिति ॥ १३ ॥

गो० टी०–अवध्य इति । एवम् उक्तप्रकारं परुषभाषणं राघवं विना स्थितां त्वामित्यन्वयः ॥ १३ ॥

१४] ति० टी०–बलवतामिन्द्रादीनामपि बलैस्तस्य बलमनिवार्यमधृष्यम् ॥ १४ ॥

रा० टी०–नन्वतिबलवत्त्वेऽपि तत्साहाय्यार्थं त्वया गन्तव्यमित्यत आह–नेति । राघवं विना अस्मिन् वने हातुं त्यक्तुं त्वां नोत्सहे । अर्धं पृथक् । नन्वतिसाहाय्यसिद्धिः कथं भविष्यतीत्यत आह–अनिवार्यमिति । बलवतां सैन्यसंयुक्तानां बलैः सैन्यैः सम्युक्तैः एकीभूय कृतोद्योगैः सामरैः अमरसहितैः सेश्वरैर्ब्रह्मादित्रितयसहितैः त्रिभिर्लोकैश्च तस्य रामस्य बलम् अनिवार्यम् अतस्ते हृदयं निर्दृतं सानन्दमस्तु अतस्तव त्वया संतापस्त्यज्यताम् ॥ १४ ॥ १५ ॥

गो० टी०–अनिवार्यमिति । सम्युक्तैः सन्नाहवद्भिः सेश्वरैः सेन्द्रैः ॥ १४ ॥

१५] ति० टी०–तव त्वया ॥ १५ ॥

गो० टी०–हृदयमिति । निर्दृतं निर्दुःखम् ॥ १५ ॥

१६] ति० टी०–स स्वरो व्यक्तं स्पष्टं तस्य रामस्य न भवति । दैवतः अशरीरदेवतासंबन्धी काश्चित्स्वर इत्यपि नेत्यर्थः । तदापि शङ्का युक्ता न त्वेवमपीत्यर्थः ॥ १६ ॥

रा० टी०–आगमिष्यतीति । ते भर्ता शीघ्रमागमिष्यति तस्योच्चारयितुः स्वरः सः शरणार्थी न कश्चित् दैवतः रामं विजिगीषुरपि न व्यक्तं स्पष्टमेतदस्माह ॥ १६ ॥

गो० टी०–न चेति । तस्य रामस्य नायं स्वरः अपि तु केनचिदन्येन मायया विचित्रशक्त्या कृतः । वस्तुतस्तु मारीचस्यैवेयं मायेत्याह–गन्धर्वेति । तस्य रक्षसः मृगीभूतस्य रक्षसः सा स्वरः मायापेक्षया स्त्रीत्वम् । गन्धर्वनगरप्रख्या गन्धर्वनगरतुल्या माया । यद्वा सा मृगरूपं गन्धर्वनगरं नाम मेघादावारोपितं प्रासादवनादिकं तत्कदाचिद्दृश्यते तद्यथा व्यामोहजनकं तथा चित्रवस्तुरूपापरव्यामोहजनिका काचिच्छक्तिर्मायेति सा तस्य रक्षसः मारीचस्यास्ति यया मुह्यसीत्यर्थः । 'गन्धर्वनगरं प्रोक्तमिन्द्रजालं मनीषिभिः' इत्यप्याहुः ॥ १६ ॥

१७–१८] ति० टी०–किं तर्हि गन्धर्वनगरप्रख्या तद्वन्मिथ्या तस्य रक्षसो मायैव वञ्चनार्थं तत्कृतोऽयं स्वर इत्यर्थः । त्वं न्यासरूपतया मयि निक्षिप्तासि, अतस्त्वां त्यक्तुं नोत्सहे इत्युत्तरेणान्वयः ॥ १७ ॥ १८ ॥

रा० टी०–नन्वत किमेतदित्यत आह–गन्धर्वेति । तस्य मृगाकृतेः रक्षसः गन्धर्वनगरप्रख्या मिथ्यात्वेन गन्धर्वनगरसदृशी माया एतेन मदूमने न प्रयोजनमिति ध्वनितम् । अर्धं पृथक् । मम गमनयोग्यतापि नास्तीत्याह–न्यासेति । यतस्त्वं महात्मना रामेण मयि न्यस्ता मत्समीपे मद्रक्षात्वेन संस्थापिताऽतस्त्वं न्यासभूताऽसि अवश्यं रक्षणीयाऽसीत्यर्थः, अतः इह अस्मिन् समये त्वां त्यक्तुमहं नोत्सहे ॥ १७ ॥

गो० टी०–न्यासेति । न्यासभूताऽसि निक्षेपरूपाऽसि केन निक्षिप्तेत्यत आह–रामेण मयि न्यस्तेति ॥ १७ ॥

रा० टी०–नन्वत न्यासभूतात्वेऽपि भयाभावात् त्वद्गमने का क्षतिरित्यत आह–कृतेति । हे कल्याणि ! खरस्य निधने रामकर्तृकवधे सति एतैर्निशाचरैः जनस्थानवधं जनस्थानस्थोर्वरितराक्षसध्वंसं प्रति वयं कृतवैराः किंच जनस्थानवधं प्रति जनस्थानध्वंससमये खरस्य निधने सति निशाचरैः वयं कृतवैराः अत एव महावने हिंसाविहाराः राक्षसाः विविधा वाचो व्याहरन्ति अतश्चिन्तयितुं त्वदुक्तमदवलोकनेन रामे चिन्तामुत्पादयितुं नार्हति । अर्धचतुष्टयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०–कृतवैरा इति । खरस्य स्वामिनो निधनात् जनस्थाने वधो यः तं प्रति वयमेतैर्निशाचरैः कृतवैराः एते अस्माभ्यु वैरमाचरितवन्त इत्यर्थः ॥ १८ ॥

१९] ति० टी०–खरस्य निधने रामेण कृते सति जनस्थानवधं जनस्थानवर्तिस्वपरिकररक्षोवधं प्रतिलक्ष्य कृतवैर इत्यन्वयः । व्याहरन्त्यस्मद्वयामोहनार्थम्, अतस्त्वां त्यक्तुं नोत्सहे ॥ १९ ॥

१ समुद्युक्तैरिति गो. रा. पाठः । २ अयमिति गो. पाठः । ३ चेति गो. पाठः । ४ मायया केनचित्कृत इति गो. पाठः । ५ सा तस्येति गो. पाठः ६ वैदेहीति गो. पाठः । ७ निधनोद्देशे इति गो. पाठः । ८ विसृजन्तीति गो. पाठः ।

हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि । लक्ष्मणेनैवमुक्ता तु क्रुद्धा संरक्तलोचना ॥ २० ॥
अब्रवीत्परुषं वाक्यं लक्ष्मणं सत्यवादिनम् । अनार्यकरुणारम्भ नृशंस कुलपांसन ॥ २१ ॥
अहं तव प्रियं मन्ये रामस्य व्यसनं महत् । रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ॥ २२ ॥
नैवं चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत् । त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ २३ ॥
सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि । मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ २४ ॥
तन्न सिध्यति सौमित्रे तवापि भरतस्य वा । कथमिन्दीवरश्यामं रामं पद्मनिभेक्षणम् ॥ २५ ॥
उपसंश्रित्य भर्तारं कामयेयं पृथग्जनम् । समक्षं तव सौमित्रे प्राणांस्त्यक्ष्याम्यसंशयम्॥ २६ ॥
रामं विना क्षणमपि नैव जीवामि भूतले । इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम् ॥ २७ ॥
अब्रवील्लक्ष्मणः सीतां प्राञ्जलिः सं जितेन्द्रियः । उत्तरं नोत्सहे वक्तु दैवतं भवती मम ॥ २८ ॥

गो० टी०–किं तत इत्यत्राह–राक्षसा इति । वाचो विसृजन्ति अस्मन्मोहनार्थमिति शेषः ॥ १९ ॥ २० ॥

२०] ति० टी०–हिंसैव साधुजनपीडैव विहारो येषां ते तथा । इदं पूर्वान्वयि । अतस्त्वं रामस्य क्लेशं न चिन्तयितुमर्हसि ॥ २० ॥

रा० टी०–लक्ष्मणेनेति । एवं गमनाभावबोधकवाक्येन उक्ता अत एव कुद्धा स्वीकृतकोपा अत एव संरक्तलोचना सीता सत्यवादिनं लक्ष्मणं परुषं लक्ष्मणप्रेषणार्थं रूक्षं वाक्यमब्रवीत् ॥ २० ॥

२१] ति० टी०–अनार्यकरुणारम्भ, अनार्यया कुत्सितया करुणया रामव्यसनेऽपि मद्विषयारम्भो मद्रक्षणारम्भो यस्य तत्संबोधनम् ॥ २१ ॥

२२] ति० टी०–ते रामव्यसनप्रियत्वेन । अत्र रामव्यसनं रामस्य प्रतिज्ञातार्थस्य सर्वरक्षोवधरूपस्य हानिस्तत्प्रियत्वेनेति गूढं तात्पर्यम् । अत एषा मद्विषया करुणानार्या कुत्सिता । प्रधानकार्यविरोधित्वादिति बोध्यम् ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–अनार्येति । अनार्यकरुणारम्भ ! अनार्येषु क्षुद्रराक्षसेषु करुणाया आरम्भो यस्य तत्सदृशः तत्संबोधनम् अत एव नृशंसकुलपां राक्षससमूहपालकानां स नो रचयितेव तत्संबोधनम् । स न रामस्य महत् व्यसनं तव प्रियं त्वत्प्रीतिविषयीभूतं मन्ये तेन हेतुना रामस्य व्यसनं सहायाभावप्रयुक्तदुःखाभासं दृष्ट्वा ज्ञात्वा एतानि गमनाभावबोधकवचनानि प्रभाषसे आचारक्रिपा सदृशलाभः ॥२१॥२२॥

गो० टी०–अनार्येति । अनार्य दुःशील अकरुणारम्भ दयाप्रसक्तिरहित । तत्र युक्तिमाह–रामस्येति । तेन अनार्यत्वादिकारणेन रामस्य व्यसनं दृष्ट्वा एतानि पूर्वोक्तवचनानि प्रभाषसे ॥ २१ ॥ २२ ॥

२३] ति० टी०–अथ पुनर्नटवदाह–नैवेत्यादि । सपत्नेषु ज्ञातित्वात् ॥ २३ ॥

रा० टी०–नन्वतिप्रतापवतो रामस्य कथं व्यसनसंभावनेत्यत आह–नेति । त्वद्विधेषु अस्मद्धारणाभिन्नविविधधारणावत्सु अत एव नृशंसेषु क्रूरेषु अत एव नित्यं प्रच्छन्नचारिषु अदृश्येयाचरणविशिष्टेषु सपत्नेषु यत् पापं पापकर्म भवेत् तत् नैव चित्रम् एतेन राक्षसानां विश्वासो न कार्य इति ध्वनितम् । त्वच्छब्दोऽन्यपर्यायः ॥ २३ ॥

गो० टी०–नैतदिति । प्रच्छन्नचारिषु त्वद्विधेषु सपत्नेषु पापं भवेदिति यत् एतन्न चित्रं नृशंसत्वादिकमत्र हेतुत्वेनोपात्तम् ॥ २३ ॥

२४] ति० टी०–सुदुष्टः सुतरां दुष्टहृदयः ॥ २४ ॥

रा० टी०–सुदुष्ट इति । सुदुष्टः शोभनाः दुष्टाः यस्मात् स दुष्टध्वंसक इत्यर्थः । अत एव एकं राममेक एवानुगच्छसि अत एव हेतोः रामगमनकारणीभूतस्य मृगस्य भरतेन शोभानिरीक्षणरतिमता प्रयुक्तः अत्र संस्थापितस्त्वं यदि प्रतिच्छन्नः राक्षसभिया निलीनः न गच्छसीत्यर्थः, तर्हि हे सौमित्रे ! मम तव च भरतस्य मृगशोभानिरीक्षणरतस्य रामस्य च तत् इहागमनप्रयोजनं न सिध्यति रामस्य प्रयोजनं मुनिरिपुध्वंसः आवयोः प्रयोजनं तत्सेवा तयोः सिद्धिर्न स्यादित्यर्थः । एतेन रामादर्शनासहिष्णुत्वं सीतायाः व्यञ्जितम् एको वा यथार्थे, अपरो हेतौ । सार्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०–सुदुष्ट इति । प्रयुक्तः प्रेषितः ॥ २४ ॥

२५] ति० टी०–तन्न सिध्यति मत्परिग्रहरूपम् ॥ २५ ॥

२६–२८] ति० टी०–उपसंश्रित्योपयुज्य ॥ २६–२८ ॥

रा० टी०–नन्तु रक्षकरहितां त्वां विहाय गन्तुमशक्यतया मत्कर्तृकगमनस्यावश्यकतया च युगपत् द्वयोर्विरोधेन त्वामयोध्यां शीघ्रं प्रापय्य रामसन्निधावहं गमिष्यामीत्यत आह–कथमिति । इन्दीवरश्यामम् इन्दीवरश्यामतासदृशश्यामताविशिष्टं पद्मनिभेक्षणं पद्मनिभे ईक्षणे यस्य तं जनं साक्षात् ब्रह्मादिद्वारा च सर्वेषां जनयितारं भर्तारं रामम् उपसंश्रित्य

---

१ सेति गो. पाठः । २ अनार्याकरुणारम्भेति गो. पाठः । ३ एतदिति गो. पाठः । ४ तन्न वेति गो. पाठः । ५ पद्मपत्रनिभेक्षणमिति गो. पाठः । ६ त्वय्ये न संशय इति गो. पाठः । ७ नहीति गो. पाठः । ८ विजितेन्द्रिय इति गो. पाठः ।

वाक्यममतिरूपं तु न चित्रं स्त्रीषु मैथिलि। स्वभावस्त्वेष नारीणामेषु[1] लोकेषु दृश्यते ॥ २९ ॥
विमुक्तधर्माश्चपलास्तीक्ष्णा[2] भेदकराः[3] स्त्रियः। न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे ॥ ३० ॥
श्रोत्रयोरुभयोर्मध्ये[4] तप्तनाराचसंनिभम्। उपशृण्वन्तु[5] मे सर्वे साक्षिणो[6] हि वनेचराः ॥ ३१ ॥
न्यायवादी यथा वाक्यमुक्तोऽहं परुषं त्वया। धिक्त्वामद्य[7] विनश्यन्तीं यन्मामेवं विशङ्कसे[8]॥ ३२ ॥
स्त्रीत्वाद्दुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम्। गच्छामि यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने ३३ ॥

वने सहागत्य पृथक् तं विना कां सुखस्वरूपामप्ययोध्यां कथमयेयं रामं विहाय गन्तुं न समर्थेत्यर्थः, अतः हे सौमित्रे! तव समक्षं प्राणांस्त्यक्ष्यामि असंशयम् अत्र संशयो न। तत्र हेतुः—रामं विना भूतले क्वचिदपि स्थले क्षणमपि नैव जीवामि। अर्धचतुष्टयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०—तत्र सिध्यतीति। पृथग्जनं क्षुद्रपुरुषम् ॥ २५ ॥ २६ ॥

रा० टी०—इतीति। रोमहर्षणं परुषं वाक्यं सीतया इत्यनेन प्रकारेण उक्तः प्राञ्जलिर्जितेन्द्रियः सः लक्ष्मणः अब्रवीत्। तद्वचनाकारमाह—यतो भवती मम दैवतं देवता अतः उत्तरं भवद्वाक्यसदृशरूक्षवाक्यं वक्तुं नोत्सहे ॥ २७ ॥ २८॥

गो० टी०—इत्युक्तः पुरुषं वाक्यमिति। "अप्रधाने दुहादीनाम्" इति कर्मण्यप्रधाने द्वितीया। सीतापारुष्येण प्रतिपारुष्यादिराहित्यं सूचयति—विजितेन्द्रिय इति ॥ २७ ॥

गो० टी०—उत्तरमिति। अप्रतिरूपम् अत्यन्तानुचितं विमुक्तधर्माः परित्यक्तविनयादिधर्माः चपलाः चञ्चलचित्ताः तीक्ष्णाः क्रूरहृदयाः भेदकराः परस्परस्नेहकार्यविच्छेदकराः ॥ २८—३० ॥

२९] ति० टी०—अप्रतिरूपमत्यन्तानुचितम् ॥ २९ ॥

३०] ति० टी०—तीक्ष्णाः क्रूराः भेदकराः। 'कृञो हेतुः' इति टः। सुतभ्रातृपित्रादेरिति शेषः ॥ ३० ॥

रा० टी०—वाक्यमिति। हे मैथिलि! एषु प्राकृतेषु लोकेषु विद्यमानानां नारीणामेषः रूक्षवदनवान् स्वभावो दृश्यते अत एव स्त्रियः प्राकृतनार्यः विमुक्तधर्माः विमुक्तः त्यक्तो धर्मः पारतन्त्र्यं याभिस्ताः अत एव चपलाः अत एव तीक्ष्ण उग्रो यो भेदः तस्य कराः संपादिका भवन्तीति शेषः, अत एव स्त्रीषु प्राकृतनारीषु अप्रतिरूपम् असदृशं वाक्यं चित्रं न, एतेन प्राकृतविलक्षणायां भवत्यां भ्रातरि प्रीतिस्ते नास्तीत्यादिवाक्यमयुक्तमिति व्यञ्जितम्। अत एव हे वैदेहि! हे जनकात्मजे! उभयोः श्रोत्रयोः तप्तनाराचसंनिभम् ईदृशं भवदुक्तसदृशं वाक्यम् अन्योचारितवचनं न सहे भवत्या उक्तं तु सर्वं सहे इति तात्पर्यम् अत एव उत्तरं नोत्सहे वक्तुं दैवतं भवती ममेत्यनेन न विरोधः। सार्धश्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

३१] ति० टी०—वनेचराः देवा इति शेषः ॥ ३१ ॥

रा० टी०—उपेति। न्यायवादी त्वद्रक्षायां रामेण नियुक्तः त्वां विहाय न गमिष्यामीत्यायुचितवक्ताहं यथा येन प्रकारेण परुषं भ्रातरि तव स्नेहो नास्तीत्यादिरूक्षं त्वयोक्तः तथा साक्षिणः सन्तः सर्वे वनेचराः वनदेवाः उपशृण्वन्तु, एतेन रामसंनिधौ मदुक्तित्वदुक्त्योरुत्तमाधमत्वनिर्णयो भवितेति ध्वनितम्। एतेन लक्ष्मणस्य रामवचनविस्मृतिरिति ध्वनितम् ॥ ३१ ॥

गो० टी०—उपशृण्वन्त्विति। मे साक्षीभूताः वनेचरा न्यायवादी अहं त्वया अन्यायं परुषं यथा उक्तः उपशृण्वन्तु ॥ ३१ ॥

३२] ति० टी०—यत्परुषमित्यादुपशृण्वन्त्विति योजना यद्यस्मान्मामेवं वागगोचरदुर्भाववन्तं विशङ्कसे तत एव दोषादद्य विनश्यन्तीमासन्नविनाशां विपरीतमतिं त्वा त्वां धिगित्यर्थः। अत्र नञ्नर्थाशेच्छार्थः तेन राक्षसकुलस्य नाशेच्छावतीं त्वां धिक्। यतो यदर्थं मामेवं विशङ्कसे वदसि इति शेषम्। यद्वा विनश्यन्तीं शक्तितया प्रतिक्षणं परिणामरूपेण विनश्यन्तीं त्वां धिक्। यन्मां त्वदस्पृष्टं त्वदाक्रमणायोग्यमेवं विशङ्कसे। त्वदाक्रान्तेषु किलैवं संभावनेति ॥ ३२ ॥

रा० टी०—नन्वं प्रकृतलोकोक्तिवदाशङ्कामात्रमूलिकेयं ममोक्तिर्न तात्त्विकीति रामसमीपनिर्णयानर्हेत्यत आह—धिगिति। यत् यतः प्राकृतस्त्रयुक्तिहेतोः यन् प्राकृतस्त्रयुक्तिमाश्रित्येत्यर्थः मामेवं विशङ्कसे तां विनश्यन्तीं प्रतिक्षणं विध्वंसं प्राप्नुवतीं त्वां प्राकृतविलक्षणभिन्नां नारीं धिक् तदनुसारेण भवतीभिर्न वर्तितव्यमित्यर्थः ॥ ३२ ॥

गो० टी०—धिक्त्वामिति। उभसर्वतसोरित्यादिना धिग्योगे द्वितीया ॥ ३२—३५ ॥

३३] ति० टी०—पुनर्वैषम्यहेतुसारेणाह—स्त्रीत्वादिति। स्त्रीत्वाद्दुष्टस्वभावेन क्रौर्येण युता त्वं गुरुवाक्ये ज्येष्ठनियोगे स्थितं मामेवं ब्रूषे इति शेषः। अतो यत्र काकुत्स्थस्तत्र गच्छामि गमिष्ये ते स्वस्त्यस्तु। सर्वत इति शेषः ॥ ३३ ॥

रा० टी०—स्त्रीत्वादिति। गुरुवाक्यं रामनियोगे व्यवस्थितम् अत एव दुष्टस्वभावेन व्यवस्थितं मां स्त्रीत्वात् प्राकृतस्त्रीत्वमनुसृत्य यदुक्तं तदनुचितमिति शेषः। अर्धं पृथक्। विविधोक्त्या प्रार्थितायाः अपि गमननिष्ठतिबोधनाय [illegible] कर्त्या-

१ एवमिति गो. पाठः। २ तीक्ष्णभेदकरा इति रा. पाठः। ३ भेऽपेति गो. पाठः। ४ साक्षि भूता इति गो. पाठः। ५ न्यायमिति गो. पाठः। ६ प्रणश्य त्वमिति गो. पाठः। ७ स्त्रीत्वं दुष्टमिति गो. पाठः। ८ गमिष्यं इति गो. पाठः।

रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः । निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे ॥
अपि त्वां सह रामेण पश्येयं पुनरागतः ॥ ३४ ॥
लक्ष्मणेनैवमुक्ता तु रुदती जनकात्मजा । प्रत्युवाच ततो वाक्यं [2]तीव्रबाष्पपरिप्लुता ॥ ३५ ॥
गोदावरीं प्रवेक्ष्यामि हीनां रामेण लक्ष्मण । आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः॥ ३६ ॥
पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम् । न त्वहं राघवादन्यं [4]कदापि पुरुषं [5]स्पृशे ॥ ३७ ॥
इति लक्ष्मणमाश्रुत्य सीता [6]शोकसमन्विता । पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ ३८ ॥

गमनाभिप्रायमलक्ष्याह-गच्छामीति । यत्र काकुत्स्थो रामस्तत्र गच्छामि ते स्वस्त्यस्तु ॥ ३३ ॥

३४] ति० टी०-यानि घोराणि निमित्तानि मे प्रादुर्भवन्ति तत्स्वत्पीडां शङ्कमानोऽहं रामेण सह पुनरागतस्त्वां पश्येयम्। एतदपि संभवेदित्यर्थः ॥ ३४ ॥

रा० टी०-रक्षन्त्विति । घोराणि अनीक्षितसाधकत्वेन क्रूराणि यानि निमित्तानि दुःशकुनानि मे प्रादुर्भवन्ति तेभ्यः समग्रा वनदेवताः त्वां रक्षन्तु अत एव रामेण सहागतोऽहं त्वां पुनः पश्येयम् । सार्धश्लोक एकान्वयी ॥ ३४ ॥

३५] ति० टी०-किमनेन सामान्यपुरुषप्रसङ्गः शङ्क्य इति मन्यमाना स्वदार्ढ्यं प्रकाशयति—लक्ष्मणेनेति ॥ ३५ ॥

रा० टी०-लक्ष्मणेनेति । रुदन्ती रामदर्शनाभावहेतुकरोदनं कुर्वती अत एव तीव्रबाष्पपरिप्लुता लक्ष्मणेनैवमुक्ता जनकात्मजा वाक्यं प्रत्युवाच ॥ ३५ ॥

३६] ति० टी०-आबन्धिष्ये । रज्ज्वा कण्ठमिति शेषः । विषमे भृग्वादिविषमे स्थित्वा । ततः प्रपातेनेति शेषः ॥ ३६ ॥

रा० टी०-तद्वचनाकारमाह-गोदावरीमिति । हे लक्ष्मण! रामेण हीनां गोदावरीं प्रवेक्ष्यामि तद्द्वारा साकेतं गमिष्यामीत्यर्थः, आत्मनो देहमाबन्धिष्ये अथवा विषमे त्यक्ष्ये ॥ ३६ ॥

गो० टी०-गोदावरीमित्यादि । आबन्धिष्ये उद्बन्धनं करिष्यामि विषमे भृग्वादिविषमस्थले पातेनेति शेषः । स्पृशे स्पृशामि ॥ ३६ ॥ ३७ ॥

३७] ति० टी०-सर्वथा कर्तव्यमर्थमाह—प्रवेक्ष्यामि हुताशनम् । अत एवात्र वाशब्दाद्वह्निः । अनेन साक्षाद्रावणगृहं न गमिष्यामि, किं त्वहं स्वरूपेणाग्नौ स्थित्वा मायया तद्धस्तं गमिष्यामीति ध्वनितम् । तदुक्तं कूर्मपुराणे—'रामस्य शुभगां भार्यां रावणो राक्षसेश्वरः । सीतां विशालनयनां चकमे कालनोदितः ॥ गृहीत्वा मायया वेषं चरन्तीं विजने वने । समाहर्तुं मनश्चक्रे तापसः किल कामिनीम् ॥ विज्ञाय सा च तद्भावं स्थित्वा दाशरथे पतिम् । 'तद्भावं लङ्कायामेव हृदि कृतम् तापसो भूत्वा हरिष्यामीति भावमित्यर्थः। 'जगाम शरणं वह्निभावसंस्थं शुचिस्मिता ॥ प्रपद्ये पावकं देवं साक्षिणं विश्वतोमुखम् । आत्मानं दीप्तवपुषं सर्वभूतहृदि स्थितम् ॥' इत्याद्यष्टश्लोकानुक्त्वा 'इति वह्न्यष्टकं जप्त्वा रामपत्नी यशस्विनी । ध्यायन्ती मनसा तस्थौ रामसुन्मीलितेक्षणा । अथावसथ्याद्भगवान्हव्यवाहो महेश्वरः । आविरासीत्सुदीप्तात्मा तेजसा निर्दहन्निव ॥ सृष्ट्वा मायामयीं सीतां स रावणवधेच्छया । सीतामादाय रामेष्टां पावकोऽन्तरधीयत ॥ कृत्वा तु रावणवधं रामो लक्ष्मणसंयुतः । समादायाभवत्सीतां शङ्काकुलितमानसः ॥ सा प्रत्ययाय भूतानां सीता मायामयी पुनः । विवेश पावकं दीप्तं ददाह ज्वलनोऽपि ताम् ॥ दग्ध्वा मायामयीं सीतां भगवानग्निरर्चिषिः । रामायार्ह्यं यत्सीतां पावकोऽसौ सुरप्रियः ॥ एतत्पतित्रतानां वै माहात्म्यं कथितं मया । स्त्रीणां सर्वाघिशमनं प्रायश्चित्तमिदं स्मृतम् ॥' इत्युत्तरखण्डे चतुस्त्रिंशेऽध्याये अनेन स्त्रीणां जातिभ्रंशकरापदि अग्निप्रवेशो न दोषाय सर्वप्रायश्चित्तं चेति ध्वनितम् । कदाप्यन्यं पुरुषं न स्पृशे इत्यन्वयः । अत्र पत्यसांनिध्य इति शेषः । तेन विराधस्पर्शेऽपि न हानिः तदा पतिसंनिधानात् । किं च साक्षाद्भगवतीस्पर्शे रावणो विराधवत्तत्क्षणादेव म्रियेत, एवं च सर्वराक्षसवधो न स्यादिति मायासीतारचना। किं चास्य कार्यं हनुमत्पुच्छाग्निना लङ्कादाहः। अन्यथा रावणवधेन लोकपालाग्निना कथं तन्नगरदाहः स्यात् । एतच्छक्तिप्रवेशे न तु तत्कार्यसामर्थ्यं तस्येति मन्तव्यम् । किंचैवं प्रतिज्ञाय रावणस्पर्शे जगन्मातुः प्रतिज्ञाभङ्गः स्यात् ॥ ३७ ॥

रा० टी०-पिबामीति । हुताशनं वह्निमपुरुषपुरुषाभासं न स्पृशे एतेन देहपीडादिसत्त्वे रामदर्शनाभावजनितदुःखस्याल्पत्वं स्यादिति हेतुर्व्यक्तः॥ ३७ ॥

३८] ति० टी०-आश्रुत्य लक्ष्मणं प्रति प्रतिज्ञाय दुःखात्सकलकरणतापादिव । उदरं प्रजघानेत्यनेन सर्वरक्षोमरणं विना न मे उदरपूर्तिरिति सूचितम् । अन्यथा शोके वक्षआघातस्यैव स्त्रीषु प्रसिद्ध्या संगतिः स्यात् ॥ ३८ ॥

रा० टी०-इतीति । शोकसमन्विता सीता उदरं प्रजघान ॥ ३८ ॥

गो० टी०-इतीति । आकुश्य विनिन्द्य ॥ ३८ ॥

१ रक्षन्त्विति रा. पाठः । २ तीव्रमिति गो. पाठः । ३ विनेति गो. पाठः । ४ अहमिति गो. पाठः । ५ पदापीति गो. पाठः । ६ आकुश्येति गो. पाठः । ७ ऊरुरिति गो. पाठः । ८ अत्र नुमः संभवो नास्तीति भाति ।

तमार्तरूपां विमना रुदन्तीं सौमित्रिरालोक्य विशालनेत्राम् ।
आश्वासयामास न चैव भर्तुस्तं भ्रातरं किंचिदुवाच सीता ॥ ३९ ॥
ततस्तु सीतामभिवाद्य लक्ष्मणः कृताञ्जलिः किंचिदभिप्रणम्य ।
अवेक्षमाणो बहुशः स मैथिलीं जगाम रामस्य समीपमात्मवान् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।

लक्ष्मणगमनेन लब्धावकाशो धृतकाषायवासा रावणः सीतान्तिकं प्राप । सौन्दर्यं प्रशस्य वनागमनकारणं पृच्छन्तमेनमतिथिं मन्वाना सा पाद्यादिभिरभ्यर्चयति ।

तया परुषमुक्तस्तु कुपितो राघवानुजः । स विकाङ्क्षन्भृशं रामं प्रतस्थे न चिरादिव ॥ १ ॥
तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः । अभिचक्राम वैदेहीं परिव्राजकरूपधृक् ॥ २ ॥

३९] ति० टी०–विमनाः सौमित्रिस्तां रुदन्तीमार्तस्येव कृतरूपामालोक्य लोकानुसारत आश्वासयामास । सा च तं न किंचिदुवाच । आश्वासनव्याजेन गमनविलम्बं करोतीति कोपेनेति शेषः ॥ ३९ ॥

रा० टी०–तामिति । रुदन्तीं तां सीतां लक्ष्मणः आश्वासयामास सीता तु भर्तुर्भ्रातरं लक्ष्मणं किंचिन्नेवोवाच ॥ ३९ ॥

गो० टी०–तामिति । भर्तुर्भ्रातरं न किञ्चिदुवाचेति आश्वासनव्याजेन गमनविलम्बं करोतीति कोपेनेति शेषः॥३९॥

४०] ति० टी०–अभिवाद्य मनसेति शेषः । किंचिदभिप्रणम्येति कायिकः स उक्तः । अत्र किंचिदित्यनेन कोपः सूचितः । यद्यपि कोपेऽपि यथोचितव्यवहारत्यागो लक्ष्मणस्यानुचितस्तथापि प्रतिशोत्तरं तथैव स्वच्छायां संदर्श्य तस्या अग्निप्रवेशोद्यमेन छायाद्वारा किंचित्प्राञ्जलित्वं किंचिदेव नमनमित्यनेन सूचितम् । कथमेनां रामेण विना त्यक्ष्यामीति बहुशोऽवेक्षमाणोऽग्निं प्रविष्टा न वेति च वीक्षमाणः ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०–तत इति । ततः आश्वासनानन्तरम् अभिवाद्य अभिवादनोचितशब्दद्वयोच्चार्य अभिप्रणम्य प्रणामायाङ्गानि संनम्य बहुशो बहुवारं मैथिलीं किंचिदवेक्ष्यमाणः कृताञ्जलिरात्मवान् लक्ष्मणः रामस्य समीपमाजगाम ॥ ४० ॥

इति श्रीसद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

गो० टी०–ततस्त्विति । किंचिदिति कोपमिश्रत्वात् किंचित्प्रणामः । बहुशोऽन्वीक्षमाण इति कथमेनामेकाकिनीं त्यक्त्वा गमिष्यामीत्यनुशयेन बहुशोऽन्वीक्षणम् । आत्मवान् धैर्यवान् ॥ ४० ॥

अस्मिन् सर्गे सार्धचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

१] ति० टी०–न चिरादिव । शीघ्रमेवेत्यर्थः । विकाङ्क्षन्विशेषेण काङ्क्षमाणस्तत्सविधगमनमिच्छन्नित्यर्थः । काङ्क्षेः शङ्कायामपि । तेन रामं विरुद्धं शङ्कमानः शीघ्रमितोऽपसरणे कार्यनाशाद्रामोऽपि विरुद्धः स्यादिति शङ्कमानः शीघ्रं जगामेति व्याख्येयम् । अत एव व्यवहितपूर्वसर्गान्ते मारीचस्य तथाशब्दोत्तरं सीताविषयां महतीं चिन्तामुक्त्वा ततः पुनरपि मांसार्थमितरमृगवधप्रवृत्तिरुक्ता सा विलम्बायैव ॥ १ ॥

रा० टी०–लक्ष्मणवृत्तान्तमाह–तयेत्यादिभिः । तया सीतया परुषमुक्तः अत एव कुपितः राघवानुजः स लक्ष्मणः रामं रामदर्शनं भृशमत्यन्तं विकाङ्क्षन् इच्छन्सन् न चिरादिव शीघ्रमेव प्रतस्थे ॥ १ ॥

गो० टी०–अथ सीतायाः लक्ष्मणविषयपरुषभाषणफलं दर्शयत्येकादशभिः सर्गैः । रावणप्रलोभनमाह षट्चत्वारिंशे–तया परुषमित्यादि । विकाङ्क्षन् अनिच्छन्नेव रामनुद्दिश्य प्रतस्थे न चिरादिव अविलम्बितमेव इवशब्दो वाक्यालङ्कार इति वा, यद्वा न चिरादिव सीतात्यागासहिष्णुतया पादौ पश्चादाकर्षतः रामप्राप्तित्वरा तु पुरतः कर्षतीतीवशब्दस्य भावः ॥ १ ॥

२] ति० टी०–तदा लक्ष्मणस्यापगमेऽन्तरं रामलक्ष्मणयोरपसरणेनावकाशमासाद्य प्राप्य ॥ २ ॥

रा० टी०–तदेति । तदा लक्ष्मणगमनानन्तरकाले अन्तरं स्वगमनयोग्यावकाशमासाद्य प्राप्य आस्थितः सीतापहरण-

१ चेत्रि रा. पाठः । २ अन्वीक्षेति गो. पाठः । ३ चेति गो. पाठः । ४ धृतेति गो. पाठः ।

श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही । वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू ॥ ३ ॥
परिव्राजकरूपेण वैदेहीमन्ववर्तत । तामाससादातिबलो भ्रातृभ्यां रहितां वने ॥ ४ ॥
रहितां सूर्यचन्द्राभ्यां संध्यामिव महत्तमः । तामपश्यत्ततो बालां राजपुत्रीं यशस्विनीम् ॥ ५ ॥
रोहिणीं शशिना हीनां ग्रहवद्भृशदारुणः । तमुग्रं पापकर्माणं जनस्थानगता द्रुमाः ॥ ६ ॥
संदृश्य न प्रकम्पन्ते न प्रवाति च मारुतः । शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ॥ ७ ॥
स्तिमितं गन्तुमारेभे भयाद्गोदावरी नदी । रामस्य त्वन्तरं प्रेप्सुर्देशग्रीवस्तदन्तरे ॥ ८ ॥
उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः । अभव्यो भव्यरूपेण भर्तारमनुशोचतीम् ॥ ९ ॥

विषयक आग्रहवान् अत एव परिव्राजकरूपधृक् दशग्रीवो रावणः वैदेहीमभिचक्राम ॥ २ ॥

गो० टी०–तदिति । आस्थितः अवकाशं प्रतीक्षमाणः स्थितो दशग्रीवः तदेव अन्तरम् अवकाशम् आसाद्य वैदेहीम् अभिचक्राम आभिमुख्येनाजगाम परिव्राजको भिक्षुः तस्य रूपं लिङ्गं धारयतीति परिव्राजकरूपधृत् ॥ २ ॥

३–५] ति० टी०–शिखी उपानहीति व्रीह्यादित्वादिनिः । अनेन त्रिदण्डिसंन्यासिविशेषः सूचितः। तदुक्तं भारते—'रावणस्तु यतिर्भूत्वा मुण्डः कुण्डी त्रिदण्डधृक्' इति । तत्र मुण्ड इत्यनेन जटित्वव्यावृत्तिः । कुण्डं कमण्डलुः । यष्टिस्त्रिदण्डात्मिका । भ्रातृभ्यां पररपरभ्रातृभ्यां रामलक्ष्मणाभ्याम्॥३–५॥

रा० टी०–परिव्राजकचिह्नानि वर्णयन्नाह–श्लक्ष्णेति । श्लक्ष्णकाषायसंवीतः श्लक्ष्णः स्वच्छः काषायः कषायरक्तः पटः तेन संवीतः आच्छादितो रावणः शिखीत्यादिमान् स्थलद्वयेऽपि व्रीह्यादित्वादिनिः छत्रीत्यत्र संहिताया अविवक्षया यणभावः शुभे स्वच्छे यष्टिकमण्डलू वामेंऽसे अवसज्य संधार्य परिव्राजकरूपेण त्रिदण्डिसंन्यासरूपेण वैदेहीम् अन्ववर्तत तदपहरणविषयकविचारमकरोत् अत्र यष्टिशब्देन त्रिदण्डग्रहणं तस्यैव शिखयुचितत्वात् । सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०–परिव्राजकलिङ्गान्याह–श्लक्ष्णेति । शिखी अदन्तत्वाभावेऽपि व्रीह्यादित्वादिनिः । छत्रीत्यत्र वाक्यसंघेरनित्यत्वेन यणभावः । उपानहीत्यत्र इनिरार्षः यष्टिः त्रिदण्डं शिखीत्यनेन साहचर्यात् अत्र धर्मप्रधानजनककुलनन्दिन्याः सीतायाः विश्वासाय धृतत्वादित्थमेव यतिलिङ्गमिति दर्शितम् । तथाहाङ्गिराः–'यतेर्लिङ्गं प्रवक्ष्यामि येनासौ लक्ष्यते यतिः । ब्रह्मसूत्रं त्रिदण्डं च वस्त्रं जन्तुनिवारणम् ॥ शिक्यं पात्रं वृसी चैव कौपीनं कटिवेष्टनम् । तस्यैतद्विद्यते लिङ्गं स यतिर्नेतरो यतिः' इति परिव्राजकरूपेणेत्यनेन ब्रह्मसूत्रादिकमुक्तं समुपागमदिति प्रतिपाद्यार्थभेदात् पुनः पुनः क्रियापदप्रयोगः ॥ ३ ॥

रा० टी०–तामिति । अतिबलो रावणः भ्रातृभ्यां रामलक्ष्मणाभ्यां रहितां तां सीतां चन्द्रसूर्याभ्यां रहितां संध्यां महत्तम इव आससाद तदपहरणविषयकनिश्चयं चकार ॥ ४ ॥

गो० टी०–तामिति । भ्रातृभ्यां रामलक्ष्मणाभ्यां महत्तम इत्यभूतोपमा सन्ध्यायां महत्तमसोऽसंभवात् ॥ ४ ॥

रा० टी०–तामिति । ततः वैदेहीसमीपगमनानन्तरं बालां राजपुत्रीं जनकराजतनयां यशस्विनीं सीतां भृशदारुणो रावणः शशिना हीनां रोहिणीं ग्रहवत् केतुवत् अपश्यत् ॥ ५ ॥

गो० टी०–तामिति । ग्रहः अङ्गारकः शनैश्चरो वा स रोहिणीमिव भृशदारुणो रावणस्तामपश्यत् यथा रोहिण्याः क्रूरग्रहवीक्षणं लोकानर्थकरं तथा रावणस्य सीतावीक्षणमिति भावः ॥ ५ ॥

६] ति० टी०–ग्रहवत्केतुवत् तं संदृश्येत्यन्वयः ॥ ६ ॥

रा० टी०–तमिति । उग्रं क्रूरं तत्र हेतुः पापकर्माणं क्रूरकर्मणां कारकं तं रावणं संदृश्य जनस्थानगताः द्रुमाः न प्रकम्पन्ते तद्भिया न चलन्तीत्यर्थः, मारुतश्च न प्रवाति ॥ ६ ॥

गो० टी०–दारुणत्वं प्रकटयति–तमुग्रमिति ॥ ६ ॥

७] ति० टी०–शीघ्रस्रोता शीघ्रप्रवाहाऽपि नदी तं वीक्षन्तं वीक्षमाणं दृष्ट्वा तद्भयात्स्तिमितं मन्दं गन्तुमारेभे इत्यन्वयः॥७॥

रा० टी०–शीघ्रेति । शीघ्रस्रोताः झटिति प्रवाहविशिष्टा गोदावरीनदी वीक्षन्तं स्वामवलोकयन्तं तं रावणं दृष्ट्वा तद्भयात् स्तिमितं मन्दं यथा स्यात्तथा गन्तुमारेभे ॥ ७ ॥

गो० टी०–शीघ्रस्रोता इति । शीघ्रस्रोताः शीघ्रप्रवाहाः वीक्षन्तं वीक्षमाणं स्तिमितमिति क्रियाविशेषणम् ॥ ७ ॥

८] ति० टी०–अन्तरमपकारयोग्यं छिद्रम् । तदन्तरे उभयरहितदेशकाले ॥ ८ ॥

रा० टी०–रामस्येति । रामस्य अन्तरं विच्छेदं प्रेप्सुः अन्वेषणशीलः दशग्रीवो रावणः तदन्तरे रामविच्छेदकाले भिक्षुरूपेण वैदेहीम् उपतस्थे तदाश्रमसमीपं जगाम ॥ ८ ॥

गो० टी०–रामस्येति । रामस्यान्तरप्रेप्सुः विश्लेषान्वेषी तदन्तरे तस्मिन्नवकाशे प्रथमं सीतामुद्दिश्य गमनम् । अथाश्रमसमीपगमनं, ततः सीतादर्शनं, ततः सन्निकर्षगमनमिति क्रमः ॥ ८ ॥

९] ति० टी०–उपतस्थे । अन्तिकसमीपं प्राप्तेत्यर्थः । अभव्यशोचतीं तामिव ॥ ९ ॥

१ समुपागमदिति गो. पाठः । २ रामपर्त्नीमिति गो. पाठः । ३ उग्रनेजःकर्माणमिति गो. पाठः । ४ रुहा इति गो. पाठः । ५ समीक्ष्येति गो. पाठः । ६ त्वन्तरप्रेप्सुरिति गो रा. पाठः ।

अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः । सहसा भव्यरूपेण तृणैः कूप इवावृतः ॥ १० ॥
अतिष्ठत्प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम् । [2]तिष्ठन्संप्रेक्ष्य च तदा पत्नीं रामस्य रावणः॥ ११ ॥
शुभां रुचिरदन्तोष्ठीं पूर्णचन्द्रनिभाननाम् । आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम्॥१२॥
स तां पद्मपलाशाक्षीं पीतकौशेयवासिनीम् । अभ्यगच्छत वैदेहीं [3]हृष्टचेता निशाचरः ॥ १३ ॥
दृष्ट्वा कामशराविद्धो ब्रह्मघोषमुदीरयन् । अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसाधिपः ॥ १४ ॥
तामुत्तमां त्रिलोकानां पद्महीनामिव श्रियम् । विभ्राजमानां वपुषा रावणः प्रशशंस ह ॥ १५ ॥
[6]रौप्यकाञ्चनवर्णाभे पीतकौशेयवासिनि । कमलानां शुभां मालां पद्मिनीव चै बिभ्रती॥ १६॥
ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीरप्सरा वा शुभानने । भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ॥ १७ ॥
समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव । विशाले विमले नेत्रे रक्तान्ते [8]कृष्णतारके ॥ १८ ॥

रा० टी०–अभव्य इति । अभव्यः नित्यममङ्गलरूपः रावणः भर्तारमनुशोचतीमनुशोचन्तीं वैदेहीं भव्यरूपेण शनैश्चरः चित्रामिव अभ्यवर्तत तत्समीपं प्राप ॥ ९ ॥

गो० टी०–अथाभिमुखगमनमाह–अभव्य इति । अभव्यः दुर्जनः भव्यरूपेण सुजनरूपेण अनुशोचतीमिति आगमशासनस्यानित्यत्वानुभावः ॥ ९ ॥

१०–११] ति० टी०–चित्रां चित्राख्यनक्षत्रम् । भव्यरूपेण परमशान्तयतिरूपेण ॥ १० ॥ ११ ॥

रा० टी०–सहसेति । तृणैः आवृतः आच्छन्नः कूप इव भव्यरूपेणोपलक्षितो रावणः रामपत्नीं वैदेहीं प्रेक्ष्य अतिष्ठत् तत्संनिधावुपाविशत् ॥ १० ॥ ११ ॥

गो० टी०–स इति । पापः अन्तः पापात्मा भव्यरूपेण साधुाकारेणोपलक्षितः ॥ १० ॥

१२–१३] ति० टी०–बाष्पैः शोकेन चाभिपीडिताम् । स्वयमग्रौ प्रविश्य मां रक्षसे दत्तवतीति शोकबाष्पौ । रामव्यसनश्रवणेत्यापाततोऽर्थः ॥ १२ ॥ १३ ॥

रा० टी०–शुभामिति । शुभां सकलमङ्गलहेतुं रुचिरदन्तोष्ठीं स्वच्छदन्तोष्ठसहितां पर्णशालायामासीनां बाष्पशोकाभिपीडितां बाष्पहेतुभूतशोकयुक्तां पद्मपलाशाक्षीं पद्मपत्रनेत्रां पीतकौशेयवासिनीं वैदेहीं हृष्टचेताः निशाचरो रावणः अभ्यगच्छत कथमेवं लोकविलक्षणं रूपमनया लब्धमित्यविचारवत् ॥ १२ ॥ १३ ॥

गो० टी०–शुभामित्यादि । बाष्पशोकाभिपीडितां रामार्तस्वरश्रवणेन बाह्याभ्यन्तरास्वास्थ्यवतीं पीतकौशेयं वस्ते इति पीतकौशेयवासिनीं णिन्यन्तात् ङीप् । अभ्यगच्छत पूर्वस्यादपि सन्निकर्षं प्राप्तः ॥ ११ ॥ १२ ॥

गो० टी०–स इति । ब्रह्मघोषमुपनिषदमावर्तयेदित्युक्तपरिव्राजकोचितवेदघोषं प्रश्रितं विनयान्वितं रहिते विजनप्रदेशे ॥ १३ ॥

१४–१५] ति० टी०–ब्रह्मघोषं ब्राह्मणसमाख्यातं वेदघोषमुदीरयन्कुर्वन् ॥ १४ ॥ १५ ॥

रा० टी०–दृष्ट्वेति । कामशराविद्धः नानेच्छारूपबाणव्याप्तः राक्षसाधिपो रावणः रहिते रामलक्ष्मणाभ्यां शून्ये समये दृष्ट्वा वैदेहीमिति शेषः, ब्रह्मघोषं वेदशब्दमुदीरयन् पठन् प्रश्रितं वाक्यमब्रवीत् प्रशंसितुमैच्छत् अत एव वक्ष्यमाणेन न पौनरुक्त्यम् ॥ १४ ॥

रा० टी०–तामिति । त्रिलोकानां मध्ये उत्तमां सर्वश्रेष्ठां वपुषा पद्महीनां श्रियमिव विभ्राजमानां तां सीतां रावणः प्रशशंस ॥ १५ ॥

गो० टी०–तामिति । लोके उत्तमां स्त्रियमित्यन्वयः । प्रश्रितं वाक्यमब्रवीदित्यस्यैव विवरणं प्रशशंसेति ॥ १४ ॥

१६] ति० टी०–रौप्यकाञ्चनवर्णाभं तप्तकाञ्चनम् ॥ १६ ॥

रा० टी०–तत्प्रशंसाकारमाह–रौप्येत्यादिभिः । रौप्यकाञ्चनवर्णस्य अत्युत्तमसुवर्णवर्णस्याभा इव आभा यस्यास्तत्संबोधनम् पीतकौशेयं वस्ते तच्छीला तत्संबोधनम्, मालां बिभ्रति संबोधनम् ॥ १६ ॥

गो० टी०–का त्वमिति । काञ्चनवर्णाभे काञ्चनतुल्यवर्णे कमलानां मालां बिभ्रतीव पद्मिनीव स्थिता पद्मतुल्यमुखनयनपाणिपादविशिष्टत्वादिति भावः ॥ १६ ॥

१७] ति० टी०–ह्रीर्गौरी, श्रीरैश्वर्यप्रधाना भगवच्छक्तिः, लक्ष्मीः सौभाग्यप्रधाना, भूतिरणिमादिसिद्धिः, रतिः कामपत्नी । स्वैरचारिणीत्वं वन आगमनात् ॥ १७ ॥

रा० टी०–ह्रीरिति । स्वैरचारिणी त्वं ह्रीरसि श्रीर्वासि श्रीः शोभासंपत्तिः लक्ष्मीरैश्वर्यसंपत्तिरिति न पौनरुक्त्यम्॥१७॥

गो० टी०–ह्रीरिति । ह्रीः विष्णुपत्नी भूमिः "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति श्रुतेः । श्रीः कमला लक्ष्मीः कान्त्याधिष्ठानदेवता रतिः मन्मथस्त्री स्वैरचारिणी स्वतन्त्रा ॥ १६ ॥

१८] ति० टी०–प्रशशंसेत्यस्य प्रपञ्चः–समा इत्यादि ।

१ स पाप इति गो. पाठः । २ अर्धमेतत् गो. रा. नास्ति । ३ दुष्टेति गो. पाठः । ४ स मन्मथेति गो. पाठः । ५ स्त्रियं लोके इति गो. पाठः । ६ का त्वमिति गो. पाठः । ७ ह्रीति गो. पाठः । ८ निभ्रति इति ह्रस्वः रा. पाठे । ९ व्यचारयादिति युक्तं भाति ।

विशालं जघनं पीनमूरू करिकरोपमौ । [1]प्रलम्बितौ वृत्तौ संहतौ संप्रगल्भितौ ॥ १९ ॥
पीनोन्नतमुखौ कान्तौ [2]स्निग्धतालफलोपमौ । मणिप्रवेकाभरणौ रुचिरौ [3]तौ पयोधरौ ॥ २० ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि । मनो हरसि मे [4]रामे नदीकूलमिवाम्भसा ॥ २१ ॥
करान्तामितमध्यासि सुकेशे संहतस्तनि । नैव देवी न गन्धर्वी न यक्षी न च किंनरी ॥ २२ ॥
नैवंरूपा मया नारी दृष्टपूर्वा महीतले । रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते ॥ २३ ॥
इह वासश्च कान्तारे चित्तमुन्माथयन्ति मे । सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि ॥ २४ ॥
राक्षसानामयं वासो घोराणां कामरूपिणाम् । प्रासादाग्राणि रम्याणि नगरोपवनानि च ॥ २५ ॥

समा इति समसंस्थानाः । शिखरिणः कुन्दकुड्मलवत्प्रशस्ताग्राः ॥ १८ ॥

रा० टी०—समा इति । समाः निम्नोन्नतरहिताः शिखरिणः कुन्दकुड्मलसदृशशोभनाग्रवंतस्तव दशनाः दन्ताः सन्ति रक्तान्ते अरुणप्रान्तभागे कृष्णतारके कृष्णतारकाविशिष्टे नेत्रे स्त इति शेषः ॥ १८ ॥

गो० टी०—समा इति । समाः वैषम्यरहिताः शिखराणि अग्राणि प्रशस्तानि सन्तीति शिखरिणः प्रशंसायामिनिः । कुन्दकुड्मलवत् प्रशस्ताग्रा इत्यर्थः । स्निग्धाः मसृणाः रक्तान्ते रक्तरेखायुक्तान्ते जघनं कटिपुरोभागः । 'पश्चात्रितम्बः श्रोणिकटयाः क्लीबे तु जघनं पुरः' इत्यमरः ॥ १७ ॥ १८ ॥

१९] ति० टी०—संप्रगल्भितावालिङ्गनादौ संजातप्रागल्भ्यौ । 'संप्रवल्गितौ' इति पाठे आलिङ्गनोद्यतावित्यर्थः ॥ १९ ॥

रा० टी०—विशालमिति । जघनं विशालं पीनं च उपचितौ उन्नतौ वृत्तौ वर्तुलौ संहतौ परस्परं सुश्लिष्टौ संप्रगल्भितौ किंचित्कम्पयन्ताविव ॥ १९ ॥

गो० टी०—एताविति । उपचितौ उन्नतौ वृत्तौ वर्तुलौ संहतौ अन्योन्यसंश्लिष्टौ सम्यक् प्रकृष्टं वल्गितं चलनं ययोस्तौ संप्रवल्गितौ गुरुत्वौन्नत्याभ्यां किंचिच्चलन्ताविव स्थितावित्यर्थः । पीनोन्नतमुखौ क्वचित् स्तनयोः पीनत्वेऽप्यग्रे औन्नत्यं पीनत्वं च न स्तः तथा न भवत इमौ किंतु पीनम् उन्नतं च मुखं ययोस्तौ कान्तौ काम्यमानौ मणिप्रवेकाभरणौ मणिप्रवेकाः मणिश्रेष्ठाः । 'प्रवेकाल्लुत्तमोत्तमौ' इत्यमरः । ते मालात्मका आभरणं ययोस्तौ रुचिरौ शोभमानौ सूक्ष्मतरकौशेयोत्तरीयचलनवशेन हठादृष्टः प्रकारो दुरात्मना वर्ण्यते ॥ १९ ॥

२०] ति० टी०— मणिप्रवेको मणिश्रेष्ठः ॥ २० ॥

रा० टी०—पीने उन्नते मुखे ययोः ॥ २० ॥

२१] ति० टी०—नदी कर्त्री । कूलं स्वकूलम् ॥ २१ ॥

रा० टी०—चारिति । चारु स्मितं यस्याः तत्संबोधनम् नदी अम्भसा कूलमिव शोभनावयवैर्मे मनो हरसि ॥ २१ ॥

गो० टी०—चारुस्मित इति । चारवो दन्ता यस्याः सा चारुदती आर्षो दन्तस्य दश्रादेशः छन्दोवद्भावेन " छन्दसि च " इति सूत्रेण समासान्तो दन्तस्य दश्रादेशो वा "दशिगदश्र" इति ङीप् । समा इत्यादिना पूर्वोक्तस्य सामान्योक्तिरियं चारुस्मितत्वनिर्वाहाय विलासोऽम्भस्थानीयम् अतो न न्यूनोपमा २०

22] ति० टी०—करान्तेनाङ्गुष्ठप्रदेशिनीचक्रप्रमाणेन मितं मध्यं यस्यास्तथाभूते ॥ २२ ॥

रा० टी०—करान्तेति । करान्तेन अङ्गुष्ठप्रदेशिनीचक्रमानेन मितं परमितं मध्यं यस्याः साऽसि एवं रूपं यस्याः सा नारी देव्यादिर्मया दृष्टपूर्वा न ॥ २२ ॥

गो० टी०—करान्तेति । करान्तेन करतलाङ्गुष्ठप्रदेशिनीचक्रमानेन मितं परिच्छिन्नं मध्यं यस्याः सा संहतस्तनीति पूर्वं संहतावित्युक्तकल्पेऽपि पुनरुक्तिर्दुर्लभलक्षणत्वविस्मयेन ॥ २१ ॥

२३–२५] ति० टी०—रूपं सुकुमारता वयः कान्तारवास इति चत्वारि चित्तमुन्माथयन्ति विकृतं कुर्वन्ति । प्रतिक्राम निर्गच्छ । रामचन्द्राधिष्ठितस्थाने राक्षसपराक्रमासंभवादेवं वचनम् ॥ २३–२५ ॥

रा० टी०—रूपमिति । अग्र्यम् अत्युत्तमं ते रूपादिकम् इह राक्षससेविते कान्तारे वने वासश्च मे चित्तमुन्मादयन्ति परस्परं विरुद्धधर्मयोरत्युत्तमरूपादिराक्षससेवितवनवासयोः कथमेकत्र समावेश इत्यत्र हेतोरज्ञानेन मे चित्तं भ्रमतीत्यर्थः ॥ २३ ॥

गो० टी०—नैवेति । एवंरूपा देवी देवस्त्री देवलोके न दृष्टा एवमुत्तरत्रापि योज्यं नारी मनुष्यस्त्री ॥ २२ ॥

गो० टी०—रूपमिति । लोकेष्वग्र्यं श्रेष्ठं रूपं लावण्यं रूपादीनि कान्तारवासश्च उन्मादयन्ति परस्परविरुद्धत्वात् किमत्र तवागमनमिति निर्णयबुद्धिं न जनयन्तीत्यर्थः ॥ २३ ॥

रा० टी०—सेति । यतः घोराणां राक्षसानामयं वनाधिकरणको वासः त्वया तु रम्याणि प्रासादाग्राणि संपन्नानि फलपुष्पादिसमन्वितानि नगरोपवनानि च वरं माल्यादि च आचरितुमुपभोक्तुं युक्तानि अतः सा अत्युत्तमरूपादिविशिष्टा त्वं प्रतिक्राम इतो गच्छ इह वस्तुं त्वं नार्हसि । सार्धश्लोकद्वयमेकान्वयि ॥ २४–२६ ॥

गो० टी०—सेति । प्रतिक्राम प्रतिनिवर्तस्व निलयमिति शेषः । वस्तुं स्थातुम् ॥ २४ ॥

---

१ दृश्यन्ताविति गो. पाठः । २ स्निग्धाविति गो. पाठः । ३ ते इति गो. पाठः । ४ कान्ते इति गो. पाठः । ५ उन्मादयन्तीति गो. पाठः । ६ वन्त इति युक्तं भाति ।

संपन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया । वरं माल्यं वरं गन्धं वरं वस्त्रं च शोभने ॥ २६ ॥
भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे । का त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते ॥ २७ ॥
वसूनां वा वरारोहे देवता प्रतिभासि मे । नेह गच्छन्ति गन्धर्वा न देवा न च किंनराः ॥ २८ ॥
राक्षसानामयं वासः कथं तु त्वमिहागता । इह शार्दूलमृगाः सिंहा द्वीपिव्याघ्रमृगा वृकाः ॥ २९ ॥
ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसे । मदान्वितानां घोराणां कुञ्जराणां तरस्विनाम् ॥ ३० ॥
कथमेका महारण्ये न बिभेषि वरानने । कासि कस्य कुतश्चं त्वं किंनिमित्तं च दण्डकान् ॥ ३१ ॥
एका चरसि कल्याणि घोरान्राक्षससेवितान् । इति प्रशस्ता वैदेही रावणेन महात्मना ॥ ३२ ॥
द्विजातिवेषेण हि तं दृष्ट्वा रावणमागतम् । सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३३ ॥
उपानीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च । अब्रवीत्सिद्धमित्येव तदा तं सौम्यदर्शनम् ॥ ३४ ॥

गो० टी०–प्रासादाग्राणीति । संपन्नानि समृद्धानि आचरितुं संचरितुम् ॥ २५ ॥

२६–२८] ति० टी०–आचरितुमुपभोक्तुम् । त्वद्युक्तं त्वत्संयुक्तमाल्यादि वरम् अन्यत्तु विफलमिति भावः ॥ २६–२८ ॥

गो० टी०–वरमिति । वरं श्रेष्ठं माल्यादि त्वद्युक्तं तव योग्यं मन्ये नतु यादृशतादृशम् एवमुत्तरत्रापि । यद्वा माल्यादिकं त्वद्युक्तं त्वत्संबद्धं सत् वरं प्रशस्तं भवतीति मन्ये ॥ २६ ॥

रा० टी०–भर्तारमिति । त्वद्युक्तं त्वत्संबन्धवन्तं भर्तारमहं वरं श्रेष्ठं मन्ये अतस्त्वं का भवसि तद्वदेत्यर्थः । नतु त्वमेव बुद्ध्या जानीहीत्यत आह–रुद्राणां मरुतां वा वसूनां वा देवता त्वं मे प्रतिभासि ॥ २७ ॥

गो० टी०–का त्वमिति । त्वं मे देवता देवस्त्रीति प्रतिभासि तत्र का त्वं किं रुद्राणां संबन्धिनी उत मरुतामु आहोस्विद्वसूनां संबन्धिनी । वाकारः समुच्चयार्थः तेन किमादित्यानामित्यपि सिध्यति ॥ २७ ॥

रा० टी०–नेति । यतो राक्षसानामयमेतद्वनाधिकरणको वासः अतः गन्धर्वादय इह न गच्छन्ति त्वं कथमिहागता ॥ २८ ॥

गो० टी०–तत्रापि संशयनिवृत्तिमाह–नेहेति ॥ २८ ॥

२९] ति० टी०–द्वीपिव्याघ्रौ सबिन्दुनिर्बिन्दू ॥ २९ ॥

रा० टी०–अत्र निवासे भीत्यन्तरमप्यस्तीत्याह–इहेति । इह शार्दूलमृगादयः सन्ति तेभ्यः कथं न बिभ्यसे बिभेषि तत्र शार्दूलमृगा वानरादयः द्वीपिव्याघ्रयोरिहावान्तरजातिपरत्वान्न पौनरुक्त्यम् तरक्षवो मृगादनाः महाव्याघ्राः ॥ २९ ॥

गो० टी०–भयहेत्वन्तरमाह–इहेति । शार्दूलमृगाः वानराः द्वीपं चर्म तद्योगात् द्वीपिनो बालव्याघ्राः व्याजिघ्रन्तीति व्याघ्रा द्वीप्यपेक्षया किंचिन्महान्तोऽमी तरक्षवो मृगादनाः महाव्याघ्रा न बिभ्यसि न बिभेषि कङ्काः मांसादाः भयंकराकृतयः पक्षिविशेषाः ॥ २९ ॥

३०–३१] ति० टी०–तरक्षुमृगादनः । बिभ्यसे बिभेषि ॥ ३० ॥ ३१ ॥

रा० टी०–मदान्विता नामिति । महारण्ये मदान्वितानामत एव घोराणां तरस्विनामतिवेगवतां कुञ्जराणाम् एका त्वं कथं न बिभेषि संबन्धसामान्यविवक्षया षष्ठी ॥ ३० ॥

गो० टी०–मदेति । पञ्चम्यर्थे षष्ठी । तरस्विनां बलवताम् ॥ ३० ॥

रा० टी०–कासीति । का किंनामासि कस्य संबन्धिन्यसि कुतो देशात् किंनिमित्तं च घोरान् राक्षससेवितान् दण्डकान् एका त्वं चरसि ॥ ३१ ॥

गो० टी०–कासीति । कासि किंनामधेयासि कस्य संबन्धिनी कुतः कस्मादेशादागतासि ॥ ३१ ॥

३२] ति० टी०–प्रशस्ता कृतप्रशंसा ॥ ३२ ॥

३३] ति० टी०–द्विजातिवेषेण तमागतं रावणं दृष्ट्वा द्विजातिवेषोऽयं रावण इति ज्ञात्वापि । अतिथिसत्कारैरतिथियोग्यसत्कारैः ॥ ३३ ॥

रा० टी०–इतीति । महात्मना अतिप्रयत्नशीलेन रावणेन प्रशस्ता कृतप्रशंसा वैदेही विदेहकुले प्रादुर्भूता मैथिली मिथिलोद्भवा सीता द्विजातिवेषेणागतं तं रावणं दृष्ट्वा सर्वैः अतिथिसत्कारैः पूजयामास । सार्धश्लोक एकान्वयी ॥ ३२ ॥ ३३ ॥

गो० टी०–इतीति । द्विजातिवेषेण संन्यासिवेषेण हि तं सहितं सत्क्रियते एभिरिति सत्कारः पूजाद्रव्याणि तैः ॥ ३२ ॥

३४] ति० टी०–पाद्येनाभिनिमन्त्र्य सत्कृत्य । तदा पाद्यदानोत्तरकाले सौम्यदर्शनं तं सिद्धं पक्वमन्नमित्यब्रवीत् ॥ ३४ ॥

रा० टी०–सत्कारप्रकारमाह–उपेति । तदा रावणप्रश्नोत्तरकाले एव पूर्वमासनमुपानीय दत्त्वा पाद्येन अभिनिमन्त्र्य सत्कृत्य च सौम्यदर्शनं तं रावणं सिद्धं पाकनिष्पन्नं भक्ष्यमिति शेषः, इत्यब्रवीत् ॥ ३४ ॥

गो० टी०–उक्तं विवृणोति–उपनीयेति । पाद्येन पादोदकेन अभिनिमन्त्र्य सत्कृत्य तदा पाद्यप्रदानानन्तरं सिद्धमित्येवाब्रवीत् पक्वान्नं सिद्धमित्यब्रवीत् ॥ ३३ ॥

१ वरानने इति गो. पाठः । २ न्विति गो. पाठः । ३ तथेति गो. पाठः । ४ बिभ्यसीति गो. पाठः । ५ चिदिति गो. पाठः । ६ पुरात्वनेति गो. पाठः । ७ उपनीयेति गो. पाठः ।

द्विजातिवेषेण समीक्ष्य मैथिली समागतं पात्रकुसुम्भधारिणम् ।
अशक्यमुद्वेष्टुमुपायदर्शनान्न्यमन्त्रयद्ब्राह्मणवत्तथागतम् ॥ ॥ ३५ ॥
इयं बृसी ब्राह्मण काममास्यतामिदं च पाद्यं प्रतिगृह्यतामिति ।
इदं च सिद्धं वनजातमुत्तमं त्वदर्थमव्यग्रमिहोपभुज्यताम् ॥ ॥ ३६ ॥
निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम् ।
प्रसह्य तस्या हरणे दृढं मनः समर्पयामास वधाय रावणः ॥ ॥ ३७ ॥
ततः सुवेषं मृगयागतं पतिं प्रतीक्षमाणा सहलक्ष्मणं तदा ।
निरीक्षमाणा हरितं ददर्श तन्महद्वनं नैव तु रामलक्ष्मणौ ॥ ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्चत्वारिंशः सर्गः ॥४६॥

३५] ति० टी०—पात्रं कमण्डलुः कुसुम्भं तद्रक्तवस्त्रम् तदुभयधारिणम् । उपायानां ब्राह्मणत्वप्रतिपत्त्यै रावणेन कृतानां काषायवस्त्रब्रह्मघोषदण्डादीनां दर्शनात् । उद्वेष्टुमपेक्षितुमशक्यमिति विचार्येति शेषः । तथागतं ब्राह्मणवेषेणागतं रावणं ब्राह्मणवदेव न्यमन्त्रयत् । पाठान्तरं त्वत्राशक्तकल्पितम् । अयमेव रक्षःसंहारोपाय इति दर्शनादित्यपि गूढमत्र ॥ ३५ ॥

रा० टी०—नन्वु संन्यासिविलक्षणवचनोच्चारणात् संन्यासित्वाभावनिश्चयात् कथमेवं सत्कारः कृत इत्यत आह—द्विजातीति । द्विजातिवेषेण उपवीतधारित्वादिना समागतं पात्रकुसुम्भधारिणमत एव उद्वेष्टुमनादर्तुमशक्यं रावणम् उपायदर्शनात् मदुद्देश्यकोपकार एतद्विनाशहेतुरित्युपायज्ञानात् येन प्रकारेण आगतं प्राप्तं सामग्रीजातं तथा तेन प्रकारेण न्यमन्त्रयत् ॥ ३५ ॥

गो० टी०—उक्तमर्थं सर्गान्तश्लोकाभ्यां विवृणोति—द्विजातीत्यादि । द्विजातिवेषेण समागतं प्राप्तम् अलाबुप्रभृतिष्वेकं कुसुम्भं महारजताख्यरञ्जकद्रव्यविशेषरक्तं वस्त्रम् । तेन रक्तमिति प्राप्तस्याणो लोप आर्षः यद्वा कुसुम्भः कमण्डलुः 'स्यान्महारजते क्लीबं कुसुम्भं करके पुमान्' इत्यमरः । तदुभयधारिणम् अपाये अपहरणे अनर्थकरणे वा दर्शनं बुद्धिर्यस्य तम् । अत एव उद्वेष्टुं भोजयितुमशक्यं तं समीक्ष्य मैथिली ब्राह्मणवत् ब्राह्मणेन सदृशं यथा भवति तथा न्यमन्त्रयत् ब्राह्मणातिथिमिति शेषः । तत्पूर्त्यर्थः । यद्वा ब्राह्मणवत् ब्राह्मणार्हम् "तदर्हम्" इति वतिः । यद्वा मैथिली जनककुलजाततया तद्व्यवहारपरिपाटीविज्ञातकपटवेषाऽपि संन्यासिवेषधारणमात्रेण उद्वेष्टुं द्वेष्टुम् अशक्यं तं न्यमन्त्रयत् । 'काषायदण्डमात्रेण यतिः पूज्यो [ ] इति वचनादिति भावः ॥ ३४ ॥

३६] ति० टी०—निमन्त्रणप्रकारः—इयं बृसीत्यादि । वनजातं वन्यपदार्थजातं त्वदर्थमेव सिद्धं कृतं तदिहोपभुज्यताम् ॥ ३६ ॥

रा० टी०—तत्प्रकारमाह—इयमिति । हे ब्राह्मण ! इयं बृषी ऋषियोग्यासनं कामं यथेच्छमास्यताम् इदं पाद्यं च प्रतिगृह्यताम् उत्तममिदं वनजातं वनोद्भवं फलादि सिद्धं पाकादिना संपन्नम् अतोऽव्यग्रमिहोपभुज्यताम् ॥ ३६ ॥

गो० टी०—सत्कारप्रकारमाह—इयमिति । इयं बृसी सुनीनामासनम् आस्यतां त्वदर्थं सिद्धं पक्वम् इदं वनजातं कन्दमूलफलादिकम् इह स्थले अव्यग्रमुपभुज्यताम् इतिकरणस्य उत्तरश्लोकेऽन्वयः ॥ ३६ ॥

३७] ति० टी०—एवं निमन्त्र्यमाणो रावण आत्मवधाय स्वनाशाय तस्याः प्रसह्य हरणे मनो दृढं निश्चितं समर्पयामास सम्यग्वधाय कृतवानित्यर्थः ॥ ३७ ॥

रा० टी०—निमन्त्र्यमाण इति । निमन्त्र्यमाणो रावणः प्रतिपूर्णभाषिणीम् अतिथियोग्यकृत्यवचनोच्चारणकर्त्रीं नरेन्द्रपत्नीं मैथिलीं प्रसमीक्ष्य आत्मवधाय स्वविध्वंसाय प्रसह्य हठात् तस्याः मैथिल्याः हरणे मनः दृढं यथा भवति तथा समर्पयामास ॥ ३७ ॥

गो० टी०—निमन्त्र्यमाण इति । इति प्रतिपूर्वभाषिणीं सर्वं संपन्नमित्यतिथये वक्तव्यं वचनं भाषमाणां धृतं धीरं यथा तथा मनोविशेषणं वा तस्या हरणे मनः समार्पयत् निहितवान् ॥ ३६ ॥

३८] ति० टी०—सुवेषं शोभनाकारम् । मृगयागतं मृगयां प्रति गतम् । हरितं श्यामम् ॥ ३८

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रा० टी०—तत इति । ततः रावणाभिप्रायज्ञानानन्तरं सुवेषं नित्यं मनोहरवेषेण विशिष्टं मृगयागतं पतिं प्रतीक्षमाणा तदागमनमिच्छन्ती अत एव निरीक्षमाणा इतस्ततो-

---

१ तदाक्षनेति गो. पाठः । २ तदाक्षनेति गो. पाठः । ३ बृषीति रा. पाठः । ४ धृतमिति गो. पाठः । ५ समार्पयत्स्वात्मेति गो. पाठः ६ वि [illegible]णेति गो [illegible]ः ।

सप्तचत्वारिंशः सर्गः ।

कापाय्याम्बरावृतेः शापाद्भीता सीता स्वेतिवृत्तं निवेदयन्ती तं प्रति तदभिज्ञानादि पप्रच्छ । लब्धावकाशो रावणः स्वरावणत्वं प्रकटय्य स्ववैभवनिवेदनेन विलोभयन् स्वकलत्र भवितु तां प्रार्थयते । रामगुणान्प्रशमन्ती सीता तदेकनिष्ठत्वं विनिवेद्य तयोर्गुणतारतम्य प्रकटयन्ती त बहुधा जगर्ह ।

रावणेन तु वैदेही तदा पृष्टा [1]जिहीर्षुणा । परिव्राजकरूपेण [2]शशंसात्मानमात्मना [3]॥ १ ॥
ब्राह्मणश्चातिथिश्चैष [4]अनुक्तो हि शपेत माम् । इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥ २ ॥
दुहिता जनकस्याहं मैथिलस्य महात्मनः । सीता नाम्नास्मि भद्रं ते रा[5]मस्य महिषी प्रिया॥ ३ ॥
उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ ४ ॥
तत्र त्रयोदशे वर्षे राजाऽमन्त्रयत प्रभुः । अभिषेचयितुं रामं समेतो राजमन्त्रिभिः ॥ ५ ॥

ऽवलोकयन्ती सीता हरितवनमेव ददर्श रामलक्ष्मणौ तु नैव ददर्श ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०–तत इति । सुवेषं शोभनाकारं मृगयागतं गतं मृगयार्थं पतिं प्रतीक्षमाणा प्रतिपालयन्ती हरितम् यत्र गतौ तौ तां दिशं विवीक्षमाणा विविधं पश्यन्ती महद्वनमेव ददर्श रामलक्ष्मणौ तु न ददर्श ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥४६॥

१] ति० टी०–रावणेन त्विति । आत्मानं जिहीर्षुणा परिव्राजकरूपेण रावणेन पृष्टा वैदेही आत्मना स्वयमेवात्मानं शशंस ॥ १ ॥

रा० टी०–सीतोत्तरं वर्णयितुमाह–रावणेनेति । आत्मानं परिव्राजकरूपेण जिहीर्षुणा रावणेन पृष्टा वैदेही आत्मना स्वयमेवात्मानं शशंस ॥ १ ॥

गो० टी०–अथ मैथिली आर्जवेन स्वस्वरूपमुक्त्वा रावणानार्जवदर्शनेन स्वपातिव्रत्यानुरूपं तमुपालभत–रावणेन त्वित्यादि । जिहीर्षता हर्तुमिच्छता तेन कापट्येन पृष्टापि यतिचिह्नं पुरस्कृत्य स्वयाथात्म्यमुक्तवतीति भावः ॥ १ ॥

२–३] ति० टी०–नन्वु पूजामात्रं कर्तव्यं किं प्रतिवचनेनेत्याह–ब्राह्मणश्चेति । एष अनुक्त इत्यार्षोऽसंधिः । अनुक्तोऽनुक्तप्रतिवचनः । २ ॥ ३ ॥

रा० टी०–तत्र हेतुं वदन्नाह–ब्राह्मण इति । एष रावणः ब्राह्मणो ब्राह्मणवेषोऽतिथिश्चातो मयानुक्तश्चेत् मां शपेतेति मुहूर्तं ध्यात्वा सीता अब्रवीत् ॥ २ ॥

गो० टी०–यतिवेषं प्रत्यात्मवंशं सा किमर्थमुक्तवतीत्याह–ब्राह्मणश्चेति ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–दुहितेत्यादिभिः । महात्मनो जनकस्य दुहिता कन्या रामस्य प्रिया महिषी नाम्ना सीताहमस्मि ॥ ३ ॥

गो० टी०–काऽसीत्यस्योत्तरमाह–दुहितेति । कस्येत्यस्योत्तरमाह–रामेति ॥ ३ ॥

४] ति० टी०–सर्वकामसमृद्धिनी । व्रीह्यादित्वादिनिः॥४॥

रा० टी०–उषित्वेति । इक्ष्वाकूणां निवेशने गृहे द्वादश समाः वर्षाणि उषित्वा मानुषान् प्राकृतविलक्षणमनुष्यसंबन्धिनो भोगान् भुञ्जानाहं सर्वकामसमृद्धिनी आसमिति शेषः, निष्ठान्तात् "अत इनिठनौ" इतीन् व्रीह्यादित्वादिनिरिति भट्टोक्तिस्तु चिन्त्या ॥ ४ ॥

गो० टी०–कुतश्चिदित्यादेरुत्तरमाह–उषित्वेत्यादिना । विवाहानन्तरम् इक्ष्वाकूणां निवेशने अयोध्यायां द्वादशसमाः द्वादशवत्सरानुषित्वा तत्र सर्वकामसमृद्धिनी काम्यन्त इति कामाः भोगोपकरणस्रक्चन्दनादीनि तेषां समृद्धं समृद्धिः भावे निष्ठा तद्वती सती मानुषान् भोगान् रतिक्रीडाः अग्राम्यत्वाय मानुषानित्युक्तं वस्तुतः स्वयं दिव्यभोगपरतया मानुषानित्यवश्यमुक्तवती, यद्वा मानुषान् मनुष्यत्वेनावतीर्णरामकृतान् भोगान् अमानुषानिति वा छंदः मनुष्यदुर्लभान् दिव्यान् भोगानित्यर्थः । भुञ्जाना अभवमिति शेषः सर्वकामसमृद्धिनि इति सप्तम्यन्तपाठे सर्वकामसमृद्धिनि इक्ष्वाकूणाम् इक्ष्वाकुवंश्यस्य रामस्य पूजायां बहुवचनं व्रीडया भर्तृनामाग्रहणं निवेशने गृहे द्वादश समाः द्वादश वत्सरान् अत्यन्तसंयोगे द्वितीया । अमानुषान् भोगान् भुञ्जाना अनुभवन्ती सती उषित्वा उषितवत्यस्मि व्यत्ययेन त्वाप्रत्ययः ॥ ४ ॥

५] ति० टी०–राजमन्त्रिभी राज्ञो राज्यनिर्वाहकैर्मन्त्रिभिरित्यर्थः ॥ ६ ॥

रा० टी०–तत्रेति । तत्र राघवनिवेशने राजमन्त्रिभिः म-

१ जिहीर्षयेति गो. पाठः । २ लिक्ष्मेनेति गो. पाठः । ३ अङ्गनेति गो. पाठः । ४ चायमिति गो. पाठः । ५ रामभार्या द्वितीयेति गो. पाठः । ६ तत इति गो. पाठः ।

तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने । कैकेयी नाम भर्तारं ममार्या याचते वरम् ॥ ६ ॥
परिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे । मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम् ॥ ७ ॥
द्वावयाचत भर्तारं सत्यसंधं नृपोत्तमम् । नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये न कदाचन॥ ८ ॥
एष मे जीवितस्यान्तो रामो यदभिषिच्यते । इति ब्रुवाणां कैकेयीं श्वशुरो मे स पार्थिवः ॥ ९ ॥
अयाचतार्थैरन्वर्थैर्न च याच्ञां चकार सा । मम भर्ता महातेजा वयसा पञ्चविंशकः ॥ १० ॥

न्त्रिराजैः मन्त्रिश्रेष्ठैरित्यर्थः, समेतो राजा राममभिषेचयितुं त्रयोदशे वर्षे अमन्त्रयत ॥ ५ ॥

गो० टी०–तत इति । राजा दशरथः अमन्त्रयत् अकथयत् राजमन्त्रिभिः मन्त्रिराजैः मन्त्रिश्रेष्ठैरिति यावत् । राजदन्तादित्वात्परनिपातः ॥ ५ ॥

६] ति० टी०–संभ्रियमाणे । संपाद्यमानसंभारे इत्यर्थः । भर्तारं दशरथम् ममार्या मम पूज्या श्वश्रूः । 'अनार्या' इति क्वचित्पाठः ॥ ६ ॥

रा० टी०–तस्मिन्निति । तस्मिन् राघवस्याऽभिषेचने संभ्रियमाणे सति कैकेयी नाम ममार्या पूजनीया श्वश्रूरित्यर्थः, वरं याचते अयाचत ॥ ६ ॥

गो० टी०–तस्मिन्निति । तस्मिन् रामाभिषेचने संभ्रियमाणे आरभ्यमाणे सति आर्या पूज्या मम श्वश्रूरित्यर्थः । सा प्रसिद्धा कैकेयी वरं याचते अयाचत ॥ ६ ॥

७–९] ति० टी०–मे श्वशुरं सुकृतेन परिगृह्य वररूपेण सुकृतेन वशीकृत्य । यद्वा धर्मेण शापयित्वेत्यर्थः । मम भर्तुः प्रव्राजनं भरतस्याभिषेचनमिति द्वौ वरावयाचत ॥ ७–९ ॥

रा० टी०–तद्वचनाकारमाह–परीति । सुकृतेन अतिशोभनकर्मणा उपलक्षितं सत्यसंधं भर्तारं मे श्वशुरं परिगृह्य स्ववशीकृत्य कैकेयी मम भर्तुः प्रव्राजनं भरतस्याऽभिषेचनं राज्यपालनं द्वौ वरौ अयाचत । सार्द्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–कं वरं कमयाचतेत्यत्राह–प्रतिगृह्येति । सार्द्धश्लोक एकान्वयः । कैकेयी मे श्वशुरं स्वस्य भर्तारं सत्यसन्धं सत्यप्रतिज्ञं नृपोत्तमं दशरथं सुकृतेन प्रतिगृह्य धर्मेण शापयित्वा, यद्वा सुकृतेनोपकारेण प्रतिगृह्य वशीकृत्य स्वकृतप्राणप्रदानोपकारस्मारणेन राजानं वशीकृत्येत्यर्थः। मम भर्तुः प्रव्राजनं भरतस्याभिषेचनमित्येवंरूपौ द्वौ वरावयाचत ॥ ७ ॥

रा० टी०–याचनप्रकारमाह–नेति । यत् यदि रामोऽभिषिच्यते तदा न भोक्ष्ये अत एव अद्य अस्मिन् काले एष रामाभिषेकः मे जीवितस्यान्तः इति ब्रुवाणां कैकेयीं मानदः अतिसत्कारप्रदः मे श्वशुरः स दशरथः अन्वर्थैः सप्रयोजनकैः अर्थैः सुवर्णरत्नालङ्कारादिभिः अयाचत भरतराज्यप्रतिनिधित्वेन रत्नादीन् गृहाणेत्यकथयदित्यर्थः सा कैकेयी तु याच्ञां राजोक्तिं न चकार स्वीचक्रे स्वप्स्ये यास्ये इत्यत्र संज्ञापूर्वकविधेरनित्यत्वाद्वात्मनेपदम् । अर्धचतुष्टयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०–नाद्येति । पास्य इत्यात्मनेपदमार्षम् एषः अभिषेकः ॥ ८ ॥

गो० टी०–इतीति । मानदः बहुमानप्रदः अन्वर्थैः अर्थानुगतैः सप्रयोजनैरिति यावत् । उपभोगक्षमैरित्यर्थः, अर्थैः सुवर्णरत्नादिभिः कैकेयीमयाचत वरद्वयप्रतिनिधित्वेनैतानर्थान् प्रतिगृह्याणेति प्रार्थयामासेत्यर्थः । सा तां याच्ञां न चकार नाङ्गीचकार ॥ ९ ॥

१०] ति० टी०–अन्वर्थैरनुगतार्थैः सप्रयोजनैरुपभोगक्षमैरर्थैरयाचत । सर्वोत्तमवस्तूनि तुभ्यं दास्यामि रामाभिषेचने विघ्नं मा कुर्विति याच्यमाना न याच्ञां चकार नाङ्गीकृतवती । वयसा पञ्चविंशकः । वननिर्गमनकाल इति शेषः नन्विदमयुक्तम् । 'ऊनषोडशवर्षोऽयम्' इति विश्वामित्रं प्रति दशरथोक्तेः । 'उषित्वा द्वादश समाः' इत्यत्रोक्तेरिति चेन्न । अल्पान्तरत्वात् । अतितरुणावस्थायामपि राज्यं त्यक्तवानित्यर्थे तात्पर्येणास्थया तथोक्तेः। यद्वातिक्रान्तपञ्चविंशक इत्यर्थः। मम भर्ता वयसा महातेजाः। अतितरुण इत्यर्थः । पञ्चविंशकः सांख्यसिद्धं पञ्चविंशं तत्त्वं चैतन्यं सोऽयमेव । एतच्चैतन्येनैव जगद्व्याप्तं न ततोऽधिकं किंचिदस्तीति सूचयितुं तथोक्तिरिति तत्त्वम् ॥ १० ॥

रा० टी०–ममेति । सत्यवान् मृषासंसर्गशून्यः सर्वभूतहिते रतः राम इति लोके प्रथितः महातेजा मम भर्ता वयसा पञ्चविंशकः पञ्चविंशेन युक्ताः काः त्रयो यस्य स अष्टाविंशतिवार्षिक इत्यर्थः अयोध्यातो निर्गमनसमये इति शेषः अत एव ऊनषोडशवर्षो मे रामो राजीवलोचन इति विश्वामित्रं प्रति दशरथोक्त्या उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने इति रावणं प्रति सीतोक्त्या च सिद्धस्य वनप्रवेशनसमये अष्टाविंशतिवार्षिकत्वस्य नापलापः निरूपितं चैतत् विस्तरतः ऊनषोडशवर्षो मे इत्यत्र व्याख्याने मम जन्मनि प्रादुर्भावे सति तु अष्टादशवर्षाणि गण्यते गण्यन्ते अयोध्यातो निर्गमनसमये अष्टादश वर्षाणि मे व्यतीतानीत्यर्थः । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०–वस्तुतो मम भर्ता प्रव्राजनायोग्यः बालत्वादूनवत्त्वाच्चेत्याह–मम भर्तेति । पञ्चोत्तरा विंशतिः पञ्चविंशतिः वयसा पञ्चविंशतिवर्षाण्यर्हतीति पञ्चविंशकः "विंशतित्रिंशद्भ्यां ड्वुन्संज्ञायाम्" इत्यार्हीयो ड्वुन् प्रत्ययः । संख्यापूर्व-

१ आर्या सेति गो. पाठः । २ कथंचनेति गो. पाठः । ३ यदीति गो. पाठः । ४ मानद इति गो. पाठः ।

अष्टादश हि वर्षाणि मम जन्मनि गण्यते । रामेति प्रथितो लोके सत्यवाञ्शीलवाञ्शुचिः॥ ११॥
विशालाक्षो महाबाहुः सर्वभूतहिते रतः । कामार्तश्च महाराजः पिता दशरथः स्वयम् ॥ १२ ॥
कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत् । अभिषेकाय तु पितुः समीपं राममागतम् ॥ १३ ॥
कैकेयी मम भर्तारमित्युवाच द्रुतं वचः । तव पित्रा समाज्ञप्तं ममेदं शृणु राघव ॥ १४ ॥
भरताय प्रदातव्यमिदं राज्यमकण्टकम् । त्वया तु खलु वस्तव्यं नव वर्षाणि पञ्च च ॥ १५ ॥
वने प्रव्रज काकुत्स्थ पितरं मोचयानृतात् । तथेत्युवाच तां रामः कैकेयीमकुतोभयः ॥ १६ ॥
चकार तद्वचः श्रुत्वा भर्ता मम दृढव्रतः । दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतम् ॥ १७ ॥
एतद्ब्राह्मण रामस्य व्रतं धृतमनुत्तमम् । तस्य भ्राता तु वैमात्रो लक्ष्मणो नाम वीर्यवान्१८ ॥
रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा । स भ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः ॥१९ ॥
अन्वगच्छद्धनुष्पाणिः प्रव्रजन्तं मया सह । जटी तापसरूपेण मया सह सहानुजः ॥ २० ॥

पदानां तदन्तग्रहणमलुकीति तदन्तविधिः पञ्चविंशतिवर्ष इत्यर्थः । वयः परिमाणं वननिर्गमनकालिकं मम जन्मनि सति वर्षाण्यष्टादशेति गण्यते । रामस्य जन्मारभ्य द्वादशे वर्षे विश्वामित्रागमनं, तदनन्तरं वैदेह्या सह नगरे द्वादशवर्षाणि वासं कृतवान् । ततः परं त्रयोदशे वर्षे यौवराज्याभिषेकारम्भः, ततश्च वनप्रवेशसमये रामः पञ्चविंशतिवर्षाहः, ततो मुनीनामाश्रमेषु दश वत्सराः पञ्चवट्यां वयः वनवासस्य चतुर्दशे वर्षे सीताहरणम्, सीतायाश्च भूगर्भादाविर्भावानन्तरं मिथिलायां षट् संवत्सराः, ततो विवाहानन्तरमयोध्यायां द्वादश इत्येवमष्टादश वर्षा गता वनवासारम्भ इत्युक्तं विस्तरेणायमर्थं जनषोडशवर्षो मे इत्यत्र प्रत्यपादि । इदानीं तु रामः अष्टत्रिंशद्वर्षः मम त्वेकत्रिंशद्वर्षा गताः इदानीं तु द्वात्रिंशो वर्षो वर्तते । अस्मिन् श्लोके मम भर्तेत्यत्र भकारो गायत्र्याः नवमाक्षरं अष्टसहस्रश्लोका गताः ॥ १० ॥

११] ति० टी०–तथा मम जन्मतो वनप्रवेशसमयेऽतीतानीत्यर्थः गण्यत इत्यार्षमेकत्वम् । मम पञ्चतन्मात्रपञ्चमहाभूतपञ्चेन्द्रियाहंकारबुद्धिमनोरूपाण्यष्टादश वर्षाणि पर्वाणि जन्मनि कार्ये गण्यन्त इति तन्मूलीभूता प्रकृतिरहमिति सूचितम् ॥ ११ ॥

गो० टी०–एवं वनवासायोग्यं वय इत्युक्त्वा गुणवत्तया प्रव्राजनार्हत्वमाह–रामेतीति । गुणवान् सौशील्यवान्॥११॥

१२–१५] ति० टी०–कामार्तः कैकेयीकामार्तः॥१२–१५॥

रा० टी०–कामार्त इति । कामार्तः कामेन किंचिद्विषयेच्छया आर्तो युक्तः महाराजो दशरथः कैकेय्याः प्रियकामार्थं प्रियः प्रीतिविषयीभूतः अत एव कामः इच्छाविषयीभूतो योऽर्थः तमुद्दिश्य रामं नाभ्यषेचयत् ॥ १२ ॥

गो० टी०–एवंभूतस्य प्रव्राजनं दशरथदोषकृतमित्याह–कामार्त इति । नाभ्यषेचयत् कैकेयीसंमतिं विनेति शेषः । तत्र हेतुः–प्रियकामार्थमिति । प्रियकरणकामाय प्रतिज्ञातकैकेयीप्रियकरणनिर्वाहायेत्यर्थः । तव प्रियं करिष्यामीति प्रथमप्रतिज्ञाकरणे हेतुः–कामार्त इति । कामार्ततया प्रथमं तव यत् प्रियं तत्कारिष्यामीति प्रतिज्ञाय पश्चाद्रामप्रव्राजनं तया कृते प्रतिज्ञाभङ्गं कर्तुमक्षमो नाभ्यषेचयदित्यर्थः ॥ १२ ॥

रा० टी०–अभिषेकायेति । पितुः समीपमागतं मम भर्तारं कैकेयी द्रुतमितीदमुवाच ॥ १३ ॥

गो० टी०–अभिषेकायेति । सामान्यत आह्वाने नाभिषेकाय भवितुमर्हति मदाह्वानमित्यागतमित्यर्थः । धृतं धैर्येणोक्तमिति क्रियाविशेषणम् ॥ १३ ॥

रा० टी०–तद्वचनाकारमाह–तवेति । हे राघव ! तव पित्रा ममाग्रे इदं समाज्ञप्तं शृणु ॥ १४ ॥

रा० टी०–तत्समाज्ञापनमेवाह–भरतायेति । इदं राज्यं भरताय प्रदातव्यं त्वया तु वने वस्तव्यम् अतः हे काकुत्स्थ ! त्वं प्रव्रज अनृतात् पितरं मोचय ॥ १५ ॥

गो० टी०–तवेत्यादिश्लोकद्वयमेकान्वयम् । त्वद्विषये पित्रा समाज्ञप्तं समाज्ञापनं मम मत्तः शृणु इदं राज्यं भरताय प्रदातव्यं तदर्थं त्वया नव पञ्च च वर्षाणि चतुर्दशवर्षाणीत्यर्थः, वने वस्तव्यं तदर्थं प्रव्रज अनृतात् प्रतिज्ञाभङ्गरूपात्॥१४॥१५॥

१६–१७] ति० टी०–अनृतान्मोचय । तच्चतुरादुपालनेनेति शेषः ॥ १६ ॥ १७ ॥

रा० टी०–तथेति । दृढव्रतः अकुतोभयः मम भर्ता रामः तद्वचः श्रुत्वा तथेत्युवाच चकार च ॥ १६ ॥

गो० टी०–तथेतीति । अकुतोभयः राज्यत्यागवनवासाभ्यां भयरहितः ॥ १६ ॥

रा० टी०–ननु समर्थो रामः किमर्थमेवं चकार इत्यतो रामगुणानाह–दद्यादिति । हे ब्राह्मण ! दद्यात् प्रतिगृह्णीयात् न सत्यं ब्रूयात् वदेत् अनृतं न ब्रूयात् एतत् अनुत्तमं सर्वोत्कृष्टं व्रतं रामस्य रामे धृतं संस्थापितम् ॥ १७ ॥

गो० टी०–दृढव्रत इत्युक्तमुपपादयति–दद्यादिति । ध्रुवं निश्चलम् अनुत्तमम् अवश्यपरिपालनीयम् ॥ १७ ॥

१८–२०] ति० टी०–वैमात्रः । शुभादिषु विमातृशब्द-

---

१ गुणवान् सत्यवानिति गो. पाठः । २ तु महातेजा इति गो. पाठः । ३ धृतमिति गो. पाठः । ४ ह्रीति गो. पाठः । ५ उक्त्वा चेति गो. पाठः । ६ तस्या इति गो. पाठः । ७ ध्रुवं व्रतमिति गो. पाठः । ८ द्वैमात्र इति गो. पाठः । ९ धर्मचारीति गो. पाठः ।

प्रविष्टो दण्डकारण्यं धर्मनित्यो दृढव्रतः । ते वयं प्रच्युता राज्यात्कैकेय्यास्तु कृते त्रयः ॥ २१ ॥
विचराम द्विजश्रेष्ठ वनं गम्भीरमोजसा । समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया ॥ २२ ॥
आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् । रुरून्गोधान्वराहांश्च हत्वाऽऽदायामिषं बहु ॥ २३ ॥
स त्वं नाम च गोत्रं च कुलमाचक्ष्व तत्त्वतः । एकश्च दण्डकारण्ये किमर्थं चरसि द्विज ॥ २४ ॥
एवं ब्रुवत्यां सीतायां रामपत्न्यां महाबलः । प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः ॥ २५ ॥
येन वित्रासिता लोकाः सदेवासुरमानुषाः । अहं स रावणो नाम सीते रक्षोगणेश्वरः ॥ २६ ॥
त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम् । रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते ॥ २७ ॥
बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः । सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ २८ ॥
लङ्का नाम समुद्रस्य मध्ये मम महापुरी । सागरेण परिक्षिप्ता निविष्टा गिरिमूर्धनि ॥ २९ ॥

पठेऽप्यापोऽण् । असहोदरो भ्रातेत्यर्थः । विभिन्नाया मातुरपत्यं वैमात्रः ॥ १८–२० ॥

रा० टी०–तस्येति । लक्ष्मणो नाम तस्य वैमात्रः विमातुः तज्जनकपितृपाणिगृहीतीभिन्नपितृपाणिगृहीत्या अयमत एव भ्राता रामस्य सहायः ॥ १८ ॥

गो० टी०–तस्येति । द्वयोर्मात्रोरपत्यं पुमान् द्वैमात्रः अण् प्रत्ययः । " मातुरुत्संख्ये–" इत्युदादेशाभाव आर्षः । गुर्वक्षरं च छान्दसम् । अरिहेति छन्दोवद्भावात् " बहुलं छन्दसि " इति सूत्रेण ब्रह्मादिभिन्नेऽप्युपपदे क्विप्, यद्वा अन्येभ्योऽपि दृश्यते दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद्वा क्विप् ॥ १८ ॥

रा० टी०–स इति । दृढव्रतो लक्ष्मणो नाम स भ्राता धनुष्पाणिः सन् प्रव्रजन्तं रामं मया सह अन्वगच्छत् ॥१९॥

गो०टी०–स इति । मया सह अन्वगच्छदित्यन्वयः॥१९॥

रा० टी०–जटीति । धर्मनित्यो दृढव्रतः सहानुजो लक्ष्मणसहितो रामः तापसरूपेण मया सह दण्डकारण्यं प्रविष्टः ॥ २० ॥

गो० टी०–जटीति । तापसरूपस्यानेकरूपत्वाज्जटीति विशेषयति ॥ २० ॥

२१] ति० टी०–कैकेय्याः कृते तन्निमित्तम् ॥ २१ ॥

रा० टी०–ते इति । हे द्विजश्रेष्ठ ! कैकेय्याः कृते कैकेयीप्रयत्ने सति राज्यात्प्रच्युताः कोशलायाः आगताः ते त्रयो वयं गम्भीरं वनमोजसा स्ववीर्येण विचराम विचरामः यतस्त्वया इह वस्तुं शक्यमतः मुहूर्तं समाश्वस तिष्ठ ॥ २१ ॥२२॥

गो० टी०–ते वयमिति । कृते प्रयोजनाय क्रियते संपाद्यत इति कृत् संपदादित्वात् क्विप् । गम्भीरं दुष्प्रवेशम् ओजसा बलेन ' ओजो दीप्तौ बले ' इत्यमरः ॥ २१ ॥

२२] ति० टी०–यदि वस्तुं शक्यं तर्हि मुहूर्तं समाश्वस । विश्रमं कुर्वित्यर्थः ॥ २२ ॥

गो० टी०–समाश्वसेति । समाश्वस समाश्वसिहि विश्रान्तिं कुर्वित्यर्थः, वस्तुं स्थातुं शक्यं पवित्रदेशत्वादिति भावः । पुष्कलं समग्रम् ॥ २२ ॥

२३] ति० टी०–हत्वा आदायेतिच्छेदः । आदनमादस्तदर्थमित्यर्थः ॥ २३ ॥

रा० टी०–तत्प्रयोजनमाह—आगमिष्यतीति । रुरुप्रभृतीन् हत्वा संताड्य पुष्कलं संपूर्णं बह्वधिकम् आमिषं भोग्यवस्त्वादाय गृहीत्वा, आगमिष्यति एतेन तदागमनसमये ते महान् सत्कारो भवितेति ध्वनितम् ॥ २३ ॥

२४–२६] ति० टी०–गोत्रमार्षम् । कुलं प्रसिद्धवंश्यकृतम् । यद्वा गोत्रं पितृकुलम् । कुलं मातुः ॥ २४–२६ ॥

रा० टी०–स इति । सः प्रसिद्धाचरणस्त्वन्नामादि तत्त्वतः आचक्ष्व कथय । प्रभान्तरमाह—दण्डकारण्ये एकस्त्वं किमर्थं चरसि ॥ २४ ॥

गो० टी०–स त्वमिति । स त्वम् एवं समाश्वस्तस्त्वं कुलं गृहम् ' कुलमन्वयसंघातगृहपर्यायश्रमेष्वपि ' इति निघण्टुः। ननु संन्यासिनं प्रति कुलगोत्रप्रश्नोऽनुपपन्नः एकाकितयारण्ये संचारश्च यतेर्धर्म एव अतोऽसङ्गत इव प्रतिभातीति चेत् । उच्यते । पूर्वाश्रमनामगोत्रप्रश्नोऽयम् । भिक्षार्थं ग्रामं प्रविशेदिति श्रुत्या भिक्षोर्ग्रामसमीपारण्ये वस्तव्यं नतु ग्रामप्रसङ्गरहितेऽरण्य इति कथं भवान् भिक्षाप्रदजनरहितश्चरसीति प्रश्न उपपद्यते ॥ २३ ॥

रा० टी०–एवमिति । सीतायामेवं ब्रुवन्त्यां सत्यां रावणः तीव्रमुत्तरं प्रत्युवाच ॥ २५ ॥

गो० टी०–एवमिति । आत्मवैभवप्रकटनावसरप्रतीक्षकतया तीव्रं शटितीत्युक्तम् ॥ २४ ॥

रा० टी०–येनेति । येन लोकाः विभ्रासिताः सः रक्षोगणेश्वरः रावणो नामाहम् ॥ २६ ॥

गो० टी०–येनेति । लोकाः जनाः ॥ २५ ॥

२७–२९] ति० टी०–दृष्ट्वा पूर्वं श्रुत्वा । अथ दृष्ट्वा चेत्यर्थः ॥ २७–२९ ॥

---

१ जितेन्द्रिय इति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ आमिषान्बहूनिति गो. पाठः । ४ चाचक्ष्वेति गो. पाठः । ५ ब्रुवन्त्यामिति रा. पाठः । ६ पन्नगा इति गो. पाठः । ७ त्विति गो. पाठः । ८ नगेति गो. पाठः । ९ पुर्याश्रमेति भाति ।

तत्र सीते मया सार्धं वनेषु [1]विचरिष्यसि । न चास्य वैनवासस्य स्पृहयिष्यसि भामिनि ॥ ३० ॥
पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः । सीते परिचरिष्यन्ति भार्या भवसि मे यदि ॥ ३१ ॥

रा० टी०—त्वामिति । काञ्चनवर्णाभां सुवर्णवर्णभासदृशाभाविशिष्टां कौशेयवासिनीं त्वां दृष्ट्वा स्वकेषु दारेषु तदुपलक्षितपुत्रमित्रादिषु रतिं प्रीतिं नाधिगच्छामि त्वामेव निरन्तरं स्मरामीत्यर्थः, एतेन तदूपस्य सर्वलौकिकसुखविस्मारकत्वं सूचितम् ॥ २७ ॥

गो० टी०—त्वामिति । काञ्चनवर्णाभां स्वर्णवर्णतुल्यकान्तिम् ॥ २६ ॥

रा० टी०—बह्वीनामिति । इतस्ततः मम आहृतानां बह्वीनां सर्वासामुत्तमस्त्रीणाम् अग्रा उत्कृष्टा महिषी पूज्या भव ॥२८॥

गो० टी०—बह्वीनामिति । उत्तमस्त्रीणामिति निर्धारणे षष्ठी ॥ २७ ॥

रा० टी०—लङ्केति । सागरेण समुद्रेण परिक्षिप्ता परितः आवृता गिरिमूर्धनि निविष्टा संस्थापिता समुद्रस्य मध्ये लङ्का नाम या महापुरी तत्र तस्यां पुर्यां वनेषु तदारामेषु मया अर्धं संवृतं सेवितमित्यर्थः, यथा भवति तथा विचरिष्यसि अत एव सा मत्सेविता त्वमस्य वनवासस्य न स्पृहयिष्यसि वाञ्छिष्यसि । श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०—लङ्केति । समुद्रमध्ये वर्तमाने नगमूर्धनि गिरिश्टङ्गप्रदेशे निविष्टा कृतनिवेशा सागरेण सगरनिर्मितेन समुद्रेण परिक्षिप्ता परिवृता पुरी मम अस्तीति शेषः ॥ २८ ॥

३०] ति० टी०—वनेषूपवनेषु ॥ ३० ॥

गो० टी०—तत्रेति । वनेषु उद्यानेषु । अरण्यवासस्येति चतुर्थ्यर्थे षष्ठी ॥ २९ ॥

३१] ति टी०—पञ्चेत्यादि । रक्षोयोनौ तमोगुणप्रधानायां जातत्वादुद्रिक्ततमसा भगवन्मायया ज्ञानाच्छादनादेवस्फुक्तिः । सर्वथा तत्त्वज्ञो रावणः कथमेवं वदेदिति तु श्रद्धाजाड्यमेव । तत्त्वज्ञचिह्नानुपलम्भात् । सीतारामौ सर्वेश्वरावित्येतन्मात्रज्ञानं रावणस्यास्त्येवेत्यपि श्रद्धाजाड्यमेव । विष्णुपुराणादिविरोधात् । तथा चोक्तं विष्णुपुराणे—'मैत्रेय उवाच—हिरण्यकशिपुत्वे च रावणत्वे च विष्णुना । अवाप निहतो भोगानाप्यानमरैरपि ॥ न लयं तत्र तेनैव निहतः स कथं पुनः । संप्राप्तः शिशुपालत्वे सायुज्यं शाश्वते हरौ ॥ एतदिच्छाम्यहं श्रोतुं सर्वधर्मभृतां वर । कौतूहलपरेणैतत्पृष्टो मे वक्तुमर्हसि ॥ पराशर उवाच—दैत्येश्वरस्य तु वधायाखिललोकोत्पत्तिस्थितिविनाशकारिणापूर्वा तनुं गृह्णता नृसिंहरूपमाविष्कृतम् । तत्र हिरण्यकशिपोर्विष्णुरयमित्येवं न मनस्यभूत् । निरतिशयपुण्यजातसंभूतमेतत्सख्यमिति रजउद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात्ततोऽवामवधैतुकीं निरतिशयमैश्वाखिलजैलोक्याधिक्यधारिणीं दशाननत्वे भोगसंपदमवाप । नातस्तस्मिन्ननादिनिधने परब्रह्मभूते भगवत्यनालम्बनीकृते मनसस्तत्र लयम् । दशाननत्वेऽप्यनङ्कुशराधीनतया जानकीसमासक्तचेतसो दाशरथिरूपधारिणस्तद्रूपदर्शनमेवासीत् । नायमच्युत इत्यासक्तिर्विपर्यतोऽन्तःकरणस्य मानुषबुद्धिरेव केवलमभूत् । विपर्यत इति विपर्यतोऽपीत्यर्थः तस्मिन्नपि समये विष्णुत्वबुद्धिर्नासीदिति भावः पुनरच्युतविनिपातनमात्रफलमखिलभूमण्डलश्लाघ्यचेदिराजकुलजन्माप्याहतं चैश्वर्यं शिशुपालत्वे चावाप । तत्र त्वखिलान्येव भगवन्नामकारणान्यभवन् । नामानि गोविन्दादीनि कारणानि गवां रक्षणादिनीत्यर्थः । ततश्च तत्कारणकृतानां तेषामशेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्धितविद्वेषानुबन्धिचित्तो निनिन्दन्संतर्जनादिष्वारणमकरोत् । तच्च रूपमुत्कुल्लपद्मदलामलाक्षमत्युज्ज्वलपीतवस्त्रधार्यमलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशङ्खचक्रगदाधरमतिप्रौढवैराग्यभवादटनभोजनस्नानासनशयनादिष्ववस्थान्तरेषु नैवापययावस्यात्मचेतसः । ततस्तमेवाकोशेषूच्चारयंस्तमेव हृदये धारयन्नात्मवधाय भगवद्वक्त्रकांशुमालोज्ज्वलमक्षय्यतेजःस्वरूपं परमब्रह्मस्वरूपमपगतरागद्वेषादिदोषं भगवन्तमद्राक्षीत् । तावच्च भगवद्वैकेणाशु व्यापादितः । तेन तत्स्मरणदग्धाखिलाघसंचयो भगवतैवान्तसुपनीतस्तस्मिन्नेव लयमुपययौ । एतत्तवाभिहितम् । भगवानिह कीर्तितः संस्मृतश्च द्वेषानुबन्धेनाप्यखिलदुरितादिदुर्लभं फलं प्रयच्छति किमुत सम्यग्भक्तिमन्तमिति । लोकदृष्ट्या तु सीतासादृश्यात्सीताबुद्ध्या हरणाच्चाततायित्वसंपत्त्या तद्वधे भगवतः प्रवृत्तिः । एवं चेदृशोक्तीनां यद्वातद्वाप्रकारेणान्यथा योजनप्रयासस्तीर्थादीनां विफल एव । विष्णुपुराणोक्तरीत्यैव भागवत उक्तम्—'एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्' इति । एते इत्यनेन पूर्वोक्ता अवतारा ऋष्यादयश्च परामृश्यन्ते पुंसः परमेश्वरस्य । तत्रावतारा अंशा ऋष्यादयः कलाः । यद्यपि कृष्णोऽप्यंश एव । तत्रैव दशमे 'तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः' इत्यायुक्तेः । 'उज्जहारात्मनः केशौ सितकृष्णौ महाद्युते इति विष्णुपुराणाच्चुक्तेः । द्वितीये भागवतेऽप्येवमेव । भारतेऽप्येवमेव । एतेन तत्रांशेनावतीर्णस्येत्यादिदशमस्थश्लोकव्याख्यानमपास्तम् । तथापि तत्तत्कारणकृतनाम्नां तत्र लाभाद्बहुशो ज्ञानकार्यनाटनाच्च शङ्खचक्रादीनां प्रत्यक्षतो दर्शनाच्च स्वयं भगवानित्युक्तिः । नैतावता रामायवतारणां ततो न्यूनत्वमिति भ्रमः कार्यः । श्रीधरोऽपि मत्स्याद्यवतारणां सर्वज्ञत्वसर्वशक्तिमत्त्वेऽपि यावदुपयोगमेव ज्ञानशक्त्याविष्कारः । अज्ञानाविष्कारश्च बहुशः । कृष्णे त्वन्त्योऽल्पः । यथाभिमन्युमरणे नाहं तत्र संनिहित आसमतस्तस्य मरण-

१ विहरिष्यसीति गो. पाठः । २ अरण्येति गो. पाठः ।

रावणेनैवमुक्ता तु कुपिता जनकात्मजा । प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥ ३२ ॥
महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम् । महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥ ३३ ॥
सर्वलक्षणसंपन्नं न्यग्रोधपरिमण्डलम् । सत्यसंधं महाभागमहं राममनुव्रता ॥ ३४ ॥
महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् । नृसिंहं सिंहसंकाशमहं राममनुव्रता ॥ ३५ ॥
पूर्णचन्द्राननं रामं राजवत्सं जितेन्द्रियम् । पृथुकीर्तिं महाबाहुमहं राममनुव्रता ॥ ३६ ॥
त्वं पुनर्जम्बुकः सिंहीं मामिहेच्छसि दुर्लभाम् । नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥ ३७ ॥

मिति । यथा द्रौपद्याः सभायां नयनकाले नाहं द्वारकायां संनिहितः किंतु सौभवधार्थं गतोऽतो भवतामयं क्लेश इति । सौभवधे च मायिकं मृतवसुदेवशरीरं दृष्ट्वा मोह इत्याद्यज्ञाननाट्यमल्पम् । रामावतारेऽपि ज्ञानाविष्कारस्तत्र तत्र दर्शितो दर्शयिष्यते च । अवतारांशेमे विराज एवांशाः । भागवते प्रथमे तृतीयेऽध्याये—'जगृहे पौरुषं रूपं भगवान्महदादिभिः । संभूतं षोडशकलमादौ लोकसिसृक्षया ॥' इत्यादिना वैराजं रूपमुक्त्वा 'एतन्नानावताराणां निधानं बीजमव्ययम् । यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ॥' इत्युक्तेः । एतदुक्तं वैराजं निधानं कार्यावसाने प्रवेशस्थानम् । बीजमुद्गमकारणम् अव्ययं स्वयं चिरस्थायि । न केवलमवताराणामेव बीजं किं तु सर्वेषामित्याह—यस्येति । यद्यपि विराट् जीव एव तथापि तदन्तर्यामिणस्तथोपासनायैवमुक्तम् । सितकृष्णकेशोद्धारेण च तेषां मूर्धन्यत्वेन मुख्यत्वात्तद्वन्मुख्ययोः प्रधानयोर्मदंशयोस्तत्त्वज्ञयोस्तद्वर्णयोर्वैकुण्ठस्थभूतलस्थयोर्विष्णुशेषयोरवतार इति सूचितम् । अत एवान्ते कृष्णं प्रति देवदूतेन त्वां विना स्वर्गो न शोभतेऽतस्त्वमागच्छेति निवेदितमिति स्पष्टं पुराणेषु । अत्र रामं प्रत्यपि तथैवोक्तम् । अंशत्वं चैषामौपाधिकम् । मायायाः सांशत्वादित्यलम् ॥ ३१ ॥

रा० टी०—पञ्चेति । यदि त्वं भवसि लङ्कायां तिष्ठसि तर्हि हे सीते ! सर्वाभरणभूषिताः पञ्च सहस्राणि मे मम भार्यास्ते दास्यः सत्यः परिचरिष्यन्ति ॥ ३१ ॥

गो० टी०—पञ्चेति । पञ्चसहस्राणि दास्यस्त्वां परिचरिष्यन्ति ॥ ३० ॥

३२] ति० टी०—रावणेति । कुपिता कुपितेव ॥ ३२ ॥

रा० टी०—रावणेनेति । एवं रामवियोगसूचनप्रकारेण रावणेनोक्ता अनवद्याङ्गी जनकात्मजा तं राक्षसं रावणमनादृत्य प्रत्युवाच ॥ ३२ ॥

गो० टी०—रावणेनेति । तुशब्देन पूर्वोक्तोपचारवचनविलक्षणवचना ॥ ३१ ॥

३३] ति० टी०—पर्वतसमुद्रोपमाभ्यां धैर्यगाम्भीर्ये दर्शिते ॥ ३३ ॥

रा० टी०—तत्प्रतिवचनाकारमाह—महेत्यादिभिः । महागिरिं सुमेरुमिवाकम्प्यमचलस्थितिं महेन्द्रः सदृशो यस्य महोदधिं समुद्रमिवाक्षोभ्यं रामं पतिमहमनुव्रता ॥ ३३ ॥

गो० टी०—महागिरिमिति । महेन्द्रसदृशं पतिं पतित्वे स्वामित्वे महेन्द्रतुल्यमित्यर्थः । अनुव्रता अनुकूलं व्रतं यस्याः सा राममुद्दिश्यानुव्रता ॥ ३२ ॥

३४] ति० टी०—न्यग्रोधपरिमण्डलं तत्सदृशपरिणाहं तद्वत्सर्वाश्रयं च राममुद्दिश्यानुस्मरणमेव व्रतं यस्याः सा ॥ ३४ ॥

रा० टी०—सर्वेति । सर्वलक्षणसंपन्नं सर्वसल्लक्षणैर्युक्तं न्यग्रोधपरिमण्डलं न्यग्रोधस्य महावटस्येव परिमण्डलं यस्य स्वाश्रितसंतापध्वंसकमित्यर्थः, सत्यसंधं सत्या संधा प्रतिज्ञा यस्य तं महाभागं राममहमनुव्रता ॥ ३४ ॥

गो० टी०—सर्वेति । न्यग्रोधपरिमण्डलं वटवृक्षमिव महापरिणाहं यद्वा न्यग्रोधवत् बहुशाखबन्धुस्तोमं तद्वत् सर्वसमाश्रयणीयमिति वा, यद्वा 'कूपोदकं वटच्छाया युवतीनां स्तनद्वयम् । शीतकाले भवत्युष्णमुष्णकाले च शीतलम्' इत्युक्तरीत्या सर्वकालेऽपि सर्वजनानुकूलमित्यर्थः ॥ ३३ ॥

३५] ति० टी०—सिंहस्य विक्रान्तं पदक्षेपस्तद्वत्पदनिक्षेपेण सगर्वगमनशीलम् । सिंहसंकाशं पराक्रमे इति भावः । नृसिंहमित्यस्य हिरण्यकशिपुहन्तृत्वं व्यङ्ग्यम् ॥ ३५ ॥

रा० टी०—महेति । सिंहविक्रान्तगामिनं सिंहस्य विक्रान्तं गमनमिव गच्छति तच्छीलं नृसिंहं पुरुषश्रेष्ठं सिंहसंकाशं सिंहमिव दुराधर्षं राममहमनुव्रता ॥ ३५ ॥

गो० टी०—महाबाहुमिति । सिंहवद्विक्रान्तं पराक्रमयुक्तं सगर्वमिति यावत् । तथा गच्छतीति सिंहविक्रान्तगामिनं सिंहसंकाशं पराक्रमे सिंहतुल्यं नृसिंहं पुरुषश्रेष्ठम् ॥ ३४ ॥

३६] ति० टी०—राजा चासौ वत्सः 'श्रेष्ठराजस्तम्' यद्वा दशरथपुत्रम् ॥ ३६ ॥

रा० टी०—पूर्णेति । राजवत्सं राजश्रेष्ठं राजपुत्रं वा पृथुकीर्तिं महाकीर्तिमन्तं राममहमनुव्रता बहुवारमनुव्रतस्त्वोक्त्या रामवियोगस्यात्यन्तायोग्यत्वं व्यञ्जितम् ॥ ३६ ॥

गो० टी०—पूर्णेति । राजवत्सं राजकुमारम् ॥ ३५ ॥

३७] ति० टी०—यथादित्यप्रभादित्यात्पृथक्कृत्य केनापि स्प्रष्टुमशक्या, तथाहं शक्तिशक्तिमतोरवियोगादिति गूढम् ॥ ३७ ॥

रा० टी०—इदानीं त्वं ममानयनार्हो नासीति बोधय-

१ महात्मानमिति गो. पाठः । २ मामिच्छसि सुदुर्लभामिति गो. पाठः ।

पादपान्काञ्चनान्नूनं बहून्पश्यसि मन्दभाक् । राघवस्य प्रियां भार्यां यस्त्वमिच्छसि राक्षस॥ ३८ ॥
क्षुधितस्य च सिंहस्य मृगशत्रोस्तरस्विनः । आशीविषस्य वदनाद्दंष्ट्रामादातुमिच्छसि ॥ ३९ ॥
मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि । कालकूटं विषं पीत्वा स्वस्तिमान्गन्तुमिच्छसि॥ ४० ॥
अक्षि सूच्या प्रमृजसि जिह्वया [2]लेढि च क्षुरम् । राघवस्य प्रियां भार्यामधिगन्तुं त्वमिच्छसि॥ ४१ ॥
अवसज्ज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि । [3]सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि॥ ४२ ॥
यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि । अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि ॥ ४३ ॥
कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि । अयोमुखानां शूलानां [4]मध्ये चरितुमिच्छसि ॥
रामस्य सदृशीं भार्यां योऽधिगन्तुं त्वमिच्छसि ॥ ४४ ॥

यदन्तरं सिंहशृगालयोर्वने यदन्तरं [5]स्यन्दनिकासमुद्रयोः ।
सुराऽमृतयोर्वीरकयोर्यदन्तरं तदन्तरं [6]दाशरथेस्तवैव च ॥ ॥ ४५ ॥

न्त्याह–त्वमिति । जम्बुकः शृगालस्त्वं दुर्लभां सिंहीं मामिच्छसि अत आदित्यस्य प्रभेव त्वया स्प्रष्टुं रामात्पृथक्कृत्य नेतुं नाहं शक्या एतेन त्वस्या रामतेजोरूपवह्निना आवृतात्वं सूचितमत एव लक्ष्मणप्रेषणसमये अग्निं वा प्रवेक्ष्यामि अन्यं पुरुषं न स्प्रक्ष्यामीति तत्कृतप्रतिज्ञाया न हानिः ॥ ३७ ॥

गो० टी०–एवं स्वभर्तुरतिशयमुक्त्वा तस्य हीनत्वमाह–त्वमित्यादिना । त्वं तु जम्बुकः गोमायुः निगीर्योध्वस्यानं तथा सिंहीमित्यत्रापि । आदित्यस्य प्रभेव रामस्याविनाभूतां त्वया स्प्रष्टुं न शक्येत्यर्थः ॥ ३६ ॥

३८] ति० टी०–काञ्चनवृक्षदर्शनं मुमूर्षुलक्षणम् । मन्दं क्षीणमायुरादि भजति स मन्दभाक् ॥ ३८ ॥

रा० टी०–ममानयने त्वद्धेतोऽवश्यं भवितेति बोधयन्नाह–पादपानिति । यस्त्वं राघवस्य प्रियां भार्यामिच्छसि नेतुमिति शेषः, स मन्दभाक् मध्यमसेवकस्त्वं पादपान्वृक्षान्काञ्चनान्स्वर्णमयान् पश्यसि नूनं निश्चितमेतत् पादपानां काञ्चनमयत्वेन दर्शनं विनाशसूचकमिति पुराणादौ प्रसिद्धम् ॥ ३८ ॥

गो० टी०–पादपानिति । आसन्नमरणाः वृक्षान् स्वर्णमयान् पश्यन्तीति प्रसिद्धिः । मन्दभाक् मन्दभाग्यः यद्वा मन्दं क्षीणम् आयुरादिकम् भजतीति मन्दभाक् मदभिलाषयुक्तस्त्वं सद्यो मरिष्यसीति भावः ॥ ३७ ॥

३९–४०] ति० टी०–क्षुधितस्य सिंहस्य सर्पस्य वदनाद्दंष्ट्राग्रहणेच्छासदृशी मदिच्छा । एषु सर्वत्र निदर्शनालंकारः ॥ ३९ ॥ ४० ॥

रा० टी०–क्षुधितस्येति । यस्त्वं राघवस्य भार्यामधिगन्तुं नेतुमिच्छसि स त्वं तरस्विनः अतिवेगवतः क्षुधितस्य मृगशत्रोः सिंहस्य आशीविषस्य अतिविषवत्कृष्णसर्पविशेषस्य च दंष्ट्रामादातुमिच्छसि अत्र रामस्य सिंहसर्पैक्यारोपात् दंष्ट्रायां च सीतयैक्यारोपात् निदर्शनालंकारः एवमुत्तरत्रापि यथासंभवमूह्यम् । पर्वतश्रेष्ठं मन्दरं पाणिना हर्तुमिच्छसि कालकूटं विषं पीत्वा स्वस्तिमान् कल्याणवान् सन् गन्तुमिच्छसि सूच्या अक्षि स्वनयनं प्रमृजसि जिह्वया क्षुरं क्षुरधारां लेढि । श्लोकत्रयमेकान्वयि ॥ ३९–४१ ॥

गो० टी०–क्षुधितस्येति । सर्वात्मना आदानस्याशक्यस्वज्ञापनाय विशेषणानि । आशीविषस्य सर्पस्य चकारो द्रष्टव्यः क्षुधितस्य तरस्विन इति चाशीविषस्यापि विशेषणम् । अत्र सदृशयोर्वाक्यार्थयोरैक्यारोपान्निदर्शनालंकारः ॥ ३८ ॥

गो० टी०–मन्दरमिति । अत्रापि राघवस्य भार्यां यस्त्वमिच्छसीत्यनुषज्यते । स्वस्तिमान् सुखित इत्यर्थः ॥३९॥

४१–४४] ति० टी०–लेढि लेक्षि ॥ ४१ ॥ ४४ ॥

गो० टी०–अक्षीति । स्वाक्षि प्रमृजसि प्रकर्षेण मार्जनं करोषि लेक्षि लेहनं करोषि लिह आस्वादन इत्यस्माद्धुञ्विकरणस्याद्धातोर्लेटि मध्यमपुरुषैकवचनम् । क्षुरं तीक्ष्णधारं शस्त्रम् अधिगन्तुं प्राप्तुम् ॥ ४० ॥

रा० टी०–अवेति । यस्त्वं रामस्य प्रियां भार्यां प्रधर्षयितुं प्रागलभ्यान्नेतुमिच्छसि स त्वं कण्ठे शिलामवसज्य बद्ध्वा समुद्रं तर्तुमिच्छसि उभौ सूर्याचन्द्रमसौ पाणिभ्यां हर्तुमिच्छसि । सार्धश्लोक एकान्वयी ॥ ४२ ॥

गो० टी०–अवसज्येति । सार्धश्लोक एकान्वयः । अवसज्य बद्ध्वा ॥ ४२ ॥

रा० टी०–अग्निमिति । रामस्य भार्यामधिगतुं नेतुं यस्त्वमिच्छसि स त्वं प्रज्वलितमग्निं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि अयोमुखानां लोहमयतीक्ष्णाग्रभागानां शूलानां मध्ये चरितुं गन्तुमिच्छसि ॥ ४३ ॥ ४४ ॥

गो० टी०–अग्निमिति । कल्याणवृत्तां शुभाचाराम्॥४३॥

गो० टी०–अयोमुखानामिति । अयोमुखानाम् अयोमयाग्राणां शूलानामग्रे शूलाग्रपट्टिषु संचरितुमिच्छसीत्यर्थः४४

४५] ति० टी०–स्यन्दनिका क्षुद्रनदी । सुराऽमृतम् । सौवीरकमारनालं काञ्जिकम् ॥ ४५ ॥

---

१ रावणेति गो. पाठः । २ लेक्षीति गो पाठः । ३ योऽधीति गो. पाठः । ४ सूर्यचन्द्रमसाविति रा. पाठः । ५ अर्धमेतत् रा. नास्ति । ६ अत्र इति गो. पाठः । ७ स्यन्दिनिकेति गो. पाठः । ८ वै तव राघवस्य चेति गो. पाठः ।

यदन्तरं काञ्चनसीसलोहयोर्यदन्तरं चन्दनवारिपङ्कयोः ।
यदन्तरं हस्तिबिडालयोर्वने तदन्तरं दाशरथेस्तवैव च ॥ ॥ ४६ ॥
यदन्तरं वायसवैनतेययोर्यदन्तरं मद्गुमयूरयोरपि ।
यदन्तरं [1]हंसकगृध्रयोर्वने तदन्तरं दाशरथेस्तवैव च ॥ ॥ ४७ ॥
तस्मिन्सहस्राक्षसमप्रभावे रामे स्थिते कार्मुकबाणपाणौ ।
हृतापि तेऽहं न जरां गमिष्ये [2]आज्यं यथा मक्षिकयावगीर्णम् ॥ ॥ ४८ ॥
इतीव तद्वाक्यमदुष्टभावा [3]सुदुष्टंमुक्त्वा रजनीचरं तम् ।
गात्रप्रकम्पाद्व्यथिता बभूव वातोद्धता सा कदलीव तन्वी ॥ ॥ ४९ ॥
तां वेपमानामुपलक्ष्य सीतां स रावणो मृत्युसमप्रभावः ।
कुलं बलं नाम च कर्म चात्मनः समाचचक्षे भयकारणार्थम् ॥ ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०—ननु ममापि रामसदृशत्वात् कथं मद्विनाशं ब्रूषे इत्यत आह—यदित्यादिभिः । सिंहशृगालयोर्यदन्तरं तत्तन्निरूपितोत्तमाधमत्वयोरन्तरालमित्यर्थः, स्पन्दनिका क्षुद्रनदी सरा अद्या पूर्वमुत्पन्ना यस्मात् अमृतमित्यर्थः, सौवीरमारनालं काञ्जिकमित्यर्थः ॥ ४६ ॥

गो० टी०—उक्तं रामोत्कृष्टत्वं रावणनिकृष्टत्वं च सदृष्टान्तमाह—यदन्तरमित्यादिना । सिंहशृगालयोः 'शृगालो वञ्चकः क्रोष्टा' इत्यमरः। यत् अन्तरं भेदः तारतम्यमिति यावत् 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबाहिरवसरमध्येऽन्तरात्मनि च, इत्यमरः। वने जले विषये 'जीवनं भुवनं वनम्' इत्यमरः । स्यन्दिनिका स्यन्दितुम् प्रस्रवितुं शीलमस्या अस्तीति स्यन्दिनिका । ताच्छील्ये णिनिः अल्पार्थे कप्रत्ययः "केऽणः" इति ह्रस्वः क्षुद्रनदी स्यन्दिनिका सुराऽद्य श्रेष्ठमद्यं सौवीरकं काञ्जिकम् । 'आरनालकसौवीरकुल्माषाभिषुतानि च । अवन्तीसोमधान्याम्लकुञ्जलानि च काञ्जिकम्' इत्यमरः॥ ४६ ॥

४६] ति० टी०—काञ्चनसीसरूपलोहयोरित्यर्थः । हस्ती गजः । बिडालो मार्जारः ॥ ४६ ॥

रा० टी०—यदिति । काञ्चनं सुवर्णं शीस एव लोहः लोहशब्दस्य धातुसामान्यपरत्वात्सामान्यविशेषयोरभेदः ॥४६॥

गो० टी०—यदिति । काञ्चनसीसलोहयोरित्यत्र लोहशब्दः प्रत्येकमभिसंबध्यते काञ्चनस्यापि नवलोहेषु परिगणनात् । चन्दनवारि चन्दनपङ्कः बिडालो मार्जारः ॥ ४६ ॥

४७] ति० टी०—मद्गुर्जलकाकः ॥ ४७ ॥

रा० टी०—यदिति । वायसः काकः, वैनतेयो गरुडः, मद्गुर्जलकाकः ॥ ४७ ॥

रा० टी०—यदिति । हंसको राजहंसः । अर्धं पृथक्—तस्मिन्निति । तस्मिन्महान्तरालवति सहस्राक्षसमप्रभावे कार्मुकबाणपाणौ रामे स्थिते सति ते हृताप्यहं मक्षिकयाऽवगीर्णं भक्षितमाज्यमिव जरां जीर्णत्वं न गमिष्ये शीघ्रमेव रामो मामानेतेत्यर्थः ॥ ४८ ॥

गो० टी०—यदन्तरमिति । मद्गुः जलवायसः, सारसो हंसविशेषः ॥ ४७ ॥

४८] ति० टी०—जरां जीर्णावस्थां सुस्नोदर्काम् । मक्षिकयाऽवगीर्णं भुक्तभाज्यं यथा तां नाशयति तद्वत् ॥ ४८ ॥

गो० टी०—तस्मिन्निति । तस्मिन् रामे स्थिते सति जरां जीर्णतां मक्षिकया अवगीर्णं ग्रस्तं वज्रम् हीररत्नं मक्षिकया तण्डुलखण्डभ्रान्त्या ग्रस्तं हीररत्नमित्यर्थः । यथा न जीर्णं भवति, यद्वा मक्षिकया सहावगीर्णं भुक्तं वज्रम् आज्यम् "वज्रो वा आज्यम्" इति श्रुतेः यथा न जीर्णं भवतीत्यर्थः, तथा अहं त्वया हृतापि ते जीर्णतां न गमिष्ये न गमिष्यामि प्रत्युत सद्यैव मरणं प्रापयिष्यामीत्यर्थः ॥ ४८ ॥

४९] ति० टी०—इतीवेत्येवम् । सुदुष्टमत्यन्तदुःखजनकं तत्पूर्वोक्तं वाक्यम् । वातोद्धता महावातप्रकम्प्यमाना ॥ ४९ ॥

रा० टी०—इतीवेति । इतीव एवंरूपं वाक्यं सुदुष्टं रजनीचरं तं रावणमुक्त्वा अदुष्टभावा सा सीता गात्रप्रकम्पाद्धेतोः वातोद्धता कदली इव व्यथिता बभूव कदल्युपमया तस्य न वास्तवं दुःखमिति ध्वनितम् ॥ ४९ ॥

गो० टी०—इतीति । इतीव उक्तप्रकारसदृशं तद्वाक्यं सुदुष्टं यथा तथा उक्त्वा सा सीता वातोद्धता वाताहता कदलीव गात्रप्रकम्पव्यथिता शरीरकम्पेन पीडिता बभूव ॥ ४९ ॥

५०] ति० टी०—भयकारणार्थं भयोत्पादनार्थम् ॥ ५० ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०—तामिति । मृत्युसमप्रभावः स रावणः वेप-

---

१ सारसेति गो. पाठः । २ वज्रमिति गो. पाठः । ३ धृष्टमिति पाठः । ४ प्रकम्पव्यथितेति गो. पाठः । ५ च स्वमिति गो. पाठः ।

अष्टचत्वारिंशः सर्गः ।

सीतया निन्दितो रावणः पुनः स्वकुलसपत्नशंसापूर्वकं रामे दोषमारोप्य स्वाङ्गीकारं प्रार्थयते । प्राप्तक्रोधा सीता तं विनिन्द्य एवं बुद्धिस्ते विनाशहेतुरतश्चेत्पीतामृतोऽपि समूलं विनङ्क्ष्यसीत्याक्रोशति ।

एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः । ललाटे भ्रुकुटिं कृत्वा रावणः प्रत्युवाच ह ॥ १ ॥
भ्राता वैश्रवणस्याहं सापत्नो वरवर्णिनि । रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ २ ॥
यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः । विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः ॥ ३ ॥
येन वैश्रवणो भ्राता वैमात्राः कारणान्तरे । द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥ ४ ॥
मैद्र्यार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत् । कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥ ५ ॥
यस्य तत्पुष्पकं नाम विमानं कामगं शुभम् । वीर्यादावर्जितं भद्रे येन यामि विहायसम् ॥ ६ ॥
मम संजातरोषस्य मुखं दृष्ट्वैव मैथिलि । विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः ॥ ७ ॥

मानां तां सीतामुपलभ्य भयकारणार्थं सीतायां स्वापादानकभीत्युत्पत्त्यर्थम् आत्मनः कुलादि समाचचक्षे ॥ ६० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

गो० टी०-तामिति । वेपमानां कम्पमानाम् उपलक्ष्य तत्कम्पेन तद्भयमुपलक्ष्य भूयो भयजननेन एषा स्ववशीकर्तुं शक्येति मत्वा भयकारणार्थं भयोत्पादनार्थं स्वं स्वकीयं कुलादिकमाचचक्षे कर्म पौरुषम् ॥ ६० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥४७॥

१] ति० टी०-एवमिति । परुषम् क्रोधावेशेन वर्णानां चर्वणेनैवोच्चारणाच्छ्रुतिकटुत्वरमित्यर्थः । संरब्धः कुद्धः ॥ १ ॥

रा० टी०-सीतावचनश्रवणानन्तरकालिकं रावणोक्तिमुपक्रमते-एवमिति । सीतायामेवं ब्रुवन्त्यां सत्यां संरब्धः संकुद्धः रावणः भ्रुकुटीं ललाटे कृत्वा प्रत्युवाच ' संरम्भः संभमः कोपः ' इति विश्वः ॥ १ ॥

गो० टी०-एवं ब्रुवन्तीं सीतां रावणो भर्त्सयति-एवमित्यादिना । संरब्धः कुपितः संभ्रमाविष्टो वा ॥ १ ॥

२-३] ति० टी०-सापत्नः शिवाद्यण् । 'सापत्ने' इति पाठे मातृसपत्नीपुत्रत्वे प्रसिद्ध इत्यर्थः । भ्रातेत्यत्र च ' साक्षात् ' इति तदा पाठः । एतेन कुलप्राशस्त्यमुक्तम् ॥ २ ॥ ३ ॥

रा० टी०-तत्प्रतिवचनाकारमाह-भ्रातेति । वरवर्णिनि हे उत्तमवर्णविशिष्टे ! यस्य भयात् मृत्योर्भीताः प्रजा इव देवादयो विद्रवन्ति येन च कारणान्तरे कस्मिंश्चित्कारणे सति द्वन्द्वं द्वन्द्वयुद्धम् आसादितः प्रापितः वैमात्रः विमातृपुत्रः वैश्रवणो भ्राता रणे क्रोधाद्विक्रम्य विक्रमं प्रकटय्य निर्जितः स वैश्रवणस्य कुबेरस्य सापत्न्यः मातृसपत्नीपुत्रः प्रतापवान् दशग्रीवः रावणो नाम भ्राताहमस्मीति शेषः, सापत्न्यशब्दः सपत्नीशब्दप्रकृतिकशिवाद्यणन्तप्रकृतिकस्वार्थष्यञन्तः ' द्वैमात्रः ' इति पाठे द्वितीयाया मातुरपत्यमित्यर्थः । मातुरुदित्युत्वाभाव आर्ष इति भट्टाः । श्लोकत्रयमेकान्वयि ॥ २-४ ॥

गो० टी०-भ्रातेति । वैश्रवणस्य सपत्न्या मातुरपत्यं पुमान् सापत्नः सापत्न एव सापत्न्यः स्वार्थे ष्यञ् ॥ २ ॥

गो० टी०-यस्येति । यस्य संबन्धिनो भयात् देवादयः मृत्योर्भीताः प्रजा इव विद्रवन्ति ॥ ३ ॥

४] ति० टी०-वैमात्रः प्राग्वत् । ' द्वैमात्रः ' इति पाठे द्वितीया माता द्विमाता । तदपत्यमित्यर्थे 'मातुरुत्' इत्युत्वाभाव आर्षः । अस्य द्विशब्दस्य द्विपूरणार्थत्वेऽपि संख्यार्थत्वाभावान्नोत्वमित्यन्ये । कारणान्तरे निमित्तविशेषे । द्वन्द्वं द्वन्द्वयुद्धम् आसादितः प्रापितः ॥ ४ ॥

गो० टी०-येनेति । द्वयोर्मात्रोरपत्यं द्वैमात्रः सपत्नीमातृपुत्र इत्यर्थः । कारणान्तरे कस्मिंश्चित् कारणावकाशे द्वन्द्वं युद्धम् ' द्वन्द्वं कलहयुग्मयोः ' इत्यमरः ॥ ४ ॥

५] ति० टी०-स्वमधिष्ठानं स्वां पुरीं लङ्काम् । कैलासाश्रयणं प्रबलाश्रयणमुक्त्या ॥ ५ ॥

रा० टी०-मैद्र्यार्तः । येन विहायसमाकाशं यामि तत् यस्य तत्संबन्धि पुष्पकं वीर्यात् स्वपराक्रमात् आवर्जितं गृहीतं सः मद्भयार्तो नरवाहनः कुबेरः ऋद्धिमत् सकलसंपत्तिविशिष्टं स्वं स्वकीयमधिष्ठानं लङ्कामित्यर्थः, परित्यज्य पर्वतश्रेष्ठं कैलासमध्यास्ते । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०-यदिति । स्वमधिष्ठानं स्वां पुरीं कैलासमध्यास्ते प्रबलावष्टम्भार्थमिति भावः । " अधिशीङ्स्थासां कर्म " इत्यधिकरणस्य कर्मसंज्ञा । नरवाहनः कुबेरः ॥ ५ ॥

६-७] ति० टी०-येन पुष्पकेण । वीर्यादावर्जितमाच्छिद्य गृहीतम् । मयेति शेषः ॥ ६ ॥ ७ ॥

गो० टी०-यस्येति । तत् प्रसिद्धं कामेन गच्छतीति

१ ब्रुवन्त्यामिति गो. रा. पाठः । २ सापत्न्य इति गो. रा. पाठः । ३ भयादिति गो. पाठः । ४ राज्ञ द्वैमात्र इति गो. वैमात्र इति रा. पाठः । ५ यदिति गो. पाठः । ६ ण्वार्जितमिति गो. पाठः ।

यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः । तीव्रांशुः शिशिरांशुश्च भयात्संपद्यते [1]दिवि ॥ ८ ॥
निष्कम्पपत्रास्तरवो नद्यश्च स्तिमितोदकाः । भवन्ति यत्र तत्राहं तिष्ठामि [2]च चरामि च ॥ ९ ॥
मम पारे समुद्रस्य लङ्का नाम पुरी शुभा । संपूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती ॥ १० ॥
प्राकारेण परिक्षिप्ता पाण्डुरेण विराजिता । हेमकक्ष्या पुरी रम्या वैदूर्यमयतोरणा ॥ ११ ॥
हस्त्यश्वरथसंबाधा तूर्यनादविनादिता । सर्वकामफलैर्वृक्षैः संकुलोद्यानभूषिता ॥ १२ ॥
तत्र त्वं वस [3]हे सीते राजपुत्रि मया सह । न स्मरिष्यसि नारीणां मानुषीणां मनस्विनि ॥ १३ ॥
भुञ्जाना मानुषान्भोगान्दिव्यांश्च वरवर्णिनि । न स्मरिष्यसि रामस्य मानुषस्य गतायुषः ॥ १४ ॥

कामगम् अधिष्ठातृकामानुरूपं गच्छतीत्यर्थः, येन पुष्पकेण विहायसम् आकाशम् एतादृशविशेषणविशिष्टो यो रावणो नाम रावण इति प्रसिद्धः सोऽहमिति पूर्वेणान्वयः ॥ ६ ॥

रा० टी०–ममेति । हे मैथिलि ! संजातरोषस्य मम मुखं दृष्ट्वैव परित्रस्ताः शक्रपुरोगमाः सुराः विद्रवन्ति ॥ ७ ॥

गो० टी०–ममेति । विद्रवन्ति विद्रवेयुः ॥ ७ ॥

८] ति० टी०–तीव्रांशुरपि मम भयाच्छिशिरांशुः संपद्यते ॥ ८ ॥

रा० टी०–यत्रेति । यत्राहं तिष्ठामि तत्र मारुतः शङ्कितः सन् वाति तीव्रांशुः भयात् भीतेः शिशिरांशुः शीतकिरणः संपद्यते भवति ॥ ८ ॥

गो० टी०–यत्रेति । यत्र देशे तीव्रांशुश्च तीक्ष्णांशुरपि रविः मद्भयात् शिशिरांशुः शीतलांशुः संपद्यते ॥ ८ ॥

९] ति० टी०–यत्र चरामि येन मार्गेण गच्छामीति यावत् । यत्र च तिष्ठामि तत्र भवन्तीत्यन्वयः ॥ ९ ॥

रा० टी०–निष्कम्पेति । यत्राहं तिष्ठामि चरामि वा तत्र तरवो वृक्षाः निष्कम्पपत्राः नद्यश्च स्तिमितोदका भवन्ति । एकश्चो वार्थे ॥ ९ ॥

गो० टी०–निष्कम्पेति । पत्राण्यपि न चलन्तीत्यर्थः ॥९॥

१०] ति० टी०–समुद्रस्य पारे मम लङ्का नाम पुरीत्यन्वयः ॥ १० ॥

रा० टी०–ममेति । घोरैः राक्षसैः संपूर्णा समुद्रस्य पारे इन्द्रस्यामरावतीव शुभा लङ्का नाम मम पुरी अस्तीति शेषः ॥ १० ॥

गो० टी०–ममेति । पारे पारसदृशे त्रिकूटे समुद्रस्य मध्य इति पूर्वमुक्तत्वात् यथेन्द्रस्यामरावती तथा मम लङ्का पुरी असाधारणेत्यर्थः, अस्तीति शेषः ॥ १० ॥

११–१२] ति० टी०–प्राकारस्य पाण्डुरत्वं सुधालेपादाजतत्वाद्वा । हेम्नः कक्ष्या अवच्छदा यस्यां सा । तोरणं पुरद्वारम् ॥ ११ ॥ १२ ॥

रा० टी०–पुरीमेव वर्णयन्नाह–प्राकारेणेति । पाण्डुरेण राजतत्वात् पाण्डुरवर्णविशिष्टेन प्राकारेण परिक्षिप्ता अत एव विराजिता विशेषेण शोभिता हेमकक्ष्या स्वर्णमयहर्म्यादिप्रकोष्ठविशिष्टा वैदूर्यमयानि तोरणानि बहिर्द्वाराणि यस्यां सा 'कक्ष्या बृहतिकायां स्यात्काञ्च्यां मध्येभबन्धने । हर्म्यादीनां प्रकोष्ठे च कार्यं हेतौ प्रयोजने' इति मेदिनी 'तोरणोऽस्त्री बहिर्द्वारं' इत्यमरः । हस्त्यश्वरथसंबाधा हस्त्यादिभिः पूर्णा सर्वकालफलैः सर्वेषु कालेषु फलन्ति तैः वृक्षैः संकुलानि व्याप्तान्येवोद्यानानि तैर्भूषिता मया सर्वलक्ष्म्या सह सहिता या पुरी लङ्का तत्र वसती वसन्ती त्वं मानुषीणां नारीणां न स्मरिष्यसि "अधीगर्थ–" इति षष्ठी । आगमशास्त्रस्यानित्यत्वात् नुमभावः । श्लोकत्रयमेकान्वयि ॥ ११–१३ ॥

गो० टी०–लङ्कां वर्णयति–प्राकारेणेति । रजतमयत्वात् पाण्डुरेण हेममय्यः कक्ष्यायाः हर्म्यौद्गमादयो यस्याः सा । 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' इत्यमरः । तोरणो बहिर्द्वारं संबाधा संकुला तूर्यनादेन वाद्यशब्देन विनादिता । सर्वः कालो येषां तानि सर्वकालानि सर्वकालसंभवानीत्यर्थः, तादृशानि फलानि येषां तैः सर्वकालफलैः संकुलोद्यानैः व्याप्तोद्यानैः शोभिता एतादृशी सा पुरी रम्येत्यन्वयः॥११॥१२॥

१३] ति० टी०–मानुषीणां नारीणां न स्मरिष्यसि । शेषे षष्ठी । मन्नगरे दिव्यनारीसमागमादिति भावः । युगपन्मानुषदिव्यभोगस्तत्रान्यत्र तूभयं युगपदुर्लभमिति भावः ॥ १३ ॥

गो० टी०–तत्रेति । वसती वसन्ती अनित्यमागमशास्त्रमिति नुमभावः । नारीणामिति "अधीगर्थ–" इति षष्ठी । मनस्विनी तत्समासक्तेत्यर्थः ॥ १३ ॥

१४] ति० टी०–गतायुष एकादशसहस्रसंख्यया मिता युषः । खरादिवधजक्रोधेन मया वधाद्धा तस्वम् ॥ १४ ॥

रा० टी०–भुञ्जानेति । हे वरवर्णिनि ! मानुषान् दिव्यांश्च भोगान् भुञ्जाना त्वं गतायुषः त्वद्वियोगदुःखेन निष्टप्तान्यत्रप्रीतेः मानुषस्य रामस्य त्वं न स्मरिष्यसि षष्ठी पूर्ववत् ॥ १४ ॥

गो० टी०–भुञ्जानेति । मानुषान् मनुष्यलोकसंभवान् दिव्यान् स्वर्गसंभवान् गतायुषः गतप्रायायुषः अल्पायुष

---

१ रविरिति गो. पाठः । २ यत्रेति गो. पाठः । ३ तीति गो. पाठः । ४ शोभितेति गो. पाठः । ५ वसतीति गो. रा. पाठः ।

स्थापयित्वा प्रियं पुत्रं राज्ये दशरथो नृपः । मन्दवीर्यस्ततो ज्येष्ठः सुतः प्रस्थापितो वनम् ॥ १५ ॥
तेन किं भ्रष्टराज्येन रामेण गतचेतसा । करिष्यसि विशालाक्षि तापसेन तपस्विना ॥ १६ ॥
रक्ष राक्षसभर्तारं कामय स्वयमागतम् । न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि ॥ १७ ॥
प्रत्याख्याय हि मां भीरु पश्चात्तापं गमिष्यसि । चरणेनाभिहत्येव पुरूरवसमुर्वशी ॥ १८ ॥
अङ्गुल्या न समो रामो मम युद्धे स मानुषः । तव भाग्येन संप्राप्तं भजस्व वरवर्णिनि ॥ १९ ॥
एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना । अब्रवीत्परुषं वाक्यं रहिते राक्षसाधिपम् ॥ २० ॥
कथं वैश्रवणं देवं सर्वदेवनमस्कृतम् । भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि ॥ २१ ॥

इत्यर्थः । अनेन भुञ्जाना मानुषान् भोगानिति पूर्वं सीतोक्तस्य परिहार उक्तः ॥ १४ ॥

१५] ति० टी०—यो रामो मन्दवीर्य इति ज्ञात्वा ज्येष्ठोऽपि राज्ये प्रियं भरतं स्थापयित्वा वनं प्रस्थापितः ॥ १५ ॥

१६] ति० टी०—तेन गतचेतसा किं करिष्यसीत्यन्वयः । भ्रष्टराज्यत्वाच्चेतोहीनत्वम् । तापसेन तपस्विना तापसश्रेष्ठतपस्विना । यद्वा तापसेन शोच्यत्वेन । तपस्विनाऽऽदरेण ॥ १६ ॥

रा० टी०—रामप्रीतिमपाकुर्वन्नाह—स्थापयित्वेति । प्रियं पुत्रं भरतं राज्ये स्थापयित्वा ततः राज्यप्रयोजनाभावाद्धेतोः मन्दवीर्यः अल्पवीर्यत्वेन राज्यानर्ह इत्यर्थः, ज्येष्ठः सुतो यो रामः वनं प्रस्थापितः तेन भ्रष्टराज्येन अत एव गतचेतसा तापसेन तपोनिरतेन तपस्विना नित्यं विचारपरेण रामेण किं करिष्यसि । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०—अथ रामस्य स्वापेक्षया उक्तमतिशयं प्रतिवक्ति—स्थापयित्वेत्यादिना । श्लोकद्वयमेकान्वयम् । प्रियं पुत्रं भरतं राज्ये स्थापयित्वा ततो राज्यात् प्रव्राजितः । ज्येष्ठत्वेऽपि प्रव्राजनान्मन्दवीर्यत्वं सिद्धमित्याह—तेनेति । तेन मन्दवीर्येण गतचेतसा कर्तव्याकर्तव्यमूढमनसा तापसेन 'भग्ना कृषेर्भागवता भवन्ति' इति न्यायेन । अशरेण तपस्विना शोच्येन ' तपस्वी तापसः शोच्यः ' इति विश्वः । अनेन इतः परं राज्यं साधयिष्यतीत्याशा न कर्तव्येत्युक्तम् ॥ १५ ॥ १६ ॥

१७] ति० टी०—'रक्ष रक्षणे' रक्ष पालय ॥ १७ ॥

रा० टी०—रक्षेति । राक्षसभर्तारं मां रक्ष पालय मन्मथशराविष्टं रिपुमदध्वंसकशरैः आविष्टं पूर्णं पराजेतुमशक्यमित्यर्थः, कामात् स्वेच्छया स्वयमिहागतं मां प्रत्याख्यातुं त्वं नार्हसि 'सर्वराक्षस' इति तीर्थपाठः ॥ १७ ॥

गो० टी०—सर्वेति । सर्वराक्षसभर्तारं त्वया प्रार्थनीयमित्यर्थः । स्वयं कामात् अर्थितया इहागतं प्रत्याख्यातुं निराकर्तुं स्वयमागमने हेतुर्मन्मथेति ॥ १७ ॥

१८] ति० टी०—उर्वशी पुरूरवसं चरणेनाभिहत्य यथा पश्चात्तापं गतेति पुराणेषु प्रसिद्धम् । तथा पश्चात्तापं गमिष्यसि ॥ १८ ॥

रा० टी०—प्रतीति । हे भीरु! मा प्रत्याख्याय मत्प्रार्थितमनादृत्येत्यर्थः, त्वं पश्चात्तापं गमिष्यसि ॥ १८ ॥

गो० टी०—प्रत्याख्यानफलमाह—प्रत्याख्यायेति । भीरु इत्यनेन रामात् भीतिः प्रत्याख्यानमूलमिति मम मन इति ध्वन्यते । परितापं पश्चात्तापम् । पुरूरवसं राजानं चरणेनाभिहत्य उर्वशीव । ऊरून् महतो वशीकरोतीत्युर्वशी वश कान्तौ पृषोदरादित्वादुकारलोपः । गौरादित्वात् ङीप् । एवं ह्रस्वादिस्तालव्यान्तश्च । तथाच माघयमकम् 'दधत्पुरोजद्वयमुर्ववशीतलं भुवो गतेव स्वयमुर्ववशी तलम् ' इति । नारायणस्य ऊरौ वसतीति व्युत्पत्तावपि पृषोदरादित्वाद्वर्णलोपादिना ह्रस्वादिस्तालव्यान्त एव च युक्तः । उर्वशी किल स्वयमेव प्रार्थयन्तं पुरूरवसं प्रथमं निरस्य पश्चात्तापेन पुनस्तमागतेति पौराणिकी कथा ॥ १८ ॥

१९-२०] ति० टी०—अङ्गुल्या न समोऽङ्गुलीबलेनापि तुल्यो न । अनेन मया नीतां पुना राम आनयिष्यतीति न शङ्क्यमिति भावः । संप्राप्तम् मामिति शेषः ॥ १९ ॥ २० ॥

रा० टी०—नन्वद्य मदपहरणे रामस्त्वां हनिष्यतीत्यत आह—अङ्गुल्येति । सः प्रसिद्धो मानुषो रामः युद्धे ममाङ्गुल्या न समः अतः तव भाग्येन त्वत्सेवार्थं संप्राप्तं मां भज स्वसेवकोचितप्रीतिं कुरु भाग्यशब्दस्तु सेवार्थकभजधातुप्रकृतिकघञन्तप्रकृतिकस्वार्थष्यञन्तः ॥ १९ ॥

गो० टी०—अङ्गुल्येति । अङ्गुल्या अङ्गुलिबलेन न समः न समबलः । संप्राप्तं मामिति शेषः ॥ १९ ॥

रा० टी०—एवमिति । एवमुक्ता रावणेन कथिता अत एव क्रुद्धा अत एव संरक्तलोचना रहिते सज्जनशून्यदेशे वियमाना वैदेही राक्षसाधिपं परुषं वाक्यमब्रवीत् ॥ २० ॥

गो० टी०—एवमिति । संरक्तेति कोपातिशयो द्योत्यते । रहिते निर्जने वने रागं विविक्ता इति वर्धयन्तीरिति रागजननौचित्येऽपि परुषमब्रवीत् । हन्त सीतायाः पातिव्रत्यमेतादृशं ऋषिर्विस्मयते ॥ २० ॥

२१] ति० टी०—रहिते रामरहिते आश्रमे स्थितेति शेषः । ईदृशवंश्यस्येदृशं कृत्यमनुचितमिति मिथ्यैवान्यवंशं स्ववंशत्वेन कथयसीति व्यङ्ग्यम् ॥ २१ ॥

---

१ राज्ञा दशरथेन य इति गो. रा. पाठः । २ ह्ययमिति गो. पाठः । ३ सर्वेति गो. पाठः । ४ कामात्स्वयमिहागतमिति गो. रा. पाठः । ५ परितापमिति गो. पाठः । ६ सर्वभूतेति गो. पाठः ।

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः । येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ २२ ॥
अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् । नेहि रामस्य भार्यां मामानीय स्वस्तिमान्भवेत्॥ २३ ॥
जीवेच्चिरं वज्रधरस्य पौश्चच्छचीं प्रधृष्यामतिरूपरूपाम् ।
न मादृशीं राक्षस धर्षयित्वा पीतामृतस्यापि तवास्ति मोक्षः ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ।

भिक्षुवेषपरित्यागपूर्वं धृतनिजरूपो रावणः सान्त्वोक्त्या सीतां परिगृह्य रथे निवेशयँल्लङ्का प्रतस्थे । गिरिनगनदीप्रभृतीन्स्वहरणवृत्तं रामाय निवेदयितुमाकन्य प्रार्थयन्माना सीताऽध्वनि प्राप्त जटायुषमुच्चैराकुश्य स्ववृत्तं रामाय निवेदयितु प्रार्थयते ।

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान् । हस्ते हस्तं समाहन्य चकार सुमहद्वपुः ॥ १ ॥

रा० टी०—तद्वचनाकारमाह-कथमित्यादिभिः । सर्वदेवनमस्कृतं देवं वैश्रवणं कुबेरं भ्रातरं स्वनिरूपितभ्रातृत्वविशिष्टं व्यपदिश्य उक्त्वा अशुभमपहरणरूपामङ्गलकारकं कर्म कथं कर्तुमिच्छसि ॥ २१ ॥

गो० टी०—कथमिति । पुण्यात्मनः कुबेरस्य भ्राता सन् कथं पापकर्मणि प्रवर्तस इत्यर्थः ॥ २१ ॥

२२-२३] ति० टी०—एवंभूतस्य राज्ञः प्रजानां सर्वथा नाशः । मम नयने सर्वजीवितच्छेद एवेति भावः ॥ २२ ॥२३ ॥

रा० टी०—अमङ्गलमेवाह-अवश्यमिति । हे रावण! कर्कशः परुषवाक् दुर्बुद्धिः दुष्टचित्तः अजितेन्द्रियस्त्वं येषां राक्षसानां राजा ते सर्वे राक्षसाः अवश्यं विनशिष्यन्ति विनङ्क्ष्यन्ति ॥ २२ ॥

गो० टी०—अवश्यमिति । कर्कशः क्रूरः ॥ २२ ॥

रा० टी०—दुर्बुद्धित्वज्ञापकं लिङ्गमाह-अपहृत्येति । इन्द्रस्य शचीं भार्यामपहृत्य जीवितुं शक्यं मामानीय तु स्वस्तिमान्न भवेत् ॥ २३ ॥

गो० टी०—अपहृत्येति । अपनीय स्थितस्य तवेति शेषः ॥ २३ ॥

२४] ति० टी०—अप्रतिरूपरूपामनुपमसौन्दर्याम् । मोक्षः मृत्योरिति शेषः । अतिमलिनान्तःकरणत्वान्मोक्षो ज्ञानैकप्राप्यस्तव नास्त्येवेति भावः ॥ २४ ॥

२५] ति० टी०—अत्र सर्गे रावणोक्तौ—'सप्तसप्तकवेत्ताहमष्टाष्टकविभूषितः। पञ्चपञ्चकतत्त्वज्ञो रावणोऽहं भजस्व माम्। इति श्लोकः क्वचित्पठ्यते । तमेवं व्याचक्षते—सप्तसप्तकं षडङ्गसहितवेदोपवेदसहितचतुर्दशविद्यारूपं तद्वेत्ता । अष्टाष्टकविभूषितश्चतुःषष्टिकलाभूषितः । पञ्चपञ्चकतत्त्वज्ञः पञ्चविंशतितत्त्वज्ञः पञ्चविंशतितत्त्वस्वरूपवेत्ता । नित्यानित्यवस्तुविवेकवानिति यावत् इति । स कृतकार्यव्याख्यातत्वात्प्राक्षिप्त इति ज्ञायते । आर्षपादेऽर्थासंगतिरपि । परपादपर्यालोचनया तृतीयपादोक्तज्ञानवत ईदृशे कर्मणि प्रवृत्तिरप्यनुचितेति भाति ॥२५॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह-जीवेदिति । अप्रतिरूपरूपाम् अनुपमरूपविशिष्टां शचीं पश्चात् इन्द्रश्चान्यकाले प्रधृष्य अपहृत्येत्यर्थः, चिरं जीवेत् मादृशीं धर्षयित्वा पीतामृतस्यापि तव मोक्षः कल्याणं नास्ति ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

गो० टी०—क्रोधातिशयेनोक्तमेव पुनराह-जीवेदिति । अप्रतिरूपम् अनुपमं रूपं यस्यास्तां मादृशीम् । अश्लीलत्वपरिहाराय न मामित्युक्तिः । मोक्षः मरणादिति शेषः । अमृतमपि न त्वद्रक्षणसमर्थमित्यर्थः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्यानेऽष्टचत्वारिंशः सर्गः ॥४८॥

१] ति० टी०—हस्ते हस्तं समाहन्य समाहत्येत्यर्थः, विनिष्पीड्येति यावत् । महिषादयश्चियैव हतास्तथा कदाचिदेषा हरणसमये कौर्यं कुर्यादिति शङ्कया क्रूरस्वीयमहद्रूपाकृतीकारः । यद्वा कपटेनापि शान्तस्वभावयतिवेषधारणात्तद्वेषस्वाभाव्येन हरणे स्वस्य प्रतिबद्धतां दृष्ट्वा स्वरूपग्रहणम् । मम रावणस्याप्ययं वेषः कौर्यप्रतिबन्धक इत्यतश्च हस्तं हस्ताघात इत्यतश्च बोध्यम् ॥ १ ॥

रा० टी०—सीतावचनश्रवणानन्तरकालिकं रावणस्य दुर्वृत्तमाह-सीताया इत्यादिभिः । दशग्रीवो रावणः सीताया वचनं श्रुत्वा हस्ते हस्तं समाहत्य संयोज्य कोपचिह्नमेतत् वपुः स्वशरीरं सुमहत् अतिप्रवृद्धं चकार ॥ १ ॥

१ नच……मप्रनीयाप्ति जीवितमिति गो. न त्विति रा. पाठः । २ हस्तादिति गो. पाठः । ३ दूषयित्वेति गो. पाठः । ४ हत्येति गो. रा. पाठः ।

स मैथिलीं पुनर्वाक्यं बभाषे वाक्यकोविदः । नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ ॥ २ ॥
उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः । आपिबेयं समुद्रं च मृत्युं हन्यां रणे स्थितः ॥ ३ ॥
अर्कं तृतीयां शरैस्तीक्ष्णैर्विभिन्द्यां हि महीतलम् । कामरूपेण उन्मत्ते पश्य मां कामरूपिणम् ॥ ४ ॥
एवमुक्तवतस्तस्य रावणस्य शिखिप्रभे । क्रुद्धस्य हरिपर्यन्ते रक्ते नेत्रे बभूवतुः ॥ ५ ॥
सद्यः सौम्यं परित्यज्य तीक्ष्णरूपं स रावणः । स्वं रूपं कालरूपाभं भेजे वैश्रवणानुजः ॥ ६ ॥
संरक्तनयनः श्रीमांस्तप्तकाञ्चनभूषणः । क्रोधेन महताविष्टो नीलजीमूतसंनिभः ॥ ७ ॥
दशास्यो विंशतिभुजो बभूव क्षणदाचरः । स परिव्राजकच्छद्म महाकायो विहाय तत् ॥ ८ ॥
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः । [संरक्तनयनः क्रोधाज्जीमूतनिचयप्रभः]॥
रक्ताम्बरधरस्तस्थौ स्त्रीरत्नं प्रेक्ष्य मैथिलीम् ॥ ॥ ९ ॥

गो० टी०—यश्चिन्तनीयः सततमापत्स्व परमासु च ।
नान्योऽस्ति चिन्तनीयस्तं सीतापतिमुपास्महे ॥

सीताया इत्यादि । हस्ते हस्तं समाहत्य संयोज्य । अयं च कोपाकृतिविशेषः ॥ १ ॥

२] ति० टी०—न श्रुतौ अग्रे वक्ष्यमाणाविति शेषः ॥२॥

रा० टी०—स इति । वाक्यकोविदो रावणः मैथिलीं पुनर्बभाषे । तद्वचनाकारमाह—उन्मत्तया त्वया मम वीर्यपराक्रमौ न श्रुतौ इत्यहं मन्ये ॥ २ ॥

गो० टी०—स इत्यादि । श्लोकत्रयमेकान्वयम् । ततः रूपकरणानन्तरम् उन्मत्तया त्वयेति शेषः । वीर्यपराक्रमौ पूर्वोक्ताविति शेषः । उद्वहेयम् उद्धरेयं विभिन्द्यां विदारयेयम् । महद्भूतित्युक्तं दर्शयति—कामेति ॥ २–४ ॥

३] ति० टी०—तानेवाह—उद्वहेयमित्यादि । आपिबेयमिति ॥ ३ ॥

रा० टी०—उदिति । अम्बरे आकाशे स्थितोऽहं भुजाभ्यां मेदिनीं पृथ्वीमुद्वहेयं समुद्रं च पिबेयम् अ इत्यव्ययम् तदत्र स्वर्गे एवं च रणे स्थितोऽहं तु मृत्युं हन्याम् ॥ ३ ॥

४] ति० टी०—कामेन चित्तजेन रूपेण च उन्मत्ते इत्यर्थः ॥ ४ ॥

रा० टी०—अर्कमिति । तीक्ष्णैः शरैरर्कं सूर्यं तृतीयां महीतलं विभिन्द्याम् । नन्वु यत्किंचिन्महीतलदेशस्य विभेदः सर्वशक्यः सर्वमहीतलभेदस्तु एकदेशशक्तित्वेन तवाप्यशक्य इति सर्वसाधारणत्वं त्वयीत्येतत्कथनमनर्थकमित्यत आह—कामरूपेण स्वेच्छाचारेण उपलक्षिते अत एव हे उन्मत्ते ! कामरूपिणं स्वेच्छारूपधारिणं मां पश्य एतेन पृथिवीपरिमितरूपस्यापि धारणसामर्थ्यं मय्यस्तीति सूचितम् ॥ ४ ॥

५] ति० टी०—हरिपर्यन्ते श्यामप्रान्ते ॥ ५ ॥

रा० टी०—एवमिति । एवमुक्तवतस्तस्य रावणस्य हरिपर्यन्ते श्यामप्रान्तदेशे रक्ते अरुणवर्णविशिष्टे नेत्रे शिखिप्रभे मयूरपुच्छसदृशे सदसद्दर्शनरहिते इत्यर्थः बभूवतुः ॥ ५ ॥

गो० टी०—अथ सीतापहारोपयोगिरूपान्तरपरिग्रहमाह—एवमित्यादिना । सूर्यकल्पे शिखिप्रभे इति तेजस्यौष्ण्ये चोपमाद्वयम् । हरिपर्यन्ते पिङ्गलवर्णपर्यन्ते 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः ॥ ५ ॥

६–७] ति० टी०— सौम्यं भिक्षुरूपं तीक्ष्णरूपं प्रशस्ततीक्ष्णं रूपं मृत्युतुल्यरूपं भेजे ॥ ६ ॥ ७ ॥

रा० टी०—सद्य इति । वैश्रवणानुजः स रावणः सौम्यं भिक्षुरूपं सद्यः परित्यज्य कालरूपाभं स्वरूपं भेजे प्राप ॥ ६ ॥

गो० टी०—सद्य इति । स्वं स्वासाधारणं कालरूपाभं मृत्युशरीराभं वैश्रवणानुज इत्यनेन जन्मकारणे तुल्येऽपि हन्तान्यतरस्य क्रौर्यमित्युच्यते ॥ ६ ॥

गो० टी०—संरक्तेति । सार्धश्लोक एकान्वयः । श्रीमान् विचित्रशक्तिसंपन्नः क्षणदाचरः संरक्तनयनत्वादिविशिष्टो बभूव७

८–९] ति० टी०—परिव्राजकच्छद्म कपटपरिव्राजकरूपम् ॥ ८ ॥ ९ ॥

रा० टी०—तद्रूपं वर्णयँस्तदेवाह—संरक्तेति । संरक्तनयनः संरक्ते नयने यस्य सः नीलजीमूतसंनिभः नीलजीमूतो मेघः तत्सदृशः दशास्यः दशमुखविशिष्टः विंशतिर्भुजाः यस्य सः क्षणदाचरः राक्षसः स रावणः तत् गृहीतं परिव्राजकछद्म विहाय महाकायो बभूव । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

रा० टी०—प्रतीति । रक्ताम्बरधरो रावणः स्वकं रूपं प्रतिपद्य स्त्रीरत्नं सर्वनारीश्रेष्ठं मैथिलीं प्रेक्ष्य तस्थौ ॥ ९ ॥

गो० टी०—उक्तानुवादपूर्वकं क्रौर्यान्तरमाह द्वाभ्याम्—स इत्यादि । परिव्राजकच्छद्म परिव्राजकरूपं परिव्राजकरूपेण परिवृतं मां प्रेक्ष्य तस्थौ(?)किमेवंरूपं दृष्ट्वाऽपि मां भजिष्यतीति प्रत्याशयेति भावः ॥ ८ ॥ ९ ॥

१ च ततो भृशमिति गो. पाठः । २ आपिबेयमिति रा. पाठः । ३ गृह्यामिति गो. पाठः । ४ कामरूपिणमुन्मत्ते पश्य मां कामदं पतिमिति गो. पाठः । ५ सूर्यकल्पे इति गो. पाठः । ६ भिक्षुरूपामिति गो. रा. पाठः । ७ स्वरूपमिति रा. पाठः । ८ कुण्डल इति गो. पाठः । ९ कार्मुकी वाणीति गो. पाठः । १० प्रतिपद्येति गो. पाठः । ११ अर्धमेतदधिकं गो. पाठे । १२ रहिते इति युक्तं भाति । १३ भक्ष्यतीति युक्तं भाति ।

स तामसितकेशान्तां भास्करस्य प्रभामिव । वसनाभरणोपेतां मैथिलीं रावणोऽब्रवीत् ॥ १० ॥
त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि । मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥ ११ ॥
मां भजस्व चिराय त्वमहं श्लाघ्यः पतिस्तव । नैव चाहं क्वचिद्भद्रे करिष्ये तव विप्रियम् ॥ १२ ॥
त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम् । राज्याच्युतमसिद्धार्थं रामं परिमितायुषम् ॥ १३ ॥
कैर्गुणैरनुरक्तासि मूढे पण्डितमानिनि । यः [2]स्त्रियो वचनाद्राज्यं विहाय ससुहृज्जनम्॥ १४ ॥
अस्मिन्व्यालानुचरिते वने वसति दुर्मतिः । इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम्॥१५॥
अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः । जग्राह रावणः सीतां बुधः खे रोहिणीमिव ॥ १६ ॥
वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः । ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥ १७ ॥
तं दृष्ट्वा [3]गिरिशृङ्गाभं तीक्ष्णदंष्ट्रं महाभुजम् । प्राद्रवन्मृत्युसंकाशं भयार्ता वनदेवताः ॥ १८ ॥
स च मायामयो दिव्यः खरयुक्तः खरस्वनः । प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः ॥ १९ ॥

१०-१२] ति० टी०-भास्करस्य प्रभामिव तस्या अपि पर्यन्ते श्यामरूपतायाश्छान्दोग्य उक्तिः ॥ १०-१२ ॥

रा० टी०-स इति । असितकेशामतिकृष्णकेशविशिष्टामित्यर्थः, भास्करस्य प्रभामिव तां मैथिलीं स रावणोऽब्रवीत्१०

गो० टी०-स इति । असितकेशान्तां नीलकेशाग्रां केशाग्रे पैङ्गल्यं दुर्लक्षणम् । भास्करस्य प्रभामित्यनेन दुष्प्रसहत्वमुच्यते वसनेत्यादिना दुस्त्यजत्वमुच्यते ॥ १० ॥

रा० टी०-तद्वचनाकारमाह-त्रिष्विति । त्रिषु लोकेषु सर्वेष्वपि भुवनेषु विख्यातं भर्तारं रामं यदि इच्छसि द्रष्टुमिति शेषः तर्हि मामाश्रय मया सह गच्छेत्यर्थः, एतेन मदुक्ताकरणे त्वां हनिष्यामीति सूचितम् । ननु रामभार्याहमन्येन राक्षसेन साकं कथं गमिष्यामीत्यत आह-सदृशः स्वसमानस्य राक्षसगणस्य पतिरहं तवैव सेवक इति शेषः, एतेन सीतादर्शनवशादहमपि साकेतस्थ इति क्षणिकज्ञानं जातमिति सूचितम् ॥ ११ ॥

गो० टी०-त्रिष्विति । वरारोहे वरजघने ॥ ११ ॥

रा० टी०-मामिति । श्लाघ्यः सर्वप्रसंशनीयः पतिः राक्षसाधिपोऽहं यतस्तवैव सेवकः अतो मां चिराय बहुकालं भजस्व सेवयस्व अत एव हे भद्रे! क्वचित् कदाचिदपि तव विप्रियम् अनीप्सितं न करिष्ये ॥ १२ ॥

गो० टी०-पुनस्त्यागशङ्कां मा कार्षीरित्याह-मामिति । क्वचित् क्रार्षीत्यर्थः ॥ १२ ॥

१३-१४] ति० टी०-मानुषो भावो मनुष्यरामविषयको भावः स्नेहबन्धः ॥ १३ ॥ १४ ॥

रा० टी०-ननु रामविमुक्ताहं कथमन्यत्र स्थास्यामीत्यत आह-त्यज्यतामिति । मानुषः मनुष्यरामसंबन्धी भावः नित्यमहं सेविकेति स्वभावः त्यज्यतां मयि भावः मन्निरूपितस्वसेव्यत्वरूपस्वभावः प्रणीयतां प्राप्यतां, स्वतन्त्रा भवेत्यर्थः, अर्थं पृथक् । रामविषयकप्रीतिनिरासार्थमाह-राज्याच्युतमिहागतमत एव असिद्धार्थं न सिद्धः अर्थः राज्याभिषेको यस्य तं रामं कैर्गुणैरनुरक्तासि एतेन तत्रानुरागो न कार्य इति सूचितम् ॥१३॥

रा० टी०-य इति । यः स्त्रियो वचनात् ससुहृज्जनं राज्यं विहाय व्यालानुचरिते सर्पादिभिः सेविते ऽस्मिन्वने वसति स दुर्मतिस्त्यज्यतामिति शेषः ॥ १४ ॥

गो० टी०-त्यज्यतामिति । सार्धश्लोकद्वयमेकान्वयम् । मानुषः मनष्यरामविषयः भावः स्नेहबन्धः । य इति । व्याला हिंस्राः तमिति पूर्वेणान्वयः ॥ १३-१५ ॥

१५] ति० टी०-प्रियवादिनीम् रावणादन्यत्रेति शेषः॥१५॥

रा० टी०-इतीति । प्रियार्हां प्रियवचनयोग्यां प्रियवादिनीं मैथिलीम् इत्थप्रियं वचः उक्त्वा दुष्टात्मा काममोहितः कामेन अपहरणविषयकोत्कटेच्छया मोहितः कर्तव्यविषयकविवेकरहितः रावणः अभिगम्य समीपं प्राप्य खे आकाशे रोहिणीं बुध इव जग्राह । अनेनोपमालङ्कारेण रावणस्य सीतायां मातृबुद्धिः जातेति सूचितम् ॥ १५ ॥ १६ ॥

गो० टी०-इतीत्यादि । सार्धश्लोक एकान्वयः । प्रियार्हत्वे हेतुः-प्रियवादिनीमिति । अत्र सुदुष्टं तिष्ठ भूयः सत्कारिष्यामीति प्रियभाषिणीं मैथिलीम् इत्युक्त्वा एवं परुषमुक्त्वा तत्र हेतुः-सुदुष्टात्मेति । बुधः खे रोहिणीमिवेत्यभूतोपमा । बुधः स्वपितृपत्नीत्वेन मातरं खे आकाशे सुखेन संचरन्तीं रोहिणीं यदि गृह्णीयात् तत्तुल्यमिदं पापमित्यर्थः ॥ १६ ॥

१६] ति० टी०-काममोहितो जग्राहेत्यत्यन्तानौचित्ये दृष्टान्तः । बुधः खे रोहिणीमिव । खे आकाशे शून्ये च । रौहिणेयो बुधो रोहिणीं स्वमातरं यदि कामाद्गृह्णीयात्तदा तत्सदृशमिदं घोरं यथौक्तौ च कल्पनमित्यतिशयोक्तिरत्र व्यङ्ग्या । सीतया सद्यो मरणपर्यवसायिशापादानं तु समूलनाशनस्य वेदवत्यंशेन प्रतिज्ञातस्य निर्वाहाय ऋषीणां देवानामग्रे रामप्रतिज्ञातस्य च निर्वाहाय ॥ १६ ॥

१७-१९] ति० टी०-वामेनेति । अननुरक्ततया शापदानभिया । स्ववामाङ्गासनत्वनिवारणायैवं ग्रहणमित्याहुः ॥ १७-१९ ॥

---

१ प्रिय इति गो. पाठः । २ स्त्रिया इति ग पाठः । ३ मृत्युसंकाशमिति गो. पाठः । ४ गिरीति गो. पाठः ।

ततस्तां परुषैर्वाक्यैरभितर्ज्य महास्वनः । अङ्केनादाय वैदेहीं रथमारोहयत्तदा ॥ २० ॥
सा गृहीतातिचुक्रोश रावणेन यशस्विनी । रामेति सीता दुःखार्ता रामं दूरं गतं वने ॥ २१ ॥
तामकामां स कामार्तः पन्नगेन्द्रवधूमिव । विचेष्टमानामादाय उत्पपाताथ रावणः ॥ २२ ॥
ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा । भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथातुरा ॥ २३ ॥
हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक । ह्रियमाणां न जानीषे रक्षसा कामरूपिणा ॥ २४ ॥
जीवितं सुखमर्थं च धर्महेतोः परित्यजन् । ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥ २५ ॥
ननु नामाविनीतानां विनेतासि परंतप । कथमेवंविधं पापं न त्वं शाधि हि रावणम् ॥ २६ ॥

रा० टी०—वामेनेति । स रावणः वामेन करेण मूर्धजेषु कबरीपतितदेशेषु गलपश्चाद्भागे इत्यर्थः, मूर्धजशब्दोऽशभाग्यजन्तः दक्षिणेन पाणिना तु ऊर्वोः सीतां जग्राह तेन तदानीं वियोगसंभावनया मूर्च्छा जातेति ध्वनितम् ॥ १७ ॥

गो० टी०—वामेनेति । शापकृतदोषो भविष्यतीति मूर्धजेषूर्वोश्च ग्रहणम् ॥ १७ ॥

रा० टी०—तमिति । गिरिशृङ्गाभं गिरिशृङ्गसदृशं मृत्युसंकाशं मृत्युवत्प्रतीयमानं तं सीतामपहरन्तं रावणं दृष्ट्वा भयार्ता वनदेवताः प्राद्रवन् ॥ १८ ॥

गो० टी०—तमिति। गृह्णन्तमित्यर्थः ॥ १८ ॥

रा० टी०—स इति । खरयुक्तः गर्दभैः संनद्धः अत एव खरस्वनः गर्दभस्वनविशिष्टः किं च अत्युग्रस्वनविशिष्टः मायामयः अत एव दिव्यः आकाशस्थः रावणस्य महारथः प्रत्यदृश्यत ॥ १९ ॥

गो० टी०—स चेति । सः पूर्वं गुप्तः मायामयः अन्तर्धानार्थतया आश्चर्यमयः खरयुक्तः अश्वतरयुक्तः हेमाङ्गः स्वर्णमयचक्रः चक्रं हि रथाङ्गमित्युच्यते ॥ १९ ॥

२०] ति० टी०—परुषैरितः परं रामप्रत्याशा त्याज्येत्येवमादिभिः । अङ्केन हस्तान्तरैरित्यर्थः ॥ २० ॥

रा० टी०—तत इति । महास्वनः रावणः ततो ग्रहणानन्तरं परुषैर्वाक्यैर्वैदेहीमभितर्ज्य आदाय च अङ्केन शीघ्रगत्योपलक्षितं रथमारोपयत् ॥ २० ॥

गो० टी०—तत इति । अङ्केन ऊरुभागेन ॥ २० ॥

२१] ति० टी०—अतिचुक्रोशेत्यादि तच्छायाया अपि मनुष्यभावनात्यम् ॥ २१ ॥

रा० टी०—सेति । रावणेन गृहीता अत एव अतिदुःखार्ता रामवियोगजनितदुःखाक्रान्ता यशस्विनी सीता दूरगतं रामं रामेति चुक्रोश ॥ २१ ॥

गो० टी०—सेति । वने दूरगतं राममुद्दिश्य रामेति विचुक्रोश । क्रुश आह्वाने रोदने च ॥ २१ ॥

२२] ति० टी०—अकामां विरागिणीम् । विचेष्टमानां ततः आत्मानं मोचयितुम् ॥ २२ ॥

रा० टी०—तामिति । अकामां रामरहितगमनविषयकेच्छारहितामत एव विचेष्टमानां तां सीतां कामार्तः सीतानयनविषयकोत्कटेच्छावान् रावणः पन्नगेन्द्रवधूमिवादाय उत्पपात २२

गो० टी०—तामिति । अकामां विरागिणीं विचेष्टमानां रथोपरिस्थले लुठन्तीम् आदाय पुनरङ्केनादाय उत्पपात रथेन सहित इति शेषः ॥ २२ ॥

२३–२५] ति० टी०—मत्तेवातिदुःखवशादुन्मत्तेव तथा भ्रान्तचित्तातुरा शोकातुरा यथा क्रोशति तथा चुक्रोश । अत्रैवयथाभ्यां सर्वचेष्टानां नाट्यत्वं सूचितम् ॥ २३–२५ ॥

रा० टी०—तत इति । ततः रामरहितत्वात् हेतोः राक्षसेन्द्रेण विहायसा ह्रियमाणा अत एव मत्ता प्राप्तदैन्या अत एव यथा यथावदातुरा शोकसंकुला सा सीता भ्रान्तचित्ता इव भृशं चुक्रोश ॥ २३ ॥

गो० टी०—तत इति । आतुरा सा मत्तेव मदयुक्तेव भ्रान्तचित्ता यथा भ्रान्तचित्तेव च चुक्रोश ॥ २३ ॥

रा० टी०—क्रोशाकारमाह—हेति । गुरुचित्तप्रसादक रामचित्तप्रसादनतत्पर हे लक्ष्मण ! रक्षसा ह्रियमाणां मां न जानीषे ॥ २४ ॥

गो० टी०—हेति । अमर्षिणा खरवधकृतामर्षवता॥२४॥

रा० टी०—जीवितमिति । हे राघव ! धर्महेतोः जीवितादिकं परित्यजँस्त्वमधर्मेण ह्रियमाणां मां न पश्यसि किं न जानासि ॥ २५ ॥

गो० टी०—जीवितमिति । धर्महेतोः आश्रितसंरक्षणरूपधर्महेतोः जीवितं सुखमर्थांश्च परित्यजन् जीवितादिपरित्यागशीलः ॥ २५ ॥

२६] ति० टी०—नन्विति प्रसिद्धौ । विनेता शिक्षकः । न शाधि प्राप्तकालं शासनं न करोषि । हिर्वाक्यालंकारे । शोकातुरत्वाद्वाऽधिकपदं न दोषाय ॥ २६ ॥

रा० टी०—नन्विति । हे परंतप ! अविनीतानाम् उत्पथगामिनां विनेता सुमार्गप्रापकस्त्वमसि अतः एवंविधं पापं पापिनं रावणं कथं न शाधि ॥ २६ ॥

गो० टी०—नन्विति । ननु नामेति प्रसिद्धौ । अविनी-

१ भर्त्सयन्स इति गो. पाठः । २ आरोपयदिति गो. रा. पाठः । ३ विचुक्रोशेति गो. पाठः । ४ दूरगतमिति गो. रा. पाठः । ५ माममर्षिणेति गो. पाठः । ६ अर्थांश्चेति गो. पाठः । ७ शास्सीति गो. पाठः ।

ननु सद्योऽविनीतस्य दृश्यते कर्मणः फलम् । कालोऽप्यङ्गीभवत्यत्र सस्यानामिव पक्तये ॥ २७ ॥
त्वं कर्म कृतवानेतत्कालोपहतचेतनः । जीवितान्तकरं घोरं रामाद्व्यसनमाप्नुहि ॥ २८ ॥
हन्तेदानीं सकामा तु कैकेयी बान्धवैः सह । ह्रियेयं धर्मकामस्य धर्मपत्नी यशस्विनः ॥ २९ ॥
आमन्त्रये जनस्थानं कर्णिकारांश्च पुष्पितान् । क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३० ॥
[माल्यवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम् । क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥]
हंससारससंघुष्टां वन्दे गोदावरीं नदीम् । क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३१ ॥
दैवतानि च यान्यस्मिन्वने विविधपादपे । नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥ ३२ ॥
यानि कानिचिदप्यत्र सत्त्वानि विविधानि च । सर्वाणि शरणं यामि मृगपक्षिगणानि वै ॥ ३३ ॥
ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम् । विवशा ते हृता सीता रावणेनेति शंसत ॥ ३४ ॥
विदित्वा तु महाबाहुरमुत्रापि महाबलः । आनेष्यति पराक्रम्य वैवस्वतहतामपि ॥ ३५ ॥

तानां दुर्जनानां विनेता शिक्षकः पापं पापिष्ठं कथं न शास्सि न शिक्षयसि ॥ २६ ॥

२७] ति० टी०–स्वयमेव तत्र हेतुमुन्नयति–नन्विति । अविनीतस्य पुरुषस्याविनयरूपकर्मणः फलं सद्यो न दृश्यते । यतस्तत्र कालोऽप्यङ्गीभवति सहकारिकारणं भवति । पक्तिः पाकः ॥ २७ ॥

रा० टी०–नेति । अविनीतस्य पुरुषस्य कर्मणः फलं सद्यो न दृश्यते अतः अत्र सद्यः फलाभावाय सस्यानां पक्तये पाकायेव कालोऽप्यङ्गीभवति कारणाङ्गत्वं प्राप्नोति ॥ २७ ॥

गो० टी०–आशासने स्वयमेव हेतुमुन्नयति–नन्विति । अविनीतस्य दुर्जनस्य कर्मणः पापस्य सद्यः फलं न दृश्यते । कुतः अत्र फलदर्शने कालोऽप्यङ्गीभवति सहकारिकारणं भवति । अभूततद्भावे च्विः पक्तये पाकाय ॥ २७ ॥

२८] ति० टी०–अधुना स्वेष्टं शापमाह–त्वमिति । व्यसनं पुत्रपौत्रादिनाशरूपम् ॥ २८ ॥

रा० टी०–रावणमुद्दिश्याह–त्वमिति । कालोपहचेतनस्त्वं यतः एतदपहरणरूपं कर्म कृतवान् अतः जीवितान्तकरं जीवनध्वंसकं घोरं व्यसनं दुःखं रामात् प्राप्नुहि ॥ २८ ॥

गो० टी०–स इति । सः त्वमित्यर्थः । व्यसनं भ्रंशम् व्यसनं विपदि भ्रंशे' इत्यमरः ॥ २८ ॥

२९] ति० टी०–सकामा तु जातेति शेषः । यत इत्यादिः ॥ २९ ॥

रा० टी०–हन्तेति । यतो यशस्विनो रामस्य धर्मपत्नी अहं ह्रियेयमतः कैकेयी केकयीदासी मन्थरा बान्धवैः सह सकामा अस्मद्दुःखश्रवणेन संप्राप्तमनोरथा भवत्विति शेषः २९

गो० टी०–वने राक्षसादिभिर्हृता भवेदिति मां कैकेयी वनं प्रेषितवतीति वैदेह्या हृदये सर्वदा स्थितं तदिदानीं धृतप्रमत्तकुपितानां भावज्ञानं दृष्टमिति न्यायेनोद्घाट्यति–हन्तेति । अत्र हेतुमाह–ह्रिये यदिति ॥ २९ ॥

३०–३३]ति०टी०–हरतीति शंसध्वमिति संबन्धः३०-३३

रा० टी०–आमन्त्रये इति । जनस्थाने विद्यमानान् पुष्पितान् कर्णिकारान् अहमामन्त्रये प्रार्थयामि । तत्स्वरूपमाह–सीतां रावणो हरति इति क्षिप्रं रामाय शंसध्वं कथयत३०

रा० टी०–माल्यवन्तमिति । शिखरिणं प्रशस्तशिखरविशिष्टं माल्यवन्तं प्रशस्तपुष्पविशिष्टं प्रश्रवणं गिरिं वन्दे । तत्प्रयोजनमाह–क्षिप्रं रामाय शंसध्वम् । अत्र वन्द्यमानयोरुद्भूतावयवत्वविवक्षया बहुवचनम् एवमुत्तरत्रापि ॥ ३१ ॥

गो० टी०–अथ चित्तविभ्रमातिरेकादचेतनानापे रामाया-ख्यातेत्यभ्यर्थयते–आमन्त्रय इत्यादिभिः सप्तश्लोकैः । आमन्त्रये संबोधयामि जनस्थाने स्थितानिति शेषः, कर्णिकारान् परिव्याधाख्यान् पुष्पवृक्षान् । रावणः सीतां हरतीति यत् एतच्छंसध्वं कथयत । एवमुत्तरत्रापि योज्यम् ॥ ३० ॥

गो० टी०–माल्यवन्तमिति । माल्यवन्तं पुष्पवन्तं शिखरिणं प्रशस्तशिखरं प्रस्रवणं प्रस्रवणाख्यम् ॥ ३१ ॥

रा० टी०–हंसेति । हंससारससंघुष्टां हंसादिभिः सेवितां गोदावरीं वन्दे ॥ ३२ ॥

गो० टी०–हंसेति । संघुष्टाः हंसाः सारसाश्च यस्यां सा हंससारससंघुष्टा कर्तरि क्तः । 'हंसकारण्डवाकीर्णाम्' इति शुद्धः पाठः ॥ ३२ ॥

रा० टी०–दैवतानीति । विविधपादपे अनेकविधवृक्षविशिष्टे अस्मिन् वने यानि दैवतानि तेभ्यो नमस्करोमि । तत्प्रयोजनमाह–हृतां मां भर्तुः अग्रे इति शेषः शंसत कथयत॥३३॥

गो० टी०–दैवतानीति । तेभ्यो युष्मभ्यमिति शेषः॥३३॥

३४] ति० टी०–ते सीतेत्यन्वयः ॥ ३४ ॥

३५] ति० टी०–अमुत्रापि परलोकेऽपि गता वैवस्वत-

१ स इति गो. पाठः । २ जनस्थाने इति गो. रा. पाठः । ३ स्विति गो. पाठः । ४ शंस त्वमिति गो. पाठः । ५ श्लोकोऽयमधिकः गो. रा. पाठे । ६ कारण्डवाकीर्णामिति गो. पाठः । ७ निवसन्त्युतेति गो. पाठः । ८ गणानपीति गो पाठः । ९ अपेति गो. पाठः । १० गामिति गो. पाठः ।

सा तदा करुणावाचो विलपन्ती सुदुःखिता । वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥ ३६ ॥
सा तमुद्वीक्ष्य सुश्रोणी रावणस्य वशंगता । समाक्रन्दद्भयपरा दुःखोपहतया गिरा ॥ ३७ ॥
जटायो पश्य मामार्य ह्रियमाणामनाथवत् । अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥ ३८ ॥
नैष वारयितुं शक्यस्त्वया क्रूरो निशाचरः । सत्त्ववाञ्जितकाशी च सायुधश्चैव दुर्मतिः ॥ ३९ ॥
रामाय तु यथातत्त्वं जटायो हरणं मम । लक्ष्मणाय च तत्सर्वमाख्यातव्यमशेषतः ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ।

सीताक्रन्दश्रवणेन स्वापादुद्बुद्धो जटायुः सीतां हरन्तं रावणं दृष्ट्वा स्वनाम सम्भाव्य जानकीं मोचयितुं प्रार्थयते । अथापि तेन तथा नानुष्ठिते योद्धुं संनद्धो बभूव ।

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे । निरैक्षद्रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥ १ ॥
ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः । वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ॥ २ ॥

हृतामपि मां विदित्वा पराक्रम्य पराक्रमं कृत्वा नेष्यत्येव, अतो यूयं शंसतेत्यन्वयः ॥ ३५ ॥

रा० टी०—यानीति । अत्र अस्मिन् वने यानि सर्वाणि सत्त्वानि तानि सर्वाणि मृगपक्षिगणश्च यामि स्वप्रयोजनबोधिकात्वेन प्राप्नोमि । तदेवाह—भर्तुः प्राणेभ्योऽपि गरीयसीं प्रियां भार्यां मां जानीतेति शेषः, अत एव रावणेन ते सीता हृता इति शरणं सर्वरक्षकं रामं शंसत । श्लोकद्वयं संमिलितान्वयि ॥३४॥३५॥

गो० टी०—यानीत्यादि । श्लोकद्वयमेकान्वयम् । सत्त्वानि जन्तवः । उतेति संबोधने समुच्चये वा । ह्रियमाणामिति । ह्रियमाणां प्राणेभ्योऽपि गरीयसीं प्रियां मां सीता रावणेन हृतेति भर्तुः शंसत रावणान्न भेतव्यं तत्त्वं कथयतेति भावः ॥ ३४ ॥ ३५ ॥

रा० टी०—कथनप्रयोजनमाह-विदित्वेति। अमुत्र लोकान्तरे गतामिति शेषः, वैवस्वतहृतामपि मां विदित्वैव आनेष्यति ३६॥

गो० टी०—कथने किं प्रयोजनं तत्राह—विदित्वेति । भवदुक्तप्रकारेण मां विदित्वा अमुत्र स्वर्गलोके गतामपि वैवस्वतहृतामपि मां पराक्रम्यानेष्यति तस्मादवश्यं शंसतेति भावः ३६

३६-३८] ति० टी०—गृध्रं जटायुषम् ॥ ३६-३८ ॥

रा० टी०—सेति। तदा तस्मिन्काले करुणाः वाचो विलपन्ती सुदुःखिता सा सीता वनस्पतिगतं वृक्षे स्थितं गृध्रं ददर्श॥३७॥

गो० टी०—सेति । करुणाः दीनाः । तात्कालिकहर्षं सूचयति—आयतलोचनेति ॥ ३७ ॥

रा० टी०—सेति । रावणस्य वशं गता अत एव भयपरा सा सीता तं जटायुषं समुद्वीक्ष्य दुःखोपहतया गिरा समाक्रन्दत् आह्वयत् ॥ ३८ ॥

गो० टी०—सा तमिति । समाक्रन्दत् 'क्रदि आह्वाने रोदने च' । दुःखोपहतया दुःखगद्गदया ॥ ३८ ॥

रा० टी०—तदाकारमाह—जटायो इति । हे जटायो पापकर्मणा अनेन राक्षसेन्द्रेण अकरुणं यथा भवति तथ अनाथवत् ह्रियमाणां मां पश्य ॥ ३९ ॥

गो० टी०—जटायो इति । आर्येति श्वशुरवत्संबोधनम् । करुणं यथा तथा ह्रियमाणाम् ॥ ३९ ॥

३९-४०] ति० टी०—'तुभ्यम्' इति पाठे स्वयेत्यर्थे आर्षं तत् । न शक्य इत्यत्र हेतुः-सत्त्ववानित्यादि ॥ ३९ ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०—नेति । सत्त्ववान् अतिबली जितकाशी जितेन बहुकर्मकजयेन काशते प्रकाशते तच्छीलः सायुधः अनेकविधायुधविशिष्टः दुर्मतिः कूटयोद्धा अत एव क्रूरः एष निशाचरः त्वया वारयितुं न शक्यः एतेन एतन्निवारणे त्वया न यतितव्यमिति सूचितं तेन सीतायाः दयालुत्वं व्यक्तम् ॥ ४० ॥

गो० टी०—नेति । अशक्यत्वे हेतुः सत्त्ववानित्यादिकम् । जितकाशी जयावहः दुर्मतिः कूटयोधी ॥ ४० ॥

रा० टी०—नन्वं मोचनप्रयत्नाभावे किमर्थं ममाह्वानमित्यत आह—रामायेति । हे जटायो ! रामाय लक्ष्मणाय च यथातत्त्वं याथार्थ्यमनतिक्रम्य सर्वं सावयवमपहरणम् अशेषतः आख्यातव्यं वक्तव्यम् ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकोनपञ्चाशत्तमः सर्गः ॥ ४९ ॥

गो० टी०—तर्हि मया किं कर्तव्यं तत्राह—रामाय त्विति । तत् अस्य दुर्जयत्वादेव हेतोः ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१-२] ति० टी०—तं शब्दं जटायो पश्य मामिति शब्दम्।

१ उपहतयेति गो. रा. पाठः । २ तवेति गो. पाठः । ३ वृष्टेति गो. रा. पाठः ।

दशग्रीव स्थितो धर्मे पुराणे सत्यसंश्रवः । भ्रातस्त्वं निन्दितं कर्म कर्तुं नार्हसि सांप्रतम् ॥ ३ ॥
जटायुर्नाम नाम्नाहं गृध्रराजो महाबलः । राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ॥ ४ ॥
लोकानां च हिते युक्तो रामो दशरथात्मजः । तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी ॥ ५ ॥
सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि । कथं राजा स्थितो धर्मे परदारान्परामृशेत् ॥ ६ ॥
रक्षणीया विशेषेण राजदारा महाबल । निवर्तय गतिं नीचां परदाराभिमर्शनात् ॥ ७ ॥
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् । यथात्मनस्तथान्येषां दारा रक्ष्या विमर्शनात् ॥ ८ ॥

अवसन्नो भोजनान्तरं दिवैव गाढसन्नोऽपि शुश्रुवे । ततस्तेन शब्देन प्रबुद्धो रावणं निरैक्षत ॥ १ ॥ २ ॥

रा० टी०—सीताहानानन्तरकालिकं जटायुवृत्तान्तमाह—तमित्यादिभिः । अथ सीतोच्चारणानन्तरकाले अवसन्नः केनचिन्निमित्तेन दिवैव गाढनिद्रो जटायुस्तं सीतोच्चारितशब्दं शुश्रुवे अत एव रावणं क्षिप्रं निरैक्षत् वैदेहीं च ददर्श ॥ १ ॥

गो० टी०—अथ स्वामिविषये दासेन यावच्छक्ति शेषवृत्तिरवश्यं कर्तव्येत्यसमर्थं लोके प्रवर्तयितुं जटायुवृत्तान्तमुपक्षिपति सर्गद्वयेन । अत्र प्रथमं जटायुः सान्त्वनभर्त्सनाभ्यां रावणमनुकूलयितुमिच्छति—तं शब्दमित्यादि । अवसन्नः ईषत्सन्नो जटायुः अथ सीतावचनानन्तरं तं शब्दं शुश्रुवे । आत्मनेपदमार्षम् । ततः प्रथमं महाशरीरतया रावणं नीरीक्ष्य सः वैदेहीं ददर्श ॥ १ ॥

रा० टी०—तत इति । ततः सीतादिदर्शनानन्तरं पर्वतकूटाभः पर्वतखण्डवत्प्रतीयमानः वनस्पतिगतः वृक्षमारूढः खगोत्तमो जटायुः शुभां गिरं व्याजहार ॥ २ ॥

गो० टी०—तत इति । तीक्ष्णतुण्डः तीक्ष्णमुखः 'वक्त्रास्ये वदनं तुण्डम्' इत्यमरः । श्रीमान् कैङ्कर्यश्रीसमृद्धः शुभां रावणस्य शोभनावहाम् ॥ २ ॥

३] ति० टी०—दशग्रीवेति संबुद्धिः । अहं सत्यसंश्रवः सत्यप्रतिज्ञः, सीतारक्षणेऽहं सहाय इत्युक्तत्वादिति भावः । नाम्ना जटायुरिति प्रसिद्धेः, अतो मत्समक्षमीदृशं कर्म कर्तुं नार्हसि । भ्रातरिति सामप्रयोगः, यथेवं न त्यक्ष्यसि तदा सत्यप्रतिज्ञत्वान्मया सह युद्धं भावीति दण्डप्रयोगश्च व्यङ्ग्यः ॥ ३ ॥

रा० टी०—तद्व्याहरणमेवाह—दशग्रीवेति । हे दशग्रीव ! हे भ्रातः ! यतः पुराणे सनातने धर्मे स्थितः अत एव सत्यसंश्रवः सत्यप्रतिज्ञो महाबलो गृध्रराजः नाम्ना जटायुर्नाम प्रसिद्धोऽहमस्मि अतः सांप्रतमिदानीं निन्दितं कर्म कर्तुं त्वं नार्हसि इदानीं नार्हसीत्यनेन सार्वकालिकीं तवाधर्मप्रवृत्तिमहं न निवारयामीति ध्वनितम् । सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०—दशग्रीवेति । पुराणे सनातने धर्मे दार्ढ्यवृत्तावित्यर्थः, स्थितः तदेकपरायणः । सत्यम् "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तः परमात्मा संश्रयः आलम्बनं यस्य सः भगवदेकोपायनिष्ठ इत्यर्थः । नाम्ना जटायुर्नाम जटायुरिति प्रसिद्धः । तथा च मयि दासे स्थिते तव सीतापहरणं न युक्तमिति भावः ॥ ३ ॥

४] ति० टी०—राजेति । सर्वस्य लोकस्य राजत्वेन तथापि राजेति ध्वनितम् ॥ ४ ॥

रा० टी०—राजेति । सर्वस्य लोकस्य भुवनस्य राजा अत एव महेन्द्रवरुणौ उपमे उपमेयौ यस्य सः अत एव लोकानां सर्वभुवनानां हिते युक्तो निरतः यो दशरथात्मजो रामः तस्य लोकनाथस्य रामस्य यां त्वं हर्तुमिच्छसि सा एषा सीता नाम धर्मपत्नी अतो राजा राक्षसराजो अत एव धर्मे स्थितो भवान् परदारान् कथं परामृशेत् स्पृशेत् । सार्धश्लोकद्वयमेकान्वयि भवानित्यध्याहृतम् ॥ ४–६ ॥

गो० टी०—स्वस्वरूपमुक्त्वा स्वामिस्वरूपमाह—राजेति । महेन्द्रवरुणोपमत्वमेकदेशसाम्यात् । सर्वलोकस्य राजा स्वामी भवतोऽपि स्वामीत्यर्थः ॥ ४ ॥

५] ति० टी०—धर्मपत्नीत्यनेनैतद्धरणे महापापं सूचितम् ५

गो० टी०—तथा च राजदारापहारो न युक्त इत्याह—तस्येति । सहधर्मचारिणीति धर्मपत्नीशब्दार्थः ॥ ५ ॥

६] ति० टी०—कथं राजेति शेषः । धर्मे प्रजापालनरूपे ॥६॥

गो० टी०—मा भूत्तव रामे स्वामित्वबुद्धिः मनुष्यमात्रबुद्धिं राजबुद्धिं वा कृत्वा सीतां परिहरेत्याह—कथमिति । राजा भवानिति शेषः ॥ ६ ॥

७] ति० टी०—राजदारा इति तद्धरणस्य गुरुतल्पसमत्वादिति भावः ॥ ७ ॥

रा० टी०—रक्षणीयेति । हे महाबल ! राजदारा विशेषेण रक्षणीयाः अतः नीचां गतिं स्वनिश्चयं परदाराभिमर्शनात् निवर्तय ॥ ७ ॥

गो० टी०—राजत्वबुद्धिस्तव रामे मा भूत् तथापि परदाराभिमर्शनं न कार्यमित्याह—निवर्तयेति । परदाराभिमर्शनान्नीतिं निवर्तय तद्विषयमतिं न कुर्वित्यर्थः । नीचत्वमेवाह—नेति । धीरः धीमान् तत्कर्म न समाचरेत् अस्य धीरस्य यत् कर्म परो विगर्हयेत् निन्देत् । यथेत्यर्धमेकं वाक्यम् । विपश्चिता विवेकिना ॥ ७ ॥

८] ति० टी०—अस्य पुरुषस्य परः स्वेतरः प्राणी यत्कर्म विगर्हयेत्, न तत्समाचरेत्स्वदारवत्परदाराश्च विमर्शनात्परस्पर्शाद्रक्ष्याः ॥ ८ ॥

अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम् । व्यवस्यन्त्यनुराजानं धर्मं पौलस्त्यनन्दन ॥ ९ ॥
राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः । धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते ॥ १० ॥
पापस्वभावश्चपलः कथं त्वं रक्षसां वर । ऐश्वर्यमभिसंप्राप्तो विमानमिव दुष्कृती ॥ ११ ॥
कामस्वभावो यः सोऽसौ न शक्यस्तं प्रमार्जितुम् । नहि दुष्टात्मनामार्यमावसत्यालये चिरम् ॥ १२ ॥
विषये वा पुरे वा ते यदा रामो महाबलः । नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ १३ ॥
यदि शूर्पणखाहेतोर्जनस्थानगतः खरः । अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ १४ ॥

रा० टी०—नेति । अस्य जनस्य यत्कर्म परं उत्कृष्टो जनो विगर्हयेत् निन्द्येत् तत् न समाचरेत् अत एव आत्मनो दारा इव अन्येषामपि दाराः विमर्शनात् परस्पर्शात् रक्ष्याः ॥ ८ ॥

९] ति० टी०—शास्त्रेष्वनागतं शास्त्रेष्वनवगतं परमसूक्ष्मत्वाच्छास्त्रतोऽनवगतमप्यर्थं वा राजानमनुसृत्य व्यवस्यन्ति । शास्त्रेऽस्फुटमपि राज्ञ आचरणं दृष्ट्वा प्रजा आचरन्ति तस्माद्राज्ञोऽधर्मप्रवृत्तिरनुचितेति तात्पर्यम् । 'न व्यवस्यन्ति राजानः' इति पाठे शास्त्रेष्वनागतं तत्राप्रतिपादितं धर्मं राजानो न व्यवस्यन्ति नेच्छन्तीत्यर्थः । तस्माच्छास्त्रानुसारिधर्मे एव मतिं कुर्यादित्याशयः ॥ ९ ॥

रा० टी०—अर्थमिति । हे पौलस्त्यनन्दन ! शास्त्रेषु शास्त्रतः अनागतमनिश्चितमर्थं वा कामं वा धर्मं वाऽनुराजानं राजानमनुश्रित्य व्यवस्यन्ति निश्चिन्वन्ति आचरन्ति इत्यर्थः ॥ ९ ॥

गो० टी०—अर्थमिति । शिष्टाः सन्तः राजानः शास्त्रेष्वनागतमनुपदिष्टं धर्ममर्थं वा यदि वाऽकामं कामं वा न व्यवस्यन्ति नेच्छन्तीत्यर्थः । लोके यथा तथा वा भवतु राज्ञस्तत्र सुतरां नेदमुचितमिति भावः ॥ ८ ॥

१०] ति० टी०—तथा राजा द्रव्याणामुत्तमवस्तूनामुत्तमो निधिः । 'तथा धर्मश्च कामश्च' इति पाठे प्रजानामिति राजेति च शेषः । द्रव्याणामिति प्राग्वदेव । यतो धनादिकं राजमूलम् अतो राजा प्रजानां धर्मादिरूप इत्यर्थः । शुभं कामम् ॥ १० ॥

रा० टी०—राजेति । यतः धर्मो वा शुभं वा पापं वा राजमूलं सत् प्रवर्तते अतः धर्मादिः राजैव ॥ १० ॥

गो० टी०—न केवलं स्वार्थं लोकानुग्रहार्थं चेदं परिहर्तव्यमित्याह—राजेति । अत्र धर्मादिशब्दाः धर्मादिप्रवर्तकपराः । द्रव्याणामर्थानामुत्तमो निधिराश्रयः । यस्मादेवं तस्माद् धर्मः धर्मादिः राजमूलं यथा तथा प्रवर्तते । शुभं शुभाचारः पापं वा राजमूलं प्रवर्तते राजानुसारेण लोकाः धर्माधर्मादिषु प्रवर्तन्ते अतो राज्ञा पापं विहाय धर्मादिकमेव कर्तव्यमित्यर्थः ॥ ९ ॥

११] ति० टी०—एवंभूतराजधर्महीने त्वयि कथमैश्वर्यागम इत्याह—पापेति । दुष्कृती स्वार्थायोग्यं देवयानमिव ॥ ११ ॥

रा० टी०—पापेति । हे रक्षसांवर ! पापस्वभावः पापाचरणशीलः अत एव चपलस्त्वं दुष्कृती निषिद्धकर्मा विमानमिव ऐश्वर्यं कथं संप्राप्तः ॥ ११ ॥

गो० टी०—परदाराभिमर्शनमैश्वर्याद्भ्रंशकं चेत्याह—पापस्वभाव इति । पापं स्वभावः सहजधर्मो यस्य स पापस्वभाव अत एव चपलः विषयप्रवणः त्वं दुष्कृतिः विमानं देवार्हं विमानमिव ऐश्वर्यमभि ऐश्वर्यं प्रति कथं संप्राप्तः योग्यः । एवं विषयचपलश्चैश्वर्याद्भ्रष्टो भविष्यसीति भावः ॥ १० ॥

१२] ति० टी०—नन्वैश्वर्येण पुण्यमपि मय्यनुमीयतां तत्राह—कामेति । यः पुमान्कामस्वभावो भवति सोऽसौ तं स्वभावं प्रमार्जितुं न शक्यः । तन्मार्जनं हि "धर्मेण पापमपनुदति" इति श्रुतेर्धर्मेण स्यात् च स तस्मिन्नस्तीत्याह—नहीति । यस्माद्दुष्टात्मनामालय आर्यं पूज्यं पुण्यं चिरं चिरकालेनापि नावसति ॥ १२ ॥

रा० टी०—कामेति । यः पुरुषः कामस्वभावः स्वेच्छाचरणशीलः सोऽसौ पुरुषः तं स्वेच्छाचरणरूपस्वभावं प्रमार्जितुं दूरीकर्तुं न शक्यः । नन्वेतादृशस्वभावे का हानिरित्यत आह—दुष्टात्मनां दुष्टस्वभावानामालये गृहे आर्यं श्रेष्ठत्वं ऐश्वर्यमिति यावत् चिरं न आवसति, यद्वा आर्ये हे राक्षसश्रेष्ठ ! दुष्टानामालये मा लक्ष्मीर्नैव वसति ॥ १२ ॥

गो० टी०—एवं बहुसान्त्वनेऽपि सीताविसर्जनाकरणात् भवादृशे उपदेशो निरर्थक इत्याह—काममिति । यो यस्य स्वभावः औत्पत्तिकः स धर्मः कामम् अत्यन्तं परिमार्जितुं न शक्यः उपदेशेन निवर्तयितुं न शक्य इत्यर्थः । तथाहि आर्यं सदुपदेशः दुष्टात्मनाम् आलये हृदये चिरं नावसति न तिष्ठति ॥ ११ ॥

१३] ति० टी०—यदा रामः यस्माद्राम इत्यर्थः ॥ १३ ॥

रा० टी०—विषय इति । ते तव विषये देशे पुरे वा महाबलो रामः यदा नापराध्यति तदा तस्य रामस्य त्वं कथमपराध्यसि ॥ १३ ॥

गो० टी०—शत्रुभार्यापहरणं मम स्वभाव इत्याशङ्क्य शात्रवप्रसक्तिरत्र नास्तीत्याह—विषये वेति । विषये राज्ये यदा नापराध्यति तदा तस्य कथमपराध्यसि ॥ १३ ॥

१४] ति० टी०—अनपराधोऽसिद्धः स्वादिवधादित्याशङ्क्याह—यदीति । अनपराधे हेतुः—पूर्वमतिवृत्तोऽतिक्रान्तोचितवृत्तः ॥ १४ ॥

१ न राजान इति गो. पाठः । २ दुष्कृतिरिति गो. पाठः । ३ काममिति गो. पाठः । ४ परिमार्जितुमिति गो. पाठः ।

अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः । यस्य त्वं लोकनाथस्य हृत्वा भार्यां गमिष्यसि॥ १५॥
क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा । दहेद्दहनभूतेन वृत्रमिन्द्राशनिर्यथा ॥ १६ ॥
सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे । ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि ॥ १७ ॥
स भारः सौम्य भर्तव्यो यो नरं नावसादयेत् । तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥ १८ ॥
यत्कृत्वा न भवेद्धर्मो न कीर्तिर्न यशो ध्रुवम् । शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत् ॥ १९ ॥
षष्टिर्वर्षसहस्राणि जातस्य मम रावण । पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥ २० ॥
वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी । न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥ २१ ॥
न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः । हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥ २२ ॥

१५] ति० टी०–गमिष्यसीत्यत्र काकुः न जीवन् गमिष्यसीत्यर्थः ॥ १५ ॥

रा० टी०–नन्वहं खरादयो अनेनैव निहता इति कथं नापराद्धमित्यत आह–यदीति । शूर्पणखाहेतोः दुर्वृत्तशूर्पणखासाहाय्यार्थं पूर्वं जनस्थानगतः अतिवृत्तः खरः यस्य लोकनाथस्य भार्यां हृत्वा त्वं गमिष्यसि तेन रामेण यदि हतः तर्हि रामस्य व्यतिक्रमः कः अत्र अस्मिन्विषये यथातत्त्वं त्वं ब्रूहि। श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–खरवध एव ममापराध इत्याशङ्क्याह द्वाभ्याम्–यदित्यादि । वृत्तं मर्यादामतिक्रान्तोऽतिवृत्तः । अत्र हननविषये । यस्येति तस्येति पूर्वशेषः॥ १३ ॥ १४ ॥

१६–१७] ति० टी०–त्वा त्वां घोरेण चक्षुषा मा दहेत् । राम इति शेषः । इन्द्राशनिरिन्द्रप्रयुक्तं वज्रम् ॥ १६ ॥ १७ ॥

रा० टी०–क्षिप्रमिति । वैदेहीं क्षिप्रं विसृज त्यज यतो दहनभूतेन वह्नित्वं प्राप्तेन घोरेण चक्षुषा इन्द्राशनिर्वृत्रमिव मा दहेत् राम इति शेषः ॥ १६ ॥

गो० टी०–प्रकृतमनुपसंहरति–क्षिप्रमिति । अत्र राम इत्यध्याहार्यम् चक्षुषेत्यनेन दर्शनमात्रेण वधो लक्ष्यते । अशनिः वज्रम् ॥ १६ ॥

रा० टी०–विसर्गाभावेऽवश्यं तेऽनिष्टं भवितेति बोधयन्नाह–सर्पमिति । आशीविषं सर्पं वस्त्रान्ते बद्ध्वा त्वं नावबुध्यसे ग्रीवायां प्रतिमुक्तं प्रतिबन्धितं कालपाशं न पश्यसि॥१७॥

गो० टी०–सीताग्रहणमवश्यं मृत्युकरमित्याह–सर्पमित्यादि । आशीविषम् आशीविषाख्यं प्रतिमुक्तम् आमुक्तम् । यथा वज्रवद्धः सर्पोऽवश्यं नाशयति तद्वत् इयं सीता गृहीता त्वां नाशयिष्यतीति भावः । व्याजस्तुतिरलंकारः ॥ १६ ॥

१८] ति० टी०–भारो भारवद्द्रव्यम् । अनामयं रोगाद्युत्पादकम् ॥ १८ ॥

रा० टी०–स इति । यः भारः नरं वहन्तं नावसादयेत् न भर्तव्यः यत् अनामयं रोगासंपादकं सत् जीर्यते तदेव भोक्तव्यम् ॥ १८ ॥

गो० टी०–स भार इति । भारः भारद्रव्यं नावसादयेत् न पीडयेत् अनामयं व्याध्यनुत्पादकम् । अत्रापि पूर्ववद्व्याजस्तुतिः॥ १७ ॥

१९] ति० टी०–यत्कर्म कृत्वा धर्मः कीर्तिः पारलौकिकी पुण्यातिशयजा बलावैश्वर्यातिशयजं यशस्तन्न भवेन्नोत्पद्येत् पूर्वार्जितं च धर्मादि न भवेन्नश्येत्। किं च येन शरीरस्य खेदस्तत्कर्म कस्त्वद्विधः समाचरेत् न कोऽपीत्यर्थः ॥ १९ ॥

रा० टी०–यदिति । यत्कर्म कृत्वा धर्मादिर्न भवेत् शरीरस्य खेदो दुःखं च भवेत् तत्कर्म कः समाचरेत् न कोऽपीत्यर्थः ॥ १९ ॥

गो० टी०–यदिति । यत्कार्यं कृत्वा स्थितस्य न धर्मो भवेत् कीर्तिः ऐश्वर्यादिजनिता प्रथा वा न भवेत् यशः भोगित्वकृतप्रथा वा न भवेत् प्रत्युत शरीर दुःखमेव भवेत् तत्कर्म कः समाचरेत् मूढ एवाचरेत् तथाविधकर्मकरणाद्भवान्मूढ एवेति भावः॥ १८ ॥

२०] ति० टी०–षष्टिवर्षसहस्राणि गतानीत्यर्थः । राज्यम् पक्षिराज्यमित्यर्थः । पितृपैतामहं पितृपितामहेभ्य आगतमित्यर्थः ॥ २० ॥

२१] ति० टी०–मे वैदेहीं दशरथमित्रत्वान्मम स्नुषां वैदेहीमादाय न कुशली गमिष्यसीत्यर्थः ॥ २१ ॥

रा० टी०–एवमपहरणनिवृत्तिबोधकानेकवाक्योक्तावपि तन्निवृत्तिमनुपलभ्याह–षष्टिरिति । हे रावण ! पितृपैतामहं पितृपितामहेभ्य आगतं राज्यं पक्षिराजत्वं यथावदनुतिष्ठतः पालयतो मम जातस्य जन्मनः षष्टिर्वर्षसहस्राणि यतो व्यतीतानीति शेषः अतो वृद्धोऽहं तथापि युवत्वादिविशिष्टस्त्वं मे मम समक्षतः वैदेहीमादाय कुशली न गमिष्यसि । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०–मयि वृद्धत्वेनावमतिं मा कृथा इत्याशयेनाह द्वाभ्याम्–षष्टिरित्यादि । षष्टिर्वर्षसहस्राणि गतानीति शेषः। जातस्येत्यनेन वयसा जीर्णत्वमुच्यते । राज्यं यथावत् अनुतिष्ठतः पालयत इत्यनेन कर्मणा जीर्णत्वमुक्तम् । अहं धनुराद्युपकरणरहितः॥ १९ ॥ २० ॥

२२] ति० टी०–मम पश्यतः मां पश्यन्तमनादृत्येत्यर्थः ।

---

१ ब्रुवीति गो. पाठः । २ षष्टिर्वर्षेति गो. रा. पाठः । ३ सशरः…रथीति गो. पाठः । ४ तथाप्यादाय वैदेहीं कुशली नेति गो. पाठः ।

युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण । शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥ २३ ॥
असकृत्संयुगे येन निहता दैत्यदानवाः । न चिराच्चीरवासास्त्वां रामो युधि वधिष्यति॥२४ ॥
किं नु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ । क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥ २५ ॥
नहि मे जीवमानस्य नयिष्यसि शुभामिमाम् । सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ॥ २६ ॥
अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः । जीवितेनापि रामस्य तथा दशरथस्य च ॥ २७ ॥
तिष्ठ तिष्ठ दशग्रीव मुहूर्तं पश्य रावण । वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥
युद्धातिथ्यं प्रदास्यामि यथाप्राणं निशाचर ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

न्यायसंयुक्तैर्वैशेषिकादियुक्ततर्काभासयुक्तैर्हेतुभिर्हेत्वाभासैर्ध्रुवां सनातनीं धर्मब्रह्मपरां वेदश्रुतिम् । छान्दसो दीर्घः । तच्छास्त्राध्येता यथा पूर्वापरमीमांसान्यायविदोऽग्रे हर्तुमन्यथा कर्तुं न शक्नोति तद्वदित्यर्थः ॥ २२ ॥

रा० टी०–नेति । मम पश्यतः बलाद्वैदेहीं हर्तुं त्वं न शक्तः न समर्थः । तत्र दृष्टान्तः न्यायसंयुक्तैः न्याय्यत्वेन प्रतीयमानैः हेतुभिः नास्तिकायुक्तिभिरीश्वरो नास्त्यदृश्यत्वादित्यायनुमानघटकहेत्वाभासैः ध्रुवां क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् इत्यायनुमानेन " यतो वा इमानि भूतानि जायन्ते " इत्यादिशास्त्रेण च ' दृश्यते त्वग्र्यया बुद्ध्या ' इत्यायुक्त्या प्रत्यक्षेण च 'कप्यासं पुण्डरीकमिव' इत्यायुक्त्योपमानेन च सिद्धां वेदश्रुतीं वेदानां सामादीनां श्रुतयस्तात्पर्यवृत्त्या यस्यां परदेवतायां तामिव दीर्घं आर्षः ॥ २२ ॥

गो० टी०–एतदेव दृष्टान्तमुखेन द्रढयति–न शक्त इति । मम पश्यतः मयि पश्यति सति सीतां बलाद्धर्तुं न शक्तः न समर्थः । कथमिव न्यायसंसिद्धैः न्यायशास्त्रसंसिद्धैः हेतुभिः अनुमानैः ध्रुवां निश्चलाम् अविचाल्यप्रामाण्यामिति यावत् वेदश्रुतीमिव वेदश्रुतिमिव दीर्घं आर्षः । वेदयतीति वेदः स्वतःप्रमाणभूतां श्रुतिमित्यर्थः । यथा वेदविद्ग्रेसरे पश्यति सति हेतुकैः न्याय्यसिद्धैर्हेतुभिः श्रुतिः अन्यथा अन्यपरा नेतुं न शक्यते तद्वदिति भावः । अन्यपरार्थवादादिव्यावृत्त्यर्थो वेदशब्दः । यथा तामन्यथा कुर्वन् स्वयमेव विनश्यति न वेदश्रुतेः कापि हानिः एवं सीतामपहरंस्त्वमेव नशिष्यसि न तु सीतायाः कापि हानिरित्याकूतम् । यथा वेदविद्ग्रेसरो वेदश्रुतिमन्यथा नीयमानामवलोकयन् तदसहमानो यावच्छक्ति निवर्तयति तथाऽहमपि त्वया बलान्नीयमानामपि सीतां यावच्छक्ति निवर्तयिष्यामीत्यर्थः ॥ २१ ॥

२३] ति० टी०–मुहूर्तं रामागमनपर्यन्तम् ॥ २३ ॥

रा० टी०–युध्यस्वेति । हे रावण ! यदि शूरोऽसि तर्हि तिष्ठ युध्यस्व यथापूर्वं खरः हतः सन् भूमौ अशयिष्ट तथा त्वं शयिष्यसे ॥ २३ ॥

गो० टी०–युध्यस्वेति । यदि शूरोऽसि मुहूर्तं तिष्ठ मा पलायस्व मया युध्यस्व । युद्धे मया हतस्त्वं पूर्वं रामेण हतः खर इव भूमौ शयिष्यसे । यद्वा यदि शूरोऽसि तदा मया युध्यस्व । अथवा रामागमनपर्यन्तं मुहूर्तं तिष्ठ तेन हतः शयिष्यस इति । यद्वा यदि शूरोऽसि मुहूर्तं तिष्ठ स्थित्वा तेन युध्यस्व ॥ २३ ॥

२४] ति० टी०–संयुगे रामेणेति शेषः । न वधिष्यति अपि तु वधिष्यतीत्यर्थः । अनेन रामस्यैश्वरत्वं व्यङ्ग्यम् ॥ २४ ॥

रा० टी०–नन्वहं मत्तस्त्वं न प्रबल इत्यत आह–असकृदिति । येन त्वया असकृत् बहुवारं देवदानवाः निहताः तं त्वां रामो वधिष्यति ॥ २४ ॥

गो० टी०–न केवलं स्वापराधप्रतीकारः किंतु देवानां दानवानां च सामान्यमधिदैवतमित्युक्तस्य रामस्य स्वकीयापराधप्रतीकारोऽपि भविष्यतीत्याह–असकृदिति ॥ २३ ॥

२५] ति० टी०–नश्यसे पलायसे । न संशयः इत्यन्वयः॥२५॥

रा० टी०–नन्वहं तमाढ्यस्त्वेत्यत आह–किमिति । तौ नृपात्मजौ दूरं गतौ अतः किं कर्तुं मया शक्यः परंतु तयोः रामलक्ष्मणयोर्भीतस्त्वं क्षिप्रं नश्यसे संशयः अत्र संदेहो न॥२५॥

गो० टी०–एवमुक्तेऽपि पुनः पलायमानं प्रत्याह–किं न्विति । किं नु शक्यं किंवा शक्यं नश्यसे अदर्शनं प्राप्नोषि तयोः ताभ्याम् ॥ २४ ॥

२६–२७] ति० टी०–जीवमानस्य जीवतः । नयिष्यसि नेष्यसि ॥ २६ ॥ २७ ॥

रा० टी०–नन्विदानीं तु सीतां नेष्यामीत्यत आह–नहीति । जीवमानस्य जीवतो मम पश्यतः रामस्य महिषीं न नयिष्यसि नेष्यसि ॥ २६ ॥

गो० टी०–तथापि त्वां नाहं गमयामीत्याह–नहीति । जीवमानस्य जीवतः मयि जीवतीत्यर्थः ॥ २५ ॥

रा० टी०–अवश्यमिति । महात्मनो रामस्य दशरथस्य च जीवितेनापि मया प्रियमवश्यं कार्यम् ॥ २७ ॥

गो० टी०–त्वया किं कर्तुं शक्यमित्यत्राह–अवश्यमिति । जीवितेनापि जीवितव्येनापि ॥ २६ ॥

२८] ति० टी०–यथाप्राणम् यथाबलमित्यर्थः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

---

१ एतदाधर्धद्वयं व्यत्यस्तं गो. पाठे । २ यावदिति गो. पाठः । ३ पलायसे इति युक्तं भाति ।

एकपञ्चाशः सर्गः ।

जटायुषा युध्यमनोरावणस्तेन रथस्य भञ्जनाद्भूमौ पपाताथ च जटायुपरिश्रान्तेर्लब्धावकाशः सीतामादाय पलायितः । तमनुधावन् जटायुर्नखैस्तत्पृष्ठं निर्लिख्य तुण्डेन भुजमण्डलमखण्डयत्तेन निवृत्तः पड्निमुखः सीतां विमुञ्च जटायुषा युध्यमानः खड्गेन तत्पक्षौ पदयुगं च चिच्छेदाथ भूशायिन मन्दजीवित त सीता परिदेवयते ।

[इत्युक्तस्य यथान्यायं रावणस्य जटायुषा । क्रुद्धस्याग्निनिभाः सर्वा रेजुर्विंशतिदृष्टयः ॥]
इत्युक्तः क्रोधताम्राक्षस्तप्तकाञ्चनकुण्डलः । राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥ १ ॥
स संप्रहारस्तुमुलस्तयोस्तस्मिन्महामृधे बभूव वातोद्धुतयोर्मेघयोर्गगने यथा ॥ २ ॥
तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा । सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥ ३ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः । अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलम् ॥ ४ ॥
स तानि शरजालानि गृध्रः पत्ररथेश्वरः । जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ५ ॥
तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः । चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥ ६ ॥
अथ क्रोधादशग्रीवो जग्राह दश मार्गणान् । मृत्युदण्डनिभान्घोराञ्शत्रोर्निधनकाङ्क्षया ॥ ७ ॥

रा० टी०–तिष्ठेति । हे दशग्रीव ! मुहूर्तं तिष्ठ पश्य मम बलमिति शेषः, दन्तात् प्रसवबन्धनात् फलमिव त्वां पातयेयमत एव यथाप्राणं बलमनतिक्रम्य युद्धातिथ्यं प्रदास्यामि । सार्धश्लोक एकान्वयी ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

गो० टी०–तिष्ठ तिष्ठेति । यथाप्राणं यथाबलम् ॥ २७ ॥

गो० टी०–दन्तादित्यर्धमेकान्वयम् 'दन्तं प्रसवबन्धनम्' इत्यमरः ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

गो० टी०–अथ स्वामिकार्याय प्राणत्यागमकरोज्जटायुरित्याह–इतीत्यादि ॥ १ ॥

१] ति० टी०–इतीति ॥ १ ॥

रा० टी०–जटायुवचनश्रवणानन्तरकालिकं रावणवृत्तान्तमाह–इतीत्यादिभिः । इति अनेन प्रकारेण उक्तो जटायुना कथितः अत एव क्रोधताम्राक्षः राक्षसेन्द्रो रावणः पतगेन्द्रं जटायुषमभिदुद्राव ॥ १ ॥

गो० टी०–संरक्तनयन इति । अमर्षणः असहनः ॥ २ ॥

२] ति० टी०–वातोद्धुतयोर्वातप्रवर्तितयोः ॥ २ ॥

रा० टी०–स इति । तयोः जटायुरावणयोः तस्मिन् महामृधे तुमुलः संप्रहारो बभूव । तत्र दृष्टान्तः–गगने वातोद्धतयोः वातप्रचलितयोः मेघयोर्यथा ॥ २ ॥

गो० टी०–स इति । सः युध्यस्वेति पूर्वं प्रवर्तितः संप्रहारः युद्धं वा । ताभ्यां प्रतिकूलवायुभ्याम् उद्धतयोः प्रेरितयोः मेघपक्षे संघट्टनमात्रम् ॥ ३ ॥

३–४] ति० टी०–माल्यवतोः द्वौ माल्यवन्तौ एको दण्डकारण्ये, अपरो मेरुपार्श्वे । सपक्षयोः पक्षसहितयोः । यद्वा यथयोक्ता कल्पनेयम्. यदि द्वौ माल्यवन्तौ सपक्षौ युध्येयातां तदा तत्सदृशमिदमिति तेनानुपमत्वं फलति ॥ ३ ॥ ४ ॥

रा० टी०–तदिति । सपक्षयोः पक्षसहितयोः माल्यवतोः पुष्पसहितयोः महापर्वतयोरिव गृध्रराक्षसयोः अद्भुतं तद् युद्धं बभूव ॥ ३ ॥

गो० टी०–तदिति । सपक्षयोः पक्षसहितयोः माल्यवतोः । माल्यवन्नामानौ द्वौ पर्वतौ एको दण्डकारण्ये पूर्वमुक्तः माल्यवन्तं शिखरिणमिति, अन्यः किष्किन्धासमीपे वक्ष्यति वर्षावर्णने ॥ ४ ॥

रा० टी०–तत इति । ततः द्वन्द्वयुद्धप्रवृत्त्यनन्तरं नालीकादिभिः बाणविशेषैः महाबलं गृध्रराजमभ्यवर्षत् रावण इति शेषः ॥ ४ ॥

गो० टी०–तत इति । नालीकैः नालमात्रशरैः नाराचैः आयसशरैः विकर्णिभिः अङ्कुशाग्रशरैः ॥ ५ ॥

५] ति० टी०–प्रतिजग्राह सेहे । रावणास्त्राणि रावणक्षिप्तानीति शरजालविशेषणम् । अस्यतेरौणादिकस्त्रन् । 'रावणास्तानि' इति पाठस्तु सुगम एव ॥ ५ ॥

रा० टी०–स इति । पत्ररथेश्वरः पक्ष्यधीशः गृध्रः स जटायुः तानि रावणास्त्राणि रावणप्रक्षिप्तानि शरजालानि प्रतिजग्राह ॥ ५ ॥

गो० टी०–स इति । पत्ररथेश्वरः पक्षीश्वरः प्रतिजग्राह सेहे । रावणास्त्राणि रावणप्रयुक्तास्त्राणि ॥ ६ ॥

६–७] ति० टी०–तस्य रावणस्य गात्रे इत्यन्वयः ॥ ६ ॥ ७ ॥

१ श्लोकोऽयमधिकः गो. पाठे । २ संरक्तनयनः कोपात्तमेति गो. पाठः । ३ वन इति गो. पाठः । ४ वातोद्धतयोरिति गो. रा. पाठः । ५ महाबल इति गो. पाठः । ६ शत्रुमर्दनेति गो. पाठः ।

स तैर्वाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः । बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः ॥ ८ ॥
स राक्षसरथे पश्यञ्जानकीं वाप्पलोचनाम् । अचिन्तयित्वा बाणांस्तान्राक्षसं समभिद्रवत् ॥ ९ ॥
ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् । चरणाभ्यां महातेजा बभञ्ज पतगोत्तमः ॥ १० ॥
ततोऽन्यद्धनुरादाय रावणः क्रोधमूर्छितः । ववर्ष शरवर्षाणि शतशोऽथ सहस्रशः ॥ ११ ॥
शरैरावारितस्तस्य संयुगे पतगेश्वरः । कुलायमभिसंप्राप्तः पक्षिवच्च बभौ तदा ॥ १२ ॥
स तानि शरजालानि पक्षाभ्यां तु विधूय हैं । चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥ १३ ॥
तच्चाग्निसदृशं दीप्तं रावणस्य शरावरम् । पक्षाभ्यां च महातेजा व्यधुनोत्पतगेश्वरः ॥ १४ ॥
काञ्चनोरश्छदान्दिव्यान्पिशाचवदनान्खरान् । तांश्चास्य जवसंपन्नाञ्जघान समरे बली ॥ १५ ॥
अथ त्रिवेणुसंपन्नं कामगं पावकार्चिषम् । मणिसोपानचित्राङ्गं बभञ्ज च महारथम् ॥ १६ ॥

रा० टी०-तस्येति । तस्य रावणस्य गात्रे तीक्ष्णनखाभ्यां तीक्ष्णनखैर्विशिष्टाभ्यां चरणाभ्यां महाबलो जटायुः बहुधा अनेकप्रकारं व्रणान् चकार ॥ ६ ॥

गो० टी०-तस्येति । तस्य रावणस्य गात्रे ॥ ७ ॥

रा० टी०-अथेति । अथ व्रणकरणानन्तरं दशग्रीवो रावणः शत्रोर्निधनकाङ्क्षया शत्रुविध्वंसविषयकेच्छया मृत्युदण्डनिभान् यमदण्डसदृशान् दश मार्गणान् बाणान् जग्राह ॥७॥

गो० टी०-अथेति । मार्गणान् बाणान् ॥ ८ ॥

८-११]ति० टी०-पूर्णमुक्तैराकर्णपूर्णाकृष्टधनुर्मुक्तैः८-११

रा० टी०-स इति । महावीर्यः स रावणः पूर्णमुक्तैः पूर्णेन आकर्णमाकृष्टेन मुक्तैः त्यक्तैः अजिह्मगैः ऋजुगमनशीलैः निशितैः शाणसंस्कृतैः अत एव तीक्ष्णैः घोरैः असह्यैः शिलीमुखैर्बाणैः गृध्रं बिभेद ॥ ८ ॥

गो० टी०-स तैरिति । पूर्णम् आकर्णाकृष्टं यथा तथा मुक्तैः अजिह्मगैः ऋजुगामिभिः निशितैः शाणोल्लीढैः । अत एव तीक्ष्णैः घोरैः भयङ्करैः शिलीमुखैः शिली शल्यं मुखे येषां तैः बाणैः गृध्रं बिभेद ॥ ९ ॥

रा० टी०-स इति । स जटायुः बाष्पलोचनां जानकीं पश्यन्सन् बाणानचिन्तयित्वा अविगणय्य राक्षसं रावणं समभिद्रवत् ॥ ९ ॥

गो० टी०-स इति । समभिद्रवत् समभ्यद्रवत् ॥ १० ॥

रा० टी०-तत इति । मुक्तामणिविभूषितं सशरं शरसहितं चापं पतगोत्तमो जटायुः चरणाभ्यां बभञ्ज ॥ १० ॥

गो० टी०-तत इति । सशरं संहितशरम् ॥ ११ ॥

रा० टी०-तत इति । क्रोधमूर्छितरावणः अन्यद्धनुः आदाय शतशः सहस्रशश्च शरवर्षाणि ववर्ष ॥ ११ ॥

गो० टी०-तत इति । क्रोधमूर्छितः क्रोधेन व्याप्तः॥१२॥

१२-१३] ति० टी०-आवारितः आ समन्ताद्व्याप्तः । कुलायं वासस्थानं संप्राप्तो यः पक्षी तद्वद्बभौ ॥ १२ ॥ १३ ॥

रा० टी०-शरैरिति । तस्य रावणस्य शरैरावारितः प्राप्ततः पतगेश्वरो जटायुः कुलायं स्ववासस्थानमभिसंप्राप्तो यः पक्षिवद्बभौ ॥ १२ ॥

गो० टी०-शरैरिति । आवारितः आसमन्ताद्व्याप्तः कुलायं नीडं प्राप्तः पक्षीव बभौ ॥ १३ ॥

रा० टी०-स इति । जटायुः तानि रावणप्रक्षिप्तानि शरजालानि पक्षाभ्यां विधूय बहिष्कृत्य चरणाभ्याम् अस्य रावणस्य महद्धनुर्बभञ्ज ॥ १३ ॥

गो० टी०-स इति । तानि च पक्षाभ्यां विधूय चरणाभ्यां धनुर्बभञ्ज चेत्यन्वयः ॥ १४ ॥

१४-१५] ति० टी०-तत्प्रसिद्धं शरावरं कवचं व्यधुनोत्पातयामास । 'शरासनम्' इति पाठे शरप्रक्षेपकारणम् । तच्च द्वितीयं धनुश्च बभञ्जेत्यन्वयः । व्यधुनोत्कम्पयति स्म रावणमिति शेषः ॥ १४ ॥ १५ ॥

रा० टी०-तदिति । पतगेश्वरः जटायुः शरावरं कवचं पक्षाभ्यां व्यधुनोत् बभञ्जेत्यर्थः ॥ १४ ॥

गो० टी०-तच्चेति । शरावरं कवचं पक्षाभ्यां पक्षवातेन व्याधुनोत् प्रच्यावयत् ॥ १५ ॥

रा० टी०-काञ्चनेति । काञ्चनोरश्छदान् स्वर्णमयकवचविशिष्टान् दिव्यान् आकाशगामिनः जवसंपन्नान् अतिवेगवतः अस्य रावणस्य तान् रथसंवहान् खरान् बली जटायुः जघान 'उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्' इत्यमरः ॥ १५ ॥

गो० टी०-काञ्चनेति । काञ्चनोरश्छदान् स्वर्णमयकवचयुक्तान् । 'उरश्छदः कङ्कटको जागरः कवचोऽस्त्रियाम्' इत्यमरः । बली जटायुः ॥ १६ ॥

१६] ति० टी०-त्रिवेणुर्युगंधरः ॥ १६ ॥

रा० टी०-अथेति । त्रिवेणुसंपन्नं युगन्धरसंयुक्तं पावकार्चिषं पावकतेजःसदृशतेजोविशिष्टं मणिभिः हेमभिश्च विचित्राण्यङ्गानि यस्य तं महारथं बभञ्ज ॥ १६ ॥

गो० टी०-वरमिति । त्रिवेणुः युगन्धरः कामं यथेच्छं गच्छतीति कामगम् ॥ १७ ॥

---

१ रावणेति रा० पाठः । २ पतगेश्वर इति गो० पाठः । ३ सुपसंप्राप्तः पक्षीव पबभाविति गो० पाठः । ४ नर्पाण नि गो० पाठः । ५ र्धति गो० पाठः । ६ स महात्मीयौ व्याधुनोदिति गो० पाठः । ७ नरमिति गो० पाठः । ८ हेमभिश्चित्रेति गो० रा० पाठः ।

पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह । पातयामास वेगेन ग्राहिभी राक्षसैः सह ॥ १७ ॥
सारथेश्चास्य वेगेन तुण्डेन चै महच्छिरः । पुनर्व्यपहनच्छ्रीमान्पक्षिराजो महाबलः ॥ १८ ॥
स भग्नधन्वा विरथो हताश्वो हतसारथिः । अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ १९ ॥
दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् । साधुसाध्विति भूतानि गृध्रराजमपूजयन् ॥ २० ॥
परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् । उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥ २१ ॥
तं प्रहृष्टं निधायाङ्के रावणं जनकात्मजाम् । गच्छन्तं खड्गशेषं च प्रनष्टहतसाधनम् ॥ २२ ॥
गृध्रराजः समुत्पत्य रावणं समभिद्रवत् । समावार्य महातेजा जटायुरिदमब्रवीत् ॥ २३ ॥
वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण । अल्पबुद्धे हरस्येनां वधाय खलु रक्षसाम् ॥ २४ ॥
सामित्रबन्धुः सामात्यः सबलः सपरिच्छदः । विषपानं पिबस्येतत्पिपासित इवोदकम् ॥ २५ ॥
अनुबन्धमजानन्तः कर्मणामविचक्षणाः । शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २६ ॥
बद्धस्त्वं कालपाशेन क्व गतस्तस्य मोक्षसे । वधाय बडिशं गृह्य सामिषं जलजो यथा ॥ २७ ॥

१७-१८] ति० टी०-ग्राहिभिश्छत्रादिधारकैः ॥१७॥१८॥

रा० टी०-पूर्णेति । पूर्णचन्द्रप्रतीकाशं पूर्णचन्द्रसदृशं व्यजनैः सह ग्राहिभी राक्षसैश्च सह छत्रं पातयामास ॥ १७ ॥

गो० टी०-पूर्णेति । ग्राहिभिः छत्रचामरादिग्राहकैः । "नन्दिग्रहि-" इत्यादिना णिनिः ॥ १८ ॥

रा० टी०-सारथेरिति । पक्षिराजो जटायुः अस्य रावणस्य सारथेर्महच्छिरः तुण्डेन व्यपाहरत् अच्छिनत् ॥ १८ ॥

गो० टी०-सारथेरिति । व्यपाहरत् खण्डितवान् । पुनरित्यनेन छत्रादिखण्डनं तुण्डेनेति सूच्यते ॥ १९ ॥

१९-२१] ति० टी०-अङ्केन क्रोडभागेन ॥ १९-२१ ॥

रा० टी०-स इति । भग्नं धनुर्यस्य स विरथो रथरहितः स रावणः वैदेहीमादाय भुवि पपात ॥ १९ ॥

गो० टी०-स इति । भग्नधन्वा । "धनुषश्च" इत्यनङ् ॥२०॥

रा० टी०-दृष्ट्वेति । भग्नवाहनं रावणं भूमौ निपतितं दृष्ट्वा भूतानि जन्तवः साधु साधु इति गृध्रराजं जटायुषम् अपूजयन् मनसा प्राशंसन् ॥ २० ॥

गो० टी०-दृष्ट्वेति । अपूजयन् मनसेति शेषः ॥ २१ ॥

रा० टी०-परीति । जरया हेतुभूतया परिश्रान्तं पक्षियूथपं दृष्ट्वा हृष्टो रावणः मैथिलीं गृह्य गृहीत्वा उत्पपात ॥२१॥

गो० टी०-परीति । गृह्य गृहीत्वा ॥ २२ ॥

२२] ति० टी०-प्रनष्टानि स्वत एव नष्टानि हतानि गृध्रेण नाशितानि साधनानि युद्धसाधनानि यस्य तम् ॥ २२ ॥

२३] ति० टी०-समावार्य संनिरुध्य ॥ २३ ॥

रा० टी०-तमिति । जनकात्मजामङ्के गमनस्थले निधाय गच्छन्तम् अत एव प्रहृष्टं तं रावणं गृध्रराजः सम्युत्पत्य उड्डीय समभिद्रुत्य तत्संमुखं प्राप्य समावार्य परिहृत्य जटायुरिदमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो०टी०-तमित्यादिसार्धश्लोक एकान्वयः । समुत्पत्य ऊर्ध्वं गत्वा समभिद्रुत्य अभिमुखं गत्वा समावार्य सम्यगवरुध्य॥२३॥

२४]ति०टी०-वज्रतुल्यः स्पर्शो येषां तादृशा बाणा यस्य २४

रा० टी०-तद्गुणाकारमाह-वज्रेति । वज्रसंस्पर्शतुल्यस्पर्शविशिष्टो बाणो यस्य तस्य रामस्य एनां भार्यां रक्षसां वधाय हरसि ॥ २४ ॥

गो० टी०-वज्रेति । वज्रसंस्पर्शाः वज्रसमस्पर्शाः बाणाः यस्य ॥ २४ ॥

२५] ति० टी०-सबलः सचतुरङ्गबलः । परिच्छदः दासीदासादि निदर्शनात्र तत्सहितो न शिष्यसीति तात्पर्यम् ॥ २५ ॥

रा० टी०-सेति । मित्रादिसहितस्त्वं पिपासित उदकमिव एतदपहरणं विषपानं यथा भवति तथा पिबसि ॥ २५ ॥

गो० टी०-सामित्रेति । पीयत इति पानं पानकरसादि विषयुक्तं पानमिति मध्यमपदलोपिसमासः । यद्वा विषस्य पानं विषपानम् एतत्सीताहरणरूपं विषपानं पिबसि करोषि । ओदनपाकं पचतीतिवत् प्रकृतेः प्रत्ययोपस्थानमात्रं प्रयोजनम् ॥ २५ ॥

२६] ति० टी०-अनुबन्धं फलम् ॥ २६ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-अनुबन्धमिति । कर्मणां स्वकृतविषपानादीनामनुबन्धं फलमजानन्तोऽपि जना यथा शीघ्रमेव विनश्यन्ति तथा त्वं विनशिष्यसि विनङ्क्ष्यसि ॥२६॥

गो० टी०-अनुबन्धमिति । अनुबध्यत इत्यनुबन्धः फलम् । अविचक्षणाः असमर्थाः कर्मणाम् आत्मना क्रियमाणानां फलमजानन्तः शीघ्रं विनश्यन्ति । तत्रोदाहरणं भवानित्याह-यथेति ॥ २६ ॥

२७] ति० टी०-तस्य ततः । कालपाशान्मोक्ष्यसे इत्यर्थः । बडिशं मत्स्यवेधनम् । जलजो मत्स्यः ॥ २७ ॥

---

१ एवेति गो. पाठः । २ व्यपाहरदिति गो. व्यपहरदिति रा. पाठः । ३ गच्छन्तमिति गो. पाठः । ४ अर्धमेतत् गो. नास्ति । ५ प्रणष्टेति रा. पाठः । ६ समभिद्रुत्य रावणमिति गो. पाठः । ७ मोक्ष्यस इति गो. पाठः ।

न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण । धर्षणं चाश्रमस्यास्य क्षमिष्येते तु राघवौ ॥ २८ ॥
यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् । तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ २९ ॥
युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण । शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥ ३० ॥
परेतकाले पुरुषो यत्कर्म प्रतिपद्यते । विनाशात्मनाऽधर्म्यं प्रतिपन्नोऽसि कर्म तत् ॥ ३१ ॥
पापानुबन्धो वै यस्य कर्मणः को नु तत्पुमान् । कुर्वीत लोकाधिपतिः स्वयंभूर्भगवानपि ॥ ३२ ॥
एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः । निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ ३३ ॥
तं गृहीत्वा नखैस्तीक्ष्णैर्विददार समन्ततः । अधिरूढो गजारोहो यथा स्याद्दुष्टवारणम् ॥ ३४ ॥

रा० टी०–बद्ध इति । कालपाशेन बद्धस्त्वं क्व गतः सन् तस्य तस्मात्कालपाशात् मोक्ष्यसे न क्वापीत्यर्थः । तत्र दृष्टान्तः सामिषं मांससहितं बडिशं मत्स्यभेदनं जलजो मत्स्यो यथा ॥ २७ ॥

गो० टी०–बद्धेति । कालपाशेन बद्धस्त्वं क्व देशे गतः सन् तस्य तस्मात्कालपाशान्मोक्ष्यसे सहानुवर्तमानाद्बन्धात्कथं ते मुक्तिर्भविष्यतीत्यर्थः । सामिषं मांससहितं बडिशं मत्स्यबन्धनम् 'बडिशं मत्स्यबन्धनम्' इत्यमरः । आमिषलोभेन गृध्नु गृहीत्वा जलजो मत्स्यो यथा देशान्तरं गतोऽपि न जीवति बडिशामोक्षणात् तद्वत् ॥ २७ ॥

२८] ति० टी०–अस्याश्रमस्य तव धर्षणं त्वत्कृतमभिभवं नहि क्षमिष्येते ॥ २८ ॥

रा० टी०–नहीति । हे रावण ! दुराधर्षौ धर्षयितुमशक्यौ काकुत्स्थौ रामलक्ष्मणौ अस्याश्रमस्य तव धर्षणं त्वत्कर्तृकपराभवं न क्षमिष्येते ॥ २८ ॥

गो० टी०–नहीति । आश्रमकर्मकं त्वत्कर्तृकं धर्षणं परिभवम् । आश्रमशब्देन आश्रमस्था सीतोच्यते मञ्चाः क्रोशन्तीतिवत् ॥ २८ ॥

२९–३०] ति० टी०–यथा यादृशं त्वया कृतं कर्म तत्तस्कराचरितो मार्गो न वीरसेवितः ॥ २९ ॥ ३० ॥

रा० टी०–यथेति । भीरुणा त्वया लोकगर्हितं कर्म यथा येन प्रकारेण कृतं तथा तेन प्रकारेण मार्गः कर्म तस्कराचरितः चौरैः सेवितः अत एव एष मार्गः वीरनिषेवितो नैव भवति ॥ २९ ॥

गो० टी०–यथेति । लोकगर्हितं कर्म भीरुणा त्वया यथा कृतं तथा तस्कराचरितो मार्गः तस्करकृत्यतुल्यं त्वत्कृत्यमित्यर्थः, तस्मादेष मार्गः वीरनिषेवितो न भवतीत्यर्थः ॥ २९ ॥

रा० टी०–युध्यस्वेति । यदि शूरोऽसि तर्हि युध्यस्व मया हतो भ्राता खर इव भूमौ शयिष्यसे ॥ ३० ॥

गो०टी०–युध्यस्वेति । पूर्वसर्गान्ते व्याख्यातोऽयम् ॥ ३० ॥

३१] ति० टी०–परेतकाले मृत्युकाले अधर्म्यं तज्जनकम् प्रतिपन्नोऽसि प्राप्तोऽसि ॥ ३१ ॥

रा० टी०–परेतेति । परेतकाले स्वविनाशसमये पुरुषो जनः यदधर्म्यं कर्म आत्मनो विनाशाय प्रतिपद्यते तत्कर्म त्वं प्रतिपन्नः प्राप्तोऽसि ॥ ३१ ॥

गो० टी०–परेतेति । परेतकाले मृत्युकाल इत्यर्थः, यत्कर्म यादृशं कर्म पुरुषः आत्मविनाशाय प्रतिपद्यते प्राप्नोति अधर्म्यम् अधर्मोदर्कं तत्कर्म सीताहरणरूपं प्रतिपन्नोऽसि एतादृशकर्मकरणादवश्यमविलम्बितं मृत्युं प्राप्नोषीत्यर्थः ॥ ३१ ॥

३२] ति० टी०–यस्य कर्मणः कर्तुः पापानुबन्धः पापफलसंबन्धः आवश्यकः शास्त्रदृष्टः को नु पुमान्वै निश्चयेन तत्कर्म कुर्वीत । लोकाधिपतिरपीन्द्रादिरपि समर्थोऽपि पापफलं कर्म न कुर्यात् । स्वयंभूर्भगवानपि पापपुण्यतत्फलतदधिकारिस्रष्टापि कर्तुमकर्तुमन्यथा कर्तुं शक्तोऽपि नेदृशं कर्म कुर्यात्तादृशमैश्वर्यमत्तेन त्वया क्रियमाणं कर्माचिरादेव फलदं भविष्यतीति तात्पर्यम् ॥ ३२ ॥

रा० टी०–ननु समर्थानामस्माकं पापकर्मफलं नैव भविष्यतीत्यत आह–पापेति । पाप हे पापिन् ! यस्य कर्मणः योऽनुबन्धः शास्त्रदृष्टफलं तत् तमनुबन्धं लोकाधिपतिः सर्वलोकपालकः विष्णुर्वा स्वयंभूर्ब्रह्मा वा भगवान् महेशो वा कः पुमान् अन्यथा कुर्वीत न कोऽपीत्यर्थः । एतेनेदं पापकर्म त्वया नैव कार्यमिति सूचितम् ॥ ३२ ॥

गो० टी०–पापेति । यस्य कर्मणः पापानुबन्धः पापफलसंबन्धो भवति तत्कर्म लोकाधिपतित्वादिविशिष्टोऽपि को नु कुर्वीत ॥ ३२ ॥

३३] ति० टी०–पृष्ठे पश्चाद्भागे ॥ ३३ ॥

रा० टी०–एवमिति । एवं वाक्यमुक्त्वा तस्य प्रसिद्धस्य दशग्रीवस्य पृष्ठे वीर्यवान् जटायुः भृशं निपपात ॥ ३३ ॥

गो० टी०–एवमिति । पृष्ठ इत्यनेन जटायुषमनादृत्य रावणस्य पलायमानत्वं गम्यते ॥ ३३ ॥

३४] ति० टी०–दुष्टवारणमधिरूढो गजारोहो हस्तिपको गजविषये यथा स्याद्तादृशव्यापारो भवेद्गजक्षतकरणव्यापारो भवेत्तथा । 'विरराव' इति पाठेऽपि क्षतानि चकारेत्येवार्थः ॥ ३४ ॥

रा० टी०–तमिति । दुष्टवारणमधिरूढः गजारोहो हस्तिपको यथा येन प्रकारेण स्यात् विदृणीयात् तथा तं रावणं गृहीत्वा समन्ततो नखैर्विददार ॥ ३४ ॥

१ कर्म को नु तदिति गो. पाठः ।

विदेदार नखैरस्य तुण्ड पृष्ठे समर्पयन् । केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३५ ॥
स तदा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः । अमर्षस्फुरितोष्ठः सन्प्राकम्पत चै राक्षसः ॥ ३६ ॥
संपरिष्वज्य वैदेहीं वामेनाङ्केन रावणः । तलेनाभिजघानार्तो जटायुं क्रोधमूर्छितः ॥ ३७ ॥
जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः । वामबाहून्दश तदा व्यपाहरदरिंदमः ॥ ३८ ॥
संछिन्नबाहोः सैद्यो वै बाहवः सहसाऽभवन् । विषज्वालावलीमुक्ता वल्मीकादिव पन्नगाः ॥ ३९ ॥
ततः क्रोधादशग्रीवः सीतामुत्सृज्य वीर्यवान् । मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥ ४० ॥
ततो मुहूर्तं संग्रामो बभूवातुलवीर्ययोः । राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च ॥ ४१ ॥
तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः । पक्षौ पादौ च पार्श्वौ च खड्गमुद्धृत्य सोऽच्छिनत् ॥४२॥
स च्छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा । निपपात महागृध्रो धरण्यामल्पजीवितः ॥ ४३ ॥
तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम् । अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता ॥ ४४ ॥

गो० टी०–तमिति । तं गृहीत्वा बलान्निवर्त्यांधिरूढः सन् जटायुः गजारोहो यन्ता दुष्टवारणं पलायिनम् अङ्कुशैर्निरुध्य यथा विदारयति तथा नखैः विरराद । स्यादिति संभावनायाम् ॥ ३४ ॥

३५–३६] ति० टी०–अस्य विददार एवं विददारेत्यर्थः । तादृशक्रियाणां बाहुल्यात्पुनरुक्तिः ॥ ३५ ॥ ३६ ॥

रा० टी०–विददारेति । नखपक्षमुखायुधो जटायुः अस्य रावणस्य पृष्ठे पश्चाद्भागे तुण्डं समर्पयन् संस्थापयन् दशन् सन्नित्यर्थः केशान् उत्पाटयामास ॥ ३५ ॥

गो० टी०–विररादेति । नखपक्षमुखायुधो गृध्रः अस्य रावणस्य पृष्ठे नखैः सह तुण्डं समर्पयन् व्यापारयन् सन् विरराद व्यदारयदित्यर्थः । केशांश्चोत्पाटयामास ॥ ३५ ॥

रा० टी०–स इति । गृध्रराजेन मुहुर्मुहुः क्लिश्यमानः अत एव अमर्षेस्फुरितोष्ठः अमर्षेण अक्षमया स्फुरितौ प्रकम्पौ ओष्ठौ यस्य स सन् राक्षसो रावणः प्राकम्पत ॥ ३६ ॥

गो० टी०–स इति । अमर्षेण क्रोधेन स्फुरितोष्ठः चलितोष्ठः प्राकम्पत प्रहारार्थं प्रदक्षिणं प्राचलदित्यर्थः ॥ ३६ ॥

३७] ति० टी०–वैदेहीं संपरिष्वज्य । पतनेन पलायनभिया ॥ ३७ ॥

रा० टी०–समिति । आर्तः पीडितः अत एव क्रोधमूर्छितो वामेन कौटिल्यविशिष्टेन अङ्केन गत्योपलक्षितो रावणः वैदेहीं परिष्वज्य पलायनभिया गृहीत्वा तलेन जटायुमभिजघान ॥ ३७ ॥

गो० टी०–स इति । अङ्केन ऊरुभागेन जटायुं, जटायुरित्युकारान्तोऽप्यस्ति ॥ ३७ ॥

३८] ति० टी०–तं तलप्रहारमतिक्रम्य सोढ्वा व्यपाहरत्पुनपदशापि तुण्डेन धृत्वा त्रोटितवान् ॥ ३८ ॥

रा० टी०–जटायुरिति । खगाधिपो जटायुः तमभिघातमतिक्रम्य अस्य रावणस्य दश वामबाहून् व्यपाहरत् ॥ ३८ ॥

गो० टी०–जटायुरिति । अभिक्रम्य अभितो गत्वा अवसरं प्रतीक्ष्येत्यर्थः । अस्य वामबाहून् यैः सीता परिष्वक्ता तानित्यर्थः, व्यपाहरत् अच्छिनत् ॥ ३८ ॥

३९–४१] ति० टी०–संछिन्नबाहोः कर्तितबाहोरपि तस्य बाहवः पुनः सहसा समभवन् । वल्मीकात्पन्नगा इव ॥ ३९–४१ ॥

रा० टी०–संछिन्नेति । सद्यः संछिन्नबाहोः बाहवः सहसा अभवन् तत्र दृष्टान्तः विषज्वालावलीयुक्ताः पन्नगाः वल्मीकादिव ॥ ३९ ॥

गो० टी०–संछिन्नबाहोरिति । संछिन्नबाहोः रावणादिति शेषः । सद्यैवेत्यार्षे सलोपे ह्रस्वः । अभवन् प्रादुरभवन् । विषज्वालेत्युपमानविशेषणाद्बाहूनां सायुधत्वं गम्यते ॥ ३९ ॥

रा० टी०–तत इति । दशग्रीवः क्रोधात् सीतां समुत्सृज्य मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥ ४० ॥

गो० टी०–तत इति । अपोथयदताडयत् ॥ ४० ॥

रा० टी०–तत इति । अतुलवीर्ययोः राक्षसानां मुख्यस्य पक्षिणां प्रवरस्य च मुहूर्तं संग्रामो बभूव ॥ ४१ ॥

गो० टी०–तत इति । संग्रामो युद्धम् ॥ ४१ ॥

४२] ति० टी०–व्यायच्छमानस्य व्यायामं पराक्रमं कुर्वाणस्य ॥ ४२ ॥

रा० टी०–तस्येति । रामस्यार्थे व्यायच्छमानस्य पराक्रमं कुर्वतः तस्य जटायोः पक्षादीन् स रावणः खड्गमुद्धृत्य अच्छिनत् ॥ ४२ ॥

गो० टी०–तस्येति । व्यायच्छमानस्य व्यायामं कुर्वतः "आङो यमहनः" इत्यात्मनेपदम् । 'शरीरायासजनकं कर्म व्यायाम उच्यते' इति वाग्भटः । युद्धं कुर्वत इत्यर्थः । पार्श्वौ पक्षमूले ॥ ४२ ॥

४३–४४] ति० टी०–अल्पजीवितो घटीमात्रावस्थानोचितप्राणः ॥ ४३ ॥ ४४ ॥

---

१ विरराडेति गो. पाठः । २ तथेति गो. पाठः । ३ स रावण इति गो. पाठः । ४ स पर्यानि गो पाठः । ५ आर्धनि गो पाठः । ६ अमीति गो पाठः । ७ सर्वेवेति गो पाठः । ८ रावण इति गो. पाठः । ९ इन इति गो. पाठः ।

तं नीलजीमूतनिकाशकल्पं महापाण्डुरोरस्कमुदारवीर्यम् ।
ददर्श लङ्काधिपतिः पृथिव्यां जटायुषं शान्तमिवाग्निदावम् ॥ ४५ ॥
ततस्तु तं पत्ररथं महीतले निपातितं रावणवेगमर्दितम् ।
पुनश्च संगृह्य शशिप्रभानना रुरोद सीता जनकात्मजा तदा ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ।

रामलक्ष्मणयो. स्वहरणवृत्तानिवेदनार्थं प्राणधारणवरेण योजयन्ती वैदेही यावत् स्वकरेण तदङ्गं परामृशति तावद्रावण एत्य तामपहृत्य ययौ । रावण विनिघ्नं मृगपक्षिणः परिदेवयन्ते । रावणगातवेगात्सीताभृतहारनूपुराद्याभरणानि धरणौ प्रापतन्

[तैमल्पजीवितं गृध्रं स्फुरन्तं राक्षसाधिपः । ददर्श भूमौ पतितं समीपे राघवाश्रमात् ॥]
सा तु ताराधिपमुखी रावणेन निरीक्ष्य तम् । गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ १ ॥
[आलिङ्ग्य गृध्रं निहतं रावणेन बलीयसा । विललाप सुदुःखार्ता सीता शशिनिभानना ॥]
निमित्तं लक्षणं स्वप्नं शकुनिस्वरदर्शनम् । अवश्यं सुखदुःखेषु नराणां पैरिदृश्यते ॥ २ ॥

रा० टी०—स इति । रौद्रकर्मणा रक्षसा रावणेन छिन्नपक्षः अत एव अल्पजीवितः महागृध्रः धरण्यां निपपात ॥ ४३ ॥

गो० टी०—स इति । अल्पजीवितः द्वित्रिक्षणावस्थानोचितप्राण इत्यर्थः ॥ ४३ ॥

रा० टी०—तमिति । क्षतजार्द्रं रुधिरक्लिन्नं जटायुषं भूमौ पातितं दृष्ट्वा दुःखिता वैदेही स्वबन्धुमिव अभ्यधावत् ॥ ४४ ॥

गो० टी०—तमिति । क्षतजं शोणितम् ॥ ४४ ॥

४५] ति० टी०—अग्निदावं दावाग्निं परनिपात आर्षः ॥४५॥

रा० टी०—तमिति । नीलजीमूतनिकाशकल्पं नीलमेघसदृशत्वेन कल्पनावन्तं पाण्डुरोरस्कं जटायुषं शान्तम् अग्निदावं दावाग्निमिव लङ्काधिपतिः पृथिव्यां ददर्श ॥ ४५ ॥

गो० टी०—तमिति । नीलजीमूतनिकाशकल्पं नीलमेघप्रकाशतुल्यम् अग्निदावं दावाग्निम् ॥ ४५ ॥

४६] ति० टी०—संगृह्य बाहुभ्यामालिङ्ग्य ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

रा० टी०—तत इति । रावणवेगमर्दितं महीतले निपातितं पत्ररथं पत्रं पक्ष एव रथो यस्य तं जटायुषं सीता संगृह्य संस्पृश्य रुरोद ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

गो० टी०—तत इति । परिष्वज्य बाहुभ्यामिति शेषः ॥४६॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

गो० टी०—जटायुर्युद्धकाले विसृष्टायाः सीतायाः पुनरपि रावणेन हरणप्रकारमाह—तमित्यादि । राघवाश्रमादित्यवधित्वात्पञ्चमी ॥ १ ॥

१] ति० टी०—सा त्विति ॥ १ ॥

रा० टी०—जटायुनिपातानन्तरकालिकं सीताहृत्तान्तरमाह—सेत्यादिभिः । ताराधिपमुखी चन्द्रवदना सा सीता रावणेन निहतं गृध्रराजं तं जटायुषं निरीक्ष्य सुदुःखिता सती विललाप ॥ १ ॥

गो० टी०—सा त्विति । रावणेन विनिहतं समीक्ष्येत्यन्वयः ॥ २ ॥

गो० टी०—विशेषान्तरं वक्तुं पुनरनुवदति-आलिङ्ग्येति । कराभ्यां संस्पृश्येत्यर्थः ॥ ३ ॥

२] ति० टी०—नराणां सुखदुःखेषु निमित्तं सूचनं वामदक्षिणाङ्गस्पन्दनादिरूपं लक्षणं चिह्नम् । तथा जलदर्शादावात्मनोऽशिरसो दर्शनं च लक्षणम् । स्वप्नम् 'स्वप्ने यः पुरुषं कृष्णं कृष्णदन्तं प्रपश्यति । स एनं हन्ति' इत्यादि स्वप्नाध्यायोपदिष्टम् । तथा शकुनीनां वामदक्षिणगमनविशेषदर्शनम् । तथा तेषां स्वराणां दर्शनमनुभवः । एतत्सर्वं यथायोगं परिदृश्यते सर्वेण । 'लक्षणज्ञानम्' इति पाठेऽङ्गस्फुरणादिज्ञानमित्यर्थः । शकुनिग्रहणं मृगाद्युपलक्षणम् ॥ २ ॥

रा० टी०—विलापाकारमाह—निमित्तमित्यादिभिः । नराणां सुखदुःखेषु प्राप्स्यमाणेष्विति शेषः निमित्तं सुखदुःखसूचकदक्षिणवामनेत्रस्फुरणादिलक्षणम् आदर्शादौ स्वशिरसोऽदर्शनं स्वप्नम् कृष्णदन्तादिविशिष्टकृष्णपुरुषदर्शनादि शकुनि-

१ स्विति गो. पाठः । २ परिष्वज्येति गो. पाठः । ३ श्लोकोऽयमधिकः गो. पाठे । ४ समीक्ष्येति गो. पाठः । ५ लक्षणज्ञानमिति गो. पाठः । ६ प्रतीति गो. पाठः ।

नै नूनं राम जानासि महद्व्यसनमात्मनः । धावन्ति नूनं कैकुत्स्थ मदर्थं मृगपक्षिणः ॥ ३ ॥
अयं हि कैपया राम मां त्रातुमिह संगतः । शेते विनिहतो भूमौ ममाभाग्याद्विहंगमः ॥ ४ ॥
त्राहि मामद्य काकुत्स्थ लक्ष्मणेति वराङ्गना । सुसंत्रस्ता समाक्रन्दच्छृण्वतां तु यथान्तिके ॥ ५ ॥
तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत् । अभ्यधावत वैदेहीं रावणो राक्षसाधिपः ॥ ६ ॥
तां लतामिव वेष्टन्तीमालिङ्गन्तीं महाद्रुमान् । मुञ्चमुञ्चेति बहुशः प्राप तां राक्षसाधिपः ॥ ७ ॥
क्रोशन्तीं रामरामेति रामेण रहितां वने । जीवितान्ताय केशेषु जग्राहान्तकसंनिभः ॥ ८ ॥
प्रधर्षितायां वैदेह्यां बभूव सचराचरम् । जगत्सर्वममर्यादं तमसाऽन्धेन संवृतम् ॥ ९ ॥

दर्शनं पक्ष्यादीनां वामदक्षिणमार्गेण गमनविशेषानुभवः स्वरदर्शनं तेषां शब्दानुभवः परिदृश्यंत भवति एतेन निमित्तादयोऽवश्यं भवद्भिर्दृष्टा भवेयुरिति सूचितम् 'लक्षणज्ञानम्' इति पाठान्तरम् ॥ २ ॥

गो० टी०-निमित्तमिति । लक्षणानि आक्षिस्पन्दनादीनि तेषां ज्ञानं शकुनीनां पिङ्गल्यादीनां स्वरस्य दर्शनं ज्ञानं नराणां सुखदुःखेषु निमित्तं ज्ञापकं प्रतिदृश्यते ॥ ४ ॥

३-४] ति० टी०-किं ततस्तत्राह-न नूनमिति । मदर्थं मदपहारसूचनप्रयोजनमुद्दिश्य मृगपक्षिणोऽशुभसूचनमार्गेण धावन्ति । त्वं तु तैः सूचितमपि स्वस्य महद्व्यसनं न जानासि नूनम् । जानीथाश्चेन्नोपेक्षेथा इति तात्पर्यमिति लोकाभिनयेन रामोपालम्भः ॥ ३ ॥ ४ ॥

रा० टी०-नेति । हे राम ! हे काकुत्स्थ ! मदर्थं मद्व्यसनसूचनार्थं मृगपक्षिणो धावन्ति अतोऽपि आत्मनः स्वस्य प्राप्तं महद्व्यसनं न जानासि निमित्तदर्शनादिना निश्चिनोषि नूनं किं कारणमत्र । एकं नूनमित्यतोऽपीत्यर्थे 'काकुत्स्थम्' इति भूषणपाठः ॥ ३ ॥

गो० टी०-ततः किमित्यत्राह-नूनमिति । हे राम ! आत्मनो महद्व्यसनं न जानासि किमिति काकुः, जानास्येव । यस्मान्मदर्थं मदपहरणमूचनप्रयोजनमुद्दिश्य मृगपक्षिणः काकुत्स्थं त्वामभिधावन्ति । नूनं संप्रति मद्व्यसनमूचकाः मृगपक्षिणः काकुत्स्थमभिधावन्ति । तेन निमित्तेन मद्व्यसनं जानास्येवेत्यर्थः ॥ ९ ॥

रा० टी०-नन्वं त्वद्रक्षणार्थं जटायुर्नियोजितः इति कथं त्वां व्यसनं प्राप्तमित्यत आह-अयमिति । मां त्रातुं पापाचारेण रावणेन सह सङ्गतः युद्धार्थं प्राप्तः अयं विहङ्गमः ममाभाग्यात् विनिहतः सन् भूमौ शेते ॥ ४ ॥

गो० टी०-व्यसनमेवाह-अयं हीति । अयं विहङ्गमः पापचारेण रावणेन विनिहतः शेते ॥ ६ ॥

५] ति० टी०-यथान्तिकं निकटस्थितानां शृण्वतां श्रवणं भवेन्नथा समाक्रन्दत् न तूच्चैः शीघ्रं रामागमनं मा भूदिति तात्पर्येण ॥ ५ ॥

रा० टी०-त्राहीति । सुसंत्रस्ता वराङ्गना सीता अन्तिके समीपे देवादीनां शृण्वतां सतां हे काकुत्स्थ ! अद्य मां यथा यथावत् त्राहि इति समाक्रन्दत् ॥ ५ ॥

गो० टी०-त्राहीति । शृण्वतामन्तिके यथा शृण्वतां समीप इव दूरस्थितम् रामं लक्ष्मणं च रामेति लक्ष्मणेति च संबोध्य आक्रन्दत् ॥ ७ ॥

६] ति० टी०-क्लिष्टानि परिमृदितानि माल्याभरणानि यस्यास्ताम् ॥ ६ ॥

रा० टी०-तामिति । क्लिष्टानि विबाधितानि माल्याभरणानि यस्याः सा ताम् अत एव अनाथवत् विलपन्तीं वैदेहीं रावणोऽभ्यधावत ॥ ६ ॥

गो० टी०-तामिति । क्लिष्टमाल्याभरणां मृदितमाल्याभरणाम् क्षणं विश्रान्तः अभ्यधावत अभ्यधावत् ॥ ८ ॥

७] ति० टी०-वेष्टन्तीं लतामिव वृक्षानालिङ्गन्तीम् । मा मुञ्च मुञ्चेति बहुशो वृक्षान्वदन्तीमिति शेषः, मोचय मोचयेत्यर्थो वा । प्राप इतस्ततो धावन्तीं समीपगत आसीत् ॥ ७ ॥

रा० टी०-तामिति । महाद्रुमान् आलिङ्गन्तीम् अत एव लतामिव वेष्टन्तीं तां सीता मुञ्चमुञ्चेति वदन्निति शेषः राक्षसाधिपः प्राप सीतासमीपमगच्छत् ॥ ७ ॥

गो० टी०-तामित्यादि द्वावेकान्वयौ । लतामिव भूतलं वेष्टन्तीं वेष्टमानाम् ॥ ९ ॥ १० ॥

८] ति० टी०-जीवितान्ताय अनेन परस्त्रीकेशस्पर्शो यस्यकस्यापि जीवितापहारीति बोधितम् ॥ ८ ॥

रा० टी०-क्रोशन्तीमिति । रामेण रहिताम् अत एव रामरामेति क्रोशन्तीं सीताम् अन्तकसन्निभो रावणः जीवितान्ताय स्वजीवनविध्वंसाय केशेषु जग्राह ॥ ८ ॥

९] ति० टी०-अमर्यादं त्यक्तस्वस्वप्रकृतिकम् जलमुष्णमग्निः शीत इत्येवमादि । अन्धेन तमसा बाह्येनाभ्यन्तरेण च ९

रा० टी०-प्रधर्षितायामिति । वैदेह्यां प्रधर्षितायाम् रावणेन पराभूतायामिव सचराचरं सर्वं जगत् अन्धेन गाढेन तमसा अन्धकारेण संवृतम् आच्छादितम् एतेन सूर्यचन्द्रमसोस्तारागणादीनां च तेजोरहितत्वं सूचितम् तेन सर्वेषां

---

१ नूनं राम नेति गो. पाठः । २ काकुत्स्थमिति गो. पाठः । ३ पापचारेण मां त्रातुमभ्यागत गो. पापाचारेणेति रा. पाठः । ४ प्रनदन्निति गो. पाठः । ५ सीतायामिति गो. पाठः ।

न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः । दृष्ट्वा सीतां परामृष्टां [1]देवो दिव्येन चक्षुषा ॥ १० ॥
कृतं कार्यमिति श्रीमान्व्याजहार पितामहः । प्रहृष्टा व्यथिताश्वासन्सर्वे ते परमर्षयः ॥ ११ ॥
दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः । रावणस्य विनाशं च प्राप्तं बुद्ध्वा यदृच्छया ॥ १२ ॥
स तु तां राम रामेति [2]रुदतीं लक्ष्मणेति च । जगामादाय चाकाशं रावणो राक्षसेश्वरः ॥ १३ ॥
तप्ताभरणवर्णाङ्गी पीतकौशेयवासिनी । रराज राजपुत्री तु विद्युत्[3]सौदामनी यथा ॥ १४ ॥
उद्धूतेन च वस्त्रेण तस्याः पीतेन रावणः । अधिकं [4]परिबभ्राज गिरिर्दीप्त इवाग्निना ॥ १५ ॥
तस्याः परमकल्याण्यास्ताम्राणि सुरभीणि च । पद्मपत्राणि वैदेह्या अभ्यकीर्यन्त रावणम् ॥ १६ ॥

शोकातिशयः सूचितः तेन रावणविध्वंसो न भविष्यतीति शोके हेतुर्व्यञ्जितः तेन रावणस्य बलातिशयो व्यक्तः अत एव अमर्यादम् अत्याश्चर्यदर्शनेन स्वस्वस्वभावरहितं बभूव प्रधर्षिताशब्दः आचारक्रियन्तप्रकृतिकक्रूक्रियन्तः ॥ ९ ॥

गो० टी०–प्रधर्षितायामिति । अमर्यादं भिन्नसत्त्वप्रकृतिकम् अन्धेन गाढेन तमसा अज्ञानान्धकारेण तदा जगत्सर्वं संवृतं विमूढं चासीदित्यर्थः ॥ ११ ॥

१०] ति० टी०–मर्यादात्यागमेवाह–न वातीति । देवो ब्रह्मापि ब्रह्मलोकस्थ एव दिव्येन चक्षुषा सीतां परामृष्टां रक्षसा केशेषु गृहीतां दृष्ट्वा ॥ १० ॥

रा० टी०–तदेव स्पष्टयन्नाह–नेति । तत्र तस्मिन्समये मारुतो वायुर्न वाति दिवाकरः सूर्यः निष्प्रभोऽभूत् । अर्थं पृथक्–दृष्ट्वेति । देवो देवदेवः पितामहो ब्रह्मा दिव्येन चक्षुषा सीतां परामृष्टां शत्रुपहृतां दृष्ट्वा कार्यं राक्षसध्वंसरूपदेवकृत्यं कृतं रामेण उपादितमिति व्याजहार कथयामास ॥ १० ॥

गो० टी०–न वातीत्यर्धमेकं वाक्यम् ॥ १२ ॥

११] ति० टी०–श्रीमान्त्रिस्तुलसकलैश्वर्यवान्पितामहः कृतं यदर्थमवतीर्णां देवानां तत्कार्यं कृतं सिद्धमित्यब्रवीत् ॥ ११ ॥

रा० टी०–प्रहृष्टा इति । दण्डकारण्यवासिनः सर्वे ते परमर्षयः सीतां परामृष्टां शत्रुपहृतां दृष्ट्वा रावणस्य विनाशं बुद्ध्वा निश्चित्य प्रहृष्टाः अतिहर्षं प्राप्ताः व्यथिताः सीताक्लेशदर्शनेन प्राप्तदुःखाश्वासन् ॥ ११ ॥ १२ ॥

गो० टी०–प्रहृष्टा इति । रावणवधस्य सिद्धप्रायत्वेन हर्षः तादात्विकसीतादशावलोकनेन व्यथा । सीतां परामृष्टां दृष्ट्वा यदृच्छया दैवगत्या रावणस्य प्राप्तं सन्निहितं विनाशं च बुद्ध्वा व्यथिताः प्रहृष्टाश्वासन्नित्यन्वयः ॥ १४ ॥

१२-१३]ति०टी०–प्रहर्षव्यथयोर्हेतुमाह–दृष्ट्वेति । तत्कालं नातिदैन्याया हरणं दृष्ट्वा तन्मायामोहितत्वाद्व्यथिताः, यदृच्छया आयासं विनैव सपरिवारस्य रावणस्य नाशं प्राप्तं बुद्ध्वा हृष्टा इत्यर्थः । भागसंधिरत्र ॥ १२ ॥ १३ ॥

गो० टी०–दृष्ट्वेति । परामृष्टाम् अपहृतां दिव्येन चक्षुषा ज्ञानेन दृष्ट्वा ज्ञात्वा कार्यं बालकाण्डे विष्णुना प्रतिज्ञातं कृतमिति व्याजहार । प्रीत्यतिशयेन पुरुषान्तरासन्निधानेऽप्युदाहरत् ॥ १३ ॥

रा० टी०–स इति । स रावणस्तु राम रामेति लक्ष्मणेति च रुदन्तीं तां सीताम् आदाय आकाशं जगाम ॥ १३ ॥

गो०टी०–स त्विति । तुशब्देन ऋष्यादिभ्यो व्यावृत्तिः १५

१४] ति० टी०–तप्ताभरणवर्णाङ्गी तप्तकाञ्चनाभरणसदृशवर्णयुक्ताङ्गी सौदामनी विद्युदिति । सुदाम्नो बहुरत्नादिमत्त्वात्तद्वा विद्युदतिप्रकाशमाना भवति तद्वत्सीतेत्यर्थः ॥ १४ ॥

रा० टी०–तप्तेति । तप्ताभरणवर्णाङ्गी तप्तं प्रतप्तं यदाभरणम् जाम्बूनदभूषणं तस्य वर्णसदृशवर्णविशिष्टमङ्गं यस्याः सा पीतकौशेयवासिनी राजपुत्री सीता सौदामनी सुदामोपर्वतविशेषोद्भवा विद्युदिव रराज शुशुभे एतेन रावणे दुष्टभावाभावः सूचितः ॥ १४ ॥

गो० टी०–तप्तेति । तप्ताभरणं तप्तं काञ्चनाभरणं तत्तुल्यवर्णाङ्गी विद्युत् विशेषेण द्योतमाना सौदामिनी तडित् । अनेन तडिद्यथा मेघे क्षणं तिष्ठति तथा रावणे सीतेति सूचितम् ॥ १६ ॥

१५] ति० टी०–अग्निना दीप्तो गिरिरिवेत्यनेनासन्नभस्मता सूचिता । असङ्गाया अपि चिच्छक्तेस्तस्या रावणविनाशसांनिध्यद्योतनाय कवी रावणेन तस्या आसक्तिं वर्णयति ॥ १५ ॥

रा० टी०–उद्धूतेनेति । उद्धूतेन वातप्रचलितेन पीतेन तस्याः सीतायाः वस्त्रेण अग्निना दीप्तो गिरिरिव रावणोऽधिकं परिबभाज ॥ १५ ॥

गो० टी०–उद्धूतेनेति । अत्रापि सीताग्रहणेन रावणस्य संतापो भविष्यतीत्यलंकारेण वस्तुध्वनिः ॥ १७ ॥

१६] ति० टी०–पद्मपत्राणि रावणमभ्यकीर्यन्त । रावणाङ्के पतितान्यभूवन्नित्यर्थः ॥ १६ ॥

रा० टी०–तस्या इति । परमकन्याप्यास्तस्याः सीतायाः सुरभीणि शोभनगन्धविशिष्टानि ताम्राणि अरुणानि पद्मपत्राणि रावणमभ्यकीर्यन्त ॥ १६ ॥

गो० टी०–तस्या इति । रावणमभ्यकीर्यन्त रावणाङ्के पतितानीत्यर्थः । अत्र रावणैश्वर्यं क्षणाद्विशीर्णं भविष्यतीति वस्तुना वस्तुध्वनिः ॥ १८ ॥

१ दीनामिति गो. पाठः । २ रुदन्नीमिति गो. रा. पाठः । ३ सौदामिनीति गा. पाठः । ४ प्रतप्ते गा. पाठः । ५ सुदामपर्वतेति भाति ।

तस्याः कौशेयमुद्भूतमाकाशे कनकप्रभम् । बभौ चादित्यरागेण ताम्रमभ्रमिवातपे ॥ १७ ॥
तस्यास्तद्विमलं वक्त्रमाकाशे रावणाङ्कगम् । न रराज विना रामं विनालमिव पङ्कजम् ॥ १८ ॥
बभूव जलदं नीलं भित्त्वा चन्द्र इवोदितः । सुललाटं सुकेशान्तं पद्मगर्भाभमव्रणम् ॥ १९ ॥
शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलंकृतम् । तस्याः सुनयनं वक्त्रमाकाशे रावणाङ्कगम् ॥ २० ॥
रुदितं व्यपमृष्टास्रं चन्द्रवत्प्रियदर्शनम् । सुनासं चारुताम्रोष्ठमाकाशे हाटकप्रभम् ॥ २१ ॥
राक्षसेन्द्रसमाधूतं तस्यास्तद्वदनं शुभम् । शुशुभे न विना रामं दिवा चन्द्र इवोदितः ॥ २२ ॥
सा हेमवर्णा नीलाङ्गं मैथिली राक्षसाधिपम् । शुशुभे काञ्चनी काञ्ची नीलं गजमिवाश्रिता ॥ २३ ॥
सा पद्मपीता हेमाभा रावणं जनकात्मजा । विद्युद्घनमिवाविश्य शुशुभे तप्तभूषणा ॥ २४ ॥

१७] ति० टी०—आतपे इत्यनेन ईषत्तप इत्यर्थकेन संध्याकालं लक्षयति । तत्र काले आदित्यरागेण तत्किरणेन युक्तमभ्रमिव तत्करयुतं वासो बभौ ॥ १७ ॥

रा०टी०—तस्या इति । आकाशे उद्भूतं कनकप्रभं तस्याः कौशेयम् आतपे ईषत्तपे संध्याकाले इत्यर्थः, आदित्यरागेण ताम्रमरुणमभ्रमिव बभौ ॥ १७ ॥

गो० टी०—तस्या इति । आतपे मध्याह्ने आदित्यरागेण ताम्रम् अरुणमभ्रमिव बभौ । अनेन रावणविनाशपिशुनोत्पातः सूचितः ॥ १९ ॥

१८] ति० टी०—विनालमिव पङ्कजम् । शोकशुष्कत्वात् ॥ १८ ॥

रा० टी०—तस्या इति । रावणाङ्कगं विमलं तस्याः वक्त्रं रामं विना विनालं नालरहितं पङ्कजमिव न रराज ॥ १८ ॥

गो० टी०—तस्यास्तदिति । उपसर्गाच्चेति नासिकाशब्दान्ताद्बहुव्रीहेरच् समासान्तः नासिकाशब्दस्य नसादेशश्च । अत्र सीताया मुखविवर्णत्वोक्त्या खेदातिशय उच्यते ॥ २० ॥

१९] ति० टी०—नीलं जलदं भित्त्वा तन्मध्य उदितश्चन्द्र इव बभौ । तत्कान्तिधूसरो हि सततमुदेति । वक्त्रं विशिनष्टि—सुललाटमिति । पद्मगर्भवदाभा यस्य तत् ॥ १९ ॥

रा० टी०—बभूवेति । सुललाटं शोभनललाटविशिष्टं पद्मगर्भाभं पद्मगर्भसदृशम् अव्रणं विस्फोटकादिहेतुकव्रणरहितं शुक्लैः श्वेतैः सुविमलैः स्वच्छैः प्रभावद्भिः प्रभाविशिष्टैः दन्तैरलंकृतं सुनयनं शोभननेत्रविशिष्टं रावणाङ्कगं सुकेशान्तं शोभनकेशपर्यन्तं तस्याः वक्त्रं मुखं नीलं जलदं मेघं भित्त्वोदितः चन्द्र इव बभूव । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०—अथ त्वरितगमनमाह—बभूवेति । अत्र मुखमिति शेषः । जलदं भित्त्वा उदितः प्रकाशमानश्चन्द्र इव मेघरन्ध्रे भासमान इत्यर्थः । अत्र प्रतिचन्द्रदर्शनरूपोत्पातः सूच्यते । पद्मगर्भाभं विकसितपद्माभमित्यर्थः । अव्रणं निर्दोषम ॥ २१ ॥

२०] ति० टी०—रावणाङ्कगम् न बभाविति शेषः ॥ २० ॥

गो० टी०—शुक्लैरिति । न शुशुभ इति वक्ष्यमाणमनुषज्यते । रावणाङ्कगं सन्न शुशुभे अनद्वरूपत्वादिति भावः ॥ २२ ॥

२१] ति० टी०—रुदितं रोदनवत् अशोभागच्च । अत एवापमृष्टास्रमपमार्जिताश्रुकम् ॥ २१ ॥

रा० टी०—रुदितमिति । रुदितं रोदनमूत्रकाकृतिविशिष्टं किं च रुदो रोदनं जातमस्येति तत् अत एव व्यपमृष्टास्रं प्रमृष्टाश्रु चन्द्रवत्प्रियदर्शनं सुनासं शोभननासाविशिष्टं चारु रमणीयं ताम्रोष्ठम् अरुणौष्ठविशिष्टं हाटकप्रभं सुवर्णप्रभासदृशप्रभाविशिष्टं राक्षसेन्द्रसमाधूतं राक्षसेन्द्रात् हेतुभूतात् प्राप्तकम्पं तस्याः सीतायास्तत् शुभं वदनं दिवा उदितः चन्द्र इव रामं विना न शुशुभे । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०—रुदितमिति । रुदितं रोदनवत् अत एव व्यपमृष्टास्रम् अनिष्टाश्रुकम् हाटकप्रभं हिरण्यप्रभम् 'हिरण्यं हेम हाटकम्' इत्यमरः । पूर्वं मनोज्ञं मुखम् इदानीम् रुदितादिमत्त्वान्न शुशुभ इति भावः ॥ २३ ॥

२२] ति० टी०—दिवोदितचन्द्रवदपगतशोभम् ॥ २२ ॥

गो० टी०—राक्षसेनेति । राक्षसेन निमित्तेन समाधूतं भयकम्पितम् ॥ २४ ॥

२३] ति० टी०—शुशुभे शोभयति स्म । नीलं गजमाश्रिता काञ्चनी काञ्चीव ॥ २३ ॥

रा० टी०—सेति । हेमवर्णा मैथिली राक्षसाधिपमाश्रिता सा सीता काञ्चनी स्वर्णमयी नीलं गजमाश्रिता काञ्ची मेखलेव शुशुभे 'मणिं नीलमिव' इति भूषणपाठः ॥ २३ ॥

गो० टी०—सेति । राक्षसाधिपमाश्रिता सा सीता नीलं मणिमाश्रिता काञ्चनी काञ्चनमयी काञ्ची मेखलेव शुशुभे । रजतमेव नीलरत्नस्य परभागकरमिति प्रसिद्धिः । तेन काञ्चनस्य नीलमणिशोभातिरस्कारकत्वात् शुशुभ इति व्यतिरेकोक्त्या न शुशुभ इत्यर्थः, नेत्यनुषङ्गो वा ॥ २६ ॥

२४] ति० टी०—पद्मपीता पद्मकेसरवत्पीतदेहा । तप्तकाञ्चनभूषणा ॥ २४ ॥

रा० टी०—सेति । पद्मपीता पद्मकेसरवद्गौरदेहा अत एव हेमाभा प्रतप्तस्वर्णसदृशी तप्तभूषणा प्रतप्तचामीकरमयभूषणविशिष्टा जनकात्मजा सा सीता विद्युद्घनमिव रावणमाविश्य तदुपरि स्थित्वा शुशुभे 'पद्मगौरी' इति तीर्थपाठः ॥ २४ ॥

१ तत्सुनसमिति गो. पाठः । २ तद्विमलमिति गो. पाठः । ३ राक्षसेनेति गो. पाठः । ४ मणिमिति गो. पाठः । ५ गौरीति गो. पाठः ।

तस्या भूषणघोषेण वैदेह्या राक्षसेश्वरः । बभूव विमलो नीलः सघोष इव तोयदः ॥ २५ ॥
उत्तमाङ्गच्युता तस्याः पुष्पवृष्टिः समन्ततः । सीताया ह्रियमाणायाः पपात धरणीतले ॥ २६ ॥
सा तु रावणवेगेन पुष्पवृष्टिः समन्ततः । समाधूता दशग्रीवं पुनरेवाभ्यवर्तत ॥ २७ ॥
अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम् । नक्षत्रमाला विमला मेरुं नगमिवोत्तमम् ॥ २८ ॥
चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम् । विद्युन्मण्डलसंकाशं पपात धरणीतले ॥ २९ ॥
तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम् । प्रशोभयत वैदेही गजं कक्ष्येव काञ्चनी ॥ ३० ॥
तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा । जहाराकाशमाविश्य सीतां वैश्रवणानुजः ॥ ३१ ॥

गो० टी०-सेति । पद्मगौरी पद्मवत्पीतवर्णा । अनेन सुकुमारवर्णतोक्ता हेमाभेत्यनेन स्थिरवर्णतोक्ता । तप्तभूषणा तपनीयभूषणा विद्युदिव सीता तस्मिन् क्षणं स्थितापि सौक्ष्म्यान्नाकाङ्क्षतेत्यर्थः ॥ २६ ॥

२५] ति० टी०-'अभूत्सचपलो नीलः' इति पाठे चपला विद्युत्तया सहितो घोषवान्मेघ इवाभूदित्यर्थः ॥ २५ ॥

रा० टी०-तस्या इति । वैदेह्याः तस्याः सीतायाः भूषणघोषेण राक्षसेश्वरो रावणः विमलः स्वच्छः नीलः नीलवर्णः सघोषो घोषसहितः तोयदो मेघ इव बभूव ॥ २५ ॥

गो० टी०-तस्या इति । सचपलः सविद्युत् । यथा सगर्जितो मेघ आशु निःसारो भविष्यति तथेति भावः ॥ २८ ॥

२६] ति० टी०-उत्तमाङ्गेति । मातः ! त्वया संपादितोऽस्मन्मनोरथ इति हर्षादेवैः क्रियमाणा पुष्पवृष्टिस्तदुत्तमाङ्गाच्च्युता तत्काले भूमौ पपातेति कतकः । वस्तुतो रावणसंनिधौ देवानां तथा वीर्यासंभवात् उत्तमाङ्गे धृतपुष्पाणां तद्वेगेन ततश्चोत्तमाङ्गच्युतेत्युक्तम् । अत एवाग्रे भूमौ पुष्पयुतं मार्गं दृष्ट्वा रामो वक्ष्यति—'अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण । अपिनद्धानि वैदेह्या मया दत्तानि कानने ॥ इति ॥ २६ ॥

रा० टी०-उत्तमाङ्गेति । ह्रियमाणायाः तस्याः वैदेह्याः उत्तमाङ्गच्युता शिरसो विभक्ता पुष्पवृष्टिः समन्ततो धरणीतले पपात ॥ २६ ॥

गो० टी०-उत्तमेति । उत्तमाङ्गाच्छिरसः ॥ २९ ॥

२७-२९] ति० टी०-रावणगमनवेगजनितवायुना समाधूतापि पुनर्दशग्रीवमेवाभ्यवर्ततताभितोऽवर्तिष्ट अनवरतं जायमानत्वात् ॥ २७-२९ ॥

रा० टी०-सा त्विति । सा सीतोत्तमाङ्गच्युता पुष्पवृष्टिस्तु रावणवेगेन समन्ततः समाधूता सती पुनर्दशग्रीवं रावणमेव अभ्यवर्तत तद्देहसंलग्नाऽभवत् ॥ २७ ॥

गो० टी०-सा त्विति । सा पुष्पवृष्टिः रावणवेगेन रावणवेगजनितवातेन समाधूता पुनर्दशग्रीवमेव अभ्यवर्तत अभितः पावर्तिष्ट अनेन रावणस्य त्वरितगमनमुक्तम् ॥ ३० ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-अभ्यवर्ततेति । पुष्पाणां सीतोत्तमाङ्गच्युतसुमनसां धारा वैश्रवणानुजं रावणं विमला नक्षत्रमाला नगोत्तमं मेरुमिव अभ्यवर्तत ॥ २८ ॥

गो० टी०-उक्तां पुष्पवृष्टिं वर्णयति-अभ्यवर्ततेति । धारा पङ्क्तिः ॥ ३१ ॥

रा० टी०-चरणादिति । रत्नभूषितम् अनेकविधरत्नसंयुक्तम् अत एव विद्युन्मण्डलसंकाशं वदेह्याश्चरणाद्भ्रष्टं स्रस्तं नूपुरं धरणीतले पपात । भ्रष्टमित्यनेन नूपुरस्य चैतन्यं ध्वनितं तेन कश्चिन्मां संगृह्य राघवाय दर्शयेत् अत एव राघवोऽपहरणदिशं विजानीयादिति हेतुः सूचितः ॥ २९ ॥

गो० टी०-चरणादिति । वामचरणादित्यर्थः । भ्रष्टं शिथिलं पपात ॥ ३२ ॥

३०] ति० टी०-तरुप्रवालरक्तवर्णा रक्तकिसलयवर्णेत्यर्थः । कोधातिशयादेवं वर्णोऽस्याः । कक्ष्या गजाच्छादिनी ॥ ३० ॥

रा० टी०-तरुविति । तरुप्रवालरक्ता तरुविशेषनवोद्भूतपल्लवारुण्यसदृशारुण्यविशिष्टा वैदेही सा सीता नीलाङ्गं राक्षसेश्वरं रावणं काञ्चनी स्वर्णमयी कक्ष्या गजाच्छादनी गजमिव प्राशोभयत ॥ ३० ॥

गो० टी०-तरुविति । तरुविशेषप्रवालवत् रक्ता पीतवर्णा । तेन रक्तं रागादित्यत्र रागशब्दो हि वर्णमात्रे प्रयुक्तः । कक्ष्येवेति । कक्ष्या इभबन्धनी । यथा कक्ष्या गजगता गजं यन्तुर्नियाम्यं करोति तथेयं रावणं प्राप्य रामनियाम्यमकरोदिति भावः ॥ ३० ॥

३१] ति० टी०-तां सीतामित्यन्वयः । अत्र प्रकरणे वारंवारं वैश्रवणानुजत्वोक्त्या ईदृशक्रियाया अत्यनौचित्यप्रदर्शनेन शीघ्रफलदत्वं सूचयति ॥ ३१ ॥

रा० टी०-तामिति । आकाशे महोल्कामिव स्वतेजसा दीप्यमानां सीतां वैश्रवणानुजो रावणः आकाशमाविश्य जहार ॥ ३१ ॥

गो० टी०-तामिति । उत्पातसूचिका तारा महोल्का ॥ ३३ ॥

१ राक्षसाधिप इति गो. पाठः । २ बभौ सचपल इति गो. पाठः । ३ अक्षाच्च्युतेति गो. पाठः । ४ उत्तमामिति गो पाठः । ५ मधुरस्वर्णामिति गो. पाठः । ६ योनोऽपि तस्या भूषणेतरमात्पूर्ण गो. पाठे ।

तस्यास्तान्यग्निवर्णानि भूषणानि महीतले । सघोषाण्यवशीर्यन्त क्षीणास्तारा इवाम्बरात् ॥ ३२ ॥
तस्याः स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः । वैदेह्या निपतन्भाति गङ्गेव गगनच्युता ॥ ३३ ॥
उत्पातवाताभिरता नानाद्विजगणायुताः । मा भैरिति विधूताग्रा व्याजहुरिव पादपाः ॥ ३४ ॥
नलिन्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः । सखीमिव गतोत्साहां शोचन्तीव स्म मैथिलीम्॥ ३५ ॥
समन्तादभिसंपत्य सिंहव्याघ्रमृगद्विजाः । अन्वधावंस्तदा रोषात्सीतांच्छायानुगामिनः ॥ ३६ ॥
जलप्रपातास्रमुखाः शृङ्गैरुच्छ्रितबाहुभिः । सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः ॥ ३७ ॥
ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः । प्रविध्वस्तप्रभः श्रीमानासीत्पाण्डुरमण्डलः ॥ ३८ ॥
नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता । यत्र रामस्य वैदेहीं सीतां हरति रावणः ॥ ३९ ॥

३२-३३] ति० टी०-क्षीणाः क्षीणपुण्याः, तारास्तारारूपावस्थिताः पुण्यकृत इत्यर्थः ॥ ३२ ॥ ३३ ॥

रा० टी०-तस्या इति । अग्निवर्णानि सघोषाणि घोषविशिष्टानि तस्याः सीताया तानि प्रसिद्धानि भूषणानि अम्बरात् क्षीणास्तारा इव अवकीर्यन्त ॥ ३२ ॥

गो०टी०-तस्या इति।भूषणानि उपात्तनपुरादिभिन्नानि३४

रा० टी०-तस्या इति । वैदेह्याः तस्याः सीतायाः स्तनान्तरात् भ्रष्टः स्खलितः ताराधिपद्युतिः चन्द्रद्युतिसदृशद्युतिमान् हारः भूमौ निपतन्सन् गगनच्युता गङ्गेव भाति अभात् ॥ ३३ ॥

गो० टी०-तस्या इति । भाति भाति स्म ॥ ३५ ॥

३४] ति० टी०-उत्पातवात ऊर्ध्ववातः । द्विजगणैः पक्षिगणैर्युक्ता व्याजहुरिव उत्प्रेक्षालंकारः ॥ ३४ ॥

रा० टी०-उत्पातेति । उत्पातवाताभिहता उत्पातवातैः प्रचलिताः अत एव धूताग्रा नानाद्विजगणायुताः अनेकविधपक्षिभिः सेविताः पादपास्त्वं मा भैषीरिति व्याजहुः सीतां प्रत्यूचुरिव ॥ ३४ ॥

गो० टी०-उत्पन्नेति । रावणवेगोत्पन्नेत्यर्थः । वातकम्पिताग्रत्वात् पक्षिगणरवत्वाच्च विधूताग्राः आश्वासनाय चलितशिरसः सन्तः मा भैरिति व्याजहुरिव ॥ ३६ ॥

३५] ति० टी०-त्रस्तां मीनप्रभृतिजलेचरा यासां ताः । सखीमिव मैथिलीं गतोत्साहाम् । 'गतोच्छ्वासाः' इति पाठे रावणत्रासाच्छुष्कजलतया गतप्राणा इत्यर्थः ॥ ३५ ॥

रा० टी०-नलिन्य इति । ध्वस्तानि कमलानि यासां ताः त्रस्ता भीताः मीनाः जलेचराः तदितरजलौकसश्च यास्तु ताः नलिन्यः गतोत्साहां मैथिलीं सखीमिव शोचन्ति स्मेव 'गतोच्छ्वासां' इति तीर्थपाठः, मूर्च्छितामिति तद्व्याख्या 'गतोच्छ्वासा' इतिपाठे रावणत्रासात् शुष्कजलतया गतप्राणा इत्यर्थः इति भट्टाः ॥ ३५ ॥

गो० टी०-नलिन्य इति । गतोच्छ्वासां गतप्राणां मूर्च्छितामिति यावत् । तादृशीं सखीमिव मैथिलीमुद्दिश्य अशोचन्त अशोचन् । ध्वस्तकमलाः कान्तिहीना इत्यर्थः । त्रस्ताः भीताः मीनाः मत्स्याः जलेचराः नक्रादयश्च यास्तु ताः । त्रस्तेत्यादिना आकुलनेत्रत्वादिकमुच्यते ॥ ३७ ॥

३६] ति० टी०-रोषाद्रावणविषयात् ॥ ३६ ॥

रा० टी०-समन्तादिति । तदा सीताया हरणसमये रोषात् रावणविषयककोपात् सिंहादयः अभिसंपत्य संप्राप्य सीताच्छायानुगामिनः सन्तः अन्वधावन् ॥ ३६ ॥

गो० टी०-समन्तादिति । तदा व्याघ्रादयः समन्तान्नादेशात् अभिसंपत्य आगत्य रावणे रोषाच्छायानुसारिणः सन्तोऽन्वधावन् ॥ ३८ ॥

३७-३८] ति० टी०-जलप्रपातरूपाण्यस्राणि मुखे येषां ते ॥ ३७ ॥ ३८ ॥

रा० टी०-जलेति । सीतायां ह्रियमाणायां सत्यां जलप्रवाहास्रमुखाः जलप्रवाहोऽस्रमश्रु इव तद्युक्तं मुखं येषां ते पर्वताः शृङ्गैः शृङ्गरूपैः उच्छ्रितबाहुभिः विक्रोशन्तीव ॥ ३७ ॥

गो० टी०-जलेति । जलप्रपातरूपाण्यस्राणि मुखे येषां ते उच्छ्रितबाहवः उन्नतबाहवः विक्रोशन्तीव व्याक्रोशन्निव ॥ ३९ ॥

रा० टी०-ह्रियमाणामिति । वैदेहीं ह्रियमाणां दृष्ट्वा श्रीमान् दिवाकरः दीनः अत एव प्रविध्वस्तप्रभः अत एव पाण्डुरमण्डल आसीत् ॥ ३८ ॥

गो० टी०-ह्रियमाणां त्विति । श्रीमान् प्राप्तविषयशोक एव श्रीः ॥ ४० ॥

३९] ति० टी०-आर्जवमजैह्यम् । अनृशंसता दया । यत्र यस्मादित्यर्थः ॥ ३९ ॥

रा० टी०-नन्वेवमधर्मो रावणेन कथं कृत इत्यत आह-नास्तीति । यत्र यस्मिन् राक्षसशरीरे स्थितो रावणः सीतां हरति तस्मिन् राक्षसशरीरे धर्मो नास्ति सत्यं कुतः आर्यवत्रता नास्ति कुतोऽनृशंसता ॥ ३९ ॥

गो० टी०-नास्तीति सार्धश्लोक एकान्वयः । अनृशंसता दया यत्र यस्मात् गणशः संघशः पर्यदेवयन् व्यलपन् ॥ ४१ ॥

१ कीर्यन्तेति गो. रा. पाठः । २ गगनाच्च्युतेति गो. पाठः । ३ उत्पन्नेति गो. पाठः । ४ हृता इति गो. रा. पाठः । ५ गतोच्छ्वासामन्यशोचन्तेति गो. पाठः । ६ सीतामिति गो. पाठः । ७ बाहव इति गो. पाठः । ८ सार्धमिति गो. पाठः ।

इति भूतानि सर्वाणि गणशः पर्यदेवयन् । वित्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः ॥ ४० ॥
उद्वीक्ष्योद्वीक्ष्य नयनैर्भयादिव विलक्षणैः । सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः ॥ ४१ ॥
विक्रोशन्तीं दृढं सीतां दृष्ट्वा दुःखं तथागताम् । तां तु लक्ष्मण रामेति क्रोशन्तीं मधुरस्वराम् ॥ ४२ ॥
अवेक्षमाणां बहुशो वैदेहीं धरणीतलम् । स तामाकुलकेशां तां विप्रमृष्टविशेषकाम् ॥
जहारात्मविनाशाय दशग्रीवो मनस्विनीम् ॥ ४३ ॥
ततस्तु सा चारुदती शुचिस्मिता विनाकृता बन्धुजनेन मैथिली ।
अपश्यती राघवलक्ष्मणावुभौ विवर्णवक्त्रा भयभारपीडिता ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ।

रावणेन नभोमार्गतो नीयमाना वैदेही मार्गस्थे तं बहु विगर्हते ।

खमुत्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा । दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥ १ ॥

४०] ति० टी०–गणशः सङ्घशः । वित्रस्तकाः स्वार्थे कः मृगपोतका मृगबालकाः ॥ ४० ॥

रा० टी०–इतीति । इति उक्तप्रकारेण सर्वाणि भूतानि वनदेवतादयः पर्यदेवयन् अत एव वित्रस्ताः रावणान्याय्यकरणाद्भीता अत एव दीनमुखाः मृगपोतका मृगबालाः रुरुदुः॥४०॥

गो० टी०–वित्रस्तका इति । स्वार्थे कः मृगपोतकाः मृगशावाः आविलं कलुषम् ॥ ४२ ॥

४१] ति० टी०–विलक्षणैर्विगतलक्षणैः विगतशोभैरिति यावत् ॥ ४१ ॥

रा० टी०–उद्वीक्ष्येति । विक्रोशन्तीं राममाह्वयन्तीं तथा तेन प्रकारेण दुःखं गतां प्राप्तां वैदेहीं दृष्ट्वा अत एव नयनैः उद्वीक्ष्योद्वीक्ष्य भयादिव रावणभीतेरेव सुप्रवेपितगात्राः वनदेवता बभूवुः । सार्धश्लोक एकान्वयी ॥ ४१ ॥

गो० टी०–सुप्रवेपितेत्यादिश्लोकद्वयमेकान्वयम् । तथा वाचामगोचरं दुःखं धरणीतलं बहुशोऽवेक्षमाणां रामलक्ष्मणप्रत्याशयेति भावः ॥ ४३ ॥ ४४ ॥

४२] ति० टी०–विक्रोशन्तीमित्यर्धं पूर्वान्वयि ॥ ४२ ॥

४३] ति० टी०–धरणीतलमवेक्षमाणां रामलक्ष्मणागमनाकाङ्क्षया वस्तुतस्तदङ्गमनाकाङ्क्षयेति तत्त्वम् । विप्रमृष्टो विलुलितो विशेषकस्तिलको यस्यास्ताम् ॥ ४३ ॥

रा० टी०–तामिति । लक्ष्मण! रामेति विक्रोशन्तीं मधुरस्वरां स्वाभाविकमधुरस्वरविशिष्टां धरणीतलं बहुशो वारंवारम् अवेक्षमाणाम् आकुलो व्याकुलः केशान्तो यस्यास्तां विप्रमृष्टविशेषकां विप्रमृष्टः विलुलितो विशेषकस्तिलको यस्यास्तां तामृतस्वरूपां मनस्विनीं वैदेहीं तां सीताम् आत्मविनाशाय दशग्रीवो जहार । अर्धचतुष्टयमेकान्वयि ॥४२॥४३॥

गो० टी०–स इति । विप्रमृष्टं विलुलितं विशेषकं तिलकं यस्यास्ताम् ‘ तमालपत्रतिलकचित्रकाणि विशेषकम् ’ इत्यमरः । मनस्विनीं दृढमनस्कां पतिव्रतामित्यर्थः ॥ ४६ ॥

४४] ति० टी०–भयभारपीडिता सेव विवर्णवक्त्रेत्यर्थः॥४४॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विपञ्चाशः सर्गः॥ ५२ ॥

रा० टी०–तत इति । चारुदती शोभनदन्तविशिष्टा शुचिस्मिता मैथिली ततोऽपहरणात् हेतोः बन्धुजनेन रामलक्ष्मणाभ्यां विना रहिता कृता अत एव रामलक्ष्मणौ अपश्यती अपश्यन्ती सती भयभारपीडिता अत एव विवर्णवक्त्रा अभवदिति शेषः॥४४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे द्विपञ्चाशत्तमः सर्गः ॥ ५२ ॥

गो० टी०–तत इति । शुचिस्मितेति भूतपूर्वाभिप्रायेण स्वाभाविकहसितत्वाद्वा । विवर्णवक्त्रा बभूवेति शेषः ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

१] ति० टी०–अथ सीतया क्रियमाणपारुष्य एव तां हरति स्मेत्याह–खमिति । वर्तिनीत्यत्रापि णिनिरार्षः ॥ १ ॥

रा० टी०–सीताहृत्तान्तमाह–खमित्यादिभिः । खमाकाशमुत्पतन्तं भीमाङ्गं राक्षसाधिपं तं रावणं दृष्ट्वा महति भये वर्तिनी अत एव दुःखिता प्राप्तखेदा अत एव परमोद्विग्ना अत्युद्विग्नचित्ता अत एव रोषरोदनताम्राक्षी रोषरोदनेन रावणविषयककोपहेतुकाश्रुविमोकेन ताम्रे अरुणे अक्षिणी यस्याः

१ आश्रुपातानिलेक्षणा इति गो. पाठः । २ स्वरमिति गो. पाठः ।

रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् । रुदती[1] करुणं सीता ह्रियमाणा तमब्रवीत् ॥ २ ॥
न व्यपत्रपसे नीच कर्मणाऽनेन रावण । ज्ञात्वा विरहितां[2] यो मां चोरयित्वा पलायसे ॥ ३ ॥
त्वयैव नूनं दुष्टात्मन्भीरुणा हर्तुमिच्छता । ममापवाहितो भर्ता मृगरूपेण मायया ॥ ४ ॥
यो हि मामुद्यतस्त्रातुं सोऽप्ययं विनिपातितः । गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ॥ ५ ॥
परमं खलु ते वीर्यं दृश्यते राक्षसाधम । विश्राव्य नामधेयं हि युद्धे नास्मि जिता त्वया॥ ६ ॥
ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे । स्त्रियाश्चाहरणं नीच रहिते चे[3] परस्य च ॥ ७ ॥
कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् । सुनृशंसमधर्मिष्ठं तव शौटीर्यमानिनः[4] ॥ ८ ॥
धिक्ते शौर्यं च सत्त्वं च यस्त्वया कथितं तदा । कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशम् ॥ ९ ॥

सा ह्रियमाणा सीता करुणं रुदती सती तं रावणमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–अथ सीता रावणस्य चौर्यकृत्यादिकं बहुशो निन्दति–खमित्यादिना । दुःखिता बभूवेति शेषः । परमोद्विग्ना कम्पिता । 'ओविजी भयचलनयोः' इत्यस्मान्निष्ठा । वर्तिनी वर्तमाना ॥ १ ॥

२] ति० टी०–रोषरोदनाभ्यां हेतुभ्यां ताम्राक्षी ॥ २ ॥

गो० टी०–रोषेति । रोषवद्रोदनमपि रक्तिमहेतुः ॥ २ ॥

३] ति० टी०–विरहिताम् रामलक्ष्मणाभ्यामिति शेषः । अनेन कर्मणा चौर्येण ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–नेत्यादिभिः । हे नीच ! विरहितां रामलक्ष्मणाभ्यां विहीनां मां चोरयित्वा यस्त्वं पलायसे स त्वम् अनेन अपहरणरूपेण कर्मणा न व्यपत्रपसे जिह्रेषि ॥ ३ ॥

गो० टी०–नेति । नीचेति संबोधनम् । न व्यपत्रपसे न लज्जसे । विरहितां रामलक्ष्मणाभ्यामिति शेषः ॥ ३ ॥

४] ति० टी०–अपवाहितोऽन्यत्र नायितः । मायया मृगरूपेण मारीचेनेति शेषः ॥ ४ ॥

रा० टी०–त्वयेति । हे दुष्टात्मन् ! भीरुणा त्वयैव मम भर्ता मृगरूपेण राक्षसविशेषेण अपवाहितः ॥ ४ ॥

गो० टी०–त्वयैवेति । हर्तुं मामिति शेषः । अपवाहितः अपनीतः । मृगरूपेण मायया मायारूपमृगेणेत्यर्थः ॥ ४ ॥

५] ति० टी०–पुराणो वृद्धः अत एवास्य निपातनम्, न तु स्वद्वीर्यहेतुकमिति भावः ॥ ५ ॥

रा० टी०–य इति । मम श्वशुरस्य पुराणो वृद्धः सखा यो मां त्रातुम् उद्यतो गृध्रराजः सोऽप्ययं विनिपातितः । एतेन स्वरक्षकाभावयुक्तः सीतायाः पश्चात्तापः सूचितः । पुराणो हत इत्यनेनाहं बलवानिति गर्वस्त्वया न कार्य इति ध्वनितम् ॥५॥

गो० टी०–य इति । पुराणो वृद्ध इति व्यङ्ग्योक्तिः अतिवृद्धं हत्वा शूरोऽहमिति मन्यस इति भावः ॥ ५ ॥

६] ति० टी०–परमं खल्विति व्यङ्ग्योक्तिः ॥ ६ ॥

रा० टी०–परममिति । हे राक्षसाधम ! नामधेयं विश्राव्य श्रावयित्वा युद्धे रामलक्ष्मणसंग्रामे त्वया न जिताऽस्मि अतस्ते वीर्यं पराक्रमः परमं दृश्यते, एतेन त्वं चोर एव न पराक्रमवान् इति सूचितम् ॥ ६ ॥

गो० टी०–परममिति । परममिति सोल्लुण्ठनं वचनम् अतिनीचमित्यर्थः । तत्र हेतुमाह–विश्राव्येति । हि यस्मात्स्वनामधेयं विश्राव्य अहं रावणोऽस्मीति स्वनाम प्रख्याप्य युद्धे नास्म्यहं जितेति व्यतिरेकोक्तिः । यद्वा ते परमम् अवीर्यं क्लीवत्वं हि यस्मायुद्धे न जितास्मि ॥ ६ ॥

७] ति० टी०–स्त्रिया हरणमेव गर्हितम् राक्षसादिविवाहानां शास्त्रे गर्हितत्वात्तत्रापि परस्य विवाहितायास्तत्रापि रहिते पतिरहिते काले देशे चेत्यतिनिन्द्यं ते कर्मेति भावः॥७॥

रा० टी०–ईदृशामिति । रहिते पत्यादिशून्यदेशे परस्य स्त्रियाः आहरणम् ईदृशम् इदं गर्हितं कर्म कृत्वा कथं न लज्जसे ॥ ७ ॥

गो० टी०–ईदृशमिति । रहिते स्वामिरहितप्रदेशे परस्य स्त्रियाः हरणरूपमीदृशं गर्हितं निन्दितं कर्म कृत्वा कथं न लज्जसे ॥ ७ ॥

८] ति० टी०–शौटीर्यमानिनः शूरमानिनः । तादृशस्येदृशी लोके निन्दा मरणादप्यधिकेति भावः ॥ ८ ॥

रा० टी०–कथयिष्यन्तीति । सुनृशंसम् अतिक्रूरम् अधर्मिष्ठम् अत्यधर्मं शौण्डीर्यमानिनः अहं शूर इति गर्ववतस्तव कर्म पुरुषाः कुत्सितं कथयिष्यन्ति अतः कुलाक्रोशकरं पुलस्त्यवंशनिन्दासंपादकम् ईदृशं ते चारित्रम् आचरितं धिक् अत एव तदा अपहरणात् पूर्वकाले त्वया कथितं यत् शौर्यं स्वशूरता सत्त्वं स्वबलं च तत् धिक् । श्लोकद्वयमेकान्वयि ॥८॥९॥

गो० टी०–कथयिष्यन्तीति । शौण्डीर्यमानिनः तव कर्म कुत्सितं सुनृशंसम् अधर्मिष्ठं च कथयिष्यन्तीत्यन्वयः ॥ ८ ॥

९] ति० टी०–सत्त्वं शारीरं बलम् । तदाऽपहरणपूर्वकाले । कुलाक्रोशः कुलनिन्दा । चारित्रमाचारः ॥ ९ ॥

गो० टी०–धिगिति । तदा हरणकाले यच्छौर्यं सत्त्वं

---

१ रुदन्तीति गो. पाठः । २ इदमिति गो. पाठः । ३ यदिति गो. पाठः । ४ च हरणमिति गो. पाठः । ५ त्विति गो. पाठः । ६ शौण्डीर्येति गो. रा. पाठः । ७ यस्त्वं कथितमनेति गो. पाठः ।

किं शक्यं कर्तुमेवं हि यज्जवेनैव धावसि । मुहूर्तमपि [1]तिष्ठ त्वं न जीवन्प्रतियास्यसि ॥ १० ॥
न हि [2]चक्षुःपथं प्राप्य तयोः पार्थिवपुत्रयोः । ससैन्योऽपि समर्थस्त्वं मुहूर्तमपि जीवितुम् ॥ ११ ॥
न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन । वने प्रज्वलितस्येव स्पर्शमग्नेर्विहङ्गमः ॥ १२ ॥
साधु कृत्वाऽऽत्मनः पथ्यं साधु मां मुञ्च रावण । मत्प्रधर्षणसंक्रुद्धो भ्रात्रा सह पतिर्मम ॥ १३ ॥
विधास्यति विनाशाय त्वं मां यदि न मुञ्चसि । येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि ॥ १४ ॥
व्यवसायस्तु ते नीच भविष्यति निरर्थकः । नह्यहं तमपश्यन्ती भर्तारं विबुधोपमम् ॥ १५ ॥
उत्सहे शत्रुवशगा प्राणान्धारयितुं चिरम् । न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे ॥ १६ ॥
मृत्युकाले यथा मर्त्यो विपरीतानि सेवते । मुमूर्षूणां तु सर्वेषां यत्पथ्यं तन्न रोचते ॥ १७ ॥
पश्यामीहं हि कण्ठे त्वां कालपाशावपाशितम् । यथा चास्मिन्भयस्थाने न बिभेषि [3]निशाचर ॥ १८ ॥

बलं च कथितवानसि तद्धिक् 'उद्बहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः' इत्यादि त्वदुक्तमनृतप्रलपनमित्यर्थः । कुलाक्रोशकरं कुलनिन्दाकरम् ॥ ९ ॥

१०] ति० टी०–हि यत एवंरूपेण हृत्वा धावसि, अतः किं कर्तुं शक्यम् । मुहूर्तमपि तिष्ठ त्वं यदि शर इति शेषः । अवस्थितौ किं स्यात्तदाह–नेति ॥ १० ॥

रा० टी०–ननु क्वाऽस्ति राम इत्यत आह–किमियत् यस्माद्धेतोः जवेन वेगेनैव त्वं धावसि अतः मया किं कर्तुं शक्यं दूरस्थे रामे कथं प्रदर्शयेयमित्यर्थः । नन्वहं किं तदर्शनेनेत्यत आह- त्वं मुहूर्तमपि तिष्ठ मुहूर्तमात्रेणाऽऽगमिष्यतीत्यर्थः, ततः जीवँस्त्वं न प्रतियास्यसि ॥ १० ॥

गो० टी०–किमिति । यत् यदा एवं जवेनैव धावसि तदा रामेण त्वयि किं कर्तुं शक्यम् । तर्हि कदा शक्यमित्यत आह–मुहूर्तमिति । मुहूर्तमपि मुहूर्तमेव तिष्ठस्व तिष्ठ तदा जीवन् सन् न प्रतियास्यसि मृतो भविष्यसीत्यर्थः ॥ १० ॥

११–१२] ति०टी०–तदेवोपपादयति–नहीति॥११॥१२॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–नहीति । तयोः रामलक्ष्मणयोः चक्षुष्पथं प्राप्य ससैन्यस्त्वं मुहूर्तमपि जीवितुं न समर्थः ॥ ११ ॥

गो० टी०–उक्तमुपपादयति–न हीति ॥ ११ ॥

रा० टी०–नेति । तयोः रामलक्ष्मणयोः शरस्पर्शं सोढुं वने प्रज्वलितस्याग्नेः स्पर्शं विहङ्गम इव कथञ्चनापि न शक्तः समर्थोऽसीति शेषः ॥ १२ ॥

गो० टी०–दर्शनप्राप्तिमात्रेण कथं जीवितुमशक्यत्वं तत्राह–न त्वमिति । अथ कर्तव्यमुपदिशति–साध्विति । अर्धश्लोक एकान्वयः । आत्मनः पथ्यं हितं साधु कृत्वा विचार्य । कृतिर्हि नानार्थो धातुवृत्तिकृतोक्तः यथा उरसिकृत्वा मनसिकृत्वेति । मां साधु सम्यक् आर्जवपूर्वकं मुञ्च ॥ १२ ॥

१३] ति० टी०–साधु आत्मनः पथ्यं कृत्वा विचार्येत्यर्थः । 'साधु कुर्वात्मनः' इति पाठान्तरम् । साधु मां मुञ्च शीघ्रं मां मुञ्च यावन्मे भर्ता नायातीत्यर्थः ॥ १३ ॥

रा० टी०–साध्विति । हे रावण ! यदि त्वं मां न मुञ्चसि तर्हि मत्प्रधर्षणसंक्रुद्धः मदपहरणहेतुकसंप्राप्तकोपो मम पतिः भ्रात्रा सह विनाशाय त्वद्विध्वंसाय विधास्यति उपायमिति शेषः । अतः आत्मनः पथ्यं हितं साधु कृत्वा संचिन्त्येत्यर्थः, साधु यथा स्यात्तथा मां मुञ्च । सार्धश्लोक एकान्वयी॥१३॥

गो० टी०–अमोचने बाधकमाह–यदीति । त्वं मां यदि न मुञ्चसि तदा मम पतिः मत्प्रधर्षणेन मत्परिभवेन रुष्टः सन् भ्रात्रा सह त्वद्विनाशाय यत्नं विधास्यति ॥ १३ ॥

१४] ति० टी०–विनाशाय विधास्यति यत्नमिति शेषः । येन व्यवसायेन स्त्रीभोगव्यवसायेन ॥ १४ ॥

रा० टी०–येनेति । येन रामो मद्वशं प्राप्स्यतीत्येतद्विषयकेन व्यवसायेन मां हर्तुं त्वमिच्छसि स ते व्यवसायः निरर्थकः निष्प्रयोजनो भविष्यति हि यतः भर्तारमपश्यन्ती शत्रुवशगाऽहं प्राणान् ते जीवनं चिरं धारयितुं नोत्सहे एतेन तृणमेव रामस्त्वां हनिष्यतीति सूचितम् । अर्धचतुष्टयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–अहमपि सफलयत्नो भविष्यामीत्याशङ्क्याह–येनेति । व्यवसायेन भोगव्यवसायेनेत्यर्थाम्योक्तिः ॥ १४ ॥

१५] ति० टी०–तन्नैरर्थक्यमेवाह–नहीति ॥ १५ ॥

गो० टी०–नैरर्थक्यमेवाह–न हीति । इदानीं कथं धारयसीत्यत्र परिहारः–चिरमिति ॥ १५ ॥

१६–१८] ति० टी०–श्रेयस्तत्कालसुखावहं पथ्यं वा परिणामसुखावहं वा न समवेक्षसे न विचारयसि । यथा मर्त्यो मृत्युकाले विपरीतानि सेवते तथा त्वमपीति भावः॥१६–१८॥

रा० टी०–नेति । आत्मनः श्रेयः कल्याणसाधकं पथ्यं परिणामतः सुखप्रदं मम वचः त्वं न समवेक्षसे शृणोषि एतेन परमात्मेच्छायाः प्राबल्यं सूचितम् । अर्धं पृथक् ॥ १६ ॥

गो० टी०–नेति । किंच त्वमात्मनः श्रेयः प्रियं पथ्यं हितं वा न समवेक्षसे न पर्यालोचयसि । किंतु मृत्युकाले मर्त्यो यथा विपरीतानि सेवते तथा त्वमपि विपरीतानि सेवस इत्यर्थः ॥ १६ ॥

---

१ तिष्ठस्वेति गो.पाठः । २ चक्षुष्पथमिति गो.रा.पाठः। ३ रुष्टो हीति गो.पाठः । ४ स इति गो.पाठः। ५ अत्रेति गो.पाठः। ६ दशाननेति गो.पाठः

व्यक्तं हिरण्मयांस्त्वं हि संपश्यसि महीरुहान् । नदीं वैतरणीं घोरां रुधिरौघविवाहिनीम्[1] ॥ १९ ॥
खड्गपत्रवनं चैव भीमं पश्यसि रावण । तप्तकाञ्चनपुष्पां च वैदूर्यप्रवरच्छदाम्[2] ॥ २० ॥
द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः कण्टकैश्चिताम्[3] । न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः ॥ २१ ॥
धारिंतुं शक्ष्यसि चिरं विषं पीत्वेव [4]निर्घृण[5] । बद्धस्त्वं कालपाशेन दुर्निवारेण रावण ॥ २२ ॥
क्व गतो लप्स्यसे शर्म मम भर्तुर्महात्मनः । निमेषान्तरमात्रेण विना भ्रातरमाहवे ॥ २३ ॥
राक्षसा निहता येन सहस्राणि चतुर्दश । कथं स राघवो वीरः सर्वास्त्रकुशलो बली ॥ २४ ॥
न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम् । एतच्चान्यच्च परुषं वैदेही रावणाङ्गना ॥
भयशोकसमाविष्टा करुणं विललाप ह ॥ २५ ॥

रा० टी०-मृत्युकाल इति । मृत्युकाले मरणसमये संनिहिते सति सर्वेषां मुमूर्षूणां यत्पथ्यं तत्र रोचते अत एव मर्त्याः विपरीतानि यथा यथावत् सेवते एतेन तव मृत्युः समीपं प्राप्त इति ध्वनितम् ॥ १७ ॥

गो० टी०-मुमूर्षूणामिति । त्वां कण्ठे कालपाशावपाशितं कालपाशेन बद्धं पश्यामि ॥ १७ ॥

रा० टी०-पश्यामीति । कण्ठे कालपाशावपाशितं कालपाशबद्धं त्वामिह अस्मिन् समये पश्यामि अत एव भयस्थाने भीतिभवने अस्मिन् अपहरणे त्वं न बिभेषि ॥ १८ ॥

गो० टी०-यथेति । किंच येन प्रकारेण न बिभेषि तेन प्रकारेण महीरुहान् हिरण्मयान् संपश्यसीति मन्य इति योजना ॥ १८ ॥

१९-२०] ति० टी०-हिरण्मयवृक्षदर्शनं मृत्युचिह्नम् । वैतरण्यादियातनास्थानं पश्यसीति वर्तमानसामीप्ये लट् १९॥२०

रा० टी०-व्यक्तमिति । त्वं महीरुहान् हिरण्मयान् पश्यसि रुधिरौघविवाहिनीमत एव घोरां वैतरणीं च पश्यसि व्यक्तं तव मरणसूचकाचरणेन स्फुटम् अत एव खड्गपत्रवनं पश्यसि तप्तकाञ्चनपुष्पां तप्तचामीकरपुष्पविशिष्टां वैदूर्यप्रवराः परिच्छदाः पत्राणि यस्याः ताम् आयसैः लोहमयैः कण्टकैः चितां व्याप्ताम् अत एव तीक्ष्णां शाल्मलीं वृक्षविशेषं च द्रक्ष्यसे एतेन मृत्युस्ते समागत इति सूचितम् । सार्धश्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०-नदीमिति । रुधिरौघैः रक्तौघैः सह निवहति प्रवहतीति तथा । असिपत्रवनम् असिमयपत्रयुक्तवनमिति नरकविशेषस्य नाम । पश्यसीति वर्तमानसामीप्ये वर्तमाननिर्देशः ॥ १९ ॥

गो० टी०-पारदारिकस्यासाधारणनरकानुभवं दर्शयति-तप्तेति । तप्तानि सद्योऽग्निनिष्टप्तानि काञ्चनमयानि पुष्पाणि यस्यास्ताम् । स्वर्णस्य तप्तत्वेऽतीवौष्ण्यं भवति । वैदूर्यप्रवराः वैदूर्यमणिश्रेष्ठमयाः छदाः पर्णानि यस्यास्ताम् । अत्रापि तप्तेति विशेषणं बोध्यम् । शाल्मलीं पारदारिकालिङ्गयत्वेन यमलोकोत्पन्नां शाल्मलीवृक्षाकारस्थूणां द्रक्ष्यसे द्रक्ष्यसि आलिङ्गितुमिति शेषः ॥ २० ॥

२१] ति० टी०-शाल्मली यातनावृक्षः ॥ २१ ॥

रा० टी०-तत्र हेतुमाह-नहीति । महात्मनस्तस्य रामस्य ईदृशमलीकमपराधं कृत्वा विषं पीत्वेव धरितुं धर्तुं प्राणानिति शेषः, नैव शक्ष्यसि ॥ २१ ॥

गो० टी०-भवत्वेवं कालान्तरे सद्यो लब्धं हि सुखमित्याह-न हीति । तस्य अलीकमप्रियं कृत्वा 'अलीकं स्वप्रियेऽनृते' इत्यमरः । धरितुं जीवितुम् ॥ २१ ॥

२२] ति० टी०-धारितुं धर्तुम् जीवितमिति शेषः ॥२२॥

रा० टी०-बद्ध इति । महात्मनो मम भर्तुरपराधं कृत्वेति शेषः क्व गतः सन् शर्म कल्याणं लप्स्यसे प्राप्स्यसि न क्वापीत्यर्थः अतः दुर्निवारेण कालपाशेन त्वं बद्धोऽसि ॥ २२ ॥

गो० टी०-त्वामादाय देशान्तरं गमिष्यामि तदा न मे रामभयं तत्राह-बद्ध इति । भर्तुरिति हेतौ पञ्चमी । तस्माद्धेतोः क्व गतः सन् शर्म लप्स्यसे न क्वचिदपीत्यर्थः ॥ २२ ॥

२३-२५] ति० टी०-मम भर्तुरपराधं कृत्वेति शेषः । भ्रातरं विना एकाकिनेति यावत् ॥ २३-२५ ॥

रा० टी०-तदेव द्वयमाह-निमेषेति । भ्रातर विना एकाकिनेत्यर्थः, येनाहवे संग्रामे चतुर्दश सहस्राणि राक्षसाः निमेषान्तरमात्रेण निहताः स वीरो राघवः इष्टभार्यापहारिणं त्वां तीक्ष्णैः शरैः कथं न हन्यात् हन्यादेवेत्यर्थः । अर्धचतुष्टयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०-कथं तस्य तादृशी शक्तिरित्यत्राह द्वाभ्याम्-निमेषेति । निमेषान्तरमात्रेण निमेषावकाशमात्रेण भ्रात्रा विना एकाकिनेत्यर्थः ॥ २३ ॥ २४ ॥

रा० टी०-एतदिति । रावणाङ्गना रावणस्याङ्गगतिं सामर्थ्यमित्यर्थः, गच्छति जानाति सा वैदेही एतदन्यच्च परुषमुक्त्वा भयशोकसमाविष्टा सती करुणं विललाप ॥ २५ ॥

गो० टी०-एतदिति । एतच्चान्यच्च वचनं करुणं परुषं च यथा भवति तथा विललाप परिदेवनमकरोत् ॥ २५ ॥

१ निवाहिनीमिति गो. पाठः। २ असिपत्रेति गो. पाठः। ३ धारितुमिति गो.रा.पाठः। ४ निर्घृणः इति गो.पाठः। ५ भ्रात्रा महानेनेति गो.पाठः।

तदा भृशार्तां बहु चैव भाषिणीं विलापपूर्वं करुणं च भामिनीम् ।
जहार पापस्तरुणीं [3]विचेष्टतीं नृपात्मजामागतगात्रवेपथुः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ।

रावणेन नीयमाना सीता ऋष्यमूकशिखरस्थसुग्रीवादिवानरमध्ये आभरणगर्भं निजकौशेयोत्तरीयं प्राक्षिपत् । रावणस्त्वरया लङ्कामेत्य निजान्तःपुरे सीतां संस्थाप्य रामवृत्तं जिज्ञासुर्निजभटाजनस्थानं प्रति प्राहिणोत् ।

ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती । ददर्श गिरिशृङ्गस्थान्पञ्च वानरपुंगवान् ॥ १ ॥
तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम् । उत्तरीयं वरारोहा शुभान्याभरणानि च ॥ २ ॥
मुमोच यदि रामाय शंसेयुरिति भामिनी । वस्त्रमुत्सृज्य तन्मध्ये निक्षिप्तं सहभूषणम् ॥ ३ ॥
संभ्रमात्तु दशग्रीवस्तत्कर्म [4]न बुद्धवान् । [5]पिङ्गाक्षस्तां विशालाक्षीं नेत्रैरनिमिषैरिव ॥ ४ ॥
विक्रोशन्तीं तदा सीतां ददृशुर्वानरोत्तमाः । स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम् ॥ ५ ॥

२६] ति० टी०—आगतगात्रवेपथुः भारातिशयात् ॥२६॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रा० टी०—तदेति । भृशार्तामतिदुःखिताम् अत एव विलापपूर्वं करुणं यथा भवति तथा बहुभाषिणीम् अत एव विचेष्टतीम् अनेकविधचेष्टावतीम् अत एव आगतरौद्रवेपथुं भामिनीं तरुणीं नृपात्मजां पापो रावणो जहार ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रिपञ्चाशत्तमः सर्गः ॥ ५३ ॥

गो० टी०—सीतोक्तं सर्वं पापिष्ठस्य तस्य सम्मुद्रघोषतुल्यमासीदित्याह—तथेति । तथेति वाचामगोचरत्वोक्तिः । विलापपूर्वं करुणं च यथा तथा भाषिणीं करुणं यथा तथा विचेष्टन्तीं विचेष्टमानाम् । आगतगात्रवेपथुम् उत्पन्नशरीरकम्पाम् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१–२] ति० टी०—अपश्यत्यपश्यन्ती ॥ १ ॥ २ ॥

रा० टी०—सीतावृत्तान्तमेवाह—ह्रियमाणेत्यादिभिः । ह्रियमाणा रावणेनेति शेषः, कञ्चिन्नाथं रक्षकमपश्यती अपश्यन्ती वैदेही गिरिशृङ्गस्थान् पञ्च वानरपुङ्गवान् ददर्श ॥ १ ॥

गो० टी०—अथ सीताया अशोकवनिकायां स्थापनमाह—ह्रियमाणा त्वित्यादि । नाथं रक्षकम् ॥ १ ॥

रा० टी०—तेषामिति । विशालाक्षी सीता यदि कदाचित् रामाय शंसेयुः इति हेतोः कनकप्रभं स्वर्णप्रभासदृशप्रभाविशिष्टं कौशेयमुत्तरीयम् आभरणानि च तेषां वानरपुङ्गवानां मध्ये मुमोच । सार्धं श्लोकएकान्वयी ॥ २ ॥

गो० टी०—तेषामित्यादिसार्धश्लोक एकान्वयः । उत्तरीयम् उत्तरीयभूतं कौशेयम् आभरणानि कौशेये बद्धा मुमोचेत्यर्थः । किमर्थं मुमोचेत्यत्राह—यदि रामाय शंसेयुरिति । यदृच्छया दृष्टाय रामाय स्वस्य रावणापहरणं कथयेयुरिति प्रत्याशयेत्यर्थः । "आशंसावचने लिङ्" इति लिङ् ॥ २ ॥

३] ति० टी०—यदि रामाय शंसेयुरिति दैवगत्या दृष्टाय रामाय शंसेयुरिति प्रत्याशयेति शेषः । वस्तुतोऽयं यदिशब्दो 'वेदाः प्रमाणं यदि स्युः' इतिवत् । वस्त्रमुत्तरीयमुत्सृज्य तन्मध्ये वानरमध्ये सहभूषणं भूषणसहितं कर्णोत्पलादि च निक्षिप्तम् तयेति शेषः ॥ ३ ॥

रा० टी०—वस्त्रमिति । सहभूषणं वस्त्रमुत्सृज्य विषमानायाः सीतायाः संभ्रमात् तदुक्तिहेतुकोद्वेगात् हेतोः निःक्षिप्तं निःक्षेपणरूपं तत्कर्म दशग्रीवो न बुद्धवान् ॥ ३ ॥

गो० टी०—वस्त्रमिति । सहभूषणं भूषणान्तरितं वस्त्रम् । उत्सृज्य उन्मुच्य तत् मध्ये सीतया निक्षिप्तमिति यत् तत्कर्म संभ्रमात्सीतापहारजनितक्षोभात् न बुद्धवान् । यदि बुध्येत गृह्णीयादेवेति भावः ॥ ३ ॥

४–५] ति० टी०—तत्कर्म च तत्कर्म तु वस्त्रभूषणप्रक्षेपकर्म तु संभ्रमात्स्वभयहरणजनितचित्तक्षोभात्, अतिभारेण शिरसामधोमुखतया च ॥ ४ ॥ ५ ॥

रा० टी०—पिङ्गाक्षा इति । तदा वस्त्रादिप्रक्षेपणसमये विक्रोशन्तीं विशालाक्षीं सीतां पिङ्गाक्षाः वानरोत्तमाः अनिमिषैः निमिषरहितैरिव नेत्रैः ददृशुः ॥ ४ ॥

गो० टी०—पिङ्गाक्षा इति । पिङ्गाक्षाः वानराः न केवलं वानराः अपि तु वानरर्षभाः वानरश्रेष्ठाः अनिमिषैरिव निमेषरहितैरिव तथा विक्रोशन्तीं राम! रामेति विक्रोशन्तीमित्यर्थः ४

---

१ तथेति गो. पाठः । २ करुणमिति गो. पाठः । ३ विवेष्टतामिति गो. पाठः । ४ गात्रवेपथुमिति गो. रौद्रवेपथुमिति रा. पाठः । ५ मैथिलीति गो. पाठः । ६ न स्म इति गो. पाठः । ७ पिङ्गाक्षास्तामिति गो. रा. पाठः । ८ वानरर्षभा इति गो. पाठः ।

जगाम [1]मैथिलीं गृह्य [2]रुदतीं राक्षसेश्वरः । तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः ॥ ६ ॥
उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम् । वनानि सरितः शैलान्सरांसि च विहायसा ॥ ७ ॥
स क्षिप्रं समतीयाय शरश्चापादिव च्युतः । तिमिनक्रनिकेतं तु वरुणालयमक्षयम् ॥ ८ ॥
सरितां शरणं गत्वा समतीयाय सागरम् । संभ्रमात्परिवृत्तोर्मी रुद्धमीनमहोरगः ॥ ९ ॥
वैदेह्यां ह्रियमाणायां बभूव वरुणालयः । अन्तरिक्षगता वाचः समूचुश्चारणास्तथा ॥ १० ॥
एतदन्तो दशग्रीव इति सिद्धास्तदाऽब्रुवन् । स तु सीतां विचेष्टन्तीमङ्केनादाय रावणः ॥ ११ ॥
प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः । सोऽभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम् ॥ १२ ॥

रा० टी०–स इति । स रावणः रुदन्तीं रुदतीं मैथिलीं गृह्य गृहीत्वा पम्पामतिक्रम्य लङ्कां पुरीमभिमुखः सन् जगाम ॥ ६ ॥

गो० टी०–स चेति । पम्पां पम्पोपर्याकाशम् । लङ्कामभिमुख इत्यनेन एतावत्पर्यन्तं रामाश्रमदत्तदृष्टिर्गतः ततः स्वच्छन्दं गतवानिति गम्यते । अत एव सुसंहृष्ट इति वक्ष्यते ॥ ६ ॥

६] ति० टी०–सुसंहृष्टः मृत्योस्तत्त्वेनाज्ञानात् । केचित्तु लब्धं रामहस्तान्मृत्युद्वारमिति संहृष्टः । विना चोत्कटं पापं पुण्यक्षयाभावेन न मृत्युः संनिहितः स्यादिति तमोगुणावृतः सन्मातर्यपि विरुद्धशब्दव्यवहारं कृतवानिति वदन्ति । तेषामेतत्सर्गान्ते वक्ष्यमाणम् ' बभूव मोहान्मुदितः ' इत्यसंगतं स्यात् । तथा ' आत्मानं बुद्धिवैक्लव्यात्कृतकृत्यममन्यत ' इत्युत्तरसर्गादित्थं चासंगतं स्यात् ॥ ६ ॥

रा० टी०–तामिति । तां सीतां सुसंहृष्टो रावणः तीक्ष्णदंष्ट्रां महाविषाम् आत्मनो मृत्युं भुजङ्गीमिव उत्सङ्गेन जहार ॥ ६ ॥

गो० टी०–तामिति । उत्सङ्गेनेत्यस्य उभयत्राप्यन्वयः । मृत्युं मृत्युहेतुभूताम् ॥ ६ ॥

७] ति० टी०–विहायसाऽऽकाशमार्गेण क्षिप्रं समतीयायेत्यन्वयः ॥ ७ ॥

रा० टी०–वनानीति । स रावणः चापात् च्युतः शर इव वनादीनि क्षिप्रं विहायसा समतीयाय ॥ ७ ॥

गो० टी०–वनानीति । विहायसा आकाशमार्गेण ॥ ७ ॥

८] ति० टी०–तिमिर्मत्स्यविशेषः ॥ ८ ॥

रा० टी०–तिमीति । तिमयो नक्रविशेषाः नक्राः मकरास्तेषां निकेतं निवासस्थानं वरुणालयं वरुणनिकेतम् अक्षयं यावदधिकारं विनाशरहितं सरितां शरणम् आश्रयं सागरं गत्वा समतीयाय ॥ ८ ॥

गो० टी०–तिमीति । तिमयो मत्स्यविशेषाः नक्राः ग्राहाः तेषां निकेतं वासस्थानम् । वरुणस्य आलयं वासः शरणं प्राप्यं गत्वा प्राप्य क्रमेण सागरं समतीयाय ॥ ८ ॥

९–१०] ति० टी०–संभ्रमाज्जगन्मात्रपहारदर्शनजक्षोभात्परिवृत्तोर्मिः स्वभावप्राप्तोर्मिप्रवृत्तिरहितः । रुद्धा रुद्धप्रचारा मीनादयो यस्मिन् ॥ ९ ॥ १० ॥

रा० टी०–संभ्रमादिति । वैदेह्यां ह्रियमाणायां सत्यां वरुणालयः संभ्रमात् सीतापहरणहेतुकभीतेः परिवृत्ताः निवृत्ताः ऊर्मयः स्वभावसिद्धतरङ्गाः यस्य अत एव रुद्धा मीनमहोरगा यस्य स बभूव द्वयोः कर्मधारयः ॥ ९ ॥

गो० टी०–संभ्रमादिति । संभ्रमात् रावणदर्शनक्षोभात् परिवृत्तोर्मिः । रुद्धमीनमहोरगः बहिःसंचाररहितमत्स्यसर्पः ९

रा० टी०–अन्तरिक्ष इति । अन्तरिक्षं गता चारणाः दशग्रीव एतदन्त एतदपहरणमेव अन्तो विध्वंसो यस्य स इति वाचं समूचुः । सिद्धा अपि तथैव अब्रुवन् ॥ १० ॥

गो० टी०–अन्तरिक्षेति । अन्तरिक्षगताश्चारणाः दशग्रीवः एतदन्तः एतत्सीतापहरणावसान इति प्राचः समूचुः ऊचुरित्यर्थः । अन्तरिक्षगताः सिद्धाश्च एतदन्तो दशग्रीव इत्यब्रुवन् ॥ १० ॥

११] ति० टी०–एतदन्तः सीताहरणकर्मावसानः । सिद्धाः सिद्धाश्च ॥ ११ ॥

रा० टी०–स इति । अङ्केन शीघ्रगत्योपलक्षितः स रावणस्तु आत्मनो मृत्युरूपिणीं यथार्थनिरूपिकां सीतामादाय लङ्कां प्रविवेश ॥ ११ ॥

गो० टी०–स त्विति । आत्मनः रूपिणीं रूपवतीं मृत्युमिति सीताविशेषणम् ॥ ११ ॥

१२] ति० टी०–रूपिणीमात्मनो मृत्युमित्यन्वयः॥१२॥

रा० टी०–स इति । स रावणः सुविभक्ताः महापथा राजमार्गा यस्यां संरुद्धाः राक्षसैराकीर्णाः कक्ष्या द्वारो यस्यास्तां, बहुलामतिविस्तृतां लङ्कां पुरीमभिगम्य स्वम् अन्तःपुरमविशत् ' संरुद्धकक्ष्याबहुलं ' इति पाठे तादृशबहुलतरद्वारवदित्यन्तःपुरविशेषणमिति भट्टाः ॥ १२ ॥

गो० टी०–स इति । संरुद्धाः जनाकीर्णाः कक्ष्याः द्वारप्रकोष्ठाः ताभिः बहुलं निबिडम् ॥ १२ ॥

१ रुदतीं गृह्य वैदेहीमिति गो. पाठः । २ रुदन्तीमिति रा. पाठः । ३ तदेति गो. पाठः । ४ तथेति रा. पाठः ।

संरूढकक्ष्यां[1] बहुलां[2] स्वमन्तःपुरमाविशत्[3] । तत्र तामसितापाङ्गीं[4] शोकमोहसमन्विताम्[5] ॥ १३ ॥
निदधे रावणः सीतां मयो मायामिवासुरीम्[6] । अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः[7] ॥ १४ ॥
यथा नैनां पुमान्स्त्री वा सीतां पश्यत्यसंमतः[8] । मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥ १५ ॥
यद्यदिच्छेत्तदैवास्या[9] देयं मच्छन्दतो[10] यथा । या च वक्ष्यति वैदेहीं वचनं किंचिदप्रियम्[11] ॥ १६ ॥
अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियम्[12] । तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान् ॥१७॥
निष्क्रम्यान्तःपुरात्तस्मात्किं कृत्यमिति चिन्तयन्[13] । ददर्शाष्टौ महावीर्यान्राक्षसान्पिशिताशनान्[14] ॥ १८ ॥
स तान्दृष्ट्वा महावीर्यो वरदानेन मोहितः[15] । उवाच तानिदं वाक्यं प्रशस्य बलवीर्यतः[16] ॥ १९ ॥
नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः[17] । जनस्थानं हतस्थानं भूतं[18] पूर्वं खरालयम्[19] ॥ २० ॥
तत्रास्यतां जनस्थाने शून्ये निहतराक्षसे[20] । पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥ २१ ॥
बहुसैन्यं महावीर्यं जनस्थाने निवेशितम्[21] । सदूषणखरं युद्धे निहतं रामसायकैः ॥ २२ ॥

१३] ति० टी०—संरूढकक्ष्यां बहुजनाकीर्णद्वाराम् । बहुलां विपुलाम् । 'संरूढकक्ष्याबहुलम्' इति पाठे तादृशबहुतरद्वारवदित्यन्तःपुरविशेषणम् ॥ १३ ॥

रा० टी०—तत्रेति । तत्रान्तःपुरैकदेशे शोकमोहसमन्विताम् असितापाङ्गीं सीतां रावणः आसुरीं मायां मय इव निदधे ॥ १३ ॥

गो० टी०—तत्रेति । तत्र अन्तःपुरे शोकमोहपरायणां शोकमोहपरतन्त्रां निदधे स्थापितवान् । मयस्त्रिपुराधिपतिः मायां मायामयीम् आश्चर्यशक्तियुक्तामित्यर्थः । स्त्रियं स्वयंप्रभां बिले यथा निदधे तथेत्यर्थः ॥ १३ ॥

१४] ति० टी०—मायामिवासुरीमित्यनेन मायारूपैवैषा सीता या कङ्कामागतेति ध्वनितम् । मुख्यमाता त्वग्निं प्रविष्टेति पूर्वमेव ध्वनितम् अत एव रावणस्य वह्नीयैषा जाता । मायात्वादेव रावणस्य तदज्ञानम् । पिशाचीः राक्षसीरित्यर्थ इति तीर्थः ॥ १४ ॥

रा० टी०—अब्रवीदिति । दशग्रीवः घोरदर्शनाः पिशाचीः अब्रवीत् । तद्वचनाकारमाह—यथा येन प्रकारेण असंमतः मदनाज्ञप्तः पुमान् स्त्री वा न पश्यति तथा रक्षतेति शेषः॥१४॥

गो० टी०—अब्रवीदिति । पिशाचीः पिशाच्याकाराः राक्षसीः यथेमां स्त्री वा पुमान्वा असंमतः अननुज्ञातः न पश्यति तथाऽब्रवीत् । एनामन्यो न पश्येदित्यब्रवीदित्यर्थः॥१४॥

१५] ति० टी०—असंमतोऽस्मदननुज्ञातः पुमांस्तथाभूता स्त्री वा न पश्यति तथा रक्षतेति शेषः ॥ १५ ॥

रा० टी०—मुक्तेति । मुक्तादीनि अन्यच्च यथदिच्छेत्तत् मच्छन्दतो मदाज्ञातः यथा यथावत् देयम् ॥ १५ ॥

गो० टी०—मुक्तेति । एषा यथदिच्छेत्तत्तदेयं यथा मच्छन्दतः मदिच्छानुसारेण यथा मह्यं दीयते तद्वदेयमित्यर्थः ॥१५॥

१६–१८] ति० टी०—मच्छन्दतो मदाज्ञया यथद्वस्तु यदेच्छेत्तत्तदैव यथाऽस्या इष्टं भवति तथैव तत्सर्वं देयम् । मच्छन्दत इत्यस्य मद्वशप्राप्तिसिद्ध्यर्थमित्यर्थ इति कतकः । अस्या अप्रियं च न वाच्यमित्याह—या चेति । तस्या जीवितं न प्रियं तां मारयामीत्यर्थः ॥ १६–१८ ॥

रा० टी०—या चेति । या काचित् किंचिदप्रियं वैदेही वक्ष्यति तस्याः प्रियं जीवितं जीवनं नङ्क्ष्यतीति शेषः ॥ १६ ॥

गो० टी०—या चेति । जीवितं न प्रियं मारयेयमित्यर्थः ॥ १६ ॥

रा० टी०—तथेति । ताः राक्षसीः तथोक्त्वा अन्तःपुरात् निष्क्रम्य प्रतापवान् राक्षसेन्द्रो रावणः किं कृत्यम् इदानीं मया किं कर्तव्यमिति चिन्तयन् अचिन्तयत् । ददर्शेति—पिशिताशनान् अष्टौ राक्षसान् ददर्श रावण इति शेषः ॥१७॥१८॥

गो० टी०—तथेति । चिन्तयन् महावीर्यान् राक्षसान् ददर्श अपश्यत् ॥ १७ ॥ १८ ॥

१९] ति० टी०—वरदानेन पैतामहेन मोहितो रामशतादपि न मे भीरिति चिन्तयानः । मोहकृतैषा चिन्ता । तान्बलवीर्यतः प्रशस्येत्यन्वयः ॥ १९ ॥

रा० टी०—स इति । वरदानेन मोहितः स रावणः तान् प्रसिद्धान् एतान् अष्टौ राक्षसान् दृष्ट्वा बलवीर्यतः बलवीर्याभ्यां प्रशस्य इदमुवाच ॥ १९ ॥

गो० टी०—स इति । वरदानेन ब्रह्मवरदानेन । तानेतानित्यन्वयः ॥ १९ ॥

२०–२२] ति० टी०—हतस्थानं रामेणेति शून्यं कृतमित्यर्थः । पूर्वं खरालयत्वं भूतं प्राप्तम् ॥ २०–२२ ॥

रा० टी०—तद्वचनाकारमाह—नानेति । नानाप्रहरणाः अनेकविधायुधविशिष्टाः सत्वराः वेगवन्तो यूयम् इतो मत्सन्नीपात् क्षिप्रं शीघ्रं भूतपूर्वं खरालयं पौर्वकालिकं खरनिवा-

१ कक्ष्याबहुलमिति गो. पाठः । २ ऽपाङ्गामिति गो. पाठः । ३ परायणामिति गो. पाठः । ४ स्त्रियमिति गो. पाठः । ५ इमामिति गो. पाठः । ६ तदेवेति गो. पाठः । ७ एतानिति गो. रा. पाठः । ८ भूतपूर्वमिति गो. रा. पाठः । ९ उच्यतामिति गो. पाठः । १० बलं हि सुराहव्यमे नपि गो. पाठः । ११ हतं रामेणेति गो. पाठः ।

ततः क्रोधो ममापूर्वो धैर्यस्योपरि वर्धते । वैरं च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २३ ॥
निर्यातयितुमिच्छामि तच्च वैरं महारिपोः । नाहि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम् ॥ २४ ॥
तं त्विदानीमहं हत्वा खरदूषणघातिनम् । रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २५ ॥
जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता । प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः ॥ २६ ॥
अप्रमादाच्च गन्तव्यं सर्वैरेवं निशाचरैः । कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति ॥ २७ ॥
युष्माकं तु बलं ज्ञातं बहुशो रणमूर्धनि । अतश्चास्मिञ्जनस्थाने मया यूयं निवेशिताः॥ २८ ॥
ततः प्रियं वाक्यमुपेत्य राक्षसा महार्थमष्टावभिवाद्य रावणम् ।
विहाय लङ्कां सहिताः प्रतस्थिरे यतो जनस्थानमलक्ष्यदर्शनाः ॥ २९ ॥

सस्थानमित्यर्थः, हतस्थानं हतो विध्वंसितः स्थानः राक्षसरूपस्थाता यस्मिंस्तत् जनस्थानं गच्छत ॥ २० ॥

गो० टी०–जानेति । ' आयुधं तु प्रहरणम् ' इत्यमरः । हतस्थानं शून्यसन्निवेशं खराख्यं भूतपूर्वं पूर्वं खराख्यमित्यर्थः । "भूतपूर्वे चरट्" इति निर्देशात्समासः ॥ २० ॥

रा० टी०–गमनप्रयोजनमाह–तत्रेति । पौरुषं स्वतेजः बलं च आश्रित्य संस्मृत्य त्रासक्षुद्वेगं दूरतः उत्सृज्य त्यक्त्वा निहतराक्षसे अत एव शून्ये तत्र प्रसिद्धजनस्थाने आस्यताम् २१

गो० टी०–तत्रेति । पौरुषं बलं न केवलं नीतिबलमित्यर्थः ॥ २१ ॥

रा० टी०–नन्वतिबलवन्तो राक्षसाः केन निहता इत्यत आह–चतुर्दशेति । महावीर्यं सदूषणखरं दूषणखरसहितं जनस्थाने निवेशितं बहु सैन्यं रामसायकैः निहतम् ॥ २२ ॥

गो० टी०–पौरुषबलाश्रयणे हेतुमाह–बलं हीति । यत् बलं सैन्यं निवेशितं तद्धतमित्यन्वयः ॥ २२ ॥

२३] ति० टी०–धैर्यस्योपरि क्रोधः धैर्योपमर्दकः क्रोध इत्यर्थः । ततः खरादिवधात्, न तु भीत्या नापि तथा क्रोध इत्यर्थः ॥ २३ ॥

रा० टी०–तत इति । ततः खरादिविध्वंसाद्धेतोः अपूर्वः पूर्वमेवं न जातः इदानीमेवोत्पन्न इत्यर्थः, क्रोधः धैर्यस्योपरि यथा भवति तथा वर्धते धैर्यस्योपरीत्यनेन तत्क्रोधरोधस्याशक्यत्वं सूचितम् अत एव सुदारुणम् अनिवर्त्यमित्यर्थः, सुमहद्वैरं रामं प्रति जातम् ॥ २३ ॥

गो० टी०–तत्रेति । तत्र वधनिमित्तम् । अमर्षात् असहनात् ॥ २३ ॥

२४–२५] ति० टी०–निर्यातयितुं प्रत्युपकारेणापनेतुम् ॥ २४ ॥ २५ ॥

रा० टी०–निरिति । रिपोस्तद्वैरं निर्यातयितुं रिपुध्वंसेन दूरीकर्तुमिच्छामि । तदभावे दोषमाह–संयुगे रिपुमहत्वा निद्रां न लप्स्यामि ॥ २४ ॥

गो०टी०–निर्यातयितुमिति। निर्यातयितुम् अवसितुम्२४

रा० टी०–तमिति । खरदूषणघातिनं तं राममिदानीमहं हत्वा निर्धनो धनं लब्ध्वेव शर्म सुखमुपलप्स्यामि ॥ २५॥

गो० टी०–तं त्विति । शर्म सुखम् उपलप्स्यामि प्राप्स्यामि ॥ २५ ॥

२६–२८] ति० टी०–प्रवृत्तिर्वार्ता उपनेतव्या मम प्रापणीया॥ २६–२८ ॥

रा० टी०–नन्वत्र गत्वाऽस्माभिः किं कर्तव्यमित्यत आह—जनस्थाने इति । जनस्थाने वसद्भिर्भवद्भिः रामः किं करोतीति राममाश्रिता प्रवृत्तिः तत्त्वत उपनेतव्या मत्समीपं प्रापणीया ॥ २६ ॥

गो० टी०–जनेति । प्रवृत्तिर्वार्ता । रामः किं करोतीति तत्त्वतो वार्ता मत्सकाशमुपनेतव्येत्यर्थः ॥ २६ ॥

रा० टी०–अप्रमादादिति । अप्रमादात् अनवधानताराहित्यादेव सर्वैर्निशाचरैर्गन्तव्यम् जनस्थानमिति शेषः, राघवस्य वधं प्रति यत्नश्च कर्तव्यः ॥ २७ ॥

गो० टी०–अप्रमादादिति । अवधानादित्यर्थः ॥ २७॥

रा० टी०–भवन्तः प्रेषयितुं योग्या इति बोधयन्नाह—युष्माकमिति । बहुशोऽनेकवारं युष्माकं बलं ज्ञातमत एवास्मिन् जनस्थाने यूयं मया निवेशिताः निवेशयितुं प्रेषिताः ॥ २८ ॥

गो० टी०–खरादिस्थाने अस्माभिः कथं स्थातुं शक्यं तत्राह–युष्माकं चेति ॥ २८ ॥

२९] ति० टी०–महार्थं महानर्थोऽभिधेयं यस्य तत् । यतो यस्मिन् जनस्थानं तदिशीत्यर्थः । अलक्ष्यदर्शना अन्तर्धानविद्यया ॥ २९ ॥

रा० टी०–तत इति । ततः रावणोक्त्यनन्तरं महार्थं प्रियं वाक्यं रावणवचनम् उपेत्य ज्ञात्वा यतः अतिप्रयत्नवन्त अष्टौ राक्षसाः रावणमभिवाद्य लङ्कां विहाय अलक्ष्यदर्शनाः सन्तः जनस्थानं प्रतस्थिरे ॥ २९ ॥

गो० टी०–तत इति । महानर्थोऽभिधेयो यस्य तं महार्थं प्रियं श्लाघारूपं वाक्यम् उपेत्य लब्ध्वा रावणतः स्तुतिं

१ वर्तत इति गो.पाठः। २अहं रिपोरिति गो.मया रिपोरिति रा.पाठः। ३अपीति गो.पाठः। ४च बलशोऽहमिति गो.पाठः। ५नियोजिता इति गो.पाठः।

ततस्तु सीतामुपलभ्य रावणः सुसंप्रहृष्टः परिगृह्य मैथिलीम् ।
प्रसज्ज्य रामेण च वैरमुत्तमं बभूव मोहान्मुदितः स रावणः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ।

रावणः सीतान्तिकं प्राप्तस्तां तत्तत्प्रदेशेषूद्यानभवनप्रासादादैश्वर्यं प्रदर्श्य प्रलोभयंश्चाटून्युपन्यस्यति ।

संदिश्य राक्षसान्घोरान्रावणोऽष्टौ महाबलान् । आत्मानं बुद्धिवैक्लव्यात्कृतकृत्यममन्यत ॥ १ ॥
स चिन्तयानो वैदेहीं कामबाणैः प्रपीडितः । प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ २ ॥
स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः । अपश्यद्राक्षसीमध्ये सीतां दुःखपरायणाम् ॥ ३ ॥
अश्रुपूर्णमुखीं दीनां शोकभारावपीडिताम् । वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ ४ ॥
मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम् । अधोगतमुखीं सीतां तामभ्येत्य निशाचरः ॥ ५ ॥

प्राप्येत्यर्थः । यतो यत्र जनस्थानं तद्वनमुद्दिश्य प्रतस्थिरे । अलक्ष्यदर्शनाः वेगातिशयेन दुष्प्रेक्ष्यस्वरूपाः ॥ २९ ॥

३०] ति० टी०–उपलभ्य प्राप्य स्पृष्ट्वा च परिगृह्य स्वगृहे स्थापयित्वा परिग्रहत्वेन विभाव्य च प्रसज्ज्य संपाद्य मोहान्मुदितः स्वरहन्तुर्वधो मम सुकरः सीतावियोगेनातिखिन्नस्येति हर्षितः ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

रा० टी०–तत इति । ततः राक्षसप्रेषणानन्तरं स प्रसिद्धो राक्षसो रावणः मैथिलीं सीतामुपलभ्य प्राप्य परिगृह्य राक्षसीभिर्गृहयित्वा तत्सेवायां राक्षसीर्नियुज्येत्यर्थः, मोहात्स्वस्वामिरामविषयकाज्ञानात् हेतोः रामेण उत्तमं महद्वैरं प्रसज्याश्रित्य मुदितो बभूव ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

गो० टी०–सर्गार्थं संगृह्य दर्शयति–तत इति । उपलभ्य दृष्ट्वा सुसंप्रहृष्टः कामविकारवान् परिगृह्य गृहीत्वा रामेण वैरं प्रसज्य प्राप्यापि मोहान्मुदितो बभूव ॥ ३० ॥

अत्र त्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुष्पञ्चाशः सर्गः ॥५४॥

१–३] ति० टी०–बुद्धिवैक्लव्याद्बुद्धिवैपरीत्यात् ॥१–३॥

रा० टी०–रावणवृत्तान्तमाह–संदिश्येत्यादिभिः । रावणः महाबलान् अष्टौ राक्षसान् संदिश्य बुद्धिवैक्लव्याद् बुद्धेर्नाशात् हेतोः आत्मानं कृतकृत्यम् अमन्यत ॥ १ ॥

गो० टी०–पूर्वं स्वप्रभावकथनसुखेन प्रलोभनं कृतवान् । अथ भोगोपकरणप्रदर्शनसुखेन रावणः सीतां प्रलोभयति पञ्चपञ्चाशे–संदिश्येत्यादि । बुद्धिवैक्लव्यात् बुद्धिदौर्बल्यात् अकृतबुद्धित्वादित्यर्थः ॥ १ ॥

रा० टी०–स इति । कामबाणैः नानामनोरथरूपशरैः प्रपीडितः वैदेहीं चिन्तयानः स रावणः सीतां द्रष्टुमभित्वरन् सन् रम्यं गृहं प्रविवेश ॥ २ ॥

गो० टी०–स इति । समर्पितः पीडित इत्यर्थः । अभित्वरन् अभित्वरमाणः ॥ २ ॥

रा० टी०–स इति । स प्रसिद्धो रावणः तत्सीताधिष्ठितं वेश्म प्रविश्य दुःखपरायणां रामवियोगजनितदुःखाक्रान्तां सीतां राक्षसीमध्ये अपश्यत् ॥ ३ ॥

गो० टी०–स प्रविश्येति । वेश्म अन्तःपुरम् ॥ ३ ॥

४] ति० टी०–शोको वायुस्थाने, अश्रु चार्णवजलस्थाने । अनेनाश्रुवेगातिशय उक्तः ॥ ४ ॥

५] ति० टी०–अधोगतमवनतं मुखं यस्याः ॥ ५ ॥

रा० टी०–सीतामेव विशेषयन्नाह–अश्रिवेति । शोकभारावपीडिताम् अतिशोकाक्रान्तामित्यर्थः, अत एव अश्रुपूर्णमुखीम् अत एव वायुवेगैराक्रान्ताम् अर्णवे मज्जन्तीं नावमिव मृगयूथपरिभ्रष्टां श्वभिः कुक्कुरैः आवृतां मृगीमिव दीनाम् अधोगतमुखीं तां सीताम् अभ्येत्य तत्समीपं प्राप्य अतिष्ठदिति शेषः । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–अश्रिवेत्यादिश्लोकत्रयमेकं वाक्यम् । अधोमुखमवनतं मुखं यस्यास्ताम् । 'स्यादवाङ्प्यधोमुखः' इत्यमरः । शोकभाराभिपीडितामभ्येत्य शोकपरां दर्शयामासेति क्रियाभेदादपुनरुक्तिः । अवशां दर्शनमनिच्छन्तीम् ॥ ४–६ ॥

१ राक्षस इति गो. पाठः । २ बाणसमर्पित इति गो. पाठः । ३ शोकेति गो. पाठः । ४ अमीति गो. पाठः । ५ सुस्रवद्वक्त्रां सीतामभ्येत्य चेति गो. पाठः ।

तां तु शोकवशादीनामवशां राक्षसाधिपः । स बलादर्शयामास गृहं देवगृहोपमम् ॥ ६ ॥
हर्म्यप्रासादसंबाधं स्त्रीसहस्रनिषेवितम् । नानापक्षिगणैर्जुष्टं नानारत्नसमन्वितम् ॥ ७ ॥
दान्तकैस्तापनीयैश्च स्फाटिकै राजतैस्तथा । वज्रवैदूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोरमैः ॥ ८ ॥
दिव्यदुन्दुभिनिर्घोषं तप्तकाञ्चनभूषणम् । सोपानं काञ्चनं चित्रमारुरोह तया सह ॥ ९ ॥
दान्तका राजताश्चैव गवाक्षाः प्रियदर्शनाः । हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः ॥ १० ॥
सुधामणिविचित्राणि भूमिभागानि सर्वशः । दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम् ॥ ११ ॥
दीर्घिकाः पुष्करिण्यश्च नानापुष्पसमावृताः । रावणो दर्शयामास सीतां शोकपरायणाम् ॥ १२ ॥
दर्शयित्वा तु वैदेहीं कृत्स्नं तद्भवनोत्तमम् । उवाच वाक्यं पापात्मा सीतां लोभितुमिच्छया १३ ॥
दश राक्षसकोट्यश्च द्वाविंशतिरथापराः । वर्जयित्वा जनान्वृद्धान्बालांश्च रजनीचरान् १४ ॥

६-७] ति० टी०-अनिच्छन्तीमपि तदर्शनं बलादर्शयामासेत्यन्वयः ॥ ६ ॥ ७ ॥

रा० टी०-तामिति । शोकवशाम् अत एव दीनाम् अवशां गृहदर्शनमनिच्छन्तीं तां सीतां देवगृहोपमगृहं स रावणो बलादर्शयामास ॥ ६ ॥

रा० टी०-तद्गृहमेव वर्णयन्नाह-हर्म्येति । हर्म्यप्रासादसंबाधं हर्म्यैः साधारणगृहैः प्रासादैः राजगृहैश्च संबाधं निबिडं दान्तकैः हस्तिदन्तनिर्मितैः तापनीयैः तपनीयं सुवर्णं तन्निर्मितैः वज्रवैदूर्यचित्रैः अत एव दृष्टिमनोरमैः स्तम्भैः संयुक्तमिति शेषः, दिव्यदुन्दुभिनिर्घोषं दिव्यदुन्दुभीनां निर्घोषः शब्दो यस्मिँस्तत् तप्तकाञ्चनतोरणं तप्तकाञ्चनमयानि तोरणानि यस्मिन् तद्गृहं दर्शयितुमिति शेषः, काञ्चनं स्वर्णमयं चित्रं तया सह आरुरोह । श्लोकत्रयमेकान्वयि ॥ ७-९ ॥

गो० टी०-गृहं वर्णयति द्वाभ्याम्-हर्म्येत्यादि । हर्म्यैः हस्त्यविमानैः प्रासादैः उन्नतविमानैश्च संबाधं निबिडं काञ्चनैः स्वर्णमयैः तापनीयैः तप्तस्वर्णमयैः स्तम्भैरुपलक्षितम् ॥ ७ ॥ ८ ॥

८] ति० टी०-दान्तकैर्गजदन्तकृतैः । तपनीयं स्वर्णं स्तम्भैर्युतमिति शेषः ॥ ८ ॥

९] ति० टी०-तया सीतया ॥ ९ ॥

गो० टी०-दिव्येति । दिव्यदुन्दुभिनिर्हादं निर्हादवत् अर्थे आयच् । यद्वा दिव्यदुन्दुभेरिव निर्हादः शब्दो यस्य तत् आरोहणकाले दुन्दुभिवत् ध्वनतीति भावः । तोरणो बहिर्द्वारं चित्रम् आश्चर्यभूतम् । 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः । तया सहारुरोह तामादाय हरेरोहेत्यर्थः ॥ ९ ॥

१०] ति० टी०-हेममयजालकैरावृताः ॥ १० ॥

रा० टी०-दान्तका इति । तत्र तस्मिन् गृहे दान्तकादयो गवाक्षा आसन् हेमजालावृताः पक्ष्यागमननिवारणाय हेममयैर्जालकैः संयुक्ताः अत एव प्रियदर्शनाः प्रासादपङ्क्तयश्चासन् तत्र स्वभवने सर्वशः भूमिभागानि भूमिभागाः सुधामणिविचित्राणि सुधाभिर्मणिभिश्च विचित्राण्यासन् तानि दशग्रीवः मैथिलीं प्रादर्शयत । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०-वक्ष्यमाणभूभागदर्शनसाधनान्याह-दान्तिका इति । दान्तिकाः दन्तविकृताः तत्र सोपानमार्गे गवाक्षा आसन् तदुपरि हेममयैः जालैः जालकैः आवृताः प्रासादपङ्क्तयश्चासन् ॥ १० ॥

११] ति० टी०-सुधया मणिभिश्च विचित्राणि भूमिभागानीत्यर्थं क्लीबत्वम् ॥ ११ ॥

गो० टी०-सुधेति । सुधालेपनेन मणिभिश्च विचित्राणि भूमिभागानीति क्लीबत्वमार्षम् । प्रादर्शयत् प्रदर्शयामास । तैर्गवाक्षैरिति शेषः ॥ ११ ॥

१२] ति० टी०-दीर्घिका वाप्यः ॥ १२ ॥

रा० टी०-दीर्घिका इति । दीर्घिकाः वापीः नानापुष्पसमावृताः पुष्करिण्यः पुष्करं जलमस्ति यासु ताः सरस्य आर्षत्वाद्वितीयार्थे प्रथमा शोकपरायणां सीतां रावणो दर्शयामास ॥ १२ ॥

गो० टी०-दीर्घिका इति । दीर्घिकाः वाप्यः पुष्करं जलमेषामस्तीति पुष्करिण्यः । द्वितीयार्थे प्रथमा "पुष्करादिभ्यो देशे" इति इनिप्रत्ययः । शोकपरायणामित्यनेन तस्या असत्त्वं द्योत्यते ॥ १२ ॥

१३]ति०टी०-लोभितुं सामनियहाभ्यां प्रलोभयितुम् ॥ १३ ॥

रा० टी०-स इति । सीतां लोभितुं भवनविषयकलोभमुत्पादयितुं कृत्स्नं सकलं तद् प्रसिद्धं भवनोत्तमं दर्शयित्वा पापात्मा रामक्लेदोत्पादनरूपपापविषयकप्रयत्नवान् रावणः उवाच ॥ १३ ॥

गो० टी०-दर्शयित्वेति । लोभितुं लोभयितुम् अन्तर्भावितण्यर्थोऽयम् ॥ १३ ॥

१४] ति० टी०-दशेति । द्वाविंशत्कोटिसंख्याः ॥ १४ ॥

१ परामिति गो. वशामिति रा. पाठः । २ काञ्चनैरिति गो. पाठः । ३ अपीति गो. पाठः । ४ हरेरिति गो. पाठः । ५ निह्रादमिति गो. पाठः । ६ तोरणमिति गो. रा. पाठः । ७ दान्तिका इति गो. पाठः । ८ वृक्षसमन्विता इति गो. पाठः । ९ स दर्शयित्वेति रा. पाठः । १० वैदेह्या इति गो. पाठः । ११ एतदार्षत्वं व्यत्यस्तं गो. रा. पाठे । १२ जरेति गो. पाठः । १३ आरुरोहेति भाति ।

तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम् । सहस्रमेकमेकस्य मम कार्यपुरःसरम् ॥ १५ ॥
यदिदं राज्यतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम् । जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी॥ १६ ॥
वह्वीनामुत्तमस्त्रीणां मम योऽसौ परिग्रहः । तासां त्वमीश्वरी सीते मम भार्या भव प्रिये ॥ १७ ॥
साधु किं तेऽन्यथाबुद्ध्या रोचयस्व वचो मम । भजस्व मामितप्तस्य प्रसादं कर्तुमर्हसि ॥ १८ ॥
परिक्षिप्ता समुद्रेण लङ्केयं शतयोजना । नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १९ ॥
न देवेषु न यक्षेषु न गन्धर्वेषु नर्षिषु । अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ २० ॥
राज्यभ्रष्टेन दीनेन तापसेन पदातिना । किं करिष्यसि रामेण मानुषेणाल्पतेजसा ॥ २१ ॥
भजस्व सीते मामेव भर्तारं सदृशस्तव । यौवनं त्वध्रुवं भीरु रमस्वेह मया सह ॥ २२ ॥

रा० टी०—तद्वचनाकारमाह-दशेति । दश अपराः द्वाविंशतिश्च राक्षसकोट्यः सन्तीति शेषः, भीमकर्मणां तेषामहं प्रभुः । तेषामित्यनेन विशेषणीभूतस्य परामर्शः अथशब्दादनुशासनम् केषां शब्दानामित्यादौ तथा दर्शनात् ॥ १४ ॥

रा० टी०—वर्जयित्वेति । तद्वान् बालांश्च रजनीचरान् जनान् वर्जयित्वा विद्यमानम् एकस्य मम एकं सहस्रं कार्यपुरस्सरं परिचारकोऽस्तीति शेषः ॥ १५ ॥

गो० टी०—दशेति । दश द्वाविंशतिश्चेति द्वात्रिंशत्कोट्यः तेषां द्वात्रिंशत्कोटिराक्षसानां गुणीभूतानामपि राक्षसानां तच्छब्देन परामर्शः ॥ १४ ॥

गो० टी०—अथ शब्दानुशासनं तेषां शब्दानामित्यत्राहे—वर्जयित्वेति । बालवृद्धान् विना ममैकस्य पुरः सरतीति पुरःसरं परिचारकजातम् एकसहस्रमस्ति ॥ १५ ॥

१५] ति० टी०—तेषामप्येकस्यैकस्यैकमेकं सहस्रं मम कार्ये प्रयोजने साधकतया पुरःसरम् अस्तीति शेषः ॥ १५ ॥

१६] ति० टी०—मे मम यदिदमुक्तरूपं राज्यतन्त्रं राजैपरिकरस्तत्त्वयि प्रतिष्ठितं त्वदधीनमित्यर्थः ॥ १६ ॥

रा० टी०—यदिति । हे विशालाक्षि ! यतस्त्वं मे प्राणैः प्राणेभ्योऽपि गरीयसी असि अतः मे यदिदं राजतन्त्रं जीवितं च तत्सर्वं त्वयि प्रतिष्ठितं तुभ्यं समर्पितं त्वदधीनीकृतमित्यर्थः॥१६॥

गो० टी०—यदिदमिति । मम यदिदं राजतन्त्रं राजपरिकरः तत्सर्वं त्वयि प्रतिष्ठितं त्वदधीनं मम जीवितं च त्वदधीनं त्वयि प्रतिष्ठितं त्वं मे मम प्राणैः प्राणेभ्यः गरीयसी ॥ १६ ॥

१७] ति० टी०—वह्वीनामुत्तमस्त्रीणामन्तःपुरसंचारिणीनाम् । यो मम परिग्रहो भार्या नित्यपुंलिङ्गः परिग्रहशब्दो भार्यावाची । मम भार्या सती तासां त्वमीश्वरी स्वामिनी भव ॥ १७ ॥

रा० टी०—वह्वीनामिति । हे सीते ! भार्या अतिशोभावती त्वं वह्वीनां तासां प्रसिद्धानां ममोत्तमस्त्रीणां मम श्रेश्वरी पूज्या भव । इतेनात्रैव भवत्या स्थातव्यमिति व्यञ्जितं तेन रामचिन्तां त्यजेति ध्वनितम् ॥ १७ ॥

गो० टी०—बह्वीनामिति । अन्तःपुरचारिणां स्त्रीसहस्राणां मध्ये योऽसौ मम परिग्रहः या भार्या इत्यर्थः । 'परिग्रहः कलत्रे स्यात्' इति शाश्वतः । नित्यपुंलिङ्गः । जात्यभिप्रायेणैकवचनम्। तासामित्यत्र स्त्रीणामित्यभिप्रायेण स्त्रीलिङ्गनिर्देशः । मम भार्या सती तासामीश्वरा स्वामिनी भव । "स्थेशभासपिसकसो वरच्" इति वरच् । ततष्टाप् ॥ १७ ॥

१८] ति० टी०—साधु हितं मम वचो रोचयस्वेत्यन्वयः । अन्यथाबुद्ध्या ते तव किं न किमपि फलमित्यर्थः । मा मां भजस्व । अमितप्तस्य कामाभितप्तस्य ॥ १८ ॥

रा० टी०—नन्वहं रामं विनाऽहं न स्थास्यामीत्यत आह—साध्विति । साधु स्वहितं मम वचो रोचयस्व अन्यथा रामविषयिण्या बुद्ध्या ते किं न किमपीत्यर्थः, अत एव त्वमा मम नित्यमाता त्वं भज सेवां कारय अतितप्तस्य भ्रात्रादिवधेन पीडितस्य मम प्रसादं प्रसन्नतां कर्तुं त्वमर्हसि ॥ १८ ॥

गो० टी०—साध्विति । मम वचो रोचयस्व मदुक्तं स्वीकुरु इदं साधु समीचीनं ते अन्यथाबुद्ध्या किं रामविषया बुद्धिर्मा भूदित्यर्थः । तस्मात् मा मां भजस्व । अमितप्तस्य कामाभितप्तस्य मे प्रसादं कर्तुमर्हसि । अर्हसि किम् नार्हसीत्यपि ध्वनिः ॥ १८ ॥

१९–२२] ति० टी०—शतयोजना भूमेरिति शेषः । अशक्यधर्षणत्वे पूर्वार्धं हेतुः । एवं च रामस्यात्रागमनमसंभावितमिति भावः ॥ १९–२२ ॥

रा० टी०—नन्वहं रामं मां बलात्नेष्यत्येवेत्यत आह—परीति। यतः शतयोजनेयं लङ्का समुद्रेण परिक्षिप्ता परिष्टता अतः सेन्द्रैः स्वस्वस्वामिसहितैः सुराद्यैः प्रधर्षयितुं न शक्या ॥ १९ ॥

गो० टी०—रामागमनप्रसक्तिरेव नास्तीत्याशयेनाह—परिक्षिप्तेति । 'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्' इति वचनात् सहस्रेण अनेकराक्षसैः परिक्षिप्ता परिष्टता इयं लङ्का शतयोजना शतयोजनपरिमिता तस्मात्नेयं धर्षयितुं शक्या ॥ १९ ॥

१ राजतन्त्रमिति गो. पाठः । २ बह्वीनां स्त्रीसहस्राणामिति गो. पाठः । ३ ईश्वरेति गो. पाठः । ४ सहस्रेणेति गो. पाठः । ५ पक्षिप्तेति गो. पाठः । ६ गतायुषेति गो. पाठः । ७ ध्रुवमिति गो. पाठः । ८ तेषामिति भाति । ९ एतत्पर्यन्तं पूर्वश्लोकटीकास्थमिति भाति । १० राज्येति भाति । ११ भूमिरिति युक्तं भाति ।

दर्शने मा कृथा बुद्धिं राघवस्य वरानने । कास्य शक्तिरिहागन्तुमपि सीते मनोरथैः ॥ २३ ॥
न शक्यो वायुराकाशे पाशैर्बद्धुं महाजवः । दीप्यमानस्य वाप्यग्नेर्[1] ग्रहीतुं विमलाः शिखाः ॥ २४ ॥
त्रयाणामपि लोकानां न तं पश्यामि शोभने । विक्रमेण [2]यस्त्वां मद्बाहुपरिपालिताम् ॥ २५ ॥
[3]लङ्कायाः सुमहद्राज्यमिदं त्वमनुपालय । त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि [4]चराचरम् ॥ २६ ॥
अभिषेकजलक्लिन्ना [5]तुष्टा च रमयस्व [6]चै । दुष्कृतं यत्पुरा कर्म वनवासेन तद्गतम् ॥ २७ ॥

रा० टी०–लङ्कायाः धर्षणाशक्यत्वं संवर्ण्य स्वस्यापि धर्षणाशक्यत्वमाह–नेति । यो मे वीर्यसमो भवेत् तं देवादिष्वहं न पश्यामि ॥ २० ॥

गो० टी०–मा भूत्पुरस्य दुर्धर्षता मम पुनर्वीर्यं श्रुत्वित्याह–न देवेष्विति । मे वीर्ये यः समो भवेत् तं देवेषु न पश्यामि, यक्षेषु न पश्यामि, गन्धर्वेषु न पश्यामि, पक्षिषु च न पश्यामि ॥ २० ॥

रा० टी०–रामविषयकविरक्तिमुत्पादयन्नाह–राज्येति । राज्यभ्रष्टेन अत एव अल्पतेजसा रामेण किं करिष्यसि एतेन रामकर्तृकराज्यप्राप्त्यनन्तरं तत्संगमः कर्तव्य इति व्यञ्जितम् २१

गो० टी०–राज्येति । गतायुषा अल्पायुषेत्यर्थः ॥ २१ ॥

रा० टी०–भजस्वेति । हे सीते ! तव भर्ता रामः इमिदानीं सदृशः तव पालनयोग्यः अन अतः इह अस्मिन् समये मां लङ्कासंपत्तिमेव भजस्व तु अनन्तरं रामराज्यप्राप्तावित्यर्थः, मया माम् अयोध्यासंपत्तिम् अयति प्राप्नोति ते न रामेण सह रमस्व रंस्यसे इत्यर्थः । तत्र हेतुः–यौवनं तव ध्रुवं नित्यम् एतेनेदानीं रामसमीपगमनयोग्यता तव नास्तीति सूचितम् इमित्यव्ययम् अध्रुवमित्यत्रत्योकारः निषेधार्थकोऽव्ययपठितः स च सदृशान्वयी ॥ २२ ॥

गो० टी०–भजस्वेति । इह भवने ॥ २२ ॥

२३] ति० टी०–अस्य रामस्य ॥ २३ ॥

रा० टी०–दर्शन इति । इह अस्मिन्समये राघवस्य दर्शने बुद्धिं मा कृथाः । नन्वसौ आगत्य मां नेष्यतीत्यत आह–अस्य रामस्य इहागन्तुं मनोरथैः मनोव्यापारैरपि का शक्तिः न शक्तिरित्यर्थः ॥ २३ ॥

गो० टी०–दर्शन इति । राघवस्य दर्शने बुद्धिं मा कृथाः तद्दर्शनं च दुर्लभमित्यर्थः । तदेव स्पष्टयति–कास्येति अत्र आगन्तुं मानसिकव्यापारोऽपि न शक्यः किं पुनः कायिक इत्यर्थः ॥ २३ ॥

२४–२५] ति० टी०–यथा वायुर्बद्धुमशक्यो यथा चाग्निशिखा ग्रहीतुमशक्यास्तथेहागन्तुमशक्यमित्यर्थः ॥ २४ ॥२५॥

रा० टी०–नेति । यथाऽऽकाशे महाजवो वायुः पाशैः रज्जुभिर्बद्धुं त्रयाणामपि लोकानां न शक्यः दीप्यमानस्य अग्नेः विमलाः शिखाश्च ग्रहीतुं न शक्याः बन्धकं ग्रहीतारं च न पश्यामीत्यर्थः, तथा मद्बाहुपरिपालितां विक्रमेण यस्त्वां नयेत् तं त्रयाणामपि लोकानां मध्ये न पश्यामि । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–अशक्यत्वे दृष्टान्तमाह–न शक्य इति । विमलां निर्धूमां शिखां ज्वालाम् ॥ २४ ॥

गो० टी०–त्रयाणामिति । लोकानामिति निर्धारणे षष्ठी ॥ २५ ॥

२६] ति० टी०–मद्विधास्त्वत्प्रेष्या भविष्यन्ति । मां चेदङ्गीकरिष्यसे तदा सेवकवत्त्वदाज्ञावशो भविष्यामि । तथाभूते मयि राक्षसा देवाश्च मद्बाहुरक्षिताः संपन्ना एव । किं विशेषेण सर्वं चराचरं त्वत्प्रेष्यं भवति तदेत्यर्थः ॥ २६ ॥

रा० टी०–लङ्कायामिति । लङ्कायां स्थिता त्वम् इदं मदीयं सुमहद्राज्यमनुपालय, एतेन त्वत्सेवकोऽहं भविष्यामीति सूचितम् । अत एव मद्विधाः ये राक्षसाः देवाश्च चराचरं सर्वं जगच्च त्वत्प्रेष्याः त्वद्भृत्याः भविष्यन्तीति शेषः ॥ २६ ॥

गो० टी०–लङ्कायामिति । त्वत्प्रेष्याः त्वत्परिचारकाः भविष्यन्तीति शेषः । अभिषेकेत्यर्धमेकं वाक्यम् । अभिषेकोदकेन पट्टमहिषीत्वेनाभिषेकोदकेन क्लिन्ना सिक्ता ॥ २६ ॥

२७] ति० टी०–अभिषेकः श्रमनिष्टत्तिद्वारा भोगाय स्नानं तदुदकेन क्लिन्नार्द्रा श्रमापनयनात्तुष्टा च मां रमयस्व । यत्पूर्वं संचितं किंचिद्दुष्कृतमासीत्तद्वनवासेन तद्गतदुःखेन गतं क्षीणम् ॥ २७ ॥

रा० टी०–अभिषेकेति । अभिषेकजलक्लिन्ना अभिषेकजलैः स्नानोदकैः क्लिन्ना स्नाता तुष्टा लङ्का राज्यप्राप्त्या प्राप्तसंतोषा च त्वं मां लङ्कासंपत्तिं रमयस्व यथेच्छं पालयस्व इत्यर्थः, एतेनापहरणसमयादारभ्य तावत्कालपर्यन्तं स्नानं तया न कृतमिति सूचितम् । अथ पृथक्–दुष्कृतमिति । पुरा पौर्वकालिकं यत् दुष्कृतं ते कर्म तद्वनवासेन गतं यच्च ते सुकृतं कर्म तस्य फलम् इह इदानीम् आप्नुहि ॥ २७ ॥

गो० टी०–दुष्कृतमिति । पुरा पूर्वजन्मनि यद्दुष्कृतं कर्मास्ति तत् वनवासेन वनवासक्लेशेन दत्तफलत्वात् गतं नष्टम् ॥ २७ ॥

---

१ ग्रहीतुं विमलां शिखामिति गो. पाठः । २ लङ्कायामिति गो. रा. पाठः । ३ चराचरा इति गो. पाठः । ४ उदकक्लिन्नेति गो. पाठः । ५ मामिति गो. रा. पाठः ।

यैश्च ते सुकृतं कर्म तस्येह फलमाप्नुहि । इह सर्वाणि माल्यानि दिव्यगन्धानि मैथिलि ॥२८॥
भूषणानि च मुख्यानि तैानि सेव मया सह । पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे ॥ २९ ॥
विमानं सूर्यसंकाशं तरसा निर्जितं रणे । विशालं रमणीयं च तद्विमानं मनोजवम् ॥ ३० ॥
तत्र सीते मया सार्धं विहरस्व यथासुखम् । वदनं पद्मसंकाशं विमलं चारुदर्शनम् ॥ ३१ ॥
शोकार्तं तु वरारोहे न भ्राजति वरानने । एवं वदति तस्मिन्सा वस्त्रान्तेन वराङ्गना ॥ ३२ ॥
पिधायेन्दुनिभं सीता मन्दमश्रूण्यवर्तयत् । ध्यायन्तीं तामिवास्वस्थां सीतां चिन्ताहतप्रभाम्॥३३॥
उवाच वचनं वीरो रावणो रजनीचरः । अलं व्रीडेन वैदेहि धर्मलोपकृतेन ते ॥ ३४ ॥
आर्षोऽयं देवि निष्पन्दो यस्त्वामभिभविष्यति । एतौ पादौ मया स्निग्धौ शिरोभिः परिपीडितौ॥३५॥

२८–३२] ति० टी०–इह लङ्कायाम् । मदङ्गीकारादिति शेषः ॥ २८–३२ ॥

रा० टी०–इहेति । मया राज्यसंपत्त्या सह सर्वाणि अनेकविधानि यानि माल्यादीनि तानि सेव सेवस्व ॥ २८ ॥

गो० टी०–इहेति । भूषणानि च मुख्यानि सेवस्व धारयेत्यर्थः ॥ २८ ॥

रा० टी०–पुष्पकमिति । सूर्यसंकाशं पुष्पकं नाम मे भ्रातुः वैश्रवणस्य विमानं तरसा अतिबलेन मया निर्जितं तद्विमानं विशालं मनोजवं चास्तीति शेषः ॥ २९ ॥ ३० ॥

गो० टी०–पुष्पकमित्यादि । तरसा बलेन विशालं वेशनयोग्यम् । "वेः शालच्छङ्कटचौ" इत्यनेन शालच् प्रत्ययः । असंकोचनयायावदुपवेष्टृसंभावनमुपदेशार्हमित्यर्थः ॥ २९ ॥३०॥

रा० टी०–तत्रेति । मया राज्यसंपत्त्या सार्धं विद्यमाने तत्र तस्मिन् विमाने यथासुखं विहरस्व । अथ पृथक्–वदनमिति । शोकार्तं ते वदनं न भ्राजति प्रकाशते एतेन शोकं त्यजेति व्यञ्जितम् ॥ ३१ ॥

गो० टी०–वदनमिति । न भ्राजति न भासते ॥ ३१ ॥

रा० टी०–एवमिति । तस्मिन् रावणे एवं वदति सति वस्त्रान्तेन इन्दुनिभं मुखं पिधाय विद्यमाना सीता अश्रूणि अवर्तयत् ॥ ३२ ॥

गो० टी०–एवमिति । वदतीति सतिसप्तमी । पिधाय आच्छाद्य ॥ ३२ ॥

३३] ति० टी०–शोकेनास्वस्थामिव चिन्तया हतप्रभामिव ध्यायन्तीमिव तामुवाचेत्यन्वयः ॥ ३३ ॥

रा० टी०–ध्यायन्तीमिति । ध्यायन्तीं रामामिति शेषः, चिन्ताहतप्रभामिव चिन्ताकर्तृकहतप्रभासदृशीम् अस्वस्थां सीतां रावणो वचनमुवाच ॥ ३३ ॥

गो० टी०–ध्यायन्तीमिति । इवशब्दोऽवधारणे । यद्वा अस्वस्थामिव भूताविष्टामिवेत्यर्थः ॥ ३३ ॥

३४] ति० टी०–तूष्णीमवस्थानाद्व्रीडया तूष्णीं स्थितेति मन्यमान आह–अलमिति । धर्मलोपः स्वभर्तृत्यागपराङ्मुखीकाररूपस्तत्कृतेन व्रीडेन लज्जयाऽलम् मास्त्वित्यर्थः ॥ ३४ ॥

रा० टी०–तद्वचनाकारमाह–अलमिति । हे देवि! आर्षः ऋषिभिः प्रोक्तः निष्पन्दः अचलः योऽयं व्रीडः पत्यादिसंनिधाने लज्जा त्वामभिभविष्यति अभिभवति तेन धर्मलोपकृतेन मातृत्वरूपधर्मविध्वंसकेन व्रीडेन लज्जया अलं न कार्य इत्यर्थः॥३४॥

गो० टी०–अलमिति । हे वैदेहि! धर्मलोपकृतेन व्रीडेनालं व्रीडा मा भूदित्यर्थः । कुत इत्यत्राह–आर्ष इति । यो दैवनिष्पन्दः दैवकृतसंबन्धः त्वामभिभविष्यति अयं संबन्धः आर्षः ऋषिप्रोक्तः न स्वधर्म्य इत्यर्थः । अत्र नारदः 'परपूर्वाः स्त्रियस्तन्वयाः सप्त प्रोक्ताः स्वयंभुवा । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥ कन्या वा क्षतयोनिर्वा पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा ॥ देशधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्यते ॥ मृते भर्तरि तु प्राप्ता देवरादीनपास्य या । उपगच्छेत्परं कामात् सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या । तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ' इति ॥ ३४ ॥

३५] ति० टी०–कुतस्तत्राह–आर्ष इति । हे देवि ! त्वामभि त्वामुद्दिश्य मया क्रियमाणो निष्पन्दः स्नेहबन्धः प्रार्थनारूपो यश्चाग्रे भविष्यति सोऽयमार्षो ऋषिदृष्ट एव क्षत्रियाणामुचितत्वेन वेदोक्त एव । 'बलात्कारेण राक्षसः' इति विवाहेषु स्मृत्या गणनात् । एवमुक्तिरपि तमोगुणप्राधान्येनैव कन्याया बलात्कारेण ग्रहणस्यैव राक्षसविवाहपदार्थत्वादिति बोध्यम् । पुनः प्रसादयति–एताविति ॥ ३५ ॥

रा० टी०–सीताविषये आत्मभावं बोधयन्नाह–एताविति । यतस्ते दासः अत एव वश्योऽहमस्मि अतः स्निग्धौ एतौ भवत्याः पादौ मया शिरोभिः परिपीडितौ अतः मे मदुपरि प्रसादं प्रसन्नतां कुरु ॥ ३५ ॥

गो० टी०–एताविति । तवेति शेषः ॥ ३५ ॥

---

१ यच्च ते सुकृतो धर्म इति गो. पाठः । २ सेवस्व चेति गो. पाठः । ३ मयेति गो. पाठः । ४ अनुत्तममिति गो. पाठः । ५ मुखमिति गो. पाठः । ६ दीनामिति गो. पाठः । ७ पाप इति गो. पाठः । ८ राक्षसेश्वर इति गो. पाठः । ९ चेति गो. पाठः । १० दैवनिष्पन्द इति गो. निष्पन्द इति रा. पाठः । ११ गमिष्यतीति गो. पाठः । १२ मद्बाखिग्धाविति गो. पाठः ।

प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते । इमाः शून्यमया वाचः शुष्यमाणेन भाषिता ॥३६॥
न चापि रावणः कांचिन्मूर्ध्ना स्त्रीं प्रणमेत ह । एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम् ॥
कृतान्तवशमापन्नो ममेयमिति मन्यते ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ।

रावणप्रलोभनैरविकृतमानसा सीताऽन्तरतस्तृणं कृत्वा तं बहुकृत्व उपालभ्य रामप्रभाव प्रस्तावयन्ती ग त्वामवश्य हन्तेत्युक्त्वा तूष्णी बभूव । त्रयोदशमास्यावधि चेन्मां न भक्ष्यस्यवश्य त्वां हनिष्यामीति इति सीतां विभीषयमाणो रावणस्तामशोकवनिका प्रापय्य तर्जनप्रलोभनाद्यैर्वशीकरणाय राक्षसी राज्ञापयत्तास्तामशोकवनं निन्युरप्रमादेन चारक्षन् ।

सा तथोक्ता तु वैदेही निर्भया शोककर्शिता । तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ १ ॥
राजा दशरथो नाम धर्मसेतुरिवाचलः । सत्यसंधः परिज्ञातो यस्य पुत्रः स राघवः ॥ २ ॥
रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः । दीर्घबाहुर्विशालाक्षो दैवतं सं पतिर्मम ॥ ३ ॥

३६] ति० टी०—इमा दासोऽहमित्यन्ताः शुष्यमाणेन कामपीडितेन मया भाषिता उक्ता वाचः शून्या यथा न भवन्ति तथा कुर्वेति शेषः ॥ ३६ ॥

रा० टी०—इमा इति । शुष्यमाणेन भातृशोकपरिपीडितेन मया शून्याः मत्प्रार्थितानङ्गीकारेण फलरहिता इमा वाचो भाषिताः ॥ ३६ ॥

गो० टी०—इमा इति । शुष्यमाणेन अनङ्गेन तप्यमानेन मया इमाः शून्याः नीचाः वाचो भाषिताः । कुतः यस्माद्रावणः स्त्रीं न प्रणमेत न प्रणमेत् । अदृष्टपूर्वत्वात् स्वस्यापि नीचोक्तिर्विस्मयावहा जातेति भावः ॥३६॥

३७] ति० टी०—एवंविधं प्रसादनं न क्वाप्यभूदित्याह—न चापीति । मन्यतेऽमंस्त । अत्र रसाभासः ॥ ३७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रा० टी०—सीतायां मे भातृत्वबुद्धिर्दृढेत्यत्र हेतुं वदन्नाह—नेति । काञ्चित् साधारणां मातृभिन्नामित्यर्थः, स्त्रीं रावणो न प्रणमेत ह प्रसिद्धमेतत् । अर्धं पृथक्—एवमिति । कृतान्तवशं रामविरोधसंपादनज्ञाप्यकालवशम् आपन्नः प्राप्तो दशग्रीवः मैथिलीमेवमुक्त्वा ममेयं वशेति शेषः इति मन्यते ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चपञ्चाशत्तमः सर्गः ॥ ५५ ॥

गो० टी०—एवमिति । मन्यते अमन्यत ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१] ति० टी०—निर्भया स्त्रियो[2] बलादुपभोगे मूर्धा ते विपतिष्यतीत्यप्सरसो रावणं प्रति शापं श्रित्वे विज्ञाय निर्भया । बलात्कारे योगवशाददृश्याऽस्पृश्या च भविष्यामीति धिया निर्भया वा । तृणमन्तरतः कृत्वा, साक्षात्पापात्मकपरपुरुषसंभाषणजदोषपरिहारायेति शेषः ॥ १ ॥

रा० टी०—रावणवचनश्रवणानन्तरकालिकं वैदेहीवृत्तान्तमाह—सेत्यादिभिः । तथा उक्ता रावणेन कथिता वैदेही अन्तरतः मध्ये तृणं कृत्वा रावणं प्रत्यभाषत, तृणं कृत्वेत्यनेन रामविरोधित्वात् रावणस्य साक्षात्प्रति भाषणानर्हत्वं ध्वनितम्॥१॥

गो० टी०—तथैतच्छ्रुत्वा परुषं भाषमाणायाः सीतायाः पुनरशोकवनिकानयनं षट्पञ्चाशे—सा तथेत्यादि । अन्तरतो मध्ये पतिव्रतायाः परपुरुषप्रत्यभिज्ञखतश्चा भाषणायोगात् ॥ १ ॥

२–३] ति० टी०—धर्मसेतुरिवेत्यत्र धर्मेति पृथक्पदं लुप्तषष्ठीकम् । धर्मस्याचलः सेतुरिव मर्यादाप्रतिष्ठापकः । परिज्ञातः प्रसिद्धः ॥ २ ॥ ३ ॥

रा० टी०—तत्प्रतिभाषणाकारमाह—राजेत्यादिभिः । यस्य पुत्रो राघवः स रामः स अचलो धर्मसेतुरिव वेदमर्यादापालक इत्यर्थः, अत एव सत्यसंधः सत्यप्रतिज्ञः अत एव परिज्ञातः सर्वत्र प्रसिद्धः दशरथो नाम राजा साकेतेऽस्तीति शेषः, एतेन ततोऽपि त्वया भेतव्यमिति सूचितम् ॥ २ ॥

गो० टी०—राजेति । धर्मसेतुः धर्मस्य सेतुरिव मर्यादास्थापक इत्यर्थः । अचलः स्थिरः परिज्ञातः प्रसिद्धः कथमेतावृशकुलं प्राप्तातिचरेदिति भावः ॥ २ ॥

गो० टी०—राम इति । सः दशरथपुत्रः दैवतं सर्वलोकानामिति शेषः । य एवंभूतः स मे पतिरिति योजना । कथमेवंभूतभर्तृकातिचरेदिति भावः ॥ ३ ॥

रा० टी०—राम इति । यो लक्ष्मणेन भ्रात्रा सह ते प्राणान् वधिष्यति स दैवतं सर्वेषां देवता इक्ष्वाकूणां कुले जातो रामः मम पतिः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

१ शून्या इति गो. पाठः । २ ह्रीति गो. पाठः । ३ स्त्रिया डि युक्तं यदि मूले पाठस्त्वेतादृश एवोपलभ्यते तदार्षत्वात्साधुरिति शेयम् ।

इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः । लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान्वैधिष्यति ॥ ४ ॥
प्रत्यक्षं यद्यहं तस्य त्वया [2]वै धर्षिता बलात् । शयिता त्वं हतः संख्ये जनस्थाने यथा खरः॥ ५ ॥
य एते राक्षसाः प्रोक्ता घोररूपा महाबलाः । राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ ६ ॥
तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः । शरीरं विधमिष्यन्ति गङ्गाकूलमिवोर्मयः ॥ ७ ॥
असुरैर्वा सुरैर्वा त्वं यद्यवध्योऽसि रावण । उत्पाद्य सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥ ८ ॥
स ते जीवितशेषस्य राघवोऽन्तकरो बली । पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥ ९ ॥
यदि पश्येत्स रामस्त्वां रोषदीप्तेन चक्षुषा । रक्षस्त्वमद्य निर्दग्धो यथा रुद्रेण मन्मथः ॥ १० ॥
यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा । सागरं शोषयेद्वापि स सीतां मोचयेदिह ॥ ११ ॥
गतासुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः । लङ्का वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥ १२ ॥

४] ति० टी०–स कस्तत्राह–य इति ॥ ४ ॥

गो० टी०–इक्ष्वाकूणामिति । त्वद्वधार्थमेव भ्रात्रा सह इक्ष्वाकुकुलेऽवतीर्ण इति भावः । तथाच न मे त्वत्तो भयमिति भावः॥ ४ ॥

५] ति० टी०–शयिता शयनकर्ता मृतोऽभूरिति शेषः, ईदार्षः ॥ ५ ॥

रा० टी०–तव पलायनादेव एतावत्कालं प्राणाः सन्तीति बोधयन्ती आह–प्रत्यक्षमिति । तस्य रामस्य प्रत्यक्षं बलात् यदि त्वयाऽहं प्रधर्षिता धृष्टतया हृता स्यामिति शेषः, तदा संख्ये संग्रामे खर इव जनस्थाने हतः सन् त्वं शयिता स्याः ॥ ५ ॥

गो० टी०–तर्हि कथमिदानीं स तूष्णीं स्थित इत्याशङ्क्याह–प्रत्यक्षमिति । प्रत्यक्षं यथा तथा यदि धर्षिता स्यां तदा त्वं हतः सन् युद्धे शयिता म्रियेथा इत्यर्थः ॥५॥

६–७] ति० टी०–प्रोक्तास्त्वया मत्पुर इति शेषः ॥६॥७॥

रा० टी०–य इति । घोररूपा य एते राक्षसाः प्रोक्ताः गमनाय प्रेरितास्ते सर्वे राघवे रामसंन्निधौ सुपर्णे पन्नगा इव निर्विषा भविष्यन्तीति शेषः ॥ ६ ॥

गो० टी०–य इति । निर्विषाः निर्वीर्या इति राक्षसपक्षे ॥ ६ ॥

रा० टी०–तस्येति । तस्य रामस्य ज्याविप्रमुक्ताः काञ्चनभूषणास्ते शराः गङ्गाकूलमूर्मयः इव शरीरं राक्षसदेहान् विधमिष्यन्ति विध्मास्यन्ति विदारयिष्यन्ति ॥ ७ ॥

गो० टी०–तस्येति । विधमिष्यन्ति ध्मास्यन्ति निपातयिष्यन्तीत्यर्थः । गङ्गेत्यविभक्तिकनिर्देशः गङ्गाया ऊर्मय इत्यर्थः ॥ ७ ॥

८] ति० टी०–तस्य रामस्य वैरं क्रोधमुत्पाद्य तत्संनिधिं प्राप्तस्ततो जीवन्न मोक्ष्यसे तस्य मनुष्यत्वादिति भावः ॥ ८ ॥

रा० टी०–असुरैरिति । यद्यपि असुरैः सुरभिन्नैः सुरैश्च त्वमवध्योऽसि तथापि तस्य रामस्य सुमहत् वैरमुत्पाद्य जीवन् सन् न मोक्ष्यसे तच्छरेभ्य इति शेषः ॥ ८ ॥

गो० टी०–असुरैरिति । त्वं सुरासुरैर्यद्यप्यवध्यः तथापि तस्य रामस्य सुमहद्वैरं कोपमुत्पाद्य स्थितस्त्वं जीवन् सन् तच्छरपातान्न मोक्ष्यसे न मुक्तो भविष्यसीत्यर्थः ॥ ८ ॥

९] ति० टी०–तदेवाह–अन्तकरो नाशकरः ॥ ९ ॥

रा० टी०–स इति । ते जीवितशेषस्य उर्वरितजीवनस्य अन्तकरो विध्वंसको बली स रामोऽस्ति यूपगतस्य पशोरिव तव जीवितं दुर्लभम् ॥ ९ ॥

गो० टी०–स इति । स राघवः ते जीवितशेषस्य अन्तकरः नाशं कर्तुं समर्थः तस्मात् यूपगतस्य पशोरिव रामापराधिनस्तव जीवितं दुर्लभम् ॥ ९ ॥

१०] ति० टी०–रक्ष इति रावणसंबोधनम् । निर्दग्धः भवेरिति शेषः ॥ १० ॥

रा० टी०–यदीति । स भर्ता रामः यदि रोषदीप्तेन चक्षुषा त्वां पश्येत् तदा रुद्रेण मन्मथ इव त्वमेव निर्दग्धो भवेः इति शेषः ॥ १० ॥

गो० टी०–यदीति । हे रक्षः ! सः रामः त्वां रोषदीप्तेन चक्षुषा यदि पश्येत् तदा त्वं निर्दग्धः सन् सद्यः पराभवं गच्छेः निर्दग्धशब्देनातीव पीडितत्वमुच्यते ॥ १० ॥

११] ति० टी०–यो रामः । पातयेदित्यादि शक्यार्थे लिङ् । यश्च तव शतयोजनसमुद्रमध्यगा लङ्काऽगम्येति बुद्धिः, सा कथमेवेत्याह–सागरं शोषयेद्वापि । वाशब्द एवार्थे स इह स्थितां सीतां मोचयेदेवेत्यर्थः ॥ ११ ॥

रा० टी०–य इति । यो रामः चन्द्रं तदुपलक्षितसकलोर्ध्ववासिनः भूमौ पातयेत् नाशयेत वा यदीच्छेदिति शेषः, सागरं तदुपलक्षितसकलभुवनानि च शोषयेत् नाशयेत् स रामः इह प्राप्तामिति शेषः सीतां मोचयेत् मोचयिष्यत्येवेत्यर्थः ॥ ११ ॥

गो० टी०–य इति । नभसः आकाशात् पातयेत् नाशयेत वा अदर्शनं प्रापयेद्वा सागरमपि शोषयेत् सः सीतां मोचयेदिति किमुत ॥ ११ ॥

१२] ति० टी०–त्वत्कृतेन त्वत्कृतापराधेन ॥ १२ ॥

१ धृष्यतीति गो. पाठः । २ स्यामिति गो. पाठः । ३ गच्छेः सद्यः पराभवमिति गो. पाठः । ४ नेति गो. पाठः । ५ आयुरिति गो. पाठः । ६ शीडः सेटूलेऽपि आर्षत्वे प्रयोजनमन्वेषणीयम् ।

नै ते पापमिदं कर्म सुखोदर्कं भविष्यति । याहं नीता विनाभावं पतिपार्श्वात्त्वया बलात् ॥१३॥
स हि [3]देवरसंयुक्तो मम भर्ता महाद्युतिः । निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके ॥ १४ ॥
स ते वीर्यं बलं दर्पमुत्सेकं च यथाविधम् । व्यपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५ ॥
यदा विनाशो भूतानां दृश्यते कालचोदितः । तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः १६ ॥
मां प्रधृष्य स ते कालः प्राप्तोऽयं राक्षसाधम । आत्मनो राक्षसानां च वधायान्तःपुरस्य च १७ ॥
न शक्या यज्ञमध्यस्था वेदिः स्रुग्भाण्डमण्डिता । द्विजातिमन्त्रसंपूता चण्डालेनावमर्दितुम् ॥ १८ ॥
तथाहं धर्मनित्यस्य धर्मपत्नी दृढव्रता । त्वया स्प्रष्टुं न शक्याहं राक्षसाधम पापिना ॥ १९ ॥

रा० टी०—गतासुरिति । त्वत्कृतेन त्वया संपादितेन अपहरणरूपकर्मणा गतासुत्वादिविशिष्टस्त्वमसीति शेषः, अत एव लङ्का वैधव्यसंयुक्ता त्वद्वधवरहिता भविष्यति ॥ १२ ॥

गो० टी०—गतायुरिति । त्वत्कृतेन परदाराभिमर्शनरूपपापेन त्वम् आयुरादिहीनो भविष्यसि, लङ्का च वैधव्यसंयुक्ता अनाथत्वसंयुक्ता भविष्यति 'आयुर्बलं यशो लक्ष्मीः परदाराभिमर्शनात् । सद्य एव विनश्यन्ति' इति स्मृतेः ॥१२॥

१३] ति० टी०—पतिपार्श्वाद्विनाभावं पतिपार्श्ववियोगम१३

रा० टी०—तेनेति । तेन रामस्यातिसामर्थ्यविशिष्टेन हेतुना इदमपहरणरूपं पापं कर्म दुःखोदर्कं दुःखवधैकं भविष्यति 'न ते' इतिपाठे काकुर्बोध्या अत एव याऽहं पतिपार्श्वात् विनाभावं पतिसेवाराहित्यं बलात् हठात् नीता प्रापिता तां मां रामो नेष्यतीति शेषः ॥ १३ ॥

गो० टी०—न त इति । याऽहं वने पतिपार्श्वात् विना भावं वियोगं नीता तस्यां मयि ते इदं पापं कर्म सुखोदर्कं न भविष्यति किंतु दुःखोदर्कमेव भविष्यतीत्यर्थः ॥ १३ ॥

१४] ति० टी०—देवरसंयुक्तो लक्ष्मणसंयुतः स खरादिहन्ता । 'दैवतसंयुक्तः' इति पाठे दैवानुकूल्यवानित्यर्थः॥१४॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—स इति । देवरसंयुक्तो लक्ष्मणसहितः सः प्रसिद्धः निर्भयः यो मम भर्ता वीर्यम् अतिपराक्रममाश्रित्य संप्राप्य शून्ये मया रहिते दण्डके वसति सः रामः ते वीर्यं प्रभावं बलं पराक्रमं च दर्पं तयोर्मदं च तथाविधमुत्सेकम् अमर्यादाचरणं च शरवर्षेण गात्रेभ्यः स्थूलसूक्ष्मकारणशरीरेभ्योऽवयवेभ्यो वा व्यपनेष्यति दूरीकरिष्यति। 'दैवतसंयुक्तः' इति पाठे दैवानुकूल्यवानित्यर्थ इति भट्टाः। श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—स हीति । दैवतसंयुक्तः दैवबलसंयुक्तः दीनस्तापसो रामो मां किं करिष्यतीति पूर्वं रावणेनोक्तस्य परिहारोऽयम् ॥ १४ ॥

१५] ति० टी०—वीर्यं पराक्रमः, बलं शारीरम्, दर्पो मदः, उत्सेकोऽमर्यादत्वम् ॥ १५ ॥

गो० टी०—स त इति । दर्पं मदम् उत्सेकम् उद्धत्य कार्यकारित्वम् गात्रेभ्य इत्युक्तिर्दर्पादीनां देहविशिष्टगुणत्वात् ॥ १५ ॥

१६] ति० टी०—कार्ये प्रमाद्यन्ति उचिते कार्ये वैपरीत्यं प्राप्नुवन्तीत्यर्थः ॥ १६ ॥

रा० टी०—तव विनाशोऽवश्यं भवितेति बोधयन्ती आह—यदेति । कालवशं गताः नराः जन्तवः यदा कार्ये कर्तव्ये प्रमाद्यन्ति विवेकरहिताः भवन्ति तदा कालचोदितः भूतानां जन्तूनां विनाशः दृश्यते ॥ १६ ॥

गो० टी०—लोकन्यायमाह—यदेति । कालचोदितो दैवकृतः विनाशो यदा दृश्यते सन्निहितो भवतीत्यर्थः । तदा कार्ये कृत्ये प्रमाद्यन्ति वैपरीत्यं प्राप्नुवन्ति ॥ १६ ॥

१७] ति० टी०—मां प्रधृष्य स्थितस्येति शेषः । स ते काल इति नाशकाल इत्यर्थः । स्वमरणेन वैधव्यमेवान्तःपुरवधः ॥ १७ ॥

रा० टी०—मामिति । हे राक्षसाधम ! मां प्रधृष्य स्थितस्य ते तव आत्मनः पुत्रादेः राक्षसानां च अन्तःपुरस्य च वधाय विध्वंसाय सः प्रसिद्धोऽयं कालः प्राप्तः अन्तःपुरविध्वंसस्तु तत्सधवात्वरूपविशेषणाभावप्रयुक्तः ॥ १७ ॥

गो० टी०—उक्तं लोकन्यायं प्रकृते योजयति—मामिति । मां प्रधृष्य स्थितस्य तव कालोऽप्ययमेव वर्तमान एव न तु चिरायेत्यर्थः, आत्मनो राक्षसानामन्तःपुरस्य च वधाय प्राप्तः ॥१७॥

१८–१९] ति० टी०—यज्ञमध्यस्था यज्ञशालामध्यस्था स्रुगादियज्ञोपकरणमण्डिता वेदिश्चण्डालेनावमर्दितुं स्प्रष्टुं न शक्या तथा त्वयाऽहमिति योजना ॥ १८ ॥ १९ ॥

रा० टी०—ममानयनं त्वयाऽनीत्याद्युचितं कृतमिति बोधयन्ती आह—नेति । स्रुग्भाण्डमण्डिता स्रुगादियागोपकरणैः शोभिता यज्ञमध्यस्था यागशालामध्यगता द्विजातिमन्त्रसंपूता ब्राह्मणोच्चारितमन्त्रैः संस्कृता वेदिः चण्डालेनावमर्दितुं संस्प्रष्टुं यथा न शक्या तथा धर्मनित्यस्य धर्मो धर्माचरणं नित्यं यस्य तस्य रामस्य दृढव्रता धर्मपत्नी अहं पापिना त्वया स्प्रष्टुं शक्या नास्मि । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०—न शक्येत्यादि । श्लोकद्वयमेकान्वयम् ।

१ ते नेति रा. पाठः । २ वने इति गो. पाठः । ३ दैवतेति गो. पाठः । ४ तथति गो. रा. पाठः । ५ अपनेष्यतीति गो. पाठः । ६ पूता चेति गो. पाठः । ७ पतिव्रतेति गो. पाठः । ८ शक्यास्मीति गो. रा. पाठः ।

क्रीडन्ती राजहंसेन पद्मषण्डेषु [1]नित्यशः । हंसी सा तृणमध्यस्थं कथं द्रक्ष्येत मद्दुकम्॥ २० ॥
इदं शरीरं निःसंज्ञं बन्ध वा घातयस्व वा । नेदं शरीरं रक्ष्यं मे जीवितं वापि राक्षस ॥ २१ ॥
न तु शक्यमपक्रोशं पृथिव्यां दातुमात्मनः । एवमुक्त्वा तु वैदेही क्रोधात्सुपरुषं वचः ॥ २२ ॥
रावणं जानकी तत्र पुनर्नोवाच किंचन । सीताया वचनं श्रुत्वा परुषं रोमहर्षणम् ॥ २३ ॥
प्रत्युवाच ततः सीतां भयसंदर्शनं वचः । शृणु मैथिलि मद्वाक्यं मासान्द्वादश भामिनि २४ ॥
कालेनानेन नाभ्येषि यदि मां चारुहासिनि । ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः २५ ॥

यज्ञे यज्ञपुरुषः तन्मध्यस्था गार्हपत्याहवनीयमध्यगता वेदिः ऐष्टिकी महावेदिः सुग्भाण्डमण्डिता सुगाद्युपकरणालंकृता द्विजातिमन्त्रैः उद्वननादिमन्त्रैः पूता शुद्धा यथा चण्डालेनावमर्दितुं पादेनाक्रमितुं न शक्या नार्हा तथाहं धर्मनित्यस्य नित्यधर्मस्य यज्ञस्थानीयस्य धर्मपत्नी पतिव्रता त्वया स्प्रष्टुं न शक्या ॥ १८ ॥ १९ ॥

२०] ति० टी०–पद्मषण्डानि पद्मसमूहाः तृणमध्यस्थं जलनील्यादितृणमध्यस्थं द्रक्ष्येत पश्येत्। मद्दुकं जलवायसम् २०

रा० टी०–अनुचितस्त्वमेव रूपकालंकारेणाह–क्रीडन्तीति। पद्मखण्डेषु कमलवनेषु राजहंसेन सह नित्यशः क्रीडन्ती या हंसी राजहंसपत्नी सा तृणमध्यस्थं तृणेषु स्थितं मद्दुकं जलवायसं कथं द्रक्ष्येत पश्येत्। 'नित्यदा' इति भूषणपाठः आर्षो दाप्रत्यय इति तत्र्याख्या ॥ २० ॥

गो० टी०–क्रीडन्तीति । नित्यदा नित्यं नित्यशब्दस्य सर्वैकादिष्वपाठेप्यार्षो दाप्रत्ययः। सा प्रसिद्धा तृणषण्डस्थं जलजनदादितृणकदम्बमध्यस्थं मद्दुकं जलकाकम् ॥ २० ॥

२१] ति० टी०–एवं निर्भयोक्तौ लोकानुसारेण पतिव्रतोचितं हेतुमाह–इदमिति । निःसंज्ञं स्वतो जडम् ॥ २१ ॥

रा० टी०–नन्वेवं शरणमागतस्य मे रक्षा त्वयैव विधेयेत्यतो मद्विनाशो न भविष्यतीत्यत आह–इदमिति। निःसंज्ञं विवेकरहितम् इदं स्वकीयं शरीरं राक्षसदेहं बन्ध बधान घातयस्व वा। तत्र हेतुः–इदं तव शरीरं जीवितम् एतच्छरीरावच्छेदेन जीवनं च मे न रक्ष्यम् ॥ २१ ॥

गो० टी०–इदमिति । निःसंज्ञं निश्चेष्टं बन्ध बधान खादयस्व भक्षय। न त्वित्यर्धनैकं वाक्यम्। आत्मनः उपक्रोशमपवादं पृथिव्यां दातुं न शक्ष्यामि ॥ २१ ॥

२२–२३] ति० टी०–अपक्रोशं सीताऽसतीति जातेति निन्द्याम् । सुपरुषं सुतरां परुषम्। अनेन प्रबन्धेन रजस्तमोयुतानामीश्वराणामेव दर्शितः ॥ २२ ॥ २३ ॥

रा० टी०–नन्वेवं शरणागतरक्षणस्य महात्मनामावश्यकत्वात् स्वकर्थं तन्निषिध्यते इत्यत आह–नेति । आत्मनः स्वस्य अपक्रोशं रामविरोधिनं सीता रक्षतीति निन्दां पृथिव्यां दातुं प्रख्यापयितुं नैव शक्ष्यामि। अर्द्धं पृथक्–एवमिति । सुपरुषम् अतिरूक्षम् एवं वचः क्रोधात् रामविरोधध्वयमिति रावणविषयककोपात् वैदेही जानकी उक्त्वा तत्र तस्मिन्समये पुनः किंचन नोवाच । अर्धद्वयमेकान्वयि ॥ २२ ॥

गो० टी०–एवमुक्त्वेति । तत्र तार्द्धपर्ये क्रियाभेदात् पुनर्मैथिलीशब्दप्रयोगः ॥ २२ ॥

रा० टी०–सीताया इति । परुषं सीतायाः वचनं श्रुत्वा ततः राक्षसत्वात् हेतोः भयसंदर्शनं वचः सीतां प्रत्युवाच रावण इति शेषः ॥ २३ ॥

गो० टी०–सीताया इति । रोमहर्षणं क्रोधावहत्वाद्रोमाञ्चकरं भयसंदर्शनं भयोत्पादकम् ॥ २३ ॥

२४] ति० टी०–भयसंदर्शनं भयोत्पादकम् । द्वादश प्रतीक्षे इति शेषः । यत्तु पाद्मे–'दशमासात्परं सीते यदि मां न भजिष्यसि । तदा हन्मि' इत्युक्तम्, तत्तु पुनः सीतासविधगमनकालिकं वच इति न विरोधः ॥ २४ ॥

रा० टी०–तद्वचनाकारमाह–शृण्विति । हे मैथिलि ! द्वादशमासान् त्वां संप्राप्येति शेषः, अनेन द्वादशमासात्मकेन कालेन मां लङ्कासंपत्तिं यदि नाभ्येषि प्राप्नोषि शोकं त्यक्त्वा लङ्काराज्यं न पालयसीत्यर्थः, तदा ततः मत्प्रार्थनाया अस्वीकारात् हेतोः सूदाः पाककर्तारः त्वां लेशशः छेत्स्यन्ति, एतेन सूदानां स्वविषयकातिभक्तिमत्त्वं व्यञ्जितम् । सार्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०–शृण्वित्यादि । सार्धश्लोक एकान्वयः । द्वादश मासानित्यत्यन्तसंयोगे द्वितीया । प्रतीक्ष इति शेषः । प्रातराशार्थं प्रातर्भक्षणार्थं सूदाः पाचकाः "सूदा औदनिका गुणाः" इत्यमरः । अत्र सीताहरणं चैत्रमास इत्यवगन्तव्यम् । संवत्सरान्ते रावणवधकरणात् त्रीन् तेन वर्षान् पञ्चवट्यां रामः स्थित इति गम्यते । हेमन्तवर्णनं तु रामतपोविशेषज्ञापनाय न शूर्पणखागमनज्ञापनाय ॥ २४ ॥ २५ ॥

२५] ति० टी०–नाभ्येषि स्वारस्येनेति शेषः ॥ २५ ॥

१ नित्यदेति गो. पाठः । २ षण्डस्थमिति गो. पाठः । ३ शक्ष्याम्युपेति गो. रा. पाठः । ४ मैथिलीति गो. पाठः ।

इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः । राक्षसीश्च ततः क्रुद्ध इदं वचनमब्रवीत् ॥ २६ ॥
शीघ्रमेव हि राक्षस्यो [1]विरूपा घोरदर्शनाः । दर्पमस्यापनेष्यन्तु मांसशोणितभोजनाः ॥ २७ ॥
वचनादेव तास्तस्य सुघोरा [3]घोरदर्शनाः । कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन् ॥ २८ ॥
स ताः प्रोवाच राजाऽसौ रावणो घोरदर्शनाः । [6]प्रचल्य चरणोत्कर्षैर्दारयन्निव मेदिनीम् ॥ २९ ॥
अशोकवनिकामध्ये मैथिली नीयतामिति । तत्रेयं रक्ष्यतां गूढं युष्माभिः परिवारिता ॥ ३० ॥
तत्रैनां तर्जनैर्घोरैः पुनः सान्त्वैश्च मैथिलीम् । आनयध्वं वशं सर्वा वन्यां गजवधूमिव ॥ ३१ ॥
इति प्रतिसमादिष्टा राक्षस्यो रावणेन ताः । अशोकवनिकां जग्मुर्मैथिलीं [10]परिगृह्य तु ॥ ३२ ॥
सर्वकामफलैर्वृक्षैर्नानापुष्पफलैर्वृताम् । सर्वकालमदैश्चापि द्विजैः समुपसेविताम् ॥ ३३ ॥
सा तु शोकपरीताङ्गी मैथिली जनकात्मजा । राक्षसीवशमापन्ना [10]व्याघ्रीणां हरिणी यथा ॥ ३४ ॥

२६] ति० टी०–शत्रून्रावयति क्रोशयति शत्रुरावणः॥२६॥

रा० टी०–इतीति । शत्रुरावणो रावण इति परुषं वाक्यमुक्त्वा ततः राक्षसत्वात् हेतोः क्रुद्धः सन् राक्षसीरिदमब्रवीत् ॥ २६ ॥

गो० टी०–इत्युक्त्वेति । शत्रून् रावयति क्रोशयतीति शत्रुरावणः ॥ २६ ॥

२७] ति० टी०–अपनेष्यन्त्वपनयन्तु ॥ २७ ॥

रा० टी०–तद्वचनाकारमाह–शीघ्रमिति । हे मांसशोणितभोजना राक्षस्यः! अस्याः सीतायाः दर्पं रामोऽतीव बलवानित्यादिगर्वम् अपनेष्यन्तु अपनयन्तु मत्प्रभाववर्णनेन दूरीकुर्वन्तु । नशुने इत्यत्र नकारयोगविभागेन सपादसप्ताध्यायीं प्रति त्रिपादी क्वचिन्नासिद्धेतिकल्पनया यलोपस्यासिद्धत्वाभावेन दीर्घः,अस्येति सामान्ये नपुंसकं वा ॥ २७ ॥

गो० टी०–शीघ्रमिति । विनेष्यध्वं विनयध्वम् । व्यत्ययेन स्यादेशः ॥ २७ ॥

२८] ति० टी०–कृतप्राञ्जलयः रावणं प्रतीति शेषः २८॥

रा० टी०–वचनादिति । तस्य रावणस्य वचनाद्धेतोः घोरदर्शनास्ता राक्षस्यः कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन् परितः बोधयितुम् अतिष्ठन् ॥ २८ ॥

गो० टी०–वचनादिति । कृतप्राञ्जलयः रावणवाक्यास्वीकारे कृतप्रकृष्टाञ्जलयः ॥ २८ ॥

२९] ति० टी०–चरणोत्कर्षैः पदोत्क्षेपैर्मेदिनीं दारयन्निव प्रचल्य द्वित्राणि पदानि चलित्वा ॥ २९ ॥

रा० टी०–स इति । सोऽसौ रावणो राजा चरणोत्कर्षैः पादप्रक्षेपैर्मेदिनीं पृथ्वीं दारयन्निव प्रचल्य अशोकवनिकामध्ये मैथिली नीयतां तत्र गूढं यथा भवति तथा युष्माभिः परिवारिता इयं सीता रक्ष्यतां तत्र एनां मैथिलीं तर्जनादिभिः वन्यां गजवधूमिव विवशं स्वार्धानत्वमानयध्वमिति घोरदर्शना राक्षसीः प्रोवाच । श्लोकत्रयमेकान्वयि ॥ २९–३१ ॥

गो० टी०–स इति । चरणोत्कर्षैः चरणाघातैः मेदिनीं भुवं दारयन्निव भिन्दन्निव प्रचाल्य गत्वा उत्थाय वा ताः प्रोवाच ॥ २९ ॥

३०–३२] ति० टी०–नीयतामिति प्रोवाचेत्यन्वयः । परिवारिता क्षणमप्यवियुक्ता । रक्ष्यतामित्यर्थः ॥ ३०–३२ ॥

रा० टी०–इतीति । रावणेन इति प्रतिसमादिष्टा राक्षस्यः मैथिलीं प्रतिगृह्य नानापुष्पफलैः अनेकविधैः पुष्पैः फलैश्च युक्तैः सर्वकामफलैः सर्वान् कामान् फलन्ति तैर्वृक्षैः कल्पतरुभिः सर्वकालमदैः सर्वकालमदविशिष्टैः द्विजैः पक्षिभिश्च समुपसेविताम् अशोकवनिकां जग्मुः । श्लोकद्वयमेकान्वयि॥३२॥३३॥

गो० टी०–अशोकेति । युष्माभिः परिवारिता युष्माभिः रक्ष्यताम् ॥ ३० ॥

गो० टी०–तत्रेति । अत्यन्तभयेन प्राणवियोगो मा भूदिति पुनः सान्त्वैरित्युक्तम् ॥ ३१ ॥

गो० टी०–इतीति । प्रतिगृह्य आदाय ॥ ३२ ॥

३३–३४] ति० टी०–सर्वे कामाः फलन्ति येभ्यस्तान् तैर्वृक्षैः कल्पतरुभिरित्यर्थः । सर्वकालमदैः सर्वकालं मदयुतैर्द्विजैः पक्षिभिः ॥ ३३–३४ ॥

गो० टी०–सर्वेति । सर्वस्मिन्नपि काले फलानि येषां ते सर्वकालफलाः तैः एवमुत्तरत्रापि जग्मुरिति पूर्वेणान्वयः ॥ ३३ ॥

रा० टी०–शेति । शोकपरीताङ्गी सा मैथिली व्याघ्राणां वशं हरिणीव राक्षसीवशमापन्ना प्राप्ता ॥ ३४ ॥

गो० टी०–सा त्विति । राक्षसीत्यविभक्तिकनिर्देशः । राक्षसीनामित्यर्थः ॥ ३४ ॥

---

१ विकृता इति गो. पाठः । २ विनेष्यध्वमिति गो. पाठः । ३ राक्षसीगणा इति गो. पाठः । ४ त्विति गो. पाठः । ५ दर्शन इति गो. पाठः। ६ प्रचाल्येति गो. पाठः । ७ इयमिति गो. पाठः । ८ तत्रैवान्तर्जनैरिति गो. पाठः । ९ प्रतीति गो. पाठः । १० व्याघ्राणामिति रा. पाठः ।

शोकेन महता त्रस्ता मैथिली जनकात्मजा । न शर्म लभते भीरुः पाशबद्धा मृगी यथा ॥ ३५ ॥
न विन्दते तत्र तु शर्म मैथिली विरूपनेत्राभिरतीव तर्जिता ।
पतिं स्मरन्ती दयितं च देवरं विचेतनाऽभूद्भयशोकपीडिता ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

---

२. इतः परं प्रक्षिप्तोऽयं सर्गो दृश्यते ।

ब्रह्मणाऽऽदिष्टो वासवः सह निद्रया लङ्कामेत्य तया राक्षसान्प्रमोहयन्सीतान्तिकं प्राप्य रामकुशलनिवेदनेनाश्वासयन्स्ववासवत्वप्रत्यायनार्थं चाम्लानकुसुमत्वादीन्यनन्यलिङ्गानि दर्शयित्वा क्षुत्तृड्हरणं हविः प्रार्पयित्वा रामलक्ष्मणाभ्यां निवेदितं तत्पायसं पीत्वा क्षुधादिदुःखं जहौ ।

प्रवेशितायां सीतायां लङ्कां प्रति पितामहः । तदा प्रोवाच देवेन्द्रं परितुष्टं शतक्रतुम् ॥ १
त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च । लङ्कां प्रवेशिता सीता रावणेन दुरात्मना ॥ २
पतिव्रता महाभागा नित्यं चैव सुवैधिता । अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनम् ॥ ३
राक्षसीभिः परिवृता भर्तृदर्शनलालसा । निविष्टा हि पुरी लङ्का तीरे नदनदीपतेः ॥ ४
कथं ज्ञास्यति तां रामस्तत्रस्थां तामनिन्दिताम् । दुःखं संचिन्तयन्ती सा बहुशः परिदुर्लभा ॥ ५
प्राणयात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयम् । स भूयः संशयो जातः सीतायाः प्राणसंक्षये ॥ ६
स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननाम् । प्रविश्य नगरीं लङ्कां प्रयच्छ हविरुत्तमम् ॥ ७
एवमुक्तोऽथ देवेन्द्रः पुरीं रावणपालिताम् । आगच्छन्निद्रया सार्धं भगवान्पाकशासनः ॥ ८
निद्रां चोवाच गच्छ त्वं राक्षसान्संप्रमोहय । सा तथोक्ता मघवना देवी परमहर्षिता ॥ ९
देवकार्यार्थसिद्ध्यर्थं प्रामोहयत राक्षसान् । एतस्मिन्नन्तरे देवः सहस्राक्षः शचीपतिः ॥ १०
आसस्माद वनस्थां तां वचनं चेदमब्रवीत् । देवराजोऽस्मि भद्रं ते इह चास्मि शुचिस्मिते ॥ ११

३५-३६] ति० टी०—शोकेन त्रस्ता सेव । इतरजनप्रतारणाय नटवल्लोकरीत्यनुसरणमनयोर्लोको यथा वास्तवममन्यत तथैव कविरपि वर्णयति तत्प्रतारणायैवेति मन्तव्यम् ॥ ३५ ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०—शोकेनेति । महता शोकेन ग्रस्ता भीरुर्जनकात्मजा पाशबद्धा मृगीव शर्म सुखं न लभते लेभे ॥ ३५ ॥

गो० टी०—शोकेनेति । लभते अलभत ॥ ३५ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—नेति । विरूपनेत्राभिर्विकृतानि रूपाणि नेत्राणि च यासां ताभिः राक्षसीभिः अतीव तर्जिता भयशोकपीडिता मैथिली दयितं पतिं देवरं च स्मरन्ती सती विचेतनाऽभूत् अत एव तत्र अशोकवाटिकायां शर्म सुखं न विन्दते अविन्दत ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षट्पञ्चाशत्तमः सर्गः ॥ ५६ ॥

गो० टी०—न विन्दत इति । तत्र अशोकवनिकायां दयितं प्राणवल्लभम् । ननु सीता लक्ष्म्या अवतार इति सिद्धम् । वक्ष्यति हि ' सीता लक्ष्मीर्भवान् विष्णुः ' इति विष्णुपुराणे चोक्तम् । ' राघवस्त्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि ' इति । एवंभूतां सीतां समरसीमनि जनितमूर्च्छालक्ष्मणं लक्ष्मणमप्युद्वर्तुमसमर्थो रावणः कथं बलात्करोति स्म । वक्ष्यति हि । ' हिमवान् मन्दरो मेरुर्लोकयं वा सहामरैः । शक्यं भुजाभ्यामुद्धर्तुं न संरुधे भरतानुजः ॥ इति उच्यते । वेदवती रूपपूर्वजन्मनि देवी तथा संकल्पितवती उक्तम् उत्तरकाण्डे । ' यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने । तस्मात्तव वधार्थं वै उत्पत्स्येऽहं महीतले ' इति । देवकार्यनिर्वाहाय स्वयमेव स्वधर्षणमङ्गीचकार प्रजायां कूपपतितायां यथा माता स्वयं तदुपरि पतति वात्सल्यातिशयेन तथा रावणबन्दीकृतदेवर्षिरक्षणाय स्वयं तत्र स्वगमनमनुमतवती । वक्ष्यति सुन्दरकाण्डे ' नापहर्तुमहं शक्या तस्य रामस्य धीमतः । विधिस्तव वधार्थाय विहितो नात्र संशयः ' इति । सीता प्रलापादिकं किमर्थं कृतवतीति चेत् शृणु । पातिव्रत्ये पतिव्रतयैवं वर्तितव्यमिति लोकशिक्षाप्रवर्तनाय प्रलापादिकमकरोदिति ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

---

१ ग्रस्तेति गो. रा. पाठः । २ दैवतमिति गो. पाठः ।

सप्तपञ्चाशः सर्गः ।

मारीचहननेन तेन कृतस्वस्वरानुकरणेनान्यैश्च दुर्निमित्तैः सीताविपदमाशङ्क्य त्वरया प्रत्यागच्छन्रामो मध्येमार्गं प्राप्तं लक्ष्मणं दृष्ट्वा सीता विजने विमुच्य किमत्रागतोऽसीत्युपालभ्य दुररिष्टदर्शनात्सीताया राक्षसैर्हरणमाशङ्कते ।

राक्षसं मृगरूपेण चरन्तं कामरूपिणम् । निहत्य रामो मारीचं तूर्णं पथि न्यवर्तत ॥ १ ॥
तस्य संत्वरमाणस्य द्रष्टुकामस्य मैथिलीम् । क्रूरस्वनोऽथ गोमायुर्विननादास्य पृष्ठतः ॥ २ ॥
स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् । शङ्कयामास गोमायोः स्वरेण परिशङ्कितः ॥ ३ ॥

अहं त्वां कार्यसिद्ध्यर्थं राघवस्य महात्मनः । साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे ॥ १२
मत्प्रसादात्समुद्रं स तरिष्यति बलैः सह । मयैवेह च राक्षस्यो मायया मोहिताः शुभे ॥ १३
तस्मादन्नमिदं सीते हविष्यान्नमहं स्वयम् । स त्वां संगृह्य वैदेहि आगतः सह निद्रया ॥ १४
एतदत्स्यसि मद्धस्तान्न त्वां बाधिष्यते शुभे । क्षुधा तृषा च रम्भोरु वर्षाणामयुतैरपि ॥ १५
एवमुक्ता तु देवेन्द्रमुवाच परिशङ्किता । कथं जानामि देवेन्द्रं त्वामिहस्थं शचीपतिम् ॥ १६
देवलिङ्गानि दृष्टानि गमलक्ष्मणसंनिधौ । तानि दर्शय देवेन्द्र यदि त्वं देवराट् स्वयम् ॥ १७
सीताया वचनं श्रुत्वा तथा चक्रे शचीपतिः । पृथिव्यां नास्पृशत्पद्भ्यामनिमेषेक्षणानि च ॥ १८
अरजोऽम्बरधारी च नम्लानकुसुमस्तथा । तं ज्ञात्वा लक्ष्मणैः सीता वासवं परिहर्षिता ॥ १९
उवाच वाक्यं रुदती भगवद्राघवं प्रति । सह भ्रात्रा महाबाहुर्दिष्ट्या मे श्रुतिमागतः ॥ २०
यथा मे श्वशुरो राजा यथा च मिथिलाधिपः । तथा त्वामद्य पश्यामि सनाथो मे पतिस्त्वया ॥ २१
तवाज्ञया च देवेन्द्र पयोभूतमिदं हविः । अशिष्यामि त्वया दत्तं रघूणां कुलवर्धनम् ॥ २२
इन्द्रहस्ताद्गृहीत्वा तत्पायसं सा शुचिस्मिता । न्यवेदयत भर्त्रे सा लक्ष्मणाय च मैथिली ॥ २३
यदि जीवति मे भर्ता सह भ्रात्रा महाबलः । इदमस्तु तयोर्भक्त्या तदाभ्रात्पायसं स्वयम् ॥ २४
इतीव तत्प्राश्य हविर्विवगनना जहौ क्षुधादुःखसमुद्भवं च तम् ।
इन्द्रात्प्रवृत्तिमुपलभ्य जानकी काकुत्स्थयोः प्रीतमना बभूव ॥ २५
स चापि शक्रस्त्रिदिवालयं तदा प्रीतो ययौ राघवकार्यसिद्धये ।
आमन्त्र्य सीतां स ततो महात्मा जगाम निद्रासहितः स्वमालयम् ॥ २६

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे प्रक्षिप्तः सर्गः ।

१] ति० टी०—अथ कवी रामवृत्तान्तमाह—राक्षसमिति ॥ १ ॥

रा० टी०—सीताहरणप्रसङ्गं समाप्य मारीचवधोद्देशकगमनकर्तृरामवृत्तान्तमाह—राक्षसमित्यादिभिः । कामरूपिणम् अत एव मृगरूपेण चरन्तं मारीचं पथि निहत्य रामः तूर्णं निवर्तत न्यवर्तत ॥ १ ॥

गो० टी०—एवमियता ग्रन्थसंदर्भेण सीताहरणवृत्तान्तमुपवर्ण्य अथ रामस्य मृगानुसरणकथाक्षेपं दर्शयितुमारभते—राक्षसमित्यादि । निवर्तते न्यवर्तत ॥ १ ॥

२-३] ति० टी०—यदा पथि निहतस्तदा तस्य मैथिलीं द्रष्टुकामस्य तां द्रष्टुं संत्वरमाणस्य तस्यैव स्थितस्य पृष्ठतो गोमायुः शिवा ननादेत्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०—तस्येति । मैथिलीं द्रष्टुकामस्य अत एव संत्वरमाणस्य तस्य प्रसिद्धस्य अस्य रामस्य पृष्ठतः पश्चादेशे क्रूरस्वनो गोमायुः शृगालः विननाद ॥ २ ॥

गो० टी०—तस्येति । द्रष्टुकामस्य तदर्थं त्वरमाणस्येति संबन्धः । गोमायुः क्रोष्टा एकस्य गोमायोः पृष्ठतः क्रूरस्वरकरणं दुर्निमित्तमिति भावः ॥ २ ॥

रा० टी०—स इति । तस्य गोमायोः रोमहर्षणं स्वरं दारुणकर्मसूचकम् आज्ञाय निश्चित्य स्वरेण स्वशब्दानुकारकमारीचस्वनेन परिशङ्कितः स रामश्चिन्तयामास ॥ ३ ॥

गो० टी०—स तस्येति । भयंकरत्वेन रोमहर्षणमित्युच्यते । पूर्वमेव मारीचस्वरेण परिशङ्कितः सञ्जातशङ्कः स रामः तस्य गोमायोः स्वरम् आज्ञाय श्रुत्वा चिन्तयामास ॥ ३ ॥

---

१ निवर्तत इति गो. रा. पाठः । २ चिन्तयेति गो. रा. पाठः ।

अशुभं बत मन्येऽहं गोमायुर्वाशते यथा । स्वस्ति स्यादपि वैदेह्या राक्षसैर्भक्षणं विना ॥ ४ ॥
मारीचेन तु विज्ञाय स्वरमालक्ष्य मामकम् । विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद्यदि ॥ ५ ॥
स सौमित्रिः स्वरं श्रुत्वा तां च हित्वार्थं मैथिलीम् । तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति ॥ ६ ॥
राक्षसैः सहितैर्नूनं सीताया ईप्सितो वधः । काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम् ॥ ७ ॥
दूरं नीत्वाऽथ मारीचो राक्षसोऽभूच्छराहतः । हा लक्ष्मण हतोऽस्मीति यद्वाक्यं व्याजहार ह ॥ ८ ॥
अपि स्वस्ति भवेद्ताभ्यां रहिताभ्यां मया वने । जनस्थाननिमित्तं हि कृतवैरोऽस्मि राक्षसैः ॥ ९ ॥
निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च । इत्येवं चिन्तयन्रामः श्रुत्वा गोमायुनिःस्वनम् ॥१०॥

४] ति० टी०—यथा भाव्यशुभं तथा वाशत इत्यर्थः । वैदेह्याः वैदेह्यै राक्षसैर्भक्षणं विना तत्कर्तृकभक्षणाभावरूपं स्वस्ति स्यादित्यर्थः । अपिः कामप्रवेदने ॥ ४ ॥

रा० टी०—चिन्ताकारमाह—अशुभमिति । यतः गोमायुर्वाशते शब्दायति अतः राक्षसैर्भक्षणं विना राक्षसकर्तृकभक्षणातिरिक्तम् अशुभं यथा यथावत् मन्ये वैदेह्या वैदेह्यै अपि स्वस्ति स्याद् एतदशुभानन्तरं शुभं भवेत् । संभावनार्थकोऽपिः ॥ ४ ॥

गो० टी०—चिन्तामेवाह—अशुभमित्यादिना । गोमायुः यथा येन प्रकारेण वाश्यते शब्दायते तेन प्रकारेणाशुभं मन्ये । अपिः संभावनायाम् ॥ ४ ॥

५–६] ति० टी०—मारीचेन मामकं स्वरं विज्ञाय मामकस्वरध्वनिं ज्ञात्वाऽऽलक्ष्य मदपकारोपायमवधार्य यन्मृगरूपेण तेनाकृष्टं हा सीते लक्ष्मणेति च, तर्हि लक्ष्मणः शृणुयात्तदा तं स्वरं श्रुत्वा मदीयस्वरत्वेन ज्ञात्वा मैथिल्यैव प्रहितस्तां हित्वैष्यति ॥ ५ ॥ ६ ॥

रा० टी०—नन्व लक्ष्मणस्य तत्र सत्त्वात् कथं सीताया अशुभशङ्केत्यत आह—मारीचेनेति । मृगरूपेण मारीचेन आलक्ष्य सीताया अशुभसंपादकं यत्नं चिन्तयित्वा विज्ञाय निश्चित्य च यदि मामकं मत्स्वरसदृशं स्वरं विक्रुष्टम् उच्चारितं तर्हि लक्ष्मणः शृणुयात् ॥ ५ ॥

रा० टी०—नन्व किं श्रवणेनेत्यत आह—स इति । सौमित्रिः स लक्ष्मणः स्वरं मत्स्वरसदृशस्वनं श्रुत्वा तया मैथिल्या प्रहितः प्रेरितः अत एव तां रक्षणीयां मैथिलीं हित्वा क्षिप्रं शीघ्रम् इहास्मिन् समये मत्सकाशं मत्समीपमेष्यति ॥ ६ ॥

गो० टी०—मारीचेनेत्यादि । श्लोकद्वयमेकान्वयम् । मृगरूपेण मारीचेन मामकं मदीयं स्वरं विज्ञाय मामकं स्वरमालम्ब्य अनुसृत्य विक्रुष्टं हा सीते ! लक्ष्मणेत्याह्वानेनोद्घोषितं स्वरं लक्ष्मणः शृणुयाद्यदि तदा स सौमित्रिर्मामकं स्वरं श्रुत्वा तं स्वरं श्रुतवत्या तया सीतया च प्रेषितः सन् इह देशे मत्सकाशं मत्समीपम् एष्यति ॥५॥६॥

७–८] ति० टी०—सहितैरीप्सितः कर्तुमिष्टः । नूनं निश्चयेन । तत्रैवा[illegible]—काञ्चन इत्यादि । यतः काञ्चनमृगो भूत्वा मां व्यपनीयाकृष्य दूरं नीत्वा राक्षसोऽभूत् । न तु चर्मप्रयोजनमृग एव स्थितः । इति वाक्यं व्याजहार च यत्तस्मात्तस्या वध ईप्सित इत्यन्वयः । काव्यलिङ्गालंकारः ॥ ७ ॥ ८ ॥

रा० टी०—नन्व किं तदागमनेनेत्यत आह—राक्षसैरिति । सहितैः संघीभूतैः राक्षसैः सीताया वधः ईप्सितः नूनं निश्चितमेतत् अत एव राक्षसो मारीचः काञ्चनो मृगो भूत्वा आश्रमात् मां व्यपनीय प्रस्थाप्य दूरं नीत्वा शराहतः मद्बाणताडितोऽभूत् अथ अनन्तरं हा लक्ष्मण ! हा सीतेति यद्वाक्यं व्याजहार तेन वाक्येन मया रहिताभ्यां द्वाभ्यां सीतालक्ष्मणाभ्यां स्वस्ति भवेत् काक्वा नेत्यर्थः, हि यतः जनस्थाननिमित्तं जनस्थानस्थहतराक्षसार्थं राक्षसैः अधिष्ठरक्षोगणैः कृतः वैरोऽहमस्मि अत एव अद्य बहूनि घोराणि उग्राणि निमित्तानि भविष्यदशुभसूचकघोरस्वनादीनि दृश्यन्ते अनुभूयन्ते । सार्धश्लोकत्रयमेकान्वयि ॥ ७–९ ॥

गो० टी०—राक्षसैरित्यादि । श्लोकद्वयमेकान्वयम् । यस्मान्मारीचः काञ्चनः मृगो भूत्वा मामाश्रमाद्बलपनीय दूरं नीत्वा मया हतः सन् राक्षसोऽभूत् लक्ष्मण ! हतोऽस्मीति वाक्यं व्याजहार च तस्मात्क्वचित्सहितैः राक्षसैः सीताया वध ईप्सितः नूनम् ॥ ७ ॥ ८ ॥

९] ति० टी०—अथ चिन्तां नाटयति—अपीति । स्वस्त्यभवने हेतुः—जनस्थानेति । जनस्थानं स्थानविशेषः । जनानां लोकानां राक्षसेभ्यो भयनिष्टत्या इह स्थाननिमित्तं चेत्यर्थः ॥ ९ ॥

गो० टी०—अपीति । जनस्थाननिमित्तं जनस्थानवासनिमित्तेन । निमित्तकारणहेतूनां सर्वेषामिष्टिः ॥ ९ ॥

१०] ति० टी०—हेत्वन्तरमपि—निमित्तानीति ॥१०॥

रा० टी०—इतीति । एवं गोमायुनिःस्वनं श्रुत्वा इति स्वनं चिन्तयन् रामः त्वरितः त्वरया विशिष्टः निवर्तमानश्च सन् आश्रमं जगाम । अर्धद्वयमेकान्वयि ॥ १० ॥

गो० टी०—निमित्तानीत्यादि । श्लोकद्वयमेकान्वयम् । गोमायुनिःस्वनं श्रुत्वा मृगरूपेण राक्षसाऽऽत्मनः अपनय-

१ वाश्यत इति गो० पाठः । २ चेति गो० पाठः ।

निवर्तमानस्त्वरितो जगामाश्रममात्मवान् । आत्मनश्चापनयनं मृगरूपेण रक्षसा ॥ ११ ॥
आजगाम जनस्थानं राघवः परिशङ्कितः । तं दीनमानसं दीनमासेदुर्मृगपक्षिणः ॥ १२ ॥
सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान् । तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः ॥ १३ ॥
[न्यवर्ततताथ त्वरितो जवेनाश्रममात्मनः । स तु सीतां वरारोहां लक्ष्मणं च महाबलम् ॥
आजगाम जनस्थानं चिन्तयन्नेव राघवः ॥]
ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम् । ततो विदूरे रामेण समीयाय स लक्ष्मणः ॥ १४ ॥
विषण्णः सन्विषण्णेन दुःखितो दुःखभागिना । स जगर्हेऽथ तं भ्राता दृष्ट्वा लक्ष्मणमागतम् ॥ १५ ॥
विहाय सीतां विजने वने राक्षससेविते । गृहीत्वा च करं सव्यं लक्ष्मणं रघुनन्दनः ॥ १६ ॥
उवाच मधुरोदर्कमिदं परुषमार्तवत् । अहो लक्ष्मण गर्ह्यं ते कृतं यत्त्वं विहाय ताम् ॥ १७ ॥
सीतामिहागतः सौम्य कच्चित्स्वस्ति भवेदिति । न मेऽस्ति संशयो वीर सर्वथा जनकात्मजा ॥ १८ ॥

नात् आश्रमादपकर्षणाच्च परिशङ्कितः सन् जनस्थानमाजगाम ॥ १० ॥ ११ ॥

११] ति० टी०—मृगरूपेणात्मनोऽपनयनं दूरमाकर्षणं दृष्ट्वा परिशङ्कितो जनस्थानं खरादिवासभूतमाजगाम । अनेन ततोऽपि परतो मारीचव्यसनेन गत इति सूचितम् ॥ ११ ॥

रा० टी०—आत्मन इति । मृगरूपेण रक्षसा यन्मात् जनस्थानात् आत्मनोऽपनयनं दूरमपकर्षणं तज्जनस्थानं परिशङ्कितो राघवः आजगाम ॥ ११ ॥

१२] ति० टी०—दीनमानसम् । दीनमानसत्वं नाटयति—दीनं शरीरेणापि म्लानम् । आसेदुर्विपरीतार्थसूचकत्वेन प्रापुः ॥ १२ ॥

रा० टी०—तमिति । दीनमानसम् अनुमितसीतादुःखेन खिन्नान्तःकरणम् अत एव दीनं कृशशरीरत्वेन प्रतीयमानं महात्मानं तं रामं सव्यं कृत्वा मृगपक्षिणः आसेदुः प्रापुः घोरान् स्वरांश्च ससृजुः चक्रुः ॥ १२ ॥

गो० टी०—तमिति । सव्यं कृत्वा अप्रदक्षिणं कृत्वा आसेदुः ॥ १२ ॥

१३] ति० टी०—तदेवाह—सव्यमप्रदक्षिणम् ॥ १३ ॥

रा० टी०—तानीति । राघवः तानि निमित्तानि दृष्ट्वा विगतप्रभमायान्तं ततः तं लक्ष्मणं ददर्श, द्वितीयान्तात्तसिः १३

गो० टी०—तानीति । त्वरितः मानसिकत्वरासहितः जवेन [illegible] ॥ १३ ॥

गो० टी०—स त्विति । सीतां लक्ष्मणं च चिन्तयन्नेवाजगाम । तत इत्यर्धमेकं वाक्यम् ॥ १४ ॥

१४] ति० टी०—अविदूरे समीपे समीयाय संगतोऽभूत् ॥ १४ ॥

रा० टी०—तत इति । ततो दर्शनानन्तरम् अविदूरे समीपे दुःखितः अत एव विषण्णः उदासीनचित्तः लक्ष्मणः सुविषण्णेन रामेण समीयाय संप्राप । अथ अनन्तरं भ्राता रामः विजने स्वजनरहिते वने सीतां विहायागतं लक्ष्मणं संजगर्ह । अर्धचतुष्टयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—तत इति । ततो दर्शनानन्तरम् अविदूरे समीपे समीयाय संगतः । दुःखभागिनेत्यत्र संपृचादिसूत्रेण विद्यण्प्रत्ययः ॥ १५ ॥

१५–१६] ति० टी०—समगुणकः सम्मिलित्वा स रामो लक्ष्मणस्य भ्राता सीतां विहायागतं लक्ष्मणं दृष्ट्वा लक्ष्मणं पञ्चम्यर्थे द्वितीया । लक्ष्मणस्य सव्यं करं गृहीत्वा जगर्ह ॥ १५ ॥ १६ ॥

रा० टी०—गर्हणप्रकारमाह—गृहीत्वेति । रघुनन्दनो रामः सव्यं वामं करं हस्तं गृहीत्वा मधुरोदर्कं माधुर्यवर्धकं परुषमिदं वचनमार्तवदुःखी इव लक्ष्मणमुवाच ॥ १६ ॥

गो० टी०—संजगर्ह इति । विजने स्वजनरहिते ॥ १६ ॥

गो० टी०—गृहीत्वेति । सव्यं करं गृहीत्वा लक्ष्मणमुवाच कथं परुषमथ मधुरोदर्कं मधुरोत्तरम्, आर्तिमत् आर्तियुक्तम्, सर्वमिदं क्रियाविशेषणम् । अहो इत्यादि परुषं, लक्ष्मणेत्यादिमधुरम् ॥ १७ ॥

१७] ति० टी०—गर्हणामाह—उवाचेति । मधुरोदर्कं शब्दतो माधुर्योत्तरम्, अर्थतः परुषमिदं वक्ष्यमाणमार्तवदार्तोऽहमुवाच । यद्वा मधुरोदर्कं तात्पर्यतो मधुरमापाततः परुषम् । ते कृतं त्वया कृतम् ॥ १७ ॥

रा० टी०—तद्वचनाकारमाह—अहो इति । हे लक्ष्मण ! तां रक्षणीयां सीतां विहाय त्वमिहागतः तत्ते कृतं गर्ह्यं श्रोतृभिर्निन्द्यम् । तत्र हेतुः—हे सौम्य ! इह त्वया रहितसमये स्वस्ति सीताकल्याणं कच्चिद्भवेन्नेत्यर्थः ॥ १७ ॥

गो० टी०—अहो इति । ते त्वया इत्युवाचेत्यन्वयः ॥ १८ ॥

१८] ति० टी०—कच्चित्स्वस्ति भवेत् कल्याणं संभाव्यत इत्यर्थः ॥ १८ ॥

---

१ अर्धमेतत् गो० नास्ति । २ नयनादिति गो० पाठः । ३ मनस इति गो० पाठः । ४ अर्धत्रयमेतदधिकम् गो० पाठे । ५ स्विति गो० रा० पाठः । ६ समिति गो० रा० पाठः । ७ ज्येष्ठ इति गो० पाठः । ८ आर्तिमदिति गो० पाठः । ९ यस्त्वमिति गो० पाठः । १० इहेति गो० पाठः ।

विनष्टा भक्षिता वापि राक्षसैर्वनचारिभिः । अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे ॥ १९ ॥
अपि लक्ष्मण सीतायाः सामग्र्यं प्राप्नुयामहे । जीवन्त्याः पुरुषव्याघ्र सुतायाः जनकस्य वै ॥ २० ॥
यथा वै मृगसंघाश्च गोमायुश्चैव भैरवम् । वाशन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम् ॥
अपि स्वस्ति भवेत्तस्या राजपुत्र्या महाबल ॥ ॥ २१ ॥

इदं हि रक्षो मृगसंनिकाशं प्रलोभ्य मां दूरमनुप्रयातम् ।
हतं कथंचिन्महता श्रमेण स राक्षसोऽभून्म्रियमाण एव ॥ ॥ २२ ॥
मनश्च मे दीनमिहाप्रहृष्टं चक्षुश्च सव्यं कुरुते विकारम् ।
असंशयं लक्ष्मण नास्ति सीता हृता मृता वा पथि वर्तते वा ॥ ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०–नेति । राक्षसैर्जनकात्मजा विनष्टा अदर्शनं प्रापिता अपहृतेत्यर्थः, भक्षिता वा संशयः अन्यतरत्र संदेहो न । तत्र हेतुः–हे वीर ! भूयिष्ठमधिकं यथा भवति तथा मे मदर्थमशुभानि प्रादुर्भवन्ति ॥ १८ ॥ १९ ॥

गो० टी०–नेति । केनापि हेतुना विनष्टा वा ॥ १९ ॥

१९] ति० टी०–विनष्टाऽपहृता । यथा प्रादुर्भवन्ति । विनष्टेत्यादि निश्चितम् ॥ १९ ॥

गो० टी०–राक्षसैर्भक्षिता वा । उक्तार्थे हेतुमाह–अशुभानीत्यर्धेन । भूयिष्ठं बहुलं यथा तथा ॥ २० ॥

२०] ति० टी०–अथापि । वा पक्षे । सामग्र्यं क्षेममनपहरणरूपम् ॥ २० ॥

रा० टी०–अपीति । हे पुरुषव्याघ्र ! जीवन्त्याः जनकस्य सुतायाः सीतायाः सामग्र्यम् अविच्छिन्नावयवत्वं प्राप्नुयामहे अपि । अपिः संभावनार्थकः ॥ २० ॥

गो० टी०–अपीति । अपिः प्रश्ने । सामग्र्यम् अक्षतत्वं क्षेममिति यावत् । हे लक्ष्मणेति संबन्धः । सामग्र्यप्राप्तिसंशये कारणमाह–यथेति । प्रदीप्तां दिशं सूर्याधिष्ठिता तत्पार्श्वद्वयदिशौ च प्रदीप्ता तामभिमुखं वाश्यन्ते नदन्ति । तेन वायसादिपक्षिणां शृगालादीनां कृष्णसारादिमृगाणां च सूर्याधिष्ठितदिशि क्रूजनं दुःखसूचकमित्युक्तम् । चिन्तातिशयेन पुनरप्याह–अपि स्वस्तीति । अर्धमेकान्वयम् ॥ २१ ॥ २२ ॥

२१] ति० टी०–वाशन्ते नदन्ति । प्रदीप्तां सूर्याधिष्ठिता ॥ २१ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–यथेति । मृगसंघाः गोमायुश्च शकुनाः पक्षिणश्च काकादय इत्यर्थः, प्रदीप्तां सूर्याक्रान्तत्वेन प्रकाशितां दिशं सूर्याभिमुखमित्यर्थः, अभितः चतुर्दिक्षु भैरवं वाशन्ते अतः तस्याः सीतायाः स्वस्त्यपि भवेत् ॥ २१ ॥

२२] ति० टी०–मृगसंनिकाशं मृगवत्प्रतिभासमानम् । म्रियमाण एव न ततः पूर्वमित्यर्थः ॥ २२ ॥

रा० टी०–इदमिति । मृगसन्निकाशं मृगाकृति कथंचित् मां प्रलोभ्य दूरमनुप्रयातम् अत एव महता श्रमेण उपलक्षितम् इदं रक्षः हतं म्रियमाणः स राक्षस एव अभूत् सर्वनाम्नामुद्देश्यविधेयान्यतरलिङ्गतेति न लिङ्गविरोधः ॥ २२ ॥

गो० टी०–लक्ष्मणाय दर्शयति–इदमिति । मृगसन्निकाशं पूर्वं मृगवद्भातम् । इदं रक्षः महता श्रमेण उपलक्षितं मां प्रलोभ्य कथंचिद्धतम् । कथंचिदित्यनेन चिरं लक्ष्यवधाप्राप्तिर्द्योत्यते । मृगत्वं कुतो गतमित्यत्राह–स इति । सः म्रियमाणः सन् राक्षस एवाभूदित्यर्थः ॥ २२ ॥

२२] ति० टी०–सव्यं वामम् । वास्तवमर्थमाह–पथि वर्तते वा म्रियमाणा वर्तते वेत्यर्थः । इदं वस्तुतत्त्वमुक्तम् ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०–सीतापहरणे कारणान्तरमाह–मन इति । हे लक्ष्मण ! इह अस्मिन्समये मे सव्यं वामचक्षुः विकारं स्फुरणं कुरुते अत एव मे मनो दीनम् अत एव अप्रहृष्टं प्रहर्षाभाववत् अत एव सीता नास्ति अभावप्रतियोगिनी । नन्वनित्यायाः कथमभावप्रतियोगित्वमित्यत आह–अमृता नित्यापि सीता असंशयं यथा भवति तथा हृता सती पथ्येव वर्तते । एको वाशब्दोऽप्यर्थे द्वितीय एवार्थे ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तपञ्चाशत्तमः सर्गः ॥ ५७ ॥

गो० टी०–निमित्तान्तरेणापि सीताहानिमनुमिनोति–मनश्चेति । इह सीतावियोगविषये अप्रहृष्टं विकारं स्फुरणं नास्तीति । आश्रम इति शेषः ॥ २४

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने अरण्यकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

---

१ वक्ष इति गो. पाठः । २ वाश्यन्त इति गो. पाठः । ३ प्रयान्तमिति गो. पाठः ।

अष्टपञ्चाशः सर्गः ।

अनुशोचन्त्रामः सीतागुणाननुस्मर्य तस्या वियोग स्वजीवितस्य दुर्वहत्व पक्षद्वयति । मारीचाकोशमाकर्ण्य महाप्रच्छन्या वैदेह्याय प्रेषितः स्यादतः स्ववधप्रतिज्ञकीर्षुभिर्निष्टुरैरेहताऽपि स्याद्वैदेहीत्याशङ्क्ते ।

स दृष्ट्वा लक्ष्मणं दीनं शून्यं दशरथात्मजः । पर्यपृच्छत धर्मात्मा वैदेहीमागतं विना ॥ १ ॥
प्रस्थितं दण्डकारण्यं या मामनुजगाम ह । क्व सा लक्ष्मण वैदेही यां हित्वा त्वमिहागतः ॥ २ ॥
राज्यभ्रष्टस्य दीनस्य दण्डकान्परिधावतः । क्व सा दुःखसहाया मे वैदेही तनुमध्यमा ॥ ३ ॥
यां विना नोत्सहे वीर मुहूर्तमपि जीवितुम् । क्व सा प्राणसहाया मे [2]सीता सुरसुतोपमा ॥ ४ ॥
पतित्वममराणां [3]हि पृथिव्याश्चापि लक्ष्मण । विना तां तपनीयाभां नेच्छेयं जनकात्मजाम् ॥ ५ ॥
कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम । कच्चित्प्रव्राजनं [4]वीर न मे मिथ्या भविष्यति ॥ ६ ॥
सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि । कच्चित्सकामा कैकेयी सुखिता सा भविष्यति ॥ ७ ॥

१-३] ति० टी०-पुनस्तदेव विस्तरेणाह-स इति । शून्यं संतोषादिहीनचित्तम् । वैदेहीं विना गतं तां त्यक्त्वा गतम् ॥ १-३ ॥

रा० टी०-लक्ष्मणसमीपं रामसंभावनामुक्त्वा रामकर्तृकं प्रभमाह-स इत्यादिभिः । स रामः वैदेहीं विना आगतम् अत एव दीनमत एव शून्यं चित्तप्रसादरहितं लक्ष्मणं दृष्ट्वा पर्यपृच्छत ॥ १ ॥

गो० टी०-अथ सीताप्राप्तिसंदेहकृतशोकप्रलापोऽष्टपञ्चाशे-स दृष्ट्वेत्यादि । शून्ये वने वैदेहीं विना आगतं वैदेहीं विसृज्यागतं लक्ष्मणं पर्यपृच्छत पर्यपृच्छत् ॥ १ ॥

रा० टी०-तत्प्रभाकारमाह-प्रस्थितमित्यादिभिः । दण्डकारण्यं प्रस्थितं मां या अनुजगाम यां च हित्वा त्वमिहागतः सा वैदेही क्वास्ति ॥ २ ॥

गो० टी०-प्रभस्वरूपमाह-प्रस्थितमित्यादिना । दण्डकारण्यं प्रति प्रस्थितम् ॥ २ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-राज्येति । राज्यभ्रष्टस्य मे दुःखसहाया दुःखे सहायः साहाय्यं यस्याः सा सा प्रिया वैदेही क्व ॥ ३ ॥

गो० टी०-राज्येति । दुःखसहाया समानदुःखेत्यर्थः॥३॥

४] ति० टी०-प्राणसहाया । तां विनाऽसहायाः प्राणाः कथं स्थास्यन्तीति भावः ॥ ४ ॥

रा० टी०-यामिति । हे वीर! यां विना मुहूर्तमपि जीवितुं नोत्सहे सा सुरसुतोपमा इन्द्रकन्यासादृश्यप्रतियोगिनी सीता क्व ॥ ४ ॥

गो० टी०-यामिति । सुरसुता सुरस्त्री ॥ ४ ॥

५] ति० टी०-अमराणां पतित्वमिन्द्रत्वम् ॥ ५ ॥

रा० टी०-पतित्वमिति । तपनीयाभां प्रतप्तसुवर्णनिभां पृथिव्याः प्रादुर्भूतां तां सीतां विना अमराणां न मरः कदाचिन्मरणं येषां ते ब्रह्मविष्णुमहेश्वराः तेषां पतित्वं नेच्छेयम् इच्छामि 'तपनीयं शातकुम्भम्' इत्यमरः ॥ ५ ॥

गो० टी०-पतित्वमिति । तपनीय सुवर्णम् इच्छेयम् इच्छामि ॥ ५ ॥

६] ति० टी०-मे प्रव्राजनं चतुर्दश समा वनप्रव्राजनव्रतधारणं तु सीताजीवने मम जीवनान्न मिथ्या भविष्यति । तदभावे मध्ये एव मम मरणे तद्धानिरिति भावः ॥ ६ ॥

रा० टी०-कच्चिदिति । मम प्राणैः प्रियतरा वैदेही कच्चिज्जीवति मे प्रव्राजनं प्रव्राजनसंबन्धि व्रतं नगरप्रवेशाभावादि मिथ्या असत्यं कच्चिन्न भविष्यति एतेन यदि नगरमध्ये एव सीतापहृत्य संस्थापिता तर्हि तदानयनं नगरप्रवेशमन्तरा कथं संभवेदिति रामविचारः सूचितः तेन अपहृतापि नगराद्बहिः संस्थापिता चेच्छोभनमिति तदभिप्रायो व्यञ्जितः ॥ ६ ॥

गो० टी०-कच्चिदिति । प्राणैः प्राणेभ्यः प्रव्राजनं चतुर्दशवर्षवनवासः मिथ्या असत्यं न भविष्यतीति कच्चित् । चतुर्दशवर्षसमाप्तावेव सीतावियोगजं जीववियोगं किं प्राप्स्यामीत्यर्थः ॥ ६ ॥

७] ति० टी०-सीतानिमित्तं तद्विनाशनिमित्तम् । मयि मृते त्वयि चैकाकिन्ययोध्यां गते इत्यर्थः । सकामा पूर्णमनोरथा ॥ ७ ॥

रा० टी०-सीतेति । हे सौमित्रे ! सीतानिमित्तं मयि त्वयि च मृते राक्षसमृतत्वे गते प्रापिते सति सकामा राक्षसवधविषयकेच्छावती कैकेयी सुखिता कच्चिद्भविष्यति ॥ ७ ॥

गो० टी०-सीतेति । सीतानिमित्तं सीताविनाशनिमित्तं त्वयि गते अयोध्यामिति शेषः । सकामेत्यनेन रामस्य हृदये कैकेयी स्वविनाशार्थमेव वनं प्रेषितवतीति सदा वर्तते तदिदानीं 'सुप्तप्रमत्तकुपितानां भावज्ञानं दृढम्' इति न्यायेन व्यक्तीकृतम् ॥ ७ ॥

१ शून्ये इति गो. पाठः । २ वैदेही तनुमध्यमेति रा. पाठः । ३ वेति गो. पाठः । ४ सौम्येति गो. पाठः ।

सपुत्रराज्यां सिद्धार्थां मृतपुत्रा तपस्विनी । उपस्थास्यति कौसल्या कच्चित्सौम्येन कैकयीम्॥ ८ ॥
यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः । संवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण॥ ९ ॥
यदि मामाश्रमगतं वैदेही नाभिभाषते । पुरः प्रहसिता सीता विनशिष्यामि लक्ष्मण ॥ १० ॥
ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न वा । त्वयि प्रमत्ते रक्षोभिर्भक्षिता वा तपस्विनी ॥ ११ ॥
सुकुमारी च बाला च नित्यं चादुःखभागिनी । मद्वियोगेन वैदेही व्यक्तं शोचति दुर्मनाः ॥ १२ ॥
सर्वथा रक्षसा तेन जिह्मेन सुदुरात्मना । वदता लक्ष्मणेत्युच्चैस्तवापि जनितं भयम् ॥ १३ ॥
श्रुतश्चै मन्ये वैदेह्या स स्वरः सदृशो मम । त्रस्तया प्रेषितस्त्वं च द्रष्टुं मां शीघ्रमागतः ॥ १४ ॥
सर्वथा तु कृतं कष्टं सीतामुत्सृजता वने । प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरम् ॥ १५ ॥
दुःखिताः खरघातेन राक्षसाः पिशिताशनाः । तैः सीता निहता घोरैर्भविष्यति न संशयः ॥ १६ ॥

८] ति० टी०–सौम्येन विनयेन ॥ ८ ॥

रा० टी०–सेति । सपुत्रराज्यां मद्विषयकातिप्रीतिपुत्रशोकासहितां सिद्धार्थां सिद्धोऽर्थो राक्षसवधरूपं प्रयोजनं यस्याः ता कैकयीं मृतः राक्षसघातकः पुत्रो यस्याः सा कौसल्या कच्चिदुपस्थास्यति प्रशंसिष्यति ॥ ८ ॥

गो० टी०–सपुत्रेति । तपस्विनी शोच्या ॥ ८ ॥

९] ति० टी०–संवृत्ता सदृत्ता यदि वृत्ता मृतेत्यर्थः ॥ ९ ॥

रा० टी०–यदीति । संवृत्ता वैदेही यदि जीवति मया लोकान् पालयिष्यति यथापूर्वं तत्रैव स्थिता भविष्यतीत्यर्थः, तदा आश्रमं गमिष्यामि यदि च वृत्तासा वृत्तः प्रवृत्तः आसः केनचिन्निमित्तेन अपुनरागमनाय गमनं यस्याः सा तदा प्राणान् पालनं त्यक्ष्यामि अहमपि तत्रैव गमिष्यामीत्यर्थः ॥ ९ ॥

गो० टी०–यदीति । वृत्ता परेता सवृत्ता स्वाचारा ॥९॥

१०] ति० टी०–प्रहसिता प्रहसितमुखी ॥ १० ॥

रा० टी०–यदीति । आश्रमगतं मां प्रहसिता वैदेही यदि पुनर्नाभिभाषते अभिभाषिष्यते राक्षसकृतपीडाजनितमूर्च्छादिना यदि किंचित्र वक्ष्यतीत्यर्थः, तर्हि विनशिष्यामि राक्षसान् विनाशयिष्यामि ॥ १० ॥

गो० टी०–यदि मामिति । प्रहसिता प्रहसितमुखी ॥ १० ॥

११-१२] ति० टी०–प्रमत्तेऽनुचितकारिणि ॥११॥१२॥

रा० टी०–ब्रूहीति । हे लक्ष्मण ! त्वयि प्रमत्ते सति रक्षोभिर्भक्षिता सती वैदेही न जीवति वा जीवति वा इति त्वं ब्रूहि एको वाशब्द इत्यर्थकः ॥ ११ ॥

गो० टी०–ब्रूहीति । यदि जीवति तदा ब्रूहि वद वैदेही जीवति वा न वा । न वेत्यस्य विवरणं त्वयीति । प्रमत्ते अनवहिते ॥ ११ ॥

रा० टी०–सुकुमारीति । नित्यमदुःखदर्शिनी दुःखं पश्यति तच्छीला नित्यं तद्विना वैदेही मद्वियोगेन दुर्मनाः सती शोचति व्यक्तं स्फुटमेतत् ॥ १२ ॥

गो० टी०–सुकुमारीति । दुःखं पश्यतीति दुःखदर्शिनी सा न भवतीत्यदुःखदर्शिनी शोचति अशोचत् । वनवास इति शेषः । दुर्मनाः चिन्ताकुलेति यावत् ॥ १२ ॥

१३] ति० टी०–तवापि ज्ञातमद्बलवीर्यादिमतोऽपि॥१३॥

रा० टी०–लक्ष्मणागमने स्वकृतनिश्चयमाह–सर्वथेति । जिह्मेन कपटेन सुदुरात्मना दुर्जेयप्रयत्नवता अत एव लक्ष्मणेत्यपैर्वदता तेन मारीचेन तवापि भयं मत्कर्मकराक्षसबाधाहेतुकभीतिर्जनितमुत्पादितम् ॥ १३ ॥

गो० टी०–सर्वथेति । जिह्मेन कपटेन तवापि अतिशूरस्यापि ॥ १३ ॥

१४] ति० टी०–मम सदृशो मम स्वरेण सदृशः । यस्माच्चमत्रागतस्तस्मात्स स्वरस्तया श्रुत इति शङ्के ॥ १४ ॥

रा० टी०–श्रुत इति । मम सदृशः मत्स्वरसमानः सः मारीचोच्चारितः स्वरः वैदेह्या श्रुतः अत एव त्रस्तया वैदेह्या प्रेषितस्त्वं मां द्रष्टुं शीघ्रमागतः इत्यहं मन्ये ॥ १४ ॥

गो० टी०–श्रुतास्त्विति । मम स्वरेण यस्मादागतः तस्मात् सः स्वरो वैदेह्या श्रुतः त्रस्तया तया त्वं प्रेषितश्चेति शङ्के इति योजना ॥ १४ ॥

१५-१६] ति० टी०–प्रतिकर्तुं मत्कृतापकारस्य प्रत्युपकारं कर्तुम् । तदपेक्षाणां रक्षसामन्तरमवकाशो दत्तः ॥ १५ ॥ १६ ॥

रा० टी०–सर्वथेति । वने सीतामुत्सृजता त्यजता त्वया सर्वथा कष्टं दुःखं कृतं संपादितम् । दुःखाकारमाह–नृशंसानां क्रूराणां रक्षसां प्रतिकर्तुं स्वजनवधप्रतिक्रियां संपादयितुमन्तरमवकाशो दत्तम् ॥ १५ ॥

गो० टी०–सर्वथेति । कष्टमेवाह–प्रतीति । प्रतिकर्तुं मत्कृतापकारस्य प्रत्यपकारं कर्तुम् अन्तरम् अवकाशो दत्तः ॥ १५ ॥

रा० टी०–नन्ववकाशदानेन किमित्यत आह–दुःखिता इति । खरघातेन ये राक्षसाः दुःखितास्तैः राक्षसैः सीता निहता दुर्वचनादिना ताडिता भविष्यति संशयः अत्र संदेहो न ॥ १६ ॥

१ सौम्य न केकयीमिति गो. केकयीमिति रा. पाठः । २ सुवृत्तेति गो. रा. पाठः । ३ दर्शिनीति गो. रा. पाठः । ४ तु शङ्क इति गो. पाठः ।

अहोऽस्मिं व्यसने मग्नः सर्वथा रिपुनाशन । किं त्विदानीं करिष्यामि शङ्के प्राप्तव्यमीदृशम् ॥ १७॥
इति सीतां वरारोहां चिन्तयन्नेव राघवः । आजगाम जनस्थानं त्वरया सहलक्ष्मणः ॥ १८ ॥
विगर्हमाणोऽनुजमार्तरूपं क्षुधाश्रमेणैव पिपासया च ।
विनिःश्वसञ्शुष्कमुखो विषण्णः प्रतिश्रयं प्राप्य समीक्ष्य शून्यम् ॥ १९ ॥
स्वमाश्रमं सं प्रविगाह्य वीरो विहारदेशाननुसृत्य कांश्चित् ।
एतत्तदित्येव निवासभूमौ प्रहृष्टरोमा व्यथितो बभूव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ।

एकाकिनी सीतां निर्जने विसृज्य किमिति सप्राप्तोऽसीति रामो लक्ष्मणं पृच्छति । स तु जातोक्तिप्रत्युक्तिमनूद्य मारीचाक्रोशश्रवणाद्विपरीदन्ती परुषानिर्वाच्यवादिनी तां समाधातुमक्षमोऽहं निर्गत इत्युत्तरयति । धिक्कृतमनुचितस्ते निर्गमः सौवर्णोऽसौ मायिक इति मारीचहतिवृत्तं प्रास्तौषीत् ।

अथाश्रमादुपावृत्तमन्तरा रघुनन्दनः । परिपप्रच्छ सौमित्रिं रामो दुःखादिदं वचः ॥ १ ॥

गो० टी०–प्रतीकारमेवाह–दुःखिता इति । पिशिताशनत्वं निहनने हेतुः ॥ १६ ॥

१७] ति० टी०–किं त्विदानीं करिष्यामीति शङ्के । ईदृशं दुःखं प्राप्तव्यमवश्यमनुभवितव्यमिति शङ्क इति धैर्यावलम्बनम् । उत्प्रेक्षा ॥ १७ ॥

रा० टी०–अहो इति । ईदृशं प्राप्तव्यं व्यसनमहं शङ्के संभावयामि अत इदानीमहं किं करिष्यामि न किंचित्कर्तव्यं प्रतिभातीत्यर्थः । अतः व्यसने दुःखेऽहं सर्वथा मग्नोऽस्मि अहो सर्वेषां स्वजनानां दुःखमिदम् । ओदिति प्रकृतिभावाभावस्त्वार्षत्वात् ॥ १७ ॥

गो० टी०–अहोऽस्मिन्निति संधिरार्षः । ईदृशं व्यसनमजनं प्राप्तव्यमिति शङ्के ॥ १७ ॥

१८] ति० टी०–जनस्थानं तद्वर्तिन्याश्रमम् ॥ १८ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेण सीतां चिन्तयन्नेव राघवः जनस्थानमाजगाम ॥ १८ ॥

गो० टी०–इतीति । वरारोहामिति चिन्ताहेतुसौन्दर्यातिशयोक्तिः ॥ १८ ॥

१९] ति० टी०–विगर्हमाण इत्यादि वक्ष्यमाणसर्गार्थसंग्रहः । श्रमेण बहुदूरधावनजेन । 'श्रमाच्चैव' इति प्रायः पाठः । प्रतिश्रयमाश्रमसमीपदेशं शून्यं सीतया ॥ १९ ॥

२०] ति० टी०–प्रतिश्रयं प्रेक्ष्यानन्तरं स्वाश्रमं प्रविगाह्य तमपि शून्यं वीक्ष्य ततः सीतायाः कांश्चिद्विहारदेशाननुसृत्य तेषु तां विचित्य तानपि शून्यान्विलोक्य एतत्क्रीडाविशेषस्थानं तत्रत्यक्रीडाविशेषं च स्मृत्वा हृष्टरोमा शोकेन व्यथितश्च बभूव ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०–विगर्हमाण इति । आर्तरूपं सीतोक्त्या रामोक्त्या च प्राप्तातिदुःखवत्तया दुःखस्वरूपम् अनुजं लक्ष्मणं विगर्हमाणः क्षुदादिना शुष्कमुखः तत्त्वेन प्रतीयमानः विनिःश्वसन् रामः प्रतिश्रयम् आश्रमसमीपदेशं प्राप्य शून्यं सीतारहितं समीक्ष्य अत एव स्वमाश्रमं प्रविगाह्य अन्वीक्ष्य तत्रापि सीतामदृष्ट्वेत्यर्थः, कांश्चित्स्वैकज्ञातान् विहारदेशान् सीताविहारस्थलानि अनुसृत्य तानपि शून्यान् समीक्ष्य तत् सीताविहारस्थलम् एतदेवेत्युक्त्वेति शेषः, निवासभूमौ स्वनिवासस्थले प्रहृष्टरोमा उद्गतरोमावलिः सन् व्यथितो बभूव । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

गो० टी०–विगर्हमाण इत्यादि । श्लोकद्वयमेकान्वयम् । वक्ष्यमाणानेकसर्गार्थसंग्रहरूपम् । श्रमात् बहुदूरधावनात् प्रतिश्रयं स्वाश्रमप्रदेशं शून्यं सीतारहितं प्रतिश्रयमित्यनुषज्यते । अनन्तरं स्वाश्रमं संप्रविगाह्य प्रविश्य तमपि शून्यं समीक्ष्येति शेषः । तदनु सीतायाः कांश्चिद्विहारदेशाननुसृत्य विचित्य तानपि शून्यान् समीक्ष्य तत्रत्यनिवासभूमौ क्रीडास्थाने तदेतदिति तादृशमेतादृशमिति विहारविशेषं स्मृत्वा प्रहृष्टरोमा सन् शोकेन व्यथितो बभूव ॥ १९ ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्यानेऽष्टपञ्चाशः सर्गः ॥५८॥

१] ति० टी०–अथ विस्तरेण मार्गमध्यकृतां कथामाह—अथेति । उपावृत्तं सीतावचनात्स्वसमीपं प्राप्तम् । अन्तरा मध्येमार्गम् ॥ १ ॥

---

१ दुरिमन्निति गो. पाठः । २ शङ्कमृदनेति गो. पाठः । ३ न्वित गो. पाठः । ४ श्रमादिति गो. पाठः । ५ विवर्ण इति गो. पाठः । ६ सांमति गो. पाठः । ७ दुःखादितं पुनरिति गो. पाठः ।

तमुवाच किमर्थं त्वमागतोऽपास्य मैथिलीम् । यदा सा तव विश्वासाद्वने विरहिता मया ॥ २ ॥
दृष्ट्वैवाभ्यागतं त्वां मे मैथिलीं त्यज्य लक्ष्मण । शङ्कमानं महत्पापं यत्सत्यं व्यथितं मनः ॥ ३ ॥
स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे । दृष्ट्वा लक्ष्मण दूरे त्वां सीताविरहितं पथि ॥ ४ ॥
एवमुक्तस्तु सौमित्रिर्लक्ष्मणः शुभलक्षणः । भूयो दुःखसमाविष्टो दुःखितं राममब्रवीत् ॥ ५ ॥
न स्वयं कामकारेण तां त्यक्त्वाऽहमिहागतः । प्रचोदितस्तयैवोग्रैस्त्वत्सकाशमिहागतः ॥ ६ ॥
आर्येणेव परिक्रुष्टं लक्ष्मणेति सुविस्वरम् । परित्राहीति यद्वाक्यं मैथिल्यास्तच्छ्रुतिं गतम् ॥ ७ ॥
सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली । गच्छ गच्छेति मामाशु रुदती भयविक्लवा ॥ ८ ॥

रा० टी०—एवमुक्त्वाऽपि लक्ष्मणोच्चारितप्रत्युत्तरमलभमानस्य रामस्य पुनः प्रश्नमाह—अथेत्यादिभिः । अथ प्रत्युत्तरप्रदानाभावानन्तरम् आश्रमात् अध्वप्रचलनजनितेषद्खेदात् उपावृत्तं निवृत्तं सौमित्रिं दुःखार्दितां रामः अन्तरा आश्रममध्ये पुनः पप्रच्छ ॥ १ ॥

गो० टी०—एवं संग्रहेणोक्तमर्थं पुनर्विस्तरेण वक्तुमुपक्रमते—अथेत्यादि । अन्तरा मध्येमार्गम् । दुःखार्दितमिति क्रियाविशेषणम् मारीचवधस्थानात् स्वाश्रमं गच्छन् मध्ये पप्रच्छेत्यर्थः ॥ १ ॥

२] ति० टी०—यदा यस्मात्तव विश्वासात्सा वने मया त्वेन विरहिता कृता, अतस्तामपास्य किमर्थं त्वमागतः ॥ २ ॥

रा० टी०—तत्प्रभाकारमाह—तमिति । आसा अतिप्रकाशविशिष्टा यत् या मैथिली तव विश्वासात् वने मया विरहिता तां मैथिलीमपास्य त्यक्त्वा किमर्थं त्वमागतः इति तं लक्ष्मणमुवाच ॥ २ ॥

गो० टी०—तमिति । तं सौमित्रिमुवाच । तत्र प्रश्नप्रकारमाह—किमर्थमिति । यदा तु त्वया रक्षितायाः का हानिरिति विश्वासात् मया विरहिता कृता तदा तामपास्य विहाय किमर्थमागतः ॥ २ ॥

३] ति० टी०—महत्पापं सीताहरणादिरूपं शङ्कमानं यन्मे मनो व्यथितमासीन्मारीचवधकाले मच्छब्दसदृशशब्दस्य तेन करणात्तन्मैथिलीं त्यज्याभ्यागतं त्वां दृष्ट्वैव सत्यमिति जाने । एकलत्वेन सर्वस्य संभावयितुं शक्यत्वादिति भावः ॥ ३ ॥

रा० टी०—वचनान्तरमाह—दृष्ट्वेति । यत् महत्पापं राक्षसकर्तृकापहरणादि शङ्कमानं मे मनो व्यथितं तत् मैथिलीं त्यज्य त्यक्त्वा अभ्यागतमिह प्राप्तं त्वां दृष्ट्वैव सत्यं प्रतीयत इति शेषः ॥ ३ ॥

गो० टी०—उवाचेत्युक्तार्थमाह—दृष्ट्वेति । त्वां दृष्ट्वा पापं सीतानिष्टरूपं शङ्कमानं मे मम मनः व्यथितमिति यत् तत्सत्यम् ॥ ३ ॥

४] ति० टी०—यस्य सत्यत्वसंभावनायां शरीरनिमित्तानि तत्कालानुभूयमानान्याह—स्फुरते इति । स्फुरति सव्यं वामम् । बाहुरपि वाम एव । हृदयं च वामभाग एव ॥ ४ ॥

रा० टी०—सत्यत्वे कारणान्तरमाह—स्फुरत इति । हे लक्ष्मण ! सीताविरहितं त्वां दूरे दृष्ट्वा विद्यमानस्य मे सव्यं वामं नयनं हृदयं बाहुश्च स्फुरते ॥ ४ ॥

गो० टी०—एतच्च कथं निश्चीयत इत्यत्राह—स्फुरत इति । बाहुः सव्य इत्यनुषज्यते । हृदयं वक्षोमध्यम् ॥ ४ ॥

५] ति० टी०—पूर्वं सीतावचनादुःखितोऽकृत्यं कृतमिति रामवचनाद्भूयो दुःखितः ॥ ५ ॥

रा० टी०—एवमिति । एवमनेन प्रकारेण भूय उक्तः दुःखसमाविष्टः लक्ष्मणः दुःखितं राममब्रवीत् ॥ ५ ॥

गो० टी०—एवमिति । भूयो दुःखेन बहुतरदुःखेन समाविष्टः पूर्वं सीतावचनदुःखाक्रान्तः संप्रति रामेण त्वया अकृत्यं कृतमित्युच्यमानत्वात् भूयो दुःखसमाविष्टत्वम् ॥ ५ ॥

६] ति० टी०—कामकारेण स्वेच्छया प्रचोदितः । उग्रैर्दुःश्रवैः वचोभिरिति शेषः ॥ ६ ॥

रा० टी०—तद्वचनाकारमाह—नेति । कामचारेण स्वेच्छयेत्यर्थः, तां सीतां त्यक्त्वा स्वयमहमिह नागतः किंतु तया सीतयैव प्रचोदितः प्रेरितोऽहं त्वत्सकाशमागतः ॥ ६ ॥

गो० टी०—न स्वयमिति । कामकारेण स्वेच्छाकरणेन स्वयमित्यस्य विवरणमिदम् । उग्रैः वचोभिरित्यर्थसिद्धम् ॥ ६ ॥

७-८] ति० टी०—लक्ष्मणेति श्रुतरां विस्वरं परित्राहीति च आर्येणेव त्वयैव यत्परिक्रुष्टं तन्मैथिल्याः श्रुतिं गतम् ॥ ७ ॥ ८ ॥

रा० टी०—ननु तयैव किमर्थं प्रेरित इत्यत आह—आर्येणेति । हे लक्ष्मण ! मां परित्राहि इत्यार्येण भवता पराक्रुष्टमिव पराक्रुष्टमुच्चारितं सुविस्वरमतिस्वरसहितं यत् वाक्यं तत् मैथिल्याः श्रुतिं श्रवणपथं गतम् ॥ ७ ॥

गो० टी०—आर्येणेति । हा सीते ! लक्ष्मणेति परित्राहीति च यद्वाक्यम् आर्येणेव भवतेव केनचित्पराक्रुष्टम् आह्वानपुरःसरं चोपितं तत् मैथिल्याः श्रुतिं गतम् ॥ ७ ॥

१ त्वां कामचारेणेति रा. पाठः । २ वाहुमिति रा. पाठः । ३ पराऽऽक्रुष्टं हा सीते लक्ष्मणेति चेति गो. पराक्रुष्टमिति रा. पाठः । ४ आह रुदन्ती सयत्निलेति गो. आह रुदन्तीति रा. पाठः । ५ आदिनेति युक्तं भाति ।

प्रचोद्यमानेन मया गच्छेति बहुशस्तया । प्रत्युक्ता मैथिली वाक्यमिदं तत्प्रत्ययान्वितम् ॥ ९ ॥
न तत्पश्याम्यहं रक्षो यदस्य भयमावहेत् । निर्दृता भव नास्त्येतत्केनाप्येतदुदाहृतम् ॥ १० ॥
विगर्हितं च नीचं च कथमार्योऽभिधास्यति । त्राहीति वचनं सीते यस्त्रायेत्त्रिदशानपि ॥ ११ ॥
किंनिमित्तं नु केनापि भ्रातुरालम्ब्य मे स्वरम् । [3]विस्वरं व्याहृतं वाक्यं लक्ष्मण त्राहि मामिति॥ १२ ॥
राक्षसेनेरितं वाक्यं त्रासात्त्राहीति शोभने । न भवत्या व्यथा कार्या कुनारीजनसेविता ॥ १३ ॥
अलं [5]विक्लवतां गन्तुं स्वस्था भव निरुत्सुका । न चास्ति त्रिषु लोकेषु पुमान्यो राघवं रणे ॥ १४ ॥
जातो वा जायमानो वा संयुगे यः पराजयेत् । [6]अजेयो राघवो युद्धे देवैः शक्रपुरोगमैः ॥ १५ ॥
एवमुक्ता तु वैदेही परिमोहितचेतना । उवाचाश्रूणि मुञ्चन्ती दारुणं मामिदं वचः ॥ १६ ॥

रा० टी०–सेति । आर्तस्वरं श्रुत्वा भयविक्लवा तव स्नेहेन रुदन्ती रुदती सा मैथिली गच्छ गच्छेति मामाह ॥८॥

गो० टी०–सा तमिति । तव स्नेहेन त्वयि स्नेहेन ॥८॥

९] ति० टी०–तत्प्रत्ययान्वितं यस्या अपि प्रत्ययेन विश्वसनीयत्वेनान्वितं तत्त्वेन योग्यमिदं वक्ष्यमाणं वाक्यं प्रत्युक्ता प्रतिवचनत्वेनोक्ता ॥ ९ ॥

रा० टी०–प्रचोद्यमानेनेति । तया सीतया गच्छेति बहुशः प्रचोद्यमानेन मया तत्प्रत्ययान्वितं रामस्य न क्वचिद्भीतिरिति सीताविश्वासकारकमिदं वाक्यं मैथिली प्रत्युक्ता ॥ ९॥

गो० टी०–प्रचोद्यमानेनेति । त्वत्प्रत्ययान्वितं त्वयि प्रत्ययः दुराधर्षत्वदैन्यराहित्यविषयो विश्वासः तेनान्वितम् इदं वक्ष्यमाणलक्षणं वाक्यं मैथिली प्रत्युक्ता ॥ ९ ॥

१०] ति० टी०–किं तत्तत्राह—नेति । एतत्कातरवचनं नास्य रामस्य । केनापि रक्षसाऽन्येन वोदाहृतम् ॥ १० ॥

रा० टी०–तद्वाक्याकारमाह–नेति । यत् अस्य रामस्य भयमावहेत्तद्रक्षोऽहं न पश्यामि अत एतदुदाहृतं रामस्य नास्ति किंतु केन अन्येनेत्यर्थः, उदाहृतमुच्चारितम् अतो निर्दृता त्यक्तभया भव ॥ १० ॥

गो० टी०–न तदिति । निर्दृता सुस्थिता भव नास्त्येतत् रामवाक्यत्वेन यच्छङ्कितम् एतत् रामवाक्यं न भवति ॥१०॥

११] ति० टी०–तद्वचनत्वाभावे हेतुः–विगर्हितमिति । क्षत्रियस्य निन्दितम्, अत एव नीचं कुत्सितम् । यो देवानपि त्रायेदेवत्राणेऽपि यः समर्थः स कथमीदृग्वाक्यं ब्रूयात् ॥ ११ ॥

रा० टी०–तत्र हेत्वन्तरमप्युक्तमित्याह–विगर्हितमिति । यस्त्रिदशान्देवानपि त्रायेत् स आर्यः सर्वश्रेष्ठः रामः विगर्हितं निन्दितं त्राहीति वचनं कथमभिधास्यति ॥ ११ ॥

गो० टी०–रामवचनत्वेऽनुपपत्तिमाह–विगर्हितमिति । विगर्हितं दैन्यावहत्वात् महाकुलप्रसूतस्य निन्दितं नीचम् आपत्काले क्षीसमाक्षानस्य क्षुद्रकृतत्वात् कुत्सितं वचनं कथमभिधास्यति यस्त्रिदशानपि त्रायेत् कथं सः सीते त्राहीति वचनमभिधास्यति ॥ ११ ॥

१२–१३] ति० टी०–किंनिमित्तं कुत्सितं किंचिन्निमित्तमाश्रित्य केनापि रक्षसेरितम् ॥ १२ ॥ १३ ॥

रा० टी०–किंमिति । किंनिमित्तं किंचित्कारणमुद्दिश्य केनापि राक्षसविशेषेण मे भ्रातुः स्वरमवलम्ब्य लक्ष्मण! मां त्राहीति विस्वरं वाक्यं व्याहृतं कथितम् ॥ १२ ॥

गो० टी०–राक्षसेनेति । हे शोभने! त्रासान्मां प्रत्युद्देगप्रापणार्थं राक्षसेन त्राहीति वाक्यमीरितमतः कुनारीजनसेविता प्राकृतनारीजनैराश्रिता व्यथा भवत्या न कार्या ॥ १३ ॥

गो० टी०–किंमिति । किं निमित्तं किमपि प्रयोजनमुद्दिश्य केनापि दुर्जनेन राक्षसेन मे भ्रातुः स्वरं स्वरसदृशं स्वरम् आलम्ब्य अवलम्ब्य त्राहि त्राहीति वाक्यम् ईरितम् उक्तम् । शोभने इति सीतासंबोधनम् ॥ १२ ॥

गो० टी०–विस्वरमिति । स्वरप्रकारविशेषशोधनेऽपि नायं रामस्वर इत्यर्थः ॥ १३ ॥

१४] ति० टी०–विक्लवतां गन्तुमलं वैक्लव्यमालम्ब्यालं मास्त्वित्यर्थः । पुमान्वियमान इति शेषः । यः पराजयेदित्यपकर्षः ॥ १४ ॥

रा० टी०–अलमिति । जातो जायमानो वा यः पुमान् राघवं पराजयेत्स त्रिषु लोकेषु नास्ति अतो राघवो देवैरप्यजेयः अतो विक्लवतां विह्वलतां गन्तुं प्राप्तुमलम्, विक्लवतां न प्राप्नुहीत्यर्थः, अतः स्वस्था सती निरुत्सुका मत्प्रेषणप्रयत्नरहिता भव 'विक्लवो विह्वलस्तथा' इति हलायुधः । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–अलमित्यादि । सार्धश्लोक एकान्वयः । वैक्लव्यं विक्लवत्वम् । 'विक्लवो विह्वलस्तथा' इति हलायुधः । निरुत्सुका मत्प्रस्थापनोद्योगरहिता भव नास्ति न विद्यते ॥१४॥

गो० टी०–नेत्यर्धमेकं पाक्यम् । पूर्वमेकैकेनाजय्यत्वमुक्तं संप्रति मिलितैरिति विशेषः ॥ १५ ॥

१५–१६] ति० टी०–जायमान इत्यनेन जनिष्यमाण इत्यर्थकेन भाविनोऽपि वारणम् । अतः संयुगे इत्यस्य न पौनरुक्त्यम् ॥ १५ ॥ १६ ॥

१ त्वदिति गो. पाठः । २ एवमिति गो. पाठेः । ३ एतदार्धर्धद्वयं व्यत्यस्तं गो. पाठेः । ४ त्राहि त्राहीति गो. पाठः । ५ वैक्लव्यमालम्ब्येति गो. पाठः । ६ स इति गो. पाठः । ७ नै इति गो. पाठः । ८ न अत्र इति गो. पाठः ।

भावो मयि तवात्यर्थपाप एव निवेशितः । विनष्टे भ्रातरि प्राप्तुं न च त्वं मामवाप्स्यसे ॥ १७ ॥
संकेताद्धरतेन त्वं रामं समनुगच्छसि । क्रोशन्तं हि यथात्यर्थं नैनमभ्यवपद्यसे ॥ १८ ॥
रिपुः प्रच्छन्नचारी त्वं मदर्थमनुगच्छसि । राघवस्यान्तरं प्रेप्सुस्तथैनं नाभिपद्यसे ॥ १९ ॥
एवमुक्तस्तु वैदेह्या संरब्धो रक्तलोचनः । क्रोधात्प्रस्फुरमाणोष्ठ आश्रमादभिनिर्गतः ॥ २० ॥
एवं ब्रुवाणं सौमित्रिं रामः संतापमोहितः । अब्रवीदुष्कृतं सौम्य तां विना त्वमिहागतः ॥ २१ ॥
जानन्नपि समर्थं मां रक्षसामपवारणे । अनेन क्रोधवाक्येन मैथिल्या निर्गतो भवान् ॥ २२ ॥
न हि ते परितुष्यामि त्यक्त्वा यदसि मैथिलीम् । क्रुद्धायाः परुषं श्रुत्वा स्त्रिया यत्त्वमिहागतः ॥ २३ ॥

रा० टी०–एवमिति । एवमुक्ता परिमोहितचेतना भवद्विषयकातिस्नेहेन व्याकुलचित्ता वैदेही अश्रूणि मुञ्चन्ती सती दारुणं वच उवाच ॥ १६ ॥

गो० टी०–एवमिति । परिमोहितचेतना कलुषितबुद्धिः ॥ १६ ॥

१७] ति० टी०–भावो मयीत्यादि व्याख्यातप्रायम् । विनष्टे भ्रातरि मां प्राप्तुमत्यर्थपापरूप एव भावस्तव हृदि मद्विषये निवेशितो दैवेनेति शेषः । न च मामवाप्स्यसे तन्नाशे ममापि नाशात् ॥ १७ ॥

रा० टी०–तदाकारमाह–भाव इत्यादिभिः । भ्रातरि रामे विनष्टे अमर्षाददृश्यत्वं प्राप्ते सति मां त्वं नावाप्स्यसेऽहमप्यदृश्या भविष्यामीति तात्पर्यम्, मयि अत्यर्थं निवेशितस्तव भावः परप्रेम पापस्तद्धेतुरेव भविष्यतीति शेषः, विपत्तौ स्वामिनाहृतोऽप्ययं न गत इति महान् पाप्ययमिति लोका वदिष्यन्तीति तात्पर्यम् ॥ १७ ॥

गो० टी०–भाव इति । भ्रातरि विनष्टे सति मां प्राप्तुं पापः कुत्सितः भावः मयि तव त्वया निवेशित एव च मां नावाप्स्यसि ॥ १७ ॥

१८–२०] ति० टी०–संकेतात् पापरूपं संकेतं कृत्वेत्यर्थः । नाभिपद्यसे नाभ्यवपद्यसे । क्रोशन्तं क्रोशतस्तस्य त्राणाय न गच्छसि ॥ १८–२० ॥

रा० टी०–संकेतादिति । संकेतात् संकेतं प्राप्य अत्यर्थं क्रोशन्तं रामं त्वं यथा यथावत् न समनुगच्छसि तर्हि भरते भरतसमीपेऽपि त्वं नाभ्यवपद्यसे स्थास्यसि भरतो निस्सारयिष्यतीति तात्पर्यम् ॥ १८ ॥

गो० टी०–संकेतादिति । भरतेन कृतात्संकेतात् कृतश्चिदवकाशे राममवश्यं हनिष्यामीत्येवंरूपात् रामं समनुगच्छसि न तु रामभक्त्या । अत्र हेतुमाह–क्रोशन्तमिति । क्रोशन्तमेनं यथा नाभ्यवपद्यसे न प्राप्नोपि तेन प्रकारेण संकेतादनुगच्छसीत्यन्वयः ॥ १८ ॥

रा० टी०–रिपुरिति । राघवस्यान्तरमभिप्रायं प्रेप्सुस्त्वं यदि मदर्थं मद्रक्षणार्थम् एनं राघवं नाभिपद्यसे तर्हि प्रच्छन्नचारी रिपुस्त्वम् अनुगच्छसि भविष्यसि । किंच प्रच्छन्नचारित्वं यद्रिपुत्वं तदनुगच्छसि प्राप्स्यसि भावप्रधानो निर्देशः समुदायस्य कर्मत्वेनान्वयान्न द्वितीया " वर्तमानसामीप्ये–" इति भविष्यति लट् ॥ १९ ॥

गो० टी०–रिपुरिति–अन्तरप्रेप्सुः रन्ध्रान्वेषी येन प्रकारेण एवमनुगच्छसि तथा नाभिपद्यसे इत्यन्वयः ॥ १९ ॥

रा० टी०–एवमिति । वैदेह्या एवमुक्तः अत एव संरब्धः जातकोपः अत एव संरक्तलोचनः अत एव प्रस्फुरमाणोष्ठोऽहं क्रोधात् हेतोः आश्रमात् अभिनिर्गतः ॥ २० ॥

गो० टी०–एवमिति । क्रोधादिति काकाक्षिन्यायेनोभयत्रान्वेति ॥ २० ॥

21] ति० टी०–दुष्कृतमकृत्यं कृतमिति शेषः ॥ २१ ॥

रा० टी०–एवमिति । संतापमोहितो रामः एवं ब्रुवाणं सौमित्रिमब्रवीत् । तद्वचनाकारमाह–तां सीतां विना यत्त्वमिहागतः तत् दुष्कृतं न कर्तव्यमित्यर्थः ॥ २१ ॥

गो० टी०–एवमिति तां विना त्वमागत इति यत् तदुष्कृतम् अकृत्यम् ॥ २१ ॥

22] ति० टी०–त्वदक्षार्थमिति चेन्नेत्याह–जानन्नपीति । अनेन मैथिल्याः क्रोधवाक्येन किं भवानाश्रमान्निर्गतः ॥ २२ ॥

रा० टी०–जानन्निति । मां राक्षसामपवारणे समर्थं जानन्नपि यो भवान् मैथिल्या अनेन क्रोधवाक्येन निर्गतः तस्मै ते न परितुष्यामि यत् यस्मात् हेतोः मैथिलीं त्यक्त्वा त्वमसि एतेन त्वत्प्रेषणे सीताया आग्रहमवलोक्य तया सहैव त्वयाऽऽगन्तव्यमिति सूचितम् । सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०–उक्तं विवृणोति–जानन्नपीति ॥ २२ ॥

२३] ति० टी०–यन्मैथिलीं त्यक्त्वा इहागतोऽसि तेन ते न परितुष्यामि । यच्च क्रुद्धायाः स्त्रियाः परुषं श्रुत्वा त्वमिहागतोऽसि तेन ते न तुष्यामि । क्रुद्धजीणां वाक्ये मर्यादालेशस्याप्यभावादिति भावः ॥ २३ ॥

रा० टी०–क्रुद्धाया इति । क्रुद्धायाः स्त्रियाः परुषं वाक्यं श्रुत्वा अत एव क्रोधस्य वशम् आगम्य प्राप्य मम शासनं

१ अत्यर्थमिति गो. पाठः । २ अवाप्स्यसी गो. पाठः । ३ अन्तरप्रेप्सुरिति गो. पाठः । ४ हीति गो. पाठः । ५ यत्त्वमागत इति गो पाठः । ६ विनिवारणे इति गो. पाठः । ७ निःसृत इति गो. पाठः । ८ यद्यासीति गो. पाठः । ९चेति गो. पाठः ।

सर्वथा त्वपनीतं ते सीतया यत्प्रचोदितः । क्रोधस्य वशमागम्य नाकरोः शासनं मम ॥ २४ ॥
असौ हि राक्षसः शेते शरेणाभिहतो मया । मृगरूपेण येनाहमाश्रमादपवाहितः ॥ २५ ॥
विकृष्य चापं परिधाय सायकं सलीलबाणेन च ताडितो मया ।
मार्गीं तनुं त्यज्य च विक्लवस्वरो बभूव केयूरधरः स राक्षसः ॥ २६ ॥
शराहतेनैव तदार्तया गिरा स्वरं ममालम्ब्य सुदूरसुश्रवम् ।
उपाहृतं तद्वचनं सुदारुणं त्वमागतो येन विहाय मैथिलीम् ॥ ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ।

अनेकदुर्निमित्तदर्शनात्सीताविपदमाशङ्कमानो रामस्तूर्णं लक्ष्मणेन समसुज्ज प्राविशत्तथा नानाविहारश्लेष्वन्विष्यमाणोऽपि तामलभमानस्तद्वार्तां तरुमृगादीन् प्रति पप्रच्छ । अथ क्वचन तद्वधलिङ्गादर्शनाद्रावणमेवैषणादीन्यूत्प्रेक्षमाणो मनसो विनोदाय पुनस्तामन्विष्यन्वने परिश्रमति ।

भृशमाव्रजमानस्य तस्याधो वामलोचनम् । प्रास्फुरच्चास्वलद्वामो वेपथुश्चास्य जायते ॥ १ ॥

त्वं नाकरोः अत एव सीतया प्रतिचोदितः सन् इहागतः यद् तत् त्वया सर्वथा अपनीतं नीतिविरुद्धं कृतमित्यर्थः ॥२३॥२४॥

गो० टी०–अनेनेत्युक्तं विशदयति–नहीति । स्त्रिया इत्यविवेकसंभवानास्त्रैवं स्त्रीष्वपि विशेषज्ञाप्नाय कुद्धाया इति । यस्त्वं कुद्धायाः स्त्रियाः परुषं श्रुत्वा इहागतः तस्य ते मैथिलीं त्यक्त्वा यासीति यत्तत्कर्म न परितुष्यामि ॥ २३ ॥

२४] ति० टी०–अपनीतम् अपनयोऽनीतिरिति यावत्, कृतेति शेषः । यतया प्रचोदितः सन्क्रोधवशं प्राप्य मम शासनं नाकरोः ॥ २४ ॥

गो० टी०–सर्वथेति । नाकरोः शासनं ममेति यत्तत्सर्वथा ते अपनीतम् अपनयः कुद्धया स्त्रिया यत्किंचित्परुषमुक्तं, चेत्तत्तोढव्यम् । कथंचिदसहने बहिरागत्यान्तर्हितो भूत्वा तत्परिपालनं कर्तव्यं केवलमागमनं तवापनीतिरेवेति भावः ॥ २४॥

२५] ति० टी०–अधुना स्वदृत्तान्तमाह–असाविति । बुद्धिस्थित्यैवं निर्देशः । अपवाहितो दूरमाकृष्टः ॥ २५ ॥

रा० टी०–स्वसदृशस्वरोच्चारणकर्तारं बोधयन् स्वदृत्तान्तमाह–असाविति । येन मृगरूपेण आश्रमादहमपवाहितः सोऽसौ राक्षसः शरेणाभिहतः सन् शेते ॥ २५ ॥

गो० टी०–अपनीतिमेवोपपादयितुं स्वरान्यथाभावं दर्शयति–असावित्यादिश्लोकत्रयेण ॥ २५ ॥

२६] ति० टी०–परिधाय संधाय । सलीलबाणेन नातिविकृष्य सुखेन । मार्गीं मृगसंबन्धिनीम् ॥ २६ ॥

रा० टी०–विकृष्येति । चापं विकृष्य सायकं बाणं परिधाय संधाय सलीलबाणेन लीलापूर्वकप्रक्षिप्तशरेण मया ताडितः स मृगरूपः मार्गीं मृगसंबन्धिनीं तनुं त्यक्त्वा त्यक्त्वा केयूरधरः अङ्गदविशिष्टो राक्षसो बभूव ‘ केयूरमङ्गदं तुल्ये ’ इत्यमरः ॥ २६ ॥

गो० टी०–विकृष्येति । परिधाय संधाय सलीलबाणेन लीलार्थबाणेन मार्गीं मृगसंबन्धिनीं त्यक्त्वा त्यक्त्वा सविक्लवस्वरः सदीनस्वरः केयूरधरः अङ्गदधरः । आर्षादित्यनेन दीर्घातीतत्वं गम्यते ॥ २६ ॥

२७] ति० टी०–स इवेऽपि संश्रवः संश्रवणं यस्य तं स्वरं मम मत्स्वरसदृशमालम्ब्य तद्वचनमुपाहृतम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

रा० टी०–शरेति । शराहतेन राक्षसेन मम स्वरम् आलम्ब्य अनुकृत्य सुदूरसुश्रवं सुदूरे अतिदूरेऽपि श्रवः श्रवणं यस्य तत् सुदारुणं वचनं वाक्यम् आर्तया गिरा दीनया उदाहृतम्, येन वचनेन मैथिलीं विहाय त्वमिहागतः ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतिलके रामायणारण्यकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

गो० टी०–शरेति । तदेति छेदः । सुदूरे संश्रवः श्रवणं यस्य तं मम स्वरं मत्स्वरसदृशं स्वरम् आलम्ब्य आश्रित्य आर्तया गिरा दीनया वाचा शराहतेन तेनैव तदा तस्मिन् काले सुदारुणं तद्वचनमुदाहृतम् । येन वचनेन श्रुतेन मैथिलीं विहाय आगतोऽसि ॥ २७ ॥

अस्मिन् सर्गे सप्तविंशतिश्लोकाः ।

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

१] ति० टी०–आव्रजमानस्याश्रममागच्छतः । अधः प्रास्फुरत्स्वयमस्खलद्वेपथुः कम्पश्चास्याजायत ॥ १ ॥

---

१ आपन्न इति गो. पाठः । २ स इति गो. पाठः । ३ संश्रवमिति गो. पाठः । ४ उदाहृतमिति गो. पाठः । ५ अप्यजायतेति गो. पाठः ।

उपालक्ष्य निमित्तानि सोऽशुभानि[1] मुहुर्मुहुः । अपि क्षेमं तु सीताया इति वै व्याजहार ह ॥ २ ॥
त्वरमाणो जगामाथ सीतादर्शनलालसः । शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ ३ ॥
उद्भ्रमन्निव वेगेन विक्षिपन्रघुनन्दनः । तत्र तत्रोटजस्थानमभिवीक्ष्य समन्ततः ॥ ४ ॥
ददर्श पर्णशालां च सीतया रहितां तदा । श्रिया विरहितां ध्वस्तां हेमन्ते पद्मिनीमिव ॥ ५ ॥
रुदन्तमिव वृक्षैश्च म्लानपुष्पमृगद्विजम्[2] । श्रिया विहीनं विध्वस्तं संत्यक्तं[3] वनदैवतैः[4] ॥ ६ ॥
विप्रकीर्णाजिनकुशं विप्रविद्धबृसीकटम्[5] । दृष्ट्वा शून्योटजस्थानं विललाप पुनः पुनः ॥ ७ ॥
हृता मृता वा नष्टा वा भक्षिता वा भविष्यति । निलीनाप्यथवा भीरुरथवा वनमाश्रिता ॥ ८ ॥

रा० टी०-लक्ष्मणं प्रति रामोक्तिं संपूर्ण्य रामवृत्तान्तमाह-भृशमित्यादिभिः । भृशम् अत्यन्तम् आव्रजमानस्य आश्रममागच्छतः तस्य रामस्य अधोवामलोचनं वामलोचनाधोभागः प्रास्फुरत् रामोऽस्खलच्च अत एव अस्य रामस्य वेपथुः कम्पः जायते अजायत 'अधो वामदृशः स्फुर्तौ बन्धुनिष्टं भजेत्पुमान्' इति 'प्रयाणकाले स्खलनं करोतीष्टस्य भञ्जनम्' इति च प्रसिद्धम् । यद्यपि सीतावियोगस्य संभोगशृङ्गारपोषकत्वेनानिष्टस्याभावात् दुर्निमित्तानुभवो न संभवति तथाऽपि तात्कालिकवियोगजनितदुःखाभासस्यावश्यंभावित्वात् दुर्निमित्तदर्शनं संभवत्येवेति दिक् ॥ १ ॥

गो० टी०-एवमियतां प्रबन्धेन संभोगशृङ्गारं वर्णयित्वा । अथ विप्रलम्भशृङ्गारमारभमाणो वेलारोहणाद्वर्णयितुमारभते । तदङ्गत्वेन रसान्तराणि दर्शयति । 'संयुक्तयोस्तु संभोगो विप्रलम्भो विपर्ययो' इति लक्षणात् । तत्र 'अभिलाषमनःसङ्गौ संकल्पो गुणसंस्तुतिः । प्रद्वेषः तापाभिपतत्यागावुन्मादो मूर्च्छना च मृतिः' इत्युक्तविप्रलम्भावस्थास्वष्टमीं दशामाह सर्गत्रयेण-भृशमित्यादि । आव्रजमानस्य आगच्छतः अधोवामलोचनं वामनेत्रस्याधःपक्ष्म प्रास्फुरत् । 'अधो वामदृशः स्फुर्तौ बन्धुनिष्टं भवेत् पुमान्' इति लक्षणात् । स्वयमस्खलत् प्रयाणकाले स्खलनं करोतीष्टस्य भञ्जनमिति प्रसिद्धिः । वेपथुः कम्पः ॥१॥

२-३] ति० टी०-अपि क्षेममिति तु व्याजहारेत्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०-उपेति । स रामः मुहुर्मुहुः अशुभानि निमित्तान्युपालक्ष्य सीताया अपि क्षेममस्तीति शेषः, इति वाचो व्याजहार ॥ २ ॥

गो० टी०-उपालक्ष्येति । अशुभानि अशुभसूचकानि॥२॥

रा० टी०-त्वरमाण इति । सीतादर्शनलालसः अत एव त्वरमाणो रामः जगाम आश्रमं प्राप । अथ अनन्तरम् आवसथम् आश्रमं शून्यं दृष्ट्वा उद्विग्नमानसो बभूव ॥ ३ ॥

गो० टी०-त्वरमाण इति । लालसः साभिलाषः आवसथं गृहम् । 'स्थानावसथवास्तु च' इत्यमरः॥ ३ ॥

४-५] ति० टी०-उद्भ्रमन्निवेत्यतो व्रजन् । विक्षिपन्हस्तादीन्विक्षिपंस्तत्र तत्र सीता भविष्यतीत्याशयाऽभिवीक्ष्य ॥४॥५॥

रा० टी०-उद्भ्रमन्निति । उद्भ्रमन् सीतान्वेषणार्थमितस्ततो गच्छन् वेगेन सीतादर्शनाभावजनितोद्वेगेन विक्षिपन् पाण्यादिप्रक्षेपं कुर्वन् सन् तत्र तत्र सीतास्थितिसंदिग्धे देश उटजस्थानं पर्णशालां समन्ततोऽभिवीक्ष्य सीतया रहिताम् अत एव हेमन्ते ध्वस्तां पद्मिनीमिव श्रिया शोभया विरहितां पर्णशालां ददर्श बुबुधे, दृशिर्ज्ञानसामान्ये । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०-उद्भ्रमन्निति । श्लोकद्वयमेकान्वयम् । वेगेन उद्भ्रमन्निव उत्पतन्निव विक्षिपन् इस्तादीनवयवानितस्ततः क्षिपन् ॥ ४ ॥ ५ ॥

६-७] ति० टी०-रुदन्तमित्यादेराश्रमो विशेष्यः । वर्णनीयमर्यादावेन कवेरपि संनिहितत्वैपरीत्यम् ॥ ६ ॥ ७ ॥

रा० टी०-रुदन्तमिति । वनदैवतैः संत्यक्तं सीतानुगमनकर्तृत्वेन वनदैवतरहितमित्यर्थः, अत एव म्लानाः पुष्पमृगद्विजा यस्मिँस्तम् अत एव रुदन्तमिव अत एव श्रिया शोभया विहीनम् अत एव विध्वस्तमिव विप्रकीर्णा इतस्ततः प्रक्षिप्ताः अजिनकुशा यस्मिन् तं विप्रविद्धबृसीकटं विप्रविद्धाः बहुसंख्याकाः बृसीकटाः मुन्यासनानि यस्मिन् तं, शून्योटजस्थानं शून्यं सीतारहितम् उटजस्थानं पर्णशाला यस्मिंस्तं, वृक्षैरुपलक्षितमाश्रमं पुनः पुनर्दृष्ट्वा विललाप विप्रकीर्णाजिनकुशमित्यनेन भूकम्पादिर्जात इति ध्वनितम्। श्लोकद्वयमेकान्वयि॥६॥७॥

गो० टी०-रुदन्तमिति । श्लोकद्वयमेकान्वयम् । वृक्षैः रुदन्तमिव स्थितं हीनस्वरभूङ्गत्वादिति भावः । पुष्पाणि सीतया पूर्वमर्पितानि द्विजाः पक्षिणः म्लानाः पुष्पमृगद्विजा यस्मिन् तत् तथोक्तम् । श्रिया कान्त्या विहीनं विध्वस्तं विशीर्णं रावणसंन्यासिने दत्तत्वेन विप्रकीर्णाः अयथास्थानस्थिता अजिनकुशाः यस्मिन् तत्तथा ग्रहणकाले सीताया अवलम्बितत्वेन विप्रविद्धबृसीकटं विपर्यस्तमुन्यासनास्तरणं शून्यं सीतारहितं विललाप पर्यदेवयत् ॥ ६ ॥ ७ ॥

८-९] ति० टी०-नष्टाऽदर्शनं गता स्वयोगशक्त्या पुनरलभ्यदर्शना जातेति तात्पर्यम् ॥ ८ ॥ ९ ॥

१ निति गो. पाठः । २ चेति गो. पाठः । ३ म्लानेति गो. रा. पाठः । ४ संत्यक्तवनदेवतामिति गो. पाठः । ५ विप्रकृद्धेति रा. पाठः । ६ शून्यं निजस्थानमिति गो. पाठः ।

गता विचेतुं पुष्पाणि फलान्यपि च वा पुनः । अथवा पद्मिनीं याता जलार्थं वा नदीं गता ॥ ९ ॥
यत्नान्मृगयमाणस्तु नाससाद वने प्रियाम् । शोकरक्तेक्षणः श्रीमानुन्मत्त इव लक्ष्यते ॥ १० ॥
वृक्षाद्वृक्षं प्रधावन्स [2]गिरींश्चापि नदीनदम् । [3]वभ्राम विलपन्रामः शोकपङ्कार्णवप्लुतः ॥ ११ ॥
अस्ति कश्चित्त्वया दृष्टा सा कदम्बप्रिया प्रिया । कदम्ब यदि जानीषे शंस सीतां शुभाननाम् ॥ १२ ॥
स्निग्धपल्लवसंकाशां पीतकौशेयवासिनीम् । शंसस्व[6] यदि सा दृष्टा बिल्व बिल्वोपमस्तनी ॥ १३ ॥
अथवाऽर्जुन शंस त्वं प्रियां तामर्जुनप्रियाम् । जनकस्य सुता तन्वी यदि जीवति वा न वा ॥ १४ ॥

रा० टी०—उद्वेलापाकारमाह—हृतेति । यतः अमृता मरणधर्मरहिता अतः अनष्टा ध्वंसप्रतियोगिनी भविष्यति अत एव अभक्षिता भक्षितापि न भविष्यति अतः हृता वा भीरुरपि वनमाश्रिता सती निलीना मत्प्रीतिपरीक्षार्थं गुप्ता वा पुष्पादीनि विचेतुं गता वा जलार्थं पद्मिनी सरसीं याता वा नदीं गता वा । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—विलापमाह द्वाभ्याम्—हृतेत्यादि । हृता अपहृता नष्टा यादृच्छिकमदर्शनं गता निलीना विनोदाय व्यवहिता अथवा निर्जनतया भीरुः सती गूढं वनमागता पद्मिनीं याता स्नानार्थमिति शेषः नदीं गतेत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ८ ॥ ९ ॥

१०] ति० टी०—नदीं गतेत्यादि संतक्यं तत्र तत्र यत्नान्मृगयमाणोऽपि नाससाद । उन्मत्त इवेत्ययमिवशब्दो मृगयमाणः प्रधावन्बभामेत्यादौ सर्वत्र संबन्ध्यः । एतत्सर्वं लोकव्यवहारनटनं भगवतश्चिरस्वरूपस्य लोके सर्वतो भार्या प्रियतमेति बोधयितुम् । अत एव मातापितृवियोगो नैतावच्छोककारणम् । तदुक्तं भागवते—'स मनुजोऽजभवार्चिताङ्घ्रिरलक्ष्यवीर्यः' इत्यादिना विशिष्टं राममुपक्रम्य 'रक्षोवधेन हतवह्निपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् । भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार ॥' इति । 'नेदं यशो रघुपतेः सुरयाच्ञयातलीलातनोरधिकसाम्यविमुक्तधाम्नः । रक्षोवधो जलधिबन्धनमक्षपूर्गैर्यत्तस्य बन्धुहनने कपयः सहायाः ॥' इति च । यथा सुग्रीवाद्याश्रयणवदिदमपि लीलैवेति न तत्तस्य स्तुतिरिति तदर्थः । लीलाप्रयोजनं च तच्छ्रवणेन लोकोद्धारः । एतन्नवमे एकादशाध्यायस्थे पथे । तथा पञ्चमेऽपि—'मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः । कुतोऽन्यथा स्यादमतः स्व आत्मन्सीताकृतानि व्यसनानीश्वरस्य ॥' इति ॥ १० ॥

रा० टी०—यत्नादिति । शोकरक्तेक्षणः संभोगश्रृङ्गारपोषकसीताविरोगजनितशोकहेतुकारुणनयनविशिष्टः श्रीमान् स्वाभाविकसर्वसंपत्तिविशिष्टो रामः यत्नात् प्रियां सीतां मृगयमाण अन्वीक्षमाणोऽपि नाससाद प्राप अत एव उन्मत्त इव लक्ष्यते ॥ १० ॥

गो० टी०—यत्नादिति । शोकाद्धेतोः उन्मत्त इव लक्ष्यते । अलक्ष्यतेत्यर्थः ॥ १० ॥

११] ति० टी०—नदीनदं नदीसंबन्धिनदम् । जातावेकवचनम् । 'नारा' इति लोकप्रसिद्धम् । नदाः पश्चिमप्रवाहा इति कतकः । पश्चिमप्रवाहाया अपि नर्मदाया नदत्वव्यवहारभावाचिन्त्यं तत् ॥ ११ ॥

रा० टी०—उन्मत्तसादृश्यमेवाविष्कुर्वन्नाह—वृक्षादित्यादिभिः । शोकपङ्कार्णवप्लुतः शोकः पङ्कार्णव इव तत्र प्लुतो मग्नो रामः विलपन् वृक्षादीन् प्रधावंश्च सन् बभ्राम । नदीनदमिति समाहारद्वन्द्वः 'नदान्नदी' इति भूषणपाठः ॥ ११ ॥

गो० टी०—वृक्षादिति । नदात् पश्चिमप्रवाहात् शोकपङ्कार्णवाप्लुतो बभूव ॥ ११ ॥

१२] ति० टी०—उन्मत्त इवेत्युक्तं विवृणोति—अस्ति कश्चिदिति प्रभे । कदम्बप्रियत्वात्सर्वथा त्वया दृष्टेत्यर्थः । यदीति । 'वेदा यदि प्रमाणम्' इतिवत् ॥ १२ ॥

रा० टी०—अस्तीति । हे कदम्ब ! कदम्बप्रिया प्रिया सीता कश्चित्त्वया दृष्टाऽस्ति, यदि जानीषे तर्हि शुभाननां सीतां शंस कथय । कश्चिदिति प्रभे ॥ १२ ॥

गो० टी०—अथ शोकमोहातिरेकेणाचेतनेषु चेतनबुद्ध्या तान् प्रतिभाषते—अपीत्यादिना । कदम्बानि कदम्बपुष्पाणि प्रियाणि यस्याः सा कदम्बप्रिया प्रिया मत्कान्ता । अपिः प्रभे । एवं प्रभेऽपि प्रतिवचनादानमनादरकृतमिति मत्वाह—कदम्बेति । शुभाननामिति चिह्नकीर्तनम् । कदम्बप्रियेत्यनेन दर्शनसंभावनोच्यते ॥ १२ ॥

१३] ति० टी०—स्निग्धपल्लवसंकाशां तद्वत्कोमलाङ्गीम् ॥ १३ ॥

रा० टी०—स्निग्धेति । हे बिल्व ! यदि सा सीता दृष्टा तर्हि स्निग्धपल्लवसंकाशां कोमलपल्लवसदृशकोमलाङ्गीं सीतां त्वं शंस ॥ १३ ॥

गो० टी०—स्निग्धेति । स्निग्धपल्लवसंकाशेत्यनेन कोमलाङ्गीत्यनुक्तम्, बिल्वोपमस्तनीत्यनेन पद्मिनीजातिरुक्ता । तदुक्तं रतिरहस्ये पद्मिनीलक्षणे—'स्तनयुगमपि यस्याः श्रीफलश्रीविडम्बि' इति ॥ १३ ॥

१४] ति० टी०—अर्जुनः करवीरः । 'करवीरः करालश्च करवीरी तथार्जुनः' इति निघण्टुः ॥ १४ ॥

२ शोकादिति गो० पाठः । २ गिरिश्चादिं नद्यानदीमिति गो० पाठः । ३ बभ्रूवेति गो० पाठः । ४ आद्भुत इति गो० पाठः । ५ संकाशा ……वासिनीति गो० पाठः । ६ त्वमिति रा० पाठः । ७ येति गो० पाठः । ८ भीरुरिति गो० पाठः । ९ अन्वीक्षमाण इति युक्त भाति ।

ककुभः ककुभोरूं तां व्यक्तं जानाति मैथिलीम् । लतापल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः ॥ १५ ॥
भ्रमरैरुपगीतश्च यथा द्रुमवरो ह्यसि । एष व्यक्तं विजानाति तिलकस्तिलकप्रियाम् ॥ १६ ॥
अशोक शोकापनुद शोकोपहतचेतनम् । त्वन्नामानं कुरु क्षिप्रं प्रियासंदर्शनेन माम् ॥ १७ ॥
यदि ताल त्वया दृष्टा पक्वतालोपमस्तनी । कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥ १८ ॥
यदि दृष्टा त्वया जम्बो जाम्बूनदसमप्रभा । प्रियां यदि विजानासि निःशङ्कं कथयस्व मे ॥ १९ ॥
अहो त्वं कर्णिकाराद्य पुष्पितः शोभसे भृशम् । कर्णिकारप्रियां साध्वीं शंस दृष्टा यदि प्रिया ॥ २० ॥
चूतनीपमहासालान्पनसान्कुरवकांस्तथा । दाडिमानपि तान्गत्वा दृष्ट्वा रामो महायशाः ॥ २१ ॥

रा० टी०—अथवेति । हे अर्जुन ! अथवा गर्वादिना बिल्वादिकर्तृकप्रत्युत्तराभावे जनकस्य सुता सीता यदि जीवति प्राणान् पोषयति तर्हि प्रियां शंस न वा उपवासादिना क्वचित्तिष्ठतीत्यर्थः, तर्हि शंस । किंच जीवति मया सह लोकान् पालयिष्यति पुनर्मां मेलिष्यतीत्यर्थः । तर्हि शंस न वा तन्मेलनमेव पालनहेतुरिति तात्पर्यम् । तर्हि अर्जुनप्रियां प्रियां सीतां त्वं शंस ॥ १४ ॥

गो० टी०—अथवेति । बिल्वेनानुक्तौ अयं मत्सरान्न कथयतीत्यर्जुनदृष्टं पृच्छति । यदि ज्ञातं यदीत्यर्थः ॥ १४ ॥

१५] ति० टी०—ककुभो मरुवकः ककुभस्य बहिस्त्वचोऽपि श्लक्ष्णत्वात्तद्वच्छ्लक्ष्णोरूम् । तस्य ज्ञातृत्वोपपादकम्—लतेत्यादि । तत्संबन्धं विना कथमियती संपदस्येति भावः ॥ १५ ॥

रा० टी०—ककुभ इति । एषः ककुभः अर्जुनविशेषः वनस्पतिः वृक्षः यतः लताप्राढ्यो भाति अतः ककुभोरूम् अर्जुनविशेषवृक्षशाखासदृशश्लक्ष्णोरुविशिष्टां मैथिलीं व्यक्तं स्फुटं जानाति ॥ १५ ॥

गो० टी०—प्रतिवचनादानेनायं न जानातीति मत्वा वृक्षान्तरं तत् ज्ञानं संभावयति—ककुभ इति । ककुभोऽर्जुनविशेषः । स च क्षीणमूरुतुल्यो भवति अत एवमुच्यते ककुभोरूमिति । केचित्करभोरूमिति वदन्ति । तत्प्रकृतशैलीविरुद्धम् । कदम्ब कदम्बप्रिया बिल्व बिल्वोपमस्तनीत्येवं ब्रुवन्ति । ज्ञाने हेतुमाह—यथेति । अनेन परिचयसंभावनोक्ता । जानाति कथं न कथमपीत्यर्थसिद्धम् । एवमुत्तरत्रापि श्लोके द्रष्टव्यम् ॥ १५ ॥

१६] ति० टी०—उप समीपे गीतः क्रियमाणश्लङ्कार इत्यर्थः । तथा द्रुमवरो ह्यसीति स्तौति । तत उत्तरमलब्धवाऽन्यं प्रत्याह—एष इति । तत्प्रियत्वात्तज्ज्ञेयत्वसंभावना ॥ १६ ॥

रा० टी०—भ्रमरैरिति । यतो भ्रमरैरुपगीतः अत एव द्रुमवरोऽसि अत एव एष तिलको भवान् तिलकप्रियां सीतां व्यक्तं स्फुटं विजानाति ॥ १६ ॥

गो० टी०—भ्रमरैरिति । उप समीपे गीतः कृतवेदघोष इति ध्वन्यते । यथा येन प्रकारेण एवंभूतो द्रुमवरोऽयं तेन प्रकारेण मन्ये एष जानाति तिलकः ॥ १६ ॥

१७-१८] ति० टी०—त्वन्नामानम् अशोकं कुर्वित्यर्थः । शोकापहृदत्वादेतत्करणयोग्यता ॥ १७ ॥ १८ ॥

रा० टी०—अशोकेति । शोकापहृद शोकनिवर्तक हे अशोक ! प्रियासंदर्शनेन त्वन्नामानमशोकं मां क्षिप्रं कुरु ॥ १७ ॥

गो० टी०—अशोकेति । स्ववचनकरणाय स्तौति—शोकापहृदेति । पचाद्यच् गुणाभाव आर्षः । त्वन्नामानं कुरु अशोकं कुरु संदर्शनेन ज्ञापनेन शोकनिवृत्त्यर्थम् प्रियां संदर्शयेत्यर्थः ॥ १७ ॥

रा० टी०—यदीति । हे ताल ! तालोपमस्तनी सीता यदि त्वया दृष्टा यदि च मयि कारुण्यं तर्हि वरारोहां सीतां कथयस्व तद्वृत्तान्तं वद ॥ १८ ॥

गो० टी०—यदि तालेति । पक्वतालेति संबन्धोक्तिः ॥ १८ ॥

१९-२०] ति० टी०—निःशङ्कम् मरणादिकथनेऽपि शङ्का न कार्येति भावः ॥ १९ ॥ २० ॥

रा० टी०—यदीति । हे जम्बो ! जाम्बूनदसमप्रभा प्रिया यदि त्वया दृष्टा यदि च प्रियां विजानासि तर्हि निःशङ्कं सीताशङ्काराहित्यं यथा भवति तथा कथयस्व ॥ १९ ॥

गो० टी०—यदीति । जम्बु "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वम्, "एङ्ह्रस्वात्संबुद्धेः" इति सुलोपः । स्निग्धताकारेण जम्बूफलौपम्यं विजानीषे चिह्नत इति शेषः ॥ १९ ॥

रा० टी०—अहो इति । हे कर्णिकार ! त्वं सुपुष्पैर्भृशमहो आश्चर्यमथ शोभसे अतः प्रिया सीता यदि दृष्टा तर्हि कर्णिकार ! प्रियां साध्वीं सीतां शंस ॥ २० ॥

गो० टी०—अहो इति । सुपुष्पैरिति धार्मिकत्वोक्तिः ॥ २० ॥

२१] ति० टी०—रामः पप्रच्छेति शेषः ॥ २१ ॥

रा० टी०—चूतेति । महायशाः आरामः सर्वाभिरामदाता रामः चूतादीन् गत्वा दृष्ट्वा च पृच्छन् सन् उन्मत्त इव लक्ष्यते । इवेन विप्रलम्भदशायाः उन्मादात् वैलक्षण्यं सूचितम् । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

१ यथेति गो. पाठः । २ ह्ययमिति गो. पाठः । ३ हतेति रा. पाठः । ४ चेतसमिति गो. पाठः । ५ तालफलेति गो. पाठः । ६ सीता जम्बु जम्बुफलोपमामिति गो. पाठः । ७ विजानीषे इति गो. पाठः । ८ सुपुष्पैरिति गो. रा. पाठः । ९ प्रिया साध्वीति गो. पाठः । १० कुरवान्धवानिति गो. पाठः । ११ असनानिति गो. पाठः ।

बकुलानथ पुंनागांश्चन्दनान्केतकांस्तथा । पृच्छन्रामो वने भ्रान्त उन्मत्त इव लक्ष्यते ॥ २२ ॥
अथवा मृगशावाक्षीं मृग जानासि मैथिलीम् । मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत् ॥ २३ ॥
गज सा गजनासोरूर्यदि दृष्टा त्वया भवेत् । तां मन्ये विदितां तुभ्यमाख्याहि वरवारण ॥ २४ ॥
शार्दूल यदि सा दृष्टा प्रिया चन्द्रनिभानना । मैथिली मम विस्रब्धः कथयस्व न ते भयम् ॥ २५ ॥
किं धावसि प्रिये नूनं दृष्टासि कमलेक्षणे । वृक्षैराच्छाद्य चात्मानं किमां न प्रतिभाषसे ॥ २६ ॥
तिष्ठ तिष्ठ वरारोहे न तेऽस्ति करुणा मयि । नात्यर्थं हास्यशीलासि किमर्थं मामुपेक्षसे ॥ २७ ॥
पीतकौशेयकेनामि सूचिता वरवर्णिनि । धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम् ॥ २८ ॥
नैव सा नूनमथवा हिंसिता चारुहासिनी । कृच्छ्रं प्राप्तं हि मां नूनं यथापेक्षितुमर्हति ॥ २९ ॥

गो० टी०—चूतेति । श्लोकद्वयमेकान्वयम् । क्रियाभेदात्रामपदद्वयम् । नीपः कदम्बः कुरवान् कुरबकान् रामः चूतादीन् गत्वा दृष्ट्वा पृच्छन् । आधावनेन सर्वत्र भ्रान्तः कृतभ्रमणः रामः उन्मत्तः चित्तविभ्रमवानिव लक्ष्यते अलक्ष्यत ॥२१॥२२॥

२२] ति० टी०—उन्मत्त इव मानुषव्यवहारनटनवशात् । वस्तुतो नोन्मत्त इत्यर्थः । उन्मादस्यापि विरहे औचित्यादशावस्थासु गणितत्वाच्च ॥ २२ ॥

२३] ति० टी०—मृगीभिः सहिता भवेदित्यादौ संभावनायां लिङ् । संभावनाबीजं मृगविप्रेक्षणीत्वम् ॥ २३ ॥

रा० टी०—वृक्षान् पृष्ट्वा तत उत्तरमलब्ध्वा च मृगादीन् पृच्छति—अथवेत्यादिभिः । अथवा वृक्षकर्तृकोत्तराभावेऽपि हे मृग ! कान्ता सीता यतो मृगविप्रेक्षणी मृगनेत्रा अतः मृगीभिः सहिता भवेत् अतः मृगशावाक्षी मृगबालनयनीं सीतां त्वं जानासि, जानासि चेद्वदेत्यर्थः ॥ २३ ॥

गो० टी०—इति वृक्षान् पृष्ट्वा मृगान् पृच्छति—अथेति । वृक्षा मा कथयन्तु त्वं तु कथयत्याशयेनाथवाशब्दप्रयोगः । मृगशावस्य मृगबालस्याक्षिणी वाक्षिणी यस्यास्ताम् । मृगस्य सीताज्ञाने योग्यतामाह—मृगेति । मृगवद्विविधं प्रेक्षत इति मृगविप्रेक्षणी सहिता । भवेदिति संभावनायां लिङ् ॥ २३ ॥

२४] ति० टी०—गजस्य वेत्तृत्वसंभावनाबीजं गजनासोरुत्वम् । यद्वोक्त्वादूरदर्शित्वम् ॥ २४ ॥

रा० टी०—गजेति । हे वरवारण ! गजनासोरूः गजस्य वारणस्य नासावदूरू यस्याः सा सीता यदि त्वया दृष्टा भवेत् तर्हि तां सीतां तुभ्यं तव विदितां त्वत्कर्तृकाकारविशेषज्ञानविषयीभूतामहं मन्ये अत आख्याहि कथय ॥ २४ ॥

गो० टी०—गजेति । गजनासोरूः करिकरोरूः वरवारण वारणश्रेष्ठ हे गज ! तां सीतां तुभ्यं तव विदितां मन्ये शङ्के । गजनासोरूः सा त्वया यदि दृष्टा भवेत्तदाख्याहि ॥ २४ ॥

२५] ति० टी०—न ते भयम् त्वया भक्षिता चेदपि तथा कथनेऽपि तव मत्तो न भयमित्यर्थः ॥ २५ ॥

रा० टी०—शार्दूलेति ! हे शार्दूल चन्द्रनिभाननाह सा सीता यदि त्वया दृष्टा तर्हि मम विस्रब्धः विश्वस्तस्त्वं कथयस्व भयं सीताभीतिस्ते न ॥ २५ ॥

गो० टी०—शार्दूलेति । अत्र तुल्यगतित्वरूपः संबन्धो बोध्यः । न ते भयं शरस्य तव भयं नास्ति । एतेन पूर्वोक्ताः सर्वे भीत्या न प्रत्युचुरिति रामस्याशयः ॥ २५ ॥

२६] ति० टी०—अतिविरहवशात्सर्वतस्तद्भावस्थां नाट्यति—किमिति ॥ २६ ॥

रा० टी०—शार्दूलादप्युत्तरमलब्ध्वा अनुरागातिशयात् दृश्यमानामिव सीतां प्रत्याह—किमिति । हे प्रिये ! त्वं दृष्टा मयाऽवलोकिताऽसि अतः वृक्षैरात्मानमाच्छाद्य किं किमर्थं धावसि मां किं न प्रतिभाषसे ॥ २६ ॥

गो० टी०—पुनरवस्थाविशेषं दर्शयति—किं धावसीति । प्रिये किमर्थं धावसि धावन्ती दृष्टासि ननम । अथादर्शनाद्वाह—वृक्षैरिति । इदं च पूर्वापेक्षयाऽतिरिक्तं दर्शनान्तरम् ॥२६॥२७॥

२७] ति० टी०—नात्यर्थं हास्यशीलासि नात्यन्तं परिहासशीलासि । किमर्थमिति । इतः परमदर्शने मूर्तिर्मे प्रसक्तेति भावः ॥ २७ ॥

रा० टी०—तिष्ठेति । त्वं तिष्ठ तिष्ठ मयि ते करुणा नास्ति काकाऽस्त्येवेत्यर्थः । ननु हास्यार्थमेवं क्रियत इत्यत आह—अत्यर्थम् अत्यन्तं हास्यशीला हास्यस्वभावा त्वं नासि अतो मां किं किमर्थमुपेक्षसे ॥ २७ ॥

२८] ति० टी०—पीतवस्त्रेण सूचितासि धावन्ती दृष्टासि च तस्मात्तिष्ठ ॥ २८ ॥

रा० टी०—पीतेति । पीतकौशेयकेन सूचिता उपलक्षिता धावन्त्यपि त्वं मया दृष्टा अतः यदि सौहृदमस्ति तर्हि तिष्ठ ॥ २८ ॥

गो० टी०—पीतेति । अन्तर्हितापि पीतकौशेयेन सूचिताऽसि । इदमपि प्रत्ययान्तरम् । पुनरपि प्रत्ययान्तरमाह—धावन्त्यपीति ॥ २८ ॥

२९] ति० टी०—पुनर्बोधावस्था नूनं सा नैव या दृष्टा । तिं सा केत्यत्राह—अथवा हिंसिता रक्षोभिः । तत्र हेतुः—यथा

१ मल्लिका माधवीश्चैव चम्पकाञ्केतकानिति गो. पाठः । २ विस्रब्धमिति गो. पाठः । ३ दूरमिति गो. पाठः । ४ नेति गो. पाठः । ५ यथोपेक्षितुमिति गो. रा. पाठः । ६ अर्हसीति रा. पाठः । ७ नयनामिति युक्तं भाति ।

व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः । विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया ॥ ३० ॥
नूनं तच्छुभदन्तोष्ठं सुनासं शुभकुण्डलम् । पूर्णचन्द्रनिभं ग्रस्तं मुखं निष्प्रभतां गतम् ॥ ३१ ॥
या हि चन्दनवर्णाभा ग्रीवा ग्रैवेयकोचिता । कोमला विलपन्त्यास्तु कान्तायाः भक्षिता शुभा ॥३२॥
नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ । भक्षितौ वेपमानाग्रौ सहस्ताभरणाङ्गदौ ॥ ३३ ॥
मया विरहिता बाला रक्षसां भक्षणाय वै । सार्थेनेव परित्यक्ता भक्षिता बहुबान्धवा ॥ ३४ ॥
हा लक्ष्मण महाबाहो पश्यसे त्वं प्रियां क्वचित् । हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः ॥ ३५ ॥
इत्येवं विलपन्रामः परिधावन्वनाद्वनम् । क्वचिदुद्भ्रमते योगात्क्वचिद्भ्रमति वेगतः ॥ ३६ ॥

एवंप्रकारेण कृच्छ्रं नूनं मां प्राप्तं सापेक्षितुमर्हति । नापेक्षते तन्मामेव मरित्यर्थः । 'उपेक्षितुम्' इति पाठे काकुः ॥ २९ ॥

रा० टी०—नेति । सा मरणधर्मरहिता त्वं नैव हिंसिताऽसि अतः कृच्छ्रं त्वद्वियोगजनितदुःखं प्राप्तं मां यथा यथावत् उपेक्षितुमनादर्तुमर्हसि काकुा नेत्यर्थः । नञोऽत्राप्यन्वयो वा ॥ २९ ॥

गो० टी०—अथ सर्वात्मना दर्शनाभावात् प्रकारान्तरमुत्प्रेक्षते—नैवेति । अथवा सात्र नैव वियते किंतु हिंसिता । अत्र हेतुमाह—कृच्छ्रमिति । कृच्छ्रं दुःखं प्राप्तं मां यथा येन प्रकारेण उपेक्षितुं नार्हति ननं तेन प्रकारेण हिंसितैव ननम् ॥ २९ ॥

३०] ति० टी०—उक्तमेव स्पष्टयति- व्यक्तमिति ॥३०॥

रा० टी०—व्यक्तमिति । आविरहिता आविभिः स्वजनरूपरक्षकैः रहिता शून्या सा त्वं राक्षसैर्यदि भक्षिता तर्हि भद्राणि राक्षसावयवान् विभज्य भक्षयित्वा मय मां प्रामुहि॥३०॥

गो० टी०—एतदेव द्रढयति—व्यक्तमिति ॥ ३० ॥

३१] ति० टी०—निष्प्रभतां गतम् रक्षोभिर्ग्रासादिति शेषः ॥ ३१ ॥

रा० टी०—भक्षणमेव प्रकल्प्याह—नूनमिति । शुभदन्तादिविशिष्टं पूर्णचन्द्रनिभं मुखं सीतावदनं यदि ग्रस्तं राक्षसैर्भक्षितं तर्हि निष्प्रभतां गतं भविष्यतीति शेषः । ननमिति यदीत्यर्थे ॥ ३१ ॥

गो० टी०—वक्ष्यमाणदशामनुसंधाय प्रलपति—नूनमिति । पूर्णचन्द्रमिव ग्रस्तं राहुग्रस्तं पूर्णचन्द्रमिव स्थितमित्यर्थः । एवंभूतं मुखं निष्प्रभतां गतं ननमित्यन्वयश्च ॥ ३१ ॥

३२] ति० टी०—सर्वत्रोत्प्रेक्षा । ग्रैवेयं ग्रीवाभूषणम् ॥ ३२ ॥

रा० टी०—सेति । चम्पकवर्णाभा चम्पकवर्णसदृशवर्णविशिष्टा ग्रैवेयकोचिता अलङ्कारयोग्या विलपन्त्याः कान्तायाः ग्रीवा भक्षिता एतेन तस्या अपि निष्प्रभात्वं भविष्यतीति सूचितम् ॥ ३२ ॥

गो० टी०—सा हीति । ग्रैवेयकं कण्ठभूषणम् । या उक्तविशेषणा ग्रीवा सा भक्षिता भवेदित्यन्वयः ॥ ३२ ॥

३३] ति० टी०—विक्षिप्यमाणावितस्ततः क्षिप्यमाणौ ॥ ३३ ॥

रा० टी०—नूनमिति । सहस्ताभरणाङ्गदौ हस्ताभरणैरङ्गदेन च विशिष्टौ बाहू भक्षितौ पूर्ववदेव सूचनम् ॥ ३३ ॥

गो० टी०—नूनमिति । हस्ताभरणं कटकम् ॥ ३३ ॥

३४] ति० टी०—रक्षसां भक्षणाय सा बाला मया स्वविरहिता कृता । बहुबान्धवापि या सार्थेन परित्यक्ता हीना स्त्री सेव भक्षिता रक्षोभिरिति शेषः ॥ ३४ ॥

रा० टी०—मयेति । बहुबान्धवाऽपि सा सीता रक्षसां भक्षणाय इव मया विरहिता कृता अत एव सार्थेन पान्थसमूहेन परित्यक्ता स्त्री इव भक्षिता ॥ ३४ ॥

गो० टी०—मयेति । भक्षणाय विरहिताऽऽसीदिति पूर्वार्धेऽन्वयः । सार्थेन पथिकसमुदायेन ॥ ३४ ॥

३५] ति० टी०—पश्यसे पश्यसि हा सीते इकारलोप आर्षः ॥ ३५ ॥

रा० टी०—हेति । हा लक्ष्मण! त्वं प्रियां क्वचित्पश्यसे पश्यसि इति पुनः पुनरुवाचेति शेषः ॥ ३५ ॥

गो० टी०—लक्ष्मणमामन्त्र्य पृच्छति—हा लक्ष्मणेति । पश्यसि पश्यसि किं हा सीते! इति वक्तव्ये हा सीतेति संधिरार्षः । इतिकरणस्य सर्गारम्भस्थेन विललापेत्यनेनान्वयः ॥ ३५ ॥

३६] ति० टी०—परिधावन्नुद्भ्रमते उत्पतति विभ्रमते वात्यावत् ॥ ३६ ॥

रा० टी०—इतीति । इत्येवंप्रकारेण विलपन् वनाद्वनं परिधावँश्च रामः क्वचिदुद्भ्रमते उत्पतति क्वचिद्भूलाद्विभ्रमते वात्येव भ्रमणं प्राप्नोतीत्यर्थः ॥ ३६ ॥

गो० टी०—इत्येवमिति सार्धश्लोक एकान्वयः । प्रथमार्धं पूर्वानुवादरूपं क्वचिदधिष्ठानसादृश्याभावेऽपि वेगात् शोकवेगादेव उद्भ्रमते सीताप्रतीतिरूपं भ्रमं प्राप्नोति । क्वचिल्लतादौ बलात् सादृश्यबलात् विभ्रमते तत्प्रतीतिभ्रमं लभते । मत्त इवाभाति मत्तवत्परिभ्रमतीत्यर्थः ॥ ३६ ॥

१ चाक्षिति गो. पाठः । २ चम्पकेति गो. रा. पाठः । ३ शोभितेति गो. पाठः । ४ पश्यसीति गो. पाठः । ५ वेगादिति गो. रा. पाठः ।

क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः । स वनानि नदीः शैलान्गिरिप्रस्रवणानि च ॥
काननानि च वेगेन भ्रमत्यपरिसंस्थितः ॥ ॥ ३७ ॥
तदा स गत्वा विपुलं महद्वनं परीत्य सर्वं त्वथ मैथिलीं प्रति ।
अनिष्ठिताशः स चकार मार्गणे पुनः प्रियायाः परमं परिश्रमम् ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ।

एवं बहुशोऽन्विष्याऽनासादितसीतमतो बहुशो विलपन्तं रामं सान्त्वयित्वा लक्ष्मणः पुनरन्वेषणे प्रवर्तयति । भूयोऽपि रामः सीता गिरिदर्यादिष्वन्विष्याऽनासाद्यैवंरूपमाक्रोशति ।

दृष्ट्वाऽऽश्रमपदं शून्यं रामो दशरथात्मजः । रहितां पर्णशालां च वैविद्ध्यान्यासनानि च ॥ १ ॥
अदृष्ट्वा तत्र वैदेहीं संनिरीक्ष्य च सर्वशः । उवाच रामः प्राकुश्य प्रगृह्य रुचिरौ भुजौ ॥ २ ॥
क्व नु लक्ष्मण वैदेही कं वा देशमितो गता । केनाहृता वा सौमित्रे भक्षिता केन वा प्रिया ॥ ३ ॥
वृक्षेणावार्य यदि मां सीते हसितुमिच्छसि । अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥ ४ ॥

३७] ति० टी०—अपरिसंस्थितः क्वचिदपि स्थितिमलभमानो भ्रमति ॥ ३७ ॥

रा० टी०—क्वचिदिति । कान्तान्वेषणतत्परः अत एव अपरिसंस्थितः क्वचिदपि स्थितिमप्राप्तो रामः वनादीनि भ्रमति अत एव मत्त इवाभाति । सार्धश्लोक एकान्वयी ॥३७॥

गो० टी०—स इति । दुर्गम्यानि वनानि दुर्गमाणि काननानि गिरेरुद्भूतानि प्रस्रवणानि गिरिप्रस्रवणानि 'उत्सः प्रस्रवणं वारि' इत्यमरः । अपरिसंस्थितः अप्रतिष्ठितः ॥ ३७ ॥

३८] ति० टी०—अनिष्ठिताशोऽनिष्पन्नाशः । मार्गणेऽन्वेषणे । पुनः परमं परिश्रमं चकार । 'अथो वा एष आत्मनः' इति श्रुतेस्तस्याः प्रियात्वम् । एतत्सर्वं लोकव्यवहारनटनमित्युक्तमेव, न त्वेतावता भगवति तमोरजसोः संभावनेति दिक् ॥३८॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षष्टितमः सर्गः ॥६०॥

रा० टी०—तदेति । विपुलं वनं गत्वा मैथिलीं प्रति मैथिल्यर्थं परीत्य अन्विष्य अनिष्ठिताशः न निष्ठिता निष्पन्ना आशा यस्य स रामः प्रियायाः मार्गणे अन्वेषणे परिश्रमं पुनश्चकार ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षष्टितमः सर्गः ॥ ६० ॥

गो० टी०—तथेति । स रामः तथा क्वचिदुद्भ्रमत इत्यादिरीत्या विपुलं विशालं महत् निरन्तरं वनं गत्वा सर्वं वनस्य सर्वप्रदेशं परीत्य पुनः पुनश्चरित्वा अथ मैथिलीं प्रति मैथिलीलाभं प्रति अनिष्ठिताशः अनिष्पन्नाशः सन् पुनरपि प्रियाया मार्गणे परमं परिश्रमं चकार ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१] ति० टी०—प्रविद्धानीतस्ततः प्रक्षिप्तानि ॥ १ ॥

रा० टी०—रामवृत्तान्तमेवाह—दृष्ट्वेत्यादिभिः । दशरथात्मजो रामः आश्रमपदं शून्यं सीतया रहितम् दृष्ट्वा पर्णशालामासनानि च विध्वस्तानि रावणेनेतस्ततः प्रक्षिप्तानि दृष्ट्वा अत्युद्विग्नोऽभवदिति शेषः ॥ १ ॥

गो० टी०—अथ रामस्य नवमीमवस्थां दर्शयत्येकषष्टितमे—दृष्ट्वेत्यादि । श्लोकद्वयमेकान्वयम् । शून्यं सीतारहितम् । रहितां सीतयेति शेषः । विध्वस्तानि रावणाक्रान्तत्वादिति भावः । सर्वशः सर्वत्र तत्र वनप्रदेशे वैदेहीं संनिरीक्ष्य विचित्य तत्रादृष्ट्वा पुनरपि रामग्रहणं क्रियाभेदात् प्राकुश्य सीताञ्चैराङ्क्रुश्य उवाच । भुजग्रहणं शोककृतविकारविशेषः । प्रगृह्य उत्क्षिप्य ॥ १ ॥ २ ॥

२] ति० टी०—प्राकुश्य हा इति शब्दं कृत्वा बाहू प्रगृह्योत्क्षिप्य ॥ २ ॥

रा० टी०—अदृष्ट्वेति । तत्र पर्णशालादौ सर्वशः संनिरीक्ष्य वैदेहीमदृष्ट्वा शुभौ भुजौ परिगृह्य प्राकुश्य आहूय राम उवाच ॥ २ ॥

३] ति० टी०—तदेव वचनम्—क्वेति ॥ ३ ॥

रा० टी०—तद्वचनप्रकारमाह—क्वेति । हे लक्ष्मण! कं कंचिद्देशमितो गता वैदेही क्व अस्तीति शेषः, केन आहृता वा भक्षिता वा ॥ ३ ॥

गो० टी०—क्वेति । क्व नु अत्र वने कुत्र प्रदेशे वर्तते कं वा देशान्तरं गता ॥ ३ ॥

४] ति० टी०—वृक्षेणेत्यादि पुनः प्रलापः । आवार्याच्छाद्य ॥ ४ ॥

रा० टी०—पुनः सीतां प्रत्याह—वृक्षेणेति । हे सीते !

१ तथेति गो. पाठः । २ विध्वस्तानीति गो. रा. पाठः । ३. परिगृह्य शुभाविति रा. पाठः । ४ आश्रमेति भाति ।

यैः पैरिक्रीडसे सीते विश्वस्तैर्मृगपोतकैः । एते हीनास्त्वया सौम्ये ध्यायन्त्यैस्त्राविलेक्षणाः ५ ॥
सीतया रहितोऽहं वै नहि जीवामि लक्ष्मण । वृतं शोकेन महता सीताहरणजेन माम् ॥ ६ ॥
परलोके महाराजो नूनं द्रक्ष्यति मे पिता । कथं प्रतिज्ञां संश्रुत्य मया त्वमभियोजितः ॥ ७ ॥
अपूरयित्वा तं कालं मत्सकाशमिहागतः । कामवृत्तमनार्यं वै मृषावादिनमेव च ॥ ८ ॥
धिक्त्वामिति परे लोके व्यक्तं वक्ष्यति मे पिता । विवशं शोकसंतप्तं दीनं भग्नमनोरथम् ॥ ९ ॥
मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् । क्व गच्छसि वरारोहे मा मोत्सृज सुमध्यमे ॥ १० ॥
त्वया विरहितश्चाहं त्यक्ष्ये जीवितमात्मनः । इतीव विलपन्रामः सीतादर्शनलालसः ॥ ११ ॥
न ददर्श सुदुःखार्तो राघवो जनकात्मजाम् । अनासादयमानं तं सीतां शोकपरायणम् ॥ १२ ॥
पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम् । लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया ॥ १३ ॥

वृक्षेणावार्य स्वात्मानमाच्छाद्य यदि मां हसितुमिच्छसि तर्हि ते हसितेनालम् अथ सुदुःखितं मां भजस्व ॥ ४ ॥

गो० टी०—वृक्षेणेति । आच्छाद्य स्वमिति शेषः । हसितुम् अन्तर्हितां मां ज्ञातुमसमर्थोऽसीत्येवं परिहसितुम् अथ शोककाले ॥ ४ ॥

५–६] ति० टी०—विश्वस्तैश्चिरकालसहवासेन विश्वासं प्राप्तैः । ध्यायन्ति त्वामिति शेषः ॥ ५ ॥ ६ ॥

रा० टी०—यैरिति । विश्वस्तैः चिरकालसमीपस्थत्वेन प्राप्तविश्वासैः यैः संमृगपोतैर्मृगबालैः परिक्रीडसे पर्यक्रीडथास्तं एते अस्राविलेक्षणा अश्रुव्याप्तनेत्राः ध्यायन्ति त्वामिति शेषः ॥ ५ ॥

गो० टी०—यैरिति । क्रीडसे क्रीडसि विश्वस्तैः चिरोपलालनेन विश्वासं प्राप्तैः मृगपोतकैः बालमृगैः ' पोतः पाकोऽर्भको बिम्बः ' इत्यमरः । ध्यायन्ति त्वामिति शेषः । किमपि ध्यायन्तीति वा । सीतयेति । इदमर्धमेकं वाक्यम् ॥ ५ ॥

रा० टी०—सीतयेति । हे लक्ष्मण ! सीतया रहितोऽहं नैव जीवामि इहलोके प्रजाः पालयिष्यामि साकेतं गमिष्यामीत्यर्थः, अत एव सीताहरणजेन शोकेन मृत लोकान्तरगमनकर्तृत्वेन मृतसदृशं परलोके साकेते विद्यमानं मां मे पिता द्रक्ष्यति नूनं निश्चितमेतत् । ' वृतं शोकेन ' इतिपाठेऽर्थः स्पष्ट एव । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०—मृतामिति । परलोके स्वर्गे ॥ ६ ॥

७–८] ति० टी०—मरणेऽपि परलोके मम धिक्कार एव प्राप्नोतीत्याह—कथमिति । संश्रुत्य प्रतिज्ञाय । अभियोजितो नियुक्तः ॥ ७ ॥ ८ ॥

रा० टी०—नन्वं किं तद्दर्शनेनेत्यत आह—कथमिति । मया अभियोजितः प्रेरितस्त्वं प्रतिज्ञां संश्रुत्य चतुर्दशवर्षं वने निवत्स्यामीति संश्राव्य तं कालमपूरयित्वा इह अस्मिन्समये एव कथमागत इति कामवृत्तं स्वेच्छाचारिणम् अत एव अनार्यमार्यमार्गावर्तिनम् अत एव मृषावादिनं त्वां धिगिति च मे पिता मां वक्ष्यति । अर्धचतुष्टयमेकान्वयि एवमुत्तरत्रापि ॥ ७ ॥ ८ ॥

गो० टी०—कथमिति । श्लोकद्वयमेकान्वयम् । प्रतिज्ञां चतुर्दशवर्षवनवासप्रतिज्ञां संश्रुत्य अङ्गीकृत्य मया अभियोजितः नियुक्तस्त्वं तं कालमपूरयित्वा कथमागतः कामवृत्तं यथेष्टाचारम् अनार्यं दुर्जनं मां धिक् त्वामिति वक्ष्यति । अहमुपालम्भयोग्य एव कामवृत्तत्वादिति भावः ॥ ७ ॥ ८ ॥

९] ति० टी०—पुनः सीताम्उद्दिश्य प्रलपति—विवशमिति ॥ ९ ॥

रा० टी०—विवशमिति । शोकसंतप्तं करुणं दयनीयं मां कीर्तिः अनृजुं कुटिलं नरमिव उत्सृज्य क्व गच्छसि मां मा उत्सृज । तत्र हेतुः त्वया विरहितोऽहम् आत्मनो जीवितं पालनं त्यक्ष्ये ॥ ९ ॥ १० ॥

गो० टी०—विवशमित्यादि श्लोकद्वयम् । विवशम् अस्वाधीनम् त्वत्परतन्त्रमित्यर्थः । करुणं यथा भवति तथा उत्सृज्य त्यागकालेऽपि तव दयाऽस्त्येवेति भावः । अनृजुं कपटाचारं मां नोत्सृज सुमध्यमे इदं मदुत्सर्जनं त्वल्लक्षणस्याननुरूपमिति भावः । उत्सर्जने को दोष इत्याह—त्वयेति ॥ ९ ॥ १० ॥

१०–११] ति० टी०—अनृजुं छलशीलं मामुत्सृज्य क्व गच्छसि । दृष्ट्वेवाह—मां मा उत्सृज त्यज ॥ १० ॥ ११ ॥

रा० टी०—इतीवेति । इतीव अत्यन्तं विलपन् सुदुःखार्तो रामः जनकात्मजां न ददर्श ॥ ११ ॥

गो० टी०—इतीवेति । एवंप्रकारेणेत्यर्थः लालसः साभिलाषः ॥ ११ ॥

१२–१३] ति० टी०—सीतामनासादयमानमप्राप्नुवानं रामं लक्ष्मण उवाचेत्यन्वयः ॥ १२ ॥ १३ ॥

रा० टी०—अनासादयमानमिति सीतामनासादयमानम् अप्राप्नुवन्तम् अत एव शोकपरायणम् अत एव विपुलं पङ्कमासाद्य कुञ्जरमिव सीदन्तं रामम् अत्यर्थम् अत्यन्तं हितकाम्यया लक्ष्मण उवाच ॥ १२ ॥ १३ ॥

---

१ सहेति गो. पाठः । २ आत्रेति गो. पाठः । ३ मामिति रा. पाठः । ४ नोत्सृजेति गो. पाठः । ५ मोक्ष्य इति गो. पाठः । ६ दशरथात्मजमिति गो. पाठः । ७ सुइत्यधिकं नात्रापेक्षितमिति भाति ।

मा विषादं महाबुद्धे कुरु यत्नं मया सह । इदं [1]गिरिवरं वीर बहुकन्दरशोभितम् ॥ १४ ॥
प्रियकाननसंचारा वनोन्मत्ता च मैथिली । सा वनं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पिताम् १५
सरितं वापि संप्राप्ता मीनवञ्जुलसेविताम् । [[2]स्नातुकामा निलीना स्याद्वासकामा वने क्वचित् ॥]
[3]वित्रासयितुकामा वा लीना स्यात्कानने क्वचित् ॥ १६ ॥
जिज्ञासमाना [4]वैदेही त्वां मां च पुरुषर्षभ । तस्या ह्यन्वेषणे श्रीमन्क्षिप्रमेव [5]यतावहे ॥ १७ ॥
वनं सर्वं विचिनुवो यत्र सा जनकात्मजा । मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः १८ ॥
एवमुक्तः स सौहार्दाल्लक्ष्मणेन समाहितः । सह सौमित्रिणा रामो विचेतुमुपचक्रमे ॥ १९ ॥
तौ वनानि गिरींश्चैव सरितश्च सरांसि च । निखिलेन [6]विचिन्वन्तौ सीतां दशरथात्मजौ ॥ २० ॥
तस्य शैलस्य सानूनि [7]शिलाश्च शिखराणि च । निखिलेन [8]विचिन्वन्तौ नैव तामभिजग्मतुः ॥ २१ ॥
विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत् । नेह पश्यामि सौमित्रे वैदेहीं पर्वते शुभाम् ॥ २२ ॥

गो०टी०–अनासाद्यमानमित्यादिसार्धश्लोक एकान्वयः। अप्राप्नुवन्तमित्यर्थः । अत्यर्थं हितकाम्ययेत्यन्वयः ॥ १२॥१३॥

१४] ति० टी०–विषादं मा कुर्विति शेषः । कुरु यत्नम् अन्वेषण इति शेषः ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–मेति । हे महाबुद्धे ! विषादं मा कुरु । मया सह यत्नं तदन्वेषणप्रयत्नं कुरु । प्रयत्नमेवाह–बहुकन्दरशोभितम् इदं गिरिवनमस्तीति शेषः । मैथिली च प्रियकाननसंचारा प्रियः काननसंचारो वनसंचरणं यस्याः सा अत एव वनोन्मत्ता वनदर्शनहेतुकातिहर्षविशिष्टा सा सीता वनं सुपुष्पितां नलिनीं वा प्रविष्टा स्यात् । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–मा विषादमित्यादि । विषादं मा कुरु अन्वेषणे यत्नं कुर्वित्युभयत्रान्वयः । अन्वेषणयोग्यतामाह–इदं हीति । बहुकन्दरैः कन्दरतुल्यलतागृहैः शोभितम् ॥१४॥

१५] ति० टी०–प्रियः काननसंचारो यस्याः सा । वनोन्मत्ता वनस्य पुष्पितत्वदर्शनादुन्मत्ता हर्षवती ॥ १५ ॥

गो० टी०–प्रियेति । प्रियः काननसंचारो यस्याः सा वनोन्मत्ता च वनं जलम् 'जीवनं भुवनं वनम्' इत्यमरः वनेन वनदर्शनेन उन्मादवती अतिप्रियसलिलेत्यर्थः । यथाक्रमं तत्कार्यमाह–सेति ॥ १५ ॥

१६] ति० टी०–वञ्जुलो वेतसः । संभावनायां लिङ् । सर्वत्र वित्रासयितुकामा अस्मान् ॥ १६ ॥

रा० टी०–सरितमिति । मीनवञ्जुलसेवितां सरितं स्नातुकामा सीता संप्राप्ता असकामा अन्यत्र वासविषयकेच्छाभाववत्यपि वैदेही मां त्वां च जिज्ञासमाना आवयोरन्वेषणसामर्थ्यज्ञानेच्छावती सती वने क्वचिदवलीना निलीना स्याद्वा । तत्र वञ्जुलो वेतसः । सार्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०–सरितमिति । वञ्जुलो वेतसः सरितं स्नातुकामा संप्राप्ता स्याद् हासकामा परिहासकामा क्वचिद्वन निलीना स्याद्वा ॥ १६ ॥

गो० टी०–वित्रासयितुकामेति । पूर्वं हास्यार्थं वदेति शङ्का अत्र वित्रासनार्थमिति भिदा । मां त्वां च जिज्ञासमान । आवयोरन्वेषणादिसामर्थ्यं जिज्ञासमानेत्यर्थः । तस्या इत्यर्थं पृथक् । श्रीमन् भार्यावियोगलक्षणं ते नास्तीति भावः ॥१७॥

१७] ति० टी०–जिज्ञासमानाऽऽवयोरन्वेषणसामर्थ्यम् । यतावहे यत्नं कुर्वः ॥ १७ ॥

रा० टी०–तस्या इति । हे श्रीमन् ! तस्याः सीतायाः अन्वेषणे यतावहे । अतः हे काकुत्स्थ ! यदि मन्यसे तर्हि यत्र जनकात्मजा संभाव्यते इति शेषः, तत्सर्वं वनं विचिनुवः अतः शोकं मनो मा स्म कृथाः ॥ १७ ॥ १८ ॥

१८] ति० टी०–यत्र सा अस्तीति शेषः ॥ १८ ॥

गो० टी०–वनमिति । यदि मन्यसे यदीच्छसि तदा विचिनुवः त्वं शोके मनो मा कृथाः ॥ १८ ॥

१९–२२] ति० टी०–विचेतुमन्वेष्टुम् ॥ १९–२२ ॥

रा० टी०–एवमिति । लक्ष्मणेनैवमुक्तः अत एव समाहितो रामः विचेतुम् अन्वेषितुम् उपचक्रमे ॥ १९ ॥

गो० टी०–एवमिति । लक्ष्मणेनैवमुक्तः अत एव समाहितः कृतचित्तसमाधानः विचेतुम् अन्वेष्टुम् ॥ १९ ॥

रा० टी०–ताविति । वनादीनि निखिलेन कृत्स्नशः सीतां विचिन्वन्तौ दशरथात्मजौ आस्तामिति शेषः ॥ २० ॥

गो० टी०–ताविति । वनानि स्वल्पानि महान्ति च पुष्पापचयव्यग्रत्वात्र सन्निहिता भवेदिति, गिरीन् विचित्रधातुसंग्रहसक्तात्र भवेदिति, सरितः हंसकारण्डवादिसलिलपुलिनतया तदवलोकनकुतुकिनी भवेदिति, सरांसि च कुङ्कुमकमलषण्डमण्डिततया तद्विहारपरात्र भवेदिति, निखिलेन भावप्रधानो निर्देशः । कात्स्न्र्येन विचिन्वानौ सीता न लब्धेति त्वरव्यापारौ न

---

१ बाहो इति गो. पाठः । २ च हि वनं शूरेति गो. पाठः । ३ अर्धमेतदधिकं गो. रा. पाठे । ४ अर्धमेतत् रा. नास्ति । ५ वैदेहीमिति गो. पाठः । ६ यतावहै इति गो. पाठः । ७ विचिन्वानाविति गो. पाठः । ८ गुहाश्चेति गो. पाठः ।

ततो दुःखाभिसंतप्तो लक्ष्मणो वाक्यमब्रवीत् । विचरन्दण्डकारण्यं भ्रातरं दीप्ततेजसम् ॥ २३ ॥
प्राप्स्यसे त्वं महाप्राज्ञ मैथिलीं जनकात्मजाम् । यथा विष्णुर्महाबाहुर्बलिं बद्ध्वा महीमिमाम् ॥ २४ ॥
एवमुक्तस्तु वीरेण लक्ष्मणेन स राघवः । उवाच दीनया वाचा दुःखाभिहतचेतनः ॥ २५ ॥
वनं सुविचितं सर्वं पद्मिन्यः फुल्लपङ्कजाः । गिरिश्चायं महाप्राज्ञ बहुकन्दरनिर्झरः ॥
नहि पश्यामि वैदेहीं प्राणेभ्योऽपि गरीयसीम् ॥ ॥ २६ ॥
एवं स विलपन्रामः सीताहरणकर्शितः । दीनः शोकसमाविष्टो मुहूर्तं विह्वलोऽभवत् ॥ २७ ॥
स विह्वलितसर्वाङ्गो गतबुद्धिर्विचेतनः । विषसादातुरो दीनो निःश्वस्याशीतमायतम् ॥ २८ ॥
बहुशः स तु निःश्वस्य रामो राजीवलोचनः । हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥ २९ ॥
तं सान्त्वयामास ततो लक्ष्मणः प्रियबान्धवम् । बहुप्रकारं शोकार्तः प्रश्रितः प्रश्रिताञ्जलिः ॥ ३० ॥
अनादृत्य तु तद्वाक्यं लक्ष्मणोग्रपुटच्युतम् । अपश्यंस्तां प्रियां सीतां प्राक्रोशत्स पुनः पुनः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

भवतः तौ दशरथात्मजौ न दृष्टेति तूष्णीं तिष्ठन्तौ भवतः मृदुप्रकृतित्वात् नैव तामभिजग्मतुरिति वक्ष्यमाणमत्राप्यनुषज्यते २०

रा० टी०—तस्येति । तस्य तत्रत्यस्य शैलस्य सानूनि शिलाप्रदेशान् गुहाश्च शिखराणि च निखिलेन कृत्स्नशः विचिन्वन्तौ तौ रामलक्ष्मणौ तां सीतां नैव अभिजग्मतुः ॥२१॥

गो० टी०—तस्येति । तस्य शैलस्य प्रस्रवणगिरेः सानूनि प्रस्थान् शिखराणि शृङ्गाणि ॥ २१ ॥

रा० टी०—विचित्येति । शैलं सर्वतो विचित्य अन्वेष्य इह पर्वते वैदेहीं न पश्यामीति रामो लक्ष्मणमब्रवीत् ॥ २२ ॥

गो० टी०—विचित्येति । शैलं सर्वतः सर्वत्र शैले "उभसर्वतसोः—" इति द्वितीया । अन्ते इतिकरणम् ॥ २२ ॥

२३] ति० टी०—'नेह पश्यामि वैदेहीम्' इत्युक्तेऽपि पुनर्विलापपरिहाराय लक्ष्मणोऽवदादित्याह—तत इति । दण्डकारण्यं विचरंस्त्वं सीतां प्राप्स्यसि ॥ २३ ॥

रा० टी०—तत इति । ततः रामवचनश्रवणानन्तरं दुःखाभिसंतप्तो दण्डकारण्यं विचरन् लक्ष्मणः दीप्ततेजसं भ्रातरमब्रवीत् ॥ २३ ॥

गो० टी०—तत इति । दीप्ततेजसमिति वक्ष्यमाणसीतालाभहेतुलक्षणोक्तिः ॥ २३ ॥

२४-२५] ति० टी०—तत्र दृष्टान्तः—यथा विष्णुरिति ॥ २४ ॥ २५ ॥

रा० टी०—तद्वचनाकारमाह—प्राप्स्यसे इति । हे महाप्राज्ञ ! बलिं बद्ध्वा विष्णुर्महीमिव मैथिलीं त्वं प्राप्स्यसे ॥२४॥

गो० टी०—प्राप्स्यसीति । सीताहर्तारं बद्ध्वेति शेषः२४॥

रा० टी०—एवमिति । लक्ष्मणेन एवमुक्तो दुःखाभिहतचेतनो राघवः दीनया वाचा उवाच ॥ २५ ॥

गो० टी०—एवमिति । दुःखाभिहतचेतनः दुःखोपहतहृदय इत्यर्थः ॥ २५ ॥

२६] ति० टी०—अस्तु लक्ष्मणैवं कृतं करुणेन किमित्याह रामः—वनमिति ॥ २६ ॥

रा० टी०—तद्वचनाकारमाह—वनमिति । वनादि सुविचितं प्राणेभ्योऽपि गरीयसीं वैदेहीं तु न पश्यामि । सार्धश्लोक एकान्वयी ॥ २६ ॥

गो० टी०—वनमिति । पद्मिन्य इत्यादौ सुविचिता सुविचित इति विभक्तिविपरिणामः कार्यः ॥ २६ ॥

गो० टी०—न हीत्यर्धमेक वाक्यम् ॥ २७ ॥

२७] ति० टी०—विह्वलः परवशः ॥ २७ ॥

रा० टी०—एवमिति । सीताहरणकर्शितो रामः एवं विलपन् सन् मुहूर्तं विह्वलोऽभवत् । अर्धद्वयमेकान्वयि ॥२७॥

गो० टी०—एवमिति । विह्वलः परवशः ॥ २८ ॥

२८] ति० टी०—गतबुद्धिर्ज्ञानशून्य इव । विचेतनश्चेष्टारहित इव । अशीतमुष्णम् । आयतं दीर्घम् ॥ २८ ॥

रा० टी०—स इति । विह्वलितसर्वाङ्गः सीतान्वेषणफलाप्राप्त्या विह्वलितानि सर्वाङ्गानि यस्य सः अत एव गतबुद्धिः कर्तव्यविषयकनिश्चयरहितः आतुरो दुःखासहिष्णुः रामः आयतं दीर्घम् अशीतमुष्णं निःश्वस्य विषसाद ॥ २८ ॥

गो० टी०—संतप्त इति । अवसन्नाङ्गः कृशाङ्गः, गतबुद्धिः निःसंज्ञः विचेतनः निश्चेष्टः अशीतम् उष्णम् आयतं दीर्घमिति निश्वासक्रियाविशेषणम् ॥ २९ ॥

२९] ति० टी०—हा प्रिये ! इतीति इकारलोप आर्षः ॥२९॥

रा० टी०—बहुश इति । बाष्पगद्गदः स रामः बहुशो निःश्वस्य हा प्रिये ! इति बहुशो विचुक्रोश ॥ २९ ॥

गो० टी०—बहुलमिति । विचुक्रोश उच्चैः स्वरेणाहूतवान् ३०

३०-३१] ति० टी०—प्रश्रितो विनयोपेतः । प्रश्रिताञ्जलिर्बद्धाञ्जलिः ॥ ३० ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्ड एकषष्टितमः सर्गः ॥ ६१ ॥

---

१ प्राप्स्यसीति गो. पाठः । २ सौहार्दादिति गो. पाठः । ३ संतप्तो ह्यवसन्नाङ्ग इति गो. पाठः । ४ बहुलमिति गो. पाठः । ५ बान्धव इति गो. पा. पाठः । ६ प्रश्रितमिति गो. पाठः । ७ पुटाच्युतमिति गो. पाठः ।

द्विषष्टितमः सर्गः ।

वैदेह्यदर्शनेन विक्लवो रामो लक्ष्मणं सबोध्य बहुशो विलपति ।

सीतामपश्यन्धर्मात्मा शोकोपहतचेतनः । विललाप महाबाहू रामः कमललोचनः ॥ १ ॥
पश्यन्निव च तां सीतामपश्यन्मन्मथार्दितः । उवाच राघवो वाक्यं विलापाश्रयदुर्वचम् ॥ २ ॥
त्वमशोकस्य शाखाभिः पुष्पप्रियतरा प्रिये । आवृणोषि शरीरं ते मम शोकविवर्धनी ॥ ३ ॥
कदलीकाण्डसदृशौ कदल्या संवृतावुभौ । ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुम्॥ ४ ॥
कर्णिकारवनं भद्रे हसन्ती देवि सेवसे । अलं ते परिहासेन मम बाधावहेन वै ॥ ५ ॥
[परिहासेन किं सीते परिश्रान्तस्य मे प्रिये । अयं स परिहासोऽपि साधु देवि न रोचते ॥]
विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते । अवगच्छामि ते शीलं परिहासप्रियं प्रिये ॥ ६ ॥

रा० टी०—तमिति । प्रियबान्धवः शोकार्तः प्रश्रितो नम्रः प्रश्रिताञ्जलिः प्रणयमचकथद्युगलकरो लक्ष्मणः तं रामं बहुप्रकारं सान्त्वयामास ॥ ३० ॥

गो० टी०—तमिति । प्रश्रितं सविनयमिति क्रियाविशेषणम् । प्रश्रिताञ्जलिः बद्धाञ्जलिः ॥ ३१ ॥

रा० टी०—अनादृत्येति । लक्ष्मणोऽपुटच्युतं तदोष्ठद्वारानिःसृतं तत् हितं लक्ष्मणवाक्यम् अनादृत्य प्रियामपश्यन् रामः पुनः पुनः प्राक्रोशत् ॥ ३१ ॥

इतिश्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

गो० टी०—अनादृत्येति । लक्ष्मणोऽपुटाच्च्युतं लक्ष्मणोक्तमित्यर्थः । पुनः प्राक्रोशत् उद्वेषेणाद्भुतवान् ॥ ३२ ॥

अस्मिन् सर्गे द्वात्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकषष्टितमः सर्गः ॥६१॥

१] ति० टी०—एवं प्रियावियोगो दुःसह इति बोधयन्पुनः शोचति—सीतामिति । शोकोपहतचेतनः शोकेन सीतावियोगजेनोपहतज्ञान इव ॥ १ ॥

रा० टी०—रामविलापमेवाह यावत्सर्गम्—सीतामित्यादिभिः । सीतामपश्यन् अत एव शोकोपहतचेतनो रामः विललाप ॥ १ ॥

गो० टी०—अथ रामस्य ' दृक्मनःसङ्कल्पा जागरः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छाम्ता इत्यनङ्गदशा दश ' इत्युक्तावस्थास्वरतिं नाम षष्ठीमवस्थां प्रदर्शयति द्विषष्टितमे—सीतामित्यादि । धर्मात्मा कामोपहतचेतन इत्याभ्यां धर्मविरुद्धकामस्यानिन्द्यत्वमुक्तम् । महाबाहुरित्यूर्ध्वबाहुत्वमुच्यते कमललोचन इत्यनेन समधुपपद्मसाम्यादशुक्लाक्षुण्यमुच्यते कामेन सीताविप्रलम्भजनितव्यामोहेन उपहता अप्रकृतिस्था चेतना चैतन्यं यस्य स तथा ॥ १ ॥

२] ति० टी०—अपश्यन्नपि भमावस्थत्वात्पश्यन्निव विलापाश्रयत्वेन दुर्वचं गद्गदकण्ठत्वात् ॥ २ ॥

रा० टी०—पश्यन्निति । तां सीतां मन्मथार्दितः स्वंप्रयशिवद्वारा मन्मथार्दको राघवः सीतामपश्यन्नपि पश्यन्निव विलापाश्रयेण विलापाश्रयणेन हेतुना दुर्वचं वक्तुमशक्यं वाक्यमुवाच ॥ २ ॥

गो० टी०—पश्यन्निवेति । पुरोवर्तित्वाभावेन सीतामपश्यन्नपि मदनार्दितो मदनपरवशः तां पश्यन्निव संबोध्योवाच । तद्वाक्यं विलापाश्रयत्वेन दुर्वचम् गद्गदकण्ठत्वादिति भावः । यद्वा विलापसंबन्धादस्माभिर्वक्तुमशक्यम् अनुवदितुमशक्यमित्यर्थः ॥ २ ॥

३] ति० टी०—ते स्वस्य सीतायाः ॥ ३ ॥

रा० टी०—तद्वचनाकारमाह—त्वमित्यादिभिः । हे प्रिये ! पुष्पप्रियतया हेतुना मम शोकविवर्धनी त्वम् अशोकस्य शाखाभिः ते स्वस्य शरीरम् आवृणोषि ॥ ३ ॥

गो० टी०—पश्यन्निवेत्युक्तमुपपादयति सार्धैः—त्वमित्यादि पञ्चभिः । त्वम् अशोकस्य शाखाभिः पुष्पिततया स्वर्णसदृशीभिः स्वयं पुष्पप्रियतमा स्वशरीरं मम शोकविवर्धनी सती आवृणोषि किं तेनावरणेन मया दृष्टत्वादिति भावः ॥ ३ ॥

४] ति० टी०—' कदलीस्कन्ध—' इति पाठेऽपि स्कन्धः काण्डम् । निगूहितुं शक्ता नासि आत्मानमिति शेषः ॥ ४ ॥

रा० टी०—कदलीति । कदलीकाण्डसदृशौ अत एव कदल्या संवृतौ उभौ ते तव ऊरू अहं पश्यामि अतः गूहितुम् आच्छादितुं त्वं न शक्तासि ॥ ४ ॥

गो० टी०—कदलीति । कदलीकाण्डसदृशौ कदलीदण्डतुल्यत्वेन कदल्या संवृतावपि ते ऊरू पश्यामि तेन तौ निगूहितुम् आच्छादितुं न शक्तासि दृष्टस्याच्छादनासंभवादिति भावः ॥ ४ ॥

५–६] ति० टी०—ततो ऽनन्तरं गच्छतीति क्रमेणाह—कर्णिकारेति ॥ ५ ॥ ६ ॥

१ कामेति गो. पाठ. । २ त्वेति गो. पाठः । ३ आर्धकोऽयं श्लोकः गो. पाठे ।

आगच्छ त्वं विशालाक्षि शून्योऽयमुटजस्तव । सुव्यक्तं राक्षसैः सीता भक्षिता वा हृतापि वा ॥ ७ ॥
नहि सा विलपन्तं मामुपसंप्रैति लक्ष्मण । एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण ॥ ८ ॥
शंसन्तीव हि [1]मे देवीं भक्षितां रजनीचरैः । हा ममार्ये क्व याताऽसि हा साध्वि वरवर्णिनि ॥ ९ ॥
हा सकामाद्य कैकेयी देवि मेऽद्य भविष्यति । सीतया सह निर्यातो विना सीतामुपागतः ॥ १० ॥
कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं [3]मम । निर्वीर्य इति लोको मां निर्देयश्चेति वक्ष्यति ॥ ११ ॥
कातरत्वं प्रकाशं हि सीतापनयनेन मे । निवृत्तवनवासश्च जनकं मिथिलाधिपम् ॥ १२ ॥
कुशलं परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम् । विदेहराजो नूनं मां दृष्ट्वा विरहितं तया ॥ १३ ॥

रा० टी०–कर्णिकारेति । हे देवि ! हसन्ती त्वं कर्णिकारवनं सेवसे तत्रैव परिहासाय निगूढाऽसीत्यर्थः । मम वाधावहेन मद्विघातकेन ते परिहासेनालं न कर्तव्यमित्यर्थः ॥ ५ ॥

गो० टी०–कर्णिकारेति । हसन्ती हासार्थं कर्णिकारवनं सेवसे ॥ ५ ॥

गो० टी०–परिहासेनेति । हे सीते ! परिहासेन किं किं प्रयोजनम् हि यस्मात् परिश्रान्तस्य मे मह्यं सः पूर्वं प्रियः अयं परिहासः साधु सम्यक् न रोचते ॥ ६ ॥

रा० टी०–विशेषेणेति । हे प्रिये ! यद्यपि परिहासप्रियं ते शीलं स्वभावम् अवगच्छामि जानामि तथापि आश्रमस्थाने विशेषभ्रमस्थित्यर्थं विशेषेणायं ते परिहासः न प्रशस्यते । यद्यपीत्यध्याहृतम् ॥ ६ ॥

गो० टी०–विशेषेणेति । शीलं स्वभावः परिहासेन प्रीणातीति परिहासप्रियम् । " इगुपधज्ञाप्रीकिरः कः " इति कः । आगच्छेत्यर्धमेकं वाक्यम् ॥ ७ ॥

७] ति० टी०–पुनर्भ्रमनिवृत्त्याह–सुव्यक्तमिति ॥ ७ ॥

रा० टी०–आगच्छेति । हे विशालाक्षि ! तवायमुटजः पर्णशाला शून्यः अतस्त्वमागच्छ । अर्थं पृथक् । लक्ष्मणं संबोध्याह–सुव्यक्तमिति । हे लक्ष्मण ! सा सीता विलपन्तं मां यतो न उपसंप्रैति आगच्छति अतः राक्षसैः अभक्षितापि सीता अपहृता एव व्यक्तं स्फुटमेतत् । एको वाशब्द एवार्थे । अर्धद्वयमेकान्वयि ॥ ७ ॥

गो० टी०–सुव्यक्तमिति । हिंसौ । उपसंप्रैति उपेक्षत इत्यर्थः ॥ ८ ॥

८] ति० टी०–उपसंप्रैति । हासरसेनोपेक्षत इत्यर्थः ॥८॥

रा० टी०–एतानीति । हे लक्ष्मण ! रजनीचरैः भक्षितां मे देवीं साश्रुनेत्राणि एतानि मृगयूथानि शंसन्तीव ॥ ८ ॥

गो० टी०–एतानीति । शंसनप्रकारः साश्रुनेत्राणीति ॥९॥

९] ति० टी०–भक्षितां शंसन्तीव । तत्र बीजम्–साश्रुनेत्राणीति ॥ ९ ॥

रा० टी०–हेति । मम संबन्धिनि आर्ये ! त्वं क्व यातासि हा कष्टमेतत् मे देवी माता अद्य सकामा तदीप्सितराक्षसवधस्य सन्निहितत्वात् प्राप्तमनोरथा भविष्यति ॥ ९ ॥

गो० टी०–हेति । मम मदीये आर्ये पूज्ये लोकैरिति शेषः । सकामा स्वाभीष्टास्मन्मरणसिद्धेरिति भावः ॥ १० ॥

१०–११] ति० टी०–विना सीतामुपागत इति सकामा भविष्यति । त्वया भक्षितयेति शेषः ॥ १० ॥ ११ ॥

रा० टी०–सीतयेति । सीतया सह निर्यातः इहागतः विना सीतां सीतारहितत्वमुपागतः प्राप्तोऽहं शून्यं ममान्तःपुरं कथं प्रवेक्ष्यामि किंच सीतां विना ममान्तःपुरमुपागतः प्राप्तोऽहं कथं प्रवेक्ष्यामि ॥ १० ॥

गो० टी०–सीतयेति । सीतां विनाऽऽगतत्वाच्छून्यम् ॥ ११ ॥

रा० टी०–निर्वीर्य इति । सीतापनयनेन सीतायाः हरणेन लोकः मां निर्वीर्य इति निर्दयश्चेति वक्ष्यति, प्रकाशं स्फुटं मे कातरत्वं च वक्ष्यति ॥ ११ ॥

गो० टी०–निर्वीर्य इति । कातरत्वम् अधीरत्वम् जीवितधारणाशक्तेरिति भावः ॥ १२ ॥

१२] ति० टी०–कातरत्वमधीरत्वम् सीतापनयनेन सीतानाशेन ॥ १२ ॥

रा० टी०–निवृत्तेति । निवृत्तवनवासोऽहं कुशलं परिपृच्छन्तं जनकं निरीक्षितुं कथं शक्ष्ये ॥ १२ ॥

गो० टी०–निवृत्तेति । निवृत्तवनवासः समाप्तवनवासः । 'समाप्तौ उक्त इत्यदः' इति शब्दार्णवे । निरीक्षितुं प्रतिवक्तुं सुतरामिति भावः ॥ १३ ॥

१३] ति० टी०–तया सीतया विरहितं हीनम् ॥ १३ ॥

रा० टी०–विदेहेति । विदेहराजो जनकः तया सीतया विरहितं मां दृष्ट्वा सुताविनाशसंतप्तः कन्यादर्शनाभावहेतुकतापं प्राप्तः सन्मोहस्य वैचित्यस्य वशमधीनत्वमेष्यति ॥ १३ ॥

गो० टी०–विदेहेति । तया सीतया ॥ १४ ॥

१ वैदेह्यामिति गो. पाठः । २ त्वया देवी कैकेयी सेति गो. पाठः । ३ पुर इति गो. पाठः ।

सुताविनाशसंतप्तो मोहस्य वशमेष्यति । अथवा न गमिष्यामि पुरीं भरतपालिताम् ॥ १४ ॥
स्वर्गोऽपि हि तया हीनः शून्य एव मतो मम । तन्मामुत्सृज्य हि वने गच्छ त्वमयोध्यापुरीं शुभाम् ॥ १५ ॥
न त्वहं तां विना सीतां जीवेयं हि कथंचन । गाढमाश्लिष्य भरतो वाच्यो मद्वचनात्त्वया ॥ १६ ॥
अनुज्ञातोऽसि रामेण पालयेति वसुंधराम् । अम्बा च मम कैकेयी सुमित्रा च त्वया विभो ॥ १७ ॥
कौसल्या च यथान्यायमभिवाद्या ममाज्ञया । रक्षणीया प्रयत्नेन भवता सूक्तचारिणा ॥ १८ ॥
सीतायाश्च विनाशोऽयं मम चामित्रसूदन । विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत् ॥ १९ ॥
इति विलपति राघवे तु दीने वनमुपगम्य तया विना सुकेश्या ।
भयविकलमुखस्तु लक्ष्मणोऽपि व्यथितमना भृशमातुरो बभूव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।

बहुशो विचित्यापि सीतामनुपलभमानं राक्षससैस्तस्या दुरन्तस्थापादन समाश्वासयन्तमात्मानं बहुशः शोचन्तं च रामं लक्ष्मण समाश्वासयति ।

स राजपुत्रः प्रियया विहीनः शोकेन मोहेन च पीड्यमानः ।
विषादयन्भ्रातरमार्तरूपो भूयो विषादं प्रविवेश तीव्रम् ॥ १ ॥

१४-१९] ति० टी०-'तात एव कृतार्थः स तत्रैव वसतादिति' इत्यर्धमधिकं कतकपाठे । ततो दशरथ एव कृतार्थः वसतादिति लोट् व्यत्ययेन । यतस्तत्रैव स्वर्गे एव वसति न तु जीवन्ती कौसल्येत्यर्थः । पक्षान्तरमादत्ते-अथवेति ॥ १४-१९ ॥

रा० टी०-अथवेति । अथवा भरतपालितां पुरीम् अहं न गमिष्यामि, एतेनात्रमितान्यपरिहासवचनभीरुत्वं सूचितम् । ननु स्वपुरत्यागः कथं भविष्यतीत्यत आह-स्वर्गः अप्रकटसाकेतोऽपि तया सीतया हीनश्चेत् शून्यः सर्वसंपत्तिरहितः मम मतः ॥ १४ ॥

गो० टी०-अथ वेति । भरतपालितां सुसमृद्धामपीत्यर्थः ॥ १५ ॥

रा० टी०-मामिति । हि उक्तहेतोः वने माम् उत्सृज्य अयोध्यां पुरीं गच्छ अहं तु सीतां विना कथंचन न जीवेयम् ॥ १६ ॥

गो० टी०-मामिति । कथंचन त्वत्कृताश्वासनेनापीत्यर्थः ॥ १६ ॥

रा० टी०-गाढमिति । रामेणानुज्ञातस्त्वं वसुंधरां पालय इति वचः गाढमाश्लिष्य मद्वचनाद्भरतस्त्वया वाच्यः ॥ १६ ॥

गो० टी०-गाढमिति । पालयेति वाच्य इत्यन्वयः १७॥

रा० टी०-अम्बेति । अम्बादिः ममाज्ञया त्वया अभिवाद्या प्रणमनीया प्रयत्नेन भवता रक्षणीया च ॥ १७ ॥ १८॥

गो० टी०-अम्बेति । प्रथमोक्तिः शोकजाग्रहात् ॥ १८ ॥

गो० टी०-रक्षणीयेत्यर्धम् । सा कौसल्या ॥ १८ ॥

रा० टी०-सीताया इति । सीतायाः मम च विनाशः परस्परमदर्शनं मे जनन्याः अग्रे त्वया विशेषेण निवेद्यः कथनीयो भवेत् ॥ १९ ॥

गो०टी०-सीताया इति । मम विनाशः भावीति शेषः२० २०] ति० टी०-भयविकलमुखो भयेन विवर्णमुखः॥२०॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

रा० टी०-इतीति । सुकेश्या शोभनकेशवत्या तया सीतया विना वनमुपगम्य प्राप्य इत्यनेन प्रकारेण राघवे विलपति सति भयविकलमुखः वियोगमूककरामवचनश्रवणजनितभयहेतुकैवैकल्यविशिष्टमुखविशिष्टः अत एव व्यथितमनाः लक्ष्मणोऽपि भृशमत्यन्तमातुरो बभूव ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

गो० टी०-इतीति । तया विना कृतं वनमुपगम्येत्यर्थः । सुकेश्येति विलापहेतुः भयेन विकलमुखः विवर्णमुखः आतुरः तप्तशरीरः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

१] ति० टी०-शोक इष्टवियोगजो धृतिविशेषः, तज्जन्यं चित्तवैकल्यं मोहः ॥ १ ॥

१ मोहेनेति गो. पाठः । २ सीतयेति गो. पाठः । ३ मामिहोत्सृज्य हीति गो. रा. पाठः । ४ अयोध्या पुरीमिति गो. रा. पाठः । ५ सोक्तकारिणेति गो. पाठः । ६ कर्त्तनेति गो. पाठः । ७ स्विनि गो. पाठः । ८ कामेन शोकेनेति गो. पाठः ।

स लक्ष्मणं शोकवशाभिपन्नं शोके निमग्नो विपुले तु रामः ।
उवाच वाक्यं व्यसनानुरूपमुष्णं विनिःश्वस्य रुदन्सशोकः ॥ २ ॥
न मद्विधो दुष्कृतकर्मकारी मन्ये द्वितीयोऽस्ति वसुंधरायाम् ।
शोकानुशोको हि परम्परायामामेति भिन्दन्हृदयं मनश्च ॥ ३ ॥
पूर्वं मया नूनमभीप्सितानि पापानि कर्माण्यसकृत्कृतानि ।
तत्रायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि ॥ ४ ॥
राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशो जननीवियोगः ।
सर्वाणि मे लक्ष्मण शोकवेगमापूरयन्ति प्रविचिन्तितानि ॥ ५ ॥
सर्वं तु दुःखं मम लक्ष्मणेदं शान्तं शरीरे वनमेत्य क्लेशम् ।
सीतावियोगात्पुनरभ्युदीर्णं काष्ठैरिवाग्निः सहसोपदीप्तः ॥ ६ ॥

रा० टी०–रामविलापमेवाह–स इत्यादिभिः । प्रियया विहीनः अत एव शोकेन मोहेन शोकजनितकर्तव्यविषयकाविवेकेन पीड्यमानः अत एव आर्तरूपः राजपुत्रः स रामः भ्रातरं विषादयन् सन् भूयोऽधिकं तीव्रं विषादं प्रविवेश ॥१॥

गो० टी०–अथ तापाख्यां मदनावस्थां दर्शयति त्रिपदिकामे–स राजपुत्र इत्यादि । कामेन प्रियास्मरणजन्येन शोकेन प्रियाविरहजन्येन भ्रातरं भूयो विषादयन् आर्तरूपः पीडितशरीरः स रामः तीव्रं विषादं प्रविवेश । स्वशोकलक्ष्मणशोकाभ्याम् अधिकतरं शोकं गत इत्यर्थः ॥ १ ॥

२] ति० टी०–शोकवशेनाभिपन्नं पीडितम् । 'विपुलेऽतिरामः' इति पाठेऽतिशयिते शोके इत्यर्थः । व्यसनानुरूपं लोकस्य दुःखप्रसङ्गे उचितम् ॥ २ ॥

रा० टी०–विषादप्रवेशानन्तरकालिकं वृत्तमाह–स इति। विपुले शोके निमग्नः स रामः व्यसनानुरूपं दुःखितजनयोग्यं वाक्यम् उष्णं विनिःश्वस्य सशोकं रुदन् सन् शोकवशाभिपन्नं शोकवशेन खिन्नं लक्ष्मणमुवाच ॥ २ ॥

गो० टी०–स इति । विपुले शोके निमग्नः लक्ष्मणशोकदर्शनजशोकेन विपुले शोके सीताशोके निमग्नः व्यसनानुरूपं लोकवद्दुःखप्रसङ्गोचितम् उष्णं यथा तथा विनिःश्वस्य रुदन् सशोकं वाक्यमुवाच ॥ २ ॥

३] ति० टी०–शोकमनुप्रवृत्तः शोकः शोकानुशोकः सः परम्परायाः तृतीयार्थे षष्ठी । परम्परयाऽविच्छेदेन हि यतो मां हृदयं तदधिष्ठानमात्मानं मनश्च भिन्दन्नेति प्राप्नोति ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–नेत्यादिभिः । मद्विधः दुष्कृतकर्मकारी दुष्कृतम् अन्यैरनाचरितं कर्म करोति तच्छीलः द्वितीयः 'वसुंधरायां नास्ति इत्यहं मन्ये अत एव हृत्शूलापहारकोऽयं शोकानुशोकः शोकोत्तरं प्रवृत्तः शोकः परंपरायाः परंपरया मनो भिन्दन् सन्नेव मामेति ॥ ३ ॥

गो० टी०–द्वितीयो मद्विधो दुष्कृतकर्मकारी पापकर्मकारी वसुंधरायां नास्तीति मन्ये । शोकेनेति । न मद्विध इत्यादिनोक्तमनेनार्थेन स्पष्टीक्रियते । परम्परायाः परम्परारूपेणागतः शोकेन शोकः शोकाच्छोकः हृदयं मनश्च भिन्दन् मामेति । मनोऽधिष्ठानं हृदयम् ॥ ३ ॥

४] ति० टी०–उक्तमेव विस्तरेणाह–पूर्वमिति । अभीप्सितानि चिकीर्षाविषयत्वं प्राप्तानि । तत्र तेषां मध्ये केषांचिद्विपाकः फलपरिपाकोऽयमधापतितः प्राप्तः । दुःखेन दुःखम् दुःखपरम्परामित्यर्थः ॥ ४ ॥

रा० टी०–स्वदुष्कृतकर्मकारित्वमेव प्रकटयन्नाह–पूर्वमिति । असकृत् वारंवारं कृतानि राक्षसैराचरितानि पापानि कर्माणि पूर्वं स्वाप्राकट्यसमये तत्र साकेते विद्यमानेन मया यत् यस्मात् अभीप्सितानि मदिच्छाविषयीभूतानि तस्मात् अयं विपाकः इच्छामात्रजनितफलम् अधापतितः अत एव दुःखेन दुःखम् अहं विशामि एतेन यदि मदिच्छा न स्यात्तर्हि राक्षसानां ब्रह्मादिप्रेरितदुष्कृतकर्मप्रवृत्तिर्न स्यादिति सूचितं तेन सकलजनकर्तृत्वादीनां खायत्तत्वं ध्वनितम् । तथाच श्रुतिः–" कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदपेक्षया " इति ॥ ४ ॥

गो० टी०–एवं शोकपरम्पर्यं हेतुमुत्प्रेक्षते–पूर्वमिति । पूर्वं पूर्वजन्मनि अभीप्सितानि प्रार्थितानि तत्र तेषु पापेषु विपाकः कार्यान्मुखरूपम् आपतितः प्राप्तः ॥ ४ ॥

५] ति० टी०–तामेवाह–राज्येति । एतानि प्रविचिन्तितानि शोकवेगमिदानींतनमापूरयन्ति ॥ ५ ॥

रा० टी०–विपाकस्वरूपं बोधयन्नाह–राज्येति । हे लक्ष्मण ! प्रविचिन्तितानि मे सर्वाणि राज्यप्रणाशादीनि मे शोकवेगम् आपूरयन्ति ॥ ५ ॥

गो० टी०–दुःखानि परिगणयति–राज्येति । राज्यप्रणाशो राज्यभ्रंशः, स्वजनैः बन्धुभिः । सर्वाणीति सामान्ये नपुंसकम् । शोकवेगं शोकराशिं प्रविचिन्तितानि स्मृतानि ॥ ५ ॥

६] ति० टी०–वनमेत्य प्राप्य शरीरे क्लेशमनुभूयापि

१ शोकेनेति गो. पाठः । २ शून्यमिति गो. पाठः । ३ प्रदीप्त इति गो. पाठः ।

सा नूनमार्या मम राक्षसेन [1]ह्यभ्याहृता खं समुपेत्य भीरुः ।
अप्यस्वरं सुस्वरविप्रलापा भयेन विक्रन्दितवत्यभीक्ष्णम् ॥ ७ ॥
तौ लोहितस्य प्रियदर्शनस्य सदोचितावुत्तमचन्दनस्य ।
वृत्तौ स्तनौ शोणितपङ्कदिग्धौ नूनं प्रियाया मम [3]नाभिपातः ॥ ८ ॥
तच्छ्लक्ष्णसुव्यक्तमृदुप्रलापं तस्या मुखं कुञ्चितकेशभारम् ।
रक्षोवशं नूनमुपागताया न भ्राजते राहुमुखे यथेन्दुः ॥ ९ ॥
तां हारपाशस्य [5]सदोचितान्तां ग्रीवां प्रियाया मम सुव्रतायाः ।
रक्षांसि नूनं [6]परिपीतवन्ति शून्ये [7]हि भित्त्वा रुधिराशनानि ॥ १० ॥
मया विहीना विजने वने सा [8]रक्षोभिरावृत्य विकृष्यमाणा ।
नूनं विनादं कुररीव दीना सा मुक्तवत्यायतकान्तनेत्रा ॥ ११ ॥

सीतासंनिधानात्सर्वं शान्तम् । अथ सीतावियोगादुनरुदीर्णं दाहं प्राप्तम् । प्रियाव्योग एव दुःसह इति भावः ॥ ६ ॥

रा० टी०–सर्वमिति । सर्वं राज्यप्रणाशादिजनितम् इदं दुःखं शून्यं बहुजनरहितं वनमेत्य शरीरे अन्तःकरणं शान्तं सीतानिरन्तरसंबन्धजनितातिप्रमोदेन निवृत्तमित्यर्थः सीतावियोगात्तु काष्ठैः उपदीप्तो वह्निरिव सहसा पुनरभ्युदीर्णं समुत्थितम् ॥ ६ ॥

गो० टी०–सर्वमिति । शून्यं निर्जनं वनमेत्य स्थितस्य मम शरीरे शान्तं शरीरक्लेशेन विस्मृतामित्यर्थः । उदीर्णम् उद्रिक्तं प्रदीप्तोऽग्निः पुनः काष्ठैरिव ॥ ६ ॥

७] ति० टी०–सा राक्षसेन ननमभ्याहृता । तदा खमाकाशं समुपेत्य प्राप्यास्वरं विस्वरं विक्रन्दितवत्यपि संभाव्यत एवमित्यन्वयः ॥ ७ ॥

रा० टी०–सीताविषये स्वकृतनिश्चयमाह–सेति । आर्या सर्वनारीश्रेष्ठा राक्षसेन खमाकाशमुपेत्य अभ्याहृता अत एव सुस्वरविप्रलापा सुस्वरः शोभनस्वरविशिष्टः विप्रलापो यस्याः सा भीरुः मम सीता अभीक्ष्णं भयेन मद्वियोगजनितभीत्या विक्रन्दितवती ननं मया निश्चितमेतत् ॥ ७ ॥

गो० टी०–सेति । मम संबन्धिनी आर्या सा राक्षसेन केनचिद्बलाद्धृता सती खमाकाशमुपेत्य भीरुतया सस्वरविप्रलापा सती उच्चैर्ध्वनियुक्तविप्रलापा सती भयेन अपस्वरम् अपगतनिजस्वरं यथा तथा अभीक्ष्णमत्यर्थम् आक्रन्दितवती उद्बोधितवतीत्युत्प्रेक्षा ॥ ७ ॥

८–९] ति० टी–लोहितस्य चन्दनस्य हरिचन्दनस्य । 'लोहितं हरिचन्दम्' इति कोशात् । शोणितपङ्कदिग्धौ भक्षणाय राक्षसैर्विश्वसनादिति भावः । मम नाभिपातः, एवमपि मम शरीरस्याभिपातो न जायत इत्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०–तावितिं । लोहितस्य कुङ्कुमादिवा मनोहररागविशिष्टस्य अत एव प्रियदर्शनस्य उत्तमचन्दनस्य सदोचितौ नित्यं संलग्नौ अत एव शोणितपङ्कदिग्धौ शोणितपङ्कसंलिप्तसदृशौ वृत्तौ तौ प्रियायाः स्तनौ मम नाभिभातः मां न प्रकाशयेते महदनुचितमेतदिति तात्पर्यम् । 'नाभिपातः' इति पाठे वियोगदुःखान्न रक्षत इत्यर्थः । शोणितपङ्कदिग्धशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः ॥ ८ ॥

गो० टी०–ताविति । लोहितस्य लोहिताख्यस्य उत्तमचन्दनस्य 'रक्तं तु चन्दनं विद्याल्लोहितं हरिचन्दनम्' इति । यद्वा कुङ्कुमादिना रक्तस्य उत्तमचन्दनस्य सदा उचितौ योग्यौ वृत्तौ वर्तुलौ मम प्रियायाः स्तनौ शोणितपङ्कदिग्धौ राक्षसेन भक्षणाय विश्वसनादिति भावः । एवंभूतौ सन्तौ नाभिभातः न प्रकाशेते । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः । 'मम नाभिपातः' इति पाठान्तरे एवमपि मम देहपातो न जायत इत्यर्थः ॥ ८ ॥

रा० टी०–तदिति । श्लक्ष्णः मनोहरः सुव्यक्तः संस्कृतः मृदुः ऋजुवर्णविशिष्टः प्रलापो यस्मात् तत् कुञ्चितानां केशानां भारो यस्मिंस्तत् रक्षोवशमुपागतायाः प्राप्तायाः तस्याः सीतायाः तन्मुखं राहुमुखे इन्दुरिव न भ्राजते ॥ ९ ॥

गो० टी०–तदिति । तत् पूर्वमनुभूतं श्लक्ष्णो मधुरः सुव्यक्तः अर्थव्यक्तियुक्तः मृदुः अपरुषः प्रलापो यस्य तत् ॥९॥

१०–११] ति० टी०–हारपाशो हाररूपा माला तस्या उचितान्ताञ्चितोऽन्तः प्रान्तभागो यस्यास्ताम् । तां कम्बुतुल्यां ग्रीवामित्यर्थः । 'परिपीतवन्ति' इति पाठे रुधिरमिति शेषः । भविष्यन्ति जातानीति वा । शून्ये विजने ॥ १० ॥ ११ ॥

रा० टी०–तामिति । हारपाशस्य हाररूपमालायाः सदोचितां तां सदोचितः अन्तःप्रान्तभागो यस्यास्तां सुव्रतायाः मम प्रियायाः तां सर्वविलक्षणां ग्रीवां रुधिराशनानि रक्षांसि भित्त्वा रुधिरं पिबन्ति ननं काङ्क्षा नेत्यर्थः ॥ १० ॥

गो० टी०–तामिति । हारपाशस्य हारमालायाः सदोचि-

---

१ बलाद्धृतेति गो. स्वभ्याहृतेति रा. पाठः । २ अपस्वरं सस्वरमिति गो. अपस्वरमिति रा. पाठः । ३ अभिभात इति गो. रा. पाठः । ४ सदोचिताया इति गो. पाठः । ५ रुधिरं पिबन्तीति रा. पाठः । रुधिरं पिबन्तीत्येव पाठो तिलकपुस्तके भाति यतस्तट्टीकायां परिपीतवन्तीति पाठ इति पाठान्तरं प्रदर्श्यते । ६ बिभिद्य शून्ये इति गो. पाठः । ७ येति गो. पाठः । ८ आहृत्येति गो. पाठः ।

अस्मिन्मया सार्धमुदारशीला शिलातले पूर्वमुपोपविष्टा ।
कान्तस्मिता लक्ष्मण जातहासा त्वामाह सीता बहुवाक्यजातम् ॥ १२ ॥
गोदावरीयं सरितां वरिष्ठा प्रिया प्रियाया मम नित्यकालम् ।
अप्यत्र गच्छेदिति चिन्तयामि नैकाकिनी याति हि सा कदाचित् ॥ १३ ॥
पद्मानना पद्मपलाशनेत्रा पद्मानि वाऽऽनेतुमभिप्रयाता ।
तदप्ययुक्तं नहि सा कदाचिन्मया विना गच्छति पङ्कजानि ॥ १४ ॥
कामं त्विदं पुष्पितवृक्षषण्डं नानाविधैः पक्षिगणैरुपेतम् ।
वनं प्रयाता नु तदप्ययुक्तमेकाकिनी साऽतिबिभेति भीरुः ॥ १५ ॥

तायाः सुव्रतायाः मदन्यं स्प्रष्टुमनिच्छन्त्याः मम प्रियायाः ग्रीवां शून्ये एकान्ते विभिद्य रुधिररूपाणि अशनानि पानानि परिपीतवन्ति ननम् ॥ १० ॥

रा० टी०–मयेति । आयतकान्तनेत्रा आयते विस्तृते कान्ताय पत्यन्येषणाय नेत्रे यस्याः सा मया विहीना अत एव रक्षोभिराहृत्य विकृष्यमाणा या सीता सा दीना सती कुररीव निनादं मुक्तवती कृतवती ननं निश्चितमेतत् ॥ ११ ॥

गो० टी०–मयेति । या विजने वने मया विहीना सा कुररीव क्रौञ्चीव विनादं मुक्तवती । आयतकान्तनेत्रेत्यनेन तत्काले मदागमनमार्गव्यग्रतोक्ता ॥ ११ ॥

१२] ति० टी०–उपोपविष्टा समीपावस्थिता । निःशब्दं स्मितम् ईषत्सशब्दो हासः ॥ १२ ॥

रा० टी०–पूर्वं कस्यांचित् शिलायां स्थित्वा सीतया सह परिहासादिकं जातं तामवलोक्याह–अस्मिन्निति । कान्तमतिरमणीयं स्मितं यस्याः सा उदारशीला पूर्वमस्मिन् शिलातले मया सार्धमुपोपविष्टा, जातहासा जातो हासः परिहासो यया सा सीता बहुवाक्यजातं परिहासमात्रविषयकत्वहेतुककुत्सितवाक्यसमूहं त्वामाह ॥ १२ ॥

गो० टी०–अस्मिन्मया सार्धमुदारशीला शिलातले पूर्वमुपोपविष्टा। कान्तस्मिता लक्ष्मण जातहासा त्वामाह सीता बहुवाक्यजातम् ? ॥ पूर्वं गोदावर्यां सीतया सह सरसलीलाविहारो यस्मिन् कृतस्तस्मिन् प्रदेशे गत्वा तदर्शनेन जातपूर्वस्मरणो लक्ष्मणं प्रत्याह–अस्मिन् एवं शून्यतया स्थिते प्रदेशे हि मया पूर्वं निर्विलंब्धः मया सार्धं प्रणयधारायामहं पण्डितमानी तादृशोऽहमप्यप्रधानोऽभवं तदीयविदग्धव्यवहारेषु उदारशीला पूर्वं नगरवासे श्वश्वादिसंनिधानेन सङ्कुचितविहारा स्थिता सीतया सार्धमिति युक्तम् सांप्रतं तु एकान्तस्थलतया सरसभोगेषु सर्वस्वदानं कृतवती शिलातले पूर्वमुपोपविष्टा गोदावरीसलिले चिरं सलिलविहारे प्रवृत्ते खिन्नो रामः प्रदेशान्तरे निस्तरणायोगात् केनचिच्छिलातलमार्गेण निर्गन्तुमालोकितवान् सीता तु 'प्रेक्षितज्ञास्तु कोसला' इति न्यायेन कान्तस्य प्रेक्षणातिशयमवगम्य तं पुनः क्लेशयितुं तच्छिलातलं पूर्वमधिरूढा उपोपविष्टा । तत्र यं यं कोणमवलम्ब्योत्थातुमिच्छति तत्तदाक्रम्य मुखे सलिलमभिषिञ्चन्ती स्थिता वीप्सयैवमवगम्यते कान्तस्मिता सहजमधुरहासवती जातहासा स्वविजयकृतहर्षेण संजातहासा त्वामाह इतःपूर्वं कुत्रापि पराजयाभावात् । अधुना क्रीतोऽभिनवपराजयाद्रामो लज्जानम्रवदनोऽभूत् तं विहाय भ्रातरं बहुधा प्रशंसन्तं लक्ष्मणं प्रत्युक्तवती बहुवाक्यजातं युवां संकल्पितं सर्वं निर्वर्तितवन्तौ हि युवामतिबलपराक्रमशालिनौ पुरुषधौरेयौ वयमबलाजनाः युवां मृगयायै शत्रुहत्यायै चाभियातारौ वयं गृहादनिर्गच्छन्त्यः युवयोः संकल्पितं सर्वं कर्तुं शक्यं युष्मदग्रजो जितवान् हि इत्येवं बहुसुखं वचनमवोचत् ॥ १२ ॥

१३] ति० टी०–मम प्रियाया नित्यकालं प्रियेत्यन्वयः । अत्र गोदावर्यामियं चिन्ता असंगतेत्याह–नैकाकिनीति ॥ १३॥

रा० टी०–गोदावरीति । सरितां वरिष्ठा इयं गोदावरी मम प्रियायाः नित्यकालं सर्वसमयं प्रिया अतः अत्र गच्छेदिति चिन्तयामि संभावयामि । संभावनाया असंभवे हेतुः–सा सीता एकाकिनी अस्मदादिसाहाय्यरहिता सती कदाचित् न याति एतेन क्वचिन्निलीना स्यादिति रामसंभावना ध्वनिता ॥ १३ ॥

गो० टी०–गोदावरीति । नित्यकालं सर्वकालम् । अत्र गोदावर्यां चिन्तयामि तत्र युक्तमिति शेषः ॥ १३ ॥

१४] ति० टी०–एवमग्रेऽपि गच्छति पङ्कजानि आनेतुमिति शेषः ॥ १४ ॥

रा० टी०–पद्मेति । पद्मानि एवानेतुमभिप्रयाता अपि इति यत् संभावनं तदप्ययुक्तम् । तत्र हेतुः–मया विना सा पङ्कजानि कदाचिन्न गच्छति ॥ १४ ॥

गो० टी०–पद्मेति । अभिप्रयाता गोदावरीमिति शेषः । पङ्कजानीत्यत्राप्यानेतुमित्यनुषज्यते ॥ १४ ॥

१५] ति० टी०–अतिबिभेत्यत्यन्तं भीता भवति ॥१५॥

रा० टी०–काममिति । पुष्पिता वृक्षखण्डा यस्मिन् तत् इदं वनं प्रयाता । तत्प्रयातमप्ययुक्तम् एकाकिनी अतिबिभेति ॥ १५ ॥

१ खण्डमिति रा. पाठः ।

आदित्य भो लोककृताकृतज्ञ लोकस्य सत्यानृतकर्मसाक्षिन् ।
मम प्रिया सा क्व गता हृता वा शंसस्व मे शोकहतस्य सर्वम् ॥ १६ ॥
लोकेषु सर्वेषु[1] न[2] नास्ति किंचिद्यत्तेन नित्यं विदितं भवेत्तत् ।
शंसस्व वायो कुलपालिनीं[3] तां मृता हृता वा पथि वर्तते वा ॥ १७ ॥
इतीव तं शोकविधेयदेहं रामं विसंज्ञं विलपन्तमेवं[4] ।
उवाच सौमित्रिरदीनसत्त्वो न्याय्ये स्थितः कालयुतं च वाक्यम् ॥ १८ ॥
शोकं विसृज्याद्य धृतिं भजस्व सोत्साहता चास्तु विमार्गणेऽस्याः[5] ।
उत्साहवन्तो हि नरा न लोके सीदन्ति कर्मस्वतिदुष्करेषु ॥ १९ ॥
इतीव सौमित्रिमुदग्रपौरुषं ब्रुवन्तमार्तं[6] रघुवंशसत्तमः ।
न चिन्तयामास धृतिं विमुक्तवान्पुनश्च दुःखं महदाप्युपागमत्[7] ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–काममिति । अतिबिभेति अत्यन्तं बिभेति१६

१६] ति० टी०–लोककृताकृतज्ञेत्यादिना तादृशमक्षमज्ञानवतस्तज्ज्ञानं सर्वथाऽस्तीति भावः ॥ १६ ॥

रा० टी०–सूर्यं संबोध्य पृच्छति–आदित्येति । लोककृताकृतज्ञ ! कृताकृतयोर्ज्ञातः ! अत एव सत्यानृतकर्मसाक्षिन् भो आदित्य मम प्रिया सीता क्व क्वचित् गता निर्लीनेत्यर्थः, हृता वा शोकहतस्य मे सर्वं शंसस्व शंस ॥ १६ ॥

गो० टी०–आदित्येति । भो ! इत्यादित्यस्य संबोधनम् । लोकस्य कृताकृते जानातीति तथा सत्यानृतयोः पुण्यपापयोः कर्मणोः साक्षिन् ! 'कर्मसाक्षी जगच्चक्षुः' इत्युक्तेः । मम प्रिया क्व गता अथवा हृता केनचिदपहृतेति शंसस्व शंस ॥ १६ ॥

१७] ति० टी०–यत्ते नित्यं विदितं न भवेत्तद्वस्तु सर्वेषु लोकेषु नैवास्ति । अतः सापि तव विदितैवेति तां शंसस्वेत्यन्वयः । कुलपालिनीमित्यनेन तस्या महत्त्वात्तज्ज्ञानं मम नेति वक्तुमशक्यमिति सूचितम् ॥ १७ ॥

रा० टी०–लोकेष्विति । हे वायो ! यत् ते तव नित्यं विदितं ज्ञातं न भवेत् तत् किंचित् सर्वेषु लोकेषु नास्ति सर्वं त्वया ज्ञातमित्यर्थः । अतः मृता लोकान्तरगमनकर्मीत्वेन मृतासदृशी वा हृता सती पथि वर्तते वा इति कुलपालनीं तां सीतां शंसस्व ॥ १७ ॥

गो० टी०–लोकेष्विति । ते नित्यं यत्र विदितं तत् सर्वेषु लोकेषु नास्ति तस्माच्छंसेति ॥ १७ ॥

१८–१९] ति० टी०–इतीवातीवशब्दौ एर्यायौ । शोकविधेयदेहं तमिव । कालयुतं कालोचितम् ॥ १८ ॥ १९ ॥

रा० टी०–इतीवेति । इतीव अतीव शोकविधेयदेहं शोकव्याप्तशरीरम् अत एव विसंज्ञं विशेषज्ञानरहितमत एव विलपन्तं रामम् अदीनसत्त्वः धैर्यावलम्बेन दीनसत्त्वाभाववान् अत एव न्याय्ये स्थितः सौमित्रिः कालयुतं समयोचितं वाक्यमुवाच ॥ १८ ॥

गो० टी०–इतीवेति । शोकविधेयः शोकपरवशः कालयुतं कालोचितम् । अदीनसत्त्वः अदीनधृतिः एवमुवाचेत्यन्वयः ॥ १८ ॥

रा० टी०–तद्वचनाकारमाह–शोकमिति । शोकं विसृज्य त्यक्त्वा धृतिं धैर्यं भजस्व अत एव अस्याः सीताया विमार्गणे सोत्साहता उत्साहवैशिष्ट्यं चास्तु हि यतः उत्साहवन्तो नराः अतिदुष्करेष्वपि कर्मसु न सीदन्ति ॥ १९ ॥

गो० टी०–शोकमिति । अस्याः सीतायाः विमार्गणे अन्वेषणे ॥ १९ ॥

२०] ति० टी०–न चिन्तयामास लक्ष्मणोक्तं युक्तमिति न विचारयामास, किं तु धैर्यं त्यक्तवानेव । अत एव पुनर्दुःखं प्रापत् ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०–इतीवेति । इतीव अत्यन्तं ब्रुवन्तम् उदग्रपौरुषम् आर्तं सौमित्रिं न चिन्तयामास एतदुक्तिः शोभनेति न स्वीचकारेत्यर्थः । अत एव धृतिं धैर्यं पुनर्विसृष्टवान् अत एव महत् दुःखं पुनरुपागमत् ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–इतीवेति । उदग्रपौरुषं श्रेष्ठपराक्रमम् इतीव ब्रुवन्तं सौमित्रिं न चिन्तयामास तद्वचनं नादृतवानित्यर्थः । धृतिं च मुक्तवान् ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमञ्जूषाख्याने आरण्यकाण्डव्याख्याने त्रिषष्टितमः ॥ ६३ ॥

---

१ वशस्य नित्यमिति गो. पाठः। २ च नेति गो. न चेति ग. पाठः। ३ एवमिति गो. पाठः। ४ विसृष्टार्येति गो. पाठः। ५ आर्तं इति गो पाठः। ६ वर्धन इति गो. पाठः। ७ अर्भीति गो. पाठः।

चतुःषष्टितमः सर्गः ।

रामः सीतायाः पद्मानयनार्थं गोदावरीं प्रति गमनं संभाव्य तत्र गतस्तां सातावार्तां पप्रच्छ । सा तु जानत्यपि रावणभिया न किमपि उवाच । ततो मृगान् तद्वार्तां पृच्छँस्तच्चेष्टाभिर्नैर्ऋतदिशि तद्गमनं प्रतर्क्य लक्ष्मणेन सह तद्दिशमनु प्रतस्थे । मार्गपार्श्वतामलवपुष्पपङ्क्तिं विलोक्य तान्मिस्तल्लीलानिचाय मन्वानः प्रचलन्मार्गे सीतारावणपदाङ्कजटायुर्भग्नकवचकार्मुकादीनि ददर्श । केनापि सीताहरणवृत्तान्तनिवेदने प्राप्तकोपः सकलभुवनभस्मीकरणाय धनुषि शरमाधत्त ।

स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत् । शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम्॥ १ ॥
अपि गोदावरीं सीता पद्मान्यानयितुं गता । एवमुक्तस्तु रामेण लक्ष्मणः पुनरेव हि ॥ २ ॥
नदीं गोदावरीं रम्यां जगाम लघुविक्रमः । तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत् ॥ ३ ॥
नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे । कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी ॥ ४ ॥
नहि तं वेद्मि वै राम यत्र सा तनुमध्यमा । लक्ष्मणस्य वचः श्रुत्वा दीनः संतापमोहितः॥ ५ ॥
रामः समभिचक्राम स्वयं गोदावरीं नदीम् । स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत् ॥ ६ ॥
भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि । न तां शशंसू रामाय तथा गोदावरी नदी ॥ ७ ॥

१-२] ति०टी०—एवं शोककरणं चारद्वारा श्रवणेन रावणस्य मनुष्यत्वबुद्धिदार्ढ्यपूर्वकं स्ववध्यत्वसंपादनायेति बोध्यम् । तदुक्तं ब्रह्माण्डपुराणे—'स्त्रीपुंसलक्षणोपेतात्मा देहो नास्य विजायते । किं तु निर्दोषचैतन्यं सुखनित्यां स्वकां तनुम् ॥ प्रकाशयति सेवेयं जनिर्विष्णोर्न चापरा । तथाप्यस्मरमोहार्थं परेषां च क्वचित्क्वचित् ॥ दुःखाज्ञानश्रमादींश्च दर्शयेच्छङ्कसद्गुणः । क्व त्रणादि क्व चाज्ञानं स्वतन्त्राचिन्त्यसद्गुणे ॥ मोक्षाभावाय तेषां तु दर्शयत्तामजो हरिः । कृष्णो ह्यत्यक्तदेहोऽपि त्यक्तदेहस्य देहवत् ॥ लोकानां दर्शयामास स्वरूपसदृशाकृतिम् ॥' इति । एतेन रावणस्येश्वरत्वबुद्धिप्रतिबन्धेन मोक्षाभावोऽपि शोककफलमित्युक्तम् । एवं रावणद्वारा सीताहरणमपि तत्पुण्यातिशयनाशेन वध्यतासंपादनाय । तथा च केदारखण्डे उक्तारूयायिका—महता तपसा लब्धबलो रावणस्तदधिकतपोबलं विना जेतुमशक्यो देवाश्च स्वयं तदधिकं तपः कर्तुमक्षमा, अतस्तेषां कार्यमत्यन्तानुचितसीतानुरागमोहानुवृत्तिसंपादनेन रावणस्य तपोवीर्यभंशं संपाद्य कर्तव्यमिति लक्ष्म्या सह विचार्य तदर्थं विष्णुः सीतया ब्रह्मविद्यया सहावतीर्ण इति ॥ १ ॥ २ ॥

रा० टी०—पूर्वसर्गान्ते दुःखं महदुपागमदित्युक्तं तदाकारं वर्णयितुमाह—स इति । दीनः स रामः दीनया वाचा लक्ष्मणमब्रवीत् । तद्वचनाकारमाह—हे लक्ष्मण ! गोदावरीं नदीं गत्वाऽन्विष्येत्यर्थः, जानीहि सीतामिति शेषः ॥ १ ॥

गो०टी०—अथ चिह्नविशेषैः सीताहरणनिश्चयश्रुतुःषष्टितमे—स दीन इत्यादि । लोके कश्चिद्दीनोऽपि दीनां वाचं न व्याहरति । इदमर्धमेकं वाक्यम् ॥ १ ॥

रा० टी०—सीतायाः तत्र गमने हेतुं वदन्नाह—अपीति । पद्मानि आनयितुम् आनेतुं गोदावरीं सीता गता स्यात् इति शेषः, संभावनार्थकोऽपिः । अर्धं पृथक्—एवमिति । रामेण एवं पुनरुक्तः लघुविक्रमः अतिशीघ्रपादप्रक्षेपवान् लक्ष्मणः गोदावरीं नदीं जगाम । अर्धद्वयमेकान्वयि ॥ २ ॥

गो० टी०—एवमिति । लघुविक्रमः त्वरितपदविन्यासः॥२॥

३] ति० टी०—लघुविक्रमोऽविलम्बितपादन्यासः तीर्थवतीमवतारवतीं पुण्योदकवतीं च ॥ ३ ॥

रा० टी०—तामिति । तीर्थवतीं प्रशस्तावतरणमार्गविशिष्टां तां गोदावरीं विचित्वा विचित्य लक्ष्मणो राममब्रवीत् ॥३॥

गो० टी०—तामिति । तीर्थवतीम् अवतारवतीम् ॥ ३ ॥

४] ति० टी०—न शृणोति मे वाक्यमिति शेषः । क्लेशनाशिनी सति दर्शन इति भावः ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—नेति । एनां सीतां तीर्थेषु न पश्यामि क्रोशतोऽपि मे क्लेशनाशिनी वैदेही न शृणोति अतः कं नु कंचित् देशं देशान्तरम् आपन्ना प्राप्ता ॥ ४ ॥

गो० टी०—नेति । क्रोशतः आह्वयतः मे मत्तः न शृणोति शेषः ॥ ४ ॥

गो० टी०—कं न्विति । वेद जानामि ॥ ५ ॥

५] ति० टी०—तं देशम् ॥ ५ ॥

रा० टी०—ननु कं देशं गता इत्यत आह—नेति । यत्र यस्मिन्देशे तनुमध्यमा सा सीता आस्ते इति शेषः, तं देशं नैव वेद्मि । अर्धं पृथक्—लक्ष्मणस्येति । लक्ष्मणस्य वचः श्रुत्वा गोदावरीं नदीं रामः स्वयं समभिचक्राम अत एव तां गोदावरीम् उपस्थितः स रामः सीता क्व इत्येवमब्रवीत् । अर्धत्रयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—लक्ष्मणस्येति श्लोकः ॥ ६ ॥

६] ति० टी०—तां गोदावरीम् ॥ ६ ॥

गो० टी०—स तामित्यर्धमेकं वाक्यम् ॥ ७ ॥

७] ति० टी०—भूतान्युक्तरूपेण पृच्छ्यमानानि रामेण

१ परनारहर्तृत्व गो. पाठः । २ अहं नेयं तं देशं ··· जनकात्मजेति गो. पाठः । ३ इतीति गो. पाठः ।

ततः प्रचोदिता भूतैः शंस चास्मै प्रियामिति । न चैं सा ह्यवदत्सीतां पृष्टा रामेण शोचता ॥ ८ ॥
रावणस्य च तद्रूपं कर्मापि च दुरात्मनः । ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस हैं ॥ ९ ॥
निराशस्तु तया नद्या सीताया दर्शने कृतः । उवाच रामः सौमित्रिं सीतादर्शनकर्शितः ॥ १० ॥
एषा गोदावरी सौम्य किंचिन्न प्रतिभाषते । किं तुं लक्ष्मण वक्ष्यामि समेत्य जनकं वचः ॥ ११ ॥
मातरं चैव वैदेह्या विना तामहमप्रियम् । या मे राज्यविहीनस्य वने वन्येन जीवतः ॥ १२ ॥
सर्वं व्यपानयच्छोकं वैदेही क्व नु सा गता । ज्ञातिवैंगैविहीनस्य वैदेहीमप्यपश्यतः ॥ १३ ॥
मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः । मन्दाकिनीं जनस्थानमिमं प्रस्रवणं गिरिम् ॥ १४ ॥
सर्वाण्यनुचरिष्यामि यदि सीता हि लभ्यते । एते महामृगा वीरा मामीक्षन्ते पुनैः पुनः ॥ १५ ॥
वक्तुकामा इहैं हि मे इङ्गितान्युपलक्षये । तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह ॥ १६ ॥

न्द्रेण हृतां ज्ञात्वापि रक्षोभयाद्रामाय न शशंसः । तथा गोदावरी च न शशंसेत्यर्थः ॥ ७ ॥

रा० टी०–भूतानीति । वधार्हेणापि राक्षसेन्द्रेण रावणेन हृतां सीतां भूतानि अपि यतो रावणभीतेः हेतोः तां सीतां न शशंसुः तथा तत एव हेतोः गोदावरी नद्यपि न शशंस ॥ ७ ॥

गो० टी०–भूतानीति । भूतानि वन्यानि सत्त्वानि दृष्टान्तार्थमिदम् । यथा पूर्वं पृच्छ्यमानानि भूतानि न शशंसुः तथा गोदावरी च न शशंसेत्यर्थः ॥ ८ ॥

८] ति० टी०–तथाभूतैरस्मै सीतां शंसेति प्रचोदितापि गोदावरी पृष्टापि नावदत् ॥ ८ ॥

रा० टी०–तत इति । भूतैः पृथिव्यादिभिः अस्मै रामाय प्रियां शशंस इति प्रचोदिता रामेण पृष्टा च सा गोदावरी सीतां न अवदत् । ' अस्मत् ' इति भूषणपाठः ॥ ८ ॥

गो० टी०–तत इति । स्वयं न शशंस भूतैः प्रचोदितापि न शशंसेत्यर्थः । अस्मत् अस्मदर्थं पञ्चमी ॥ ९ ॥

९] ति० टी०–तत्र हेतुः–रावणस्येति ॥ ९ ॥

रा० टी०–तदेव सहेतुकमाह–रावणस्येति । दुरात्मनो रावणस्य तत् अतिभयंकरं रूपं कर्म च ध्यात्वा संस्मृत्य भयात् सा गोदावरी वैदेहीं न शशंस ॥ ९ ॥

गो० टी०–अकथने हेतुमाह–रावणस्येति ॥ १० ॥

१०] ति० टी०–नद्या सीतामशंसन्त्या रामः सीतादर्शने निराशः कृतः । इयं गोदावरी दिव्यदेवता न ब्रूते, अतस्तद्दर्शनं दुर्लभमिति निराशोऽभूत् ॥ १० ॥

रा० टी०–निराश इति । सीताया दर्शने तया गोदावर्या निराशः कृतः सीतादर्शनकर्शितः सीताया अदर्शनेन प्राप्तकृशत्वो रामः सौमित्रिमुवाच ॥ १० ॥

गो० टी०–निराश इति । निराशः कृत इत्यन्वयः ११–१२

११–१३] ति० टी०–तदेवाह–एषेति ॥ ११–१३ ॥

रा० टी०–एषेत्यादिभिः । हे सौम्य ! एषा गोदावरी किंचिन्न प्रतिभाषते सीतावृत्तान्तलेशमपि न कथयतीत्यर्थः । अत जनकं मिथिलाधिपं वैदेह्या मातरं च समेत्य प्राप्य तां सीतां विनाऽहं किम् अप्रियं वक्ष्यामि । सार्धश्लोक एकान्वयी ॥११॥

रा० टी०–येति । राज्यविहीनस्य त्यक्तराज्यस्य अत एव वन्येन फलादिना वने जीवतो मे या वैदेही सर्वं शोकं व्यपनयत् सा क्व गता ॥ १२ ॥

गो० टी०–येति । वन्येन फलादिना ॥ १३ ॥

रा० टी०–ज्ञातीति । ज्ञातिपक्षविहीनस्य ज्ञातिभिः पक्षैः सहायैश्च विहीनस्य राजपुत्रीमपश्यतः अत एव जाग्रतः निद्रामलभमानस्य मम रात्रयः दीर्घा बृहत्यो भविष्यन्ति अतिदुःखेन व्यत्येष्यन्तीत्यर्थः, इत्यहं मन्ये ॥ १३ ॥

गो० टी०–ज्ञातीति । ज्ञातयश्च ते पक्षाः सहायाश्च तैर्विहीनस्य ॥ १४–१६ ॥

१४] ति० टी०–मन्दाकिनी काचिन्नदी । प्रस्रवणस्तदाख्यो गिरिः ॥ १४ ॥

रा० टी०–मन्दाकिनीमिति । यदि कदाचित् सीता दृश्यते तर्हि सर्वाणि मन्दाकिनीप्रभृतीनि अनुचरिष्यामि ॥१४॥

१५] ति० टी०–सर्वाण्यनुचरिष्याण्यनुचरवत्सेविष्यामि ॥ १५ ॥

रा० टी०–एते इति । वीर हे लक्ष्मण ! मे मह्यं वक्तुकामा इवैते महामृगाः मां पुनः पुनः ईक्षन्ते । वक्तुकामत्वे गमकमाह–इङ्गितानि चेष्टितानि उपलक्षये जानामि ॥ १५ ॥

१६] ति० टी०–एषामिङ्गितानि तथोपलक्षये यथा वक्तुकामा इवैमे इत्यर्थः ॥ १६ ॥

रा० टी०–तानिति । नरव्याघ्रो राघवो रामः तान् वक्तुकामान् मृगान् दृष्ट्वा निरीक्षन् उत्तरदानोद्देश्यकमृगचेष्टां विचारयन् सन् बाष्पसंरुद्धया गिरा क्व सीतेति प्रत्युवाच ॥ १६ ॥

गो० टी०–तांस्त्विति । बाष्पसंरुद्धया वृशा निरीक्षन् निरीक्षमाणः सन् क्व सीतेत्युवाच ॥ १७ ॥

---

१ अस्मत्तामिति गो. पाठः । २ तु साऽभ्यवदिति गो. पाठः । ३ कर्माणीति गो. पाठः । ४ तामिति गो. पाठः । ५ स्मिति गो. पाठः । ६ व्यपनयेत्यिति गो. व्यपनयदिति रा. पाठः । ७ पक्षेति गो. रा. पाठः । ८ राजपुत्रीमिति गो. रा. पाठः । ९ दृश्यत इति गो. पाठः । १० मृगा महावीर्या इति गो. पाठः । ११ वीरेति रा. पाठः । १२ मुहुर्मुहुरिति गो. पाठः । १३ इवेति गो. रा. पाठः ।

क्व सीतेति निरीक्षन्त्वै बाष्पसंरुद्धया [1]गिरा । एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः ॥ १७ ॥
दक्षिणाभिमुखाः सर्वे दर्शयन्तो [2]नभःस्थलम् । मैथिली ह्रियमाणा सा दिशं यामभ्यपद्यत [3] ॥ १८ ॥
तेन मार्गेण [4]गच्छन्तो निरीक्षन्ते नराधिपम् । येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः ॥ १९ ॥
पुनर्नदन्तो गच्छन्ति लक्ष्मणेनोपलक्षिताः । तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम् ॥ २० ॥
उवाच लक्ष्मणो धीमाञ्ज्येष्ठं भ्रातरमार्तवत् । क्व सीतेति त्वया पृष्टा यदिमे सहसोत्थिताः ॥ २१ ॥
दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः । साधु गच्छावहे देव दिशमेतां च नैर्ऋतीम् ॥ २२ ॥
यदि तत्स्यागमः कश्चिदार्या वा साऽथ लक्ष्यते । बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम् ॥ २३ ॥
लक्ष्मणानुगतः श्रीमान्वीक्षमाणो वसुंधराम् । एवं संभाषमाणौ तावन्योन्यं भ्रातरावुभौ ॥ २४ ॥

१७] ति० टी०–निरीक्षन्मृगचेष्टाज्ञानाय सूक्ष्मदृष्टिं कुर्वन् । एवमुक्ता एवं पृष्टाः ॥ १७ ॥

रा० टी०–एवमिति । नरेन्द्रेण रामेण एवमुक्ताः अत एव सहसोत्थिताः सर्वे ते मृगाः नभस्थलं दर्शयन्तः सन्तः दक्षिणाभिमुखाः बभूवुरिति शेषः । अनया चेष्टया आकाशमार्गेण दक्षिणादिशं वैदेही गतेति सूचितम् ॥ १७ ॥

गो० टी०–एवमिति । उक्तः पृष्टः नभःस्थलं दर्शयन्तः आकाशावलोकनेङ्गितेन सीतागमनमार्गं दर्शयन्त इत्यर्थः । उत्थिताः प्रस्थिताः आकाशमार्गेण दक्षिणां दिशं गता सीतेत्यनूच्चर्यन्निति भावः । अस्मुमेवार्थं स्पष्टयति–मैथिलीति । ह्रियमाणा सा मैथिली यां दिशमन्वपद्यत प्राप तेन मार्गेण तया दिशा धावन्तः सन्तः नराधिपं निरीक्षन्ते ॥ १८ ॥ १९ ॥

१८] ति० टी०–नभःस्थलं दर्शयन्तः ऊर्ध्वमुखतयाऽऽकाशविलोकनेङ्गितेनेत्यर्थः । ह्रियमाणा सीता यां दिशमभ्यपद्यत १८

रा० टी०–तदेव स्पष्टमाह–मैथिलीति । ह्रियमाणा मैथिली यां दिशमभ्यपद्यत तेन मार्गेण दक्षिणदिशेत्यर्थः, गच्छन्तो धावन्तो मृगाः नराधिपं रामं निरीक्षन्ते दिश एव मार्गशब्देन ग्रहणान्न यत्तदोर्भिन्नविषयत्वम् ॥ १८ ॥

१९] ति० टी०–तेन मार्गेण दिङ्मार्गेण गच्छन्तो धावन्तो नराधिपं रामं निरीक्षन्ते । एवमिङ्गितं लक्ष्मणोऽपश्यदित्याह–येनेति । येन हेतुना मार्गमाकाशमार्गं पुनर्भूमौ गमनाय भूमिं च निरीक्षन्ते ॥ १९ ॥

रा० टी०–येनेति । येन हेतुना मार्गमाकाशरूपाध्वानं भूमिं च ते पृष्टाः मृगाः निरीक्षन्ते स्म नदन्तः पुनर्गच्छन्ति स्म तेन हेतुना लक्ष्मणेन ते मार्गप्रदर्शकाः मृगा उपलक्षिता ज्ञाताः तन्मार्गप्रदर्शनमवबुद्धमित्यर्थः १९ ॥

गो० टी०–येनेति । येन कारणेन मार्गम् आकाशमार्गं भूमिं दक्षिणां भूमिं च निरीक्षन्ते स्म पुनश्च मार्गं दक्षिणमार्गम् इच्छन्ति स्म, गन्तुमिति शेषः । तेन कारणेन मृगाः उपलक्षिताः गृहीतचेष्टार्था आसन् ॥ २० ॥

२०] ति० टी०–पुनश्च मार्गं दर्शयितुमिच्छन्तो लक्ष्मणेनोपलक्षितास्तेषामिङ्गितं लक्ष्मणो लक्षयामासेत्यर्थः । आकाशमार्गेण गत्वा दक्षिणदिशि दूरे स्थापिता सीता दक्षिणदिशि गच्छतेत्येवं तदिङ्गितं तेषां च वचनसर्वस्वभूतं स्वयं लक्षयामास ॥ २० ॥

रा० टी०–तेषामिति । वचनस्य उक्तस्य सर्वस्वः सर्वार्थो यस्मिन् तत्तेषामिङ्गितं लक्षयामास तात्पर्यं बुबुधे इत्यर्थः, अत एव ज्येष्ठं भ्रातरं लक्ष्मण आर्तवत् वच उवाच ॥ २० ॥

गो० टी०–उक्तमनुवदन्नाह–तेषामिति । वचनसर्वस्वं तत्सदृशमिङ्गितमित्यर्थः । लक्षयामास मृगचेष्टार्थं वचनोक्तमिव ज्ञातवानित्यर्थः उवाच चेत्यन्वयः । आर्तवत् आर्तमिति क्रियाविशेषणम् क्वतुप्रत्ययः ॥ २१ ॥

२१–२२] ति० टी०–ततो ज्ञात्वा भ्रातरमप्युवाचेत्यर्थः । आर्तवदार्तार्हम् ॥ २१ ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–क्वेति । सीता क्व इति त्वया पृष्टा अत एव सहसोत्थिता इमे मृगाः क्षितिं नभोभूमिं दक्षिणां नैर्ऋतीं दिशं च यत् यतो दर्शयन्ति अतः एतां नैर्ऋतीं दिशं साधु गच्छावहे यदि तस्य सीतादर्शनस्य आगम उपायः सा सीतैव वा लक्ष्यते लक्ष्येत संभावनार्थको यदिः । अर्धचतुष्टयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०–क्वेत्यादि । श्लोकद्वयमेकान्वयम् । यथा येन प्रकारेण दर्शयन्ति तथा गच्छावहे इत्यन्वयः । आर्षमात्मनेपदम् । नैर्ऋतिं दक्षिणपश्चिमां राक्षसाधिष्ठितां तस्याश्च दक्षिणैकदेशत्वादक्षिणां दिशमिति व्यपदेशः । आगमः सीतादर्शनोपायः ॥ २२ ॥ २३ ॥

२३–२४] ति० टी०–तस्यागमः तस्या आगम इत्यर्थः आर्षं दीर्घः ज्ञापकं वस्तु दृश्येतेत्यर्थः ॥ २३ ॥ २४ ॥

रा० टी०–बाढमिति । बाढमित्येवोक्तेति शेषः । लक्ष्मणानुगतः काकुत्स्थो रामः वसुन्धरां वीक्षमाणः सन् दक्षिणां दिशं प्रस्थितः ॥ २३ ॥

गो० टी०–बाढमिति । श्रीमान् सीताधिगमनहेतुदर्शनश्रीमान् ॥ ॥ २४ ॥

१ दृश्येति गो. पाठः । २ नभस्थलमिति रा. पाठः । ३ अन्वपद्यतेति गो. पाठः । ४ धावन्त इति गो. पाठः । ५ च मार्गमिच्छन्तीति गो. पाठः । ६ स्यादिति गो. पाठः । ७ क्तिप्रत्यय इति युक्तं भाति ।

वसुंधरायां पतितपुष्पमार्गमपश्यताम् । पुष्पवृष्टिं निपतितां दृष्ट्वा रामो महीतले ॥ २५ ॥
उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः । अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण ॥ २६ ॥
अपिनद्धानि वैदेह्या मया दत्तानि कानने । मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी ॥ २७ ॥
अभिरक्षन्ति पुष्पाणि प्रकुर्वन्तो मम प्रियम् । एवमुक्त्वा महाबाहुर्लक्ष्मणं पुरुषर्षभम् ॥ २८ ॥
उवाच रामो धर्मात्मा गिरिं प्रस्रवणाकुलम् । क्वचित्क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ॥ २९ ॥
रामा रम्ये वनोद्देशे मया विरहिता त्वया । क्रुद्धोऽब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा ॥ ३० ॥
तां हेमवर्णां हेमाङ्गीं सीतां दर्शय पर्वत । यावत्सानूनि सर्वाणि न ते विध्वंसयाम्यहम् ॥ ३१ ॥
एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति । दर्शयन्निव तां सीतां नादर्शयत राघवे ॥ ३२ ॥
ततो दाशरथी राम उवाच च शिलोच्चयम् । मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि ॥ ३३ ॥
असेव्यः सर्वनश्चैव निस्तृणद्रुमपल्लवः । इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण ॥ ३४ ॥

रा० टी०–एवमिति । एवं पूर्वोक्तरीत्या अन्योन्यं संभाषमाणौ तावुभौ भ्रातरौ वसुन्धरायां पृथिव्यां पतितपुष्पमार्गं स्खलितपुष्परूपं पन्थानमपश्यताम् ॥ २४ ॥

गो० टी०–एवमिति । एवं साध्वित्युक्तरीत्या पुष्पमार्गं पुष्पयुक्तमार्गम् मध्यमपदलोपिसमासः ॥ २५ ॥

२५] ति० टी०–पतितपुष्पमार्गं पतितपुष्पयुतं मार्गम् ॥ २५ ॥

रा० टी०–पुष्पेति । महीतले निपतितां पुष्पवृष्टिं दृष्ट्वा दुःखितो वीरो रामः दुःखितं लक्ष्मणमुवाच ॥ २५ ॥

गो० टी०–तामिति । वीरः दर्शनोपायमात्रे ज्ञाते तां द्रष्टुं समर्थः ॥ २६ ॥

२६] ति० टी०–अभिजानामि प्रत्यभिजानामि ॥ २६ ॥

रा० टी०–तद्वचनाकारमाह–अभीति । हे लक्ष्मण ! काने वने मया दत्तानि वृक्षेभ्य आहृत्य समर्पितानि अत एव देह्या अपिनद्धानि धृतानि यानि तानीमानि पुष्पाणि अभिजानामि बुध्या निश्चिनोमि ॥ २६ ॥

गो० टी०–अभिजानामीति । तानीमानि पुष्पाणि मया दत्तानि वैदेह्या केशपाशे पिनद्धानि बद्धानीत्यभिजानामि ॥२७॥

२७–२८] ति० टी०–अपिनद्धानि केशपाशे बद्धानि । अम्लानत्वेन रविरपनयनेन वायुर्धारणेन वसुंधरा मत्प्रियं सीताज्ञापनरूपं प्रकुर्वन्तो रक्षन्तीति मन्ये ॥ २७ ॥ २८ ॥

रा० टी०–नन्वेतावत्कालपर्यन्तं कथं तत्रैव स्थितानीयत आह–मन्ये इति । मम प्रियं प्रकुर्वन्तः सूर्यादयोऽभिरक्षन्तीति मन्ये निश्चिनोमि ॥ २७ ॥

गो० टी०–मन्य इति । अम्लानीकरणात् सूर्यः, अदृश्यीकरणात् वायुः, धारणात् भूमिश्च रक्षन्तीति भावः ॥ २८ ॥

रा० टी०–एवमिति । महाबाहुः रामः लक्ष्मणमेवमुक्त्वा प्रस्रवणाकुलं तदभिधं गिरिमुवाच ॥ २८ ॥

गो० टी०–एवमिति । महाबाहुमित्यनेन बलवत्सहायत्वं, पुरुषर्षभ इत्यनेन स्वतः पराक्रमशालित्वमुक्तम् । तथापि धर्मात्मा सहसा गिरेरविनाशकरणात् ॥ २९ ॥

२९] ति० टी०–मया विरहिता क्वचिद्रम्ये वनोद्देशे सर्वाङ्गसुन्दरी दृष्टा ॥ २९ ॥

रा० टी०–तद्वचनाकारमाह–क्वचिदिति । क्षितिभृतां नाथ हे पर्वतश्रेष्ठ ! रम्ये रमणीये वनोद्देशे मया विरहिता सर्वाङ्गसुन्दरी रामा स्त्री त्वया क्वचित् दृष्टा क्वचिदिति प्रश्ने ॥ २९ ॥

गो० टी०–क्वचिदिति । रामा स्त्री ॥ ३० ॥

३०] ति० टी०–क्रुद्धस्तदधिष्ठातृदेवतोद्देशेन क्रोधः ॥ ३० ॥

रा० टी०–तदुत्तरादानानन्तरकालिकं रामवचनमाह–क्रुद्ध इति । तत्र तदुत्तरादानसमये क्रुद्धः क्रोधवत्त्वेन प्रतिभासमानो रामः क्षुद्रमृगं सिंह इव अब्रवीत् ॥ ३० ॥

गो० टी०–अदर्शनादाह–क्रूर इति । एकमर्धम् ॥ ३१ ॥

३१] ति० टी०–हेमाङ्गीमित्यनेन लावण्यमुक्तम् ॥ ३१ ॥

रा० टी०–तद्वचनाकारमाह–तामिति । सर्वाणि ते सानूनि शिलाः यावदहं न विध्वंसयामि तावदेव हे पर्वत ! हेमवर्णां सुवर्णवर्णसदृशवर्णविशिष्टाम् अत एव हेमाङ्गीं हेममयाङ्गीत्वेन प्रतीयमानां सीतां दर्शय ॥ ३१ ॥

गो० टी०–तामिति । हेमवर्णां हेमप्रतिमासदृशीं हेमाभां स्वर्णतुल्यकान्तिम् ॥ ३२ ॥

३२–३४ ति० टी०–दर्शयन्निव वक्ष्यमाणलिङ्गद्वारा नादर्शयत् वाग्ग्रहित्येन साक्षादिति शेषः । राघवे तद्विषये ॥ ३२–३४ ॥

रा०टी०–एवमिति । मैथिलीं प्रति रामेण एवमुक्तः पर्वतः तां सीतां दर्शयन् जानन्नपि राघवे राघवसमीपे नादर्शयत अबोधयत् । एतेन ज्ञापनसमये रावणस्मृतिर्भवतीति ध्वनितं तेन रावणभीतेरतिप्राबल्यं व्यञ्जितम् ॥ ३२ ॥

१ पतितमिति गो. पाठः । २ तां पुष्पवृष्टिं पतितामिति गो. पाठः । ३ पिनद्धानीहेति गो. पाठः । ४ बाहुमिति गो. पाठः । ५ हेमाभामिति गो. पाठः । ६ शस्तन्निव तत इति गो. पाठः । ७ संतंनमिति गो. पर्वत इति रा. पाठः ।

यदि नाख्याति मे सीतामद्यचन्द्रनिभाननाम्। एवं प्ररुषितो[1] रामो दिधक्षन्निव चक्षुषा ॥ ३५ ॥
ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत्। त्रस्ताया रामकाङ्क्षिण्याः[2] प्रधावन्त्या इतस्ततः[3] ॥ ३६ ॥
राक्षसेनानुसृप्तायाः[4] वैदेह्याश्च पदानि तु[5]। स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च ॥ ३७ ॥
भग्नं धनुश्च तूणी च विकीर्णं बहुधा रथम्। संभ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम् ॥ ३८ ॥
पश्य लक्ष्मण वैदेह्या कीर्णाः[6] कनकबिन्दवः। भूषणानां हि सौमित्रे माल्यानि विविधानि च ॥ ३९ ॥
तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः। आवृतं पश्य सौमित्रे सर्वतो धरणीतलम् ॥ ४० ॥
मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः। भित्त्वा भित्त्वा विभक्ता वा भक्षिता वा भविष्यति ॥ ४१ ॥
तस्या निमित्तं सीताया द्वयोर्विवदमानयोः। बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह ॥ ४२ ॥
मुक्तामणिचितं चेदं रमणीयं विभूषितम्। धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः ॥ ४३ ॥

गो० टी०–एवमिति। शंसन्निव प्रतिध्वनिना कथयन्निव स्वपृष्टस्यैवानुवादेनानादरोक्तिं रामोऽमन्यतेति भावः। ततः अनादरोक्त्या रावणे विषये सीतां नादर्शयत। "णिचश्च" इत्यात्मनेपदम् ॥ ३३ ॥

रा० टी०–तत इति। शिलोच्चयं पर्वतं दाशरथिरुवाच। अर्थं पृथक्। तद्वचनाकारमाह–मम बाणाग्निदग्धः पर्वतस्त्वं भस्मीभूतो भविष्यसि अत एव निस्तृणद्रुमपल्लवः सन् असेव्यश्च भविष्यसि। अर्धद्वयमेकान्वयि ॥ ३३ ॥

गो० टी०–तत इति। दाशरथिरिति हेतुगर्भम्। शिलोच्चयं पर्वतम्। इदमर्धमेकम् ॥ ३४ ॥

गो० टी०–ममेति श्लोकः ॥ ३५ ॥

रा० टी०–पर्वतं प्रत्युक्त्वा लक्ष्मणं प्रत्याह–इमामिति। हे लक्ष्मण! यदि सीतां नाख्याति तर्हि सरितमिमां गोदावरीं शोषयिष्यामि ॥ ३४ ॥

गो० टी०–इमामिति। इयमपि पृष्टा चेन्न वक्ष्यतीति मत्वेति भावः ॥ ३६ ॥

३५] ति०टी०–दिधक्षन्निव न तु वास्तवी दिधक्षेति भावः ॥ ३६ ॥

रा० टी०–एवमिति। एवं प्ररुषितः आश्रितप्ररोषो रामः चक्षुषा दिधक्षन् दग्धुमिच्छन् सन्निव भूमौ पर्वतगोदावरीसमीपदेशे निष्क्रान्तं राक्षसस्य जटायुनिपातितरावणस्य महत् पदं पदाकृतिरेखां त्रस्तायाः रामवियोगात् भीतायाः अत एव रामकाङ्क्षिण्याः अत एव इतस्ततः प्रधावन्त्या राक्षसेन अनुसृप्तायाः अनुगतायाः वैदेह्याः पदानि च ददर्श। अर्धचतुष्टयमेकान्वयि ॥ ३६ ॥ ३६ ॥

गो० टी०–एवमिति। निष्क्रान्तं प्रादुर्भूतम्। इतः पूर्वमदर्शनादेवमुक्तम् त्रस्तायाः रावणाद्भीतायाः रामकाङ्क्षिण्याः रामाश्रमं प्रयातुमुद्युक्तायाः अत एव राक्षसेनानुवृत्तायाः अनुगतायाः अत एवेतस्ततो धावन्त्याः ददर्शेत्यनुवर्तते ॥ ३७॥३८ ॥

३६] ति० टी०–निष्क्रान्तं प्रवृत्तविक्षेपम्, महदत्यायतविस्तृतम् ॥ ३६ ॥

३७-३८] ति० टी०–अनुसृप्तायाः अनुगम्यमानायाः। जटायुयुद्धसमये सीतायाः रावणेन भूमौ विसृज्य पुनर्ग्रहणादेवमुक्तिः। परिक्रान्तं परिदृष्टम्। एतत्सर्वं समीक्ष्य भ्रातरं शशंसेत्यन्वयः ॥ ३७ ॥ ३८ ॥

रा० टी०–स इति। सीतायाः राक्षसस्य च परिक्रान्तमितस्ततो गमनं समीक्ष्य भग्नं धनुः भग्नौ तूणी च बहुधा विकीर्णम् अवयवशः प्रक्षिप्तं रथं च समीक्ष्य संभ्रान्तहृदयः उद्विग्नचित्तो रामः भ्रातरं शशंस ॥ ३७ ॥ ३८ ॥

गो० टी०–तं समीक्ष्येति सार्धश्लोक एकान्वयः। परिक्रान्तं परिक्रमं पदन्यासमिति यावत् ॥ ३९ ॥

३९] ति० टी०–कनकबिन्दवो भूषणावयवीभूतस्वर्णशकलानि। भूषणानामिति पूर्वान्वयि ॥ ३९ ॥

रा० टी०–शंसनप्रकारमाह–पश्येति। हे लक्ष्मण! कीर्णाः भूमौ प्रक्षिप्ताः भूषणानामाभरणानां कनकबिन्दवः स्वर्णमयबिन्दुरूपावयवाः विविधानि माल्यानि पुष्पाणि च पश्य। वाक्यस्य कर्मत्वान्न द्वितीया ॥ ३९ ॥

गो० टी०–पश्येति। कनकबिन्दवः स्वर्णशकलानि॥४०॥

४०] ति० टी०–तप्तबिन्दुनिकाशैस्तपनीयबिन्दुसदृशैः क्षतजबिन्दुभी रुधिरबिन्दुभिः ॥ ४० ॥

रा० टी०–तप्तेति। तप्तबिन्दुनिकाशैः प्रतप्तस्वर्णबिन्दुसदृशैः चित्रैः ह्रस्वलघ्वादिभेदेनानेकविधैः क्षतजबिन्दुभिः रुधिरपृषतैः सर्वत्र आवृतं धरणीतलं पश्य। एतेन सीताकृजनितानीमानि किमिति संशयः सूचितः ॥ ४० ॥

गो० टी०–तप्तेति। तप्तं स्वर्णम् ॥ ४१ ॥

४१-४३] ति० टी०–मन्ये इति। सीताया वा इमे रुधिरबिन्दवः सीतानिमित्तं सुन्दोपसुन्दवधुद्ध्यमानयो रक्षसोर्वेति विकल्पालंकारः श्लोकद्वयेनोक्तः ॥ ४१–४३ ॥

---

१ सीतामार्यामिति गो. पाठः। २ स रुषित इति गो. पाठः। ३ वृत्ताया इति गो. पाठः। ४ अथेति गो. पाठः। ५ शीर्णा इति गो. पाठः। ६ वैदेह्या इति गो. पाठः। ७ मयमिति गो. पाठः। ८ तपनीयेति गो. रा. पाठः।

राक्षसानामिदं वत्स सुराणामथवापि वा । तरुणादित्यसंकाशं वैदूर्यगुलिकाचितम् ॥ ४४ ॥
विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम् । छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ॥ ४५ ॥
भग्नदण्डमिदं [2]सौम्य भूमौ कस्य निपातितम् । काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः ॥ ४६ ॥
भीमरूपा महाकायाः कस्य वा निहता रणे । दीप्तपावकसंकाशो द्युतिमान्समरध्वजः ॥ ४७ ॥
अपविद्धश्च भग्नश्च कस्य साङ्ग्रामिको रथः । रथाक्षमात्रा विशिखास्तपनीयविभूषणाः ॥ ४८ ॥
कस्येमे [3]निहता बाणाः प्रकीर्णा घोरदर्शनाः । शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य लक्ष्मण ॥ ४९ ॥

रा० टी०—वस्तुतस्तु रुधिराणि सीताङ्गजन्यानि न संभवन्तीति बोधयन्नाह—मन्य इति । हे लक्ष्मण ! कामरूपिभिः राक्षसैः भित्त्वा भित्त्वा विभक्ता सती भक्षिता अनैव भविष्यति इति मन्ये । एको वा एवार्थे अपर इत्यर्थे । एतेन तस्या नित्यात्वं सूचितम् ॥ ४१ ॥

गो० टी०—मन्य इति । इति मन्य इति योज्यम् ॥ ४२ ॥

रा० टी०—नन्वु कस्याङ्गजानीमानि रुधिराणीत्यत आह—तस्या इति । सीताया निमित्तं विवदमानयोः द्वयोः राक्षसयोः इह युद्धं बभूव । एतेन तयोरन्यतरशरीरजमिति व्यञ्जितं बलवत्त्वेन राक्षससदृशपरैकराक्षसशब्देनैकशेषात् न मृषावाचित्वसंसर्गः ॥ ४२ ॥

गो० टी०—तस्या इति । तस्या निमित्तं छन्दोपछन्दवत् परिग्रहार्थमित्यर्थः । विवदमानयोः वैमत्यं प्राप्तयोः "भासनोपसंभाषा-" इत्यादिना आत्मनेपदम् ॥ ४३ ॥

रा० टी०—मुक्तेति । मुक्तामणिचितं मुक्ताभिर्मणिभिश्च चितं संरचितं तपनीयविभूषितं स्वर्णनिर्मितविशेषेण राजितं भग्नं धरण्यां पतितम् इदं महद्धनुः कस्य धनुषोऽतिविचित्रत्वाद्राक्षसामान्यस्य न संभवतीति प्रश्ने बीजम् ॥ ४३ ॥

गो० टी०—मुक्तेति । मुक्तामणिमयं मुक्तामणिप्रचुरम् ४४

४४–४५] ति० टी०—वैदूर्यगुलिकाचितं वैदूर्यमण्यलंकृतम् ॥ ४४ ॥ ४५ ॥

रा० टी०—राक्षसानामिति । वैदूर्यगुलिकाचितं वैदूर्यमण्यलंकृतम् इदं धनुः राक्षसानां राक्षसविशेषाणां वा सुराणां देवविशेषाणां वा ॥ ४४ ॥

गो० टी०—तरुणेति । वैदूर्यगुलिकाचितं वैदूर्यमणिखचितम् ॥ ४५ ॥

रा० टी०—विशीर्णमिति । विशीर्णम् अत एव भूमौ पतितं काञ्चनं कवचं दिव्यमाल्योपशोभितं शतशलाकं शताकाशतविशिष्टम् इदं छत्रं च कस्य ॥ ४५ ॥

गो० टी०—छत्रमिति । सम्यक् शतधा भग्नदण्डमित्यन्वयः ॥ ४६ ॥

४६] ति० टी०—काञ्चनोरश्छदाः काञ्चनमयतनुत्राणाः ॥ ४६ ॥

रा० टी०—भग्नेति । भूमौ निपातितम् इदं भग्नदण्डं काञ्चनोरश्छदाः स्वर्णमयोरश्छदविशिष्टाः पिशाचवदनाः रणे निहिताः भीमरूपाः इमे खरा गर्दभविशेषाश्च कस्य । सार्धश्लोक एकान्वयी ॥ ४६ ॥

गो० टी०—काञ्चनेति । काञ्चनमयाः उरश्छदाः तनुत्राणि येषां ते खराः अश्वतराः रासभविशेषा वा ॥ ४७ ॥

४७] ति० टी०—समरे स्वामिप्रकाशको ध्वजो यत्र स समरध्वज इति रथविशेषणम् । तादृशो रथोऽपविद्धः परित्यक्त्वा पातितो भग्नश्चेत्युत्तरेणान्वयः । केचित्तु—ध्वजोपविद्धो ध्वस्तो रथो भग्न इत्यन्वयमाहुः ॥ ४७ ॥

रा० टी०—दीप्तेति । दीप्तपावकसंकाशः प्रदीप्तज्वलनसदृशः समरध्वजः समरे ध्वजः स्वामिप्रकाशकश्चिह्नविशेषः यस्मिन्सः सांग्रामिकः अपविद्धः पातितः अत एव भग्नः रथः कस्य । अर्धद्वयमेकान्वयि ॥ ४७ ॥

गो० टी०—दीप्तेति । द्युतिमत्त्वादेव दीप्तपावकसंकाशः समरे नायकसूचको ध्वजः समरध्वजः अपविद्धः रथश्च भग्न इति संबन्धः । सांग्रामिकः समरोचितः ॥ ४८ ॥

४८] ति० टी०—रथाक्षमात्राश्चतुःशताङ्गुलदीर्घा विशिखा फलभागा इत्यर्थः ॥ ४८ ॥

रा० टी०—रथेति । रथाक्षमात्रा रथाधारप्रमाणकाः चतुःशताङ्गुलायता इत्यर्थः, विशिखाः विगताः शिखाः फलभागा येषां ते तपनीयविभूषणाः सुवर्णशोभिताः घोरदर्शनाः निहताः केनचिद्बलाः अत एव प्रकीर्णाः इतस्ततः प्रक्षिप्ताः इमे बाणाः कस्य ॥ ४८ ॥

गो० टी०—रथेति । रथस्याक्षः आधारदण्डः तन्मात्राः तद्वदीर्घप्रमाणाः प्रमाणे मात्रच् । विशिखाः विगतशिखाः मुण्डाग्रा इत्यर्थः, विगतफलभागा इति वा । अभिहताः भग्नाः प्रकीर्णाः इतस्ततो विप्रकीर्णाः ॥ ४९ ॥

४९] ति० टी०—निहताः परेण योधेन । शरावरौ तूणीरौ ॥ ४९ ॥

रा० टी०—शरावराविति । शरैः पूर्णौ विध्वस्तौ शरावरौ इषुधी पश्य प्रतोदाभीषुहस्तः प्रतोदस्तोत्रम् अभीषवः प्रग्रहरश्मयः हस्ते यस्य सोऽयं कस्य पुरुषस्य सारथिर्हतः । एषा पदवी प्रपतितरथादिसूचितमार्गः कस्यापि रक्षस एव व्यक्तं स्फुटमेतत् 'अभीषुः अग्रहे रश्मौ' इति शाश्वतः ॥ ४९ ॥ ५० ॥

१ अर्धमेतत् गो. नास्ति । २ कस्य भूमौ सम्यागिति गो. पाठः । ३ऽभिहता इति गो. पाठः

प्रतोदाभीषुहस्तोऽयं कस्य वा सारथिर्हतः । [कस्येमे पुरुषव्याघ्र शयाते निहतौ युधि ।
चामरग्राहिणौ सौम्य सोष्णीषमाणिकुण्डलौ ॥] पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः ॥ ५० ॥
वैरं शतगुणं पश्य मम [2]तैर्जीवितान्तकम् । सुघोरहृदयैः सौम्य राक्षसैः कामरूपिभिः ॥ ५१ ॥
हृता मृता वा [3]वैदेही भक्षिता वा तपस्विनी । न धर्मस्त्रायते सीतां ह्रियमाणां महावने ॥ ५२ ॥
भक्षितायां हि वैदेह्यां हृतायामपि लक्ष्मण । के हि लोकप्रियं कर्तुं शक्ताः सौम्य ममेश्वराः ॥५३॥
कर्तारमपि लोकानां शूरं करुणवेदिनम् । अज्ञानात्प्रलपन्तीह भूतानि लक्ष्मण ॥ ५४ ॥
मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम् । निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ ५५ ॥

गो० टी०–शरावराविति । शरानाशृणुत इति शरावरौ निषङ्गौ प्रतोदः तोत्रम् अभीषवः रश्मयः 'अभीषुः प्रग्रहे रश्मौ' इति शाश्वतः ॥ ५० ॥

गो० टी०–कस्येति । उष्णीषः शिरोवेष्टनम् ॥ ५१ ॥

५०] ति० टी०–प्रतोदस्तोत्रम् अभीषवः प्रग्रहाः कस्यापि राक्षसपुरुषस्यैषा पदवी पदसंचारमार्गः ॥ ५० ॥

गो० टी०–पदवीति । एषा पदवी मार्गः पुरुषस्य जघनभागनिम्नत्वाद्यभावात् तत्रापि रक्षसः पदवी विषमरूपत्वात् । एवं च मम राक्षसैः सह इदं वैरं शतगुणं सत्तेषां जीवितमन्तयति विनाशयतीति जीवितान्तकं संपन्नं पश्य । एतावत्पर्यन्तं राक्षसैस्तीव्रवैराकरणात्तदपराधः सोढः संप्रति तान् समूलं नाशयिष्यामीति भावः ॥ ५२ ॥

५१] ति० टी०–अतो मम तै राक्षसैः सह एतन्निमित्तजं वैरं पूर्ववैराच्छतगुणं सत्तेषां जीवितान्तकं जीवितस्यान्तकमन्तरूपं संपन्नं पश्य ॥ ५१ ॥

रा० टी०–वैरमिति । सुघोरहृदयैस्तैः सीतापहारिभिः राक्षसैः सह जीवितान्तकं राक्षसजीवनविघातकं शतगुणं पूर्वापेक्षया अत्यधिकं मम वैरं पश्य जानीहि । ' ममासीत् ' इति तीर्थपाठः ॥ ५१ ॥

गो० टी०–सुघोरेति । मृता मारिता ॥ ५२ ॥

५२–५३] ति० टी०–एवं रक्षोभिः सीताविपत्तिं निश्चित्य धर्मं निन्दति—नेति । यतः सीतां धर्मो न त्रायते । एवं च भक्षितायां हृतायां वा वैदेह्यां के हि लोके मम प्रियं कर्तुं शक्ताः, न केऽपि । धर्मासाध्ये तेषामकिंचित्करत्वादिति भावः ॥ ५२ ॥ ५३ ॥

रा० टी०–हृतेति । यतः अमृता मरणधर्मरहिता अत एव न भक्षिता वैदेही हृतैव महावने ह्रियमाणां सीतां धर्म एव त्रायते ॥ ५२ ॥

गो० टी०–अस्यामवस्थायामरक्षकत्वाद्धर्मेऽपि रोषो जात इत्याह–न धर्म इति । इदमर्धमेकम् ॥ ५४ ॥

रा० टी०–भक्षितायामिति । भक्षितायां रुद्रादिद्वारा सकललोकसंहारकर्त्र्यां वैदेह्यां हृतायां सत्यां मम प्रियं कर्तुं लोके के ईश्वराः ब्रह्मविष्णुमहेशान्यतमाः समर्थाः न केऽपीत्यर्थः । अत्र रुद्रादिद्वारा सकललोकसंहारकर्त्र्यां हृतायामित्युक्त्या अपहरणमपि कस्मैचिन्निमित्ताय तदिच्छयैव जातमिति सूचितं तेनापहरणकर्तुस्तत्परिकरवर्तित्वं सूचितम् । भक्षिताशब्दः कर्तृनिष्ठान्तः कर्मावविक्षितत्वेनाकर्मकत्वात् ॥ ५३ ॥

गो० टी०–न केवलं धर्मे तत्फलप्रददेवेषु च रोषो जात इत्याह–भक्षितायामिति । के वा ईश्वराः मम अप्रियं कर्तुं शक्ता इत्यन्वयः । आद्यो हिः पादपूरणे द्वितीयः प्रसिद्धौ ॥५३॥

५४] ति० टी०–अथ पौरुषमेवावलम्बितुं तच्छेषतया कांचिल्लोकस्थितिमाह—कर्तारमिति । सर्वलोकस्योत्पत्तिस्थितिसंहारकर्तारमपि श्रुत्यादिप्रसिद्धं शूरं त्रिपुरसंहारादिविषयकात्यन्तशौर्यवन्तं महेश्वरमपि करुणवेदिनं करुणं यथा तथा वेदितुं शीलमस्य तम् । दयादृष्ट्या तूष्णीं स्थितमज्ञानात्तद्भैरवाज्ञानादवमन्येरन् । किमयं कुपितोऽपि करिष्यतीति न गणयन्तीत्यर्थः ॥ ५४ ॥

रा० टी०–नन्वपहरणकर्तुः सीतापरिकरस्थत्वे त्वत्परिकरस्थत्वमर्थसमाजप्रस्तामिति कथं भवन्तमनादृत्य भवत्प्रियामपहृतवान् इत्यत आह–कर्तारमिति । लोकानां कर्तारम्, उत्पत्त्यादिविधातारं शूरम् अतिशौर्यवन्तं करुणवेदिनं करुणो दयालुरेव वेदी दयालुत्वसमानाधिकरणसकलविषयकज्ञानवन्तमित्यर्थः । परमात्मानम् अज्ञानात् सर्वभूतानि अवमन्येरन् नाद्रियन्ते इत्यर्थः । एतेन अज्ञानस्य अतिप्राबल्यं सूचितम् ॥५४॥

गो० टी०–तर्हीदानीं कथमप्रियं तैः कृतमित्यत्राह–कर्तारमिति । लोकानां कर्तारमपि शूरमपि संहारकरणसमर्थमपि करुणवेदिनं कारुण्यपरं पुरुषं सर्वभूतानि अज्ञानादवमन्येरन् नाद्रियेरन् । लोकस्वभावोऽयमिति भावः ॥ ५६ ॥

५५] ति० टी०–यदेवमतः—मृदुमिति । लोकहिते प्राणिसौख्यसंपादने युक्तं युक्तचित्तम् अत एव मृदुस्वभावं दान्तं नानाप्रकारेण दुर्विषयप्रवृत्तिरहितेन्द्रियवर्गं मां त्रिदशेश्वरा इन्द्रादयो निर्वीर्यं मन्यन्ते यतः सीतात्राणं न कृतवन्त इत्यर्थः ॥ ५६ ॥

रा० टी०–नन्वं तत्परिकरस्थत्वेनैव तस्यां हृतायां किमर्थं

१ श्लोकोऽयमधिकः गो. पाठे । २ इदमिति गो. पाठः । ३ सीता सेति गो. पाठः ।

मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण । अद्यैव सर्वभूतानां रक्षसामभवाय च ॥ ५६ ॥
संहृत्यैव शशिज्योत्स्नां महान्सूर्य इवोदितः । संहृत्यैव गुणान्सर्वान्मम तेजः प्रकाशते ॥ ५७ ॥
नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः । किंनरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण ॥ ५८ ॥
ममास्त्रबाणसंपूर्णमाकाशं पश्य लक्ष्मण । असंपातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम् ॥ ५९ ॥
सांनरुद्धप्रचारग्रहगणावारितनिशाकरम् । विप्रनष्टानलमरुद्भास्करद्युतिसंवृतम् ॥ ६० ॥
विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् । ध्वस्तद्रुमलतागुल्मं विप्रणाशितसागरम् ॥ ६१ ॥

भवतो विषाद इत्यत आह—मृदुमिति । मृदुं सरलस्वभावं लोकहिते युक्तं सज्जनप्रियार्थे निरतं करुणवेदिनं करुणत्वसमानाधिकरणसकलविषयकज्ञानवन्तं मां त्रिदशेश्वराः ब्रह्मप्रभृतयः निर्वीर्यः पराक्रमरहितोऽयमिति मन्यन्ते मंस्यन्ते "वर्तमानसामीप्ये—" इति भविष्यति लट् एतेन मदेकनिवर्तनीयराक्षसोपद्रुतानां महान् खेदो भविष्यतीति सूचितं तेन तन्निवर्तनोपायः कर्तव्य इति ध्वनितम् ॥ ५५ ॥

गो० टी०—विशिष्य गर्विता देवाः मां नादरिष्यन्तीत्याह—मृदुमिति । लोकहिते युक्तं सक्तम् अत एव मृदुं कोमलहृदयम् अत एव करुणवेदिनं दान्तं विषयचापलरहितं मां निर्वीर्यं मन्यन्ते अज्ञत्वाविशेषादिति भावः ॥ ५७ ॥

५६—५७] ति०टी०—तस्मात्पौरुषमेवावलम्बनीयमित्याह—मामिति । गुणोऽपि मार्दवादिर्मां प्राप्य दोषोऽनिष्टसाधनं वृत्त इति हेतोरेतं त्यक्त्वा पौरुषमवलम्बे । पश्य अथ मम तेज एव प्रकाशते । सर्वभूतानामभवाय नाशाय । शशिज्योत्स्नां संहृत्यैव प्रलयकालोदितो महासूर्य इव । शशिज्योत्स्नातुल्यान्मामकान्गुणान्संहृत्यैव रविवत्तेजो मदीयं प्रकाशते पश्येत्यन्वयः ॥ ५६ ॥ ५७ ॥

रा० टी०—मामिति । हे लक्ष्मण ! गुणः सौशील्यादिः दोषः संवृत्तः संपन्न इति त्वं पश्य जानीहि । एतेन यदि सौशील्यादिगुणो न स्यात् तर्हि राक्षसप्रवृद्धिर्न स्यादिति व्यञ्जितम् । अर्धं पृथक्—अद्येति । सर्वभूतानाम् अभवाय चिन्तानिवृत्तये रक्षसां अभवाय परमकल्याणाय च अतिप्रभावविशिष्टशरस्पर्शहेतुकराक्षसत्वनिवृत्तिपूर्वकमोक्षायेत्यर्थः । शशिज्योत्स्नां संहृत्यैव उदितो महान् सूर्य इव सर्वान् दण्डदानविरोधिगुणान् सौशील्यादीन् संहृत्य एव इव मम तेजः अद्यैव प्रकाशते तत्पश्येति तात्पर्यम् । सार्धश्लोक एकान्वयी ॥ ५६ ॥ ५७ ॥

गो० टी०—मामिति । गुणः कारुण्यादिः मां प्राप्य दोषः संवृत्तः अनिष्टसाधनत्वेन संवृत्तः । तस्मादस्मदवमानहेतुतया दोषरूपेण गुणेन किं प्रयोजनमित्यर्थः । यद्वा सर्वभूतानां रक्षसां च उभवाय नाशाय गुणः दोषः संवृत्तः दयां त्यक्त्वा क्रोधं करिष्यामीत्यर्थः ॥ ५८ ॥

गो० टी०—संहृत्येति । यथा उदितः सूर्यः शशिज्योत्स्नां शीतलचन्द्रचन्द्रिकां संहृत्यैव प्रकाशते । तथा मम तेजः गुणान् मृदुत्वादीन् संहृत्यैव निरस्यैव प्रकाशते ॥ ५९ ॥

५८] ति० टी०—तदेव प्रपञ्चयति—नैवेति ॥ ५८ ॥

रा० टी०—तेजसः प्रकाशाभावे दोषमाह—नैवेति । यक्षादय तेजसः प्रकाशाभावे इति शेषः सुखं न प्राप्स्यन्ति । अत्र राक्षसा विभीषणादयः सुखशब्देन पारलौकिकसुखस्यापि ग्रहणे राक्षससामान्यग्रहेऽपि न क्षतिः । वौ निषेधार्थौ ॥ ५८ ॥

गो० टी०—देवविषयः कोपस्तत्संबन्धिष्वपि प्रवर्तेतामित्याह—नैवेति ॥ ६० ॥

५९] ति० टी०—पश्य अचिरादेवेति शेषः । त्रैलोक्यचारिणामसंपातं बाणावरणात्क्रियाराहित्यं यथा भवति तथा करिष्यामि ॥ ५९ ॥

रा० टी०—ममेति । अस्त्रबाणसंपूर्णम् अस्त्रैर्ब्रह्मास्त्रादिभिः बाणैश्च संपूर्णं व्याप्तमाकाशं पश्य । अथ त्रैलोक्यचारिणां राक्षसानामसंपातं क्रियाराहित्यं करिष्यामि ॥ ५९ ॥

गो० टी०—ममेति । अस्त्राणि ब्रह्मास्त्रादीनि पश्य उत्तरक्षण इति शेषः । त्रैलोक्यचारिणां निःसंपातं[1] बाणप्रचारतोऽशक्यसंचारम् ॥ ६१ ॥

६०—६१] ति० टी०—संनिरुद्धप्रचारो ग्रहगणो यत्र तत्त्रैलोक्यम् । विप्रनष्टा अनलादिद्युतयो यत्र तच्च तत्संवृतं तमसा संवृतमित्यर्थः ॥ ६० ॥ ६१ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—समित्यादिभिः । कालकर्मणा कालस्य इव कर्म व्यापारो यस्य तेन रावणतेजसेत्यर्थः। संनिरुद्धा आच्छादिता ग्रहगणा यस्मिन् अत एव आवारितनिशाकरम् आच्छादितनिशाकरविशिष्टमत एव विप्रनष्टानलमरुद् विप्रनष्टौ स्वाभाविकप्रकाशाभावेन स्वाभाविकगत्यभावेन च विप्रनष्टप्रायौ अनलमरुतौ यस्मिंस्तत् अत एव भास्करद्युतिसंवृतं संवृतभास्करद्युतिकमत एव विनिर्मथितशैलाग्रं विनिर्मथितानि विलोडितानि शैलाग्राणि यस्मिन् तत् अत एव शुष्यमाणजलाशयं शुष्यज्जलाशयविशिष्टमत एव ध्वस्तद्रुमलतागुल्मं ध्वस्तद्रुमादिविशिष्टमत एव विप्रनाशितः इतस्ततश्चालितः सागरो यस्मिन् तत् त्रैलोक्यं संयुक्तं बाधकविध्वंसेन तत्तत्प्रभावविशिष्टं करिष्यामि । सार्धश्लोकद्वयमेकान्वयि ॥ ६० ॥ ६१ ॥

१ निःसंपातमिति गो. पाठः ।

त्रैलोक्यं तु करिष्यामि संयुक्तं कालकर्मणा । न [1]ते कुशलिनीं सीतां प्रदास्यन्ति ममेश्वराः ॥ ६२ ॥
अस्मिन्मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम् । नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण ॥ ६३ ॥
[मम चापगुणोन्मुक्तैर्बाणजालैर्निरन्तरम् । [2]अर्दितं मम नाराचैर्ध्वस्तभ्रान्तमिव द्विजम् ॥]
समाकुलममर्यादं जगत्पश्यद्य लक्ष्मण । आकर्णपूर्णैरिषुभिर्जीवलोकदुरावरैः ॥ ६४ ॥
करिष्ये मैथिलीहेतोरपिशाचमराक्षसम् । मम रोषप्रयुक्तानां [3]विशिखानां बलं सुराः ॥ ६५ ॥
द्रक्ष्यन्त्यद्य विमुक्तानां[4]मर्षाद्दूरगामिनाम् । नैव देवा न दैतेया न पिशाचा न राक्षसाः ॥ ६६ ॥
भविष्यन्ति मम क्रोधात्त्रैलोक्ये विप्रणाशिते । देवदानवयक्षाणां लोका ये रक्षसामपि ॥ ६७ ॥
बहुधा [5]निपतिष्यन्ति बाणौघैः शकलीकृताः । निर्मर्यादानिमाँल्लोकान्करिष्याम्यद्य सायकैः ॥ ६८ ॥

गो० टी०—सन्निरुद्धेत्यादिसार्धश्लोकद्वयमेकान्वयम् । सन्निरुद्धः ग्रहगणः ग्रहगणसंचारः यस्य आवारितः आच्छादितः विप्रणष्टानलमरुत् नष्टाग्निवातं भास्करद्युतिसंवृतं संवृतभास्करद्युति । आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । कालसाध्यो धर्मः कालधर्मः विनाशः तेन कालधर्मणा अनिजार्षः ॥ ६२ ॥ ६३ ॥

६२-६३] ति० टी०—कालकर्मणा कालसाध्यं कर्म नाशस्तेन । 'कालधर्मणा' इति पाठेऽपि तद्रूपेण कालधर्मेणेत्यर्थः तत्पुरुषेऽनिजार्षः ॥ ६२ ॥ ६३ ॥

रा० टी०—नेति । ईश्वराः सीतासमर्पणे समर्थाः ते राक्षसाः कुशलिनीं नित्यं कुशलविशिष्टां मम सीतां यदि न दास्यन्ति तर्हि अस्मिन् लोके मुहूर्ते कस्मिंश्चित् समये मम विक्रमं द्रक्ष्यन्ति । अर्धद्वयमेकान्वयि ॥ ६२ ॥

गो० टी०—न तामिति । तस्मादस्मिन् मुहूर्ते इत्युपस्कार्यम् । कुशलिनीं क्षेमयुक्ताम् अक्षतामित्यर्थः ॥ ६४ ॥

रा० टी०—नेति । हे लक्ष्मण ! मम चापमुखात् धनुरग्रभागात् मुक्तैः बाणजालैः निरन्तरम् अन्तररहितम् आकाशं सर्वभूतानि न उत्पतिष्यन्ति ॥ ६३ ॥

रा० टी०—मर्दितमिति । मम नाराचैः बाणविशेषैः समाकुलं व्याप्तमत एव मर्दितं प्राप्तक्षोदमत एव ध्वस्तभ्रान्तमृगद्विजं ध्वस्ताः अधःपतिताः भ्रान्ताश्च मृगद्विजाः यस्मिन् अत एव अमर्यादं चित्तस्वास्थ्यरहितत्वेन स्वस्वपरिपाटीरहितजन्तुविशिष्टं जगत्पश्य ॥ ६४ ॥

गो० टी०—नाकाशमिति । गुणो मौर्वी ॥ ६५ ॥

गो० टी०—अर्दितमिति । अर्दितं हिंसितं समाकुलं व्याप्तमग्रम् अमर्यादं त्यक्तस्वस्वप्रकृत्यवस्थानम् ॥ ६६ ॥

६४-६५] ति० टी०—अमर्यादं त्यक्तस्वस्वप्रकृत्यवस्थानम् जीवलोकेन दुरावरैर्दुर्निवारैः । दुरावरशब्दः स्खलन्तः ॥ ६४ ॥ ६५ ॥

रा० टी०—नन्वेते राक्षसहेतोः सर्वेषां विनाशं कथं करिष्यसीत्यत आह—आकर्णेति । जीवलोकदुरावरैः जीवलोके नियम्यनियामकयोर्मध्ये दुरावरं दुर्वारणं येषां तैः आकर्णपूरैः इषुभिः बाणैः अपिशाचं पिशाचरहितम् । अराक्षसं राक्षसरहितं जगत् मैथिलीहेतोः करिष्ये । एतेन राक्षसतद्वध्याव्यतिरिक्तानां भीतिमात्रं भविष्यति न ध्वंस इति ध्वनितम् ॥ ६६ ॥

गो० टी०—आकर्णेति । दुरावरैः दुर्वारैः जीवलोकं ब्रह्माण्डम् ॥ ६७ ॥

रा० टी०—ममेति । अमर्षात् राक्षसकृतबहुदुष्कृतासहनात् हेतोः रोषप्रयुक्तानां क्रोधात्त्यक्तानां विप्रमुक्तानां विशेषेण मुक्तं संसारान्मोक्षो यैः तेषां दूरगामिनां विशिखानां बाणानां बलं शूराः द्रक्ष्यन्ति । एतेन सुरकार्यार्थमेवायमुद्योग इति ध्वनितम् ॥ ६६ ॥

गो० टी०—ममेति । रोषप्रयुक्तानां रोषसंप्रयुक्तानाम् ममेति शेषः । अतिदूरातिगामिनाम् अतिदूरातिपातिनाम् ॥ ६८ ॥

६६-६८] ति० टी०—देवादयो न भविष्यन्ति । प्रत्येकं सर्वे नशिष्यन्तीत्यर्थः ॥ ६६-६८ ॥

रा० टी०—ननु बहूनां रक्षसां पुलस्त्यवंशत्वात् तद्द्रोहे तद्वंशीयकुबेरादिभिरपि भवतां द्रोहः संपद्येतेत्यत आह—नेति । प्रणाशिते अस्मन्नियम्यरुद्रादिद्वारा अनेकवारमदर्शनं प्रापिते त्रैलोक्ये विप्लवमाना देवादयो मम क्रोधात् न भविष्यन्ति अस्मद्द्रोहबुद्धिमत्त्वे विनङ्क्ष्यन्तीत्यर्थः । अत एव मद्बाणैः शकलीकृताः खण्डत्वं प्रापिताः देवादीनां लोकाः बहुधा अनेकविधं निपतिष्यन्ति । अर्धचतुष्टयमेकान्वयि ॥ ६७ ॥ ६८ ॥

गो० टी०—नैवेति । न भविष्यन्ति नशिष्यन्तीत्यर्थः । पूर्वं दुःखप्राप्तिरेवोक्ता ॥ ६९ ॥

गो० टी०—देवेति । बहुधा शकलीकृता इत्यन्वयः ॥ ७० ॥

रा० टी०—निरिति । मृतां रुद्रादिद्वारा सकलजगद्विध्वंसिनीं हतां मम प्रियामिति शेषः । ईश्वराः सीतासमर्पणे समर्थाः राक्षसाः यदि न दास्यन्ति तर्हि सायकैः इमान् राक्षसत्वं प्राप्तान् लोकान् जनान् निर्मर्यादान् त्यक्तराक्षसस्वभावान् करिष्यामि । मृताशब्दः अविवक्षितकर्मकत्वात् कर्तृप्रत्ययान्तः ॥ ६९ ॥

---

१ धर्मेणेति गो. पाठः । २ तामिति गो. पाठः । ३ श्लोकोऽयमधिकः गो. रा. पाठे । ४ मर्दितमिति रा. पाठः । ५ सायकानामिति गो. पाठः । ६ अतिदूरातीति गो. पाठः । ७ न भविष्यन्तीति गो. पाठः ।

हृतां मृतां वा सौमित्रे न दास्यन्ति ममेश्वराः । तथारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम् ॥ ६९ ॥
नाशयामि जगत्सर्वं त्रैलोक्यं सचराचरम् । यावद्दर्शनमस्या वै तापयामि च सायकैः ॥ ७० ॥
इत्युक्त्वा क्रोधताम्राक्षः स्फुरमाणोष्ठसंपुटः । वैल्कलाजिनमाबद्ध्य जटाभारमबन्धयत् ॥ ७१ ॥
तस्य क्रुद्धस्य रामस्य तथाभूतस्य धीमतः । त्रिपुरं जघ्नुषः पूर्वं रुद्रस्येव बभौ तनुः ॥ ७२ ॥
लक्ष्मणादथ चादाय रामो निष्पीड्य कार्मुकम्[1] । शरमादाय संदीप्तं घोरमाशीविषोपमम् ॥ ७३ ॥
[2]संदधे धनुषि श्रीमान्रामः परपुरंजयः । युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत् ॥ ७४ ॥
यथा जरा यथा मृत्युर्यथा कालो यथा विधिः । नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण ॥
तथाहं क्रोधसंयुक्तो न निवार्योऽस्म्यसंशयम् ॥ ॥ ७५ ॥
पुरेव मे चारुदतीमनिन्दितां दिशन्ति सीतां यदि नाद्य मैथिलीम् ।
सदेवगन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहम् ॥ ७६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–निर्मर्यादानिति । निर्मर्यादान् स्वस्वव्यवस्थारहितान् न दास्यन्ति न दास्यन्ति यदि ॥ ७१ ॥

६९–७२] ति० टी०–तथारूपां यथापूर्वस्वभावाम् । अत्र न दास्यन्तीति पौनरुक्त्यं क्रोधातिशयाय दोषाय ॥६९–७२॥

रा० टी०–नन्वं रावणभिया सर्वे लोकास्तत्साहाय्यं करिष्यन्तीति कथं प्रियायाः प्राप्तिर्भविष्यतीत्यत आह–तथेति । प्रियां वैदेहीं यदि न दास्यन्ति तर्हि सचराचरं रावणसहायीभूतचराचरसहितं त्रैलोक्यं लोकत्रयात्मकं सर्वं जगत् नाशयामि नाशयिष्यामि ॥ ७० ॥

गो०टी०–हृतां मृतां वेत्यत्र सूचितमाह–तथारूपामिति । जगत्सर्वं सर्वं जनमित्यर्थः । अन्यथा त्रैलोक्यमित्यनेन पुनरुक्तिः । सचराचरमित्यनुवादः ॥ ७२ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेण उक्त्वा क्रोधताम्राक्षः स्वीकृतराक्षसत्वनिवर्तनहेतुककोपजनितात्यरुणनयनः रामः कार्मुकं निष्पीड्य दृढमुष्टिना परिगृह्य आशीविषोपमम् अतिविषवत्कृष्णसर्पसदृशं शरमादाय धनुषि संदधे ॥ ७१ ॥

गो० टी०–इत्युक्त्वेति । श्लोकद्वयमेकान्वयम् । निष्पीड्य दृढमुष्टिबलेन गृहीत्वा ॥ ७३ ॥ ७४ ॥

७३–७४ ति० टी०–निष्पीड्य दृढमुष्टिबन्धेन गृहीत्वा ॥ ७३ ॥ ७४ ॥

रा० टी०–युगान्ते इति । युगान्ताग्निरिव क्रुद्धो रामः इदमब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह—यथेति । हे लक्ष्मण ! सर्वभूतेषु प्राप्ताः जरादयो यथा न प्रतिहन्यन्ते परमात्मातिकृपापात्रातिरिक्तैर्न निवार्यन्ते तथा क्रोधसंयुक्तोऽहम् असंशयं यथा भवति तथा न निवार्योऽस्मि ॥ ७२ ॥ ७३ ॥

७५] ति० टी०–यथा जरादयोऽनिवार्यास्तथाहमस्मात्कर्मणः केनापि वारयितुमशक्यः । विधिर्दैवम् ‘ विधिर्विधाने दैवेऽपि’ इति कोशः ॥ ७५ ॥

गो० टी०–यथेत्यादिसार्धश्लोकः । विधिः अदृष्टं जरादयो यथा न प्रतिहन्यन्ते तथाहं न निवार्यः । अन्ये यथाशब्दाः पादपूरणार्थाः, यद्वा बहुवचनमविवक्षितम् । प्रतिहन्यत इति प्रत्येकमन्वयः ॥ ७५ ॥

७६] ति० टी०–पुरे वेति । अत्र पुरेत्यावर्तते । पुरेव पूर्वरूपसदृशरूपवतीं पुरा न दिशन्ति न दास्यन्तीत्यर्थः । परिवर्तयामि नाशयामि । नन्वेवंविधः क्रोधः कथमस्य किमर्थं चेति चेच्छृणु । मनुष्यदेहधारणेन तद्व्यवहारनटनमेवैतत् । किंच ईदृशदुःखकालेऽस्य क्रोधाभावे रावणो मनुष्यबुद्धिं कुर्यात् । तथा च तद्वधो शक्यः स्यादित्येतदर्थं च सः । मृत्युं मरणधर्मेण योजयामि इत्यादि वचोऽपि रावणवचोवदेव आरोपितक्रोधमूलकत्वात् । अत एव शरैर्विधमिष्यामीत्युक्तिः । लक्ष्मणस्तु तत्त्वज्ञोऽपि तद्वदेवावतत्त्वज्ञ इव तन्मायामोहितो वा प्रलयकालिकरौद्रशक्त्यावेशं संभाव्यानुनयति स्म किंचास्य क्रोधस्यारोपितत्वाभावेऽप्य सीताया अलाभे सर्वजगत्परिवर्तनं प्रतिज्ञाय कथं लक्ष्मणप्रार्थनयापि तामन्वयथयेत् । अन्यथा कैकेय्यग्रे कृतां वनवासप्रतिज्ञां कथं कौसल्यावचसा न त्यक्तवान् । तस्मात्सा यथार्था, इयं तु आरोपितैतेवेव सारम् । अनेन व्यवहारेण क्रोधादिकाले कृताया अयुक्ताया अपि प्रतिज्ञाया अपालनेऽत्यन्तदोषाभाव इत्यपि सूचितम् ॥ ७६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽरण्यकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

रा० टी०–पुरेति । पुरा इव अरुदतीं क्लेशरहितामित्यर्थः । अनिन्दितां नित्यं निन्दारहितां सीतां यदि न दिशन्ति अप-

---

१ अर्धमेतत् गो. रा. नास्ति । २ रोषताम्राक्षो रामो निष्पीड्य कार्मुकमिति गो. रामो निष्पीड्य कार्मुकमिति रा. पाठः । ३ एतदादिश्लोकद्वयं गो. रा. नास्ति । ४ संधायेति गो. पाठः ।

पञ्चषष्टितमः सर्गः ।

सीतापहाराप्रकुपितमतः सकललोकसंहारसमुद्युक्तं रामं प्रति युक्तियुग्वचनोपन्यासेन लक्ष्मणः परिसान्त्वयति ।

तप्यमानं तदा रामं सीताहरणकर्शितम् । लोकानामभवे युक्तं सांवर्तकमिवानलम् ॥ १ ॥
वीक्षमाणं धनुः सज्यं निःश्वसन्तं पुनः पुनः । दग्धुकामं जगत्सर्वं युगान्ते च यथा हरम् ॥ २ ॥
अदृष्टपूर्वं संक्रुद्धं दृष्ट्वा रामं तु लक्ष्मणः । अब्रवीत्प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता ॥ ३ ॥
पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः । न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ४ ॥
चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा । एतच्च नियतं नित्यं त्वयि चानुत्तमं यशः ॥ ५ ॥
एकस्य नापराधेन लोकान्हन्तुं त्वमर्हसि । ननु जानामि कस्यायं भग्नः साङ्ग्रामिको रथः ॥ ६ ॥

हरणकर्तारो न दास्यन्ति तर्हि देवादिसहितं शैलसहितं जगत् परिवर्तयामि । एतेन राक्षसभिया देवादिभिस्तत्साहाय्यं न कार्यमिति ध्वनितम् ॥ ७४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–पुरेति । पुरैव मे चारुदतीं मायामृगं प्रति गमनात् पूर्वं कान्तं मां प्रति इमं मृगं गृहीत्वा मद्यं देहीति हर्षेण यत् स्मितं कृतवती तेन सहैव न दास्यन्ति चेत् अनिन्दितां तामलब्ध्वा जगदुपसंहारं करिष्यामीति चेदपि इदं निन्दितमिति न केऽपि वक्ष्यन्तीति भावः । वक्ष्यते हि ' यदि रामः सप्तद्वान्तां मेदिनीं परिवर्तयेत् । अस्या हेतोर्विशालाक्ष्या युक्तमित्येव मे मतिः ' इति सर्वज्ञेन हनुमता । चारुदतीमित्यत्र छन्दसीति सूत्रेण दन्तशब्दस्य दत्रादेशः अग्रान्तेति सूत्रस्थचकारेण वा दत्रादेशः । सीताम् अयोनिजतया मत्तोऽप्यतिशयितां मैथिलीं वीरभेषजनकचक्रवर्तिपुत्रीत्वेन मत्सदृशीम् । सदेवेत्यादि । सर्वलोकस्य संभूतमरणमेव करिष्यामीति भावः । परिवर्तयामि नाशयामि अन्यथा करिष्यामीति वा ॥ ७६ ॥

अस्मिन् सर्गे सार्धपञ्चसप्ततिश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥६४॥

१] ति० टी०–अभवे नाशे युक्तमुद्युक्तम् सांवर्तकं प्रलयकालिकम् ॥ १ ॥

२] ति० टी०–हरं कालाग्निरुद्रम् ॥ २ ॥

३] ति० टी०–अदृष्टपूर्वं पूर्वमेवं कदाप्यदृष्टसंहारशस्यावेशं संक्रुद्धं रामं दृष्ट्वा राममब्रवीदिति रामपदद्वयसंबन्धः । स्वपरिशोषो लोकविनाशभयेन ॥ ३ ॥

रा० टी०–रामं प्रति लक्ष्मणोक्तिं वर्णयितुमाह–तप्यमानमित्यादिभिः । सीताहरणकर्शितं लोकानां भुवनानामभवे यथोचितं चिन्ताभावार्थं परमकल्याणार्थं वा युक्तमुद्युक्तं सांवर्तकं प्रलयकालिकमनलमिव प्रतीयमानमिति शेषः । सज्यं धनुः वीक्षमाणं पुनः पुनर्निःश्वसन्तं युगान्ते सर्वजगद्दग्धुकाममं अत एव तप्यमानं प्राप्तकोपसंपत्तिं हरमिव संक्रुद्धम् अत एव अदृष्टपूर्वं दृष्टपूर्वभिन्नं रामं सर्वाभिरामदातारं रामं तदभिधं दृष्ट्वा प्राञ्जलिर्लक्ष्मणः परिशुष्यता मुखेनाब्रवीत् । श्लोकत्रयमेकान्वयि ॥ १–३ ॥

गो० टी०–एवं जगदुपसंहारक्रोधकलुषं रामं लक्ष्मणः संबोधयति पञ्चषष्टितमे–तप्यमानमित्यादि । श्लोकत्रयमेकान्वयम् । तप्यमानं तपन्तं तथा तप्यमानमित्यनेन पूर्वोक्तजगदुपसंहारवाचस्तप्तत्वकृताः; ननु संकल्पपूर्वा इत्युच्यते । रामं दृष्ट्वा राममब्रवीदिति क्रियाभेदान्न पुनरुक्तिदोषः । अभवे विनाशे युक्तम् उद्युक्तं संवर्तकं संहारकम् अदृष्टपूर्वमिति क्रोधनक्रियाविशेषणं परिशुष्यता लोकविनाशभयेनेति भावः ॥ १–३ ॥

४] ति० टी०–प्रकृतिं सर्वभूतहितत्वरूपाम् ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–पुरेत्यादिभिः । मृदुः सरलस्वभावः दान्तः नियमितोभयकरणः सर्वभूतहिते रतः अत एव पुरा पालनार्थं भूत्वा प्रकटीभूय विद्यमानस्त्वं क्रोधवशमापन्नः प्राप्तः सन् प्रकृतिं स्वस्वभावं हातुं नार्हसि ॥ ४ ॥

गो० टी०–पुरेति । क्रोधवशमापन्नः सन् प्रकृतिं मृदुत्वादिनिजस्वभावं न हातुमर्हसि ॥ ४ ॥

५] ति० टी०–एतच्च उक्तचतुष्टयं च अनुत्तमं यशश्च त्वयि नियतमित्यर्थः ॥ ५ ॥

रा० टी०–चन्द्रादौ लक्ष्म्यादिचतुष्टयं क्रमेणास्ति अनुत्तमं सर्वोत्तमं नियतं चाञ्चल्यरहितं नित्यम् एतत् लक्ष्म्यादिचतुष्टयं यशश्च त्वय्यस्ति ॥ ५ ॥

गो० टी०–चन्द्र इति । लक्ष्म्यादिकमेकैकस्य प्रतिनियतं त्वयि तु एतत्सर्वं च यशश्च प्रतिनियतमित्यर्थः ॥ ५ ॥

६] ति० टी०–एकस्यापराध इति कथं ज्ञायते तत्राह–नन्विति । ननु जानाम्येक एवापराद्ध इति कुतस्तत्राह–

---

१ तेषेति गो. पाठः । २ संवर्तकमिति गो. पाठः । ३ लिति गो. पाठः । ४ सर्नमिति गो. पाठः । ५ त्विति गो. रा. पाठः ।

केन वा कस्य वा होतोः सयुगः सपरिच्छदः। खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः ॥ ७ ॥
देशो निवृत्तसङ्ग्रामः सुघोरः पार्थिवात्मज। एकस्य तु विमर्दोऽयं न द्वयोर्वदतां वर ॥ ८ ॥
नहि वृत्तं हि पश्यामि बलस्य महतः पदम्। नैकस्य तु कृते लोकान्विनाशयितुमर्हसि ॥ ९ ॥
युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः। सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ॥ १० ॥
को नु दारप्रणाशं ते साधु मन्येत राघव। सरितः सागराः शैला देवगन्धर्वदानवाः ॥ ११ ॥
नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः। येन राजन्हृता सीता तमन्वेषितुमर्हसि ॥ १२ ॥

कस्यचिदेव न केषांचिदित्यर्थः। सायुधपरिकरो भग्न इत्यन्वयः ॥ ६ ॥

रा० टी०—नन्वेवं राक्षसानां वधस्यावश्यकत्वे किमर्थं निवार्यते इत्यत आह—एकस्येति। एकस्य राक्षसस्य अपराधेन लोकान् सर्वजनान् हन्तुं त्वं नार्हसि एतेन विभीषणकर्मकविघातजनितभीतिमत्त्वं लक्ष्मणस्य सूचितम्। अर्धं पृथक्। ननु अपकारिणमेव बोधयेत्यत आह—नेति। सांग्रामिकः सायुधः आयुधसहितः सपरिच्छदः सामग्रीसहितः अयं रथः कस्य हेतोः केन वा भग्नः इत्यहं नैव जानामि। अर्धद्वयमेकान्वयि ॥ ६ ॥

गो० टी०—मम दान्ततयैवैतादृशी दशा जाता अधुनाऽपि यदि क्रोधो न स्यात् को वा मम विस्रस्येत् कथं च सीताप्राप्तिरित्याशङ्क्याह—एकस्येति। अर्धत्रयमेकान्वयम्। अयं भावः एको रथो दृश्यते एकस्यैव पदं प्रतीयते तेन एक एवापराधीति निश्चीयते एकस्य चापराधेन सर्वान् हन्तुं नार्हसि। तर्हि को वाऽपराधीत्यत्राह—नत्विति। केन प्रतिपक्षिणा कस्य प्रयोजनस्य हेतोः "षष्ठी हेतुप्रयोगे" इति षष्ठी। प्रकृतादन्यस्माद्वा निमित्तादिति न जानामि। तच्चिन्तनीयमित्यर्थः। सपरिच्छदः सपरिकरः ॥ ६ ॥

७-८] ति० टी०—स केन भग्नः केन हेतुनेत्येतत्तु न जानामीति शेषः। खुरनेमिक्षतत्वादिविशिष्टोऽयं देशो निर्वृत्तसंग्रामो दृश्यते इति शेषः। एवंभूतैर्हेतुभिरयं विमर्दः संग्राम एकस्य रथिकस्य केनचित्सह न तु द्वयोरधिकयोरिति शेषः ॥ ७ ॥ ८ ॥

रा० टी०—ननु तर्हि बहूनामपराधोऽस्ति इत्यत आह—खुरेति। खुरनेमिक्षतः खुरैः अश्वाङ्गिभिः नेमिभिश्च क्षतः रुधिरबिन्दुभिः सिक्तः निर्वृत्तः संजातः संग्रामो यस्मिन् सोऽयं देशः एकस्यैव विमर्दः विमर्दनविशिष्टः न द्वयोः एतेन इदानीमपराध एकर्तृक एव प्रतीयत इति सूचितम् ॥ ७ ॥ ८ ॥

गो० टी०—खुरेति। अश्वानां खुरैः रथनेमिभिः रथाङ्गैश्च क्षतः निर्वृत्तसंग्रामः दृश्यत इति शेषः ॥ ७ ॥

गो० टी०—एकस्येति। विमर्दः संप्रहारः। तत्र हेतुमाह—नहीति। वृत्तं संक्रान्तम् ॥ ८ ॥

९] ति० टी०—तदेवाह—नहीति। वृत्तं भुवि कृतचिह्नमत एकस्य कृते लोकनाशो न युक्तः ॥ ९ ॥

रा० टी०—नहीति। महतो बलस्य सैन्यस्य वृत्तं प्रवृत्तं पदं चरणचिह्नं नैव पश्यामि अतः कस्यचित् एकस्यैव अपराध इति सूचितम्। अत एव एकस्यैव कृते तदपराधार्थं लोकान् सर्वजनान् विनाशयितुं नार्हसि ॥ ९ ॥

गो० टी०—वक्तव्यमुक्त्वा प्रकृतमाह—नैकस्येति। युक्तदण्डा अपराधोचितशिक्षणप्रवर्तकाः ॥ ९ ॥

१०] ति० टी०—युक्तदण्डा यथापराधदण्डाः। मृदवोऽकठिनाः ॥ १० ॥

रा० टी०—युक्तेति। वसुधाधिपाः रघुकुलोद्भूतमहीपतयः युक्तदण्डादिविशिष्टा भवन्ति अत एव सर्वभूतानां शरण्यः परमा गतिश्च त्वमसि अतः हे राघव! तव दारप्रणाशं कः साधु मन्येत न कोऽपीत्यर्थः। सार्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०—विशिष्य तवायं धर्म इत्याह—सदेति। शरण्यः शरणार्हः परमा गतिः परमप्राप्यः। देवादिकृतोऽयमपराधो नेत्याह—को न्विति ॥ १० ॥

११] ति० टी०—किंच यदि त्वदारप्रणाशो लोककर्तृको लोकानुमतो वा स्यात्तर्युक्तं तन्नाशनम्। नैवमस्तीत्याह—को न्विति ॥ ११ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—सरित इति। दीक्षितस्य अप्रियं कर्तुं साधव इव तेऽप्रियं कर्तुं सरिदादयः नालमतः येन राक्षसेन सीता हृता तमन्वेषयितुं मद्द्वितीयः अहं द्वितीयो यस्य सः परमर्षिभिः सहायैरुपलक्षितः धनुष्पाणिः त्वमर्हसि। अर्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०—सरित इति। दीक्षितस्य उपक्रान्तयज्ञानुष्ठानस्य साधवः ऋत्विजः ॥ ११ ॥

१२] ति० टी०—सरिदादयस्ते विप्रियं कर्तुं नालं न समर्था न स्पृहावन्तो वा दीक्षितस्य यजमानस्य साधवो ज्ञानसंपन्ना ऋत्विगादयो यथा विप्रियं शापादि दातुं व्यङ्गं वा कर्म कर्तुमसमर्थास्तद्वत् ॥ १२ ॥

गो० टी०—येनेति। परमर्षिभिः एतद्वनस्थैः ॥ १२ ॥

---

१ सायुध इति गो. रा. पाठः।

माद्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः । समुद्रं वो विचेष्यामः पर्वतांश्च वनानि च ॥ १३ ॥
गुहाश्च विविधा घोराः पक्षिन्यो विविधास्तथा । देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः ॥ १४ ॥
यावन्नाधिगमिष्यामस्तत्र भार्यापहारिणम् । न चेत्साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः ॥
कोशलेन्द्र ततः पश्चात्प्राप्तकालं करिष्यसि ॥ ॥ १५ ॥
शीलेन साम्ना विनयेन सीतां नयेन न प्राप्स्यसि चेन्नरेन्द्र ।
ततः समुत्सादय हेमपुङ्खैर्महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

सीताविरहदुःखितं राम परिसान्त्वयँल्लक्ष्मणः प्रारब्धकर्मणो भोगावश्यंभावित्वे वसिष्ठादीन्निदर्शनीकृत्य अपकारिनिकृन्तनेन सीतापरिमोचनाय प्रवर्तयति ।

तं तथा शोकसंतप्तं विलपन्तमनाथवत् । मोहेन महता युक्तं परिद्यूनमचेतसम् ॥ १ ॥
ततः सौमित्रिराश्वास्य मुहूर्तादिव लक्ष्मणः । रामं संबोधयामास चरणौ चाभिपीडयन् ॥ २ ॥

१३-१४] ति० टी०-माद्वितीयोऽहं द्वितीयः सहायो यस्य सः । समुद्रादिस्थाश्रमेषु विचयनार्थं परमर्षिभिः सहायैरित्युक्तम् ॥ १३ ॥ १४ ॥

रा० टी०-अन्वेषणप्रकारमाह-समुद्रमिति । तत्र भार्यापहारिणं यावन्न अधिगमिष्यामः प्राप्स्यामः तावत् समुद्रादीनि विचेष्यामः देवादिलोकांश्च विचेष्यामः । पक्षिन्यो विविधा इति समुदायस्य कर्मतयाऽन्वयात् न द्वितीया । अर्थचतुष्टयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०-समुद्रमिति । विचेष्यामः अन्वेषिष्यामहे १३

गो० टी०-देवेति । स्पष्टम् ॥ १४ ॥

१५] ति० टी०-यस्मद्विचयनेनाशक्या तत्प्राप्तिः स्यात् ततः परं देवाः सर्वज्ञा यदि ते पत्नीं पत्नीवार्तां न दास्यन्ति ततः पश्चात्प्राप्तकालं चतुर्थोपायं दण्डं तपु करिष्यसि ॥ १५ ॥

रा० टी०-नेति । हे कोशलेन्द्र ! त्रिदशेश्वराः तदुपलक्षितनिश्चितदारापहारिणः साम्ना सामरूपोपायेन ते पत्नीं चेद्यदि न प्रदास्यन्ति ततः पश्चात् प्राप्तकालं प्राप्तः कालो यस्मिन् तं चतुर्थोपायं दण्डं करिष्यसि ॥ १५ ॥

गो० टी०-न चेदिति । प्राप्तश्चतुर्थोपायकालो यस्मिन् कर्मणि तत्तथा ॥ १५ ॥

१६] ति० टी०-शीलं सुचरित्रम् साम साधुवादः विनयः प्रश्रयः नयो नीतिः ॥ १६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-शीलेनेति । हे नरेन्द्र ! शीलेन सुचरितेन साम्ना साधूक्त्या विनयेन प्रश्रयेण नयेन पर्यटनेन च सीतां यदि न प्राप्स्यसि तर्हि महेन्द्रवज्रप्रतिमैः इन्द्रवज्रः प्रतिमा उपमेयं येषां तैः शरौघैः समुत्सादय निश्चितापकारिणमिति शेषः ॥ १६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

गो० टी०-एतदेव स्पष्टयति-शीलेनेति । समुत्पादय विवक्षितकार्यमिति शेषः । 'समुत्सादय' इति पाठे लोकानिति शेषः । एवं लक्ष्मणप्रसादनेन रामकोपशान्तिप्रपञ्चनाद्रावणाराधिततत्पक्षपातिरुद्रसंकल्पाद्रामकोपो भग्न इति वदन् मूर्ख इत्यवगन्तव्यः ॥ १६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

१] ति० टी०-एवं क्रोधमुपशमय्य सहजप्रकृतिप्राप्तये बोधयति लक्ष्मणो रामम्-तमिति । परिद्यूनं क्षीणमचेतसमस्वस्थचित्तमिव ॥ १ ॥

२] ति० टी०-मुहूर्तादिव मुहूर्तादेव ॥ २ ॥

रा० टी०-लक्ष्मणोक्तिमेव वर्णयन्नाह-तमित्यादिभिः । शोकसंतप्तं सीतावियोगजनितशोकेन पीडितम् अत एवाचेतसं चित्तस्वास्थ्यरहितम् अत एव अनाथवत् नाथस्वाभाववन्तमिव विलपन्तम् अत एव परिद्यूनमिव क्षीणत्वेन प्रतीयमानमित्यर्थः । अत एव महता मोहेन कर्तव्यविषयकाविवेकेन युक्तं तं रामं ततः शोकसंतप्तत्वादिहेतोः सौमित्रिः मुहूर्तात् मुहूर्तमाश्वास्य चरणौ अभिपीडयन् सन् संबोधयामास शोकादिनिवृत्तिकारणीभूतवचनमुच्चारयामास । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०-एवं लक्ष्मणो राममाश्वास्य पुनर्वक्तव्यांशं ज्ञापयति षट्षष्टितमे-तं तथेत्यादि । श्लोकद्वयमेकान्वयम् । परिद्यूनं परिदेवनं प्राप्तं परिशोचन्तमित्यर्थः । "च्क्रुवोः शऽनुनासिके च" इत्यूठ् "दिवो विजिगीषायाम्" इति निष्ठानत्वम् । अचेतनम्

१ चेति गो. पाठः । २ नदीः पद्मवनानि चेति गो. पाठः । ३ पादयेति गो. पाठः । ४ आविष्टमिति गो. पाठः । ५ अचेतनमिति गो. पाठः ।

महता तपसा चापि महता चापि कर्मणा । राज्ञा दशरथेनासील्लब्धोऽमृतमिवामरैः ॥ ३ ॥
तव चैव गुणैर्बद्धस्त्वद्वियोगान्महीपतिः । राजा देवत्वमापन्नो भरतस्य यथा श्रुतम् ॥ ४ ॥
यदि दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे । प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति ॥ ५ ॥
आश्वसिहि नरश्रेष्ठ प्राणिनः कस्य नापदः । संस्पृशन्त्यग्निवद्राजन्क्षणेन व्यपयान्ति च ॥ ६ ॥
[दुःखितो हि भवाँल्लोकांस्तेजसा यदि धक्ष्यते । आर्ताः प्रजा नरव्याघ्र क्व नु यास्यन्ति निर्वृतिम् ॥]
लोकस्वभाव एवैष ययातिर्नहुषात्मजः । गतः शक्रेण सालोक्यमनयस्तं समस्पृशत् ॥ ७ ॥

अस्वस्थचित्तं संबोधयामास ज्ञापयामास । अभिपीडयन् उपसंगृह्णन् ॥ १ ॥ २ ॥

३] ति० टी०—बोधनप्रकारः—महतेत्यादि । तपसा पुत्रकामनया कृतेन व्रतादिना कर्मणा ऋष्यशृङ्गानयनपूर्वक-महायागेन ॥ ३ ॥

रा० टी०—संबोधनप्रकारमाह—महतेत्यादिभिः । महता अत्युत्कृष्टेन तपसा पुत्रहेतुकव्रतादिना महता कर्मणा ऋष्यशृङ्गि-ऋष्यानयनादिरूपक्रियया च राज्ञा दशरथेन अमरैरमृतमिव लब्ध आसीत् भवानिति शेषः । एतेन त्वमतिदुर्लभोऽसीति सूचितं तेन रामस्यातिमहत्त्वं व्यञ्जितं तेन महतां शोकोऽनुचित इति ध्वनितं तेन त्वया शोको न कार्य इति व्यञ्जितम् ॥ ३ ॥

गो० टी०—महतेति । महता तपसा कायक्लेशेन व्रतोपवासादिना महता चापि कर्मणा अश्वमेधपुत्रकामेष्टिप्रभृति-कर्मणा राज्ञा दशरथेन राजा लोकस्य रञ्जनात् । अनेन मन्त्र-द्रव्यक्रियालोपाभावेनाधिकारिणा कृतत्वमुच्यते । अमृतमिव तद्वत् भोग्यत्वं यत्नसाध्यत्वं चोच्यते । अमरैः अनेकसुरकृत-यत्नः एकेन कृत इति गम्यते ॥ ३ ॥

४] ति० टी०—भरतस्य श्रुतादिति शेषः । यथा यथा-वच्छ्रुतम् ॥ ४ ॥

रा० टी०—तवेति । तव गुणैर्बद्धो महीपतिः सर्वपृथ्वी-नियन्ता राजा अतिदीप्तिमान् दशरथः त्वद्वियोगात् देवत्वं साकेतकर्मकगतिम् आपन्नः कृतवान् इत्यर्थः, इति भरतस्य भरतात् यथा यथावत् श्रुतम् । एतेन रामगुणानां निरवधत्वं सूचितं, तेनातिशोकवत्त्वे धैर्यादिगुणस्य मालिन्यापत्तिरिति व्यञ्जितम् ॥ ४ ॥

गो० टी०—तवेति । एवकारेण इतरपुत्रव्यावृत्तिः । तवैव गुणैर्बद्धः त्वदेकगुणैकपरवशः महीपतिः राजा न तु जातिमात्रेण राजा देवत्वमापन्नः । तत्र किं प्रमाणं तत्राह—भरतस्येति । भरतादित्यर्थः पञ्चम्यर्थे षष्ठी तथैव मयोक्तमिति शेषः ॥ ४ ॥

५] ति० टी०—इतरः क इति । ' यद्यदाचरति श्रेष्ठस्तत्त-देवेतरो जनः ' इत्युक्तेः । ' मर्त्यावतारस्त्विह मर्त्यशिक्षणम् ' इति भागवतोक्तरीत्या लोकशिक्षणार्थमपि स्वदवतारादिति भावः ॥ ५ ॥

रा० टी०—यदीति । हे काकुत्स्थ ! प्राप्तमिदं दुःखं यदि त्वं न सहिष्यसे तर्हि अल्पसत्त्वः अत एव इतरः त्वत्तो नीचः प्राकृतो जनः कः सहिष्यति ' इतरस्त्वन्यनीचयोः ' इति कोशः ॥ ५ ॥

गो० टी०—यदीति । काकुत्स्थेत्यनेनाप्राकृतत्वं महास-त्त्वत्वं च सिद्धम् । सहिष्यति सहिष्यते ॥ ५ ॥

६] ति० टी०—आश्वसिहीति " न ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति " इति श्रुतेः ॥ ६ ॥

रा० टी०—दुःखित इति । दुःखितः प्रियावियोगेन खिन्नो भवान् यदि लोकान् धक्ष्यते द्वेष्यत्वसंशयेन भस्मीकरिष्यति तर्हि आर्ताः प्राप्तदुःखाः प्रजाः निर्वृतिं सुखं क्व नु यास्यन्ति न क्वापीत्यर्थः ॥ ६ ॥

गो० टी०—दुःखित इति । धक्ष्यते धक्ष्यति ॥ ६ ॥

७] ति० टी०—तदेव विवृणोति—लोकेति । एष औपाधिकदुःखसंबन्धो लोकस्य शरीरिणः स्वभाव एव । तदे-वाह—ययातिरिति । अनयोऽनयमूलं दुःखं तच्च स्वर्गाद्भ्रंश-रूपम् । समस्पृशदित्यनेनाचिरस्थितिकस्पर्शमात्रार्थकेन पुनरवि-लम्बेनैव दौहित्रप्रयुक्तसुखोत्तरकालिकदुःखनिवृत्तिरप्यस्य सू-चिता ॥ ७ ॥

रा० टी०—सीताविषये अपक्षयादिसंशयो न कार्य इति बोधयन्नाह—लोकेति । एष अपक्षयादिः लोकस्वभावः प्राकृत-जनानां स्वभावसिद्धः, एतेन सीतायाः प्राकृतविलक्षणत्वं व्यञ्जितम् । स्वभावसिद्धत्वमेव विवृण्वन्नाह—शक्रेण सालोक्यं गतो नहुषात्मजो यो ययातिः तम् अनयः स्वर्गप्राप्तिविध्वंसः समस्पृशत् स्वर्गाद्विध्वस्त इत्यर्थः ॥ ७ ॥

गो० टी०—प्रसङ्गात् दैविकावर्थानर्थावन्ये महान्तोऽपि प्राप्नुवन्तीति दृष्टान्तमुखेन प्रतिपादयितुमाह—लोकस्वभाव इत्यादिना । एष लोकस्वभाव इति वक्ष्यमाणेषु सर्वत्र योज्यम् । अनयः अनयमूलं दुःखमित्यर्थः, तमः अज्ञानं स्पृशत् अस्पृशत् । स हि स्वर्गगतोऽपि इन्द्रेणासूयाकलुषेण भवद्राज्ये को वा श्रेष्ठ इति पृष्टः सत्यवादितयाऽहमेवेत्युक्तवानिन्द्रेणास्मत्साधी त्वं न स्वर्गार्ह इति पातित इति पुराणप्रसिद्धिः । नहुषात्मज इत्यनेन नहुषानीतिरपि व्यज्यते । स च सप्तर्षीन् स्ववाहकान्

---

१ रामेति गो. पाठः । २ अयं श्लोको नास्ति गो. रा. पुस्तकयोः । ३ षष्ठस्थाने श्लोकोऽयं गो. रा. पाठे । ४ तमः स्पृशदिति गो. पाठः ।

महर्षिर्यो वसिष्ठस्तु यः पितुर्नः पुरोहितः । अह्ना पुत्रशतं जज्ञे तथैवास्य पुनर्हतम् ॥ ८ ॥
या चेयं जगतो माता सर्वलोकनमस्कृता । अस्याश्च चलनं भूमेर्दृश्यते कौशलेश्वर ॥ ९ ॥
यौ धर्मौ जगतो नेत्रौ यत्र सर्वं प्रतिष्ठितम् । आदित्यचन्द्रौ ग्रहणमभ्युपेतौ महाबलौ ॥ १० ॥
सुमहान्त्यपि भूतानि देवाश्च पुरुषर्षभ । न दैवस्य प्रमुञ्चन्ति सर्वभूतानि देहिनः ॥ ११ ॥
शक्रादिष्वपि देवेषु वर्तमानौ नयानयौ । श्रूयेते नरशार्दूल न त्वं व्यथितुमर्हसि ॥ १२ ॥
मृतायामपि वैदेह्यां नष्टायामपि राघव । शोचितुं नार्हसे वीर यथान्यः प्राकृतस्तथा ॥ १३ ॥
त्वद्विधा नहि शोचन्ति सततं सर्वदर्शनाः । सुमहत्स्वपि कृच्छ्रेषु रामानिर्विण्णदर्शनाः ॥ १४ ॥

शचीस्मरणेन सर्प सर्पेत्युक्तवान् सर्पो भवेत्यगस्त्यशप्तश्चिरं तथाभूतस्तस्थौ ॥ ७ ॥

८] ति० टी०–यो महर्षिर्यः पुनर्नः पितुः पुरोहितस्तस्य पुत्रशतं जज्ञे । अह्ना एकाह्ना च पुनर्विश्वामित्रेण हतम् । पूर्वं सुखोत्तरकालिकदुःखानन्तरं सुखं व्यङ्ग्यतयोक्त्वाऽत्र सुखानन्तरं दुःखमुक्तम् । एवं च महतामप्यवश्यं जायमाने ईदृशे सुखे दुःखे च न हर्षशोकौ भवादृशस्योचिताविति भावः ॥ ८ ॥

रा० टी०–महर्षिरिति । यो महर्षिः सकलद्रष्टा यश्च नोऽस्माकं पितुः पुरोहितो वसिष्ठः अस्य वसिष्ठस्य अह्ना एकदिनेन पुत्रशतं शतसंख्याकप्राकृतपुत्राः जज्ञे तथा एकदिनेनैव हतं विश्वामित्रेणेति शेषः ॥ ८ ॥

गो० टी०–महर्षिरिति । अह्ना पुत्रशतं हतम् विश्वामित्रकोपेन युगपत्पुत्रशतनाशदुःखमनुभूतमिति भावः ॥ ८ ॥

९] ति० टी०–चलनम् भूकम्पजं दुःखमित्यर्थः ॥ ९ ॥

रा० टी०–येति । जगतो माता अत एव सर्वलोकनमस्कृता या इयं भूमिः अस्या भूमेः चलनं दृश्यते ॥ ९ ॥

गो० टी०–या चेति । माता सर्वोपादानत्वात् देवी देवस्य विष्णोः पत्नी अत एव लोकनमस्कृता । सत्यसंश्रवेति त्वयैव हि पूर्वं मह्यमेवमुपदिष्टमिति भावः ॥ ९ ॥

१०] ति० टी०–यौ धर्मौ परावरधर्मप्रवर्तकौ नेत्रौ जगतः संसारचक्रस्य कालपरिच्छेददारा प्रवर्तकौ । अत एव यत्र सर्वं प्रतिष्ठितं तौ च ग्रहणं राहुग्रासदुःखं प्राप्तौ ॥ १० ॥

रा० टी०–याविति । यौ जगतो धर्मौ यथासंभवं कर्मप्रवृत्तिहेतू नेत्रौ कालपरिच्छेददारा जनानां तत्तल्लोकप्रापकौ अत एव यत्र ययोः सर्वं प्रतिष्ठितं महाबलौ तौ आदित्यचन्द्रौ ग्रहणं राहुग्रासजनितदुःखम् अभ्युपेतौ प्राप्तौ ॥ १० ॥

गो० टी०–याविति । धर्मौ धर्मप्रवर्तकौ सर्वधर्मसाक्षित्वात् नेत्रौ नेतारौ कालपरिच्छेदादिमुखेन जगतः प्रवर्तकौ 'नेत्रो नेतरि भेषजवान्' इति विश्वः । सर्वेषामर्थप्रकाशकत्वेन नेत्रभूतौ वा । लिङ्ग्यत्ययश्छान्दसः । यत्र ययोः सर्वं जगत् प्रतिष्ठितं यदधीनस्वरूपस्थितिप्रवृत्तिकाः सर्वजना इत्यर्थः । सूर्यस्य वर्षहेतुत्वात् चन्द्रस्यौषधिहेतुत्वाच्चेति भावः । 'आदित्याज्जायते वृष्टिस्ततोऽन्नमभिजायते' इति वचनात् । ग्रहणं राहुकेतुभ्यां ग्रासम् ॥ १० ॥

११] ति० टी०–दैवस्य कर्मणो वशं न प्रमुञ्चन्तीत्यर्थः । किं पुनर्वक्तव्यं देहिनः सर्वभूतानि देहवन्ति सर्वभूतानि न मुञ्चन्तीति पुंस्त्वमार्षम् ॥ ११ ॥

रा० टी०–तदेव संगृह्याह–सुमहान्तीति । सुमहान्ति भूतानि पृथिव्यादीनि देहिनोऽतिप्रबुद्धा देवाश्च दैवस्य नित्यप्रमोदविशिष्टस्य सर्वभूतस्य सर्वाणि भूतानि यस्मात् तस्य त्वत्तनुप्रकाशब्रह्मणः न प्रमुञ्चन्ति तदाशापितं न जहति अत एव शक्रादिषु देवाधीशेष्वपि नयानयौ सुखप्राप्त्यप्राप्ती श्रूयेते अतः त्वं व्यथितुं नार्हसि । एतेन यदि त्वत्तनुप्रकाशरूपब्रह्मज्ञानवर्तित्वं सर्वलोकानामस्ति तर्हि तवाज्ञानवर्तित्वमस्तीति किं वक्तव्यमिति काव्यार्थापत्तिरलंकाररूपो हेतुर्ध्वनितः । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–किं बहुना संग्रहेणोच्यत इत्याह–सुमहान्तीति । सुमहान्ति भूतानि मान्धातृनलप्रभृतिमहाजना अपि सर्वभूतादिदेहिनः सर्वभूतानि आदिदेहोऽस्यास्तीति तथा सर्वभूतान्तर्यामिण इत्यर्थः । दैवस्य परमात्मनः पञ्चम्यर्थे षष्ठी । न प्रमुञ्चति सर्वेऽपि तत्संकल्पं नातिक्रामन्तीत्यर्थः ॥ ११ ॥

१२–१३] ति० टी०–नयानयौ तन्मूलसुखदुःखे ॥ १२ ॥ १३ ॥

गो० टी०–उपसंहरति–शक्रादिष्वपीति । नयानयौ-तत्मूलसुखदुःखे अतो न त्वं शोचितुमर्हसीत्यर्थः ॥ १२ ॥

रा० टी०–मृतायामिति । मृतायां स्वनियम्यरुद्रादिद्वारा सकलभुवननिवर्तिकायां सीतायां नष्टायाम् अपहरणेनादृश्यत्वं प्राप्तायां सत्यामपि अन्यः प्राकृतविलक्षणस्त्वं प्राकृत इव शोचितुं नार्हसि ॥ १३ ॥

गो० टी०–उक्तं विष्णोति–नष्टायामपीति । नार्हसे नार्हसि ॥ १३ ॥

१४] ति० टी०–अनिर्विण्णदर्शना विषादरहितदर्शना विषादराहित्येन कृत्याकृत्यतत्त्वज्ञानवन्तः ॥ १४ ॥

रा० टी०–प्रकृतविलक्षणप्राणां शोको न युक्त इति बोधयन्नाह–त्वद्विति । सर्वदर्शनाः सर्वविषयकज्ञानवन्तः अत एव

---

१ जगतामिति गो. पाठः । २ देवीति गो. पाठः । ३ सत्यसंश्रवेति गो. पाठः । ४ भूतादेति गो. भूतस्येति रा.पाठः । ५ शोचितुमिति गो.पाठः । ६ नष्टायामपि वैदेह्यां हृतायामपि चानघेति गो. पाठः । ७ सत्यदर्शिन इति गो. पाठः ।

तत्त्वतो हि नरश्रेष्ठ बुद्ध्या समनुचिन्तय । बुद्ध्या युक्ता महाप्राज्ञा विजानन्ति शुभाशुभे ॥ १५ ॥
अदृष्टगुणदोषाणामध्रुवाणां तु कर्मणाम् । नान्तरेण क्रियां तेषां फलमिष्टं च वर्तते ॥ १६ ॥
मामेवं हि पुरा वीर त्वमेव बहुशोक्तवान् । अनुशिष्याद्धि को नु त्वामपि साक्षाद्बृहस्पतिः ॥ १७ ॥
बुद्धिश्च ते महाप्राज्ञ देवैरपि दुरन्वया । शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहम् ॥ १८ ॥
दिव्यं च मानुषं चैवमात्मनश्च पराक्रमम् । इक्ष्वाकुवृषभावेक्ष्य यतस्व द्विषतां वधे ॥ १९ ॥

अनिर्विण्णदर्शना निरन्तरं प्रसन्नचित्ताः त्वद्विधाः प्राकृतविलक्षणाः जना नैव शोचन्ति, एतेन तत्र शोको न युज्यते इति व्यक्तितम् ॥ १४ ॥

गो० टी०–त्वद्विधा इति । सत्यदर्शिनः यथार्थदर्शिनः कृच्छ्रेषु दुःखेषु अनिर्विण्णम् अविनाशिदर्शनं कृत्याकृत्यविवेको येषां ते तथा ॥ १४ ॥

१५] ति० टी०–तत्त्वतः समनुचिन्तय युक्तायुक्तं कृत्याकृत्यं चेति शेषः । शुभाशुभे कर्तव्याकर्तव्ये युक्तायुक्ते बुद्धियुक्ता जानन्ति तस्मात्त्वं बुद्ध्या विचिन्तयेति शेषः ॥ १५ ॥

रा० टी०–नन्वहं तु इदानीं न सर्वदर्शनः सीताचरितविषयकज्ञानाभावात् इत्यत आह—तत्त्वत इति । यतो बुद्ध्या युक्ताः महाप्राज्ञाः शुभाशुभे विजानन्ति अतः बुद्ध्या निश्चयकारकान्तःकरणवृत्त्या तत्त्वतः तत्त्वं शृङ्गारपोषकविप्रलम्भमित्यर्थः, समनुचिन्तय निश्चिनु ॥ १५ ॥

गो० टी०–तत्त्वत इति । तत्त्वतो बुद्ध्या अबाधितबुद्ध्या समनुचिन्तय शुभाशुभे इति शेषः । महाप्राज्ञाः बुद्ध्या तात्कालिक्या युक्ताः सन्तः शुभाशुभे भाविनी विजानन्ति ॥ १५ ॥

१६] ति० टी०–एवं दुःखमूलं प्राचीनं कर्म बुद्ध्वा दुःखं सोढव्यमेवेत्याह—अदृष्टेति । शास्त्रैकसमधिगम्यतया प्रत्यक्षेणादृष्टगुणदोषाणां धर्मत्वाधर्मत्वे गुणदोषौ । आपाततो धर्मवद्भासमानानामधर्मत्वाद्धेयत्वाच्च अध्रुवाणां फलनाश्यानाम् । अनेन फलावश्यंभावः सूचितः । तादृशानां कर्मणां निष्पत्तिः क्रियां तत्तत्पुरुषव्यापारमन्तरेण न भवति । स्वव्यापारेण कृतानां तेषामिष्टं फलं सुखं चादनिष्टं च फलं वर्तते प्रवर्तत एव, न तु न प्रवर्तत इति । अतः सोढव्यमेवेति भावः ॥ १६ ॥

रा० टी०–अदृष्टेति । न दृष्टौ फलोत्पत्तौ प्रागनुभूतौ गुणदोषौ येषां तेषामध्रुवाणां तेषां प्रसिद्धानां कर्मणामिष्टं फलं क्रियां विचारकर्मान्तरेण विना नैव वर्तते प्रवर्तते । एतेन विप्रलम्भस्याप्यतिसुखदातृत्वं ध्वनितम् ॥ १६ ॥

गो० टी०–इदानीं फलानुभवः पूर्वकर्मसाध्यः अतस्तत्र न शोचनीयमित्याह–अदृष्टेति । अदृष्टगुणदोषाणां प्रत्यक्षतो द्रष्टुमशक्यसूक्ष्मदुःखरूपगुणदोषाणाम् अध्रुवाणां पुरा एवं कृतमिति निश्चेतुमशक्यानां तेषां प्रसिद्धानां पूर्वकृतानामित्यर्थः । कर्मणामिष्टं फलं क्रियामनुष्ठानमन्तरेण न प्रवर्तते पूर्वकर्मानुष्ठानं विना इदानीं फलं नोत्पद्यते । अतः पूर्वकर्मफले इदानीं प्रवृत्ते कात्र परिदेवनेति भावः ॥ १६ ॥

१७] ति० टी०–इयं च बुद्धिस्त्वदत्तैव मे, अतस्तवोपदेशे किं सामर्थ्यमिति न वाच्यमित्याह—मामिति । अकारणे क्रोधवशमापन्नमिति शेषः । बहुशोक्तवानिति संधिरार्षः । अनुशिष्याच्छिक्षितुं शक्तः स्याद्बृहस्पतिरपि अन्यस्य का गणनेत्यर्थः ॥ १७ ॥

रा० टी०–ननु त्वया इयं बुद्धिः कथं लब्धेत्यत आह—मामिति । एवमनेन प्रकारेण पुरा बहुशोऽनेकवारं मां त्वमेव उक्तवान् अतः को ब्रह्मा वा बृहस्पतिर्वा त्वां सर्वगुरुमनुशिष्यादपि नेत्यर्थः, बहुशोक्तवानित्यत्र संधिरार्षः ॥ १७ ॥

गो० टी०–त्वमेवेति । अन्वशाः अनुशासितवानासि ॥ १७ ॥

१८ [ति० टी०–देवैरपि दुरन्वयान्वेतुमनुगन्तुमशक्या । त्वज्ज्ञानपरिच्छेदं देवानामप्यशक्य इति भावः । अनेनेश्वरता सूचिता । तथापि शोकेनान्तर्हितमिव ते ज्ञानं संबोधयामीव बोधयामीव ॥ १८ ॥

रा० टी०–ननु गुरुं मां त्वं कथं शिक्षयसीत्यत आह—बुद्धिरिति । ते बुद्धिर्निश्चयो देवैरपि दुरन्वया ज्ञातुमशक्या अतः शोकेन अभिप्रसुप्तं तिरोहितत्वेन प्रतीतं ते ज्ञानं संबोधयामि तत्स्वरूपं कथयामि ॥ १८ ॥

गो० टी०–बुद्धिश्चेति । दुरन्वया दुर्लभा प्रसुप्तं सितमितं संबोधामि उत्थापयामि ॥ १८ ॥

१९] ति० टी०–दिव्यं देवोचितम् । मानुषं मनुष्योचितम् । एवमुभयविधपराक्रमाश्रयत्वमात्मनोऽवेक्ष्य । तत्राद्यः परशुरामविषयः, अन्त्यो रक्षोविषयः । एवं च देवोचितपराक्रमस्यायं नावसर इति भावः ॥ १९ ॥

रा० टी०–स्वप्रार्थनायास्तात्पर्यमाह–दिव्यमिति । इक्ष्वाकुवृषभ इक्ष्वाकुश्रेष्ठ ! दिव्यं सर्वैः स्तुत्यं मानुषं प्राकृतविलक्षणं नित्यमनुष्यमात्रनिष्ठं च आत्मनः पराक्रमम् अवेक्ष्यैव द्विषतामेव वधे यतस्वैव द्वेषसंभावनया अन्येषां वधो मा भूदित्यर्थः । चकारा एवंचैवार्थाः ॥ १९ ॥

गो० टी०–दिव्यमिति । दिवि भवं दिव्यं प्राणिजातं देवगन्धर्वादिकं तच्च सात्त्विकं वधानर्हं मानुषं मनुष्यलोकोद्भवं ब्राह्मणादिकं तदपि वधानर्हं सर्वलोकसंहारसमर्थम् आत्मनः पराक्रमं च अवेक्ष्य विचार्य द्विषतामेव वधे यतस्व ॥ १९ ॥

---

१ अधृतानां चेति गो. पाठः । २ प्रेति गो. पाठः । ३ त्वमेव हि पुरा राम मामेवमिति गो. पाठः । ४ अन्वशा इति गो. पाठः । ५ च त्वमिति गो. पाठः ।

किं ते सर्वविनाशेन कृतेन पुरुषर्षभ । तमेव तु रिपुं पापं विज्ञायोद्धर्तुमर्हसि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।

लक्ष्मणेन समाश्वासितो राघवः कोपं सत्यज्य तेन सह सीतामन्विष्यन् जटायुं दृष्ट्वा रक्षोवुद्ध्या तं हन्तुमुद्युङ्क्ते । स तु रावणेन सीताहरणं स्वस्य तेन युद्ध श्रान्तत्वाच्च तेन स्वस्य पक्षौ छित्वा सीतारमादाय विहायसा गमनं कृतमिति न्यवेदीत् । पितुसुहृत्वाज्जटायुषं परिष्वज्य विलपन् रामो भुवि पपात ।

पूर्वजोऽप्युक्तवाक्यस्तु लक्ष्मणेन सुभाषितम् । सारग्राही महासारं प्रतिजग्राह राघवः ॥ १ ॥
सं निगृह्य महाबाहुः प्रवृद्धं रोषमात्मनः । अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत् ॥ २ ॥
किं करिष्यावहे वत्स क्व वा गच्छाव लक्ष्मण । केनोपायेन पश्यावः सीतामिह विचिन्तय ॥ ३ ॥
तं तथा परितापार्तं लक्ष्मणो वाक्यमब्रवीत् । इदमेव जनस्थानं त्वमन्वेषितुमर्हसि ॥ ४ ॥
राक्षसैर्बहुभिः कीर्णं नानाद्रुमलतायुतम् । सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च ॥ ५ ॥
गुहाश्च विविधा घोरा नानामृगगणाकुलाः । आवासाः किंनराणां च गन्धर्वभवनानि च ॥ ६ ॥
तानि युक्तो मया सार्धं समन्वेषितुमर्हसि । त्वद्विधा बुद्धिसंपन्ना महात्मानो नरर्षभाः ॥ ७ ॥
आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः । इत्युक्तस्तद्वनं सर्वं विचचार सलक्ष्मणः ॥ ८ ॥

२०] ति० टी०—कृतेनानुष्ठितेन ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—किमिति । कृतेन सर्वविनाशेन ते किं न किमपीत्यर्थः, अतस्तं प्रियाहर्तारं रिपुं विज्ञाय यत्नतो निश्चित्य उद्धर्तुं विध्वंसितुमर्हसि ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

गो० टी०—किमिति । उद्धर्तुं नाशयितुम् ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

१–४] ति० टी०—पूर्वजोऽपि रामो लक्ष्मणेन सुभाषितं यथा भवति तथोक्तवाक्यस्तद्वाक्यस्य महासारं सयुक्तिकत्वात्सारांशम् ॥ १–४ ॥

रा० टी०—लक्ष्मणवचनश्रवणानन्तरकालिकं रामवृत्तान्तमाह—पूर्वज इत्यादिभिः । लक्ष्मणेनोक्तं वाक्यं यस्मै सः सारग्राही पूर्वजो राघवो रामः महासारम् अतिसारांशयुक्तं लक्ष्मणेन सुभाषितं प्रतिजग्राह, लक्ष्मणेनेत्युभयान्वयि ॥ १ ॥

गो० टी०—अथ लक्ष्मणवाक्यप्रतिष्ठापितधैर्यो रामो युद्धे भूमेर्दक्षिणतः किंचिद्दूरे गृध्रराजं दृष्ट्वा रोदिति सप्तषष्टितमे—पूर्वजोऽपीत्यादि । राघवः पूर्वजोऽपि लक्ष्मणेन कनिष्ठेन सुभाषितं युक्तियुक्ततयोक्तं वाक्यमुक्तमात्रस्तु उक्तमात्र एव जग्राह 'बालादपि सुभाषितम्' इति स्मृतेः । स्वयमुपदेष्टा कथमन्योक्तं जग्राहेत्याह—सारग्राहीति । कथमस्य वाक्यस्य सारवत्त्वं तत्राह—महासारमिति ॥ १ ॥

रा० टी०—स इति । महाबाहू रामः प्रवृद्धमात्मनो रोषं निगृह्य धनुरवष्टभ्य च लक्ष्मणमब्रवीत् ॥ २ ॥

गो० टी०—संनिगृह्येति । स्पष्टम् ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—किमित्यादिभिः । इह वने सीतां केनोपायेन पश्येयमिति विचिन्तय ॥ ३ ॥

गो० टी०—किमिति । पश्येयं पश्येव ॥ ३ ॥

रा० टी०—तमिति । तथा परितापार्तं रामं लक्ष्मणोऽब्रवीत्। तद्वाक्याकारमाह—जनस्थानमेव त्वमन्वेषितुमर्हसि॥४॥

गो० टी०—तमिति । सार्धश्लोक एकान्वयः ॥ ४ ॥

५–८] इह जनस्थाने गिरिगतानि दुर्गाणि गन्तुमशक्यदेशाः सन्तीत्यर्थः । निर्दरा विदीर्णपाषाणाः ॥ ५–८ ॥

रा० टी०—तदेव सहेतुकमाह—राक्षसैरित्यादिभिः । राक्षसैः कीर्णं युक्तं द्रुमलतायुतं जनस्थानमस्तीति शेषः । इह अस्मिन् जनस्थाने गिर्यादीनि सन्ति तानि अन्वेषितुमर्हसि । सार्धश्लोकद्वयमेकान्वयि । तत्र गिरिदुर्गाणीत्यस्य गिरिगतदुर्गमस्थानानीत्यर्थः। निर्दराः विदीर्णाः शिलाः कन्दराणि गिरिसंधयः, गुहाः पर्वतवर्तिवासयोग्यस्थानविशेषाः ॥ ५ ॥ ६ ॥

गो० टी०—सन्तीति । इह जनस्थाने गिरिगतानि दुर्गा-

---

१ त्वमिति गो. पाठः । २ मात्र इति गो. पाठः । ३ संनिगृह्येति गो. पाठः । ४ प्रवृत्तं कोपमिति गो. पाठः । ५ पश्येयमिति गो. रा. पाठः । ६ राममिति गो. पाठः । ७ त्वमिति गो. पाठः । ८ नरर्षभेति गो. पाठः ।

क्रुद्धो रामः शरं घोरं संधाय धनुषि क्षुरम् । ततः पर्वतकूटाभं महाभागं द्विजोत्तमम् ॥ ९ ॥
ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम् । तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत् ॥ १० ॥
अनेन सीता वैदेही भक्षिता नात्र संशयः । गृध्ररूपमिदं व्यक्तं रक्षो भ्रमति काननम् ॥ ११ ॥
भक्षयित्वा विशालाक्षीमास्ते सीतां यथासुखम् । एनं वधिष्ये दीप्ताग्रैः शरैर्घोरैरजिह्मगैः ॥ १२ ॥
इत्युक्त्वाभ्यपतद्रुष्टं संधाय धनुषि क्षुरम् । क्रुद्धो रामः समुद्रान्तां चालयन्निव मेदिनीम् ॥ १३ ॥
तं दीनदीनया वाचा सफेनं रुधिरं वमन् । अभ्यभाषत पक्षी सँ रामं दशरथात्मजम् ॥ १४ ॥
यामोषधीमिवायुष्मन्नन्वेषसि महावने । सा देवी मम च प्राणा रावणेनोभयं हृतम् ॥ १५ ॥
त्वया विरहिता देवी लक्ष्मणेन च राघव । ह्रियमाणा मया दृष्टा रावणेन बलीयसा ॥ १६ ॥

णि गन्तुमशक्यप्रदेशा इत्यर्थः । निर्दराः विदीर्णपाषाणाः कन्दराणि पाषाणसंधयः गुहाः देवखातविलानि ॥ ६ ॥

गो० टी०–आवासा इति । युक्तः संनद्धः ॥ ६ ॥

रा० टी०–त्वदिति । बुद्धिसंपन्नाः त्वद्बुद्धयः त्वां विदधति ते त्वत्सेवका इत्यर्थः, अत एव महात्मानो नरर्षभाः वायुवेगैरचलाः पर्वता इव आपत्सु न प्रकम्पन्ते नाभिभवन्ति । अर्धद्वयमेकान्वयि ॥ ७ ॥

गो० टी०–त्वद्बुद्धिभा इति । न प्रकम्पन्ते न चञ्चलचित्ता भवन्तीत्यर्थः ॥ ७ ॥

रा० टी०–इतीति । सलक्ष्मणः लक्ष्मणसहितः कुद्धः कुधं जहाति सः त्यक्तकोपो रामः क्षुरं क्षुरसदृशं तीक्ष्णं शरं धनुषि संधाय वनं विचचार ॥ ८ ॥

गो० टी०–इतीति । क्षुरं क्षुरप्राख्यं शरं सीताया अदर्शनात् क्रोधः ॥ ८ ॥

९–१३] ति० टी०–क्षुरं तद्वन्निशितं शरमित्यर्थः । तं संधाय विचचारेत्यन्वयः ॥ ९–१३ ॥

रा० टी०–तत इति । ततः विचरणोपक्रमणानन्तरं पर्वतकूटाभं पर्वतशृङ्गसदृशं द्विजोत्तमं पक्षिश्रेष्ठं क्षतजार्द्रं रुधिरव्याप्तं जटायुषं ददर्श ॥ ९ ॥

गो० टी०–तत इति । कूटः शृङ्गं महाभागं महाभाग्यं स्वाम्यर्थं त्यक्तशरीरत्वात् द्विजोत्तमं पक्षिश्रेष्ठम् । 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । क्षतजं रुधिरम् ॥ ९ ॥

रा० टी०–तमिति । तं जटायुषं दृष्ट्वा रामोऽब्रवीत् । अर्धं पृथक् ॥ १० ॥

गो० टी०–तमित्यादि । भक्षिता [1]खादितेति भावः ॥ १० ॥

रा० टी०–तद्वचनाकारमाह–अनेनेति । इदं गृध्ररूपं वस्तु यदि रक्षो राक्षसस्तर्हि अनेन रक्षसा भक्षिता सीता अत्र अस्योदरे भ्रमति भ्रमेत् संशयो न । यदीत्यध्याहृतम् भ्रमतीत्यनेन तस्याः नित्यात्वं सूचितं तेनैतदुदरान्निर्गच्छेदिति संभावना व्यञ्जिता ॥ ११ ॥

गो० टी०–गृध्रेति । गृध्रस्य रूपमिव रूपं यस्य तत्तथा ॥ ११ ॥

रा० टी०–भक्षयित्वेति । यथा यदि सीतां भक्षयित्वा आस्ते अयमिति शेषः, तदा अजिह्मगैः ऋजुप्रवेशकर्तृभिः शरैः एनं सुखं वधिष्ये ॥ १२ ॥

गो० टी०–एनमिति । अर्धमेकं वाक्यम् । अजिह्मम् अकुण्ठम् अवक्रं वा गच्छन्तीत्यजिह्मगाः तैः ॥ १२ ॥

रा० टी०–इतीति । यद्यपि शरं संधायोपलक्षितो रामः इत्युक्त्वा मेदिनीं चालयन्निव द्रष्टुमभ्यपतत् अभिमुखमगच्छत् ॥ १३ ॥

गो० टी०–इतीति । अभ्यपतत् अभिमुखं गतः समुद्रान्तां समुद्रपर्यन्ताम् ॥ १३ ॥

१४] ति० टी०–सफेनं फेनसहितम् । दीनदीनयातिशयितदीनया दीनसदृशा वा ॥ १४ ॥

रा० टी०–तमिति । पक्षी जटायुः सफेनं रुधिरं वमन् सन् दीनं क्षीणत्वेन प्रतीयमानं रामं दीनया वाचा अभ्यभाषत ॥ १४ ॥

गो० टी०–तमिति । दशरथात्मजमिति संबन्धोक्तिः ॥ १४ ॥

१५–१६] ति० टी०–ओषधीमिव संजीवनौषधीमिव । अन्वेषस्यन्वेषसे ॥ १५ ॥ १६ ॥

रा० टी०–तद्भाषणप्रकारमाह–यामिति । हे आयुष्मन् ! याम् औषधीमिव महावने अन्वेषसि सा देवी सीता मम प्राणाश्च उभयमेतद्वयं रावणेन हृतम् ॥ १५ ॥

गो० टी०–यामिति । यथा महौषध्यन्वेषिणः प्रतिवनमन्वेषन्ते तथा यामस्मिन् विस्तीर्णे वनेऽन्वेषसि । एषु गतावित्यस्माद्वयत्ययेन परस्मैपदम् । निर्गं प्राणसमेतयुक्ता सा देवी मम प्राणाश्च उभयं रावणेन हृतं मम प्राणान् हृतप्रायान् कृत्वा सीतां रावणो हृतवानित्यर्थः । खरवधादिना रामबलं ज्ञात्वाऽप्यस्थाने भयशङ्कितया रामस्यायुः प्रार्थयते–आयुष्मन्निति ॥ १५ ॥

रा० टी०–तत्प्रकारमाह–त्वयेति । त्वया लक्ष्मणेन च

[1] आस्वैघोरैर्बाणैरिति गो. पाठः । २ कम्पयन्निति गो. पाठः । ३ लिति गो. पाठः ।

सीतामभ्यवपन्नोऽहं रावणश्च रणे प्रभो । विध्वंसितरथच्छत्रः पतितो धरणीतले ॥ १७ ॥
एतदस्य धनुर्भग्नमेते चास्य शरास्तथा । अयमस्य रणे राम भग्नः साङ्ग्रामिको रथः ॥ १८ ॥
अयं तु सारथिस्तस्य मत्पक्षनिहतो भुवि । परिश्रान्तस्य मे पक्षौ छित्त्वा खड्गेन रावणः ॥ १९ ॥
सीतामादाय वैदेहीमुत्पपात विहायसम् । रक्षसा निहतं पूर्वं मां न हन्तुं त्वमर्हसि ॥ २० ॥
रामस्तस्य तु विज्ञाय [बाष्पपूर्णमुखस्तदा । द्विगुणीकृतसंतापार्तः]
सीतासक्तां प्रियां कथाम् । । गृध्रराजं परिष्वज्य परित्यज्य महद्धनुः ॥ २१ ॥
निपपातावशो भूमौ रुरोद सहलक्ष्मणः । द्विगुणीकृतसंतापार्तो रामो धीरतरोऽपि सन् ॥ २२ ॥
एकमेकायने कृच्छ्रे निःश्वसन्तं मुहुर्मुहुः । समीक्ष्य दुःखितो रामः सौमित्रिमिदमब्रवीत् ॥ २३ ॥
राज्यं भ्रष्टं वने वासः सीता नष्टा मृतो द्विजः । ईदृशीयं ममालक्ष्मीर्दहेदपि हि पावकम् ॥ २४ ॥

रहिता अत एव रावणेन ह्रियमाणा देवी सीता मया दृष्टा ॥ १६ ॥

गो० टी०—त्वयेति । स्पष्टम् ॥ १६ ॥

१७–२०] ति० टी०—अहं सीतामभ्यवपन्नः सीतापरित्राणमुद्दिश्याभिगतः । मया रावणश्च रणे विध्वंसितरथच्छत्रो धरणीतले पतितश्च कृतः ॥ १७–२० ॥

रा० टी०—स्वप्राणापहरणे निमित्तं बोधयन्नाह—सीतामिति । हे प्रभो ! अहं सीतामभ्यवपन्नः तदाऽऽक्रोशश्रवणमात्रेण तत्संमुखं प्राप्तः अत एव विध्वंसितरथच्छत्रो रावणः धरणीतले पतितः पातितः मयेति शेषः ॥ १७ ॥

गो० टी०—सीतामिति । अभ्यवपन्नः आभिमुख्येन गतः ह्रियमाणां सीतामवलोक्य तदभिमुखमागत इत्यर्थः । रावणश्च विध्वंसितरथः सन् अत्र धरणीतले पातितः रथाद्भ्रंशित इत्यर्थः ॥ १७ ॥

रा० टी०—एतदिति । भग्नं भिन्नम् ॥ १८ ॥

गो० टी०—एतदिति । भग्नमेतद्धनुः अस्य रावणस्य संबन्धि एवमुत्तरत्रापि योज्यम् । शरावरं वर्म तूणीरं वा ॥ १८ ॥

रा० टी०—अयमिति । तस्य रावणस्य भुवि पतितोऽयं सारथिस्तु मत्पक्षनिहतः । अर्धं पृक्-परीति । परिश्रान्तस्य मे पक्षौ रावणः छित्त्वा सीतामादाय च विहायसमाकाशमुत्पपात । अतो रक्षसा पूर्वं निहितं मां हन्तुं त्वं नार्हसि । सार्धश्लोक एकान्वयी ॥ १९ ॥ २० ॥

गो० टी०—अयं त्वित्यर्धमेकम् ॥ १९ ॥

गो० टी०—परिश्रान्तस्येति । वैदेहीं जनकेन सम्यक् परिपोषिताम् ॥ २० ॥

गो० टी०—रक्षसेत्यर्धमेकम् ॥ २१ ॥

२१] ति० टी०—तस्य स्वरूपं विज्ञाय । सीतासक्तां सीतासंबद्धां कथां च श्रुत्वा ॥ २१ ॥

२२] ति० टी०—द्विगुणीकृतसंतापार्तः सीताविरयोगजजटायुवधजसंतापश्चेति तापस्य द्वैगुण्यम्, तेनार्तो बभूवेति शेषः २२

रा० टी०—राम इति । रामः सर्वाभिरामदाता सहलक्ष्मणः लक्ष्मणसहितो द्विगुणीकृतसंतापार्तः द्वौ संभोगपोषकस्वभक्तसंतापापहारकत्वरूपौ गुणौ यस्मिन्स द्विगुणः अद्विगुणो द्विगुणः कृतः यस्तापस्तेनार्तो युक्तः धीरतरोऽपि रामः गृध्रराजं विज्ञाय तस्योच्चारितां सीतासक्तां सीतासंबन्धिनीमत एव प्रियां कथां च विज्ञाय गृध्रराजं परिष्वज्य महद्धनुः परित्यज्य च अवशः सन् भूमौ निपपात रुरोद च । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०—राम इति । तस्य गृध्रस्य संबन्धिनीं सीताविषयकथां विज्ञाय श्रुत्वा द्विगुणीकृतेन गृध्रवधेन द्विरावर्तितेन तापेन आर्तः पीडितः अभूदिति शेषः ॥ २२ ॥

गो० टी०—गृध्रेति । अवशः मूर्छित इत्यर्थः । रुरोद क्रमादिति शेषः ॥ २३ ॥

२३] ति० टी०—एकमसहायम् । एकस्मिन्नूर्ध्वतालक्षणेऽयने श्वासमार्गेऽत एव कृच्छ्रे मुहुर्मुहुर्निःश्वसन्तमिति कतकसंमतपाठेऽर्थः । 'एकमेकायने दुर्गे निःश्वसन्तं कथंचन' इति पाठे लताकण्टकसंकीर्णे एकायने एकमार्गे पतित्वा कथंचन निःश्वसन्तं मृतप्रायमित्यर्थ इति तीर्थः ॥ २३ ॥

रा० टी०—एकमिति । एकायने एक एव अयते यस्मिन् एकमात्रजनगम्ये अत एव कृच्छ्रे देशे पतितमिति शेषः, मुहुर्मुहुर्निःश्वसन्तम् एकमसहायं जटायुषं समीक्ष्य दुःखितो रामः सौमित्रिमब्रवीत् । 'एकायने दुर्गे' इति तीर्थपाठः ॥ २३ ॥

गो० टी०—एकमिति । एकम् असहायम् एकायने एकस्य मार्गे 'अयनं वर्त्म मार्गोऽध्व-' इत्यमरः एकपथामित्यर्थः । सहायरहितं दयया संरक्षकपथिकजनरहितमित्यर्थः । दुर्गे इतः परमपि केनचिद्गन्तुमशक्ये इति दुःखहेत्वतिरेकोक्तिः । निःश्वसन्तं गृध्रराजमिति शेषः ॥ २४ ॥

२४] ति० टी०—ममालक्ष्मीर्ममदुष्कर्मसंबद्धाऽलक्ष्मीः पावकं सर्वदाहकमपि दहेत् किमुत मच्छिथ्रयमित्यर्थः ॥ २४ ॥

रा० टी०—तद्वचनाकारमाह—राज्यमिति । राज्यं राज्याभिषेको भ्रष्टं वने वासो जात इति शेषः, या पावकमपि दहेत्

---

१ मदेति गो. पाठः । २ रथश्चात्र पतित इति गो. पाठः । ३ भग्नमेतदस्य शरावरमिति गो. पाठः । ४ रथ इति गो. पाठः । ५ पक्षौ इति गो. पाठः । ६ चरणद्वयमेतदधिकं गो. पाठे । ७ अर्धमेतत् गो. नास्ति । ८ दुर्गे इति गो. पाठः । ९ कथंचनेति गो. पाठः । १० दुःखिततरो रामः सौमित्रिमब्रवीदिति गो. पाठः । ११ राज्याद्भ्रंश इति गो. पाठः ।

संपूर्णमपि चेदद्य प्रतरेयं महोदधिम् । सोऽपि नूनं ममालक्ष्म्या विशुष्येत्सरितां पतिः॥ २५ ॥
नास्त्यभाग्यतरो लोके मत्तोऽस्मिन्सचराचरे । येनेयं महती प्राप्ता मया व्यसनवागुरा ॥ २६ ॥
अयं [1]पितुर्वयस्यो मे गृध्रराजो महाबलः । शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥ २७ ॥
इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः । जटायुषं च पस्पर्श [2]पितृस्नेहं [3]निदर्शयन्॥ २८ ॥
निकृत्तपक्षं रुधिरावसिक्तं [4]तं गृध्रराजं [5]परिगृह्य राघवः ।
क्व मैथिली प्राणसमा [6]गतेति विमुच्य वाचं निपपात भूमौ ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ।

सीताहरणस्य याथार्थ्यं रामेण पृष्टो जटायुस्तत्कथयित्वा सीताहरणस्य विन्दमुहूर्ते जातत्वात्त्वं तां पुनरवश्यं विन्देथा इति राम समाश्वासयति। रावणवृत्तं निवेदयतो जटायोः प्राणा निरगच्छन्। तमनुशोचन्रामस्तस्मै पुण्यलोकानुद्दिश्यैहिकं चितायामारोप्य पिण्डोदकं ददौ।

रामः प्रेक्ष्य तु तं गृध्रं भुवि रौद्रेण पातितम् । सौमित्रिं मित्रसंपन्नमिदं वचनमब्रवीत् ॥ १ ॥
ममायं नूनमर्थेषु यतमानो विहङ्गमः । राक्षसेन हतः संख्ये प्राणांस्त्यजति मत्कृते ॥ २ ॥

ईदृशी ममालक्ष्मीः मस्य मधुसूदनस्य मा लक्ष्मीः तस्या अपि लक्ष्मीः इयं बुद्धिस्था सीता नष्टा अपहरणेन अदृश्यत्वं प्राप्ता, द्विजः सहायकपक्षी मृतो मृतप्रायः 'भो यमे समयेऽपि स्याद्विषे च मधुसूदने' इति मेदिनी ॥ २४ ॥

गो० टी०—राज्यादिति । यद्यपि न चास्य महतीं लक्ष्मीं राज्यनाशोपकर्षति वनवासो महोदय इति अभिमततमतया प्रोक्तौ राज्यनाशवनवासौ तथापि संप्रति सीताविश्लेषकारित्वाज्जटायुवियोगफलकत्वाच तावेवानर्थकरौ जातावित्याह—राज्याद्भ्रंशः इठात् लब्धराज्यस्य विच्युतिः।वने वासः राज्यभ्रंशेऽपि राज्ये भिक्षुकत्वापि स्थातुं शक्यं तदपि न लब्धम्। सीता नष्टा वनवासेऽप्यभिमतजनविश्लेषाभावे उखेनावस्थातुं शक्यं तदपि नास्ति। हतो द्विजः अभिमतजनविश्लेषेऽपि बन्धुजनसन्निधौ शोको निर्वापयितुं शक्यः स च निवृत्तः। ईदृशी एतादृशदुःखपर्यवसायिनी मम अलक्ष्मीः दौर्भाग्यं पावकमपि निर्दहेत्सर्ववस्तुदाहकमपि दहेत् सदा विश्लेषप्रसक्तिशून्यं लक्ष्मणमपि विश्लेषयेदिति भावः ॥ २५ ॥

२५] ति० टी०—एतदुःखपरितापशान्तये संपूर्णं महोदधिमपि प्रतरेयं तदा सोऽपि सरितां पतिर्नूनं निश्चयेन ममालक्ष्म्या विशुष्येत् ॥ २५ ॥

रा० टी०—संपूर्णमिति । पतिः सर्वेषां नियन्ताऽहं संपूर्णा सरितां नदीं संपूर्णं महोदधिं महासमुद्रं च ममालक्ष्म्या मधुसूदनलक्ष्मीलक्ष्म्या सहितोऽत् निरन्तरं वनपर्यटनशीलोऽहं चेत् यदि इच्छामि तदा प्रतरेयं विशुष्ये शोषयामि च अतः येन रक्षसा हेतुभूतेन महती इयं व्यसनवागुरा दुःखरूपमृगादिबन्धनजालं मया कर्त्रा प्राप्ता प्रापिता तस्मान्मत्त उन्मत्तः अभाग्यतरश्च लोके नास्ति, एतेन स शीघ्रं ध्रुवं नङ्क्ष्यतीति सूचितम् । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो०टी०—संपूर्णमिति । प्रतरेयं तापशान्तये प्लवेयं चेत्२६

२६]ति०टी०—येनाभाग्येन। वागुरा मृगादिबन्धनजालम्२६

गो० टी०—नास्तीति । व्यसनं वागुरेव व्यसनवागुरा 'वागुरा मृगबन्धिनी' इत्यमरः ॥ २७ ॥

२७] ति० टी०—पितुर्वयस्यः सखा ॥ २७ ॥

रा० टी०—तदेव द्रढयन्नाह—अयमिति । मे पितुर्वयस्यः सखा निहतो निहतप्रायोऽयं गृध्रराजः भाग्यविपर्ययात् हननकर्तुर्भाग्यवैपरीत्यात् एव ममार्थे शेते ॥ २७ ॥

गो० टी०—अयमिति । पितुर्वयस्यः सखा ॥ २८ ॥

२८–२९] ति० टी०—पितृस्नेहं पितरीव स्नेहम्॥२८॥२९॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०—इतीति । राघवो जटायुषं पस्पर्श ॥ २८ ॥

गो० टी०—इतीति । पितरीव स्नेहः पितृस्नेहः ॥ २९ ॥

रा० टी०—निकृत्तेति । निकृत्तौ छिन्नौ पक्षौ यस्य तं गृध्रराजं परिगृह्य क्व मैथिलीति वाचं विमुच्योच्चार्येत्यर्थः भूमौ निपपात २९

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

गो०टी०—निकृत्तेति । रामः वाचं विमुच्य उक्त्वेत्यर्थः३०

अस्मिन् सर्गे एकोनत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

१–२] ति० टी०—रौद्रेण रक्षसा अनेन रक्षसा तमः-

---

१ पितृव्वयस्य इति गो. पाठः । २ जरान्वित इति गो. पाठः । ३ वीति गो. पाठः । ४ स इति गो. पाठः । ५ परिरभ्य राम इति गो. पाठः । ६ ममेति गो. पाठः । ७ त्यक्ष्यति दुस्त्यजानिति गो. दुस्त्यजानिति रा. पाठः ।

अतिखिन्नः शरीरेऽस्मिन्प्राणो लक्ष्मण विद्यते । तथा स्वरविहीनोऽयं विक्लवं समुदीक्षते ॥ ३ ॥
जटायो यदि शक्नोषि वाक्यं व्याहरितुं पुनः । सीतामाख्याहि भद्रं ते वधमाख्याहि चात्मनः ॥ ४ ॥
किंनिमित्तो जहारार्यां रावणस्तस्य किं मया । अपराधं तु यं दृष्ट्वा रावणेन हृता प्रिया ॥ ५ ॥
कथं तच्चन्द्रसंकाशं मुखमासीन्मनोहरम् । सीतया कानि चोक्तानि तस्मिन्काले द्विजोत्तम ॥ ६ ॥
कथंवीर्यः कथंरूपः किंकर्मा स च राक्षसः । क्व चास्य भवनं तात ब्रूहि मे परिपृच्छतः ॥ ७ ॥
तमुद्वीक्ष्य स धर्मात्मा विलपन्तमनाथवत् । वाचा विक्लवया राममिदं वचनमब्रवीत् ॥ ८ ॥
सा हृता राक्षसेन्द्रेण रावणेन दुरात्मना । मायामास्थाय विपुलां वातदुर्दिनसंकुलाम् ॥ ९ ॥
परिक्रान्तस्य मे तात पक्षौ छित्त्वा निशाचरः । सीतामादाय वैदेहीं प्रयातो दक्षिणामुखः ॥ १० ॥

प्राधान्यमेवेति सूचितम् । मित्रसंपन्नं मित्रत्वेन संपन्नं सर्वजनेषु मैत्र्या युक्तम् ॥ १ ॥ २ ॥

रा० टी०–किंचित्स्वास्थ्यप्राप्त्यनन्तरं लक्ष्मणं प्रति रामोकिं वर्णयितुमाह—राम इति । रौद्रेण अतिभयंकरेण रक्षसा पातितं गृध्रं तं जटायुषं प्रेक्ष्य मित्रसंपन्नं मित्रत्वं प्राप्तं सौमित्रिं रामोऽब्रवीत् । मित्रशब्दो भावप्रधानः ॥ १ ॥

गो० टी०–अथ भगवत्कार्यार्थं त्यक्तशरीरस्य गृध्रराजस्य मोक्षपदप्रापणमष्टषष्टितमे–राम इत्यादि । रौद्रेण रावणेन मित्रसंपन्नं सर्वजनमित्रमित्यर्थः । यद्वा परनिपातः संपन्नमित्रम् अत्यन्तरामविषयसौहार्दयुक्तमित्यर्थः ॥ १ ॥

रा० टी०–तद्वचनाकारमाह–ममेति । ममार्थेषु यतमानः अत एव संख्ये संग्रामे राक्षसेन हतः अयं विहङ्गमः दुस्त्यजान् प्राणान् त्यजति ॥ २ ॥

गो० टी०–ममेति । अर्थेष्विति निमित्तसप्तमी मम प्रयोजनार्थमित्यर्थः । संख्ये युद्धे ॥ २ ॥

३] ति० टी०–तथातिखिन्नप्राण इव स्वरहीनो विह्वलेक्षणश्च ॥ ३ ॥

रा० टी०–अतीति । हे लक्ष्मण ! अस्मिन् जटायुसंबन्धिनि शरीरे प्राणः प्राणवायुः अतिखिन्नः क्षीणतां प्राप्तो विद्यते तथा अत एव स्वरविहीनः क्षीणस्वरोऽयं विक्लवं यथा भवति तथा समुदीक्षते पश्यति ॥ ३ ॥

गो० टी०–अयमिति । अयं प्राणः सूक्ष्मप्राणः स्वरहीनः हीनस्वरः विक्लवः विह्वलः ॥ ३ ॥

४] ति० टी०–व्याहरितुं व्याहर्तुम् । वधं वधप्रकारम् ॥ ४ ॥

रा० टी०–लक्ष्मणं प्रत्युक्त्वा जटायुं प्रत्याह–जटायो इति । हे जटायो ! वाक्यं व्याहरितुं व्याहर्तुम् अभिधातुं यदि पुनः शक्नोषि तर्हि सीतां सीताहरणवृत्तान्तम् आख्याहि आत्मनो वधं वधवृत्तान्तं चाख्याहि ॥ ४ ॥

गो० टी०–जटायो इति । व्याहरितुं व्याहर्तुं वधं वधप्रकारम् ॥ ४ ॥

५–८] ति० टी०–यमपराधं दृष्ट्वा तु प्रिया सीता हृता सोऽपराधस्तस्य मया किं कृतः, अपि तु न । अतः–किंनिमित्त इति । किं निमित्तं हृदि यस्य स रावण आर्यां जहार ॥ ५–८ ॥

रा० टी०–पृष्टवृत्तान्तस्वरूपमाह–किमिति । रावणः आर्यां सीतां किंनिमित्तः सन् जहार । तदेव भङ्ग्यन्तरेणाह–यमपराधं दृष्ट्वा ज्ञात्वा रावणेन प्रिया सीता हृता सोऽपराधः मया किं कृत इति शेषः । किमिति प्रश्ने ॥ ५ ॥

गो० टी०–किमिति । किंनिमित्तः किं निमित्तं यस्यासौ किंनिमित्तः केन हेतुना अहरदित्यर्थः । किं भोगार्थम् उत अपकारप्रतीकारार्थमित्यर्थः । चरमपक्षे तत्स्वरूपं पृच्छति–तस्येति । यम् अपराधम् ॥ ५ ॥

रा० टी०–कथमिति । चन्द्रसंकाशं चन्द्रस्यापि प्रकाशकम् अत एव मनोहरं तत्प्रसिद्धं सीताया मुखं तस्मिन्नपहरणकाले कथं कीदृशमित्यर्थः, आसीत् कानि वचनानि सीतया चोक्तानि ॥ ६ ॥

गो० टी०–कथमिति । कथं कीदृशप्रकारं कानि वाक्यानि ॥ ६ ॥

रा० टी०–कथमिति । राक्षसो रावणः कथंवीर्यादिविशिष्टः अस्य रावणस्य भवनं क्व इति परिपृच्छतो मे ब्रूहि ॥ ७ ॥

गो० टी०–कथंवीर्य इति । तात पितृतुल्य ॥ ७ ॥

रा० टी०–तमिति । धर्मात्मा स जटायुः अनन्तरमन्तरर-हितं निरन्तरमित्यर्थः, विलपन्तं विविधं पृच्छन्तं रामंउद्वीक्ष्य प्रेमभरेणावलोक्य अतिसन्नया अतिक्षीणया वाचा इदमब्रवीत् ॥ ८ ॥

गो० टी०–तमिति । दीनात्मा दीनमनाः अतिसन्नया अतिकार्श्यं प्राप्तया ॥ ८ ॥

९–१०] ति० टी०–किंकर्मेत्यस्योत्तरम्—मायामिति । वातेन दुर्दिनेन च संकुलाम् ॥ ९ ॥ १० ॥

रा० टी०–तद्वचनाकारमाह–सेति । रावणेन वातदुर्दिन-

१ sहरत्सीतामिति गो. पाठः । २ राद्धमिति गो. पाठः । ३ उद्वीक्ष्याथ दीनात्मेति गो. पाठः । ४ अनन्तरमिति गो. रा. पाठः । ५ sतिसन्नया रामं जटायुरिदमिति गो. पाठः । ६ हृता सेति गो. पाठः । ७ विहायसेति गो. पाठः । ८ श्रान्तस्येति गो. रा. पाठः । ९ स राक्षस इति गो. पाठः । १० दक्षिणां दिशमिति गो. पाठः ।

उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघव । पश्यामि वृक्षान्सौवर्णानुशीरकृतमूर्धजान् ॥ ११ ॥
येन याति मुहूर्तेन सीता मादाय रावणः । विप्रनष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥ १२ ॥
विन्दो नाम मुहूर्तोऽसौ न च काकुत्स्थ सोऽबुधत् । [त्वत्प्रियां जनकीं हृत्वा रावणो राक्षसेश्वरः]
झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥ १३ ॥
न च त्वया व्यथा कार्या जनकस्य सुतां प्रति । वैदेह्यां रंस्यसे क्षिप्रं हत्वा तं रणमूर्धनि ॥ १४ ॥
असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः । आस्यात्सुस्राव रुधिरं म्रियमाणस्य सामिषम् ॥ १५ ॥

संकुलां वातेन दुर्दिनेन च संयुक्तां विपुलां बहुमायामास्थाय सा सीता हृता ॥ ९ ॥

गो० टी०–किंकर्मेत्यस्योत्तरमाह–हृता सेति । वातेन दुर्दिनेन च संकुलाम् 'मेघच्छन्नेह्नि दुर्दिनम्' इत्यमरः । मायया महावातं मेघच्छादनं चोत्पाद्य हृतवानित्यर्थः ॥ ॥ ९ ॥

रा० टी०–परीति । परिश्रान्तस्य रावणयुद्धे प्राप्तपरिश्रमस्य मे पक्षौ छित्त्वा सीतामादाय च निशाचरो रावणः दक्षिणामुखः सन् प्रयातः ॥ १० ॥

गो०टी०–वधमाख्याहीत्यस्योत्तरमाह–परिश्रान्तस्येति। युद्धपरिश्रान्तस्येत्यर्थः ॥ १० ॥

११] ति० टी–अन्यप्रभोत्तरासामर्थ्यं ध्वनयन्प्राणोपरोधमाह—उपेति । उशीरेण नलदेन कृता मूर्धजाः केशा येषां तान्सौवर्णान्वृक्षान्पश्यामि । तादृशसौवर्णवृक्षदर्शनं मरणचिह्नम् ॥ ११ ॥

रा० टी०–उत्तरान्तरं वक्तुं सामर्थ्यं नास्तीति बोधयन्नाह–उपेति । हे राघव ! मे प्राणाः उपरुध्यन्ति कार्यव्यापारं निवारयन्ति निर्गच्छन्तीत्यर्थः । किं च मे प्राणाः इन्द्रियाणि उपरुध्यन्ते पिधीयन्ते स्वस्वव्यापारसामर्थ्यं जहतीत्यर्थः, अत एव दृष्टिर्भ्रमति अत एव सौवर्णान् सुवर्णमयान् उशीरकृतमूर्धजान् उशीरेण नलदेन कृताः संरचिताः मूर्धजाः अग्रभागा येषां तान् वृक्षान् पश्यामि मरणचिह्नत्वेन जानामीत्यर्थः ॥११॥

गो० टी०–प्रभान्तरे प्रत्युत्तरकथनाशक्तिमाह–उपरुध्यन्तीति । उपरुध्यन्ति उपरुध्यन्ते मरणवेदनया पीड्यन्त इत्यर्थः। सौवर्णान् मरणकाले तथा प्रतीयन्त इति प्रसिद्धम् । उशीरैः श्यामजकैः कृताः कल्पिताः मूर्धजाः केशाः येषां ते तथा ॥११॥

१२] ति० टी–ज्योतिषज्ञानबलादाह—येनेति ॥१२॥

रा० टी०–स्वस्य शास्त्रविज्ञातृत्वं बोधयन्नाह–येनेति। रावणः येन मुहूर्तेन सीतामादाय याति तस्मिन् मुहूर्ते तत्स्वामी धनाधिपः विप्रनष्टम् अदृश्यत्वं प्राप्तं धनं क्षिप्रं प्रतिपद्यते॥१२॥

गो० टी०–किमिह बहुनोक्तेन सर्वथा सीता पुनर्लप्स्यत इत्याह–येनेति । येन मुहूर्तेन निमित्तभूतेन रावणः सीतामादाय याति स्म तन्मुहूर्तबलेन स्वामी धनस्वामी विप्रणष्टं धनं क्षिप्रम् अचिरेण पुनः प्रतिपद्यते प्राप्नोति ॥ १२ ॥

१३] ति० टी–कोऽसौ मुहूर्तस्तत्राह–विन्द इति । लाभार्थाद्विदेर्निष्पन्नोऽसावित्याहुः । स च रावणो निजकर्मानानुकूलं तं नावबुधत् 'बुधिरवगमने' इत्यस्य लुङि रूपम् । न केवलं मुहूर्तमहिम्ना इष्टप्राप्तिरेव, अपि तु शत्रुनाशोऽपीत्याह–झषेति । बडिशं गृहीत्वा झष इव क्षिप्रमेव विनश्यति । वर्तमाननिर्देशेनातिसांनिध्यं विनाशस्य दर्शयति ॥ १३ ॥

रा० टी०–नन्वं कोऽसौ मुहूर्त इत्यत आह–विन्द इति । हे काकुत्स्थ ! असौ सीतापहरणसंबन्धी विन्दो नाम मुहूर्तः अपहृतवस्तु तत्स्वामिसमीपं प्रापयतीत्यर्थः। नन्वस्मिन् मुहूर्ते रावणेन सीता कथमपहृतेत्यत आह–स रावणो न अबुधत् स्वप्रतापाभिमानात् मुमूर्षुत्वाद्वा नागणयदित्यर्थः;अत एव बडिशं संगृह्य गृहीत्वा झषवत् मीनवत् विनश्यति विनंष्टा । अबुधत् इति इरितो बुधो लुङ् । विकरणव्यत्ययश्छान्दस इति भूषणोक्तिस्तु चिन्त्या ॥ १३ ॥

गो० टी०–कोऽसौ मुहूर्त इत्यत्राह–विन्द इति । नष्टं धनं विन्दति लभतेऽस्मिन्निति विन्दः स रावणस्तु नाबुधत् नाबुध्यत विकरणव्यत्ययश्छान्दसः । तस्मात् बडिशं गृह्य गृहीत्वा झषवत् मत्स्य इव विनश्यति वर्तमानसामीप्ये वर्तमानवत् । 'बडिशं मत्स्यवेधनम्' इत्यमरः ॥ १३ ॥

१४] ति० टी०–अतः—न चेति ॥ १४ ॥

रा० टी०–नेति । यतस्तं रावणं रणमूर्धनि हत्वा वैदेह्या सह क्षिप्रं रंस्यसे अतः जनकस्य सुतां प्रति त्वया व्यथा न कार्या ॥ १४ ॥

गो० टी०–फलितमाह–न चेति ॥ १४ ॥

१५] ति० टी०–असंमूढस्य मृतिकालेऽप्यभ्रान्तस्य । रामं प्रत्यनुभाषतः उत्तरं भाषमाणस्य ॥ १५ ॥

रा० टी०–असंमूढस्येति । असंमूढस्य संमूढतारहितस्य सावधानचित्तस्येत्यर्थः, गृध्रस्य आस्यात् मुखात् सामिषं मांससहितं रुधिरं सुस्राव ॥ १५ ॥

गो० टी०–असंमूढस्येति । एतावत्पर्यन्तमिति शेषः । अनुभाषतः उत्तरं भाषमाणस्य सामिषं मांससहितं रुधिरम् ॥ ॥ १५ ॥

---

१ यात इति गो. पाठः । २ प्रणष्टमिति गो. पाठः । ३ ऽयमिति गो. पाठः । ४ नाऽबुधदिति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ वैदेहेति गो. रा. पाठः । ७ राक्षसं रणे इति गो. पाठः ।

पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च । इत्युक्त्वा दुर्लभान्प्राणान्मुमोच पतगेश्वरः ॥ १६ ॥
ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जलेः । त्यक्त्वा शरीरं गृध्रस्य प्राणा जग्मुर्विहायसम्॥ १७॥
स निक्षिप्य शिरो भूमौ प्रसार्य चरणौ तथा । विक्षिप्य च शरीरं स्वं पपात धरणीतले ॥ १८ ॥
तं गृध्रं प्रेक्ष्य ताम्राक्षं गतासुमचलोपमम् । रामः सुबहुभिर्दुःखैर्दीनः सौमित्रिमब्रवीत्॥ १९ ॥
बहूनि रक्षसां वासे वर्षाणि वसता सुखम् । अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा ॥ २० ॥
अनेकवार्षिको यस्तु चिरकालसमुत्थितः । सोऽयमद्य हतः शेते कालो हि दुरतिक्रमः ॥ २१ ॥
पश्य लक्ष्मण गृध्रोऽयमुपकारी हतश्च मे । सीतामभ्यवपन्नो हि रावणेन बलीयसा ॥ २२ ॥
गृध्रराज्यं परित्यज्य पितृपैतामहं महत् । मम हेतोरयं प्राणान्मुमोच पतगेश्वरः ॥ २३ ॥

१६–१९] ति० टी०–इत्युक्त्वैतावन्मात्रमुक्त्वा । तद्वीर्यतद्भवनादिकथनात्पूर्वमिति शेषः ॥ १६–१९ ॥

रा० टी०–पुत्र इति । विश्रवसः साक्षात् पुत्रः औरसः सुतः वैश्रवणस्य कुबेरस्य भ्राता इत्युक्त्वा तदैश्वर्यादिकमनुक्त्वेत्यर्थः, पतगेश्वरो दुर्लभान् प्राणान्मुमोच ॥ १६ ॥

गो० टी०–अथ रावणवंशं वक्तुमुपक्रमते–पुत्र इति । साक्षात्पुत्रः औरस इत्यर्थः । अस्योत्तरार्धम्–' अध्यास्ते नगरीं लङ्कां रावणो राक्षसेश्वरः' इति बोध्यम् । उत्तरत्र संपातिवचने इदमेव पूर्वार्धमुपादाय अस्योत्तरार्धस्य कथनादिति लोकाचार्योक्तम् । इत्युक्त्वा एतावन्मात्रमुक्त्वा भवनादिकथनात् पूर्वमित्यर्थः, दुर्लभान् ब्रूहि ब्रूहीति पृच्छते रामाय साकल्येन विज्ञापनपर्यन्तं प्राणा न स्थिताः हन्तेति ऋषिः शोचति ॥ १६ ॥

रा० टी०–ब्रूहीति । ब्रूहि ब्रूहि रावणवृत्तान्तं कथय कथय इति ब्रुवाणस्य रामस्याग्रे कृताञ्जलेर्गृध्रस्य प्राणाः शरीरं त्यक्त्वा विहायसं जग्मुः ॥ १७ ॥

गो० टी०–ब्रूहीति । ब्रुवाणस्य ब्रुवाणे सति प्राणः सूक्ष्मशरीरेन्द्रियप्राणसहित आत्मेत्यर्थः ॥ १७ ॥

रा० टी०–स इति । स जटायुः शिरो भूमौ निक्षिप्य चरणौ प्रसार्य स्वं शरीरं विक्षिप्य इतस्ततः संचाल्य धरणीतले पपात ॥ १८ ॥

गो० टी०–स इति । निक्षिप्य मरणवेदनयेति भावः । विक्षिप्य विधूय पपातेत्युक्तिरौपचारिकी ॥ १८ ॥

रा० टी०–तमिति । ताम्राक्षं रक्तनयनं गतासुं निर्गतप्राणम् अचलोपमं तं जटायुं सुबहुभिः अनेकविधैर्दुःखैः शुश्रूषोपकसीताविरोगजनितदुःखाभासैः दीनः क्षीणस्वेन प्रतीयमानः रामः सौमित्रिमब्रवीत् ॥ १९ ॥

गो० टी०–तमिति । ताम्राक्षम् अधःशिरस्कतया पतनजश्रोभात् ॥ १९ ॥

२०] ति० टी०–अस्मिन्दण्डकारण्ये बहूनि वर्षाणि सुखं वसताऽनेन पक्षिणैवैव दण्डकारण्ये विशीर्णं देहविशरणं प्राप्तम् ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–बहूनीति । रक्षसां वासे निवासस्थाने दण्डकारण्ये बहूनि वर्षाणि सुखं वसता अनेन पक्षिणा इह विशीर्णं प्राणा त्यक्ता इत्यर्थः । ' विचीर्णं' इति तीर्थपाठः ॥ २० ॥

गो० टी०–बहूनीति । रक्षसां वासे दण्डकारण्ये बहूनि वर्षाणि निर्भयतया सुखं वसताऽनेन पक्षिणा विशीर्णं देहविशरणं प्राप्तम् इहैव सुखं वसित्वा इहैव मृतमनेनेति भावः । 'विचीर्णम्' इति पाठे अत्रैव वसता अनेन अत्रैव सुखं विचीर्णम् अनुभूतमित्यर्थः ॥ २० ॥

२१] ति० टी०–अनेकवार्षिक इत्यस्यैव विवरणम्–चिरकालसमुत्थित इति ॥ २१ ॥

रा० टी०–अनेकेति । अनेकवार्षिकः बहुवर्षपरिच्छिन्नावस्थाकः यश्चिरकालसमुत्थितः बहुकालं प्रवृद्धः सोऽयमद्य हतः सन् शेते हि यतः कालो दुरतिक्रमः अनिवारणीयः ॥ २१ ॥

गो० टी०–एतदेव विवृणोति–अनेकेति । अनेकवार्षिकः बहुवयःप्राप्तः चिरकालसमुत्थितः चिरकालमभ्युदयं प्राप्तः॥२१॥

२२–२३] ति० टी०–मे उपकारीत्यन्वयः । सीतामभ्यवपन्नः सीतां मोचयितुं प्रवृत्तः ॥ २२ ॥ २३ ॥

रा० टी०–पश्येति । मे उपकारी अयं गृध्रः सीतामभ्यवपन्नः अपहरणनिवारणाय सीतासंमुखं प्राप्तः अत एव बलीयसा रावणेन हतः ॥ २२ ॥

गो० टी०–पश्येति । अनेन मोक्षप्रदानोचितं तदीयसुकृतविशेषं दर्शयति । सीतामभ्यवपन्नो मे उपकारी सन् हतः॥२२॥

रा० टी०–गृध्रेति । पितृपैतामहं पित्रादिपरंपराप्राप्तं गृध्रराज्यं परित्यज्य अयं पतगेश्वरः पक्ष्यधीशः मम हेतोः प्राणान्मुमोच ॥ २३ ॥

गो० टी०–गृध्रराज्यमिति । गृध्रराज्यं परित्यज्येति प्राप्याभ्यासपरित्याग उक्तः, महदिति स्वकीयेक्ष्वाकुराज्यव्यावृत्तिः, एकमुखत्वात् ममेत्यादिना उपायानुष्ठानोक्तिः । पतगेश्वरः पितुर्मरणात् हृतःपरमस्य पक्षानाश्रित्य सुखं स्थास्यामीति स्थितोऽहम् अयं तातवन्मत्कृते प्राणत्यागं कृतवानिति भावः ॥ २३ ॥

१ तदेति गो० पाठः ।

सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः । शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि ॥ २४ ॥
सीताहरणजं दुःखं न मे सौम्य तथागतम् । यथा विनाशो गृध्रस्य मत्कृते च परंतप ॥ २५ ॥
राजा दशरथः श्रीमान्यथा मम महायशाः । पूजनीयश्च मान्यश्च तथायं पतगेश्वरः ॥ २६ ॥
सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम् । गृध्रराजं दिधक्ष्यामि मत्कृते निधनं गतम् ॥ २७ ॥
नाथं पतगलोकस्य [1]चितिमारोपयाम्ययम् । इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा ॥ २८ ॥
या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः । अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥ २९ ॥
मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान् । गृध्रराज महासत्त्व संस्कृतश्च मया व्रज ॥ ३० ॥
एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम् । ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः ॥ ३१ ॥

२४] ति० टी०–सर्वत्र सर्वजातिषु ॥ २४ ॥

रा० टी०–सर्वत्रेति । सर्वत्र ! हे सर्वसज्जनरक्षणकर्तः सौमित्रे ! तिर्यग्योनिगतेष्वपि धर्माचरणादिमन्तो दृश्यन्ते॥२४॥

गो० टी०–सर्वत्रेति सर्वजातिष्वपीत्यर्थः । तिर्यग्योनिगतस्यास्य कथमेतादृशी बुद्धिरिति न मन्तव्यमिति भावः॥२४॥

२५–२६] ति० टी०–तथा आगतमिति च्छेदः, प्राप्तमित्यर्थः । मन्निमित्तं यो गृध्रविनाशस्तज्जं दुःखं यथा मां प्राप्तम् । सीताहरणजदुःखाद्गृध्रविनाशजं दुःखमधिकमिति भावः । तस्याः पुनः प्राप्तिसंभावनासत्त्वादस्य तदभावाच्चेति तात्पर्यम् ॥ २५ ॥ २६ ॥

रा० टी०–सीतेति । मत्कृते मदर्थं यथा गृध्रस्य विनाशो विनाशजनितदुःखं मे आगतं प्राप्तं तथा सीताहरणजं दुःखं नागतम् । विनाशशब्दो भाक्तः ॥ २५ ॥

गो० टी०–सीतेति । मत्कृते च मत्कृत एव यथाऽस्य विनाशः प्राप्तः तथा सीताहरणजं दुःखं नागतं न प्राप्तम् । अत्र विनाशशब्देन तज्जं दुःखमुच्यते ॥ २५ ॥

रा० टी०–तत्र हेतुमाह–राजेति । यथा राजा दशरथः पूजनीयो मान्यश्च तथाऽयं पतगेश्वरश्च तन्मित्रत्वादिति तात्पर्यम् ॥ २६ ॥

गो० टी०–अथ संस्कारयोग्यतामाह–राजेति । पूज्यः पैतृकविधिना अर्चनीयः, मान्यः श्लाघ्यः ॥ २६ ॥

२७–२८] ति० टी०–दिधक्षामि दग्धुमिच्छामि सद्गतिसिद्धये ध्यनार्षः ॥ २७ ॥ २८ ॥

रा० टी०–सौमित्रे इति । हे सौमित्रे ! गृध्रराजं दिधक्षामि दग्धुमिच्छामि अतः काष्ठानि एतच्छरीरभस्मीकरणयोग्यद्रव्याणि हर प्रापय । अहं पावकं निर्मथिष्यामि मथनेन निष्पादयिष्यामि ॥ २७ ॥

गो० टी०–सौमित्र इति । दिधक्षामि दग्धुमिच्छामि । दहेः सन्नन्तात् घत्वभषभावौ ॥ २७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–नाथमिति । पतगलोकस्य पक्षिजनस्य नाथं यतोऽहं धक्ष्यामि अतः चितिं चितामारोपयामि आरोपयिष्यामि प्रापयिष्यामि एतेन रामस्य कृपालुत्वं कृतज्ञत्वं च व्यक्तम् ॥ २८ ॥

गो० टी०–नाथमिति । चितां काष्ठभारम् ॥ २८ ॥

२९–३१] ति० टी०–अपरावर्तिनाम् सङ्गामे इति शेषः । गम्यत इति गतिर्लोकः । यज्ञशीलानां लोकान्क्रमेण प्राप्य मदनुज्ञातः सन्ननुत्तमान्येभ्यः परे उत्तमा न सन्ति तांल्लोकान्ब्रह्मणो लोकान्क्रममुक्तिदान्गच्छ । अनेन संकल्पमात्रात्कर्मानधिकृतातिरश्चः साधनहीनस्यापि तल्लोकदानेन भगवान्रामस्वस्वरूपांशे मायया ऽऽवृतज्ञान इति प्रलपतां मुखं ध्वस्तम् । शोकादि तु नटनमित्युक्तमेवासकृत् । तदुक्तम्–'संस्कारमकरोत्तस्य रामो ब्रह्मविधानतः । स्वपदं च ददौ तस्मै सोऽपि रामः प्रसादतः ॥ हरेः सामान्यरूपेण प्रययौ परमं पदम् ॥' इति जटायुषं प्रक्रम्य पाद्मे । एतेन तिरश्चामपि स्नेहादिना दाहादियुक्तमिति ध्वनितम् । सारूप्यमुक्तिलाभश्लोकः । मया मद्रूपेण सामान्यहरिरूपेण ॥ २९–३१ ॥

रा० टी०–व्यञ्जितस्वरूपं दर्शयन्नाह–योति । हे गृध्रराज ! मया समनुज्ञातः संस्कृतश्च त्वं यज्ञशीलादीनां या गतिस्तां गतिं प्राप्येति शेषः, अनुत्तमान् सर्वोत्तमान् लोकान् गच्छ । संस्कृतो गच्छेत्युक्त्या रामस्य मर्यादापालकत्वं व्यञ्जितम् । श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो०टी०–या गतिरित्यादिश्लोकद्वयमेकान्वयम् । गम्यत इति गतिः लोकः यज्ञशीलानां यज्ञाः शीलं सद्वृत्तं येषां ते तथा सदा यज्ञानुष्ठानपराणाम् गृहस्थानामित्यर्थः । आहिताः परितः स्थापिताः अग्नयः पञ्चाग्नयो यस्य स तथा सर्वदा तपःशीलस्य वानप्रस्थस्येत्यर्थः । अग्न्याधानस्य पूर्वेणैव सिद्धत्वात् पृथक् फलाभावाच्च अपरावर्तिनाम् अरण्यमियात्ततो न पुनरेयादित्युक्तानां संन्यासिनामित्यर्थः । रणादपलायितानामित्यर्थवर्णने जटायोस्तादृशत्वेन तत्फलस्य स्वतःसिद्धत्वेनानुज्ञातव्यत्वाभावात् श्रुक्तानां धर्मप्रकरणे उक्तत्वसंभवात् भूमिप्रदायिनां भूमिभोगत्यागिनां नैष्ठिकानामित्यर्थः । ता गतीरिति यत्तदोर्नित्यसंबन्धात्सिद्धम् । ता गतीः 'प्राजापत्यं गृहस्थानां ब्राह्मं संन्यासिनां स्मृतम्' इत्यायुक्तस्थानानि, यद्वा

---

१ दिधक्षामीति गो. रा. पाठः । २ चितामारोप्य राघवेति गो. पाठः ।

रामोऽपि[1] सहसौमित्रिर्वनं यात्वा स वीर्यवान् । स्थूलान्हत्वा महारोहीननु तस्तार तं द्विजम् ॥ ३२ ॥
रोहिमांसानि चोद्धृत्य[2] पेशीकृत्वा महायशाः । शकुनाय ददौ रामो रम्ये हरितशाद्वले ॥ ३३ ॥
यत्तत्प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः । तत्स्वर्गगमनं क्षिप्रं[4] तस्य रामो जजाप ह ॥ ३४ ॥
ततो गोदावरीं गत्वा नदीं नरवरात्मजौ । उदकं चक्रतुस्तस्मै गृध्रराजाय तावुभौ ॥ ३५ ॥

यज्ञदानतपःसंन्यासिनामित्यर्थः । तेषां या या गतिः शास्त्रविहिता तां मया संस्कृतो व्रज मया समनुज्ञातस्तु अनुत्तमान् सर्वश्रेष्ठान् लोकान् । अथ "यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु" इत्यादिश्रुतिप्रसिद्धान् विष्णुलोकान् गच्छ अवयवबहुत्वाद्बहुवचनम् अन्यथा गतिशब्देन पौनरुक्त्यम् अनन्वयश्च समनुज्ञातः संस्कृतश्चेति पदद्वयानर्थक्यं च । नन्वेवमात्मनोऽपि भावं भावयतः श्रीरामस्य कथं मुक्तिप्रदानं तस्य परत्वासाधारणचिह्नत्वादिति चेत् सत्येन लोकान् जयतीत्युक्तरीत्या स्वार्जितधर्मविशेषेण स्वाधीनसर्वलोकत्वाविरोधात् । केचित्तु मया संस्कृतस्ततोऽनुज्ञातस्त्वं यज्ञशीलादीनां या गतयः तान् लोकान् गच्छ सर्वान्ते मां व्रज 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' इत्युक्तरीत्या मुक्तभोगं प्राप्नुहि । न च निर्हेतुकमुक्तिप्रदानेऽतिप्रसङ्गः स्वकार्यमुद्दिश्य प्राणत्यागस्यैव हेतुत्वात् । अत एव नृसिंहपुराणे–'मत्कृते निधनं यस्मात्त्वया प्राप्तं द्विजोत्तम । तस्मान्मम प्रसादेन विष्णुलोकमवाप्स्यसि' इत्युक्तम् । 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति हि कर्मणोऽपि मुक्तिहेतुत्वमुक्तम् । "नान्यः पन्थाः" इति श्रुतिः परमात्मनोऽन्यत्र साक्षान्मुक्तिहेतुत्वं निषेधति तस्यैव प्राधान्येन प्रकृतत्वादित्याहुः । यद्वा हे गृध्रराज महासत्त्व ! मया संस्कृतस्त्वं मयानुज्ञातो भूत्वा अनुत्तमान् लोकान् मल्लोकानित्यर्थः, गच्छ आहुपङ्क्तिकतया यज्ञशीलादीनां या या गतयस्ता अपि गच्छ गम्यत इति गतिः लोकः आहिताग्नेः गार्हपत्याहवनीयदक्षिणाग्निरितस्य या गतिः "अग्नयो वै त्रयी विद्या" इत्यारभ्य "तस्मादग्नीन् परमं वदन्ति" इत्याहिताग्नित्वस्यापि पृथक् धर्मत्वश्रवणात् । अपरावर्तिनां युद्धादपरावर्तमानानां या गतिः दृष्टान्तार्थमिदमुक्तम् जटायोस्तादृशत्वेन तत्फलस्येदानीमदेयत्वात् तिरश्चां यज्ञाद्यधिकाराभावेन तत्फलमात्रस्य देयत्वात् । यथापरावर्तिनां गतिं प्राप्स्यसि तथा यज्ञशीलादीनां लोकानपि ब्रह्मप्राप्तौ यद्यत्त्वादिकामिव प्राप्नुहीत्यर्थः । अस्मिन् कल्पे भूमिप्रदायिनामित्यस्य प्रतीयमानार्थकत्वमेव व्रज एवं गच्छ । यद्वा मया प्रथमं संस्कृतः "अथ तृतीयेन ज्योतिषा संविशस्व" इत्यादिमन्त्रेणानुज्ञातो मया त्वं यज्ञाधिकारिणां लोकान् गच्छ ब्रह्ममेधसंस्कारबलेन प्राप्नुहीत्यर्थः । इदं च फलं संस्कारोत्तरक्षण एवानुतिष्ठतीत्युच्यते–संस्कृतो व्रजेति । 'गृध्रराज महासत्त्व संस्कृतश्च महाव्रत' इति पाठे संस्कृतश्च भवेति वार्थः ॥ २९ ॥ ३० ॥

रा० टी०–एवमिति । स्वबन्धुं स्वविषयकात्यन्तरागवन्तं पतगेश्वरं चितामारोप्य दुःखित एव रामो ददाह ॥ ३१ ॥

गो० टी०–एवमिति । दीप्तां दीपनार्हां स्वबन्धुमिवेत्यनेन मन्त्रपूर्वकत्वं दाहस्योच्यते ॥ ३१ ॥

३२] ति० टी०–स प्रसिद्धमहिमा रामः महारोहीन्महामृगान् । रोहिशब्द इकारान्तोऽपि मृगवाची । तान्हत्वा पिण्डदानार्थं मांसमादायागत्यानु अनन्तरं तं द्विजं पक्षिणमुद्दिश्य पिण्डदानार्थं शाद्वलं तृणं तस्तार ॥ ३२ ॥

रा० टी०–राम इति । रामो वनं यात्वा गत्वा स्थूलान्महारोहीन् मूलविशेषान् हत्वा छेदनेनानीय द्विजं पक्षिणं तं जटायुमुद्दिश्य अनुतस्तार पिण्डदानार्थं कुशैर्भूमिमाच्छादयामास ॥ ३२ ॥

गो० टी०–राम इति । महारोहीन् महामृगान् तान् द्विजमनु जटायुषमुद्दिश्य हत्वा तस्तार पिण्डदानार्थं दर्भानास्तृतवान् ॥ ३२ ॥

३३] ति० टी०–तत्र तन्मांसान्युत्कृत्य पेशीकृत्वा पेशीकृत्य पिण्डं कृत्वा शकुनाय ददौ ॥ ३३ ॥

रा० टी०–रोहीति । रोहिमांसानि स्थूलमूलसंबन्धिभोग्यांशान् उद्धृत्य निस्सार्य पेशीकृत्वा पिण्डाकारतां संपाद्य रम्ये हरितशाद्वले आस्तृतकोमलकुशमयभूमौ शकुनाय पक्षिणे ददौ ॥ ३३ ॥

गो० टी०–रोहीति । उत्कृत्य उद्धृत्य पेशीकृत्य पिण्डीकृत्य हरितशाद्वले नवीनतृणास्तृतप्रदेशे शकुनाय पक्षिणे ददौ ॥ ३३ ॥

३४–३५] ति० टी०–यत्तन्मन्त्रजातं प्रेतस्य मर्त्यस्य स्वर्गादिगमनमुद्दिश्य ब्राह्मणाः कथयन्ति तत्स्वर्गगमनं तद्गमनसाधनं तत्तस्य क्षिप्रं स्वर्गगमनाय रामो जजाप ॥ ३४ ॥ ३५ ॥

रा० टी०–यदिति । प्रेतस्य इमं लोकं त्यक्त्वा गतस्य मर्त्यस्य जन्तोः यत् स्वर्गगमनं साकेतप्रापकं मन्त्रस्वरूपं द्विजातयः कथयन्ति पठन्ति तत् तस्य जटायुषोऽर्थं तद्विस्तृतं यथा भवति तथा रामो जजाप । एतेन दशरथसमीपं प्रेषयामासेति सूचितम् ॥ ३४ ॥

गो० टी०–यत्तदिति । प्रेतस्य मर्त्यस्य मनुष्यस्य यत्तत् प्रसिद्धं मन्त्रजातं स्वर्गगमनं स्वर्गो गम्यतेऽनेनेति स्वर्गगमनं स्वर्गप्रापकं वदन्ति । पित्र्यं पितृदेवताकं तज्जजाप याम्यसूक्तादिकं जजापेत्यर्थः ॥ ३४ ॥

रा० टी०–तत इति । ततः दाहानन्तरं गोदावरीं गत्वा

१ ऽथेति गो. पाठः । २ गत्वेति गो. पाठः । ३ चोत्कृत्येति गो. पाठः । ४ तस्य पित्र्यमिति गो. पाठः ।

शास्त्रदृष्टेन विधिना जलं गृध्राय राघवौ । स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा ॥ ३६ ॥
स गृध्रराजः कृतवान्यशस्करं सुदुष्करं कर्म रणे निपातितः ।
महर्षिकल्पेन च संस्कृतस्तदा जगाम पुण्यां गतिमात्मनः शुभाम् ॥ ३७ ॥
कृतोदकौ तावपि पक्षिसत्तमे स्थिरां च बुद्धिं प्रणिधाय जग्मतुः ।
प्रवेश्य सीताधिगमे ततो मनो वनं सुरेन्द्राविव विष्णुवासवौ ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

गृध्रराजाय उदकं सलिलक्रियां चक्रतुः । तत इत्यनेन दाहानुत्तरकाललाभस्तु पाठक्रमादर्थक्रमो बलीयानिति न्यायेन ॥ ३६ ॥

गो० टी०–तत इति । चक्रतुरिति लक्ष्मणस्य कर्तृत्वं सहकारितया । उदकम् उदकदानमित्यर्थः ॥ ३६ ॥

३६] ति० टी०–उक्तस्य सर्वस्यास्य स्नानपूर्वकत्वं दर्शयितुं पुनराह–शास्त्रेति । तत्र पाठक्रमादर्थक्रमस्य बलवत्त्वात्पूर्वं स्नानम्, ततः उदकदानम्, ततः पिण्डदानमिति क्रमो बोध्यः ॥ ३६ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–शास्त्रेति । राघवौ गृध्राय गृध्रोद्देश्यककर्मनिष्पत्त्यर्थं जलं जलाशयं प्राप्येति शेषः, स्नात्वा च शास्त्रदृष्टेन विधिना गृध्रराजाय गृध्रराजार्थम् उदकं उदककियां चक्रतुः ॥ ३६ ॥

गो० टी०–उक्तस्यैवार्थस्य स्नानपूर्वकत्वविधिपूर्वकत्वप्रदर्शनाय पुनरप्याह–शास्त्रेति । तदा तौ राघवौ शास्त्रदृष्टेन विधिना गृध्राय गृध्रमुद्दिश्य जले[1] स्नात्वा गृध्रराजायोदकं चक्रतुरित्यन्वयः । अयमत्र क्रमः–गृध्रराजं दग्ध्वा स्वर्गगमनसूक्तं जप्त्वा गोदावरीं गत्वा स्नात्वा उदकं दत्त्वा रोहिमांसपिण्डं ददाविति । ननु वैदिकोक्तमो रामः कथं हीनजातिं तिर्यञ्चं वैदिकेन कर्मणा संस्कृतवान् मैवं तस्यात्यन्तभक्तत्वेन जातेरपगमात् ' न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः । सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने ' इत्युक्तेः । न चेदं वचनम् अपशवो वा अन्ये गोअश्वेभ्य इतिवत् प्रशंसापरमिति वक्तुं शक्यम् बाधकाभावात् । ब्राह्मणत्वादिजातिर्हि शास्त्रैकसमधिगम्या न तु गोत्वादिवदाकृतिगम्या येन तत्तुल्यत्वमाश्रद्धेयेत अत एव विश्वामित्रस्यापि क्षत्रियत्वजातिरपनीता उपनीता च ब्राह्मणत्वजातिरित्युपपादितं बालकाण्डे, अयमर्थ उपपादियिष्यते च श्रमणीवृत्तान्ते । इदं च द्रौपदीविवाहादिवदैतिह्यासिकविलक्षणव्यक्तिविशेषनियतमिति च नातिप्रसङ्गावकाशः ॥३६॥

३७] ति० टी०–पुण्यां पुण्यैकलभ्याम् अत एव सुखां सुखैकरूपभावाम् ॥ ३७ ॥

रा० टी०–स इति । यः गृध्रराजः सुदुष्करम् अन्यैः कर्तुमशक्यम् यशस्करं यशस्संपादकं कर्म सीतारक्षणोद्देश्यकक्रियां कृतवान् रणे निपातितश्च स गृध्रराजः महर्षिकल्पेन महर्षित्वादिसंपादकेन रामेण संस्कृतः सन् पुण्यां पापसंसर्गशून्यां शुभाम् आत्मनो गतिं स्वप्राप्यसाकेतं जगाम ॥ ३७ ॥

गो० टी०–उक्तमर्थमादरातिशयेन पुनः संगृह्णाति–स इति । रणे सीतानिमित्तं दुष्करं कर्म प्राणविनाशपर्यन्तं व्यापारं कृतवान् स गृध्रराजः रावणेन निपातितः महर्षिकल्पेन महर्षितुल्येन रामेण संस्कृतश्च तदा तदुत्तरक्षण एव पुण्यां पुण्यफलभूताम् आत्मनः सुखावहां गतिं लोकं जगाम ॥ ३७ ॥

३८] ति० टी०–पक्षिसत्तमे तद्विषये पितरीवेत्यर्थः । स्थिरां बुद्धिं तस्मिन्पितृवद्बुद्धिं निधाय सीताधिगमे सीताप्राप्तिसूचके निमित्ते मनः प्रवेश्य तादृशं निमित्तं दृष्ट्वा वनं जग्मतुः ॥ ३८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्येऽरण्यकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

रा० टी०–कृतेति । कृतोदकौ कृता निष्पादिता उदका उदककियाविशिष्टा प्रमीतक्रिया याभ्यां तौ सुरेन्द्रौ अश्वविष्ण्वादिसकलदेवस्वामिनौ रामलक्ष्मणौ पक्षिसत्तमे स्थिरां परमपुरुषार्थप्राप्तत्वेन चाञ्चल्यरहितां बुद्धिं प्रणिधाय संस्थाप्य सीताधिगमे सीताप्राप्तौ मनः प्रवेश्य ततस्तस्मात्स्थानाद् विष्णुवासवाविव जग्मतुः ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

गो० टी०–कृतोदकाविति । इदं पिण्डदानस्याप्युपलक्षणम् । पक्षिसत्तमे स्थिरां बुद्धिं प्रणिधाय सीतामवश्यं प्राप्स्यसीत्युक्तम् तद्वचनं विश्वस्येत्यर्थः, सीताधिगमे मनः प्रवेश्य वनं जग्मतुः । सुरेन्द्रौ विष्णुवासवाविव स्थिताधिस्थयेन सीतान्वेषणं भावनामात्रमिति सूच्यते ॥ ३८ ॥

अस्मिन् सर्गे सार्धाष्टत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने
आरण्यकाण्डव्याख्यानेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

---

[1] जले इति गो. पाठः ।

एकोनसप्ततितमः सर्गः ।

जटायुषं निवापजलं दत्त्वा नैर्ऋत्यां प्रस्थितौ दाशरथी मध्येवनं कांचिन्निशाचरीमपश्यताम् । साऽप्ययोमुखीति स्वनाम संश्राव्य यावत् लक्ष्मण कामयमानोपगूहितुमियेष तावत्स तस्याः कर्णनासं चिच्छेद । दुःशकुनादेतस्मादनिष्टं संभाव्यावहितं चरन्तौ तौ कबन्धनामक किंचिदक्ष आयतभुजाभ्यां जग्राह । तेन भयविक्लवं लक्ष्मण रामः समाश्वासयति । कौ युवां किमिति वनमभ्यागताविति प्रश्नपूर्वं तावत्तमुद्यते तस्मिन्महतामपि शोककारणात्कालबलीयस्त्व विभाव्य रामस्तमनुशोचति ।

कृत्वैवमुदकं तस्मै प्रस्थितौ राघवौ तदा । अन्वेक्षन्तौ वने सीतां जग्मतुः पश्चिमां दिशम् ॥ १ ॥
तां दिशं दक्षिणां गत्वा शरचापासिधारिणौ । अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिपेदतुः ॥ २ ॥
गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितम् । आवृतं सर्वतो दुर्गं गहनं घोरदर्शनम् ॥ ३ ॥
व्यतिक्रम्य तु वेगेन गृहीत्वा दक्षिणां दिशम् । सुभीमं तन्महारण्यं व्यतियातौ महाबलौ ॥ ४ ॥
ततः परं जनस्थानात्त्रिक्रोशं गम्य राघवौ । क्रौञ्चारण्यं विविशतुर्गहनं तौ महौजसौ ॥ ५ ॥
नानामेघघनप्रख्यं प्रहृष्टमिव सर्वतः । नानावर्णैः शुभैः पुष्पैर्मृगपक्षिगणैर्युतम् ॥ ६ ॥
दिदृक्षमाणौ वैदेहीं तद्वनं तौ विचिन्वतुः । तत्र तत्रावतिष्ठन्तौ सीताहरणदुःखितौ ॥ ७ ॥

१] ति० टी०—पश्चिमामित्यनेकोत्तरश्लोके दक्षिणामित्युक्तेर्नैर्ऋतीं जग्मतुरिति लभ्यते ॥ १ ॥

रा० टी०—सीतान्वेषणं वर्णयन्नाह—कृत्वेत्यादिभिः । तस्मै जटायुषे उदकं कृत्वा सीतामन्वेक्षन्तौ अन्वेषन्तौ अत एव प्रस्थितौ गमनाय कृतप्रयत्नौ शरचापासिधारिणौ राघवौ पश्चिमां दक्षिणां पश्चिमदक्षिणदिगन्तरालं दिशं जग्मतुः तां दिशं गत्वा अविप्रहतं जनैरक्षुण्णं पन्थानं प्रतिपेदतुः प्रापतुः पश्चिमदक्षिणशब्दौ भ्रान्तौ । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—अथायोमुखीविरूपकरणपूर्वकं कबन्धदर्शनमेकोनसप्ततितमे—कृत्वैवमित्यादि । अपेक्षन्तौ अपेक्षमाणौ पश्चिमां दक्षिणपश्चिमामित्यर्थः ॥ १ ॥

२] ति० टी०—अविप्रहतं जनाक्षुण्णम् ॥ २ ॥

गो० टी०—ताविति । दक्षिणां दिशमिति दक्षिणपश्चिमा उभयथा व्यवहर्तुं शक्या । अविप्रहतम् अक्षुण्णम् ऐक्ष्वाकौ "दाण्डिनायन—" इत्यादिसूत्रे निपातितः। प्रतिपेदतुः प्रतिपेदाते२

३] ति० टी०—गुल्मादिभिः प्रवेष्टितम्, अत एव सर्वत आवृतम्, अत एव दुर्गं दुष्प्रवेशं गहनं वनरूपं पन्थानं प्रतिपेदतुरित्यन्वयः ॥ ३ ॥

४] ति० टी०—वेगेनातिक्रम्य चलित्वा तन्महारण्यं व्यतियातौ व्यतिक्रम्य गतौ ॥ ४ ॥

रा० टी०—गुल्मैरिति । गुल्मैः वेणुप्रभृतिभिः बहुभिर्वृक्षैर्वृक्षान्तरैश्च प्रवेष्टितं लताभिश्च सर्वत आवृतं गहनं निबिडम् अत एव दुर्गं दुर्गमम् अत एव घोरदर्शनं क्रूरत्वेन प्रतीयमानम् अत एव सुभीमम् अतिभयंकरं यत् महारण्यं महाबलौ रामलक्ष्मणौ दक्षिणां दिशं गृहीत्वा व्यतीयातौ प्राप्तौ तत् वेगेन व्यतिक्रम्य उल्लङ्घ्य ततस्तस्माज्जनस्थानात्त्रिक्रोशं गम्य गत्वा क्रौञ्चारण्यं तदभिधं गहनं वनं विविशतुः । श्लोकत्रयमेकान्वयि ॥ ३–५ ॥

गो० टी०—गुल्मैरित्यादिश्लोकद्वयमेकान्वयम् । गुल्मैः कीचकप्रभृतिभिः वृक्षैश्च प्रवेष्टितं लताभिश्चावृतं दुर्गमं विषमं गहनं दुष्प्रवेशं घोरदर्शनम् अत एव सुभीमं तत् महारण्यं दण्डकारण्यं व्यतिक्रम्य अतीत्य व्यतियातौ गतौ ॥ ३ ॥ ४ ॥

५] ति० टी०—गम्य गत्वा गहनं दुष्प्रवेशम् । क्रौञ्चारण्यं क्रौञ्चारण्याख्यं गहनं वनमिति वा ॥ ५ ॥

गो० टी०—ततः परमिति । ततः परं गमनानन्तरं जनस्थानात् त्रिक्रोशं गम्य गत्वा क्रौञ्चारण्याख्यं गहनं वनं विविशतुः ' गहनं काननं वनम् ' इत्यमरः ॥ ५ ॥

६–७] ति० टी०—अनेकमेघानां घनः समूहस्तत्प्रख्यं तद्वच्छ्यामम् । सर्वतः प्रहृष्टमिव पुष्पविकासादिना तद्वृतजन्तुहर्षेण वा तस्य प्रहृष्टत्वव्यपदेशः ॥ ६ ॥ ७ ॥

रा० टी०—नानेति । नानामेघघनप्रख्यं नानामेघानां घनः समूहस्तद्वत्प्रख्या वर्णो यस्य तत् नानावर्णैरनेकविधवर्णविशिष्टैः पुष्पैः सर्वतः प्रहृष्टमिव पक्षिगणैर्युतं तद्वनं दिदृक्षमाणौ अत एव तत्र तत्रातिरमणीयप्रतिस्थले तिष्ठन्तौ सीताहरणदुःखितौ तौ रामलक्ष्मणौ वैदेहीं विचिन्वतुः । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०—नानेत्यादिश्लोकद्वयमेकान्वयम् । नानामेघघनप्रख्यं नानावर्णमेघसमूहसदृशं प्रहृष्टमिव पुष्पोद्गमादिभिः संतुष्टमिव व्यालमृगैः सर्पैः मृगैश्च तद्वनं क्रौञ्चारण्यं तत्र तत्र वृक्षमूले विश्रान्त्यै तिष्ठन्तौ सन्तौ विचिक्यतुः मृगयामासतुः ॥ ६ ॥ ७ ॥

---

१ रामलक्ष्मणाविति गो. पाठः । २ अपेक्षन्ताविति गो. पाठः । ३ ताविति गो. पश्चिमामिति रा. पाठः । ४ व्यतीयाताविति रा. पाठः । ५ व्यालसिंहनिषेवितमिति गो. पाठः । ६ पक्षिगणैर्युतं नानाव्यालमृगैर्युतामिति गो. पाठः । ७ विचिक्यतुरिति गो. पाठः । ८ कर्शिताविति गो. पाठः ।

ततः पूर्वेण तौ गत्वा त्रिक्रोशं भ्रातरौ तदा । क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रममन्तरे ॥ ८ ॥
दृष्ट्वा तु तद्वनं घोरं बहुभीममृगद्विजम् । नानाव्यालसमाकीर्णं सर्वं गहनपादपम् ॥ ९ ॥
ददृशाते गिरौ तत्र दरीं दशरथात्मजौ । पातालसमगम्भीरां तमसा नित्यसंवृताम् ॥ १० ॥
आसाद्य च नरव्याघ्रौ दर्यास्तस्याविदूरतः । ददर्शतुर्महारूपां राक्षसीं विकृताननाम् ॥ ११ ॥
भयदामल्पसत्त्वानां बीभत्सां रौद्रदर्शनाम् । लम्बोदरीं तीक्ष्णदंष्ट्रां करालीं परुषत्वचम् ॥ १२ ॥
भक्षयन्तीं मृगान्भीमान्विकटां मुक्तमूर्धजाम् । ऐक्षेतां तु तौ तत्र भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
सा समासाद्य तौ वीरौ व्रजन्तं भ्रातुरग्रतः । एहि रंस्यावहेत्युक्त्वा समालम्भत लक्ष्मणम् ॥ १४ ॥
उवाच चैनं वचनं सौमित्रिमुपगुह्य च । अहं त्वयोमुखी नाम लाभस्ते त्वमसि प्रियः ॥ १५ ॥
नाथ पर्वतदुर्गेषु नदीनां पुलिनेषु च । आयुश्चिरमिदं वीर त्वं मया सह रंस्यसे ॥ १६ ॥

८-१०] ति० टी०-कौञ्चारण्यमतिक्रम्य तद्वनात्पूर्वेण त्रिक्रोशं गत्वान्तरे मध्येमार्गं मतङ्गाश्रमं ददृशतुः । अथ घोरत्वादिविशेषणं तद्वनं मतङ्गाश्रमवनं दृष्ट्वा तत उच्यमानविशेषणां तत्र गिरौ दरीं ददृशाते ॥ ८-१० ॥

रा० टी०-तत इति । ततोऽनन्तरं त्रिक्रोशं पूर्वेण गत्वा क्रौञ्चारण्यमतिक्रम्यान्तरे मार्गमध्ये मतङ्गाश्रमं दृष्ट्वा बहुभीममृगद्विजम् अनेकविधभयंकरमृगपक्षिविशिष्टं नानासत्त्वसमाकीर्णं नानासत्त्वानामनेकविधमृगादीनां समाकीर्णं भक्षणाय राक्षसादिकर्तृकापक्षेपो यस्मिन् तत् गहनपादपं गहनाः निबिडाः पादपाः यस्मिन् तत् किंच पादपैर्गहनं राजदन्तादित्वात्पादपस्य परत्वं तत् मतङ्गाश्रमसमीपस्थं सर्वं वनं दशरथात्मजौ ददृशाते । तत्र तस्मिन्वने गिरौ पर्वते पातालसमगम्भीरां पातालतुल्यगाम्भीर्यविशिष्टामत एव तमसा अन्धकारेण नित्यसंवृतां दरीं कन्दरामासाद्य प्राप्य तस्याः दर्या अविदूरतः समीपे महारूपां बृहद्रूपविशिष्टां विकृताननां विकारविशिष्टाननविशिष्टां राक्षसीं ददर्शतुः ददृशतुः । श्लोकचतुष्टयमेकान्वयि ॥ ८—११ ॥

गो० टी०-तत इत्यादिश्लोकत्रयमेकान्वयम् । ततः क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रमं पूर्वेण मतङ्गाश्रमपूर्वदिग्भागे "एनपा द्वितीया" इति द्वितीया। त्रिक्रोशं गत्वा अन्तरे मतङ्गाश्रमक्रौञ्चारण्ययोर्मध्ये तद्वनं मतङ्गाश्रमसंबन्धि किंचिद्वनं दृष्ट्वा तत्र दरीं ददृशाते ददृशतुः अत्रोपरिष्टाच्च कर्तरि लिट्यात्मनेपदमार्षम् ॥ ८-१० ॥

११] ति० टी०-तस्याविदूर इति संधिरार्षः तद्दरीसमीपे इत्यर्थः ॥ ११ ॥

गो० टी०-आसाद्येत्यादि । तस्याविदूरत इत्यार्षः संधिः। महारूपां महाशरीराम् ॥ ११ ॥

१२] ति० टी०-बीभत्सां जुगुप्सितां । परुषत्वचं कर्कशत्वचम् । करालीं तुङ्गशरीराम् 'करालो भीषणे तुङ्गे' ॥१२॥

१३] ति० टी०-विकटामतिस्थूलाकारां तत्र तत्रास्थानेऽपि निम्नोन्नतां वा ॥ १३ ॥

रा० टी०-तामेव वर्णयन्नाह-भयदामिति । बीभत्सां घृणोत्पादिकां लम्बोदरीं लम्बोदरविशिष्टां तीक्ष्णाः दन्ताः यस्यास्तामत एव करालीं क्रूरस्वरूपामत एवाल्पसत्त्वानामबहुबलानां भयदां परुषत्वचं कठिनत्वग्विशिष्टां भीमान् भयंकरान् मृगान् व्याघ्रादीन् भक्षयन्तीं विकटां अतिस्थूलवक्त्रावयवविशिष्टां मुक्तमूर्धजां राक्षसीं तत्र दरीसमीपे रामलक्ष्मणौ अवैक्षताम् । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०-सामान्यतो दर्शनमुक्त्वा विशेषतो दर्शनमाह द्वाभ्याम्-भयदामित्यादि ॥ १२ ॥ १३ ॥

१४] ति० टी०-भ्रातुः रामस्याग्रतो व्रजन्तम् । एहि रंस्यावहेत्युक्त्वेत्यत्र इकारलोप आर्षः । समालम्भत गृहीतवती ॥ १४ ॥

रा० टी०-सेति । सा राक्षसी वीरौ रामलक्ष्मणौ समासाद्य प्राप्य भ्रातुः अग्रतोऽग्रे व्रजन्तं लक्ष्मणमेहि रंस्यावहे इत्युक्त्वा समालम्भत अगृह्णात् गुण आर्षः ॥ १४ ॥

गो० टी०-सेति । रंस्यावहे इत्युक्त्वेत्यत्र संधिरार्षः । समालम्भत हस्ते गृहीतवती ॥ १४ ॥

१५] ति० टी०-उपगुह्यालिङ्ग्य । अयोमुखीत्यन्वर्थं नाम । अहं ते तव लाभो निध्यादिवल्लाभरूपास्मि, त्वं च मे प्रियो भर्तासि ॥ १५ ॥

रा० टी०-उवाचेति । एनं सौमित्रिमुपगुह्य उवाच । तद्वचनाकारमाह-अयोमुखी नामाहं ते लाभः अपूर्वनिध्यादिवल्लब्धा अतस्त्वं मे प्रियः भर्ता असि ॥ १५ ॥

गो० टी०-उवाचेत्यर्धम् । उपगुह्य आलिङ्ग्य ॥ १५ ॥

गो० टी०-अहमित्यादिसार्धश्लोकः । अयोमुखीत्यन्वर्थनामा 'हयमुखी' इत्यपि पाठः । ते लाभः लाभभूता त्वमपि मम प्रियोऽसि नाथेति । आयुःशेषमित्यत्यन्तसंयोगे द्वितीया ॥ १६ ॥

१६] ति० टी०-आयुश्चिरं चिरमायुः ॥ १६ ॥

१ सत्त्वेति गो. मृगेति रा. पाठः । २ व्यालेति गो. पाठः । ३ ददृशाते इति गो. पाठः । ४ करालामिति गो. पाठः । ५ ऐक्षेतां तौ ततस्तत्रेति गो. पाठः । ६ आक्रम्येति गो. पाठः । ७ कूटेष्विति गो. पाठः । ८ आयुःशेषमिति गो. पाठः ।

एवमुक्तस्तु कुपितः खड्गमुद्धृत्य लक्ष्मणः । कर्णनासस्तनं तस्या [2]निचकर्तारिसूदनः ॥ १७ ॥
कर्णनासे निकृत्ते तु विस्वरं [3]विननाद सा । यथागतं प्रदुद्राव राक्षसी [4]घोरदर्शना ॥ १८ ॥
तस्यां गतायां गहनं व्रजन्तौ वनमोजसा । आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥
लक्ष्मणस्तु महातेजाः सत्त्ववाञ्छीलवाञ्शुचिः । अब्रवीत्प्राञ्जलिर्वाक्यं भ्रातरं दीप्ततेजसम् ॥ २० ॥
स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः । प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये ॥ २१ ॥
तस्मात्सज्जीभवार्य त्वं कुरुष्व वचनं मम । ममैव हि निमित्तानि सद्यः शंसन्ति संभ्रमम् ॥ २२ ॥
एष वञ्चुलको नाम पक्षी परमदारुणः । आवयोर्विजयं युद्धे शंसन्निव विनर्दति ॥ २३ ॥
तयोरन्वेषतोरेवं सर्वं तद्वनमोजसा । संजज्ञे विपुलः शब्दः प्रभञ्जन्निव तद्वनम् ॥ २४ ॥
संवेष्टितमिवात्यर्थं गहनं मातरिश्वना । वनस्य तस्य शब्दोऽभूद्वनमापूरयन्निव ॥ २५ ॥

रा० टी०—नाथेति । हे स्वामिन् ! पर्वतदुर्गादिषु चिरं बहुकालिकमिदमायुः संप्राप्येति शेषः, मया सह रंस्यसे ॥१६॥

१७] ति० टी०—कर्णनासस्तनमिति समाहारद्वन्द्वः॥१७॥

रा० टी०—एवमिति । एवमुक्तः अत एव कुपितः स लक्ष्मणस्तस्याः अयोमुख्याः कर्णनासस्तनं चकर्त चिच्छेद कर्णनासस्तनमित्यत्र प्राण्यङ्गत्वादेकवचनम् ॥ १७ ॥

गो० टी०—एवमिति । कर्णनासावित्यत्र एकवद्भावाभाव आर्षः नासाशब्दस्य पुंलिङ्गता चार्षी ॥ १७ ॥

१८] ति० टी०—कर्णनासे इति सप्तमी ॥ १८ ॥

रा० टी०—कर्णेति । सा अयोमुखी कर्णनासे निकृत्ते छिन्ने सति विस्वरं यथा स्यात्तथा विननाद यथागतं प्रदुद्राव च ॥ १८ ॥

गो० टी०—कर्णेति । एकवद्भावे सप्तमी ॥ १८ ॥

१९-२०] ति० टी०—तस्यां गतायां पश्चाद्व्रजन्तौ गहनं दुष्प्रवेशं वनमासेदतुः प्रापतुः ॥ १९ ॥ २० ॥

रा० टी०—तस्यामिति । तस्यां राक्षस्यां गतायां सत्यां व्रजन्तौ रामलक्ष्मणौ गहनं निबिडं वनमासेदतुः प्रापतुः ॥१९॥

गो० टी०—तस्यामिति । गहनं दुष्प्रवेशं वनं विशन्तौ वनमध्यं गच्छन्तौ आसेदतुः वक्ष्यमाणनिमित्तानीति शेषः॥१९॥

रा० टी०—लक्ष्मण इति । महातेजाः लक्ष्मणः प्राञ्जलिः सन् भ्रातरं राममब्रवीत् ॥ २० ॥

गो० टी०—लक्ष्मणस्त्विति । महातेजा इत्यदीनतोक्तिः । सत्त्ववान् निर्मलमनस्कः शीलवान् सद्वृत्तवान् शुचिः कायशुद्धियुक्तः एभिर्विशेषणैर्भोक्तृभक्तिरुक्ता ॥ २० ॥

२१] ति०टी०—बाहुर्वामः । अनिष्टानि तत्सूचकानि॥२१॥

रा० टी०—तद्वचनाकारमाह—स्पन्दते इति । मे मम बाहुः बाहुद्वयं वृदं स्पन्दते प्रस्फुरति अत एव मे मनः उद्विग्नमिव उद्विग्नसदृशम् । उद्विग्नसदृशमित्युक्त्या वस्तुत उद्विग्नत्वाभावः सूचितः तेन दक्षिणस्यापि भुजस्य प्रस्फुरणात् यथाकथंचित्प्राप्तस्य विघ्नस्य विध्वंसो भविष्यतीति निश्चयः सूचितः। विनिगमनाविरहाद्बाहुशब्देन बाहुद्वयग्रहणम् एकवचनं तु जात्यभिप्रायेण । अर्षं पृथक्—प्रायश इति । हे आर्य ! प्रायशः अनिष्टानि इष्टविरोधीनि निमित्तानि उपलक्षये पश्यामि तस्मादेतोः त्वं सज्जीभव अवधानतां प्राप्नुहि हि यतः निमित्तानि सद्यो मम संभ्रमं शंसन्ति बोधयन्ति ॥ २१ ॥ २२ ॥

गो० टी०—स्पन्दत इति । बाहुः वाम इति शेषः, उद्विग्नं कम्पितम् अनिष्टानि अनिष्टसूचकानि ॥ २१ ॥

२२] ति० टी०—सज्जीभव यतो भव। संभ्रमं भयम्॥२२॥

गो० टी०—तस्मादिति । मम वचनमित्यन्वयः । संभ्रमं भयम् ॥ २२ ॥

२३] ति० टी०—ततः कंचिच्छकुनमप्याह—एष इति । वञ्चुलकः कण्ठवालः। 'वञ्जुलकः' इत्यपि पाठान्तरम् । अनेन युद्धमवश्यंभावि जयश्चेत्युभयं सूचितम् ॥ २३ ॥

रा० टी०—नन्वयं यदि दुर्निमित्तानि पश्यसि तर्हि अनिष्टं भविष्यत्येवेति किं सज्जीभवनेनेत्यत आह—एष इति । वञ्जुलकस्तदभिधः परमदारुणः एष पक्षी युद्धे आवयोर्विजयं शंसन्निव विनर्दति ॥ २३ ॥

गो० टी०—एष इति । वञ्चुलकः कर्णवालाख्यः पक्षिविशेषः ' वञ्चुलः कर्णवालः स्यात्' इति निघण्टुः । विनर्दति कूजति ॥ २३ ॥

२४] ति० टी०—अन्वेषतोः सीतामिति शेषः । ओजसा सामर्थ्येन ॥ २४ ॥

रा० टी०—तयोरिति । सर्वं वनमन्वेषतोः तद्वनं प्रभञ्जन्निव विपुलोऽतिमहाञ्छब्दः संजज्ञे ॥ २४ ॥

गो० टी०—तयोरिति । एवम् एतादृशोक्तिपूर्वकम् अन्वेषतोः अन्वेषमाणयोः प्रभञ्जन् प्रभञ्जयन् ॥ २४ ॥

२५] ति० टी०—तद्वहनं वनमत्यन्तं मातरिश्वना संवे-

१ कर्णनासौ स्तनौ चेति गो पाठः । २ स चकर्तेति रा. पाठः । ३ सा विनद्य चेति गो. पाठः । ४ भीमेति गो. पाठः । ५ विशन्तावित्रि गो. पाठः । ६ हितमिति गो. पाठः । ७ गगनमिति गो. पाठः । ८ दिवमिति गो. पाठः ।

तं शब्दं काङ्क्षमाणस्तु रामः खड्गी सहानुजः । ददर्श सुमहाकायं राक्षसं विपुलोरसम् ॥ २६ ॥
आसेदतुश्च तद्रक्षस्तावुभौ प्रमुखे स्थितम् । विवृद्धमशिरोग्रीवं कबन्धमुदरेमुखम् ॥ २७ ॥
रोमभिर्निशितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रितम् । नीलमेघनिभं रौद्रं मेघस्तनितनिःस्वनम् ॥ २८ ॥
अग्निज्वालानिकाशेन ललाटस्थेन दीप्यता । महापक्ष्मेण पिङ्गेन विपुलेनायतेन च ॥ २९ ॥
एकेनोरसि घोरेण नयनेन सुदर्शिना । महादंष्ट्रोपपन्नं तं लेलिहानं महामुखम् ॥ ३० ॥
भक्षयन्तं महाघोरानृक्षसिंहमृगद्विजान् । घोरौ भुजौ विकुर्वाणमुभौ योजनमायतौ ॥ ३१ ॥
कराभ्यां विविधान्गृह्य ऋक्षान्पक्षिगणान्मृगान् । आकर्षन्तं विकर्षन्तमनेकान्मृगयूथपान् ॥ ३२ ॥

क्षितं व्याप्तमिव जातम् । ततस्तस्य वनस्य मध्ये शब्दोऽभवत् ॥ २६ ॥

रा० टी०–संवेष्टितमिति । अत्यर्थमत्यन्तं मातरिश्वना वायुना संवेष्टितमिव गहनं वनमासीदिति शेषः, तस्य वनसंबन्धी शब्दः प्रतिस्वनः वनमापूरयन्निव अभूत् ॥ २६ ॥

गो० टी०–संवेष्टितमिति । मातरिश्वना वायुना संवेष्टितं पूरितम् अयमुत्पातविशेषः । शब्दः पूर्वोक्तः तस्य वनस्य संबन्धिनी दिवम् आकाशम् आपूरयन्निवाभूत् ॥ २६ ॥

२६] ति० टी०–तं शब्दं काङ्क्षमाणः तदुत्पत्तिनिमित्तं काङ्क्षमाणः ॥ २६ ॥

रा० टी०–तमिति । तं शब्दं काङ्क्षमाणो निश्चेतुकामः सहानुजो रामः सुमहाकायम् अतिबृहच्छरीरम् अत एव विपुलोरसं राक्षसं ददर्श ॥ २६ ॥

गो० टी०–तमिति । तं काङ्क्षमाणः किमस्योत्पत्तिमूलमिति ज्ञातुमिच्छन् गत्वेति शेषः, कक्षे गुल्मे ददर्श दूरादिति शेषः ॥ २६ ॥

२७] ति० टी०–आसेदतुर्ददृशतुः । विवृद्धं विटङ्काकारम् अशिरोग्रीवमदृश्यमानशिरोग्रीवम् अत एव कबन्धमन्वर्थतन्नामकम् उदरेमुखम् "अमूर्धमस्तकात्" इत्यच्प्रत्ययः ॥ २७ ॥

रा० टी०–आसेदतुरिति । विवृद्धं विटङ्कशरीरम् उदरे संलग्नं मुखं यस्य तम् "अमूर्धमस्तकात्" इत्यच्प्रत्ययः । अत एव अशिरोग्रीवम् अदृश्यमानशिरोग्रीवाविशिष्टं प्रमुखे संग्रामे स्थितमास्थावन्तं तत्प्रसिद्धं कबन्धं नाम रक्षः उभौ रामलक्ष्मणौ आसेदतुः तत्समीपं प्रापतुः ॥ २७ ॥

गो० टी०–आसेदतुरित्यादिसार्धषट्श्लोकी । प्रमुखे अग्रे विवृद्धम् उन्नतम् अशिरोग्रीवम् अदृश्यमानशिरोग्रीवम् अत एव कबन्धम् अन्वर्थकबन्धनामकम् उदरेमुखम् "अमूर्धमस्तकात्स्वाङ्गादकामे" इत्यच्प्रत्ययः । रोमभिरुपलक्षितं निचितैर्निबिडैः अग्निज्वालानिकाशेन तत्सदृशेन महापक्ष्मेण महापक्ष्मणा अदन्तत्वमार्षम् । विपुलेन विस्तीर्णेन आयतेन दीर्घेण उरसि उरोऽन्तर्गतशिरस्कत्वेन उरसि दृश्यमानेनेत्यर्थः । लेलिहानं पुनः पुनर्जिह्वया लेहनं कुर्वन्तं महामुखं विपुलास्यरन्ध्रं विकुर्वाणं व्यापारयन्तं योजनमिति अध्ववाचित्वादत्यन्तसंयोगे द्वितीया । आकर्षन्तम् आभिमुख्येन कर्षन्तं विकर्षन्तं विशेषेण कर्षन्तं मृगयूथपानिति मृगविशेषणम् । प्रपन्नयोः समीपं प्राप्तयोः ॥ २७–३२ ॥

२८] ति० टी०–निशितैरित्यस्य विवरणम्—तीक्ष्णैरिति । उपलक्षितमिति शेषः । 'रोमभिर्निबिडैस्तीक्ष्णैः' इति क्वचित्पाठः ॥ २८ ॥

२९–३०] ति० टी०–उच्यमानविशेषणेन ललाटस्थेनैकेन नयनेनोरःप्रदेशान्तर्गतशिरस्त्वादुरस्युरःप्रदेशेऽन्तरुपलभ्यमानेन नयनेनोपलक्षितं मुखं लेलिहानम् । महापक्ष्मेणेत्यार्षम् ॥ २९ ॥ ३० ॥

३१] ति० टी०–विकुर्वाणं विक्षिपन्तम् ॥ ३१ ॥

३२] ति० टी०–आकर्षन्तमिष्टान्मृगानाभिमुख्येन कर्षन्तम् अनिष्टान्मृगान्मुञ्चन्तम् ॥ ३२ ॥

रा० टी०–तमेव वर्णयन्नाह–रोमभिरिति । निचितैर्निबिडैः तीक्ष्णैः रोमभिरुपलक्षितं महागिरिमिव उच्छ्रितमुन्नतं नीलमेघनिभं मेघस्तनितनिःस्वनं मेघशब्दसदृशशब्दवन्तम् अग्निज्वालानिकाशेन अग्निज्वालासदृशेन ललाटस्थेन महापक्ष्मेण बृहत्पक्ष्मणा पिङ्गेन पिङ्गवर्णेन विपुलेन अतिविस्तारविशिष्टेन आयतेन दीर्घेण घोरेण भयंकरेण उरसि विद्यमानेन अत एव सुदर्शिना द्रष्टव्येन एकेन नयनेनोपलक्षितं लेलिहानं स्ववक्त्रमिति शेषः, महाघोरान् ऋक्षादीन् भक्षयन्तं योजनमायतौ विस्तृतौ घोरौ भुजौ विकुर्वन्तं विविधं क्षिपन्तं कराभ्याम् ऋक्षादीन् अनेकान् बहून् मृगयूथपाँश्च गृह्य गृहीत्वा आकर्षन्तं विकर्षन्तमनभिप्रेतान् त्यजन्तं प्रपन्नयोः समीपं प्राप्तयोर्भ्रात्रोः रामलक्ष्मणयोः पन्थानमावृत्य स्थितं महान्तं विलक्षणस्वरूपवत्त्वात्प्रशंसनीयं दारुणं हिंसकम् अत एव भीमं भयोत्पादकं भुजाभ्याम् आकर्षणप्रसारितहस्ताभ्यां संहतं संयुक्तं संस्थानात् स्थितेरेव घोरप्रदर्शनं कबन्धं तौ रामलक्ष्मणौ क्रोशमात्रं समतिक्रम्य मार्गान्तरेण गत्वा ददर्शतुः ददृशतुः । श्लोकसप्तकमेकान्वयि ॥ २८–३४ ॥

---

१ स महेति रा. पाठः । २ ततस्तत्रेति गो. पाठः । ३ निचितैरिति गो. रा. पाठः । ४ ऽसुदर्शिनेति गो. पाठः । ५ विकुर्वन्तमिति रा. पाठः ।

स्थितमावृत्य पन्थानं तयोर्भ्रात्रोः प्रपन्नयोः । अथ [1]तं समतिक्रम्य क्रोशमात्रं ददर्शतुः ॥ ३३ ॥
महान्तं दारुणं भीमं कबन्धं भुजसंवृतम् । कबन्धमिव संस्थानादतिघोरप्रदर्शनम् ॥ ३४ ॥
स महाबाहुरत्यर्थं प्रसार्य विपुलौ भुजौ । जग्राह सहितावेव राघवौ पीडयन्बलात् ॥ ३५ ॥
खड्गिनौ दृढधन्वानौ [4]तिग्मतेजौ महाभुजौ । भ्रातरौ विवशं प्राप्तौ कृष्यमाणौ महाबलौ ॥ ३६ ॥
तत्र धैर्याच्च शूरस्तु राघवो नैव विव्यथे । बाल्यादनाश्रयाच्चैव लक्ष्मणस्त्वभिविव्यथे ॥ ३७ ॥
उवाच च विषण्णः सन्राघवं राघवानुजः । पश्य मां विवशं वीर राक्षसस्य वशंगतम् ॥ ३८ ॥
मयैकेन तु निर्युक्तः परिमुच्यस्व राघव । मां हि भूतबलिं दत्त्वा पलायस्व यथासुखम् ॥ ३९ ॥
अधिगन्तासि वैदेहीमचिरेणेति मे मतिः । प्रतिलभ्य च काकुत्स्थ पितृपैतामहीं महीम् ॥ ४० ॥
तत्र मां राम राज्यस्थः स्मर्तुमर्हसि सर्वदा । लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत् ॥ ४१ ॥

३३] ति० टी०–प्रपन्नयोः पन्थानमिति शेषः । आवृत्य स्थितं तं ज्ञात्वा तद्भुजवेष्टनं समतिक्रम्य दूरे स्थितौ तं क्रोशमात्रं ददर्शतुः ॥ ३३ ॥

३४] ति०टी०–भुजाभ्यां जन्तून्संवृणोतीति भुजसंवृतम्। संस्थानादेहस्थित्याशिरस्कत्वलक्षणकबन्धवत्स्थितम् ॥ ३४ ॥

गो० टी०–अथेति । सार्धश्लोक एकान्वयः । अथ आसादनानन्तरं समभिक्रम्य आभिमुख्येन गत्वा क्रोशमात्रे समीपे ददर्शतुः दृष्टवतुः दारुणं भीमम् अतिशयेन भीमम् । भुजाभ्यां मृगान् संवृणोतीति भुजसंवृतं संस्थानात् देहस्थित्या कबन्धमिव सर्वदा अशिरस्कत्वलक्षणकबन्धवत् स्थितम् ३३॥३४

३५] ति० टी०–सहितौ नैकमपि मुक्त्वेत्यर्थः ॥ ३५ ॥

रा० टी०–स इति । महाबाहुः स कबन्धः विपुलौ भुजौ प्रसार्य सहितौ राघवौ पीडयन् बलात् हठात् जग्राह ॥ ३५ ॥

गो० टी०–स इति । सहितावेव नैकमपि मुक्त्वेत्यर्थः३५

३६] ति० टी०–तिग्मतेजौ तीक्ष्णतेजसौ तादृश-वेषधरावित्यर्थः । विवशं प्राप्तौ बलात्कर्षणं प्राप्तौ ॥ ३६ ॥

रा० टी०–खड्गिनाविति । दृढधन्वानौ दृढे धनुषी ययोस्तौ तिग्मं तेजो ययोः कृष्यमाणौ भ्रातरौ विवशं कबन्धाधीनत्वं प्राप्तौ बभूवतुरिति शेषः ॥ ३६ ॥

गो० टी०–खड्गिनाविति । तिग्मं खरं तेजो यस्य तत्तथा तादृशवपुर्धरौ विवशं पारवश्यं प्राप्तौ ॥ ३६ ॥

३७–३८] ति० टी०–तत्र तस्यामवस्थायाम् अनाश्रयात् धैर्यस्येति शेषः धैर्यानालम्बनादित्यर्थः । तत्र हेतुर्बाल्यं बालबुद्धित्वं शुद्धसत्त्वाप्रधानत्वम् । 'अनाश्रयत्वात्' इति पाठे आश्रयभूतस्य रामस्यापि कबन्धभुजावृतत्वादिति भावः ॥ ३७ ॥ ३८ ॥

रा० टी०–तत्रेति । तत्र तस्मिन् समये शूरो राघवो धैर्यात् हेतोर्न विव्यथे । शूरो लक्ष्मणस्तु बाल्यात् राक्षसबाहुना आच्छादनात् हेतोः अनाश्रयात् रामरूपाश्रयरहित्यात् रामस्यास्वस्थत्वेन प्रतापमानादित्यर्थः, हेतोर्विव्यथे॥३७॥

गो० टी०–तत्रेति । तत्र तस्यामवस्थायां बाल्यात् बालबुद्धित्वात् रामवदप्रौढबुद्धित्वादित्यर्थः । अनाश्रयत्वात् धैर्यानालम्बनात् अतिविव्यथे अत्यन्तं खिन्नोऽभूत् उवाच च ॥ ३७ ॥

रा० टी०–उवाचेति । विषण्णो राघवानुजो लक्ष्मणः राघवमुवाच । तद्वचनाकारमाह–हे वीर ! राक्षसस्य वशमधीनत्वं गतं प्राप्तम् अत एव विवशमविगतकान्तिं मां पश्य ॥ ३८ ॥

गो० टी०–पश्येत्यादि । राक्षसस्य वशं गतत्वेन विवशमिति योजना । विनिर्युक्तः वियुक्तः । एतस्यैव विवरणम्–मामिति । भूतबलिं भूतस्य कबन्धस्य बलिम् ॥ ३८ ॥ ३९ ॥

३९] ति० टी०–निर्युक्तो नियोजितरक्षोबलिः संस्त्वं किंचित्स्ववशमात्मानं परिमुच्यस्व पलायनेनेति शेषः । तस्यैव विवरणमुत्तरार्धम्–मां हीति । भूतबलिम् महाभूताकाररक्षसे बलिमित्यर्थः ॥ ३९ ॥

रा० टी०–स्वव्यथां बोधयितुं राममाह–मयेति । मां भूतबलिं दत्त्वा पिशाचाकारराक्षसाय समर्प्येत्यर्थः, एकेन मया निर्युक्तो वियुक्तस्त्वं पलायस्व राक्षसमिति शेषः. अत एव यथासुखं परिमुच्यस्व आत्मानमिति शेषः। मां भूतबलिं दत्त्वेत्यनेन मां प्राप्य संतोषप्राप्त्या पराक्रमात् राक्षसो निवर्तिष्यते इति सूचितं तेन सीतान्वेषणे विलम्बो न कार्य इति ध्वनितं तेन लक्ष्मणस्य सीताविषयकप्रेमातिशयो व्यञ्जितः ॥ ३९ ॥

४०–४१] ति० टी०–अधिगन्ता प्राप्ता ॥ ४० ॥ ४१ ॥

रा० टी०–नन्वं त्वया विना कथमन्वेषणसिद्धिरित्यत आह–अचिरेणेति । अचिरेण अल्पेन कालेन वैदेहीमधिगन्तासीति मे मतिर्निश्चयः । अर्थं पृथक् । नन्वं तव सकृमः कदा भवितेत्यत आह–हे काकुत्स्थ ! तत्रायोध्यायां महीं स्वराज्यं

१ तावितिति गो. तदिति रा. पाठः । २ मात्रे इति गो. पाठः । ३ एवेति गो. पाठः । ४ तिग्मतेजोनपुर्धराविति गो. पाठः । ५ धैर्येणेति गो. पाठः । ६ श्रयत्वाच्चेति गो. पाठः । ७ अतीति गो. पाठः । ८ विनिर्मुक्तः परिमुचस्वेति गो. पाठः ।

मा स्म त्रासं वृथा वीर नहि त्वादृग्विषीदति । एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ ॥ ४२ ॥
तावुवाच महाबाहुः कबन्धो दानवोत्तमः । कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ ॥ ४३ ॥
घोरं देशमिमं प्राप्तौ [2]दैवेन मम चाक्षुषौ । वदतं कार्यमिह वां किमर्थं चागतौ युवाम् ॥ ४४ ॥
इमं देशमनुप्राप्तौ [3]क्षुधार्तस्येह तिष्ठतः । सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ ॥ ४५ ॥
मां तूर्णमनुसंप्राप्तौ दुर्लभं जीवितं [4]हि वाम् । तस्य तद्वचनं श्रुत्वा कबन्धस्य दुरात्मनः ॥ ४६ ॥
उवाच लक्ष्मणं रामो मुखेन परिशुष्यता । कृच्छ्रात्कृच्छ्रतरं प्राप्य दारुणं सत्यविक्रम ॥ ४७ ॥
व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियाम् । कालस्य सुमहद्वीर्यं सर्वभूतेषु लक्ष्मण ॥ ४८ ॥

प्रतिलभ्य सर्वदा नित्यं राज्यस्थस्त्वं मां स्मर्तुमर्हसि । तत्र स्थितेनैव भवता मदानयनोद्योगः कर्तव्य इति व्यञ्जितम्॥४०॥

गो० टी०–अधीत्येकार्थम् ॥ ४० ॥

गो० टी०–प्रतिलभ्येति । तत्र मद्याम् ॥ ४१ ॥

रा० टी०–लक्ष्मणेनेति । एवमुक्तो रामः हे वीर ! त्रासं भयं मा कृथाः हि यतः त्वादृक् पुरुषः न विषीदति इति सौमित्रिमब्रवीत् ॥ ४१ ॥

गो० टी०–लक्ष्मणेनेति । स्पष्टम् ॥ ४२ ॥

४२–४३] ति० टी०–एतस्मिन्नन्तरे इति । लक्ष्मणविषादनिवृत्तिफलकरामाश्वासनसमये इति शेषः ॥ ४२ ॥४३॥

४४] ति० टी०–दैवेन दैवगत्या मम चाक्षुषौ चक्षुर्गोचरौ ॥ ४४ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे समये दानवोत्तमः कबन्धः रामलक्ष्मणावुवाच । दानवोत्तम इत्युक्त्या दनुवंशोद्भवत्वेऽपि कर्मणा राक्षसत्वादन्यत्र राक्षसोक्तिर्न विरुध्यते ॥ ४२ ॥

गो० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे लक्ष्मणाश्वासनावसरे ॥ ४३ ॥

रा० टी०–तद्वचनाकारमाह–कावितिं । इमं घोरं देशं प्राप्तौ दैवेन मम भाग्येन चाक्षुषौ चक्षुर्विषयौ युवां कौ युवामिह किमर्थमागतौ वां युवां कार्यं प्रयोजनं वदतम्। ' मम भक्ष्यावुपस्थितौ ' इति भूषणपाठः ॥ ४३ ॥ ४४ ॥

गो० टी०–काविति । भक्ष्यौ आहारौ ॥ ४३ ॥

गो० टी०–वदतमिति । इह वने वां युवयोः कार्यं वदतम् लोण्मध्यमपुरुषद्विवचनम् । वामिह वने किं कार्यं किं कर्तव्यं किमर्थं कस्य प्रयोजनाय आगतौ न किमप्यस्त्रत्र वां प्रयोजनं प्रत्युतास्मत्प्रयोजनमेव सिद्धमित्याह–इमामिति । इह तिष्ठतः ममेति शेषः । क्षुधार्तस्य मम संबन्धिनमिमं देशमनुप्राप्तावित्यनेन मम क्षुन्निवृत्त्यर्थमेव वामागमनमिति भावः ॥ ४५ ॥

४५] ति० टी०–एवं कार्यादिकं पृष्ट्वा तदुपेक्ष्य स्वप्रयोजनं संपन्नमित्याह–इमं देशमिति । इह तिष्ठतः क्षुधार्तस्य मम भाग्यादिमं देशमनुप्राप्तौ ॥ ४५ ॥

रा० टी०–इममिति । क्षुधार्तस्येह तिष्ठतो मम भाग्यात् सबाणचापखड्गेन बाणसहितचापासिभ्यामुपलक्षितौ अत एव तीक्ष्णशृङ्गौ तीक्ष्णशृङ्गविशिष्टौ ऋषभौ वृषभाविव युवामिमं देशमनुप्राप्तौ ॥ ४५ ॥

४६] ति० टी०–ततः किं तत्राह–दुर्लभमिति ॥ ४६ ॥

रा० टी०–ननु किमप्राप्येत्यत आह–ममेति । हि यतः ममास्यं मुखं वां युवाम् अनुसंप्राप्तौ अतो वां युवयोः जीवितं दुर्लभम्, वामिति शब्दादृश्या उभयान्वयि । अयं पृथक् । ' ममास्य ' इति पाठः । तस्येति । कबन्धस्य तद्वचनं श्रुत्वा परिशुष्यता मुखेनोपलक्षितो राम उवाच ॥ ४६ ॥

गो० टी०–आगमने आवयोः का हानिरित्यत्राह–सबाणेति ॥ ४६ ॥

गो० टी०–तस्येति मुखेन उपलक्षित इति शेषः ॥ ४७ ॥

४७-४८] ति० टी०–मुखेन परिशुष्यतोपलक्षितं लक्ष्मणमुवाच–हे सत्यविक्रम! कृच्छ्रात्कष्टात्कष्टतरं राज्यभंशवनवासप्रियापहारादि प्राप्य स्थितयोरावयोस्तां प्रियामप्राप्यैव जीवितान्तायेदं व्यसनं प्राप्तम् । यदेवमतः सर्वेष्वपि भूतेषु कालस्य वीर्यं सुमहत् अनर्गलप्रचारमस्तीति शेषः ॥४७॥४८॥

रा० टी०–तद्वचनाकारमाह–कृच्छ्रादिति । कृच्छ्रात् स्वजनत्यागदुःखात् दारुणम् असह्यमित्यर्थः, कृच्छ्रतरं सीताविरोगजनिताधिकक्लेशं प्राप्य तां प्रियां सीतामप्राप्य राक्षसवशेन सीतान्वेषणोद्योगमलब्ध्वा जीवितान्ताय अवध्यतिक्रमणहेतुकायोध्यावासिजीवनविध्वंसाय व्यसनं राक्षसग्रहजनितदुःखं प्राप्तम् ॥ ४७ ॥

गो० टी०–कृच्छ्रादिति । कृच्छ्रात्कृच्छ्रतरं राज्यभंशवनवाससीताहरणपर्यन्तं प्राप्यावस्थितयोः पुनश्च तां प्रियामप्राप्यैव आवयोर्जीवितान्ताय दारुणं व्यसनं दुःखं प्राप्तम् ॥४८॥

रा० टी०–इदानीमस्य राक्षसोऽपि मरणसमयः प्राप्त इति बोधयन्नाह–कालस्येति । हे लक्ष्मण ! सर्वभूतेषु भूतविकारेषु कालस्य सुमहत् वीर्यं नियामकतया स्थितमिति शेषः, कालवशतयैव सर्वः प्रवर्तत इत्यर्थः, अत एव त्वां मां च व्यसनैः राक्षसदत्तदुःखैः मोहितौ विकलचित्तौ पश्य एतेन राक्षसानन्तकालः समागत इति व्यञ्जितम् ॥ ४८ ॥

---

१ पप्रच्छ वर्त्मनिर्योप इति गो. पाठः । २ मम भक्ष्यावुपस्थिताविति गो. पाठः । ३ क्षुदार्तस्येति गो. पाठः । ४ खड्गेनेति रा. पाठः । ५ ममास्यमिति रा. पाठः । ६ पुनरिति गो. पाठः । ७ मम भक्ष्यावुपस्थितावितिं भूषणपाठ इति रा. शिरोमणौ लेखनाद्भक्ष्यावित्येव गो. पाठे युक्ततरं भाति ।

त्वां च मां च नरव्याघ्र व्यसनैः पश्य मोहितौ । नहि भारोऽस्ति दैवस्य सर्वभूतेषु लक्ष्मण ॥ ४९ ॥
शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे । कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ ५० ॥
इति ब्रुवाणो दृढसत्यविक्रमो महायशा दाशरथिः प्रतापवान् ।
अवेक्ष्य सौमित्रिमुदग्रविक्रमः स्थिरां तदा स्वां मतिमात्मनाऽकरोत् ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सप्ततितमः सर्गः ।

स्वमन्तमुद्यत कबन्ध दृष्ट्वा तद्धस्तच्छेद यावल्लक्ष्मणो मन्त्रयते तावत्कबन्धो बाहुभ्यां तौ ग्रहीतु प्रावर्तत । राघवौ तद्बाहू अच्छिन्ताम् । कौ युवामिति तेन पृष्टो लक्ष्मणः स्वेतिवृत्त सीताहरणान्त निवेद्य त कबन्धरूपप्राप्तिकारण पप्रच्छ ।

तौ तु तत्र स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ । बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत् ॥ १ ॥
तिष्ठतः किं नु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ । आहारार्थं तु संदिष्टौ दैवेन हतचेतनौ ॥ २ ॥
तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा । उवाचोर्तिसमापन्नो विक्रमे कृतनिश्चयः ॥ ३ ॥

गो० टी०–अत्र हेतुमाह–कालस्येति । सर्वभूतेष्वपि कालस्य वीर्यं सुमहत् अनर्गलमित्यर्थः, त्वां च मां च महाबलपराक्रमावपि व्यसनैर्मोहितौ कालः करोतीति पश्य ॥ ४९ ॥

४२–५०] ति०टी०–कुतः, यतः–त्वां चेति । महाबलपराक्रमावपि व्यसनैर्दुःखैर्मोहितौ कालः करोतीति पश्य । उक्तार्थस्यैव प्रपञ्चः–नहीति । 'नाति' इति पाठान्तरम् ॥४९॥५०॥

रा० टी०–ननु तर्हि स्वस्वकल्याणार्थं काल एव सर्वैरुपासितव्य इत्यत आह–नेति । दैवस्य परमात्मायत्तस्य कालस्य सर्वभूतेषु अतिभारः स्वातन्त्र्येण पोषणं नास्ति यथा परमात्मेच्छं कल्याणकारक इत्यर्थः । एतेन कल्याणकामैः परमात्मैवोपास्य इति व्यञ्जितम् ॥ ४९ ॥

रा० टी०–ननु तर्हि कालो मास्त्वित्यत आह–शूरा इति । बलवन्तः कृतास्त्राश्च शूराः कालाभिपन्नाः कालवशं प्राप्ताः सन्तः वालुकसेतव इव सीदन्ति नश्यन्ति । एतेन प्रत्यक्षसिद्धस्य वस्तुनो बाधकमन्तरापलापः कर्तुमशक्य इति सूचितम् ॥ ५० ॥

गो० टी०–उक्तमर्थमुपपादयति–नातीति । सार्धश्लोक एकान्वयः । वालुकसेतवः सिकतामयसेतवः ॥ ५० ॥

५१] ति० टी०–उदग्रविक्रम उत्कटपराक्रमो रामः सौमित्रिमवेक्ष्य दीनमिति शेषः, स्वां मतिमात्मनाऽऽत्मवैभवेन स्थिरामकरोत् इंपदपि विषादं न प्राप्तवानित्यर्थः । अत्र लक्ष्मणस्यापि लोकव्यवहारनाट्यमेवेत्यन्ये ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्ड एकोनसप्ततितमः सर्गः ॥ ६९ ॥

रा० टी०–इतीति । दृढसत्यविक्रमः उदारकीर्तिः रामः सौमित्रिं सौमित्र्युक्तिमवेक्ष्य आत्मना स्वेच्छयैव स्वां मतिं स्थिरामकरोत् । 'सौमित्रिमुदारकीर्तिः' इति पाठः ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

गो० टी०–इतीति । सौमित्रिं दीनमवेक्ष्य स्वां मतिम् आत्मनैव स्थिरामकरोत् ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

१] ति० टी०–बाहुपाशपरिक्षिप्तौ बाहुभ्यां पाशाकारेण परितो व्याप्तौ ॥ १ ॥

रा० टी०–रामस्वास्थ्यं संवर्ण्य कबन्धवृत्तान्तं वर्णयन्नाह–तावित्यादिभिः । तत्र स्वस्य समीपे स्थितौ बाहुपाशपरिक्षिप्तौ स्वबाहुरूपपाशे बद्धौ रामलक्ष्मणौ दृष्ट्वा कबन्धोऽब्रवीत् ॥ १ ॥

गो० टी०–अथ कबन्धस्य बाहुच्छेदेन पूर्वजन्मस्मृतिरुच्यते सप्ततितमे–तौ त्वित्यादि । परिक्षिप्तौ परिवेष्टितौ॥१॥

२–३] ति० टी०–क्षुधार्तं मां दृष्ट्वा भीतौ नु किं तिष्ठतम् । यतो मे आहारार्थं संदिष्टौ, अतो न जीवनसंभावनेत्यर्थः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–तिष्ठत इति । क्षुधार्तं पीडितं मां दृष्ट्वा दैवेन आहारार्थं संदिष्टौ अत एव हतचेतनौ क्षत्रियर्षभौ युवां किं किमर्थं तिष्ठतः, मदास्ये प्रविशतामिति तात्पर्यं, तेन जीवनाशा न कर्तव्येति ध्वनितम् ॥ २ ॥

गो० टी०–तिष्ठत इति । क्षुधार्तं मां दृष्ट्वा भीतौ किंनु

१ नातीति गो. रा. पाठः । २ उदग्रपौरुषमिति गो. उदारकीर्तिरिति रा. पाठः । ३ स्विति रा. पाठः । ४ गतचेतसाविति गो. पाठः । ५ आर्तिमिति गो. पाठः । ६ कृतलक्षण इति गो. पाठः ।

त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः । तस्मादसिभ्यामस्याशु बाहू छिन्दावहे गुरू ॥ ४ ॥
भीषणोऽयं महाकायो राक्षसो भुजविक्रमः । लोकं ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति ॥ ५ ॥
निश्चेष्टानां वधो राजन्कुत्सितो जगतीपतेः । क्रतुमध्योपनीतानां पशूनामिव राघव ॥ ६ ॥
एतत्संजल्पितं श्रुत्वा तयोः क्रुद्धस्तु राक्षसः । विदार्यास्यं ततो रौद्रं तौ भक्षयितुमारभत् ॥ ७ ॥
ततस्तौ देशकालज्ञौ खड्गाभ्यामेव राघवौ । अच्छिन्दन्तां सुसंहृष्टौ बाहू तस्यांसदेशयोः ॥ ८ ॥
दक्षिणो दक्षिणं बाहुमसक्तमसिना ततः । चिच्छेद रामो वेगेन सव्यं वीरस्तु लक्ष्मणः ॥ ९ ॥
स पपात महानुच्छिन्नबाहुर्महास्वनः । खं च गां च दिशश्चैव नादयञ्जलदो यथा ॥ १० ॥

तिष्ठतः व्यर्थमेव न तु जीवितापत्परिहार इत्यर्थः, यतो गतचेतसौ युवां मे दैवेनाहारार्थं संदिष्टौ ॥ २ ॥

रा० टी०—तदिति । आर्तिसमापन्नो लक्ष्मणः तत् कबन्धोद्गिरितं वाक्यं श्रुत्वा विक्रमे पराक्रमप्रकटने कृतनिश्चयः सन् प्राप्तः कालः समयो यस्य तद् हितं वाक्यमुवाच ॥ ३ ॥

गो० टी०—तच्छ्रुत्वेति । कृतलक्षणः कृतोद्योगः ॥ ३ ॥

४] ति० टी०—पुरा आदत्ते आदास्यतीत्यर्थः ॥ ४ ॥

रा० टी०—तद्वचनाकारमाह—त्वामिति । हे राम ! पुरा पूर्वं मत्कर्तृकापराधाद्युत्पत्तावित्यर्थः, यतः राक्षसाधमः त्वां मां च आदत्ते अगृह्णात् तस्मात् हेतोः अस्य गुरू महान्तौ बाहू असिभ्यां छिन्दावहे शब्दमहिम्ना संबोध्य मध्याहृतं तेनानपराधिनं कथं हन्यामिति संभावना न कार्येति ध्वनितम् ॥ ४ ॥

गो० टी०—त्वां चेति । पुरा आदत्ते आदास्यतीत्यर्थः ॥ ४ ॥

५] ति० टी०—भुजमात्रेण विक्रमो यस्य न त्वायुधेनेत्यर्थः । अतिजितं सर्वथा पराजितम् ॥ ५ ॥

रा० टी०—नन्वेतावद्ग्रहणमात्रेण कथमपराधः संभवतीत्यत आह—भीषण इति । भुजविक्रमः भुजयोर्विक्रमो यस्य सोऽयं राक्षसः लोकं सर्वजनमतिजितं पराजितमिव कृत्वा इह अस्मिन्काले एव आवां हन्तुमिच्छति ॥ ५ ॥

गो० टी०—भीषण इति । भुजयोरेव विक्रमो यस्य स तथा । लोकं जनम् अतिजितम् अत्यन्तजितम् ॥ ५ ॥

६] ति० टी०—अस्य बाहुच्छेद एव युक्तः, न तु प्राणवियोजनमित्याह—निश्चेष्टानामिति । शस्त्रादिभिर्विक्रमहीनानाम् जगतीपतेः क्षत्रियस्य क्रतुमध्ये प्राप्तानां पशूनां वध इव स यथा स्वर्गफलदोऽपि शास्त्रविहितोऽपि कुत्सितः सांख्यपातञ्जलाद्युक्तरीत्याऽधर्मजनकत्वात् लोकदृष्ट्या च कुत्सितः । एतेन तद्वधस्यापीष्टापफलदता सूचिता । केचित्तु क्रतुमध्यापनीतानाम्' इति पाठं श्रद्धाजाड्येन कल्पयित्वा क्रतुमध्यादन्यत्र नीतानां वधो यथा कुत्सित इति व्याचक्षते ॥ ६ ॥

रा० टी०—नन्वेतावद्ग्रहणमात्रेण शस्त्रादिविहीनोऽयं कथं मया हन्तव्य इत्यत आह—निश्चेष्टानामिति । क्रतुमध्योपनीतानां पशूनामिव निश्चेष्टानां वधव्यापाररहितानामेव वधः जगतीपतेः राज्ञः कुत्सितो निन्दितः एतेनायं हन्तव्य एवेति सूचितम् ॥ ६ ॥

गो० टी०—भुजच्छेदनमात्रं कर्तव्यं न तु मारणमित्याह—निश्चेष्टानामिति । निश्चेष्टानां प्रतीकाराशक्तानां जगतीपतेः क्षत्रियस्य क्रतुमध्योपनीतानां निश्चेष्टानामित्यस्मिन्नर्थे प्रयुक्तम् । यद्वा "पर्यग्निकृतानारण्यानुत्सृजन्त्यहिंसायै" इत्युक्तरीत्या अश्वमेधक्रताद्युपनीतानामारण्यपशूनां वधः कुत्सित एव ॥ ६ ॥

७] ति० टी०—तयोरेतत्संजल्पितं श्रुत्वेति संबन्धः । भक्षयितुमारभत् हस्ताभ्यामाकृष्टवानित्यर्थः ॥ ७ ॥

रा० टी०—एतदिति । तयोः रामलक्ष्मणयोः एतत् संजल्पितं कथितं श्रुत्वा राक्षसः रौद्रमास्यं मुखं विदार्य व्यादाय तौ भक्षयितुमारभत् ॥ ७ ॥

गो० टी०—एतदिति । तयोरेतत् संजल्पितं श्रुत्वा भक्षयितुमारभत् हस्ताभ्यामाकृष्टवानित्यर्थः ॥ ७ ॥

८] ति० टी०—सुसंहृष्टौ कदलीकाण्डच्छेदेनेव तच्छेदन हस्तसुखलाभात् ॥ ८ ॥

रा० टी०—तत इति । ततः राक्षसकर्तृकव्यापारानन्तरं देशकालज्ञौ रामलक्ष्मणौ तस्य रक्षसो बाहू अंसदेशयोः अच्छिन्दताम् ॥ ८ ॥

गो० टी०—तत इति । सुसंहृष्टौ कदलीकाण्डवत् सुखच्छेदनादिति भावः ॥ ८ ॥

९] ति० टी०—दक्षिणः समर्थो दक्षिणपार्श्वस्थो वा ॥ ९ ॥

रा० टी०—तत्प्रकारमाह—दक्षिण इति । दक्षिणो दक्षिणपार्श्वस्थो रामः दक्षिणं बाहुम् असक्तम् आस्थारहितं यथा भवति तथा चिच्छेद लक्ष्मणस्तु सव्यं वामं चिच्छेद दक्षिणशब्दः कुशलार्थको वा ॥ ९ ॥

गो० टी०—दक्षिण इति । दक्षिणः समर्थः असक्तम् अप्रतिबन्धं यथा भवति तथा रामस्य दक्षिणपार्श्वगमनं लक्ष्मणस्य अत उभयोर्दक्षिणसव्यपार्श्वप्राप्तिः ॥ ९ ॥

१०] ति० टी०—गां भूमिम् ॥ १० ॥

रा० टी०—स इति । छिन्नौ बाहू यस्य सः अत एव महास्वनः स राक्षसः खादि नादयन् जलदो महामेघ इव पपात ॥ १० ॥

गो० टी०—स इति । गां भूमिम् ॥ १० ॥

---

१ तदा रौद्र इति गो. पाठः । २ स्थिति रा. पाठः । ३ देशज्ञ इति गो. पाठः ।

स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः । दीनः पप्रच्छ तौ वीरौ कौ युवामिति दानवः ॥ ११ ॥
इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः । शशंस तस्य काकुत्स्थं कबन्धस्य महाबलः ॥ १२ ॥
अयमिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः । तस्यैवावरजं विद्धि भ्रातरं मां[1] लक्ष्मणम् ॥ १३ ॥
मात्रा प्रतिहते राज्ये रामः प्रव्राजितो वनम् । मया सह चरत्येष भार्यया च महद्वनम् ॥ १४ ॥
अस्य देवप्रभावस्य वसतो विजने वने । रक्षसाऽपहृता भार्या यामिच्छन्ताविहागतौ[2] ॥ १५ ॥
त्वं तु को वा किमर्थं वा कबन्धसदृशो वने । आस्येनोरसि दीप्तेन भग्नजङ्घो[3] विचेष्टसे[4] ॥ १६ ॥
एवमुक्तः कबन्धस्तु लक्ष्मणेनोत्तरं वचः । उवाच वचनं प्रीतस्तदिन्द्रवचनं स्मरन् ॥ १७ ॥
स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि वामहम् । दिष्ट्या चेमौ निकृत्तौ मे युवाभ्यां बाहुबन्धनौ[5] १८ ॥
विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद्यथा । तन्मे शृणु नरव्याघ्र तत्त्वतः शंसतस्तव[6] ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

११-१२] ति० टी०-कौ युवामिति पप्रच्छ पूर्वमप्राप्तोत्तरत्वात्पुनः प्रभः ॥ ११ ॥ १२ ॥

रा० टी०-स इति । शोणितौघपरिप्लुतः रुधिरमज्जद्व्याप्तः स दानवः निकृत्तौ छिन्नौ भुजौ स्वबाहू दृष्ट्वा युवां कौ इति वीरौ रामलक्ष्मणौ पप्रच्छ ॥ ११ ॥

गो० टी०-स निकृत्ताविति । पूर्वमदत्तोत्तरत्वात् पुनः प्रभः ॥ ११ ॥

रा० टी०-इतीति । इत्येवंप्रकारेण ब्रुवाणस्य कबन्धस्य समीपे तस्य रामस्य प्रेरितो लक्ष्मणः काकुत्स्थं रामं शशंस॥१२॥

गो० टी०-इतीति । क्रियाभेदात् पुनस्तच्छब्दः ॥ १२ ॥

१३-१४] ति०टी०-इक्ष्वाकुदायादो दशरथपुत्रः॥१३॥१४॥

रा० टी०-तल्लक्षणप्रकारमाह-अयमित्यादिभिः। इक्ष्वाकुदायादः दशरथपुत्र इत्यर्थः, रामो नाम जनैः श्रुतः प्रख्यातः अयं तस्यैव अवरजमनुजं लक्ष्मणं मां विद्धि जानीहि ॥ १३ ॥

रा० टी०-नन्विह किमर्थमागतौ इत्यत आह-मात्रेति । राज्ये राज्याभिषेके मात्रा केनचिद्धेतुना प्रतिषिद्धे सति रामो वनं प्रव्राजितः अत एव मया भार्यया च सह एव रामः महद्वनं चरति अटति ॥ १४ ॥

गो० टी०-अयमिति । इक्ष्वाकुदायादः दशरथपुत्रः 'दायादो सतबान्धवौ' इत्यमरः ॥ १३ ॥

१५] ति० टी०-यामिच्छन्तौ यामन्वेषयन्तौ ॥ १५ ॥

रा० टी०-अस्येति । ननु भार्या क्रान्तीत्यत आह-अस्येति । यामिच्छन्तौ इहागतौ आवामिति शेषः, सा वने वसतोऽस्य रामस्य भार्या रक्षसाऽपहृता ॥ १५ ॥

गो० टी०-अस्येति। इच्छन्तौ अन्वेषमाणावित्यर्थः॥१४॥

१६] ति० टी०-विचेष्टसे चेष्टमानस्तिष्ठसीत्यर्थः ॥१६॥

रा० टी०-आत्मानमवबोधयं तं ज्ञातुकामः पृच्छति—त्वमिति । कबन्धसदृशः छिन्नशिरा इव उरसि दीप्तेन प्रकाशमानेन आस्येन उपलक्षितः भग्नजङ्घस्त्वं को वा किमर्थं वा विचेष्टसे ॥ १६ ॥

गो० टी०-त्वं त्विति । विचेष्टसे लुठसीति यावत् ॥१६॥

१७] ति० टी०-प्रीतः शापमोक्षकालप्रत्यभिज्ञानात् । तदिन्द्रवचनं वक्ष्यमाणम् ॥ १७ ॥

रा० टी०-एवमिति । लक्ष्मणेन एवमुक्तं वच उक्तः अत एव प्रीतः कबन्धः तत्पूर्वोक्तम् इन्द्रवचनं स्मरन्सन् वचनमुवाच ॥ १७ ॥

गो० टी०-एवमिति । प्रीतः शापमोक्षकालप्रत्यभिज्ञानात् तदिन्द्रवचनम् उत्तरतंप्रतिपाद्यम् ॥ १६ ॥

१८] ति० टी०-बाह्वोर्बन्धनं ययोरंसदेशयोस्तौ बाहुबन्धनावंसदेशौ॥ १८ ॥

रा० टी०-स्वागतमिति । हे नरव्याघ्रौ ! वां युवयोः स्वागतं शोभनमागमनम् अत एव वां युवां दिष्ट्या भाग्यातिशयेन अहं पश्यामि दिष्ट्यैव इमौ बाहुबन्धनौ बन्धनरूपौ बाहू युवाभ्यां निकृत्तौ छिन्नौ॥ १८ ॥

गो०टी०-स्वागतमिति । बाह्वोर्बन्धनं ययोस्तौ बाहुबन्धनौ अंसावित्यर्थः ॥ १७ ॥

१९] ति० टी०-यथाविनयाद्यादृशाविनयात्प्राप्तं तच्छृण्वित्यन्वयः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

रा० टी०-विरूपमिति । विरूपं विकृतः रूपः आकारो यस्य तत् रूपं स्वरूपं यत् यस्मात् अविनयात् यथा यथावत् मे मम प्राप्तं तत्तवाग्रे तत्त्वतः शंसतः मे मत्तः शृणु ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

---

१ राघवं तमिति गो. पाठः । २ महात्मन इति गो. पाठः । ३ अरयेति गो. पाठः । ४ श्लोकोऽयं गो. नास्ति । ५ पत्नीति गो. पाठः । ६ विवेष्टस इति गो. पाठः । ७ चाभ्यहमिति गो. पाठः ।

एकसप्ततितमः सर्गः ।

कबन्धः सामस्त्येन स्ववृत्तान्तं विनिवेद्य विज्ञानप्रतिबन्धककुत्सितराक्षसदेहदाहे निर्नर्तिते प्राप्तविज्ञानोऽहं ते सीतान्वेषणे साहाय्यं साधय इति रामं प्रतिजानीते ।

पुरा राम महाबाहो महाबलपराक्रमम् । रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम् ॥ १ ॥
यथा सूर्यस्य सोमस्य शक्रस्य च यथा वपुः । सोऽहं रूपमिदं कृत्वा लोकत्रासनं महत् ॥ २ ॥
ऋषीन्वनगतान्राम त्रासयामि ततस्ततः । ततः स्थूलशिरा नाम महर्षिः कोपितो मया ॥ ३ ॥
स चिन्वन्विविधं वन्यं रूपेणानेन धर्षितः । तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ॥ ४ ॥
एतदेवं[2] नृशंसं ते रूपमस्तु विगर्हितम् । स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति॥ ५ ॥
अभिशापकृतस्येति तेनेदं भाषितं वचः । यदा छित्त्वा भुजौ रामस्त्वां दहेद्विजने वने ॥ ६ ॥
तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम् । श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण॥ ७ ॥

गो०टी०–विरूपमिति । विरूपं विषमरूपं यथा येन प्रकारेण प्राप्तं तत्कारणं तत्त्वतस्तव शंसतो मे सकाशाच्छृणु ॥ १८ ॥

अस्मिन् सर्गे अष्टादश श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

१] ति० टी०–अचिन्त्यमचिन्त्यवैभवम् ॥ १ ॥

रा० टी०–कबन्धशंसनाकारं वर्णयन्नाह–पुरेत्यादिभिः । हे राम ! त्रिषु लोकेषु विश्रुतं ख्यातमचिन्त्यं स्वेच्छामयत्वेन चिन्तयितुमशक्यं मम रूपं पुरा आसीत् ॥ १ ॥

गो० टी०–अथ कबन्धः स्ववृत्तान्तकथनपूर्वकं स्वशापमोक्षाय स्वशरीरदहनमर्थयते एकसप्ततितमे–पुरेत्यादि । सार्धश्लोक एकान्वयः । अचिन्त्यम् अचिन्त्यवैभवम् ॥ १ ॥

२] ति० टी०–तदेवाह—यथेति । इदं रूपं रक्षोरूपं वैभवेन कृत्वा ॥ २ ॥

रा० टी०–यथेति । सः प्राप्ताचिन्त्यस्वरूपोऽहं लोकत्रासनं लोकोद्वेगसंपादकं सूर्यादेरिव महद्वपुः कृत्वा इतस्ततः वनतागन् ऋषीन् त्रासयामि अत्रासयम् । सार्धः श्लोक एकान्वयी ॥ २ ॥

गो० टी०–सोऽहमिति । छन्दररूपोऽहं रूपं शरीरं लोकत्रासनं क्रूरं कृत्वा परिगृह्य ततस्ततः तत्र तत्र ऋषीन् त्रासयामि अत्रासयम् ॥ २ ॥

३] ति० टी०–ऋषींस्त्रासयामीत्यन्वयः ॥ ३ ॥

रा० टी०–तत इति । ततः अनेकविधरूपदर्शनात् हेतोः स्थूलशिरा नाम महर्षिः मया कोपितः ॥ ३ ॥

गो० टी०–तत इति । विविधं वन्यं संचिन्वन् स्थूलशिराः धर्षितः अपहृतवन्यः तेन कोपितश्च ॥ ३ ॥

४] ति० टी०–एवमुक्तः ॥ ४ ॥

रा० टी०–कोपनप्रकारमाह—स इति । विविधम् अनेकप्रकारं वन्यं मूलफलादि चिन्वन्स महर्षिः अनेन प्रदर्शिताचिन्त्यस्वस्वरूपेण धर्षितः वञ्चितः मयेति शेषः, घोरशापाभिधायिना घोरशापबोधकवचनशीलेन महर्षिणा प्रेक्ष्य अवलोक्य एवमहमुक्तः ॥ ४ ॥

गो० टी०–तेनेति । एवंविधं मे रूपं प्रेक्ष्य घोरशापाभिधायिना तेन ऋषिणा नृशंसं गर्हितम् एतदेव रूपं ते अस्त्वित्यहमुक्तः ॥ ४ ॥

गो० टी०–स इति । अभिशापशब्देन तन्निमित्तं धर्षणं लक्ष्यते मद्धर्षणकृतस्य शापस्यान्तो भवेदिति स मया याचितः प्रार्थितः इति हेतोः तेन मयैवं याचितेन इदं वक्ष्यमाणं वचो भाषितम् ॥ ५ ॥

५] ति० टी०–एवंशब्दार्थः—एतदेवेति । एतदेव रूपं नृशंसं क्रूरं विगर्हितं चास्त्वित्यवदत् ॥ ५ ॥

रा० टी०–तदुक्तिप्रकारमाह—एतदिति । एतत्ते रूपं नृशंसं क्रूरम् अत एव विगर्हितं जनैर्निन्दितमस्तु । सः दत्तशापः ऋषिः मया याचितः तत्प्रकारमाह–शापस्यान्तः विध्वंसः भवेदिति ॥ ५ ॥

६–७] ति० टी०–अभिशापकृतस्य मत्कर्तृकत्वत्प्रधर्षणे त्वया कृतस्यास्य शापस्यान्तो भवत्विति याचितः । तेनैवं याचितेन । तद्वच आह—यदेति । तदा त्वं विपुलमुत्तमं श्रिया विराजितं रूपं प्राप्स्यस इति तेन भाषितमिति संबन्धः । एवंवृत्तं मां दनोः पुत्रं विद्धीत्यन्वयः । 'श्रिया विराजितं पुत्रं दनु त्वं विद्धि लक्ष्मण' इति पाठान्तरम् तदा श्रियाः श्रीनाम्नो दानवस्य पुत्रं दनुनामानमित्यर्थः ॥६॥७॥

रा० टी०–अभीति । अभिशापकृतस्य स्वापराधद्वारा महाशापप्रवर्तकस्य मम इति समीपे तेन मत्प्रार्थितेन महर्षिणा दं वचो भाषितम् । अर्थं पृथक् । तद्वचनाकारमाह–यदेति । यदा भुजौ तौ बाहू रामश्छित्वा विजने वने त्वां दहेत् तदा विपुलं विशालं त्वं स्वकीयं रूपं स्वरूपं प्राप्स्यसे ॥ ६ ॥

१ पराक्रमेति गो. रा. पाठः । २ एवेति गो. रा पाठः ।

इन्द्रशापादिदं रूपं प्राप्तमेवं[1] रणाजिरे । अहं हि तपसोग्रेण पितामहमतोषयम् ॥ ८ ॥
दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोऽस्पृशत् । दीर्घमायुर्मया प्राप्तं किं मां शक्रः करिष्यति ॥ ९ ॥
इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् । तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा ॥ १० ॥
सक्थिनी च[4] शिरश्चैव शरीरे संप्रवेशितम् । स मया याच्यमानः सन्नानयद्यमसादनम् ॥ ११ ॥
पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् । अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः ॥ १२ ॥
वज्रिणाऽभिहतः कालं सुदीर्घमपि जीवितुम् । स[6] एवमुक्तः शक्रो मे बाहू योजनमायतौ ॥ १३ ॥
तदा चास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत् । सोऽहं भुजाभ्यां दीर्घाभ्यां संक्षिप्यास्मिन्वनेचरान्[7]
सिंहद्वीपिमृगव्याघ्रान्भक्षयामि समन्ततः । स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः ॥ १५ ॥
छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि । अनेन वपुषा तात वनेऽस्मिन्राजसत्तम ॥ १६ ॥

गो० टी०—तदेवाह—यदेति ॥ ६ ॥

रा० टी०—स्वस्वरूपविकृतिवृत्तान्तमुक्त्वा आत्मानं बोधयन्नाह—श्रियेति । श्रिया विराजितं दनोः पुत्रं विद्धि मामिति शेषः ॥ ७ ॥

गो० टी०—तर्हि कबन्धरूपप्राप्तिः केन हेतुनेत्यत्राह—श्रियेति । मामिति शेषः, एवं एवंविधं रणाजिरे रणाङ्गणे ॥ ७ ॥

८] ति० टी०—नन्वेवं कुत्सितरूपत्वे शापेऽपि कथं कबन्धरूपताप्राप्तिस्तत्राह—इन्द्रेति । तच्छापबीजमाह—अहमिति । ऋषिशापतो घोररूपप्राप्त्यनन्तरमुग्रेण तपसा पितामहमतोषयं स्वकुलारातीन्द्रादिभयेनेति शेषः ॥ ८ ॥

रा० टी०—नन्वेवं शापहेतुककुत्सितरूपप्राप्तावपि कबन्धरूपताप्राप्तिः कथमित्यत आह—इन्द्रेति । इदं कबन्धाकृतिरूपं रणाजिरे संग्रामाङ्गणे इन्द्रशापात् प्राप्तं मयेति शेषः, अर्धं पृथक् । इन्द्रशापे कारणं बोधयितुमाह—अहमिति । उग्रेण तपसा पितामहं ब्रह्माणम् अतोषयम् अत एव ब्रह्मा मे मह्यं दीर्घायुः प्रादात् ततस्तस्माद्धेतोः विभ्रमो गर्वः मामस्पृशत् प्राप्नोत् । अर्धद्वयमेकान्वयि ॥ ८ ॥

गो० टी०—इन्द्रेण योद्धुं तव कुतः सामर्थ्यं तत्राह—अहं हीति । ऋषिदत्तघोराकारप्राप्त्यनन्तरम् उग्रेण तपसा पितामहमतोषयं स्वकुलशत्रोरिन्द्रस्य जयायेत्यर्थः । विभ्रमः अज्ञानम् ॥ ८ ॥

९] ति० टी०—विभ्रमो गर्वः । तमेवाह—दीर्घमिति ॥ ९ ॥

रा० टी०—गर्वस्वरूपं बोधयन्नाह—दीर्घमिति । मया दीर्घमायुः प्राप्तमतः शक्रः मे किं करिष्यति इत्येवं बुद्धिं निश्चयमास्थाय रणे संग्रामे शक्रमधर्षयम् ॥ ९ ॥

गो० टी०—तदेवाह—दीर्घमिति ॥ ९ ॥

१०] ति० टी०—शतपर्वणा शतधारेण ॥ १० ॥

रा० टी०—तस्येति । तस्य इन्द्रस्य बाहुप्रमुक्तेन बाहुना प्रक्षिप्तेन शतपर्वणा शतधारेण वज्रेण सक्थिनी तदुपलक्षितं नाभ्यधोभागं शिरश्च शरीरे संप्रवेशितम् ॥ १० ॥

गो० टी०—तस्येति । शतपर्वणा शतधारेण सक्थिनी पृष्ठास्थिफलके शरीरे मध्यदेहे उदरभागे सक्थ्नोः प्रवेशनम् उरोभागे मूर्ध्नः प्रवेशनम् संप्रवेशितमित्यत्र "नपुंसकमनपुंसकेन—" इति नपुंसकपरिशेषत्वम् एकवद्भावश्च ॥ १० ॥

११] ति० टी०—सक्थिनी नाभ्यधोभागोपलक्षणम् । शरीरे शरीरमध्यस्थ उदरभागे । एवंभूतेनोर्ध्वाधरव्यवहाररहितेन मया मरणं याच्यमानोऽपि तन्नाकरोत् ॥ ११ ॥

रा० टी०—स इति । स इन्द्रः मया याच्यमानः ब्रह्मदत्ताक्षयोऽहम् इत्यादिना प्रार्थ्यमानः सन् यमसादनं मृत्युगृहं नानयत्, तत्पितामहवचः सत्यमस्तु इत्येवमब्रवीच्च ॥ ११ ॥

गो० टी०—स इति । याच्यमानः मारयेति प्रार्थ्यमानः यमसादनं नानयत् मृतिं न प्रापितवान् । कुत इत्यत्राह—पितामहेति । तत्पूर्वोक्तं दीर्घायुर्विषयकं पितामहवचः सत्यमस्त्विति मम मह्यम् अब्रवीत् न त्वां मारयामीत्यब्रवीदित्यर्थः ॥ ११ ॥

१२] ति० टी०—किमिति नाकरोत्तत्राह—पितामहेति । तद्वचो दीर्घायुर्दानरूपम् ॥ १२ ॥

रा० टी०—स्वकर्तृकप्रार्थनानन्तरमाह—अनाहार इति । वज्रिणा त्वया अभिहतः अत एव भग्नसक्थिशिरोमुखोऽहमनाहारः सन् सुदीर्घं कालं जीवितुमपि कथं शक्तो भविष्यामीति शेषः ॥ १२ ॥

गो० टी०—अनाहार इत्यादि । श्लोकद्वयमेकान्वयम् । अनाहारः सन् सुदीर्घं कालं कथं जीवितुं शक्तः भग्नसक्थिशिरोमुखत्वमनाहारत्वे हेतुः । बाहू प्रादात् आस्यमकल्पयत् ॥ १२ ॥ १३ ॥

१३] ति० टी०—वज्रिणा त्वयाऽभिहतो जीवितुं कथं शक्त इत्यन्वयः । एवमुक्तः अनाहारस्याक्रियस्य कथं जीवनमित्युक्तः ॥ १३ ॥

रा० टी०—स इति । एवमुक्तः स शक्रः योजनमायतौ बाहू तीक्ष्णदंष्ट्राविशिष्टं कुक्षौ कुक्षिप्रदेशे आस्यं मुखं च अकल्पयत् ॥ १३ ॥

१४-१६] ति० टी०—वनेचरान्वने संचारवतः ॥ १४-१६ ॥

---

१ कोपादिति गो. पाठः । २ एवेति रा. पाठः । ३ मे इति गो. रा. पाठः । ४ चैव मूर्ध्नि चेति गो. पाठः । ५ वज्रेणेति गो. पाठः । ६ एवमुक्तस्तु मे शक्र इति गो. पाठः । ७ प्रादादास्यमिति गो. पाठः । ८ संकृष्येति गो. पाठः । ९ रामेति गो. पाठः ।

यद्यत्पश्यामि सर्वस्य ग्रहणं साधु रोचये । अवश्यं ग्रहणं रामो मन्येऽहं समुपैष्यति ॥ १७ ॥
इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः । स त्वं रामोऽसि भद्रं ते नाहमन्येन राघव ॥ १८ ॥
शक्यो हन्तुं यथा तत्त्वमेवमुक्तं महर्षिणा । अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ ॥ १९ ॥
मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना । एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः ॥ २० ॥
इदं जगाद वचनं लक्ष्मणस्य च पश्यतः । रावणेन हृता भार्या सीता मम यशस्विनी ॥ २१ ॥
निष्क्रान्तस्य जनस्थानात्सह भ्रात्रा यथासुखम् । नाममात्रं तु जानामि न रूपं तस्य रक्षसः ॥ २२ ॥
निवासं वा प्रभावं वा वयं तस्य न विद्महे । शोकार्तानामनाथानामेवं विपरिधावताम् ॥ २३ ॥

रा० टी०–स इति । सः प्राप्तभुजादिरहं सिंहादीन् वनेचरान्संक्षिप्य मुखे प्रक्षिप्य भक्षयामि ॥ १४ ॥

गो० टी०–सोऽहमिति । संकृष्य आकृष्य ॥ १४ ॥

रा० टी०–स इति । यदा रामः ते बाहू छेत्स्यते तदा त्वं स्वर्गं गमिष्यसि इति स इन्द्रो मामब्रवीत् ॥ १५ ॥

गो० टी०–स त्विति । स मामित्यनेन बलात्कारो लक्ष्यते ॥ १५ ॥

रा० टी०–अनेनेति । हे राजसत्तम ! अस्मिन् वने यत्यत्पश्यामि तस्य तस्य सर्वस्य अनेन वपुषा ग्रहणं साधु यथा स्यात्तथा रोचये । तत्र हेतुः–रामो ग्रहणमवश्यं समुपैष्यति प्राप्स्यति इत्यहं मन्ये इन्द्रवचनान्निश्चिनोमि अत एव इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः देहत्यागोद्देश्यकृतप्रयत्नोऽहमस्मीति शेषः । अर्धचतुष्टयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०–अनेनेति । अनेन वपुषा उपलक्षितोऽहं यत्यत्पश्यामि तस्य ग्रहणं रोचयेत न त्वभक्ष्यबुद्धया किंचित्त्यजामीत्यर्थः ॥ १६ ॥

१७] ति० टी०–सर्वस्य ग्रहणं साधुरोचये न किंचिदप्यभक्ष्यबुद्धया त्यजामीत्यर्थः । ऋषेरिन्द्रस्य च वाक्यविश्वासादवश्यं रामो मम हस्ते ग्रहणमेष्यतीति मन्ये मन्यमानस्तिष्ठामि ॥ १७ ॥

गो० टी०–अवश्यमिति । महर्षेर्वचविश्वासात् अवश्यं रामो ग्रहणं समुपैष्यतीति मन्ये इमां पुरस्कृत्य देहन्यासे कृतश्रमो भवामि विकृतदेहत्यागे कृतोद्योगो भवामि देहत्यागे कृतबुद्धितया रामोऽवश्यं ग्रहणमुपैष्यतीति सर्वग्रहणं रोचय इति भावः ॥ १७ ॥

१८] ति० टी०–मम देहन्यासे देहत्यागे कृतश्रमः कृतयत्नो रामो मम हस्ते ग्रहणमेष्यतीतीमां बुद्धिं पुरस्कृत्य सर्वस्य ग्रहणं साधु रोचये । अयमेव रामो भवेदिति बुद्ध्याकिमपि न त्यजामीत्याशयः ॥ १८ ॥

रा० टी०–स इति । यतो महर्षिणा यथातत्त्वमुक्तमतः अन्येन हन्तुमहं न शक्यः अतः सः महर्षिणोक्तो राम एव त्वमतस्ते भद्रम् ॥ १८ ॥

गो० टी०–स त्वमिति । रामत्वे युक्तिमाह–नाहमिति । एवं यथातत्त्वं यथार्थमेव महर्षिणोक्तम् ॥ १८ ॥

१९] ति० टी०–सर्वथा दाहोत्तरं तव बुद्धिं मित्रं चोपदेक्ष्यामि ॥ १९ ॥

रा० टी०–अहमिति । हे नरर्षभ ! युवाभ्यामग्निना संस्कृतोऽहं मतिसाचिव्यं भवत्कार्यसाधनाय बुद्ध्या साहाय्यं करिष्यामि । तत्स्वरूपमाह–तव कार्यसाधकमिति शेषः, मित्रं युवाभ्यामुपदेक्ष्यामि ॥ १९ ॥

गो० टी०–अहमिति । मतिसाचिव्यं बुद्धिसाहाय्यं करिष्यामि किंच तद्विषये मित्रं चोपदेक्ष्यामि युवाभ्यामग्निना संस्कृतश्चेद्भवेयम् ॥ १९ ॥

२०] ति० टी०–दनुना दनुनाम्ना ॥ २० ॥

रा० टी०–एवमिति । अनेन दनुना एवमुक्तो राघवः पश्यतो लक्ष्मणस्य समीपे इदं जगाद ॥ २० ॥

गो० टी०–एवमिति । दनुना दनुवंश्येन औपचारिकस्तद्वंश्ये तच्छब्दः ॥ २० ॥

२१] ति० टी०–वह्निसंस्कारं करिष्यामि मम साहाय्यं कुर्वित्याशयेनाह–इदमिति ॥ २१ ॥

रा० टी०–तद्वचनाकारमाह–रावणेनेति । भ्रात्रा सह जनस्थानात् यथासुखं निष्क्रान्तस्य मम भार्या रावणेन हृता ॥ २१ ॥

गो० टी०–रावणेनेति । जनस्थानाद्यथासुखं निष्क्रान्तस्य निर्गतस्य मे भार्या हृता ॥ २१ ॥

२२–२३] ति० टी०–यथासुखं हृतेत्यन्वयः । नाममात्रम् आप्तस्य जटायोर्वाक्यादिति भावः ॥ २२ ॥ २३ ॥

रा० टी०–नन्वु हर्तारं जानास्येव पुनः किं पृच्छसीत्यत आह–नामेति । तस्य अपहर्तुः रक्षसः नाममात्रमेव जानामि तस्य निवासादिकं न विद्महे ॥ २२ ॥

गो० टी०–नामेति । नाममात्रं तु जानामि आप्तवाक्यादिति शेषः । न विद्महे अहं मत्पुरीजनाश्चेत्यर्थः ॥ २२ ॥

रा० टी०–शोकार्तानामिति । शोकार्तानां शोकपीडितानामनाथानाम् अपूर्णमनोरथानाम् अत एवमनेन प्रकारेण विपरिधावताम् अस्माकमुपकारण हेतुना सदृशं योग्यं कारुण्यं कृपां कर्तुं वर्तताम् ॥ २३ ॥

[1] तपश्चरत इति गो. पाठः ।

कारुण्यं सदृशं कर्तुमुपकारेण वर्तताम् । काष्ठान्यानीय भग्नानि काले शुष्काणि कुञ्जरैः २४ ॥
धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते । स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ॥ २५ ॥
कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः । एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ॥ २६ ॥
प्रोवाच कुशलो वक्ता वक्तारमपि राघवम् । दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् २७ ॥
यस्तां वेक्ष्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः । योऽभिजानाति तद्रक्षस्तद्वक्ष्ये राम तत्परम् ॥ २८ ॥
अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो । राक्षसं तु महावीर्यं सीता येन हृता तव ॥ २९ ॥
विज्ञानं हि मयेदृष्टं शापदोषेण राघव । स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ॥ ३० ॥
किं तु यावन्न यात्यस्तं सविता श्रान्तवाहनः । तावन्मामवटे क्षिप्त्वा दह राम यथाविधि ॥ ३१ ॥
दग्धस्त्वयाऽहमवटे न्यायेन रघुनन्दन । वक्ष्यामि तं महावीर यस्तं वेत्स्यति राक्षसम् ३२ ॥

गो० टी०–शोकार्तानामिति । उपकारे परोपकारे वर्ततां प्रवर्तमानानाम् अस्माकं विषये कारुण्यं कर्तुं सदृशं युक्तम् ॥ २३ ॥

२४] ति० टी०–उपकारेण परोपकारेण वर्ततामस्माकं सदृशमुचितं कारुण्यं सीताहर्तृदेशादिकथनरूपमुपकारं कर्तुमर्हसि । दाहविषये त्वया चिन्ता न कार्येत्याह—काष्ठानीति ॥ २४ ॥

रा० टी०–काष्ठानीति । काले समयान्तरे द्रुमैः भग्नानि अत एव शुष्काणि काष्ठान्यानीय कल्पिते सद्यः कृते श्वभ्रे अवटे त्वां धक्ष्यामः "अस्मदो द्वयोश्च" इति बहुवचनम् ॥ २४ ॥

गो० टी०–उपकारमेवाह–काष्ठानीति । कल्पिते सद्ये श्वभ्रे अवटे ॥ २४ ॥

२५] ति० टी०–कल्पिते इदैव कृते । येन कर्त्रा । यत्र देशे ॥ २५ ॥

रा० टी०–स इति । सः प्राप्तसंस्कारस्त्वं यदि तत्त्वतो जानासि तर्हि अत्यर्थमत्यन्तं कल्याणं त्वं कुरु । कल्याणस्वरूपमाह–येन सीता हृता तं यत्रास्ति तं च सीतां सीताचेष्टां च समाचक्ष्व ब्रूहि ॥ २५ ॥

गो० टी०–स त्वमिति । कल्याणं तत्त्वकथनरूपम् ॥ २५ ॥

२६] ति० टी०–कल्याणं तत्त्वाख्यानरूपम् । दाह एव मे दिव्यज्ञानसाधनं तत्कुरु ततः परं सर्वं वक्ष्यामीत्याह—एवमिति ॥ २६ ॥

रा० टी०–एवमिति । रामेण एवमुक्तो दनुः वक्तारं राघवं प्रोवाच ॥ २६ ॥

गो० टी०–एवमिति । वक्तारमपि राघवं वक्तुं कुशलः ॥ २६ ॥

२७] ति० टी०–कुशलो वक्ता वक्तृताचातुर्यवान् । वक्तारं प्रशस्तवक्तारम् ॥ २७ ॥

रा० टी०–तद्वचनाकारमाह–दिव्यमिति । मे दिव्यं ज्ञानं नास्ति अतो मैथिलीं नाभिजानामि अतो यस्तां मैथिलीं वक्ष्यते तं दग्धः अत एव स्वं रूपमास्थितोऽहं वक्ष्ये ॥ २७ ॥

गो० टी०–दिव्यमिति । मैथिलीं तदपहर्तारं चेति द्रष्टव्यम् । तर्हि किंवा मतिसाचिव्यं करिष्यसीत्यत्राह–य इति । तर्हि तं वा ब्रूहित्यत्राह–दग्ध इति ॥ २७ ॥

२८–२९] ति० टी०–यस्ताम् सखेति शेषः । तत्परं दाहात्परम् ॥ २८ ॥ २९ ॥

रा० टी०–नन्विदानीमेव तं बोधयेत्यत आह—य इति । येन तव सीता हृता तं राक्षसं विज्ञातुं विशेषतो बोधयितुम् अदग्धस्य मे शक्तिर्नास्ति तत् तस्मात् हेतोः तत्परं दाहोत्तरकाले तद्रक्षः योऽभिजानाति तमहं वक्ष्ये । योऽभिजानाति तं वक्ष्ये इत्येनेन रावणभीतिः सुग्रीवद्वारैव सीताप्राप्तिरेवेति निश्चयः सूचितः ॥ २८ ॥

गो० टी०–इदमेव व्यतिरेकमुखेनाह–अदग्धस्येति ॥ २८ ॥

३०–३२] ति० टी०–विज्ञानमतीन्द्रियविषयम् । स्वकृतेनानुचितकर्मणा ॥ ३०–३२ ॥

रा० टी०–ज्ञानाभावे हेतुमाह–विज्ञानमिति । हे राघव ! स्वकृतेन स्वसंपादितेन शापदोषेण महद्विज्ञानं भ्रष्टं लोकविगर्हितं रूपं च प्राप्तम् ॥ २९ ॥

गो० टी०–कुत इत्यत्राह–विज्ञानं हीति । विज्ञानम् अतीन्द्रियविषयकं स्वकृतेन पापेनेति शेषः ॥ २९ ॥

रा० टी०–स्वेप्सितं प्रार्थयते–किमिति । यावत् सविता सूर्योऽस्तं न याति तावत् मां अवटे क्षिप्त्वा यथाविधि दह । किं त्विति वृत्तान्तरे ॥ ३० ॥

गो० टी०–किं त्विति । अवटे श्वभ्रे यथाविधि यथा सम्यक् दग्धं भवति तथेत्यर्थः ॥ ३० ॥

रा० टी०–तत्प्रयोजनमाह–दग्ध इति । न्यायेन विधिना दग्धोऽहं यस्तं राक्षसं वेत्स्यति वेत्ति तं वक्ष्यामि ॥ ३१ ॥

गो० टी०–दग्ध इति । न्यायेन सम्यक्त्वेन ॥ ३१ ॥

---

१ उपकारे चेति गो. पाठः । २ आदावेति गो. पाठः । ३ वक्तुमिति गो. पाठः । ४ शास्त्यनीति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ तमिति गो. पाठः । ७ ममेति गो. पाठः । ८ अहं वीरेति गो. पाठः । ९ शास्त्यतीति गो. पाठः ।

तेन सख्यं च कर्तव्यं न्याय्यवृत्तेन राघव । कल्पयिष्यति ते [2]वीर साहाय्यं [3]लघुविक्रमः॥ ३३ ॥
नहि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव । सर्वान्परिवृतो[4]लोकान्पुरा [5]वै कारणान्तरे ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ।

रामः कबन्धमवटे चितायामारोप्य ददाह ।

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ । गिरिप्रदरमासाद्य पावकं विससर्जतुः ॥ १ ॥
लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समन्ततः । चितामादीपयामास सा प्रजज्वाल सर्वतः ॥ २ ॥
तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत् । मेदसा पच्यमानस्य मन्दं [6]दहत पावकः ॥ ३ ॥
स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः । अरजे वाससी बिभ्रन्माल्यं [7]दिव्यं महाबलः॥ ४ ॥
ततश्चिताया वेगेन भास्वरो [8]विरजाम्बरः । उत्पपाताशु संहृष्टः सर्वप्रत्यङ्गभूषणः ॥ ५ ॥

३३] ति० टी०–तेन यो राक्षसं ज्ञास्यति तेन न्याय्यवृत्तेन नीतिमच्चरित्रेण ॥ ३३ ॥

रा० टी०–नन्वु त्वया बोधितोऽपि सः मह्यं कथं बोधयिष्यतीत्यत आह–तेनेति । न्यायवृत्तेन न्यायाचरणेन त्वया तेन श्रवणविज्ञात्रा सह सख्यं कर्तव्यम् अत एव लघुविक्रमः शीघ्रकार्यकारी ते साहायं कल्पयिष्यति ॥ ३२ ॥

गो० टी०–तेनेति । न्यायवृत्तेन नीतिमच्चरित्रेण ॥ ३२ ॥

३४] ति० टी०–कारणान्तरे कस्मिंश्चिन्निमित्ते जाते सतीत्यर्थः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

रा० टी०–साहाय्यकरणे तयोग्यतामाह–नहीति । कारणान्तरे कस्मिंश्चित्कारणे यतः सर्वान् लोकान् परिवृत्तः परिभ्रान्तः अतः त्रिषु लोकेषु तस्याविज्ञानं नास्ति ॥३३॥३४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

गो० टी०–नहीति । कारणान्तरे भ्रातृविरोधरूपनिमित्तान्तरे अयं रावणमेव न जानाति सुग्रीवं तु जानाति किंतु मह्यम न कथितवान् दाहात्पूर्वं कथने कुत्सितशरीरदहने रामो वैमनस्यं कुर्यादिति ॥ ३३ ॥

अस्मिन् सर्गे सार्धत्रयस्त्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

१–२] ति० टी०–प्रदरं गर्तमासाद्य कबन्धं प्रापय्य सर्वतः काष्ठानि दत्त्वा तत्राग्निं ददतुः॥ १ ॥ २ ॥

रा० टी०–कबन्धशरीरदाहमाह–एवमित्यादिभिः। कबन्धेन एवमुक्तौ तौ रामलक्ष्मणौ गिरिप्रदरं गिरिगर्तमासाद्य प्राप्य तत्र चितां निर्मायेति कबन्धशरीरं संस्थाप्येति च शेषः, पावकं विससर्जतुः विससृजतुः ॥ १ ॥

गो० टी०–अथ संस्कृतः कबन्धः स्वरूपं प्रत्यापन्नो मित्रमुपदिशति द्विसप्ततितमे–एवमुक्तावित्यादि । प्रदरं श्वभ्रम् आसाद्य प्रापय्य कबन्धमिति शेषः ॥ १ ॥

रा० टी०–लक्ष्मण इति । लक्ष्मणस्तु ज्वलिताभिः महोल्काभिः समन्ततः चितामादीपयामास अत एव सा चिता सर्वतः प्रजज्वाल ॥ २ ॥

गो० टी०–लक्ष्मणस्त्विति । महोल्काभिः निर्गतज्वालकाष्ठैः ॥ २ ॥

३] ति० टी०–मेदसा पूर्णस्येति शेषः । मेदःपूर्णत्वान्मन्ददाहः दहतादहत् ॥ ३ ॥

रा० टी०–तदिति । पच्यमानस्य दह्यमानस्य मेदसा मांसेन पूर्णमिति शेषः, अत एव घृतपिण्डोपमं तच्छरीरं पावको मन्दं दहति ॥ ३ ॥

गो० टी०–तदिति । मेदसा मांसेन पच्यमानस्य अभिवृद्धस्य कबन्धस्य शरीरम् ॥ ३ ॥

४] ति० टी०–अरजे निर्मले ॥ ४ ॥

रा० टी०–स इति । स कबन्धः चितामाशु विधूय प्रकम्प्य अजरे जीर्णतारहिते नवीने इत्यर्थः, वाससी दिव्यां मालां च बिभ्रत्सन् विधूमः धूमरहितः अग्निरिव उत्थितः ॥ ४ ॥

गो० टी०–स इति । अरजे निर्मले अदग्नत्वमार्षम्॥४॥

५] ति० टी०–चितायाः उत्पपात । भास्वरः कान्तिमान् । सर्वेषु प्रत्यङ्गेषु करचरणादिषु भूषणानि यस्य ॥ ५ ॥

---

१ न्यायेति गो. पाठः । २ प्रीत इति गो. पाठः । ३ लघुविक्रमः इति गो पाठः । ४ सूत इति गो. पाठः । ५ इलाविनि गो. पाठः । ६ दहतीनि गो. रा. पाठः । ७ मालां दिव्यामिति गो. रा. पाठः । ८ विमलेति गो. पाठः ।

विमाने भास्करे तिष्ठन्हंसयुक्ते यशस्करे । प्रभया च महातेजा दिशो दश विराजयन्॥ ६ ॥
सोऽन्तरिक्षगतो वाक्यं कबन्धो राममब्रवीत् । शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि॥ ७ ॥
राम षडभ्युक्तयो लोके याभिः सर्वं विमृश्यते । परिमृष्टो दशान्तेन दशाभागेन सेव्यते ॥ ८ ॥
दशाभागगतो हीनस्त्वं हि राम सलक्ष्मणः । यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम् ॥ ९ ॥
तदवश्यं त्वया कार्यः स सुहृत्सुहृदां वर । अकृत्वा नहि ते सिद्धिमहं पश्यामि चिन्तयन्॥ १० ॥
श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः । भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना॥ ११ ॥
ऋष्यमूके गिरिवरे पम्पापर्यन्तशोभिते । निवसत्यात्मवान्वीरश्चतुर्भिः सह वानरैः ॥ १२ ॥

रा० टी०–तत इति । विरजाम्बरः नवीनाम्बरवान् भास्वरः अतिप्रकाशवान् सर्वप्रत्यङ्गभूषणः सर्वेषु प्रत्यङ्गेषु करादिषु भूषणानि यस्य सः अत एव संहृष्टो महातेजाः कबन्धः भास्वरे विमाने तिष्ठन् प्रभया दश दिशो विराजयंश्च सन् तत. तस्याश्रितायां वेगेन उत्पपात । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–तत इति । चितायां उत्पपात सर्वेषु प्रत्यङ्गेष्वङ्गुल्यादिष्वपि भूषणानि यस्य स तथा ॥ ५ ॥

६] ति० टी०–हंसयुक्ते रामकृतसंस्कारप्रभावेण पूर्वतपःप्रभावेण चैवंभूतं विमानं प्राप्तः ॥ ६ ॥

गो० टी०–विमान इति । हंसयुक्त इत्यनेन रामदग्धतया ब्रह्मलोकप्राप्तिः सूच्यते । विराजयन् अभूदिति शेषः ॥६॥

७] ति०टी०–तत्त्वेन परमार्थत उच्यमानमिति शेषः ॥ ७ ॥

रा० टी०–स इति । अन्तरिक्षगतः स कबन्धः हे राघव! यथा सीतामवाप्स्यसि तथा तत्त्वेन शृणु इति राममब्रवीत् ॥७॥

गो० टी०–स इति । तत्त्वेन परमार्थतः शृण्विति वाक्यमब्रवीदिति संबन्धः ॥ ७ ॥

८] ति० टी०–अथ प्रतिज्ञातमुपायमाह–राम षडिति । षडभ्युक्तयः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्या लोके सन्ति । याभिर्युक्तिभिः सर्वं वस्तुजातं राज्ञा विमृश्यते विमृश्य प्राप्यते । तत्र दशान्तेन दुर्दशापरिपाककालेन यः परिमृष्टः स दशाभागेन दशाभागं दुर्दशापरिपाकावस्थां प्राप्तेन सेव्यत इति नीतिः । तस्मात्त्वयान्त्य उपायः समाश्रयः कार्य इत्यर्थः । 'परिस्पृष्टः' इति पाठे दशान्तेन दुर्दशापरिपाककालेनार्थाद्भक्षित इत्यर्थः ॥ ८ ॥

८।० टी०–तद्वचनाकारमाह–रामेत्यादिभिः । हे राम ! याभिर्युक्तिभिः सर्वं कृत्यं लोके विमृश्यते विज्ञायते ताः युक्तयः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षट् सन्तीति शेषः, एतेन राजाभिस्ताः अवश्यं कर्तव्या इति सूचितम् । अर्धं पृथक् । त्वयि दुःखप्राप्तिर्न संभवतीति बोधयन्नाह–परिमृष्ट इति । दशा सर्वदंशकेन अन्तेन कालेन परिमृष्टः वशं प्राप्तः पुरुषः दशाभागेन दशांशेन दुर्दशयेत्यर्थः, सेव्यते प्राप्यते दशान्तेन कालेन हीनस्तद्वशत्वानाक्रान्तोऽपि स लक्ष्मणस्त्वं दशाभागगतः भार्यापहरणेन कुदशां प्राप्तः इव । हिरिवार्थे आश्चर्यमेतदिति तात्पर्यम् । अर्धद्वयमेकान्वयि ॥ ८ ॥

गो० टी०–रामेति । हे राम ! लोके षडभ्युक्तयः सन्ति युक्तयः उपायाः ते च सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः । याभिर्युक्तिभिः सत्त्वं[1] राज्ञां कृत्यं विमृश्यते ताः सन्तीति ॥ ८ ॥

गो० टी०–ततः किमित्यपेक्षायां संधिविषयं दर्शयति–परिमृष्ट इति । दशा नाम दौस्थ्यरूपावस्था तस्या अन्तः परिपाकः तेन परिमृष्टः संस्पृष्टः पुरुषः दशाभागेन दशायाः भागः परिपाकलक्षणांशो यस्य तेन सेव्यते संधीयते । अस्तु प्रकृते किमायातं तत्राह–दशाभागगत इति । हे राम ! सलक्ष्मणस्त्वं दशाभागगतः दुर्दशापन्नः अत एव हीनश्च कृतः यत्कृते येन कारणेन दारप्रधर्षणं नाम व्यसनं प्राप्तं तेन त्वं दशाभागगतः ॥ ९ ॥

९] ति० टी०–नन्वहं दशाभागं प्राप्त इति कथं त्वया निर्णीतं तत्राह–दशाभागगत इति । यतस्त्वं सलक्ष्मण एव हीनः राज्यादिनेत्यर्थः । यत्कृते यद्दशाभागनिमित्तं त्वया दारप्रधर्षणं प्राप्तं तेन त्वं ज्ञायते दुर्दशाभोगकालं प्राप्त इति ॥९॥

रा० टी०–यदिति । यद् यस्माद् दारप्रधर्षणं दारापहरणमत एव व्यसनं दुःखं त्वया प्राप्तं तद् तस्य कृते छेदाय सः केनचिद्धेतुना दुर्दशां प्राप्तः सुहृन्मित्रं त्वया कार्यः करणीयः हि यतः अकृत्वा सुहृदमिति शेषः, ते सिद्धिं चिन्तयन्नहं न पश्यामि ॥ ९ ॥ १० ॥

१०] ति० टी०–यदेवमतस्त्वया स सुहृद्दशाभागप्राप्तः सुहृत्कार्यः । तत्करणावश्यकत्वे हेतुमाह–अकृत्वेति ॥ १० ॥

गो० टी०–ततोऽपि किमित्यत्राह–तदिति । दशाभागेन त्वया सः दशाभागगतः कश्चित् सुहृत् कार्यः अवश्यमित्यत्र हेतुमाह–अकृत्वेति । सुहृदम् अकृत्वा असंपाद्य सिद्धिं सीतालाभं चिन्तयन्नपि न पश्यामि ॥ १० ॥

११] ति० टी०–तादृशः सुहृत्क इत्यत आह–श्रूयतामिति ॥ ११ ॥

१२] ति० टी०–पम्पापर्यन्तेन पम्पाप्रदेशेन शोभिते । चतुर्भिः मन्त्रिभिरिति शेषः ॥ १२ ॥

रा० टी०–नन्वं तादृशः कोऽस्तीत्यत आह–श्रूयतामिति ।

१ सत्त्वमिति गो. पाठः ।

वानरेन्द्रो महावीर्यस्तेजोवानमितप्रभः । सत्यसंधो विनीतश्च धृतिमान्मतिमान्महान् ॥ १३ ॥
दक्षः प्रगल्भो द्युतिमान्महानलपराक्रमः । भ्रात्रा विवासितो वीर राज्यहेतोर्महात्मना ॥ १४ ॥
स ते सहायो मित्रं च सीतायाः परिमार्गणे । भविष्यति हि ते राम मा च शोके मनः कृथाः ॥ १५ ॥
भवितव्यं हि तच्चापि न तच्छक्यमिहान्यथा । कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः ॥ १६ ॥
गच्छ शीघ्रमितो वीर सुग्रीवं तं महाबलम् । नयस्यं तं कुरु क्षिप्रमितो गत्वाऽद्य राघव ॥ १७ ॥
अद्रोहाय समागम्य दीप्यमाने विभावसौ । नै च ते सोऽवमन्तव्यः सुग्रीवो वानराधिपः ॥ १८ ॥
कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान् । शक्तौ ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितम् ॥ १९ ॥
कृतार्थो वाऽकृतार्थो वा तव कृत्यं करिष्यति । स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः ॥ २० ॥

हे राम ! अहं वक्ष्यामि तादृशमिति शेषः, अतस्त्वया श्रूयताम्। तद्वचनाकारमाह—शक्रसूनुना कुद्धेन भ्रात्रा वालिना सुग्रीवो नाम वानरो निरस्तः अत एव पम्पापर्यन्तशोभिते पम्पाप्रदेशेन विराजिते गिरिवरे ऋष्यमूके चतुर्भिर्वानरैः सह निवसति ॥ ११ ॥ १२ ॥

गो० टी०—स पुनः क इत्यपेक्षायामाह—श्रूयतामित्यादि। श्लोकद्वयमेकान्वयम् ॥ ११ ॥ १२ ॥

१३] ति० टी०—तेजोवान्प्रतापी । अमितप्रभोऽपरिच्छिन्नकान्तिः ॥ १३ ॥

१४ ति० टी०—द्युतिमान्। तरुणानां वास्तवस्त्वबोधनायोक्तस्यापि कस्यचित्पुनः कथनम् ॥ १४ ॥

रा० टी०—निरसनप्रकारमाह—वानरेन्द्र इति । महावीर्यत्वादिविशिष्टः वानरेन्द्रः सुग्रीवः राज्यहेतोः भ्रात्रा विवासितः ततस्तेजस्वी प्रतापवान् अमितप्रभः अनियतबुद्धिविशेषविशिष्टः । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०—स च त्वत्सदृशगुणकत्वादशाभागगतत्वाच्च ते मित्रतामर्हतीत्याह त्रिभिः—वानरेन्द्र इति । तेजोवान् तेजस्वी द्युतिमान् कान्तिमान् ॥ १३-१५ ॥

१५] ति० टी०—हे राम! ते भविष्यति। हिर्निश्चये ॥ १५ ॥

रा० टी०—स इति । हे राम ! सुग्रीवस्ते मित्रम् अत एव सीतायाः परिमार्गणे अन्वेषणे सहायश्च भविष्यति अतः शोके मनो मा कृथाः ॥ १५ ॥

१६] ति० टी०—यद्भवितव्यं राज्यभ्रंशदारापहारादिदुःखं तदन्यथा कर्तुं केनापि न शक्यमिति । अतः शोकेन मनो मा कृथा इति शेषः । ते इत्यादीनां पुनरुक्तिस्तु रामदुःखेन तस्यापि दुःखितचित्तत्वान्न दोषाय ॥ १६ ॥

रा० टी०—इदानीं राक्षसविध्वंससमयः संप्राप्त इति बोधयन्नाह—भवितव्यमिति । हे इक्ष्वाकुशार्दूल ! यद्भवितव्यं तदन्यथा कर्तुं न शक्यं जनैरिति शेषः। तत्र हेतुः—हि यतः कालः दुरतिक्रमः अतिक्रमितुमशक्यः ॥ १६ ॥

गो० टी०—शोकापनोदनाय लोकन्यायमाह—भवितव्यमिति श्लोकेन ॥ १६ ॥

१७] ति० टी०—तं गच्छन्तं वयस्यं कुर्वित्यन्वयः ॥ १७ ॥

रा० टी०—गच्छेति । हे राघव ! महाबलं तं सुग्रीवमितः शीघ्रं गच्छ तं सुग्रीवं गत्वा अद्रोहाय द्रोहानुत्पत्तये दीप्यमाने विभावसौ वह्निसमीपं समागम्य प्राप्य वयस्यं सखायं कुरु अत एव वानराधिपः कृतज्ञत्वादिविशिष्टः स कृतस्वयः सुग्रीवस्ते त्वया नावमन्तव्यः । सार्धश्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०—गच्छेत्यादिसार्धश्लोक एकान्वयः। इतो गत्वेत्यनुवादः । समागम्य सुग्रीवेण संयुज्य अद्रोहाय परस्परद्रोहाभावाय विभावसौ अग्नौ दीप्यमाने सति अग्निसाक्षिकमित्यर्थः तं सुग्रीवं वयस्यं कुरु ॥ १७ ॥

१८] ति० टी०—परस्परं द्रोहपरिहारायाग्निसाक्षिकं सख्यं कार्यमित्याह—अद्रोहायेति ॥ १८ ॥

गो० टी०—स चेति । स च सुग्रीवः ते त्वया नावमन्तव्यः अयं तिर्यक् किमनेनेति तस्मिन्नावमतिः कार्या । तत्र हेतुमाह—कृतज्ञ इति ॥ १८ ॥

१९] ति० टी०—तस्य तिर्यक्त्वात्तदवमतिः कुतो न कार्येत्यत्र हेतुमाह—कृतज्ञ इति । नन्वसौ किमर्थं मया सह मैत्रीं कुर्यादत आह—सहायार्थीति । नन्वावाभ्यामशक्ताभ्यां कस्तस्य सहायार्थ इत्यत आह—शक्तौ हीति । तस्य चिकीर्षितं कार्यं कर्तुं युवां शक्तावित्यन्वयः ॥ १९ ॥

रा० टी०—सख्यकरणयोग्यतां बोधयन्नाह—शक्ताविति । तस्य सुग्रीवस्य चिकीर्षितमिच्छाविषयीभूतं कार्यं कर्तुं युवां शक्तौ समर्थौ कृतार्थः कृतप्रयोजनो वा अकृतार्थो वा तव कृत्यं कार्यं करिष्यति, एतेन सुग्रीवस्य सत्यप्रतिज्ञत्वं सूचितम् । अर्धद्वयमेकान्वयि ॥ १९ ॥

गो० टी०—शक्ताविति । तस्य सुग्रीवस्य चिकीर्षितं युवां कर्तुं शक्तौ अतः स कृतार्थः कृतस्वप्रयोजनः अकृतार्थः करिष्यमाणस्वप्रयोजनो वा तव कृत्यं करिष्यति ॥ १९ ॥

२०] ति० टी०—नन्वस्य तिरश्चोऽस्मत्साहाय्ये का शक्तिस्तत्राह—कृतार्थ इति । स [illegible] कृतप्रयोजनः करिष्यमाणप्रयोजनोऽपि तव कार्यं सीतान्वेषणादिरूपं स

---

१ तेजस्वी चेति रा. पाठः । २ रामेति गो. पाठः । ३ बल इति गो. पाठः । ४ यदिति गो. रा. पाठः । ५ स च ते नेति गो. पाठः ।

भास्करस्यौरसः पुत्रो वालिना कृतकिल्बिषः । संनिधायायुधं क्षिप्रमृष्यमूकालयं कपिम् ॥ २१ ॥
कुरु राघव सत्येन वयस्यं वनचारिणम् । स हि स्थानानि कात्स्न्र्येन सर्वाणि कपिकुञ्जरः॥२२॥
नरमांसाशिनां लोके नैपुण्यादधिगच्छति । न तस्याविदितं लोके किंचिदस्ति हि राघव ॥२३॥
यावत्सूर्यः प्रतपति सहस्रांशुः परंतप । स नदीर्विपुलाञ्शैलान्गिरिदुर्गाणि कन्दरान्॥२४॥
अन्विष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति । वानरांश्च महाकायान्प्रेषयिष्यति राघव ॥ २५ ॥
दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम् । अन्वेष्यति वरारोहां मैथिलीं रावणालये ॥ २६ ॥
स मेरुशृङ्गाग्रगतामनिन्दितां प्रविश्य पातालतलेऽपि वाश्रिताम् ।
प्लवङ्गमानामृषभस्तव प्रियां निहत्य रक्षांसि पुनः प्रदास्यति ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

करिष्यत्येव । तथासामर्थ्यं प्रयोजकं तस्य कुलीनत्वमाह—स ऋक्षेति । पुत्रः क्षेत्रज इत्यर्थः ॥ २० ॥

रा० टी०—सुग्रीवस्थानं निर्दिशन्नाह—स इति । वालिना स्वभ्रात्रा सह कृतकिल्बिषः वाल्यपराधकारीत्यर्थः, अत एव शङ्कितः भ्रातुः प्राप्तशङ्कः भास्करस्य सूर्यस्यौरसः उरसो जातः पुत्रः ऋक्षरजसस्तदभिधस्य पुत्रः क्षेत्रज इत्यर्थः, स सुग्रीवः पम्पामटति ॥ २० ॥

गो० टी०—स कस्य पुत्रः कुत्र तिष्ठतीत्यत्राह—स इति । संधिरार्षः । ऋक्षरजास्तन्मातेत्याहुः । पम्पामटति तत्तीरे पर्यटति शङ्कितः वालिनिमित्तमिति शेषः, कृतकिल्बिषः कृतवैरः ॥२०॥

२१–२४] ति० टी०—तदेवाह—भास्करस्यौरस इति । कृतकिल्बिषः कृतवैरः, अत एव वालिनः शङ्कितोऽटति तमग्निसंनिधावायुधं संनिधाय संस्थाप्य तेन सत्येन च तं कपिं वयस्यं कुरु । हि यतः स रक्षसां स्थानानि सर्वाणि जानाति ॥ २१–२४ ॥

रा० टी०—समिति । ऋष्यमूकालयम् ऋष्यमूके आलयं यस्य तं कपिं सुग्रीवम् अग्निसन्निधौ आयुधं संनिधाय सत्येन शपथेनेत्यर्थः, वयस्यं सखायं कुरु ॥ २१ ॥

गो० टी०—सख्यं च न केवलमाग्निसाक्षिकं किं त्वायुधमपि संनिधाप्य कर्तव्यमित्याह—संनिधायेति । सत्येन शपथेन २१

रा० टी०—स इति । कपिकुञ्जरः कपिश्रेष्ठः स सुग्रीवः नरमांसाशिनां राक्षसानां सर्वाणि स्थानानि नैपुण्यात्स्वनिपुणतया कात्स्न्र्येनाधिगच्छति प्राप्नोति जानाति वा अत एतस्य सुग्रीवस्याविदितमज्ञातं लोके किंचिन्नास्ति । सार्धः श्लोक एकान्वयी ॥ २२ ॥ २३ ॥

गो० टी०—स इति । नरमांसाशिनां राक्षसानाम् अधिगच्छति ज्ञास्यति ॥ २२ ॥

गो० टी०—येति । यावत्सूर्यः प्रतपति तावति लोक इत्यन्वयः ॥ २३ ॥

रा० टी०—यावदिति । सहस्रांशुः सहस्रकिरणविशिष्टः सूर्यः यावद्देशं प्रतपति तावद्देशं नदीप्रभृतीन् वानरैः सार्धमन्विष्यते पत्नीमधिगमिष्यति ज्ञात्वा बोधयिष्यति । सार्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०—स इति । अधिगमिष्यति ज्ञास्यति ॥ २४ ॥

२५] ति० टी०—अधिगमिष्यति ज्ञास्यति ॥ २५ ॥

२६] ति० टी०—रावणालये शोचन्तीमिति संबन्धः । अनेन ज्ञायते सर्वदिक्षु रावणालयाः सन्ति । तत्र किंदिक्स्थरावणालये इति ज्ञातुं सर्वदिग्विचयनम् ॥ २६ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—वानरानिति । दिशः पूर्वादिदिग्भागान् विचेतुमन्वेषितुं महाकायान्वानरान्प्रेषयिष्यति अत एव त्वद्वियोगेन शोचतीं रावणालये वियमानां मैथिलीम् अन्वेष्यते त्वां प्रापयिष्यति सीता रावणेनापि हृतेति ज्ञानेऽपि सर्वदिगन्वेषणोक्त्या सर्वास्वपि दिक्षु रावणालयमस्तीति सूचितम् ॥ २५ ॥ २६ ॥

गो० टी०—वानरांश्चेति सार्धश्लोकः । शोचतीं शोचन्तीम् ॥ २५ ॥ २६ ॥

२७] ति० टी०—अनिन्दितां निर्मलाम् अनेन सीताशुद्धत्वं ज्ञापितम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

रा० टी०—स इति । प्लवङ्गमानां शाखामृगाणामृषभोऽधिपतिः स सुग्रीवः मेरुशृङ्गाग्रगतां वा पातालतले आश्रितां वा प्रविश्य रक्षांसि निहत्य अनिन्दितां नित्यं निन्दारहितां तव प्रियां पुनः प्रदास्यति ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

---

१ प्रवर इति गो. पाठः ।

त्रिसप्ततितमः सर्गः ।

रघवाय सुग्रीवनिवासमार्गं दर्शयित्वा कबन्धेन पम्पासर ऋष्यमूकपर्वतं च विस्तरेणोपवर्ण्य तत्रस्थेन सुग्रीवेणाग्निसाक्षिक सख्यकरणमुपदिश्य रामलक्ष्मणावनुज्ञाप्य स्वर्गं प्रति कृत प्रस्थानम् ।

दर्शयित्वा तु रामाय सीतायाः परिमार्गणे । वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत् ॥ १ ॥
एष राम शिवः पन्था यत्रैते पुष्पिता द्रुमाः । प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः ॥ २ ॥
जम्ब्वाम्रियालपनसा न्यग्रोधप्लक्षतिन्दुकाः । अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः॥ ३ ॥
धन्वना नागवृक्षाश्च तिलका नक्तमालकाः । नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः ॥ ४ ॥
अग्निमुख्या अशोकाश्च सुरक्ताः पारिभद्रकाः । तानारुह्याथवा भूमौ पातयित्वा च तान्बलात् ॥ ५ ॥
फलान्यमृतकल्पानि भक्षयित्वा गमिष्यथः । तदतिक्रम्य काकुत्स्थ वनं पुष्पितपादपम् ॥ ६ ॥
नन्दनप्रतिमं त्वन्यत्कुरवस्तूत्तरा इव । सर्वकालफला यत्र पादपा मधुरस्रवाः ॥ ७ ॥
सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा । फलभारनतास्तत्र महाविटपधारिणः ॥ ८ ॥
शोभन्ते सर्वतस्तत्र मेघपर्वतसंनिभाः । तानारुह्याथवा भूमौ पातयित्वार्थवा सुखम् ॥ ९ ॥

गो० टी०–स इति । प्रविश्य रक्षांसि निहत्येत्यन्वयः । अनिन्दितामिति सीतायाः शुद्धत्वप्रतिज्ञा ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

१] ति० टी०–परिमार्गणे उपायं दर्शयित्वा पुनर्वाक्यमब्रवीत् ॥ १ ॥

रा० टी०–कबन्धोक्तिमेव वर्णयितुमाह–निदर्शयित्वेति । सीतायाः परिमार्गणे अन्वेषणे उपायमिति शेषः, निदर्शयित्वा निबोध्य अन्वर्थं सप्रयोजनं वाक्यं अर्थज्ञः कबन्धः पुनरब्रवीत् ल्यबभाव आर्षः ॥ १ ॥

गो० टी०–अथ कबन्धः सुग्रीवस्थानमार्गं दर्शयित्वा गत इत्याह त्रिसप्ततितमे–निदर्शयित्वेत्याद्दि । सीतायाः प्रतिपादने प्रापणे निमित्ते निदर्शयित्वा प्रदर्श्य " कत्वा च च्छन्दसि " इति क्त्वाप्रत्ययः । पूर्वोक्तमुपायमिति शेषः ॥ १ ॥

२] ति० टी०–यत्र प्रकाशन्ते तत्र गन्तुमेष शिवोऽदुष्टः पन्थाः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह—एष इत्यादिभिः । हे राम ! प्रतीचीं दिशमाश्रित्य यत्र देशे पुष्पिताः अत एव मनोरमाः एते द्रुमाः प्रकाशन्ते एष एव शिवः कल्याणप्रदः पन्थाः सुग्रीवसमीपप्रापकमार्गः ॥ २ ॥

गो० टी०–ऋष्यमूकमार्गं सचिह्नं दर्शयति–एष इति । शिवः शोभनः । शोभनत्वमेवाह–यत्रेति । द्रुमान् विशेषयति सार्धद्वयेन–जम्ब्वित्यादि । प्रियालाः पलःपटाख्या वृक्षाः, प्लक्षाः वटभेदाः, तिन्दुकाः स्फूर्जकाख्या वृक्षाः, धन्वनाः धवाः, नागवृक्षाः नागकेसराः, तिलकाः क्षुरकवृक्षाः, नक्तमालकाः बिल्वाख्याः, करवीराः प्रतिहासाख्या वृक्षाः, अग्निमुख्याः भल्लातकीवृक्षाः, सुरक्ताः रक्तचन्दनाः, पारिभद्रकाः निम्बाः॥ २–४ ॥

३] ति० टी०–एते के तत्राह–जम्ब्वित्यादि ॥ ३ ॥

४] ति० टी०–धन्वना धवाः । नागवृक्षो नागकेसरः॥४॥

रा० टी०–जम्ब्वित्यादि । जम्ब्वादयो ये वृक्षास्तानारुह्य बलाद्भूमौ पातयित्वा वा अमृतकल्पानि अमृतसदृशानि फलानि भक्षयन्तौ युवां गमिष्यथः । तत्र धन्वनाः धवाः, नागवृक्षाः नागकेसराः, अग्निमुख्याः अरुष्कराः, सुरक्ताः रक्तचन्दनाः, पारिभद्रकाः मन्दाराः । सार्धश्लोकत्रयमेकान्वयि॥३–५॥

५–६] ति० टी०–अग्निमुख्योऽरुष्करः । रक्ता रक्तचन्दनाः । पारिभद्रको मन्दारः । बलात्तान्वृक्षान्भूमौ पातयित्वा शाखां धृत्वा भूमिपर्यन्तं संनाम्य ॥ ५ ॥ ६ ॥

७] ति० टी०–अन्यद्वनमित्यर्थेति शेषः । उत्तरकुरुवच्च॥७॥

रा० टी०–तदिति । हे काकुत्स्थ ! तद्वनम् अतिक्रम्य नन्दनप्रतिमम् अन्यद्वनं प्राप्स्यथ इति शेषः, यत्र वने उत्तराः कुरव इव पादपाः वृक्षाः मधुरस्रवाः मधुच्युतः सर्वकालफलाश्च सन्तीति शेषः । सार्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०–तानिति । पातयित्वा नमयित्वा तानारुह्य अथवा भूमौ तान् पातयित्वा वेत्यन्वयः ॥ ५ ॥

गो० टी०–तदिति । तद्वनमतिक्रम्य नन्दनप्रतिममन्यद्वनं पश्यतमिति शेषः । उत्तरकुरुसाम्यं सर्वकामसमृद्धया ॥ ६ ॥

८–९] ति० टी०–विटपाः शाखाः ॥ ८ ॥ ९ ॥

रा० टी०–सर्वे इति । चैत्ररथे वने यथा इव सर्वे ऋतवः तस्मिन्वने सन्तीति शेषः । अर्धं पृथक्–तत्र तस्मिन्वने फलभारनताः फलभारेणाधो गताः महाविटपधारिणः अतिवृहच्छा-

---

१ निदर्शयित्वेति गो. रा. पाठः । २ प्रतिपादन इति गो. पाठः । ३ भक्षयन्नौ गमिष्यन इति गो. रा. पाठः । ४ चान्यत्कुरवो ह्युत्तरा इति गो. पाठः । ५ कामफला वृक्षाः पादपास्तु मधुस्रवा इति गो. पाठः । ६ यथामुखमिति गो. पाठः ।

फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति । चङ्क्रमन्तौ वराञ्शैलाञ्शैलाच्छैलं वनाद्वनम् ॥ १० ॥
ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथ । अशर्करामविभ्रंशां समतीर्थामशैवलाम् ॥ ११ ॥
राम संजातवालूकां कमलोत्पलशोभिताम् । तत्र हंसाः प्लवाः क्रौञ्चाः कुररांश्चैव राघव ॥ १२ ॥
वल्गुस्वरा निकूजन्ति पम्पासलिलगोचराः । नोद्विजन्ते नरान्दृष्ट्वा वधस्याकोविदाः पुरा ॥ १३ ॥
घृतपिण्डोपमान्स्थूलांस्तान्द्विजान्भक्षयिष्यथ । रोहितांश्चक्रतुण्डांश्च नलमीनांश्च राघव ॥ १४ ॥
पम्पायामिषुभिस्तीक्ष्णांस्तत्र राम वरान्हतान् । निस्त्वक्पक्षानयस्तप्तानकृशाननेककण्टकान् ॥ १५ ॥
तव भक्त्या समायुक्तो लक्ष्मणः संप्रदास्यति । भृशं तांस्त्वादतो मत्स्यान्पम्पायाः पुष्पसंचये ॥ १६ ॥
पद्मगन्धि शिवं वारि सुखशीतमनामयम् । उद्धृत्य च तदा क्षिप्तं रूप्यस्फटिकसंनिभम् ॥ १७ ॥

खावन्तः मेघपर्वतसंनिभाः ये वृक्षाः सर्वतः शोभन्ते तानारुह्य अथवा भूमौ पातयित्वा अमृतकल्पानि फलानि सुखं यथा स्यात्तथा लक्ष्मणस्ते तुभ्यं प्रदास्यति । अर्धचतुष्टयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—तद्वनं वर्णयति त्रिभिः—सर्वेत्यादि । मधु पुष्परसं स्रवन्तीति मधुस्रवाः सर्वैः काम्यमानानि फलानि येषां ते सर्वकामफलाः ऋतवः । षट् ऋतवः वसन्तीति शेषः । चैत्ररथे कुबेरोद्याने तत्र वने महाविटपधारिणः 'विस्तारो विटपोऽस्त्रियाम्' इत्यमरः । पादपा इत्यनुषङ्गः तत्र मेघपर्वतसंनिभाः तत्र विद्यमानाः मेघपर्वता इव स्थिता इत्यर्थः ॥ ७—९ ॥

१०] ति० टी०—चङ्क्रमन्तौ चङ्क्रम्यमाणौ ॥ १० ॥

११] ति० टी०—तीर्थमवतारमार्गः । अविभ्रंशां शैवलासंबन्धेन पादभ्रंशाहेतुम् ॥ ११ ॥

रा० टी०—चङ्क्रमन्ताविति । वरान् शैलान् पर्वतान् शैलात् शैलं शैलान्तरं च वनाद्वनं च चङ्क्रमन्तौ चङ्क्रम्यमाणौ युवाम् अशर्करां शर्करारहिताम् अविभ्रंशां न विभ्रंशः अधःपतनकारकः कर्दमस्तीरे यस्यां तां समतीर्थां वैषम्यरहितघट्टविशिष्टाम् अशैवलां शैवलरहितां संजातवालूकां संजाता शिलासंघर्षेण समुद्भूता वालुका यस्यां तां कमलोत्पलशोभितां कमलैः उत्पलैः श्यामकमलैश्च शोभितां पम्पां नाम पुष्करिणीं ततस्तस्मिन्काले गमिष्यथः। वालूकामित्यत्र दीर्घ आर्षः । अर्धचतुष्टयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०—चङ्क्रमन्ताविति । श्लोकद्वयमेकं वाक्यम् । चङ्क्रमन्तौ चङ्क्रम्यमाणौ पुनः पुनः गच्छन्तौ पुष्करिणीं सरसीम् अशर्करां शर्करारहिताम् अविभ्रंशाम् अशिथिलतटां समतीर्थाम् अवतारस्थलेऽतिनिम्नत्वात्यगाधत्वरहितां संजातवालूकाम् अपङ्कतया संहतसिकतां दीर्घ आर्षः ॥ १० ॥ ११ ॥

१२] ति० टी०—संजातवालूकामिति दीर्घ आर्षः । प्लवा मण्डूकाः ॥ १२ ॥

रा० टी०—तत्रेति । पम्पासलिलगोचराः पम्पाजलमात्रनिवासिनः पुरा पूर्वं वधस्याकोविदाः अविज्ञातारः वल्गुस्वनाः हंसादयस्तत्र पम्पायां निकूजन्ति नरान्दृष्ट्वा उद्विजन्ते च न । सार्धश्लोक एकान्वयी ॥ १२ ॥ १३ ॥

गो० टी०—तत्रेति । प्लवाः मण्डूकाः हंसभेदा वा कुरराः क्रौञ्चभेदाः वल्गुस्वनाः रम्यस्वनाः ससिलगोचराः सलिलचारिणः गोचरः संचारः ॥ १२ ॥

१३] ति० टी०—वधस्याकोविदा वधमजानानाः ॥ १३ ॥

गो० टी०—नेति । वधस्याकोविदाः वधमजानानाः नोद्विजन्ते न बिभ्यति । द्विजा इति शेषः तानित्यनुवादात् ॥ १३ ॥

१४] ति० टी०—द्विजान्पक्षिणः । रोहिता मत्स्यविशेषा । चक्रतुण्डा नलमीनाश्च त एव ॥ १४ ॥

१५] ति० टी०—अयस्तप्तान्शूलाग्रे पक्वान् । अकृशा अनेके च कण्टका येषां विद्यन्ते तान् ॥ १५ ॥

रा० टी०—घृतेति । इषुभिर्बाणाग्रभागैर्निस्त्वक्पक्षान् निर्गतवल्कलपरिग्रहणान् अत एव न एकोऽपि कण्टको येषु तान् अत एव घृतपिण्डोपमान् अकृशान् अशुष्कानित्यर्थः, अयस्तप्तान् अयसा वह्नौ बाणाग्रभागगृहीतेन तप्तान् परिपक्वान् यान् भक्ष्यान् मूलफलसमूहान् तव भक्त्या समायुक्तो लक्ष्मणः तव तुभ्यं संप्रदास्यति तान् स्थूलान् द्विजान् पक्षिणः तान् प्रसिद्धान् वरान् श्रेष्ठान् रोहितादींश्च ह प्रसिद्धं भक्षयिष्यथः भोजयिष्यथः । सार्धश्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—रोहितानित्यादिश्लोकद्वयम् । रोहितान् पितृप्रियमत्स्यभेदान् चक्रतुण्डान् चक्रमुखमत्स्यान् नडमीनान् नडाख्यतृणविशेषस्तम्बसंचारशीलान् मत्स्यान् वरान् श्रेष्ठान् अयस्तप्तान् अयःशूलाग्रप्रोततया पक्वान् कृशाश्चानेककण्टकांश्च ते न भवन्तीत्यकृशानेककण्टकाः तान् ॥ १४ ॥ १५ ॥

१६] ति० टी०—पुष्पसंचये पद्मादिपुष्पसमूहे वर्तमानम् १६

१७] ति० टी०—अत एव पद्मगन्धि । अक्लिष्टं मलादिकश्मलहीनम् ॥ १७ ॥

रा० टी०—भृशमिति । पद्मगन्धविशिष्टं शिवं कल्याणप्रदं सुखशीतं सुखं सुखप्रदं शीतं शैत्यं यस्य तत् अनामयं रोगनिवर्तकम् अक्लिष्टं मलादिबाधारहितम् अत एव रूप्यस्फ-

---

१ देशानिति गो. पाठः । २ गमिष्यथः इति गो. रा. पाठः । ३ शालिनीमिति गो. पाठः । ४ कुरव इति रा. पाठः । ५ स्वना इति गो. रा. पाठः । ६ शुभा इति गो. पाठः । ७ भक्षयिष्यथः इति गो. रा. पाठः । ८ वक्रतुण्डांश्च नडेति गो. पाठः । ९ अकृशाश्चानेककण्टकानिति रा. पाठः । १० ते इति गो. तान् खादते इति रा. पाठः । ११ रौप्यस्फाटिकेति गो. पाठः । १२ चङ्क्रम्यमाणाविति युक्तं भाति ।

अथ[1] पुष्करपर्णेन[2] लक्ष्मणः पाययिष्यति । स्थूलान्गिरिगुहाशय्यान्[3]वानरान्वनचारिणः ॥ १८ ॥
सायाह्ने विचरन्राम दर्शयिष्यति लक्ष्मणः । अपां लोभादुपावृत्तान्तृषभानिव नर्दतः ॥ १९ ॥
स्थूलान्पीतांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम । सायाह्ने विचरन्राम विटपी[5] माल्यधारिणः ॥ २० ॥
[6]शिवोदकं च पम्पायां दृष्ट्वा शोकं विहास्यसि । सुमनोभिश्चितास्तत्र तिलका[7] नक्तमालकाः ॥ २१ ॥
उत्पलानि च फुल्लानि पङ्कजानि च राघव । न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः ॥ २२ ॥
न च वै म्लानतां यान्ति न च शीर्यन्ति राघव । मतङ्गशिष्यास्तत्रासन्नृषयः सुसमाहिताः ॥ २३ ॥
तेषां भाराभितप्तानां वन्यमाहरतां गुरोः । ये प्रपेतुर्महीं तूर्णं शरीरात्स्वेदबिन्दवः ॥ २४ ॥
तानि माल्यानि जातानि मुनीनां तपसा तदा । स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव ॥ २५ ॥

टिकसंनिभं वारि पम्पाजलं स लक्ष्मणः पुष्करपत्रेण कमलपर्णेन उद्धृत्य पुष्पसंचये कमलपुष्पसमूहसमीपे मत्स्यान् मत्स्यत्वेन प्रतीयमानान् फलादीनित्यर्थः, भृशं खादते पक्ष्यादये पाययिष्यति । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०—भृशमित्यादिद्वावेकान्वयौ । पुष्पसंचये पुष्पसमूहे वर्तमानम् अत एव सुगन्धि शिवं पापापहं सुखशीतं नातिशीतमित्यर्थः । अनामयम् अव्याधिकरमित्यर्थः । एवंभूतं वारि पुष्करपर्णेन पद्मपत्रेण पम्पाया उद्धृत्य पाययिष्यति॥१६॥१७॥

१८–१९] ति० टी०—पुष्करपर्णेन पद्मपर्णेनोद्धृत्य मत्स्यान्खादतस्ते जलं पाययिष्यतीति संबन्धः । गिरिगुहाश्च शय्या-ऽऽसनं येषां तान् ॥ १८ ॥ १९ ॥

रा० टी०—स्थूलानिति । गिरिगुहाशय्यान् गिरिगुहायां शय्या शयनं येषां तान् लक्ष्मणो दर्शयिष्यति अत एव अपां जलस्य लोभात् दुरावृत्तान् बहिर्निर्गतान् तृषभानिव नर्दतः रूपान्वितान् शोभनरूपविशिष्टान् वानरान् पम्पायां द्रक्ष्यसि । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०—स्थूलानित्यादिसार्धश्लोक एकान्वयः । गिरिगुहायां शय्या येषां तान् रूपान्वितान् सौन्दर्यवतः॥१८॥१९॥

२०] ति० टी०—पीताञ्जलपानं कृतवतः । विटपी विटपिनः आर्षमेकत्वं प्रथमान्तत्वम् । माल्यधारिणः पुष्पवतस्तान्दृष्ट्वा शीतोदकं च दृष्ट्वा शोकं हास्यसि ॥ २० ॥

रा० टी०—सायाह्न इति । हे राम ! माल्यधारिणः पुष्पवतः विटपी विटपिनः प्रशस्तशाखावतः वृक्षान् सायाह्ने विचरन् त्वं पम्पायां शीतोदकं दृष्ट्वा शोकं विहास्यसि ॥ २० ॥

गो० टी०—सायाह्न इति । विटपीन् विटपिनः इनिप्रत्ययस्य नलोप आर्षः । माल्यधारिणः पुष्पधारिणः पुष्पविकासहेतुत्वात् सायाह्न इत्युक्तम् ॥ २० ॥

२१] ति० टी०—अन्यान्यपि शोकहन्तृणि दर्शनीयान्याह—सुमनोभिरिति ॥ २१ ॥

रा० टी०—सुमनोभिरिति । तत्र पम्पासमीपे सुमनोभिः पुष्पैः चिताः संपन्नाः तिलका नक्तमालका वृक्षविशेषाः फुल्लानि विकसितानि उत्पलानि नीलकमलानि पङ्कजानि तदितरकमलानि च सन्तीति शेषः, तानि माल्यानि पुष्पाणि आरोपयिता प्रगृह्य संधर्ता नरो मनुष्यो नास्ति नरसंचाराभावादिति तात्पर्यं तेन तानि धारयिष्यथ इति व्यञ्जितम् । अर्धद्वयमेकान्वयि ॥ २१ ॥

गो० टी०—सुमनोभिरिति । सुमनोभिः चितान् निरन्तरान् उत्पलानि इन्दीवराणि दृष्ट्वा शोकं विहास्यसीत्यत्रापि व्यनुषज्यते ॥ २१ ॥

२२] ति० टी०—आरोपयिता गृहीत्वा धारयिता । महावनत्वान्मनुष्यसंचाराभावेनेत्यर्थः ॥ २२ ॥

रा० टी०—तन्माल्यानामद्भुतत्वमाह—नेति । म्लानतां न यान्ति शीर्यन्ति च न माल्यानीति शेषः ॥ २२ ॥

गो० टी०—न तानीति । आरोपयिता गृहीत्वा ग्रथिता वनविस्तारात्पुष्पबाहुल्याच्च तानि म्लानतां न यान्ति न शीर्यन्ति न शीर्यन्ते शीर्णदलानि न भवन्तीत्यर्थः । मतङ्गशिष्यप्रभावाद्वा अनारोपणम् ॥ २२ ॥

२३] ति० टी०—अम्लानाशीर्णत्वे हेतुः—मतङ्गेत्यादि ॥ २३ ॥

२४] ति० टी०—भारेण तप्तानां गुर्वर्थं आहियमाणवन्यभारेण श्रान्तानाम् ॥ २४ ॥

२५] ति० टी०—तानि माल्यानीति विधेयापेक्षं क्लीबत्वम् ॥ २५ ॥

रा० टी०—तत्र हेतुमाह—मतङ्गेति । सुसमाहिताः मतङ्गशिष्या ऋषयः तत्र पम्पासमीपे आसन् । अर्धं पृथक्—तेषामिति । गुरोः गुरवे वन्यं फलाद्याहरताम् अत एव भाराभितप्तानां तेषां मतङ्गशिष्याणां शरीराद्ये स्वेदबिन्दवः महीं प्रपेतुः ते मुनीनां तपसा तपःप्रभावेण माल्यानि पुष्पाणि जातानि उत्पन्नानि अत एव स्वेदबिन्दुसमुत्थानि

१ असाविति गो. पाठः । २ पत्रेणेति रा. पाठः । ३ वराहानिति गो. पाठः । ४ अर्धमेतत् गो. नास्ति । ५ दुरावृत्तानिति रा. पाठः । ६ रूपान्वितानिति गो. पाठः । ७ विटपीनिति गो. पाठः । ८ शीतोदकं च पम्पाया इति गो. शीतोदकमिति रा. पाठः । ९ चितानिति गो. पाठः । १० तिलकान्नक्तमालकानिति गो. पाठः । ११ म्लानतामिति गो. रा. पाठः ।

तेषां गतानामद्यापि दृश्यते परिचारिणी । श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी॥ २६ ॥
त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम् । दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति ॥ २७ ॥
ततस्तद्राम पम्पायास्तीरमाश्रित्य पश्चिमम् । आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि॥ २८ ॥
न तत्राक्रमितुं नागाः शक्नुवन्ति तदाश्रमे । [[3]विविधास्तत्र वै नागा येन तस्मिंश्च पर्वते ।]
ऋषेस्तस्य मतङ्गस्य विधानात्तच्च काननम् ॥ २९ ॥
मतङ्गवनमित्येव विश्रुतं रघुनन्दन । तस्मिन्नन्दनसंकाशे देवारण्योपमे वने ॥ ३० ॥
नानाविहगसंकीर्णे रंस्यसे राम निर्वृतः । ऋष्यमूकस्तु पम्पायाः पुरस्तात्पुष्पितद्रुमः॥ ३१ ॥
सुदुःखारोहणश्चैव शिशुनागाभिरक्षितः । उदारो ब्रह्मणा चैव पूर्वकालेऽभिनिर्मितः ॥ ३२ ॥

तानि न विनश्यन्ति अन्यथाभावं प्राप्नुवन्ति । अर्धचतुष्टयमेकान्वयि ॥ २३–२६ ॥

गो० टी०–अग्राह्यत्वाम्लानत्वादौ निमित्तमाह–मतङ्गेति । सार्धश्लोकद्वयमेकान्वयम् । मतङ्गो नाम महाप्रभावो महर्षिः तत्र पम्पातीरे सुष्ठु समाहितं समाधियेषां ते तथा वन्यमाहरताम् अत एव भाराभिहतानां तानीति विधेयापेक्षया नपुंसकत्वं स्वेदबिन्दुसम्भृत्यानीति हेतुगर्भविशेषणं स्वेदबिन्दवो वायुना शुष्कोपरि नीता माल्यानि जातानीत्याशयः ॥२३॥२४॥

२६] ति० टी०–शबरी नाम शबरीत्याख्या श्रमणी तापसी ॥ २६ ॥

रा० टी०–तेषामिति । गतानां तपोर्जितलोकं प्राप्तानां तेषां मतङ्गशिष्याणां परिचारिणी दासी अत एव श्रमणी तपोनिरता अत एव चिरजीविनी शबरी नाम अद्यापि दृश्यते॥२६॥

गो० टी०–तेषामिति । तेषां मतङ्गशिष्याणां परिचारिणी श्रमणी संन्यासिनी शबरीति नाम शबरीति प्रसिद्धा ॥ २६ ॥

२७] ति० टी–त्वां दृष्ट्वा स्वर्गलोकं गमिष्यति । पूर्वार्जिततपसस्त्वदर्शनस्य च माहात्म्यात्स्वर्गलोकोऽत्र ब्रह्मलोक इति वदन्ति । ' देवलोकम् ' इति पाठेऽपि स एवार्थः ॥ २७ ॥

रा० टी०–त्वामिति । धर्मे स्थिता नित्यं स्वधर्मे निरता शबरी त्वां दृष्ट्वा स्वर्गलोकं गमिष्यति । एतेन त्वद्दर्शनावध्येव तस्या इहावस्थानमिति सूचितं तेन तस्याः रामदिदृक्षा व्यञ्जिता ॥ २७ ॥

गो० टी०–त्वामिति । धर्मे गुरुपरिचरणधर्मे ॥ २६ ॥

२८] ति० टी०–तदाश्रमस्थानं शबरीवासरूपं मतङ्गाश्रमस्थानम् गुह्यमाश्रमेषु गुह्यम् ॥ २८ ॥

रा० टी०–तत इति । ततोऽनन्तरं हे राम ! पम्पायाः पश्चिमं तीरम् आश्रित्य विद्यमानम् अतुलम् अनुपमं, गुह्यं जनैरगम्यत्वेन गुप्तं तत्प्रसिद्धम् आश्रमस्थानम् अत्यन्तश्रमनिवर्तकमतङ्गकुटीं पश्यसि ॥ २८ ॥

गो० टी०–तत इति । तत् शबर्यावासभूतं गुह्यम् इतरैरदर्शनीयं पश्यसि द्रक्ष्यसि ॥ २७ ॥

२९] ति० टी०–नागा गजाः । तत्र तदाश्रमे तस्मिन्मतङ्गाश्रमे इत्यर्थः । यद्यपि तत्र विविधा नागाः सन्ति, तथापि मतङ्गस्य विधानात्प्रभावात्तदेकदेशमतङ्गाश्रमे न संचार इत्यर्थः॥२९॥

रा० टी०–तदुद्यत्वमेव प्रकटयन्नाह–नेति । तत्र तदाश्रमसमीपे तस्मिन्प्रसिद्धे वने पर्वते च विविधाः ये नागाः गजाः सन्तीति शेषः, तेऽपि नागाः तत्र तस्मिन् तदाश्रमे मतङ्गस्थाने आक्रमितुं न शक्नुवन्ति एतेन मतङ्गस्य प्रभावातिशयः सूचितः ॥ २९ ॥

रा० टी०–ऋषेरिति । तत् आश्रमसमीपस्थं यत् काननं वनं तत् मतङ्गस्य ऋषेः विधानात् निर्माणादेव मतङ्गवनमिति विश्रुतं प्रख्यातम् ॥ ३० ॥

गो० टी०–न तत्रेति । तस्मिन् वने वक्ष्यमाणे ऋश्यमूकपर्वते च विविधाः नागाः गजाः सन्ति तथापि तमाश्रमं तत्र प्रदेशे स्थिताः नागाः नाक्रमितुं शक्नुवन्ति ॥ २८ ॥

गो० टी०–अनाक्रमणे हेतुमाह–ऋषेरिति । तस्य पूर्वोक्तस्य विधानात् निर्माणात् तत्काननं जातमिति शेषः ॥ २९ ॥

३०] ति० टी०–अतस्तच्च वनं मतङ्गवनमित्येव विश्रुतम् । देवारण्यं नन्दनादि तत्सदृशम् ॥ ३० ॥

रा० टी०–तस्मिन्निति । नन्दनसंकाशे नन्दनेन फलपुष्पसंवृद्धया संकाशः अतिशोभा यस्य तस्मिन्देवारण्योपमे नन्दनचैत्ररथादिसदृशे नानाविहगसंकीर्णे अनेकविधपक्षिसंकुले तस्मिन्वने निर्वृतः आनन्दयुक्तः सन् रंस्यसे ॥ ३१ ॥

गो० टी०–तस्मिन्निति । देवारण्यं चैत्ररथादि निर्वृतः निष्टत्तदुःख इत्यर्थः ॥ ३० ॥

३१] ति० टी०–पम्पायाः पम्पातीरवर्तिमतङ्गाश्रमादित्यर्थः ॥ ३१ ॥

३२] ति० टी०–सुदुःखारोहणोऽत्युच्चत्वात् । हेत्वन्तरमप्याह–शिशुभिर्नागैः सर्वैरभिरक्षितः । उदारो दाता । ब्रह्मणा पूर्वकाले सृष्टिकाले निर्मितो विश्वोदार्यतपःप्राधान्येन निर्मितः॥ ३२॥

रा० टी०–ऋष्यमूक इति । पम्पायाः पम्पातीरवर्तिमतङ्गाश्रमात् पुरस्तात् पूर्वदिग्भागे पुष्पितद्रुमः पुष्पिताः द्रुमाः

१ अद्यापि तत्रैवेति गो. पाठः । २ तमाश्रममिति गो. पाठः । ३ अर्धमेतदधिकं गो.पाठे । ४ तत्रेति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ ऋश्येति गो. पाठः । ७ चेति गो. पाठः । ८ नामेति गो. पाठः ।

शयानः पुरुषो राम तस्य शैलस्य मूर्धनि । यः स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥ ३३ ॥
[नै त्वेनं विषमाचारः पापकर्माधिरोहति ।]
यस्त्वेनं विषमाचारः पापकर्माऽधिरोहति । तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ॥ ३४ ॥
ततोऽपि शिशुनागानामाक्रन्दः श्रूयते महान् । क्रीडतां रामपम्पायां मतङ्गाश्रमवासिनाम्॥ ३५ ॥
सक्ता रुधिरधाराभिः संहत्य परमद्विपाः । प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ ३६ ॥
ते तत्र पीत्वा पानीयं विमलं चारु शोभनम् । अत्यन्तसुखसंस्पर्शं सर्वगन्धसमन्वितम् ॥ ३७ ॥
निवृत्ताः संविगाहन्ते वनानि वनगोचराः । ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ॥ ३८ ॥
रुरूनपेतानजयान्दृष्ट्वा शोकं प्रहास्यसि । राम तस्य तु शैलस्य महती शोभते गुहा॥ ३९ ॥

यस्मिन्सः शिशुनागाभिरक्षितः शिशुनागैः बालसर्पैर्बालगजैश्च अभिरक्षितः अत एव सुदुःखम् अतिदुःखप्रदम् आरोहणं यस्य सः उदारः अभीष्टदाता पूर्वकाले सृष्ट्यादौ ब्रह्मणाऽभिनिर्मितः ऋष्यमूकः तदभिधपर्वतः अस्तीति शेषः, तदर्थस्तु ऋषीणां तत्र प्राप्तानाम् अमूकः मूकतानिवृत्तिः अज्ञानध्वंस इति यावत् यस्मात्सः । सार्धश्लोक एकान्वयी ॥ ३२ ॥ ३३ ॥

गो० टी०-एवमनुग्रहार्थं भवर्याश्रमं गत्वा पुनः पम्पायाः पुरस्तादृश्यमूको गन्तव्य इत्याह सार्धश्लोकेन-ऋष्येति । ऋश्या मृगविशेषाः मूकाः निःशब्दा भवन्ति यस्मिन् स ऋश्यमूकः सुदुःखमारोहणं यस्य स तथा । तत्र हेतुः-शिशुनागाभिरक्षित इति । अत्र नागाः गजा एव विविधास्तत्र वै नागा इति पूर्वमुक्तत्वात् । उदारः प्रशस्तः पूर्वकाले ब्रह्मणा उदारः प्रशस्तो निर्मितः कुत्रचिन्निमित्ते अयं प्रशस्तो भवत्वित्यनुगृहीत इत्यर्थः ॥ ३१ ॥

३३] ति०टी०-औदार्यमेव दर्शयति-शयान इति॥३३॥

रा० टी०-तत्प्रभावं वर्णयन्नाह-शयान इति । हे राम ! तस्य ऋष्यमूकस्य मूर्धनि शिखरे शयानः यः पुरुषः स्वप्ने यत् वित्तं लभते सः प्रबुद्धः निवृत्तनिद्रः सन् तद्वित्तमधिगच्छति प्राप्नोति ॥ ३४ ॥

गो० टी०-प्राग्वस्त्यमाह-शयान इति ॥ ३२ ॥ ३३ ॥

३४] ति० टी०-अन्यमप्यतिशयमाह-य इति । तत्रैव पर्वतमूर्ध्न्येव ॥ ३४ ॥

रा० टी०-य इति । पापकर्मा अत एव विषमाचारः यः पुरुषः एनं पर्वतमधिरोहति तं तत्रैव सुप्तमेनं पुरुषं राक्षसाः तत्प्रभावजनितरक्षोविशेषाः तत्र पर्वते एव प्रहरन्ति ॥ ३५ ॥

गो० टी०-अतिशयान्तरमाह-यस्त्विति ॥ ३४ ॥

३५] ति० टी०-शिशुनागानां बालगजानाम् ॥ ३५ ॥

रा० टी०-तत इति । ततः तत्र मतङ्गाश्रमवासिनां पम्पायां क्रीडतां शिशुनागानां बालगजानां महान् आक्रन्दः शब्दः श्रूयते ॥ ३६ ॥

गो० टी०-तत्रापीति । शिशुनागानां कलभानां तत्रापीत्यत्रापिशब्दात् पम्पादिकं समुच्चीयते । अनेन ऋश्यमूकस्य पम्पासामीप्यमुक्तम् ॥ ३६ ॥

३६-३७] ति० टी०-रुधिरधाराभिरीषदक्तमदधाराभिः सक्ताः संबद्धा संहत्य संभूय संचरन्ति पृथक्कीर्णाश्चरन्ति३६॥३७

रा० टी०-सक्ता इति । रुधिरधाराभिः ईषदरुणमदप्रवाहैः सक्ताः युक्ता मेघवर्णाः वरस्विनो वेगवन्तो वनगोचराः वनमात्रनिवासिनो ये परमद्विपाः महागजाः संहत्य स्वस्वसजातीयैर्मिलित्वा पृथक् कीर्णाः विजातीयेभ्यो भिन्नाः सन्तः प्रचरन्ति । ते परमगजाः तत्र पम्पायां विमलं पानीयं पीत्वा निर्वृताः प्राप्तानन्दाः सन्तो वनानि संविगाहन्ते तान् दृष्ट्वा शोकं प्रहास्यसीत्यपकृष्यते । सार्धलोकद्वयमेकान्वयि ॥ ३७ ॥ ३८ ॥

गो० टी०-सिक्ता इति । संहत्य अन्योन्यं प्रहृत्य रुधिरधाराभिः सिक्ताः अत एव पृथक्कीर्णाः चरन्ति ॥ ३६ ॥

गो० टी०-त इति । संविगाहन्ते प्रविशन्ति ॥ ३७ ॥

३८] ति० टी०-नीलमणिवत्कोमलकान्तीन् ॥ ३८ ॥

रा० टी०-ऋक्षानिति । नीलकोमलकप्रभान् नीलमणिसदृशकोमलकप्रभावतः प्राप्तान् ऋक्षान् द्वीपिनो व्याघ्रांश्च अपेतान् वधशङ्काया अभावेन समीपे प्राप्तान् अजयान् मनुष्यजयरहितान् रुरून् मृगविशेषांश्च दृष्ट्वा शोकं प्रहास्यसि ॥३९॥

गो० टी०-ऋक्षांश्चेति । द्वीपिनः व्याघ्रान् नीलकोमलकप्रभान् नीलरत्नवन्मनोज्ञप्रभान् रुरून् मृगविशेषान् अपेतापजयान् जयशीलानित्यर्थः । जहिष्यसि त्यक्ष्यसि ॥ ३८ ॥

३९] ति० टी०-अपेतान्मनुष्यं दृष्ट्वा पलायितान् अजयान्प्राणिजयहीनान् अनेनाकूरता । अथासाधारणं चिह्नमाह-रामेति ॥ ३९ ॥

रा० टी०-रामेति । हे राम ! महती विशाला शिला-पिधाना शिला पिधानमाच्छादनं यस्याः सा तस्य ऋष्यमूकस्य गुहा शोभते अस्याः गुहायाः प्रवेशनं सुग्रीवाद्यन्यकर्तृकप्रवेशः दुःखं प्रवेष्टुमशक्यमित्यर्थः ॥ ४० ॥

गो० टी०-रामेति । शिला अपिधानमाच्छादनं यस्याः सा

---

१ यदिति गो. पाठः । २ अर्धमेतदधिकं गो. पाठे । ३ यस्तु तमिति गो. पाठः । ४ तत्रेति गो. पाठः । ५ अरण्येति गो. पाठः । ६ सिक्ता इति गो. पाठः ७ संहत्येति गो. पाठः । ८ शीतमन्यमिति गो. पाठः । ९ अर्धमेतत् गो. नास्ति । १० अपेतापजयानिति गो. पाठः । ११ जाहेष्यसीति गो. पाठः ।

शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनम् । तस्या गुहायाः प्राग्द्वारे महाञ्शीतोदको ह्रदः ॥ ४० ॥
बहुमूलफलो[1] रम्यो नानानगसमाकुलः[2] । तस्यां वसति धर्मात्मा सुग्रीवः सह वानरैः[3] ॥ ४१ ॥
कदाचिच्छिखरे तस्य पर्वतस्यापि तिष्ठति[4] । कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ॥ ४२ ॥
स्रग्वी भास्करवर्णाभः[5] खे व्यरोचत वीर्यवान् । तं तु खस्थं महाभागं तावुभौ रामलक्ष्मणौ ॥ ४३ ॥
प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके । गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत्स च ॥ ४४ ॥
सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥ ४५ ॥
स तत्कबन्धः प्रतिपद्य रूपं वृतः श्रिया भास्वरसर्वदेहः ।
निदर्शयन्राममवेक्ष्य खस्थः सख्यं कुरुष्वेति तदाभ्युवाच ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

अस्या गुहायाः प्रवेशनं दुःखं दुःखकरम् उन्नतस्थानस्थितत्वादिति भावः ॥ ३९ ॥

४०] ति० टी०–शिलापिधानेति गुहानामेति तीर्थः विशेषणमित्यन्ये ॥ ४० ॥

रा० टी०–तस्या इति । तस्याः गुहायाः प्राग्द्वारे बहुमूलफलः अनेकविधमूलफलविशिष्टः अत एव रम्यः नानानगसमाकुलः अनेकविधनगैर्व्याप्तः महान् विशालः शीतस्रुदकं यस्य स ह्रदः गुहायाः प्राग्द्वारे अस्तीति शेषः ॥ ४१ ॥

गो० टी०–तस्या इति । महान् विशालः अस्तीति शेषः। फलमूलान्वितः फलमूलान्विततीरः[1] ॥ ४० ॥

४१] ति० टी०–तस्यां गुहायाम् ॥ ४१ ॥

रा० टी०–तस्यामिति । धर्मात्मा सुग्रीवः तस्यां गुहायां वसति कदाचित्पर्वतस्य शिखरेऽपि तिष्ठति ॥ ४२ ॥

गो० टी०–तस्यामिति । कदाचित् भूमाविति सिद्धम्[2]४१

४२–४३] ति० टी०–कदाचित्पर्वतस्य शिखरेऽपि तिष्ठति अपिधानश्च ॥ ४२ ॥ ४३ ॥

रा० टी०–कबन्ध इति । भास्करवर्णाभः सूर्यवर्णसदृशवर्णविशिष्टः स्रग्वी मालावान्कबन्धः रामलक्ष्मणावनुशास्य स्व आकाशे व्यरोचत ॥ ४३ ॥

गो० टी०–कबन्ध इति । अनुशास्य उपदिश्य स्रगस्यास्तीति स्रग्वी "अस्मायामेधास्रजो विनिः" इति विनिप्रत्ययः । भास्करवर्णाभः सूर्यप्रभातुल्यप्रभः खे व्यरोचत रामानुज्ञानार्थं क्षणमतिष्ठदित्यर्थः ॥ ४२ ॥

रा० टी०–तमिति । खस्थमाकाशस्थं तं कबन्धं प्रस्थितौ रामलक्ष्मणौ त्वं व्रजस्वेति वाक्यमूचतुः स कबन्धोऽपि अन्तिके निकटे विद्यमानौ यौ रामलक्ष्मणौ कार्यसिद्ध्यर्थं गम्यतामित्यब्रवीत् । सार्धश्लोक एकान्वयी ॥ ४४ ॥ ४५ ॥

गो० टी०–तं त्विति । प्रस्थितौ सन्तौ खं व्रजस्व व्रज इति अन्तिके ऊचतुः अन्तिके प्रस्थितावित्ति कबन्धसमीपमागत्योचतुरित्यर्थः ॥ ४३ ॥

४४–४५] ति० टी०–प्रस्थितावावां सुग्रीवसमीपं प्रस्थितौ त्वं व्रजस्व पुण्यलोकमिति शेषः । अन्तिके समीपे वर्तमानं देवभूतं तावूचतुः । स ताभ्यां कृतानुमतिकः कबन्धः ॥ ४४ ॥ ४५ ॥

रा० टी०–सुप्रीताविति । तदा तस्मिन्काले सुप्रीतौ रामलक्ष्मणावनुज्ञाप्य कबन्धः प्रस्थितः अभवदिति शेषः । अथं पृथक् । उपसंहरन्नाह–स इति । श्रिया सर्वसंपत्त्या वृतो युक्तः अत एव भास्वरसर्वदेहः भास्वरः प्रकाशमानः सर्वदेहः सावयवशरीरं यस्य सः खस्थः स कबन्धः तद्भूतं रूपं प्रतिपद्य रामं चावेक्ष्य सख्यं कुरुष्व इति निदर्शयन्नब्रभ्युवाच ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

गो० टी०–गम्यतामिति । प्रस्थितः स्वर्गमिति शेषः॥४४॥

४६] ति० टी०–उक्तार्थोपसंहारः–स तदिति । निदर्शयन् मार्गादिकमिति शेषः, किंचिद्दूरं गत्वा पुना राममवेक्ष्य सख्यं कुरुष्वेत्युवाच ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

गो० टी०–उक्तमर्थं सर्गान्ते संगृह्णाति–स इति । तत्पूर्वोक्तं रूपं शरीरं रामं प्रति निदर्शयन् सख्यं कुरुष्व सुग्रीवेणेति शेषः ॥ ४६ ॥

अस्मिन् सर्गे पञ्चचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

---

१ फलमूलान्विन इति गो. पाठः। २ मृगसमाकृत इति गो. पाठः । ३ सुग्रीवश्चतुर्भिरिति गो. पाठः । ४ अवतिष्ठते इति गो. पाठः । ५ भास्करतुल्येति गो. पाठः।

चतुःसप्ततितमः सर्गः ।

कबन्धदर्शितमार्गेणानुगच्छन्तौ प्राप्ताश्रमौ रामलक्ष्मणौ पम्यापश्चिमतीरस्थस्वाश्रमस्था शबर्यानर्च । मतङ्गपेस्तच्छात्राणां नानाविधतपःप्रभावोद्योतकप्रदेशान्दर्शयन्ती रामेण कृताभ्यनुज्ञा शबरी वह्नौ देहत्यागात्प्राप्तदिव्यशरीरा सती महर्ष्याचार्याध्युषित दिव्यलोकं जगाम ।

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने । आतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥ १ ॥
तौ शैलेष्वाचितानेकान्क्षौद्रपुष्पफलद्रुमान् । वीक्षन्तौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ ॥ २ ॥
कृत्वा तु शैलपृष्ठे तु तौ वासं रघुनन्दनौ । पम्पायाः पश्चिमं तीरं राघवावुपतस्थतुः ॥ ३ ॥
तौ पुष्करिण्याः पम्पायास्तीरमासाद्य पश्चिमम् । अपश्यतां ततस्तत्र शबर्या रम्यमाश्रम् ॥ ४ ॥
तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम् । सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥ ५ ॥
तौ दृष्ट्वा तु तदा सिद्धा समुत्थाय कृताञ्जलिः । पादौ जग्राह रामस्य लक्ष्मणस्य च धीमतः ॥ ६ ॥
पाद्यमाचमनीयं च सर्वं प्रादाद्यथाविधि । तामुवाच ततो रामः श्रमणीं धर्मसंस्थिताम् ॥ ७ ॥
कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः । कच्चित्ते नियतः कोप आहारश्च तपोधने ॥ ८ ॥
कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम् । कच्चित्ते गुरुशुश्रूषा सफला चारुभाषिणि ॥ ९ ॥

१] ति० टी०—यः कबन्धेन कथितस्तं मार्गं गृहीत्वा पम्पाह्रदिश्य प्रतीचीं दिशमातस्थतुः प्रतस्थतुः ॥ १ ॥

रा० टी०—कबन्धगमनानन्तरकालिकं रामवृत्तान्तमाह—तावित्यादिभिः । कबन्धेन दर्शितं पम्पायाः तं मार्गं प्रतीचीं दिशं गृह्य गृहीत्वा तौ रामलक्ष्मणौ आतस्थतुः ॥ १ ॥

गो० टी०—एवमेतावत्पर्यन्तं भगवत्कैङ्कर्यतत्फले दर्शिते । अथाचार्याभिमाननिष्ठा तत्फले दर्शयति चतुःसप्ततितमे—तावित्यादि । प्रतीचीं दिशं गृह्य गृहीत्वा कबन्धेन दर्शितं पम्पाया मार्गमुद्दिश्य प्रतस्थतुः प्रतस्थाते ॥ १ ॥

२] ति० टी०—आचितानेकान्विद्यमाननानेकान् माधुर्येण क्षौद्रं मधु तत्तुल्यपुष्पफलान् ॥ २ ॥

रा० टी०—ताविति । शैलेषु पर्वतावयवेषु आचितानेकान् आचितान् व्याप्तान् अनेकान् बहून् क्षौद्रपुष्पफलद्रुमान् क्षौद्रैर्मधुभिः पुष्पैः फलैश्च विशिष्टान् तरून् वीक्षन्तौ रामलक्ष्मणौ सुग्रीवं द्रष्टुं जग्मतुः ॥ २ ॥

गो० टी०—ताविति । शैलेष्वाचितान् प्ररूढान् अनेकांश्च क्षौद्रकल्पफलान् मधुतुल्यफलयुक्तान् वीक्षन्तौ वीक्षमाणौ ॥२॥

३-४] ति० टी०—उपतस्थतुः प्रापतुः ॥ ३ ॥ ४ ॥

रा० टी०—कृत्वेति । तौ रामलक्ष्मणौ शैलपृष्ठे वासं कृत्वैव पम्पायाः पश्चिममेव तीरमुपतस्थतुः ॥ ३ ॥

गो० टी०—कृत्वा चेति । वासं तस्यां रात्र्यामिति शेषः । उपतस्थतुः उपतस्थाते प्रापतुरित्यर्थः । रात्र्यन्त इति शेषः ॥३॥

रा० टी०—ताविति । तौ रामलक्ष्मणौ पुष्करिण्याः पम्पायाः पश्चिमं तीरमासाद्य तत्र शबर्याः आश्रमम् अपश्यताम् ॥ ४ ॥

गो० टी०—तौ पुष्करिण्या इति । स्पष्टम् ॥ ४ ॥

५] ति० टी०—तं शबर्याश्रमम् ॥ ५ ॥

रा० टी०—ताविति । तौ बहुभिर्द्रुमैः आवृतं सुरम्यं तं शबरीसंबन्धिनमाश्रमम् आसाद्य वीक्षन्तौ इतस्ततः शबरीमन्वेषयन्तौ अभ्युपेयतुः ॥ ५ ॥

गो० टी०—ताविति । आश्रममासाद्य तमभिवीक्षन्तौ अभिवीक्षमाणौ ॥ ५ ॥

६-७] ति० टी०—सिद्धा सिद्धयोगा ॥ ६ ॥ ७ ॥

रा० टी०—तौ इति । सिद्धा तपःसिद्धिं प्राप्ता शबरी तौ रामलक्ष्मणौ दृष्ट्वा कृताञ्जलिः सती उत्थाय पादौ जग्राह पाद्यादिकं च प्रादात् । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०—तौ चेति । सार्धश्लोक एकान्वयः । सिद्धा सिद्धयोगा ॥ ६ ॥

रा० टी०—तामिति । ततः शबरीदत्तपाद्यादिस्वीकारानन्तरं श्रमणीं तपस्विनीं शबरीं रामः उवाच । अर्धं पृथक् ॥ ७ ॥

गो० टी०—तामित्यादि । विघ्नाः तपोविघ्नाः कामादयः नियतः निगृहीतः आहारश्चेत्यत्रापि नियत इत्यनुषज्यते । "तपो नानशनात्परम्" इति श्रुतेः । नियमाः व्रतानि मनसः सुखं मनःसंतोषः चारुभाषिणीति साध्वीसंबोधनप्रकारः । इति तामुवाचेति संबन्धः ॥ ७-९ ॥

८-९] ति० टी०—विघ्नास्तपोविघ्नाः कामादयः कोपो नियतो निगृहीतः आहारश्च नियत इत्यनुकर्षः ॥ ८ ॥ ९ ॥

रा० टी०—तद्वचनाकारमाह—कच्चिदित्यादिभिः । ते त्वया विघ्नाः निर्जिताः कच्चिदिति प्रश्ने । कोपो नियतः निवर्तितः आहारो नियतो नियमितः शब्दाद्वया उभयान्वयी ॥

---

१ प्रेप्ति गो. पाठः । २ कल्पफलानिति गो. पाठः । ३ रामलक्ष्मणाविति गो. पाठः । ४ शंसितव्रतामिति गो. पाठः । ५ कोप इति गो. पाठः ।

रामेण तापसी पृष्टा सा सिद्धा सिद्धसंमता । शशंस शबरी वृद्धा रामाय प्रेत्यवस्थिता ॥ १० ॥
अद्य प्राप्ता तपःसिद्धिस्तव संदर्शनान्मया । अद्य मे सफलं जन्म गुरवश्च सुपूजिताः ॥ ११ ॥
अद्य मे सफलं तप्तं स्वर्गश्चैव भविष्यति । त्वयि देववरे राम पूजिते पुरुषर्षभ ॥ १२ ॥
तेनाहं चक्षुषा सौम्य पूता सौम्येन मानद । गमिष्याम्यक्षयांल्लोकांस्त्वत्प्रसादादरिंदम ॥ १३ ॥
चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः । इतस्ते दिवमारूढा यानहं पर्यचारिषम् ॥ १४ ॥
तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्महर्षिभिः । आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ १५ ॥
स ते प्रतिग्रहीतव्यः सौमित्रिसहितोऽतिथिः । तं च दृष्ट्वा वरांल्लोकानक्षयांस्त्वं गमिष्यसि ॥ १६ ॥
एवमुक्ता महाभागैस्तदाहं पुरुषर्षभ । मया तु संचितं वन्यं विविधं पुरुषर्षभ ॥ १७ ॥
तवार्थे पुरुषव्याघ्र पम्पायास्तीरसंभवम् । एवमुक्तः स धर्मात्मा शबर्या शबरीमिदम् ॥ १८ ॥

रा० टी०—कच्चिदिति । नियमाः योगाङ्गीभूतनियमादयः सफलाः फलसहिताः ॥ ९ ॥

१०] ति० टी०—प्रत्यवस्थिता अभिमुखं स्थिता ॥ १० ॥

रा० टी०—रामेणेति । रामेण पृष्टा प्रत्यवस्थिता तत्संमुखं स्थिता तापसी शबरी रामाय शशंस ॥ १० ॥

गो० टी०—रामेणेति । रामाय प्रत्युपस्थितेति तादर्थ्ये चतुर्थी ॥ १० ॥

११] ति० टी०—अद्य प्राप्ता तपःसिद्धिरित्यादिः शबर्या उपचारवत्परमार्थदर्शनादः ॥ ११ ॥

रा० टी०—तद्वचनाकारमाह—अद्येति । तव संदर्शनाद् अद्य तपःसिद्धिः कृछ्रचान्द्रायणादिनिष्पत्तिः प्राप्ता अत एव मे जन्म सफलम् अत एव गुरवः सुपूजिताः ॥ ११ ॥

गो०टी०—अद्येति । तपःसिद्धिः तपःपरिपाकः तप्तं तपः११

१२] ति० टी०—स्वर्गो ब्रह्मलोकः । देववरे सर्वान्तरात्मनि ॥ १२ ॥

रा० टी०—अद्येति । हे पुरुषर्षभ ! देववरे ब्रह्मादिभ्योऽपि भेदे त्वयि सुपूजिते सति तप्तं विचारः सफलम् अत एव स्वर्गोऽपि भविष्यति ॥ १२ ॥

गो० टी०—अद्य म इति । अद्येत्यस्यार्थं विवृणोति—त्वयीति । देववरे विष्णौ अनेन शबर्याः परमार्थज्ञानं वृत्तमिति सूच्यते ॥ १२ ॥

१३] ति० टी०—अक्षयाँल्लोकानपुनरावृत्तिकान्ब्रह्मलोकान् ॥ १३ ॥

रा० टी०—चक्षुषेति । हे रघुनन्दन ! तव सौम्येन चक्षुषावलोकनेन अहं पूतास्मि अत एव त्वत्प्रसादात्त्वत्प्रसन्नतां प्राप्य अक्षयान् ध्वंसाप्रतियोगिनः लोकान् गमिष्यामि ॥१३॥

गो० टी०—एवमुपचारवादादुक्त्वा स्वप्रयोजनमाह—चक्षुषा तव सौम्येन पूतास्मि रघुनन्दन । गमिष्याम्यक्षयान् लोकान् त्वत्प्रसादादरिन्दमेति । तेन सौम्येन चक्षुषा निर्हेतुककटाक्षेण पूतास्मि अनेन पूर्वाघविनाश उक्तः । अरिन्दमेत्यनेन उत्तराघाश्लेष उच्यते त्वत्प्रसादात् 'धातुः प्रसादान्महिमानमात्मनः' इत्युक्तत्वादाचार्यप्रसादोपबृंहितात्त्वत्प्रसादात् अक्षयान् लोकान् गमिष्यामि पुनरावृत्तिरहितं परमपदं प्राप्स्यामीत्यर्थः ॥ १३ ॥

१४] ति० टी०—चित्रकूटमिति । तदासन्निवैभवमात्रादित्यर्थः । इतोऽस्मदाश्रमात् ॥ १४ ॥

रा० टी०—चित्रकूटमिति । यान् ऋषीनहं पर्यचारिषम् असेविषि ते ऋषयः त्वयि चित्रकूटं प्राप्ते सति अतुलप्रभैः अनुपमप्रभाविशिष्टैः विमानैः इतः दिवमारूढाः ॥ १४ ॥

गो० टी०—तर्हि त्वदाचार्यैरेव सह किमर्थं न गतासीत्यत्राह—चित्रकूटमिति । ते मतङ्गशिष्या मदाचार्याः ॥ १४॥

१५] ति० टी०—आगमिष्यति अनुग्रहायेति शेषः ॥ १५ ॥

१६] ति० टी०—ते त्वया तं दृष्ट्वाऽस्मत्सेवाफलभूतं तद्दर्शनं प्राप्य । अक्षयाँल्लोकान्ब्रह्मलोकम् अवयवाभिप्रायेण गुणाभिप्रायेण वा बहुवचनम् ॥ १६ ॥

रा० टी०—स्वस्थितौ निमित्तमाह—तैरिति । सौमित्रिसहितो रामः इमं ते आश्रममागमिष्यति अतः स रामोऽतिथिः ते त्वया प्रतिग्रहीतव्यः सत्कारपूर्वं निवेशनीयः तं रामं दृष्ट्वा वरान् उत्तमान् लोकान् त्वं गमिष्यसि इति तैर्दिवमारोहद्भिः महर्षिभिरहमुक्ता । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०—तैरिति । धर्मज्ञैः योगरूपभगवत्प्राप्त्युपायाभावेऽप्याचार्यप्रसादकृतभगवत्प्रसादात् सद्गतिमियं प्राप्स्यतीत्येतद्धर्मज्ञैः महाभागैः भविष्यत्तद्वृत्तान्तज्ञानोचितभाग्यवद्भिः सुपुण्यमित्यागमनाद्धेत्वनुच्यते । स इति । प्रतिग्रहीतव्यः आतिथ्यकरणेन सत्करणीयः । दृष्ट्वा तेन दर्शनेन निमित्तेन अक्षयान् लोकान् गमिष्यसि । वरानिति कैवल्यव्यावृत्तिः गमिष्यसीति तैरहमुक्तेत्यन्वयः । अनेन आचार्यशुश्रूषणं भगवत्प्रसादद्वारा मोक्षहेतुरित्युक्तं भवति ॥ १५ ॥ १६ ॥

१७-१८] ति० टी०—एवमुक्ताहं यतः, अतो मया स्वदर्थं

१ प्रत्युपस्थितेति गो. पाठः । २ तप्तमिति गो. पाठः । ३ जन्मेति गो. पाठः । ४ चक्षुषा तव सौम्येन पूतास्मि रघुनन्देनेति गो. चक्षुषा तव सौम्येनेति रा. पाठः । ५ अर्धमेतत् गो. नास्ति ।

राघवः प्राह विज्ञाने तां नित्यमबहिष्कृताम् । दनोः सकाशात्तत्त्वेन प्रभावं ते महात्मनाम् ॥ १९ ॥
श्रुतं प्रत्यक्षमिच्छामि संद्रष्टुं यदि मन्यसे । एतत्तु वचनं श्रुत्वा रामवक्त्रविनिःसृतम् ॥ २० ॥
शबरी दर्शयामास तावुभौ तद्वनं महत् । पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम् ॥ २१ ॥
मतङ्गवनमित्येव विश्रुतं रघुनन्दन । इह ते भावितात्मानो गुरवो मे महाद्युते ॥
जुहवाञ्चक्रिरे [3]नीडं मन्त्रवन्मन्त्रपूजितम् ॥ ॥ २२ ॥
इयं प्रत्यक्स्थली वेदी यत्र ते मे सुसत्कृताः । पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः ॥ २३ ॥

वन्यं सम्यक्परीक्ष्य माधुर्ययुतं संचितमित्यर्थः । तदुक्तं पाद्मे-शबरी प्रस्तुत्य—' प्रत्युद्गम्य प्रणम्याथ निवेश्य कुशविष्टरे । पादप्रक्षालनं कृत्वा तत्तोयं पापनाशनम् ॥ शिरसा धार्य पीत्वा च वन्यैः पुष्पैरथार्चयत् । फलानि च सुपक्वानि मूलानि मधुराणि च ॥ स्वयमास्वाद्य माधुर्यं परीक्ष्य परिभक्ष्य च । पश्चान्निवेदयामास राघवाभ्यां दृढव्रता ॥ फलान्यास्वाद्य काकुत्स्थस्तस्यै मुक्तिं परां ददौ ' इति ॥ १७ ॥ १८ ॥

रा० टी०—एवमिति । तदा स्वर्गगमनसमये महाभागैः महर्षिभिः यतोऽहमेवमुक्ता अतः मया तवार्थे पम्पायास्तीरसंभवं विविधं वन्यं फलमूलादि संचितम् । साधश्लोक एकान्वयी ॥ १७ ॥

गो० टी०—आचार्योक्तिश्रद्धामात्मनः सूचयति—मयेति । तीरसंभवं विविधं वन्यं संचितं वन्यशब्देन फलमूलादिकमुच्यते । विविधमित्यनेन फलमूलादिभेद उच्यते । संचितमित्यनेन रामस्य चित्रकूटागमनात् प्रभृति संपादितत्वम् आदरेण गुप्तत्वं च तत्तत्फलजातीयमाधुर्यं परीक्ष्य स्थापितमिति संप्रदायः ॥ १७ ॥

रा० टी०—एवमिति । शबर्या एवमुक्तो राघवः विज्ञाने अतिदुर्लभपरमात्मज्ञानेऽपि अबहिष्कृतां तद्विषयकज्ञानवतीमित्यर्थः, तां शबरीम् इदं प्राह ॥ १८ ॥

गो० टी०—एवमिति । विज्ञाने विषये अबहिष्कृताम् अन्तरङ्गभूतां ज्ञात्वा हीनामप्याचार्यप्रसादलब्धब्रह्मज्ञानामिति भगवताप्यादरणीयतोक्तिः ॥ १८ ॥

१९-२०] ति० टी०—विज्ञाने आगतानागतज्ञाने अबहिष्कृतां तादृशज्ञानवतीमित्यर्थ इति तीर्थः । विज्ञाने ब्रह्मविद्यायां मैत्रेय्यादिवदबहिष्कृतां तत्राप्यधिकारिणीमित्यर्थ इति कतकः । विशिष्टं ज्ञानं येषां तेषां संबन्धो यस्यास्तत्संबोधनं हे विज्ञाने ! इति संबोध्य । तां नित्यमबहिष्कृतां भोजनादिव्यवहारादिति शेषः । तत्तमाहाराद्यङ्गीकृत्येति च शेष इत्यन्ये । किमाह तदाह—दनोरिति । ते महात्मनां स्वदाचार्याणां दनोः सकाशाच्छ्रुतं प्रत्यक्षं कर्तुमिच्छामीति शेषः । संद्रष्टुं यदि मन्यसे संदर्शयितुं योग्यं यदि मन्यस इत्यर्थः ॥१९॥२०॥

रा० टी०—तद्वचनाकारमाह—दनोरिति । दनोः कबन्धात् श्रुतं ते त्वत्संबन्धिनां महात्मनां प्रत्यक्षं महात्मजनप्रसिद्धं प्रभावं साक्षात्संद्रष्टुमिच्छामि यदि मन्यसे इच्छसि ॥ १९ ॥

गो० टी०—दनोरिति । दनोः सकाशात् दनुत इत्यर्थः । पञ्चम्यर्थे सकाशशब्दं प्रयुञ्जते । तत्त्वेन याथार्थ्येन ते महात्मनः त्वत्संबन्धिनो महात्मनः मतङ्गस्येत्यर्थः । 'महात्मनाम्' इति पाठे त्वदाचार्याणामित्यर्थः । श्रुतं प्रभावं प्रत्यक्षं संद्रष्टुमिच्छामि यदि मन्यसे दर्शयितुमिति शेषः ॥ १९ ॥

रा० टी०—एतदिति । रामवक्त्रविनिःसृतमेतद्वचनं श्रुत्वा उभौ रामलक्ष्मणौ तद्वनं दर्शयामास ॥ २० ॥

गो० टी०—एतत्त्विति । विनिःसृतं निर्गतम् ॥ २० ॥

२१] ति० टी०—मेघो वर्षुको यो घनस्तद्वन्नीलम् ' मिह सेचने ' बाहुलकाद्धत्वम् ॥ २१ ॥

रा० टी०—दर्शनप्रकारमाह—पश्येति । मेघघनप्रख्यं निबिडमेघसदृशं मतङ्गवनमिति नाम्ना विश्रुतं प्रसिद्धम् एव इदं वनं पश्य ॥ २१ ॥

गो० टी०—पश्येति । मेघघनप्रख्यं घनमेघसदृशं विश्रुतं वनमिति शेषः ॥ २१ ॥

२२] ति० टी०—मतङ्गवनं तत्तपोमहिम्ना विश्रुतं प्रसिद्धं ते प्रसिद्धाः । मन्त्रपूजितं मन्त्रस्य गायत्र्या जपेन पूजितमतिशुद्धं नीडं देहपञ्जरम् । ' तीर्थम् ' इति पाठेऽपि स एवार्थः । मन्त्रवत्तद्वोममन्त्रवत् जुहवांचक्रिरे हुतवन्तः । यद्वा तीर्थमध्वरं जुहवाञ्चक्रिरे हुतवन्तः । यद्वा तीर्थमध्वरं जुहवाञ्चक्रिरे कृतवन्त इत्यर्थः ॥ २२ ॥

रा० टी०—इहेति । भावितात्मानः परिशीलितपरमात्मानः ते प्रसिद्धाः मे गुरवः इह अस्मिन्प्रदेशे मन्त्रवन्मन्त्रपूजितं मन्त्रवतां मन्त्रवेदितृणामित्यर्थः, मन्त्रैः पूजितम् आह्वानमन्त्रैरभिमन्त्रितं तीर्थं गङ्गादि जुहवाञ्चक्रिरे आददिरे आनिन्युरित्यर्थः, तीर्थमध्वरं जुहवाञ्चक्रिरे चक्रुरित्यर्थो वा ॥ २२ ॥

गो० टी०—इहेति । भावितात्मानः चिन्तितात्मानः ते प्रसिद्धाः मे गुरवः मन्त्रवन्मन्त्रपूजितं मन्त्रवतां मन्त्रैः पूजितं तीर्थं गङ्गादिपुण्यसलिलम् इह प्रदेशे जुहवाञ्चक्रिरे आहृतवन्तः। महाद्युते इत्यनेन द्युनिप्रभावश्रवणे सन्तोषवत्त्वं व्यज्यते ॥२२॥

२३] ति० टी०—प्रत्यक्स्थली तत्राञ्ची वेदी यत्र यस्यां

---

१ महात्मन इति गो. पाठः । २ वक्त्रादिति गो. पाठः । ३ तीर्थमिति गो. रा. पाठः ।

तेषां तपःप्रभावेण पश्याद्यापि रघूत्तम[1] । द्योतयन्ती दिशः सर्वाः श्रिया वेद्यतुलप्रभा[2] ॥ २४ ॥
अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः । चिन्तितेतानागतान्पश्य[3] सम्मेतान्सप्त सागरान् ॥ २५ ॥
कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह[4] । अद्यापि न[5] विशुष्यन्ति प्रदेशे रघुनन्दन ॥ २६ ॥
देवकार्याणि कुर्वद्भिर्यानीमानी कृतानि वै । पुष्पैः कुवलयैः सार्धं[6] म्लानत्वं न[7] तु यान्ति वै ॥ २७ ॥
कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया । तदिच्छाम्यभ्यनुज्ञाता त्यक्ष्याम्येतत्कलेवरम्[8] ॥ २८ ॥
तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम् । मुनीनामाश्रमो येषामहं च परिचारिणी ॥ २९ ॥

सुसत्कृतात्यन्तं पूज्या मे मत्संबन्धिनस्ते गुरवः श्रमादुद्वेपिभिः कम्पवद्भिर्दृढतरत्वात्करैः पुष्पोपहारं देवताभ्यः कुर्वन्ति ॥२३॥

रा० टी०–इयमिति । यत्र यस्यां मे मया सुसत्कृताः ते मतङ्गशिष्याः श्रमात् अत्यन्तोषितकृच्छ्रचान्द्रायणादिजनितखेदात् उद्वेपिभिः कम्पयुक्तैः करैः पुष्पोपहारं कुर्वन्ति ॥ २३ ॥

गो० टी०–इयमिति । प्रत्यक्स्थली प्रत्यक्प्रदेशे स्थलीभूता प्राक्प्रदेशे पश्चिमाभिमुखविष्णुस्थानत्वेन प्रत्यङ्निम्नेत्यर्थः । वेदिः देवपूजास्थानम् इयम् अवलोक्यतामिति शेषः । यत्र वेद्यां मे मया सुसत्कृतास्ते गुरवः श्रमात् दृढतांकृतया पुष्पधारणाशक्त्या उद्वेपिभिः उत्कम्पिभिः करैः पुष्पोपहारं पुष्पैरर्चनं कुर्वन्ति अकुर्वन् । अत्र वेदिरिति जात्येकवचनम् उत्तरश्लोके बहुवचनप्रयोगात् बहूनां बहुवेदिसंभवाच्च ॥ २३ ॥

२४] ति० टी०–तेषां मदाचार्याणां प्रभावेणेयं वेदिस्तत्पूजाकाल इवाद्यापि सर्वा दिशो द्योतयन्त्यतुलप्रभा दृश्यते पश्य ॥ २४ ॥

रा० टी०–तेषामिति । हे रघूत्तम ! तेषामस्मद्गुरूणां तपःप्रभावेण श्रिया स्वशोभया सर्वाः दिशः अद्यापि द्योतयन्ती वेदी त्वं पश्य । वाक्यार्थस्य दृशिक्रियायां कर्मत्वेनान्वयात्तद्वाचकस्य प्रातिपदिकत्वाभावात् न द्वितीया 'द्योतयन्ति दिशः सर्वाः श्रिया वेद्योऽतुलप्रभाः' इति भूषणपाठः ॥ २४ ॥

गो० टी०–तेषामिति । तेषाम् अस्मदाचार्याणां प्रभावेण अतुलप्रभाः इमाः वेद्यः अद्यापि तेषामसंनिधानेऽपि सर्वा दिशः द्योतयन्ति प्रकाशयन्ति । अनेन आचार्याभिमतो देशस्तदसंनिधानेऽप्युद्देश्य इत्युक्तम् ॥ २४ ॥

२५] ति० टी०–आश्चर्यान्तरं दर्शयति—अशक्नुवद्भिरिति । सागरादितीर्थं गन्तुमशक्नुवद्भिरित्यर्थः । तत्र हेतुः—उपवासश्रमालसैः कृच्छ्रादिशास्त्रीयोपवासैर्जनितेन श्रमेणालसैः ईदृशैस्तैश्चिन्तितेन तेषां ध्यानेन तदभिषेकतीर्थं आगतान्सप्त सागरान्समेतान्पश्य ॥ २५ ॥

रा० टी०–अशक्नुवद्भिरिति । उपवासश्रमालसैः शास्त्रविहितोपवासजनितश्रमहेतुकालसविशिष्टैः अत एव गन्तुमशक्नुवद्भिस्तैः मदाचार्यैः चिन्तितेन चिन्तया गतान्समेतान् संघीभूतान्सप्त सागरान् त्वं पश्य ॥ २५ ॥

गो० टी०–पुनर्वैभवान्तरमाह–अशक्नुवद्भिरिति । उपवासश्रमेण अलसैः मन्दैः अत एव सप्त सागरान् गन्तुमशक्नुवद्भिः मे गुरुभिः चिन्तिते चिन्तितमात्रे अभ्यागतान् अभिमुखमागतान् सप्त सागरान् पश्य ॥ २५ ॥

२६] ति० टी०–आश्चर्यान्तरमाह—कृताभिषेकैरिति । न विशुष्यन्ति तीर्थवैभवात्तत्तपोवैभवाच्चेति भावः ॥ २६ ॥

रा० टी०–कृतेति । हे रघुनन्दन ! पादपेषु वृक्षेषु कृताभिषेकैः कृतस्नानैः न्यस्ताः संस्थापिताः वल्कला अद्यापि न विशुष्यन्ति ॥ २६ ॥

गो० टी०–अद्भुतान्तरमाह–कृतेति । इह प्रदेशे सागरप्रदेशे कृताभिषेकैः कृतस्नानैः तैर्मुनिभिः पादपेषु न्यस्ताः आर्द्रवल्कलाः अद्यापि नावशुष्यन्ति न शुष्का भवन्ति । तदङ्गसंपर्कवैभवादिति भावः ॥ २६ ॥

२७] ति० टी०–आश्चर्यान्तरमाह—देवेति । कृतानि दत्तान्यतिमृदुकुवलयसहितानि पुष्पाणि अद्यापि म्लानत्वं यान्ति तत्तपःप्रभावादिति शेषः ॥ २७ ॥

रा० टी०–देवेति । देवकार्याणि कुर्वद्भिः अस्मदाचार्यैः कुवलयैः कुड्मलैः सार्धं पुष्पैः यानि इमानि कृतानि रचितानि मालाजातानि तानि म्लानत्वं नैव यान्ति ॥ २७ ॥

गो० टी०–देवेति । देवकार्याणि देवार्चनानि कुर्वद्भिः तैः कुवलयैः सह पुष्पैः पुष्पान्तरैः यानीमानि माल्यानि कृतानि तानि म्लानत्वं नोपयान्ति भक्त्यतिशयेन समर्पितत्वादिति भावः । एतावता ग्रन्थसंदर्भेण 'गुरुं प्रकाशयेद्धीमान्' इत्युक्तरीत्या आचार्यवैभवप्रकटनं कर्तव्यमिति सूचितम् ॥ २७ ॥

२८] ति० टी०–उपसंहरति—कृत्स्नमिति । दृष्टं त्वया मया दर्शितं श्रुतं त्वया मया श्रावितं अभ्यनुज्ञाता त्वयेति शेषः । तत्तस्मादेतत्कलेवरं त्यक्ष्यामीतीच्छामि ॥ २८ ॥

रा० टी०–कृत्स्नमिति । इदं वनं त्वया दृष्टं श्रोतव्यं महात्मानो यशः श्रुतं च तत्तस्माद्धेतोः अभ्यनुज्ञाता आचार्यैः रामाग्रे त्वया तनुत्यागः कर्तव्यः इत्याज्ञापिता अहम् एतत्कलेवरं त्यक्ष्यामि ॥ २८ ॥

गो० टी०–उपसंहरति–कृत्स्नमिति । अभ्यनुज्ञाता त्वयेति शेषः ॥ २८ ॥

२९] ति० टी०–येषां मुनीनामयमाश्रमो येषां चाहं

१ रघूद्वहेति गो. पाठः । २ वेद्योऽतुलप्रभा इति गो. पाठः । ३ चिन्तितेऽभ्यागतानिति गो. पाठः । ४ सहितानिति गो. पाठः । ५ नावशुष्यतीति गो. पाठः । ६ नोपेति गो. पाठः । ७ त्यक्ष्यमिति गो. पाठः ।

धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः । प्रहर्षमतुलं लेभे आश्चर्यमिति चाब्रवीत् ॥ ३० ॥
तामुवाच ततो रामः शबरीं संशितव्रताम् । अर्चितोऽहं त्वया भद्रे गच्छ कामं यथासुखम् ॥ ३१ ॥
इत्येवमुक्ता जटिला चीरकृष्णाजिनाम्बरा । [तस्मिन्मुहूर्ते शबरी देहं जीर्णं जिहासती ।]
अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने । ॥ ३२ ॥
ज्वलत्पावकसंकाशा स्वर्गमेव जगाम ह । दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना ॥ ३३ ॥
दिव्याम्बरधरा तत्र बभूव प्रियदर्शना । विराजयन्ती तं देशं विद्युत्सौदामनी यथा ॥ ३४ ॥
यत्र ते सुकृतात्मानो विहरन्ति महर्षयः । तत्पुण्यं शबरीस्थानं जगामात्मसमाधिना ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

परिचारिणी तेषां भावितात्मनां सदानुसंहितपरमात्मनां मुनीनां समीपं गन्तुमहमिच्छामीति चाब्रवीत् ॥ २९ ॥

रा० टी०–तद्धं त्यक्त्वा किं करिष्यसीत्यत आह–तेषामिति । तेषाम् आश्रमः अयमिति शेषः, अहं परिचारिणी च तेषां भावितात्मनां परिशीलितपरमात्मनां मुनीनां समीपं गन्तुमहमिच्छामि ॥ २९ ॥

गो० टी०–त्यक्त्वा किं करिष्यसीत्यत्राह–तेषामिति । समीपं पादमूलं गमिष्यामि यानहं पर्यचारिषमित्यन्यत्रोक्तेः । आश्रमः अयमिति शेषः, येषामाश्रमोऽयं येषामहं च परिचारिणी तेषां समीपं गन्तुमिच्छामीति संबन्धः ॥ २९ ॥

३०] ति० टी०–श्रुतार्थमुद्दिश्येति शेषः ॥ ३० ॥

रा० टी०–धर्मिष्ठमिति । धर्मिष्ठम् अत्यन्तं धर्मसंयुक्तं वचः शबरीवचनं श्रुत्वा प्रहर्षं लेभे आश्चर्यमित्यब्रवीच्च ॥ ३० ॥

गो० टी०–धर्मिष्ठमिति । वचः आचार्यवैभवप्रदर्शनादिरूपं तत्त्वतः मायां विना आश्चर्यमिति मत्वा ॥ ३० ॥

३१] ति० टी०–संशितव्रतां तीक्ष्णव्रताम् ॥ ३१ ॥

रा० टी०–तामिति । शंशितव्रताम् अतितीक्ष्णव्रतशीलां शबरीं हे भद्रे ! त्वया अहं अर्चितः अतो यथाकामं गच्छ इति राम उवाच ॥ ३१ ॥

गो० टी०–अथ शबरीमनोरथं पूरयति–तामिति । शंसितव्रताम् आचार्यपरिचर्यानिष्ठामित्यर्थः । अर्चितः तव गुरुवृत्तिसंदर्शनेनेति शेषः । भक्त्या वन्यसंपादनमात्रेण वा अयमेवार्थः संक्षेपे 'शबर्या पूजितः सम्यक्' इत्युक्तेः । कामं काम्यमानं लोकम् ॥ ३१ ॥

३२] ति० टी०–आत्मानं हुताशने हुत्वा स्वाचार्योपदिष्टमार्गेणेत्यर्थः ॥ ३२ ॥

रा० टी०–इतीति । इत्येवं रामेण उक्ता जटिला जटावती चीरकृष्णजिनाम्बरा चीरं खण्डपटः तत्सहितं कृष्णाजिनम् अम्बरं यस्याः अनुज्ञाता रामाज्ञया त्वया समागन्तव्यम् इति पूर्वं स्वाचार्यैराज्ञापिता शबरी आत्मानं स्वदेहं हुताशने हुत्वा संस्थाप्य ज्वलत्पावकसंकाशा प्रज्वलितवह्निसदृशी सती स्वर्गमेव जगाम । सार्धश्लोक एकान्वयी ॥ ३२ ॥

गो० टी०–इतीति । श्लोकद्वयमेकान्वयम् । जिहासती हातुमिच्छन्ती स्वर्गमेवेत्यवधानं द्योतयति ॥ ३२ ॥ ३३ ॥

३३–३४] ति० टी०–स्वर्गं ब्रह्मलोकमेव ॥ ३३ ॥ ३४ ॥

रा० टी०–दिव्येति । दिव्याभरणसंयुक्ता दिव्यभूषणैर्भूषिता दिव्यमाल्यानुलेपना दिव्ये माल्यानुलेपने पुष्पचन्दने यस्याः सा दिव्याम्बरधरा शबरी प्रियदर्शना बभूव ॥ ३३ ॥

गो० टी०–दिव्येति । सार्धश्लोकः । तत्र स्वर्गगमनारम्भे विद्युत् विशेषेण द्योतमाना सौदामिनी तडित् ॥ ३४ ॥

रा० टी०–विराजयन्तीति । सौदामिनी सुदामाभिधपर्वते प्रकाशमाना विद्युदिव तं देशं विराजयन्ती प्रकाशयन्ती शबरी यत्र यस्मिन् स्थाने सुकृतात्मानः महर्षयः ते शबरीगुरवः विहरन्ति तत् पुण्यस्थानम् आत्मसमाधिना स्वचित्तैकाग्र्येण जगाम । सार्धश्लोक एकान्वयी ॥ ३४ ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

३५] ति० टी०–यत्र ब्रह्मलोके तत्पुण्यस्थानं शबर्यात्मसमाधिना जगाम ब्रह्मसमाधिनेत्यर्थः ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

गो० टी०–यत्रेति । ते गुरवः सुकृतात्मानः सुकृतधैर्यवन्तः आत्मसमाधिना आत्मविषययोगेन एतत्सर्गवृत्तान्तेन मतङ्गशिष्योपदिष्टसमाधिका शबरी गुर्वनुज्ञया रामागमनपर्यन्तं स्थित्वा ततो रामानुज्ञया स्वसमाधिबलेन स्वगुरुगतं स्वर्गविशेषं प्राप्तेत्यवगम्यते । क्रियामपि विदुरादेरिव योगाधिष्ठारः संभवति तदङ्गयज्ञादिकर्मस्थाने गुरुशुश्रूषा स्वर्गश्च आदौ अक्षयानित्युक्त्या पुनरावृत्तिरहितं परमपदमित्यवगम्यते "एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुत्या केवलस्वर्गस्य क्षयित्वावगमात् ॥ ३५ ॥

---

१ तत्त्वक्त इति गो. पाठः । २ श्रमणीमिति गो. पाठः । ३ भक्त्येति गो. पाठः । ४ इत्युक्ता जटिला वृद्धेति गो. पाठः । ५ अर्धमेतदधिकं गो.पाठे । ६ सेति गो. पाठः । ७ मिनीति गो. पाठः ।

पञ्चसप्ततितमः सर्गः ।

मतङ्गादिमहर्षिपरिग्रहिमानं प्रशंसन् निर्वर्तितपुण्यतीर्थावगाहः कृताह्निकश्च रामः शबर्याश्रमान्निर्गत्य लक्ष्मणेन सह पम्पातीरमनुजगाम ।

दिवं तु तस्यां यातायां शबर्यां स्वेन तेजसा । लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः ॥ १ ॥
[1]चिन्तयित्वा तु धर्मात्मा प्रभावं तं महात्मनाम् । हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् ॥ २ ॥
दृष्टो मयाऽऽश्रमः सौम्य बह्वाश्चर्यः कृतात्मनाम् । विश्वस्तमृगशार्दूलो नानाविहगसेवितः ॥ ३ ॥
स्नानानां च समुद्राणां [3]तेषां तीर्थेषु लक्ष्मण । उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ॥ ४ ॥
[4]प्रनष्टमशुभं यन्नः कल्याणं समुपस्थितम् । तेन [5]त्वेतत्प्रहृष्टं मे मनो लक्ष्मण संप्रति ॥ ५ ॥
हृदये [6]मे नरव्याघ्र शुभमाविर्भविष्यति । तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम् ॥ ६ ॥
ऋष्यमूको गिरिर्यत्र नातिदूरे प्रकाशते । यस्मिन्वसति धर्मात्मा सुग्रीवोऽशुमतः सुतः ॥ ७ ॥
नित्यं वालिभयात्रस्तश्चतुर्भिः सह वानरैः । अहं [8]त्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ॥ ८ ॥
तदधीनं हि मे कार्यं सीतायाः परिमार्गणम् । [9]इति ब्रुवाणं तं [10]वीरं सौमित्रिरिदमब्रवीत् ॥ ९ ॥

अस्मिन् सर्गे सार्धपञ्चत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुःसप्ततितमः सर्गः ॥ ७४ ॥

१] ति० टी०–दिवं त्विति ॥ १ ॥

रा० टी०–शबरीस्वर्गगमनानन्तरकालिकं रामवृत्तान्तमाह–दिवमित्यादिभिः । शबर्यां दिवं यातायां सत्यां राघवः चिन्तयामास श्रुनिप्रभावं प्रशंसयामासेत्यर्थः ॥ १ ॥

गो० टी०–अथ पम्पागमनं पञ्चसप्ततितमे–दिवं त्वित्यादि । स्वेन तेजसा उपलक्षितायामिति शेषः ॥ १ ॥

२–३] ति० टी०–महात्मनां प्रभावं शबर्युक्तम्॥ २॥ ३ ॥

रा० टी०–चिन्तयित्वेति । महात्मनां प्रभावं चिन्तयित्वा एकाग्रं समीहितचित्तं लक्ष्मणं राघवोऽब्रवीत् ॥ २ ॥

गो० टी०–स इति । एकाग्रम् एकचित्तम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–दृष्ट इति । बह्वाश्चर्यः अनेकविधाश्चर्यविशिष्टः विश्वस्ताः मृगशार्दूला यस्मिन्स कृतात्मनां परिशीलितपरमार्थानां मुनीनामाश्रमो मया दृष्टः ॥ ३ ॥

गो० टी०–दृष्ट इति । बह्वाश्चर्यः अत्यद्भुतपुष्पफलादिसंपत्तिसकलतीर्थसमागमादिना आश्चर्ययुक्तः विश्वस्ताः विश्वासं प्राप्ताः परस्परहिंसकत्वरहिताः मृगाः शार्दूलाश्च यस्मिन् तथा ३॥

४] ति० टी०–तेषां मुनीनाम् । स्नानां समुद्राणां तीर्थेषु लोकोपकाराय तैः स्थापितेषु उपस्पृष्टं स्नातम् ॥ ४ ॥

रा० टी०–स्नानानामिति । तेषां मुनिभिरानीतानां स्नानसमुद्राणां तीर्थेषु जलेषु विधिवत् उपस्पृष्टं स्नातं पितरस्तर्पिताश्च ॥ ४ ॥

गो० टी०–स्नानानामिति । उपस्पृष्टं स्नातम्। अनेन पुण्यतीर्थप्राप्तौ स्नानश्राद्धादिकं कर्तव्यमित्युक्तम् ॥ ४ ॥

५] ति० टी०–तेन कल्याणोपस्थानेन ॥ ६ ॥

रा० टी०–प्रणष्टमिति । अशुभं सीतापहरणजनितसंतापः प्रणष्टम् इदानीं नानुभूयते अत एव कल्याणं सीतासंयोगजनितसुखं समुपस्थितं समीपे प्राप्तं तेन हेतुना एतत् मे मनः प्रहृष्टम् अत एव शुभं प्रियासंयोगजनितसुखम् आविर्भविष्यति तत् तस्मात् हेतोः आगच्छ मत्समीपमिति शेषः । तत्प्रयोजनमाह–नातिदूरे इतः समीपे यत्र यस्यास्तीरे यस्मिन् अंशुमतेः सूर्यवो वालिभयात्रस्त उद्विग्नः सन् चतुर्भिर्वानरैः सह वसति स ऋष्यमूको गिरिः प्रकाशते तां पम्पां गमिष्यावः। सार्धश्लोकत्रयमेकान्वयि ॥ ५–७ ॥

गो० टी०–प्रणष्टमिति । तत्तदशुभं प्रणष्टं कल्याणं शुभं तेन अशुभनिवृत्तिपूर्वकशुभप्राप्त्या ॥ ५ ॥

६] ति० टी०–शुभं मित्रलाभादि ॥ ६ ॥

गो० टी०–हृदय इत्यर्धमेकम् । शुभं शुभस्मरणम् ॥ ६ ॥

गो० टी०–तदित्यादिश्लोकद्वयम्। अंशुमतः सूर्यस्य ७॥८॥

७] ति० टी०–अंशुमतः सूर्यस्य ॥ ७ ॥

८–९] ति० टी०–त्वरे त्वरामि ॥ ८ ॥ ९ ॥

रा० टी०–अहमिति । तं कबन्धेन समादिष्टं सुग्रीवं द्रष्टुमहं त्वरे हि यतः मे कार्यं सीतायाः परिमार्गणमन्वेषणं तदधीनं सुग्रीवायत्तम् । अर्धद्वयमेकान्वयि ॥ ८ ॥

गो० टी०–अभीति । मे सीताया इत्यन्वयः ॥ ९ ॥

रा० टी०–इतीति । इति ब्रुवाणं रामं ममापि मनस्त्वरते अतस्त्वरितं गच्छावः इदं सौमित्रिरब्रवीत् ॥ ९ ॥

---

१ स चिन्तयित्वेति गो. पाठः । २ ऽयमिति गो. पाठः । ३ एष्विति गो. पाठः । ४ प्रणष्टमिति गो. रा. पाठः । ५ तत्त्वेन हृष्टमिति गो. पाठः । ६ ईति गो.पाठः । ७ अभीति गो.पाठः । ८ सौम्येति गो.पाठः । ९ एवमिति गो.पाठः । १० धीरं राममिति गो.पाठः । ११ श्रुत इति पदमत्रापेक्षितम्

गच्छावस्त्वरितं तत्र ममापि त्वरते मनः । आश्रमात्तु ततस्तस्मान्निष्क्रम्य स विशांपतिः ॥ १० ॥
आजगाम ततः पम्पां लक्ष्मणेन सह प्रभुः । समीक्षमाणः पुष्पाढ्यं सर्वतो विपुलद्रुमम् ॥ ११ ॥
कोयष्टिभिश्चार्जुनकैः शतपत्रैश्च कीचकैः । एतैश्चान्यैश्च बहुभिर्नादितं तद्वनं महत् ॥ १२ ॥
[समाजग्मतुरव्यग्रौ राघवौ सुसमाहितौ ।]
स रामो विविधान्वृक्षान्सरांसि विविधानि च । पश्यन्कामाभिसंतप्तो जगाम परमं ह्रदम् ॥ १३ ॥
स तामासाद्य वै रामो दूरात्पानीयवाहिनीम् । मतङ्गसरसं नाम ह्रदं समवगाहत ॥ १४ ॥
तत्र जग्मतुरव्यग्रौ राघवौ हि समाहितौ । स तु शोकसमाविष्टो रामो दशरथात्मजः ॥ १५ ॥
विवेश नलिनीं रम्यां पङ्कजैश्च समावृताम् । तिलकाशोकपुंनागबकुलोद्दालकाश्रिनीम् ॥ १६ ॥
रम्योपवनसंबाधां रेम्यसंपीडितोदकाम् । स्फटिकोपमतोयां तां श्लक्ष्णवालुकसंततताम् ॥ १७ ॥
मत्स्यकच्छपसंबाधां तीरस्थद्रुमशोभिताम् । सखीभिरिव संयुक्तां लताभिरनुवेष्टिताम् ॥ १८ ॥
किंनरोरगगन्धर्वयक्षराक्षससेविताम् । नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभाम् ॥ १९ ॥
पद्मसौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः । नीलां कुवलयोद्घाटैर्बहुवर्णां कुथामिव ॥ २० ॥
अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम् । पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ॥ २१ ॥

गो० टी०–एवमिति । धीरं कृतधैर्यमित्यर्थः ॥ १० ॥

१०–१३]ति० टी०–ममापि त्वरते पम्पादर्शने ॥१०–१३॥

रा० टी०–आश्रमादिति । ततः लक्ष्मणोक्त्यनन्तरं वेशां प्रजानां पतिः प्रभुः रामः तस्मादाश्रमान्निष्क्रम्य पुपाढ्यं विपुलद्रुमं बहुद्रुमविशिष्टं वनं समीक्षमाणः सन् लक्ष्मणेन सह ततः तां पम्पां जगाम प्राप । सार्धश्लोक एकान्वयी ॥ १० ॥ ११ ॥

रा० टी०–कोयष्टिकैरिति । कोयष्टिकादिभिर्नादितं तत्पम्पासंबन्धि महद्वनं सुसमाहितौ अत एव अव्यग्रौ राघवौ समाजग्मतुः । सार्धश्लोक एकान्वयी ॥ १२ ॥

रा० टी०–तत्र कोयष्टिकाः टिट्टिभकाः अर्जुनका मयूराः अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः' इति मेदिनी । शपत्रा दार्वाघाटकाः कीरकाः शुकाः । स इति । विविधान् नेकप्रकारान्वृक्षादीन् पश्यन् कामाभिसंतप्तः सीतासंगमविषयकातीच्छावान् स रामः परमं मतङ्गसंबन्धित्वेन अत्युत्कृष्टं ह्रदं पम्पैकदेशवर्तिं दहरं जगाम ॥ १३ ॥

गो० टी०–आश्रमादिति । ततः अनन्तरं विशां प्रजानां तिः ततः तत्र मार्गे अभिभवतीत्यभिभूः अभिभावक इत्यर्थः । तृणामित्यर्थसिद्धम् । 'प्रभुः' इत्यपि पाठः ॥ ११ ॥

१४–१६] ति० टी०–पानीयवाहिनीं पानार्हातिमधुरतोयनिर्मलजलवाहिनीम् । अनेन पम्पानदीति लभ्यते । वाहिनीमित्यस्य धारिणीमित्यर्थो वा । मतङ्गसरसमित्याकारान्तः । तच्च पम्पायामेव प्रदेशभेदो गङ्गायां [illegible] ॥ १४–१६ ॥

१७–१९] ति० टी०–श्लक्ष्णा मृदुस्पर्शा ॥ १७–१९ ॥

२०] ति० टी०–कुवलयोद्घाटैः कुवलयसमूहैः । कुथा गजास्तरणचित्रकम्बलः ॥ २० ॥

रा० टी०–स इति । स रामः दूरात् दूरदेशं पानीयवाहिनीं पानयोग्यजलवहनशीलां तां पम्पाम् आसाद्य प्राप्य मतङ्गसरसं नाम ह्रदं पम्पैकदेशवर्तिं दहरं समवगाहत पानीयवाहिनीमित्यनेन तस्याः स्रोतोविशिष्टत्वं व्यक्तं मतङ्गसरसमित्यत्र "अनोऽमायःसरसां जातिसंज्ञयोः" इत्यच् ॥१४॥

रा० टी०–स इति । शोकसमाविष्टः स रामः पङ्कजैः समावृतां तिलकादिभिः प्रकाशितां रम्यां पवनसंबाधां रमणीयानेकविधोपवननिबिडां पद्मसंपीडितोदकां पद्मपुष्पभिन्नोदकविशिष्टां स्फटिकोपमतोयां स्फटिकमणिसदृशतोयविशिष्टां श्लक्ष्णवालुकसंततां स्वच्छवालुकैर्विशिष्टां मत्स्यकच्छपसंबाधां मत्स्यादिनिबिडां तीरस्थद्रुमैः शोभितां लताभिः अनुवेष्टिताम् अत एव सखीभिरिव संयुक्तां किंनरादिभिः संचितां नानाद्रुमलताकीर्णाम् अनुक्तानेकविधतरुलतासंयुक्तां शीतवारिनिधिं शीतैर्वारिभिः पूर्णां पद्मसौगन्धिकैः अरुणकमलैः ताम्रामरुणां कुमुदमण्डलैः शुक्लां कुवलयोद्घाटैः नीलकमलसमूहैः नीलाम् अत एव बहुवर्णां कुथां करिकम्बलमिव अरविन्दोत्पलवतीं अरविन्दोत्पलयोर्जातिविशेषैरपि विशिष्टां पद्मसौगन्धिकजातिविशेषैर्विशिष्टां पुष्पिताम्रवनैरुपेतां बर्हिणां मयूराणामुद्घुष्टैः शब्दैः नादितां नलिनीं सरसीं पम्पां विवेश । त्रयोदशानामर्थानामेकान्वयित्वम् ॥ १६–२१ ॥

२१]ति०टी०–अरविन्दपद्मयो रक्तश्वेतविषयत्वेन भेदः २१

१ ऽभिभूरिति गो. पाठः । २ अर्धमेतदधिकं रा. पाठे । ३ एतदाद्यासर्गसमाप्ति गो. श्लोकपौर्वापर्येऽतीव व्यत्यास उपलभ्यतेऽतस्तत्पाठः सामस्त्येनैव सर्गान्ते निवेश्यते । ४ अर्धमेतत् रा.नास्ति । ५ पद्मेति रा.पाठः । ६ श्वेति रा. पाठः।

स तां दृष्ट्वा ततः पम्पां रामः सौमित्रिणा सह । विललाप च तेजस्वी रामो दशरथात्मजः ॥ २२ ॥
तिलकैर्बीजपूरैश्च वटैः शुक्लद्रुमैस्तथा । पुष्पितैः करवीरैश्च पुंनागैश्च सुपुष्पितैः ॥ २३ ॥
मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा । अशोकैः सप्तपर्णैश्च कतकैरतिमुक्तकैः ॥ २४ ॥
अन्यैश्च विविधैर्वृक्षैः प्रमदेवोपशोभिताम् । [सै तामासाद्य पम्पां च विषसाद महामनाः ।]
अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ॥ २५ ॥
ऋष्यमूक इति ख्यातश्चित्रपुष्पितपादपः । हरिर्ऋक्षरजोनाम्नः पुत्रस्तस्य महात्मनः ॥ २६ ॥
अध्यास्ते तु महावीर्यः सुग्रीव इति विश्रुतः । सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ ॥ २७ ॥
इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमः । कथं मया विना सीतां शक्यं लक्ष्मण जीवितुम् ॥ २८ ॥

इत्येवमुक्त्वा मदनाभिपीडितः स लक्ष्मणं वाक्यमनन्यचेतनः ।
विवेश पम्पां नलिनीमनोरमां तमुत्तमं शोकमुदीरयाणः ॥ २९ ॥
क्रमेण गत्वा प्रविलोकयन्वनं ददर्श पम्पां शुभदर्शकाननाम् ।
अनेकनानाविधपक्षिसंकुलां विवेश रामः सह लक्ष्मणेन ॥ ३० ॥

२२] ति० टी०–विललाप सीतावियोगादिति शेषः॥२२॥
रा० टी०–स इति । सौमित्रिणा सह रामोऽभिरामदाता रामो विललाप ॥ २२ ॥
२३] ति० टी०–शुक्लद्रुमो लोध्रः॥ २३ ॥
२४] ति० टी०–भण्डीरो वटः । निचुलो वञ्जुलः । अतिमुक्तो माधवीलता ॥ २४ ॥
रा० टी०–तिलकैरिति । तिलकादिभिः अन्यैश्च वृक्षैः शोभितां प्रमदामिव तां पम्पाम् आसाद्य महामनाः अपि रामः विषसाद सीतावियोगेन विषादं प्राप । अर्धषट्कमेकान्वयि ॥ २३–२९ ॥
२५] ति० टी०–पूर्वोक्तः कबन्धोक्तः ॥ २५ ॥
२६–२७] ति० टी०–तस्य प्रसिद्धतरस्य ऋक्षरजोनामकस्य पुत्रो हरिर्वानरः ॥ २६ ॥ २७ ॥
२८] ति० टी०–इत्युवाचान्तरान्तरा सीताशोकम् ॥२८॥
रा० टी०–अस्या इति । पूर्वोक्तः कबन्धेन पूर्वं वर्णितः धातुमण्डितः अनेकधातुभिः शोभितः ऋष्यमूक इति ख्यातः अस्याः पम्पायास्तीरे योऽयं पर्वतः तं पर्वतम् ऋक्षरजोनाम्नः महात्मनः तस्य पुत्रः सुग्रीव इति विश्रुतः महावीर्यः हरिर्वानरः अध्यास्ते तत्र वसतीत्यर्थः, तं वानरेन्द्रं सुग्रीवं नरर्षभ हे लक्ष्मण ! त्वमभिगच्छ इति, सीतां विना मया जीवितुं कथं शक्यम् इति च वाक्यम् सत्यविक्रमो रामः लक्ष्मणं पुनरुवाच । अर्धसप्तकमेकान्वयि ॥ २६–२८ ॥
२९] ति० टी०–उपसंहरति—इतीति । अनन्यचेतनो नास्त्यन्यत्र सीतायाः चेतनं चित्तं यस्य सः । नलिनीभिर्मनोरमां पम्पां मतङ्गसरसः प्रदेशवर्तिनीं विवेश ॥ २९ ॥
रा० टी०–इतीति । मदनाभिपीडितः सीताविरहजनितदैन्याक्रान्तः अनन्यचेतनः न अन्यस्मिन् सीतातिरिक्तवस्तुनि चेतनं चित्तं यस्य सः रघूत्तमः स रामः इत्येवं लक्ष्मणमुक्त्वा शोकविषादयन्त्रितः तिरोहितशोकविषादः सन् नलिनीं सरसीं पम्पां विवेश ॥ २९ ॥
३०] ति० टी०–शुभदर्शं शुभदर्शनं काननं यस्यां तां पम्पां ददर्श सर्वत इति शेषः । विवेश च मतङ्गसरसावच्छेदेनेति बोध्यम् ॥ ३० ॥

विराधादिकबन्धान्तान्हत्वा स्वपदमादिशत् ।
विचरन्दण्डकारण्ये भवारण्ये स मे गतिः ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

रा० टी०–क्रमेणेति । वनं पम्पातीरवर्तिकाननं प्रविलोकयन् सन् क्रमेण गत्वा शुभो दर्शो दर्शनं येषां तानि काननानि यस्याः ताम् अनेकैर्बहुभिर्नानाविधैरनेकप्रकारकैः पक्षिभिः संकुलां व्याप्तां पम्पां लक्ष्मणेन सह रामः ददर्श विवेश च चतुर्दिक्षिति शेषः ॥ ३० ॥

नमामः श्रीरामं परममभिरामं सुमनसां
समाप्ता संसेव्यं गुरुमपि हनूमन्तमभयम् ।
त्रिवेणीं वाल्मीकिं सुखदमनिशं यत्कृपया
सुगारण्यव्याख्या परमपुरुषार्थैकहृदया ॥ १ ॥
आरण्यकाण्डव्याख्यानं रामायणशिरोमणिः ।
विदध्यात्परमां प्रीतिं श्रीरामे परतः परे ॥ २ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणावारण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

---

१ प्रमदामिवेति रा. प्रमदामिव भूषितामिति गो. पाठः । २ अर्धमेतदधिकं रा. पाठे । ३ नलिनीमिति रा. पाठः । ४ विषादवान्प्राप्त इति रा. पाठः ।

गोविन्दराजसंमतः पाठः—

[स ददर्श ततः पुण्यामुदारजनसेविताम् ॥ नानाद्रुमलतार्कीर्णां पम्पां पानीयवाहिनीम् ॥ १२ ॥
पद्मैः सौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः ॥ नीलां कुवलयोद्घातैर्बहुवर्णां कथामिव ॥ १३ ॥
स तामासाद्य वै रामो दूरादुदकवाहिनीम् ॥ मतङ्गसरसं नाम ह्रदं समवगाहत ॥ १४ ॥
अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम् ॥ पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ॥ १५ ॥
तिलकैर्बीजपूरैश्च धवैः शुक्लद्रुमैस्तथा ॥ पुष्पितैः करवीरैश्च पुंनागैश्च सुपुष्पितैः ॥ १६ ॥
मालतीकुन्दगुल्मैश्च भाण्डीरैर्निचुलैस्तथा ॥ अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥ १७ ॥
अन्यैश्च विविधैर्वृक्षैः प्रमदामिव भूषिताम् ॥ समीक्षमाणौ पुष्पाढ्यं सर्वतो विपुलद्रुमम् ॥ १८ ॥
कोयष्टिकैश्चार्जुनकैः शतपत्रैश्च कीरकैः ॥ एतैश्चान्यैश्च विहगैर्नादितं तु वनं महत् ॥ १९ ॥
ततो जग्मतुरव्यग्रौ राघवौ सुसमाहितौ ॥ तद्वनं चैव सरसः पश्यन्तौ शकुनैर्युतम् ॥ २० ॥
स ददर्श ततः पम्पां शीतवारिनिधिं शुभाम् ॥ प्रहृष्टनानाशकुनां पादपैरुपशोभिताम् ॥
(तिलकाशोकपुंनागबकुलोद्दालकाशिनीम्) ॥ २१ ॥
स रामो विविधान् वृक्षान् सरांसि विविधानि च ॥ पश्यन्कामाभिसंतप्तो जगाम परमं ह्रदम् ॥ २२ ॥
पुष्पितोपवनोपेतां सालचम्पकशोभिताम् ॥ षट्पदौघसमाविष्टां श्रीमतीमतुलप्रभाम् ॥ २३ ॥
स्फटिकोपमतोयाढ्यां श्लक्ष्णवालुकसंततताम् ॥ स तां दृष्ट्वा पुनः पम्पां पद्मसौगन्धिकैर्युताम् ॥
इत्युवाच तदा वाक्यं लक्ष्मणं सत्यविक्रमः ॥ २४ ॥
अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ॥ ऋश्यमूक इति ख्यातः पुण्यः पुष्पितपादपः ॥ २५ ॥
हरेर्ऋक्षरजोनाम्नः पुत्रस्तस्य महात्मनः ॥ अध्यास्ते तं महावीर्यः सुग्रीव इति विश्रुतः ॥ २६ ॥
सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ ॥ इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमम् ॥ २७ ॥
राज्यभ्रष्टेन दीनेन तस्यामासक्तचेतसा ॥ कथं मया विना शक्यं सीता लक्ष्मण जीवितुम् ॥ २८ ॥

गो० टी०-स ददर्श ततः पुण्यामित्यादि द्वौ श्लोकौ । उदारजनाः श्रेष्ठजनाः मुनिप्रभृतयः पानीयवाहिनीं पानार्हशीतलस्वादुजलवतीमित्यर्थः । सौगन्धिकैः कह्लारैः कुवलयोद्घातैः कुवलयसमूहैः कुथा चित्रकम्बलं ददर्श । दूरादिति बोध्यम् अग्र इत्युक्तवादात् ॥ १२ ॥ १३ ॥

गो० टी०-स तामिति । उदकवाहिनीं तां दूरादासाद्य मतङ्गसरसं नाम मतङ्गसरसमिति प्रसिद्धम् "अनोऽश्मायःसरसां जातिसंज्ञयोः" इति टच् समासान्तः । ह्रदं पम्पासमीपस्थं सरः समवगाहत सस्नौ पुण्यतीर्थत्वादिति भावः ॥ १४ ॥

गो० टी०-दूरतः पम्पादर्शनमनुवदन् तत्तीरवनदर्शनमाह चतुर्भिः-अरविन्देत्यादि । अरविन्दं रक्ताब्जं पद्मैः सितपद्मैः आम्रवणं चूतवनं बर्हिणोद्घुष्टं मयूरशब्दैः तेन नादितां संजातनादां तिलकैः क्षुरकवृक्षैः बीजपूरैः दाडिमैः धवैः धवाख्यैर्वृक्षविशेषैः शुक्लद्रुमैः अर्जुनवृक्षैः करवीरैः प्रसिद्धैः पुन्नागैः तुङ्गवृक्षैः मालती इति मालतीगुल्मैः कुन्दगुल्मैश्चेत्यन्वयः । भाण्डीरैः वटैः निचुलैः वञ्जुलैः सप्तपर्णैः विषमच्छदवृक्षैः अतिमुक्तकैः नेमिवृक्षैः भूषितां शोभिताम् अत एव प्रमदामिव स्थितां सर्वतः चतुर्दिक्प्रदेशेऽपि कोयष्टिकैः टिट्टिभाख्यैः पक्षिविशेषैः अर्जुनकैः पक्षिविशेषैः शतपत्रैः दार्वाघाटैः कीरकैः शुकैः । अव्यग्रौ सुसमाहितौ व्याकुलत्वरहितौ प्रत्युत सावधानौ चेत्यर्थः । राघवौ अरविन्दोत्पलवतीमित्यादिविशेषितां तिलकादिभिर्वृक्षैर्भूषिताम् अत एव प्रमदामिव स्थितां पम्पां सर्वतः समीक्षमाणौ ततः पुष्पाढ्यं सर्वतो विपुलद्रुमं कोयष्टिकादिभिर्विहगैर्नादितम् अन्यैः शकुनैश्च युतं सरसः पम्पायाः संबन्धि तद्वनं च पश्यन्तावेव सन्तौ अव्यग्रौ सुसमाहितौ च सन्तौ तद्वनं जग्मतुरिति संबन्धः । अतो न वनशब्दद्वयदोषः ॥ १९-२० ॥

गो० टी०-समीपतः पम्पादर्शनमाह-स ददर्शेति ॥ २१ ॥

गो० टी०-अथ पम्पाप्राप्तिमाह-स राम इति । परमं ह्रदं पम्पाख्यं सरः ॥ २२ ॥

गो० टी०-प्राप्त्यनन्तरं पम्पां दृष्ट्वा लक्ष्मणं प्रत्याह-पुष्पितेत्यादि । सार्धश्लोकद्वयम् । सालाः सर्जकवृक्षाः चम्पकाः चाम्पेयवृक्षाः ॥ २३-२४ ॥

गो० टी०-अस्या इति । पूर्वोक्तः कबन्धेनेति शेषः ॥ २५ ॥

गो० टी०-हरेरिति । हरेर्वानरस्य तस्य प्रसिद्धस्य तमृक्षमूकम् ॥ २६ ॥

गो० टी०-सुग्रीवमिति । अभिगच्छेत्यनन्तरमित्युक्त्वेति शेषः । इति वक्ष्यमाणप्रकारेण सुग्रीवमभिगच्छेत्युक्त्वा लक्ष्मणं पुनरित्युवाचेत्यन्वयः ॥ २७ ॥

गो० टी०-राज्येति । राज्यभ्रष्टेन अत एव दीनेन सर्वदैन्यपरिहारार्थं तस्यां सीतायाम् आसक्तचेतसा मया सीतां विना कथं जीवितुं शक्यम् ॥ २८ ॥

इत्येवमुक्त्वा मदनाभिपीडितः स लक्ष्मणं वाक्यमनन्यचेतसम् ॥
विवेश पम्पां नलिनीं मनोहरां रघूत्तमः शोकविषादयन्त्रितः ॥ २९ ॥
ततो महद्दूर्मं सुदूरसंक्रमः क्रमेण गत्वा प्रतिकूलधन्वनम् ॥
ददर्श पम्पां शुभदर्शकाननामनेकनानाविधपक्षिजालकाम् ॥ ३० ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्येऽरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७९ ॥

गो० टी०–इतीति । अनन्यचेतसं स्ववाक्यश्रवणे सावधानं विवेश ज्ञानायेति शेषः । नलिनीं सरसीं शोकः दुःखं विषादः तत्कृतः कार्यकरणापाटवरूपशरीरावसादः ताभ्यां यन्त्रितः नियमितः तत्परवश इत्यर्थः ॥ २९ ॥

गो० टी०–सर्गार्थं संगृह्णाति–तत इति । सुदूरं संक्रमः गमनं यस्य स तथा दूरादागत इत्यर्थः । प्रतिकूलधन्वनं पथिकजनप्रतिकूलभूतमरुकान्तारं कबन्धवनमित्यर्थः । क्रमेण अनेकविघ्ननिवृत्तिपूर्वकं गत्वा शुभः शोभनः दर्शः दर्शनं यस्य तादृशं काननं यस्यास्ताम् अनेके नानाजातीयाः बहवो वा नानाविधाः नानासंस्थानाः पक्षिणः शुकशारिकाकोकिलप्रभृतयः तेषां जालकानि समूहाः यस्यां तां, यद्वा अनेकानि नानाविधपक्षिजालकानि यस्यां तां काननद्वारा पक्षिजालवत्त्वं तादृशीं पम्पां ददर्श ॥ ३० ॥


अस्मिन्सर्गे त्रिंशच्छ्लोकाः । न्यूनातिरेकसद्भावस्तु कोशेषु बहुधा दृश्यते ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥७५॥

इत्थं कौशिकदिव्यवंशकलशीवाराशिराकाशशी
पादाम्भोजमरन्दभोगरसिकः श्रीमच्छठारेर्गुरोः ॥
आलोक्याखिलदेशिकोत्तमकृतव्याख्यानशैलीश्रियं
व्याचख्यौ तदरण्यकाण्डमखिलं गोविन्दराजाभिधः ॥१॥

श्रीमदारण्यकाण्डपठनश्रवणयोः फलं ब्रह्माण्डपुराणे सप्तचत्वारिंशदुत्तरशततमे अध्याये—
आरण्यकं तु यः काण्डमतिभक्तिसमन्वितः । पठेद्वा शृणुयाद्वापि सोमसायुज्यमाप्नुयात् ॥

अरण्यकाण्डं समाप्तम् ।



RÂMÂYAN

OF

VÂLMÎKI

WITH THREE COMMENTARIES CALLED

TILAKA, SHIROMANI, and BHOOSHANA

WITH NUMEROUS READINGS AND NOTES

KISHKINDHAKANDA

EDITED BY

SHASTRI SHRINIVASA KATTI MUDHOLKARA

SANSKRITA ADHYAPAKA IN THE ELPHINSTONE COLLEGE,—BOMBAY.

(All Rights Reserved)

PRINTED AND PUBLISHED BY MANILAL ITCHARAM DESAI AT

THE GUJARATI PRINTING PRESS

No. 8, SASSOON BUILDINGS-CIRCLE, FORT,

BOMBAY.

SHAKA 1837 A. D. 1915

Price Rs. 2-8-0



रोचते यदि मे सख्यं वाहुरेष प्रसारितः । गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा ॥ ५१ ।
एतच्तु वचनं श्रुत्वा सुग्रीवस्य सुभाषितम् । सप्रहृष्टमना हस्तं पीडयामास पाणिना ॥ ५२ ।

किष्किन्धाकाण्डे सर्गः ४

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

रामायणतिलक–रामायणशिरोमणि–गोविन्दराजीयरामायण-
भूषणेतिटीकात्रयोपेतम् ।

किष्किन्धाकाण्डम् ।

एल्फिन्स्टन्कॉलेज्संज्ञकांग्लपाठशालाया संस्कृताध्यापकैर्मुधोळकरोपाह्व–
कट्टी–श्रीनिवासशास्त्रिभिः
संशोधितं पाठान्तरैः सनाथीकृतं स्थलविशेषेषु टिप्पणीभिः समलंकृतं च ।

मुम्बय्याम्
'गुजराती' मुद्रणालयाधिपतिना स्वीये मुद्रणालये मुद्रयित्वा प्रकाशितम् ।
शकः १८३७, ख्रिस्ताब्दः १९१५.
मूल्यं सार्धं रूप्यकद्वयम् ।

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीये(भूषणे)ति-
टीकात्रयसमलंकृतम्

किष्किन्धाकाण्डम् ।

प्रथमः सर्गः ।

पम्पामुपागतो रामो लक्ष्मण सर्वोपयन्पम्पातीरारण्यरामणीयकदर्शनेनोद्दीपितानङ्ग्यश्च. सीता सस्मरन्बहुविध परिदेवयते । सचिवैः राममृष्यमूक निवसन्सुग्रीव पम्यापरिसरचारिण राम ददर्श ।

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् । रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥ १ ॥

तिलकटीका ।

सुग्रीवस्यावनं तुर्ये इन्द्रमनोश्च मर्दनम् ।
मारुतेर्मुद्रिकादानं कृतं येन स मे गतिः ॥

१] स विराधादिवधेन प्रसिद्धपराक्रमः पम्पादर्शनोद्दीपितकामो वा तां सुग्रीवाधिष्ठितर्ष्यमूकसमीपगां पुष्करिणीं पम्पानयन्तरगतं पम्पाख्यं मतङ्गाख्यं वा सरोविशेषम् । विललाप पर्यदेवयत् ॥ १ ॥

रामायणशिरोमणिः ।

प्रणम्यार्यां गङ्गां निखिलभयभङ्गां सयमुनां
सवाचं वाल्मीकिं पवनतनयं लक्ष्मणयुतम् ।
गुरुं गीतं वन्दे मुनिगणनुतं रामचरणं
सदा सीतासेव्यं सकलसुखदातारमनिशम् ॥ १ ॥
यदीयां विष्वाया निखिलभुवनाधीशपतयः
सदा संसेवन्ते मुनिगणयुतां तत्त्वनिवहाम् ।
गिरं तां गीर्वाणाः सकलकलया कालवलया:
समीहन्ते नित्यं सकलभयहन्त्रीं सुमुददाम ॥ २ ॥
कथादिर्यस्यास्ते त्रिभुवनजयी जह्नुतनया
यदीयां संप्रीतिं विनरति सदा सेवकजने ।
स रामस्तीर्थानां परममभिरामः सुमनसां
जयत्युच्चैः श्रीमान् जनकतनयासक्तहृदयः ॥ ३ ॥
अथारण्ये पूर्णां विदृतिमनुकल्प्याप्यकविना
कृते काव्ये कुर्मः सुजनसुखसंपत्तिविपुलाम् ।
सुकिष्किन्धाख्यायां परमरसिकोपास्यसफलां
त्रिवेणीतीरे तां दशरथसुतप्रीतिवितराम् ॥ ४ ॥
किष्किन्धाया विवरणो रामायणशिरोमणिः ।
सीतारामप्रियां प्रीतिं दयात्सर्वसुखावहाम् ॥ ५ ॥

रामकर्तृकपम्पाप्रदर्शनमारण्यकाण्डान्ते उक्त्वा तत्रस्य-रामवृत्तान्तं वर्णयन् किष्किन्धाकाण्डमुपक्रमते-स तामित्यादिभिः । सः सर्ववेदप्रसिद्धः सौमित्रिसहितो रामः पद्मादिविशिष्टां पुष्करिणीं सरसीं तां पम्पां गत्वा संप्राप्य आकुलेन्द्रिय. सीतासंयोगाभावप्रयुक्तव्याकुलेन्द्रियविशिष्टः सन् विललाप अनेकविधं जगाद ॥ १ ॥

भूषणटीका ।

क्वाहं मन्दमतिर्गभीरमधुरं रामायणं तत्क्व च
व्याख्यानेऽस्य परिश्रमन्महमहो हासास्पदं धीमताम् ।
को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपा-
कूपारो रचयत्पदः सपदि मज्जिह्वाग्रसिंहासनः ॥१॥

तत्र दृष्ट्वैव तां हर्षादिन्द्रियाणि चकम्पिरे । स कामवशमापन्नः सौमित्रिमिदमब्रवीत् ॥ २ ॥
सौमित्रे शोभते पम्पा वैदूर्यविमलोदका । फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥ ३ ॥
सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् । यत्र राजन्ति शैला वा द्रुमाः सशिखरा इव ॥ ४ ॥
मां तु शोकाभिसंतप्तमाधयः पीडयन्ति वै । भरतस्य च दुःखेन वैदेह्या हरणेन च ॥ ५ ॥
शोकार्तस्यापि मे पम्पा शोभते चित्रकानना । व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ॥ ६ ॥

श्रीरामायणराजस्य समर्घ्यं मणिमेखलाम् ।
सारोद्धारमिमं हारमर्पयिष्यामि संप्रति ॥ २ ॥

एवं पूर्वस्मिन् काण्डे दीनजनसंरक्षणरूपो धर्मोऽनुष्ठापितः । अथ किष्किन्धाकाण्डे मित्रसंरक्षणरूपो धर्मोऽनुष्ठाप्यते । तथा पूर्वस्मिन् काण्डे मोक्षप्रदत्वरूपं परतत्त्वचिह्नमुपदर्शितम् । अत्रासंख्येयकल्याणगुणाकरत्वं प्रतिपाद्यते । वस्तुतस्तु प्रथमे काण्डे श्रीमत्त्वं श्रीमत्पदोदीरितमुक्तम् । द्वितीये सर्वजनव्यामोहविषयत्वोक्त्या नारायणशब्दार्थः । तृतीये पञ्चवटीवासपर्यन्तवृत्तान्तेन मुनिजनकृतकैङ्कर्योक्त्या चतुर्थ्यर्थ उक्तः । खरादिवधवृत्तान्तेन नमःशब्दार्थ उक्तः । अथ मारीचदर्शनवृत्तान्तमारभ्य चेतनोज्जीवनप्रकारः प्रदर्श्यते । तत्र मारीचदर्शनवृत्तान्तेन भगवन्नित्यानुभवयोग्यस्य चेतनस्याप्राप्तविषयप्रावण्यम् । तेन रावणरूपमहामोहाक्रमणम् । जटायुव्यापारेण रावणानिवृत्तिकथनात् केवलकर्मणा संसारस्यानिवर्त्यत्वम् । लङ्काप्रवेशेन सांसारिकशरीरप्रवेशः । एकाक्ष्येककर्णीप्रभृतिव्यापारैस्तापत्रयाभिहतिः । रामान्वेषणेन भगवतश्चेतनोज्जीवनोपायचिन्तनं चोक्तमारण्यकाण्डे । अथाचार्यमुखेन चेतनस्य स्वविषयभक्त्युत्पादनकृते तदन्वेषणमुच्यते किष्किन्धाकाण्डे । तत्र प्रथमे सर्गे नित्यकैङ्कर्यपरनित्यसूरिदर्शनेन एतत्तुल्यभोगस्य प्राप्तोज्जीवनवर्गः किमिति न मां प्राप्त इति भगवतः क्लेशातिशयं दर्शयति । स एकाकी न रमेतेति श्लोकम्—स तामित्यादि । पद्मोत्पलप्लवैः कमलेन्दीवरमत्स्यैः आकुलां तां पम्पाख्यां पुष्करिणीं सरसीं गत्वा मुखनयनकटाक्षवत्यां कान्तायाः स्मारकत्वेन व्याकुलेन्द्रियः मोहं प्रसादं च प्राप्तः स रामः तादृशैर्यैर्विशिष्टोऽपि सौमित्रिसहितः आश्वासकान्तरङ्गपुरुषसहितोऽपि विललाप ॥ १ ॥

२] ति० टी०—तां पम्पां दृष्ट्वा तज्जन्यहर्षात्तस्येन्द्रियाणि चकम्पिरे उद्रिक्तविकाराणीवाभूवन् । कामवशमापन्न इव ॥ २ ॥

रा० टी०—विलापाकारमाह—तस्येति । तां पद्मादिविशिष्टां पम्पां दृष्ट्वैव वियमानस्य तस्य रामस्य हर्षात् सीतावयवसदृशपङ्कजादिदर्शनजनितप्रमोदात् इन्द्रियाणि चकम्पिरे चञ्चलतां प्रापुः अत एव कामवशं सीतादर्शनविषयकातीच्छाहेतुकतदन्वेषणजनितविविधचेष्टोपलक्षितशोभाविशेषम् आपन्नः प्राप्तः स रामः सौमित्रिमब्रवीत् ॥ २ ॥

गो० टी०—आकुलेन्द्रिय इत्येतद्विवृण्वन्नाह—तस्येति । दृष्ट्वा स्थितस्य तस्य इन्द्रियाणि हर्षाच्चकम्पिरे च्युतानीत्यर्थः ॥ २ ॥

३] ति० टी०—वैदूर्यवत्तत्प्रभावन्निर्मलोदका पम्पा तदाख्यसरोवरावच्छिन्ना पम्पानदी । तज्जलस्यौपाधिकश्यामत्वप्रतिभासाद्वैदूर्यप्रभासादृश्यम् । उपाधिमाह—फुल्लेति । द्रुमादिच्छायया तथा भानम् ॥ ३ ॥

रा० टी०—तद्वचनाकारमाह—सौमित्र इति । वैदूर्यविमलोदका वैदूर्यमणिसदृशविमलजलविशिष्टा फुल्लपद्मोत्पलवती विकसितानेकविधपद्मविशिष्टा विविधैः द्रुमैः शोभिता संयुक्ता इयं पम्पा शोभते ॥ ३ ॥

गो० टी०—प्रलापप्रकारमाह—सौमित्रे इत्यादिना । अनेन भक्तिद्रुतहृदयस्तत्सूचकमुखप्रसादः सपरिकरः पुरुष उच्यते॥३॥

४] ति० टी०—पम्पायाः काननं तत्परिसरवर्तिकाननम् । यत्र काननं सशिखरा इवोन्नताग्रशाखाभिः सशृङ्गा इव द्रुमाः शैला वा शैला इव राजन्ति ॥ ४ ॥

रा० टी०—सौमित्र इति । यत्र यस्यां पम्पायां सशिखराः शृङ्गविशिष्टा इव शैलाः पर्वता इव द्रुमा वृक्षाः राजन्ति तस्याः पम्पायाः शुभदर्शनं काननं वनं पश्य ॥ ४ ॥

गो० टी०—सौमित्रे इति । यत्र काननं सशिखरा इव उन्नताग्रशाखाभिः सशृङ्गा इव स्थिताः अत एव शैलाभाः । अनेन भगवदयारसोपजीविन आचार्याः तदुपजीविनोऽन्तेवासिनश्चोच्यन्ते । अत्र परत्र चापीति न्यायेन नित्यविभूतावपि शिष्यत्वं सिद्धम् ॥ ४ ॥

५] ति० टी०—शोकाभिसंतप्तं राज्यभ्रंशसीतावियोगादिना शोकतप्तम् आधयः पीडयन्तीत्युक्तम् । तानाधीनाह—भरतस्येति । दुःखेन जटावल्कलादिदुःखस्मरणेन ॥ ५ ॥

रा० टी०—मामिति । भरतस्य दुःखेन मद्वियोगजनितभरतक्लेशस्मरणेन वैदेह्याः हरणेन च शोकाभितप्तं माम् आधयः मानसव्यथाः पीडयन्ति ॥ ५ ॥

गो० टी०—मां त्विति । भरतस्य दुःखेन नगरात् बहिर्व्रतोपवासादिनियमकृतदुःखेन वैदेह्याः हरणेन च पूर्वमेव संतप्तं मां माधवो वसन्तस्तु विशेषेण पीडयन्निव भवतीत्यर्थः । वस्तुतः पीडाभावादिवशब्दः । अनेन संसारतो जीवस्य दुःखेन दुःखितत्वमुक्तम् ॥ ५ ॥

६] ति० टी०—एवं शोकार्तस्यापि शोभते सुखावहा वर्तते इत्यर्थः ॥ ६ ॥

१ तस्येति गो. रा. पाठः । २ माधवः पीडयन्निवेति गो. पाठः ।

नलिनैरपि संछन्ना ह्यत्यर्थशुभदर्शना । सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥ ७ ॥
अधिकं प्रविभात्येतन्नीलपीतं तु शाद्वलम् । द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम्॥ ८ ॥
पुष्पभारसमृद्धानि शिखराणि समन्ततः । लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ॥ ९ ॥
सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः । गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः ॥ १० ॥
पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् । सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव ॥ ११ ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः । वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥ १२ ॥
पतितैः पतमानैश्च पादपस्थैश्च मारुतः । कुसुमैः पश्य सौमित्रे क्रीडतीव समन्ततः ॥ १३ ॥

रा० टी०–शोकार्तस्येति । चित्रकानना अनेकविधवनविशिष्टा बहुविधैः पुष्पैः व्यवकीर्णा सर्वतो व्याप्ता नलिनैः क्रमलैः संछन्ना सर्पैः व्यालैः तज्जातिविशेषैश्च अनुचरिता तद्मनशोभितेत्यर्थः, पम्पा शोकार्तस्यापि मे शोभते । एतेन सीतावयवसदृशकमलादिदर्शनेन सीतैव दृश्यते इति स्वसंभावना सूचिता । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०–सर्वेषु मद्भक्तेषु सुखं वसत्सु किमर्थमेते संसारिणः क्लिश्यन्तीत्यभिप्रायेणाह–शोकार्तस्येत्यादिना । शोकार्तस्यापि मे मयि शोकार्तेऽपि शोभते व्यर्थेयं शोभेति भावः ॥ ६ ॥

७] ति० टी०–व्यालाः श्वापदाः ॥ ७ ॥

गो० टी०–नलिनैरिति । अपिशब्देन कुमुदादिकं समुच्चीयते । व्यालोऽजगरः, सर्पव्याला एवानुचरा ते अस्य संजाता इति सर्पव्यालानुचरिता । सर्पव्यालानुचरितत्वेऽपि नलिनसंछन्नत्वादत्यर्थं शुभदर्शना भवतीत्यर्थः । अनेन ज्ञानिनो यः कश्चिद्दोषोऽपि न तस्य हेयतापादक इत्युक्तम् ' तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ' इति स्मृतेः ॥ ७ ॥

८] ति० टी०–नीलानुबद्धं पीतं नीलपीतं शाद्वलं हरितप्रदेशः । परिस्तोमैः कुथैरर्पितं युक्तम् 'परिस्तोमः कुथो द्वयोः' । 'द्रुमाणामुच्छ्रितैः' इति पाठे उच्छ्रितगन्धैः । यद्वा परिस्तोमैः परिस्तोमभूतैः राशीभूतैरिव स्थितैः पुष्पैरर्पितं युक्तम् ॥ ८ ॥

रा० टी०–अधिकमिति । नीलपीतम् अनेकविधानां धातूनां तृणानां च संसर्गात् उपलक्षणतया नीलत्वपीतत्वादिविशिष्टं शाद्वलं तृणविशिष्टस्थलं विविधैः अनेकप्रकारकैः परिस्तोमैः स्वस्वजात्या संघीभूतैः द्रुमाणां पुष्पैः अर्पितं संयुक्तमिव अधिकं प्रविभाति, यद्वा विविधैः पुष्पैरर्पितमत एव नानेतत् शाद्वलमधिकमेव प्रविभाति । इव एवार्थे ॥ ८ ॥

गो० टी०–अधिकमिति । एतदिति परिसरप्रदेशमङ्गुल्या निर्दिशति । नीलपीतमिति मयूरकण्ठवर्ण इत्युच्यते । परिस्तोमैः कुथैः 'परिस्तोमः कुथो द्वयोः' इत्यमरः । अनेन नानागुरुसुखलब्धज्ञानतया भगवद्वासयोग्यः पुरुष उच्यते ॥ ८ ॥

९] ति० टी०–शिखराणि द्रुमाग्राणि उपगूढानि व्याप्तानि । सर्वतः सर्वावच्छेदेन ॥ ९ ॥

रा० टी०–पुष्पेति । सर्वतः चतुर्दिक्षु पुष्पभारसमृद्धानि पुष्पभारैः प्रपतितबहुपुष्पैः समृद्धानि समृद्धिमन्ति शिखराणि पुष्पिताग्राभिः पुष्पिताग्रभागविशिष्टाभिः शाखाभिः समन्ततः उपगूढानि आच्छन्नानि सन्तीति शेषः ॥ ९ ॥

गो० टी०–पुष्पेति । शिखराणि वृक्षाग्राणि समन्ततः सर्वत्र प्रदेशे आमूलाग्रम् उपगूढानि शोभन्त इति शेषः । अनेन गार्हस्थ्येऽपि निरवधिकबोधा उच्यन्ते ॥ ९ ॥

१०-११] ति० टी०–अयं कालो वसन्तः प्रचुरमन्मथः कामोद्दीपकः । अत एव गन्धवान्कामोद्दीपनेन गर्ववान् 'गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः' इति । सुरभिर्मासो मधुमासः । जातानि पुष्पफलानि यत्र तादृद्रुमः ॥ ११ ॥११॥

रा० टी०–सुखेति । हे सौमित्रे ! जातपुष्पफला द्रुमा यस्मिन् अत एव प्रचुरोद्दीपको मन्मथः कामो यस्मात् सः सुरभिः सुगन्धविशिष्टः अत एव गन्धवान् कामोद्दीपनं करोम्येवेति गर्वविशिष्टः अयं मासः चैत्र इत्यर्थः, कालः वियुक्तानां चित्तविक्षेपहेतुरस्तीति शेषः । क्षेपणार्थककलधातुप्रकृतिकणिजन्तप्रकृतिकोऽच् 'गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः' इति विश्वः ॥ १० ॥

गो० टी०–सुखेति । अनेन जनकादिवदैश्वर्यं सत्यपि भगवज्ज्ञानरत उच्यते ॥ १० ॥

रा० टी०–पश्येति । पुष्पशालिनाम् अनेकविधपुष्पविशिष्टानाम् अत एव वर्षं तोयं सृजतां त्यजतां तोयमुचां मेघानामिव पुष्पाणि सृजतां वनानां रूपाणि पश्य ॥ ११ ॥

गो० टी०–पश्येति । तोयं सृजतां तोयमुचां रूपाणीवेति पूर्णोपमा । अनेन परोपदेशप्रवृत्ता आचार्या उच्यन्ते ॥ ११ ॥

१२-१३] ति० टी०–प्रस्तरेषु समशिलातलेषु ॥१२॥१३॥

रा० टी०–प्रस्तरेष्विति । वायुवेगप्रचलिताः विविधाः काननद्रुमाः वनवृक्षाः पुष्पैः रम्येषु प्रस्तरेषु शिलासु गां पृथ्वीमवकिरन्ति आच्छादयन्ति ॥ १२ ॥

गो० टी०–प्रस्तरेष्विति । प्रस्तरेषु पाषाणेषु गां

१ तोयमिति गो. पाठः । २ क्रीडन्निवेति गो. पाठः ।

विक्षिपन्विविधाः शाखा नगानां कुसुमोत्कटाः । मारुतश्चलितः स्थानैः षट्पदैरनुगीयते ॥ १४ ॥
मत्तकोकिलसंनादैर्नर्तयन्निव पादपान् । शैलकन्दरनिष्क्रान्तः प्रगीत इव चानिलः ॥ १५ ॥
तेन विक्षिपताऽत्यर्थं पवनेन समन्ततः । अमी संसक्तशाखाग्रा ग्रथिता इव पादपाः ॥ १६ ॥
स एष सुखसंस्पर्शो वाति चन्दनशीतलः । गन्धमभ्यवहन्पुण्यं श्रमापनयनोऽनिलः ॥ १७ ॥
अमी पवनविक्षिप्ता विनदन्तीव पादपाः । षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ १८ ॥
गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः । संसक्तशिखराः शैला विराजन्ति महाद्रुमैः ॥ १९ ॥

भूमिं प्रस्तरभूमिमित्यर्थः । अनेन कठिनहृदयेष्वपि दयावशात् ज्ञानवर्षण उच्यन्ते ॥ १२ ॥

रा० टी०–पतितैरिति । पतितैः भूतकालिकपतनकर्तृभिः पतमानैः वर्तमानकालिकपतनकर्तृभिः पादपस्थैः वृक्षस्थितैश्च कुसुमैः पुष्पैः क्रीडतीव मारुतो वायुः पश्य । पश्य मृगो धावतीतिवत्प्रयोगः ॥ १३ ॥

गो टी०–पतितैरिति । पतमानैः पतद्भिः । अनेन सर्वगुरुप्रेरणैकलीलः सर्वान्तर्याम्युच्यते ॥ १३ ॥

१४] ति टी०–कुसुमोत्कटा बहुकुसुमाः । 'कुसुमोत्कचाः' इति पाठे कुसुमैरुद्भूतकचाः संजातकेशा इवेत्यर्थ इति कतकः । तादृशीः शाखा विक्षिपंश्चालयन्मारुतश्चलितस्थानैः स्तत्तत्कुसुमस्थानतश्चलितैः आहिताग्न्यादिरयम् । षट्पदैरनुगीयते । पुष्पं हरन्मारुतोऽनुमृत्य गीयत इत्यर्थः ॥ १४ ॥

रा० टी०–विक्षिपन्निति । कुसुमोत्कटाः विविधकुसुमैरुत्कटतां प्राप्ताः शाखाः विक्षिपन् चालयन् मारुतः चलितस्थानैः कुसुमेभ्यः कुसुमान्तराणि प्राप्तैः षट्पदैः भ्रमरैः अनुगीयते गानेन प्रशस्यते इवेत्यर्थः ॥ १४ ॥

गो० टी०–विक्षिपन्निति । कुसुमोत्कचा. कुसुमोत्कटाः विक्षिपन् कम्पयन् मारुतः चलितस्थानैः स्वस्थानकुसुमोन्मालितैः षट्पदैः अनुगीयते । अनेन 'ज्ञानी त्वात्मैव मे मतम्' इत्यात्मभूतज्ञानिनां भक्तिहृदये भगवति भुवमवतीर्णे इमान् लोकान् कामान्नीकामरूप्यनुसंचरन् एतत्साम गायन्नास्ते इत्युक्तरीत्या तमनुगच्छन् भक्तलोक उच्यते ॥ १४ ॥

१५] ति० टी०–मत्तेति । अत्र वायोर्गानकर्तृत्वेन नर्तकाचार्यसाधर्म्यमुच्यते । मत्तकोकिलकृतैः संनादैर्मद्दङ्गादिध्वनिभिर्नर्तयन्निव नृत्यं शिक्षयन्निव । शैलकन्दरनिष्क्रान्तस्तन्निष्क्रमकाले ध्वनियुक्तत्वात्प्रगीतवानिव ॥ १५ ॥

रा० टी०–मत्तेति । पादपान् वृक्षान् नर्तयन्निव शैलकन्दरनिष्क्रान्तोऽनिलः मत्तकोकिलसंनादैः मत्तकोकिलानां शब्दैः प्रगीत इव आसीदिति शेषः ॥ १५ ॥

गो० टी०–मत्तेति । मत्तकोकिलसंनादैः सुखवाद्यस्थानीयैः पादपान्नर्तयन् शैलकन्दरनिष्क्रान्ततया तन्निष्क्रमणध्वनियुक्ततया प्रगीत इव गातुमुपक्रान्त इव "आदिकर्मणि क्तः कर्तरि च" इति कर्तरि निष्ठा । यद्वा पादपान् नर्तयन् नर्तयितुमिव "लक्षणहेत्वोः" इति शतृप्रत्ययः । मत्तकोकिलसंनादैः प्रगीतः प्रकृष्टगीतः सन् शैलकन्दरात् नैपथ्यस्थानान्निष्क्रान्तः । अनेन वेदप्रवर्तनमुखेन लोकस्य भक्त्युत्पादनाय वैकुण्ठादवतीर्णो भगवानित्युच्यते ॥ १५ ॥

१६] ति० टी०–तेन मन्दत्वादिगुणवता विक्षिपता वृक्षांश्चालयता ग्रथिताः कृतग्रथना इव ॥ १६ ॥

रा० टी०–तेनेति । अत्यर्थमत्यन्तं विक्षिपता संचालयता पवनेन संसक्तशाखाग्राः संसक्तानि परस्परं संमिलितानि शाखाग्राणि येषां ते अमी पादपाः ग्रथिता इव दृश्यन्ते इति शेषः ॥ १६ ॥

गो० टी०–तेनेति । विक्षिपता विविधं प्रेरयता पवनेन अत्यर्थं समन्ततः संसक्तशाखाग्रा अमी पादपाः ग्रथिताः मालावन्निबद्धा इव भान्ति अनेन भगवत्कृपया परस्परमनुरक्ता भागवता उच्यन्ते ॥ १६ ॥

१७] ति० टी०–गन्धमभ्यवहन्वातीति संबन्धः ॥ १७ ॥

रा० टी०–स इति । चन्दनशीतलः चन्दनस्पर्शजनितशैत्यविशिष्टः अत एव पुण्यं गन्धम् अभ्यवहन् प्रापयन् अत एव श्रमापनयनः श्रमनिवर्तकः अत एव सुखसंस्पर्शः सोऽनिलः वाति ॥ १७ ॥

गो० टी०–मन्दमारुतं वर्णयति–स एष इति । स्पार्शनप्रत्यक्षत्वादेष इत्युक्तिः । चन्दनशीतलः मलयगतचन्दनेन शीतलः दक्षिणमारुत इत्यर्थः, चन्दनच्छीतलो वा । गन्धं पुष्पगन्धं पुण्यं रम्यम् । सुखसंस्पर्श इत्यनेन मान्द्यमुक्तम् । एवं शैत्यमान्द्यसौरभ्यवान् अत एव श्रमापनयनः । अनेन 'सर्वगन्धः सर्वरसः' इत्युक्तस्य भगवतो भक्तेषु सांनिध्यमुक्तम्१७

१८] ति० टी०–अनुकूजद्भिः षट्पदैर्विनदन्तीव ॥ १८ ॥

रा० टी०–अमी इति । मधुगन्धिषु मधुगन्धविशिष्टेषु वनेषु अनुकूजद्भिः षट्पदैः उपलक्षिताः पवनविक्षिप्ताः वायुसंचालितशाखावन्तः अमी पादपाः विनदन्ति गायन्तीव ॥ १८ ॥

गो० टी०–अमी इति । अनेन भगवदनुभवबलात्कारेण एतत्साम गायन्नास्त इत्युक्तसामगानरसिका उच्यन्ते ॥ १८ ॥

१९] ति० टी०–संसक्तशिखराः संपन्नशेखराः इवेत्यर्थ इति कतकः । गिरिप्रस्थेषूत्पन्नैर्द्रुमैः शैलाः संबद्धाग्रभागा इत्यर्थ इति तीर्थः ॥ १९ ॥

---

१ उत्कचा इति गो पाठः । २ एष इति गो. पाठः ।

पुष्पसंछन्नशिखरा मारुतोत्क्षेपचञ्चलाः । अमी मधुकरोत्तंसाः प्रगीता इव पादपाः ॥ २० ॥
सुपुष्पितांस्तु पश्यैतान्कार्णिकारान्समन्ततः । हाटकप्रतिसंछन्नान्नरान्पीताम्बरानिव ॥ २१ ॥
अयं वसन्तः सौमित्रे नानाविहगनादितः । सीतया विप्रहीणस्य शोकसंदीपनो मम ॥ २२ ॥
मां हि शोकसमाक्रान्तं संतापयति मन्मथः । हृष्टं प्रवदमानश्च समाह्वयति कोकिलः ॥ २३ ॥
एष दात्यूहको हृष्टो रम्ये मां वननिर्झरे । प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण ॥ २४ ॥
श्रुत्वैतस्य पुरा शब्दमाश्रमस्था मम प्रिया । मामाहूय प्रमुदिता परमं प्रत्यनन्दत ॥ २५ ॥

रा० टी०–गिरीति । गिरिप्रस्थेषु पर्वतपृष्ठेषु संजातैरिति शेषः, पुष्पवद्भिरत एव मनोरमैः महद्भिः संसक्तशिखराः शैलाः विराजन्ति ॥ १९ ॥

गो० टी०–गिरीति । गिरिप्रस्थेषु निजप्रस्थेष्वित्यर्थः । तदुत्पन्नैर्द्रुमैः संसक्तशिखराः परस्परसंश्लिष्टाग्राः शैला भान्ति महान्तः पुष्पराशय इव भान्तीत्यर्थ. । अनेन सर्वेषां ज्ञानिनामेककण्ठत्वमुक्तम् ॥ १९ ॥

२०] ति० टी०–पुष्पैः संछन्नाः शिखराः शाखाग्रभागा येषाम् । मारुतकृतोत्क्षेपणेन चालनेन चञ्चला मधुकररूप उत्तंसश्चूडा येषां ते । प्रगीता इव प्रारब्धनृत्यगीता इवेत्यर्थः ॥ २० ॥

रा० टी०–पुष्पेति । पुष्पैः संछन्नानि शिखराणि शाखाग्राणि येषां ते मारुतोत्क्षेपचञ्चलाः मधुकरा एव उत्तंसाः कर्णपूरा इव शिरःसंबन्धिनः उष्णीषा इव वा येषां ते अमी पादपाः प्रगीताः प्रकृष्टं गीतं गानं येषां ते प्रकृष्टगायका इत्यर्थः, लक्ष्यन्त इति शेषः ' पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽथ शेखरे ' इति कोशः । उत्तरपक्षे उत्तंसशब्दोऽर्शआद्यजन्तः ॥ २० ॥

गो० टी०–पुष्पेति । मधुकरा एव उत्तंसाः शिखराणि येषां ते ' पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे' इत्यमरः । पुष्पाढ्यताशिखोपरि नीलोष्णीषधारिणः सगीतिकं नृत्यन्त इव भान्तीत्यर्थः । अनेन भगवद्भक्त्या नर्तनपरा गम्यन्ते ॥ २० ॥

२१–२२] ति० टी०–कर्णिकारः पीतपुष्प इत्यनेन ज्ञायते ॥ २१ ॥ २२ ॥

रा० टी०–सुपुष्पितानिति । सुपुष्पितान् समन्ततः एतान् कर्णिकारान् पीतवर्णविशिष्टकर्णिकाराभिधतरून् हाटकप्रतिसंछन्नान् ऊर्ध्वभागे स्वर्णभूषणनिबिडान् पीताम्बरान् अधोभागे पीताम्बरधारिणः नरान् इव पश्य । एतेन तत्पुष्पाणां सुवर्णवर्णत्वं फलितम् ॥ २१ ॥

गो० टी०–पुष्पितेति । पुष्पिताग्रान् पुष्पितोपरिप्रदेशान् अत एव हाटकसंच्छन्नान् पीताम्बरांश्च नरानिव पश्य । पुष्पिताग्राः कर्णिकाराः सुवर्णवस्त्राभरणवन्त इव भान्तीत्यर्थः । अनेन भगवत्सारूप्यं गता उच्यन्ते ॥ २१ ॥

रा० टी०–अयमिति । नानाविहगनादितः अयं वसन्तः सीतया विप्रहीनस्य वियुक्तस्य मम शोकसंदीपनोऽस्तीति शेषः ॥ २२ ॥

गो० टी०–एवं मद्भक्तेषु सर्वेषु मदनुभवतृप्तेषु बद्धा मां दुःखीकुर्वन्तीत्याह–अयमिति । इदानीं वसन्तवर्णनेन नगरनिर्गममारभ्य त्रयोदश वत्सरा गता इति गम्यते ॥ २२ ॥

२३] ति० टी०–हृष्टं यथा तथा प्रवदमानः कोकिलो मां समाह्वयति स्पर्धयेवेत्यर्थः ॥ २३ ॥

रा० टी०–मामिति । शोकसमाक्रान्तं मां मन्मथः मन्निष्ठमदापहारित्वं संतापयति सीतापहर्तृविज्ञानमन्तरावस्थितिं न लभत इत्यर्थः, हृष्टं यथा भवति तथा प्रवदमानः कोकिलः समाह्वयति प्रियया संयोक्तुं प्रेरयतीवेत्यर्थः ॥ २३ ॥

गो० टी०–एवं वासन्तपुष्पसमृद्धिं वर्णयित्वा तथैवोद्दीपनभूतपक्षिरवानाह–मामित्यादिना । पूर्वार्धं स्पष्टम् । मां शोकिनं मा हृष्टः कोकिलः प्रवदमानः प्रवदन् विजयघोषं कुर्वन् सन् आह्वयति । स्पर्धत इवेति गम्योत्प्रेक्षा । ज्ञानैकवत्सलं माममिज्ञाय केवलं कर्मठा मां स्पर्धन्त इति भावः॥२३॥

२४] ति० टी०–दात्यूहको जलकुक्कुटः हृष्टः कामावेशेन । वननिर्झरे वनमध्यगे प्रस्रवणे ॥ २४ ॥

रा० टी०–एष इति । हृष्ट एष दात्यूहको जलकुक्कुटः प्रणदन् सन् मन्मथाविष्टं मदापहारकत्वविशिष्टं मां शोचयिष्यति प्रियापहारिणो विशेषज्ञानाभावात् तन्मदापहरणस्याशक्यतया शोक एव तिष्ठतीत्यर्थः ॥ २४ ॥

गो० टी०–एष इति । नत्यूहकः कुक्कुटभेदः वननिर्झरे प्रणदन्नित्यन्वयः । अनेन केवलजपपरा उच्यन्ते । ज्ञानभक्त्योरेव भगवतः सद्यः प्रीत्यावहत्वात् साधनान्तरपरो नातिप्रिय इति रहस्यम् । 'ज्ञानी त्वात्मैव मे मतम् । भक्तिक्रीतो जनार्दनः' इत्यादिवचनात् ॥ २४ ॥

२५] ति० टी०–मामाहूय प्रदर्शनार्थमिति शेषः । परममतिशयेन ॥ २५ ॥

रा० टी०–श्रुत्वेति । मम प्रिया सीता पुरा पूर्वमेतस्य दात्यूहस्य शब्दं श्रुत्वा प्रमुदिता मामाहूय परममत्यन्तं प्रत्यनन्दत ॥ २५ ॥

१ हृष्ट इति गो. पाठः । २ मामिति गो. पाठः । ३ नत्यूहक इति गो पाठः ।

एवं विचित्राः पतगा नानारावविराविणः । वृक्षगुल्मलताः पश्य संपतन्ति समन्ततः ॥ २६ ॥
विमिश्रा विहगाः पुंभिरात्मव्यूहाभिनन्दिताः । भृङ्गराजप्रमुदिताः सौमित्रे मधुरस्वराः ॥ २७ ॥
अस्याः कूले प्रमुदिताः सङ्घशः शकुनास्त्विह । दात्यूहरतिविक्रन्दैः पुंस्कोकिलरुतैरपि ॥ २८ ॥
स्वनन्ति पादपाश्चेमे ममानङ्गप्रदीपकाः । अशोकस्तबकाङ्गारः षट्पदस्वननिःस्वनः ॥ २९ ॥
मां हि पल्लवताम्रार्चिर्वसन्ताग्निः प्रधक्ष्यति । नहि तां सूक्ष्मपक्ष्माक्षीं सुकेशीं मृदुभाषिणीम् ३० ॥
अपश्यतो मे सौमित्रे जीवितेऽस्ति प्रयोजनम् । अयं हि रुचिरस्तस्याः कालो रुचिरकाननः ॥ ३१ ॥
कोकिलाकुलसीमान्तो दयिताया ममानघ । मन्मथायाससंभूतो वसन्तगुणवर्धितः ॥ ३२ ॥

गो० टी०–किमयं सर्वदेत्थं शोकावहः नेत्याह–श्रुत्वेति । श्रुत्वा प्रमुदिता प्रिया मामाह्वय परमं प्रकामं प्रत्यनन्दत । नत्यूहरवाकर्णनोद्दीपिता मामाह्वय विविधं क्रीडारसमनुभूतवतीत्यर्थः । अनन्यप्रयोजनस्य जपः प्रीत्यावह इति भावः ॥ २५ ॥

२६] ति० टी०–पतगाः कर्तारो वृक्षादीन्कर्मभूतान्संपतन्ति पश्य ॥ २६ ॥

रा० टी०–एवमिति । विचित्रा अनेकविधरागादिविशिष्टाः नानारावविराविणः अनेकविधशब्दवन्तः पतगाः पक्षिणः वृक्षगुल्मलताः समन्ततः संपतन्ति त्वं पश्य ॥ २६ ॥

गो० टी०–एवमिति । स्पष्टम् ॥ २६ ॥

२७] ति० टी०–पुंभिर्विहगैर्विमिश्राः संबद्धाः आत्मव्यूहेषु स्वस्वजातिसमूहेषु अभिनन्दिताः प्राप्तानन्दाः भृङ्गराजप्रमुदिताः प्रमुदितभृङ्गराजा इव मधुरस्वनाः अस्याः कूले सन्तीति शेषः । यद्वा भृङ्गराजसंबन्धेन प्रमुदिता मधुरस्वरा भृङ्गयश्चात्र सन्तीति शेषः ॥ २७ ॥

रा० टी०–विमिश्रा इति । पुंभिः पक्षिभिः विमिश्रा आत्मव्यूहाभिनन्दिताः आत्मव्यूहैः स्वस्वज्ञातिसमूहैः अभिनन्दिताः परस्परं प्रापितानन्दाः भृङ्गराजप्रमुदिताः भृङ्गराजशब्देन च प्राप्तप्रमोदाः मधुरस्वराः विहगाः स्त्रीत्वविशिष्टपक्षिणः सन्तीति शेषः ॥ २७ ॥

गो० टी०–विमिश्रा इति । विहगाः स्त्रियः पुंभिः पुंविहगैः विमिश्राः आश्लिष्टाः सत्यः आत्मव्यूहाभिनन्दिताः अनुरूपेण कान्तेन सहिताऽसीत्येवं सजातीयैः श्लाघिताः । भृङ्गराजप्रमुदिताः भृङ्गराजझङ्कारश्रवणसंतुष्टाः तदुद्दीपनेन मधुरस्वराः रम्यरतिकूजिताः वर्तन्ते । एतान् पश्येति शेषः । अनेनाचार्यपरतन्त्राः सामगानपरा उच्यन्ते ॥ २७ ॥

२८] ति० टी०–तथास्या इह कूले शकुनाश्च प्रमुदिताः सन्ति । दात्यूहानां रतिसंबन्धिनो विक्रन्दा दात्यूहरतिविक्रन्दास्तैः ॥ २८ ॥

रा० टी०–अस्या इति । अस्या पम्पायास्तीरे विद्यमानाः संघशः शकुनाः पक्षिणः दात्यूहरतिविक्रन्दैर्दात्यूहानां प्रीत्युत्पादकशब्दविशेषैः पुंस्कोकिलरुतैरपि प्रमुदिताः सन्तीति शेषः॥२८॥

गो० टी०–नत्यूहेति । विक्रन्दैः शब्दैः स्वनन्ति स्वनन्तीव । अनेन नानाविधभगवन्नामकीर्तनपराः श्लाघ्यन्ते ॥२८॥

२९–३०] ति० टी०–अशोकस्तबकरूपा अङ्गारा यस्य । अग्रेः सशब्दत्वादाह—षट्पदस्वन एव निःस्वनो यस्य । पल्लवरूपा अर्चिषो यस्य ॥ २९ ॥ ३० ॥

रा० टी०–स्वनन्तीति । ममानङ्गप्रदीपकाः इमे पादपाः स्वनन्ति स्वनविशिष्टबहुपक्षिमत्तया ते अपि स्वनन्तीवेत्यर्थः । अर्धं पृथक्–अशोकेति । अशोकस्तबक एव अङ्गारो यस्य सः षट्पदस्वन एव निःस्वनः शब्दो यस्मिन् सः पल्लवताम्रः अरुणपल्लव एव अर्चिर्ज्वाला यस्मिन् स वसन्ताग्निर्मां प्रधक्ष्यति दहतीवेत्यर्थः । अर्धद्वयमेकान्वयि ॥ २९ ॥

गो० टी०–अशोकेति । षट्पदस्वननिःस्वन इति । अग्रेः निःस्वनवत्त्वं ज्वलनावस्थायां दृष्टम् । अनेन स्वप्रेमजनकभक्तियुक्ता उच्यन्ते ॥ २९ ॥

रा० टी०–नहीति । सूक्ष्मपक्ष्मे अक्षिणी यस्यास्तां सीतामपश्यतो मे जीविते प्राणपोषणे प्रयोजनं नास्ति ॥३०॥

गो० टी०–नहीति । एतेष्वेवं मत्प्रेमपरतन्त्रेषु संसारिचेतनो दुःखमनुभवतीत्येतन्ममासह्यमिति भावः ॥ ३० ॥

३१] ति० टी०–अयं हीति । अयं कालो वसन्तकालस्तस्या मम दयिताया रुचिर इष्टः ॥ ३१ ॥

रा० टी०–अयमिति । रुचिराणि काननानि यस्मिन् सः कोकिलैः आकुलो व्याप्तः सीमान्तः वनमर्यादापर्यन्तं यस्मिन् सः अयं कालः वसन्तः मम प्रियायाश्च रुचिरः प्रिय इत्यर्थः । एतेन यदीदानीं सा इह स्यात् तदातीव प्रमोदप्रवृद्धिः भवेदिति सूचितम् ॥ ३१ ॥

गो० टी०–अयमिति । अयं कालो मम दयितायाः रुचिरो हि प्रियतरो हीत्यर्थः । यदीहेदानीं दयिता स्यात्तदाऽतीव तुष्येदिति भावः । कोकिलाकुलसीमान्तः कोकिलरवाकुलचतुःसीम इत्यर्थः ॥ ३१ ॥

३२] ति० टी०–कोकिलैराकुलः सीम्नां वनसीम्नामन्तो मध्यप्रदेशो येन सः । मन्मथायासेन कामपीडया संभूतो जनितः वसन्तगुणैर्मन्दानिलपुष्पितकाननत्वादिरूपैर्वर्धितः प्रज्वलितः ३२

रा० टी०–मन्मथेति । मन्मथायाससंभूतः मन्मथेन

१ अर्धमेतत् गो. नास्ति । २ नत्यूहेनि गो. पाठः । ३ प्रदीपना इति गो. पाठः । ४ सुकेशामिति रा. पाठः । ५ दयित इति गो. पाठः

अयं मां धक्ष्यति क्षिप्रं शोकाग्निर्न चिरादिव । अपश्यतस्तां वनितां पश्यतो रुचिरान्द्रुमान्[1]॥ ३३ ॥
ममायमात्मप्रभवो भूयस्त्वमुपयास्यति । अदृश्यमाना वैदेही शोकं वर्धयतीह[2] मे ॥ ३४ ॥
दृश्यमानो वसन्तश्च स्वेदसंसर्गदूषकः । मां हि[3] सा मृगशावाक्षी चिन्ताशोकबलात्कृतम् ३५ ॥
संतापयति सौमित्रे क्रूरश्चैत्रश्च[4]वनानिलः । अमी मयूराः शोभन्ते प्रनृत्यन्तस्ततस्ततः[5] ॥ ३६ ॥
स्वैः पक्षैः पवनोद्धूतैर्गवाक्षैः स्फाटिकैरिव । शिखिनीभिः परिवृतास्त एते मदमूर्छिताः ॥ ३७ ॥
मन्मथाभिपरीतस्य मम मन्मथवर्धनाः । पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति ॥ ३८ ॥

स्वनिष्ठमदमथनसामर्थ्यं निरोधेन यः आयासः तन्निरोधजनित-श्रमः तस्मात्संभूतः वसन्तगुणवर्धितः अयं शोकाग्निः न चि-राद् शीघ्रमेव क्षिप्रं सीताप्राप्तौ अतित्वराविशिष्टं मां धक्ष्यतीव ॥ ३२ ॥

गो० टी०–मन्मथेति । मन्मथायाससंभूतः मदनपीडा-जनितः वसन्तस्य गुणेन रामणीयकेन वर्धितः क्षिप्रं धक्ष्यति ननु चिराद् । इवशब्दो वाक्यालंकारे ॥ ३२ ॥

३३] ति० टी०–न चिरादिवेदानीमेव । 'अचिरादिव' इति पाठान्तरम् ॥ ३३ ॥

रा० टी०–अपश्यत इति । वनितां तां सीतामपश्यतः रुचिरद्रुमान्पश्यतः मम आत्मप्रभवः मनोजनितः चिन्तेत्यर्थः, भूयस्त्वमधिकत्वमुपयास्यति प्राप्नोतीत्यर्थः ॥ ३३ ॥

गो० टी०–अपश्यत इति । आत्मप्रभवः मन्मथः । भूयस्त्वं प्रवृद्धत्वम् ॥ ३३ ॥

३४] ति० टी०–आत्मप्रभवः कामः । भूयस्त्वं वैपुल्यम् ॥ ३४ ॥

रा० टी०–अदृश्यमानेति । अदृश्यमाना दृष्टिपथमप्रा-प्ता वैदेही स्वेदसंसर्गदूषकः मलयसंबन्धिपवनद्वारा घर्मोद्भव-जनितप्रस्वेदसंबन्धनिवर्तकः दृश्यमानः वसन्तश्च इह अस्मिन्वने मे शोकं वर्धयति ॥ ३४ ॥

गो० टी०–अदृश्यमानेति । दृश्यमानः पुष्पादिद्वारा स्वेदसंसर्गदूषकः मलयमारुतद्वारा स्वेदसंबन्धनिवर्तकः । रतिश्रान्तिहर इत्यर्थः ॥ ३४ ॥

३५] ति० टी०–स्वेदसंसर्गः कामविकारजस्तेन दूष-यति मलिनीकरोति तादृशः । यद्वा तं दूषयति नाशयति मल-यानिलसंबन्धात्तादृशः । चिन्ताशोकाभ्यां बलात्कृतं बला-त्कृतपीडम् ॥ ३५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–मामिति । मृगशावाक्षी मृगशावलोचनसदृशनयनविशिष्टा सा सीता वियुक्तानां दुःखप्र-दत्वेन क्रौर्यविशिष्टः चैत्रवनानिलश्च चिन्ताशोकबलात्कृतं चिन्ताशोकबलहेतुकविविधकृतिमन्तं मां संतापयति अविवक्षि-तकर्मकत्वेनाकर्मकत्वात्कर्तरि निष्ठा ॥ ३५ ॥

गो० टी०–मां हीति । क्रूरः मन्मथोद्दीपकत्वात् । अत्र चकारो द्रष्टव्यः ॥ ३५ ॥

३६] ति० टी०–चैत्रसंबन्धी वनानिलः ॥ ३६ ॥

रा० टी०–अमी इति । स्फाटिकैः स्वच्छत्वेन स्फटि-कनिर्मितैः गवाक्षैरिव पवनोद्धूतैः पवनेन कम्पितैः स्वैः पक्षैः इतस्ततो नृत्यन्तोऽमी मयूराः शोभन्ते ॥ ३६ ॥

गो० टी०–अमी इति । ततस्ततः तत्र तत्र प्रदेशे पवनोद्धूतैः अत एव स्पष्टदृष्टशुभ्रनालजालत्वात् स्फाटिकैर्ग-वाक्षैरिव स्थितैः । यद्वा स्फाटिकैः स्फटिकप्रधानैः चन्द्रार्क-परम्परायास्तत्तुल्यत्वादिति भावः । अनेन भगवत्कृपाप्रवर्ति-तविविधकर्मपरा उच्यन्ते ॥ ३६ ॥

३७] ति० टी०–शिखिनीभिर्मयूरीभिः । मदमूर्च्छिता मत्ताः ॥ ३७ ॥

रा० टी०–शिखिनीभिरिति । शिखिनीभिः परिवृताः मदमूर्छिताः मदेन हर्षेण मूर्छिताः प्रवृद्धा नृत्यन्त एते मयूराः मन्मथाभिपरीतस्य गर्वापहारित्वधर्मविशिष्टस्य मम मन्मथ-वर्धनाः गर्वापहारित्वप्रवर्धकाः सीतासंयोगार्थं तदपहारिगर्व-ध्वंसाय प्रेरयन्त इवेत्यर्थः ॥ ३७ ॥

गो० टी०–शिखिनीभिरिति । शिखिनीभिः मयूर-स्त्रीभिः परिवृताः अत एव मदमूर्च्छिताः मदव्याप्ताः त एते पूर्वश्लोकोक्ता एते शिखिनः मन्मथाभिपरीतस्य पूर्वमेव मन्म-थाभिव्याप्तस्य मम पुनर्मन्मथवर्धनाः अन्यरतिदर्शनस्य उद्दी-पनत्वादिति भावः । सशिष्यभक्तदर्शनं मे सर्वत्र भक्त्युत्पादन-व्यामोहं जनयतीत्यर्थः ॥ ३७ ॥

३८] ति० टी०–अभिपरीतस्य व्याप्तस्य ॥ ३८ ॥

रा० टी०–पश्येति । मन्मथार्ता एषा शिखिनी नृत्य-न्तं भर्तारं मयूरमुपनृत्यति त्वं पश्य ॥ ३८ ॥

गो० टी०–पश्येत्यादि श्लोकद्वयमेकान्वयम् । नृत्यन्तं स्वयं लीलारसप्रवृत्तं भर्तारं प्रति मन्मथार्ता रत्यर्थं तमाक-ष्टुकामा शिखिनी उपनृत्यति । तामेव रामां कान्तां मनसा उपधावति समीपमागन्तुमिच्छतीत्यर्थः । उपधावनं च रत्य-र्थमिति द्योतयति–चितत्येति । रतैः रतिकूजितैः उपलक्षितः । पक्षविस्तारणं च रत्यर्थव्यापारः । उपहसन्निव प्रसन्नमुख इत्यर्थः । यद्वा कान्ताविरहिणं मामुपहसन्निवेत्युत्प्रेक्षा । अत्र शिष्याचार्ययोरन्योन्यप्रावण्यमुच्यते ॥ ३८ ॥ ३९ ॥

१ रुचिरद्रुमानिति गो. पाठः । २ वर्धयते ममेति गो. पाठः । ३ अथेति गो. पाठः । ४ चैत्रो वनानिल इति गो. पाठः । ५ इतस्तत इति रा. पाठः ।

शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुनि । तामेव मनसा रामां मयूरोऽप्यनुधावति ॥ ३९ ॥
वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव । मयूरस्य वने नूनं रक्षसा न हृता प्रिया ॥ ४० ॥
तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया । मम त्वयं विना वासः पुष्पमासे सुदुःसहः ॥ ४१ ॥
पश्य लक्ष्मण सैंरागस्तिर्यग्योनिगतेष्वपि । अधुना शिखिनी कामाद्भर्तारमभिवर्तते ॥ ४२ ॥
ममाप्येवं विशालाक्षी जानकी जातसंभ्रमा । मदनेनाभिवर्तेत यदि नापहृता भवेत् ॥ ४३ ॥
पश्य लक्ष्मण पुष्पाणि निष्फलानि भवन्ति मे । पुष्पभारसमृद्धानां वनानां शिशिरात्यये ॥ ४४ ॥
रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया । निष्फलानि महीं यान्ति समं मधुकरोत्करैः ॥ ४५ ॥
नदन्ति कामं शकुना मुदिताः सङ्घशः कलम् । आह्वयन्त इवान्योन्यं कामोन्मादकरा मम ॥ ४६ ॥

३९] ति० टी०–अनुधावति नृत्यप्रसङ्गेनाग्रे गताम् ॥३९॥

रा० टी०–तामिति । रुचिरौ पक्षौ वितत्य प्रसार्य रुतैः शब्दैस्तां रामामुपहसन्निव मयूरोऽपि मनसा अनुधावति रामासमीपं गन्तुमिच्छति ॥ ३९ ॥

४०] ति० टी०–रुतैरुपहसन्निव मामिति शेषः ॥ ४० ॥

रा० टी०–मयूरस्येति । यस्मात् मयूरस्य वने प्रिया सीता न हृता तस्मात् कान्तया सह नृत्यति मयूर इति शेषः । अनेन सीतापहरणदर्शने मयूराणामपि शोकातिशयः स्यादिति सूचितम् ॥ ४० ॥

गो० टी०–मयूरस्येति । वने उपभोगयोग्ये देशे रावणः सीतां हृतवान् नतु नगर इति हार्दो भावः । न हृता अस्य भाग्यवशादिति भावः । तस्मादित्यादि । एतादृशरम्यदेशकालेषु धन्याः कान्ताभिः क्रीडन्तीति भावः ॥४०॥

४१] ति० टी०–यतो न हृता तस्मान्नृत्यतीत्यर्थः । विना सीतां विनाऽयं मम पुष्पमासे चैत्रे वासः सुदुःसहः अतिपीडाजनकत्वात् ॥ ४१ ॥

रा० टी०–ममेति । पुष्पमासे चैत्रे इत्यर्थः, विना सीततयेति शेषः, ममायं वासस्तु सुदुःसहः । अर्धं पृथक् ॥ ४१ ॥

गो० टी०–अनुमेवाशयमुद्घाटयति–मम त्विति । विना सीतयेति शेषः ॥ ४१ ॥

४२-४३] ति० टी०–नन्वेतावान्रागस्तवानुचितस्तत्राह–पश्येति । संरागोऽतिशयितो रागः ॥ ४२ ॥ ४३ ॥

रा० टी०–पश्येति । तिर्यग्योनिगतेष्वपि संरागः जातः अधुना वसन्तसमये शिखिनी कामात् भर्तारं मयूरं यथाऽभिवर्तते एवं तथैव विशालाक्षी जानकी यदि अपहृता न भवेत् तदा मदनेन अतिहर्षेणोपलक्षिता जातसंभ्रमा मत्कर्मकादरविशिष्टा सती ममाप्यभिवर्तेत मत्समीपमेव तिष्ठेदित्यर्थः, इति त्वं पश्य जानीहि । श्लोकद्वयमेकान्वयि ॥ ४२ ॥ ४३ ॥

गो० टी०–पश्येति । सम्यग्रागः संरागः तं कान्तानुरागमित्यर्थः । तिर्यग्योनिगतेषु तिर्यग्योनिजातेषु । यदेषेति । लोके स्त्रियं पुमाननुवर्तते न तु स्त्री पुरुषम् अतोऽतीवास्याः कामः । अहो वसन्तवैभव इति भावः ॥ ४२ ॥

गो० टी०–ममाप्येवमिति । विशालाक्षी मदवलोकनविस्फारितेक्षणा जातसंभ्रमा जातत्वरा यदि नापहृता भवेत् तदा मामेवाभिवर्तेत । अत्र चापलं नाम संचारीभावः ॥ ४३ ॥

४४] ति० टी०–अन्यानि पुष्पाणि मे सीतावियोगाद्भोगसाधनत्वाभावान्निष्फलानि भवन्ति ॥ ४४ ॥

रा० टी०–पश्येति । हे लक्ष्मण ! शिशिरात्यये वसन्ते इत्यर्थः, पुष्पभारसमृद्धानां वनानां पुष्पाणि मम निष्फलानि प्रियया विना निष्प्रयोजनकानि भवन्ति ॥ ४४ ॥

गो० टी०–पश्येति । शिशिरात्यये वसन्ते पुष्पभारसमृद्धानां पुष्पाणि अमितानि पुष्पाणीत्यर्थः । संसारिदुःखं पश्यतो मे ज्ञानिलाभोऽकिंचित्कर इव भातीत्यर्थः ॥ ४४ ॥

४५] ति० टी०–उक्तस्यैव विवरणं पुष्पाणीत्यादि । अतिश्रिया रुचिराणीत्यन्वयः । मधुकरोत्करैर्मधुकरसमूहैः ॥ ४५ ॥

रा० टी०–ग्राहकान्तराणामप्यभावात्पुष्पाणां वैयर्थ्यमेवेति बोधयन्नाह–रुचिराणीति । अतिश्रियाऽतिशोभया रुचिराण्यपि पादपानां पुष्पाणि निष्फलानि निष्प्रयोजनकानि अत एव मधुकरोत्करैः मधुकरसमूहैः समं महीं यान्ति ॥४५॥

गो० टी०–उक्तमर्थं विशिष्य दर्शयति–रुचिराण्यपीति । अतिश्रिया अत्यन्तकान्त्या रुचिराण्यपि अस्मदनुप्रयोजनान्निष्फलानि भवन्ति । निर्भरमकरन्दभरिततया मधुकरसमूहैः समं महीं यान्ति ॥ ४५ ॥

४६] ति० टी०–आह्वयन्त इव नदन्तीत्यन्वयः ॥ ४६ ॥

रा० टी०–नदन्तीति । शकुनाः पक्षिणः अन्योन्यम् आह्वयन्त इव मम कामोन्मादकराः सीतासंयोगविषयकोत्कटेच्छयोन्मादप्रवर्तकाः सन्तः कामं यथेच्छं कलं मनोहरं नदन्ति॥४६॥

गो० टी०–वदन्तीति । शकुनाः मम कामोन्मादकराः सन्तः अन्योन्यमाह्वयन्त इव कलं मधुरं रावं वदन्ति शब्दं कुर्वन्तीत्यर्थः । मम कामोन्मादकरणार्थं संघीभवितुमन्योन्यमाह्वयन्त इवेत्युत्प्रेक्षा । अनेन स्वदयोक्तमकज्ञानिव्यापार उक्तः ॥ ४६ ॥

१ संरागमिति गो. पाठः । २ यदेषेति गो. पाठः । ३ वदन्ति रावं मुदिताः शकुना इति गो. पाठः ।

वसन्तो यदि तत्रापि यत्र मे वसति प्रिया । नूनं परवशा सीता सापि शोचत्यहं यथा ॥ ४७ ॥
नूनं न तु वसन्तस्तं देशं स्पृशति यत्र सा । कथं ह्यसितपद्माक्षी वर्तयेत्सा मया विना ॥ ४८ ॥
अथवा वर्तते तत्र वसन्तो यत्र मे प्रिया । किं करिष्यति सुश्रोणी सा तु निर्भर्त्सिता परैः ॥ ४९ ॥
श्यामा पद्मपलाशाक्षी मृदुर्भाषा च मे प्रिया । नूनं वसन्तमासाद्य परित्यक्ष्यति जीवितम् ॥ ५० ॥
दृढं हि हृदये बुद्धिर्मम संपरिवर्तते । नालं वर्तयितुं सीता साध्वी मद्विरहं गता ॥ ५१ ॥
मयि भावो [3]हि वैदेह्यास्तत्त्वतो विनिवेशितः । ममापि भावः सीतायां सर्वथा विनिवेशितः ॥ ५२ ॥
एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः । तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥ ५३ ॥

४७] ति० टी०–यदि सीतावासदेशेऽपि वसन्तोऽस्ति तदा मद्वदेव सापि शोचति सामग्र्याः समत्वात् ॥ ४७ ॥

रा० टी०–वसन्त इति । यत्र मे प्रिया सीता परवशा सती वसति तत्रापि यदि वसन्तः वसन्तहेतुकमयूरादिशब्दश्रवणं पुष्पोत्करादिदर्शनं च भवेदिति शेषः, उपवनादौ तिष्ठेदित्यर्थः, तदा अहमिव शोचति शोचेत् ॥ ४७ ॥

गो० टी०–वसन्त इति । शोचति शोचेत् ॥ ४७ ॥

४८] ति० टी०–यद्यपि तत्र वसन्तो न भवेत्कदाचित्, तथापि मया विना सा कथं वर्तयेज्जीवेत् । मद्विरह एव तन्नाशे पर्याप्त इति भावः ॥ ४८ ॥

रा० टी०–संभावनान्तरमाह–नूनमिति । यत्र सा सीता अस्ति तं देशं वसन्तः वसन्तचिह्नं नैव स्पृशति सा नैव जानातीत्यर्थः, नूनं निश्चितमेतत् । तत्र हेतुमाह–असितपद्माक्षी अरुणकमलनयना सा सीता मया विना कथं वर्तयेत् नैव तिष्ठेदित्यर्थः । एतेन मद्वियोगसमये वसन्तचिह्नदर्शनादेव मद्वियोगमसहमाना सती द्रुतं साकेतं गच्छेदिति तात्पर्यम् ॥ ४८ ॥

गो० टी०–गृहदेशप्रापणेन तद्देशे वसन्तप्रसङ्गाभावात्र तस्याः शोकप्रसक्तिरित्याशङ्क्य वसन्ताभावेऽपि मां विना न जीवितं धारयिष्यतीत्याह–नूनमिति ॥ ४८ ॥

४९] ति० टी०–अथवा वर्तते तत्र वसन्तस्तथापि परैः शत्रुभिः पीडिता यतः सा, अतस्तस्या वसन्तः किं करिष्यति । परकृतपीडासत्त्वे कामपीडानवकाशादिति भाव इति प्राञ्चः । परे तु तत्र वसन्तो नास्त्येव । तत्सत्त्वे मया विना सा कथं तत्र तिष्ठेत् । आगतैव स्यादित्यर्थः । तदेव सूचयन्नाह–अथवेति । परनिर्भर्त्सनवशान्नायातीत्याशय इत्याहुः ॥ ४९ ॥

रा० टी०–संभावनान्तरमाह–अथवेति । अथवा यत्र मे प्रिया तत्र वसन्तः वर्तते वर्तेत सा तं जानीयादित्यर्थः । परंतु परैः शत्रुभिः निर्भर्त्सिता सती सा सीता किं करिष्यति । एतेन रावणस्य सामर्थ्यातिशयो व्यञ्जितः ॥ ४९ ॥

गो० टी०–वसन्तप्राप्तिमङ्गीकृत्याह–अथ वेति ॥ ४९ ॥

५०] ति० टी०–सर्वथा तस्याः कामपीडया नाश एव प्राप्त इत्याह–श्यामेति ॥ ५० ॥

रा० टी०–श्यामेति । श्यामा नित्यं षोडशवार्षिकीत्वेन प्रतीयमाना पद्मपलाशाक्षी कमलपत्रनयना मे प्रिया वसन्तमासाद्य प्राप्य जीवितं स्वशरीरपालनं परित्यक्ष्यति नूनं निश्चितमेतत् ॥ ५० ॥

गो० टी०–श्यामेति । श्यामा यौवनमध्यस्था ॥ ५० ॥

५१] ति० टी०–तदेव विवृणोति—दृढमिति । साध्वी सीता मद्विरहं गता संप्राप्ता, वसन्तसत्त्वेऽसत्त्वे वा सर्वथा वर्तयितुं जीवितुं नालं न समर्था ॥ ५१ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–दृढमिति । मद्विरहं वियोगं गता प्राप्ता सीता अलं वर्तयितुं शोभनतया स्थातुं न शक्ष्यतीति शेषः, हि इति बुद्धिः मम हृदये दृढं संपरिवर्तते ॥ ५१ ॥

गो० टी०–उक्तमर्थं सहेतुकं द्रढयति–दृढं हीति । अस्यान्ते इतिकरणं द्रष्टव्यम् । वर्तयितुं जीवितुं नालं न समर्था ॥ ५१ ॥

५२] ति० टी०–एवंनिश्चयकारणं परस्परानुरागसाम्यं दर्शयति–मयि भाव इति ॥ ५२ ॥

रा० टी०–तत्र हेतुं बोधयन्नाह–मयीति । वैदेह्याः भावः प्रीतिः मयि तत्त्वतो विनिवेशितः संस्थापितः, ममापि भावः सीतायां सर्वथा तत्त्वतो विनिवेशितः । एतेन द्वयोः प्रीत्योरेचात्यत्वं व्यञ्जितम् ॥ ५२ ॥

गो० टी०–अत्र हेतुमाह–मयीति । भावोऽनुरागः तत्त्वतः एकतत्त्वतया सर्वथा । न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्ति मया समो वेत्युक्तप्रकारेण । अनेन स्वस्य जीवसंबन्धः स्वाभाविक उक्तः ॥ ५२ ॥

५३] ति० टी०–हिमावहोऽपि पावकप्रतिमोऽत्युष्ण इति विरोधाभासः ॥ ५३ ॥

रा० टी०–एव इति । पुष्पवहः सुगन्धवानित्यर्थः, हिमावहः शैत्यं प्राप्तः अत एव सुखस्पर्शः एष वायुस्तां सीतां चिन्तयतो मम पावकप्रतिमः वह्निसदृशः, प्रतीयते इति शेषः ॥ ५३ ॥

गो० टी०–एवं वसन्तोद्दीपनतामुक्त्वा मलयमारुतोद्दी-

१ अयमिति गो. पाठः । २ पूर्वोऽभिभाषिणीति गो. पाठः । ३ त्विति गो. पाठः ।

सदा सुखमहं मन्ये यं पुरा सह सीतया । मारुतः स विना सीतां शोकसंजननो[1] मम ॥ ५४ ॥
तां विनाऽथ विहङ्गोऽसौ[2] पक्षी प्रणदितस्तदा । वायसः पादपगतः प्रहृष्टमभिकूजति[3] ॥ ५५ ॥
एष वै तत्र वैदेह्या विहगः प्रतिहारकः । पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति[4]॥ ५६ ॥
पश्य लक्ष्मण संनादं वने मदविवर्धनम् । पुष्पिताग्रेषु वृक्षेषु द्विजानामवकूजताम् ॥ ५७ ॥
विक्षिप्तां पवनेनैतामसौ तिलकमञ्जरीम् । षट्पदः सहसाभ्येति मदोद्धूतामिव प्रियाम्॥ ५८ ॥
कामिनामयमत्यन्तमशोकः शोकवर्धनः । स्तबकैः पवनोत्क्षिप्तैस्तर्जयन्निव मां स्थितः ॥ ५९ ॥

पनतामाह—एष इत्यादिना । पुष्पवहः पुष्पगन्धवहः । अनेन सौरभ्यमुक्तम् । सुखस्पर्श इत्यनेन मान्यम् । हिमावहः हिमवत्त्वावह इति शैत्यम् । 'तुषारः शीतलः शीतो हिमः सन्नान्यलिङ्गकाः' इत्यमरः । तां विचिन्तयतः विरहिणः इत्यर्थः । पावकप्रतिमः संतापकर इत्यर्थः ॥ ५३ ॥

५४] ति० टी०—यं वायुं सीतया सह स्थितिकाले सदा सुखं मन्ये इत्यन्वयः ॥ ५४ ॥

रा० टी०—सदेति । यं मारुतं पुरा सीतया सहाऽहं सदा सुखं मन्ये स मारुतः सीतां विना मम शोकसंजननः ॥ ५४ ॥

गो० टी०—उक्तमर्थं विवृणोति—सदेति । आभ्यां संसारिण्यकिंचित्करी स्वदया स्वस्याप्यसह्येत्युच्यते ॥ ५४ ॥

५५-५६] ति० टी०—तदा सीतासंयोगकालेऽसौ वायसः पक्षी विहङ्ग आकाशगः सन्प्रणदितस्तेन च तद्वियोगं सूचितवानित्याशयः । अथ तां विना तद्वियोगावस्थायां पादपगतः प्रहृष्टमभिकूजति तेन तत्संयोगं सूचयतीत्याशयः । तदेव विवृणोति—विहगः सन्प्रतिहारकः । अपहारक इत्यर्थः । तु इदानीं तु स पक्षी तस्याः समीपं मां नेष्यतीत्यर्थः । कतकस्तु—'पक्षी प्रणदितस्तथा' इति, 'विहगः प्रीतिकारकः' इति च प्राचीनः पाठः । असौ पक्षी तथाऽतिसुखं यथा भवति तथा विहगः सन्नाकाशगः प्रणदितो नादं कृतवान् । अस्य पूर्वमिति शेषः । तत्संयोगकाले इत्यर्थः । अथेदानीं तां विना तद्वियोगकाले । अन्यथेति शेषः । दुःखनाद इत्यर्थः । अथ कंचिच्छकुनमाह—पादपगतो वायसः प्रहृष्टं यथा कूजति । एष विहग एवंनादविशिष्टो विहगो वायसो यत्र सीता तिष्ठति तत्र तस्याः प्रीतिकारकोऽतिपीडाभावसूचकः । मां तु मां च तस्याः समीपं तत्समीपगमनद्वारमुपनेष्यत्युपस्थापयिष्यतीत्यर्थ इत्याह ॥ ५५ ॥ ५६ ॥

रा० टी०—तामिति । योऽसौ वायसः काकः पक्षी विहङ्गः आकाशं प्राप्तः सन् तदा सीतासंयोगकाले प्रणदितः वियोगसूचकप्रणादं कृतवान् स वायसस्तां विना सीतावियोगसमय इत्यर्थः, पादपगतः वृक्षं प्राप्तः सन् प्रहृष्टमभिकूजति संयोगसूचकनादं करोतीत्यर्थः । एतेन सीतासंयोगो ध्रुवं भविष्यतीति सूचितम् ॥ ५५ ॥

गो० टी०—मध्ये यत्किंचिदाश्वसनं दृष्टमनुवदति द्वाभ्याम्—तामिति । तदा प्रथमदर्शनकाले सीताया वियोगपूर्वकाले वा वायसः पक्षी विहङ्गः आकाशगतः सन् यः प्रणदितः परुषं वाशितवान् स इदानीं तां विना तद्विरहावस्थायां पादपगतः सन् प्रहृष्टं यथा तथा अभिनर्दति । पूर्वमाकाशगतः सन् परुषनादेन तद्विश्लेषं सूचितवान् इदानीं पादपगतः सन् प्रहृष्टनादेनास्याः संश्लेषं सूचयतीत्यर्थः ॥ ५५ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—एष इति । विहगः आकाशगः सन् य एष वायसः प्रतिहारकः वियोगसूचकशब्दवत्त्वेन अपहरणहेतुः स एव पक्षी विशालाक्ष्याः सीतायाः समीपं मामुपनेष्यति प्रापणसूचकसुशब्दवत्त्वेन हेतुना प्रापयिष्यति ॥ ५६ ॥

गो० टी०—एतदेव विवृणोति—एष इति । तत्र तदानीं प्रतिहारकः वियोजकः सन् । आभ्यां यादृच्छिकप्रासङ्गिकसुकृतदर्शनमुक्तम् ॥ ५६ ॥

५७] ति० टी०—पुनः कामपीडां नाटयति—पश्येति । शृण्वित्यर्थः । अवकूजतां शब्दं कुर्वताम् ॥ ५७ ॥

रा० टी०—पश्येति । वने पुष्पिताग्रेषु वृक्षेषु अवकूजतां द्विजानां पक्षिणां मदविवर्धनं संनादं पश्य जानीहि ॥ ५७ ॥

गो० टी०—पश्येति । अनेन परमपदे ज्ञानप्रधाने सामगायिनां नित्यमुक्तानां स्थितिरुक्ता ॥ ५७ ॥

५८-५९] ति० टी०—मदोद्धूतां मदेन स्खलन्तीम् ५८॥५९

रा० टी०—विक्षिप्तामिति । पवनेन विक्षिप्तां संचालितां तिलकमञ्जरीम् असौ षट्पदो भ्रमरः मदोद्धूतां मदहेतुकप्रकम्पविशिष्टां सहसाऽभ्येति प्राप्नोति । एतेन प्रियया संयोक्तुं मामपि प्रेरयतीवेति सूचितम् ॥ ५८ ॥

गो० टी०—विक्षिप्तामिति । पवनेन विक्षिप्तां कम्पितां प्रियामिव स्थितां तिलकमञ्जरीं षट्पदः भृङ्गोऽभ्येति । अनेन भगवद्यविषयभूतस्योत्तरक्षणे द्वयप्राप्तिर्भवितेत्युच्यते ॥ ५८ ॥

रा० टी०—कामिनामिति । अयमशोकः कामिनां प्रियाविषयकेच्छावतां वियुक्तानामित्यर्थः, अत्यन्तं शोकवर्धनः अत एव पवनोत्क्षिप्तैः स्तबकैः मां तर्जयन्निव स्थितः ॥ ५९ ॥

गो० टी०—कामिनामिति । कामिनां विरहिणां शोकवर्धनः दुःखवर्धनस्वभावः स्वभावतो दुष्टप्रकृतिरित्यर्थः ।

१ शोकं वर्धयते इति गो. पाठः । २ य इति गो. पाठः । ३ नर्दतीति गो. पाठः । ४ उपेति गो. पाठः ।

अमी लक्ष्मण दृश्यन्ते चूताः कुसुमशालिनः । विभ्रमोत्सिक्तमनसः साङ्गरागा नरा इव ॥ ६० ॥
सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु । किंनरा नरशार्दूल विचरन्ति यतस्ततः ॥ ६१ ॥
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः । नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥ ६२ ॥
एषा प्रसन्नसलिला पद्मनीलोत्पलायुता । हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥ ६३ ॥
जले तरुणसूर्याभैः षट्पदाहतकेसरैः[2] । पङ्कजैः शोभते पम्पा समन्तादभिसंवृता ॥ ६४ ॥
चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा । मातङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ॥ ६५ ॥
पवनाहतवेगाभिरूर्मिभिर्विमलेऽम्भसि । पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण ॥ ६६ ॥
पद्मपत्राविशालाक्षीं सततं प्रियपङ्कजाम्[4] । अपश्यतो मे वैदेहीं जीवितं नाभिरोचते ॥ ६७ ॥
अहो कामस्य वामत्वं यो गतामपि दुर्लभाम् । स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम् ६८ ॥

अशोकः पवनोत्क्षिप्तैः वायुना पत्राणां बहिश्चालितैः स्तबकैः मां तर्जयन्निव स्थितः । त्वत्संहारार्थमिमे तप्तबाणाः पञ्चबाणेन स्थापिता इति भीषयन्निव स्थित इत्युत्प्रेक्षा । संसारिणमनुजीवयन्तं मां ज्ञानिनो लज्जितं कुर्वन्तीत्यर्थः ॥ ५९ ॥

६०] ति० टी०–विभ्रमोत्सिक्तमनसः शृङ्गारोद्रिक्तचित्ताः ६०

रा० टी०–अमी इति । हे लक्ष्मण ! कुसुमशालिनः प्रशस्तकुसुमाश्रयाः अमी चूताः विभ्रमोत्सिक्तमनसः विभ्रमेण शृङ्गारविषयकविचारविशेषेण उत्सिक्तं युक्तं मनो येषां ते अत एव साङ्गरागाः अङ्गरागसहिताः नरा इव दृश्यन्ते ॥ ६० ॥

गो० टी०–पुनरपि ज्ञानिनां समृद्धिं दर्शयन्वर्णयति–अमी इत्यादिना । कुसुमशालिनः अत एव साङ्गरागाः विभ्रमोत्सिक्तमनसः विलासगर्वितमनसः रागिण इति यावत् । नरा इव भान्ति ॥ ६० ॥

६१] ति० टी०–विचरन्ति किंनरीभिः सहेति शेषः । स्वनायिकासहितनायकान्तरदर्शनमुद्दीपनम् ॥ ६१ ॥

रा० टी०–सौमित्र इति । चित्रासु पम्पायाः वनराजिषु वनपङ्क्तिषु किंनराः यतस्ततो विचरन्तीति पश्य ॥ ६१ ॥

गो० टी०–सौमित्र इति । स्पष्टम् ॥ ६१ ॥

६२] ति० टी०–नलिनान्यत्र रक्तकमलानि ॥ ६२ ॥

रा० टी०–इमानीति । जले तरुणसूर्यवत् उदयकालिकसूर्य इव इमानि नलिनानि अरुणकमलानि प्रकाशन्ते । अभूतोपमैषा ॥ ६२ ॥

गो० टी०–इमानीति । नलिनानि रक्तोत्पलानि जले तरुणसूर्यवत् प्रातिस्वरूपं प्रातिफलितबालसूर्यवत् ॥ ६२ ॥

६३] ति० टी०–नीलोत्पलैरासमन्तायुतः ॥ ६३ ॥

रा० टी०–एषेति । प्रसन्नसलिला स्वच्छजलविशिष्टा पद्मैः नीलोत्पलैश्चायुता व्याप्ता हंसकारण्डवाकीर्णा हंसैः कारण्डवैश्च आकीर्णा युक्ता सौगन्धिकायुता सौगन्धिकेन कमलजातिविशेषकह्लारेणायुता व्याप्ता असौ पम्पाऽस्तीति शेषः ॥ ६३ ॥

गो० टी०–विरजातृष्ट्या पम्पां वर्णयति–एषेत्यादिभिः चतुर्भिः। 'सौगन्धिकं तु कह्लारम्' इत्यमरः। शोभत इति शेषः६३

६४] ति० टी०–जले षट्पदाहतकेसरैर्जले भ्रमरपतितपुष्पधूलिभिरभिसंवृता व्याप्ता शोभते ॥ ६४ ॥

रा० टी०–जल इति । तरुणसूर्याभैः उदयकालिकसूर्यसदृशैः षट्पदैः आहतानि केशराणि येषां तैः पङ्कजैररुणकमलैः समन्तादभिसंवृता पम्पा शोभते ॥ ६४ ॥

गो० टी०–जल इति । पङ्कजैरभिसंवृतेत्यन्वयः ॥ ६४ ॥

६५] ति० टी०–चित्रप्रस्थानि चित्रप्रदेशानि वनान्तराणि यस्याः सा ॥ ६५ ॥

रा० टी०–चक्रेति । नित्यचक्रवाकयुता चित्रप्रस्थवनान्तरा चित्रप्रस्थानि चित्रप्रदेशकानि वनान्तराणि वनमध्यानि यस्याः सा पम्पा सलिलार्थिभिः जलं पातुकामैः मातङ्गैर्गजैः मृगयूथैश्च शोभते ॥ ६५ ॥

गो० टी०–चक्रवाकेति । चित्रप्रस्थवनान्तरा चित्रतीरवनपरिधाना । अन्तरं परिधानम् ॥ ६५ ॥

६६] ति० टी०–पवनाहतवेगाभिः पवनाघातजनितवेगाभिः । अम्भसि पङ्कजानि विराजन्त इत्यन्वयः ॥ ६६ ॥

रा० टी०–पवनेति । पवनेन आहताः वेगाः यासां ताभिः ऊर्मिभिः लहरीभिस्ताड्यमानानि पङ्कजानि विमले अम्भसि जले विराजन्ते ॥ ६६ ॥

गो० टी०–पवनेति । पवनाहितवेगाभिः पवनोत्पादितवेगाभिः । ताड्यमानानि कशाभिस्ताड्यमानानीव ॥ ६६ ॥

६७] ति० टी०–अपश्यतो मे । आत्मने इति शेषः । यद्वा कर्तुः शेषत्वविवक्षायां मे इति षष्ठी ॥ ६७ ॥

रा० टी०–पद्मेति । सततं प्रियपङ्कजां वैदेहीमपश्यतो मे जीवितं प्राणपालनं नाभिरोचते ॥ ६७ ॥

गो० टी०–एवं पम्पादर्शनजकामोद्रेकमरत्यवस्थया दर्शयति–पद्मेति । स एकाकी न रमेतेतिवद्विरजातीरवासो मे न रोचत इति लक्ष्मणायाभिव्यनक्ति ॥ ६७ ॥

६८] ति० टी०–वामत्वं कौटिल्यं गतः । वियुक्तां दुर्ल-

१ तत इति गो. पाठः । २ केशरैरिति रा. पाठः । ३ आहतेति गो. पाठः । ४ पङ्कजप्रियामिति गो. पाठः ।

शक्यो धारयितुं कामो भवेद्[1]भ्यागतो मया । यदि भूयो वसन्तो मां न हन्यात्पुष्पितद्रुमः ॥ ६९ ॥
यानि स्म रमणीयानि तया सह भवन्ति मे । तान्येवारमणीयानि जायन्ते मे तया विना ॥ ७० ॥
पद्मकोशपलाशानि द्रष्टुं दृष्टिर्हि[2] मन्यते । सीताया नेत्रकांशाभ्यां सदृशानीति लक्ष्मण ॥ ७१ ॥
पद्मकेसैरसंसृष्टो वृक्षान्तरविनिःसृतः । निःश्वास इव सीताया वाति वायुर्मनोहरः ॥ ७२ ॥
सौमित्रे पश्य पम्पाया दक्षिणे गिरिसानुषु[3] । पुष्पितां कर्णिकारस्य यष्टिं परमशोभिताम्[4] ॥ ७३ ॥
अधिकं शैलराजोऽयं धातुभिस्तु विभूषितः । विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ ७४ ॥

भामवाप्राप्यां स्मारयिष्यति स्मारयतीत्यर्थः । चित्तवैकल्यबोधनद्वारान्यथाप्रयोगो विरहपरिपोषाय ॥ ६८ ॥

रा० टी०–अहो इति । यः गतामन्यत्र प्राप्ताम् अत एव दुर्लभां दुःखेन लब्धव्यां कल्याणीं नित्यं कल्याणसंयुक्तामत एव कल्याणतरवादिनीं सीतां स्मारयिष्यति स्मरयति तस्य कामस्य संयोगेच्छाविशेषस्य अमत्वं प्राप्तिः अहो सुखप्रदं, वाशब्दो हेत्वर्थे । एतेन भविष्यत्कालिकी तस्याः प्राप्तिर्यदि न स्यात्तर्हि ईदृगिच्छाविशेषो न स्यादिति सूचितं तेन तस्याः प्राप्तिर्ध्रुवं भविष्यतीति ध्वनितम् ॥ ६८ ॥

गो० टी०–अहो इति । वामत्वं वक्रत्वं गतां दृग्गतां स्मारयिष्यति स्मारयति । कल्याणतरवादिनीं शुभतरवचनशीलाम् । मृगमाहरेति चरमश्रुतमेव वाक्यमस्य हृदये वर्तते॥६८॥

६९] ति० टी०–कामः कामकृततापः । भूयोऽधिकम् ॥ ६९ ॥

रा० टी०–शक्य इति । पुष्पितद्रुमः वसन्तः यदि मां न हन्यात् तर्हि अभ्यागतः संप्राप्तः कामः सीताप्राप्तिविषयकोत्कटेच्छा धारयितुं मया शक्यः भवेत् । एतेन वसन्तहेतुकेन प्रियावियोगजनितदुःखेन यदि धैर्यिन्यं प्राप्नुयात् तर्हि तादृगिच्छाऽपि निवर्तेत तर्हि इच्छाहेतुकोद्योगाभावात् तत्प्राप्तिर्न भविष्यतीति ध्वनितम् ॥ ६९ ॥

गो० टी०–शक्य इति । अयागतः इदानीं वर्तमानः । पुष्पिताः द्रुमाः येन स पुष्पितद्रुमः सर्वथा कामो दुःसहः इति उच्यते ॥ ६९ ॥

७०] ति० टी०–रमणीयानि भवन्ति स्म ॥ ७० ॥

रा० टी०–यानीति । सीतया सह यानि पुष्पादीनि मे रमणीयानि भवन्ति तान्येव तया विना अरमणीयानि जायन्ते ॥ ७० ॥

गो० टी०–भाग्यस्य वसन्तस्य कुतो बाधकत्वं तत्राह–यानीति ॥ ७० ॥

७१] ति० टी०–पद्मकोशस्य पलाशानि दलानि कामोद्दीपकान्यपि तत्रेत्रकोशाभ्यां तत्रेत्रपुटाभ्यां सदृशानीति द्रष्टुं दृष्टिर्मन्यत इत्यर्थः ॥ ७१ ॥

रा० टी०–पद्मेति । पद्मकोशपलाशानि पद्मकोशदलानि सीतायाः नेत्रकोशाभ्यां नेत्रपक्ष्मप्रदेशाभ्यां सदृशानि इति हेतोः द्रष्टुं दृष्टिः चक्षुः मन्यते इच्छति । पद्मकोशपलाशानीत्युभयान्वयि एकत्रशब्द अपरत्रार्थः ॥ ७१ ॥

गो० टी०–पद्मेति । नेत्रकोशाभ्यां नेत्रदलाभ्यां सीतानेत्रे स्मारयित्वा संतापयन्तीत्यर्थः ॥ ७१ ॥

७२–७४] ति० टी०–पद्मकेसरेत्यादिना शैत्यसौरभ्ये वृक्षान्तरेत्यादिना मान्द्यम् ॥ ७२–७४ ॥

रा० टी०–पद्मेति । पद्मकेशरसंसृष्टः पद्मकेशरसंबन्धी वृक्षान्तरविनिस्सृतः वृक्षयोर्मध्यादागतः मनोहरो वायुः सीतायाः निःश्वास इव वाति ॥ ७२ ॥

गो० टी०–सर्वप्राणिनां प्राणहेतुर्वायुरेवास्मत्सर्वस्वापहारं कुरुत इत्याह–पद्मकेसरेति । पद्मकेसरसंसृष्टः । धूलीकरणं वायुकार्यम् । तथा च सर्वप्राणहेतुरेव सर्वधूलीकरणप्रवृत्तः सर्वसंहारप्रवृत्त इत्यर्थः । यद्वा पद्माविरहात् पद्मकेसराणि प्रतिकूलानि सन्ति वायोः साहाय्यं कुर्वन्ति । पादारुन्तुदमेव पङ्कजरज इति स्वजनसहजबाधकं कथं नास्मद्बाधकम् । राजसप्रकृतित्वादस्मानपि बाधितुमुपक्रमते । केसरशब्देन तत्स्थरजसोऽत्र विवक्षितत्वात् किञ्जल्कानामानयनायोगात् । एतन्मूलं कण्टकिसंसर्गः । पद्मकेसरसंसृष्टः नायं वातः किंतु केसरी सिंहः इत्यपि ध्वनिः । यद्वा पद्मकेसरैः संसृष्टः स्वयमेव संहारक्षमः तदुपरि ससहायः । यद्वा रूपवान् त्रसहायशूरः रूपरहितोऽयं कथं न सहायमपेक्षेत । रूपवान् दृढशरीर इत्यपि ध्वनिः । वायुबाधकश्चेत्तया पूर्वमेव परिहृत्य वर्तितव्यं तत्राह–वृक्षान्तरविनिःसृतः दूरे दृष्ट्वा परिहर्तुं शक्यते वृक्षषण्डे पूर्वमात्मानं सङ्कोच्य स्थित्वा झटिति विनिर्गतः । यद्वा यथा राजकुमारः सौकुमार्येण छायामार्गेणागच्छति तथायमपीत्यर्थः । यद्वा मन्मथतापेन विश्रमाय तरुच्छायामपि नाश्रयितुं क्षमते । यदि तेऽहं बाधकः तर्हि दूरादपसरेत्यत्राह—निःश्वास इव सीतायाः पूर्वपरिचितवदनभासमानतया परिहर्तुमपि न शक्नोमि । यद्वा सीता निःश्वासतुल्यतया सात्र किं वृक्षमूले निलीना समागच्छतीति चापलातिशयनान्यत्र न चलितुं शक्नोमि । सुरभिनिःश्वसिते दधतस्तृषामिति निःश्वासस्य सौरभ्यं कविभिरुक्तम् । यद्वा न केवलमनिलः सपरिकर एव बाधते किं तु स्मारकतयापि वाति न कदाचिदायाति सर्वदा याति सकलमपि काननं सविलासं संचरति । यद्वा वाति "वा, गतिग-

---

१ अद्येति गो. पाठः । २ केशरेति रा. पाठ. । ३ सानुनीति गो. पाठः । ४ शोभनामिति गो. पाठः ।

गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः । निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ ७५ ॥
पम्पातीररुहाश्चेमे संसिक्ता मधुगन्धिनः । मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ॥ ७६ ॥
केतक्यः [1]सिन्दुवाराश्च वासन्त्यश्च सुपुष्पिताः । [2]मातुलिङ्गाश्च पूर्णाश्च कुन्दगुल्माश्च सर्वशः ॥ ७७ ॥
चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा । चम्पकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः॥ ७८ ॥
[[3]नीपाश्च वरणाश्चैव खर्जूराश्च सुपुष्पिताः]
पद्मकाश्चैव[4] शोभन्ते नीलाशोकाश्च पुष्पिताः । लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिञ्जराः ॥ ७९ ॥

न्धनयोः" स्वार्जितगन्धेन सर्वान् परवशीकरोति । एतादृशबाधकोऽपि न यः कश्चिदित्याह–वायुः सर्वोज्जीवनहेतुः । यद्वा "भीषाऽस्माद्वातः पवते" इति मन्त्रो भीतो मां भर्त्सयति । बाधनप्रकारमाह–मनोहरः आन्तरमपि पदार्थमपहरति । पद्मकेसरसंसृष्ट इत्यनेन शैत्यमुक्तम् । वृक्षान्तरविनिःसृत इत्यनेन मान्यम् । निःश्वास इव सीताया इति सौरभ्यम् । यद्वा पद्मकेसरसंसृष्ट इत्यनेन चौरसमा भीरुच्यते । स्वस्वरूपापरिज्ञानाय भीरुजनभीषणाय च भस्मोद्धूलितवदनः समायाति । वृक्षान्तरविनिःसृतः पथिकानां स्वसमीपागमनपर्यन्तं गूढतया स्थित्वा तेषु समीपमागतेषु सपदि समुत्तिष्ठन्निव भाति । निःश्वास इव सीतायाः चिरपरिचित इव सरससंश्लापविशेषैः कस्ते ग्रामः किं ते नामेति संभाषमाण इव स्थितः वाति । धनस्य हस्तगतिपर्यन्तं नि.स्पृहतया ततस्ततः संचरन्निव स्थितः वायुः चौर्यं दृष्ट्वा केनचित् ग्रहीतुमुद्युक्तश्लाघवेन हस्तग्रहणानर्हः । मनोहरः नापाततोऽपाहरत् अपि तु सुगुप्तमपि । अनेन निर्हेतुकहरिदयाप्रवाह उपवर्ण्यते । पद्मकेसरसंसृष्टः "ङ्यापोः संज्ञाछन्दसोः" इति ह्रस्वः । पद्मायाः केसरैः तत्तुल्यातुरागैः संमृष्टः पुरुषकारभूतलक्ष्मीप्रणयप्रवृत्त इत्यर्थः । पितेव स्वत्प्रेयान् जनविपरिपूर्णागसि जने हितस्रोतोवृत्त्या भवति च कदाचित्कलुषधीः । किमेतान्निर्दोषः क इह जगतीति त्वमुचितैरुपायैर्विस्मार्य स्वजनयसि माता तदसि नः ।" वृक्षान्तरविनिःसृतः 'ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्' इति वृक्षत्वेनोक्ते संसारमण्डले प्रवृत्तः । निःश्वास इव सीतायाः । स्त्रीप्रायमितरत्सर्वमिति परतन्त्रतया स्त्रीतुल्यानां लोकानाम् आश्वासको धारकश्चेत्यर्थः । वाति अनवरतं प्रवहति । वायुः सार्वत्रिकः मनोहरः मानसिकसकलकल्मषहरः । (द्रविडोपनिषद्व्याख्याकारैर्व्याख्यातोऽयं श्लोकः)॥ ७२ ॥

रा० टी०–सौमित्र इति । पम्पायाः दक्षिणे गिरिसानुनि पर्वतशिखरे पुष्पितां कर्णिकारस्य यष्टिं कर्णिकारवृक्षमित्यर्थः, पश्य ॥ ७३ ॥

गो० टी०–अथ विरजाया अर्वाक्प्रदेशवर्तिनां राजसतामसात्त्विकभेदभिन्नानां चेतनानां स्वरूप स्वकटाक्षविषयभूतं दर्शयति–सौमित्र इत्यादिना । दक्षिण इत्यनेन पम्पादक्षिणतीरं क्रमेण प्रविष्ट इत्यवगम्यते । अनेन कर्णिकारवर्णनेन सत्यलोकादिषु जृम्भमाणा राजसी वृत्तिरुच्यते । यष्टिं लताम् ॥ ७३ ॥

रा० टी०–अधिकमिति । धातुभिः गैरिकादिभिः विभूषितः अयं शैलराजः वायुवेगविघट्टितं वायुवेगेन संप्रापितं विचित्रमनेकविधै. सुगन्धैः रङ्गैश्च विशिष्टं रेणुं सृजते ॥ ७४ ॥

गो० टी०–अधिकमिति । अनेन ऋष्यमूकसमीपगमनं द्योतितम् । रजोवर्धकलोक उक्तः ॥ ७४ ॥

७५] ति० टी०–किंशुकैः प्रदीप्ता इवेत्यन्वयः ॥ ७५ ॥

रा० टी०–गिरीति । हे सौमित्रे ! गिरिप्रस्थाः शैलप्रदेशाः सर्वतः संप्रपुष्पितै. अत एव निष्पत्रैः अत एव रम्यैः किंशुकैः पलाशैः सर्वतः प्रदीप्ताः प्रज्वलिता इव भान्तीति शषः ॥ ७५ ॥

गो० टी०–गिरीति । प्रदीप्ताः ज्वलिताः ॥ ७५ ॥

७६] ति० टी०–पम्पातीररुहास्तत्तीरवृक्षाः संसिक्तास्तज्जलसेकेन वर्धिताः । मालती जातिः ॥ ७६ ॥

७७] ति० टी०–वासन्ती हेमपुष्पिका ॥ ७७ ॥

७८] ति० टी०–चिरिबिल्वो नक्तमालः ॥ ७८ ॥

७९] ति० टी०–पद्मका गन्धवृक्षविशेषाः । सिंहकेसरा पिञ्जरा यैस्ते ॥ ७९ ॥

रा० टी०–पम्पेति । संसिक्ताः पम्पाजलकर्तृकसेकविशिष्टाः मधुगन्धिनः मालत्यादयः पम्पातीररुहाः गिरिपृष्ठेषु नीलाशोकादयश्च शोभन्ते । श्लोकचतुष्टयमेकान्वयि ॥७६–७९॥

गो० टी०–पम्पेत्यादिसार्धसप्तश्लोकाः । इमे उपशोभन्त इत्यन्वयः । तदुपरि दृश्यन्त इत्यन्वयः । संसक्ताः अविरलाः । मधुगन्धिन इति सर्वविशेषणम् । लिङ्गवचनविपरिणामः कार्यः । एवं पुष्पितपदमपि । पम्पातीररुहा इमे मालत्यादयः पदार्था उपशोभन्ते इत्येकोऽन्वयः । मालती जातिः । मल्लिकापद्माः मल्लिकासमूहाः । करवीराः प्रसिद्धाः । सिन्धुवाराः निर्गुण्ड्यः । वासन्त्यः पीतवर्णपुष्पाः लताः । 'अत्र पीतायां वासन्ती हेमपुष्पिका' इति वैजयन्ती । माधव्यः अतिमुक्तलताः । गन्धेन पूर्णाः गन्धपूर्णाः । कुन्दानां गुल्माः कक्षा कुन्दगुल्माः । चिरिबिल्वाः नक्तमालाः । मधूकाः मधुद्रुमाख्या वृक्षाः । वञ्जुलाः वेतसाः । बकुलाः प्रसिद्धाः । तिलकाः क्षुरकाः । नागवृक्षाः नागकेसराः । नीपाः जलकदम्बाः । वरणाः वरणवृक्षाः । खर्जूराः प्रसिद्धाः । पद्मकाः पद्मपर्ण्याख्या

१ षण्डा इति गो. पाठः । २ सिन्धुवाराश्चेति गो. पाठः । ३ माधव्यो गन्धपूर्णा इति गो. पाठः । ४ अर्धमेतदधिक गो. पाठे । ५ उपेति गो. पाठः ।

अङ्कोलाश्च कुरण्टाश्च चूर्णकाः पारिभद्रकाः । चूताः पाटलयश्चापि कोविदाराश्च पुष्पिताः ॥ ८० ॥
मुचुकुन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु । केतकोद्दालकाश्चैव शिरीषाः शिंशपा धवाः ॥ ८१ ॥
शाल्मल्यः किंशुकाश्चैव रक्ताः कुरबकास्तथा । तिनिशा नक्तमालाश्च चन्दनाः स्यन्दनास्तथा[2] ८२ ॥
[3]हिन्तालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः । पुष्पितान्पुष्पिताग्राभिर्लताभिः परिवेष्टितान् ॥ ८३ ॥
द्रुमान्पश्येह सौमित्रे पम्पाया रुचिरान्बहून् । वातविक्षिप्तविटपान्यथासन्नान्द्रुमानिमान् ॥ ८४ ॥
लताः समनुवर्तन्ते मत्ता इव वरस्त्रियः । पादपात्पादपं गच्छञ्शैलाच्छैलं वनाद्वनम् ॥ ८५ ॥
वाति नैकरसास्वादसंमोदित इवानिलः । केचित्पर्याप्तकुसुमाः पादपा मधुगन्धिनः ॥ ८६ ॥
केचिन्मुकुलसंवीताः श्यामवर्णा इवाबभुः । इदं मृष्टमिदं स्वादु प्रफुल्लमिदमित्यपि ॥ ८७ ॥
रागरक्तो मधुकरः कुसुमेष्वेव लीयते । निलीय पुनरुत्पत्य सहसाऽन्यत्र गच्छति ॥
मधुलुब्धो मधुकरः पम्पातीरद्रुमेष्वसौ ॥ ८८ ॥

वृक्षविशेषाः । लोध्राः शावरवृक्षाः सिंहकेसरपिञ्जराः सिंहकेसरवर्णा इत्यर्थः । अङ्कोलाः निकोचकाः । कुरण्टाः पीतवर्णपुष्पा महासहारूया गुल्माः । पूर्णकाः शाल्मलिभेदा वृक्षविशेषाः । पारिभद्रकाः निम्बाः । पाटलयः इकारान्त आर्षः । कोविदाराः युगपत्रकाख्या वृक्षाः । मुचुलिन्दाः नारङ्गवृक्षाः । अर्जुनाः ककुभवृक्षाः । केतकानि हेमवर्णपुष्पाणि इति पूर्वस्माद्विशेषः । उद्दालकाः श्लेष्मातकवृक्षाः । शिरीषाः कपीतनाख्या वृक्षाः । शिंशुपाः भस्मगर्भाख्या वृक्षाः । धवाः मधुराख्या वृक्षविशेषाः । कुरबकाः रक्तवर्णपुष्पा महासहाख्या गुल्माः । रक्तपदं विस्पष्टार्थम् । तिनिशाः नेमिद्रुमाः । नक्तमालाः चिरिबिल्वभेदाः । चन्दनाः प्रसिद्धाः । स्पन्दनाः वृक्षविशेषाः ॥ ७६–८२ ॥

८०] ति० टी०–चूर्णकाः शाल्मलीविशेषाः पारिभद्रको मन्दारः ॥ ८० ॥

८१–८२] ति० टी०–मुचुकुन्दाः । 'मुचिलिन्दाः' इति पाठान्तरम् ॥ ८१ ॥ ८२ ॥

रा० टी०–अङ्कोला इति । गिरिसानुषु गिरिश्रृङ्गेषु अङ्कोलादयः दृश्यन्ते । सार्धश्लोकत्रयमेकान्वयि ॥ ८०–८२ ॥

८३] ति० टी०–पुष्पिताः सन्तीति शेषः । तान्पश्येत्याह—पुष्पितानिति । समासोक्त्यलंकारः ॥ ८३ ॥

रा० टी०–पुष्पितानिति । पुष्पिताग्राभिः लताभिः परिवेष्टितान् पुष्पितान् अत एव सुरुचिरान् पम्पायाः बहून् द्रुमान् पश्य । अर्धद्वयमेकान्वयि ॥ ८३ ॥

गो० टी०–पुष्पितानिति । पम्पायाः संबन्धिन इति शेषः ॥ ८३ ॥

८४–८५] ति० टी०–तानेवोपमामुखेनोपपादयति—वातेति ॥ ८४ ॥ ८५ ॥

रा० टी०–वातेति । वातेन विक्षिप्ताः संचलिताः विटपाः शाखाः येषां तान् अत एव संनतान् नम्रीभूतान् इमान् द्रुमान् लताः मत्ताः वरस्त्रिय इव यथा यथावत् समनुवर्तन्ते संवेष्टयन्ति ॥ ८४ ॥

गो० टी०–वातेति । वातविक्षिप्तविटपान् वायुविधूतशाखानिति तात्कालिककान्तिविशेषोक्तिः । यथासन्नान् यथा संस्प्रष्टुं शक्यते तथा आसन्नान् समीपवर्तिन इत्यर्थः । इयता ग्रन्थेन विषयान्तरप्रवणः प्राकृता उक्ताः ॥ ८४ ॥

रा० टी०–पादपादिति । पादपात् वृक्षात् पादपं वृक्षान्तरं शैलात् शैलं वनाद्वनं गच्छन् अनिलो वायुः नैकरसास्वादेन अनेकविधरसानुभवेन संमोदितः प्राप्तानन्द इव वाति॥८५॥

गो० टी०–पादपात्पादपमिति । कच्छात् कच्छमित्यपि ज्ञेयम् । नैकरसास्वादः अनेकमधुरसकवलनेन संमोदितः संजातसंमोद इव ॥ ८५ ॥

८६] ति० टी०–नैकरसास्वादसंमोदित इवानेकरसास्वादेन जातहर्ष इव ॥ ८६ ॥

रा० टी०–केचिदिति । पर्याप्तकुसुमाः पर्याप्तानि परिपूर्णानि कुसुमानि येषु ते मधुगन्धिनः केचित्पादपाः आबभुः । मुकुलसंवीताः कुड्मलैः पूर्णाः अत एव श्यामवर्णा इव केचित्पादपाः आबभुः ॥ ८६ ॥

गो० टी०–केचिदिति । पर्याप्तकुसुमा इत्यनेन मुकुलाल्पत्वम् । मुकुलसंवीताः मुकुलैः समन्तात् वेष्टिता इत्यनेन विकसितपुष्पस्वल्पत्वं चावगम्यते । श्यामवर्णाः कृष्णवर्णेनेति भावः, आबभुः आभान्ति लडर्थे लिट् ॥ ८६ ॥

८७–८८] ति० टी०–मधुलिप्सया पुष्पात्पुष्पान्तरं गच्छन् । उत्प्रेक्षते–इदं मृष्टमिति । मृष्टं मधुरम् ॥८७॥८८॥

रा० टी०–इदमिति । इदं मृष्टं स्वच्छम् इदं स्वादु इदं प्रफुल्लमित्यपि इति च रागयुक्तः अनुरागविशिष्टो मधुकरः कुसुमेषु अवलीयते ॥ ८७ ॥

गो० टी०–इदमिति । मृष्टं रम्यम् । स्वादु रसवत् ।

---

१ एवेति गो. पाठः । २ स्पन्दना इति गो. पाठः । ३ अर्धमेतत् गो. नास्ति । ४ अवेति गो. रा. पाठः ।

इयं कुसुमसंघातैरुपस्तीर्णा सुखाकृता । स्वयं निपतितैर्भूमिः शयनप्रस्तरैरिव ॥ ८९ ॥
विविधा विविधैः पुष्पैस्तैरेव नगसानुषु । [1]विस्तीर्णाः पीतरक्ताभाः सौमित्रे प्रस्तराः कृताः ॥ ९० ॥
हिमान्ते पश्य सौमित्रे वृक्षाणां पुष्पसंभवम् । पुष्पमासे हि तरवः संघर्षादिव पुष्पिताः ॥ ९१ ॥
आह्वयन्त इवान्योन्यं नगाः षट्पदनादिताः । कुसुमोत्तंसविटपाः शोभन्ते बहु लक्ष्मण ॥ ९२ ॥
एष कारण्डवः पक्षी विगाह्य सलिलं शुभम् । रमते कान्तया सार्धं काममुद्दीपयन्निव ॥ ९३ ॥
मन्दाकिन्यास्तु यदिदं रूपमेतन्मनोरमम् । स्थाने जगति विख्याता गुणास्तस्या मनोरमाः ॥ ९४ ॥
यदि दृश्येत सा साध्वी यदि चेह वसेमहि । स्पृहयेयं न शक्राय नायोध्यायै रघूत्तम ॥ ९५ ॥

रागमत्तः अभिनवपुष्पकृतहलाकुल इत्यर्थः । अवलीयते सक्तो भवति ॥ ८७ ॥

रा० टी०–अवलीनप्रकारमाह–निलीयेति । मधुकरो भ्रमरः पम्पातीरद्रुमेषु केषुचित् द्रुमपुष्पेषु निलीय पुनरुत्पत्य निःसृत्य सहसा अन्यत्र पुष्पान्तरेषु गच्छति ॥ ८८ ॥

गो० टी०–पुनर्मधुकरस्य चापलं दर्शयति–निलीयेति । निलीय क्वचित् पुष्पे क्षणमात्रं स्थित्वा पुष्पान्तरे भूयसीमिव मधुसमृद्धिं दृष्ट्वा तत्क्षणादन्यत्र पुष्पे गच्छति । एवं सर्वत्रेति ज्ञापयितुं पम्पातीरद्रुमेष्वित्युक्तम् ॥ ८८ ॥

८९] ति० टी०–स्वयं निपतितैः कुसुमसमूहैरुपस्तीर्णैर्यं भूमिः शयनप्रस्तरैः शयनार्थतल्पप्रसरणैरिव सुखाकृता सुखकरी । 'सुखप्रियादानुलोम्ये' इति डाच् ॥ ८९ ॥

रा० टी०–इयमिति । शयनप्रस्तरैः शय्यास्तरणैरिव स्वयं निपतितैः कुसुमसंघातैः पुष्पसमूहैः उपस्तीर्णा आच्छादिता अत एव सुखाकृता सुखसंपादिका इयं भूमिरस्तीति शेषः ॥ ८९ ॥

गो० टी०–इयमिति । इयं भूमिः स्वयं निपतितैः अतिसुकुमारैरित्यर्थः, कुसुमसंघातैः उपस्तीर्णा व्याप्ता सती शयनप्रस्तरैः शयनास्तरणैरिव सुखाकृता सुखावहा कृता ॥ ८९ ॥

९०] ति० टी०–विविधैस्तैः पुष्पैर्नगसानुषु विस्तीर्णाः पीतरक्ताभाः, अत एव विविधाः प्रस्तराः शय्याः कृता इत्युत्प्रेक्षा ॥ ९० ॥

रा० टी०–विविधा इति । विविधैस्तैः स्वयं पतितैरेव पुष्पैः विविधा अनेकविधाः विस्तीर्णाः विशालाः पीतरक्ताभाः प्रस्तराः शय्या इव गिरिसानुषु पर्वतश्रृङ्गेषु कृताः ॥ ९० ॥

गो० टी०–विविधा इति । नगसानुषु विकीर्णैः विविधैः इतस्ततः स्वयं पतितैः पुष्पैः विविधाः प्रस्तराः कृता हीत्युत्प्रेक्षा । विविधा इत्यस्य विवरणं पीतरक्ता इति । इदमुपलक्षणम् ननावर्णा इत्यर्थः । क्वचित्पीतवर्णचम्पकादिपुष्पाणि पतितानि हेममयपर्यङ्क इव भवति । क्वचिद्रक्तवर्णकर्णिकारादिपुष्पाणि पतितानि पट्टवस्त्ररचिततल्पानीव । इत्येवं नानावर्णनानाशय्या इव भान्तीति भावः ॥ ९० ॥

९१] ति० टी०–हिमान्ते शिशिरान्ते । पुष्पमासे चैत्रे संघर्षः स्पर्धा ॥ ९१ ॥

रा० टी०–हिमान्त इति । हिमान्ते शिशिरावसाने पुष्पमासे चैत्रे तरवः हि यतः संघर्षात् परस्पराभिभवेच्छयेव पुष्पिताः अतः वृक्षाणां पुष्पसंभवं पुष्पसंपत्तिं पश्य ॥ ९१ ॥

गो० टी०–हिमान्त इत्यर्धम् । हिमान्ते वसन्ते वृक्षाणां पुष्पसंभवं पुष्पसमृद्धिं वक्ष्यमाणस्य संक्षेपेणोक्तिः ॥ ९१ ॥

गो० टी०–पुष्पेति । पुष्पमासे वसन्ते संघर्षात् पुष्पिता अमी तरवः षट्पदनादिताः सन्तः परस्परमाह्वयन्त इव यूयं वयमिव न पुष्पिता इत्यन्योन्यं भृङ्गरवेण व्याजेन वदन्तीवेत्युत्प्रेक्षा । अर्धत्रयमेकान्वयं वा । आह्वयन्त इवेत्युक्त्वा कुसुमोत्तंसविटपाः पूर्वोक्ताः तरवः बहु अधिकं शोभन्त इति॥९२॥

९२] ति० टी०–नगा वृक्षाः विटपाः शाखाः कुसुमयुक्तशाखावन्त इत्यर्थः ॥ ९२ ॥

रा० टी०–आह्वयन्त इति । कुसुमोत्तंसविटपाः कुसुमशिरस्कशाखावन्तः अत एव षट्पदनादिताः अत एव अन्योन्यमाह्वयन्त इव नगाः वृक्षाः शोभन्ते ॥ ९२ ॥

९३] ति० टी०–उद्दीपयन्निव ममेति शेषः ॥ ९३ ॥

रा० टी०–एष इति । कारण्डव एष पक्षी कामं सीतासंयोगेच्छामुद्दीपयन्निव सलिलं विगाह्य कान्तया सार्धं रमते॥९३॥

गो० टी०–एष इति । काममुद्दीपयन् अन्यरतिदर्शनस्य उद्दीपकत्वादिति भावः ॥ ९३ ॥

९४] ति० टी–मन्दाकिन्यास्तत्सदृशपम्पायाः । अतिशयोक्तिरत्र । यत इदं मनोरममतो यज्जगति तस्या गुणा विख्याता एतत्स्थाने युक्तमित्यर्थः ॥ ९४ ॥

रा० टी०–मन्दाकिन्या इति । यत् यस्मात् हेतोः मन्दाकिन्याः तत्सदृश्याः पम्पायाः इदमेतत् रूपं मनोरमम् अतः तस्याः मन्दाकिन्याः मनोरमाः गुणा जगति विख्याताः प्रसिद्धाः अतः स्थाने युक्तमेतत् ॥ ९४ ॥

गो० टी०–मन्दाकिन्या इति । यदिदं पम्पायाः रूपम् एवं मन्दाकिन्याश्च मनोहरं रूपम् । कथमेतत्सादृश्यं तस्या इत्यत्राह–स्थान इति । मनोरमाः जगति विख्याताः तस्या गुणाः स्थाने युक्ताः ॥ ९४ ॥

९५] ति० टी०–वसेमहि तया सहेति शेषः । शक्राय शक्रपदप्राप्तये ॥ ९५ ॥

१ विकीर्णैः पीतरक्ता हीति गो. पाठः । २ एवमिति गो. पाठः । ३ मनोहरमिति गो. पाठः ।

नह्येवं रमणीयेषु शाद्वलेषु तया सह । रमतो मे भवेच्चिन्ता न स्पृहाऽन्येषु वा भवेत् ॥ ९६ ॥
अमी हि विविधैः पुष्पैस्तरवो विविधच्छदाः । काननेऽस्मिन्विना कान्तां [1]चिन्तामुत्पादयन्ति मे ९७ ॥
पश्य शीतजलां चेमां सौमित्रे पुष्करायुताम् । चक्रवाकानुचरितां कारण्डवनिषेविताम् ॥ ९८ ॥
प्लवैः क्रौञ्चैश्च संपूर्णां [2]महामृगनिषेवितामृ । अधिकं शोभते पम्पा विकूजद्भिर्विहङ्गमैः ॥ ९९ ॥
दीपयन्तीव मे कामं विविधा मुदिता द्विजाः । श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम्
पश्य सानुषु चित्रेषु मृगीभिः सहितान्मृगान् ॥ ॥ १०० ॥
मां पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतम् । व्यथयन्तीव मे चित्तं संचरन्तस्ततस्ततः ॥ १०१ ॥
अस्मिन्सानुनि रम्ये हि मत्तद्विजगणाकुले [3]। पश्येयं यदि तां कान्तां ततः स्वस्ति भवेन्मम ॥ १०२ ॥
जीवेयं खलु सौमित्रे मया सह सुमध्यमा । [4]सेवेत यदि वैदेही पम्पायाः पवनं शुभम् ॥ १०३ ॥

रा० टी०–यदीति। रघूत्तम हे लक्ष्मण! सा सीता यदीह दृश्येत अत एव यदि वसेम तदा शक्राय इन्द्रसखाय अयोध्यायै च न स्पृहयेयम् ॥ ९५ ॥

गो० टी०–यदीति। ननु परपुरुषेणापहृता कथं रतये प्रार्थ्यते तत्राह–साध्वीति। 'वसेम हि। भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते'। इत्युक्तवता त्वया सह वसेमेत्याशयेन बहुवचनम्। शक्राय शक्रत्वाय। ऐश्वर्ये इन्द्रत्वस्य प्राथमिकत्वात्तथोक्तम्। "रुच्यर्थानां प्रीयमाणः" इति चतुर्थी। उत्तमं पुरुषं प्रति नासत्यमुच्यत इत्याशयेन रघूत्तमेत्युक्तिः ॥ ९५ ॥

९६–९७] ति० टी०–उक्तमेवानुरागातिशयेन पुनराह–नहीति। अन्येषु सुखान्तरेषु ॥ ९६ ॥ ९७ ॥

रा० टी०–तदेव सहेतुकमाह–नहीति। शाद्वलेषु तया सीतया सह रमतो मम अन्येषु लोकादिषु चिन्तास्मृतिर्न भवेत् एवं स्पृहा इच्छा न भवेत् ॥ ९६ ॥

गो० टी०–उक्तेर्थे हेतुमाह–नहीति। रमतः रममाणस्य हि यस्मात् चिन्ता न भवेत् अयोध्यायाः अलाभकृता चिन्ता न स्यात्। अन्येषु शक्रत्वादिषु रहस्यप्येवंविधमानुषत्वभावनानुरूपं वचनं योगिनो बुध्येरन्निति ॥ ९६ ॥

रा० टी०–अमी इति। विविधच्छदाः अनेकविधपत्रविशिष्टाः अमी तरवः कान्तां विना मे चिन्तामुत्पादयन्ति॥९७॥

गो० टी०–अमी इति। विना वर्तमानस्येति शेषः ॥९७॥

९८–९९] ति० टी०–इमां पम्पाम्। पुष्करैरासमन्तादुतां ॥ ९८ ॥ ९९ ॥

रा० टी०–पश्येति। शीतजलां पुष्करायुतां चक्रवाकानुचरितां चक्रवाकैः सेवितां महामृगनिषेवितामृ इमां पम्पां पश्य। सार्धश्लोक एकान्वयी ॥ ९८ ॥ ९९ ॥

रा० टी०–अधिकमिति। विकूजद्भिर्विहङ्गमैः पम्पा अधिकं शोभते। अर्थं पृथक्–दीपयन्तीति। मुदिता द्विजाः पक्षिणः श्यामां षोडशवार्षिकीत्वेन प्रतीयमानां प्रियां स्मृत्वा विद्यमानस्य मे कामं संयोगेच्छां दीपयन्तीव दीपयन्त्येव। अर्धद्वयमेकान्वयि ॥ १०० ॥

गो० टी०–पश्येत्यादिसार्धश्लोकः। पुष्करैः पद्मैः आयुतां व्याप्ताम्। कारण्डवाः जलकाकाः। प्लवैः जलकुक्कुटैः। वराहेति तीर इति शेषः ॥ ९८ ॥

गो० टी०–अधिकमित्यर्धम्। विहङ्गमैः उक्तभिन्नैः॥९९॥

१००] ति० टी०–स्मृत्वा स्मारयित्वा दीपयन्तीवेत्यन्वयः ॥ १०० ॥

रा० टी०–पश्येति। चित्रेषु सानुषु मृगीभिः सहितान्मृगान्पश्य। एतेन संयुक्तदर्शनमपि मम प्रियास्मारकमिति सूचितम् ॥ १०१ ॥

गो० टी०–दीपयन्तीति। स्मृत्वा वर्तमानस्येति शेषः ॥ १०० ॥

गो० टी०–पश्येति। पुनस्त्वर्थः। विरहीकृतं विरहिणमित्यर्थः। मृगीभिः सहितान् मृगान् पश्य। वैदेह्या विरही कृतं मां पुनः पश्येत्यन्वयः। एतेषु सकलत्रेषु सुखं संचरत्सु ममैकस्याहो कष्टावस्थेति भावः ॥ १०१ ॥

१०१–१०२] ति० टी०–विरहीकृतं विरहितं कृतम्। पश्येत्युत्कर्षः। संचरन्तः मृगीभिः सहिता मृगाः इति शेषः ॥ १०१ ॥ १०२ ॥

रा० टी०–नन्वत किं तेनेत्यत आह–मामिति। मृगशावाक्ष्या मृगबालनयनया वैदेह्या विरहीकृतं मां ततस्ततः संचरन्तः मृगीसहिताः मृगाः मे चित्तमतीव व्यथयन्ति संयोगकालिकसुखानुभवस्मृत्या व्यथां संपादयन्तीत्यर्थः ॥ १०२ ॥

गो० टी०–व्यथयन्तीति। संचरन्तः मृगादय इति शेषः ॥ १०२ ॥

रा० टी०–अस्मिन्निति। रम्ये मत्तद्विजगणाकुले उन्मत्तपक्षिसमूहैर्व्याप्ते अस्मिन्सानुनि यदि कान्तां पश्येयं तर्हि मम स्वस्ति भवेत् ॥ १०२ ॥

गो० टी०–पश्येयमित्यर्धम्। ततः तदा स्वस्ति शुभम् ॥ १०२ ॥

१०३] ति० टी०–स्वस्ति भवेदित्यस्यैव विवरणम्—

१ चित्तमुन्मादयन्तीति गो. पाठः। २ वराहमृगसेवितामिति गो. पाठः। ३ युते इति गो. पाठः। ४ सेवते इति गो. पाठः।

पद्मसौगन्धिकवहं शिवं शोकविनाशनम् । धन्या लक्ष्मण सेवन्ते पम्पाया वनमारुतम् ॥ १०४ ॥
श्यामा पद्मपलाशाक्षी प्रिया विरहिता मया । कथं धारयति प्राणान्विवशा जनकात्मजा ॥ १०५ ॥
किं नु वक्ष्यामि धर्मज्ञं राजानं सत्यवादिनम् । जनकं पृष्टसीतं तं कुशलं जनसंसदि ॥ १०६ ॥
या मामनुगता मन्दं पित्रा प्रस्थापितं वनम् । सीता धर्मं समास्थाय क्व नु सा वर्तते प्रिया ॥ १०७ ॥
तया विहीनः कृपणः कथं लक्ष्मण धारये । या मामनुगता राज्याद्भ्रष्टं विहतचेतसम् ॥ १०८ ॥
तच्चारुश्चितपद्माक्षं सुगन्धि शुभमव्रणम् । अपश्यतो मुखं तस्याः सीदतीव ममेतिमम ॥ १०९ ॥

जीवेयमिति । यदि सा मया सहैवंभूतं पद्मानां सौगन्धिकानां च गन्धवहं पवनं सेवेत तदा जीवेयमित्यन्वयः ॥ १०३ ॥

रा० टी०–तदाकारमाह–जीवेयमिति । वैदेही यदि पम्पायाः पवनं मया सह सेवेत तर्हि जीवेयं शरीरपालनं कुर्याम ॥ १०४ ॥

गो० टी०–जीवेयमिति । स्पष्टम ॥ १०४ ॥

१०४] ति० टी०–पम्पावनवायुं ये नायिकया सह सेवन्ते ते धन्या इत्यर्थः ॥ १०४ ॥

रा० टी०–पद्मेति । पद्मसौगन्धिकयोः वहं सुगन्धप्रापकम् अत एव शोकविनाशनं पम्पायाः वनमारुतं ये सेवन्ते धन्याः । पद्मसौगन्धिकशब्दो लक्षणया स्वस्वगन्धपरः अवान्तरजातिभेदात्र पौनरुक्त्यम् ॥ १०५ ॥

गो० टी०–पद्मेति । पद्मकह्लारगन्धवहमिति लक्षणयार्थः । धन्याः सकान्ताः । पदप्रयोजनं त्वाचार्या ऊचुः । पद्मं च सौगान्धिकं च पद्मसौगान्धिके ते वहति प्रापयतीति पद्मसौगन्धिकवहम् । अत्र पद्मसौगन्धिकयोर्वहनानुपपत्तेस्तद्गन्धो लक्ष्यते । लक्षणायाश्च प्रयोजनेन भवितव्यम् यथा गङ्गायां घोष इत्यत्र पावनत्वादि तथात्र प्रयोजनम् । यथा पद्मस्यैव घ्राणसमीपानयनेऽपि उपरि स्थितः परिमलः शीतलो गृह्यते नान्तःस्थित उष्णमिश्रः तथायं वायुरपि उपरिस्थशीतलपरिमलमादाय समागच्छतीत्यर्थः । यद्वा पद्मकेसरसंसृष्ट इत्यनुक्तेः पद्मसौगन्धिकोपरिवर्तिपरिमलावह इत्यर्थः । गुणगुणिनोरभेदविवक्षया पद्मसौगन्धिकेत्युक्तिः । उभयोक्त्या नानापुष्पग्रथितमालिकाधारिण इव नानापुष्पपरिमलं वहतीत्युच्यते । शिवं शुद्धम् । तथा चान्यासंस्पर्शितोक्त्या प्राथमिकमलयमारुत इत्युच्यते । शोकविनाशनं विरहिणो दक्षिणपवनः शोकवर्धनः न तु शोकविनाशनः तथा च जीवतो हि शोकं कुर्यात् जीवितापायकरणेन शोकधर्म्यभावाच्छोकविनाशनम् । धन्याः एवंविधे मलयानिले वाति सति एकान्तस्थलमन्वेष्य शयनपराः केचन सन्ति हि सेवन्ते कदा समागविष्यत्ययं पवन इत्यवसरप्रतीक्षा भवन्ति । सेवा ह्यवसरप्रतीक्षा । पम्पोपवनमारुतम् आकरादागताग्निमिव स्थितं सञ्जग्राद्युत्थितवडवानलमिवेत्यर्थः । प्रत्येकश्लोकव्याख्यानेऽप्ययमेवाभिप्राय उक्तः ॥ १०५ ॥

१०५] ति० टी०–विवशा शत्रुवशत्वात् ॥ १०५ ॥

रा० टी०–श्यामेति । श्यामा नित्यं षोडशवार्षिकीत्वेन प्रतीयमाना मया विरहिता जनकात्मजा प्राणान्कथं धारयति ॥ १०६ ॥

गो० टी०–श्यामेति । विवशा प्राणत्यागेऽपि न स्वतन्त्रेत्यर्थः ॥ १०६ ॥

१०६] ति० टी०–पृष्टा सीता केति येन तं किंनु कुशलं वक्ष्यामि ॥ १०६ ॥

रा० टी०–किमिति । पृष्टसीतं पृष्ट्वा सीता येन तं सत्यवादिनं जनकं किं कुशलं वक्ष्यामि नु महान्विस्मयोऽयम् ॥ १०७ ॥

गो० टी०–किं न्विति । सीतया सह मम कुशलं पृष्ट इत्यर्थः ॥ १०७ ॥

१०७] ति० टी०–मन्दं मन्दभाग्यम् ॥ १०७ ॥

रा० टी०–यामिति । या सीता पित्रा वनं प्रस्थापितं मां धर्मं समास्थाय मन्दं शनैः अनुगता सा सीता क्व वर्तते ॥ १०८ ॥

गो० टी०–येति । मन्दं भाग्यरहितम् 'मृदाल्पापटुनिर्भाग्या मन्दा. स्युः' इत्यमरः । सत्पथं पतिव्रतामार्गमास्थाय अनुगतेत्यन्वयः ॥ १०८ ॥

१०८] ति० टी०–धारये प्राणानिति शेषः ॥ १०८ ॥

रा० टी०–तयेति । राज्याद्भ्रष्टम् इहागतम् अत एव विहतचेतसं निवर्तितराज्यविषयकचित्तं मां या सीता अनुगता तया विहीन. अत एव कृपणोऽहं कथं धारये प्राणानिति शेषः ॥ १०९ ॥

गो० टी०–तयेति । धारये जीवामि । विगतचेतसं विकलहृदयम् ॥ १०९ ॥

१०९] ति० टी०–अञ्चिते पूजिते पद्मतुल्ये अक्षिणी यत्र तादृशम् ॥ १०९ ॥

रा० टी०–तदिति । अञ्चिते पूजिते विदै. प्रशंसिते इत्यर्थः, पद्मतुल्ये अक्षिणी यस्मिन् सुगन्धि शोभनगन्धविशिष्टं शुभं सकलमङ्गलहेतुभूतम् अव्रणं विस्फोटकादिहेतुकव्रणरहितं तस्याः सीतायाः चारु मुखम् अपश्यतो मम मनः सीदत्येव । इवशब्द एवार्थे ॥ ११० ॥

गो० टी०–तदिति । अञ्चितपक्ष्माक्षम् अञ्चितानि पूजितानि स्निग्धानीति यावत्, पक्ष्माणि ययोस्ते अञ्चितपक्ष्मणी

१ पम्पोपवनेति गो.पाठः । २ सीताया जनकं पृष्ट इति गो.पाठः । ३ प्रव्राजितमिति गो पाठः । ४ सत्पथमिति गो.पाठः । ५ मन इति गो.पाठः ।

स्मितहास्यान्तरयुतं गुणवन्मधुरं हितम् । वैदेह्या वाक्यमतुलं कदा श्रोष्यामि लक्ष्मण ॥ ११० ॥
प्राप्य दुःखं वने श्यामा मां[1] मन्मथविकर्शितम् । नष्टदुःखेव हृष्टेव साध्वी साध्वभ्यभाषत ॥ १११ ॥
किं नु वक्ष्याम्ययोध्यायां[2] कौसल्यां हि नृपात्मज । क्व सा स्नुषेति पृच्छन्तीं कथं चापि मनस्विनीम् ११२ ॥
गच्छ लक्ष्मण पश्य त्वं भरतं भ्रातृवत्सलम् । नह्यहं जीवितुं शक्तस्तामृते जनकात्मजाम् ॥ ११३ ॥
इति रामं महात्मानं विलपन्तमनाथवत् । उवाच लक्ष्मणो भ्राता वचनं युक्तमव्ययम् ॥ ११४ ॥
संस्तम्भ राम भद्रं ते मा शुचः पुरुषोत्तम । नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनाम् ॥ ११५ ॥
स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने । अतिस्नेहपरिष्वङ्गाद्वर्तिरार्द्राऽपि दह्यते ॥ ११६ ॥

अक्षिणी यस्य तत् शुभं शोभमानम् अव्रणं निर्दोषमित्यर्थः, व्रणकिणरहितं वा ॥ ११० ॥

११०] ति० टी०–स्मितेनेषद्धास्येन विनोदवचनेनान्तरे मध्ये एव युतम्, न त्वोष्ठप्रदेशाद्बहिरिति पतिव्रतालक्षणसूचनम् । इदं पूर्ववर्णितमुखान्वयि । कश्चित्तु प्रसन्नहास्यविशेषेण युतमिति वाक्यविशेषणमाह । गुणवत्प्रसादवत् । मधुरमपरुषाक्षरम् ॥ ११० ॥

रा० टी०–स्मितेति । स्मितहास्यान्तरयुतं स्मितम् ईषद्धास्यं यस्मिंस्तदेव अन्तरं मुखमध्यं तत्रैव युतं संयोगो यस्य तत् गुणवत् प्रसादादिगुणविशिष्टं मधुरं मधुरवर्णविशिष्टं हितम् उपकारकम् अत एव अतुलम् उपमारहितं वैदेह्याः वाक्यं कदा श्रोष्यामि ॥ १११ ॥

गो० टी०–स्मितेति । स्मितहास्यान्तरयुतम् 'कान्तस्मिता लक्ष्मण जातहासा' इत्युक्तरीत्या स्मितेन नैसर्गिकस्मितेन हास्यान्तरेण आगन्तुकहास्येन च युक्तं गुणवत् स्ववचनापेक्षया उत्कर्षवत् मधुरं हितं प्रियहितम् अतुलम् 'प्रियवादि च भूतानाम्' इत्युक्तरामवचनमप्यस्य न सदृशमित्यर्थः। संसारादुत्तीर्णस्य चेतनस्य एतत्साम गायन्नास्त इत्युक्तसामध्वनि कदा श्रोष्यामीति व्यञ्जयति ॥ १११ ॥

१११] ति० टी०–वने दुःखं प्राप्यापि नष्टदुःखेव ॥१११॥

रा० टी०–प्राप्येति । श्यामा षोडशवार्षिकीत्वेन प्रतीयमाना साध्वी पतिव्रता सीता वने दुःखं प्राप्यापि मन्मथविकर्शितं समयाभावाद् तिरोहितमदमथनकर्तृत्वकं मां प्राप्यैव नष्टदुःखा अत एव हृष्टा सती साधु यथा भवति तथा अभ्यभाषत अभिभाषेत । एक इव एवार्थे अपरो हेत्वर्थे ॥ ११२ ॥

गो० टी०–प्राप्येति । स्वयं दुःखं प्राप्य स्थिताऽपि स्वदुःखमप्रकाशयन्ती हर्षं भावयन्ती साधु मन्मथार्तिनिवर्तकं वचनमभ्यभाषत पूर्वमिति शेषः । अनादिकालं मम कैङ्कर्ययोग्यो जीव इत्यर्थः ॥ ११२ ॥

११२–११३] ति० टी०–क्व सा स्नुषा, कथं किंप्रकारेति च पृच्छन्तीं किं नु वक्ष्यामि । यथाजातं वक्ष्यामि वाऽन्यथा वा। उभयमपि वक्तुं न शक्यत इत्यर्थः ॥ ११२ ॥ ११३ ॥

रा० टी०–किमिति । नृपात्मज हे लक्ष्मण ! सा मया प्रेषिता स्नुषा क्व कस्मिन् स्थाने कथं केन प्रकारेणास्तीति शेषः, इति पृच्छन्तीं कौसल्यां किं नु वक्ष्यामि ॥ ११३ ॥

गो० टी०–किं न्विति । सा स्नुषा क्व कथं कीदृक्प्रकारेति पृच्छन्तीं कौसल्यां किं वक्ष्यामि । अतिमनस्विनीमित्यनेन यथार्थं वक्ष्यामि चेतदानीमेव वात्सल्यातिशयान्नश्येदित्युच्यते ॥ ११३ ॥

रा० टी०–गच्छेति । हे लक्ष्मण ! त्वं गच्छ भरतं पश्य अहं तु तां जनकात्मजामृते विना जीवितुमिह पालयितुं न शक्तोऽस्मीति शेषः ॥ ११४ ॥

गो० टी०–किमत्र युक्तं तत्राह–गच्छेति। ऋते विना॥११४॥

११४] ति० टी०–अव्ययमनपायार्थम् ॥ ११४ ॥

रा० टी०–इतीति । अनाथवत् नाथत्वाभाववन्तमिव इति विलपन्तं महात्मानं रामं लक्ष्मणः युक्तमुचितमव्ययं विकाररहितं वचनमुवाच ॥ ११५ ॥

गो० टी०–इतीति । अव्ययं युक्तिभिरविनाश्यम्॥११५॥

११५] ति० टी०–संस्तम्भ शोकं निरुन्धीत्यर्थः । अकलुषात्मनामपीदृशानां शोकमनसां मतिर्मन्दा नेति न, अपि तु मन्दैव ॥ ११५ ॥

रा० टी०–तद्वचनाकारमाह–संस्तम्भेति । हे पुरुषोत्तम ! हे राम ! मा शुचः शोकं न कुरु संस्तम्भ समुत्पन्नं शोकं निवर्तय । तत्र हेतु.–ते भद्रमेव । तत्रापि हेतुः–अकलुषात्मनां नित्यं कलुषसंसर्गरहितानाम् ईदृशानां भवत्सदृशानां मतिरिच्छा मन्दा निष्फला न भवति । एतेन भवदीप्सितसिद्धिर्भविष्यत्येवेति तात्पर्यम् ॥ ११६ ॥

गो० टी०–संस्तम्भेति । संस्तम्भ संस्तम्भस्व धैर्यमवलम्बस्वेत्यर्थः । अकलुषात्मनां सधैर्यहृदयानामीदृशानां स्वादृशानां मन्दा अल्पा कलुषितेत्यर्थः ॥ ११६ ॥

११६] ति० टी०–अतः–स्मृत्वेत्यादि । 'संयोगा विप्रयोगान्ताः' इति न्यायेन प्रियविषयेऽवश्यंभावि वियोगदुःखं स्मृत्वा स्नेहं त्यज । विपक्षे बाधकमाह—अतिस्नेहेति । आर्द्रा जलसिक्ताऽपि । एवं शान्तमपि चित्तमतिस्नेहसंबन्धेन तद्वियोगजशोकदीप्त्येतैवंति भावः ॥ ११६ ॥

रा० टी०–अशीघ्रप्राप्तौ कृत्यमाह–स्मृत्वेति । वियो-

---

१ सा मां मन्मथेति गो. पाठः । २ कौसल्यामयोध्यायामिति गो. पाठः ।

यदि गच्छति पातालं ततोऽभ्यधिकमेव वा। सर्वथा रावणस्तौत न भविष्यति राघव ॥११७॥
प्रवृत्तिर्लभ्यतां तावत्तस्य पापस्य रक्षसः। ततो ज्ञास्यति वा सीतां निधनं वा गमिष्यति ॥११८॥
यदि याति [2]दितेर्गर्भं रावणं सह सीतया। तत्राप्येनं हनिष्यामि न चेद्[3]दास्यति मैथिलीम् ॥११९॥
स्वास्थ्यं [4]भद्र भजस्वार्य त्यज्यतां कृपणा मतिः। अर्थो हि नष्टकार्यार्थैरयत्नेनाधिगम्यते [5]॥१२०॥
उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम्। सोत्साहस्य [6]हि लोकेषु न किंचिदपि दुर्लभम् ॥१२१॥
उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु। उत्साहमात्रमाश्रित्य [7]प्रतिलप्स्याम जानकीम्॥१२२॥
त्यज्यतां कामवृत्तत्वं शोकं संन्यस्य पृष्ठतः। महात्मानं कृतात्मानमात्मानं नावबुद्ध्यसे ॥१२३॥

गर्जं दुःखं स्मृत्वा प्रिये अतिप्रीतिविषयीभूते अजने विधातरि स्नेहं प्रीतिं त्यज राममात्रैकवध्यो रावण इति ब्रह्मवरप्रदानं दूरीकुर्वित्यर्थः। एतेन वरप्रदानस्य मृषात्वे मां महाकालं वा संप्रेर्य द्रुतं रावणं घातयेति सूचितम् ॥ ११७ ॥

गो० टी०–स्मृत्वेति। वियोगजं दुःखं भवतीत्येतल्लोकवृत्तं स्मृत्वा तद्धेतुभूतं प्रियजनविषयातिस्नेहं त्यजेत्यर्थः। तत्र श्लेषगर्भमर्थान्तरं न्यस्यति–अतीति। स्नेहः प्रीतिः तैलं च अतः वात्सल्यप्रवृत्तिं विहाय चेतनसंतरणोपायं चिन्तयेत्यर्थः ॥ ११७ ॥

११७] ति० टी०–ततोऽभ्यधिकं पातालादभ्यधिकं गुप्तदेशम्। न भविष्यति न जीविष्यतीत्यर्थः ॥ ११७ ॥

रा० टी०–ननु रावणो यदि पलायेत तर्हि कथं तद्विघात इत्यत आह–यदीति। रावणो यदि पातालं गच्छति गच्छेत् ततोऽप्यधिकमधो वा गच्छति तदाऽपि रावणः सर्वथा न भविष्यति विनङ्क्ष्यतीत्यर्थः ॥ ११८ ॥

गो० टी०–यदीति। न भविष्यति विनाशिष्यतीत्यर्थः११८॥

११८] ति० टी०–तावत्प्रथमम्। प्रवृत्तिर्वार्तासवृत्तान्तः ॥ ११८ ॥

रा० टी०–ननु ब्रह्मवरप्रदानस्य मृषात्वे मर्यादाभङ्गः स्यात् अतः उपायान्तरं वक्तव्यमित्याशङ्क्याऽऽह–उपायान्तरमाह–प्रवृत्तिरिति। तस्य रावणस्य प्रवृत्तिः संस्थितिः तावत्प्रथमं लभ्यतां यत्नतो ज्ञायतां, ततः प्रवृत्तिज्ञानानन्तरं सीतां वा हास्यति निधनं विनाशं वा गमिष्यति प्राप्स्यति। तत्र गत्वा जहीत्यर्थः ॥ ११९ ॥

गो० टी०–प्रवृत्तिरिति। प्रवृत्तिर्वार्ता ॥ ११९ ॥

११९] ति० टी०–दितेरवरमातुः ॥ ११९ ॥

रा० टी०–ननु पलायितश्चेत्कथमस्मत्कर्तृकवधः स्यादित्यत आह–यदीति। चेत् यदि मैथिलीं न दास्यति तदा सीतया सह रावणो यदि दितेः अवध्यदैत्यमातुः गर्भं याति तदा तत्र गर्भे एनं रावणं हनिष्यामि रावणं संताड्य सीतामानेताऽस्मीति तात्पर्यम् ॥ १२० ॥

गो० टी०–यदीति। अदितेः इन्द्रस्य मातुः ॥ १२० ॥

१२०] ति० टी०–स्वास्थ्यं धैर्यं स्वस्वभावरूपम्। नष्टः कार्योऽवश्यं सेव्योऽर्थो येषां तैः पुंभिः सोऽर्थोऽयत्ने यत्नाभावे सति नाधिगम्यते ॥ १२० ॥

रा० टी०–स्वास्थ्यमिति। हे आर्य! भद्रं कल्याणकारकं स्वास्थ्यं धैर्यं भजस्व स्वीकुरु अत एव कृपणा सीतावियोगहेतुककार्पण्यविशिष्टा मतिः त्यज्यताम्। एतेन तस्या अन्वेषणे यत्नः कर्तव्य इति व्यञ्जितम्। यत्नाभावे दोषमाह–अयत्ने यत्नाभावे सति नष्टकार्यार्थैः नष्टौ कार्यार्थौ प्रयत्नधने येषां तैः अर्थः नष्टधनं न लभ्यते ॥ १२१ ॥

गो० टी०–स्वास्थ्यमिति। स्वास्थ्यं धैर्यम्। नष्टकार्यार्थैः नष्टकार्यरूपप्रयोजनैः पुरुषैः अयत्नेन यत्नाभावेन॥१२१॥

१२१] ति० टी०–अत —उत्साह इति। बलवान्कार्यसाधनसमर्थः ॥ १२१ ॥

रा० टी०–यत्नोऽप्युत्साहमूलक इति बोधयन्नाह–उत्साह इति। हि यतः उत्साहात् उत्साहं परित्यज्य बलं परमुत्कृष्टं कार्यसाधकमित्यर्थः, नास्ति अतः उत्साह एव बलवान् प्रशस्तबलप्रवर्तकः अतः सोत्साहस्य पुरुषस्य लोकेषु किंचिदपि न दुर्लभम् ॥ १२२ ॥

गो० टी०–अतो यत्नः कर्तव्य इत्याह द्वाभ्याम्–उत्साह इत्यादिभ्याम् ॥ १२२ ॥ १२३ ॥

१२२] ति० टी०–उत्साहमात्रं शत्रुसंहारे पौरुषम् ॥१२२॥

रा० टी०–उत्साहवन्त इति। उत्साहवन्तः प्रशस्तोत्साहविशिष्टाः पुरुषाः कर्मसु दुष्करक्रियास्वपि नावसीदन्ति अतः उत्साहमात्रमाश्रित्य जानकीं प्रतिलप्स्यामः ॥ १२३ ॥

१२३] ति० टी०–कामवृत्तत्वं कामपरतन्त्रत्वम्। शोकं पृष्ठतः संन्यस्य कामजशोकसेवने कामस्य दृढेस्तत्सेवनं पृष्ठतः कृत्वेत्यर्थः। महात्मानं रजस्तमोमलास्पृष्टचित्तं निरतिशयगौर्यधैर्यादिस्वभावचित्तं च कृतात्मानं श्रुतिस्मृत्यादिषु गुरुभिः शिक्षितस्वरूपं किं नावबुद्ध्यसे। यद्यपीश्वरस्य लोकवद्धर्माधर्माश्रयं चित्तं नास्ति तथापि मायिकं तदाश्रयं तदस्ति तत्स्वीकारे बाधकाभावात् ॥ १२३ ॥

रा० टी०–त्यज्यतामिति। महात्मानं महान्तं सर्वं

१ तावदिति गो. पाठः। २ अदितेरिति गो. पाठः। ३ हास्यतीति गो. पाठः। ४ भद्रमिति गो. रा.पाठः। ५ नायत्नेनाधीति गो पाठः। ६ ऽस्मिलोकेऽस्मिन्निति गो. पाठः। ७ सीता प्रति लभेमहीति गो. पाठः।

एवं संबोधितस्तेन शोकोपहतचेतनः । त्यक्त्वा शोकं च मोहं च रामो धैर्यमुपागमत् ॥ १२४ ॥
सोऽभ्यतिक्रामदव्यग्रस्तामचिन्त्यपराक्रमः । रामः पम्पां सुरुचिरां रम्यां पारिप्लवद्रुमाम् ॥ १२५ ॥
निरीक्षमाणः सहसा महात्मा सर्वं वनं निर्झरकन्दरं च ।
उद्विग्नचेताः सह लक्ष्मणेन विचार्य दुःखोपहतः प्रतस्थे ॥ १२६ ॥
तं मत्तमातङ्गविलासगामी गच्छन्तमव्यग्रमना महात्मा ।
स लक्ष्मणो राघवमिष्टचेष्टो ररक्ष धर्मेण बलेन चैव ॥ १२७ ॥
तावृष्यमूकस्य समीपचारी चरन्ददर्शाद्भुतदर्शनीयौ ।
शाखामृगाणामधिपस्तरस्वी वितत्रसे नैव विचेष्ट चेष्टाम् ॥ १२८ ॥

पूज्यब्रह्मादित्रयाणामात्मानं नियन्तारमत एव कृतात्मानं तैः कृतः आत्मा मनो यस्मिंस्तमात्मानं स्वस्वरूपं किं किमर्थं न बुध्यसे स्मरसि । बोधप्रयोजनमाह–शोकं पृष्ठतः संन्यस्य कृत्वा त्यक्त्वेत्यर्थः, कामवृत्तत्व राक्षसकर्तृकयथेच्छवर्तनं त्यज्यतां त्याज्यताम् ॥ १२४ ॥

गो० टी०–त्यज्यतामिति । कामे वृत्तो व्यापारो यस्य स तथा त्वं पृष्ठतः संन्यस्य तिरस्कृत्येत्यर्थः, आत्मानं कृतात्मानं शिक्षितमनस्कं महात्मानं महाधैर्य नावबुध्यसे तस्मात्त्यज्यतामित्यन्वयः । किं वात्मलाभेन तप्यसे 'साधुकारी साधुर्भवति पापकारी पापी भवति' इति भवद्भिरेव कृतां शास्त्रमर्यादां किं नावबुध्यस इत्यर्थ. ॥ १२४ ॥

१२४] ति० टी०–एवं द्विर्विवचनमात्रेण शुद्धसत्त्वप्रकृतिकत्वादारोपितशोकादि संत्यज्य धैर्यमुपागमत् । मोहः कामजो मोहजश्च शोकः ॥ १२४ ॥

रा० टी०–एवमिति । शोकोपहतचेतनः प्रियावियोगहेतुकशोकव्याप्तचित्तः एवं संबोधितः लक्ष्मणेन प्रार्थितः रामः शोकं मोहं कर्तव्यविषयकविवेकराहित्यं च त्यज्य त्यक्त्वा धैर्यमुपागमत् प्राप्नोत् ॥ १२५ ॥

गो० टी०–एवमिति । अत्र शोकमोहशब्दाभ्यां दयावात्सल्ये उच्येते । तयोस्त्यागो नाम शास्त्रमर्यादानुसारेण चेतनरक्षणायोगः ॥ १२५ ॥

१२५] ति० टी०–अतिक्रामदत्यक्रामत् । पारिप्लवा वायुचञ्चलास्तीरद्रुमा यस्यां ताम् ॥ १२५ ॥

रा० टी०–स इति । अचिन्त्यपराक्रमः अव्ययः नित्यं व्ययरहितः स रामः पारिप्लवद्रुमां वायुप्रकम्पितद्रुमविशिष्टां पम्पामभ्यतिक्रामत् अत्यजत् । आगमशास्त्रस्यानित्यत्वादडभावः ॥ १२६ ॥

गो० टी०–स इति । अभ्यतिक्रामत् अनित्यत्वादडभावः। पारिप्लवद्रुमां चञ्चलद्रुमाम्, अनेन भगवतः संसारिमण्डलाभिमुख्यं सूचितम् ॥ १२६ ॥

१२६] ति० टी०–विचार्य लक्ष्मणोक्तेर्युक्तत्वमिति शेषः ॥ १२६ ॥

रा० टी०–अतिक्रमणप्रकारमाह–निरीक्षमाण इत्यादिभिः । उद्विग्नचेताः वियुक्तसीतास्मरणहेतुकोद्विग्नचित्तः अत एव दुःखोपहतः दुःखव्याप्तः महात्मा रामः विचार्य सीतान्वेषणमवश्यं कर्तव्यमिति निश्चित्य सर्वं वनं निर्झरकन्दरं च निरीक्षमाणः सन् प्रतस्थे ॥ १२७ ॥

गो० टी०–सर्गार्थं पुनः संग्रहेण दर्शयति द्वाभ्याम्–निरीक्षमाण इति । विचार्य सीतामन्विष्येत्यर्थः ॥ १२७ ॥

१२७] ति० टी०–धर्मेण 'संस्तम्भ राम' इत्यादिनीतिरूपधर्मबोधनेन । बलेन 'गच्छति पातालम्' इत्यादिस्वबलकथनेन च ॥ १२७ ॥

रा० टी०–तमिति । गच्छन्तं राघवं तं रामं मत्तमातङ्गविलासगामी मत्तगजवत् विलासेन गच्छति तच्छीलः धर्मेण रामसेवकत्वरूपस्वस्वभावेन बलेन च उपलक्षितः अत एव इष्टचेष्टः इष्टे रघुनाथेच्छाविषयीभूते चेष्टा व्यापारो यस्य रामेप्सितसाधक इत्यर्थः, स लक्ष्मणः ररक्ष ॥ १२८ ॥

गो० टी०–तं मत्तेति । मत्तगजवत् विलासेन गन्तुं शीलमस्यास्तीति तथा । अनेन वनदुर्गप्रदेशेऽपि निर्भयसंचारित्वमुच्यते। अव्यग्रमनाः अचञ्चलचित्तः अप्रकम्प्यरामविषयप्रेमभार इत्यर्थः । महात्मा अप्रच्युतधैर्यः अप्रमत्तः गमनसौन्दर्यानुभवेऽप्यसक्तः सः 'रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति' इति सुमित्रया संदिष्टः लक्ष्मणः कैङ्कर्यलक्ष्मीयुक्तः तं सीताविरहाद् गच्छन्तं मत्तमातङ्गगामिनमित्युक्तरीत्या गमनचारुतया सर्वान् वशीकुर्वन्तं राघवं धर्मेण संस्तम्भेत्यादिराजनीतिकथनेन बलेन तत्राप्येनं हनिष्यामीति स्वबलकथनेन च ररक्ष निर्दुःखमकरोत् ॥ १२८ ॥

१२८]ति० टी०–एवं वृत्तमनूद्य वर्तिष्यमाणं दर्शयति–ताविति । वितत्रसे वितत्रास । बाल्यानीतत्वशङ्कया त्रासः । इष्टमिष्टभोजनादिविषयचेष्टामपि नैव विचेष्ट च न चकार च ।

---

१ तत्रेति गो. पाठः । २ न्यस्येति गो. पाठः । ३ तत इति गो. पाठः । ४ रम्यपारिप्लवेति गो. पाठः । ५ कन्दरानिति गो. पाठः । ६ अप्रमत्त इति गो. पाठः । ७ ऋश्येति गो. पाठः । ८ चिचेष्ट किंचिदिति गो. पाठः ।

स तौ महात्मा गजमन्दगामी शाखामृगस्तत्र चरंश्चरन्तौ ।
दृष्ट्वा विषादं परमं जगाम चिन्तापरीतो भयभारभग्नः ॥ १२९ ॥
तमाश्रमं पुण्यसुखं शरण्यं सदैव शाखामृगसेवितान्तम् ।
त्रस्ताश्च दृष्ट्वा हरयो विजग्मुर्महौजसौ राघवलक्ष्मणौ तौ ॥ १३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

रामलक्ष्मणौ पश्यन्सुग्रीवस्तयोर्वालिप्रेषितत्वमूहमानः स्वामात्यै सम निलीनस्तस्थौ । तत्र हनुमॉस्त युक्त्या समाश्वासयति । रामलक्ष्मणयोर्भावं जिज्ञासुः सुग्रीवो हनुमन्त तत्र प्रैषयत् ।

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ । वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत् ॥ १ ॥
उद्विग्नहृदयः सर्वा दिशः समवलोकयन् । न व्यतिष्ठत कस्मिंश्चिद्देशे वानरपुंगवः ॥ २ ॥

'विश्रान्तिमत्तस्य बभूव चित्तम्' इत्याधुनिकपाठे तस्य सुग्रीवस्य चित्तं तद्दर्शनेन विश्रान्तिमत् भयवद्भूवेत्यर्थः ॥ १२८ ॥

रा० टी०–ताविति । ऋष्यमूकस्य समीपचारी शाखामृगाणां वानराणामधिपः सुग्रीवः अद्भुतदर्शनीयौ तौ रामलक्ष्मणौ ददर्श अत एव वितत्रसे वालिप्रेषितबलवत्पुरुषसंभावनया वित्रासं प्राप अत एव इष्टं किंचित् हितं न चिचेष्ट नावलुलोके । 'विश्रान्तिमत्तस्य बभूव चित्तम् इति तीर्थादिपाठः १२९

गो० टी०–अथ सीताप्राप्तिबीजमुपक्षिपति–ताविति । ऋश्यमूकस्य ऋश्यमूकाख्यपर्वतस्य समीपचारी समीपसंचरणशीलः वालिभयादिति शेषः, चरन् कदाचित्पम्पोपान्ते पर्यटन् अद्भुतं यथा भवति तथा दर्शनीयौ शाखामृगाणां वानराणाम् अधिपः सुग्रीवः तरस्वी बलवान् वितत्रसे तत्रास व्यत्ययेनात्मनेपदम् भीतोऽभूत् । न चिचेष्ट न चिचेष्टे व्यत्ययेन परस्मैपदम् । स्तब्धोऽभूदित्यर्थः ॥ १२९ ॥

१२९] ति० टी०–उक्तमेव विवृणोति—स ताविति । भयभारभग्नो भयभारेण भग्नोत्साहः ॥ १२९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–स इति । गजमन्दगामी शाखामृगः सुग्रीवः तत्र ऋष्यमूके चरन् सन् चरन्तौ तौ रामलक्ष्मणौ दृष्ट्वा चिन्तापरीतः क्रोऽयमिति चिन्तया व्याप्तः अत एव भयभारभग्नः निरस्तोत्साहश्च सन् परमं विषादं दुःखं जगाम प्राप ॥ १३० ॥

गो० टी०–स इति । तत्र पम्पावने विषादचिन्ताभयहेतव उत्तरसर्गे व्यक्तीभविष्यन्ति ॥ १३० ॥

१३०] ति० टी०–तमाश्रमं मतङ्गशापाद्बालिना दुष्प्रवेशम्, अत एव शरण्यम् । सेवितान्तं सेवितमध्यं, सेवितप्रान्तं वा । तौ दृष्ट्वा त्रस्ता हरयो वालिप्रेरितबुद्ध्या भीता विजग्मुर्गताः ॥ १३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०–तमिति । पुण्यसुखं पुण्यसुखयोः संपादकं शरण्यं शरणहितमत एव सदैव शाखामृगसेवितान्तं शाखामृगैः सेवितः अन्तः मध्यं यस्य तं मतङ्गशापात् वालिना दुष्प्रवेशमाश्रमं महौजसौ तौ राघवलक्ष्मणौ दृष्ट्वा त्रस्ताः हरयो वानराः अभिजग्मुः ॥ १३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे प्रथमः सर्गः ॥ १ ॥

गो० टी०–न केवलं सुग्रीव एव त्रस्तः तत्सचिवा अपीत्याह–तमिति । आश्रमं मतङ्गाश्रमं पुण्यं धर्मवर्धकं सुखं सुखकरं शरण्यं मुनिजनवासयोग्यं सदैव वानरसेवितान्तं वानरसेवितमध्यमिति दुष्प्रवेशत्वोक्तिः, तौ दृष्ट्वा हरयः वानराः वित्रस्ताः मुनिवेषेण वालिप्रेरितौ समागताविति शङ्कयेति भावः । हरयः तौ दृष्ट्वा त्रस्ताः सन्त आश्रममभिजग्मुरित्यन्वयः ॥ १३१ ॥

अस्मिन् सर्गे सार्धत्रिंशदुत्तरशतश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

१] ति० टी०–तदेव विस्तारयति—तौ त्विति ॥ १ ॥

रा० टी०–सुग्रीववृत्तान्तमाह–तावित्यादिभिः । वरायुधधरौ रामलक्ष्मणौ दृष्ट्वा सुग्रीवः शङ्कितोऽभवत् ॥ १ ॥

गो० टी०–सुग्रीवेण हनुमत्प्रेषणं द्वितीये–तौ त्वित्यादि । महात्मानौ महाशरीरौ महाकृती इत्यर्थः, वरायुधधरौ अत एव वीरौ ॥ १ ॥

२] ति० टी०–न व्यतिष्ठत न व्यवस्थितोऽभूत् ॥ २ ॥

रा० टी०–उद्विग्नेति । उद्विग्नहृदयो वानरपुङ्गवः सुग्रीवः सर्वा दिशः समवलोकयन् सन् कस्मिंश्चित् देशे न व्यतिष्ठत ॥ २ ॥

गो० टी०–उद्विग्नेति । उद्विग्नहृदयः भीतमनस्कः ॥ २ ॥

१ चिरमिति गो. पाठः ।

नैव चक्रे मनः स्थातुं वीक्ष्यमाणौ महाबलौ । कपेः परमभीतस्य चित्तं व्यवससाद ह ॥ ३ ॥
चिन्तयित्वा स धर्मात्मा विमृश्य गुरुलाघवम् । सुग्रीवः परमोद्विग्नः सर्वैस्तैर्वानरैः सह ॥ ४ ॥
ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः । शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ ॥ ५ ॥
एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवम् । छद्मना चीरवसनौ प्रचरन्ताविहागतौ ॥ ६ ॥
ततः सुग्रीवसचिवा दृष्ट्वा परमधन्विनौ । जग्मुर्गिरितटात्तस्मादन्यच्छिखरमुत्तमम् ॥ ७ ॥
ते क्षिप्रमभिगम्याथ यूथपा यूथपर्षभम् । हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे ॥ ८ ॥
एवमेकायनगताः प्लवमाना गिरेर्गिरिम् । प्रकम्पयन्तो वेगेन गिरीणां शिखराणि च ॥ ९ ॥
ततः शाखामृगाः सर्वे प्लवमाना महाबलाः । बभञ्जुश्च नगांस्तत्र पुष्पितान्दुर्गमाश्रितान् ॥ १० ॥
आप्लवन्तो हरिवराः सर्वतस्तं महागिरिम् । मृगमार्जारशार्दूलांस्त्रासयन्तो ययुस्तदा ॥ ११ ॥

३] ति० टी०–व्यवससाद विषण्णमभूत् ॥ ३ ॥

रा० टी०–नेति । महाबलौ रामलक्ष्मणौ वीक्षमाणः सुग्रीवः स्थातुमेकाग्रतया निवेष्टुं मनो नैव चक्रे अत एव परमभीतस्य कपेः सुग्रीवस्य चित्तं व्यवससाद दुःखं प्राप ॥ ३ ॥

गो० टी०–नैवेति । स्थाने स्वस्थाने निश्चलत्व इति यावत् । व्यवससाद दुःखितमभूत् ॥ ३ ॥

४] ति० टी०–अवस्थितिप्रस्थानयोर्गुरुलाघवं विमृश्य सचिवैः सह विचार्य ॥ ४ ॥

रा० टी०–चिन्तयित्वेति । धर्मात्मा स सुग्रीवः चिन्तयित्वा वालिबलं संस्मृत्य गुरुलाघवं तद्बलस्य गुरुत्वं स्वबलस्य लाघवं लघुत्वं च विमृश्य निश्चित्य सर्वैः वानरैः सह परमोद्विग्न आसेति शेषः ॥ ४ ॥

गो० टी०–चिन्तयित्वेति । धर्मे राजधर्मे आत्मा मतिर्यस्य स धर्मात्मा अनुचरैः मन्त्रिभिः सह चिन्तयित्वा गुरुलाघवं विमृश्य स्थाने पलायने च गुरुलाघवं विमृश्य च परमोद्विग्नोऽभवत् ॥ ४ ॥

५] ति० टी०–ततो विचारानन्तरं प्रस्थानेच्छया सचिवेभ्यः शशंस भयहेतुमिति शेषः ॥ ५ ॥

रा० टी०–तत इति । रामलक्ष्मणौ पश्यन् सन् परमोद्विग्नः सुग्रीवः सचिवेभ्य अमात्येभ्यः शशंस ॥ ५ ॥

गो० टी०–तत इति । रामलक्ष्मणौ तत्स्वभावं शशंस ॥ ५ ॥

६] ति० टी०–तमेवाह–एताविति । छद्मना विश्वासार्थम् ऋषिवेषेणेत्यर्थः । ध्रुवमित्युत्प्रेक्षायाम् अतो ज्ञात्वा प्रस्थातव्यमित्याशयः ॥ ६ ॥

रा० टी०–शंसनप्रकारमाह–एताविति । इदं दुर्गं वनं प्रचरन्तौ अत एव इहागतौ चीरवसनौ एतौ छद्मना कापट्येन वालिप्रणिहितौ ध्रुवं निश्चितमेतत् ॥ ६ ॥

गो० टी०–एताविति । प्रणिहितौ चारौ छद्मना ऋषिवेषव्याजेन ॥ ६ ॥

७] ति० टी०–ततः सुग्रीवोक्त्यनन्तरं सुग्रीवसचिवास्तौ परमधन्विनावत एव शङ्कास्पदौ दृष्ट्वा तस्मात्पूर्वमधिष्ठितादिरितटादन्यत्तस्यैव गिरेः शिखरं जग्मुः सुग्रीवेण सहेति शेषः । ' अन्यं शिखरम् ' इति पाठे पुंस्त्वमार्षम् ॥ ७ ॥

रा० टी०–तत इति । ततः सुग्रीववचनश्रवणानन्तरं सुग्रीवसचिवाः परमधन्विनौ रामलक्ष्मणौ दृष्ट्वा तस्मात् गिरितटात् अन्यत् शिखरं जग्मुः सुग्रीवेण सहेति शेषः ॥ ७ ॥

गो० टी०–तत इति । जग्मुः सुग्रीववचने हितत्वबुद्ध्येति शेषः ॥ ७ ॥

८] ति० टी०–ते क्षिप्रं शिखरान्तरमभिक्रम्य प्राप्य यूथपर्षभं वानरश्रेष्ठं सुग्रीवं परिवार्योपतस्थिरे उपविष्टाः ॥ ८ ॥

रा० टी०–ते इति । यूथपाः ते सचिवाः यूथपर्षभं सुग्रीवं परिवार्य उपतस्थिरे ॥ ८ ॥

गो० टी०–त इति । अधिगम्य नानादिक्षु पलायिताः एकत्र समागम्य ॥ ८ ॥

९–११] ति० टी०–उक्तमेव विवृणोति—एवमिति । उक्तरीत्या स्थितिगतिभयाभयसुखदुःखादावेकायनमेकमार्गसमानत्वं गताः । गिरेः प्रागधिष्ठितगिरिशृङ्गाद्गिरिं तस्यैव शिखरान्तरं मृगव्रासादि कुर्वन्तो ययुर्गतवन्तः ॥ ९–११ ॥

रा० टी०–वानरान्तराणां वृत्तान्तमाह–एवमिति । एवमनेन प्रकारेण भीताः अत एव एकायनगताः एकमार्गं प्राप्ताः गिरेर्गिरिं प्लवमाना गच्छन्तः गिरीणां शिखराणि वेगेन प्रकम्पयन्तः प्लवमानाः कंचित्तरुमुल्लङ्घन्तः महाबलाः सर्वे शाखामृगाः वानराः तत्र तस्मिन्समये ततः तान् नगान् वृक्षान् बभञ्जुः । श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०–एकमिति । पुनरपि गिरेर्गिरिं प्लवमानाः गिरीणां शिखराण्यपि प्रकम्पयन्तः एकायनगताः क्रमेणैकस्थानगताः सन्तः एकम् एकाकिनं सुग्रीवमुपतस्थिर इत्यनुषङ्गः । ' एवमेकायनगताः ' इति पाठे एवमुक्तरीत्या एकायनगता स्ते प्रकम्पयन्तोऽभवन्निति योजना ॥ ९ ॥

१ स्थाने इति गो. पाठः । २ अनुचरैरिति गो. पाठः । ३ अपीति गो. पाठ.

ततः सुग्रीवसचिवाः पर्वतेन्द्रे समाहिताः । संगम्य कपिमुख्येन सर्वे प्राञ्जलयः स्थिताः॥ १२ ॥
ततस्तु भयसंत्रस्तं वालिकिल्बिषशङ्कितम् । उवाच हनुमान्वाक्यं सुग्रीवं वाक्यकोविदः॥ १३ ॥
संभ्रमस्त्यज्यतामेष सर्वैर्वालिकृते महान् । मलयोऽयं गिरिवरो भयं नेहास्ति वालिनः ॥ १४ ॥
यस्मादुद्विग्नचेतास्त्वं विद्रुतो हरिपुङ्गव । तं क्रूरदर्शनं क्रूर नेह पश्यामि वालिनम् ॥ १५ ॥
यस्मात्तव भयं सौम्यं पूर्वजात्पापकर्मणः । स नेह वाली दुष्टात्मा न ते पश्याम्यहं भयम्॥ १६ ॥
अहो शाखामृगत्वं ते व्यक्तमेव प्लवङ्गम । लघुचित्ततयाऽऽत्मानं न स्थापयसि यो मतौ १७ ॥
बुद्धिविज्ञानसंपन्न इङ्गितैः सर्वमाचर । नह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि॥ १८ ॥

गो० टी०–तत इति । दुर्गं गिरिः ॥ १० ॥

रा० टी०–आप्लवन्त इति । तदा तस्मिन्समये तं महागिरिं सर्वत आप्लवन्तः मृगादीन् त्रासयन्तः सन्तः ययुः सुग्रीवसमीपं प्रापुः ॥ ११ ॥

गो० टी०–आप्लवन्त इति । आप्लवन्तो ययुः ननु मन्दं ययुरित्यर्थः॥ ११ ॥

१२ ति० टी०–सुग्रीवसचिवा हनुमदादयः॥ १२ ॥

रा० टी०–तत इति । ततः सर्ववानरसमागमानन्तरं समाहिता एकाग्रचित्ता. सुग्रीवसचिवाः कपिमुख्येन सुग्रीवेण पर्वतेन्द्रे संगम्य प्राञ्जलय. सन्तः स्थिताः ॥ १२ ॥

गो० टी०–तत इति । पर्वतेन्द्रम् ऋश्यमूकं पर्यन्तपर्वतेषु तत्र तत्र गत्वा पुनस्तमेव ऋश्यमूकं ययुरित्यर्थः ॥ १० ॥

१३] ति० टी०–वालिकिल्बिषेण वालिप्रवर्तनया किल्बिषाद्धाच्छङ्कितम् ॥ १३ ॥

रा० टी०–तत इति । ततः सर्वसंगमानन्तरं वालिकिल्बिषशङ्कितं वालिनि भासमानस्वापराधेन भीतम् अत एव भयसंत्रस्तं भयाभ्यां वालिप्रेषिताविमाविति संभावनया भयहेतुभ्या संत्रासवन्तं सुग्रीवं वाक्यकोविदःहनूमान् उवाच॥१३॥

गो० टी०–तत इति । वालिकिल्बिषेण वालिकपटेन शङ्कितं वालिना प्रेषिताविमाविति शङ्कितमित्यर्थः ॥ १३ ॥

१४] ति० टी०–संभ्रमश्चित्तक्षोभः । वालिकृते वालिनिमित्तम् । सर्ववानरैः मलयो मलयपर्यायो ऋष्यमूकः॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–संभ्रम इति । वालिकृते युष्मद्वाधोद्देश्यकवालिप्रयत्नार्थं संभ्रमः भीतिः सर्वैः भवद्भिस्त्यज्यताम् । तत्र हेतुः–यतः अय गिरिर्मलयः मस्य भवद्विघातकवालिनः लयः ऋषिशापाद्विध्वंसो यस्मिन् सः अत इह वालिनो भयं नास्ति ॥ १४ ॥

गो० टी०–संभ्रम इति । वालिकृते वालिनिमित्तं संभ्रमस्त्यज्यताम् । मलय इति पर्वतमात्रस्य नाम अयं मलयः अयं पर्वतः गिरिश्रेष्ठः ऋश्यमूक इत्यर्थः ॥ १४ ॥

१५] ति० टी०–यस्माद्वालिनः ॥ १५ ॥

रा० टी०–यस्मादिति । यस्मात् वालिनः विद्रुतः पलायितः अत एव उद्विग्नचेताः त्वमसि तं क्रूरदर्शनं वक्रदृष्टिं क्रूरं क्रूरकर्माणं वालिनमिह न पश्यामि, तस्येहागमनं न संभावयामीत्यर्थः ॥ १५ ॥

गो० टी०–वाली वेपान्तरधारी समागत इति भयं वारयति–यस्मादित्यादिना । यस्मात् वालिनः क्रूरं क्रूरकर्माणम् ॥ १५ ॥

१६] ति० टी०–तदेवाह आदरात्–यस्मात्तवेति। पूर्वजाद्वालिन. इह पर्वते तस्मात्ते भयं न पश्याभीत्यन्वय. ॥ १६ ॥

रा० टी०–यस्मादिति–यस्मात् पूर्वजात् त्वत: पूर्वजन्मनः पापकर्मण. वालिनः तव भयं स दुष्टात्मा वाली यथपीह न अतः ते भयं न पश्यामि. तथापि हे प्लवङ्गम ! लघुचित्ततया अल्पज्ञानेन हेतुना आत्मानं स्वमनः मतौ सम्यग्विचारे यस्त्वं न स्थापयसि तस्य ते व्यक्तं प्रकटितं यत् शाखामृगत्वं प्राकृतवानरधर्मः कारणाभावेऽपि भीतत्वमित्यर्थः, तत् अहो आश्चर्यम् । अहो इत्यनेन तस्य प्राकृतवानरभिन्नत्वं व्यञ्जितम् । यद्यपि तथापीत्यनयोरध्याहारः । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०–यस्मादिति । पापकर्मणः अनुजभार्यापहारिणः भयं भयहेतुम् ॥ १६ ॥

१७] ति० टी०–शाखामृगत्वं बहुचेष्टचपलचित्तमर्कटत्वम् । तदेवाह––लघुचित्ततयेति । लघु चपलम् ॥ १७ ॥

गो० टी०–अहो इति । मतौ सम्यग्विचारे ॥ १७ ॥

१८] ति० टी०–ननु ततो भयाभावेऽपि तत्प्रेरिताद्भयम्, तत्राह–बुद्धीति । इङ्गितैरन्तराशयगमकैश्चेष्टाविशेषैर्बुद्धया निश्चयात्मकेन विज्ञानेन पारक्याशयज्ञानेन संपन्नः संस्तदुचितं सर्वमाचर । सर्वभूतानि निजशास्यप्रजाजातम् ॥ १८ ॥

रा० टी०–ननु वालिनः भयाभावेऽपि तत्प्रेष्याद्भयसंभावनाऽस्त्येवेत्यत आह–बुद्धीति । बुद्धिविज्ञानसंपन्नस्त्वमिङ्गितैः परचेष्टाजनितविचारैः सर्वं भीतिनिवर्तकयत्नादि आचर हि यतः अबुद्धिं विचाराभावं गतः प्राप्तो राजा सर्वभूतानि सर्वस्वप्रजाः न शास्ति शासितुमर्हतीत्यर्थः ॥ १८ ॥

गो० टी०–बुद्धीति । बुद्धिः सामान्यतो ज्ञानम्, विशेषतो ज्ञानं विज्ञानम्, इङ्गितम् अभिप्रायसूचको व्यापारः सर्वं कार्यम् अबुद्धिम् अबुद्धयादिकम् ॥ १८ ॥

१ पर्वतेन्द्रं समाश्रिता इति गो. पाठः । २ त भयसंविग्नमिति गो. पाठः ।

सुग्रीवस्तु शुभं वाक्यं श्रुत्वा सर्वं हनूमतः । ततः शुभतरं वाक्यं हनूमन्तमुवाच ह ॥ १९ ॥
दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ । कस्य न स्याद्भयं दृष्ट्वा ह्येतौ सुरसुतोपमौ ॥ २० ॥
वालिप्रणिहितावेवं शङ्केऽहं पुरुषोत्तमौ । राजानो बहुमित्राश्च विश्वासो नात्र हि क्षमः॥ २१ ॥
अरयश्च मनुष्येण विज्ञेयाश्छद्मचारिणः । विश्वस्तानामविश्वस्ताश्छिद्रेषु प्रहरन्त्यपि ॥ २२ ॥
कृत्येषु वाली मेधावी राजानो बहुदर्शिनः । भवन्ति परहन्तारस्ते ज्ञेयाः प्राकृतैर्नरैः ॥ २३ ॥
तौ त्वया प्राकृतेनैव गत्वा ज्ञेयौ प्लवङ्गम । इङ्गितानां प्रकारैश्च रूपव्याभाषणेन च ॥ २४ ॥
लक्षयस्व तयोर्भावं प्रहृष्टमनसौ यदि । विश्वासयन्प्रशंसाभिरिङ्गितैश्च पुनः पुनः ॥ २५ ॥
ममैवाभिमुखं स्थित्वा पृच्छ त्वं हरिपुंगव । प्रयोजनं प्रवेशस्य वनस्यास्य धनुर्धरौ ॥ २६ ॥

१९] ति० टी०–नेदं भयं चापलमूलमित्याह–सुग्रीव इति ॥ १९ ॥

रा० टी०–सुग्रीव इति । हनूमतः शुभं वाक्यं श्रुत्वा ततस्तं हनूमन्तं सुग्रीवः शुभतरं वाक्यमुवाच ॥ १९ ॥

गो० टी०–सुग्रीव इति । ततः शुभतरं तद्वाक्यादत्यन्तशुभम् ॥ १९ ॥

२०] ति० टी०–तदेवाह–दीर्घेति ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–दीर्घेति । सुरसुतोपमौ एतौ दृष्ट्वा कस्य पुरुषस्य भयं न स्यात् ॥ २० ॥

गो० टी०–दीर्घबाहू इति । दीर्घा बाहवो ययोस्तौ दीर्घबाहू इत्येवं सर्वत्र समासः ॥ २० ॥

२१] ति० टी०–ननु वनचारिणा वानरेण वालिना कुतोऽनयोः प्रवर्तना, तत्राह–राजान इति । बहुमित्रा जात्यन्तरेष्वपि मित्रवन्तः यथा दशरथो गृध्रराजेन मित्रवान्, एवं वालिनापि नरमैत्र्यं संभावितमिति भावः ॥ २१ ॥

रा० टी०–तत्र हेतुमाह–वालीति । एतौ पुरुषोत्तमौ वालिप्रणिहितौ वालिना प्रेषितौ इति अहं शङ्के । शङ्काया बीजमाह–हि यतः राजानः बहुमित्राः अनेकविधमित्रवन्तः भवन्तीति शेषः, अतः अत्र राजविषये विश्वासः न क्षमः न कार्य इत्यर्थः ॥ २१ ॥

गो० टी०–वालिप्रणिहताविति । वालिप्रणिहतौ नाहं वाली समागत इति विभेमि किंतु तत्प्रेषिताविति मत्वेति भावः । एतादृशतदीयपुरुषस्य का प्रसक्तिस्तत्राह–राजान इति । अत्र राजविषये ॥ २१ ॥

२२] ति० टी०–नन्वथापि तापसाभ्यां कुतो भयम्, तत्राह–अरयश्चेति । यतस्ते छद्मचारिणः, अतो विज्ञेयाः । यतश्च विश्वस्तानां वञ्चनया प्राप्तविश्वासानामरीणां स्वयमविश्वस्ता छिद्रेषु प्रहारावकाशेषु प्रहरन्ति अतो विज्ञेया इत्यर्थः२२

रा० टी०–अरय इति । छद्मचारिणः कपटाचरणशीलाः अरयः मनुष्येण जनेन विज्ञेयाः विशेषतः शङ्कनीया इत्यर्थः, हि यतः विश्वस्तानां कथंचित् विश्वासं प्रापितानां छिद्रेषु अवसरेषु अविश्वस्ताः स्वयं विश्वासाभाववन्तः प्रहरन्ति, संबन्धसामान्ये षष्ठी ॥ २२ ॥

गो० टी०–अरयश्चेति । छद्मचारिणोऽरयः मनुष्येण शत्रुमता ज्ञेयाः । कुत इत्यत्राह–विश्वस्तानामिति । विश्वस्तानां शत्रूणां रन्ध्रेषु प्रमादेषु सत्सु स्वयमविश्वस्ताः सन्तः प्रहरन्ति हि ॥ २२ ॥

२३] ति० टी०–उक्तमुपनयति–कृत्येष्विति । राजानो बहुदर्शिनो नानाविधवञ्चनोपायज्ञाः परहन्तारो भवन्ति । ते एते प्राकृतैः प्राकृतवेषैश्चारैर्ज्ञेया ज्ञातव्यान्तराशयाः ॥ २३ ॥

रा० टी०–कृत्येष्विति । यतः राजानो बहुदर्शिनः अनेकविधोपायाभिज्ञाः अत एव परहन्तारः शत्रुध्वंसकाः भवन्ति अतो नरैर्जनैः प्राकृतैः स्वाभाविकोपायैरुपलक्षितास्ते शत्रुभूता राजानः ज्ञेयाः प्रतिक्षणमन्वेषणीयाः अत एव कृत्येषु राजोचितकार्येषु वाली मेधावी निपुणः । एतेन वाली अवश्यमन्वेषणीय इति ध्वनितम् ॥ २३ ॥

गो० टी०–कृत्येष्विति । कृत्येषु कर्तव्यकार्येषु वाली मेधावी दूरदर्शी । स्वभावश्चाय राज्ञामित्याह–राजान इति । राजानः बहुदर्शनाः बहूपायज्ञाः परहन्तारो भवन्ति, ते प्राकृतैः दीनवेषधरैः नरैः ज्ञेयाः ॥ २३ ॥

२४] ति० टी०–यत एवमतः–ताविति । प्राकृतेनैव उदासीनेनैव इङ्गितानां प्रकारैर्विशेषैः, रूपेण सौम्यासौम्याकारेण, व्याभाषणेन तत्तत्प्रसङ्गे दीयमानोत्तरेण च ॥ २४ ॥

रा० टी०–तत्प्रकारमाह–ताविति । प्राकृतेन स्वाभाविकेन गमनेन गत्वा इङ्गितानां व्यापाराणां प्रकारैः उत्कटाउत्कटादिविशेषाकारैः रूपव्याभाषणेन रूपेण मृदुमृद्वाकारकृत्या व्याभाषणेन सकपटाकपटाकारवचनेन च तौ नरवरा त्वया ज्ञेयौ ज्ञातव्यौ ॥ २४ ॥

गो० टी०–ताविति । प्राकृतेन प्राकृतवेषेण इङ्गितानां भावसूचककायिकव्यापाराणां प्रकारैरवान्तरभेदैः, रूपेण सौम्यासौम्यलक्षणेन, व्याभाषणेन अन्योन्यसंभाषणेन च तौ ज्ञेयौ॥२४॥

२५–२६] ति० टी०–तयोर्मनुष्ययोः यदि त्वयि समी-

१ एताविति गो. रा. पाठः । २ रन्ध्रेष्विति गो पाठः । ३ हीति गो. रा पाठः । ४ दर्शना इति गो. पाठः ।

शुद्धात्मानौ यदि त्वेतौ जानीहि त्वं प्लवङ्गम । व्याभाषितैर्वा रूपैर्वा विज्ञेया दुष्टताऽनयोः ॥ २७ ॥
इत्येवं कपिराजेन संदिष्टो मारुतात्मजः । चकार गमने बुद्धिं यत्र तौ रामलक्ष्मणौ ॥ २८ ॥
तथेति संपूज्य वचस्तु तस्य कपिः सुभीतस्य दुरासदस्य ।
महानुभावो हनुमान्ययौ तदा स यत्र रामोऽतिबली सलक्ष्मणः ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

धृतभिक्षुवेषो हनुमान्रामलक्ष्मणावुपेत्य कृतप्रणामः कौ युवामिति पृष्ट्वा श्रावितसुग्रीवेतिवृत्तस्तत्स्नेहस्ग्रहाकाङ्क्षा न्यवेदीत् । हनुमद्व्यवहारचातुरीतुष्टो रामस्तद्वेदव्याकरणवेत्तृत्व श्लाघते । रामेणानुमतो लक्ष्मणो रामस्य सुग्रीवेण साकं स्नेहाकाङ्क्षां व्यनक्ति ।

वचो विज्ञाय हनुमान्सुग्रीवस्य महात्मनः । पर्वतादृष्यमूकात्तु प्लुप्लुवे यत्र राघवौ ॥ १ ॥

पस्थिते प्रहृष्टमनसावुत्तरप्रत्युत्तरादौ संतुष्टमनसौ तदा तयोरभिमुखं स्थित्वा ममैव प्रशंसाभिस्तद्बोधकवाक्यैरिङ्गितैर्मामकाभिप्रायबोधनैर्मयि तौ विश्वासयन्तस्य वनस्य प्रवेशस्य प्रयोजनं पृच्छ । यद्वा ममैवाभिमुखं यथा तथा स्थित्वा प्रशंसाभिस्तयोः स्तुतिभिः, इङ्गितैः स्वीयैस्तावात्मनि मयि च विश्वासयन्पृच्छेत्यन्वयः । स्वाभिमुखस्थितिकथनमन्यादृशवचनकथनसंभावनया तन्निरासायेति बोध्यम् ॥ २६ ॥ २६ ॥

रा० टी०–लक्षयस्वेति । तयोर्नृवरयोः भावमभिप्रायं लक्षयस्व जानीहि । यदि तौ प्रहृष्टमनसौ अनुमानादिज्ञातकापट्यरहितान्तःकरणौ तर्हि प्रशंसाभिः तत्कर्मकप्रशंसावचनैः इङ्गितैः स्वचेष्टितैश्च विश्वासयन् स्वविषयकविश्वासमुत्पादयन् ममाभिमुखमग्रेव स्थित्वा अस्य वनस्य वनसंबन्धिनः प्रवेशस्य प्रयोजनं धनुर्धरौ नृवरौ पृच्छ । श्लोकद्वयमेकान्वयि ॥२५॥२६॥

गो० टी०–लक्षयस्वेति । यदि प्रहृष्टमनसौ यदि शुद्धभावौ तदा प्रशंसाभिः तदनुकूलेङ्गितैश्च पुनः पुनः विश्वासयन् ममैवाभिमुखम् अनुकूलं यथा भवति तथा स्थित्वा स्थापयित्वा धनुर्धरौ धनुर्धरतया अत्र वने प्रवेशस्य प्रयोजनं पृच्छ॥२५॥२६॥

२७–२९] ति० टी०–प्रभावसरं दर्शयति–शुद्धेति । यथेतौ शुद्धात्मानावस्मासु द्वेषरहितौ जानीहि ज्ञास्यसि तथैव तदभिमतं प्रयोजनं पृच्छ । उपसंहरति–व्याभाषितैरिति । दुष्टताऽदुष्टता चेति तन्त्रेण पदच्छेदः ॥ २७–२९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०–तत्प्रयोजनमाह–शुद्धेति । प्लवङ्गम हे वानर ! एतौ यदि शुद्धात्मानौ वालिप्रेषितत्वाभावेन शुद्धान्तःकरणौ तर्हि व्याभाषिताद्यैः अनयोः अदुष्टता आचरणादिजनितदोषरहितत्वं विज्ञेया ॥ २७ ॥

गो० टी०–शुद्धेति । यथेतौ शुद्धात्मानौ तदा पुनरपि जानीहि । किं तेनेत्यत्राह–व्याभाषितैरिति । वाकारश्चार्थः । अदुष्टेति छेदः ॥ २७ ॥

रा० टी०–इतीति । कपिराजेन सुग्रीवेण इत्येवं संदिष्टो मारुतात्मजः यत्र रामलक्ष्मणौ तत्र गमने गमनार्थं बुद्धिं निश्चयं चकार ॥ २८ ॥

गो० टी०–सुग्रीववचनं समीचीनममन्यतेत्याह–इतीति२८

रा० टी०–निश्चयानन्तरकालिकं कृत्तमाह–तथेति । महानुभावः कपिर्हनुमान् सुभीतस्य सुग्रीवस्य वचः तथेति संपूज्य यत्रातिबली रामस्तत्र ययौ ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किधाकाण्डे द्वितीयः सर्गः ॥ २ ॥

गो० टी०–तथेति । संपूज्य श्लाघयित्वा । सुभीमस्य दुरासदस्येत्येताभ्यां सुनीतित्वं सूचितम् । महानुभावः वेषान्तरधारणसमर्थः सः हनुमान् यत्र रामो लक्ष्मणश्च तं देशं ययाविति्यन्वयः ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वितीयः सर्गः ॥ २

१] ति० टी०–विज्ञाय तात्पर्यतो ज्ञात्वा ॥ १ ॥

रा० टी०–हनुमद्गमनादिवृत्तान्तं बोधयन्नाह–वच इत्यादिभिः । हनुमान् सुग्रीवस्य वचो विज्ञाय यत्र राघवौ तत्र ऋष्यमूकात् पर्वतात् प्लुप्लुवे जगाम ॥ १ ॥

गो० टी०–प्रथमे सर्गे वैकुण्ठवासिनो भगवतः स्वीयेषु केषांचित्स्वपरत्वे वर्तमाने, केषांचिद्विपयान्तरप्रावण्यमवलोक्य दूयमानमानसस्य दयावृत्तिविशेषः प्रतिपादितः । द्वितीये चेतनस्य भगवदपराधदण्डभीतस्य तस्मिन्नाभिमुख्यमुक्तम् । अथ तल्लाभहेत्वाचार्यकृत्यं दर्शयति तृतीये—वच इत्यादि ॥ १ ॥

१ विज्ञेया स्याद्दुष्टादुष्टता तयोरिति गो. पाठः । २ तत्कर्मेत्यिति गो. पाठः । ३ बलश्चेति गो. पाठः ।

कपिरूपं परित्यज्य हनुमान्मारुतात्मजः । भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः ॥ २ ॥
ततश्च हनुमान्वाचा श्लक्ष्णया सुमनोज्ञया । विनीतवदुपागम्य राघवौ प्रणिपत्य च ॥ ३ ॥
आबभाषे च तौ वीरौ यथावत्प्रशशंस च । संपूज्य विधिवद्वीरौ हनुमान्वानरोत्तमः ॥ ४ ॥
उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ । राजर्षिदेवप्रतिमौ तापसौ [3]संशितव्रतौ ॥ ५ ॥
देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ । त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः ॥ ६ ॥

२] ति० टी०–भिक्षुरूपं प्राकृततापसरूपम् । शठबुद्धितयाऽविश्वस्तबुद्धितया ॥ २ ॥

रा० टी०–कपीति । अशठबुद्धितया वानरत्वसूचितशठबुद्धित्वाभावेनोपलक्षितो मारुतात्मजो हनुमान् कपिरूपं परित्यज्य तिरोधाय भिक्षुरूपं भेजे प्राप प्रसिद्धं च लोके वानराणां शठबुद्धित्वम् एतेन वानरत्वसूचितशठबुद्धिं मां विज्ञाय रामो न संभाषेत इति हनुमत्संभावना सूचिता, रूपान्तरमगृहीत्वा भिक्षुरूपं भेजे इत्यनेन इमौ दीनदयालू इति हनुमता ज्ञातमिति व्यञ्जितं तेन तद्बुद्धेः प्रभावातिशयो व्यक्तः ॥ २ ॥

गो० टी०–कपीति । रूपान्तरपरिग्रहसामर्थ्यमुच्यते–मारुतात्मज इति । शठबुद्धितया वञ्चकबुद्धितया भिक्षुरूपं संन्यासिवेषम् ' भिक्षुः परिव्राट् कर्मन्दी पाराशर्योपि मस्करी' इत्यमरः ॥ २ ॥

३] ति० टी०–विनीतवद्विनीतयोग्यम् ॥ ३ ॥

रा० टी०–तत इति । ततः भिक्षुरूपधारणानन्तरं श्लक्ष्णया मधुरया अत एव मनोज्ञया मनोहरया वाचा उपलक्षितः विनीतवत् विनीतत्ववत् स्थिरं यस्मिन् स हनुमान् वीरौ तौ राघवौ उपागम्य प्राप्य प्रणिपत्य च आबभाषे यथावत्प्रशशंस च । सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०–तत इति सार्धः । विनीतवत् सविनयम् उपागम्य प्रणिपत्य नमस्कृत्य श्लक्ष्णया अपरुषया सुमनोज्ञया अर्थतोऽतिरम्यया वाचा आबभाषे, यथावत्परमार्थतया प्रशशंस च । अत्र भिक्षुरूपस्य हनुमतः प्रणामादन्यत्रापि भिक्षोर्गृहस्थादिविषये प्रणामः कर्तव्य एवेति विज्ञायते । संन्यासिनो गृहस्थादिप्रणामनिषेधवचनान्यज्ञविषयाणीति मन्तव्यानि। यदि हि ज्ञानाधिकं दृष्ट्वा कर्ममात्रेणाधिको यतिर्न प्रणमेत् तर्हि ' विप्राणां ज्ञानतो ज्यैष्ठ्यम् ' इति मनुवचनं विरुध्येत । नहि तत्प्रणामनिषेधकं मनुवचनं किंचिदृश्यते किं त्वनारभ्याधीतमदृष्टाकरं यत्किंचियतिप्रणामनिषेधवचनं किं वदन्तीसिद्धं तस्य च विषयोऽज्ञगृहस्थादिरूपः । यत्तु कैश्चिदुक्तम् अत्यद्भुतरामलक्ष्मणरूपदर्शनसंजाताग्निविस्मयः सन्नङ्कीकृतं भिक्षुरूपं विस्मृत्य अवशः प्रतिपेदिरे इतिवत् प्रणनामेति न विरोध इति, तत्र उपक्रमविरोधात् । इङ्गितवचनादिभिः परहृदयज्ञानार्थं हि प्रेषितोऽयम् नहि तथा नियुक्तः सुनिपुणमतिः सचिवधुरंधरः स्वकार्यविरोधकरं परिगृहीताकारविरुद्धमविरुद्धमविस्मम्महेतुत्वेन परेङ्गितानाविष्कारहेतुभूतं कार्यं कुर्यात् । यदप्युक्तम् ' रूपमेवास्यैतन्महिमानं व्याचष्टे ' इति न्यायेन दर्शनमात्रेणैतौ सुग्रीवविरोधिनिरसनदक्षाविति निश्चित्य परिगृहीतवेषान्तरस्य स्वस्य चारत्वं प्रकटयितुं नमस्कारं कृतवानिति न दोष इति । तदपि न, तथा सति सुग्रीवो नामेत्यादिवक्ष्यमाणमेव प्रथमं कथयेत् । केचित्तु भिक्षुर्ब्रह्मचारी अतो न दोष इत्याहुः तन्न, तादृशभिक्षुकत्वस्य पूर्वमेव सिद्धत्वेन इदानीमपरिग्राह्यत्वात् । अपरे तु सर्वथा कपिरूपं परित्यज्येत्युपक्रमात् उपरिष्टात् प्रच्छन्नत्वोक्त्या च मानुषरूपाङ्गीकारावश्यंभावात्तद्रूपविशिष्टं ब्रह्मचर्यमेवात्र भिक्षुशब्देनोच्यत इति न विरोध इत्यूचिरे । तत्पक्षे तु पूर्वोक्तया दिशा दूषणं चिन्त्यम् ॥ ३ ॥

४] ति० टी०–यथावत्प्रशशंस न तु मिथ्यास्तुतिरित्यर्थः। आबभाषे वक्तुमभिमुखीचकार । संपूज्य वाचा प्रशस्य ॥ ४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–समिति । वीरौ सत्यपराक्रमौ रामलक्ष्मणौ हनुमान् विधिवत्संपूज्य कामतः सुग्रीवेच्छानुसारात् मृदुवाक्यमुवाच । अर्धद्वयमेकान्वयि ॥ ४ ॥

गो० टी०–संपूज्येति । कामतः भक्त्या पूर्वोक्तप्रशंसा भक्तिकृता न तु केवलपरीक्षाकृतेति भावः ॥ ४ ॥

५] ति० टी०–कामतः सुग्रीवोपदेशाविरुद्धस्वेच्छातः । राजर्षी च देवौ च तत्प्रतिमौ ॥ ५ ॥

६] ति० टी०–वरवर्णिनौ ब्रह्मचारिश्रेष्ठौ । अन्यांश्च रक्षोसुरादीन् ॥ ६ ॥

रा० टी०–तदाकारमाह–राजर्षीति । राजर्षीणां देवपूजिता प्रतिमा प्रतिकृतिर्ययोस्तौ वरवर्णिनौ मृगगणान् अन्यांश्च वनचारिणः त्रासयन्तौ स्वतेजसा धर्षयन्तौ भवन्तौ इमं देशं कथं केन प्रकारेण प्राप्तौ । राजर्षीणामित्यत्र द्वन्द्वस्तत्पुरुषो वा । अर्धत्रयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–राजर्षीत्यादिश्लोकद्वयम् । मृगान् अन्यान् वनचारिणश्च त्रासयन्तौ समन्ततः पम्पातीरुहान् वृक्षान् वीक्षमाणौ च भवन्तौ वरवर्णिनौ स्निग्धरूपवन्तौ कर्मधारयादपि मत्वर्थीयो दृष्टचरः, अत एव राजर्षिदेवप्रतिमौ संशितव्रतौ तीक्ष्णव्रतौ अत एव तापसौ तपस्विवेषौ भूत्वा इमं दुर्गमं देशं कथं प्राप्तौ ॥ ५ ॥ ६ ॥

१ स इति गो. पाठः । २ मारुतात्मज इति गो. पाठः । ३ शंसितेति रा. पाठ

पम्पातीररुहान्वृक्षान्वीक्षमाणौ समन्ततः । इमां नदीं शुभजलां शोभयन्तौ तरस्विनौ ॥ ७ ॥
धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ । निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः॥ ८ ॥
सिंहविप्रेक्षितौ वीरौ महाबलपराक्रमौ । चक्रचापनिभे चापे गृहीत्वा शत्रुनाशनौ ॥ ९ ॥
श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ । हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ ॥ १० ॥
प्रभया पर्वतेन्द्रोऽसौ युवयोरवभासितः । राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥ ११ ॥
पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ । अन्योन्यसदृशौ वीरौ देवलोकादिहागतौ ॥ १२ ॥
यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुंधराम् । विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥ १३ ॥

७] ति० टी०–समन्ततो वीक्षमाणौ । किंचिद्वस्त्वन्वेषमाणाविवेत्यर्थः । इमां नदीमिति सरस्यपि विस्तृतत्वेन नदीत्वोपचार इति केचित्, नद्येवेत्यन्ये ॥ ७ ॥

८–९] ति० टी०–शोभनो वर्ण आभा कान्तिश्च ययोस्तौ निःश्वसन्तौ किंचिदुःखवशेनेति शेषः । इमा वन्याः प्रजाः पीडयन्तौ स्वरूपमात्रेणेति शेषः ॥ ८ ॥ ९ ॥

१०] ति० टी०–हस्तः शुण्डादण्डः ॥ १० ॥

रा० टी०–पम्पेति । पम्पातीररुहान् पम्पायास्तीरे जातान् वृक्षान् वीक्षमाणौ इमां नदीं नदीसदृशीं पम्पां शोभयन्तौ तरस्विनौ अतिबलवन्तौ धैर्यवन्तौ सुवर्णाभौ सुवर्णसदृशशरीरौ चीरवाससौ खण्डपटधरौ निःश्वसन्तौ वरभुजौ महाबाहू इमाः अदृष्टमानुषाः वन्याः प्रजाः पीडयन्तौ, किं च इमा अस्मत्प्रभृतीन् प्रजाः पीडयन्तौ निःश्वासोपलक्षितस्वदुःखदर्शनेन पीडां प्रापयन्तौ युवां कौ। नदीशब्द आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः, नद्येव तत्र काचिदिति केचित्। श्लोकद्वयमेकान्वयि। द्रुतसुवर्णस्य श्यामत्वेन दृश्यमानत्वात् अद्रुतस्य च गौरवर्णत्वेन दृश्यमानत्वात् सुवर्णवर्णाभाविति न विरुद्धं सुवर्णशब्देन अवस्थाद्वयापन्नयोर्ग्रहणे बाधकाभावात् ॥ ७ ॥८॥

रा० टी०–सिंहेति । सिंहविप्रेक्षितौ सिंहस्येव विप्रेक्षितं प्रेक्षणं ययोस्तौ, सिंहातिबलविक्रमौ सिंहातिकामकबलविक्रमविशिष्टौ शक्रचापनिभे इन्द्रधनुस्तुल्ये चापे धनुषी गृहीत्वा शत्रुनाशना रिपुविनाशकौ वृषभश्रेष्ठविक्रमौ वृषभश्रेष्ठस्य श्रेष्ठवृषभस्येव विक्रमः पादन्यासो ययोस्तौ हस्तिहस्तोपमभुजौ शुण्डादण्डसदृशभुजविशिष्टौ अत एव राज्यार्हौ अमरप्रख्यौ देवतुल्यौ ययोः युवयोः प्रभया असौ पर्वतेन्द्रः अवभासितः प्रकाशितः तौ युवामिह अस्मिन्देशे कथं केन हेतुना आगतौ प्राप्तौ। श्लोकत्रयमेकान्वयि ॥ ९–११ ॥

गो० टी०–इमामित्यादिसार्धश्लोकत्रयमेकान्वयम्। पम्पायाः सरस्त्वेऽपि स्वल्पतया पूर्वापरप्रवाहवत्त्वेन नदीत्वमविरुद्धम्। शोभयन्तौ स्वतेजसेति शेषः। सुवर्णाभौ रामस्य श्यामत्वेऽपि लक्ष्मणस्य पीतवर्णत्वाच्छत्रिन्यायात् सुवर्णकान्तित्वम्। निःश्वसन्तौ वनसंचारायासात् वरभुजौ सुन्दरभुजौ हस्तिहस्तेत्यनेन दैर्घ्यपीवरत्वयोर्वक्ष्यमाणत्वात् इमाः प्रजाः पक्षिमृगादीन् पीडयन्तौ अपूर्वदर्शनेन विद्रावकाविवेत्यर्थः, सिंहस्येव विप्रेक्षितं वीक्षणं ययोस्तौ सिंहातिबलविक्रमौ सिंहातिः शायिबलपराक्रमौ शक्रचापनिभेन्द्रधनुस्तुल्ये चापे गृहीत्वा शत्रुमुद्दनौ शत्रुसंहारकौ नीलभेदपरभागतया धनुषोराभरणत्वं शत्रुसंहारकत्वेनायुधकोटिप्रविष्टत्वं च दर्शितमाभ्यां विशेषणाभ्याम्। श्रीमन्तौ कान्तिमन्तौ रूपसंपन्नौ सौन्दर्ययुक्तौ वृषभश्रेष्ठविक्रमौ वृषभश्रेष्ठगमनौ द्युतिमन्तौ तेजस्विनौ तेजस्तु श्रियो भिन्नमिति न पुनरुक्तिः। एवंभूतौ युवां कावित्यन्वयः॥७–१०॥

११] ति० टी०–राज्यार्हौ देवतुल्यौ देशं हित्वा कथमिहागतावित्यर्थः। आकारतो महाराजत्वनिश्चयादेवमुक्तिः ॥११॥

गो० टी०–प्रभयेत्यर्धम् ॥ ११ ॥

गो० टी०–राज्येत्यादित्रय एकान्वयः। अमरप्रख्यौ देवतुल्यपराक्रमौ देवलोकादागतौ वीराविव स्थितौ यदृच्छया दैवात् वसुन्धरां प्राप्तौ चन्द्रसूर्याविव स्थितौ देवरूपिणौ देवतुल्यरूपिणौ वीरौ मानुषौ युवां राज्यार्हावपि राज्यं त्यक्त्वा वीरौ जटामण्डलधारिणावविच्छिन्नजटामण्डलधारिणौ भूत्वा इहदेशं वनदेशं कथं किमर्थम् आगतौ। समस्तराजलक्षणलक्षितयोर्युवयोः राज्यभोग एवोचित. न तु वनवास इति भावः ॥ १२–१४ ॥

१२–१३] ति० टी०–देवलोकादिह भूतल आगताविव ॥ १२ ॥ १३ ॥

रा० टी०–पद्मेति । पद्मपत्रेक्षणौ अन्योन्यसदृशौ परस्परतुल्यौ यदृच्छया स्वेच्छया देवलोकाद्वसुन्धरां संप्राप्तौ वीरौ चन्द्रसूर्याविव इहागतौ विशालवक्षसौ वीरौ भवद्गुणज्ञानरहितेषु विशेषकं या प्रापकौ वीरौ मानुषौ नित्यमनुष्यौ देवरूपिणौ देवानामप्युत्पादकौ सिंहस्कन्धौ समदौ मदसहितौ वीरौ गोवृषाविव सकिरणवृषसदृशौ उभौ युवां ससागरवनां सागरवनसहितां विन्ध्यमेरुविभूषितां कृत्स्नामिमां पृथिवीं रक्षितुं योग्यौ अहं मन्ये अतः आयताः विस्तृताः सुदृत्ताः पुष्टाः परिघोपमाः सर्वभूषणभूषार्हा इमे बाहवः किमर्थं न विभूषिताः। सार्धश्लोकचतुष्टयमेकान्वयि ॥ १२–१६ ॥

१ सूदनाविति गो. पाठः । २ इवेति गो. पाठः ।

सिंहस्कन्धौ महोत्साहौ समदाविव गोवृषौ । आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः ॥ १४ ॥
सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः । उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् ॥ १५ ॥
ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम् । इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ॥ १६ ॥
प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते । संपूर्णाश्चैव शितैर्बाणैस्तूणाश्च शुभदर्शनाः ॥ १७ ॥
जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः । महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ ॥ १८ ॥
खड्गावेतौ विराजेते निर्मुक्तभुजगाविव । एवं मां परिभाषन्तं कस्माद्वै नाभिभाषतः ॥ १९ ॥
सुग्रीवो नाम धर्मात्मा कश्चिद्वानरपुंगवः । वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ॥ २० ॥
प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना । राज्ञा वानरमुख्यानां हनुमान्नाम वानरः ॥ २१ ॥
युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति । तस्य मां सचिवं विद्धि वानरं पवनात्मजम् ॥ २२ ॥

१४-१५] ति० टी०-समदौ हृष्टौ गौवृषौ तरुणवृषभाविव ॥ १४ ॥ १५ ॥

गो० टी०-आयताश्चेति । आयताः आजानुविलम्बिनः सुवृत्ताः भुजगभोगवद्वृत्ताः बाहवः रामस्य दक्षिणो बाहुरिति लक्ष्मणस्य रामबाहुत्वात्तद्बाहुभ्यां बहुवचनम् । यद्वा हनुमतो भक्तत्वेन तस्य चतुर्भुजवेषेण दृश्योऽभवत् । यद्वा द्वयोर्बाहुचतुष्टयवत्त्वाद्बहुवचनम् । परिघोपमाः परिघो गदाविशेषः तदुपमाः स्वसौन्दर्यानुभवपराणां समस्तविरोधिनिवर्तनक्षमा इत्यर्थः, सर्वभूषणभूषार्हाः आभरणस्याभरणमित्युक्तरीत्या भूषणान्यपि भूषयितुमर्हाः किमर्थं न विभूषिताः, इमान् भूषणैरलंकृत्य आभरणाभरणत्वं किंमिति न प्रकाशितमित्यर्थः । यद्वा दृष्टिदोषपरिहाराय एतादृशबाहुसौन्दर्यमाच्छादयितव्यं तत्किमर्थं नाच्छादितामिति भावः । यद्वा आभरणच्छन्नसौन्दर्यमेवालमस्मद्वशीकरणाय अधिकं निरावरणसौन्दर्यप्रदर्शनमिति भावः । यद्वा राजकुमाराणां क्षणमात्रं ताम्बूलाभावे म्लानतावत्क्षणमात्रविरहेऽपि स्थातुमनर्हा भूषाः किमर्थं विश्लेषिता इति भावः । यद्वा एवं भूषणविरहः कस्य वा शत्रोर्मूलघातायेति भावः । अनेन अप्रतिहतसंकल्पत्वेऽपि नित्यसखीन् विहाय चतुर्थावतरणे को हेतुरित्युक्तम् ॥ १५ ॥ १६ ॥

१६] ति०टी०-चित्रमनुलेपनं स्वर्णजलरूपणं ययोस्ते॥१६॥

रा० टी०-इमे इति । चित्रे अनेकचित्रविशिष्टे श्लक्ष्णे चिक्कणे चित्रानुलेपने द्रुतसुवर्णादिनिर्मितचित्ररूपानुलेपनविशिष्टे इमे धनुषी हेमविभूषिते इन्द्रस्य वज्रे इव प्रकाशेते । अर्धद्वयमेकान्वयि ॥ १६ ॥

गो० टी०-इमे इति । चित्रे लोके एतादृशधनुषोरदर्शनादद्भुतावहे वज्रे इत्यभूतोपमा ॥ १७ ॥

१७-१८] ति० टी०-हेमभूषिते वज्रे यथा ॥१७॥१८॥

रा० टी०-संपूर्णा इति । शितैः तीक्ष्णैः जीवितान्तकरैः रिपुजीवनविध्वंसकैः पन्नगैरिव घोरैः ज्वलद्भिः प्रकाशमानैः बाणैः संपूर्णाः अत एव शुभदर्शनाः तूणा इषुधयः सन्तीति शेषः ॥ १७ ॥

गो० टी०-संपूर्णा इति । तूणा इति बहुवचनम् एकैकस्य पार्श्वद्वयेऽपि तूणीरद्वयसत्त्वात् ॥ १८ ॥

रा० टी०-महेति । महाप्रमाणौ अतिप्रमाणविशिष्टौ विपुलौ पुष्टौ तप्तहाटकभूषणौ द्रुतसुवर्णालिखितौ एतौ खड्गौ निर्मुक्तभुजगौ त्यक्तकल्चुकसर्पाविव विराजेते ॥ १८ ॥

गो० टी०-महेति । महाप्रमाणाविति दीर्घत्वम् । विस्तीर्णाविति विशालता । तप्तहाटकं द्रुतकनकम् । निर्मुक्तौ निर्मुक्तत्वचौ ॥ १९ ॥

१९] ति० टी०-निर्मुक्तौ मुक्तकल्चुकौ । कस्माद्वै कस्माद्धेतोर्नाभिभाषथः प्रत्युत्तरमिति शेषः ॥ १९ ॥

रा० टी०-एवमिति । एवमनेन प्रकारेण परिभाषन्तं भवद्गुणान् कथयन्तं मां कस्मान्नाभिभाषथः उत्तरं वदथः । अर्धं पृथक् । नन्वहं त्वद्विषयकज्ञानमन्तरा नोच्यते इत्यत आह-सुग्रीव इति । वानरपुंगवः वानरश्रेष्ठः भ्रात्रा विनिकृतः निःसारितः अत एव दुःखितः कश्चित्सुग्रीवो नाम धर्मात्मा जगद्भ्रमति ॥ १९ ॥ २० ॥

गो० टी०-एवमिति । परिभाषन्तं पुनः पुनर्भाषमाणं नाभिभाषतः नाभिभाषेथे । व्यत्यय आर्षः ॥ २० ॥

२०-२१] ति० टी०-ननु कस्त्वं कस्य वा यस्यास्माभिः प्रत्युत्तरं देयम्, तत्राह-सुग्रीव इति । सुग्रीवस्याद्भुतत्ववोधनाय तत्स्तुतिपूर्वकमुक्तिः । विनिकृतो निरस्तः ॥२०॥ २१ ॥

गो० टी०-एवं स्ववाक्सौष्ठवेन तूष्णींभूतौ दृष्ट्वा स्वकार्यमावेदयति-सुग्रीव इत्यादिना । विनिकृतः वञ्चितः ॥ २१ ॥

रा० टी०-प्राप्त इति । वानरमुख्यानां राज्ञा महात्मना तेन सुग्रीवेण प्रेषितः हनुमान्नाम वानरोऽहं प्राप्तः स्वामिति शेषः ॥ २१ ॥

गो० टी०-प्राप्त इति । महात्मना महाबुद्धिना ॥ २२ ॥

२२] ति० टी०-ननु त्वदाज्ञाऽस्मत्सभीपे प्रेषणं किमर्थम्, तत्राह-युवाभ्यामिति ॥ २२ ॥

१ निशितैरिति गो. पाठः । २ श्रमद्भिरिति गो. पाठः । ३ विस्तीर्णाविति गो. पाठः । ४ निर्मुक्ताविव पन्नगाविति गो. पाठः । ५ थूथप इति गो. पाठः । ६ विद्धीति रा. पाठः ।

भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात् । ऋष्यमूकादिह प्राप्तं कामगं कामचारिणम् ॥ २३ ॥
एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ । वाक्यज्ञो वाक्यकुशलः पुनर्नोवाच किंचन ॥ २४ ॥
एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् । प्रहृष्टवदनः श्रीमान्भ्रातरं पार्श्वतः स्थितम् ॥ २५ ॥
सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः । तमेव काङ्क्षमाणस्य ममान्तिकमिहागतः ॥ २६ ॥
तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् । वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दमम् ॥ २७ ॥
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः । नासामवेदविदुषः शक्यमेवं विभाषितुम् ॥ २८ ॥

रा० टी०—ननु त्वत्प्रेषणे तस्य किं प्रयोजनमित्यत आह—युवाभ्यामिति । धर्मात्मा सुग्रीवः युवाभ्यां सख्यमिच्छति । अर्थं पृथक् । ननु तेन तव कः संबन्धः इत्यत आह—तस्येति । भिक्षुरूपप्रतिच्छन्नं भिक्षुरूपेण प्रतिच्छन्नमाच्छादितस्ववानरस्वरूपं सुग्रीवप्रियकारणात् इह प्राप्तं कामगं यथेच्छं गमनकर्तारं कामरूपिणमीप्सितरूपधारणसमर्थं तस्य सुग्रीवस्य सचिवं पवनात्मजं वानरं मां विद्धि जानीहि सत्यवृत्तकथनेन रामस्तेन विज्ञात इति सूचितम् । श्लोकत्रयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०—युवाभ्यामिति । वित्तं विदेर्लोटि मध्यमपुरुषद्विवचनम् ॥ २३ ॥

२३–२५] ति० टी०—वानरराजसचिवस्य मानुषं रूपं कुतस्तत्राह—भिक्षुरूपेति । अनेन शुद्धं वानरत्वमेव नेत्यपि बोधितम् । ईदृशं वित्तमिति प्राक्तनेनान्वयः ॥ २३–२५ ॥

गो० टी०—तर्हि कथं भिक्षुरसीत्यत्राह—भिक्षुरिति ॥२४॥

रा० टी०—एवमिति । वाक्यज्ञः वाक्यतात्पर्यज्ञाता वाक्यकुशलः वाक्यप्रयोगे निपुणः हनुमान् रामलक्ष्मणौ एवमुक्त्वा पुनः किञ्चन नोवाच ॥ २४ ॥

गो० टी०—एवमिति । नोवाच तद्वचनश्रवणेच्छयेति भावः ॥ २५ ॥

रा० टी०—एतदिति । तस्य हनुमतः एतद्वचः श्रुत्वा प्रहृष्टवदनो रामः पार्श्वतः स्थितं भ्रातरमब्रवीत् ॥ २५ ॥

गो० टी०—एतदिति । हनुमन्तं स्तोतुं लक्ष्मणं प्रत्युक्तिः ॥ २६ ॥

२६] ति० टी०—तमेव सुग्रीवमेव । काङ्क्षमाणस्येच्छत इत्यर्थः ॥ २६ ॥

रा० टी०—तद्वचनाकारमाह—सचिव इत्यादिभिः । कपीन्द्रस्य सुग्रीवस्य अयं सचिवः तं सुग्रीवमेव काङ्क्षमाणस्य मम अन्तिकं समीपमागतः ॥ २६ ॥

गो० टी०—सचिव इति । उपागतः स एव सचिवद्वारेति शेषः ॥ २७ ॥

२७] ति० टी०—तमभ्यभाषाभिभाषस्वेति यावत् । वाक्येति । वाक्यज्ञं वाक्यरचनाभिज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमभ्यभाषेत्यन्वयः ॥ २७ ॥

रा० टी०—तमिति । वाक्यज्ञं तं सुग्रीवसचिवं हनुमन्तं स्नेहयुक्तं यथा भवति तथा मधुरैर्वाक्यैः अभ्यभाष अभिभाषस्व ॥ २७ ॥

गो० टी०—तमिति । स्नेहयुक्तं मयि सुग्रीवे च प्रीतियुक्तमित्यर्थः । अभ्यभाष अभिभाषस्व । अडागमपरस्मैपदे आर्षे । मन्त्रिणा स्वामिनो वचनं न नीतिरिति सौमित्रिं नियोजयति ॥ २८ ॥

२८] ति० टी०—विनयः प्रातिशाख्यादिज्ञानपूर्वकाभ्यासः । ऋग्वेदविषये तद्धीनो यो न भवति तेन । एकैकानुवाकेऽनुवाकान्तरसांकर्येण तद्धारणस्य दुष्करत्वायजुर्वेदधारणाहीनभिन्नेन । गायनविषयोहादेर्दुर्ज्ञेयत्वात्सामवेदज्ञानहीनभिन्नेनैवं प्रभाषितुं शक्यं न तद्धीनेनेत्यर्थः । षष्ठ्यर्थौ, शेषे वा । यद्वा तद्धीनैरेवं प्रभाषितुं न शक्यम् अशक्यमित्यर्थः । तेनायं सर्वथा तज्ज्ञ इति नोपेक्षार्ह इति व्यङ्ग्यम् ॥ २८ ॥

रा० टी०—अयं सकलवेदशास्त्रसंपन्न इति बोधयन्नाह—नेति । अऋग्वेदविनीतस्य साभिप्रायऋग्वेदाभ्यासरहितस्य पुरुषस्य एवंविधं प्रभाषितुं न शक्यम् । एवमन्यत्रापि योजनीयम् । अऋग्वेदविनीतादिविशेषणविशिष्टस्य न शक्यं न शक्यं न शक्यमित्यन्वयो वा । एतेन हनुमतो निखिलवेदाभिज्ञत्वं सूचितं तेन तस्यागाधबोधत्वं व्यक्तम् ॥ २८ ॥

गो० टी०—अथ चेतनोजीवनस्याचार्यमुखमन्तरेणासंभवादाचार्यलाभं दर्शयति—नानृग्वेदेत्यादिना । 'आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्रार्थदः शुचिः ॥ गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवंलक्षणसंपन्नो गुरुरित्यभिधीयते ॥' इत्युक्तमाचार्यलक्षणं दर्शयति । ऋग्वेदेषु विनीतस्य शिक्षितस्य विनयधारणवेदनानि सर्वत्र वेदेषु योज्यानि । यद्वा प्रतिवर्णं स्वरभूयस्त्वेन मनोनियमनेन सावधानोचार्यस्वादृग्वेदविनीतस्येत्युक्तिः । एकैकानुवाके अनुवाकान्तरवाक्यासांकर्येण धारणस्य दुष्करत्वायजुर्वेदधारिण इत्युक्तम् । ऊहरहस्यादिगर्भितगानविशेषाणां दुर्विज्ञेयत्वात् सामवेदविदुष इति । अथर्वणस्याध्ययनादिनियमाभावादनुक्तिः । एवं प्रभाषितुं देशं कथमिमं प्राप्तावित्यारभ्य उक्तरीत्या व्यक्तं वक्तुं न शक्यमिति । अनृग्वेदविनीतस्य एवं प्रभाषितुं न शक्यम्, अयजुर्वेदधारिण एवं प्रभाषितुं न शक्यम्,

१ काम्येयेति गो. पाठः । २ रूपिणमिति गो. पाठः । ३ उपागत इति गो. पाठः । ४ प्रेति गो. पाठः ।

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहुव्याहरताऽनेन न किंचिदपशब्दितम् ॥ २९ ॥
न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा । अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित् ॥ ३० ॥
अविस्तरमसंदिग्धमविलम्बितमव्यथम् । उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमस्वरम् ॥ ३१ ॥
संस्कारक्रमसंपन्नामद्रुतामविलम्बिताम् । उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥ ३२ ॥

असामवेदविदुषः एवं प्रभाषितुम् न शक्यमिति प्रत्येकमन्वयः। प्रत्येकं नञ्प्रयोगात् दादर्थं व्यतिरेकमुखेनोक्तिः। अनृग्वेदविनीतस्य 'उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम्' इत्यादिनोक्तसृष्टिस्थितिसंहारकर्तृत्वं वक्तुं न शक्यम्। ऐतरेयके हि "ब्रह्म वा इदमेक एवाग्र आसीत्" इत्यादिना तथात्वं प्रथमतः प्रतिपाद्यते । अयजुर्वेदधारिणः मानुषौ देवरूपिणाविति त्यादिना "अजायमानो बहुधा विजायते" इत्युक्तावतारहस्यं वक्तुं न शक्यम्। असामवेदविदुषः सुवर्णाभौ पद्मपत्रेक्षणाविति त्येवं भाषितुं न शक्यते। छान्दोग्ये हि "अथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इत्यारभ्य "तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" इत्याम्नायते ॥ २९ ॥

२९] ति० टी०—नन्वेदमात्राध्यायिना न किंचिद्राजमन्त्रादि ज्ञातुं शक्यं तत्राह—नूनमिति । कृत्स्नं पदतदर्थस्वरूपनिर्णयोपयोगिन्यायसहितं व्याकरणबोध्यसाधुत्वस्यार्थघटितत्वात्। अनेन सर्वज्ञत्वं सूचितम्। तथाश्रवणे हेतुमाह—बह्विति॥२९॥

रा० टी०—नूनमिति । बहुधा अनेकप्रकारं व्याकरणमनेन श्रुतमधीतम् अत एव बहु अनेकविधं व्याहरता कथयताऽनेन किंचित्र अपशब्दितम् अशुद्धं भाषितम् ॥ २९ ॥

गो० टी०—न केवलं वेदाध्ययनम् अङ्गाध्ययनं च कृतमित्याह—नूनमिति । तत्र हेतुमाह—बह्विति । अपशब्दितम् अपकृष्ट न शब्दितम् । अत्रादौ यदित्यध्याहार्यम् । व्याकरणं श्रुतम् अतो नापशब्दितम्, कृत्स्नं श्रुतम् अतो न किंचिदपशब्दितम् । प्रकृतिप्रत्ययसमाससंध्यादिषु किंचिदपि नापभ्रंशितमित्यर्थः। बहुधा श्रुतम् एकवारश्रवणे क्वचिदन्यथाभावोऽपि स्यात् ॥ ३० ॥

३०] ति० टी०—इङ्गितैरप्यसौ विश्वासयोग्य इत्याह—न मुखे इति । दोषः संविदितः व्यवहारकाले इति शेषः ॥ ३० ॥

रा० टी०—नेति । मुखादिषु अन्येषु पाण्यादिषु च दोषः मृषासंसर्गादिः न संविदितः ज्ञातः ॥ ३० ॥

गो० टी०—शिक्षा चानेन श्रुतेत्याह चतुर्भिः—न मुख इत्यादिभिः । लोके केषांचिद्व्यवहारदशायां मुखादिषु सर्वत्र यत्र कुत्रापि वा विकारो दृश्यते न तथात्रेति भावः। दोषः विकृतिः न संविदित इत्यनेन स्वेन सूक्ष्ममवलोकितमिति गम्यते । तदुक्तं शिक्षायाम् " गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ न शिरः कम्पयेद्धात्रं भ्रुवौ चाप्यक्षिणी तथा । तैलपूर्णमिवात्मानं तत्तद्वर्णे प्रयोजयेत्' इति ॥ ३१ ॥

३१] ति० टी०—अथ वचनरचनासौष्ठवमाह—अविस्तरमिति । नातिविस्तारमित्यर्थः । असंदिग्धमसंदिग्धार्थमसंदिग्धाक्षरं च । अविलम्बितम् अनेनास्खलद्गीष्टम् । अव्यथं न विद्यते श्रोतृश्रुतेर्व्यथा यस्मात्तादृशं तेनाश्रुतिकटुवर्णमित्यर्थः। उरस्थं मध्यमारूपेण, कण्ठगं वैखरीरूपेण कण्ठविवराच्छ्रोतृश्रोत्रं गतम्, अत एव मध्यमस्वरं नात्युच्चैर्नातिनीचैः ॥ ३१ ॥

रा० टी०—वाक्यरचनानैपुण्यमाह—अविस्तरमिति । अविस्तरं विस्ताररहितम् असंदिग्धं संदेहरहितवर्णार्थविशिष्टम् अविलम्बितं संबन्धविघातकविलम्बोच्चारणरहितम् अव्यथं श्रोतॄणां व्यथानिवर्तकं वर्णतोऽर्थतश्चातिमधुरमित्यर्थः, उरस्थं मध्यमारूपेण उरसि स्थितं कण्ठगं वैखरीत्वेन कण्ठान्निर्गतं मध्यमस्वरम् अत्युच्चैरतिनीचैरुच्चारणरहितं वाक्यं वर्तते एतस्येति शेषः ॥ ३१ ॥

गो० टी०—एवमुच्चारणशक्तिरुक्ता । अथ वाक्यप्रयोगचातुरीं दर्शयति—अविस्तरमिति । अविस्तरं शब्दप्रपञ्चरहितम् " प्रथने वावशब्दे " इति धात्वो निषेधात् "ऋ दोरप्" इत्यप्प्रत्ययः । असंदिग्धं पदवर्णसंदेहरहितम् । अविलम्बितं विलम्बितत्वे स्वाशक्तिः प्रकटिता स्यात् । अद्रुतं द्रुतोच्चारणे परप्रत्यायनं न स्यात् । उरःस्थं मन्द्रं कण्ठगं मध्यमम्, तादृशं वाक्यं मध्यमे स्वरे वर्तते न मन्द्रं न मध्यमं न द्रुतं न विलम्बितं चेत्यर्थः । इदं चतुर्दशदोषाभावानामुपलक्षणम् । तथाह शिक्षाकारः—" शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् । काकुस्वरं शीर्षगतं तथा स्थानविवर्जितम् ॥ विस्वरं विरसं चैव विश्लिष्टं विषमान्वितम् । व्याकुलं तालुभिर्जं च पाठदोषाश्चतुर्दश " इति । अन्यत्राप्युक्तम् " उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् । निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् " ॥ ३२ ॥

३२] ति० टी०—संस्कारक्रमसंपन्नां संस्काराणां क्रमे क्रमेण जनने संपन्नां समर्थाम् 'विशिष्टादपूर्वाविशेषरूपेण पदादीनां ग्रहणाय क्रमवत्तत्तद्वर्णाकारसंस्कारानन्तःकरण उत्पाय तत्क्रमेण क्रमवद्वर्णावभासपदवाक्यज्ञानम्' इति वाक्यप्रदीपादौ स्पष्टम् । तेन मध्यमस्योच्चारणं सूचितम्, तदाह—अद्रुतामविलम्बितामिति । अत एव हृदयहर्षिणीम् ॥ ३२ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—संस्कारेति । संस्कार-

१ वागीति गो. पाठः । २ गात्रेष्विति गो. पाठः । ३ अद्रुतमिति गो. पाठः । ४ मध्यमे स्वरे इति गो. पाठः । ५ अद्रुतामिति गो. पाठः । ६ हारिणीमिति गो. पाठः ।

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया । कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥ ३३ ॥
एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु । सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ॥ ३४ ॥
एवंगुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः । तस्य सिध्यन्ति सर्वेऽर्था दूतवाक्यप्रचोदिताः॥ ३५ ॥
एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम् । अभ्यभाषत वाक्यज्ञो वाक्यज्ञं पवनात्मजम् ॥ ३६ ॥
विदिता नौ गुणा विद्वन्सुग्रीवस्य महात्मनः । तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम् ॥ ३७ ॥
यथा ब्रवीषि हनुमन्सुग्रीववचनादिह । तत्तथा हि करिष्यावो वचनात्तव सत्तम ॥ ३८ ॥

क्रमेण शिक्षाव्याकरणादिजनितधारणाविशेषानुरोधेन संपन्नां संयुक्ताम् अत एव अद्रुतां यथोक्तवर्णग्रहणध्वंसकातिशीघ्रोच्चारणरहिताम् अविलम्बितां संबन्धविघातकविलम्बोच्चारणरहितां कल्याणीं कल्याणप्रदाम् अत एव हृदयहर्षिणीं वाचमुच्चारयति हनुमानिति शेषः ॥ ३२ ॥

गो० टी०–एवं पाठदोषा उक्ताः अथ तद्गुणानाह–संस्कारेति । संस्कारो व्याकरणकृता शब्दशुद्धिः व्यक्तपदत्वमिति यावत् । क्रमः वर्णानां क्रमिकता व्यक्ताक्षरत्वमिति यावत् । कल्याणीम् इतरगुणवतीं हृदयहारिणीं मधुरां वाणीम् उच्चारयति उच्चरति । तदिदमुक्तं शिक्षायाम् " माधुर्यमक्षरव्यक्तिः पदच्छेदस्तथाऽत्वरा। धैर्यं लयसमत्वं च षडेते पाठका गुणाः" इति॥३२॥

३२] ति० टी०–त्रिस्थानव्यञ्जनस्थया त्रिषु स्थानेषूरःकण्ठशिरःसु यद्व्यञ्जनमभिव्यक्तिस्तया तिष्ठति श्रोतृग्राह्यस्वरूपं लभते तादृश्या । अनेन 'नित्य एव स्फोटरूपः शब्दः' इति सूचितम् । नाराध्यते नानुकूल्यते ॥ ३३ ॥

रा० टी०–अनयेति । त्रिस्थानव्यञ्जनस्थया त्रिषु स्थानेषु उरःकण्ठशिरस्सु व्यञ्जनमभिव्यक्तिस्तेन तिष्ठति तया चित्रया अनया वाचा उद्यतासेः वधाय उद्यतखड्गस्यापि कस्यारेः चित्तं नाराध्यते प्रसाद्यते प्रसादयत एवेत्यर्थः ॥ ३३ ॥

गो० टी०–माधुर्यपराकाष्ठामाह–अनयेति । चित्रया आश्चर्यावहया । त्रिस्थानानि उरःकण्ठशिरांसि व्यज्यन्ते एषु वर्णा इति व्यञ्जनानि । त्रिस्थानरूपव्यञ्जनेषु तिष्ठतीति तथा । तथात्वं च न तदुत्पन्नत्वं शिरस्यत्वस्य निषिद्धत्वात् । शीर्षगतं तथेति ह्युदाहृतं किंतु उदात्तानुदात्तस्वरितवत्त्वम् । तथोक्तं शिक्षायाम् " अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कण्ठमूलीयः पार्श्वास्ये प्रचयस्तु" इति । नाराध्यते न तोष्यते । कस्येत्यस्य विवरणम्–उद्यतासेररेरपीति । उद्यतासेः छेत्तुमुद्धृतासेरित्यतिक्रूरतोक्तिः । अनेन हनुमदादिभिः रामादीनां संस्कृतभाषयैव व्यवहार इति गम्यते ॥ ३४ ॥

३४] ति० टी०–कार्याणां गतयः परिपाकाः ॥ ३४ ॥

रा० टी०–एवमिति । यस्य पार्थिवस्य एवंविधः एतत्सदृशो दूतो न भवेत् तस्य कार्याणां गतयः प्राप्तयः कथं सिध्यन्ति न सिध्यन्तीत्यर्थः ॥ ३४ ॥

गो० टी०–एवं हनुमता वाक्चातुरीमभिनन्य बुद्धिचातुरीमभिनन्दति–एवंविध इति । एवंविधः एवंप्रष्टा अस्मत्प्रश्नाव्याजेन कुलगोत्रनामधेयराज्यत्यागकारणादीनां प्रष्टा । गतयः सिद्धयः ॥ ३५ ॥

३५]ति०टी०–दूतवाक्यप्रचोदितास्तद्वाक्यबोधिताः॥३५॥

रा० टी०–एवमिति । यस्य राज्ञः कार्यसाधकाः दूताः एवंगुणगणैर्युक्ता भवन्ति तस्य सर्वे अर्थाः दूतवाक्यप्रचोदिताः सन्त एव सिध्यन्ति । एतेन नृपतिभिरेवंविधो दूतोऽवश्यं संपादनीय इति व्यञ्जितं तेन हनुमति रामस्य प्रीत्यतिशयः सूचितः ॥ ३५ ॥

गो० टी०–उक्तमर्थमन्वयमुखेनापि दर्शयति–एवमिति । दूतवाक्यप्रचोदिताः दूतवाक्यमूला एव सिध्यन्ति न प्रधानापेक्षा इति भावः ॥ ३६ ॥

३६] ति० टी०–एवमुक्तः रामेणेति शेषः ॥ ३६ ॥

रा० टी०–एवमिति । एवमुक्तः रामेणेति शेषः, सौमित्रिः वाक्यज्ञं सुग्रीवसचिवमभ्यभाषत ॥ ३६ ॥

गो० टी०–एवमिति । वाक्यज्ञो वाक्यज्ञमित्युक्त्या यथारीत्या हनुमतोक्तं तथैव सौमित्रिणाऽपीत्युच्यते ॥ ३७ ॥

३७] ति० टी०–नावावयोः । तमेव सुग्रीवमेव । मार्गावो मार्गयावः ॥ ३७ ॥

रा० टी०–तद्भाषणाकारमाह–विदिता इति । हे विद्वन्! नौ आवयोः सुग्रीवगुणा विदिताः ज्ञाताः अत एव आवां तं सुग्रीवमेव मार्गावः अन्वेषयावः ॥ ३७ ॥

गो० टी०–विदिता इति । विद्वन्निति हनुमत्संबोधनम् ॥ ३८ ॥

३८] ति० टी०–यथा ब्रवीषि सख्यमिच्छतीति यदवादीः तत्तथैव करिष्याव इत्यर्थः ॥ ३८ ॥

रा० टी०–यथेति । हे हनुमन् ! सुग्रीववचनात् यथा यत् त्वमिह ब्रवीषि तत् तव वचनात् त्वदुक्तैः करिष्यावः॥३८॥

गो० टी०–यथेति । अनेन एतावत आचार्याभिमाननिष्ठाः तेषां कार्यं तद्वचनादेव करिष्यामीति भगवतः प्रतिज्ञा सूचिता ॥ ३९ ॥

---

१ सर्वार्था इति गो. पाठः ।

तत्तस्य वाक्यं निपुणं निशम्य प्रहृष्टरूपः पवनात्मजः कपिः ।
मनः समाधाय जयोपपत्तौ सख्यं तदा कर्तुमियेष ताभ्याम् ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ।

हनुमाञ्छ्रीरामं प्रति पम्पाऽऽगमनकारण पप्रच्छ । रामनोदितो लक्ष्मणः सीतावियोगान्त रामेतिवृत्त विनिवेद्य कबन्धप्रेरणात्सुग्रीवसख्यसपादनमत्रागमने हेतुरित्युवाच । सुग्रीवस्यापि रामसमानदुःखता निरूपयन्हनुमान्रामप्रसादापेक्षां दर्शयन्प्रकटितस्वस्वरूपस्तौ स्कन्धे निवेश्य ऋष्यमूकं प्राप ।

ततः प्रहृष्टो हनुमान्कृत्यवानिति तद्वचः । श्रुत्वा मधुरभावं च सुग्रीवं मनसा गतः ॥ १ ॥
भाव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः । यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतम् ॥ २ ॥
ततः परमसंहृष्टो हनूमान्प्लवगोत्तमः । प्रत्युवाच ततो वाक्यं रामं वाक्यविशारदम् ॥ ३ ॥
किमर्थं चेह वनं घोरं पम्पाकाननमण्डितम् । आगतः सानुजो दुर्गं नानाव्यालमृगायुतम् ॥ ४ ॥

३९] ति० टी०–जयोपपत्तौ सुग्रीवस्येति शेषः । ताभ्यां रामसुग्रीवाभ्याम् ॥ ३९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०–तदिति । तत् स्वप्रार्थिताङ्गीकारबोधकं तस्य लक्ष्मणवाक्यं निशम्य श्रुत्वा प्रहृष्टरूपः पवनात्मजः जयोपपत्तौ सुग्रीवविजयसिद्धौ मनः समाधाय ताभ्यां रामलक्ष्मणाभ्यां सख्यं कर्तुमियेष ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे तृतीयः सर्गः ॥ ३ ॥

गो० टी०–तदिति । जयोपपत्तौ वालिजयोपपत्तिनिमित्तम् ॥ ४० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०–तद्वचः 'सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः । तमेव काङ्क्षमाणस्य ममान्तिकमुपागतः ॥' इति रामवचः 'महात्मनः' इति सोपचारप्रयोगतः सुग्रीवविषये मधुरभावं सौम्यभावं श्रुत्वा 'तमेव काङ्क्षमाणः' इत्यनेन सुग्रीवे रामः किंचित्कृत्यवानिति विज्ञाय प्रहृष्टः सुग्रीवं सुग्रीवाभिमतसिद्धिं मनसा गतो दृष्टवान् ॥ १ ॥

रा० टी०–लक्ष्मणवचनश्रवणानन्तरकालिकं हनुमद्वृत्तान्तमाह–तत इत्यादिभिः । मधुरभावं सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मन इत्यादिरामोक्त्या तन्मधुरस्वभावबोधकं कृत्यवान् । तमेव काङ्क्षमाण इति लक्ष्मणोक्त्या रामः किंचित्कृत्याकाङ्क्ष इति बोधकं च तत् रामलक्ष्मणवचः श्रुत्वा प्रहृष्टो हनुमान् सुग्रीवं सुग्रीवकार्यसिद्धिं मनसा गतः निश्चितवान् ॥ १ ॥

गो० टी०–अथाचार्यमुखेन चेतनलाभश्रुतेर्थं–तत इत्यादि । मधुरसंभाषं मधुरभाषणं तद्वचः श्रुत्वा कृत्यवान् कार्यवान् रामः इति हेतोः प्रहृष्टः सन् सुग्रीवं मनसा गतः तमेव चावां मार्गाव इति वचनभावतया रामस्य कृत्यवत्त्वज्ञानम् ॥ १ ॥

२] ति० टी०–तदेव विवृणोति–भाव्य इति । अवश्यंभावीत्यर्थः । यदयं महापुरुषः कृत्यवान्, प्रयोजनसापेक्षः प्राप्तः एतत्कृत्यं चोपागतं सुग्रीवं प्राप्तमित्यर्थः ॥ २ ॥

रा० टी०–तन्निश्चयमेवाह–भाव्य इति । अयं रामः यत् यस्मात् कृत्यवान् प्रयोजनापेक्षः सन् प्राप्तः कृत्यं तत्प्रयोजनं च एतदुपागतम् एतं सुग्रीवमुपागतं सुग्रीवसाध्यत्वेन निश्चितमित्यर्थः, तस्माद्धेतोः सुग्रीवराज्यागमो भाव्यः अवश्यं भविष्यतीत्यर्थः ॥ २ ॥

गो० टी०–मनसा गत इत्येतदर्शयति–भव्य इति । यस्मादयं कृत्यवान् प्राप्तः तस्मात् महात्मनः महाभाग्यस्य तस्य सुग्रीवस्य राज्यागमः भव्यः भावी । एतत् कृत्यं राज्यागमनरूपकार्यम् उपागतं समीपे आगतं निष्पन्नप्रायमित्यर्थः ॥ २ ॥

३] ति०टी०–एवं सुहृदयत्वमवगत्य स्वस्वाम्युक्तं पृच्छति–तत इति ॥ ३ ॥

रा० टी०–तत इति । ततः सुग्रीवराज्यप्राप्तिनिश्चयाद्धेतोः परमसंहृष्टो हनुमान् ततस्तं रामं प्रत्युवाच ॥ ३ ॥

गो० टी०–तत इति । अस्मिन् श्लोके प्लवगर्षभ इत्यत्र गकारो गायत्र्याः दशमाक्षरम् । नवसहस्रश्लोका गता ॥ ३ ॥

४] ति० टी०–पम्पाकाननेन मण्डितमलंकृतं घोर मन्यदिति शेषः ॥ ४ ॥

१ संभाषमिति गो. पाठः । २ भव्य इति गो. पाठः । ३ हनुमान् प्लवगर्षभ इति गो. पाठः । ४ विशारद इति गो. पाठः । ५ त्वमिति गो. पाठः ।

तस्य तद्वचनं श्रुत्वा लक्ष्मणो रामचोदितः । आचचक्षे महात्मानं रामं दशरथात्मजम् ॥ ५ ॥
राजा दशरथो नाम द्युतिमान्धर्मवत्सलः । चातुर्वर्ण्यं स्वधर्मेण नित्यमेवाभिपालयन् ॥ ६ ॥
न द्वेष्टा विद्यते तस्य स तु द्वेष्टि न कंचन । स तु सर्वेषु भूतेषु पितामह इवापरः ॥ ७ ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः । तस्यायं पूर्वजः पुत्रो रामो नाम जनैः श्रुतः ॥ ८ ॥
शरण्यः सर्वभूतानां पितुर्निर्देशपारगः । ज्येष्ठो दशरथस्यायं पुत्राणां गुणवत्तरः ॥ ९ ॥
राजलक्षणसंयुक्तः संयुक्तो राज्यसंपदा । राज्याद्भ्रष्टो मया वस्तुं वने सार्धमिहागतः ॥ १० ॥
भार्यया च महाभाग सीतयाऽनुगतो वशी । दिनक्षये महातेजाः प्रभयेव दिवाकरः ॥ ११ ॥
अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः । कृतज्ञस्य बहुज्ञस्य लक्ष्मणो नाम नामतः ॥ १२ ॥
सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः । ऐश्वर्येण विहीनस्य वनवासे रतस्य च ॥ १३ ॥

रा० टी०–तत्प्रतिवचनाकारमाह–किमर्थमिति । पम्पाकाननमण्डितं पम्पावनेन शोभितं नानाव्यालमृगायुतम् अत एव दुर्गं मनुष्यैर्दुर्गमं घोरं वनं सानुजस्त्वं किमर्थमागतः ॥ ४ ॥

गो० टी०–किमर्थमिति । पम्पाकाननेन पम्पोपवनेन मण्डितं वनं दण्डकारण्यम् । दण्डकारण्येऽप्येतत्प्रदेशं किमर्थमागत इति भावः । अनुजत्वमाकारसाम्यात्तमभ्यभाषेति नियोजनाचेति ॥ ४ ॥

५–६] ति० टी०–रामचोदितः इङ्गितेनेति शेषः । आचचक्षे बोधितवान् ॥ ५ ॥ ६ ॥

रा० टी०–तस्येति । तस्य हनुमतः तद्वचनं श्रुत्वा रामचोदितः लक्ष्मणः महात्मानं दशरथात्मजं रामम् आचचक्षे कथयामास ॥ ५ ॥

रा० टी०–तत्कथनाकारमाह–राजेति । दशरथो नाम राजा स्वधर्मेण राजनीत्या चातुर्वर्ण्यं नित्यमभ्यपालयत् ॥ ६ ॥

गो० टी०–तस्येति । महात्मत्वेन दशरथात्मजत्वेन चाचचक्ष इत्यर्थः ॥ ५ ॥ ६ ॥

७–८] ति० टी०–पितामह इव पालकत्वेनेत्यर्थः॥७॥८॥

रा० टी०–नेति । स दशरथः कंचन न द्वेष्टि अत एव तस्य दशरथस्य द्वेष्टा न विद्यते अत एव सः सर्वभूतेषु अपरः पितामह इव अभवदिति शेषः ॥ ७ ॥

रा० टी०–अग्नीति । आप्तदक्षिणैः परिपूर्णदक्षिणाविअग्निष्टोमादिभिः यज्ञैः इष्टवान् दशरथ इति शेषः । तस्य दशरथस्य पूर्वजः ज्येष्ठः पुत्रः जनैः श्रुतः विख्यातः रामो नामायम् ॥ ८ ॥

गो० टी०–न द्वेष्टेति । सर्वेषु भूतेषु मध्ये पितामह इव श्रेष्ठ इत्यर्थः ॥ ७ ॥ ८ ॥

९] ति० टी०–निर्देशो नियोगस्तत्पारगः । तस्य समाप्तकल्पत्वादेवमुक्तम् ॥ ९ ॥

रा० टी०–शरण्य इति । सर्वभूतानां शरण्यः शरणेहितः पुत्राणां मध्ये गुणवत्तरः राजलक्षणसंयुक्तः राज्यसंपदा संयुक्तः दशरथस्य ज्येष्ठः पुत्रः पितुर्निर्देशपारगः निर्देशपाराय आज्ञापितसमाप्तये गच्छति सः अत एव राज्याद्भ्रष्टस्त्यक्तराज्यः दिनक्षये प्रभया दिवाकर इव सीतया भार्ययाऽनुगतोऽयं रामः वने वस्तुं मया सार्धमिहागतः । श्लोकत्रयमेकान्वयि ॥ ९–११ ॥

गो० टी०–वीर इति । पुत्राणां, पुत्राणां मध्ये ॥ ९ ॥

१०–११] ति० टी०–संयुक्तः संयुज्यमानः । भ्रष्टः किंचिन्निमित्तवशात् ॥ १० ॥ ११ ॥

गो० टी०–राज्यादित्यादि । भार्ययेति । ऐश्वर्यभ्रंशदशायामप्यनुवर्तनयोतनाय दिनक्षय इत्युक्तम् ॥ १० ॥ ११ ॥

१२–१३] ति० टी०–अवरः कनीयान् दास्यमुपागतः अस्येति शेषः ॥ १२ ॥ १३ ॥

रा० टी०–अहमिति । कृतज्ञस्य बहुज्ञस्य अस्य रामस्य गुणैर्विलक्षणवात्सल्यादिभिर्दास्यमुपागतः प्राप्तः लक्ष्मणो नाम अवरो भ्राताऽहम् ॥ १२ ॥

रा० टी०–सुखार्हस्येति । सुखार्हस्य सकलसुखयोग्यस्य महार्हस्य महेन सर्वपूज्यब्रह्मादित्रयेण अर्हस्य पूज्यस्य अत एव सर्वभूतहितात्मनः सर्वभूतहितः आत्मा यस्य तस्य वनवासे रतस्य अत एव ऐश्वर्येण विहीनस्य विहीनत्वेन प्रतीयमानस्य अस्य रामस्य भार्या रहिते आवाभ्यां शून्यसमये कामरूपिणा रक्षसा अपहृता येनापहृता तद्रक्षश्च न ज्ञायते । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–अहमिति । भवानस्य क इत्याकाङ्क्षायामाह–अस्यावरो भ्राता एतदभिप्रायेण भ्राताऽस्मि अहं तु गुणैर्दास्यमुपागतः गुणवशीकृतहृदयः सन् तस्य दासोऽस्मि । यद्यपि परवानस्मीत्यादौ स्वरूपप्रयुक्तदास्यमुक्तं तथापि योग्यताप्रकर्षात् गुणोक्तम्भितं तदास्यमिति तदविरोधो द्रष्टव्यः । उपेत्यनेन

१ अभ्यपालयदिति गो. रा. पाठः । २ न च स द्वेष्टीति गो. पाठः । ३ चेति गो. पाठः । ४ वीर इति गो पाठः । ५ तम इति गो. पाठः । ६ संपन्न इति गो. पाठः । ७ राजेति गो. पाठः । ८ तेजा इति गो. पाठः । ९ चेति गो. पाठः । १० वनवासाश्रितस्येति गो. पाठः ।

रक्षसाऽपहृता भार्या रहिते कामरूपिणा । तच्च न ज्ञायते रक्षः पत्नी येनास्य वा हृता ॥ १४ ॥
दनुर्नाम दितेः पुत्रः शापाद्राक्षसतां गतः । आख्यातस्तेन सुग्रीवः समर्थो वानराधिपः ॥ १५ ॥
स ज्ञास्यति महावीर्यस्तव भार्यापहारिणम् । एवमुक्त्वा दनुः स्वर्गं भ्राजमानो[3] दिवं गतः ॥१६ ॥
एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः । अहं चैव चै रामश्च सुग्रीवं शरणं गतौ ॥ १७ ॥
एष दत्त्वा च वित्तानि प्राप्य चानुत्तमं यशः । लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति॥ १८ ॥
सीता[1] यस्य स्नुषा चासीच्छरण्यो धर्मवत्सलः । तस्य पुत्रः शरण्यस्य सुग्रीवं शरणं गतः ॥ १९ ॥
सर्वलोकस्य धर्मात्मा शरण्यः शरणं पुरा । गुरुर्मे राघवः सोऽयं सुग्रीवं शरणं गतः ॥ २० ॥
यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः । स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षते ॥ २१ ॥

सर्वदेशसर्वकालसर्वावस्थोचितसर्वविधकैङ्कर्यं प्राप्त इत्युच्यते । इदमपि कैङ्कर्यं तन्मुखोल्लासार्थं न तु मदर्थमिति आह-कृतज्ञस्य बहुज्ञस्येति । अल्पमपि कृतं बहुतया जानत इत्यर्थः । इदमपि कैङ्कर्यं सहजमित्याशयेनाह-नान्ना लक्ष्मणो नामेति । स्वनामतः कैङ्कर्यलक्ष्मीसंपन्न इति प्रसिद्धः । सुखेत्यादिश्लोकद्वयमेकान्वयम्, यद्वा प्रथमश्लोकस्य पूर्वेणान्वयः । सहजत्वमुपपादयति-सुखेति । महार्हस्य ऐश्वर्यसंपन्नस्य वनवासाश्रितस्य दुःखितस्येत्यर्थः । तथा च समृद्धिदशायामसमृद्धिदशायां च दास्योक्त्या सहजत्वमुपपादितम् । सहजमेव कैङ्कर्यं गुणास्तु तद्वर्धका इति भावः ॥ १२ ॥ १३ ॥

१४] ति० टी०-रहिते आवाभ्यां रहिते काले न ज्ञायते विशिष्येति शेषः ॥ १४ ॥

गो० टी०-रक्षसेति । रहिते आवाभ्यां रहितदेशे ॥१४॥

१५] ति० टी०-दनुः कबन्धः 'स ज्ञास्यति' इत्याख्यातः ॥ १५ ॥

रा० टी०-दनुरिति । दनुर्नाम दितेः पुत्रः शापात् हेतोः राक्षसतां गतः प्राप्तः मार्गे आवाभ्यां सङ्गत इति शेषः, तेन राक्षसेन समर्थः सुग्रीवः आख्यातः कथितः ॥ १५ ॥

गो० टी०-दनुरिति । दनुः दनुवंशजः कबन्धः दितेः पुत्रः पुत्रप्रायः तेन सुग्रीवः समर्थ इत्याख्यातः ॥ १५ ॥

१६-१७] ति० टी०-स्वर्गं गन्तुं दिवमाकाशं गत उत्पतितः ॥ १६ ॥ १७ ॥

रा० टी०-तत्कथनप्रकारमाह-स इति । महावीर्यः स सुग्रीवः तव भार्यापहारिणं ज्ञास्यति एवमुक्त्वा भ्राजमानो दनुः तत्पुत्रः सुखं यथा भवति तथा स्वर्गं गतः अत एव अहं रामश्च शरणम् आश्रयभूतं रक्षाकाङ्क्षिणं वा सुग्रीवं गतौ प्राप्तौ, पृच्छतः ते तवाग्रे एतत्सर्वं याथातथ्येन आख्यातं कथितम् । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०-स इति । स्पष्टम् ॥ १६ ॥

गो० टी०-एतदिति । ते तुभ्यं याथातथ्येनाख्यातम्॥१७॥

गो० टी०-अहमित्यर्धम् ॥ १८ ॥

१८] ति० टी०-नाथं रक्षकमिच्छति दैवगत्येति शेषः१८

रा० टी०-रामे रक्षणसामर्थ्यमस्तीति सुग्रीवविश्वासं द्रढयितुं रामगुणान्पुनः पुनर्वर्णयन्नाह-एष इत्यादिभिः । पूर्वमयोध्यायामिति शेषः, वित्तानि दत्त्वा याचकेभ्यो यथेच्छं समर्प्य अनुत्तमं सर्वोत्कृष्टं यशः प्राप्य नाथं रक्षाकामं सुग्रीवमिच्छति रक्षकत्वेन प्राप्तुं वाञ्छतीत्यर्थः ॥ १८ ॥

गो० टी०-परत्वसौशील्ये दर्शयति-एष इति । त्रैलोक्यनाथत्वमेव सुग्रीवनाथत्वेच्छायां हेतुः परत्वं विना सौशील्यस्यागुणत्वात् । इच्छति लप्स्यते न वा स्वयमभिलषति अपर्याप्तयोज्या हि स्वतन्त्रा इति भावः । चकारेण लब्धा चेत्युच्यते । अनुत्तमं परत्वापेक्षयाऽवतारप्रयुक्तातिशयवत् । लोकनाथः सर्वलोकैर्याच्यमानः सर्वस्वामी च "नाथृ नाथृ याच्ञोपतापैश्वर्याशीःषु" धातुः ॥ १९ ॥

१९-२१] ति० टी०-यः शरण्यो धर्मवत्सलश्चासीदित्यर्थः ॥ १९-२१ ॥

रा० टी०-सीतेति । यस्य स्नुषा पुत्रवधूः सीता आसीत् तस्य शरण्यस्य पुत्रः शरण्यः शरणहितः धर्मवत्सलः धर्मविषयकवात्सल्यवान् रामः शरणं रक्षाकामं सुग्रीवं गतः ॥ १९ ॥

गो० टी०-तदेव सौशील्यं प्रकारान्तरेणाह-पितेति । शरण्यः प्राप्यः । शरणं रक्षकम् ॥ २० ॥

रा० टी०-सर्वेति । सर्वलोकस्य शरण्यः शरणहितः शरणं रक्षकश्च मे गुरू राघवः शरणं रक्षाकामं सुग्रीवं गतः प्राप्तः ॥ २० ॥

गो० टी०-शरण्य इत्युक्तं विशेषयति-सर्वलोकस्येति । गुरुः अग्रजः ॥ २१ ॥

रा० टी०-यस्येति । यस्य रामस्य प्रसादे इमाः प्रजाः सततं प्रसीदेयुः स रामः वानरेन्द्रस्य सुग्रीवस्य प्रसादं प्रसन्नतामभिकाङ्क्षते ॥ २१ ॥

गो० टी०-यस्य प्रसाद इति । इमाः प्रजाः सततं प्रसीदेयुः तत्प्रसादलब्धसकलपुरुषार्थतया सर्वदा प्रसन्नचित्ता

१ सेति गो. चाहतेति रा.पाठः । २ वानरर्षभ गो.पाठः। ३ गतः सुखमिति गो.पाठः। ४ ह्रीति गो.पाठः। ५ पिता यस्य पुरा ह्यासीदिति गो. पाठः।

येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः । मानिताः सततं राज्ञा सदा दशरथेन वै ॥ २२ ॥
तस्यायं पूर्वजः पुत्रस्त्रिषु लोकेषु विश्रुतः । सुग्रीवं वानरेन्द्रं तु रामः शरणमागतः ॥ २३ ॥
शोकाभिभूते रामे तु शोकार्ते शरणं गते । कर्तुमर्हति सुग्रीवः प्रसादं सह यूथपैः ॥ २४ ॥
एवं ब्रुवाणं सौमित्रिं करुणं साश्रुपातनम् । हनूमान्प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ २५ ॥
ईदृशा बुद्धिसंपन्ना जितक्रोधा जितेन्द्रियाः । द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शनमागताः ॥ २६ ॥
स हि राज्याच्च विभ्रष्टः कृतवैरश्च वालिना । हृतदारो वने त्रस्तो भ्रात्रा विनिकृतो भृशम्॥ २७ ॥
करिष्यति स साहाय्यं युवयोर्भास्करात्मजः । सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे २८ ॥
इत्येवमुक्त्वा हनुमाञ्श्लक्ष्णं मधुरया गिरा । बभाषे साधु गच्छामः सुग्रीवमिति राघवम् ॥ २९ ॥
एवं ब्रुवन्तं धर्मात्मा हनूमन्तं स लक्ष्मणः । प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवम् ॥ ३० ॥
कपिः कथयते हृष्टो यथाऽयं मारुतात्मजः । कृत्यवान्सोऽपि संप्राप्तः कृतकृत्योऽसि राघव ३१ ॥

भवेयुः । वानरेन्द्रस्य स्वप्रसाद्यप्रजैकदेशक्षुद्रतरजनस्य प्रसादमभिकाङ्क्षते स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वादिति भावः ॥२२॥

२२-२३] ति० टी०-सर्वगुणोपेताः मूर्धाभिषिक्ता इति यावत् । सदा प्रतिदिनम् सततमनुक्षणम् ॥ २२ ॥ २३ ॥

रा० टी०-येनेति । येन दशरथेन पृथिव्यां सर्वपार्थिवा मानिताः स्वसेवकत्वेन सत्कृताः तस्य पूर्वजः पुत्रः अयं रामः शरणं रक्षाकामं सुग्रीवम् आगतः । एतेन सुग्रीवेप्सितसिद्धिरवश्यं भवितेति सूचितं तेन तस्य भाग्यातिशयः सूचितः । श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०-येनेत्यादिश्लोकद्वयमेकान्वयम् । येन सततं सर्वगुणोपेताः सर्वोपचारोपेता यथा भवन्ति तथा सदा मानिताः । वानरेन्द्रं वनमात्रप्रसिद्धशाखामृगमिति सौशील्यातिशयध्वनिः ॥ २३ ॥ २४ ॥

२४] ति० टी०-शोकाभिभूते शोकाविष्टे । शोकार्ते शोकपीडिते ॥ २४ ॥

रा० टी०-शोकेति । शोकाभिभूते शोकपराभवकारिणि इदानीं शोकार्ते शोकपीडितत्वेन प्रतीयमाने रामे शरणं रक्षाकामं सुग्रीवं गते प्राप्ते सति सुग्रीवः यूथपैः सह प्रसादं स्वप्रसन्नतां कर्तुमर्हति । एतेन इतःप्रभृति सुग्रीवे भयं न प्राप्स्यतीति सूचितम् ॥ २४ ॥

गो० टी०-शोकेति । शोकेनाभिभूते शोकपरतन्त्रे । शोकार्ते शोकपीडिते । कर्मपरतन्त्रं शोकाकुलं स्वजनमालोक्य स्वयं शोकाकुलस्याचार्यस्रुखं विनोभयशोकानुद्धारादिति भावः ॥२५॥

२५] ति० टी०-साश्रुपातनमस्माकमप्यन्यशरणापेक्षेत्यश्रुपातनसहितम् ॥ २५ ॥

रा० टी०-एवमिति । एवं ब्रुवाणं साश्रुपातनम् अश्रुपातनसहितं करुणं दयावन्तं सौमित्रिं हनूमान् प्रत्युवाच॥२५॥

गो० टी०-एवमिति । साश्रुलोचनमिति रामदुःखदर्शनादुःखितत्वमुच्यते ॥ २६ ॥

२६] ति० टी०-द्रष्टव्या द्रष्टुं योग्याः ॥ २६ ॥

रा० टी०-तद्वचनाकारमाह-ईदृशेति । ईदृशाः भवत्सदृशा बुद्धिसंपन्नाः दर्शनमस्मद्दृष्टिपथं प्राप्ताः दिष्ट्या अतिभाग्योदयमेतत् अत एव वानरेन्द्रेण सुग्रीवेण द्रष्टव्याः समीपतोऽवलोकयितव्याः एतेन तत्र भवद्भ्यां गन्तव्यमिति सूचितम् ॥ २६ ॥

गो० टी०-ईदृशा इति । द्रष्टव्याः अन्वेषितव्याः ॥ २७ ॥

२७] ति० टी०-स हीत्यनेन तस्यापि सहायापेक्षत्वं दर्शितम् ॥ २७ ॥

रा० टी०-तत्र गमने भवतोऽपि प्रयोजनं सेत्स्यतीत्याह—स इति द्वाभ्याम् । स सुग्रीवः वालिना कृतवैरः अत एव विनिकृतः निःसारितः अत एव राज्याद्विभ्रष्टः अत एव हृतदारः अत एव त्रस्तः सन् वने वसतीति शेषः, अतः अस्माभिः सह भास्करात्मजः स सुग्रीवः सीतायाः परिमार्गणे अन्वेषणे साहाय्यं करिष्यति। श्लोकद्वयमेकान्वयि ॥ २७॥२८॥

गो० टी०-स हीति । विनिकृत वञ्चितः ॥ २८ ॥

२८-३०] ति० टी०-यदेवम्, अतः परिमार्गणे साहाय्यं करिष्यतीत्यन्वयः ॥ २८-३० ॥

गो० टी०-करिष्यतीति । परिमार्गणे साहाय्यं करिष्यति ततः परं भवतोरग्रे का शत्रुवार्तेति भावः ॥ २९ ॥

रा० टी०-इतीति । मधुरया गिरा इत्येवमुक्त्वा साधु यथा भवति तथा सुग्रीवं गच्छावः इति श्लक्ष्णं वचः हनुमान् राघवं बभाषे ॥ २९ ॥

गो० टी०-इतीति । बभाषे पुनरपीति शेषः ॥ ३० ॥

रा० टी०-एवमिति । धर्मात्मा लक्ष्मणः एवं ब्रुवन्तं हनुमन्तं यथान्यायं प्रतिपूज्य सत्कृत्य राघवं राममिदं प्रोवाच ॥ ३० ॥

गो० टी०-एवमिति । यथान्यायं दूतानुरूपम् ॥ ३१ ॥

३१] ति० टी०-सोऽपि त्वया कृत्यवानिति यथा कथयते तथा जाने । एनं देशं संप्राप्तस्त्वं कृतकृत्योऽसीत्यर्थः॥३१॥

---

१ हरियूथप इति गो. पाठः । २ लोचनमिति गो. पाठः । ३ हनुमानिति गो. पाठः । ४ त्यक्त इति गो. पाठः । ५ सोऽभिगच्छेमेति गो. पाठः । ६ ब्रुवाणमिति गो. पाठः ।

प्रसन्नमुखवर्णश्च व्यक्तं हृष्टश्च भाषते । नानृतं वक्ष्यते वीरो हैनूमान्मारुतात्मजः ॥ ३२ ॥
ततः स सुमहाप्राज्ञो हैनूमान्मारुतात्मजः । जगामादाय तौ वीरौ हरिराजाय राघवौ ॥ ३३ ॥
भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः । पृष्ठमारोप्य तौ वीरौ जगाम कपिकुञ्जरः ॥ ३४ ॥
स तु विपुलयशाः कपिप्रवीरः पवनसुतः कृतकृत्यवत्प्रहृष्टः ।
गिरिवरमुरुविक्रमः प्रयातः स शुभमतिः सह रामलक्ष्मणाभ्याम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः

मलयस्थ सुग्रीवमुपस्थितो हनुमान्मया राघवौ ऋष्यमूकं प्रापिताविति विनिवेद्य तयोर्वृत्तं न्यवेदीत् । श्रुत्वा तद्वृष्टः सुग्रीवः परिधृतमानुषवेषो रामसुपेत्य सप्रशस प्रसारितपाणिर्मर्यादाग्रहणाय पाणिग्राह प्रार्थयते । रामः पाणिग्रहणपूर्वकं सुग्रीवं पर्यष्वजत । एवं तयोरग्निसाक्षिके सख्ये निवृत्ते निवेदितस्ववृत्तः सुग्रीवो वालिवधमयाचत । रामस्तं प्रतिजज्ञे ।

ऋष्यमूकात्तु हनुमान्गत्वा तं मलयं गिरिम् । आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥ १ ॥

रा० टी०–तद्वचनाकारमाह–कपिरिति । मारुतात्मजोऽयं कपिः हृष्टः सन् यथा यथावत्कथयते तदाकारमाह सुग्रीवोऽपि कृत्यवान् त्वत्तः स्वप्रयोजनसिद्ध्यभिलाषी अतः संप्राप्तः इहागतस्त्वं कृतकृत्यः सिद्धस्वप्रयोजनोऽसि । एतेन नष्टाश्वदग्धरथन्यायेन द्वयोः सख्यमेव द्वयोः कार्यसाधकं भवितेति ध्वनितम् ॥ ३१ ॥

गो० टी०–कपिरिति । अयं हृष्टः सन् यथा यथार्थं कथयते यथार्थकथने हृष्टत्वं हेतुः । सीतापरिमार्गणं करिष्यतीति यथार्थमेव । सोऽपि सुग्रीवः कृत्यवान् प्राप्तः जातः तस्मात् कृतकृत्योऽसि ॥ ३२ ॥

३२-३३] ति० टी०–उक्तं समर्थयते—प्रसन्नेति । मुखवर्णो मुखशोभा ॥ ३२ ॥ ३३ ॥

रा० टी०–प्रसन्नेति । हृष्टः अत एव प्रसन्नमुखवर्णः मारुतात्मजो हनुमान् व्यक्तं स्पष्टं भाषते अनृतं च न वक्ष्यते वक्ति ॥ ३२ ॥

गो० टी०–हृष्टपदसूचितं विवृणोति–प्रसन्नेति । वक्ष्यते वक्ष्यति अनृतं न वदेदित्यर्थः ॥ ३३ ॥

रा० टी०–हनुमद्वृत्तान्तमाह–तत इति । मारुतात्मजो हनुमान् वीरौ तौ राघवौ आदाय हरिराजाय सुग्रीवाय जगाम " गत्यर्थानां–" इति कर्मणि चतुर्थी ॥ ३३ ॥

गो० टी०–तत इति । हरिराजाय वानरराजाय ॥ ३४ ॥

३४] ति० टी०–वानरं वानरस्येदम् । आर्षोऽण् ॥ ३४ ॥

रा० टी०–गमनाकारमाह–भिक्षुरूपमिति । कपिकुञ्जरः कपिश्रेष्ठो हनुमान् भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः स्वीकारवान् सन् वीरौ रामलक्ष्मणौ पृष्ठमारोप्य जगाम ॥ ३४ ॥

गो० टी०–उक्तं विवृणोति–भिक्षित्रेति ॥ ३५ ॥

३५] ति० टी०–उक्तं संगृह्णाति—स त्विति । कृतकृत्यवत्तदर्हम् । गिरिवरं ऋष्यमूकम् ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०–स इति । विपुलयशाः बहुयशोविशिष्टः कृतकृत्यवत्सुग्रीवो रामश्च कृतकृत्य इति वक्ता उरुविक्रमः पवनसुतः गिरिवरमृष्यमूकं रामलक्ष्मणाभ्यां सह प्रयातः ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चतुर्थः सर्गः ॥ ४ ॥

गो० टी०–स त्विति । विपुलयशाः सर्वदेववरप्रसादेन विशालकीर्तिः कपिप्रवीरः सुग्रीवमपि नियन्तुं समर्थः अनेन भगवल्लाभ आचार्याधीन इत्युक्तम् ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

१] ति० टी०–ऋष्यमूकादिति । ऋष्यमूके सुग्रीववासस्थाने राघवौ स्थापयित्वा, ततः सुग्रीवानयनार्थं ऋष्यमूकैकदेशं मलयाख्यं गिरिं गत्वेत्यन्वयः ॥ १ ॥

रा० टी०–रामलक्ष्मणनयनानन्तरकालिकं हनुमद्वृत्तान्तमाह–ऋष्यमूकादित्यादिभिः । ऋष्यमूकात् मलयं तदेकदेशमलयाभिधं गिरिं हनुमान्गत्वा कपिराजाय सुग्रीवाय राघवौ रामलक्ष्मणावाचचक्षे । एतेन राघवौ ऋष्यमूके एव हनुमता संस्थापिताविति सूचितम् ॥ १ ॥

गो० टी०–अथ पापभीतस्य कर्मांहरूपं फलं दिशतो भगवतोऽपि त्रस्तस्य आचार्यत्वात् भगवद्गुणान् श्रुत्वा तदेकोपायनिष्ठा सूच्यते पञ्चमे–ऋष्यमूकात्त्वित्यादि । राम-

१ हनुमानिति गो. पाठः । २ ऋष्येति गो. पाठः ।

अयं रामो [1]महाप्राज्ञ संप्राप्तो [2]दृढविक्रम । लक्ष्मणेन सह भ्रात्रा रामोऽयं सत्यविक्रमः ॥ २ ॥
इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः । धर्मे निगदितश्चैव पितुर्निर्देशकारकः ॥ ३ ॥
राजसूयाश्वमेधैश्च [3]वह्नियेनाभितर्पितः । दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥ ४ ॥
तपसा सत्यवाक्येन वसुधा [4]तेन पालिता । स्त्रीहेतोस्तस्य पुत्रोऽयं रामोऽरण्यं समागतः ॥ ५ ॥
[5]तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः । रावणेन हृता भार्या स त्वां शरणमागतः ॥ ६ ॥
भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ । प्रगृह्य [7]चार्चयस्वैतौ पूजनीयतमावुभौ ॥ ७ ॥
श्रुत्वा [8]हनूमतो वाक्यं सुग्रीवो वानराधिपः । [भयं [9]चैव राघवाद्घोरं प्रजहौ विगतज्वरः ।
स कृत्वा मानसं रूपं सुग्रीवः [10]प्लवगर्षभः] ॥ दर्शनीयतमो भूत्वा [11]प्रीत्योवाच च राघवम् ॥ ८ ॥
भवान्धर्मविनीतश्च [12]सुतपाः सर्ववत्सलः । आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः ॥ ९ ॥
[13]तन्ममैवैष सत्कारो लाभश्चैवोत्तमः प्रभो । यत्त्वमिच्छसि सौहार्दं [14]वानरेण मया सह ॥ १० ॥

लक्ष्मणदर्शनभीतः सुग्रीवः ऋश्यमूकादुत्प्लुत्य गहनं मलयाद्यृश्यमूकपर्यन्तपर्वतं गतः हनुमान् रामलक्ष्मणौ तत्र प्रतिष्ठाप्य सुग्रीवं तत्रानीतवानिति बोध्यम् ॥ १ ॥

२] ति० टी०–अयं रामः मलयस्थसुग्रीवदृष्टिपथवर्तित्वादेवं निर्देशः । पुनराहादरात्–रामोऽयमिति । सत्यविक्रमस्वदृढत्वाभ्यां त्वच्छत्रुनिरसनक्षमता व्यज्यते ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–अयमिति । महाप्राज्ञ ! हे सुग्रीव ! दृढविक्रमः अजेयपराक्रमः सत्यविक्रमः सत्याय सत्यपरिपालनाय विक्रमः पादन्यासो यस्य सः धर्मे स्वधर्माचरणे निगदितः प्रसिद्धः अत एव पितुर्निर्देशकारक आज्ञापरिपालकः आरामः सर्वाभिरामदाता अरामः अरमतिप्रकाशममति प्राप्नोति सः इक्ष्वाकूणां कुले जातः प्रादुर्भूतो दशरथात्मजो दशरथनित्यपुत्रः अयं रामः लक्ष्मणेन भ्रात्रा सह अयं शापवशेन वालिना प्राप्तुमशक्यम् ऋष्यमूकं संप्राप्तः । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–अयमिति । अयं रामः संप्राप्तः । अयं रामः सत्यविक्रमः त्वच्छत्रुनिबर्हणक्षम इत्यर्थः ॥ २ ॥

३–४] ति० टी०–इक्ष्वाकूणामित्यनेन स्वरूपकथनम् । धर्मे स्वसत्यपरिपालनरूपधर्मनिमित्तम् । निगदितः प्रेरितः पित्रेति शेषः अत एव तस्य पितुर्निर्देशकारकः ॥ ३ ॥ ४ ॥

गो० टी०–इक्ष्वाकूणामिति । निगदितः प्रसिद्धः ॥ ३ ॥

रा० टी०–वनगमनप्रयोजनं स्पष्टतो वदन्नाह–राजेति । येन राजसूयाश्वमेधैर्वह्निरतितर्पितः शतसहस्रशः गावो दक्षिणा उत्सृष्टाः दत्ताः तपसा अतिविचारेण सत्यवाक्येन च येन वसुधा पालिता तस्य दशरथस्य पुत्रोऽयं रामः स्त्रीहेतोः भार्यानिदर्शितमुनिपरिपालनकारणात् अरण्यं समागतः संप्राप्तः । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

५–६] ति० टी०–स्त्रीहेतोः पित्रा स्त्रियै दत्तस्य वरस्य पालनहेतोः ॥ ५ ॥ ६ ॥

रा० टी०–तस्येति । तस्य पित्राज्ञप्तस्य अत एवारण्ये वसतः नियतस्य नित्यं यतचित्तस्यास्य रामस्य भार्या रावणेन हृता अतः स रामः शरणं स्वरक्षार्थिनं त्वामागतः प्राप्तः ॥६॥

गो० टी०–तस्येत्यादि ॥ ४–८ ॥

७] ति० टी०–प्रगृह्य दर्शनाकाङ्क्षिणोर्दर्शनं दत्त्वा ॥ ७ ॥

रा० टी०–भवतेति । भवता सख्यकामौ सख्यविषयकेच्छावन्तौ एतौ रामलक्ष्मणौ प्रगृह्य तत्संनिधिं गत्वा आनीय अर्चयस्व ॥ ७ ॥

८] ति० टी०–दर्शनीयतमो भूत्वा इच्छावशादिति शेषः ॥८॥

रा० टी०–श्रुत्वेति । हनुमतो वाक्यं श्रुत्वा हृष्टमानसः सुग्रीवः राघवात् भयं वालिप्रेषितसंभावनया समुत्पन्नभीतिं प्रजहौ अत एव गतविज्वरोऽभवदिति शेषः ॥ ८ ॥

रा० टी०–स इति । सुग्रीवो मानुषं रूपं कृत्वा अत एव दर्शनीयतमो भूत्वा प्रीत्या राघवं प्राप्येति शेषः, उवाच ॥ ९ ॥

गो० टी०–स कृत्वेति । राघवं प्राप्येति शेषः ॥ ९–११॥

९] ति० टी०–धर्मविनीतो धर्मे शिक्षितः ॥ ९ ॥

रा० टी०–तद्वचनाकारमाह–भवानिति । धर्मविनीतः धर्मविषयकातिशिक्षावान् अत एव सुतपाः अतिविचारवान् अत एव सर्ववत्सलः सर्वविषयकवात्सल्यवान् भवान् अस्तीति शेषः । नन्वहं त्वया कथं ज्ञातमित्यत आह–भवद्गुणाः वायुपुत्रेण मह्यं तत्त्वतः आख्याताः ॥ १० ॥

१०] ति० टी०–एष मन्मैत्रीच्छारूपः । तदेवाह–यत्त्वमिति । वानरेण तिर्यग्योनिनाऽपि ॥ १० ॥

रा० टी०–तदिति । एष त्वं वानरेण मया सह सौहार्दं यदिच्छसि तन्मम सत्कारः उत्तमो लाभश्च ॥ ११ ॥

---

१ महाप्राज्ञः इति गो. पाठः । २ दृढविक्रमः इति गो. पाठः । ३ पारग इति गो. पाठः । ४ येनेति गो. पाठः । ५ त्वां शरण गत इति गो. पाठः । ६ श्लोकोऽयं चतुर्थस्थाने गो. पाठे । ७ हनुमत इति गो. रा. पाठः । ८ हृष्टमानस इति गो. रा. पाठः । ९ श्लोकोऽयमधिकः गो. रा. पाठे । १० स इति रा. पाठः । ११ प्लवगाधिप इति रा. पाठः । १२ प्रीत्या प्रोवाचेति गो. पाठः । १३ विक्रान्त इति गो. पाठः । १४ मयेति गो. पाठः ।

रोचते यदि [1]मे सख्यं बाहुरेष प्रसारितः । गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा ॥ ११ ॥
एतत्तु वचनं श्रुत्वा [2]सुग्रीवस्य सुभाषितम् । संप्रहृष्टमना हस्तं पीडयामास पाणिना ॥ १२ ॥
हृष्टः [3]सौहृदमालम्ब्य पर्यष्वजत पीडितम् । ततो हनूमान्संत्यज्य भिक्षुरूपमरिंन्दमः ॥ १३ ॥
काष्ठयोः स्वेन रूपेण जनयामास पावकम् । दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम् ॥ १४ ॥
तयोर्मध्ये तु सुप्रीतो [4]निदधौ सुसमाहितः । ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ॥ १५ ॥
सुग्रीवो राघवश्चैव [5]वयस्यत्वमुपागतौ । ततः सुप्रीतमनसौ तावुभौ हरिराघवौ ॥ १६ ॥
अन्योन्यमभिवीक्षन्तौ न तृप्तिमभिजग्मतुः । त्वं वयस्योऽसि हृद्यो मे एकं दुःखं सुखं च नौ ॥ १७ ॥

११] ति० टी०–रोचते यदीति । कार्यवशादिति शेषः। ध्रुवा मर्यादातद्भङ्गनीयोऽन्योन्यकार्यसंपादनविषयो निश्चयः । बध्यतां दृढया विचार्य प्रतिज्ञायताम् ॥ ११ ॥

रा० टी०–रोचते इति । यदि मे सख्यं रोचते भवते इति शेषः, तदा एष बाहुः प्रसारितो मयेति शेषः। तत्प्रयोजनमाह–पाणिना स्वहस्तेन पाणिः मम हस्तः गृह्यतां ध्रुवा अचाल्या मर्यादा गृहीतकरो न त्यक्तव्य इत्याकारकसदाचारः गृह्यतां स्वीक्रियताम् ॥ १२ ॥

गो० टी०–रोचत इति । मर्यादा व्यवस्था ॥ १२ ॥

१२] ति० टी०–हस्तं पीडयामास दक्षिणहस्तेन दक्षिणहस्तं गृहीतवान् ॥ १२ ॥

रा० टी०–एतदिति । सुग्रीवस्य सुभाषितमेतद्वचनं श्रुत्वा संप्रहृष्टमनाः रामः पाणिना हस्तं सुग्रीवपाणिं पीडयामास दृढं जग्राह ॥ १३ ॥

गो० टी०–एतत्त्विति । राम इति शेषः ॥ १३ ॥

१३] ति० टी०–पीडितं पर्यष्वजत गाढमालिङ्गितवान् 'कृतसौहार्दस्थैर्याय दत्तपदिष्टाग्निसाक्षिकत्वसिद्धये च रामप्रेरितहनूमतः प्रवृत्तिः–तत इति । भिक्षुरूपं परित्यज्य 'तौ त्वया प्राकृतेनैव गत्वा ज्ञेयौ प्लवंगम' इति सुग्रीवाज्ञाकरणप्रतीतये रामागमननिवेदनसमये पुनः कृतं भिक्षुरूपं परित्यज्य ॥ १३ ॥

रा० टी०–हृष्ट इति । सौहृदमालम्ब्य प्राप्य हृष्टः सुग्रीवः पीडितं सीतावियोगदुःखितं रामं पर्यष्वजत ततोऽनन्तरम् अरिन्दमो हनूमान् भिक्षुरूपं संत्यज्य स्वेन आत्मीयेन रूपेणोपलक्षितः सन् काष्ठयोः अरण्योः पावकं वह्निं जनयामास । भिक्षुरूपं संत्यज्येत्यनेन सुग्रीवसमीपागमनसमये तद्विश्वासार्थं पुनर्भिक्षुरूपं जग्राहेति व्यञ्जितम् । सार्धश्लोक एकान्वयी ॥ १४ ॥

गो० टी०–हृद्यमित्यर्धम् । पीडितं दृढम् ॥ १४ ॥

गो० टी०–मर्यादा बध्यतामिति वदतः सुग्रीवस्याशयं विदित्वाचरति–तत इति । भिक्षुरूपं संत्यज्येत्यनेन सुग्रीवविश्वासार्थम्, तौ त्वया प्राकृतेनैव गत्वा ज्ञेयौ प्लवङ्गमेति तदुक्तप्रकारेण पुनर्भिक्षुरूपेणैव तदन्तिकं गत इत्यवगम्यते । स्वेन रूपेण वानररूपेण काष्ठयोः अरणिभूतशमीकाष्ठयोः । सम्प्रम्यन्तं पदम् ॥ १५ ॥

१४] ति० टी०–स्वेन रूपेण वानररूपेण काष्ठयोररण्योरग्निं जनयामास । ततो दीप्यमानमाग्निं तयोर्मध्ये निदधौ । निहितं च तं पुष्पैरभ्यर्च्य सत्कृतं परिस्तरणादिसत्कृतं चाकरोत् ॥ १४ ॥

रा० टी०–दीप्यमानमिति । ततस्तयोररण्योर्दीप्यमानं वह्निं सत्कृतं यथा भवति तथा पुष्पैरभ्यर्च्य तयोः रामसुग्रीवयोर्मध्ये सुप्रीतो हृष्टमान् निदधौ । अर्धद्वयमेकान्वयि॥१५॥

गो० टी०–दीप्यमानमिति । सत्कृतमित्यभ्यर्च्येत्यस्यानुवादः । तयोः रामसुग्रीवयोः ॥ १६ ॥

१५–१६] ति० टी०–प्रदक्षिणं चक्रतुः मैत्रीदार्ढ्यायेति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–तत इति । ततो वह्निस्थापनान्तरं वयस्यत्वं सख्यमुपागतौ प्राप्तौ सुग्रीवो राघवश्च प्रदक्षिणं चक्रतुः ॥ १६ ॥

गो० टी०–तत इति । प्रदक्षिणं चक्रतुः अन्योन्यं पाणिं गृहीत्वेति शेषः । उपागतौ अग्निसाक्षिकमिति शेषः ॥ १७ ॥

रा० टी०–तत इति । ततः अग्निसाक्ष्यपूर्वकसख्यप्राप्त्यनन्तरम् अन्योन्यमभिवीक्षन्तौ उभौ हरिराघवौ वानररामौ तृप्तिं न अभिजग्मतुः ॥ १७ ॥

गो० टी०–तत इति । अभिवीक्षन्तौ अभिवीक्षमाणौ ॥ १८ ॥

१७] ति० टी०–हृद्यो हृदयप्रियः । एकं समानमित्यर्थः ॥ १७ ॥

रा० टी०–त्वमिति । यतस्त्वं मे वयस्योऽसि अत एव हृद्यः हृदयप्रियः अत एव नौ आवयोः दुःखं सुखं च एकमेव च एकमेव इति प्रहृष्टवत् प्रहर्षविशिष्टं अत्यानन्दकरमित्यर्थः, वाक्यं सुग्रीवो राघवमुवाच ॥ १८ ॥

गो० टी०–त्वमिति । एकं समानम्, स्वदुःखेन मम दुःखं भवतु त्वत्सुखेन मम सुखं भवत्वित्यर्थः । अनेन परस्याप्यन्यभ्यर्थनं सूचितम् ॥ १९ ॥

१ वेति गो. पाठः । २ सुग्रीवेणेति गो. पाठः । ३ हृद्यमिति गो. पाठः । ४ निदधे इति गो. पाठः । ५ उपेति गो. पाठः ।

सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत् । ततः सुपर्णबहुलां भङ्क्त्वा शाखां सुपुष्पिताम् १८ ॥
शालस्यास्तीर्य सुग्रीवो निषसाद सराघवः । लक्ष्मणायाथ संहृष्टो हनुमान्मारुतात्मजः ॥ १९ ॥
शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम् । ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा ॥ २० ॥
प्रत्युवाच तदा रामं हर्षव्याकुललोचनः । अहं विनिकृतो राम चरामीह भयार्दितः ॥ २१ ॥
हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः । सोऽहं त्रस्तो वने भीतो वसाम्युद्भ्रान्तचेतनः ॥ २२ ॥
वालिना निकृतो भ्रात्रा कृतवैरश्च राघव । वालिनो मे महाभाग भयार्तस्याभयं कुरु ॥ २३ ॥
कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद्यथा । एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ॥ २४ ॥
प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव । उपकारफलं मित्रं विदितं मे महाकपे ॥ २५ ॥
वालिनं तं वधिष्यामि तव भार्यापहारिणम् । अमोघाः सूर्यसंकाशा ममेमे निचिताः शराः ॥ २६ ॥

१८] ति० टी०–प्रहृष्टवत्प्रहृष्टः सन्नेतावत्पर्यन्तं सम्यग्विश्वासाभावात्सुग्रीवः पृथगासनस्थ एवासीदिति ज्ञायते । तदाह–तत इति ॥ १८ ॥

रा० टी०–तत इति । शोभनानि पर्णबहुलानि बहुपत्राणि यस्यां तां सुपुष्पितां शालस्य वृक्षविशेषस्य शाखां भङ्क्त्वा संछिद्य आस्तीर्य सराघवः सुग्रीवः निषसाद । शाखायामित्यर्थतो लब्धम् ॥ १९ ॥

गो० टी०–तत इति । सराघव इत्यनेन एकासनत्वमुक्तम् ॥ २० ॥ २१ ॥

१९] ति० टी०–आस्तीर्य राघवायेति शेषः । सराघवो निषसाद स्वयं तत्र स्थित इत्यर्थः ॥ १९ ॥

रा० टी०–लक्ष्मणायेति । हनुमान् परमपुष्पितां चन्दनवृक्षस्य शाखां लक्ष्मणाय ददौ ॥ २० ॥

२०] ति० टी०–लक्ष्मणाय विषादपरिहारार्थं चन्दनशाखास्तरणदानम् । अथ कार्यमर्यादाबन्धनाय प्रवृत्तिः–तत इति ॥ २० ॥

रा० टी०–तत इति । प्रहृष्टः प्राप्तसंतोषः अत एव हर्षव्याकुललोचनः सुग्रीवः मधुरया गिरा श्लक्ष्णं यथा भवति तथा रामं प्रत्युवाच ॥ २१ ॥

गो० टी०–तत इति । 'प्रत्युवाच तदा रामम्' इति पाठः२२

२१–२२] ति० टी०–इह वने इत्यन्वयः ॥ २१ ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–अहमिति । हे राम ! विनिकृतः भ्रात्रा निःसारितः अत एव हृतभार्यः अत एव भयार्दितः तद्भयपीडितः अत एव त्रस्तः उद्विग्नचित्तोऽहं अवने स्वरक्षार्थम् एतत् दुर्गमुपाश्रितः नित्यं प्राप्तः सन् चरामि ॥ २२ ॥ २३ ॥

गो० टी०–अहमिति । त्रस्तः चकितः । अत्रस्त इति वा ॥ २३ ॥

रा० टी०–स इति । वालिना निकृतः अत एव कृतवैरः अत एव त्रस्तः उद्विग्नः अत एव उद्भ्रान्तचेतनः कर्तव्याकर्तव्यविषकविवेकरहितचित्तवान् सः त्वत्सख्यं प्राप्तोऽहं वने वसामि अतः वालिनः सकाशात् भयार्तस्य मे अभयं भीतिरहितं त्वं कुरु । सार्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०–सोऽहमिति । त्रस्तः भीतः उत्तरोत्तरं भीतः । यद्वा वालित्रस्तोऽहमस्मिन् वने अभीतो वसामीत्यर्थः ॥ २४ ॥

२३] ति० टी०–अभयं कुर्वभयप्रतिज्ञां कुरु ॥ २३ ॥

गो० टी०–वालिन इति । अभयं भयाभावं कुरु । आर्त्यतिशयेन दार्ढ्याय पुनरुच्यते कर्तुमित्यर्धेन–मे भयं यथा न भवेत्तथा कर्तुमर्हसीत्यन्वयः ॥ २५ ॥

२४] ति० टी०–तदेव दार्ढ्याय पुनराह–कर्तुमिति॥२४॥

रा० टी०–कर्तुमिति । काकुत्स्थ हे राम ! यथा मे भयं न भवेत् तथा कर्तुमर्हसि, वालिनं जहीति तात्पर्यम् । अर्धं पृथक् । एवमिति । एवमुक्तस्तेजस्वी रामः प्रहसन्निव सुग्रीवं प्रत्यभाषत । अर्धद्वयमेकान्वयि ॥ २५ ॥

गो० टी०–एवमुक्त इति । प्रहसन्निव कियन्मात्रमेतदिति हसित्वा । इवशब्दो मन्दस्मितत्वे ॥ २६ ॥ २७ ॥

२५–२६] ति० टी०–लीलाविसृष्टैकेषुमात्रसाध्यत्वात्प्रहसन्निवेति । उपकारः फलं यस्य तम् ॥ २५ ॥ २६ ॥

रा० टी०–तद्वचनाकारमाह–उपकारेति । मित्रम् उपकारफलम् उपकारकारकमित्यर्थः, भवतीति मे विदितं विज्ञातम् अतस्तव भार्यापहारिणं वालिनं वधिष्यामि ॥ २६ ॥

रा० टी०–अमोघा इति । अमोघाः नैष्फल्यरहिताः वेगिताः अतिवेगवन्तः कङ्कपत्रप्रतिच्छन्नाः तीक्ष्णाग्राः ऋजुपर्वाणः ऋजुपर्वविनिष्टाः सरोषा निशिताः तीक्ष्णदंष्ट्राः भुजगा इव मे शरा बाणाः दुर्वृत्ते दुष्टाचरणशीले वालिनि निपतिष्यन्ति । अर्धचतुष्टयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–अमोघा इत्यादि । कङ्कपत्रप्रतिच्छन्नाः कङ्कपत्रैर्बद्धा इत्यर्थः ॥ २८ ॥ २९ ॥

१ सपर्णेति गो. पाठः । २ छित्त्वेति गो. पाठः । ३ शालेति रा. पाठः । ४ प्लवगवर्षभ इति गो. पाठः । ५ मित्रेति गो. पाठः ।

तस्मिन्वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः । कङ्कपत्रप्रतिच्छन्ना महेन्द्राशनिसंनिभाः ॥ २७ ॥
तीक्ष्णाग्रा ऋजुपर्वाणः सरोषा भुजगा इव । तमद्य वालिनं पश्य [1]तीक्ष्णैराशीविषोपमैः ॥ २८ ॥
शरैर्विनिहतं भूमौ [2]प्रकीर्णमिव पर्वतम् । स तु तद्वचनं श्रुत्वा राघवस्यात्मनो हितम्
सुग्रीवः परमप्रीतः [3]परमं वाक्यमब्रवीत् ॥ २९ ॥
तव प्रसादेन नृसिंह [4]वीर प्रियां च राज्यं च समाप्नुयामहम् ।
तथा कुरु त्वं नरदेव वैरिणं यथा न [5]हिंस्यात्स पुनर्ममाग्रजम् ॥ ३० ॥
सीताकपीन्द्रक्षणदाचराणां राजीवहेमज्वलनोपमानि ।
सुग्रीवरामप्रणयप्रसङ्गे वामानि नेत्राणि समं स्फुरन्ति ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ।

हनुमतो ज्ञातत्वदुःखोऽस्यतो यत्रकुत्रापि वर्तमानां सीतामन्विष्य त्वत्सकाशं प्रापयिष्यामीत्याश्वास्य सुग्रीवो ह्रियमाणसीतयोत्सृष्टत्वाल्लब्धं कोशेयवद्वमाभरण गुहात आनीय प्रार्पयत् । दृष्टाभरणो रामस्तज्ज्ञानक्या एवेति परिज्ञाय प्रोद्बुद्धवियोगदुःखो बिलस्थः पन्नग इव भृशं निःश्वस्य कोऽसौ कुत्रत्यो रावण इति पप्रच्छ ।

पुनरेवाब्रवीत्प्रीतो राघवं रघुनन्दनम् । अयमाख्याति ते राम सेवको मन्त्रिसत्तमः ॥ १ ॥

२७–२९] ति० टी०–वेगिताः संजातवेगाः॥२७–२९॥

रा० टी०–तमिति । आशीविषोपमैः अतिविषवत्सर्पतुल्यैः शरैः विनिहतमत एव भूमौ प्रकीर्णं प्रक्षिप्तं पर्वतमिव अथवालिनं पश्य ॥ २९ ॥

रा० टी०–स इति । आत्मनो हितं राघवस्य तद्वचनं श्रुत्वा परमप्रीतः सुग्रीवः अब्रवीत् ॥ ३० ॥

गो० टी०–तमिति । अथ पश्येत्यनेन क्रियाशक्तित्यभुक्तम् ॥ ३० ॥ ३१ ॥

३०] ति० टी०–मम वैरिणमग्रजं तथा कुरु, यथा पुनः स मम न हिंस्यात् ॥ ३० ॥

रा० टी०–तद्वचनाकारमाह–तवेति । तव प्रसादेन प्रियां भार्यां राज्यं च अहं समाप्नुयाम् इति हेतोः वैरिणं ममाग्रजं वालिनं तथा कुरु यथा सोऽग्रजः मां पुनर्न हिंस्यात् ॥ ३१ ॥

गो० टी०–तवेति । कुरु यतस्त्वेत्यर्थः । वैरिणं रिपुमिति द्विरुक्त्या वैरकृतं शात्रवं नतु जात्येत्युक्तम् ॥ ३२ ॥

३१] ति० टी०–सीतादीनां राजीवादिभिः क्रमेणान्वयः। कपीन्द्रोऽत्र वाली । पुंसां वामनेत्रस्पन्दोऽशुभशंसी, स्त्रीणां स शुभशंसी ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चमः सर्गः ॥ ५ ॥

रा० टी०–कार्यसिद्धिसूचकसुशकुनमाह–सीतेति । सुग्रीवरामप्रणयप्रसङ्गे सुग्रीवरामयोः सख्यसमये सीतादीनां क्रमेण राजीवादिसदृशानि वामानि नेत्राणि समभेककालावच्छेदेन स्फुरन्ति तत्र कपीन्द्रो वाली, क्षणदाचरा राक्षसाः। स्त्रीणां वामाङ्गस्फुरणस्य शुभप्रदत्वं पुंसाममङ्गलप्रदत्वमिति तन्त्रान्तरे प्रसिद्धम् ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चमः सर्गः ॥ ५ ॥

गो० टी०–प्रसङ्गात् कविराह–सीतेति । सीतानेत्रं राजीवोपमम् । वालिनेत्रं हेमोपमं पिङ्गाक्षत्वात् । रावणनेत्राणि ज्वलनोपमानि । पुरुषस्य वामनेत्रस्फुरणमनर्थकरं स्त्रियास्तु शोभनमिति निमित्तशास्त्रविदः ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

१] ति० टी०–आख्यात्याख्यातवान् तन्निमित्तमिति शेषः ॥ १ ॥

रा० टी०–रामं प्रति सुग्रीवोक्तिं वर्णयन्नाह–पुनरित्यादिभिः । प्रीतः सुग्रीवः राघवं पुनरब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह–अयमिति । हे राम ! यन्निमित्तं लक्ष्मणेन सह त्वं निर्जनं वनमागतः तत् जनकात्मजा भार्या त्वया लक्ष्मणेन च वियुक्ता अत एव अन्तरम् अवसरं प्रेप्सुना रक्षसा जटायुषं गृध्रं हत्वा अपहृता अतः तेन रक्षसा भार्यावियोगजं दुःखं त्वं प्रापितः इति च मन्त्रिसत्तमः मे सेवकोऽयं

१ क्रूरैरिति गो. पाठः । २ विकीर्णमिति गो. पाठः । ३ सुमहदिति गो. पाठः । ४ राघवेति गो. पाठः । ५ निहंस्यच रिपुमिति गो. पाठः । ६ सचिव इति गो. पाठः ।

हनूमान्यन्निमित्तं त्वं निर्जनं वनमागतः । लक्ष्मणेन सह भ्रात्रा वसतश्च वने तव ॥ २ ॥
रक्षसाऽपहृता भार्या मैथिली जनकात्मजा । त्वया वियुक्ता रुदती लक्ष्मणेन च धीमता ॥ ३ ॥
[2]अन्तरं प्रेप्सुना तेन हत्वा गृध्रं जटायुषम् । भार्यावियोगजं दुःखं [3]प्रापितस्तेन रक्षसा ॥ ४ ॥
[4]भार्यावियोगजं दुःखं नचिराच्त्वं विमोक्ष्यसे । अहं तामानयिष्यामि नष्टां [5]देवश्रुतामिव ॥ ५ ॥
रसातले वा वर्तन्तीं वर्तन्तीं वा नभस्तले । अहमानीय दास्यामि तव भार्यामरिन्दम ॥ ६ ॥
इदं तथ्यं मम वचस्त्वमवेहि च राघव । न शक्या सा जरयितुमपि सेन्द्रैः सुरासुरैः ॥ ७ ॥
तव भार्या महाबाहो भक्ष्यं विषकृतं यथा । त्यज शोकं महाबाहो तां कान्तामानयामि ते ॥ ८ ॥
अनुमानात्तु जानामि मैथिली सा न संशयः । ह्रियमाणा मया दृष्टा रक्षसा [6]रौद्रकर्मणा ॥ ९ ॥
क्रोशन्ती रामरामेति लक्ष्मणेति च विस्वरम् । स्फुरन्ती रावणस्याङ्के पन्नगेन्द्रवधूर्यथा ॥ १० ॥
आत्मना पञ्चमं मां हि दृष्ट्वा शैलतले स्थितम् । उत्तरीयं तया त्यक्तं शुभान्याभरणानि च ॥ ११ ॥

हनुमान् मे आख्याति अकथयत् । मेशब्द उभयान्वयी सार्धश्लोकत्रयमेकान्वयि ॥ १–४ ॥

गो० टी०–एवं रामेण वालिवधे प्रतिज्ञाते सुग्रीवेणापि रामकार्यसिद्धिः प्रतिज्ञायते षड्भि–पुनरेवेत्यादि । राघवमिति नाम । सुग्रीव इति शेषः ॥ १ ॥

गो० टी०–अयमिति । त्वं यन्निमित्तं वनमागतः तदाख्याति स्म ॥ २ ॥

२] ति० टी०–तर्हि तत्राह—यन्निमित्तमिति ॥ २ ॥

गो० टी०–लक्ष्मणेनेत्यादि । श्लोकद्वयम् । तेन पूर्वमविज्ञातेन ॥ ३ ॥ ४ ॥

३–४] ति० टी०–त्वया लक्ष्मणेन च वियुक्ता तव भार्यां सीतान्तरं प्रेप्सुना छिद्रं दिदृक्षुणा हृता, तेन लोकरावणेन रक्षसा त्वं भार्यावियोगजं दुःखं प्रापित इति चाख्यातवान् ॥ ३ ॥ ४ ॥

५] ति० टी०–रामेण स्वकार्यसाधने प्रतिज्ञाते सति स्वयमपि तत्कार्यसाधनं प्रतिजानीते—भार्येत्यादि । न चिरान्नष्टां मधुकैटभहृतां देवस्य धर्मस्य ब्रह्मणश्च ज्ञानसाधनभूता श्रुतित्रयी तामिव । दीर्घ आर्षः ॥ ५ ॥

रा० टी०–नन्वं किं तत्कथनेनेत्यत आह–भार्येति । नष्टां राक्षसेनापहृतां वेदश्रुतीं वेदश्रुतिमिव तां सीतामहमानयिष्यामि आनेष्यामि अतो भार्यावियोगजं दुःखम् अचिरात् शीघ्रं विमोक्ष्यसे त्यक्ष्यसि ॥ ५ ॥

गो० टी०–भार्येति । विमोक्ष्यसे त्यक्ष्यसि । नष्टां मधुकैटभापहृतां वेदश्रुतीं श्रूयत इति श्रुतिः शब्दः वेदरूपश्रुतीमिव वेदगिरमिव दीर्घ आर्षः ॥ ५ ॥

६] ति० टी०–वर्तन्तीं वर्तमानाम् ॥ ६ ॥

रा० टी०–नन्वं तस्याः स्थितिरेव न विज्ञायते इति कथमानेष्यसीत्यत आह–रसातले इति । रसातले वर्तन्तीं वा नभःस्थले वर्तन्तीं वा तव भार्यामानीय दास्यामि ॥ ६ ॥

गो० टी०–रसातल इति । वर्तन्तीं वर्तमानाम् ॥ ६ ॥

७] ति० टी०–तथ्यं तथ्यमेवावेहीत्यन्वयः ॥ ७ ॥

रा० टी०–इदमिति । सा सीता सेन्द्रैः इन्द्रसहितैः सुरासुरैरपि जरयितुं गोपयितुमित्यर्थः, न शक्या इदं मम वचः तथ्यं सत्यमवेहि ॥ ७ ॥

गो० टी०–इदमित्यादि । जरयितुम् आत्मसात्कर्तुम् । विषकृतं विषेण पक्वम् ॥ ७ ॥ ८ ॥

८] ति० टी०–विषकृतं विषमिश्रितम् ॥ ८ ॥

रा० टी०–तवेति । भार्या–भार्यापहरणं विषकृतं विषेण संमिश्रं भक्ष्यमिव एतेनोपमालङ्कारेण यथा विषमिश्रभक्ष्यभक्षणकर्तारो विनश्यन्ति तथा सीतापहर्ता विनङ्क्ष्यतीत्युपमालङ्कारः सूचितः, अतस्ते कान्तामानयामि त्वं शोकं त्यज ॥ ८ ॥

गो० टी०–त्यज शोकमित्यादि । अनुमानात् योग्यतया या दृष्टा सा मैथिली न संशयः अनुमानात्तु जानामीत्यस्यैव विवरणमिदम् ॥ ९ ॥ १० ॥

९–१०] ति० टी०–या दृष्टा सा मैथिलीत्यनुमानास्वद्वार्यात्वाद्यनुमापकाद्रामेत्याक्रोशाछिङ्गाज्जानामीत्यन्वयः ॥ ९ ॥ १० ॥

रा० टी०–अनुमानादिति । रौद्रकर्मणा रक्षसा रावणेन ह्रियमाणा स्वदेशं प्राप्यमाणा अत एव रावणस्याङ्के रावणकर्तृकगमनप्रेरणायां राम रामेति लक्ष्मणेति च विस्वरं यथा भवति तथा क्रोशन्ती पन्नगेन्द्रवधूरिव स्फुरन्ती प्रकाशयन्ती मया दृष्टा सा मैथिली सीतैव इत्यनुमानादहं जानामि । यथाशब्द इवार्थे । अनुमानप्रकारस्तु इयं नैतत्संबन्धिनी एतत्स्पर्शभीतात्वात् चाण्डालस्पर्शभीतब्राह्मणवत् । इयं सीता निरन्तरं राममनस्कात्वात् यन्नैवं तन्नैवम् इयं राममनस्का असकृत् तत्प्रार्थनाबोधकशब्दवतीत्वात् शंभुवत् । श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

११] ति० टी०–आत्मना पञ्चमं मन्त्रिचतुष्टयसहितं मामित्यर्थः ॥ ११ ॥

रा० टी०–आत्मनेति । आत्मना स्वेन पञ्चमं मन्त्रिच-

१ हनुमानिति गो. पाठः । २ अन्तरप्रेप्सुनेति गो. पाठः । ३ अचिरात्त्वं विमोक्ष्यसे इति गो. पाठः । ४ अर्धमेतत् गो. नास्ति । ५ वेदेति गो. रा. पाठः । ६ क्रूरेति गो. पाठः ।

तान्यस्माभिर्गृहीतानि निहितानि च राघव । आनयिष्याम्यहं तानि प्रत्यभिज्ञातुमर्हसि ॥ १२ ॥
तमब्रवीत्ततो रामः सुग्रीवं प्रियवादिनम् । आनयस्व सखे शीघ्रं किमर्थं प्रविलम्बसे ॥ १३ ॥
एवमुक्तस्तु सुग्रीवः शैलस्य गहनां गुहाम् । प्रविवेश ततः शीघ्रं राघवप्रियकाम्यया ॥ १४ ॥
उत्तरीयं गृहीत्वा तु सै तान्याभरणानि च । इदं पश्येति रामाय दर्शयामास वानरः ॥ १५ ॥
ततो गृहीत्वा वौसस्तु शुभान्याभरणानि च । अभवद्बाष्पसंरुद्धो नीहारेणेव चन्द्रमाः ॥ १६ ॥
सीतास्नेहप्रवृत्तेन स तु बाष्पेण दूषितः । हा प्रियेति रुदन्धैर्यमुत्सृज्य न्यपतत्क्षितौ ॥ १७ ॥
हृदि कृत्वा स बहुशस्तमलंकारमुत्तमम् । निश्श्वास भृशं सर्पो बिलस्थ इव रोषितः ॥ १८ ॥
अविच्छिन्नाश्रुवेगस्तु सौमित्रिं प्रेक्ष्य पार्श्वतः । परिदेवयितुं दीनं रामः समुपचक्रमे ॥ १९ ॥
पश्य लक्ष्मण वैदेह्या संत्यक्तं ह्रियमाणया । उत्तरीयमिदं भूमौ शरीराद्भूषणानि च ॥ २० ॥
शाद्वलिन्यां ध्रुवं भूम्यां सीतया ह्रियमाणया । उत्सृष्टं भूषणमिदं तथा रूपं हि दृश्यते ॥ २१ ॥
एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् । नाहं जानामि केयूरे नाहं जानामि कुण्डले ॥ २२ ॥
नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् । ततस्तु राघवो वाँक्यं सुग्रीवमिदमब्रवीत् ॥ २३ ॥

तुष्टयसहितमित्यर्थः, शैलतले स्थितं मां दृष्ट्वा तया सीतया उत्तरीयं त्यक्तं शुभान्याभरणानि च त्यक्तानि ॥ ११ ॥

गो० टी०-आत्मनेति । आत्मना मया पञ्चमम् ॥ ११॥

१२-१३] ति० टी०-आनयिष्याम्यानेष्यामि । दृष्टेत्यत्र प्रमाणप्रदर्शनमिदम् ॥ १२ ॥ १३ ॥

रा० टी०-तानीति । तानि उत्तरीयादीनि अस्माभिर्गृहीतानि निहितानि संस्थापितानि च अतस्तानि आनयिष्यामि आनेष्यामि प्रत्यभिज्ञातुं सीतासंबन्धित्वेन निश्चेतुं त्वमर्हसि ॥१२॥

रा० टी०-तमिति । ततः सुग्रीववचनश्रवणानन्तरं शीघ्रमानयस्व किमर्थं प्रविलम्बसे इति प्रियवादिनं सुग्रीवमब्रवीत् ॥ १३ ॥

गो० टी०-तानीति । प्रत्यभिज्ञातुं स्मर्तुम् ॥ १२-१४॥

१४-१६] ति० टी०-गहनां दुष्प्रवेशाम् ॥ १४-१६ ॥

रा० टी०-एवमिति । एवमुक्तः सुग्रीवः गहनामन्यैर्दुर्गमां शैलस्य गुहां शीघ्रं प्रविवेश ॥ १४ ॥

रा० टी०-उत्तरीयमिति । वानरः स सुग्रीव उत्तरीयम् आभरणानि च गृहीत्वा इदं पश्येति रामाय दर्शयामास॥१५॥

रा० टी०-तत इति । ततोऽनन्तरं वास आभरणानि च गृहीत्वा नीहारेण चन्द्रमा इव बाष्पसंरुद्धोऽभवत् ॥ १६ ॥

गो० टी०-उत्तरीयमिति । उत्तरीयमाभरणानि च उत्तरीयवद्वानीत्यर्थः ॥ १५-१७ ॥

१७] ति० टी०-हा प्रियेतीत्यत्र संधिरार्षः ॥ १७ ॥

रा० टी०-सीतेति । सीतास्नेहप्रवृत्तेन बाष्पेण दूषितः व्याप्तः स रामः धैर्यमुत्सृज्य हा सीते ! इति रुदन् सन् क्षितौ न्यपतत् ॥ १७ ॥

१८-२०] ति० टी०-हृदीति प्रियासंबन्धेन प्रीत्यतिशयात् ॥ १८-२० ॥

रा० टी०-हृदीति । तं सीतासंबन्धिनमलंकारं बहुशोऽनेकवारं हृदि कृत्वा बिलस्थो रोषितः सर्प इव भृशमत्यन्तं निश्श्वास ॥ १८ ॥

गो० टी०-हृदीति । अलंकारमिति जात्येकवचनम् । रोषितः संजातरोषः ॥ १८ ॥

रा० टी०-अविच्छिन्नेति । अविच्छिन्नाश्रुवेगो रामः पार्श्वतः सौमित्रिं प्रेक्ष्य दीनं यथा भवति तथा परिदेवयितुं विलापयितुं समुपचक्रमे ॥ १९ ॥

गो० टी०-अविच्छिन्नेति । परिदेवयितुं प्रलपितुम् । दीनमिति क्रियाविशेषणम् ॥ १९ ॥

रा० टी०-तद्विलापाकारमाह—पश्येति । ह्रियमाणया वैदेह्या संत्यक्तमिदमुत्तरीयं शरीरात् संत्यक्तानि भूषणानि च पश्य, दृष्ट्वा निश्चिन्वित्यर्थः ॥ २० ॥

गो० टी०-पश्येति । शरीरात् अपनीयेति शेषः ॥ २० ॥

२१] ति० टी०-शाद्वलभूम्युत्सर्गे लिङ्गमाह—तथा रूपमिति । अभग्नतया यथा पूर्वरूपमित्यर्थः ॥ २१ ॥

रा० टी०-शाद्वलिन्यामिति । ह्रियमाणया सीतया शाद्वलिन्यां वासयुक्तायां भूम्यामिदं भूषणमुत्सृष्टं हि यतः तथारूपं पौर्वकालिकरूपविशिष्टं दृश्यते ॥ २१ ॥

गो० टी०-शाद्वलिन्यामित्यादि । अत्र शाद्वलशब्देन हरितृणान्युच्यन्ते स्वार्थे वलजार्षः । तद्वत्यां भूमौ मृदुस्थले उत्सृष्टत्वात् तथारूपम् अविकलरूपं दृश्यते ॥ २१-२३ ॥

२२-२३] ति० टी०-नाहमिति । ऊर्ध्वदृष्ट्या परस्त्रीत्वेन कदाप्यदर्शनादिति भावः ॥ २२ ॥ २३ ॥

रा० टी०-एवमिति । रामेण एवमुक्तो लक्ष्मणः केयूरे अहं न जानामि कुण्डले च न जानामि पूर्वमदृष्टत्वादिति तात्पर्यम्, नूपुरे तु नित्यं पादाभिवन्दनात् हेतोः अभिजानामि

---

१ शुभानीति गो. पाठः । २ तद्वास इति गो. पाठः । ३ स इति गो. पाठः । ४ दीन इति गो. पाठः ।

ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया । रक्षसा रौद्ररूपेण मम प्राणैप्रिया हृता ॥ २४ ॥
क्व वा वसति तद्रक्षो महद्व्यसनदं मम । यन्निमित्तमहं सर्वान्नाशयिष्यामि राक्षसान् ॥ २५ ॥
हरता मैथिलीं येन मां च रोषयता ध्रुवम् । आत्मनो जीवितान्ताय मृत्युद्वारमपावृतम् ॥ २६ ॥
मम दयिततमा हृता वनाद्रजनिचरेण विमथ्य येन सा ।
कथय मम रिपुं तमद्य वै पुवगपते यमसंनिधिं नयामि ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ।

दौष्कुलेयनिष्ठुराधमस्य स्थानादि नाहं वेद्मि यथापि तथा प्रयतिष्ये यथा त्वं जानक्या समेष्यसीति सुग्रीवेणाश्वासितो रामः सुग्रीवं प्रशंसयन्वालिवधं प्रतिजानीते ।

एवमुक्तस्तु सुग्रीवो रामेणार्तेन वानरः । अब्रवीत्प्राञ्जलिर्वाक्यं सबाष्पं बाष्पगद्गदः ॥ १ ॥
न जाने निलयं तस्य सर्वथा पापरक्षसः । सामर्थ्यं विक्रमं वापि दौष्कुलेयस्य वा कुलम् ॥ २ ॥

इति वाक्यमब्रवीत् । एतेन सीताचरणमन्तरा तदवयवान्तरं लक्ष्मणेन नावलोकितमिति ध्वनितम् । सार्धश्लोक एकान्वयी ॥ २२ ॥

रा० टी०–तत इति । ततः लक्ष्मणोक्तिश्रवणानन्तरं राघवः सुग्रीवमब्रवीत् ॥ २३ ॥

२४] ति० टी०–कं देशम् उद्दिश्येति शेषः । प्राणप्रिया प्राणेभ्योऽपीष्टा प्राणसंबन्धस्य तदधीनत्वादिति भावः ॥ २४ ॥

रा० टी०–तद्वचनाकारमाह—ब्रूहीति । हे सुग्रीव ! मम प्राणप्रिया भार्या रक्षसा कं देशं ह्रियमाणा सती त्वया लक्षिता ॥ २४ ॥

गो० टी०–ब्रूहीति । कं देशं कां दिशम् प्रति ह्रियन्ती ह्रियमाणेत्यर्थः । प्राणैः प्राणेभ्यः ॥ २४ ॥

२५–२६] ति० टी०–यन्निमित्तं प्रियापहारि तन्निमित्तम् ॥ २५ ॥ २६ ॥

रा० टी०–केति । यन्निमित्तं सर्वान् राक्षसानहं नाशयिष्यामि मैथिलीं हरता अत एव मां रोषयता येनात्मनो जीवितान्ताय मृत्युद्वारमपावृतम् उद्घाटितम् तत् मम व्यसनदं महत् रक्षः क्व वसति । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०–क्वेत्यादि । अपावृतम् उद्घाटितं येन तत्क्व वसतीत्यन्वयः ॥ २५ ॥ २६ ॥

२७] ति० टी०–विमथ्य वञ्चयित्वा ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षष्ठः सर्गः ॥ ६ ॥

रा० टी०–ममेति । येन रजनिचरेण विमथ्य वञ्चनया अस्मान् पराभूय वनान्तात् मम दयिततमा हृता तं मम रिपुं यमसंनिधिं वै कथं नयामि इति त्वं कथय ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०–ममेति । विषमवृत्तम् ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति० टी०–एवमिति ॥ १ ॥

रा० टी०–रामवचनश्रवणानन्तरकालिकं सुग्रीववृत्तान्तमाह—एवमिति । आर्तेन रामेण एवमुक्तः अत एव बाष्पगद्गदः सुग्रीवः प्राञ्जलिः सन् सबाष्पं राममब्रवीत् ॥ १ ॥

गो० टी०–एवमाभरणदर्शनव्याजेन चेतनस्य यादृच्छिकप्रासङ्गिकसुकृतदर्शनेन तद्भावत्वरा भगवत उच्यते सप्तमे—एवमुक्त इत्यादि । बाष्पगद्गदः रामबाष्पदर्शनेन स्वयमपि बाष्पगद्गदः । एकं दुःखं सुखं च नात्वित्यस्य प्रथमोदाहरणमिदम् ॥ १ ॥

२] ति० टी०–तस्य पापरक्षसः पापं कृतवतो रक्षसो निलयं निलयस्थानं गुप्तवासस्थानं सर्वथा न जाने । नहीदृशं पापं कर्म कृत्वा राजधान्यां वस्तुमर्हतीति भावः । सामर्थ्यं शौर्यादि । विक्रमं विशेषेण क्रामति पादविक्षेपं करोति यत्र तद्वासनगरम् । दौष्कुलेयस्येत्यनेन रक्षःकुलजत्वं ध्वनितम् । तज्जाने एवेति शेषः । वाशब्दः स्वर्थे । अत एव जङ्घाक्षीपं निर्दिश्य 'स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ ' इति हनूमदादिप्रेषणकालिकसुग्रीववचसा न विरोधः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह—नेत्यादिभिः । दौष्कुले-

१ प्राणैः प्रिया प्रियेति गो. प्राणप्रिया प्रियेति रा.पाठः । २ भृशमिति गो. पाठः । ३ तरेमि गो. पाठः ।

सत्यं तु प्रतिजानामि त्यज शोकमरिंदम । करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीम् ॥ ३ ॥
रावणं सगणं हत्वा परितोष्यात्मपौरुषम् । तथाऽस्मि कर्ता नचिराद्यथा प्रीतो भविष्यसि ॥ ४ ॥
अलं वैक्लव्यमालम्ब्य धैर्यमात्मगतं स्मर । त्वद्विधानां न सदृशमीदृशं बुद्धिलाघवम् ॥ ५ ॥
मयापि व्यसनं प्राप्तं भार्याविरहजं महत् । नाहमेवं हि शोचामि धैर्यं न च परित्यजे ॥ ६ ॥

यस्य दुष्कुले प्रसूतस्य । तत्कुलस्य दुष्कुलत्वं तु तन्मातुः राक्षसीत्वेन । पापरक्षसस्तस्य रावणस्य निलयं स्थितिं सामर्थ्यं शौर्यं विक्रमं बलं च आकुलं चञ्चलचित्तत्वं तत्कारणं चेत्यर्थः, सर्वथा सर्वप्रकारेण न जाने सामान्यतो जाने इत्यर्थः । एतेन तस्य नैकत्र स्थितिरिति मायावित्वं च व्यञ्जितम् अत एव 'द्वीपस्तस्य शतयोजनमायतः । अगम्यो मानुषैर्द्वीपस्तं मार्गध्वं समन्ततः । रक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः' इति वक्ष्यमाणेन न विरुध्यते ॥ २ ॥

गो० टी०–न जान इति । दौष्कुलेयस्य दुष्कुले भवो दौष्कुलेयः 'दुष्कुलाड्ढक्' इति ढक् । तस्य पापरक्षसः परदारापहरणरूपपापकृतो राक्षसस्य निलयं वासस्थानं सामर्थ्यं शक्तिं विक्रमं वा सर्वथा न जाने किंचिदपि न जानामीत्यर्थः। नन्विदं वक्ष्यमाणेन विरुध्यते वक्ष्यति वानरप्रेषणावसरे–'द्वीपस्तस्यापरे पारे शतयोजनमायतः । अगम्यो मानुषैर्देवैस्तं मार्गध्वं समन्ततः ॥ स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः। राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥' इति तत्र हि रावणस्य निलयसामर्थ्यपराक्रमाः सुग्रीवेण स्पष्टमवगता इति गम्यते। सत्यम्, तथापि स्वकार्ये प्रथमं प्रवर्तयितुमेवमुक्तवान् सुग्रीवः । अत एव 'ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया' इत्यस्यापि प्रतिवचनं नोक्तवान् । कथं गमनदेशमपि न जानीयात् य एवमाह ह्रियमाणा मया दृष्टेति । न चैवमादावेव मित्रद्रोहः कृतः स्यादिति वाच्यम्, दूरदर्शिना सुग्रीवेणैवं मनसि कृतम्—यदि मया रावणवृत्तान्तो मया ज्ञात इत्युक्तः स्यात् तदातिष्यसनी रामोऽयं सीतान्वेषणे प्रथमं मां प्रवर्तयेत् तच्चायुक्तं वानराणां वालिवशंवदत्वेनास्मदधीनत्वाभावात् । कथंचित् केषाञ्चिद्वशीकरणेऽपि रावणेन कृतसख्यो वाली चास्मन्मनोरथानुरूपां प्रवृत्तिं कर्थं सहेत। तथा चोभयकार्यभङ्गः इत्यज्ञानमाभिनीतवान् सुमतिः सुग्रीवः । न चैवं सति वानरप्रेषणकालिकसुग्रीववचनेन कथमिव रामो नाशङ्कतेति वाच्यम्, तारोक्तलक्ष्मणवचनश्रवणेन रामस्य न शङ्कावकाशः । पूर्वमयं न जानाति पश्चात्तारावचनैर्ज्ञातवानिति रामस्यापि प्रतिपत्तिर्भवेत्। एवं चाह लक्ष्मणं प्रति तारा 'शतकोटिसहस्राणि लङ्कायां किल राक्षसाः । अयुतानि च षट्त्रिंशत्सहस्राणि शतानि च ॥ अहत्वा तांश्च दुर्धर्षान् राक्षसान् कामरूपिणः । न शक्यो रावणो हन्तुं येन सा मैथिली हृता ॥' इत्यादि । किंच कथं वा लोकालोकपर्यन्तं पर्यटतस्तदपरिज्ञानम् अत एव हि रामबलपरीक्षासमये दुन्दुभ्यादिधर्षणकथनप्रसङ्गे वक्तव्यमपि रावणजयवृत्तान्तं नोक्तवान् । नन्वेवमिदानीं परमार्थतो न विजानाति सुग्रीवः पश्चात्तारया ज्ञातवानिति किं न विकल्प्यत इति चेन्न, तारादर्शनात्प्रभृति कामपरवशेन सुग्रीवेण तारया सह रामकार्यपर्यालोचनाप्रसक्तेः। यदि च सुग्रीवः सर्वथा न जानीयात् तदा सीताकोशादिना स्फुटमवगतां दिशं वदेदेव । यच्च कैश्चिदुक्तम् निलयं न जनामीत्यस्य इदानीं तदवस्थानदेशं न जानामीत्यर्थ इति तन्न, सर्वात्मना रावणवृत्तान्तमपरिज्ञाय कियदपि तत्स्वरूपज्ञानं भवत्विति तात्पर्येण क्व वा वसति तद्रक्ष इति पृष्टवन्तं प्रतिज्ञातांशमात्रमप्यनुक्त्वा इदानीं तदवस्थानभूमिं न जानामीत्युत्तरस्य छलत्वापत्तेः। तद्वासमात्रज्ञाने तद्भक्षणे स स्वयमेवेहागमिष्यतीति हि रामाभिप्रायः । किं च इदानीं निलयापरिज्ञानेऽपि सामर्थ्यपराक्रमौ वा वक्तव्यौ स्याताम् । इतरदिशः प्रति वानराणां प्रेषणं तान् प्रति–'रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः' इति वचनं च बहुकालविलम्बेन यत्र कुत्रापि सीतां स्थापयेत्तिष्ठेद्वेति संगच्छते । एतेनेदमपि निरस्तम् । सर्वथा सर्वप्रकारेणापि तन्निलयं न जानामीति विशिष्टाभावोऽर्थः । तथा चाग्रे केनचित्प्रकारेण तन्निलयज्ञानाविरोध इति वानरान् प्रति यावन्मात्रमुच्यते तावदादावपि वक्तव्यत्वात् । यदपि केनचिदुक्तम्–संवत्सरपर्यन्तं सीतादुःखकरणाभावे रावणकृतशिवपूजाफलं न भवेदिति दैवप्रतिबन्धवशात्तदानीं सुग्रीवस्याज्ञानमिति । तत्तुच्छम्, दृष्टे संभवत्यदृष्टकल्पनाया अन्याय्यत्वात् सम्यक्च परदारधर्षणं शिवपूजाफलमिति । तस्मादयोक्त एवार्थो ग्राह्यः ॥ २ ॥ ३ ॥

३] ति० टी०–यद्यप्येतावज्जानामि, तथापि तदुपवर्णनं निष्फलम् तावन्मात्रज्ञानेऽपि तद्बाधासंभवात् । क्वचिद्दुर्गे स्थितिसंभवात् एतावत्त्ववगम्यतामित्याह–सत्यं त्विति ॥ ३ ॥

रा० टी०–सत्यमिति । मैथिलीं त्वं यथा प्राप्स्यसि तथा यत्नं करिष्यामि इति सत्यमहं प्रतिजानामि अतः शोकं त्यज॥३॥

४] ति० टी०–परितोष्यं भवतः परितोषार्हम् । आत्मनः सपरिवारस्य मम पौरुषमवलम्ब्येति शेषः ॥ ४ ॥

रा० टी०–रावणमिति । आत्मपौरुषं सेनामित्यर्थः, परितोष्य संतोष्य रावणं हत्वा यथा त्वं प्रीतो भविष्यसि तथा नचिरात् शीघ्रम् अहं कर्तास्मि ॥ ४ ॥

गो० टी०–रावणमिति । सगणं सपरिवारं रावणं हत्वा भवन्तं परितोष्य आत्मपौरुषं तथा कर्तास्मि यथा प्रीतो भविष्यसीति संबन्धः ॥ ४ ॥

५–६] ति० टी०–न सदृशमयुक्तम् ॥ ५ ॥ ६ ॥

---

१ विद्धीति गो. पाठः । २ हरणजमिति गो. पाठः

नाहं तामनुशोचामि प्राकृतो वानरोऽपि सन् । महात्मा च विनीतश्च किं पुनर्धृतिमान्भवान् ॥ ७ ॥
बाष्पमापतितं धैर्यान्निग्रहीतुं त्वमर्हसि । मर्यादां सत्त्वयुक्तानां धृतिं नोत्स्रष्टुमर्हसि ॥ ८ ॥
व्यसने वार्थकृच्छ्रे वा भये वा जीवितान्तगे । विमृशंश्चै स्वया बुद्ध्या धृतिमान्नावसीदति ॥ ९ ॥
बालिशस्तु नरो नित्यं वैक्लव्यं योऽनुवर्तते । स मज्जत्यवशः शोके भाराक्रान्तेव नौर्जले ॥ १० ॥
एषोऽञ्जलिर्मया बद्धः प्रणयात्त्वां प्रसादये । पौरुषं श्रय शोकस्य नान्तरं दातुमर्हसि ॥ ११ ॥
ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम् । तेजश्च क्षीयते तेषां न त्वं शोचितुमर्हसि ॥ १२ ॥
शोकेनाभिप्रपन्नस्य जीविते चापि संशयः । स शोकं त्यज राजेन्द्र धैर्यमाश्रय केवलम् ॥ १३ ॥
हितं वयस्यभावेन ब्रूमि नोपदिशामि ते । वयस्यतां पूजयन्मे न त्वं शोचितुमर्हसि ॥ १४ ॥
मधुरं सान्त्वितस्तेन सुग्रीवेण स राघवः । मुखमश्रुपरिक्लिन्नं वस्त्रान्तेन प्रमार्जयत् ॥ १५ ॥
प्रकृतिस्थस्तु काकुत्स्थः सुग्रीववचनात्प्रभुः । संपरिष्वज्य सुग्रीवमिदं वचनमब्रवीत् ॥ १६ ॥

रा० टी०–अलमिति । आत्मगतं धैर्यमालम्ब्य वैक्लव्यमलं त्यक्तव्यम् । तत्र हेतुः–त्वद्विधानां सदृशं योग्यं बुद्धिलाघवं न इति स्मर जानीहि ॥ ६ ॥

गो० टी०–अलमित्यादि । वैक्लव्यं दैन्यम् ॥ ६ ॥

रा० टी०–मयेति । भार्याविरहजं व्यसनं दुःखं मयाऽपि प्राप्तं परंतु एवं न शोचामि । तत्र हेतुः–धैर्यं न परित्यजे ॥६॥

गो० टी०–मयेति । परित्यजे परित्यजामि ॥ ६ ॥

७] ति० टी०–तां प्रियाम् ॥ ७ ॥

रा० टी०–नेति । प्राकृतः स्वाभाविको वानरः सन्प्यहं तां स्वस्त्रियं न शोचामि महात्मत्वादिविशिष्टस्त्वं न शोचसीति किं वक्तव्यम् ॥ ७ ॥

गो० टी०–नाहमिति । प्राकृतः हीनः । विनीतः वृद्धैः सुशिक्षितः ॥ ७ ॥

८] ति० टी०–सत्त्वयुक्तानां सत्त्वगुणवताम् ॥ ८ ॥

रा० टी०–बाष्पेति । सत्त्वयुक्तानां मर्यादां निबद्धां बोधितामित्यर्थः, धृतिं धैर्यमुत्स्रष्टुं त्यक्तुं त्वं नार्हसि अत एव आपतितं बाष्पं धैर्यात् निग्रहीतुमर्हसि ॥ ८ ॥

गो० टी०–बाष्पमिति । सत्त्वयुक्तानां व्यवसायवताम् । 'द्रव्यास्तव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः । मर्यादां व्यवस्थारूपां धृतिम् ॥ ८ ॥

९] ति० टी०–व्यसने इष्टवियोगजे, अर्थकृच्छ्रे धननाशे, भये चौरव्याघ्रादिजे, जीवितान्तगे जीवितनाशप्रापके विमृशन् प्रारब्धवेगमिति शेषः ॥ ९ ॥

रा० टी०–धैर्यमाहात्म्यमाह–व्यसन इति । व्यसने प्रियवियोगे वा अर्थकृच्छ्रे धननाशे वा जीवितान्तगे जीवनध्वंसप्रापके भये वा धृतिमान् जनः त्वया बुद्ध्या विमृशन् विचारयन् सन्नावसीदति ॥ ९ ॥

गो० टी०–व्यसन इति । अर्थकृच्छ्रे धननाशे ॥९॥१०॥

१०] ति० टी०–यो बालिशः, यश्च नित्यं वैक्लव्यमनुवर्तते, स मज्जति । तुश्चार्थे । भाराक्रान्ताऽतिभारवती ॥ १० ॥

रा० टी०–बालिश इति । यो नरः बालिशः विचाररहितः सन् वैक्लव्यं विकलतां स्वस्थचित्तरहितत्वमित्यर्थः, नित्यमनुवर्तते प्राप्नोति स नरः जले भाराक्रान्ता नौरिव शोके मज्जति शोकान्न निवर्तते इत्यर्थः ॥ १० ॥

११–१३] ति० टी०–अन्तरमवसरम् ॥ ११–१३ ॥

रा० टी०–एष इति । पौरुषं स्वैकनिष्ठपरमपुरुषत्वं श्रय स्मरेत्यर्थः । अत एव शोकस्य अन्तरमवकाशं दातुं नार्हसि अत एव प्रणयात् प्रणयं प्राप्य एषः अञ्जलिर्मया बद्धः त्वां प्रासादये च ॥ ११ ॥

रा० टी०–ये इति । ये जनाः शोकमनुवर्तन्ते प्राप्नुवन्ति तेषां सुखं न विद्यते तेजश्च क्षीयते अतः शोचितुं नार्हसि ॥ १२ ॥

रा० टी०–शोकेनेति । शोकेन अभिप्रपन्नस्य युक्तस्य तव जीविते लोकस्थितावपि संशयः अतः स त्वं शोकं त्यज धैर्यमाश्रय प्राप्नुहि ॥ १३ ॥

गो० टी०–एष इति । अन्तरम् अवकाशम् ॥११–१३॥

१४] ति० टी०–ब्रूमि ब्रवीमि ॥ १४ ॥

रा० टी०–हितमिति । वयस्यभावेन सख्यधर्मेण हितं ब्रूमि ब्रवीमि, उपदिशामि न अतः मे वयस्यतां पूजयन् सत्कुर्वन् त्वं शोचितुं नार्हसि ॥ १४ ॥

गो० टी०–हितमिति । ब्रूमि ब्रवीमि । वयस्यतां मित्रत्वम् ॥ १४ ॥

१५–१६] ति० टी०–प्रमार्जयत्प्रामार्जयत् ॥१५॥१६॥

रा० टी०–मधुरमिति । सुग्रीवेण मधुरं सान्त्वितो राघवः अश्रुपरिक्लिन्नं मुखं प्रमार्जयत् प्रामार्जयत् ॥ १५ ॥

रा० टी०–प्रकृतिस्थ इति । सुग्रीववचनात् प्रकृ-

१ भवानिति गो. पाठः । २ वै इति गो. पाठः ।

कर्तव्यं यद्वयस्येन स्निग्धेन च हितेन च । अनुरूपं च युक्तं च कृतं सुग्रीव तत्त्वया ॥ १७ ॥
एष च प्रकृतिस्थोऽहमनुनीतस्त्वया सखे । दुर्लभो हीदृशो बन्धुरस्मिन्काले विशेषतः ॥ १८ ॥
किं तु यत्नस्त्वया कार्यो मैथिल्याः परिमार्गणे । राक्षसस्य च रौद्रस्य रावणस्य दुरात्मनः ॥ १९ ॥
मया च यदनुष्ठेयं विस्रब्धेन तदुच्यताम् । वर्षास्विव च सुक्षेत्रे सर्वं संपद्यते तव ॥ २० ॥
मया च यदिदं वाक्यमभिमानात्समीरितम् । तत्त्वया हरिशार्दूल तत्त्वमित्युपधार्यताम् ॥ २१ ॥
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन । एतत्ते प्रतिजानामि सत्येनैव शपाम्यहम् ॥ २२ ॥
ततः प्रहृष्टः सुग्रीवो वानरैः सचिवैः सह । राघवस्य वचः श्रुत्वा प्रतिज्ञातं विशेषतः ॥ २३ ॥
एवमेकान्तसंपृक्तौ ततस्तौ नरवानरौ । उभावन्योन्यसदृशं सुखं दुःखमभाषताम् ॥ २४ ॥
महानुभावस्य वचो निशम्य हरिर्नृपाणामधिपस्य तस्य ।
कृतं स मेने हरिवीरमुख्यस्तदा च कार्यं हृदयेन विद्वान् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तमः सर्गः ॥ ७ ॥

तिस्थः त्यक्तशोक इत्यर्थः, काकुत्स्थः सुग्रीवं संपरिष्वज्य इदमब्रवीत् ॥ १६ ॥

गो० टी०–मधुरमिति । प्रमार्जयत् स्वार्थे णिच् । अनित्यमागमशासनमिति अडभावः ॥ १५ ॥ १६ ॥

१७] ति० टी०–कर्तव्यं यत् शोकनाशार्थमिति शेषः॥१७॥

रा० टी०–तद्वचनाकारमाह–कर्तव्यमिति । स्निग्धेन स्नेहयुक्तेन अत एव हितेन वयस्येन यत् कर्तव्यं तत् अनुरूपं ममोचितं युक्तं युक्तिविशिष्टं त्वया कृतम् ॥ १७ ॥

गो० टी०–कर्तव्यमिति । अनुरूपं मित्रत्वानुरूपं, युक्तं शोकनिवारणयोग्यं कृतम् उक्तमित्यर्थः ॥ १७–१९ ॥

१८] ति० टी०–प्रकृतिस्थः स्वभावस्थः दुःखहीन इत्यर्थः । अस्मिन्काले व्यसनकाले ॥ १८ ॥

रा० टी०–एष इति । त्वयाऽहमनुनीतः नीतिमुक्त अत एव प्रकृतिस्थोऽस्मीति शेषः, ईदृशो भवत्सदृशो बन्धुः अस्मिन्काले शोकग्रस्तसमये विशेषतो दुर्लभः ॥ १८ ॥

१९] ति० टी०–रावणस्य संहारे चेति शेषः ॥ १९ ॥

रा० टी०–किं त्विति । किं तु इदमुच्यते रावणस्य वशं गताया इति शेषः, मैथिल्याः परिमार्गणे यत्नस्त्वया कार्यः । राक्षसस्येत्यपि परिमार्गणेन्वयि वा ॥ १९ ॥

२०] ति० टी०–मया च यदनुष्ठेयं तवेति शेषः । वर्षास्विव सुक्षेत्र उप्तं बीजमिति शेषः । संपद्यते सफलं भविष्यतीत्यर्थः । शैघ्र्यप्रत्यायनाय वर्तमानप्रयोगः ॥ २० ॥

रा० टी०–मयेति । विस्रब्धेन प्राप्तविश्रामेन मया यदनुष्ठेयं कर्तव्यं तत् उच्यताम् । तत्र हेतुः–वर्षासु सुक्षेत्रे सर्वं तदीप्सितनानाविधसस्यमिव तव सर्वमीप्सितं संपद्यते प्राप्स्यति ॥ २० ॥

गो० टी०–मयेति । विस्रब्धेन स्निग्धेन ॥ २० ॥

२१] ति० टी०–इदं वाक्यं वालिनं वधिष्यामीति वाक्यमभिमानात्तत इव ॥ २१ ॥

रा० टी०–मयेति । यत् अभिमानात् स्वपरमपुरुषत्वाभिनिवेशात् मया समीरितं तत् तत्त्वं यथार्थमेव इत्युपधार्यतां निश्चीयताम् ॥ २१ ॥

गो० टी०–मयेति । अभिमानात् शौर्याभिमानात् त्वय्यभिमानाद्वा तत्त्वं यथार्थम् ॥ २१–२३ ॥

२२–२३] ति० टी०–एतदनृतवचनाभावं सत्येन तत्साक्षितयेत्यर्थः ॥ २२ ॥ २३ ॥

रा० टी०–तत्र हेतुमाह–अनृतमिति । अनृतम् मृषा मे नोक्तपूर्वं न च कदाचन वक्ष्ये सत्येनैव एतत्प्रतिज्ञानामि अनृतं न वच्मीत्यर्थः, ते शपामि शपथं करोमीत्यर्थः ॥ २२ ॥

रा० टी०–तत इति । ततः तस्य राघवस्य विशेषतः प्रतिज्ञातं वचः श्रुत्वा वानरैः सचिवैः सह सुग्रीवः प्रहृष्टोऽभवदिति शेषः ॥ २३ ॥

२४–२५] ति० टी०–संपृक्तौ कृतसख्यसंपन्नौ अभापतामभावेताम् ॥ २४ ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा० टी०–एवमिति । ततोऽनन्तरम् एकान्तसंपृक्तौ एकान्ते स्थितौ नरवानरौ रामसुग्रीवौ अन्योन्यसदृशमेवं सुखदुःखमभाषताम् ॥ २४ ॥

रा० टी०–महानुभावस्येति । हरिवीरमुख्यः हरिर्वानरो विद्वान् सुग्रीवः नृपाणामधिपस्य रामस्य वचो निशम्य हृदयेन मनसा कार्यं कृतं मेने ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तमः सर्गः ॥ ७ ॥

१ मयीति गो. पाठः । २ प्रभावत्तामिति गो. पाठः

अष्टमः सर्गः ।

रामसौहृदकृष्टेरात्मानं सुहृद्गणांश्च प्रशंसन्सुग्रीवो रामेण सहैकशाखासनोपविष्टो वालितोऽभय याचते । पुनश्च विस्तरतः भार्याहरणादिवात्यपकृतिं संदर्शयँस्तद्वधं याचते । एतादृग्विरोधकारण रामेण पृष्टः सुग्रीवस्तद्वक्तुमुपक्रमते ।

परितुष्टस्तु[1] सुग्रीवस्तेन वाक्येन हर्षितः[2] । लक्ष्मणस्याग्रजं शूरमिदं वचनमब्रवीत् ॥ १ ॥
सर्वथाहमनुग्राह्यो देवतानां न संशयः । उपपन्नो[3] गुणोपेतः सखा यस्य भवान्मम ॥ २ ॥
शक्यं खलु भवेद्राम सहायेन त्वयाऽनघ । सुरराज्यमपि प्राप्तुं स्वराज्यं किमुत प्रभो ॥ ३ ॥
सोऽहं सभाज्यो बन्धूनां सुहृदां चैव राघव । यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजम्[4] ॥ ४ ॥
अहमप्यनुरूपस्ते वयस्यो ज्ञास्यसे शनैः[5] । न तु वक्तुं समर्थोऽहं त्वयि आत्मगतान्गुणान्[6] ॥ ५ ॥
महात्मनां तु भूयिष्ठं त्वद्विधानां कृतात्मनाम् । निश्चला भवति प्रीतिर्धैर्यमात्मवतां वर[7] ॥ ६ ॥
रजतं वा सुवर्णं वा शुभान्याभरणानि[8] च । अविभक्तानि साधूनामवगच्छन्ति साधवः ॥ ७ ॥
आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा । निर्दोषश्च सदोषश्च वयस्यः परमा गतिः ॥ ८ ॥

गो० टी०–एवमिति । एकान्तसंपृक्तौ संयुक्तौ एकान्ते रहसि संयुक्तौ एकान्तं नियतं यथा तथा संयुक्तौ वा अभाषताम् । व्यत्ययेन परस्मैपदम् अडभावश्च ॥ २४ ॥

गो० टी०–महेति । स्पष्टम् ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

१] ति० टी०–तेन वाक्येन 'अनृतं नोक्तपूर्वं मे' इत्यादिवाक्येन ॥ १ ॥

रा० टी०–रामं प्रति सुग्रीवोक्तिमाह–परितुष्ट इत्यादिभिः । तेन रामोक्तेन वाक्येन परितुष्टः अत एव हर्षितः प्राप्तानन्दः सुग्रीवः लक्ष्मणस्याग्रजं राममिदमब्रवीत् ॥ १ ॥

गो० टी०–अथ सुग्रीवस्य स्वशोकमूलविज्ञापनमष्टमे–परितुष्टमित्यादि ॥ १ ॥

२–३] ति० टी०–उपपन्नः संपन्नः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–सर्वेत्यादिभिः । उपपन्नः स्वाभाविकसकलसंपत्तिविशिष्टः गुणोपेतः सकलसद्गुणयुक्तः भवान् यस्य मम सखा सोऽहं देवतानां सर्वथाऽनुग्राह्यः अनुग्रहणीयः । 'उपपन्नगुणोपेतः' इति भूषणपाठः ॥ २ ॥

गो० टी०–सर्वथेति । देवतानामनुग्राह्यः दयनीयोऽभवम् । यस्य मे भवान् सखाऽऽसीत् । कीदृशः सखा, उपपन्नगुणोपेतः राजयोग्यशौर्यवीर्यादिसर्वगुणोपपन्नः ॥ २ ॥

रा० टी०–शक्यमिति । हे राम ! सहायेन त्वया सुरराज्यमपि प्राप्तुं शक्यं स्वराज्यं प्राप्तुं शक्यमिति किमुत॥३॥

गो० टी०–शक्यमित्यादि चतुश्चत्वारिंशत् ॥ ३ ॥

४] ति० टी०–सभाज्यः पूज्यः । यस्य येन राघववंशजं मित्रं लब्धम् ॥ ४ ॥

रा० टी०–स इति । यस्य मम अग्निसाक्षिकमग्निसाक्षिपूर्वकं राघववंशजं मित्रं लब्धं सोऽहं बन्धूनां सुहृदां च सभाज्यः पूजनीयः । यस्येत्यत्र संबन्धसामान्ये षष्ठी ॥ ४ ॥

गो० टी०–सोऽहमिति । सभाज्यः पूज्यः ॥ ४ ॥ ५ ॥

५] ति० टी०–अनुरूपो योग्यः । ज्ञास्यसे आनुरूप्यमिति शेषः । न तु वक्तुं समर्थः 'आत्मप्रशंसा मरणं मम' इति न्यायात् ॥ ५ ॥

रा० टी०–अहमिति । ते अनुरूपः योग्यः वयस्यः सखा अहमपि अस्मीति शेषः, इति शनैः यथाकार्यं ज्ञास्यसे । ननु केन गुणेनानुरूपोऽसीत्यत आह–आत्मगतान् गुणान् स्वयं वक्तुमहं न समर्थः । एतेन स्वस्यातीव दुःखादिमत्त्वं सूचितम् ॥ ५ ॥

६] ति० टी०–भूयिष्ठमधिकं प्रीतिर्निश्चला भवति । वयस्यानामिति शेषः । आत्मवतां स्वाधीनानाम् ॥ ६ ॥

रा० टी०–महात्मनामिति । महात्मनां पूज्यस्वभावानां कृतात्मनां यतचित्तानामात्मवतां निश्चलधैर्याणां त्वद्विधानां भूयिष्ठं धैर्यमिव प्रीतिः अतिशु स्नेहः निश्चला भवति ॥ ६ ॥

गो० टी०–महात्मनामिति । भूयिष्ठम् अतिशयेन आत्मवताम् आत्मज्ञानिनाम् ॥ ६ ॥

७] ति० टी०–साधूनां वयस्यानाम् । साधवो वयस्याः । रजतमित्याद्युपलक्षणम् ॥ ७ ॥

८] ति० टी०–वयस्यः परमा गतिः । वयस्यस्येति शेषः ८॥

रा० टी०–रजतमिति । साधूनां वयस्यानां रजतायुपलक्षितवस्तुजातानि अविभक्तानि स्ववस्तुजातादभिन्नानि साधवो वयस्याः अवगच्छन्ति अत एव आढ्यः संपत्तिमान् वा दुःखितो वा निर्दोषो वा सदोषो वा वयस्यः सखैव परमा गतिः, वय-

---

१ परितुष्टमिति गो. पाठः २ वानर इति गो. पाठः । ३ उपपन्नगुणोपेत इति गो. पाठः । ४ स्वयमिति गो. रा. पाठः । ५ इवेति गो. रा. पाठः । ६ वक्ष्याभरणानीति गो. पाठः । ७ नेति गो. पाठः ।

धनत्यागः सुखत्यागो [1]देशत्यागोऽपि वाऽनघ । वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम् ॥ ९ ॥
तत्तथेत्यब्रवीद्रामः सुग्रीवं प्रियदर्शनम् । लक्ष्मणस्याग्रतो लक्ष्म्या वासवस्येव धीमतः॥ १० ॥
ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलम् । सुग्रीवः सर्वतश्चक्षुर्वने [2]लोलमपातयत् ॥ ११ ॥
स ददर्श ततः सालमविदूरे हरीश्वरः । सुपुष्पमीषत्पत्राढ्यं भ्रमरैरुपशोभितम् ॥ १२ ॥
तस्यैकां पर्णबहुलां शाखां भङ्क्त्वा [3]सुशोभिताम् । [4]रामस्यास्तीर्य सुग्रीवो निषसाद सराघवः ॥ १३ ॥
तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणम् । शालशाखां समुत्पाट्य विनीतमुपवेशयत् ॥ १४ ॥
सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा । [5]सालपुष्पावसंकीर्णे तस्मिन्गिरिवरोत्तमे ॥ १५ ॥
ततः प्रहृष्टः सुग्रीवः [6]श्लक्ष्णया शुभया गिरा । उवाच प्रणयाद्रामं हर्षव्याकुलिताक्षरम् ॥ १६ ॥

स्थानामिति शेषः । अत एव तथाविधमत्युत्कर्षं स्नेहं वयस्यप्रीतिं दृष्ट्वा अनुभूय वयस्यार्थे वयस्यप्रयोजनाय धनत्यागादयः प्रवर्तन्ते । श्लोकत्रयमेकान्वयि ॥ ७–९ ॥

गो० टी०–रजतमिति । साधूनां मित्राणां साधवो मित्राणि ॥ ७ ॥ ८ ॥

९] ति० टी०–तथाविधं स्वरसतो धनादित्यागप्रवर्तकमित्यर्थः ॥ ९ ॥

गो० टी०–धनत्याग इति । तथाविधं स्वस्नेहसदृशं स्नेहं दृष्ट्वा स्थितस्य वयस्यस्य वयस्यार्थे धनत्यागादयः प्रवर्तन्त इति योजना । अनया सुग्रीववचनभङ्ग्या आवाभ्यामेवं वर्तितव्यमिति व्यवस्था द्योत्यते ॥ ९ ॥

१०] ति० टी०–तत्तथेति । यदुक्तं वयस्ययोर्धनविभागादिकं तन्ममापि संमतमित्यब्रवीदित्यर्थः । लक्ष्म्या कान्त्या युतो रामो वासवस्येव वासवसदृशस्य लक्ष्मणस्येत्यन्वयः । लक्ष्मणस्याग्रत इत्यनेन यथा मम लक्ष्मणस्य मैत्री तथैव तवापीत्यपि सूचितम् ॥ १० ॥

रा० टी०–तदिति । तत् वयस्ययोर्धनादिभेदो नास्तीत्येतत्प्रतिपादकसुग्रीववचनं तथेति लक्ष्म्या स्वतःसिद्धसंपत्त्योपलक्षितो रामः वासवस्य इन्द्रस्येव लक्ष्मणस्याग्रतः सुग्रीवमब्रवीत् ॥ १० ॥

गो० टी०–तत्तथेति । लक्ष्म्या कान्त्या वासवस्येव स्थितस्य लक्ष्मणस्याग्रत इति संबन्धः । अनेनोक्तार्थे लक्ष्मणानुमतिर्ज्ञापिता ॥ १० ॥

११] ति० टी०–ततस्तस्मिन्नपगमोत्तरं द्वितीयदिन इत्यर्थः। स्थितं दृष्ट्वा भूमाविति शेषः ॥ ११ ॥

रा० टी०–तत इति । रामं स्थितं दृष्ट्वा वने सर्वतः चतुर्दिक्षु लोलं चञ्चलं चक्षुरपातयत् अलोकयत् इत्यर्थः ॥ ११ ॥

गो० टी०–तत इति । स्थितं भूषणग्रहणकालात्प्रभृति तिष्ठन्तमित्यर्थः । लोलं चक्षुरपातयदिति समीचीनशाखालाभार्थं सर्वत्रान्वेषयामासेत्यर्थः ॥ ११ ॥

१२] ति० टी०–ईषत्सुपुष्पं पत्राढ्यं पत्रबहुलम् ॥ १२ ॥

रा० टी०–स इति । हरीश्वरो वानरराजः सुग्रीवो अविदूरे निकटे सुपुष्पं शोभनपुष्पयुतम् ईषत्पत्राढ्यम् ईषत्पत्रैः ह्रस्वपर्णैः संपन्नं भ्रमरैरुपशोभितं शालं तदभिधतरुं ददर्श ॥ १२ ॥

गो० टी०–स ददर्शेति । ईषत्पत्राढ्यमिति पल्लवप्रचुरमित्यर्थः ॥ १२ ॥

१३–१४]ति०टी०–सराघवः सुग्रीवो निषसाद॥१३॥१४॥

रा० टी०–तस्येति । तस्य शालस्य पर्णबहुलामेकां शाखां भङ्क्त्वा रामस्याग्रे इति शेषः, आस्तीर्य सराघवः सुग्रीवो निषसाद ॥ १३ ॥

गो० टी०–तस्येति । पर्णबहुलां पल्लवबहुलाम् ॥ १३ ॥

रा० टी०–ताविति । आसीनौ तौ रामसुग्रीवौ दृष्ट्वा हनुमानपि शालशाखां समुत्पाट्य विनीतं लक्ष्मणमुपवेशयत् । एतेन पूर्वदत्तशाखासनयोः अतिसुखप्रदत्वं नेति ध्वनितम् ॥ १४ ॥

गो० टी०–ताविति । विनीतम् एकासने स्थितिमनङ्गीकुर्वन्तमित्यर्थः, उपवेशयत् उपावेशयत् ॥ १४ ॥

१५-१६] ति० टी०–सुखोपविष्टं रामं तु दृष्ट्वेति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–सुखेति । सालपुष्पावसंकीर्णे सालपुष्पैर्व्याप्ते गिरिवरोत्तमे गिरिवरस्योत्तमप्रदेशे प्रसन्नमुदधिं समुद्रमिव सुखोपविष्टं रामं ददर्शेति शेषः ॥ १५ ॥

रा० टी०–तत इति । ततः प्रसन्नतया रामस्य स्थितिदर्शनात् हेतोः प्रणयात् प्रणयं प्राप्य हर्षव्याकुलिताक्षरं यथा भवति तथा सुग्रीवो राममुवाच ॥ १६ ॥

गो० टी०–सुखोपविष्टमित्यादिश्लोकद्वयमेकान्वयम् । द्वितीयरामपदमभिरामार्थकम् । प्रसन्नमुदधिं यथा तद्वत् प्रसन्नं गम्भीरमित्यर्थः ॥ १५–१८ ॥

---

१ देहत्यागोऽपि वा पुनरिति गो. पाठः । २ वादिनमिति गो. पाठः । ३ पुष्पितामिति गो. पाठः । ४ सालस्येति गो. पाठः। ५ फलपुष्पसमाकीर्णे इति गो. शालेति रा. पाठः । ६ श्लक्ष्णं मधुरयेति गो. पाठः ।

अहं विनिकृतो भ्रात्रा चराम्येष भयार्दितः । ऋष्यमूकं गिरिवरं हृतभार्यः सुदुःखितः ॥ १७ ॥
सोऽहं त्रस्तो भये मग्नो वैने संभ्रान्तचेतनः । वालिना निकृतो भ्रात्रा कृतवैरश्च राघव ॥ १८ ॥
वालिनो मे भयार्तस्य सर्वलोकाभयंकर । ममापि त्वमनाथस्य प्रसादं कर्तुमर्हसि ॥ १९ ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः । प्रत्युवाच स काकुत्स्थः सुग्रीवं प्रहसन्निव ॥ २० ॥
उपकारफलं मित्रमपकारोऽरिलक्षणम् । अद्यैव तं वधिष्यामि तव भार्यापहारिणम् ॥ २१ ॥
इमे हि मे महाभागं पत्रिणस्तिग्मतेजसः । कार्तिकेयवनोद्भूताः शरा हेमविभूषिताः ॥ २२ ॥
कङ्कपत्रपरिच्छन्ना महेन्द्राशनिसंनिभाः । सुपर्वाणः सुतीक्ष्णाग्राः सरोषा भुजगा इव ॥ २३ ॥
वालिसंज्ञममित्रं ते भ्रातरं कृतकिल्बिषम् । शरैर्विनिहतं पश्य विकीर्णमिव पर्वतम् ॥ २४ ॥
राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः । प्रहर्षमतुलं लेभे साधुसाध्विति चाब्रवीत् ॥ २५ ॥
राम शोकाभिभूतोऽहं शोकार्तानां भवान्गतिः । वयस्य इति कृत्वा हि त्वय्यहं परिदेवये ॥ २६ ॥

१७-२०] ति० टी०-अहं विनिकृत इति पूर्वदिवसोक्तार्थस्मारणं तदर्थस्थावश्यानुष्ठेयत्वाभिप्रायेण ॥ १७-२० ॥

रा० टी०-तद्वचनाकारमाह-अहमित्यादिभिः । अहमित्यारभ्य श्लोकचतुष्टयमेवमानुपूर्वीकं पञ्चमसर्गे पठितमिति तत्राख्यानेनैव गतार्थत्वान्न व्याख्यायते । पौनरुक्त्यं तु न पूर्वप्रार्थितस्य स्मारकत्वात् ॥ १७ ॥

रा० टी०-स इति ॥ १८ ॥

रा० टी०-वालिन इति ॥ १९ ॥

गो० टी०-वालिन इति । हे सर्वलोकाभयंकर ! वालिनः सकाशात् भयार्तस्य मे ममापि अत्यन्तभाग्यहीनस्यापि प्रसादं कर्तुमर्हसि ॥ १९ ॥

रा० टी०-एवमिति ॥ २० ॥

गो० टी०-एवमिति । प्रहसन्निव पूर्वमेव प्रतिज्ञातेऽपि चापलातिशयात् पुनः प्रार्थयत इति मन्दस्मितवानित्यर्थः॥२०॥

२१] ति० टी०-नन्वं भ्रातृत्वमरित्वेन विरुद्धमिति जनाशङ्कायां स्वयमेवोत्तरयति-उपकारेत्यादि । उपकाररूपफलमेव मित्रत्वे प्रयोजकम्, न त्वेकोदरे जन्मेत्याशयः॥ २१॥

रा० टी०-तद्वचनाकारमाह-उपकारेति । उपकारः फलं बोधकं यस्य तत् मित्रं भवतीति शेषः । अपकारोऽरिलक्षणम् अरिबोधकं सामान्ये नपुंसकम् अतः तव भार्यापहारिणमथैव वधिष्यामि ॥ २१ ॥

गो० टी०-उपकारेति । अरिलक्षणमित्यनन्तरम् अत इत्युपस्कार्यम् ॥ २१ ॥

२२] ति० टी०-कार्तिकेयस्य स्कन्दस्योत्पत्तिक्षेत्रभूतं वनं शरवणं तत्रोत्पन्नकाण्डाः ॥ २२ ॥

रा० टी०-तद्वधयोग्यतासंभवायाह-इमे इति । पत्रिणः कङ्कपत्रविशिष्टाः तिग्मतेजसः हेमविभूषिताः इमे शराः कार्तिकेयवनोद्भूताः स्कन्दोत्पत्तिभूमिकाननप्रादुर्भूतकाण्डकाः एतेन तेषामभेद्यत्वं बोधितं तदुद्भूतशराणामभेद्यत्वेन प्रसिद्धत्वात्२२

गो० टी०-इमे हीति । पत्रिणः प्रशस्तपत्रिणः तिग्मतेजसः क्रूरतेजसः कार्तिकेयवनोद्भूताः शरवणोद्भूताः कङ्कपत्रप्रतिच्छन्ना इति पत्रिण इत्युक्तं विशेष्यते । महेन्द्रपदेनाशनेस्तत्संनिहितत्वातिशय उच्यते । इमे मे शराः महावेगत्वादिविशिष्टा हि अतः एतैः शरैर्वालिनं विनिहतं पश्येति संबन्धः ॥ २२-२४ ॥

२३] ति० टी०-शोभनानि पर्वाणि येषां ते ॥ २३॥

रा० टी०-कङ्केति । अयं पूर्वो व्याख्यातः ॥ २३ ॥

२४-२५] ति० टी०-भ्रातरमित्रमप्येकोदरजन्ममात्रेण तथा व्यवहृतं पश्य द्वित्रैर्दिवसैरिति शेषः ॥ २४ ॥ २५ ॥

रा० टी०-वालीति । वालिसंज्ञमरिं शङ्कुं ते भ्रातरं विकीर्णं हिंसितं पर्वतमिव शरैर्विनिहतं पश्य ॥ २४ ॥

रा० टी०-राघवस्येति । वाहिनीपतिः वानरसेनाधीशः सुग्रीवः राघवस्य वचः श्रुत्वा अतुलं प्रहर्षं लेभे साधु साधु इति उक्त्वा अब्रवीच्च ॥ २५ ॥

गो० टी०-राघवस्येति । वाहिनीपतिः वानरसेनाधिपतिः ॥ २५ ॥

२६] ति० टी०-दुःखाशयात्पुनराह-राम इत्यादि । शोकार्तगतित्वाद्वयस्यत्वाच्च त्वयि देवनम् ॥ २६ ॥

रा० टी०-तद्वचनाकारमाह-राम इति । हे राम ! अहं शोकाभिभूतः भवान् तु शोकार्तानां गतिः वयस्यः सखा च इति कृत्वा इति हेतोः त्वयि त्वत्समीपे अहं परिदेवये स्वदुःखं कथयामि ॥ २६ ॥

गो० टी०-राम इति । वयस्य इति । वयस्य इति चेत्यर्थः, त्वयि त्वत्समीपे ॥ २६-२८ ॥

१ वसाम्युद्भ्रान्तेति गो.पाठः । २ हनिष्यामीति गो.पाठः । ३ वेगा इति गो.पाठः । ४ प्रतीति रा.पाठः। ५ भ्रातृसज्ञममित्रं ते वालिनमिति गो.पाठः।

त्वं हि पाणिप्रदानेन वयस्यो मेऽग्निसाक्षिकम् । कृतः प्राणैर्बहुमतः सत्येन च शपाम्यहम् ॥ २७ ॥
वयस्य इति कृत्वा च [2]विस्रब्धः प्रवदाम्यहम् । दुःखमन्तर्गतं [3]तन्मे मनो हरति नित्यशः ॥ २८ ॥
एतावदुक्त्वा वचनं बाष्पदूषितलोचनः । बाष्पदूषितया वाचा नोच्चैः शक्नोति भाषितुम् २९॥
बाष्पवेगं तु सहसा नदीवेगमिवागतम् । धारयामास धैर्येण सुग्रीवो रामसंनिधौ ॥ ३० ॥
सं[5] निगृह्य तु तं बाष्पं प्रमृज्य नयने शुभे । विनिःश्वस्य च तेजस्वी राघवं पुनरूचिवान्॥३१॥
पुराहं वालिना राम राज्यात्स्वादवरोपितः । परुषाणि च संश्राव्य निर्धूतोऽस्मि बलीयसा॥३२॥
हृता भार्या च मे तेन प्राणेभ्योऽपि गरीयसी । सुहृदश्च मदीया ये संयता बन्धनेषु ते ॥ ३३ ॥
यत्नवांश्च स दुष्टात्मा मद्विनाशाय राघव । बहुशस्तत्प्रयुक्ताश्च वानरा निहता मया ॥ ३४ ॥
शङ्कया त्वेतयाहं च दृष्ट्वा त्वामपि राघव । नोपसर्पाम्यहं भीतो भये सर्वं हि बिभ्यति॥ ३५ ॥
केवलं हि सहाया मे हनुमत्प्रमुखास्त्विमे । अतोऽहं धारयाम्यद्य प्राणान्कृच्छ्रगतोऽपि सन् ३६
एते हि कपयः स्निग्धा मां रक्षन्ति समन्ततः । सह गच्छन्ति गन्तव्ये नित्यं तिष्ठन्ति चास्थिते३७॥

२७] ति० टी०–वयस्यत्वमुपपादयन्करुणामुत्पादयति–त्वं हीति। अग्निसाक्षिकं पाणिप्रदानेन वयस्य इत्यन्वयः॥२७॥

रा० टी०–त्वमिति । पाणिप्रदानेन अग्निसाक्षिकं यथा भवति तथा मे मया वयस्यः कृतः अतः त्वं मे प्राणैः प्राणेभ्यः बहुमतः अधिकं ज्ञातः इति सत्येन सत्यावलम्बेन अहं शपामि शपथं करोमि ॥ २७ ॥

२८] ति० टी०–अवक्तव्यमपि वयस्य इति कृत्वा विस्रब्धो विश्वस्तो वदामि । हरति क्षीणं करोति ॥ २८ ॥

रा० टी०–वयस्य इति । वयस्य[6] इति कृत्वा विस्रब्धः जातविश्वासोऽहं यत् दुःखं नित्यशः मे मनो हरति क्षिणोति तत् प्रवदामि ॥ २८ ॥

२९–३१] ति० टी०–न शक्नोति नाशक्नोत् ॥२९–३१॥

रा० टी०–एतावदिति । बाष्पदूषितलोचनः अश्रुव्याप्तनयनः सुग्रीवः एतावद्वचनमुक्त्वा बाष्पदूषितया वाचा हेतुभूतया उच्चैर्भाषितुं न शक्नोति ॥ २९ ॥

गो० टी०–एतावदिति । एतावदुक्त्वा पुराऽहं वालिनेत्यादि वक्तुकामस्तदुपोद्घातत्वेन ' दुःखमन्तर्गतं यन्मे मनो हरति नित्यशः ' इत्येतावदुक्त्वा शक्नोति अशक्नोत् ॥ २९ ॥

रा० टी०–बाष्पेति । आगतं नदीवेगमिव बाष्पवेगं धैर्येण सुग्रीवो धारयामास रुरोध ॥ ३० ॥

रा० टी०–स इति । स सुग्रीवः बाष्पं निगृह्य संरुध्य शुभे नयने प्रमृज्य च राघवं पुनरूचिवान् ॥ ३१ ॥

गो० टी०–बाष्पवेगमिति । रामसंनिधाविति मां प्रत्युपदिश्य स्वयं न शक्नोतीति रामो मन्येतेति भिया धारयामासेति भावः ॥ ३० ॥ ३१ ॥

३२] ति० टी०–वालिविनिकारं संक्षेपेणाह—पुराऽहमिति । स्वाद्राज्याद्धियमानज्येष्ठोचिताद्वानरराज्यात् अवरोपितोऽपहृताधिकारः, निर्धूतो भर्त्सितः ॥ ३२ ॥

रा० टी०–तद्वचनाकारमाह–पुरेति । पुरा पूर्वं परुषाणि वचांसि संश्राव्य वालिना स्वात् ज्येष्ठत्वेन तयोर्ग्यात् तदीयात् राज्यात् अवरोपितः हृताधिकारोऽहं निर्धूतः निःसारितोऽस्मि ॥ ३२ ॥

गो० टी०–पुराऽहमिति । स्वाद्राज्यात् यौवराज्यात् निर्धूतः निरस्तः ॥ ३२ ॥

३३] ति० टी०–बन्धनेषु बन्धनागारेषु संयता बद्धाः॥३३॥

रा० टी०–हृतेति । प्राणेभ्योऽपि गरीयसी मे भार्या हृता । ये मदीयाः सुहृदस्ते बन्धनेषु कारागारेषु संयता निरुद्धाः ॥ ३३ ॥

गो० टी०–हृतेति । बन्धनेषु कारागृहेषु ॥ ३३ ॥ ३४ ॥

३४] ति० टी०–तत्प्रयुक्ता मद्वधाय तत्प्रेरिताः ॥ ३४ ॥

रा० टी०–यत्नवानिति । दुष्टात्मा स वाली मद्वधाय यत्नवान् अस्तीति शेषः, अत एव तत्प्रयुक्ता मद्वधाय प्रेषिता बहुशो वानरा मया निहताः ॥ ३४ ॥

३५–३७] ति० टी०–एतया शङ्कया मद्वधाय वालिप्रेरितत्वशङ्कया । नोपसर्पामि नोपासर्पम् । भये यत्किंचिद्भयप्राप्तौ बिभ्यति सर्वत एवेति शेषः ॥ ३५—३७ ॥

रा० टी०–शङ्कयेति । त्वां दृष्ट्वाऽपि एतया वालियत्नजनितया शङ्कया भीतोऽहं नोपसर्पामि हि यतः भये भयहेतौ सर्वे बिभ्यति ॥ ३५ ॥

गो० टी०–शङ्कयेति । एतया शङ्कया वालिप्रयुक्तत्वशङ्कया भीतः नोपसर्पामि नोपासर्पम् । भये भयनिमित्ते ॥ ३५ ॥

रा० टी०–केवलमिति । हनुमत्प्रमुखाः हनुमत्प्रभृतयः इमे कपयः केवलं सहायाः अतः कृच्छ्रगतः सन्नप्यहं प्राणान् धारयामि ॥ ३६ ॥

---

१ अपि शपामि ते इति गो. पाठः । २ विस्रब्धमिति गो. पाठः । ३ यदिति गो. पाठः । ४ बाष्पोपहतयेति गो. पाठः । ५ समिति गो. पाठः । ६ वाक्यमत्रेदिति गो. पाठः । ७ चेहेति गो. पाठः । ८ च स्थिते इति गो. पाठः ।

संक्षेपस्त्वेष मे राम किमुक्त्वा विस्तरं हि ते । स मे ज्येष्ठो रिपुर्भ्राता वाली विश्रुतपौरुषः॥३८॥
तद्विनाशेऽपि मे दुःखं प्रमृष्टं स्यादनन्तरम् । सुखं मे जीवितं चैव तद्विनाशनिबन्धनम् ॥ ३९ ॥
एष मे राम शोकान्तः शोकार्तेन निवेदितः । दुःखितः सुखितो वापि सख्युर्नित्यं सखा गतिः॥४०
श्रुत्वैतच्चै वचो रामः सुग्रीवमिदमब्रवीत् । किंनिमित्तमभूद्वैरं श्रोतुच्छामि तत्त्वतः ॥ ४१ ॥
सुखं हि कारणं श्रुत्वा वैरस्य तव वानर । आनन्तर्याद्विधास्यामि संप्रधार्य बलाबलम्॥ ४२ ॥
बलवान्हि ममामर्षः श्रुत्वा त्वामवमानितम् । वर्धते हृदयोत्कम्पि प्रावृड्वेग इवाम्भसः ॥ ४३ ॥
हृष्टः कथय विस्रब्धो यावदारोप्यते धनुः । सृष्टश्च हि मया बाणो निरस्तश्च रिपुस्तव॥ ४४ ॥
एवमुक्तस्तु सुग्रीवः काकुत्स्थेन महात्मना । प्रहर्षमतुलं लेभे चतुर्भिः सह वानरैः ॥ ४५ ॥

गो० टी०-केवलमिति । केवलम् अद्वितीयं यथा तथा ॥ ३६ ॥

रा० टी०-साहाय्यप्रकारमाह-एत इति । जिघ्राः मद्विषयकस्नेहयुक्ता एते कपयः समन्ततो मां रक्षन्ति गन्तव्यदेशे मया सह गच्छन्ति च स्थिते मयि सतीति शेषः, तिष्ठन्ति ॥ ३७ ॥

गो० टी०-केवलत्वमुपपादयति-एते हीति । गन्तव्ये मयि गच्छतीत्यर्थः ॥ ३७ ॥

३८] ति० टी०-संक्षेपस्त्वेष इत्येतच्छब्दार्थः-स मे ज्येष्ठ इति ॥ ३८ ॥

३९-४०] ति० टी०-तद्विनाशेऽपीति । यद्यपि भ्रातुर्नाशो दुःखाय, तथाप्यनन्तरं संप्रति विद्यमानं मे दुःखं तद्विनाशे एव प्रमृष्टं स्यात् । अपिरेवार्थे । तदेवाह—सुखमिति ॥ ३९ ॥ ४० ॥

रा० टी०-संक्षेप इति । हे राम ! एष संक्षेपः संक्षिप्योक्तमित्यर्थः । विस्तरमुक्त्वा मे किं प्रयोजनमिति शेषः, न प्रयोजनमित्यर्थः । नन्वं तर्हि किं कर्तव्यमित्यत आह-सः मद्वधविषयकयत्नवान् अत एव रिपुः विश्रुतपौरुषः मे मम भ्राता वाली अस्तीति शेषः, तद्विनाशे सत्येव अनन्तरं व्यवधानरहितं मे दुःखं प्रमृष्टं प्रणष्टं स्यात् अत एव सुखं सुखविशिष्टं मे जीवितं तद्विनाशनिबन्धनं वालिविध्वंसाधीनमेव । अपिरेवार्थे । श्लोकद्वयमेकान्वयि ॥ ३८ ॥ ३९ ॥

रा० टी०-एष इति । यतः सख्युर्गतिः रक्षकः दुःखितः सुखितो वा सखैव अतः शोकार्तेन मया शोकान्तः शोकविध्वंसोपायः निवेदितः कथितः ॥ ४० ॥

गो० टी०-संक्षेप इत्यादिद्वयम् । तद्विनाशादनन्तरं मे दुःखं प्रणष्टं स्यात् मे सुखं मे जीवितं चैव तद्विनाशनिबन्धनमित्येष संक्षेप इत्यन्वयः ॥ ३८-४१ ॥

४१] ति० टी०-तन्निमित्तं तत्त्वतः श्रोतुमिच्छामीत्यन्वयः ॥ ४१ ॥

रा० टी०-श्रुत्वेति । एतत् सुग्रीवोक्तं वचो रामः श्रुत्वा सुग्रीवमब्रवीत् । तद्वचनाकारमाह-किमिति । भ्रातुर्वालिनो वैरं किंनिमित्तं किंकारणकमभूत्तत्त्वतः इच्छामि श्रोतुमिति शेषः ॥ ४१ ॥

४२] ति० टी०-तव तेन वैरस्य कारणं श्रुत्वा युवयोर्बलाबलं च श्रुत्वा, आनन्तर्यात्तदनन्तरोत्पन्नविमर्शात्संप्रधार्य निश्चित्य हि निश्चयेन तव सुखं त्वत्सुखसाधनं वालिवधं विधास्यामि ॥ ४२ ॥

रा० टी०-तत्प्रयोजनमाह-सुखमिति । तव वैरस्य कारणं श्रुत्वा बलाबलं युवयोः प्राबल्यनैर्बल्ये संप्रधार्य ज्ञात्वा आनन्तर्यम् अन्तररहितं तव सुखं विधास्यामि । आनन्तर्यमित्यत्र स्वार्थे ष्ट्यञ् ॥ ४२ ॥

गो० टी०-सुखमिति । तव वैरस्य कारणं श्रुत्वा बलाबलं संप्रधार्य वैरकारणं वा वैरं वा बलवदिति विचार्य आनन्तर्यम् अनन्तरम् स्वार्थे ष्यञ् । तव सुखं विधास्यामि, स्वल्पापराधे प्रबलवैरं तेन कृतं चेत्तमयैव हत्वा तव सुखं विधास्यामि अनल्पापराधे स्वल्पवैरं चेत्समाधानसुखेन सुखं विधास्यामीति भावः ॥ ४२ ॥

४३] ति० टी०-अम्भःसंबन्धी प्रावृट्कालिको वेग इव मेऽमर्षो वर्धते ॥ ४३ ॥

रा० टी०-श्रवणप्रयोजनमाह-बलवानिति । अवमानितम् अपराधमन्तरा तत्कर्तृकानादरवन्तं त्वां श्रुत्वा अम्भसो जलस्य प्रावृड्वेग इव हृदयोत्कम्पी बलवान् ममामर्षो वर्धते । अवमानितं श्रुत्वेत्यनेन तदपराधाभावे तं न हन्तास्मीति व्यञ्जितं तेन रामस्य मर्यादापालकत्वं व्यक्तम् । अमर्षो वर्धते इत्यनेन कोपोद्गममन्तरा वधस्याशक्यत्वं सूचितम् ॥ ४३ ॥

गो० टी०-अपराधस्वल्पत्वपक्ष आह-बलवानिति । प्रावृषि वेगः प्रावृड्वेगः ॥ ४३ ॥

४४-४५] ति० टी०-यावदारोप्यते आरोपयिष्यामि । सृष्टो विसृष्टः रिपुर्निरस्तश्च । सप्तचयालंकारः, व्यङ्ग्यातिशयोक्तिश्च ॥ ४४ ॥ ४५ ॥

रा० टी०-हृष्ट इति । यावत्कालं मया धनुः आरोप्यते

१ नाशाद्धीति गो.पाठः । २ प्रणष्टमिति गो.पाठः । ३ वचनमिति गो.पाठः । ४ वर्तत इति गो.पाठः । ५ ष्यञिति तात्पर्यम् । षस्य स्थाने खस्योच्चारणात् ।

ततः प्रहृष्टवदनः सुग्रीवो लक्ष्मणाग्रजे । वैरस्य कारणं तत्त्वमाख्यातुमुपचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

स्त्रीहेतुकवैरानुबन्धिना मायाविनाम्ना रात्रिंचरेण निशीथे योद्धुमाहूतो वाली मया समं निर्गत्य पलायमाननिश्चरपदवीमनुसृतः प्राप्तगुहाद्वारः मां सशपथं बहिर्निवेश्य गुहां प्राविशत् । वत्सरपर्यन्तं निर्गमाभावादन्तश्चासुरकोलाहलतो गुहानिर्गतरुधिरप्लुतेश्च वालिनो नाशं मन्वानोऽहं शिलया गुहाद्वारं पिधाय निर्गतोऽप्रजायोदकं दत्त्वा किष्किन्धां प्रविष्टः भन्मुद्रया निश्चितवालिनाशैर्मन्त्रिभी राज्येऽभिषिक्तः प्रत्यागत्य निर्भर्त्सितमन्त्रिणो वालिनः प्रसादनाय तमभ्यवादयमिति सुग्रीवः कथयति ।

वाली नाम मम भ्राता ज्येष्ठः शत्रुनिषूदनः । पितुर्बहुमतो नित्यं मम चापि तथा पुरा ॥ १ ॥
पितर्युपरते तस्मिञ्ज्येष्ठोऽयमिति मन्त्रिभिः । कपीनामीश्वरो राज्ये कृतः परमसंमतः ॥ २ ॥
राज्यं प्रशासतस्तस्य पितृपैतामहं महत् । अहं सर्वेषु कालेषु प्रणतः प्रेष्यवत्स्थितः ॥ ३ ॥
मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः । तेन तस्य महद्वैरं वालिनः स्त्रीकृतं पुरा ॥ ४ ॥

तावत्कालं विस्रब्धः मद्विषयकविश्वासवान् अत एव हृष्टस्त्वं कथय वैरहेतुमिति शेषः । हर्षे हेतुमाह–यदा बाणो मया सृष्टः त्यक्तस्तदैव तव रिपुर्निरस्तः विध्वस्त इत्येवेहीति शेषः ॥४४॥

रा० टी०–एवमिति । काकुत्स्थेन रामेण एवमुक्तः सुग्रीवः वानरैः सह प्रहर्षं लेभे ॥ ४५ ॥

गो० टी०–वालिवैरस्वल्पत्व आह–हृष्ट इति । हृष्ट इत्यनेन वालिहननानन्तरं शोकं मा कुर्वित्यर्थः । क्रमेण तत्काले वक्ष्यत इत्याह–सृष्ट इति । यदा बाणो विसृष्टस्तदैव रिपुर्नष्ट इत्येवेहीत्यर्थः ॥ ४४ ॥ ४५ ॥

४६] ति० टी०–तत्त्वं तात्त्विकं वैरस्य कारणमित्यन्वयः ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टमः सर्गः ॥ ८ ॥

रा० टी०–तत इति । ततः प्रहर्षप्राप्त्यनन्तरं प्रहृष्टवदनः सुग्रीवः लक्ष्मणाग्रजे रामे वैरस्य तत्त्वमाख्यातुमुपचक्रमे ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डेऽष्टमः सर्गः ॥ ८ ॥

गो० टी०–तत इति । लक्ष्मणाग्रज इति निमित्तसप्तमी तन्निमित्तमित्यर्थः ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यानेऽष्टमः सर्गः ॥ ८ ॥

१] ति० टी०–उपक्रान्तमेवाह—वालीति । पितुः क्षेत्रिणः मात्रैक्याच्च भ्रातृत्वं भीमार्जुनादिवत् ॥ १ ॥

रा० टी०–सुग्रीवोक्तिमाह–वालीत्यादिभिः । शत्रुनिषूदनो ज्येष्ठो वालीनाम मम भ्राता पुरा वैरात्पूर्वं यथा पितुर्बहुमतः प्रियः इत्यर्थः, तथा ममापि बहुमतः आसीदिति शेषः ॥ १ ॥

गो० टी०–अथ वाल्यपराधवृत्तान्तो नवमे–वाली नामेत्यादि । षड्विंशतिः श्लोकाः ॥ १ ॥

२] ति० टी०–कपीनां राज्ये इत्यन्वयः ॥ २ ॥

रा० टी०–पितरीति । पितरि उपरते मृते सति ज्येष्ठोऽयमिति हेतोः राज्ये राज्यासने परमसंमतो वाली मन्त्रिभिः कपीनामीश्वरः कृतः ॥ २ ॥

गो० टी०–पितरीति । अयं ज्येष्ठः अतः कपीनामीश्वर इति राज्ये कृतः स्थापितः ॥ २ ॥

३] ति० टी०–पितृपैतामहम् आर्षत्वादुत्तरपदवृद्धिः॥३॥

रा० टी०–राज्यमिति । पितृपैतामहं पित्रादिपरम्परया भुक्तं राज्यं प्रशासतस्तस्य वालिनः प्रेष्यवत् भृत्यवत् सर्वेषु कालेषु प्रणतोऽहं स्थितः ॥ ३

गो० टी०–राज्यमिति । पितृपैतामहं स्वपितुः ऋक्षरजसः पित्रा ब्रह्मणा तस्मै दत्तत्वात् ॥ ३ ॥

४] ति० टी०–मायावीत्यन्वर्थं नाम । पूर्वजो ज्येष्ठः । स्त्रीकृतं स्त्रीनिमित्तम् । अयमितिहासः क्वचित्पुराणे शोधनीयो बहुदर्शिभिः ॥ ४ ॥

रा० टी०–मायावीति । दुन्दुभेः पूर्वजो ज्येष्ठः मयस्य सुतो मायावीनाम बभूवेति शेषः । तेन मायाविना तस्य वालिनः स्त्रीकृतं स्त्रीमूलकं महद् वैरं पुरा अभवदिति शेषः । मयस्येत्यध्याहृतम् अत एव 'मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरम्' इत्युत्तरकाण्डे वक्ष्यमाणं संगच्छते ॥ ४ ॥

गो० टी०–मायावीति । दुन्दुभेः पूर्वजः अग्रजः सुतः मयस्येति शेषः । वक्ष्यत्युत्तरकाण्डे मयः—'मायावी प्रथम-

१ ऽस्माकमिति गो. पाठः । २ स्त्रीकृतं विश्रुतमिति रा. पाठः ।

स तु सुप्ते जने रात्रौ किष्किन्धाद्वारमागतः । नर्दति स्म सुसंरब्धो वालिनं चाह्वयद्रणे ॥ ५ ॥
प्रसुप्तस्तु मम भ्राता नर्दतो भैरवस्वनम् । श्रुत्वा न ममृषे वाली निष्पपात जवात्तदा ॥ ६ ॥
स तु वै निःसृतः क्रोधात्तं हन्तुमसुरोत्तमम् । वार्यमाणस्ततः स्त्रीभिर्मया च प्रणतात्मना ॥ ७ ॥
स तु निर्धूय ताः सर्वा निर्जगाम महाबलः । ततोऽहमपि सौहार्दान्निःसृतो वालिना सह ॥ ८ ॥
स तु मे भ्रातरं दृष्ट्वा मां च दूरादवस्थितम् । असुरो जातसंत्रासः प्रदुद्राव तदा भृशम् ॥ ९ ॥
तस्मिन्द्रवति संत्रस्ते ह्यावां द्रुततरं गतौ । प्रकाशोऽपि कृतो मार्गश्चन्द्रेणोद्गच्छता तदा ॥ १० ॥
स तृणैराततं दुर्गं धरण्या विवरं महत् । प्रविवेशासुरो वेगादावामासाद्य विष्ठितौ ॥ ११ ॥
तं प्रविष्टं रिपुं दृष्ट्वा बिलं रोषवशं गतः । मामुवाच ततो वाली वचनं क्षुभितेन्द्रियः ॥ १२ ॥
इह तिष्ठाद्य सुग्रीव बिलद्वारि समाहितः । यावदेत्र प्रविश्याहं निहन्मि समरे रिपुम् ॥ १३ ॥
मया त्वेतद्वचः श्रुत्वा याचितः स परंतपः । शापयित्वा च मां पद्भ्यां प्रविवेश बिलं ततः ॥ १४ ॥
तस्य प्रविष्टस्य बिलं साग्रः संवत्सरो गतः । स्थितस्य च बिलद्वारि स कालो व्यत्यवर्तत ॥ १५ ॥

स्तात दुन्दुभिस्तदनन्तरः' इति । तेन मायाविना तस्य वालिनः स्त्रीकृतं स्त्रीनिमित्तं महद्वैरमस्तीति पुरा विश्रुतम् ॥ ४ ॥

५-१०] ति० टी०-सुप्ते जने रात्रौ सुप्तजने भागेऽर्धरात्रे रणनिमित्तम् ॥ ५-१० ॥

रा० टी०-स इति । रात्रौ जने सुप्ते सति किष्किन्धाद्वारमागतः सुसंरब्धः जातकोपः स मायावी नर्दति स्म रणे रणार्थं वालिनमाह्वयच्च ॥ ५ ॥

गो० टी०-स त्विति । सुप्तजने सुप्तः जनो यस्मिन् रात्र्यंशे स सुप्तजनः, अर्धरात्र इत्यर्थः ॥ ५ ॥

रा० टी०-प्रसुप्त इति । प्रसुप्तो मम भ्राता वाली नर्दतो मायाविनो भैरवस्वनं श्रुत्वा न ममृषे अत एव जवात् वेगात् निष्पपात निरगच्छत् ॥ ६ ॥

रा० टी०-स इति । क्रोधात् असुरोत्तमं हन्तुं निस्सृतः स वाली स्त्रीभिः प्रणतात्मना मया च वार्यमाण आसीदिति शेषः ॥ ७ ॥

रा० टी०-स इति । स वाली ताः मया सहिताः सर्वाः स्त्रियः निर्धूय तिरस्कृत्य निर्जगाम । ततोऽनन्तरं सौहार्दात् हेतोः वालिना सह अहमपि निस्सृतः ॥ ८ ॥

रा० टी०-स इति । अवस्थितं भ्रातरं मां च दूरात् दृष्ट्वा जातसंत्रासः असुरः स मायावी भृशं प्रदुद्राव ॥ ९ ॥

गो० टी०-प्रसुप्त इति । भैरवस्वनं भैरवस्वनरूपं नर्दितं गर्जितम् ॥ ६-९ ॥

रा० टी०-तस्मिन्निति । संत्रस्ते तस्मिन् द्रवति विद्रवति सति आवां द्रुततरमतिशीघ्रं गतौ तदा उद्गच्छता उदयं प्राप्नुवता चन्द्रेण मार्गोऽपि प्रकाशः प्रकाशितः कृतः ॥ १० ॥

गो० टी०-तस्मिन्निति । उद्गच्छता उदयमानेन ॥ १० ॥

११] ति० टी०-तृणैराततं छन्नं विवरं बिलमासाद्य प्राप्य विष्ठितौ स्थितौ ॥ ११ ॥

रा० टी०-स इति । असुरः स मायावी तृणैः आततं महत् बृहत् अत एव दुर्गममन्यैर्दुर्गमं धरण्या विवरं वेगात् प्रविवेश । आवामासाद्य गुहाद्वारं प्राप्य विष्ठितौ स्थितौ ॥ ११ ॥

गो० टी०-स इति । आसाद्य बिलद्वारमिति शेषः ॥ ११-१३ ॥

१२-१३] ति० टी०-बिलं प्रविष्टं दृष्ट्वा ॥ १२ ॥ १३ ॥

रा० टी०-तामिति । बिलं प्रविष्टं तं रिपुं दृष्ट्वा रोषवशं गतः अत एव क्षुभितेन्द्रियो वाली मामुवाच ॥ १२ ॥

रा० टी०-तद्वचनाकारमाह-इहेति । अत्र अस्यां गुहायामथ प्रविश्य समरे रिपुं यावन्निहन्मि तावत् समाहितस्त्वमिह बिलद्वारि तिष्ठ ॥ १३ ॥

१४] ति० टी०-एतद्वचो रिपुवधाय बिलप्रवेशवचनं याचितः सहप्रवेशमिति शेषः । स्वपादाभ्यां शापयित्वा स्वपादशपथपूर्वं सहप्रवेशान्निवार्य यावन्मदागमनं तावद्बिलद्वारि तिष्ठेति चोक्त्वेत्यर्थः ॥ १४ ॥

रा० टी०-मयेति । एतत् वचः श्रुत्वा परंतपः स वाली मया याचितः सह प्रवेशायेति शेषः, स मया याचितो वाली पद्भ्यां स्वचरणाभ्यां मां शापयित्वा बिलात् यावत्स्वागमनं स्वचरणशपथपूर्वकं संस्थाप्येत्यर्थः, ततस्तद्बिलं प्रविवेश ॥ १४ ॥

गो० टी०-मया त्विति । याचितः सह प्रवेशनमिति शेषः । पद्भ्यां स्वपदाभ्याम् "शपथङ्कृत्थाशपां क्षीप्स्यमानः" इति चतुर्थी ॥ १४ ॥

१५] ति० टी०-साग्रः संवत्सरः किंचिदधिकः संवत्सरः, द्वारि स्थितस्य च मम स कालः साग्रः संवत्सरो व्यत्यवर्ततातिक्रान्तः । तावत्पर्यन्तं मया तत्रैव स्थितमित्याशयः ॥ १५ ॥

---

१ नर्दनमिति गो. पाठः । २ सर्वान्न इति गो. पाठः । ३ तंत इति गो. पाठः । ४ चेति गो. पाठः । ५ तदेति गो. पाठः । ६ त्वं तिष्ठेति गो. पाठः । ७ तत्रेति गो. पाठः । ८ सहसेति गो. पाठः । ९ त्विति गो. पाठः । १० महदिति गो. पाठः । ११ मम द्वारीति गो. पाठः ।

अहं तु नष्टं तं ज्ञात्वा स्नेहादागतसंभ्रमः । भ्रातरं न प्रपश्यामि पापशङ्कि च मे मनः ॥ १६ ॥
अथ दीर्घस्य कालस्य विलात्तस्माद्विनिःसृतम् । सफेनं रुधिरं दृष्ट्वा ततोऽहं भृशदुःखितः ॥ १७ ॥
नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः । न रतस्य च संग्रामे क्रोशतोऽपि स्वनो गुरोः ॥१८॥
अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं हतम् । पिधाय च बिलद्वारं शिलया गिरिमात्रया ॥ १९ ॥
शोकार्तश्चोदकं कृत्वा किष्किन्धामागतः सखे । गूहमानस्य मे तत्त्वं यत्नतो मन्त्रिभिः श्रुतम्॥ २० ॥
ततोऽहं तैः समागम्य समेतैरभिषेचितः । राज्यं प्रशासतस्तस्य न्यायतो मम राघव ॥ २१ ॥
आजगाम रिपुं हत्वा दानवं स तु वानरः । अभिषिक्तं तु मां दृष्ट्वा क्रोधात्संरक्तलोचनः॥ २२ ॥
मदीयान्मन्त्रिणो बद्ध्वा परुषं वाक्यमब्रवीत् । निग्रहे चै समर्थस्य तं पापं प्रति राघव ॥ २३ ॥

रा० टी०–तस्येति । बिलं प्रविष्टस्य तस्य वालिनः साग्रः समग्रः संवत्सरः गतो व्यतीतः । बिलद्वारि स्थितस्य ममापि सः साग्रः संवत्सरः कालः व्यत्यवर्तत ॥ १५ ॥

गो० टी०–तस्येति । तस्य प्रविष्टस्य तस्मिन् प्रविष्टे साग्रः संपूर्णः स कालः संवत्सरः, ममापि संवत्सरो गत इत्यर्थः ॥ १५ ॥

१६-१७] ति० टी०–ततो यदा हतं भ्रातरं न पश्यामि तदाऽहं भ्रातरं नष्टं दर्शनाविषयं जातम् स्नेहादागतसंभ्रम आगतक्षोभो जातः, पापशङ्कि मरणशङ्कि मे मनो जातं च॥१६॥१७॥

रा० टी०–अहमिति । तं बिले प्रविष्टं भ्रातरं न पश्यामि संवत्सरपर्यंतं नापश्यम् इति हेतोः मे मनः पापशङ्कि पापात् पापिनः मायाविनः शङ्कते स्वभ्रातृकर्मकवधं संभावयति तच्छीलं मे मनो जातमिति शेषः, अत एव तं भ्रातरं नष्टं हिंसितं ज्ञात्वा स्नेहात् तद्विषयकातिप्रीतेः हेतोः आगतसंभ्रमः प्राप्तोद्वेगः आसामिति शेषः॥ १६ ॥

गो० टी०–अहं त्विति । अहं तं नष्टं ज्ञात्वा साग्रसंवत्सरमदृष्टं बुद्ध्या स्नेहादागतसंभ्रमोऽभवं भ्रातरं च न पश्यामि नापश्यम् ततः मे मनः पापाशङ्कि तन्मरणाशङ्कि जातम्॥१६॥

रा० टी०–अथेति । अथानन्तरं दीर्घस्य कालस्य अपगमे सतीति शेषः, तस्माद्बिलाद्बिनिस्सृतं सफेनं रुधिरं दृष्ट्वा ततस्तस्मादर्शनात् अहं भृशदुःखितः अभवमिति शेषः ॥ १७ ॥

गो० टी०–अथेति । रक्तं रक्तवर्णम् ॥ १७ ॥ १८ ॥

१८] ति० टी०–संग्रामे रतस्य निरतस्य क्रोशतोऽपि गुरोः स्वनो न श्रोत्रमागत इत्यनुकर्षः॥ १८ ॥

रा० टी०–नर्दतामिति । नर्दतामसुराणां ध्वनिः मे श्रोत्रमागतः प्राप्तः । संग्रामे रतस्य क्रोशतोऽपि गुरोः वालिनः स्वनः न श्रोत्रमागतः श्रोत्रमागत इत्युभयान्वयि ॥ १८ ॥

१९] ति० टी०–चिह्नैर्बिलद्वारि रुधिरनिःसरणाद्यैरीयत्कालमक्रोशनादिभिर्भ्रातरं हतमवगतो ज्ञातवान् । पिधाय राक्षसनिर्गमशङ्कया ॥ १९ ॥

रा०टी०–अहमिति । तैः बिलनिर्गतरुधिराक्षरमात्रगर्जनादिभिः चिह्नैः भ्रातरं हतं बुद्धया स्वविचारेण अवगतः निश्चयवान् अहमासमिति शेषः, अत एव गिरिमात्रया पर्वततिभया शिलया बिलद्वारं पिधाय राक्षसकर्तृकबहिर्निर्गमनाभावाय आच्छाद्य शोकार्तः सन् उदकं कृत्वा किष्किन्धामागतः प्राप्तः । सार्धश्लोक एकान्वयी ॥ १९ ॥

गो० टी०–अहं त्विति । चिह्नैः मरणकालिकस्वरैः॥१९॥

२०] ति० टी०–यत्नतो गूहमानस्यापि मे तत्त्वं वालिवृत्तान्तविषयं मन्त्रिभिर्वालिमन्त्रिभिः श्रुतम् ॥ २० ॥

रा० टी०–गूहमानस्येति । तत्त्वं वालिवधं यत्नतोऽनेकविधोपायैर्गूहमानस्य शब्दाक्रमणादिशङ्कया गोप्यमानस्य मे मन्त्रिभिरमात्यैः श्रुतं तेषां संनिधौ मया कथितमित्यर्थः । ततस्तस्माद्धेतोः समेतैः तैः मन्त्रिभिः अहमभिषेचितः ॥ २० ॥

गो० टी०–गूहमानस्येति । तत्त्वं यथार्थं वालिमरणं गूह्यमानस्य प्रच्छाद्यतः मे मत्तः यत्नतः बहुयत्नेन स्वविषयशापादिना श्रुतमासीत् ॥ २०–२२ ॥

२१-२२] ति० टी०–समेतैर्मिलितैः । तस्य राज्यमिति बुद्ध्यैव न्यायतः प्रशासतो मम समीपमाजगाम स वानर इत्यन्वयः॥ २१ ॥ २२ ॥

रा० टी०–राज्यमिति । न्यायतो राज्यं प्रशासतो मम अभिमुखमिति शेषः । वानरो वाली रिपुं हत्वा आजगाम॥२१॥

रा० टी०–अभिषिक्तमिति । अभिषिक्तं मां दृष्ट्वा क्रोधात् संरक्तलोचनो वाली मदीयान् मन्त्रिणो बद्ध्वा परुषं वाक्यमब्रवीत् ॥ २२ ॥

२३] ति० टी०–मदीयान्मदभिषेककर्तॄन् । निग्रहे समर्थस्यापि मे बुद्धिर्भ्रातृगौरवेण यन्त्रिता संकुचिता सती तं पापं प्रति निग्रहाय न प्रावर्तत ॥ २३ ॥

रा० टी०–निग्रह इति । निग्रहे तत्परुषवाक्यादिनिरोधे समर्थस्यापि मे बुद्धिः भ्रातृगौरवयन्त्रिता भ्रातृगौरवहेतुकप्राप्तसंकोचा सती तं वालिनं प्रति न प्रावर्तत ॥ २३ ॥

गो० टी०–निग्रहेऽपीति । पापम् अज्ञानकृतमिति

१ चेति गो. पाठः । २ रक्तमहं दृष्ट्वा सुदुःखित इति गो. पाठः । ३ निरस्तस्येति गो. पाठः । ४ निरिति गो. पाठः । ५ वाली तमसुरोत्तममिति गो. पाठः । ६ वालीति गो. पाठः । ७ ऽपीति गो. पाठः ।

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

न प्रावर्तत मे बुद्धिर्भ्रातृगौरवयन्त्रिता । हत्वा शत्रुं स मे भ्राता प्रविवेश पुरं तदा ॥ २४ ॥
मानयँस्तं महात्मानं यथावच्चाभिवादयम् । उक्ताश्च नाशिषस्तेन प्रहृष्टेनान्तरात्मना ॥ २५ ॥
नत्वा पादावहं तस्य मुकुटेनास्पृशं प्रभो । अपि वाली मम क्रोधान्न प्रसादं चकार सः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

शल्याक्रमणशङ्किभिर्मन्त्रिभिरहं बलात्पदे न्ययोजि सुष्ठुतेऽभिगमः प्रतिपद्यात्मनः पदमित्युक्त्वा क्षमां याचन्त मां निवेदितशत्रुविनाशः क्रुद्धो वाली पौरान्साक्षीकृत्य दोषमारोप्य बहुवाच्यं श्रावयन्नगराग्निरवासयदिति श्रुतोभयवैरकारणो रामो वालिवधं प्रतिज्ञाय सुग्रीवमाश्वासयति ।

ततः क्रोधसमाविष्टं संरब्धं तमुपागतम् । अहं प्रसादयाञ्चक्रे भ्रातरं [3]हितकाम्यया ॥ १ ॥
दिष्ट्यासि कुशली प्राप्तो निहतश्च त्वया रिपुः । अनाथस्य हि मे नाथस्त्वमेको नाथ नँन्दन ॥ २ ॥
इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम् । छत्रं सवालव्यजनं प्रतीच्छस्व मया धृँतम् ॥ ३ ॥
आर्तस्तस्यँ बिलद्वारि स्थितः संवत्सरं नृप । दृष्ट्वा चँ शोणितं द्वारि बिलाच्चापि समुत्थितम् ॥ ४ ॥
शोकसंविग्नहृदयो भृशं व्याकुलितेन्द्रियः । अपिधाय बिलद्वारं शैलशृङ्गेण तत्त्वदा ॥ ५ ॥

सान्त्वनेऽपि धिक्कारणात् पापिष्ठं तं प्रति निग्रहे समर्थस्य प्रकृतिबलसंपन्नत्वादिति भावः । यन्त्रिता नियमिता ॥ २३ ॥

२४-२५] ति० टी०-उक्तानुवादपूर्वमवशिष्टव्यापारकथनम्—हत्वेत्यादि ॥ २४ ॥ २५ ॥

रा० टी०-हत्वेति । शत्रुं हत्वा मे भ्राता यदा पुरं प्रविवेश तदा महात्मानं तं वालिनं मानयन् सन् यथावत् अभ्यवादयं तेन वालिना च प्रहृष्टेन अन्तरात्मना मनसा आशिषो न उक्ताः । सार्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०-हत्वेति । प्रविवेश पुरमित्युक्त्वा मन्त्रिबन्धनादिकं पुराद्बहिरिति ज्ञेयम् ॥ २४ ॥ २५ ॥

२६] ति० टी०-अपि तथापीत्यर्थः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०-नत्वेति । तस्य वालिनः पादावहं नत्वा मुकुटेन अस्पृशं वाली तु क्रोधात् प्रसादं न चकार ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे नवमः सर्गः ॥ ९

गो० टी०-नत्वेति । मम क्रोधान्मयि कोपात् ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

१-५] ति० टी०-संरब्धं क्रोधावेशादेव क्षुभितचित्तम् । हितकाम्ययाऽऽत्महितेच्छया ॥ १-६ ॥

रा० टी०-सुग्रीवः कुद्धवालिविषये स्वकृत्यमाह-तत इत्यादिभिः । ततः वालिसमागमानन्तरं क्रोधसमाविष्टं क्रोधेन संयुक्तम् अत एव संरब्धं क्रोधसूचकचेष्टावन्तम् उपागतं प्राप्तं तं वालिनं हितकाम्यया स्वकल्याणवाञ्छयाऽहं प्रसादयाञ्चक्रे ॥ १ ॥

गो० टी०-अथ वालिदोषदर्शनेन रामस्य दृढतरा वालिवधप्रतिज्ञा दशमे-तत इत्यादि ॥ १ ॥

रा० टी०-प्रसादनप्रकारमाह-दिष्ट्येत्यादिभिः । हे अनाथनन्दन ! त्वया रिपुर्निहतः कुशली त्वं प्राप्तश्च स्वपुरमिति शेषः, दिष्ट्या भाग्यमेतत् ॥ २ ॥

गो० टी०-दिष्ट्येति । अनाथान् नन्दयतीत्यनाथनन्दनः ॥ २ ॥

रा० टी०-इदमिति । मया धृतमिदं सवालव्यजनं चामरसहितम् उदितं पूर्णचन्द्रमिव बहुशलाकं ते छत्रं प्रतीच्छस्व स्वीकुरु ॥ ३ ॥

गो० टी०-इदमिति । उद्यतम् अर्पितं प्रतीच्छस्व प्रतीच्छ ॥ ३ ॥

रा० टी०-नन्वहं माञ्जपेक्ष्य कथं त्वमिहागत इत्यत आह-आर्त इति । आर्तः भवत्कर्तृकबिलप्रवेशात् दुःखितः अत एव तत्र तस्यां बिलद्वारि संवत्सरं स्थितः बिलात् सञ्चरित्यतं शोणितं रुधिरं द्वारि दृष्ट्वा शोकसंविग्नहृदयः निश्चितभ्रातृवियोगजनितशोकव्याप्तचित्तः अत एव भृशमत्यन्तं व्याकुलितेन्-

१ भ्रातुरिति गो. पाठः । २ संतुष्टेनेति गो. पाठः । ३ प्रियेति गो. पाठः । ४ नन्दनः इति गो. पाठः । ५ उद्यतमिति गो. पाठः । ६ चार्थीते गो. पाठः । ७ अहमिति गो. पाठः । ८ तथेति गो. पाठः ।

तस्मादेशादपाक्रम्य किष्किन्धां प्राविशं पुनः । विषादाच्चिह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च ॥ ६ ॥
अभिषिक्तो न कामेन तन्मे क्षन्तुं त्वमर्हसि । त्वमेव राजा मानार्हः सदा चाहं यथा पुरा ॥ ७ ॥
राजभावे नियोगोऽयं मम त्वद्विरहात्कृतः । सामात्यपौरनगरं स्थितं निहतकण्टकम् ॥ ८ ॥
न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम् । मा च रोषं कृथाः सौम्य मम शत्रुनिबर्हण ॥९॥
याचे त्वां शिरसा राजन्मया बद्धोऽयमञ्जलिः । बलादस्मिन्समागम्य मन्त्रिभिः पुरवासिभिः १०॥
राजभावे नियुक्तोऽहं शून्यदेशजिगीषया । स्निग्धमेवं ब्रुवाणं मां स विनिर्भर्त्स्य वानरः ॥११॥
धिक्त्वामिति च मामुक्त्वा बहु तत्तदुवाच ह । प्रकृतीश्च समानीय मन्त्रिणश्चैव संमतान् ॥ १२ ॥
मामाह सुहृदां मध्ये वाक्यं परमगर्हितम् । विदितं वो मया रात्रौ मायावी स महासुरः ॥१३॥
मां समाह्वयत क्रुद्धो युद्धाकाङ्क्षी तदा पुरा । तस्य तद्भाषितं श्रुत्वा निःसृतोऽहं नृपालयात् १४॥

न्द्रियोऽहं शैलशृङ्गेण बिलद्वारमपिधाय असुरनिर्गमाभावाय आछाय तस्मात् देशात् अपाक्रम्य निर्गत्य किष्किन्धां पुनः प्राविशम्। सार्धश्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–आर्त इति । संवत्सरं बिलद्वारि स्थितः अहं च बिलद्वारि सम्भृतं शोणितं दृष्ट्वा आर्तश्चास्मि ॥ ४ ॥

गो० टी०–शोकेति । शोकसंविग्नहृदयः शोककम्पितहृदयः तद्बिलद्वारम् । तथा त्वया दृष्टप्रकारेण अपिधाय प्रच्छाद्य प्राविशम् ॥ ५ ॥

६] ति० टी०–विषादात्प्राविशमित्यन्वयः ॥ ६ ॥

रा० टी०–विषादादिति । विषादादिहागतमिति शेषः, मां दृष्ट्वा पौरैर्मन्त्रिभिश्चाहमभिषिक्तः कामेन स्वेच्छया नाभिषिक्तः तत् तस्मात् हेतोः मे अज्ञातापराधमिति शेषः, क्षन्तुमर्हसि यतो मानार्हः अस्माभिः पूजनीयः राजा त्वमेव अहं तु यथापुरा पूर्वसदृशस्त्वत्सेवक इत्यर्थः। सार्धश्लोक एकान्वयी ॥ ६ ॥ ७॥

गो० टी०–विषादादिति । इह विषादादागतं मां दृष्ट्वा विषादात् राज्यनाशविषादात् ॥ ६ ॥

७] ति० टी०–अभिषिक्तो बलान्न कामेन न मदीयराज्येच्छया तत्तस्मान्मे दैवागतापराधं क्षन्तुमर्हसि । यथा पुरा तव सेवकस्तथैव सदा इदानीमपीत्यर्थः ॥ ७ ॥

गो० टी०–त्वमेवेति अहं यथापुरं पूर्ववद्युवराजो भवामीत्यर्थः । राजभावनियोगः राजत्वेन राज्यशासनम् ॥७–९॥

८–१०] ति० टी०–राजभावे राज्येऽयं मम नियोगो मन्त्रिभिस्त्वद्विरहात्कृतः । अमात्यपौरसहितं नगरं निहतकण्टकम् अराजत्वप्रयुक्तदोषरहितं कर्तुमिति शेषः । तच्चेदं स्वदीयराज्यं मयि न्यासभूतं स्थितम् अहं तव निर्यातयामि, मा रोषं कृथा इत्यन्वयः ॥ ८–१० ॥

रा० टी०–नन्वेवं सेवकत्वे कथं राज्ये स्थितिरित्यत आह–राजेति । राजभावे राजधर्मे अयं मम नियोगस्त्वद्विरहात् तवाभावात् हेतोः कृतः अमात्यैः संपादितः अत एव सामात्यपौरनगरम् अमात्यपौरनगरसहितं निहतकण्टकं राज्यं स्थितम् ८

रा० टी०–न्यासेति । तव न्यासभूतं स्वकीयत्वेन संस्थापितमिव इदं राज्यं निर्यातयामि तुभ्यं समर्पयामीत्यर्थः, अतः मम मयि रोषं मा कृथाः ॥ ९ ॥

रा० टी०–याचे इति । मन्त्रिभिः पुरवासिभिश्च समागम्य शून्यदेशजिगीषया राजरहितदेशकर्तृकोत्कर्षप्राप्तीच्छया शश्वदाक्रमणनिवारणायेत्यर्थः, बलात् हठात् राजभावे अहं नियुक्तः अतः शिरसा प्रणतमूर्धा त्वां याचे प्रसादाय प्रार्थयामि अत एव अयमञ्जलिर्मया बद्धः । सार्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०–बलादिति । शून्यदेशजिगीषया राजशून्यदेशवशीकरणेच्छया ॥ १० ॥

११] ति० टी०–शून्यदेशस्य राजहीनदेशस्य या परेषां जिगीषा तया तन्निवृत्तिहेतुना । 'मशकार्थो धूमः' इतिवदयं प्रयोगः ॥ ११ ॥

रा० टी०–स्निग्धमिति । स वानरः स्निग्धं स्नेहयुक्तमेवं वचो ब्रुवाणं मां विनिर्भर्त्स्य त्वां धिगिति च मामुक्त्वा बहु अत्यन्तं तत्तत् अवाच्यवचनजातमुवाच ॥ ११ ॥

गो० टी०–स्निग्धमिति । तत्तत्परुषभाषणम् अश्लीलतया विशिष्य नोक्तम् ॥ ११ ॥

१२] ति० टी०–तत्तदुवाच अवाच्यवचनजातमित्यर्थः । प्रकृतीः स्वीयप्रजाः ॥ १२ ॥

रा० टी०–प्रकृतीरिति । सुहृदां मध्ये प्रकृतीः प्रजाः संमतान् मन्त्रिणश्च समानीय परमगर्हितं निन्दितं वाक्यं मामाह ॥ १२ ॥

गो० टी०–प्रकृतीरिति । मामुद्दिश्य प्रकृत्यादीनाहेत्यर्थः ॥ १२–१९ ॥

१३–१४] ति० टी०–मां प्रति परमं गर्हितं वाक्यं सुहृदां मध्य आह, मम विगर्हणाहेतुं च सभासदोऽभ्येत्याह–विदितं व इति । युष्माकं विदितं प्रत्यक्षसिद्धम् ॥१३॥१४॥

रा० टी०–तदाकारं बोधयितुं वाल्युक्तिमाह–विदितमि-

---

१ पुरमिति गो. पाठः । २ राजभावनियोग इति गो. पाठः । ३ मयेति गो. पाठः । ४ मयि शत्रुनिबर्हणेति गो. पाठः । ५ क्रूर इति गो. रा. पाठः । ६ सुदुर्मतिरिति गो. पाठः । ७ वचनमिति गो. पाठः ।

अनुयातश्च मां तूर्णमयं भ्राता सुदारुणः । स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः ॥ १५ ॥
प्राद्रवद्भयसंत्रस्तो वीक्ष्यावां समुपागतौ । अभिद्रुतस्तु वेगेन [3]विवेश स महाबिलम् ॥ १६ ॥
तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम् । अयमुक्तोऽथ मे भ्राता मया तु क्रूरदर्शनः ॥१७॥
अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम् । बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम् ॥१८॥
स्थितोऽयमिति मत्वाहं प्रविष्टस्तु दुरासदम् । तं मे मार्गयतस्तत्र गतः संवत्सरस्तदा ॥ १९ ॥
स तु दृष्टो मया शत्रुरनिर्वेदाद्भयावहः । निहतश्च मया सद्यः स सर्वैः सह बन्धुभिः॥ २० ॥
तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम् । पूर्णमासीदुराक्रामं स्तनतस्तस्य भूतले ॥ २१ ॥
सूदयित्वा तु तं शत्रुं विक्रान्तं तँमहं सुखम् । निष्क्रामं नेहँ पश्यामि बिलस्य पिहितं मुखम् ॥२२॥
विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः । यतः प्रतिवचो नास्ति ततोऽहं भृशदुःखितः ॥२३॥
पादप्रहारैस्तु मया बहुभिः परिपातितम् । ततोऽहं तेन निष्क्रम्य पथाँ पुरमुपागतः ॥ २४ ॥

त्यादिभिः । आपुरा युद्धाकाङ्क्षातिपूरकेण मया युद्धाकाङ्क्षी महासुरो मायावी मां समाह्वयत तत् वो युष्माकं विदितम्॥१३॥

रा० टी०–तस्येति । तस्य मायाविनो भाषितं श्रुत्वा नृपालयात् स्वगृहात् अहं निःसृतः सदारुणः वक्ष्यमाणदारुणकर्मविशिष्टः अयं भ्राता मामनुयातः ॥ १४ ॥

१५–१७] ति० टी०–सद्वितीयं भ्रात्रा सहायम् ॥ १५–१७ ॥

रा० टी०–स इति । महाबलः स मायावी सद्वितीयं द्वितीयसहितं मां दृष्ट्वैव भयसंत्रस्तः सन् प्राद्रवत् पलायत समुपागतौ पलायनेऽपि समीपं प्राप्तौ आवां वीक्ष्य अभिद्रुतः अतिद्रुतं गतः सन् महाबिलं वेगेन विवेश । सार्धश्लोकः संमिलितान्वयी ॥ १५ ॥ १६ ॥

रा० टी०–तमिति । सुमहद् बिलं प्रविष्टं तं मायाविनं विदित्वा अयं भ्राता मया उक्तः ॥ १७ ॥

१८] ति० टी०–शक्तिरिच्छाशक्तिः । प्रतीक्ष प्रतीक्षस्व ॥ १८ ॥

रा० टी०–तदुक्तिप्रकारमाह–अहत्वेति । अहत्वा मायाविवधमकृत्वा इतः पुरीं गन्तुं मे शक्तिर्नास्ति अतः यावदेनं मायाविनं निहन्मि तावत् बिलद्वारि त्वं प्रतीक्ष प्रतीक्षस्व॥१८॥

१९] ति० टी०–स्थितोऽयं बिलद्वारीति शेषः ॥ १९ ॥

रा० टी०–स्थित इति । अयं स्थितः गुहाद्वारीति शेषः, इति मत्वा निश्चित्य दुरासदम् असुरातिरिक्तैः प्रवेष्टुमशक्यं विवरमहं प्रविष्टः । तं मायाविनं मार्गयतः अन्वेषयतो मे मम संवत्सरो गतो व्यतीतः ॥ १९ ॥

२०] ति० टी०–अनिर्वेदात्संवत्सरान्वेषणेऽपि दर्शनाभावाद्भयावहः स तु कथंचिद्दृष्टो निहतश्च । समुच्चयालंकारः ॥ २० ॥

रा० टी०–स इति । अनिर्वेदात् संवत्सरमन्वेषणादनिवृत्तेर्हेतोः बन्धुभिः सह भयावहो मायावी मया दृष्टो निहतश्च२०

गो० टी०–स त्विति अनिर्वेदात् अक्लेशात् ॥ २० ॥

२१] ति० टी०–भुवस्तलेऽधस्तले पाताले स्तनतः शब्दं कुर्वतस्तस्यास्यात्प्रवृत्तेन रुधिरौघेण पूर्णं तद्बिलं दुराक्रममासीत् ॥ २१ ॥

रा० टी०–तस्येति । तस्य चोरप्रायस्य भूतले भुवोऽधोभागे स्तनतः स्वनं कुर्वतस्तस्य निहतमायाविनः आस्यात् मुखात् प्रवृत्तेन रुधिरौघेण दुराक्रामं तद्बिलं पूर्णमासीत् ॥ २१ ॥

गो० टी०–तस्येति । भूतले भूविवरे स्तनतः गर्जतः तत्पूर्वोक्तं तस्य बिलं स्तनतः तस्य आस्यात् प्रवृत्तेन रुधिरौघेण पूर्णं सत् दुराक्रममासीदिति योजना ॥ २१ ॥

२२–२३] ति० टी०–विक्रान्तं शूरं तं प्रसिद्धं मायाविनं सुखं सूदयित्वा त्विहागन्तुं निष्क्रामं निर्गममार्गं न पश्यामि । यतो बिलस्य मुखं पिहितम् ॥ २२ ॥ २३ ॥

रा० टी०–सूदयित्वेति । विक्रान्तम् अतिविक्रमवन्तं शत्रुं तं मायाविनमहं सुखं सूदयित्वा इह वर्णितबिले निष्क्रामं निर्गममार्गं न पश्यामि नापश्यम् । तत्र हेतुः–बिलस्य मुखं पिहितम् ॥ २२ ॥

गो० टी०–सूदयित्वेति । दुन्दुभेः सुतं भ्रातरमित्यर्थः, यद्वा नायं मायावी मयपुत्रः किं तु दुन्दुभिपुत्रोऽन्य इति बोध्यम् । पूर्वजो दुन्दुभेः सुत इति हि पूर्वमप्युक्तम् पिहितमिति हेतुगर्भं पिहितत्वान्मुखं न पश्यामि ॥ २२ ॥

रा० टी०–विक्रोशमानस्येति । सुग्रीवेति पुनः पुनः विक्रोशमानस्य मे यतः प्रतिवचः प्रत्युत्तरं नास्ति ततः तस्मात् हेतोः अहं भृशं दुःखितः ॥ २३ ॥

गो०टी०–विक्रोशमानस्येति । विक्रोशमानस्य आह्वयत । "कुश, आह्वाने रोदने च" इति धातुः ॥ २३ ॥

२४] ति० टी०–तेन पथा बिलद्वारमार्गेण ॥ २४ ॥

रा० टी०–पादप्रहारैरिति । बहुभिः पादप्रहारैः परिपातितं विदारितं निर्गमाय मार्गः कृत इत्यर्थः, ततोऽनन्तरं

१ तमनुद्रुताविति गो. पाठः । २ अनुद्रुतश्चेति गो. पाठः । ३ प्रविवेशेति गो.पाठः । ४ च मे मार्गमाणस्येति गो. पाठः । ५ तत्र सोऽसुरो बन्धुभिः सहेति गो. पाठः । ६ दुन्दुभेः सुतमिति गो.पाठः । ७ एवेति गो. पाठः । ८ यदेति गो.पाठः । ९ तद्विशारितमिति गो. पाठः । १० यथेति गो. रा.पाठः।

तत्रानेनास्मि संरुद्धो राज्यं मृगयतात्मनः । सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम् ॥२५॥
एवमुक्त्वा तु मां तत्र वल्लेणैकेन वानरः । तदा निर्वासयामास वाली विगतसाध्वसः ॥२६॥
तेनाहमपविद्धश्च हृतदारश्च राघव । तद्भयाच्च महीं सर्वां क्रान्तवान्सवनार्णवाम् ॥२७॥
ऋष्यमूकं गिरिवरं भार्याहरणदुःखितः । प्रविष्टोऽस्मि दुराधर्षं वालिनः कारणान्तरे ॥२८॥
एतत्ते सर्वमाख्यातं वैरानुकथनं महत् । अनागसा मया प्राप्तं व्यसनं पश्य राघव ॥ २९ ॥
वालिनश्च भयात्तस्य सर्वलोकभयापह । कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात् ॥ ३० ॥
एवमुक्तः स तेजस्वी धर्मज्ञो धर्मसंहितम् । वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ ३१ ॥
अमोघाः सूर्यसंकाशा निशिताः मे शरा इमे । तस्मिन्वालिनि दुर्वृत्ते पतिष्यन्ति रुषान्विताः॥३२॥
यावत्तं नहि पश्येयं तव भार्यापहारिणम् । तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः ॥३३॥
आत्मानुमानात्पश्यामि मग्नस्त्वं शोकसागरे । त्वामहं तारयिष्यामि बाढं प्राप्स्यसि पुष्कलम् ॥३४॥
तस्य तद्वचनं श्रुत्वा हर्षपौरुषवर्धनम् । सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे दशमः सर्गः ॥ १० ॥

तेन स्वपादप्रहारकृतमार्गेण निष्क्रम्य पुरं यथा यथावत् उपागतः, किंच यथापुरं पूर्ववदवेत्यर्थः॥ २४ ॥

गो० टी०–पादेति । तद्विलं विदारितं क्वचित्सरन्ध्रीकृतम् तेन पथा रन्ध्रमार्गेण ॥ २४ ॥

२५] ति० टी०–आत्मनो राज्यं मृगयता मार्गयतानेन तत्र बिलद्वारे संरुद्धो निरुद्धगतिकः कृतः ॥ २५ ॥

रा० टी०–शिलापिधाने स्वकल्पितहेतुमाह–तत्रेति । आत्मनो राज्यं मृगयता कथं प्राप्नुयामिति विचारयता सुग्रीवेण भ्रातृसौहृदं विस्मृत्य तत्र तस्मिन् बिलेऽहं सरुद्धोऽस्मि ॥ २५ ॥

गो० टी०–अत्रेति । अत्र बिले ॥ २५ ॥ २६ ॥

२६] ति० टी०–एकेन वल्लेणेति । अन्यत्सर्वं मम हरेत्यर्थः ॥ २६ ॥

रा० टी०–एवमिति । तत्र तस्मिन्समये मामेवमुक्त्वा विगतसाध्वसस्त्यक्तभयः वाली निर्वासयामास निःसारयामास२६

२७] ति० टी०–अपविद्धो निरस्तः ॥ २७ ॥

रा० टी०–तेनेति । तेन वालिना अपविद्धस्ताडितः हृतदारश्चाहं तद्भयात् सवनार्णवां वनार्णवसहितां सर्वां महीं क्रान्तवानस्मीति शेषः । एतेन निर्वासितेऽपि सुग्रीवेऽनेकविधविघातयत्नं कृतवानिति व्यक्तं, तेन तस्य महानपराधो व्यञ्जितः ॥२७॥

गो० टी०–तेनेति । अपविद्धः ताडितः ॥ २७ ॥

२८] ति० टी०–ऋष्यमूकं प्रविष्टोऽस्म्यन्यत्र निर्भयस्थितिमलभमानः । अत्र निर्भयस्थितिः कथं तत्राह–दुराधर्षमिति । मतङ्गशापलक्षणे कारणविशेषे सति वालिना दुराधर्षं दुष्प्रवेशम् ॥ २८ ॥

रा० टी०–ऋष्यमूके निरन्तरं स्थितौ हेतुमाह–ऋष्यमूकमिति । भार्याहरणदुःखितोऽहं कारणान्तरे मतङ्गशापकारणविशेषे सति वालिनो दुराधर्षं प्रवेष्टुमशक्यम् ऋष्यमूकं प्रविष्टोऽस्मि ॥ २८ ॥

गो० टी०–ऋष्यमूकमिति । कारणान्तरे मतङ्गशापनिमित्ते सति वालिनो दुराधर्षं दुराक्रमम् ॥ २८ ॥

२९] ति० टी०–वैरानुकथनं वैरकारणम् ॥ २९ ॥

रा० टी०–एतदिति । हे राघव ! अनागसा अपराधरहितेन मया व्यसनं दुःखं प्राप्तम् इति पश्य जानीहि एतत् महत् वैरानुकथनं वैरकथा ते तुभ्यमाख्यातं कथितम् ॥२९॥

गो०टी०–एतदिति । वैरानुकथनं वैरकारणाख्यानम्२९

३०–३१] ति० टी०–वालिन इति पञ्चमी ॥३०॥३१॥

रा० टी०–वालिन इति । हे सर्वलोकभयापह ! वालिनः सकाशात् भयार्तस्य मे प्रसादं तस्य वालिनः निग्रहात् वधात् कर्तुमर्हसि ॥ ३० ॥

रा० टी०–एवमिति । एवमुक्तः सुग्रीवेण प्रार्थितः स तेजस्वी रामः प्रहसन्निव सुग्रीवं वक्तुमारेभे । इव एवार्थे ॥३१॥

गो० टी०–वालिन इति । वालिन इति पञ्चमी॥३०–३३

३२] ति० टी०–रुषान्विता रुष्टेन मया पातिताः ॥३२॥

रा० टी०–तद्वचनाकारमाह–अमोघा इति । अमोघा-नैष्फल्यरहिताः रुषा तवापराधजनितदुरितनिवृत्तिहेतुककोपेन प्रयुक्ताः इमे मे शराः दुर्वृत्ते वालिनि पतिष्यन्ति ॥ ३२ ॥

३३] ति० टी०–चारित्रदूषकः निषिद्धानिषिद्धज्ञानवत्वे सति जीवतो भ्रातुर्भार्यापहारात् ॥ ३३ ॥

रा० टी०–वधे विलम्बो नास्तीति बोधयन्नाह–यावदिति। तव भार्यापहारिणं तं वालिनं यावन्न पश्येयं स्वात्मानं न दर्शयामि तावत् चारित्रदूषकः मर्यादाविघातको वाली जीवेत् ॥ ३३ ॥

३४–३५] ति० टी०–आत्मानुमानात्। अयं शोकाब्धि-

१ अत्रेति गो.पाठः। २ महीं कृत्स्नां क्रान्तवन्निति गो.पाठः। ३ भयार्तस्येति गो.पाठः। ४ भयंकरेति गो.पाठः। ५ममैते निशिताः शरा इति गो.पाठः। ६निपतिष्यन्ति वेगिता इति गो.पाठः। ७नाभिपश्यामिति गो.पाठः। ८मग्नं त्वामिति गो.पाठः। ९काममिति गो.पाठः। १०राघवस्यात्मनो हितमिति गो.पा.।

एकादशः सर्गः ।

रामबलं परिज्ञापयितुं वालिबलकथने प्रवृत्तः सुग्रीवः । वीर्योत्सिक्तदुन्दुभिनाम्नाऽसुरेण युद्धार्थं वालिनः समाह्वानं कृतम्, वालिना तं निहत्य मतङ्गर्षेराश्रमपरिसर उत्क्षेपणं च कृतम्, तन्मुखोच्छलद्रुधिरबिन्दुभिराश्रमदुष्टेः कुपितर्षेः ' यद्येतत्कर्तैतद्वन प्रविशेत्स न जीवेत् ' इति शापविसृष्टेरहमत्र निर्भयो वसामीत्युपक्रम्यैव बलिष्ठस्यापि वालिनो नाशक ते वीर्यं कथमवधारयामीतिसदिहान सुग्रीवं वद यत्करणेन ते सदेहो नश्येदिति लक्ष्मणेनोक्ते वालिनिर्दिष्टदुन्दुभ्यस्थिकङ्कालं रामः पादाङ्गुष्टेन चिक्षेप शुष्कोऽयं पञ्जरस्तदानींतनाल्पीयस्त्वान्नानेन बलमवधारयितुं शक्यं किंतु यद्येतैषामेकं सालं भिन्द्यात्तदयं ते बलं वालिविनाशक मन्य इति सुग्रीवः आक्षिपते ।

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् । सुग्रीवः पूजयाञ्चक्रे राघवं प्रशशंस च ॥ १ ॥
असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः । त्वं दहेः कुपितो लोकान्युगान्त इव भास्करः॥ २ ॥
वालिनः पौरुषं यत्तद्यच्च वीर्यं धृतिश्च या । तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम् ॥ ३ ॥
समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम् । क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः ॥ ४ ॥

मग्नो रिपुहृतदारत्वान्मद्वदित्यनुमानम् । बाढं प्राप्स्यसि भार्यां पुष्कलं राज्यं च ॥ ३४ ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे दशमः सर्गः ॥१०॥

रा० टी०–आत्मेति । आत्मानुमानात् स्वदृष्टान्तकानुमानरूपप्रमाणतः त्वं शोकसागरे मग्न इत्यहं पश्यामि जानामि अतः त्वामहं तारयिष्यामि शोकसागरात्पारं प्रापयिष्यामि अतः पुष्कलं संपूर्णं भार्यां राज्यं चेत्यर्थः, बाढं यथा भवति तथा प्राप्स्यसि ॥ ३४ ॥

रा० टी०–तस्येति । हर्षपौरुषवर्धनं तस्य रामस्य तद्वचनं श्रुत्वा परमप्रीतः सुग्रीवः समहद्वाक्यमब्रवीत् ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०–आत्मानुमानादिति । आत्मानुमानात् आत्मवत्सर्वभूतानीति न्यायादित्यर्थः । तारयिष्यामि शोकसागरादिति शेषः ॥ ३४–३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

१] ति० टी०–इदानीं वालिनो बलमाह–रामस्येति । वचनं वालिवधविषयम् ॥ १ ॥

रा० टी०–रामं प्रति सुग्रीवोक्तिं वर्णयन्नाह–रामस्येत्यादिभिः । सुग्रीवः रामस्य वचनं श्रुत्वा राघवं रामं पूजयाञ्चक्रे बद्धाञ्जल्यादिना तोषयाञ्चक्रे प्रशशंस च ॥ १ ॥

गो० टी०–अथ सुग्रीवो वालिवधश्रमं रामबलं परीक्षितुकामस्तद्बलं दर्शयन्येकादशे–रामस्येत्यादि । पूजयाञ्चक्रे अञ्जलिबन्धादिना । प्रशशंस तुष्टाव ॥ १–२ ॥

२] ति० टी०–राघवं प्रशशंसेत्युक्तं तां प्रशंसामाह–असंशयमिति ॥ २ ॥

रा० टी०–प्रशंसाप्रकारं बोधयन्नाह–असंशयमिति । यद्यपि कुपितस्त्वं युगान्ते भास्कर इव मर्मातिगैः मर्मप्रवेशिभिः शरैः लोकान् असंशयं यथा भवति तथा प्रदहेः तथापि वालिनः पौरुषादि त्वमेकमनाः सन् श्रुत्वा तदनन्तरं विधत्स्व तद्वधप्रयत्नं कुरु । एतेन वालिनः पौरुषादेर्लोकोत्तरत्वं व्यञ्जितं यद्यपीत्यध्याहृतम् । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

३] ति० टी०–पौरुषं बलवैभवम् । वीर्यं परसंहारशक्तिः । धृती रणे धैर्यम् ॥ ३ ॥

गो० टी०–वालिन इति । पौरुषं बलम् अनन्तरं यत्कर्तव्यं तद्विधत्स्व ॥ ३ ॥

४] ति० टी०–अनुदिते सूर्ये क्रामति । ब्राह्मे मुहूर्ते उत्थायेति शेषः ॥ ४ ॥

रा० टी०–तत्पौरुषायेवाह–समुद्रादित्यादिभिः । व्यपगतक्लमो वाली ब्राह्मे मुहूर्ते उत्थायेति शेषः, सूर्ये अनुदिते उदयमप्राप्नुवति सति पश्चिमात् समुद्रात् पूर्वं समुद्रं क्रामति गच्छति ततो दक्षिणं प्राप्येति शेषः दक्षिणात्समुद्रात् उत्तरमपि क्रामति ॥ ४ ॥

गो० टी०–समुद्रादिति । ब्राह्मे मुहूर्ते उत्थाय इति ब्राह्ममुहूर्तस्य संध्याकर्मकालत्वेन तस्मिन्नुत्थाय अनुदिते सूर्ये संध्याकर्मकरणार्थं पश्चिमात्समुद्रात्पूर्वसमुद्रं दक्षिणात्समुद्रादुत्तरं समुद्रं च व्यपगतक्लमः सन् क्रामति । इदं व्यक्तमुत्तरकाण्डे । तारः–चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण । इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम्' इति ॥ नन्वत्र कथं चतुर्वप्येकसंध्याकरणम् । उच्यते, एकस्मिन् तटाके पार्श्वभेद इव स्नानाचमनार्घ्यप्रदानजपानां कर्तुं शक्यत्वात् अनुदिते सूर्ये इत्युत्तरावधिरभिहितः । पूर्वावधिस्तु–ब्राह्मे मुहूर्ते उत्थायेत्यनुष्ठानाङ्गत्वेन विहितः कालः । चतुःसमुद्रपरिक्रमस्यानुष्ठानार्थत्वम् 'चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण । इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम् ॥' इत्युत्तरश्रीरामायणोक्तेरवचनादवगम्यते ॥ ४ ॥

अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि । ऊर्ध्वमुत्पात्य तरसा प्रतिगृह्णाति वीर्यवान् ॥ ५ ॥
बहवः सारवन्तश्च वनेषु विविधा द्रुमाः । वालिना तरसा भग्ना बलं प्रथयतात्मनः ॥ ६ ॥
महिषो दुन्दुभिर्नाम कैलासशिखरप्रभः । बलं नागसहस्रस्य धारयामास वीर्यवान् ॥ ७ ॥
स वीर्योत्सेकदुष्टात्मा वरदानेन मोहितः । जगाम स महाकायः समुद्रं सरितां पतिम् ॥ ८ ॥
ऊर्मिमन्तमतिक्रम्य सागरं रत्नसंचयम् । मम युद्धं प्रयच्छेति तमुवाच महार्णवम् ॥ ९ ॥
ततः समुद्रो धर्मात्मा समुत्थाय महाबलः । अब्रवीद्वचनं राजन्नसुरं कालचोदितम् ॥ १० ॥
समर्थो नास्मि ते दातुं युद्धं युद्धविशारद । श्रूयतां त्वभिधास्यामि यस्ते युद्धं प्रदास्यति ॥ ११ ॥
शैलराजो महारण्ये तपस्विशरणं परम् । शंकरश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ १२ ॥
महाप्रस्रवणोपेतो बहुकन्दरनिर्झरः । स समर्थस्तव प्रीतिमतुलां कर्तुमर्हति ॥ १३ ॥
तं भीतमिति विज्ञाय समुद्रमसुरोत्तमः । हिमवद्वनमभ्यागम्य शरश्चापादिव च्युतः ॥ १४ ॥
ततस्तस्य गिरेः श्वेता गजेन्द्रप्रतिमाः शिलाः । चिक्षेप बहुधा भूमौ दुन्दुभिर्विननाद च ॥ १५ ॥
ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः । हिमवानब्रवीद्वाक्यं स्व एव शिखरे स्थितः ॥ १६ ॥
क्षेष्टुमर्हसि मां न त्वं दुन्दुभे धर्मवत्सल । रणकर्मस्वकुशलस्तपस्विशरणो ह्यहम् ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा गिरिराजस्य धीमतः । उवाच दुन्दुभिर्वाक्यं क्रोधात्संरक्तलोचनः ॥ १८ ॥

५-६]ति०टी०-ऊर्ध्वमुत्पात्य कन्दुकवदिति भावः॥५॥६॥

रा० टी०-अग्राणीति । वीर्यवान् वाली ऊर्ध्वमुत्पत्य शैलानां महान्त्यपि अग्राणि मुख्यानि शिखराणि आरुह्य प्रतिगृह्णाति ॥ ५ ॥

गो० टी०-अग्राणीति । कंदुकानिवेति भावः ॥ ५ ॥

रा० टी०-बहव इति । आत्मनो बलं प्रथयता वालिना सारवन्तः स्थिरांशविशिष्टा बहवो द्रुमा भग्नाः ॥ ६ ॥

गो० टी०-बहव इति । मञ्जिकोत्सारणरीत्येति भावः । सारवन्तः स्थिरांशवन्तः 'सारो बले स्थिरांशेच' इत्यमरः ॥६॥

७-८]ति० टी०-महिषस्तद्रूपधरः ॥ ७ ॥ ८ ॥

रा० टी०-पराक्रमान्तरमाह-महिष इत्यादिभिः । महिषो महिषाकृतिः कैलासशिखरप्रभः दुन्दुभिर्नाम नागसहस्रस्य सहस्रसंख्याकगजस्य बलं धारयामास ॥ ७ ॥

गो० टी०-महिषो दुन्दुभिर्नामेति । कैलासशिखरप्रभः तदाकार इत्यर्थः ॥ ७ ॥

रा० टी०-स इति । वीर्योत्सेकेन पराक्रमगर्वेण दुष्टः आत्मा मनो यस्य सः वरदानेन मोहितः स दुन्दुभिः सरितां पतिं समुद्रं जगाम ॥ ८ ॥

गो० टी०-वीर्येति । वीर्योत्सेकेन वीर्यगर्वेण दुष्टात्मा दुर्बुद्धिः अतिक्रम्य जगाम । पूर्वकालो न विवक्षितः आक्रामन् जगामेत्यर्थः ॥ ८-९ ॥

९-१४] ति टी०-ऊर्मिमन्तमूर्मिमत्त्वाद्याकारवन्तं समुद्रमतिक्रम्याविगणय्य तं तदधिष्ठातृदेवतामब्रुवाच ॥ ९-१४॥

रा० टी०-ऊर्मिमन्तमिति । रत्नसंचयं बहुरत्नविशिष्टं सागरमतिक्रम्य उल्लङ्घ्य मम युद्धं प्रयच्छेति तं महार्णवमब्रुवाच ॥ ९ ॥

रा० टी०-तत इति । ततः दुन्दुभिवचनश्रवणानन्तरं धर्मात्मा समुद्रः कालचोदितमसुरं दुन्दुभिमब्रवीत् ॥ १० ॥

रा० टी०-तद्वचनाकारमाह-समर्थ इति । हे युद्धविशारद ! अहं ते युद्धं दातुं न समर्थः अतः यस्ते युद्धं प्रदास्यति तमभिधास्यामि त्वया श्रूयताम् ॥ ११ ॥

गो०टी०-तत इति । समुत्थाय पुरुषवेषेणोत्थाय१०॥११

रा० टी०-शैलराज इति । तपस्विशरणं तपस्विनां रक्षकः शङ्करश्वशुरः हिमवानिति नाम्ना विश्रुतः प्रख्यातो यः शैलराजः सः तवातुलां प्रीतिं युद्धमित्यर्थः, कर्तुमर्हति॥१२॥१३॥

रा० टी०-तमिति । इति एवमुक्तोऽसुरोत्तमो दुन्दुभिस्तं समुद्रं भीतं विज्ञाय चापात् च्युतः शर इव हिमवद्वनम् आगच्छत् ॥ १४ ॥

गो० टी०-शैलराज इति । परं तपस्विशरणं तपस्विनां परमावासस्थानम् नित्यनपुंसकम् । प्रस्रवणं निर्झरः । निर्दराः विदीर्णपाषाणरन्ध्राणि ॥ १२-१८ ॥

१५-१८] ति०टी०-गजेन्द्र ऐरावतः ॥ १५-१८ ॥

रा० टी०-तत इति । ततः हिमवद्वनागमनानन्तरं गजेन्द्रप्रतिमाः ऐरावतसदृशाः तस्य गिरेः बहुधा अनेकप्रकाराः श्वेताः शिलाः दुन्दुभिः चिक्षेप विननाद च ॥ १५ ॥

रा० टी०-तत इति । श्वेताम्बुदाकारः प्रीतिकरा प्रीतेरुत्पादिका आकृतिर्यस्य अत एव सौम्यः स्व एव शिखरे स्थितः हिमवान्वाक्यमब्रवीत् ॥ १६ ॥

१ उत्क्षिप्य गो. उत्पत्य रा. पाठः । २ वीर्योत्सेकेन गो. पाठः । ३ दानाच्च गो. पाठः । ४ सु गो. रा.पाठः । ५ मह्यं गो.पाठः । ६ चाभि गो. पाठः । ७ गुह्येति गो. पाठः । ८ निर्दरः गो. पा. । ९ भीतः गो. पाठः । १० आगच्छत् गो. रा. पाठः । ११ विपुला गो. पाठः । १२ शरणं गो.पा. ।

यदि युद्धेऽसमर्थस्त्वं मद्भयाद्वा निरुद्यमः । तमाचक्ष्व प्रदद्यान्मे यो [1]हि युद्धं युयुत्सतः ॥१९॥
हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः । अनुक्तपूर्वं धर्मात्मा क्रोधात्तमसुरोत्तमम् ॥ २० ॥
वाली नाम [2]महाप्राज्ञ शक्रपुत्रः [3]प्रतापवान् । अध्यास्ते वानरः श्रीमान्किष्किन्धामतुलप्रभाम् २१॥
स समर्थो महाप्राज्ञस्तव युद्धविशारदः । द्वन्द्वयुद्धं [4]सै दातुं ते नमुचेरिव वासवः ॥ २२ ॥
तं शीघ्रमभिगच्छ त्वं यदि युद्धमिहेच्छसि । स हि [5]दुर्धर्षणो नित्यं शूरः समरकर्मणि ॥ २३ ॥
श्रुत्वा हिमवतो वाक्यं कोपा[6]विष्टः स दुन्दुभिः । जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा॥२४॥
धारयन्महिषं [7]वेषं तीक्ष्णशृङ्गो भयावहः । प्रावृषीव महामेघस्तोयपूर्णो नभस्तले ॥ २५ ॥
ततस्तु द्वारमागम्य किष्किन्धाया महाबलः । ननर्द कम्पयन्भूमिं दुन्दुभिर्दुन्दुभिर्यथा ॥ २६ ॥
समीप[8]जान्दुमान्भञ्जन्वसुधां दारयन्खुरैः । विषाणेनोल्लिखन्दर्पात्तद्वारं द्विरदो यथा ॥ २७ ॥
अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः । निष्पपात सह स्त्रीभिस्ताराभिरिव चन्द्रमाः ॥२८॥
मितं व्यक्ताक्षरपदं तमुवाच [9]सै दुन्दुभिम् । हरीणामीश्वरो वाली सर्वेषां वनचारिणाम् ॥ २९ ॥

रा० टी०–तद्वचनाकारमाह–क्लेष्टुमिति । हे दुन्दुभे! यतः रणकर्मसु अहमकुशलः अत एव तपस्विशरणस्तपस्विन एव शरणानि रक्षका यस्य सोऽहमस्मि अतः मां क्लेष्टुं क्लेशं दातुं त्वं नार्हसि ॥ १७ ॥

रा० टी०–तस्येति । गिरिराजस्य तस्य हिमवतः तद् युद्धानर्हत्वप्रतिपादकं वचनं श्रुत्वा क्रोधात्स्वाभाविककोपात् संरक्ते लोचने यस्य स दुन्दुभिरुवाच ॥ १८ ॥

१९] ति० टी०–युद्धे असमर्थ इतिच्छेदः ॥ १९ ॥

रा० टी०–तद्वचनाकारमाह–यदीति । यदि युद्धे त्वमसमर्थः मद्भयाद्वा निरुद्यमः युद्धोद्योगरहितस्त्वमसीति शेषः, तदा युयुत्सतो मे यो युद्धं दद्यात् तमाचक्ष्व बोधय ॥ १९ ॥

गो० टी०–यदीति । त्वं युद्धासमर्थो यदि यदि वा समर्थोऽपि मद्भयान्निरुद्यमः उभयथापि न त्वां योत्स्यामीत्यर्थः । युयुत्सतः योद्धुमिच्छतः ॥ १९ ॥

२०–२१] ति० टी०–अनुक्तपूर्वमितः पूर्वं नोक्तो युद्धदातास्य तमसुरम् ॥ २० ॥ २१ ॥

रा० टी०–हिमवानिति । अनुक्तपूर्वं न उक्तः केनचिद्बोधितः पूर्वः युद्धेन प्रीतिप्रापको यस्मै तमसुरेश्वरं वाक्यविशारदः हिमवान् वाक्यमब्रवीत् ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–वालीति । प्रतापवान् अतिप्रतापविशिष्टः वालीनाम शक्रपुत्रः वानरः अतुलप्रभां किष्किन्धामध्यास्ते ॥ २१ ॥

गो० टी०–हिमवानिति । अनुक्तपूर्वम् इतः पूर्वं केनाप्युक्तं वाक्यम् अत एव क्रोधात् ॥ २० ॥ २१ ॥

२२–२८] ति० टी०–एकः सशब्दः प्रसिद्धपराक्रमार्थकः ॥ २२–२८ ॥

रा० टी०–स इति । महाप्राज्ञस्तव युद्धविशारदः प्रवृद्धयुद्धे निपुणः स वाली स वासव इन्द्रः नमुचेरिव ते द्वन्द्वयुद्धं दातुं समर्थोऽस्तीति शेषः ॥ २२ ॥

गो० टी०–स इति । दातुं समर्थ इत्यन्वयः ॥२२॥२५॥

रा० टी०–तमिति । यदीह युद्धमिच्छसि तदा तं शीघ्रमभिगच्छ हि यतः स वाली दुर्धर्षणः उत्कटवचनश्रवणासहः समरकर्मणि नित्यं शूरः ॥ २३ ॥

रा० टी०–श्रुत्वेति । हिमवतो वाक्यं श्रुत्वा कोपाविष्टः वालिबलवत्ताश्रवणजनितकोपविशिष्टः तीक्ष्णशृङ्गः प्रावृषि तोयपूर्णः महामेघ इव स दुन्दुभिः वालिनः पुरीं किष्किन्धां जगाम । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

रा० टी०–तत इति । महाबलः दुन्दुभिः किष्किन्धायाः द्वारमागत्य भूमिं कम्पयन् समीपजान्द्रुमान् भञ्जन् खुरैः वसुधां दारयन् विषाणेन शृङ्गेण द्विरदो गज इव तद्वारमुल्लिखन् सन् दुन्दुभिर्यथा दुन्दुभिरिव ननर्द । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०–तत इति । तद्वारं किष्किन्धाद्वारम् । विषाणेन उल्लिखन् उद्भिन्दन् ॥ २६ ॥ २७ ॥

रा० टी०–अन्तरिति । अन्तःपुरगतः अन्तःपुरे स्थितः शब्दं श्रुत्वा अमर्षणः असहनो वाली ताराभिश्चन्द्रमा इव स्त्रीभिः सह निष्पपात दुन्दुभिसमीपं प्राप्नोत् ॥ २८ ॥

गो० टी०–अन्तःपुरगत इति । सह स्त्रीभिरिति मदातिरेकादिति भावः ॥ २८ ॥

२९] ति० टी०–हरीणामीश्वरः अहमस्मीति शेषः ॥२९॥

रा० टी०–मितेति । मितानि प्रमितानि व्यक्तानि स्फुटानि अक्षरपदानि यस्मिन् तद्वाक्यं हरीणां वानराणां सर्वेषां वनचारिणां च ईश्वरो वाली तं दुन्दुभिमुवाच ॥ २९ ॥

---

१ ऽथेति गो. पाठः । २ प्राज्ञः इति रा. पाठः । ३ तुल्यपराक्रम इति गो पाठः । ४ महद्दातुमिति गो.पाठः । ५ दुर्धर्षण इति गो.पाठः । ६ क्रोधेति गो. पाठः । ७ रूपमिति गो. पाठ । ८ तरिति गो. पाठः । ९ आग-धेति रा. पाठः । १० स्थानिति गो. पाठः । ११ अथेति गो. पाठः ।

किमर्थं नगरद्वारमिदं रुद्ध्वा [1]विनर्दसे । दुन्दुभे विदितो मेऽसि रक्ष प्राणान्महाबल ॥ ३० ॥
तस्य तद्वचनं श्रुत्वा वानरेन्द्रस्य धीमतः । उवाच दुन्दुभिर्वाक्यं क्रोधात्संरक्तलोचनः ॥ ३१ ॥
न त्वं स्त्रीसंनिधौ वीर वचनं वक्तुमर्हसि । मम युद्धं प्रयच्छाद्य ततो ज्ञास्यामि ते बलम् ॥ ३२ ॥
अथवा धारयिष्यामि क्रोधमद्य निशामिमाम् । गृह्यतामुदयः स्वैरं कामभोगेषु वानर ॥ ३३ ॥
दीयतां संप्रदानं च परिष्वज्य च वानरान् । सर्वशाखामृगेन्द्रस्त्वं संसाधय सुहृज्जनम् ॥ ३४ ॥
सुदृष्टां कुरु किष्किन्धां कुरुष्वात्मसमं पुरे । क्रीडस्व च समं स्त्रीभिरहं ते दर्पनाशनः ॥ ३५ ॥
यो हि मत्तं प्रमत्तं वा भग्नं वा रहितं कृशम् । हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितम् ॥ ३६ ॥
स [9]प्रहस्याब्रवीन्मन्दं [10]क्रोधात्तमसुरेश्वरम् । विसृज्य ताः स्त्रियः सर्वास्तारामभृतिकास्तदा ३७ ॥

गो० टी०-मितमिति । व्यक्तान्यक्षराणि येषु तानि व्यक्ताक्षराणि पदानि यस्मिन् कर्मणि तद्व्यक्ताक्षरपदमिति क्रियाविशेषणम् वनचारिणां भल्लूकादीनाम् ॥ २९-३१ ॥

३०-३२] ति० टी०-नगरद्वारम् । मामकमिति शेषः मे विदितोऽसि मया ज्ञातबलोऽसि, अतः प्राणान्रक्ष ॥ ३०-३२ ॥

रा० टी०-तद्वचनाकारमाह-किमर्थमिति । हे दुन्दुभे यतस्त्वं मे विदितः ज्ञातोऽसि अतः नगरद्वारं रुद्ध्वा किमर्थं विनर्दसे विनर्दनं न कुर्वित्यर्थः, एतेन विनर्दनं त्वां हनिष्यामीति सूचितम् अतः हे महाबल ! प्राणान् रक्ष विदितोऽसीत्यनेन तत्पराक्रमस्याल्पत्वं ध्वनितम् ॥ ३० ॥

रा० टी०-तस्येति । वानरेन्द्रस्य वालिनस्तद्वचनं श्रुत्वा क्रोधात्संरक्तलोचनो दुन्दुभिर्वाक्यमुवाच ॥ ३१ ॥

रा० टी०-तद्वचनाकारमाह-नेति । स्त्रीसंनिधौ वीरवचनं स्ववीरत्वबोधकं वाक्यं वक्तुं त्वं नार्हसि एतेन स्त्रीवधनार्थमेव एवं वचनं त्वयोक्तमिति सूचितम् अथ मम मल्लं युद्धं त्वं प्रयच्छ ततः युद्धदानात् ते बलं ज्ञास्यामि वीरेति संबोधनं वा ॥ ३२ ॥

गो० टी०-न त्वमिति । स्त्रीसंनिधौ वचनं स्त्रीजनग्राम्यकम् वचनमित्यर्थः ॥ ३२ ॥

३३] ति० टी०-स्त्रीसमूहगतो युद्धाय नाह्वातव्य इति स्मृत्वा पश्चान्तरमाह-अथवेति । स्वैरं कामभोगेष्वदयस्तावत्पर्यन्तं कालो मत्प्रोक्तोऽवधिर्गृह्यताम् उदयपर्यन्तं त्वां प्रतीक्ष इत्यर्थः ॥ ३३ ॥

रा० टी०-अथवेति । अथवा स्त्रीसंयोगस्य दुष्परिहरत्वे इमां निशां क्रोधं त्वदुद्धतवाक्यजनितकोपं धारयिष्यामि अन्तर्नियच्छामि अतः कामभोगेषु उदयः आसक्तिः स्वैरं गृह्यतां एतेन निशावसाने कामासक्तिं संत्यज्य मया युद्धस्वेति सूचितम् ॥ ३३ ॥

गो० टी०-अथ वेति । उदयः सूर्योदयः । गृह्यताम् अवधित्वेन गृह्यताम् ॥ ३३ ॥

३४] ति०टी०-वानरान्परिष्वज्य तेभ्यः संप्रदानं प्रीतिदानं दीयताम् । संसाधयामन्त्रयस्व । पाठान्तरेऽप्युक्तार्थ एव ॥ ३४ ॥

३५] ति० टी०-सुदृष्टां पुनर्दर्शनासंभवात् आत्मसमं पुत्रादिकं राज्यरक्षायै राजानं कुरुष्व क्रीडस्व आ उदयम् ॥ ३५ ॥

रा० टी०-भावियुद्धजनितस्वप्राणघातं संस्मृत्य अन्तकालकृत्यं निशायामेव क्रियताम् इति बोधयन्नाह-दीयतामिति । यतोऽहं ते गर्वनाशनः अतः वानरान्परिष्वज्य अन्तकालोचितालिङ्गनं कृत्वा संप्रदानं प्रीत्यादेयं वस्तु दीयतां त्वयेति शेषः, अत एव सर्वशाखामृगेन्द्रस्त्वं सुहृज्जनं संभावय प्रीतिदानेन संतोषयेत्यर्थः । किष्किन्धां सुदृष्टां कुरु पुनरागमनाशानिष्ठतया अत्यन्तमवलोकयेत्यर्थः । आत्मसमं पालकत्वेन स्वसदृशं पुरे किष्किन्धायां कुरुष्व राज्यासने कंचन संस्थापयेत्यर्थः । स्त्रीभिः सह क्रीडस्व च इमां निशामिति शेषः । श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०-दीयतामिति । संप्रदानं देयद्रव्यम्, वानरान् बन्धून् परिष्वज्य तेभ्यः संप्रदानं दीयतां चरमकालदानं दीयतामित्यर्थः । संसाधय कंचिदपि कालं संगच्छस्व आत्मसमं राजानमित्यर्थः क्रीडस्व क्रीड अथेति शेषः दर्पनाशनः पश्चादिति शेषः ॥ ३४ ॥ ३५ ॥

३६-३७] ति० टी०-मत्तं पानादिना । प्रमत्तमनवहितम् । रहितमायुधादिभिः । त्वद्विधं त्वामिव स्त्रीमध्यगम् । मदमोहितं स्त्रीभोगार्थं कृतमधुपानादितिकर्तव्यतामूढम् ॥ ३६ ॥ ३७ ॥

रा० टी०-निशावकाशदाने हेतुमाह-य इति । मत्तं पुत्रलालनादिना अनवहितं प्रमत्तं मद्यपानादिना अनवहितं वा सन्नं स्वापविशिष्टं रहितमायुधादिहीनं वा त्वद्विधं भग्नमत्यन्तं मदमोहितं वा यो हन्यात् स भ्रूणहा भवेत् । एतेन अपराधशङ्कयैव इदानीं मया त्वं न हन्यसे इति सूचितम् ॥ ३६ ॥

गो० टी०-यो हीति । मत्तं मधुपानादिना मत्तम् प्रमत्तम् अनवहितम् रहितम् आयुधादिशून्यं त्वद्विधं त्वामिव स्त्रीमध्यगतं मदमोहितं मदनमोहितं यो हन्यात्सः भ्रूणहा गर्भवधकृत् ॥ ३६ ॥

---

१ नर्दसीति गो. पाठः । २ रोषादिति गो. पाठः । ३ सादय सुहृज्जनानिति गो. संभावयेति रा. पाठः । ४ संहेति गो. पाठः । ५ गर्वनाशन इति रा. पाठः । ६ नाशन इति गो. पाठः । ७ सुप्तमिति गो.रा.पाठः । ८ भृशमिति गो.रा.पाठः । ९ संप्रहस्येति रा पाठः । १० वाक्यमिति रा.पाठः ।

मत्तोऽयमिति मामंस्था यद्यभीतोऽसि संयुगे । मदोऽयं संप्रहारेऽस्मिन्वीरपानं समर्ध्यताम् ॥३८॥
तमेवमुक्त्वा संक्रुद्धो मालामुत्क्षिप्य काञ्चनीम् । पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत ॥ ३९ ॥
विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसंनिभम् । अविध्यत तदा वाली विनदन्कपिकुञ्जरः ॥ ४० ॥
वाली व्यापादयाञ्चक्रे ननर्द च महास्वनम् । श्रोत्राभ्यामथ रक्तं तु तस्य सुस्राव पात्यतः॥ ४१ ॥
तयोस्तु क्रोधसंरम्भात्परस्परजयैषिणोः । युद्धं समभवद्घोरं दुन्दुभेर्वालिनस्तथा ॥ ४२ ॥
अयुध्यत तदा वाली शक्रतुल्यपराक्रमः । मुष्टिभिर्जानुभिः पद्भिः शिलाभिः पादपैस्तथा॥४३॥
परस्परं ह्रतोस्तत्र वानरासुरयोस्तदा । आसीद्धीनोऽसुरो युद्धे शक्रसूनुर्व्यवर्धत ॥ ४४ ॥
[व्यापारवीर्यधैर्यैश्च परिक्षीणं पराक्रमैः]
तं तु दुन्दुभिमुद्यम्य धरण्यामभ्यपातयत् । युद्धे प्राणहरे तस्मिन्निष्पिष्टो दुन्दुभिस्तदा ॥४५॥
स्रोतोभ्यो बहु रक्तं तु तस्य सुस्राव पात्यतः । पपात च महाबाहुः क्षितौ पञ्चत्वमागतः ॥ ४६ ॥

रा० टी०–स इति । स वाली प्रहस्य क्रोधात् ताराप्रभृतिकाः सर्वाः स्त्रियो विसृज्य त्यक्त्वा च अक्षरेश्वरं दुन्दुभिं वाक्यमब्रवीत् ॥ ३७ ॥

गो० टी०–स इति । मन्दं प्रहस्य धर्मान्वितवाक्यत्वादिति भावः । ताः विसृज्याब्रवीत् ॥ ३७ ॥

३८] ति० टी०–मदोऽयं स्त्रीगोजीजनितोऽपि वीरपानम् वीरे रणे मनउत्साहार्थं क्रियमाणः पानविशेषः समर्ध्यतां ज्ञायताम् ॥ ३८ ॥

रा० टी०–तद्वचनाकारमाह–मत्त इति । संयुगे संग्रामे यदि अभीतोऽसि तदा अयं मत्तः इति मामंस्थाः । नन्व किं मन्तव्यमित्यत आह–अयं स्त्रीसंगजनितो मदः अस्मिन् संप्रहारे संग्रामे वीरपानं युद्धोत्साहहेतुकवीरकर्तृकपानविशेषः समर्ध्यतां बुध्यताम् ॥ ३८ ॥

गो० टी०–मत्त इति । संयुगे यद्यभीतोऽसि तदा अयं मत्त इति मा मंस्थाः । अयं मदः अस्मिन् संप्रहारे युद्धे वीरपानं समर्ध्यतां वीरपानं कृतमिति मन्यताम् । वीरपानं नाम युद्धोपक्रमे उत्साहवर्धनाय वीरैः क्रियमाणं पानम् ॥३८॥

३९] ति० टी०–उत्क्षिप्य कण्ठे प्रतिष्ठप्य । एषा हि माला संग्रामजयदा ॥ ३९ ॥

रा० टी०–तमिति । संक्रुद्धः वाली तं दुन्दुभिमेवमुक्त्वा काञ्चनीं पित्रा महेन्द्रेण दत्तां मालाम् उत्क्षिप्य कण्ठे संधार्येत्यर्थः, युद्धाय व्यवतिष्ठत ॥ ३९ ॥

गो० टी०–तमेवमिति । उत्क्षिप्य अंसयोरुपरि विन्यस्य एतत्काञ्चनमालाधारणकाले यः पुरो युद्धायागच्छति तस्य बलं सर्वं तवैव भविष्यतीति महेन्द्रेण दत्तामित्यर्थः । व्यवतिष्ठत व्यवातिष्ठत ॥ ३९ ॥

४०] ति० टी०–अविध्यत क्षिप्तवान् ॥ ४० ॥

रा० टी०–विषाणयोरिति । गिरिसंनिभं दुन्दुभिं विषाणयोः शृङ्गयोर्गृहीत्वा कपिकुञ्जरो वाली विनदन्सन् अविध्यत क्षुद्यादिना क्षुब्धादावताडयत् ॥ ४० ॥

गो०टी०–विषाणयोरिति । आविध्यत अभामयत्॥४०॥

४१] ति० टी०–व्यापादयांचक्रे पातितवान् । पात्यतः पात्यमानस्य ॥ ४१ ॥

रा० टी०–बलादिति । बलाद्व्यापादयाञ्चक्रे पातयामास महास्वनं ननर्द च अथ अनन्तरं पात्यतः पात्यमानस्य तस्य दुन्दुभेः श्रोत्राभ्यां रक्तं सुस्राव ॥ ४१ ॥

गो० टी०–वालीति । व्यापातयांचक्रे भूमौ पातयामास अथ पात्यतः पात्यमानस्य श्रोत्राभ्यां रक्तं सुस्राव श्रोत्रमूलविषाणपीडनादिति भावः ॥ ४१ ॥

४२–४३] ति० टी०–अस्यैव प्रपञ्चः–तयोरित्यादि ॥ ४२ ॥ ४३ ॥

रा० टी०–तयोरिति । क्रोधसंरम्भात् क्रोधावेशात् परस्परजयैषिणोस्तयोः दुन्दुभेः वालिनश्च घोरं युद्धं समभवत् ४२

रा० टी०–अयुध्यतेति । तदा शक्रतुल्यपराक्रमो वाली मुष्ट्यादिभिरयुध्यत ॥ ४३ ॥

गो०टी०–तयोरिति । क्रोधसंरम्भात् क्रोधवेगात्४२–४३

४४] ति० टी०–हीनो हीनबलः ॥ ४४ ॥

रा० टी०–परस्परमिति । तत्र युद्धे वानरासुरयोः परस्परं ह्रतोः सतोः असुरो दुन्दुभिः हीनः क्षीणबल आसीत् तदा शक्रसूनुः वाली व्यवर्धत प्रबलत्वं प्राप्नोत् ॥ ४४ ॥

गो० टी०–परस्परमिति । ह्रतोः सतोः ॥ ४४ ॥ ४६ ॥

४५] ति० टी०–उद्यम्य हस्ताभ्यामूर्ध्वीकृत्य । ' उत्साय' इति पाठे उत्पाटितविषाणं कृत्वेत्यर्थः ॥ ४५ ॥

रा० टी०–तमिति । तस्मिन्प्राणहरे युद्धे दुन्दुभिम् उद्यम्य उत्थाप्य धरण्यामभ्यपातयत् अत एव तदा पातनकाले दुन्दुभिः निष्पिष्टः आसीदिति शेषः ॥ ४५ ॥

४६] ति० टी०–स्रोतोभ्यो नासादिद्वारेभ्यः ॥ ४६ ॥

रा० टी०–स्रोतोभ्य इति । यः महाकायः क्षितौ पपात

---

१ आविध्यतेति गो. पाठः । २ बलादिति रा. पाठः । ३ वानरस्य चेति गो. पाठः । ४ चैवेति गो. पाठः । ५ आसीदसुर इति गो. पाठः । ६ अर्धमेतदधिकं गो. पाठे । ७ उत्पाट्येति गो. पाठः । ८ अर्धमेतत् गो. नास्ति । ९ काय इति रा. पाठः ।

तं तोलयित्वा बाहुभ्यां गतसत्त्वमचेतनम् । चिक्षेप वेगवान्वाली वेगेनैकेन योजनम् ॥ ४७ ॥
तस्य वेगप्रविद्धस्य वक्त्रात्क्षतजबिन्दवः । प्रपेतुर्मारुतोत्क्षिप्ता मतङ्गस्याश्रमं प्रति ॥ ४८ ॥
तान्दृष्ट्वा पतितांस्तत्र मुनिः शोणितविप्रुषः । क्रुद्धस्तस्य महाभाग चिन्तयामास को न्वयम् ॥४९॥
येनाहं सहसा स्पृष्टः शोणितेन दुरात्मना । कोऽयं दुरात्मा दुर्बुद्धिरकृतात्मा च बालिशः ॥५०॥
इत्युक्त्वा सै विनिष्क्रम्य ददृशे मुनिसत्तमः । महिषं पर्वताकारं गतासुं पतितं भुवि ॥ ५१ ॥
स तु विज्ञाय तपसा वानरेण कृतं हि तत् । उत्ससर्ज महाशापं क्षेप्तारं वानरं प्रति ॥ ५२ ॥
इह तेनाप्रवेष्टव्यं प्रविष्टस्य वधो भवेत् । वनं मत्संश्रयं येन दूषितं रुधिरस्रवैः ॥ ५३ ॥
क्षिप्ता पादपाश्चेमे संभग्नाश्चासुरीं तनुम् । समन्तादाश्रमं पूर्णं योजनं मामकं यदि ॥ ५४ ॥
आक्रमिष्यति दुर्बुद्धिर्व्यक्तं स नभविष्यति । ये चास्य सचिवाः केचित्संश्रिता मामकं वनम्॥५५॥

तस्य पात्यतः पात्यमानस्य स्रोतोभ्यः स्रोतस्सदृशेभ्यः नासिकादिभ्यः बहु रक्तं सुस्राव च अत एव पञ्चत्वमागतः मृत इत्यर्थः ॥ ४६ ॥

गो० टी०–युद्ध इति । प्राणहरे तस्मिन् युद्धे निष्पिष्टो दुन्दुभिः पञ्चत्वं भूतानां पृथग्भावं मरणमिति यावत् । आगतः प्राप्तः पपात ॥ ४६ ॥

४७–४८] ति० टी०–तोलयित्वा हस्तग्रहणेन भारं ज्ञात्वा । योजनं तावद्दूरम् ॥ ४७ ॥ ४८ ॥

रा० टी०–तमिति । तं दुन्दुभिं बाहुभ्यां तोलयित्वा वेगेवान्वाली एकेनाल्पेन वेगेन योजनं चिक्षेप ॥ ४७ ॥

गो० टी०–तमिति । तोलयित्वा चालयित्वा एकेन वेगेन एकप्रयत्नेन ॥ ४७ ॥

रा० टी०–तस्येति । वेगप्रवृद्धस्य वेगः प्रवृद्धो यस्मै तस्य दुन्दुभेः वक्त्रात् मुखात् मारुतोत्क्षिप्ताः क्षतजबिन्दवः रुधिरविप्रुषः मतङ्गस्याश्रमं प्रति प्रपेतुः ॥ ४८ ॥

गो० टी०–तस्येति । वेगप्रविद्धस्य वेगेन क्षिप्तस्य ॥ ४८ ॥

४९] ति० टी०–तस्य विप्रुषः कर्तारं को न्वयमिति चिन्तयामास ॥ ४९ ॥

रा० टी०–तानिति । पतितान् शौणितविप्रुष. रक्तबिन्दून् दृष्ट्वा क्रुद्धो मुनिर्मतङ्गस्तस्य शोणितस्य कर्तां कोऽयमिति चिन्तयामास । विप्रुट्विशेषणयोः पुल्लिङ्गत्वमार्षम् ॥ ४९ ॥

गो० टी०–तान् दृष्ट्वेति । शोणितविप्रुष इति पुँल्लिङ्गत्वमार्षम् । तत्र शोणितबिन्दुविषये क्रुद्धः सन् को न्वयमिति चिन्तयामास ॥ ४९ ॥

५०–५२] ति० टी०–चिन्ताया एवाभिनयः–येनेत्यादि ॥ ५०–५२ ॥

रा० टी०–तच्चिन्ताकारमाह–येनेति । दुरात्मना येन कर्त्रा शोणितेन करणेनाहं स्पृष्टः सः दुरात्मा दुष्टप्रयत्नकः दुर्बुद्धिः अकृतात्मा अयत्तचित्तः अत एव बालिशः अयं समीपस्थः क. ॥ ५० ॥

रा० टी०–इतीति । इत्युक्त्वा मुनिसत्तमो मतङ्गः विनिष्क्रम्य गतासुम् अत एव भुवि पतितं पर्वताकारं महिषं ददर्श ॥ ५१ ॥

गो० टी०–को न्वयमित्येतद्विवृणोति—येनेति । स्पृष्टः अन्तर्भावितण्यर्थः । दुरात्मा दुःस्वभावः अत एव दुर्बुद्धिः । अकृतात्मा अवशीकृतान्तःकरणः । बालिशः मूर्खः ॥५०–५१॥

रा० टी०–स इति । स मतङ्गस्तपसा ज्ञानचक्षुषा तत्कर्म वानरेण कृतं विज्ञाय क्षेप्तारम् असुरशरीरस्येति शेषः, वानरं प्रति महाशापमुत्ससर्ज ॥ ५२ ॥

गो० टी०–स त्विति । तपसा तपोमाहात्म्येन ॥ ५२ ॥

५३] ति० टी०–अप्रवेष्टव्यम् न प्रवेष्टव्यमित्यर्थः॥५३॥

रा० टी०–शापप्रकारमाह–इहेति । मत्संश्रयं वनं येन रुधिरस्रवैर्दूषितं तेन इह वने अप्रवेष्टव्यम् । तत्र हेतुः–प्रविष्टस्य वधो भवेत् ॥ ५३ ॥

गो० टी०–इहेति । अप्रवेष्टव्यम् न प्रवेष्टव्यमित्यर्थः । संभग्ना इति । आसुरीं तनुमिह क्षिपतेत्यन्वयः ॥ ५३ ॥

५४] ति० टी०–आसुरीं तनुं क्षिपता येनेमे पादपाः संभग्ना इत्यन्वयः । स यदि मामकमाश्रमं तदागमनमुद्दिश्य समन्तात्परिसरवर्ति पूर्णं योजनं तत्पर्यन्तं ॥ ५४ ॥

रा० टी०–तदगम्यदेशमर्यादां बोधयन्नाह–क्षिपतेति । आसुरीं तनुं क्षिपता येन इमे पादपाः संभग्नाः स दुर्बुद्धिः समन्तात्पूर्णं योजनं मामकमाश्रमं यदि आक्रमिष्यति तर्हि न भविष्यति मरिष्यतीत्यर्थः । सार्धश्लोक एकान्वयी ॥ ५४ ॥

गो० टी०–समन्तादिति । स न भविष्यति नश्यतीत्यर्थः ॥ ५४ ॥

५५] ति० टी०–आक्रमिष्यति पद्भ्यां स्प्रक्ष्यति तर्हि न भविष्यति न जीविष्यतीत्यर्थः ॥ ५५ ॥

---

१ बलवानिति गो. पाठः । २ तस्येति गो. पाठः । ३ भागाश्चन्तयामासेति गो. पाठः । ४ अथेति गो. पाठः । ५ ददर्श मुनिपुंगव इति गो. पाठः । ६ वालिनमिति गो. पाठः । ७ संभग्ना पादपाश्चेमे क्षिप्तेहेति गो. पाठः । ८ आगमिष्यतीति गो. पाठः । ९ चापीति गो. पाठः । १० तस्येति गो. पाठः ।

न च तैरिह वस्तव्यं श्रुत्वा यान्तु यथासुखम् । तेऽपि वा यदि तिष्ठन्ति शपिष्ये तानपि ध्रुवम्॥ ५६ ॥
वनेऽस्मिन्मामके नित्यं पुत्रवत्परिरक्षिते । पत्राङ्कुरविनाशाय फलमूलाभवाय च ॥ ५७ ॥
दिवसश्चाद्य मर्यादा यं द्रष्टा श्वोऽस्मि वानरम् । बहुवर्षसहस्राणि स वै शैलो भविष्यति ॥ ५८ ॥
ततस्ते वानराः श्रुत्वा गिरं मुनिसमीरिताम् । निश्चक्रमुर्वनात्तस्मात्तान्दृष्ट्वा वालिरब्रवीत् ॥ ५९ ॥
किं भवन्तः समस्ताश्च मतङ्गवनवासिनः । मत्समीपमनुप्राप्ता अपि स्वस्ति वनौकसाम् ॥ ६० ॥
ततस्ते कारणं सर्वं तथा शापं च वालिनः । शशंसुर्वानराः सर्वे वालिने हेममालिने ॥ ६१ ॥
एतच्छ्रुत्वा तदा वाली वचनं वानरेरितम् । स महर्षिं समासाद्य याचते स्म कृताञ्जलिः ॥ ६२ ॥
महर्षिस्तमनादृत्य प्रविवेशाश्रमं प्रति । शापधारणभीतस्तु वाली विह्वलतां गतः ॥ ६३ ॥
ततः शापभयाद्भीतो ऋष्यमूकं महागिरिम् । प्रवेष्टुं नेच्छति हरिर्द्रष्टुं वाऽपि नरेश्वर ॥ ६४ ॥
तस्याप्रवेशं ज्ञात्वाहमिदं राम महावनम् । विचरामि सहामात्यो विषादेन विवर्जितः ॥ ६५ ॥
एषोऽस्थिनिचयस्तस्य दुन्दुभेः संप्रकाशते । वीर्योत्सेकान्निरस्तस्य गिरिकूटनिभो महान्॥ ६६ ॥

रा० टी०–ये इति । अस्य क्षेप्तुः ये केचित् सचिवा. मामकं वनं संश्रितास्तैरिह वने न वस्तव्यम् इति वचः श्रुत्वा यथासुखं यान्तु ॥ ५५ ॥

गो० टी०–ये चेति । तस्य वालिनः ॥ ५५ ॥

५६] ति० टी०–तैर्वालिसचिवैः श्रुत्वा मदुत्सृष्टं शापम् ॥ ५६ ॥

५७] ति० टी०–शापमेव हेतूपन्यासपूर्वमाह–वने इति। फलाद्यभावाय तन्नाशाय जायन्ते यतः, अतः शपिष्यामि ॥५७॥

रा० टी०–ते इति । ते तत्सचिवाः पुत्रवत्परिरक्षिते अस्मिन् मामके वने पत्रादिविनाशाय यदि तिष्ठन्ति स्थास्यन्ति तर्हि तानपि ध्रुवं शपिष्ये शपामि । सार्धश्लोक एकान्वयी ॥५६॥५७॥

गो० टी०–यदीति । अस्मिन् वने पत्राङ्कुरविनाशाय फलमूलाभवाय च यदीह तिष्ठन्तीत्यन्वयः ॥ ५६ ॥ ५७ ॥

५८–६१] ति० टी०–अथ दिवसोऽयं दिवसः । मर्यादा दास्यमानशापस्य । तदेवाह—यमिति । अस्म्यहं यं वानरं वालिसंबन्धिनं श्वो द्रष्टा स शैलो भविष्यति ॥ ५८–६१ ॥

रा० टी०–शापप्रकारमाह–दिवस इति । अद्यदिवसः इदं दिनं मर्यादा अस्मादिनादारभ्येत्यर्थः, यं वालिपक्षीयं वानरं श्वोऽनागते अह्नि द्रष्टास्मि स वानरः शैलो भविष्यति ॥ ५८ ॥

गो० टी०–दिवस इति । अस्य शापस्य एकोऽयं दिवसो मर्यादा श्वः परेद्युः यं द्रष्टास्मि सः शैलो भविष्यति॥५८॥

रा० टी०–तत इति । मुनिसमीरितां गिरं वानराः श्रुत्वा तस्मात् वनात् निश्चक्रमुः तान् निष्क्रान्तान् वानरान् दृष्ट्वा वालिरब्रवीत् ॥ ५९ ॥

गो० टी०–ततस्त्विति । गिरं शापम् ॥ ५९ ॥

रा० टी०–तद्वचनाकारमाह–किमिति । मतङ्गवनवासिनः समस्ताः निखिला भवन्तः मत्समीपं किं किमर्थमनुप्राप्ताः । वनौकसां वनौकेभ्यः अपि स्वस्ति ॥ ६० ॥

गो० टी०–किं भवन्त इति । वनौकसां वानरेभ्यः॥६०॥

रा० टी०–तत इति । ततः वालिप्रभृश्रवणानन्तरं सर्वं कारणं शापहेतुं वालिन वालिसंबन्धिनं शापं च हेममालिने वालिने सर्वे वानराः शशंसु. ॥ ६१ ॥

गो० टी०–ततस्ते कारणमिति । कारणं दुन्दुभिपतनम् ॥ ६१ ॥

६२] ति० टी०–याचते स्मायाचत शापमोक्षमिति शेषः ॥ ६२ ॥

रा० टी०–एतदिति । वानरेरितं वानरैरुक्तमेतद्वचनं श्रुत्वा वाली महर्षिं तं मतङ्गं समासाद्य प्राप्य कृताञ्जलिः सन् याचते स्म शापनिवृत्तये प्रार्थनां चक्रे इत्यर्थः ॥ ६२ ॥

गो० टी०–एतच्छ्रुत्वेति । स्पष्टम् ॥ ६२ ॥

६३–६५] ति० टी०–शापधारणेन शापविषयदोषज्ञानेन ॥ ६३–६५ ॥

रा० टी०–महर्षिरिति । महर्षिर्मतङ्गः तं वालिनमनादृत्य प्रार्थनामनङ्गीकृत्येत्यर्थः, आश्रमं प्रति विवेश वाली तु शापधारणभीतः शापहेतुकप्राप्तभयः सन् विह्वलतां गतः प्राप्तः ॥६३॥

रा० टी०–तत इति । ततस्तस्मादिनादारभ्य शापभयाद् भीतो हरिर्वानरो वाली ऋष्यमूकं महागिरिं प्रवेष्टुं द्रष्टुं वा नेच्छति ॥ ६४ ॥

रा० टी०–तस्येति । हे राम ! तस्य वालिनः अप्रवेशं शापवशेन प्रवेशाभावं ज्ञात्वा विषादेन दुःखेन विवर्जितः सहामात्योऽहमिदं महावनं विचरामि ॥ ६५ ॥

गो० टी०–महर्षिरिति । विह्वलतां गत इति जगामेति शेषः ॥ ६३–६५ ॥

६६] ति० टी०–अस्थिनिचयः शुष्ककायः ॥ ६६ ॥

रा० टी०–एष इति । वीर्योत्सेकात्स्ववीर्यगर्वात् निर-

१ तदेति गो. पाठः । २ कूटोपम इति गो. पाठः ।

इमे च विपुलाः सालाः सप्तशाखावलम्बिनः । यत्रैकं घटते वाली निष्पत्रयितुमोजसा ॥ ६७ ॥
एतदैस्यासमं वीर्यं मया राम प्रैकाशितम् । कथं तं वालिनं हन्तुं समरे शक्ष्यसे नृप ॥ ६८ ॥
तथा ब्रुवाणं सुग्रीवं प्रहसँल्लक्ष्मणोऽब्रवीत् । कस्मिन्कर्मणि निर्वृत्ते श्रद्दध्या वालिनो वधम्॥ ६९ ॥
तमुवाचाथ सुग्रीवः सप्त सालानिमान्पुरा । एवमेकैकशो वाली विँध्याथाथ स चासकृत् ॥ ७० ॥
रामो ४निर्दारयेदेषां बाणेनैकेन चँ द्रुमम् । वालिनं निहतं मन्ये दृष्ट्वा रामस्य विक्रमम् ॥ ७१ ॥
हतस्य महिषस्यास्थि पादेनैकेन लक्ष्मण । उद्यम्य प्रैक्षिपेच्चापि तरसा द्वे धनुःशते ॥ ७२ ॥

स्तस्य वालिना त्याजितस्य तस्य वालिनिहतस्य दुन्दुभेः गिरिकूटनिभः महान् अस्थिनिचयः अस्थिसमूहः एष संप्रकाशते ६६

गो० टी०–एष इति । अस्थिनिचयः शुष्ककाय इति यावत् ॥ ६६ ॥

६७] ति० टी०–इमे विपुला विशालमूलस्कन्धाः शाखावलम्बिनः प्रशस्तबहुशाखावन्तः । यत्र येषु । एकमेककालमेव वाली ओजसा ओजोयुक्तकम्पनेन सर्वान्निष्पत्रयितुं पत्रहीनान्कर्तुं घटते चेष्टते । त इमे सप्त साला इत्यर्थः । अनेन वायोरप्यधिकं बलं सूचितम् । नहि वायोर्युगपत्कम्पनेन सकलार्द्रपत्रपातनं क्वचिदृष्टचरम् । कश्चित्तु निष्पत्रयितुं निष्पत्रीकर्तुमित्यर्थः । एकं सालं शरेण भित्त्वा शरो निष्पत्रं यथा गच्छति तथा कर्तुम् अतिव्यथयितुमिति यावत् । "सपत्रनिष्पत्रादतिव्यथने" इति शाखादप्राकृतकपित्वाच्च बाणव्यापारस्यापि संभव इति व्याचख्यौ ॥ ६७ ॥

रा० टी०–इमे इति । शाखावलम्बिनः प्रशस्तशाखायुक्ताः विपुलाः अतिस्थूलमूलादिमन्तः इमे सप्तसंख्याकाः शालास्तदभिधतरवः सन्तीति शेषः । यत्रयेषु तरुषु एकं तरुं निष्पत्रयितुं पत्रविहीनं कर्तुमोजसा ओजोहेतुकमूलग्रहणपूर्वककम्पनेन वाली घटते शक्नोति ॥ ६७ ॥

गो० टी०–इमे चेति । विपुलाः स्थूलाः शाखावलम्बिनः लम्बितशाखाः शाखाद्वतत्वेन दुर्ज्ञेयलक्ष्या इत्यर्थः । यत्र सालेषु एकं सालम् ओजसा नतु धनुषा निष्पत्रयितुं निर्गतशरपत्रं कर्तुं घटते शक्नोति एकं सालं भित्त्वा शरो निष्पत्रं यथा तथा वृक्षान्तरासक्तमूलं गच्छति तथा वेद्धुं समर्थ इत्यर्थः । धनुर्विना केवलबाणेन एकं सालं विध्यतीत्यर्थः । यद्वा वेद्धुं शक्तः नतु कदाचित्तथा कृतवानिति घटत इति पदेन व्यज्यते । एवमुत्तरत्रापि योज्यम् । यद्वा स्वजातिविरुद्धत्वेन युद्धे धनुर्ग्रहणाभावेऽपि लीलार्थं धनुरस्तीति ध्येयम् ॥ ६७ ॥ ६८ ॥

६८] ति० टी०–उक्तं वालिवीर्यमुपसंहरति—एतदिति ॥ ६८ ॥

रा० टी०–एतदिति । तस्य वालिनः असमम् अन्यसाम्यरहितम् एतद्वीर्यं मया प्रकाशितम्, तं वालिनं समरे हन्तुं त्वं कथं शक्ष्यसे ॥ ६८ ॥

६९] ति० टी०–प्रहसन् भगवद्वीर्याज्ञानादेवं वाद इति हासः ॥ ६९ ॥

रा० टी०–तथेति । तथा तेन प्रकारेण ब्रुवाणं सुग्रीवं प्रहसन् लक्ष्मण अब्रवीत् । तद्वचनाकारमाह–कस्मिन्कर्मणि निर्वृत्ते रामेण निष्पादिते सति वालिनो वधं त्वं श्रद्दध्याः वधविश्वासं कुर्याः ॥ ६९ ॥

गो० टी०–तथेति । कस्मिन्निति सुग्रीवेण चतुःसमुद्रगमने उत्क्षिप्तपर्वतशिखरग्रहणे दुन्दुभिकायोत्क्षेपणे सालभेदने वेत्यर्थः ॥ ६९ ॥

७०] ति० टी०–एवमुक्तप्रकारेणैकैकश एकैकस्मिन्काले सप्तापि स वाल्यसकृद्विव्याथ पीडितवान् आर्षं परस्मैपदम् । सकृत्कृतेः काकतालीयत्वव्युदासायासकृदिति । 'विव्याध' इति पाठान्तरम् । तुल्योऽर्थः ॥ ७० ॥

रा० टी०–तमिति । अथ अनन्तरं सुग्रीवः तं लक्ष्मणमुवाच । तद्वचनाकारमाह–पुरा पूर्वमिमान्सप्तशालान् एकैकशः असकृदनेकवारं प्रहारेण स वाली विव्याध अकम्पयत् । एवमनेन प्रकारेण एषां तरूणां मध्ये द्रुममेकतरुं रामः चेद्यदि एकेन बाणेन विदारयेत् हतस्य वालिना निहतस्य महिषस्य अस्थि एकेन पादेन उद्यम्य द्वे धनुःशते तरसा वेगेन प्रक्षिपेच्च तदा रामस्य विक्रमं दृष्ट्वा वालिनं निहतं मन्ये मंस्ये । श्लोकत्रयमेकान्वयि ॥ ७०–७२ ॥

गो० टी०–तमिति । पुरा वाली इमान् सप्त सालान् विव्याध । अथ च अनन्तरमपि एवमेकैकशः असकृद्विव्याधेति योजना । यद्वा स वाली एवंविधानिमान्सप्त सालान् एकैकशः पुरा विव्याध अनन्तरमपि असकृद्विव्याध ॥ ७० ॥

७१–७२] ति० टी०–एकेन बाणेनैषामेकं द्रुममपि चेन्निरदारयेत्तदापि वालिनं हतं मन्ये । तद्वधयोग्यतासंभावनयेति भावः । पादेन अस्थ्नो हस्तेन स्पर्शायोग्यत्वात् । तरसा बलेन प्रक्षिपेदपि चेत्तदापि रामस्य विक्रमं दृष्ट्वा वालिनं हतं मन्य इति संबन्धः ॥ ७१ ॥ ७२ ॥

गो० टी०–राम इति । एषां मध्ये एकं द्रुमम् एकेन बाणेन यदि विदारयेत् तदा तादृशं विक्रमं दृष्ट्वा वालिनं निहतं मन्ये । उद्यम्य प्रकोष्ठेनोत्क्षिप्य द्वे धनुःशते धनुःशत-

१ तस्येति रा. पाठः । २ प्रकीर्तितमिति गो. पाठः । ३ विव्याधेति गो. रा. पाठः । ४ ऽपीति गो. पाठः । ५ चेदिति गो. पाठः । ६ अथ प्रक्षिपेच्चेदिति गो. पाठः ।

एवमुक्त्वा तु सुग्रीवो रामं रक्तान्तलोचनः । ध्यात्वा मुहूर्तं काकुत्स्थं पुनरेव वचोऽब्रवीत् ॥ ७३ ॥
शूरश्च शूरमानी च प्रख्यातबलपौरुषः । बलवान्वानरो वाली संयुगेष्वपराजितः ॥ ७४ ॥
दृश्यन्ते चास्य कर्माणि दुष्कराणि सुरैरपि । यानि संचिन्त्य भीतोऽहमृष्यमूकमुपाश्रितः ॥ ७५ ॥
तमजय्यमधृष्यं च वानरेन्द्रममर्षणम् । विचिन्तयन्नहं वालिं चापि ऋष्यमूकमुं त्वहम् ॥ ७६ ॥
उद्विग्नः शङ्कितश्चाहं विचरामि महावने । अनुरक्तैः सहामात्यैर्हनुमत्प्रमुखैर्वरैः ॥ ७७ ॥
उपलब्धं च मे श्लाघ्यं सन्मित्रं मित्रवत्सल । त्वामहं पुरुषव्याघ्र हिमवन्तमिवाश्रितः ॥ ७८ ॥
किं तु तस्य बलज्ञोऽहं दुर्भ्रातुर्बलशालिनः । अप्रत्यक्षं तु मे वीर्यं समरे तव राघव ॥ ७९ ॥
न खल्वहं त्वां तुलये नावमन्ये न भीषये । कर्मभिस्तस्य भीमैश्च कातर्यं जनितं मम ॥ ८० ॥
कामं राघव ते वाणी प्रमाणं धैर्यमाकृतिः । सूचयन्ति परं तेजो भस्मच्छन्नमिवानलम् ॥ ८१ ॥
तस्य तद्वचनं श्रुत्वा सुग्रीवस्य महात्मनः । स्मितपूर्वमथो रामः प्रत्युवाच हरिं प्रति ॥ ८२ ॥

द्वयदरम् । धनुर्नाम चतुर्हस्तमानम् 'किष्कुः स्यादवटो हस्तश्चतुर्विंशतिरङ्गुलः । चतुर्हस्तो धनुर्दण्डो धनुर्धन्वन्तरं युगम्॥' इति वैजयन्ती । एवं सुग्रीवस्तमुवाचेति पूर्वेणान्वयः॥७१॥७२॥

७३] ति० टी०–ध्यात्वा रामवीर्यस्याप्रत्यक्षत्वाद्रामेण वालिवधः शक्यो न वेति संचिन्त्य ॥ ७३ ॥

रा० टी०–एवमिति । सुग्रीवः एवमुक्त्वा रक्तान्तलोचनमरुणनेत्रप्रान्तभागं रामं मुहूर्तं ध्यात्वा अयं वालिवधयोग्यो न वेति संचिन्त्य अब्रवीत् ॥ ७३ ॥

गो० टी०–एवमविश्वासकरणे सहदुर्मनायेतेत्यालोच्य यथा रामः संतुष्यति तथा वदति–एवमुक्त्वेत्यादिना ॥७३–७६॥

७४] ति० टी०–पुनर्मित्रभावेनाह–शूरश्चेति ॥ ७४ ॥

रा० टी०–तद्वचनाकारमाह–शूर इति । शूरः अतिशौर्यविशिष्टः अत एव शूरमानी शूरकर्तृकसत्कारवान् प्रख्यातबलपौरुषः प्रसिद्धबलैश्वर्यवान् बलवान् अनेकबलवद्विशिष्टः प्रशस्तसेनाविशिष्टो वा संयुगेषु संग्रामेषु अपराजितः वाली अस्तीति शेषः ॥ ७४ ॥

७५] ति० टी०–यानि वालिकर्माणि संचिन्त्य भीतस्तेन सह रणाय भीतः ॥ ७५ ॥

रा० टी०–दृश्यन्ते इति । अस्य वालिनः सुरैरपि दुष्कराणि यानि कर्माणि दृश्यन्ते तानि संचिन्त्य भीतोऽहमृष्यमूकमुपाश्रितः प्राप्तः ॥ ७५ ॥

७६–७७] ति० टी०–उक्तमेव भीत्या पुनराह–तमजय्यमिति ॥ ७६–७७ ॥

रा० टी०–तमिति । अजय्यम् अस्माभिर्जेतुमशक्यम् अत एव अधृष्यं धर्षयितुमशक्यम् अमर्षणं क्षमारहितं वानरेन्द्रं वालिनं विचिन्तयन् अहम् अमुम् ऋष्यमूकं न मुञ्चामि ॥७६॥

रा० टी०–उद्विग्न इति । शङ्कितस्तत्पौरुषादिस्मरणेन शङ्कावान् अत एव उद्विग्नः उद्विग्नचित्तोऽहमनुरक्तैः मद्विषयकानुरागविशिष्टैर्हनुमत्प्रमुखैरमात्यैः सह महावने विचरामि ॥७७॥

गो० टी०–उद्विग्न इति । उद्विग्नः भीतः ॥ ७७–७९ ॥

७८] ति० टी०–त्वां मित्रभूतम् ॥ ७८ ॥

रा० टी०–उपलब्धमिति । हे मित्रवत्सल ! श्लाघ्यं प्रशंसनीयं सन्मित्रं मे मया उपलब्धम् अत एव पुरुषव्याघ्र हिमवन्तमिव त्वामहमाश्रितः ॥ ७८ ॥

७९] ति० टी०–यदि मामाश्रितस्तर्हि त्यज वालिभयम् तत्राह—किं त्विति । तद्बलं ज्ञातं त्वद्बलं चाज्ञातमतो भयमित्यर्थः ॥ ७९ ॥

रा० टी०–नन्वेवं तर्हि संशयं त्यजेत्यत आह–किमिति । बलशालिनः अतिबलवतः दुर्भ्रातुस्तस्य वालिनः बलज्ञोऽहं तव वीर्यं तु समरे मे अप्रत्यक्षम् एतेन इदानीमपि संशयो न निवृत्त इति सूचितम् ॥ ७९ ॥

८०] ति० टी०–तुलये त्वद्बलपरीक्षां न कुर्वे इति भावः । नावमन्ये न भीषये च, किं तु स्वकातर्यादेव पुनर्ब्रवीमीति भावः ॥ ८० ॥

रा० टी०–संशयनिवृत्त्यभावे हेतुं वदन्नाह–नेति । त्वामहं न तुलये केनचित्सदृशं जानामि सर्वविलक्षणत्वादिति तात्पर्यम् । अवमन्ये न वालिकथनेनावमानं न करोमि भीषये च न किंतु तस्य वालिनः भीमैः कर्मभिः मम कातर्यं जनितम् । एतेन कातर्यमूलकमेव वालिपराक्रमवर्णनमिति व्यञ्जितम्॥८०॥

गो० टी०–नेत्यादि ॥ ८० ॥

८१–८२] ति० टी०–वाणी वालिवधविषया प्रमाणं विश्वसनीया । यतो धैर्यमाकातर्येण तूष्णीकृत्य वादः । आकृतिरनुभवसिद्धो दिव्यविग्रह एते द्वे । परं तेजः सकलजगत्संहारकं तेजः काममतिशयेन सूचयन्ति सूचयतः । भस्मच्छन्नानलोपमया गुप्तावस्थितिमहाशक्तिमत्त्वं सूचितम् ॥ ८१ ॥ ८२ ॥

रा० टी०–नन्वेवं तर्हि मद्विश्वासं कथं करोषीत्यत आह–काममिति । हे राघव ! ते वाण्यादयः भस्मच्छन्नमनलं वह्निमिव ते तेजः सूचयन्ति ॥ ८१ ॥

---

१ लोचनमिति गो. रा. पाठः । २ घातीति गो. पाठः । ३ ऋष्यमूकं समाश्रित इति गो. पाठः । ४ न मुञ्चामीति गो. पाठः । ५ ऽपीति गो. पाठः । ६ अथो इति गो. रा. पाठः । ७ न जाना मीति युक्तमाति ।

यदि न प्रत्ययोऽस्मासु विक्रमे तव वानर । प्रत्ययं समरे श्लाघ्यमहमुत्पादयामि ते ॥ ८३ ॥
एवमुक्त्वा तु सुग्रीवं सान्त्वयँल्लक्ष्मणाग्रजः । राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन लीलया ॥ ८४ ॥
तोलयित्वा महाबाहुश्चिक्षेप दशयोजनम् । असुरस्य तनुं शुष्कां पादाङ्गुष्ठेन वीर्यवान् ॥ ८५ ॥
क्षिप्तं दृष्ट्वा ततः कायं सुग्रीवः पुनरब्रवीत् । लक्ष्मणस्याग्रतो रामं तपन्तमिव भास्करम् ॥
हरीणामग्रतो वीरमिदं वचनमर्थवत् ॥ ८६ ॥
आर्द्रः समांसः प्रत्यग्रः क्षिप्तः कायः पुरा सखे । परिश्रान्तेन मत्तेन भ्रात्रा मे वालिना तदा ॥ ८७ ॥
लघुः संप्रति निर्मांसस्तृणभूतश्च राघव । क्षिप्तं एवं प्रहर्षेण भवता रघुनन्दन ॥ ८८ ॥
नात्र शक्यं बलं ज्ञातुं तव वा तस्य वाऽधिकम् । आर्द्रं शुष्कमिति ह्येतत्सुमहद्राघवान्तरम् ॥ ८९ ॥
स एव संशयस्तात तव तस्य च यद्बलम् । सालमेकं विनिर्भिद्य भवेद्व्यक्तिर्बलाबले ॥ ९० ॥
कृत्वैतत्कार्मुकं सज्यं हस्तिहस्तमिवापरम् । आकर्णपूर्णमायम्य विसृजस्व महाशरम् ॥ ९१ ॥

रा० टी०–तस्येति । महात्मनस्तस्य सुग्रीवस्य तद्वचनं श्रुत्वा रामः हरिं सुग्रीवं प्रति स्मितपूर्वं प्रत्युवाच ॥ ८२ ॥

गो० टी०–काममिति । वाणी एकरूपं वचनं प्रमाणं बुद्धिः धैर्यम् अचञ्चलता आकृतिर्वेषश्च भस्मच्छन्नमनलमिव स्थितं ते परं तेजः कामम् अतिशयेन सूचयन्ति । अथापि मे कार्यं जनितमिति पूर्वेणान्वयः ॥ ८१ ॥ ८२ ॥

८३–८५] ति० टी०–अस्मासु विक्रमेऽस्मन्निष्ठविक्रमे । प्रत्ययो विश्वासः ॥ ८३–८५ ॥

रा० टी०–तद्वचनाकारमाह–यदीति । हे वानर ! अस्मासु विद्यमाने विक्रमे पराक्रमे तव प्रत्ययो विश्वासो यदि न तर्हि समरे श्लाघ्यं ते प्रत्ययं प्रतीतिविषयीभूतविक्रमम् उत्पादयामि ॥ ८३

गो० टी०–यदीति । विक्रमे विषये । प्रत्ययं विश्वासं समरे विषये ॥ ८३ ॥

रा० टी०–एवमिति । लक्ष्मणाग्रजो रामः सुग्रीवं सान्त्वयन् सन् एवमुक्त्वा असुरस्य दुन्दुभेः कायं पादाङ्गुष्ठेन तोलयित्वा शुष्कां तनुं पादाङ्गुष्ठेन लीलया दशयोजनं चिक्षेप । कर्मणः करणस्य च पुनरुपादानमुभयत्र शाब्दान्वयविवक्षया । श्लोकद्वयमेकान्वयि ॥ ८४ ॥ ८५ ॥

गो० टी०–एवमिति । सान्त्वमित्यनेन प्रत्ययप्रभेन सुग्रीवस्य दुःखितत्वं द्योत्यते । पादाङ्गुष्ठेन अनुद्धृतेन तोलयित्वा चालयित्वा ॥ ८४ ॥

गो० टी०–असुरस्येति । तनुं पूर्वापेक्षया स्वल्पं कायं शरीरम् ॥ ८५ ॥

८६] ति० टी०–अर्थवदुपपत्तियुक्तमिदं वचनमब्रवीत् अनुत्पन्नप्रत्यय इति शेषः ॥ ८६

रा० टी०–क्षिप्तमिति । सुग्रीवः क्षिप्तं कायं दृष्ट्वा भास्करमिव लक्ष्मणस्याग्रतः अग्रे तपन्तं प्रकाशमानं रामं हरीणां वानराणामग्रतः अग्रे अर्थवदिदं वचनं पुनरब्रवीत् । सार्धश्लोक एकान्वयी ॥ ८६ ॥

गो० टी०–कथं कमित्यत्राह—लक्ष्मणस्येति ॥ ८६ ॥

८७–८८] ति० टी०–तदेवाह—आर्द्रं इति । प्रत्ययो नूतनः मत्तेन भोगार्थं पीतमदेन ॥ ८७ ॥ ८८ ॥

रा० टी०–तदाकारमाह–आर्द्रं इति । हे सखे ! आर्द्रः रुधिरव्याप्तः समांसः मांससहितः प्रत्यग्रः अग्रभागसहितः कायः परिश्रान्तेन परिश्रमविशिष्टेन मत्तेन मे भ्रात्रा वालिना पुरा पूर्वं क्षिप्तः संप्रति इदानीं तु निर्मांसः मांसरहितः शुष्क इत्यर्थः, अत एव लघुः अत एव तृणभूतः लघुत्वेन तृणत्वं प्राप्तः काय इति शेषः, भवता क्षिप्तः अतः अत्र अस्मिन् क्षेपे तत्राधिकं बलं वालिनो वा अधिकं बलं विज्ञातुं निर्णेतुं न शक्यम् । सार्धश्लोकद्वयमेकान्वयि ॥ ८७ ॥ ८८ ॥

गो० टी०–आर्द्रं इति । आर्द्रः सरक्तः । प्रत्यग्रः यत्किंचित्प्राणचेष्टायुक्तः । लघुत्वं सदृष्टान्तमाह–तृणभूत इति ॥ ८७ ॥

गो० टी०–एवं प्रक्षेपेऽप्यवैषम्यमुक्त्वा प्रक्षेप्तृतारतम्यमाह—परिश्रान्तेनेति । एवंप्रहर्षेण एवंविधप्रहर्षवता । नात्रेति । अत्र दुन्दुभिकायक्षेपकर्मणि तव वा तस्य वा अधिकं बलमिति ज्ञातुं न शक्यम् ॥ ८८ ॥

८९] ति० टी०–बलाधिक्यनिर्णये हेतुमाह–आर्द्रमिति ॥ ८९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–आर्द्रमिति । हे राघव ! हि यतः आर्द्रं शुष्कं सुमहदन्तरं परस्परमतिभेदवत् अतस्तव तस्य वालिनो यद्बलं तत्र सः पौर्वकालिक एव संशयस्तिष्ठतीति शेषः ॥ ८९ ॥

गो० टी०–पुनः संग्रहेणाह—आर्द्रमिति । आर्द्रं शुष्कमित्येतत्सुमहत् अन्तरं तारतम्यं यस्मादस्ति अतस्तव च तस्य च बले युवयोर्बलतारतम्ये स एव संशयो वर्तते संशयो न निवृत्त इत्यर्थः ॥ ८९ ॥

९०–९१] ति० टी०–यद्बलम् तत्रेति शेषः । 'यद्बले'

---

१ सान्त्वं लक्ष्मणपूर्वज इति गो. पाठः । २ शुष्कमिति गो. पाठः । ३ एतदादि प दद्वयं गो. नास्ति । ४ अब्रवीदिति गो. पाठः । ५ एतदाद्यर्धद्वयं व्यत्यस्तं गो. पाठे । ६ क्षिप्तमिति गो. पाठः । ७ चेति रा. पाठः । ८ बले इति गो. पाठः । तु निर्भिन्या इति गो. पाठः ।

इमं हि सालं प्रहितस्त्वया शरो न संशयोऽत्रास्ति विदारयिष्यति ।
अलं विमर्शेन मम प्रियं ध्रुवं कुरुष्व राजन्प्रतिशापितो मया ॥ ९२ ॥
यथा हि तेजःसु वैरः सदा रविर्यथा हि शैलो हिमवान्महाद्रिषु ।
यथा चतुष्पात्सु च केसरी वरस्तथा नराणामसि विक्रमे वरः ॥ ९३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्ड एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ।

सप्ततालपूर्वं रसातलं निर्भिद्य पुनरागत्य तूणौ प्रविशन्त रामेषु विलोक्य विस्मितः सुग्रीवो राम प्रशसन्वालिहननं प्रार्थयते । वालिना योद्धु सुग्रीवं प्रेषयन्रामः सस्वजनो वृक्षमूले निलीनस्तथौ । सुग्रीवाह्वानमसहमानेन वालिना प्रवृत्तयुद्धे तयोर्विशेषानवबोधाद्रामेण वालिनि शरामोक्षणाद्भग्नबलः सुग्रीवः पलाय्य ऋष्यमूकं प्रापत्तदन्तिकं प्राप्तो रामो वालिवधाकरणे कारण प्रदर्श्य सुग्रीवमाश्वासयन्वालिना पुनर्योद्धुं समनाहयदथो रामप्रचोदितो लक्ष्मणः प्रत्यभिज्ञानाय पुष्पितां गजपुष्पीमुत्पाट्य सुग्रीवग्रीवाया बबन्ध ।

एतच्च वचनं श्रुत्वा सुग्रीवस्य सुभाषितम् । प्रत्ययार्थं महातेजा रामो जग्राह कार्मुकम् ॥ १ ॥
स गृहीत्वा धनुर्घोरं शरमेकं च मानदः । सालमुद्दिश्य चिक्षेप पूरयन्स रवैर्दिशः ॥ २ ॥
स विसृष्टो बलवता बाणः स्वर्णपरिष्कृतः । भित्त्वा तालान्गिरिप्रस्थं सप्तभूमिं विवेश ह ॥ ३ ॥

इति पाठे यदित्यव्ययम् । यः संशयोऽस्थिप्रक्षेपात्प्राग्बलविषय आसीत्, सोऽप्यप्यस्त्येवेत्यर्थः । तर्हि किं ते प्रत्ययकारकं तत्राह–सालमेकमिति । एकं सालमुक्तेषु विनिर्भिद्य बलाबलविषये व्यक्तिः प्रकटता भवेत् ॥ ९० ॥ ९१ ॥

रा० टी०–नन्वं कथं संशयनिवृत्तिरित्यत आह–सालमिति । अपरं हस्तिहस्तमिव एतत्कार्मुकं धनुः सज्यं कृत्वा आकर्णपूर्णमायम्य महाशरं विसृजस्व अत एव एकं सालं विनिर्भिद्य बलाबले बलाबलयोः व्यक्तिः प्राकट्यं भवेत् । सार्धश्लोक एकान्वयी ॥ ९० ॥ ९१ ॥

गो० टी०–सालमिति । निर्भिन्याः भञ्जय । व्यक्तिः विशेषज्ञानम् ॥ ९० ॥ ९१ ॥

९२] ति० टी०–त्वया प्रहितः क्षिप्तः शर इमं सालं विदारयिष्यति । अत्र न संदेहः, तस्मात्त्वया विमर्शो विचारो न कर्तव्यः । मया सख्या संप्रति शापितः शपथपूर्वं नियुक्तः, अतो मम प्रियं ध्रुवं कुरुष्वेत्यर्थः ॥ ९२ ॥

रा० टी०–इममिति । त्वया प्रहितः शरः इमं सालं विदारयिष्यति अत्र संशयो नास्ति अतः मया प्रतिशापितः कृतशपथस्त्वं मम प्रियं ध्रुवं कुरुष्व विमर्शेन एतद्विरोधिविचारेण अलं न कुर्वित्यर्थः ॥ ९२ ॥

गो० टी०–पुनर्निर्बन्धेन कुपितो भवेदिति सान्त्वयति–इममिति । सहितः संहितः "समो वा हिततत्तयोः" इति मलोपः । शरो विदारयिष्यति । विमर्शेन पुनः किमर्थं प्रत्ययोत्पादनमिति विमर्शेन । मम प्रियं नतु त्वत्परीक्षार्थम् ॥ ९२ ॥

९३] ति० टी०–तेजःसु तेजस्विषु । विक्रमे वरः श्रेष्ठस्त्वेनाभिमतोऽसि भवसीत्यर्थः । सालभेदने सतीति शेषः ॥ ९३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकादशः सर्गः ॥ ११ ॥

रा० टी०–यथेति । तेजस्सु तेजोविशिष्टेषु रविर्वरः महाद्रिषु हिमवान् चतुष्पात्सु केसरी सिंहो यथा तथा विक्रमे त्वमसि इत्थं प्रतीयसे इत्यर्थः ॥ ९३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकादशः सर्गः ॥ ११ ॥

गो० टी०–यथेति । तेजःसु तेजस्विषु । विक्रमे स्थितानामिति शेषः ॥ ९३ ॥

अस्मिन् सर्गे त्र्युत्तरनवतिश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

१–२] ति० टी०–॥ १ ॥ २ ॥

रा० टी०–सुग्रीवप्रार्थितरामकर्तृकसप्ततालभेदनं वर्णयितुमाह–एतदिति । सुग्रीवस्य सुभाषितमेतद्वचनं श्रुत्वा महातेजा रामः प्रत्ययार्थं सुग्रीवविश्वासार्थं कार्मुकं धनुर्जग्राह ॥१॥

रा० टी०–स इति । स रामः धनुरेकं शरं च गृहीत्वा सरवैः रवत्त्वविशिष्टैः रवैरित्यर्थः।दिशः पूरयन् सन् सालमुद्दिश्य चिक्षेप२

गो० टी०–अथ प्रत्ययपूर्वकं वालिवधाय गमनं द्वादशे–एतद्धेत्यादि ॥ १ ॥ २ ॥

३] ति० टी०–स एकसालोद्देशेनैव क्षिप्तोऽपि बाणः

१ राजात्मजेति गो.पाठः। २ रविरिति गो.पाठः। ३सुग्रीवेणेति गो पाठः। ४ज्यास्वनैः पूरयन्दिश इति गो.पाठः। ५सालान्गिरिप्रस्थे इति गो.रा.पाठः।

सायकस्तु मुहूर्तेन तालान्भित्त्वा महाजवः । निष्पत्य च पुनस्तूणं तमेव प्रविवेश ह ॥ ४ ॥
तान्दृष्ट्वा सप्त निर्भिन्नान्सालान्वानरपुंगवः । रामस्य शरवेगेन विस्मयं परमं गतः ॥ ५ ॥
स मूर्ध्ना न्यपतद्भूमौ प्रलम्बीकृतभूषणः । सुग्रीवः परमप्रीतो राघवाय कृताञ्जलिः ॥ ६ ॥
इदं चोवाच धर्मज्ञं कर्मणा तेन हर्षितः । रामं सर्वास्त्रविदुषां श्रेष्ठं शूरमवस्थितम् ॥ ७ ॥
सेन्द्रानपि सुरान्सर्वांस्त्वं बाणैः पुरुषर्षभ । समर्थः समरे हन्तुं किं पुनर्वालिनं प्रभो ॥ ८ ॥
येन सप्त महातालाः गिरिर्भूमिश्च दारिताः । बाणेनैकेन काकुत्स्थ स्थाता ते को रणाग्रतः ॥ ९ ॥
अद्य मे विगतः शोकः प्रीतिरद्य परा मम । सुहृदं त्वां समासाद्य महेन्द्रवरुणोपमम् ॥ १० ॥
तमद्यैव प्रियार्थं मे वैरिणं भ्रातृरूपिणम् । वालिनं जहि काकुत्स्थ मया बद्धोऽयमञ्जलिः ॥ ११ ॥
ततो रामः परिष्वज्य सुग्रीवं प्रियदर्शनम् । प्रत्युवाच महाप्राज्ञो लक्ष्मणानुगतं वचः ॥ १२ ॥

सप्तसालान्भित्त्वा तदाश्रमगिरिप्रस्थमपि भित्त्वा तदाधारभूमिमपि भित्त्वा सप्तभूमिरसातलं विवेशेत्यर्थः ॥ ३ ॥

रा० टी०—स इति । बलवता रामेण विसृष्टः त्यक्तः स्वर्णपरिष्कृतो बाणः सालान् तदभिधसप्ततरुन् गिरिप्रस्थं तदाश्रयीभूतगिरिखण्डं च सप्तभूमिम् अधस्सप्तलोकावरकांश्च भित्त्वा विवेश उद्देश्यातिरिक्तभेदनस्य सामर्थ्यसूचकत्वान्न प्रयोक्तृनैपुण्यहानिः उपलक्षणतयाऽन्यस्याप्युद्देश्यता वा ॥ ३ ॥

गो० टी०—स विसृष्ट इति । सः एकसालोद्देशेन विसृष्टः स्वर्णपरिष्कृतः स्वर्णपट्टालंकृतः अनेन सर्वोत्तमत्वमुक्तम् । सालानिति सप्त सालान् भित्त्वा गिरिप्रस्थे गिरिप्रस्थमार्गणभूमिं विवेश । इत्थं श्लुक्तमभिप्युक्तैः । सालांश्च सप्त सगिरीन् सरसातलानिति संक्षेपे च गिरिं रसातलं चैवेति । अन्यस्त्वपपाठः ॥ ३ ॥

४-५] ति० टी०—निष्पत्य रसातलपर्यन्तं गत्वा तत्रत्यासुरान्हत्वा तमेव तूणं पूर्वाधारं तूणम् । अनेन रामबाणानां चेतनपरशक्तिमदेवताधिष्ठितत्वं सूचयति । तदुक्तम्'—'युगपत्सप्ततालांश्च रघुनाथो बिभेद ह । पातालदानवान्हत्वा पुनस्तूणं विवेश च ॥' इति ॥ ४ ॥ ५ ॥

रा० टी०—सायक इति । महाजवः सायकः सालान् उपलक्षणतया तत्प्रभृतीन् मुहूर्तेन भित्त्वा निष्पत्य बहिरागत्य स्वतूणीमिषुधिं प्रविवेश ॥ ४ ॥

गो० टी०—प्रविष्ट इति । धरां भित्त्वा प्रविष्टः स शरः महाजवत्वान्मुहूर्तेन निष्पत्य निर्गत्य पुनस्तां तूणीं प्रविवेश । मन्त्रप्रभावेनाचेतनस्यापि पुनरागमनम् ॥ ४ ॥

रा० टी०—तानिति । वानरपुंगवः सुग्रीवः निर्भिन्नान् सप्तसालान् दृष्ट्वा परमं विस्मयं गतः ॥ ५ ॥

गो० टी०—तानिति । दृष्ट्वेत्यनेनाल्पज्ञत्वात्सुग्रीवः सालानेव भिन्नान् ददर्श सप्तभूमिप्रवेशं त्वहमेव धर्मवीर्येण पश्यामीति भावः ॥ ५ ॥

६-८] ति० टी०—प्रलम्बी कृतभूषणः साष्टाङ्गप्रणामवशाल्लम्बमानावस्थापन्नोरःकण्ठादिवर्तिसकलभूषणः। कृताञ्जलिः उत्थानानन्तरमिति शेषः ॥ ६-८ ॥

रा० टी०—स इति । परमप्रीतः स सुग्रीवः प्रलम्बीकृतभूषणः दण्ड्यमानप्रणामहेतुकप्रलम्बीभूतवनमालादिभूषणविशिष्टः सन् भूमौ मूर्ध्ना राघवाय न्यपतत् ॥ ६ ॥

रा० टी०—इदमिति । तेन तालादिभेदनरूपेण कर्मणा हर्षितः सुग्रीवः धर्मज्ञं राममिदमुवाच ॥ ७ ॥

रा० टी०—तद्वचनाकारमाह—सेन्द्रानिति । सेन्द्रान् सर्वान् सुरानपि समरे बाणैर्हन्तुं त्वं समर्थः तर्हि वालिनं हन्तुं समर्थ इति किम् ॥ ८ ॥

गो० टी०—स इति । सः सुग्रीवः परमप्रीतः सन् राघवाय कृताञ्जलिः मूर्ध्ना भूमौ न्यपतत् शिरसा भूमिं स्पृष्ट्वा प्रणनामेत्यर्थः । प्रलम्बीकृतभूषण इत्यनेन उदरास्पर्श उक्तः । अनेन भगवद्विषये प्रणामप्रकारः शिक्षितो भवति ॥ ६-११ ॥

९-११] ति० टी०—भूमिश्च चात्सप्तपातालास्तद्वर्तिनोऽसुराश्च ॥ ९-११ ॥

रा० टी०—येनेति । येन भवता सप्तमहासाला गिरिः भूमिः सप्ताधोलोकावरणानि दारिताः तस्य ते रणाग्रतः कः स्थाता ॥ ९ ॥

रा० टी०—अद्येति । सुहृदं त्वां समासाद्य प्राप्य अथ भवदतिपराक्रमदर्शनसमये मे शोको विगतः अत एव अथ मम परा प्रीतिर्भवतीति शेषः ॥ १० ॥

रा० टी०—तमिति । हे काकुत्स्थ! मे प्रियार्थं भातृरूपं मे वैरिणं वालिनं जहि अत एवायमञ्जलिर्मया बद्धः ॥ ११ ॥

१२] ति० टी०—लक्ष्मणानुगतम् तत्समभित्यर्थः । यद्वा लक्ष्मणवत्प्रियत्वेनानुगतं स्वीकृतं सुग्रीवमित्यर्थः ॥ १२ ॥

रा० टी०—तत इति । ततः सुग्रीवप्रार्थनाश्रवणानन्तरं महाप्राज्ञो रामः लक्ष्मणानुगतं मैत्र्या लक्ष्मणतुल्यत्वं प्राप्तं सुग्रीवं प्रत्युवाच ॥ १२ ॥

गो० टी०—तत इति । लक्ष्मणानुमतमिति क्रियाविशेषणम् । भातृगन्धिनं भातृहिंसकम् " गन्धनावक्षेपणे " इत्यत्र तथा प्रयोगात् । इति रामः सुग्रीवं प्रत्युवाचेति पूर्वेणान्वयः ॥ १२ ॥ १३ ॥

---

१ प्रविष्टश्चेति गो. पाठः । २ धरामिति गो. पाठः । ३ तूणं स्वतूणीमिति गो. रा. पाठः । ४ साला इति गो. रा. पाठः ।

अस्माद्गच्छाम किष्किन्धां क्षिप्रं गच्छ त्वमग्रतः । गत्वा चाह्वय सुग्रीव वालिनं भ्रातृगन्धिनम् ॥ ११ ॥
सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम् । वृक्षैरात्मानमावृत्य ह्यतिष्ठन्गहने वने ॥ १४ ॥
सुग्रीवोऽप्यनदद्घोरं वालिनो ह्वानकारणात् । गाढं परिहितो वेगान्नादैर्भिन्दन्निवाम्बरम् ॥ १५ ॥
तं श्रुत्वा निनदं भ्रातुः क्रुद्धो वाली महाबलः । निष्पपात सुसंरब्धो भास्करोऽस्ततटादिव ॥ १६ ॥
ततः सुतुमुलं युद्धं वालिसुग्रीवयोरभूत् । गगने ग्रहयोर्घोरं बुधाङ्गारकयोरिव ॥ १७ ॥
तलैरशनिकल्पैश्च वज्रकल्पैश्च मुष्टिभिः । जघ्नतुः समरेऽन्योन्यं भ्रातरौ क्रोधमूर्छितौ ॥ १८ ॥
ततो रामो धनुष्पाणिस्तावुभौ समुदैक्षत । अन्योन्यसदृशौ वीरावुभौ देवाविवाश्विनौ ॥ १९ ॥
यन्नावगच्छत्सुग्रीवं वालिनं वापि राघवः । ततो न कृतवान्बुद्धिं मोक्तुमन्तकरं शरम् ॥ २० ॥

१३] ति० टी०—अस्मादृष्यमूकात् । भ्रातृगन्धिनमनर्थकभ्रातृव्यपदेशम् ॥ १३ ॥

रा० टी०—तदाकारमाह—अस्मादिति । अस्मात् पर्वतात् किष्किन्धां गच्छाम अतस्त्वं ममाग्रतः क्षिप्रं गच्छ गत्वा च भ्रातृगन्धिनं भ्रातृशब्दबोध्यं वालिनमाह्वय ॥ १३ ॥

१४] ति० टी०—आत्मानं स्वदेहान् ॥ १४ ॥

रा० टी०—सर्वे इति । ते रामाज्ञप्ताः सर्वे सुग्रीवप्रभृतयः वालिनः पुरीं किष्किन्धां गत्वा तन्निष्ठसंयोगावृकूल्यापारं कृत्वा वृक्षैरात्मानमावृत्य उपगूह्य गहने दुर्गमे वने किष्किन्धासमीपकानने अतिष्ठन् ॥ १४ ॥

गो० टी०—सर्व इति । आत्मानं स्वं स्वमित्यर्थः ॥ १४ ॥

१५] ति० टी०—ह्वानकारणादाह्वाननिमित्तं गाढं परिहितं वस्त्रं येनेत्यर्थः । वासस्ता दृढं कटिं बद्धेत्यर्थः । वेगान्नादकारणप्राणवेगात् उत्पन्नैरिति शेषः ॥ १५ ॥

रा० टी०—सुग्रीव इति । गाढं परिहितः वस्त्रेण दृढं बद्धकटिः सुग्रीवः वालिनोह्वानकारणात् ह्वानार्थं नादैरम्बरं भिन्दन्निव घोरमनदत् ॥ १५ ॥

गो० टी०—सुग्रीव इति । ह्वानम् आह्वानम् । गाढं परिहितः बलाद्बद्धे दृढबद्धपरिधानः ॥ १५ ॥

१६] ति० टी०—भास्करोऽस्ततटादतिदूरमप्युदयपर्वतमत्यल्पेन कालेन याति, एवमदूरस्थानतया ततुल्यगुहातः क्षणेन बहिरागत इत्यर्थः । यत्त्वस्तपदेनोदयागिरिलक्षणम्, यदपि मेरूत्तरवासिनोऽधिकृत्येयमुक्तिरिति व्याख्यानं तत्क्लिष्टमसंगतं चेति स्पष्टं सुधियाम् ॥ १६ ॥

रा० टी०—तमिति । महाबलो वाली भ्रातुः निनदं श्रुत्वा सुसंरब्धः यातयुद्धोत्साहः सन् अस्ततटात् अस्ताचलसमीपात् भास्करः सूर्य इव निष्पपात ॥ १६ ॥

गो० टी०—तमिति । भास्करोऽस्ततटादिवेति यथा सूर्योऽस्ततटादवतरन्नदूरदिमर्भवति तथेदानीं किष्किन्धानिर्गमनं वालिनोऽल्पकालेन नाशहेतुरिति द्योतनार्थमस्ततटादित्युक्तम् । अस्मदेशोदयगिरिः प्रदेशान्तरापेक्षया अस्तगिरिरित्युक्तमित्यप्याहुः ॥ १६ ॥

१७] ति० टी०—बुधाङ्गारकयोरिव । ' वज्रगोकर्णयोर्यथा ' इति पाठान्तरम् । वज्रगोकर्णौ तदाख्यपर्वतौ । यथा तथेति शेषः ॥ १७ ॥

रा० टी०—तत इति । ततः वाल्यागमनानन्तरं गगने बुधाङ्गारकयोर्ग्रहयोरिव वालिसुग्रीवयोः घोरं सुतुमुलं युद्धमभूत् ॥ १७ ॥

गो० टी०—ततः सुतुमुलमिति । बुधाङ्गारकाख्ययोर्ग्रहयोरिव ॥ १७ ॥

१८–१९] ति० टी०—अशनिर्दम्भोलिः । वज्रं वज्रायुधम् ॥ १८ ॥ १९ ॥

रा० टी०—तलैरिति । अशनिकल्पैः वज्रोपमैस्तलैः करपादतलैः वज्रकल्पैः मुष्टिभिश्च भ्रातरौ अन्योन्यं जघ्नतुः॥१८॥

गो० टी०—तलैरिति । अशनिः मेघज्योतिः ॥ १८ ॥

रा० टी०—तत इति । ततः युद्धप्रवृत्त्यनन्तरं धनुष्पाणिः रामः उभौ अश्विनौ देवाविव अन्योन्यसदृशौ उभौ वालिसुग्रीवौ समुदैक्षत ॥ १९ ॥

गो० टी०—तत इत्यादि । श्लोकद्वयमेकान्वयम् । उभावश्विनौ देवाविव स्थितौ तावुभौ समुदीक्ष्य सुग्रीवं वालिनं वा विशेषतो यन्नावगच्छत् । ततः तस्माद्रामः शरं मोक्तुं बुद्धिं न कृतवानित्यन्वयः ॥ १९–२१ ॥

२०] ति० टी०—नावगच्छत् विविच्येति शेषः ॥ २० ॥

रा० टी०—यदिति । यद् यस्माद्धेतोः राघवो रामः नावगच्छत् मिलितत्वात्समानाकारत्वाच्च विविच्य बोद्धुं नैच्छत् ततस्तस्माद्धेतोः अन्तकरं शरं मोक्तुं बुद्धिं निश्चयं न कृतवान् एतेन वालिनि रामस्य स्नेहः सूचितः तेन सुग्रीवविषयकस्नेहस्य पराकाष्ठा व्यञ्जिता तेनेदानीमपि यदि द्वयोर्मैत्री स्यात्तर्हि न हनिष्यामीति रामाभिप्रायो व्यक्तः ॥ २० ॥

१ गच्छेमेति गो. पाठः । २ व्यतिष्ठन्निति गो. पाठः । ३ निश्चक्रामेति गो. पाठः । ४ उदीक्ष्य त्विति गो. पाठः ।

एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना । अपश्यन्राघवं नाथमृष्यमूकं प्रदुद्रुवे ॥ २१ ॥
क्लान्तो रुधिरसिक्ताङ्गः प्रहारैर्जर्जरीकृतः । वालिनाऽभिद्रुतः क्रोधात्प्रविवेश महावनम् ॥ २२ ॥
तं प्रविष्टं वनं दृष्ट्वा वाली शापभयात्ततः । मुक्तो ह्यसि त्वमित्युक्त्वा सं निवृत्तो महाबलः २३ ॥
राघवोऽपि सह भ्रात्रा सह चैव हनूमता । तदेव वनमागच्छत्सुग्रीवो यत्र वानरः ॥ २४ ॥
तं समीक्ष्यागतं रामं सुग्रीवः सहलक्ष्मणम् । ह्रीमान्दीनमुवाचेदं वसुधामवलोकयन् ॥ २५ ॥
आह्वयस्वेति मामुक्त्वा दर्शयित्वा च विक्रमम् । वैरिणा घातयित्वा च किमिदानीं त्वया कृतम् २६ ॥
तामेव वेलां वक्तव्यं त्वया राघव तत्त्वतः । वालिनं न निहन्मीति ततो नाहमितो व्रजे ॥ २७ ॥
तस्य चैवं ब्रुवाणस्य सुग्रीवस्य महात्मनः । करुणं दीनया वाचा राघवः पुनरब्रवीत् ॥ २८ ॥
सुग्रीव श्रूयतां तात क्रोधश्च व्यपनीयताम् । कारणं येन बाणोऽयं स मया न विसर्जितः ॥ २९ ॥
अलंकारेण वेषेण प्रमाणेन गतेन च । त्वं च सुग्रीव वाली च सदृशौ स्थः परस्परम् ॥ ३० ॥

२१-२२] ति० टी०-राघवं नाथं रक्षकमित्यपश्यन्नजानन् ॥ २१ ॥ २२ ॥

रा० टी०- एतस्मिन्निति । एतस्मिन्नन्तरे समये वालिना भग्नः भग्नकरादिमान् सुग्रीवः नाथं स्वस्वामिनं राघवमपश्यन् सन् ऋष्यमूकं प्रदुद्रुवे ॥ २१ ॥

रा० टी०-क्लान्त इति । रुधिरेण सिक्तमङ्गं यस्य वालिना प्रहारैर्जर्जरीकृतः अत एव क्लान्तः ग्लानिं प्राप्तः अत एव अभिद्रुतः सुग्रीवः महावनं प्रविवेश ॥ २२ ॥

गो० टी०-क्लान्त इति । जर्जरीकृतः परुषत्वकृतः ॥ २२-२४ ॥

२३-२४] ति० टी०-वनं प्रविष्टम् ऋष्यमूकस्येति शेषः । स निवृत्तः परावृत्तः ॥ २३ ॥ २४ ॥

रा० टी०-तामिति । वनं प्रविष्टं तं सुग्रीवं दृष्ट्वा त्वं मुक्तोऽसीत्युक्त्वा शापभयात् ततस्तस्मात् महावनात् संनिवृत्तः ॥ २३ ॥

रा० टी०-राघव इति । भ्रात्रा लक्ष्मणेन हनुमता च सह राघवोऽपि यत्र वानरः सुग्रीवः तदेव वनमागच्छत् ॥२४॥

२५] ति० टी०-ह्रीमान्पराभूतत्वात् ॥ २५ ॥

रा० टी०-तमिति । सहलक्ष्मणमागतं तं रामं समीक्ष्य ह्रीमान् पराभवहेतुकलज्जावान् सुग्रीवः वसुधामवलोकयन्सन् दीनमिदमुवाच ॥ २५ ॥

गो० टी०-तमिति । वसुधामवलोकयन्निति लज्जानुभावः ॥ २५ ॥

२६] ति० टी०-विक्रमं सालभेदनेन घातयित्वा युद्धप्रेरणद्वारा । किं कृतम् अनुचितमेव कृतमित्यर्थः ॥ २६ ॥

रा० टी०-तद्वचनाकारमाह-आह्वयस्वेति । विक्रमं स्वपराक्रमं दर्शयित्वा तालभेदादिना संप्रदर्श्य मामाह्वयस्व इत्युक्त्वा अरिणा घातयित्वा च त्वया किं कृतम् इष्टमनिष्टं वा कृतमिति न विद्म इति तात्पर्यम् ॥ २६ ॥

गो० टी०-आह्वयस्वेति । दर्शयित्वा च विक्रममिति व्यतिरेकोक्तिः त्वया किं कृतं किं चिन्तिततमित्यर्थः । कृतिरनेकार्थः ॥ २६ ॥

२७-२८] ति० टी०-तामेव वेलाम् । सप्तम्यर्थे द्वितीया । वालिना युद्धप्रेरणवेलायाम् । ततस्तदेत्यर्थः । इतः ऋष्यमूकवनादित्यर्थः ॥ २७ ॥ २८ ॥

रा० टी०-तामिति । तां वेलां मद्गमनसमये वालिनमहं न निहन्मीति तत्त्वतः यथार्थतः त्वया वक्तव्यं ततस्तदा इतोऽहं न व्रजे व्रजेयम् । तां वेलामित्यत्र सप्तम्यर्थे द्वितीया ॥ २७ ॥

गो० टी०-तामेव वेलामिति । अत्यन्तसंयोगे द्वितीया वालिनं जहि काकुत्स्थेति प्रार्थनवेलायामित्यर्थः । ततः तथोक्तं चेत् ॥ २७ ॥

रा० टी०-तस्येति । दीनया वाचा एवं करुणं ब्रुवाणस्य सुग्रीवस्य समीपे राघवः पुनः अब्रवीत् ॥ २८ ॥

गो० टी०-तस्येति । करुणं सदयम् अब्रवीत् ॥ २८ ॥

२९] ति० टी०-स बाणो वालिसंहारको बाणः ॥२९॥

रा० टी०-तद्वचनाकारमाह-सुग्रीवेति । हे सुग्रीव ! येन कारणेन सोऽयं बाणः मया न विसर्जितस्तत्कः तत्कारणं श्रूयताम् अत एव क्रोधः बाणप्रक्षेपाभावजनितकोप व्यपनीयतां त्यज्यताम् ॥ २९ ॥

गो० टी०-सुग्रीवेति । येन कारणेन बाणो न विसर्जितः तत्कारणं श्रूयतां श्रुत्वा क्रोधश्चापनीयतामिति योजना ॥ २९ ॥

३०] ति०टी०-तदेव कारणमाह-अलंकारेणेति॥३०॥

रा० टी०-तत्कारणमेवाह-अलंकारेणेति । हे सुग्रीव ! त्वं वाली च अलंकारादिना स्वरादिना च परस्परं सदृशौ स्थः अतः व्यक्तिं द्वयोर्विभिन्नलोकप्राप्तिं न उपलक्षये अहमिनोमि वालिनि मृते त्वमपि तत्स्नेहान्मरिष्यसीति तात्पर्यम् वाक्यैः वचनरचनाविशेषैः अत एव वचसा इत्यनेन न पौनरुक्त्यम् । श्लोकद्वयमेकान्वयि ॥ ३० ॥ ३१ ॥

---

१ भयार्दित इति गो. पाठः । २ सानिवृत्त इति रा. पाठः । ३ द्युतिरिति गो. पाठः

स्वरेण [1]वर्चसा चैव प्रेक्षितेन च वानर । विक्रमेण च वाक्यैश्च व्यक्तिं वां नोपलक्षये ॥ ३१ ॥
ततोऽहं रूपसादृश्यान्मोहितो वानरोत्तम । नोत्सृजामि महावेगं शरं शत्रुनिबर्हणम् ॥ ३२ ॥
जीवितान्तकरं घोरं सादृश्यात्तु विशङ्कितः । मूलघातो न नौ स्याद्धि द्वयोरिति कृतो मया॥ ३३ ॥
त्वयि [2]वीर विपन्ने हि अज्ञानाल्लाघवान्मया । मौढ्यं च मम बाल्यं च ख्यापितं स्यात्[3]कपीश्वर॥३४॥
दत्ताभयवधो नाम पातकं महदद्भुतम् । अहं च लक्ष्मणश्चैव सीता च वरवर्णिनी ॥ ३५ ॥
त्वदधीना वयं सर्वे वनेऽस्मिन्शरणं भवान् । तस्माद्युध्यस्व भूयस्त्वं मा माशङ्कीश्च वानर॥ ३६ ॥
एतन्मुहूर्तं तु[5] मया पश्य वालिनमाहवे । निरस्तमिषुणैकेन [6]चेष्टमानं महीतले ॥ ३७ ॥
अभिज्ञानं कुरुष्व त्वमात्मनो वानरेश्वर । येन त्वामभिजानीयां द्वन्द्वयुद्धमुपागतम् ॥ ३८ ॥

गो० टी०–अलंकारेणेति । वर्चसेण आकारेण प्रमाणेन औन्नत्येन गतेन गमनेन ॥ ३० ॥

३१] ति० टी०–वर्चः शरीरकान्तिः वां युवयोः॥३१॥

गो० टी०–स्वरेणेति । वर्चसा तेजसा प्रेक्षितेन वीक्षणेन वाक्यैः भाषणैः व्यक्तिं विशेषम् तत इति। मोहितः संजातमोहः विशेषानभिज्ञ इत्यर्थः ॥ ३१ ॥

३२] ति० टी०–मोहित इति । नन्विदमनुचितं यद्भगवतो मोहः अमोहे मोह इत्यनृतकथनं च । किं च पलायनसमये ऋष्यमूकाभिमुखधावनेन व्यक्तिरस्त्येवेति चेन्न । वालिन आयुर्दीयासमाहृत्या तथाकरणेऽपि सुग्रीवसंतोषाय स्वस्मिन्मानुष्यबुद्ध्यनुत्पादाय चात्मनि मोहोत्प्रेक्षया समाधानादक्षतेः । मोहित इत्यस्येवेति शेषः । ईदृशे विषय एवंविधानृतवचनं न दोषयेत्यप्यनेन ध्वनितम् । नोत्सृजामि नोदसृजम् ॥ ३२ ॥

३३] ति० टी०–विशङ्कितः शङ्कावान् । हि निश्चयेन नावावयोर्द्वयोरपि त्वन्नाशेन मूलघातो न स्यान्मा भूदित्येतदर्थं मया कृतः शरादुत्सर्ग इति शेषः ॥ ३३ ॥

रा० टी०–तत इति । ततस्तस्मात् रूपसादृश्यात् हेतोः मोहितः मान ऊहितं तर्कितं येन सोऽहं महावेगं जीवितान्तकरं घोरं शरं नोत्सृजामि । नन्वहमपि मरणे तव का क्षतिरित्यत आह सादृश्यात् वालिनिष्ठसुग्रीवप्रतियोगिकसदृशत्वात् तन्मूलकात्तवापि मरणादित्यर्थः, हेतोर्नौ आवयोर्द्वयोर्मूलघातः मूलयोः राज्यप्राप्तिजीप्राप्तिरूपहेत्वोर्विघातो विनाशो न स्यात् इति विशङ्कितोऽहमभवमिति शेषः सदृशभ्रातृमरणे तज्जानितदुःखेन यदि सुग्रीवमृतिः स्यात्तर्हि तद्राज्यप्राप्तिविघातः स्यात् आतः तव्यापारसाध्यसीताप्राप्तिविरहो भवेदिति तात्पर्यम् अत एव मया कृतः प्रक्षेपाभाव इति शेषः। श्लोकद्वयमेकान्वयि ॥३२॥३३॥

गो० टी०–नोत्सृजामीत्यादिसार्धश्लोक एकान्वयः । अन्ते इतिकरणं द्रष्टव्यम् । द्वयोरपि नौ मया मूलघातो न कृतः स्यादिति हि शरं नोत्सृजामि नोत्सृष्टवानस्मीति योजना । नन्वकाञ्चनमाकारूपो वालिनो विशेषोऽस्ति । सत्यम् तस्मिन् दिने तत्र धृत्वा गतवानिति ज्ञेयम् । यद्यप्यत्र मत्तत्वभोगचिह्नाश्रान्तत्वपुरनिर्गतत्वादिकं वाल्यसाधारणमस्ति समीपस्था हृतमदादयश्च प्रष्टुं शक्याः स्वयं च सूक्ष्मज्ञः ' प्रेक्षितज्ञास्तु कोसलाः ' इत्युक्तेः तथापि त्वया मया च कुन्त्या चोक्तिन्यायेनासाधारण्यं परिहर्तुं दृष्टहेतून् कांश्चिदुक्त्वान्राम इति ज्ञेयम् ॥ ३२–३६ ॥

३४] ति० टी०–मूलघातमेव दर्शयति—त्वयीति । मया विपन्ने मद्व्यापारतो नाशिते । अज्ञानमनिश्चयप्रवृत्तिः लाघवात्चापल्यात् ॥ ३४ ॥

रा० टी०–त्वयीति । हे वीर ! अज्ञानात् सदृशभ्रातृवधे सुग्रीवो मरिष्यतीति विचाराभावपूर्वकवालिवधात् लाघवात् अल्पकालतः त्वयि विपन्ने तच्छोकेन मृते सति मम मौढ्यं बाल्यं च ख्यापितं स्यात् ॥ ३४ ॥

३५] ति० टी०–बाधकान्तरमाह—दत्तमभयमस्मै स दत्ताभयस्तस्य वधो महत्पातकमिति नाम प्रसिद्धम । स्वमूलघातमप्याह—अहमिति ॥ ३५ ॥

रा० टी०–दोषान्तरमाह–दत्तेति । दत्तमभयं यस्मै तस्य वधः महत्पातकम् अत एव अद्भुतं सर्वेषामाश्चर्यं भविष्यति । अर्धं पृथक् । न केवलं पातकमेव त्वद्वधेऽस्मत्कार्यध्वंसोऽपि भवेदित्याह–अहमिति । लक्ष्मणः सीता च वयं च सर्वे त्वदधीनाः अत एव अस्मिन्वने अहं न जहाति तत् शरणं रक्षको भवान् । एतेन त्वदभावेऽस्माकं रक्षापि न स्यादिति सूचितम् "अस्मदो द्वयोश्च " इत्यनुशासनादेकस्मिन्नपि रामे बहुवचनप्रयोगः । अर्धद्वयमेकान्वयि ॥ ३५ ॥

३६–३८] ति० टी०–मा माशङ्कीरित्याबाधायां द्वित्वम् ॥ ३६–३८ ॥

रा० टी०–तस्मादिति । तस्मात् वालिकर्तृकवैरत्यागाभावात् हेतोः भूयस्त्वं युध्यस्व मा मां मा शङ्कीः अयं मामिष्यतीत्याशङ्कां न कृथाः ॥ ३६ ॥

रा० टी०–एतदिति । एतन्मुहूर्ते त्वत्कर्तृकपुनर्युद्धसमये मया एकेनेषुणा निरस्तमत एव महीतले चेष्टमानं वालिनं त्वं पश्य ॥ ३७ ॥

---

१ वचसेति रा. पाठः । २ वीरे इति गो. पाठः । ३ हरीश्वरेति गो. पाठः । ४ उच्यत इति गो. पाठः । ५ सुग्रीवेति गो. पाठः । ६ वेष्टमानमिति गो. पाठः ।

गजपुष्पीमिमां फुल्लामुत्पाट्य शुभलक्षणाम् । कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः ॥ ३९ ॥
ततो गिरितटे जातामुत्पाट्य कुसुमायुताम् । लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे व्यसर्जयत् ॥ ४० ॥
स तया शुशुभे श्रीमाँल्लतया कण्ठसक्तया । [[१]विपरीत इवाकाशे सूर्यो नक्षत्रमालया]
मालयेव बलाकानां ससंध्य इव तोयदः ॥ ४१ ॥
विभ्राजमानो वपुषा रामवाक्यसमाहितः । जगाम सह रामेण किष्किन्धां पुनराप सः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।

वालिन जिघांसू रामः सुग्रीवादिभिः सह किष्किन्धां प्रस्थितो मध्येमार्गं दृष्टरमणीयवनखण्डः कस्येदमाश्रमस्थानमिति सुग्रीवं पप्रच्छ । सशरीरं दिवं गताना सप्तजननामर्षीणां तपःप्रभावं संवर्ण्य तेषामिदमाश्रमस्थानमित्युपंसहरन्सुग्रीवः कल्याणकामैरवश्यप्रणम्यानेतान्प्रणमेति रामं प्रवर्तयति । तथा रामस्तान्प्रणम्य सर्वैः समं किष्किन्धां जगाम ।

[२]ऋष्यमूकात्स धर्मात्मा किष्किन्धां लक्ष्मणाग्रजः । जगाम सह सुग्रीवो वालिविक्रमपालिताम् ॥ १ ॥
समुद्यम्य महच्चापं रामः काञ्चनभूषितम् । शरांश्चादित्यसंकाशान्गृहीत्वा रणसाधकान् ॥ २ ॥
अग्रतस्तु ययौ तस्य राघवस्य महात्मनः । सुग्रीवः संहतग्रीवो [३]लक्ष्मणस्य महाबलः ॥ ३ ॥
पृष्ठतो हनुमान्वीरो नलो नीलश्च [४]वीर्यवान् । तारश्चैव महातेजा हरियूथपयूथपः ॥ ४ ॥
ते वीक्षमाणा वृक्षांश्च पुष्पभारावलम्बिनः । प्रसन्नाम्बुवहाश्चैव सरितः सागरंगमाः ॥ ५ ॥

गो० टी०–तस्मादिति । मा मा शङ्कीरिति मा मां प्रति मा शङ्कीः शङ्कां मा कुरु व्यत्ययेन परस्मैपदम् ॥ ३७ ॥

रा० टी०–अभिज्ञानमिति । येन द्वन्द्वयुद्धमुपागतं त्वामहमभिजानीयां भ्रातृमरणजनितं महद् दुःखमस्मिन्न भविष्यतीति निश्चिनुयां तद् आत्मनोऽभिज्ञानम् अतिशोकानुत्पत्त्यभिज्ञापकचिह्नं कुरुष्व ॥ ३८ ॥

गो० टी०–अभिज्ञानमिति । अभिज्ञानं चिह्नम् ॥ ३८ ॥

३९] ति० टी०–गजपुष्पी नागपुष्पी लता । शुभं सम्यग्लक्षयतीति शुभलक्षणा ताम् ॥ ३९ ॥

रा० टी०–तत्प्रकारमाह–गजपुष्पीमिति । हे लक्ष्मण ! फुल्लां शुभलक्षणामतिशोकानुत्पादकत्वेन शुभप्रापिकां गजपुष्पीं महात्मनः सुग्रीवस्य कण्ठे कुरु । एतेन गजपुष्पीनिबद्धानामतिशोको न भवतीति सूचितम् ॥ ३९ ॥

गो० टी०–गजपुष्पीमिति । गुजपुष्पी नागपुष्पी नाम लताम् ॥ ३९ ॥

४०] ति० टी०–व्यसर्जयन्निसृष्टवान् समर्पितवानित्यर्थः ॥ ४० ॥

रा० टी०–तत इति । ततः रामाज्ञापनानन्तरं गिरितटे जातां कुसुमायुतां पुष्पैर्व्याप्तां तां शुभां गजपुष्पीं लक्ष्मण उत्पाट्य तस्य कण्ठे व्यसर्जयत् अबध्नात् ॥ ४० ॥

गो० टी०–तत इति । व्यसर्जयत् अमोचयत् बद्धवान्४०

४१]ति० टी०–लतया शुक्लपुष्पनागपुष्पीलतया संध्यारागसहिततोयद इव स्वयं बलाकानां मालयेव तया लतया शुशुभे ४१

४२] ति० टी०–रामवाक्ये तत्करणे समाहित उक्तः॥४२॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वादशः सर्गः ॥ १२ ॥

रा० टी०–स इति । स सुग्रीवः कण्ठसक्तया कण्ठे संबद्धया तया गजपुष्पीलतया बलाकानां मालया ससंध्यः संध्यारागसहितः तोयदो मेघ इव शुशुभे ॥ ४१ ॥

रा० टी०–विभ्राजमान इति । रामवाक्यसमाहितः रामवचने आस्थावान् वपुषा विभ्राजमानः सुग्रीवः रामेण सह किष्किन्धां पुनर्जगाम ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणा किष्किन्धाकाण्डे द्वादशः सर्गः ॥ १२ ॥

गो० टी०–स तयेत्यादि । विपरीत इवेत्यायुपरि विभ्रीयते । ससंध्य इव तोयद इति सुग्रीवस्य हेमपिङ्गलत्वादिति भावः ॥ ४१ ॥ ४२ ॥

अस्मिन् सर्गे सार्धद्विचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

१-३] ति० टी०–ऋष्यमूकादिति ॥ १-३ ॥

४-५] ति० टी०–संहतग्रीवो दृढबन्धबद्धग्रीवः हरियूथपानामपि यूथं पाति तादृशः ॥ ४ ॥ ५ ॥

१ आकुलामिति गो. पाठः । २ अर्धमेतदधिकं गो. पाठे । ३ वालिपालितामिति गो. पाठः । ४ ऋक्षेति गो. पाठः । ५ लक्ष्मणश्चेति गो. पाठः । ६ वानर इति गो. पाठः ।

कन्दराणि च शैलांश्च निर्दराणि गुहास्तथा । शिखराणि च मुख्यानि दरीश्च प्रियदर्शनाः ॥ ६ ॥
वैदूर्यविमलैस्तोयैः पद्मैश्चाकोशकुड्मलैः । शोभितान्सजलान्मार्गे तटाकांश्चावैलोकयन् ॥ ७ ॥
कारण्डैः सारसैर्हंसैर्वञ्जुलैर्जलकुक्कुटैः । चक्रवाकैस्तथा चान्यैः शकुनैः प्रतिनादितान् ॥ ८ ॥
मृदुशष्पाङ्कुराहारान्निर्भयान्वनचारिणाम् । चरतां सर्वतः पश्यन्स्थलीषु हरिणान्स्थितान् ॥ ९ ॥
तटाकवैरिणश्चापि शुक्लदन्तविभूषितान् । घोरानेकचरान्वन्यान्द्विरदान्कूलघातिनः ॥ १० ॥
मत्तान्गिरितटोद्धृष्टान्पर्वतानिव जङ्गमान् । वनेरान्द्विरदप्रख्यान्महीरेणुसमुक्षितान् ॥ ११ ॥
वने वनचरांश्चान्यान्खेचरांश्च विहङ्गमान् । पश्यन्तस्त्वरिता जग्मुः सुग्रीववशवर्तिनः ॥ १२ ॥
तेषां तु गच्छतां तत्र त्वरितं रघुनन्दनः । द्रुमषण्डवनं दृष्ट्वा रामः सुग्रीवमब्रवीत् ॥ १३ ॥
एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते । मेघसंघातविपुलं पर्यन्तकदलीवृतम् ॥ १४ ॥

६] ति० टी०–कन्दराणि मन्दिराकारपर्वतविवराणि निर्दराणि शिलाविवराणि गुहा देवखातगिरिबिलानि दर्यो गह्वराणि ॥ ६ ॥

७] ति० टी०–आकोशमग्रभागपर्यन्तं कुड्मलैर्मुकुलरूपैस्तेषद्विकसितैः पद्मैः शोभितानवलोकयन् ॥ ७ ॥

८] ति० टी०–कारण्डैः कारण्डवैः ॥ ८ ॥

रा० टी०–किष्किन्धाप्रस्थानानन्तरकालिकं रामवृत्तान्तमाह–ऋष्यमूकादित्यादिभिः । सहसुग्रीवः सुग्रीवसहितः लक्ष्मणाग्रजो रामः वालिविक्रमपालितां किष्किन्धाम् । ऋष्यमूकात् जगाम ॥ १ ॥

रा० टी०–समिति । रामः काञ्चनभूषितं महत् चापं सज्यमम्य रणसाधकान् शरान् गृहीत्वा अग्रतः प्रथमं ययौ । तस्य राघवस्य रामस्य पृष्ठतः सुग्रीवप्रभृतिर्ययौ । संहतग्रीव इत्यस्य संहता संबद्धा ग्रीवा यस्य स इत्यर्थः । श्लोकत्रयमेकान्वयि ॥ २–४ ॥

गो० टी०–अथ पुनः किष्किन्धाप्रवेशक्रमोद्देशे–ऋष्यमूकादित्यादि ॥ १ ॥ २ ॥

गो० टी०–अग्रत इति । संहतग्रीवः निबिडकण्ठ इत्यर्थः । इदं स्वरूपकीर्तनं गजपुष्पीबन्धनेन वा ॥ ३ ॥ ४ ॥

रा० टी०–ते इति । दृक्षादीन् वीक्ष्यमाणाः तत्र कन्दराणि मन्दिरवत्प्रकाशमानानि गिरिविवराणि निर्झराणि पाषाणविवराणि गुहाः देवनिलयीभूतगिरिविवराणि दर्यः भयंकरगुहाः इति न पौनरुक्त्यं वैदूर्यविमलैः वैदूर्यवत्स्वच्छैः पर्णैः[1] उपलक्षितैः आकोशकुड्मलैः अग्रभागपर्यन्तं कुड्मलविशिष्टैः पद्मैः शोभितान् सजलान् जलसहितान् तटाकान् अवलोकयन् अवलोकयन्तः कारण्डाद्यैः शकुनैः प्रतिनादितान् मृदुशष्पाङ्कुराहारान् कोमलतृणाङ्कुरभक्षणकर्तॄन् स्थलीषु अकृत्रिमभूमिषु स्थितान् हरिणांश्च पश्यन्पश्यन्तः शुक्लदन्तविभूषितान् घोरान् भयङ्करान् एकचरान् सहायराहित्येन गमनकर्तॄन् कूलघातिनः अत एव तटाकवैरिणः चरतो गच्छतः द्विरदान् गजान् मत्तान् मदविशिष्टान् गिरितटोत्कृष्टान् गिरितटाः उत्कृष्टाः विदारिताः यैस्ते तान् जङ्गमान् गच्छतः पर्वतानिव महीरेणुसमुत्थितान् महीरेणुव्याप्तशरीरान् अत एव द्विरदप्रख्यान् गजसदृशान् अन्यांश्च वनचरान् खेचरान् विहङ्गमांश्च पश्यन्तस्ते रामादयः सुग्रीववशवर्तिनश्च त्वरिताः सन्तः जग्मुः । श्लोकाष्टकमेकान्वयि ॥ ५–१२, ॥

गो० टी०–अथ कार्यसिद्धिसूचकपदार्थान्तभवविशेषं दर्शयति–ते वीक्ष्यमाणा इत्यादिना । कन्दराणि गृहाकारगुहाविशेषान् । निर्दराणि स्फुटितशैलरन्ध्रविशेषान् । गुहाः देवखातबिलानि । दरीः गुहाविशेषान् । आकोशकुड्मलैः ईषद्विकसितमुकुलैः । कारण्डैः 'कारण्डको महापक्षी' इति वैजयन्ती । सारसैः सरोनिवासैः शकुनैरुपनादितान् तटाकान् व्यलोकयन्निति पूर्वेणान्वयः ॥ ५–८ ॥

९] ति० टी०–शष्पं तृणम् ॥ ९ ॥

गो० टी०–मृदुशष्पेति । चरतः स्थितांश्चापश्यन् ॥ ९ ॥

१०] ति० टी०–कूलघातित्वादेव तटाकवैरित्वम् । एकचरानसहायचरान् ॥ १० ॥

११–१२] ति० टी०–द्विरदप्रख्यान्गजतुल्यान्॥११॥१२॥

गो० टी०–तटाकवैरिण इत्यादि । तटाकवैरिणः कलुषीकरणात् एकचरान् एकाकिनः द्विरदाः द्विदन्ता इति चतुर्दन्तव्यावृत्तिः । गिरितटोत्कृष्टान् उल्लिखितगिरितटान् ॥१०-१२॥

१३] ति०टी०–द्रुमाणां षण्डः समूहो यस्मिंस्तादृशं वनम् १३

रा० टी०–तेषामिति । गच्छतां तेषां मध्ये रघुनन्दनः द्रुमषण्डवनं द्रुमसमूहनिबिडकाननं दृष्ट्वा सुग्रीवमब्रवीत् 'षण्डं पशादिसंघाते न स्त्री स्यान्नोपतौ पुमान्' इति मेदिनी ॥ १३ ॥

गो०टी०–तेषां त्विति । द्रुमषण्डं वृक्षषण्डमयमिति लतागुल्मव्यावृत्तिः ॥ १३ ॥

१४] ति० टी०–वृक्षषण्डो वृक्षसमूहः । मेघेत्यायुत्तरान्वयि ॥ १४ ॥

१ पर्णैरिति गो.पाठः । २ व्यलोकयन्निति गो.पाठः । ३ उपेति गो.पाठः । ४ गोचरानिति गो. चारिण इति रा. पाठः । ५ चरतः सर्वतोऽपश्यन्निति गो. रा. पाठः । ६ कुलेति गौ. पाठः । ७ तटोत्कृष्टानिति गो. पाठः । ८ वारणान्वारिदप्रख्यानिति गो. पाठः । ९ समुत्क्षितानिति गो. समुत्थितानिति रा. पाठः । १० द्रुमषण्डमिति गो. पाठः । ११ विपुलः पर्यन्तकदलीवृत इति गो. पाठः ।

किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं मम । कौतूहलापनयनं कर्तुमिच्छाम्यहं त्वया ॥ १५ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः । गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्महद्वनम् ॥ १६ ॥
एतद्राघव विस्तीर्णमाश्रमं श्रमनाशनम् । उद्यानवनसंपन्नं स्वादुमूलफलोदकम् ॥ १७ ॥
अत्र सप्तजना नाम मुनयः शंसितव्रताः । सप्तैवासन्नधःशीर्षा नियतं जलशायिनः ॥ १८ ॥
सप्तरात्रे कृताहारा वायुनाचैलवासिनः । दिवं वर्षशतैर्याताः सप्तभिः सकलेवराः ॥ १९ ॥
तेषामेतत्प्रभावेण द्रुमप्राकारसंवृतम् । आश्रमं सुदुराधर्षमपि सेन्द्रैः सुरासुरैः ॥ २० ॥
पक्षिणो वर्जयन्त्येतत्तथान्ये वनचारिणः । विशन्ति मोहाद्येऽप्यत्र न निवर्तन्ति ते पुनः॥ २१ ॥
विभूषणरवाश्चात्र श्रूयन्ते सकलाक्षराः । तूर्यगीतस्वनश्चापि गन्धो दिव्यश्च राघव ॥ २२ ॥
त्रेताग्नयोऽपि दीप्यन्ते धूमो ह्येष प्रदृश्यते । वेष्टयन्निव वृक्षाग्रान्कपोताङ्गारुणो घनः ॥ २३ ॥
एते वृक्षाः प्रकाशन्ते धूमसंसक्तमस्तकाः । मेघजालमतिच्छन्ना वैदूर्यगिरयो यथा ॥ २४ ॥

रा० टी०–तद्वचनाकारमाह–एष इति । मेघसंघातविपुलं मेघसमूहेन व्याप्तं पर्यन्तकदलीवृतं चतुर्दिक्षु कदलीसंयुक्तम् एष वृक्षषण्डः आकाशे मेघ इव प्रकाशते । सामान्ये नपुंसकम् मेघसंघातेत्यायुत्तरान्वयि वा, तत्र वनं विशेष्यं बोध्यम् ॥ १४ ॥

गो० टी० एष इति । मेघ इवेति नीलवर्ण उपमा १४–१७

१५–१६] ति० टी०–त्वया कर्त्रा कौतूहलस्यौत्सुक्यस्यापनयनं निवर्तनं कर्तुं कारयितुमिच्छामि ॥ १५ ॥ १६ ॥

रा० टी०–किमिति । एतत् एतादृशं किं कथम् एतज्ज्ञातुमहमिच्छामि । तत्र हेतुः यतो मे कौतूहलम् एतत्कारणश्रवणविषयकोत्कटेच्छा अतस्त्वया कौतूहलापनयनं कर्तुमिच्छामि १५

रा० टी०–तस्येति । सुग्रीवः गच्छन्नेव राघवस्य वचः श्रुत्वा तद्वनं वनप्रशंसाकारणम् आचचक्षे ॥ १६ ॥

१७] ति० टी०–उद्यानैरुपवनैश्च संपन्नं युक्तम् ॥ १७ ॥

रा० टी०–तद्वचनाकारमाह–एतदिति । उद्यानवनसंपन्नमुद्यानवनैर्निबिडं स्वादुमूलफलोदकं स्वादुविशिष्टमूलादियुक्तम् अत एव श्रमनाशनं विस्तीर्णमेतदाश्रममवेहीति शेषः ॥ १७ ॥

१८] ति० टी०–सप्तजना नाम सप्तजना इति प्रसिद्धा अधःशीर्षा भूप्रतिष्ठापितशिरसः ॥ १८ ॥

रा० टी०–अत्रेति । संशितव्रतास्तीक्ष्णव्रतपरायणाः नियतमधःशीर्षाः जलशायिनः विहितजलशयनादिमन्तः सप्त तत्संख्याकाः सप्तजना नाम मुनयः आसन् ॥ १८ ॥

गो० टी०–अत्रेत्यादि ॥ १८ ॥

१९] ति० टी०–केवलवायुनैव सप्तरात्रे गते कृताहाराः सप्तभिर्वर्षशतैः सकलेवरा दिवं याताः ॥ १९ ॥

रा० टी०–सप्तजननाम्नि निमित्तं बोधयन्नाह–सप्तेति । सप्तरात्रे व्यतीते सतीति शेषः, वायुना कृताहाराः अचलवासिनः निश्चलनिवसनशीलाः मुनयः सकलेवराः शरीरसहिताः सप्तभिः वर्षशतैः दिवं याताः ॥ १९ ॥

गो० टी०–सप्तरात्रेति । सप्तरात्रकृताहाराः वायुना सप्तरात्रस्य एकवारं कृताहाराः सप्तभिर्वर्षशतैरित्यन्वयः ॥ १९ ॥

२०]ति०टी०–एतदाश्रमम्। अर्धचंद्रादिराश्रमशब्दः ॥२०॥

रा० टी०–तेषामिति । तेषां सप्तजनानां प्रभावेण तेजसा द्रुमप्राकारसंवृतं द्रुमरूपप्राकारप्राप्तं सेन्द्रैः सुरासुरैरपि सुदुराधर्षं तेषामेतदाश्रमम् अवेहीति शेषः ॥ २० ॥

गो० टी०–तेषामित्यादि ॥ २० ॥

२१] ति० टी०–वर्जयन्ति न प्रविशन्ति पुनर्न निवर्तन्ति अत्रैव म्रियन्त इत्यर्थः ॥ २१ ॥

रा० टी०–पक्षिण इति । एतदाश्रमं पक्षिणः अन्ये च वनचारिणः वर्जयन्ति अतितेजोदर्शनजनितभिया न गच्छन्तीत्यर्थः । मोहात् अविवेकात् अत्र अस्मिन् आश्रमे ये विशन्ति ते पुनर्न निवर्तन्ति निवर्तन्ते ॥ २१ ॥

गो० टी०–विशन्तीति । ये मोहादत्राश्रमे विशन्ति न ते निवर्तन्ते किंतु तत्रैव नश्यन्तीत्यर्थः ॥ २१ ॥

२२] ति० टी०–सकलाक्षराः कलाक्षराभिर्मधुराक्षराभिर्वाग्भिः सहिता भूषणरवाः अप्सरसामिति शेषः । दिव्यो गन्धश्च तासामेवानुभूयत इति शेषः ॥ २२ ॥

रा० टी०–विभूषणेति । सकलाक्षराः मधुराक्षरसहिताः विभूषणरवाः विभूषणस्वनाः तूर्यगीतस्वनाश्च श्रूयन्ते दिव्यो गन्धश्च अनुभूयते इति शेषः । एतेन तत्रत्यानामतिसुखं सूचितम् ॥ २२ ॥

गो० टी०–दिवं गताः शरीरान्तरेण पुनस्त्रागत्याप्सरोभिः क्रीडन्तीत्याशयेनाह—विभूषणेत्यादिना । भूषणरवेण नृत्तमुपलक्ष्यते । सकलाक्षरा इति गीतस्वनविशेषणम् । तूर्यशब्दोऽत्र गीतभिन्नवाद्यपरः ॥ २२ ॥

२३–२४] ति० टी०–न केवलं भोगभूमिः, कर्मभूमिरपीत्याह–त्रेतेत्यादि । कपोताङ्गवदरुणो धूसरो घन इव धूमो वृक्षाग्रान्वेष्टयन्व्याप्नुवन्दृश्यते ॥ २३ ॥ २४ ॥

---

१ ह्ह मे इति गो. पाठः । २ रात्रकृताहारा इति गो. पाठः । ३ वनेति गो. पाठः । ४ एवंप्रभावानामिति गो. पाठः । ५ निवर्तन्ते नेति गो. पाठः । ६ तत्रेति गो. पाठः । ७ स्वनाश्चात्रेति गो. पाठः । ८ ह्यत्र प्रकाशत इति गो. पाठः ।

कुरु प्रणामं धर्मात्मंस्तेषामुद्दिश्य राघव । लक्ष्मणेन सह भ्रात्रा प्रयतः [2]संहताञ्जलिः ॥ २५ ॥
प्रणमन्ति हि ये तेषामृषीणां भावितात्मनाम् । न तेषामशुभं किंचिच्छरीरे राम विद्यते ॥ २६ ॥
ततो रामः सह भ्रात्रा लक्ष्मणेन कृताञ्जलिः । समुद्दिश्य महात्मानस्तानृषीनभ्यवादयत् ॥ २७ ॥
अभिवाद्य च धर्मात्मा रामो भ्रात्रा च लक्ष्मणः । सुग्रीवो वानराश्चैव जग्मुः संहृष्टमानसाः ॥ २८ ॥
ते गत्वा दूरमध्वानं तस्मात्सप्तजनाश्रमात् । ददृशुस्तां दुराधर्षां किष्किन्धां वालिपालिताम् २९॥
ततस्तु रामानुजरामवानराः प्रगृह्य शस्त्राण्युदितोग्रतेजसः ।
पुरीं सुरेशात्मजवीर्यपालितां वधाय शत्रोः पुनरागतास्त्विह ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ।

रामादयः किष्किन्धान्तिकदेशवर्तिवने वृक्षैरात्मानमाच्छाद्यावतस्थुः । सुग्रीवो वालिवधप्रतिज्ञा साधयितु रामं प्रार्थयते । वालिवधप्रत्ययमुत्पादयन्रामः सुग्रीव वालिनमाह्वातुं प्रेरयति । प्रगर्जन्सुग्रीवो वालिन योद्धुमाह्वयते ।

सर्वे ते त्वरितं गत्वा किष्किन्धां वॉलिनः पुरीम् । वृक्षैरात्मानमावृत्य व्यतिष्ठन्गहने वने ॥ १ ॥
विसार्य सर्वतो दृष्टिं कानने काननप्रियः । सुग्रीवो विपुलग्रीवः क्रोधमाहारयद्भृशम् ॥ २ ॥
ततस्तुं निनदं घोरं कृत्वा युद्धाय चाह्वयत् । परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम् ॥ ३ ॥

रा० टी०–त्रेतेति । त्रेताग्नयः । त्रेतायुगस्थापिता वह्नयः गार्हपत्यादयो वा दीप्यन्ते अत एव कपोताङ्गारुणः कपोताङ्गवद्धूसरवर्णविशिष्ट अत एव घन इव मेघसदृशः एष धूमः वृक्षाग्रान्वेष्टयन्निव प्रदृश्यते ॥ २३ ॥

गो० टी०–त्रेतेति ॥ २३ ॥

रा० टी०–एते इति । धूमसंसक्तमस्तकाः धूमाविष्टाग्रभागविशिष्टाः एते वृक्षा मेघजालप्रतिच्छन्नाः मेघसमूहैः आच्छादिताः वैदूर्यगिरय इव प्रकाशन्ते ॥ २४ ॥

गो० टी०–त्रेताग्निदीपने लिङ्गमाह—धूमो हीति । घनः निबिडः ॥ २४ ॥

२५] ति० टी०–तेषामुद्दिश्य तानुद्दिश्येति यावत् ॥२५॥

रा० टी०–कुर्विति । हे धर्मात्मन् ! तेषां सप्तजनानां प्रीतिमिति शेषः, उद्दिश्य लक्ष्मणेन सह संहताञ्जलिः सन् प्रणामं कुरु ॥ २५ ॥

गो० टी०–कुर्विति । समुद्दिश्य किंचित्फलमुद्दिश्य तेषां प्रणामं कुरु ॥ २५ ॥

२६] ति० टी०–तेषां प्रणमन्ति तान्प्रणमन्ति ॥ २६ ॥

रा० टी०–तत्फलमाह–प्रणमन्तीति । हे राम ! भावितात्मनां परिशीलितपरमात्मनामृषीणां ये प्रणमन्ति तेषां शरीरे अशुभं शुभविरोधि शोकादिकमित्यर्थः, न विद्यते भवति। ऋषीणामित्यत्र संबन्धसामान्यविवक्षया षष्ठी ॥ २६ ॥

गो०टी०–प्रणमन्तीति । शरीरे अशुभं व्याध्यादिकम् २६॥

२७] ति० टी०–महात्मानो महात्मनस्तानृषीनुद्दिश्याभ्यवादयन्नमस्कृतवान् ॥ २७ ॥

रा० टी०–तत इति । ततः सुग्रीवोक्तिश्रवणानन्तरं महात्मानः महात्मनः ऋषीन्समुद्दिश्य अभ्यवादयत् ॥ २७ ॥

गो०टी०–ततो राम इति । महात्मानः महात्मनः ॥ २७ ॥

२८–२९] ति० टी०–वानरा हनुमदादयः । एतत्कथाप्रभ्रादिकं वाल्मायुःसमाप्तिकाललाभाय ॥ २८ ॥ २९ ॥

रा० टी०–अभिवाद्येति । रामादयः अभिवाद्य प्रणम्य सहृष्टमानसाः सन्तः जग्मुः ॥ २८ ॥

रा० टी०–ते इति । ते रामादयः सप्तजनाश्रमात् दूरमध्वानं गत्वा किष्किन्धां ददृशुः ॥ २९ ॥

गो०टी०–अभिवाद्येति । अनेन सर्वेषामभिवादनमनुमतं । अत्राभिवादनं नमस्कारः तेषां परोक्षत्वात् । अनेन सज्जनप्रणामो विजयावह इत्ययमर्थः सूचितः । तदिदं द्योत्यते उपरितनश्लोके उदितोग्रतेजस इति । प्रणामेनेति भावः ॥ २८ ॥ २९ ॥

३०] ति० टी०–शस्त्राणि वानराणां शस्त्रं शिलादि ॥३०॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—तत इति । उदितोग्रतेजसः रामानुजादयः शस्त्राणि प्रगृह्य सुरेशात्मजवीर्यपालितां वालिपराक्रमरक्षितां पुरीं किष्किन्धां पुनरागताः ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०–तत इति । सह युगपत् ॥ ३० ॥

इतिश्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

१–३] ति० टी०–गहने निबिडे दुष्प्रवेशे ॥ १–३ ॥

---

१ तान्समुद्दिश्यति गो. पाठः । २ संयताञ्जलिरिति गो. पाठः । ३ मुनीनामिति गो. पाठः । ४ उदिताग्र्येति गो. पाठः । ५ वालिपालितामिति गो. पाठः । ६ विचार्येति गो. पाठः । ७ स इति गो. पाठः ।

गर्जन्निव महामेघो वायुवेगपुरःसरः । अथ बालार्कसदृशो दृप्तसिंहगतिस्ततः ॥ ४ ॥
दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत् । हरिवागुरया व्याप्तां तदा काञ्चनभूषणाम् ॥ ५ ॥
प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम्। प्रतिज्ञा या कृता वीर त्वया वालिवधे पुरा ॥ ६ ॥
सफलां कुरु तां क्षिप्रं लतां काल इवागतः । एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ॥ ७ ॥
तमेवोवाच वचनं सुग्रीवं शत्रुसूदनः । कृताभिज्ञानचिह्नस्त्वमनया गजसाह्वया ॥ ८ ॥
लक्ष्मणेन समुत्पाट्य एषा कण्ठे कृता तव । शोभसेऽप्यधिकं वीर लतया कण्ठसक्तया ॥ ९ ॥

रा० टी०–किष्किन्धासमीपप्रस्थानानन्तरकालिकं वृत्तान्तमाह–सर्व इति । सर्वे रामादयः किष्किन्धां गत्वा दृष्ट्वैरात्मानमाच्छाद्य धर्मनिवारणार्थं वृक्षाद्यः स्थित्वेत्यर्थः, गहने वने व्यतिष्ठन् ॥ १ ॥

रा० टी०–विसार्येति । काननप्रियः सुग्रीवः सर्वतो दृष्टिं विसार्य क्रोधं भृशमत्यन्तमाहारयत् प्राप्नोत् ॥ २ ॥

गो० टी०–अथ बाल्याद्भानभीतं सुग्रीवं निश्वासयति रामश्चतुर्दशे—सर्व इत्यादि ॥ १ ॥ २ ॥

रा० टी०–तत इति । ततः क्रोधप्राप्त्यनन्तरं परिवारैः स्वपरिकरैः परिवृतः सुग्रीवः युद्धाय युद्धं कर्तुमम्बरमाकाशं भिन्दन्निव घोरं निनदं शब्दं कृत्वा आह्वयत् ॥ ३ ॥

गो० टी०–तत इत्यादि । वायुवेगपुरःसरः वायुवेगान्मेघे अधिको ध्वनिरिति प्रसिद्धिः । यतः वायुवेगपुरःसरः अत एव गर्जन्महामेघ इव स्थितः, परिवारैः परिवृतः सः नादैरम्बरं भिन्दन्निव घोरं निनदं कृत्वा युद्धायाह्वयत् वालिनमिति शेषः ३॥४

४] ति० टी०–वायोर्वेगः पुरःसरो यस्य स महामेघ इव । बालार्कसदृशो वर्णेन प्रतापेन च ॥ ४ ॥

रा० टी०–गर्जन्निति । वायुवेगपुरःसरः वायुवेगेन वेगितः मेघ इव गर्जन् बालार्कसदृशः आरुण्येन औदयकालिकसूर्यसदृशः दृप्तसिंहगतिः दृप्तसिंहगमनसदृशगमनवान् सुग्रीवः क्रियादक्षं रामं दृष्ट्वा अब्रवीत्। किं च वायुवेग एव पुरःसरः अधिक इत्यर्थः, यद्वेगात् सः अतिवेगवानित्यर्थः, सुग्रीवविशेषणम् । सार्धश्लोक एकान्वयी ॥ ४ ॥

५] ति० टी०–हरिरूपवागुरया व्याप्तां वागुराकारतया स्थितहरिकाम् ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह—हरीति । हरिवागुरया वानररूपमृगबन्धकपाशेन व्याप्तां ध्वजयन्त्राढ्यां ध्वजैः यन्त्रैः शतघ्न्यादिभिराढ्यां किष्किन्धां पुरीं वयं प्राप्ताः स्म अतः हे वीर ! वालिवधे वालिवधार्थं या प्रतिज्ञा त्वया कृता तां प्रतिज्ञां लतां पुष्पितवल्लरीम् आनतः प्राप्तः कालः फलप्रापकसमय इव त्वं सफलां कुरु वालिनं जहीत्यर्थः । अर्धचतुष्टयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–हरीति । हरिवागुरया हरय एव वागुरा मृगग्रहणपाशः तया व्याप्ताम् इतरदुष्प्रवेशामित्यर्थः, यद्वा हरिवागुरया हरिग्रहः जात्येकवचनम् । 'वागुरा मृगशालिके' इति वैजयन्ती ॥ ५ ॥

६] ति० टी०–ध्वजैर्यन्त्रैः प्राकारयुद्धापेक्षितैराढ्याम्॥६॥

गो० टी०–प्रतिज्ञेति । आगतः कालः फलकालः॥६॥७॥

७] ति० टी०–यथा आगतः कालो ऋतुविशेषरूपो लतां प्राक्सपुष्पां ततः सफलां करोति, तथा स्वकृतप्रतिज्ञां त्वमपि सफलां कुर्वित्यर्थः ॥ ७ ॥

रा० टी०–एवमिति । सुग्रीवेण एवमुक्तः धर्मात्मा राघवः सुग्रीवमुवाच ॥ ७ ॥

८–९] ति० टी०–गजसाह्वया गजेन समाना आह्वा नाम यस्यास्तया ॥ ८ ॥ ९ ॥

रा० टी०–तद्वचनाकारमाह–कृतेति । यतः एषा लता लक्ष्मणेन समुत्पाट्य तव कण्ठे कृता अतः अनया गजसाह्वया गजः गजशब्दः साह्वयः आह्वयत्वं प्राप्तः संज्ञेत्यर्थः, यस्यास्तया कण्ठसक्तया अनया लतया कृताभिज्ञानचिह्नस्त्वं नक्षत्रमालया विपरीतः संयुक्तः आकाशे सूर्य इव शोभसे अभूतोपमैषा । अर्धचतुष्टयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०–कृताभिज्ञानचिह्न इत्यादि । अभिज्ञापकं चिह्नम् अभिज्ञानचिह्नं कृतमभिज्ञानचिह्नं तस्य स तथा । गजपुष्प्यामेव गजसाशब्दः, यद्वा गजेन समा आह्वा आख्या यस्याः सा गजसाह्वा तया शोभस इति । अत्राहुः–विपरीते रात्रौ। सूर्यः पूर्णचन्द्रः 'परीतं तु दिवा प्रोक्तं विपरीतं तु शर्वरी । राकामध्यगतश्चन्द्रः सूर्य इत्यभिधीयते ॥' इति वचनात् । यद्वा नक्षत्रमालया विपरीतः विशेषेण परिवृतः । सूर्य इव चन्द्र इव । अन्यशब्देनान्यस्याभिधानम् कथमिति चेत् "नवो नवो भवति" इति श्रुतौ अह्नां केतुः सूर्यः चन्द्राप्यायकत्वाच्चन्द्रमा इत्युच्यते । तद्वच्चन्द्रोऽपि सूर्यकिरणाद्दप्रवेशायत्तप्रकाशविशेषवत्त्वात् सूर्यशब्देनाभिधीयत इति । यद्वा विशेषेण परीतो विपरीतः नक्षत्रावृतः सूर्य इवेत्यभूतोपमा । विपरीत इत्यनेन तात्कालिकतेजोवत्त्वमुच्यते । यद्वा विपरीते विपरीतकाले सूर्यो नक्षत्रमालयेवानया लतया शोभसे । उत्पातकाले हि मध्याह्ने नक्षत्राणि दृश्यन्त इत्युच्यते ज्योतिःशास्त्रे—'रात्राविन्द्रधनुर्दर्शे दिवा नक्षत्रदर्शने । तद्राष्ट्रनाथनाशः स्यादिति गर्गस्य भाषितम्' इति । अतः भाविवालिवधरूपफलानुसारेण तेजसा ज्वलन्

१ तदेति गो. पाठः । २ तमेति गो. पाठः । ३ तोरणमिति गो. पाठः । ४ अथेति गो. पाठः । ५ यैषेति गो. पाठः ।

विपरीत इवाकाशे सूर्यो नक्षत्रमालया । अद्य वालिसमुत्थं ते भयं वैरं च वानर ॥ १० ॥
एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे । मम दर्शय सुग्रीव वैरिणं भ्रातृरूपिणम् ॥ ११ ॥
वाली विनिहतो यावद्वने पांसुषु [1]चेष्टते । यदि दृष्टिपथं प्राप्तो जीवन्स विनिवर्तते ॥ १२ ॥
ततो दोषेण मा[2] गच्छेत्सद्यो गर्हेच्च [3]मां भवान् । प्रत्यक्षं सप्त ते [4]ताला मया बाणेन दारिताः॥ १३ ॥
[5]तेतो वेत्सि बलेनाद्य [6]वालिनं निहतं [7]रणे । अनृतं नोक्तपूर्वं मे [8]चिरं कृच्छ्रेऽपि तिष्ठता॥ १४ ॥
धर्मलोभपरीतेन न च वक्ष्ये कथंचन । सफलां च करिष्यामि प्रतिज्ञां जहि संभ्रमम्॥१५॥
प्रसूतं कलमक्षेत्रं वर्षेणेव शतक्रतुः । तदाह्याननिमित्तं [9]चं वालिनो हेममालिनः॥ १६ ॥

सुग्रीवः शुभपुष्पावलीशोभमानगजपुष्पीमालया उत्पातकाले नक्षत्रमालया सूर्य इव बभावित्यस्मदाचार्योक्तम् । अत्राहुरित्यारभ्य सूर्यशब्देनाभिधीयत इत्यन्तं गोविन्दराजोक्तमेव रामानुजीये दृश्यते विशेषस्त्वयम् ॥ ८ ॥ ९ ॥

१०] ति० टी०—नक्षत्रमालयाऽऽकाशे विपरीतो विशेषेण परीतो वेष्टितः सूर्य इव । कविविकल्पितोपमालीकोपमा । तेन तादृशः सूर्यो यदि भवेत्तदा तरुणार्कवर्णस्य कण्ठसक्तशुक्लपुष्पमालस्योपमा स्यादित्यतिशयोक्तिरत्र व्यङ्ग्या । केचित्तु विपरीते इति सप्तम्यन्तम् 'परीतं तु दिवा प्रोक्तं विपरीतं तु शर्वरी । पौर्णमासगितश्चन्द्रः सूर्य इत्यभिधीयते ॥' इति व्याचक्षते ॥ १० ॥

रा० टी०—अद्येति । एकेन बाणमोक्षेण शरप्रक्षेपेण वालिसमुत्थं ते भयं वैरं च प्रमोक्ष्यामि निवर्तयिष्यामि ॥१०॥

गो० टी०—अद्येति । प्रमोक्षयामि प्रमोचयिष्यामि । अनिट्त्वमार्षम् ॥ १० ॥

११] ति० टी०—प्रमोक्षयामि प्रमोचयिष्यामि ॥ ११ ॥

रा० टी०—ममेति । भ्रातृरूपिणं वैरिणं त्वं दर्शय । तत्प्रयोजनमाह—यावत्सोकल्येन विनिहतः मद्बाणैर्हिंसितः वाली पांसुषु धूलिषु चेष्टते चेष्टेत ॥ ११ ॥

गो० टी०—ममेति । यावद्वेष्टते वेष्टिष्यते "यावत्पुरानिपातयोर्लट्" इति लट् ॥ ११ ॥

१२] ति० टी०—चेष्टते लुठिष्यति । मदर्शनानन्तरमेवेति शेषः ॥ १२ ॥

रा० टी०—यदीति । दृष्टिपथं प्राप्तः मया दृष्टः स वाली यदि विनिवर्तते तदा दोषेणोपलक्षितं मां भवान् गच्छेत् जानीयात् अत एव गर्हेत् ॥ १२ ॥

गो० टी०—यदीति । स वाली दृष्टिपथं प्राप्तः सन् पुनर्जीवन्यदि विनिवर्तते ततः तदा दोषेणोपलक्षितं मा माम् आगच्छेत् सद्यो मा मां भवान् गर्हेच्च गर्हेत च । यदि दृष्टमात्रेण तं न हन्यां तदा मत्समीपमागच्छ मां गर्हस्व चेत्यर्थः ॥ १२ ॥१३॥

१३] ति० टी०—यदि मद्दृष्टिपथं गतो जीवन्स विनिवर्तते ततस्तदा मा मां दोषेणोपलक्षितं गच्छेदवगच्छेन्मां गर्हेच्च । किं च मद्विद्धस्य दृष्टत्वाद्वालिनं निहतमेवावेद्दीत्याह—प्रत्यक्षमिति ॥ १३ ॥

रा० टी०—वालिवधे संशयस्त्वया न कार्य इत्याह—प्रत्यक्षमिति । ते प्रत्यक्षं सप्त सालाः मया बाणेन दारितास्ततो हेतोः रणे मया निहतं वालिनं त्वं वेत्सि अवेदीः " वर्तमानसामीप्ये " इति भूते लट् । एतेन तन्न विस्मर्तव्यमिति सूचितम् ॥ १३ ॥

१४] ति० टी०—वेत्सि विद्धि । कृच्छ्रेऽपि प्राणसंकटेऽपि मे मया ॥ १४ ॥

रा० टी०—नन्वेवं वालिवधयोग्यसामर्थ्यातिशये न संशयः किं तु तत्कर्तृत्वे संशय इत्यत आह—अनृतमिति । हे वीर ! कृच्छ्रे अस्याज्यपितृगुर्वादिपरस्परविरुद्धोक्तिसंशयजनितसंकटेऽपि तिष्ठता धर्मलोभपरीतेन धर्मसंरक्षणवाञ्छायुक्तेन मया अनृतं नोक्तपूर्वम् अत एव न च कदाचन वक्ष्ये अतः प्रसूतं शतक्रतुविश्वासेन आरोपितं कलमक्षेत्रं क्षेत्रशालिनं शतक्रतुरिव प्रतिज्ञां स्वोक्तवालिवधनिश्चायकवचनं सफलां वालिवधरूपफलसहितां करिष्यामि अतः संभ्रमं भयं जहि । अर्धचतुष्टयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—अनृतमिति । मे मया "ते मयावेकवचनस्य" इत्येतत्तृतीयायामप्यार्षे दृश्यते । अतस्तद्विशेषणेऽपि तृतीयाप्रयोगः । धर्मलोभपरीतेन लोभो लब्धस्य त्यागासहिष्णुता । धर्महान्यसहिष्णुनेत्यर्थः ॥ १४ ॥

१५] ति० टी०—धर्मलोभेन धर्मलिप्सया परीतेन व्याप्तचित्तेनेति पूर्वान्वयि ॥ १५ ॥

गो० टी०—सफलामिति । संभ्रमं संशयकृतचाञ्चल्यं पराक्रमेण प्रतिज्ञासफलत्वकरणे दृष्टान्तमाह—प्रसूतामिति । कलमं सस्यम् ॥ १५ ॥

१६] ति० टी०—सफलां करिष्यामीत्यत्र दृष्टान्तः—प्रसूतामिति । अङ्कुरितमित्यर्थः । कलमक्षेत्रमिति व्रीहिक्षेत्रमित्यर्थः ॥ १६ ॥

रा० टी०—तदिति । तत् वधस्य निश्चयाद्धेतोः वालिनः

---

१ वेष्टत इति गो. पाठः । २ मामिति रा. पाठः । ३ मेति गो. पाठः । ४ साला इति गो.पाठः । ५ तेनावेद्दीति गो.पाठः । ६ तं रणे निहतं मयेति रा. पाठः । ७ मयेति गो. पाठः । ८ वीरेति गो. पाठः । ९ कलमं क्षेत्रे इति गो. पाठः । १० त्वमिति गो. पाठः ।

सुग्रीव कुरु तं शब्दं निष्पतेद्येन वानरः । जितकाशी जयश्लाघी त्वया चाधर्षितः पुरात् १७॥
निष्पतिष्यत्यसंगेन वाली स प्रियसंयुगः । रिपूणां धर्षितं श्रुत्वा मर्षयन्ति न संयुगे ॥ १८ ॥
जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः । स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः ॥ १९ ॥
ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् । तत्र शब्देन वित्रस्ता गावो यान्ति हतप्रभाः॥ २० ॥
राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः । द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः ॥
पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः ॥ २१ ॥
ततः स जीमूतकृतप्रणादो नादं ह्यमुञ्चत्त्वरया प्रतीतः ।
सूर्यात्मजः शौर्यविवृद्धतेजाः सरित्पतिर्वानिलचञ्चलोर्मिः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

आह्वाननिमित्तं शब्दं कुरु येन शब्देन वानरो वाली निष्पतेत् ॥ १६ ॥

गो० टी०–तदाह्वानेति । तत्तस्मात् ॥ १६ ॥

१७] ति० टी०–जितकाशी जितश्वासो जितभयो वा । त्वया आधर्षितः सन्पुरायेन निष्पतेत्तं शब्दं कुर्वित्यर्थः ॥ १७॥

रा० टी०–सोऽवश्यं पतिष्यतीत्यत्र हेतुं वदन्नाह–जितेति । जयश्लाघी स्वविजयाविषयकश्लाघावान् अत एव प्रियसंयुगः अत एव जितकाशी स्वविजयहेतुकगमनशीलः अधर्षितस्त्वया पराभवमप्राप्तः वाली असंगेन कलत्राद्यासक्तिरहितत्वेन पुरान्निष्पतिष्यति एतेन न निष्पतेच्चेत्कि करिष्यसीति शङ्का न कार्येति ध्वनितम् ॥ १७ ॥

गो० टी०–जितेति । जितेन जयेन काशते प्रकाशत इति जितकाशी ताच्छील्ये णिनिः असंगेन अविलम्बेन ॥ १७ ॥

१८] ति० टी०–नन्वं कृतेऽप्याह्वाने स्त्र्यादिसक्तो न निष्पतिष्यति तत्राह—निष्पतिष्यतीति । असंगेन स्त्र्यादिसंगपरित्यागेनेत्यर्थः । यतः प्रियसंयुगः । न मर्षयन्तीत्यस्य शूरा इति शेषः ॥ १८ ॥

रा० टी०–रिपूणामिति । रिपूणां धर्षितं प्रागल्भ्यवचनं श्रुत्वा स्वकं वीर्यं विशेषतोऽधिकं जानन्तो जनाः स्त्रीसमक्षं स्त्रीणां समीपं ज्ञात्वेति शेषः, विशेषतो न मर्षयन्ति सहन्ते ॥ १८ ॥

गो०टी०–रिपूणामिति।स्त्रीसमक्षमित्यनेन तदानीं सायंकाल इत्यवगम्यते 'प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया । सायं कामेन पीड्यन्ते जन्तवो निशि निद्रया॥' इति वचनात्॥१८॥१९॥

१९] ति० टी०–विशेषतो न मर्षयन्तीत्यनुषङ्गः ॥१९॥

रा० टी०–स इति । सुग्रीवः रामवचः श्रुत्वा अम्बरमाकाशं निर्भिन्दन्निव क्रूरनादेन ननर्द ॥ १९ ॥

२०] ति० टी०–गावो महान्तो वृषभाः । हतप्रभा हतशक्तयः ॥ २० ॥

२१] ति० टी०–राजदोषेण प्रजारक्षणाभावरूपेण राजदोषेण परैरन्यैरामृष्टा, अत एवाकुला व्याकुलाः कुलस्त्रिय इव गावो यान्ति । ग्रहा देवाः ॥ २१ ॥

रा० टी०–तेनेति । तेन सुग्रीवजनितेन शब्देन वित्रस्ता गावः राजदोषपरामृष्टाः राजदोषेण प्रजारक्षणाभावरूपराजापराधेन परामृष्टाः परैः विटैः आमृष्टाः स्प्रष्टुं वाञ्छिताः अत एव आकुला कुलस्त्रिय इव हतप्रभाः सत्यः यान्ति इतस्ततो धावन्ति रणे भग्नास्तोत्रादिना ताडिताः हया इव मृगाः द्रवन्ति च क्षीणपुण्याः ग्रहा इव खगाः भूमौ पतन्ति च । अर्धचतुष्टयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०–तस्येति । हतप्रभाः भीतिविकृतमुखकान्तयः। गाव इत्यनेन गवां पुरप्रवेशकालसूचनात्तत्कृतस्य सायंतनत्वं गम्यते । राजदोषपरामृष्टाः राजदोषेण अराजकत्वरूपदोषेण परामृष्टाः परैः परपुरुषैः आमृष्टाः केशेषु गृहीताः कुलस्त्रिय इव आकुलाः गन्तव्यप्रदेशाभावेनाकुलाः ॥ २० ॥ २१ ॥

२२] ति० टी०–जीमूतवत्कृतप्रणादः । प्रतीतः रामे इति शेषः । शौर्ये पराक्रमकरणे विवृद्धं तेजो यस्य । सरित्पतिर्वा समुद्र इव ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

रा० टी०–तत इति । जीमूतकृतः जीमूतोऽयमिति भ्रान्तिसंपादकः प्रणादो यस्य सः शौर्येण रामसाहाय्यहेतुकप्रवृद्धशूरत्वेन विवृद्धं तेजो यस्य स त्वरया युद्धोत्साहहेतुकवेगेन प्रतीत उपलक्षितः सूर्यात्मजः सुग्रीवः अनिलचञ्चलोर्मिः सरित्पतिः समुद्र इव नादं व्यमुञ्चत् । वाशब्द इवार्थे ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किधाकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

गो० टी०–तत इति । प्रतीतः नादमोचने प्रसिद्धः । सरित्पतिर्वा समुद्र इव ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

१ बलेति गो. पाठः । २ पुरेति गो. पाठः । ३ धर्षण शूरा इति गो. पाठः । ४ तस्येति गो. नेनेति रा. पाठः । ५ गणेति गो. पाठः ।

पञ्चदशः सर्गः ।

सुग्रीवनिनादश्रवणेन रोषाद्युद्धायोत्पततो वालिनस्तत्पत्न्या तारया हेतून्यासपुरःसर प्रतिषेधः ।

अथ तस्य निनादं तं[1] सुग्रीवस्य महात्मनः । शुश्रावान्तःपुरगतो वाली भ्रातुरमर्षणः ॥ १ ॥
श्रुत्वा तु तस्य निनदं सर्वभूतप्रकम्पनम् । मदश्चैकपदे नष्टः क्रोधश्चापादितो महान् ॥ २ ॥
ततो रोषपरीताङ्गो वाली सं[2] कनकप्रभः । उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ३ ॥
वाली दंष्ट्राकरालस्तु क्रोधादीप्ताग्निलोचनः । भात्युत्पतितपद्माभः समृणाल इव ह्रदः ॥ ४ ॥
शब्दं दुर्मर्षणं श्रुत्वा निष्पपात ततो हरिः । वेगेन चै[3] पदन्यासैर्दारयन्निव मेदिनीम् ॥ ५ ॥
तं तु तारा परिष्वज्य स्नेहाद्दर्शितसौहृदा । उवाच त्रस्तसंभ्रान्ता हितोदर्कमिदं वचः ॥ ६ ॥
साधु क्रोधमिमं वीर नदीवेगमिवागतम् । शयनादुत्थितः काल्यं त्यज भुक्तामिव स्रजम्[4] ॥ ७ ॥

१] ति० टी०–अथेति ॥ १ ॥

रा० टी०–सुग्रीवकृतनिनादश्रवणानन्तरकालिकं वालिष्टत्तान्तमाह–अथेत्यादिभिः । अन्तःपुरगतः अन्तःपुरे स्थितः वाली भ्रातुः सुग्रीवस्य निनादं शुश्राव ॥ १ ॥

गो० टी०–अथ ताराबुद्धिः पञ्चदशे–अथ तस्येत्यादि । महात्मनः महाधैर्यस्य ॥ १ ॥

२] ति० टी०–एकपदे तत्क्षणे । आपादितः संपादितः ॥ २ ॥

रा० टी०–श्रुत्वेति । सर्वभूतप्रकम्पनं तस्य सुग्रीवस्य निनादं श्रुत्वा विद्यमानस्य वालिनः एकपदे तस्मिन् क्षणे मदः मत्तः सर्वं विभ्यतीति गर्वः नष्टः क्रोधः आपादितः संप्राप्तः॥२॥

गो० टी०–श्रुत्वेति । स्थितस्येति शेषः । एकपदे एकस्मिन्नेव स्थाने सद्य इत्यर्थः । आपतितः उत्पन्न इत्यर्थः ॥ २॥

३] ति० टी०–कनकप्रभस्य क्रोधादतिरक्तत्वे सहजप्रभानाशेनोपरक्तादित्योपमेयता, एतदादीन्यासन्नमृत्युलक्षणानि ॥ ३ ॥

रा० टी०–तत इति । रोषपरीताङ्गः कोपाविष्टः वाली उपरक्तः राहुग्रस्तः आदित्य इव सद्यो निष्प्रभतां गतः ॥ ३ ॥

गो० टी०–स त्विति । रोषेण परीताङ्गः विपरीताङ्गः विकृतवेष इत्यर्थः । अत एव संध्यातपप्रभः कोपपावकयावकितानन इति प्रयोगात्कोपरक्तदेहत्वात्संध्यातपप्रभत्वम् । किंच उपरक्तः समीपरक्तः कृतपरिवेष इत्यर्थः । परिवेषयुक्तो हि सूर्यो निष्प्रभो दृश्यते, उपरक्तो राहुग्रस्तो वा ॥ ३ ॥

४] ति० टी०–उत्पतितपद्मेत्येकदेशे तन्त्रम् । उत्पतितैरुद्गतैः पद्मैरुत्पतिता नष्टा पद्मकृतशोभा यस्य तादृशो मृणालसहितो ह्रद इव दंष्ट्रा मृणालस्थानीया ॥ ४ ॥

रा० टी०–वालीति । दंष्ट्राकरालः दंष्ट्राहेतुकभयङ्करत्वविशिष्टः वाली उत्पतितपद्माभः उत्पतिता विनष्टा पद्माभा पद्मविनाशेन पद्महेतुका दीप्तिर्यस्य सः समृद्धालः पद्मनालमात्रविशिष्टह्रद इव भाति वर्तते एतेन वालिनः पराभवोऽवश्यं भविष्यतीति सूचितम् ॥ ४ ॥

गो० टी०–वालीति । दंष्ट्राकरालः दंष्ट्रादन्तुरः ' कराली दन्तुरे तुङ्गे ' इत्यमरः । क्रोधाद्धेतोः दीप्ताग्निसन्निभः अत एवोत्पतितपद्मः विकसितरक्तोत्पलः । ' उत्पतितपद्माभः ' इति पाठे उत्पतिता स्वोपरि प्रसृता पद्मानामाभा यस्मिन् स इत्यर्थः, समृणालो ह्रद इव भाति बभौ ॥ ४ ॥ ६ ॥

५] ति० टी०–दुर्मर्षणं दुःसहम् । वेगेन युक्तैः पदन्यासैः ॥ ६ ॥

रा० टी०–शब्दमिति । दुर्मर्षणं दुःसहं शब्दं श्रुत्वा हरिर्वाली वेगेन पदन्यासैः मेदिनीं पृथिवीं दारयन्निव ततः किष्किन्धायाः निष्पपात ॥ ६ ॥

६] ति० टी०–त्रस्तसंभ्रान्ता । कर्मधारये पुंवत्त्वम् । त्रस्ता भीता संभ्रान्ता क्षुभितचित्ता हितोदर्कं हितरूपोत्तरकालफलम् ॥ ६ ॥

रा० टी०–तमिति । तमन्तःपुरान्निष्क्रामन्तं वालिनं दर्शितसौहृदा तारा स्नेहात् परिष्वज्य आलिङ्ग्य त्रस्तसंभ्रान्ता त्रस्ता उद्विग्नचित्ता संभ्रान्ता भीता च सती किंच त्रस्तेन वाल्युद्विग्नचित्तत्वेन संभ्रान्ता जातभया सती हितोदर्कं हितरूपौत्तरकालिकफलकं वचः उवाच ॥ ६ ॥

गो० टी०–तं त्विति । परिष्वज्य स्ववचनश्रवणाभिमुख्यायालिङ्ग्य स्नेहात् परिष्वज्येत्यन्वयः दर्शितसौहृदा यथा भवति तथोवाचेत्यर्थः । संभ्रान्ता त्वरिता ' संभ्रमस्त्वरा ' इत्यमरः । हितोदर्कं हितफलकम् ॥ ६ ॥

७] ति० टी०–काल्यं प्रातःकाले शयनादुत्थितो भुक्तां स्रजमिव त्यज क्रोधम् ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह—साध्विति । हे वीर !

---

१ खिति गो. पाठः । २ आपतित इति गो. पाठः । ३ स त्विति गो. पाठः । ४ संध्यातपप्रभ इति गो. पाठः । ५ सनिभ इति गो. पाठः । ६ मृडालेति रा. पाठः । ७ चरणेति गो. पाठः ।

कल्यमेतेन संग्रामं करिष्यसि च वानर । वीर ते शत्रुबाहुल्यं फल्गुता वा न विद्यते ॥ ८ ॥
सहसा तव निष्क्रामो मम तावन्न रोचते । श्रूयतामभिधास्यामि यन्निमित्तं निवार्यते ॥ ९ ॥
पूर्वमापतितः क्रोधात्स त्वामाह्वयते युधि । निष्पत्य च निरस्तस्ते हन्यमानो दिशो गतः॥ १० ॥
त्वया तस्य निरस्तस्य पीडितस्य विशेषतः । इहैत्य पुनराह्वानं शङ्कां जनयतीव मे ॥ ११ ॥
दर्पश्च व्यवसायश्च यादृशस्तस्य नर्दतः । निनादस्य च संरम्भो नैतदल्पं हि कारणम् ॥ १२ ॥
नासहायमहं मन्ये सुग्रीवं तमिहागतम् । अवष्टब्धसहायश्च यमाश्रित्यैष गर्जति ॥ १३ ॥
प्रकृत्या निपुणश्चैव बुद्धिमांश्चैव वानरः । नापरीक्षितवीर्येण सुग्रीवः सख्यमेष्यति ॥ १४ ॥

आगतं सुग्रीवस्वनश्रवणेन संजातमिमं क्रोधं नदीवेगमिव कालेयं प्रातःकाले शयनादुत्थितो जनः शुष्कां स्रजं मालामिव त्यज ॥ ७ ॥

गो० टी०–साध्विति । कालेयं प्रातः शयनादुत्थितः पुरुषः शुष्कां स्रजमिव नदीवेगमिव आगतम् अप्रतिबद्धं क्रोधम् साधु निःशेषं त्यज ॥ ७ ॥

८–९] ति० टी०–कालेयं प्रातःकाले संग्रामं कुरु । हे वीर! यद्यपि संग्रामे शत्रोर्बाहुल्यं त्वत्त आधिक्यं न विद्यते, नापि तव फल्गुता लघुता विद्यते, अथापि सहसा हठात्तवाद्य निष्क्रामो निष्क्रमणं मम न रोचते । कुतस्तत्राह—श्रूयतामिति ॥ ८ ॥ ९ ॥

रा० टी०–कल्यमिति । हे वानर ! यतः ते तव शत्रुबाहुल्यं न अत एव ते फल्गुता लघुतापि न विद्यते अतः कल्यं प्रातःकाले एतेन सुग्रीवेण सह संग्रामं त्वं करिष्यसि ॥८॥

गो० टी०–कालेयमिति । कालेयं प्रातःकाले एतेन युद्धं करिष्यसि । तेन फल्गुता लाघवं वा शत्रुबाहुल्यं शत्रुगौरवं वा न विद्यते । अतः किमर्थमद्यैव निर्गच्छसीत्यर्थः ॥ ८ ॥

रा० टी०–सहसेति । सहसा अविचारेण तव निष्क्रामस्त्वत्कर्तृकनिष्क्रमणं मम न रोचते । नन्वहं संग्रामार्थं पूर्वं निष्क्रमणे न निवारितवतीदानीं किमर्थं निवारयसीत्यत आह–श्रूयतामिति । यन्निमित्तं यदर्थं मया निवार्यसे तदभिधास्यामि त्वया श्रूयताम् ॥ ९ ॥

गो० टी०–सहसा निर्गमे को दोष इत्यत्राह–सहसेति॥९॥

१०] ति० टी०–पूर्वं क्रोधादापतितः सुग्रीवो युद्धाय त्वामाह्वयत, तदा ते त्वया निष्पत्य निरस्तो हन्यमानश्च दिशो गतः ॥ १० ॥

रा० टी०–तदभिधानमेवाह–पूर्वमिति । आपतितः प्राप्तः स सुग्रीवः युधि युद्धार्थं क्रोधात् त्वामाह्वयते आह्वयत निष्पत्य निर्गत्य ते त्वया हन्यमानः अत एव निरस्तः पराभूतः सन् दिशो गतः अपलायतेत्यर्थः ॥ १० ॥

गो० टी०–प्रथमं युक्तिमाह–पूर्वमित्यादि । श्लोकद्वयमेकान्वयम् । पूर्वमापतितः ते त्वया क्रोधान्निष्पत्य यो युधि निरस्तः हन्यमानो दिशो गतश्च स त्वामाह्वयते । पुनरेत्य स्थितस्य तस्यैतदाह्वानं मे शङ्कां सहायसहितत्वशङ्कां जनयतीति योजना इवशब्दो वाक्यालंकारे ॥ १० ॥ ११ ॥

११] ति० टी०–तस्य तथा निरस्तस्य पुनरेत्याह्वानं शङ्कां जनयत्येव ॥ ११ ॥

रा० टी०–त्वयेति । त्वया निरस्तस्य अत एव विशेषतः पीडितस्य दुःखितस्य तस्य सुग्रीवस्य पुनरिहैत्याह्वानं मे शङ्कां जनयत्येव । इवशब्द एवार्थे ॥ ११ ॥

१२] ति० टी०–कुतस्तत्राह–दर्पश्चेति । दर्पो गर्वः । व्यवसायो युद्धविषयः । यादृशश्च नर्दतो निनादस्य संरम्भो वृद्धिरेतदेतस्य कारणं नाल्पम् । अयं दर्पादिः कारणविशेषपूर्वकः कार्यविशेषत्वादित्यनुमितम् ॥ १२ ॥

रा० टी०–दर्प इति । नर्दतस्तस्य सुग्रीवस्य यादृशो दर्पः गर्वः व्यवसायो निश्चयश्च निनादस्य संरम्भो वृद्धिश्च एतत् एतस्य कारणमल्पं न महाकारणका इमे इत्यर्थः ॥ १२ ॥

गो० टी०–अवधारणे हेत्वन्तरमप्याह–दर्पश्चेति । नर्दतस्तस्य दर्पश्च व्यवसायश्च यत्नश्च निनादश्च सौरभश्च यादृशः अस्य एतत्कारणमल्पं न भवतीति योजना ॥ १२ ॥

१३] ति० टी०–कारणविशेषं दर्शयति–नेति । अवष्टब्धसहायः परिगृहीतसहायः सर्वथा सहायसंबन्धमूलोऽयं संरम्भ इति भावः ॥ १३ ॥

रा० टी०–कारणमेवाह–नेति । तं पूर्वं पराभूतमिह इदानीमागतं सुग्रीवमसहायं सहायरहितमहं न मन्ये । नन्वमातीव प्रबलत्वात्सहायेनापि तेन किमित्यत आह–यमाश्रित्य एषः गर्जति स अवष्टब्धसहायः प्रबलसहाय इत्यर्थः । एतेन स त्वया निवर्तयितुं न शक्य इति सूचितम् ॥ १३ ॥

गो० टी०–फलितमाह–नासहायमिति । अवष्टब्धसहायश्च परिगृहीतसहाय एव । कुतः एष यमाश्रित्य गर्जति तादृशगर्जनहेतुसहायाश्रित एष इत्यर्थः ॥ १३ ॥

१४] ति० टी०–नन्विति तस्य बुद्धिः कुतस्तत्राह–प्रकृत्येति । निपुणः उचितकृत्यनिष्पादने समर्थस्तत्सक्षमबुद्धिमांश्च । नन्वहं सहायवन्तं वधिष्यामीति चेत्तत्राह—अपरीक्षितशत्रुनाशकवीर्येण पुंसा सुग्रीवः सख्यं नेष्यति । अतस्तत्सहायभूतः शङ्कनीय एव ॥ १४ ॥

१ कल्यमिति रा.पा.। २ निवार्यसे इति गो.पा.। ३ निनादश्चार्थानि गो.पा.। ४ अपरीक्षितेति गो.पा.। ५ सह नैष्यतीति गो.पा.। ६ पलायतेति युक्तं भाति।

पूर्वमेव मया वीर श्रुतं कथयतो वचः । अङ्गदस्य कुमारस्य वक्ष्याम्येष हितं वचः ॥ १५ ॥
अङ्गदस्तु कुमारोऽयं वनान्तमुपनिर्गतः । प्रवृत्तिस्तेन कथिता चारैरौसीन्निवेदिता ॥ १६ ॥
अयोध्याधिपतेः पुत्रौ शूरौ समरदुर्जयौ । इक्ष्वाकूणां कुले जातौ प्रस्थितौ रामलक्ष्मणौ॥ १७ ॥
सुग्रीवप्रियकामार्थं प्राप्तौ तत्र दुरासदौ । सै ते भ्रातुर्हि विख्यातः सहायो रणकर्मणि ॥ १८ ॥
रामः परबलामर्दी युगान्ताग्निरिवोत्थितः । निवासवृक्षः साधूनामापन्नानां परा गतिः ॥ १९ ॥

रा० टी०—सहायस्य प्रबलत्वे हेतुं वदन्ती आह—प्रकृत्येति । प्रकृत्या स्वभावेन निपुणः सकलकर्मकुशलः बुद्धिमान् वानरः सुग्रीवः अपरीक्षितवीर्येण पुरुषेण सह सख्यं न एष्यति करिष्यतीत्यर्थः ॥ १४ ॥

गो० टी०—सहायस्यातिशये किं मानमित्यत आह—प्रकृत्येति ॥ १४ ॥

१५] ति० टी०—न केवलं मदुक्तमित एवायमर्थः, किंतु शब्दप्रमाणादप्यवगत इत्याह—पूर्वमेवेति । यन्मया पूर्वमङ्गदस्य कुमारस्य वचः श्रुतं तत्तव हितमथ त्वां वक्ष्यामि ॥ १५ ॥

रा० टी०—तत्रैव निश्चयमाह—पूर्वमिति । हे वीर! हितं सुग्रीवस्य सख्यं कथयतः कुमारस्य अङ्गदस्य वचः मया श्रुतम् अथ वक्ष्यामि तद्वच इति शेषः ॥ १५ ॥

गो० टी०—न केवलं युक्त्यायं निर्णयः वचनाच्चेत्याह—पूर्वमिति । वचो यत् प्रासङ्गिकं कथयतोऽङ्गदस्य वचः मया श्रुतं तत् हितं वचः त्वां प्रति वक्ष्यामि ॥ १५ ॥

१६-१७] ति० टी०—तदेवाह—अङ्गदस्त्विति । वनान्तं वनमध्यं या तस्मै चारैर्निवेदिता प्रवृत्तिरासीत् । प्रवृत्तिः सुग्रीववृत्तान्तः। सा तेन मम कथिता ॥ १६॥१७ ॥

रा० टी०—तद्वचनाकारमाह—अङ्गद इति । अयं कुमारः अङ्गदः वनान्तं वनसमीपं गत्वेति शेषः, उपनिर्गतः पुनः मत्समीपं प्राप्त आसीत् तेन कुमारेण चारैर्निवेदिता प्रवृत्तिः सुग्रीववृत्तं कथिता ॥ १६ ॥

रा० टी०—अङ्गदोक्तिमेवाह—अयोध्येति । इक्ष्वाकूणां कुले जातौ अयोध्याधिपतेः दशरथस्य पुत्रौ नित्यपुत्रत्वविशिष्टौ रामलक्ष्मणौ प्रस्थितौ केनचिन्निमित्तेन वनं प्राप्तौ ॥ १७ ॥

गो० टी०—अङ्गद इति । वनान्तङ्गपवनान्तमभिनिर्गतः विहारार्थं गतः । प्रवृत्तिर्वार्ता 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः । तत्र ऋष्यमूके दुरासदावित्यनन्तरमितिकरणं बोध्यम् । प्राप्ताविति प्रवृत्तिस्तेन कथितेति संबन्धः ॥ १६ ॥ १७ ॥

१८-१९] ति० टी०—तत्र तयोर्मध्ये यस्तव भ्रातुः सहायो विख्यातः । हि यतः स परबलामर्दी । साधूनां निवासवृक्षश्च आश्रयः । आपन्नानां शरणागतानां गतिः शरणम् ॥ १८ ॥१९ ॥

रा० टी०—सुग्रीवेति । दुरासदौ धर्षयितुमशक्यौ रामलक्ष्मणौ तत्र सुग्रीवसमीपे प्राप्तौ रणकर्मणि विख्यातः सः लक्ष्मणसहितरामस्ते भ्रातुः सुग्रीवस्य सहायः सखा, अभवदिति शेषः ॥ १८ ॥

गो० टी०—तौ कीदृशावित्यपेक्षायाम् एकस्य स्वरूपकथनेनान्यस्य स्वरूपमप्यर्थादुक्तं भवतीति मत्वा प्रधानभूतरामस्वरूपमाह—तवेत्यादिना श्लोकत्रयेण । रामः उक्तविशेषणविशिष्ट इत्यन्वयः ॥ १८ ॥

रा० टी०—रामो जेतुमशक्य इति बोधयितुमाह—राम इति । उत्थितः प्रवृद्धः युगान्ताग्निरिव परबलामर्दी शत्रुसेनानां विघातकः साधूनां परोपकारनिरतानां निवासवृक्ष आश्रय इत्यर्थः, आपन्नानां प्राप्तापत्तीनां परा उत्कृष्टा गतिः रक्षकः आर्तानां दुःखितानां संश्रयः दुःखविध्वंसक इत्यर्थः, यशसः कीर्तेः एकभाजनं महायशस्वीत्यर्थः, ज्ञानविज्ञानसंपन्नः ज्ञानेन सकलशास्त्रविषयकबोधेन विज्ञानेन वेदवर्णितसकलवस्तूनां साक्षादनुभवेन च संपन्नः युक्तः अत एव पितुर्निदेशे आज्ञायां निरतः रामः धातूनामाकरः शैलेन्द्र इव गुणानां वात्सल्यादीनां महानाकरोऽस्तीति शेषः । सार्धश्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०—तत्रस्थितिं सूचयन्त्याह—निवासेति । यथा सुग्रीवस्य सहायः एवं ममापि कुतो न स्यादित्यत्राह—साधूनामिति । स्वच्छायापेक्षिणाम् अनुकूलानां निवासवृक्षः । वृक्ष इत्यभेदाध्यवसायेन सर्वथा सादृश्यमुच्यते । यथा वृक्षः प्रथमं तापमपहृत्य पुष्पफलप्रदानादिना सर्वेन्द्रियतर्पणः तथायमित्यर्थः । निवास इति विशेषणेन कादाचित्कच्छायकतरुव्यावृत्तिः 'वासुदेवतरुच्छाया नातिशीता न घर्मदा । नरकाङ्गारशमनी सा किमर्थं न सेव्यते ॥' इत्युक्तत्वात् । सुग्रीवद्रोहकरणेन नास्माकं साधुत्वलेश इत्याशयः । साधूनामेदम् आपन्नानां तु परा गतिः । योगक्षेमं वहामीत्युक्तरीत्या आश्रितविषये उपायदशाप्रभृतिफलपर्यन्तसर्वकार्यकर इत्यर्थः । तत्राप्यार्तानां संश्रयश्चैव । आश्रितेष्वपि आर्तानां तु सर्वदा समीचीनाश्रयः सर्वकार्यनिर्वाहक इत्यर्थः । भवत्वेवं ममापि कश्चिदाश्रयो भविष्यतीत्यत्राह—यशसश्चैकभाजनमिति । एवंविधरक्षको लोकेऽन्यो नास्तीत्यर्थः । अत्र 'चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥' इत्युक्ताश्चतुर्विधाधिकारिण उच्यन्ते । साधूनां जिज्ञासूनां कैवल्य-

१ स्वेति गो. पाठः । २ आत्तैरिति गो. पाठः । ३ तवेति गो. पाठः । ४ कर्कश इति गो. पाठः ।

आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् । ज्ञानविज्ञानसंपन्नो निदेशे निरतः पितुः ॥ २० ॥
धातूनामिव शैलेन्द्रो गुणानामाकरो महान् । तत्क्षमो न विरोधस्ते सह तेन महात्मना ॥ २१ ॥
दुर्जयेनाप्रमेयेण रामेण रणकर्मसु । शूर वक्ष्यामि ते किंचिन्न चेच्छाम्यभ्यसूयितुम् ॥ २२ ॥
श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितम् । यौवराज्येन सुग्रीवं तूर्णं साध्वभिषेचय ॥ २३ ॥
विग्रहं मा कृथा वीर भ्रात्रा राजन्यवीयसा । अहं हि ते क्षमं मन्ये तेन रामेण सौहृदम् ॥ २४ ॥
सुग्रीवेण च संप्रीतिं वैरमुत्सृज्य दूरतः । लालनीयो हि ते भ्राता यवीयानेष वानरः ॥ २५ ॥
तत्र वा सन्निहस्थो वा सर्वथा बन्धुरेव ते । नहि तेन समं बन्धुं भुवि पश्यामि कंचन ॥ २६ ॥
दानमानादिसत्कारैः कुरुष्व प्रत्यनन्तरम् । वैरमेतत्समुत्सृज्य तव पार्श्वे स तिष्ठतु ॥ २७ ॥

कामानामित्यर्थः । आपन्नानाम् अपूर्वैश्वर्यकामानाम् । आर्तानां भ्रष्टैश्वर्यकामानाम् । यशसः ज्ञानी त्वात्मैव मे मतमित्युक्तयशोयुक्तस्य । एकवचनेन तस्य सुदुर्लभत्वमुक्तम् । एकभाजनम् अद्वितीयाश्रयः । यद्वा साधूनामुपासकानाम् आपन्नानां सकृदेव प्रपन्नायेत्युक्तरीत्या ईषत्प्रपन्नानाम् । आर्तानाम् आर्तप्रपन्नानाम् 'आर्तो वा यदि वा दृप्तः परेषां शरणागतः' इति वक्ष्यमाणत्वात् । यशसश्चैकभाजनमित्यनेन एवंभूतोऽन्यो नास्तीत्युच्यते १९

२०] ति० टी०–आर्तानां शत्रुपीडितानाम् तन्नाशाय संश्रयः संश्रयार्हः । ज्ञानं ब्रह्मज्ञानम् धर्मविषयं विज्ञानं शिल्पनैपुणं वा निदेशे निरत इत्यनेन स्वराज्यमरक्षितवतः कुतः परररक्षणसामर्थ्यमित्यपास्तम् ॥ २० ॥

गो०टी०–आश्रितफलप्रदानोपयोगिज्ञानसंपत्तिमाह–ज्ञानविज्ञानसंपन्न इति। ज्ञानं लौकिकज्ञानं विज्ञानं शास्त्रजन्यज्ञानं ताभ्यां संपन्नः यद्वा विज्ञानेन धर्मभूतेन संपन्नः । ज्ञानश्चासौ विज्ञानसंपन्नश्चेति कर्मधारयः । ज्ञानस्वरूपो ज्ञानगुणकश्चेत्यर्थः । ज्ञानसंपत्तिमुक्त्वाऽनुष्ठानसंपत्तिमाह–निदेशे निरतः पितुरिति । प्रधानत्वात्पितृवचनपरिपालनत्वमुक्तम् । इदमुपलक्षणं धर्मान्तराणाम्, अनेन सौलभ्यं चोक्तम् । समस्तकल्याणगुणसमृद्धिमाह–गुणानामाकर इति बहुवचनेनासंख्येयत्वमुक्तम् । आकर इत्यनेन गुणातिरिक्तत्वं गुणिन उक्तम् । महानित्यनेन गुणानामप्युत्कर्षावहं गुणिस्वरूपमुच्यते । धातूनामित्यनेन गुणानां ज्ञानशक्तिबलैश्वर्यादिभेदेन नानाविधत्वमुक्तम् । शैलेन्द्रो हिमवान् अनेनाप्रकम्प्यत्वमुक्तम् ॥ २० ॥

२१] ति० टी०–तत्तस्मात्तेनोच्यमानगुणकेन रामेण तव विरोधो न क्षमो न युक्तः ॥ २१ ॥

रा० टी०–नन्वु किमेतद्वर्णनेनेत्यत आह–तदिति । तत् रामस्य सकलगुणनिधित्वाद्धेतोः अप्रमेयेण बलादिषु इयत्तारहितेन अत एव रणकर्मसु दुर्जयेन महात्मना तेन रामेण सह ते तव विरोधः न क्षमः युक्तः एतेन राम एव त्वयाऽभ्याश्रयितव्य इति सूचितम् । अर्धद्वयमेकान्वयि ॥ २१ ॥

गो० टी०–तदिति । रणकर्मसु दुर्जयेनेत्यन्वयः ॥ २१ ॥

१ क्षममिति गो. पाठः ।

२२–२३] ति० टी०–दुर्जयेनेत्यार्धं पूर्वान्वयि । किंचिद्वक्ष्यमाणं त्वयाऽभ्यसूयितुं नेच्छामि कथमियं मां प्रति वदतीति मदसूया न कर्तव्येत्यर्थः आर्षत्वादसमानकर्तृत्वेऽपि तुमुन् ॥ २२ ॥ २३ ॥

२४–२५] ति० टी०–तेन बलीयसा रामेण ॥२४–२५॥

रा०टी०–रामाश्रयणोपायं वक्तुमाह–शूरेति । हे शूर! यतः अभ्यसूयितुं तवासूयां प्रकटयितुं नेच्छामि अतः किंचिद्वक्ष्यामि अतः यत्तव हितं वक्ष्यामि तत् श्रूयताम् ॥ २२ ॥

गो० टी०–शूरेति । ते अभ्यसूयितुं नेच्छामि त्वद्विषये अभ्यसूयां दोषाविष्करणं कर्तुं कदाचिदपि नेच्छामीत्यर्थः । यद्वा मया वक्ष्यमाणे हिते त्वया अभ्यसूया न कार्येत्यर्थः॥२२॥

रा० टी०–तद्वचनाकारमाह–यौवराज्येनेति । हे वीर ! हे राजन् ! तूर्णं शीघ्रं यौवराज्येन सुग्रीवं साध्वभिषेचय भ्रात्रा सह विग्रहं मा कृथाः हि यतः रामेण सौहृदं सुग्रीवेण संप्रीतिं च ते क्षमं योग्यं मन्ये अतः वैरमुत्सृज्य यवीयान् कनिष्ठस्ते भ्राता सुग्रीवस्ते लालनीयः । सार्धश्लोकद्वयमेकान्वयि ॥ २३–२५ ॥

गो० टी०–यौवराज्येनेति । यौवराज्येनाभिषेचय यौवराज्येनोपलक्षितो यथा भवति तथाऽभिषिञ्चेत्यर्थः ॥ २३–२५॥

२६] ति० टी०–तत्र तस्मिन्दूरदेशे वा सन्विद्यमानः, इहस्थस्त्वत्समीपस्थो वा भुवि न पश्यामि तवेति शेषः ॥२६॥

रा० टी०–तत्रेति । तत्र ऋष्यमूके सन् स्थितो वा इहस्थः किष्किन्धायां स्थितो वा तव बन्धुरेव, तेन सुग्रीवेण समं सदृशं बन्धुं भुवि कंचन न पश्यामि ॥ २६ ॥

गो० टी०–नहीति । प्रत्यनन्तरं त्वदनन्तरं समीपवर्तिनं वा कुरुष्व ॥ २६ ॥ २७ ॥

२७] ति० टी०–प्रत्यनन्तरं स्वाधीनम् ॥ २७ ॥

रा० टी०–दानेति । एतत् किंचित्प्रसङ्गेन जातं वैरं समुत्सृज्य त्यक्त्वा सुग्रीवं दानादिभिः प्रत्यनन्तरं प्राप्तान्तररहितम् अन्तरङ्गमित्यर्थः, कुरुष्व अत एव स सुग्रीवः पार्श्वे तिष्ठतु ॥ २७ ॥

सुग्रीवो विपुलग्रीवो महाबन्धुर्मतस्तव । भ्रातृसौहृदमालम्ब्य नान्या गतिरिहास्ति ते ॥ २८ ॥
यदि ते मत्प्रियं कार्यं यदि चावैषि मां हिताम् । याच्यमानः प्रियत्वेन साधु वाक्यं कुरुष्व मे ॥२९॥
प्रसीद पथ्यं शृणु जल्पितं हि मे न रोषमेवानुविधातुमर्हसि ।
क्षमो हि ते कोशलराजसूनुना न विग्रहः शक्रसमानतेजसा ॥ ३० ॥
तदा हि तारा हितमेव वाक्यं तं वालिन पथ्यमिदं बभाषे ।
न रोचते तद्वचनं हि तस्य कालाभिपन्नस्य विनाशकाले ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।

तारां निर्भर्त्स्य वालिनो युद्धार्थं निर्गमनम् ततः सुग्रीवेण सह घोरः संग्रामः । तत्र च सुग्रीवमार्त पश्यता रामेण वाली शरेणोरसि ताडितः क्षितौ पपात ।

तामेवं ब्रुवतीं तारां ताराधिपनिभाननाम् । वाली निर्भर्त्सयामास वचनं चेदमब्रवीत् ॥ १ ॥
गर्जतोऽस्य सुसंरब्धं भ्रातुः शत्रोर्विशेषतः । मर्षयिष्यामि केनापि कारणेन वरानने ॥ २ ॥

२८] ति० टी०–भ्रातृसौहृदमालम्ब्यैव तव गतिः नान्या गतिरस्तीत्यर्थः ॥ २८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–सुग्रीव इति । भ्रातृसौहृदमालम्ब्य विद्यमानस्य तव सुग्रीवो महाबन्धुर्मतः अतः अन्या सुग्रीवभिन्ना व्यक्तिः ते गतिः रक्षिका न ॥ २८ ॥

गो० टी०–भ्रातुरित्यर्धम् । आलम्ब आलम्बस्व॥ २८ ॥

२९–३०]ति० टी०–यदि ते यदि त्वयेत्यर्थः॥२९॥३०॥

रा० टी०–यदीति । ते तव यदि मत्प्रियं कार्यं यदि च मां हितामवैषि जानासि तर्हि प्रियत्वेन याच्यमानस्त्वं मे वाक्यं साधु कुरुष्व ॥ २९ ॥

गो० टी०–यदीति । अवैषि जानासि प्रयत्नेन बहुप्रयत्नेन ॥ २९ ॥

रा० टी०–प्रसीदेति । पथ्यं हितं मे जल्पितं कथितं त्वं श्रुत्वा अत एव प्रसीद अत एव रोषं कोपमनुविधातुं नार्हसि । तद्वचनाकारमाह–शक्रसमानतेजसा कोशलराजसूनुना समं विग्रहः कलहो न क्षमः ॥ ३० ॥

गो० टी०–स्ववचनाश्रवणे बाधकं सूचयन्त्याह–प्रसीदेति । प्रसीद त्यक्तरोषो भव । पथ्यं हितं जल्पितं वचनं भावे क्तः । शक्रसमानतेजसा शक्रतेजस्तुल्यतेजसा । अनेन वालिनो रामस्याधिक्यमुक्तम् ॥ ३० ॥

३१] ति० टी०–तदा हीत्यादि कविवाक्यम् ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०–तदेति । इदं हितं पथ्यं वाक्यं तदा तस्मिन् वालिविनाशकाले तारा वालिनं बभाषे तद् ताराभाषितं वचनं कालाभिपन्नस्य विनाशकालं प्राप्तस्य तस्य वालिनः न रोचते३१

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो० टी०–तदेति । तदा वक्तव्यकाले वालिनं प्रतीति शेषः । भाषतेर्द्विकर्मकत्वात् । तस्य तस्मै चतुर्थ्यर्थे षष्ठी "रुच्यर्थानाम्" इति हि स्मृतिः । विनाशकालत्वे हेतुः–कालाभिपन्नस्येति मृत्युना गृहीतस्येत्यर्थः ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

१] ति० टी०–तामिति ॥ १ ॥

रा० टी०–तारावचनश्रवणानन्तरकालिकं वालिवृत्तान्तमाह–तामित्यादिभिः । ताराधिपनिभाननां चन्द्रमुखीम् एवं ब्रुवतीं तारां वाली निर्भर्त्सयामास इदं वचनमब्रवीच्च ॥ १ ॥

गो०टी०–अथ वालिवधः षोडशे–तामेवमित्यादि॥१॥२॥

२] ति० टी०–सुसंरब्धं भावे निष्ठा सुसंरम्भमित्यर्थः । केनापि न केनापि त्वदुक्तकारणेनेत्यर्थः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–गर्जत इति । गर्जतो विशेषतः शत्रोर्भ्रातुरस्य सुग्रीवस्य सुसंरब्धं गर्वं केन कारणेन मर्षयिष्यामि मर्षणकारणं नास्तीति तात्पर्यम् । विशेषत इत्यस्य गर्जत इत्यत्रान्वयो वा ॥ २ ॥

---

१ तव बन्धुःसदा मत इति गो. पाठः । २ भ्रातुः सौहृदमालम्बेति गो. पाठः । ३ प्रयत्नेनेति गो. पाठः । ४ च संरम्भमिति गो. पाठः । ५ अहं केनेति गो. पाठः ।

अधर्षितानां शूराणां समरेष्वनिवर्तिनाम् । धर्षणामर्षणं भीरु मरणादतिरिच्यते ॥ ३ ॥
सोढुं न च समर्थोऽहं युद्धकामस्य संयुगे । सुग्रीवस्य च संरम्भं हीनग्रीवस्य गर्जितम् ॥ ४ ॥
न च कार्यो विषादस्ते राघवं प्रति मत्कृते । धर्मज्ञश्च कृतज्ञश्च कथं पापं करिष्यति ॥ ५ ॥
निवर्तस्व सह स्त्रीभिः कथं भूयोऽनुगच्छसि । सौहृदं दर्शितं तावन्मयि भक्तिस्त्वया कृता ॥ ६ ॥
प्रतियोत्स्याम्यहं गत्वा सुग्रीवं जहि संभ्रमम् । दर्पं चास्य विनेष्यामि न च प्राणैर्वियोक्ष्यते ॥ ७ ॥
अहं ह्याजिस्थितस्यास्य करिष्यामि यदीप्सितम् । वृक्षैर्मुष्टिप्रहारैश्च पीडितः प्रतियास्यति ॥ ८ ॥
न मे गर्वितमायस्तं सहिष्यति दुरात्मवान् । कृतं तारे सहायत्वं दर्शितं सौहृदं मयि ॥ ९ ॥
शापिताऽसि मम प्राणैर्निवर्तस्व जनेन च । अलं जित्वा निवर्तिष्ये तमहं भ्रातरं रणे ॥ १० ॥
तं तु तारा परिष्वज्य वालिनं प्रियवादिनी । चकार रुदती मन्दं दक्षिणा सा प्रदक्षिणम् ॥ ११ ॥

३] ति० टी०–धर्षणामर्षणं सहनम् ॥ ३ ॥

रा० टी०–सहने दोषमाह–अधर्षितानामिति । अधर्षितानां पराभूतिरहितानां समरेषु अनिवर्तिनां शूराणां धर्षणामर्षणं धर्षणायाः सहनं मरणात् अतिरिच्यते अधिकं भवति । नन्वत्र किमेतेनेत्यत आह–सोढुमिति । इनग्रीवस्य इना श्रेष्ठा विपुलेत्यर्थः, ग्रीवा यस्य तस्य संयुगे युद्धकामस्य सुग्रीवस्य संरम्भं गर्वं गर्जितं च सोढुं नैव समर्थः । हिशब्दएवार्थे । अत एव विपुलग्रीव इत्यनेन न विरुध्यते ॥ ३ ॥ ४ ॥

गो० टी०–अधर्षितानामिति । धर्षणामर्षणं धर्षणस्य आमर्षणं सहनमिति वा, धर्षणायाः तिरस्कारस्य मर्षणमिति वार्थः ॥ ३ ॥

४] ति० टी०–संयुगे संरम्भम् । संयुगनिमित्तं संरम्भमित्यर्थः ॥ ४ ॥

गो० टी०–सोढुमिति । सुग्रीवस्य च संरम्भं हीनग्रीवस्येति गर्जत इति हीनग्रीवस्येति परुषोक्तिः ॥ ४ ॥

५] ति० टी०–राघवं प्रति राघवनिमित्तभयमालक्ष्य मत्कृते त्वया विषादो न कार्यः यतो धर्मज्ञत्वादिगुणः सः । पापं मद्वधरूपम् ॥ ५ ॥

रा० टी०–न च सुग्रीवस्यातिप्रबलराघवसंसर्गित्वाद्विषाद इत्यत आह–नेति । धर्मज्ञः कृतज्ञो रामः मत्कृते अस्मदर्थं पापमनुचितं कथं करिष्यति उचितमेव करिष्यतीत्यर्थः, अतः राघवं प्रति त्वया विषादो न कार्यः । एतेन वालिनो रघुनाथानुकूलवर्तित्वं सूचितम् ॥ ५ ॥

गो० टी०–न चेति । पापं निरपराधवधम् ॥ ५ ॥

६] ति० टी०–कथं भूयोऽनुगच्छसि निवर्तस्वेत्युच्यमानापीति भावः । भक्तिरनुरागः ॥ ६ ॥

रा० टी०–निवर्तस्वेति । स्त्रीभिः सह कथं किमर्थमनुगच्छसि अनुगमनस्य न प्रयोजनमित्यर्थः, अतः निवर्तस्व । मयि सौहृदं मैत्री भूयोऽधिकं त्वया दर्शितम्, भक्तिः सेवा च कृता ॥ ६ ॥

गो० टी०–निवर्तस्वेति । निवर्तने क्रियमाणेऽपि भूयः सौहृदं सुहृत्कर्तव्यं हितोपदेश इति यावत् । भक्तिः कृता प्रकाशितेत्यर्थः ॥ ६ ॥

७] ति० टी०–दर्पं च दर्पमेव । वियोक्ष्यते वियोजयिष्यते । सोदरत्वात् ॥ ७ ॥

रा० टी०–न च भ्रातृवधे दोषः स्यादित्यत आह–प्रतीति। अहं सुग्रीवं गत्वा प्राप्य प्रतियोत्स्यामि अत एवास्य सुग्रीवस्य दर्पं गर्वं विनेष्यामि दूरीकरिष्यामि प्राणैस्तु न वियोक्ष्यते अतः संभ्रमं भ्रातृवधजनितदोषहेतुकभीतिं जहि त्यज ॥ ७ ॥

गो० टी०–प्रतियोत्स्यामीति । सुग्रीवं प्रतियोत्स्यामि७

८] ति० टी०–उक्तमेव विवृणोति–ईप्सितं त्वदीप्सितं दर्पमोचनेनेत्यर्थः । वृक्षैर्वृक्षप्रहारैः ॥ ८ ॥

रा० टी०–अहमिति । आजिस्थितस्य संग्रामस्थस्य अस्य सुग्रीवस्य यत्त्वया ईप्सितम् अस्य वधो न भवेदिति वाञ्छितं तदहं करिष्यामि अतः वृक्षैः वृक्षप्रहारैः मुष्टिप्रहारैश्च पीडितः सन् प्रतियास्यति स्वगृहं प्राप्स्यति ॥ ८ ॥

गो० टी०–संप्रहारव्याकुलेन त्वया कथं तस्य प्राणरक्षणं कर्तुं शक्यं तत्राह—अहं ह्रीति । यथेप्सितम् ईप्सितं तत्प्राणरक्षणमनतिक्रम्य आजौ युद्धे स्थितस्य ॥ ८ ॥

९] ति० टी०–गर्वितं दर्पम् आयस्तं तत्प्रवृत्तं हृदयत्वं भावे निष्ठा । सहायत्वं बुद्धिसाचिव्यम् ॥ ९ ॥

रा० टी०–यदुक्तं दानमानादिसत्कारैरिति तस्य प्रत्युत्तरमाह–नेति । गर्वितं सामानाधिकरण्यसंबन्धेन स्वबलवत्त्वाद्जनितगर्वविशिष्टं मे आयस्तं प्रवृत्तिं न सहिष्यति एतेन तस्य मद्वधवर्तित्वं न भविष्यतीति सूचितम् 'नाहं गर्वितमायस्तं सहिष्यामि दुरात्मनः' इति तीर्थाङ्कितपुस्तकपाठः । कृतमिति । हे तारे ! सहायत्वञ्चोचितवाक्यसहायता त्वया कृतं मयि सौहृदं च दर्शितम् ॥ ९ ॥

गो० टी०–नेति । गर्वितं गर्वम् । आयस्तम् आयासं प्रयत्नमिति यावत् । सहिष्यतीति परस्मैपदमार्षम् । सहायत्वं बुद्धिसाहाय्यम् ॥ ९ ॥ १० ॥

१०–११] ति० टी०–जनेन स्वपरिवारजनेनालं जित्वा

१ गर्जत इति गो. पाठः । २ तारे इति गो. पाठः । ३ दर्पमात्रमिति गो. पाठः । ४ यथेति गो. पाठः । ५ जयेनेति गो. पाठः । ६ अहमिति गो. पाठः ।

ततः स्वस्त्ययनं कृत्वा मन्त्रविद्विजयैषिणी । अन्तःपुरं सह स्त्रीभिः प्रविष्टा शोकमोहिता ॥ १२ ॥
प्रविष्टायां तु तारायां सह स्त्रीभिः स्वमालयम् । नैर्ऋतो निर्ययौ क्रुद्धो महासर्प इव श्वसन् ॥ १३ ॥
स निःश्वस्य महारोषो वाली परमवेगवान् । सर्वतश्चारयन्दृष्टिं शत्रुदर्शनकाङ्क्षया ॥ १४ ॥
स ददर्श ततः श्रीमान्सुग्रीवं हेमपिङ्गलम् । सुसंवीतमवष्टब्धं दीप्यमानमिवानलम् ॥ १५ ॥
तं स दृष्ट्वा महाबाहुः सुग्रीवं पर्यवस्थितम् । गाढं परिदधे वासो वाली परमकोपनः ॥ १६ ॥
स वाली गाढसंवीतो मुष्टिमुद्यम्य वीर्यवान् । सुग्रीवमेवाभिमुखो ययौ योद्धुं कृतक्षणः ॥ १७ ॥
श्लिष्टं मुष्टिं समुद्यम्य संरब्धतरमागतः । सुग्रीवोऽपि समुद्दिश्य वालिनं हेममालिनम् ॥ १८ ॥
तं वाली क्रोधताम्राक्षं सुग्रीवं रणकोविदम् । आपतन्तं महावेगमिदं वचनमब्रवीत् ॥ १९ ॥
एष मुष्टिर्मयान्बद्धो गाढः सुनियताङ्गुलिः । मया वेगविमुक्तस्ते प्राणानादाय यास्यति ॥ २० ॥
एवमुक्तस्तु सुग्रीवः क्रुद्धो वालिनमब्रवीत् । तव चैषं हरन्प्राणान्मुष्टिः पततु मूर्धनि ॥ २१ ॥

जयमात्रं कृत्वा निवर्तिष्ये नतु वधमित्यर्थः । 'अहं जित्वा' इति पाठस्त्वसांप्रदायिकः ॥ १० ॥ ११ ॥

रा० टी०–शापितेति । मम प्राणैस्त्वं शापिता शपथं प्रापिता अतः जनेन स्वपरिकरेण सह निवर्तस्व अहं तु रणे भ्रातरमलं जित्वा निवर्तिष्ये ॥ १० ॥

रा० टी०–तमिति । तं स्वोक्तस्वीकाराभाववन्तं वालिनं परिष्वज्य दक्षिणा अतिकुशला तारा मन्दं रुदती सती प्रदक्षिणं चकार ॥ ११ ॥

गो० टी०–तं त्विति । दक्षिणा स्वस्मिन् परस्मिंश्च तुल्यहिता ॥ ११ ॥

१२–१३] ति० टी०–मन्त्रविस्स्वस्त्ययनमन्त्रवेत्री । देवांशस्त्वात्तद्वेदनम् ॥ १२ ॥ १३ ॥

रा० टी०–तत इति । ततः प्रदक्षिणकरणानन्तरं मन्त्रवित् स्वस्त्ययनादिमन्त्रवेदित्री विजयैषिणी तारा स्वस्त्ययनं कृत्वा शोकमोहिता सती स्त्रीभिः सह अन्तःपुरं प्रविष्टा ॥ १२ ॥

रा० टी०–प्रविष्टायामिति । तारायां स्वमालयं प्रविष्टायां सत्यां क्रुद्धो महासर्प इव श्वसन् वाली नगर्याः किष्किन्धायाः निर्ययौ ॥ १३ ॥

गो० टी०–तत इति । मन्त्रवत् स्वस्त्ययनमन्त्रवत् । मन्त्रश्च वैदिकादन्य इति शेषः ॥ १२ ॥ १३ ॥

१४] ति० टी०–सर्वतो दृष्टिं चारयन् । स्थित इति शेषः ॥ १४ ॥

रा० टी०–स इति । महारोषः स वाली शत्रुदर्शनकाङ्क्षया सर्वतो दृष्टिं चारयन्सन् सुसंवीतं बद्धकक्षादिम् अवष्टब्धं दृढं स्थितमनलमिव दीप्यमानं सुग्रीवं ददर्श, श्रीमान्स सुग्रीवोऽपि ततस्तं वालिनं ददर्श । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–स निःश्वस्येति । चारयन् प्रस्थित इति शेषः ॥ १४ ॥

१५–१६] ति० टी०–सुसंवीतं बद्धकच्छम्, अवष्टब्धं युयुत्सया दृढं भूमिमाक्रम्य स्थितम् ॥ १५ ॥ १६ ॥

गो० टी०–स ददर्शेति । सुसंवीतं वाससा सुष्ठु परिवीतम् । अवष्टब्धं युयुत्सया भूमिमाक्रम्य स्थितम् ॥ १६ ॥

रा० टी०–तमिति । महाबाहुर्वाली सुग्रीवं पर्यवस्थितं दृष्ट्वा वासः वस्त्रं गाढं परिदधे ॥ १६ ॥

गो० टी०–स तमिति । पर्यवस्थितं समीपे अवस्थितम् ॥ १६ ॥

१७] ति० टी०–गाढं संवीतो दृढं बद्धकच्छः ॥ १७ ॥

रा० टी०–स इति । गाढसंवीतः दृढं बद्धकटिः कृतक्षणः प्रकटितयुद्धोत्सवः अभिमुखः सुग्रीवसंमुखे स्थितः स वाली योद्धुं सुग्रीवं ययौ ॥ १७ ॥

गो० टी०–स वालीति । कृतक्षणः कृतोत्सवः लब्धावसरो वा 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः' इत्यमरः ॥ १७–२० ॥

१८–१९] ति० टी०–सुग्रीवोऽपि वालिनं समुद्दिश्य श्लिष्टं दृढबद्धं मुष्टिमुद्यम्य किंचित्संमुखमागतः ॥ १८ ॥ १९ ॥

रा० टी०–श्लिष्टमिति । सुग्रीवोऽपि संरब्धतरमतिक्रुद्धं वालिनं समुद्दिश्य श्लिष्टं दृढं बद्धं मुष्टिं समुद्यम्य उत्थाप्य आगतः वालिसमीपं प्राप्तः ॥ १८ ॥

रा० टी०–तमिति । रणकोविदं रणे चतुरं क्रोधताम्राक्षं महावेगमापतन्तं सुग्रीवमिदं वचनमब्रवीत् ॥ १९ ॥

२०] ति० टी०–वेगविमुक्तः त्वदुपरीति शेषः ॥ २० ॥

रा० टी०–तद्वचनाकारः–एष इति । गाढः दृढः मया बद्धः सुनियताङ्गुलिः सुनियता यथोचितसंनिवेशिता अङ्गुलयो यस्मिन् स एष महान्मुष्टिः मया वेगविमुक्तः सन् ते प्राणान् आदाय यास्यति ॥ २० ॥

२१] ति० टी०–एवमुक्तो वालिना तव प्राणान्हरन्नेष मुष्टिर्मामकस्तव मूर्ध्नि पतत्वित्यब्रवीत् ॥ २१ ॥

---

१ नगरादिति गो. पाठः । २ तेजा इति गो. पाठः । ३ रोषण इति गो.पाठः । ४ स तं दृष्ट्वा महावीर्यमिति गो. पाठः । ५ रोषण इति गो.पाठः । ६ ताम्राक्ष इति गो. पाठः । ७ पण्डितमिति गो. पाठः । ८ मयेति गो. पाठः । ९ संनिहिताङ्गुलिरिति गो. पाठः । १० एव चाहरन्निति गो. पाठः ।

ताडितस्तेन तं क्रुद्धः समभिक्रम्य वेगतः । अभवच्छोणितोद्गारी सापीड इव पर्वतः ॥ २२ ॥
सुग्रीवेण तु निःशङ्कं सालमुत्पाट्य तेजसा । गात्रेष्वभिहतो वाली वज्रेणेव महागिरिः ॥ २३ ॥
स तु वृक्षेण निर्भग्नः सालताडनविह्वलः । गुरुभारभराक्रान्तो नौः ससार्थेव सागरे ॥ २४ ॥
तौ भीमबलविक्रान्तौ सुपर्णसमवेगितौ । प्रयुद्धौ घोरवपुषौ चन्द्रसूर्याविवाम्बरे ॥ २५ ॥
परस्परमित्रघ्नौ छिद्रान्वेषणतत्परौ । ततोऽवर्धत वाली तु बलवीर्यसमन्वितः ॥ २६ ॥
सूर्यपुत्रो महावीर्यः सुग्रीवः परिहीयते । वालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ॥ २७ ॥
वालिनं प्रति सामर्षो दर्शयामास राघवम् । वृक्षैः सशाखैः [1]शिखरैर्वज्रकोटिनिभैर्नखैः॥ २८ ॥
मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः । तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव ॥ २९ ॥
तौ शोणिताक्तौ युध्येतां वानरौ वनचारिणौ । मेघाविव महाशब्दैस्तर्जमानौ परस्परम् ॥ ३० ॥
हीयमानंमथापश्यत्सुग्रीवं वानरेश्वरम् । [11]प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥ ३१ ॥

रा० टी०–एवमिति । एवमुक्तः अत एव क्रुद्धः सुग्रीवस्तव प्राणान् हरन् सन् एषः मया बद्धो मुष्टिस्तव मूर्धनि पततु इति वालिनमब्रवीत् ॥ २१ ॥

गो० टी०–एवमिति । पततु मूर्धनीत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ २१ ॥

२२] ति० टी०–सुग्रीवमभिक्रम्याक्रम्य स्थितेन वालिना वेगतस्ताडितः सुग्रीवः सापीडः सनिर्झरः पर्वत इवाभवत्॥२२॥

रा० टी०–ताडित इति । समभिक्रम्य द्रुतं सुग्रीवसमीपं संप्राप्य तेन वालिना वेगतस्ताडितः अत एव संक्रुद्धः सुग्रीवः सापीडः निर्झरसहितः पर्वत इव शोणितोद्गारी शोणितप्रवाहवान् अभवत् ॥ २२ ॥

गो० टी०–ताडित इति । तेन वालिना ताडितः अत एव संक्रुद्धः वेगितः संजातवेगः पुनः प्रहारायेति शेषः । अत्र सुग्रीव इत्यध्याहार्यम् । सोत्पीडः सनिर्झरः ॥ २२ ॥ २३ ॥

२३–२४] ति० टी०–निःशङ्कं शोणितोद्गारजदुःखसंबन्धरहितं यथा तथाऽभिहतो वाली सागरे नौरिव विह्वलोऽभवत् ॥ २३ ॥ २४ ॥

रा० टी०–सुग्रीवेणेति । तेजसा अतिप्रभावेण उपलक्षितेन सुग्रीवेण सालमुत्पाट्य निःशङ्कं यथा भवति तथा वज्रेण महागिरिरिव वाली गात्रेषु अभिहतः ॥ २३ ॥

रा० टी०–स इति । वृक्षेण निर्भग्नः अत एव सालताडनविह्वलः सालेन प्राप्तेन ताडनेन विह्वलः वाली ससार्थो सार्थैः सहिता अत एव गुरुभारभराक्रान्ता सागरे नौरिव अभवदिति शेषः ॥ २४ ॥

गो० टी०–स त्विति । नौः पोतः ॥ २४ ॥

२५–२६] ति० टी०–सुपर्णेन समं वेगितं वेगो ययोस्तौ । प्रकृष्टं युद्धं ययोस्तौ । चन्द्रसूर्याविवेति यथार्थातिशयोक्तिरेषा ॥ २५ ॥ २६ ॥

रा० टी०–ताविति । भीमबलविक्रान्तौ बलेन विक्रान्तौ कृतपादन्यासौ अत एव भीमौ भयंकरौ भीमावेव बलविक्रान्ताविति कर्मधारयः भयंकरबलेन कृतपादन्यासाविति वार्थौ वा । सुपर्णसमवेगितौ गरुडसमवेगं प्राप्तौ प्रयुद्धौ प्रवृद्धयुद्धविशिष्टौ घोरवपुषौ अमित्रघ्नौ शत्रुसूदनौ तौ वालिसुग्रीवौ अम्बरे चन्द्रसूर्याविव दृश्येते इति शेषः । सार्धश्लोक एकान्वयी ॥ २५ ॥

गो० टी०–ताविति । विक्रान्तौ विक्रमवन्तौ भीमबलौ च तौ विक्रान्तौ चेति कर्मधारयः । सुपर्णसमवेगिनौ गरुडवेगतुल्यवेगवन्तौ कर्मधारयान्मत्वर्थीयः । चन्द्रसूर्याविव पौर्णमासीचन्द्रसूर्याविव प्रवृद्धावभूतामित्यर्थः ॥ २५ ॥

रा० टी०–तत इति । ततः युद्धप्रवृद्ध्यनन्तरं बलवीर्यसमन्वितो वाली अवर्धत, सूर्यपुत्रः सुग्रीवस्तु परिहीयत आगमशास्त्रस्यानित्यवात् अडभावः ॥ २६ ॥

गो० टी०–तत इति । अवर्धत तेजसेति शेषः । परिहीयते पर्यहीयतेत्यर्थः ॥ २६ ॥

२७] ति० टी०–परिहीयत । अडभाव आर्षः ॥ २७ ॥

रा० टी०–वालिनेति । वालिना भग्नदर्पः अत एव मन्दविक्रमः अत एव वालिनं प्रति सामर्षः अमर्षसहितः सुग्रीवः राघवं दर्शयामास बोधयामास स्वहानिं वालिनो वृद्धिं चेति शेषः २७

गो० टी०–वालिनेति । लाघवं शैथ्यम् 'लघु माधुर्यशीघ्रयोः' इति निघण्टुः ॥ २७ ॥

२८–२९] ति० टी०–राघवं दर्शयामास स्वहानिमिति शेषः ॥ २८ ॥ २९ ॥

रा० टी०–सिंहावलोकनन्यायेन तयोर्युद्धमेव वर्णयति–वृक्षैरित्यादिभिः । वृक्षादिभिस्तयोर्वालिसुग्रीवयोः वृत्रवासवयोरिव घोरं युद्धमभूत् । सार्धश्लोक एकान्वयी ॥ २८ ॥ २९ ॥

गो० टी०–वृक्षैरित्यादि । तयोर्युद्धमभूद्घोरमिति पाठः२८

३०–३१] ति० टी०–युध्येतामयुध्येताम् ॥ ३० ॥ ३१ ॥

रा० टी०–ताविति । शोणिताक्तौ रुधिरलिप्तौ महाश-

१ संक्रुद्ध इति गो. पाठः । २ सोत्पीड इति गो. पाठः । ३ सङ्गमिति गो. पाठः । ४ वाली प्रचलित इति गो. पाठः । ५ क्रान्तो नौसार्थ इति गो. पाठः। ६ समवेगिनाविति गो. पाठः । ७ हीयते इति गो. पाठः । ८ लाघवमिति गो. पाठः । ९ सशिखैरिति गो.पाठः । १० अथोऽपश्यदिति गो. पाठः । ११ वीक्षेति गो. पाठः ।

ततो रामो महातेजा आर्तं दृष्ट्वा हरीश्वरम् । सं शरं वीक्षते वीरो वालिनो वधकाङ्क्षया ॥ ३२ ॥
ततो धनुषि संधाय शरमाशीविषोपमम् । पूरयामास तच्चापं कालचक्रमिवान्तकः ॥ ३३ ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः । प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥ ३४ ॥
मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसंनिभः । राघवेण महाबाणो वालिवक्षसि पातितः ॥ ३५ ॥
ततस्तेन महातेजा [3]वीर्ययुक्तः कपीश्वरः । वेगेनाभिहतो वाली निपपात महीतले ॥ ३६ ॥
इन्द्रध्वज इवोद्भूतः पौर्णमास्यां महीतले । आश्वयुक्समये मासि गतसत्त्वो विचेतनः ॥
बाष्पसंरुद्धकण्ठस्तु वाली चार्तस्वरः शनैः ॥ ३७ ॥
नरोत्तमः काल इवान्तकोपमं शरोत्तमं काञ्चनरूपभासितम् ।
ससर्ज दीप्तं तममित्रमर्दनं सधूममग्निं मुखतो यथा हरः ॥ ३८ ॥

व्दैर्मेघाविव तर्जमानौ वानरौ तौ वालिसुग्रीवौ परस्परं युध्येताम् ॥ ३० ॥

रा० टी०–हीयमानमिति । अथ सुग्रीवबोधनानन्तरं राघवः हीयमानं क्षीणतां प्राप्नुवन्तमत एव मुहुर्मुहुः दिशः प्रेक्षमाणं सुग्रीवमपश्यत् ॥ ३१ ॥

गो० टी०–ताविति युध्येताम् अयुध्येताम् । तर्जमानाविति उभयत्र आगमशासनस्यानित्यत्वादडभावः सुमभावश्च २९॥३०॥

३२-३३] ति० टी०–स रामः शरं वीक्षते स्म॥३२॥३३॥

रा० टी०–तत इति । महातेजाः स रामः हरीश्वरं सुग्रीवमार्तं दृष्ट्वा वालिनो वधकाङ्क्षया शरं बाणं वीक्षते व्यैक्षत ॥३२॥

गो० टी०–ततो राम इति । शरं वीक्षते वालिवधोचितं शरं पर्यालोचयदित्यर्थः ॥ ३१ ॥

रा० टी०–तत इति । ततः धनुःकर्मकवीक्षणानन्तरमाशीविषोपमं शरं धनुषि संधाय तत् शरसहितं चापं कालचक्रमन्तक इव पूरयामास आकर्णान्तमाकृष्टवानित्यर्थः ॥ ३३ ॥

गो० टी०–तत इति । कालचक्रं यमस्यायुधविशेषः॥३२॥

३४] ति०. टी०–पत्ररथाः पक्षिणः ॥ ३४ ॥

रा० टी०–तस्येति । तस्य चापस्य ज्यातलघोषेण त्रस्ताः उद्विग्ना पत्ररथेश्वराः पक्षिराजाः मृगाश्च युगान्ते प्रलयसमये मोहिता जना इव प्रदुद्रुवुः ॥ ३४ ॥

गो० टी०–तस्येति । पत्ररथेश्वराः पक्षिश्रेष्ठाः ॥ ३३ ॥

३५-३६] ति० टी०–मुक्तो बाणः पातित इत्यर्थः ३५॥३६

रा० टी०–मुक्त इति । मुक्तः ज्यायाः प्रच्युतः वज्रनिर्घोषः वज्रनिर्घोषसदृशनिर्घोषविशिष्टः प्रदीप्ताशनिसंनिभः प्रदीप्तवज्रसदृशप्रदीप्तिविशिष्टः महाबाणः राघवेण वालिवक्षसि पातितः॥३५॥

गो० टी०–मुक्तस्त्विति । वज्रस्येव निर्घोषो यस्य तथा प्रदीप्ताशनिसंनिभः प्रदीप्तविद्युत्तुल्यः । 'अंशनिस्तु द्वयोर्वज्रे सौदामिन्याम्' इति वर्षणः ॥ ३४ ॥

रा० टी०–तत इति । तेन महाबाणेन वेगेन अभिहतः कपीश्वरो वाली ततस्तस्मिन्महीतले निपपात ॥ ३६ ॥

गो० टी०–तत इत्यादिश्लोकद्वयमेकान्वयम् । उद्भूतः पातितः । आश्वयुक्समये अश्वयुक्समयरूपे मासि पौर्णमास्यां महीतले पातित इत्यन्वयः ॥ ३५ ॥ ३६ ॥

३७] ति० टी०–आश्वयुक्समये आश्वयुगाश्वयुजी पौर्णमासी यत्र मासे तस्मिन्नाश्विने मासि पौर्णमास्यामिन्द्रध्वजोत्सवान्ते उद्भूत उत्क्षिप्त इन्द्रध्वजो यथा भूमौ पतात तद्वद्वाली ग्रीष्मान्ते पतित इत्यर्थः । अत एव सुग्रीवाभिषेकसमये श्रावणो मासोऽधुना वर्तते इति वचनेन न विरोधः ॥ ३७ ॥

रा० टी०–इन्द्रेति । आश्वयुक्समये आश्वयुजी पौर्णमासी अस्ति अस्मिन् स एव समयस्तस्मिन्मासि । किंच आश्वयुजः अश्विनीयुक्तपौर्णमास्याः सम्यक् अयः प्राप्तिर्यस्मिन् तस्मिन् आश्विने इत्यर्थः, पौर्णमास्यामुद्भूतः प्रक्षिप्तः इन्द्रध्वज इव उद्भूतः अत एव गतसत्त्वोऽत एव विचेतनः अत एव बाष्पसंरुद्धकण्ठः अत एव शनैः आर्तस्वरः वाली आसीदिति शेषः । गौडदेशे कस्मिंश्चिदुत्सवे आश्विनपूर्णिमायामिन्द्रमुद्दिश्य ध्वजं संस्थाप्योत्सवोत्तरं प्रक्षिपन्तीति प्रसिद्धम् । सार्धश्लोक एकान्वयी ॥ ३७ ॥

३८] ति० टी०–उक्तमुपसंहरति–नरोत्तम इति । मुखतः मुखस्थललाटनेत्रेणेत्यर्थः ॥ ३८ ॥

रा० टी०–उपसंहरन्नाह–नरोत्तम इति द्वाभ्याम् । नरोत्तमः रामः कालयुगान्तकोपमं युगान्तकालसदृशं काञ्चनरूपभूषितं यथोचितं स्वर्णरजताभ्यामलंकृतम् अमित्रमर्दनं शत्रुसूदनं शरोत्तमं ससर्ज । तत्र दृष्टान्तः सधूमं धूमसहितं दीप्तमग्निं मुखतः मुखात् हरो यथा ॥ ३८ ॥

गो० टी०–उक्तमर्थं वृत्तान्तरेण संगृह्णाति–नरोत्तम इत्यादिश्लोकद्वयेन । कालयुगान्तकोपमं युगान्तकालोपममित्यर्थः, स्वार्थे कप्रत्ययः । युगान्तकालो युगान्तमृत्युः । काञ्चनरूप्यभूषितं परभागाय स्वर्णरजताभ्यामलंकृतम् । सधूममित्यनेन ज्वालोन्मुखत्वमुच्यते । हरः प्रलये संहर्ता । नन्वत्र एकवचनादेकेन बाणेन वाली हत इत्युक्तम् । इदम् उत्तरत्र तारावाक्येन

१ शरं चेति गो. पाठः । २ कारणादिति गो. पाठः । ३ वीर्योत्सिक्त इति गो. पाठः । ४ श्रीक इति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ रूप्यभूषितामिति गो. भूषितमिति रा. पाठः ।

अथोक्षितः शोणिततोयविस्रवैः प्रपुष्पिताशोक इवाचलोद्गतः ।
विचेतनो वासवसूनुराहवे प्रभ्रंशितेन्द्रध्वजवत्क्षितिं गतः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ।

उरसि विदीर्णोऽपि शक्रदत्तमालाप्रभावेण प्राणैस्तेजसा चाहीयमानो वाली रुषा रामं बहुविधं निनिन्द ।

ततः शरेणाभिहतो रामेण रणकर्कशः । पपात सहसा वाली निकृत्त इव पादपः ॥ १ ॥
स भूमौ न्यस्तसर्वाङ्गस्तप्तकाञ्चनभूषणः । अपतद्देवराजस्य मुक्तरश्मिरिव ध्वजः ॥ २ ॥
अस्मिन्निपतिते भूमौ हर्यृक्षाणां गणेश्वरे । नष्टचन्द्रमिव व्योम न व्यराजत मेदिनी ॥ ३ ॥
भूमौ निपतितस्यापि तस्य देहं महात्मनः । न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः ॥ ४ ॥
शक्रदत्ता वरा माला काञ्चनी रत्नभूषिता । दधार हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा ॥ ५ ॥
स तया मालया वीरो हैमया हरियूथपः । संध्यानुगतपर्यन्तः पयोधर इवाभवत् ॥ ६ ॥

'रामेण प्रहितै रौद्रैर्मार्गणैर्दूरपातिभिः, इत्यनेन बहुबाणहतत्ववचनेन विरुध्यते । मैवं व्याकुलवचनत्वात्तस्य । यतः तारा एकबाणहतं श्रुत्वाऽप्येवमाह । वक्ष्यति हि–'तं भार्या बाणमोक्षेण रामदत्तेन संयुगे । हतं प्लवगशार्दूलं तारा शुश्राव वालिनम्' इति । स्वर्गोपक्रमे च 'निजघान च तत्रैनं शरेणैकेन राघवः' इत्यत्र एकशब्दः प्रयुक्तः । प्रतिज्ञातं च रामेण तथा वालिवधं प्रतीति प्रतिज्ञानिर्वाहाय छद्मनाऽपि वालिवधः कृतः ॥ ३७ ॥ ३८ ॥

अस्मिन् सर्गे एकोनचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

३९] ति० टी०–शोणिततोयस्य विस्रवैः स्रुतिभिः । प्रभंशित उत्सवान्ते पातितः ॥ ३९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०–अथेति । शोणिततोयविस्रवैः शोणितप्रस्वेदयोः च्युतिभिः उक्षितः सिक्तः विचेतनः वासवसूनुर्वाली अनिलोद्धतः वायुना पातितः प्रपुष्पिताशोक इव प्रभंशितेन्द्रध्वज इव च क्षितिं गतः ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षोडशः सर्गः ॥ १६ ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–वालिवृत्तान्तमेव वर्णयन्नाह–तत इत्यादिभिः । ततः शरप्रक्षेपानन्तरं रामेण कर्त्रा शरेण करणेन अभिहतः रणकर्कशो वाली निकृत्तः छिन्नः पादप इव सहसा पपात ॥१॥

गो० टी०–अथ रामं प्रति वालिनिन्दा सप्तदशे—ततः शरेणेत्यादि । आरम्भणार्थोऽयमनुवादः ॥ १ ॥

२] ति० टी०–मुक्तरश्मिर्मुक्तरथरज्जुबन्धनः ॥ २ ॥

रा० टी०–स इति । तप्तकाञ्चनभूषणः स वाली मुक्तरश्मिः त्यक्तबन्धनरज्जुः अत एव भूमौ न्यस्तसर्वाङ्गः देवराजस्य ध्वज इव अपतत् ॥ २ ॥

गो० टी०–स भूमाविति । रश्मिः बन्धनरज्जुः ॥२॥३॥

३-४] ति० टी०–मेदिनी तद्राज्यभूमिः ॥ ३ ॥ ४ ॥

रा० टी०–तस्मिन्निति । हर्यृक्षाणां हरीणाम् ऋक्षाणां च गणेश्वरे तस्मिन् वालिनि भूमौ निपतिते सति मेदिनी पृथिवी नष्टचन्द्रं व्योमाकाशमिव न व्यराजत ॥ ३ ॥

रा० टी०–भूमाविति । भूमौ निपतितस्यापि महात्मनस्तस्य वालिनो देहं श्रीप्रभृतिर्न जहाति ॥ ४ ॥

गो० टी०–भूमाविति । तेजः प्रतापः ॥ ४ ॥

५] ति० टी०–प्राणाग्रहाने कारणमाह–शक्रेति ॥ ५ ॥

रा० टी०–तत्र कारणमाह–शक्रेति । रत्नभूषिता काञ्चनी स्वर्णमयी अत एव वरा शक्रदत्ता सा प्रसिद्धा माला हरिमुख्यस्य वालिनः प्राणादीन् दधार धारयामास । एतेन मालायाः प्रभावातिशयः सूचितः ॥ ५ ॥

गो० टी०–उक्तेऽर्थे हेतुमाह–शक्रेति ॥ ५ ॥

६] ति० टी०–हैमया हैम्न्या संध्यया संध्यारागेणानुगतः पर्यन्तो यस्य । पयोधरस्तार्क्ष्य तु वालिदेहस्य ॥ ६ ॥

रा० टी०–स इति । हरियूथपः स वाली तया इन्द्रदत्तया हैमया हैम्न्या मालया संध्यानुगतपर्यन्तः संध्यारागव्याप्तः पयोधरो मेघ इव अभवत् ॥ ६ ॥

---

१ सुपुष्पितेति गो. पाठः । २ ऽनलोद्धत इति गो. ऽनिलोद्धत इति रा. पाठः । ३ तस्मिन्निति गो. रा. पाठः । ४ वानराणामिति गो. पाठः । ५ भूतलमिति गो. पाठः ।

तस्य माला च देहश्च मर्मघाती च यः शरः । त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते ॥ ७ ॥
तदस्य तस्य वीरस्य स्वर्गमार्गप्रभावनम् । रामबाणासनक्षिप्तमावहत्परमां गतिम् ॥ ८ ॥
तं तथा पतितं संख्ये गतार्चिषमिवानलम् । [बहु मान्य च तं वीरं वीक्षमाणं शनैरिव]
ययातिमिव पुण्यान्ते देवलोकादिह च्युतम् । ॥ ९ ॥
आदित्यमिव कालेन युगान्ते भुवि पातितम् । महेन्द्रमिव दुर्धर्षमुपेन्द्रमिव दुःसहम् ॥ १० ॥
महेन्द्रपुत्रं पतितं वालिनं हेममालिनम् । व्यूढोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम् ॥ ११ ॥
लक्ष्मणानुचरो रामो ददर्शोपससर्प च । तं तथा पतितं वीरं गतार्चिषमिवानलम् ॥ १२ ॥
बहुमान्य च तं वीरं वीक्षमाणं शनैरिव । उपयातौ महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
तं दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम् । अब्रवीत्परुषं वाक्यं प्रश्रितं धर्मसंहितम् ॥ १४ ॥

गो० टी०–स इति । हैमयेति स्त्रीत्वभाव आर्षः ॥ ६ ॥

७] ति० टी०–त्रिधा रचितेव त्रिधा विभक्तेव माला । देहशरूपा लक्ष्मीरिति यावत् ॥ ७ ॥

रा० टी०–तस्येति । पतितस्यापि तस्य वालिनो यो मालाप्रभृतिः शोभते स मालाप्रभृति त्रिधा रचिता विधात्रा निर्मिता लक्ष्मीः शरीरशोभेव ॥ ७ ॥

गो० टी०–तस्येति । लक्ष्मीः तेजः ॥ ७ ॥

८–९] ति० टी०–स्वर्गमार्गप्रभावनं तत्प्रकाशकं सत्परमां गतिं ब्रह्मलोकमावहत्प्रापयति स्म । बाणा अस्यन्तेऽनेनेति बाणासनं धनुः ॥ ८ ॥ ९ ॥

१०] ति० टी०–महेन्द्रमुपेन्द्रस्यैव इत्रवधोत्तरमिदं नामेत्येके । महेन्द्र आजानदेवः । उपेन्द्रः कर्मदेव इत्यन्ये ॥ १० ॥

११–१२] ति० टी०–हरिलोचनं पीतनेत्रम् । हरिच्छन्दः पीतपर्यायः । 'हरिद्राभः पालाशो हरितो हरित्' इति कोशः आर्षस्तलोपः ॥ ११ ॥ १२ ॥

रा० टी०–तदिति । स्वर्गमार्गप्रभावनं स्वर्गमार्गस्य साकेताध्वनः रामतत्त्वज्ञानस्येत्यर्थः, प्रभावनं स्वस्पर्शमात्रेण प्रापकं रामबाणासनक्षिप्तं रामबाणासनेन रामसंबन्धिधनुषा क्षिप्तं प्रक्षिप्तं वीरस्य तस्य रामस्य तत्प्रसिद्धमर्थं बाणः परमामत्युत्कृष्टां गतिं साकेतलोकमावहत् प्रापयितुमैच्छत् ॥ ८ ॥

गो० टी०–तदस्त्रमिति । स्वर्गमार्गस्य प्रभावनं प्रापकम् "भू, प्राप्तौ" इत्यस्माल्लुट् अत एव परमां गतिम् आवहत् संपादयामासेत्यर्थः ॥ ८ ॥

रा० टी०–तमिति । गतार्चिषं निर्वृत्तज्वालं पतितमनलमिव देवलोकात् इह पृथिव्यां च्युतं ययातिमिव युगान्ते कालेन भुवि पातितमादित्यमिव महेन्द्रमिव दुर्धर्षम् उपेन्द्रं वामनमिव दुःसहं व्यूढोरस्कं व्यूढं विशालमुरो यस्य स तं महाबाहुमाजानुबाहुविशिष्टं दीप्तास्यं प्रकाशितमुखविशिष्टं हरिलोचनं पीतवर्णविशिष्टलोचनविशिष्टं संख्ये संग्रामे पतितं महेन्द्रपुत्रं वालिनं लक्ष्मणोऽनुचरो यस्य स रामो ददर्श उपससर्प तत्समीपदेशसंयोगानुकूलव्यापारं चकार । हरितशब्दः पीतवचनः 'पालाशो हरितो हरित्' इति कोशः । तकारलोप आर्षः इति भट्टाः। वस्तुतस्तु हरिशब्दस्यापि पीतवाचकत्वम् 'स्वर्णवर्णो हरिः स्मृतः' इत्यनेकार्थः । सार्धश्लोकत्रयमेकान्वयि ॥९–११॥

रा० टी०–तमिति । गतार्चिषमनलमिव संख्ये तथा पतितं वीरपरिपाट्या संग्रामभुवि लुण्ठितम् अत एव बहुमान्यमधिकं सत्करणीयं वीक्ष्यमाणं दृष्टिपथं प्राप्तं वीरं तं प्राप्तमोक्षं तं वालिनं भ्रातरौ रामलक्ष्मणौ शनैरुपयातौ 'तश्चौरामृतपुच्छेषु' इति कोशः । सार्धश्लोक एकान्वयी ॥१२॥१३॥

गो० टी०–तं तदेत्यादिचत्वारः । संख्ये युद्धे तं वीरं रामं बहुमान्य साधु बाणं पातितवानसीति श्लाघयित्वा स क्व स्थित इति शनैः वेदनातिशयान्मन्दं वीक्षमाणम् । इवशब्दो वाक्यालंकारे । ययातिमिव कालेन दैवेन 'कालः श्यामलदिष्टयोः' इति दर्पणः । महेन्द्रमिव दुःसहम् आभिमुख्येन स्थातुमशक्यम् । सिंहेति । दीप्तास्यं दीप्तमुखं हरिलोचनं कपिलनेत्रम् ॥ ९–१२ ॥

१३–१४] ति० टी०–बहुमान्य संमान्य । शनैरेवोपयातौ समीपं गतौ ॥ १३ ॥ १४ ॥

रा० टी०–तमिति । तं स्वसमीपं प्राप्तं रणगर्वितं रणगर्वित्वं तनोति स्वाश्रितेषु विस्तारयति यदाश्रयात्कातरा अपि शूरा भवन्तीत्यर्थः, तं राघवं लक्ष्मणं च दृष्ट्वा परुषं परुषत्वेन प्रतीयमानं प्रश्रितं नम्रतासूचकं धर्मसंहितं धर्मसंयुक्तं गर्वितं स्वगर्वसूचकं वाक्यमर्थसंहितया स्वार्थयुक्तया वाचा नित्यं युक्त इति शेषः, स्वार्थसाधकवचनपरायण इत्यर्थः, निहतः रामबाणेन विद्धः अत एव भूमौ पतित इति शेषः, अत एव अल्पतेजोहतः अल्पतेजोऽल्पप्राणविशिष्टः अत एव नष्टचेतनः विनष्टबुद्धिः स वाली अब्रवीत् । किंच अग-

---

१ तदेति गो. पाठः । २ अर्धमेतदधिकं गो. पाठे । ३ लोकात्परिच्युतमिति गो. पाठः । ४ महेन्द्रमिवेति गो. पाठः । ५ सिंहोरस्कमिति गो. पाठः । ६ गत इति गो. पाठः । ७ एतदादिः सार्धश्लोकः गो. नास्ति । ८ मान्यमिति रा. पाठः ।

स भूमावल्पतेजोसुर्निहतो नष्टचेतनः । अर्थसंहितया वाचा गर्वितं रणगर्वितम् ॥ १५ ॥
[त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः । कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः ॥]
पराङ्मुखवधं कृत्वा कोऽत्रै प्राप्तस्त्वया गुणः । यदहं युद्धसंरब्धस्त्वत्कृते निधनं गतः ॥ १६ ॥
कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः । रामः करुणवेदी च प्रजानां च हिते रतः ॥ १७ ॥
सानुक्रोशो महोत्साहः समयज्ञो दृढव्रतः । इत्येतत्सर्वभूतानि कथयन्ति यशो भुवि ॥ १८ ॥
दमः शमः क्षमा धर्मो धृतिः सत्त्वं पराक्रमः । पार्थिवानां गुणा राजन्दण्डश्चाप्यपकारिषु ॥ १९ ॥
तान्गुणान्संप्रधार्याहमग्र्यं चाभिजनं तव । तारया प्रतिषिद्धः सन्सुग्रीवेण समागतः ॥ २० ॥
न मामन्येन संरब्धं प्रमत्तं वेद्धुमर्हसि । इति ते बुद्धिरुत्पन्ना बभूवादर्शने तव ॥ २१ ॥
सै त्वां विनिहतात्मानं धर्मध्वजमधार्मिकम् । जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥ २२ ॥

र्वितमिति छेदः तद्रामविशेषणं रणगर्वितमिति वाक्यविशेषणम् । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०-तं दृष्ट्वेति । प्रश्रितं विनयान्वितम् इत्येवं पाठक्रमः साधुः ॥ १३ ॥

१५] ति० टी०-अल्पं तेजोऽसवश्च यस्य सः । नष्टचेतनो नष्टचेष्टः । गर्वितं गर्वोपेतं यथा भवति तथा रणगर्वितं राममर्थयुक्तया वाचा परुषमब्रवीदित्यन्वयः ॥ १५ ॥

गो० टी०-प्रश्रितं वचनमाह-त्वमित्यादिना । प्रियदर्शनः प्रियं दर्शनं शास्त्रं यस्य सः ' दर्शनं दृशि शास्त्रे स्यात् इति दर्पणः । पराङ्मुखवधं परयुद्धासक्तवधम् । गुणः उत्कर्षः । युद्धसंरब्धः अन्ययुद्धपराङ्मुख इत्यर्थः ॥ १४ ॥ १५ ॥

१६-१७] ति० टी०-पराङ्मुखवधं युयुत्सया त्वदनभिमुखवधम् । तदेवाह-युद्धसंरब्धो युद्धार्थमन्यस्मै कृतक्रोधः ॥ १६ ॥ १७ ॥

१८] ति० टी०-समयज्ञ उचितानुचितकालज्ञः ॥ १८ ॥

रा० टी०-तद्वचनाकारमाह-पराङ्मुखेति । पराङ्मुखवधं युद्धोन्मुखरहितजनहिंसां कृत्वा कः गुणः प्राप्तः, केन पुरुषेणेति शेषः । यत् यस्मात् गुणात् अत्र समये युद्धसंरब्धः अन्येन योद्धुमाश्रितकोपोऽहं त्वत्कृते त्वद्व्यापारे जाते निधनं मृत्युं गतः 'शरेणोरसि ताडितः' इति तीर्थपुस्तकपाठः । अन्येन योद्धुमाश्रितकोपोऽहमित्युक्त्या रामसुग्रीवयोर्मैत्री जातेति तयोश्चैक्यमेवेत्यंशे वालिनः परमज्ञानं सूचितम् ॥ १६ ॥

रा० टी०-कुलीन इति । कुलीनः शोभनकुले प्रादुर्भूतः सत्त्वसंपन्नः प्राकृतविलक्षणसत्त्वगुणयुक्तस्तेजस्वी अतिशयतेजोविशिष्टः चरितव्रतः चरितानि कृतानि व्रतानि वेदोक्तकर्माणि येन सः करुणवेदी करुणं दयावन्तं वेत्ति स्वकीयत्वेन जानाति तच्छीलः प्रजानां हिते इष्टसाधने रतः सानुक्रोशः दयासहितः महोत्साहः महान् ध्वंसाप्रतियोगित्वेन अतिप्रशंसनीयः उत्साहो यस्य सः, समयज्ञः समयं कार्योचितकालं जानाति सः दृढव्रतः अप्रच्युतसंकल्पः रामोऽस्ति इत्येतत् तव यशः भुवि सर्वभूमौ सर्वभूतानि सर्वे प्राणिनः कथयन्ति अत एव हे राजन् ! पार्थिवानां ये दमादयो गुणास्तान् गुणान् संप्रधार्य त्वयि निश्चित्य अग्र्यं सर्वोत्कृष्टं तवाभिजनं महाकुलोद्भवत्वं च संप्रधार्य तारया प्रतिषिद्धः सन्नप्यहं सुग्रीवेण समागतः योद्धुं प्राप्तः । श्लोकचतुष्टयमेकान्वयि॥१७-२०॥

गो० टी०-राम इति । करुणवेदी कारुण्यज्ञः, सानुक्रोशः सदयः । समयज्ञः आचारज्ञः ते यश इत्यन्वयः ॥ १६ ॥

१९] ति० टी०-दमशमावन्तर्बाह्येन्द्रियनिग्रहः । क्षमा शक्यप्रतिक्रियापकारसहिष्णुता ॥ १९ ॥

गो० टी०-दम इति । 'शमश्चित्तप्रशान्तिः स्यादम इन्द्रियनिग्रहः' ॥ १७ ॥

२०] ति० टी०-तान्राजयोग्यान् । अभिजनं महाकुलप्रसूतत्वम् ॥ २० ॥

गो० टी०-अभिजनमाभिजात्यम् । समागतः युद्धं कृतवानस्मीत्यर्थः ॥ १८ ॥

२१] ति० टी०-अन्येन संयुक्तम्, अत एव ते त्वयि प्रमत्तमसावधानं मां न वेद्धुमर्हसीति बुद्धिस्तवादर्शने तव दर्शनात्प्रागुत्पन्ना ॥ २१ ॥

रा० टी०-नन्वं किमेतत् निश्चयेनेत्यत आह-नेति । अन्येन संरब्धं योद्धुं जातकोपम् अत एव प्रमत्तं त्वत्तोऽनवधानं मां वेद्धुं बाणेन ताडयितुं नार्हति राम इति शेषः, इति मे बुद्धिः तवादर्शने त्वत्कर्मकदर्शनाभावे उत्पन्ना बभूव ॥२१॥

गो० टी०-न मामिति । प्रमत्तं युद्धपरवशम् । अर्हति उक्तगुणो राम इति शेषः । अदर्शने तव दर्शने त्वेवमभूदिति भावः ॥ १९ ॥

२२] ति०टी०-विनिहतात्मानमधर्माचरणान्नष्टात्मानम्२२

रा० टी०-नन्वं ममैतेनाभेद एवेत्यत आह-नेति । पापसमाचारं पापाचरणशीलम् अत एव अधार्मिकं धार्मिकप्रतियोगिकभेदविशिष्टम् अत एव विनिहतात्मानं विनिहतस्त्वया घातितः आत्मा मम देहो येन तं तृणैरावृतं कूपमिव तु-

१ 'स भूमा' एतत्स्थानेऽयं श्लोकः गो.पाठे। २ न्विति गो.पाठः। ३ शरेणोरसि ताडित इति गो.पाठः। ४ अर्थमेतत् गो.नास्ति ५ जितोत्साह इति गो.पाठः। ६ इति ते इति गो. पाठः । ७ सत्यमिति गो. पाठः । ८ऽपीति गो.पाठः । ९ योद्धुमर्हतीति गो. रा. पाठः । १० मे इति रा.पाठः। ११ नेति गो.रा.पाठः।

सतां वेषधरं पापं प्रच्छन्नमिव पावकम् । नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतम् ॥ २३ ॥
विषये वा पुरे वा ते यदा पापं करोम्यहम् । न च त्वामवजानेऽहं[4] कस्मात्त्वं हंस्यकिल्बिषम् २४॥
फलमूलाशनं नित्यं वानरं वनगोचरम् । मामिहाप्रतियुध्यन्तमन्येन च समागतम् ॥ २५ ॥
[3]त्वं नराधिपतेः पुत्रः प्रतीतः प्रियदर्शनः । लिङ्गमप्यस्ति ते राजन्दृश्यते धर्मसंहितम् ॥ २६ ॥
कः क्षत्रियकुले जातः श्रुतवान्नष्टसंशयः । धर्मलिङ्गप्रतिच्छन्नः क्रूरं कर्म समाचरेत् ॥ २७ ॥
[3]त्वं राघवकुले जातो धर्मवानिति विश्रुतः । अभव्यो भव्यरूपेण किमर्थं परिधा[5]वसे ॥ २८ ॥
साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ । पार्थिवानां गुणा राजन्दण्डश्चाप्यपकारिषु ॥ २९ ॥
वयं वनचरा राम मृगा मूलफलाशिनः । एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वर ॥ ३० ॥

णाच्छन्नकूपसदृशं सुग्रीवं धर्मध्वजं परमधर्मप्रकाशकं त्वामहं न जाने युवयोर्भेदाभावो न संभवतीत्यर्थः ॥ २२ ॥

गो० टी०–न त्वामिति । विनिहतात्मानं विशेषेण निहतबुद्धिम् । धर्मध्वजं धर्मलिङ्गम्, वस्तुतो धर्मरहितमित्यर्थः ॥ २० ॥

२३] ति० टी०–प्रच्छन्नं भस्मनेति शेषः । छद्म व्याजः॥२३॥

रा० टी०–असंभवे हेतुमाह–सतामिति । सतां सज्जनानां वेषधरं व्याप्तिधारकं सर्वज्ञतासंपादकमित्यर्थः, प्रच्छन्नं भस्मादिभिरावृतं पावकमिव तिरोहितस्वप्रकाशत्वात्मकमित्यर्थः, त्वां धर्मच्छद्माभिसंवृतं धर्मव्याजेन युक्तं पापं पापसंबन्धिनं सुग्रीवं नाभिजानामि केनचित्प्रमाणेनाभेदं न निश्चिनोमीत्यर्थः ॥ २३ ॥

गो० टी०–एतदेव स्पष्टयति–सतामिति । धर्मच्छद्माभिसंवृतं धर्मव्याजयुक्तम् ॥ २१ ॥

२४–२५] ति० टी०–विषये देशे । यदा यस्मात्पापं न करोमि । नेत्यस्यानुकर्षः । त्वां नावजाने तवावज्ञां च न करोमि ॥ २४ ॥ २५ ॥

रा० टी०–नन्वभेदो मास्त्विस्यत आह–विषय इति । ते तव विषये स्वद्भोग्यदेशे पुरे वा यदा पापमपराधमहं न करोमि तदा अकिल्बिषम् अपराधरहितं नित्यं फलमूलाशनं वनगोचरं वनमात्रनिवासिनमप्रतियुध्यन्तं त्वया सह युद्धमकुर्वन्तमन्येन सुग्रीवेण समागतं युध्यन्तं मां त्वं कस्माद्हंसि । एतेन परमधर्मज्ञत्वत्कर्तृकानपराधिमत्कर्मकहननमेवाभेदं बोधयतीति सूचितम् । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–विषय इति । यदा नापकरोमि यस्मान्नापाकरवं त्वां नावजाने त्वय्यवमानं नाकरवमित्यर्थः, तस्मादकिल्बिषं मां किमर्थं हंसीति संबन्धः । फलेत्यस्य श्लोकस्य मामिति पूर्वेण संबन्धः ॥ २२ ॥ २३ ॥

२६–२७] ति० टी०–लिङ्गं जटाबल्कलधरत्वमस्ति मदहिंसासाधनमिति शेषः । तच्च प्रत्यक्षदृश्यमेवेत्याह–दृश्यत इति ॥ २६ ॥ २७ ॥

गो० टी०–लिङ्गमिति । हे राजन्! अधर्मसंहितम् अधर्मकृतं लिङ्गमपि ते अस्ति दृश्यते च स्पष्टमवगम्यते चेत्यर्थः । कुत इत्यत्राह–क इति ॥ २४ ॥ २६ ॥

२८–२९] ति० टी०–अभव्योऽविनीतः ॥ २८ ॥ २९ ॥

रा० टी०–स्ववधायोग्यत्वमेव बोधयन्नाह–त्वमिति । नराधिपतेः दशरथस्य पुत्रः अत एव प्रतीतः विश्वसनीयः प्रियदर्शनस्त्वमसीति शेषः । हे राजन्! लिङ्गं धर्मबोधकचिह्नं ते अस्ति अत एव ते धर्मसंहितं नित्यं धर्माचरणं दृश्यते प्रतीयते । एतेनापुत्रैतद्धननहेतुं त्वं ब्रूहीति सूचितम्, लिङ्गमप्यस्तीत्यनेन वालिनः सूक्ष्मदर्शित्वं व्यक्तम् ॥ २६ ॥

रा० टी०–प्राकृतोऽपि जनोऽनपराधिनं न हन्तीति बोधयन्नाह–क इति । श्रुतवान् शास्त्रश्रवणसंपन्नः अत एव नष्टसंशयः धर्माधर्मविषयकसंशयरहितः अत एव धर्मलिङ्गप्रतिच्छन्नः धर्मबोधकवाक्यार्थाधीनः क्षत्रियकुले जातः कः क्रूरं शास्त्रविरुद्धहिंसादिरूपं कर्म समाचरेत्, न कोऽपीत्यर्थः ॥ २७ ॥

रा० टी०–रामेति । हे राम! धर्मवानिति विश्रुतः प्रख्यातः भव्यरूपेण सकलसज्जनमङ्गलकारकत्वरूपेण राजकुले जातः प्रादुर्भूतः अभव्यः अचिन्तनीयप्रभावस्त्वं किमर्थं परिधावसि सुग्रीवेण सह परिभ्रमसि ॥ २८ ॥

गो० टी०–रामेति । अभव्यः क्रूरः भव्यरूपेण सौम्यरूपेण परिधावसि चरसि ॥ २६ ॥

रा० टी०–स्ववधस्यायोग्यत्वं बोधयितुं राजधर्मानाह–सामेति । हे राजन्! सामादयोऽष्टौ पार्थिवानां गुणाः, सन्तीति शेषः । एतेनाऽनपकारिमद्वधे तव धर्मच्युतिः स्यादिति सूचितम् ॥ २९ ॥

गो० टी०–सामेति । साम सान्त्वनम् ॥ २७ ॥

३०] ति० टी०–एषा वनचरत्वादिरूपा प्रकृतिः स्वभावः पुरुषस्त्वम्, तेन ग्रामवासित्वादज्ञात्वं व्यङ्ग्यम् ॥ ३० ॥

रा० टी०–नन्वज्ञातः कश्चिदपराधो भवेदित्यत आह–वयमिति । हे राम! वयं मृगाः अत एव वनचराः वनमात्रनिवासिनः अत एव मूलफलाशिनः स्म इति शेषः । ननु त्वत्क-

१ चेति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ राम राजेति गो. रा. पाठः । ४ धावसीति गो. पाठः । ५ अपराधिष्विति गो.पाठः । ६ अशना इति गो. पाठः । ७ नरेश्वरः इति गो. रा. पाठः ।

भूमिर्हिरण्यं रूपं च [1]निग्रहे कारणानि च । तत्र कस्ते वने लोभो मदीयेषु फलेषु वा ॥ ३१ ॥
नयश्च विनयश्चोभौ निग्रहानुग्रहावपि । राजवृत्तिरसंकीर्णा न नृपाः कामवृत्तयः ॥ ३२ ॥
त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः । राजवृत्तेषु संकीर्णः शरासनपरायणः ॥ ३३ ॥
न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता । इन्द्रियैः कामवृत्तः सन्कृष्यसे मनुजेश्वर ॥ ३४ ॥
हत्वा वाणेन काकुत्स्थ मामिहानपराधिनम् । किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम् ३५ ॥
राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः । नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ ३६ ॥

तृकपुरवासादौ को बोधक इत्यत आह—एषा वनचरत्वादिरूपाऽस्माकं प्रकृतिः स्वभावसिद्धा त्वं तु नरेश्वरः मनुष्यादिनियन्ता पुरुषोऽसीति शेषः। एतेन त्वन्निरूपितनियम्यत्वमपि मयि नास्तीति सूचितं तेन मयि तवापराधकर्तृत्वयोग्यता नास्तीति ध्वनितम् ॥ ३० ॥

गो० टी०—लोके कस्यचिद्वधे अपराधस्तदर्थलाभेच्छा वा हेतुर्भवेत् तत्र नाथ इत्याह—वयमिति । पुरुषः मनुष्यः नच केवलमनुष्यः अपि तु नरेश्वरः ॥ २८ ॥

३१] ति०टी०—रूपं रूप्यम् । कारणानि चेति आहुरिति शेषः । वने विद्यमानेषु मदीयेषु मूलेषु फलेषु वा कस्ते लोभोऽपेक्षा न कापीत्यर्थः। एवं च वनचरत्वपुरुषचरत्वमृगत्वमनुष्यत्वमूलाशनत्वाशनत्वनरेश्वरत्ववानरेश्वरत्वरूपवैधर्म्याश्रावयोर्विरोधप्रसक्तिरिति भावः ॥ ३१ ॥

रा० टी०—नन्वहं ममाखण्डमण्डलेश्वरत्वात् सर्वनियामकत्वे मन्निरूपितनियम्यत्वं त्वयि सिद्धमेवेत्यत आह—भूमिरिति । निग्रहे दण्डे नियमने कारणानि भूम्यादित्रीणि तत्र तेषु तवानुपयुक्तेषु अत एव मदीयेषु वनचरमात्रोपयोगिषु वने विद्यमानेषु फलेषु ते तव को लोभः लोभकारणं नास्तीत्यर्थः। एतेन अकारणकं नियमनं लोके न दृष्टमिति सूचितम् ॥ ३१ ॥

गो० टी०—द्वितीयोऽपि नेत्याह—भूमिरिति । लोके भूम्यादीनि कलहे कारणानि भवन्ति । अत्र अन्येषु वा मदीयेषु फलेषु ते को लोभः किंविषयेच्छा वर्तते ॥ २९ ॥

३२] ति टी०—नयो नीतिः । विनयः प्रश्रयः । असंकीर्णा निग्रहानुग्रहादिविषये विपरीता ॥ ३२ ॥

रा० टी०—नन्वहं स्वतन्त्रत्वात् यथेच्छं मम क्रियेत्यत आह—नय इति । नयो यथोचिताज्ञाप्रापणं, विनयः विनम्रता उभौ इमौ द्वौ निग्रहानुग्रहावप्युभौ असंकीर्णा वैपरीत्यरहिता राज्यवृत्तिरस्तीति शेषः, अतः नृपाः कामवृत्तयः अविहितस्वच्छन्दवर्तिनो न भवन्तीति शेषः ॥ ३२ ॥

गो० टी०—नयश्चेति । नयोऽनुग्रहश्च सद्राजधर्मौ विनयो विपरीतनयः निग्रहश्च कुराजधर्मौ इत्येषा राजवृत्तिरसङ्कीर्णा ज्ञाप्या । तथा च नृपाः कामवृत्तयो न स्युः । स्वेच्छया नयो विनयश्च निग्रहोऽनुग्रहश्च राजाभिर्न कार्या इत्यर्थः ॥ ३० ॥

३३] ति० टी०—शरासनपरायणो यत्र क्वापि शराणामासनं त्यागस्तत्परायणः ॥ ३३ ॥

रा० टी०—त्वमिति । त्वं तु कामप्रधानः कामः कामी सुग्रीवः प्रधानो यस्य सः तत्प्रार्थितकारीत्यर्थः, अत एव कोपनः कोपविषयेष्वपि कोपवान् अत एवानवस्थितः चञ्चलचित्तः अत एव राजवृत्तेषु संकीर्णः विपरीतवृत्तिः अत एव शरासनपरायणः वधायोग्येष्वपि बाणप्रक्षेपणनिरतोऽसीति शेषः । एतेन सुग्रीवसंसर्गस्त्वया न कार्य इति सूचितम् ॥ ३३ ॥

गो० टी०—त्वं त्विति । अनवस्थितः अमर्यादः राजवृत्तैः राजचरितैः हेतुभिः संकीर्णः संकीर्णराजवृत्त इत्यर्थः । शरासनपरायणः यदृच्छया यं हन्तुमिच्छसि तं हंसीत्यर्थः॥३३॥

३४-३५] ति० टी०—अपचितिः पूजा । कामवृत्तः सन्निन्द्रियैः कृष्यस इति संबन्धः ॥ ३४ ॥ ३५ ॥

रा० टी०—ननु मय्येव दोषाः सन्ति सुग्रीवसंसर्गस्य न दोष इत्यत आह—नेति । यतस्ते तव धर्मे अपचितिः प्रशंसा अस्तीति शेषः, अतः अर्थे अन्यदीयधने तव बुद्धिर्नैवावस्थिता अत एव कामवृत्तः सन् इन्द्रियैस्त्वं न कृष्यसे । यद्वा धर्मे अर्थे च ते बुद्धिरवस्थिता अनवस्थिता नास्ति अत एव ते अपचितिर्हानिर्नास्ति अत एव कामवृत्तः सन् त्वमिन्द्रियैर्न कृष्यसे । एतेन त्वयि दोषस्थितेर्न संभव इति ध्वनितम् । वाश्वार्थे 'भवेदपचितिः पूजाव्ययनिष्कृतिहानिषु ' इति मेदिनी । भागुरिमतेनाकारलोपे नञ्समासे अनवस्थितेत्यर्थलाभः ॥ ३४ ॥

गो० टी०—न त इति । अपचितिः पूजा धर्मश्रद्धा नास्तीत्यर्थः । अवस्थिता व्यवस्थिता परद्रव्याभिलाषिणीत्यर्थः । कामे च न व्यवस्थेत्याह—इन्द्रियैरिति ॥ ३४ ॥

रा० टी०—सुग्रीवसंसर्गस्तव हानिकर इति बोधयन्नाह—हत्वेति । जुगुप्सितं निन्दितं पापिसख्यरूपं कर्म कृत्वा अत एव अनपराधिनं मां हत्वा सतां मध्ये किं वक्ष्यसि ॥ ३५

गो० टी०—हत्वेति । मां हत्वा स्थितः त्वं जुगुप्सितं कर्म कृत्वा सतां साधुकर्मकारिणां मध्ये किं वक्ष्यसि ॥ ३३ ॥

३६] ति० टी०—परिवेत्ता ज्येष्ठेऽकृतदारेऽकृताग्निहोत्रे च कृतदारः कृताग्निहोत्रोऽनुजः ॥ ३६ ॥

रा० टी०—सुग्रीवपापित्वमेव प्रकाशयन्नाह—राजेति द्वाभ्याम् । राजहादयः निरयगामिनः नरकगमनशीलाः एते सर्वे पापात्मनां लोके गच्छन्ते गच्छन्ति अत्र संशयो न ।

१ विग्रहे इति गो. पाठः । २ वृत्तैश्चेति गो. पाठः ।

सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः । लोकं[1] पापात्मनामेते गच्छन्ते नात्र संशयः ॥३७॥
अधार्यं चर्म मे सद्भी रोमाण्यस्थि च वर्जितम् । अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः ॥३८॥
पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव । शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः ॥३९॥
चर्म चास्थि च मे राम न स्पृशन्ति मनीषिणः । अभक्ष्याणि च मांसानि सोऽहं पञ्चनखो हतः ॥४०॥
तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम् । तदतिक्रम्य मोहेन कालस्य वशमागतः ॥४१॥
त्वया नाथेन काकुत्स्थ न सनाथा वसुंधरा । प्रमदा शीलसंपूर्णा पत्येव[2] च विधर्मणा[3] ॥४२॥
शठो नैकृतिकः क्षुद्रो मिथ्याप्रश्रितमानसः । कथं दशरथेन त्वं जातः पापो महात्मना ॥४३॥

तत्र परिवेत्ता ज्येष्ठे अकृतोद्वाहे अकृताग्न्याधाने च कृतोद्वाहः कृताग्न्याधानः कनिष्ठः । एतेन मद्बधः सुग्रीववधेनेति सूचितं तेन सुग्रीव एव महापापीति व्यञ्जितम् ॥ ३६ ॥ ३७ ॥

गो० टी०–राजहेति । परिवेत्ता ज्येष्ठेऽन्दे दारान् परिग्रहकृत् 'परिवेत्ताऽनुजोऽब्दे ज्येष्ठे दारपरिग्रहात्' इत्यमरः । नरयगामिनः नरकगामिनः ॥ ३४ ॥

३७] ति० टी०–गच्छन्ते गच्छन्ति । तेषु प्रकृते राजहत्वं दोषो बोध्यः ॥ ३७ ॥

गो० टी०–सूचकश्चेति । सूचकः पिशुनः कदर्यः लुब्धः । गच्छन्ते गच्छन्ति ॥ ३६ ॥

३८] ति० टी०–यद्यपि क्षत्रियस्य मृगहननमप्यस्ति, तथापि मद्विषयमिदमप्रयोजनमित्याह–अधार्यमिति । वर्जितम् अस्पृश्यत्वेन स्मृतिषूक्तमित्यर्थः ॥ ३८ ॥

रा० टी०–नन्वेवं मृगयायां वन्यवधो राज्ञां धर्म एवेत्यत आह—अधार्यमिति । त्वद्विधैः धर्मचारिभिः धर्मप्रवर्तकैः सद्भिः मे चर्म अधार्यं रोमाणि अस्थि च वर्जितम् अस्पृश्यमित्यर्थः, मांसानि अभक्ष्याणि । एतेन मृगयायामपि अकारणिका हिंसा न कर्तव्येति सूचितम् ॥ ३८ ॥

गो० टी०–किमेवं निन्दसि मृगयायां मृगवधस्यादोषत्वादित्यत्राह–अधार्यमिति । मृगचर्मवत् मे चर्म न धार्यम् । मे रोमाणि ऊर्णादिवन्नास्तरणार्हाणि । मे अस्थि च गजास्थिवत् न स्पृश्यम् । मांसानि च न भक्ष्याणि । अतः किमर्थं मां हतवानसि ॥ ३६ ॥

३९] ति० टी०–अभक्ष्याणीत्यत्र प्रमाणमाह–पञ्च पञ्चेत्यादि । ब्रह्मक्षत्रेणेति समाहारद्वन्द्वः । शल्यकः खड्गी । शुक्तिकाकारशल्यावृतसर्वाङ्गो जन्तुविशेष इत्यन्ये । श्वाविधः कण्टकाकारदीर्घरोमभिः शुनां वेधको जन्तुः ॥ ३९ ॥

रा० टी०–अभक्ष्यत्वे प्रमाणमाह—पञ्चेति । हे राघव ! ब्रह्मक्षत्रेण ब्राह्मणेन क्षत्रियेण च पञ्चनखाः शल्यकादयः पञ्चैव भक्ष्याः । परिसङ्ख्याविधिरयं रागादन्यत्रापि भक्षणस्य प्राप्तत्वात्, अत एव एवकारलाभः । तथाच मीमांसा—'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति' । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते' इति । तत्र शल्यकः शुक्तिकाकारशल्यावृतनिखिलशरीरः जन्तुविशेषः, स एव खड्गीत्युच्यते । श्वाविधः कण्टकाकारस्वदीर्घरोमभिः श्वानं विध्यति सः ॥ ३९ ॥

गो० टी०–अभक्ष्यता कुत इत्यत्राह–पञ्चेति । शल्यकः, श्वाविट्, गोधा, शशः, कूर्मश्चेति पञ्चनखाः पञ्च भक्ष्याः पञ्चनखेषु जन्तुषु एते पञ्चैव भक्ष्याः नान्य इत्यर्थः । परिसंख्याविधिरयम् । ब्रह्मक्षत्रेणेत्युपलक्षणं, त्रैवर्णिकेनेत्यर्थः । शल्यतीति शल्यः "शल इच्छ, आशुगमने" इत्यस्माद्धातोः " सानसिवर्णसिपर्णसितण्डुलाडुशचषालेलवलधिष्ण्यशल्याः" इति निपातनाद्यत्प्रत्ययः । ततः स्वार्थे कः । यद्वा शल्यं शङ्कुः 'वा पुंसि शल्यं शङ्कुर्ना' इत्यमरः । तत्सदृशानि रोमाणि शल्यानि तद्वान् शल्यः अर्शआद्यजन्तः ततः स्वार्थे कः । श्वानं विध्यतीति श्वाविधः पचाद्यच् । " अन्येषामपि " इति दीर्घः । पृषोदरादित्वा- (डुकारः ? संप्रसारणम्) इमौ वराहविशेषौ ॥ ३७ ॥

४०–४१] ति० टी०–सोऽहं पञ्चनखो हतः । अभक्ष्यः पञ्चनखो हत इत्यर्थः ॥ ४० ॥ ४१ ॥

रा० टी०–मद्वधनं निरर्थकमेवेत्याह—चर्मेति । हे राम ! मनीषिणः यस्य मे चर्मादि न स्पृशन्ति, मांसानि चाभक्ष्याणि स पञ्चनखोऽहं हतस्त्वयेति शेषः ॥ ४० ॥

रा० टी०–इदानीं मदीया युद्धप्रवृत्तिरेव नोचितेति बोधयन्नाह–तारयेति । सर्वज्ञया तारया हितं सत्यं वाक्यमहमुक्तः, मोहेन स्वाज्ञानेन तद्वाक्यमतिक्रम्य कालस्य मृत्योर्वशमागतः प्राप्तः ॥ ४१ ॥

गो० टी०–उपसंहरति–चर्मेति । सोहम् अभक्ष्यपञ्चनखान्तर्भूतोऽहम् ॥ ३८ ॥ ३९ ॥

४२] ति० टी०–त्वं तु न राज्यार्ह इत्याह—त्वयेति ॥ ४२ ॥

रा० टी०–त्वयेति । विधर्मणा सुग्रीवप्रार्थितविरुद्धधर्माचरणेन त्वया नाथेन वसुन्धरा पृथ्वी विधर्मणा किंचित्संसर्गवशेन विरुद्धधर्माचरणेन पत्या शीलसंपूर्णा प्रमदेव सनाथा न प्रतीयते इति शेषः ॥ ४२ ॥

गो० टी०–त्वयेति । पतिना पत्या ॥ ४० ॥

४३] ति० टी०–शठो गूढविप्रियकृत् । निकृतिं परापकारं चरतीति नैकृतिकः । मिथ्यैव प्रश्रितं मानसं यस्य सः अजितान्तःकरण इति यावत् ॥ ४३ ॥

१ लोके इति रा० पाठः । २ राजन्निति गो० पाठः । ३ संपन्ना धूर्तेन पतिना यथेति गो० पाठः ।

छिन्नचारित्र्यकक्ष्येण[1] सतां धर्मातिवर्तिना । त्यक्तधर्माङ्कुशेनाहं निहतो रामहस्तिना ॥ ४४ ॥
अशुभं चाप्ययुक्तं च सतां चैव विगर्हितम् । वक्ष्यसे चेदृशं कृत्वा सद्भिः सह समागतः ॥ ४५ ॥
उदासीनेषु योऽस्मासु विक्रमोऽयं[2] प्रकाशितः । अपकारिषु[3] ते राम नैवं पश्यामि विक्रमम् ॥ ४६ ॥
दृश्यमानस्तु युध्येथा मया युधि नृपात्मज । अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥ ४७ ॥
त्वयाऽदृश्येन तु रणे निहतोऽहं दुरासदः । प्रसुप्तः पन्नगेनेव नरः पापवशं[4] गतः ॥ ४८ ॥
सुग्रीवप्रियकामेन[5] यदहं[6] निहतस्त्वया । मामेव यदि पूर्वं त्वमेतदर्थमचोदयः ॥
मैथिलीमहमेकाह्ना[7] तव चानीतवान्भवेः[8] ॥ ४९ ॥
राक्षसं च दुरात्मानं तव भार्यापहारिणम् । कण्ठे बद्ध्वा प्रदद्यां तेऽनिहतं[9] रावणं रणे ॥ ५० ॥

रा० टी०–शठ इति । महात्मना पा पृथिवीपालकेन दशरथेन जातस्त्वं शठः क्रूरचित्तः अत एव नैकृतिकः निकृतिमपकारं रचयति सः अत एव क्षुद्रः नीचकर्मा अत एव मिथ्याप्रश्रितमानसः कापट्येन नम्रचित्त इव प्रतीत इत्यर्थः। सुग्रीवः कथमापः प्रापः, वाक्यस्य कर्मतयाऽन्वयात्र द्वितीया ॥ ४३ ॥

गो० टी०–शठ इति । शठः गृद्धविप्रियकृत् निकृत्या अपकारेण जीवतीति नैकृतिकः, क्षुद्रः क्षुद्रकर्मकारी । मिथ्याप्रश्रितमानसः मिथ्याशान्तमनस्कः ॥ ४१ ॥

४४] ति० टी०–छिन्ना चारित्र्यस्य कक्ष्या मर्यादा येन स तथा । सतां धर्ममतिक्रान्तेन ॥ ४४ ॥

रा० टी०–छिन्नेति । छिन्नचारित्रकक्ष्येण छिन्ना चारित्रकक्ष्या सदाचारमर्यादा येन स तेन अत एव सतां धर्मातिवर्तिना सज्जनधर्मोल्लङ्घनशीलेन अत एव त्यक्तधर्माङ्कुशेन त्यक्तः अतिप्रार्थनया त्याजितः धर्माङ्कुशो येन तेन सुग्रीवेण कर्त्रा रामहस्तिना रामहस्तसंबन्धिना बाणेन करणेन अहं निहतस्ताडितः ॥ ४४ ॥

गो० टी०–छिन्नेति । छिन्ना चारित्रमेव कक्ष्या इभबन्धनं येन स तथा । सतां धर्मातिवर्तिना सतां धर्माः पूर्वोक्ताः सामदानसापराधिजनदण्डनादयः तानतीत्य वर्तत इति तथा । गजविषये अतिक्रान्तमर्यादेनेत्यर्थः ॥ ४२ ॥

४५] ति० टी०–वक्ष्यसे किं वक्ष्यसीत्यर्थः । किमित्यध्याहारः ॥ ४५ ॥

रा० टी०–अशुभमिति । अशुभम् अविहितहिंसामयत्वेनाप्रकृतम् अत एव अयुक्तम् अयोग्यम् अत एव सतां विगर्हितम् ईदृशम् अन्यप्रार्थनया संपादितं कर्म कृत्वा सद्भिः सह समागतस्त्वं किं वक्ष्यसे । एकश्चकारः किमर्थे ॥ ४५ ॥

गो० टी०–अशुभमिति । ईदृशं कृत्वा स्थितस्त्वं सद्भिः ईदृशम् अशुभत्वादिविशिष्टं वक्ष्यसे अशुभकारीत्येवं वक्ष्यसीत्यर्थः ॥ ४३ ॥

४६–४७] ति० टी०–अपकारिषु दारापहारिषु॥४६॥४७॥

रा० टी०–ननु स्वप्रयोजनसाधनार्थमेवेदं मया कृतमित्याह–उदासीनेष्विति । हे राम ! उदासीनेषु उपकारानपेक्षरहितेषु अस्मासु योऽयमुत्कटः विक्रमः प्रकाशितः सुग्रीवेण कारित इत्यर्थः, एवमनेन प्रकारेण ते अपकारिषु विक्रमं सुग्रीवपराक्रमं न पश्यामि सुग्रीवो न करिष्यतीत्यर्थः ॥ ४६ ॥

गो० टी०–उदासीनेष्विति । अपकारिषु रावणादिषु ४४

रा० टी०–दृश्यमानेति । हे नृपात्मज ! दृश्यः सर्वद्रष्टा अत एव अमानः सर्वदृष्टत्वादिगर्ववरहितः किंच न मानः पूजावान् यस्मात् सः सर्वपूज्य इत्यर्थः, त्वं यदि मया सह युधि युध्येथास्तदा अद्यैव मया निहतस्ताडित एव त्वं स्वतम् अतिविस्तृतं देवं मयुद्योत्साहजनितकान्तिं त्वं पश्येः । एतेन सुग्रीवस्याल्पबलत्वान्ममातीवयुद्धोत्साहो न जात इति ध्वनितम् । तुशब्दो यद्यर्थे इववैशब्दा एवार्थे ॥ ४७ ॥

गो० टी०–' दृश्यमानस्तु युध्येथाः ' इति पाठः ॥ ४९ ॥

४८] ति० टी०–अदृश्येनाप्राप्तदर्शनेन त्वया पन्नगवन्निहतः अतस्त्वं पापवशं गत इत्यर्थः ॥ ४८ ॥

रा० टी०–त्वयेति । दृश्येन मदृष्टिपथं गतेनापि त्वया दुरासदः अन्यैर्धर्षयितुमशक्योऽहं पानवशं गतः मद्यादिपानवशं प्राप्तः अत एव प्रसुप्तः प्रसुप्तसदृशो नरः पन्नगेनेव निहतः। एतेन सुग्रीवं त्यक्त्वा रामेणैव सह मया युद्धं न कृतमिति वालिपश्चात्तापः सूचितः ॥ ४८ ॥

गो० टी०–त्वयेति । अदृश्येनेति छेदः ॥ ४६ ॥

४९] ति० टी०–एतदर्थं सीताया आहरणमुद्दिश्य मामेव पूर्वं प्राप्य यद्यचोदयस्तदा तव मैथिलीमहमेकाह्नाऽऽनीतवान्भवेयमिति यावत् ॥ ४९ ॥

५०] ति० टी०–अनिहतम् अनिहतमेवेत्यर्थः ॥ ५० ॥

रा० टी०–सुग्रीवेति । यत् यदर्थं सुग्रीवप्रियकामेन त्वया अहं निहतः एतदर्थं यदि मां पूर्वं त्वमचोदयस्तर्हि रणे अनिहतमेव तव भार्यापहारिणमत एव दुरात्मानं रावणं राक्षसं कण्ठे बद्ध्वा ते तुभ्यमहं प्रदद्याम् । श्लोकद्वयमेकान्वयि

---

१. चारित्रेति गो. रा. पाठः । २ ते इति गो. पाठः । ३ तं राजन्नहीति गो. पाठः । ४ पानेति गो. रा. पाठः । ५ अर्धमेतदग्रिमश्लोकोत्तरं गो. पाठे । ६ यत्कृतेऽस्मीति गो. पाठः । ७ अर्धमेतत् रा. नास्ति । ८ भवेदिति गो. पाठः । ९ अर्धमेतत् गो. नास्ति ।

न्यस्तां सागरतोये वा पाताले वाऽपि मैथिलीम् । आनयेयं तवादेशाच्छ्वेतामश्वतरीमिव ॥ ५१ ॥
युक्तं यत्प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि । अयुक्तं यदधर्मेण त्वयाऽहं निहतो रणे ॥ ५२ ॥
काममेवंविधो लोकः कालेन विनियुज्यते । क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम् ॥ ५३ ॥
इत्येवमुक्त्वा परिशुष्कवक्त्रः शराभिघाताद्व्यथितो महात्मा ।
समीक्ष्य रामं रविसंनिकाशं तूष्णीं बभौ वानरराजसूनुः ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तदशः सर्गः ॥ १७ ॥

एतेन दीनदयालुत्वादयो रामगुणाः वालिना न ज्ञाता इति सूचितम् ॥ ४९ ॥ ५० ॥

गो० टी०—मामेवेति । एतदर्थं मैथिल्यानयनार्थं भवेत् भवेयम्, पुरुषव्यत्यय आर्षः ॥ ४७ ॥

गो० टी०—सुग्रीवेति । यत्कृते यस्य रावणस्य कृते हतोऽस्मि तं कण्ठे बद्धा ते प्रदद्यामिति योजना । सुग्रीवसख्यनिमित्तभूतं मैथिल्यानयनं च तारया पूर्वं निवेदितमिति ज्ञेयम् ॥ ४८ ॥

५१-५२] ति० टी०—सागरतोये तन्मध्यवर्तिद्वीपे । श्वेतामश्वतरीमिव श्वेताश्वतरीरूपिणीं श्रुतिं मधुकैटभाभ्यां पाताले निगृहीतां यथा हयग्रीवो भुवमानयति स्म तद्वत् ॥ ५१ ॥५२॥

रा० टी०—न्यस्तामिति । सागरतोये वा पाताले वा न्यस्तां केनचित्संस्थापितामेतां त्वदीप्सितां मैथिलीं तवादेशात् त्वदाज्ञात अश्वतरीम् अश्वेन हयग्रीवेण तरति स्वस्थानं प्राप्नोति तां वेदश्रुतिमिव शु आशु आनयेयम् । अश्वतरीशब्दः गौरादिर्ङीषन्तः अणन्तप्रकृतिको वा, तद्धयभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् । किंच श्वेतां शुक्लामश्वतरीं तद्रूपां श्रुतिमिव उक्तस्वरूपां श्रुतिं मधुकैटभौ जहतुस्तां हयग्रीवोऽनयदिति प्रसिद्धम् ॥ ५१ ॥

गो० टी०—न्यस्तामिति । श्वेतामश्वतरीमिव मधुकैटभाभ्यां पाताले निरुद्धां श्वेताश्वतरीरूपां श्रुतिं हयग्रीव इवेत्यर्थः ॥ ४९ ॥

रा० टी०—युक्तमिति । अधर्मेणोपलक्षितोऽपि सुग्रीवः मयि स्वर्गते सति यद्राज्यं प्राप्नुयात् तद्युक्तं, यत् अहं त्वया रणे निहतस्तत्तु अयुक्तम् । किंच यत् त्वया रणेऽहं निहतस्तदयुक्तम् अत एव मयि स्वर्गते सति अधर्मेण अयुक्तं धर्मेण पालितमित्यर्थः, यत् राज्यं तत् सुग्रीवः प्राप्नुयात् । सुदृढं राजानमन्तरा धर्मो नङ्क्ष्यतीति तात्पर्यम् ॥ ५२ ॥

गो० टी०—युक्तमिति । राज्यार्थं सुग्रीवो मां हतवानित्येतद्युक्तं त्वं तु मां हतवानित्येतत्त्वयुक्तमित्यर्थः, ज्ञातीनामेवंविधकृत्यस्य स्वाभाविकत्वादिति भावः ॥ ५० ॥

५३] ति० टी०—लोकः सर्वोऽपि कालेन कालधर्मेण मृत्युना विनियुज्यते, एवंविधः स्वभावः काममस्तु तस्माभ्मे मरणकृतो न विषादः, अपि तु भवता राज्यं प्राप्तं चेत्तदा मद्वधकारणस्य त्वद्राज्यस्य लोकैः प्रभे क्षमं युक्तमुत्तरं साधु सम्यग्विचिन्त्यताम् ॥ ५३ ॥

रा० टी०—काममिति । एवंविधः मत्सदृशः लोकः सर्वजनः कालेन कामं यथेच्छं विनियुज्यते शरीरेभ्य इति शेषः, अतो मयि न विषाद इति तात्पर्यम् । ननु विषादाभावे कथमेवं बहु वदसीत्यत आह-क्षमं युक्तं प्राप्तं लोकम् अनुभूतमुत्तरं किमर्थं वाली त्वया निहतः इति जनप्रश्नप्रत्युत्तरं साधु चिन्त्यताम्॥५३॥

गो० टी०—काममिति । लोकः एवंविधे मरणरूपे कर्मणि विनियुज्यते, जातस्य मरणं स्वभाव इत्यर्थः । भवता प्राप्तम् अदृश्यतया प्रहरणं क्षमं चेत् तत्र साधूत्तरं चिन्त्यतामित्यर्थः ॥ ५१ ॥

५४] ति० टी०—उपसंहरति—इत्येवमिति । अस्य सर्गस्य तीर्थेन रामस्तुतिपरतया यथोजनं तत्र कविनिबद्धस्य वक्तुर्वालिनस्तात्पर्यविषयभूतम् । 'यदयुक्तं मया पूर्वं प्रमादाद्वाक्यमप्रियम् । तत्रापि खलु मे दोषं कर्तुं नार्हसि राघव ॥' इत्यग्रे वाल्युक्तेः । नापि वाल्मीकेस्तस्य दुरुक्तत्वबोधकत्वात् । अतात्पर्यविषयमपि बुद्धिवैभवादक्षरार्थत्वेन वर्ण्यत इति चेत्काव्यान्तरमेव भगवतः स्तावकं क्रियताम्, किमनेन प्रयासेनेति दिक् ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तदशः सर्गः ॥१७॥

रा० टी०—इतीति । शराभिघाताद्व्यथितः अत एव परिशुष्कवक्त्रः महात्मा अमरराजसूनुः वाली इत्येवमुक्त्वा रविसंनिकाशं रवेरपि प्रकाशकं रामं समीक्ष्य तूष्णीं बभूव ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तदशः सर्गः ॥ १७ ॥

गो० टी०—इतीति । परिशुष्कवक्त्रः बहुभाषणक्लेशादिति भावः ॥ ५२ ॥

अस्मिन् सर्गे द्विपञ्चाशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ।

भ्रातृभार्यापहारपातकिनस्ते वधरूपो दण्डो धर्म्य एवेति राम समर्थयति । पूर्वं कृतनिन्दातोऽनुतप्तोवाली रामः क्षमयित्वाङ्गद-परिपालन प्रार्थयते । तदङ्गीकृत्य रामो वालिनमाश्वासयति ।

इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम् । परुषं वालिना रामो निहतेन विचेतसा ॥ १ ॥
तं निष्प्रभमिवादित्यं मुक्ततोयमिवाम्बुदम् । उक्तवाक्यं हरिश्रेष्ठमुपशान्तमिवानलम् ॥ २ ॥
धर्मार्थगुणसंपन्नं हरीश्वरमनुत्तमम् । अधिक्षिप्तस्तदा रामः पश्चाद्वालिनमब्रवीत् ॥ ३ ॥
धर्ममर्थं च कामं च समयं चापि लौकिकम् । अविज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे ॥ ४ ॥
अपृष्ट्वा बुद्धिसंपन्नान्वृद्धानाचार्यसंमतान् । सौम्यं[1] वानरचापल्यात्त्वं मां वक्तुमिहेच्छसि ॥ ५ ॥
इक्ष्वाकूणामियं भूमिः सशैलवनकानना । मृगपक्षिमनुष्याणां निहानुग्रहेष्वपि[2] ॥ ६ ॥
तां पालयति धर्मात्मा भरतः सत्यवानृजुः । धर्मकामार्थतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ ७ ।

१-२] ति० टी०–प्रश्रितं प्रश्रयाभासोपेतम्, एवं धर्मार्थसहितत्वं चाभासरूपमेव । तत्र 'मामेव यदि पूर्वम्' इत्यादि हिताभासोऽर्थाभासश्च । धर्माभासो राजहेत्यादि । परुषत्वं तु मुख्यमेव । निहतेन विरुद्धेन ॥ १ ॥ २ ॥

३] ति० टी०–धर्मार्थगुणसंपन्नमित्यब्रवीदिति क्रिया-विशेषणम् । अधिक्षिप्तः परुषमुक्तः ॥ ३ ॥

रा० टी०–वालिवचनश्रवणानन्तरकालिकरामवचनं वर्ण-यितुमाह–इतीति । इत्यनेन प्रकारेण प्रश्रितं नम्रताविशिष्टं धर्मार्थसहितं परुषं परुषत्वेन प्रतीयमानं वाक्यं निहतेन रामबाण-विद्धेन अत एव विचेतसा व्याकुलचित्तेन वालिना राम उक्त आसीदिति शेषः ॥ १ ॥

गो० टी०–अथ रामस्योत्तरमष्टादशे–इत्युक्त इत्यादि । वालिना इत्युक्त इत्यन्वयः । विचेतसेत्यनेन परुषवचनमज्ञान-कृतमित्युच्यते ॥ १ ॥

रा० टी०–तमिति । निष्प्रभं प्रभारहितम् आदित्यमिव मुक्ततोयं त्यक्तजलम् अम्बुदं मेघमिव उपशान्तं जलेन सि-क्तम् अनलं वह्निमिव उक्तं वाक्यं येन तं हरिश्रेष्ठं श्रेष्ठवानरैः सहितम् अनुत्तमम् अनुजदारग्रहणरूपाधर्मकर्मणाऽधमं हरीश्वरं तं वालिनं तदा वैचित्यकाले अधिक्षिप्तः वालिकर्तृकाधिक्षेपवि-शिष्टो रामः पश्चात् वाल्युक्तिश्रवणानन्तरं धर्मार्थगुणसंपन्नं धर्मार्थगुणैः संयुक्तं वचनमब्रवीत् । श्लोकद्वयमेकान्वयि ॥२॥३॥

गो० टी०–तमित्यादि द्वौ । तदा पूर्वम् अधिक्षिप्तो रामः धर्मार्थगुणसंपन्नम् अनुत्तमं यथा भवति तथा पश्चाद्वा-लिनमब्रवीदिति योजना ॥ २ ॥ ३ ॥

४] ति० टी०–लौकिकं समयं लोकाचारम् ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–धर्ममित्यादिभिः । धर्मा-दिकं लौकिकं समयं शिष्टाचारमित्यर्थः, कथमविज्ञाय बाल्यात् स्वाज्ञानात् हेतोः मां विगर्हसे ॥ ४ ॥

गो० टी०–धर्ममिति । समयम् आचारम् 'समयाः शप-थाचारकालसिद्धान्तसंविदः' इत्यमरः । बाल्यात् अज्ञानात् ॥४॥

५] ति० टी०–अविज्ञाने हेतुमाह—अपृष्ट्वेति । आचा-र्यसंमतान्स्वस्वकुलाचारशिक्षकान् । वानरत्वादेवैतदभावः । वानरत्वप्रयुक्तचापल्यादेव वादस्तवेत्यर्थः । इच्छस्यैषीः ॥ ५ ॥

रा० टी०–अपृष्ट्वेति । हे सौम्य! हे वानर! आचार्यसंमतान् आचार्यानुकूलान् बुद्धिसंपन्नान् वृद्धान् अपृष्ट्वा तेभ्यः प्रभृपूर्वकं धर्मानश्रुत्वेत्यर्थः, चापल्याद्धेतोः त्वं मां वक्तुमिच्छसि ॥ ५ ॥

गो० टी०–अपृष्ट्वेति । अपृष्ट्वा धर्मादिकमिति शेषः । वानरचापल्यात् वानरत्वकृतचापल्यात् ॥ ५ ॥

६] ति० टी०–इयं भूमिरिक्ष्वाकूणां मनुनाऽस्मत्कुलकू-टस्थेन दत्तेत्यर्थः । तथा मृगादिपर्यन्तं निग्रहानुग्रहेष्वधिका-रोऽपि दत्त इति शेषः ॥ ६ ॥

रा० टी०–तदज्ञानमेव प्रकटयन्नाह–इक्ष्वाकूणामिति । सशैलवनकानना शैलवनकाननविशिष्टा इयं भूमिः इक्ष्वाकूणाम् अतो मृगपक्षिमनुष्याणां निग्रहानुग्रहेषु अधिकार इति शेषः । अपिर्हेतौ ॥ ६ ॥

गो० टी०–इक्ष्वाकूणामिति । इयं जम्बूद्वीपात्मिका। लोके कस्यचित् भूमेः स्वत्वेऽपि शैलवनादिकमाक्रम्यान्ये भूमिं पीडयन्ति तद्व्यावृत्त्यर्थमाह–सशैलेति । काननं महारण्यम् । मृगादिनिग्रहानुग्रहावपि इक्ष्वाकूणामेव कृतमिति शेषः ॥ ६ ॥

७] ति० टी०–तां पितृपितामहादिक्रमागतां भुवम् । निग्रहानुग्रहे दुष्टशिष्टयोरिति शेषः ॥ ७ ॥

रा० टी०–तामिति । तामिक्ष्वाकुभूमिमृजुः सरलस्वभावः सत्यवानतिसत्यवक्ता धर्मात्मा धर्मकामार्थतत्त्वज्ञः धर्मादिया-थार्थ्यज्ञाता निग्रहानुग्रहे रतस्तत्परो भरतः पालयति ॥ ७ ॥

गो० टी०–तामिति । तां भूमिम् ॥ ७ ॥

१ सौम्येति गो. रा. पाठः । २ निग्रहप्रग्रहावपीति गो. पाठः ।

नयश्च विनयश्चोभौ यस्मिन्सत्यं च सुस्थितम् । विक्रमश्च यथा दृष्टः स राजा देशकालवित् ॥ ८ ॥
तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः । चरामो वसुधां कृत्स्नां धर्मसंतानमिच्छवः ॥ ९ ॥
यस्मिन्नृपतिशार्दूले भरते धर्मवत्सले । पालयत्यखिलां पृथ्वीं कश्चरेद्धर्मविप्रियम् ॥ १० ॥
ते वयं मार्गविभ्रष्टं स्वधर्मे परमे स्थिताः । भरताज्ञां पुरस्कृत्य [४]चिन्तयामो यथाविधि॥ ११ ॥
त्वं तु संक्लिष्टधर्मश्च कर्मणा च विगर्हितः । कामतन्त्रप्रधानश्च न स्थितो राजवर्त्मनि ॥ १२ ॥
ज्येष्ठो भ्राता पिता वाऽपि यश्च विद्यां प्रयच्छति । त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः ॥ १३ ॥
यवीयानात्मनः पुत्रः शिष्यश्चापि गुणोदितः । पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चैवात्र कारणम् ॥ १४ ॥

८] ति० टी०–यथा दृष्टोऽपरोक्षानुभवसिद्धः स राजाऽस्मिन्काले सर्वभूमेरिति शेषः ॥ ८ ॥

रा० टी०–भरतस्य धर्मात्मत्वादिवर्णने फलमाह–नय इति । यस्मिन्नुभौ नयो विनयश्च सुस्थितमत्याज्यत्वं सत्यं च सन्तीति शेषः, यथा यथावद्विक्रमश्च दृष्टः देशकालवित् उचितदेशादिविज्ञातृत्वधर्मश्च दृष्टः स राजा भवतीति शेषः । एतेन भरते सर्वे राजगुणाः सन्तीति सूचितम् ॥ ८ ॥

गो० टी०–नयश्चेति । नयो नीतिः, विनयः शिक्षा, तावुभौ सत्यं च यथादृष्टः शास्त्रविहितः विक्रमश्च एतत्सर्वं यस्मिन् सुस्थितं देशकालवित् स भरतो राजेति योजना ॥ ८ ॥

९] ति० टी०–ततः किं तत्राह—तस्येति । धर्माय कृत आदेशो नियोगो येषां ते । धर्मसंतानं धर्मवृद्धिम् । धर्मपदमधर्मनिवृत्तेरप्युपलक्षणम् ॥ ९ ॥

रा० टी०–तस्येति । धर्मसंतानमिच्छवो वयमन्ये च पार्थिवाः तस्य भरतस्य धर्मकृतादेशाः धर्माय कृतः आदेशः आज्ञा यैस्ते सन्तः कृत्स्नां वसुधां चरामः भरतानुकूलतयैव सर्वं वर्तन्त इत्यर्थः ॥ ९ ॥

गो० टी०–तस्येति । धर्मकृतादेशाः धर्मकृतनियोगाः । कथं कनिष्ठेन ज्येष्ठनियोग इत्यपेक्षायां राजवर्मोऽयमित्याशयेनोक्तं धर्मपदम् । धर्मसंतानं धर्मवृद्धिम् । यद्यपि भरतेन नादेशः कृतः तथापि नेदमसत्यं यथाकथंचित् भरतेन राज्यभरणस्य स्वीकृतत्वात्तदन्येषां तत्कुलीनानां तदादिष्टत्वं सिद्धमिति हृदयम् । अत एवायोध्याकाण्डे दर्शितम्–त्वं राजेति ॥ ९ ॥

१०] ति० टी०–धर्मविप्रियं धर्मनाशं कश्चरेदाचरितुं शक्नुयात् ॥ १० ॥

रा० टी०–तस्मिन्निति । नृपतिशार्दूले नृपतिश्रेष्ठे भरते पृथ्वीं पालयति सति धर्मविप्रियं धर्मविरुद्धं कश्चरेत् ॥ १० ॥

गो० टी०–तस्मिन्निति । धर्मनिग्रहं धर्महानिम् ॥ १० ॥

११] ति० टी०–ते वयमिदानींतनमूलप्रभुभरताज्ञया मार्गविभ्रष्टं चिन्तयामो विचारयामः । 'निगृह्णीमः' इति पाठान्तरम् ॥ ११ ॥

रा० टी०–ते इति । परमे उत्कृष्टे स्वधर्मे राजोचितकर्मणि स्थितास्ते धर्मसंतानमिच्छवो वयं भरताज्ञां भरतकर्मकाज्ञापनं पुरस्कृत्य मार्गविभ्रष्टान् यथाविधि चिन्तयामः विचार्य दण्डयाम इत्यर्थः । 'धर्मविभ्रष्टान्' इति भूषणपाठः ॥ ११ ॥

गो०टी०–ते वयमिति । धर्मविभ्रष्टं जनमिति शेषः॥११॥

१२] ति० टी०–ततः किं तत्राह—त्वं तु कर्मणा चारित्रेण गर्हितो लोके निन्दितः, अत एव संक्लिष्टः पीडितो धर्मो येन तादृशः । कामतन्त्रं कामरूपः पुरुषार्थः स एव प्रधानो मुख्यो यस्य सः ॥ १२ ॥

रा० टी०–नन्वविचारेण त्वया किं निश्रितमित्यत आह–त्वमिति । कामतन्त्रप्रधानः कामतन्त्रेषु कामाधीनेषु प्रधानो मुख्यः अत एव राजवर्त्मनि राजोचितमार्गे न स्थितः अत एव कर्मणा स्वेच्छाचरणेन हेतुना विगर्हितो निन्दितः अत एव संक्लिष्टधर्मा संक्लिष्टः विबाधितः धर्मः सदाचारो येन सः त्वमसीति शेषः ॥ १२ ॥

गो० टी०–त्वं त्विति । संक्लिष्टधर्मा धर्मविलोपकृत् कर्मणा च विगर्हित इति अकृत्यकारीत्यर्थः ॥ १२ ॥ १३ ॥

१३] ति० टी०–तदुपपादयति–ज्येष्ठ इति । विद्यां त्रय्यादिविद्याम् । धर्मे च पथि वर्तिनो धर्ममार्गे वर्तो वर्तनं यस्य तस्य ॥ १३ ॥

रा० टी०–तदनुष्ठितकर्मणां सदाचारविरुद्धत्वं बोधयितुं धर्मानाह–ज्येष्ठ इति द्वाभ्याम् । धर्मे पथि वर्तिनो जनस्य ज्येष्ठो भ्राता पिता च यो विद्यां प्रयच्छति स च ते त्रयः पितर इव ज्ञेयाः पितृवत्पूज्या इत्यर्थः । एकश्चशब्द इवार्थे ॥ १३ ॥

१४] ति० टी०–अत्र चिन्तने । तथा धर्मो धर्मज्ञानमेव कारणम् ॥ १४ ॥

रा० टी०–यवीयानिति । यवीयान् कनिष्ठो भ्राता, आत्मनः पुत्रश्च, गुणोदितः शिष्योचितगुणयुक्तः शिष्यश्च, ते त्रयः पुत्रवच्चिन्त्याः मन्तव्या इत्यर्थः । अत्र एवंचिन्तने धर्म एव कारणम् एवेन दृष्टकारणव्यावृत्तिः, एतेन सुग्रीवे ते विद्वेषोऽयमिति सूचितम् ॥ १४ ॥

१ तस्मिन्निति गो. रा. पाठः । २ नियहमिति गो. पाठः । ३ धर्मेति गो. रा. पाठः । ४ निगृह्णीम इति गो. पाठः । ५ धर्मा चेति गो. पाठः ६ चैवेति गो. पाठः । ७ चेदत्रेति गो. पाठः ।

सूक्ष्मः परमविज्ञेयः सतां धर्मः प्लवङ्गम । हृदिस्थः सर्वभूतानामात्मा वेद शुभाशुभम् ॥ १५ ॥
चपलश्चपलैः सार्धं वानरैरकृतात्मभिः । जात्यन्ध इव जात्यन्धैर्मन्त्रयन्प्रेक्षसे नु किम् ॥ १६ ॥
अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ते । नहि मां केवलं रोषात्त्वं विगर्हितुमर्हसि ॥ १७ ॥
तदेतत्कारणं पश्य यदर्थं त्वं मया हतः । भ्रातुर्वर्तसि भार्यायां त्यक्त्वा धर्मं सनातनम्॥ १८ ॥
अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः । रुमायां वर्तसे कामात्स्नुषायां पापकर्मकृत् ॥ १९ ॥

गो० टी०–यवीयानिति । आत्मन इति त्रिष्वप्यन्वेति । गुणोदित इति च । ते त्रयः पुत्रवच्चिन्त्याः । पुत्रशब्दोऽत्र दृष्टान्तार्थः । यथा पुत्रे पुत्रवद्वर्तते तथान्ययोरपि वर्तितव्यमित्यर्थ । पुत्रे पुत्रवद्वृत्तिर्नाम सम्यक् स्नेहः, गगनं गगनाकारमितिवत् । एवं चिन्त्यत्वे किं प्रमाणं तत्राह–धर्मज्ञेदिति । अत्र अस्मिन्नर्थे धर्मः कारणं व्यवस्थापकम् । चेत् यदि धर्मो नानुवर्तनीयः तदा नैवं द्रष्टव्यम् अनुवर्तनीयश्चेत् अवश्यमेवं द्रष्टव्यमिति चेच्छब्दस्य भावः ॥ १४ ॥

१५] ति० टी०–तत्र न सर्वेषां सुलभमित्याह—सूक्ष्म इति । सतां सूक्ष्मो यो धर्मः स परा सद्रूपदेशादिजा मा शोभा येषां तैरेव विज्ञेयः, अन्यैः परमत्यर्थमविज्ञेय एव । किं चेश्वर एव तज्ज्ञ इत्याह–हृदिस्थ इति । सर्वभूतानामात्मा तत्त्वभूतो व्यापकश्च, अत एव सर्वप्राणिहृदिस्थः स सर्वभूतानां सर्वप्राणिनां शुभाशुभं वेद । एवं चान्तर्यामित्वात्तव पापमहं जाने इति व्यङ्ग्यमत्र ॥ १५ ॥

रा० टी०–ननु सर्वैर्धर्मो विज्ञायते त्वया किमर्थं वर्ण्यते इत्यत आह–सूक्ष्म इति । प्लवङ्गम हे कपे ! सतां धर्मः सूक्ष्मः दुर्लक्ष्य इत्यर्थः, अत एव परमदुर्ज्ञेयः ज्ञातुमत्यन्तमशक्यः । ननु त्वया कथं ज्ञात इत्यत आह–सर्वभूतानां हृदिस्थः आत्मा नियन्ता सर्वभूतानां शुभाशुभं वेद जानाति । एतेन स्वस्य नियन्तृत्वं सूचितं तेन सर्वज्ञत्वं व्यञ्जितम् । सर्वभूतानामित्युभयान्वयि ॥ १५ ॥

गो० टी०–सूक्ष्म इति । सूक्ष्मः अतीन्द्रियः । अत एव सतामपि परमदुर्ज्ञेयः किमुत भवादृशस्येति भावः । यद्वा जनस्य धर्माधर्मकरणं न कोऽपि वेत्तुमर्हति । तर्हि को वेत्तीत्यत्राह–हृदिस्थ इति । सर्वभूतानां हृदिस्थः सर्वान्तर्यामी, अलुक् । आत्मा परमात्मा शुभाशुभं शुभाशुभकरणं वेत्तीत्यर्थः । सूक्ष्मं धर्मं परमात्मना मया विना को वेत्तुं दक्ष इति भावः ॥ १५ ॥

१६] ति० टी०–त्वं तु धर्मज्ञानप्रसक्तिहीन एवेत्याह–चपल इति । जात्यन्धो जात्यन्धैरिव चपलैरकृतात्मभिराचार्याशिक्षितैर्वानरैः सह मन्त्रयन्निश्चिन्वन्किं नु कथं नु प्रेक्षसे ज्ञास्यसि, धर्ममिति शेषः । 'रक्षसे नु किम्' इति पाठे रक्षणीयप्रजाजातं किं नु रक्षसि, न किमपि । अतो धर्मभ्रष्टो राजदण्ड्यस्त्वमिति भावः ॥ १६ ॥

रा० टी०–चपल इति । जात्यन्धैर्जन्मान्धैः सार्धं मन्त्रयन् जात्यन्ध इव अकृतात्मभिः अस्वस्थचित्तैः अत एव चपलैः वानरैः सार्धं मन्त्रयन् चपलस्त्वं किं नु प्रेक्षसे विचारयसि धर्ममिति शेषः ॥ १६ ॥

गो० टी०–त्वया तु न शक्य इत्याह–चपल इति । किं नु द्रक्ष्यसे न किमपि द्रक्ष्यसीत्यर्थः ॥ १६ ॥

१७] ति० टी०–अथ धर्मभ्रष्टत्वं व्यक्तमेव वक्तुमाह–अहं त्विति । अस्य वचनस्य चपलश्चपलैरिति वचनस्य व्यक्तताम् । व्यक्तोऽर्थोऽस्येत्यर्शआद्यजन्तं व्यक्तपदम् । तद्भावो व्यक्तता तदर्थस्तं ब्रवीमि ॥ १७ ॥

रा० टी०–नन्वस्माकं चपलत्वादिवैशिष्ट्यं नास्तीति किमर्थमेवमुच्यते इत्यत आह–अहमिति । अस्य स्वोक्तस्य वचनस्य चापल्यादिबोधकवाक्यस्य व्यक्ततामभिप्रायप्राकट्यं ते ब्रवीमि अतः रोषात् मां केवलं विगर्हितुं त्वं नार्हसि ॥१७॥

गो० टी०–अहमिति । अस्य वचनस्य यवीयानात्मन इति पूर्वोक्तवचनस्य ॥ १७ ॥

१८] ति० टी०–पश्य युक्तमयुक्तं वेति चिन्तय । वर्तसि वर्तसे ॥ १८ ॥

रा० टी०–तदिति । यदर्थं मया त्वं हतस्तदेतत्कारणं पश्य जानीहि श्रुण्वित्यर्थः । तत् कारणमाह–सनातनं धर्मं त्यक्त्वा भ्रातुः कनिष्ठबन्धोर्भार्यायां वर्तसि वर्तसे ॥ १८ ॥

गो० टी०–तदिति । वर्तसि वर्तसे ॥ १८ ॥

१९] ति० टी०–ननु 'भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् । धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥' इत्यग्ने प्रायोपवेशसमयेऽङ्गदोक्तेः सुग्रीवस्यापि ज्येष्ठभ्रातुः पितृसमस्य भार्यात्वमर्थेन तुल्यमित्यत आह—अस्य त्वमिति । धरमाणस्य प्राणान्धारयत एव जीवतस्त्वया निश्चीयमानजीवमस्यैव पत्न्यां तत्र स्नुषाभूतायां रुमायां यतो वर्तसे, अतस्त्वं स्पष्टं पापकर्मकृत् । सुग्रीवस्तु तव जीवननिश्चयाभावात्त्वत्पत्न्यां तारायां प्रागवर्तिष्ट अतः परं वर्त्स्यति च । किंच त्रैवर्णिकेष्वपि देवरस्य मृतभ्रातृस्त्रियां पुत्रायां क्षत्तिदर्शनात्तिर्यग्योनिषु तस्यां क्षत्तिर्न दोषः । तथाहुस्तौ च मरणज्ञानमेव प्रयोजकं तिर्यक्ष्वेति भगवदाशयः । अनेन त्रैवर्णिकेतरस्त्रीणां मृतभर्तृकाणां तरुणीनां स्वजातीयपुरुषाङ्गीकारो नाधर्म इति सूचितम् । दृश्यते च तथा व्यवहारः शूद्रादिजातौ । न च मनुष्याधिकारस्य निषेधादिशास्त्रस्य कथं

१ दुर्ज्ञेय इति गो. पाठः । २ द्रक्ष्यसे इति गो. पाठः । ३ वेदितुमिति युक्तं भाति

तद्व्यतीतस्य ते धर्मात्कामवृत्तस्य वानर । भ्रातृभार्याभिमर्शेऽस्मिन्दण्डोऽयं प्रतिपादितः ॥ २० ॥
नहि लोकविरुद्धस्य लोकवृत्तादपेयुषः । दण्डादन्यत्र पश्यामि निग्रहं हरियूथप ॥ २१ ॥
न चै ते मर्षये पापं क्षत्रियोऽहं कुलोद्वतः । औरसीं भगिनीं वापि भार्यां वाप्यनुजस्य यैः ॥ २२ ॥
प्रचरेत नरः कामात्तस्य दण्डो वधः स्मृतः । भरतस्तु महीपालो वयं त्वादेशवर्तिनः ॥ २३ ॥

तिर्यक्षु प्रवृत्तिरिति वाच्यम् । तिर्यग्योनेरपि मनुष्यवद्राजादिव्यवहारदर्शनेन मनुष्यतुल्यज्ञानवत्त्वादस्त्येवायं दोष इत्याशयात् । किंच धर्मेऽनधिकारिणामपीन्द्रादीनां छत्रवधादौ ब्रह्महत्यादिदोषस्मरणेन निषेधेषु तदतिक्रमप्रायश्चित्तादौ च देवानामधिकारत्वदेषामप्यधिकारे बाधकाभावः । किंच देवादीनां स्वयजनीयेन्द्रान्तराभावादनधिकार इति पूर्वमीमांसायां निर्णीतम् । एवं च तदनपेक्षदानादिधर्मेषु ब्रह्मविद्यायां चाधिकारोऽस्त्येवेत्युत्तरमीमांसायां स्पष्टम् । तद्वदीदृशानां ज्ञानवतां तिरश्चामप्यधिकारे बाधकाभावः । किंच सर्वदेवतावाचकपदानामन्तर्यामीश्वरवाचकत्वेन सर्वत्र देवानामधिकारोऽस्त्येव । न च ब्राह्मणत्वाद्यभावात्तेषामनधिकारः, तेषामपि क्षत्रियत्वाद्वैस्वतमन्वादेरिव । अत एव चन्द्रवरुणादीनां यज्ञः स्मर्यते पुराणेषु । तत्र तत्र कर्मण्यर्थवादतः फलकल्पनवत्पुराणस्यार्थवादैस्तदधिकारस्यापि कल्पयितुं युक्तत्वात् । किंच त्रैवर्णिकस्याधिकार इत्यत्र त्रैवर्णिकपदं वेदतदर्थज्ञानवत्परम् । अतो देवादीनां तदधिकारः सिद्ध इति भगवतो व्यासवाल्मीकिप्रभृतीनां चाशयः । जैमिनेस्त्वेतदंशेऽज्ञानमेव । अत एव तद्दूरीकरणार्थं मार्कण्डेयेनात्मानं प्रति धर्मान्पृच्छतो जैमिनेर्विन्ध्यारण्यवासितत्वज्ञपक्षिमुखेन धर्मबोधनं कृतम् । तेन हि पक्षिणां ज्ञानानधिकार इति स्वोक्तेस्तस्याविश्वासे जातेऽन्यत्रापि व्यासादिविरुद्धे स्वोक्तेऽर्थे तस्याप्रामाण्यग्रहो भविष्यतीति तदाशय इत्यन्यत्र विस्तरः । अत एव गृध्रराजस्य भगवता दाहादि कृतम्, अग्ने च संपातिना तद्भ्रात्रा कारिष्यमाणसुदकदानादि नासंगतमिति दिक् ॥ १९ ॥

रा० टी०—ननु पितृसदृशज्येष्ठभ्रातृभार्यावमर्शात् सुग्रीवस्यापि तथात्वमित्यत आह—अस्येति । धरमाणस्य धारयतः प्राणानिति शेषः, जीवत इत्यर्थः, महात्मनः सुग्रीवस्य स्नुषायां पुत्रवधूसदृश्यां रुमायां तदभिधभार्यायां कामात् पापकर्मकृत् स्ववशीभूतकनिष्ठभ्रातृत्यागरूपपापकर्मकर्ता त्वं वर्तसे । एतेन सुग्रीवस्य स्वजीवनाभावनिश्चयात् स्वद्भार्यावमर्शेऽपि न दोष इति, तव तु कनिष्ठजीवननिश्चयेऽपि तद्भार्यावमर्शात् शरणागतभ्रातृत्यागात् दोषसमूह इति च सूचितम् । मृतज्येष्ठभ्रातृभार्यापरिग्रहे न दोष इति धर्मशास्त्रे प्रसिद्धम् । अत एव 'भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् । धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः' इति वक्ष्यमाणप्रायोपवेशसमये अङ्गदोक्तौ जीवत इति विशेषणं संगच्छते । अत एव 'देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्' इत्यादि संगच्छते । नच हृद्यपेक्षया मनुष्याधिकारत्वादिति सूत्रभाष्यादौ मनुष्यमात्रस्यैव शास्त्रनियम्यत्वमिति सिद्धान्ततत्त्वात् वालिविषये धर्मधर्मविचारः सर्वज्ञेन परमात्मना रामेण कथं कृत इति वाच्यम् 'तदुपर्यपि बादरायणः' इतितदुत्तरसूत्रभाष्यादौ गन्धर्वादीनामपि शास्त्रनियम्यत्वस्य सिद्धान्ततत्त्वेन वालिनो देवपुत्रत्वादेवत्वेनादोषात् । अत एव भगवत्पार्श्ववर्तिनां नन्दीश्वरगरुडकाकशुण्डादीनां वेदाधिकारो न विरुध्यते । अत एव सर्वज्ञपरमात्मरामकृता जटायुषः प्रमीतक्रिया तद्भ्रात्रा संपातिना करिष्यमाणोदकदानादि च संगच्छते । न च ब्राह्मणायुद्देश्येन कर्मबोधकप्रवृत्तेः देवादीनां तदभावात्कथं तद्विषयत्वमिति वाच्यं, तेषामपि कश्यपादिजन्यत्वादिना ब्राह्मणादित्वादिति दिक् ॥ १९ ॥

गो० टी०—अस्येति । धरमाणस्य जीवितं धारयतः । अनेन जीवतो भ्रातुर्भार्या भ्रात्रा न ग्राह्या मृतस्य तु ग्राह्येति तत्कुलधर्म इति प्रतीयते । अत एव हि वालिनो विलगमनानन्तरं मन्त्रिभिरभिषिक्तस्य सुग्रीवस्य तारापरिग्रहं रामो न निन्दितवान् । अत एव प्रायोपवेशेऽङ्गदो वक्ष्यति 'भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् । धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥' इति ॥ १९–२१ ॥

२०] ति० टी०—उपसंहरति—तदिति । तस्माद्धर्माद्व्यतीतस्य धर्मभ्रष्टस्य । एवं चेदृशे व्यवहारे प्राणान्तो दण्ड इति सूचितम् ॥ २० ॥

रा०टी०—उपसंहरन्नाह—तदिति । तत् मम धर्मपालकत्वाद्धेतोः कामवृत्तस्य स्वेच्छावर्तिनः अत एव अस्मिन् भ्रातृभार्याभिमर्शे धर्माद्व्यतीतस्य परिभ्रष्टस्य ते तव अयं वधरूपो दण्डः मया प्रतिपादितः ॥ २० ॥

२१] ति० टी०—लोकवृत्तात्लोकव्यवहारमर्यादातोऽपेयुषोऽपगतवतः । दण्डादन्यत्र ततोऽन्यमित्यर्थः । केचित्तु—अनेन तिर्यग्योनिव्यवहारमर्यादाप्येवैवेति ध्वनितम् । दृश्यते च गृहे पाल्यमानेषु पारावतादिष्वन्यं स्वभार्यासहितं दृष्टवत्तच्च परस्परं युद्धम् । भार्याया बहुप्रकारताडनादिदण्ड इत्याहुः ॥ २१ ॥

रा० टी०—दण्डस्यावश्यकत्वं बोधयन्नाह—नहीति । लोकवृत्तात् शिष्टजनव्यवहारात् अपेयुषः बहिर्गतस्य अत एव लोकविरुद्धस्य जन्तोर्दण्डात् अन्यत्र अन्यस्मिन्नुपाये निग्रहं प्रायश्चित्तं न पश्यामि ॥ २१ ॥

२२–२३] ति० टी०—क्षत्रियोऽहं, दण्डाधिकारीत्यर्थः ।

१ अवमर्शे इति गो. पाठः । २ धर्मेति गो. पाठः । ३ हीति गो. पाठः । ४ कुलोद्भव इति गो. पाठः । ५ चेति रा. पाठः ।

त्वं चै धर्मादतिक्रान्तः कथं शक्यमुपेक्षितुम् । गुरुधर्मव्यतिक्रान्तं प्राज्ञो धर्मेण पालयन् ॥ २४ ॥
भरतः कामयुक्तानां निग्रहे पर्यवस्थितः । वयं तु भरतादेशावधिं कृत्वा हरीश्वर ॥
त्वद्विधान्भिन्नमर्यादान्निग्रहीतुं व्यवस्थिताः ॥ २५ ॥
सुग्रीवेण च मे सख्यं लक्ष्मणेन यथा तथा । दारराज्यनिमित्तं च निःश्रेयसकरः स मे ॥ २६ ॥
प्रतिज्ञा च मया दत्ता तदा वानरसंनिधौ । प्रतिज्ञा च कथं शक्या मद्विधेनानवेक्षितुम् ॥ २७ ॥

दण्डादन्यत्र निग्रहं न पश्यामीत्युक्तेऽर्थे स्मृतिं प्रमाणयति—औरसीमिति ॥ २२ ॥ २३ ॥

रा० टी०—नन्वु जन्मान्तरे भोगेन पापक्षयो भवितेति किं त्वत्कर्तृकवधेनेत्यत आह—न चेति । कुलोद्गतः कुलमुद्गतम् उत्कर्षतां प्राप्तं यस्य सः क्षत्रियोऽहं ते पापं न मर्शये सहे । अर्थं पृथक् । नन्वु धर्मशास्त्रे बहुविधदण्डानां सत्त्वाद्वध एव किमर्थं कृत इत्यत आह—औरसीमिति । औरसीं मुख्यकन्यां भगिनीं वा अनुजस्य भार्यां वा यो नरः कामात् भोगेच्छातः प्रचरेत तस्य दण्डः वधः प्राणवियोग एव स्मृतः । अर्थद्वयमेकान्वयि ॥ २२ ॥

गो० टी०—तर्हि शिक्षैव कर्तव्या किमर्थमवधीस्तत्राह—न हीति ॥ २२ ॥

रा० टी०—नन्वु इदानीं भरतस्यैव महीपालत्वात् त्यक्तराज्यस्य भवतः शासनमनुचितमित्यत आह—भरत इति । यद्यपि महीपालो भरतस्तथापि आदेशवर्तिनः पालनाज्ञाप्रवर्तकाः वयं स्म इति शेषः, अतः धर्मादतिक्रान्तं च्युतं त्वामुपेक्षितुम् अविचारेण त्यक्तुं कथं शक्यमस्माभिरिति शेषः । तुशब्दः यद्यपीत्यर्थे ॥ २३ ॥

गो० टी०—औरसीं पुत्रीं प्रचरेत गच्छेत् ॥ २३ ॥ २४ ॥

२४] ति० टी०—गुरुर्महान्यो धर्मस्तं व्यतिक्रान्तं तत्प्रच्युतं निग्रहीति शेषः । प्राज्ञो विद्वान्धर्मेण पालयन् धर्मयुक्तामिति शेषः ॥ २४ ॥

२५] ति० टी०—भरतादेशावधिं कृत्वा भरतादेशं तदाज्ञामवधिं प्रमाणं कृत्वा । नन्वु भरतेन रामं प्रत्याज्ञाया अकृतत्वान्मृषोक्तिरेषेति चेन्न, अस्मादेव भगवद्वाक्यात्तथा भरतोक्तेरनुमानेनाज्ञातेः । यद्वा राज्यमूलप्रभौ पर्यवस्थिते सर्वेषां तदीयानां दण्ड्यदण्डनादावनुक्ताऽपि तदाज्ञा सिद्धैवेति न दोषः । अपि च स्वराज्ये भगवता भरतस्य पालनाज्ञायां दत्तायामर्थात्स्वस्मिन्प्रधानराजपुरुषत्वसिद्धौ तदाज्ञार्थसिद्धैवेति न दोषः२५

रा० टी०—गुर्विति । गुरुधर्मव्यतिक्रान्तं गुरुः सर्वोत्कृष्टो यो धर्मस्तस्माद्व्यतिक्रान्तं च्युतं जनं निग्रहीति शेषः, धर्मेण पालयन् । किंच गुरुधर्मव्यतिक्रान्तं पालयन् दण्डपूर्वकशुद्ध्या रक्षन्भरतः कामयुक्तानां निग्रहे अन्वेषणे पर्यवस्थितः वयं तु अवधिं कालनियमं कृत्वा भरतादेशाः भरते आदेशः प्रजापालनाज्ञा येषां ते सन्तो वने चराम इति शेषः । देशावधिमित्यत्र "नञ्सुभ्याम्" इतिसूत्रे नेतियोगविभागेन क्वचित् त्रिपाद्या आसिद्धत्वभावज्ञापनात् संहिता, भागुरिमते अवाकारलोपेन वधिशब्दोऽप्यवधिवाचको वा, भरतकर्तृकाज्ञायाः अवधिं कृत्वेत्यर्थो वा । अत्र पक्षे समासप्रयुक्तषष्ठ्याः लुप्तत्वात् न संहितायां संदेहः । भरताज्ञप्ता इत्यर्थस्तु न युक्तः रामकर्मकभरताज्ञाया अप्रसिद्धत्वात् अयोग्यत्वाच्च, क्लिष्टकल्पनायां प्रमाणाभावाच्च । सार्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०—भरतस्तु महीपाल इत्युक्तं विवृणोति—गुरुरिति । धर्मव्यतिक्रान्तं धर्मव्यतिक्रमणं पालयन् परामृशन् गुरुः भरतश्च निग्रहे पर्यवस्थितः । वयं च तदादेशं विधिं शास्त्रं कृत्वा नियन्तुं पर्यवस्थिताः । अतः कथं शक्य उपेक्षितुमिति पूर्वेण संबन्धः ॥ २५ ॥ २६ ॥

२६] ति० टी०—अथ कारणान्तरमपि वालिवधे दर्शयति—सुग्रीवेणेति । लक्ष्मणेन यथा तथा सुग्रीवेणापि मम सख्यमस्ति । यस्मात्ततः स सुग्रीवो दारराज्यनिमित्तं स्वदारप्राप्त्यर्थं राज्यप्राप्त्यर्थं च मे मम निःश्रेयसकरो मन्निःश्रेयसविषये कृतप्रतिज्ञः ॥ २६ ॥

रा० टी०—सुग्रीवेणेति । मे सख्यं यथा लक्ष्मणेन तथा दारराज्यनिमित्तं स्वदारराज्ययोः प्राप्त्यर्थं सुग्रीवेणापि मे सख्यमकारीति शेषः, अत एव स सुग्रीवः निःश्रेयसकरः सेवातत्परोऽस्तीति शेषः । अत एव तदा सख्यसमये वानरसंनिधौ प्रतिज्ञा त्वत्कर्मकरक्षानिश्चयः दत्ता कृता, मद्विधेन सत्यप्रतिज्ञेनेत्यर्थः । प्रतिज्ञा प्रतिज्ञाविषयीभूतार्थः अनवेक्षितुमकर्तुमित्यर्थः, कथं शक्या । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०—एवं निरपराधवधदोषशङ्कायाः परिहारमुक्त्वा मामेव यदि पूर्वं त्वमेतदर्थमचोदयः इत्युक्तस्य परिहारमाह—सुग्रीवेणेति । सुग्रीवेण यत्सख्यं तल्लक्ष्मणसख्यतुल्यं तद्वदपरिहार्यम् । दारराज्यनिमित्तं च दारराज्यफलकं च । स च मे निःश्रेयसि रतश्च अतः कथमुपेक्षितुं शक्य इत्यन्वयः ॥ २७ ॥

२७] ति० टी०—तत्प्रतिज्ञोत्तरं मयाऽपि तदभिमतविषया प्रतिज्ञा दत्ता कृता च । सा प्रतिज्ञा मद्विधेन कथमनवेक्षितुमसमापयितुं शक्या ॥ २७ ॥

गो० टी०—हेत्वन्तरमप्याह—प्रतिज्ञा चेति । तदा सख्यकरणकाले अनवेक्षितुम् उपेक्षितुमिति यावत् ॥ २८ ॥

१ त्वामिति रा.पाठः । २ त्विति गो. पाठः । ३ क्रान्तमिति रा.पाठः । ४ वृत्तानामिति गो.पाठः । ५ आदेशं विधिमिति गो.पाठः । ६ अर्धमेतत् रा. नास्ति । ७ नियन्तुं पर्यवस्थिता इति गो. पाठः । ८ श्रेयसि रत इति गो. पाठः ।

तदेभिः कारणैः सर्वैर्महद्भिर्धर्मसंश्रितैः । शासनं तव यद्युक्तं तद्भवाननुमन्यताम् ॥ २८ ॥
सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः । वयस्यस्योपकर्तव्यं धर्ममेवानुपश्यता ॥ २९ ॥
शक्यं त्वयाऽपि तत्कार्यं धर्ममेवानुवर्तता । श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ॥
गृहीतौ धर्मकुशलैस्तथा तच्चरितं मया ॥ ३० ॥
राजभिर्धृतदण्डाश्च कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥३१॥
शासनाद्वापि मोक्षाद्वा स्तेनः पापात्प्रमुच्यते । राजा त्वशासन्पापस्य तदवाप्नोति किल्बिषम् ॥३२॥

२८] ति० टी०–एभिरुक्तैः कारणैरेकैकमेव तव वधे पर्याप्तम्, किं पुनर्मिलितानि । तस्मात्तव मया शासनमिदं कृतम् तद्युक्तं शास्त्रसंमतमिति भवानप्यनुमन्यतां चिन्तयतु । तव भ्रातृभार्योपहारकत्वेन दण्ड्यत्वात्सखिकार्यस्य स्वकार्यत्वात्क्षत्रियस्य प्रतिज्ञाहानौ च महतोऽधर्मस्य श्रवणात्त्वद्वधो मे आवश्यको धर्मश्चेत्याशयः ॥ २८ ॥

रा० टी०–तदिति । धर्मसंश्रितैः धर्मविशिष्टैः अत एव महद्भिः सर्वैरेभिरुक्तैः कारणैर्युक्तम् उचितं यत् तव शासनं तद्भवाननुमन्यतां युक्तत्वेन निश्चिनुताम् ॥ २८ ॥

गो० टी०–तदिति । तत्तस्मात् उपेक्षितुमशक्यत्वात् । एभिः भ्रातृभार्यापहरणादिकारणैः तव भ्रातृभार्यावमर्शकस्य यच्छासनं कृतं तद्युक्तं शास्त्रविहितमिति भवाननुमन्यताम्॥२९॥

२९] ति० टी०–सर्वथा मया यः कृतस्तव निग्रहः स धर्म एवेति त्वया द्रष्टव्यः । दुष्टनिग्रहफलकत्वादवतारग्रहणस्येत्याशयो गृदः । किं च धर्ममेवानुपश्यता जानता मित्रस्योपकर्तव्यम् । मित्रोपकारकरणमपि धर्म एवेति सुग्रीवोपकाररूपत्वाद्वधस्य धर्मत्वमिति भावः ॥ २९ ॥

रा० टी०–सर्वथेति । धर्ममनुपश्यता जानता पुरुषेण वयस्यस्य सख्युः उपकर्तव्यं सरूपकारो धर्म इत्यर्थः । अत एव तव निग्रहः दण्डः सर्वथा सर्वप्रकारेण धर्म एवेत्ययं त्वया द्रष्टव्यः ज्ञातव्यः ॥ २९ ॥

गो० टी०–पुनर्हेत्वन्तराणि वक्तुं पीठिकामारचयति–सर्वथेति ॥ ३० ॥

गो० टी०–वयस्यस्यापीति शत्रुवद्धर्ममेवानुपश्यतो वयस्यस्यापि स्वमित्रशत्रुनिरसनं कर्तव्यम् । धर्ममेवानुपश्यता त्वयाऽपि तत्कार्यम् आत्मनिग्रहरूपं शक्यं प्रायश्चित्तत्वेनानुमन्तुं योग्यमित्यर्थः ॥ ३१ ॥

३०] ति० टी०–किं चानृतापादिना धर्ममनुवर्तता एतदुष्कर्मप्रायश्चित्तरूपधर्मानुवृत्तिं कुर्वता त्वयाऽपि तत्कार्यं मत्कृतनिग्रहरूपं कार्यं शक्यं राजप्रार्थनापूर्वं कारयितुं शक्यम् । सत्यनृतापे त्वया प्रार्थनापूर्वमयं दण्डः स्वस्य कारणीय एवेति स्वत्करणीयस्यैव मया कृतत्वान्न क्षोभः कार्य इति भावः । पापिनामेवं स्वदण्डप्रार्थना स्मृतिसिद्धेत्याह—श्रूयत इति । चारित्रवत्सलौ चरित्रप्रतिपादनतत्परौ धर्मकुशलैर्गृहीतौ च । भवतस्तत्तदर्थतत्त्वमेव तथा शास्त्रोक्तप्रकारेणैव मया चरितं कृतम् ॥ ३० ॥

रा० टी०–शक्यमिति । धर्ममनुवर्तता त्वयाऽपि कार्यं सर्वैः कर्तव्यं तत् मत्कर्तृकानुशासनं शक्यं कर्तुमिति शेषः । अर्धं पृथक् । स्वाचरिते शिष्टोक्तिं प्रमाणयितुमाह–श्रूयते इति । यथा येन प्रकारेण यदर्थं धर्मकुशलैः गृहीतौ स्वीकृतौ चारित्रवत्सलौ शुभाचरणप्रतिपादकौ मनुना गीतौ श्लोकौ श्रूयेते तथा तेन प्रकारेण तत्तद्गृहीतं मया चरितं कृतम् । अर्धद्वयमेकान्वयि ॥ ३० ॥

गो० टी०–स्तेनावश्यं हन्तव्यत्वे वालिनाऽवश्यमनुमन्तव्यत्वे च संवादं दर्शयति–श्रूयत इति । चारित्रवत्सलौ आचारैकपरौ गृहीतौ धृतौ । तच्छ्लोकद्वयोक्तम् ॥ ३२ ॥

३१] ति० टी०–तौ श्लोकावाह–राजभिरिति । अनेन स्वकृतदण्डस्य शास्त्रसंमतत्वं दण्ड्यहितत्वं चोक्तम् ॥ ३१ ॥

रा० टी०–श्लोकावेवाह—राजभिरिति । पापानि कृत्वा वियमाना मानवाः राजभिर्धृतदण्डाः अत एव निर्मलाः सन्तः सुकृतिनः सन्त इव स्वर्गमायान्ति प्राप्नुवन्ति ॥ ३१ ॥

गो० टी०–श्लोकौ पठति–राजभिरित्यादिना ॥ ३३ ॥

३२] ति० टी०–त्वयाऽपि प्रार्थनापूर्वमयमर्थः कारणीय इत्यर्थप्रतिपादकं श्लोकमाह—शासनाद्वेति । पापोऽहं मे दण्डं कुर्विति प्रार्थनया स्वसमीपमागतस्य पापिनः शासनादण्डकरणाद्वा मोक्षादयया विसर्जनाद्वा । स्तेन इति पापोपलक्षणम् । तत्र द्वितीयः पक्षो राज्ञो दोषायेत्याह–राजा त्विति। राजा तु पापस्याशासन्पापनियहमकुर्वन् । अनेन त्वदण्डकरणमस्मादृशामावश्यकमिति ध्वनितम् ॥ ३२ ॥

रा० टी०–शासनादिति । स्तेनस्तदुपलक्षितपापी शासनात् शरीरदण्डात् मोक्षात् ग्राह्मणादीनां पापित्वे मोक्षणात् ग्रामादिभ्यो निःसारणादित्यर्थः, पापात्प्रमुच्यत एव, पापस्य पापिनो अशासन् दण्डमकुर्वन् राजा तु तदा शासनाभावसमये किल्बिषं पापमवाप्नोत्येव ॥ ३२ ॥

गो० टी०–शासने परस्याभ्युदयमुक्त्वा अशासने राज्ञोऽभ्युदयमाह–शासनादिति । राज्ञा शासने मोचने वा स्तेनश्चोरो मुच्यत एव पापात् । पापस्य पापिनस्याशासनाद्राजा तत्किल्बिषं पापमाप्नोति ॥ ३४ ॥

१ ऽपीति गो. पाठः । २ पश्यतेति गो. पाठः । ३ हरे इति गो. पाठः । ४ विमोक्षादिति गो. पाठः । ५ स्तेयादिति गो. पाठः ।

आर्येण मम मान्धात्रा व्यसनं घोरमीप्सितम् । श्रमणेन कृते पापे यथा पापं कृतं त्वया ॥३३॥
अन्यैरपि कृतं पापं प्रमत्तैर्वसुधाधिपैः । प्रायश्चित्तं च कुर्वन्ति तेन तच्छाम्यते रजः ॥३४॥
तदलं परितापेन धर्मतः परिकल्पितः । वधो वानरशार्दूल न वयं स्ववशे स्थिताः ॥३५॥
शृणु चाप्यपरं भूयः कारणं हरिपुंगव । तच्छ्रुत्वा [2]हि महद्वीर न मन्युं कर्तुमर्हसि ॥३६॥
न मे तत्र मनस्तापो न मन्युर्हरिपुंगव । वागुराभिश्च पाशैश्च कूटैश्च विविधैर्नराः ॥३७॥
प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून्मृगान् । प्रधावितान्वा वित्रस्तान्वैस्रब्धानतिविष्ठितान् ॥३८॥
प्रमत्तानप्रमत्तान्वा नरा मांसाशिनो भृशम् । विध्यन्ति विमुखांश्चापि न च दोषोऽत्र विद्यते ॥३९॥

३३] ति० टी०–अथात्रार्थे शिष्टाचारमपि प्रमाणयति–आर्येणेति । मम कूटस्थेन मांधात्रा त्वया यत्प्रकारं पापं कृतं तत्प्रकारे पापे केनचिच्छ्रमणेनार्हतेन कृते सति कर्तुमीप्सितं घोरं व्यसनं दण्डरूपं मांधात्रा कृतम् ॥ ३३ ॥

रा० टी०–स्वकृते शिष्टाचारं प्रमाणयति—आर्येणेति । यथा येन प्रकारेण त्वया पापं कृतं तथा तेन प्रकारेण श्रमणेन केनचिदार्हतेन पापे कृते सति ईप्सितं शास्त्रानुसारि घोरं हिंसारूपं व्यसनं दुःखं दत्तमिति शेषः ॥ ३३ ॥

गो० टी०–न केवलं वचनम् आचारश्चास्मिन्नर्थेऽस्तीत्याह–आर्येणेति । यथा त्वया पापं कृतं तथा श्रमणेन क्षपणकेन केनचित्पापे कृते मम आर्येण वृद्धप्रपितामहेन मांधात्रा घोरं व्यसनं दण्डनम् ईप्सितं प्रयुक्तमिति यावत् ॥ ३३ ॥

३४] ति० टी०–अन्यैरपि वसुधाधिपैः प्रमत्तपुरुषैः कृतं पापं प्रति शुद्धये दण्डनं कृतमित्यध्याहारः । न केवलं राजदण्ड एव पापप्रायश्चित्तम्, अन्यदपि मन्वाद्युक्तमित्याह–प्रायश्चित्तं च कुर्वन्ति, कृतपापा इति शेषः । तेन कर्त्रनुष्ठित-प्रायश्चित्तेन ॥ ३४ ॥

रा० टी०–अन्यैरिति । अन्यैरपि वसुधाधिपैः राजभिः प्रमत्तैर्जनैः कृतं पापं दण्डेन निवर्तितमिति शेषः । ननु गुर्वादीनां दण्डने राज्ञामनधिकारात्कथं तच्छुद्धिरित्यत आह—प्रायश्चित्तं पापनिवर्तकगायत्रीजपादि कुर्वन्ति पापे सति गुर्वादय इति शेषः । तेन प्रायश्चित्तेन तत् गुर्वादिकृतं राजपापं शाम्यते निवर्त्यते इत्यर्थः ॥ ३४ ॥

गो० टी०–अन्यैरपीति । प्रमत्तैर्वसुधाधिपैर्हेतुभिः अन्यैरपि जनैः पापं कृतं ते वसुधाधिपाः विगतानवधानाः सन्तः कर्मपरामर्शवेलायां पापिनां प्रायश्चित्तं वधादिकं कुर्वन्ति तेन प्रायश्चित्तेन तद्रजः तत्पापं शाम्यति, अथापीति शेषः ॥ ३६ ॥

३५] ति० टी०–धर्मतः शास्त्रतः । न वयं स्ववशे स्थिताः किंतु शास्त्राधीना इति शेषः । एतेनादर्शनपूर्वकं वधोऽधर्म इति यदुक्तं तदपि समाहितम् । दण्डार्थवधे दर्शनानपेक्षणात् । एवं वाल्मिनः संध्योपासनाद्यनुष्ठानेन शास्त्रज्ञत्वमवलम्ब्य समाहितम् ॥ ३५ ॥

रा० टी०–तदिति । हे वानरशार्दूल ! यतो वयं स्ववशे न स्थिताः शास्त्रानुसारवर्तिन इत्यर्थः, अत एव धर्मतः धर्मपालनाय वधः परिकल्पितः तत्तस्माद्धेतोः परितापेन तव शोकेनालं, शोको न कर्तव्य इत्यर्थः ॥ ३५ ॥

गो० टी०–तदलमिति । न स्ववशे स्थिताः न स्वतन्त्राः शास्त्रवश्या इत्यर्थः । अनेन पराङ्मुखवधस्य दोषत्वमपि परिहृतं प्रायश्चित्तस्य यथाकथंचित्कर्तव्यत्वात् । पञ्चमहापातकादिप्रायश्चित्तस्य मरणान्तिकत्वाद्वधादेव हि कार्यं भवति नान्यथा ॥ ३७ ॥

३६] ति० टी०–अथ केवलशास्त्रामृगत्वमवलम्ब्यापि समाधत्ते—शृणु चापीति । छद्मेनानभिमुखस्य निःशङ्कवधे कारणं शृण्वित्यर्थः । तन्महत्कारणं श्रुत्वा मन्युं न कर्तुमर्हसि ॥ ३६ ॥

रा० टी०–ननु ममेन्द्रपुत्रत्वेऽपि वानरत्वेनैव व्यवहाराच्छास्त्रस्यास्मद्विषयत्वाभावात् मदनुशासनमनुचितमेवेति तदापाततः शङ्कां जिहीर्षुस्तुण्यति दुर्जनन्यायेनाह—शृणिवति । हरिपुङ्गव हे वानरराज ! अपरं लघुकारणं वधे निमित्तं भूयः शृणु । तत् कारणं श्रुत्वा महत् मन्युं कर्तुं नार्हसि सामान्ये नपुंसकम् । किंच महत् त्वया प्रशंसनीयं कारणमित्यन्वयः ॥ ३६ ॥

गो० टी०–एवं संध्योपासनराज्यपालनादिकं नियमेनानुतिष्ठतो वालिनः शास्त्रवश्यत्वमवलम्ब्योक्तम् । अथ शास्त्रामृगत्वमवलम्ब्याह–शृणु चेत्यादिना ॥ ३८ ॥

३७] ति० टी०–तत्र प्रच्छन्नवधे मनस्तापः कथमेवं कृतमिति पश्चात्तापो न। नापि वधस्य कारणं मन्युर्मम क्रोधः, यद्वा मन्युः शोकः । मृगाणां तादृशवधस्य राज्ञां स्वभावतया न दोष इत्याह–वागुराभिरिति । विविधैः कूटैस्तृणाच्छन्नगर्त्तादिसंपादनरूपैः ॥ ३७ ॥

३८–३९] ति० टी०–पर्णाद्याच्छादितत्वादिरूपैः प्रतिच्छन्ना इत्यन्वयः । विस्रब्धान्विश्वस्तान् । अतिविष्ठितान्स्वपालितमृगौर्वेष्टितान्विरोधेन स्थितान् । युध्यमानानिति यावत् ॥ ३८ ॥ ३९ ॥

रा० टी०–नेति । तत्र देवत्वाभाववत्त्वद्वधे मन्युः क्रोधः न अपेक्षित इति शेषः, अत एव मनस्तापो न । तत्र कारणमाह–

१ यदिति गो. पाठः । २ हेतुमदिति गो. पाठः । ३ विस्रब्धाश्चापि नीति गो. पाठः । ४ मांसार्थिन इति गो. पाठः ।

यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः । तस्माच्चं निहतो युद्धे मया बाणेन वानर ॥
अयुध्यन्प्रतियुध्यन्वा यस्माच्छाखामृगो ह्यसि ॥ ४० ॥
दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च । राजानो वानरश्रेष्ठ प्रदातारो न संशयः ॥ ४१ ॥
तान्न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् । देवा मानुषरूपेण चरन्त्येते महीतले ॥ ४२ ॥
त्वं तु धर्ममविज्ञाय केवलं रोषमास्थितः । [1]विदूषयसि मां धर्मे पितृपैतामहे स्थितम् ॥ ४३ ॥

वागुराभिः लोहनिर्मितमृगग्राहिकाभिः पाशैश्च विविधैः अनेकप्रकारैः कूटैः कापट्ययुक्तव्यापारैश्च प्रतिच्छन्ना दृश्या वानराः राजप्रभृतयः विस्रस्तान् भीतान् अत एव प्रधावितान् पलायितान् विस्रब्धान् मद्विघातकोऽत्र नास्तीति विश्वासयुक्तान् अत एव अतिविष्ठितान् संस्थितान् वा सुबहून् अतिविपुलान् मृगान् गृह्णन्ति। एतेन ग्रहणे दोषाभावः सूचितः। श्लोकद्वयमेकान्वयि ॥ ३७ ॥ ३८ ॥

रा० टी०—नन्वु शिष्टाचारेण ग्रहणे दोषाभावः प्रतीयते न तु वधे अत्र तु वध इत्यत आह—प्रमत्तानिति । मांसार्थिनः अनरा नरसदृशा राजानस्तु प्रमत्तानप्रमत्तान्वा विस्रब्धान् पलायितान्वा मृगान् विध्यन्ति घ्नन्ति । अत्र वधे दोषः मनुष्यवधवत्पापं न विद्यते एतेन मृगवधजनितपापस्याल्पत्वात् प्रायश्चित्तस्य सुकरत्वान्न तद्वधे भीतिरिति सूचितम् । यदि च मांसार्थित्वं यागार्थमित्युच्यते तदा न दोष इत्यस्य दोषसंसर्गाभावो बोध्य इति दिक् ॥ ३९ ॥

गो० टी०—' दृश्यमानस्तु युध्येथा मया यदि नृपात्मज । अथ वैवस्वतं देवं पश्येस्त्वं निहतो मया' इति। 'त्वया दृश्येन तु रणे निहतोऽहं दुरासदः । प्रसुप्तः पन्नगेनेव नरः पानवशंगतः ' इति च वालिना यदुक्तं तदुभयस्योत्तरमाह—न मे तत्र मनस्ताप इति । तत्र यमसदनप्रापणोक्तिप्रच्छन्नवेधननिन्दोक्तिविषये मे मन्युर्नास्ति शाखामृगस्य तवालक्ष्यत्वादिति भावः । मनस्तापाभावश्च मृगविषये प्रच्छन्नवेधनस्य राज्ञां स्वभावतया दोषाभावादिति भावः । तदेवोपपादयति—वागुराभिरित्यादिना । कूटैः कपटव्यापारैः विस्रब्धान् विश्वस्तान् । यद्यपि प्रकृते न मांसार्थिता तथापि पराङ्मुखवधान्न दोष इति तात्पर्यम् ॥ ३९—४२ ॥

४०] ति० टी०—न दोष इत्यत्र शिष्टाचारं प्रमाणयति—यान्तीति । मृगयां नानाप्रकारमृगवधयुक्तां कर्तुं राजर्षयो धर्मकोविदा यान्ति । प्रतियुध्यन्नन्येन युद्धं कुर्वन् । मांसादिलोभाभावेऽपि क्षत्रियस्वाभाव्यात्तव वधो मया कृतः इतरव्याघादितिर्यग्जन्तुवत् । तत्र मे न कश्चिन्महान्दोषः, अल्पस्तु प्राणायामप्रमाणापनेय इति भावः ॥ ४० ॥

रा० टी०—नन्वु भवतामिदानीं न मांसार्थित्वमिस्यत आह—यान्तीति । अत्र अस्मिन्वने धर्मकोविदाः अपि राजर्षयः मृगयां यान्ति तस्माद्धेतोः यस्माच्चं शाखामृगोऽसि अतः अयुध्यन् साक्षाद्युद्धमकुर्वन् प्रति युध्यन् सुग्रीवद्वारा युद्धं कुर्वंश्च त्वं युद्धे मया निहतः । धर्मकोविदा इत्यनेन तेषां मृगयाप्रवृत्तिः दुष्टनिग्रहार्थैवेति व्यञ्जितं, तेन मत्कर्तृकवधोऽपि त्वदुष्टत्वविनिवृत्तये इति ध्वनितं, तेन मृगयायामपि सप्रयोजनमेव हननमहं तु निष्प्रयोजनं हतः इति श्रमो न कार्य इति बोधितम् । सार्धश्लोक एकान्वयी ॥ ४० ॥

४१] ति० टी०—शुभस्यैहिकाभ्युदयस्य । राजानः क्षत्रियाः ॥ ४१ ॥

रा० टी०—आपाततः स्वविषयकाक्षिप्तेपं निवर्तयितुमाह—दुर्लभस्येत्यादिभिः । दुर्लभस्य अन्यैर्दुष्प्रापस्य धर्मस्य शुभस्य मङ्गलहेतुकस्य जीवितस्य च प्रदातारः राजानो भवन्तीति शेषः । अर्धद्वयमेकान्वयि । जीवितस्य प्रदातार इत्यनेन यदि त्वयि जीवितेच्छा तर्हि त्वां जीवयिष्यामीति सूचितम् ॥ ४१ ॥

गो० टी०—परपीडाकरो राज्ञां व्यापारो निष्फल इत्याशङ्क्य व्रणचिकित्सान्यायेन सः श्रेयस्कर एवेत्याह—दुर्लभस्येति । जीवितस्य जीवनस्य ॥ ४३ ॥

४२-४३] ति० टी०—न हिंस्यात् रणव्यतिरेकेणेत्यर्थः आक्रोशो निन्दा आक्षेपोऽवमाननम् अप्रियवादः प्रतिकूलवचनम् त्वं तु न तादृशो राजेति भावः । एतेन राज्ञो वधादौ ब्रह्मवधादिदोष इति सूचितम् ॥ ४२ ॥ ४३ ॥

रा० टी०—राजगुणवर्णनस्य फलमाह—तानिति । देवा एव एते राजानः मानुषरूपेण महीतले चरन्ति । तस्मात् तान् राज्ञः न हिंस्यात् न वा आक्रोशेत् निन्देत्, न वा क्षिपेत् कूटं वदेत् न वा अप्रियं वदेत् ॥ ४२ ॥

गो० टी०—तानिति । न हिंस्यान्न पीडयेत् तेष्वनर्थकरत्वबुद्धिं न कुर्यादित्यर्थः नाक्रोशेन्न निन्देत् नाक्षिपेत् नोक्तिखण्डनं कुर्यात् नाप्रियं वदेत् परुषं न वदेदित्यर्थः । तत्र हेतुमाह—देवा इति । एते पूर्वोक्ता राजानः देवाः अष्टौ लोकपालाः ' अष्टाभिर्लोकपालानां मात्राभिः कल्पितो नृपः ' इतिवचनात् । मनुष्यरूपेण मनुष्यशरीरेण उपलक्षिताश्चरन्ति ॥ ४४ ॥

रा० टी०—त्वमिति । केवलं रोषमास्थितस्त्वं तु धर्ममविज्ञाय पितृपैतामहे धर्मे स्थितं मां विदूषयसि एतेन दुर्वचनं हेयमिति व्यञ्जितम् ॥ ४३ ॥

गो० टी०—त्वं त्विति । पितृपैतामहे पितृपितामहप्राप्ते । नन्वेवमपि कथंचित्परिहार्यं परतश्चहर्तिं वालिद्रोहं मनागपसर्प-

१ मनुष्येति गो. पाठः । २ प्रदूषयसीति गो. पाठः ।

एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम् । न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः ॥ ४४ ॥
प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः । यत्त्वमात्थ नरश्रेष्ठ तत्तथैव न संशयः ॥ ४५ ॥
प्रतिवक्तुं प्रकृष्टे हि नापकृष्टस्तु शक्नुयात् । यदयुक्तं मया पूर्वं प्रमादाद्वाक्यमप्रियम् ॥ ४६ ॥
तत्रापि खलु मां दोषं कर्तुं नार्हसि राघव । त्वं हि दृष्टार्थतत्त्वज्ञः प्रजानां च हिते रतः ॥
कार्यकारणसिद्धौ च प्रसन्ना बुद्धिरव्यया ॥ ४७ ॥
मामप्येवगतं धर्माद्व्यतिक्रान्तपुरस्कृतम् । धर्मसंहितया वाचा धर्मज्ञ परिपालय ॥ ४८ ॥
बाष्पसंरुद्धकण्ठस्तु वाली सार्तरवः शनैः । उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ॥ ४९ ॥

णमित्याक्षेपवादकरं छन्नवेधनं समर्थोऽपि किमर्थं कृतवान् तदवहितमनाः शृणु । यदि रामो वालिनः पुरतस्तिष्ठेत्तदा विदिततदीयप्रभावतया वाली प्रबुद्धो भवेत् तदा तद्बुधो न युक्तः प्रतिज्ञा च व्याहन्येत तद्द्वारा तन्मित्रं रावणोऽपि शरणं व्रजेत् देवकार्यं च लुप्येत् अतः प्रच्छन्नो वलिनमवधीत् ॥ ४५ ॥

४४-४५] ति० टी०-प्रव्यथितो भगवति मिथ्यादोषोक्त्या प्रव्यथितो न दोषं राघवे दध्यौ तथाध्यानस्यापि पापावहत्वादिति भावः । यद्वा ध्यानेनाऽपि नाविन्दत् शुद्धबुद्धमुक्तस्वभावत्वादिति भावः । धर्मेऽधिगतनिश्चयो भगवद्वचनादेव धर्मविषये जातनिश्चयः ॥ ४४ ॥ ४५ ॥

रा० टी०-एवमिति । रामेण एवमुक्तः अत एव धर्मे धर्मपूर्वकरामकर्तृकस्ववधे अधिगतनिश्चयः अत एव भृशं प्रमथितः दुरुक्त्याभासहेतुकव्यथां प्राप्तो वाली राघवे दोषं न दध्यौ । एतेन क्वचिन्निलीय रामो बाणं चिक्षेपेत्युक्तिरापाततो रमणीया अत एवापाततः स्वबुद्ध्या रूढरामविपरीतकर्मवर्णनावसरे तन्नोक्तम् । दृष्टैरात्मानमाच्छाद्येत्युक्तिस्तु आतपतापस्तत्र नास्तीति बोधनपरा दृष्टैरात्मानमाच्छाद्य विद्यमानां किष्किन्धामित्यर्थो वा अत एव किष्किन्धातो निःसरणसमये रामसमीपस्थमेव सुग्रीवं वाली ददर्शेत्युक्तिः संगच्छते ॥ ४४॥

गो० टी०-एवमिति । प्रव्यथितः अज्ञानाद्राममधिक्षिप्तवानस्मीत्यनुतप्तः ॥ ४६ ॥

रा० टी०-प्रतीति । ततः धर्मेणैव रामेणाहं हत इति निश्चयात् हेतोः प्राञ्जलिर्वानरेश्वरः रामं प्रत्युवाच ॥ ४५ ॥

रा० टी०-तत्प्रतिवचनकारमाह-यदिति । हे नरश्रेष्ठ ! यत् त्वमात्थ कथयसि तत् तथैव सत्यमेवेत्यर्थः, इदानीं दुरुक्तिजनितस्वापराधक्षमापणाय स्तोतुमप्यहं न समर्थ इति बोधयन्नाह-प्रतीति । प्रकृष्टे उत्कृष्टजनसंनिधौ अपकृष्टः नीचो जनः प्रतिवक्तुं न शक्नुयात् । एतेन यदि प्रतिवक्तुमेव न शक्नुयात्तर्हि स्तोतुं न शक्नुयादिति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो ध्वनितः ॥ ४६ ॥

गो० टी०-यत्त्वमिति । प्रकृष्टे विषये ॥ ४७ ॥

४६] ति० टी०-प्रकृष्टे प्रकृष्टज्ञानैश्वर्ये । अपकृष्टः मादृश इति शेषः । यत्प्रमादाद्वाक्यमुक्तं तदयुक्तमेव ॥ ४६ ॥

रा० टी०-यदिति । प्रमादात् अनवधानात् अप्रियम् अत एव अयुक्तं वाक्यं यन्मया पूर्वमुक्तं तत्र मदुक्तौ मे दोषं दोषबुद्धिं कर्तुं नार्हसि ॥ ४७ ॥

गो० टी०-तदिति । कर्तुं चिन्तयितुम् ॥ ४८ ॥

४७] ति० टी०-तत्राप्यज्ञानजाप्रियोक्तावपि दोषं कर्तुं दोषं भावयितुम् । तत्र हेतुः-त्वं हीति । दृष्टेनापरोक्षतयाऽवेनार्थतत्त्वस्य धर्मोदितत्वस्य ज्ञाता । कार्यं दण्डः, कारणं तद्धेतुभूतं पापम्, तयोः सिद्धौ निश्चये तव बुद्धिरन्तःकरणं प्रसन्ना निर्मला वैषम्यरहितेत्यर्थः ॥ ४७ ॥

रा० टी०-त्वमिति । हि यतः दृष्टार्थतत्त्वज्ञः अस्मदादिज्ञानविषयीभूतार्थयाथार्थ्यविज्ञाता प्रजानां हिते रतश्च त्वमसीति शेषः । अतः कार्यकारणसिद्धौ कार्यं कर्तव्यं दण्डनमित्यर्थः, कारणं तद्धेतुभूतपापं तयोः सिद्धौ निश्चये इत्यर्थः, अव्यया परिणामादिरहिता बुद्धिस्त्वदन्तःकरणधर्मविशेषः प्रसन्ना संशयरहितेत्यर्थः ॥ ४८ ॥

गो० टी०-त्वं हीति । दृष्टार्थश्चासौ तत्त्वज्ञश्च दृष्टार्थतत्त्वज्ञः । यद्वा ज्ञः पण्डितः दृष्टार्थतत्त्वश्चासौ ज्ञश्चेति समासः । कार्यकारणसिद्धौ कार्यं दण्डनम् कारणं तद्धेतुभूतं पापम् तयोः सिद्धौ परिज्ञाने । बुद्धिः अन्तःकरणम् ॥ ४९ ॥

४८] ति० टी०-धर्मादेव व्यतिक्रान्तानां पुरस्कृतमग्रेसरम् । अवगतं तदग्रेसरत्वेन प्रसिद्धं मामपि पापिष्ठतरं धर्मसंहितया वाचा परिपालय, उत्तमश्लोकान्प्राप्नुहीति वाचानुगृह्णीत्यर्थः ॥ ४८ ॥

रा० टी०-मामिति । धर्मात् व्यतिक्रान्तपुरस्कृतं व्यतिक्रान्तेषु च्युतेषु पुरस्कृतम् अग्रे गणनमपि अवगतं त्वां प्राप्तं मां धर्मसंहितया धर्मवन्निष्ठया शरणागतं पालयामीत्याकारिकया वाचा परिपालय दोषान्निवर्तयेत्यर्थः । 'अगतधर्माणं व्यतिक्रान्तपुरस्कृतम्' इति तीर्थपाठः ॥ ४९ ॥

गो० टी०-मामपीति । अगतधर्माणं कृत्याकरणवन्तं व्यतिक्रान्तपुरस्कृतं पुरस्कृतव्यतिक्रमम् अकृत्यकारिणमित्यर्थः। वाचा परिपालय सर्वं मया क्षान्तमिति वदेत्यर्थः ॥ ९० ॥

४९] ति०टी०-उवाच पुत्रादिमायाकृतः सन्नुवाचेत्यर्थः४९

रा० टी०-वालिनो वचनानन्तरं वर्णयितुमाह-बाष्पेति ।

१ तदेवं नास्तेति गो. पाठः । २ उक्तमिति गो. पाठः । ३ मे इति गो. पाठः । ४ अगतधर्माणमिति गो. पाठः । ५ श्लोकोऽयं गो. नास्ति

न चात्मानमहं शोचे न तारां नापि बान्धवान् । यथा पुत्रं गुणज्येष्ठमङ्गदं कनकाङ्गदम् ॥ ५० ॥
स ममादर्शनादीनो बाल्यात्प्रभृति लालितः । तटाक इव पीताम्बुरुपशोषं गमिष्यति ॥ ५१ ॥
बालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः । तारेयो राम भवता रक्षणीयो महाबलः ॥ ५२ ॥
सुग्रीवे चाङ्गदे चैव विधत्स्व मतिमुत्तमाम् । त्वं हि गोप्ता च शास्ता च कार्याकार्यविधौ स्थितः ५३ ॥
या ते नरपते वृत्तिर्भरते लक्ष्मणे च या । सुग्रीवे चाङ्गदे राजंस्तां चिन्तयितुमर्हसि ॥ ५४ ॥
मदोषकृतदोषां तां यथा तारां तपस्विनीम् । सुग्रीवो नावमन्येत तथाऽवस्थातुमर्हसि ॥ ५५ ॥
त्वया ह्यनुगृहीतेन शक्यं राज्यमुपासितुम् । त्वद्वशे वर्तमानेन तव चित्तानुवर्तिना ॥ ५६ ॥

बाष्पसंरुद्धकण्ठः अत एव पङ्कलग्नः कर्दमे निमग्नः द्विपो हस्तीव सार्तः आर्तत्वसहितः रवः स्वरो यस्य स वाली रामं संप्रेक्ष्य शनैरुवाच ॥ ५० ॥

५०] ति० टी०—न त्वात्मानं भगवता त्वया हतत्वाद्दुष्कृतभोगत्वात् न तारां सुग्रीवस्यापि तस्यामनुरागात् न बान्धवान् सुग्रीवतोऽपि सेवया जीवनलाभात् पुत्रं शोचामि बालत्वात् ॥ ५० ॥

रा० टी०—तद्वचनाकारमाह—नेति । कनकाङ्गदं सुवर्णाङ्गदविशिष्टं गुणज्येष्ठं पित्रानुकूल्यादिवर्तनरूपश्रेष्ठगुणवन्तम् अङ्गदं यथा शोचे तथा आत्मादीन् न शोचे । एतेन रामहतत्वात्प्राप्तपरमकल्याणत्वनात्मन- शोकानर्हत्वं, तारायां बान्धवेषु च रामानुगृहीतसुग्रीवस्यापि प्रेमाधिक्यात् तयोरपि शोकानर्हत्वं व्यञ्जितम् ॥ ५१ ॥

गो० टी०—कार्यान्तरमप्यर्थयते—न त्वित्यादिना । नात्मानं प्रति शोचे त्वया दत्तसम्यग्गतिकत्वात् । नापि तारादिकान् प्रति सुग्रीवस्य विद्यमानत्वात् । पुत्रम् "अङ्गादङ्गात्संभवसि" इत्युक्तरीत्या स्वानतिरिक्तं गुणश्रेष्ठं पितृशुश्रूषादिगुणैः श्रेष्ठं कनकाङ्गदम् दर्शनीयमित्यर्थः ॥ ५१-५३ ॥

५१] ति० टी०—मया लालितः स ममादर्शनाच्छोषं गमिष्यति । पीताम्बुः सस्याद्यपयोजिताम्बुः ॥ ५१ ॥

रा० टी०—नन्वङ्गदे सुग्रीवद्वेषस्य त्वया अदृष्टत्वात्तद्विषयकोऽपि शोकः किमथ क्रियते इत्यत आह—स इति । बाल्यात्प्रभृति बाल्यादारभ्य लालितः अत एव ममादर्शनादीनः सोऽङ्गदः पीताम्बुः सूर्यकिरणशोषितजलस्तटाक इवोपशोषं कृशत्वमित्यर्थः, गमिष्यति प्राप्स्यति ॥ ५२ ॥

५२] ति० टी०—तारेयस्तारापत्यम् । एकपुत्रत्वेनातिलालितत्वम् ॥ ५२ ॥

रा० टी०—बाल इति । बालः अल्पवयस्कः अत एव अकृतबुद्धिः न कृता संपन्ना बुद्धिर्यस्मिन्सः तारेयः तारापत्यं मे प्रियः मत्प्रीतिविषयीभूतः महाबलः मे एकपुत्रः भवता रक्षणीयः । मे इत्युभयान्वयि ॥ ५३ ॥

५३-५४] ति० टी०—मतिमुत्तमाम् ' मरणान्तानि वैराणि ' इति न्यायेनेति भावः । सुग्रीवे च तत्रैवेत्यर्थः । भातृस्नेहोद्बोधेन वा तत्राप्यनुग्रहप्रार्थनम् । कार्यविधौ गोप्ता अकार्यविधौ शास्ता ॥ ५३ ॥ ५४ ॥

रा० टी०—सुग्रीवे स्वद्वेषाभावं द्योतयन्नाह—सुग्रीव इति । हि यतः कार्याकार्यविधौ विहिताविहिताचरणे यथाक्रमं गोप्ता रक्षकः शास्ता शासनकर्ता च सन् त्वं स्थितः अतः सुग्रीवे अङ्गदे च उत्तमां मद्वैरनिमित्तकपरस्परवैराजननेन उत्कृष्टां मतिं विधत्स्व संपादय ॥ ५४ ॥

गो० टी०—सुग्रीवे चेति । मतिं तुल्यामिति शेषः ॥ ५४ ॥

रा० टी०—अङ्गदेऽपि रामप्रीतिमुत्पादयितुमाह—येति । हे नरपते ! हे राजन् ! अस्मद्विषयकानुरागविशिष्टभरते लक्ष्मणे च या ते वृत्तिस्त्वत्कर्मकसेवा तां सेवामेव सुग्रीवे अङ्गदे च चिन्तयितुं बोधयितुं कारयितुमित्यर्थः, अर्हसि । यदि च वृत्तिशब्देन वात्सल्यद्वारा स्थितिरुच्यते तदा ते इति कर्तरि षष्ठी ॥ ५५ ॥

गो० टी०—या त इति । वृत्तिः प्रीतिरिति यावत् ॥ ५५ ॥

५५] ति० टी०—मदोषकृतदोषां मत्कृतसुग्रीवापकारदोषानुसरणमात्रेण कृतदोषां न तु स्वतः कृततदपकाराम् । तपस्विनीं शोच्याम् । अवस्थातुमवस्थापयितुम् ॥ ५५ ॥

रा० टी०—मदोषेति । तपस्विनीमतिविचारशीलामत एव मदोषकृत एव दोषो यस्यां तां स्वयं सुग्रीववधमकुर्वाणामित्यर्थः, तारां सुग्रीवो यथा नावमन्येत तथा अवस्थातुम् अवस्थापयितुं शिक्षयितुमित्यर्थः, त्वमर्हसि ॥ ५६ ॥

गो० टी०—मदोषेति । नावमन्येत पुत्रनिर्वासनेनेति भावः । अवस्थातुं व्यवस्थापयितुम् ॥ ५६ ॥

५६] ति० टी०—राज्यं वानरराज्यम् ॥ ५६ ॥

रा० टी०—सेवाप्रार्थनायां फलमाह—त्वयेति । त्वद्वशे वर्तमानेन अत एव चित्तानुवर्तिना प्रीत्या स्वचित्तविषयीभूतेन त्वदीप्सितकारिणा वा अत एव त्वया अनुगृहीतेन जनेन राज्यं वसुधाधिपत्यमुपासितुं कर्तुं शक्यं, दिवं वसुधां च अर्जयितुम् एककालावच्छेदेन गृहीतुं शासितुं पालयितुं च शक्यम् । सार्धश्लोक एकान्वयी ॥ ५७ ॥

गो० टी०—त्वयेति । उपासितुं मयेति शेषः । न केवलं मद्राज्यम् अन्यच्चेत्याह—शक्यमिति ॥ ५७ ॥ ५८ ॥

१ त्विति गो. पाठः । २ न चेति गो. पाठः । ३ त्वमाधातुमिति गो. पाठः ।

शक्यं दिवं चार्जयितुं वसुधां चापि शासितुम् । त्वत्तोऽहं वधमाकाङ्क्षन्वार्यमाणोऽपि तारया ॥ ५७ ॥
सुग्रीवेण सह भ्रात्रा द्वन्द्वयुद्धमुपागतः । इत्युक्त्वा वानरो रामं विरराम हरीश्वरः ॥ ५८ ॥
स तमाश्वासयद्रामो वालिनं व्यक्तदर्शनम् । साधुसंमतया वाचा धर्मतत्त्वार्थयुक्तया ॥ ५९ ॥
[नै संतापस्त्वया कार्य एतदर्थं प्लवङ्गम]
न वयं भवता चिन्त्या नाप्यात्मा हरिसत्तम । वयं भवद्विशेषेण धर्मतः कृतनिश्चयाः ॥ ६० ॥
दण्ड्ये यः पातयेद्दण्डं दण्ड्यो यश्चापि दण्ड्यते । कार्यकारणसिद्धार्थावुभौ तौ नावसीदतः ॥ ६१ ॥
तद्भवान्दण्डसंयोगादस्माद्विगतकल्मषः । गतः स्वां प्रकृतिं धर्म्यां दण्डदिष्टेन वर्त्मना ॥ ६२ ॥
त्यज शोकं च मोहं च भयं च हृदये स्थितम् । त्वया विधानं हर्यृक्ष न शक्यमतिवर्तितुम् ॥ ६३ ॥

५७-५८] ति० टी०—शक्यमिति । स्वाराज्यमपि त्वत्प्रसादलभ्यमिति भावः । अहं त्वदुपदेशतस्त्वद्दर्शनतश्चेदानीं क्षीणपापस्त्वत्तो वधमुत्तमलोकराज्यफलकमाकाङ्क्षन्नपेक्षमाण इदानीमस्मि । अतस्तारया वार्यमाणोऽपि यद्भ्रात्रा युद्धमुपागतः प्राप्तस्तत्पूर्वकृतपुण्यपरिपाकेनेति शेषः ॥ ५७ ॥ ५८ ॥

रा० टी०—नन्वु तवेच्छा चेत् त्वां जीवयामि राज्यं कुर्वित्यत आह—त्वत्त इति । तारया वार्यमाणोऽप्यहं त्वत्तो वधमाकाङ्क्षन् सन् सुग्रीवेण सह द्वन्द्वयुद्धमुपागतः प्राप्तः । एतेन वालिनो जीवनेच्छाभावः सूचितः । अर्धद्वयमेकान्वयि ॥ ५८ ॥

रा० टी०—इतीति । वानरो वाली राममित्युक्त्वा विरराम । अर्धं पृथक् ॥ ५९ ॥

गो० टी०—तर्हि तथा किं न कृतं तत्राह—त्वत्त इति । आकाङ्क्षन् आकाङ्क्षमाण इवेत्यर्थः ॥ ५९ ॥ ६० ॥

५९] ति० टी०—व्यक्तदर्शनमुद्बुद्धबोधम् ॥ ५९ ॥

रा० टी०—स इति । स वालिना प्रार्थितो रामः व्यक्तदर्शनमाविर्भूतज्ञानवन्तं वालिनं धर्मतत्त्वार्थयुक्तया धर्मयाथार्थ्यरूपार्थविशिष्टया अत एव साधुसंमतया वाचा आश्वासयत् ॥ ६० ॥

गो० टी०—स तमिति । व्यक्तदर्शनं विशदज्ञानम् । साम सान्त्वनम् ॥ ६१ ॥

६०] ति० टी०—न वयं गुप्तवधरूपाकृत्यकारित्वेन चिन्त्याः । नाप्यात्मा भ्रातृभार्यापहरणरूपाकृत्यकारित्वेन । तत्र हेतुः—वयमित्यादि । भवद्विशेषेण त्वदपेक्षया विशेषेण विशेषज्ञत्वेन । धर्मतो धर्मशास्त्रमार्गेण । कृते त्वत्कृतपापे स्वकृतवधयोतकत्वरूपे व्यापारे च निश्चयोऽत्र पापेऽयमेव दण्ड इति निश्चयो येषां तादृशाः ॥ ६० ॥

रा० टी०—तदाश्वासनप्रकारमाह—नेति । हे हरिसत्तम ! वयं सुग्रीवप्रभृतयः आत्मा स्वस्वरूपं च न चिन्त्याः शङ्कनीयाः । तत्र हेतुः—भवद्विशेषेण भवद्विषयकप्रीत्यतिशयेन युक्ताः वयं धर्मतः धर्मशास्त्रानुसारेण कृतनिश्चयास्त्वदुक्तादिसर्वकार्यविषयकनिश्चयवन्तः स्म इति शेषः ॥ ६१ ॥

गो० टी०—न संताप इति । एतदर्थं पुत्रपालनार्थम् ॥ ६२ ॥

गो० टी०—न वयमिति । वयं न चिन्त्याः अकृत्यकारिण इति शेषः । नाप्यात्मा निवृत्तपापत्वात् । कुत इत्यत्राह—वयमिति । भवद्विशेषेण भवतो कृत्यरूपविशेषेण हेतुना । धर्मतः प्रायश्चित्तरूपे धर्मे सम्यर्थे तसिः । कृतनिश्चयाः अतो वयं न चिन्त्या इत्यादि पूर्वेणान्वयः ॥ ६३ ॥

६१] ति० टी०—अत्रार्थे स्मृतिमुपन्यस्यति—दण्ड्ये य इति । कार्यकारणेति भावप्रधानो निर्देशः । कार्यत्वं दण्ड्यत्वम्, कारणत्वं दण्डयितृत्वं, ताभ्यां सिद्धार्थौ निष्पन्नपरलोकप्रयोजनौ, अत एव नावसीदतः । एवं न्याय्यदण्डकर्तृत्वान्नाहमकृत्यकारी, जातदण्डत्वाच्च त्वमपि न तथेति भावः ॥ ६१ ॥

रा० टी०—शास्त्रीतिमेवाह—दण्ड्य इति । यो राजादिः दण्ड्ये दण्डनीये दण्डं पातयेत् प्रापयेत् यश्च दण्ड्यः दण्ड्यते दण्डं प्राप्नोति तौ कार्यकारणसिद्धार्थौ कार्यकारणाभ्यां दण्ड्यत्वदण्डकत्वाभ्यां सिद्धाः अर्थाः ययोस्तौ उभौ नावसीदतः क्लेशं प्राप्नुतः ॥ ६२ ॥

गो० टी०—उक्तं विवृणोति—दण्ड्य इति । कार्यकारणसिद्धार्थौ दण्ड्यत्वदण्डयितृत्वाभ्यां निष्पन्नप्रयोजनाविति्यर्थः ६४ ॥

६२] ति० टी०—तदेवाह—स्वां प्रकृतिं स्वकीयं शुद्धस्वभावत्वम् । दण्डदिष्टेन दण्डबोधकशास्त्रोक्तेन मार्गेण ॥ ६२ ॥

रा० टी०—तदिति । तत् मम शास्त्रानुसारित्वाद्धेतोः दण्डदिष्टेन दण्डविषयकशास्त्रोक्तेन वर्त्मना मार्गेण दण्डसंयोगात् मत्कर्तृकदण्डसंबन्धात् विगतकल्मषः निवृत्तपापः अत एव धर्म्यां धर्मादनपेतां स्वां प्रकृतिं गतः प्राप्तो भवानस्तीति शेषः ॥ ६३ ॥

गो० टी०—तदिति । धर्मदृष्टेन धर्मशास्त्रदृष्टेन वर्त्मना दण्डसंयोगात् विगतकल्मषः सन् धर्म्यां धर्मादनपेतां स्वां प्रकृतिं यथावस्थितशुद्धस्वरूपं गतः ॥ ६९ ॥

६३] ति० टी०—भयं भ्रातृभार्याहरणकर्मजनितनरकभयं मदूषणनिमित्तपरलोकभयं च दण्डेन कर्मणो नाशान्मदूषणस्य मया क्षान्तत्वाच्च । शोकमोहौ तारातोरयविषयौ । विधानं प्राग्भवीयं कर्म । अत्रान्ते दण्डस्यैव संहारात्तिरश्चामपि ज्ञानवतां शास्त्रार्थेऽधिकारो दृढः कृत इति बोध्यम् ॥ ६३ ॥

रा० टी०—त्यजेति । हृदये स्वान्तःकरणे स्थितं शोकं

१ संनत इति गो. पाठः । २ सामसंपन्नयेति गो. पाठः । ३ अर्धमेतदधिकं गो. पाठे । ४ धर्मदृष्टेनेति गो. पाठः ।

यथा त्वय्यङ्गदो नित्यं वर्तते वानरेश्वर । तथा वर्तेत सुग्रीवे मयि चापि न संशयः ॥ ६४ ॥
स तस्य वाक्यं मधुरं महात्मनः समाहितं धर्मपथानुवर्तितम् ।
निशम्य रामस्य रणावमर्दिनो वचः सुयुक्तं निजगाद वानरः ॥ ६५ ॥
शराभितप्तेन विचेतसा मया प्रभाषितस्त्वं यदजानता विभो ।
इदं महेन्द्रोपमभीमविक्रम प्रसादितस्त्वं क्षम मे हरीश्वर ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ।

वालिवधश्रवणाच्छोकसंतप्ता तारा किष्किन्धातो वालिसमीपमागन्तु निर्ययौ । रामभयात्प्रपलायमाना अतो मार्गमध्ये मिलित वानरा भयोत्पादनेन तारां संनिवर्तयितुमुद्यताः सन्तो नगररक्षणाङ्गदाभिषेचनादीनि प्रास्तावयन् । तान्निराकृत्य रणाङ्गणमापतन्ती तारा रणशय्याशायिनं वालिन रामादीश्चापश्यत् ।

स वानरमहाराजः शयानः शरपीडितः । प्रत्युक्तो हेतुमद्वाक्यैर्नोत्तरं प्रतिपद्यत ॥ १ ॥
अश्मभिः परिभिन्नाङ्गः पादपैराहतो भृशम् । रामबाणेन चाक्रान्तो जीवितान्ते मुमोह सः ॥ २ ॥
तं भार्या बाणमोक्षेण रामदत्तेन संयुगे । हतं प्लवगशार्दूलं तारा शुश्राव वालिनम् ॥ ३ ॥

पुत्रादिदुःखविषयकचिन्तां मोहं तद्विषयकस्नेहजनितवैचित्यं च भयं स्वकृतपापजनितभीतिं च त्यज । तत्र हेतुः-हे हर्यक्ष्य ! त्वया विधानं त्वत्कर्तृकविचारविषयीभूतमित्यर्थः, अतिवर्तितुमन्यथा कर्तुं न शक्यं, केनचिदिति शेषः ॥ ६४ ॥

गो० टी०-हेत्वन्तरेणाश्वासयति-त्यजेति । विधानं विधिः प्रारब्धं कर्मेति यावत् ॥ ६६ ॥ ६७ ॥

६४] ति० टी०-तथा वर्तेत पितृवदेव तं पालयिष्याव इति भावः । अस्मत्तस्तथा वृत्तिं प्राप्नुयादित्यश्वरार्थः ॥ ६४ ॥

रा० टी०-यथेति । अङ्गदः यथा त्वयि नित्यं वर्तते अवर्तत तथा मयि सुग्रीवे च वर्तेत संशयः अस्मिन्विषये संदेहः न कार्य इति शेषः ॥ ६५ ॥

६५] ति० टी०-तस्य वाक्यमात्मनः सुगतेः पुत्रपालनस्य च प्रतिपादकम् ॥ ६५ ॥

रा० टी०-स इति । धर्मपथानुवर्तिनः धर्मरूपमार्गमात्रवर्तनशीलस्य रणावमर्दिनः रणप्राप्तारिपुमर्दनकर्तुः महात्मनस्तस्य स्वसंमुखं प्राप्तस्य रामस्य सुयुक्तं शोभनयुक्तिसहितं समाहितं समाधानकारकं मधुरं वाक्यं निशम्य श्रुत्वा वानरो वाली निजगाद पुनरुवाच ॥ ६६ ॥

गो० टी०-उक्तमर्थं सर्गान्ते श्लोकाभ्यां पुनः संगृह्णाति-स तस्येति । समाहितं समाधानरूपम् ॥ ६८ ॥

६६] ति० टी०-इदं प्रभाषणम् ॥ ६६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०-तदाकारमाह-शरेति । हे विभो ! हे महेन्द्रोपम ! हे भीमविक्रम ! शराभितप्तेन बाणवेगपीडितेन अत एव विचेतसा अत एव अजानता विशेषज्ञानाभाववता मया यत्त्वं प्रभाषितः दोषाभासवत्त्वेनोक्तस्तत् मे प्रसादितः मया प्रार्थितस्त्वं क्षम क्षमस्व ॥ ६७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किधाकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

गो० टी०-शरेति । प्रदूषित इति यत् इदं मे अपचरितं क्षम क्षमस्व ॥ ६९ ॥

अस्मिन् सर्गे सार्धसप्तषष्टिश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यानेऽष्टादशः सर्गः ॥ १८ ॥

१] ति० टी०-हेतुमद्वाक्यैर्हेतूपन्यासयुतैर्वाक्यैः । प्रत्युक्त उक्तप्रत्युत्तरः ॥ १ ॥

रा० टी०-वालिकर्तृकरामप्रार्थनानन्तरकालिकं वालिवृत्तान्तमाह-स इति । शरपीडितः विद्धः रामबाणेन व्यथितः अत एव शयानः स रामदृष्टिपथं गतो वानरमहाराजो वाली हेतुमद्वाक्यैः युक्तिविशिष्टवचनैः प्रत्युक्तस्त्वदोष इदानीं परिभ्रष्ट इत्यादिप्रत्युत्तरितोऽपि उत्तरं न प्रतिपद्यते प्रत्यपद्यत विशेषतो नाशृणोदित्यर्थः ॥ १ ॥

गो० टी०-तारागमनमेकोनविंशे-स वानरमहाराज इत्यादि । विद्धतः विशेषेण क्षतः । जीवितान्ते जीवितान्तकाले ॥ १-३ ॥

२-३] ति० टी०-जीवितान्ते तत्समये । मुमोह विसंज्ञोऽभूत् ॥ २ ॥ ३ ॥

रा० टी०-तत्र हेतुमाह-अश्मभिरिति । अश्मभिः शि-

१ वर्तिन इति गो. पाठः । २ प्रदूषित इति गो. पाठः । ३ प्रभो इति गो. पाठः । ४ नरेश्वरेति गो. पाठः । ५ शरविक्षत इति गो. पाठः । ६ प्रत्यपद्यतेति गो. पतिपद्यते इति रा. पाठः ।

सा सपुत्राऽप्रियं श्रुत्वा वधं भर्तुः सुदारुणम् । निष्पपात भृशं तस्माद्दुद्रुवा गिरिकन्दरात् ॥ ४ ॥
ये त्वङ्गदपरीवारा वानरा हि महाबलाः । ते सकार्मुकमालोक्य रामं त्रस्ताः प्रदुद्रुवुः ॥ ५ ॥
सा ददर्श ततस्तान्हरीन्पततो द्रुतम् । यूथादिव परिभ्रष्टान्मृगान्निहतयूथपान् ॥ ६ ॥
तानुवाच सभासाद्य दुःखितान्दुःखिता सती । रामवित्रासितान्सर्वाननुबद्धानिवेषुभिः ॥ ७ ॥
वानरा राजसिंहस्य यस्य यूयं पुरःसराः । तं विहाय सुविस्त्रस्ताः कस्माद्द्रवत दुर्गताः ॥ ८ ॥
राज्यहेतोः स चेद्भ्राता भ्रात्रा क्रूरेण पातितः । रामेण प्रसृतैर्दूरान्मार्गणैर्दूरपातिभिः ॥ ९ ॥
कपिपत्न्या वचः श्रुत्वा कपयः कामरूपिणः । प्राप्तकालमविश्लिष्टमूचुर्वचनमङ्गनाम् ॥ १० ॥
जीवपुत्रे निवर्तस्व पुत्रं रक्षस्व चाङ्गदम् । अन्तको रामरूपेण हत्वा नयति वालिनम् ॥ ११ ॥

लाभिः परिभिन्नाङ्गः भृशमस्यन्तं पादपैरभ्याहतः रामबाणेन च आक्रान्तः आविद्धः स वाली जीविताऽन्ते प्राणापगमसमये सुमोह ॥ २ ॥

रा० टी०–तामिति । भार्या तारा रामदत्तेन रामकृतेन बाणमोक्षेण हतं तं प्रसिद्धं प्लवगश्रेष्ठं वानरश्रेष्ठं वालिनं शुश्राव ॥ ३ ॥

४–५] ति० टी०–अप्रियमिति छेदः । सपुत्रा, पुत्रोऽङ्गदः । गिरिकन्दरं गिरिगह्वरं किष्किन्धाख्यम् ॥ ४ ॥ ५ ॥

रा० टी०–सेति । सपुत्रा पुत्रसहिता सा तारा अप्रियम् अत एव सुदारुणं भर्तुर्वधं श्रुत्वा भृशमुद्विग्ना सती तस्मात्पुरभूताद् गिरिकन्दरात् किष्किन्धाभिधगिरिगुहातः निष्पपात निर्जगाम ॥ ४ ॥

गो० टी०–सा सपुत्राप्रियमिति । अप्रियमिति छेदः । विविधाज्ञानाकक्ष्यात् गिरिगह्वराद्रिगुहातः गुहारूपा हि किष्किन्धेत्युक्तम् ॥ ४ ॥

रा० टी०–ये इति । महाबलाः अङ्गदपरीवारा ये वानरास्ते तु सकार्मुकं धनुःसहितं राममालोक्य प्रदुद्रुवुः ॥ ५ ॥

गो० टी०–ये त्वित्यादि श्लोकद्वयमेकान्वयम् ॥ ५ ॥ ६ ॥

६] ति० टी०–सा तारा । आपततः पलायमानान् ॥ ६ ॥

रा० टी०–सेति । यूथात् परिभ्रष्टान् निहतयूथपान् वा मृगानिव त्रस्तान् अत एव द्रुतमापततः प्रदुद्रुवतः हरीन् वानरान् सा तारा ददर्श ॥ ६ ॥

७] ति० टी०–इषुभिरनुबद्धानिवानुसृतानिव । रामवित्रासितान्रामाद्भित्रस्तान् ॥ ७ ॥

रा० टी०–तानिति । रामवित्रासितान् अत एव इषुभिर्बाणैः अनुविद्धानिव अत एव दुःखितान् सर्वान् तान् वानरान् समासाद्य प्राप्य उवाच ॥ ७ ॥

गो० टी०–पूर्वं सामान्यतो विदितवृत्तान्तापि विशेषजिज्ञासया पृच्छति–तानिति ॥ ७ ॥

८] ति० टी०–वचनमाह—वानरा इति । यस्य वालिनः । दुर्गता वर्त्मादिकमपश्यन्तः ॥ ८ ॥

रा० टी०–तद्वचनाकारमाह–वानरा इति । हे वानराः ! यस्य राजसिंहस्य वालिनो यूयं पुरःसरास्तं विहाय सुविस्त्रस्ताः अत एव दुर्गताः दुर्मार्गगमनशीलाः सन्तः कस्मात् द्रवत द्रवथ ॥ ८ ॥

गो० टी०–वानरा इत्यादि । श्लोकद्वयमेकान्वयम् । दुर्गताः अगतिकाः राज्यलाभाय सुग्रीवेण वाली हतश्चेद्भवतां किं भयमित्यर्थः । मार्गणैरिति बहुवचनं संभावनयोक्तम् ॥ ८ ॥ ९ ॥

९] ति० टी०–भ्राता प्रयोजककर्ता । रामः प्रयोज्यकर्ता । बाणः करणम् । दूरादूरे स्थित्वा तैः स पातितश्चेत्किं युष्माभिः पलायितमिति शेषः । तत्तेनैव भवज्जीवनसंभवादिति भावः ॥ ९ ॥

रा० टी०–राज्येति । क्रूरेण भ्रात्रा सुग्रीवेण प्रयोजकेन रामेण प्रयोज्यभूतेन प्रसृतैः अतिवेगवद्भिः दूरपातिभिः दूरगतस्यापि लक्ष्यस्य विघातकैरित्यर्थः, मार्गणैः बाणैः करणैः राज्यहेतोः भ्राता स वाली चेत् यदि पातितस्तर्हि भवत्पलायनं न युज्यते इति शेषः, सुग्रीव एव सेव्यतामिति तात्पर्यम् । मार्गणैरित्यत्र बहुवचनं तु स्वप्रतीत्यभिप्रायेण ॥ ९ ॥

१०] ति० टी०–प्राप्तकालं कालोचितम् । अविश्लिष्टं सर्वसंमतिपूर्वमेकरूपम् । 'अविक्लिष्टम्' इति पाठे व्यक्तमित्यर्थः । अङ्गनां वालिन इति शेषः ॥ १० ॥

रा० टी०–कपीति । कपिपत्न्यास्तारायाः वचः श्रुत्वा प्राप्तकालं कालप्रतिबोधकम् अविश्लिष्टं स्पष्टं वचनम् अङ्गनां तारामूचुः । 'अविक्लिष्टम्' इतिपाठन्तरं सुयुक्तिमदिति तदर्थः ॥ १० ॥

गो० टी०–कपिपत्न्या इति । अविक्लिष्टं सयुक्तिकमिति यावत् ॥ १० ॥

११] ति० टी०–पुत्रं रक्षस्व रामादिति शेषः । कुतः पुत्रस्य भयं तत्राह—अन्तक इत्यादि । नयति यमपुरमिति शेषः ॥ ११ ॥

रा० टी०–तद्वचनाकारमाह–जीवेति । जीवः सप्राणः पुत्रो यस्यास्तत्संबोधनम् । अन्तकः कालः रामरूपेण वालिनं

१ त्रस्ता विविधाद्रिगह्वरादिति गो. पाठः । २ भीमविक्रमा इति गो.पाठः । ३ भृशमिति गो. पाठः । ४ सुसंत्रस्ता इति गो. पाठः । ५ रौद्रेणेति गो. पाठः । ६ प्रहितै रौद्रैरिति गो. पाठः ।

क्षिप्रान्वृक्षान्समाविध्य विपुलाश्च तथा शिलाः । वाली वज्रसमैर्बाणैर्वज्रेणेव निपातितः ॥ १२ ॥
अभिभूतमिदं सर्वं विद्रुतं वानरं बलम् । अस्मिन्प्लवगशार्दूले हते शक्रसमप्रभे ॥ १३ ॥
रक्ष्यतां नगरी शूरैरङ्गदश्चाभिषिच्यताम् । पदस्थं वालिनः पुत्रं भजिष्यन्ति प्लवङ्गमाः ॥ १४ ॥
अथवा रुचितं स्थानमिह ते रुचिरानने । आविशन्ति चेदं दुर्गाणि क्षिप्रमद्यैव वानराः ॥ १५ ॥
अभार्याः सहभार्याश्च सन्त्यत्र वनचारिणः । लुब्धेभ्यो विप्रलब्धेभ्यस्तेभ्यो नः सुमहद्भयम् १६ ॥
अल्पान्तरगतानां तु श्रुत्वा वचनमङ्गना । आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी ॥ १७ ॥
पुत्रेण मम किं कार्यं राज्येनापि किमात्मना । कपिसिंहे महाभागे तस्मिन्भर्तरि नश्यति ॥ १८ ॥
पादमूलं गमिष्यामि तस्यैवाहं महात्मनः । योऽसौ रामप्रयुक्तेन शरेण विनिपातितः ॥ १९ ॥
एवमुक्त्वा प्रदुद्राव रुदंती शोकमूर्छिता । शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती ॥ २० ॥
सा व्रजन्ती ददर्शाथ पतिं निपतितं भुवि । हन्तारं वानरेन्द्राणां समरेष्वनिवर्तिनाम् ॥ २१ ॥

हत्वा नयति स्वलोकमिति शेषः, अतो निवर्तस्व किष्किन्धां प्रविशेत्यर्थः । तत्प्रयोजनमाह–अङ्गदं स्वपुत्रं रक्षस्व । एतेन सपुत्रायाः पत्यद्यगमनं नोचितमिति सूचितम् ॥ ११ ॥

गो० टी०–जीवपुत्रे इति । अपुत्रायाः खलु मृतभर्तृगमनमिति भावः । नयति लोकान्तरमिति शेषः ॥ ११ ॥१२॥

१२] ति० टी०–वृक्षान्वालिप्रहितान् । अयं सर्वोऽपि संभाव्यवादः । एवं बहुबाणत्यागवादोऽपि ॥ १२ ॥

रा० टी०–वधप्रकारमाह–क्षिप्तानिति । क्षिप्तान् रिपुवधाय वालिना संत्यक्तान् वृक्षान् विपुलाः बहुशिलाश्च वज्रसमैर्वज्रसदृशैर्बाणैर्वज्रेणवज्रिणेव रामेणेति शेषः, समाविध्य वाली निपातितः । वज्रशब्दः अर्शआद्यजन्तः ॥ १२ ॥

१३] ति० टी०–अभिभूतमिव द्रुतम् । वानरं वानराणामिदम् ॥ १३ ॥

रा० टी०–अभीति । प्लवगशार्दूले श्रेष्ठे अस्मिन् वालिनि हते सति वानरसंबन्धि वानरम् इदं सर्वं बलमभिभूतं रामेण पराभूतमत एव विद्रुतं पलायितमस्तीति शेषः ॥ १३ ॥

गो० टी०–अभिद्रुतमिति । विद्रुतं पूर्वं किष्किन्धातो निर्गतमिदं बलं प्रसृतं प्रकीर्णं सत् अभिद्रुतं किष्किन्धाभिमुख्येन द्रुतम् ॥ १३ ॥ १४ ॥

१४]ति०टी०–पदस्थं वानरराज्यपदस्थं पुत्रमङ्गदं भजिष्यन्ति । अन्यथाऽराजकेऽत्रास्माभिरवस्थातुमशक्यमिति भावः १४

रा० टी०–वानरपलायननिवृत्तौ यत्नमाह–रक्ष्यतामिति । शूरैः पलायनरहितैरित्यर्थः, वानरैः नगरी रक्ष्यताम् अङ्गदश्चाभिषिच्यतां च । पदस्थं राज्यासने स्थितं वालिनः पुत्रमङ्गदं प्लवङ्गमाः भजिष्यन्ति भक्ष्यन्ति ॥ १४ ॥

१५–१६] ति० टी०–अथवेति । सरामे सुग्रीवे किष्किन्धामागच्छत्यभिषिक्तेनाप्यङ्गदेनास्मत्पालनमशक्यमेवेति नेह स्थातुं योग्यमिति शेषः । हे रुचिरानने ! यद्यपीदं स्थानं ते तुभ्यं रुचितमभीष्टम्, तथापीह किष्किन्धायां विद्यमानानि दुर्गाण्यप्येव वानराः सुग्रीवहृदमादाय आविशन्ति, वर्तमानसामीप्ये लट् । तेषु प्रविष्टेषु ये अभार्याः सभार्याश्च वानराः सुग्रीवावलम्बिनः प्रागस्माभिः कृतवैरास्ते च प्रवेक्ष्यन्ति । ततश्च लुब्धेभ्यो राज्यादिविषये विप्रलब्धेभ्यः पूर्वमस्माभिर्वञ्चितेभ्योऽस्माकं तुमुलं महद्भयमस्ति, यत इति शेषः । केचित्तु–इह ते स्थानमस्माकमरुचितमनभिमतम् । इतरत्पूर्ववदित्याहुः ॥ १५ ॥ १६ ॥

रा० टी०–पक्षान्तरमाह–अथवेति । हे रुचिरानने ! अथवा यदि इह अस्यां किष्किन्धायां स्थानं स्थितिस्ते रुचितं प्रीतिविषयीभूतं न तदा अभार्याः सहभार्याश्च ये वनचारिणो वानरा अत्र सन्ति ते अथ अस्मिन् काले क्षिप्रं शीघ्रं दुर्गाणि किष्किन्धादुर्गमस्थानानि आविशन्ति आविशन्तु । तत्र हेतुः—विप्रलुब्धेभ्यः अस्माभिर्वञ्चितेभ्यः अत एव लुब्धेभ्यः अस्मद्बलनाथाकाङ्क्षिभ्यः तेभ्यः प्रविष्टेभ्यो नः सुमहद्भयमस्ति । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–अथ वेति । हे रुचिरानने ! ते इह किष्किन्धायां स्थानम् अवस्थानम् अरुचितम् अनभिमतम् अत्र स्थातुम् अस्माकं न रोचते इत्यर्थः । हि अस्मात्कारणात् वानराः शत्रुभूताः दुर्गाणि किष्किन्धायाः दुष्प्रवेशस्थलानि आविशन्ति आक्रमिष्यन्ति अन्यानि अस्मदावासस्थलभिन्नानीत्यर्थः॥१५॥

गो० टी०–अस्त्वाक्रमणं ततः किमित्यत्राह–अभार्या इति । अभार्याः भार्याविरहिताः सभार्याः समानभार्याः साधारणभार्या इत्यर्थः, ये वालिना विप्रवासिताः वनचारिणः सन्ति तेभ्यः विप्रलुब्धेभ्यः स्वभार्याविरहिभ्यः लुब्धेभ्यः साधारणभार्यान्तराभिलाषिभ्यः स्वेभ्यो ज्ञातिभ्यः सुग्रीवादिभ्यः नः अस्माकम् अत्र किष्किन्धास्थाने तुमुलं निरन्तरम् भयं भवति । अनेन भाविसुग्रीवव्यापारः सूचितः । रुचिरानन इत्यादिसंबोधनात्तस्याः सह मरणसाहसं द्योत्यते ॥ १६ ॥

१७–२१] ति० टी०–अल्पान्तरगतानां नातिदूरवर्ति-

---

१ रामेण विनीति गो. पाठः । २ हुतमिति गो. पाठः । ३ अ द्रुतमिति गौ. पाठः । ४ नगरद्वारमिति गो. पाठः । ५ हीति गो. पाठः । ६ अन्यानीति गो. पाठः । ७ च सभार्याश्चेति गो. पाठः । ८ लुब्धेभ्य इति गो. लुब्धेभ्य इति रा. पाठः । ९ तुमुलमिति गो. पाठः । १० रुदन्तीति गो. पाठ. । ११ कम्पितेति गो. पाठः । १२ आव्रजन्ती इति गो. पाठः । १३ दानवेति गो. पाठः ।

क्षेप्तारं पर्वतेन्द्राणां वज्राणामिव वासवम् । महावातसमाविष्टं महामेघौघनिःस्वनम् ॥ २२ ॥
शक्रतुल्यपराक्रान्तं दृष्ट्वेवोपरतं घनम् । नर्दन्तं नर्दतां भीमं शूरं शूरेण पातितम् ॥
शार्दूलेनामिषस्यार्थे मृगराजमिवाहतम् ॥ २३ ॥
अर्चितं सर्वलोकस्य सपताकं सवेदिकम् । नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा ॥ २४ ॥
अवष्टभ्यावतिष्ठन्तं ददर्श धनुरूर्जितम् । रामं रामानुजं चैव भर्तुश्चैव तथानुजम् ॥ २५ ॥

नाम् । 'अवान्तरगतानाम्' इति पाठे मध्येमार्गमागतानामित्यर्थः । तेषां वानराणां वचनं श्रुत्वाऽऽत्मनः प्रतिरूपं कालोचितं बभाषे ॥ १७–२१ ॥

२२] ति० टी०–पर्वतेन्द्राणां क्षेप्तारम् , रणेष्विति शेषः । रणभेदमपेक्ष्य वज्राणामिति बहुवचनप्रयोगः । महता वातेन समं तुल्यमाविष्टमावेशो यस्य रणेषु तम् ॥ २२ ॥

२३] ति० टी०–शक्रतुल्यं पराक्रान्तं पराक्रमो यस्य तम् । दृष्ट्वेव जलमुत्सृज्याविरतं नर्दतां मध्ये भीमं नर्दन्तं मृगराजं प्रभूतमांसादिमत्त्वेन मृगश्रेष्ठम् । शार्दूलो व्याघ्रः ॥ २३ ॥

२४–२५] ति० टी०–सर्वलोकस्य सर्वलोकेनार्चितं चैत्यं चतुष्पथवर्ति वल्मीकं नागहेतोरन्तर्विद्यमाननागभक्षणार्थं सुपर्णेन गरुडेन यथोन्मथितं तथा सुग्रीवस्य राज्यभोगहेतो रामेणोन्मथितमित्यर्थः ॥ २४ ॥ २५ ॥

रा० टी०–अल्पेति । अल्पान्तरगतानां किंचित् दूरे वर्तमानानां वानराणां वचः श्रुत्वा अङ्गना वालिस्त्री सा तारा आत्मनः प्रतिरूपं सदृशं वचनं बभाषे ॥ १७ ॥

रा० टी०–तद्वचनाकारमाह–पुत्रेणेति । कपिसिंहे भर्तरि नश्यति सति पुत्रादिना मम किं कार्यं न किमपीत्यर्थः ॥ १८ ॥

रा० टी०–पादेति । योऽसौ पतिः रामप्रयुक्तेन रामत्यक्तेन शरेण विनिपातितस्तस्यैव पादमूलमहं गमिष्यामि ॥१९॥

गो० टी०–अल्पेति । अल्पान्तरगतानां किंचिदवकाशं प्राप्तानां संभाषणाय कियन्मात्रावकाशं प्राप्तानामित्यर्थः । आत्मनः प्रतिरूपं स्वबुद्ध्यनुगुणम्, यद्वा आन्तरं बुद्धिः अल्पबुद्धीनामित्यर्थः ॥ १७–१९ ॥

रा० टी०–एवमिति । एवमुक्त्वा दुःखेन रुदन्ती अत एव शोकमूर्छिता प्रबुद्धशोका अत एव शिर उरश्च समभिघ्नती तारा प्रदुद्राव वालिसमीपं जगाम ॥ २० ॥

गो० टी०–एवमिति । बाहुभ्याम् हस्ताभ्यामित्यर्थः ॥ २० ॥

रा० टी०–सेति । व्रजन्ती सा तारा समरेषु अनिवर्तिनां दानवेन्द्राणां मायाद्यादीनां हन्तारं वज्राणां वज्रैः पर्वतेन्द्राणां क्षेप्तारं वासवमिव महावातेन समं सदृशमाविष्टमावेशो वेग इत्यर्थः, यस्य स तं, महामेघौघस्य निःस्वन इव निःस्वनो यस्य तं, शक्रतुल्यं पराक्रान्तं पराक्रमो यस्य तं, नर्दतां नानराणां मध्ये भीमं नर्दन्तं, दृष्टया दृष्टेः उपरतं निवृत्तं घनमिव आमिषस्य मांसस्यार्थे शार्दूलेन व्याघ्रेण आहतं मृगराजं विपुलमांसवत्तया मृगश्रेष्ठं गजमिव सर्वलोकस्य अर्चितं पूजितं, सपताकं पताकासहितं सवेदिकं वेदिकासहितं नागहेतो नागग्रहणाय सुपर्णेन गरुडेन उन्मथितं चैत्यं देवालयमिव शूरेण रामेण पातितमत एव भुवि निपतितं पतिं ददर्श । सार्धश्लोकचतुष्टयमेकान्वयि ॥ २१–२४ ॥

रा० टी०–अवष्टभ्येति । ऊर्जितं धनुरवष्टभ्य गृहीत्वा अवतिष्ठन्तं रामं रामानुजं च भर्तुरनुजं सुग्रीवं च ददर्श । अर्धद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०–आव्रजन्तीत्यादि । दानवेन्द्राणां मायाविप्रभृतीनाम् । वज्राणामिति प्रयोगबाहुल्यापेक्षया बहुवचननिर्देशः । महावातसमाविष्टं समाविष्टमहावातमिव स्थितम् । समावेशः संघीभावः, यद्वा समाविष्टमिति भावे निष्ठा । महावातसमावेशमिव स्थितं पराक्रान्तं पराक्रमः । नर्दतां मध्ये भीमं नर्दन्तम् । शार्दूलेन सिंहेन 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः श्वेतपिङ्गलः । व्यादीर्णास्यो महानादः शार्दूलोऽतुलविक्रमः ॥' इति वैजयन्ती । यद्वा असंभावितत्वद्योतनाय शार्दूलहिंसितमिवेत्यभूतोपमा । अर्चितमिति । अत्र भागवताद्युक्तकालीयनागग्रहरणवेलायां बलिस्थानं चैत्यमप्युन्मथितमित्यवगन्तव्यमित्याहुः । सर्वलोकस्य सर्वलोकेन अर्चितं सपताकम् अलंकृतमित्यर्थः, सवेदिकं श्रमहरवेदिकासंपन्नं, एवं वर्तमानमपि तत्र निगृह्णनागग्रहणाय गरुडोन्मथितं चैत्यमिव स्थितमित्यर्थः । शौर्यादिसंपन्नोऽपि भ्रातृभार्यापहरणपापत्वेन हत इत्यत्र दृष्टान्तोऽयम् । अवष्टभ्येति । ऊर्जितं दृढं धनुरवष्टभ्य तिष्ठन्तम् अनेनाकर्षकाकार उच्यते । चकारेण तादृशसंस्थानविशेषेणाकर्षकता कथ्यते । भर्तारं हतवन्तं रामं तत्साहाय्यकृतं तदनुजं तेन संहारयितारं सुग्रीवं च ददर्श । शुभा तत्र शत्रुत्वबुद्धिं विहाय शुभहृदया बभूव । न रामस्य दोषोऽस्ति किं तु वालिन एव पानीयपानाय तटाके खाते तत्र कण्ठे गुर्वीं शिलां बद्धा पतित्वा म्रियमाणस्यैव हि दोषः । अयमप्यनुकूलश्चेत् कथमेनं न रक्षेत् । किं च 'मम प्राणा हि पाण्डवाः' इत्युक्तरीत्या स्वप्राणभूते स्वाश्रिते हिंसां कुर्वन्तं कथं मृष्येत् । अत एव हि प्रथमयुद्धे न हिंसितवान् किंतु स्वाश्रितापराधं दृष्ट्वैव पुनर्युद्धे वालिनं हतवानित्यमन्यतेति भावः ॥ २१–२६ ॥

१ क्षेति गो. पाठः । २ चेति गो. पाठः । ३ उत्तममिति गो. पाठः । ४ अनुजं शुभेति गो. पाठः ।

तानतीत्य समासाद्य भर्तारं निहतं रणे । समीक्ष्य व्यथिता भूमौ संभ्रान्ता निपपात ह ॥ २६ ॥
सुप्तेव पुनरुत्थाय आर्यपुत्रेति वादिनी । रुरोद सा पतिं दृष्ट्वा [2]संवीतं मृत्युदामभिः ॥ २७ ॥
तामवेक्ष्य तु सुग्रीवः क्रोशन्तीं कुररीमिव । विषादमगमत्कष्टं दृष्ट्वा चाङ्गदमागतम् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ।

वालिनमालिङ्गयाङ्गदमुद्दिश्य सकरुण विलपन्ती तारा प्रायोपवेशनमध्यवस्यति ।

रामचापविसृष्टेन शरेणान्तकरेण तम् । दृष्ट्वा विनिहतं भूमौ तारा ताराधिपानना ॥ १ ॥
सा समासाद्य भर्तारं पर्यष्वजत भामिनी । इषुणाऽभिहतं दृष्ट्वा वालिनं कुञ्जरोपमम् ॥ २ ॥
वानरं पर्वतेन्द्राभं शोकसंतप्तमानसा । तारा तरुमिवोन्मूलं पर्यदेवयतातुरा ॥ ३ ॥
रणे दारुणविक्रान्त प्रवीर प्लवतां वर । किमिदानीं पुरोभागामद्य त्वं नाभिभाषसे ॥ ४ ॥
उत्तिष्ठ हरिशार्दूल भजस्व शयनोत्तमम् । नैवंविधाः शेरते हि भूमौ नृपतिसत्तमाः ॥ ५ ॥
अतीव खलु ते कान्ता वसुधा वसुधाधिप । गतासुरपि तां गात्रैर्मा विहाय निषेवसे ॥ ६ ॥

२६] ति० टी०–तानतीत्य मार्गस्थान्रामादीनतीत्य॥२६॥

रा० टी०–तानिति । तान् रामादीन् अतीत्य अतिक्रम्य भर्तारं समासाद्य समीपं प्राप्य समीक्ष्य च व्यथिता दुःखिता अत एव संभ्रान्ता उद्विग्नचित्ता तारा भूमौ निपपात ॥ २७ ॥

गो० टी०–तमिममर्थं व्यञ्जयन्नाह–तानिति । अतीत्येति नातिक्रम उच्यते सर्वेषां समीपस्थत्वात् किंतु तत्र दोषबुद्धिमकृत्वेत्यर्थः । भर्तारं समासाद्येति उपसर्गेण स्वाज्ञानेनायं हत इति बुद्धवतीति ज्ञाप्यते ॥ २६ ॥

२७–२८] ति० टी०–संवीतं बद्धम् ॥ २७ ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०–सुप्तेति । सुप्ता पुनरुत्थाय इव विद्यमाना सा तारा मृत्युरूपपाशेन संवीतं बद्धं पतिं दृष्ट्वा आर्यपुत्रेति वादिनी सती रुरोद ॥ २८ ॥

गो० टी०–सुप्तेति । संदितं बद्धं मृत्युदामभिः मृत्युपाशैः, आसन्नप्राणमित्यर्थः ॥ २७ ॥

रा० टी०–तामिति । कुररीमिव क्रोशन्तीं तां तारामवेक्ष्य आगतमङ्गदं च दृष्ट्वा सुग्रीवः कष्टं विषादमगमत् ॥२९॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकोनविंशतितमः सर्गः ॥ १९ ॥

गो० टी०–तामिति । कष्टं विषादम् अत्यन्तविषादमित्यर्थः ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

१–२] ति० टी०–अन्तकरेण मृत्युकारिणा ॥ १ ॥ २ ॥

३]ति० टी०–उन्मूलमुत्पाटितमूलं पतिततमिति शेषः ॥३॥

रा० टी०–ताराविलापं वर्णयितुमाह–रामेति । रामचापविसृष्टेन अन्तकरेण विनाशकेन शरेण भूमौ विनिहतं भर्तारं समासाद्य समीपं प्राप्य ताराधिपानना चन्द्रमुखी भामिनी स्वप्रारब्धविषयककोपवती तारा पर्यष्वजत आलिङ्गयत । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–अथ ताराप्रलापो विंशे–रामेत्यादिसार्धश्लोकः । सा तारा तं दृष्ट्वा पर्यष्वजत ॥ १ ॥

रा० टी०–इषुणेति । इषुणा अभिहतमत एव उन्मूलं तरुमिव पर्वतेन्द्राभं वालिनं दृष्ट्वा शोकसंतप्तमानसा आतुरा तारा पर्यदेवयत व्यलपत ॥ २ ॥ ३ ॥

गो० टी०–इषुणेत्यादिसार्धः ॥ २ ॥

४–६] ति० टी०–प्लवतां वानराणां श्रेष्ठ ! इदानीं पुरोभागामेतस्मिन्काले कृतापराधां मत्त्वाऽद्य नाभिभाषसे किमित्यन्वयः ॥ ४–६ ॥

रा० टी०–विलापाकारमाह–रण इति । दारुणं विक्रान्तं विक्रमो यस्य तत्संबोधनम् । प्रवीर नित्यं युद्धोत्साहविशिष्ट ! पुरोभागाम् अग्रे स्थितां मां किं किमर्थं नाभिभाषसे ॥ ४ ॥

रा० टी०–उत्तिष्ठेति । हे हरिशार्दूल ! स्वशयनोत्तमं भजस्व स्वीकुरु तस्मिँस्तिष्ठेत्यर्थः । तत्र हेतुः–एवंविधाः भवत्सदृशाः नृपतयः भूमौ न शेरते ॥ ५ ॥

रा० टी०–अतीवेति । वसुधा भूमिः ते अतीव कान्ता प्रिया खलु निश्चितमेतत् अत एव गतासुरपि त्वं मां विहाय गात्रैस्तां वसुधां निषेवसे ॥ ६ ॥

१ क्रोशतीं, इति गो. पाठः । २ संदितमिति गो. पाठः । ३ वानरेन्द्रं महेन्द्राभमिति गो. पाठः । ४ किं दीनामपुरोभागामिति गो. पाठः । ५ यामिति गो. पाठः । ६ आलिङ्गदिति युक्तं भाति ।

व्यक्तमद्य त्वया वीर धर्मतः संप्रवर्तता । किष्किन्धेव पुरी रम्या स्वर्गमार्गे विनिर्मिता ॥ ७ ॥
यान्यस्माभिस्त्वया सार्धं वनेषु मधुगन्धिषु । विहृतानि त्वया काले तेषामुपरमः कृतः ॥ ८ ॥
निरानन्दा निराशाऽहं निमग्ना शोकसागरे । त्वयि पञ्चत्वमापन्ने महायूथपयूथपे ॥ ९ ॥
हृदयं सुस्थितं[1] मह्यं दृष्ट्वा [2]निपतितं भुवि । यन्न शोकाभिसंतप्तं स्फुटतेऽद्य सहस्रधा ॥ १० ॥
सुग्रीवस्य त्वया भार्या हृता स च विवासितः । [3]यत्तत्तस्य त्वया व्युष्टिः प्राप्तेयं प्लवगाधिप ॥ ११ ॥
निःश्रेयसपरा मोहात्त्वया चाहं विगर्हिता । यैषाऽब्रुवं हितं वाक्यं वानरेन्द्र हितैषिणी ॥ १२ ॥
रूपयौवनदृप्तानां दक्षिणानां च मानद । नूनमप्सरसामार्य चित्तानि प्रमथिष्यसि ॥ १३ ॥
कालो निःसंशयो नूनं जीवितान्तकरस्तव । वलाद्येनावपन्नोऽसि सुग्रीवस्यावशो[4] वशी ॥ १४ ॥

गो० टी०–रण इति । अपुरोभागां दोषदर्शनरहिताम् अनपरावामिति यावत् ॥ ३–६ ॥

७] ति० टी०–हे वीर! धर्मतः संप्रवर्तता धर्मेण युद्धमाचरता त्वयाद्य स्वर्गमार्गे स्वर्गसाधनरणभूमौ किष्किन्धेवान्या रम्या पुरी निर्मिता । नो चेत्कथं किष्किन्धां विहायात्र शेष इत्यर्थः । कतकस्तु–धर्मतः प्रवर्तिता रक्षिता किष्किन्धेवान्याऽपि स्वर्गमार्गे स्वर्गरूपदेशे निर्मितेत्यर्थमाह॥७॥

रा० टी०–व्यक्तमिति । धर्मतः धर्मेण संप्रवर्तता त्वया स्वर्गमार्गे धर्मवद्भिरन्वेषणीयस्वर्गे किष्किन्धा इव पुरी निर्मिता व्यक्तं स्फुटमतत् ॥ ७ ॥

गो० टी०–व्यक्तमिति । हे वीर! अत्र निर्मिता किष्किन्धेवान्या पुरी स्वर्गमार्गे त्वया धर्मतः प्रवर्तिता । अतः खल्विमां त्यक्त्वा गन्तुमुद्यतोऽसीति भावः ॥ ६ ॥

८–९] ति० टी०–यानि त्वया सार्धं विहृतानि तेषामत्र काले त्वयोपरमः समाप्तिः कृता ॥ ८ ॥ ९ ॥

रा० टी०–यानीति । मधुगन्धिषु वनेषु काले समये त्वया सार्धं यानि सुखानि विहृतानि प्राप्तानि तेषामुपरमो निवृत्तिस्त्वया कृतः ॥ ८ ॥

गो० टी०–यानीति । अस्माभिरिति इतरव्यपेक्षया बहुवचनम् । अस्माभिः सह त्वया यानि विहृतानि विहाराः कृतानीत्यध्याहारः, तेषां त्वया उपरमः विरामः कृतः ॥ ७ ॥

रा० टी०–निरानन्देति । त्वयि पञ्चत्वमापन्ने प्राप्ते सति निराशा सुखाशारहिता अत एव निरानन्दा अत एव शोकसागरे निमग्नाऽहमस्मीति शेषः ॥ ९ ॥

गो० टी०–निरानन्देति । अथ निरानन्दा निराशा कालान्तरे आनन्दो भविष्यतीत्याशारहिताऽहं शोकसागरे निमग्ना अस्मीति शेषः । पञ्चत्वं मरणम् ॥ ८ ॥

१०] ति० टी०–मह्यं मम हृदयं सुस्थितमतिदृढम्, यत्त्वां पतितं दृष्ट्वा न स्फुटते ॥ १० ॥

रा० टी०–हृदयमिति । भुवि निपतितं त्वां दृष्ट्वा शोकाभिसंतप्तं मह्यं मम यत् हृदयं सहस्रधा न स्फुटते तत् सुस्थितमतिदृढं निश्चिनोमीति शेषः ॥ १० ॥

गो० टी०–हृदयमिति । मह्यं मम ॥ ९ ॥

११] ति० टी०–स विवासित इति यत्तत्प्रसिद्धं कर्म, तस्य कर्मण इयं व्युष्टिः परिपाकः प्राप्त इत्यर्थः ॥ ११ ॥

रा० टी०–सुग्रीवस्येति । यत् सुग्रीवस्य भार्या त्वया हृता यच्च स सुग्रीवो विवासितः तत् तस्य तस्य कर्मण इयं व्युष्टिः फलं प्राप्ता ॥ ११ ॥

गो० टी०–सुग्रीवस्येति । व्युष्टिः फलम् ' व्युष्टिः फले समृद्धौ च ' इत्यमरः । विवासित इति यत्तस्य व्युष्टिरित्यन्वयः ॥ १० ॥

१२] ति० टी०–यैषाऽहं हितं वाक्यमब्रुवम्, सा त्वया मोहाद्विगर्हिता अस्वीकृतवचना कृतेति यावत् ॥ १२ ॥

रा० टी०–निःश्रेयसेति । हितैषिणी त्वद्धिताकाङ्क्षिणी अत एव निःश्रेयसपरा त्वच्छुभकर्मसाधिका यैषाऽहं हितं वाक्यमब्रुवं रामेण संग्राममवारयमित्यर्थः, साऽहं मोहात् युद्धोत्साहहेतुकचित्तस्वास्थ्याभावात् विगर्हिता तिरस्कृता, मद्वाक्यं न स्वीकृतवानसीत्यर्थः ॥ १२ ॥

गो० टी०–निःश्रेयसेति । निःश्रेयसपरा श्रेयस्कामा॥११॥

१३] ति० टी०–दक्षिणानां विदग्धानां समर्थानां वा चित्तानि प्रमथिष्यसि प्राप्तदिव्यदेहेनाप्सरसां काममोहजननेनेति शेषः ॥ १३ ॥

रा० टी०–त्वद्वियोगे ममैव दुःखं तव तु तत्राऽपि सुखमिति बोधयन्ती आह–रूपेति । रूपयौवनदृप्तानां रूपादिजनितगर्वविशिष्टानां दक्षिणानां निपुणानामप्सरसां चित्तानि प्रमथिष्यसि विहरिष्यसीत्यर्थः ॥ १३ ॥

गो० टी०–रूपेति । दक्षिणानाम् अनङ्कृतन्त्रे कुशलानां प्रमथिष्यसि वशीकरिष्यसीति भावः । वीरस्य स्वर्गसिद्धेरिति भावः ॥ १२ ॥

१४] ति० टी०–कालः प्राप्त इति शेषः । अवपन्नः प्रापितोऽसि । कालविशेषणं निःसंशय इति । तत्तदायुर्विषयसंदेहरहित इत्यर्थः ॥ १४ ॥

१ सुस्थिरमिति गो. पाठः । २ विनिहत पतिमिति गो. पाठः । ३ यत्तु तस्येति गो. पाठः । ४ वशमिति गो. रा. पाठः ।

अस्थाने वालिनं हत्वा युध्यमानं परेण च । न संतप्यति काकुत्स्थः कृत्वा कर्म सुगर्हितम् १५ ॥
वैधव्यं शोकसंतापं कृपणाकृपणा सती । अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत् ॥ १६ ॥
लालितश्चाङ्गदो वीरः सुकुमारः सुखोचितः । वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्छिते ॥ १७ ॥
कुरुष्व पितरं पुत्र सुदृष्टं धर्मवत्सलम् । दुर्लभं दर्शनं तस्य तव वत्स भविष्यति ॥ १८ ॥
समाश्वासय पुत्रं त्वं संदेशं संदिशस्व मे । मूर्ध्नि चैनं समाघ्राय प्रवासं प्रस्थितो ह्यसि ॥ १९ ॥
रामेण हि महत्कर्म कृतं त्वामभिनिघ्नता । आनृण्यं तु गतं तस्य सुग्रीवस्य प्रतिश्रवे ॥ २० ॥
सकामो भव सुग्रीव रुमां त्वं प्रतिपत्स्यसे । भुङ्क्ष्व राज्यमनुद्विग्नः शस्तो भ्राता रिपुस्तव २१ ॥
किं मामेवं प्रलपतीं प्रियां त्वं नाभिभाषसे । इमाः पश्य वरा वल्गो भार्यास्ते वानरेश्वर ॥ २२ ॥
तस्या विलपितं श्रुत्वा वानर्यः सर्वतश्च ताः । परिगृह्याङ्गदं दीना दुःखार्ताः प्रतिचुक्रुशुः ॥ २३ ॥

रा० टी०–काल इति । येन कालेन अवशोऽपि त्वं सुग्रीवस्य वशमवपन्नः प्रापितः स तव जीवितान्तकरः निःसंशयः कार्याकार्ययोः स्वतन्त्रत्वात् संशयरहित इत्यर्थः, कालः ननं निश्चितमेतत् ॥ १४ ॥

गो० टी०–काल इति । वशम् अवपन्नः प्राप्तः ॥ १३ ॥

१५] ति० टी०–न संतप्यति तदस्थानेऽयुक्तम् ॥ १५ ॥

रा० टी०–अस्थानेति । अस्थाने अप्रसङ्गे स्वभार्यासु विद्यमानास्वित्यर्थः, सुगर्हितम् अतिनिन्दितं कर्म अनुजवधूपरिग्रहं कृत्वा परेण सुग्रीवेण युध्यमानं वालिनं हत्वा काकुत्स्थो रामो न संतपति संतापं प्राप्नोति संतापहेतोरवध्यवधस्याभावादिति भावः ॥ १५ ॥

१६] ति० टी०–कृपणाकृपणाऽतिशयेन कृपणा, आबाधायां वा द्वित्वम् । पूर्वमदुःखोपचिता, अदुःखं दुःखरहितं यथा भवति तथोपचिता वर्धिता ॥ १६ ॥

रा० टी०–वैधव्यमिति । पूर्वमदुःखोपचिता अप्राप्तदुःखेत्यर्थः अत एव अकृपणा कार्पण्यरहिता अहमनाथवत् रक्षकाभाववत् शोकसंतापं शोकसंतापविशिष्टं वैधव्यं कृपणा सती वर्तयिष्यामि प्राप्स्यामीत्यर्थः ॥ १६ ॥

गो० टी०–वैधव्यमिति । अहं पूर्वम् अदुःखोपचिता अकृपणा च सती संप्रति कृपणा भूत्वा वैधव्यं शोककृतसंतापं च वर्तयिष्यामि धारयिष्यामि ॥ १४ ॥

१७] ति० टी०–मे मया लालितः । कामवस्थां प्राप्य वत्स्यत इत्यर्थः ॥ १७ ॥

रा० टी०–लालित इति । पितृव्ये सुग्रीवे क्रोधमूर्छिते सति सुखोचितः सर्वकालं सुखयोग्यः लालितः मे सुकुमारोऽङ्गदो वीरः कामवस्थां दशां वत्स्यते प्राप्स्यतीत्यर्थः ॥ १७ ॥

गो० टी०–लालित इति । मे मया लालितः अङ्गदः पितृव्ये पितृभ्रातरि क्रोधमूर्च्छिते सति कामवस्थां वत्स्यते वर्तयिष्यति नश्यत्येवेति भावः ॥ १६ ॥

१८] ति० टी०–पितरं सुदृष्टं कुरुष्व ॥ १८ ॥

रा० टी०–अङ्गदं प्रत्याह–कुरुष्वेति । हे पुत्र ! पितरं सुदृष्टमतिदर्शनकर्मीभूतं कुरुष्व । तत्र हेतुः–तस्य पितुः दर्शनं तव दुर्लभं दुष्प्रापं भविष्यति ॥ १८ ॥

गो० टी०–कुरुष्वेति । अनेन तदानीमङ्गदः समागत इति द्योत्यते ॥ १६ ॥ १७ ॥

१९] ति० टी०–मूर्ध्न्येनमुपाघ्राय संदेशं कर्तव्योपदेशं संदिशस्वेत्यन्वयः । प्रस्थितः प्रस्थानुकामः ॥ १९ ॥

रा० टी०–वालिनं प्रत्याह–स्मिति । हि यतः प्रवासं प्रस्थितोऽसि अतः एनं मे पुत्रं मूर्ध्नि समाघ्राय संदेशम् एतस्य कर्तव्यं संदिशस्व उपदिश ॥ १९ ॥

२०] ति० टी०–प्रतिश्रवे प्रतिज्ञाविषये । अनेन रामस्य वालिवधविषयदोषाभावो ध्वनितः ॥ २० ॥

रा० टी०–रामेणेति । सुग्रीवस्य संनिधौ प्रतिश्रवे त्वद्वधप्रतिज्ञासमाप्त्यर्थं त्वामभिनिघ्नता रामेण आनृण्यं मित्रीभूतसुग्रीवयाचितदेयरूपऋणराहित्यं गतं प्राप्तमत एव महत् अन्यैरसाध्यं कर्म कृतम् ॥ २० ॥

गो० टी०–रामेणेति । महत् अन्यैरशक्यं कर्म कृतम् आनृण्यं च गतं प्राप्तम् । प्रतिश्रवे प्रतिज्ञाविषये ॥ १८ ॥

२१–२२] ति० टी०–शस्तो हिंसितः ॥ २१ ॥ २२ ॥

रा० टी०–सुग्रीवं प्रत्याह–सकाम इति । हे सुग्रीव ! रिपुस्तव भ्राता शस्तः हिंसितः अतः अनुद्विग्नस्त्वं राज्यं भुङ्क्ष्व रुमां च प्रतिपत्स्यसे अत एव सकामो भव ॥ २१ ॥

गो०टी०–सुग्रीवं प्रत्याह–सकाम इति। शस्तः हिंसितः१९

रा० टी०–पुनर्वालिनं प्रत्याह–किमिति । हे वानरेश्वर ! एवं प्रलपतीं विविधं वदन्तीं प्रियां मां किं नाभिभाषसे बल्गुयः इमास्ते भार्याः पश्य । वाक्यस्य कर्मतपाऽन्वयान्न द्वितीया॥२२॥

गो० टी०–वालिनं प्रत्याह–किमिति ॥ २० ॥

२३] ति० टी०–तस्या विलपितं तारायाः विलापम्॥२३॥

रा० टी०–तस्या इति । ता वालिसंबन्धिन्यः वानर्य-

१ श्लोकोऽयं गो. नास्ति । २ कृपणं कृपणेति गो. पाठः । ३ प्रेम्णेति गो. पाठः । ४ बल्गुरिति गो. पाठः । ५ वानर्य इति गो. रा. पाठः । ६ दीनमिति गो. पाठः । ७ परीति गो. पाठः ।

किमङ्गदं साङ्गदवीरबाहो विहाय यातोऽसि चिरं प्रवासम् ।
न युक्तमेवं गुणसंनिकृष्टं विहाय पुत्रं प्रियचारुवेषम् ॥ २४ ॥
[[3]किमप्रियं ते प्रियचारुवेष मया कृतं नाथ सुतेन वा ते ।
सहाङ्गदां मां स विहाय वीर यत्प्रस्थितो दीर्घमितः प्रवासम् ॥]
यद्यप्रियं किंचिदसंप्रधार्य कृतं मया स्यात्तव दीर्घबाहो ।
क्षमस्व मे तद्धरिवंशनाथ व्रजामि मूर्ध्ना तव वीर पादौ ॥ २५ ॥
तथा तु तारा करुणं रुदन्ती भर्तुः समीपे सह वानरीभिः ।
व्यवस्यत प्रायमनिन्द्यवर्णा उपोपवेष्टुं भुवि यत्र वाली ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ।

बहुविधवचनोपन्यासैः शोचन्ती तारां समाश्वासयन्हनुमानङ्गदहस्तेन वालिन और्ध्वदैहिकं विधाप्याङ्गदाभ्युदयिकं चिन्तयेति प्रेरयति । सा तु निश्चयादनिवर्तमानाऽङ्गदाभ्युदयाद्भर्तृपादगमनमेव मे नि.श्रेयसकरतममक्षय्यसुखं चेत्युपन्यस्यति ।

ततो निपतितां तारां च्युतां तारामिवाम्बरात् । शनैराश्वासयामास हनूमान्हरियूथपः ॥ १ ॥

स्तस्या तारायाः विलपितं श्रुत्वा अङ्गदं परिगृह्य सर्वतः प्रतिचुक्रुशुः ॥ २३ ॥

गो० टी०–तस्या इति विलपितम् विलापम् ॥ २१ ॥

२४] ति० टी०–किमङ्गदं साङ्गदवीरबाहो साङ्गदो वीरहन्ता बाहुर्यस्य तादृश ! गुणसंनिकृष्टं गुणैस्तव प्रत्यासन्नम् प्रियश्चारुवेषो यस्य तं पुत्रं विहाय चिरं प्रवासं गन्तुं न युक्तमित्यन्वयः ॥ २४ ॥

रा० टी०–तत्प्रतिकोशप्रकारमाह–किमिति। साऽङ्गदोऽङ्गदसहितो वीरो मानी वीरविध्वंसकत्वेन वीरत्वविशिष्टो बाहुर्यस्य तत्संबोधनम्, अङ्गदमचिरं शीघ्रं विहाय किं किमर्थं प्रवासं यास्यसि । हे प्रियपुत्र ! एवंगुणसंनिकृष्टं गुणैः संपन्नं पुत्रं विहाय गन्तुं न युक्तम् ॥ २४ ॥

गो० टी०–किमङ्गदमिति । साङ्गदौ वीरौ वीर्यवन्तौ बाहू यस्य स तथोक्तः । गुणसंनिकृष्टं गुणैः प्रत्यासन्नं गुणैस्तव सदृशमित्यर्थः । हे ! प्रियपुत्रेति संबुद्धिः । प्रियः पुत्रो यस्य सः प्रियपुत्र इति । इयं स्त्रीजनप्रलापपरिपाटी ॥ २२ ॥ २३ ॥

२५] ति० टी०–असंप्रधार्याविचार्य । हरिवंशानां वानरसमूहानां नाथ ! व्रजामि स्पृशामीत्यर्थः ॥ २५ ॥

रा० टी०–यदीति । हरिवंशानां वानरजातानां नाथः स्वामी तत्संबोधनम् । असंप्रधार्य अज्ञात्वा यदि तव किंचिदप्रियं मया कृतं स्यात् तर्हि तत् मे अपराधं क्षमस्व । मूर्ध्ना तव पादौ चरणौ व्रजामि प्राप्नोमि, स्पृशामीत्यर्थः ॥ २५ ॥

गो० टी०–यदीति । असंप्रधार्य अविज्ञाय ॥ २४ ॥

२६] ति० टी०–यत्र वाली तत्रोपभुवि तद्भूसमीपभुवि प्रायमुपवेष्टुं प्रायोपवेशं कर्तुं व्यवस्यत निश्चितवती ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे विंशः सर्गः ॥ २० ॥

रा० टी०–तथेति । तथा उक्तप्रकारेण भर्तुः समीपे वानरीभिः सह करुणं रुदन्ती अनिन्द्यवर्णा रिपुभिरपि न निन्द्यो वर्णो यस्याः सा तारा यत्र यस्यां भुवि वाली वर्तत इति शेषः, तत्र प्रायमुपोपवेष्टुं प्रायोपवेशं कर्तुं व्यवस्यत निरचिनोत् ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे विंशतितमः सर्गः ॥ २० ॥

गो० टी०–तथा त्विति । प्रायमुपोपवेष्टुम् प्रायोपवेशं कर्तुमित्यर्थः " प्रसमुपोदः पादपूरणे " इति द्विर्वचनम् । अत्र सर्गे श्लोकव्यत्यासो लेखककृतः ॥ २५ ॥

अस्मिन् सर्गे षड्विंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–तारां प्रति हनुमदुपदेशं वर्णयितुमुपक्रमते–तत इति । ततस्ताराविलापकाले अम्बरात् आकाशात् च्युतां पतितां तारां नक्षत्रमिव निपतितां तारां हनूमान् शनैराश्वासयामास ॥ १ ॥

गो० टी०–अथ हनुमत्समाश्वासनमेकविंशे–तत इत्यादि । तारां तारकाम् ॥ १ ॥

---

१ यास्यथ चिरप्रवासमिति गो. यास्यस्यचिरमिति रा.पाठः। २ पुत्र गन्तुमिति गो.रा. पाठः। ३ श्लोकोऽयमधिकः गो.पाठे। ४ हनुमानिति गो.रा.पाठः।

गुणदोषकृतं जन्तुः स्वकर्मफलहेतुकम् । अव्यग्रस्तदवाप्नोति सर्वं प्रेत्य शुभाशुभम् ॥ २ ॥
शोच्या शोचसि कं शोच्यं दीनं दीनानुकम्पसे । कश्च कस्यानुशोच्योऽस्ति देहेऽस्मिन्बुद्बुदोपमे ॥ ३ ॥
अङ्गदस्तु कुमारोऽयं द्रष्टव्यो जीवपुत्रया । आयत्यां च विधेयानि समर्थान्यस्य चिन्तय ॥ ४ ॥
जानास्यनियतामेवं भूतानामागतिं गतिम् । तस्माच्छुभं हि कर्तव्यं पण्डितेनेह लौकिकम् ॥ ५ ॥
यस्मिन्हरिसहस्राणि शतानि नियुतानि च । वर्तयन्ति कृताशानि सोऽयं दिष्टान्तमागतः ॥ ६ ॥

२] ति० टी०–जन्तुः फलहेतुकं स्वर्गनरकादिफलसाधनं स्वार्थे कः । गुणैः शमादिभिः, दोषेण रागादिना वा कृतं यत्स्वकर्मास्ति तत्तस्य शुभाशुभरूपं फलं प्रेत्याव्ययोऽनाकुलोऽवाप्नोति । गुणदोषकृतं ज्ञानाज्ञानकृतमित्यर्थ इति कश्चित्॥२॥

रा० टी०–तदाश्वासनप्रकारमाह–गुणेति । अव्ययो जन्तुः प्राणी गुणदोषकृतं गुणेन धर्मबुद्ध्या दोषेण पापबुद्ध्या कृतं निष्पादितं फलहेतुकं शुभाशुभफलकारणीभूतं यत् स्वकर्म तत् तस्य स्वकर्मणः शुभाशुभं फलं प्रेत्य प्राणांस्त्यक्त्वा अवाप्नोति । एतेन पूर्वोपार्जितकर्मफलमेव त्वया प्राप्तमिति सूचितम् ॥ २ ॥

गो० टी०–गुणेति । जन्तुः गुणदोषकृतं ज्ञानाज्ञानाभ्यां कृतं स्वकर्मफलं स्वकर्मवासना हेतुर्यस्य तत्तथोक्तं यत् कर्मास्ति तत्तस्य शुभाशुभं फलभूतं सुखदुःखं प्रेत्य लोकान्तरं प्राप्य अव्ययः एकाग्रः सन् अवाप्नोति । अत्रकृतं शुभाशुभरूपं कर्म लोकान्तरे फलदानाय सहैव गच्छतीत्यर्थः । सुग्रीवेणार्य मारित इति न मन्तव्यं किं तु स्वकर्मणैव हतः निमित्तमात्रं सुग्रीव इति भावः ॥ २ ॥

३] ति० टी०–शोच्या पापपुण्यकर्मपाशवशगत्वेन शोचनीया त्वं कमन्यं शोच्यं शोचसि । कर्मवशगं भर्त्रादिकम् । कर्मफलवशतो दीना त्वं कमन्यं पुत्रादिकमनुकम्पसे। बुद्बुदोपमे देहेऽतीते कः कस्यानुशोच्योऽस्ति । उपलक्षणं, कस्य को नु शोचकोऽस्तीत्यपि बोध्यम । विदुषो नोचितः शोक इति भावः ॥ ३ ॥

रा० टी०–शोच्येति । शोच्या भविष्यद्वृत्ताज्ञानेन शोचनीया अत एव दीना त्वं कं शोच्यं दीनं शोचसि अनुकम्पसे च, स्वयमसमर्थस्य शोको नोचित इति तात्पर्यम् तुल्यन्यायात् । सर्वशोकस्य अनुचितत्वमाह–अस्मिन्प्रसिद्धे बुद्बुदोपमे देहे कः जन्तुः कस्य जन्तोः अनुशोच्योऽस्ति न कस्यचिदित्यर्थः, अशक्यनिवारणस्य प्रवृत्तौ शोको व्यर्थ इति तात्पर्यम्। अङ्गद इति । जीवपुत्रया जीवंश्चिरञ्जीवी पुत्रो यस्यास्तया त्वया अयमङ्गदः कुमारः द्रष्टव्यः रक्षणीयत्वेनावलोकनीयः। अत एव आयत्यामुत्तरकाले अस्य समर्थानि समीचीनार्थकारकाणि विधेयानि कार्याणि चिन्तय ॥ ३ ॥ ४ ॥

गो० टी०–नायं शोचनीयः स्वकर्मानुरूपेण गतत्वात् किं तु स्वास्मैव शोच्यः केन कर्मणा कं लोकं गमिष्यामीति। तदर्शयति–शोच्येति । स्वयं शोच्या त्वं कं प्रति शोचसि । स्वयं दीनाकं दीनम् अनुकम्पसे दयसे । बुद्बुदोपमे जलबुद्बुदवदस्थिरे देहे निमित्तसप्तमी। कस्य को वाऽनुशोच्योऽस्ति सर्वेषामप्यस्थिरत्वाविशेषात् । स्वयं स्थिर एव ह्यस्थिरं शोचेदिति भावः ॥ ३ ॥

४] ति० टी०–द्रष्टव्यः वालिशोकनिवृत्यर्थमिति शेषः । अस्य वालिनो मरिष्यमाणस्यायत्यां मरणोत्तरकाले यानि विधेयानि कार्याणि समर्थानि श्रेष्ठानि तानि त्वं चिन्तय विचारय ॥ ४ ॥

गो० टी०–अङ्गदस्त्विति[1] । द्रष्टव्यः परिपालनीयः । आयत्याम् उत्तरकाले समर्थानि हितानि ॥ ४ ॥

५] ति० टी०–अनियतामव्यवस्थिताम् । तस्माच्छुभं परलोकसुखावहं यत्तत्कर्तव्यम् । हे पण्डिते ! इह पतिपित्रादिवियोगकाले न लौकिकं बहुरोदनादि कर्तव्यम् । प्रीतिमात्रबोधकतया मृतेष्टसाधनत्वेन च तस्य लौकिकत्वम् ॥ ५ ॥

रा० टी०–जानासीति । अनियतां ज्ञायमानकालनियमरहितां भूतानामागतिं जन्मगतिं मरणं जानासि तत्मात् हेतोः पण्डितेन ज्ञानविशिष्टेन त्वया लौकिकं रोदनादिकमिव शुभं पारलौकिकमपि कर्तव्यम्। पण्डितेनेति सामान्ये नपुंसकम् एवंशब्दः सादृश्यवचनः ॥ ५ ॥

गो० टी०–जानासीति । अनियतामागतिं गतिम् अस्थिरतामिति यावत् । शुभम् और्ध्वदैहिकम् । ऐहलौकिकं रोदनादिकम् ॥ ५ ॥

६] ति० टी०–यस्मिन् जीवतीति शेषः । कृताशानि कृतभोग्याशानि । वर्तयन्ति जीवन्ति । दिष्टान्तमायुर्दायरूपकल्पितकालान्तरम् ॥ ६ ॥

रा० टी०–यस्मिन्निति । यस्मिन् वालिसमीपे कृतांशानि परिकल्पितस्वस्वविभागानि प्रयुक्तानि आज्ञप्तानि हरीणां वानराणां सहस्राणि अर्बुदानि च वर्तयन्ति स्वस्वकार्याणि निर्वाहयन्ति । सोऽयं वाली दिष्टान्तं प्रारब्धभोगावसानमागतः प्राप्तः । 'शतानि नियुतानि च' इतिभट्टटीकाङ्कितपुस्तकपाठः॥६॥

गो० टी०–यस्मिन्निति । यस्मिन् विषये हरीत्यविभक्तिकनिर्देशः, हरीणामित्यर्थः । कृतांशानि कृतविभागानि । सन्ति वर्तयन्ति जीवनं कुर्वन्ति सोऽयं दिष्टान्तं दिष्टस्य दैवकल्पितकालस्य अन्तं समाप्तिम् 'कालो दिष्टोऽप्यनेहापि' इत्यमरः । बहून् स्वजनान् जीवयित्वा गतः स्वसुकृतफलं प्राप्तुं गतः । अतः स न शोच्य इति भावः ॥ ६ ॥

१ कस्य को वेति गो. पाठः । २ प्रयुतान्यर्बुदानीति गो. रा. पाठः । ३ कृतांशानीति गो. रा. पाठः ।

यदयं न्यायदृष्टार्थः सामदानक्षमापरः । गतो धर्मजितां भूमिं नैनं शोचितुमर्हसि ॥ ७ ॥
सर्वे चैव हरिशार्दूलाः पुत्रश्चायं तवाङ्गदः । हर्यृक्षपतिराज्यं च त्वत्सनाथमनिन्दिते ॥ ८ ॥
ताविमौ शोकसंतप्तौ शनैः प्रेरय भामिनि । त्वया परिगृहीतोऽयमङ्गदः शास्तु मेदिनीम् ॥ ९ ॥
सततिश्च यथा दृष्टा कृत्यं यच्चापि सांप्रतम् । राज्ञस्तत्क्रियतां सर्वमेष कालस्य निश्चयः ॥ १० ॥
संस्कार्यो हरिराजस्तु अङ्गदश्चाभिषिच्यताम् । सिंहासनगतं पुत्रं पश्यन्ती शान्तिमेष्यसि ॥ ११ ॥
सा तस्य वचनं श्रुत्वा भर्तृव्यसनपीडिता । अब्रवीदुत्तरं तारा हनूमन्तमवस्थितम् ॥ १२ ॥
अङ्गदप्रतिरूपाणां पुत्राणामेकतः शतम् । हतस्याप्यस्य वीरस्य गात्रसंश्लेषणं वरम् ॥ १३ ॥

७] ति० टी०–न्यायेन नीतिशास्त्रेण दृष्टोऽर्थो राजकार्यं येन । सामादिपरो वानरेषु । धर्मजितां धर्मेण भूमिं जितवतां राज्ञां भूमिं स्थानं गतः, गन्तेत्यर्थः । अतो नैतच्छोक उचितः ॥७॥

रा० टी०–यदिति । यत् यस्माद्धेतोः न्यायेन राजनीत्या दृष्टः ज्ञातः अर्थः येन अत एव सामदानक्षमापरः अयं वाली धर्मजितां धर्मवद्भिः प्राप्यां भूमिं लोकं गतः प्राप्तः अत एवैनं शोचितुं नार्हसि ॥ ७ ॥

गो० टी०–यदिति । न्यायदृष्टार्थः शास्त्रदृष्टतत्त्वार्थः । साम दुःखितानां स्वजनानां सान्त्वनम् । दानम् अभीष्टार्थदानम् । क्षमा तत्कृतापराधसहनम् । एतास्तु परः सक्तः अयं धर्मजितां स्वाधीनधर्माधर्मकाणां भूमिं लोकं यत् यस्मात् गतः तस्मात्नैनं शोचितुमर्हसि ॥ ७ ॥

८] ति० टी०–त्वमपि न शोककरणार्हेत्याह–सर्वे चेति । त्वत्सनाथं त्वयैवैकया सनाथम् ॥ ८ ॥

रा० टी०–सर्व इति । सर्वे हरिशार्दूलास्त्वत्सनाथाः त्वया नाथवन्तः अङ्गदश्च त्वत्सनाथः । हर्यृक्षपतिराज्यं हरिपतीनाम् ऋक्षपतीनां च राज्यं त्वत्सनाथम् । त्वत्सनाथशब्दः लिङ्गवचनपरिणामेन अन्यत्राप्यन्वेति ॥ ८ ॥

गो० टी०–सर्व इति । हरीणाम् ऋक्षाणां च राज्यं त्वत्सनाथं त्वया सनाथम् ॥ ८ ॥

९] ति० टी०–ताविमौ सुग्रीवाङ्गदौ शनैः प्रेरय उत्तरकार्यकरणायेति शेषः ॥ ९ ॥

रा० टी०–ताविति । तौ वालिविघातेन प्राप्तौ इमौ शोकसंतप्तौ शोकं तत्कारणीभूतसंतापं च प्रेरय निवर्तयस्व । तत्प्रयोजनमाह–त्वया परिगृहीतोऽयमङ्गदः मेदिनीं शास्तु ॥९॥

गो० टी०–ताविमाविति । ताविमौ शोकसंतापौ शोकतत्कृततापौ शनैः क्रमेण प्रेरय निवर्तय । भर्तृमरणशोकस्य सद्यो दुस्त्यजत्वादिति भावः ॥ ९ ॥

१०] ति० टी०–संततिरङ्गदो यथा दृष्टा यत्प्रयोजनकतया शास्त्रे दृष्टा, यच्च राज्ञः सांप्रतं परलोकहितं कृत्यं तत्क्रियताम् एष कालस्येदानींतनकालस्योचितो निश्चयोऽनुष्ठाननिश्चयः ॥ १० ॥

रा० टी०–संततिरिति । संततिः पुत्रः यथा यथावत् दृष्टा त्वया प्राप्तेत्यर्थः, अतः सांप्रतं यत् राज्ञः कृत्यमस्ति तत् क्रियताम् एषः कृत्यकारः कालस्य निश्चयः प्रेरणा । कालप्रेरणेत्यनेन कृत्यकरणस्य दुर्निवारत्वं व्यञ्जितम् ॥ १० ॥

गो० टी०–संततिश्चेति । संततिश्च यथा दृष्टा यत्प्रयोजनकः संतानो लब्धः सांप्रतम् इदानीं यच्च कृत्यं कर्तुं योग्यं तत्सर्वं राज्ञः क्रियताम् । एष निश्चयोऽस्य कालस्य योग्य इति शेषः, नतु शोक इति भावः । पुत्रोत्पादनफलमौर्ध्वदैहिकं क्रियतामित्यर्थः ॥ १० ॥

११–१२] ति० टी०–तदेवाह–संस्कार्य इति । रामबाणस्यामोघत्वान्मरणनिश्चयेनैवमुक्तिः ॥ ११ ॥ १२ ॥

रा० टी०–कृत्यस्वरूपमाह–संस्कार्य इति । हरिराजो वाली संस्कार्यः प्रमीतिविधिना संस्करणीयः । अङ्गदश्च अभिषिच्यताम् । सिंहासनगतं पुत्रं पश्यन्ती त्वं शान्तिमेष्यसि प्राप्स्यसि ॥ ११ ॥

रा० टी०–सेति । भर्तृव्यसनपीडिता सा तारा तस्य हनुमतो वचनं श्रुत्वा उत्तरं वाक्यमब्रवीत् ॥ १२ ॥

गो० टी०–उक्तमर्थं वाचा दर्शयति–संस्कार्य इति । शान्तिं दुःखशमम् ॥ ११ ॥ १२ ॥

१३] ति० टी०–यदुक्तम् 'पुत्रेण सुखिनी भव' इति तत्प्रत्याख्याति तारा–अङ्गदेति । अङ्गदतुल्यानां पुत्राणां शतमेकतः सुखसाधनैककोटौ, हतस्यापि पत्युर्गात्रसंश्लेषोऽपरकोटौ तयोर्मध्ये द्वितीयो वरमतिशयितसुखसाधनम्, परलोके परमानन्दहेतुत्वात् । तस्मात्सहगमनं करिष्य इति भावः ॥ १३ ॥

रा० टी०–तद्वचनाकारमाह–अङ्गदेति । अङ्गदप्रतिरूपाणामङ्गदसदृशानां पुत्राणां शतमेकतः एकत्र अस्तु, एकत्र हतस्यापि अस्य गात्रसंश्लेषणमस्तु तत्र गात्रसंश्लेषणं वरं तोलनयेदमेवाधिकमित्यर्थः । एतेन एतद्वियोगे न मम किंचित्सुखदमिति सूचितम् ॥ १३ ॥

गो० टी०–अङ्गदेति । अङ्गदप्रतिरूपाणाम् अङ्गदतुल्यानां पुत्राणां सत्पुत्राणां शतम् एकतः एकत्र एकतुलायामस्तु ।

---

१ ह्रीति गो. पाठः । २ इदं हर्यृक्षराज्यमिति गो. पाठः । ३ तावदिति गो. पाठः । ४ हनुमन्तमिति रा. पाठः ।

न चाहं हरिराज्यस्य प्रभवाम्यङ्गदस्य वा । पितृव्यस्तस्य सुग्रीवः सर्वकार्येष्वनन्तरः ॥ १४ ॥
नह्येषा बुद्धिरास्थेया हनूमन्नङ्गदं प्रति । पिता हि बन्धुः पुत्रस्य न माता हरिसत्तम ॥ १५ ॥
नहि मम हरिराजसंश्रयात्क्षमतरमस्ति परत्र चेह वा ।
अभिमुखहतवीरसेवितं शयनमिदं मम सेवितुं क्षमम् ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ।

कनिष्ठेनापि सुग्रीवेण स्वापकारं क्षमयन्वाली तारावुद्धिं प्रशसन्सुग्रीव तारावचनमानने प्रेरयन्नङ्गदपालनं रामकार्यकरण च राघ्राार्थ्य स्वकण्ठादुत्तार्य काञ्चनमाला सुग्रीवकण्ठे विनिवेश्याङ्गद प्रति हितमुपदिशतो वालिनः प्राणा उदक्रामन्। वालिनोऽद्भुतापदानं प्रशसन्तः कपिगणा बहुशः पर्यदेवयन्। सप्राप्तनवियोगदुःखार्ता तारा वालिन परिरभ्यापतत्।

वीक्षमाणस्तु मन्दासुः सर्वतो मन्दमुच्छ्वसन् । आदावेव तु सुग्रीवं ददर्शानुजमग्रतः ॥ १ ॥
तं प्राप्तविजयं वाली सुग्रीवं प्लवगेश्वरम् । आभाष्य व्यक्तया वाचा सस्नेहमिदमब्रवीत् ॥ २ ॥

हतस्याप्यस्य गात्रसंश्लेषणं गाढालिङ्गनम् एकतोऽस्तु । तयोर्मध्ये भर्तृसंश्लेषणमेव वरमित्यर्थः ॥ १३ ॥

१४] ति० टी०–राज्यं त्वदधीनमिति यदुक्तं तन्निराचष्टे–न चेति । न राज्यस्य प्रभवामि न योग्या स्त्रीत्वात्। अङ्गदस्य वा राज्यदाने न प्रभवामि अनन्तरः समर्थो मत्तः प्रत्यासन्नश्च ॥ १४ ॥

रा०टी०–ननु सुखाभावेऽपि संस्कारादि कार्यमेवेत्यत आह–नेति । हरिराजस्य संस्कारायेति शेषः, अङ्गदस्य अभिषेकाय चेति शेषः, अहं न प्रभवामि ममर्थोऽस्मि तस्याङ्गदस्य पितृव्यः सुग्रीवः सर्वकार्येषु अनन्तरः समर्थ इत्यर्थः ॥ १४ ॥

गो० टी०–संस्कार्य इत्यस्योत्तरमाह–न चेति । हरिराजस्य न प्रभवामि तस्य संस्कारकरणे न समर्थोऽस्मि अङ्गदस्य वा न प्रभवामि तस्य राज्याभिषेककरणे न प्रभवामीत्यर्थः ॥ १४ ॥

१५–१६] ति० टी०–एषा बुद्धिर्मत्कर्तृकाभिषेकबुद्धिः । पिता तत्तुल्यः सुग्रीवो बन्धुः सुखदानाधिकारी न मातेत्यर्थः ॥ १५ ॥ १६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकविंशः सर्गः ॥ २१ ॥

रा० टी०–ननु त्वत्कर्तृकाभिषेकाप्रवृत्तौ त्वद्विषयकाङ्गदप्रीतिर्विनङ्क्ष्यतीत्यत आह–नहीति । हे हनुमन् ! पिता तदुपलक्षितपितृव्यादिश्च पुत्रस्य बन्धुः माता तु न, न एषा बुद्धिः अङ्गदं प्रति आस्थेया प्रापणीया। किंच मातैव बन्धुः पित्रादिस्तु न इति बुद्धिर्नास्थेया पितृव्येऽपि बन्धुत्वं बोधनीयमित्यर्थः। एतेनेतरबुद्धयनुत्पत्तौ सुग्रीवविद्वेषेऽङ्गदविध्वंसो भविष्यतीति व्यञ्जितम् ॥ १५ ॥

गो० टी०–न हीति । नास्थेया नादर्तव्या न कर्तव्येत्यर्थः । पिता पितृव्यः ॥ १५ ॥

रा० टी०–नन्वौदासीन्यं संत्यज्य सुग्रीवाङ्गदादिभिः प्रीतिं संपादयेत्यत आह–न हीति । इहलोके परत्र वा हरिराजसंश्रयात् अन्यत् क्षमतरम् आश्रयणीयमित्यर्थः, नैवास्ति । अतः अभिमुखं संमुखं हतो यो वीरस्तेन सेवितमिदं शयनं मम सेवितुं क्षमम् ॥ १६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकविंशः सर्गः ॥ २१ ॥

गो० टी०–नहीति । परत्र परलोके इह अस्मिन् लोके शत्रभिमुखतया हतः अभिमुखहतः स चासौ वीरश्च तेन सेवितम् ॥ १६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

१] ति० टी०–सर्वतो वीक्षमाणः स आत्मजस्याग्रतः स्थितं सुग्रीवमेवादौ ददर्श ॥ १ ॥

रा० टी०–वाल्युक्तिमुपक्रमते–वीक्षमाण इति । मन्दासुः शिथिलप्राणः अत एव मन्दमुच्छ्वसन् सर्वतो वीक्षमाणः अवलोकयन् वाली आदौ प्रथममग्रतः स्थितं सुग्रीवं ददर्श । तत्काले वालिप्राणसत्त्वेऽपि संस्कार्यो हरिराजोऽयमितिः हनुमदुक्तिर्न विरुध्यते प्राणहारकरामबाणविद्धत्वेन मरणनिश्चयात् ॥ १ ॥

गो० टी०–एवममोघरामशराभिघातेन मोहसमाविष्टं वालिनं मृतं निश्चित्य संस्कारादिकरणाय त्वरमाणे हनुमति दैवात्किंचित्समाश्वस्तो वाली कर्तव्यभागं नियच्छति द्वाविंशे–वीक्षमाण इत्यादि । मन्दासुः अल्पप्राणः ॥ १ ॥

२] ति० टी०–आभाष्य सुग्रीवेति संबोध्य ॥ २ ॥

रा० टी०–तामिति । प्लवगेश्वरो वाली प्राप्तविजयं

१ हनुमन्निति गो. पाठः । २ ददर्श त्वात्मजाग्र इति गो. पाठः । ३ प्लवगेश्वर इति गो. रा. पाठः ।

सुग्रीव दोषेण न मां गन्तुमर्हसि किल्बिषात् । कृष्यमाणं भविष्येण बुद्धिमोहेन मां बलात् ॥ ३ ॥
युगपद्विहितं तात न मन्ये सुखमावयोः । सौहार्दं भ्रातृयुक्तं हि तदिदं जातमन्यथा ॥ ४ ॥
प्रतिपद्य त्वमद्यैव राज्यमेषां वनौकसाम् । मामप्यद्यैव गच्छन्तं विद्धि वैवस्वतक्षयम् ॥ ५ ॥
जीवितं च हि राज्यं च श्रियं च विपुलां तथा । प्रजहाम्येष वै तूर्णमहं चागर्हितं यशः ॥ ६ ॥
अस्यां त्वहमवस्थायां वीर वक्ष्यामि यद्वचः । यद्यप्यसुकरं राजन्कर्तुमेव त्वमर्हसि ॥ ७ ॥
सुखार्हं सुखसंवृद्धं बालमेनमबालिशम् । बाष्पपूर्णमुखं पश्य भूमौ पतितमङ्गदम् ॥ ८ ॥

सुग्रीवं व्यक्तया वाचा आभाष्य संबोध्य सस्नेहमिदमब्रवीत् ॥ २ ॥

गो० टी०–तमिति । आभाष्य संबोध्य ॥ २ ॥

३] ति० टी०–हे सुग्रीव ! मां किल्बिषात्प्राग्भवीयदुष्कृतवशाद्भविष्येण भविष्यताऽवश्यंभाविना बुद्धिमोहेन त्वयि शत्रुबुद्धिरूपेण बलात्कृष्यमाणं मां ज्ञात्वा त्वं दोषेण स्वापकारदोषवत्त्वेन मां गन्तुमवगन्तुं नार्हसि ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–सुग्रीवेति । हे सुग्रीव ! किल्बिषात् मत्कर्तृकस्वविषयकदोषाचरणं संस्मृत्य दोषेण विद्विष्टं मां गन्तुं बोद्धुं नार्हसि । तत्र हेतुः–भविष्येण भविष्यता बुद्धिमोहेन बुद्धेर्मोहकेन तव प्रारब्धभोगेनेत्यर्थः, बलात् कृष्यमाणं स्ववशे प्राप्यमाणं मां गन्तुमर्हसि । एतेनायं मद्विरोधीति बुद्धिं त्यजेति सूचितम् ॥ ३ ॥

गो० टी०–सुग्रीवेति । किल्बिषात् राज्यविवासनदारहरणरूपकिल्बिषाद्धेतोः मां दोषेण गन्तुं दोषसहितं ज्ञातुं नार्हसि, किंतु भविष्येण भाविफलेन हेतुना जातेन बुद्धिमोहेन बलात्कृष्यमाणं मां गन्तुमर्हसि ॥ ३ ॥

४] ति० टी०–कार्यानुमितं कर्मप्राबल्यं दर्शयति—युगपदिति । भ्रातृयुक्तं भ्रात्रोर्युक्तमुचितं सौहार्दं सुखं च राज्यसुखं चावयोः कर्मणा युगपन्न निहितमिति मन्ये, यतस्तदिदमुचितमपि सुखं चान्यथा जातम् विघटितमित्यर्थः ॥ ४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–युगपदिति । हे तात ! यस्मात् आवयोः सुखं युगपत् एककालावच्छेदेन न विहितं ब्रह्मणा लिखितं तत्तस्माद्धेतोः भ्रातृयुक्तं भ्रात्रोः उचितम् इदं लोके प्रसिद्धं सौहार्दमन्यथा जातमित्यहं मन्ये ॥ ४ ॥

गो० टी०–युगपदिति । आवयोः भ्रात्रोः भ्रातृयुक्तं भ्रातृत्वप्रयुक्तम् सौहार्दं सुखं राज्यसुखं च एतदुभयं दैवेन युगपन्न विहितं मन्ये, ध्रुवम् अव्ययमेतत् । तदिदं दैवकृतं युगपद्विधानम् अन्यथा न हि अन्यप्रकारं न भवति हि ॥४॥

५] ति० टी०–अथ रामशरक्षीणपापत्वात्प्राप्तदिव्यप्रकृतिः स्वयमेव सुग्रीवाय स्वानन्तरं प्राप्तं राज्यं ददाति–प्रतिपद्येति । प्रतिपद्यस्वेत्यर्थः । वैवस्वतक्षयं यमगृहम् । ननु राजनि मृते तत्पुत्र एव राज्याधिकारी न तु तत्कनीयान्भ्रातेति चेन्न, पुत्रस्य बालत्वेन राज्यरक्षणासामर्थ्याद्भलवदाश्रितत्वाच्च पुत्रनाशो मा भूदिति तथोक्तेः । भगवता रामेणापि राज्यरक्षणासामर्थ्येनाङ्गदस्य सुग्रीवोऽभिषिक्तो राज्ये । यौवराज्ये चाङ्गदः । सुग्रीवानन्तरं त्वङ्गदस्यैव राज्याधिकारः, न तु सुग्रीवपुत्राणामज्येष्ठपुत्रत्वादित्याहुः ॥ ५ ॥

रा० टी०–प्रतिपद्येति । वैवस्वतक्षयं कालरहितस्थानमित्यर्थः, अद्यैव गच्छन्तं मां विद्धि जानीहि अतः वनौकसां राज्यमद्यैव प्रतिपद्यस्व प्रतिपद्य प्राप्नुहि । न च राजपुत्रसत्त्वे भ्रातुः राज्यानौचित्यात् कथमेवमुक्तमिति वाच्यं, बिलप्रविष्टवालिमरणनिश्चये तदानीं वालिपुत्रस्याभावात् सुग्रीवस्य प्राप्तराज्यत्वेन नवीनराज्यत्वाभावेनादोषात् ॥ ५ ॥

गो० टी०–प्रतीति । प्रतिपद्य पालयेति शेषः, यद्वा प्रतिपद्य प्राप्नुहि । इयङन्तोऽयम् । यमक्षयं यमगृहम् ॥ ५ ॥

६] ति० टी०–अगर्हितं यशः प्रशस्तं यशो वाली केनाप्यवध्य इत्येवम् । तच्च प्रजहामि एकेनैव शरेण रामहतत्वादिति प्राज्ञः । अन्ये तु—चस्त्वर्थे यश इत्युत्तरं बोध्यः । अगर्हितं यशस्तु प्राप्नोमीति शेषः । वाली भगवता रामेण छद्मेन हत इत्येवंरूपं च यश इत्याहुः ॥ ६ ॥

रा० टी०–जीवितमिति । एषोऽहं जीवितादिकमगर्हितमनिन्दितं प्रशस्तमित्यर्थः, यशश्च प्रजहामि त्यजामि ॥ ६ ॥

गो० टी०–जीवितमिति । अगर्हितं यशः केनाप्यवध्यो वालीति प्रसिद्धं यशः ॥ ६ ॥

७] ति० टी०–अस्यामवस्थायां चरमदशायां यद्यप्यसुकरं मयात्यन्तमपकृतत्वात्, तथापि कर्तुमर्हस्येवेति योजना । सात्त्विकत्वात्सात्त्विकसमाश्रयणाच्चेत्याशयः । स्वयं राज्यस्य दत्त्वाद्राजन्निति संबोधनम् ॥ ७ ॥

रा० टी०–अस्यामिति । हे वीर ! हे राजन् ! अस्यामासन्नमरणायामवस्थायाम् असुकरमपि यद्वचः यदि वक्ष्यामि तदा तत् कर्तुं त्वमर्हसि ॥ ७ ॥

गो० टी०–अस्यामिति । अस्यामवस्थायां चरमावस्थायां यद्वचो वक्ष्यामि एतद्यद्यप्यसुकरं तथाप्यवश्यं कर्तुमर्हसि । मदुक्तरीत्या राजा भवेत्यर्थः ॥ ७ ॥

८] ति० टी०–तदेवाह—सुखार्हमिति । अबालिशं समर्थम् ॥ ८ ॥

रा० टी०–सुखार्हमिति । सुखार्हं सुखयोग्यमत एव

१ तात नान्यथेति गो. पाठः । २ तदिति गो. पाठः ।

मम प्राणैः प्रियतरं पुत्रं पुत्रमिवौरसम् । मया हीनमहीनार्थं सर्वतः परिपालय ॥ ९ ॥
त्वमप्यस्य पिता दाता परित्राता च सर्वशः । भयेष्वभयदश्चैव यथाऽहं प्लवगेश्वर ॥ १० ॥
एष तारात्मजः श्रीमांस्त्वया तुल्यपराक्रमः । रक्षसां च वधे तेषामग्रतस्ते भविष्यति ॥ ११ ॥
अनुरूपाणि कर्माणि विक्रम्य बलवान्रणे । करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः ॥ १२ ॥
सुषेणदुहिता चेयमर्थसूक्ष्मविनिश्चये । औत्पातिके च विविधे सर्वतः परिनिष्ठिता ॥ १३ ॥
यदेषा साध्विति ब्रूयात्कार्यं तन्मुक्तसंशयम् । नहि तारामतं किंचिदन्यथा परिवर्तते ॥ १४ ॥
राघवस्य च ते कार्यं कर्तव्यमविशङ्कया । स्यादधर्मो ह्यकरणे त्वां च हिंस्यादमानितः ॥ १५ ॥
इमां च मालामाधत्स्व दिव्यां सुग्रीव काञ्चनीम् । उदारा श्रीः स्थिता ह्यस्यां संप्रजह्यान्मृते मयि॥ १६ ॥

सुखसंवृद्धमबालिशं सुबुद्धिमित्यर्थः, बाष्पपूर्णमुखं भूमौ पतितमङ्गदं बालं पश्य ॥ ८ ॥

गो० टी०–सुखार्हमिति । वयसा बालमध्यबालिशं बालबुद्धिरहितम् । ममेति । प्राणैः प्राणेभ्यः । मम पुत्रं त्वम् औरसं पुत्रमिव पश्येति संबन्धः ॥ ८ ॥

९] ति० टी०–प्राणैः प्राणेभ्यो मम पुत्रं स्वमौरसं पुत्रमिवाहीनार्थमक्षीणैहिकसकलप्रयोजनं यथा तथा सर्वतः सर्वत्र देशे काले च पालय । स्वानन्तरमस्यैव राज्यं देहीति व्यङ्ग्यम् ॥ ९ ॥

रा० टी०–दर्शनप्रयोजनमाह–ममेति । प्राणैः प्राणेभ्यः प्रियतरं मया हीनं मम औरसं पुत्रं स्वस्यौरसं पुत्रमिव अहीनार्थं यथा भवति तथा सर्वतः सर्वप्रकारेण परिपालय ॥ ९ ॥

गो० टी०–मयेत्यादि । अस्य अङ्गदस्य दाता वस्त्राभरणादीनामिति शेषः, सर्वतः शत्रुभ्यः परित्राता भयेष्वभयदः शत्रुपुत्रत्वेन स्थानान्निष्कासनादिभयहेतुषु विषये अभयदः ॥ ९–११ ॥

१०] ति० टी०–पालनप्रकारमेव दर्शयति—त्वमपीति। सर्वत्र भवेति शेषः ॥ १० ॥

रा० टी०–परिपालनप्रकारं वदन्नाह–त्वमिति । अहमिव त्वमपि अस्य अङ्गदस्य पित्रादिर्भवेति शेषः ॥ १० ॥

११] ति० टी०–उक्तं स्वपुत्रस्यावालिशत्वं दर्शयति–एष इति । रक्षसां वधे रामप्रत्युपकारप्रसङ्गप्राप्ते ॥ ११ ॥

रा० टी०–तत्परिपालने तवापि प्रयोजनं भवितेति बोधयन्नाह–एष इति । त्वया तुल्यपराक्रमः एष तारात्मजस्तेषां त्वदीप्सितवधानां रक्षसां वधे ते अग्रतोऽग्रे भविष्यति भविता ॥ ११ ॥

१२] ति० टी०–अङ्गरूपाणि मदनुरूपाणि ॥ १२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अनुरूपाणीति । तरुणः बलवान् तारेयः एषः अङ्गदः रणे विक्रम्य प्राप्य अनुरूपाणि मत्सदृशानि कर्माणि करिष्यति ॥ १२ ॥

१३] ति० टी०–तारारक्षणं तत उपकारमात्रदर्श सूचयति–सुषेणेति । तदुहिता तारा अर्थानां मध्ये सूक्ष्मः परमदुर्ज्ञेयो योऽर्थस्तस्य निश्चये, औत्पातिके विविधे नानाप्रकारोत्पातमूचितापत्कालिकानुष्ठेयनिश्चये, सर्वत ऐहिकामुष्मिकनिश्चये च, परिनिष्ठिताऽतिसमर्था ॥ १३ ॥

रा० टी०–सुषेणेति । सुषेणदुहिता इयं तारा विविधे अनेकप्रकारके औत्पातिके उत्पातकालोचिते अर्थसूक्ष्मविनिश्चये दुर्ज्ञेयार्थबोधने सर्वतः सर्वप्रकारेण हि यतः परिनिष्ठिता अतिनिपुणाऽस्तीति शेषः, अतः किंचित्तारामतमन्यथा न परिवर्तते भवति अतः एषा तारा यत्कर्तव्यं साधु ब्रूयात् तत् मुक्तसंशयं यथा भवति तथा कार्यम् । श्लोकद्वयमेकान्वयि । एतेन ताराऽवश्यं रक्षणीयेति सूचितम् ॥ १३ ॥ १४ ॥

गो० टी०–सुषेणेति । अर्थसूक्ष्मविनिश्चये सूक्ष्मार्थविनिश्चये औत्पातिके उत्पातविषयज्ञाने च परिनिष्ठिता संजातनिष्ठा समर्थेति यावत् ॥ १३ ॥

१४] ति० टी०–ततः किं तत्राह–यदिति । तत्कार्यं त्यक्तसंशयं कार्यमनुष्ठेयम् । तदेव द्रढयति–नहीति । मदनुभवसिद्धमेतदिति भावः । अनेन त्रैवर्णिकेतरत्वेन तरुणत्वेनावश्यं कर्तव्यपुरुषान्तरस्वीकारायास्तारायाः देवरत्वात्सुग्रीवस्य स्वीकारोऽप्यनुमत इति गम्यते ॥ १४ ॥

गो० टी०–यदिति । न परिवर्तते न भवतीत्यर्थः ॥१३॥

१५] ति टी०–अथ भात्रे वक्तव्यमुपदेशमाह–राघवस्येति । अकरणेऽधर्मः स्यात् मिथ्याप्रतिज्ञत्वापत्तेरिति भावः । एवं पारलौकिकमनिष्टं प्रदर्श्यैहिकमपि तदाह—त्वां चेति । मामिव धर्मभ्रष्टत्वादिति भावः ॥ १५ ॥

रा० टी०–राघवस्येति । राघवस्य कार्यं ते त्वया अविशङ्कया संदेहराहित्येन कर्तव्यं हि यतः अकरणे अधर्मः मिथ्याप्रतिज्ञत्वादिपातकं स्यात्, अमानितः अवमानितो रामस्त्वां हिंस्याच्च ॥ १५ ॥

गो० टी०–राघवस्य चेति । विमानितः राघव इति शेषः ॥ १४ ॥

१६] ति० टी०–अथ राज्यानुमतिं क्रिययाऽपि दर्शयति–इमां चेति । उदारा प्रशस्ता श्रीर्जयलक्ष्मीरस्यां स्थिता

---

१ त्वमेवास्य हि दाता चेति गो. पाठ० । २ सर्वत इति गो. पाठः ।

इत्येवमुक्तः सुग्रीवो वालिना भ्रातृसौहृदात् । हर्षं त्यक्त्वा पुनर्दीनो ग्रहग्रस्त इवोडुराट् ॥ १७ ॥
तद्वालिवचनाच्छान्तः कुर्वन्युक्तमतन्द्रितः । जग्राह सोऽभ्यनुज्ञातो मालां तां चैव काञ्चनीम् १८ ॥
तां मालां काञ्चनीं दत्त्वा दृष्ट्वा चैवात्मजं स्थितम् । संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत् ॥ १९ ॥
देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये । सुखदुःखसहः काले सुग्रीववशगो भव ॥ २० ॥
यथा हि त्वं महाबाहो लालितः सततं मया । न तथा वर्तमानं त्वां सुग्रीवो बहु मन्यते ॥ २१ ॥
नास्यामित्रैर्गतं गच्छेर्मा शत्रुभिररिन्दम । भर्तुरर्थपरो दान्तः सुग्रीववशगो भव ॥ २२ ॥

महेन्द्रानुग्रहात्, हि यतो मृते मयि शवस्पर्शादेनां सा श्रीर्जह्यात् अत इदानीमेवेमां गृहाणेति भावः ॥ १६ ॥

रा० टी०–इमामिति । हे सुग्रीव ! काञ्चनीं स्वर्णमयीं दिव्यामिमाम् इन्द्रदत्तां मालां त्वमाधत्स्व हि यतः अस्यां मालायामुदारा अत्युत्कर्षा श्रीः विजयादिलक्ष्मीः स्थिता, एतद्धारयिता विजयादिलक्ष्मीः प्राप्नोतीत्यर्थः । ननु यावज्जीवं त्वय्येव तिष्ठतु इत्यत आह–मयि मृते सति श्रीः मालां संप्रजह्यात् शवस्पर्शदोषात् त्यजेत् । मालां श्रीरिति चोभयान्वयि ॥ १६ ॥

गो० टी०–इमामिति । संप्रजह्यान्मृते मयि मृते सति श्रीरिमां काञ्चनीं मालां संप्रजह्यात् । ततः पूर्वमेव मयि जीवति गृहाणेति भावः ॥ १६ ॥

१७] ति० टी०–एवं वालिवचः श्रुत्वा, पूर्वं वाली दुष्ट इति बुद्ध्या तद्वधे जातं हर्षमिदानीमेव सौमनस्यदर्शनेन त्यक्त्वा दीनः विषण्णोऽभूदित्यर्थः । ग्रहग्रस्तो राहुग्रस्तः॥१७॥

रा० टी०–इतीति । वालिना भ्रातृसौहृदात् इत्येवमुक्तः सुग्रीवः हर्षं रिपुवधजनितानन्दं त्यक्त्वा ग्रहग्रस्तः राहुपीडितः उडुराट् चन्द्र इव दीनः द्रोहनिवृत्तिपूर्वकभ्रातृवधहेतुकदैन्यवान् अभवदिति शेषः ॥ १७ ॥

गो० टी०–इतीति । दीनः अभूदिति शेषः । ग्रहग्रस्तः राहुग्रस्तः ॥ १६ ॥

१८] ति० टी०–तद्वालिवचनात्तादृशवालिवचनेन शान्तः शान्तवैरो युक्तं भ्रातृस्नेहोचितदर्शनादिव्यवहारमतन्द्रितः कुर्वन्मालाग्रहणे वालिनाऽभ्यनुज्ञातो मालां जग्राह ॥ १८ ॥

रा० टी०–तदिति । वालिवचनात् शान्तः अत एव अतन्द्रितः स्वस्थचित्तः अभ्यनुज्ञातः स सुग्रीवः युक्तं योग्यं तत् लोके प्रसिद्धं विलापादि कुर्वन् मालां जग्राह ॥ १८ ॥

गो० टी०–तदिति । तत्तदनन्तरं शान्तः त्यक्तवैरः ॥१७॥

१९] ति० टी०–प्रेत्यभावाय संसिद्धो निश्चितमरणः॥१९॥

रा० टी०–तामिति । तां इन्द्रदत्तां मालां दृष्ट्वा सुग्रीवायेति शेषः, प्रेत्यभावाय परलोकप्राप्तये संसिद्धः कृतनिश्चयो वाली आत्मजमङ्गदं स्थितं दृष्ट्वा स्नेहादब्रवीत् ॥ १९ ॥

गो० टी०–तामिति । प्रेत्यभावाय मरणाय संसिद्धः कृतनिश्चयः ॥ १८ ॥

२०] ति० टी०–देशकालौ तत्तत्कर्मोचितौ भजस्व जानीहि । प्रियाप्रिये इष्टानिष्टयोगजे काले सेवाकाले सुग्रीववशगस्तत्सेवापरो भव ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–देशेति । प्रियाप्रिये वचने क्षममाणः तुल्यत्वेन मन्यमान इत्यर्थः, अत एव सुखदुःखसहस्त्वं देशकालौ भजस्व विचारय अत एव काले अस्मिन् समये सुग्रीववशगो भव ॥ २० ॥

गो० टी०–देशेति । अद्य मत्प्रयाणानन्तरं देशकालौ भजस्व । गत्यर्था ज्ञानार्थाः देशकलौ जानीहि, अस्मिन् देशे अस्मिन् काले च एवं वर्तितव्यम् एवं न वर्तितव्यमिति विवेचयेत्यर्थः । प्रियाप्रिये क्षममाणः प्रभोः प्रियवचनवृदप्रियवचनमपि सोढव्यमित्यर्थः । काले सुखदुःखसहः दुःखकाले सुखं सुखकाले दुःखं च सहमान इत्यर्थः, सुग्रीववशो भव सुग्रीवपरतन्त्रो भव ॥ १९ ॥ २० ॥

२१] ति० टी०–विपक्षे बाधकमाह–यथा हीति । बालतया केवलं लालितो यथा सेवोचितकालेऽपि सेवारहितोऽवर्तिष्ट, तथा सेवाराहित्येन वर्तमानं त्वां सुग्रीवो न बहु मन्येत, अतः सेवां कुर्वित्युपदेशः ॥ २१ ॥

रा० टी०–सुग्रीववशगत्वे हेतुमाह–यथेति । यथा येन प्रकारेण अपराधकर्तृत्वेनाधीत्यर्थः, वर्तमानस्त्वं सततं निरन्तरं मया पालितस्तथा वर्तमानं त्वां सुग्रीवो न बहुमन्यते पालयिष्यतीत्यर्थः ॥ २१ ॥

२२] ति० टी०–किं चास्य सुग्रीवस्यामित्रैरुपकारकैस्तथा शत्रुभिरपकारकैश्च गतं संगतं सख्यं मा गच्छेः मा गच्छ । भर्तुः सुग्रीवस्यार्थपरः प्रयोजनसाधनपरः ॥ २२ ॥

रा० टी०–सेवाप्रकारमाह–नेति । अस्य सुग्रीवस्य अमित्रैः उदासीनैः गतं संगतं सख्यमित्यर्थः, न गच्छेः प्राप्नुयाः, शत्रुभिश्च संगतं मा गच्छेः । हेयत्वपदिश्योपादेयमाह–दान्तो जितेन्द्रियस्त्वं भर्तुः सुग्रीवस्य अर्थपरः प्रयोजनसाधकः सन् सुग्रीववशगो भव ॥ २२ ॥

गो० टी०–माऽस्येति । अस्य सुग्रीवस्यामित्रैर्गतं प्राप्तं पुरुषं मा गच्छेः अस्य शत्रुमित्रं न भजेरित्यर्थः, शत्रुभिः सह च मा गच्छेः ॥ २१ ॥

१ मंस्थ इति गो. पाठः ।

न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते । उभयं हि महादोषं तस्मादन्तरदृग्भव ॥ २३ ॥
इत्युक्त्वाऽथ विवृत्ताक्षः शरसंपीडितो भृशम् । विवृतैर्दशनैर्भीमैर्बभूवोत्क्रान्तजीवितः ॥ २४ ॥
ततो विचुक्रुशुस्तत्र वानरा हतयूथपाः । परिदेवयमानास्ते सर्वे प्लवगसत्तमाः ॥ २५ ॥
किष्किन्धा ह्यद्य शून्या च स्वर्गते वानरेश्वरे । उद्यानानि च शून्यानि पर्वताः काननानि च ॥ २६ ॥
हते प्लवगशार्दूले निष्प्रभा वानराः कृताः । [यस्य वेगेन महता काननानि वनानि च ।
पुष्पौघेणानुबध्यन्ते करिष्यति तदद्य कः ।] येन दत्तं महद्युद्धं गन्धर्वस्य महात्मनः ॥ २७ ॥
गोलभस्य महाबाहोर्दश वर्षाणि पञ्च च । नैव रात्रौ न दिवसे तद्युद्धमुपशाम्यति ॥ २८ ॥
ततः षोडशमे वर्षे गोलभो विनिपातितः । तं हत्वा दुर्विनीतं तु वाली दंष्ट्राकरालवान् ॥
सर्वाभयंकरोऽस्माकं कथमेष निपातितः ॥ ॥ २९ ॥

२३-२४] ति० टी०-नातिप्रणयः पुत्रत्वात् अप्रणयश्च न कार्यः अस्मद्वधादिनाऽन्तरदृक् 'अत्यासत्तिर्विनाशाय त्वतिदूरं तु निष्फलम् । सेवा मध्यमभावेन राजवह्निगुरुस्त्रियाम् ॥' इति न्यायेन मध्यममार्गमवलम्बस्वेत्याशय. ॥ २३ ॥ २४ ॥

रा० टी०-शिक्षान्तरमाह-न चेति । अतिप्रणयः परप्रीतिः न कार्यः क्वचिदपि करणीयः । अप्रणयः स्नेहनिवर्तकविद्वेष इत्यर्थः, न कर्तव्यः । तत्र हेतुमाह-उभयम् अतिप्रीतिविद्वेषं महादोषमतिदोषविशिष्टं तस्मात् अन्तरदृक् मध्यवर्ती भव॥२३॥

गो० टी०-न चेति । अतिप्रणयः अतिस्नेहः अप्रणयः स्नेहाभावश्च । अन्तरदृग्भव मध्यमभावमवलम्बस्वेत्यर्थः॥२२॥

रा० टी०-इतीति । इत्युक्त्वा भृशं शरसंपीडितः अत एव विवृत्ताक्षः विवृत्तनयनः अत एव भीमैः भयंकरैः विवृतैः दशनैर्दन्तैः उपलक्षितो वाली उत्क्रान्तजीवितो बभूव ॥ २४ ॥

गो० टी०-इतीति । विवृत्ताक्षः भ्रामितनेत्रः । विवृतैः प्रकाशितैः, अत एव भीमैः दशनैः दन्तैरुपलक्षितः उत्क्रान्तजीवितः उद्गतप्राणः ॥ २३ ॥

२५] ति० टी०-हतो यूथपो येषां तादृशाः परिदेवयमाना विचुक्रुश्चरित्यन्वयः ॥ २५ ॥

रा० टी०-तत इति । ततः उत्क्रान्तजीवनानन्तरं तत्र वालिसमीपे हतयूथपाः अत एव परिदेवयमानाः रुदन्तस्ते प्रसिद्धाः प्लवगसत्तमाः सर्वे वानराः विचुक्रुशुः विलेपुः ॥२५॥

गो० टी०-तत इति । परिदेवयमानाः रुदन्त इत्यर्थः । प्लवगप्लवाः बलेन श्रेष्ठाः पुनश्च हरियूथपाः यूथस्य निर्वोढारः वानराः वानरजातयः ॥ २४ ॥

२६-२७] ति० टी०-अस्यैव प्रपञ्चः-किष्किन्धेत्यादि ॥ २६ ॥ २७ ॥

२८] ति० टी०-गोलभस्य तदाख्यस्य । महद्युद्धं पञ्चदशवर्षावध्यहोरात्रमविश्रमं युद्धम् । तदेवाह-नैवेति ॥ २८ ॥

रा० टी०-विलापप्रकारमाह-किष्किन्धेत्यादीभिः । वानरेश्वरे वालिनि स्वर्गते सति किष्किन्धा शून्या, उद्यानादीनि च शून्यानि ॥ २६ ॥

गो० टी०-परिदेवनमेवाह-किष्किन्धेत्यादिना । शून्या शून्यप्राया ॥ २६ ॥

रा० टी०-हत इति । प्लवगशार्दूले हते सति वानरा निष्प्रभाः कृताः । अर्धं पृथक् । यस्येति । यस्य महता वेगेन प्रतापेन काननानि अरण्यानि वनानि जलानि च सकमलसरांसीत्यर्थः, पुष्पौघेन पुष्पसमूहेन अनुबध्यन्ते सर्वकालं योज्यन्ते तत् योजनमस्य वालिमरणसमये कः कस्य प्रतापः करिष्यति । अर्धद्वयमेकान्वयि ॥ २७ ॥

रा० टी०-येनेति । येन वालिना महात्मनो गन्धर्वस्य महाबाहोः गोलभस्य गोलभाभिधस्य दश पञ्च च वर्षाणि महद्युद्धं दत्तं तत्तस्य युद्धं रात्रौ नैवोपशाम्यति निवर्तते दिवसे च नोपशाम्यति ततः दशपञ्चवर्षानन्तरं षोडशमे षोडशे वर्षे गोलभो विनिपातितः वालिना हतः । अर्धचतुष्टयमेकान्वयि ॥२८॥२९॥

गो० टी०-यस्येति । वेगेन पराक्रमेण काननानि अरण्यानि वनानि जलानि सरांसीत्यर्थः, पुष्पौघेण अनुबध्यन्ते संबध्यन्ते । सदा पुष्पितानि भवन्तीत्यर्थः । तत्पुष्पानुबन्धनम् अस्य तु वालिमरणानन्तरकाले । यद्वा वनानि क्षुद्रारण्यानि यस्मिन् वालिनि गच्छति सति तदूरुवेगेनाविशेषेण सर्वाणि वनानि पुष्पैः सहानुगच्छन्तीत्यर्थः ॥ २६ ॥

गो० टी०-येनेति । गोलभस्य गोलभाख्यस्य उपशाम्यति उपशाम्यत् भूते लट् । दंष्ट्राकरालवान् करालदंष्ट्रावान्, परनिपातः ॥ २७-२९ ॥

२९] ति० टी०-दंष्ट्राकरालवान् आर्षः स्वार्थे मतुप् दंष्ट्राकराल इत्यर्थः । अस्माकं सर्वाभयंकरः सर्वेभ्योऽभयंकरः स एष वीरः कथं निपातितः ॥ २९ ॥

रा० टी०-तामिति । दुर्विनीतं गोलभं हत्वा अस्माकं सर्वाभयंकरः दंष्ट्राकरालवान् दंष्ट्राकरालत्वविशिष्टः भावप्रधानो निर्देशः अत एवान्यवन्नार्षकल्पना, एष वाली कथं निपातितः१०

१ महान् दोष इति गो. पाठः । २ हरियूथपा इति गो. पाठः । ३ पुंगवा इति गो. पाठः । ४ ऽऽसीदिति गो. पाठः । ५ वानराधिपे इति गो. पाठः । ६ श्लोकोऽयमधिकः गो. रा. पाठे । ७ तु षोडशे इति गो. पाठः ।

हते तु वीरे प्लवगाधिपे तदा वनेचरास्तत्र न शर्म लेभिरे ।
वनेचराः सिंहयुते महावने यथा हि गावो निहते गवां पतौ ॥ ३० ॥
ततस्तु तारा व्यसनार्णवप्लुता मृतस्य भर्तुर्वदनं समाश्रिता ।
जगाम भूमिं परिरभ्य वालिनं महाद्रुमं छिन्नमिवाश्रिता लता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ।

वदनमाघ्रायालिङ्गितुं प्रयतमानाऽपि तारा रेणुरुधिरोक्षिताङ्गं वालिनं परिरब्धुं न शशाक । नीलो वालिहृदयाद्रामबाणमुद्धार । तारयोदितोऽङ्गदो वालिचरणावभ्यवादयत ।

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम् । पतिं लोकश्रुता तारा मृतं वचनमब्रवीत् ॥ १ ॥
शेषे त्वं विषमे दुःखमकृत्वा वचनं मम । उपलोपचिते वीर सुदुःखे वसुधातले ॥ २ ॥
मत्तः प्रियतरा नूनं वानरेन्द्र मही तव । शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे ॥ ३ ॥
सुग्रीवस्य वशं प्राप्तो विधिरेष भवत्यहो । सुग्रीव एव विक्रान्तो वीर साहसिकप्रिय ॥ ४ ॥

३०] ति० टी०–वनेचराः प्लवङ्गमा न शर्म लेभिरे इत्यन्वयः । अपरं वनेचरा इति गवां विशेषणम् ॥ ३० ॥

रा० टी०–तद्विलापं संवर्ण्य तद्वृत्तान्तमाह–हत इति । तदा रामबाणप्रविद्धसमये तत्र तस्मिन् प्रसिद्धे वीरप्लवगाधिपे वालिनि हते सति वनेचराः शर्म सुखं न लेभिरे । तत्र दृष्टान्तः–गवां पतौ पत्यौ रक्षके निहते सति सिंहयुते महावने वनेचरा गावो यथा ॥ ३१ ॥

गो० टी०–हत इति । शर्म सुखम् । सिंहयुत इति सिंहस्थानीयो रामः ॥ ३० ॥

३१] ति० टी०–'समीक्ष्य सा' इति पाठः ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामायते रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०–तत इति । ततस्तत्प्राणापगमे सति व्यसनार्णवप्लुता सा तारा भर्तुर्वदनं मुखं समीक्ष्य वालिनं परिरभ्य छिन्नमहाद्रुममाश्रिता लतेव भूमिं जगाम ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०–ततस्त्विति । व्यसनार्णवे आप्लुता मग्नेति यावत् ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१] ति० टी०–अथ तारा मृतं दृष्ट्वा पुनः प्रलपति–तत इति । लोकश्रुता लोकप्रसिद्धा ॥ १ ॥

रा० टी०–तारायाः एव विलापान्तरमुपक्रमते–तत इति । ततः भर्तृपरिरम्भणकाले कपिराजस्य वालिनस्तन्मुखमुपजिघ्रन्ती लोकविश्रुता तारा मृतं पतिमब्रवीत् ॥ १ ॥

गो० टी०–अथ मरणानन्तरं ताराविलापस्त्रयोविंशे–ततः समुपजिघ्रन्तीत्यादि । लोकाच्युतम् अस्माल्लोकाच्युतं स्वर्गतमित्यर्थः ॥ १ ॥

२–३] ति० टी०–उपलैः पाषाणैरुपचिते व्याप्ते सुदुःखे सुतरां दुःखकरे ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–शेषे इति । उपलोपचिते पाषाणैर्व्याप्ते अत एव विषमे अत एव सुदुःखे वसुधातले मम वचनमकृत्वा दुःखं यथा भवति तथा शेषे ॥ २ ॥

रा० टी०–मत्त इति । मही मत्तस्तव प्रियतरा हि यतस्तां मही परिष्वज्य शेषे मां च न प्रतिभाषसे प्रतिवदसि ॥ ३ ॥

गो० टी०–शेष इति । दुःखमित्येतत् क्रियाविशेषणम् । सुदुःखे सुतरां दुःखकरे ॥ २ ॥ ३ ॥

४] ति० टी०–एष विधी रामरूपः सुग्रीवस्य वशं प्राप्तोऽधीनो भवति । अहो इत्याश्चर्ये । ननु त्वद्वशं प्राप्तो येनाद्यैव भार्यया योजितः स्यादिति भावः । अतः सुग्रीव एव विक्रान्तोऽत्रराज्ये भवितेति शेषः । साहसिकं साहसकर्म ॥ ४ ॥

रा० टी०–सुग्रीवस्येति । हे साहसिकप्रिय ! यः सुग्रीवः विक्रान्तस्त्वया बहुवारं पराभूतस्तस्य सुग्रीवस्य वशं त्वं प्राप्तः अतः एषः वशप्रापकरामरूपः विधिः अहो आश्चर्यं भवति ॥४॥

गो० टी०–सुग्रीवस्येति । त्वं सुग्रीवस्य तव बहुशः कान्दिशीकस्य वशं प्राप्तः । सुग्रीव एव विक्रान्त इत्येषः विधिः दैवव्यापारः अहो आश्चर्यकरो भवति ॥ ४ ॥

१ प्लवङ्गमा इति गो. पाठः । २ समीक्ष्य सेति गो. रा. पाठः । ३ लोकाच्युतमिति गो. पाठः ।

ऋक्षवानरमुख्यास्त्वां [1]बलिनं पर्युपासते । [2]तेषां विलपितं कृच्छ्रमङ्गदस्य च शोचतः ॥ ५ ॥
मम [3]चेमा गिरः श्रुत्वा किं त्वं न प्रतिबुध्यसे । इदं तद्वीरशयनं [4]तत्र शेषे हतो युधि ॥ ६ ॥
शायिता निहता यत्र त्वयैव रिपवः पुरा । विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय ॥ ७ ॥
मामनाथां विहायैकां गतस्त्वमसि मानद । शूराय न प्रदातव्या कन्या खलु विपश्चिता ॥ ८ ॥
शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम् । अवभग्नश्च मे मानो भग्ना मे शाश्वती गतिः ॥ ९ ॥
अगाधे च निमग्नाऽस्मि विपुले शोकसागरे । अश्मसारमयं नूनमिदं मे हृदयं दृढम् ॥ १० ॥
भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा [5]कृतम् । सुहृच्चैव [6]च भर्ता च प्रकृत्या च मम प्रियः ॥ ११ ॥
[7]प्रहारे च पराक्रान्तः शूरः पञ्चत्वमागतः । पतिहीना तु या नारी कामं भवतु पुत्रिणी ॥ १२ ॥
धनधान्यसमृद्धाऽपि विधवेत्युच्यते [8]बुधैः । स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले ॥ १३ ॥

५] ति० टी०–पर्युपासते पर्युपासन्त ॥ ५ ॥

रा० टी०–ऋक्षेति । ये ऋक्षवानरमुख्याः बलिनं त्वां पर्युपासते तेषां कृच्छ्रं विलपितं शोचतोऽङ्गदस्य मम च गिरः श्रुत्वा किं किमर्थं न प्रतिबुध्यसे जागर्षि । सार्धः श्लोक एकान्वयी ॥ ५ ॥

गो० टी०–ऋक्षवानरेति । कृच्छ्रं दुःखम् ॥ ५ ॥

६] ति० टी०–यत्र त्वया निहता रिपवः शायितास्तदिदं वीरशयनम् । तत्र त्वमपि शेषे ॥ ६ ॥

रा० टी०–इदमिति । यत्र युधि रिपवः शायितास्तत्र युधि इदं तद्वीरशयनं रिपुशयनकर्तृवीरसंबन्धिशय्या तत्र शेषे, त्वमिति शेषः । अर्धद्वयमेकान्वयि ॥ ६ ॥

गो० टी०–इदमिति । युधि हतो यत्र शेषे पुरा त्वया निहता रिपवो यत्र शायिताः तदिदं वीरशयनमित्यन्वयः । युद्धपरायणस्य तव युद्धेनैव मरणं प्राप्तं खल्विति भावः ॥ ६ ॥

७-८] ति० टी०–विशुद्धसत्त्वाभिजन विशुद्धसत्त्ववंशभव ! प्रिययुद्ध प्रिययुद्धत्वाद्युद्धेनैव मरणं जातमिति भावः ॥ ७ ॥८॥

रा० टी०–विशुद्धेति । विशुद्धानि कापट्यसंसर्गरहितानि बलानि येषां ते अभिजनाः पार्श्ववर्तिनो यस्य, किं च विशुद्धं सत्त्वं स्थितिर्यस्मिन् तस्मिन् कुले अभिजनः अभिजातः तत्संबोधनं, एकां साहाय्यरहिताम् अनाथाम् अन्यस्मात्स्वकल्याणमनिच्छन्तीं मां विहाय त्वं गतोऽसि ॥ ७ ॥

गो० टी०–विशुद्धसत्त्वाभिजनेति । कूटयुद्धाभावाद्विशुद्धबलसत्कुलप्रसूतत्वादभिजनशुद्धकुल ॥ ७ ॥

रा० टी०–शूरायेति । विपश्चिता जानता जनेन शूराय कन्या न प्रदातव्या । नन्वु किमर्थमिदमुच्यते इत्यत आह–शूरभार्यां मां विधवां कृतां वैधव्यं प्राप्तामत एव हतां पश्य ॥८॥

गो० टी०–शूरायेति । अप्रदातव्यत्वे हेतुमाह–शूरभार्यामिति ॥ ८ ॥

९-१०] ति० टी०–शूराय कन्याया अदाने हेतुः–शूरस्य तव भार्यां मां विधवां कृतां पश्य । मानो राजपत्नीत्वाभिमानः । शाश्वती स्थिरा गतिः सुखप्राप्तिः ॥ ९ ॥ १० ॥

रा० टी०–अवेति । मे मानः स्वपतिकर्तृकसत्कारः अवभग्नः अत एव शाश्वती सार्वकालिकी मे मम गतिः सुखप्राप्तिः भग्ना अत एव शोकसागरे निमग्नाऽस्मि ॥ ९ ॥

गो० टी०–अवभग्नश्चेति । गतिः पतिशुश्रूषेरर्थः, यद्वा गम्यत इति गतिः सुखमित्यर्थः ॥ ९ ॥

रा० टी०–अश्मेति । यन्मे हृदयं भर्तारं निहतं दृष्ट्वा शतधा कृतं छिन्नं तत् हृदयमश्मसारमयं दृढपाषाणविकारः अत एव दृढं नूनं निश्चितमेतत् ॥ १० ॥

गो० टी०–अश्मसारेति । अश्मसारमयत्वे हेतुर्दृढमिति ॥ १० ॥

११] ति० टी०–कृतम् शोकेनेति शेषः । प्रकृत्याऽनुपाधितः ॥ ११ ॥

रा० टी०–सुहृदिति । यो मम भर्ता प्रकृत्या स्वभावेनैव सुहृत् कापट्यरहितः प्रहारे पराक्रान्तः परः शत्रुः क्रान्तः पराभूतो येन स शूरः पञ्चत्वं मरणमागतः प्राप्तः ॥ ११ ॥

गो० टी०–हृदयभेदने हेतुमाह–सुहृदिति । पञ्चत्वं मरणम् ॥ ११ ॥ १२ ॥

१२-१३] ति० टी०–प्रहारे रणे पराक्रान्तः परेणाक्रान्तोऽभिभूतः पञ्चत्वमागतः । एतद्दृष्ट्वाऽपि यद्धृदयं न भिन्नमतो दृढमिति पूर्वेणान्वयः । नन्वु सपुत्रायाः कस्ते शोकः, अत आह–पतिहीनेत्यादि ॥ १२ ॥ १३ ॥

रा० टी०–नन्वु तव पुत्रस्य सत्त्वात् किमर्थं शोचसीत्यत आह–पतीति । कामं पुत्रिणी पुत्रसहिता धनधान्यसमृद्धापि या नारी भवेत् पतिहीना साऽपि बुधैर्विधवेत्युच्यते ॥ १२ ॥

रा० टी०–स्वगात्रेति । हे वीर ! कृमिरागपरिस्तोमे कृमिरागस्य लाक्षारसरक्तवस्त्रस्य स्तोमः आस्तरणं यस्मिन् तस्मिन् स्वकीये शयने इव स्वगात्रप्रभवे रुधिरमण्डले शेषे । किं

---

१ बलिन इति गो. पाठः । २ एषामिति गो. पाठः । ३ चेमां गिरमिति गो. पाठः । ४ यत्रेति गो. पाठः । ५ गतमिति गो. पाठः । ६ हीति गो. पाठः । ७ आहवे इति गो. पाठः । ८ धान्यैः सुपूर्णाऽपीति गो. पाठः । ९ जनैरिति गो. पाठः ।

कृमिरागपरिस्तोमे स्वकीये शयने यथा । रेणुशोणितसंवीतं गात्रं तव समन्ततः ॥ १४ ॥
परिरब्धुं न शक्नोमि भुजाभ्यां प्लवगर्षभ । कृतकृत्योऽद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे ॥ १५ ॥
यस्य रामविमुक्तेन हृतमेकेषुणा भयम् । शरेण हृदि लग्नेन गात्रसंस्पर्शने तव ॥ १६ ॥
वार्योमि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते । उद्ववर्ह शरं नीलस्तस्य गात्रगतं तदा ॥ १७ ॥
गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा । तस्य निष्कृष्यमाणस्य बाणस्यापि बभौ द्युतिः १८ ॥
अस्तमस्तकसंरुद्धरश्मेर्दिनकरादिव । पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य सर्वशः ॥ १९ ॥
ताम्रगैरिकसंपृक्ता धारा इव धराधरात् । अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना ॥ २० ॥
अस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम् । रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहितं पतिम् ॥ २१ ॥
उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना । अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम् २२ ॥

च कृमेः इन्द्रगोपस्य राग इव रागो यस्मिन् स परिस्तोमो यस्य तस्मिन्नित्यर्थः ॥ १३ ॥

गो० टी०–स्वगात्रेति । कृमेः इन्द्रगोपस्य राग इव रागो यस्मिन् स कृमिरागः । परिस्तोमः आस्तरणं यस्मिन् स तथा ॥ १३–१६ ॥

१४] ति० टी०–कृमेरिन्द्रगोपादे राग इव रागो यस्य तादृशः परिस्तोम आस्तरणं यस्मिन् । कृमिरागो लाक्षारागः 'कृमिरागं वदन्त्यार्या लाक्षिकं प्रियदर्शनम्' इत्युत्पलमालाकोशादित्यन्ये ॥ १४ ॥

रा० टी०–रेण्विति । समन्ततः रेणुशोणितसंवीतं रेणुशोणिताभ्यां व्याप्तं तव गात्रं परिरब्धुमालिङ्गितुं न शक्नोमि ॥१४॥

१५]ति० टी०–परिरब्धुमालिङ्गितुं न शक्नोमि । रेणुशोणितसंवीतत्वाच्छोकेन भुजयोर्बलाभावाच्च गात्रसंलग्नशरत्वाच्च । अस्मिन्वैरे वालिविषये वैरे कृतकृत्यः कृतात्युद्योद्यानः ॥१५॥

रा० टी०–कृतेति । रामविमुक्तेन एकेषुणा यस्य भयं हृतं स सुग्रीवः अस्मिन्नतिदारुणे वैरे कृतकृत्यः सिद्धकार्यः अस्तीति शेषः ॥ १५ ॥

१६] ति० टी०–शरेण तव गात्रसंस्पर्शने वार्योमि निवारिता भवामीत्यन्वयः ॥ १६ ॥

रा० टी०–शरेणेति । त्वयि पञ्चत्वमागते प्राप्ते सति तव हृदि लग्नेन शरेण तव गात्रसंस्पर्शने वियमाना त्वां निरीक्षन्ती अहं वार्योमि वार्ये ॥ १६ ॥

गो० टी०–शरेणेति । वार्योमि वारिताऽस्मीत्यर्थः ॥१६॥

१७–१८] ति० टी०–एवं तद्वचः श्रुत्वा नीलः शरमुद्ववर्होद्धृतवान् । अस्य बाणस्यातितेजस्विशत्रुवधेन तेजःक्षयान्न पुनस्तूणगमनमिति बोध्यम् ॥ १७ ॥ १८ ॥

रा० टी०–ताराविलापमुक्त्वा वृत्तान्तमाह–उद्वितिः। गिरिगह्वरसंलीनं दुर्गमगिरिसंसक्तम् आशीविषमिव तस्य वालिनो गात्रगतं शरं नील उद्ववर्ह बहिश्चकार ॥ १७ ॥

गो० टी०–उद्ववर्हेति । उद्धृतवान् । नीलः सुग्रीवसेनापतिः ॥ १७ ॥

गो० टी०–तस्येति । निष्कृष्यमाणस्य तस्य द्युतिः अस्तमस्तकसंरुद्धः अस्ताद्रिशिखरनिरुद्धः दिनकरादुच्छन् रश्मिरिव बभौ । पूर्वश्लोकोक्तसर्पसाम्यापेक्षया चशब्दः ॥१८॥

१९] ति० टी०–दिनकरादिति पञ्चमी षष्ठ्यर्थे । रुधिररक्तत्वादिति भावः । व्रणेभ्यः शरशिलापादपजनितेभ्यः॥१९॥

रा० टी०–अस्तेति । अस्तमस्तकसंरुद्धः अस्ताचलशिखरनिरुद्धो दिनकरादुच्छ्वसन् रश्मिभिः किरण इव निष्कृष्यमाणस्य तस्य वारणस्य द्युतिर्बभौ अधिकं शुशुभे ॥ १८ ॥

रा० टी०–पेतुरिति । धराधरात् पर्वतात् ताम्रगैरिकसंपृक्ताः अरुणगैरिकसंलग्ना धारा इव तस्य वालिनः सर्वशो व्रणेभ्यः क्षतजधाराः पेतुः ॥ १९ ॥

गो० टी०–पेतुरिति । व्रणेभ्यः इति बहुवचनं पाषाधिकरणन्यायेनावयवबहुत्वात् । यद्वा शिलापादपप्रहारकृतव्रणानि एतावत्पर्यन्तं शोणितनिर्गमशून्यतया स्थितानि इदानीं शरव्रणाच्छोणितनिर्गमकाले सर्वेभ्योऽपि शोणितानि स्रुस्रुवुरित्यर्थः । इदानीं रुधिरनिर्गमादेतावत्पर्यन्तं सर्वात्मना प्राणो न गत इति गम्यते ॥ १९–२१ ॥

२०–२१]ति० टी०–रणरेणुनाऽवकीर्णं व्याप्तम्॥२०॥२१॥

रा० टी०–अवकीर्णमिति । रणरेणुना अवकीर्णम् अस्त्रसमाहतमसृग्व्याप्तं शूरं भर्तारं विमार्जन्ती तारा अस्रैः अश्रुभिः सिषेच ॥ २० ॥

रा० टी०–रुधिरेति । रुधिरोक्षितसर्वाङ्गं क्षतजसिक्तशरीरं विनिहतं प्राणैर्वियुक्तं पतिं दृष्ट्वा अङ्गना वालिजा तारा पिङ्गाक्षमङ्गदं पुत्रमुवाच ॥ २१ ॥

२२] ति० टी०–पश्चिमावस्था मरणम् ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–अवस्थामिति । हे पुत्र ! पापकर्मणा पूर्वोपार्जितपापक्रियासंप्रसक्तस्य वैरस्य अन्तोऽवसानं गतः प्राप्तः। तत्र हेतुं वदन्नाह–पितुः सुदारुणाम् अतिभयावहां पश्चिमाम् अन्तावस्थां पश्य ॥ २२ ॥

१ स्वमात्मेति गो. पाठः । २ संरुद्धो रश्मिरिति गो. रा. पाठः । ३ आशैरिति गो. पाठः ।

संप्रसक्तस्य वैरस्य गतोऽन्तः पापकर्मणा । बालसूर्योज्ज्वलतनुं प्रयातं यमसादनम् ॥ २३ ॥
अभिवादय राजानं पितरं पुत्र मानदम् । एवमुक्तः समुत्थाय जग्राह चरणौ पितुः॥ २४ ॥
भुजाभ्यां पीनवृत्ताभ्यामङ्गदोऽहमिति ब्रुवन् । अभिवादयमानं त्वामङ्गदं त्वं यथा पुरा ॥ २५ ॥
दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे । अहं पुत्रसहाया त्वामुपासे गतचेतनम्
सिंहेन पातितं सद्यो गौः सवत्सेव गोवृषम् ॥ २६ ॥
इष्ट्वा सङ्ग्रामयज्ञेन रामप्रहरणाम्भसा । तस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना २७ ॥
या दत्ता देवराजेन तव तुष्टेन संयुगे । शातकौम्भीं प्रियां मालां तां ते पश्यामि नेह किम्२८
राज्यश्रीर्न जहाति त्वां गतासुमपि मानद । सूर्यस्यावर्तमानस्य शैलराजमिव प्रभा ॥ २९ ॥
न मे वचः पथ्यमिदं त्वया कृतं न चास्मि शक्ता हि निवारणे तव ।
हता सपुत्रास्मि हतेन संयुगे सह त्वया श्रीर्विजहाति मामपि ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाडे त्रयोविंशः सर्गः ॥ २३ ॥

गो० टी०–अवस्थामिति । पापकर्मणा पापरूपकर्मणा संप्रसक्तस्येति संबन्धः ॥ २२–२४ ॥

२३–२४] ति० टी०–पापकर्मणा प्राचीनपापवशात्संप्रसक्तस्य प्राप्तस्य वैरस्यान्तोऽवसानं गतः प्राप्तवान्॥२३॥२४॥

रा० टी०–बालेति । बालसूर्योज्वलतनुं बालसूर्यवत्स्वच्छशरीरं यमसादनं कालागम्यलोकमित्यर्थः, प्रयातं मानदं पितरमभिवादय ॥ २३ ॥

रा० टी०–एवमिति । एवमुक्तोऽङ्गदः पीनवृत्ताभ्यां भुजाभ्यां पितुश्चरणौ जग्राह ॥ २४ ॥

२५] ति० टी०–त्वामभिवादयमानम् । इदं तारावाक्यम् ॥ २५ ॥

रा० टी०–अभिवादयमानमङ्गदमवलोक्य पतिं प्रत्याह—अभीति । त्वामभिवादयमानमङ्गदं 'दीर्घायुर्भव पुत्र' इति यथा पुरा पूर्वमिव किमर्थं नाभिभाषसे ॥ २५ ॥

गो० टी०–अभिवादयमानमिति । त्वामभिवादयमानमित्यन्वयः ॥ २५ ॥ २६ ॥

२६] ति० टी०–उपासे समीपे तिष्ठामि ॥ २६ ॥

रा० टी०–अहमिति । सिंहेन सद्यः पातितं गाङ्गर्षं सवत्सा गौरिव पुत्रसहाया पुत्रसहिताऽहं त्वामुपासे ॥ २६ ॥

२७] ति० टी०–रामस्य प्रहरणं बाणस्तदूपेणाम्भसा मया विना कथमवभृथे स्नातः ॥ २७ ॥

रा० टी०–इष्ट्वेति । संग्रामयज्ञेन संग्रामरूपयागेन इष्ट्वा देवान् सत्कृत्य रामप्रहरणाम्भसा रामप्रहरणरूपजलेन तस्मिन् प्रसिद्धे अवभृथे संग्रामरूपयज्ञान्तस्नाने पत्न्या मया विना त्वं कथं स्नातः ॥ २७ ॥

गो० टी०–इष्ट्वेति । रामप्रहरणाम्भस्येवावभृथ इति व्यस्तरूपकम् ॥ २७ ॥ २८ ॥

२८] ति० टी०–मालामिह न पश्यामि । किं तु सुग्रीवाय मालादानस्यादर्शनं शोकवशादृष्टस्यापि विस्मरणं चेत्येवमुक्तिः ॥ २८ ॥

रा० टी०–येति । तव संयुगे संग्रामे संतुष्टेन देवराजेन इन्द्रेण या माला दत्ता तां शातकौम्भीं स्वर्णमयीं मालामिह अस्मिन् समये किं कथं न पश्यामि, सुग्रीवाय किमर्थं दत्तेत्यर्थः ॥ २८ ॥

२९] ति० टी०–आवर्तमानस्यास्तं गच्छतः । शैलराजं तमवास्ताचलम् ॥ २९ ॥

रा० टी०–राज्येति । आवर्तमानस्य परिभ्रमतः सूर्यस्य प्रभा शैलराजं सुमेरुमिव गतासुमपि त्वां राज्यश्रीर्न जहाति ॥ २९ ॥

गो० टी०–राजश्रीरिति । शैलराजं मेरुम् आवर्तमानस्य अस्तं गच्छत इत्यर्थः ॥ २९ ॥

३०] ति० टी०–पथ्यमिदं वच इति स्मृतिसंनिहितस्य प्रागुपदिष्टस्य परामर्शः ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०–नेति । पथ्यं हितम् इदं रामभिन्नीभूतसुग्रीवेण सह युद्धप्रवृत्तिनिवारणरूपं मे वचस्त्वया न कृतम् अत एव निवारणे अशक्ता अभवमिति शेषः, अत एव संयुगे हतेन त्वया सपुत्राऽहं हताऽस्मि अत एव श्रीः त्वया सह विद्यमानां मामपिना पुत्रं च जहाति त्यजति ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

१ उद्येति गो. पाठः । २ चेतसमिति गो. पाठः । ३ निहतमिति गो. पाठः । ४ ऽम्भसीति गो. पाठः । ५ अस्मिन्निति गो. पाठः । ६ कुम्भमयीमिति गो. पाठः । ७ राजेति गो. पाठः । ८ इहेति गो. पाठः ।

चतुर्विंशः सर्गः ।

ताराविलापश्रवणाद्द्रुतहृदयः सुग्रीवोऽङ्गदादिभिः सीतान्वेषणं संप्रार्थ्य स्वस्याग्निप्रवेशमर्थयते । तेन रामोऽपि दुर्मना बभूव । तारा रामान्तिकमेत्य भक्त्या तं प्रस्तौति । जीवितत्यागोन्मुखीं तारां रामोऽङ्गदाभ्युदयाद्युपपादनेन समाश्वासयति ।

तामाशु वेगेन दुरासदेन त्वभिप्लुतां शोकमहार्णवेन ।
पश्यंस्तदा वाल्यनुजस्तरस्वी भ्रातुर्वधेनाप्रतिमेन तेपे ॥ १ ॥
स बाष्पपूर्णेन मुखेन पश्यन्क्षणेन निर्विण्णमना मनस्वी ।
जगाम रामस्य शनैः समीपं भृत्यैर्वृतः संपरिदूयमानः ॥ २ ॥
स तं समासाद्य गृहीतचापमुदात्तमाशीविषतुल्यबाणम् ।
यशस्विनं लक्ष्मणलक्षिताङ्गमवस्थितं राघवमित्युवाच ॥ ३ ॥
यथा प्रतिज्ञातमिदं नरेन्द्र कृतं त्वया दृष्टफलं च कर्म ।
ममाद्य भोगेषु नरेन्द्रसूनो मनो निवृत्तं हतजीवितेन ॥ ४ ॥
अस्यां महिष्यां तु भृशं रुदत्यां पुरेऽतिविक्रोशति दुःखतप्ते ।
हते नृपे संशयितेऽङ्गदे च न राम राज्ये रमते मनो मे ॥ ५ ॥

गो० टी०–न म इति । पथ्यं हितं वचः न कृतं नानुष्ठितम् ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

१] ति० टी०–तां ताराम् । आशुवेगेन शोकमहार्णवेनाभिप्लुतां खिन्नाम् । अप्रतिमेनासदृशेन । आत्मन इति शेषः॥१॥

रा० टी०–सुग्रीवविलापं वर्णयितुमुपक्रमते–तामिति । अशुवेगेन अश्रूणां वेगो यस्मात् तेन अत एव दुरासदेन दुःसहेन शोकमहार्णवेन अभिप्लुतां निमग्नां तां तारां पश्यन् तरस्वी अतिवेगवान् वाल्यनुजः सुग्रीवः अप्रतिमेन असदृशेन भ्रातुर्वधेन तेपे ॥ १ ॥

गो० टी०–अथ ताराप्रलापश्रवणदुःखितसुग्रीवसमाश्वासनपूर्वकं तारायाः रामे प्रतिपत्तिं दर्शयति चतुर्विंशे–तामित्यादि । अशुवेगेन च दुरासदेन दुष्प्रापेण शोकमहार्णवेन च अभिप्लुतां व्याप्तां तां तारां पश्यन् तेन भ्रातुर्वधेन च तेपे दुःखितोऽभूत् ॥ १ ॥

२] ति० टी०–बाष्पपूर्णेन मुखेनोपलक्षितां तारां पश्यन्निर्विण्णमनाः खिन्नः संपरिदूयमानः सम्यगनुतप्यमानः ॥ २ ॥

रा० टी०–स इति । संपरिदूयमानः अतिपरितापविशिष्टः अत एव निर्विण्णमनाः उदासीनचित्तः मनस्वी बाष्पपूर्णेन मुखेन उपलक्षितः स सुग्रीवः क्षणेन पश्यन् विचारयन् सन् भृत्यैर्वृतश्च सन् शनैः रामस्य समीपं जगाम ॥ २ ॥

गो० टी०–स इति । मुखेन उपलक्षितः स वीक्ष्य तारामिति शेषः ॥ २ ॥

३] ति० टी०–उदात्तं धीरोदात्तस्वभावम् । लक्षणैः साधुद्विकशास्त्रोक्तराजलक्षणैर्लक्षितमङ्गं यस्य तम् ॥ ३ ॥

रा० टी०–स इति । गृहीतचापमाशीविषतुल्यबाणमाशीविषसदृशबाणविशिष्टमुदात्तं शीलधैर्यादिना अतिमहान्तं लक्ष्मणेन लक्षितमङ्गं यस्य तमवस्थितं राघवं समासाद्य प्राप्य इत्युवाच । ' लक्षणलक्षिताङ्गम् ' इत्यपि पाठः, तत्र लक्षणैः साधुद्विकोक्तमहाराजचिह्नैर्लक्षितमङ्गं यस्येत्यर्थो बोध्यः ॥ ३ ॥

गो० टी०–स तमिति । उदात्तं श्रेष्ठं लक्षणेन सुलक्षणेन लक्षिताङ्गम् ॥ ३ ॥

४] ति० टी०–दृष्टफलं राज्यभोगफलं कर्म वालिवधरूपम् । हतजीवितेन कुत्सितजीवितेन साध्येषु भोगेष्वित्यन्वयः ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–यथेति । दृष्टफलं प्रत्यक्षराज्यप्राप्तिफलकं कर्म वालिवधः यथाप्रतिज्ञातं प्रतिज्ञातमनतिक्रम्य कृतम् । नन्वेवं तर्हि राज्यं प्रामुहीत्यत आह–हे नरेन्द्रसूनो ! हतजीवितेन भ्रातृवधहेतुकनिहतप्रायजीवनेन हेतुना भोगेषु राज्यसुखात्मकेषु प्रसक्तं मनोऽभिलाषो निवृत्तम् ॥ ४ ॥

गो० टी०–यथेति । यथाप्रतिज्ञातं प्रतिज्ञातमनतिक्रम्य । दृष्टफलं दृष्टराज्यफलकं कर्म त्वया कृतं जीवितेन सह स्थितेषु भोगेषु जीविते भोगेषु च मनो निवृत्तमित्यर्थः ॥ ४ ॥

५] ति० टी०–अस्यां तारायाम् । पुरे तस्थे जनेऽतिविक्रोशत्यत्यन्तं रुदति । अङ्गदे संशयिते पितृवियोगात्संशयितजीविते ॥ ५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अस्यामिति । नृपे वा-

१ चाश्विति गो. अश्विति रा. पाठः । २ वीक्ष्येति गो. पाठः, । ३ लक्ष्मणेति रा. पाठः । ४ पुत्रेति गो. पाठः । ५ रुदन्त्यामिति गो. रा. पाठः । ६ पुरे चेति गो. पाठः । ७ ऽप्रजे इति गो. पाठः ।

क्रोधादमर्षादतिविप्रधर्षाद्भ्रातुर्वधो मेऽनुमतः पुरस्तात् ।
हते त्विदानीं हरियूथपेऽस्मिन्सुतीक्ष्णमिक्ष्वाकुवरं प्रतप्स्ये ॥ ६ ॥
श्रेयोऽद्य मन्ये मम शैलमुख्ये तस्मिन्हि वासाच्छिरमृष्यमूके ।
यथा तथा वर्तयतः स्ववृत्त्या नेमं निहत्य त्रिदिवस्य लाभः ॥ ७ ॥
न त्वा जिघांसामि चरेति यन्मामयं महात्मा मतिमानुवाच ।
तस्यैव तद्राम वचोऽनुरूपमिदं वचः कर्म च मेऽनुरूपम् ॥ ८ ॥
भ्राता कथं नाम मया गुणस्य भ्रातुर्वधं राम विरोचयेत ।
राज्यस्य दुःखस्य च वीर सारं विचिन्तयन्कामपुरस्कृतोऽपि ॥ ९ ॥
वधो हि मे मतो नासीत्स्वमाहात्म्यव्यतिक्रमात् । ममासीद्बुद्धिदौरात्म्यात्प्राणहारी व्यतिक्रमः ॥ १० ॥

लिनि हते सति अत एव महिष्यामस्यां तारायां भृशं रुदन्त्यां सत्याम् अत एव पुरं तन्निवासिजने अतिविक्रोशति रुदति सति अत एव दुःखतप्ते अङ्गदे संशयिते जीवनादिविषयकसंशयं प्राप्ते सति राज्ये मे मनो न रमते ॥ ६ ॥

गो० टी०–अस्यामिति । पुरे पुरस्थजने संशयिते पितृमरणदुःखेन जीवति वा न वेति संशयविषयीभूते सति राज्ये मनः न रमते रतिं न प्राप्नोति ॥ ६ ॥

६] ति० टी०–अतिविप्रधर्षाद्भ्रातृकृताधिकपराभवाद्धेतोर्ममोत्पन्नात्क्रोधादमर्षादसहिष्णुतया चू सुतीक्ष्णमतिशयेन प्रतप्स्ये तपामि ॥ ६ ॥

रा० टी०–क्रोधादिति । अमर्षात् दुःसहात् अतिविप्रधर्षात् भ्रातृकर्तृकातिपराभवात् जातात् क्रोधात् पुरस्तात् पूर्वं भ्रातुर्वधः मे अनुमतः संमतः इदानीं तु हरियूथपे हते सति सुतीक्ष्णमत्यन्तं प्रतप्स्ये प्रतपामि ॥ ६ ॥

गो० टी०–क्रोधादिति । क्रोधान्निर्निमित्तनिर्वासनकृतात् अमर्षात्परुषभाषणाक्षमया अतिविप्रधर्षात् अत्यन्तमाक्रमणाच्च ॥ ६ ॥

७] ति० टी०–यथातथा येनकेनापि प्रकारेण । स्ववृत्त्या स्वजात्युचितवृत्त्या वर्तयतो जीवत ऋष्यमूकवास एव श्रेयो मन्ये, न तु त्रिदिवस्य लाभ इत्यन्वयः ॥ ७ ॥

रा० टी०–श्रेय इति । शैलमुख्ये ऋष्यमूके यथा तथा येन कथञ्चिदाप्युपायेन स्ववृत्त्या फलादिभक्षणेन वर्तयतो मम चिरं वास एव श्रेयो मन्ये इमं वालिनं निहत्य तु त्रिदिवस्य यो लाभस्तमपि श्रेयो न मन्ये पूर्वत्र वाक्यार्थस्य कर्मतयाऽन्वयान्न द्वितीया ॥ ७ ॥

गो० टी०–श्रेय इति । यथा तथा कथंचित् स्ववृत्त्या वानरजात्युचितवृत्त्या तस्मिन् शैलमुख्ये ऋश्यमूके निवासः श्रेयस्करः, इमं वालिनं निहत्य त्रिदिवस्य स्वर्गस्य लाभोऽपि न श्रेय इत्यर्थः ॥ ७ ॥

८] ति० टी०–तद्वचस्तस्यैवानुरूपम् । ईषत्करघातेऽपि मयि तदकृत्वान्तरभ्रातस्नेहबद्धतया त्वां न जिघांसामि । कदापि चर गच्छेति यत्तद्वच इत्यर्थः । इदं कर्म भ्रातृवधरूपं वचस्तदर्थमाकारणरूपम् ॥ ८ ॥

रा० टी०–नेति । मतिमान् प्रशस्तमतिविशिष्टः महात्मा अयं वाली त्वामहं न जिघांसामि हन्तुमिच्छामि अतः चर इतोऽपसर इति मां यदुवाच तद्वचस्तस्य वालिन एवानुरूपं योग्यमिदं बन्धुप्राणवियोगजनकप्रार्थनारूपं वचः कर्म युद्धाद्याचरणं च मे एवानुरूपम् । एव उभयान्वयि । एतेन स्वस्यातितुच्छत्वं ध्वनितम् ॥ ८ ॥

गो० टी०–न त्वामिति । महात्मा महास्वभावः मतिमान् कर्तव्याकर्तव्यविवेकशीलः अयं वाली त्वां न जिघांसामि न मारयितुमिच्छामि, चर यथेष्टं गच्छेति मामुवाचेति यत् तद्वचः तस्यैव अनुरूपं सदृशम् तद्बुद्धिशीलतुल्यम् । इदं भ्रातृवधरूपं कर्म तु मे दुरात्मनो दुर्मतेरनुरूपम् ॥ ८ ॥

९] ति० टी०–कामः पुरस्कृतो येन तादृशोऽपि भ्राता राज्यस्य तत्सुखस्य दुःखस्य भ्रातृवधे भाविदुःखस्य सारं तारतम्यं विचिन्तयन्विचारयन्कथं भ्रातुर्वधं रोचयेत । एवं चाहं तत्तारतम्यानभिज्ञ इति भावः ॥ ९ ॥

रा० टी०–भ्रातेति । कामपुरस्कृतः उत्कटेच्छावानपि भ्राता राज्यस्य भ्रातृवधजानितराज्यसुखस्य दुःखस्य भ्रातृवधानन्तरजायमानक्लेशस्य च सारं प्राबल्यं विचिन्तयन्सन् महागुणस्य भ्रातुर्वधं कथं विरोचयेत । एतेनैवं लब्धराज्यस्य दुःखप्रदत्वं ध्वनितम् ॥ ९ ॥

गो० टी०–भ्रातेति । राज्यस्य भ्रातृवधसाध्यस्य दुःखस्य वधानन्तरभाविदुःखस्य च सारम् उत्कर्षम् न चिन्तयन् उभयोस्तारतम्यमचिन्तयन्नित्यर्थः ॥ ९ ॥

१०] ति० टी०–उक्तमेव विवृणोति—वधो हीति । मां हन्तुं तस्य मतिर्नासीदित्यर्थः । तत्र हेतुः—स्वमाहात्म्यव्यतिक्रमादनुचितकर्मकारी वालीत्ययशःप्रसङ्गभयात् । प्राणहारी भ्रातुरिति शेषः । व्यतिक्रमोऽन्यायः ॥ १० ॥

१ तीव्रमिति गो. पाठः । २ कुमार तप्स्ये इति गो. पाठः । ३ ऋश्येति गो. पाठः । ४ त्वामिति गो. रा. पाठः । ५ महेति गो. रा. पाठः । ६ राघवेति गो. पाठः । ७ कृतः सन्निति गो. पाठः ।

द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिष्टनन् । सान्त्वयित्वा त्वनेनोक्तो न पुनः कर्तुमर्हसि ॥ ११ ॥
भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षितः । मया क्रोधश्च कामश्च कपित्वं च प्रदर्शितम् ॥ १२ ॥
अचिन्तनीयं परिवर्जनीयमनीप्सनीयं स्वनवेक्षणीयम् ।
प्राप्तोऽस्मि पाप्मानमिदं वयस्य भ्रातुर्वधात्त्वाष्ट्रवधादिवेन्द्रः ॥ १३ ॥
पाप्मानमिन्द्रस्य मही जलं च वृक्षाश्च कामं जगृहुः स्त्रियश्च ।
को नाम पाप्मानमिमं सहेत शाखामृगस्य प्रतिपत्तुमिच्छेत् ॥ १४ ॥
नार्हामि संमानमिमं प्रजानां न यौवराज्यं कुत एव राज्यम् ।
अधर्मयुक्तं कुलनाशयुक्तमेवंविधं राघव कर्म कृत्वा ॥ १५ ॥

रा० टी०–भ्रातुर्महत्त्वं प्रकटयन्नाह–वध इति । स्वमाहात्म्यव्यतिक्रमात् आत्ममहत्त्वविपरीत्यभयात् मे वधः मन्निष्ठप्राणवियोगः मतः वालिसंमतिविषयीभूतो नासीत् । मम बुद्धिदौरात्म्यात् बुद्धेर्दुष्टत्वात् प्राणहारी बन्धुप्राणविघातकः मम व्यतिक्रमः मत्कर्तृकमर्यादातिक्रमणमासीत् ॥ १० ॥

गो० टी०–महात्मेत्युक्तं विशदयति–वध इति । अस्य वालिनः स्वमाहात्म्यस्य स्वमहत्त्वस्य अव्यतिक्रमात् अनतिक्रमात् मे वधः मन्निधनं मतो नासीत् । मम तु बुद्धिदौरात्म्यात् बुद्धेर्दुःस्वभावात् प्राणहारी भ्रातृवधकारी व्यतिक्रमः अमर्यादा आसीत् ॥ १० ॥

११] ति० टी०–द्रुमशाखयाऽवभग्नः पलायितः, अत एव मुहूर्तं परिनिष्टनंस्त्वामाक्रोशन्यदाऽभवं तदा तेन भ्रात्रा सान्त्वयित्वा पुनरेवं दुश्चेष्टां कर्तुं नार्हसीत्युक्तः, न पुनर्मां हतवानित्यर्थः ॥ ११ ॥

रा० टी०–द्रुमेति । द्रुमशाखावभग्नः वालिना द्रुमशाखया निहतः अत एव मुहूर्तं परिनिष्टनन् त्वदाह्वानार्थं दीनशब्दं कुर्वन्नहम् अनेन वालिना सान्त्वयित्वा त्वां न हनिष्यामीत्युक्त्वा पुनः कर्तुं मया सह युद्धमिति शेषः, त्वं नार्हसीत्युक्तः । तुशब्द इत्यर्थे ॥ ११ ॥

गो० टी०–मतो नासीदित्युक्तं विशदयति–द्रुमेति । परिनिष्टनन् आर्तरवं कुर्वन् न पुनः कर्तुमर्हसि युद्धमिति शेषः अत्रेतिकरणं द्रष्टव्यम् ॥ ११ ॥ १२ ॥

१२] ति० टी०–अत एव–भ्रातृत्वमित्यादि ॥ १२ ॥

रा० टी०–भ्रातृत्वमिति । अनेन वालिना भ्रातृत्वादिः रक्षितः मया तु क्रोधादि प्रदर्शितं रक्षितम् । तत्र कपित्वं चाञ्चल्यम् ॥ १२ ॥

१३] ति० टी०–अचिन्तनीयं चिन्तयितुमप्ययोग्यम् अत एवार्यैर्नित्यं परिहरणीयं यत्किंचिदुपाधिनाप्यनीप्सनीयम् आत्मकर्तृकमपि सर्वथाऽनवेक्षणीयं दर्शनानर्हमिदं प्राप्तोऽस्मि । इदंपदार्थमाह—पाप्मानमिति । हे वयस्य ! भ्रातुर्ज्येष्ठस्य भ्रातुर्वधात्पाप्मानं तद्रूपं वास्त्वित्यर्थः । त्वाष्ट्रो विश्वरूपः ॥१३॥

रा० टी०–अचिन्तनीयमिति । वयस्य हे सखे ! त्वाष्ट्रवधात् त्वाष्ट्रहननात् इन्द्र इव भ्रातुर्वधात् अचिन्तनीयं चिन्तयितुमप्ययोग्यमत एव परिवर्जनीयं निवर्तयितव्यम् अत एव अनीप्सनीयम् अवाञ्छितव्यम् अत एव स्वनवेक्षणीयं विचारायोग्यमिमं पाप्मानं पापं प्राप्तोऽस्मि ॥ १३ ॥

गो० टी०–अचिन्तनीयमिति । अचिन्तनीयम् अपरिच्छेद्यमित्यर्थः । परिवर्जनीयं साधुभिस्त्यक्तव्यम् । अनीप्सनीयम् अनभिलषणीयं कदाचिदपि इच्छाया अयोग्यमित्यर्थः । स्वनवेक्षणीयं सुतरामदर्शनीयं जुगुप्सितमित्यर्थः । त्वष्टुः पुत्रः त्वाष्ट्रः विश्वरूपः तं हत्वा इन्द्रो महान्तं पाप्मानमगमदिति कथा ॥ १३ ॥

१४] ति० टी०–प्रतिपत्तुं प्राप्तुं क इच्छेत्को वा सहेत ग्रहीतुं शक्नुयादित्यर्थः ॥ १४ ॥

रा० टी०–नन्वेवं कृतपापोऽपीन्द्रः शुद्ध एवेत्यत आह–पाप्मानमिति । इन्द्रस्य पाप्मानं पापं मह्यादयः जगृहुः शाखामृगस्य मम तु इमं भ्रातृवधजनितं पाप्मानं पापं प्रतिपत्तुं प्राप्तुं क इच्छेत्, न कोऽपीत्यर्थः ॥ १४ ॥

गो० टी०–पाप्मानमिति । इन्द्रस्य परमैश्वर्यसंपन्नस्य पाप्मानं मह्यादयः ऊषरकेनेर्यासक्रतुरूपेण जगृहुः खातपूरणादिवरप्रदत्त्वात् । मम तु शाखामृगस्य कस्याप्यनुपकारकस्य पाप्मानं प्रतिपत्तुं किंचिद्वरं प्राप्तुमिच्छन् को नाम क्षमेत, ग्रहीतुमिति शेषः । यद्यपि विश्वरूपाख्यायिकायाम् त्वाष्ट्रशिरश्छेदकृतब्रह्महत्यात्रितयं पृथिवीवनस्पतिस्त्रिय एव जगृहुरित्युक्तं तथापि शाखान्तराद्वरोधेन जलेनापि कश्चिदंशो गृहीत इत्यवगन्तव्यम् ॥ १४ ॥

१५] ति० टी०–प्रजानां संमानं ताभिः क्रियमाणं स्वसंमाननमपि नार्हामि पापग्रस्तत्वात् । न यौवराज्यं ज्येष्ठस्य पुत्रमङ्कृत्वा राज्ये कृत्वा यथाप्राप्तं यौवराज्यमित्यर्थः । एवंविधं कर्म कृत्वा राज्यं सर्वथा नाहोमीत्यन्वयः ॥ १५ ॥

रा० टी०–नन्वेवं राज्यप्राप्त्यनन्तरं यागादिना शुद्धिर्भविष्यतीत्यत आह–नेति । हे राघव ! अधर्मयुक्तम् अत एव कुलना-

१ इमं नरेन्द्रेति गो. रा. पाठः । २ क्षमेतेति गो. पाठः । ३ इच्छन्निति गो. पाठः ।

पापस्य कर्ताऽस्मि विगर्हितस्य क्षुद्रस्य लोकापकृतस्य लोके ।
शोको महान्मामभिवर्ततेऽयं वृष्टेर्यथा निम्नमिवाम्बुवेगः ॥ १६ ॥
सोदर्यघातापरगात्रवालः संतापहस्ताक्षिशिरोविषाणः ।
एनोमयो मामभिहन्ति हस्ती दृप्तो नदीकूलमिव प्रवृद्धः ॥ १७ ॥
अंहो बतेदं नृवराविषह्यं निवर्तते मे हृदि साधुवृत्तम् ।
अग्नौ विवर्णं परितप्यमानं किट्टं यथा राघव जातरूपम् ॥ १८ ॥
महाबलानां हरियूथपानामिदं कुलं राघव मन्निमित्तम् ।
अस्याङ्गदस्यापि च शोकतापादर्धस्थितप्राणमितीव मन्ये ॥ १९ ॥

शपुक्तं कुलविध्वंसकारकम् एवंविधं भ्रातृविनाशनं कर्म कृत्वा प्रजानां संमानं प्रजाकर्तृकसत्कारं नार्हामि अत एव यौवराज्यं नार्हामि राज्यं कुतः, राज्यप्राप्तेर्न संभावनेत्यर्थः ॥ १५ ॥

गो० टी०—नार्हामीति । कुलनाशयुक्तं कुलनाशफलकं वालिविनाशेनाङ्गदादेरजीवनादिति भावः । एवंविधं भ्रातृवधरूपं कर्म कृत्वा प्रजानां संमानं प्रजाकर्तृकं राजसंमानं नार्हामि । अत एव यौवराज्यमेव नार्हामि कुतो महाराज्यमिति भावः ॥ १५ ॥

१६] ति० टी०—क्षुद्रस्य क्षुद्रयोग्यस्य लोके इहलोके विगर्हितस्य निन्दितस्य लोकापकृतस्य परलोकेऽपरमार्थसाधनस्य पापस्य कर्ताऽस्मि । अतो महाञ्शोको मामिव तथा भिवर्तते यथा वृष्टेरम्बुवेगो निम्नम् । इवशब्दस्तथाशब्दार्थे ॥ १६ ॥

रा० टी०—पापस्येति । लोके सर्वभुवने गर्हितस्य निन्दितस्य अत एव क्षुद्रस्य नीचजनयोग्यस्य लोकापकृतस्य राजापकृनिद्वारा सर्वजनापकारस्य कर्ताऽस्मि अत एव वृष्टेरम्बुवेगः निम्नमधोदेशमिव अयं महान् शोकः मामभिवर्तते मयि तिष्ठति ॥ १६ ॥

गो० टी०—पापस्येति । क्षुद्रस्य दुष्टस्य विगर्हितस्य विशेषेण शिष्टैर्निन्दितस्य लोकापकृतस्य सर्वलोकैस्त्यक्तस्य पापस्य कर्ताऽस्मि । एतादृशपापस्योत्तरपापहेतुत्वज्ञापनाय तृच्प्रत्ययः । वृष्टेरुत्पन्नोम्बुवेगो यथा तादृशशोको मां निम्नमिवाभिवर्तते । उभयत्राप्युपमावाचकप्रयोगो महाकविनिबन्धनेष्वस्त्येव ॥१६॥

१७] ति० टी०—सोदर्यघात एवापरगात्रभागो वालश्च यस्य तज्जसंताप एव हस्ताक्षिशिरोविषाणं यस्य सः दृप्तो मत्तः प्रवृद्धो महान् ॥ १७ ॥

रा० टी०—सोदर्येति । सोदर्यघातः समानोदर्यविध्वंसः स एव अपरगात्रवालः पुच्छकेशः यस्य सः, संतापाः अनेकविधखेदाः हस्ताक्षिशिरोविषाणानि यस्य सः, एनोमयः पापरूपः प्रवृद्धो दृप्तो हस्ती नदीकूलमिव मामभिहन्ति ॥ १७ ॥

गो० टी०—सोदर्येति । सोदर्यस्य भ्रातुः घात एवापरगात्रवालौ अपरकायपुच्छौ यस्य स तथा, संताप एव हस्तादीनि यस्य स तथा । वधादपि संतापस्य प्रधान्यादूर्ध्वकायत्वरूपणं, वधप्रकारवैविध्यात्संतापवैविध्याच्च नानावयवत्वेन रूपणम् । "एनोमय" इति स्वार्थे मयट् । पापमेव हस्ती । एनसो दृप्तत्वप्रयुक्तटत्वं तस्य प्रवृद्धत्वं महत्त्वं गजस्योन्नतत्वम् ॥ १७ ॥

१८] ति० टी०—हे नृवर ! इदमंहः पापम् । बत खेदे । अविषह्यं सोढुमशक्यं प्राप्य मे हृदि स्थितं साधु वृत्तं जन्मान्तरार्जितपुण्यं निवर्तते । विवर्णम् अत एवाग्नौ परितप्यमानं जातरूपमविषह्यमशक्यसहावस्थानं प्राप्य किट्टं मलं यथा निवर्तते तथेत्यर्थः । यथा बलवतोत्तमेनाधमः स्थातुं न शक्नोति, तथा बलवताऽधमेन सहोत्तमोऽपीत्याशयः । एवं चानेन पापेन सर्वपुण्यक्षयो जात इति तात्पर्यम् । केचित्तु—अग्नौ परितप्यमानं जातरूपं स्वर्णं यथा विवर्णं विवर्णताकारकं किट्टं दाहकक्षारद्रव्यं प्राप्य निवर्तते भस्म भवति तथेत्यर्थ इत्याहुः ॥ १८ ॥

रा० टी०—अंह इति । हे नृवर ! अविषह्यं दुःसहम् इदं भ्रातृवधजनितमंहः पापं मे हृदि विद्यमानं साधुवृत्तं साध्वाचरणं निवर्तते निवर्तयति । तत्र दृष्टान्तः—अग्नौ परितप्यमानं विवर्णं मलिनं जातरूपं सुवर्णं किट्टं स्वमलं यथा ॥ १८ ॥

गो० टी०—हे नृवर राघव ! मे हृदि इदं साधु वृत्तम् अंहः स्वेन सह वर्तमानं पापम् अविषह्य असोढ्वा निवर्तते निर्गच्छति । कथमिव विवर्णं जातरूपम् अग्नौ परितप्यमानं सत् किट्टं यथा ऋजीषांशमविषह्य निवर्तते किट्टाद्विपुज्यत इत्यर्थः । बतेति विषादे ॥ १८ ॥

१९] ति० टी०—मन्निमित्तम् मयैतत्स्वामिवधादिति भावः । अपि चास्याङ्गदस्य शोकतापाच्च । इतीव मन्य इत्युत्प्रेक्षाबोधकम् ॥ १९ ॥

रा० टी०—महाबलानामिति । महाबलानामतिबलवतां हरियूथपानां वानराधिपानामिदं कुलं मन्निमित्तं मदभिन्ननिमि-

१ चैवेति गो. पाठः । २ऽविषह्येति गो. पाठः । ३ विवर्णमम्नाविति गो.पाठः ।

सुतः सुलभ्यः सुजनः सुवश्यः कुतस्तु पुत्रः सदृशोऽङ्गदेन ॥
न चापि विद्येत स वीर देशो यस्मिन्भवेत्सोदरसंनिकर्षः ॥ २० ॥
अद्याङ्गदो वीरवरो न जीवेज्जीवेत माता परिपालनार्थम् ।
विना तु पुत्रं परितापदीना सा नैव जीवेदिति निश्चितं मे ॥ २१ ॥
सोऽहं प्रवेक्ष्याम्यतिदीप्तमग्निं भ्रात्रा च पुत्रेण च सख्यमिच्छन् ।
इमे विचेष्यन्ति हरिप्रवीराः सीतां निदेशे परिवर्तमानाः ॥ २२ ॥
कृत्स्नं तु ते सेत्स्यति कार्यमेतन्मय्यप्यतीते मनुजेन्द्रपुत्र ।
कुलस्य हन्तारमजीवनार्हं रामानुजानीहि कृतागसं माम् ॥ २३ ॥
इत्येवमार्तस्य रघुप्रवीरः श्रुत्वा वचो वालिजघन्यजस्य ।
संजातबाष्पः परवीरहन्ता रामो मुहूर्तं विमना बभूव ॥ २४ ॥

तात् अङ्गदस्यातीवशोकसंतापात् हेतोः अर्धस्थितप्राणं मन्ये । यद्वा मन्निमित्तमहं निमित्तं यस्मिन् वालिवधजानितदुःखे तत् प्राप्य अतीव अत्यन्तम् अङ्गदस्य शोकतापात् शोकतापं विज्ञाय वियमानमिदं कुलम् अर्धस्थिताः प्राणा यस्मिन् तत् अहं मन्ये ॥ १९ ॥

गो० टी०—महाबलानामिति । अपि चेति समुच्चयः पूर्वश्लोकोक्तदोषापेक्षया मन्निमित्तं मत्तो निमित्तात् अस्याङ्गदस्य शोकतापात् महाबलानां हरियूथपानाम् इदं परिदृश्यमानं कुलं यूथम् अर्धस्थितप्राणमिव भवतीति मन्ये । 'सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकम्' इत्यमरः ॥ १९ ॥

२०] ति० टी०—सुलभ्यः सुलभ इत्यर्थः ॥ २० ॥

रा० टी०—नन्वङ्गदादेरतिशोकवत्त्वे सुतान्तराण्युत्पाय सुजनान्वशीकृत्य भोगान् भुङ्क्ष्वेत्यत आह—सुत इति । सुतः पुत्रान्तरः सुलभ्यः सुजनः सुवश्यः एतत् त्रयं न दुर्लभमित्यर्थः, अङ्गदेन सदृशः पुत्रस्तु कुतो लभ्यः न लभ्य इत्यर्थः, सोदरसंनिकर्षः वालिसामीप्यं यस्मिन्देशे भवेत् स देशोऽपि न विद्येत । एतेन भ्रात्राद्यभावत्वे राज्यभोगादि दुःखभोग एवेति सूचितम् ॥ २० ॥

गो० टी०—सुत इति । सुजनः सौजन्यवान् सुवश्यः सुतरां वश्यः स्वाधीनः सुतः सुलभ्यः लोके सुखेन लब्धुं योग्यः अङ्गदेन तुल्यः पुत्रस्तु कुतो हेतोः सुलभ्यः दुर्लभ इत्यर्थः । सोदरसन्निकर्षोऽपि दुर्लभ इत्याह—न चापीति । सन्निकर्षः सन्निधानम् ॥ २० ॥

२१] ति० टी०—अङ्गदो न जीवेत् । यदि जीवेत्तदा माता तारा पुत्रपालनाय जीवेत् । तदभावे तु सा सर्वथा न जीवेदित्यर्थः ॥ २१ ॥

रा० टी०—अद्येति । अथ एतादृशपितृवियोगसमये वीरवरोऽङ्गदो न जीवेत् यदि जीवेत् तदा माता तारा परिपालनार्थं स्वसुतरक्षार्थं जीवेत् । पुत्रं विना तु परितापदीना अतिखेदेन क्षीणा सा तारा नैव जीवेदिति मे निश्चितम् । जीवेदित्युभयान्वयि यदीत्यध्याहृतम् ॥ २१ ॥

गो० टी०—अङ्गदो यदि जीवेत्तदा ताराऽपि जीवेत् अन्यथा नेत्याह—यदीति ॥ २१ ॥

२२] ति० टी०—सख्यं समानत्वम् । निदेशे त्वदाज्ञायाम् ॥ २२ ॥

रा० टी०—स इति । सः भ्रात्रादिवियुक्तोऽहं भ्रात्रादिना सख्यमिच्छन् सन् अतिदीप्तमग्निं प्रवेक्ष्यामि । ननु मत्कार्यसिद्धिः कथं भवितेत्यत आह—निदेशे मदाज्ञायां परिवर्तमाना इमे हनुमत्प्रभृतयो हरिप्रवीराः सीतां विचेष्यन्ति मार्गयिष्यन्ति ॥ २२ ॥

गो० टी०—अङ्गदमरणं निश्चित्याह—सोऽहमिति । पुत्रेण अङ्गदेन 'भ्रातृणामेकजातानां यथैकः पुत्रवान् भवेत् । तेन पुत्रेण ते सर्वे पुत्रिणो मनुरब्रवीत् ॥' इति स्मृतिः । सख्यमिति तन्मरणे मरणं हि स्नेहस्य पराकाष्ठा । निदेशे त्वदाज्ञायाम् ॥ २२ ॥

२३] ति० टी०—अनुजानीहि अग्निप्रवेशायेति शेषः ॥ २३ ॥

रा० टी०—कृत्स्नमिति । तु यतो मयि अतीते मृतेऽपि ते कृत्स्नं कार्यं सेत्स्यति अतः कुलस्य हन्तारम् अत एव कृतागसम् अत एव अजीवनार्हं मामनुजानीहि अग्निं प्रवेष्टुमाज्ञापय ॥ २३ ॥

गो० टी०—कृत्स्नमिति । अप्रतीते अप्रकाशे मृत इति यावत्, मां विनाऽपि त्वं सर्वं कार्यं कर्तुं क्षम इत्यर्थः ॥ २३ ॥

२४] ति० टी०—संजातबाष्पो दुःखिप्राणिदर्शनेन । महतामयं स्वभावः ॥ २४ ॥

रा० टी०—इत्येवमिति । एवमार्तस्य दुःखितस्य वालि-

१ स्यति गो. पाठः । २ यदीति गो. पाठः । ३ वराहेति गो. पाठः । ४ जीवेच्चेति गो. पाठः । ५ तारा नेति गो. पाठः । ६ तवेति गो. पाठः ।

तस्मिन्क्षणेऽभीक्ष्णमवेक्षमाणः क्षितिक्षमावान्भुवनस्य गोप्ता ।
रामो रुदन्तीं व्यसने निमग्नां समुत्सुकः सोऽथ ददर्श ताराम् ॥ २५ ॥
तां चारुनेत्रां कपिसिंहनाथां पतिं समाश्लिष्य तदा शयानाम् ।
उत्थापयामासुरदीनसत्त्वां मन्त्रिप्रधानाः कपिराजपत्नीम् ॥ २६ ॥
सा विस्फुरन्ती परिरभ्यमाणा भर्तुः समीपादपनीयमाना ।
ददर्श रामं शरचापपाणिं स्वतेजसा सूर्यमिव ज्वलन्तम् ॥ २७ ॥
सुसंवृतं पार्थिवलक्षणैश्च तं चारुनेत्रं मृगशावनेत्रा ।
अदृष्टपूर्वं पुरुषप्रधानमयं स काकुत्स्थ इति प्रजज्ञे ॥ २८ ॥
तस्येन्द्रकल्पस्य दुरासदस्य महानुभावस्य समीपमार्या ।
आर्ताऽतित्वरं व्यसनं प्रपन्ना जगाम तारा परिविह्वलन्ती ॥ २९ ॥

जघन्यजस्य वाल्यनुजस्य इति वचः श्रुत्वा संजातबाष्पो रामो मुहूर्तं विमना बभूव ॥ २४ ॥

गो० टी०–अथ रामस्याश्रितकार्यमेव स्वकार्यं नतु स्वतः किंचिदस्ति । अत एव मम शत्रुर्वालीति सुग्रीवेणोक्ते तं निहत्य तास्मिन्नश्रूणि मुक्त्वा शोचति सति स्वयमपि तथा शोचति स्मेत्याह–इत्येवमिति । यद्वा सर्वेश्वरस्य कुत्रचिद्विषयीकारस्तत्संतानपर्यन्तः घण्टाकर्णमालाकारादिष्वित्येवेत्याह–इत्येवमिति । रघुप्रवीर इत्यनेन स्वस्य वानरेण संबन्धान्तरप्रसक्तिर्नास्तीत्युच्यते । वाल्यनुजस्य आर्तस्य वाल्यनुजे आर्ते सतीत्यर्थः, वचः श्रुत्वा तद्वचनं च श्रुत्वा सञ्जातबाष्पः तदार्तिनिमित्तकार्तिक इत्यर्थः । परवीरहन्ता आश्रितविरोधिनिरसनशीलः ताच्छील्ये तृच् । सुग्रीववचनात् कृतवालिवधत्वेन तच्छोचनादशोचदित्यर्थः । अनेन रामस्य क्रोधशोकावाश्रितक्रोधशोकायत्तावित्ययमर्थः सूचितः ॥ २४ ॥

२५] ति० टी०–तस्मिन्क्षणे तस्मिन्नवसरे तारां रुदन्तीमभीक्ष्णं वारंवारमवेक्षमाणो जीवन्तीमिच्छन्क्षितिरिव क्षमावान्सञ्जातशोकः शोकापनयनायेति शेषः ॥ २५ ॥

रा० टी०–तस्मिन्निति । क्षितिक्षमावान् पृथ्वीक्षमासदृक्षक्षमाविशिष्टः समुत्सुकस्तारावलोकनेच्छुः रामः अभीक्ष्णमवेक्षमाणः सन् व्यसने दुःखसागरे निमग्नां तारां ददर्श ॥२५॥

गो० टी०–तस्मिन्निति । तस्मिन्क्षणे तस्मिन्नवसरे अभीक्ष्णं पुनः पुनः अवेक्ष्यमाणः[1] तारयेति शेषः, अनेन तारायाः रामाविषयमानुकूल्यमुक्तम् । क्षितिक्षमावान् क्षितेर्यादृशी क्षमा तादृशक्षमावान् । क्षमावत्त्वभुवनगोप्तृत्वगुणौ तारया चिन्तितौ कविनोक्तौ । रुदन्तीमित्यादिना तारायां दयनीयतोक्ता । समुत्सुकः शोकापनयने कृतादरः ॥ २५ ॥

२६–२७] ति० टी०–कपिसिंहनाथां कपिसिंहानां स्वामिनीम् ॥ २६ ॥ २७ ॥

रा० टी०–तामिति । कपिसिंहो वाली नाथो यस्यास्ताम् अदीनसत्त्वां न दीनाः सत्त्वाः सत्तावन्तो यस्यास्तामतिदीनामित्यर्थः, कपिराजपत्नीं तां तारां मन्त्रिप्रधानाः उत्थापयामासुः ॥ २६ ॥

रा० टी०–सेति । परिरभ्यमाणा परिरभमाणा भर्तारमालिङ्गयन्ती अत एव विस्फुरन्ती भर्तुः समीपादपनीयमाना सा तारा शरचापपाणिं रामं ददर्श । अविस्फुरन्तीति छेदो वा ॥ २७ ॥

गो० टी०–रामागमनमालोक्य मन्त्रिणस्तामुत्थापयामासुरित्याह–तामिति ॥ २६ ॥ २७ ॥

२८] ति० टी०–पुरुषप्रधानं पुरुषश्रेष्ठम् । सोऽङ्गदोक्तः काकुत्स्थोऽयमिति प्रजज्ञे इति संबन्धः ॥ २८ ॥

रा० टी०–सुसंवृतमिति । पार्थिवलक्षणैः राजोचितचिह्नैः सुसंवृतं संयुक्तमत एव चारुनेत्रमदृष्टपूर्वं पूर्वं न दृष्टः इत्यदृष्टपूर्वः " सह सुपा " इति समासः । किंच न दृष्टं दर्शनं पूर्वं यस्य तं, किंच न दृष्टः पौर्वकालिकदर्शनकर्मीभूतभिन्नः स एव पूर्वः सर्वेषामादिस्तं पुरुषप्रधानं तं रामं मृगशावस्य मृगबालस्य नेत्रे इव नेत्रे यस्याः सा तारा अयं सः सुग्रीवमित्रीभूतः काकुत्स्थः ककुत्स्थवंशोद्भवः इति प्रजज्ञे बुबुधे ॥ २८ ॥

गो० टी०–सुसंवृतमिति । पार्थिवलक्षणैः राजलक्षणैः सुसंवृतम् अन्यूनतया युक्तमित्यर्थः, चारुनेत्रम् पुण्डरीकाक्षं मृगशावनेत्रा 'विद्वानेव विजानाति विद्वज्जनपरिश्रमम्' इति न्यायेन स्वयं चारुनेत्रतया तत्रैव प्रथमं दृष्टिं न्यधादिति भावः । अदृष्टपूर्वम् इतः पूर्वं कुत्राप्यदृष्टचरं योगं विना अदृष्टमित्यर्थः । पुरुषप्रधानं पुरुषोत्तमम् अयं स इति विजज्ञे । यः पूर्वं भर्तारं हतवान् सोऽयमिति ज्ञातवती । यद्वा यः पूर्वमकस्माच्छ्रुतः यद्वा यः पूर्वं पुण्डरीकाक्षत्वादिगुणविशिष्टतया महाजनेभ्यः श्रुतः स एवायमित्यर्थः । अत एव वक्ष्यति–त्वमप्रमेयश्चेति ॥ २८ ॥

२९] ति० टी०–परिविह्वलन्ती कष्टेन स्खलनपूर्वं गच्छन्ती ॥ २९ ॥

रा० टी०–तस्येति । इन्द्रकल्पस्य इन्द्रादिनिर्माणे सम-

१ अवेक्ष्यमाण इति गो. पाठः । २ नाथमिति गो. पाठः । ३ वीरेति गो. पाठः । ४ सकाशादिति गो. पाठः । ५ व्यसनाभिपन्नेति गो. पाठः ।

[1]तं सा समासाद्य विशुद्धसत्त्वं शोकेन संभ्रान्तशरीरभावा ।
मनस्विनी वाक्यमुवाच तारा रामं रणोत्कर्षणलब्धलक्ष्यम् ॥ ३० ॥
त्वमप्रमेयश्च दुरासदश्च जितेन्द्रियश्चोत्तमधर्मिकश्च ।
अक्षीणकीर्तिश्च विचक्षणश्च क्षितिक्षमावान्क्षतजोपमाक्षः ॥ ३१ ॥

र्थस्य अत एव दुरासदस्य पराभावयितुमशक्यस्य तस्य रामस्य समीपमार्ता अति दुःखिता अत एव व्यसनम् उरआद्यङ्गताडनाय हस्तादिप्रक्षेपं प्रपन्ना प्राप्ता अत एव परिविह्वलन्ती क्वचित् क्वचित् स्खलन्ती तारा अतित्वरं जगाम ॥ २९ ॥

गो० टी०–तस्येति । व्यसननिवर्तनक्षमा गुणा उच्यन्ते । परिविह्वलन्ती मूर्छन्तीत्यर्थः ॥ २९ ॥

३०] ति० टी०–संभ्रान्तो विस्मृतः शरीरभावो राजस्त्रीत्वादिर्यया सा । रणेषु युद्धेषूत्कर्षणेन सर्वाधिकोत्कर्षेण लक्ष्यं येन । सर्वतोऽधिकवेध्यवेधक इत्यर्थः ॥ ३० ॥

रा० टी०–तमिति । विशुद्धसत्त्वं प्राकृतविलक्षणसत्त्वविशिष्टं रणोत्कर्षणलब्धलक्ष्यं रणे यदुत्कर्षणमाश्रयोत्कर्षस्तेन लब्धं लक्ष्यं देवादिकर्तृकदर्शनकर्मता येन तं रामं शोकेन संभ्रान्तः वैपरीत्यं प्राप्तः शरीरभावः देहधर्मो यस्याः सा मनस्विनी सा प्रसिद्धा तारा उवाच ॥ ३० ॥

गो० टी०–सेति । रणे उत्कर्षणेन उत्कर्षेण लब्धः लक्षः शरव्यं यस्य तथा एकेन शरेण स्वभर्तृहन्तारमित्यर्थः । तं रामं शोकेन संभ्रान्तः अयथाभूतः शरीरभावः शरीरकृतभावः यस्याः सा कुपितेत्यर्थः, मनस्विनी मत्प्रियहन्तारं यावच्छक्ति परुषाणि वदेयमिति कृताध्यवसाया समासाद्य विशुद्धसत्त्वा रामसंनिधिमाहात्म्येन निवृत्तकालुष्यतया समुन्मिषितशुद्धसत्त्वा तारा वाक्यमुवाच परुषभाषणोद्युक्तयैव वाचा अस्तौषीदित्यर्थः ॥ ३० ॥

३१] ति० टी०–अप्रमेयो देशतः कालतश्चापरिच्छेद्यो गुणैयत्तया दुर्ज्ञेयश्च । दुरासदो योगिभिरपि प्राप्तुमशक्यः । उत्तमधर्मकः पुरुषोत्तमधर्मा । अक्षीणकीर्तिः पापवदाभासमानेनापि कर्मणेति शेषः । अत एव पुरुषोत्तमधर्मा क्षतजोपमाक्षो रक्ताक्षः ॥ ३१ ॥

रा० टी०–तद्वचनाकारमाह–त्वमिति । अप्रमेयः अनियतप्रभावः अत एव दुरासदः पराभावयितुमशक्यः अत एव जितेन्द्रियः नित्यं वशीकृतसकलकरणः अत एव उत्तमधर्मकः उत्तमः सर्वकालमधर्मसंसर्गशून्यत्वेन अतिश्रेष्ठः धर्मो यस्मिन् सः अत एव क्षितिक्षमावान् अत एव न क्षीणा कस्मिंश्चित्समये निवृत्ता कीर्तिर्यस्य सः अत एव विचक्षणः सर्वविलक्षणः क्षतजोपमाक्षः अरुणनयनस्त्वमसीति शेषः ॥ ३१ ॥

गो० टी०–एवं पुरुषोत्तमत्वपुण्डरीकाक्षत्वादिभिरद्भुतसंहितं परत्वं तारानुसंधत्ते—त्वमप्रमेयश्चेति । त्वं वक्ष्यमाणकल्याणगुणानुगुणधर्मिवैलक्षण्ययुक्तः अप्रमेयः " वेदाहं–" इत्युपक्रम्य " महान्तं क इत्था वेद " इति देवैरप्यपरिच्छेद्यः, अप्रमेयः " सो अङ्ग वेद यदि वा न वेद " इति स्वेनापि परिच्छिद्य ज्ञातुमशक्यः, त्वमप्रमेयः प्रत्यक्षगम्योऽपि मनसा दुर्विभाव्यस्वभावः, । त्वमप्रमेयः शरचापधरोऽपि त्वं शङ्खचक्रधरोऽसि, त्वमप्रमेयः सौलभ्यदशैव ? न परिच्छेत्तुं शक्यते, त्वमप्रमेयः परिकररहितोऽपि प्रतापातिशयेन निरवधिकपरिकरपरिगत इव दुरवगाहोऽसीत्येकवचनस्य भावः । एवमन्तःकरणेन दुष्प्रापोऽपि किं बाह्यकरणैः सुप्रापः नेत्याह–दुरासदश्च । मनसाऽपि दुरासदः कथं प्रकारान्तरेण स्वासद इति भावः । दुरासदश्च ' महाजनो येन गतः स पन्थाः ' इत्युक्तं सन्मार्गं विना पथस्खलितेन दुष्प्राप इत्यर्थः । दुरासदश्च " षद्लृ–विशरणगत्यवसादनेषु " इति धातुपाठोक्तार्थत्रयमपि तन्त्रेणोच्यते । नित्यत्वान्न विशरणार्हः, विभुत्वान्न विचालनार्हः, नित्यानन्दत्वान्नावसादमापादयितुं शक्य इत्यर्थः । दुरासदश्च बालिवधकुपितानां प्रतिकाराय संनिधानमपि गन्तुमशक्य इत्यर्थः । दुरासदश्च बाह्यकुदृष्टिभिरुत्कट्याभासैरप्रकम्प्यवैभव इत्यर्थः । एवमप्रमेयत्वदुर्धर्षत्वाभ्यां सुहृन्नोऽपि न परदारराज्यपरिग्रहलुब्ध इत्याह–जितेन्द्रियश्च । निःस्पृहतया सुग्रीवाय दत्तराज्य इत्यर्थः । जितेन्द्रियश्च यः कोऽपि पुरुषः कांचियोषितमालक्ष्य निर्वर्णयति त्वं तु न तथा 'न रामः परदारान् वै चक्षुर्भ्यामपि पश्यति' इत्युक्तेः जितेन्द्रियश्च । "पश्यत्यचक्षुः स शृणोत्यकर्णः । अपाणिपादो जवनो ग्रहीता" इत्याद्युक्तरीत्या सर्वेन्द्रियैर्विनापि सर्वं सर्वत्र सर्वदा जानन्नित्यर्थः । जितेन्द्रियः ' दुर्ग्रहं मनसाप्यन्यैरिन्द्रियैरपि दुर्जयैः ' इत्युक्तरीत्या वाङ्मनसागोचरः । त्वं जितेन्द्रियः त्वमेव जितेन्द्रियः सर्वं वाक्यं सावधारणम् अब्भक्षो वायुभक्ष इतिवत् ' अहल्यायै जारः सुरपतिरभूदात्मतनयां प्रजानाथोऽयासीदभजत गुरोरिन्दुरबलाम् ' इत्युक्तरीत्या स्वव्यतिरिक्ताः सर्वेऽपि विषयचपलाः । त्वमेको जितेन्द्रियः इत्यर्थः । एवं विरक्तोऽप्ययमस्मद्धितया अधार्मिक इति मया स्थितं न तथेत्याह–उत्तमधार्मिकश्च स्वाश्रितसंरक्षणार्थमेवंविधव्यापारकारितया परमधार्मिकः, स्वार्थकर्मकारी अधमधार्मिकः, स्वपरसाधारणकर्मकारी मध्यमधार्मिकः, परार्थमेव प्रवर्तमान उत्तमधार्मिकः । यद्वा वर्णाश्रमाचारसमाराध्यो धार्मिकः, उत्तमधार्मिको भक्तिमार्गभजनीयः । यद्वा उत्तमधार्मिकः शरणागतसंरक्षकः । यद्वा उपायो गुरुरेव स्यात्तेनानुगृहीतो ब्रह्मलोकं गच्छतीत्युक्तधर्मवानुत्तमधार्मिकः । यद्वा आनृशंस्यं परो धर्म इत्युक्तधर्म-

१ सा तामिति गो. पाठः । २ सत्त्वेति गो. पाठः । ३ लक्ष्मिति गो. पाठः । ४ धार्मिक इति गो. पाठः । ५ अक्षय्येति गो. पाठः ।

त्वमात्तबाणासनबाणपाणिर्महाबलः संहननोपपन्नः ।
मनुष्यदेहाभ्युदयं विहाय दिव्येन देहाभ्युदयेन युक्तः ॥ ३२ ॥
येनैव[1] बाणेन हतः प्रियो मे तेनैव[2] बाणेन हि मां जहीहि ।
हता गमिष्यामि समीपमस्य न मां[3] विना वीर रमेत वाली ॥ ३३ ॥
स्वर्गेऽपि पद्मामलपत्रनेत्रै[4] समेत्य संप्रेक्ष्य च मामपश्यन् ।
नह्येष उच्चावचताम्रचूडा विचित्रवेषाप्सरसोऽभजिष्यत्[5] ॥ ३४ ॥

वान् धार्मिकः, स्वाश्रितानामापत्सु स्ववक्षोलक्षीकुर्वन्नुत्तमधार्मिकः । यद्वा आर्तसुग्रीवरक्षणाद्धार्मिकः, अकृत्यकरणेन नारकिणं वालिनं निहत्य तस्य पूतत्वकरणादुत्तमधार्मिकः । प्रच्छन्नवेधितया निरपराधवधेन च कथमस्य धार्मिकत्वमित्याशङ्क्याह—अक्षय्यकीर्तिश्च आश्रितापराधितया तिर्यक्षु मृगयान्यायेन पराङ्मुखवधस्यादोषत्वात्तिर्यग्भिराभिमुख्येन युद्धकरणस्य सार्वभौमस्यावध्यावहत्वाच्च तव कीर्तिर्न दूषयितुं शक्येत्यर्थः । अक्षय्यकीर्तिश्च 'तस्य नाम महद्यशः' इत्युक्तरीत्या परत्वप्रथायुक्तः । विचक्षणश्च दूरदृष्टितया युक्तायुक्तविचारपूर्वकं सर्वकार्यकृत् अत एव हि निरपराधवधो मा भूदिति कदाचिद्वालितः पराभवं प्रापितवान् । लक्ष्यवैपरीत्यपरिहाराय गजपुष्पीं धारितवान् । एवं शत्रुसंहर्तोऽपि 'सपुत्रपौत्रं सामात्यं समन्त्रिज्ञातिबान्धवम् । हत्वा' इत्युक्तरीत्या अकृदादिष्वकिंचित्करतया प्रशस्तक्षमावानसीत्याह—क्षितिक्षमावान् स्वाश्रितापराधकारिविषये तव सान्वयविनाशकरणे प्राप्तेऽपि तत्क्षमणं तवातिश्लाघ्यमित्यर्थः। क्षितिक्षमावान् 'क्षमया पृथिवीसमः' इत्युक्तरीत्या पञ्चाशत्कोटिविस्तीर्णायाः पृथिव्या यावती क्षमा तावती तवैकस्यास्तीति भावः। नित्ययोगे मतुप्, ते न कदाचिदप्यस्याक्षमाप्रसङ्गोऽपि नास्तीति द्योत्यते । क्षतजोपमाक्षः वालिविषये कोपातिशयेनाप्यापि शोणीकृतनयनोऽपि तदीयेषु क्षमावान् । यद्वा 'रक्तास्यनेत्रपाणिः त्रिताम्रः' इत्यादिसाम्बद्विकोक्तरीत्या रक्तान्तनेत्रः 'रामो रक्तान्तलोचनः' इति श्रुतिः । अत्र प्रतिपदं चकारप्रयोगः एकैक एव गुणः परत्वे पर्याप्तं लिङ्गमिति द्योतयितुम् । क्षमावानित्यत्र चकाराप्रयोगस्तु रामेण क्षान्ते सर्वैरपि क्षान्तमेव अतोऽन्यत्रापि संभवेन निरपेक्षत्वाभावाच्चकाराप्रयोगः । क्षतजोपमाक्ष इत्यत्र तु विग्रहगुणत्वेन भिन्नाधिकरणत्वात् समुच्चयाभावः, क्षतजोपमाक्षेति संबुद्ध्यन्तं वा । यद्वा अप्रमेयः अनाश्रितानां दुर्ज्ञेयः, चकारादाश्रितानां सुप्रमेयः । "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति श्रुतेः 'नमो नमो वाङ्मानसातिभूमये नमो नमो वाङ्मानसकैभूमये' इत्युक्तेश्च । एवमनाश्रितानां दुरासदो दुष्प्रापः, चकारादाश्रितानां सुलभः । जितेन्द्रियः चकारादाश्रितविषये चपलः । उत्तमधार्मिकः चकारादूरीकृताधर्मः । अक्षय्यकीर्तिः तदनुरूपकृत्यश्चशब्दार्थः । विचक्षणः चकारादाश्रितविषयत्यागाशक्तश्च 'मित्रभावेन संप्राप्तं न त्यजेयम्' इत्यशक्तिर्ध्वन्यते । अत्रत्यचकारः देहलीदीपन्यायेनोभयत्रान्वेति तेन दयादिकं सङ्गच्छीयते ॥ ३१ ॥

३२] ति० टी०—आत्तबाणासनश्चासौ बाणपाणिश्चेति कर्मधारयः । संहननं दृढगात्रता, तादृशेन त्वया हतो वाली मनुष्यदेहाभ्युदयं मनुष्यलोकवर्तिदेहप्राप्यमभ्युदयसुखं विहाय दिव्यदेहेन प्राप्यो योऽभ्युदयस्तेन युक्तः । समास आर्षः॥३२॥

रा० टी०—त्वमिति । आत्तं गृहीतं बाणासनं धनुर्येन बाणः पाणौ यस्य स एव स इति कर्मधारयः । संहननोपपन्नः संहननेन दृढगात्रत्वेन उपपन्नः युक्तः मनुष्यदेहानाम् अभ्युदयोऽतिमङ्गलं यस्मात् तत्स्वराज्यं विहाय दिव्येन प्राकृतविलक्षणेन देहाभ्युदयेन स्वशरीरजनितमङ्गलकर्मणा युक्तो महाबलस्त्वं येन बाणेन इ अन्यविस्मयेन मे प्रियस्त्वया हतस्तेनैव बाणेन मां हि निश्चयेन जहि । ननु तेनैव बाणेन हननं किमर्थं प्रार्थयसे इत्यत आह—हता तेनैव बाणेन हिंसिता अहम् अस्य वालिनः समीपं गमिष्यामि । तत्प्रयोजनमाह—हे वीर ! मां विना वाली न रमेत । मनुष्यदेहाभ्युदयं मनुष्यदेहोचितसुखं विहाय दिव्येन देहाभ्युदयेन देहसुखेन युक्त इति वालिविशेषणमिति भट्टाः ॥ ३२ ॥ ३३ ॥

गो० टी०—त्वमिति । अनेनाप्राकृतवियहत्वमुच्यते । संहननेन समीचीनावयवसंस्थानेन उपपन्नः युक्तः मनुष्यदेहाभ्युदयं मानुषशरीरपरिग्रहं विहाय दिव्येन देहाभ्युदयेन देहसौभाग्येन युक्तः॥ ३२ ॥

३३] ति० टी०—अतः—येनैवेति । रमेत रंस्यते॥३३॥

गो० टी०—एवं रामस्य दिव्यतेजोविशेषदर्शनेन विस्मिता क्षणं विस्मृतशोका तद्वैभवं वर्णयित्वा स्वप्रकृत्यनुसारेण प्रलपति—येनेत्यादिना ॥ ३३ ॥

३४] ति० टी०—पद्मस्यामलं यत्पत्रं तद्वन्नेत्रं ! समेत्याप्सरोभिस्ताः संप्रेक्ष्य च मामपश्यन्न रमेतेत्यन्वयः । उच्चावचैर्नानाप्रकारैस्ताम्रै रक्तपुष्पैः कृतः शेखरो याभिस्ता अप्सरसो नाभजिष्यन्न भेजिष्यति । रक्तपुष्पधारणं नालिवशीकरणाय ॥ ३४ ॥

रा० टी०—ननु दिव्यलोके अनेकविधवरस्त्रीणां विद्यमान-

---

१ ऐकति गो.पाठः । २ मा त्वं जहि सायकेनेति गो.पाठः । ३ ऋते रामेति गो.पाठः । ४ नेत्रः इति गो.पाठः । ५ भजिष्यतीतिरूप चिन्त्यमिति भाति।

स्वर्गेऽपि शोकं च विवर्णतां च मया विना प्राप्स्यति वीर वाली ।
रम्ये नगेन्द्रस्य तटावकाशे विदेहकन्यारहितो यथा त्वम् ॥ ३५ ॥
त्वं वेत्थ तावद्वनिताविहीनः प्राप्नोति दुःखं पुरुषः कुमारः ।
तत्त्वं प्रजानञ्जहि मां न वाली दुःखं ममादर्शनजं भजेत ॥ ३६ ॥
यद्यापि मन्येत भवान्महात्मा स्त्रीघातदोषस्तु भवेन्न मह्यम् ।
आत्मेयमस्येति हि मां जहि त्वं न स्त्रीवधः स्यान्मनुजेन्द्रपुत्र ॥ ३७ ॥
शास्त्रप्रयोगाद्विविधाच्च वेदादन्यरूपाः पुरुषस्य दाराः ।
दारप्रदानाद्धि न दानमन्यत्प्रदृश्यते ज्ञानवतां हि लोके ॥ ३८ ॥
त्वं चापि मां तस्य मम प्रियस्य प्रदास्यसे धर्ममवेक्ष्य वीर ।
अनेन दानेन न लप्स्यसे त्वमधर्मयोगं मम वीर घातात् ॥ ३९ ॥

त्वात् तत्र तव काऽपेक्षेत्यत आह–स्वर्गे इति । हे पद्मालपत्रनेत्र ! एष वाली स्वर्गेऽपि समेत्य संप्राप्य संप्रेक्ष्य मदुरेशेन चतुर्दिक्ष्ववलोक्य च मामपश्यन् सन् उद्यावचाभिस्ताम्रचूडाभिः अरुणपुष्पादिकृतारुणकेशवेशैः विचित्राणि वेषाः यासां ता एवं अप्सरसः न अभजिष्यत् अभक्ष्यत् सेविष्यते॥३४॥

गो० टी०–स्वर्गेऽपीति । पद्मालपत्रनेत्रो वाली स्वर्गेऽपि अप्सरोभिः समेत्य ताः संप्रेक्ष्य च मामपश्यन् उद्यावचताम्रचूडाः विविधताम्रकुक्कुटैः कृतशेखराः विचित्रवेषाप्सरसः नाभजिष्यत् न भजिष्यति, लृदर्थे लृङ् ॥ ३४ ॥

३५] ति० टी०–तटावकाशे तटदेशे ॥ ३५ ॥

रा० टी०–स्वर्गे इति । हे वीर ! रम्ये मनोरमे नगेन्द्रस्य उत्तमपर्वतस्य तटावकाशे विस्तीर्णतटे विदेहकन्यारहितस्त्वं यथा शोकं विवर्णतां च प्राप्नोषि तथा स्वर्गेऽपि मया विना वाली शोकादि प्राप्स्यति ॥ ३५ ॥

गो० टी०–स्वर्गेऽपीति । नगेन्द्रस्य ऋश्यमूकस्य ॥३५॥

३६] ति० टी०–यद्वनिताहीनो दुःखं प्राप्नोति तत्त्वं वेत्थ, अतस्तज्जानंस्त्वं मां जहि । कुमारः क्षुद्रः पुरुषः । यद्वा दुःखहेतुमाह–कुमार इति कुत्सितो मारो यस्य मारकत्वेन मदनस्य प्रसिद्धेः, अथवा कुत्सितो मारो मरणं यस्य मरणादपि दुःखजनकत्वादेवमुक्तिः । भावे घञ् ॥ ३६ ॥

रा० टी०–त्वमिति । वनितावियोगेन पुरुषः यावत् यत्परिमितं दुःखं प्राप्नोति तावत् दुःखं कुमारः नित्यं कुमारस्त्वेन प्रतीयमानस्त्वं वेत्थ अतः तत्त्वं याथार्थ्यं जानन् त्वं मां जहि । तत्र हेतुः–वाली ममादर्शनजं दुःखं न भजेत प्राप्नुयात् ॥ ३६ ॥

गो०टी०–त्वं वेत्थेति । कुमारः युवा तत् वनिताविग्रहदुःखं प्रजानन् त्वं मां जहि वाली ममादर्शनजं दुःखं न भजेत ॥३६॥

३७] ति० टी०–मह्यं स्त्रीघातदोषो भवेदिति भवान्महात्मा मन्येत तदपि न । इयं ताराऽस्य वालिन आत्मेति ज्ञात्वा जहि । एवं च तदभिन्नत्वान्मम न ते स्त्रीवधदोष इति भावः । महात्मेत्यनेन ताटकावधादिकृतवतः स्त्रीवधोऽकिंचित्कर इत्यपि सूचितम् ॥ ३७ ॥

रा० टी०–यद्यिति । महात्मा भवान् स्त्रीघातदोषो मह्यं भवेत् तव वधे इति शेषः, यत् यदि मन्येत तदा इयमस्य वालिनः आत्मा इति बुद्ध्या मां जहि अतः स्त्रीवधो न स्यात् तेन तद्दोषस्याशङ्का न कर्तव्येति सूचितम् ॥ ३७ ॥

गो० टी०–यद्यापीत्यादिसार्धश्लोकः । मह्यं स्त्रीघातदोषो न भवेदिति भवान् यन्मन्यते तन्न युक्तम् । इयं तारा अस्य वालिनः आत्मा इति मत्वा मां जहि तेन ते स्त्रीवधः स्त्रीवधदोषो न स्यात् । आत्मेयेतदुपपादयति–शास्त्रेति । " अर्धो वा एष आत्मनो यत्पत्नी आत्मा हि दाराः " इत्यादिरूपात् विविधात् वेदाद्वेदरूपात् शास्त्रप्रयोगादित्यन्वयः । यद्वा वेदात् शास्त्रप्रयोगात् धर्मशास्त्रप्रयोगाच्चेति वार्थः ॥ ३७ ॥

३८] ति० टी०–स्त्रीणां पुरुषात्मत्वमेव साधयति–शास्त्रेति । शास्त्रे शास्त्रीययागाद्यनुष्ठाने प्रकर्षेण सहैव योगादधिकारात् । विविधाच्च वेदात् । "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः । अनन्यरूपा अभिन्नरूपाः । न केवलं दोषाभावमात्रम्, अपि तु स्त्रीदानफलमपीत्याह–दारेति । अन्यदधिकं दानं नेति भावः ॥ ३८ ॥

रा० टी०–नन्वं कथं त्वं तस्यात्मेत्यत आह–शास्त्रेति । विविधात् अनेकानुपूर्वीविशिष्टात् वेदात् " अर्धो वा एष आत्मनो यत् पत्नी " इत्यादिरूपात् हेतोर्दाराः पुरुषस्य अनन्यरूपाः अभिन्नस्वरूपाः अतः ज्ञानवतां लोके विचारे दारप्रदानात् अन्यत् श्रेष्ठं दानं न दृश्यते दारप्रदानमेव वरं दानमित्यर्थः । एतेन रामबाणेन वधे पतिलोकमहं प्राप्स्यामीति तस्या निश्चयो ध्वनितः ॥ ३८ ॥

गो० टी०–सुकृतमप्यस्तीत्याह–दारेति ॥ ३८ ॥

३९] ति० टी०–त्वं चापीति । एवं च 'धर्मेण पापमप-

१ यावदिति गो. पाठः । २ दोषो न भवेत्तु गो. दोषस्तु भवेत्तु रा. पाठः । ३ आत्मा ह्यनन्य इति गो. पाठः ।

आर्तामनाथामपनीयमानामेवंगतां नार्हसि मामहन्तुम् ।
अहं हि मातङ्गविलासगामिना प्लवङ्गमानामृषभेण धीमता ॥ ४० ॥
विना वरार्होत्तमहेममालिना चिरं न शक्ष्यामि नरेन्द्र जीवितुम् ।
इत्येवमुक्तस्तु विभुर्महात्मा तारां समाश्वास्य हितं बभाषे ॥ ४१ ॥
मा वीरभार्ये विमतिं कुरुष्व लोको हि सर्वो विहितो विधात्रा ।
तं चैव सर्वं सुखदुःखयोगं लोकोऽब्रवीत्तेन कृतं विधात्रा ॥ ४२ ॥
त्रयोऽपि[2] लोका विहितं विधानं नातिक्रमन्ते वशगा हि तस्य ।
प्रीतिं परां प्राप्स्यसि तां तथैव पुत्रश्च[3] ते प्राप्स्यति यौवराज्यम् ॥ ४३ ॥

द्रुदति' इति न्यायेनापि हे वीर ! ते न मद्वधादोष इति भावः । यद्वा मम वीरस्य पत्युश्छलेन घातात्प्राप्तमधर्मसंबन्धं न लप्स्यसे । किं च–तत एव मच्छापतः प्राप्तमधर्मयोगमधर्मफलयोगं जीवियोगरूपं न लप्स्यसे ममावधे तु लप्स्यस एव । अत एव क्वचित्पठ्यते 'अचिरेणैव कालेन त्वया वीर्यबलाहृता । सा सीता मम शापेन न चिरात्त्वयि वत्स्यति ॥' इति ॥ ३९ ॥

रा० टी०–नन्वेवं पुण्यसत्त्वेऽपि अवध्यवधदोषस्तु दुरुद्धर एवेत्यत आह–त्वमिति । हे वीर ! मम प्रियस्य तस्य वालिनो यदि धर्ममवेक्ष्य मां प्रदास्यसे तर्हि अनेन दानेन मम घातात् जनितमधर्मयोगं त्वं न लप्स्यसे ॥ ३९ ॥

गो० टी०–न केवलं पापनिवृत्तिस्तुकृते प्रायश्चित्तं चेदमित्याह–त्वं चापीति । वीर ! घातादित्येतत्सुग्रीवदुःखदुःखितरामहृदयानुसारेणोक्तं त्वमुत्तमधार्मिकश्रेति पूर्वमुक्तत्वात्॥३९॥

४०] ति० टी०–अपनीयमानाम् प्रियसकाशादन्यत इति शेषः । अहन्तुं नार्हसि अपि तु हन्तुमेवेत्यर्थः । तत्र हेतुः–अहं हीति ॥ ४० ॥

४१] ति० टी०–वरार्होत्तमहेममालिना श्रेष्ठयोग्योत्तमस्वर्णमालावता ॥ ४१ ॥

रा० टी०–आर्तामिति । अनाथां पतिरहितामत एव अपनीयमानां पत्याश्लिङ्गनात् बहिष्कृतामत एव आर्तामतिदुःखिताम् अत एव एवंप्रकारेण गतां स्ववधाय त्वां प्राप्तां माम् अहन्तुं नार्हसि । अर्थं पृथक् । नन्वेवं पुत्रलालनादिसुखं संत्यज्य स्वविघातं कथं प्रार्थयसीत्यत आह–अहमिति । वरार्हे ! हे सकलश्रेष्ठपूज्ये ! मातङ्गविलासगामिना मत्तगजगमनसदृशगमनशालिन प्लवङ्गमानां वानराणामृषभेण स्वामिना उत्तमहेममालिना इन्द्रदत्तत्वेनोत्तमा या हेममाला तद्युक्तेन वालिना विना चिरं जीवितुमहं न शक्ष्यामि । विभुः स्वप्रकाशज्ञानद्वारा सर्वत्र पूर्णः महात्मा रामस्तारां समाश्वास्य हितं बभाषे । सार्धश्लोक एकान्वयी ॥ ४०॥४१॥

गो० टी०–आर्तामिति । अपनीयमानां वालिना वञ्चिताम् ॥ ४० ॥ ४१ ॥

४२] ति० टी०–विमतिं मरणविषयां विरुद्धमतिम् । सर्वो लोको विधात्रा विहितोऽहरादौ सृष्टस्तं लोकं सुखदुःखाभ्यामवर्जनीयाभ्यां योगोऽस्य तं तेनैव विधात्रा कृतम् । लोक्यतेऽनेनेति लोको वेदोऽब्रवीत् । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति श्रुतेः ॥ ४२ ॥

रा० टी०–तद्वचनाकारमाह–मेति । हे वीरभार्ये ! विमतिं मरणविषयकविरुद्धबुद्धिं मा कुरुष्व हि यतः सर्वो लोकः प्राकृतजनः विधात्रा विहितः सृष्टः तं विधात्रा कृतं लोकं सुखदुःखयोगं नित्यं सुखदुःखाभ्यां संयुक्तं लोको वेदोऽब्रवीत् तेन वेदोक्तेन हेतुना कृतं ब्रह्मणाऽपि तथैव निर्मितम् । लोकशब्दस्य वेदपरत्वं लोक्यते ब्रह्मणाऽपि ज्ञायतेऽनेनेति व्युत्पत्तेः॥४२॥

गो० टी०–हितवचनमेवाह–मा वीरेति । विमतिं जीवितुं न शक्ष्यामीत्यादिविरुद्धमतिम् । सर्वो लोकः विधात्रा ब्रह्मणा विहितो निर्मितः । हिः प्रसिद्धौ । तं सुखदुःखयोगं च विधात्रा कृतमिति लोकः पण्डितः पामरश्चाब्रवीत् ॥ ४२ ॥

४३] ति० टी०–त्रयोऽपि लोका लोकत्रयवासिनोऽपि जना विधातृविहितं विधानं नातिक्रमन्ते । हि यतस्तस्य वशगा ब्रह्मादिस्थावरान्ताः । वाली परां प्रीतिं स्वत्संबन्धजां प्राप्स्यति मत्संकल्पात् । किं च भवत्यपि वालिसंबन्धजां प्रीतिं सुग्रीवसंबन्धात्प्राप्स्यसि । ते पुत्रो यौवराज्यं प्राप्स्यति च । चेनाहमपि शापं प्राप्स्याम्येवेति ॥ ४३ ॥

रा० टी०–त्रय इति । त्रयः त्रिविधलोकवासिनः लोकाः जनाः तस्य विधातुर्वशगाः अत एव विहितं विधात्रा नियुक्तं विधानं कर्मफलं नातिक्रमन्ते त्यक्तुं शक्नुवन्ति । एतेन विधातृविहितस्याशक्यवारणत्वात् शोको न कर्तव्य इति सूचितम् । ननु मम निर्वाहः कथं भावेष्यतीत्यत आह–ते पुत्रः यौवराज्यं प्राप्स्यति अतस्तथा पौर्वकालिकीमिव तां प्रसिद्धपरां प्रीतिं सुदं प्राप्स्यसि ॥ ४३ ॥

गो० टी०–वस्तुस्थितिश्च तथेत्याह–त्रय इति । लोका लोकस्थजनाः विहितं विधानं ब्रह्मकल्पितं प्रकारं नातिक्रमन्ते हि यस्मात्तस्य वशगाः । प्रीतिमिति । तां वालिसंभोगसदृशभोगमिति द्योतयति ॥ ४३ ॥

१ विधामर्हसि मां निहन्तुमिति गो. पाठः । २ हीति गो. पाठः । ३ त्विति गो. पाठः । ४ अत्र प्रथमपुरुषेण भवितव्यमिति भाति ।

धात्रा विधानं विहितं तथैव न शूरपत्न्यः परिदेवयन्ति ।
आश्वासिता तेन महात्मना तु प्रभावयुक्तेन परंतपेन ॥
सा वीरपत्नी ध्वनता मुखेन सुवेषरूपा विरराम तारा ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ।

राम. सुग्रीवादीन्समाश्वासयति । लक्ष्मणो वालिसंस्करणार्थं काष्ठाद्यानयनाय सुग्रीव नियोज्याङ्गद शिबिकानयनाय प्रेषयति। गृहीतरामाज्ञाः सुग्रीवादय आनीतवाहने वालिनमारोप्य गिरिनदी प्राप्ताः सैकते शिबिकामवरोप्य चिता निर्ममुः । उत्सङ्गे शिर आरोप्य वालिन शोचन्ती तारां वानर्य आश्वासयन्ति । अङ्गदो वालिनः काय चितायामारोप्य संस्करोति । समापितसंस्कारास्ते वालिनं जलमासिच्य रामान्तिकमीयुः ।

सै सुग्रीवं च तारां च साङ्गदां सहलक्ष्मणः । समानशोकः काकुत्स्थः सान्त्वयन्निदमब्रवीत्॥ १ ॥
न शोकपरितापेन श्रेयसा युज्यते मृतः । यदत्रानन्तरं कार्यं तत्समाधातुमर्हथ ॥ २ ॥
लोकवृत्तमनुष्ठेयं कृतं वो बाष्पमोक्षणम् । न कालादुत्तरं किंचित्परं कर्म उपासितुम् ॥ ३ ॥

४४] ति० टी०–धात्रेदं विधानं तथैव विहितम्, यथा मयोक्तं कृतं च । अनेन सर्वज्ञत्वशक्तिराविष्कृता । एवमीश्वरकृतं सर्वं ज्ञात्वा शूरपत्न्यो न शोचन्ति । ध्वनता मुखेनोपलक्षिता विरराम त्यक्तपरिदेवनाऽभूत् ॥ ४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

रा० टी०–धात्रेति । धात्रा यथा विहितं नियुक्तं तथैव विधानं मत्कर्तृकानुष्ठानमवेहीति शेषः, तेन मयि रिपुबुद्धिर्न कर्तव्येति सूचितम् । विलापस्यायुक्तत्वमाह–शूरपत्न्यः न परिदेवयन्ति विलपन्ति । अर्धं पृथक्–आश्वासितेति । ध्वनता विलापशब्दवता मुखेनोपलक्षिता अत एव महात्मना रामेण आश्वासिता सुवेषरूपा शोभनवेषरूपाभ्यां युक्ता तारा विरराम विलापात् निवृत्ते । अर्धद्वयमेकान्वयि ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

गो० टी०–आश्वासितेति । प्रभावयुक्तेन अङ्गदयौवराज्यप्रदानसमर्थेन परंतपेन तद्विरोधिनिरसनसमर्थेन आश्वासिता अत एव ध्वनता शब्दायमानेन मुखेनोपलक्षिता । सुवेषरूपेत्यनेन समाश्वासनकृतान्तरहर्षवत्त्वं सूचितं स्वलंकारयुक्तशरीरेत्यर्थः ॥ ४४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्विंश सर्गः ॥ २४ ॥

१] ति० टी०–समानशोकः सुग्रीवादिभिरिति शेषः ॥१॥

रा० टी०–रामकर्तृकसुग्रीवादिसान्त्वनमुपक्रमन्नाह—स इति । समानशोकः सुग्रीवमित्रत्वात् तादृशशोकविशिष्टः सहलक्ष्मणः लक्ष्मणसहितः स रामः साङ्गदमङ्गदसहितं सुग्रीवं तारां च सान्त्वयन् इदमब्रवीत् ॥ १ ॥

गो० टी०–अथ रामः सर्वसान्त्वनपूर्वकं वालिनः संस्कारं कारयति पञ्चविंशे–सुग्रीवमित्यादि । साङ्गदमिति सुग्रीवविशेषणम् । समानशोकः तारादिभिस्तुल्यशोकः ॥ १ ॥

२] ति० टी०–शोकयुक्तः परितापस्तेन शोकश्चित्तधर्मः । तावन्मात्रेणैव न मृतस्य श्रेयः समाधातुमनुष्ठातुम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–नेति । मृतो जनः शोकपरितापेन करणेन श्रेयसा कल्याणेन न युज्यते अतः अत्र अस्मिन् समये अनन्तरं मरणात्पश्चात् यत्कार्यं तत् समाधातुं सम्यक्कर्तुमर्हथ ॥ २ ॥

गो० टी०–नेति । शोकपरितापेन शोककृतपरितापेन युष्मदीयेनेति शेषः, मृतो वाली श्रेयसा न युज्यते । अत्र वालिनि विषये अनन्तरं मरणानन्तरम् यत् श्रेयस्करं कार्यम् और्ध्वदैहिकरूपं तत्समाधातुं कर्तुम् अर्हथ ॥ २ ॥

३] ति० टी०–लोकवृत्तं लोकाचारोऽप्यनुष्ठेय एव । तच्च बाष्पमोक्षणरूपं कृतं युष्माभिरिति शेषः । यद्वा कृतं पर्याप्तम् । बाष्पमोक्षणमिति द्वितीया तृतीयार्थे । यतः कालात्तत्तत्कर्मणि विहितात्कालादुत्तरं परम्, तस्मिन्ननिक्रान्त इति यावत् । किंचिदपि परं कर्म विहितं कर्मोपासितुं कर्तुमशक्यं कालस्योपादेयकारणत्वात् । अकाले कृतस्याकृतप्रायत्वादिति भावः ॥ ३ ॥

रा० टी०–लोकेति । लोकवृत्तं लोकाचारः अत एव अनुष्ठेयं कर्तव्यं बाष्पमोक्षणं वो युष्माभिः कृतं कालादुत्तरं कालप्रापितमरणानन्तरकाले किंचित् कर्म मरणनिवृत्तिसंपादकक्रिया उपासितुं कर्तुं न शक्यम् ॥ ३ ॥

१ तु राघवेणेति गो. पाठः । २ सुग्रीवं चेवेतिगो. पाठः । ३ साङ्गदमिति गो. रा. पाठः । ४ कर्म शक्यमिति गो. रा. पाठः

नियतिः कारणं लोके नियतिः कर्मसाधनम् । नियतिः सर्वभूतानां नियोगेष्विह कारणम् ॥४॥
न कर्ता कस्यचित्कश्चिन्नियोगे नापि चेश्वरः । स्वभावे वर्तते लोकस्तस्य कालः परायणम् ॥ ५ ॥
न कालः कालमत्येति न कालः परिहीयते । स्वभावं च समासाद्य न [1]किंचिदतिवर्तते ॥ ६ ॥

गो० टी०–लोकेति । लोकवृत्तं लोकाचारसिद्धम् अत एव सर्वैरनुष्ठेयं बाष्पमोक्षणं वः युष्माभि. कृतम् । बाष्पमोक्षणादतिरिक्तं किमपि न युष्माभिः कर्तुं शक्यमित्याह–न कालादिति । कालादुत्तरं कालं विनेत्यर्थः, किंचित्कर्म उपासितुं कर्तुं न शक्यं देवाज्ञामुल्लङ्घ्य स्वातन्त्र्येण किंचिदपि कर्म कर्तुं न शक्यमित्यर्थः ॥ ३ ॥

४] ति० टी०–कालस्य मुख्यत्वं दर्शयति–नियतिरिति । नियतिः नियम्यतेऽनयेति नियतिः कालः । कालकृता व्यवस्था निमेषादिपरार्धान्ता । कालस्त्वीश्वर एव । लोके लोकसृष्टयादिव्यवहारे । कर्मणो लौकिकालौकिककर्मप्रवृत्तेर्दिनादिरूपेण कारणं काल एव । सर्वभूतानां नियोगाधिकृतप्राणिमात्रस्य नियोगेषु ज्योतिष्टोमादिषु नियतिर्वसन्तादिः कारणम् ॥ ४ ॥

रा० टी०–कालस्य प्राबल्यमाह–नियतिरित्यादिभिः । नियम्यते तत्तत्कर्मणि प्रवर्त्यते अनयेति, किंच नितरां यतिः ऐहिकभोगानिवृत्तिः यया सा नियतिः काल एव कर्मसाधनं सकलकर्मप्रवर्तकं नियतिरेव सर्वभूतानां नियोगेषु तत्तज्जातिविषयकाग्रहेषु कारणं हेतुः अतः इह प्राकृते लोके नियतिरेव कारणं निखिलहेतुः ॥ ४ ॥

गो० टी०–तदेतदुपपादयति–नियतिरिति । नियम्यतेऽनेनेति नियतिः ईश्वरः लोके विषये कारणं सर्वलोककर्तेत्यर्थः । क्रियत इति कर्म कार्यं तस्य साधनं सहकारीत्यर्थः । सर्वभूतानाम् नियोगेषु प्रेरणेषु नियतिः कारणं सर्वप्रवर्तकोऽपीश्वर इत्यर्थः, तेन विना तृणाग्रमपि न चलतीति न्यायात् । ईश्वरपरतन्त्रतया लोकः कर्म करोति न तु स्वातन्त्र्येणेत्यर्थः ॥ ४ ॥

५] ति० टी०–कालातिरिक्तं न साक्षात्प्रवर्तकमित्याह–न कर्तेत्यादि । कस्यचित्कृष्यादेः कश्चित्कर्ता न नियतिनिरपेक्षः कर्ता न । तथा नियोगे नियोगानुष्ठानेऽपि नियतिनिरपेक्षः कश्चिदीश्वरो न नियतिनैरपेक्ष्येण समर्थो न । यतो लोको लोकव्यवहारः स्वभावे ईश्वरसहिते प्राकृतस्वकर्मणि वर्तते तदधीनो वर्तते । तस्य च स्वभावस्य कालः परायणम् । सहकारीत्यर्थः । तदुक्तं सूतसंहितायां शिववाक्येन–'स्वभावादेव संभूतं समस्तमिति केचन । तत्र सिध्यति विप्रेन्द्रा देशकालाद्यपक्षणात् ॥ मत्तः कर्मानुरूपेण जगज्जन्मादि जायते । एष स्वभावो विप्रेन्द्रा इति वेदार्थनिर्णयः ॥ न मया केवलेनापि न च केवलकर्मणा । प्राणिनां कर्मपाकेन मया च श्रुनिसत्तमाः । जगतः संभवो नाशः स्थितिश्च भवति द्विजाः ॥' इति ॥ ५ ॥

रा० टी०–ननु निखिलप्रवृत्तिकारणत्वेन स्वभावस्य प्रसिद्धिरित्यत आह—नेति । यो लोको जनः स्वभावे वर्तते स्वभावाधीनतया तिष्ठति तस्य लोकस्य परायणं परमप्रवर्तकः कालः अत एव कस्यचित्कर्मणः कश्चित्स्वभावादिः कर्ता कालमनपेक्ष्य कारको न अत एव नियोगे जात्यादिविषयकाग्रहेऽपि ईश्वरः समर्थो न ॥ ५ ॥

गो० टी०–एवमन्वयमुखेन ईश्वराधीनत्वमुक्त्वा व्यतिरेकमुखेन दर्शयति–न कर्तेति । कश्चित्पुरुषः कस्यचित्कर्मणः न कर्ता न स्वातन्त्र्येण कर्ता नियोगे कस्यचित्प्रेरणे च नेश्वरः किं तु स्वभावे वर्तते स्वभावाधीनो वर्तते लोकः । तत्र हेतुमाह–तस्येति । कालः तस्य परायणं गतिः। अत्र स्वभावनियतिकालादिशब्दैरीश्वर एवाभिधीयते अन्यथाऽनेकराजत्वापत्तेः, श्वेताश्वतरश्रुतिश्च—" स्वभावमेके कवयो वदन्ति " इत्यादिकैवमाह ॥ ५ ॥

६] ति० टी०–कालात्मा भगवानेव सर्वकर्मप्रवर्तक इत्याह–न काल इति । कालो भगवानीश्वरः कालं स्वकृतां कालव्यवस्थां जन्ममरणादिरूपां नात्येति नातिक्रामति, स भगवान्कालो न परिहीयते । अनुक्षणं जगद्धानिकरस्य हानिकारणाभावात् । स्वभावमुक्तलक्षणं समासाद्य किंचिदस्युत्कृष्टमपि जीवजातं नातिवर्तते । उत्पत्तियोग्यमुत्पद्यते नश्वरं नश्यत्येवेत्यर्थः ॥ ६ ॥

रा० टी०–ननु कालस्यापि कदाचिन्नाशे कः प्रवर्तक इत्यत आह–नेति । कालः कालं स्वात्मानं नात्येति उल्लङ्घते असंभवात् न विघातयतीत्यर्थः, अतः कालः न परिहीयते केनचित् निवर्त्यते अतः स्वभावं समासाद्य प्राप्य किंचिदपि वस्तु न अतिवर्तते कालमुल्लङ्घ्यते ॥ ६ ॥

गो० टी०–न काल इति । कालः ईश्वरः कालम् आत्मानं न त्येति नातिक्रामति सः स्वाधीन एव न तु लोकवत् कस्यचित्परतन्त्रः " न चास्य कश्चिज्जनिता न चाधिपः " इति श्रुतेः । न कालः परिहीयते न नश्यति । इदमुपलक्षणं षड्भावविकाररहित इत्यर्थः । ' अपक्षयविनाशाभ्यां परिणामर्द्धिजन्माभिः । वर्जितः शक्यते वक्तुं यः सदाऽस्तीति केवलम् । इति श्लोकम् । स्वस्मिन् भवतीति स्वभाव ईश्वरः। वाशब्दोऽवधारणे स्वभावमासाद्यैव वर्तते न तु कश्चित्तमतिवर्तते । निरङ्कुशः स्वतन्त्रः स्वकृतां व्यवस्थां स्वयमपि नातिवर्तते तत्परतन्त्रोऽनीशः किमुतेति भावः ॥ ६ ॥

१ कश्चिदिति गो. पाठः ।

न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः । न मित्रज्ञातिसंबन्धः कारणं नात्मनोऽवशः ॥ ७ ॥
किं तु कालपरीणामो द्रष्टव्यः साधु पश्यता । धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः ॥ ८ ॥
इतः स्वां प्रकृतिं वाली गतः प्राप्तः क्रियाफलम् । सौमदानार्थसंयोगैः पवित्रं प्लवगेश्वरः ॥ ९ ॥
स्वधर्मस्य च संयोगाज्जितस्तेन महात्मना । स्वर्गः परिगृहीतश्च प्राणानपरिरक्षता ॥१०॥

७-८] ति० टी०-स च भगवान्न पक्षपातस्वभाव इत्याह-न कालस्येति । न कालस्य बन्धुत्वमस्ति । प्राप्तकालं वस्तु सर्वथा संहरत्येव । न तु पक्षपातेन किमपि त्यजतीत्यर्थः । न हेतुः स्वसृज्ये स्वनाश्ये वा स्वकृतव्यवस्थातिरिक्तकारणनिरपेक्ष इत्यर्थः । यद्वा प्राप्तकालसंहारनिवर्तने न कश्चिदपि हेतुर्मन्त्रतन्त्रौषधादिः प्रभवतीत्यर्थः । तस्यैव प्रपञ्चः-न पराक्रमः । महापराक्रमवतामपि काले प्राप्ते संहारो भवत्येव । न मित्रज्ञातिसंबन्धो न बहुमित्रता न बहुज्ञातिता प्राप्तकालसंहारनिवर्तने हेतुः । सोऽपि भगवानात्मनः प्रत्यग्वर्गस्य जीवजातस्य न वशस्तदिच्छाधीनो न, किंतु परमस्वतन्त्र एव । तेन च भगवता कालेन क्रियमाणो नियत्यधीनः स्वस्वकर्मपरिणाम एव सर्वसुखदुःखादिलाभ इत्येव साधु पश्यता सुमतिना विवेकवता द्रष्टव्यो ज्ञातव्यः, नतु विषादहर्षौ कर्तव्यौ नापि स्वसामर्थ्यनिन्देति भावः । एवं धर्मादयोऽपि, चादधर्मादयोऽपि, कालक्रमेणैव समाहिताः संपादिता भवन्ति ॥ ७ ॥ ८ ॥

रा० टी०-ननु तर्हि काल एव सर्वैः सेव्यः परमात्मा किमर्थं सेव्यते इत्यत आह-नेति । आत्मनः स्वप्रकाशब्रह्मद्वारा सर्वत्र परिपूर्णस्य परमात्मनो वशो यः कालस्तस्य कालस्य बन्धुत्वं सेवयापि स्नेहो नास्ति अत एव हेतुः तद्वशे कारणं न अत एव पराक्रमस्तद्वशकारकबलं नास्ति अत एव मित्रज्ञातिसंबन्धः मित्रत्वज्ञात्यादिसंसर्गः कालस्य नास्ति अत एव कारणं कस्य सुखस्य अरणं प्राप्तिर्नास्ति एतेन कालस्य जडत्वं सूचितं तेन परमात्मानमनपेक्ष्य कालमात्राश्रयणे कल्याणं न भवतीति ध्वनितं तेन परमात्मैव सेव्य इति व्यञ्जितम् ॥ ७ ॥

गो० टी०-पुनरपीश्वरस्य स्वातन्त्र्यमुपपादयति-न कालस्येति । कालस्येश्वरस्य बन्धुत्वं नास्ति पक्षपातो नास्तीत्यर्थः । हेतुश्च नास्ति वशीकरणोपायश्च नास्ति तत्प्रसादं विना स्वयत्नेन वशीकर्तुं न शक्यते इत्यर्थः । न पराक्रमः तज्जयहेतुपराक्रमोऽपि नास्ति । पुरुषपराक्रमस्य स न बिभेति इति भावः । न मित्रज्ञातिसंबन्धः न सुहृत्सगोत्रसंबन्धः । अपराधिषु दण्डधरत्वमुक्तम् " एष सेतुर्विधरण एषां लोकानामसंभेदाय " इति श्रुतेः । अतः कारणमीश्वरः आत्मनो जीवस्य न वशः न परतन्त्रः तत्तत्कर्मानुगुणमेव ईश्वरः सर्वं वर्तयतीत्यर्थः॥ ७ ॥

रा० टी०-तर्हि किं कालः उपेक्षणीय इत्यत आह-किं त्विति । धर्मादयः कालक्रमसमाहिताः कालक्रमेणैव भवन्ति अतः साधु पश्यता सम्यग्जानता जनेन धर्मादिः कालपरीणामः परमात्माधीनकालकृतः द्रष्टव्यः ज्ञातव्यः । कालस्य परमात्मवशत्वे " यः कालकालो गुणी सर्वविद्यः " इत्यादिश्रुतिरनुग्राहिका ॥ ८ ॥

गो० टी०-तर्ह्यनीशेन जन्तुना किं कर्तव्यं तत्राह-किं त्विति । साधु सम्यक् पश्यता शास्त्रनिष्कर्षमवगच्छतेत्यर्थः, कालस्य ईश्वरस्य परिणामः चेतनकर्मानुगुणप्रवृत्तिविशेषः द्रष्टव्यः ईश्वरकृतव्यापारेषु न शोकः कर्तव्यः यद्धितं तत्करिष्यतीति स्थातव्यमिति भावः । धर्मार्थकामास्तु कालक्रमेण ईश्वरमर्यादया समाहिताः समर्पिता भवन्ति धर्मादिषु यत् प्राप्तव्यं तत् प्रापयतीश्वर एवेति भावः । अत्र नियतिकालस्वभावपदैर्व्याभिश्रतयोक्तिस्तदानीं रहस्यं वक्तुमनर्हत्वादिति बोध्यम्॥८॥

९] ति० टी०-प्रकृतमाह-इत इति । सामदानाभ्यामर्जितैरर्थसंयोगैरैश्वर्यैः पवित्रं शुभं क्रियाफलं भोगमिह लोके प्राप्तवान्वाली इतो लोकादेहाच्च गतोऽपगतः स्वां प्रकृतिं गतः प्राप्तः । कार्याणां कारणे लयात् । एवं चन्द्रलोकं गतो वालीति सूचितम् ॥ ९ ॥

रा० टी०-प्रासङ्गिकमुक्त्वा प्रकृतमाह-इत इति । स्वां प्रकृतिं चाञ्चल्यं तद्वशात् अधर्ममित्यर्थः, गतः प्राप्तः अतः क्रियाफलमधर्महेतुकमरणं प्राप्तोऽपि प्लवगेश्वरो वाली इतोऽस्मिन् समये सामदानार्थसंयोगैः साम्ना दानेन च अर्थस्तेन प्रार्थितः यः संयोगो मद्बाणसंबन्धस्तेन च पवित्रं लोकं प्राप्तः इति शेषः, सामदानप्रभावेण मद्बाणप्रहारप्रार्थना तेन च सल्लोकप्राप्तिरिति तात्पर्यम् ॥ ९ ॥

गो० टी०-एवमर्थस्थितिमुक्त्वा तां प्रकृते संगमयति-इत इति । स्वां प्रकृतिं गतः मद्बाणवेधकृतप्रायश्चित्ततया स्वकीयं शुद्धभावं प्राप्तः सन् प्लवगेश्वरो वाली इतः अस्माल्लोकात् धर्मार्थकामसंयोगैः विहितकालानुष्ठितधर्मार्थकामसंबन्धैः पवित्रं क्रियाफलं स्वर्गं प्राप्तः । ' सामदानार्थसंयोगैः ' इति पाठे नीतिशास्त्रानुष्ठानैरित्यर्थः ॥ ९ ॥

१०] ति० टी०-स्वधर्मस्य संयोगात्तेन महात्मना वालिना पूर्वं स्वर्गो जितोऽर्जितः । युद्धे प्राणानपरिरक्षतेदानीं परिगृहीतश्च प्राप्तश्च ॥ १० ॥

रा० टी०-स्वधर्मस्य बाणप्रहारप्रार्थनाहेतुत्वेन प्रशंसां कुर्वन्नाह-स्वधर्मस्येति । महात्मना पुरुषेण जितः प्राप्तः स्वर्गः स्वधर्मस्य संयोगाद्धेतोस्तेन वालिना परिगृहीतः प्राप्तः अत एव प्राणा न परिरक्षिताः ॥ १० ॥

१ धर्मार्थकामेति गो. पाठः ।

एषा वै नियतिः श्रेष्ठा यां गतो हरियूथपः । तदलं परितापेन प्राप्तकालमुपास्यताम् ॥ ११ ॥
वचनान्ते तु रामस्य लक्ष्मणः परवीरहा । अवदत्प्रश्रितं वाक्यं सुग्रीवं गतचेतसम् ॥ १२ ॥
कुरु त्वमस्य सुग्रीव प्रेतकार्यमनन्तरम् । ताराङ्गदाभ्यां सहितो वालिनो दहनं प्रति ॥ १३ ॥
समाज्ञापय काष्ठानि शुष्काणि च बहूनि च । चन्दनानि च दिव्यानि वालिसंस्कारकारणात् ॥ १४ ॥
समाश्वासय [1]दीनं त्वमङ्गदं दीनचेतसम् । मा भूर्बालिशबुद्धिस्त्वं त्वदधीनमिदं पुरम् ॥ १५ ॥
अङ्गदस्त्वानयेन्माल्यं वस्त्राणि विविधानि च । घृतं तैलमथो गन्धान्[2]यैश्चात्र समनन्तरम् ॥ १६ ॥
त्वं तार शिबिकां शीघ्रमादायागच्छ संभ्रमात् । त्वरा गुणवती युक्ता ह्यस्मिन्काले विशेषतः ॥ १७ ॥
सज्जीभवन्तु प्लवगाः शिबिकावा[3]हनोचिताः । समर्था बलिनश्चैव निर्हरिष्यन्ति वालिनम् ॥ १८ ॥
एवमुक्त्वा तु सुग्रीवं सुमित्रानन्दवर्धनः । तस्थौ भ्रातृसमीपस्थो लक्ष्मणः परवीरहा ॥ १९ ॥
लक्ष्मणस्य वचः श्रुत्वा तारः संभ्रान्तमानसः । प्रविवेश गुहां शीघ्रं शिबिकासक्तमानसः ॥ २० ॥
आदाय शिबिकां तारः स तु पर्यापतत्पुनः । वानरैरुह्यमानां तां शूरैरुद्वहनोचितैः ॥ २१ ॥

गो० टी०–केन स्वां प्रकृतिं प्राप्त इत्यपेक्षायामुक्तं विशदयति–स्वधर्मस्य चेति । स्वधर्मस्य संयोगात्स्वविहितधर्मानुष्ठानात् रणे प्राणानपरिरक्षतेत्यनेन शौर्यकृतधर्मोऽप्युक्तः । उभाभ्यां जितः पूर्वं स्ववशीकृतः स्वर्गः इदानीं परिगृहीतश्च॥१०॥

११–१२] ति० टी०–एषा नियतिः कालकृतव्यवस्थाप्राप्तिः । प्राप्तकालम् कर्मेति शेषः ॥ ११ ॥ १२ ॥

रा० टी०–एषेति । यां हरियूथपो वाली गतः प्राप्तः सा एषा युद्धे प्राणापहारिका नियतिः कालः श्रेष्ठा तत्तस्माद्धेतोः परितापेन तद्विषयकशोकेन अलं शोको न कर्तव्य इत्यर्थः, अतः प्राप्तः कालो यस्य तत् प्रमीतक्रियादि उपास्यतां क्रियताम् ॥ ११ ॥

गो० टी०–एषेति । हरियूथपः यां नियतिं गतः सा नियतिर्गतेः श्रेष्ठा तत्तस्मात्कारणात् परितापेनालं सद्गतिं प्राप्तं प्रति शोको न कार्यः । प्राप्तकालम् एतत्कालोचितम् उपास्यताम् अनुष्ठीयताम् ॥ ११ ॥

रा० टी०–वचनान्त इति । रामस्य वचनान्ते उक्त्यवसाने लक्ष्मणः प्रश्रितं नम्रं वाक्यं गतचेतसं नष्टविवेकं सुग्रीवमवदत् ॥ १२ ॥

गो० टी०–वचनान्त इति । गतचेतसं दुःखितमिति यावत् ॥ १२ ॥

१३] ति० टी०–अस्य प्रेतकार्यं कुर्वित्यन्वयः । दहनं प्रति दहननिमित्तम् यतस्वेति शेषः ॥ १३ ॥

१४] ति० टी०–वालिसंस्कारनिमित्तं काष्ठान्यानेतुं समाज्ञापयेति संबन्धः ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–कुर्विति । हे सुग्रीव ! अनन्तरं शीघ्रमित्यर्थः, अस्य वालिनः प्रेतकार्यं ताराङ्गदाभ्यां सहितस्त्वं कुरु अत एव वालिनो दहनं प्रति दहनार्थं बहूनि शुष्काणि काष्ठानि वालिसंस्कारकारणात् दिव्यानि चन्दनानि च समाज्ञापय आनेतुं भृत्यानिति शेषः । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–कुरु त्वमस्येत्यर्धमेकं वाक्यम् ॥ १३ ॥

गो० टी०–तारेत्यादि । वालिनो दहनं प्रति ताराङ्गदाभ्यां सहितः सन् वालिसंस्कारकारणात् वालिसंस्काराथं चन्दनादीनि काष्ठानि समाज्ञापय यत्रात्र समनन्तरं मरणानन्तरं यदानेतव्यमस्ति तत्सर्वमङ्गदः समानयेदित्यर्थः॥१४–१६॥

१५] ति० टी०–त्वं सुग्रीव ! अङ्गदं समाश्वासय ॥१५॥

रा० टी०–समिति । यतः इदं किष्किन्धाख्यं पुरं त्वदधीनमतो बालिशबुद्धिः अविवेकचित्तस्त्वं मा भूः अत एवाङ्गदं समाश्वासय ॥ १५ ॥

१६]ति० टी०–कः कुत्राज्ञापनीयस्तत्राह–अङ्गदस्त्विति। समनन्तरमपेक्षि तत् ॥ १६ ॥

रा० टी०–अङ्गद इति । माल्यादीनि यदत्र समनन्तरं शीघ्रमपेक्षितं तदन्यत्तिलादि च अङ्गद आनयेत् ॥ १६ ॥

१७] ति० टी०–तारः सचिवः । संभ्रमाद्वेगात् । हि यतोऽस्मिन्काले विशेषतस्त्वरा युक्ता, सैव चेदृशेऽवसरे गुणवतीति संबन्धः ॥ १७ ॥

रा० टी०–वालिमन्त्रिणं संबोध्याह—त्वमिति । हे तार! संभ्रमात् अतिवेगात् शिबिकामादाय किष्किन्धातो गृहीत्वा शीघ्रमागच्छ हि यतः अस्मिन् काले त्वरा वेगः गुणवती अनेकगुणविशिष्टा, अतः विशेषतो युक्ता कर्तव्येत्यर्थः ॥ १७ ॥

गो० टी०–त्वमिति । त्वरा गुणवती अस्मिन्काले विशेषतो युक्ता ॥ १७ ॥

१८–२१] ति० टी०–समर्था बलिनः शिबिकावाहनोचिता ये निर्हरिष्यन्ति ते सज्जीभवन्त्वित्यन्वयः । निर्हारो दहनदेशनयनम् ॥ १८–२१ ॥

रा० टी०–सज्जीभवन्त्विति । बलिनः अतिबलवन्तः

१ चैनं त्वमिति गो. पाठः । २ अन्यचेति रा. पाठः । ३ वहनोचिता इति गो. पाठः ।

दिव्यां भद्रासनयुतां शिबिकां स्यन्दनोपमाम् । पक्षिकर्मभिराचित्रां द्रुमकर्मविभूषिताम् ॥ २२ ॥
आचितां चित्रपत्तीभिः सुनिविष्टां समन्ततः । विमानमिव सिद्धानां जालवातायनायुताम् ॥ २३ ॥
सुनियुक्तां विशालां च सुकृतां [1]शिल्पिभिः कृताम् । दारुपर्वतकोपेतां चारुकर्मपरिष्कृताम् ॥ २४ ॥
वराभरणहारैश्च चित्रमाल्योपशोभिताम् । गुहागहनसंछन्नां रक्तचन्दनभूषिताम् ॥ २५ ॥
पुष्पौघैः समभिच्छन्नां पद्ममालाभिरेव च । तरुणादित्यवर्णाभिर्भ्राजमानाभिरावृताम् ॥ २६ ॥
ईदृशीं शिबिकां दृष्ट्वा [2]रामो लक्ष्मणमब्रवीत् । क्षिप्रं विनीयतां वाली प्रेतकार्यं विधीयताम् ॥ २७ ॥

अत एव समर्था वालिवहनसामर्थ्ययुक्ताः अत एव शिबिकावाहनोचिताः शिबिकानयनयोग्याः ये प्लवगाः वालिनं निर्हरिष्यन्ति चिताभूमिं प्रापयिष्यन्ति ते सज्जीभवन्तु कृतप्रयत्नास्तिष्ठन्तु ॥ १८ ॥

रा० टी०–एवमिति । लक्ष्मणः सुग्रीवमेवमुक्त्वा तस्थौ तूष्णीं बभूव ॥ १९ ॥

गो० टी०–सज्जीभवन्त्विति । ये निर्हरिष्यन्ति ते सज्जीभवन्त्विति योजना । निर्हारः शववहनम् ॥ १८॥ १९ ॥

रा० टी०–लक्ष्मणस्येति । संभ्रान्तमानसः उद्विग्नचित्तस्तारो वालिमन्त्री लक्ष्मणस्य वचः श्रुत्वा शिबिकासक्तमानसः शिबिकानयने आसक्तमनाः सन् गुहां प्रविवेश ॥ २० ॥

गो० टी०–लक्ष्मणस्येति । गुहां किष्किन्धाम्॥२०॥२१॥

रा० टी०–आदायेति । उद्वहनोचितैर्वानरैः उह्यमानाम् ॥ २१ ॥

गो० टी०–वानरैरित्यादि । भद्रासनयुतां राजासनयुक्ताम्, राजार्होन्नतासनयुक्तामिति रामानुजार्यः । पक्षिकर्मभिराचित्रां कृत्रिमपक्षिभिः समन्तादाश्रयीभूताम् । क्रियत इति कर्म प्रतिकृतिः, द्रुमकर्मभिः द्रुमप्रतिकृतिभिः विभूषिताम् आचितां चित्रपत्तीभिः चित्रलेखाभिः पदातिभिरित्येके । आर्षो दीर्घः । सुनिविष्टां शोभनसन्निवेशवतीं जालवातायनावृतां सूक्ष्मरन्ध्रसमूहो जालं गोनयनाकृतिरन्ध्रसमूहो गवाक्षं तदावृताम्, सुनियुक्तां सुश्लिष्टां सुकृतां सुष्ठु कृतां यत्नेन कृतामित्यर्थः । दारुपर्वतकोपेतां दारुनिर्मितक्रीडापर्वतयुक्तां, चारुकर्मणा उत्तेजनेन परिष्कृताम् अलंकृताम्, वराभरणैः हारैश्च युक्तामिति शेषः । गुहागहनसंछन्नां कृत्रिमैर्गुहागहनैः गुहाभिः काननैश्च संछन्नां पुष्पौघैः मुक्तकपुष्पनिचयैः आस्तरणार्थैः समभिच्छन्नां व्याप्तां, पद्मेति चतुर्दिक्षु पुष्पसरोपेतत्वेऽप्यन्तरान्तरा पद्ममालाभिः पद्मपङ्क्तिभिर्युक्तामित्यर्थः ॥ २२–२६ ॥

२२] ति० टी०–भद्रासनयुतां मध्ये राजोचितमहार्हासनवतीम् । पक्षिकर्मभिः पक्षिप्रतिकृतिभिरासमन्ताच्चित्रां चित्रवतीम् द्रुमकर्मभिर्द्रुमप्रतिकृतिभिर्भूषिताम् ॥ २२ ॥

रा० टी०–दिव्यां देवलोकात् प्राप्तां भद्रासनयुतां कल्याणकारकासनविशिष्टामत एव शिबिकामारोहकाणां कल्याणप्रदाम् "उदीचां" इतीत्वम् । स्यन्दनोपमाम् अतिविपुलत्वेन रथसदृशीं पक्षिकर्मभिः पक्षिनिर्मापकक्रियाभिः आचित्रां समन्ताच्चित्रितां शिल्पिनिर्मितानेकविधपक्षिविशिष्टामित्यर्थः, द्रुमकर्मभिः कृत्रिमद्रुमविभूषितां शिल्पिनिर्मितानेकविधद्रुमविशिष्टामित्यर्थः ॥ २२ ॥

२३] ति० टी०–चित्रपत्तीभिश्चित्रपदातिभिः दीर्घ आर्षः, सुनिविष्टां सुसंनिवेशाम् जालवातायनयुतां जालवन्निर्मितवातमार्गयुताम् ॥ २३ ॥

रा० टी०–चित्रपत्तीभिः । चित्रीभूतपदातिभिः आचितां व्याप्तां सुनिविष्टां शोभनप्रवेशमार्गविशिष्टां विमानमिव विमानसदृशीं जालवातायनायुताम् जालवन्निर्मितवायुमार्गविशिष्टाम् ॥ २३ ॥

२४] ति० टी०–सुनियुक्तां सुश्लिष्टाम् । शिल्पिभिर्विशालां कृतामेवमुक्तरीत्या सुकृताम् । दारुनिर्मितक्रीडापर्वतयुक्ताम् । चारुकर्मभिः परिक्रियाकर्मभिः परिष्कृताम् ॥ २४ ॥

रा० टी०–सुनियुक्तां शोभनावयवसंनिवेशविशिष्टां विशालां विस्तीर्णस्थलां शिल्पिभिः सुकृतां शोभनप्रयत्नजनितां कृतामारोहकाणां दुःखनिवर्तिकां दारुपर्वतकोपेतां दारुनिर्मितक्रीडापर्वतविशिष्टां चारुकर्मपरिष्कृतां चारु शोभनं कर्म येषां तैरनेकशिल्पिभिरित्यर्थः, परिष्कृतां सेवितां ॥ २४ ॥

२५–२६] ति० टी०–तदेवाह–वराभरणहारैरिति । युक्तामिति शेषः । गुहागहनशब्देन शिबिकोपरि प्रसार्यमाणं पञ्जरमुच्यते ॥ २५ ॥ २६ ॥

रा० टी०–वराभरणहारैर्युक्तामिति शेषः, चित्रमाल्योपशोभिताम् चित्रीभूतानेकविधपुष्पयुक्ताम्, गुहागहनसंछन्नाम् शिल्पिनिर्मितगुहाकाननाभ्यां संछन्नां संयुक्ताम् ॥ २५ ॥

रा० टी०–पुष्पौघैः बहुपुष्पैः समभिच्छन्नाम्, तरुणादित्यवर्णाभिः अत एव भ्राजमानाभिः पद्ममालाभिः आवृताम् शिबिकामादाय स लक्ष्मणाज्ञप्तस्तारः पुनः पर्यापतत् आगच्छत्। श्लोकषट्कमेकान्वयि ॥ २६ ॥

२७] ति० टी०–विनीयतां दहनदेशमिति शेषः ॥ २७ ॥

रा० टी०–ईदृशीमिति । शिबिकां दृष्ट्वा वाली क्षिप्रं विनीयतां चितां प्राप्यताम् प्रेतकार्यं विधीयतामिति रामो लक्ष्मणमब्रवीत् ॥ २७ ॥

गो० टी०–ईदृशीं शिबिकामिति । पुनरुक्तिर्व्यवहितानुस्मरणार्था ॥ २७ ॥

१ ऽऽकृतामिति गो. पाठः । २ विश्वकर्मणेति गो. पाठः । ३ ओघैरिति गो. पाठः ।

ततो वालिनमुद्यम्य सुग्रीवः शिबिकां तदा । आरोपयत विक्रोशन्नङ्गदेन सहैव तु ॥ २८ ॥
आरोप्य शिबिकां चैव वालिनं गतजीवितम् । अलंकारैश्च विविधैर्माल्यैर्वस्त्रैश्च भूषितम् ॥ २९ ॥
आज्ञापयत्तदा राजा सुग्रीवः प्लवगेश्वरः । और्ध्वदेहिकमार्यस्य क्रियतामनुकूलतः ॥ ३० ॥
विश्राणयन्तो रत्नानि विविधानि बहूनि च । अग्रतः प्लवगा यान्तु शिबिका तदनन्तरम् ॥ ३१ ॥
राज्ञामृद्धिविशेषा हि दृश्यन्ते भुवि यादृशाः । तादृशैरिह कुर्वन्तु वानरा भर्तृसत्क्रियाम् ॥ ३२ ॥
तादृशं वालिनः क्षिप्रं प्राकुर्वन्नौर्ध्वदेहिकम् । अङ्गदं परिरभ्याशु तारप्रभृतयस्तथा ॥ ३३ ॥
क्रोशन्तः प्रययुः सर्वे वानरा हतबान्धवाः । ततः प्रणिहिताः सर्वा वानर्योऽस्य वशानुगाः ॥ ३४ ॥
चुक्रुशुर्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम् । तारप्रभृतयः सर्वा वानर्यो हतबान्धवाः ॥ ३५ ॥
अनुजग्मुश्च भर्तारं क्रोशन्त्यः करुणस्वनाः । तासां रुदितशब्देन वानरीणां वनान्तरे ॥ ३६ ॥
वनानि गिरयश्चैव विक्रोशन्तीव सर्वतः । पुलिने गिरिनद्यास्तु विविक्ते जलसंवृते ॥ ३७ ॥
चितां चक्रुः सुबहवो वानरा वनचारिणः । अवरोप्य ततः स्कन्धाच्छिबिकां वानरोत्तमाः ॥ ३८ ॥
तस्थुरेकान्तमाश्रित्य सर्वे शोकपरायणाः । ततस्तारा पतिं दृष्ट्वा शिबिकातलशायिनम् ॥ ३९ ॥
आरोप्याङ्के शिरस्तस्य विललाप सुदुःखिता । हा वानर महाराज हा नाथ मम वत्सल ॥ ४० ॥

२८] ति० टी०–उद्यम्य हस्ताभ्यां भूमेरूर्ध्वं कृत्वा ॥२८॥

रा० टी०–तत इति । ततः रामवचनश्रवणानन्तरम् अङ्गदेन सहैव विक्रोशन् सुग्रीवः उद्यम्य यत्नेनोत्थाप्य वालिनं शिबिकामारोपयत ॥ २८ ॥

गो० टी०–तत इति । ततः लक्ष्मणं प्रति वाली विनीयतामित्युक्तिश्रवणानन्तरमित्यर्थः । यद्वा लक्ष्मणं प्रत्युक्तिः स्वसुहृद्यैवेति ज्ञात्वेत्यर्थः । आरोपयत आरोपयत् ॥ २८ ॥

२९]ति०टी०–शिबिकामारोप्य शिबिकायां स्थापयित्वा२९

३०] ति० टी०–आज्ञापनप्रकारः–और्ध्वदेहिकमित्यादि । और्ध्वदेहिकं तत्क्रियायोग्यं स्थानमनुकूलतो नदीतीरसमीपतः क्रियतामित्युत्तरमिति द्रष्टव्यम् ॥ ३० ॥

रा० टी०–आरोप्येति । सुग्रीवः अलंकारादिभिर्भूषितं वालिनं शिबिकामारोप्य आज्ञापयत् । आज्ञापनप्रकारमाह–आर्यस्य वालिनः और्ध्वदेहिकम् अनुकूलतो नदीकूलसमीपे शास्त्रानुसारतो वा क्रियताम् । श्लोकद्वयमेकान्वयि ॥२९॥३०॥

गो० टी०–आरोप्येति । आर्यस्य ज्येष्ठस्य देहादूर्ध्वं कर्तव्यम् और्ध्वदेहिकम् उत्तरक्रिया । शिबिकासमनन्तरम् आसन्नीसमीपे । अत्रेतिकरणं द्रष्टव्यम् इत्याज्ञापयदिति पूर्वेण संबन्धः ॥ २९–३१ ॥

३१] ति० टी०–विश्राणयन्तः क्षिपन्तः । इत्याज्ञापयदित्यन्वयः ॥ ३१ ॥

रा० टी०–विश्राणयन्त इति । रत्नानि विश्राणयन्तः प्लवेषेण ददतः प्लवगा अग्रतो यान्तु,तदनन्तरम् शिबिका यातु३१

३२–३३] ति० टी०–तादृशै ऋद्धिविशेषैः सत्क्रियां कुर्वन्तु ॥ ३२ ॥ ३३ ॥

रा० टी०–राज्ञामिति । राज्ञां भुवि चिताभूमिसमीपे यादृशा ऋद्धिविशेषा दृश्यन्ते अदृश्यन्त तादृशैः ऋद्धिविशेषैः हे वानराः! भर्तृसत्क्रियां समीचीनप्रमीतक्रियां भवन्तः कुर्वन्तु॥३२॥

गो० टी०–राज्ञामिति । ऋद्धिविशेषाः ऋद्धिविशेषापादुकपाः यादृशा और्ध्वदैहिकक्रियाप्रकारा दृश्यन्ते तादृशमौर्ध्वदैहिकं क्षिप्रं प्राकुर्वन् ॥ ३२ ॥

रा० टी०–तादृशामिति । तदा सुग्रीववचनश्रवणानन्तरकाले तारप्रभृतयः अङ्गदं परिरभ्य परिगृह्य तादृशं राजान्तरौर्ध्वदेहिकसदृशमौर्ध्वदेहिकं प्राकुर्वन् कर्तुमारभन्त ॥ ३३ ॥

गो० टी०–अङ्गदमिति । तारप्रभृतयो वानरा इति सम्यक् ॥ ३३ ॥

३४–३६] ति० टी०–प्रणिहिताः समेताः ॥ ३४–३६ ॥

रा० टी०–क्रोशन्त इति । हताः राजविघातेन निहतप्राया बान्धवा येषां ते क्रोशन्तो वानराः प्रययुः । ततोऽनन्तरं प्रणिहिताः समीपं प्राप्ताः अस्य वालिनो वशानुगाः वानर्यः वीरवीरेतिभूयश्चुक्रुशुः अत एव वानरा अपि भूयः क्रोशन्ति आक्रोशन् । सार्धश्लोक एकान्वयी ॥ ३४ ॥

रा० टी०–तारेति । करुणस्वनाः दयोत्पादकस्वनवत्यः तारापभृतयो नार्यः क्रोशन्त्यः सत्यः भर्तारमनुजग्मुः । अर्धद्वयमेकान्वयि ॥ ३६ ॥

रा० टी०–तासामिति । वनान्तरे वनमध्ये वानरीणां रुदितशब्देन वनादीनि क्रोशन्तीव ॥ ३६ ॥

गो० टी०–तत इति । प्रणिहिताः आप्ताः ॥ ३४–३७ ॥

३७–४०] ति० टी०–विक्रोशन्तीव प्रतिध्वनिनेति शेषः । जलसंवृते समन्ताज्जलावृतभूदेशे ॥ ३७–४० ॥

---

१ और्ध्वदेहिकमिति गो. पाठः । २ रूपत इति गो. पाठः । ३ ऽपीति गो. पाठः । ४ समनन्तरमिति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ और्ध्वदेहिकमिति गो. पाठः । ७ तवेति गो. रा. पाठः । ८ स्त्रिय इति गो. पाठः । ९ यूथपा इति गो. पाठः । १० शोककर्षिता इति गो. पाठः । ११ बहुनोचिता इति गो. पाठः । १२ समन्विता इति गो. पाठः ।

हा महार्ह महाबाहो हा मम प्रिय पश्य माम् । जनं न पश्यसीमं त्वं कस्माच्छोकाभिपीडितम् ॥ ४१ ॥
प्रहृष्टमिह ते वक्त्रं गतासोरपि मानद । अस्तार्कसमवर्णं च दृश्यते जीवतो यथा ॥ ४२ ॥
एष त्वां रामरूपेण कालः कर्षति वानर । येन स्म विधवाः सर्वाः कृता एकेषुणा रणे ॥ ४३ ॥
इमास्तास्तव राजेन्द्र वानर्योऽप्लवगास्तव । पादैर्विकृष्टमध्वानमागताः किं न बुध्यसे ॥ ४४ ॥
तवेष्टा ननु चैवेमा भार्याश्चन्द्रनिभाननाः । इदानीं नेक्षसे कस्मात्सुग्रीवं प्लवगेश्वर ॥ ४५ ॥
एते हि सचिवा राजंस्तारप्रभृतयस्तव । पुरवासिजनश्चायं परिवार्य विषीदति ॥ ४६ ॥
विसर्जयैनान्सचिवान्यथापुरमरिन्दम । ततः क्रीडामहे सर्वा वनेषु मदनोत्कटाः ॥ ४७ ॥
एवं विलपतीं तारां पतिशोकपरीतताम् । उत्थापयन्ति स्म तदा वानर्यः शोककर्शिताः ॥ ४८ ॥
सुग्रीवेण ततः सार्धं सोऽङ्गदः पितरं रुदन् । चितामारोपयामास शोकेनाभिप्लुतेन्द्रियः ॥ ४९ ॥
ततोऽग्निं विधिवद्दत्त्वा सोऽपसव्यं चकार ह । पितरं दीर्घमध्वानं प्रस्थितं व्याकुलेन्द्रियः ॥ ५० ॥

रा० टी०–पुलिन इति । विविक्ते जनैरसेविते जलसंवृते जलसमीपे चतुर्दिक्षु जलैराच्छादिते वा गिरिनद्याः पर्वतीयसरितः पुलिने सुबहवो वानराः चितां चक्रुः ॥ ३७ ॥

रा० टी०–अथेति । ततः चितासमीपप्राप्त्यनन्तरं शोकपरायणाः वानरोत्तमाः शिबिकां स्कन्धादवरोप्य उत्तार्य एकान्तमेकदेशमाश्रित्य तस्थुः ॥ ३८ ॥

रा० टी०–तत इति । सदुःखिता तारा शिबिकातलशायिनं पतिं दृष्ट्वा तस्य शिरः अङ्के आरोप्य तस्याङ्के शिर आरोप्य वा विललाप ॥ ३९ ॥

रा० टी०–विलापप्रकारमाह–हेत्यादिभिः । महार्ह ! हे वीरकर्तृकातिसत्कृत ! मां पश्य ॥ ४० ॥

गो० टी०–अवरोप्येति । वहनोचिताः वाहकाः ॥ ३८–४२ ॥

४१–४२] ति० टी०–महार्ह ! उत्तमभोगार्ह ॥ ४१ ॥ ४२ ॥

रा० टी०–जनमिति । इमं जनं कस्मात् त्वं न पश्यसि । अर्धं पृथक् ॥ ४१ ॥

रा० टी०–प्रहृष्टमिति । अस्तार्कसमवर्णम् अस्तकालिकसूर्यवर्णसदृशवर्णविशिष्टं गतासोरपि ते वक्त्रं जीवतो वक्त्रमिव प्रहृष्टं दृश्यते ॥ ४२ ॥

४३] ति० टी०–रणे सुग्रीवेण सह युद्धे ॥ ४३ ॥

रा० टी०–एष इति । येन एकेषुणा एकबाणेन सर्वा वयं विधवाः कृताः स एषः रामरूपेण काल एव त्वां कर्षति लोकान्तरं नयति ॥ ४३ ॥

४४–४६] ति० टी०–अप्लवगाः प्लवगतिमजानन्त्यैः । विकृष्टं दूरम् ॥ ४४–४६ ॥

रा० टी०–इमा इति । विकृष्टं दूरमध्वानं पादैरागताः तव वानर्यस्तव प्लवगाश्च किं न बुध्यसे जानासि । वाक्यस्य कर्मत्वान्न द्वितीया ॥ ४४ ॥

गो० टी०–इमास्ता इति । विकृष्टं विप्रकृष्टम् अध्वानं पादैरागताः ॥ ४३ ॥

रा० टी०–तवेति । तवेष्टा ईप्सिता भार्याः सुग्रीवं च इदानीं कस्मात् नेक्षसे ॥ ४५ ॥

रा० टी०–एते इति । तारप्रभृतयः सचिवाः पुरवासिजनश्च परिवार्य त्वां संवेष्ट्य विषीदन्ति, विषीदति वचनविपरिणामेन पूर्वत्राप्यन्वयः ॥ ४६ ॥

गो० टी०–इदानीमित्यादि । मदनोत्कटाः उत्कटमदनाः ॥ ४४ ॥ ४६ ॥

४७–४९] ति० टी०–यथापुरं यथापूर्वं क्रीडामहे । त्वया सहेति विललापेति शेषः ॥ ४७–४९ ॥

रा० टी०–विसर्जयेति । हे अरिन्दम ! एतान् सचिवान् यथापुरं पूर्वमिव विसर्जय ततोऽनन्तरं मदनोत्कटा उत्कटमदनवत्यो वयं वनेषु क्रीडामहे, त्वया सहेति शेषः ॥ ४७ ॥

रा० टी०–एवमिति । पतिशोकपरीततां अत एव एवं विलपतीं विलपन्तीं तारां वानर्यः उत्थापयन्ति स्म ॥ ४८ ॥

गो० टी०–एवमिति । विलपतीं विलपन्तीम् ॥ ४६ ॥

रा० टी०–सुग्रीवेणेति । सोऽङ्गदः सुग्रीवेण सार्धं रुदन् सन् पितरं चितामारोपयामास प्रापयामास, तत्र संस्थापयामासेत्यर्थः ॥ ४९ ॥

गो० टी०–सुग्रीवेणेति । पितरं पितृशरीरम् ॥ ४७ ॥

५०] ति० टी०–अपसव्यमपसव्यपरिक्रमणम् ॥ ५० ॥

रा० टी०–तत इति । ततः आरोपणानन्तरम् अग्निं विधिवत् दत्त्वा संस्थाप्य दीर्घं पथिकानिवर्तक्रमं अध्वानं प्रस्थितं पितरं वालिनं सोऽङ्गदः अपसव्यं चकार प्रदक्षिणेन परिक्रमणं चक्रे इत्यर्थः ॥ ५० ॥

गो० टी०–तत इति । अपसव्यम् अप्रदक्षिणम् ॥ ४८ ॥

---

१ लक्ष्यते इति गो. पाठः । २ वने इति गो.पाठः । ३ बहुभाः सदेति गो. प्लवगा इति रा.पाठः । ४ नामैना इति गो.पाठः । ५ ईश्वरमिति गो.पाठः । ६ वासी जनश्चेति गो. पाठः । ७ आसतेऽनघेति गो.पाठः । ८ प्लवगान्यथोचितमिति गो.पाठः । ९ परिप्लुतामिति गो. पाठः १० स इति गो. नास्ति । ११ अजानत्य इति युक्तं भाति ।

संस्कृत्य वालिनं [1]तं तु विधिवत्प्लवगर्षभाः । आजग्मुरुदकं कर्तुं नदीं [2]शुभजलां शिवाम् ॥ ५१ ॥
ततस्ते सहितास्तत्र [3]अङ्गदं स्थाप्य चाग्रतः । सुग्रीवतारासहिताः सिषिचुर्वानरा जलम् ॥ ५२ ॥
सुग्रीवेणेव दीनेन दीनो भूत्वा महाबलः । समानशोकः काकुत्स्थः प्रेतकार्याण्यकारयत् ॥ ५३ ॥
ततोऽर्थं तं वालिनमप्रयपौरुषं प्रकाशमिक्ष्वाकुवरेषुणा हतम् ।
प्रदीप्य दीप्ताग्निसमौजसं तदा सलक्ष्मणं राममुपेयिवान्हरिः ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ।

हनुमता किष्किन्धाप्रवेशं प्रति प्रार्थितो रामः पित्राऽहं ग्रामनगरप्रवेशे निषिद्धोऽस्मीतः सुग्रीवं किष्किन्धाराज्येऽङ्गदं च यौवराज्येऽभिषेचयतेति नियोज्य स्वस्यावर्षान्तं गुहानिवासं प्रतिजानीते, ततश्च सीतान्वेषणमनुमनुते । गृहीतरामाशः सुग्रीवस्तथाऽनुतिष्ठति ।

ततः शोकाभिसंतप्तं सुग्रीवं क्लिन्नवाससम् । शाखामृगमहामात्राः परिवार्योपतस्थिरे ॥ १ ॥
अभिगम्य महाबाहुं राममक्लिष्टकारिणम् । स्थिताः प्राञ्जलयः सर्वे पितामहमिवर्षयः ॥ २ ॥
ततः काञ्चनशैलाभस्तरुणार्कनिभाननः । अब्रवीत्प्राञ्जलिर्वाक्यं [4]हनूमान्मारुतात्मजः ॥ ३ ॥
भवत्प्रसादात्कार्कुत्स्थ पितृपैतामहं महत् । [5]वानराणां सुदंष्ट्राणां संपन्नबलशालिनाम् ॥ ४ ॥
[6]मेऽात्मनां सुदुष्प्रापं [7]प्राप्तं राज्यमिदं प्रभो । भवता समनुज्ञातः प्रविश्य नगरं शुभम् ॥ ५ ॥

५१–५२] ति० टी०–विधिवदेवांशत्वेन स्वयंज्ञातवेदस्वाज्ज्ञानवत् तिर्यग्देहोचितविधिवदित्यर्थः, विधिवदग्निहोत्रविधिनेत्यर्थ इत्यन्ये ॥ ५१ ॥ ५२ ॥

रा० टी०–संस्कृत्येति । प्लवगर्षभाः वालिनं विधिवत् संस्कृत्य वह्निसंस्कारं कारयित्वा उदकं कर्तुं दातुं नदीमाजग्मुः ॥ ५१ ॥

गो० टी०–संस्कृत्येति । वालिनं वालिशरीरम् उदकं कर्तुं जलतर्पणं कर्तुं नदीं किष्किन्धासमीपवर्तिनीम् ॥ ४९ ॥

रा० टी०–तत इति । ततः सहिताः संघीभूताः सुग्रीवतारासहिताः ते वानरर्षभाः वालिनः वालिने जलं सिषिचुः ॥५२॥

गो० टी०–ततस्त इति । सुग्रीवतारासहिता इति तारयाप्युदकदानं कुलाचारः ॥ ५० ॥

५३–५४] ति० टी०–प्रेतकार्याणि जलदानादिरूपाण्यकारयत् तदितिकर्तव्यताम्नपदिष्टवानित्यर्थः ॥ ५३ ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०–सुग्रीवेणेति । सुग्रीवेण समानशोकः काकुत्स्थो रामः दीनो भूत्वा सुग्रीवेण प्रेतकार्याणि अकारयत् ॥५३॥

गो० टी०–सुग्रीवेणेति । अनेन रामः सहैवागत इत्यवगम्यते ॥ ५१ ॥

रा० टी०–तत इति । ततः प्रेतकृत्यसाधनानन्तरम् अप्रयपौरुषम् अतिबलवन्तं प्रकाशं प्रसिद्धम् इक्ष्वाकुवरेषुणा हतं तं वालिनं प्रदीप्य विधिवत्संदह्य दीप्ताग्निसमौजसं सलक्ष्मणं रामं हरिः सुग्रीवः उपेयिवान् प्राप ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किधाकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

गो० टी०–ततस्त्विति । प्रकाशं प्रसिद्धं प्रदीप्य दग्ध्वा हरिः सुग्रीवः । अन्ये पुरं प्रविविशुरित्यर्थसिद्धम् । यद्यपि तिर्यगधिकरणरीत्या तिरश्चां न शास्त्रविहितसंस्काराधिकारः तथापि देवांशसंभूतानां तिर्यग्वस्थामात्रभाजां वेदाध्ययनसंयोगादेवक्षत्रजातत्वात् संस्कारार्हताऽस्तीति बोध्यम् ॥ ५२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

१–५] ति० टी०–क्लिन्नवाससमार्द्रवाससम् । शाखामृगमहामात्रा वानरबलप्रधानाः ॥ १–५ ॥

रा० टी०–सुग्रीवकर्तृकागमनानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । क्लिन्नवाससम् आर्द्रवस्त्रयुक्तं सुग्रीवं शाखामृगमहामात्राः शाखामृगमहस्य सकलवानरपूज्यस्य सुग्रीवस्य

---

१ ते इति गो. पाठः । २ पूर्वं प्लवङ्गमाः इति गो. पाठः । ३ शीतेति गो. पाठः । ४ हीत्यधिकम् गो. पाठे । ५ वालिने इति गो. पाठः । ६ त्विति गो. पाठः । ७ हनुमानिति गो. पाठः । ८ सुग्रीव इति गो. पाठः । ९ अर्धमेतत् गो. नास्ति । १० वानराणामिति गो. पाठः । ११ प्राप्त इति गो. पाठः ।

संविधास्यति कार्याणि सर्वाणि सुहृदृणः । स्नातोऽयं विविधैर्गन्धैरौषधैश्च यथाविधि ॥ ६ ॥
अर्चयिष्यति माल्यैश्च रत्नैश्च त्वां विशेषतः । इमां गिरिगुहां रम्यामभिगन्तुं त्वमर्हसि ॥ ७ ॥
कुरुष्व स्वामिसंबन्धं वानरान्संप्रहर्षय । एवमुक्तो हनुमता राघवः परवीरहा ॥ ८ ॥
प्रत्युवाच हनूमन्तं बुद्धिमान्वाक्यकोविदः । चतुर्दश समाः सौम्य ग्रामं वा यदि वा पुरम् ॥ ९ ॥
न प्रवेक्ष्यामि हनुमन्पितुर्निर्देशपारगः । सुसमृद्धां गुहां दिव्यां सुग्रीवो वानरर्षभः ॥ १० ॥
प्रविष्टो विधिवद्वीरः क्षिप्रं राज्येऽभिषिच्यताम् । एवमुक्त्वा हनूमन्तं रामः सुग्रीवमब्रवीत् ॥ ११ ॥
वृत्तज्ञो वृत्तसंपन्नमुदारबलविक्रमम् । इममप्यङ्गदं वीरं यौवराज्येऽभिषेचय ॥ १२ ॥
ज्येष्ठस्य हि सुतो ज्येष्ठः सदृशो विक्रमेण च । अङ्गदोऽयमदीनात्मा यौवराज्यस्य भाजनम् ॥ १३ ॥
पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः । प्रवृत्ताः सौम्य चत्वारो मासा वार्षिकसंज्ञिताः ॥ १४ ॥
नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम् । अस्मिन्वत्स्याम्यहं सौम्य पर्वते सहलक्ष्मणः ॥ १५ ॥

अमात्राः मन्त्रिणः परिवार्य उपतस्थिरे सुग्रीवेण सह जग्मुः॥१॥

गो० टी०–अथ सुग्रीवाभिषेकः षड्भिः–तत इत्यादि । क्लिन्नवाससम् आर्द्रवस्त्रं सद्यःस्नानादिति भावः । शाखामृगमहामात्राः वानररूपा मन्त्रिणः ॥ १ ॥

रा० टी०–अभिगम्येति । अक्लिष्टकारिणं क्लेशाभावेन सकलकर्मप्रवर्तनशीलं रामम् अभिगम्य प्राप्य सर्वे सुग्रीवप्रभृतयः पितामहं ब्रह्माणम् ऋषय इव प्राञ्जलयः प्रणयसूचकबद्धयुगलकराः सन्तः स्थिताः ॥ २ ॥

रा० टी०–तत इति । ततः रामसमीपप्राप्त्यनन्तरं काञ्चनशैलाभः सुमेरुसदृशः तरुणार्ककनिभाननः तरुणसूर्यसदृशमुखः हनुमान् अब्रीत् ॥ ३ ॥

गो० टी०–अभिगम्येति । सर्वे सुग्रीवादयः ॥ २॥३ ॥

रा० टी०–तद्वचनाकारमह–भवदिति । सुदंष्ट्राणां तीक्ष्णदंष्ट्राविशिष्टानां संपन्नबलशालिनाम् अतिबलवतां महात्मनां वानराणां सुदुष्प्रापं प्राप्तुमशक्यं पितृपैतामहं महदिदं राज्यं भवत्प्रसादात् प्राप्तं सुग्रीवेणेति शेषः। सार्धश्लोक एकान्वयी॥४॥

रा० टी०–भवतेति । भवता समनुज्ञातः सुहृद्गणः सुग्रीवः नगरं किष्किन्धां प्रविश्य सर्वाणि कार्याणि राज्ञा कर्तव्यानि संविधास्यति ॥ ६ ॥

गो० टी०–भवत्प्रसादादिति । वानराणां राज्यमित्यन्वयः ॥ ४ ॥ ६ ॥

६–७] ति० टी०–कार्याणि राजकार्याणि । यथाविधि ज्ञातो राज्याभिषेकाभिधिक्तः ॥ ६ ॥ ७ ॥

रा० टी०–स्नात इति । गन्धैरौषधैश्च स्नातोऽयं सुग्रीवः माल्यैः रत्नैश्च त्वां विशेषतोऽर्चयिष्यति अतः गिरिगुहां किष्किन्धामितो गन्तुमर्हसि । सार्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०–अतिनिपुणतया हनुमान् प्रथमं संग्रहेण विज्ञाप्य तच्छ्रुण्वति रामे पुनर्विशदमाह–स्नात इति ॥ ६ ॥

गो० टी०–इमामिति । गिरिगुहां किष्किन्धाम् । वानराणां स्वामिना संबन्धं कुरु सुग्रीवं वानरराजं कुर्वित्यर्थः ॥७—११॥

८–१०] ति० टी०–स्वामिसंबन्धं वानरस्वामित्वसंबन्धम् । सुग्रीवस्य राज्याभिषेकेणेति शेषः ॥ ८–१० ॥

रा० टी०–कुरुष्वेति । स्वामिसंबन्धं सुग्रीवे वानरनिरूपितस्वामित्वसंसर्गं कुरुष्व सुग्रीवं राज्ये स्थापयेत्यर्थः, अत एव वानरान् संप्रहर्षय । अर्धं पृथक्–एवमिति । हनुमता एवमुक्तो राघवः हनूमन्तं प्रत्युवाच । अर्धद्वयमेकान्वयि ॥ ८ ॥

रा० टी०–तद्वचनाकारमाह–चतुर्दशेति । हे हनुमन्! पितुः निर्देशपारगः आज्ञानिर्वाहकोऽहं चतुर्दश समाः वर्षाणि ग्रामं पुरं च न प्रवेक्ष्यामि ॥ ९ ॥

रा० टी०–नन्वं तर्हि सुग्रीवोऽपि इहैव तिष्ठतु इत्यत आह–सुसमृद्धामिति । गुहां किष्किन्धां प्रविष्टः मदाज्ञया संप्राप्तः सुग्रीवः क्षिप्रं राज्ये राज्यासने अभिषिच्यतामभिषेकेण प्राप्यताम् ॥ १० ॥

११–१२] ति० टी०–अभिषिच्यताम् । मदाज्ञया त्वयेति शेषः ॥ ११ ॥ १२ ॥

रा० टी०–एवमिति । हनूमन्तमेवमेवमुक्त्वा रामः सुग्रीवमब्रवीत् ॥ ११ ॥

रा० टी०–तद्वचनाकारमाह–वृत्तज्ञ इति । वृत्तज्ञः लोकशास्त्रवृत्तान्ताभिज्ञस्त्वसदृशबलविक्रमम् उदारौ अधिकावित्यर्थः बलविक्रमौ पराक्रमप्रतापौ यस्य तमङ्गदं यौवराज्ये अभिषेचय ॥ १२ ॥

गो० टी०–इममपीत्यादि । भाजनम् योग्यमित्यर्थः १२

१३] ति० टी०–यतो ज्येष्ठस्य ज्येष्ठः सुतो विक्रमेण ज्येष्ठस्य सदृशश्च, तस्मायौवराज्ये योग्यः ॥ १३ ॥

रा० टी०–तत्र हेतुमाह–ज्येष्ठस्येति । ज्येष्ठस्य भ्रातुः ज्येष्ठः सुतः अत एव विक्रमेण सदृशः अत एव अदीनात्मा अयमङ्गदः यौवराज्यस्य भाजनं पात्रम् ॥ १३ ॥

१४–१५] ति० टी०–सीतान्वेषणोद्योगं सुग्रीवस्या-

१ जन इति गो. पाठः । २ इत इति गो. रा. पाठः । ३ हर्षयीत्रति गो. पाठः । ४ पालक इति गो. पाठः । ५ रम्यामिति गो. पाठः । ६ वीरेति गो. पाठः । ७ स इति गो. पाठः । ८ ते इति गो. पाठः । ९ संज्ञिका इति गो. पाठः ।

इयं गिरिगुहा रम्या विशाला युक्तमारुता । प्रभूतसलिला सौम्य प्रभूतकमलोत्पला ॥ १६ ॥
कार्तिके समनुप्राप्ते त्वं रावणवधे यत । एष नः समयः सौम्य प्रविश त्वं स्वमालयम् ॥ १७ ॥
अभिषिञ्चस्व राज्ये च सुहृदः संप्रहर्षय । इति रामाभ्यनुज्ञातः सुग्रीवो वानरर्षभैः ॥ १८ ॥
प्रविवेश पुरीं रम्यां किष्किन्धां वालिपालिताम् । तं वानरसहस्राणि प्रविष्टं वानरेश्वरम् ॥ १९ ॥
अभिवार्य प्रविष्टानि सर्वतः प्लवगेश्वरम् । ततः प्रकृतयः सर्वा दृष्ट्वा हरिगणेश्वरम् ॥ २० ॥
प्रणम्य मूर्ध्ना पतिता वसुधायां समाहिताः । सुग्रीवः प्रकृतीः सर्वा संभाष्योत्थाप्य वीर्यवान ॥ २१ ॥

लक्ष्याह—पूर्वोऽयमिति । ये चत्वारो वार्षिकसंज्ञकाः प्रहृत्तास्तेषामयं पूर्व इति योजना ॥ १४ ॥ १५ ॥

रा० टी०—नन्वं भवत्कार्यसाधनमन्तरा सुग्रीवाभिषेको नोचित इत्यत आह—पूर्व इति । वार्षिकसंज्ञकाः वार्षिकवृष्टिकर्तृत्वं तस्य संज्ञा ज्ञानं ज्ञाता येषु ते ये चत्वारो मासाः प्रवृत्ताः संप्राप्ताः । किंच प्रकृष्टवृत्तान्तवन्तः राजादियात्रानिवर्तका इत्यर्थः, तेषां मध्ये सलिलागमः अतिवृष्टिप्रवर्तकः वार्षिकः वर्षर्तुसंबन्धी पूर्वोऽयं श्रावणो मासः वर्तते इति शेषः, अतः अयमुद्योगसमयः सीतान्वेषणोद्योगकालो न अतस्त्वं पुरीं किष्किन्धां प्रविश सलक्ष्मणोऽहं तु अस्मिन्पर्वते वत्स्यामि । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—अस्त्वभिषेकः सीतान्वेषणरावणवधादिकं प्रत्युद्योगः क्रियत इत्याशङ्क्याह—पूर्व इत्यादि । पूर्वः वर्षत्वं-पेक्षया प्रथमः वर्षाः वर्षतुः 'स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा' इत्यमरः । तत्र भवो वार्षिकः । 'द्वौ द्वौ मार्गादिमासौ सावृतुः' इति श्रावणभाद्रपदौ वर्षर्तुः तदेकदेशत्वाच्छ्रावणो वार्षिक इत्युच्यते "वर्षाभ्यष्ठक्" इति ठक्प्रत्ययः । वार्षिकसंज्ञिकाश्चत्वारो मासा इति आश्वयुजाषाढाभ्यां चतुष्टमिति ज्ञेयं छत्रिन्यायात् । वर्षर्तुसत्त्वाद्वर्षानन्तरकालत्वाच्च चत्वारोऽपि युद्धयोग्या न भवन्ति । कश्चित्तु—"पञ्च वै मासा" इति श्रुतिपक्षमाश्रित्य चत्वारो वार्षिका मासा इत्युक्तम् । श्रावणः प्रथमो मास इत्यत्रापि प्रथमः पञ्च इत्यर्थः । चत्वारो वार्षिका मासा गता वर्षशतोपमा इत्युपसंहारादित्याह ॥ १३–१५ ॥

१६] ति० टी०—युक्तमारुता मारुतेन युक्तेत्यर्थः । अस्यां स्थास्यामीति शेषः ॥ १६ ॥

रा० टी०—इयमिति । विशाला विस्तीर्णा युक्तमारुता नित्यं मारुतयुक्ता प्रभूतसलिला बह्वनिर्झरवतीत्वे बहुसलिलविशिष्टा प्रभूतानि अत्यन्तं संजातानि कमलोत्पलानि यस्यां सा अत एव रम्या रन्तुं योग्या इयं गिरिगुहा, अस्तीति शेषः । एतेन तस्याः स्थितियोग्यता सूचिता ॥ १६ ॥

१७-२०] ति० टी०—यत यतस्व । एष नः समय इति आश्विनेऽतीतयत्नारम्भरूपः संकेत इत्यर्थः ॥ १७–२० ॥

रा० टी०—कार्तिके इति । कार्तिके समग्रप्राप्ते सति रावणवधे यत प्रयत्नं कुरु, एष नः समयः अस्मत्कृतः संकेतः बोद्धव्य इति शेषः, अतस्त्वं स्वमालयं प्रविश स्वराज्ये प्रविश्य सुहृदः संप्रहर्षय । सार्धश्लोक एकान्वयी ॥ १७ ॥

रा० टी०—इतीति । इति रामाभ्यनुज्ञातः सुग्रीवः किष्किन्धां प्रविवेश ॥ १८ ॥

रा० टी०—तमिति । प्रविष्टं प्रवेशाय गच्छन्तं वानरेश्वरं सुग्रीवं प्रहृष्टानि वानरसहस्राणि अभिवाय सर्वतः पर्यवारयन्[4]१९

गो० टी०—कार्तिक इति । कार्तिके मासि समग्रप्राप्ते समीपं प्राप्ते आश्वयुजान्त इत्यर्थः । यत यतस्व सेनासंनहनं कुरु । कार्तिकशब्दस्य आश्वयुजान्तपरत्वं स्वयमेव वक्ष्यति—'वयमाश्वयुजे मासि पित्र्याक्षप्रतिचोदिताः' इति । प्रचोदनं संनहनं न तु निर्गमः निर्गमस्तु मार्गशीर्षे । स्वसंकेतितकार्तिकातिक्रमादेव रामस्य सुग्रीवे कोपो लक्ष्मणप्रेषणं च । स्वयंप्रभाविलनिर्गमनानन्तरं द्रुमान् वासन्तिकान् दृष्ट्वेत्येतद्वसन्तपुष्पोद्गमोपक्रमभूतपत्रविगलनहेतुफाल्गुनापेक्षया । पक्षान्तरे फाल्गुनचैत्रयोर्वसन्तत्वोक्तेर्वा । अयमत्र क्रमोऽनुसंधेयः—'उत्तरस्यादिना पूर्वस्यापि जानीयात्' इति न्यायेन उत्तरस्योत्तरस्य ग्रहणात् पूर्वपूर्वकालसंख्याज्ञापनं वाल्मीकेः शैली । तथा च चैत्रे रामस्य साकेतान्निर्गमः । अगस्त्याश्रमागमनात्पूर्वं दश संवत्सरा गता इत्युक्तम् । अथ पञ्चवट्यां वर्षत्रयानन्तरं चैत्रे प्राप्ते शूर्पणखानासिकाच्छेदनखरवधादिकं कृतमित्यवगम्यते । रावणेन च मारीचवचनादिना किंचिद्विलम्ब्य तस्मिन्नेव चैत्रे सीता हृता । सीताविरहेण दूयमानस्य रामस्य वसन्तवर्णने चैत्रवनानिल इत्युक्तेः लङ्कायां सीतायाः संवत्सरवासोक्तेश्च पुनः फाल्गुने हि रावणवधः, आषाढे वालिवधः शरदि सेनासंनहनम्, मार्गशीर्षे वानरप्रस्थापनम्, स्वयंप्रभाविले बहुकालयापनम् 'कालश्च नो महान् यातः' इत्युक्तेः । बहिर्निर्गमनानन्तरं फाल्गुनशुद्धत्रयोदश्यां हनुमतः समुद्रतरणम्, चतुर्दश्यां पुनरागमनम् (?) पौर्णमास्यां दण्डयात्रेत्यादि । अन्यद्युद्धकाण्डे वक्ष्यते । समयः संकेतः ॥ १६–१९ ॥

रा० टी०—तत इति । ततः सुग्रीवप्रवेशानन्तरं हरिगणेश्वरं सुग्रीवं दृष्ट्वा सर्वाः प्रकृतयः मूर्ध्ना प्रणम्य वसुधायां समाहिताः संस्थिताः ॥ २० ॥

गो० टी०—तत इति । प्रणम्येति । मूर्ध्ना प्रणम्य वसुधायां पतिताः समाहिताः अनन्यमनस्काः ॥ २० ॥

२१] ति० टी०—मूर्ध्ना प्रणम्य नम्रीभूय वसुधायां दण्डवत्पतिताः । उत्थाप्य वसुधायां पतिता इति शेषः ॥ २१ ॥

१ चित्रः स्वेति गो. पाठः । २ अपिच इति गो. पाठः । ३ वार्षेति गो. वाथ प्रहृष्टानीति रा. पाठः । ४ पर्यवारयन्निति गो. पाठः ।

भ्रातुरन्तःपुरं सौम्यं प्रविवेश महाबलः । प्रविष्टं भीमविक्रान्तं सुग्रीवं वानरर्षभम् ॥ २२ ॥
अभ्यषिञ्चन्त सुहृदः सहस्राक्षमिवामराः । तस्य पाण्डुरमाजह्रुश्छत्रं हेमपरिष्कृतम् ॥ २३ ॥
शुक्ले च वालव्यजने हेमदण्डे यशस्करे । तथा रत्नानि सर्वाणि सर्वबीजौषधानि च ॥ २४ ॥
सक्षीराणां च वृक्षाणां प्ररोहान्कुसुमानि च । शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनम् ॥ २५ ॥
सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च । चन्दनानि च दिव्यानि गन्धांश्च विविधान्बहून् ॥ २६ ॥
अक्षतं जातरूपं च प्रियङ्गुमधुसर्पिषी । दधि चर्म च वैयाघ्रं परार्ध्यौ चाप्युपानहौ ॥ २७ ॥
समालम्भनमादाय गोरोचनं मनःशिलाम् । आजग्मुस्तत्र मुदिता वराः कन्याश्च षोडश ॥ २८ ॥
ततस्ते वानरश्रेष्ठमभिषेक्तुं यथाविधि । रत्नैर्वस्त्रैश्च भक्ष्यैश्च तोषयित्वा द्विजर्षभान् ॥ २९ ॥
ततः कुशपरिस्तीर्णे समिद्धं जातवेदसम् । मन्त्रपूतेन हविषा हुत्वा मन्त्रविदो जनाः ॥ ३० ॥
ततो हेमप्रतिष्ठाने वरास्तरणसंवृते । प्रासादशिखरे रम्ये चित्रमाल्योपशोभिते ॥ ३१ ॥
प्राङ्मुखं विधिवन्मन्त्रैः स्थापयित्वा वरासने । नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समन्ततः ॥ ३२ ॥
आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः । अपः कनककुम्भेषु निधाय विमलं जलम् ॥ ३३ ॥

रा० टी०—सुग्रीव इति । सुग्रीवः प्रकृतीः प्रजाः संभाष्य संबोध्य उत्थाप्य च भ्रातुः सौम्यमन्तःपुरं प्रविवेश ॥ २१ ॥

गो० टी०—सुग्रीव इति । भ्रातुरन्तःपुरं प्रविवेशेति तारां संमान्य स्ववशीकरणार्थमिति भावः ॥ २१ ॥ २२ ॥

२२–२४] ति० टी०—प्रविष्टं भीमविक्रान्तमिति 'प्रविश्य त्वभिनिष्क्रान्तम्' इति पाठे प्रविश्यान्तःपुरगतशोकादिकं दृष्ट्वाऽभिषेकाय तु पुनर्निष्क्रान्तं प्रतिनिवृत्तं सभामागतमित्यर्थः ॥ २२–२४ ॥

२५] ति० टी०—क्षीरवृक्षप्ररोहा अधोजटाः ॥ २५ ॥

२६–२७] ति० टी०—गन्धान्गन्धद्रव्याणि ॥२६॥२७॥

रा० टी०—प्रविष्टमिति । भीमविक्रान्तं भीमो रिपुभयंकरो विक्रान्तो विक्रमो यस्य तं सुग्रीवं सहस्राक्षममराः इव सुहृदः अभ्यषिञ्चन्त ॥ २२ ॥

रा० टी०—तत्प्रकारमाह—तस्येत्यादिभिः । हेमपरिष्कृतं पाण्डुरं छत्रं हेमदण्डे वालव्यजने केशमयव्यजने चामरे चेत्यर्थः, तस्य समीपमाजह्रुः ॥ २३ ॥

रा० टी०—तथेति । रत्नादीनि षोडश कन्याश्चादाय आजग्मुः, वानरा इति शेषः । तत्र प्ररोहा अधोजटाः, गन्धाः गन्धद्रव्याणि, जातरूपं सुवर्णं, परार्ध्ये बहुमूल्ये समालम्भनमनुलेपनविशेषः । सार्धश्लोकचतुष्टयमेकान्वयि ॥ २४–२८ ॥

रा० टी०—तत इति । ते हनुमदादयः वानरश्रेष्ठमभिषेक्तुं रत्नाद्यैर्द्विजर्षभान् तोषयित्वा आसन्निति शेषः ॥ २९ ॥

गो० टी०—तस्येत्यादि । प्ररोहान् पल्लवान् । अनुलेपनं कर्पूरादि । गन्धाः अगरुप्रभृतयः । अक्षतम् जातरूपम् । अक्षततण्डुलं हरिद्राभिश्रम् । प्रियङ्गुः सूक्ष्मधान्यविशेषः । वाराही वराहचर्मविकृती । " सुपां सुलुक् " इत्यादिना पूर्वसवर्णदीर्घः ॥ २३–२६ ॥

२८–२९] ति० टी०—समालम्भनमनुलेपनद्रव्यम् । तदेवाह—गोरोचनमित्यादि ॥ २८ ॥ २९ ॥

गो० टी०—समालम्भनमिति । समालम्भनम् अनुलेपनविशेषः । 'समालम्भो विलेपनम्' इत्यमरः । रोचनां गोरोचनाम् । समनःशिलां शैलधातुविशेषसंहितं तिलकसाधनं मनःशिला ॥ २७ ॥

गो० टी०—ततस्ते वानरश्रेष्ठमित्यारभ्य वसवो वासवं यथेत्यन्तमेकं वाक्यम् । यथाकालं विहितकालमनतिक्रम्य । यथाविधि यथाक्रमं द्विजर्षभान् याजनार्थमाहूतान् । समिद्धं ज्वलितं जातवेदसम् अग्निं । मन्त्रविदः वानरपुरोहिताः हैमप्रतिष्ठाने हेममयपादयुक्ते वरासनविशेषणमेतत् । नदीनदेभ्यस्तीर्थेभ्यः समुद्रेभ्यश्च अपः आहृत्य आनीय संहृत्य संमिश्रीकृत्य तद्विमलं जलं कनककुम्भेषु निधाय तेभ्यो दृषभशृङ्गादिभिरुद्धृत्य शास्त्रदृष्टेन विधिना क्रमेण महर्षिविहितेन कल्पसूत्रविहितेन च विधिना अभ्यषिञ्चन्त ॥ २८–३३ ॥

३०–३१] ति० टी०—ततः कुशेति । अनेनाग्निसाध्यकर्माधिकारं तेषां दर्शयति । मनुष्यसदृशसर्वव्यवहाराद्देवज्ञत्वाच्च ॥ ३० ॥ ३१ ॥

३२] ति० टी०—मन्त्रैः स्थापयित्वा । 'वसवस्त्वा गायत्रेण च्छन्दसा' इत्यादिमन्त्रैरासने स्थापयित्वेत्यर्थः ॥ ३२ ॥

३३] ति० टी०—अप आहृत्य मिलिताः कृत्वा विमलं जलं कुम्भेषु निधायेति संबन्धः ॥ ३३ ॥

१ प्रविश्य त्वभिनिष्क्रान्तमिति गो. पाठः । २ प्लवगेश्वरमिति गो. पाठः । ३ औषधैरपीति गो. पाठः । ४ वाराहीति गो. पाठः । ५ रोचनां समनः शिलामिति गो. गोरोचनमनःशिलामिति रा. पाठः । ६ यथाकालमिति गो. पाठः । ७ विमलाः शुभा इति गो. पाठः ।

शुभैर्ऋषभशृङ्गैश्च कलशैश्चैव काञ्चनैः । शास्त्रदृष्टेन विधिना महर्षिविहितेन च ॥ ३४ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः । मैन्दश्च द्विविदश्चैव हनूमाञ्जाम्बवांस्तथा ॥ ३५ ॥
अभ्यषिञ्चत सुग्रीवं प्रसन्नेन सुगन्धिना । सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ३६ ॥
अभिषिक्ते तु सुग्रीवे सर्वे वानरपुंगवाः । प्रचुक्रुशुर्महात्मानो हृष्टाः शतसहस्रशः ॥ ३७ ॥
रामस्य तु वचः कुर्वन्सुग्रीवो वानरेश्वरः । अङ्गदं संपरिष्वज्य यौवराज्येऽभ्यषेचयत् ॥ ३८ ॥
अङ्गदे चाभिषिक्ते तु सानुक्रोशाः प्लवङ्गमाः । साधु साध्विति सुग्रीवं महात्मानो ह्यपूजयन् ॥ ३९ ॥
रामं चैव महात्मानं लक्ष्मणं च पुनः पुनः । प्रीताश्च तुष्टुवुः सर्वे तादृशे तत्र वर्तिनि ॥ ४० ॥
हृष्टपुष्टजनाकीर्णा पताकाध्वजशोभिता । बभूव नगरी रम्या किष्किन्धा गिरिगह्वरे ॥ ४१ ॥
निवेद्य रामाय तदा महात्मने महाभिषेकं कपिवाहिनीपतिः ।
रुमां च भार्यामुपलभ्य वीर्यवानवाप राज्यं त्रिदशाधिपो यथा ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षड्विंशः सर्गः ॥ २६ ॥

३४-३६] ति० टी०-महर्षिविहितेन बौधायनादिविहितेन ॥ ३४-३६ ॥

रा० टी०-तत इति । ततः प्राप्तसंतोषानन्तरं मन्त्रविदो जनाः द्विजवर्षभाः कुशपरिस्तीर्णं परितः कुशैर्वीक्षिप्तं समिद्धं प्रज्वलितं जातवेदसं वह्निं मन्त्रपूतेन हविषा हुत्वा अवर्तन्त इति शेषः ॥ ३० ॥

रा० टी०-तत इति । रम्ये प्रासादशिखरे प्रासादाकारभूते विद्यमाने हेमप्रतिष्ठाने हेम्नः प्रतिष्ठानानि पादाः यस्मिन् वरास्तरणसंस्तृते आसने राजपीठे सुग्रीवं मन्त्रैः विधिवत् प्राङ्मुखं स्थापयित्वा तीर्थेभ्यः पुण्यहेतुभ्यः नद्यादिभ्यः शुभैः ऋषभशृङ्गादिभिराहृत्य संस्थापितानि अपो जलानि कनककुम्भेषु निधाय प्रसन्नेन प्रसादेनोपलक्षिताः वानरर्षभाः गजादयः शास्त्रदृष्टेन शास्त्रोक्तेन विधिना महर्षिविहितेन महर्षीणामाज्ञया च सुग्रीवमभ्यषिञ्चन्त । तत्र दृष्टान्तः सुगन्धिना सलिलेन सहस्राक्षं सहस्रसंख्याकनयनविक्षिप्तं वासवमिन्द्रं वसवो यथा । श्लोकषट्कमेकान्वयि ॥ ३१-३६ ॥

३७-३९] ति० टी०-हृष्टाः प्रचुक्रुशुः किलकिलाशब्दं कृतवन्तः ॥ ३७-३९ ॥

रा० टी०-अभिषिक्त इति । सुग्रीवे अभिषिक्ते सति वानरपुंगवाः हृष्टाः सन्तः प्रचुक्रुशुः प्रभूतं स्वजातीयशब्दं चक्रुः ३७

रा० टी०-रामस्येति । सुग्रीवः रामस्य वचः रामकर्तृकाज्ञां कुर्वन् सन् अङ्गदं संपरिष्वज्य यौवराज्ये अभ्यषेचयत् ॥ ३८ ॥

रा० टी०-अङ्गद इति । अङ्गदे अभिषिक्ते यौवराज्याभिषेकं प्राप्ते सति सानुक्रोशाः दयावन्तः प्लवङ्गमाः साधु साध्विति सुग्रीवमपूजयन् ॥ ३९ ॥

गो० टी०-अङ्गद इति । सानुक्रोशाः अङ्गदे सदयाः ३८

४०-४२] ति० टी०-तादृशे तत्रवर्तिनि । अभिषिक्ते सुग्रीवेऽङ्गदे च, तत्र किष्किन्धायां वर्तिनि वर्तमाने सतीत्यर्थः ॥ ४०-४२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षड्विंशः सर्गः ॥ २६ ॥

रा० टी०-राममिति । तादृशे विधिपूर्वके तत्र तस्मिन्नभिषेके वर्तति वर्तमाने सति सर्वे वानराः समं लक्ष्मणं च पुनः पुनस्तुष्टुवुः ॥ ४० ॥

गो० टी०-रामं चैवेति । तादृशे सुग्रीवाङ्गदाभिषेकरूपोत्सवे वर्तति वर्तमाने सति ॥ ३९ ॥

रा० टी०-हृष्टेति । गिरिगह्वरे विद्यमाना किष्किन्धा हृष्टपुष्टजनाकीर्णा अत एव पताकाध्वजशोभिता अत एव रम्या बभूव ॥ ४१ ॥

गो० टी०-हृष्टेति । पताकाध्वजयोर्भेद उक्तः ॥ ४० ॥

रा० टी०-निवेद्येति । कपिवाहिनीपतिः वानरसेनाधीशः सुग्रीवः महाभिषेकं रामाय निवेद्य रुमां भार्यामुपलभ्य प्राप्य त्रिदशाधिप इव राज्यमवाप ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षड्विंशः सर्गः ॥ २६ ॥

गो० टी०-निवेद्येति । निवेद्य रामसमीपमागत्य निवेद्येत्यर्थः ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

---

१ शुभैर्वृषभेति गो. पाठः । २ अपीति गो. पाठः । ३ हनुमानिति गो. पाठः । ४ नल इति गो. पाठः । ५ तत्रेति गो. पाठः । ६ वर्ततीति गो. रा. पाठः । ७ प्रतिलभ्येति गो. पाठः ।

सप्तविंशः सर्गः ।

प्रस्रवणगिरिगुहां प्राप्तो रामस्तत्र सुनिवासानुगुणसंपदं दृष्ट्वोवास । कदाचिच्चन्द्रदर्शनाद्बुद्धीपनैरुद्दीपितानङ्गतापं रामं लक्ष्मणः समाश्वासयति ।

अभिषिक्ते तु सुग्रीवे प्रविष्टे वानरे गुहाम् । आजगाम सह भ्रात्रा रामः प्रस्रवणं गिरिम् ॥ १ ॥
शार्दूलमृगसंघुष्टं सिंहैर्भीमरवैर्वृतम् । नानागुल्मलतागूढं बहुपादपसंकुलम् ॥ २ ॥
ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितम् । मेघराशिनिभं शैलं नित्यं शुचिकरं शिवम् ॥ ३ ॥
तस्य शैलस्य शिखरे महतीमायतां गुहाम् । प्रत्यगृह्णत वासार्थं रामः सौमित्रिणा सह ॥ ४ ॥
कृत्वा च समयं रौमः सुग्रीवेण सहानघः । कालयुक्तं महद्वाक्यमुवाच रघुनन्दनः ॥ ५ ॥
विनीतं भ्रातरं भ्राता लक्ष्मणं लक्ष्मिवर्धनम् । इयं गिरिगुहा रम्या विशाला युक्तमारुता ॥ ६ ॥
अस्यां वैत्स्याम सौमित्रे वर्षरात्रमरिन्दम । गिरिशृङ्गमिदं रम्यमुत्तमं पार्थिवात्मज ॥ ७ ॥
श्वेताभिः कृष्णताम्राभिः शिलाभिरुपशोभितम् । नानाधातुसमाकीर्णं नदीदर्दुरसंयुतम् ॥ ८ ॥
विविधैर्वृक्षषण्डैश्च चारुचित्रलतायुतम् । नानाविहगसंघुष्टं मयूरवरनादितम् ॥ ९ ॥
मालतीकुन्दगुल्मैश्च सिन्दुवारैः शिरीषकैः । कदम्बार्जुनसर्जैश्च पुष्पितैरुपशोभितम् ॥ १० ॥

१] ति० टी०–गुहां किष्किन्धाख्याम् । प्रस्रवणं तदाख्यम् ॥ १ ॥

रा० टी०–रामवृत्तान्तमुपक्रमते–अभिषिक्त इति। अभिषिक्ते वानरे सुग्रीवे गुहां प्रविष्टे रामं संप्रार्थ्य याते सति रामः प्रस्रवणं गिरिमाजगाम ॥ १ ॥

गो० टी०–अथ रामस्यैकान्तवाससमुद्भूतसीताविरहशोकप्रशमनं लक्ष्मणेन क्रियते सप्तविंशे–अभिषिक्त इत्यादि । शैलं शिलामयमिति मृच्छिलोभयमयगिरिभ्यो व्यावृत्तिः, अतो न गिरिं शैलमिति पुनरुक्तिः ॥ १–४ ॥

२–३] ति० टी०–गिरिवर्णनम्—शार्दूलेति ॥२॥३॥

रा० टी०–गिरिं वर्णयन्नाह–शार्दूलेति। शार्दूलमृगसंघुष्टं शार्दूलैः मृगैश्च शब्दितं भीमरवैः सिंहैर्वृतं नानागुल्मलतागूढमनेकविधैर्गुल्मैर्लताभिश्च आच्छादितम् ॥ २ ॥

रा० टी०–ऋक्षादिभिश्च निषेवितं मेघराशिनिभं शुचिकरं दर्शनादिकर्तृणां पवित्रकारकं शिवं मङ्गलप्रदं यत् शैलम् ॥ ३ ॥

४] ति० टी०–प्रत्यगृह्णत प्रत्यगृह्णात् ॥ ४ ॥

रा० टी०–तस्य शैलस्य शिखरे महतीं गुहां रामः प्रत्यगृह्णीत स्वीचकार ॥ ४ ॥

५] ति० टी०–समयं पूर्वोक्तम् । कालयुक्तं तत्कालोचितम् ॥ ५ ॥

रा० टी०–कृत्वेति । अनघः शरणागतानामघनिवर्तकः सुग्रीवेण सह समयं कृत्वा प्रस्रवणमागत इति शेषः, रामः कालयुक्तं कालोचितं वाक्यं भ्रातरं लक्ष्मणमुवाच । सार्धश्लोक एकान्वयी ॥ ५ ॥

गो० टी०–कृत्वेति । कालयुक्तं तत्कालोचितम् ॥ ५ ॥

६] ति० टी०–युक्तमारुतोचितवाता ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–इयमिति । इयं गिरिगुहा विशाला युक्तमारुता नित्यं मारुतविशिष्टा अत एव रम्या अतः अस्यां गुहायां वर्षरात्रं वार्षिकान् मासान् इत्यर्थः, वत्स्याम ॥ ६ ॥

गो० टी०–इयमिति । युक्तमारुता उचितमारुता यावदपेक्षमारुतेत्यर्थः । वसाव लोडुत्तमद्विवचनम् । वर्षरात्रमिति अच् समासान्त आर्षः, जात्येकवचनम् ॥ ६ ॥

७] ति० टी०–वर्षरात्रं जातावेकवचनं वार्षिका मासा इत्यर्थः ॥ ७ ॥

८] ति० टी०–नदीसंबन्धिदर्दुरैः संयुतम् ॥ ८ ॥

रा० टी०–गिरिशृङ्गं वर्णयन्नाह–गिरीति । पार्थिवात्मज ! हे लक्ष्मण! श्वेतादिभिः शिलाभिः उपशोभितं नानाधातुभिः समाकीर्णं व्याप्तं नदीदर्दुरसंयुतं नदीसंसर्गिमण्डूकैर्विशिष्टम् ॥ ७ ॥ ८ ॥

गो० टी०–गिरिशृङ्गमित्यादि । कदम्बाः अर्जुनाः नदीसर्जाः ॥ ७–१० ॥

९–१०] ति० टी०–वृक्षषण्डैश्चारु सुन्दरम् ॥ ९ ॥ १० ॥

रा० टी०–वृक्षखण्डैस्तरुसमूहैः चारु रमणीयं चित्रलतावृत्तम् ॥ ९ ॥

रा० टी०–पुष्पितैः मालत्यादिभिः उपशोभितमत एव रम्यमिदमस्तीति शेषः, एतेनात्रैव वस्तव्यमिति सूचितम् । सार्धश्लोकत्रयमेकान्वयि ॥ १० ॥

१ गृह्णीतेति रा. पाठः । २ सौम्य इति गो. पाठः । ३ वसाव इति गो. पाठः । ४ दर्दुरनिर्झरशोभितमिति गो. पाठः । ५ खण्डैरिति रा. पाठः । ६ वृत्तमिति गो. रा. पाठः । ७ सिन्दुवारकुरण्टकैरिति गो. पाठः ।

इयं च नलिनी रम्या फुल्लपङ्कजमण्डिता । नातिदूरे गुहाया नौ भविष्यति नृपात्मज ॥ ११ ॥
प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति । पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति ॥ १२ ॥
गुहाद्वारे च सौमित्रे शिला समतला शिवा । कृष्णा चैवायता चैव भिन्नाञ्जनचयोपमा ॥ १३ ॥
[1]गिरिशृङ्गमिदं तात पश्य चोत्तरतः शुभम् । भिन्नाञ्जनचयाकारमम्भोधरमिवोदितम् ॥ १४ ॥
दक्षिणस्यामपि दिशि स्थितं श्वेतमिवाम्बरम् । कैलासशिखरप्रख्यं नानाधातुविराजितम् ॥ १५ ॥
प्राचीनवाहिनीं चैव नदीं भृशमकर्दमाम् । गुहायाः परतः पश्य त्रिकूटे जाह्नवीमिव ॥ १६ ॥
चन्दनैस्तिलकैः सालैस्तमालैरतिमुक्तकैः । पद्मकैः सरलैश्चैव अशोकैश्चैव शोभितम् ॥ १७ ॥
वानीरैस्तिमिदैश्चैव बकुलैः केतकैरपि । हिन्तालैस्तिनिशैर्नीपैर्वेतसैः कृतमालकैः ॥ १८ ॥
तीरजैः शोभिता भाति नानारूपैस्ततस्ततः । वसनाभरणोपेता प्रमदेवाभ्यलंकृता ॥ १९ ॥

११] ति० टी०–गुहाया नातिदूरे भविष्यति । भाविवारिपूरवृद्धया गुहासमीपवर्तिनी भविष्यतीत्यर्थः ॥ ११ ॥

रा० टी०–इयमिति । हे नृपात्मज ! फुल्लपङ्कजमण्डिता पुष्पितकमलैः शोभिता इयं नलिनी सरसी नौ आवयोः गुहायाः नातिदूरे समीपे इत्यर्थः, भविष्यति वृष्टिवशात्पूर्णतां प्राप्स्यतीत्यर्थः ॥ ११ ॥

गो० टी०–इयं चेति । नातिदूरे भविष्यतीत्यनेन वर्षाकालस्य प्रवृत्तत्वाद्वाविजलसमृद्धया समीपवर्तिनी भविष्यतीत्यर्थः ॥ ११ ॥

१२] ति० टी०–प्रागुदक्प्रवण ईशानदिङ्नम्रवति देशे वर्तमाना गुहा साधु सम्यग्भविष्यति, सुखसाधनमिति शेषः । पौरस्त्यवर्षवातप्रवेशाभावाच्च साधुत्वं बोध्यम् । तेन निर्ऋतिद्वारत्वं सूचितम् । पश्चाद्भागे चैवोन्नता, अत एव पुरोवातनिरोधकत्वान्निवाता च ॥ १२ ॥

रा० टी०–प्रागिति । प्रागुदक्प्रवणे ईशानदिशि निम्ने देशे विद्यमाना इयं गुहा साधु वासाय शोभना भविष्यति तेन ईशानदिग्भागे निम्नत्वादसंभवेन गुहाद्वाराभावः सूचितः अत एव पश्चात् नैर्ऋत्यदिग्भागे उन्नता एतद्दिग्द्वारिकेति तात्पर्यम् । अत एव निवाता प्रायो वातप्रवेशाभाववती भविष्यति एतेन प्रायो वातेरितवृष्टिजलकणसंसर्गाभावः सूचितः ॥ १२ ॥

गो० टी०–प्रागिति । प्रागुदक्प्रवणे देशे वर्तमाना गुहा साधु भविष्यति । प्रागुदक्प्रवणे देशे वर्तमानत्वाभिधानाद्गुहाया नैर्ऋत्याभिमुखद्वारत्वमुक्तम् । अत एव पौरस्त्यवर्षप्रवेशाभावेन साधुत्वमुक्तं भवति । इयं पश्चादुन्नता पश्चाद्भागोन्नता अत एव पुरोवातनिरोधकत्वान्निवाता च भविष्यति ॥ १२ ॥

१३] ति० टी०–गुहाद्वारे इति । तेन बहिरुपवेशनसौकर्यम् ॥ १३ ॥

रा० टी०–गुहेति । समतला निम्नोन्नतरहितमध्या शिवा स्थातॄणां कल्याणप्रदा आयता विशाला भिन्नाञ्जनचयोपमा विविक्तदेशस्थाञ्जनसमूह इव अत एव कृष्णा गुहाद्वारे शिलास्तीति शेषः ॥ १३ ॥

गो० टी०–गुहाद्वारे चेति । अस्मिन् श्लोके वर्तत इति शेषः ॥ १३ ॥

१४] ति० टी०–उत्तरत उत्तरभागे ॥ १४ ॥

रा० टी०–गिरेरिति । भिन्नाञ्जनचयाकारं विविक्तदेशस्थाञ्जनसमूहसदृशमुदितमुत्थितमम्भोधरं समुद्रमिव उत्तरतः उत्तरस्यां दिशि इदं गिरेः शृङ्गं पश्य ॥ १४ ॥

गो० टी०–गिरिशृङ्गमित्यादि । श्वेतमिव रूप्यमिव 'दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतम्' इत्यमरः । अपरम्, अपरं शृङ्गं पश्येति पूर्वेणान्वयः ॥ १४ ॥ १५ ॥

१५] ति० टी०–श्वेतमिवाम्बरं श्वेतवस्त्रमिव स्थितम् । 'श्वेतमिवापरम्' इति पाठेऽपरं शृङ्गं श्वेतमिव रूप्यमिव स्थितमित्यर्थः ॥ १५ ॥

रा० टी०–दक्षिणस्यामिति । श्वेतमम्बरं वस्त्रमिव कैलासशिखरप्रख्यं कैलासशृङ्गसदृशं नानाधातुविराजितं दक्षिणस्यामपि दिशि स्थितमिदं गिरेः शृङ्गं पश्येत्यन्वयः ॥ १५ ॥

१६] ति० टी०–त्रिकूटे पूर्वोक्तत्रिकूटाचले । जाह्नवीपदेन तत्रत्या जाह्नवीसदृशी मन्दाकिन्याख्या नदी ॥ १६ ॥

१७–१९] ति० टी०–अतिमुक्तः पुण्ड्रकः । पद्मकश्चन्दनभेदः सरलः पीतद्रुमः ॥ १७–१९ ॥

रा० टी०–प्राचीनेति । त्रिकूटे जाह्नवीं गङ्गामिव भृशमत्यन्तम् अकर्दमां कर्दमरहितां प्राचीनवाहिनीं पूर्वदिग्वाहिनीं चन्दनाद्यैः शोभितां नदीं गुहायाः पुरतः पूर्वस्यां दिशि पश्य । श्लोकत्रयमेकान्वयि ॥ १६–१८ ॥

रा० टी०–तीरजैरिति । नानारूपैः अनेकविधैस्तीरजैश्चन्दनादिभिः शोभिता युक्ता नदी वसनाभरणोपेता अभ्यलंकृता सिन्दूरादिविभूषिता प्रमदा इव भाति ॥ १९ ॥

गो० टी०–प्राचीनवाहिनीमित्यादि । अतिमुक्तकैः

१ गिरेरिति रा. पाठः । २ इवोत्थितमिति गो. पाठः । ३ अपरमिति गो. पाठः । ४ भूषितमिति गो. पाठः । ५ पूर्वत इति गो. पुरत इति रा. पाठः । ६ चम्पकै···तालैरिति गो. पाठः । ७ तिमिशैरिति गो. रा. पाठः । ८ धवैरिति गो. पाठः । ९ तिरिटैरिति गो. पाठः । १० वेत्रकैरिति गो. पाठः ।

शतशः पक्षिसङ्घैश्च नानानादविनादिता । एकैकमनुरक्तैश्च चक्रवाकैरलंकृता ॥ २० ॥
पुलिनैरतिरम्यैश्च हंससारससेविता । प्रहसन्त्येव भात्येषा नानारत्नसमन्विता ॥ २१ ॥
क्वचिन्नीलोत्पलैश्छन्ना भाति रक्तोत्पलैः क्वचित् । क्वचिदाभाति शुक्लैश्च दिव्यैः कुमुदकुड्मलैः ॥ २२ ॥
पारिप्लवशतैर्जुष्टा बर्हिणक्रौञ्चविनादिता । रमणीया नदी सौम्या मुनिसंघैर्निषेविता ॥ २३ ॥
पश्य चन्दनवृक्षाणां पङ्क्तीः सुरुचिरा इव । ककुभानां च दृश्यन्ते मनसैवोदिताः समम् ॥ २४ ॥
अहो सुरमणीयोऽयं देशः शत्रुनिषूदन । दृढं रंस्याव सौमित्रे साध्वत्र निवसावहे ॥ २५ ॥
इतश्च नातिदूरे सा किष्किन्धा चित्रकानना । सुग्रीवस्य पुरी रम्या भविष्यति नृपात्मज ॥ २६ ॥
गीतवादित्रनिर्घोषः श्रूयते जयतां वर । नदतां वानराणां च मृदङ्गाडम्बरैः सह ॥ २७ ॥
लब्ध्वा भार्यां कपिवरः प्राप्य राज्यं सुहृद्वृतः । ध्रुवं नन्दति सुग्रीवः संप्राप्य महतीं श्रियम् ॥ २८ ॥
इत्युक्त्वा न्यवसत्तत्र राघवः सहलक्ष्मणः । बहुदृश्यदरीकुञ्जे तस्मिन्प्रस्रवणे गिरौ ॥ २९ ॥

पुण्ड्रकैः, पद्मकैः पद्मपर्णाख्यवृक्षविशेषैः, सरलैः यूपसरलैः, तिमिशैः स्यन्दनैः ' तिमिशे स्यन्दनो नेमिः ' इत्यमरः । धवैः धुन्धुरैः, हिंतालैः लताङ्कुराख्यवृक्षैः ' अथ स्याल्लताङ्कुरः । हिन्तालस्तृणराजश्च ' इति वैजयन्ती । तिरिटैः तिल्ववृक्षैः ' तिरिटस्तिल्वमार्जनौ ' इत्यमरः । वेत्रकैरिति सम्यक् ॥१६–१९॥

२०–२२] ति० टी०–एकैकमनुरक्तैः परस्परानुरागः ॥ २०–२२ ॥

रा० टी०–शतश इति । शतशः पक्षिसंघैः पक्षिणां समूहैः नानानादविनादिता एकैकं परस्परमनुरक्तैः चक्रवाकैः अतिरम्यैः पुलिनैश्च अलंकृता हंससारससेविता नानारत्नसमन्विता एषा नदी प्रहसन्ती अवभाति । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

रा० टी०–क्वचिदिति । क्वचित् कस्मिंश्चित् स्थले नीलोत्पलैः क्वचित् रक्तोत्पलैः छन्ना सती आभाति । शुक्लैः दिव्यैः क्रीडायोग्यैः कुमुदकुड्मलैः क्वचिदाभाति ॥ २२ ॥

गो० टी०–शतश इति । एकैकमनुरक्तैः अन्योन्यानुरागयुक्तैः ॥ २०–२२ ॥

२३] ति० टी०–पारिप्लवा जलपक्षिणः ॥ २३ ॥

रा० टी०–पारिप्लवेति । पारिप्लवशतैः अनेकजलपक्षिभिः जुष्टा बर्हिणदेवेस्तस्मादिति ? अत एव रमणीया सौम्या नदी मुनिसंघैर्निषेविता अस्तीति शेषः ॥ २३ ॥

गो० टी०–पारिप्लवेति । पारिप्लवैः जलोपरिसंचारिपक्षिः ॥ २३ ॥

२४–२६] ति० टी०–सुरुचिरा इव इवोऽत्यर्थं । शोभमानाश्चन्दनवृक्षपङ्क्तीरपि पश्य । मनसा संकल्पेन सममेवोदिताः । ककुभानां वृक्षविशेषाणां पङ्क्त्य इति शेषः ॥२४–२६॥

रा० टी०–पश्येति । मनसा मदिच्छया सममुदिताः जाता इव चन्दनवृक्षाणां ककुभानामर्जुनवृक्षाणां च याः पङ्क्तयः दृश्यन्ते ताः सुरुचिराः पङ्क्तीः पश्य अवलोकय ॥ २४ ॥

गो० टी०–पश्येति । सुरचिता इव मालारूपेण ग्रथिता इव ककुभानाम् अर्जुनवृक्षाणाम् दृश्यन्ते पङ्क्तय इति शेषः । मनसैवोदिताः सममिति मनसा संकल्पेन समं युगपत् उदिता इव स्थिताः ॥ २४ ॥

रा० टी०–अहो इति । हे शत्रुनिषूदन ! अयं देशः अहो आश्चर्यं रमणीयः अतः अत्र साधु निवसावहे रंस्याव च दृढं निश्चितमेतत् ॥ २५ ॥

गो० टी०–अहो इति । रंस्याव रंस्यावहे अतः अत्र गिरौ निवसावहै निवसाव ॥ २५ ॥

रा० टी०–इत इति । सुग्रीवस्य पुरी किष्किन्धा इतो नातिदूरे समीपे अस्तीत्यर्थः ॥ २६ ॥

गो० टी०–अत्र वासे क्रियमाणे किष्किन्धा च समीपवर्तिनी भविष्यतीत्याह–इतश्चेति ॥ २६ ॥

२७–२८] ति० टी०–नातिदूरत्वगमकम्–गीतेत्यादि । मृदङ्गाडम्बरैर्मृदङ्गशब्दैः ॥ २७ ॥ २८ ॥

रा० टी०–तत्र ज्ञापकमाह–गीतेति । मृदङ्गाडम्बरैः मृदङ्गशब्दैः सह नदतां वानराणां गीतवादित्रनिर्घोषः श्रूयते ॥ २७ ॥

रा० टी०–लब्ध्वेति । सुग्रीवः राज्यं महतीं श्रियं च संप्राप्य भार्यां च लब्ध्वा ध्रुवं नन्दति ॥ २८ ॥

गो० टी०–गीतेति । मृदङ्गाडम्बरैः सह नदतां वानराणां निर्घोषः श्रूयत इत्यन्वयः ॥ २७ ॥ २८ ॥

२९] ति० टी०–बहूनि दृश्यान्युत्तमवस्तूनि यत्र तादर्यः कुञ्जाश्च यस्मिन्निति गिरिविशेषणम् ॥ २९ ॥

रा० टी०–इतीति । राघवः इत्युक्त्वा बहूनि दृश्यानि अपूर्ववत्त्वेन द्रष्टव्यानि अनेकविधवस्तूनि यस्मिन् तदेव दरीकुञ्जं तस्मिन् प्रस्रवणे गिरौ न्यवसत् ॥ २९ ॥

गो० टी०–इतीति । तत्र गुहायाम् । कुञ्जः लतागृहम् ॥२९॥

१ नादैरिति गो. पाठः । २ सेवितैरिति गो. पाठः । ३ अवेति रा. पाठः । ४ नारीसर्वविभूषितेति गो. 'पाठः । ५ बर्हिणक्रौञ्चनादितेति गो. रा. पाठः । ६ संघैरिति गो. पाठः । ७ रचिता इति गो. पाठः । ८ वहै इति गो. पाठः ।

सुसुखे [1]हि बहुद्रव्ये तस्मिन्हि धरणीधरे । वसतस्तस्य रामस्य रतिरल्पाऽपि नाभवत् ॥ ३० ॥
हृतां हि भार्यां स्मरतः प्राणेभ्योऽपि गरीयसीम् । उदयाभ्युदितं दृष्ट्वा शशाङ्कं [2]सं विशेषतः ॥ ३१ ॥
आविवेश न तं निद्रा निशासु शयनं गतम् । तत्समुत्थेन शोकेन बाष्पोपहतचेत[3]नम् ॥ ३२ ॥
तं शोचमानं काकुत्स्थं नित्यं शोकपरायणम् । तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्मणो[4]ऽनुनयं वचः ॥ ३३ ॥
अलं वीर व्यथां गत्वा न त्वं शोचितुमर्हसि । शोचतो ह्यवसीदन्ति सर्वार्था विदितं हि ते ॥ ३४ ॥
भवान्क्रियापरो लोके भवान्दे[5]वपरायणः । आस्तिको धर्मशीलश्च व्यवसायी च राघव ॥ ३५ ॥
नह्यव्यवसितः शत्रुं राक्षसं तं विशेषतः । समर्थस्त्वं रणे हन्तुं विक्रमे[6] जिह्मकारिणम् ॥ ३६ ॥
समुन्मूलय शोकं त्वं व्यवसायं [7]स्थिरीकुरु । ततः सपरिवारं तं रा[8]क्षसं हन्तुमर्हसि ॥ ३७ ॥
पृथिवीमपि काकुत्स्थ ससागरवनाचलाम् । परिवर्तयितुं शक्तः किं पु[9]नस्तं हि रावणम् ॥ ३८ ॥
शरत्कालं प्रतीक्षस्व प्रावृट्कालोऽयमागतः । ततः सराष्ट्रं सगणं रावणं तं वधिष्यसि ॥ ३९ ॥

३०] ति० टी०–बहुद्रव्ये सुखसाधनबहुद्रव्यवति । रतिः सुखम् ॥ ३० ॥

रा० टी०–सुसुख इति । सुसुखे अतिसुखहेतावपि तस्मिन् धरणीधरे पर्वते वसतः प्राणेभ्योऽपि गरीयसीं भार्यां स्मरतः रामस्य अल्पऽपि रतिः प्रीतिर्नाभवत् । सार्धश्लोक एकान्वयी ॥ ३० ॥

गो०टी०–सुसुखेऽपीति । बहुद्रव्ये बहुपुष्पफलादिधने ३०

३१–३२] ति० टी०–उदये उदयपर्वतेऽभ्युदितमुदयं प्राप्तम् ॥ ३१ ॥ ३२ ॥

रा० टी०–उदयेति । सम्विशेषतः विशेषेण सकलकलयेत्यर्थः, उदयाभ्युदितम् उदयाचलात् प्रकाशितं शशाङ्कं चन्द्रं दृष्ट्वा शयनं गतं तत्समुत्थेन हृतभार्यास्मरणजनितेन शोकेनोपलक्षितमत एव बाष्पोपहतचेतनमत्यश्रुद्रुमहेतुकचैतन्याभाववत्त्वेन प्रतीयमानं तं हृतभार्यं रामं निद्रा न आविवेश । सार्धश्लोक एकान्वयी ॥ ३१ ॥ ३२ ॥

गो०टी०–उदयेति । उदयाभ्युदितम् उदयपर्वतादुद्गतम् ३१

गो० टी०–तत्समुत्थेनेत्यादि । 'लक्ष्मणोऽनुनयन् वचः' इति पाठः ॥ ३२–३४ ॥

३३] ति० टी०–अनुनयमनुनयवत् ॥ ३३ ॥

रा० टी०–तमिति । शोचमानं काकुत्स्थं रामं लक्ष्मणः अनुनयं विनीतं वचो अब्रवीत् ॥ ३३ ॥

३४] ति०टी०–व्यथां गत्वालम् व्यथा मास्त्वित्यर्थः॥३४॥

रा० टी०–तद्वचनाकारमाह–अलमिति । व्यथां चित्तचाञ्चल्यं गत्वा प्राप्य अलं बहु शोचितुं नार्हसि । तत्र हेतुः–सर्वथा अत्यन्तं शोचन्तो जनाः अवसीदन्ति इति ते विदितम् ॥ ३४ ॥

३५] ति० टी०–क्रियापरो नित्यकर्मानुष्ठाता देवपरायणो देवपूजकः व्यवसाय्युद्यमी ॥ ३५ ॥

रा० टी०–शोकानर्हत्वे हेतुं वदन्नाह–भवानिति । लोके सर्वभुवने क्रियापरः निखिलक्रियाप्रवर्तकः भवानेव देवपरायणः देवपराणां देवतानिकारकाणामयनः आश्रयः भवानेव अत एव आस्तिकादिर्भवानेव । एतेन त्वत्सावधानतामात्रेण सर्वं कार्यं सेत्स्यतीति सूचितम् ॥ ३५ ॥

गो० टी०–भवानिति । क्रियापर इत्यनेन कार्यसिद्धिहेतुभूतपुरुषकारत्वमुक्तम् । दैवपरायण इत्यनेन कार्यसिद्धिहेतुभूतदेवतानिष्ठतोक्ता ॥ ३५ ॥

३६] ति० टी०–अव्यवसितः शोकेनोद्यमहीनस्त्वं हन्तुं न समर्थः । विक्रमे विक्रमस्थाने रणे जिह्मकारिणं कुटिलम् ॥ ३६ ॥

रा० टी०–तदभावे दोषमाह–नह्रीति । विक्रमे विशेषतो जिह्मकारिणं कापट्यकर्मशीलं राक्षसं तं रावणं रणे हन्तुम् अव्यवसितः व्यवसायरहितस्त्वं समर्थो न प्रतीयसे इति शेषः ॥ ३६ ॥

गो० टी०–न ह्रीति । अव्यवस्थितः धैर्यरहित इत्यर्थः । रणे विक्रमैर्हन्तुं न समर्थ इत्यन्वयः ॥ ३६ ॥ ३७ ॥

३७] ति० टी०–अतः शोकं समुन्मूलय । व्यवसायमुद्योगम् ॥ ३७ ॥

रा० टी०–समिति । शोकं समुन्मूलय संत्यज, व्यवसायमुद्यमं स्थिरीकुरु, ततोऽनन्तरं राक्षसं रावणं हन्तुमर्हसि ॥ ३७ ॥

३८–३९] ति० टी०–परिवर्तनमधरोत्तरीकरणम् ३८॥३९

रा० टी०–पृथ्वीमिति । ससागरवनाचलां पृथिवीं परिवर्तयितुं त्वं शक्तः रावणं परिवर्तयितुं शक्तश्चेत् किं वक्तव्यम् ॥ ३८ ॥

रा० टी०–नन्वेवं किमिदानीमेवोद्योगः कर्तव्य इत्यत आह–शरदिति । अयं प्रावृट्काल आगतः प्राप्तः अतः शरत्कालं शरत्कालावयवीभूताश्विनपर्यन्तं प्रतीक्षस्व क्षमस्व ततोऽनन्तरं सराष्ट्रं रावणाद्यकुलराष्ट्रसहितं रावणं वधिष्यसि ॥ ३९ ॥

गो० टी०–पृथिवीमपीति । परिवर्तयितुम् अधरोत्तरं कर्तुम् । अङ्गेति संबोधनम् । पुनरित्यत्र दीर्घाभाव आर्षः ॥ ३८ ॥ ३९ ॥

१ ऽपीति गो. पाठः । २ चेति गो. पाठः । ३ चेतसमिति गो. पाठः । ४ ऽनुनयन्निति गो. पाठः । ५ व्यवेति गो. पाठः । ६ वैवेति गो. पाठः । ७ विक्रमैरिति गो. पाठः । ८ स्थिरमिति गो. पाठः । ९ निर्मूलं कुरु राक्षसमिति गो. पाठः । १० अङ्ग पुन रावणमिति गो. पाठः ।

अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये । दीप्तैराहुतिभिः काले भस्मच्छन्नमिवानलम् ॥ ४० ॥
लक्ष्मणस्य[1] हि तद्वाक्यं प्रतिपूज्य हितं शुभम् । राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत् ॥ ४१ ॥
वाच्यं यदनुरक्तेन स्निग्धेन च हितेन च । सत्यविक्रमयुक्तेन तदुक्तं लक्ष्मण त्वया ॥ ४२ ॥
एष शोकः परित्यक्तः सर्वकार्यावसादकः । विक्रमेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहम् ॥ ४३ ॥
शरत्कालं प्रतीक्षिष्ये स्थितोऽस्मि वचने तव । सुग्रीवस्य नदीनां च प्रसादमनुपालयन् ॥ ४४ ॥
उपकारेण वीरस्तु प्रतिकारेण युज्यते । अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ४५ ॥
तदेव[2] युक्तं प्रणिधाय लक्ष्मणः कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ।
उवाच रामं स्वभिरामदर्शनं प्रदर्शयन्दर्शनमात्मनः शुभम् ॥ ४६ ॥
यथोक्तमेतत्तव सर्वमीप्सितं नरेन्द्र कर्ता न चिरात्तु[3] वानरः ।
शरत्प्रतीक्षः क्षमतामिमं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः ॥ ४७ ॥

४०-४१] ति० टी०-दीप्तैः दीप्तैर्वाक्यैरिति शेषः । काले होमकाले ॥ ४० ॥ ४१ ॥

रा० टी०-अहमिति । काले होमसमये आहुतिभिः भस्मच्छन्नमनलमिव दीप्तैस्तव वीर्यप्रकाशकैः वचनैः प्रसुप्तं शोकवशात् तिरोहितं ते वीर्यं प्रतिबोधये संस्मारयामि ॥ ४० ॥

रा० टी०-लक्ष्मणस्येति । राघवः लक्ष्मणस्य वाक्यं प्रतिपूज्य सुहृदं लक्ष्मणं स्निग्धं वचनमब्रवीत् ॥ ४१ ॥

गो० टी०-अहं त्विति । दीप्तैः ज्वलनकरैः उद्बोधकैः वाक्यैरिति शेषः ॥ ४० ॥ ४१ ॥

४२] ति० टी०-अनुरक्तेनानुरागयुतेन स्निग्धेन तत्कालोचितप्रियपरेण हितेनोदर्कहितैषिणा सत्यविक्रमयुक्तेनामोघविक्रमयुक्तेन ॥ ४२ ॥

रा० टी०-तद्वचनाकारमाह-वाच्यमिति । अनुरक्तेन अनुरागयुक्तेन जनेन यत् वाच्यं तत् स्निग्धेन स्नेहयुक्तेन अत एव हितेन हिताचरणप्रवर्तकेन सत्यविक्रमयुक्तेन त्वया उक्तम् ॥ ४२ ॥

गो० टी०-वाच्यमिति । अनुरक्तेन अनुरागयुक्तेन स्निग्धेन तत्कालोचितप्रियपरेण हितेन हितपरेण सत्यविक्रमयुक्तेन अमोघविक्रमयुक्तेन यद्वाच्यं तत्सर्वं त्वयोक्तमिति सम्बन्धः ॥ ४२-४४ ॥

४३] ति० टी०-विक्रमकालेषु तेजः सहजमिति शेषः । प्रोत्साहयामि वर्धयामि । अधुना त्वाच्छन्नमिव तदिति भावः ४३

रा० टी०-एष इति । सर्वकार्यावसादकः सकलकार्यविघातकः एषः स्ववीर्यविस्मृतिहेतुकः शोकः परित्यक्तः अत एव विक्रमेषु अप्रतिहतं तेजः स्ववीर्यं प्रोत्साहयामि संस्मरामि॥४३॥

४४] ति० टी०-शरत्कालं तत्प्रान्तम् । सुग्रीवस्य प्रसादं चित्तसौमनस्यम् नदीनां चामलोदकत्वरूपम् ॥ ४४ ॥

रा० टी०-शरदिति । तव वचने अहं स्थितोऽस्मि अतः सुग्रीवस्य नदीनां च प्रसादमाप्लवकूल्यमनुपालयन् सन् शरत्कालमाश्विनं प्रतीक्षिष्ये ॥ ४४ ॥

४५] ति० टी०-उपकारेण युक्तो वीरोऽवश्यं प्रतिकारेण प्रत्युपकारेण युज्यते । केनचित्कृतोपकारो वीरपुरुषोऽवश्यं प्रत्युपकरोत्येवेति भावः । कृत एवं निश्चयस्तत्राह—अकृतज्ञो भूत्वा यत्प्रतिकृतोऽकृतप्रत्युपक्रियो भवति तदा सत्त्ववतामस्मादृशां मनो हन्ति मैत्रीं नाशयत्येव । अतो मित्रत्वादवश्यं स प्रत्युपकर्तेति भावः ॥ ४५ ॥

रा० टी०-सुग्रीवोऽवश्यं मत्कार्यं साधयितेति बोधयन्नाह-उपेति । उपकारेण युक्तो वीरः प्रतिकारेण प्रत्युपकारेण युज्यत एव । तत्र हेतुः-अकृतज्ञः विस्मृतोपकारः अत एव अप्रतिकृतः प्रत्युपकारसहितः जनः सत्त्ववतां महात्मनां मनः ईप्सितानां धर्मशास्त्रमित्यर्थः, हन्ति न मन्यते । एतेन शास्त्रानुसारित्वात् सुग्रीवो मदुपकृतिं न विस्मरिष्यतीति सूचितम् ॥ ४५ ॥

गो० टी०-उपकारेणेति । तुशब्दोऽवधारणे । उपकारेण युक्तो वीरः प्रतिकारेण युज्यत एव प्रत्युपकारं करोत्येवेत्यर्थः । अप्रतिकृतः अकृतप्रत्युपकारः पुरुषः सत्त्ववतां सात्त्विकानाम् मनः हन्ति पीडयति सात्त्विकास्तमजस्रं निन्दन्तीत्यर्थः । सज्जनापवादभीतः सुग्रीवोऽस्माकं प्रत्युपकारं करीत्येवेति भावः ॥ ४५ ॥

४६] ति० टी०-तदेव रामवाक्यमेव युक्तं प्रणिधाय, निश्चित्यात्मनः शुभं दर्शनं शुभां बुद्धिं, प्रदर्शयन्नुवाच ॥ ४६ ॥

रा० टी०-तदिति । तत् रामोक्तं युक्तमेव इति प्रणिधाय निश्चित्य कृताञ्जलिः लक्ष्मणः तत् रामसंबधि भाषितं प्रतिपूज्य आत्मनः शुभं दर्शनं ज्ञानं प्रदर्शयन् रामाय बोधयन् स्वभिरामदर्शनम् अत्यानन्दकारकदर्शनविशिष्टं रामम्बवाच ॥ ४६ ॥

गो० टी०-अथैवमिति । प्रणिधाय भाविकार्यमालोच्य दर्शनं मतं प्रणिधानेन दृष्टार्थामित्यर्थः ॥ ४६ ॥

४७] ति० टी०-जलप्रपातं वर्षाकालम् । धृतः स्थिरनिश्चयः ॥ ४७ ॥

१ त्विति गो. पाठः । २ अथैवमुक्त इति गो. पाठः । ३ हरीश्वर इति गो. पाठः ।

नियम्य कोपं पैरिपाल्यतां शरत्समस्व मासांश्चतुरो मया सह ।
वसाचलेऽस्मिन्मृगराजसेविते संवर्तयञ्शत्रुवधे समर्थः ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।

वैधुर्यप्राप्तकशिमा प्रावृट्कैत्यं सोढुमशक्नुवन्नप्याश्रितविश्लेषासहिष्णुत्व प्रकटयन्रामो लक्ष्मणेन संलपन् वर्षासमयमुपश्लोकयति ।

स तदा वालिनं हत्वा सुग्रीवमभिषिच्य च । वसन्माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत् ॥ १ ॥
अयं स कालः संप्राप्तः समयोऽद्य जलागमः । संपश्य त्वं नभो मेघैः संवृतं गिरिसंनिभैः ॥ २ ॥
नवमासधृतं गर्भं भास्करस्य गभस्तिभिः । पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–यथेति । उक्तं सुग्रीवाय त्वया कथितं सर्वमेतत्तवेप्सितं शरत्प्रतीक्षः त्वदाज्ञया शरत्कालपर्यन्तं प्रतीक्षावान् वानरः सुग्रीवः न चिरात् शीघ्रमेव यथा यथावत्कर्ता अ ः इमं जलप्रपातं वृष्टिकालं रिपुनिग्रहे धृतः वृढनिश्चयो भवान् क्षमताम् ॥ ४७ ॥

गो० टी०–यथोक्तमिति । न चिरात् अविलम्बितम् । जलानि प्रपतन्त्यस्मिन्निति जलप्रपातो वर्षाकालः भवान् क्षमतां त्वं क्षमस्व वर्षाकालकृतविरहवेदनां मा कुर्वित्यर्थः । रिपुनिग्रहे धृतः धैर्ययुक्तः ॥ ४७ ॥

४८] ति० टी०–किं तु सुग्रीवेणायैव रावणं हनिष्यामीत्युक्त्वा कुतो विलम्बयत इत्येवं कुद्धं राममालक्ष्याह–नियम्येति । शरत्तदन्तः संवर्तयन्नुक्तकालं क्षपयन् ॥ ४८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०–उपसंहरन्नाह–नियम्येति । कोपं राक्षसापराधस्मृतिजनितक्रोधाभासं नियम्य शरत् परिपाल्यतां गमनाय निश्चीयताम् । अत एव शत्रुवधे समर्थः सर्वकालं सामर्थ्यविशिष्टोऽपि त्वं संवर्तयन् स्वधर्मज्ञत्वं विस्तारयन् अस्मिन्नचले पर्वते मया सह चतुरो मासान् वस क्षमस्व वियोगदुःखं सहस्व च ॥ ४८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो० टी०–सुग्रीवः प्रत्युपकारं करोतु वा मा वा सखः शत्रुवधः कर्तव्य इति पुनः संजातकोपं रामं प्रत्याह–नियम्येति । चतुरो मासान् आषाढश्रावणभाद्रपदाश्वयुजान् । शरत् कार्तिकमासः । शत्रुवधे सत्रुयमम् उत्साहम् संवर्धयन् अभिवर्धयन् । 'सत्रुयत' इति पाठे संवर्तयन् मृगराजादीनाश्रयन् ॥४८॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

१] ति० टी०–स तदेति ॥ १ ॥

रा० टी०–रामोक्तिमुपक्रमते–स इति । माल्यवतः पृष्ठे वसन् स रामः लक्ष्मणमब्रवीत् ॥ १ ॥

गो०टी०–अथ रामः स्वस्याश्रितविश्लेषासहिष्णुत्वमन्यापदेशेन लक्ष्मणाय प्रदर्शयन् वर्षर्तुवर्णनमारभतेऽष्टाविंशे–स तथेत्यादि । यत्किंचिद्विरोधिनिरसनाशितसंरक्षणलाभेऽप्यसत्कल्पमेतन्मन्यमानः माल्यवतः पूर्वं प्रस्रवणाख्यतयोक्तस्य गिरेः पृष्ठे उपरि वसन् सर्वजनोजीवनाय सन्निहित इत्यर्थः ॥ १ ॥

२] ति० टी०–स विरहिप्रमाथकः स कस्तत्राह—अय जलागमः समयः संप्रवृत्तस्तं संपश्य । नभ आकाशम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–अयमित्यादिभिः । जलागमः वृष्टिप्रापकः अत एव कालः सर्वस्थित्युपदेशकः स प्रसिद्धोऽयं समयः संप्राप्तः अतः गिरिसंनिभैः मेघैः संवृतं नभः त्वं पश्य । काल इति उपदेशार्थककालधातुप्रकृतिककर्त्रजन्तः अत एव न पौनरुक्त्यम् ॥ २ ॥

गो० टी०–अयमिति । समयः सुग्रीवस्य स्थानावधित्वेन संकेतितः सोऽयं जलागमः कालः वर्षाकालः अय संप्राप्तः संप्रवृत्तः ॥ २ ॥

३] ति० टी०–समुद्राणां रसं जलं भास्करस्य गभस्तिभिर्यैः पीत्वा कार्तिकादिनवमासधृतं गर्भं जलरूपं रसायनं लोकजीवातुभूतं प्रसूते त्यजति । गर्भमाहात्म्यात्साम्बुद्रस्य क्षारस्यापि स्वादुता ॥ ३ ॥

रा० टी०–समयं वर्णयति–नवेत्यादिभिः । द्यौराकाशं सूर्यस्य गभस्तिभिः किरणैः रसायनं सर्वरसानां मूलं समुद्राणां रसं पीत्वा नवमासधृतं गर्भमिव प्रसूते । गर्भशब्द आधारकिञ्चन्तः ॥ ३ ॥

गो० टी०–नवेति । द्यौः भास्करस्य गभस्तिभिः किरणैः समुद्राणां रसं पीत्वा नवमासधृतं कार्तिकाषाढपर्यन्तनवमासधृतं रसायनं षड्रसानां कारणं गर्भं जलं प्रसूते जनयति । भास्करस्य गभस्तिभिरित्यनेन "याभिरादित्यस्तपति

१ प्रतीति गो. पाठः । २ संवर्धयन्निति गो. पाठः । ३ समुद्यममिति गो. पाठः । ४ तथेति गो. पाठः

शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः । कुटजार्जुनमालाभिरलंकर्तुं दिवाकरः ॥ ४ ॥
संध्यारागोत्थितैस्ताम्रैरन्तेष्वपि च पाण्डुभिः । स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम् ॥ ५ ॥
मन्दमारुतनिःश्वासं[1][2][3] संध्याचन्दनरञ्जितम् । आपाण्डुजलदं भाति कामातुरमिवाम्बरम् ॥ ६ ॥
एषा धर्मपरिक्लिष्टा[4] नववारिपरिप्लुता । सीतेव शोकसंतप्ता मही बाष्पं विमुञ्चति ॥ ७ ॥
मेघोदरविनिर्मुक्ताः[5] कर्पूरदलशीतलाः । शक्यमञ्जलिभिः पातुं वाताः[6] केतकगन्धिनः ॥ ८ ॥
एष फुल्लार्जुनः शैलः केतकैरभिवासितः । सुग्रीव इव शान्तारिर्धाराभिरभिषिच्यते ॥ ९ ॥

रश्मिभिस्ताभिः पर्जन्यो वर्षति" इति श्रुतिः सूच्यते । सप्तद्राणां रसमित्यनेन हंसस्य क्षीरनीरविभागचातुर्यवत् नीरक्षवणविभागसामर्थ्यं द्योत्यते । अत्र प्रस्तुतद्योवर्षदृत्तान्तेनाप्रस्तुतस्यानेकनायकाहितवीर्यगर्भम् भक्तिकाभिर्धृत्वा काले प्रेमास्पदस्तुतप्रसवकृद्भूपृष्टदृत्तान्तस्य प्रतीतेः समासोक्तिरलंकारः । यदि सीता संनिहिता साऽपीदानीं नवप्रसूतिः स्यादिति रामनोरथो गम्यते ॥ ३ ॥

४] ति० टी०–दिवाकरोऽलंकर्तुं शक्यः सुकर इत्यर्थः॥४॥

रा० टी०–शक्यमिति । कुटजार्जुनमालाभिः कर्तृभिः मेघसोपानपङ्क्तिभिः मेघरूपसोपानसमूहमार्गेण अम्बरमारुह्य दिवाकरोऽलंकर्तुं शक्यम्, सामान्ये नपुंसकम् ॥ ४ ॥

गो० टी०–शक्यमिति । मेघा एव सोपानानि तेषां पङ्क्तिभिरम्बरमारुह्य कुटजार्जुनानां वार्षिकपुष्पाणां मालाभिः दिवाकरम् अस्मत्कुलगुरुभूतसूर्यमध्ये सदा ध्येयं विष्णुम् 'अलंकारप्रियो विष्णुः' इति न्यायेनालंकर्तुं शक्यम् । लिङ्गसामान्ये नपुंसकम् । सह पत्न्या विशालाक्ष्या नारायणमुपागमदित्युक्तरीत्या सीतया सहाराधनं न लब्धमित्युत्कण्ठा द्योत्यते ॥ ४ ॥

५] ति० टी०–संध्यारागोत्थितैरुद्भिन्नसंध्यारागैः, अत एव ताम्रैरन्तेषु पर्यन्तभागेषु श्वेतैः स्निग्धैः । किंचिज्जलसंबन्धात् अभ्रपटच्छेदैरभ्ररूपैश्छिन्नपटैर्बद्धव्रणमिवेत्युत्प्रेक्षा ॥ ५ ॥

रा० टी०–संध्येति । संध्यारागोत्थितैः संध्यारागसंबद्धैः अत एव ताम्रैः अरुणैः अन्तेषु च पाण्डुभिः श्वेतैः अभ्रपटच्छेदैः अभ्ररूपपटखण्डैः बद्धव्रणमिव अम्बरमाकाशमभवदिति शेषः ॥ ५ ॥

गो० टी०–संध्येति । संध्यारागोत्थितैः उत्थितसन्ध्यारागैः आहिताग्न्यादित्वात् परनिपातः । वज्रखण्डपक्षे उत्थितसंध्यातुल्यरागैः अत एव ताम्रैः अन्तेषु प्रान्तेषु अधिकपाण्डुरैः अत्यन्तशुभ्रैः स्निग्धैः आर्द्रैः अभ्रपटच्छेदैः अभ्राणि मेघा एव पटच्छेदाः वज्रखण्डाः तैः बद्धव्रणमिवाम्बरं भाति । उपमालंकारः ॥ ५ ॥

६] ति० टी०–मन्दमारुत एव निःश्वासो यस्य तम् । संध्याकपेण चन्दनेन हरिचन्दनेन रञ्जितम् । आपाण्डुजलदं प्रान्तपाण्डुजलदम् । जलदस्थाने कामातुरस्य कपोलादि ॥ ६ ॥

रा० टी०–मन्देति । मन्दमारुत एव निःश्वासो यस्य तत् संध्याचन्दनरञ्जितं संध्यारूपचन्दनचर्चितम् आपाण्डुजलदम् ईषत्पाण्डुजलदविशिष्टम् अम्बरं कामातुरमिव भाति । ईषत्पाण्डुजलदस्य कपोलरूपकत्वं तेन वियुक्तत्वं व्यज्यते ॥६॥

गो० टी०–मन्देति । मन्दमारुत एव निश्वासो यस्य तत् तथा । अनेन निरन्तरनिश्वासवत्त्वमुच्यते । संध्या संध्यारागः स एव चन्दनं तेन रञ्जितम् आलिप्तम् अनेन तापशान्तिकरशीतोपचार उक्तः । आपाण्डुजलदमित्यनेन विरहपाण्डुतोक्ता । अत एव कामातुरं कान्ताविरहपीडितमिवेत्युत्प्रेक्षा रूपकानुप्राणिता ॥ ६ ॥

७] ति० टी०–घर्मेण रवितेजसा परिक्लिष्टा संतप्ता । बाष्पमूष्माणं बाष्पं नेत्रजलं च ॥ ७ ॥

रा० टी०–एषेति । घर्मपरिक्लिष्टा घर्मेण संतप्ता अनन्तरं नववारिपरिप्लुता एषा मही शोकसंतप्ता सीतेव बाष्पं विमुञ्चति ॥ ७ ॥

गो० टी०–एषेति । घर्मेण ग्रीष्मसंतापेन सीतापक्षे विरहतापेन परिक्लिष्टा नववारिभिः परिप्लुता सिक्ता सीतापक्षे अश्रुक्लिन्ना बाष्पम् ऊष्मं अश्रुजलं च विमुञ्चति । प्रथमजलनिपाते हि भूमेरूष्मा सम्मुद्भवति । श्लेषालंकारः ॥ ७ ॥

८] ति० टी०–मेघैः स्वोदराद्विनिर्मुक्ता इति मन्दता । कर्पूरदलवच्छीतलाः केतकगन्धिनो वाताः । अञ्जलिभिः पातुमित्यादरातिशयादुक्तिः । जलवच्छ्रान्तिहरत्वाच्च ॥ ८ ॥

रा० टी०–मेघेति । मेघोदरविनिर्मुक्ताः मेघोदरादागताः अत एव कर्पूरदलशीतलाः कर्पूरदलवत् शीतलाः केतकगन्धिनो वाताः अञ्जलिभिः पातुं शक्या इव ॥ ८ ॥

गो० टी०–मेघेति । मेघेत्यादिना मान्यमुक्तम् । कङ्कारेत्यादिना शैत्यसौरभ्ये । एवंगुणत्वात् वाताः आदरातिशयेन अञ्जलिभिरादाय पातुं शक्यम् । अतिशयोक्तिरलंकारः ॥ ८ ॥

९] ति० टी०–फुल्लाः पुष्पिता अर्जुना यस्मिन् । धारा जलधाराः । अत्र शैलस्यारिर्वनदाहकत्वाद्वाग्निः ॥ ९ ॥

रा० टी०–एष इति । फुल्लाः प्रफुल्लिताः अर्जुना यस्मिन् सः केतकैरभिवासित एष शैलः शान्तारिः सुग्रीव इव धाराभिरभिषिच्यते ॥ ९ ॥

गो० टी०–एष इति । फुल्लार्जुन इत्यनेन मालालंकृतत्वमुच्यते । केतकैरधिवासित इत्यनेन चन्दनादिमत्त्वं च सुग्री-

१ करमिति गो. पाठः । २ अधिकपाण्डुरैरिति गो. पाठः । ३ निश्वासेति गो. रा. पाठः । ४ कंङ्कारमुखेति गो. पाठः । ५ केतकिगन्धिन इति गो. पाठः । ६ अपीति गो. पाठः । ७ इदं चिन्त्यम् ।

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः । मारुतापूरितगुहाः प्राधीता इव पर्वताः ॥ १० ॥
कशाभिरिव हैमीभिर्विद्युद्भिरभिताडितम् । अन्तस्तनितनिर्घोषं सवेदनमिवाम्बरम् ॥ ११ ॥
नीलमेघाश्रिता विद्युत्स्फुरन्ती प्रतिभाति [1]मे । स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी ॥ १२ ॥
इमास्ता मन्मथवतां हिताः प्रतिहता दिशः । अनुलिप्ता इव घनैर्नष्टग्रहनिशाकराः ॥ १३ ॥
क्वचिद्वाष्पाभिसंरुद्धान्वर्षागमसमुत्सुकान् । कुटजान्पश्य सौमित्रे पुष्पिताञ्गिरिसानुषु ॥
मम शोकाभिभूतस्य कामसंदीपनान्स्थितान् ॥ १४ ॥
रजः प्रशान्तं स हिमोऽद्य वायुर्निदाघदोषप्रसराः प्रशान्ताः ।
स्थिता हि यात्रा वसुधाधिपानां प्रवासिनो यान्ति नराः स्वदेशान् ॥ १५ ॥

वस्य सूच्यते । शान्तारिरित्यनेन शैलस्य निस्तापत्वमुक्तम् । बिम्बप्रतिबिम्बभावेन साम्यप्रतिपादनादुपमालंकारः ॥ ९ ॥

१०] ति० टी०–धारा वर्षधारास्तद्रूपयज्ञोपवीतधराः । मारुतापूरितत्वेन शब्दवत्ता । प्राधीताः उपक्रान्ताध्ययना वटव इवेत्यर्थः ॥ १० ॥

रा० टी–मेघेति । मेघकृष्णाजिनधराः मेघरूपकृष्णाजिनधारिणः धारा एव यज्ञोपवीतानि तद्वन्तः मारुतेन आपूरिता गुहा येषां ते पर्वताः प्राधीताः आरब्धाध्ययना इव आसन्निति शेषः ॥ १० ॥

गो० टी०–मेघेति । मेघा एव कृष्णाजिनानि तेषां धराः नीलवर्णतया तद्रूपणम् । शुभ्रत्वेन धाराया उपवीतत्वरूपणम् । धारा निर्झरधाराः । मारुतापूरितगुहा इत्यनेन शब्दहेतुवायुमत्कण्ठत्वमुच्यते । प्राधीताः प्रकर्षेणाध्येतुमुपक्रान्ताः आदिकर्मणि क्तः । रूपकानुप्राणित उपमालंकारः ॥ १० ॥

११–१२] ति० टी०–अन्तर्गतस्तनितरूपो निर्घोषः कशाप्रहारे क्रियमाणः शब्दो यस्य तत् । सवेदनमित्यस्योत्तमार्धमिति शेषः ॥ ११ ॥ १२ ॥

रा० टी०–कशाभिरिति । विद्युद्भिरन्तःस्तनितनिर्घोषमम्बरं हैमीभिः कशाभिस्तोत्रैः अभिताडितं सवेदनमार्तमिव पश्येति शेषः ॥ ११ ॥

गो० टी०–कशाभिरिति । विद्युद्भिरेव हैमीभिः कशाभिः व्यस्तरूपकम् । ताडितमिव स्थितं स्तनितमेव निर्घोषो यस्य तत् । अत एव अन्तः सवेदनमिवाम्बरं भाति । कशाभिघातेन उच्चैरधीयानसखेदमाणवकसाम्यमुच्यते । उपमोत्प्रेक्षारूपकाणामङ्गाङ्गिभावेन संकरः ॥ ११ ॥

रा० टी०–नीलेति । नीलमेघाश्रिता स्फुरन्ती विद्युत् रावणस्याङ्के स्थामे स्फुरन्ती वैदेहीव मे प्रतिभाति ॥ १२ ॥

गो० टी०–नीलेति । स्फुरन्ती चलन्ती । तपस्विनी शोच्या ॥ १२ ॥

१३] ति० टी०–घनैरनुलिप्ता इव, अत एव नष्टा अदृश्या ग्रहादयो याश्च ताः, प्रतिहताः प्रतिहतप्राचीत्वादिज्ञानाः, इमा दिशो मन्मथवतां मन्मथोत्सवसाधनप्रियासहितानां हिताः सुखजनिकाः ॥ १३ ॥

रा० टी०–इमा इति । घनैर्मेघैरनुलिप्ताः अत एव नष्टग्रहनिशाकराः अदृष्टग्रहचन्द्राः अत एव प्रतिहता इव इमा दिशः मन्मथवतां हिताः उद्दीपकचन्द्रादिदर्शनाभाववत्तया हिता एवेत्यर्थः ॥ १३ ॥

गो० टी०–इमा इति । घनैरनुलिप्ता इव स्थिताः । नष्टग्रहनिशाकराः अदृष्टशुक्रादिग्रहचन्द्राः ' णश–अदर्शने ' इत्यस्मान्निष्ठा । यद्वा नष्टग्रहः ग्रहणरहितः अदृश्यमान इत्यर्थः, तादृशश्चन्द्रो याश्च ताः अत एव प्रतिहताः अज्ञातप्राच्युदीच्यादिदिग्विभागाः ता इमाः दिशः मन्मथवतां सस्त्रीकाणां हिताः सुखकराः विरहिणां तु दुःखकरा इत्यर्थः । यद्वा मन्मथवतामभिसारिकजनानां हिताः ॥ १३ ॥

१४] ति० टी०–बाष्पाभिसंरुद्धान्नववारिसेकजमहीसमुद्भूतोष्मणा वृतान्वर्षाया आगमेन समुत्सुकान्सहर्षान्साढ्यु स्थितानित्यन्वयः ॥ १४ ॥

रा० टी०–क्वचिदिति । क्वचित्स्थले बाष्पाभिसंरुद्धान् बाष्पैः नवजलसेकजनितपार्थिवोष्मभिः अभिसंरुद्धान् व्याप्तान् वर्षागमसमुत्सुकान् पुष्पितान् शोकाभिभूतस्य मम कामसंदीपनान् गिरिसानुषु स्थितान् कुटजान् पश्य । सार्धश्लोक एकान्वयी ॥ १४ ॥

गो० टी०–क्वचिदित्यादिसार्धश्लोक एकान्वयः । बाष्पाभिसंरुद्धान् अभिनवजलकणसेचनसमुत्थनिदाघोष्मसमाहृतान् कामुकपक्षे आनन्दबाष्पवतः वर्षागमेन समुत्सुकान् आप्यायितान् अन्यत्र स्त्रीसङ्गमसंतुष्टान् गिरिसानुषु पुष्पितान् अन्यत्र सहासान् अत एव मम शोकाभिभूतस्य कामसंदीपनान् अन्यरतिदर्शनस्योद्दीपनत्वादिति भावः । अनेन केषुचिदस्मदीयेषु ब्रह्मानुभवसंतुष्टेषु सत्सु केषांचिदस्मदनुभवाभावो ममातीव दुःसह इत्युक्तम् ॥ १४ ॥

१५] ति० टी०–सहिमः सशीतः । निदाघस्य ग्रीष्मस्य दोषप्रसरास्तापादयः । स्थिता स्तब्धा निवृत्तेति यावत् । स्वदेशान्यान्ति प्रियाविमुक्तैः स्थातुमशक्यत्वात् ॥ १५ ॥

---

१ मेति गो. पाठः ।

संप्रस्थिता मानसवासलुब्धाः प्रियान्विताः संप्रति चक्रवाकाः ।
अभीक्ष्णवर्षोदकविक्षतेषु यानानि मार्गेषु न संपतन्ति ॥ १६ ॥
क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित्क्वचित्पर्वतसंनिरुद्धं रूपं यथा शान्तमहार्णवस्य ॥ १७ ॥
व्यामिश्रितं सर्जकदम्बपुष्पैर्नवं जलं पर्वतधातुताम्रम् ।
मयूरकेकाभिरनुप्रयातं शैलापगाः शीघ्रतरं वहन्ति ॥ १८ ॥
रसाकुलं षट्पदसंनिकाशं प्रभुज्यते जम्बुफलं प्रकामम् ।
अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम् ॥ १९ ॥

रा० टी०–रज इति । रजः धूलिः प्रशान्तं दृष्ट्या निवृत्तं सहिमः सशीतः वायुर्वातीति शेषः, अत एव निदाघदोषप्रसराः निदाघदोषाणां तापादीनां प्रसराः विस्ताराः प्रशान्ताः अत एव वसुधाधिपानां यात्रा स्थिता निवृत्तेत्यर्थः, अत एव प्रवासिनो नराः स्वदेशान् यान्ति ॥ १५ ॥

गो० टी०–अथ भगवत्कटाक्षफलमन्यापदेशेन दर्शयति–रज इत्यादिना । रज इत्युपलक्षणम् रजस्तमसी प्रक्रान्ते । वायुशब्देन सततसंसारगतिर्जन इत्युच्यते । सहिम इति शीतलहृदयत्वम् । निदाघेत्यादिना आध्यात्मिकादितापशान्तिः । यात्रा संसारगतिः । स्वदेशान् स्वप्राप्यभूतपरमपदम् । स्वभावार्थस्तु स्पष्ट एव ॥ १५ ॥

१६] ति० टी०–मानसं सरः । अभीक्ष्णमतिशयितं यद्वर्षोदकं तेन विक्षतेषु क्लिष्टगमनेषु मार्गेष्विति शेषः, यानानि रथादीनि न संपतन्ति न गच्छन्ति ॥ १६ ॥

रा० टी०–संप्रतीति । संप्रति दृष्टिकाले मानसवासलुब्धाः मानससरोवासविषयकोत्कटेच्छावन्तः सन्तः प्रियान्विताः चक्रवाकाः संप्रस्थिताः मानसं सरोऽगच्छन् । अभीक्ष्णानि पुनः पुनः पतितानि एव वर्षोदकानि तैः विक्षतेषु विनष्टेषु मार्गेषु यानानि रथादीनि न संपतन्ति गच्छन्ति ॥ १६ ॥

गो० टी०–संप्रस्थिता इति । मानसवासलुब्धाः हंसाः संप्रस्थिताः वर्षभीततया क्वचिल्लीनाः परमहंसाख्यानां संन्यासिनां चातुर्मास्यतया संचारनिवृत्तिर्योत्यते । चक्रवाकाः कामोद्रेकेण प्रियासमन्विता भवन्ति । यानासंपतने हेतुः–अभीक्ष्णेति । यानानि शकटरथादीनि संप्रस्थिता इत्यनेन कृतवैराग्यत्वमुच्यते । प्रियान्विता इति भगवद्भक्तिः । अभीक्ष्णेत्यादिना भगवत्कटाक्षेण निवृत्तकर्मत्वमुच्यते ॥ १६ ॥

१७] ति० टी०–शान्तमहार्णवस्य निस्तरङ्गसमुद्रस्य॥१७॥

रा० टी०–क्वचिदिति । प्रकीर्णाः प्रक्षिप्ताः अम्बुधराः मेघा यस्मिन् तत् नभः क्वचित्प्रकाशं क्वचिदप्रकाशं विभाति । तत्र दृष्टान्तः–पर्वतसंनिरुद्धं प्रशान्तमहार्णवस्य तरङ्गरहितसमुद्रस्य रूपं स्वरूपं यथा क्वचित्क्वचिद्विभाति ॥ १७ ॥

गो० टी०–क्वचिदिति । प्रकीर्णाम्बुधरं विप्रकीर्णमेघम् अत एव क्वचित्प्रकाशं क्वचिदप्रकाशं नभः क्वचित्क्वचित् पर्वतसन्निरुद्धं शान्तमहार्णवस्य निस्तरङ्गसमुद्रस्य रूपं स्वरूपमिव भाति । अनेन मन्दज्ञानेन प्रकाशाप्रकाशं ब्रह्मस्वरूपमुच्यते ॥ १७ ॥

१८] ति० टी०–सर्जादिपुष्पैर्मिश्रं पर्वतसंबन्धिधातुभिस्ताम्रं ताम्रवर्णं मयूरशब्दैरनुप्रयातमनुसृतं जलं नद्यः शीघ्रं वहन्ति समुद्रं वहन्ते ॥ १८ ॥

रा० टी०–व्यामिश्रितमिति । सर्जकदम्बपुष्पैः व्यामिश्रितं पर्वतधातुताम्रं पर्वतधातुभिः गैरिकादिभिस्ताम्रमरुणं मयूरकेकाभिः मयूरशब्दैः अनुप्रयातं जलं शैलापगाः पर्वतसरितः शीघ्रतरं वहन्ति समुद्रं प्रापयन्ति ॥ १८ ॥

गो० टी०–व्यामिश्रितमिति । सर्जैः असनपुष्पैः कदम्बपुष्पैश्च व्यामिश्रितं संमिलितम् । पर्वतधातुताम्रमित्यनेन नदीनां पर्वतादुत्पत्तिरुक्ता । मयूराणां केकाभिः केकारवैः अनुप्रयातम् अनुस्यूतं नवं जलं वहन्ति । अत्र सात्त्विकराजसज्ञानमिश्रं भगवद्विषयानुरागयुक्तं भक्तिप्रेरितस्तुतिरवमुखरितपरिसरं हृदयं वहन्तो भक्ताः कथ्यन्ते ॥ १८ ॥

१९] ति० टी०–रसाकुलं रसवत् । षट्पदसंनिकाशं भ्रमरसदृशवर्णम् । प्रकामं यथेच्छं यथा भवति तथा प्रभुज्यते जनैरिति शेषः । आम्रफलस्यातिपक्वत्वात्स्वत एव भूमौ पातः ॥ १९ ॥

रा० टी०–रसेति । रसाकुलं रसैर्व्याप्तं षट्पदसंनिषट्पदैः संनीयते रसपानार्थं प्राप्यते तत् अनेकवर्णं पवनावधूतं वायुना कम्पितं विपक्वं जम्बुफलम् आम्रफलं च भूमौ पतति अत एव काशं सुखव्याप्तं यथा भवति तथा प्रकामं प्रभुज्यते जन्तुभिरिति शेषः ॥ १९ ॥

गो० टी०–रसेति । रसाकुलं माधुर्यव्याप्तं षट्पदसंनिकाशं भृङ्गवर्णीलं जम्बु जम्ब्वाख्यं फलम् ' जम्बूः स्त्री जम्बु जाम्बवम् ' इत्यमरः । प्रकामम् अतिशयेन प्रभुज्यते जनैरिति शेषः । अनेकवर्णं रक्तहरितादयनेकरूपम् । आम्रफलं चूतफलम् । अनेन भगवत्कृपया जीवफलाभोग उच्यते ॥ १९ ॥

विद्युत्पताकाः सबलाकमालाः शैलेन्द्रकूटाकृतिसंनिकाशाः ।
गर्जन्ति मेघाः समुदीर्णनादा मत्ता गजेन्द्रा इव संयुगस्थाः ॥ २० ॥
वर्षोदकाप्यायितशाद्वलानि प्रवृत्तनृत्तोत्सवबर्हिणानि ।
वनानि निर्वृष्टबलाहकानि पश्यापराङ्क्षेष्वधिकं विभान्ति ॥ २१ ॥
समुद्वहन्तः सलिलातिभारं बलाकिनो वारिधरा नदन्तः ।
महत्सु शृङ्गेषु महीधराणां विश्रम्य विश्रम्य पुनः प्रयान्ति ॥ २२ ॥
मेघाभिकामा परिसंपतन्ती संमोदिता भाति बलाकपङ्क्तिः ।
वातावधूता वरपौण्डरीकी लम्बेव माला रुचिराम्बरस्य ॥ २३ ॥
बालेन्द्रगोपान्तरचित्रितेन विभाति भूमिर्नवशाद्वलेन ।
गात्रानुपृक्तेन शुकप्रभेण नारीव लाक्षोक्षितकम्बलेन ॥ २४ ॥

२०] ति० टी०–बलाकमालया तत्पङ्क्त्या सहिताः । कूटः शिखरं तदाकारसदृशाकाराः ॥ २० ॥

रा० टी०–विद्युदिति । विद्युतः पताका इव येषां ते सबलाकमालाः बलाकपङ्क्तिसहिताः शैलेन्द्रकूटस्य गिरिराजशिखरस्य आकृतिरिव संनिकाश आकृतिर्येषां ते समुदीर्णः अतिगम्भीरः नादो येषां ते मेघाः मत्ताः संयुगस्थाः गजेन्द्रा इव गर्जन्ति ॥ २० ॥

गो० टी०–विद्युदिति । नक्षत्रमालास्थानीया बलाकमाला शैलेन्द्रस्य कूटानां शृङ्गाणामाकृतेः संस्थानस्य सन्निकाशास्तुल्याः । अनेन सर्वलोकप्रसिद्धाः सकलवावदूकाः वेदमार्गप्रतिष्ठापका उक्ताः ॥ २० ॥

२१] ति० टी०–प्रवृत्तेत्यादि । नृत्तोत्सवप्रवृत्तमयूराणि नितरां दृष्टा बलाहका येषु तानि ॥ २१ ॥

रा० टी०–वर्षेति । वर्षोदकैः आप्यायितानि प्रवृद्धानि शाद्वलानि येषु तानि प्रवृत्तनृत्तोत्सवाः बर्हिणाः मयूराः येषु निर्वृष्टाः बलाहकाः मेघा येषु तानि वनानि अपराङ्क्षेषु अधिकं विभान्ति त्वं पश्य ॥ २१ ॥

गो० टी०–वर्षेति । निर्वृष्टाः वर्षुकाः बलाहकाः मेघाः येषु तानि कर्तरि क्तः । अत्र दिव्यदम्पत्योः स्वकरोद्धृतकुम्भजलसिक्तालवालकलितोद्यानतुल्या लोकाः सर्वे भगवत्कृपावर्षेण संपन्नार्थकामा इत्युच्यते ॥ २१ ॥

२२] ति० टी०–सलिलातिभारं सलिलरूपभारम् । भारवत्त्वाच्च विश्रम्य विश्रम्य गमनम् ॥ २२ ॥

रा० टी०–समिति । बलाकिनः बकपङ्क्तियुक्ताः सलिलातिभारं समुद्वहन्तः नदन्तः वारिधराः मेघाः महीधराणां पर्वतानां महत्सु शृङ्गेषु विश्रम्य विश्रम्य पुनः प्रयान्ति ॥ २२ ॥

गो० टी०–समुद्वहन्त इति । सगर्भजिनाः पर्वतमारोहन्त इव महत्सु शृङ्गेषु पुनः पुनर्विश्रम्य प्रयान्ति । अनेन 'हृद्येनोद्वहन् हरिम्' इत्युक्तरीत्या भगवद्ध्यानेन युक्ताः विश्वदृशानाः सन्ततस्तुतिशीलाः पूर्वापोत्तराघक्लेशं क्रमेणोत्तीर्य परां कोटिमापन्नाः प्रतिपाद्यन्ते ॥ २२ ॥

२३] ति० टी०–गर्भार्थं मेघेष्वभिकामो यस्याः सा । परिसंपतन्ती नभसि गच्छन्ती, अत एव संमोदिता हर्षवती । बलाकपङ्क्तिरित्यर्थो ह्रस्वः । तदुत्प्रेक्षा–व्रातेत्यादि । वरा श्रेष्ठा पौण्डरीकी श्वेतपद्मसंबन्धिनी लम्बा रुचिराम्बरस्य मालेव॥२३॥

रा० टी०–मेघेति । मेघाभिकामा गर्भधारणार्थं मेघविषयकेच्छावती अत एव परिसंपतन्ती मेघानवलोक्य परितो गच्छन्ती संमोदिता बलाकपङ्क्तिः अम्बरस्य आकाशस्य वातावधूता वरपौण्डरीकी श्रेष्ठश्वेतपद्मनिर्मिता लम्बा वृहती रुचिरा रमणीया मालेव भाति ॥ २३ ॥

गो० टी०–मेघेति । गर्भधारणार्थं मेघमभिकामयत इति मेघाभिकामा परिसंपतन्ती मेघं प्राप्तुमागच्छन्तीत्यर्थः । संमोदिता संजातसंमोदा पुण्डरीकाणां सितपद्मानां विकारः पौण्डरीकी वरा चासौ पौण्डरीकी चेति कर्मधारयः । लम्बा रचिता लम्बमानतया कृता । अनेन भगवन्तं कालमेघश्यामं प्राप्तुं प्रवृत्ता भक्तिरूपापन्नधीर्भवति सत्पुरुषस्येति द्योत्यते॥२३॥

२४] ति० टी०–बालैरिन्द्रगोपैरन्तरे मध्ये मध्ये चित्रितेन शाद्वलेन युता भूमिः स्वतः शुकवर्णेन मध्ये मध्ये लाक्षाबिन्दुयुतेन कम्बलेन गात्रानुपृक्तेन गात्रसंपृक्तेन युता नारीव ॥२४॥

रा० टी०–बालेति । बालेन्द्रगोपान्तरचित्रितेन बालैर्नवैः इन्द्रगोपैः अन्तरचित्रितेन मध्ये चित्रीकृतेन नवशाद्वलेन युक्ता भूमिः गात्रानुपृक्तेन शरीरलग्नेन शुकप्रभेण हरितवर्णेन लाक्षोक्षितकम्बलेन मध्ये लाक्षारसरक्तीभूतकम्बलविशेषेण युक्ता नारीव विभाति ॥ २४ ॥

गो० टी०–बालेति । बालेन्द्रगोपैः अन्तरेषु चित्रितेन नानावर्णीकृतेन नवशाद्वलेन उपलक्षिता भूमिः शुकप्रभेण प्राचुर्येण शुकवर्णेन लाक्षोक्षितकम्बलेन मध्ये मध्ये लाक्षारसरञ्जितेन कम्बलेन नारीव भाति । अत्र भगवत्कटाक्षवर्षेण किंचिदुद्भिन्नभक्तिका उच्यन्ते ॥ २४ ॥

१ रचितेति गो. पाठः । २ वृत्तेनेति गो. पाठः ।

निद्रा शनैः केशवमभ्युपैति द्रुतं नदी सागरमभ्युपैति ।
हृष्टा बलाका घनमभ्युपैति कान्ता सकामा प्रियमभ्युपैति ॥ २५ ॥
जाता वनान्ताः शिखिसुप्रनृत्ता जाताः कदम्बाः सकदम्बशाखाः ।
जाता वृषा गोषु समानकामा जाता मही सस्यवनाभिरामा ॥ २६ ॥
वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गमाः ॥ २७ ॥
प्रहर्षिताः [२]केतकिपुष्पगन्धमाघ्राय [३]मत्ता वननिर्झरेषु ।
प्रपातशब्दाकुलिता गजेन्द्राः सार्धं मयूरैः समदा नदन्ति ॥ २८ ॥
धारानिपातैरभिहन्यमानाः कदम्बशाखासु विलम्बमानाः ।
क्षणार्जितं पुष्परसावगाढं शनैर्मदं षट्चरणास्त्यजन्ति ॥ २९ ॥
अङ्गारचूर्णोत्करसंनिकाशैः फलैः सुपर्याप्तरसैः समृद्धैः ।
जम्बूद्रुमाणां प्रविभान्ति शाखा [४]निपीयमाना इव षट्पदौघैः ॥ ३० ॥
तडित्पताकाभिरलंकृतानामुदीर्णगम्भीरमहारवाणाम् ।
विभान्ति रूपाणि बलाहकानां रणोत्सुकानामिव [५]वारणानाम् ॥ ३१ ॥

२५] ति० टी०–निद्रेति । आषाढ्यां स्वापोत्सवादृष्टा गर्भधारणार्थम् ॥ २५ ॥

रा० टी०–निद्रेति । निद्रा केशवमभ्युपैति प्राप्नोति नदी सागरमभ्युपैति बलाका बकपङ्क्तिः घनमभ्युपैति सकामा कान्ता प्रियमभ्युपैति ॥ २५ ॥

गो० टी०–निद्रेति । आषाढे स्वापारम्भः श्रावणे निद्रासक्तिरुच्यते । अत्र तुल्ययोगितालंकारः । लोकोज्जीवनप्रहृत्या हरेस्तदेकचित्तत्वं शेषभूतानां शेषिपारतन्त्र्यसिद्धिश्च द्योतिता २५

२६] ति० टी०–शिखिनां सुष्ठु प्रनृत्तं येषु ते सकदम्बाः सकदम्बपुष्पाः शाखा येषाम् समानकामाः उभयेऽपि कामवन्त इत्यर्थः सस्यैर्वनैश्चाभिरामा ॥ २६ ॥

रा० टी०–जाता इति । वनान्ताः वनमध्यदेशाः शिखिनां सुप्रनृत्तमतिनर्तनं येषु ते । जाताः कदम्बाः सकदम्बाः कदम्बपुष्पसहितशाखावन्तो जाताः वृषाः । वर्दाः गोषु समानकामा जाताः । मही सस्यवनाभिरामा सस्यैर्वनैश्च रामा रमणीया जाता ॥ २६ ॥

गो० टी०–जाता इति । शिखिभिः संप्रनृत्तं येषु ते तथोक्ताः । कदम्बशब्देन कदम्बपुष्पमुच्यते सकदम्बपुष्पशाखा इत्यर्थः । सस्यवनेन सस्यसमूहेन अभिरामा रम्या । अनेन सर्वान्नकूल्यमुक्तम् ॥ २६ ॥

२७] ति० टी०–वहनादिक्रियाणां नद्यादीनां च क्रमेणान्वयाद्यथासंख्यमत्रालंकारः । प्लवङ्गमाः समाश्वसन्ति सुग्रीवराज्यलाभात् ॥ २७ ॥

रा० टी०–वहन्तीति । नदीप्रभृतयः यथाक्रमं वहनादि कुर्वन्ति तत्र प्लवङ्गाः वानराः समाश्वसन्ति इदानीं न कस्माद्विभयमिति बोधयन्तीत्यर्थः । 'समाहयन्ति' इति पाठान्तरम् तत्र हर्षेणेतस्ततो गच्छन्तीत्यर्थः ॥ २७ ॥

गो० टी०–वहन्तीति । यथासंख्यमलंकारः । प्लवङ्गाः वानराः समाश्वसन्ति एकत्रैव बहुभक्ष्यलाभेन अचलचित्ता भवन्तीत्यर्थः ॥ २७ ॥

२८] ति० टी०–वननिर्झरे क्रीडया केतकगन्धमाघ्राय प्रहर्षिताः । प्रपातशब्दः प्रपतन्निर्झरशब्दः ॥ २८ ॥

रा०टी०–प्रहर्षिता इति। केतकपुष्पगन्धमाघ्राय प्रहर्षिताः प्रपातशब्दाकुलिताः निर्झरशब्दश्रवणेन चञ्चलचित्ताः समदाः मदसहिताः अत एव मत्ताः गजेन्द्राः मयूरैः सार्धं नदन्ति ॥२८॥

गो० टी०–प्रहर्षिता इति । हृष्टाः पूर्वमेव संतुष्टाः केतकगन्धमाघ्राय प्रहर्षिताः प्रकर्षेण संतुष्टाः वननिर्झरेषु यः प्रपातशब्दः पतनकृतशब्दः तेनाकुलिताः ॥ २८ ॥

२९] ति० टी०–पुष्परसैस्तदास्वादैरवगाढं दृढं मदं क्षणेनोत्सवेनार्जितम् ॥ २९ ॥

रा० टी०–धारेति । धारानिपातैरभिहन्यमानाः कदम्बशाखासु विलम्बमानाः षट्चरणाः भ्रमराः क्षणार्जितम् उत्सवेन गृहीतं पुष्परसावगाढं पुष्परसैः प्रवृद्धं मदं शनैस्त्यजन्ति ॥२९॥

गो० टी०–धारेति । क्षणार्जितं तत्क्षणसंपादितं पुष्परसेनावगाढम् उत्पन्नं मदं धारानिपातैः अभिहन्यमानाः अत एव पुष्पं विहाय केवलं शाखासु लम्बमानाः षट्चरणाः भृङ्गाः त्यजन्ति । कदम्बपुष्पेषु रसबाहुल्यात्क्षणेन मदः क्षणेन तद्धानिश्च भवतीत्यर्थः ॥ २९ ॥

३०-३१] ति० टी०–अङ्गार० शान्ताग्निस्तच्चूर्णस्य

१ प्लवङ्गा इति गो. रा. पाठः । २ केतकेति गो. रा. पाठः । ३ हृष्टा इति गो. पाठः । ४ निलीयेति गो. पाठः । ५ उद्यतानामिति गो. पाठः । ६ वारणानामिति गो. रा. पाठः ।

मार्गानुगः शैलवनानुसारी संप्रस्थितो मेघरवं निशम्य ।
युद्धाभिकामः प्रतिनादशङ्की मत्तो गजेन्द्रः प्रतिसंनिवृत्तः ॥ ३२ ॥
क्वचित्प्रगीता इव षट्पदौघैः क्वचित्प्रनृत्ता इव नीलकण्ठैः ।
क्वचित्प्रमत्ता इव वारणेन्द्रैर्विभान्त्यनेकाश्रयिणो वनान्ताः ॥ ३३ ॥
कदम्बसर्जार्जुनकन्दलाढ्या वनान्तभूमिर्मधुवारिपूर्णा ।
मयूरमत्ताभिरुतप्रनृत्तैरापानभूमिप्रतिमा विभाति ॥ ३४ ॥
मुक्तासमाभं सलिलं पतद्वै सुनिर्मलं पत्रपुटेषु लग्नम् ।
हृष्टा विवर्णच्छदना विहङ्गाः सुरेन्द्रदत्तं तृषिताः पिबन्ति ॥ ३५ ॥
षट्पादतन्त्रीमधुराभिधानं प्लवङ्गमोदीरितकण्ठतालम् ।
आविष्कृतं मेघमृदङ्गनादैर्वनेषु संगीतमिव प्रवृत्तम् ॥ ३६ ॥

य उत्करस्तत्समैः । अनेन फलानामतिमहत्त्वं सूचितम् । अत्युक्तिरत्रालंकारः ॥ ३० ॥ ३१ ॥

रा० टी०–अङ्गारेति । अङ्गारचूर्णोत्करसंनिकाशैः जलासिक्तकाष्ठाग्निचूर्णसमूहसदृशैः सुपर्याप्तरसैः परिपूर्णरसविशिष्टैः समृद्धैः बृहत्स्वरूपैः फलैर्युक्ता जम्बुद्रुमाणां शाखाः षट्पदौघैः निपीयमाना इव भान्ति ॥ ३० ॥

गो० टी०–अङ्गारेति । अङ्गारचूर्णानाम् इङ्गालचूर्णानाम् उत्करैः समूहैस्तुल्याः अङ्गारचूर्णोत्करसंनिकाशाः तद्वन्नीला इत्यर्थः ॥ ३० ॥

रा० टी०–तडिदिति । तडितः पताका इव ताभिरलंकृतानाम् उदीर्णः संजातो गम्भीरमहारवो येषां तेषां बलाहकानां मेघानां रूपाणि रणोत्सुकानां वारणानां गजानां रूपाणीव विभान्ति ॥ ३१ ॥

गो० टी०–तडिदिति । विद्युत्पताका इति श्लोकोक्तमेवार्थमादरातिशयेन भङ्ग्यन्तरेणोक्तवान् ॥ ३१ ॥

३२] ति० टी०–पृष्ठतो मेघरवं निशम्य श्रुत्वा प्रतिनादशङ्की शत्रुभूतगजान्तरनादशङ्की प्रतिनिवृत्तः ॥ ३२ ॥

रा० टी०–मार्गेति । शैलवनानुसारी शैलवनेषु विचरणशीलः युद्धाभिकामः गजेन सह युद्धाय अभिकामो यस्य सः अत एव मार्गानुगः मार्गाय गजान्वेषणाय अनुगः निरन्तरं गन्ता मत्तो गजः मेघरवं निशम्य पश्चादेशे श्रुत्वा प्रतिनादशङ्की योद्धुकामगजान्तरशब्दविषयकशङ्कावान् प्रतिसंनिवृत्तः अग्रे गमनात् निवृत्तः पश्चादेशं चलित इत्यर्थः ॥ ३२ ॥

गो० टी०–मार्गेति । मार्गानुगः सन्मार्गचारी वेदमार्गानुसारी दिग्जयाय प्रवृत्तः प्रतिवादिशब्दं श्रुत्वा वादाहवकाङ्क्षी प्रतिसंनिवृत्तः पुरुषधौरेयोऽत्र गम्यते ॥ ३२ ॥

३३] ति० टी०–अनेकाश्रयिणोऽनेकभावाश्रयिणः ॥ ३३ ॥

रा० टी०–क्वचिदिति । षट्पदौघैः भ्रमरसमूहैः क्वचित्प्रगीता इव नीलकण्ठैर्मयूरैः क्वचित्प्रनृत्ता इव वारणेन्द्रैर्गजैः क्वचित्प्रमत्ता इव वनान्ता वनमध्यदेशाः अनेकाश्रयिणः बहुधर्मविशिष्टा भान्ति ॥ ३३ ॥

गो० टी०–क्वचिदिति । प्रकृष्टं गीतं येषां ते प्रगीताः एवमुत्तरत्रापि योज्यम् । अनेकाश्रयिणः गीतनृत्तमदाश्रयिणः ३३

३४] ति० टी०–कन्दलं स्थलोत्पलम् मधुवारि मधुसदृशवारि आपानभूमिर्मद्यपानभूमिस्तस्यामपि कदम्बादिपुष्पाणि मद्यपूर्णता मत्तजनशब्दस्तन्नृत्यं च ॥ ३४ ॥

रा० टी०–कदम्बेति । कदम्बादिभिस्तरुभिराढ्या मधुवारिभिः मद्यसदृशवर्णविशिष्टजलैः पूर्णा वनान्तभूमिः मयूरमत्ताभिरुतप्रनृत्तैः मत्तमयूररुतनृत्यैः आपानभूमिप्रतिमा मद्यपानभूमिसदृशी विभाति । मद्यपानभूमौ मद्यपनृत्यादि प्रसिद्धम् ॥ ३४ ॥

गो० टी०–कदम्बेति । कदम्बैः सर्जैः बन्धूकैः कन्दलैः भूता(?)लपुष्पैश्चाद्या मयूराणां मत्ताभिरुतैः प्रनृत्तैश्च आपानभूमिप्रतिमा मद्यपानस्थलीतुल्या विभाति । सा हि संस्कारपुष्पाद्या मद्यपूर्णा उन्मादनृत्तवत्पुरुषयुक्ता च भवति ॥ ३४ ॥

३५] ति० टी०–विवर्णच्छदनाः जलसेकतो विवर्णपक्षाः ॥ ३५ ॥

रा० टी०–मुक्तेति । सुरेन्द्रदत्तम् इन्द्रप्रेरणया मेघैर्मुक्तम् अत एव पतत् अधः आगच्छत् अत एव पत्रपुटेषु द्रोणाकारपत्रेषु लग्नं मुक्तासमाभं सुनिर्मलसलिलं हृष्टाः स्वपेयजलप्राप्त्या प्राप्तहर्षाः विवर्णच्छदनाः जलसिक्तत्वेन परिणतपक्षास्तृषिताः विहङ्गा चातकाः पिबन्ति । चातकाः सद्योवृष्टस्वातिजलमेव पिबन्तीति प्रसिद्धिः ॥ ३५ ॥

गो० टी०–मुक्तेति । विवर्णच्छदनाः विविधवर्णपक्षाः विहङ्गाः चातकाः सुरेन्द्रदत्तं देवेन्द्रदत्तम् । चातकाः भूस्थं जलं न पिबन्ति किंतु सद्योवर्षदेवताभूतेन्द्रदत्तमेव पिबन्तीति प्रसिद्धिः ॥ ३५ ॥

३६] ति० टी०–षट्पदो भ्रमरस्तद्ध्वनिरूपं तन्त्रीणां मधुरमभिधानं गीतं यस्मिन् प्लवङ्गमानां भेकानामुदीरितमेव

१ नवेति गो. पाठः । २ सकाशमिति गो. पाठः ।

क्वचित्प्रनृत्तैः क्वचिदुन्नदद्भिः क्वचिच्च वृक्षाग्रनिषण्णकायैः ।
व्यालम्बबर्हाभरणैर्मयूरैर्वनेषु संगीतमिव प्रवृत्तम् ॥ ३७ ॥
स्वनैर्घनानां प्लवगाः प्रबुद्धा विहाय निद्रां चिरसंनिरुद्धाम् ।
अनेकरूपाकृतिवर्णनादा नवाम्बुधाराभिहता नदन्ति ॥ ३८ ॥
नद्यः समुद्वाहितचक्रवाकास्तटानि शीर्णान्यपवाहयित्वा ।
दृष्ट्वा नवप्रावृतपूर्णभोगाद्दृतं स्वभर्तारमुपोपयन्ति ॥ ३९ ॥
नीलेषु नीला नववारिपूर्णा मेघेषु मेघाः प्रतिभान्ति सक्ताः ।
दवाग्निदग्धेषु दवाग्निदग्धाः शैलेषु शैला इव बद्धमूलाः ॥ ४० ॥

कण्ठतालं सूत्रधारमुखशब्दतालो यस्मिन् मेघशब्दा एव मृदङ्गनादास्तैराविष्कृतं प्रकटितं संगीतं वनेषु प्रवृत्तमिव ॥ ३६ ॥

रा० टी०–षट्पादेति । षट्पादा भ्रमरास्तन्त्र्यो वीणा इव तेषां मधुराभिधानं मधुरशब्दो यस्मिन् तत् प्लवङ्गमैः दर्दुरैः उदीरितः कण्ठतालः सूत्रधारकण्ठनिःसृतशब्दविशेषो यस्मिन् तत् मेघा एव मृदङ्गास्तेषां नादैः आविष्कृतं प्रकटितं वनेषु संगीतमिव प्रवृत्तम् ॥ ३६ ॥

गो० टी०–षट्पादेति । षट्पादा भृङ्गाः एव तन्त्री तस्या मधुराभिधानं मधुरनादः यस्मिन् तत् प्लवङ्गमोदीरितं मण्डूकनाद एव कण्ठतालो यस्मिन् तत् मेघा एव मृदङ्गा मर्दलाः तेषां नादैराविष्कृतं प्रकटीकृतं संगीतं वनेषु प्रवृत्तमिव संबभूवेति योजना ॥ ३६ ॥

३७] ति० टी०–प्रनृत्तैरारब्धनृत्तैः उन्नदन्तो गायकास्तैः वृक्षाग्रनिषण्णकायास्ते संगीतोपलक्षितनृत्यप्रदर्शकाः॥३७॥

रा० टी०–क्वचिदिति । क्वचित्कस्मिंश्चित् समये प्रनृत्तैः प्रकृष्टनर्तनविशिष्टैः क्वचित् उन्नदद्भिः महानादं कुर्वद्भिः क्वचिद्वृक्षाग्रेषु निषण्णाः संस्थापिताः कायाः शरीराणि यैस्तैः व्यालम्बीनि अतिविशालानि बर्हाणि पिच्छानि एव आभरणानि येषां तैः मयूरैः वनेषु संगीतमिव प्रवृत्तम् ॥ ३७ ॥

गो० टी०–क्वचिदिति । संगीतविषये केचिन्नृत्यन्ति केचिद्गायन्ति केचित् प्रधाना अनुभवन्ति तत्सर्वं वनेऽपि दर्शयति–नृत्यन्तो मयूराः नर्तकस्थानीयाः नदन्तो मयूराः गायकस्थानीयाः वृक्षाग्रनिषण्णकायाः मयूराः अनुभवितृस्थानीयाः । अतस्तैः संगीतं प्रवृत्तमिव ॥ ३७ ॥

३८] ति० टी०–चिरसंनिरुद्धां चिरसंपादिताम् । शुष्कमृत्तिकास्विति शेषः, प्लवगा भेकाः अनेकरूपाकृतिः संस्थानं वर्णो नीलपीतादिर्नादश्च येषाम् ॥ ३८ ॥

रा० टी०–स्वनैरिति । चिरसंनिरुद्धां बहुकालं स्थितां निद्रां घनानां स्वनैः करणैर्विहाय प्रबुद्धाः सावधानाः अनेकरूपाकृतिवर्णनादाः अनेकरूपादिविशिष्टाः प्लवगाः भेका अम्बुधाराभिहताः सन्तो नदन्ति ॥ ३८ ॥

गो० टी०–स्वनैरिति । प्लवगाः मण्डूकाः घनानां स्वनैः चिरसंनिरुद्धां चिरकालव्यापारनिरोधिकां निद्रां विहाय प्रबुद्धा इति संबन्धः ॥ ३८ ॥

३९] ति० टी०–कामातुरयुवतिवृत्तान्तं नदीष्वारोपयति–नद्य इति। वारिपूरेण समुद्वाहिता उन्नमिताश्चक्रवाकरूपस्तना याभिः । शीर्णानि तटानि रोधकजरतीस्थानीयान्यपवाहयित्वा निरस्य नवप्रावृतपूर्णभोगाद्दृतं नवं प्रावृतं पुष्पाद्युपहारात्पूर्णभोगायादृतं स्वीकृतम् । उपोपयन्ति 'प्रसमुपोदः पादपूरणे' इति द्वित्वम् ॥ ३९ ॥

रा० टी०–नद्य इति । समुद्वाहिताः वारिपूरेणोन्नीताः चक्रवाकाः याभिस्ताः दृष्टाः नद्यः शीर्णानि स्ववेगेन विदारितानि तटानि अपवाहयित्वा नवप्रावृतपूर्णभोगाः नवैः प्रावृतैः पुष्पाद्युपहारैः पूर्णाः भोगा यासां ताः सत्यः स्वभर्तारं समुद्रं द्रुतमुपोपयान्ति ॥ ३९ ॥

गो० टी०–अथ नदीनां स्वभर्तृसङ्गममिच्छन्तीभिरुत्कटमन्मथाभिर्युवतिभिः साम्यमुच्यते । समुद्वाहितचक्रवाकाः वारिपूरोन्नमितचक्रवाकाः स्तनस्थानीयाः । अपवाहयित्वेत्येतन्नवोद्वेधोचितलज्जातिलङ्घनस्थानीयम् । नवप्रावृतपूर्णभोगाः प्रावृतं फलाद्युपहारः भोगश्चन्दनकर्पूरकुसुमताम्बूलादिः, स्वभर्तारं समुद्रम् उपोपयान्ति उपयान्तीत्यर्थः ॥ ३९ ॥

४०] ति० टी०–नीलेषु मेघेषु सक्ता नीलमेघाः प्रतिभान्ति । दवाग्निदग्धेषु शैलेषु तादृशाः शैला यदि सक्ता भवन्ति तदा ते इव । बद्धमूला इत्युभयान्वयि ॥ ४० ॥

रा० टी०–नीलेष्विति । नीलेषु जलपूर्णतया नैल्यविशिष्टेषु मेघेषु सक्ताः आसक्ताः वारिपूर्णाः मेघाः दवाग्निदग्धेषु शैलेषु बद्धमूलाः सक्ताः दग्धा शैला इव प्रतिभान्ति ॥ ४० ॥

गो० टी०–नीलेष्विति । दवाग्निदग्धेषु बद्धमूला दवाग्निदग्धाः शैला इव नीलेषु मेघेषु सक्ता नववारिपूर्णाः नीला मेघाः प्रविभान्ति । बद्धमूलस्वस्थाने नववारिपूर्णा इत्युक्तम् उभयत्र स्थायित्वमर्थः ॥ ४० ॥

---

१ व्यालम्बीति रा. पाठः । २ भूतेति गो. पाठः । ३ यास्तीति गो. रा. पाठः । ४ प्रवीति गो. पाठः । ५ शक्ता इति रा. पाठः

प्रमत्तसंनादितबर्हिणानि सशक्रगोपाकुलशाद्वलानि ।
चरन्ति नीपार्जुनवासितानि गजाः सुरम्याणि वनान्तराणि ॥ ४१ ॥
नवाम्बुधाराहतकेसराणि ध्रुवं परित्यज्य सरोरुहाणि ।
कदम्बपुष्पाणि सकेसराणि नवानि हृष्टा भ्रमराः पिबन्ति ॥ ४२ ॥
मत्ता गजेन्द्रा मुदिता गवेन्द्रा वनेषु विक्रान्ततरा मृगेन्द्राः ।
रम्या नरेन्द्रा निभृता नरेन्द्रा प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥ ४३ ॥
मेघाः समुद्धूतसमुद्रनादा महाजलौघैर्गगनावलम्बाः ।
नदीस्तटाकानि सरांसि वापीर्महीं च कृत्स्नामपवाहयन्ति ॥ ४४ ॥
वर्षप्रवेगा विपुलाः पतन्ति प्रवान्ति वाताः समुदीर्णवेगाः ।
प्रनष्टकूलाः प्रवहन्ति शीघ्रं नद्यो जलं विप्रतिपन्नमार्गाः ॥ ४५ ॥
नरैर्नरेन्द्रा इव पर्वतेन्द्राः सुरेन्द्रनीतैः पवनोपनीतैः ।
घनाम्बुकुम्भैरभिषिच्यमाना रूपं श्रियं स्वामिव दर्शयन्ति ॥ ४६ ॥
घनोपगूढं गगनं न तारा न भास्करो दर्शनमभ्युपैति ।
नवैर्जलौघैर्धरणी वितृप्ता तमोविलिप्ता न दिशः प्रकाशाः ॥ ४७ ॥

४१-४२] ति० टी०–प्रमत्तशब्दवन्मयूरवन्ति । शक्रगोपः इन्द्रगोपः ॥ ४१ ॥ ४२ ॥

रा० टी०–प्रमत्तेति । प्रमत्ताः अत एव संनादिताः संनादवन्तो बर्हिणाः मयूराः येषु तानि सशक्रगोपैः(?)आकुलानि व्याप्तानि शाद्वलानि येषु तानि नीपार्जुनवासितानि नीपार्जुनयोर्गन्धविशिष्टानि वनान्तराणि गजाः चरन्ति ॥ ४१ ॥

गो० टी०–प्रहृष्टेति । वनान्तराणि वनमध्यानि चरन्ति वनमध्येषु चरन्तीत्यर्थः ॥ ४१ ॥

रा० टी०–नवेति । नवाम्बुधाराभिः हताः केसराः येषां तानि सरोरुहाणि कमलानि परित्यज्य सकेसराणि नवानि कदम्बपुष्पाणि हृष्टाः भ्रमराः पिबन्ति ॥ ४२ ॥

गो०टी०-नवेति। कदम्बकेसराणामहतत्वे हेतुर्नवानीति४२

४३] ति० टी०–गवेन्द्रा वृषभाः । निभृतास्त्यक्तोद्योगाः सर्वत्र जाता इति शेषः । सुरेन्द्रो देवेन्द्रः प्रक्रीडितः कर्तरि निष्ठा ॥ ४३ ॥

रा० टी०–मत्ता इति । गजेन्द्राः मत्ताः गवेन्द्राः वृषभाः मुदिताः मृगेन्द्राः वनेषु विक्रान्ततराः अतिविक्रमवन्तः नगेन्द्राः महापर्वताः रम्याः नरेन्द्राः निभृताः त्यक्तोद्योत्साहाः सुरेन्द्रः वारिधरैः प्रक्रीडितः ॥ ४३ ॥

गो० टी०–मत्ता इति । मृगेन्द्राः सिंहाः नगेन्द्राः पर्वतश्रेष्ठाः रम्याः पल्लवपुष्पाङ्कुरादिति भावः । प्रक्रीडित इति कर्तरि निष्ठा ॥ ४३ ॥

४४] ति० टी०–समुद्धूतस्तिरस्कृतः समुद्रनादो यैः । अपवाहयन्ति प्रवहज्जलानि कुर्वन्ति ॥ ४४ ॥

रा० टी०–मेघा इति । समुद्धूतः तिरस्कृतः समुद्रनादः यैस्ते गगनावलम्बाः मेघाः महाजलौघैः नद्यादीनि अपवाहयन्ति पूरयन्तीत्यर्थः ॥ ४४ ॥

गो० टी०–मेघा इति । अपवाहयन्ति परिवाहयन्ति ॥४४॥

४५] ति० टी०–वर्षप्रवेगा दृष्टयः । विप्रतिपन्नः प्रतिबद्धो मार्गो नृणां याभिस्ताः ॥ ४५ ॥

रा० टी०–वर्षेति । विपुलाः वर्षप्रवेगाः दृष्टिप्रवाहाः पतन्ति । समुदीर्णवेगाः अतिवेगवन्तो वाताः प्रवान्ति । अत एव प्रणष्टकूलाः अत एव विप्रतिपन्नाः निवर्तिताः मार्गाः जनानामध्वानः याभिस्ताः नद्यः जलं शीघ्रं प्रवहन्ति ॥ ४५ ॥

गो० टी०–वर्षेति । वर्षप्रवेगाः अतिवेगा दृष्टय इत्यर्थः । विपुलाः निरन्तराः नद्यो जलैः विप्रतिपन्नमार्गाः विरुद्धं प्राप्तमार्गाः ॥ ४५ ॥

४६] ति० टी०–रूपं निर्मलमाकारम् । श्रियं विविधधातुयुक्तत्वरूपां दर्शयन्तीव ॥ ४६ ॥

रा० टी०–नरैरिति । नरैर्नरेन्द्रा राजान इव सुरेन्द्रदत्तैरिन्द्रप्रेरितैः पवनोपनीतैः घनाम्बुकुम्भैः घना एव अम्बुकुम्भास्तैरभिषिच्यमानाः पर्वतेन्द्राः रूपं स्वां श्रियं चाभिदर्शयन्ति॥४६॥

गो० टी०–नरैरिति । अभिषिक्ताः नरेन्द्राः स्वां श्रियमिव अभिषिच्यमानाः पर्वताः स्वं रूपं दर्शयन्ति नैर्मल्यादिनेति भावः ॥ ४६ ॥

४७] ति० टी०–घनोपगूढत्वाद्गगनस्य तारारविदर्शनाभावः । वितृप्ता जामितां ? प्राप्ता ॥ ४७ ॥

१ प्रहृष्टेति गो. पाठः । २ द्रुतं परित्यज्येति गो. परित्यज्येति रा. पाठः । ३ पतन्तीति गो. पाठः । ४ विश्रान्तेति गो.पाठः । ५ नगेन्द्रा इति गो. रा. पाठः । ६ घोषा इति गो. पाठः । ७ जलैरिति गो. पाठः । ८ दत्तैरिति गो. रा. पाठः । ९ सतारमिति गो. पाठः । १० प्रकाश इति रा. पाठः ।

महान्ति कूटानि महीधराणां धाराविधौतान्यधिकं विभान्ति ।
महाप्रमाणैर्विपुलैः प्रपातैर्मुक्ताकलापैरिव लम्बमानैः ॥ ४८ ॥
शैलोपलप्रस्खलमानवेगाः शैलोत्तमानां विपुलाः प्रपाताः ।
गुहासु संनादितबर्हिणासु हारा विकीर्यन्त इवावभान्ति ॥ ४९ ॥
शीघ्रं[1] प्रवेगा विपुलाः प्रपाता निर्धौतशृङ्गोपतला गिरीणाम् ।
मुक्ताकलापप्रतिमाः पतन्तो महागुहोत्सङ्गतलैर्[2]श्रियन्ते ॥ ५० ॥
सुरतामर्दविच्छिन्नाः स्वर्गस्त्रीहारमौक्तिकाः । पतन्ति चातुला[3] दिक्षु तोयधाराः समन्ततः ॥ ५१ ॥
विलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः । विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥ ५२ ॥
वृत्ता यात्रा नरेन्द्राणां सेना पथ्येव वर्तते । वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥ ५३ ॥
मासि प्रौष्ठपदे ब्रह्म ब्राह्मणानां विवक्षताम्[5] । अयमध्यायसमयः सामगानामुपस्थितः ॥ ५४ ॥

रा० टी०–घन इति । गगनं घनोपगूढं घनैराच्छन्नम् अतः तारादर्शनं नाभ्युपैति भास्करश्च दर्शनं नाभ्युपैति जलौघैर्धरणी विलुप्ता तमोविलिप्ता अन्धकारेणावृता च अत एव दिशः प्रकाशो न ॥ ४७ ॥

गो० टी०–घनेति । तमोविलिप्ता दिशः न प्रकाशाः ॥४७॥

४८] ति० टी०–प्रपातैर्निर्झरैः ॥ ४८ ॥

रा० टी०–महान्तीति । महाप्रमाणैः अतिविस्तृतैर्विपुलैर्बहुभिः मुक्ताकलापैः मुक्तासमूहैः लम्बमानैरिव प्रपातैर्निर्झरैः धाराविधौतानि महीधराणां महान्ति कूटानि अधिकं विभान्ति ४८

गो० टी०–महान्तीति । प्रपातैः निर्झरैः ॥ ४८ ॥

४९] ति० टी०–प्रपतन्तीति प्रपाता निर्झराः । विकीर्यन्तस्त्रुट्यन्तः ॥ ४९ ॥

रा० टी०–शैलेति । शैलोपलेषु प्रस्खलमानो वेगो येषां ते विपुलाः प्रपाताः निर्झराः संनादितबर्हिणासु शैलोत्तमानां गुहासु विकीर्यन्तः त्रुट्यन्तो हारा इव भान्ति ॥ ४९ ॥

गो० टी०–शैलेति । शैलोत्तमानां विपुलाः प्रपाताः निर्झराः शैलोपलप्रस्खलमानवेगाः सन्तः सन्नादितबर्हिणासु गुहासु विकीर्यन्तः विकीर्यमाणाः हारा इव अवभान्ति ॥ ४९ ॥

५०–५१] ति० टी०–निर्धौतं क्षालितं शृङ्गाणामुपतलं यैस्ते ॥ ५० ॥ ५१ ॥

रा० टी०–शीघ्रेति । शीघ्रप्रवगाः विपुला बहवः निर्धौतश्रृङ्गोपतलाः प्रक्षालितशृङ्गप्रदेशाः मुक्ताकलापप्रतिमाः मुक्तासमूहसदृशाः पतन्तो गिरीणां प्रपाताः महागुहानामुत्सङ्गतलैर्श्रियन्ते ॥ ५० ॥

गो० टी०–शीघ्रेति । निर्धौतानि निर्मलीकृतानि शृङ्गोपतलानि शृङ्गसमीपतलानि यैस्ते तथा । गुहोत्सङ्गतलैः गुहामध्यतलैः ॥ ५० ॥

रा० टी०–सुरतेति । सुरतामर्दविच्छिन्नाः सुरतेषु विहारेषु आमर्देर्विच्छिन्नाः पतिताः स्वर्गस्त्रीहारमौक्तिका इव तोयधारा समन्ततः पतन्ति ॥ ५१ ॥

गो० टी०–सुरतेति । तोयधाराः मौक्तिका इव पतन्तीति स्वरूपोत्प्रेक्षा ॥ ५१ ॥

५२] ति० टी०–ज्ञायतेऽनुमीयते । अनुमानालंकारः॥५२॥

रा० टी०–सूर्यदर्शनाभावेन रात्रिदिवसयोस्तुल्यत्वेऽपि रात्रिबोधकमसाधारणचिह्नमाह–विलीयमानैरिति । विलीयमानैः स्वस्ववासतृक्षं गच्छद्भिर्विहगैः निर्मीलद्भिर्मुकुलीभावं प्राप्नुवद्भिः पङ्कजैः विकसन्त्या मालत्या च अस्तं गतो रविर्ज्ञायते ॥ ५२ ॥

गो० टी०–निलीयमानैरिति । निलीयमानैः नीडेषु गच्छद्भिः ॥ ५२ ॥

५३] ति० टी०–वृत्ता निवृत्ता । 'वृक्ता' इति पाठेऽप्ययमेवार्थः । प्रस्थितापि सेना पथ्येव वर्तते । समीकृताः निरुद्धत्वं साधारणधर्मः ॥ ५३ ॥

रा० टी०–वृत्तेति । नरेन्द्राणां यात्रा वृत्ता निवृत्ता अत एव सेना पथि वर्तते न क्वचित् यातीत्यर्थः, अत एव वैराणि परस्परं राज्ञां द्वेषा मार्गाश्च सलिलेन समीकृताः ॥ ५३ ॥

गो० टी०–वृत्तेति । वृत्ता निवृत्ता अतोऽग्रे गता सेना प्रतिनिवृत्ता । सलिलेन वैराणि समीकृतानि सलिलप्रतिरोधाद्वैराणि शान्तानीत्यर्थः । मार्गाश्च समीकृताः जलेन मार्गामार्गविवेको नासीदित्यर्थः ॥ ५३ ॥

५४] ति० टी०–प्रौष्ठपदो भाद्रपदः । ब्रह्म वेदं विवक्षतामध्येतुमिच्छताम् अध्यायसमय उपाकरणकालः ॥ ५४ ॥

रा० टी०–मासीति । ब्रह्म वेदं विवक्षतां पठितुमिच्छतां सामगानां प्रोष्ठपदे भाद्रे मासि अयं शुक्लतृतीयातिथिः अध्यायसमयः उपाकरणकालः उपस्थितः प्राप्तः ॥ ५४ ॥

गो० टी०–मासीति । अनेन भाद्रपदो मासः संप्रवृत्त इति सूचयति । ब्रह्म वेदं विवक्षताम् अध्येतुमिच्छताम् अध्यायसमयः वेदारम्भसमयः ॥ ५४ ॥

१ शीघ्रप्रवेगा इति गो. रा. पाठः । २ इवाकुला इति गो. पाठः । ३ निलीयेति गो. पाठः । ४ प्रतिनीति गो. पाठः । ५ प्रोष्ठपद इति गो. पाठः ।

विवृत्तकर्मायतनो नूनं संचितसंचयः । आषाढीमभ्युपगतो भरतः कोशलाधिपः ॥ ५५ ॥
नूनमापूर्यमाणायाः सरय्वा वर्धते रयः । मां समीक्ष्य समायान्तमयोध्याया इव स्वनः ॥ ५६ ॥
इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते । विजितारिः सदारश्च राज्ये महति च स्थितः ॥ ५७ ॥
अहं तु हृतदारश्च राज्याच्च महतश्च्युतः । नदीकूलमिव क्लिन्नमवसीदामि लक्ष्मण ॥ ५८ ॥
शोकश्च मम विस्तीर्णो वर्षाश्च भृशदुर्गमाः । रावणश्च महाञ्छत्रुरपारः प्रतिभाति मे ॥ ५९ ॥
अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान् । प्रणते चैव सुग्रीवे न मया किंचिदीरितम् ॥ ६० ॥
अपि चापि परिक्लिष्टं चिराद्दारैः समागतम् । आत्मकार्यगरीयस्त्वाद्वक्तुं नेच्छामि वानरम् ॥ ६१ ॥

५५] ति० टी०–निवृत्तं कर्म छादनादि कर्म यस्य तादृशमायतनं यस्य । संचिताः संचया जीवनसाधनानि येन स भरत आषाढीं प्राप्याभ्युपगतः कृतयत्किंचिद्व्रतसंकल्पः॥५५॥

रा० टी०–निवृत्तेति । निवृत्तं कर्मायतनं राजकर्मणां मूलं यात्रेत्यर्थः, यस्य सः अत एव संचिता आजिताः संचयाः कर्मसाधकपदार्थाः येन स कोशलाधिपो भरतः आषाढीं पूर्णिमां प्राप्य अभ्युपगतः विशेषानुष्ठानमारभत ॥ ५५ ॥

गो० टी०–निवृत्तेत्ति । निवृत्तं कर्म यस्य तन्निवृत्तकर्म आयतनं गृहं यस्य सः निवृत्तकर्मायतनः उपरतसकलगृहोपकरणसंपादन इत्यर्थः । संचितसंचयः संपादितधननिचयः । आषाढीम् आषाढमाससमाप्तिपौर्णमासीम् अभ्युपगतः व्रताङ्गत्वेन स्वीकृतवान् । अनेन चत्वारो वार्षिका मासा इति पूर्वोक्तमासानाम् आषाढः प्राथमिक इति सूचितम् ॥ ५५ ॥

५६] ति० टी०–मामायान्तं समीक्ष्य । वनतः प्रतिनिवृत्तमिति शेषः ॥ ५६ ॥

रा० टी०–नूनमिति । आयान्तं मां समीक्ष्य अयोध्यायां स्वन इव आपूर्यमाणायाः सरय्वा रयो वेगः वर्धते ॥ ५६ ॥

गो० टी०–नूनमिति । अयोध्यायाः अयोध्यावासिजनस्य ॥ ५६ ॥

५७] ति० टी०–वर्षाः प्राप्येति शेषः ॥ ५७ ॥

रा० टी०–इमा इति । स्फीतगुणाः इमाः वर्षा राज्ये च स्थितः सुग्रीवः सुखमश्नुते ॥ ५७ ॥

गो० टी०–इमा इति । वर्षा इत्यत्यन्तसंयोगे द्वितीया ॥ ५७ ॥

५८] ति० टी०–नदीकूलं कर्तृ ॥ ५८ ॥

रा० टी०–अहमिति । हृता दारा यस्य सः अत एव महतो राज्यात् शोभायाश्च्युतोऽहं तु क्लिन्नमाप्लावितं नदीकूलमिव अवसीदामि ॥ ५८ ॥

गो० टी०–अहं त्विति । अजितारिश्चेत्यपि शेयम् । क्लिन्नम् आर्द्रम् ॥ ५८ ॥

५९] ति० टी०–वर्षाश्च विस्तीर्णा इत्यनुकर्षः । अपारो दुष्प्रापवैरनिर्यातनपरः ॥ ५९ ॥

रा० टी०–शोक इति । मम शोकादिः अपारः बहुकालमन्तरहित इव भाति ॥ ५९ ॥

गो० टी०–शोकश्चेति । मम शोकश्च विस्तीर्णः वर्षाश्च भृशदुर्गमाः अत्यन्तं दुरत्ययाः रावणश्च महान् शत्रुः अतश्च एतत्त्रितयम् अपारं दुस्तरं प्रतिभाति ॥ ५९ ॥

६०] ति० टी०–अयात्रां वर्षवशायात्राभावम् । कार्योन्मुखतया सुग्रीवे प्रणतेऽपि मया सीतान्वेषणाद्युद्दिश्य किंचिदपि नोक्तम् ॥ ६० ॥

रा० टी०–अयात्रामिति । दुर्गमान् मार्गान् दृष्ट्वा अत एव अयात्रां यात्राभावं दृष्ट्वा प्रणतेऽपि सुग्रीवे मया किंचिन्न ईरितम् ॥ ६० ॥

गो० टी०–अयात्रामिति । अयात्रां राज्ञामेतत्कालोचितदण्डयात्राभावम् । प्रणते चैव इदानीमेव सीतान्वेषणरावणनिरसनोद्योगः कर्तव्य इति प्रार्थनापूर्वकं प्रह्वीभूते सत्यपीत्यर्थः ॥ ६० ॥

६१] ति० टी०–अपि च तदानीं गरीयसे आत्मकार्याय वक्तुमनुचितमित्याह—अपि चेति । अपिपरिक्लिष्टमतिपरिक्लिष्टम् गरीयस्त्वादल्पकालाल्पयत्नासाध्यत्वात् नेच्छामि नैषिषम् ॥ ६१ ॥

रा० टी०–अपीति । अपि च अन्यदुच्यते चिराद् बहुकालं परिक्लिष्टं दारैः समागतम् इदानीं स्त्रीभिः संयुक्तं वानरं सुग्रीवं वक्तुम् आज्ञापयितुम् आत्मनः कार्यस्य गरीयस्त्वात् बहुकालादितः साध्यत्वात् हेतोः नेच्छामि, किंच आत्मकार्यस्य गरीयस्त्वात् गुरुत्वादपि नेच्छामि ॥ ६१ ॥

गो० टी०–अपि चेति । आत्मकार्यगरीयस्त्वात् अस्मत्प्रयोजनस्यातिमहत्त्वात् अल्पयत्नेन अल्पकालेन चासाध्यत्वादित्यर्थः, वक्तुं नियोक्तुं नेच्छामीति भूतार्थे लट् ॥ ६१ ॥

१ अपारमिति गो. पाठः ।

स्वयमेव हि विश्रम्य ज्ञात्वा कालमुपागतम् । उपकारं च सुग्रीवो वेत्स्यते नात्र संशयः ॥ ६२॥
तस्मात्कालप्रतीक्षोऽहं स्थितोऽस्मि शुभलक्षण । सुग्रीवस्य नदीनां च प्रसादमभिकाङ्क्षयन् ॥ ६३ ॥
उपकारेण वीरो हि प्रतीकारेण युज्यते । अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ६४ ॥
अथैवमुक्तः प्रणिधाय लक्ष्मणः कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ।
उवाच रामं स्वभिरामदर्शनं प्रदर्शयन्दर्शनमात्मनः शुभम् ॥ ६५ ॥
यदुक्तमेतत्तव सर्वमीप्सितं नरेन्द्र कर्ता न चिराद्धरीश्वरः ।
शरत्प्रतीक्षः क्षमतामिदं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।

विषयासक्त्या विस्मृतरामकार्यमतः शरदागमेऽपि सुहृत्कार्योदासीन सुग्रीवं रामगुणानुवर्णनपूर्वकं स्मारयन्हनुमान्सीतान्वेषणार्थं सैन्यसमानयने प्रेरयति । प्रबुद्धः सुग्रीवः सकलकपिबलानयनार्थं दूतप्रेषणे नीलं नियुङ्क्ते ।

समीक्ष्य विमलं व्योम गतविद्युद्बलाहकम् । सारसाकुलसंघुष्टं रम्यज्योत्स्नानुलेपनम् ॥ १ ॥
समृद्धार्थं च सुग्रीवं मन्दधर्मार्थसंग्रहम् । अत्यर्थं चासतां मार्गमेकान्तगतमानसम् ॥ २ ॥
निवृत्तकार्यं सिद्धार्थं प्रमदाभिरतं सदा । प्राप्तवन्तमभिप्रेतान्सर्वानेव मनोरथान् ॥ ३ ॥
स्वां च पत्नीमभिप्रेतां तारां चापि समीप्सिताम्। विहरन्तमहोरात्रं कृतार्थं विगतज्वरम् ॥ ४ ॥
क्रीडन्तमिव देवेशं गन्धर्वाप्सरसां गणैः । मन्त्रिषु न्यस्तकार्यं च मन्त्रिणामनवेक्षकम् ॥ ५ ॥

६२-६६] ति० टी०-वेत्स्यते प्रत्युपकारकः स्मरिष्यति शेषं व्याख्यातम् ॥ ६२-६६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

रा० टी०-स्वयमिति । विश्रम्य स्वश्रमं निवर्त्य उपागतं प्राप्तं कालमन्वेषणसमयं ज्ञात्वा उपकारं मत्कर्तृकोपकृतिं वेत्स्यते समयं प्राप्य यतिष्यत इत्यर्थः, अत्र संशयो न ॥ ६२ ॥

गो० टी०-स्वयमिति । कालं शरत्कालम् ॥ ६२ ॥

रा० टी०-तस्मादिति । तस्मादुक्तहेतोः सुग्रीवस्य नदीनां च प्रसादं स्वेच्छयोद्योगप्रवृत्तिं मार्गदात्रीत्वं चेत्यर्थः, अभिकाङ्क्षयन् कालप्रतीक्षोऽहं स्थितोऽस्मि ॥ ६३ ॥

गो० टी०-उक्तोपपत्तिभिः पूर्वसर्गोक्तं द्रढयति-तस्मादित्यादिना ॥ ६३ ॥

रा० टी०-उपकारेणेत्यादि । श्लोकत्रयमित्थं पूर्वमपि पठितमिति व्याख्यातत्वान्नात्र व्याख्यायते ॥ ६४-६६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०-उपकारेणेति । अकृतज्ञः कृतोपकारानभिज्ञः पुरुषः अप्रतिकृतः प्रत्युपकारमकुर्वन् सत्त्ववतां महात्मनां मनो हन्ति क्षोभयति । वीरः प्रत्युपकारसमर्थः उपकारेण हेतुना प्रतिकारेण प्रत्युपकारेण युज्यते हि युज्यत एव । सुग्रीवोऽप्येवंविधत्वात् प्रत्युपकारं करिष्यतीति भावः । अनेन प्रत्युपकारं कारयित्वा लोके प्रत्युपकारधर्मं प्रवर्तयिष्यामि इत्याशयः ॥ ६४ ॥

गो० टी०-अस्य रामवचनस्य पूर्वसर्गान्तोत्तरमाह-तमिति । तं राममित्यन्वयः । दर्शनं मतम् ॥ ६६ ॥

गो० टी०-यथोक्तमिति । कर्ता करिष्यति लुट् ॥ ६६॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यानेऽष्टाविंशः सर्गः ॥ २८ ॥

१] ति० टी०-ईदृशं व्योम समीक्ष्य हरीश्वरमुपागम्य हनुमानब्रवीदित्युत्तरेण नवमश्लोकस्थेनान्वयः ॥ १ ॥

२] ति० टी०-मन्दो धर्मार्थयोः संग्रहो यस्य तम् । असतां मार्गं कामप्रवृत्तिलक्षणम् अत्यर्थमाश्रयन्तमिति शेषः । एकान्तगतमानसं कामभोगार्हैकान्तदेशगतचित्तम् ॥ २ ॥

३] ति० टी०-निवृत्तकार्यं निष्पन्नवालिवधरूपस्वकार्यम् । सिद्धार्थं प्राप्तराज्यम् । अभिप्रेतानीप्सितानर्थान्प्राप्तवन्तम् ॥ ३ ॥

४-५] ति० टी०-स्वां पत्नीं रुमाम् ॥ ४ ॥ ५ ॥

१ अनुपालयन्निति गो. पाठः । २ प्रतिकारेणेति गो. पाठः । ३ तमेवमिति गो. पाठः । ४ यथोक्तमिति गो. रा. पाठः । ५ इममिति गो. रा. पाठः । ६ रवेति गो. पाठः । ७ अत्यर्थमसतामिति गो. पाठः । ८ नन्दन इति गो. पाठः ।

उच्छिन्नराज्यसंदेहं कामवृत्तमिवस्थितम् । निश्चितार्थोऽर्थतत्त्वज्ञः कालधर्मविशेषवित् ॥ ६ ॥
प्रसाद्य वाक्यैर्विविधैर्हेतुमद्भिर्मनोरमैः । वाक्यविद्वाक्यतत्त्वज्ञं हरीशं मारुतात्मजः ॥ ७ ॥
हितं तथ्यं च पथ्यं च सामधर्मार्थनीतिमत् । प्रणयप्रीतिसंयुक्तं विश्वासकृतनिश्चयम् ॥ ८ ॥
हरीश्वरमुपागम्य हनूमान्वाक्यमब्रवीत् । राज्यं प्राप्तं यशश्चैव कौली श्रीरभिवर्धिता ॥ ९ ॥
मित्राणां संग्रहः शेषस्तद्भवान्कर्तुमर्हति । यो हि मित्रेषु कालज्ञः सततं साधु वर्तते ॥ १० ॥

६] ति० टी०–उच्छिन्नराज्यसंदेहं मन्त्रिसौष्ठवेन नष्टराज्यपालनसंदेहम् । निश्चितार्थो निश्चितसर्वशास्त्रार्थः, अत एवार्थतत्त्वज्ञः कर्तव्याकर्तव्यसकलार्थतत्त्वज्ञः । कालेति कालोचितं धर्मविशेषमनुष्ठेयं वेत्ति तादृशः ॥ ६ ॥

७] ति० टी०–वाक्यैः प्रसादप्रयोजनैः ॥ ७ ॥

८] ति० टी०–हितं तत्कालहितम् । पथ्यं कालान्तरहितम् । तथ्यं सत्यम् । सामादिचतुष्कवदेतच्चतुष्टयं वाक्यविशेषणम् । प्रणयत्वं प्राप्तया प्रीत्या संयुक्तम् । विश्वासे स्ववचनप्रामाण्ये कृतनिश्चयमीदृशं हरीश्वरमित्यन्वयः ॥ ८ ॥

रा० टी०–सुग्रीवं प्रति हनुमदुक्तिमाह–समीक्ष्येत्यादिभिः । गतविद्युद्बलाहकं गता निवृत्ता विद्युतो बलाहकाश्च यस्मात् तत् अत एव विमलं सारसैराकुलं व्याप्तम् अत एव संवृष्टं तदेव तदिति कर्मधारयः रम्यज्योत्स्नाया अनुलेपनं व्याप्तिर्यस्मिन् तत् व्योम समीक्ष्य समृद्धः संपन्नः अर्थो यस्य तमस्यर्थमत्यन्तमसतां मार्गं कामित्वं प्राप्तमिति शेषः, अत एव एकान्ते क्षीमात्रेवितस्थले गतं संलग्नं मानसं यस्य तम् अत एव निवृत्तं कार्यं कृत्यान्तरं यस्य अत एव सदा प्रमदाभिरभिरतम् अत एव मन्दः शिथिलीभूतः धर्मार्थयोः संग्रहो यस्य तम् अभिप्रेतान् इच्छाविषयीभूतान् सर्वान् मनोरथान् उत्तमपदार्थान् अभिप्रेतां स्वां पत्नीं रुमां च समीप्सितां तारां च प्राप्तवन्तम् अत एव गन्धर्वाप्सरसां गणैः क्रीडन्तं कृतार्थं विगतज्वरं देवेशमिव अहोरात्रं विहरन्तम् अत एव सिद्धार्थं मन्त्रिषु न्यस्तानि अधीनीकृतानि कार्याणि येन तं मन्त्रिणामनवेक्षकम् उच्छिन्नः राज्यसंदेहो यस्य तं कामैः कामिभिः वृत्तं वर्तनं यस्य तं वाक्यतत्त्वज्ञम् अवस्थितं हरीशं हरयः ईशाः समर्थाः यस्य तं हरीश्वरं सुग्रीवमुपागम्य प्राप्य अर्थतत्त्वज्ञः अर्थयाथार्थ्यज्ञाता अत एव निश्चितः अर्थः कर्तव्यं वस्तु येन कालधर्मविशेषवित् वाक्यवित् मारुतात्मजो हनुमान् हेतुमद्भिः सयुक्तिकैः वाक्यैः हितं तत्कालोचितं पथ्यमुपकारकं तथ्यं सत्यं सामधर्मार्थनीतिमत् सामादियुक्तं प्रणयप्रीतिभ्यां संयुक्तं प्रणयो नम्रता विश्वासकृतानां श्लोकौ विश्वासयुक्तानां निश्चयो यस्मिन् तत् वाक्यमब्रवीत् । सार्धश्लोकाष्टकमेकान्वयि ॥ १–८ ॥

गो० टी०–अथ हनुमान् रामभक्तोऽपि स्वस्वाम्यनुज्ञाभावेन तं ध्यायन् सुग्रीवसमीप एव स्थितः स्वस्वामिना सर्वस्वामिहितानुगुणं कार्यमारब्धवानित्याहैकोनत्रिंशे–समीक्ष्येत्यादि । हनुमान्वाक्यमब्रवीदित्यन्तमेकं वाक्यम् । हनुमान् उक्तगुणविशिष्टं व्योम उक्तगुणविशिष्टं सग्रीवं च समीक्ष्य हरीशं प्रसाद्य हरीश्वरमुपागम्य प्रणयाद्वाक्यमब्रवीदिति संबन्धः । विमलमित्यादिना सेनासंनाहस्य प्राप्तकालत्वमुक्तं समृद्धार्थमित्यादिना समयातिक्रमहेतवः प्रदर्श्यन्ते । समृद्धार्थं संपूर्णरत्नवस्त्राभरणादिकं मन्दः अल्पः धर्मार्थयोः संग्रहः संपादनं यस्य तम् एकान्तगतमानसम् एकस्मिन् कामपुरुषार्थे अन्तं निश्चयं गतं मानसं यस्य तथोक्तम् । यद्वा असतां कान्तकानां मार्गम् एकान्तगतम् अत्यन्तगतम् मानसं यस्य स तथा 'तीव्रैकान्तानितान्तानि' इत्यमरः । निवृत्तकार्यं निष्पन्नवालिवधकपकार्यं सिद्धार्थं प्राप्तराज्यम् अभिप्रेतानीप्सितान् मनोरथान् राज्यप्राप्त्यनन्तरमेवं करिष्यामीति संकल्पविषयीभूतानर्थान् तारां च प्राप्तवन्तमिति संबन्धः । कृतार्थं निष्पन्नधनम् । मन्त्रिणामनवेक्षकं मन्त्रिकृतकार्यापरामर्शकम् उत्सन्नराज्यसंदेहं नष्टराज्यनियमनं कामवृत्तं कामव्यापारम् अवस्थितं कामव्यापारपरतन्त्रतयाऽवस्थितमित्यर्थः । निश्चितार्थः निश्चितकर्तव्यः । अत्र हेतुः–अर्थतत्त्वज्ञ इति । कालोचितो धर्मः कालधर्मः तद्विशेषवित् वाक्यवित् तदुचितव्यवहारवित् हितम् उदर्कसुखकरं तथ्यं यथार्थं पथ्यं नीतिमार्गादनपेतं सामधर्मार्थनीतिमत् साम च धर्मश्च अर्थश्च नीतिश्च सामधर्मार्थनीति तदस्यास्तीति सामधर्मार्थनीतिमत् । प्रणयप्रीतिसंयुक्तं प्रणयसमानविषयस्नेहः, प्रीतिः स्नेहविषयः, विश्वासकृतनिश्चयम् आप्तवाक्यत्वविश्वासे विषये कृतनिश्चयम् ॥ १–८ ॥

९] ति० टी०–तत्र प्रसादप्रयोजनवाक्यान्याह–राज्यं प्राप्तमित्यादि । कौली कुलक्रमागता ॥ ९ ॥

रा० टी०–तद्वाक्याकारमाह–राज्यमिति । राज्यं यशश्च प्राप्तं त्वयेति शेषः, अत एव कौली स्वकुलसंबन्धिनी श्रीः अभिवर्धिता दार्ढ्यं प्रापिता । मित्राणां संग्रहः तत्कार्यसाधनं तु शेषः अवशिष्टः तत्साधनं कर्तुमर्हति ॥ ९ ॥

गो० टी०–राज्यमिति । कौली कुलक्रमागता श्रीः संपत् अभिवर्धिता अप्रतिद्वन्द्वत्वादिति भावः । मित्राणां संग्रहः तत्कार्यकरणं शेषः अवशिष्टो भवति । इदमेव वचनं प्रसाद्य वाक्यैरित्यादिना पूर्वं प्रशंसितम् ॥ ९ ॥

१०] ति० टी०–शेषः कर्तव्यशेषः । कालज्ञः प्रत्युपकारकालज्ञः साधु वर्तते साध्वनुष्ठानवान्भवति ॥ १० ॥

१ उत्सन्नेति गो. पाठः । २ संदेशमिति गो. पाठः । ३ अवेति गो. रा. पाठः । ४ वाक्यैर्मधुरैरिति गो. पाठः । ५ तत्त्वमिति गो. पाठः । ६ हनुमानिति गो. पाठः ।

तस्य राज्यं च कीर्तिश्च प्रतापश्चापि वर्धते । यस्य कोशश्च दण्डश्च मित्राण्यात्मा च भूमिप ॥
सैमान्येतानि सर्वाणि स राज्यं महदश्नुते ॥ ११ ॥
तद्भवान्वृत्तसंपन्नः स्थितः[1] पथि निरत्यये । मित्रार्थमभिनीतार्थं यथावत्कर्तुमर्हति ॥ १२ ॥
संत्यज्य सर्वकर्माणि मित्रार्थे यो न वर्तते । संभ्रमाद्विकृतोत्साहः सोऽनर्थेनावरुध्यते[2] ॥ १३ ॥
यो [3]हि कालव्यतीतेषु मित्रकार्येषु वर्तते । स कृत्वा महतोऽप्यर्थान्न मित्रार्थेन[4] युज्यते ॥ १४ ॥
तदिदं मित्रकार्यं नः कालातीतमरिन्दम । क्रियतां राघवस्यैतद्वैदेह्याः परिमार्गणम् ॥ १५ ॥
[[5]तदिदं वीर कार्यं ते कालातीतमरिन्दम]
न च कालमतीतं ते निवेदयति कालवित् । त्वरमाणोऽपि [6]सं[7] प्राज्ञस्तव राजन्वशानुगः ॥ १६ ॥

रा० टी०–तत्र हेतुमाह–य इति । यो जनः मित्रेषु साधु वर्तते तस्य राज्यादि वर्धते ॥ १० ॥

गो० टी०–मित्रकार्यस्यावश्यकर्तव्यत्वमाह–यो हीति । कालज्ञः मित्रसंग्रहकालज्ञः तत्कालातिक्रमे विपरीतं भवतीत्यर्थः । मित्रेषु वर्तते मित्राधीनो भवतीत्यर्थः ॥ १० ॥

११] ति० टी०–दण्ड्यतेऽनेन दण्डः सैन्यम् । आत्मा सकरणग्रामः समानि स्ववशत्वेन समत्वम् । 'समवेतानि' इति पाठे मिलितानीत्यर्थः । न त्वेकमपि पृथग्भूतमिति भावः ॥ ११ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–यस्येति । कोशः धनागारं दण्ड्यते अनेन दण्डः सेना मित्राणि च आत्मा स्वदेहश्च एतानि सर्वाणि यस्य समानि स्वदेहवत् कोशादयोऽपि परिपाल्यन्ते इत्यर्थः, स पुरुषः महत् राज्यमश्नुते प्राप्नोति ॥ ११ ॥

गो० टी०–यस्येति । दण्ड्यतेऽनेनेति दण्डः सेनाविशेषः आत्मा प्रभुरित्यर्थः । समवेतानि समुदितानि एकन्यूनत्वे महाराज्यहानिरिति भावः ॥ ११ ॥

१२] ति० टी०–निरत्यये निरपाये । अभिनीतार्थं प्रतिज्ञातार्थम् ॥ १२ ॥

रा० टी०–तदिति । निरत्यये ध्वंसरहिते पथि रामाश्रयणरूपमार्गे स्थितः अत एव वृत्तं प्राप्तं संपन्नं संपत्तियं सः भवान् अभिनीतार्थं प्रतिज्ञाविषयीभूतवस्तुसिद्ध्यर्थं मित्रार्थं यथावत्कर्तुमर्हति ॥ १२ ॥

गो० टी०–तदिति । निरत्यये अविनाशिनि पथि सन्मार्गे इत्यर्थः । मित्रार्थं मित्रकार्यम् अभिनीतार्थं प्रापितप्रयोजनं यथा भवति तथा । यथावत् यथाप्रतिज्ञमिति यावत् ॥ १२ ॥

१३] ति० टी०–संभ्रमात्त्वरया । विशेषेण कृतोत्साहः अन्यत्र कर्मणीति शेषः ॥ १३ ॥

रा० टी०–विपक्षे दोषमाह–सामिति । यो जनः सर्वकर्माणि संत्यज्य मित्रार्थे मित्रप्रयोजनसिद्ध्ये संभ्रमात् उद्वेगात् न वर्तते स जनः कृतः छिन्नः उत्साहो यस्य स सन् अनर्थेन अवरुध्यते प्राप्यत इत्यर्थः । कृतोत्साहः जातोत्साहविशिष्टः सन् न वर्तते इति वा योजना ॥ १३ ॥

गो० टी०–संत्यजेति । सर्वकर्माणि स्वभोगसाधनानि संत्यज्य कृतोत्साहः सन् संभ्रमात् आदरात् मित्रार्थे विषये य अनुवर्तते अनुस्यूततया तिष्ठति सोऽनर्थेनावरुध्यते न संबध्यते ॥ १३ ॥

१४] ति० टी०–कालव्यतीतेषु करणोचितकालमतिक्रान्तेषु पश्चात्तेषु वर्तते तत्सिद्ध्यर्थं यतते स मित्रस्य महतोऽर्थान्कृत्वाऽपि मित्रार्थेन मित्रत्वप्रयोजनकार्थेन न युज्यते । उचितकालेऽकृतम् । कृतमप्यकृतप्रायमिति भावः ॥ १४ ॥

रा० टी०–कालात्यये दोषमाह–य इति । कालः कर्तव्यसमयो व्यतीतो येषां तेषु मित्रकार्येषु यो वर्तते सः महतोऽर्थान् कृत्वाऽपि मित्रार्थे न युज्यते मित्रार्थकारी न भवतीत्यर्थः ॥ १४ ॥

गो० टी०–एवं कर्तव्यं मित्रकार्यमुचितकाले कर्तव्यमित्याह–यस्त्विति । कालव्यतीतेषु अतिक्रान्तकालेषु ॥ १४ ॥

१५] ति० टी०–तत्कालातीतम् । भविष्यतीति शेषः । तस्मात्क्रियतामित्यादि ॥ १५ ॥

रा० टी०–यदिति । एतत्प्राप्तकालं राघवस्य वैदेह्याः परिमार्गणं यत् यतः कालातीतं नो भवेदिति शेषः, तस्मात् इदं मित्रकार्यं मित्रीभूतवानरनियोगो वैदेह्याः परिमार्गणं वा क्रियताम् ॥ १५ ॥

गो० टी०–यदिदमिति । हे वीर ! नः अस्माभिः यदिदं मित्रकार्यं कर्तव्यम् एतत् वैदेह्याः परिमार्गणं क्रियतामिति संबन्धः ॥ १५ ॥

गो० टी०–तदिदमिति । ते कार्यं त्वया कर्तव्यम् इदं मित्रकार्यम् ॥ १६ ॥

१६] ति० टी०–नन्वेतत्कार्यकालात्ययश्चेत्तं ज्ञापयिष्यत्येवेत्याह–न चेति । कालवित्कालज्ञोऽपि स प्राज्ञत्वात्स्वदभिप्रायमेव केवलमनुगच्छेत् । तूष्णीं तिष्ठतीति भावः ॥ १६ ॥

---

१ ऽभीति गो. पाठः । २ समवेतानीति गो. पाठः । ३ स्थितमिति गो. पाठः । ४ हि कृतेति गो. रा. पाठः । ५ ऽनर्थेनेति गो. पाठः । स्तितिगो. पाठः । ७ हीति रा. पाठः । ८ यदिदं वीरेति गो. यदिदमिति रा. पाठः । ९ नो इति रा. पाठः । १० मित्रकार्यमिति गो. पाठः । ११ अर्धमेतत् गो. अधिकम् । १२ सन्निति गो. पाठः ।

कुलस्य हेतुः स्फीतस्य दीर्घबन्धुश्च राघवः । अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः ॥ १७ ॥
तस्य त्वं कुरु वै कार्यं पूर्वं तेन कृतं तव । हरीश्वर कपिश्रेष्ठानाज्ञापयितुमर्हसि ॥ १८ ॥
नहि तावद्भवेत्कालो व्यतीतश्चोदनादृते । चोदितस्य हि कार्यस्य भवेत्कालव्यतिक्रमः ॥ १९ ॥
अकर्तुरपि कार्यस्य भवान्कर्ता हरीश्वर । किं पुनः प्रतिकर्तुस्ते राज्येन च धनेन च ॥ २० ॥
शक्तिमाननिविक्रान्तो वानरर्क्षगणेश्वर । कर्तुं दाशरथेः प्रीतिमाज्ञायां किं नु सज्जसे ॥ २१ ॥
कामं खलु शरैः शक्तः सुरासुरमहोरगान् । वशे दाशरथिः कर्तुं त्वत्प्रतिज्ञामवेक्षते ॥ २२ ॥
प्राणत्यागाविशङ्केन कृतं तेन महत्प्रियम् । तस्य मार्गाम वैदेहीं पृथिव्यामपि चाम्बरे ॥ २३ ॥

रा० टी०—नन्वन्वेषणसमये राम एव आज्ञापयितेत्यत आह—नेति । कालवित् तव वशानुगः त्वद्वशं प्राप्तः प्राज्ञः स रामः त्वरमाणोऽपि अतीतं कालं न निवेदयति स्वयं न निवेदयिष्यति । एतेन रामस्य सौशील्यगुणो व्यञ्जितः ॥ १६ ॥

गो० टी०—न चेति । कालवित् राम इति शेषः । त्वरमाण इत्यर्धं पूर्वेणान्वेति । कालवत् प्राज्ञो रामः त्वरमाणोऽपि सन् वैदेहीसमानयनाय त्वरमाणोऽपि सन् न निवेदयतीति संबन्धः ॥ १७ ॥

१७] ति० टी०—त्वदीयस्य स्फीतस्य महतः कुलस्य हेतुर्वृद्धिहेतुः । दीर्घबन्धुरिदानीं कालान्तरे च बन्धुः । स्वयं च चाक्षुक्षमणः ॥ १७ ॥

रा० टी०—कुलस्येति । कुलस्य वंशस्य स्फीतस्य प्रशस्तस्य हेतुः यस्मिन्कुले तस्य प्रसादो भवति तदेव प्रशस्तं भवतीत्यर्थः, दीर्घबन्धुः गुणैः अप्रतिमः अत एव अप्रमेयप्रभावः यस्त्वयं राघवः तस्य कार्यं त्वं कुरु । तत्र हेतुः—तेन रामेण तव कार्यं कृतम् अतः कपिश्रेष्ठान् आज्ञापयितुमर्हसि । अर्धचतुष्टयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०—कुलस्येति । स्वयं चेति त्वमपि गुणैरप्रतिम इत्यर्थः ॥ १८ ॥

१८] ति० टी०—कृतम् तव कार्यमिति शेषः । आज्ञापयितुमर्हसि । रामनियोगात्पूर्वमिति शेषः ॥ १८ ॥

गो० टी०—तस्येति । आज्ञापयितुं वानरसेनामानेतुमिति शेषः ॥ १९ ॥

१९] ति० टी०—नन्वेवमपि कालव्यतिक्रमस्तुल्योऽत आह—नहीति । चोदनादृते रामप्रेरणां विना जातोऽपि कालातिक्रमो न दोषायेति भावः । तत्प्रेरणया यदि कार्यकरणं तदा कालव्यतिक्रमो भवेदेवेत्यर्थः ॥ १९ ॥

रा० टी०—नन्वयं कालोऽतीतो जात एवेत्यत आह—नहीति । चोदनात् रामप्रेरणायाः ऋते विना व्यतीतोऽपि कालः व्यतीतो नैव भवेत् हि यतः चोदितस्य प्रेरितस्य कार्यस्य व्यतीतः कालः कालव्यतिक्रमो भवेत् । कालो व्यतीत इति व्यन्वयि ॥ १९ ॥

गो० टी०—इदानीं वानरानयनेऽपि कालव्यतिक्रमस्तुल्य इत्याशङ्क्याह—न हीति । चोदनादृते रामप्रेषणं विना कालो न व्यतीतो भवेत् रामचोदनानन्तरं कार्यं क्रियते चेत्तदा कालातिक्रमः तच्चोदनात्पूर्वमस्माभिः कार्यप्रवर्तने न कालातिक्रमदोष इति भावः ॥ २० ॥

२०] ति० टी०—अकर्तुरप्युपकर्तुरपि कार्यस्य कर्ता अर्हं तृच् । प्रतिकर्तुरुपकर्तुः ॥ २० ॥

रा० टी०—अकर्तुरिति । हे हरीश्वर ! अकर्तुः अकृतोपकारस्यापि जनस्य कार्यस्य भवान् राज्येन धनेन च कर्ता करणशीलः ते प्रतिकर्तुः कार्यस्य कर्ता भवान् चेत्किं पुनर्वक्तव्यम् ॥ २० ॥

गो० टी०—अकर्तुरपीति । अकर्तुः अनुपकर्तुः ॥ २१ ॥

२१] ति० टी०—आज्ञायां किं नु सज्जसे किमर्थं तदाज्ञाप्रतीक्षया विलम्बसे ॥ २१ ॥

रा० टी०—शक्तिमानिति । शक्तिमाननिसामर्थ्यविशिष्टः अतिविक्रान्तः महाबलस्त्वं दाशरथेः प्रीतिं कर्तुम् आज्ञायां वानराज्ञापने किंनु किमर्थं सज्जसे विलम्बसे ॥ २१ ॥

गो० टी०—शक्तिमानपीति । प्रीतिं कर्तुम् आज्ञायाम् आज्ञापने न सज्जसे नोद्योगं करोषि ॥ २२ ॥ २३ ॥

२२] ति० टी०—यद्यपि रामस्य न सहायापेक्षा, तथापि सपरिवारोऽहं सीतामन्वेषयिष्यामीति त्वत्प्रतिज्ञामवेक्षते, सत्याऽसत्या वेति परीक्षत इत्यर्थः ॥ २२ ॥

रा० टी०—काममिति । सुरासुरमहोरगान् शरैर्वशे कर्तुं यो दाशरथिः शक्तः समर्थः स त्वत्प्रतिज्ञामवेक्षते । एतेन त्वदनुग्रहार्थमेव रामस्त्वामाश्रित इति सूचितम् ॥ २२ ॥

२३] ति० टी०—प्राणत्यागाविशङ्केनानपकारिवालिप्राणत्याजने तदनौचित्यशङ्कारहितेन मित्रकृत्यं स्वकृत्यमेवेति बुद्धया तव प्रियं कृतम् । मार्गामान्वेषयाम ॥ २३ ॥

रा० टी०—प्राणेति । प्राणत्यागाविशङ्केन साक्षात्स्वानपराधिवालिप्राणत्याजनानौचित्यशङ्कारहितेन तेन रामेण महत् प्रियं ते महाप्रमोदः कृतम् अतस्तस्य रामस्य वैदेहीं पृथिव्यामम्बरे च मार्गाम अन्वेषयाम ॥ २३ ॥

गो० टी०—प्राणत्यागेति । प्राणत्यागाविशङ्केनेत्यनेन उपकारमहत्त्वं द्योतितम् ॥ २४—२६ ॥

१ हरीति गो. पाठः । २ धनेनेति गो. रा. पाठः । ३ ऽपीनि गो. पाठः । ४ नेनि गो. पाठः । ५ नु काङ्क्षन इति गो. पाठः । ६ नवेति गो. पाठः ।

देवदानवगन्धर्वा असुराः समरुद्गणाः । न च यक्षा भयं तस्य कुर्युः किमिव[1] राक्षसाः ॥ २४ ॥
तदेवं शक्तियुक्तस्य पूर्वं प्रतिकृतस्तथा[2] । रामस्यार्हसि पिङ्गेश कर्तुं सर्वात्मना प्रियम्[3] ॥ २५ ॥
नाधस्तादवनौ नाप्सु गतिर्नोपरि चाम्बरे । कस्यचित्सज्जतेऽस्माकं[4] कपीश्वर तवाज्ञया ॥ २६ ॥
तदाज्ञापय कः किं ते कुतो[5] वाऽपि व्यवस्यतु । हरयो ह्यप्रधृष्यास्ते सन्ति कोट्यग्रतोऽनघ[6] ॥ २७ ॥
तस्य तद्वचनं श्रुत्वा काले साधु निरूपितम्[7] । सुग्रीवः सत्त्वसंपन्नश्चकार मतिमुत्तमाम् ॥ २८ ॥
संदिदेशातिमतिमान्नीलं नित्यकृतोद्यमम्[8] । दिक्षु सर्वासु सर्वेषां सैन्यानामुपसंग्रहे[9] ॥ २९ ॥
यथा सेना समग्रा मे यूथपालाश्च सर्वशः । समागच्छन्त्यसङ्केन सेनाग्र्येण[10] तथा कुरु ॥ ३० ॥
ये त्वन्तपालाः प्लवगाः शीघ्रगा व्यवसायिनः । समानयन्तु ते [11]शीघ्रं त्वरिताः शासनान्मम ॥
स्वयं चानन्तरं कार्यं[12] भवानेवानुपश्यतु ॥ ३१ ॥

२४] ति० टी०–भयमिति रणे इति शेषः ॥ २४ ॥

रा० टी०–देवेति । तस्य रामस्य भयं देवादयो नैव कुर्युः राक्षसाः किं कथं कुर्युः । एतेन राक्षसा अतिप्रबला इति कथं जेतव्या इति संशयो न कार्य इति ध्वनितम् ॥ २४ ॥

२५] ति० टी०–प्रतिकृतः कृतोपकारस्य । पिङ्गेश ! कपिराज ॥ २५ ॥

रा० टी०–तदिति । पिङ्गेश हे वानरेश ! तत् उक्तहेतोः एवं शक्तियुक्तस्य पूर्वं तव प्रतिकृतः कृतोपकारस्य रामस्य सर्वात्मना निखिलयत्नेन प्रियं कर्तुमर्हसि ॥ २५ ॥

२६] ति० टी०–इदानीं सुग्रीवस्याज्ञावैभवं दर्शयति—नाधस्तादिति । तवाज्ञयाह्वाने सत्यस्माकं हरीणां मध्ये यः कश्चिदपि सज्जते विलम्बते तस्य कस्यचित्कस्यापि बलिनो दुर्बलस्य वाऽधस्तात्पातालेऽन्यत्र वा गतिर्जीवनं नास्ति ॥ २६ ॥

रा० टी०–नेति । हे कपीश्वर ! तवाज्ञया अस्माकं मध्ये कस्यचिद्वानरादेर्गतिर्गमनम् अधस्तादादौ न सज्जते शिथिलीभवति तत् उपरि अन्तरिक्षे अम्बरे ततोऽप्यूर्ध्वदेशे । एतेन दुर्गमदेशे स्थापिता चेत्सीता कथमन्वेषणीयेति संशयो न कार्य इति ध्वनितम् ॥ २६ ॥

गो० टी०–नाधस्तादिति । कस्यचिदिति अस्माकं मध्ये कस्यचिद्गतिर्न सज्जते न मन्दीभवति ॥ २७ ॥

२७] ति० टी०–यदेवं तदाज्ञापय । आज्ञाप्रकारं पृच्छति—कः कपिस्ते किं कं नियोगं कुतो वापि । सार्वविभक्तिकस्तसिः । कुत्रापि स्थितो व्यवस्यत्वनुतिष्ठतु । आज्ञापनीया सेना कियत्यस्ति तत्राह—हरय इति । कोट्यग्रतः कोटिघटितसंख्याया न्यर्बुदस्याग्र उपरि या संख्या सप्तद्राख्या तया संख्ययेत्यर्थः ॥ २७ ॥

रा० टी०–तदिति । अप्रधृष्याः धर्षयितुमशक्याः ये हरयो वानराः कोट्यग्रः कोटितोऽप्यधिकास्ते सन्ति तेषां मध्ये कः वानरः कुतः कस्मिन्प्रदेशे किं त्वदाज्ञापनं व्यवस्यतु निश्चिनोतु तदाज्ञापय ॥ २७ ॥

गो० टी०–तदिति । अप्रधृष्याः कोट्यग्रतः कोट्यधिकाः हरयः ते सन्ति तेषां मध्ये कः ते कृते त्वदर्थं किं करोत्विति शेषः । कुत्र कुत्र कार्ये व्यवस्यतु व्यवसायं करोतु तदाज्ञापय ॥ २८–३० ॥

२८–२९] ति० टी०–मतिं तदनुष्ठानविषयाम् ॥२८॥२९॥

रा० टी०–तस्येति । तस्य हनुमतः काले यथोचितसमये साधुनिरूपितं वचनं श्रुत्वा सत्त्वसंपन्नः सुग्रीवः उत्तमां रामकार्यसाधनविषयिकात्वेनोत्कृष्टां मतिं निश्चयं चकार ॥२८॥

रा० टी०–समिति । अतिमतिमान् सुग्रीवः सर्वासु दिक्षु वियमानानां सर्वेषां सैन्यानामुपसंग्रहे स्वसमीपानयनार्थं नित्यकृतोद्यमं नीलं संदिदेश ॥ २९ ॥

३०] ति० टी०–असङ्केनाविलम्बेन । सेनाग्र्येण सेनानाथेन सहेति शेषः ॥ ३० ॥

रा०टी०–आज्ञाप्रकारमाह–यथेति। सेनाग्र्येण सेनाग्रेसरैः सह मे समग्राः सेनाः सर्वशो यूथपालाश्च असङ्केन अविलम्बेन यथा समागच्छन्ति तथा कुरु ॥ ३० ॥

गो० टी०–यथेति । सेनाग्राणि सेनाग्रेसरान् सेनानेतॄनित्यर्थः, तथा कुरु तथा आज्ञापय ॥ ३१ ॥

३१] ति० टी०–अन्तपाला दिगन्तवर्तिसेनापतयः समानयन्तु समागच्छन्तु । अनन्तरमानयनानन्तरम् । कार्यं सेनादर्शनगणनादि अनुपश्यतु संपादयत्विति यावत् ॥ ३१ ॥

रा० टी०–समागमनप्रकारमाह–ये इति । ये अन्तपालाः अतिदूरदेशवर्तिसेनाधीशाः शीघ्रगा व्यवसायिनः प्लवगास्तेऽपि त्वरिताः सन्तः समानयन्तु आगच्छन्तु ॥ ३१ ॥

रा० टी०–स्वयमिति । अनन्तरं सेनासमागमनोत्तरकाले कार्यं सेनागणनादि स्वयं भवानेव अनुपश्यतु विचारयतु करोत्विति यावत् । अर्थं पृथक् ॥ ३२ ॥

गो० टी०–ये त्विति । अन्तपालाः सेनापर्यन्तपालकाः ॥ ३२ ॥

---

१ न देवा न च गन्धर्वा नासुरा न मरुद्गणा इति गो.पाठः । २ उतेति गो. पाठः । ३ प्रियेति गो. पाठः । ४ तवेति गो. पाठः । ५ ऽस्मास्विति रा. पाठः । ६ कृते कुत्रेति गो. पाठः । ७ ऽनघा इति गो. पाठः । ८ निवेदितमिति गो. पाठः । ९ स संदिदेशाभिमतमिति गो. पाठः । १० अग्राणीति गो. पाठः । ११ सैन्यमिति गो. पाठः ।

त्रिपञ्चरात्रादूर्ध्वं यः प्रापुयादिह[1] वानरः । तस्य प्राणान्तिको दण्डो नात्र कार्या विचारणा ॥ ३२ ॥
हरींश्च वृद्धानुपयातु साङ्गदो भवान्ममाज्ञामधिकृत्य [2]निश्चितम् ।
इति व्यवस्थां हरिपुङ्गवेश्वरो विधाय वेश्म प्रविवेश वीर्यवान् ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ।

कालप्राप्तशारदचन्द्रकुमुदादिविभावैरुद्दीपितानङ्गव्यथं रामं सीता संस्मृत्य बहुशः शोचन्त लक्ष्मणो वीरवादपुरस्कारेणाश्वासयति । शरद्गुणसपद्विभावैर्भावितहृदयो रामः शरत्सपद स्तौति शरदागमेऽप्यप्राप्तसुग्रीवसमुद्योगे प्रवर्तयितुं लक्ष्मण च प्रेषयति ।

गुहां[3] प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः । वर्षरात्रे[4] स्थितो रामः कामशोकाभिपीडितः ॥ १ ॥
पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम् । शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् ॥ २ ॥
कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम् । दृष्ट्वा कालमतीतं च मुमोह परमातुरः ॥ ३ ॥
स तु संज्ञामुपागम्य मुहूर्तान्मतिमान्नृपः । मनस्थामपि वैदेहीं चिन्तयामास राघवः ॥ ४ ॥

३२] ति० टी०–त्रिपञ्चरात्रात्पञ्चदशदिनादूर्ध्वं य आगच्छेत्तस्य दण्डस्तेन पञ्चमध्ये सर्वैरागन्तव्यामिति भावः । कार्तिकशुक्लादावियमाज्ञेति बोध्यम् ॥ ३२ ॥

रा० टी०–त्रिपञ्चेति । सीतावृत्तान्तज्ञानार्थं गतो यो वानरः त्रिपञ्चरात्रात् त्रिगुणितपञ्चरात्रात् पञ्चदशाहादित्यर्थः, ऊर्ध्वमिह प्रापुयात् तस्य प्राणान्तिकः प्राणविघातको दण्डो भवेत् अत्र अस्मिन् विषये विचारणा न कार्या ॥ ३२ ॥

गो० टी०–त्रिपञ्चेति । त्रिपञ्चरात्रादूर्ध्वं पञ्चदशरात्रादनन्तरदिवसे ॥ ३२ ॥

३३] ति० टी०–वृद्धान्हरीन्साङ्गदो भवानुपयातु । संमाननार्थमिति शेषः ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

रा० टी०–हरीनिति । साङ्गदो भवान् निश्चितां ममाज्ञामधिकृत्य वृद्धान् हरीन् वानरान् उपयातु तेषां सत्कृत्यर्थं तत्समीपं गच्छतु । हरिपुङ्गवेश्वरः सुग्रीवः इति व्यवस्थां नियोगं विधाय कृत्वा वेश्म स्वशिबिरं प्रविवेश ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

गो० टी०–हरींश्चेति । वृद्धान् जाम्बवत्प्रभृतीन्॥३४॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

१–२] ति० टी०–॥ १ ॥ २ ॥

रा० टी०–रामवृत्तान्तमाह–गुहामित्यादिभिः । सुग्रीवे गुहां प्रविष्टे सति वर्षरात्रस्थितो रामः घनैर्गगने विमुक्ते सति कामशोकाभिपीडितः कामेन जानकीप्राप्तिविषयकोत्कटेच्छया शोकेन तत्प्राप्त्यभावजनितचिन्तया अभिपीडितो व्याप्त आसीदिति शेषः ॥ १ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–पाण्डुरमिति । विमलं निर्मलं गगनं दृष्ट्वा विमलं घनच्छायारहितं पाण्डुरं चन्द्रमण्डलं च दृष्ट्वा ज्योत्स्नायाः चन्द्रिकायाः अनुलेपनं व्याप्तिर्यस्यां तां शारदीं रजनीं च दृष्ट्वा ॥ २ ॥

गो० टी०–अथ शरत्समागमेऽपि सुग्रीवस्याहृद्योगाद्रामकोपक्लिशे–गुहामित्यादि । सुग्रीवे गुहां प्रविष्टे वर्षरात्रोषितो रामः कामशोकाभिपीडितः सन् क्रमेण गगने घनैर्विमुक्ते पाण्डुरं निर्मलं गगनं दृष्ट्वा परमातुरः वर्षाकालिकशोकादधिकं शोकं प्राप्तः सन् मुमोह । एतावत्पर्यन्तं कस्यचिद्दवर्धेर्विषयमानतया कथंचिद्धृतवान् संप्राप्ते तदभावान्मुमोहेत्यर्थः ॥ १–३ ॥

३] ति० टी०–कालं सेनोद्योगकालम् । मुमोह व्याकुलचित्तो बभूव ॥ ३ ॥

रा० टी०–अत एव कालं वृष्टिसमयमतीतं व्यतीतं दृष्ट्वा सुग्रीवं कामवृत्तं कामासक्तं दृष्ट्वा जनकात्मजां नष्टां दृष्ट्वा संस्मृत्य परमातुरो रामो मुमोह ॥ ३ ॥

४] ति० टी०–संज्ञां चित्तस्वास्थ्यम् । मनस्थां मनःसंनिहितामपि चिन्तयामास । जीवति न वा कथमेनां प्रत्यानेष्यामीति चिन्ता ॥ ४ ॥

रा० टी०–स इति । सः विह्वलचित्तो नृपो राघवः मुहूर्तात्संज्ञां चैतन्यमुपागम्य प्राप्य मनःस्थां वैदेहीं चिन्तयामास॥४॥

गो० टी०–स त्विति । मनःस्थामपि वैदेहीं चिन्तयामास पुनः पुनर्विशेषतश्चिन्तितवानित्यर्थः ॥ ४ ॥

१ नेह वानेरिति गो.पाठः। २ निश्चितामिति गो.रा.पाठः। ३ गुह्यामिति गो.रा.पाठः। ४ रात्रोषित इति गो. रात्रस्थित इति रा.पाठः। ५ वुद्ध्रेति गो.पाठः।

दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम् । सारसारावसंघुष्टं विललापार्तया गिरा ॥ ५ ॥
आसीनः पर्वतस्याग्रे हेमधातुविभूषिते । शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम् ॥ ६ ॥
सारसारावसंनादैः सारसारावनादिनी । याऽऽश्रमे रमते बाला साऽद्य मे रमते कथम् ॥ ७ ॥
पुष्पितांश्चासनान्दृष्ट्वा काञ्चनानिव निर्मलान् । कथं सा रमते बाला पश्यन्ती मामपश्यती ॥ ८ ॥
या पुरा कलहंसानां कलेन कलभाषिणी । बुध्यते चारुसर्वाङ्गी साऽद्य मे रमते कथम् ॥ ९ ॥
निःस्वनं चक्रवाकानां निशम्य सहचारिणाम् । पुण्डरीकविशालाक्षी कथमेषा भविष्यति ॥ १० ॥
सरांसि सरितो वापीः काननानि वनानि च । तां विना मृगशावाक्षीं चरन्नाद्य सुखं लभे ॥ ११ ॥
अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम् । सुदूरं पीडयेत्कामः शरदुष्णनिरन्तरः ॥ १२ ॥
एवमादि नरश्रेष्ठो विललाप नृपात्मजः । विहङ्ग इव सारङ्गः सलिलं त्रिदशेश्वरात् ॥ १३ ॥

५] ति० टी०–सारसशब्दैः संघुष्टं शब्दवद्व्योम दृष्ट्वेति संबन्धः ॥ ५

रा० टी०–दृष्ट्वेति । गतविद्युद्बलाहकमत एव विमलं व्योम सारसारवसंघुष्टं दृष्ट्वा विज्ञाय आर्तया गिरा विललाप, राम इति शेषः ॥ ५ ॥

गो० टी०–दृष्ट्वा च विमलमिति । गिरा स्वरेण ॥ ६ ॥

६] ति० टी०–हेमवर्णा धातवो हेमधातवः ॥ ६ ॥

गो० टी०–आसीन इति । मनसा जगाम चिन्तयामासेति यावत् ॥ ५ ॥

७] ति० टी०–सारसनादसदृशनादवती या सा सारसानामारावाय परस्परसमाह्वानाय कृतैर्नादैर्या रमते आश्रमे ॥७॥

रा० टी०–विलापाकारमाह–सारसेति । सारसारवनादिनी सारसानां रववत् नदति तच्छीला या बाला सीता सारसारवसंनादैः सारसारवप्रतिध्वनिभिरुपलक्षिते आश्रमे मे मया सह रमते अरमत साऽद्य मद्वियोगसमये कथं रमते रमेत ॥६॥

गो० टी०–सारसेति । सारसारवसन्नादैः सारसारावोत्थितध्वनिभिः ॥ ७ ॥

८] ति० टी०–काञ्चनानिव काञ्चनपुष्पानिव निर्मलानासनवृक्षान्दृष्ट्वा सौन्दर्यातिशयात्पुनः पुनस्तान्पश्यन्ती तदा च मामपश्यन्ती कथं वर्तते ॥ ८ ॥

रा० टी०–पुष्पितानिति । या काञ्चनान् स्वर्णमयानिव निर्मलान् पुष्पितान् अशनान् असनाभिधतरून् दृष्ट्वा मां पश्यन्ती आतष्ठदिति शेषः, सा मामपश्यती अपश्यन्ती बाला सीता कथं रमते रमेत ॥ ७ ॥

गो० टी०–पुष्पितानिति । पश्यन्ती मदिदृक्षया इतस्ततो दृष्टिं निक्षिपन्ती ॥ ८ ॥ ९ ॥

९] ति० टी०–कलेन शब्देन बुध्यत इत्यन्वयः । कलभाषिणी कोमलशब्दवती ॥ ९ ॥

रा० टी०–योनि । कलभाषिणी मधुरभाषणशीला या सीता पुरा पूर्वं कलहंसाना कलेन शब्दन बुध्यते तच्छब्दश्रवणमात्रेण सैवागतेऽतिप्रतीत्या द्रुतं गत्वा मयेतस्ततोऽवलोक्यते इत्यर्थः, सा अद्य कथं बुध्यते अवलोक्येत ॥ ८ ॥

१०] ति० टी०–निशम्य श्रुत्वा ॥ १० ॥

रा० टी०–निःस्वमिति । सहचारिणां स्त्रियां सहैव गमनशीलानां चक्रवाकाना निःस्वनं श्रुत्वा पुण्डरीकविशालाक्षी एषा सीता कथं भविष्यति स्थास्यति ॥ ९ ॥

गो० टी०–निःस्वनमिति । पुण्डरीकविशालाक्षीं चक्रवाकनिनदश्रवणस्यासह्यतया नाथकागमपथं सलीलमवलोकयन्तीत्यर्थः । कथं भविष्यति कथं सत्तां धारयिष्यतीत्यर्थः ॥ १० ॥

११] ति० टी०–काननवनयोः कान्तारोपवनात्मना भेदः ॥ ११ ॥

रा० टी०–सरांसीति । मृगशावाक्षीं मृगबालनयनां तां सीतां विना सर आदीनि चरन्नहं सुखं न लभे । काननवनयोः लघुत्वेन महत्त्वेन च भेदात् न पौनरुक्त्यम् ॥ १० ॥

गो० टी०–सरांसीति । वापीः क्षुद्रसरांसि । काननानि महावनानि ॥ ११ ॥

१२] ति० टी०–अपि तामित्यादि । शरदुष्णनिरन्तरः शरदुष्णैर्निरन्तरप्रवृत्तः कामः मद्वियोगसौकुमार्याभ्यां हेतुभ्यां सुदूरमतिशयेन पीडयेदेव ॥ १२ ॥

रा०टी०–अपीति । मद्वियोगाद्धेतोः शरदुष्णनिरन्तरः शरदुष्णैः निरन्तरम् प्रवृत्तः कामः मद्विषयकोत्कटेच्छा भामिनीं नित्यप्रभां सीतां सौकुमार्यात् हेतोः सुदूरमत्यन्तं पीडयेत् ॥११॥

गो० टी०–अपि तामिति । शरदुष्णनिरन्तरः शरदुष्णैः साधनैः निरन्तरः पूर्णः कामः सौकुमार्यात् मद्वियोगाच्च हेतोः तां भामिनीं दूरम् आमरणं न पीडयेत् । अपिः संभावनायां, पीडयेदेवेत्यर्थः ॥ १२ ॥

१३] ति० टी०–सारङ्गाख्यचातकविहंगस्तृषितो यथा त्रिदशेश्वराज्जलं काङ्क्षमाणो विललाप तथा काङ्क्षमाणो विललाप ॥ १३ ॥

रा० टी०–एवमिति । सारङ्गः चातको विहङ्गः पक्षी त्रिदशेश्वरात् इन्द्रात् सलिलं जलमिच्छन् यथा विलपति तथा

१ पञ्चमषष्ठश्लोकयोः गो. व्यत्यस्तः पाठः । २ आरवेति गो. रा.पाठः । ३ श्लोकोऽयं रा. नास्ति । ४ रवेति गो. रा.पाठः । ५ स्वरेणेति गो.पाठः ।

ततश्चञ्चूर्य रम्येषु फलार्थी गिरिसानुषु । ददर्श पर्युपावृत्तो लक्ष्मीवाल्लक्ष्मणोऽग्रजम् ॥ १४ ॥
सै चिन्तया दुःसहया परीतं विसंज्ञमेकं विजने मनस्वी ।
भ्रातुर्विषादाच्चैवरितोऽतिदीनः समीक्ष्य सौमित्रिरुवाच [3]दीनम् ॥ १५ ॥
किमार्य कामस्य वशंगतेन किमात्मपौरुष्यपराभवेन ।
अयं [4]हिया संहियते समाधिः किमत्र योगेन [5]निवर्तते न ॥ १६ ॥
क्रियाभियोगं मनसः प्रसादं समाधियोगानुगतं च कालम् ।
सहायसामर्थ्यमदीनसत्त्वः स्वकर्महेतुं च कुरुष्व तात ॥ १७ ॥

एवमादि विललाप, सीताप्राप्तिमाचकाङ्क्षेत्यर्थः । 'सारङ्गः पुंसि हरिणे चातके च मतङ्गजे' इति मेदिनी ॥ १२ ॥

गो० टी०–एवमादीति । त्रिदशेश्वरात् सलिलमुद्दिश्य सारङ्गश्चातक इव विललापेति संबन्धः ॥ १३ ॥

१४] ति० टी०–ततस्तत्र काले । रम्येषु गिरिसानुषु चञ्चूर्य भ्रातृदुःखेन गर्हितं चरित्वा । यङ्लुगन्तादाधोऽसमासे ल्यप् । पर्युपावृत्तो लक्ष्मणोऽग्रजं रामं ददर्श ॥ १४ ॥

रा० टी०–तत इति । ततः रामविलापकाले फलार्थी लक्ष्मणः रम्येषु गिरिसानुषु चञ्चूर्य बम्भ्रम्य पर्युपावृत्तः सन् अग्रजं ददर्श ॥ १३ ॥

गो० टी०–तत इति । चञ्चूर्य कुटिलं चरित्वा फलाभिलाषेण कुटिलमार्गेण चरित्वा "नित्यं कौटिल्ये गतौ" इति यङ् ॥ १४ ॥ १५ ॥

१५] ति० टी०–विषादाद्विषाददर्शनात् ॥ १५ ॥

रा० टी०–स इति । एकं प्रियया विहीनमत एव दुस्सहया चिन्तया परीतं युक्तमत एव दीनं क्षीणत्वेन प्रतीयमानमत एव विसंज्ञं कर्तव्यविषये विवेकरहितं रामं त्वरित वेगेन आगतः भ्रातृविषादात् अतिदीनः सौमित्रिः विजने वने समीक्ष्य उवाच ॥ १४ ॥

१६] ति० टी०–अथ लक्ष्मणः कर्मयोगज्ञानयोगावेव पौरुषबद्धये दुःखशान्तये चानुतिष्ठेति स्मारयति—किमार्येत्यादि । हे आर्य ! कामस्य वशंगतेन त्वया किं कर्म कृतं स्यात्, अपि चैवं कामवशत्वेनात्मपौरुषस्य स्वपौरुषस्याभिभवेन किं प्रयोजनं साधितं स्यात्, तस्मात्कामवशत्वं त्यक्त्वा कर्मयोगं कुरु । किंच ज्ञानादिकर्मयोगोत्तरकालभवसरप्राप्तोऽयं समाधिर्ब्रह्मात्मसंधानम् । ह्रिया हरतीति ह्रीः शोकस्तेन किमर्थं संहियते । अत्रास्यामवस्थायां योगेन समाधिना सर्वं दुःखमिति शेषः, किं न निवर्तते अपि तु निवर्तत एवेत्यर्थः । एवमेव पाङ्क्तः पाठ इति कतकक्रुत् । पाठान्तरं त्वस्य योजनाशक्त्या कल्पितमिति च सः ॥ १६ ॥

रा० टी०–तद्वचनाकारमाह–किमित्यादिभिः । कामस्य उत्कटेच्छायाः वशंगतेन अधीनभूतेन शोकेन किं न किंचित्साध्यमित्यर्थः । तत्र दोषमाह–आत्मपौरुष्यस्य पराभवस्तिरोधानं येन तेन ह्रिया आत्मनां लज्जाकारकेण शोकेन अयं महात्मभिः आहृतः समाधिः चित्तैकाग्र्यं संहियते निवर्त्यते अतः निवर्तितेन योगेन चित्तैकाग्र्येण किं चित्तैकाग्र्यविघातो न कार्य इत्यर्थः ॥ १५ ॥

गो० टी०–किमिति । वशंगतेन मनसेति शेषः । पौरुष्यं पौरुषं स्वार्थे ष्यञ् । अय वर्तमानः समाधिः चित्तसमाधानं सदा तत्र तत्र काले संहियते संपाद्यते । अत्र अस्मिन् काले निवर्तितेन योगेन किम् । 'अयं यदा संहियते समाधिः' इति पाठान्तरम् । यदा यस्मिन् काले अयं समाधिः चित्तसमाधानं संहियते संपाद्यते अत्रास्मिन् काले निवर्तितेन योगेन सत्वहनेन उत्साहेन किमित्यर्थः ॥ १६ ॥

१७] ति० टी०–उक्तमेव विवृणोति—क्रियाभियोगमिति । क्रियाणां शौचज्ञानादीनामभितः कात्स्न्येन योगमनुष्ठानं मनसः प्रसादं चास्थाय, कालं सर्वकालं समाधियोगाद्गतं तेन संबद्धमेव कुरुष्व । तथाऽदीनसत्त्वोऽक्षीणसत्त्वः सन्स्वकर्महेतुं पौरुषबृद्धेः कारणं सहायसामर्थ्यं तद्घटनरूपं स्वकर्म देवार्चनादिरूपकर्मयोगं च कुरुष्व । अनेन यावत्फलं निदिध्यासनजातकर्मसमुच्चय उक्तः ॥ १७ ॥

रा० टी०–क्रियेति । समाधियोगाद्गतं चित्तैकाग्र्याधीनं मनसः प्रसादं कुरुष्व । तत्प्रयोजनमाह–स्वकर्महेतुं स्वकर्तव्यकारणं सहायानां सामर्थ्यं येन सहायसामर्थ्यसाधकमित्यर्थः, कालं समयमेव क्रियाभियोगं क्रियाणामन्वेषणादिकर्मणामभियोगः साधनमित्यर्थ, येन तत् कुरुष्व प्राप्तसमये एव यतितव्यमित्यर्थः ॥ १६ ॥

गो० टी०–क्रियेति । क्रियाभियोगं कार्योद्योगं मनसः प्रसादं समाधियोगानुगतं धैर्योपायाभ्यासनुबद्धं कालं च सहायसामर्थ्यं सुधीवादिसहायसामर्थ्यं स्वकर्म देवतोपासनात्मकं तदेव हेतुः तं च हेतुं कुरुष्व क्रियाभियोगादिकं सर्वं स्वकार्यसिद्धौ हेतुं कुरुष्वेत्यर्थः । अत्र प्रकरणे लक्ष्मणेन रामस्याश्रितरक्षणत्वरा संदीप्यत इति स्वोपदेशः सुलभः ॥ १७ ॥

---

१ तमिति गो. पाठः । २ परितापदीन इति गो. पाठः । ३ रामामिति गो. पाठः । ४ सदेति गो. पाठः । ५ निवर्तितेनेति गो. पाठः । ६ हेतुमिति गो. पाठः ।

न जानकी मानववंशनाथ त्वया सनाथा सुलभा परेण ।
न चाग्निचूडां ज्वलितामुपेत्य न दह्यते वीर वराहं कश्चित् ॥ १८ ॥
सलक्षणं लक्ष्मणमप्रधृष्यं स्वभावजं वाक्यमुवाच रामः ।
हितं च पथ्यं च नयप्रसक्तं ससामधर्मार्थसमाहितं च ॥ १९ ॥
निःसंशयं कार्यमवेक्षितव्यं क्रियाविशेषोऽप्यनुवर्तितव्यः ।
नै तु प्रवृद्धस्य दुरासदस्य कुमार [2]वीर्यस्य फलं चै चिन्त्यम् ॥ २० ॥
अथ पद्मपलाशाक्षीं मैथिलीमनुचिन्तयन् । उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ॥ २१ ॥
तर्पयित्वा सहस्राक्षः सलिलेन वसुंधराम् । निर्वर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः ॥ २२ ॥

१८] ति० टी०–त्वया सनाथा नाथवती जानकी परेण न सुलभा न सुग्रहा । ज्वलितामग्निचूडामग्निशिखामुपेत्य स्पृष्ट्वा कश्चिदपि न दह्यते इति न, अपि तु वह्निव्यतिरिक्तः सर्वोऽपि दह्यत एव । अतो या नीता सा तत्प्रतिकृतिरेव, सा तु त्वदुपासितात्राविति व्यङ्ग्यम् ॥ १८ ॥

रा० टी०–जानकीविषये कथंचित् शङ्का न कार्येति बोधयन्नाह–नेति । हे मानववंशनाथ ! त्वया सनाथा त्वदेकनाथेत्यर्थः, जानकी परेण त्वदन्येन न सुलभा । एतेन त्वदन्यस्तद्ग्रहकामो यदि भवेत्तर्हि नङ्क्ष्यत्येवेति सूचितम् । तत्र दृष्टान्तः–ज्वलितामग्निचूडां वह्निज्वालामुपेत्य प्राप्य कश्चित् वह्निभिन्नः न दह्यते इति न दह्यत एवेत्यर्थः ॥ १७ ॥

गो० टी०–न जानकीति । सुलभा लुब्धुमर्हा । अग्निचूडाम् अग्निज्वालाम् ॥ १८ ॥

१९] ति० टी०–रामोऽप्रधृष्यं न्यायोपेतत्वादविचाल्यं स्वभावजं तत्त्वार्थकं वाक्यमुक्तवन्तं लक्ष्मणसहितं लक्ष्मणमुवाच । किमुवाच–यत्त्वया प्रत्युक्तं वाक्यं तद्धितं तत्कालसुखम् पथ्यं कालान्तरेऽपि सुखम् नयप्रसक्तं राजनीत्युपेतम् । सामसहितधर्मार्थाभ्यां समाहितं संगतम् ॥ १९ ॥

रा०टी०–सेति । सलक्षणं राजवंशोचितचिह्नसहितमप्रधृष्यं परैः प्रधर्षयितुमशक्यं लक्ष्मणं हितं वर्धकम् अत एव पथ्यं नयप्रसक्तं नीतियुक्तमत एव ससामधर्मार्थसमाहितं सामसहितधर्मार्थाभ्यां सहितं स्वभावजं द्रुतस्खलितोच्चारणरहितमित्यर्थः, वाक्यं राम उवाच ॥ १८ ॥

गो० टी०–सलक्षणमिति । रामः अप्रधृष्यं युक्तिभिरविचाल्यं स्वभावजं स्वभावसिद्धं हितम् उदर्कसुखकरं पथ्यं तत्कालसुखकरं नयप्रसक्तं राजनीतियुक्तं ससाम सान्त्वयुक्तं धर्मार्थसमाहितं च वाक्यमुक्तवन्तं सलक्षणं लक्ष्मणमुवाचेति योजना । यद्वा अप्रधृष्यत्वादिविशेषणविशिष्टं वाक्यं राम उवाच । लक्ष्मणोक्ताद्ववादरूपत्वाद्रामवाक्यस्यापि तथात्वमिति बोध्यम् ॥ १९ ॥

२०] ति० टी०–तस्मात्त्वदुक्तं निःसंशयं कार्यं त्वद्वाक्यार्थोऽनुष्ठेय एव । अनुष्ठेयमाह––अवेक्षितव्यं समाधियोगेन भगवत्तत्त्वं द्रष्टव्यम् । क्रियाविशेषः कर्मयोगः, सोऽप्यनुवर्तितव्योऽनुष्ठेयः । हे कुमार ! न तु कर्मज्ञानयोगौ हित्वा प्रकर्षेण वृद्धिं प्राप्तस्य, अत एव दुरासदस्य वीर्यस्य वीर्यवतः कर्मणः फलं च फलमेव चिन्त्यमपेक्षणीयम् । अनेन यावत्फलं निदिध्यासनकर्मसमुच्चय उक्तः ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–निस्संशयमिति । हे कुमार ! कार्यं कर्तव्यं निस्संशयमवेक्षितव्यं विचारणीयमत एव क्रियाविशेषः कर्तव्यसाधकं कर्म अनुवर्तितव्यः संपादनीयः दुरासदस्य अन्यैरनिवर्तनीयस्य प्रवृद्धस्य अतिवृद्धिं प्राप्तस्य वीर्यस्य स्वपराक्रमस्य फलं चिन्त्यम् ॥ १९ ॥

गो० टी०–निःसंशयमिति । कार्यं सीतान्वेषणादिकं निःसंशयं यथा भवति तथा अवेक्षणीयं तदनुरूपं धैर्यं कर्तव्यमित्यर्थः । क्रियाविशेषः उत्साहादिः अनुवर्तितव्यः अनुवर्तितव्य एव । हे कुमार ! प्रवृत्तस्य दुरासदस्य कार्यस्य फलं सीताप्राप्तिरूपम् न चिन्त्यं ननु, चिन्त्यमेव ॥ २० ॥

२१] ति० टी०–लक्ष्मणवचसा तत्कालं स्वस्थस्यापि पुनर्मैथिलीं स्मृत्वा खिद्यमानस्य शरदनुभववर्णनम्––अथेत्यादि ॥ २१ ॥

रा० टी०–अथेति । अथ उक्तवचनानन्तरं मैथिलीमनुचिन्तयन् अत एव परिशुष्यता मुखेनोपलक्षितो रामः लक्ष्मणमुवाच ॥ २० ॥

गो० टी०–एवं लक्ष्मणसमाश्वासनेन प्रतिष्ठापितधैर्योऽपि सीताविषयकामानुवृत्त्या पुनः शरदं वर्णयति–अथेत्यादिना ॥ २१ ॥

२२] ति० टी०–निर्वर्तयित्वा संपाद्य । अहं स्वकृतकर्मेति व्यङ्ग्यम् ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–तर्पयित्वेति । सहस्राक्षः वसुन्धरां तर्पयित्वा अत एव सस्यानि निवर्तयित्वा कृतकर्मा साधितकृत्यः सन् व्यवस्थितः स्वस्थचित्तोऽभवदिति शेषः॥२१॥

गो० टी०–तर्पयित्वेति । निर्वर्तयित्वा परिपक्वानि कृत्वा कृतकर्मा कृतकृत्यः ॥ २२ ॥

---

१ ननु प्रवृत्तस्येति गो. पाठः । २ कार्यस्येति गो. पाठः । ३ नेति गो. पाठः ।

[1]दीर्घगम्भीरनिर्घोषाः शैलद्रुमपुरोगमाः । विसृज्य सलिलं मेघाः परिश्रान्ता नृपात्मज ॥ २३ ॥
नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश । विमदा इव मातङ्गाः शान्तवेगाः पयोधराः ॥ २४ ॥
जलगर्भा महामेघाः कुटजार्जुनगन्धिनः । चरित्वा विरताः सौम्य वृष्टिवाताः समुद्यताः ॥ २५ ॥
घनानां वारणानां च मयूराणां च लक्ष्मण । नादः प्रस्रवणानां च प्रशान्तः सहसाऽनघ ॥ २६ ॥
अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः । अनुलिप्ता इवाभान्ति गिरयश्चन्द्ररश्मिभिः ॥ २७ ॥
शाखासु सप्तच्छदपादपानां प्रभासु तारार्कनिशाकराणाम् ।
लीलासु चैवोत्तमवारणानां श्रियं विभज्याद्य शरत्प्रवृत्ता ॥ २८ ॥
संप्रत्यनेकाश्रयचित्रशोभा लक्ष्मी शरत्कालगुणोपपन्ना ।
सूर्याग्रहस्तप्रतिबोधितेषु पद्माकरेष्वभ्यधिकं विभाति ॥ २९ ॥
सप्तच्छदानां कुसुमोपगन्धी षट्पादवृन्दैरनुगीयमानः ।
मत्तद्विपानां पवनानुसारी दर्पं [2]विनेष्यन्नधिकं विभाति ॥ ३० ॥

२३] ति० टी०–गच्छन्तीति गमाः पचाद्यच् । शैलद्रुमपुर इति द्वितीयाबहुवचनान्तम् तान्गच्छन्ति तथा भूत्वा सलिलं विसृज्य परिशान्ताः ॥ २३ ॥

रा० टी०–दीर्घेति । दीर्घः गम्भीरः निधाषो येषां ते गमाः गगनमागताः मेघाः सलिलं शैलद्रुमपुरः विसृज्य प्राप्य परिशान्ताः अभवन्निति शेष. । शैलद्रुमपुरोगमा इत्येकं पदं वा, तदर्थस्तु शैलद्रुमाणां पुरोऽग्रभागे गच्छन्तीति ॥ २२ ॥

गो० टी०–स्निग्धेति । शैलद्रुमपुरोगमाः शैलद्रुमाणामग्रे गच्छन्तः अत्र प्रकरणे सर्वत्र विषये प्रवृत्तिः रामावतारकृता सूच्यते ॥ २३ ॥ २४ ॥

२४] ति० टी०–नीलोत्पलदलश्यामा इति पयोधरविशेषणम् । अहं त्वशान्तकामवेग इति व्यङ्ग्यम् । एवमग्रेऽप्यूह्यम् ॥ २४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–नीलेति । नीलोत्पलदलश्यामाः पयोधराः दशदिशः श्यामीकृत्वा विमदाः मातङ्गा इव शान्तवेगाः अभवन्निति शेषः ॥ २३ ॥

२५-२६] ति० टी०–वृष्टिसहितवाताः समुद्यता अपि विरताः ॥ २५ ॥ २६ ॥

रा० टी०–जलेति । जलगर्भाः जलरूपगर्भविशिष्टाः कुटजार्जुनगन्धिनः समुद्यताः प्रभूताः वृष्टिवाताः चरित्वा संव्याप्य विरताः निवृत्ताः अभवन्निति शेषः ॥ २४ ॥

गो० टी०–जलगर्भा इति । वृष्टिकरा वाता वृष्टिवाताः पुरोवाता इत्यर्थः ॥ २५ ॥ २६ ॥

२७] ति०टी०–महामेघैरभिवृष्टाः, अत एव निर्मलाः॥२७॥

रा० टी०–घनानामिति । घनादीनां नादः सहसा एककालावच्छेदेन प्रशान्तः प्रश्रवणाः निर्झराः ॥ २६ ॥

रा०टी०–अभीति। महामेघैः अभिवृष्टाः अत एव निर्मलाः चित्रसानवः चित्रशृङ्गविशिष्टाः गिरयः चन्द्ररश्मिभिः अनुलिप्ता इव आभान्ति ॥ २६ ॥

गो० टी०–अभिवृष्टा इति । चित्रदीप्तिभिः नानावर्णकान्तिभिः ॥ २७ ॥

गो० टी०–दर्शयन्तीति । अनेन चिरकालानुवर्तनेन गुरूणां शिष्येभ्यो रहस्यार्थप्रकाशनं सूच्यते ॥ २८ ॥

२८] ति० टी०–श्रियं विभज्येति शाखाप्रभालीलासु त्रिधा विभागं कृत्वेत्यर्थः ॥ २८ ॥

रा० टी०–शाखासु इति । सप्तच्छदपादपानां शरद्विकसनशीलसप्तच्छदाभिधतरूणा शाखासु तारार्कनिशाकराणां प्रभासु च उत्तमवारणानां महागजानां लीलासु च श्रियं शोभां विभज्य त्रिविधविभागेन संस्थाप्य शरत्प्रवृत्ता ॥ २७ ॥

गो० टी०–शाखास्विति । सप्तच्छदा नाम शरत्पुष्पा वृक्षाः । शरत्कर्त्री श्रियं स्वसमृद्धिं विभज्य त्रेधा विभज्य सप्तच्छदशाखादिषु प्रवृत्ता सप्तच्छदेषु पुष्पविकासरूपा श्रीः तारादिप्रभासु निर्मलता रूपा गजलीलासु उन्मत्तकतारूपा ॥२९॥

२९] ति० टी०–अनेकपदार्थाश्रयाश्रिता शोभा यस्याः सा । अग्रहस्ताः प्रथमविसृतकिरणाः ॥ २९ ॥

रा० टी०–संप्रतीति । शरत्कालगुणोपपन्ना लक्ष्मीः अनेकाश्रयचित्रशोभा अनेकाश्रयाणां चित्रशोभा यया साऽपि संप्रति अस्मिन् काले सूर्याग्रहस्तप्रतिबोधितेषु सूर्यकिरणाग्रैः विकसितेषु पद्माकरेषु पद्मसमूहेषु अधिकं विभाति ॥ २८ ॥

गो० टी०–संप्रतीति । अनेकाश्रयचित्रशोभा सितरक्तनीलपङ्कजादिरूपानेकाश्रयतया चित्रशोभा नानावर्णकान्तिः शरत्कालगुणोपनीता शरत्कालोत्कर्षेण प्रापिता लक्ष्मीः समृद्धिः सूर्यस्याग्रहस्तैः प्राथमिककिरणैः । हस्तशब्देन करा लक्ष्यन्ते भगवत्कटाक्षबोधितेषु पुरुषेषु नानारूपसंवित्प्रकाश उच्यते॥३०॥

३०] ति० टी०–पवनमनुसरति तच्छीलः विनेष्यन्नलं

---

१ स्निग्धेति गो. पाठः । २ श्रान्ता इति गो. पाठः । ३ चित्रदीप्तिभिरिति गो. पाठः । ४ उपनीतेति गो. पाठः । ५ वनेष्वभ्यधिकं करोतीति गो. पाठः ।

अभ्यागतैश्चारुविशालपक्षैः स्मरप्रियैः पद्मरजोवकीर्णैः ।
महानदीनां पुलिनोपयातैः क्रीडन्ति हंसाः सह चक्रवाकैः ॥ ३१ ॥
मदप्रगल्भेषु च वारणेषु गवां समूहेषु च दर्पितेषु ।
प्रसन्नतोयासु च निम्नगासु विभाति लक्ष्मीर्बहुधा विभक्ता ॥ ३२ ॥
नभः समीक्ष्याम्बुधरैर्विमुक्तं विमुक्तबर्हाभरणा वनेषु ।
प्रियास्वरक्ता विनिवृत्तशोभा गतोत्सवा ध्यानपरा मयूराः ॥ ३३ ॥
मनोज्ञगन्धैः प्रियकैरनल्पैः पुष्पाग्रभारावनताग्रशाखैः ।
सुवर्णगौरैर्नयनाभिरामैरुद्द्योतितानीव वनान्तराणि ॥ ३४ ॥
प्रियान्वितानां नलिनीप्रियाणां वनप्रियाणां कुसुमोद्धतानाम् ।
मदोत्कटानां मदलालसानां गजोत्तमानां गतयोऽद्य मन्दाः ॥ ३५ ॥

शोषयन् शरत्काल इति शेषः । मत्तद्विपानां दर्पमधिकं कुर्वन्विभाति ॥ ३० ॥

रा० टी०–सप्तेति । षट्पादवृन्दैः भ्रमरसमूहैः अनुगीयमानः पवनानुसारी पवनेन संचलनशीलः सप्तच्छदानां कुसुमोपगन्धः कुसुमोपगन्धत्वमस्मिन् सः तद्गन्ध एवेत्यर्थः, मत्तद्विपानां मदयुक्तगजानां दर्पं गर्वं विनेष्यन् दूरीकुर्वन् सन् अधिकं विभाति । किंच मत्तद्विपानां पवनानुसारी पवन एवेत्यर्थः, अस्मिन्पक्षे कुसुमोपगन्धशब्देन भावप्रधानकल्पना ॥ २९ ॥

गो० टी०–सप्तेति । अनुसारी अनुसृत्य वर्तमानः अविच्छेदेनैव प्रवर्तमान इत्यर्थः । मत्तद्विपानां दर्पं करोति मदवृद्धिहेतुत्वादिति भावः ॥ ३१ ॥

३१] ति० टी०–मानससरस्तः स्वेन सहाभ्यागतैश्चक्रवाकैः सह क्रीडन्ति ॥ ३१ ॥

रा० टी०–अभ्यागतैरिति । चारुविशालपक्षैः अभ्यागतैः मानससरसः समागतैः स्मरप्रियैः कामप्रीतिविषयभूतैः पद्मरजोवकीर्णैः पद्मरजोभिर्व्याप्तैर्महानदीनां पुलिनेषु उपयातैः प्राप्तैः चक्रवाकैः सह हंसाः क्रीडन्ति ॥ ३० ॥

गो० टी०–अभ्यागतैरिति । मिथुनतया आभिमुख्येन संगतैः चारु यथा तथा विशालपक्षैः हर्षेण विस्तृतपक्षैरित्यर्थः । क्रीडन्ति हंसाः सह चक्रवाकैः । हंसाश्च क्रीडन्ति चक्रवाकाश्च क्रीडन्तीत्यर्थः ॥ ३२ ॥ ३३ ॥

३२] ति० टी०–विमुक्तं त्यक्तं बर्हरूपमाभरणं यैः । अरक्ता रागरहिताः ॥ ३२ ॥

रा० टी०–मदेति । मदप्रगल्भेषु वारणेषु गजेषु दर्पितेषु गवां समूहेषु च प्रसन्नतोयासु निम्नगासु नदीषु च बहुधा त्रिधा विभक्ता लक्ष्मीः शरत्संपत् विभाति ॥ ३१ ॥

३३] ति० टी०–प्रियकैरसनदृक्षैः ॥ ३३ ॥

रा० टी०–नभ इति । अम्बुधरैः मेघैः विमुक्तं संत्यक्तं नभो गगनं समीक्ष्य गतोत्सवाः भोगोत्साहरहिताः अत एव प्रियासु अरक्ताः अनुरागरहिताः अत एव विमुक्तं संत्यक्तं बर्हाभरणं बर्हरूपमाभरणं यैः अत एव निवृत्तशोभाः वनेषु विषयमाणाः मयूराः ध्यानपराः मेघचिन्तनरताः बभूवुरिति शेषः ॥ ३२ ॥

गो० टी०–नभ इति । गतोत्सवाः नष्टहर्षा इत्यर्थः, बभूवुरिति शेषः ॥ ३४ ॥

३४] ति० टी०–कुसुमोद्भूतानां सप्तच्छदकुसुमाघ्राणप्रवृत्तानाम् । 'उद्भूतानाम्' इत्येव पाङ्क्तः पाठः । 'उद्धतानाम्' इति कल्पित इति कतकृतः । मदोत्कटा अधिकमदाः, अत एव मदलालसाः मदशब्देन तज्जन्यः कामभोगस्तत्रेच्छावन्तः ॥ ३४ ॥

रा० टी०–मनोज्ञेति । पुष्पाग्रभारैः अवनताः अग्रशाखाः येषां तैः अत एव मनोज्ञगन्धैः सुवर्णगौरैः अत एव नयनाभिरामैः अनल्पैः बहुभिः प्रियकैः असनतरुभिः वनान्तराणि वनमध्यानि उद्योतितानि प्रकाशितान्येव । इव एवार्थे ॥३३॥

गो० टी०–मनोज्ञगन्धैरिति । प्रियकैः बन्धूकैः 'सर्जकासनबन्धूकपुष्पप्रियकजीवकाः' इत्यमरः ॥ ३५ ॥

३५] ति० टी०–शुभ्रवदुत्तेजितासिवद्विधौतो विमलो वर्णो नैर्ल्यं यस्य तत् । कह्लारशीताः कह्लाराश्च शीताश्चेत्यर्थः३५

रा० टी०–प्रियान्वितानामिति । प्रियैः पतिभिरन्वितानां नलिनी कमलिनी प्रिया येषां तेषां वनप्रियाणां कुसुमे सप्तच्छदकुसुमघ्राणे उद्भूतानां प्रवृत्तानां मदेन उत्कटानां प्रवृद्धानाम् अत एव मदलालसानां मदजनितकामभोगविषयकोत्कटेच्छावतां गजोत्तमानां गतयोऽद्य शरदि मन्दाः कान्तिमत्यः शनैस्त्वविशिष्टा वा सन्तीति शेषः ॥ ३४ ॥

गो० टी०–प्रियान्वितानामिति । कुसुमोद्भूतानां सप्तच्छदकुसुमाघ्राणेन मत्तानां मदोत्कटानां मदेन उद्भिन्नकटानाम् ॥ ३६ ॥

---

१ सर इति गो.पाठः। २ गर्मेष्विति गो.पाठः। ३ अमत्ता इति गो.पाठः। ४ अलीनि गो.पाठः। ५ वमे रत्नानामिति गो.पाठः। ६ उद्भूतानामिति गो.पाठः।

व्यक्तं नभः शस्त्रविधौतवर्णं कृशप्रवाहानि नदीजलानि ।
कह्लारशीताः पवनाः प्रवान्ति तमो विमुक्ताश्च दिशः प्रकाशाः ॥ ३६ ॥
सूर्यातपक्रामणनष्टपङ्का भूमिश्चिरोद्घाटितसान्द्ररेणुः ।
अन्योन्यवैरेण समायुतानामुद्योगकालोऽद्य नराधिपानाम् ॥ ३७ ॥
शरद्गुणाप्यायितरूपशोभाः प्रहर्षिताः पांसुसमुत्थिताङ्गाः ।
मदोत्कटाः संप्रति युद्धलुब्धा वृषा गवां मध्यगता नदन्ति ॥ ३८ ॥
समन्मथा तीव्रतरानुरागा कुलान्विता मन्दगतिः करेणूः ।
मदान्वितं संपरिवार्य यान्तं वनेषु भर्तारमनुप्रयाति ॥ ३९ ॥
त्यक्त्वा वराण्यात्मविभूषितानि बर्हाणि तीरोपगता नदीनाम् ।
निर्भर्त्स्यमाना इव सारसौघैः प्रयान्ति दीना विमना मयूराः ॥ ४० ॥
वित्रास्य कारण्डवचक्रवाकान्महारवैर्भिन्नकटा गजेन्द्राः ।
सरःसु बुद्धाम्बुजभूषणेषु विक्षोभ्य विक्षोभ्य जलं पिबन्ति ॥ ४१ ॥

रा० टी०—व्यक्तमिति । नभः शस्त्रविधौतवर्णं शरणसंस्कृतखड्गवर्णविशिष्टं व्यक्तं प्रादुर्भूतम्, नदीजलानि कृशप्रवाहानि जातानि, कह्लाराः तद्गन्धविशिष्टा एव शीताः पवनाः प्रवान्ति, दिशः तमोविमुक्ताः तमसा रहिताः अत एव प्रकाशाः॥ ३६ ॥

गो० टी०—व्यभ्रमिति । व्यभ्रं विगतमेघं शस्त्रविधौतवर्णं विधौतशस्त्रवर्णम् । कृशप्रवाहानि संकुचितप्रवाहानि ॥ ३७ ॥

३६-३७] ति० टी०—सूर्यातपस्य कामणं संबन्धः । चिरेणोद्घाटितः प्रकाशितः सान्द्रो रेणुर्यया अनेन शरदुत्तरार्धकालोऽयमिति ज्ञायते ॥ ३६ ॥ ३७ ॥

रा० टी०—सूर्येति । सूर्यातपक्रामणेन अत्यातपप्रहृत्या नष्टानि पङ्कानि यस्याः सा अत एव चिरोद्घाटिताः बहुकालादुत्थिताः सान्द्ररेणवो यस्यां सा भूमिरभवत् । अत एव अन्योन्यवैरेण समायुतानां नराधिपानामुद्योगकालोऽद्य प्रवृत्त इति शेषः ॥ ३६ ॥

गो० टी०—सूर्यातपेति । चिरोद्घाटितसान्द्ररेणुः चिरात् ईषत् उत्पादितनिबिडरेणुः स्थूलरेणुरित्यर्थः । अन्योन्यवैरामर्षायुतानामित्यत्र क्तभङ्ग आर्षः । वैरं विरोधः अमर्षः असहिष्णुता । ताभ्याम् आयुतानाम् आसमन्तायुतानां वैरामर्षपूर्णानामित्यर्थः ॥ ३८ ॥

३८] ति० टी०—आप्यायिते वर्धिते रूपशोभे येषाम् । पांसुसमुत्थिताङ्गाः पांसुयुक्ताङ्गाः ॥ ३८ ॥

रा० टी०—शरदिति । शरद्गुणैराप्यायिता प्रवृद्धा रूपशोभा येषाम् अत एव मदोत्कटाः प्रवृद्धमदाः अत एव प्रहर्षिताः अत एव युद्धलुब्धा युद्धविषयकलोभवन्तः अत एव गवां मध्यगताः युद्धार्थमिति शेषः अत एव पांसुभ्यः समुत्थिताम्यङ्गानि येषां ते वृषा नदन्ति ॥ ३७ ॥

गो० टी०—शरद्गुणेति । रूपशोभाः शरीरशोभाः ॥३९॥

३९] ति० टी०—समन्मथत्वादिविशेषणचतुष्टयं करेण्वाः । करेणुरिति दीर्घत्वमार्षम् ॥ ३९ ॥

रा० टी०—सेति । समन्मथा मन्मथसहिता अत एव तीव्रतरः अनुरागः प्रीतिर्यस्याः सा अत एव मन्दगतिः कुलान्विता शोभनकुलजाता करेणुः हस्तिनी वनेषु यान्तं मदान्वितं भर्तारं संपरिवार्य आवर्त्य अनुप्रयाति निरन्तरं गच्छति ॥ ३८ ॥

गो० टी०—समन्मथमिति । कुलान्विताः सजातीयसमूहेन युक्ताः ॥ ४० ॥

४०] ति० टी०—विभूषितं विभूषणम् । विमना मयूराः । मनःपर्यायो मनशब्दोऽकारान्तोऽपि द्विरूपकोशात् ॥ ४० ॥

रा० टी०—त्यक्त्वेति । विमनाः घनगर्जनानहुभवेनोदासीनचित्ता अत एव वराणि आत्मविभूषितानि विभूषणानि बर्हाणि त्यक्त्वा नदीनां तीरोपगताः अत एव दीनाः क्षीणाः मयूराः सारसौघैर्निर्भर्त्स्यमाना इव प्रयान्ति परावर्तन्ते । अद्यन्तोऽपि मनशब्दः प्रसिद्धः ॥ ३९ ॥

गो० टी०—त्यक्त्वेति । सारसौघैः हंससमूहैः ॥ ४१ ॥

४१] ति० टी०—बुद्धाम्बुजानि विकसितकमलानि ॥४१॥

रा० टी०—वित्रास्येति । भिन्नकटाः च्योतन्मदा गजेन्द्राः कारण्डवचक्रवाकान् महारवैर्वित्रास्य बुद्धैः विकसितैरम्बुजैर्भूषणं येषां तेषु सरस्सु विक्षोभ्य संचाल्य जलं पिबन्ति ॥ ४० ॥

गो० टी०—वित्रास्येति । महारवैः वित्रास्येति संबन्धः । भिन्नकटाः मदेनेति शेषः ॥ ४२ ॥

१ व्यभ्रमिति गो. पाठः । २ वैरामर्षैति गो. पाठः । ३ उल्लिखेतेति गो पाठः । ४ समन्मथमिति गो पाठः । ५ करण्य इति गो. करेणुरिति रा. पाठः । ६ प्रयान्तीति गो. पाठः ।

व्यपेतपङ्कासु सवालुकासु प्रसन्नतोयासु सगोकुलासु ।
ससारसारावविनादितासु नदीषु हंसा निपतन्ति हृष्टाः ॥ ४२ ॥
नदीघनप्रस्रवणोदकानामतिप्रवृद्धानिलबर्हिणानाम् ।
प्लवङ्गमानां च गतोत्सवानां ध्रुवं रवाः संप्रति संप्रनष्टाः ॥ ४३ ॥
अनेकवर्णाः सुविनष्टकाया नवोदितेष्वम्बुधरेषु नष्टाः ।
क्षुधार्दिता घोरविषा बिलेभ्यश्चिरोषिता [2]विप्रसरन्ति सर्पाः ॥ ४४ ॥
चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका । अहो रागवती संध्या जहाति [3]स्वयमम्बरम् ॥ ४५ ॥
रात्रिः शशाङ्कोदितसौम्यवक्त्रा तारागणोन्मीलितचारुनेत्रा ।
ज्योत्स्नांशुकप्रावरणा विभाति नारीव शुक्लांशुकसंवृताङ्गी ॥ ४६ ॥
विपक्वशालिप्रसवानि भुक्त्वा प्रहर्षिता सारसचारुपङ्क्तिः ।
नभः समाक्रामति शीघ्रवेगा वातावधूता ग्रथितेव माला ॥ ४७ ॥

४२] ति० टी०–ससारसाश्च तास्तदारावविनादिताश्च तासु ॥ ४२ ॥

रा० टी०–व्यपेतेति । सगोकुलासु गोकुलसमूहैर्युक्तासु ससारसा सारससहिता अत एव आरावविनादिता अतिशब्दवत्यः कर्मधारयः, तासु नदीषु हृष्टाः हंसा निपतन्ति ॥ ४१ ॥

गो० टी०–व्यपेतेति । सवालुकासु सांसिकतासु ससारसा इति पदच्छेदः रावविनादितासु निजशब्देन संजातशब्दासु ॥ ४३ ॥

४३] ति० टी०–अतिप्रवृद्धानिलो महावायुः । बर्हिणा मयूराः । प्लवङ्गमा भेकाः ॥ ४३ ॥

रा० टी०–नदीति । गतोत्सवानां नद्यादित्रयाणाम् अतिप्रवृद्धानिला महावाताः बर्हिणा मयूराश्च तेषां प्लवङ्गमानां भेकानां च रवाः शब्दाः ध्रुवं संप्रनष्टाः ॥ ४२ ॥

गो० टी०–नदीति । नद्यश्च घनप्रस्रवणानि च तेषाम् उदकानां प्लवङ्गमानां मण्डूकानाम् ॥ ४४ ॥

४४] ति० टी०–अनेके वर्णा येषां ते । नवोदितेष्वम्बुधरेषु सुविनष्टकायाः सुतरां नष्टदेहयात्राः, अत एव नष्टा मृतप्रायाः ॥ ४४ ॥

रा० टी०–अनेकेति । अम्बुधरेषु नवोदयेषु सत्सु चिरोषिताः अत एव क्षुधा अर्दिताः पीडिताः अत एव सुविनष्टकायाः अत एव नष्टा नष्टप्रायाः घोरविषाः अनेकवर्णाः सर्पाः बिलेभ्यः प्रसरन्ति । चिरोषितापीत्यत्र संधिरत एव ज्ञापकात् ॥ ४३ ॥

गो० टी०–अनेकेति । अनेकवर्णा कृष्णपीतादिवर्णाः सुविनष्टकायाः अत्यन्तकृशशरीराः नष्टा लीनाः ॥ ४५ ॥

४५] ति० टी०–चञ्चतां शोभमानानां चन्द्रकिरणानां स्पर्शेन यो हर्षस्तेनोन्मीलिता ईषत्प्रकाशितास्तारका नक्षत्राणि नेत्रकनीनिका च यया सा । रागवती रक्तवर्णानुरक्ता च । अम्बरमाकाशं वस्त्रं च । समासोक्तिरलंकारः । कान्तकरस्पर्शसुखादर्धोन्मीलितनयनायास्तद्वद्रागवशात्स्वतो विगलितवसनायाः कामुक्या वृत्तान्तस्य संध्यायामारोपादिति बोध्यम् ॥४५॥

रा० टी०–चञ्चदिति । चञ्चत् शोभमानो यश्चन्द्रस्तस्य किरणैः यः स्पर्शः तस्माज्जातो यो हर्षस्तेन उन्मीलिता ईषत्प्रकाशविशिष्टा तारा यस्यां सा अत एव रागवत्यपि संध्या अम्बरं स्वयं जहाति अहो आश्चर्यमेतत् ॥ ४४ ॥

गो० टी०–चञ्चदिति । चञ्चच्चन्द्रकरस्पर्शेन यो हर्षः तेन उन्मीलिततारका निर्मलनक्षत्रा रागवती आरुण्यवती संध्या अम्बरम् आकाशं स्वयं जहाति । अत्र कान्तकरस्पर्शेन हर्षविस्फारितनेत्रकनीनिका उत्तेजितानुरागा स्वयमेव रतये अम्बरं त्यजन्ती कामुकी प्रतीयत इति समासोक्तिः । संध्यारागः प्रायेण शरत्येव भवतीत्येवमुक्तम् ॥ ४६ ॥

४६] ति० टी०–शशाङ्कोदितेति उदितशशाङ्कस्त्यर्थः । तारागणा एवोन्मीलितानि चारूणि नेत्राणि यस्याः सा ॥४६॥

रा० टी०–रात्रिरिति । शशाङ्कोदितः उदितचन्द्रः एव सौम्यं वक्त्रं यस्यास्तारागणाः एव उन्मीलितानि प्रकाशितानि चारुनेत्राणि यस्याः सा, ज्योत्स्नांशुकेन जोत्स्नारूपवस्त्रेण प्रावरणं यस्याः सा रात्रिः शुक्लांशुकसंवृताङ्गी नारीव विभाति ॥ ४५ ॥

गो० टी०–रात्रिरिति । शशाङ्कोदितसौम्यवक्त्रा उदितशशाङ्कसम्यवक्त्रा तारागणोन्मीलितचारुनेत्रा उन्मीलिततारागणचारुनेत्रा ॥ ४७ ॥

४७] ति० टी०–शालिप्रसवा व्रीहयः । मालेव नभः समाक्रामति ॥ ४७ ॥

रा० टी०–विपक्वेति । विपक्वान्येव शालिप्रसवानि व्रीहीन् भुक्त्वा प्रहर्षिता शीघ्रवेगा सारसचारुपङ्क्तिः वातावधूता ग्रथिता माला इव नभः समाक्रामति ॥ ४६ ॥

---

१ द्रुतमिति गो. पाठः । २ ऽप्रीति रा. पाठः । ३ जहातीति गो. रा. पाठः ।

सुप्तैकहंसं कुमुदैरुपेतं महाह्रदस्थं सलिलं विभाति ।
घनैर्विमुक्तं निशि पूर्णचन्द्रं तारागणाकीर्णमिवान्तरिक्षम् ॥ ४८ ॥
प्रकीर्णहंसाकुलमेखलानां प्रबुद्धपद्मोत्पलमालिनीनाम् ।
वाप्युत्तमानामधिकाऽद्य लक्ष्मीर्वराङ्गनानामिव भूषितानाम् ॥ ४९ ॥
वेणुस्वरव्यञ्जिततूर्यमिश्रः प्रत्यूषकालेऽनिलसंप्रवृत्तः ।
संमूर्च्छितो गह्वरगोवृषाणामन्योन्यमापूरयतीव शब्दः ॥ ५० ॥
नवैर्नदीनां कुसुमप्रहासैर्व्याधूयमानैर्मृदुमारुतेन ।
धौतामलक्षौमपटप्रकाशैः कूलानि काशैरुपशोभितानि ॥ ५१ ॥
वनप्रचण्डा मधुपानशौण्डाः प्रियान्विताः षट्चरणाः प्रहृष्टाः ।
वनेषु मत्ताः पवनानुयात्रां कुर्वन्ति पद्मासनरेणुगौराः ॥ ५२ ॥

गो० टी०–विपक्वेति । भुक्त्वा मुखाग्रे गृहीत्वा माला मानावर्णपुष्पमाला ॥ ४८ ॥

४८] ति० टी०–सुप्तैकहंसमिति चन्द्रप्रतिबिम्बवत् ॥४८॥

रा० टी०–सुप्तेति । सुप्तः एकः हंसो यस्मिन् कुमुदैः उपेतं युक्तं महाह्रदस्थं सलिलं घनैर्विमुक्तं घनरहितं पूर्णः चन्द्रो यस्मिन् तत् तारागणाकीर्णमन्तरिक्षमिव भाति ॥ ४७ ॥

गो० टी०–सुप्तैकहंसमिति । सुप्तैकहंसमिति इदं चन्द्रस्थाने महाह्रदस्थमिति गाम्भीर्यकृतनैर्मल्यातिशयेन आकाशसाम्याय घनैर्विमुक्तमिति परिपूर्णत्वायोक्तम् ॥ ४९ ॥ ५० ॥

४९] ति० टी०–प्रकीर्णा हंसा एवाकुला मेखला यासाम् । वाप्युत्तमानामुत्तमवापीनाम् ॥ ४९ ॥

रा० टी०–प्रकीर्णेति । प्रकीर्णाः प्रसृताः हंसाः एव आकुलमेखला यासां प्रबुद्धानि विकसितान्येव पद्मोत्पलानि तेषां माला समूहः तद्वतीनां वाप्युत्तमानां लक्ष्मीः संपत्तिः भूषितानां वराङ्गनानां लक्ष्मीरिव अधिका विभातीति शेषः ॥ ४८ ॥

५०] ति० टी०–वेणुस्वररूपेण व्यञ्जितेन व्यक्तेन तूर्येण वाद्यघोषेण मिश्रः प्रत्यूषकाले प्रातःकालेऽनिलेन संप्रवृत्तस्ततसंबन्धेन जातः संमूर्च्छितो व्याप्तो गह्वराणां गिरिगह्वराणां गोवृषाणां च वनवर्तिनां शब्दोऽन्योन्यमापूरयतीव वर्धयतीव । गह्वरगोवृषशब्दाः साजात्यात्परस्परवर्धका इत्यर्थः । 'गह्वरगोवृषाणाम्' इतिपाठः ॥ ५० ॥

रा० टी०–वेणुस्वरेति । वेणुस्वनव्यञ्जितः प्रकटीभूतवेणुस्वन एव तूर्यं वाद्यस्वनः तेन मिश्रः संयुक्तः प्रत्यूषकाले अनिलसंप्रवृत्तः वायुसंसर्गेण संबद्धः अत एव संमूर्छितो व्याप्तः गह्वरगोवृषाणां वने वियमानानां गवां वृषाणां च शब्दः अन्योन्यमापूरयतीव ॥ ४९ ॥

गो० टी०–वेणुस्वरेति । वेणूनां सुषिरवंशानां स्वनेन व्यञ्जितं यत्तूर्यं गीतवाद्यं तेन मिश्रः प्रत्यूषकालानिलेन प्रातःकालवायुना संप्रवृद्धः अभिवृद्धः संमूर्छितः अभिव्याप्तः गर्गरगोवृषाणां गर्गराणां दधिमथनभाण्डानां गवां वृषाणां च शब्दः अन्योन्यमापूरयतीव परस्परमभिवर्धयतीव । प्रातःकालिकदधिमथनघोषः वत्सोत्सुकानां गवां पुष्ट्या कामातुराणां वृषाणां च शब्दः गोपालवेणुस्वनैः प्राभातिकवायुभिश्रापि वृद्धो जायत इत्यर्थः ॥ ५१ ॥

५१] ति० टी०–नदीनां कूलानि मृदुमारुतेन व्याधूयमानैः कम्पितैः कुसुमप्रहासैः कुसुमविकासैर्युतैः काशैरुपशोभितानि ॥ ५१ ॥

रा० टी०–नवैरिति । कुसुम एव प्रहासो येषां तैः मृदुमारुतेन व्याधूयमानैः धौताः अमलक्षौमपटाः तद्वत्प्रकाशो येषां तैः नवैः काशैः काशाभिधतृणैः नदीनां कूलानि उपशोभितानि ॥ ५० ॥

गो० टी०–नवैरिति । कुसुमैः प्रभासन्त इति कुसुमप्रभासाः तैः पटप्रकाशैः पटतुल्यैः काशैः शुभ्रपुष्पदर्भविशेषैः नदीनां कूलानि तटानीत्युक्त्या स्त्रीणां जघनोपमा सूच्यते॥५२॥

५२] ति० टी०–प्रचण्डाः प्रगल्भाः । शौण्डा मत्ताः । पद्मानामसनपुष्पाणां च रेणुभिर्गौराः पीताः पवनानुयात्रां कुर्वन्ति । गन्धलोभादिति भावः ॥ ५२ ॥

रा० टी०–वनेति । वनप्रचण्डा वनविचरणशीलाः मधुपानशौण्डाः पुष्परसपाने चतुराः अत एव पद्मासनरेणुगौराः पद्मपुष्पाणाम् असनपुष्पाणां च रेणुभिर्गौराः अत एव मत्ताः प्रहृष्टाः षट्चरणाः भ्रमराः पवनानुयात्रां गन्धप्राप्त्यर्थं पवनेन सह गमनं कुर्वन्ति ॥ ५१ ॥

गो० टी०–वनेति । वने प्रचण्डाः निरङ्कुशगतयः मधुपाने शौण्डाः धूर्ताः पद्मानामसनानां च रेणुभिः गौराः षट्चरणाः भृङ्गाः वनेषु पवनानुयात्रां वातानुगमनं कुर्वन्ति । परिमलानुसारादिति भावः ॥ ५२ ॥

---

१ कुसुमैरिति गो. पाठः । २ स्वनेति गो. रा. पाठः । ३ कालानिलेति गो. पाठः । ४ गर्गरेति गो. पाठः । ५ प्रभासैरिति गो. पाठः ।

जलं प्रसन्नं कुसुमप्रहासं क्रौञ्चस्वनं शालिवनं विपक्वम् ।
मृदुश्च वायुर्विमलश्च चन्द्रः शंसन्ति वर्षव्यपनीतकालम् ॥ ५३ ॥
मीनोपसंदर्शितमेखलानां नदीवधूनां गतयोऽद्य मन्दाः ।
कान्तोपभुक्तालसगामिनीनां प्रभातकालेष्विव कामिनीनाम् ॥ ५४ ॥
सचक्रवाकानि सशैवलानि काशैर्दुकूलैरिव संवृतानि ।
सपत्रलेखाणि सरोचनानि वधूमुखानीव नदीमुखानि ॥ ५५ ॥
प्रफुल्लबाणासनचित्रितेषु प्रहृष्टषट्पादनिकूजितेषु ।
गृहीतचापोद्यतदण्डचण्डः प्रचण्डचापोऽद्य वनेषु कामः ॥ ५६ ॥
लोकं सुवृष्ट्या परितोषयित्वा नदीस्तटाकानि च पूरयित्वा ।
निष्पन्नसस्यां वसुधां च कृत्वा त्यक्त्वा नभस्तोयधराः प्रनष्टाः ॥ ५७ ॥
दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः । नवसंगमसव्रीडा जघनानीव योषितः ॥ ५८ ॥
प्रसन्नसलिलाः सौम्य कुररीभिर्विनादिताः । चक्रवाकगणाकीर्णा विभान्ति सलिलाशयाः ॥ ५९ ॥
अन्योन्यबद्धवैराणां जिगीषूणां नृपात्मज । उद्योगसमयः सौम्य पार्थिवानामुपस्थितः ॥ ६० ॥

५३] ति० टी०–कुसुमरूपः प्रहासो यस्य तम् । शालिवन शालिसमूहः । वर्षस्य व्यपनीतं व्यपनयो यस्मिंस्तं कालम् ॥ ५३ ॥

रा० टी०–जलमिति । प्रसन्नं स्वच्छं जलं कुसुम एव प्रहासो यस्य तत् क्रौञ्चानां स्वनो यस्मिन् तत् विपक्वं शालिवनं च मृदुर्वायुश्च विमलश्चन्द्रश्च व्यपनीतकालं गतसमयं वर्षं शंसन्ति बोधयन्ति ॥ ५२ ॥

गो० टी०–जलमिति । प्रभासत इति प्रभासं पचाद्यच्, विकस्वरमित्यर्थः । वर्षव्यपनीतकालं वर्षात्ययकालं शरत्कालमिति यावत् ॥ ५४ ॥

५४] ति० टी०–मीना एवोपसंदर्शिता मेखला यासाम् ५४

रा० टी०–मीनेति । मीनोपसंदर्शितमेखलानां मीना एव उपसंदर्शिताः प्रतीताः मेखला यासां तासां नदीवधूनां नदीरूपस्त्रीणां गतयः प्रभातकालेषु कान्तेन उपभुक्ताः अत एव अलसगामिन्यस्ता एव तत्र इति कर्मधारयः, तासां कामिनीनां गतय इव मन्दाः भवन्तीति शेषः ॥ ५३ ॥

गो० टी०–मीनेति । कामिनीनां वारस्त्रीणामित्यर्थः ॥ ५५ ॥

५५] ति० टी०–चक्रवाकशैवलकाशा रोचनापत्ररेखा-दुकूलस्थानीयाः ॥ ५५ ॥

रा० टी०–सेति । सचक्रवाकानि चक्रवाकसहितानि सशैवलानि शैवलसहितानि दुकूलैरिव कासैः संवृतानि नदीमुखानि सपत्रलेखानि सरोचनानि वधूमुखानीव प्रकाशन्ते इति शेषः । तत्र चक्रवाकशैवालौ रोचनापत्रलेखास्थानीयौ ॥ ५४ ॥

गो० टी०–सचक्रवाकानीति । चक्रवाकशैवलकाशाः रोचनापत्रलेखावकुण्ठनदुकूलस्थानीयाः ॥ ५६ ॥

५६–५७] ति० टी०–सम्पन्यन्ते वनविशेषणे । वनेष्विति शेषः । गृहीतेन चापेनोद्यते आरब्धे विरहिविषयके दण्डे चण्डः प्रचण्डः । प्रचण्डश्चापो यस्य सः इदं हेतुगर्भम् ॥ ५६ ॥ ५७ ॥

रा० टी०–प्रफुल्लेति । वनेषु प्रफुल्लबाणासनाभ्यां पुष्पिततरुविशेषाभ्यां चित्रितेषु अत एव प्रहृष्टषट्पादनिकूजितेषु सरस्सु गृहीतचाप आत्तधनुष्कः उद्यतः प्रारब्धः दण्डचण्डः चण्डदण्डो येन सः प्रचण्डचापः कामः वनेषु प्रादुर्भूत इति शेषः । वनेषु इत्युभयान्वयि ॥ ५६ ॥

गो० टी०–प्रफुल्लेति । बाणाः बाणवृक्षाः । असनाः सर्जकाः । गृहीतचापेन उद्यतः प्रयुक्तः चण्डदण्डः तीक्ष्णदण्डनं येन स तथा । यद्वा गृहीतचापश्चासौ उद्यतचण्डदण्डश्च दण्डः शरविशेषः 'दण्डादयः काण्डभेदाः स्युः' इति हलायुधः । प्रचण्डचारः उग्रसंचारः ॥ ५७ ॥

रा० टी०–लोकमिति । सुवृष्ट्या लोकं परितोषयित्वा परितोष्य नदीतटाकानि च पूरयित्वा वसुधां निष्पन्नसस्यां च कृत्वा नभस्त्यक्त्वा पयोधरा मेघाः प्रनष्टाः अदृश्याः बभूवुरिति शेषः ॥ ५६ ॥

गो० टी०–लोकमिति । लोकं जनम् ॥ ५८ ॥

५८–६०] ति० टी०–दर्शयन्तीति पद्ये समासोक्तिः स्पष्टैव व्याख्या ॥ ५८–६० ॥

रा० टी०–दर्शयन्तीति । शरन्नद्यः नवसंगमसव्रीडाः योषितो जघनानीव पुलिनानि शनैः दर्शयन्ति ॥ ५७ ॥

रा० टी०–प्रसन्नेति । प्रसन्नानि सलिलानि येषां ते कुररीभिर्विनादिताः चक्रवाकगणैः आकीर्णाः सलिलाशयाः विभान्ति ॥ ५८ ॥

गो० टी०–प्रसन्नेति । कुररीभिः क्रौञ्चीभिः सलिलाशयाः सरांसि ॥ ५९

१ कुमुदं प्रभासमिति गो. पाठः । २ स्वन इति गो. पाठः । ३ चार इति गो. पाठः । ४ प्रणष्टा इति गो. पाठः । ५ श्लोकोऽयमष्टाविंशस्य स्थाने गो. पठे । ६ संव्रीडा इति गो. पाठः । ७ कुररीभिरिति गो. पाठः ।

इयं सा प्रथमा यात्रा पार्थिवानां नृपात्मज । न च पश्यामि सुग्रीवमुद्योगं चै तथाविधम् ॥ ६१ ॥
असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः । दृश्यन्ते बन्धुजीवाश्च श्यामाश्च गिरिसानुषु ॥ ६२ ॥
हंससारसचक्राह्वैः कुररैश्च समन्ततः । पुलिनान्यवकीर्णानि नदीनां पश्य लक्ष्मण ॥ ६३ ॥
चत्वारो वार्षिका मासा गता वर्षशतोपमाः । मम शोकाभिभूतस्य तथा सीतामपश्यतः ॥ ६४ ॥
चक्रवाकीव भर्तारं पृष्ठतोऽनुगता वनम् । विषमं दण्डकारण्यमुद्यानमिव चाङ्कना ॥ ६५ ॥
प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते । कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥ ६६ ॥
अनाथो हृतराज्योऽहं रावणेन च धर्षितः । दीनो दूरगृहः कामी मां चैव शरणं गतः ॥ ६७ ॥
इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः । अहं वानरराजस्य परिभूतः परंतपः ॥ ६८ ॥
स कालं परिसंख्याय सीतायाः परिमार्गणे । कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते ॥ ६९ ॥
सं किष्किन्धां प्रविश्य त्वं ब्रूहि वानरपुङ्गवम् । मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ ७० ॥

रा० टी०–अन्योन्येति । हे नृपात्मज ! पार्थिवानामुद्योगसमयः उपस्थितः संप्राप्तः ॥ ६९ ॥

गो० टी०–अन्योन्येति । हे नृपात्मज ! जिगीषूणां पार्थिवानामित्यन्वयः ॥ ६२ ॥

६१] ति० टी०–यात्रा यात्राकाल इत्यर्थः । तथाविधं यात्रोपयोगिनमुद्योगं च तस्य न पश्यामीत्यनुत्कर्षः ॥ ६१ ॥

रा० टी०–इयमिति । सा वर्षानन्तरकाला प्रथमा इयं पार्थिवानां यात्रा समयः प्राप्ता सुग्रीवं तथाविध पूर्वसुग्रीवप्रतिज्ञासदृशम् उद्योगं च न पश्यामि ॥ ६० ॥

गो० टी०–इयमिति । यात्रा उपस्थितेतिति शेषः ॥ ६३ ॥

६२–६३] ति० टी०–श्यामास्तमालाः ॥ ६२ ॥ ६३ ॥

रा० टी०–दृष्टिनिवृत्तिचिह्नमाह–असना इति । श्यामाः असनादयः गिरिसानुषु पुष्पिता दृश्यन्ते । श्यामा अपि तरुविशेषा एव वा ॥ ६१ ॥

रा० टी०–हंसेति । हंसाद्यैः अवकीर्णानि नदीना पुलिनानि पश्य ॥ ६२ ॥

गो० टी०–असना इति । बन्धुजीवाः श्यामाश्च लताविशेषाः ॥ ६० ॥ ६१ ॥

६४] ति० टी०–चत्वार इति । यद्यपि चतुर्थो मासो विद्यत एव, तथापि तत्रोद्योगाभावेन तस्यापि गतप्रायत्वादुक्ता इत्युक्तिः ॥ ६४ ॥

६५–६६] ति० टी०–का सा सीता तत्राह—चक्रेति । या विषमं दण्डकारण्याख्यं वनमुद्यानमिव ज्ञात्वा चक्रवाकी भर्तारमिव मां पृष्ठतोऽनुगता ॥ ६५ ॥ ६६ ॥

रा० टी०–चत्वार इति । या अङ्गना विषमं दण्डकारण्यमुद्यानं वनं चक्रवाकीव भर्तारं मामनुगता तां सीतामपश्यतः अत एव शोकाभिभूतस्य मम वार्षिकाश्चत्वारो मासाः वर्षशतोपमाः गताः । श्लोकद्वयमेकान्वयि ॥ ६३ ॥ ६४ ॥

रा० टी०–प्रियेति । हे लक्ष्मण ! प्रियाविहीनत्वादिविशिष्टे मयि सुग्रीवः कृपां न कुरुते ॥ ६५ ॥

गो० टी०–चत्वार इति । चत्वारः आषाढाद्याः । केचिदाहुः श्रावणाद्या इति । पूर्वोक्तं वार्षिको मासः श्रावणः सलिलागम इत्युपक्रमोक्तेः आश्वयुजकार्तिकयोर्वर्षानुवृत्त्या वार्षिकत्वम् कार्तिके समनुप्राप्ते त्वं रावणवधे यतेति पूर्वोक्तवचने तु कार्तिके समनुप्राप्त इत्यस्य समाप्ते इत्यर्थ इत्याहुः ॥६४–६६॥

६७] ति० टी०–कृपाया अकरणे हेतुमुन्नयति–अनाथ इति । 'दूरगृहः' इति पाठे दूरवर्तिस्त्रीविषयो ग्रहो रावणोऽभिनिवेशो वा यस्येत्यर्थः ॥ ६७ ॥

६८] ति० टी०–वानरराजस्य वानरराजेन शेषे षष्ठी॥६८॥

रा० टी०–ननु स्वयं समर्थत्वात्सुग्रीवापेक्षा किमर्थं क्रियते इत्यत आह–अनाथ इति । रावणेन रावणसदृशेन वालिना धर्षितः अत एव अनाथः रक्षकरहितः अत एव दीनः कामी अयं सुग्रीवः मां शरणं गतः इत्येतैः कारणैः वानरराजस्य सुग्रीवस्य सुग्रीवेण परिभूतः वशीकृतः अहमस्मीति शेषः । श्लोकद्वयमेकान्वयि ॥ ६६ ॥ ६७ ॥

गो० टी०–अनाथ इत्यादि । सुग्रीवस्य परिभूत इति "कर्तृस्य च वर्तमाने " इति षष्ठी । कृपा न कुरुत इत्यादिकं सुग्रीवाभिमानमनुसृत्योक्तम् ॥ ६७–६९ ॥

६९–७०] ति० टी०–परिसंख्याय गणयित्वा न बुध्यते । समयमिति शेषः ॥ ६९ ॥ ७० ॥

रा० टी०–स इति । कालम् अन्वेषणयोग्यमदुष्कृतदृष्टिसमयं परिसंख्याय ज्ञात्वा सीतायाः परिमार्गणे समयं गतदृष्टिकालकनिश्चयं कृत्वा कृतार्थो दुर्मतिः स सुग्रीवः नावबुध्यते६८

रा० टी०–स इति । सः तत्कृतनिश्चयज्ञाता त्वं किष्किन्धां प्रविश्य ग्राम्यसुखे सक्तमत एव मूर्खं सुग्रीवं मम वचनाद्ब्रूहि ॥ ६९ ॥

---

१ वेति गो. पाठः । २ एतदादी द्वौ श्लोकौ 'अन्योन्य' इत्यस्मात्प्राक् गो. पाठे । ३ ऽभिभूतस्य सौम्येति गो. पाठः । ४ याऽऽगता इति गो. पाठः। ५ परतपेति गो. पाठः । ६ त्वं प्रविश्य च, किष्किन्धामिति गो. पाठः ।

अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम् । आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ ७१ ॥
शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम् । सत्येन परिगृह्णाति स वीरः पुरुषोत्तमः ॥ ७२ ॥
कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये । तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ७३ ॥
नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे । द्रष्टुमिच्छसि चापस्य रूपं विद्युद्गणोपमम् ॥ ७४ ॥
घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे । निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छसि ॥ ७५ ॥
काममेवंगतेऽप्यस्य परिज्ञाते पराक्रमे । त्वत्सहायस्य मे वीर न चिन्ता स्यान्नृपात्मज ॥ ७६ ॥
यदर्थमयमारम्भः कृतः परपुरंजय । समयं नाभिजानाति कृतार्थः प्लवगेश्वरः ॥ ७७ ॥
वर्षाः समयकालं तु प्रतिज्ञाय हरीश्वरः । व्यतीतांश्चतुरो मासान्विहरन्नावबुध्यते ॥ ७८ ॥
सामात्यपरिषत्क्रीडन्पानमेवोपसेवते । शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम् ॥ ७९ ॥

७१] ति० टी०–उपपन्नानां बलवीर्यादियुक्तानामाशामभिमतार्थविषयां संश्रुत्य प्रतिज्ञाय ॥ ७१ ॥

रा० टी०–वचनप्रकारमाह–अर्थिनामिति । उपपन्नानामतिवीर्यादियुक्तानामत एव पूर्वमुपकारिणामार्थिनामाशामीप्सितं संश्रुत्य पूरयितुं प्रतिज्ञाय यो जनः हन्ति न पूरयति स पुरुषाधमः अधमपुरुषो ज्ञेय इति शेषः ॥ ७० ॥

७२] ति० टी०–सत्येनामोघतया ॥ ७२ ॥

रा० टी०–शुभमिति । शुभं पापं वा उदीरितं प्रतिज्ञातं वाक्यं यो यदि सत्यत्वेन अत्याज्यत्वेनेत्यर्थः, परिगृह्णाति स वीरस्तदा पुरुषोत्तमः मन्तव्यः ॥ ७१ ॥

गो० टी०–त्वं प्रविश्य चेत्यादि । शुभमिति । यः उदीरितं वाक्यं सत्येन परिगृह्णाति सत्यत्वेन स्वीकरोति यथोक्तमनुतिष्ठतीत्यर्थः । मित्राणां न भवन्ति मित्राणामुपकाराय न भवन्तीत्यर्थः । अस्य श्लोकस्य अन्ते इतिकरणं द्रष्टव्यम् इति सुग्रीवं ब्रूहीति पूर्वेण संबन्धः । शुभमिति । यो हि वाक्यमुदीरितमिति पाठः ॥ ७०–७४ ॥

७३–७४] ति० टी०–न भवन्ति कार्यायेति शेषः । क्रव्यादाः श्वादयः ॥ ७३ ॥ ७४ ॥

रा० टी०–कृतार्था इति । कृतार्थाः साधितस्वप्रयोजनाः ये जनाः अकृतार्थानां मित्राणां न भवन्ति कार्यसाधनायेति शेषः, मृतानपि तान् कृतघ्नान् क्रव्यादाः मांसाशिनः श्वप्रभृतयः न उपभुञ्जते खादन्ति ॥ ७३ ॥

रा० टी०–नूनमिति । रणे मया विकृष्टस्य काञ्चनपृष्ठस्य चापस्य विद्युद्गणोपमं रूपं द्रष्टुमिच्छसि ननं किम् ॥ ७३ ॥

७५] ति० टी०–संश्रोतुमिच्छसीत्युत्तरमिति सुग्रीवं ब्रूहीति संबन्धः ॥ ७५ ॥

रा० टी०–घोरमिति । संयुगे क्रुद्धस्य मम वज्रस्य निर्घोषमिव घोरं ज्यातलनिर्घोषं पुनः संश्रोतुमिच्छसि किमिति शेषः ॥ ७४ ॥

गो० टी०–घोरमिति । 'निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छति' इति पाठः ॥ ७५ ॥

७६] ति टी०–एवंगते इत्यस्य विवरणम्––पराक्रमे परिज्ञाते इति । त्वत्सहायस्य मे पराक्रमे ज्ञातेऽप्यस्य सुग्रीवस्य चिन्ता वालिवन्मामपि मारयिष्यतीति चिन्ता कामं न स्यादित्याश्चर्यमिति भावः ॥ ७६ ॥

रा० टी०–तदुपकृत्यभावेऽपि मम न क्षतिरिति बोधयँल्लक्ष्मणं प्रत्याह–काममिति । अस्य सुग्रीवस्य एवम् अनेन प्रकारेण उपकृत्यभावं गतेऽपि पराक्रमे स्वपौरुषे परिज्ञाते चिन्तिते सति त्वत्सहायस्य मे चिन्ता न स्यात् ॥ ७६ ॥

गो० टी०–काममिति । वीर नृपात्मज ! त्वत्सहायस्य मे एवंगते सालगिरिभूदलनादिपु इत्थमप्रतिहते पराक्रमे कामं परिज्ञाते सत्यपि अस्य सुग्रीवस्य चिन्तासमयव्यतिक्रमे मामपि हनिष्यतीति विचारः मा भूदित्यर्थः ॥ ७६ ॥

७७] ति० टी०–यदर्थं सीतान्वेषणार्थमयमारम्भ एतत्सख्यरूपः कृतस्तद्विषयं समयं कृतार्थो निष्पन्नस्वप्रयोजनः नाभिजानाति न स्मरति ॥ ७७ ॥

रा० टी०–यदर्थमिति । यदर्थं यत्प्रयोजनसाधनार्थमयं सख्यादिः आरम्भः आरब्धः अत एव कृतः अन्वेषणसमयः संपादितस्तं समयं कृतार्थः प्लवगेश्वरः सुग्रीवः नाभिजानाति स्म ॥ ७६ ॥

गो० टी०–यदर्थमिति । अयमारम्भः सख्यकरणवालिनिरसनरूपः यदर्थं यस्मै सीतान्वेषणप्रयोजनाय कृतः । समयं तद्विषयसंकेतं प्लवगेश्वरो नाभिजानातीति संबन्धः ॥७७॥

७८ ति० टी०–वर्षाः वर्षोत्तरकालं समयकालं संकेतविषयं कालं प्रतिज्ञाय । व्यतीतान्व्यतीतप्रायान् ॥ ७८ ॥

रा० टी०–वर्षेति । वर्षासमयकालं वर्षस्य वृष्टिसमयस्य आसमयः सम्यग्गमनं यस्मिन् तं कालं हरीश्वरः प्रतिज्ञाय विहरन् सन् व्यतीतान् चतुरो मासान् नावबुध्यते ॥ ७७ ॥

गो० टी०–वर्षेति । वर्षासमयकालं वर्षा एव समयकालः संकेतकालः तम् । वर्षाशब्देन चत्वारो मासा उपलक्ष्यन्ते॥७८॥

७९] ति० टी०–पानं मद्यपानम् ॥ ७९ ॥

१ इच्छतीति गो. पाठः । २ वर्षासमयेति गो. रा. पाठः ।

उच्यतां गच्छ सुग्रीवस्त्वया [1]वीर महाबल । मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः ॥ ८० ॥
न स संकुचितः पन्था येन वाली हतो गतः । समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ ८१ ॥
एक एव रणे वाली शरेण निहतो मया । त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम् ॥ ८२ ॥
[2]यदेवं विहिते कार्ये यद्धितं पुरुषर्षभ । तत्तद्ब्रूहि नरश्रेष्ठ त्वरा कालव्यतिक्रमः ॥ ८३ ॥

कुरुष्व सत्यं मम वानरेश्वर प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम् ।
मा वालिनं प्रेतगतो [3]यमक्षये त्वमद्य पश्येर्मम [4]चोदितः शरैः ॥ ८४ ॥
स पूर्वजं तीव्रविवृद्धकोपं लालप्यमानं प्रसमीक्ष्य दीनम् ।
चकार तीव्रां मतिमुग्रतेजा हरीश्वरे मानववंशवर्धनः ॥ ८५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०—सेति । सामात्यपरिषत् अमात्यपरिषत्सहितः सुग्रीवः पानमेवोपसेवते अत एव शोकदीनेषु अस्मासु दयां न कुरुते ॥ ७८ ॥

गो० टी०—सामात्येति । सामात्यपरिषत्सामात्यबान्धवः ॥ ७९ ॥

८०] ति० टी०—उच्यतामित्युक्तं किं वक्तव्यमित्यत आह—यद्रूपमिति । मम रोषस्य यद्रूपमुचितमिति शेषः । तद्रूपा इदं वचश्च ब्रूयाः ॥ ८० ॥

रा० टी०—उच्यतामिति । हे महाबल ! त्वं गच्छ मम रोषस्य यद्रूपं तत्सुग्रीवस्त्वया उच्यताम् इदं वक्ष्यमाणं वचः ब्रूयाश्च ॥ ७९ ॥

गो० टी०—उच्यतामिति । मम रोषस्य यद्रूपं तत्सुग्रीव उच्यताम् एनमिदं वक्ष्यमाणं वचश्च ब्रूयाः ॥ ८० ॥

८१-८२] ति० टी०—तद्वच आह—नेति । समये तिष्ठ । समयं मा हासीरित्यर्थः ॥ ८१ ॥ ८२ ॥

रा० टी०—तद्वचनाकारमाह—नेति । येन पथा हतो वाली गतः स पन्थाः न संकुचितः नष्टः अतः समये अन्वेषणकाले तिष्ठ समयं न त्यज अन्वेषणं कुर्वित्यर्थः, वालिपथं माम्वगाः ॥ ८० ॥

रा० टी०—एक इति । मया शरेण वाली एक एव निहतः सत्यादतिक्रान्तं त्वां तु सबान्धवं हनिष्यामि ॥ ८१ ॥

गो० टी०—न चेति । हतो वाली येन पथा गतः स पन्थाः परलोक इत्यर्थः, न संकुचितः न नष्ट इत्यर्थः । समये मर्यादायां तिष्ठ । वालिपथं वालिगतं मार्गम् ॥ ८१ ॥ ८२ ॥

८३] ति० टी०—एवं तेन विहिते कार्ये यदाहितमस्माकं तस्य च तत्तद्ब्रूहि । त्वराहेतुः—कालव्यतिक्रमः जायत इति शेषः ॥ ८३ ॥

रा०टी०—लक्ष्मणं प्रत्याह—यदिति। एवं कालविलम्बेन कार्ये हते असिद्धे सति यत् यत् हितं तत् तत् ब्रूहि सुग्रीवं प्रतीति शेषः, अतस्त्वर शीघ्रं गच्छ कालव्यतिक्रमो मा भूदिति शेषः ॥८३॥

गो० टी०—तदेवमिति । कार्ये एवं विहिते एवमवस्थिते सति यद्धितं तद्ब्रूहि । कालव्यतिक्रमः मा भूदिति शेषः । अतः त्वर त्वरस्वेति संबन्धः ॥ ८३ ॥

८४] ति० टी०—उपदेशसंक्षेपः—कुरुष्वेति । प्रेतगतः प्रेतत्वं प्राप्तः यमक्षये यमगृहे मा वालिनं पश्येः । मम शरैश्चोदितः प्रेरितः प्रेतत्वायेति शेषः । इति ब्रूहीत्यन्वयः ॥ ८४ ॥

रा० टी०—सुग्रीवं बोधयितुमुपसंहरन्नाह—कुरुष्वेति । हे वानरेश्वर ! शाश्वतं सर्वकालिकं धर्ममवेक्ष्य ममाग्रे प्रतिश्रुतं प्रतिज्ञातं सत्यं मम चोदितः प्रेरितस्त्वं कुरुष्व । मम शरैः प्रेतगतः परलोकं प्राप्तः सन् यमक्षये यमागोचरलोके वियमानं वालिनं मा पश्येः ॥ ८३ ॥

गो० टी०—उक्तमर्थं पुनः संक्षेपेण सर्गान्ते दर्शयति—कुरुष्वेति । मयि विषये प्रतिश्रुतं सत्यं कुरु । शाश्वतं धर्ममवेक्ष्य प्रतिश्रुतकरणम् अक्षयो धर्म इत्यवेक्ष्य ॥ ८४ ॥

८५] ति० टी०—मानववंशवर्धनो लक्ष्मणः ॥ ८५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिंशः सर्गः ॥३०॥

रा० टी०—स इति । दीनं प्रियावियोगेन कृशं तत्त्वेन भासमानम् अत एव तीव्रविवृद्धकोपम् अन्वेषणकालातिक्रमेण आश्रितातिक्रोधम् अत एव लालप्यमानम् अतिशयेन कथयन्तं पूर्वजं वीक्ष्य उग्रतेजाः स लक्ष्मणः हरीश्वरे सुग्रीवे तीव्रां तद्विघातिकात्वेन क्रूरां मतिं चकार ॥ ८४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रिंशः सर्गः ॥ ३० ॥

गो० टी०—स इति । सः लक्ष्मणः हरीश्वरे सुग्रीवे तीव्रां मतिं नियहबुद्धिमित्यर्थः । लालप्यमानं प्रलपन्तम् ॥ ८५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

---

१ वत्सेति गो. पाठः । २ तदेवमिति गो. पाठः । ३ प्रेत्य गतो यमक्षयमिति गो. पाठः । ४ नाथ इति गो पाठः ।

एकत्रिंशः सर्गः ।

रामोक्त्या सुग्रीवे कोप मन्वानो लक्ष्मणः सुग्रीववधे उद्यतोऽभूत् । तं सान्त्वयन्रामः सुग्रीवे सान्त्वेव व्यवहर्तुं लक्ष्मणं प्रेषयति। नाटितकोपाटोपः शरचापपाणिर्लक्ष्मणः किष्किन्धामेत्य स्वागमन सुग्रीवाय निवेदयितुमङ्गद प्रेषयति । प्रविश्याङ्गदेन कथितलक्ष्मणागमनोऽपि सुग्रीवो मदवशतया न तज्जग्राहापि तु वित्रस्तकपिकुलकिलकिलारवेणोद्बुद्धो मन्त्रिवराभ्यां च वेदितलक्ष्मणागमनस्तं प्रसादयितुमप्रार्थि ।

स कामिनं दीनमदीनसत्त्वं शोकाभिपन्नं समुदीर्णकोपम् ।
नरेन्द्रसूनुर्नरदेवपुत्रं रामानुजः पूर्वजमित्युवाच ॥ १ ॥
न वानरः स्थास्यति साधुवृत्ते न मन्यतेऽसौ कर्मफलानुषङ्गान् ।
न भोक्ष्यते वानरराज्यलक्ष्मीं तथा हि नातिक्रमतेऽस्य बुद्धिः ॥ २ ॥
मतिक्षयाद्ग्राम्यसुखेषु सक्तस्तव प्रसादात्प्रतिकारबुद्धिः ।
हतोऽग्रजं पश्यतु वीरवालिनं न राज्यमेवं विगुणस्य देयम् ॥ ३ ॥
न धारये कोपमुदीर्णवेगं निहन्मि सुग्रीवमसत्यमद्य ।
हरिप्रवीरैः सह वालिपुत्रो नरेन्द्रपुत्र्या विचयं करोतु ॥ ४ ॥

१] ति० टी०–स लक्ष्मणः ॥ १ ॥

रा०टी०–रामवचनश्रवणानन्तरकालिकां लक्ष्मणोक्तिमाह–स इत्यादिभिः । शोकाभिपन्नं प्रियावियोगजनितशोकाविशिष्टम् अत एव कामिनं तदन्वेषणविषयकोत्कटेच्छावन्तम् अत एव समुदीर्णः संस्मृतः कामः सुग्रीवो येन तं दीनं दीनत्वेन प्रतीयमानम् अदीनसत्त्वम् अक्षीणमहापराक्रमं नरदेवपुत्रं पूर्वजं ज्येष्ठं रामं रामानुजः स लक्ष्मणः इत्युवाच ॥ १ ॥

गो० टी०–अथाङ्गदेन लक्ष्मणकोपकथनं सुग्रीवायैकविंशे–स कामिनमिति । कामिनम् अधिककामम् अत एव दीनं तथाप्यदीनसत्त्वम् । एतेन वस्तुतः अदीनसत्त्वोऽपि दैन्यं भावयतीति गम्यते । शोकाभिपन्नम् शोकं प्राप्तं समुदीर्णकोपम् अभिवृद्धकोपम् । अस्मिन् श्लोके नरदेवपुत्रमित्यत्र देकारो गाय-त्र्या एकादशाक्षरम् । दशसहस्रश्लोका गताः ॥ १ ॥

२] ति० टी०–साधुवृत्ते साधूनां वृत्ते स्थिरस्नेहतालक्षणे । कर्मणा जनितान्फलानुषङ्गानकण्टकराज्यभोगसंबन्धान् मन्यते सत्यमूलानिति शेषः । अत एव वानरराज्यलक्ष्मीं न भोक्ष्यते । हि यस्मात्तस्मात्तथा तत्प्रकारोऽस्य बुद्धिः प्रेमपरिपालनेऽत्यन्तं न क्रमते । ' तथा हि नातिक्रमते ' इति पाठः पाङ्क्तः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–नेति । अस्य सुग्रीवस्य बुद्धिस्तथा उक्तप्रकारेण अति अत्यन्तं नाक्रमते अन्वेषणे न प्रवर्तते इत्यर्थः । तत्र हेतुः–वानरः सुग्रीवः कर्मफलानुषङ्गान् उद्योगनिष्पादितराज्यप्राप्तिरूपफलसाधकावस्मान्न मन्यते अतः साधुवृत्ते महात्मभिः सेविते धर्मेण राज्यपालन इत्यर्थः, न स्थास्यति अधर्मं करिष्यतीत्यर्थः । अतः वानरराजलक्ष्मीं न भोक्ष्यते एतेन तद्बुद्धिभंशो जात इति सूचितम् ॥ २ ॥

गो० टी०–नेति । साधुवृत्ते साधूनां मित्रसमानसुखदुःखानां सुहृदां वृत्ते आचारे न स्थास्यति । कर्मफलानुषङ्गान् अग्निसाक्षिकसख्यरूपकर्मणा वालिनिरसनराज्यदारलाभरूपफलानुबन्धान् न मंस्यते । वानरराज्यलक्ष्मीं न भोक्ष्यते । तथा अस्य बुद्धिः नाभिक्रमते अस्मत्प्रयोजनाभिमुख्ये व वर्तत इति योजना ॥ २ ॥

३] ति० टी०–तत्र हेतुमाह––मतिक्षयादिति । मतिक्षये हेतुस्तवाप्रसादः । अतस्तस्य प्रतिकारबुद्धिः प्रत्युपकारबुद्धिर्न वर्तत इति शेषः । न देयम् दत्तं नानुपालनीयमित्यर्थः ॥ ३ ॥

रा० टी०–तत्र गमकमाह–मतीति । मतिक्षयात् बुद्धिभंशात् हेतोः प्रसादात् अतिप्रसन्नतां प्राप्य ग्राम्यसुखेषु सक्तः अत एव प्रतिकारबुद्धेः प्रत्युपकारविषयिणी मतिर्न अतः हतः सन् अग्रजं वीरवालिनं पश्यतु एवं विगुणस्य धर्मविरोधिगुणवतः राज्यं तव न देयं नस्य आवृत्तिः । किंच प्रतिकारबुद्धिः विनष्टमतिः सुग्रीवविशेषणम् अस्मिन् पक्षे कार इति क्रीरूपम् ? ॥ ३ ॥

गो० टी०–मतीति । मतिभ्रमात् बुद्धिविपर्यासात् । तव प्रसादाप्रतिकारबुद्धिः प्रसादस्य राज्यप्रदानादिरूपस्य अप्रतिकारबुद्धिः प्रत्युपकारबुद्धिरहितः । अत एव हतः सुग्रीवः अग्रजं वालिनं पश्यतु । एवं विगुणस्य तस्य राज्यं न देयम् । 'वालिनम्' इति क्वचित्पाठः । तत्र वृत्तमुपजातिः ॥ ३ ॥

४] ति० टी०–न धारये धारयितुं न शक्नोमि । वालिपुत्रोऽङ्गदो विचयमन्वेषणम् । सुग्रीवं हत्वा तस्मै राज्यसमर्पणादिति भावः ॥ ४ ॥

१ कोपमिति गो.पाठः । २ मंस्यत इति गो.पाठः । ३ ऽभीति गो.पाठः। ४ भ्रमादिति। गो.पाठः। ५ तस्येति गो.पाठः । ६ पत्न्या इति गो.पाठः।

तमात्तबाणासनमुत्पतन्तं निवेदितार्थं रणचण्डकोपम् ।
उवाच रामः परवीरहन्ता स्ववीक्षितं सानुनयं च वाक्यम् ॥ ५ ॥
नहि वै त्वद्विधो लोके पापमेवं समाचरेत् । कोपमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ ६ ॥
नेदमत्र त्वया ग्राह्यं साधुवृत्तेन लक्ष्मण । तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च संगतम् ॥ ७ ॥
सामोपहितया वाचा रूक्षाणि परिवर्जयन् । वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये ॥ ८ ॥
सोऽग्रजेनानुशिष्टार्थो यथावत्पुरुषर्षभः । प्रविवेश पुरीं वीरो लक्ष्मणः परवीरहा ॥ ९ ॥
ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः । लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः ॥ १० ॥
शक्रबाणासनप्रख्यं धनुः कालान्तकोपमम् । प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव ॥ ११ ॥
यथोक्तकारी वचनमुत्तरं चैव सोत्तरम् । बृहस्पतिसमो बुद्ध्या मत्वा रामानुजस्तदा ॥ १२ ॥

रा० टी०—नेति । उदीर्णवेगं कोपं न धारये निवर्तयामीत्यर्थः, अतः असत्यं सुग्रीवं निहन्मि अतः नरेन्द्रपुत्र्याः जनकात्मजायाः विचयमन्वेषणं हरिप्रवीरैः सह वालिपुत्रोऽङ्गदः करोतु ॥ ४ ॥

गो० टी०—नेति । न धारये अकार्यकरणं कर्तुं न क्षम इत्यर्थः । असत्यं सत्यवचनरहितं नरेन्द्रपत्न्याः सीतायाः विचयम् अन्वेषणम् ॥ ४ ॥

५] ति० टी०—निवेदितार्थं विज्ञापितसुग्रीववधप्रवृत्तिम् । स्ववीक्षितं सुष्ठ्वीक्षितं समयोचितम् ॥ ५ ॥

रा० टी०—तमिति । आत्तबाणासनं गृहीतधनुषं निवेदितार्थं बोधितगमनप्रयोजनं रणचण्डकोपं रणकारकचण्डकोपविशिष्टं तं लक्ष्मणं परवीरहन्ता रामः स्वेन निश्चितं सानुनयं वाक्यमुवाच । किंच स्ववीक्षितमिति लक्ष्मणविशेषणं स्वस्मिन् वीक्षितं वीक्षणं यस्येत्यर्थः ॥ ५ ॥

गो० टी०—तमिति । मम अहृदयवचनमात्रेण अयं तं हन्यादेवेत्यनुतप्तो रामः प्राह स्म । परवीरहन्ता नतु स्वाश्रितहन्ता स्ववेक्षितं सुष्ठु निरूपितम् ॥ ५ ॥

६] ति० टी०—त्वद्विधो धर्मज्ञः पापं मित्रवधाध्यवसायरूपम् । आर्येण सम्यग्विवेकेन ॥ ६ ॥

रा० टी०—तद्वचनाकारमाह—नहीति । त्वद्विधः धर्मज्ञ इत्यर्थः, एवं मित्रविघातरूपं पापं नैव समाचरेत् धारयेत् । नतु गृहीतकोपस्य का गतिरित्यत आह—आर्येण विवेकेन कोपं यो हन्ति स वीरः स एव पुरुषोत्तमः पुरुषश्रेष्ठश्च । एतेन कोपं त्यजेति सूचितम् ॥ ६ ॥

गो० टी०—न हीति । पापं मित्रहननाध्यवसायरूपम् । आर्येण सम्यग्विवेकेन ॥ ६ ॥

७] ति० टी०—इदं मित्रघातरूपं वस्तु न ग्राह्यं न निश्चेयम् । साधुवृत्तं साधुत्वं तेन तां पूर्वकृतां प्रीतिमनुवर्तस्व, सुग्रीवे इति शेषः । पूर्ववृत्तं संगतं च सख्यं च स्मरेति शेषः ॥ ७ ॥

रा० टी०—नेति । तां समागमकालां प्रीतिं परस्परं प्रेम संगतसूचितं पूर्ववृत्तं परस्परोक्तिं च अनुवर्तस्व स्मरेत्यर्थः, अत एव इदं मित्रीभूतसुग्रीवविहननं साधुवृत्तेन त्वया न ग्राह्यं निश्चेतव्यम् ॥ ७ ॥

गो० टी०—नेदमिति । इदं मित्रहननाध्यवसायरूपं पापं पूर्ववृत्तं च संगतं पूर्ववृत्तं सख्यरूपं बान्धवं च ॥ ७ ॥

८] ति० टी०—कालपर्यये कालातिक्रमे व्यतीतमतिक्रममेव कालोऽतिक्रान्त इत्येव वक्तुमर्हसि नापरं किंचिदित्यर्थः ॥ ८ ॥

रा० टी०—तात्कालिककर्तव्यमाह—सामेति । सामोपहितया सान्त्वयुक्तया वाचा रूक्षाणि परिवर्जयन् सन् कालपर्यये कालातिक्रमे स्थितं सुग्रीवं व्यतीतं कालं वक्तुमर्हसि कालो व्यतीत इति बोधयेत्यर्थः ॥ ८ ॥

गो० टी०—सामेति । कालपर्यये कालक्रमे विषये व्यतीतं व्यतिक्रान्तवन्तं सुग्रीवं रूक्षाणि परुषाणि परिवर्जयन् सामोपहितया सान्त्वयुक्तया वाचा वक्तुमर्हसि ॥ ८ ॥ ९ ॥

९] ति० टी०—अग्रजेन रामेण ॥ ९ ॥

रा० टी०—स इति । अग्रजेन अनुशिष्टः अर्थो यस्मै स लक्ष्मणः पुरीं किष्किन्धां यथावत्प्रविवेश ॥ ९ ॥

१०] ति० टी०—भवनं प्रतिजगाम । संरब्धो नाटितकालातिक्रमजकोपः ॥ १० ॥

रा० टी०—तत इति । ततः पुरीप्रवेशानन्तरं भ्रातुः प्रियहिते रतः अत एव प्रतिसंरब्धः अन्वेषणकालातीतेन जातकोपो लक्ष्मणः शक्रबाणासनप्रख्यं इन्द्रधनुःसदृशं कालान्तकोपमं संहारककालसदृशं गिरिशृङ्गाभं पर्वतशिखरसदृशं धनुः प्रगृह्य सानुमान् स्फटविशिष्टः मन्दर इव कपेः सुग्रीवस्य भवनं जगाम । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०—तत इति । प्रतिसंरब्धः प्रतिनिवृत्तहननाद्यवसायः ॥ १० ॥

११] ति० टी०—कालान्तकोपमं कालादिवद्भयंकरम् । सानुमान्मन्दर इव जगामेत्यन्वयः ॥ ११ ॥

गो० टी०—सोऽग्रजेनेत्यादिश्लोकद्वयोक्तं विस्तरेणाह—शक्रेत्यादिना । धनुः प्रगृह्य सानुमान् पर्वत इव स्थितः ॥ ११ ॥

१२] ति० टी०—यथोक्तकारी रामस्येति शेषः । वचनं

१ पापमिति गो. पाठः । २ अथेति गो. पाठः । ३ उपम इति गो. पाठः । ४ त्वेति गो. पाठः ।

कामक्रोधसमुत्थेन भ्रातुः क्रोधाग्निना वृतः । प्रभञ्जन इवाप्रीतः प्रययौ लक्ष्मणस्ततः ॥ १३ ॥
सालताला[1]श्चकर्णांश्च तरसा पातयन्बलात् । पर्यस्यन्गिरिकूटानि द्रुमानन्यांश्च वेगितः ॥ १४ ॥
शिलाश्च शकलीकुर्वन्पद्भ्यां गज इवाशुगः । दूरमेकपदं त्यक्त्वा ययौ कार्यवशाद्द्रुतम् ॥ १५ ॥
तामपश्यद्बलाकीर्णां हरिराजमहापुरीम् । दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां गिरिसंकटे ॥ १६ ॥
रोषात्प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः । ददर्श वानरान्भीमान्किष्किन्धायां[3] बहिश्चरान् ॥ १७ ॥
तं दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभम् । शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ॥
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे ॥ १८ ॥
तान्गृहीतप्रहरणान्सर्वान्दृष्ट्वा तु लक्ष्मणः । बभूव द्विगुणं क्रुद्धो वह्निन्धन इवानलः ॥ १९ ॥
तं ते भयपरीताङ्गाः क्षुब्धं दृष्ट्वा प्लवङ्गमाः । कालमृत्यु[6]युगान्ताभं शतशो विद्रुता दिशः ॥ २० ॥
ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः । क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ॥ २१ ॥
तारया सहितः कामी सक्तः कपिवृषस्तदा । न तेषां कपिसिंहानां शुश्राव वचनं तदा ॥ २२ ॥

सुग्रीवं प्रति स्वेन वक्तव्यम् उत्तरं तदुपरि सुग्रीवेण वक्तव्यम् सोत्तरं तदुपरि स्ववक्तव्योत्तरसहितम् मत्वाऽऽलोच्य ॥ १२ ॥

१३] ति० टी०–भ्रातू रामस्य यः कामो मनोरथस्तज्जन्यो यः क्रोधस्तद्विघातजन्यः क्रोधस्तत्समुत्थेन तज्जन्येन क्रोधाग्निना वृतः, अत एवाप्रीतः प्रभञ्जनो वायुरिव वेगेन प्रययौ ॥ १३ ॥

रा० टी०–यथेति । यथोक्तकारी रामोक्तमनतिक्रम्य सकलकार्यकरणशीलः भ्रातुः कामक्रोधसमुत्थेत्र कामः सीतान्वेषणविषयकोत्कटेच्छा तद्विघातकसुग्रीवानवधानतेत्यर्थः, तस्मात्समुत्थेन जातेन क्रोधाग्निना स्वकोपरूपवह्निना वृतः अत एव अप्रीतः सुग्रीवविषयकप्रीतिरहितः बुद्धया बृहस्पतेः समः रामानुजो लक्ष्मणः सोत्तरं दास्यमानसुग्रीवप्रत्युत्तरसहितमुत्तरं सुग्रीवप्रत्युत्तरानन्तरकालकदास्यमानस्वप्रत्युत्तरं वचनं किंचोत्तरमुत्कृष्टं सोत्तरमुत्तरसहितमुत्तरमित्यर्थः, मत्वा निश्चित्य प्रभञ्जनः वेगेन वायुरिव प्रययौ । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०–यथोक्तेति । यथोक्तं रामोक्तमनतिक्रम्य करोतीति यथोक्तकारी लक्ष्मणः वचनं सुग्रीवं प्रति स्वेन वक्तव्यं वचनं यथोक्तकारीति विशेषणाद्रामोपदिष्टं वचनमिति सिद्धम् । उत्तरं च स्ववचनस्य सुग्रीवेण वक्ष्यमाणमुत्तरं च सोत्तरं स्वेन वक्ष्यमाणोत्तरसहितं मत्वा आलोच्य प्रययाविति संबन्धः । दूरमिति । एकपदं पौरस्त्यपदं दूरं त्यक्त्वा दूरे क्षिप्त्वा । अनेन द्रुतगमनं सूचितं, द्रुतं गच्छन् हि पुरुषः पुरः पादं दूरे क्षिपति ॥ १२–१५ ॥

१४] ति० टी०–तरसोरुवेगेन पर्यस्यन्क्षिपन् । वेगितः संजातवेगः ॥ १४ ॥

१५] ति० टी०–एकपदमेकैकपदं दूरं यथा भवति तथा त्यक्त्वा कार्यवशाद्द्रुतं ययौ ॥ १५ ॥

रा० टी०–गमनप्रकारं वर्णयन्नाह–सालेति । बलात् तरसा वेगेन सालादीन् पातयन् गिरिकूटानि अन्यांश्च द्रुमान् पर्यस्यन् उत्पाट्य इतस्ततः प्रक्षिपन् गज इव पद्भ्यां शिलाः शकलीकुर्वन् खण्डीकुर्वाणः एकपदं दूरं त्यक्त्वा दूरे दूरे पादं धृत्वेत्यर्थः, वेगितः अतिवेगं प्राप्तः अत एव आशुगः लक्ष्मणः कार्यवशात् द्रुतं ययौ । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

१६–१७] ति० टी०–बलाकीर्णां वानरसेनाव्याप्ताम् । गिरिसंकटे भूधरमध्ये वर्तमानान् ॥ १६ ॥ १७ ॥

रा० टी०–तामिति । गिरिसंकटे पर्वतमध्ये विद्यमानां बलाकीर्णां वानरसेनासंयुक्तामत एव दुर्गां परैरगम्यां हरिराजमहापुरीं तां प्रसिद्धां किष्किन्धां इक्ष्वाकुशार्दूलः लक्ष्मणः अपश्यत् ॥ १६ ॥

रा० टी०–रोषादिति । सुग्रीवं प्रति रोषाद्धेतोः प्रस्फुरमाणौ औष्ठौ यस्य स लक्ष्मणः किष्किन्धायाः बहिश्चरान् वानरान् ददर्श ॥ १७ ॥

गो० टी०–तामिति । गिरिसंकटे निबिडगिरिमध्ये अनेन पूर्वोक्तगुहाशब्दो विवृतः ॥ १६ ॥ १७ ॥

१८] ति० टी०–क्रुद्धलक्ष्मणदर्शनेन भीत्या शैलशृङ्गादिग्रहो वानराणाम् ॥ १८ ॥

रा० टी०–तमिति । वानराः नरा इव कुञ्जरप्रख्याः सर्वे वानराः तं लक्ष्मणं दृष्ट्वा पर्वतान्तरे पर्वतमध्ये विद्यमानानि शतशः शैलशृङ्गाणि प्रवृद्धान् महीरुहांश्च जगृहुः । वाशब्द इवार्थे सार्धश्लोक एकान्वयी ॥ १८ ॥

गो० टी०–तं दृष्ट्वेत्यादि । वानराः पूर्वोक्ता बहिश्चराः ॥ १८–२६ ॥

१९–२२] ति० टी०–द्विगुणं क्रुद्धः । मां दृष्ट्वैव प्रणामं त्यक्त्वा प्रहरणं गृह्णन्तीति कोपद्वैगुण्यम् ॥ १९–२२ ॥

---

१ तदेति गो. पाठः । २ बहूनिति गो. पाठः । ३ भाषा इति गो. रा. पाठः । ४ हरीनिति गो. पाठः । ५ क्रुद्धमिति गो. पाठः । ६ मृत्युं समायान्तमिति रा. पाठः । ७ रह इति गो. पाठः । ८ वीराणामिति गो. पाठः ।

ततः सचिवसंदिष्टा हरयो रोमहर्षणाः । गिरिकुञ्जरमेघाभा नगरान्निर्ययुस्तदा ॥ २३ ॥
नखदंष्ट्रायुधाः सर्वे वीरा विकृतदर्शनाः । सर्वे शार्दूलदंष्ट्राश्च सर्वे [1]विकृतदर्शनाः ॥ २४ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः । केचिन्नागसहस्रस्य बभूवुस्तुल्यवर्चसः ॥ २५ ॥
तैस्तैः कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः । अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदाम् ॥ २६ ॥
ततस्ते हरयः सर्वे प्राकारपरिखान्तरात् । निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतं तदा ॥ २७ ॥
सुग्रीवस्य प्रमादं च पूर्वजस्यार्थमात्मवान् । दृष्ट्वा क्रोधवशं वीरः पुनरेव जगाम सः ॥ २८ ॥
स दीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः । बभूव नरशार्दूलः सधूम इव पावकः ॥ २९ ॥
बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् । स्वतेजोविषसंभूतः पञ्चास्य इव पन्नगः ॥ ३० ॥
तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम् । समासाद्याङ्गदस्त्रासाद्विषादमगमत्परम् ॥ ३१ ॥

रा० टी०–तानिति । गृहीतप्रहरणान् स्वीकृतायुधान् तान् वानरान् दृष्ट्वा लक्ष्मणः वह्निन्धनाऽनल इव द्विगुणं रुद्धः क्रोधेन प्रज्वलितो बभूव ॥ १९ ॥

रा० टी०–तमिति । समायान्तं कालमृत्युं कालमृत्युमिव क्षुब्धं तं लक्ष्मणं दृष्ट्वा भयपरीताङ्गाः शतशो वानराः दिशो विदुताः । कालमृत्युशब्द आचारक्विबन्तः ॥ २० ॥

रा० टी०–तत इति । हरिपुङ्गवाः वानरश्रेष्ठाः सुग्रीवस्य भवनं प्रविश्य लक्ष्मणस्यागमनं क्रोधं च न्यवेदयन् ॥ २१ ॥

रा० टी०–तारयेति । कामी विषयभोगेच्छुः अत एव सक्तः तत्र प्रसक्तः तारया सहितः कपिश्रेष्ठः सुग्रीवः कपिसिहानां वचनं न शुश्राव ॥ २२ ॥

२३] ति० टी०–ततः सचिवसंदिष्टाः सुग्रीवं बोधयित्वा तदनुमत्या लक्ष्मणोऽस्माभिर्यावत्प्रवेश्यते तावद्बहिर्लक्ष्मणप्रवेशं निरुन्धानास्तिष्ठत इत्येवं सचिवैर्हनूमदादिभिः संदिष्टा हरयो नगरान्निर्ययुः ॥ २३ ॥

रा० टी०–तत इति । ततः वचनश्रवणाभावानन्तरं सचिवसंदिष्टाः सचिवैराज्ञप्ताः अत एव रोमहर्षणाः जातहर्षाः गिरिकुञ्जरमेघाभाः हरयः नगरात् निर्ययुः ॥ २३ ॥

२४] ति० टी०–विकृतदर्शना भीमदर्शनाः । विकृतदर्शनाः प्रकटदर्शनाः ॥ २४ ॥

रा० टी०–नखेति । सर्वे नखदंष्ट्रायुधाः अत एव घोराः भयंकराः सर्वे विकृतदर्शना विकृतनयनाश्च सर्वे शार्दूलदंष्ट्राः शार्दूलसदृशदंष्ट्रावन्तश्च सर्वे विकृताननाश्च ॥ २४ ॥

२५] ति० टी०–दशगुणोत्तराः शतनागबला इत्यर्थः । नागसहस्रस्य तुल्यवर्चसो नागसहस्रतेजस्तुल्यतेजसः ॥ २५ ॥

रा० टी०–दशेति । केचित् दशनागबलाः केचित् दशगुणोत्तराः नागबलादशगुणमधिकबला इत्यर्थः, केचित् नागसहस्रस्य तुल्यविक्रमाः बभूवुः । 'तुल्यवर्चसः' इत्यपि पाठः॥२५॥

२६] ति० टी०–दुरासदामपश्यदित्यन्वयः ॥ २६ ॥

रा० टी०–तत इति । द्रुमहस्तैः कपिभिर्व्याप्तामत एव दुरासदां किष्किन्धां क्रुद्धो लक्ष्मणः अपश्यत् ॥ २६ ॥

२७] ति० टी०–प्राकाराद्बहिर्वर्तिनी परिखा तदन्तरात्तदवधेरपि बहिर्निष्क्रम्याविष्कृतं प्रकटितं यथा तथा तस्थुः ॥ २७ ॥

रा० टी०–तत इति । उदग्रसत्त्वाः महाबलाः सर्वे हरयः प्राकारपरिखान्तरात् निष्क्रम्य आविष्कृतं यथा भवति तथा तस्थुः ॥ २७ ॥

गो० टी०–ततस्त इति । प्राकारपरिखान्तरान्निष्क्रम्य आविष्कृतं प्रकाशं यथा भवति तथा तस्थुः ॥ २७ ॥

२८] ति० टी०–प्रमादं च चाद्वानरप्रतिरोधं च । पूर्वजस्य रामस्यार्थं च दृष्ट्वा विचार्य ॥ २८ ॥

रा० टी०–सुग्रीवस्येति । आत्मवान् धैर्यवान् लक्ष्मणः सुग्रीवस्य प्रमादं समीपानागमनानुमितानवधानतां पूर्वजस्य ज्येष्ठभ्रातुः अर्थं च दृष्ट्वा ज्ञात्वा पुनः क्रोधवशं कोपकार्श्यं जगाम ॥ २८ ॥

गो० टी०–सुग्रीवस्येति । आर्तं कामपीडितम् ॥ २८॥

२९] ति० टी०–दीर्घं उष्णो महानुच्छ्वासो यस्य ॥ २९ ॥

रा० टी०–स इति । दीर्घोष्णः अत्युष्णः महोच्छ्वासो यस्य स नरशार्दूलः स लक्ष्मणः सधूमः पावक इव बभूव॥२९॥

गो० टी०–स इत्यादि ॥ २९ ॥

३०]ति० टी०–बाणस्य शल्यमेव स्फुरन्ती जिह्वा यस्य सः सायकासनं धनुरेव भोगो यस्य स्वतेजोरूपविषेण संभूतो व्याप्तः ॥ ३० ॥

रा० टी०–बाणेति । बाणशल्यं बाणाग्रभाग एव स्फुरन्ती जिह्वा यस्य सः सायकासनं धनुरेव भोगः तद्वान् स्वतेजोविषसंभूतः स्वतेजोरूपविषेण व्याप्तः पञ्चास्यः पन्नग इव लक्ष्मणो दृश्यत इति शेषः ॥ ३० ॥

गो० टी०–बाणेति । बाणशल्यं बाणाग्रमेव स्फुरन्ती जिह्वा यस्य स तथा सायकासनं धनुः तदेव भोगः फणा तद्वान् बभूवेति पूर्वेण संबन्धः ॥ ३० ॥ ३१ ॥

३१] ति० टी०–विषादमगमत् । एतावत्पर्यन्तं रामकार्यं न चिन्तितमिति विषादः ॥ ३१ ॥

---

१ नगर्या इति गो. पाठः । २ घोराः सर्वे इति गो. पाठः । ३ दर्पा इति गो. पाठः । ४ च विकृताननाः इति गो. रा. पाठः । ५ विक्रमा इति गो. रा. पाठः । ६ कुस्सा इति गो. पाठः । ७ परिघेति गो. पाठः । ८ पूर्वज चार्तमिति गो.पाठः । ९ संघात इति गो. पाठः । १० भृशमिति गो. पाठः । ११ वश कान्ताविति धातुगणपाठादयमर्थो लभ्यते ।

सोऽङ्गदं रोषताम्राक्षः संदिदेश महायशाः । सुग्रीवः कथ्यतां वत्स ममागमनमित्युत ॥ ३२ ॥
एष रामानुजः प्राप्तस्त्वत्सकाशमरिन्दम । भ्रातुर्व्यसनसंतप्तो द्वारि तिष्ठति लक्ष्मणः ॥ ३३ ॥
तस्य वाक्यं यदि रुचिः क्रियतां साधु वानरः । इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमरिन्दम ॥ ३४ ॥
लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् । पितुः समीपमागम्य सौमित्रिरयमागतः ॥ ३५ ॥
अथाङ्गदस्तस्य सुतीव्रवाचा संभ्रान्तभावः परदीनवक्त्रः ।
[1]निर्गत्य पूर्वं नृपतेस्तरस्वी ततो रुमायाश्चरणौ ववन्दे ॥ ३६ ॥
संगृह्य पादौ पितुरुग्रतेजा जग्राह मातुः पुनरेव पादौ ।
पादौ रुमायाश्च निपीडयित्वा निवेदयामास ततस्तदर्थम् ॥ ॥ ३७ ॥
स निद्राक्रान्तसंवीतो वानरो न विबुद्धवान् । बभूव मदमत्तश्च मदनेन च मोहितः ॥ ३८ ॥
ततः किलकिलां चक्रुर्लक्ष्मणं प्रेक्ष्य वानराः । प्रसादयन्तस्तं क्रुद्धं भयमोहितचेतसः ॥ ३९ ॥

रा० टी०–तमिति । दीप्तं कालाग्निमिव कोपितं नागेन्द्रमिव तं लक्ष्मणं समासाद्य प्राप्य त्रासात् लक्ष्मणकोपदर्शनजनितोद्वेगात् परं विषादमगमत् ॥ ३१ ॥

३२] ति० टी०–इत्युत एवंप्रकारेणेत्यर्थः ॥ ३२ ॥

रा० टी०–स इति । दोषताम्राक्षः स लक्ष्मणः अङ्गदं संदिदेश संदेशं कथयामास । तदाकारमाह–हे वत्स ! इति एवं ममागमनं सुग्रीवः कथ्यताम् ॥ ३२ ॥

गो० टी०–सोऽङ्गदमित्यादि । वत्स ! अरिन्दमः एष रामानुजः त्वत्सकाशं प्राप्त इति ममागमनं सुग्रीवः कथ्यताम् । भ्रातृव्यसनसंतप्तः स लक्ष्मणः द्वारि तिष्ठति । तस्य वाक्ये तव यदि रुचिः तर्हि साधु युक्तं तत्र तव गमनं वा अत्रैव तस्यानयनं वा क्रियताम् इत्येतद्वाक्यमुक्त्वा शीघ्रमागच्छ इति सोऽङ्गदं संदिदेशेति संबन्धः ॥ ३२–३४ ॥

३३] ति० टी०–तं प्रकारं दर्शयति—एष इति ॥३३॥

रा० टी०–कथनप्रकारमाह–एष इति । भ्रातुर्व्यसनसंतप्तः एष रामानुजः त्वत्सकाशं त्वत्समीपं प्राप्तः सन् द्वारि तिष्ठति३३

३४–३५] ति० टी०–इदमुक्तं मम वाक्यं तस्मै इत्युक्तप्रकारेणोक्त्वा स वानरः सुग्रीवः साधु साधुकारी यथा भवति तथा क्रियताम् । अनन्तरं तस्यास्मासु यदि रुचिर्भवति तदा तस्य वाक्यं श्रुत्वा शीघ्रमागच्छ ॥ ३४ ॥ ३५ ॥

रा० टी०–तस्येति । तस्य लक्ष्मणस्य वाक्ये यदि रुचिः तर्हि साधु क्रियताम् इतीदं मम वाक्यमुक्त्वा शीघ्रमागच्छ३४

रा० टी०–लक्ष्मणस्येति । लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टः व्याप्तशोकोऽङ्गदः पितुः समीपमागम्य अयं सौमित्रिरागत इत्यब्रवीत् ॥ ३५ ॥

गो० टी०–लक्ष्मणस्येति । अयमागतमित्यनन्तरमिति करणं बोध्यम् ॥ ३५ ॥

३६] ति० टी०–'लक्ष्मणस्य' इति श्लोकेन संक्षिप्योक्तस्यार्थस्य विस्तरः—अथेति । संभ्रान्तभावः संभ्रान्तचित्तः । परदीनवक्त्रः परमतिशयेन दीनं वक्त्रं यस्य सः । 'परिदीन—' इति पाठान्तरम् । निर्गत्य लक्ष्मणसंनिहितदेशात्परावृत्येत्यर्थः । पूर्वं नृपतेस्ततो रुमायाः । इदमुपलक्षणम् तारायाश्चरणाविति अन्वयः ॥ ३६ ॥

रा० टी०–गमनप्रकारं बोधयन्नाह–अथेति । अथ लक्ष्मणवचनश्रवणानन्तरं तस्य लक्ष्मणस्य सुतीव्रवाचा उग्रवचनेन संभ्रान्तभावः संभ्रान्तचित्तः अत एव परदीनवक्त्रः म्लानमुखोऽङ्गदः निर्गत्य लक्ष्मणसमीपदेशादागत्य पूर्वं नृपतेः सुग्रीवस्य चरणौ ववन्दे ततो रुमायास्तदुपलक्षिततारायाश्च चरणौ ववन्दे ॥ ३६ ॥

गो० टी०–उक्तं विस्तृणाति–अथेति ॥ ३६ ॥

३७] ति० टी०–तदेव विस्तारयति—संगृह्येति । मातुस्तारायाः ॥ ३७ ॥

रा० टी०–संगृह्येति । उग्रतेजा अङ्गदः पितुः पादौ संगृह्य पुनर्मातुस्तारायाः पादौ जग्राह रुमायाश्च पादौ निपीडयित्वा निपीड्य ततः तम् अयं सौमित्रिरागतःइत्येतद्रूपमर्थं निवेदयामास ॥ ३७ ॥

गो० टी०–संगृह्येति । मातुः पुनरेवेत्यनेन मातुः पृथग्वन्दनमुच्यते ॥ ३७ ॥

३८] ति० टी०–निद्रया क्रान्तः संवीतः व्याप्तश्चेत्यर्थः । न विबुद्धवान् तन्नास्ति तद्वचनं चेत्यर्थः । यतो मदनेन मोहितो मदमत्तश्च बभूवासीत् ॥ ३८ ॥

रा० टी०–स इति । यः मदनेन कामेन मोहितः अत एव मदमत्तः मादकद्रव्यादिनोन्मत्तः अत एव निद्राक्रान्तसंवीतः निद्राक्रान्तेन निद्राजनितग्लान्या संवीतो व्याप्तो बभूव स सुग्रीवो न विबुद्धवान् प्रबोधं प्राप ॥ ३८ ॥

गो० टी०–स इति । मदमत्तः पानकृतमदमत्तः ॥ ३८ ॥

३९] ति० टी०–ततोऽङ्गदस्य सुग्रीवसमीपगमनानन्तरं

---

१ अरिन्दमः इति गो. पाठः । २ वाक्ये इति गो. रा. पाठः । ३ वानरेति गो. पाठः । ४ वचो निशम्येति गो. पाठः । ५ निपत्य तूर्णमिति गो. पाठः । ६ कुमार इति गो. पाठः । ७ अध्येति गो. पाठः । ८ तमिति रा. पाठः । ९ मंदति गो. पाठः ।

ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम् । सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ॥ ४० ॥
तेन शब्देन महता प्रत्यबुध्यत वानरः । मदविह्वलताम्राक्षो व्याकुलः स्रग्विभूषणः ॥ ४१ ॥
अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ । मन्त्रिणौ वानरेन्द्रस्य संमतोदारदर्शनौ ॥ ४२ ॥
प्लुक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः । वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ ४३ ॥
प्रसादयित्वा सुग्रीवं वचनैः सार्थनिश्चितैः । आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम् ॥ ४४ ॥
सत्यसंधौ महाभागौ भ्रातरौ रामलक्ष्मणौ । मनुष्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ॥ ४५ ॥
तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः । यस्य भीताः प्रवेपन्तो नादान्मुञ्चन्ति वानराः ॥ ४६ ॥
स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः । व्यवसायरथः प्राप्तस्तस्य रामस्य शासनात् ॥ ४७ ॥
अयं च तनयो राजंस्तारायां दयितोऽङ्गदः । लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयाऽनघ ॥ ४८ ॥
सोऽयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान् । वानरान्वानरपते चक्षुषा निर्दहन्निव ॥ ४९ ॥
तस्य मूर्ध्ना प्रणामं त्वं सपुत्रः सहबान्धवः । गच्छ शीघ्रं महाराज रोषो ह्यद्योपशाम्यताम् ॥ ५० ॥

वानराणां भयक्रोधादिजः शब्दसमूहः किलकिला । तं लक्ष्मणम् ॥ ३९ ॥

रा० टी०–तत इति । ततः सुग्रीवप्रबोधाभावानन्तरं क्रुद्धं लक्ष्मणं प्रेक्ष्य भयमोहितचेतसः वानराः अङ्गदप्रभृतयस्तं प्रसादयन्तः सन्तः किलकिलां दीनतासूचकस्वजातीयशब्दं चक्रुः ॥ ३९ ॥

गो० टी०–तत इति । किलकिलेति वानराणां शब्द उच्यते ॥ ३९ ॥

४०–४१] ति० टी०–ते लक्ष्मणं दृष्ट्वा महौघनिभं तच्छब्दसदृशशब्दं वज्रादिसदृशशब्दं च समं सह सिंहनादं चक्रुः सुग्रीवोद्बोधनायेति शेषः ॥ ४० ॥ ४१ ॥

रा० टी०–ते इति । ते बुद्धिमन्तो वानराः लक्ष्मणस्य लक्ष्मणं दृष्ट्वा महौघनिभं महाप्रवाहस्वनसदृशस्वनं वज्राशनिसमस्वनं च सिंहनादं च सममेककालावच्छेदेन समीपतः सुग्रीवसंनिधौ चक्रुः सुग्रीवप्रबोधायेति शेषः ॥ ४० ॥

रा० टी०–तेनेति । मदविह्वलताम्राक्षः मदेन विह्वलः ताम्रे अक्षिणी यस्य स एव स इति कर्मधारयः अत एव व्याकुलः अस्वस्थचित्तः स्रग्विभूषणः मालया शोभितः वानरः सुग्रीवः तेन महता शब्देन प्रत्यबुध्यत गतनिद्रोऽभवत् ॥ ४१ ॥

गो० टी०–त इति। महौघनिभं महाप्रवाहतुल्यं लक्ष्मणम् । समं युगपत् ॥ ४० ॥ ४१ ॥

४२] ति० टी०–अथेति । वानरशब्देन प्रबुद्धस्य वानरेन्द्रस्य सुग्रीवस्य समीपमङ्गदवचः श्रुत्वा तेनाङ्गदेनैव सह मन्त्रिणौ वानरेन्द्रस्य समीपमागतौ संमतौ च तादृदारदर्शनौ च संमतोदारदर्शनौ ॥ ४२ ॥

रा० टी०–अथेति । अथ प्रबोधानन्तरमङ्गदवचः लक्ष्मणसंदेशकथनाय राजा भवद्भ्यां गन्तव्य इत्याकारिकामङ्गदोक्तिं श्रुत्वा वानरेन्द्रस्य संमतौ प्रीतिविषयीभूतौ उदारं दर्शनं ययोस्तावेव तादृशि कर्मधारयः वानरेन्द्रस्य मन्त्रिणौ तेनाङ्गदेन सह समागतौ । वानरेन्द्रस्येस्युभयान्वयि ॥ ४२ ॥

गो० टी०–अथेति । तेनैव समागतौ तदाह्वानेन समागतौ मन्त्रिणौ प्रशस्तमन्त्रौ अर्थधर्मयोर्विषये उच्चावचं वक्तुं प्राप्तं लक्ष्मणं शशंसतुः ॥ ४२ ॥ ४३ ॥

४३] ति० टी०—कौ तौ तत्राह–प्लक्ष इत्यादि । अर्थधर्मयोर्विषय उच्चावचं स्वयं वक्तुं प्राप्तं लक्ष्मणं शशंसतुः॥ ४३॥

रा० टी०–मन्त्रिणोर्नाम निर्दिशन्नाह–प्लक्ष इति । अर्थधर्मयोः उच्चावचं वक्तुं बोधयितुं यौ मन्त्रिणौ आसाताम्इति शेषः, तौ प्लक्षः प्रभावश्च प्राप्तं लक्ष्मणं शशंसतुः सुग्रीवसमीपे इति शेषः ॥ ४३ ॥

४४] ति० टी०–सार्थनिश्चितैरर्थनिश्चयसहितैर्वचनैः प्रसादयित्वा शशंसतुरित्यन्वयः ॥ ४४ ॥

४५] ति० टी०–राज्यार्हौ त्रिलोकीराज्यार्हौ । राज्यदायिनौ तवेति शेषः । मनुष्यभावं प्राप्तावित्यनेन वस्तुतो न मनुष्याविति सूचितम् ॥ ४५ ॥

४६] ति० टी०—यस्य भीता यस्माद्भीताः ॥ ४६ ॥

४७–५०] ति० टी०–वाक्यं रामवाक्यं सारथिर्यस्य व्यवसायः कर्तव्यार्थनिश्चयः स रथो यस्य ॥ ४७–५० ॥

रा० टी०–शंसनप्रकारमाह–प्रसादयित्वेति । मरुत्पतिं देवेशमिवासीनं सुग्रीवं पर्युपासीनौ समीपे स्थितौ मन्त्रिणौ सार्थनिश्चयैः अर्थनिश्चयसहितैर्वचनैः प्रसादयित्वा मनुष्यभावं मनुष्याकृतिं संप्राप्तौ नित्यं स्वीकृतवन्तौ राज्यदायिनौ तुभ्यमिति शेषः, यौ रामलक्ष्मणौ तयोर्मध्ये एकः यस्य भीता वानराः प्रवेपन्तः सन्तो महानादान् मुञ्चन्ति स धनुष्पाणिर्लक्ष्मणो द्वारि तिष्ठति अर्द्धषट्कमेकान्वयि॥४४–४६॥

१ दर्शनाविति गो. पाठः । २ प्रभासश्चेति लि. पु. पाठः । ३ सामेति गो. पाठः । ४ वयस्येति गो. पाठः । ५ प्रणम्येति गो.पाठः । ६ बन्धुभिरिति गो. पाठः । ७ ह्यस्य निवर्त्स्यतामिति गो. पाठः ।

येथा हि रामो धर्मात्मा तत्कुरुष्व समाहितः । राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ।

अङ्गदादितः श्रुतलक्ष्मणक्रोधाटोपमतः सुभीतं सुग्रीव सेवासमयविज्ञो हनुमान्स्वसंकेतितकालातिक्रमएव रामकोपकारणं प्रतिभात्यतः प्रसाद्य लक्ष्मणं भवेः प्रयाणसंनद्ध इति प्रवर्तयति ।

अङ्गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह । लक्ष्मणं कुपितं श्रुत्वा सुमोचासनमात्मवान् ॥ १ ॥
स च तानब्रवीद्वाक्यं निश्चित्य गुरुलाघवम् । मन्त्रज्ञान्मन्त्रकुशलो मन्त्रेषु [1]परिनिष्ठितः ॥ २ ॥
न मे दुर्व्याहृतं किंचिन्नापि मे दुरनुष्ठितम् । लक्ष्मणो राघवभ्राता क्रुद्धः किमिति चिन्तये ॥ ३ ॥
असुहृद्भिर्ममामित्रैर्नित्यमन्तरदर्शिभिः । मम दोषानसंभूताऽश्राविते राघवानुजः ॥ ४ ॥

रा० टी०–स इति । वाक्यं रामवचनं सारथिर्यस्य व्यवसायः करणीयार्थविषयकनिश्चयः रथो यस्य स लक्ष्मणः रामशासनादेव प्राप्तः ॥ ४७ ॥

रा० टी०–अयमिति । तारायां दयितः प्रियस्तनयोऽयमङ्गदस्ते तव सकाशं समीपं लक्ष्मणेन त्वरया प्रेषितः ॥४८॥

रा० टी०–स इति । रोषपरीताक्षः सोऽयं लक्ष्मणः वानरान् चक्षुषा निर्दहनिव द्वारि तिष्ठति ॥ ४९ ॥

रा० टी०–तस्येति । तस्य समीपमयैव शीघ्रं गच्छ । तत्प्रयोजनमाह–रोषः लक्ष्मणकोपः उपशाम्यतां तत्र न श्रम इत्याह–मूर्ध्ना प्रणामं त्वं कुरुष्वेति शेषः हिरेवार्थकः ॥ ५० ॥

गो० टी०–प्रसादयित्वेत्यादि । सामनिश्चितैः सान्त्वविषये निश्चितैः ऊचतुरिति शेषः । यस्येति । यस्य भीताः यस्माद् भीताः वाक्यसारथिः रामवाक्यप्रेरित इत्यर्थः कथमिदं दुर्गमेकः प्रविष्टवानित्यत्राह–व्यवसायरथ इति । प्रतिपन्ननिरासाध्यवसायरथः तस्य तस्मै स्वसमये स्वमर्यादायाम् सत्यप्रतिश्रवाः सत्यप्रतिज्ञो भव ॥ ४४–५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

५१] ति० टी०–धर्मात्मा वदतीति शेषः । सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्ड एकत्रिंशः सर्गः ॥ ३१ ॥

रा० टी०–यथेति । धर्मात्मा रामः यथा येन प्रकारेण यदुपदिशतीति शेषः तेन प्रकारेण तत् कुरुष्व रामो यथा समाहितः स्वस्थचित्तो भवेत् तत्कुरुष्व अत एव समये स्वकृतान्वेषणसंकेते तिष्ठ अन्वेषणं कुरुष्वेत्यर्थः, अत एव सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किधाकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

१] ति० टी०–अङ्गदस्येति ॥ १ ॥

रा० टी०–मन्त्रिप्रार्थनानन्तरकालिकं सुग्रीवदृत्तान्तमुपक्रमते–अङ्गदस्येत्यादिभिः । अङ्गदस्य अङ्गदप्रेरितमन्त्रिणोर्वचः श्रुत्वा आत्मवान् धैर्यवान्सुग्रीवः आसनं सुमोच शयनासनाद्बहिस्तस्थौ ॥ १ ॥

गो० टी०–अथ हनुमता हितोपदेशे द्वात्रिंशे–अङ्गदस्येत्यादि । अङ्गदस्य प्राधान्यादङ्गदस्य वचः श्रुत्वेत्युक्तम् आसनं सुमोच भयेनासनादुदतिष्ठदित्यर्थः ॥ १ ॥

२] ति० टी०–गुरुलाघवं गुरुत्वलघुत्वे इत्यर्थः ॥ २ ॥

रा० टी०–स इति । गुरुलाघवं गुरुत्वलघुत्वे रामे गुरुत्वं स्वस्मिन् लघुत्वं चेत्यर्थः, निश्चित्य मन्त्रेषु परिनिष्ठितः तद्विषयकातीवज्ञानवान् अत एव मन्त्रकुशलः मन्त्रप्रयोगे निपुणः स सुग्रीवः मन्त्रज्ञान् तान् मन्त्रिणः वाक्यमब्रवीत्॥२॥

गो० टी०–सचिवानिति । मन्त्रकुशलः मन्त्रप्रयोगकुशलः ॥ २ ॥

३] ति० टी०–दुर्व्याहृतमनुचितवचनमुक्तम् । दुरनुष्ठितमनुचितं कृत्यं कृतमिति शेषः ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–नेति । मे मया किंचिन्न दुर्व्याहृतं दुरुक्तं रामायेति शेषः, नापि किंचिन्मे दुरनुष्ठितमनिष्टं कृतं रामस्येति शेषः, अतः लक्ष्मणः किं किमर्थं क्रुद्धः इत्यहं चिन्तये विचारयामि ॥ ३ ॥

गो० टी०–न म इति । दुर्व्याहृतं परुषभाषणम्, दुरनुष्ठितम् अपकारः किं किमर्थम् ॥ ३ ॥

४] ति० टी०–कोपकारणमुन्नयति—असुहृद्भिरिति । असुहृदः शत्रवः अमित्रा अपकारिणः अन्तरं छिद्रम् असंभूतानुत्पन्नान् श्राविताः नूनमिति शेषः ॥ ४ ॥

रा० टी०–स्वनिश्चितमाह–असुहृद्भिः मलिनान्तः करणैः अत एव नित्यमन्तरदर्शिभिः स्वदुद्धिप्रकल्पितशुद्धबोधनशीलैः ममामित्रैः रिपुभिः असंभूतान् मया अनिष्पादितान् मम

१ यदाहेति गो. पाठः । २ श्रवा इति गो. पाठः । ३ परिनिष्ठितानिति गो. पाठः ।

अत्र तावद्यथाबुद्धिः सर्वैरेव यथाविधि । भावस्य निश्चयस्तावद्विज्ञेयो निपुणं शनैः ॥ ५ ॥
न खल्वस्ति मम त्रासो लक्ष्मणान्नापि राघवात् । मित्रं त्वस्थानकुपितं जनयत्येव संभ्रमम् ॥ ६ ॥
सर्वथा सुकरं मित्रं दुष्करं प्रतिपालनम् । अनित्यत्वात्तु चित्तानां प्रीतिरल्पेऽपि भिद्यते ॥ ७ ॥
अतोनिमित्तं त्रस्तोऽहं रामेण तु महात्मना । यन्ममोपकृतं शक्यं प्रतिकर्तुं न तन्मया ॥ ८ ॥
सुग्रीवेणैवमुक्ते तु हनूमान्हरिपुंगवः । उवाच स्वेन तर्केण मध्ये वानरमन्त्रिणाम् ॥ ९ ॥
सर्वथा नैतदाश्चर्यं यत्त्वं हरिगणेश्वर । न विस्मरस्यविस्रब्धमुपकारं कृतं शुभम् ॥ १० ॥
राघवेण तु वीरेण भयमुत्सृज्य दूरतः । त्वत्प्रियार्थं हतो वाली शक्रतुल्यपराक्रमः ॥ ११ ॥
सर्वथा प्रणयात्क्रुद्धो राघवो नात्र संशयः । भ्रातरं संप्रहितवाँल्लक्ष्मणं लक्ष्मिवर्धनम् ॥ १२ ॥

दोषान् राघवानुजः श्रावितः कारणमन्तरा लक्ष्मणक्रोधो न संभवतीति तात्पर्यम् ॥ ४ ॥

गो०टी०–असुहृद्भिरिति । अशुहृद्भिः अशोभनहृदयैः॥४॥

५] ति० टी०–अत्र लक्ष्मणकोपविषये । तावत्प्रथमतः । यथा तत्त्वात्मिका बुद्धिर्ज्ञानं यस्मिन्निश्चये स भावस्य कोपस्य निश्चयस्तात्त्विककोपनिमित्तस्य निश्चयो विज्ञेयः कर्तव्यः ॥ ५ ॥

रा० टी०–अत्रेति । अत्र अस्मिन् समये भावस्य मचित्तान्तकस्य लक्ष्मणस्य निश्चयोऽभिप्रायः यथाबुद्धि स्वस्वबुद्ध्यनुरूपं यथाविधि विधिमनतिक्रम्य निपुणं यथा भवति तथा सर्वैः भवद्भिः तावन्मत्सङ्गमात्पूर्वमेव शनैर्विज्ञेयः ॥ ५ ॥

गो० टी०–अत्रेति । तावत् प्रथमम् यथाविधि यथाक्रमम् । भावस्य चेष्टायाः निश्चयः अध्यवसायः ॥ ५ ॥

६] ति० टी०–त्रासः । मदपराधमूल इति शेषः । कुतस्तर्हि त्रासोऽत आह—मित्रमिति । अस्थानेऽकाण्डे वास्तवापराधाभावेऽपि रिपुकृतमिथ्योपजापेन कुपितं संजातकोपं मित्रं संभ्रमं भयं जनयत्येव ॥ ६ ॥

रा० टी०–नेति । राघवात् रामान्न मम त्रासः अत एव लक्ष्मणादपि न त्रासः अस्थानकुपितमपराधाभावेन अनवसरकोपविशिष्टं तु संभ्रमं भयं जनयत्येव । एतेन अयं मित्रद्रोहीति लोकोक्तिर्बिभेमीति सूचितम् । न त्रास इत्यनेनापराधेऽपि राघवः शरणागतं न त्यजतीति सुग्रीवनिश्चयः सूचितः । 'कथंचिदुपकारेण कृतेनैकेन तुष्यति ॥ न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ इत्यादिवचनमत्रानुसंधेयम् ॥ ६ ॥

गो० टी०–निजभयकृतमासनचलनमपह्नुते–न खल्विति६

७] ति० टी०–रिपुजोपजापपरिहारेण सख्यपालनं दुष्करमित्याह—सर्वथेति। अल्पेऽपि उपजापे इति शेषः॥७॥

रा० टी०–सर्वथेति । मित्रं सर्वथा सर्वप्रकारेण सुकरमनायासेन मित्रं लभ्यते इत्यर्थः, प्रतिपालनं मित्रस्य रक्षणं तु दुष्करं तत्र हेतुः–चित्तानामनित्यत्वात्प्रतिक्षणं विषयान्तरवर्तित्वाद्धेतोः अल्पे जने प्रीतिर्भिद्यते ॥ ७ ॥

गो० टी०–मित्रस्यास्थानकोपसंभावनायां लोकन्यायमाह–सर्वथेति । अल्पे वैषम्य इति शेषः ॥ ७ ॥

८] ति० टी०–अतोनिमित्तमस्मान्निमित्तात् । अथ स्वदोषशङ्कानिवृत्तये कृतज्ञतां मन्त्रिभ्यो दर्शयति–रामेण स्विति ॥८॥

रा० टी०–अत इति । महात्मना रामेण यत् ममोपकृतं तत्प्रतिकर्तुं मया न शक्यमतः इदं निमित्तं त्रस्तोऽहम् ॥ ८ ॥

गो० टी०–तत इति । महात्मना रामेण मम यदुपकृतं तन्मया प्रतिकर्तुं न शक्यम् । अतो निमित्तम् अस्मान्निमित्तात् त्रस्तोऽहमिति संबन्धः ॥ ८ ॥

९] ति० टी०–अथ सुख्यमन्त्री हनुमान्कोपनिमित्तं निश्चित्याह—सुग्रीवेणेति । तर्को युक्तिः ॥ ९ ॥

रा० टी०–सुग्रीवेणेति । सुग्रीवेण एवमुक्ते सति हरिपुङ्गवो हनुमान् वानरमन्त्रिणां मध्ये स्वेन स्वकीयेन तर्केण अनुमानेन उवाच ॥ ९ ॥

गो० टी०–सुग्रीवेणेति । तर्केण ऊहेन ॥ ९ ॥

१०] ति० टी०–अथ निश्चयं विवक्षुः स्वस्य गुणग्राहित्वरूपं मान्त्रिलक्षणं प्रकटयति—सर्वथेति ॥ १० ॥

रा० टी०–सर्वथेति । हे हरिगणेश्वर ! अविस्रब्धमतिविश्वस्तं यथा भवति तथा कृतमुपकारं यत् सर्वथा त्वं न विस्मरसि तदेतत् आश्चर्यं न, महात्मनां स्वभाव एवायमिति तात्पर्यम् ॥ १० ॥

गो० टी०–सर्वथेति । उपकारकृतम् उपकारकारिणम् ॥ १०–१५ ॥

११] ति० टी०–उपकारमेवाह—राघवेणेति । भयं वालिपराक्रमजं वालिनश्छलेन वधकृतं लोकापवादजं वा ॥११॥

रा० टी०–राघवेणेति । राघवेण भयं दूरतः उत्सृज्य वाली हतः, एतेन राघवस्य स्वप्रतीव कृपेति सूचितम् ॥११॥

१२] ति० टी०–प्रणयात्क्रुद्धः । न तु स्वात्मोपजापत इत्यर्थः ॥ १२ ॥

रा० टी०–सर्वथेति । सर्वथा सर्वप्रकारेण प्रणयात् स्वद्विषयकस्नेहादेव राघवः क्रुद्धः स्वद्विघातकापराधजनितदोषं निवर्तयितुं क्रोधाभासमाश्रितवानित्यर्थः, तत्र संशयो न अत एव भ्रातरं संप्रहितवान् प्रेषितवान् ॥ १२ ॥

---

१ यथाबुद्धीति गो. रा. पाठः । २ त्रेति गो. पाठः । ३ उक्त इति गो. पाठः । ४ हनुमानिति गो. पाठः । ५ सुस्निग्धमुपकारकृतमिति गो. पाठः ।

त्वं प्रमत्तो न जानीषे कालं कालविदां वर । फुल्लसप्तच्छदश्यामा प्रवृत्ता तु शरच्छुभा ॥ १३ ॥
निर्मलग्रहनक्षत्रा द्यौः प्रनष्टबलाहका । प्रसन्नाश्च दिशः सर्वाः सरितश्च सरांसि च ॥ १४ ॥
प्राप्तमुद्योगकालं तु नावैषि हरिपुंगव । त्वं प्रमत्त इति व्यक्तं लक्ष्मणोऽयमिहागतः ॥ १५ ॥
आर्तस्य हृतदारस्य परुषं पुरुषान्तरात् । वचनं मर्षणीयं ते राघवस्य महात्मनः ॥ १६ ॥
कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम् । अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात् ॥ १७ ॥
नियुक्तैर्मन्त्रिभिर्वाच्यो ह्यवश्यं पार्थिवो हितम् । इत एव भयं त्यक्त्वा ब्रवीम्यवधृतं वचः ॥ १८ ॥
अभिक्रुद्धः समर्थो हि चापमुद्यम्य राघवः । सदेवासुरगन्धर्वं वशे स्थापयितुं जगत् ॥ १९ ॥
न स क्षमः कोपयितुं यः प्रसाद्यः पुनर्भवेत् । पूर्वोपकारं स्मरता कृतज्ञेन विशेषतः ॥ २० ॥
तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः ससुहृज्जनः । राजंस्तिष्ठ स्वसमये भर्तुर्भार्येव तद्वशे ॥ २१ ॥

१३-१४] ति० टी०-प्रणयकोपस्यापि निमित्ताभासं दर्शयति—त्वमिति । कालं प्रतिज्ञानं सीतान्वेषणकालम् । प्रवृत्ता प्रकर्षेण वृत्ता गतप्रायेति यावत् ॥ १३ ॥ १४ ॥

रा० टी०-अपराधमेव बोधयति-त्वमिति । हे कालविदांवर ! प्रमत्तः असावधानचित्तस्त्वं कालं स्वप्रतिज्ञातान्वेषणसमयं न जानीषे स्मरसि । नन्वत्र कः स काल इत्यत आह-फुल्लसप्तच्छदश्यामा पुष्पितसप्तच्छदहेतुकश्यामस्वविशिष्टा शुभा गमनयोग्या शरत् प्रवृत्ता ॥ १३ ॥

रा० टी०-तल्लक्षणमाह-निर्मलेति । प्रनष्टाः बलाहकाः मेघाः यस्यां सा अत एव निर्मलग्रहनक्षत्रा द्यौः प्रकाशते इति शेषः, अत एव दिक्प्रभृतयः प्रसन्नाः ॥ १४ ॥

१५] ति० टी०-व्यक्तं ज्ञात्वेति शेषः ॥ १५ ॥

रा० टी०-प्राप्तमिति । हे हरिपुङ्गव ! प्राप्तमुद्योगकालं यतो नावैषि अतस्त्वं प्रमत्तः इति व्यक्तम् अत एव अयं लक्ष्मण इहागतः ॥ १५ ॥

१६-१७] ति० टी०-पुरुषान्तरात्लक्ष्मणाच्छ्रुतं परुषं वचनं ते त्वया मर्षणीयम् । तत्संभावनमालक्ष्यायञ्च पदेशः ॥ १६ ॥ १७ ॥

रा० टी०-आर्तस्येति । पुरुषान्तरात् लक्ष्मणात् श्रुतमिति शेषः हृतदारस्य राघवस्य परुषं परुषाभासं वचनं ते त्वया मर्षणीयं क्षन्तव्यम् ॥ १६ ॥

गो० टी०-आर्तस्येति । पुरुषान्तरात् लक्ष्मणात् आगतमिति शेषः । अत्र मर्षणीयत्वे बहवो हेतव उपन्यस्यन्ते । हृतदारस्य परुषवचनं मर्षणीयम् । एवमार्तस्येत्यादौ राघवस्य महात्मनः परमात्मनः सर्वस्वामिन इत्यर्थः ॥ १६ ॥

रा० टी०-कृतेति । अञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात् अन्तरेण विना कृतापराधस्य ते अन्यत् क्षमं योग्यं न पश्यामि ॥ १७ ॥

गो० टी०-अथापराधप्रायश्चित्तं विदधाति-कृतेति । कृतापराधस्य न त्वारब्धापराधस्य । अपराधारम्भकाले सानुतापो यदि लघुप्रायश्चित्तेन तदा तस्य परिहारः स्यात् न तथाभूः किंतु निश्चयेन कृतापराधोऽसि तेन अञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनादन्तरेण प्रसादनं विना अन्यत् क्षमम् अपराधपरिहारक्षमं साधनं न पश्यामि ' अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी ' इति शास्त्रात् । लक्ष्मणस्येत्यनेन तदीयं प्रत्यञ्जलिरेव भगवदपचारपरिहारक इत्युक्तम् । त्वदङ्घ्रिद्वयरिश्येतिवत् । ते इत्यनेनात्राधिकारिनियमो नास्तीत्युच्यते । अञ्जलिमित्येकवचनेन सकृत्करणमेवालमित्युक्तम् । बद्ध्वेत्यनेन देशकालनियमाभावः सूचितः । बद्ध्वा लक्ष्मणस्य प्रसादनादित्यनेन क्षिप्रं देवप्रसादिनीत्यस्यार्थ उक्तः ॥ १७ ॥

१८-१९] ति० टी०-नियुक्तैः हितोपदेशे इति शेषः । भयं त्यक्त्वा ब्रवीमि राजानमपि कार्यवशात्परस्मा अञ्जलिं कुर्विति वचोऽवधृतं निश्चितं वदामि ॥ १८ ॥ १९ ॥

रा० टी०-नन्वत्र मद्वयरहित इव त्वं कथं ब्रवीषीत्यत आह-नियुक्तैरिति । नियुक्तैः युक्तार्थबोधने नियोजितैः पार्थिवोऽवश्यं हिते वाच्यः इत एव भयं त्यक्त्वा अवधृतं हितत्वेन निश्चितं वचो ब्रवीमि ॥ १८ ॥

गो० टी०-किमेवं मां प्रति हीनवृत्तमुपदिष्टवानसीत्यत्राह-नियुक्तैरिति ॥ १८ ॥

रा०टी०-राघवस्य प्रसादने तवैव हितं तत्कार्यं त्वन्यथापि सेत्स्यतीत्याह-अभीति । अभिक्रुद्धो राघवः चापमुद्यम्य सदेवासुरगन्धर्वं देवादिसहितं जगत् स्ववशे स्थापयितुं समर्थः । एतेन रावणमपि स्ववशे स्थापयितुं समर्थ एवेति बोधितम्॥१९॥

गो० टी०-कथमिदं हितं तत्राह-अभिक्रुद्ध इति ॥१९॥

२०-२१] ति० टी०-यः पुनः प्रसाद्यो भवेत्स कोपयितुं न क्षमो न युक्तः ॥ २० ॥ २१ ॥

रा० टी०-नेति । यो रामः पुनः निरन्तरं प्रसाद्यः सर्वैः रिति शेषः, सः कृतज्ञेन अत एव पूर्वोपकारं स्मरता त्वया विशेषतः प्रसाद्यः अत एव कोपयितुं न क्षमः ॥ २० ॥

गो० टी०-हेत्वन्तरमाह-न स इति ॥ २० ॥

१ शिवेति गो. पाठः । २ अत इति गो. पाठः

न रामरामानुजशासनं त्वया कपीन्द्र युक्तं मनसाऽप्यपोहितुम् ।
मनो हि ते ज्ञास्यति मानुषं बलं सराघवस्यास्य सुरेन्द्रवर्चसः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ।

अङ्गदादिभिः किष्किन्धा प्रवेशितो लक्ष्मणो राजमार्गोभयतोऽद्भुततमान्युच्चराजभवनाद्याश्चर्याणि विलोकयन्यावत्सुग्रीवगृहं प्रविष्टस्तावदनेकविलासोपस्करैरापूर्णेऽन्तर्भवनेऽनेकातोद्यमधुरध्वनिमिश्रितगीतध्वनिं मञ्जुमञ्जीरशिञ्जितादिं च शृण्वन्नेकान्तेऽवकाशं ददद्धनुष्टङ्कारं विधाय तस्थौ । श्रुतज्याघोषेण सुग्रीवेण प्रेषिता तारा सकलसेनासमानयनाय सुग्रीवकृतनीलप्रेषणादि प्रस्तूय लक्ष्मणसान्त्वे प्रयतते । किंचिच्छान्तरोषो लक्ष्मणस्तारयाऽन्तःपुरं प्रापितः सुग्रीव ददर्श ।

अथ प्रतिसमादिष्टो लक्ष्मणः परवीरहा । प्रविवेश गुहां रम्यां किष्किन्धां रामशासनात् ॥ १ ॥
द्वारस्था हरयस्तत्र महाकाया महाबलाः । बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्राञ्जलयः स्थिताः ॥ २ ॥
निःश्वसन्तं[1] तु तं दृष्ट्वा क्रुद्धं दशरथात्मजम् । बभूवुर्हरयस्त्रस्ता न चैनं पर्यवारयन् ॥ ३ ॥
स तां रत्नमयीं दिव्यां श्रीमान्पुष्पितकाननाम् । रम्यां रत्नसमाकीर्णां ददर्श महतीं गुहाम् ॥ ४ ॥

रा० टी०–प्रसादनोपायमाह–तस्येति । तस्य राघवस्य पादौ मूर्ध्ना प्रणम्य समये प्राप्तकाले भातुर्भार्येव तद्वशे तिष्ठस्व तिष्ठ ॥ २१ ॥

गो० टी०–अञ्जलिं बद्धेत्युक्तं विवृणोति–तस्येति । स्वसमये तिष्ठ तद्वशे च तिष्ठ ॥ २१ ॥

२२] ति० टी०–अपोहितुमुपेक्षितुम् । सराघवस्य सलक्ष्मणस्यास्य रामस्य मानुषं मनुष्यमतिक्रान्तं बलं ते मनो ज्ञास्यति जानात्येव वालिवधादिनेति भावः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

रा० टी०–उपसंहरन्नाह–नेति । रामरामानुजयोः शासनं मनसाऽपि अपोहितुं त्यक्तुं त्वया न शक्यम् । तत्र हेतुः–सराघवस्य रामसहितस्य अस्य लक्ष्मणस्य मानुषं मः इयत्ताया अनुषः विध्वंसो यस्मिन् तद्बलं ते मनो ज्ञास्यति जानाति ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

गो० टी०–न रामेति । सुरेन्द्रवर्चसः सराघवस्य सलक्ष्मणस्य अस्य रामस्य मानुषं बलं दिव्यास्त्रादिबलमन्तरेण केवलं स्वाभाविकं बलं ते मनो ज्ञास्यति हि जानात्येव । सालगिरिभेदनादौ दृष्टचरत्वादिति भावः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

१] ति० टी०–अथैवं हनुमद्वचनानन्तरम् । प्रतिसमादिष्टोऽङ्गदात्प्रतिसंदेशं प्राप्तः ॥ १ ॥

रा० टी०–हनुमत्प्रार्थनानन्तरकालिकं लक्ष्मणवृत्तान्तमाह–अथेति । अथ सुग्रीवकर्मकहनुमत्प्रार्थनानन्तरं प्रतिसमादिष्टः गुहाप्रवेशाय अङ्गदेन प्रार्थितः रामशासनादागतो लक्ष्मणः किष्किन्धां प्रविवेश ॥ १ ॥

गो० टी०–अथान्तःपुरं प्रविष्टस्य लक्ष्मणस्य तारया प्रसादनं त्रयस्त्रिंशे–अथेत्यादि । प्रतिसमादिष्टः प्रत्याहृतः अङ्गदेनेति शेषः ॥ १ ॥ २ ॥

२] ति० टी०–स्थिता हरयः प्राञ्जलयो बभूवुरित्यन्वयः२

रा० टी०–द्वारस्था इति । सर्वे द्वारस्थाः हरयः लक्ष्मणं दृष्ट्वा प्राञ्जलयः सन्तः स्थिताः बभूवुः ॥ २ ॥

३] ति० टी०–पर्यवारयन् भयेन लक्ष्मणं परिवार्य गन्तुं नाशक्नुवन्नित्यर्थः ॥ ३ ॥

रा० टी०–निःश्वसन्तमिति । क्रुद्धं दशरथात्मजं दृष्ट्वा हरयः त्रस्ताः बभूवुः अत एव एनं लक्ष्मणं न पर्यवारयन् प्राप्तत्य सह नागच्छन् ॥ ३ ॥

गो० टी०–निःश्वसन्तमिति । न चैनं पर्यवारयन् भयेन लक्ष्मणमुपगन्तुं नाशक्नुवन्नित्यर्थः ॥ ३ ॥

४] ति० टी०–पुष्पितानि काननानि यस्यां सा ताम् रत्नसमाकीर्णामनेकोत्तमवस्त्वाक्रान्ताम् ॥ ४ ॥

रा०टी०–स इति। श्रीमान्स लक्ष्मणः रत्नमयीं रत्नप्रचुरां रत्नसमाकीर्णां रत्नैः अनेकविधोत्तमपदार्थैर्व्याप्ताम् ॥ ४ ॥

गो० टी०–स तामिति । रत्नमयीं रत्ननिर्मितां रत्नसमाकीर्णाम् आपणस्थरत्नैः समाकीर्णाम् । हर्म्याः धनिनां वासाः, प्रासादाः देवगृहाः, पद्मानाम् आलेपविशेषाणाम् । ददर्शेति । गिरिनद्यः गिरिनदीः व्यत्ययेन द्वितीया ॥ ४–७ ॥

---

१ घोरामिति गो. पाठः । २ निश्वसन्तमिति गो. पाठः ।

हर्म्यप्रासादसंबाधां नानारत्नोपशोभिताम् । सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभिताम् ॥ ५ ॥
देवगन्धर्वपुत्रैश्च वानरैः कामरूपिभिः । दिव्यमाल्याम्बरधरैः शोभितां प्रियदर्शनैः ॥ ६ ॥
चन्दनागुरुपद्मानां गन्धैः सुरभिगन्धिताम् । मैरेयाणां मधूनां च संमोदितमहापथाम् ॥ ७ ॥
[४]विन्ध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः । ददर्श गिरिनद्यश्च विमलास्तत्र राघवः ॥ ८ ॥
अङ्गदस्य गृहं रम्यं मैन्दस्य द्विविदस्य च । गवयस्य गवाक्षस्य गजस्य शरभस्य च ॥ ९ ॥
विद्युन्मालेश्च संपातेः सूर्याक्षस्य हनूमतः । वीरबाहोः सुबाहोश्च नलस्य च महात्मनः ॥ १० ॥
कुमुदस्य सुषेणस्य तारजाम्बवतोस्तथा । दधिवक्त्रस्य नीलस्य सुपाटलसुनेत्रयोः ॥ ११ ॥
एतेषां कपिमुख्यानां राजमार्गे महात्मनाम् । ददर्श गृहमुख्यानि महासाराणि लक्ष्मणः ॥ १२ ॥
पाण्डुराभ्रप्रकाशानि गन्धमाल्ययुतानि च । प्रभूतधनधान्यानि स्त्रीरत्नैः शोभितानि च ॥ १३ ॥
पाण्डुरेण तु [६]शैलेन परिक्षिप्तं दुरासदम् । वानरेन्द्रगृहं रम्यं महेन्द्रसदनोपमम् ॥ १४ ॥
शुक्लैः प्रासादशिखरैः कैलासशिखरोपमैः । सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितम् ॥ १५ ॥
महेन्द्रदत्तैः श्रीमद्भिर्नीलजीमूतसंनिभैः । दिव्यपुष्पफलैर्वृक्षैः शीतच्छायैर्मनोरमैः ॥ १६ ॥
हरिभिः संवृतद्वारं बलिभिः शस्त्रपाणिभिः । दिव्यमाल्यावृतं शुभ्रं तप्तकाञ्चनतोरणम् ॥ १७ ॥
सुग्रीवस्य गृहं रम्यं प्रविवेश महाबलः । अवार्यमाणः सौमित्रिर्महाभ्रमिव भास्करः ॥ १८ ॥

५-६] ति० टी०-तस्यैव प्रपञ्चः-हर्म्येति । सर्वकामफलैः सर्वदापेक्षितफलयुक्तैः ॥ ५ ॥ ६ ॥

रा० टी०-हर्म्यैः प्रासादैश्च संबाधां निबिडां सर्वकामफलैः सकलकामनादातृफलविशिष्टैः वृक्षैः उपशोभिताम् ॥ ५ ॥

रा० टी०-देवादिभिश्च शोभिताम् ॥ ६ ॥

७-१३] ति० टी०-पाण्डुरेण पञ्चं पद्मकाख्यं गन्धद्रव्यम् सुरभिगन्धितां सुगन्धिताम् । मधूनां च संघैरिति शेषः॥७-१३॥

रा० टी०-चन्दनागुरुपद्मानां गन्धैः सुरभि यथा भवति तथा गन्धिता मैरेयाणां मधूनां च मैरेयादिभिः संमोदिताः महान्तः पन्थानो यस्या सा ता गुहां ददर्श । श्लोकचतुष्टयमेकान्वयि ॥ ७ ॥

रा० टी०-ददर्शेति । तत्र गुहासमीपे विमलाः गिरिनद्यः अङ्गदादेः रम्यं गृहं च राघवो ददर्श । विमला नद्य इति वाक्यस्य कर्मतयाऽन्वयान्न द्वितीया । सार्धश्लोकत्रयमेकान्वयि८-१०

रा० टी०-एतेषामिति । एतेषामङ्गदादीनां महासाराणि अतिपुष्टानि पाण्डुराभ्रवत्प्रकाशो येषां तानि स्त्रीरत्नैः उत्तमस्त्रीभिः शोभितानि गृहमुख्यानि उक्ततत्तद्गृहाणां मध्यवर्तिवेश्मानि पाण्डुरेण ईषद्रक्तेन शैलेन परिक्षिप्तं चतुर्दिक्षु प्राकृतमत एव दुरासदं रिपुभिर्गन्तुमशक्यं वानरेन्द्रगृहं सुग्रीवमुख्यभवनं च लक्ष्मणो ददर्श । अर्धषट्कमेकान्वयि ॥ ११-१३ ॥

गो० टी०-अङ्गदस्येत्यादि । महासाराणि अतिदृढानि ॥ ८-१२ ॥

१४-१५] ति० टी०-पाण्डुरेण शैलेन परिक्षिप्तं स्फटिकशिलामयवप्रेण वेष्टितम् ॥ १४ ॥ १५ ॥

१६-१८] ति० टी०-महेन्द्रदत्तैर्वृक्षैः कल्पवृक्षैः॥१६-१८॥

रा० टी०-शुक्लैरिति । कैलासशिखरोपमैः कैलासश्रृङ्गतुल्यैः शुक्लैः प्रासादशिखरैः प्रासादैश्च सर्वे कामाः मनोरथाः येभ्यस्तानि फलानि येषां तैः, किं च सर्वान् कामान् फलन्ति निष्पादयन्ति तैर्वृक्षैश्च महेन्द्रदत्तैः इन्द्रेण समर्पितैः नीलजीमूतसंनिभैर्नीलमेघसदृशैः दिव्यानि पुष्पफलानि येषु शीता छाया येषा तैः अत एव मनोरमैः वृक्षैः कल्पतरुभिश्च संवृतानि द्वाराणि यैस्तैः हरिभिर्वानरैश्च उपशोभितं दिव्यमाल्यावृतं दिव्यपुष्पैराकीर्णं तप्तकाञ्चनं प्रतप्तस्वर्णमयं तोरणं बहिर्द्वारं यस्य तत्सुग्रीवस्य गृहमवार्यमाणः प्रतीहारैरिति शेषः, सौमित्रिः लक्ष्मणः महाभ्रं भास्कर इव प्रविवेश । सार्धश्लोकचतुष्टयमेकान्वयि ॥ १४-१८ ॥

गो० टी०-पाण्डुरेणेति । पाण्डुरेण सालेन सुधाधवलितप्राकारेण । दिव्यपुष्पफलैर्वृक्षैरित्यनेन इन्द्रदत्ताः स्वर्गीया वृक्षा उच्यन्ते पूर्वमुक्ता वृक्षा भौमा इत्यवगन्तव्यम् । पूर्वं वानरेन्द्रगृहं रम्यमित्युक्तस्यानेकविशेषणव्यवधानेन सुग्रीवस्य गृहं रम्यमिति पुनर्निर्गमनम् स्वरूपतो रम्यम् उक्तविशेषणैश्च रम्यमिति रम्यपदद्वयानिर्वाहः । यद्वा वानरेन्द्रगृहं वानरेन्द्रयोः ऋक्षरजोवालिनोः गृहभूतम् इदानीं सुग्रीवस्य गृहं प्रविवेशेति संबन्धः ॥ १३-१९ ॥

१ पण्येति गो. पाठः । २ अगर्विति गो. रा. पाठः । ३ गन्धिनामिति गो. पाठः । ४ अर्धमेतत् गो. रा. नास्ति । ५ दिव्येति गो. पाठः । ६ सालेनेति गो. पाठः । ७ द्वारैरिति रा. पाठः ।

स सप्त कक्ष्या धर्मात्मा यानासनसमावृताः । ददर्श सुमहद्गुप्तं ददर्शान्तःपुरं महत् ॥ १९ ॥
हैमराजतपर्यङ्कैर्बेहुभिश्च वरासनैः । महार्हास्तरणोपेतैस्तत्र तत्र समावृतम् ॥ २० ॥
प्रविशन्नेव सततं शुश्राव मधुरस्वनम् । तन्त्रीगीतसमाकीर्णं समतालपदाक्षरम् ॥ २१ ॥
बह्वीश्च विविधाकारा रूपयौवनगर्विताः । स्त्रियः सुग्रीवभवने ददर्श स महाबलः ॥ २२ ॥
दृष्ट्वाऽभिजनसंपन्नास्तत्र माल्यकृतस्रजः । वरमाल्यकृतव्यग्रा भूषणोत्तमभूषिताः ॥ २३ ॥
नातृप्तान्नाति च व्यग्रान्नानुदात्तपरिच्छदान् । सुग्रीवानुचरांश्चापि लक्षयामास लक्ष्मणः ॥ २४ ॥
कूजितं नूपुराणां च काञ्चीनां निःस्वनं तथा । स निशम्य ततः श्रीमान्सौमित्रिर्लज्जितोऽभवत् ॥ २५ ॥
रोषवेगप्रकुपितः श्रुत्वा चाभरणस्वनम् । चकार ज्यास्वनं वीरो दिशः शब्देन पूरयन् ॥ २६ ॥
चारित्रेण महाबाहुरपकृष्टः स लक्ष्मणः । तस्थावेकान्तमाश्रित्य रामकोपसन्वितः ॥ २७ ॥
तेन चापस्वनेनाथ सुग्रीवः प्लवगाधिपः । विज्ञायागमनं त्रस्तः सं चचाल वरासनात् ॥ २८ ॥
अङ्गदेन यथा मह्यं पुरस्तात्प्रतिवेदितम् । सुव्यक्तमेष संप्राप्तः सौमित्रिर्भ्रातृवत्सलः ॥ २९ ॥

१९-२०] ति० टी०–सप्तकक्ष्या इत्यस्यातिक्रम्येति शेषः ॥ १९ ॥ २० ॥

२१–२२] ति० टी०–तन्त्रीगीतेन वीणावाद्यघोषेण सहितं मधुरस्वनं मुरजादेः शुश्राव ॥ २१ ॥ २२ ॥

रा० टी०–स इति । यानासनसमावृताः यानैर्विमानादिभिः आसनैः चित्रकम्बलाद्यास्तरणविशिष्टपर्यङ्कादिभिः, किंच यानानां विमानादीनाम् आसनानि चित्रकम्बलादीनि तैः समावृताः पूर्णाः सप्त कक्ष्याः द्वारः प्रविश्य सुमहद्गुप्तं वानरैरत्यन्तं संरक्षितमन्तःपुरं धर्मात्मा लक्ष्मणो ददर्श ॥ १९ ॥

रा० टी०–हैमेति । तत्र तत्र उचिते स्थाने महार्हास्तरणोपेतैः अतिप्रशंसनीयास्तरणविशिष्टैः हैमराजतपर्यङ्कैः वरासनैश्च समावृतम् अन्तःपुरमिति शेषः, प्रविशन्नेव तन्त्रीगीतेन वीणास्वनेन समाकीर्णं व्याप्तं समतालपदानि अक्षराणि यस्मिन् तत् मधुरस्वनं सततं शुश्राव । लक्ष्मण इति शेषः । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

रा० टी०–बह्वीरिति । महाबलो लक्ष्मणः सुग्रीवभवने बह्वीः स्त्रियो ददर्श ॥ २२ ॥

गो० टी०–प्रविशन्नेवेति । सः लक्ष्मणः ततं वीणादिवाद्यजातम् । मधुरस्वरं मधुरध्वनियुक्तम् । तन्त्रीशब्देन तन्त्रीध्वनिर्लक्ष्यते तद्रूपैर्गीतैः समाकीर्णं समगीतपदाक्षरं समतया तन्त्रीगीतसमतया गीतानि कण्ठैर्गीतानि पदान्यक्षराणि च यस्य । यद्वा समानि अन्यूनातिरिक्तानि गीतसंबन्धीनि पदान्यक्षराणि च यस्य ॥ २० ॥ २१ ॥

२३] ति० टी०–अभिजनसंपन्ना आभिजात्ययुक्ताः वरमाल्यकृतव्यग्रा वरमाल्यानामुत्तमस्रजां कृतं करणं तत्र व्यग्राः ॥ २३ ॥

२४] ति० टी०–अव्यग्रान्परिचर्यात्वरारहितान् अनुदात्तपरिच्छदान्प्रशस्तालंकाररहितान् ॥ २४ ॥

रा० टी०–दृष्ट्वेति । अभिजनेन संपन्ना युक्ता भूषणात्तमैर्भूषिताः माल्यैः पुष्पैः कृता रचिताः स्रजो याभिः वरमाल्यकृताय उत्तमपुष्पसंपादनाय व्यग्राः कृतत्वराः स्त्रियो दृष्ट्वा सुग्रीवानुचरानपि अतृप्तान् तृप्तिरहितान् न लक्षयामास, अव्यग्रान् स्वामिकार्ये त्वरारहितानपि न लक्षयामास, अनुदात्तपरिच्छदान् महाभूषणादिरहितांश्च न लक्षयामास, तृप्तत्वादिविशिष्टानेव ददर्शेत्यर्थः । श्लोकद्वयमेकान्वयि ॥२३॥२४॥

गो० टी०–दृष्ट्वेति । फलमाल्यकृतव्यग्राः फलमाल्यार्थं व्यग्रा इत्यर्थः । नानुदात्तपरिच्छदान् अकृष्टवस्त्राभरणादिकान् ॥ २२ ॥ २३ ॥

२५] ति० टी०–लज्जितोऽभवत् । अयोध्यातोऽप्यधिकसौभाग्यदर्शनाल्लज्जा । परस्त्रीदर्शनकृता लज्जेत्यन्ये ॥ २५ ॥

रा० टी०–कूजितमिति । सौमित्रिः नूपुरादीनां स्वनं निशम्य श्रुत्वा लज्जितः बहुस्त्रीमात्रसांनिध्यप्राप्त्या व्रीडितोऽभवत् ॥ २५ ॥

गो० टी०–कूजितमिति । लज्जितोऽभवत् उपरिसुरतयोतकत्वादिति भावः ॥ २४ ॥

२६] ति० टी०–रोषवेगेन प्रकुपितः नेदानीमपि कामभोगं त्यजतीति कोपवृद्धिः । ' रोषवेगप्रवलितः ' इति पाठान्तरम् । अर्थस्तुल्यः । आभरणस्वनं श्रुत्वा स्त्रीणां ततो निवृत्तये ज्यास्वनं चकार ॥ २६ ॥

रा० टी०–रोषेति । आभरणस्वनं श्रुत्वा रोषवेगप्रचलितः रोषवेगः प्रचलितो निवृत्तो यस्य सः तिरोहितकोप इत्यर्थः, वीरो लक्ष्मणः शब्देन दिशः पूरयन् सन् ज्यास्वनं चकार । सुग्रीवानवधानतानिवृत्तये इति शेषः २६ ॥

गो० टी०–रोषेति । रोषवेगप्रकुपितः रोषप्रवृद्धः, प्रकोपशब्दो ऽभिवृद्धवाची ॥ २५ ॥

२७–२९] ति० टी०–तदेवाह–चारित्रेणेति । चारि-

१ नानाजनसमाकुला इति गो. पाठः । २ प्रविश्येति गो. पाठः । ३ उपशोभितमिति गो. पाठः । ४ तृप्तान्नापि चान्यग्रानिति गो. पाठः ५ निनदमिति गो. पाठः । ६ समिति गो. पाठः । ७ शोकेति गो. पाठः । ८ स इति रा. पाठः ।

अङ्गदेन समाख्यातो ज्यास्वनेन च वानरः । बुबुधे लक्ष्मणं प्राप्तं मुखं चास्योपशुष्यत ॥ ३० ॥
ततस्तारां हरिश्रेष्ठः सुग्रीवः प्रियदर्शनाम् । उवाच हितमव्यग्रस्त्रासंभ्रान्तमानसः ॥ ३१ ॥
किं नु रूक्षकारणं सुभ्रु प्रकृत्या मृदुमानसः । सरोष इव संप्राप्तो येनायं राघवानुजः ॥ ३२ ॥
किं पश्यसि कुमारस्य रोषस्थानमनिन्दिते । न खल्वकारणे कोपमाहरेन्नरपुङ्गवः ॥ ३३ ॥
येंद्यस्य कृतमस्माभिर्बुध्यसे किंचिदप्रियम् । तद्बुद्ध्या संप्रधार्याशु क्षिप्रमेवाभिधीयताम् ॥ ३४ ॥
अथवा स्वयमेवैनं द्रष्टुमर्हसि भामिनि । वचनैः सान्त्वयुक्तैश्च प्रसादयितुमर्हसि ॥ ३५ ॥
त्वद्दर्शने विशुद्धात्मा न स्म कोपं करिष्यति । नहि स्त्रीषु महात्मानः क्वचित्कुर्वन्ति दारुणम् ॥ ३६ ॥
त्वया सान्त्वैरुपक्रान्तं प्रसन्नेन्द्रियमानसम् । ततः कमलपत्राक्षं द्रक्ष्याम्यहमरिन्दमम् ॥ ३७ ॥

त्रेण श्रीगोष्ठ्यां प्रवेष्टुं नोचितमित्याचारपर्यालोचनयाऽपकृष्टो निवर्तितान्तःपुरप्रवेशः सन्नेकान्तमाश्रित्य रामकोपसमन्वितो रामकार्याप्रवृत्तिदर्शनजकोपेन समन्वितस्तस्थौ ॥ २७–२९ ॥

रा० टी०–चारित्रेणेति । रामकोपसमन्वितः कोपविरामविशिष्टः चारित्रेण श्रीसमूहाप्रवेशनरूपस्वसदाचारेण हेतुना अपकृष्टः निवृत्तोत्तरदेशगमनः लक्ष्मण एकान्तमाश्रित्य तस्थौ ॥२७॥

गो० टी०–चारित्रेणेति । रामशोकसमन्वितः रामविषयशोकसमन्वितः एकान्तं श्रीप्रसङ्गरहितप्रदेशम् ॥ २६ ॥

रा० टी०–तेनेति । सुग्रीवः चापस्वनेन आगमनं लक्ष्मणस्येति शेषः, विज्ञाय त्रस्तः सन् वरासनात् चचाल ॥ २८ ॥

रा० टी०–विज्ञानसूचकं तद्विचारमाह–अङ्गदेनेति । पुरस्तात् पूर्वमङ्गदेन यथा येन प्रकारेण प्रतिवेदितं तेन प्रकारेणैव स एष सौमित्रिः संप्राप्तः इति व्यक्तं ज्यास्वनश्रवणेन स्फुटम् ॥ २९ ॥

गो० टी०–तेनेति । सौमित्रिः संप्राप्त इत्यागमनं विज्ञायेति संबन्धः । संचचाल वरासनात् लाङ्गूलचालनमाल्यच्छेदनादिकापेयव्यापारानकरोदित्यर्थः ॥ २७–२९ ॥

३०–३१] ति० टी०–समाख्यातो बोधितलक्ष्मणागमनः । उपशुष्यतोपाशुष्यत ॥ ३० ॥ ३१ ॥

रा० टी०–शब्दश्रवणानन्तरकालिकं सुग्रीववृत्तान्तमाह–अङ्गदेनेति । अङ्गदेन ज्यास्वनेन च समाख्यातो वानरः सुग्रीवः प्राप्तं समीपमागतं लक्ष्मणं बुबुधे, अत एव अस्य सुग्रीवस्य मुखमुपशुष्यत उपाशुष्यत । एतेन तस्य भीतत्वं व्यक्तम् ॥ ३० ॥

रा० टी०–तत इति । त्रासेन उद्वेगेन संभ्रान्तं मानसं यस्य स सुग्रीवः अव्यग्रः सावधानो भूत्वेति शेषः, हितं वाक्यं तारामुवाच ॥ ३१ ॥

गो० टी०–तत इति । अव्यग्रः कार्याश इति शेषः ३०-३५

३२] ति० टी०–सरोष इव सरोष एव ॥ ३२ ॥

रा० टी०–तद्वचनाकारमाह–किमिति । सुभ्रु हे सुभ्रूः! प्रकृत्या स्वभावेनैव मृदुमानसो राघवानुजः येन सरोष इव संप्राप्तः तत् रुट्कारणं किं, न जानामीत्यर्थः ॥ ३२ ॥

३३] ति० टी०–रोषस्थानं रोषकारणं ममापराधमित्यर्थः ॥ ३३ ॥

रा० टी०–किमिति । कुमारस्य लक्ष्मणस्य रोषस्थानं रोषकारणं किं पश्यसि जानासि । नन्वस्तु कारणमित्यत आह–अकारणे कोपकारणाभावे कोपं नैवाहरेत् प्राप्नुयात् ॥ ३३ ॥

३४] ति० टी०–अस्माभिः कृतं यत्किंचिदित्यन्वयः ३४॥

रा० टी०–यदीति । यदि अस्य रामस्य किंचिदपि अप्रियमस्माभिः कृतं त्वं यदि बुध्यसे तर्हि बुद्ध्या मनसा आशु संप्रधार्य संचिन्त्य क्षिप्रमभिधीयतां कथ्यताम् ॥ ३४ ॥

३५] ति० टी०–निर्निमित्तकोपासंभवान्निमित्तं चानिर्णीय स्वस्य समीपगमनमनुचितमिति पक्षान्तरं गृह्णाति–अथवेति । स्वयमेव मां विहायेत्यर्थः ॥ ३५ ॥

रा० टी०–अपराधनिश्चयस्य सत्त्वे असत्त्वे वा स तु सर्वथा सान्त्वनीय एवेति पक्षान्तरमाह–अथवेति । हे भामिनि ! एनं लक्ष्मणं त्वं स्वयमेव द्रष्टुमर्हसि । तत्प्रयोजनमाह–सान्त्वयुक्तैः वचनैः प्रसादयितुमर्हसि ॥ ३५ ॥

३६] ति० टी०–विशुद्धात्मा गतक्रोधचित्तः ॥ ३६ ॥

रा० टी०–ननु स्वयैव कथं न प्रसाद्यते इत्यत आह–त्वदिति । त्वद्दर्शनेन त्वदवलोकनमात्रेण विशुद्धः विगतमदपराधशङ्कावान् आत्मा अन्तःकरणं यस्य सः लक्ष्मणः कोपं नैव करिष्यति निवर्तयिष्यतीत्यर्थः । ननु त्वदपराधशङ्क्या मां दण्डयिष्यतीत्यत आह–महात्मानः श्रीषु क्वचित् कदाचिदपि दारुणं कर्म न कुर्वन्ति ॥ ३६ ॥

३७] ति० टी०–उपक्रान्तमुपक्रान्तक्षमापनम् ॥ ३७ ॥

रा० टी०–त्वयेति । सान्त्वैः सान्त्वनवचनैः त्वया उपक्रान्तं प्राप्तमत एव प्रसन्नेन्द्रियमानसम् अरिन्दमं लक्ष्मणमहं द्रक्ष्यामि ॥ ३७ ॥

१ स्खलितमिति गो. पाठः । २ व्यशुष्यतेति गो. पाठः । ३ तदिति गो. पाठः । ४ सत्त्वम इति गो. पाठः । ५ यदिति गो. पाठः । ६ ऽर्हसि भाषितुमिति गो. पाठः । ७ भाषितुमिति गो. पाठः । ८ दर्शनविशुद्धेति गो. रा. पाठः । ९ स इति गो. पाठः ।

सा प्रस्खलन्ती मदविह्वलाक्षी प्रलम्बकाञ्चीगुणहेमसूत्रा ।
सलक्षणा लक्ष्मणसंनिधानं जगाम तारा नमिताङ्गयष्टिः ॥ ३८ ॥
स तां समीक्ष्यैव हरीशपत्नीं तस्थावुदासीनतया महात्मा ।
अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः स्त्रीसंनिकर्षोद्विनिवृत्तकोपः ॥ ३९ ॥
सा पानयोगाच्च निवृत्तलज्जा दृष्टिप्रसादाच्च नरेन्द्रसूनोः ।
उवाच तारा प्रणयप्रगल्भं वाक्यं महार्थं परिसान्त्वरूपम् ॥ ४० ॥
किं कोपमूलं मनुजेन्द्रपुत्र कस्ते न संतिष्ठति वाङ्निदेशे ।
कः शुष्कवृक्षं वनमापतन्तं दवाग्निमासीदति निर्विशङ्कः ॥ ४१ ॥
स तस्या वचनं श्रुत्वा सान्त्वपूर्वमशङ्कितः । भूयः प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ॥ ४२ ॥

गो० टी०–त्वयेति । त्वया सान्त्वैः प्रसन्नेन्द्रियमानसमिति संबन्धः । उपक्रान्तम् उपागतम् ॥ ३६ ॥

३८] ति० टी०–प्रस्खलन्ती मदालसतया पदे पदे स्खलन्ती मदविह्वलाक्षी भोगार्थं कृतमधुपानमदेनालसचकितनेत्रा प्रलम्बे काञ्चीगुणहेमसूत्रे यस्याः काञ्चीगुणो रशना नमिताङ्गयष्टिः स्तनभारेणेति शेषः ॥ ३८ ॥

रा० टी०–सेति । प्रलम्बे काञ्चीगुणहेमसूत्रे यस्याः सा सलक्षणा सल्लक्षणयुक्ता मदेन विह्वले आघूर्णिते अक्षिणी यस्याः सा अत एव प्रस्खलन्ती पदे पदे निपतन्ती तारा लक्ष्मणसंनिधानं जगाम ॥ ३८ ॥

गो० टी०–सेति । सा कान्तसंश्लेषं विनाऽपि रमणीयगमनसौन्दर्या प्रस्खलन्ती संश्लेषकृतायासेन पदे पदं कृत्वा गच्छन्ती मदविह्वलाक्षी भोगसंवर्धकमधुपानमदेन विह्वलनेत्रा प्रलम्बे काञ्चीगुणहेमसूत्रे यस्याः सा प्रलम्बकाञ्चीगुणहेमसूत्रा ईषच्छिथिलदुकूलतया शयने यथा स्थिता तथैव समागतेत्यर्थः । सलक्षणा व्यक्तैः संभोगलक्षणैः समागता लक्ष्मणसन्निधानं जगाम । किं मातुरपि गोप्यमस्तीत्यागता नमिताङ्गयष्टिः द्रवीभावावस्थायां नमितं नार्जवमर्हति अतः नम्रतैव यथा निरूपकं भवति तथा स्थितेत्यर्थः ॥ ३७ ॥

३९] ति० टी०–हरीशपत्नीं सुग्रीवपत्नीं ताराम् ॥३९॥

रा० टी०–स इति । मनुजेन्द्रपुत्रो लक्ष्मणः हरीशपत्नीं तारां समीक्ष्यैव अवाङ्मुखः सन् उदासीनतया तस्थौ, स्त्रीसंनिकर्षात् निवृत्तकोपश्चाभूत् ॥ ३९ ॥

गो० टी०–स तामिति । उदासीनतया तत्कान्तिनिर्वर्णनानादरतया ॥ ३८ ॥

४०] ति० टी०–प्रणयप्रगल्भं मैत्रीसमर्थनसमर्थम् । परिसान्त्वरूपं परितः सान्त्वरूपम् । 'पतिसान्त्व–' इति पाठः सुगमः ॥ ४० ॥

रा० टी०–सेति । पानयोगात् मादकपेयद्रव्यादिसंबन्धात् नरेन्द्रसूनोः दृष्टिप्रसादात् प्रसन्नतयाऽवलोकनाच्च निवृत्ता लज्जा यस्याः सा तारा प्रणयप्रगल्भं दृढस्नेहम् अत एव परिसान्त्वरूपम् अत एव महार्थं वाक्यमुवाच ॥ ४० ॥

गो० टी०–सेति । नरेन्द्रसूनोः धार्मिकस्य लक्ष्मणस्य दृष्टिप्रसादाद्धेतोः प्रणयप्रगल्भं स्नेहदृष्टम् ॥ ३९ ॥

४१] ति० टी०–वाङ्निर्देशेऽनुशिष्टकार्यानुष्ठाने । आपतन्तं दग्ध्वा तिष्ठन्तम् ॥ ४१ ॥

रा० टी०–तद्वचनाकारमाह–किमिति । हे मनुजेन्द्रपुत्र! ते वाङ्निर्देशे वचनेनादिष्टे को न संतिष्ठति अत एव को विशङ्कः शुष्कवृक्षं वनमापतन्तं दावाग्निमासीदति निपतति न कोऽपीत्यर्थः, अतः कोपमूलं तव कोपकारणं किं तद्वदेत्यर्थः ॥ ४१ ॥

गो० टी०–किमिति । चतुरो मासान् राजपुत्रौ विषुत्स्तनितसात्कृत्य स्वयं भोगप्रवणा स्थिता तज्जानन्त्यपि किं कोपमूलमित्याह–तत्कृपारसविशेषवशतया दृष्टिप्रसादादिति सुक्तम् । मनुजेन्द्रपुत्र! षष्टिवर्षसहस्राणि राज्यं परिपाल्य प्रजापरार्धं क्षान्तवतो दशरथस्य पुत्रस्त्वम् अपराधिजनानां शिरच्छेदनं करिष्यामीति संप्रति समागतोऽसि सम्यग्धी भवतो गतिः । कस्ते न संतिष्ठति वाङ्निर्देशे यस्ते वाङ्निर्देशे न तिष्ठति सः कः । अशास्त्रवश्यस्य दृष्टे वस्तुनि सपदि चापलं कृत्वा निवर्तितुमक्षमस्य तिर्यग्जनस्य च्युतान् भोगान् स्वयमेव दत्वा स्वाज्ञां कुर्वन्तं हिंसितुमिच्छसि । क इत्यादि । दवाग्नौ पतन् चपलः शलभः किलेति भावः । तद्वच्चपलोऽयमित्येवं दृष्टान्तः । संतिष्ठतीत्यार्षं परस्मैपदम् ॥ ४० ॥

४२] ति० टी०–भूयोऽधिकं प्रणयप्रकाशपूर्वं दृष्टोऽर्थो यस्मिंस्तत् ॥ ४२ ॥

रा० टी०–स इति । स लक्ष्मणः तस्यास्तारायाः सान्त्वपूर्वमशङ्कितं सुग्रीवकापट्यशङ्कानिवर्तकं प्रणयेन स्नेहेन दृष्टो बोधितोऽर्थो येन तत् वचनं श्रुत्वा अब्रवीत् ॥ ४२ ॥

गो० टी०–स इति । असंशयं निःसंशयम् अकुटिलमिति यावत् । प्रणयदृष्टार्थं स्नेहसंदर्शितप्रयोजनम् ॥ ४१ ॥

१ वीति गो. पाठः । २ समीचीति युक्तं भाति ।

किमयं कामवृत्तस्ते लुप्तधर्मार्थसंग्रहः । भर्ता भर्तृहिते युक्ते न चैवमवबुध्यसे ॥ ४३ ॥
न चिन्तयति राज्यार्थं सोऽस्माञ्शोकपरायणान् । सामान्यपरिषत्तारे काममेवोपसेवते ॥ ४४ ॥
स मासांश्चतुरः कृत्वा प्रमाणं प्लवगेश्वरः । व्यतीतांस्तान्मदोदग्रो विहरन्नावबुध्यते ॥ ४५ ॥
नहि धर्मार्थसिद्ध्यर्थं पानमेवं प्रशस्यते । पानादर्थश्च कामश्च धर्मश्च परिहीयते ॥ ४६ ॥
धर्मलोपो महांस्तावत्कृते ह्यप्रतिकुर्वतः । अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ॥ ४७ ॥
मित्रं ह्यर्थगुणश्रेष्ठं सत्यधर्मपरायणम् । तद्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितम् ॥ ४८ ॥
तदेवं प्रस्तुते कार्ये कार्यमस्माभिरुत्तरम् । तत्कार्यं कार्यतत्त्वज्ञे त्वमुदाहर्तुमर्हसि ॥ ४९ ॥

४३] ति० टी०–अयं ते भर्ता लुप्तधर्मार्थसंग्रहो वर्तते । अर्थोऽत्र मित्ररूपः एनं किं न बुध्यसे ॥ ४३ ॥

रा० टी०–तद्वचनाकारमाह–किमिति । भर्तृहिते युक्ते नियुक्ते हे तारे ! कामवृत्तः कामे एव वृत्तः प्रवृत्तः अत एव लुप्तधर्मार्थसंग्रहः ते भर्ता अस्तीति शेषः । अतः एनं भर्तारं त्वं कथं न बुध्यसे बोधयसि ॥ ४३ ॥

गो० टी०–अतीवायुक्तं तव भर्तुर्विपयप्रावण्यमित्याह–किमयमित्यादिना । युक्ते सक्ते इति संबुद्धिः । अयं कामवृत्त इति एनं नावबुध्यसे किमिति संबन्धः ॥ ४३ ॥

४४] ति० टी०–लुप्तधर्मादित्वमेवाह–नेति । राज्यार्थं राज्यस्थैर्यार्थं सामान्या परिषद्यस्य तादृश. भूत्वेति शेषः ॥४४॥

रा० टी०–तल्लोपाकारमाह–नेति । राज्यार्थं स्वराज्यस्थित्यर्थं शोकपरायणान् अस्मान् सामात्यपरिषत्सुग्रीवः न चिन्तयति तत्र हेतु–सः सुग्रीवः काममेवोपसेवते ॥ ४४ ॥

गो० टी०–न चिन्तयतीति । राज्यार्थं राज्यरूपप्रयोजनम् ॥ ४३ ॥

४५–४६] ति० टी०–विहरंस्त्वया क्रीडन् ॥४५॥४६॥

रा० टी०–स्वकर्मचिन्तनाभावे गमकमाह–स इति । स सुग्रीवः चतुरो मासान् प्रमाणम् अन्वेषणमर्यादां कृत्वा मदोदग्रः मादकरसविशेषपानादिनोदग्रः प्रवृद्धमदः अत एव विहरन्स्तन् नावबुध्यते प्रमाणमित्यनुकृष्यते ॥ ४५ ॥

गो० टी०–स इति । प्रमाणं मर्यादाम् ॥ ४४ ॥

रा० टी०–मादकरसविशेषपाने दोषमाह–नहीति । धर्मार्थसिद्ध्यर्थं पानं नैव प्रशस्यते । तत्र हेतुः–पानात् अर्थादिः परिहीयते ॥ ४६ ॥

गो० टी०–न ह्रीति । धर्मार्थसिद्ध्यर्थं यतमानस्येति शेषः ॥ ४५ ॥

४७] ति० टी०–पानादर्थादिनाशमनुपपादयति–धर्मेति । महान्धर्मलोपः प्रतिज्ञाहानिरूपः । कृते उपकारेऽप्रतिकुर्वतः प्रत्युपकारमकुर्वतः । तावत्प्रथमम् ततो गुणवतो मित्रस्य मैत्रीनाशे महानर्थलोपो भवति ॥ ४७ ॥

रा० टी०–धर्मेति । गुणतः अनेकोपकृतिरूपगुणविशिष्टस्य मित्रस्य मित्रार्थं कृते शिष्टैराचरिते प्रत्युपकारे अप्रतिकुर्वतः प्रवृत्तिरहिततया वर्तमानस्य जनस्य नाशे विनाशाय महान्धर्मलोपः अर्थलोपश्च धर्मार्थयोर्लोपे कामलोपस्य अर्थसिद्धत्वात् कामलोपश्च भवतीति सिद्धम् । नाश इति क्विबन्तप्रकृतिकचतुर्थ्यन्तम् ॥ ४७ ॥

गो० टी०–धर्मेति । कृते उपकारविषये अप्रतिकुर्वतः महान् धर्मलोपो भवेत् । प्रत्युपकाराकरणाद्गुणवतो मित्रस्य नाशे सति महानर्थलोपो भवेत् चकारात्कामलोपश्च ॥ ४६ ॥

४८] ति० टी०–अर्थगुणश्रेष्ठं मित्रार्थसाधनलक्षणश्रेष्ठगुणवत् सत्यधर्मपरायणमेतद्गुणद्वयवन्मित्रं हि प्रसिद्धम् तद्वय गुणद्वयमपि तव भर्त्रा परित्यक्तम्, न तु धर्मे मैत्रीपालनरूपे धर्मे व्यवस्थितम् ॥ ४८ ॥

रा० टी०–मित्रमिति । अर्थगुणैः अर्थसाधनीभूतवात्सल्यादिभिः श्रेष्ठं सर्वोत्कृष्टं सत्यधर्मपरायणं सत्यस्य धर्माणां वेदविहितकर्मणां च परायणं परमाश्रयः तत्तत्फलादिदातेत्यर्थः, तत् मित्रं त्वद्भर्त्रा परित्यक्तम् अत एव धर्मे नैव व्यवस्थितं सनातनो धर्मस्त्यक्त इत्यर्थः, तत् तस्मात् हेतोः द्वयमुभयलोकसुखं परित्यक्तम् । परित्यक्तमित्युभयान्वयि ॥ ४८ ॥

गो० टी०–उक्तमर्थमुपपादयति–मित्रं ह्रीति । सत्यधर्मपरायणम् मित्रं अर्थगुणश्रेष्ठं हि । अत्र गुणशब्दः कामवाची, अर्थकामयोर्मूलत्वान्मित्रं ताभ्यां श्रेष्ठं हि तादृशं मित्रं त्यजता सुग्रीवेण तद्वयम् अर्थकामद्वयम् परित्यक्तं तु परित्यक्तमेव । धर्मे तु न व्यवस्थितम् धर्मोऽपि परित्यक्त इत्यर्थः ॥ ४७ ॥

४९] ति० टी०–तत्तस्तस्मादेवं सति प्रस्तुते कार्ये प्रस्तुतकार्यसिद्धिनिमित्तमित उत्तरं यदस्माभिः कार्यं तत्कार्यमुदाहर्तुमर्हसि ॥ ४९ ॥

रा० टी०–तदिति । कार्ये सुग्रीवकर्तव्ये एवमनेन प्रकारेण प्रस्तुते मया कथिते सति यदस्माभिः कार्यं कर्तव्यं तत् कार्यमुत्तरं श्रेष्ठं यथा भवति तथा त्वमुदाहर्तुं वक्तुमर्हसि ॥४९॥

गो० टी०–तदिति । तत्तस्मात् कार्यतत्त्वज्ञे ! कार्ये धर्मार्थकामविलोपहेतुभूते मित्रपरित्यागलक्षणे कार्ये एवं प्रस्तुते सति यदुत्तरं कार्यमस्माभिः कार्यं कर्तव्यं तत् उदाहर्तुं वक्तुम अर्हसि ॥ ४८ ॥

१ नेति गो. पाठः । २ सामात्येति गो. रा. पाठः । ३ मदव्यग्र इति गो. पाठः । ४ एवमिति गो. पाठः । ५ यदिति गो. पाठः । ६ तदिति गो.पाठः।

सा तस्य धर्मार्थसमाधियुक्तं निशम्य वाक्यं मधुरस्वभावम् ।
तारा गतार्थे मनुजेन्द्रकार्ये विश्वासयुक्तं तमुवाच भूयः ॥ ५० ॥
न कोपकालः क्षितिपालपुत्र न चापि कोपः स्वजने विधेयः ।
त्वदर्थकामस्य जनस्य तस्य प्रमादमप्यर्हसि वीर सोढुम् ॥ ५१ ॥
कोपं कथं नाम गुणप्रकृष्टः कुमार कुर्यादपकृष्टसत्त्वे ।
कस्त्वद्विधः कोपवशं हि गच्छेत्सत्त्वावरुद्धस्तपसः प्रसूतिः ॥ ५२ ॥
जानामि कोपं[1] हरिवीरबन्धोर्जानामि कार्यस्य च कालसङ्गम् ।
जानामि कार्यं त्वयि यत्कृतं नस्तच्चापि जानामि यदत्र कार्यम् ॥ ५३ ॥
तच्चापि जानामि तथाविधं[2] बलं नरश्रेष्ठ शरीरजस्य ।
जानामि यस्मिंश्च जनेऽवबद्धं कामेन सुग्रीवमसक्तमद्य ॥ ५४ ॥

५०] ति० टी०–धर्मार्थसमाधियुक्तं तत्संबन्धयुक्तम् । अगतार्थे भष्टप्रयोजने मनुजेन्द्रकार्ये तद्विषये विश्वासयुक्तं यथा तथा भूयः पुनरुवाच ॥ ५० ॥

रा० टी०–सेति । सा तारा धर्मार्थसमाधियुक्तं धर्मार्थयोः समाधिर्निश्चयस्तेन युक्तं धर्मार्थयोर्निश्चायकमित्यर्थः, मधुरस्वभावं मधुरस्वभावबोधकं वाक्यं निशम्य आगतार्था आगतो ज्ञातोऽर्थो लक्ष्मणागमनप्रयोजनं यया सा तारा मनुजेन्द्रकार्ये तत्कार्यसिद्ध्यर्थं विश्वासयुक्तं वचनं भूय उवाच ॥ ५० ॥

गो० टी०–सेति । धर्मार्थयोः समाधिना संबन्धेन युक्तं गतार्थे प्रयोजनयुक्तं नरेन्द्रकार्ये विषये विश्वासयुक्तम् ॥ ४९ ॥

५१] ति० टी०–न कोपकालः अर्थस्यानीतत्वादिति भावः । प्रमादमज्ञातभूतमपराधम् ॥ ५१ ॥

रा० टी०–नेति । हे क्षितिपालपुत्र ! कोपकालः क्रोधसमयो न क्रोधस्य कार्यविलम्बकारकत्वमस्तीति तात्पर्यम् । अपि अन्यदुच्यते स्वजने कोपो न विधेयः । नन्वेवं सत्यपराधे कथं न कोप इत्यत आह–त्वदर्थकामस्य त्वदर्थसाधनेच्छावतः जनस्य सुग्रीवस्य प्रमादमनवधानतामपि सोढुमर्हसि ॥ ५१ ॥

गो० टी०–नेति । न कोपकालः सुग्रीवस्य कामार्तत्वादिति भावः । त्वदर्थकामस्य त्वत्प्रयोजनपरस्य जनस्य सुग्रीवस्य ॥ ५० ॥

५२] ति० टी०–तस्य सोढव्यतां समर्थयति–कोपं कथं नामेति । अपकृष्टसत्त्वे हीने सत्त्वावरुद्धः सहजसत्त्वगुणावरुद्धविपरीतव्यापारः । ' सत्त्वाविरुद्धः ' इति पाठे सहजगुणाविरुद्धव्यापारः । अत एव तपसः प्रसूतिः ॥ ५२ ॥

रा० टी०–अस्मादृशेषु तव कोपः सर्वदैवानुचित इति बोधयन्ती आह–कोपमिति । हे कुमार ! गुणप्रकृष्टः गुणैः श्रेष्ठः पुरुषः अपकृष्टसत्त्वे कोपं कथं कुर्यात् न कुर्यादित्यर्थः । नन्वेवं कोपो दुर्निवार एवेत्यत आह–सत्त्वावरुद्धः विशुद्धसत्त्वमयः अत एव तपसो विचारस्य प्रसूतिः कारणम् अतिविचारवानित्यर्थः, त्वद्विधः कः कोपवशं गच्छेत् प्राप्नुयात् न कोऽपीत्यर्थः ॥ ५२ ॥

गो० टी०–कोपमिति । गुणप्रकृष्टः उत्कृष्टवीर्यगुणः अपकृष्टसत्त्वे हीनबले सत्त्वावरुद्धः व्यवसाययुक्तः 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ' इत्यमरः । तपसः शान्तिरूपस्य प्रसूतिः उत्पत्तिस्थानम् ॥ ५१ ॥

५३] ति० टी०–जानामि कोपमिति । हरिवीरबन्धो रामस्य कोपं कोपनिमित्तं कार्यस्य कालसङ्गं विलम्बं च जानामि । त्वयि यदायत्तं न कार्यं राज्यदानलक्षणं त्वया कृतं तदपि जानामि । यदत्र विषये कार्यं प्रतिकर्तव्यरूपं तदपि जानामि ॥ ५३ ॥

रा० टी०–जानामीति । कोपं त्वत्क्रोधहेतुमहं जानामि । कार्यस्य अन्वेषणस्य कालसङ्गं योग्यकालसंबन्धं च जानामि । त्वयि नोऽस्माकं यत्कार्यं कर्तव्यं तदपि जानामि । यत् विलम्बितं सुग्रीवेण कृतं तदपि जानामि । अत्र अस्मिन् समये यत् कार्यम् अनुष्ठेयं तदपि जानामि ॥ ५३ ॥

गो० टी०–मद्दोषमेव जानासि न तु तद्धेतूनित्यत्राह–जानामीति । हरिवीरबन्धोः रामस्य रोषं जानामि रोषममोघस्वरूपं जानामीत्यर्थः । कार्यस्य च कालसङ्गम् उद्योगरूपकार्यस्य कालविलम्बनं च जानामि । जानामि कार्यं त्वयि यत्कृतं न यत् वालिवधरूपं कार्यं नः अस्माकं कृतम् त्वयि विद्यमानं तदपि जानामि । यदत्र कार्यम् अस्मिन्नुपकारे अस्माभिर्यत्सीतान्वेषणादिकं कर्तव्यं तच्चापि जानामि ॥ ५२ ॥

५४] ति० टी०–तव कोपस्यायुक्तत्वे हेतुमपि जानामीत्याह–तच्चापीति । शरीरजस्य कामस्य तथाऽविषह्यं बलं तच्चापि जानामि । एवं सुग्रीवं यस्मिञ्जने जीवने कामेनावबद्धं संभावयसि तं च जानामि । तथान्यत्र कृत्येऽसक्तमव्यापारं च जानामि ॥ ५४ ॥

रा० टी०–जानामीति । शरीरजस्य कामस्य यदविषह्यं बलं तच्चापि जानामि । यस्मिन् जने स्त्रियामित्यर्थः, कामेन अवबद्धं सुग्रीवस्य अत्यासक्तिस्तमपि जानामि अथ असक्तम् आसक्तिरहितं सुग्रीवं च जानामि ॥ ५४ ॥

१ऽतीति गो. पाठः । २ रोषमिति गो. पाठः । ३ यथेति गो. पाठः ।

न कामतन्त्रे तव बुद्धिरस्ति त्वं वै यथा मन्युवशं प्रपन्नः ।
न देशकालौ हि यथार्थधर्मावविवेक्षते[1] कामरतिर्मनुष्यः ॥ ५५ ॥
तं कामवृत्तं मम संनिकृष्टं[2] कामाभियोगाच्च विमुक्तलज्जम्[3] ।
क्षमस्व तावत्परवीरहन्तस्त्वद्भ्रातरं वानरवंशनाथम् ॥ ५६ ॥
महर्षयो धर्मतपोभिरामाः[4] कामानुकामाः प्रतिबद्धमोहाः ।
अयं प्रकृत्या चपलः कपिस्तु कथं न सज्जेत सुखेषु राजा ॥ ५७ ॥
इत्येवमुक्त्वा वचनं महार्थं सा वानरी लक्ष्मणमप्रमेयम् ।
पुनः सखेदं मदविह्वलाक्षी[5] भर्तुर्हितं[6] वाक्यमिदं बभाषे ॥ ५८ ॥
उद्योगस्तु चिराज्ञप्तः सुग्रीवेण नरोत्तम । कामस्यापि विधेयेन तवार्थप्रतिसाधने ॥ ५९ ॥
आगता हि महावीर्या हरयः कामरूपिणः । कोटीः शतसहस्राणि नानानगनिवासिनः ॥ ६० ॥

गो० टी०—तञ्चेति । हे नरश्रेष्ठ ! शरीरजस्य कामस्य बलं यथा अविषह्यं तत्रापि जानामि । अथ सुग्रीवं यस्मिन् जने कामेन असक्तम् अनवरतम् अवबद्धं जानामि तं च स्त्रीजनं जानामीति योजना ॥ ५३ ॥

५५] ति० टी०—नन्वेवं सति मम कोपस्यायुक्तता कथमत आह—नेति । यथा त्वं वै निश्चयेन मन्युवशं प्रपन्नो दृश्यसे तथा जानामि । कामतन्त्रे कामस्वभावपरिज्ञाने तव बुद्धिर्नास्ति चिरकालं स्त्रीसङ्गाभावादिति भावः तमेव कामस्वभावमाह—नेति । हि प्रसिद्धम् । यथा देशकालौ भोगायोग्यौ न जानाति तथार्थधर्मावपि नावेक्षते । मनुष्य इति मनुष्योऽपि न जानाति किमुत तिर्यग्जन्तुरिति भावः ॥ ५५ ॥

रा० टी०—ननु किमन्ये न जानन्तीत्यत आह—नेति । कामतन्त्रे कामाधीने तव बुद्धिर्ज्ञानं यथा यथावन्नास्ति कामवशो न हन्तव्य इति न जानासीत्यर्थः, अत एव त्वं मन्युवशं प्रपन्नः प्राप्तः । कामतन्त्रत्वं बोधयन्ती आह—कामरतिर्मनुष्यः यथा अर्थधर्मौ न अवेक्षते तथा देशकालावपि नावेक्षते एतेन यदि मनुष्यो नावेक्षते तर्हि वानरो नावेक्षते इति किं वक्तव्यमिति काव्यार्थापत्तिरलंकारो व्यक्तः ॥ ५५ ॥

गो० टी०—लक्ष्मणसंरम्भोपशमनाय स्वप्रागल्भ्येन लोकस्थितिं दर्शयति—न कामतन्त्रे इत्यादिना । त्वं यथा येन प्रकारेण मन्युवशं प्रपन्नः तेन प्रकारेण कामतन्त्रे रतिक्रीडादौ तव बुद्धिर्नास्ति कामतन्त्राभिज्ञश्चेत्तादृशं न द्विष्या इति भावः । किं कामतन्त्रप्रवणः किमपि न जानातीत्यत्राह—न देशकालाविति ॥ ५४ ॥

५६] ति० टी०—मम संनिकृष्टं स्वभार्यायां मम समीपे कामवशाद्वर्तमानम् कामाभियोगः कामावेशः क्षमस्वेति । परवशप्रवृत्तापराधत्वात्स्वभ्रातृत्वाच्च क्षमैवात्र योग्या, न तु कोप इत्याशयः ॥ ५६ ॥

रा० टी०—तमिति । कामवृत्तं कामे एव प्रवृत्तम् अत एव कामाभियोगात् विमुक्तलज्जं मम संनिकृष्टं त्वद्भिया स्त्रीसमुदाये स्थितमित्यर्थः, त्वद्भ्रातरं रामसख्यत्वेन त्वद्बन्धुं वानरवंशनाथं क्षमस्व तदपराधं सहस्वेत्यर्थः ॥ ५६ ॥

गो० टी०—तमिति । मम सन्निकृष्टं समीपस्थम् अत एव कामवृत्तं कामव्यापारमिति क्रमेण योजना ॥ ५५ ॥

५७] ति० टी०—कामवशत्वं नास्यैवेत्याह—महर्षय इति । कामे कामभोगेऽनुकामोऽभिलाषो येषां ते, अत एव स्त्रीषु प्रतिबद्धमोहाः । कपिस्तत्रापि राजा ॥ ५७ ॥

रा० टी०—महर्षय इति । धर्मतपोभ्यामभिरामाः प्राप्तशोभाः अत एव प्रतिबद्धमोहा निवृत्ताविवेकाः महर्षयोऽपि कामानुकामाः विषयाभिलाषिणः सन्तः सज्जन्ते इति शेषः, तर्हि कपिः कथं न सज्जेत ॥ ५७ ॥

गो० टी०—महर्षयोऽपि कामवशाः किमुत पृथग्जन इत्याह—महर्षय इति । धर्मतपसी अभिक्रामयन्त इति धर्मतपोऽभिकामाः कामस्याभिलाषस्य अनु पश्चात् कामो येषां ते कामानुकामाः प्रतिबद्धमोहाः नियतस्त्रीभ्यामोहाः ॥ ५६ ॥

५८] ति० टी०—भर्तुर्हितम् उद्दिश्येति शेषः ॥ ५८ ॥

रा० टी०—इतीति । वानरी सा तारा इति वचनं सखेदमुक्त्वा भर्तुर्हितमिदं वाक्यं पुनर्बभाषे ॥ ५८ ॥

गो० टी०—इतीति । सखेदं सलीलम् ॥ ५७–५९ ॥

५९] ति० टी०—चिराज्ञप्तः त्वदागमनात्पूर्वमेवेति शेषः ५९

रा० टी०—तद्वचनाकारमाह—उद्योग इति । कामस्य विधेयेन वशेनापि सुग्रीवेण तवार्थप्रतिसाधने उद्योगः यत्नः चिरपूर्वमाज्ञप्तः अत एव कोटीशतसहस्राणि कोटीयुक्तानि शतसहस्राणि नानानगनिवासिनो हरय आगताः । श्लोकद्वयमेकान्वयि ॥ ५९ ॥ ६० ॥

६०] ति० टी०—कामविधेयस्योद्योगाज्ञाऽपि न विश्वसनीयेत्यत आह—आगता इति । कोटीः शतेत्यस्य बहुत्वे तात्पर्यम् ॥ ६० ॥

१ न चार्थेति गो. पाठः। २ अपेति गो. पाठः। ३ निकृष्टेति गो. पाठः। ४ कामा इति गो. पाठः। ५ सखेलमिति गो. पाठः। ६ विह्वलं चेति गो. पाठः।

तदागच्छ महाबाहो चारित्रं रक्षितं त्वया । अच्छलं मित्रभावेन सतां दारावलोकनम् ॥ ६१ ॥
तारया चाप्यनुज्ञातस्त्वरया वापि चोदितः । प्रविवेश महाबाहुरभ्यन्तरमरिन्दमः ॥ ६२ ॥
ततः सुग्रीवमासीनं काञ्चने परमासने । महार्हास्तरणोपेते ददर्शादित्यसंनिभम् ॥ ६३ ॥
दिव्याभरणचित्राङ्गं दिव्यरूपं यशस्विनम् । दिव्यमाल्याम्बरधरं महेन्द्रमिव दुर्जयम् ॥ ६४ ॥
दिव्याभरणमालाभिः प्रसादाभिः समन्ततः । संरब्धतररक्ताक्षो बभूवान्तकसंनिभः ॥ ६५ ॥
रुमां तु वीरः परिरभ्य गाढं वरासनस्थो वरहेमवर्णः ।
ददर्श सौमित्रिमदीनसत्त्वं विशालनेत्रः सँ विशालनेत्रम् ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ।

सीतान्वेषणवैमुख्याज्ज्ञातकृतघ्नतादोषोऽपि त्वं जागृहि न वालिनमनुसरेति लक्ष्मणः सुग्रीव तर्जयते ।

तमप्रतिहतं क्रुद्धं प्रविष्टं पुरुषर्षभम् । सुग्रीवो लक्ष्मणं दृष्ट्वा बभूव व्यथितेन्द्रियः ॥ १ ॥
क्रुद्धं निःश्वसमानं तं प्रदीप्तमिव तेजसा । भ्रातुर्व्यसनसंतप्तं दृष्ट्वा दशरथात्मजम् ॥ २ ॥
उत्पपात हरिश्रेष्ठो हित्वा सौवर्णमासनम् । महान्महेन्द्रस्य यथा स्वलंकृत इव ध्वजः ॥ ३ ॥

६१] ति० टी०—चारित्रं रक्षितं शङ्कित्यन्तःपुरागमनेन । अच्छलं छलमधर्मः, स नेत्यर्थः। मित्रभावेन, न तु विकारेण ६१

रा० टी०—तदिति । यतः चारित्रं सखा प्रबोधनीय इति मर्यादा त्वया रक्षितं तत् तस्मादागच्छ अन्तः प्रविश । नन्वन्तः प्रवेशे अनुचितपरस्त्रीदर्शनं भविष्यतीत्यत आह-मित्रभावेन दारावलोकनं सताम् अच्छलं नाधमः ॥ ६१ ॥

गो० टी०—तदिति । चारित्रं रक्षितं त्वया अन्तःपुरस्त्रयवलोकनमनुचितमिति बहिरेव तिष्ठता त्वया सदाचारः सम्यगनुष्ठित इत्यर्थः, शरणागतरक्षणाचारस्त्वया सम्यगनुष्ठित इति वा । अच्छलम् अदोषावहम् ॥ ६० ॥

६२-६४] ति० टी०—त्वरया रामाज्ञाकरणत्वरया ६२-६४

६५] ति० टी०—प्रमदाभिः समं ददर्शेत्यन्वयः । ततः संरब्धतररक्ताक्षो बभूवेत्यन्वयः ॥ ६५ ॥

रा० टी०—तारयेति । तारया अभ्यनुज्ञातः प्रार्थितः त्वरया अन्वेषणकारणकवेगेन च प्रचोदितो लक्ष्मणः अभ्यन्तरं प्रविवेश ॥ ६२ ॥

रा० टी०—तत इति । ततः प्रवेशानन्तरं महार्हास्तरणोपेते अतिप्रशंसनीयास्तरणविशिष्टे काञ्चने सुवर्णमये परमासने आसीनं दिव्याभरणचित्राङ्गादिविशेषणविशिष्टं प्रमदाभिः समं सहितं सुग्रीवं ददर्श ततो दर्शनानन्तरम् अन्तकसंनिभो लक्ष्मणः संरब्धतररक्ताक्षः अत्यारूढितारुणनयनवान् बभूव । श्लोकत्रयमेकान्वयि ॥ ६३-६५ ॥

गो० टी०—तारयेत्यादि । श्लोकचतुष्टयमेकं वाक्यम् । समाहृतं परिहृतम् । संरब्धतरः कुपिततरः अत एव रक्ताक्षश्च ॥ ६१—६५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

६६] ति०टी०—परिरभ्यावस्थित एव संददर्शेत्यन्वयः॥६६॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०—रुमामिति । रुमां गाढं परिरभ्य स्थितः वरासनस्थः सुग्रीवः सौमित्रिं ददर्श ॥ ६६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

१-२] ति० टी०—तमिति । अप्रतिहतं केनाप्यप्रतिबद्धम् ॥ १ ॥ २ ॥

३] ति० टी०—महान्महेन्द्रध्वजो यथालंकृतः ॥ ३ ॥

रा० टी०—सुग्रीववृत्तान्तमाह—तमित्यादिभिः । क्रुद्धमत एव अप्रतिहतं केनाप्यनिवारितं लक्ष्मणं सुग्रीवो दृष्ट्वा व्यथितेन्द्रियो बभूव ॥ १ ॥

गो० टी०—अथ सुग्रीवं प्रति रामसंदेशकथनं चतुस्त्रिंशे—तमप्रतिहतमित्यादि ॥ १ ॥

रा० टी०—क्रुद्धमिति । तेजसा प्रदीप्तमिव दशरथात्मजं लक्ष्मणं दृष्ट्वा स्वलंकृतो महेन्द्रस्य ध्वज इव आसनं हित्वा हरिश्रेष्ठः उत्पपात भूमौ न्यपतत् । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

१ ऽभीति गो. पाठः । २ चेति गो. रा. पाठः । ३ माल्येति गो. पाठः । ४ समावृतमिति गो. पाठः । ५ रिवति गो. पाठः ।

उत्पतन्तमनूत्पेतू रुमाप्रभृतयः स्त्रियः । सुग्रीवं गगने पूर्णं चन्द्रं तारागणा इव ॥ ४ ॥
संरक्तनयनः श्रीमान्संचचार कृताञ्जलिः । बभूवावस्थितस्तत्र कल्पवृक्षो महानिव ॥ ५ ॥
रुमाद्वितीयं सुग्रीवं नारीमध्यगतं स्थितम् । अब्रवील्लक्ष्मणः क्रुद्धः सतारं शशिनं यथा ॥ ६ ॥
सत्त्वाभिजनसंपन्नः सानुक्रोशो जितेन्द्रियः । कृतज्ञः सत्यवादी च राजा लोके महीयते॥ ७ ॥
यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम् । मिथ्या प्रतिज्ञां कुरुते को नृशंसतरस्ततः ॥ ८ ॥
शतमश्वानृते हन्ति सहस्रं तु गवानृते । आत्मानं स्वजनं हन्ति पुरुषः पुरुषानृते ॥ ९ ॥
पूर्वं कृतार्थो मित्राणां न तत्प्रतिकरोति यः । कृतघ्नः सर्वभूतानां स वध्यः प्लवगेश्वर ॥ १० ॥
गीतोऽयं ब्रह्मणा श्लोकः सर्वलोकनमस्कृतः । दृष्ट्वा कृतघ्नं क्रुद्धेन तन्निबोध प्लवङ्गम ॥ ११ ॥

गो० टी०–क्रुद्धमित्यादि । महेन्द्रस्य ध्वज इव उत्पपात । स्वलंकृत इत्युभयविशेषणम् ॥ २ ॥ ३ ॥

४] ति० टी०–अनूत्पेतुः पश्चादुत्थितवत्यः ॥ ४ ॥

रा० टी०–उत्पतन्तमिति । रुमाप्रभृतयः स्त्रियः उत्पतन्तं सुग्रीवमनूत्पेतुः । तत्र दृष्टान्तः—गगने उत्पतन्तं पूर्णं चन्द्रं तारागणा इव ॥ ४ ॥

गो० टी०–उत्पतन्तमिति । अनूत्पेतुः पश्चादुत्पेतुः ॥४॥

५] ति० टी०– संचचार संमुखमाजगाम । अवस्थितो बभूवेत्यस्य लक्ष्मण इति शेषः । कल्पवृक्षोपमया सर्वहितत्वं व्यङ्ग्यम् ॥ ५ ॥

रा० टी०–समिति । संरक्तनयनः श्रीमान् लक्ष्मणः संचचार इतस्ततोऽगच्छत् तत्र लक्ष्मणसंनिधौ महान् कल्पवृक्ष इव कृताञ्जलिः सुग्रीवोऽवस्थितो बभूव ॥ ५ ॥

गो० टी०–संरक्तेति । संरक्तनयनः मदेनेति शेषः॥५–७॥

६] ति० टी०–सतारं शशिनमिव स्थितम् ॥ ६ ॥

रा० टी०–रुमेति । नारीमध्यगतं नारीणां मध्ये प्राप्तं रुमा द्वितीया यस्य तं सतारं शशिनमिव स्थितं सुग्रीवं लक्ष्मणोऽब्रवीत् ॥ ६ ॥

७] ति० टी०–सत्त्वाभिजनाभ्यां संपन्नः । तल्लक्षणानि सानुक्रोशत्वादीनि ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह—सत्त्वेति । सत्त्वाभिजनाभ्यां संपन्नः सानुक्रोशः सदयः सत्यवादी राजा लोके महीयते पूज्यते ॥ ७ ॥

८] ति० टी०–अधर्मे स्थित इत्यन्वयः अधर्ममार्गस्थः । नृशंसतरः क्रूरतरः ॥ ८ ॥

रा० टी०–य इति । अधर्मे स्थितः यो राजा उपकारिणां मित्राणामग्रे प्रतिज्ञां स्वप्रतिश्रवं मिथ्या कुरुते ततस्तस्मादधिकः नृशंसतरः अतिघातुकः कः, स एव महाहिंसक इत्यर्थः॥८॥

गो० टी०–यस्त्विति । अधर्म इति च्छेदः ॥ ८ ॥

९] ति० टी०–प्रकृतोपयुक्तमसत्यदोषमाह–शतमिति। एकाश्वनिमित्तकेऽनृते दानादिप्रतिज्ञाविघाते सति सोऽनृतवाक् । शतं हन्ति शताश्वहननदोषभाक् । गोविषयानृते गोसहस्रहननभाक् । एवं पुरुषानृते पुरुषविषयकिंचित्प्रतिज्ञाहानौ स पुरुषः प्रथममात्मानं हन्त्यात्मघातदोषभाक् । निजं पुण्यलोकं नाशयति वा । तथा स्वजनस्य पित्रादेः पुण्यलोकं च नाशयति ॥ ९ ॥

रा० टी०–विषयभेदेन मिथ्याभेदमुपपादयति–शतमिति। अश्वानृते अश्वनिमित्तकमिथ्यावादे सति शतं हन्ति शताश्वहननजनितदोषं प्राप्नोति । गवानृते गोविषयकानृतवादे सहस्रं हन्ति सहस्रसंख्याकगवीहननजनितदोषं प्राप्नोति । पुरुषानृते पुरुषविषयकानृतवादे स्वजनमात्मानं च हन्ति स्वजनविघातजनितमात्मघातजनितं च दोषं प्राप्नोति । एतेन परमपुरुषविषयकानृतभाषिणः दोषस्य न इयत्तेति सूचितम् ॥ ९ ॥

गो० टी०–शतमिति । पुरुषः अश्वानृते अश्वविषयानृते शतं हन्ति शताश्वहननदोषभाग् भवेदित्यर्थः । एवं गवानृते गोविषयानृते सहस्रं हन्ति सहस्रगोहननदोषभाग् भवेत् । पुरुषानृते आत्मानं स्वजनं हन्ति आत्मस्वजनहननदोषभाग् भवेदित्यर्थः । महापुरुषरामविषयानृते तु सर्वहननदोषभाग् भवेदिति भावः ॥ ९ ॥

१०] ति० टी०–अथ कृतघ्नदोषमाह—पूर्वमिति । कृतार्थः मित्रैरिति शेषः । सर्वभूतानां सर्वलोकानां वध्यः सर्वलोकबहिष्कार्य इत्यर्थः ॥ १० ॥

रा० टी०–पूर्वमिति । पूर्वं कृतार्थो मित्रेण साधितस्वप्रयोजनो यो जनः मित्राणां तत्प्रयोजनं न करोति सः कृतघ्नः अत एव सर्वभूतानां वध्यः ॥ १० ॥

गो० टी०–पूर्वमिति । तन्मित्रकार्यं न प्रतिकरोति पुनर्न करोति ॥ १० ॥

११] ति० टी०–नायमर्थः स्वकल्पनामात्रकल्पित इत्याह–गीत इति । ब्रह्मणा हिरण्यगर्भेणायं श्लोकः पूर्वोक्तः सर्वलोकनमस्कृतः ब्रह्मवदेव सर्वस्मर्तृसंमत इत्यर्थः । अथ रामवचनमाह–त्वां कृतघ्नं दृष्ट्वा कुद्धेन रामेण यदुक्तं तच्छृणु ॥ ११ ॥

रा० टी०–नन्विदं स्वयं प्रकल्प्योच्यते इत्यत आह—गीत इति । कृतघ्नं दृष्ट्वा कुद्धेन ब्रह्मणा सर्वलोकनमस्कृतः सर्वैर्मन्तव्य इत्यर्थः, अयमुक्तः श्लोको गीतः ॥ ११ ॥

१ पूर्णचन्द्रमिति गो. पाठः ।

गोघ्ने चैव सुरापे च चौरे भग्नव्रते तथा । निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः॥ १२ ॥
अनार्यस्त्वं कृतघ्नश्च मिथ्यावादी च वानर । पूर्वं कृतार्थो रामस्य न तत्प्रतिकरोषि यत् ॥ १३ ॥
ननु नाम कृतार्थेन त्वया रामस्य वानर । सीताया मार्गणे यत्नः कर्तव्यः कृतमिच्छता ॥ १४ ॥
स त्वं ग्राम्येषु भोगेषु सक्तो मिथ्याप्रतिश्रवः । न त्वां रामो विजानीते सर्पं मण्डूकराविणम् ॥ १५ ॥
महाभागेन रामेण पापः करुणवेदिना । हरीणां प्रापितो राज्यं त्वं दुरात्मा महात्मना ॥ १६ ॥
कृतं चेन्नातिजानीषे राघवस्य महात्मनः । सद्यस्त्वं निशितैर्बाणैर्हतो द्रक्ष्यसि वालिनम् ॥ १७ ॥
न सँ संकुचितः पन्था येन वाली हतो गतः । समये तिष्ठ सुग्रीव मा वालिपथमन्वगा ॥ १८ ॥
न नूनमिक्ष्वाकुवरस्य कार्मुकाच्छरांश्च तान्पश्यसि वज्रसंनिभान् ।
ततः सुखं नाम विषेवसे सुखी न रामकार्यं मनसाऽप्यवेक्षसे ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०–गीतोऽयमिति । ब्रह्मणा स्वायम्भुवमनुना११ १२] ति० टी०–किं तत्तत्राह–गोघ्न इति ॥ १२ ॥

रा० टी०–ननु प्रायश्चित्तमनुक्त्वा वध्यत्वमेव किमर्थमुक्तमित्यत आह—गोघ्न इति । गोघ्नादौ निष्कृतिः प्रायश्चित्तं सद्भिर्विहिता कृतघ्ने तु निष्कृतिर्नास्ति ॥ १२ ॥

गो० टी०–ब्रह्मघ्ने चेति । निष्कृतिः प्रायश्चित्तम्१२॥१३॥

१३] ति० टी०–कुतोऽहं कृतघ्नस्तत्राह–पूर्वमिति ॥१३॥

रा० टी०–ननु किमर्थमिदमुच्यते इत्यत आह—अनार्य इति । हे वानर ! पूर्वं कृतार्थः रामेण साधितस्वप्रयोजनस्त्वं यस्माद्धेतोः रामस्य तत् स्वप्रतिज्ञातं प्रयोजनं न प्रतिकरोषि अतस्त्वं कृतघ्नः मिथ्यावादी च अत एव अनार्यः अधमः असीति शेषः ॥ १३ ॥

१४] ति० टी०–मिथ्यावादित्वं दर्शयति—नन्विति । यत्नः प्राक्प्रतिज्ञातः । कृतमिच्छता कृतस्य प्रतिकृतं कर्तुमिच्छता ॥ १४ ॥

रा० टी०–मिथ्यावादित्वमेव भङ्ग्यन्तरेणाह–नन्विति । कृतार्थेन अत एव कृतं प्रतिकरणमिच्छता येन त्वया सीताया मार्गणे अन्वेषणे यत्नः कर्तव्यः स त्वं ग्राम्येषु भोगेषु सक्तः अत एव मिथ्याप्रतिश्रवोऽसीति शेषः । त्वां रामो न विजानीते एतद्दोषविशिष्टत्वेन न जानाति । तत्र दृष्टान्तः–मण्डूकराविणं स्वयं गृहीतस्वमुखस्थापितदर्दुरशब्देन शब्दवन्तं सर्पं लोक इव यथा सर्पमुखस्थितदर्दुरशब्देन दर्दुरमेव जानाति न तु सर्पं तथा स्वन्मधुरभाषाणादिना त्वां सज्जनमेव जानाति न तु त्वत्स्वरूपभूतदुर्जनत्वमित्यर्थः । श्लोकद्वयमेकान्वयि ॥१४॥१५॥

गो० टी०–नन्विति । कृतमिच्छता उपकारं स्मरता॥१४॥

१५] ति० टी०–मण्डूकराविणं स्वगृहीतमुखस्थमण्डूकशब्देन शब्दवन्तं सर्पं यथा जनोऽनवलोकनान्मण्डूकमेव जानीते, न तु सर्पम्, तथा तव स्वरूपं रामो नाज्ञासीदिति भावः । कश्चित्तु—मण्डूकग्रहणार्थं सर्पो मण्डूकवद्रौतीति तेन स्वरेण स्वगण इति विलब्धः स्वसमीपमागतो मण्डूकस्तेन गृह्यते । एवं वञ्चकं त्वां नाज्ञासीदित्यर्थ इत्याह । तत्तु तथालोकाप्रसिद्ध्योपेक्ष्यम् ॥ १५ ॥

गो० टी०–स त्वमिति । मण्डूकराविणं मण्डूकवद्रौतीतमिव वञ्चकं त्वां न जानातीत्यर्थः ॥ १५–१८ ॥

१६–१८] ति० टी०–पापस्त्वमित्यन्वयः ॥ १६–१८॥

रा० टी०–महाभागेनेति । करुणंवेदिना रामेण दुरात्मा त्वं हरीणां राज्यं प्रापितोऽसि ॥ १६ ॥

रा० टी०–कृतमिति । राघवस्य कृतं चेद्यदि न जानीषे तर्हि बाणैर्हतस्त्वं वालिनं द्रक्ष्यसि ॥ १७ ॥

रा० टी०–न चेति । येन यथा वाली गतः स पन्थाः न संकुचितः आच्छन्नः अतः समये स्वकृतसंकेते तिष्ठ तं संस्मरेत्यर्थः । किंच समये सम्यक् शुभावहकार्ये तिष्ठ कुर्वित्यर्थः, वालिपथं मरणं मान्वगाः प्राप्नुहि ॥ १८ ॥

१९] ति० टी–शराञ्नूनं न पश्यसि, यतो ग्राम्यसुखं निषेवसे तेन च सुखी सन्रामकार्यं मनसापि नावेक्षसे ॥१९॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०–नेति । रामकार्यं मनसाऽपि त्वं नावेक्षसे अतः इक्ष्वाकुवरस्य कार्मुकात् धनुषः च्युतान् वज्रसंनिभान् शरान् पश्यासि द्रक्ष्यस्येवेत्यर्थः, ततस्तद्बाणदर्शनानन्तरं सुखं न निषेवसे निषेविष्यसे ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०–रामस्य संदिष्टं वाक्यमभिधाय प्रकृतकार्योचितं स्ववाक्यमाह–न नूनमिति । इक्ष्वाकुवरस्य कार्मुकच्युतान् बाणान् वज्रसंनिभान् न पश्यसि नादाक्षीः ननम् ततो

---

१ ब्रह्मघ्ने चेति गो.पाठः। २ नाभीति गो.पाठः। ३ रामस्याङ्गिष्टकर्मण इति गो.पाठः। ४ चेति गो.रा.पाठः। ५ कार्मुकच्युतान् शरानिति गो.पाठः।

पञ्चत्रिंशः सर्गः।

कालविलम्बे हेतूनप्रदर्श्य सुग्रीवाय कुद्धं लक्ष्मणं सान्त्वयन्ती तारा स्थिरो भव सर्वं ते सेत्स्यतीति प्रार्थयते।

तथा ब्रुवाणं सौमित्रिं प्रदीप्तमिव तेजसा। अब्रवील्लक्ष्मणं तारा ताराधिपनिभानना ॥ १ ॥
नैवं लक्ष्मण वक्तव्यो नायं परुषमर्हति। हरीणामीश्वरः श्रोतुं तव वक्त्राद्विशेषतः ॥ २ ॥
नैवाकृतज्ञः सुग्रीवो न शठो नापि दारुणः। नैवानृतकथो वीर न जिह्मश्च कपीश्वरः ॥ ३ ॥
उपकारं कृतं वीरो नाप्ययं विस्मृतः कपिः। रामेण वीर सुग्रीवो यदन्यैर्दुष्करं रणे ॥ ४ ॥
रामप्रसादात्कीर्तिं च कपिराज्यं च शाश्वतम्। प्राप्तवानिह सुग्रीवो रुमां मां च परंतप ॥ ५ ॥
सुदुःखशयितः पूर्वं प्राप्येदं सुखमुत्तमम्। प्राप्तकालं न जानीते विश्वामित्रो यथा मुनिः ॥ ६ ॥
घृताच्यां किल संसक्तो दश वर्षाणि लक्ष्मण। अहो मन्यत धर्मात्मा विश्वामित्रो महामुनिः॥ ७ ॥
स हि प्राप्तं न जानीते कालं कालविदां वरः। विश्वामित्रो महातेजाः किं पुनर्यः पृथग्जनः॥ ८ ॥
देहधर्मगतस्यास्य परिश्रान्तस्य लक्ष्मण। अवितृप्तस्य कामेषु रामः क्षन्तुमिहार्हति ॥ ९ ॥

नाम तस्मात् खलु सुखं निषेवसे सुखी सन् रामकार्यं मनसापि नावेक्षस इति योजना ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

१ ति० टी०—॥ १ ॥

रा० टी०—लक्ष्मणवचनश्रवणानन्तरकालिकं तारावचनमाह—तथेत्यादिभिः। ताराधिपनिभानना चन्द्रमुखसदृशमुखी तारा लक्ष्मणमब्रवीत् ॥ १ ॥

गो० टी०—अथ पुनस्तारया लक्ष्मणसान्त्वनं पञ्चत्रिंशे—तथा ब्रुवाणमित्यादि ॥ १ ॥

२] ति० टी०—तवेति। तव सुहृदो वक्त्रात् मुखादित्यर्थः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—नेति। हे लक्ष्मण! हरीणामीश्वरोऽयं सुग्रीवः विशेषतो महतस्तव वक्त्रात् परुषं वचः श्रोतुं नार्हति अतः एवं वचो भवता हरीश्वरो न वक्तव्यः ॥२॥

गो० टी०—नैवमिति। वक्तव्यः परुषमिति शेषः ॥ २ ॥

३–५] ति० टी०—नार्हतीत्यत्र हेतुः—नैवेत्यादि। अनृतकथोऽनृतवाक् ॥ ३–५ ॥

रा० टी०—नन्वस्य गुणाः एव उच्यन्ते न किंचिदपूर्वमित्यत आह—नेति। सुग्रीवः अकृतज्ञत्वादिविशिष्टो न ॥ ३ ॥

गो० टी०—नैवेति। जिह्मः कुटिलः ॥ ३ ॥

रा० टी०—उपकारमिति। अन्यैर्दुष्करं रामेण कृतमुपकारं यत् प्रत्युपकारविषयकयत्नवान् सुग्रीवः न विस्मृतः कर्तरि निष्ठा ॥ ४ ॥

रा० टी०—रामेति। रामप्रसादात् रामानुग्रहात् सुग्रीवः कीर्त्यादि प्राप्तवान् ॥ ५ ॥

गो० टी०—उपकारमिति। विस्मृत इति कर्तरि निष्ठा। अन्यैर्दुष्करं तम् उपकारं न विस्मृत इति योजना ॥ ४–६ ॥

६] ति० टी०—यदि न कृतघ्नः, कथं तर्हि कालात्ययानभिज्ञस्तत्राह—सुदुःखेति। सुतरामनुभूतदुःखः। प्राप्तकालमवश्यं कर्तव्यम् ॥ ६ ॥

रा० टी०—नन्वस्य विस्मृत्यभावे कथं कालातिक्रम इत्यत आह—सुदुःखमिति। पूर्वं सुदुःखं शयितः सुग्रीवः इदमुत्तमं सुखं प्राप्य विश्वामित्रो मुनिरिव प्राप्तकालं न जानीते अजानात् ॥ ६ ॥

७–८] ति० टी०—घृताच्यामिति। अहो दिनम्। यद्यपि पूर्वं बालकाण्डे मेनकासंबन्ध उक्तस्तथाप्येतद्वचनाद्घृताचीसंबन्धोऽपि तस्य ज्ञेय इत्याहुः ॥ ७ ॥ ८ ॥

रा० टी०—विश्वामित्रस्य कालविस्मृतिमुपपादयति—घृताच्यामिति। घृताच्यां तदभिधाप्सरस्सु संसक्तो महामुनिर्विश्वामित्रः दशवर्षाणि अहः एकदिनममन्यत ॥ ७ ॥

रा० टी०—स इति। स प्रसिद्धो महातेजा विश्वामित्रः न जानीते पृथक् ततोऽन्यो यो जनः स न जानीते इति किम् ॥ ८ ॥

गो० टी०—घृताच्यामिति। विश्वामित्रो घृताच्यामासक्तो दश वर्षाणि अहो मन्यत दिनममन्यत। घृताचीशब्देनात्र मेनकैवोच्यते मेनकासंगस्य बालकाण्डेऽभिधानात् ॥ ७ ॥ ८ ॥

९] ति० टी०—देहधर्मा आहारनिद्रामैथुनानि। 'पशुधर्म' इति पाठेऽप्ययमेवार्थः ॥ ९ ॥

रा० टी०—देहेति। देहधर्मगतस्य देहित्वात् देहधर्मवतः अत एव परिश्रान्तस्य पूर्वं चिरं दुःखानुभवात् खिन्नस्य अत एव कामेषु रामप्रसादात् प्राप्तराजोचितविषयेषु अवितृप्तस्य

१ सुदुःखमिति गो. रा. पाठः। २ वरेति रा. पाठः। ३ धर्मेति गो. पाठः। ४ काममिति गो. पाठः।

न च रोषवशं तात गन्तुमर्हसि लक्ष्मण । निश्चयार्थमविज्ञाय सहसा प्राकृतो यथा ॥ १० ॥
सत्त्वयुक्ता हि पुरुषास्त्वद्विधाः पुरुषर्षभ । अविमृश्य न रोषस्य सहसा यान्ति वश्यताम् ॥ ११ ॥
प्रसादये त्वां धर्मज्ञ सुग्रीवार्थं समाहिता । महान्रोषसमुत्पन्नः संरम्भस्त्यज्यतामयम् ॥ १२ ॥
रुमां मां चैङ्गदं राज्यं धनधान्यपशूनि च । रामप्रियार्थं सुग्रीवस्त्यजेदिति मतिर्मम ॥ १३ ॥
समानेष्यति सुग्रीवः सीतया सह राघवम् । शशाङ्कमिव रोहिण्या हत्वा तं राक्षसाधमम् ॥ १४ ॥
शतकोटिसहस्राणि लङ्कायां किल रक्षसाम् । आयुतानि च षट्त्रिंशत्सहस्राणि शतानि च ॥ १५ ॥
अहत्वा तांश्च दुर्धर्षान्राक्षसान्कामरूपिणः । अशक्यं रावणं हन्तुं येन सा मैथिली हृता ॥ १६ ॥
ते न शक्या रणे हन्तुमसहायेन लक्ष्मण । रावणः क्रूरकर्मा च सुग्रीवेण विशेषतः ॥ १७ ॥
एवमाख्यातवान्वाली स ह्यभिज्ञो हरीश्वरः । आगमस्तु न मे व्यक्तः श्रवार्त्तस्य ब्रवीम्यहम्॥ १८ ॥

अल्पकालेन तृप्तिरहितस्य अस्य सुग्रीवस्य इह अस्मिन्समये रामः क्षन्तुमर्हति ॥ ९ ॥

गो० टी०–देहेति । देहधर्मं गतस्य शरीरत्वभावं प्राप्तस्य कामं कामवर्तनम् ॥ ९ ॥

१०–११] ति०टी०–निश्चयार्थं कर्तव्यार्थनिश्चयम्१०-११॥

रा० टी०–नेति । निश्चयार्थं निश्चिततत्त्वमविज्ञाय अनिश्चित्य प्राकृत इव रोषवशं गन्तुं नार्हसि ॥ १० ॥

रा० टी०–तत्र शिष्टाचारं प्रमाणयति–सत्त्वेति । त्वद्विधास्त्वत्सदृशाः सत्त्वयुक्ताः पुरुषाः अविमृश्य अविचार्य रोषस्य वश्यतां सहसा न यान्ति ॥ ११ ॥

गो० टी०–अपराधमङ्गीकृत्य सान्त्वयित्वा इदानीं विचार्यमाणे अपराध एव नास्तीत्याह–न चेति । निश्चयार्थं निश्चयरूपमर्थं सुग्रीवाभिप्रायमिति यावत् ॥ १० ॥ ११ ॥

१२–१४] ति० टी०–रोषेण समुत्पन्नः संरम्भः क्षोभः ॥ १२–१४ ॥

रा० टी०–प्रसादय इति । सुग्रीवार्थं सुग्रीवकल्याणार्थं समाहिता एकाग्रचित्ताऽहं त्वां प्रसादये अतः रोषसमुत्पन्नः अयं संरम्भः संक्षोभः त्यज्यताम् ॥ १२ ॥

गो० टी०–प्रसाद् इति । संरम्भः अभिनिवेशः ॥ १२ ॥

रा० टी०–नन्वु रामकार्यसिद्धिः कथं स्यादित्यत आह—रुमामिति । सुग्रीवः रामप्रियार्थं रामप्रीतये रुमादिकं त्यजेत् इति मम मतिर्निश्चयः एतेन रामसदृशः सुग्रीवप्रियः कश्चिन्नास्तीति ध्वनितम् ॥ १३ ॥

गो० टी०–रुमामिति । धनधान्येत्यत्र धनशब्दो हस्तिरथाश्वादिपरः वसुशब्दो रत्नपरः ॥ १३ ॥

रा० टी०–समिति । सुग्रीवः राक्षसाधमं हत्वा रोहिण्या शशाङ्कं चन्द्रमिव सीतया सह राघवं समानेष्यति ॥ १४ ॥

गो० टी०–समानेष्यतीति । समानेष्यति घटयिष्यति । निहत्वेत्यत्र ल्यबभाव आर्षः ॥ १४–१६ ॥

१५–१६] ति० टी०–कथमयं रावणं हनिष्यतीत्यत्र तत्साहाय्यकसाध्यत्वात्तद्वधस्येत्याह–शतेति । एषा संख्या विवक्षितैव । दशकोटिः समुद्रः शतकोटिर्मध्यं मध्यानां सहस्रं तथा षष्टिसहस्राधिकत्रिलक्षाणि तदुपरि षट्त्रिंशत्सहस्राणि तदुपरि तावन्ति शतानीत्यर्थः ॥ १५ ॥ १६ ॥

रा० टी०–नन्विदानीमेव गत्वा रावणं निहत्य मैथिलीं कुतो नानयतीत्यत आह—शतेति । रक्षसां शतकोटिसहस्राणि शतकोटिसहस्रसंख्याकरक्षांसीत्यर्थः, रक्षसामयुतादीनि च अयुतादिसंख्याकरक्षांसीत्यर्थः, लङ्कायां सन्तीति शेषः॥१५॥

रा० टी०–अहत्वेति । कामरूपिणस्तान् लङ्कास्थान् राक्षसान् अहत्वा येन मैथिली हृता तं रावणं हन्तुमशक्यमवेहीति शेषः। कामरूपिण इत्यनेन लङ्कायामुक्तसंख्याकराक्षसस्थित्यसंभवाभावः सूचितः तेन कार्यवशादेव तच्छरीराणां महत्वमिति व्यक्तम् ॥ १६ ॥

१७] ति० टी०–तावतां वधे परमशरस्यापि सहायापेक्षास्तीत्याह–ते इति । यस्मादसहायेन रामेण ते हन्तुमशक्या यस्माद्रावणश्च क्रूरकर्मा क्रूरपराक्रमस्तस्माद्विशेषतः सुग्रीवेण सहायेन प्रयोजनमस्ति । तत्सममतिसेनाघटनस्य सुग्रीवाधीनत्वात्सर्वेषां मनुष्यावध्यत्वाच्चेति भावः । यत्तु तीर्थः सुग्रीवेण सहायेन ते राक्षसा हन्तुमशक्याः, रावणश्च हन्तुमशक्यः, इत्यन्वयं कृत्वा वाली किलोक्तवान्रावणवधाय सुग्रीवं वृथा प्रार्थयते रामस्तस्यासावशक्य इति कथां च कल्पयतीतदपार्थकम् रामस्य सहायापेक्षासमर्थनस्यैव प्रस्तुतत्वात् ॥१७॥

रा० टी०–नन्वु पूर्वं राक्षसान् निहत्यानन्तरं रावणो हन्तव्य इत्यत आह—ते नेति । असहायेन विपुलबलरामोभयसाहाय्यरहितेन सुग्रीवेण ते राक्षसाः विशेषतः क्रूरकर्मा रावणश्च हन्तुं न शक्याः ॥ १७ ॥

गो० टी०–ते न शक्या इति । ते न शक्या इति छेदः

---

१ अर्थं इति गो. पाठः । २ कपिराज्यं चेति गो. पाठः । ३ वसूनीति गो. पाठः । ४ निहत्वा रावणं रणे इति गो. पाठः । ५ राक्षसा इति गो. पाठः । ६ अयुतानीति गो. पाठः । ७ न शक्य इति गो. पाठः । ८ तस्मादिति गो. पाठः ।

त्वत्सहायनिमित्तं [1]हि प्रेषिता हरिपुङ्गवाः। आनेतुं वानरान्युद्धे सुबहून्हरिपुंङ्गवान् ॥ १९ ॥
तांश्च प्रतीक्षमाणोऽयं विक्रान्तान्सुमहाबलान्। राघवस्यार्थसिद्ध्यर्थं न निर्याति हरीश्वरः ॥ २० ॥
कृता[2] सुसंस्था सौमित्रे सुग्रीवेण पुरा यथा। [3]अद्य तैर्वानरैः सर्वैरागन्तव्यं महाबलैः ॥ २१ ॥
ऋक्षकोटिसहस्राणि गोलाङ्गूलशतानि च। अद्य त्वामुपयास्यन्ति जहि कोपमरिन्दम
कोट्योऽनेकास्तु काकुत्स्थ कपीनां दीप्ततेजसाम् ॥ २२ ॥
तव हि मुखमिदं निरीक्ष्य कोपात्क्षतजसमे नयने निरीक्षमाणाः।
हरिवरवनिता न यान्ति शान्तिं प्रथमभयस्य हि शङ्किताः स्म सर्वाः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

ते राक्षसाः हन्तुं न शक्याः। रावणो विशेषेणासहायेन सुग्रीवेण हन्तुं न शक्यः ॥ १७ ॥

१८] ति० टी०—नन्वेषा रक्षःसंख्या त्वया कथं ज्ञाता तत्राह—एवमिति। आगमस्तु न मे व्यक्तः, रावणस्यैवं बलप्राप्तिप्रकारस्तु न मया ज्ञातः संख्यामात्रं प्रसङ्गात्पूर्वं श्रुतम् तस्य श्रवणात्तन्मुखतो वाक्यश्रवणात् ॥ १८ ॥

रा० टी०—नन्वेवं रक्षसां संख्या त्वया कथं ज्ञातेत्यत आह—एवमिति। अभिज्ञः सर्वदेशवृत्तान्ताभिज्ञाता सः प्रसिद्धो वाली एवमाख्यातवान् कथितवान्, तस्य वालिवचनस्य श्रवात् श्रवणादेवाहं ब्रवीमि। नन्वेवं बलप्राप्तिः रावणस्य कथमित्यत आह—आगमः एवं बलप्राप्तिप्रकारस्तु मे मया न व्यक्तो ज्ञातः प्राप्तिप्रकारं वाली न कथितवानित्यर्थः ॥ १८ ॥

गो० टी०—तर्हि रावणवृत्तान्तः सर्वोऽप्याख्यायतामित्यत आह—एवमिति। आगमः स्वयमवगमः श्रवात् श्रवणात् अत्र सुग्रीवेण युद्धाय निर्गमकाले तारयाऽऽद्रदोक्तरामसुग्रीवसख्यकरणेऽभिहिते एतादृशो रावणः सुग्रीवो दुर्बलः तं कथं रामोऽवलम्बत इति वालिनोक्तमिति ज्ञेयम् ॥ १८–२० ॥

१९] ति० टी०—नन्वेतावत्सहायसंपत्तिप्रवृत्तेरस्मिन्नदर्शनात्कोपो नस्तत्राह—त्वदिति ॥ १९ ॥

रा० टी०—त्वदिति। त्वत्सहायनिमित्तं सुबहून् अतिबहुसंख्याकान् हरिपुङ्गवान् वानरश्रेष्ठान् वानरानानेतुं हरिपुंगवाः प्रेषिताः सुग्रीवेणेति शेषः ॥ १९ ॥

२०] ति० टी०—राघवार्थं तान्प्रतीक्षमाणस्तिष्ठति, अतएवेदानीं न निर्याति ॥ २० ॥

रा० टी०—तानिति। अयं सुग्रीवः विक्रान्तान् अतिवेगवतः सुमहाबलान् तान् वानरान् राघवस्यार्थसिद्ध्यर्थं प्रतीक्षमाणः न निर्याति इदानीमेव न निर्गच्छति। एतेन तेषामागमने शीघ्रमेव निर्गमिष्यतीति ध्वनितम् ॥ २० ॥

२१] ति० टी०—ते तर्हि कदागमिष्यन्ति तत्राह—कृतेति। सुसंस्था शोभनागमनकालमर्यादा पुरा पूर्वं दूतप्रेषणसमये यथा कृता तथा तैः सर्वैरद्यागन्तव्यम् ॥ २१ ॥

रा० टी०—नन्वेतेषामागमने विलम्बः प्रतीयते इत्यत आह—कृतेति। पुरा प्रेषणसमये सुसंस्था तेषां त्वरितमागमनाय निश्चितमर्यादा यथा यथावत् कृता अतः सर्वैर्महाबलैर्वानरैः अद्यैवागन्तव्यम् इदमेव मर्यादादिनमिति तात्पर्यम्॥२१॥

गो० टी०—कृतेति। अत्र सीतान्वेषणकार्यविषये सुग्रीवेण पुरा त्वदागमनात्पूर्वमेव संस्था व्यवस्था त्रिपञ्चरात्रादूर्ध्वं नागन्तव्यमित्येवंरूपा यथा येन प्रकारेण कृता तथा अद्य अस्मिन् दिने तैरागन्तव्यम् ॥ २१ ॥ २२ ॥

२२] ति० टी०—रक्षःसेनापेक्षया स्वसेनाधिक्यमाह—ऋक्षेति। शतकोटिमर्ध्यं तदशगुणात्मिका सहस्रकोटिस्तत्संख्या ऋक्षाः गोलाङ्गूलानां शतानि च शतकोटिः अन्ये कपयोऽनेकाः कोट्यः असंख्या इत्यर्थः ॥ २२ ॥

रा० टी०—आगन्तव्यवानरादिसंख्यां बोधयन्ती आह—ऋक्षेति। ऋक्षकोटिसहस्राणि कोटिसहस्रसंख्याकऋक्षा इत्यर्थः, गोलाङ्गूलशतानि अनन्तसंख्याकगोलाङ्गूला दैर्घ्यसदृशदैर्घ्यविशिष्टलाङ्गूलविशिष्टवानरविशेषाश्चेत्यर्थः, कपीनामनेका कोट्यश्च अद्य अस्मिन् दिने त्वामुपयास्यन्ति प्राप्स्यन्ति अतः कोपं जहि अतिबहुसंख्याप्रयुक्तस्थित्यसंभवशङ्कानिरासस्तूलराक्षसन्यायेनावगन्तव्यः। सार्धश्लोक एकान्वयी ॥२२॥

२३] ति० टी०—प्रथमभयस्य तत्सदृशभयस्य वालिवधवत्सुग्रीववधभयस्य। षष्ठयार्थौ ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०—तवेति। इदं तव मुखं निरीक्ष्य कोपात् क्षतजसमे रुधिरसदृशे तव नयने निरीक्षमाणाः अत एव प्रथमभयस्य पौर्वकालिकवालिवधसंबन्धिभयस्येव शङ्किताः सुग्रीववधविषयकशङ्कावत्य इत्यर्थः, सर्वाः हरिवरवनिताः शान्तिं न यान्ति। एतेन कोपचेष्टाद्युपसंहरेति सूचितम्। हिशब्द एवार्थे ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

---

१ वै इति गो. पाठः। २ यूथपानिति गो. पाठः। ३ ऽत्रेति गो. पाठः। ४ उक्तैरिति रा. पाठः। ५ निमे इति गो. पाठः।

षट्त्रिंशः सर्गः ।

तारापरिसान्त्वनेन शान्तमनस्क लक्ष्मणं सुग्रीवो राममहिमप्रशंसनपूर्वं ममापराध क्षमस्वेति प्रार्थयते । प्रकृतिं प्राप्तो लक्ष्मणः क्रोधोक्तं परुष क्षमस्वेति सुग्रीवं प्रार्थ्य संप्राप्य रामं क्षमयेति तं नियुङ्क्ते ।

इत्युक्तस्तारया वाक्यं प्रश्रितं धर्मसंहितम् । मृदुस्वभावः सौमित्रिः प्रतिजग्राह तद्वचः ॥ १ ॥
तस्मिन्प्रतिगृहीते तु वाक्ये हरिगणेश्वरः । लक्ष्मणात्सुमहत्त्रासं वल्गं क्लिन्नमिवात्यजत् ॥ २ ॥
ततः कण्ठगतं माल्यं चित्रं बहुगुणं महत् । चिच्छेद विमदश्चासीत्सुग्रीवो वानरेश्वरः ॥ ३ ॥
स लक्ष्मणं भीमबलं सर्ववानरसत्तमः । अब्रवीत्प्रश्रितं वाक्यं सुग्रीवः संप्रहर्षयन् ॥ ४ ॥
प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् । रामप्रसादात्सौमित्रे पुनश्चाप्तमिदं मया ॥ ५ ॥
कः शक्तस्तस्य देवस्य ख्यातस्य स्वेन कर्मणा । तादृशं प्रतिकुर्वीत अंशेनापि नृपात्मज ॥ ६ ॥
सीतां प्राप्स्यति धर्मात्मा वधिष्यति च रावणम् । सहायमात्रेण मया राघवः स्वेन तेजसा ॥ ७ ॥
सहायकृत्यं किं तस्य येन सप्त महाद्रुमाः । गिरिश्च वसुधा चैव बाणेनैकेन दारिताः ॥ ८ ॥
धनुर्विस्फारमाणस्य यस्य शब्देन लक्ष्मण । सशैला कम्पिता भूमिः सहायैः किं नु तस्य वै ॥ ९ ॥

गो० टी०–तव हीति । हिशब्दः पादपूरणे सर्वाः हरिवरवनिताः तवेदं मुखं निरीक्ष्य प्रथमभयस्य शङ्किताः वालिवधजनितभयशङ्किताः सत्यः रोषाद्धेतोः क्षतजसमे नयने निरीक्षमाणाः भ्रान्ति न यान्ति हि न यान्त्येव । प्रथमभयस्य शङ्किता इति कर्मणि षष्ठी "न लोकाव्यय–" इत्यादिना षष्ठीप्रतिषेधेऽपि तत्प्रयोग आर्षः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

१] ति० टी०–इतीति ॥ १ ॥

रा० टी०–तारार्थनानन्तरकालिकवृत्तान्तमाह—इतीत्यादिभिः । तारया इति वाक्यमुक्तः सौमित्रिः तद्वचः तारावचनं जग्राह कोपं त्यक्तवानित्यर्थः ॥ १ ॥

गो० टी०–अथ लक्ष्मणसुग्रीवसौहृदभाषणं षट्त्रिंशे–इत्युक्त इत्यादि ॥ १ ॥

२] ति० टी०–तस्मिंस्तारावनयवाक्ये ॥ २ ॥

रा० टी०–तस्मिन्निति । तस्मिन् लक्ष्मणे वाक्ये प्रतिगृहीते सति हरिगणेश्वरः सुग्रीवः लक्ष्मणात् प्रकुपितलक्ष्मणावलोकनात् जातं सुमहत्त्रासमत्यजत् ॥ २ ॥

गो० टी०–तस्मिन्निति । सुमहत्त्रासमिति "आन्महतः इत्याकाराभाव आर्षः । क्लिन्नम् आर्द्रम् ॥ २ ॥

३] ति० टी०–माल्यं मालाम् । बहुगुणं बहुविधकाममदकरम् अत एव तच्छेदफलं विमदश्चासीदिति ॥ ३ ॥

रा० टी०–तत इति । ततः त्रासत्यागानन्तरं सुग्रीवः बहुगुणं विपुलकाममदयोगकारकं कण्ठगतं माल्यं चिच्छेद॥३॥

गो० टी०–तत इति । बहुगुणं बहुविधभोगप्रदम् । महद् दिव्यम् ॥ ३ ॥ ४ ॥

४–५] ति० टी०–लक्ष्मणं संप्रहर्षयन्नित्यन्वयः ॥४॥ ५॥

रा० टी०–स इति । सर्ववानरसत्तमः सुग्रीवः लक्ष्मणं प्रहर्षयन् सन् प्रश्रितं वाक्यमब्रवीत् ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह—प्रनष्टेति । श्रीप्रभृतिः पूर्वं प्रनष्टा इदं श्र्यादि रामप्रसादात् मया पुनः प्राप्तम् ॥ ५ ॥

गो० टी०–प्रणष्टेति । इदं पूर्वोक्तं सर्वम् ॥ ५ ॥

६] ति० टी०–शक्तः समर्थः । तस्य देवावतारस्य स्वेन कर्मणा धनुर्भङ्गवालिवधादिना ख्यातस्य । तादृशं तज्जनितोपकारसदृशम् ॥ ६ ॥

रा० टी०–क इति । स्वेन कर्मणा ख्यातस्य देवस्य नित्यप्रमोदवतस्तस्य रामस्य तादृशं तत्कर्मसदृशं कर्म अंशेन एककलयाऽपि कः शक्तः समर्थः प्रतिकुर्वीत न कोऽपीत्यर्थः॥६॥

गो० टी०–क इति । तादृशं विक्रमं प्रतिकर्तुं तादृशस्य विक्रमस्य प्रतिकर्तुमित्यर्थः ॥ ६ ॥

७] ति० टी०–सहायमात्रेणोपलक्षितम् । स्वयमेवार्थनिर्वाहकः, अहं तु परिकरमात्रमित्यर्थः ॥ ७ ॥

रा० टी०–सीतामिति । राघवः स्वेन तेजसैव सहायमात्रेण मया रावणं वधिष्यति सीतां च प्राप्स्यति ॥ ७ ॥

गो० टी०–सीतामिति । सहायमात्रेण मयेत्युपलक्षणे तृतीया । स्वयमेवार्थसाधकः अहं तु तस्य परिकरमात्रमिति भावः ॥ ७–१० ॥

८–९] ति० टी०–सहायकृत्यं सहायसाध्यं कृत्यम् । येन पातालानि तत्स्थदैत्याश्च ॥ ८ ॥ ९ ॥

रा० टी०–सहायसंग्रहोऽपि तस्य कीलैवेति बोधयन्नाह—सहायेति । येन एकेन बाणेन द्रुमादयो दारिताः तस्य रामस्य सहायकृत्यं सहायैः साध्यं किम् ॥ ८ ॥

---

१ पुनः प्राप्तमिति गो० पाठः । २ सक्त इति रा० पाठः । ३ विक्रम वीर प्रतिकर्तुमरिन्दमेति गो० पाठः । ४ शैल इति गो० पाठः ।

अनुयात्रां नरेन्द्रस्य करिष्येऽहं नरर्षभ । गच्छतो रावणं हन्तुं वैरिणं सपुरःसरम् ॥ १० ॥
यदि किंचिदतिक्रान्तं विश्वासात्प्रणयेन वा । प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति ॥ ११ ॥
इति तस्य ब्रुवाणस्य सुग्रीवस्य महात्मनः । अभवल्लक्ष्मणः प्रीतः प्रेम्णा चेदमुवाच ह ॥ १२ ॥
सर्वथा हि मम भ्राता सनाथो वानरेश्वर । त्वया नाथेन सुग्रीव प्रश्रितेन विशेषतः ॥ १३ ॥
यस्ते प्रभावः सुग्रीव यच्च ते शौचमीदृशम् । अर्हस्त्वं कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम् ॥ १४ ॥
सहायेन तु सुग्रीव त्वया रामः प्रतापवान् । वधिष्यति रणे शत्रूनचिरान्नात्र संशयः ॥ १५ ॥
धर्मज्ञस्य कृतज्ञस्य संग्रामेष्वनिवर्तिनः । उपपन्नं च युक्तं च सुग्रीव तव भाषितम् ॥ १६ ॥
दोषज्ञः प्रतिसामर्थ्ये कोऽन्यो भाषितुमर्हति । वर्जयित्वा मम ज्येष्ठं त्वां च वानरसत्तम ॥ १७ ॥
सदृशश्चासि रामेण विक्रमेण बलेन च । सहायो दैवतैर्दत्तश्चिराय हरिपुङ्गव ॥ १८ ॥
किं तु शीघ्रमितो वीर निष्क्रम त्वं मया सह । सान्त्वयस्व वयस्यं च भार्याहरणदुःखितम् ॥ १९ ॥
यच्च शोकाभिभूतस्य दृष्ट्वा रामस्य भाषितम् । मया त्वं परुषाण्युक्तस्तत्क्षमस्व सखे मम ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०–धनुरिति । धनुर्विस्फारमाणस्य यस्य शब्देन सशैला भूमिः कम्पिता तस्य सहायैः किम् ॥ ९ ॥

१०] ति० टी०–अनुयात्रां पश्चाद्गमनम् । सपुरःसरं युद्धाये पुरःसरैः सहितं रावणम् ॥ १० ॥

रा० टी०–अन्विति । वैरिणं सपुरस्सरं पुरस्सरसहितं रावणं हन्तुं गच्छतो नरेन्द्रस्य रामस्य अनुयात्रां तेन सहानुगमनं करिष्ये ॥ १० ॥

११–१३] ति० टी०–विश्वासादयं न क्रूरोऽमित्र इति विश्वासात्प्रणयेन वा यदि किंचिदतिक्रान्तमपराद्धं तदुक्तहेतुभ्यां प्रेष्यस्य दासस्य क्षमितव्यं क्षन्तव्यम् । यस्माद्यो दासो नापराध्यति तादृग्दासासंभवः । स्वामिचित्तानुवर्तनस्य सर्वथासंभवात् ॥ ११–१३ ॥

रा० टी०–यदीति । विश्वासात् विश्वासं प्रापय्य यदि किंचिन्मया अतिक्रान्तं तत् प्रेष्यस्य भृत्यस्य मे प्रणयेन भृत्यविषयकस्वाभाविकस्नेहेन क्षमितव्यं कश्चिन्नापराध्यतीति न सर्वोऽपि यस्किंचिदपराध्यतीत्यर्थः, तेनापराधं दृष्ट्वा तव क्षमाया अभावे तव भृत्यस्नेहो निर्विषयो भविष्यतीति व्यञ्जितम् ॥ ११ ॥

रा० टी०–इतीति । इत्यनेन प्रकारेण ब्रुवाणस्य सुग्रीवस्य प्रेम्णा प्रीतोऽभवत् अत एव इदमुवाच ॥ १२ ॥

रा० टी०–तद्वचनाकारमाह—सर्वथेत्यादिभिः । विशेषतः प्रश्रितेन स्नेहयुक्तेन अत एव नाथेन अभिलाषप्रापकेण त्वया मम भ्राता सर्वथा सनाथोऽभिलाषप्रापकसहितोऽभवदिति शेषः ॥ १३ ॥

गो० टी०–यदीति । अतिक्रान्तम् अतिक्रमणं क्षमितव्यं क्षन्तव्यम् ॥ ११–१५ ॥

१२–१५] ति० टी०–शौचमिन्द्रियनिग्रहः ॥ १४ ॥ १५ ॥

रा० टी०–य इति । हे सुग्रीव ! यस्ते प्रभावः प्रतापः यच्च ते ईदृशं शौचं मनश्शुद्धिः ताभ्यां कपिराज्यस्य श्रियं भोक्तुं त्वमर्हः ॥ १४ ॥

रा० टी०–सहायेनेति । हे सुग्रीव ! त्वया सहायेन युक्तो रामः शत्रून् न चिरात् शीघ्रं वधिष्यति ॥ १५ ॥

१६] ति० टी०–उपपन्नं योग्यम् । युक्तं युक्तियुक्तम् ॥ १६ ॥

रा० टी०–धर्मज्ञस्येति । धर्मज्ञस्य तव भाषितमुपपन्नं युक्तिसहितमत एव युक्तमुचितम् ॥ १६ ॥

गो० टी०–धर्मज्ञस्येति । उपपन्नम् अर्हम् । युक्तं युक्तियुक्तम् ॥ १६ ॥

१७–१८] ति० टी०–दोषज्ञो विद्वान्को रामसुग्रीवाभ्यामन्यो भवद्वाक्यसदृशं वाक्यं वक्तुमर्हति ॥ १७ ॥ १८ ॥

रा० टी०–दोषज्ञ इति । सामर्थ्ये सति भाषितुम् एवं कथयितुं मम ज्येष्ठं रामं त्वां च वर्जयित्वा अन्यः को दोषज्ञोऽर्हति ॥ १७ ॥

रा० टी०–सदृश इति । यस्त्वं दैवतैर्देवैः सहायो दत्तः दैवयोगात्सहायत्वेन प्राप्त इत्यर्थः, स त्वं विक्रमेण बलेन च रामेण सदृशोऽसि ॥ १८ ॥

गो० टी०–दोषज्ञ इति । दोषज्ञः स्वदोषज्ञः, लोके हि समर्थः पुरुषः स्वदोषमपकुते नतु प्रकाशयति न तथा त्वमिति भावः ॥ १७–१९ ॥

१९] ति० टी०–वयस्यं रामम् ॥ १९ ॥

रा० टी०–किमिति । किंतु इदमिदानीं कर्तव्यमित्यर्थः । मया सह इतः अस्मात् पुरात् शीघ्रं निष्क्रम तत्प्रयोजनमाह–भार्याहरणदुःखितं वयस्यं सान्त्वयस्व ॥ १९ ॥

२०] ति० टी०–स्वोक्तवाक्यानां रामोक्तस्वशब्दाभ्या-

---

१ एवमिति गो. पाठः । २ आर्जवमिति गो. पाठः । ३ चेति गो. पाठः । ४ सतीति गो. पाठः । ५ निष्क्रामेति गो. पाठः । ६ त्वमिति गो. पाठः । ७ कर्शितमिति गो. पाठः । ८ श्लक्ष्णेति गो. पाठः । ९ तच्च त्वं क्षन्तुमर्हसीति गो. पाठः ।

सप्तत्रिंशः सर्गः ।

सकलदिगन्ततः कपिसैन्यसमानयनार्थं दूतान्प्रेषयितुं सुग्रीवो हनुमन्तं नियुङ्क्ते । श्रुतसुग्रीवसंदेशाः कपयः सर्वतः सुग्रीव समापतन् । नीलेनाग्रतः प्रेषिता दूताः सुग्रीवाय फलमूलाद्युपायनानि समर्पयन्तः सकलकपिसमागमन न्यवेदयन् ।

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना । हनुमन्तं स्थितं पार्श्वे वैचनं चेदमब्रवीत् ॥ १ ॥
महेन्द्रहिमवद्विन्ध्यकैलासशिखरेषु च । मन्दरे पाण्डुशिखरे पञ्चशैलेषु ये स्थिताः ॥ २ ॥
तरुणादित्यवर्णेषु भ्राजमानेषु नित्यशः । पर्वतेषु समुद्रान्ते पश्चिमस्यां तु ये दिशि ॥ ३ ॥
आदित्यभवने चैव गिरौ संध्याभ्रसंनिभे । पद्माचलवनं भीमाः संश्रिता हरिपुंगवाः ॥ ४ ॥
अञ्जनाम्बुदसंकाशाः कुञ्जरेन्द्रमहौजसः । अञ्जने पर्वते चैव ये वसन्ति प्लवंगमाः ॥ ५ ॥
महाशैलगुहावासा वानराः कनकप्रभाः । मेरुपार्श्वगताश्चैव ये च धूम्रगिरिं श्रिताः ॥ ६ ॥
तरुणादित्यवर्णाश्च पर्वते ये महारुणे । पिबन्तो मधु मैरेयं भीमवेगाः प्लवंगमाः ॥ ७ ॥
वनेषु च सुरम्येषु सुगन्धिषु महत्सु च । तापसाश्रमरम्येषु वनान्तेषु समन्ततः ॥ ८ ॥
तांस्तांस्त्वमानय क्षिप्रं पृथिव्यां सर्ववानरान् । सामदानादिभिः कल्पैर्वानरैर्वेगवत्तरैः ॥ ९ ॥

वृत्तये स्वोक्तित्वमेव बोधयन्त्वापराधं क्षमापयति–यच्चेति । रामभाषितं सीताविरोगजविलापरूपम् ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०–यदिति । शोकाभिभूतस्य रामस्य भाषितं विलापमित्यर्थः, श्रुत्वा मया परुषाणि त्वदुक्तस्तन्मे क्षमस्व॥२०॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

गो० टी०–स्वोक्तपरुषवाक्यानां रामोक्तस्वशङ्का मा भूदिति स्वेनैवोक्तस्वदुपपादयन् स्वापराधं शमयति–यच्चेति । भाषितं सीतोद्देशेन श्रवणासह्यं विलापम् ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

१–२] ति० टी०–अथ सुग्रीवेणापरिमितदूतप्रेषणमनेककोटिनिजसेनासंमेलनम्—एवमिति ॥ १ ॥ २ ॥

रा० टी०–लक्ष्मणाज्ञाश्रवणानन्तरकालिकं सुग्रीववृत्तान्तमाह—एवमित्यादिभिः । लक्ष्मणेन एवमुक्तः सुग्रीवः पार्श्वे स्थितं हनुमन्तमिदमब्रवीत् ॥ १ ॥

गो० टी०–अथ सर्ववानरसमानयनं सप्तत्रिंशे–एवमित्यादि ॥ १ ॥

रा० टी०–तद्वचनाकारमाह—महेन्द्रेत्यादिभिः । ये हरिपुङ्गवाः महेन्द्रादिपाण्डुशिखरविशिष्टमन्दरान्तेषु पञ्चशैलेषु स्थितास्तान् पश्चिमस्यां पश्चिमायां दिशि समुद्रान्ते समुद्रपरतीरे विद्यमानेषु नित्यशो भ्राजमानेषु तरुणादित्यवर्णेषु पर्वतेषु अस्ताचलावलम्बिपष्टिसहस्रसौवर्णगिरिषु ये स्थितास्ताश्च संध्याभ्रसंनिभे सायंकालिकमेघसदृशे आदित्यभवने गिरौ च उदयाचलास्ताचलयोरित्यर्थः, ये स्थिताः ये च पद्माचलवनं पद्माचलाभिधगिरिविशेषसंबन्धिकाननं संश्रिताः ये च प्लवङ्गमाः अञ्जने अञ्जननिभे पर्वते वसन्ति ये च वानराः महाशैलगुहावासाः महाशैलगुहास्तु आवासो येषां ते ये च मेरुपार्श्वगताः ये च धूम्रगिरिं श्रिताः मैरेयं मधु पिबन्तः महारुणे पर्वते वनादिषु च समन्ततो ये श्रितास्तान् सर्ववानरान् सामदानादिभिः कल्पैः आनेतुं समर्थैः वेगवत्तरैर्वानरैः क्षिप्रं त्वमानयस्व । श्लोकाष्टकमेकान्वयि ॥ २—९ ॥

गो० टी०–महेन्द्रादय एव पञ्च शैलाः ॥ २ ॥

३] ति० टी०–पर्वतेषूक्तातिरिक्तेषु । तथा पश्चिमस्यां तु ये दिशि पश्चिमस्यामित्यार्षम् ॥ ३ ॥

४-५] ति० टी०–आदित्यभवने गिरौ ये स्थिताः उदयाचलास्ताचलयोरित्यर्थः । पद्माचलो गिरिविशेषः ॥ ४ ॥ ५ ॥

६-७] ति० टी–महाशैलस्तदाख्यपर्वतः ॥ ६ ॥ ७ ॥

८] ति० टी०–तापसाश्रमरम्येषु रम्यतापसाश्रमेषु । यद्वा तै रम्येष्विति वनविशेषणम् ॥ ८ ॥

९] ति० टी०–क्षिप्रमानयेत्युक्ते मयैव गन्तव्यमित्याशङ्क्याह—' सामदानादिभिः कल्पैर्वानरैर्वेगवत्तरैः ' इत्यादिना दुष्टे दण्डः । कल्पैरुपायैः । आनयेत्यस्य चानाययेत्यर्थ इति कतकः ॥ ९ ॥

गो० टी०–तरुणेति । पश्चिमायां दिशि ये स्थिताः तेषु ये वानराः स्थिता इति योजना । अस्तगिरिपर्यन्तपर्वतेष्वि-

---

१ सचिवं त्विदमिति गो.पाठः। २ सर्वत इति गो. पाठः। ३ पश्चिमायामिति गो.पाठः। ४ पद्मतालवनं भीममिति गो.पाठः। ५ कुञ्जरप्रतिमौजस इति गो.पाठः। ६ मनःशिलेति गो.पाठः। ७ चेति गो.पाठः। ८ तापसानां चेति गो.पाठः। ९ समानयेति गो.पाठः।१० कल्पैराशु प्रेषय वानरानिति गो. पाठः।

प्रेषिताः प्रथमं ये च मयाज्ञाता महाजवाः । त्वरणार्थं तु भूयस्त्वं [1]संप्रेषय हरीश्वरान् ॥ १० ॥
ये प्रसक्ताश्च कामेषु दीर्घसूत्राश्च वानराः । इहानयस्व ताञ्[2]शीघ्रं सर्वानेव कपीश्वरान् ॥ ११ ॥
अहोभिर्दशभिर्ये [3]चै नागच्छन्ति ममाज्ञया । हन्तव्यास्ते दुरात्मानो राजशासनदूषकाः ॥ १२ ॥
शतान्यथ [4]सहस्राणि कोट्यश्च मम शासनात् । प्रयान्तु कपिसिंहानां [6]निदेशे मम ये स्थिताः॥ १३ ॥
मेघपर्वतसंकाशाश्छादयन्त इवाम्बरम् । घोररूपाः कपिश्रेष्ठा यान्तु मच्छासनादितः॥ १४ ॥
ते गतिज्ञा गतिं गत्वा पृथिव्यां सर्ववानराः । आनयन्तु हरीन्सर्वांस्त्वरिताः शासनान्मम ॥ १५ ॥
तस्य वानरराजस्य श्रुत्वा वायुसुतो वचः । दिक्षु सर्वासु विक्रान्तान्प्रेषयामास वानरान् ॥ १६ ॥
ते पदं विष्णुविक्रान्तं पतत्रिज्योतिरध्वगाः । प्रयाताः प्रहिता राज्ञा हरयस्तु क्षणेन वै ॥ १७ ॥
ते समुद्रेषु गिरिषु वनेषु च सरःसु च । वानरा वानरान्सर्वान्रामहेतोरचोदयन् ॥ १८ ॥
मृत्युकालोपमस्याज्ञां राजराजस्य वानराः । सुग्रीवस्याययुः श्रुत्वा सुग्रीवभयशङ्किताः ॥ १९ ॥

स्यर्थः । आदित्यभवने उदयगिरौ पद्माः चन्दनविशेषाः मनःशिलागुहावासाः मनःशिलामयगुहावासाः । महारुणे महारुणाख्ये । यत्र यच्छब्दो नास्ति तत्राध्याहर्तव्यः । सामेति । कल्पैः उपायैः समानय तदर्थं प्रेषय ॥ ३–९ ॥

१०] ति० टी०–नन्वेते प्रेषिता एव पूर्वं दूता इत्यत्राह—प्रेषिता इति । प्रथमं पूर्वं ये महाजवा दूताः प्रेषितास्ते मया ज्ञाता एव, तथाऽपि तेषां त्वरणार्थमपरान्हरीश्वरान्प्रेषय ॥१०॥

रा० टी०–नन्वेतेषामानयनार्थं वानराः पूर्वमेव प्रेषिताः पुनः किमर्थमिदानीमुच्यते इत्यत आह—प्रेषिता इति । मया ज्ञाता परीक्षिताः ये पूर्वं प्रेषितास्तेषां त्वरणार्थं हरीश्वरान् भूयः संप्रेषय ॥ १० ॥

गो० टी०–प्रेषिता इति । प्रेषितदूतत्वरणार्थोक्तिः स्वस्य प्रकृतकार्ये पूर्वमेव सावधानतां लक्ष्मणाय द्योतयितुम् ॥ १० ॥

११] ति० टी०–कामेषु तद्भोगेषु प्रसक्ता ये च दीर्घसूत्रा विलम्बितव्यापाराः आनयस्वानायय ॥ ११ ॥

रा० टी०–ये इति । ये वानराः कामेषु प्रसक्ताः ये च दीर्घसूत्राः स्वभावतो विलम्बेन कार्यकारिणः तान् शीघ्रमिहानयस्व ॥ ११ ॥

गो० टी०–ये प्रसक्ता इति । दीर्घसूत्राः चिरक्रियाः उद्योगं कुर्वाणा इव कालयापका इत्यर्थः ॥ ११ ॥ १२ ॥

१२] ति० टी०–ये दूताः ॥ १२ ॥

रा० टी०–अहोभिरिति । दशभिः अहोभिः दिनैः ये इह न आगच्छन्ति ते राजशासनदूषकाः ममाज्ञया हन्तव्याः ॥१२॥

१३] ति० टी०–प्रेषणीयदूतसंख्यामाह—शतानीति । एतेन दूतानन्त्यमुक्तम् ॥ १३ ॥

रा० टी०–शतानीति । ये मम निदेशे स्थितास्तेषां कपिसिंहानां शतादीनि प्रयान्तु ॥ १३ ॥

गो० टी०–शतानीति । बहुसंख्याभिधानं लक्ष्मणाय वानरासंख्येयत्वद्योतनार्थम् ॥ १३ ॥ १४ ॥

१४] ति०टी०–तदेव स्पष्टयति–छादयन्त इवाम्बरमिति१४

रा० टी०–मेघेति । अम्बरं छादयन्त इव मेघपर्वतसंकाशाः ये कपिश्रेष्ठास्ते मच्छासनादितः यान्तु त्वरणार्थमिति शेषः ॥ १४ ॥

१५–१६] ति० टी०–गतिं गत्वा वेगवत्तरां गतिं गत्वा ॥ १५ ॥ १६ ॥

रा० टी०–ते इति । गतिज्ञाः तत्तत्स्थानाभिज्ञाः सर्ववानराः गतिं तत्तन्निवासं गत्वा सर्वान् हरीन् आनयन्तु गतिशब्दः कर्मसाधनः ॥ १५ ॥

रा० टी०–तस्येति । वायुसुतो हनुमान् वानरराजस्य वचः श्रुत्वा विक्रान्तान् विक्रमवतो वानरान् सर्वासु दिक्षु प्रेषयामास ॥ १६ ॥

गो० टी०–त इति । गम्यत इति गतिः वासस्थानम् । पृथिव्यां सर्वान् हरीन् आनयन्तु इति संबन्धः ॥ १५ ॥ १६ ॥

१७–१८] ति० टी०–विष्णुविक्रान्तं पदमाकाशम् । पतत्रिज्योतिरध्वगाः पक्षिणां नक्षत्राणां च मार्गगाः॥१७॥१८॥

रा० टी०–ते इति । राज्ञा प्रहिताः प्रेषितास्ते हरयः पतत्रिज्योतिरध्वगाः पतत्रिज्योतिषां पक्षिणां तारागणानां च अध्वना गच्छन्ति ते सन्तः विष्णुविक्रान्तं विष्णुचरणेन समाक्रान्तं पदं गगनं क्षणेन प्रयाताः ॥ १७ ॥

रा० टी०–ते इति । ते वानराः समुद्रादिषु वियमानान् वानरान् रामहेतोः अचोदयन् ॥ १८ ॥

गो० टी०–ते पदमिति । पतत्रिज्योतिरध्वगाः पक्षिनक्षत्रमार्गगाः सन्तः विष्णुविक्रान्तं पदम् आकाशं प्रयाताः१७–१९

१९] ति०टी०–मृत्युकालोपमस्य निग्रहविषय इति शेषः१९

---

१ दूता इति गो. पाठः । २ हरीन् संप्रेषयापरानिति गो. पाठः । ३ सर्वाञ्शीघ्रं तु मम शासनादिति गो. पाठः । ४ हीति गो. पाठः । ५ सहस्राणामिति गो. पाठः । ६ दिशो मम मते इति गो. पाठः । ७ नदिति गो. पाठः ।

ततस्तेऽञ्जनसंकाशा गिरेस्तस्मान्महाबलाः । तिस्रः कोट्यः प्लवंगानां निर्ययुर्यत्र राघवः ॥ २० ॥
अस्तं गच्छति यत्रार्कस्तस्मिन्गिरिवरे रताः । संतप्तहेमवर्णाभास्तस्मात्कोट्यो दश च्युताः ॥२१॥
कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम् । ततः कोटिसहस्राणि वानराणां समागमन् ॥ २२ ॥
फलमूलेन जीवन्तो हिमवन्तमुपाश्रिताः । तेषां कोटिसहस्राणां सहस्रं समवर्तत ॥ २३ ॥
अङ्गारकसमानानां भीमानां भीमकर्मणाम् । विन्ध्याद्वानरकोटीनां सहस्राण्यपतन्द्रुतम् ॥ २४ ॥
क्षीरोदवेलानिलयास्तमालवनवासिनः । नारिकेलाशनाश्चैव तेषां संख्या न विद्यते ॥ २५ ॥
वनेभ्यो गह्वरेभ्यश्च सरिद्भ्यश्च महाबलाः । आगच्छद्वानरी सेना पिबन्तीव दिवाकरम् ॥ २६ ॥
ये तु त्वरयितुं याता वानराः सर्ववानरान् । ते वीरा हिमवच्छैले ददृशुस्तं महाद्रुमम् ॥ २७ ॥
तस्मिन्गिरिवरे पुण्ये यज्ञो माहेश्वरः पुरा । सर्वदेवमनस्तोषो बभूव सुमनोरमः ॥ २८ ॥
अन्ननिस्यन्दजातानि मूलानि च फलानि च । अमृतस्वादुकल्पानि ददृशुस्तत्र वानराः ॥ २९ ॥
तदन्नसंभवं दिव्यं फलमूलं मनोहरम् । यः कश्चित्सकृदश्नाति मासं भवति तर्पितः ॥ ३० ॥

रा० टी०–मृत्विमिति । मृत्युकालोपमस्य अस्य सुग्रीवयात्रां श्रुत्वा सुग्रीवभयशङ्किताः सन्तः वानरा आययुः ॥१९॥

२०–२४] ति० टी०–तस्माद्गिरेरञ्जनगिरेः ॥२०–२४॥

रा० टी०–तत इति । ततः आगमनानन्तरं तस्माद्वर्णिगद्रिरेः आगताः प्लवङ्गमानां तिस्रः कोट्यः यत्र राघवस्तत्र निर्ययुः ॥ २० ॥

रा० टी०–अस्तमिति । यत्र अर्कः अस्तं गच्छति तस्मिन् गिरिवरे रताः स्थिताः ये संतप्तहेमवर्णाभास्ते दशकोट्यस्तस्माद् गिरेः च्युताः ॥ २१ ॥

रा० टी०–कैलासेति । सिंहकेसरवर्चसां वानराणां कोटिसहस्राणि समागमन् ॥ २२ ॥

रा० टी०–फलेति । फलमूलेन जीवन्तः हिमवन्तमुपाश्रितास्तेषां कोटिसहस्राणां कोटिसहस्रसंख्याकानां सहस्रं समवर्तत प्राप्नोत् ॥ २३ ॥

रा० टी०–अङ्गारकेति । अङ्गारकसमानानां भौमसदृशानां भीमकर्मणां भयंकरकर्मकारिणामत एव भीमानां वानरकोटीनां कोटिसंख्याकवानराणां सहस्राणि विन्ध्यात् विन्ध्यगिरेः द्रुतमपतन् ॥ २४ ॥

गो० टी०–तत इति । यत्र येन हेतुना राघवो वर्तते ततः तस्माद्धेतोः तस्माद् गिरेः अञ्जनगिरेः निर्ययुः ॥ २०–२४ ॥

२५–२६] ति० टी०–असंख्यं बलमित्याह—तेषां संख्या न विद्यत इति ॥ २५ ॥ २६ ॥

रा० टी०–क्षीरेति । क्षीरोदवेलानिलयाः क्षीरसागरवप्रनिवासिनस्तमालवनवासिनश्च नारिकेलाशनाः ये वानराः आगता इति शेषः, तेषां संख्या न विद्यते बहुत्वात्ते न परिगणिता इति तात्पर्यम् ॥ २६ ॥

रा० टी०–वनेभ्य इति । वानरीसेना दिवाकरं पिबन्तीव वनादिभ्य आगच्छत् ॥ २६ ॥

गो० टी०–क्षीरोदेति अत्रापतन् द्रुतमित्यनुषज्यते । संख्या न विद्यत इति उत्तरत्र संख्याकीर्तनं प्रधानाभिप्रायेण ॥ २५ ॥ २६ ॥

२७] ति० टी०–ये च त्वरयितुं याता हनुमत्प्रेषिता महाद्रुममतिप्रसिद्धभगवद्धामभूतं माहेश्वरयज्ञवाटस्थं ददृशुः । पूर्वं नीलप्रेषितान्दूताश्च ददृशुरिति शेषः । अतस्तेषां तत एव परावृत्तिः ॥ २७ ॥

रा० टी०–ये इति । सर्ववानरान् त्वरयितुं याता ये वानरास्ते तु तं शिवाश्रमत्वेन प्रसिद्धं महाद्रुमं ददृशुः ॥ २७ ॥

गो० टी०–ये त्विति । तुशब्दो हनुमत्प्रेरितवानरव्यावर्तकः । नीलेन पूर्वं प्रेरिता इत्यर्थः तेषामेव लक्ष्मणसंनिधाने समागमनं सत्यो हनुमत्प्रेरितानां तदसंभवात् । तं प्रसिद्धम् ॥ २७–३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

२८] ति० टी०–माहेश्वरो यज्ञो महेश्वरदेवत्यो दिव्योऽश्वमेध इति कतकः । सर्वदेवानां मनस्तोषो यत्र सः ॥ २८ ॥

रा० टी०–तस्मिन्निति । पुण्ये तस्मिन् गिरिवरे सर्वदेवमनस्तोषः निखिलदेवतृप्तिकारकः माहेश्वरः महेश्वरदेवताकः सुमनोरमः यज्ञो बभूव ॥ २८ ॥

२९–३०] ति० टी०–अन्ननिस्यन्दाद्धोमद्रव्याज्यादिस्रवणाज्जातानि ॥ २९ ॥ ३० ॥

रा० टी०–अन्नेति । तत्र तस्मिन् गिरिवरे अन्ननिष्यन्दात् पायसादिप्रस्रावणात् जातानि अमृतस्वादुकल्पानि मूलानि फलानि च वानराः ददृशुः ॥ २९ ॥

रा० टी०–तदिति । तदन्नसंभवं फलमूलं सकृदेकवारं योऽश्नाति स मासं तर्पितस्तृप्तो भवति ॥ ३० ॥

---

१ जवा इति गो. पाठः । २ स्थिता इति गो. पाठः । ३ तप्तहेममहाभास इति गो. पाठः । ४ उपेति गो. पाठः । ५ अशना इति गो. रा. पाठः । ६ जवेति गो. बलेति रा. पाठः । ७ शैलमिति गो. पाठः । ८ बभौ दिव्यो मनोहर इति गो. पाठः । ९ निष्यन्देति गो.रा.पाठः। १० अमृतास्वादेति गो. पाठः । ११ फलमिति गो. पाठः ।

तानि मूलानि दिव्यानि फलानि च फलाशनाः । औषधानि च दिव्यानि जगृहुर्हरिपुङ्गवाः ॥ ३१ ॥
तस्माच्च यज्ञायतनात्पुष्पाणि सुरभीणि च । आनिन्युर्वानरा गत्वा सुग्रीवप्रियकारणात् ॥ ३२ ॥
ते तु सर्वे हरिवराः पृथिव्यां सर्ववानरान् । संचोदयित्वा त्वरितं यूथानां जग्मुरग्रतः ॥ ३३ ॥
ते तु तेन मुहूर्तेन कपयः शीघ्रचारिणः । किष्किन्धां त्वरया प्राप्ताः सुग्रीवो यत्र वानरः ॥ ३४ ॥
ते गृहीत्वौषधीः सर्वाः फलमूलं च वानराः । तं प्रतिग्राहयामासुर्वचनं चेदमब्रुवन् ॥ ३५ ॥
सर्वे परिसृताः शैलाः सरितश्च वनानि च । पृथिव्यां वानराः सर्वे शासनादुपयान्ति ते ॥ ३६ ॥
एवं श्रुत्वा ततो हृष्टः सुग्रीवः प्लवगाधिपः । प्रतिजग्राह चैं प्रीतस्तेषां सर्वमुपायनम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टात्रिंशः सर्गः ।

शिबिकामधिरुह्य सौमित्रिणा सहागत्य पादयोः प्रणमन्तं सुग्रीवं परिष्वज्योपवेश्य रामः सग्रहेण राजतन्त्र समुपदिशन्कार्यं स्मारयति । रामप्रसादं प्रशंसन्सुग्रीवः स्वोद्यमं निवेद्यासन्ध्येयकपिबलप्रापणं ख्यापयन्परितोषयति ।

प्रतिगृह्य च तत्सर्वमुपायनमुपाहृतम् । वानरान्सान्त्वयित्वा च सर्वानेव व्यसर्जयत् ॥ १ ॥
विसर्जयित्वा स हरीन्सहस्रान्कृतकर्मणः । मेने कृतार्थमात्मानं राघवं च महाबलम् ॥ २ ॥
स लक्ष्मणो भीमबलं सर्ववानरसत्तमम् । अब्रवीत्प्रश्रितं वाक्यं सुग्रीवं संप्रहर्षयन् ॥ ३ ॥
किष्किन्धाया विनिष्क्राम यदि ते सौम्य रोचते । तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य सुभाषितम् ॥ ४ ॥

३१-३२] ति० टी०–औषधानि संजीवन्यादीनि॥ ३१॥ ३२॥

रा० टी०–तानीति । तानि मूलानि फलानि च दिव्यानि औषधानि च हरियूथपाः जगृहुः ॥ ३१ ॥

रा० टी०–तस्मादिति । तस्माद् गिरिस्थाद् यज्ञायतनाद् यज्ञभूमेः सुरभीणि पुष्पाणि वानराः गत्वा आनिन्युः ॥ ३२ ॥

३३-३४] ति० टी०–ते तु सर्वे दूतरूपा यूथानामग्रतः स्वप्रेरितबलानामागमनात्पूर्वमित्यर्थः ॥ ३३ ॥ ३४ ॥

रा० टी०–ते इति । ते सर्वे हरिवराः पृथिव्यां वियमानान् सर्ववानरान् अनागतनिखिलकपीन् संचोदयित्वा संचोद्य यूथानामग्रतः त्वरितं जग्मुः ॥ ३३ ॥

रा० टी०–ते इति । त्वरयोपलक्षितास्ते कपयस्तेन स्वस्वयूथपेन सह यत्र सुग्रीवो वानरस्तां किष्किन्धां मुहूर्तेन प्राप्ताः ॥ ३४ ॥

३५-३७] ति० टी०–ते हनुमत्प्रेष्यसहिता नीलप्रेषिता दूताः ॥ ३५-३७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०–ते इति । ते वानराः सर्वाः गृहीतौषधीस्तं सुग्रीवं ग्राहयामासुः इदमब्रुवन् च ॥ ३५ ॥

रा० टी०–तद्वचनाकारमाह—सर्वे इति । शैलादयः परिसृताः अस्माभिर्गताः अत एव सर्वे वानराः तव शासनाद् उपयान्ति समीपमागच्छन्ति ॥ ३६ ॥

रा० टी०–एवमिति । एवं श्रुत्वा हृष्टः सुग्रीवस्तेषामुपायनं प्रतिजग्राह ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

१] ति० टी०–प्रतिगृह्येति ॥ १ ॥

रा० टी०–उपायनप्रग्रहणानन्तरकालिकं सुग्रीवदृत्तान्तमाह—प्रतिगृह्येत्यादिभिः । उपाहृतं वानरैः प्रापितमुपायनं प्रतिगृह्य वानरान् सान्त्वयित्वा व्यसर्जयत् ॥ १ ॥

गो० टी०–अथ रामेण सुग्रीवसमागमोऽष्टात्रिंशे–प्रतिगृह्येत्यादि । उपायनम् उपदाम् ॥ १-६ ॥

२-३] ति० टी०–राघवं च कृतार्थमित्यनुषङ्गः ॥ २॥ ३॥

रा० टी०–विसर्जयित्वेति । स सुग्रीवः कृतकर्मणः बहुवारं साधितकृत्यान् हरीन् विसर्जयित्वा विसृज्य राघवमात्मानं च कृतार्थं मेने ॥ २ ॥

रा० टी०–स इति । लक्ष्मणः सुग्रीवं संप्रहर्षयन् हे सौम्य ! यदि तव रोचते तर्हि किष्किन्धाया विनिष्क्रामः विनिष्क्रमणं भवेदिति शेषः, इति प्रश्रितं वाक्यमब्रवीत् । सार्धश्लोक एकान्वयी ॥ ३ ॥

४] ति० टी०–विनिष्क्रामेति । प्रार्थने लोट् ॥ ४ ॥

१ यूथपा इति गो. रा. पाठः । २ त्वरिता इति गो. पाठः । ३ यूथपा इति गो. पाठः । ४ गामिन इति गो. पाठः । ५ गता इति गो. पाठः । ६ समुद्रा इति गो. पाठः । ७ तदिति गो. पाठः । ८ शूरांस्तानिति गो. रा. पाठः । ९ विनिष्क्रामो इति रा. पाठः ।

परमप्रीतो वाक्यमेतदुवाच ह । एवं भवतु गच्छाम स्थेयं त्वच्छासने मया ॥ ५ ॥
तमेवमुक्त्वा सुग्रीवो लक्ष्मणं शुभलक्षणम् । विसर्जयामास तदा तारायाश्चैव योषितः ॥ ६ ॥
[1]एहीत्युच्चैर्हरिवरान्सुग्रीवः समुदाहरत् । तस्य तद्वचनं श्रुत्वा हरयः शीघ्रमाययुः ॥ ७ ॥
बद्धाञ्जलिपुटाः सर्वे ये स्युः स्त्रीदर्शनक्षमाः । तानुवाच ततः प्राप्तान्राजाऽर्कसदृशप्रभः ॥ ८ ॥
उपस्थापयत क्षिप्रं शिबिकां मम वानराः । श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः ॥ ९ ॥
समुपस्थापयामासुः शिबिकां प्रियदर्शनाम् । तामुपस्थापितां दृष्ट्वा शिबिकां वानराधिपः ॥ १० ॥
लक्ष्मणारुह्यतां शीघ्रमिति सौमित्रिमब्रवीत् । इत्युक्त्वा काञ्चनं यानं सुग्रीवः सूर्यसंनिभम्॥ ११ ॥
[2]बहुभिर्हरिभिर्युक्तमारुरोह सलक्ष्मणः । पाण्डुरेणातपत्रेण [3]ध्रियमाणेन मूर्धनि ॥ १२ ॥
शुक्लैश्च वालव्यजनैर्धूयमानैः समन्ततः । शङ्खभेरीनिनादैश्च [4]बन्दिभिश्चाभिनन्दितः ॥ १३ ॥
निर्ययौ प्राप्य सुग्रीवो राज्यश्रियमनुत्तमाम् । स वानरशतैस्तीक्ष्णैर्बहुभिः शस्त्रपाणिभिः ॥ १४ ॥
परिकीर्णो ययौ तत्र यत्र रामो व्यवस्थितः । स तं देशमनुप्राप्य श्रेष्ठं रामनिषेवितम् ॥ १५ ॥
अवातरन्महातेजाः शिबिकायाः सलक्ष्मणः । आसाद्य च ततो रामं कृताञ्जलिपुटोऽभवत् ॥ १६ ॥
कृताञ्जलौ स्थिते तस्मिन्वानराश्चाभवंस्तथा । तटाकमिव तं दृष्ट्वा रामः कुड्मलपङ्कजम् ॥ १७ ॥
वानराणां महत्सैन्यं सुग्रीवे प्रीतिमानभूत् । पादयोः पतितं मूर्ध्ना तमुत्थाप्य हरीश्वरम् ॥ १८ ॥
प्रेम्णा च बहुमानाच्च राघवः परिषस्वजे । परिष्वज्य च धर्मात्मा निषीदेति ततोऽब्रवीत्॥ १९ ॥
निषण्णं तं ततो दृष्ट्वा क्षितौ रामोऽब्रवीत्ततः । धर्ममर्थं च कामं च काले यस्तु निषेवते ॥ २० ॥
विभज्य सततं वीर स राजा हरिसत्तम । हित्वा धर्मं तथाऽर्थं च कामं यस्तु निषेवते ॥ २१ ॥

रा० टी०–तस्येति । सुभाषितं लक्ष्मणस्य वचनं श्रुत्वा त्वच्छासने यतो मया स्थेयम् अतः एवं भवदुक्तं भवतु सिध्यतु वयं गच्छामः एतत् वाक्यं परमप्रीतः सुग्रीव उवाच । सार्धश्लोक एकान्वयी ॥ ४ ॥ ५ ॥

५-६] ति० टी०–स्थेयम् तत्र हातव्यमित्यर्थः ॥ ५ ॥६॥

रा० टी०–तमिति । सुग्रीवो लक्ष्मणमेवमुक्त्वा तारायाः योषितः विसर्जयामास तत्तत् गृहं प्रापयामास ॥ ६ ॥

७] ति० टी०–एहि एतेत्यर्थः ॥ ७ ॥

रा० टी०–एहीति । सुग्रीवो हरिवरान् एहीत्युच्चैः समुदाहरत । अर्धं पृथक् । तस्येति । ये स्त्रीदर्शने क्षमाः तारादिसमीपस्थ सुग्रीवदर्शनयोग्याः स्युः बद्धाञ्जलिपुटास्ते हरयः वचनं श्रुत्वा शीघ्रमाययुः । अर्धद्वयमेकान्वयि ॥ ७ ॥

गो० टी०–एतेति । एत आगच्छत ॥ ७–११ ॥

८-११] ति० टी०–स्त्रीदर्शनक्षमाः स्त्रीसमूहेऽपि राजदर्शनक्षमाः अत्यात्मा इति यावत् ॥ ८–११ ॥

रा०टी०–तानिति । अर्कसदृशप्रभो राजा हे वानराः! मम शिबिकां क्षिप्रमुपस्थापयत इति प्राप्तान् वानरान् उवाच ॥८॥

रा० टी०–श्रुत्वेति । हरयस्तस्य सुग्रीवस्य वचनं श्रुत्वा शिबिकां समुपस्थापयामासुः ॥ ९ ॥

रा० टी०–तामिति । वानराधिपः सुग्रीवः शिबिकां समुपस्थापितां दृष्ट्वा हे लक्ष्मण ! त्वया आरुह्यतामिति सौमित्रिमब्रवीत् ॥ १० ॥

रा० टी०–इतीति । इत्युक्त्वा बहुभिर्हरिभिर्वानरैः युक्तं विमानं सलक्ष्मणो लक्ष्मणसहितः सञ्चारुरोह ॥ ११ ॥

गो० टी०–इत्युक्त्वेति । हरिभिः वाहकहरिभिः १२–१६

१२–१६] ति० टी०–हरिभिर्वाहकैः । सलक्ष्मण इत्यनेनैकवाहनारोहणात्सख्यातिशयः सूचितः ॥ १२–१६ ॥

रा० टी०–पाण्डुरेणेति । मूर्धनि ध्रियमाणेन पाण्डुरेण पाण्डुरवर्णविशिष्टेन आतपत्रेण छत्रेण समन्ततो धूयमानैर्वालव्यजनैश्चामरैश्च शङ्खभेरीनिनादैश्च बन्दिभिश्च अभिनन्दितः प्राप्तानन्दः सुग्रीवः उत्तमां राज्यश्रियं प्राप्य निर्ययौ । अर्धचतुष्टयमेकान्वयि ॥ १२ ॥ १३ ॥

रा० टी०–स इति । तीक्ष्णैः बहुभिः परिकीर्णो युक्तः सः सुग्रीवः यत्र रामो व्यवस्थितः संस्थितस्तत्र ययौ ॥ १४ ॥

रा० टी०–स इति । सलक्ष्मणः सुग्रीवः रामनिषेवितं तं देशमनुप्राप्य शिबिकायाः अवातरत् । ततो राममासाद्य कृताञ्जलिपुटोऽभवत् । सार्धश्लोक एकान्वयी ॥ १५ ॥ १६ ॥

गो० टी०–आसाद्येति । तथाभवन् कृताञ्जलिपुटा अभवन् ॥ १७ ॥ १८ ॥

१७–२१] ति० टी०–वानराश्च तथाभवन् कृताञ्जलि-

१ तारामन्याश्चेति गो. पाठः । २ एतेत्युच्चैरिति गो. पाठः । ३ हरिभिरिति गो. पाठः । ४ भ्रीयेति गो. पाठः । ५ हरिभिरिति गो. पाठः । ६ वच इति गो. पाठः ।

स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते । अमित्राणां वधे युक्तो मित्राणां संग्रहे रतः ॥ २२ ॥
त्रिवर्गफलभोक्ता च राजा धर्मेण युज्यते । उद्योगसमयस्त्वेष प्राप्तः शत्रुनिषूदन ॥ २३ ॥
संचिन्त्यतां हि पिङ्गेश हरिभिः सहमन्त्रिभिः । एवमुक्तस्तु सुग्रीवो रामं वचनमब्रवीत् ॥ २४ ॥
प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् । त्वत्प्रसादान्महाबाहो पुनः प्राप्तमिदं मया ॥ २५ ॥
तव देव प्रसादाच्च भ्रातुश्च जयतां वर । कृतं न प्रतिकुर्याद्यः पुरुषाणां हि दूषकः ॥ २६ ॥
एते वानरमुख्याश्च शतशः शत्रुसूदन । प्राप्ताश्चादाय वलिनः पृथिव्यां सर्ववानरान् ॥ २७ ॥
ऋक्षाश्च वानराः शूरा गोलाङ्गूलाश्च राघव । कान्तारवनदुर्गाणामभिज्ञा घोरदर्शनाः ॥ २८ ॥
देवगन्धर्वपुत्राश्च वानराः कामरूपिणः । स्वैः स्वैः परिवृताः सैन्यैर्वर्तन्ते पथि राघव ॥ २९ ॥
शतैः शतसहस्रैश्च वर्तन्ते कोटिभिस्तथा । अयुतैश्चावृता वीर शङ्कुभिश्च परंतप ॥ ३० ॥
अर्बुदैरर्बुदशतैर्मध्यैश्चान्त्यैश्च वानराः । समुद्राश्च पराधैश्च हरयो हरियूथपाः ॥ ३१ ॥
आगमिष्यन्ति ते राजन्महेन्द्रसमविक्रमाः । मेघपर्वतसंकाशा मेरुविन्ध्यकृतालयाः ॥ ३२ ॥

पुटा अभवन्नित्यर्थः । आह्लादकत्वात्तटाकोपमा तदुपमेयं वानराणां महत्सैन्यम् ॥ १७—२१ ॥

रा० टी०-कृतेति । स्थिते तस्मिन् सुग्रीवे कृताञ्जलौ सति वानराश्च तथा कृताञ्जलयोऽभवन् । अर्धं पृथक्—तटाकमिति । कुड्मलपङ्कजं मुकुलीभूतपङ्कजविशिष्टं तं प्रसिद्धं तटाकमिव वानराणां महत्सैन्यं रामो दृष्ट्वा सुग्रीवे प्रीतिमानभूत् । अर्धद्वयमेकान्वयि ॥ १७ ॥

रा० टी०-पादयोरिति । मूर्ध्ना पादयोः पतितं हरीश्वरं प्रेम्णा बहुमानात् अतिसत्कारात् धर्मात्मा राघवः परिष्वस्वजे परिष्वज्य निषीद तिष्ठ इत्यब्रवीच्च । सार्धश्लोक एकान्वयी ॥ १८ ॥ १९ ॥

रा० टी०-निषण्णमिति । क्षितौ पृथिव्यां निषण्णं स्थितं तं सुग्रीवं दृष्ट्वा रामोऽब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह—धर्ममिति । यः पुरुषः धर्मादीन् विभज्य काले यथोचितसमये सततं सेवते स एव राजा । अर्धद्वयमेकान्वयि ॥ २० ॥

रा० टी०-हित्वेति । यः पुरुषः धर्ममर्थं च हित्वा काममेव सेवते सः पुरुषः पतितः अर्थादिभ्यः च्युतः सन् प्रतिबुध्यते पश्चात्तापं करोतीत्यर्थः । तत्र दृष्टान्तः—वृक्षाग्रे सुप्तः अत एव पतितः जनो यथा ॥ २१ ॥

गो० टी०-पादयोरिति । पूर्वं दूरादञ्जलिः कृतः संप्रति समीपे पादयोः पतनम् ॥ १९—२३ ॥

२२] ति० टी०-वृक्षाग्रे सुप्तः पतितः सन्यथा प्रतिबुध्यते, तथा कामपरो राज्यभ्रष्टः सन्प्रतिबुध्यत इत्यर्थः ॥ २२ ॥

रा०टी०-अमित्राणामिति । अमित्राणां शत्रूणां वधे युक्तः नियतचित्तः मित्राणां संग्रहे संपादने रतो राजा धर्मेण युज्यते अत एव त्रिवर्गफलभोक्ता च भवतीति शेषः ॥ २२ ॥

गो० टी०-अमित्राणामिति । त्रिवर्गफलभोक्ता यथाकालं धर्मार्थकामरूपफलभोक्ता । अयथाकालानुष्ठानवैषम्यं द्योतयति तुशब्दः । धर्मेण राजधर्मेण ॥ २४—२६ ॥

२३] ति० टी०-त्रिवर्गो धर्मार्थकामलक्षणस्तस्य तत्फलस्य च यथाकालं भोक्ता ॥ २३ ॥

२४-२५] ति० टी०-संचिन्त्यताम् सीतान्वेषणादिप्रतिज्ञापरिपूर्त्युपायश्चिन्त्यतामित्यर्थः ॥ २४ ॥ २५ ॥

रा० टी०-उद्योगेति । हे शत्रुनिषूदन ! एषः उद्योगसमयः उद्योगकालः प्राप्तः अतः मन्त्रिभिर्हरिभिर्वानरैः सह संचिन्त्यताम् उद्योगः क्रियतामित्यर्थः, एवमुक्तः सुग्रीवः राममब्रवीत् । सार्धश्लोक एकान्वयी ॥ २३ ॥ २४ ॥

रा० टी०-तद्वचनाकारमाह-प्रनष्टेति । अयमित्थमेव पूर्वमपि पठितः अतो न व्याख्यायते ॥ २५ ॥

गो० टी०-प्रनष्टेत्यादिसार्धश्लोकमेकं वाक्यम् । देव ! त्वत्प्रसादात्तव भ्रातुः प्रसादाच्च कपिराज्यादिकं पुनश्च प्राप्तम् ॥ २७ ॥ २८ ॥

२६] ति०टी०-हे देव ! तव प्रसादात्तव भ्रातुः प्रसादाच्चेत्यर्थः । पुरुषाणां मध्ये स एव दूषकः धर्मनाशक इत्यर्थः॥२६॥

रा० टी०-तवेति । प्रसादात् प्रीतेः तव भ्रातुर्लक्ष्मणस्य च कृतमुपकारं यो न प्रतिकुर्यात् स पुरुषाणां महात्मनां दूषकः महात्मविघातदोषं लभते इत्यर्थः ॥ २६ ॥

२७-२९] ति० टी०-आदायाहुय ॥ २७-२९ ॥

रा० टी०-एते इति । शतशः एते वानरमुख्याः पृथिव्यां सर्ववानरानादाय प्राप्ताः ॥ २७ ॥

रा० टी०-ऋक्षा इति । कान्तारवनदुर्गाणामभिज्ञाः स्वैः स्वैः सैन्यैः परिवृताः ऋक्षादयः देवादिपुत्राश्च वानराः पथि वर्तन्ते । श्लोकद्वयमेकान्वयि ॥ २८ ॥ २९ ॥

गो० टी०-एत इति । आदाय आहुय ॥ २९-३१ ॥

३०] ति० टी०-शतैरित्यादौ 'केचित्' इत्यध्याहारः । परिवृता इत्यर्थकम् 'आवृताः' इते च सर्वत्र योज्यम् । शतसहस्रं लक्षम् । लक्षशतं कोटिः । दशसहस्रमयुतम् । कोटिलक्षं शङ्कुः ॥ ३० ॥

३१-३२] ति० टी०-शङ्कुसहस्रमर्बुदम् । अर्बुदाद्दशगुणं

१ स्थिति गो. पाठः । २ विनाशनेति गो. पाठः । ३ स इति गो. पाठः । ४ ऽवाहिता इति गो. पाठः । ५ कोटिभिश्च ध्रुवन्नमा इति गो. पाठः । ६ अन्तैरिति गो. पाठः । ७ समुद्रैश्च परार्धैश्चेति गो. रा. पाठः । ८ मेरुमन्दरसंकाशा विन्ध्यमेर्वितं गो. पाठः ।

ते त्वामभिगमिष्यन्ति राक्षसं [1]योद्धुमाहवे । निहत्य रावणं युद्धे ह्यानयिष्यन्ति मैथिलीम् ॥ ३३ ॥
ततः [3]समुद्योगमवेक्ष्य [4]वीर्यवान्हरिप्रवीरस्य निदेशवर्तिनः ।
बभूव हर्षाद्वसुधाधिपात्मजः प्रबुद्धनीलोत्पलतुल्यदर्शनः ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ।

नानाजातीयासंख्यातकपिबलोत्कामणोत्थितधूलिपटलेनाकाशं सवितानमारचयन्तः शतबलिप्रमुखाः कीशसैनिकाः समुपेत्य मिथः समन्त्रयतो रामसुग्रीवयोश्चरणौ प्रणेमुः ।

इति ब्रुवाणं सुग्रीवं रामो धर्मभृतां वरः । बाहुभ्यां संपरिष्वज्य प्रत्युवाच कृताञ्जलिम् ॥ १ ॥
यदिन्द्रो वर्षते वर्षं न तच्चित्रं [5]भविष्यति । आदित्योऽसौ सहस्रांशुः कुर्याद्दिवसं [6]नभः ॥ २ ॥
चन्द्रमा रञ्जनीं कुर्यात्प्रभया सौम्य निर्मलाम् । त्वद्विधो वाऽपि मित्राणां प्रीतिं कुर्यात्परंतप ॥ ३ ॥

मध्यम् तस्मादशगुणोऽन्त्यः ततो विंशतिगुणः समुद्रः ततश्चैकशतगुणः परार्धस्तेनासंख्यत्वमुक्तम् ॥ ३१ ॥ ३२ ॥

रा० टी०-शतैरिति । हरियूथपाः हरयः शतादिभिर्वानरैरावृता वर्तन्ते, तत्र शतसहस्रे प्रसिद्धे । कोटिर्लक्षशतमयुतं दशसहस्रं, शङ्कुः कोटिलक्षम्, अर्बुदं शङ्कुसहस्रं, मध्यम् अर्बुदादशगुणं, अन्त्यः मध्यादशगुणः, समुद्रः अन्त्यादशगुणः, परार्धः समुद्राद्विंशद्गुण इति । श्लोकद्वयमेकान्वयि ॥ ३० ॥ ३१ ॥

रा० टी०-आगमिष्यन्तीति । ते उक्तसंख्याकाः वानरा आगमिष्यन्ति शीघ्रं प्राप्स्यन्ति ॥ ३२ ॥

गो० टी०-शतैरित्यादि । अत्र केचित्पदमध्याहर्तव्यम् । केचित् प्लवङ्गमाः शतैः कपिशतैः आवृता आगमिष्यन्ति केचिच्छतसहस्रैरावृता आगमिष्यन्ति केचित्कोटिभिरावृता आगमिष्यन्ति । केचिदयुतैरावृता आगमिष्यन्ति । केचिच्छङ्कुभिः केचिदर्बुदैः केचिन्मध्यैः केचिदन्तैरावृता आगमिष्यन्ति केचिद्वरयः समुद्रैरावृता आगमिष्यन्ति केचित्परार्धैरावृता आगमिष्यन्तीति योजना । संख्यालक्षणमुक्तं ज्योतिःशास्त्रे-'एकं दशशतमस्मात्सहस्रमयुतं ततः परं लक्षम् । प्रयुतं कोटिमथार्बुदमब्जे खर्वं निखर्वं च ॥ तस्मान्महासरोजं शङ्कुं सरितां पतिं त्वन्तम् । मध्यं परार्धमाहुर्यथोत्तरं दशगुणं तथा ज्ञेयम्' इति । हरियूथपा इत्येतत्प्रथमान्तविशेषणत्वेन सर्वत्र संबध्यते ॥ ३२-३४ ॥

३३] ति० टी०-ये आनयिष्यन्ति ते त्वामभिगमिष्यन्तीत्यन्वयः ॥ ३३ ॥

रा० टी०-ते इति । ये वानरास्त्वामभिगमिष्यन्ति ते सबान्धवं रावणं निहत्य मैथिलीमानयिष्यन्ति आनेष्यन्ति॥३३॥

३४] ति० टी०-प्रबुद्धनीलोत्पलतुल्यदर्शनो विकसितनीलोत्पलसदृशनेत्रः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०-तत इति । वीर्यवान् वसुधाधिपात्मजः रामः हरिप्रवीरस्य सुग्रीवस्य समुद्योगमवेक्ष्य हर्षात् प्रबुद्धनीलोत्पलतुल्यदर्शनो बभूव ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०-तत इति । प्रबुद्धनीलोत्पलतुल्यदर्शनः विकसितनीलोत्पलदर्शनीयवर्णः ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यानेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

१] ति० टी०-इतीति ॥ १ ॥

रा० टी०-सुग्रीवप्रार्थनानन्तरकालिकं रामवृत्तान्तमाह-इतीत्यादिभिः । धर्मभृतां वरो रामः इति ब्रुवाणं सुग्रीवं बाहुभ्यां संपरिष्वज्य प्रत्युवाच ॥ १ ॥

गो० टी०-अथ सर्ववानरसेनासमागम एकोनचत्वारिंशे-इति ब्रुवाणमित्यादि ॥ १ ॥

२] ति० टी०-उपकर्तृत्वं तव सहजधर्म एवेति भगवान्सुग्रीवं स्तौति-यदिति । वर्षत इति यत्तन्न चित्रम् स्वाभाविकत्वादिति शेषः ॥ २ ॥

३] ति० टी०-निर्मलां रविकिरणजतापरहिताम् । त्वद्विधः सात्त्विको मित्राणां प्रत्युपकारेण प्रीतिं कुर्यादिति यत्तदपि न चित्रम् ॥ ३ ॥

१ ये सबान्धवमिति गो. रा. पाठः । २ संख्ये इति गो. पाठः । ३ तमिति गो. पाठः । ४ बुद्धिमानिति गो. पाठः । ५ भवेत्कचिद्विनि गो. पाठः । ६ वेति गो. पाठः । ७ रश्मिभिरिति गो. पाठः । ८ पृथिवीमिति गो. पाठः ।

एवं त्वयि न तच्चित्रं भवेद्यत्सौम्य शोभनम् । जानाम्यहं त्वां सुग्रीव सततं प्रियवादिनम् ॥ ४ ॥
त्वत्सनाथः सखे संख्ये जेतास्मि सकलानरीन् । त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि ॥ ५ ॥
जहारात्मविनाशाय [1]मैथिलीं राक्षसाधमः । वञ्चयित्वा तु पौलोमीमनुह्लादो यथा शचीम् ॥ ६ ॥
न चिरात्तं वधिष्यामि रावणं निशितैः शरैः । पौलोम्याः पितरं दृप्तं शतक्रतुरिवाँरिहा ॥ ७ ॥
एतस्मिन्नन्तरे चैव रजः समभिवर्तत । [2]उष्णतीव्रां सहस्रांशोश्छादयद्गगने प्रभाम् ॥ ८ ॥
दिशः पर्याकुलाश्चासंस्तमसा तेन [3]वेष्टिताः । चचाल च मही सर्वा सशैलवनकानना ॥ ९ ॥
ततो नरेन्द्रसंकाशैस्तीक्ष्णदंष्ट्रैर्महाबलैः । कृत्स्ना संछादिता भूमिरसंख्येयैः प्लवङ्गमैः ॥ १० ॥
निमेषान्तरमात्रेण ततस्तैर्हरियूथपैः । कोटीशतपरीवारैर्वानरैर्हरियूथपैः ॥ ११ ॥
नादेयैः पार्वतेयैश्च सामुद्रैश्च महाबलैः । हरिभिर्मेघनिर्ह्रादैरन्यैश्च वनवासिभिः ॥ १२ ॥

रा० टी०—तद्वचनाकारमाह—यादिति। वर्षं जलं यदिन्द्रो वर्षते, आदित्यः नभ आकाशं यत् वितिमिरं कुर्यात्, चन्द्रमाः प्रभया रजनीं रात्रिं निर्मलां कुर्यात्, त्वद्विधः त्वत्सदृशो धर्मात्मा मित्राणां प्रीतिं कुर्यात्, तच्चित्रं न वर्षणादेस्तत्तत्स्वभावसिद्धत्वान्नाश्चर्यमित्यर्थः। श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०—यादिन्द्र इत्यादि। त्वद्विधः त्वादृशः सत्पुरुषः मित्राणां प्रतिकुर्यात् प्रत्युपकारं कुर्यात् न तच्चित्रमिति संबन्धः। शोभनं प्रत्युपकाररूपम्। सुहृत् शोभनहृदयः ॥ २—५ ॥

४] ति० टी०—एवं त्वयि मित्रप्रत्युपकारार्थं सेनाभेलनं यत्तन्न चित्रम्। हे सौम्य! शोभनं भद्रं जातम् ॥ ४ ॥

रा० टी०—एवमिति। एवम् इन्द्रादिवर्षणादेरिव शोभनं कर्म त्वयि भवेत् त्वया निष्पाद्येत तच्चित्रं न शोभनकर्तृत्वस्य त्वयि स्वभावसिद्धत्वादित्यर्थः, प्रियवादिनं त्वामहं जानामि ॥४॥

५] ति० टी०—संख्ये युद्धे ॥ ५ ॥

रा० टी०—त्वदिति। त्वत्सनाथः त्वयैवाभीष्टप्रापकसहितोऽहं संख्ये संग्रामे अरीन् जेतास्मि अतः मे सुहृन्मित्रं त्वं सहायं कर्तुमर्हसि ॥ ५ ॥

६-७] ति० टी०—यथा पौलोमीपितरं वञ्चयित्वा कृताह्लादमतिकं कृत्वा शचीं योऽनुह्लादो जहारात्मविनाशाय। इन्द्रस्तत्पितरमनुमन्तारं हर्तारं चानुह्लादं हत्वा शचीं प्रत्यानीतवानिति पुराणगाथा। एवं य आत्मविनाशाय मैथिलीं जहार मारीचेन मां वञ्चयित्वा तं न चिराच्छीघ्रमरिहेन्द्र इव वधिष्यामि। पौलोम्याः पितरमित्येनेन रावणकृतो जानक्यतिक्रमाभावः सूचितः ॥ ६ ॥ ७ ॥

रा० टी०—जहारेति। राक्षसाधमो रावणः मैथिलीं वञ्चयित्वा आत्मविनाशाय जहार। तत्र दृष्टान्तः—पौलोमीं पुलोमदुहितरं शचीं तदभिधाभिप्रायेण अनुह्लादो यथा, शचीपितरं स्वानुमते कृत्वा शचीमनुह्लादो जहार इन्द्रस्तदज्ञात्वा अनुह्लादं शचीपितरं च निहत्य शचीं निनायेति पौराणिकी प्रसिद्धिः ॥ ६ ॥

रा० टी०—नेति। रावणं निशितैः शरैः पौलोम्याः पितरं शतक्रतुरिवाहं न चिरात् शीघ्रं वधिष्यामि ॥ ७ ॥

गो० टी०—जहारेति। इन्द्रेण ईप्सितां पौलोमीं तत्पितुः पुलोमस्यानुमत्याऽनुह्लादो जहार। इन्द्रस्त्वनुमन्तारं पुलोमं हत्वा तां पुनरानीयोदवहदिति पौराणिकी कथा ज्ञेया ॥ ६ ॥ ७ ॥

८-१०] ति० टी०—अभिवर्तताभ्यवर्तत ॥ ८-१० ॥

रा० टी०—एतस्मिन्निति। एतस्मिन्नन्तरे रामसुग्रीवसंवादसमये उष्णं तीव्रमसहमानं सहस्रांशोः सूर्यस्य प्रभां छादयत् रजः वानरसेनोत्थधूलिः समभिवर्तत समभ्यवर्तत ॥ ८ ॥

रा० टी०—दिश इति। तेन रजोजनितेन तमसा अन्धकारेण पर्याकुलाः व्याप्ता दिश आसन् अत एव सशैलवनकानना मही चचाल ॥ ९ ॥

गो० टी०—एतस्मिन्निति। समभिवर्तत समभ्यवर्तत। मूर्छिता व्याप्नुवता ॥ ८ ॥ ९ ॥

रा० टी०—तत इति। ततः रजोजनितान्धकारव्याप्त्यनन्तरं नगेन्द्रसंकाशैः महापर्वतसदृशैः नादेयैः नदीभवैः प्लवङ्गमैः पार्वतेयैश्च हरियूथपैः साम्रद्रैश्च हरियूथपैर्वानरैः वनवासिभिश्च हरिभिः हेमकूटालयैर्हेमाचलवासिभिश्च वानरैर्निमेषान्तरमात्रेण कृत्स्ना भूमिः संछादिताऽभवत्। श्लोकचतुष्टयमेकान्वयि १०-१३

रा० टी०—तदेव विशदयन्नाह—कोटीति। दशभिः कोटीसहस्रैः परिवृतः शतबलिर्नाम वानरः प्रत्यदृश्यत ॥ १४ ॥

गो० टी०—अथ सेनासमुदायव्याप्तिमाह—तत इति। ततः रजोव्याप्त्यनन्तरम् ॥ १० ॥

११] ति० टी०—उक्तमेव प्रपञ्चयति—निमेषेति ॥ ११ ॥

१२] ति० टी०—वनवासिभिः उक्तताताद्रिवनवासिभिः ॥ १२ ॥

---

१ वैदेहीमिति गो. पाठः। २ आहवे इति गो. पाठः। ३ उष्णामिति गो. उष्णं तीव्रमिति रा. पाठः। ४ रजसेति गो. पाठः। ५ मूर्छतेति गो. पाठः। ६ नगेन्द्रेति गो. पाठः। ७ कामरूपिभिरावृता इति गो. पाठः। ८ पार्वतीयैरिति गो. पाठः। ९ चारिभिरिति गो. पाठः। १० साहाय्यमिति युक्तं भाति।

तरुणादित्यवर्णैश्च शशिगौरैश्च वानरैः । पद्मकेसरवर्णैश्च श्वेतैर्हेमैकुतालयैः ॥ १३ ॥
कोटीसहस्रैर्दशभिः श्रीमान्परिवृतस्तदा । वीरः शतबलिर्नाम वानरः प्रत्यदृश्यत ॥ १४ ॥
ततः काञ्चनशैलाभस्तारायाः वीर्यवान्पिता । अनेकैर्बहुसाहस्रैः कोटिभिः प्रत्यदृश्यत ॥ १५ ॥
तथाऽपरेण कोटीनां सहस्रेण समन्वितः । पिता रुमायाः संप्राप्तः सुग्रीवश्वशुरो विभुः ॥ १६ ॥
पद्मकेसरसंकाशस्तरुणार्कनिभाननः । बुद्धिमान्वानरश्रेष्ठः सर्ववानरसत्तमः ॥ १७ ॥
अनेकैर्बहुसाहस्रैर्वानराणां समन्वितः । पिता हनुमतः श्रीमान्केसरी प्रत्यदृश्यत ॥ १८ ॥
गोलाङ्गूलमहाराजो गवाक्षो भीमविक्रमः । वृतः कोटिसहस्रेण वानराणामदृश्यत ॥ १९ ॥
ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः । वृतः कोटिसहस्राभ्यां द्वाभ्यां समभिवर्तत ॥ २० ॥
महाबलैर्निभैर्घोरैः पनसो नाम यूथपः आजगाम महावीर्यैस्तिसृभिः कोटिभिर्वृतः ॥ २१ ॥
नीलाञ्जनचयाकारो नीलो नामर्क्ष यूथपः अदृश्यत महाकायः कोटिभिर्दशभिर्वृतः ॥ २२ ॥
ततः काञ्चनशैलाभो गवयो नाम यूथपः आजगाम महावीर्यः कोटिभिः पञ्चभिर्वृतः ॥ २३ ॥
दरीमुखश्च बलवान्यूथपोऽभ्याययौ तदा वृतः कोटिसहस्रेण सुग्रीवं समुपस्थितः ॥ २४ ॥
मैन्दश्च द्विविदश्चोभावश्विपुत्रौ महाबलौ कोटिकोटिसहस्रेण वानराणामदृश्यताम् ॥ २५ ॥
गजश्च बलवान्वीरस्तिसृभिः कोटिभिर्वृतः [आजगाम महातेजाः सुग्रीवस्य समीपतः ।]
ऋक्षराजो महातेजा जाम्बवान्नाम नामतः ॥ २६ ॥
कोटिभिर्दशभिर्व्याप्तः सुग्रीवस्य वशे स्थितः । रुमणो नाम तेजस्वी विक्रान्तैर्वानरैर्वृतः ॥ २७ ॥
आगतो बलवांस्तूर्णं कोटीशतसमावृतः । ततः कोटिसहस्राणां सहस्रेण शतेन च ॥ २८ ॥
पृष्ठतोऽनुगतः प्राप्तो हरिभिर्गन्धमादनः । ततः पद्मसहस्रेण वृतः शङ्कुशतेन च ॥ २९ ॥

गो० टी०–निमेषेति । ततः सेनासमुदायव्याप्त्यनन्तरम् । नादेयैः नदीतीरवनभवैः पार्वतीयैः पर्वतोत्पन्नैः वनचारिभिः आवृतेति पूर्वेणान्वयः ॥ ११—१४ ॥

१३–१४] ति० टी०–हेमा हेमाचलः ॥ १३ ॥ १४ ॥

१५] ति० टी०–तारापिता सुषेणः ॥ १५ ॥

रा० टी०–तत इति । अनेकैः बहुसाहस्रैः कोटिभिश्च वानरैः सह तारायाः पिता सुषेणः प्रत्यदृश्यत ॥ १५ ॥

गो० टी०–तत इति । तारायाः पिता सुषेणः ॥ १५ ॥

१६–१८] ति० टी०–रुमापिता तारः ॥ १६–१८ ॥

रा० टी०–तथेति । परेणान्येन उत्कृष्टेन वा कोटीनां सहस्रेण समन्वितः रुमायाः पिता संप्राप्तः ॥ १६ ॥

रा० टी०–पद्मेति । वानराणामनेकैर्बहुसाहस्रैः समन्वितः पद्मकेसरसंकाशः हनुमतः पिता केसरी प्रत्यदृश्यत । श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–तथेति । रुमायाः पिता तारः ॥ १६—२० ॥

१९–२९] ति० टी०–गोलाङ्गूलो वानरावान्तरजातिः ॥ १९—२९ ॥

रा० टी०–गोलाङ्गूलेति । वानराणां कोटिसहस्रेण वृतः गोलाङ्गूलमहाराजः गोलाङ्गूलाधिपतिः गवाक्षः तदभिधवानरः अदृश्यत ॥ १९ ॥

रा० टी०–ऋक्षाणामिति । ऋक्षाणां द्वाभ्यां कोटिसहस्राभ्यां वृतः धूम्रस्तदभिधः समभिवर्तत समभ्यवर्तत ॥ २० ॥

रा० टी०–महाबलेति । महाबलनिभैः महाबलेन प्रकाशमानैः तिसृभिः कोटिभिर्वृतः पनसो नाम यूथपः आजगाम ॥ २१ ॥

रा० टी०–नीलेति । दशभिः कोटिभिर्वृतः नीलो नाम यूथपः अदृश्यत ॥ २२ ॥

रा० टी०–तत इति । पञ्चभिः कोटिभिर्वृतः गवयो नाम यूथपः आजगाम ॥ २३ ॥

गो०टी०–महाचलेति । कोटिभिः कोटिसंख्याकैः२१-२३

रा० टी०–दरीमुख इति । कोटिसहस्रेण वृतः दरीमुखो यूथपः सुग्रीवं समुपास्थितः सन् अभ्याययौ ॥ २४ ॥

गो० टी०–दरीमुखश्चेति । सुग्रीवं समुपस्थितः प्राप्तः२४

रा० टी०–मैन्द इति । वानराणां कोटकोटिसहस्रेण मैन्दो द्विविदश्च उभौ अदृश्यताम् ॥ २५ ॥

रा० टी०–गज इति । तिसृभिः कोटिभिर्वृतः गजस्तद-

१ मेविति गो.पाठः। २ दशेति गो.पाठः। ३ चलेति गो.पाठः । ४ अथेति गो. पाठः । ५ उपेति गो. पाठः । ६ अर्धमेतदधिकं गो.पाठे। ७ प्राप्तइति गो. पाठः। ८ रुमण्वान्नाम विक्रान्तो वानरो वानरेश्वरमिति गो. रुमण्वान्नाम तेजस्वी विक्रान्तो वानरेश्वरमिति रा. पाठः । ९ आययाविति गो.पाठः ।

युवराजोऽङ्गदः प्राप्तः [1]पितुस्तुल्यपराक्रमः । ततस्ताराद्युतिस्तारो [2]हरिभिर्भीमविक्रमैः ॥ ३० ॥
पञ्चभिर्हरिकोटीभिर्वृतः पर्यदृश्यत । इन्द्रजानुः [3]कविर्वीरो यूथपः प्रत्यदृश्यत ॥ ३१ ॥
एकादशानां कोटीनामीश्वरस्तैश्च संवृतः । ततो रम्भस्त्वनुप्राप्तस्तरुणादित्यसंनिभः ॥ ३२ ॥
अयुतेन वृतश्चैव सहस्रेण शतेन च । ततो यूथपतिर्वीरो दुर्मुखो नाम वानरः ॥ ३३ ॥
प्रत्यदृश्यत कोटीभ्यां द्वाभ्यां परिवृतो बली । कैलासशिखराकारैर्वानरैर्भीमविक्रमैः ॥ ३४ ॥
वृतः कोटिसहस्रेण [4]हनुमान्प्रत्यदृश्यत । नलश्चापि महावीर्यः संवृतो द्रुमवासिभिः ॥ ३५ ॥
कोटीशतेन संप्राप्तः सहस्रेण शतेन च । ततो [5]दधीमुखः श्रीमान्कोटिभिर्दशभिर्वृतः ॥ ३६ ॥
संप्राप्तोऽभिनंदंस्तस्य सुग्रीवस्य महात्मनः । शरभः कुमुदो वह्निर्वानरो [6]रंभ एव च ॥ ३७ ॥
एते चान्ये च बहवो वानराः कामरूपिणः । आवृत्य पृथिवीं सर्वां पर्वतांश्च वनानि च ॥ ३८ ॥
यूथपाः समनुप्राप्ता [7]येषां संख्या न विद्यते । आगताश्च [8]निविष्टाश्च पृथिव्यां सर्ववानराः ॥ ३९ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः । अभ्यवर्तन्त सुग्रीवं सूर्यमभ्रगणा इव ॥ ४० ॥
कुर्वाणा बहुशब्दांश्च [9]प्रकृष्टा बाहुशालिनः । शिरोभिर्वानरेन्द्राय सुग्रीवाय न्यवेदयन् ॥ ४१ ॥

भिधः दशभिः कोटिभिर्व्याप्तो जाम्बवान् नाम च सुग्रीवस्य वशे स्थितः । सार्धश्लोक एकान्वयी ॥ २६ ॥

रा० टी०–रुमण्वानिति । कोटीशतसमावृतः विक्रान्तोऽतिबलवान् रुमण्वान् नाम वानरः वानरेश्वरमागतः प्राप्तः ॥ २७ ॥

गो० टी०–मैन्द्रश्चेति । अदृश्यताम् अदृश्येताम् २५-२७

रा० टी०–तत इति । कोटिसहस्राणां वानराणां शतेन सहस्रेण लक्षेणेत्यर्थः वृतः पृष्ठतोऽनुगतः पश्चाच्चलितः । किंच पृष्ठतोऽनुगता अनुचरा यस्य स गन्धमादनः प्राप्तः ॥ २८ ॥

रा० टी०–तत इति । पद्मसहस्रेण शङ्कुशतेन च वृतो युवराजोऽङ्गदः प्राप्तः ॥ २९ ॥

गो० टी०–रुमण्वानिति । रुमण्वान्नाम विक्रान्तो वानरो वानरेश्वरमाययौ ॥ २८—३० ॥

३०-४०] ति० टी०–ताराद्युतिर्नक्षत्रप्रभः । अयं रुमापितुरन्यस्तारः ॥ ३०—४० ॥

रा० टी०–तत इति । पञ्चभिर्हरिकोटीभिर्हरिभिस्तारस्तदभिधः पर्यदृश्यत । नीलघटवान् घटवानितिवद्द्वीपः किं च पञ्चभिर्हरिभिः हरिकोटीभिश्च तारः पर्यदृश्यतेत्यर्थः ॥ ३० ॥

रा० टी०–इन्द्रभानुरिति । एकादशानां कोटीनामीश्वरैः संवृतश्च इन्द्रभानुर्यूथपः प्रत्यदृश्यत ॥ ३१ ॥

रा० टी०–तत इति । अयुतेन सहस्रेण च शतेन च वृतः रम्भस्तदभिधोऽङ्गप्राप्तः ॥ ३२ ॥

रा० टी०–तत इति । द्वाभ्यां कोटीभ्यां परिवृतो दुर्मुखो नाम यूथपतिः प्रत्यदृश्यत ॥ ३३ ॥

गो० टी०–तत इति । ताराद्युतिः नक्षत्रतुल्यप्रभः । तारः रुमायाः पितुरन्योऽयम् ॥ ३१—३४ ॥

रा० टी०–कैलासेति । कोटिसहस्रेण वानरैर्वृतः हनुमान् प्रत्यदृश्यत ॥ ३४ ॥

गो० टी०–कैलासेति । कोटिसहस्रेणोपलक्षितैर्वानरैर्वृत इति संबन्धः ॥ ३५ ॥

रा० टी०–नल इति । कोटीशतेन सहस्रेण च शतेन च संवृतो नलः संप्राप्तः ॥ ३५ ॥

गो० टी०–नल इति । कोटिशतेनेत्याद्युपलक्षणे तृतीया ॥ ३६—३९ ॥

रा० टी०–तत इति । दशभिः कोटिभिर्वृतः दधिमुखः सुग्रीवस्याग्रे अभिनन्दन् सन् संप्राप्तः ॥ ३६ ॥

रा० टी०–शरभ इति । येषां संख्या सैन्यपरिमाणं न विद्यते ते शरभादयो यूथपाः पृथिव्यादीनावृत्य संप्राप्ताः । अर्धचतुष्टयमेकान्वयि ॥ ३७ ॥ ३८ ॥

रा० टी०–आगता इति । आप्लवन्तो लक्षादीन् सञ्जलङ्घयन्तः प्लवन्तः शाखादीन्लङ्घयन्तः प्लवङ्गमाः अभ्रगणाः सूर्यमिव सुग्रीवमभ्यवर्तन्त, आगताः सर्ववानराः पृथिव्यां निविष्टाश्च । सार्धश्लोक एकान्वयी ॥ ३९ ॥ ४० ॥

गो० टी०–आगता इति । पृथिव्यां विशिष्टाश्च प्राकृताः देवयोनय इत्यर्थः । सर्ववानराश्च प्राकृतवानराश्च आगता एव ॥ ४० ॥

गो० टी०–आप्लवन्त इति । आप्लवन्तः लङ्घयन्तः अभ्रगणाः मेघगणाः ॥ ४१ ॥

४१] ति० टी०–शिरोभिर्न्यवेदयन् बहुसंमर्दादूरे स्थित्वा नमस्कारेणैवात्मानं न्यवेदयन्नित्यर्थः ॥ ४१ ॥

रा० टी०–आगतवानरान्तरवृत्तमाह–कुर्वाणा इति ।

---

१ पितृतुल्येति गो. पाठः । २ हरिर्भीमपराक्रम इति गो. पाठः । ३ भानुरिति रा. पाठः । ४ हनूमानिति रा. पाठः । ५ दधीति गो. रा. पाठः । ६ मत इति गो.पाठः । ७ रंह इति गो.पाठः । ८ तेषामिति गो.पाठः । ९ विशिष्टा इति गो.पाठः । १० प्रहृष्टा इति गो. प्रकृष्टबलशालिन इति रा.पाठः ।

अपरे वानरश्रेष्ठाः [1]संगम्य च यथोचितम् । सुग्रीवेण समागम्य स्थिताः प्राञ्जलयस्तदा॥ ४२ ॥
सुग्रीवस्त्वरितो रामे सर्वांस्तांस्त्वरितांस्तदा । निवेदयित्वा धर्मज्ञः स्थितः प्राञ्जलिरब्रवीत्॥ ४३ ॥
यथासुखं पर्वतनिर्झरेषु वनेषु सर्वेषु च वानरेन्द्राः ।
निवेशयित्वा विधिवद्बलानि बलं बलज्ञः प्रतिपत्तुमीष्टे ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्ड एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।

रामाशामनुपालयन्सुग्रीवः प्राच्यां दिशि कपिसचारार्हान्तांस्तान्प्रदेशान् विशेषस्थलवर्णनपूर्वं विनतनामान स्वसेनाध्यक्ष निर्दिश्य सीतान्वेषणे नियुञ्जानः प्रङ्मासात्सीताशुद्धिं विधायागन्तव्यं मासातिक्रमी दण्ड्यतेत्याज्ञापयति ।

अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः । उवाच नरशार्दूलं रामं परबलार्दनम् ॥ १ ॥
आगता विनिविष्टाश्च बलिनः कामचारिणः । वानरेन्द्रा महेन्द्राभा ये मद्विषयवासिनः ॥ २ ॥

प्रकृष्टबलशालिनः केचन वानराः बहुशब्दान् कुर्वाणाः सन्तः शिरोभिः प्रकम्पितस्वमूर्धभिः सुग्रीवाय न्यवेदयन् स्वागमनमिति शेषः ॥ ४१ ॥

गो० टी०–कुर्वाणा इति । न्यवेदयन् आत्मानमिति शेषः ॥ ४२ ॥

४२] ति० टी०–अपरे संगम्य समीपदेशं प्राप्य यथोचित निवेद्य जग्मुः । अपरे हनूमदङ्गदादयः समागम्य निकटमागत्य स्थिताः ॥ ४२ ॥

रा० टी०–अपर इति । यथोदितं सुग्रीवोक्तिमनतिक्रम्य संयम्य वानरान् स्ववशे कृत्वा आगताः अपरे वानराः सुग्रीवेण समागम्य स्थिताः ॥ ४२ ॥

गो० टी०–अपर इति । संयम्य वक्त्रादिकं संकुचितं कृत्वा । 'संनम्य' इति च पाठः ॥ ४३ ॥

४३] ति० टी०–धर्मज्ञो राजधर्मज्ञः रामाभिमुखं प्राञ्जलिः स्थितो भूत्वा सर्वान्यूथपतीन्निवेदयित्वा यूथपानब्रवीत् ॥ ४३ ॥

रा० टी०–सुग्रीव इति । स्थितः सुग्रीवः वानरर्षभान् रामे निवेदयित्वा निवेद्य अब्रवीत् ॥ ४३ ॥

गो० टी०–सुग्रीव इति । सुग्रीवः प्राञ्जलिस्त्वरितः सन् सर्वान् रामे निवेदयित्वा स्थितः तानब्रवीच्च । ॥ ४४ ॥

४४] ति० टी०–भो वानरेन्द्राः ! पर्वतादिषु यथासुखं स्वानि बलानि निवेशयित्वा तेषु यो बलज्ञो बलतत्त्वज्ञः प्रतिपत्तुं क आगतः को नागत इति ज्ञातुमीष्टे ईशो भवेत् । लिङर्थे लट् ॥ ४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रा० टी०–तदाकारमाह—यथेति । वानरेन्द्राः पर्वतादिषु बलानि सैन्यानि निवेशयित्वा निवेश्य यथासुखं सन्तीति शेषः, अतः बलज्ञो भवान् बलं सैन्यं प्रतिपत्तुम् इयत्तया निश्चेतुमीष्टे समर्थोऽस्ति ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

गो० टी०–तदेवाह—यथेति । ये वानरेन्द्राः पर्वतादिषु स्वानि बलानि यथासुखं निवेशयित्वा बलज्ञो यूथपः स्वं बलं प्रतिपत्तुं ज्ञातुम् ईष्टे ईशो भवेत्, लिङर्थे लट् । यद्वा रामे निवेदयित्वा तदधीनं कृत्वा अब्रवीत् तत्तत्स्वरूपमब्रवीत्। यथेति । 'वानरेन्द्र' इति च पाठः । सुग्रीवः बलं प्रतिपत्तुमीष्टे स्म॥४५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥३९॥

१] ति० टी०–अथेति ॥ १ ॥

रा० टी०–सुग्रीवोक्तिं वर्णयन्नाह–अथेत्यादिभिः । अथ सैन्येयत्ताकरणप्रार्थनानन्तरं समृद्धार्थः प्रवृद्धसर्वसंपत्तिः सुग्रीवो रामम्ब्रवाच ॥ १ ॥

गो० टी०–अथ सीतान्वेषणाय पूर्वस्यां दिशि सुग्रीवेण विनतप्रेषणं चत्वारिंशे—अथ राजेत्यादि ॥ १ ॥

२] ति० टी०–विनिविष्टार्थेति स्वस्वसेनानिवेश इति शेषः, निवेशिता इत्यर्थः । मद्विषयवासिनो मम विषये वानरराज्ये वासिनः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह—आगता इत्यादिभिः । ये मद्विषयवासिनः बलिनो वानरेन्द्राः ते आगताः विनिविष्टाः उचितदेशे संस्थिताश्च ॥ २ ॥

गो० टी०–आगता इति । मद्विषयवासिनः मदवगतदेशवासिनः 'विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि' इत्यमरः । यद्वा मद्राज्यवासिनः ॥ २ ॥ ३ ॥

१ संनम्येति रा. पाठः । २ वानरर्षभानिति गो. रा पाठः । ३ रूपिण इति गो. पाठः । ४ वानरा वारणेन्द्राभा इति गो. पाठः ।

त इमे बहुविक्रान्तै[1]र्बलिभिर्भीमविक्रमैः । आगता वानरा घोरा दैत्यदानवसंनिभाः ॥ ३ ॥
ख्यातकर्मापदानाश्च बलवन्तो जितक्लमाः । पराक्रमेषु विख्याता व्यवसायेषु चोत्तमाः ॥ ४ ॥
पृथिव्यम्बुचरा राम नानानगनिवासिनः । कोट्योघाश्च[2] इमे प्राप्ता वानरास्तव किंकराः ॥ ५ ॥
निदेशवर्तिनः सर्वे सर्वे गुरुहिते [3]स्थिताः । अभिप्रेतमनुष्ठातुं तव शक्ष्यन्त्यरिन्दम ॥ ६ ॥
त इमे बहुसाहस्रै[4]रनेकैर्बहुविक्रमैः । आगता वानरा घोरा दैत्यदानवसंनिभाः ॥ ७ ॥
यन्मन्यसे नरव्याघ्र प्राप्तकालं तदुच्यताम् । त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितुमर्हसि ॥ ८ ॥
काममेवं[5]मिदं कार्यं विदितं मम तत्त्वतः । तथाऽपि तु यथायुक्तमाज्ञापयितुमर्हसि ॥ ९ ॥
तथा ब्रुवाणं सुग्रीवं रामो दशरथात्मजः । बाहुभ्यां संपरिष्वज्य इदं वचनमब्रवीत् ॥ १० ॥
ज्ञायतां [6]सौम्य वैदेही यदि जीवति वा न वा । स च देशो महाप्राज्ञ यस्मिन्वसति रावणः ॥ ११ ॥
अभिगम्य तु वैदेहीं निलयं रावणस्य च । प्राप्तकालं विधास्यामि तस्मिन्काले सह त्वया ॥ १२ ॥
नाहमस्मिन्प्रभुः कार्ये वानरेन्द्र[7] न लक्ष्मणः । त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर ॥ १३ ॥

३] ति० टी०–बहुविक्रान्तैर्बहुषु स्थलेषु कृतपराक्रमैः अत एव भीमविक्रमैः स्वयूथैः सहेति शेषः ॥ ३ ॥

४] ति० टी०–ख्यातं कर्मणि युद्धेऽपदानं शौर्यं येषाम् ॥ ४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—त इति । बहुविक्रान्तैरनेकदेशचारिभिर्बलिभिर्वानरैः सह ख्यातकर्मसु युद्धेषु अपदानं शौर्यं येषां ते बलवन्तः प्रशस्तबलविशिष्टाः अत एव जितक्लमाः अत एव पराक्रमेषु व्यवसायेषु च विख्याताः अत एव उत्तमाः पृथिव्यम्बुचराः पृथिवीपु अम्बुषु समुद्रादिजलेषु विचरणशीलाः दैत्यदानवसंनिभाः वानराः आगताः । सार्धश्लोक एकान्वयी ॥ ३ ॥ ४ ॥

गो० टी०–ख्यातेति । ख्यातकर्मापदानाः कर्म दूरलङ्घनादिक्रिया अपदानं पूर्ववृत्तम् विस्मयनीयशत्रुनिरसनं ख्याते कर्मापदाने येषां ते तथा । कोट्यश्च इति बहुसंख्योपलक्षणम् ॥ ४ ॥ ५ ॥

५] ति० टी०–अम्बुचराः समुद्रमध्यद्वीपचराः । कोट्योघा इत्यसंख्यत्वोपलक्षणम् ॥ ५ ॥

६] ति० टी०–गुरुहिते स्वामिहिते तवाभिप्रेतमनुष्ठातुं शक्ष्यन्ति समर्था इत्यर्थः ॥ ६ ॥

रा० टी०–कोटीति । कोट्योघाः कोटिसमूहाः प्राप्ताः ये तव किङ्कराः वानरास्ते सर्वे अभिप्रेतं तवेप्सितमनुष्ठातुं शक्ष्यन्ति । सार्धश्लोक एकान्वयी ॥ ५ ॥ ६ ॥

गो० टी०–निदेशेति । गुरुहिते स्वामिहिते ॥ ६ ॥

७] ति० टी०–अनेकैः सहेति शेषः ॥ ७ ॥

रा० टी०–शक्तत्वमेव द्रढयन्नाह—त इति । अनेकैर्बहुविक्रमैर्बहुसाहस्रैः सह ये इमे आगता वानरास्ते दैत्यदानवसंनिभाः सन्तीति शेषः ॥ ७ ॥

गो० टी०–त इम इति । बहुसाहस्रैर्भीमविक्रमैरनीकैः सहिताः त इम इत्यङ्गुल्या निर्देशः प्राप्तकालं कालोचितम् ॥७॥

८] ति० टी०–प्राप्तकालं कालोचितं तदुच्यताम् । मन्त्रियोगः कार्य इत्यर्थः । नन्विदं त्वत्सैन्यं न मन्त्रियोज्यतामर्हतीति तत्राह—त्वत्सैन्यमिति ॥ ८ ॥

रा० टी०–यदिति । हे नरव्याघ्र ! त्वद्वशे युक्तं प्राप्तं त्वत्सैन्यमाज्ञापयितुमर्हसि अतः यत् प्राप्तकालं मन्यसे तदुच्यताम् ॥ ८ ॥

९–११] ति० टी०–इदं कार्यं सीतान्वेषणरूपम्॥९–११॥

१२] ति० टी०–तस्मिन्काले वृत्तान्तावगत्यनन्तरकाले १२

रा० टी०–काममिति । इदं सीतान्वेषणरूपं कार्यं यद्यप्येषां मम च तत्त्वतो विदितं तथाऽपि यथायुक्तं युक्तमनतिक्रम्यैव यथेच्छमाज्ञापयितुमर्हसि ॥ ९ ॥

रा० टी०–तथेति । तथा तेन प्रकारेण ब्रुवाणं सुग्रीवं रामो बाहुभ्यां संपरिष्वज्य इदमब्रवीत् ॥ १० ॥

रा० टी०–तद्वचनाकारमाह—ज्ञायतामित्यादिभिः । यस्मिन्देशे रावणो वसति स देशः वैदेही जीवति न वा इति च यदि यस्मिन् काले ज्ञायतां तस्मिन् काले वैदेहीमभिगम्य प्राप्य रावणस्य निलयं प्राप्तकालं विध्वंसाश्रयमित्यर्थः, विधास्यामि करिष्यामि । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२॥

गो० टी०–काममिति । एषां कार्यम् एभिः कर्तव्यं मम विदितं मया विदितम् ॥ ८—१३ ॥

१३] ति० टी०–अस्मिन्कार्ये वानरप्रेषणरूपे । अस्य कार्यस्येति सिद्धेरिति शेषः ॥ १३ ॥

रा० टी०–नन्वहं तर्हि वानरान् आज्ञापयेत्यत आह—नेति । अस्मिन् अन्वेषणाज्ञापने अहं प्रभुः नास्मि । न ल-

१ हरिभिरिति गो. पाठः । २ कोट्यश्च इति गो. पाठः । ३ रता इति गो. पाठः । ४ अनीकैर्भीमेति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ एषामिति गो. रा. पाठः । ७ तत्त्वमिति गो. पाठः । ८ इतीति गो. पाठः । ९ ममेति गो. पाठः । १० ईशेति गो. पाठः ।

त्वमेवाज्ञापय विभो मम कार्यविनिश्चयम् । त्वं हि जानासि [1]मे कार्यं मम वीर न संशयः ॥ १४ ॥
सुहृद्द्वितीयो विक्रान्तः [2]प्राज्ञः कालविशेषवित् । भवानस्माद्धिते युक्तः [3]सुहृदाप्तोऽर्थवित्तमः ॥ १५ ॥
एवमुक्तस्तु सुग्रीवो विनतं नाम यूथपम् । अब्रवीद्रामसांनिध्ये लक्ष्मणस्य च धीमतः ॥ १६ ॥
शैलाभं मेघनिर्घोषमूर्जितं प्लवगेश्वरम् । सोमसूर्यनिभैः सार्धं वानरैर्वानरोत्तम ॥ १७ ॥
देशकालनयैर्युक्तो [5]विज्ञः कार्यविनिश्चये । वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ १८ ॥
अधिगच्छ दिशं पूर्वां सशैलवनकाननाम् । तत्र सीतां च वैदेहीं निलयं रावणस्य च ॥ १९ ॥
मार्गध्वं गिरिदुर्गेषु वनेषु च नदीषु च । नदीं भागीरथीं रम्यां सरयूं कौशिकीं तथा ॥ २० ॥
कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम् । सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम् ॥ २१ ॥
महीं कालमहीं चापि शैलकाननशोभिताम् । ब्रह्ममालान्विदेहांश्च मालवान्काशिकोसलान् ॥ २२ ॥
मागधांश्च महाग्रामान्पुण्ड्रांस्त्वङ्गांस्तथैव च । भूमिं च कोशकाराणां भूमिं च रजताकराम् ॥ २३ ॥
सर्वं चैं तद्विचेतव्यं मृगयद्भिस्ततस्ततः । रामस्य दयितां भार्यां सीतां दशरथस्नुषाम् ॥ २४ ॥

क्ष्मणः प्रभुरस्ति । अतः अस्य कार्यस्य हेतुः कारणं प्रभुः तत्र समर्थश्च त्वमेव ॥ १३ ॥

१४] ति० टी०—मम कार्यविनिश्चयं ज्ञात्वेति शेषः । हे वीर ! त्वं मम सुहृदित्यन्वयः ॥ १४ ॥

रा० टी०—त्वमिति । मम कार्यविनिश्चयं त्वमेव आज्ञापय हि यतः मम यत् कार्यं तत् त्वं जानासि ॥ १४ ॥

१५-१६] ति०टी०—द्वितीयः सुहृल्लक्ष्मणापेक्षया॥१५॥१६॥

रा० टी०—सुहृदिति । सुहृद्द्वितीयो विक्रान्तो बलम् अतः प्राज्ञः सर्वविषयकज्ञानवान् अत एव कालविशेषवित् अर्थवित्तमः याथार्थ्यविज्ञातृषु श्रेष्ठः भवान् यदि अस्माद्धिते युक्तः तर्हि सुकृतार्थः अर्थः सिद्धः ॥ १५ ॥

रा० टी०—एवमिति । एवमुक्तः सुग्रीवः शैलाभं प्लवगेश्वरं विनतं नाम यूथपं रामसांनिध्ये लक्ष्मणस्य च सांनिध्ये इति शेषः । अब्रवीत् । सार्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०—'सुहृद्विनीत.' इति च पाठः ॥ १४—१६ ॥

१७] ति० टी०—सोमसूर्यनिभैस्तत्सदृशकान्तिभिः ॥१७॥

रा० टी०—तद्वचनाकारमाह—सोमेत्यादिभिः । देशकालनयैर्युक्तः कार्यविनिश्चये विज्ञः तरस्विनां वानराणां शतसहस्रेण वृतस्त्वं सोमसूर्यनिभैः वानरैः सार्धं पूर्वां दिशमभिगच्छ । अर्धचतुष्टयमेकान्वयि ॥ १७ ॥

गो० टी०—सोमेत्यादि । देशेति । कार्याकार्यविषये देशकालनयैः देशोचितनीतिभिः कालोचितनीतिभिश्चेत्यर्थः । देशकालानुगुणनयप्रवर्तनं कर्तव्यमित्यर्थः ॥ १७—१९ ॥

१८] ति० टी०—नयो नीतिः । विज्ञः तज्ज्ञस्त्वमिति शेषः १८

१९] ति० टी०—निलयं रावणस्य निलयस्थानम् । यद्वा चतुर्विंश रावणवासस्थानमनेन सूचितम् ॥ १९ ॥

रा० टी०—तत्रेति । तत्र पूर्वस्यां दिशि गिर्यादिषु सीता रावणस्य निलयं च मार्गध्वम् ॥ १८ ॥

२०] ति० टी०—मार्गध्वमिति सामान्यतो नियोगः । विशेषेणाह—नदीमित्यादि । द्वितीयान्तानां प्राप्येति शेषः ॥ २० ॥

२१] ति० टी०—कालिन्दीं यमुनाम् । यामुनो गिरिर्यमुनोत्पत्तिस्थानभूतः कलिन्दगिरिः ॥ २१ ॥

२२] ति० टी०—महीकालमह्यौ नद्यौ । अथ प्राच्यदेशानाह—ब्रह्ममालानिति । हिमवद्विन्ध्यमध्यवर्त्यार्यावर्तापेक्षया प्राच्यादिविभागोऽत्र विवक्षित इत्याहुः ॥ २२ ॥

२३] ति० टी०—कोशकाराणां भूमिं कौशेयकतन्तूत्पादकजन्तूत्पत्तिस्थानभूतां भूमिम् । रजताकरां रजतखनिम्॥२३॥

२४] ति० टी०—एतानि प्राप्य एतत्पूर्वोक्तं सर्वं सर्वावयवं विचेतव्यम् । तत्र किं विचेतव्यं तत्राह—रामस्य दयितामिति ॥ २४ ॥

रा० टी०—नदीमिति । भागीरथ्यादीन् पर्वतादींश्च ये केचिदालया मन्दरस्य कोटिं देशं संश्रिताः तांश्च प्राप्य रामस्य भार्यां दशरथस्य स्नुषां सीतां मृगयद्भिर्वद्भिस्ततस्ततः सर्वं तत्स्थलं विचेतव्यम् । तत्र कालिन्दी यमुना यामुनः यमुनोत्पत्तिकारणीभूतगिरिः, महीकालमह्यौ नदीविशेषौ, कोशकाराः राजविशेषाः क्रिमिविशेषा वा अवगाढाः समुद्रसंबद्धाः। सार्धश्लोकपञ्चकमेकान्वयि ॥ १९—२४ ॥

गो० टी०—नदीमित्यादि । रजताकरामित्यन्तमेकं वाक्यम् । प्राप्येति शेषः । ततस्ततः सीतां मृगयद्भिर्भवद्भिः भागीरथ्यादिकं प्राप्य एतत्पूर्वोक्तं सर्वं विचेतव्यमिति संबन्धः। अत्रेदमवधेयम्—शरावती नाम काचिन्नदी हिमवद्विन्ध्यमध्यदेशे वलयाकारेण प्रवहति । तदपेक्षया प्राचीदिगिदानीं विचे-

१ यदिति गो. रा. पाठः । २ सुकृतार्थ इति गो. रा. पाठः । ३ ईश्वर इति गो. पाठः । ४ सूर्यात्मजैरिति गो. पाठः । ५ कार्याकार्येति गो.पाठः । ६ शूरेष्विति गो. पाठः । ७ चैवेति गो. पाठः । ८ पत्तनमिति गो. पाठः । ९ एतदिति गो. पाठः । १० मार्गयद्भिरिति गो. पाठः ।

समुद्रमवगाढांश्च पर्वतान्पत्तनानि च । मन्दरस्य च ये कोटिं संश्रिताः केचिदालयाः ॥ २५ ॥
कर्णप्रावरणाश्चैव तथा चाप्योष्ठकर्णकाः । घोरलोहमुखाश्चैव जवनाश्चैकपादकाः ॥ २६ ॥
अक्षया बलवन्तश्च तथैव पुरुषादकाः । किरातास्तीक्ष्णचूडाश्च हेमाभाः प्रियदर्शनाः ॥ २७ ॥
आममीनाशनाश्चापि किराता द्वीपवासिनः । अन्तर्जलचरा घोरा नरव्याघ्रा इति स्मृताः ॥ २८ ॥
एतेषामाश्रयाः सर्वे विचेयाः काननौकसः । गिरिभिर्ये च गम्यन्ते प्लवनेन प्लवेन च ॥ २९ ॥
यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम् । सुवर्णरूप्यकद्वीपं सुवर्णकरमण्डितम् ॥ ३० ॥
यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः । दिवं स्पृशति शृङ्गेण देवदानवसेवितः ॥ ३१ ॥

यत्नेनोच्यते नतु किञ्चिन्न्यापेक्षया नापि सर्वापेक्षयेति । यान्तुनं महागिरिं यमुनासंबन्धिनं पर्वतं मध्यादयो देशविशेषाः । मागधान् मगधदेशान् , महाग्रामान् महाग्रामयुक्तान् । कोशकाराणां राजविशेषाणाम् ॥ २०—२३ ॥

२५] ति० टी०–समुद्रमवगाढान्समुद्रान्तर्गतान् । पत्तनानि समुद्रद्वीपवर्तीनि । आलया ग्रामाः ॥ २६ ॥

गो० टी०–समुद्रमित्यादि । समुद्रम् अवगाढान् प्रविष्टान् । पर्वतान् मन्दरस्य आयतां कोटिं च संश्रिताः ये कर्णप्रावरणादयः एतेषामालयाः सर्वे विचेया इति संबन्धः । काननौकस इति संबोधनम् । कर्णप्रावरणाः आच्छादितकर्णाः निष्कर्णा इत्यर्थः। ओष्ठे कर्णौ येषां ते ओष्ठकर्णकाः लोहमुखाः लोहतुल्यमुखाः कर्णेषु चूडा येषां ते कर्णचूडाः आममीनाशना इति पूर्वोक्तकिराता व्यावर्त्यन्ते । द्वीपवासिनः द्वीपान्तरेऽपि वसन्तो मन्दरेऽपि वसन्तीत्यर्थः । नरव्याघ्राः अर्धनररूपा व्याघ्ररूपाश्चेत्यर्थः ॥ २४—२८ ॥

२६] ति० टी०–कर्णप्रावरणाः प्रावरणं वस्त्रं तद्वद्विशालश्रवणपुटाः ओष्ठकर्णका ओष्ठपर्यन्तकर्णाः । लोहमुखाः लोहवत्कठिनकृष्णमुखाः । एकपादका एकपादकाः सन्तो जवना वेगगतयः ॥ २६ ॥

रा० टी०–कर्णेति । कर्णप्रावरणाः स्वकर्णकृतवस्त्राः विशालकर्णा इत्यर्थः। ओष्ठकर्णकाः ओष्ठपर्यन्तकर्णविशिष्टाः घोरलोहमुखाः घोरा एव लोहमुखाः नीलत्वादिना लोहसदृशमुखविशिष्टाः एकपादका यवनाश्च ॥ २५ ॥

२७] ति० टी०–अक्षया अक्षयसंतानाः एते उक्ताः पुरुषाः तथैव पुरुषादका राक्षोभेदाः तीक्ष्णसूच्यग्रसदृशतैक्ष्ण्यवती चूडा केशपाशो येषाम् ॥ २७ ॥

रा० टी०–अक्षयाः नाशरहिता गृहरहिता वा पुरुषादकाः राक्षसाश्च तीक्ष्णचूडाः तीक्ष्णकेशपाशविशिष्टाः हेमाभाः किराताश्च ॥ २६ ॥

२८] ति० टी०–आममीनाशना अपक्वमत्स्यभुजः नरव्याघ्रा अधःप्रदेशे नराकारा एव सन्त उपरिभागे व्याघ्राकाराः, अत एव घोराः ॥ २८ ॥

रा० टी०–आममीनाशनाः अपक्वमीनभोजिनः द्वीपवासिनः नद्यन्तर्गतजलाप्लावितदेशवसनशीलाः किराताश्च अन्तर्जलचराः नरव्याघ्राः इत्यनेन नाम्ना श्रुताः प्रसिद्धाश्च सन्तीति शेषः, तत्प्रसिद्धिस्तु अधोदेशे नराकारत्वेन ऊर्ध्वदेशे व्याघ्राकारत्वेन च बोध्या ॥ २७ ॥

२९] ति० टी०–काननौकस इति संबोधनम् । गिरिभिर्ये च गम्यन्ते गिरीनाक्रम्य ये देशा द्वीपाश्च गम्यन्ते, ये च प्लवनेन कूर्दनेन गम्यन्ते, ये च प्लवेनोडुपेन गम्यन्ते, ते च विचेया इत्यन्वयः ॥ २९ ॥

रा० टी०–एतेषामिति । एतेषां कर्णप्रावरणादीनामाश्रयाः स्थानानि ये देशाः गिरिभिः पर्वतैः प्लवनेन उत्प्लुत्या च प्लवेन उडुपेन च गम्यन्ते ते च । किंच गिरिप्रभृतिभिर्ये गम्यन्ते ते कर्णप्रावरणादीनामाश्रया विचेयाः अन्वेषणीयाः । काननौकस इति संबोधनम् ॥ २८ ॥

गो० टी०–एवं जम्बूद्वीपान्वेषणं विधाय द्वीपान्तरान्वेषणं विधत्ते—गिरिभिरित्यादि । रामपत्नीं यशस्विनीमित्यन्तमेकं वाक्यम् । ये द्वीपाः गिरिभिर्गम्यन्ते प्लवनेन लङ्घनेन च ये गम्यन्ते प्लवेन उडुपेन ये गम्यन्ते तान् द्वीपान् सप्तराज्योपशोभितं सप्तखण्डोपशोभितं यवद्वीपं च गच्छत । तं यवद्वीपमतिक्रम्य यः शिशिरो नाम पर्वतः शृङ्गेण दिवं स्पृशति तं गच्छत । एतेषां द्वीपादीनां गिरिदुर्गेषु वनेषु च प्रपातेषु निर्झरेषु च रामपत्नीं मार्गध्वमिति संबन्धः । यवद्वीपसुवर्णरूप्यकावपि लङ्काद्वीपवत् समुद्रान्तर्वर्तिनौ द्वीपविशेषौ ॥ २९—३१ ॥

३०] ति० टी०–ततः परं यत्नवन्तो भूत्वा सप्तराज्योपशोभितं यवद्वीपम्, तथा सुवर्णद्वीपम्, रूप्यकद्वीपम् । निचेतव्यमिति शेषः । सुवर्णकरमण्डितमिति सुवर्णं कुर्वन्ति ये तैः शोभितम् ॥ ३० ॥

३१] ति० टी०–ततः परं यवाख्यद्वीपमतिक्रम्य शिशिरनामा पर्वतोऽस्ति ॥ ३१ ॥

१ आयतामिति गो. पाठः । २ यवना इति रा. पाठः । ३ पुरुषा इति गो. पाठः । ४ कर्णचूडा इति गो.पाठः । ५ हेमाक्षा इति गो. हेमाभा इति रा. पाठः । ६ तत्रेति गो.पाठः । ७ श्रुता इति गो. रा पाठः । ८ आलया इति गो. पाठः । ९ रूप्यकं चैवेति गो पाठः । १० सुवर्णकरेति गो.पाठः ।

एतेषां गिरिदुर्गेषु प्रपातेषु वनेषु च । मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम् ॥ ३२ ॥
ततो रक्तजलं प्राप्य शोणाख्यं शीघ्रवाहिनम् । गत्वा पारं समुद्रस्य सिद्धचारणसेवितम् ॥ ३३ ॥
तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३४ ॥
पर्वतप्रभवा नद्यः सुभीमबहुनिष्कुटाः । मार्गितव्या दरीमन्तः पर्वताश्च वनानि च ॥ ३५ ॥
ततः समुद्रद्वीपांश्च सुभीमान्द्रष्टुमर्हथ । ऊर्मिमन्तं महारौद्रं क्रोशन्तमनिलोद्धतम् ॥ ३६ ॥
तत्रासुरा महाकायाश्छायां गृह्णन्ति नित्यशः । ब्रह्मणा समनुज्ञाता दीर्घकालं बुभुक्षिताः ॥ ३७ ॥
तं कालमेघप्रतिमं महोरगनिषेवितम् । अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥ ३८ ॥
ततो रक्तजलं भीमं लोहितं नाम सागरम् । गत्वा प्रेक्ष्यथ तां चैव बृहतीं कूटशाल्मलीम् ॥ ३९ ॥

३२] ति० टी०–एतेषामुक्तद्वीपानाम् ॥ ३२ ॥

रा० टी०–यत्नवन्त इति । सप्तराज्योपशोभितं सप्तसंख्याकराज्ययुक्तं यवद्वीपं सुवर्णकरमण्डितं स्वर्णप्रकाशेन प्रकाशितं सुवर्णरूप्यकद्वीपं च यवद्वीपमतिक्रम्य देवदानवसेवितः यः शिशिरो नाम पर्वतः श्वेतेन दिवं स्पृशति तं च प्राप्येति शेषः, एतेषां यवद्वीपादीनां गिरिदुर्गेषु पर्वतगुहासु प्रपातेषु निर्झरेषु च वनेषु च यत्नवन्तः कृतप्रयत्नाः सहिताः मिलिताः सर्वे यूयं रामपत्नीं मार्गध्वम् । श्लोकत्रयमेकान्वयि ॥२९-३१॥

३३] ति० टी०–ततः समुद्रस्य पारं गत्वा रक्तवर्णजलम्, अत एव शोणाख्यं नदं प्राप्य ॥ ३३ ॥

३४] ति० टी०–तस्य तीर्थेष्ववतारभेदेषु ॥ ३४ ॥

रा० टी०–तत इति । ततोऽनन्तरं सिद्धचारणसेवितं समुद्रस्य पारं गत्वा रक्तजलं शोणाख्यं प्राप्य तीर्थेषु पवित्रेषु तस्य शोणस्य वनेषु, किंच तस्य तीर्थेषु घट्टेषु वनेषु च वैदेह्या सह रावणो मार्गितव्यः । श्लोकद्वयमेकान्वयि ॥३२॥३३॥

गो० टी०–एवं जम्बूद्वीपं लवणसमुद्रं चोक्त्वा प्लक्षद्वीपप्रदेशानाह—तत इत्यादिना । समुद्रस्य पारं लवणसमुद्रापरपारस्थं रक्तजलम् अगाधं शीघ्रगामिनं सिद्धचारणसेवितम् शोणं शोणाख्यं नदं गत्वा तस्य तीर्थेषु अवतारेषु वनेषु च वैदेह्या सह रावणो मार्गितव्यः । केवलं रावणं केवलं सीतां च दृष्ट्वा नागन्तव्यं रावणहननाय सीतानयनाय च उभावपि दृष्ट्वा आगन्तव्यमिति भावः ॥ ३२ ॥ ३३ ॥

३५] ति० टी०–बहुनिष्कुटा बहुपवनप्रदेशाः । दरीमन्तो दरीयुक्ताः ॥ ३५ ॥

रा० टी०–पर्वतेति । सुभीमबहुनिष्कुटाः भयङ्करानेकवनप्रदेशयुक्ताः पर्वतप्रभवाः नद्यः दरीमन्तः दरीयुक्ताः पर्वताश्च वनानि च मार्गितव्याः ॥ ३४ ॥

गो० टी०–प्लक्षद्वीपपर्वतादीनाह—पर्वतेति । निष्कुटा उपवनविशेषाः । अथेक्षुसमुद्रद्वीपानाह—तत इति ॥३४॥३५॥

३६] ति० टी०–समुद्रद्वीपात्तदुक्तदेशात्परिवर्तीक्षुसमुद्रद्वीपान् । ऊर्मिमन्तम्, अत एव क्रोशन्तं महाघोषम् ॥ ३६ ॥

रा० टी०–तत इति । ततोऽनन्तरम् ऊर्मिमन्तमत एव क्रोशन्तमनिलोद्धतमिक्षुसमुद्रमिति शेषः, समुद्रद्वीपांश्च द्रष्टुमन्वेषितुमर्हथ ॥ ३५ ॥

गो० टी०–इक्षुसमुद्रविशेषं वक्तुमाह–ऊर्मिमन्तमित्यर्धम् । ऊर्मिमन्तं समुद्रम् इक्षुसमुद्रमित्यर्थः । अभिगच्छतेति शेषः । 'लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम्' इति समुद्रक्रमः॥३६

३७] ति० टी०–तत्रेक्षुसमुद्रे समनुज्ञाताः समनुज्ञातच्छायाद्वारकग्रहणसामर्थ्यादिमन्तः, छायागृहीतप्राणिभक्षणादुमतिकाश्च ॥ ३७ ॥

रा० टी०–तत्रेति । तत्र तस्मिन् इक्षुसमुद्रे दीर्घकालं बुभुक्षिताः अत एव ब्रह्मणा समनुज्ञाता गृहीतच्छायकभोजनाय आज्ञप्ताः महाकायाः असुराः छायां गृह्णन्ति छायाद्वारा जन्तूनाकर्षन्तीत्यर्थः ॥ ३६ ॥

गो० टी०–इक्षुसमुद्रस्य दुर्गमत्वं दर्शयति—तत्रेति । तत्र इक्षुसमुद्रे ॥ ३७ ॥

३८] ति० टी०–इक्षुरसस्यापि श्यामत्वात्तदुदधेः कालमेघप्रतिमत्वम् । तीर्थेनोपायेनाभिगम्य प्राप्य ॥ ३८ ॥

३९] ति० टी०–ततः इक्षुसागरात्परतः रक्तजलं रक्तवर्णजलम् अत एव लोहिताख्यम् । कूटशाल्मलीं शाल्मलोद्वीपत्वप्रयोजकवृक्षम् । जम्बूद्वीपं जम्बुवत् ॥ ३९ ॥

रा० टी०–तमिति । महोरगनिषेवितं कालमेघप्रतिमं महानादं तं पूर्ववर्णितं महोदधिं तीर्थेनोपायेन अभिगम्य प्राप्य ततस्तस्मान्महोदधेः रक्तजलमरुणजलविशिष्टं लोहितं नाम सागरं गत्वा बृहतीं विशालां कूटशाल्मलीं कूटाकारशाल्मलीतरुं यूयं द्रक्ष्यथ । श्लोकद्वयमेकान्वयि ॥ ३७ ॥ ३८ ॥

गो० टी०–तमिति । तीर्थेनाभिगम्य उपायेनाभिगम्य 'तीर्थं मन्त्रार्णवोपाध्यायशास्त्रेष्वम्भसि पावने। पात्रोपायावतरणेषु' इति वैजयन्ती । छायाग्राहिपरिहारेण गन्तव्यमित्यर्थः । यद्वा तीर्थेनावतरणेन गन्तव्यं नान्येन तेन छायाग्राहिपरिहारो भविष्यतीति भावः । ततो गताः इक्षुसमुद्रान्निर्गताः

१ शोणमगाधमिति गो. पाठः । २ गामिनमिति गो. पाठः । ३ सुरम्या इति गो. पाठः । ४ समुद्रं चेति गो. पाठः । ५ गता इति गो. पाठः । ६ द्रक्ष्यथेति गो. पाठ ।

गृहं च वैनतेयस्य नानारत्नविभूषितम् । तत्र कैलाससंकाशं विहितं विश्वकर्मणा ॥ ४० ॥
तत्र शैलनिभा भीमा मन्देहा नाम राक्षसाः । शैलशृङ्गेषु लम्बन्ते नानारूपा भयावहाः ॥ ४१ ॥
ते पतन्ति जले नित्यं सूर्यस्योदयनं प्रति । अभितप्ताः स्म सूर्येण लम्बन्ते स्म पुनः पुनः ॥ ४२ ॥
निहता ब्रह्मतेजोभिरहन्यहनि राक्षसाः । ततः पाण्डुरमेघाभं क्षीरोदं नाम सागरम् ॥ ४३ ॥
गत्वा द्रक्ष्यथ दुर्धर्षा मुक्ताहारमिवोर्मिभिः । तस्य मध्ये महाञ्श्वेतो ऋषभो नाम पर्वतः ॥ ४४ ॥
दिव्यगन्धैः कुसुमितैरचितैश्च नगैर्वृतः । सरश्च राजतैः पद्मैर्ज्वलितैर्हेमकेसरैः ॥ ४५ ॥
नाम्ना सुदर्शनं नाम राजहंसैः समाकुलम् । विबुधाश्चारणा यक्षाः किंनराश्चाप्सरोगणाः ॥ ४६ ॥
हृष्टाः समधिगच्छन्ति नलिनीं तां रिरंसवः । क्षीरोदं समतिक्रम्य तदा द्रक्ष्यथ वानराः ॥ ४७ ॥

तां कूटशाल्मलीं लोहितं नाम सागरं मधुसमुद्रं च द्रक्ष्यथ ॥ ३८ ॥ ३९ ॥

४०] ति० टी०–तत्र कूटशाल्मलीसमीपे ॥ ४० ॥

रा० टी०–'तीर्थं शाल्मलक्षेत्रोपायनारीरजस्सुच' इति मेदिनी ।—गृहमिति । तत्र कूटशाल्मलीसंनिधौ विश्वकर्मणा निर्मितं वैनतेयस्य गरुडस्य गृहं द्रक्ष्यथेत्यनुकृष्यते ॥ ३९ ॥

गो० टी०–गृहं चेति । तत्र शाल्मलिद्वीपे ॥ ४० ॥

४१] ति० टी०–शैलशृङ्गेषु सुरासमुद्रान्तर्वर्तिशैलशृङ्गेषु लम्बन्ते अधोमुखा इति शेषः ॥ ४१ ॥

रा० टी०–तत्रेति । तत्र कूटशाल्मलीसंनिधिवर्तिपर्वते शैलनिभाः पर्वतसदृशाः मन्देहा नाम राक्षसाः शैलशृङ्गेषु लम्बन्ते अधोमुखेनेति शेषः ॥ ४० ॥

४२–४३] ति० टी०–सूर्यस्योदयनं प्रति सूर्योदयं प्राप्योर्ध्वमुखाः सूर्येण युध्यमानाः सूर्येणाभितप्तास्तन्मण्डलब्रह्मतेजोभितप्ताः ब्रह्मतेजोभिरहन्यहनि त्रैवर्णिकप्रवर्तितैर्ब्रह्मविद्यातेजोभिर्निहताः सन्तः सुरोदजले पतन्ति । ततः पुनरुज्जीविता लम्बन्ते स्म । शैलशृङ्गेष्विति शेषः । अत्र कतककृतः–'शैलशृङ्गेषु लम्बन्ते' इत्यादि श्लोकद्वयं प्रक्षिप्तम् । 'तानि रक्षांसि मन्देहारुणे द्वीपे प्रक्षिपन्ति' इति श्रुतावरुणद्वीपे तत्प्रक्षेपोक्तेरत्रारुणद्वीपप्रसङ्गाभावात्प्राचीनपुस्तकेष्वदर्शनाच्चेत्याहुः । ततः—पाण्डुरेति । अत्र सुराक्षीरोदयोर्मध्ये सर्पिर्दधिसमुद्रयोर्विवेचनानुक्तिस्तत्र विवेचयदुर्गस्थलाभावादिति कतककः । अनुक्तमपि तदुभयविवेचनमर्थतोऽवगन्तव्यमिति तीर्थः ॥४२॥४३॥

रा० टी०–ते इति । मन्देहा नाम राक्षसाः सूर्यस्योदयनं प्रति उदयसमये सूर्येण योद्धुं गता इति शेषः, अत एव सूर्येण ब्रह्मतेजोभिर्व्यापकीभूतकिरणैः अभितप्ताः अत एव निहताः सन्तः जले निपतन्ति पुनः पुनर्लम्बन्ते च, शैलशृङ्गेषु इति शेषः । सार्धश्लोक एकान्वयी ॥ ४१ ॥

गो० टी०–तत्रेति । तत्र मधुसमुद्रे सूर्यस्योदयनं प्रतीत्यतः परं निहता इत्यर्थम् । ततः परम् अभितप्ताश्चेत्यर्थम् लम्बन्ते वर्तन्त इत्यर्थः, ब्रह्मतेजोभिः गायत्रीप्रभावैः॥४१॥४२॥

रा० टी०–तत इति । ततः अनन्तरं पाण्डुरमेघाभं क्षीरोदं नाम सागरम् ऊर्मिभिर्मुक्ताहारमिव दुर्धर्षा यूयं द्रक्ष्यथ। अर्धद्वयमेकान्वयि ॥ ४२ ॥

गो० टी०–ततः पाण्डुरेति । अत्र मधुसमुद्रानन्तरं सर्पिर्दधिसमुद्रयोः कुशक्रौञ्चद्वीपयोश्च वक्तव्यत्वेऽपि तान् विहाय क्षीरोदप्राप्त्यभिधानं तदुभयप्राप्तिमन्तरेण क्षीरोदप्राप्तेरसंभवात् । अतः अनुक्तावपि तावुक्तावेव समुद्रौ द्वीपौ चेति बोध्यम् । यद्वा लवणसमुद्रं तन्मध्यद्वीपांश्चोक्त्वा प्लक्षद्वीपशाल्मलिद्वीपकुशद्वीपक्रौञ्चद्वीपान् इक्षुसुरासर्पिर्दधिसमुद्रांश्च तत्त्रेण दर्शयति–ततः समुद्रद्वीपांश्च सुधीमान् द्रष्टुमर्हथेति । ततः ऊर्मिमन्तमित्यादिना इक्षुसमुद्रस्य विशेषणमुक्त्वा ततो रक्तजलमित्यादिना सुरासमुद्रस्य स्वरूपमुक्त्वा ततः शाल्मलिद्वीपवृत्तान्तं प्रदर्श्य अन्यत्र विशेषाभावात् क्षीरसमुद्रगमनं निर्दिशति—ततः पाण्डुरमेघाभमित्यादिना । ऊर्मिभिर्मुक्ताहारं मुक्ताहारयुक्तमिव स्थितम् ॥ ४३ ॥

४४] ति० टी०–मुक्ताहारमिव ऊर्मिभिस्तद्वन्तमिवेत्यर्थः ॥ ४४ ॥

रा० टी०–तस्येति । तस्य क्षीरोदस्य मध्ये कुसुमितैः राजतैः रजतमयैर्नगैस्तरुभिर्वृतः ऋषभो नाम पर्वतोऽस्तीति शेषः ॥ ४३ ॥

गो० टी०–तस्येत्यादि ॥ ४४ ॥

४५] ति० टी०–सरश्च नाम्ना सुदर्शनमित्यन्वयः ॥४५॥

रा० टी०–सर इति । हेमकेसरैः स्वर्णमयकेसरविशिष्टैः राजतैः रजतमयैः ज्वलितैः पद्मैः राजहंसैश्च समाकुलं व्याप्तं नाम्ना सुदर्शनं सुदर्शननामेत्यर्थः, सरोऽस्तीति शेषः । नाम प्रसिद्धमतत् ॥ ४४ ॥

गो० टी०–सरश्चेति । नाम्ना सुदर्शनं सर इत्यन्वयः ॥ ४५ ॥ ४६ ॥

४६] ति० टी०–नामशब्दः प्रसिद्ध्यर्थः ॥ ४६ ॥

रा० टी०–विबुधा इति । रिरंसवो रन्तुमिच्छवो विबुधादयस्तां नलिनीं सरसीं समधिगच्छन्ति ॥ ४५ ॥

४७] ति० टी०–नलिनीयुक्तं सुदर्शनं सर इत्यर्थः॥४७॥

---

१ एतदाद्यर्धद्वयं व्यत्यस्तं गो. पाठे । २ चेति गो. पाठः । ३ गता इति गो. पाठः । ४ राजतैरिति गो. रा.पाठः । ५ साप्सरो इति गो. पाठः । ६ अभीति गो. पाठः । ७ तत इति गो. पाठः ।

जलोदं सागरं शीघ्रं सर्वभूतभयावहम् । तत्र तत्कोपजं तेजः कृतं हयमुखं महत् ॥ ४८ ॥
अस्याद्भुतं महावेगमोदनं सचराचरम् । तत्र विक्रोशतां नादो भूतानां सागरौकसाम् ॥
श्रूयते चासमर्थानां दृष्ट्वाऽऽवूडवामुखम् ॥ ४९ ॥
स्वादूदस्योत्तरे तीरे योजनानि त्रयोदश । जातरूपशिलो नाम सुमहान्कनकप्रभः ॥ ५० ॥
तत्र चन्द्रप्रतीकाशं पन्नगं धरणीधरम् । पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ वानराः ॥ ५१ ॥
आसीनं पर्वतस्याग्रे सर्वदेवनमस्कृतम् । सहस्रशिरसं देवमनन्तं नीलवाससम् ॥ ५२ ॥
त्रिशिराः काञ्चनः केतुस्तालस्तस्य महात्मनः । स्थापितः पर्वतस्याग्रे विराजति सवेदिकः ॥ ५३ ॥
पूर्वस्यां दिशि निर्माणं कृतं तत्त्रिदशेश्वरैः । ततः परं हेममयः श्रीमानुदयपर्वतः ॥ ५४ ॥
तस्य कोटिर्दिवं स्पृष्ट्वा शतयोजनमायता । जातरूपमयी दिव्या विराजति सवेदिका ॥ ५५ ॥
सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः । जातरूपमयैर्दिव्यैः शोभते सूर्यसंनिभैः ॥ ५६ ॥

रा० टी०–क्षीरोदमिति । क्षीरोदं समतिक्रम्य सर्वभूतभयावहं जलोदं प्रशस्तजलविशिष्टं सागरं द्रक्ष्यथ ॥ ४६ ॥

गो० टी०–क्षीरोदमिति । जलोदं शुद्धजलसमुद्रम्॥४७॥

४८] ति० टी०–जलोदं शुद्धजलरूपोदकम् । तत्र जलसमुद्रे तत्कोपजमौर्वब्रह्मर्षिकोपजं हयमुखं वडवामुखं तेजो ब्रह्मणा कृतमस्ति ॥ ४८ ॥

रा० टी०–तत्रेति । तत्र जलोदसागरे तत्कोपजम् और्वऋषिकोपात् जातं तेजस्तेजोरूपं महत् हयमुखं कृतं निक्षिप्तं सचराचरं सागरवर्तिचराचरसहितं महावेगं महावेगविशिष्टं जलम् अस्य हयमुखस्य ओदनं भक्ष्यमासीति शेषः ॥ ४७ ॥

गो० टी०–तत्रेति । तत्र शुद्धोदके कृतं निक्षिप्तं कोपजम् और्वकोपजं हयमुखं तत्प्रसिद्धं महत्तेजः वर्तत इति शेषः। अस्य तेजसः सचराचरं महावेगं तत् जलमिति शेषः ओदनमाहुः संहारवेलायामिन्धनमाहुरित्यर्थः ॥ ४८ ॥

४९] ति० टी०–अस्याद्भुतं महावेगं सचराचरं सर्वं जगत्युगान्ते ओदनं वदन्ति अनेन तस्य ब्रह्मरूपता सूचिता। तद्वडवामुखं दृष्ट्वा तत्र पतनभीत्या विक्रोशतामसमर्थानाम्, चात्रसमर्थानामपि, सागरौकसां भूतानां यो नादोऽभूत्सः श्रूयते ॥ ४९ ॥

रा० टी०–तत्रेति । तत्र सागरे यद्वडवामुखमभूत् तद्वडवामुखं दृष्ट्वा विक्रोशतामसमर्थानां तत्पतनपरिहारकसामर्थ्यरहितानां सागरौकसां भूतानां नादो रोदनं श्रूयते ॥ ४८ ॥

गो० टी०–तत्रेति। समर्थानामपि वडवामुखं तत्तेजो दृष्ट्वा विक्रोशतां नादः श्रूयते ॥ ४९ ॥

५०] ति० टी०–स्वादूदस्य शुद्धोदकस्य समुद्रस्य। 'उत्तरे तीरे' इति पाठ्यः पाठः ॥ ५० ॥

रा० टी०–स्वादिति । स्वादूदस्य सागरस्य उत्तरे तीरे त्रयोदश योजनानि जातरूपशिलः स्वर्णमयशिलावान् अत एव कनकप्रभः सुमहान् पर्वतोऽस्तीति शेषः । 'जलोदस्य' इति पाठान्तरम् ॥ ४९ ॥

गो० टी०–स्वादूदस्येति । स्वादूदस्य शुद्धजलसमुद्रस्य उत्तरे देशे अपरे पारे ॥ ५०–५३ ॥

५१–५२] ति० टी०–चन्द्रप्रतीकाशं श्वेतवर्णम् ॥५१॥५२॥

रा० टी०–तत्रेति । तत्र तस्मिन् पर्वतस्याग्रे आसीनं चन्द्रप्रतीकाशं श्वेतत्वेन चन्द्रतुल्यं पद्मपत्रविशालाक्षं सर्वदेवनमस्कृतं सहस्रशिरसं धरणीधरं नीलवाससं पन्नगमनन्तं द्रक्ष्यथ । अर्धचतुष्टयमेकान्वयि ॥ ५० ॥ ५१ ॥

५३] ति० टी०–त्रिशिराः शिरःप्रदेशवर्तित्रिस्कन्धवान् । सवेदिक आधारवेदिबन्धसहितः ॥ ५३ ॥

रा० टी०–त्रिशिरा इति । त्रिशिराः शास्त्रात्रयविशिष्टः सवेदिकः आधारभूतवेदिकासहितः महारमनोऽनन्तस्य स्थापितः काञ्चनः स्वर्णमयः केतुः केतुभूतस्तालः पर्वतस्याग्रे विराजति ५२

५४] ति० टी०–अयमेव तालः पूर्वस्यां दिशि पूर्वदिग्व्यवस्थाया निर्माणं कृतम् अभिज्ञाशङ्कुवत्प्रमाणनिर्माणं कृतमित्यर्थः ॥ ५४ ॥

रा० टी०–पूर्वस्यामिति । ततः तालात्परं त्रिदशेश्वरैर्यस्य निर्माणं कृतं तत् स हेममयः उदयपर्वतः पूर्वस्यां दिश्यस्तीति शेषः तदिति सामान्ये नपुंसकम् ॥ ५३ ॥

गो० टी०–पूर्वस्यामिति । पूर्वस्यां दिशि तन्निर्माणं कृतं पूर्वदिगवधित्वेन तालरूपः केतुः कल्पित इत्यर्थः ॥ ५४–५६ ॥

५५–५६] ति० टी०–कोटिः शिखरम् सवेदिका साधारपर्वता ॥ ५५–५६ ॥

रा० टी०–तस्येति । तस्य उदयपर्वतस्य शतयोजनमायता जातरूपमयी सवेदिका कोटिरग्रभागः दिवं स्पृष्ट्वा विराजति ॥ ५४ ॥

---

१ सागरश्रेष्ठमिति गो. पाठः । २ वडवमिति गो. रा. पाठः । ३ आदुस्तन्महेति गो. पाठः । ४ च समर्थानामिति गो. पाठः । ५ तदिति गो. पाठः । ६ देशे इति गो. पाठः । ७ महान्कनकपर्वत इति गो. पाठः ।

तत्र योजनविस्तारमुच्छ्रितं दशयोजनम् । शृङ्गं सौमनसं नाम जातरूपमयं ध्रुवम् ॥ ५७ ॥
तत्र पूर्वं पदं कृत्वा पुरा विष्णुस्त्रिविक्रमे । द्वितीयं शिखरे मेरोश्चकार पुरुषोत्तमः ॥ ५८ ॥
उत्तरेण परिक्रम्य जम्बूद्वीपं दिवाकरः । दृश्यो भवति भूयिष्ठं शिखरं तन्महोच्छ्रयम् ॥ ५९ ॥
तत्र वैखानसा नाम बालखिल्या महर्षयः । प्रकाशमाना दृश्यन्ते सूर्यवर्णास्तपस्विनः ॥ ६० ॥
अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते । तस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि ॥ ६१ ॥
शैलस्य तस्य पृष्ठेषु कन्दरेषु वनेषु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६२ ॥
काञ्चनस्य च शैलस्य सूर्यस्य च महात्मनः । आविष्टा तेजसा संध्या पूर्वा रक्ता प्रकाशते ॥ ६३ ॥

रा० टी०–सालैरिति । सूर्यसंनिभैः तालादिभिः शोभते तस्य कोटिरिति शेषः ॥ ५६ ॥

५७] ति० टी०–तत्र शतयोजनदीर्घे उदयगिरिशिखरे॥५७॥

रा० टी०–तत्रेति । तत्रोदयपर्वते योजनविस्तारं योजनपरिमितविस्तारविशिष्टं दशयोजनमुच्छ्रितं दशयोजनपरिमितोच्छ्रायविशिष्टं जातरूपमयं सौमनसं नाम शृङ्गमस्तीति शेषः५६

गो० टी०–तत्र योजनेति । तत्र उदयपर्वतकोटौ ॥५७॥

५८] ति० टी०–तत्र सौमनसे शृङ्गे । त्रिविक्रमे त्रिभिः पदैस्त्रिलोक्या आक्रमणप्रस्तावे प्रथमं पदं तत्र कृत्वा द्वितीयं पदं मेरोः शिखरे चकार ॥ ५८ ॥

रा० टी०–तत्रेति । पुरा पूर्वं त्रिविक्रमे त्रिलोकीयत्नाकरणसमये तत्र सौमनसशृङ्गे पूर्वं प्रथमं पदं चरणं कृत्वा धृत्वा द्वितीयचरणं मेरोः शिखरे चकार ॥ ५७ ॥

गो० टी०–तत्र पूर्वमिति । विष्णुः त्रिविक्रमे त्रिविक्रमप्रस्तावे तत्र सौमनसशृङ्गे पूर्वं पदं कृत्वा द्वितीयं पदं मेरोः पश्चिमदिगवधिभूतस्य सावर्णिमेरोः शिखरे चकार । पूर्वपश्चिमदिगवधिभूतयोरुदयाचलसावर्णिमेर्वोर्विष्णोः पदविन्यासः बलेः कृत्स्नराज्यग्रहणार्थः । भूमध्यस्थमेरौ पदविन्यासे कृत्स्नाक्रमणं न लभ्येत । वस्तुतस्तु मेरोरेव शिखरे द्वितीयं पदं न्यस्तं मेरुशिखरस्य स्वर्गत्वात् । भूमावेकं स्वर्गे द्वितीयं तृतीयं ब्रह्मलोक इति पौराणिकी गाथा ॥ ५८ ॥

५९–६०] ति० टी०–अस्तानन्तरमुत्तरेण जम्बूद्वीपं परिक्रम्य तन्महोच्छ्रयं शिखरं सौमनसाख्यं प्राप्य स्थितो दिवाकरो जम्बूद्वीपवर्तिनां भूयिष्ठं दृश्यो भवति । सौमनसे शिखरे इत्यर्थः । इदं सत्ययुगाभिप्रायम् । त्रेतायां क्षीरसागरमध्यगस्य द्वापरे सरोदमध्यगस्य कलौ लङ्कामध्यगस्य जम्बूद्वीपस्थमनुष्यदृश्यताया अन्यत्रोक्तत्वात् ॥ ५९ ॥ ६० ॥

रा० टी०–उत्तरेणेति । दिवाकरः अस्तं प्राप्येति शेषः, उत्तरेण पथा जम्बूद्वीपं परिक्रम्य महोच्छ्रयं तत् सौमनसाभिधं शिखरमागत्येति शेषः, भूयिष्ठमधिकं दृश्यो भवति जम्बूद्वीपनिवासिनामिति शेषः इदं सत्ययुगाभिप्रायं त्रेतायां क्षीरसागरमध्यगस्य द्वापरे सरोदमध्यगस्य कलौ लङ्कामध्यगस्य मनुष्यलोकदृश्यताया अन्यत्रोक्तत्वादिति भट्टाः ॥ ५८ ॥

गो० टी०–उत्तरेणेति । दिवाकरः जम्बूद्वीपमुत्तरेण जम्बूद्वीपोत्तरभागे " एनपा द्वितीया " इति द्वितीया । परिक्रम्य महोच्छ्रयं तत् सौमनसं शिखरं प्राप्येति शेषः । दृश्यो भवति मेरोर्दक्षिणपार्श्ववर्तिनां दृश्यो भवतीत्यर्थः ॥ ५९ ॥

रा० टी०–तत्रेति । तत्र सौमनसशृङ्गे सूर्यवर्णाः बालखिल्याः दृश्यन्ते ॥ ५९ ॥

गो० टी०–तत्रेति । वैखानसाः ब्रह्मनखोत्पन्नाः, बालखिल्याः ब्रह्मरोमोत्पन्नाः " ये नखास्ते वैखानसाः । ये बालास्ते बालखिल्याः " इति श्रुतेः ॥ ६० ॥

६१–६२] ति० टी०–यस्य पुरः पुरस्तात्समीपे एवायं प्रागुक्तसुदर्शनसरश्चिह्नो द्वीपः प्रकाशते, तस्मिन्सौमनसशिखरे भगवत्युदिते सर्वप्राणभृतां प्राणिनां तेजःसंबन्धो भवति, चक्षुश्च प्रकाशते ॥ ६१ ॥ ६२ ॥

रा० टी०–अयमिति । यस्य सौमनसशृङ्गस्य पुरोऽग्रे अयं सुदर्शनो द्वीपः प्रकाशते तस्मिन् सौमनसशृङ्गे सर्वप्राणभृतां तेजः चक्षुश्च तत्र सूर्ये गते सत्येव प्राणिनां तेजःसंबन्धः चक्षुषः कार्यकारित्वं च भवतीत्यर्थः ॥ ६० ॥

गो० टी०–अयमिति । अयम् उदयपर्वतपार्श्वस्थो द्वीपः सुदर्शनो नाम । सुदर्शनसंज्ञाम्वर्थेत्याह–यस्येति । यस्य तेजसः पुरः संनिधौ सर्वप्राणभृतामपि चक्षुः प्रकाशते विषयग्रहणशक्तं भवति तत्तेजः सूर्याख्यं यस्मिन् द्वीपे प्रकाशते अयं द्वीपः सुदर्शनो नामेति योजना ॥ ६१ ॥

रा० टी०–शैलस्येति । तस्य शैलस्य पृष्ठादिषु वैदेह्या सह रावणः मार्गितव्यः ॥ ६१ ॥

गो०टी०–शैलस्येति । शैलस्य उदयशैलस्येत्यर्थः६२॥६३॥

६३] ति० टी०–काञ्चनशैलस्य सूर्यस्य च तेजसाऽऽविष्टा समाक्रान्ता पूर्वा संध्योदयावच्छिन्ना पूर्वा दिग्रक्ता सती प्रकाशते ॥ ६३ ॥

रा० टी०–काञ्चनस्येति । काञ्चनस्य शैलस्य सूर्यस्य च तेजसा आविष्टा पूर्वा संध्या रक्ता प्रकाशते तेजोद्वयाविष्टात्वं तु सूर्यस्य काञ्चनशैलाधिष्ठितत्वे एव भवतीति तात्पर्यम् ॥६२॥

१ यस्मिन्निति गो. पाठः । २ शृङ्गेष्विति गो. पाठः ।

पूर्वमेतत्कृतं द्वारं पृथिव्या भुवनस्य च । सूर्यस्योदयनं चैव पूर्वा ह्येषा दिगुच्यते ॥ ६४ ॥
तस्य शैलस्य पृष्ठेषु निर्झरेषु गुहासु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६५ ॥
ततः परमगम्या स्यादिक्पूर्वा त्रिदशावृता । रहिता चन्द्रसूर्याभ्यामदृश्या तमसावृता ॥ ६६ ॥
शैलेषु तेषु सर्वेषु कन्दरेषु नदीषु च । ये च नोक्ता मयोद्देशा विचेया तेषु जानकी ॥ ६७ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः । अभास्करममर्यादं न जानीमस्ततः परम् ॥ ६८ ॥
अभिगम्य तु वैदेहीं निलयं रावणस्य च । मासे पूर्णे निवर्तध्वमुदयं प्राप्य पर्वतम् ॥ ६९ ॥
ऊर्ध्वं मासान्न वस्तव्यं वसन्वध्यो भवेन्मम । सिद्धार्थाः संनिवर्तध्वमधिगम्य च मैथिलीम् ॥ ७० ॥
महेन्द्रकान्तां वनषण्डमण्डितां दिशं चरित्वा निपुणेन वानराः ।
अवाप्य सीतां रघुवंशजप्रियां ततो निवृत्ताः सुखिनो भविष्यथ ॥ ७१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

६४] ति० टी०–तदेवाह–पूर्वमिति । चो हेतौ। यतो भुवनस्य प्रकाशनहेतोः सूर्यस्योदयनमवेक्ष्य पूर्वं प्रथमं पृथिव्या एतद्द्वारमूर्ध्वस्थानां पृथिवीप्रवेशस्य द्वारं पृथ्वीस्थानां भुवनस्य ब्रह्मभुवनस्य प्रवेशद्वारमेतदुदयगिरिरूपं कृतम्, अत एषा पूर्वा दिगुच्यते । अन्ये तु—एतद्वारमेतद्गिवर्तिं महद्भू-विवरं सृष्टं ब्रह्मणा, तस्मादेषा पूर्वा दिगुच्यते ॥ ६४ ॥

रा० टी०–पूर्वमिति । एतत् सूर्यस्य उदयनं उदयस्थानं पूर्वं कृतं ब्रह्मणा विरचितमत एव पृथिव्याः भुवनस्य जनस्य द्वारं प्रवृत्तिमार्गः पूर्वं कृतमतः एषा दिक् पूर्वोच्यते ॥ ६३ ॥

गो० टी०–पूर्वमिति । हि यस्मादेतदुदयपर्वतः द्वारशब्दापेक्षया नपुंसकत्वम् । पृथिव्याः भुवनस्य च पूर्वं द्वारं कृतं प्रथमद्वारत्वेन ब्रह्मणा सृष्ट्यादौ कल्पितं सूर्यस्य परितो भ्रमणाय प्रथमम् एतदुदयनं च कृतमुदयस्थानं कल्पितं तस्मादेषा पूर्वा दिगुच्यते ॥ ६४ ॥

६५] ति० टी०—तस्य शैलस्योदयशैलस्य ॥ ६५ ॥

रा० टी०–तस्येति । तस्य उदयभूमेः शैलस्य पृष्ठादिषु रावणः मार्गितव्यः ॥ ६४ ॥

गो० टी०–तस्येत्यादि । सम्यगन्वेषणाय पुनरुक्तिः॥६५॥

६६] ति० टी०–ततः परमुदयाद्रेः पुरस्तात्त्रिदशावृता तद्दिगधिष्ठात्रिन्द्रादित्रिदशाधिष्ठिता । उदयाचलात्परमगम्यत्वे हेतुमाह—रहितेति ॥ ६६ ॥

रा० टी०–तत इति । ततः उदयगिरेः परं पूर्वा दिक् चन्द्रसूर्याभ्यां रहिता अत एव तमसा वृता अत एव अदृश्या अत एव त्रिदशावृता दिग् देवतामात्राविष्ठा अत एव अगम्या अस्माभिरिति शेषः । एतेन ततः परं न गन्तव्यमिति सूचितम् ॥ ६६ ॥

गो० टी०–तत इति । त्रिदशावृता त्रिदशाधिष्ठिता दिक् उदयाचलप्रदेशरूपा ततः परम् उदयाद्रेः परम् अगम्या ॥६६॥

६७–६९] ति० टी०—उक्तार्थोपसंहारः—शैलेष्वित्यादि ॥ ६७–६९ ॥

रा० टी०–शैलेष्विति । ये उद्देशाः देशा मया नोक्ताः तेष्वपि शैलादिषु जानकी विचेया ॥ ६६ ॥

गो० टी०–उपसंहरति–शैलेष्विति । ये मया नोक्तास्तेषु शैलादिषु विचेया ॥ ६७ ॥

रा० टी०–एतावदिति । हे वानरपुङ्गवाः! एतावत् उदयगिरिपर्यन्तमेव वानरैर्गन्तुं शक्यम् अतः अभास्करं भास्करोपलक्षितसूर्यचन्द्रादिरहितमत एव अमर्यादं ततः उदयगिरेः परं स्थलं वयं न जानीमः ॥ ६७ ॥

रा० टी०–अभिगम्येति । उदयं पर्वतं प्राप्य रावणस्य निलयं वैदेहीं च अभिगम्य निश्चित्य मासे पूर्णे मासाभ्यन्तरे इत्यर्थः, निवर्तध्वम् ॥ ६८ ॥

गो० टी०–एतावदिति । अमर्यादं ग्रामनगरादिमर्यादारहितं केवलान्धकारभूतमित्यर्थः ॥ ६८–७० ॥

७०–७१] ति० टी०–सिद्धार्थाः कृतान्वेषणकृत्याः७०॥७१

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–ऊर्ध्वमिति । मासादूर्ध्वं न वस्तव्यम् । तत्र हेतुः—मासादूर्ध्वं वसन् वानरः मम वध्यो भवेत् अतो मैथिलीमधिगम्य मासाभ्यन्तरे निश्चित्य सिद्धार्था यूयं संनिवर्तध्वम् ॥ ६९ ॥

रा० टी०–महेन्द्रेति । महेन्द्रकान्तां महेन्द्रस्वामिकां वनखण्डमण्डितां वनसमूहशोभितां दिशं प्राचीं निपुणेन नैपुण्येन चरित्वा सीतामवाप्य ततः प्राच्याः निवृत्ताः यूयं सुखिनो भविष्यथ ॥ ७० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

---

१ सेति रा. पाठः । २ वनेष्विति गो. पाठः । ३ खण्डेति रा. पाठ. । ४ समित्यधिकं भाति मूलेऽदृष्टत्वात् ।

एकचत्वारिंशः सर्गः ।

दक्षिणदिक्स्थतत्तत्प्रदेशविशेषान्निर्दिशन्सुग्रीवः सीतान्वेषणाय हनुमन्नीलाङ्गदादीन्मासावधिं विधाय प्रेषयति ।

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलम् । दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥ १ ॥
नीलमग्निसुतं चैव हनूमन्तं च वानरम् । पितामहसुतं चैव जाम्बवन्तं महौजसम् ॥ २ ॥
सुहोत्रं च शरारिं च शरगुल्मं तथैव च । गजं गवाक्षं गवयं सुषेणं वृषभं तथा ॥ ३ ॥
मैन्दं च द्विविदं चैव सुषेणं गन्धमादनम् । उल्कामुखमनङ्गं च हुताशनसुतावुभौ ॥ ४ ॥
अङ्गदप्रमुखान्वीरान्वीरः कपिगणेश्वरः । वेगविक्रमसंपन्नान्संदिदेश विशेषवित् ॥ ५ ॥
तेषामग्रेसरं चैव बृहद्बलमथाङ्गदम् । विधाय हरिवीराणामादिशद्दक्षिणां दिशम् ॥ ६ ॥
ये केचन समुद्देशास्तस्यां दिशि सुदुर्गमाः । कपीशः कपिमुख्यानां स तेषां समुदाहरत् ॥ ७ ॥
सह्यशिरसं विन्ध्यं नानाद्रुमलतायुतम् । नर्मदां च नदीं रम्यां महोरगनिषेविताम् ॥ ८ ॥
ततो गोदावरीं रम्यां कृष्णवेणीं महानदीम् । [वैरंदां च महाभागां महोरगनिषेविताम् ।]
मेखलानुत्कलांश्चैव दशार्णनगराण्यपि ॥ ९ ॥
औम्रवन्तीमवन्तीं च सर्वमेवानुपश्यत । विदर्भान्ऋष्टिकांश्चैव रम्यान्माहिषकानपि ॥ १० ॥

गो० टी०–महेन्द्रेति । महेन्द्रकान्ताम् इन्द्रप्रियाम् । निपुणेन नैपुण्येन ॥ ७१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

१–३] ति० टी०–तत इति । अभिलक्षितान्कार्यसमर्थत्वेन निर्णीतान् ॥ १–३ ॥

४] ति० टी०–अयं सुषेणस्तारापितुरन्यः । हुताशनसुताविति अग्नित्वव्याप्यं हुताशनत्वमित्यग्निहुताशनयोर्भेदः॥४॥

५] ति० टी०–विशेषविदन्वेष्टव्यदेशविशेषवित् ॥ ५ ॥

रा० टी०–दक्षिणस्यां दिशि वानरप्रेषणमुपक्रमते–तत इति । ततः प्राचीप्रेषणानन्तरं सुग्रीवो महत् वानरं बलम् अभिलक्षितान् कार्यसाधकत्वेन परीक्षितान् वानरान् प्रस्थाप्य प्रस्थानविधि कारयित्वेत्यर्थः, दक्षिणां दिशं प्रेषयामास ॥ १ ॥

गो० टी०–अथ दक्षिणदिशि वानरप्रेषणमेकचत्वारिंशे–ततः प्रस्थाप्येत्यादि । अभिलक्षितान् दृष्टापदानान् ॥ १ ॥

रा० टी०–प्रेषणप्रकारमाह—नीलमित्यादिभिः । देशविशेषवित् कपिगणेश्वरः सुग्रीवः नीलप्रभृतीन् अङ्गदप्रमुखांश्च संदिदेश । द्वितीयः सुषेणः तारापितुरन्य इति न पानरुक्त्यम् । श्लोकचतुष्टयमेकान्वयि ॥ २—५ ॥

गो०टी०–नीलमित्यादि । अत्रोक्तः सुषेणस्तारापितुरन्यः। वेगविक्रमसंपन्नप्रेषणे हेतुमाह–विशेषविदिति ॥ २–५ ॥

६] ति० टी०–अग्रेसरं मुख्यम् । 'असंग्रहम्' इति पाठेऽसंकोचप्रभुमित्यर्थः । दक्षिणां दिशमादिशत् अन्वेष्टव्यत्वेनेति शेषः ॥ ६ ॥

रा० टी०–तेषामिति । तेषां प्रेष्याणां हरिवीराणामग्रेसरं मुख्यमङ्गदं विधाय दक्षिणां दिशमादिशत् प्रेषयामास ॥ ६ ॥

गो० टी०–तेषामग्रेसरं चैव महद्बलमसंगगमिति । असङ्गगम् अविलम्बगामि वेगवदिति यावत् बलं सैन्यम् अग्रेसरम् अग्रचरं विधाय ॥ ६ ॥

७] ति० टी०–तस्यां दिशि ये दुर्गमास्तान्सम्युदाहरदुवाच ॥ ७ ॥

रा० टी०–ये इति । तस्यां दक्षिणस्यां दिशि ये केचन सम्युद्देशाः प्रदेशाः सुदुर्गमाः तान् कपीशः सुग्रीवः कपिमुख्यानां कपिमुख्यान् सम्युदाहरत् अबोधयत संबन्धसामान्याविवक्षया षष्ठी अग्रे इत्यस्याध्याहारो वा अत्र पक्षे सम्युदाहरदित्यस्य अकथयदित्यर्थः ॥ ७ ॥

गो० टी०–ये केचनेति । तान् समुद्देशान् ॥ ७ ॥

८] ति० टी०–अत्राप्यार्यावर्तापेक्षया दक्षिणत्वम् । तदाह–सह्यशिरसं सह्यशिखरम् ॥ ८ ॥

९] ति० टी०–गोदावरीं विन्ध्यपूर्वप्रदेशवर्तिगोदावरीं नदीम् । मेखलादयो देशभेदाः ॥ ९ ॥

१०] ति० टी०–'ऋष्टिकान्' इति पाठः ॥ १० ॥

रा० टी०–तत्प्रकारमाह–सह्यस्येत्यादिभिः । विन्ध्यादीन् अनुपश्यत अन्वेषयत । अत्रापि दिग्विभागः आर्यो-

---

१ हनुमन्तमिति गो. पाठः । २ मतमिति रा. पाठः । ३ महाबलमिति गो. पाठः । ४ ऋषभमिति गो. पाठः । ५ विजयमिति गो. पाठः । ६ असङ्गमिति गो. पाठः । ७ महद्बलमसङ्गगमिति गो. पाठः । ८ तानिति गो. पाठ. । ९ दुर्गानिति गो. पाठः । १० अर्धमेतदधिकं गो. पाठे । ११ मेखलामुत्कलामिति गो.पाठः । १२ आतुवन्तीमिति रा. अश्ववन्तीमिति गो. पाठः । १३ ऋक्षिकामिति गो. पाठः ।

तथा मत्स्यकलिङ्गांश्च कौशिकांश्च समन्ततः । अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम् ॥ ११ ॥
नदीं गोदावरीं चैव सर्वमेवानुपश्यत । तथैवान्ध्रांश्च पुण्ड्रांश्च चोलान्पाण्ड्यांश्च केरलान्॥ १२ ॥
अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः । विचित्रशिखरः श्रीमांश्चित्रपुष्पितकाननः ॥ १३ ॥
[1]सुचन्दनवनोद्देशो मार्गितव्यो महागिरिः । ततस्तामापगां दिव्यां प्रसन्नसलिलाशयाम् ॥ १४ ॥
तत्र द्रक्ष्यथ कावेरीं विहृतामप्सरोगणैः । तस्यासीनं नगस्याग्रे मलयस्य महौजसः ॥ १५ ॥
द्रक्ष्यथादित्यसंकाशमगस्त्यमृषिसत्तमम् । ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ॥ १६ ॥
ताम्रपर्णीं ग्राहजुष्टां तरिष्यथ महानदीम् । सा चन्दनवनैश्चित्रैः[2] प्रच्छन्नद्वीपवारिणी ॥ १७ ॥
कान्तेव युवती[3] कान्तं समुद्रमवगाहते । ततो हेममयं दिव्यं मुक्तामणिविभूषितम् ॥ १८ ॥
युक्तं कवाटं पाण्ड्यानां गता द्रक्ष्यथ वानराः । ततः समुद्रमासाद्य संप्रधार्यार्थनिश्चयम् ॥ १९ ॥
अगस्त्येनान्तरे तत्र सागरे विनिवेशितः । [4]चित्रसानुनगः श्रीमान्महेन्द्रः पर्वतोत्तमः ॥ २० ॥
जातरूपमयः श्रीमानवगाढो महार्णवम् । नानाविधैर्नगैः [5]फुल्लैर्लताभिश्चोपशोभितम् ॥ २१ ॥
देवर्षियक्षप्रवरैरप्सरोभिश्च [6]शोभितम् । सिद्धचारणसङ्घैश्च प्रकीर्णं [7]सुमनोरमम् ॥ २२ ॥

वर्तांद्वोध्यः । अतो विन्ध्यस्य तदुत्तरत्वेऽपि न क्षतिः । श्लोकपञ्चकमेकान्वयि ॥ ८—१२ ॥

गो० टी०—सहस्रशिरसमित्यादि । पूर्ववन्मध्यदेशापेक्षया विन्ध्यस्य दक्षिणत्वव्यपदेशः ॥ ८—१० ॥

गो० टी०—तत्र सर्वमेवानुपश्यतेत्यन्तेन विन्ध्यस्य पश्चिमभागस्थांस्तदक्षिणपार्श्वस्थांश्च नदीनगरदेशानुपदिशति । विदर्भानित्यादिना पूर्वभागस्थान्देशानुपदिशति । नदीं गोदावरीमिति दण्डकारण्यवर्तिगोदावरीखण्डमित्यर्थः ॥ ११ ॥ १२ ॥

११] ति० टी०—मत्स्यांश्च कलिङ्गांश्च तान् ॥ ११ ॥

१२] ति० टी०—नदीं गोदावरीं दण्डकारण्यवर्तिगोदावरीप्रदेशम् ॥ १२ ॥

१३-१४] ति० टी०—अयोमुख इति मलयस्य नामान्तरम् सुचन्दनवनत्वलिङ्गात् ॥ १३ ॥ १४ ॥

रा० टी०—अयोमुख इति । चित्रपुष्पितकाननः अयोमुखः पर्वतो गन्तव्यः ॥ १३ ॥

रा० टी०—सुचन्दनेति । सुचन्दनवना उद्देशाः प्रदेशा यास्मिन् यस्य वा स महागिरिर्मलयो मार्गितव्यः। अर्थं पृथक्। तत इति । ततो मार्गणसमये तत्र तस्मिन् मलये अप्सरोगणैर्विहृतां कावेरीं द्रक्ष्यथ अर्धद्वयमेकान्वयि ॥ १४ ॥

गो० टी०—अयोमुख इति । अयोमुखः सल्लः॥१३॥१४॥

गो० टी०—तत इति । अप्सरोगणैः विहितां पूजितामित्यर्थः ॥ १५ ॥

१५] ति० टी०—तस्यायोमुखपर्वायस्य ॥ १५ ॥

रा० टी०—तस्येति । तस्य नगस्य मलयस्याग्रे आसीनम् आदित्यसंकाशमगस्त्यं द्रक्ष्यथ तत्राप्यगस्त्याश्रमस्य सत्त्वात् तन्नामकक्रव्यन्तरकल्पनाद्वा न पञ्चवटीप्रकरणाद्विरोधः ॥१५॥

गो० टी०—तस्येति । तस्य प्रसिद्धस्य ॥ १६—१८ ॥

१६] ति० टी०—अगस्त्यमिति यद्यपि पञ्चवटीत उदग्भागेऽगस्त्याश्रमः पूर्वमुक्तस्तथाप्यत्रापि बोध्यः । वाल्मीकेरनेकदेशेष्वाश्रमवत्समाननामान्य एवायमित्यन्ये ॥ १६ ॥

रा० टी०—तत इति । तेनागस्त्येन अनुज्ञाता यूयं ग्राहजुष्टां बहुग्राहैः संवितां ताम्रपर्णीं महानदीं तरिष्यथ ॥ १६ ॥

१७] ति० टी०—ग्राहजुष्टामित्यादि ताम्रपर्णीविशेषणम् चन्दनैः प्रच्छन्नानि द्वीपानि वारि च यस्याः सा प्रच्छन्नद्वीपवारिणी प्रच्छन्नशरीरेति यावत् ॥ १७ ॥

रा० टी०—सेति । चित्रैः चन्दनवनैः प्रच्छन्नद्वीपमालिनी आच्छन्नद्वीपसमूहवती सा ताम्रपर्णी युवती कान्तेव कान्तं समुद्रमवगाहते प्रच्छन्नानि द्वीपानि वारीणि च यस्या इति भट्टव्याख्यया ' द्वीपवारिणी ' इति पाठः प्रतीयते तत्र नुमागम आर्षो बोध्यः ॥ १७ ॥

१८] ति० टी०—अत एव युवती कान्तेव ॥ १८ ॥

रा० टी०—तत इति । हे वानराः ! ततः ताम्रपर्ण्याः गताः यूयं हेममयं युक्तं पुरद्वारि निविष्टं पाण्ड्यानां राजविशेषाणां कवाटं द्रक्ष्यथ ॥ १८ ॥

गो० टी०—ततो हेममयमिति । पाण्ड्यानां पाण्ड्यराजानां युक्तं योग्यं कपाटम् अनेन नगरं लक्ष्यते । मुक्ताकर्पैर्मणिभिः रत्नैः भूषितं तदुत्पत्तिदेशत्वादिति भावः ॥ १९ ॥

१९] ति० टी०—युक्तं पुरप्राकारघटितम् । अर्थं समुद्रतरणरूपे निश्चयं शक्याशक्यनिश्चयं संप्रधार्य कृत्वा ॥ १९ ॥

२०] ति० टी०—तत्र प्लवनसाधनभूतः पर्वत उपदिश्यते—अगस्त्येनेति । सागरेऽन्तरे सागरस्यातसंबन्धिन्यन्तरेऽवकाशेऽगस्त्येन विनिवेशितः प्रतिष्ठापितो महेन्द्रः पर्वतोत्तमोऽस्ति । श्रीमान्सुन्दरः ॥ २० ॥

२१-२२] ति० टी०—अवगाढः प्रविष्टैकपार्श्वः ॥२१॥२२॥

---

१ गुहामिति रा. पाठ. । २ सचन्दनेति गो. पाठः । ३ सालिलां शिवामिति गो. पाठः । ४ दिव्यैः प्रच्छन्ना द्वीपशालिनीति गो. मालिनीति रा. पाठः । ५ युवतिरिति गो. पाठः । ६ तत्र नानानग इति गो. पाठः । ७ सर्वैरिति गो. पाठः । ८ सेवितमिति गो. पाठः । ९ हरमिति गो. पाठः ।

तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु । द्वीपस्तस्यापरे पारे शतयोजनविस्तृतः ॥ २३ ॥
अगम्यो मानुषैर्दीप्तस्तं मार्गध्वं समन्ततः । तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ॥ २४ ॥
स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ २५ ॥
दक्षिणस्य समुद्रस्य मध्ये तस्य तु राक्षसी । अङ्गारकेति विख्याता छायामाक्षिप्य भोजनी ॥ २६ ॥
एवं निःसंशयान्कृत्वा संशयान्नष्टसंशयाः । मृगयध्वं नरेन्द्रस्य पत्नीममिततेजसः ॥ २७ ॥
तमतिक्रम्य लक्ष्मीवान्समुद्रे शतयोजने । गिरिः पुष्पितको नाम सिद्धचारणसेवितः ॥ २८ ॥
चन्द्रसूर्यांशुसंकाशः सागराम्बुसमाश्रयः । भ्राजते विपुलैः शृङ्गैरम्बरं विलिखन्निव ॥ २९ ॥

रा० टी०—तत इति । समुद्रमासाद्य प्राप्य अर्थनिश्चयम् अर्थस्य अन्वेष्यसीताया निश्चयं स्थितिनियमं संप्रधार्य तत्रत्यजन्तुभ्यः प्रभादिना निश्चित्य चित्रसानुगतः विचित्रानेकसानुमान् तत्र सागरे अन्तरे तटे अगस्त्येन विनिवेशितः अत एव फुल्लैः पुष्पितैर्नगैस्तरुभिर्लतााभिश्चोपशोभितं देवर्ष्यादिभिः शोभितं सिद्धादिभिः प्रकीर्णं व्याप्तं महार्णवमवगाढः निमग्नैकपार्श्वः महेन्द्रः पर्वतोऽन्वेषणीय इति शेषः । सार्धश्लोकत्रयमेकान्वयि ॥ १९—२२ ॥

गो० टी०—अथ महेन्द्रं वर्णयति—तत इत्यादिना । मार्गितव्या विशेषत इत्यन्तमेकान्वयम् । ततः पाण्ड्यनगरात् समुद्रमासाद्य अर्थनिश्चयं कर्तव्यसमुद्रलङ्घनायर्थनिश्चयं संप्रधार्य कृत्वा अगस्त्येन तत्र सागरे अन्तरे अवकाशे निवेशितः श्रीमान् पुष्पफलादिसमृद्धिमान् श्रीमान् कान्तिमान् महेन्द्रोऽस्ति । तं पर्वतं पर्वसु पर्वसु समुद्रस्नानायागच्छति । तस्यापरे पारे अन्तरालिकतीरे द्वीपोऽस्ति तं मार्गध्वं तत्र सर्वात्मना सर्वप्रयत्नेन विशेषतः सीता मार्गितव्या इत्यर्थः ॥ २०—२४ ॥

२३] ति० टी०—तद्युक्तविशेषणविशिष्टम् । सहस्राक्ष उपैतीत्यनेन महेन्द्राधिष्ठितत्वादन्वर्थनामकत्वं महेन्द्रस्य सूचितम् । अपरे पारेऽपरे परतीरे । अपरशब्दो विशेषवाची परतीरविशेषे प्रतिष्ठित इति शेषः । द्वीप इति । उत्तरभागे दक्षिणे लवणसमुद्र इति तस्य द्वीपत्वम् । सगरखातोऽप्येकदेशेनोदग्भागे च समुद्रसंबद्धः ॥ २३ ॥

रा० टी०—तमिति । तं निमग्नमहेन्द्राचलकं समुद्रं पर्वसु पर्वसु सहस्राक्षः सदा उपैति तस्य समुद्रस्यापरे पारे शतयोजनविस्तृतः मानुषैरगम्यः दीप्तः प्रकाशितो यो द्वीपस्तं समन्ततो मार्गध्वं परतटस्य द्वीपत्वं तु दक्षिणत आगत्य समुद्रान्तरसंगमात् । सार्धश्लोक एकान्वयी ॥ २३ ॥

२४—२५] ति० टी०—दीप्तः स्वर्णभूयिष्ठत्वात्तत्र द्वीपे सर्वात्मना सर्वप्रकारेण । विशेषत एकदेशमप्यनुपेक्ष्य ॥ २४ ॥ २५ ॥

रा० टी०—तत्रेति । सहस्राक्षसमद्युतेः वध्यस्य रावणस्य वासः वासाश्रयः स एव देशः अतस्तत्र द्वीपे सर्वात्मना निखिलयत्नेन सीता विशेषतो मार्गितव्या । सार्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०—स हीति । एवं रावणालयावगमेऽपि इतरदिक्षु वानरप्रेषणं स्थानान्तरे सीतामादाय किं गच्छेदिति शङ्क्येति बोध्यम् ॥ २५ ॥ २६ ॥

२६] ति० टी०—समुद्रसंबद्धत्वात्सागरोऽपि समुद्रत्वेन समुद्रश्च सागरत्वेन व्यवहियत इत्यविरोधः । तस्य तु रावणस्य तु भोजनी भोक्तुशीला[3] ॥ २६ ॥

रा० टी०—दक्षिणस्येति । दक्षिणस्य समुद्रस्य मध्ये छायामाक्षिप्य संगृह्य भोजिनी छायावज्जन्तुभक्षणशीला अङ्गारकेति विख्याता राक्षसी अस्तीति शेषः, एतेन तदुल्लङ्घनं सावधानतया कर्तव्यमिति सूचितम् ॥ २६ ॥

२७] ति० टी०—संशयान्संशयविषयान्देशान्निःसंशयान्सम्यगन्वेषणेन कृत्वा, ततो नष्टसंशया आप्तसत्त्वासत्वनिश्चयास्तत्रासत्त्वे सति तं लङ्कामद्वीपमतिक्रम्य मृगयध्वम् ॥ २७ ॥

रा० टी०—एवमिति । नष्टसंशयाः सीताप्राप्तिविषयकसंशयरहिता यूयं संशयान् तत्तदाकारविषयकसंशयसहितान् देशान् एवं मदुक्तनेन निःसंशयान् कृत्वा नरेन्द्रस्य रामस्य पत्नीं मृगयध्वम् ॥ २७ ॥

गो० टी०—ननु पूर्वं न जाने निश्चयं तस्य सर्वथा पापरक्षस इत्युक्तं संप्रति स हि देशस्तु वध्यस्य रावणस्य दुरात्मन इत्युच्यते अतो विरुद्धमिदमित्याशङ्क्य परिहरति—एवमिति । एवं मदुक्तरीत्या संशयान् संशयविषयभूतान् देशान् निःसंशयान् संशयाविषयीभूतान् निश्चितसदसद्भावान् कृत्वा नष्टसंशयाः सन्तः अमिततेजसो नरेन्द्रस्य पत्नीं मृगयध्वम् । यदृच्छादर्शनापरिस्फुटज्ञातमर्थं कथं निश्चयेन कथयामीति न जान इति पूर्वमुक्तम् इदानीं तथाविधमप्यर्थमन्वेषणगौरवाय निश्चयेन ब्रवीमीति भावः ॥ २७ ॥

२८—२९] ति० टी०—क्व मार्गणीया तत्राह—लक्ष्मीवानिति ॥ २८ ॥ २९ ॥

रा० टी०—तमिति । तं लङ्काप्रदेशमतिक्रम्य विद्यमाने शतयोजनविस्तीर्णे समुद्रे लक्ष्मीवान् सर्वसंपत्तिविशिष्टः सागराम्बुसमाश्रयः उत्तरावयवेन सागरजले निमग्नः पुष्पितको नाम गिरिः विपुलैः शृङ्गैः अम्बरमाकाशं विलिखन्निव भ्राजते । श्लोकद्वयमेकान्वयि ॥ २८ ॥ २९ ॥

---

१ योजनमायत इति गो. पाठः । २ भोजिनीति रा. पाठः । ३ वृत इति गो. पाठः ।

तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः । [श्वेतं राजतमेकं च सेवते यन्निशाकरः ।]
न [1]तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ॥ ३० ॥
प्रणम्य शिरसा शैलं तं विमार्गेथ वानराः । तमतिक्रम्य दुर्धर्षं [2]सूर्यवान्नाम पर्वतः ॥ ३१ ॥
अध्वना दुर्विगाहेन योजनानि चतुर्दश । ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः ॥ ३२ ॥
सर्वकामफलैर्वृक्षैः सर्वकालमनोहरैः । तत्र भुक्त्वा वरार्हाणि मूलानि च फलानि च ॥ ३३ ॥
मधूनि पीत्वा जुष्टानि परं गच्छत वानराः । तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः ॥ ३४ ॥
अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा । तत्र योजनविस्तारमुच्छ्रितं दशयोजनम् ॥ ३५ ॥
शरणं काञ्चनं दिव्यं नानारत्नविभूषितम् । तत्र भोगवती नाम सर्पाणामालयः पुरी ॥ ३६ ॥
विशालरथ्या दुर्धर्षा सर्वतः परिरक्षिता । रक्षिता पन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्महाविषैः ॥ ३७ ॥
सर्पराजो महाघोरो यस्यां वसति वासुकिः । निर्याय मार्गितव्या च सा च भोगवती पुरी ॥ ३८ ॥
तत्र चानन्तरोद्देशा ये केचन समाहृताः । तं च देशमतिक्रम्य महानृषभसंस्थितिः ॥ ३९ ॥

गो० टी०–तमतिक्रम्येति । परापरयोगे चेति क्त्वाप्रत्ययः एवं पूर्वत्रापरत्र च बोध्यम् ॥ २८ ॥ २९ ॥

३०–३१] ति० टी०–तस्य काञ्चनं शृङ्गमस्ति । यं भगवान्सूर्यः सेवते नित्यं संनिहितो भवति । शृङ्गशब्दोऽर्चादिः । अतश्चन्द्रसूर्याधिष्ठितत्वात्तं कृतघ्ना न पश्यन्ति ॥ ३० ॥ ३१ ॥

रा० टी०–तस्येति । तस्य पुष्पितकगिरेः एकं काञ्चनं शृङ्गमयं दिवाकरः सूर्यः सेवते एकं राजतं शृङ्गमयं निशाकरः सेवते ॥ ३० ॥

रा० टी०–नेति । तत् शृङ्गं कृतघ्नादयो न पश्यन्ति । तं तादृशशृङ्गवन्तं शैलं शिरसा प्रणम्य विमार्गत ॥ ३१ ॥

गो०टी०–तस्यैकमिति। दक्षिणायन इति शेषः॥३०॥३१॥

३२-३४] ति० टी०–चतुर्दशेति तैरुपलक्षित इत्यर्थः ३२-३४

रा० टी०–तमिति । तं शैलमतिक्रम्य विचरमाणः दुर्विगाहेन अध्वना उपलक्षितः चतुर्दशयोजनानि सूर्यवान्नाम पर्वतोऽस्तीति शेषः ॥ ३२ ॥

गो० टी०–तमतिक्रम्य दुर्धर्षा इति । हे दुर्धर्षाः ! सूर्यवान् नाम पर्वत इति शेषः । दुर्विगाहेनाध्वना उपलक्षितः । योजनानि चतुर्दश पुष्पितकसूर्यवतोरन्तराल इति शेषः ॥३२॥

रा० टी०–तत इति । तं सूर्यवत् शैलमयमतिक्रम्य विचरमाणः सर्वाणि कामफलानि येषु तैः सर्वकालमनोहरैः वृक्षैरुपलक्षितः वैद्युतो नाम पर्वतोऽस्तीति शेषः ॥ ३३ ॥

रा० टी०–तत्रेति । तत्र वैद्युतपर्वते वराहाणि अतिप्रशंसनीयानि मूलानि फलानि च भुक्त्वा जुष्टानि सेवनीयानि मधूनि पीत्वा परमग्निमदेशं गच्छत ॥ ३४ ॥

रा० टी०–तत्रेति । यत्र विश्वकर्मणा निर्मितमगस्त्यभवनं तत्र वैद्युतनामपर्वतसमीपे नेत्रमनःकान्तः नेत्रमनसोरभिरामदाता कुञ्जरो नाम पर्वतोऽस्तीति शेषः ॥ ३६ ॥

गो० टी०–तत इति । वराणां श्रेष्ठानामर्हाणीति वराहाणि परं ततः परं देशम् ॥ ३३–३६ ॥

गो० टी०–अगस्त्यभवनं विशेषयति–तत्र योजनेति । शरणं गृहम् ॥ ३६ ॥

३५] ति० टी०–तत्र कुञ्जरपर्वते । अगस्त्यभवनवर्णनम्—योजनेत्यादि । इदं तृतीयमगस्त्यस्थानम् ॥ ३६ ॥

रा० टी०–अगस्त्यभवनमेव वर्णयन्नाह–तत्रेति । तत्र कुञ्जरनामपर्वते योजनं विस्तारो यस्य तत् दशयोजनं दशयोजनपर्यन्तमुच्छ्रितं काञ्चनं स्वर्णमयं नानारत्नविभूषितं शरणमगस्त्यगृहमस्तीति शेषः ॥ ३६ ॥

गो० टी०–तत्रेत्यादि । निर्याय अगस्त्यभवनान्निर्गत्य ॥ ३७ ॥ ३८ ॥

३६–३७] ति० टी०–शरणं गृहम् अगस्त्यस्येति शेषः। तत्र कुञ्जरपर्वत एव । आलयशब्दो नित्यं पुंल्लिङ्गः । यद्यपि भोगवती रसातले प्रसिद्धा, तथापि रावणस्य जनस्थानवत्सर्पाणामपि भोगवत्याख्यपुरं भूमावप्यस्तीति वासुकेर्भुव उपर्यपि योगवैभवात्स्थितिरिति चेत् एवावगन्तव्यम् । यथाऽगस्त्यस्य कुञ्जरपर्वतावच्छिन्ने विश्वकर्मनिर्मितभवने नक्षत्रपदे मलये पञ्चवटी दक्षिणभागे च वासस्तथेति ध्येयम् ॥३६॥३७॥

रा० टी०–तत्रेति । तत्र कुञ्जरनामपर्वते सर्पाणामालयः विशाला विस्तीर्णा रथ्या मार्गा यस्यां सर्वतः परिरक्षिता वृद्धा घोरैः पन्नगैः रक्षिता भोगवती नाम पुरी अस्तीति शेषः । सार्धश्लोक एकान्वयी ॥ ३७ ॥

३८] ति० टी०–निर्याय विशेषतो गत्वा ॥ ३८ ॥

रा० टी०–सर्पेति । सर्पराजो वासुकिः यस्यां वसति सा भोगवती पुरी निर्याय गत्वा मार्गितव्या । तत्र पुरीसमीपे समाहृताः अग्रकृताः अनन्तराः अव्यवहिताः ये केचन देशाः ते च मार्गितव्याः । भोगवत्याः पाताले प्रसिद्धत्वेऽपि अत्र भोगवत्यन्तरकल्पनया न दोषः । सार्धश्लोक एकान्वयी॥३८॥३९॥

३९] ति० टी०–समाहृता गुप्तास्ते च मार्गितव्याः । ऋषभसंस्थितिर्ऋषभाकारसंस्थानवान् ॥ ३९ ॥

---

१ अर्धमेतदधिकं गो. रा. पाठे । २ तदिति रा. पाठः । ३ दुर्धर्षा इति गो. दुर्धर्षेति रा. पाठः । ४ मुख्यानीति गो. पाठः । ५ कक्ष्येति गो. पाठः । ६ प्राज्ञ इति गो. पाठः । ७ चानन्तरा देशा इति गो. रा. पाठः । ८ संस्थित इति गो. पाठः ।

श्रीमानृषभो

दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम् । न तु तच्चन्दनं दृष्ट्वा स्पष्टव्यं तु कदाचन ॥ ४१ ॥
रोहिता नाम गन्धर्वा घोरं रक्षन्ति तद्वनम् । तत्र गन्धर्वपतयः पञ्च सूर्यसमप्रभाः ॥ ४२ ॥
शैलूषो ग्रामणीः शिक्षः शुको बभ्रुस्तथैव च । रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम् ॥ ४३ ॥
अन्ते पृथिव्या दुर्धर्षास्ततः स्वर्गजितः स्थिताः । ततः परं न वः सेव्यः पितृलोकः सुदारुणः ॥ ४४ ॥
राजधानी यमस्यैषा कष्टेन तमसाऽऽवृता । एतावदेव युष्माभिर्वानरपुङ्गवाः ॥
शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः ॥ ४५ ॥
सर्वमेतत्समालोक्य यच्चान्यदपि दृश्यते । गतिं विदित्वा वैदेह्याः संनिवर्तितुमर्हथ ॥ ४६ ॥
यश्च मासान्निवृत्तोऽग्रे द्रष्टा सीतेति वक्ष्यति । मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति ॥ ४७ ॥
ततः प्रियतरो नास्ति मम प्राणाद्विशेषतः । कृतापराधो बहुशो मम बन्धुर्भविष्यति ॥ ४८ ॥
अमितबलपराक्रमा भवन्तो विपुलगुणेषु कुलेषु च प्रसूताः ।
मनुजपतिसुतां यथा लभध्वं तदधिगुणं पुरुषार्थमारभध्वम् ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०—तमिति । तं भोगवतीसमीपवर्तिनं देशमतिक्रम्य यत्र अग्निसमप्रभं दिव्यं तत्प्रसिद्धं गोशीर्षकादिचन्दनविशेषजातिमत् उत्पद्यते सः ऋषभसंस्थितिः वृषभाकृतिः ऋषभो नाम पर्वतः अस्तीति शेषः । श्लोकद्वयमेकान्वयि ॥ ४० ॥ ४१ ॥

गो० टी०—तत्रेति । ये अनन्तराः अव्यवहिता देशाः ते मार्गितव्या इति शेषः ॥ ३९ ॥

गो० टी०—तं चेति । तं च देशमतिक्रम्य तस्मादेशात्परत इत्यर्थः । ऋषभसंस्थितः ऋषभतुल्यसंस्थानः ॥ ४० ॥

४०-४१]ति० टी०—गोशीर्षकादयश्चन्दनभेदाः॥४०॥४१॥

४२-४३] ति० टी०—तच्चन्दनास्पष्टृत्वे हेतुः—रोहिता इति ॥ ४२ ॥ ४३ ॥

गो० टी०—गोशीर्षकमिति । गोशीर्षकं गोरोचनासदृशवर्णं पद्मकं पद्मदलसवर्णं हरिद्यामं तमालदलवर्णम् अग्निसमप्रभम् अग्निसदृशवर्णम् एवंविधं दिव्यं चन्दनम् यत्रोत्पद्यते स ऋषभः पर्वतो वर्तत इति पूर्वेणान्वयः ॥ ४१-४८ ॥

रा० टी०—नेति । तत् चन्दनं दृष्ट्वा कदाचन भवद्भिर्न स्पष्टव्यम् । तत्र हेतुः—रोहिता नाम गन्धर्वास्तद्वनं रक्षन्ति । तत्र हेतुः—सूर्यसमप्रभाः शैलूषादयः पञ्च गन्धर्वपतयः तत्र तस्मिन् वने निवसन्तीति शेषः । श्लोकद्वयमेकान्वयि ॥ ४२ ॥ ४३ ॥

रा० टी०—रवीति । ततः ऋषभात्परतः पृथिव्याः अन्ते पुण्यकर्मणां रविसोमाग्निवपुषां निवासः अत एव ततस्तत्र दुर्धर्षाः स्वर्गजित एव स्थिताः ॥ ४४ ॥

४४-४७] ति० टी०—ततः ऋषभात्परतः पृथिव्या अन्ते पुण्यकर्मणां निवासस्तत्र स्वर्गजित एव स्थिता भवन्ति, अतो हेतोस्ततः परं पितृलोको न सेव्योऽगम्यः ॥ ४४-४७ ॥

रा० टी०—तत इति । ततः परं परदेशवर्ती सुदारुणः पितृलोकः वो युष्माकं सेव्यो न । सुदारुणत्वे हेतुः—कष्टेन दुःखेन तमसा आवृता एषा यमस्य राजधानी ॥ ४५ ॥

रा० टी०—एतावदिति । एतावत् पितृलोकात् पूर्वमेव गन्तुं विचेतुं वा शक्यम् अतः परं गतिमतां जीवन्मनुष्यादीनामित्यर्थः, गतिर्न ॥ ४६ ॥

रा० टी०—सर्वमिति । एतत् मद्बोधितं सर्वमन्यदपि यदृश्यते तदपि समालोक्य वैदेह्या गतिं स्थितिं विदित्वा संनिवर्तितुमर्हथ ॥ ४७ ॥

रा० टी०—य इति । मासात् मासान्तदिनात् अग्रे पूर्वं निवृत्तो यो वानरः सीता मया दृष्टेति वक्ष्यति स मत्तुल्यविभवः सन् भोगैः भोग्यपदार्थैः सुखं विहरिष्यति । किंच यो मासादेव निवृत्तः सन् दृष्टेति अग्रे प्रथमं वक्ष्यति सः अग्रे मत्संनिधौ वक्ष्यतीति वा मदग्रे विहरिष्यतीति वार्थः ॥ ४८ ॥

४८] ति० टी०—बहुशः कृतापराधोऽपीत्यर्थः ॥ ४८ ॥

रा० टी०—तत इति । ततः दृष्टा सीतेत्युक्तवतोऽन्यो मम प्राणाद्विशेषतो विशेषः प्रियतरो नास्ति स एव विशेषतः प्रियतर इत्यर्थः, अत एव सः कृतापराधोऽपि मम बन्धुः प्रीतिविषयीभूत एव भविष्यति तदपराधं न गणयिष्यामीत्यर्थः ॥ ४९ ॥

गो० टी०—तत इति । ततः तस्माद् पुरुषात् प्रियतरो नास्ति मम प्राणात् विशेषतः सः प्रियतर इति शेषः ॥ ४९ ॥

४९] ति० टी०—लभध्वं लप्स्यध्वम् । तथा तत्कार्यमुद्दिश्याधिगुणमधिकगुणोपेतं पुरुषार्थं पुरुषयत्नमारभध्वम्॥४९॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्ड एकचत्वारिंशः सर्गः ॥ ४१ ॥

---

१ शिशुः शुभ्रो इति गो. पाठः । २ वीरा इति गो. पाठः । ३ स्विति गो. पाठः । ४ दृष्टेति गो. रा. पाठः ।

द्विचत्वारिंशः सर्गः ।

मासमवधीकृत्य पश्चिमायां दिशि सीतान्वेषणाय सुग्रीवः सुषेणादीन्प्रहिणोति ।

अथ प्रस्थाप्य सै हरीन्सुग्रीवो दक्षिणां दिशम् । अब्रवीन्मेघसंकाशं सुषेणं नाम वानरम् ॥ १ ॥
तारायाः पितरं राजा श्वशुरं भीमविक्रमम् । अब्रवीत्प्राञ्जलिर्वाक्यमभिगम्य प्रणम्य च ॥ २ ॥
मैहर्षिपुत्रं मारीचमर्चिष्मन्तं महाकपिम् । वृतं कपिवरैः शूरैर्मेहेन्द्रसदृशद्युतिम् ॥ ३ ॥
बुद्धिविक्रमसंपन्नं वैनतेयसमद्युतिम् । मरीचिपुत्रान्मारीचानर्चिर्माल्यान्महाबलान् ॥ ४ ॥
ऋषिपुत्रांश्च तान्सर्वान्प्रतीचीमादिशद्दिशम् । द्वाभ्यां शतसहस्राभ्यां कपीनां कपिसत्तमाः ॥ ५ ॥
सुषेणप्रमुखा यूयं वैदेहीं परिमार्गथ । सौराष्ट्रान्सहबाह्लीकांश्चैन्द्रचित्रांस्तथैव च ॥ ६ ॥
स्फीताञ्जनपदान्रम्यान्विपुलानि पुराणि च । पुंनागगहनं कुक्षिं बकुलोद्दालकाकुलम् ॥ ७ ॥
तथा केतकखण्डांश्च मार्गध्वं हरिपुङ्गवाः । प्रत्यक्स्रोतोवहाश्चैव नद्यः शीतजलाः शिवाः ॥ ८ ॥

रा० टी०–अमितेति । विपुलगुणेषु बहुगुणवत्सु कुलेषु प्रसूता अत एव अमितबलपराक्रमाः अत एव भवन्तो दीप्तिमन्तो यूयं मनुजपतिसुतां जानकीं यथा येन प्रकारेण लभध्वं तदनुगुणं तदनुसारिणं पुरुषार्थमारभध्वम् ॥ ६० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०–अमितेति । तदधिगुणं तदनुगुणं पुरुषार्थं पुरुषव्यापारम् अत्र संयमिनीपर्यन्तमभिधानात् सप्तद्वीपसागरगमनमर्थसिद्धम् एवमुत्तरसर्गयोरपि बोध्यम् ॥ ६० ॥

अत्र सार्धपञ्चाशत् श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

१] ति० टी०–अथेति ॥ १ ॥

रा० टी०–पश्चिमदिक्प्रेषणप्रक्रमते–अथेति । कपिसत्तमः सुग्रीवः हरीन् दक्षिणां दिशं प्रस्थाप्य मेघसंकाशं तारायाः पितरं सुषेणं प्रणम्य अब्रवीत् महर्षेः मरीचेः पुत्रमर्चिष्मन्तमर्चिष्मन्नामानमित्यर्थः, किंच महर्षेर्भृगोः पुत्रं वैनतेयसमद्युतिमर्चिष्मन्तं चाब्रवीत् । अर्चिर्माल्यान् अर्चिर्युक्तमाल्यविशिष्टान् मारीचान् तदभिधान् तान्प्रसिद्धान् ऋषिपुत्रान् अन्यानपीत्यर्थः आदिशत् अब्रवीत् । तदाकारमाह–कपीनां द्वाभ्यां शतसहस्राभ्यां युक्ता यूयं प्रतीचीदिशं गत्वेति शेषः, वैदेहीं परिमार्गथ अन्वेषयध्वम् । सार्धश्लोकपञ्चकं संमिलितान्वयि ॥ १—६ ॥

गो० टी०–अथ पश्चिमदिशि वानरयोजनं द्विचत्वारिंशे–अथेत्यादि ॥ १ ॥

२] ति० टी०–श्वशुरत्वात्प्राञ्जलिः प्रणम्याब्रवीत् । एतद्विशेषकथनायैव पुनरब्रवीदित्युक्तिः ॥ २ ॥

गो० टी०–तारायाः इति । प्राञ्जलित्वादिकथनार्थमब्रवीदिति अतो न पौनरुक्त्यम् ॥ २ ॥

३] ति० टी०–महर्षेः पुत्रं मारीचं महर्षेर्मरीचेः पुत्रम् अर्चिष्मन्तमर्चिष्मदाख्यम् अयं तेषु प्रधानः अर्चिर्माल्याख्या अन्येऽपि मरीचिपुत्राः ॥ ३ ॥

४–५] ति० टी०–मारीचशब्दस्य व्युत्पत्त्यन्तरसंभवान्मरीचिपुत्रानित्युक्तम् ॥ ४ ॥ ५ ॥

गो० टी०–मरीचिपुत्रमिति । मारीचपदमन्वर्थसंज्ञेति द्योतयितुं मरीचिपुत्रमित्युक्तिः । मरीचिपुत्रान् मारीचानित्यत्रापि तथा । मारीचमिति ज्येष्ठ उक्तः मारीचा इति तदनुजा उच्यन्ते । अर्चिर्मालान् अर्चिष्मतः ॥ ३–५ ॥

६] ति० टी०–परिमार्गथ मार्गध्वम् । चन्द्रचित्रानिति शरान् । 'भीमान्' इति पाठान्तरम् । देशविशेषा इमे ॥ ६ ॥

७] ति० टी०–विपुलानि विशालानि । कुक्षिर्देशविशेषः॥७॥

रा० टी०–तत्प्रकारमाह–सौराष्ट्रानिति । सौराष्ट्रादीन् मार्गध्वम् । अर्धचतुष्टयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०–सुराष्ट्रानित्यादि । पुन्नागेति । पुन्नागगहनं पुन्नागवनम् कुक्षिः मध्यदेशविशेषः उद्दालकाः वृक्षविशेषाः केतकषण्डान् केतकवनानि प्रत्यक् स्रोतो गच्छन्तीति प्रत्यक्स्रोतोगमाः शिवाः पावनाः कान्तारान् दुर्गममार्गान् । तान् मार्गध्वमिति पूर्वेण संबन्धः ॥ ६–८ ॥

८] ति० टी०–प्रत्यक्स्रोतोवहाः पश्चिमाभिमुखप्रवाहाः॥८॥

रा० टी०–प्रत्यगिति । प्रत्यक्स्रोतोवहनद्यादयः अन्वेषणीया इति शेषः ॥ ८ ॥

---

१ सुग्रीवस्तान्हरीनिति गो. पाठः । २ यूथपमिति गो. पाठः । ३ मरीचिपुत्रमिति गो. पाठः । ४ मालानिति गो. पाठः । ५ मार्गनेति गो. पाठः । ६ सुराष्ट्रानिति गो. पाठः । ७ शूरान्भीमानिति गो. पाठः । ८ षण्डानिति गो. पाठः । ९ यूथपा इति गो. पाठः । १० गमा इति गो. पाठः ।

तापसानामरण्यानि कान्तारगिरयश्च[1] ये । तत्र स्थलीर्मरुप्राया[2] अत्युच्चशिशिराः[3] शिलाः ॥ ९ ॥
गिरिजालावृतां दुर्गां मार्गित्वा पश्चिमां दिशम् । ततः पश्चिममागम्य समुद्रं द्रष्टुमर्हथ ॥ १० ॥
तिमिनक्राकुलजलं गत्वा द्रक्ष्यथ वानराः[4] । ततः केतकखण्डेषु[5] तमालगहनेषु च ॥ ११ ॥
कपयो विहरिष्यन्ति नारिकेलवनेषु च । तत्र सीतां च मार्गध्वं निलयं रावणस्य च ॥ १२ ॥
वेलातटनिविष्टेषु[6] पर्वतेषु वनेषु च । मुरचीपत्तनं चैव रम्यं चैव जटापुरम्[7] ॥ १३ ॥
अवन्तीमङ्गलेपां[8][10] च तथा चालक्षितं वनम्[9] । राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ॥ १४ ॥
सिन्धुसागरयोश्चैव संगमे तत्र पर्वतः । महान्सोमगिरिर्नाम[11] शतशृङ्गो महाद्रुमः ॥ १५ ॥
तत्र प्रस्थेषु रम्येषु सिंहाः पक्षगमाः स्थिताः । तिमिमत्स्यगजांश्चैव नीडान्यारोपयन्ति ते ॥ १६ ॥
तानि नीडानि सिंहानां गिरिशृङ्गगताश्च ये । दृप्तास्तृप्ताश्च मातङ्गास्तोयदस्वननिःस्वनाः ॥ १७ ॥
विचरन्ति विशालेऽस्मिंस्तोयपूर्णे समन्ततः । तस्य शृङ्गं दिवस्पर्शं काञ्चनं चित्रपादपम् ॥ १८ ॥

९] ति० टी०–कान्तारगिरयः कान्तारयुक्ता गिरयः । स्थल्यकृत्रिमा भूः । शिशिराः शीतलाः ॥ ९ ॥

रा० टी०–तत्रेति । तत्र नद्यादिषु मरुप्रायाः स्थलीः अत्युच्चाः शिशिराः शीतलाः कर्मधारयः शिलाश्च मार्गध्वमिति शेषः, स्थली अकृतिमा भूमिः । सार्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०–ततः स्थलीमित्यादि श्लोकद्वयमेकान्वयम् । स्थल्यादिकं मार्गित्वा ततः तस्माद्देशात् पश्चिमं समुद्रमागम्य तिमिनक्रायुतमक्षोभ्यं तं द्रष्टुमर्हथ ॥ ९ ॥ १० ॥

१०–११] ति० टी०–तत्रादर्शने ततः किंचित्पश्चिमं गत्वा समुद्रं द्रष्टुमर्हथ । तत्र समुद्रं द्रक्ष्यथेति निश्चय एव॥१०॥११॥

१२–१३] ति० टी०–कपयो भवत्सैनिकाः ॥ १२॥१३॥

१४] ति० टी०–अवन्त्यङ्गलेपे पुर्यौ । आलक्षितारण्यं वनम् ॥ १४ ॥

रा० टी०–गिरीति । गिरिजालावृतां गिरिसमूहैर्निबिडां पश्चिमां दिशं मार्गित्वा तत आगम्य गत्वा तिमिनक्राकुलजलमत एव अक्षोभ्यं पश्चिमं समुद्रं द्रष्टुमर्हथ अत एव गत्वा द्रक्ष्यथ । सार्धश्लोक एकान्वयी ॥ १० ॥

रा० टी०–तत इति । ततः समुद्रदर्शनानन्तरं वेलातटनिविष्टेषु केतकखण्डादिषु कपयो विहरिष्यन्ति तत्र केतकखण्डादिषु सीतां रावणस्य निलयं च मार्गध्वम् । अर्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–तत इति । कपयो भवदीयाः ॥ ११ ॥

गो० टी०–तत्रेति । वेलातटनिविष्टेषु वेलायाम् अम्बुविकृतौ तटे च स्थितेषु ' अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ' इत्यमरः ॥ १२ ॥

रा० टी०–मुरचीति । मुरचीपत्तनादीनि मार्गध्वमिति शेषः । सार्धश्लोक एकान्वयी ॥ १३ ॥ १४ ॥

गो० टी०–मुरचीति । पूर्वस्यां दिश्यवन्त्यन्या इयं चान्या यत्र प्रविष्टा वननैरन्तर्येण न लक्ष्यन्ते तदलक्षितं नाम मार्गध्वमित्यनुषङ्गः ॥ १३ ॥

१५] ति० टी०–महाद्रुमो महान्तो द्रुमा यस्मिन् सः१५

रा० टी०–सिन्धिति । तत्र प्रसिद्धे सिन्धुसागरयोः संगमे शतशृङ्गः महाद्रुमः महाद्रुमविशिष्टः सोमगिरिर्नाम पर्वतोऽस्तीति शेषः, सिन्धुर्नदविशेषः ॥ १५ ॥

गो० टी०–सिन्धिति । सिन्धुर्नदविशेषः । तत्र पश्चिमदिशि पक्षैर्गच्छन्तीति पक्षगमाः सपक्षा इति विशेषणम् । नीडानि वृक्षाग्रस्थस्वावासस्थानानि अत एव महाद्रुम इति पूर्वमुक्तम् ॥ १४ ॥ १५ ॥

१६–१७] ति० टी०–सिंहास्तदाख्याः पक्षगमाः पक्षिणः स्थिताः ते पक्षिणस्तिमिमत्स्यगजान्नीडानि स्ववासस्थानान्यारोपयन्ति प्रापयन्ति ॥ १६ ॥ १७ ॥

रा० टी०–तत्रेति । तत्र सोमगिरिसंबन्धिषु प्रस्थेषु शृङ्गेषु पक्षगमाः पक्षाभ्यां गमनशीलाः सिंहाः स्थितास्ते सिंहाः तिमिमत्स्यगजान् नीडानि स्ववासस्थानानि अरोपयन्ति लालनार्थं नीडेषु स्थापयन्तीत्यर्थः ॥ १६ ॥

रा० टी०–तानीति । गिरिशृङ्गगताः ये मातङ्गाः तदुपलक्षिततिम्यादयस्ते दृप्ताः सपक्षसिंहादृतत्वेन प्राप्तगर्वास्तृप्ताः प्राप्तसंतोषाः अत एव तोयदस्वननिःस्वनाः सन्तः तोयपूर्णे अस्मिन् शृङ्गे विद्यमानानि सिंहानां तानि नीडानि समन्ततो विचरन्ति । सार्धश्लोक एकान्वयी ॥ १७ ॥

गो० टी०–तानीत्याद्यर्धत्रयम् । समन्ततस्तोयपूर्णेऽस्मिन् स्थले ये गजाः सन्ति गिरिशृङ्गगताश्च ये ते गजास्तानि नीडानि विचरन्ति सिंहनीडाश्रयसात्रुषु विचरन्तीत्यर्थः । बाधकस्थानगमने हेतुमाह–दृप्ता इति ॥ १६ ॥

१८] ति० टी०–तोयपूर्णे प्रस्थे ॥ १८ ॥

रा० टी०–तस्येति । दिवस्पर्शं चित्रपादपं तस्य सर्वं शृङ्गं कामरूपिभिः कपिभिः आशु विचेतव्यम् ॥ १८ ॥

---

१ कान्तारा इति गो. पाठः । २ ततः स्थलीं मरुप्रायामिति गो.पाठः । ३ शिरस इति गो.पाठः । ४ आसाद्येति गो.पाठः । ५ अयुतेति गो. पाठः । ६ षण्टेष्विति गो. पाठः । ७ तटेति गो. पाठः । ८ मुरवीतिरा. पाठः । ९ जटीपुरमिति गो. पाठः । १० लोपामिति गो. पाठः । ११ हेमेति गो. पाठः ।

सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः । कोटिं तत्र समुद्रस्य काञ्चनीं शतयोजनाम् ॥ १९ ॥
दुर्दर्शां पारियात्रस्य गत्वा द्रक्ष्यथ वानराः । कोट्यस्तत्र चतुर्विंशद्गन्धर्वाणां तपस्विनाम् ॥ २० ॥
वसन्त्यग्निनिकाशानां घोराणां पापकर्मणाम् । पावकार्चिःप्रतीकाशाः समवेताः समन्ततः ॥ २१ ॥
नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः । नादेयं च फलं तस्माद्देशात्किंचित्प्लवङ्गमैः ॥ २२ ॥
दुरासदा हि ते वीराः सत्त्ववन्तो महाबलाः । फलमूलानि ते तत्र रक्षन्ते भीमविक्रमाः ॥ २३ ॥
तत्र यत्नश्च कर्तव्यो मार्गितव्या च जानकी । नहि तेभ्यो भयं किंचित्कपित्वमनुवर्तताम् ॥ २४ ॥
तत्र वैदूर्यवर्णाभो वज्रसंस्थानसंस्थितः । नानाद्रुमलताकीर्णो वज्रो नाम महागिरिः ॥ २५ ॥
श्रीमान्समुदितस्तत्र योजनानां शतं समम् । गुहास्तत्र विचेतव्याः प्रयत्नेन प्लवङ्गमाः ॥ २६ ॥
चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः । तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा ॥ २७ ॥

गो० टी०–तस्येति । कपिभिः भवद्भिरिति शेषः ॥ १७ ॥

१९–२०] ति० टी०–कोटिं शृङ्गम् । समुद्रस्य मध्ये इति शेषः ॥ १९ ॥ २० ॥

रा० टी०–कोटिमिति । हे वानराः ! तत्र प्रसिद्धे समुद्रे समुद्रस्य मध्ये शतयोजनां काञ्चनीं दुर्दर्शाम् अन्यैर्द्रष्टुमशक्यां पारियात्रस्य गिरेः कोटिं शृङ्गं द्रक्ष्यथ ॥ १९ ॥

रा० टी०–कोट्य इति । तत्र पारियात्रशृङ्गे कामरूपिणां घोराणां भयंकराणाम् अग्निनिकाशानां वह्निसदृशानां तरस्विनां गन्धर्वाणां चतुर्विंशत् कोट्यो वसन्ति ॥ २० ॥

गो० टी०–कोटिमिति । तत्र समुद्रे गतां पारियात्रस्य कोटिं शृङ्गम् ॥ १८ ॥ १९ ॥

२१] ति० टी०–घोराणाम्, अत एव पापकर्मणां संहर्तॄणाम् । पावकार्चिःप्रतीकाशाः कोट्यः समवेता इत्यन्वयः ॥ २१ ॥

रा० टी०–पावकेति । पावकार्चिःप्रतीकाशाः वह्निज्योतिःसदृशाः समन्ततः समवेताः पूर्णास्ते गन्धर्वाः भीमविक्रमैर्वानरैर्न अत्यासादयितव्याः पीडयितव्याः ॥ २१ ॥

गो० टी०–पावकार्चिःप्रतीकाशा इत्यादि । नात्यासादयितव्याः नातिसमीपं प्राप्तव्याः नादेयं न स्वीकार्यम् । तर्हि ते गन्धर्वा अस्मान् हनिष्यन्तीत्यत्राह–तत्रेति । यत्नः फलचापलनिवृत्तौ यत्नः कर्तव्यः विशालत्वाद्न्वेषणे यत्नो वा । न किंचिद्भयं कपिसंचारस्य वनमात्रधर्मत्वादिति भावः । अनुवर्तताम् अनुवर्तमानानाम् मार्गितव्या चेति संबन्धः ॥२०–२२॥

२२–२३] ति० टी०–नात्यासादयितव्या न द्रष्टव्या नापराद्धव्या वा । नादेयं न ग्राह्यम् ॥ २२ ॥ २३ ॥

रा० टी०–नेति । हि यतः दुरासदाः भीमविक्रमा अतिवेगाः महाबलास्ते गन्धर्वाः तत्र शृङ्गे फलमूलानि रक्षन्ते अतस्तस्मात् देशात् किंचित्फलं प्लवङ्गमैर्नादेयम् । सार्धश्लोक एकान्वयी ॥ २२ ॥ २३ ॥

२४] ति० टी०–यत्नः कर्तव्यः मार्गण इति शेषः । ननु पापकारित्वात्तदनासादने कथं तत्र मार्गणसंभवः अत आह–नहि तेभ्य इति । तदेशे मृगपक्ष्यादिवत्प्राकृतमृगस्वभावे तिष्ठतामित्यर्थः, अत एव नापराद्धव्या इति पूर्वं व्याख्यातम् ॥ २४ ॥

रा० टी०–तत्रेति । तत्र शृङ्गे जानकी मार्गितव्या अतयत्नः अन्वेषणप्रयत्नः कर्तव्यः । ननु गन्धर्वाणामतिप्रावल्यात् कथमन्वेषणसिद्धिरित्यत आह–कपित्वं स्वाभाविकः चाञ्चल्यमनुवर्ततां युष्माकं तेभ्यो गन्धर्वेभ्यः किञ्चिद्भयं न एतेन स्वाभाविकगमनव्याजेनैव अन्वेषणं कर्तव्यमिति व्यञ्जितम् ॥ २४ ॥

२५] ति० टी०–वैदूर्यवर्ण आभा च यस्य सः । वज्रवत्कठिनसंस्थानेन संस्थितः ॥ २५ ॥

२६] ति० टी०–समुदितः प्रतिष्ठितः । समम् आयामतो विस्तारतश्च शतयोजन इत्यर्थः ॥ २६ ॥

रा० टी०–तत्रेति । तत्र पारियात्रगिरिसंनिधौ तत्र समुद्रे वैदूर्यवर्णस्येवाभा यस्य सः वज्रसंस्थानसंस्थितः वज्रवत् संस्थानमवयवसंनिवेशस्तेन संस्थितो युक्तः योजनानां शतं समम् उन्नतानुन्नतरहितम् यथा भवति तथा समुदितः प्रकाशितः वज्रो नाम गिरिरस्तीति शेषः, तत्र वियमाना गुहाः प्रयत्नेन विचेतव्याः । श्लोकद्वयमेकान्वयि ॥ २५॥२६ ॥

गो० टी०–तत्र वैदूर्येत्यादि सार्धश्लोक एकान्वयः । श्रीमानिति । योजनानां शतं समं यथा भवति तथा समुदितः समुन्नतः ॥ २३ ॥ २४ ॥

२७] ति० टी०–चतुर्भागे चतुर्थभागे गत इति शेषः॥२७॥

रा० टी०–चतुरिति । समुद्रस्य चतुर्भागे चतुर्थांशे चक्रवान्नाम पर्वतोऽस्तीति शेषः । तत्र तस्मिन् पर्वते विश्वकर्मणा निर्मितं सहस्रारं चक्रमतिष्ठदिति शेषः । तत्र चक्रनिर्माणोत्तरकाले पुरुषोत्तमो नारायणः पञ्चजनं तदभिधं हयग्रीवं तदभिधं च दानवं हत्वा ततस्तस्मात्पर्वतात् चक्रमाजहार शङ्खं च आजहार पञ्चजनास्थितो विश्वकर्मणा निर्मापय्य आनया-

१ समुद्रे क्वेति गो. पाठः । २ गता इति गो. पाठः । ३ कामरूपिणामिति गो रा. पाठ. । ४ सहस्रश इति गो. पाठः ।

तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम् । आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः ॥ २८ ॥
तत्र[1] सानुषु रम्येषु विशालासु गुहासु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २९ ॥
योजनानि[3] चतुःषष्टिर्वराहो नाम पर्वतः । सुवर्णशृङ्गः सुमहानगाधे वरुणालये ॥ ३० ॥
तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम् । तस्मिन्[4]वसति दुष्टात्मा नरको नाम दानवः ॥ ३१ ॥
तत्र सानुषु रम्येषु विशालासु गुहासु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३२ ॥
तमतिक्रम्य शैलेन्द्रं काञ्चनान्तरदर्शनम्[5] । पर्वतः सर्वसौवर्णो धाराप्रस्रवणायुतः ॥ ३३ ॥
तं गजाश्च वराहाश्च सिंहा व्याघ्राश्च सर्वतः[7] । अभिगर्जन्ति सततं तेन शब्देन दर्पिताः ॥ ३४ ॥
यस्मिन्[8]हरिहयः श्रीमान्महेन्द्रः पाकशासनः । अभिषिक्तः सुरैः राजा मेघो[6] नाम स पर्वतः ॥ ३५ ॥
तमतिक्रम्य शैलेन्द्रं महेन्द्रपरिपालितम् । षष्टिं गिरिसहस्राणि काञ्चनानि गमिष्यथ ॥ ३६ ॥
तरुणादित्यवर्णानि भ्राजमानानि सर्वशः । जातरूपमयैर्दृष्टैः शोभितानि सुपुष्पितैः ॥ ३७ ॥
तेषां मध्ये स्थितो राजा मेरुरुत्तमपर्वतः[8] । आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा ॥ ३८ ॥

मासेत्यर्थः । हत्वा चक्रमाजहारेत्यनेन चक्राहरणप्रतिबन्धकौ तौ गतावितिं सूचितम् । श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–चतुर्भाग इति । चतुर्भागे चतुर्थभागे समुद्रस्य लवणसमुद्रस्य ॥ २९ ॥

२८–३०] ति० टी०–तत्र चक्रवत्पर्वते । पञ्चजनं तदाख्यम्, हयस्येव ग्रीवा यस्य तं च ॥ २८–३० ॥

रा० टी०–तत्रेति । तत्र चक्रवत्पर्वतीयेषु सानुषु गुहासु च वदेह्या सह रावणः मार्गितव्यः ॥ २९ ॥

रा० टी०–योजनानीति । अगाधे वरुणालये चतुःषष्टियोंजनानि सुवर्णशृङ्गः वराहो नाम पर्वतोऽस्तीति शेषः ॥ ३० ॥

गो० टी०–तत्र पञ्चजनमिति । तत्र चक्रवत्पर्वते पुरुषोत्तमो विष्णुः ' श्रीपतिः पुरुषोत्तमः ' इत्यमरः । चक्ररक्षकं हयग्रीवाख्यं दानवं हत्वा चक्रं पञ्चजनाख्यं दानवं हत्वा तदस्थिभूत पाञ्चजन्याख्यं शङ्खं च जग्राह । कृष्णः पञ्चजनं हत्वा पाञ्चजन्यं जग्राहेत्युच्यते तद्विष्ण्ववतारेऽप्यस्तीति ज्ञेयम् ॥ २६-२८ ॥

३१–३२] ति० टी०–तत्र वराहपर्वते । जातरूपं स्वर्णम् ॥ ३१ ॥ ३२ ॥

रा० टी०–तत्रेति । तत्र वराहपर्वते जातरूपमयं प्राग्ज्योतिषं नाम पुरमस्तीति शेषः । तस्मिन् परे नरको नाम दानवो वसति ॥ ३१ ॥

रा० टी०–तत्रेति । तत्र वराहपर्वतीयेषु सानुषु गुहासु च रावणो मार्गितव्यः ॥ ३२ ॥

गो० टी०–तत्र प्रागिति । तत्र वराहपर्वते ॥ २९ ॥ ३० ॥

३३] ति० टी०–काञ्चनान्तरदर्शनं काञ्चनगर्भा अन्तरा निर्दरा यस्मिंस्तस्य दर्शनं भविष्यतीति शेषः ॥ ३३ ॥

रा० टी०–तमिति । काञ्चनाः स्वर्णमयाः अन्तरा गर्भा दृश्यन्ते यत्र किंच काञ्चनान्तराणि विलक्षणवर्णानि दृश्यन्ते यत्र तं शैलेन्द्रं वराहमतिक्रम्य सर्वसौवर्णः धाराप्रस्रवणानां निर्झराणामयुतानि यस्मिन् स पर्वतोऽस्तीति शेषः ॥ ३३ ॥

गो० टी०–तमतिक्रम्येति । तमतिक्रम्य तस्मात्परत इत्यर्थः । काञ्चनान्तरनिर्दरः सौवर्णमयान्तरप्रदेशवत्कन्दरः । अन्तर्बहिश्च सौवर्णकन्दर इत्यर्थः ॥ ३१ ॥

३४] ति० टी०–तं प्राप्य स्थिता गजादयस्तेन शब्देन स्वध्वनिजप्रतिध्वनिशब्देन दर्पिताः सर्वतोऽभिगर्जन्ति ॥ ३४ ॥

रा० टी०–तमिति । तं सर्वसौवर्णं पर्वतं सर्वतः गजादयः सततमभिगर्जन्ति तेन स्वगर्जितेन दर्पिताः भवन्तीति शेषः ३४

गो० टी०–तं गजाश्चेति । तेन शब्देन स्वशब्देन दर्पिता गजादयस्तं पर्वतमभिगर्जन्ति ॥ ३२ ॥

३५–३७] ति० टी०–सः सौवर्ण इत्युक्तः ॥ ३५–३७ ॥

रा० टी०–यस्मिन्निति । यस्मिन् सौवर्णपर्वते हरिहयः हरितवर्णविशिष्टाश्वस्वामी पाकशासनः महेन्द्रो राजा सुरैरभिषिक्तः स पर्वतो मेघो नाम मेघनामा ॥ ३५ ॥

रा० टी०–तमिति । महेन्द्रपरिपालितं तं शैलेन्द्रमतिक्रम्य काञ्चनानि अत एव तरुणादित्यवर्णानि जातरूपमयैः दृष्टैः शोभितानि अत एव भ्राजमानानि दीप्तिमन्ति षष्टिं गिरिसहस्राणि गमिष्यथ । श्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

गो० टी०–यस्मिन्निति । हरिहयः श्यामवर्णाश्वयुक्तः । राजाभिषिक्तः राजत्वेनाभिषिक्तः ॥ ३३–३६ ॥

३८] ति० टी०–तेषां षष्टिसहस्रपर्वतानां मध्ये राजेव मेरुवत्काञ्चनः पर्वतोऽस्ति एनं सावर्णिमेरुरिति वदन्ति ॥ ३८ ॥

रा० टी०–तेषामिति । तेषां षष्टिसहस्रसंख्याककाञ्चनगिरीणां मध्ये पुरा पूर्वं प्रसन्नेन आदित्येन दत्तवरः उत्तमपर्वतः पर्वतोत्तमः राजा सर्वपर्वताधीशः मेरुस्तदभिधः शैलः स्थितः ॥ ३८ ॥

१ तत्रेति गो. पाठ । २ चिन्तेति गो. पाठः । ३ योजनानां तत इति गो. पाठः । ४ यस्मिन्निति गो. पाठः । ५ निर्दर इति गो. पाठः । ६ मेघवान्नामेति गो. पाठः । ७ सर्वत इति गो. पाठः । ८ उत्तरेति गो. पाठः ।

तेनैवमुक्तः शैलेन्द्रः सर्व एव त्वदाश्रयाः । मत्प्रसादाद्भविष्यन्ति दिवा रात्रौ च काञ्चनाः॥ ३९ ॥
त्वयि ये चापि वत्स्यन्ति देवगन्धर्वदानवाः । ते भविष्यन्ति भक्ताश्च प्रभया काञ्चनप्रभाः ॥ ४० ॥
विश्वेदेवाश्च वसवो मरुतश्च दिवौकसः । आगत्य पश्चिमां संध्या मेरुमुत्तमपर्वतम् ॥ ४१ ॥
आदित्यमुपतिष्ठन्ति तैश्च सूर्योऽभिपूजितः । अदृश्यः सर्वभूतानामस्तं गच्छति पर्वतम् ॥ ४२ ॥
योजनानां सहस्राणि दश तानि दिवाकरः । मुहूर्तार्धेन तं शीघ्रमभियाति शिलोच्चयम् ॥ ४३ ॥
शृङ्गे तस्य महद्दिव्यं भवनं सूर्यसंनिभम् । प्रासादगणसंबाधं विहितं विश्वकर्मणा ॥ ४४ ॥
शोभितं तरुभिश्चित्रैर्नानापक्षिसमाकुलैः । निकेतं पाशहस्तस्य वरुणस्य महात्मनः ॥ ४५ ॥
अन्तरा मेरुमस्तं च तालो दशशिरा महान् । जातरूपमयः श्रीमान्भ्राजते चित्रवेदिकः ॥ ४६ ॥
तेषु सर्वेषु दुर्गेषु सरःसु च सरित्सु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ४७ ॥
यत्र तिष्ठति धर्मज्ञस्तपसा स्वेन भावितः । मेरुसावर्णिरित्येष ख्यातो वै ब्रह्मणा समः ॥ ४८ ॥
प्रष्टव्यो मेरुसावर्णिर्महर्षिः सूर्यसंनिभः । प्रणम्य शिरसा भूमौ प्रवृत्तिं मैथिलीं प्रति ॥ ४९ ॥

३९] ति० टी०–कीदृशो वरस्तत्राह—तेनैवमिति । आदित्येनैवमुक्त इत्येवंशब्दार्थः सर्व एवेति ॥ ३९ ॥

रा० टी०–वरप्रकारमाह–तेनेति । दिवा रात्रौ ये त्वदाश्रयाः भविष्यन्ति ते सर्वे काञ्चनाः सुवर्णमयाः भविष्यन्ति एवं तेन रविणा शैलेन्द्र उक्तः ॥ ३९ ॥

गो० टी०–वरमेवाह–तेनैवमिति । प्रभया रक्ता भविष्यन्तीत्यन्वयः ॥ ३७ ॥ ३८ ॥

४०] ति० टी०–ते भक्ताः मयीति शेषः । काञ्चनप्रभाश्च भविष्यन्ति ॥ ४० ॥

रा० टी०–त्वयीति । ये देवादयस्त्वयि वत्स्यन्ति ते प्रभया काञ्चनप्रभाः सन्तः भक्ताः मयि प्रीतिमन्तो भविष्यन्ति ॥ ४० ॥

४१] ति० टी०–विश्वेदेवादयस्तमुत्तमपर्वतं मेरुं सावर्णिमेरुमागत्य तत्र स्थित्वा पश्चिमां संध्यां प्राप्यादित्यमुपतिष्ठन्तीत्यग्रिमेणान्वयः ॥ ४१ ॥

४२] ति० टी०–इतः पूर्वभागस्था अनुक्ता अपि द्वीपा विचेतव्या इत्यर्थतः सिद्धम् ॥ ४२ ॥

रा० टी०–विश्व इति । विश्वेदेवादयः पश्चिमां संध्यां पश्चिमसंध्यासंबन्धिकालमागत्य ज्ञात्वा उत्तमपर्वतं मेरुमागत्य प्राप्य आदित्यमुपतिष्ठन्ति पूजयन्ति तैरभिपूजितः सूर्योऽस्तं पर्वतं गच्छति अत एव सर्वभूतानामदृश्यो भवतीति शेषः । श्लोकद्वयमेकान्वयि ॥ ४१ ॥ ४२ ॥

गो० टी०–विश्वेदेवा इति । पश्चिमां सन्ध्याम् अत्यन्तसंयोगे द्वितीया । मेरुसदृक्षत्वान्मेरुम् । मेरुमागम्य आदित्यमुपतिष्ठन्ति पूजयन्ति । मन्त्रकरणाभावात्परस्मैपदम् । अस्तगिरिसमीपस्थसावर्णिमेरोरभिधानात्सर्वेऽपि सप्तद्वीपाद्रयोऽपि मार्गितव्यत्वेनोक्ताः ॥ ३९–४७ ॥

४३] ति० टी०–ततः परं दशयोजनसहस्रेऽस्ताचल इत्याह—योजनानामिति । तान्पुरुसंख्यायोजनानि अतीत्येति शेषः । मुहूर्तार्धमेका घटी तया तं शिलोच्चयमस्तमभियाति ॥ ४३ ॥

रा० टी०–योजनानामिति । दिवाकरः शिलोच्चयं तमस्ताचलं तानि प्रसिद्धानि योजनानां दशसहस्राणि मुहूर्तार्धेन एकघटिकयोर्द्वयेति शेषः, अभियाति मेरुतोऽभिगच्छति॥४३॥

४४–४५] ति० टी०–अथ वरुणपुरवर्णनम्—शृङ्ग इति ॥ ४४ ॥ ४५ ॥

रा० टी०–शृङ्ग इति । तस्य अस्ताचलस्य शृङ्गे महद्विशालं प्रासादगणसंबाधं प्रासादसमूहैर्निबिडं विश्वकर्मणा विहितं निर्मितं नानापक्षिसमाकुलैश्चित्रैस्तरुभिः शोभितं भवनं चिन्तनीयं पाशहस्तस्य वरुणस्य निकेतमस्तीति शेषः । श्लोकद्वयमेकान्वयि ॥ ४४ ॥ ४५ ॥

४६–४७] ति० टी०–दशशिरा दशस्कन्धः ॥४६॥४७॥

रा० टी०–अन्तरेति । मेरुमस्तं च अन्तरा मध्ये दशशिराः दशमहाशाखावान् जातरूपमयः चित्रवेदिकस्तालस्तरुर्भाजते ॥ ४६ ॥

रा० टी०–तेष्विति । तेषु प्रसिद्धेषु दुर्गेषु दुर्गमेषु सरःसु सरित्सु च रावणो मार्गितव्यः ॥ ४७ ॥

४८] ति० टी०–यत्र मेरौ ब्रह्मणा समो महामेरुवर्तिप्रजापतिसमः ॥ ४८ ॥

४९] ति० टी०–मैथिलीं प्रति प्रवृत्तिं मैथिलीसंबन्धिप्रवृत्तिं प्रष्टव्य इत्यन्वयः ॥ ४९ ॥

रा० टी०–यत्रेति । यत्र मेरौ स्वेन तपसा भावितः प्रकाशितः मेरुसावर्णिरिति नाम्ना ख्यातः प्रसिद्धः ब्रह्मणा समः एष महर्षिः तिष्ठति तत्र मेरुसावर्णिर्महर्षिः मैथिलीं प्रति प्रवृत्तिं मैथिल्याः स्थिति प्रष्टव्यः । श्लोकद्वयमेकान्वयि ॥ ४८ ॥ ४९ ॥

---

१ रक्ता इति गो. पाठः । २ आगम्येति गो. पाठः । ३ उत्तरेति गो. पाठः । ४ एवेति गो. पाठः ।

एतावज्जीवलोकस्य भास्करो रजनीक्षये । कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतम् ॥ ५० ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः । अभास्करममर्यादं न जानीमस्ततः परम् ॥ ५१ ॥
अवगम्य तु वैदेहीं निलयं रावणस्य च । अस्तं पर्वतमासाद्य पूर्णे मासे निवर्तत ॥ ५२ ॥
ऊर्ध्वं मासान्न वस्तव्यं वसन्वध्यो भवेन्मम । सहैव शूरो युष्माभिः श्वशुरो मे गमिष्यति ॥ ५३ ॥
श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः । गुरुरेष महाबाहुः श्वशुरो मे महाबलः ॥ ५४ ॥
भवन्तश्चापि विक्रान्ताः प्रमाणं सर्व एव हि । प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशम्॥ ५५ ॥
[दृष्टायां तु नरेन्द्रस्य पत्न्यामिततेजसः ।] कृतकृत्या भविष्यामः कृतस्य प्रतिकर्मणा ॥
अतोऽन्यदपि यत्कार्यं कार्यस्यास्य प्रियं भवेत् । संप्रधार्य भवद्भिश्च देशकालार्थसंहितम् ॥ ५६ ॥
ततः सुषेणप्रमुखाः प्लवङ्गमाः सुग्रीववाक्यं निपुणं निशम्य ।
आमन्त्र्य सर्वे प्लवगाधिपास्ते जग्मुर्दिशं तां वरुणाभिगुप्ताम् ॥ ५७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

५०-५१] ति० टी०-एतावदुदयाचलमारभ्य मेरुसावर्णिपर्यन्तम् ॥ ५० ॥ ५१ ॥

रा० टी०-एतावदिति । रजनीक्षये रात्रिनिष्टत्यर्थं जीवलोकस्य एतावत्सर्वं स्थानं वितिमिरं कृत्वा भास्करोऽस्तं पर्वतं गच्छति ॥ ५० ॥

रा० टी०-एतावदिति । हे वानरपुङ्गवाः! एतावदेव वानरैर्गन्तुं शक्यम् एतेनातः परं मया न गतमिति सूचितम् अत एव ततः परं न जानीमः ॥ ५१ ॥

गो० टी०-एतावदिति । भास्करः रजनीक्षये जीवलोकस्य एतावत् उदयास्तादिमध्यं वितिमिरं कृत्वा अस्तं गच्छतीति योजना ॥ ४८-५० ॥

५२-५३] ति० टी०-निवर्तत निवर्तध्वम् ॥५२॥५३॥

रा० टी०-अवगम्येति । अस्तं पर्वतमासाद्य प्राप्य वैदेहीमवगम्य ज्ञात्वा पूर्णे मासे निवर्तत मासपूर्त्यभ्यन्तरसमये इह प्रागुत्तेत्यर्थः ॥ ५२ ॥

रा० टी०-ऊर्ध्वमिति । मासादूर्ध्वं वसन् वानरः मम वध्यो भवेत् अतः ऊर्ध्वं न वस्तव्यम् युष्माभिः सहैव मे श्वशुरः सुषेणो गमिष्यति ॥ ५३ ॥

गो०टी०-सहैवेति । दिष्टकारिभिः आदिष्टकारिभिः५३॥५२

५४]ति० टी०-दिष्टं संदिष्टम् ॥ ५४ ॥

रा० टी०-श्रोतव्यमिति । एष सुषेणः यतो गुरुर्महान् अतः दिष्टकारिभिः आज्ञावर्तिभिः भवद्भिः एतस्य सुषेणस्य सर्वं वचनं श्रोतव्यं श्रुत्वा कर्तव्यम् ॥ ५४ ॥

५५] ति० टी०-प्रमाणं कर्तव्याकर्तव्यनिश्चायकाः । अथाप्येनं सुषेणं विशिष्य प्रमाणं संस्थाप्य ॥ ५५ ॥

रा० टी०-भवन्त इति । सर्वकर्मसु निखिलक्रियासु भवन्तो यद्यपि प्रमाणं व्यवस्थापकास्तथाप्येनं सुषेणं प्रमाणं संस्थाप्य व्यवस्थापकत्वेन निश्चित्य पश्चिमां दिशं पश्यध्वम् । बहूनां स्वातन्त्र्येण कार्यव्यवस्थापकत्वे कार्यं न सिध्यतीति तात्पर्यम् ॥ ५५ ॥

गो० टी०-प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशमिति पाठः । प्रमाणं व्यवस्थापकं पश्यध्वं पश्यत आत्मनेपदमार्षम् ॥ ५३ ॥

५६-५७] ति० टी०-कृतस्य प्रतिकर्मणोपकारप्रत्युपकारेण अस्य कार्यस्येति । रावणवधान्तरामकार्यस्येत्यर्थः ॥५६॥५७॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः॥४२॥

रा० टी०-कृतेति । कृतस्य रामकर्तृकोपकारस्य प्रतिकर्मणा प्रत्युपकारेणैव यतः कृतकृत्या भविष्यामः तस्मात् अतो मदुपदिष्टात् अन्यत् कार्यस्यान्वेषणस्य प्रियं सानुकूलं भवेत् तदपि देशकालार्थसहितं देशकालार्थानुकूलं संप्रधार्य निश्चित्य भवद्भिः कार्यम् । सार्धश्लोक एकान्वयी ॥ ५६ ॥

रा० टी०-तत इति । ततः अवश्यं कर्तव्यत्वाद्धेतोः निपुणं न्याययुक्तं सुग्रीववाक्यं निशम्य श्रुत्वा सुषेणप्रमुखाः प्लवगाधिपाः प्लवङ्गमाः आमन्त्र्य परस्परं निश्चित्य वरुणाभिगुप्तां दिशं तां पश्चिमां जग्मुः ॥ ५७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

गो० टी०-अतोऽन्यदिति । अस्य कार्यस्य सीतान्वेष-

१ अधीति गो. पाठः । २ अस्तपर्वतमिति गो. पाठः । ३ कर्मस्विति गो. पाठः । ४ अर्धमेतदधिकं गो. पाठे । ५ हितमिति गो. पाठः । ६ प्लवङ्गा इति गो. पाठः । ७ अधिपमिति गो. पाठः ।

त्रिचत्वारिंशः सर्गः ।

उत्तरस्यां दिशि सीतापरिमार्गणाय सुग्रीवः शतबलीप्रमुखकपिबल प्रेषयति ।

ततः संदिश्य सुग्रीवः श्वशुरं पश्चिमां दिशम् । वीरं शतबलिं नाम वानरं वानरेश्वरः ॥ १ ॥
उवाच राजा सर्वज्ञः सर्ववानरसत्तमः । वाक्यमात्महितं चैव रामस्य च हितं तदा ॥ २ ॥
वृतः शतसहस्रेण त्वद्विधानां वनौकसाम् । वैवस्वतसुतैः सार्धं प्रविष्टः सर्वमन्त्रिभिः ॥ ३ ॥
दिशं ह्युदीचीं विक्रान्तहिमशैलावतंसिकाम् । सर्वतः परिमार्गध्वं रामपत्नीं यशस्विनीम् ॥ ४ ॥
अस्मिन्कार्ये विनिर्वृत्ते कृते दाशरथेः प्रिये । ऋणान्मुक्ता भविष्यामः कृतार्थार्थविदां वरं ॥ ५ ॥
कृतं हि प्रियमस्माकं राघवेण महात्मना । तस्य चेत्प्रतिकारोऽस्ति सफलं जीवितं भवेत् ॥ ६ ॥
अर्थिनः कार्यनिर्वृत्तिमकर्तुरपि यश्चरेत् । तस्य स्यात्सफलं जन्म किं पुनः पूर्वकारिणः ॥ ७ ॥
एतां बुद्धिं समास्थाय दृश्यते जानकी यथा । तथा भवद्भिः कर्तव्यमस्मत्प्रियहितैषिभिः ॥ ८ ॥
अयं हि सर्वभूतानां मान्यस्तु नरसत्तमः । अस्मासु च गतैः प्रीतिं रामः परपुरञ्जयः ॥ ९ ॥

णरूपस्य अन्यदपि यद्धितं भवेत् देशकालार्थसंहितं तत्संप्रधार्य भवद्भिः कार्यमित्यन्वयः ॥ ५४ ॥ ५५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१] ति० टी०–तत इति ॥ १ ॥

२] ति० टी०–सर्वज्ञो देशदृत्तान्ताभिज्ञः ॥ २ ॥

रा० टी०–उत्तरदिक्प्रेषणमुपक्रमते–तत इति । सर्वज्ञः निखिलकार्यविज्ञाता अत एव सर्ववानरसत्तमः अत एव वानरेश्वरः निखिलवानरप्रवर्तकः राजा सुग्रीवः श्वशुरं पश्चिमां दिशं संदिश्य आत्महितं स्वहितकारकं रामस्य हितं प्रियं वाक्यं शतबलिं नाम वीरमुवाच । श्लोकद्वयमेकान्वयि ॥१॥२॥

गो० टी०–अथोत्तरदिशि शतबलिप्रेषणं त्रिचत्वारिंशे–ततः संदिश्येत्यादि ॥ १ ॥ २ ॥

३] ति० टी०–वैवस्वतसुतैर्यमसुतैः ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–वृत इति । त्वद्विधानां वनौकसां शतसहस्रेण वृतस्त्वं सुमन्त्रिभिः शोभनमन्त्रिविशिष्टैः सार्धं प्रविष्टस्त्र समानकार्यकारित्वेनैकीभव ॥ ३ ॥

गो० टी०–वृत इत्यादि । हिमशैलावतंसकां हिमशैलालङ्कारां ॥ ३ ॥ ४ ॥

४] ति० टी०–विक्रान्तेति शतबलस्य संबुद्धिः । सर्वत इति सामान्यतो नियोगः ॥ ४ ॥

रा० टी०–तत्कार्यमेवाह–दिशामिति । हिमशैलावतंसिकां हिमपर्वतैः शोभिताम् उदीचीं दिशं विक्रान्ताः प्राप्ताः यूयं रामपत्नीं सर्वतः परिमार्गध्वम् ॥ ४ ॥

५] ति० टी०–विनिर्वृत्ते विशेषेणानुष्ठिते । कृतार्थाः कृतकृत्याः । अर्थविदां लब्धाभीष्टानाम् । संधिरार्षः ॥ ५ ॥

रा० टी०–अस्मिन्निति । हे अर्थविदांवराः ! दाशरथे प्रिये अस्मिन् सीतास्थितिनिश्चयरूपे कार्ये विनिर्वृत्ते सिद्धे सति अत एव दाशरथेः प्रिये कृते सति वयम् ऋणान्मुक्ताः अत एव कृतार्थाः कृतकृत्याः भविष्यामः । संधिस्तु न सुनेत्यत्र नेतियोगं विभज्य सपादसप्ताध्यायीस्थं प्रति त्रिपादी क्वचिदसिद्धा नेति ज्ञापनात् । किंच कृतोऽर्थो यैस्ते एवार्थविद इति कर्मधारयः तेषाम् ॥ ५ ॥

गो० टी०–अस्मिनिति । कृतार्थाश्चार्थविदश्च कृतार्थार्थविदः तेषां वराः ॥ ५–९ ॥

६] ति० टी०–अस्ति क्रियेत ॥ ६ ॥

रा० टी०–कृतमिति । राघवेण महात्मना यदस्माकं प्रियं कृतं तस्य प्रतिकारः प्रत्युपकृतिश्चेद्यस्ति तर्हि मे जीवितं सफलं भवेत् ॥ ६ ॥

७–९] ति० टी०–अर्थिनः स्वस्मात्प्रयोजनार्थिनः । कार्यनिर्वृत्तिं तत्प्रयोजनानुष्ठानम् । अकर्तुः पूर्वमुपकाराकर्तुरपि यश्चरेत्कुर्यात् ॥ ७–९ ॥

रा० टी०–सफलत्वे निश्चयमाह–अर्थिन इति । अकर्तुः उपकारकर्तृत्वाभाववतोऽप्यर्थिनः कार्यनिर्वृत्तिं यश्चरेत् कुर्यात् तस्य जन्म सफलं स्यात् । पूर्वकारिणः कृतोपकारस्य कार्यनिर्वृत्तिं यश्चरेत् तस्य चेरिंक वक्तव्यम् ॥ ७ ॥

रा० टी०–एतामिति । एतामुक्तविषयकां बुद्धिं निश्चयं समास्थाय कृत्वा जानकी यथा दृश्यते तथा भवद्भिः कर्तव्यम् ॥ ८ ॥

१ बलिमिति गो. पाठः । २ ऋषभ इति गो. पाठः । ३ धर्मश्च इति गो. पाठः । ४ सत्तममिति गो. पाठः । ५ तथेति गो. पाठः । ६ प्रतिष्टस्व स्वेति गो. पाठः । ७ विक्रान्तामिति गो. विक्रान्ता इति रा पाठः । ८ अवतंसकामिति गो. पाठः । ९ अनिन्दितामिति गो. पाठः । १० वरा इति गो. रा. पाठः । ११ अवस्थायेति गो. पाठः । १२ आगतप्रीतिरिति गो. पाठः ।

इमानि बहुदुर्गाणि नद्यः शैलान्तराणि च । भवन्तः परिमार्गन्तु बुद्धिविक्रमसंपदा ॥ १० ॥
तत्र म्लेच्छान्पुलिन्दांश्च शूरसेनांस्तथैव च । प्रस्थलान्भरतांश्चैव कुरूंश्च सह मद्रकैः ॥ ११ ॥
[2]काम्बोजयवनांश्चैव [3]शकानां पत्तनानि च । [[4]बाह्लीकानृषिकांश्चैव पौरवानथ टङ्कणान् ॥
चीनान्परमचीनांश्च हारांश्च पुनः पुनः] अन्वीक्ष्य [5]वैदृशांश्चैव हिमवन्तं [6]विचिन्वथ ॥ १२ ॥
लोध्रपद्मकखण्डेषु [7]देवदारुवनेषु च । रावणः सह [8]वैदेह्या मार्गितव्यस्ततस्ततः ॥ १३ ॥
ततः सोमाश्रमं गत्वा देवगन्धर्वसेवितम् । कालं नाम महासानुं पर्वतं [9]तं गमिष्यथ ॥ १४ ॥
महत्सु तस्य [10]शैलेषु पर्वतेषु गुहासु च । [11]विचिन्वत महाभागां [12]रामपत्नीमनिन्दिताम् १५ ॥
तमतिक्रम्य शैलेन्द्रं हेमगर्भं महागिरिम् । ततः सुदर्शनं नाम पर्वतं गन्तुमर्हथ ॥ १६ ॥
ततो [13]देवसखा नाम पर्वतः पतगालयः । नानापक्षिसमाकीर्णो [14]विविधद्रुमभूषितः ॥ १७ ॥
तस्य [15]काञ्चनखण्डेषु [16]निर्देरेषु गुहासु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १८ ॥
तमतिक्रम्य चाकाशं सर्वतः शतयोजनम् । अपर्वतनदीदृक्षं सर्वसत्त्वविवर्जितम् ॥ १९ ॥

रा० टी०–अयमिति । सर्वभूतानां मान्यः नरसत्तमोऽयं रामः अस्मासु प्रीतिं गतः, एनेन स्वस्य भाग्यातिशयः सूचितः ॥ ९ ॥

१०] ति० टी०–इमानि वक्ष्यमाणानि ॥ १० ॥

रा० टी०–इमानीति । बुद्धिविक्रमसंपदा बुद्धिविक्रमरूपसंपत्त्या नवदुर्गादीनि भवन्तः परिमार्गन्तु ॥ १० ॥

गो० टी०–इमानीत्यादि । इमानि वक्ष्यमाणानि । नद्यः नदीः ॥ १० ॥

११–१२] ति० टी०–प्रस्थला भरताश्च देशविशेषाः । कुरून् दक्षिणकुरून् ॥ ११ ॥ १२ ॥

रा० टी०–तत्रेति । तत्र वनदुर्गादिषु अन्वीक्ष्य म्लेच्छादीन् देशविशेषान् हिमवन्तं च विचिन्वथ । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–तत्रेति । भरतान् इन्द्रप्रस्थादिप्रदेशान् कुरून् दक्षिणकुरून् हिमवदन्तान् पुनः पुनरन्विष्य परिमार्गयन्त्विति पूर्वेण संबन्धः ॥ ११—१३ ॥

१३] ति० टी०–लोध्रपद्मकखण्डेषु हैमवतेष्विति शेषः १३

रा० टी०–लोध्रेति । लोध्रादिषण्डादिषु वैदेह्या सह रावणो मार्गितव्यः ॥ १३ ॥

गो० टी०–लोध्रेति । पद्मकाश्चन्दनविशेषाः साहचर्यात् ॥ १४–१६ ॥

१४] ति० टी०–तं कालाख्यं पर्वतम् ॥ १४ ॥

रा० टी०–तत इति । ततः लोध्रषण्डादेः देवगन्धर्वसेवितं सोमाश्रमं गत्वा महासानुं कालं नाम पर्वतं गमिष्यथ ॥ १४ ॥

१५] ति० टी०–तस्य शैलेषु गण्डपर्वतेषु पर्वतेषु ततो महत्सु तेषु ॥ १५ ॥

रा० टी०–महत्स्विति । तस्य कालाभिधगिरेः महत्सु शैलेषु अवयवेषु पर्वतेषु ततोऽवरावयवेषु गुहासु विचिन्वत ' तस्य शैलस्य कन्दरेषु गुहासु च ' इति भूषणाङ्कितपुस्तकपाठः ॥ १५ ॥

१६] ति० टी०–तं कालपर्वतम् ॥ १६ ॥

रा० टी०–तमिति । शैलेन्द्रं तं कालपर्वतमभिक्रम्य हेमगर्भं महागिरिं सुदर्शनं नाम पर्वतं गन्तुमर्हथ ॥ १६ ॥

गो० टी०–तमतिक्रम्येति । तं कालं नाम महागिरिमतिक्रम्य ततः तस्मात् सुदर्शनं पर्वतं गन्तुमर्हथ ॥ १७ ॥

१७–१८] ति० टी०–ततः सुदर्शनादपरतः । पतगाः पक्षिणः ॥ १७ ॥ १८ ॥

रा० टी०–तत इति । ततोऽनन्तरं विविधद्रुमभूषितः देवसखो नाम पर्वतोऽस्तीति शेषः ॥ १७ ॥

रा० टी०–तस्येति । तस्य देवसखस्य काञ्चनखण्डादिषु मार्गितव्यः ॥ १८ ॥

गो० टी०–तत इति । पतगालयः पक्षिणामावासभूतः । पक्षिणां वैविध्यमाह–नानापक्षिसमाकीर्ण इति ॥ १८॥१९॥

१९] ति० टी०–तं देवसखपर्वतमतिक्रम्याकाशं शून्यदेशम् । शून्यत्वोपपादकम्—पर्वतेत्यादि ॥ १९ ॥

रा० टी०–तमिति । तं देवसखमतिक्रम्य अपर्वतनदीदृक्षं पर्वतनदीदृक्षरहितमत एव सर्वसत्त्वविवर्जितं सर्वतः शतयोजनम् आकाशं शून्यमस्तीति शेषः ॥ १९ ॥

गो० टी०–तमिति । तमतिक्रम्य तस्मादेवसखाख्यपर्वतात्परम् अपर्वतनदीदृक्षं शून्यारण्यस्थलं वर्तत इति शेषः॥२०॥

१ वनेति गो. पाठः । २ काम्बोजानिति गो. पाठः । ३ शकानारट्टकानपीति गो. पाठः । ४ श्लोकोऽयमधिकः गो. पाठे । ५ दरदानिति गो. पाठः । ६ तथैव चेति गो. पाठः । ७ षण्डेष्विति गो. रा. पाठः । ८ त्विति गो. पाठः । ९ शैलस्य निर्देरेष्विति गो. पाठः । १० विचिनुध्वमिति गो. पाठः । ११ पत्नीं ततस्तत इति गो. पाठः । १२ देवसख इति गो. रा. पाठः । १३ गणेति गो. पाठः । १४ काननषण्डेष्विति गो. पाठः । १५ निर्झरेष्विति गो. पाठः ।

तेन्तु शीघ्रमतिक्रम्य कान्तारं रोमहर्षणम् । कैलासं पाण्डुरं प्राप्य हृष्टा यूयं भविष्यथ ॥ २० ॥
तत्र पाण्डुरमेघाभं जाम्बूनदपरिष्कृतम् । कुबेरभवनं रम्यं [1]निर्मितं विश्वकर्मणा ॥ २१ ॥
विशाला नलिनी यत्र प्रभूतकमलोत्पला । हंसकारण्डवाकीर्णा [2]अप्सरोगणसेविता ॥ २२ ॥
तत्र वैश्रवणो राजा सर्वलोकनमस्कृतः । धनदो रमते श्रीमान्गुह्यकैः सह यक्षराट् ॥ २३ ॥
तस्य चन्द्रनिकाशेषु पर्वतेषु गुहासु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २४ ॥
क्रौञ्चं तु गिरिमासाद्य बिलं तस्य सुदुर्गमम् । अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत्स्मृतम् ॥ २५ ॥
वसन्ति हि महात्मानस्तत्र सूर्यसमप्रभाः । देवैर्[3]भ्यर्थिताः सम्यग्देवरूपा महर्षयः ॥ २६ ॥
क्रौञ्चस्य तु गुहाश्चान्याः सानूनि शिखराणि च । [4]दर्दराश्च नितम्बाश्च विचेतव्यास्ततस्ततः ॥ २७ ॥
[क्रौञ्चस्य शिखरं चापि निरीक्ष्य च ततस्ततः]
अदृक्षं कामशैलं च मानसं विहगालयम् । न गतिस्तत्र भूतानां [5]देवानां न च रक्षसाम् ॥ २८ ॥

२०-२१] ति० टी०-कान्तारमपर्वतवनत्वादिना । रोमहर्षणं भयंकरत्वात् ॥ २० ॥ २१ ॥

रा० टी०-तमिति । कान्तारं भयङ्करम् अत एव रोमहर्षणं तमाकाशमतिक्रम्य पाण्डुरं कैलासं प्राप्य यूयं हृष्टा भविष्यथ ॥ २० ॥

गो० टी०-तं त्विति । कैलासमिति । यद्यपि कैलासो हिमवदेकदेश इति पुराणान्तरोक्तं तथापि तदविरुद्धं ज्ञेयम् । मध्ये शून्यप्रदेशेऽपि तावत्पर्यन्तं हिमवानिति ॥ २१ ॥

रा० टी०-तत्रेति । तत्र कैलासे पाण्डुरमेघाभं पाण्डुरमेघसदृशं जाम्बूनदपरिष्कृतं सुवर्णेनालंकृतं विश्वकर्मणा निर्मितं रम्यं कुबेरभवनमस्तीति शेषः ॥ २१ ॥

गो० टी०-तत्रेत्यादि । तत्र कैलासे नलिनी मानसाख्यसरसी ॥ २२ ॥ २३ ॥

२२-२३] ति० टी-नलिनी सरसी ॥ २२ ॥ २३ ॥

रा० टी०-विशालेति । यत्र भवने प्रभूतकमलोत्पला बहुकमलोत्पलविशिष्टा अत एव हंसकारण्डवाकीर्णा विशाला नलिनी सरसी अस्ति तत्र यक्षराट् यक्षप्रकाशकः धनदो धनदाता वैश्रवणः कुबेरो राजा गुह्यकैः सह रमते । श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०-तत्रेति । तत्र कैलासे ॥ २४ ॥

२४] ति० टी०-तस्य कैलासस्य । पर्वतेषु गण्डपर्वतेषु २४

रा० टी०-तस्येति । तस्य कैलासस्य चन्द्रनिकाशेषु चन्द्रवत्प्रकाशमानेषु पर्वतेषु गुहासु च मार्गितव्यः ॥ २४ ॥

गो० टी०-तस्येति । तस्य कैलासस्य पर्वतेषु पर्यन्तपर्वतेषु ॥ २५ ॥

२५] ति० टी०-तस्य क्रौञ्चस्य । बिलं स्कन्दशक्तिकृतं विवरम् ॥ २५ ॥

रा० टी०-क्रौञ्चमिति । सुदुर्गमं क्रौञ्चगिरिमासाद्य प्राप्य तस्य यद्दुष्प्रवेशं स्मृतं तत् बिलमप्रमत्तैः भवद्भिः प्रवेष्टव्यम् ॥ २५ ॥

गो०टी०-क्रौञ्चं त्विति । बिलं स्कन्दशक्तिकृतम् २५-२८

२६-२७] ति० टी०-तत्र क्रौञ्चगुहायाम् ॥ २६ ॥ २७ ॥

रा० टी०-वसन्तीति । देवैः अभ्यर्थिताः महर्षयस्तत्र बिले वसन्ति ॥ २६ ॥

रा० टी०-क्रौञ्चस्येति । क्रौञ्चस्य अन्याः उक्तबिलात् भिन्नाः गुहाः सान्वादयश्च विचेतव्याः ॥ २७ ॥

गो० टी०-क्रौञ्चस्येत्यादि । शिखरं च प्रधानभूतं शिखरं च । अदृक्षम् अदृक्षाख्यं प्रत्यन्तपर्वतं विहगालयं मानसं मानसाख्यं गिरिं च निरीक्ष्य ते विचेतव्या इति पूर्वेण संबन्धः ॥ २९ ॥

२८] ति० टी०-कामशैलं कामतपःस्थानशैलम् तद्विशेषणमदृक्षम् । मानसं तदाख्यम् तत्र मानसपर्वते ॥ २८ ॥

रा० टी०-अदृक्षमिति । अदृक्षं दृक्षरहितं कामशैलं दर्शनमात्रेण कामनापूरकक्रौञ्चशैलशिखरं विहगालयं विहगानां पक्षिगतीनामासमन्तात् भावेन लयोऽभावो यस्मिन् तत् मानसं च शिखरमस्तीति शेषः, तत्र मानसे भूतादीनां गतिर्न शून्यत्वेन प्रयोजनाभावाद्दूतादयस्तत्र न गच्छन्तीत्यर्थः । स इति । ससानुप्रस्थः सानुप्रस्थसहितः भूधरः क्रौञ्चावयवकामशैलमानस इत्यर्थः, सर्वैर्भवद्भिः विचेतव्यः सानुप्रस्थयोर्बृहत्त्वाल्पत्वाभ्यां भेदात् न पौनरुक्त्यम् । सार्धश्लोक एकान्वयी २८॥२९

गो० टी०-न गतिरिति । तत्र मानसाख्ये पर्वते । ससानुप्रस्थभूधरः सानवः उपत्यकाः, प्रस्था मध्यतटाः, भूधरा अधित्यकाः ॥ ३० ॥

१ तमिति गो. रा. पाठः । २ शैलं प्राप्य हृष्टा इति गो. पाठः । ३ दिव्यमिति गो. पाठः । ४ ह्यप्सर इति गो. पाठः । ५ भूतेति गो. पाठः । ६ अर्पाति गो. पाठः । ७ निर्दरा इति गो. दर्दुरा इति रा. पाठः । ८ अर्धमेतदधिकं गो. पाठे । ९ देवदानवेति गो. न देवानां नेति रा. पाठः ।

स च सर्वैर्विचेतव्यः ससानुप्रस्थभूधरः । क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः ॥ २९ ॥
मयस्य भवनं तत्र दानवस्य [1] स्वयंकृतम् । मैनाकस्तु विचेतव्यः ससानुप्रस्थकन्दरः ॥ ३० ॥
स्त्रीणामश्वमुखीनां [2] तु निकेतस्तत्र तत्र तु । तं देशं समतिक्रम्य आश्रमं सिद्धसेवितम् ॥ ३१ ॥
सिद्धा वैखानसा [3] तत्र वालखिल्याश्च तापसाः । [3] वन्दितव्यास्ततः सिद्धास्तपसा वीतकल्मषाः॥ ३२ ॥
प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः । [4] हिमपुष्करसंछन्नं तत्र वैखानसं सरः ॥ ३३ ॥
तरुणादित्यसंकाशैर्हंसैर्विचरितं शुभैः । औपवाह्यः कुबेरस्य सार्वभौम इति स्मृतः ॥ ३४ ॥
गजः पर्येति तं देशं सदा सह करेणुभिः । तत्सरः समतिक्रम्य नष्टचन्द्रदिवाकरम् ॥
अनक्षत्रगणं व्योम निष्पयोदमनादितम् ॥ ३५ ॥
गभस्तिभिरिवार्कस्य स तु देशः [5] प्रकाश्यते । विश्राम्यद्भिस्तपःसिद्धैर्देवकल्पैः स्वयंप्रभैः ॥ ३६ ॥

२९-३२] ति० टी०-स चेति क्रौञ्चपर्वत इत्यर्थः । सानूनि प्रस्थाः, भूधराः पर्यन्तपर्वताः, तैः सहितः मैनाक इति मैनाकोऽयं समुद्रमग्रादन्यः ॥ २९-३२ ॥

रा० टी०-क्रौञ्चमिति । क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम यः पर्वतः तत्र पर्वते मयस्य दानवस्य स्वयंकृतं भवनमस्तीति शेषः, ससानुप्रस्थकन्दरः मैनाकोऽपि विचेतव्यः । सार्धश्लोक एकान्वयी । तुरव्यर्थकः ॥ ३० ॥

गो० टी०-क्रौञ्चमिति । क्रौञ्चं गिरिमतिक्रम्य क्रौञ्चगिरेः परतः मैनाको नाम पर्वतः वर्तत इति शेषः ॥ ३१ ॥

रा० टी०-स्त्रीणामिति । तत्र तत्र मैनाकस्य प्रदेशे प्रदेशे अश्वमुखीनां स्त्रीणां निकेतो निलयमस्तीति शेषः, तं देशं समतिक्रम्य यत्र वैखानसाः वालखिल्याः सन्तीति शेषः, तं सिद्धसेवितमाश्रमम् अवलोकयध्वमिति शेषः । सार्धश्लोकः संमिलितान्वयी ॥ ३१ ॥

गो० टी०-मैनाकस्त्विति । अश्वमुखीनां किंपुरुषस्त्रीणाम् ॥ ३२ ॥

गो० टी०-तं देशमिति । आश्रमं सिद्धसेवितम् अस्तीति शेषः ॥ ३३ ॥

रा० टी०-वन्दितव्य इति । ततस्तत्र वीतकल्मषाः निवृत्तपापाः सिद्धाः विनयान्वितैः भवद्भिर्वन्दितव्याः सीतायाः प्रवृत्तिर्वृत्तान्तश्च प्रष्टव्या ॥ ३२ ॥

गो० टी०-वन्द्या इति । तपःसिद्धाः अणिमाद्यष्टैश्वर्यसिद्धियुक्ताः ॥ ३४ ॥ ३५ ॥

३३] ति० टी०-वैखानसं वैखानसानामिदम् ॥ ३३ ॥

रा० टी०-हेमेति । तरुणादित्यसंकाशैः हंसैः विचरितं हेमपुष्करसंच्छन्नं सुवर्णाकृतिकमलैर्निबिडं वैखानसं सरस्तत्राश्रमेऽस्तीति शेषः ॥ ३३ ॥

३४] ति० टी०-विचरितं सेवितम् । औपवाह्यो वाहनम् ॥ ३४ ॥

रा० टी०-औपवाह्य इति । सार्वभौम इति स्मृतः ख्यातः कुबेरस्यौपवाह्यो वाहनं गजस्तं देशं करेणुभिः सह सदा पर्येति विचरति ॥ ३४ ॥

गो० टी०-औपवाह्य इति । औपवाह्यः राजार्हं वाहनम् 'राजवाहस्त्वौपवाह्यः' इत्यमरः ॥ ३६ ॥

३५] ति० टी०-तत्सरोऽतिक्रम्य वर्तमानं व्योम । कियानवकाशश्चन्द्रादिसर्वज्योतिर्गणप्रकाशरहितः ॥ ३५ ॥

रा० टी०-तदिति । तत् सरः समतिक्रम्य नष्टचन्द्रदिवाकरं चन्द्रदिवाकराभ्यां रहितमनक्षत्रगणं नक्षत्रगणरहितं निष्पयोदं पयोदरहितम् अनादिमत् आदिरहितं नित्यमित्यर्थः, व्योमाकाशमस्तीति शेषः ॥ ३५ ॥

गो० टी०-अथ महामेरुपर्यन्तेलावृतप्रदेशानुपदिशति-तत्सर इति । उत्तरत्र हिमवन्तं च मेरुं च समुद्रं च तथोत्तरमिति वक्ष्यमाणत्वादत्र मेरुकीर्तनप्रसक्तिरेव नास्तीति न भ्रमितव्यं व्योम वर्तत इति शेषः । व्योम्नो नष्टचन्द्रदिवाकरादित्वं नियतमार्गवर्तिनां चन्द्रमसार्कादीनां मेरुनिकटे किरणसंचाराभावात् । तदुक्तं विष्णुपुराणे-'यावत्पुरस्तात्तपति तावत्पृष्ठे च पार्श्वयोः । ऋते हेमगिरेर्मेरोरुपरि ब्रह्मणः सभाम् ॥' इति ॥ ३७ ॥

३६] ति० टी०-नापि सान्धकार इत्याह-गभस्तिभिरिवेति । चन्द्रादिज्योतींष्यभिभूयार्कगभस्तिसदृशैः स्वीयैर्गभस्तिभिः प्रकाश्यते । के ते यैः स्वगभस्तिभिः प्रकाश्यते तत्राह-विश्राम्यद्भिरिति । सुखोपविष्टैः स्वतपःसिद्धैः, अत एव देवकल्पैः सूर्यादिदेवतुल्यैः स्वयंप्रभैश्च सूर्यादिवत्स देशः प्रकाश्यते । यत्तु तत्र चन्द्रादीनां संचाराभाव एवेति, तन्न अग्रे सुप्रसिद्धचन्द्रादिसंचारवदुत्तरकुरूणां तदूर्ध्वसुपदेशादुपपत्तेः ॥ ३६ ॥

रा० टी०-गभस्तिभिरिति । सः चन्द्रादिरहितो देशः स्वयंप्रभैः तपस्सिद्धैः अर्कस्य गभस्तिभिरिव प्रकाश्यते ॥३६॥

गो० टी०-गभस्तिभिरिति । स देशः अर्कस्य गभ-

१ यत्रेति गो. पाठः । २ च निकेता इति गो. पाठः । ३ वन्द्यास्ते तु तपःसिद्धा इति गो. पाठः । ४ हेमेति गो. पाठः । ५ तस्मिन्निति गो. पाठः । ६ प्रकाशत इति गो. पाठः ।

तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा । उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ॥ ३७ ॥
ते नयन्ति परं तीरं सिद्धान्प्रत्यानयन्ति च । उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः ॥
ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः । ॥ ३८ ॥
नीलवैदूर्यपत्राढ्या नद्यस्तत्र सहस्रशः । रक्तोत्पलवनैश्चात्र मण्डिताश्च हिरण्मयैः ॥ ३९ ॥
तरुणादित्यसंकाशा भान्ति तत्र जलाशयाः । महार्हमणिरत्नैश्च काञ्चनप्रभकेसरैः ॥ ४० ॥
नीलोत्पलवनैश्चित्रैः स देशः सर्वतो वृतः । निस्तुलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः ॥ ४१ ॥
उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः । सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः ॥ ४२ ॥
जातरूपमयैश्चापि हुताशनसमप्रभैः । नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ॥ ४३ ॥
दिव्यगन्धरसस्पर्शाः सर्वकामान्स्रवन्ति च । नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः ४४ ॥

स्तिभिरिव स्थितैः स्वयंप्रभैः स्वतःसिद्धज्ञानैः तपःसिद्धैः प्रकाशते ॥ ३८ ॥

३७] ति० टी०–निम्नगा अस्तीति शेषः । अन्तःसुषिरो वेणुः कीचकः ॥ ३७ ॥

रा० टी०–तमिति । तं देशमतिक्रम्य शैलोदा नाम निम्नगा नद्यस्तीति शेषः, तस्याः उभयोस्तीरयोः कीचकाः सस्वना वेणवः सन्तीति शेषः, नाम प्रसिद्धमेतत् ॥ ३७ ॥

गो० टी०–तं त्विति । निम्नगा वर्तत इति शेषः ॥ ३९ ॥

गो० टी०–उभयोरिति । तस्याः शैलोदायाः उभयोस्तीरयोः कीचका नाम वेणवः सन्ति । ते उभयतीरजाः कीचकाः अन्योन्यसंग्रथिततया गमनसाधनभूताः सन्तः सिद्धान् परं तीरं नयन्ति प्रत्यानयन्ति च ॥ ४० ॥

३८] ति० टी०–परं तीरम् शैलोदाया इति शेषः । कृतपुण्यानां प्रतिश्रया निवासभूताः । पद्मिनीभिः सरसीभिः कृतोदकाः कृतोदककार्याः ॥ ३८ ॥

रा० टी०–ते इति । ते वेणवः सिद्धान् परं तीरं शैलोदाया इति शेषः, नयन्ति प्रत्यानयन्ति पूर्वतीरं प्रापयन्ति च । कृतपुण्यप्रतिश्रयाः कृतपुण्यैराश्रिताः उत्तराः कुरवस्तत्र शैलोदायास्तीरे सन्तीति शेषः ॥ ३८ ॥

गो० टी०–उत्तरा इति । उत्तराः कुरवः उत्तरकुरुसंज्ञिकाः देशाः वर्तन्त इति शेषः । कृतपुण्यानां प्रतिश्रया आश्रयभूताः आवासभूताः ॥ ४१ ॥

रा० टी०–तत इति । काञ्चनवत्पद्मानि याश्च ताभिः पद्मिनीभिः सरसीभिः कृतोदकाः संमिश्रसलिलाः नीलवैदूर्यपत्राढ्याः सहस्रशो नद्यस्तत्र कुरुषु भान्तीत्यपकृष्यते ॥ ३९ ॥

गो० टी०–तत इत्यादि । ततः कृतपुण्यप्रतिश्रयत्वाद्धेतोः कृतपुण्यभोग्यभूमित्वात् उक्तविशेषा नद्यः सन्तीति भावः । पद्मिनीभिः पद्मलताभिः कृतोदकाः पर्याप्तोदकाः 'युगपर्याप्तयोः कृतम्' इत्यमरः ॥ ४२ ॥

३९] ति० टी०–तत आरभ्योत्तरकुरुदेशस्य भोगभूमित्वकथनम् । दिव्यनद्योऽपि तत्र सन्तीत्याह—नीलेत्यादि ॥३९॥

रा० टी०–रक्तेति । हिरण्मयैः रक्तोत्पलवनैर्मण्डिताः शोभिताः तरुणादित्यसंकाशा जलाशयास्तत्र भान्ति॥४०॥४१॥

गो० टी०–रक्तेति । रक्तेत्यविभक्तिकनिर्देशः रक्तैरुत्पलवनैर्हिरण्मयैरुत्पलवनैः. तरुणादित्यसदृशैरुत्पलवनैश्चेत्यर्थः । तत्रात्र तेष्वेतेषु कुरुष्वित्यन्वयः ॥ ४३ ॥

४०] ति० टी०–जलाशयास्तटाकादयः ॥ ४० ॥

गो० टी०–महार्हेति । महार्हमणयो नीलरत्नानि तत्तुल्यपत्रैः ॥ ४४ ॥

४१] ति० टी०–निस्तुलाभिर्वर्तुलाभिः । 'निस्तुलं वृत्तम्' इत्यमरः ॥ ४१ ॥

रा० टी०–नीलेति । स देशः चित्रैर्नीलोत्पलवनैः सर्वतो वृतः । अर्धं पृथक् । निरिति । निस्तुलाभिः वर्तुलाभिः मुक्ताभिः महाधनैर्बहुमूल्यैर्जातरूपैश्च उद्भूतानि युक्तानि पुलिनानि यासां ताः सर्वरत्नमयैः अत एव चित्रैः नगोत्तमैः पर्वतश्रेष्ठैः जातरूपमयैः अत एव हुताशनसमप्रभैश्च नगोत्तमैः अवगाढाः व्याप्ताः निम्नगाः सन्तीति शेषः । श्लोकद्वयमेकान्वयि ॥ ४२ ॥

गो० टी०–निस्तुलाभिरिति । निस्तुलाभिः वर्तुलाभि-'वर्तुलं निस्तुलं वृत्तम्' इत्यमरः । महाधनैः बहुमूल्यैः उद्भूतपुलिनाः उन्नतपुलिनाः निम्नगा भान्तीति शेषः ॥ ४६ ॥

४२] ति० टी०–जातरूपैः स्वर्णैरुद्भूतपुलिना युक्तपुलिनाः । नगोत्तमैः पर्वतैरवगाढा व्याप्ताः ॥ ४२ ॥

गो० टी०–सर्वेति । नगोत्तमैः पर्वतश्रेष्ठैः अवगाढाः प्रविष्टा इति निम्नगाविशेषणम् ॥ ४६ ॥

४३-४४] ति० टी०–नगा वृक्षाः। पत्ररथैः पक्षिभिराकुला व्याप्ताः ॥ ४३ ॥ ४४ ॥

रा० टी०–नित्येति । नित्यं पुष्पाणि फलानि च येषु पत्ररथैः पक्षिभिराकुलाः व्याप्ताः दिव्या गन्धरसस्पर्शा येषां ते नगाः वृक्षाः सर्वकामान् स्रवन्ति ददति ॥ ४३ ॥

गो० टी०–नित्यपुष्पफला इति । पत्ररथाकुलाः पक्षिभिराकुलाः सर्वकामान् सर्वाभीष्टान् ॥ ४७ ॥

---

१ पत्राभिरिति गो. पाठः । २ सदृशैरिति गो. पाठः । ३ पत्रैरिति गो. पाठः । ४ उद्भूतेति गो. पाठः ।

मुक्तावैदूर्यचित्राणि भूषणानि तथैव च । स्त्रीणां यान्यनुरूपाणि पुरुषाणां तथैव च ॥ ४५ ॥
सर्वर्तुसुखसेव्यानि फलन्त्यन्ये नगोत्तमाः । महार्हमणिचित्राणि फलन्त्यन्ये नगोत्तमाः ॥ ४६ ॥
शयनानि प्रसूयन्ते चित्रास्तरणवन्ति च । मनःकान्तानि माल्यानि फलन्त्यत्रापरे द्रुमाः ४७ ॥
पानानि च महार्हाणि भक्ष्याणि विविधानि च । स्त्रियश्च गुणसंपन्ना रूपयौवनलक्षिताः ॥ ४८ ॥
गन्धर्वाः किंनराः सिद्धा नागा विद्याधरास्तथा । रमन्ते सततं तत्र नारीभिर्भास्वरप्रभाः ॥ ४९ ॥
सर्वे सुकृतकर्माणः सर्वे रतिपरायणाः । सर्वे कामार्थसहिता वसन्ति सह योषितः ॥ ५० ॥
गीतवादित्रनिर्घोषः सोत्कृष्टहसितस्वरैः । श्रूयते सततं तत्र सर्वभूतमनोरमः ॥ ५१ ॥
तत्र नामुदितः कश्चिन्नात्र कश्चिदसत्प्रियः । अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः ॥ ५२ ॥
तमतिक्रम्य शैलेन्द्रमुत्तरः पयसां निधिः । तत्र सोमगिरिर्नाम मध्ये हेममयो महान् ॥ ५३ ॥
[इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये । देवास्तं समवेक्षन्ते गिरिराजं दिवं गताः ॥]
स तु देशो विसूर्योऽपि तस्य भासा प्रकाशते । सूर्यलक्ष्याभिविज्ञेयस्तपतेव विवस्वता ॥ ५४ ॥

रा० टी०–नानेति । अन्ये नगोत्तमाः स्त्रीणां पुरुषाणां च यान्यनुरूपाणि योग्यानि तानि नानाकाराणि अनेकविधाकारविशिष्टानि वासांसि मुक्तावैदूर्यैः चित्राणि भूषणानि च फलन्ति । सार्धश्लोक एकान्वयी ॥ ४४ ॥ ४५ ॥

गो० टी०–नानाकाराणीति ॥ ४८ ॥

४५–५१] ति० टी०–इत उत्तरं केचिच्छ्लोकाः 'रमन्ते सततं तत्र नारीभिर्भास्वरप्रभाः' इत्यन्ताः प्रक्षिप्ताः, प्राचीनपुस्तकेष्वनुपलम्भादिति कतकः ॥ ४५—५१ ॥

रा० टी०–सर्वेति । अन्ये नगोत्तमाः सर्वर्तुसुखसेव्यानि सर्वर्तुषु सुखेन सेव्यानि फलानि फलन्ति । अन्ये नगोत्तमाः महार्हमणिवत् चित्राणि फलानि फलन्ति ॥ ४६ ॥

रा० टी०–शयनानीति । चित्रास्तरणवन्ति विचित्रास्तरणविशिष्टानि शयनानि शय्याः मनःकान्तानि मनोहराणि माल्यानि मालाश्च महार्हाणि बहुमूल्यानि पानानि च विविधानि भक्ष्याणि च रूपयौवनलक्षिताः रूपयौवनैः प्रकाशिताः गुणसंपन्नाः स्त्रियश्च अपरे द्रुमाः फलन्ति । श्लोकद्वयमेकान्वयि ॥ ४७ ॥ ४८ ॥

रा० टी०–गन्धर्वा इति । भास्वरप्रभाः गन्धर्वादयः नारीभिस्तत्र रमन्ते ॥ ४९ ॥

गो० टी०–मुक्तेति । सर्वर्तुसुखसेव्यानि हेमन्ताद्यृतुष्वपि सुखेन सेवितुं योग्यानि ॥ ४९–५२ ॥

रा० टी०–सर्व इति । ये सर्वे सुकृतकर्माणस्तत्र वसन्ति ते सर्वे सहयोषितः योषित्सहिताः कामार्थसहिताः इच्छाविषयीभूतार्थैर्विषयमाणाः सन्तः रतिपरायणा भवन्तीति शेषः॥५०॥

गो० टी०–सर्व इति । सहयोषितः योषित्सहिताः ॥५२॥

रा० टी०–गीतेति । सोत्कृष्टहसितस्वनः उत्कृष्टहसितस्वनसहितः सर्वभूतमनोरमः गीतवादित्रनिर्घोषः सततं श्रूयते॥५१॥

गो० टी०–गीतेति । सोत्कृष्टहसितस्वनः उत्कृष्टहासशब्दसहितः ॥ ५४ ॥

५२] ति० टी०–असदविद्यमानं प्रियं यस्य तादृशः॥५२॥

रा० टी०–तत्रेति । अमुदितः प्रमोदरहितः तत्र कश्चिन्, असत्प्रियः असत्कर्मविषयकप्रीतिविशिष्टः अत्र उत्तरकुरुषु कश्चित् न । अहन्यहनि प्रतिदिनं मनोरमाः गुणास्तत्र वर्धन्ते ॥ ५२ ॥

गो० टी०–तत्रेति । असत्प्रियः अविद्यमानाऽनृतः । गुणाः सुखादयः ॥ ५९ ॥

५३] ति० टी०–अत्र सुमेर्वन्वेषणं नोक्तम्, तत्र रक्षसां वासासंभवादित्याहुः । मध्ये उत्तरसमुद्रमध्ये ॥ ५३ ॥

रा० टी०–तमिति । तं देशमतिक्रम्य उत्तरः परादिग्वर्ती पयसां निधिः क्षीराब्धिरस्तीति शेषः, तत्र क्षीराब्धौ हेममयो महान् सोमगिरिरस्ति ॥ ५३ ॥

रा० टी०–इन्द्रेति । इन्द्रादिलोकगताः ये देवास्ते दिवं गतं गिरिराजं समवेक्षन्ते ॥ ५४ ॥

गो० टी०–समतिक्रम्येति । पयसां निधिः लवणसमुद्रः अस्तीति शेषः ॥ ५६ ॥

गो० टी०–तत्रेति । तत्र लवणसमुद्रे मध्ये मध्ये देशे ये दिवं गता इत्यनुषज्यते ॥ ५७ ॥

५४] ति० टी०–स तु देशो विसूर्योऽपि सूर्यसंचाररहितोऽपि तस्य भासा सोमगिरिप्रभया तपता विवस्वता युक्तदेश इव सूर्यलक्ष्म्या सूर्योपेतदेशश्रिया युक्तः प्रकाशते ॥ ५४ ॥

रा० टी०–स इति । तपता विवस्वता सूर्येणेव तस्य सोमगिरेः भासा प्रकाशेन विसूर्यः सूर्यचन्द्रादिरहितोऽपि

१ चार्पीति गो. पाठः । २ महार्हाणि चेति गो. पाठः । ३ हैमानीति गो. पाठः । ४ नागविद्येति रा. पाठः । ५ स्वन इति गो. रा. पाठः । ६ र इति गो. पाठः । ७ श्लोकोऽयमधिकः गो. रा. पाठे । ८ गतमिति रा. पाठः ।

भगवांस्तत्र विश्वात्मा शंभुरेकादशात्मकः । ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः ॥ ५५ ॥
न कथंचन गन्तव्यं कुरूणामुत्तरेण वः । अन्येषामपि भूतानां नानुक्रामति[2] वै गतिः ॥ ५६ ॥
स हि सोमगिरिर्नाम देवानामपि दुर्गमः । तमालोक्य ततः क्षिप्रमुपावर्तितुमर्हथ[3] ॥ ५७ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः । अभास्करममर्यादं न जानीमस्ततः परम् ॥ ५८ ॥
सर्वमेतद्विचेतव्यं यन्मया परिकीर्तितम् । यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः ॥ ५९ ॥
ततः कृतं दाशरथेर्महत्प्रियं महत्प्रियं[1] चापि ततो मम प्रियम् ।
कृतं भविष्यत्यनिलानलोपमा विदेहजादर्शनजेन कर्मणा ॥ ॥ ६० ॥

स देशः सूर्यलक्ष्म्याभिविज्ञेयो देश इव प्रकाशते । इव उभयान्वयी ॥ ५५ ॥

गो० टी०–स त्विति । स देशः विसूर्य अपि रात्रौ विगतसूर्योऽपि तस्य सोमगिरेर्भासा प्रकाशते । कथमिव सूर्यलक्ष्म्या अभिविज्ञेयः ज्ञातव्यपदार्थको देशः तपता विवस्वतेव ॥ ५८ ॥

५५] ति० टी०–विश्वमतति व्याप्नोतीति विश्वात्मा व्यापकस्तेन विष्णुरूपः । 'विष्लृ व्याप्तौ' इत्यद्यसारात् । स एव शंभुः शं भवत्यस्मात्स एवैकादशात्मक एकादशानुवाकार्थैकादशरुद्रात्मकः । एवं ब्रह्मा बृंहणत्वाज्जगत्स्रष्टृत्वात् । एवं रूपत्रयात्मा भगवांस्तत्र सोमगिरौ कार्यब्रह्मलोकत्वाद्वसतीत्यर्थः ॥ ५५ ॥

रा० टी०–भगवानिति । ब्रह्मर्षिपरिवारितस्तत्र सोमगिरौ विश्वात्मा सकलजगन्नियन्ता एकादशात्मकः भगवान् शम्भुः देवेशः ब्रह्मा च वसति ॥ ५६ ॥

गो० टी०–भगवानिति । विश्वात्मा विश्वशरीरकः भगवान् षाड्गुण्यपरिपूर्णो वासुदेवः 'एवमेव महान् शब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥' इत्युक्तेः नचेदमपि शम्भुविशेषणम् एकादशात्मकत्वविरोधात् । न हि विश्वात्मकत्वमेकादशकत्वं चैकत्र संभवति । एकादशात्मकः एकादशमूर्तिः शम्भुः रुद्रः देवेशो ब्रह्मा ब्रह्मर्षिपरिवारितः तत्र वसति । इयं च क्रिया सर्वत्रापि संबध्यते । यथा कश्चित् प्रकरणाभावात् विष्णुरत्र नोच्यत इति कथयेत् तर्हि रुद्रोऽपि नोच्यते । कथमिति चेत् शं भावयतीति शम्भुरिति व्युत्पत्त्या 'शम्भू ब्रह्मत्रिलोचनौ' इति कोशकारवचनाच्च सर्वाण्यपि विशेषणानि ब्रह्मपराणि भवेयुरिति ॥ ५९ ॥

५६] ति० टी०–नानुक्रामति वै गतिः । तस्य कार्यब्रह्मलोकत्वेन ब्रह्मर्षिभ्यतिरिक्तस्य तत्रागतेः । ब्रह्मर्षिपदेन दहरादिमार्गेण ब्रह्मोपासका ऋषय उच्यन्ते ॥ ५६ ॥

रा० टी०–नेति । कुरूणामुत्तरेण पथा वो युष्माकमन्येषामपि भूतानां गतिः न अनुक्रामति अस्ति, अतः वो युष्माभिः कथञ्चन न गन्तव्यम् । व इत्युभयान्वयि ॥ ५७ ॥

गो० टी०–न कथंचनेति । कुरूणामुत्तरेण 'षष्ठ्यपीष्यते' इत्यनेनैनपायोगे षष्ठी । अन्येषामपि शक्तिविशेषविशिष्टदैत्यादीनामपि वः युष्माभिः न गन्तव्यम् ॥ ६० ॥ ६१ ॥

५७–५८] ति० टी०–तदाह—देवानामपि दुर्गम इति ॥ ५७ ॥ ५८ ॥

रा० टी०–स इति । स सोमगिरिः देवानामपि दुर्गमः अतस्तमालोक्य क्षिप्रमुपावर्तितुमर्हथ ॥ ५८ ॥

रा० टी०–एतावदिति । हे वानरपुङ्गवाः ! एतावदेव वानरैर्गन्तुं शक्यम्, अतस्ततः परं न जानीमः ॥ ५९ ॥

गो० टी०–एतावदिति । एतावत् उत्तरकुरुदेशपर्यन्तं ततः परम् उत्तरकुरुदेशात् परं समुद्रद्वीपादिकम् अभास्करममर्यादं च प्रदेशं न जानीमः । ततः परस्य देशस्य सर्वैर्गन्तुमशक्यत्वेन मयाऽपि अनवगतत्वादिति भावः ॥ ६२ ॥

५९] ति० टी०–तत्रापि मतिः क्रियतामिति अन्वेषणायेति भावः ॥ ५९ ॥

रा० टी०–सर्वमिति । यन्मया परिकीर्तितं तत्सर्वं विचेतव्यं यत् अन्यत् उक्तदेशसमीपस्थं नोक्तं तत्रापि मतिः अन्वेषणनिश्चयः क्रियताम् ॥ ६० ॥

गो० टी०–सर्वमेतदिति । यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः गम्यत्वेनोक्तप्रदेशानां यत्पार्श्वादिकमनुक्तं तत्रापि अन्वेषणे मतिः कर्तव्येत्यर्थः ॥ ६३ ॥

६०] ति० टी०–प्रियमित्यस्य स्वस्येत्यादिः । विदेहजादर्शनजेन कर्मणा विदेहजादर्शनमुद्दिश्य जातेन कर्मणा । अन्वेषणकर्मणेति यावत् ॥ ६० ॥

रा० टी०–तत इति । हे अनिलानलोपमाः ! विदेहजादर्शनजेन सीतादर्शनजनकेन कर्मणा दाशरथेः महत्प्रियं यदि कृतं भवद्भिः संपादितं भविष्यति ततस्तस्मात् रामप्रियात् ममापि महत्तरं प्रियं प्रीतिर्भविष्यति ॥ ६१ ॥

गो० टी०–तत इति । ततः अन्वेषणानन्तरं विदेहजादर्शनजेन कर्मणा दाशरथेर्महत्प्रियं कृतं भविष्यति मम चापि ततः दाशरथिप्रियात् महत्तरं प्रियं कृतं भविष्यतीति योजना ॥ ६४ ॥

१ अपीति गो. पाठः । २ नातीति गो. पाठः । ३ तरमिति गो. रा. पाठः

ततः कृतार्थाः सहिताः सबान्धवा मयार्चिताः सर्वगुणैर्मनोरमैः ।
चरिष्यथोर्वीं प्रति शान्तशात्रवाः सहप्रियाभूतधराः प्लवङ्गमाः ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ।

सुग्रीवेण पूर्वपराक्रमं प्रशस्य सीतान्वेषणस्य विशेषनिर्वहणे हनुमति समुद्दिष्टे तद्व्यापारेणान्वेषणस्य विशेषभर तस्मिन्मन्वानो रामः स्वनामाङ्कितमङ्गुलीयकमभिज्ञानत्वेन सीताप्रत्ययनार्थं हनुमते दिदेश । गृहीतनियोगो मारुतिः श्रीरामचरणावभिवन्द्य कपिवाहिन्या समं प्रतस्थे ।

विशेषेण तु सुग्रीवो हनूमत्यर्थमुक्तवान् । स हि तस्मिन्हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥ १ ॥
अब्रवीच्च हनूमन्तं विक्रान्तमनिलात्मजम् । सुग्रीवः परमप्रीतः प्रभुः सर्ववनौकसाम् ॥ २ ॥
न भूमौ नान्तरिक्षे वा नाम्बरे नामरालये । नाप्सु वा गतिसङ्गं ते पश्यामि हरिपुङ्गव ॥ ३ ॥
सासुराः सहगन्धर्वाः सनागनरदेवताः । विदिताः सर्वलोकास्ते ससागरधराधराः ॥ ४ ॥
गतिर्वेगश्च तेजश्च लाघवं च महाकपे । पितुस्ते सदृशं वीर मारुतस्य महौजसः ॥ ५ ॥

६१] ति० टी०–भूतधरा भूतैः प्राणिभिर्ध्रियन्ते ते भूतधराः । प्राणिभिरुपजीव्या इत्यर्थः ॥ ६१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०–तत इति । हे प्लवङ्गमाः ! ततः रामप्रियाचरणात् हेतोः सर्वगुणैः सर्वसद्गुणविशिष्टैः मनोरमैः पदार्थैः मयार्चिताः सत्कृताः अत एव शान्तशात्रवाः सहिता हितसहिताः सबान्धवाः बान्धवसहिताः सहप्रियाः स्त्रीसहिताः यूयं भूतधराः भूतैर्ध्रियन्ते यास्तद्वन्तः मत्तः प्राप्तजीविका इत्यर्थः, अत एव कृतार्थाः सन्तः उर्वीं प्रति चरिष्यथ ॥ ६२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०–तत इति । भूतधराः प्राणिभूतः प्राणिभिरुपजीव्या इति यावत् ॥ ६१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

१] ति० टी०–हनूमत्यर्थस्य सविशेषणस्य हेतुः—स हीति । अर्थसाधने तद्विषये निश्चितार्थः तादृशार्थतद्विषयकनिश्चयवान् ॥ १ ॥

रा० टी०–हनूमन्तं प्रति सुग्रीवोक्तिं वर्णयितुमुपक्रमते–विशेषेणेति । हि यतः स सुग्रीवः अर्थसाधने अर्थानां साधके हरिश्रेष्ठे तस्मिन् हनुमति निश्चितो दृढीकृतः अर्थः सीतादर्शनसिद्धियेन सः अतः विशेषेण उक्तवान् हनुमन्तमित्यर्थः ॥ १ ॥

गो० टी०–अथ निश्चितकार्यसाधनसामर्थ्याय हनुमते अङ्गुलीयकदानं चतुश्चत्वारिंशे–विशेषेण त्वित्यादि । हनुमति विषये अर्थं वक्ष्यमाणार्थम् उक्तवान् । विशेषार्थकथने हेतुमाह–स हीति । अर्थसाधने विषये निश्चितार्थः ॥ १ ॥

२] ति० टी०–उक्तिप्रकारं दर्शयति––अब्रवीच्चेति । सर्ववनौकसाम् मध्य इति शेषः ॥ २ ॥

रा० टी०–विशेषं प्रकटयितुमाह—अब्रवीदिति । विक्रान्तमतिबलवन्तम् अनिलात्मजं हनुमन्तं परमप्रीतः अयमर्थं साधयितेति बुद्ध्या अतिप्रीतिमान् सर्ववनौकसां प्रभुः सुग्रीवः अब्रवीत् ॥ २ ॥

गो०टी०–संग्रहेणोक्तमर्थं विस्तरेण दर्शयति–अब्रवीच्चेत्यादिना । न भूमाविति । भूमौ सजातीयप्रतिपक्षबहुलायाम् । अन्तरिक्षे निरालम्बे मेघादिसंचारमार्गे अम्बरे वातचक्राक्रान्तप्रदेशे अमरालये प्रबलाधिष्ठिते स्वर्गे अप्सु तिर्यक्संचारानर्हासु वा गतिसङ्गं गतिविलम्बं न पश्यामि ॥ २–४ ॥

३] ति० टी०–अन्तरिक्षं पृथिव्यासन्नपक्षिमार्गः । अम्बरं मेघमार्गः । अमरालयः स्वर्गः गतिसङ्गं गतिप्रतिबन्धम् ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह—नेत्यादिभिः । भूम्यादिषु ते अगतिसङ्गं गतिसंबन्धनिवर्तकं न पश्यामि । अन्तरिक्षं पक्षिगतिदेशमात्रमिति नाम्बरेण पौनरुक्त्यम् ॥ ३ ॥

४] ति०टी०–सर्वलोकविशेषणम्–सासुरा इत्यादि॥४॥

रा० टी०–सेति । सासुराः असुरसहिताः सनागनरदेवताः नागनरदेवतासहिताः ससागरधराधराः सागरशैलसहिताः सर्वलोकास्ते विदिताः ज्ञाताः सन्तीति शेषः ॥ ४ ॥

५] ति० टी०–लाघवं क्षिप्रकारित्वम् ॥ ५ ॥

---

१ हनुमतीति गो. रा. पाठः ।

तेजसा वाऽपि ते भूतं न समं भुवि विद्यते । तद्यथा लभ्यते[1] सीता तत्त्वमेवानुचिन्तय ॥ ६ ॥
त्वय्येव हनुमन्नस्ति[2] बलं बुद्धिः पराक्रमः । देशकालानुवृत्तिश्च नयश्च नयपण्डित ॥ ७ ॥
ततः कार्यसमासङ्गमवगम्य हनूमति[3] । विदित्वा हनुमन्तं च चिन्तयामास राघवः ॥ ८ ॥
सर्वथा निश्चितार्थोऽयं हनूमति हरीश्वरः । निश्चितार्थतरश्चापि हनूमान्कार्यसाधने[4] ॥ ९ ॥
तदेवं प्रस्थितस्यास्य परिज्ञातस्य कर्मभिः । भर्त्रा परिगृहीतस्य ध्रुवः कार्यफलोदयः[5] ॥ १० ॥
तं समीक्ष्य महातेजा व्यवसायोत्तरं हरिम् । कृतार्थ इव संहृष्टः[6] प्रहृष्टेन्द्रियमानसः ॥ ११ ॥
ददौ तस्य ततः प्रीतः स्वनामाङ्कोपशोभितम् । अङ्गुलीयमभिज्ञानं राजपुत्र्याः परंतपः ॥ १२ ॥
अनेन त्वां हरिश्रेष्ठ चिह्नेन जनकात्मजा । मत्सकाशादनुप्राप्तमनुद्विग्नाऽनुपश्यति[7] ॥ १३ ॥

रा० टी०–गतिरिति । हे महाकपे ! हे वीर ! ते गत्यादि महौजसो मारुतस्य पितुः सदृशमस्तीति शेषः ॥ ५ ॥

गो० टी०–गतिः अप्रतिहतगतिः ॥ ॥ ५ ॥

६] ति० टी०–भूतं प्राणी । तत्तस्माद्यथा सीता लभ्यते तदर्थजातं त्वमेवानुचिन्तय ॥ ६ ॥

रा० टी०–तेजसेति । ते तेजसा समं तेजः भुवि न भूतम् अभवत् न विद्यते तत् तस्मात् हेतोः सीता यथा लभतां तथा तत् सीतालाभं त्वमेवानुचिन्तय ॥ ६ ॥

गो० टी०–तेजसेति । भूतं जन्तुः तत् तस्मात्कारणात् तत्सीतान्वेषणम् उपपादय संपादय ॥ ६ ॥

७] ति० टी०–बलं शारीरम् पराक्रम उत्साहः देशकालानुवृत्तिस्तदुचितकर्मानुष्ठानम् नये नीतिशास्त्रे पण्डितेति संबुद्धिः ॥ ७ ॥

रा० टी०–त्वयीति । नयपण्डित ! हे नीति शास्त्राभिज्ञ ! हे हनुमन् ! बुद्ध्यादित्रयं देशकालानुवृत्तिः देशकालानुसरणं च त्वय्येवास्ति ॥ ७ ॥

गो० टी०–त्वयीति । नयपण्डितेत्यनन्तरमितिकरणं बोध्यम् इत्यग्रवीदिति पूर्वेणान्वयः ॥ ७ ॥

८] ति० टी०–तत एवं सुग्रीववचनात्कार्यसमासङ्गं कार्यसिद्धिसंबन्धमवगम्य स्वयं च तत्सामर्थ्यानुभवेन तस्मिन्कार्यसाधकत्वं विदित्वा, चात्तद्गम्यदेश एव सीतां विदित्वा चिन्तयामास अस्मिन्स्वकर्तव्यसमर्पणं युक्तमिति विचारयामास ॥८॥

रा० टी०–तत इति । ततः सुग्रीवोक्त्यनन्तरं कार्यसमासङ्गं स्वकार्यसिद्धिम् अवगम्य हनूमति अवगम्यः सर्वकार्यसाधकत्वेन सर्वज्ञातव्यः स एव हनुमानिति कर्मधारयः तस्मिन् विदित्वा ज्ञात्वा राघवो हनुमन्तं चिन्तयामास तद्गुणान् तस्मारेत्यर्थः ॥ ८ ॥

गो० टी०–तत इति । ततः सुग्रीववचनात् हनूमति कार्यसमासङ्गं कार्यविषयासक्तिमवगम्य अस्मिन् सुग्रीवेण स्वकार्यभारो निक्षिप्त इति ज्ञात्वेत्यर्थः, स्वयमपि हनुमन्तं कार्यसाधकं विदित्वा चिन्तयामास ॥ ८ ॥

९] ति० टी०–चिन्ताप्रकारमाह—सर्वथेति । निश्चितार्थ एतदर्थविषयकनिश्चयवान् । स्वतोऽप्ययमतिशयेन कार्यसाधने निश्चितार्थः ॥ ९ ॥

रा० टी०–चिन्ताजनितनिश्चयमाह—सर्वथेति । कार्यसाधने निश्चितः अर्थतरः अत्युपायो येन स यो हनुमान् तस्मिन् हनूमति सर्वथा सर्वप्रकारेण निश्चितः अर्थो जानकीदर्शनं येन सः हरीश्वरः सुग्रीवोऽस्तीति शेषः । एतेन सुग्रीवस्य याथार्थ्यवेदितृत्वं व्यञ्जितम् । किंच हरीश्वरो हनूमति निश्चितार्थोऽस्ति हनूमांस्तु निश्चितार्थतरः एतेन हनुमतो ज्ञानाधिक्यं सूचितम् । पूर्वकल्पेतरार्थस्याविवक्षया नेयं व्यञ्जनेति बोध्यम् ॥ ९ ॥

गो० टी०–चिन्ताप्रकारमाह–सर्वथेत्यादिना श्लोकद्वयेन । अन्ते इतिकरणं बोध्यम् । कार्यसाधने विषये निश्चितार्थः निश्चितकार्यसाधकः हनुमानपि निश्चितार्थकरः ॥ ९ ॥

१०] ति० टी०–प्रस्थितस्य भर्त्रा प्रस्थापितस्य । परिज्ञातस्य परीक्षितस्य परिगृहीतस्य श्रेष्ठतयेति शेषः । कार्यस्य फलोदयः सीतादर्शनप्राप्तिरूपः स ध्रुवो निश्चितार्थः ॥ १० ॥

रा० टी०–तादिति । कर्मभिः पूर्वं तत्कृतानेककार्यैः भर्त्रा परिज्ञातस्य अत एव परिगृहीतस्य मत्कार्यसाधकत्वेन स्वीकृतस्य प्रस्थितस्यास्य हनूमतस्तत् मदीप्सितः उत्तमः कार्यफलोदयः क्रियाफलप्रकाशः ध्रुवो भवितेति शेषः । तदिति सामान्ये नपुंसकम् ॥ १० ॥

गो० टी०–तदेवमिति । अस्य कार्यफलोदयः अस्य संबन्धिनी कार्यसिद्धिः ध्रुवः निश्चितः ॥ १० ॥

११] ति० टी०–व्यवसायोत्तरं कार्यसाधने श्रेष्ठं तं हरिं हनुमन्तं समीक्ष्य प्रहृष्टेन्द्रियमानसो बभूव ॥ ११ ॥

रा० टी०–तमिति । महातेजा रामः हरिं हनुमन्तं व्यवसायोत्तरं कार्यनिष्पादने श्रेष्ठं वीक्ष्य ज्ञात्वा कृतार्थः सिद्धप्रयोजन इव संहृष्टः अत एव प्रहृष्टानि प्रहर्षितानि इन्द्रियमानसानि सुग्रीवादीनामिन्द्रियादीनि येन सोऽभवदिति शेषः ॥११॥

गो० टी०–तमिति । व्यवसायोत्तरं व्यवसायेन उत्तरं श्रेष्ठं कृतार्थः संवृत्त इव अमन्यतेति शेषः ॥ ११ ॥

१२-१३] ति० टी०–ततो निश्चितकार्यसाधकत्वादेव हेतो राजपुत्र्या अभिज्ञानं प्रत्यभिज्ञासाधनं ददौ ॥ १२ ॥ १३॥

१ लभते इति रा. पाठः । २ उपपादयेति गो. पाठः । ३ स्वस्तीति गो. पाठः । ४ कर इति गो. पाठः । ५ हनुमानिति गो. पाठः । ६ यवमिति गो. पाठः । ७ संवृत्त इति गो. पाठः ।

व्यवसायश्च ते वीर सत्त्वयुक्तश्च विक्रमः । सुग्रीवस्य च संदेशः सिद्धिं कथयतीव मे ॥ १४ ॥
स तेदृष्ट्वा हरिश्रेष्ठः कृत्वा मूर्ध्नि कृताञ्जलिः । वन्दित्वा चरणौ चैव प्रस्थितः प्लवगर्षभः ॥ १५ ॥
स तत्प्रकर्षन्हरिणां महद्बलं बभूव वीरः पवनात्मजः कपिः ।
गताम्बुदे व्योम्नि विशुद्धमण्डलः शशीव नक्षत्रगणोपशोभितः ॥ १६ ॥
अतिबल बलमाश्रितस्तवाहं हरिवर विक्रम विक्रमैरनल्पैः ।
पवनसुत यथाधिगम्यते सा जनकसुता हनुमंस्तथा कुरुष्व ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ।

गृहीतसुग्रीवनिदेशा विनतादयः कीशाधिपाः सवीरवाद गर्जन्तः स्वस्ववाहिनीमनुकर्षन्तः सुग्रीवोद्दिष्टां स्वस्वदिशमभिप्रतरस्थिरे ।

सर्वांश्चाहूय सुग्रीवः प्लवगान्प्लवगर्षभः । समस्तांश्चाब्रवीद्राजा रामकार्यार्थसिद्धये ॥ १ ॥

रा० टी०–दृष्टाविति । राजपुत्र्याः सीतायाः अभिज्ञानं रामप्रेषितोऽयमिति ज्ञापकं स्वनामाङ्केन उपशोभितम् अङ्गुलीयं तस्य तस्मै हनुमते परन्तपो रामो ददौ ॥ १२ ॥

गो० टी०–दृष्टाविति । राजपुत्र्या अभिज्ञानं अभिज्ञायतेनेनेत्यभिज्ञानम् । नन्वस्यकलधनस्य वन्यवृत्त्या वर्तमानस्य कुतोऽङ्गुलीयकमिति चेत् इदमेकमेतत्कार्यार्थं रक्षितवान् अत एवाङ्गुलीयमुन्मुच्यते नोक्तम् । यद्वा रामनामाङ्कितमङ्गुलीयकं सीतायाः कदाचिद्रावणागमनात् पूर्वं प्रणयपरत्वेन रामेण स्वीकृतमिति बोध्यम् । यद्वा भार्याजेहेन कनिष्ठिकायां सदा मुद्रिका धार्यते इति देशाचारः । यद्वा विवाहकाले जनकेन दत्तमिदं वरालङ्कारत्वेन गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणमित्युक्तेः ॥ १२ ॥

रा० टी०–नन्वेतत्किमर्थमिदं दीयते इत्यत आह–अनेनेति । हरिश्रेष्ठ हे हनुमन् ! चिह्नेन ज्ञापकेन अनेन अङ्गुलीयेन अनुद्विग्रा उद्वेगरहिता सती मत्सकाशादनुप्राप्तं त्वां जनकात्मजा अनुपश्यति अनुद्रष्टा ॥ १३ ॥

गो० टी०–भवद्वचनमेवालं किमर्थमेतद्दीयते तत्राह–अनेनेति । पश्यति द्रक्ष्यति ॥ १३ ॥

१४] ति० टी०–तावत्पर्यन्तं मद्गमननिश्चयः कथमत आह–व्यवसायश्चेति ॥ १४ ॥

रा० टी०–व्यवसाय इति । सुग्रीवस्य संदेशः सम्यगुपदेशः ते व्यवसायः निश्चितकार्यसाधनं च सत्त्वयुक्तः महाबलविशिष्टस्ते विक्रमो वेगश्च मे सिद्धिं कार्यनिष्पत्तिं कथयतीव॥१४॥

गो० टी०–हनुमन्तं प्रशंसति–व्यवसाय इति । सत्त्वयुक्तो विक्रमः बलं च विक्रमश्चेत्यर्थः ॥ १४ ॥ १५ ॥

१५] ति० टी०–तदभिज्ञानपदार्थम् ॥ १५ ॥

रा० टी०–स इति । कृतौ अञ्जली येन स हनुमान् तत् अङ्गुलीयं गृहीत्वा च मूर्ध्नि कृत्वा चरणौ वन्दित्वा च प्रस्थितः अभवदिति शेषः ॥ १५ ॥

१६] ति० टी०–स तद्धरिणाम् । दीर्घाभाव आर्षः । महद्बलं प्रकर्षन् ॥ १६ ॥

रा० टी०–स इति । हरिणां हरीणां तत् महत् बलं प्रकर्षन् आकर्षन् सन् पवनात्मजो हनुमान् गताम्बुदे निवृत्तमेघे व्योम्नि विशुद्धमण्डलः घनाद्यावरणरहितमण्डलवान् शशीव बभूव॥१६॥

गो० टी०–स तदिति । प्रकर्षन् नयन् । हरिणामित्यत्र दीर्घाभाव आर्षः ॥ १६ ॥

१७] ति० टी०–हरिवरविक्रम श्रेष्ठसिंहविक्रम ! अतिबलपवनसुत हनूमन्! तवैव बलमाश्रितोऽहमस्मि, अतोऽनल्पैर्विक्रमैर्जनकसुता यथाऽधिगम्यते तथा कुरुष्व । इत्यब्रवीदिति शेषः । रामसुग्रीवयोः साधारणमिदं वचः ॥ १७ ॥

कर्तकेन तु चतुश्चित्वारिंशत्संख्यश्लोकः सर्गोऽयमुक्तः ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रा० टी०–हनुमन्तं प्रति रामोक्तिमाह—अतीति । हे हरिवर ! तवातिबलमहमाश्रितः अतः सा हृता जनकसुता यथा अधिगम्यते तथा अनल्पैः विक्रमैरुपलक्षितस्त्वं कुरुष्व अत एव विक्रम गच्छ ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

गो० टी०–पुनरपि गच्छन्तं प्रति रामवचनम्–अतिबलेति । अतिबलेति संबुद्धिः । हरिवरविक्रम सिंहश्रेष्ठविक्रम! सुग्रीवतुल्यविक्रमेति वा । श्लोकान्ते इति रामोऽब्रवीदित्यध्याहार्यम् ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥४४॥

१] ति० टी०–सर्वानिति ॥ १ ॥

१ तमिति गो. पाठः । २ स्थाप्येति गो. पाठः । ३ प्लवगोत्तम इति गो. पाठः । ४ समस्तानब्रवीद्भूय इति गो. पाठः ।

एवमेतद्विचेतव्यं भवद्भिर्वानरोत्तमैः । तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः ॥ २ ॥
शलभा इव संछाद्य मेदिनीं संप्रतस्थिरे । रामः प्रस्रवणे तस्मिन्न्यवसत्सहलक्ष्मणः ॥ ३ ॥
प्रतीक्षमाणस्तं मासं सीताधिगमने कृतः । उत्तरां तु दिशं रम्यां गिरिराजसमावृताम् ॥ ४ ॥
प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा । पूर्वां दिशं प्रतिययौ विनतो हरियूथपः ॥ ५ ॥
ताराङ्गदादिसहितः प्लवगः पवनात्मजः । अगस्त्याचरितामाशां दक्षिणां हरियूथपः ॥ ६ ॥
पश्चिमां चैव दिशं घोरां सुषेणः प्लवगेश्वरः । प्रतस्थे हरिशार्दूलो दिशं वरुणपालिताम् ॥ ७ ॥
ततः सर्वा दिशो राजा चोदयित्वा यथातथम् । कपिसेनापतिर्वीरो मुमोद सुखितः सुखम् ॥ ८ ॥
एवं संचोदिताः सर्वे राज्ञा वानरयूथपाः । स्वां स्वां दिशमभिप्रेत्य त्वरिताः संप्रतस्थिरे ॥ ९ ॥
[आनयिष्यामहे सीतां हनिष्यामश्च रावणम् ।]
नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः । क्ष्वेडन्तो धावमानाश्च विनदन्तो महाबलाः ॥ १० ॥
एवं संचोदिताः सर्वे राज्ञा वानरयूथपाः । आनयिष्यामहे सीतां हनिष्यामश्च रावणम् ॥ ११ ॥
अहमेको वधिष्यामि प्राप्तं रावणमाहवे । ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम् ॥ १२ ॥

रा० टी०-प्रेष्यवानरान् प्रति सुग्रीवोक्तिमाह-सर्वानिति। समस्तान् संघीभूतान् सर्वान् प्लवगान् राजा सुग्रीवः आहूय संबोध्य भवद्भिर्वानरोत्तमैः एतदुपदिष्टदेशजातं विचेतव्यम्, एवं वचः रामकार्यार्थसिद्धये अब्रवीत् । सार्धश्लोक एकान्वयी ॥१॥

गो० टी०-अथ प्रेषितानां वानराणां सज्जाह उच्यते पञ्चचत्वारिंशे-सर्वांश्चेत्यादि । सर्वानाहूय ततः समस्तान् संघीभूतान् प्लवगान् अब्रवीत् । यद्वा सम इति छेदः समः सर्वत्र पक्षपातरहितः एतत्पूर्वोक्तं स्वां स्वां दिशं स्वांशभूमण्डलम् एवम् अस्मदुक्तप्रकारेण इत्यब्रवीदिति संबन्धः ॥ १ ॥

२] ति० टी०-उक्तिप्रकारः—एवमिति ॥ २ ॥

रा० टी०-तदिति । हरिपुङ्गवाः भर्तुरुग्रशासनं विज्ञाय मेदिनीं शलभा इव संछाद्य संप्रतस्थिरे । अर्धद्वयमेकान्वयि ॥२॥

गो० टी०-तदिति। शलभा इति बहुत्वमात्रे दृष्टान्तः॥२॥

३] ति० टी०-प्राप्तनियोगानामुद्योगः—शलभा इवेति ३

रा० टी०-राम इति । सीताधिगमने सीतावृत्तान्तबोधने यो मासः कृतः अवधित्वेन निश्चितः तं मासं प्रतीक्षमाणः सहलक्ष्मणो रामः प्रस्रवणे गिरौ न्यवसत् ॥ ३ ॥

गो० टी०-राम इति । सीताधिगमे सीताधिगमनिमित्तं कृतः कृतसंकेतः ॥ ३ ॥

४-७] ति०टी०-यः सीताभ्यधिगमे तद्वृत्तान्तज्ञानेऽवधिभूतः कृतस्तं मासमित्यन्वयः । गिरिराजो हिमालयः ॥ ४-७ ॥

रा० टी०-उत्तरामिति । गिरिराजेन हिमवता समावृताम् उत्तरां दिशं शतबलिर्हरिर्वानरः प्रतस्थे ॥ ४ ॥

रा० टी०-पूर्वामिति । विनीतो हरियूथपः पूर्वां दिशं प्रति ययौ । ताराङ्गदादिसहितः पवनात्मजो हनुमान् अगस्त्याचरितामाशां दक्षिणां दिशं प्रति ययौ । सार्धश्लोक एकान्वयी ॥ ५ ॥ ६ ॥

रा० टी०-पश्चिमामिति । सुषेणः वरुणपालितां पश्चिमां दिशं प्रतस्थे ॥ ७ ॥

गो० टी०-उत्तरामिति । प्रतस्थे प्रस्थातुमुद्युक्तः सर्गान्ते सुग्रीवसन्निधौ संनाहकथनात् ॥ ४-६ ॥

८] ति० टी०-यथातथं यथायोग्यमित्यर्थः । मुमोद चिक्रीड ॥ ८ ॥

रा० टी०-तत इति । ततः वानराणां साङ्गकुलस्त्रेन सुखितो राजा सुग्रीवः कपिसेनापतीन् यथातथं यथायोग्यं सर्वाः दिशः चोदयित्वा मुमोद दानसत्कारादिना प्रमोदयामास ॥ ८ ॥

गो० टी०-तत इति । मुमोद सुखितः सुखमिति पूर्वम् राज्यलाभेन सुखितो राजा सुखं यथा भवति तथा मुमोद उत्तरोत्तरं सुखं प्रापेत्यर्थः ॥ ७ ॥

९] ति० टी०-अभिप्रेत्योद्दिश्य ॥ ९ ॥

१०] ति० टी०-नादादयः शब्दावान्तरभेदाः ॥ १० ॥

रा० टी०-एवमिति। राज्ञा एवं संचोदिताः सर्वे वानरयूथपाः प्लवङ्गमाः नादादि कुर्वन्तः सन्तः स्वां स्वां दिशमभिप्रेत्य उद्दिश्य संप्रतस्थिरे । नादादीनामधिकन्यूनादिना अवान्तरभेदान्न पौनरुक्त्यम् । श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०-एवं संचोदिता इत्यादि । आनयिष्यामह इत्यत्र इतिकरणं द्रष्टव्यम् । आनयिष्यामह इति नदन्त इत्यन्वयः । नदन्तः शब्दं कुर्वन्तः, उन्नदन्तः पुनः संतोषातिशयेन उच्चैर्नदन्तः, गर्जन्तः आत्मश्लाघां कुर्वन्तः, क्ष्वेलन्तः सिंहनादं कुर्वन्तः, विनदन्तः विविधान् विकृताश्वा नादान्कुर्वन्तः संप्रतस्थिर इति पूर्वेणान्वयः ॥ ८ ॥ ९ ॥

११-१२] ति० टी०-आनयिष्यामह इत्यादेरुच्चरित्यमेनान्वयः ॥ ११ ॥ १२ ॥

---

१ यन्मया परिकीर्तितमिति गो. पाठः । २ यः सीताधिगमे इति गो. पाठः । ३ बलिरिति गो. रा. पाठः । ४ मास्तेति गो. पाठः । ५ अगस्त्यचरितामिति गो.पाठः । ६ तु भृशमिति गो. पाठः । ७ पतीन्सुग्रीवानिति गो. पाठः । ८ संबोधिना इति गो. पाठः । ९ अर्धमेतदधिकं गो. पाठे । १० क्ष्वेलन्त इति गो. पाठः । ११ श्लोकोऽयं गो. प्रथमशब्दे विकृतो नवमाङ्के दृश्यते । १२ हनिष्यामीति गो. पाठः ।

वेपमानां श्रमेणाद्य भवद्भिः स्थीयतामिति । एक एवाहरिष्यामि पातालादपि जानकीम् ॥ १३ ॥
विधमिष्याम्यहं वृक्षान्दारयिष्याम्यहं गिरीन् । धरणीं दारयिष्यामि क्षोभयिष्यामि सागरान् ॥ १४ ॥
अहं योजनसंख्यायाः प्लवेयं नात्र संशयः । शतयोजनसंख्यायाः शतं समधिकं ह्यहम् ॥ १५ ॥
भूतले सागरे वापि शैलेषु च वनेषु च । पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः ॥ १६ ॥
इत्येकैकैस्तदा तत्र वानरा बलदर्पिताः । ऊचुश्च वचनं तस्य हरिराजस्य संनिधौ ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।

सीतान्वेषणाय कापेय सदिशतः सुग्रीवस्याखिलभूमण्डलवेदितृत्वमनुभूतवता राघवेण कृतस्तेऽखिलभुवनविज्ञानमिति पृष्टः सुग्रीवो वालिदुन्दुभियुद्धमुपक्रम्य तन्मूलमात्मनो वालिविद्वेषमुल्लिखंस्तेनानुद्रुतोऽहमखिलमहीमण्डलपर्यावर्तनमन्वभवमिति समाधत्ते ।

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत् । कथं भवान्विजानीते सर्वं वै मण्डलं भुवः ॥ १ ॥
सुग्रीवश्च ततो राममुवाच प्रणतात्मवान् । श्रूयतां सर्वमाख्यास्ये विस्तरेण वचो मम ॥ २ ॥

रा० टी०–एवमिति । एवं संचोदिताः सर्वे वानरयूथपाः वयमेव सीतामानयिष्यामहे आनेष्यामहे रावणं हनिष्यामश्च इत्यूचुरिति शेषः ॥ ११ ॥

रा० टी०–अहमिति । अहमेव एकः आहवे संग्रामे प्राप्तं रावणं वधिष्यामि ततोऽनन्तरमुन्मथ्य राक्षसान्तराण्यपि निहत्य जनकात्मजामाहरिष्ये इति कश्चिदाहेति शेषः ॥ १२ ॥

गो० टी०–अहमित्यादि । सागरानित्यन्तमेकान्वयम् ॥ १०—१२ ॥

१३–१४] ति० टी०–श्रमेण वेपमानामिति जनकजाविशेषणम् ॥ १३ ॥ १४ ॥

रा० टी०–वेपमानामिति । एक एवाहं पातालादपि जानकीमाहरिष्यामि इति कश्चिदाहेति शेषः ॥ १३ ॥

रा० टी०–विधमिष्यामीति । वृक्षान् विधमिष्यामि गिरीन् दारयिष्यामि धरणीं च दारयिष्यामि सागरान् क्षोभयिष्यामि इति कश्चिदाहेति शेषः ॥ १४ ॥

१५–१६] ति० टी०–अहं योजनेत्येकस्य वाक्यम् । शतयोजनेत्यन्यस्य ॥ १५ ॥ १६ ॥

रा० टी०–अहमिति । अहं योजनसंख्यायाः शतं शतयोजनजलमित्यर्थः, अहं प्लवेयं शतयोजनसंख्यायाः समधिकमधिकमपि अहं प्लवेयमिति कश्चिदाहेति शेषः ॥ १५ ॥

रा० टी०–भूतल इति । भूतलादौ मम गतिर्नोच्छिद्यते कैश्चित्प्रतिबध्यते इति कश्चिदाहेति शेषः ॥ १६ ॥

गो० टी०–अहं योजनसंख्यायाः शतं प्लवितेत्येकस्य वचनम् । योजनसंख्यायाः शतं समधिकमित्यन्यस्य । हिः प्रसिद्धौ ॥ १३—१६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

१७] ति० टी०–एकैकः एकश इत्यर्थः ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०–उपसंहरन्नाह—इतीति । वानराः एकैकः एकैकशः हरिराजसंनिधौ वचनमूचुः ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

१] ति० टी०–गतेष्विति ॥ १ ॥

रा० टी०–सुग्रीवदृत्तान्तं श्रोतुकामस्य रामस्योक्तिमाह—गतेष्विति । सर्वं भुवो मण्डलं भवान्कथं विजानीते इति वचः वानरेन्द्रेषु गतेषु सत्सु रामः सुग्रीवमब्रवीत् ॥ १ ॥

गो० टी०–अथ रामाय सुग्रीवेण स्वस्य सर्वभूमण्डलज्ञानमूलकथनं षट्चत्वारिंशे—गतेष्वित्यादि ॥ १ ॥

२] ति० टी०–प्रणत आत्मा देहो यस्यास्तीति ॥ २ ॥

रा० टी०–सुग्रीव इति । ततः रामप्रश्नश्रवणानन्तरं सुग्रीवो रामस्यवाचं । तद्वचनाकारमाह—सर्वमहमाख्यास्ये मम वचः श्रूयताम् ॥ २ ॥

गो० टी०–सुग्रीवस्त्विति । प्रणतात्मवान् प्रणतदेहवान् ॥ २ ॥

---

१ विमथिष्याम्यहं वृक्षान्पातयिष्यामीति गो. पाठः । २ धारयिष्यामीति गो. पाठः । ३ प्लवितेति गो. पाठः । ४ एकमिति गो. पाठः । ५ तत्रेति गो. पाठः । ६ नरर्षभेति गो. पाठः ।

यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम् । प्रतिकालयते वाली मलयं प्रति पर्वतम् ॥ ३ ॥
तदा विवेश महिषो मलयस्य गुहां प्रति । विवेश वाली तत्रापि मलयं तज्जिघांसया ॥ ४ ॥
ततोऽहं तत्र निक्षिप्तो गुहाद्वारि विनीतवत् । न च निष्क्रामते वाली तदा संवत्सरे गते ॥ ५ ॥
ततः क्षतजवेगेन आपुपूरे तदा बिलम् । तदहं विस्मितो दृष्ट्वा भ्रातुः शोकविषार्दितः॥ ६ ॥
अथाहं गतबुद्धिस्तु सुव्यक्तं निहतो गुरुः । शिला पर्वतसंकाशा बिलद्वारि मया कृता ॥ ७ ॥
अशक्नुवन्निष्क्रमितुं महिषो [1]विनशिष्यति । ततोऽहमागां किष्किन्धां निराशस्तस्य जीविते॥ ८ ॥
राज्यं च सुमहत्प्राप्य तारां च रुमया सह । मित्रैश्च सहितस्तस्य वसामि विगतज्वरः ॥ ९ ॥
आजगाम ततो वाली हत्वा तं वानरर्षभः । ततोऽहमददां राज्यं गौरवाद्भ्रययन्त्रितः ॥ १० ॥
स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेन्द्रियः । परिकालयते वाली धावन्तं सचिवैः सह ॥ ११ ॥

३] ति० टी०–दुन्दुभिं नामेति । अत्र दुन्दुभिशब्देन महिषशब्देन च तत्पुत्रो मायाविनामा दानव उच्यते तद्वृत्तान्तस्यैवाग्रे वक्ष्यमाणत्वात् । 'मायावी नाम तेजस्वी दुन्दुभेः पूर्वजः सुतः' इति प्रागुक्तेस्तस्य तत्पुत्रत्वम्, पितुर्माहिषाकाकारत्वात्तत्पुत्रस्य च तदाकारत्वमिति च बोध्यम् ॥ ३ ॥

४–५] ति० टी०–मलयं मलयगुहाम् ॥ ४ ॥ ५ ॥

रा० टी०–तदभिधानप्रकारमाह—यदेत्यादिभिः । यदा महिषाकृतिं दुन्दुभिं लक्षणया दुन्दुभिपुत्रं मायाविनं तन्नामदानवं मलयं पर्वतं प्रति प्रतिकालयते प्राद्रावयत् तदा महिषो मायावी मलयस्य गुहामाविवेश वाली अपि तज्जिघांसया मलयं मलयगुहामाविवेश । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–यदेति । केचिदत्र दुन्दुभिशब्देन उपचारान्मायाव्येवोच्यते मायाविनो वृत्तान्तस्यात्रवादादित्याहुः, तन्न महिषाकृतिमित्यस्य विरोधात् । तदा विवेश महिषः, महिषो विनशेदिति पुनः पुनरुक्तेश्च रामेण विदितवृत्तान्तश्च न वचनमर्हति । तर्हि कथमुपपत्तिरिति चेत् उच्यते–पूर्वं मायाविवृत्तान्ताभिधानादत्र महिषवृत्तान्ताभिधानाच्च तदानीमुभावप्यागताविति वेदितव्यम् । तत्र महिषः कथंचित् स्वात्मानं गोपयित्वा वालिनि निर्निर्गते पुनः मत्तः कदाचिदागत्य वालिना हत इत्यविरोधः । वक्ष्यत्येवमन्यत्रापि विषये । रावणेन सीतोपप्लवे उद्युक्ते मन्दोदरीधान्यमालिन्यौ निवारिण्यौ तत्रैका पूर्वमुक्ता अन्याः वानरसंनिधावनुवादे । तस्मादयमृक्षपेः स्वभाव इति बोध्यम् । परिकालयते पलाययति कलतेर्मिती वृद्धिरार्षी । तत्रापि गुहायामपि तज्जिघांसया मलयं विवेश ॥ ३ ॥ ४ ॥

रा० टी०–तत इति । ततोऽनन्तरं विनीतवत् विशेषनीतियुक्तं यथा भवति तथाऽहं निक्षिप्तः गुहाद्वारि संस्थापितः संवत्सरे गतेऽपि वाली न निष्क्रमते निरक्रमत ॥ ५ ॥

गो० टी०–ततोऽहमिति । विनीतवत् विनययुक्तमिति क्रियाविशेषणम् ॥ ५ ॥

६] ति० टी०–आपुपूरे पूर्णम् ॥ ६ ॥

रा० टी०–तत इति । ततः क्षतजवेगेन वेगवद्रुधिरेण बिलम् आपुपूरे तद्रुधिरं दृष्ट्वा विस्मितोऽहं भ्रातुः शोकविषार्दितः भ्रातृमरणसंशयजनितशोकविषादयुक्तोऽभवमिति शेषः ॥ ६ ॥

गो० टी०–तत इति । भ्रातृशोक एव विषं तेन अर्दितः अभवमिति शेषः ॥ ६ ॥

७] ति० टी०–निहत इति । गतबुद्धिः प्राप्तबुद्धिः जात इति शेषः । ततः—मयेत्यादि ॥ ७ ॥

रा० टी०–अथेति । अथानन्तरं गुरुर्भ्राता सुव्यक्तं निहतः इति गतबुद्धिः प्राप्तनिश्चयोऽहमासमिति शेषः अतः महिषो निष्क्रामितुमशक्नुवन् सन् विनशिष्यति इति बुद्ध्या पर्वतसंकाशा शिला गुहाद्वारि मया कृता । सार्धश्लोक एकान्वयी॥७॥

गो० टी०–अथेति । अहं गुरुर्निहत इति कृतबुद्धिः अभवमिति शेषः । विनशेत् विनश्येदित्यर्थः ॥ ७ ॥ ८ ॥

८] ति० टी०–विनशिष्यतीत्यस्येति बुद्ध्येति शेषः । तस्य वालिनः ॥ ८ ॥

रा० टी०–तत इति । तस्य वालिनो जीविते जीवने निराशोऽहं सुमहत् राज्यं रुमया सह तारां च प्राप्य मित्रैः सह तत्र किष्किन्धायां वसामि अवसम् । सार्धश्लोक एकान्वयी ॥ ८ ॥ ९ ॥

९–१०] ति० टी०–तारां च प्राप्येति संबन्धः । वसाम्यवसम् ॥ ९ ॥ १० ॥

गो० टी०–मित्रैश्चेति । वसामि अवसं दानवर्षभं मायाविनम् ॥ ९ ॥

रा० टी०–आजगामेति । ततोऽनन्तरं तं मायाविनं हत्वा वाली आजगाम । ततस्तदागमनानन्तरं गौरवाद्वालिनो गुरुत्वात् हेतोः भययन्त्रितः भयेन संकुचितः सन् राज्यमददाम् ॥ १० ॥

गो० टी०–ततोऽहमिति । भययन्त्रितः भयपरवशः १०

११] ति० टी०–परिकालयते सचिवैः सह धावन्तमद्धावति स्म ॥ ११ ॥

१ विनशेदितीति गो. पाठः । २ प्राप्तमिति गो. पाठः । ३ तत्रेति गो. पाठः । ४ दानवर्षभमिति गो. पाठः । ५ क्रोधादिति गो. पाठः

ततोऽहं वालिना तेन सोऽनुबद्धः प्रधावितः । नदीश्च विविधाः पश्यन्वनानि नगराणि च ॥ १२ ॥
आदर्शतलसंकाशा ततो वै पृथिवी मया । अलातचक्रप्रतिमा दृष्टा गोष्पदवत्कृता ॥ १३ ॥
पूर्वां दिशं ततो गत्वा पश्यामि विविधान्द्रुमान् । पर्वतान्सदरीन्रम्यान्सरांसि विविधानि च ॥ १४ ॥
उदयं तत्र पश्यामि पर्वतं धातुमण्डितम् । क्षीरोदं सागरं चैव नित्यमप्सरसालयम् ॥ १५ ॥
परिकाल्यमानस्तु तदा वालिनाऽभिद्रुतो भयम् । पुनरावृत्य सहसा प्रस्थितोऽहं तदा विभो ॥ १६ ॥
[पुनरावर्तमानस्तु वालिनाऽभिद्रुतो द्रुतम् ।]
दिशस्तस्यास्ततो भूयः प्रस्थितो दक्षिणां दिशम् । विन्ध्यपादपसंकीर्णां चन्दनद्रुमशोभिताम् ॥ १७ ॥
द्रुमशैलान्तरे पश्यन्भूयो दक्षिणतोऽपराम् । अपरां च दिशं प्राप्तो वालिना समभिद्रुतः ॥ १८ ॥
स पश्यन्विविधान्देशानस्तं च गिरिसत्तमम् । प्राप्य चास्तं गिरिश्रेष्ठमुत्तरं संप्रधावितः ॥ १९ ॥
हिमवन्तं च मेरुं च समुद्रं च तथोत्तरम् । यदा न विन्दे[11] शरणं वालिना समभिद्रुतः ॥ २० ॥

रा० टी०–स इति । प्रव्यथितेन्द्रियः गुहान्तर्मुखपिधानपूर्वकमदागमनेन दुःखितचित्तः अत एव दुष्टात्मा चञ्चलचित्तो वाली मां जिघांसुः सन् सचिवैः सह धावन्तं पलायेन्तं मां परिकाल्यते अन्वधावत् ॥ ११ ॥

गो० टी०–स इति । परिकाल्यते निरकासयत् ॥११॥

१२] ति० टी०–ततस्तेन वालिना सोऽहमबन्धवोऽद्रुतः प्रधावितः ॥ १२ ॥

रा० टी०–तत इति । ततस्तेन वालिना प्रधावितः अबन्धुतः साबन्धुः अमात्यसहितोऽहं नद्यादीन् पश्यन् सन् आगच्छमिति शेषः ॥ १२ ॥

गो० टी०–ततोऽहमिति । सानुबन्धः सामात्यः नदीः पश्यन्नहं प्रधावित इत्यन्वयः ॥ १२ ॥ १३ ॥

१३] ति० टी०–ततो वै तदनुधावनहेतोर्मया गोष्पदवत्परिधाम्यमाणेयं पृथिव्यलातचक्रप्रतिमादर्शतलसंकाशा च दृष्टा । गोष्पदवदित्यनेन लङ्घनेऽप्रयास उक्तः । अलातचक्रेत्यनेन स्वीयो भ्रमणवेगः । आदर्शतलेत्यनेन भूतचक्रवर्तिपदार्थस्य स्पष्टमनुभव उक्तः ॥ १३ ॥

रा० टी०–आदर्शेति । ततः प्रधावनादेतोः मया पृथिवी आदर्शतलसंकाशा स्पष्टं सर्वदर्शनेन आदर्शतलसदृशी अलातचक्रप्रतिमा अतिवेगवत्स्वगमनेन अलातचक्रसदृशी च दृष्टा, गोष्पदवत् भ्रमणे श्रमाभावेन गोष्पदसदृशी च कृता ॥ १३ ॥

१४] ति०टी०–उक्तमेव विवृणोति–पूर्वां दिशामिति १४

रा० टी०–भ्रमणप्रकारमाह—पूर्वामित्यादिभिः । पूर्वां दिशं गत्वा द्रुमादीन् पश्यामि अपश्यम् ॥ १४ ॥

गो० टी०–पूर्वां दिशामिति । पश्यामि अपश्यम् अप्सरसा अप्सरसाम् पूर्वसवर्णदीर्घः । वालिनाभिद्रुतः परिकाल्यमानोऽहं द्रुमादिकमपश्यमिति पूर्वेणान्वयः ॥ १४–१६ ॥

१५] ति० टी०–अप्सरसशब्दोऽकारान्तोऽप्यार्षः ॥१५॥

रा० टी०–उदयमिति । तत्र पूर्वदिशि उदयपर्वतादि पश्यामि अपश्यम् अप्सरसशब्दः अदन्तोऽप्यत एव द्रुप्यते १५

१६] ति०टी०–परिकाल्यमानः परिकाल्यमानः पलायमान इत्यर्थः अकारलोप आर्षः पुनरावृत्योदयगिरिभुवः ॥ १६ ॥

रा० टी०–परीति । वालिना परिकाल्यमानः पलायमानः अत एव अभिद्रुतः शीघ्रं प्रचलितोऽहं पुनरावृत्य निवर्त्य प्रस्थितः मार्गान्तरेण पश्चाद्भागं प्रचलितोऽहमासमिति शेषः ॥ १६ ॥

१७] ति० टी०–तस्या दिशस्तां दिशं त्यक्त्वा ॥ १७ ॥

रा० टी०–दिश इति । ततोऽनन्तरं तस्याः पूर्वस्याः दिशः विन्ध्यपादपसंकीर्णां दक्षिणां दिशं प्रस्थितोऽहमभवमिति शेषः ॥ १७ ॥

गो० टी०–पुनरित्यादि श्लोकद्वयमेकान्वयम् । अस्याः पूर्वस्या दिशः पुनरावृत्य प्रस्थितोऽस्मि । आवर्तमानोऽहं पुनर्वालिनाभिद्रुतोऽस्मि । विन्ध्यपादपेत्यनेन किष्किन्धाया दक्षिणतोऽपि विन्ध्यपर्वतशेषोऽस्तीति गम्यते ॥ १७–१९ ॥

१८] ति० टी०–द्रुमान्तरे शैलान्तरे च तद्भयवहितं वालिनं पश्यन्नपरां पश्चिमां दिशं समभिद्रुत इति शेषः ॥१८॥

रा० टी०–द्रुमेति । वालिना समभिद्रुतोऽहं दक्षिणतो दक्षिणस्यां दिशि द्रुमशैलान् पश्यन् सन् अपरां तद्भिन्नां पश्चिमां दिशं प्राप्तः ॥ १८ ॥

१९] ति० टी०–गिरिसत्तमम् अभिधावित इति शेषः १९

रा० टी०–संपश्यन्निति । विविधान् देशान् गिरिसत्तममस्तं च संपश्यन् सन् गिरिश्रेष्ठमस्तं प्राप्य उत्तरां दिशं संप्रधावितः ॥ १९ ॥

२०] ति० टी०–मेरुं महामेरुम् । न विन्दे न लभे ॥२०॥

रा० टी०–हिमवन्तमिति । वालिना समभिद्रुतोऽहं हि-

---

१ सानुबन्ध इति गो. रा. पाठः । २ तदेति गो. पाठः । ३ पर्वतांश्च नदी रम्या इति गो. पाठः । ४ कालयमान इति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ भूषितामिति गो. पाठः । ७ शैलांस्तत इति गो. पाठः । ८ पश्चिमां स्थिति गो. पाठः । ९ समिति गो. रा. पाठः । १० उत्तरामिति गो. पाठः । ११ विन्दमिति गो. पाठः । १२ पलायमानमिति युक्तं भाति ।

ततो मां बुद्धिसंपन्नो हनुमान्वाक्यमब्रवीत् । इदानीं मे स्मृतं राजन्यथा वाली हरीश्वरः ॥ २१ ॥
मतङ्गेन तदा शप्तो ह्यस्मिन्नाश्रममण्डले । प्रविशेद्यदि वै वाली मूर्धास्य शतधा भवेत् ॥ २२ ॥
तत्र वासः सुखोऽस्माकं निरुद्विग्नो भविष्यति । तत्र पर्वतमासाद्य ऋष्यमूकं नृपात्मज ॥ २३ ॥
न विवेश तदा वाली मतङ्गस्य भयात्तदा । एवं मया तदा राजन्प्रत्यक्षमुपलक्षितम् ॥
पृथिवीमण्डलं सर्वं गुहामेस्म्यागतस्ततः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।

तत्तद्दिक्प्रदेशेषु बहुशो निपुणमन्विष्यापि सीतामप्राप्नुवद्भिस्तत्कार्यनिराशैर्विनतादिभिर्मासावधेः प्रागेव प्रत्यागत्याभिवाद्य रामसुग्रीवौ निवेदितसीतादर्शनैरनेकहेतूक्तिभिर्हनुमत्येव सीताशुद्धिं निश्चित्य समर्थयद्भिस्तस्थे ।

दर्शनार्थं तु वैदेह्याः सर्वतः कपिकुञ्जराः । व्यादिष्टाः कपिराजेन यथोक्तं जग्मुरञ्जसा ॥ १ ॥
[3]ते सरांसि सरित्कक्षानाकाशं नगराणि च । नदीदुर्गास्तथा [4]देशान्विचिन्वन्ति समन्ततः ॥ २ ॥
सुग्रीवेण समाख्याताः सर्वे वानरयूथपाः । तत्र देशान्विचिन्वन्ति सशैलवनकाननान् ॥ ३ ॥

भवत्प्रभृतिं शरणं रक्षकं यदा न विन्दे ततस्तदा हनुमान् वाक्यमब्रवीत् । सार्धश्लोक एकान्वयी ॥ २० ॥

गो० टी०–हिमवन्तमिति । अपश्यमिति शेषः ॥२०॥

गो० टी०–यदेत्यादि । शरणं रक्षणं न विन्दं नाविन्दम् २१

२१] ति० टी०–किमब्रवीत्तदाह–इदानीमिति । मे मया स्मृतम् । किं स्मृतं तदाह—यथेति ॥ २१ ॥

२२] ति० टी०–तदा पूर्वकाले । अस्मिन्नाश्रममण्डले वाली यदा प्रविशेत्तदास्य मूर्धा शतधा भवेदिति हरीश्वरो मतङ्गेन शप्तः ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह—इदानीमिति । अस्मिन्नाश्रममण्डले यदि वाली प्रविशेत् तदा अस्य मूर्धा शतधा भवेत् इति मतङ्गेन यथा वाली शप्तः तथा इदानीं मे मया स्मृतम् । सार्धश्लोक एकान्वयी ॥ २१ ॥ २२ ॥

गो० टी०–इदानीमित्यादि । राजन् अस्मिन्नाश्रममण्डले वाली प्रविशेद्यदि तदास्य मूर्धा शतधा भवेदिति मतङ्गेन पुरा हरीश्वरो यथाभिशप्तः तथा इदानीं मे स्मृतमिति योजना । निरुद्विग्नः निर्भयः भावे निष्ठा । इति हनुमान् वाक्यमब्रवीदिति संबन्धः ॥ २२ ॥ २३ ॥

गो० टी०–तत इति । आसाद्य स्थितोऽहमिति शेषः २४

२३] ति० टी०–तत्र मतङ्गाश्रमे । निरुद्विग्नो निर्भयः । आसाद्य स्थितस्य मम समीपमिति शेषः, न विवेशेत्यन्वयः॥२३॥

रा०टी०–तत्रेति । तत्र मतङ्गाश्रमे निरुद्विग्नः उद्वेगरहितः अत एव सुखः अस्माकं वासो भविष्यति । तत्र तस्यां हनुमदुक्तौ सत्याम् ऋष्यमूकमासाद्य प्राप्य विद्यमानस्य मम समीपे मतङ्गस्य भयाद् वाली न विवेश । सार्धश्लोक एकान्वयी ॥ २३ ॥

२४] ति० टी०–तदा जातशापकृतादिति शेषः । गुहाम् ऋष्यमूकस्येति शेषः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः ॥४६॥

रा० टी०–उपसंहरन्नाह—एवमिति । एवमुक्तप्रकारेण पृथिवीमण्डलं प्रत्यर्थं मया उपलक्षितं दृष्टं ततोऽनन्तरं गुहामागतोऽस्मि ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०–एवमिति । अस्य ऋष्यमूकस्य गुहां सीताभरणस्थानभूताम् ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

१] ति० टी०–यथोक्तम् । स्वस्वान्वेषणीयतयोक्तं देशमनतिक्रम्येत्यर्थः ॥ १ ॥

रा०टी०–दक्षिणातिरिक्तदिग्गतानां वानराणां वृत्तान्तं वर्णयितुमाह–दर्शनार्थमिति । ये कपिकुञ्जराः वैदेह्याः दर्शनार्थं कपिराजेन सर्वतः सर्वदिक्षु व्यादिष्टा नियुक्तास्ते यथोक्तमुक्तमनतिक्रम्य अञ्जसा अनायासेन जग्मुः ॥ १ ॥

गो० टी०–अथ दक्षिणेतरदिग्गतवानरागमनं सप्तचत्वारिंशे–दर्शनार्थं त्विति । यथोक्तं देशम् ॥ १ ॥

२–३] ति० टी०–आकाशं वनगिर्यनाद्यतप्रदेशमित्यर्थः ।

---

१ तदेति गो. पाठः । २ हनूमानिति रा. पाठः । ३ वै इति गो. पाठः । ४ कुरून्नमिति गो. पाठः । ५ अस्वागत इति गो. पाठः। ६ यूथपा इति गो. पाठः । ७ सरांसि सरित इति गो. पाठः । ८ शैलानिति गो. पाठः। ९ प्रदेशान्प्रवीति गो. पाठः ।

विचित्य दिवसं सर्वे सीताधिगमने धृताः । समायान्ति स्म मेदिन्यां निशाकालेषु वानराः ॥ ४ ॥
सर्वर्तुकांश्च देशेषु वानराः सफलद्रुमान् । आसाद्य रजनीं शय्यां चक्रुः सर्वेष्वहःसु ते ॥ ५ ॥
तदहः प्रथमं कृत्वा मासे प्रस्रवणं गताः । कपिराजेन संगम्य निराशाः कपिकुञ्जराः ॥ ६ ॥
विचित्य तु दिशं पूर्वां यथोक्तां सचिवैः सह । अदृष्ट्वा विनतः सीतामाजगाम महाबलः ॥ ७ ॥
दिशमप्युत्तरां सर्वां विविच्य स महाकपिः । आगतः सह सैन्येन भीतः शतबलिस्तदा ॥ ८ ॥
सुषेणः पश्चिमामाशां विविच्य सह वानरैः । समेत्य मासे पूर्णे तु सुग्रीवमुपचक्रमे ॥ ९ ॥
तं प्रस्रवणपृष्ठस्थं समासाद्याभिवाद्य च । आसीनं सह रामेण सुग्रीवमिदमब्रुवन् ॥ १० ॥
विचिताः पर्वताः सर्वे वनानि गहनानि च । निम्नगाः सागरान्ताश्च सर्वे जनपदाश्च ये ॥ ११ ॥

नदीदुर्गानिति । नदीप्रवाहैर्गन्तुमशक्या देशा नदीदुर्गास्तान् ॥ २ ॥ ३ ॥

रा० टी०–ते इति । ते प्रेषिता वानराः सरःप्रभृतीन् विचिन्वन्ति स्म विचिन्वन् ॥ २ ॥

रा० टी०–तदेव भङ्क्त्यन्तरेणाह—सुग्रीवेणेति । सुग्रीवेण समाख्याताः सम्यगुपदिष्टाः सर्वे वानरयूथपाः विचिन्वन्ति॥३॥

गो० टी०–तदेव विवृणोति–सरांसीत्यादिना । कक्षान् गुल्मान् लतागृहानित्यर्थः । आकाशं वृक्षगुल्मादिरहितप्रदेशं नदीदुर्गान् नदीभिर्दुर्गमान् ॥ २ ॥ ३ ॥

४] ति० टी०–दिवसमित्यत्यन्तसंयोगे द्वितीया । धृता उद्युक्ताः । मेदिन्यां सर्वाधारभूतायां निद्रासौकर्यार्थमिति भावः४

रा० टी०–तत्प्रकारमाह—विचित्येति । सीताधिगमने सीतादर्शने धृता निश्चिताः सर्वे वानराः दिवसं विचित्य पृथक् पृथग्गत्वा अन्वीक्ष्य निशाकालेषु मेदिन्यां सर्वसंमतिविषयीभूतभूमौ समायान्ति संघीभूय प्राप्नुवन्ति ॥ ४ ॥

गो० टी०–विचित्येति । धृताः तत्पराः ॥ ४ ॥

५] ति० टी०–तेषु देशेषु सर्वर्तुकात्रित्यसंनिहितसर्वर्तुयुक्तान्, अत एव सदा सफलद्रुमान्सर्वेष्वहःसु विचयनसमये समासाद्य कामं प्राप्य, रजनीं रजन्यां शय्यां चक्रुः । तादृशवृक्षवत्त्वं च देशस्य रामप्रसादात् ॥ ५ ॥

रा० टी०–तदेव भङ्क्त्यन्तरेणाह—सर्वर्तुकानिति । ते वानराः सर्वेषु देशेषु अहस्सु विचित्येति शेषः, सर्वर्तुकान् सर्वकालं संनिहितसर्वर्तून् सफलाः सर्वर्तूचितफलसहिताः ये द्रुमास्तान् रजनीं रजन्यामासाद्य प्राप्य शय्यां शयनं चक्रुः॥५॥

गो० टी०–विचित्येति श्लोकोक्तं विवृणोति–सर्वेति । सर्वर्तुकामान् काम्यन्त इति कामाः पुष्पफलादयः सर्वर्तुसंभवफलपुष्पादियुक्तानित्यर्थः । सफलान् वानरैरुपभुज्यमानत्वेन सफलान् द्रुमानासाद्य सर्वेष्वहस्सु एकमासान्तर्गतसर्वदिनेषु रजनीं रजन्यामेव शय्यां चक्रुः । अनेनाहारविश्रमादिकमहस्सु नास्तीत्यवगम्यते ॥ ५ ॥

६–८] ति० टी०–तदहः प्रस्थानदिवसं प्रथमं कृत्वा गताः । पुनर्मासे गते निराशाः सीतालाभे प्रस्रवणं गता आगताः, कपिराजेन संगम्य स्थिता इत्यन्वयः ॥ ६–८ ॥

रा० टी०–तदिति । तत् अन्वेषणाज्ञापनसंबन्धि अहो दिनं प्रथमं कृत्वा प्रथमत्वेन परिगणय्य मासे मासान्तदिवसे त्रिंशत्तमे इत्यर्थः, प्रस्रवणं गताः निराशाः सीतादर्शनविषयकाशारहिताः अप्राप्तसीताश्चत्तान्ता इत्यर्थः, कपिकुञ्जराः कपिराजेन संगम्य अतिष्ठन्निति शेषः ॥ ६ ॥

गो० टी०–तदिति । तदहः प्रस्थानदिनं प्रथमं कृत्वा तदारभ्य मासे पूर्णे सति निराशाः सीतान्वेषणे निरुत्साहाः सन्तः कपिराजेन संगम्य तस्मै स्वागमनं निवेदयित्यर्थः, प्रसवणं माल्यवन्तं गताः ॥ ६ ॥

रा० टी०–तदागमनप्रकारमाह—विचित्येत्यादिभिः । महाबलो विनतः उक्तामादिष्टां पूर्वां दिशं यथावत् विचित्य सीतामदृष्ट्वा आजगाम ॥ ७ ॥

रा० टी०–दिशमिति । शतबलिर्वीरः उत्तरां दिशं विविच्य विचित्य सीतामदृष्ट्वेति शेषः, आगतः ॥ ८ ॥

गो० टी०–एवं सामान्येन वानरागमनमुक्त्वा प्रत्येकं च दर्शयति–विचित्येत्यादिना । सचिवैः सहायभूतैः ॥७॥८॥

९–१०] ति० टी०–उपचक्रमे प्राप्तः ॥ ९ ॥ १० ॥

रा० टी०–सुषेण इति । सुषेणः पश्चिमां दिशं विविच्य सीतामलब्ध्वेति शेषः, सुग्रीवमुपचक्रमे प्राप ॥ ९ ॥

गो० टी०–सुषेण इति । उपचक्रमे उपागतः ॥ ९ ॥

रा० टी०–तमिति । रामेण सह आसीनं प्रस्रवणगिरिस्थं तं सुग्रीवं समासाद्य अभिवाद्य च इदमब्रवीत्, यूथत्रयमिति शेषः ॥ १० ॥

गो० टी०–तमिति । प्रस्रवणपृष्ठस्थं प्रस्रवणाग्रस्थं रामेण सहासीनं रामेण सहितमित्यर्थः । वनानि क्षुद्रवनानि गहनानि महावनानि सागरान्ताः समुद्रतीराणि लतावितानसंततानि लताभिर्वितताः व्याप्ताः संततानि निरन्तरा इति महागुल्मविशेषणम् ॥ १०–१२ ॥

११] ति० टी०–सागरान्ताः सागरमध्यवर्तिद्वीपाः ॥११॥

---

१ कामानिति गो. पाठः । २ सफलानिति गो. पाठः । ३ यूथपा इति गो. पाठः । ४ उत्तरां च दिशमिति गो. पाठः । ५ वीर इति गो. रा. पाठः । ६ लिरिति गो. रा. पाठः । ७ विचित्येति गो. पाठः । ८ मासि संपूर्णे इति गो. पाठः ।

गुहाश्च विचिताः सर्वा याश्च ते परिकीर्तिताः । विचिताश्च महागुल्मा लताविततसंतताः ॥ १२ ॥
गहनेषु च देशेषु दुर्गेषु विषमेषु च । सत्त्वान्यतिप्रमाणानि विचितानि हतानि च ॥ १३ ॥
[2]ये चैव गहना देशा विचितास्ते पुनः पुनः ।
उदारसत्त्वाभिजनो हनूमान्स मैथिलीं ज्ञास्यति वानरेन्द्र ।
दिशं तु यामेव गता तु सीता तामास्थितो वायुसुतो हनूमान् ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ।

अङ्गदादिभिर्युतो हनुमान्विन्ध्यगहनगह्वरादिषु सीता व्यचिनोत् । पुत्रनाशशोकतः खिन्नकण्डुमुनिशापान्निवृत्तफलपुष्पागमवृक्षके कस्मिंश्चिद्वने परिश्रमपरिश्रान्ताः कपयस्तत्र कंचिद्राक्षस व्यलोकयन् । साटोप मुष्टिमुद्यम्याभ्यापतन्त तमङ्गदो रावणबुद्धया जघान । कान्तारश्रमणपरिश्रान्तास्ते क्वचन वृक्षमूलमुपाजग्मुः ।

सह ताराङ्गदाभ्यां तु सहसा हनुमान्कपिः । सुग्रीवेण यथोद्दिष्टं गन्तुं देशं प्रचक्रमे ॥ १ ॥
स तु दूरमुपागम्य सर्वैस्तैः कपिसत्तमैः । ततो विचित्य विन्ध्यस्य गुहाश्च गहनानि च ॥ २ ॥
पर्वताग्रनदीदुर्गान्सरांसि विपुलद्रुमान् । वृक्षखण्डांश्च विविधान्पर्वतान्वनपादपान् ॥ ३ ॥
अन्वेषमाणास्ते सर्वे वानराः सर्वतोदिशम् । न सीतां ददृशुर्वीरा मैथिलीं जनकात्मजाम् ॥ ४ ॥
ते भक्षयन्तो मूलानि फलानि विविधान्यपि । अन्वेषमाणा दुर्धर्षा न्यवसंस्तत्र तत्र ह ॥
स तु देशो दुरन्वेषो गुहागहनवान्महान् । निर्जलो निर्जनः शून्यो गहनो घोरदर्शनम् ॥ ५ ॥

१२-१३] ति० टी०-लताविततैर्लतापतानैः संततताः समन्ताद्व्याप्तास्तादृशा महागुल्मा लतागृहविशेषाः ॥१२॥१३॥

रा० टी०-तद्वचनाकारमाह-विचिता इति । पर्वतादयो विचिता अस्माभिरिति शेषः । श्लोकद्वयमेकान्वयि ॥११॥१२॥

रा० टी०-गहनेष्विति । गहनादिविद्यमानानि अतिप्रमाणानि अतिबृहच्छरीराणि सत्त्वानि अन्वेषणप्रतिबन्धकीभूतप्राणिजातानि विचितानि च ॥ १३ ॥

गो० टी०-गहनेष्विति । गहनेषु दुष्प्रवेशेषु नानाद्वीपेष्वित्यर्थः । दुर्गेषु दुःखेन गन्तव्येषु निम्नोन्नतेष्वित्यर्थः । अतिप्रमाणानि अतिमात्रशरीराणि विचितानि किमयं रावणः उत नेतीति भावः । उदारसत्त्वः श्रेष्ठसत्त्वोऽभिजनो वंशो यस्य स उदारसत्त्वाभिजनः महाबलवतः पुत्र इति सीतादर्शने प्रथमो हेतुः, महात्मा महाधैर्य इति द्वितीयः, दिशन्त्वित्यादिना तृतीयो हेतुः । इति अब्रुवन् वानरा इति पूर्वेणान्वयः ॥ १३-१४ ॥

अस्मिन्सर्गे चतुर्दश श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१४] ति० टी०-दिक्त्रयासत्त्वसिद्धनिश्चयमर्थमनुवदति-उदारेति ॥ १४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०-ये इति । ये गहना वृक्षादिपिहितत्वादिना दुर्गमास्ते देशाः पुनः पुनर्विचिताः । अर्धं पृथक् ॥ १४ ॥

रा० टी०-नन्वेवं सीतातत्तान्तलाभ इत्यत आह-उदारेति । यां दिशं सीता गता तां दिशं हनुमान् एवास्थितः अतः उदाराः अधिकाः सत्त्वाभिजना यस्य स हनुमान् मैथिलीं ज्ञास्यति ॥ १५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१-३] ति० टी०-प्रचक्रमे अन्वेष्टुमिति शेषः ॥ १-३ ॥
४-५] ति० टी०-अन्वेषमाणास्ते विविधानि फलान्यपि भक्षयन्तः सीतां न ददृशुः ॥ ४ ॥ ५ ॥

रा० टी०-हनुमदादिदृत्तान्तमाह-सहेत्यादिभिः । हनुमान् सुग्रीवेण ऽदिष्टं देशं गन्तुं प्रचक्रमे ॥ १ ॥

गो० टी०-अथ सीतान्वेषणाय दक्षिणां दिशं गतानाम-

१ त्वया या इति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ महात्मेति गो. पाठः । ४ द्रक्ष्यति वानरेन्द्र इति गो. रा.पाठः । ५ गत्वा स इति गो. पाठः । ६ तें देशमुपचक्रमे इति गो. पाठः । ७ विचिनोति स्मेति गो. पाठः । ८ अग्रानिति गो. पाठः । ९ घनेनि गो. पाठः । १० चेति गो. पाठः । ११ श्लोकोऽयमधिकः गो. रा.पाठे । १२ हीति रा. पाठः । १३ रोमहर्षणमिति गो. रा. पाठः ।

तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः । सै देशश्च दुरन्वेष्यो गुहागहनवान्महान् ॥ ६ ॥
त्यक्त्वा तु तं ततो देशं सर्वे वै हरियूथपाः । देशमन्यं दुराधर्षं विविशुश्चाकुतोभयाः ॥ ७ ॥
यत्र वन्ध्यफला वृक्षा विपुष्पाः पर्णवर्जिताः । निस्तोयाः सरितो यत्र मूलं यत्र सुदुर्लभम् ॥ ८ ॥
न सन्ति महिषा यत्र न मृगा न च हस्तिनः । शार्दूलाः पक्षिणो वाऽपि ये चान्ये वनगोचराः ॥ ९ ॥
न चौत्र वृक्षा नौषध्यो न वल्ल्यो नापि वीरुधः । स्निग्धपत्राः स्थले यत्र पद्मिन्यः फुल्लपङ्कजाः ॥ १० ॥
प्रेक्षणीयाः सुगन्धाश्च भ्रमरैश्च विवर्जिताः । कण्डुर्नाम महाभागः सत्यवादी तपोधनः ॥ ११ ॥
महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः । तस्य तस्मिन्वने पुत्रो बालको दशवार्षिकः ॥ १२ ॥
प्रनष्टो जीवितान्ताय क्रुद्धस्तेन महामुनिः । तेन धर्मात्मना शप्तं कृत्स्नं तत्र महद्वनम् ॥ १३ ॥

ऽरनिरसनपर्यन्तो वृत्तान्तोऽष्टचत्वारिंशे—सह ताराङ्गदाभ्यामित्यादि ॥ १ ॥

रा० टी०—स इति । स हनुमान् कपिसत्तमैः सह दूरं देवमुपागम्य विन्ध्यस्य गुहाः गहनानि च विचिन्य अतिष्ठदिति शेषः ॥ २ ॥

रा० टी०—पर्वतेति । सर्वदिशं पर्वतादीन् अन्वेषमाणाः सर्वे वानराः हनुमदादयः सीतां न ददृशुः । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

रा० टी०—ते इति । अन्वेषमाणास्ते सर्वे वानराः मूलानि फलानि च भक्षयन्तः सन्तस्तत्र तत्र न्यवसन् ॥ ५ ॥

गो० टी०—स इति । पर्वताग्रान् विन्ध्याग्रप्रदेशान् पर्वतान् पर्यन्तपर्वतान् ॥ २–५ ॥

गो० टी०—निर्जलमित्यादि । वन्ध्यफलाः फलैर्वन्ध्याः निष्फला इत्यर्थः । स्निग्धपत्रा इत्यादि । अत्रापि न सन्तीत्यनुषज्यत इति केचित् तन्न, भ्रमरैश्चापि वर्जिता इत्यस्यानन्वयात् । किं तु भ्रमरैरप्यनुपभुक्तं स्थलपद्मिनीमात्रमित्यर्थः । सर्वेऽपि महातटाकाः स्थलपद्मिनीत्वं गता इति भावः । अन्यं देशं विविशुरिति पूर्वेणान्वयः ॥ ६–१० ॥

६–७] ति० टी०—यत्र निर्जलत्वादिवद्गहनं तादृशान्यपि दुरन्वेष्याणि विचित्येत्यन्वयः । भृशपीडिता निर्जलारण्यान्वेषणेन क्षुत्पिपासाभ्यां पीडिताः । स देशो निर्जलादिदेशो यद्यपि दुरन्वेष्यः, अथापि तं विचित्य ततस्तं देशं त्यक्त्वाऽन्यदेशं विविशुरित्यग्रिमेणान्वयः ॥ ६ ॥ ७ ॥

८–९] ति० टी०—वन्ध्यफला अनुत्पन्नफलाः ॥ ८ ॥ ९ ॥

१०] ति० टी०—वल्ल्यो वृक्षाद्याश्रिताः । वीरुधो भूम्याधाराः । स्थले यत्र स्थले नेत्यनुकर्षः ॥ १० ॥

रा० टी०—स इति । स तैः परिमार्गितो देशो यतो गुहागहनवान् अतः दुरन्वेषः अन्यैः परिमार्गयितुमशक्योऽस्तीति शेषः । अर्धं पृथक् । निर्जनमिति । निर्जनत्वादिविशिष्टं तं देशं त्यक्त्वा परित्यज्य सर्वे हरियूथपाः आसाद्येति शेषः । अर्धद्वयमेकान्वयि ॥ ६ ॥

रा० टी०—तादृशानीति । तादृशानि निर्जनत्वादिविशिष्टानि अरण्यानि विचित्य भृशपीडिताः अकुतोभयाः वानराः यत्र वन्ध्यफलाः सर्वकालं फलाभाववन्तः विपुष्पाः पुष्परहिताः वृक्षाः सन्ति सरितो निस्तोयास्तोयरहिताः अत एव यत्र मूलं सुदुर्लभमत एव यत्र महिषादयो न सन्ति अत एवात्र वृक्षाः वृक्षजातीया औषध्यादयो न यत्र स्थले स्निग्धपत्राः फुल्लपङ्कजाः सुगन्धाः पद्मिन्यो न सन्ति अत एव भ्रमरैर्विवर्जिताः तमन्यं देशं विविशुः । सार्धश्लोकचतुष्टयमेकान्वयि ॥ ७–११ ॥

११] ति० टी०—भ्रमरैर्विवर्जिता विगतं वर्जितं यासु ताः संयुक्ता इत्यर्थः । तादृशाः फुल्लपङ्कजाश्च यत्र न सन्ति । यत्र वने कण्डुर्नाम महर्षिरासीत् ॥ ११ ॥

रा० टी०—तस्य निर्जलत्वादिविशिष्टत्वे हेतुमाह—कण्डुरिति । परमामर्षी अपराधासहनशीलः नियमैः इन्द्रियनिग्रहादिभिः उपलक्षितः अत एव दुष्प्रधर्षणः प्रधर्षयितुमशक्यः कण्डुर्नाम महर्षिस्तस्मिन् अवसदिति शेषः ॥ १२ ॥

गो० टी०—देशस्य तादृशत्वे निमित्तमृषिरित्याह—कण्डुरित्यादिना ॥ ११ ॥

१२] ति० टी०—वने पूर्वमिति शेषः । इदानीमुक्तलक्षणः ॥ १२ ॥

रा० टी०—तस्य कण्डोः दशवार्षिको बालस्तस्मिन्वने प्रनष्टः कथंचिन्मृतस्तेन हेतुना जीवितान्ताय वनप्रध्वंसाय महामुनिः कण्डुः क्रुद्धोऽभवदिति शेषः ॥ १३ ॥

गो० टी०—तस्येति । तत्र वने विषये जीवितान्ताय तस्य नाशाय कुपितः ॥ १२ ॥

१३] ति० टी०—जीवितान्ताय जीवितान्तं गत्वा प्रनष्टस्तेन बालदुर्मरणेन क्रुद्धो मुनिरभूत् ततस्तेन धर्मात्मना शापानुग्रहसमर्थप्रबलधर्मवता । तत्र काले शप्तमभूत् ॥ १३ ॥

रा० टी०—तेनेति । धर्मात्मनाऽपि तेन कण्डुना शप्तं दुराधर्षं कृत्स्नं वनमशरण्यं जलादिरहितमत एव मृगपक्षिविवर्जितम् अभवदिति शेषः ॥ १४ ॥

---

१ एतदाद्ययोः श्लोकयोः व्यत्यासः गो. पाठे । २ अर्धमेतत् गो. रा. नास्ति । ३ तदेति गो. पाठः । ४ यत्रेति गो पाठः । ५ लता इति गो.पाठः । ६ऽपीति गो. पाठः । ७ बालः षोडशेति गो. पाठः । ८ तत्रेति गो. पाठः ।

अशरण्यं दुराधर्षं मृगपक्षिविवर्जितम् । तस्य ते काननान्तांस्तु गिरीणां कन्दराणि च ॥ १४ ॥
प्रभवानि नदीनां च विचिन्वन्ति समाहिताः । तत्र चापि महात्मानो नापश्यञ्जनकात्मजाम् ॥ १५ ॥
हर्तारं रावणं वाऽपि सुग्रीवप्रियकारिणः । ते प्रविश्य तु तं भीमं लतागुल्मसमावृतम् ॥ १६ ॥
ददृशुर्भीमकर्माणमसुरं सुरनिर्भयम् । तं दृष्ट्वा वानरा घोरं स्थितं शैलमिवोन्नतम् ॥ १७ ॥
गाढं परिहिताः सर्वे दृष्ट्वा तं पर्वतोपमम् । सोऽपि तान्वानरान्सर्वान्नष्टाः स्थेत्यब्रवीद्बली ॥ १८ ॥
अभ्यधावत संक्रुद्धो मुष्टिमुद्यम्य संगतम् । तमापतन्तं सहसा वालिपुत्रोऽङ्गदस्तदा ॥ १९ ॥
रावणोऽयमिति ज्ञात्वा तलेनाभिजघान ह । स वालिपुत्राभिहतो वक्त्राच्छोणितमुद्वमन् ॥ २० ॥
असुरो न्यपतद्भूमौ पर्यस्त इव पर्वतः । ते तु तस्मिन्निरुच्छ्वासे वानरा जितकाशिनः ॥ २१ ॥
विचिन्वन्प्रायशस्तत्र सर्वे ते गिरिगह्वरम् । विचितं तु ततः सर्वं सर्वे ते कोननौकसः ॥ २२ ॥
अन्यदेवापरं घोरं विविशुर्गिरिगह्वरम् । ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः ॥
एकान्ते वृक्षमूले तु निषेदुर्दीनमानसाः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

गो० टी०–तेनेति । अशरण्यम् अनाश्रयम् अभवदिति शेषः ॥ १३ ॥

१४] ति० टी०–शापस्वरूपमाह–अशरण्यमनावासम् । ते वानरास्तस्य काननान्तान्विचिन्वन्तीत्यन्वयः ॥ १४ ॥

रा० टी०–तस्येति । तस्य सुग्रीवस्य प्रेषितास्ते हनुमदादयः काननान्तान् वनान्तपर्यन्तान् गिरीणां कन्दराणि च नदीनां प्रभवाणि उत्पत्तिस्थानानि च समाहिताः सन्तः विचिन्वन्ति ॥ १५ ॥

गो० टी०–तस्य त इति । नदीनां प्रभवानि गिरिगणमध्यप्रदेशाः ॥ १४ ॥ १५ ॥

१५] ति० टी०–नदीनां प्रभवान्युत्पत्तिस्थानानि ॥ १५ ॥

रा० टी०–तत्रेति । सुग्रीवप्रियकारिणः हनुमदादयः जनकात्मजां रावणं च नापश्यन् ॥ १६ ॥

१६] ति० टी०–ते प्रविश्य वनान्तरमिति शेषः । तमसुरं ददृशुरित्यन्वयः ॥ १६ ॥

रा० टी०–ते इति । ते हनुमदादयः लतागुल्मसमावृतं भीमं वनान्तरं प्रविश्य सुरनिर्भयं वरदानेन देवभयरहितं सुरवरदानात् प्राप्तभयाभावं वा भीमकर्माणमसुरं ददृशुः ॥१७॥

गो० टी०–ते प्रविश्येति । सुरनिर्भयं सुरेभ्यो निर्भयम् १६

१७] ति० टी०–सुरेभ्यो निर्भयः सुरनिर्भयः तथा वरदानादिति भावः ॥ १७ ॥

रा० टी०–तमिति । शैलमिव स्थितं घोरं तमसुरं दृष्ट्वा वानराः विव्यथुरिति शेषः, अत एव पर्वतोपमं तं दृष्ट्वा गाढं यथा भवति तथा परिहिताः संनद्धाः अभवन्निति शेषः ॥१८॥

गो० टी०–तं दृष्ट्वेति । गाढं परिहिताः दृढं परिहितवसनाः अभवन् ॥ १७ ॥

१८–२१] ति० टी०–गाढं परिहिता दृढं परिवद्धवस्त्राः संनद्धा इति यावत् ॥ १८–२१ ॥

रा० टी०–स इति । असुरोऽपि यूयं सर्वे नष्टाः स्थ इति सर्वान् वानरान् अब्रवीत्, सङ्गतं वद्धं मुष्टिमुद्यम्य अभ्यधावत च ॥ १९ ॥

रा० टी०–तमिति । वालिपुत्रोऽङ्गदः आपतन्तमसुरं रावणोऽयमिति ज्ञात्वा अभिजघान ॥ २० ॥

गो० टी०–सोऽपीति ॥ १८ ॥ १९ ॥

रा० टी०–स इति । वालिपुत्राभिहतः सोऽसुरः वक्त्राच्छोणितमुद्वमन् सन् पर्यस्तः प्रक्षिप्तः पर्वत इव भूमौ न्यपतत् ॥ २१ ॥

रा० टी०–ते इति । ते वीरप्राये तस्मिन् असुरे निरुच्छ्वासे उच्छ्वासरहिते सति जितकाशिनः जितेन जयेन काशः प्रकाशो येषां ते वानराः सर्वं गिरिगह्वरं विचिन्वन् । आगमशास्त्रस्यानित्यत्वात् अङ्गिरहः ॥ २२ ॥

गो० टी०–पर्यस्तः पातितः ॥ २० ॥

गो० टी०–तेऽपीति । तस्मिन्नसुरे निरुच्छ्वासे मृत इत्यर्थः॥ तस्मिन्नसुरे रावणभ्रान्त्या तत्समीपवर्तने चिरमन्वेषितवन्त इति बोध्यम् ॥ २१ ॥

२२–२३] ति० टी०–सर्वं विचितं ज्ञात्वेति शेषः २२॥३३

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टचत्वारिंशः सर्गः ॥४८॥

१ चेति गो. पाठः । २ ऽऽश्चिति गो. पाठः । ३ क्रूरेति गो. पाठः । ४ अपरमिति गो. पाठः । ५ संहितमिति गो. पाठः । ६ ऽपीति गो. पाठः । ७ व्यचिन्वन्निति गो. पाठः । ८ तदिति गो. पाठः । ९ कृत्स्नेति गो. पाठः । १० कालनं पुनरिति गो. पाठः ।

एकोनपञ्चाशः सर्गः ।

अटव्यटनश्रान्तानपि फलानिष्पत्तेः सुनिर्विण्णान्वानरान् सुग्रीवचण्डतामन्वेषणकालातिपातं च संस्मारयन्नङ्गदः फलसंभावनया प्रोत्साहयन्नन्वेषणे प्रवर्तयति । अङ्गदवचसः समर्थनाद्गन्धमादनेनोद्दीपितोत्साहास्ते निर्गत्य रजतगिरिगुहादीनि विचिन्वन्तः सुश्रान्ताः क्वचन वृक्षखण्डे किंचिद्विश्रम्य पुनरन्वेषणसनद्धा बभूवुः ।

अथाङ्गदस्तदा सर्वान्वानरानिदमब्रवीत् । परिश्रान्तो महाप्राज्ञः समाश्वास्य[1] शनैर्वचः ॥ १ ॥
वनानि गिरयो नद्यो दुर्गाणि गहनानि च । दरी[2] गिरिगुहाश्चैव विचिता[3]ः सर्वमन्ततः ॥ २ ॥
तत्र तत्र सहास्माभिर्जानकी न च दृश्यते । तथा रक्षोऽपहर्ता[4] च सीतायाश्चैव दुष्कृती ॥ ३ ॥
कालश्च [5]नो महान्यातः सुग्रीवश्चोग्रशासनः । तस्माद्भवन्तः सहिता विचिन्वन्तु समन्ततः ॥ ४ ॥
विहाय तन्द्रीं शोकं च निद्रां चैव समुत्थिताम् । विचिनुध्वं तथा सीतां पश्यामो जनकात्मजाम्[6]॥ ५ ॥
अनिर्वेदं च दाक्ष्यं च मनसश्चापराजयम्[7] । कार्यसिद्धिकराण्याहुस्तस्मादेतद्ब्रवीम्यहम् ॥ ६ ॥
अद्यापी[8]दं वनं दुर्गं विचिन्वन्तु वनौकस[9]ः । खेदं त्यक्त्वा पुनः सर्वे वनमेव विचिन्वन्[10]ताम् ॥ ७ ॥

रा० टी०–विचितमिति । सर्वं काननं विचितं कृत्वा अन्यत् विलक्षणमपरं गिरिगह्वरं विविशुः ॥ २३ ॥

गो० टी०–विचितं त्विति । अपरम् अदृश्यम् 'परं दूरान्यशत्रुरूपेषु' इति वैजयन्ती । गिरिगह्वरं गिरिमध्यप्रदेशम्॥२२॥

रा० टी०–ते इति । विचित्य खिन्नाः वस्तुप्राप्त्यभावेन प्राप्तखेदाः निष्पत्य तस्मान्निस्सृत्य एकान्ते वृक्षमूले समागतास्ते वानराः दीनमानसाः सन्तः निषेदुः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
किष्किन्धाकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

गो० टी०–ते विचित्येति । विनिष्पत्य विनिर्गत्य समागताः संघीभूताः ॥ २३ ॥

अस्मिन्सर्गे चतुर्विंशतिः श्लोकाः ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने
किष्किन्धाकाण्डव्याख्यानेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१-२] ति० टी०–समाश्वास्य वानरानिति शेषः ॥१॥२॥

रा० टी०–वानरान् प्रति अङ्गदोक्तिमाह–अथेति । अथ वृक्षमूलस्थित्यनन्तरं परिश्रान्तो महाप्राज्ञोऽङ्गदः शनैः समाश्वास्य वानरान् इदं वचोऽब्रवीत् ॥ १ ॥

रा० टी०–तद्वचनाकारमाह–वनानीत्यादिभिः । वनादयोऽन्ततो विचिताः अस्माभिरिति शेषः ॥ २ ॥

गो० टी०–पुनः प्रदेशान्तरान्वेषणमेकोनपञ्चाशे–अथाङ्गद इत्यादि । सह युगपत् दाक्ष्यम् उत्साहः "दक्ष उत्साहे" इत्युक्तेः । मनसश्चापराजयः धैर्यमित्यर्थः । वनमेतत् विचीयताम् अन्विष्यताम् । मीलनं नेत्रमीलनं कर्तव्यमकृत्वा तूष्णींभाव इत्यर्थः । खेदमिति । विचिन्वतामिति चिनोतेर्लोटि प्रथमपुरुषबहुवचने रूपम् । 'विचीयताम्' इति पाठे युष्माभिरिति शेषः ॥ १—१० ॥

३] ति० टी०–रक्षस्तदूपोपहर्तेत्यार्षः ॥ ३ ॥

रा० टी०–तत्रेति । तत्र तत्र अन्वेषिते स्थले स्थले सहा दुःखानि सहमाना जानकी सीताया अप हर्ता रक्षश्च अस्माभिर्न दृश्यते अदन्तो रक्षःशब्दोऽपि अत एव सान्ता अदन्ता अपि पक्षः सानुकूलः अत एव भट्टादिवन्नार्षकल्पना ॥ ३ ॥

४] ति० टी०–नो महान्यातः मासमध्य इति शेषः । तन्मध्येऽल्पोऽवशिष्ट इति भावः । पराङ्मुत्य गमने महदनिष्टमित्याह—सुग्रीवश्चेति ॥ ४ ॥

रा० टी०–काल इति । कालः नियमितान्वेषणसमयः महान् बहुर्यातो व्यतीतः सुग्रीवश्च उग्रशासनस्तस्मात् सहिताः भवन्तो विचिन्वन्तु ॥ ४ ॥

५] ति० टी०–तथा विचिनुध्वम्, यथा सीतां पश्याम इत्यन्वयः ॥ ५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–विहायेति । शोकं समुत्थितां निद्रां च विहाय सीतां यथा पश्यामस्तथा विचिनुध्वम् ॥ ५ ॥

६] ति० टी०–अनिर्वेदमखेदम् दाक्ष्यं सामर्थ्यम् अपराजयं कार्यापराङ्मुखत्वम् । एतद्वक्ष्यमाणम् ॥ ६ ॥

रा० टी०–अनिर्वेदमिति । अनिर्वेदं खेदराहित्यं विरक्तिराहित्यं वा दाक्ष्यं सामर्थ्यं च मनसः अपराजयं न्यूनीकरणाभावं च कार्यसिद्धिकराणि आहुस्तस्मात् अहमेतद्ब्रवीमि ॥६॥

७] ति० टी०–हे वनौकसः ! इदं दुर्गवनमथापि विचिन्वन्तु भवन्तः । आदरात्पुनराह—खेदं त्यक्त्वा पुनर्विचिन्वताम् ॥ ७ ॥

रा० टी०–अद्येति । विचिन्वताम् अन्वेषणसाधकानां करचरणादीनां खेदं श्रमं त्यक्त्वा विस्मृत्य अद्यापीदं वनं विचिन्वन्तु ॥ ७ ॥

---

१ आश्वस्येति गो. पाठः । २ दर्य इति गो. पाठः । ३ विचितानि समन्तत इति गो. पाठः । ४ तद्देति गो. पाठः । ५ हृता येन सीता सुरक्षितोपमेति गो. पाठः । ६ व इति गो. पाठः । ७ जय इति गो. पाठः । ८ तदिति गो. पाठः । ९ सर्वैरिति गो. पाठः । १० चीक्षतामिति गो. पाठः ।

अवश्यं [1]कुर्वतां तस्य दृश्यते कर्मणः फलम् । [2]परं निर्वेदमागम्य नहि [3]नोन्मीलनं क्षमम् ॥ ८ ॥
सुग्रीवः [4]क्रोधनो राजा तीक्ष्णदण्डश्च वानराः । भेतव्यं तस्य सततं रामस्य च महात्मनः ॥ ९ ॥
हितार्थमेतदुक्तं वः क्रियतां यदि रोचते । उच्यतां [6]हि क्षमं यैत्तत्सर्वेषामेव वानराः ॥ १० ॥
अङ्गदस्य वचः श्रुत्वा वचनं गन्धमादनः । उवाच व्यक्तया वाचा पिपासाश्रमखिन्नया ॥ ११ ॥
सदृशं खलु वो वाक्यमङ्गदो यदुवाच ह । हितं चैवानुकूलं च क्रियतामस्य भाषितम् ॥ १२ ॥
पुनर्मार्गामहे शैलान्कन्दरांश्च शिलास्तथा । काननानि च शून्यानि गिरिप्रस्रवणानि च ॥ १३ ॥
यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना । विचिन्वन्तु वनं सर्वे गिरिदुर्गाणि संगताः ॥ १४ ॥
ततः समुत्थाय पुनर्वानरास्ते महाबलाः । विन्ध्यकाननसंकीर्णां विचेरुर्दक्षिणां दिशम् ॥ १५ ॥
ते शारदाभ्रप्रतिमं श्रीमद्रजतपर्वतम् । शृङ्गवन्तं दरीवन्तमधिरुह्य च वानराः ॥ १६ ॥
तत्र [12]लोध्रवनं रम्यं सप्तपर्णवनानि च । विचिन्वन्तो हरिवराः सीतादर्शनकाङ्क्षिणः ॥ १७ ॥
तस्याग्रमधिरूढास्ते श्रान्ता विपुलविक्रमाः । न पश्यन्ति स्म वैदेहीं रामस्य महिषीं प्रियाम् ॥ १८ ॥
ते तु दृष्टिगतं [13]दृष्ट्वा तं शैलं बहुकन्दरम् । [14]अध्यारोहन्त हरयो वीक्षमाणाः समन्ततः ॥ १९ ॥
अवरुह्य ततो भूमिं [15]श्रान्ता विगतचेतसः । [16]स्थिता मुहूर्तं तत्राथ वृक्षमूलमुपाश्रिताः ॥ २० ॥
ते मुहूर्तं समाश्वस्ताः किंचिद्भग्नपरिश्रमाः । पुनरेवोद्यताः कृत्स्नां मार्गितुं दक्षिणां दिशम् ॥ २१ ॥

८] ति० टी०–निर्वेदं खेदम् । नोन्मीलनमनुन्मीलनमनुद्योग इति यावत् । न क्षमं न युक्तम् ॥ ८ ॥

रा० टी०–अवश्यमिति । क्रियमाणस्य कर्मणः फलमवश्यं दृश्यते अतः परं निर्वेदं कार्याद्विरक्तिमागम्य प्राप्य नोन्मीलनम् अनुन्मीलनमुत्साहाभाव इत्यर्थः नैव क्षमं युक्तम् ॥ ८ ॥

९] ति० टी०–तत्र हेतुः—सुग्रीव इति ॥ ९ ॥

रा० टी०–सुग्रीव इति । वानरो राजा सुग्रीवः क्रोधनः कार्याभावे अतीवक्रोधयुक्तो भवतीत्यर्थः, अतस्तस्य सुग्रीवस्य महात्मनो रामस्य च भेतव्यम् । संबन्धसामान्यविवक्षया षष्ठी॥९॥

१०–११] ति० टी०–यदि मदुक्तमेतन्न रोचते तर्हि यदन्यत्क्षमं तदुच्यताम् ॥ १० ॥ ११ ॥

रा० टी०–हितार्थमिति । हितार्थं हितसाधकमेतत् उक्तं मद्वचनं यदि वो रोचते तर्हि क्रियतां सर्वेषां यत्क्षमं युक्तं तदुच्यतां च ॥ १० ॥

रा० टी०–अङ्गदस्येति । गन्धमादनो नाम वानरः अङ्गदस्य वचः श्रुत्वा पिपासाश्रमखिन्नया पिपासापरिश्रमोभयजनितखेदयुक्तया वाचा उवाच ॥ ११ ॥

गो० टी०–अङ्गदस्येत्यादि । कन्दरान् भेदान् विचिन्वन्तु वनं सर्वं इति भवन्त इति शेषः ॥ ११—२२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१२–१७] ति० टी०–वो युष्माकम् । यदङ्गद उवाच तत्सदृशम् तस्यैवेति शेषः ॥ १२–१७ ॥

रा० टी०–तद्वचनाकारमाह—सदृशमिति । यद्वाक्यमङ्गद उवाच तत् वः सदृशं योग्यमतः हितमनुकूलमस्याङ्गदस्य भाषितं क्रियतां युष्माभिरिति शेषः ॥ १२ ॥

रा० टी०–पुनरिति । शैलादीन् पुनर्मार्गामहे ॥ १३ ॥

रा० टी०–यथेति । सङ्गताः कृतसंमताः सर्वे भवन्तः सुग्रीवेणोद्दिष्टानि सर्वाणि गिरिदुर्गाणि यथावद्विचिन्वन्तु॥१४॥

रा० टी०–तत इति । ततः गन्धमादनवचनश्रवणानन्तरं सीतादर्शनकाङ्क्षिणः महाबलाः वानराः समुत्थाय विन्ध्यकाननसंकीर्णां विन्ध्यवननिबिडां दक्षिणां दिशं विचेरुः ॥ १५ ॥

रा० टी०–ते इति । शारदाभ्रप्रतिमं शरत्कालिकमेघसदृशं श्रीमद्रजतपर्वतं हरिवरास्ते वानराः अधिरुह्य तत्र रजतपर्वते विद्यमानं लोध्रवनं विचिन्वन्तः आसन्निति शेषः । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

१८] ति० टी०–तस्य रजतपर्वतस्य ॥ १८ ॥

रा० टी०–तस्येति । तस्य रजतपर्वतस्य अग्रमधिरूढाश्रान्तास्ते वानराः वैदेहीं न पश्यन्ति स्म ॥ १८ ॥

१९–२१] ति० टी०–दृष्टिगतं दृष्टिगोचरम् । अध्यारोहन्त अवारोहन्तेत्यर्थः ॥ १९–२१ ॥

रा० टी०–ते इति । ते हरयो वानराः दृष्टिगतं दृष्टिविषयं शैलं बहुकन्दरं दृष्ट्वा अध्यारोहन्त अवारोहन्त ॥ १९ ॥

१ क्रियमाणस्येति गो. रा. पाठः । २ अलमिति गो. पाठः । ३ नो मीलनमिति गो. पाठः । ४ कोपन इति गो. पाठः । ५ वानर इति गो. पाठः । ६ वेति गो. पाठः । ७ यन्न इति गो. पाठः । ८ अव्यक्तयेति रा. पाठः । ९ दरीरिति गो. पाठः । १० सर्वंश इति गो. पाठः । ११ क्रोद्रेति गो. पाठः । १२ न्वैस्ते इति गो. पाठः । १३ कृत्वेति गो. पाठः । १४ अवारोहन्तेति गो. पाठः । १५ श्रान्ता इति गो. पाठः । १६ स्थित्वेति गो. पाठः ।

हनुमत्प्रमुखास्तावत्प्रस्थिताः प्लवगर्षभाः । विन्ध्यमेवादितः कृत्वा विचेरुश्च समन्ततः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ।

दुरन्वेषविन्ध्यगुहादिष्वन्वेषणेनैव सुग्रीवादिष्टकालातिपाते क्षुत्पिपासार्दिता हनुमदादयः ऋक्षबिलाख्यां कांचिद्धरीं ददृशुः । बिलद्वाःस्थार्द्रपक्षखगदर्शनादनुमितान्तर्जलां तां गाढान्धतमोवृतामप्येकैकहस्तावलम्बेन रचितमालाः प्राविशन् । आरूमितकिंचिदन्तराश्च काञ्चनवृक्षादिभासोद्योतमानेऽद्भुतप्रदेशे कांचित्तपस्विनीं ददृशुः । तत्प्रदेशविषयजिज्ञासुर्हनुमांस्तामभिवाद्य पृच्छति ।

सह ताराङ्गदाभ्यां तु संगम्य हनुमान्कपिः । विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥ १ ॥
सिंहशार्दूलजुष्टाश्च गुहाश्च परितस्तदा । विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च ॥ २ ॥
आसेदुस्तस्य शैलस्य कोटिं दक्षिणपश्चिमाम् । तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ॥ ३ ॥
स हि देशो दुरन्वेष्यो गुहागहनवान्महान् । तत्र वायुसुतः सर्वं विचिनोति स्म पर्वतम् ॥ ४ ॥
परस्परेण रहिता अन्योन्यस्याविदूरतः । गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ ५ ॥
मैन्दश्च द्विविदश्चैव हनूमाञ्जाम्बवानपि । अङ्गदो युवराजश्च तारश्च वनगोचरः ॥ ६ ॥

रा० टी०–अवरुह्येति । श्रान्ताः परिश्रमवन्तः अत एव विगतचेतसः संचलितचित्ताः वानरास्ततः रजतपर्वतात् भूमिमवरुह्य प्राप्य वृक्षमूलमुपाश्रिताः सन्तस्तत्र मुहूर्तं स्थिताः बभूवुरिति शेषः ॥ २० ॥

रा० टी०–ते इति । मुहूर्तं समाश्वस्ताः अत एव किंचित् भग्नपरिश्रमाः वानराः कृत्स्नां दक्षिणां दिशं मार्गितुं पुनरुद्यताः अभवन्निति शेषः ॥ २१ ॥

२२] ति० टी०–आदितस्तावद्विन्ध्यं विचेरुः अन्वेषणायेति शेषः । तावच्छब्दो वाक्यालंकारे ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः ॥४९॥

रा० टी०–हनुमदिति । प्रस्थिताः उद्यताः कृतोद्योगाः हनुमत्प्रमुखाः प्लवगर्षभाः तावत् पूर्वं विन्ध्यमेव समन्ततो विचेरुः ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१] ति० टी०–सहेति ॥ १ ॥

रा० टी०–तदन्वेषणमेवाह–सहेत्यादिभिः । हनूमान् कपिस्ताराङ्गदाभ्यां सह सङ्गम्य नगेन्द्रस्य विन्ध्यस्य विषमेषु दुर्गमेष्वित्यर्थः, महाप्रस्रवणेषु तत्समीपेषु वर्तमानाः सिंहशार्दूलजुष्टाः गुहाः बहुगुहावत्यः गुहावनानि च विचिनोति व्यचिनोत् । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–अथ ऋक्षबिले स्वयंप्रभादर्शनं पञ्चाशे–सहेत्यादि ॥ १ ॥

२] ति० टी०–विषमेषु क्लेशजनकेषु ॥ २ ॥

गो० टी०–सिंहेति । नगेन्द्रस्य शार्दूलजुष्टेषु विषमेषु विषमप्रदेशेषु शिलाः महाप्रस्रवणेषु सरितश्च विचिनोति स्मेति पूर्वेणान्वयः ॥ २ ॥

३] ति० टी०–दक्षिणपश्चिमां कोटिं नैर्ऋत्यभागीयशृङ्गम् स कालः सुग्रीवकल्पितः कालः व्यत्यवर्तत व्यतिक्रान्तः ॥३॥

रा० टी०–आसेदुरिति । तस्य उक्तस्य शैलस्य दक्षिणपश्चिमां नैर्ऋत्यकोणस्थां कोटिं शृङ्गमासेदुः तत्रैव शृङ्गे वसतां तेषां सः अमार्गणीयः कालः रात्रिसमयः व्यत्यवर्तत व्यतीतोऽभवत् ॥ ३ ॥

गो० टी०–आसेदुरिति । कालः सुग्रीवोक्तमासः । मासः पूर्णो बिलस्थानामित्युत्तरश्राद्धदवचनस्य बिल एवान्यो मासो गत इत्यर्थो वक्ष्यते ॥ ३ ॥

४] ति० टी०–स देशो नैर्ऋत्यविन्ध्यकोटिप्रदेशः ॥ ४ ॥

रा० टी०–स इति । गुहागहनवान् स देशः यद्यपि दुरन्वेष्यस्तथापि वायुसुतो हनुमान् विचिनोति स्म । अन्यकर्तृकविचयनस्यापि सत्त्वेऽपि प्राधान्यात् हनुमन्मात्रोक्तिः ॥ ४ ॥

गो० टी०–नन्वत्र विचेतव्यप्रदेशेषु बहुषु विद्यमानेषु कथमत्रैव मासं क्षपितवन्त इत्याशङ्क्याह–स हीति ॥ ४ ॥

गो० टी०–तत्रेति । सङ्गम्येत्यध्याहार्यम् । वायुसुतः हनुमान् अन्योन्यस्याविदूरतः परस्परेण संगमन्य सर्वं पर्वतं विचिनोति स्मेति संबन्धः ॥ ५ ॥

५–६] ति० टी०–परस्परेण रहिताः प्रत्येकमन्योन्यस्याविदूरतो भूत्वा हनुमान्गाजादयश्च विचिन्वन्ति स्म ॥५॥६॥

१ ते स्थिति गो. पाठः । २ तावदिति गो. पाठः । ३ ते ततस्तत इति गो. पाठः । ४ स्मेति गो. पाठः । ५ जुष्टेषु शिलाश्च सरितस्तथेति गो. पाठः । ६ हनुमानिति गो. पाठः । ७ सुषेणो जाम्बवान्नल इति गो. पाठः ।

गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम्। विचिन्वन्तस्ततस्तत्र ददृशुर्विवृतं बिलम् ॥ ७ ॥
दुर्गमृक्षबिलं नाम दानवेनाभिरक्षितम्। क्षुत्पिपासापरीतास्तु श्रान्तास्तु सलिलार्थिनः॥ ८ ॥
अवकीर्णं लतावृक्षैर्ददृशुस्ते महाबिलम्। तत्र क्रौञ्चाश्च हंसाश्च सारसाश्चापि निष्क्रमन् ॥ ९ ॥
जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः। ततस्तद्बिलमासाद्य सुगन्धि दुरतिक्रमम् ॥ १० ॥
विस्मयव्यग्रमनसो बभूवुर्वानरर्षभाः। संजातपरिशङ्कास्ते तद्बिलं प्लवगोत्तमाः ॥ ११ ॥
अभ्यपद्यन्त संहृष्टास्तेजोवन्तो महाबलाः। नानासत्त्वसमाकीर्णं दैत्येन्द्रनिलयोपमम् ॥ १२ ॥
दुर्दर्शमिव घोरं च दुर्विगाह्यं च सर्वशः। ततः पर्वतकूटाभो हनूमान्मारुतात्मजः ॥ १३ ॥
अब्रवीद्वानरान्घोरान्कान्तारवनकोविदः। गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् १४ ॥
वयं सर्वे परिश्रान्ता न च पश्याम मैथिलीम्। अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः१५ ॥
जलार्द्राश्चक्रवाकाश्च निष्पतन्ति स्म सर्वशः। नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः ॥ १६ ॥

७] ति० टी०–विवृतमनावृतद्वारम् ॥ ७ ॥

रा० टी०–अन्वेषणप्रकारमाह–परस्परेणेति। अन्योन्यस्य अविदूरतः समीपे एव स्थिताः परस्परेण रहिताः साहाय्यहीनाः गजादयः दक्षिणां दिशं विचिन्वन्तः सन्तः ततस्तान् प्रसिद्धान् गिरिजालावृतान् पर्वतसमूहाच्छादितान् देशान्मार्गित्वा तत्र देशे विवृतमनाच्छादितद्वारं बिलं ददृशुः। श्लोकत्रयमेकान्वयि ॥ ५—७ ॥

गो० टी०–गज इत्यादि। चकाराद्वनमांश्च गजादयः गिरिजालावृतान् देशान्मार्गित्वा ततो दक्षिणां दिशं विचिन्वन्तः तत्र विवृतं विस्तृतं बिलं ददृशुरिति संबन्धः ॥ ६ ॥ ७ ॥

८] ति० टी०–दुर्गं दुर्गमम्। दानवेन मयेन ॥ ८ ॥

रा० टी०–दुर्गमिति। दानवेनाभिरक्षितमत एव दुर्गं दुर्गमं लतावृक्षैरवकीर्णम् ऋक्षबिलं नाम महाबिलं क्षुत्पिपासापरीताः अत एव श्रान्ताः खिन्ना अत एव सलिलार्थिनः वानराः ददृशुः। सार्धश्लोक एकान्वयी ॥ ८ ॥

गो० टी०–दुर्गमित्यादि। दानवेन मयेन ऋक्षबिलं नाम ऋक्षबिलमिति प्रसिद्धम् महाबिलं ददृशुरिति पुनरुक्तिर्गुणान्तरविधानाय ॥ ८ ॥

९] ति० टी०–तत्र ततः निष्क्रमन्निराक्रमन् ॥ ९ ॥

रा० टी०–तत्रेति। तत्र तस्माद् बिलात् पद्मरेणुभिः रक्ताङ्गाः जलार्द्राः क्रौञ्चादयः निष्क्रमन् निरक्रमन्। अर्धद्वयमेकान्वयि ॥ ९ ॥

गो० टी०–तत इति। निष्क्रमन् निरक्रमन् ॥ ९ ॥

१०] ति० टी०–सुगन्धि, बिलान्तर्वक्ष्यमाणदिव्यगन्धपुष्पसंबद्धवातसङ्गात् ॥ १० ॥

रा० टी०–तत इति। ततो दर्शनानन्तरं सुगन्धि वक्ष्यमाणपुष्पितदिव्यतरुवायुसंबन्धात् शोभनगन्धयुक्तं तद्बिलमासाद्य प्राप्य वानरर्षभाः विस्मयव्यग्रमनसः अपूर्वदर्शनजनितविस्मयहेतुकचञ्चलचित्ता बभूवुः ॥ १० ॥

गो० टी०–ततस्तदिति। दुरतिक्रमं दुष्प्रवेशम् ॥ १० ॥

११] ति० टी०–संजातपरिशङ्काः। संजातजलसंभावनाः ॥ ११ ॥

रा० टी०–संजातेति। संजाता शङ्का जलविषयकतर्को येषां ते अत एव संहृष्टाः प्लवगोत्तमाः नानासत्त्वसमाकीर्णम् अतिघोरं भयावहमित्यर्थः, दुर्दर्शं द्रष्टुमशक्यं दुर्विगाह्यं बिलम् अभ्यपद्यन्त। अर्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–संजातेति। संजातपरिशङ्काः किमिदं पातालम् उतान्यन्मायामयमिति संदिहानाः असंहृष्टाः सन्तः अभ्यपद्यन् अभ्यपद्यन्त ॥ ११ ॥

१२–१३] ति० टी०–दैत्येन्द्रनिलयः पातालम् ॥ १२ ॥ १३ ॥

गो० टी०–नानेति श्लोकौ बिलविशेषणम् ॥ १२ ॥

रा० टी०–तत इति। कान्तारवनकोविदो दुर्गमारण्याभिज्ञाता हनुमान् घोरान् वानरान् अब्रवीत् ॥ १३ ॥

गो० टी०–तत इति। कान्तारे दुर्गमार्गे वने कोविदः समर्थः ॥ १३ ॥

१४–१६] ति० टी०–कान्तारवनकोविदस्तत्प्रवेशादौ समर्थः ॥ १४–१६ ॥

रा० टी०–तद्वचनाकारमाह–गिरीति। दक्षिणां दिशं प्राप्य गिरिजालावृतान् देशान् मार्गित्वा परिश्रान्ता वयं मैथिलीं न पश्यामः ॥ १४ ॥

रा० टी०–अस्मादिति। जलार्द्राः हंसादयः अस्मात् बिलात् निष्पतन्ति तथा बिलद्वारि स्निग्धाः पादपास्तिष्ठन्ति अतः सलिलवान् कूपो वा यदि वा अथवा ह्रदोऽस्तीति शेषः, नूनं निश्चितमेतत्। अर्धचतुष्टयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–गिरीति। गिरिजालावृतान् देशान्। दक्षिणां दिशम् तादृग्देशरूपां दक्षिणां दिशमित्यर्थः ॥ १४ ॥ १५ ॥

गो० टी०–नूनमिति। अस्तीति शेषः ॥ १६ ॥

---

१ चेति गो. पाठः। २ पद्मरेणेति गो. पाठः। ३ अतीति गो. पाठः। ४ गाहमिति गो. पाठः। ५ हनुमान्वनेति गो. पाठः। ६ सर्वानिति गो. पाठः। ७ चेति रा. पाठः। ८ सर्वत इति गो. पाठः।

तथा चेमे बिल्वद्वारे स्निग्धास्तिष्ठन्ति पादपाः । इत्युक्तास्तद्बिलं सर्वे विविशुस्तिमिरावृतम् ॥ १७ ॥
अचन्द्रसूर्यं हरयो ददृशू रोमहर्षणम् । निशाम्य तस्मात्सिंहांश्च तांस्तांश्च मृगपक्षिणः ॥ १८ ॥
प्रविष्टा हरिशार्दूला बिलं तिमिरसंवृतम् । न तेषां सज्जते दृष्टिर्न तेजो न पराक्रमः ॥ १९ ॥
वायोरिव गतिस्तेषां दृष्टिस्तमसि वर्तते । ते प्रविष्टास्तु वेगेन तद्बिलं कपिकुञ्जराः ॥ २० ॥
प्रकाशं चाभिरामं च ददृशुर्देशमुत्तमम् । ततस्तस्मिन्बिले भीमे नानापादपसंकुले ॥ २१ ॥
अन्योन्यं संपरिष्वज्य जग्मुर्योजनमन्तरम् । ते नष्टसंज्ञास्तृषिताः संभ्रान्ताः सलिलार्थिनः ॥ २२ ॥
परिपेतुर्बिले तस्मिन्कंचित्कालमतन्द्रिताः । ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः ॥ २३ ॥
आलोकं ददृशुर्वीरा निराशा जीविते यदा । ततस्तं देशमागम्य सौम्या वितिमिरं वनम् ॥ २४ ॥
ददृशुः काञ्चनान्वृक्षान्दीप्तवैश्वानरप्रभान् । सालांस्तालांस्तमालांश्च पुंनागान्वञ्जुलान्धवान् २५ ॥
चम्पकान्नागवृक्षांश्च कर्णिकारांश्च पुष्पितान् । स्तबकैः काञ्चनैश्चित्रै रक्तैः किसलयैस्तथा ॥ २६ ॥

१७] ति० टी०–इत्युक्ताः हनुमतेति शेषः ॥ १७ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण उक्ताः हनुमता बोधिताः सर्वे हरयः अचन्द्रसूर्यं चन्द्रसूर्यादिरहितम् अत एव तिमिरावृतम् अत एव रोमहर्षणं भयजनकत्वेन रोमोद्गमकारकं तद्बिलं विविशुः ॥ १७ ॥

गो० टी०–इत्युक्त्वेति । हनुमदुक्तप्रकारेण सर्वेऽप्युक्त्वा विविशुः तिमिरावृतं ददृशुश्च । अचन्द्रसूर्यं चन्द्रसूर्यकिरणरहितम् ॥ १७ ॥

१८] ति० टी०–निशाम्यावलोक्य ॥ १८ ॥

रा० टी०–निशाम्येति । तस्मात् बिलात् निर्गच्छत इति शेषः सिंहादीन् निशाम्य अवलोक्य हरिशार्दूलाः तिमिरसंवृतं बिलं प्रविष्टाः ॥ १८ ॥

गो० टी०–निशाम्येति । तस्मान्निर्गच्छतः सिंहान् तांस्तान् नानाप्रकारान् मृगपक्षिणश्च ॥ १८ ॥

१९–२१] ति० टी०– न सज्जते न प्रतिबध्यते । तेजः प्रभावः । अन्ये तु तेषां दृष्टिर्न सज्जते तत्रत्यपदार्थेष्विति शेषः, तिमिरावृतत्वात्, अत एव तेजःपराक्रमयोरपि कुण्ठितगमनम् । यद्यपि वायोरिव गतिस्तथाऽपि यतो दृष्टिस्तमसि प्रतिबद्धा वर्तते, अतो वेगेन परस्परहस्तग्रहणपूर्वकं प्रविष्टा इत्यर्थः । अत एव ' गृह्य हस्तैः परस्परम् ' इत्यग्रे हनुमदुक्तिरित्याहुः ॥ १९–२१ ॥

रा० टी०–नेति । तेषां वानराणां दृष्टिप्रभृति न सज्जते निरुध्यते अत एव तेषां दृष्टिस्तमसि, वर्तते वायोरिव गतिश्च ॥ १९ ॥

गो० टी०–न तेषामिति । वर्तते अयत्नपूर्वं प्रवर्तत इत्यर्थः ॥ १९ ॥

रा० टी०–ते इति । प्रविष्टास्ते कपिकुञ्जराः प्रकाशं शोभितम् अभिरामं सुखप्रदं देशं ददृशुः दूरतोऽवलुलोकिरे ॥२०॥

गो० टी०–ते प्रविष्टा इति । प्रकाशं निस्तमस्कम्॥२०॥

रा० टी०–तत इति । ततस्तदेशावलोकनानन्तरम् अन्योन्यं संपरिष्वज्य तदेशावलोकनजनितानन्देनालिङ्ग्य तस्मिन् भीमे बिले योजनमन्तरं देशं जग्मुः ॥ २१ ॥

गो० टी०–संग्रहणोक्तं प्रपञ्चयति–ततस्तस्मिन्नित्यादिना । अन्योन्यं संपरिष्वज्य अन्योन्यं हस्तावलम्बनं कृत्वा ॥ २१ ॥

२२] ति० टी०–अन्योन्यं संपरिष्वज्य तिमिरदेशविनिर्गमजसंतोषवशादिति शेषः । यद्वाऽन्योन्यं हस्तावलम्बनं कृत्वा हस्तेन परस्परस्योरआदि सम्यग्गृह्येति यावत् पूर्वोक्तस्यैव विस्तरः । नष्टसंज्ञास्तृषावशात्, तदाह–तृषिता इति॥२२॥

रा० टी०–ते इति । तृषिताः पिपासावन्तः अत एव सलिलार्थिनः अत एव नष्टसंज्ञाः तल्लाभाभावहेतुकविवेकरहिताः अत एव संभ्रान्ताः चञ्चलचित्तास्ते वानराः तस्मिन् बिले परिपेतुः अत एव कंचित्कालमतन्द्रिता अभवन्निति शेषः ॥ २२ ॥

गो० टी०–त इति । परिपेतुः जग्मुः । कंचित्कालमित्यत्यन्तसंयोगे द्वितीया ॥ २२ ॥

२३] ति० टी०–परिपेतुरिति अधोमार्गावलम्बनान्धकारे गताः ॥ २३ ॥

रा० टी०–ते इति । परिश्रान्तास्तथा जीविते निराशाः प्लवङ्गमाः आलोकं प्रकाशितदेशं ददृशुः ॥ २३ ॥

गो० टी०–ते कृशा इति । आलोकं प्रकाशम्॥२३-२५॥

२४–२६] ति० टी०–आलोकमेव ददृशुः, न तु जलम् । जीविते निराशा यदा बभूवुस्तदोच्यमानलक्षणं देशमागम्य काञ्चनान्वृक्षांश्च ददृशुः । यद्वा जीविते निराशा बभूवुस्तदा भगवत्कृपया लोकं ददृशुरुच्यमानविशेषणे देशे काञ्चनान्वृक्षान्ददृशुः ॥ २४—२६ ॥

रा० टी०–तत इति । सौम्याः वानरास्ततस्तिमिरावृत-

१ इत्युक्त्वेति गो. पाठः । २ चक्षुरिति गो. पाठः । ३ प्रकाशमभीति गो. पाठः । ४ दुर्गे इति गो. पाठः । ५ तदेति गो. पाठः । ६ सौम्यमिति गो. पाठः । ७ च पुंनागान्ककुभानिति गो. पाठः ।

आपीडैश्च लताभिश्च हेमाभरणभूषितान् । तरुणादित्यसंकाशान्वैदूर्यमयवेदिकान् ॥ २७ ॥
विभ्राजमानान्वपुषा पादपांश्च हिरण्मयान् । नीलवैदूर्यवर्णैश्च पद्मिनीः पतैर्गैर्वृताः ॥ २८ ॥
महद्भिः कांश्चनैर्वृक्षैर्वृतं बालार्कसंनिभैः । जातरूपमयैर्मत्स्यैर्महद्भिश्चोथ पङ्कजैः ॥ २९ ॥
नलिनीस्तत्र ददृशुः प्रसन्नसलिलायुताः । काञ्चनानि विमानानि राजतानि तथैव च ॥ ३० ॥
तपनीयगवाक्षाणि मुक्ताजालावृतानि च । हैमराजतभौमानि वैदूर्यमणिमन्ति च ॥ ३१ ॥
ददृशुस्तत्र हरयो गृहमुख्यानि सर्वशः । पुष्पितान्फलिनो वृक्षान्प्रवालमणिसंनिभान् ॥ ३२ ॥
काञ्चनभ्रमरांश्चैव मधूनि च समन्ततः । मणिकाञ्चनचित्राणि शयनान्यासनानि च ॥ ३३ ॥
विविधानि विशालानि ददृशुस्ते समन्ततः । हैमराजतकांस्यानां भाजनानां च राशयः ॥ ३४ ॥
अगुरूणां च दिव्यानां चन्दनानां च संचयान् । शुचीन्यभ्यवहाराणि मूलानि च फलानि च ॥ ३५ ॥
महार्हाणि च यानानि मधूनि रसवन्ति च । दिव्यानामम्बराणां च महार्हाणां च संचयान् ॥ ३६ ॥
कम्बलानां च चित्राणामजिनानां च संचयान् । [तैस्तै तत्र च विन्यस्तान्दीप्तान्वैश्वानरप्रभान् ॥
ददृशुर्वानराः शुभ्राञ्जातरूपस्य संचयान् ।] तत्र तत्र विचिन्वन्तो बिले तस्मिन्महाप्रभाः ॥ ३७ ॥
ददृशुर्वानराः शूराः स्त्रियं कांचिददूरतः । तां च ते ददृशुस्तत्र चीरकृष्णाजिनाम्बराम् ॥ ३८ ॥
तापसीं नियताहारां ज्वलन्तीमिव तेजसा । विस्मिता हरयस्तत्र व्यवतिष्ठन्त सर्वशः ॥
पप्रच्छ हनुमांस्तत्र काऽसि त्वं कस्य वा बिलम् । ॥ ३९ ॥

तदेशात् वितिमिरं तं प्रकाशदेशमागम्य वितिमिरं वनं ददृशुरित्युत्तरेणान्वयः ॥ २४ ॥

रा० टी०–दर्शनप्रकारमाह–ददृशुरिति । काञ्चनान् सुवर्णमयान् अत एव दीप्तवैश्वानरप्रभान् प्रदीप्ताग्निसदृशान् साखादीन् चित्रैरनेकविधैः काञ्चनैः अत एव रक्तैः स्तबकैः गुच्छैः किसलयैः पत्रैश्च आपीडैः अत्युन्नतोर्ध्वभागैश्च लताभिश्च युक्तान् हिरण्मयान् पादपान् तद्विन्नवृक्षांश्च पतगैः पक्षिभिर्वृतान् पद्मिनीश्च बालार्कसंनिभैः काञ्चनैर्वृक्षैः जातरूपमयैर्मत्स्यैश्च महद्भिः पङ्कजैश्च वृताः प्रसन्नसलिलायुताः नलिनीः सरसीश्च ददृशुः । सार्धश्लोकपञ्चकमेकान्वयि ॥ २६—३० ॥

२७] ति० टी०–आपीडैः स्तबकशेखरैर्लताभिश्च संयुक्तान्पादपान्ददृशुः ॥ २७ ॥

गो० टी०–आपीडैः शेखरैः लताभिश्च उपशोभितानिति शेषः, हेमाभरणभूषितान् फलितहेमाभरणान् पादपांश्च हिरण्मयान् रजतमयांश्च वृक्षान् ॥ २६ ॥ २७ ॥

२८–२९] ति० टी०–पद्मिनीः पद्मलताः ॥ २८ ॥ २९ ॥

गो० टी०–नीलवैदूर्येत्यादि श्लोकद्वयमेकान्वयम् । उक्तविशेषणविशिष्टाः पद्मिनीः उक्तविशेषणयुक्ता नलिनीश्च ददृशुरित्यन्वयः । अतो न पुनरुक्तिः ॥ २८ ॥ २९ ॥

३०] ति० टी०–पद्मादियुता नलिनीः सरांसि च ददृशुः ३०

रा० टी०–काञ्चनानीति । काञ्चनानि राजतानि च विमानानि तपनीयाः गवाक्षाः वातायनाः येषु तानि मुक्ताजालैः मुक्तारचितकुड्यगतजालविशेषैरावृतानि हैमराजतभौमानि हेमादिमयानि वैदूर्यमणिवन्ति वैदूर्यमणिविशिष्टानि सर्वशो गृहमुख्यानि हरयो ददृशुः । श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

गो० टी०–काञ्चनानीत्यादि । हैमराजतभौमानीति शेषः, गृहमुख्यविशेषणं वा ॥ ३० — ३२ ॥

३१–३५] ति० टी०–मुक्ताजालैर्मुक्ताखचितजालैरावृतानि । हैमेत्यादि गृहमुख्यानीत्यस्य विशेषणम् ॥ ३१–३५ ॥

३६–३८] ति० टी०–यानानि शिबिकादीनि ॥ ३६–३८ ॥

३९] ति० टी०–व्यवतिष्ठन्त तूष्णीमवस्थिता बभूवुः ॥ ३९ ॥

रा० टी०–पुष्पितानिति । पुष्पितान् पुष्पविशिष्टान् फलिनः फलविशिष्टान् मणिसंनिभान् वृक्षान् काञ्चनभ्रमरान् स्वर्णमयचूडाविशिष्टमधुपांश्च मधूनि च मणिकाञ्चनचित्राणि विशालानि विस्तीर्णानि शयनानि आसनानि च ददृशुः । श्लोकद्वयमेकान्वयि ॥ ३३ ॥ ३४ ॥

गो० टी०–जातरूपस्य संचयान् । इत्येष पाठक्रमः ॥ ३३ ॥

रा० टी०–हैमेति । बिले तत्र तत्र प्रतिप्रदेशे विचिन्वन्तो वानराः हैमादीनां भाजनानां राशयो राशीन् अगरूणां चन्दनानां च संचयान् शुचीनि पवित्राणि अभ्यवहाराणि भक्षणीयानि मूलानि फलानि च महार्हाणि बहुमूल्यानि यानानि शिबिकादीनि च रसवन्ति मधुराणि मधूनि च अम्बराणां वस्त्राणां संच-

१ वैदूर्यकृतेति गो.पाठः। २ वर्णानिति रा. पाठः। ३ पतगावृता इति गो. पाठः। ४ काञ्चनैः पद्मैर्वृता इति गो. वृतेति रा. पाठः। ५ च सकच्छपैरिति गो. पाठः। ६ वृता इति गो. पाठः। ७ महार्हाणि च यानानीति गो. पाठः। ८ संचयानिति गो. पाठः। ९ हार्याणीति गो. पाठः। १० यानानीति गो. पाठः। ११ अधिकोऽयं श्लोकः गो. पाठे। १२ तस्मिन्महाबला इति गो. पाठः। १३ दृष्ट्वा भृशसंत्रस्ता इति गो. रा. पाठः। १४ व्यवातिष्ठन्तेति गो. पाठः। १५ अर्धमेतत् रा. नास्ति।

ततो हनूमान्गिरिसंनिकाशः कृताञ्जलिस्तामभिवाद्य वृद्धाम् ।
पप्रच्छ का त्वं भवनं बिलं च रत्नानि चेमानि वदस्व कस्य ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ।

स्वयंप्रभाख्या सा तापसी बिलनिर्माणादि निवेद्याभ्यागतवानरान्फलमूलाद्यशनपानेन विश्रामयन्ती वानरागमनकारणं पृच्छति ।

इत्युक्त्वा हनुमांस्तत्र चीरकृष्णाजिनाम्बराम् । अब्रवीत्तां महाभागां तापसीं धर्मचारिणीम् ॥ १ ॥
इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् । क्षुत्पिपासापरिश्रान्ताः परिखिन्नाश्च सर्वशः ॥ २ ॥
महद्धरण्या विवरं प्रविष्टाः स्म पिपासिताः । इमांस्त्वेवंविधान्भावान्विविधानद्भुतोपमान् ॥ ३ ॥
दृष्ट्वा वयं प्रव्यथिताः संभ्रान्ता नष्टचेतसः । कस्यैते काञ्चना वृक्षास्तरुणादित्यसंनिभाः ॥ ४ ॥
शुचीन्यभ्यवहाराणि मूलानि च फलानि च । काञ्चनानि विमानानि राजतानि गृहाणि च ॥ ५ ॥
तपनीयगवाक्षाणि मणिजालावृतानि च । पुष्पिताः फलवन्तश्च पुण्याः सुरभिगन्धयः ॥ ६ ॥
इमे जाम्बूनदमयाः पादपाः कस्य तेजसा । काञ्चनानि च पद्मानि जातानि विमले जले ॥ ७ ॥

यांश्च चित्राणां कम्बलानाम् अजिनानां च संचयान् कांचित् स्त्रियं च ददृशुः । सार्धश्लोकचतुष्टयमेकान्वयि ॥ ३५–३८ ॥

गो० टी०–हैमेत्यादि । शुभान् निर्मलान् ॥३४—३८॥

रा० टी०–तामिति । चीरकृत्स्नाजिनाम्बरां तेजसा ज्वलन्तीमिव तापसीं दृष्ट्वा भृशसंत्रस्ताः विस्मिताश्च सर्वे हरयः सर्वेशः सर्वस्थलेषु व्यवतिष्ठन्त व्यवातिष्ठन्त । सार्धश्लोक एकान्वयी ॥ ३९ ॥ ४० ॥

गो० टी०–तां दृष्ट्वेति । व्यवातिष्ठन्त दूरे स्थिता इत्यर्थः ॥ ३९ ॥ ४० ॥

४०] ति० टी०–पप्रच्छ हनूमानित्यर्थस्यैव सविशेषप्रतिपादनम्—ततो हनुमानिति ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०–तत इति । ततो तापसीदर्शनानन्तरं कृताञ्जलिर्हनूमान् वृद्धां तां तापसीमभिवन्द्य त्वं का भवनादीनि च कस्य इति त्वं वदस्व इति पप्रच्छ ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चाशत्तमः सर्गः ॥ ५० ॥

गो० टी०–पप्रच्छेत्यर्धस्य विवरणम्–ततो हनुमानिति ॥ ४१ ॥

अस्मिन् सर्गे सार्धैकचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

१] ति० टी०–इत्युक्त्वा का त्वं भवनमित्यादि पृष्ट्वा ॥१॥

रा० टी०–तापसीं प्रति हनुमदुक्तिमेवाह–इतीत्यादिभिः । इति अनेन प्रकारेण उक्त्वा पृष्ट्वा हनुमान् तां तापसीमब्रवीत् १

गो० टी०–अथ स्वयंप्रभया ऋक्षबिलवृत्तान्तोक्तिरेकपञ्चाशे–इत्युक्त्वेत्यादि । परिखिन्नाः अध्वश्रमखिन्नाः क्षुत्पिपासापरिश्रान्तत्वेऽपि पिपासैव प्रवेशहेतुरित्याशयेनोक्तं पिपासिता इति । भावान् पदार्थान् । प्रव्यथिताः किमिदमसदृशादिमायेति संजातव्यथाः । नष्टचेतसः कर्तव्यमुद्धिरहिताः मणिजालावृतानि रत्नमयजालकानि । जालकगवाक्षयोर्भेद उक्तः। आत्मानं त्वाम्। अद्भुतभावं प्रभावम् । कस्य चैतत्तपोबलं तवेत्यर्थः ॥ १—९ ॥

२] ति० टी०–किमब्रवीत्तदाह–इदमिति । सहसा हठात् २

रा० टी०–तद्वचनाकारमाह–इदमित्यादिभिः । क्षुत्पिपासापरिश्रान्ताः अत एव परिखिन्नाः वयम् इदं बिलं सहसा प्रविष्टाः ॥ २ ॥

३–६] ति० टी०–उक्तमेवार्थं प्रपञ्चयति—महदिति । भावान्पदार्थान् ॥ ३—६ ॥

रा० टी०–महदिति । धरण्याः महद्विवरं प्रविष्टा वयं एवंविधान् विविधान् अनेकान् अद्भुतोपमान् अद्भुतपदार्थसदृशान् इमान् भावान् पदार्थान् दृष्ट्वा प्रव्यथिताः संचलितचित्ताः अत एव संभ्रान्ताः भीताः अत एव नष्टचेतसः ध्वस्तविवेकाः स्म स्मः । सार्धश्लोक एकान्वयी ॥ ३ ॥

रा० टी०–कस्येति । एते वृक्षादयः कस्य । सार्धश्लोक एकान्वयी ॥ ४–६ ॥

७] ति० टी०–कस्य तेजसा संभूता इति शेषः ॥ ७ ॥

१ हेमानीति गो. पाठः । २ पुनरिति गो. पाठः । ३ हार्याणीति गो. पाठः । ४ गन्धिन इति गो. पाठः ।

कथं मत्स्याश्च सौवर्णा दृश्यन्ते सह कच्छपैः । [1]आत्मनस्त्वनुभावाद्वा कस्य [2]वैतत्तपोबलम् ॥ ८ ॥
अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि । एवमुक्ता हनुमता तापसी धर्मचारिणी ॥ ९ ॥
प्रत्युवाच हनूमन्तं सर्वभूतहिते रता । मयो नाम महातेजा मायावी [3]वानरर्षभ ॥ १० ॥
तेनेदं निर्मितं सर्वं मायया काञ्चनं वनम् । पुरा दानवमुख्यानां विश्वकर्मा बभूव ह ॥ ११ ॥
येनेदं काञ्चनं दिव्यं निर्मितं भवनोत्तमम् । स तु वर्षसहस्राणि तपस्तप्त्वा [4]महद्वने ॥ १२ ॥
पितामहाद्वरं लेभे सर्वमौशनसं धनम् । [5]विधाय सर्वं बलवान्सर्वकामेश्वरस्तदा ॥ १३ ॥
उवास सुखितः कालं कंचिदस्मिन्महावने । तमप्सरसि हेमायां सक्तं [6]दानवपुङ्गवम् ॥ १४ ॥
विक्रम्यैवाशनिं गृह्य [7]जघानेशः पुरन्दरः । इदं च ब्रह्मणा दत्तं हेमायै [8]वनमुत्तमम् ॥ १५ ॥
[9]शाश्वतः कामभोगश्च गृहं चेदं हिरण्मयम् । दुहिता मेरुसावर्णेरहं तस्याः स्वयंप्रभा ॥ १६ ॥

रा० टी०–इमे इति । कस्य तेजसा इमे पादपाः जाम्बूनदमयाः सुवर्णोपादानकाः पद्मानि च काञ्चनानि जातानि ॥ ७ ॥

८] ति० टी०–आत्मनः तवेत्यर्थः । कस्य वा अन्यस्य वेत्यर्थः ॥ ८ ॥

९-१०] ति०टी०–अजानतामेतत्स्वरूपमजानताम्९॥१०॥

रा० टी०–कथमिति । कच्छपैः सह मत्स्याः सौवर्णाः कथं दृश्यन्ते अयमेतत्सर्वनिर्मापकः आत्मनस्तव अनुभावाद्वा कस्यचित्तपोबलं वा, अजानतां नोऽस्माकं समीपे सर्वमाख्यातुमर्हसि । सार्धश्लोक एकान्वयी ॥ ८ ॥ ९ ॥

रा० टी०–एवमिति । हनुमता एवमुक्ता तापसी हनूमन्तं प्रत्युवाच ॥ १० ॥

रा० टी०–मय इति । मयो नाम महातेजा यो मायावी तेन इदं काञ्चनं वनं निर्मितम् ॥ ११ ॥

गो० टी०–मयो नामेति । मयो नाम त्रिपुराधिपतिः त्रिपुरे नष्टे स्वरक्षणार्थमिदं बिलं कृतवानिति मात्स्यपुराणे त्रिपुरदहनप्रस्तावेऽभिहितम् । मायया विचित्रशक्त्या मायावी मायायुक्तः दानवर्षभ इत्यनेन नायमसुरस्तथा मय इति सूचितम् ॥ १०—१३ ॥

११] ति० टी०–मायया विचित्रनिर्माणशक्त्या । को मय इत्याशङ्क्य तत्प्रसिद्धिमाह—पुरेति । विश्वकर्मा शिल्पी ह प्रसिद्धम् ॥ ११ ॥

रा० टी०–तन्निर्माणशक्तिलाभे कारणं वदन्ती आह—पुरेति । येन इदं काञ्चनं भवनोत्तमं निर्मितं स पुरा पूर्वं दानवमुख्यानां विश्वकर्मा शिल्पी बभूव ॥ १२ ॥

१२] ति० टी०–येनेदं निर्मितं स दानवानां विश्वकर्मेत्यन्वयः । निर्माणशक्तिबीजमाह—स त्विति ॥ १२ ॥

रा० टी०–स इति । स शिल्पी महावने वर्षसहस्राणि तपस्तप्त्वा औशनसम् उशनःसंबन्धि धनं सर्जनसामर्थ्यं सर्जनसामग्रीजातं च वरं पितामहाल्लेभे ॥ १३ ॥

१३] ति० टी०–वरं विचित्रसृष्टिसामर्थ्यरूपम् । अपि च सर्वमौशनसं धनं निर्माणसाधनपदार्थजातं निर्माणसाधनशिल्पं शास्त्रज्ञानं च लेभे । शिल्पशास्त्रस्योशनःप्रणीतत्वात्तद्धनत्वव्यपदेशः । बलवान्तत्तत्पबलवान् । सर्वकामेश्वरः स्वसृष्टिभोग्यविशेषाणामीश्वरो भोक्ता ॥ १३ ॥

रा० टी०–विधायेति । तदा लब्धवरसमये सर्वकामेश्वरः सर्वविषयनिर्माणे स्वतन्त्रः मयः सर्वमिदं वनादि विधाय निर्माय अस्मिन् स्वनिर्मिते महावने सुखितः सन् कंचित्कालमुवास ॥ १४ ॥

१४] ति० टी०–सुखितोऽवोवास । हेमायां तदाख्याप्सरसि सक्तम् ॥ १४ ॥

रा० टी०–तमिति । हेमायां तदभिधायाम् अप्सरसि सक्तं दानवपुङ्गवं तं मयमशनिं वज्रं गृह्य गृहीत्वा विक्रम्य युद्धं कृत्वा पुरन्दरो जघान ॥ १५ ॥

गो० टी०–तमिति । तं स्वपुत्रीं मन्दोदरीं रावणाय दत्तवन्तम् । एकान्ते हेमायां सक्तं विदित्वा ईशः त्रैलोक्याधिपतिः अशनिं वज्रं गृहीत्वा जघान ॥ १४ ॥

१५] ति० टी०–दानवपुंगवमशनिं गृह्य गृहीत्वा विक्रम्यैव युद्धं कृत्वैव पुरंदरो जघान । यद्यप्यसुरशिल्पी मयो नित्य इति कथं हननं तस्य, तथापि य एवासुरशिल्पोपदस्थः सैवोऽपि मयाख्य इति ' प्रवाहनित्यतैव तस्येन्द्रवत् ' इति न दोषः । तस्मिंश्च हते इदं वनं शाश्वतः कामभोग इदं गृहं च मयभुक्तायै हेमायै न्यायप्राप्तत्वाद्भगवता ब्रह्मणा दत्तमित्यर्थः । एतेन विचित्रनिर्माणसामर्थ्यगुणयोगादत्र ब्रह्मशब्दो मयदानवपर इत्यपास्तम् । इतेन दानार्हभवात् ॥ १५ ॥

रा० टी०–इदमिति । इदमुत्तमं वनं शाश्वतः सार्वकालिकः कामभोगश्च हिरण्मयं गृहं च ब्रह्मणा हेमायै दत्तम् ॥ १६ ॥

गो० टी०–इदं चेति । मयनाशानन्तरम् इदं वनं ब्रह्मणा हेमायै दत्तम् ॥ १५ ॥ १६ ॥

१६] ति० टी०–स्वयंप्रभेत्यन्वर्थं नाम तस्याः, तेन सूर्यावलोकाभावेऽपि प्रकाशवत्त्वरूपपादितम् । तस्या हेमाया भवनमित्यन्वयः ॥ १६ ॥

१ चरन्तीति गो. पाठः । २ आत्मानमनुभावं चेति गो. पाठः । ३ चेति गो.पाठः । ४ दानवर्षभ इति गो. पाठः । ५ महावने इति गो. रा.पाठः । ६ वनं विधायेति गो. पाठः। ७जघान स इति गो.पाठः।८शाश्वताः कामभोगा इति गो.पाठः।९शिरिपशब्दो ह्रस्वः।१० स सर्वं इति च युक्त इति भाति।

इदं रक्षामि भवनं हेमाया वानरोत्तम । मम प्रियसखी हेमा नृत्तगीतविशारदा ॥ १७ ॥
तया दत्तवरा चास्मि रक्षामि भवनं महत् । किं कार्यं कस्य वा हेतोः कान्ताराणि प्रपद्यथ ॥ १८ ॥
कथं चेदं वनं दुर्गं युष्माभिरुपलक्षितम् । शुचीन्यभ्यवहाराणि मूलानि च फलानि च ॥
भुक्त्वा पीत्वा च पानीयं सर्वं मे वक्तुमर्हसि ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ।

रामवनप्रवेशादात्मनो गुहाप्रवेशावधि वृत्तान्त निवेदयन्हनुमान्स्वयंप्रभया कृतातिथ्यं प्रशंसंस्तत्प्रत्युपकृति चिकीर्षुराज्ञापयेति तां प्रार्थयते । धर्ममाचरन्त्या मे न केनचित्प्रयोजनमिति सा तन्निषेधति ।

अथ तानब्रवीत्सर्वान्विश्रान्तान्हरियूथपान् । इदं वचनमेकाग्रा तापसी धर्मचारिणी ॥ १ ॥
वानरा यदि वः खेदः प्रनष्टः फलभक्षणात् । यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि तां कथाम् २ ॥
तस्यास्तद्वचनं श्रुत्वा हनूमान्मारुतात्मजः । आर्जवेन यथातत्त्वमाख्यातुमुपचक्रमे ॥ ३ ॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः । रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ ४ ॥

रा० टी०–नन्वं त्वं काऽसीत्यत आह—दुहितेति । मेरुसावर्णेः दुहिताऽहं तस्याः हेमायाः स्वयंप्रभा तदभिधमिदं भवनं रक्षामि । वाक्यार्थस्य कर्मतयाऽन्वयान्न द्वितीया, स्वयम्प्रभाशब्दस्य मेरुसावर्णिदुहितुर्नामत्वे तु भवनमिति द्वितीयान्तमेव ॥ १७ ॥

१७] ति० टी०–नन्वं त्वं किमर्थं रक्षसि तत्राह—मम प्रियसखीति ॥ १७ ॥

रा० टी०–नन्वं त्वं किमर्थं रक्षसीत्यत आह–ममेति । नृत्यगीतविशारदा हेमा मम प्रियसखी अतः तया आदत्तः गृहीतो वरः स्वभवनरक्षारूपः यस्याः साऽहं महद्भवनं रक्षामि ॥ १८ ॥

गो० टी०–ममेति । सेदानीं ब्रह्मसदनं गतेत्याशयेनाह–नृत्तेति ॥ १७ ॥

१८] ति० टी०–दत्तवरा रक्षणसामर्थ्यवत्त्वात्संक्षित्वेन प्रार्थितरक्षणा च । एवं स्ववृत्तान्तमुक्त्वा हनूमदादिवृत्तान्तं पृच्छति—किमिति ॥ १८ ॥

रा० टी०–किमिति । कस्य जनस्य हेतोः किं कार्यं कृत्यं भवतामस्ति वा यतः कान्तारानि दुर्गमपथान् प्रपद्यथ दुर्गं दुर्गममिमं वनं युष्माभिः कथमुपलक्षितम् आगत्य अवलोकितम् ॥ १९ ॥

गो० टी०–किमिति । किं कार्यं किं प्रयोजनम् कस्य हेतोः कस्मात् प्रयोजनात् ॥ १८ ॥ १९ ॥

अस्मिन् सर्गे सार्धैकोनविंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

१९] ति० टी०–अभ्यवहाराण्यभ्यवहार्याणि ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्ड एकपञ्चाशः सर्गः ॥ ५१ ॥

रा० टी०–म्लानमुखान् तान् दृष्ट्वा आह—शुचीनीति । अभ्यवहाराणि भक्षणीयानि शुचीनि मूलानि फलानि च भुक्त्वा पानीयं पीत्वा च सर्वं मे पृष्टं वक्तुमर्हथ ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकपञ्चाशत्तमः सर्गः ॥ ५१ ॥

१] ति० टी०–इदं वचनं वक्ष्यमाणम् ॥ १ ॥

रा० टी०–वानरान् प्रति मेरुसावर्णितनयोक्तिमेवाह—अथेति । अथ वानरकर्तृकभोजनाथनन्तरं विश्रान्तान् हरियूथपान् एकाग्रा यतचित्ता तापसी इदमब्रवीत् ॥ १ ॥

गो० टी०–अथ हनुमता स्वागमनहेतुरुच्यते द्विपञ्चाशे–अथेत्यादि ॥ १ ॥ २ ॥

२-३] ति० टी०–यदि चैतत्किं कार्यमित्यादि प्राक्पृष्टार्थतत्त्वम् ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह—वानरा इति । हे वानराः ! फलभक्षणात् यदि वः खेदः प्रनष्टः यदि च एतत् मत्पृष्टं मया श्राव्यं तर्हि श्रोतुमिच्छामि अतः कथ्यताम् ॥ २ ॥

रा० टी०–तस्या इति । तस्यास्तापस्यास्तद्वचनं श्रुत्वा मारुतात्मजो हनूमान् आर्जवेन सरलतया यथातत्त्वं याथार्थ्यमनतिक्रम्य आख्यातुमुपचक्रमे ॥ ३ ॥

गो० टी०–तस्या इति । आर्जवेन अकपटेन ॥ ३–५ ॥

४] ति० टी०–सर्वलोकराजत्वेन तस्येश्वरत्वं सूचितम्॥४॥

---

१ भवनोत्तममिति गो. पाठः । २ प्रपद्यथेति गो.पाठः । ३ इमान्यभ्यवहार्याणीति गो. पाठः । ४ अर्हथेति गो. पाठः । ५ विक्रान्तान्हरिपुङ्गवानिति गो. पाठः । ६ प्रणष्ट इति गो. पाठः । ७ कथ्यतामिति गो. रा. पाठः । ८ हनुमानिति गो. पाठः । ९ सखीत्वेनेति दीर्घं एव युक्त इति भाति ।

लक्ष्मणेन सह भ्रात्रा वैदेह्या सह भार्यया । तस्य भार्या जनस्थानाद्रावणेन हृता बलात् ॥ ५ ॥
वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः । राजा वानरमुख्यानां येन प्रस्थापिता वयम् ॥ ६ ॥
अगस्त्यचरितामाशां दक्षिणां यमरक्षिताम् । सहैर्भिर्वानरैर्मुख्यैरङ्गदप्रमुखैर्वयम् ॥ ७ ॥
रावणं सहिताः सर्वे राक्षसं कामरूपिणम् । सीतया सह वैदेह्या मार्गध्वमिति चोदिताः ॥ ८ ॥
विचित्य तु वनं सर्वं समुद्रं दक्षिणां दिशम् । वयं बुभुक्षिताः सर्वे वृक्षमूलमुपाश्रिताः ॥ ९ ॥
विवर्णवदनाः सर्वे सर्वे ध्यानपरायणाः । नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे ॥ १० ॥
चारयन्तस्ततश्चक्षुर्दृष्टवन्तो महद्बिलं । लतापादपसंपन्नं तिमिरेण समावृतम् ॥ ११ ॥
अस्माद्धंसा जलक्लिन्नाः पक्षैः सलिलरेणुभिः । कुरराः सारसाश्चैव निष्पतन्ति पतत्रिणः ॥ १२ ॥
साध्वत्र प्रविशामेति मया तूक्ताः प्लवङ्गमाः । तेषामपि हि सर्वेषामनुमानमुपागतम् ॥ १३ ॥
अस्मिन्निपतिताः सर्वेऽप्यथ कार्यत्वरान्विताः । ततो गाढं निपतिता गृह्य हस्तैः परस्परम् ॥ १४ ॥

रा० टी०–तदारुरुक्षानमेवाह–राजेति । सर्वस्य लोकस्य भुवनस्य राजा महेन्द्रवरुणौ उपमा यस्य स रामो लक्ष्मणेन भ्रात्रा वैदेह्या भार्यया च सह दण्डकावनं प्रविष्टः । सार्धश्लोक एकान्वयी ॥ ४ ॥

५-६] ति० टी०–बलाद्बलात्कारेण ॥ ५ ॥ ६ ॥

७] ति० टी०–अङ्गदप्रमुखैर्वानरैः सह वयं प्रस्थापिताः॥७॥

रा० टी०–तस्येति । तस्य रामस्य भार्या बलात् स्वस्वरूपाच्छादनात् संन्यासिवेषेणेत्यर्थः, रावणेन जनस्थानाद् हृता एतेन सीताया आभरणप्रक्षेपसमये रावणस्य संन्यासिवेषो हनुमताऽवलोकित इति सूचितम् । अर्धं पृथक् ॥ ५ ॥

रा० टी०–वीर इति । येन अङ्गदप्रमुखैः सहिता वयं वयं वः रामसख्यरक्षणस्य अयः प्राप्तिर्यस्मिन् तत् यथा भवति तथा दक्षिणां दिशं प्रस्थापिताः स वानरमुख्यानां राजा सुग्रीवो नाम वानरः राज्ञो रामस्य सखा । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०–वीर इति । दक्षिणामाशां येन प्रस्थापिताः स राजाऽस्तीति पूर्वेणान्वयः ॥ ६–१२ ॥

८] ति० टी०–सहिता मिलिताः सन्तो रावणं सीतया सह मार्गध्वमिति वयं चोदिताश्च स्मः ॥ ८ ॥

९] ति० टी०–तदाह—विचित्य त्विति । समुद्रं विचेतुकामा इति शेषः ॥ ९ ॥

रा० टी०–रावणमिति । सीतया सह कामरूपिणं रावणं सहिताः सर्वे यूयं मार्गध्वमिति चोदिताः सुग्रीवेण प्रेरिता वयं समुद्रं विचेतुकामाः सन्त इति शेषः, दक्षिणां दिशं विचित्य बुभुक्षिताः सन्तः वृक्षमूलमुपाश्रिताः प्राप्ताः । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

१०-११] ति० टी०–नाधिगच्छाम । हे इति स्वयंप्रभासंबोधनम् । नाध्यगच्छाम पारं चिन्तामहार्णवस्येति शेषः ॥ १० ॥ ११ ॥

रा० टी०–विवर्णेति । ध्यानपरायणाः सुग्रीवाज्ञास्मरणनिरताः सर्वे वयं नाधिगच्छामहे सीतावृत्तान्तं न जानीमः अतः चिन्तामहार्णवे शोकसागरे इत्यर्थः, मग्ना अत एव विवर्णवदनाः वयं पारं शोकसागरस्यान्तं नाधिगच्छामहे प्राप्नुमः । अधिगच्छामहे इति शब्दाद्वया उभयान्वयि ॥ १० ॥

रा० टी०–चारयन्त इति । ततस्तस्मिन् समये चक्षुश्चारयन्तो वयं लतापादपसंपन्नं महद् वनं दृष्टवन्तोऽभवाम॥११॥

१२] ति० टी०–सलिलरेणुभिः सलिलपद्मरेणुयुक्तपक्षैरुपलक्षिता इत्यर्थः निष्पतन्ति निष्पतिताः ॥ १२ ॥

रा० टी०–अस्मादिति । सलिलरेणुभिः पक्षैः उपलक्षिताः जलक्लिन्ना हंसादयः अस्माद् बिलाद् निष्पतन्ति अत्र ध्रुवं जलमस्तीति तात्पर्यम् । अत्र बिले साधु प्रविशामेति प्लवङ्गमा मयोक्ताः । सार्धश्लोक एकान्वयी ॥ १२ ॥

१३] ति० टी०–अनुमानं जलानुमापको हेतुरागतं मनआप्तम् ॥ १३ ॥

रा० टी०–तेषामिति । तेषां मयोक्तवानराणाम् अनुमानम् अनुमानेन जलसत्तानिश्चयः उपागतम् । अथ अतः कार्यत्वरान्विताः जलपानविषयकत्वरायुक्ताः सर्वे अस्मिन् बिले बिलसमीपे निपतिताः ॥ १३ ॥

गो० टी०–तेषामिति । अनुमानमुपागतम् जलचरसत्त्वदर्शनेन जलबुद्धिर्जातेत्यर्थः, यद्वा तेषामपीति भर्तृकार्यत्वरान्विताः सन्तो गच्छामः बिलद्वारमिति शेषः । बिलं प्रविशाम इति अनुमानम् अङ्गीकरणम् ॥ १३ ॥ १४ ॥

१४] ति० टी०–अस्मिन्देशे ततो गच्छाम इत्युक्त्वा निबिडान्धकारत्वात्परस्परं हस्तैर्गाढं गृहीत्वा निपतिताः गुहामिति शेषः । 'हस्ते' इति पाठेऽपि हस्तैरित्येवार्थः । परिष्वज्येति पूर्वोक्तस्वरसात् ॥ १४ ॥

रा० टी०–तत इति । ततस्तदा निपतीता वानराः गाढं

---

१ चापीति गो. पाठः । २ घोरैरिति गो. पाठः । ३ वयं सर्वे समग्रामिति गो. पाठः । ४ बुभुक्षिताः परिश्रान्ता इति गो. पाठः । ५ वयमिति गो. पाठः । ६ छन्नमिति गो. पाठः । ७ विप्लवैरिति गो. पाठः । ८ गच्छाम प्रविशामेति भर्तृकार्येति गो. पाठः । ९ हस्ताविति गो. पाठः ।

इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् । एतन्नः कार्यमेतेन कृत्येन वयमागताः ॥ १५ ॥
त्वां चैवोपगताः सर्वे परिघ्यूना बुभुक्षिताः । आतिथ्यधर्मदत्तानि मूलानि च फलानि च ॥ १६ ॥
अस्माभिरुपयुक्तानि बुभुक्षापरिपीडितैः । यत्त्वया रक्षिताः सर्वे म्रियमाणा बुभुक्षया ॥ १७ ॥
ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः । एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयंप्रभा ॥ १८ ॥
प्रत्युवाच ततः सर्वानिदं वानरयूथपान् । सर्वेषां परितुष्टाऽस्मि वानराणां तरस्विनाम् ॥ १९ ॥
चरन्त्या मम धर्मेण न कार्यमिह केनचित् । एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितम् ॥ २० ॥
उवाच हनुमान्वाक्यं तामनिन्दितलोचनाम् । शरणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणीम्॥ २१ ॥
यः कृतः समयोऽस्मासु सुग्रीवेण महात्मना । स तु कालो व्यतिक्रान्तो बिले च परिवर्तताम् ॥ २२ ॥
सा त्वमस्माद्बिलाद्दुर्गानुत्तारयितुमर्हसि । तस्मात्सुग्रीववचनादतिक्रान्तान्गतायुषः ॥ २३ ॥
त्रातुमर्हसि नः सर्वान्सुग्रीवभयशङ्कितान् । महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि ॥ २४ ॥
तच्चापि न कृतं कार्यमस्माभिरिह वासिभिः । एवमुक्ता हनुमता तापसी वाक्यमब्रवीत् ॥ २५ ॥

यथा भवति तथा हस्तैः परस्परं गृह्य गृहीत्वा इदं बिलं प्रविष्टाः ॥ १४ ॥

१५] ति० टी०–एतत्सीतान्वेषणरूपम् ॥ १५ ॥

रा० टी०–एतदिति । एतत् पिपासादिश्रमनरूपं नोऽस्माकं कार्यम् एतेनैव कृत्येन कार्येण वयमागताः बिलप्राप्ताः । अर्धं पृथक् ॥ १५ ॥

गो० टी०–एतदिति । परिघ्यूनाः परिक्षीणाः ॥१५–१७॥

१६–१७] ति० टी०–यतो बुभुक्षिता अतः परिघ्यूनाः क्षीणाः ॥ १६ ॥ १७

रा० टी०–त्वामिति । बुभुक्षिता अत एव परिघ्यूनाः क्षीणा ये सर्वे वानराः त्वामुपागतास्तैरस्माभिः आतिथ्यधर्मदत्तानि फलानि उपभुक्तानि । सार्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०–यदिति । बुभुक्षया म्रियमाणाः सर्वे वानराः यद्यस्मात् त्वया रक्षिताः तस्मात् प्रत्युपकारार्थं वानरास्ते किं कुर्वन्तु तद्ब्रूहि ॥ १७ ॥

१८] ति० टी०–किं ते कुर्वन्तु प्रियमिति शेषः ॥ १८ ॥

रा० टी०–एवमिति । एवमुक्ता सर्वज्ञा स्वयंप्रभा वानरयूथपानिदं प्रत्युवाच ॥ १८ ॥

गो० टी०–एवमिति ॥ १८ ॥

१९] ति० टी०–परितुष्टाऽस्मि प्रत्युपचिकीर्षावचनेनैवेति भावः । धर्मेण चरन्त्या धर्मानुष्ठानेन वर्तमानायाः ॥ १९ ॥

रा० टी०–तत्प्रतिवचनाकारमाह–सर्वेषामिति । सर्वेषां वानराणां परितुष्टाऽस्मि प्रत्युपकारकरणमन्तरैवेति शेषः । नन्वत्र प्रत्युपकारः कार्य एवेत्यत आह–धर्मेण चरन्त्या मम कार्यं कर्तव्यं केनचित् न कार्यम् । एतेन स्वधर्माचरणमन्तरा मे कार्यं नास्तीति सूचितम् ॥ १९ ॥

गो० टी०–सर्वेषामिति । संबन्धसामान्ये षष्ठी ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

२०–२१] ति० टी०–अत्र कतकस्तु द्विपञ्चाशत्सर्गसमाप्तिमाह । एवमुक्त इति ॥ २० ॥ २१ ॥

रा० टी०–एवमिति । एवमुक्तो हनुमान् अनिन्दितचेष्टितां तामुवाच ॥ २० ॥

गो० टी०–अथ बिलादुत्तीर्णानां वानराणां निर्वेदक्षिप्ताशे–एवमुक्त इत्यादि ॥ १ ॥

रा० टी०–तद्वचनाकारमाह–शरणमिति । हे धर्मचारिणि ! शरणं रक्षिकां त्वां वयं प्रपन्नाः प्राप्ताः स्मः । एतेन रक्षा कर्तव्येति सूचितम् । अर्धं पृथक् ॥ २१ ॥

गो० टी०–शरणमित्यादि । बिले च परिवर्ततामित्यनेन बहुकालं वानरैर्बिले स्थितमिति गम्यते ॥ २–१० ॥

२२] ति० टी०–समयः कालावधिर्मासरूपः । बिले च बिले एव ॥ २२ ॥

रा० टी०–नन्वस्माकं रक्षा कथं भविष्यतीत्यत आह–य इति द्वाभ्याम् । अस्माच्च यः समयः कालनियमः सुग्रीवेण कृतः स कालस्ते बिले परिवर्ततामस्माकं व्यतीतः ॥ २२ ॥

२३-२५] ति०टी०–तस्माद्धेतोरस्माद्बिलादस्मानित्यन्वयः । गतायुषो नष्टजीवितान् तत्र हेतुः–सुग्रीववचनादतिक्रान्तानिति सुग्रीवाज्ञप्तकालादतिक्रान्तकालानित्यर्थः ॥ २३–२५ ॥

रा० टी०–सेति । सुग्रीववचनात् अतिक्रान्तान् अत एव गतायुषोऽस्मान् अस्माद्बिलात् उत्तारयितुं त्वमर्हसि॥२३॥

रा० टी०–त्रातुमिति । उपसंहरन्नाह–सुग्रीवभयशङ्कितान् अस्मान् त्रातुं त्वमर्हासि । नन्वत्र तत्कार्यसाधनायागतानां

१ भुक्तानीति गो. पाठः । २ अत्रैव सर्गसमाप्तिः गो. पाठे । ३ चेष्टितामिति गो. रा. पाठः । ४ चेति रा. पाठः । ५ ऽस्माकमिति गो. पाठः । ६ चेति गो. पाठः । ७ ह्यतीति गो.पाठः । ८ घोरादिति गो. पाठः । ९ कर्शितानिति । गो. पाठः ।

जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम् । तपसः सुप्रभावेण नियमोपार्जितेन च ॥ २६ ॥
सर्वानेव बिलादस्मात्तारयिष्यामि वानरान् । निमीलयत चक्षूंषि सर्वे वानरपुङ्गवाः ॥ २७ ॥
नहि निष्क्रमितुं शक्यमनिमीलितलोचनैः । ततो निमीलिताः सर्वे सुकुमाराङ्गुलैः करैः ॥ २८ ॥
सहसा पिदधुर्दृष्टिं हृष्टा गमनकाङ्क्षया । वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा ॥ २९ ॥
निमेषान्तरमात्रेण बिलादुत्तारितास्तया । उवाच सर्वांस्तांस्तत्र तापसी धर्मचारिणी ॥ ३० ॥
निःसृतान्विषमात्तस्मात्समाश्वास्येदमब्रवीत् । एष विन्ध्यो गिरिः श्रीमान्नानाद्रुमलतायुतः ॥ ३१ ॥
एष प्रस्रवणः शैलः सागरोऽयं महोदधिः । स्वस्ति वोऽस्तु गमिष्यामि भवनं वानरर्षभाः ॥
इत्युक्त्वा तद्बिलं श्रीमत्प्रविवेश स्वयंप्रभा ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ।

हनुमत्प्रार्थितस्वयप्रभया स्वाज्ञया निमीलितलोचनेषु कपिषु क्षणमात्रेण गुहात उत्तारितेषु फलपुष्पाङ्कुरोद्गमाच्छिशिरागममनुमाय विषीदत्सु सुग्रीवचण्डत्वं कथयन्नङ्गदः कालातिक्रमतः सुग्रीवकोधाग्नौ शलभायमानेषु भवत्सु प्रायोपवेशनमेव शरणमित्यनुशास्ति । विषीदतो वानरान्रामसुग्रीवभीतेः स्वयंप्रभाबिलमेव युष्माकं रक्षकमिति तारः सूचयति । अनुमोदिततद्वचनास्ते तत्रैव वासं निश्चिक्युः ।

ततस्ते ददृशुर्घोरं सागरं वरुणालयम् । अपारमभिगर्जन्तं घोरैरूर्मिभिराकुलम् ॥ १ ॥

युष्माकं कथं भीतिरित्यत आह–यत् महत्कार्यं सीतान्वेषणमस्माभिः कर्तव्यं तदपि न कृतम् । सार्धश्लोक एकान्वयी ॥२४॥

रा० टी०–एवमिति । हनुमता एवमुक्ता तापसी अब्रवीत् । अर्धं पृथक् ॥ २५ ॥

२६–२७] ति० टी०–प्रविष्टेनेदं बिलं प्रविष्टेन प्राणिना जीवताऽस्मान्निवर्तितुं दुष्करं मन्ये । तर्हि वयं किं कुर्मस्तत्राह–तपस इति ॥ २६ ॥ २७ ॥

रा० टी०–तद्वचनाकारमाह–जीवतेति । प्रविष्टेन महाद्वारमन्तरा इहागतेन जीवता निवर्तितुं दुष्करं मन्ये । अर्धं पृथक् । नन्वेषां का गतिरस्माकमित्यत आह–तपस इति । नियमोपार्जितेन नियमयमादिना प्रकटितेन तपसो ज्ञानस्य प्रभावेण सर्वान् वानरान् बिलात्तारयिष्याम्येव ॥ २६ ॥

रा० टी०–निष्क्रमणोपायमाह–निमीलयतेति । हे वानरपुङ्गवाः ! अनिमीलितलोचनैः निष्क्रमितुं न शक्यम् अतः चक्षूंषि निमीलयत ॥ २७ ॥

२८] ति० टी०–निमीलिताः सन्तोऽकस्मादुन्मीलनभिया सुकुमाराङ्गुलैः करैः ॥ २८ ॥

रा० टी०–तत इति । ततस्तस्मिन्समये निमीलितुमाज्ञप्ताः गमनकाङ्क्षया हृष्टाः सर्वे वानराः सुकु सुकुमाराङ्गुलविशिष्टैः करैः दृष्टिं चक्षुः सहसा पिदधुः ॥ २८ ॥

गो० टी०–तत इति । विषमात् संकटप्रदेशात् ११–१५

२९–३०] ति० टी०–सहसा दृष्टिं पिदधुः ॥२९॥३०॥

रा० टी०–वानरा इति । हस्तरुद्धमुखा एव वानराः निमेषान्तरमात्रेण तया स्वयंप्रभयैव बिलात् उत्तारिताः । उक्त्वा एवार्थौ । च अनन्तरं धर्मचारिणी निःसृतान् वानरान् समाश्वास्य इदमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

३१] ति० टी०–इदमब्रवीत् दिङ्मोहघ्नान्त्यर्थमिति भावः ॥ ३१ ॥

३२] ति० टी०–प्रस्रवणः किष्किन्धासमीपप्रस्रवणादन्योऽयमित्याहुः । अस्युच्चत्वात्तटोऽपि तस्य दर्शनमित्यन्ये । यत्रेच्छा तत्र गन्तव्यमिति तात्पर्यम् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०–तद्वचनाकारमाह–एष इति । एषः भवद्भिरागन्तव्यः विन्ध्यो गिरिः एषः प्रस्रवणः शैलः अयं महोदधिः सागरः भवद्भिः प्राप्त इति शेषः, अतः अहं भवनं गमिष्यामि वो स्वस्त्यस्तु । इत्युक्त्वा स्वयम्प्रभा तद्बिलं प्रविवेश । अयं प्रस्रवणः किष्किन्धासमीपवर्तिप्रस्रवणादन्य इति बोध्यम् । अर्धचतुष्टयमेकान्वयि ॥ ३१ ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे द्विपञ्चाशत्तमः सर्गः ॥ ५२ ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–बिलनिर्गतवानराणां वृत्तान्तमाह–तत इत्या-

१ त्विति गो. पाठः । २ उद्धरिष्यामीति गो. पाठः । ३ समिति गो. पाठः । ४ ततस्तान्वानरान्सर्वानिति गो. पाठः । ५ कुरु इति गो.पाठः । ६ आवृतमिति गो. पाठः ।

मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम् । तेषां मासो व्यतिक्रान्तो यो राज्ञा समयः कृतः ॥ २ ॥
विन्ध्यस्य तु गिरेः पादे संप्रपुष्पितपादपे । उपविश्य महात्मानश्चिन्तामापेदिरे तदा ॥ ३ ॥
ततः पुष्पातिभाराग्रांल्लताशतसमावृतान् । द्रुमान्वासन्तिकान्दृष्ट्वा बभूवुर्भयशङ्किताः ॥ ४ ॥
ते वसन्तमनुप्राप्तं प्रतिवेद्य परस्परम् । नष्टसंदेशकालार्था निपेतुर्धरणीतले ॥ ५ ॥
ततस्तान्कपिवृद्धांश्च शिष्टांश्चैव वनौकसः । वाचा मधुरयाऽऽभाष्य यथावदनुमान्य च ॥ ६ ॥
स तु सिंहवृषस्कन्धः पीनायतभुजः कपिः । युवराजो महाप्राज्ञ अङ्गदो वाक्यमब्रवीत् ॥ ७ ॥
शासनात्कपिराजस्य वयं सर्वे विनिर्गताः । मासः पूर्णो विलस्थानां हरयः किं न बुध्यत ॥ ८ ॥

द्विभिः । ततः स्वयं प्रभाबोधनानन्तरम् अपारम् अदृश्यमानपारकं घोरैः ऊर्मिभिः आकुलं व्याप्तम् अत एव अभिगर्जन्तं वरुणालयं सागरं ते वानराः ददृशुः ॥ १ ॥

२] ति० टी०–गिरिदुर्गम् ऋक्षबिलाख्यम् । समयः कालावधिः ॥ २ ॥

रा० टी०–मयस्येति । मयस्य मायाविहितं गिरिदुर्गं विचिन्वतां वानराणां यः समयो राज्ञा सुग्रीवेण कृतः स मासो व्यतीतः ॥ २ ॥

३] ति० टी०–तदा शिशिरारम्भसमये ॥ ३ ॥

रा० टी०–विन्ध्यस्येति । तदा मासव्यतीतसमये संप्रपुष्पितपादपे विन्ध्यस्य गिरेः पादे प्रदेशविशेषे उपविश्य महात्मानो वानराः चिन्तामापेदिरे ॥ ३ ॥

गो० टी०–विन्ध्यस्येति । पादे दक्षिणपार्श्वे दक्षिणपश्चिमकोटावित्यर्थः । 'हिमवद्विन्ध्यशैलाभ्यां प्रायो व्याप्ता वसुंधरा' इति भेषजकल्पोक्तिः ॥ १६ ॥

४] ति० टी०–पुष्पातिभारयुक्तान्यग्राणि येषाम् । वासन्तिकान्वसन्तकाले फलवत आम्रादीन् ॥ ४ ॥

रा० टी०–तत इति । पुष्पाणामतिभारो येषु तान्येव अग्राणि येषां तान् वासन्तिकान् वसन्तकालकानिव द्रुमान् दृष्ट्वा भयशङ्किता बभूवुः । वासन्तिकशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः। एतेन तद्देशस्य प्रभावातिशयः सूचितः॥४॥

गो० टी०–तत इति । पुष्पातिभाराग्रान् पुष्पैरतिभाराणि अग्राणि येषां तान् वासन्तिकान् वसन्तफलिनश्चूतादीन् । ये वसन्ते फलन्ति ते शिशिरे पुष्प्यन्ति । भयशङ्किताः सुग्रीवाद्भयविषयशङ्कावन्तः ॥ १७ ॥

५] ति० टी०–भयकृतशङ्कां विष्टणोति—ते इति । वसन्तमनुप्राप्तं प्रकृतशिशिरकालस्योत्तरकालमासन्नतया प्राप्तप्रायम् । नष्टः संदेशकाले राजसंदिष्टमासरूपे कालेऽनुक्षेयोऽर्थो येषां ते ॥ ५ ॥

रा० टी०–ते इति । ते वानराः अनुप्राप्तं वसन्तं परस्परं प्रतिवेद्य वसन्तचिह्नहेतुकानुमानेन बोधयित्वा नष्टः संदेशकालरूपोऽर्थो येषां ते व्यतीतावधिमासका इत्यर्थः, वानरा धरणीतले निपेतुः एतेन तेषां शोकहेतुका भ्रान्तिः सूचिता। किं च वसन्तं बुद्ध्वारूढमनुप्राप्तं तं कालात्ययं परस्परं प्रतिवेद्य ते वानराः धरणीतले निपेतुः ॥ ५ ॥

गो० टी०–त इति । वसन्तम् अनुप्राप्तं प्रत्यासन्नम् । तदानीं हि शिशिरः । तथाहि । शरत्कालान्ते मार्गशीर्षे मासि सेनां संनिधाप्य पौषमासमवधिं कृत्वा प्रस्थापितवान् स पौषो माघश्चातीतः फाल्गुन एव प्रवृत्त इति तेन वसन्तः प्रत्यासन्न एव न प्राप्तः ॥ १८–२० ॥

६] ति० टी०–तान्भयेन भूतले पतितान् शिष्टान्वृद्धेभ्योऽन्यान् अनुमान्य संपूज्य ॥ ६ ॥

७] ति० टी०–प्राज्ञ अङ्गद इत्यार्षम् ॥ ७ ॥

रा० टी०–तत इति । सिंहवृषस्कन्धः सिंहवृषभस्कन्धसदृशस्कन्धविशिष्टः पीनायतभुजः स्थूलदीर्घभुजविशिष्टो महाप्राज्ञः सोऽङ्गदः शिष्टान् आप्तान् कपिवृद्धान् मधुरया वाचा आभाष्य संबोध्य अनुमान्य सत्कृत्य च अब्रवीत् । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

८] ति० टी०–शासनव्यतिक्रमं दर्शयति—मास इति । अन्वेषणावधित्वेन दत्त इत्यर्थः । किं न बुद्ध्यत नाबुद्ध्यत कालात्ययमिति शेषः ॥ ८ ॥

रा० टी०–तद्वचनाकारमाह–शासनादिति । कपिराजस्य शासनात् ये वयं विनिर्गतास्तेषां बिलस्थानामस्माकं मासः पूर्णः किं न बुध्यत ॥ ८ ॥

गो० टी०–शासनादित्यादि । वयमाश्वयुजे मासीति कालसंख्याव्यवस्थिताः कालसंख्यया नियमिताः । वयम् आश्वयुजे मासि हनुमच्चोदितेन सुग्रीवेण पञ्चदशरात्रसंख्यया नियम्य समाहूताः । ततो मार्गशीर्षे लक्ष्मणचोदितेन तेन दशरात्रसंख्यया समाहूताः । ततः सीतान्वेषणे पौषमासमवधिं कृत्वा तेन प्रेषिताः । एवमाश्वयुजमासमारभ्य कालसंख्याव्यवस्थितानामस्माकं कालविस्मरणं न युक्तमित्यर्थः । अन्ये त्वाहुः–आश्वयुजे मासि दशम्यामुत्थितायामितिवत्सामीपिकाधिकरणविवक्षया सप्तमी । तेन कार्तिके समनुप्राप्ते त्वं रावणवधे यत । इत्युक्तकालातिक्रमणप्रयुक्तरामकोपदर्शनात् कार्ति-

१ बुद्ध्वा इति गो. पाठः । २ त्विति गो. पाठः ।

वयमाश्वयुजे मासि कालसंख्याव्यवस्थिताः । प्रस्थिताः सोऽपि चातीतः किमतः कार्यमुत्तरम्॥ ९ ॥
भवन्तः प्रत्ययं प्राप्ता नीतिमार्गविशारदाः । हितेष्वभिरता भर्तुर्निसृष्टाः सर्वकर्मसु ॥ १० ॥
कर्मस्वप्रतिमाः सर्वे दिक्षु विश्रुतपौरुषाः । मां पुरस्कृत्य निर्याताः पिङ्गाक्षप्रतिचोदिनाः ॥ ११ ॥
इदानीमकृतार्थानां मैर्तव्यं नात्र संशयः । हरिराजस्य संदेशमकृत्वा कः सुखी भवेत् ॥ १२ ॥
अस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम् । प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम् ॥ १३ ॥
तीक्ष्णः प्रकृत्या सुग्रीवः स्वामिभावे व्यवस्थितः। न क्षमिष्यति नः सर्वानपराधकृतो गतान् ॥ १४ ॥
अप्रवृत्तौ च सीतायाः पापमेव करिष्यति । तस्मात्क्षममिहाद्यैव गैन्तुं प्रायोपवेशनम् ॥ १५ ॥

कान्तो विवक्षितः। सोऽपि चातीतः स मार्गणावधिभूतमार्गशीर्षमासः। अपिचेत्याभ्यां पदाभ्यां तदनन्तरभूतौ पौषमाघौ समुच्चीयेते । अतश्च फाल्गुन एव प्राप्त इति भाव इत्याहुः । अत उत्तरं किं कार्यम् ॥ २१ ॥ २२ ॥

९] ति० टी०–कालात्ययमेवाह—वयमिति । आश्वयुजे अतीतप्राये इति शेषः । 'कार्तिके समनुप्राप्ते त्वं रावणवधे यत' इत्युक्तेः । ततः पञ्चदशरात्रकालसंख्यया प्रवर्तितदूतैर्व्यवस्थिता मिलिताः । एवं चामान्तमानेनाश्विनस्योत्तरे दीपोत्सवामायुते पक्षे सर्वसैन्यागमनं किष्किन्धायाम् । रामस्य क्रोधस्तु तत्रैव पक्षे कार्तिकसंनिधावपि तदुपमाभावकृतः। ततः कार्तिकेऽवधिरन्वेषणस्य । ततो मार्गशुक्ल इदं वचनम् । प्रायस्तद्वर्षे पौषः क्षयमासः । 'कार्तिकादित्रये नान्यतः' इत्युक्तेः अतो मार्गशुक्ल एव आम्रादीनां पुष्पोद्गमः उत्पाततो वा । तादृशरीत्या पुष्पोद्गमं दृष्ट्वाऽपि वसन्तासन्नतानुमानेन भयोपपत्तिः । कतकादयस्तु—अन्वेषणेऽवधित्वेन दत्तः पौषो मासः। 'आश्वयुजे' इत्यस्य तत्प्रत्यासन्नकार्तिकान्ते इत्यर्थः । कालसंख्येति कार्तिकोत्तरं पञ्चदशरात्रसंख्याकालेनावधिना वानरानयनाय दूतप्रेषणम् । ततः पूर्णिमान्तमानेन मार्गशुक्लेन सर्ववानरागमनम् । ततः पौषादिने दिक्षवन्वेषणाय वानरप्रस्थानम् । तत्र पौषे माघकृष्णीयैकिंचिद्दिनसहितेऽतीते इदं वाक्यमित्याहुः । तेषां सीतानयनोत्तरं सीतां प्रति द्वादश मासा रावणावधिरिति स्पष्टमेव, पम्पायां चैत्रे आगमनमित्यस्योक्तत्वात् । ततः पूर्वं फाल्गुने सीतापहार इति च स्पष्टमेव । एवं च माघकृष्णे तच्छुक्लादौ वा हनुमतः सीतासमीपगमने हनुमन्तं प्रति 'वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम' इति सीतोक्तिविरोधः । किं च हनुमतो लङ्काप्रवेशदिने प्रदोषसमय एव पूर्णकलपक्षचन्द्रोदयवर्णनं च विरोध इत्याहुः ॥ ९ ॥

रा० टी०–वयमिति । आश्वयुजे आश्विने मासि कालसंख्याव्यवस्थिताः कालसंख्यायां संस्थापिताः वयं प्रस्थिताः सः नियमितकालः अतीतः अतः उत्तरमस्माभिः किं कार्यम् ॥ ९ ॥

१०–११] ति० टी०–उक्तमेव विस्तरेणाह–भवन्त इति । प्रत्ययमन्वेषणार्थराजनियोगं प्राप्ता ज्ञातवन्तो भवन्तो मां पुरस्कृत्य निर्याता इत्यन्वयः ॥ १० ॥ ११ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–भवन्त इति । प्रत्ययं राजविश्वासं प्राप्ताः नीतिमार्गविशारदाः अत एव सर्वकर्मसु निसृष्टाः यथाकालं नियोजिताः अत एव कर्मसु क्रियासु अप्रतिमाः अनुपमाः अत एव दिक्षु विश्रुतपौरुषाः अत एव भर्तुः हितेषु अभिरताः अत एव पिङ्गाक्षप्रतिचोदिताः सुग्रीवप्रेरिताः भवन्तः मां पुरस्कृत्य निर्गताः । श्लोकद्वयमेकान्वयि॥ १० ॥ ११ ॥

गो० टी०–भवन्त इति । प्रत्ययं विश्वासम् । नीतिमार्गे विशारदाः प्रगल्भाः । निसृष्टाः दक्षा इति यावत् ॥ २३–२५ ॥

१२] ति० टी०–तस्य कालस्य च बिले गतत्वादिदानीमकृतार्थानामस्माकं मर्तव्यं मरणमेवानुष्ठेयम् । कुतस्तत्राह–हरिराजस्येति ॥ १२ ॥

रा० टी०–इदानीमिति । इदानीं संयोजितकाले अकृतार्थानाम् अकृतराजप्रयोजनानामस्माकं कर्तव्यं सुग्रीवोक्तमिति शेषः । तत्र हेतुः–हरिराजस्य सुग्रीवस्य संदेशमनुपदिष्टमकृत्वा कः सुखी भवेत् न कोऽपीत्यर्थः, अत्र संशयो न ॥ १२ ॥

१३] ति० टी०–प्रायोपवेशनं युक्तम् प्राणत्यागायेति शेषः ॥ १३ ॥

रा० टी०–नन्वत्र तत्करणे सामर्थ्यं नास्तीत्यत आह—अस्मिन्निति । सुग्रीवेण कृते नियमिते अस्मिन्काले अतीते सति प्रायोपवेशनं मरणाय अनशनं वनौकसां युक्तम् ॥ १३ ॥

गो० टी०–तस्मिन्निति । प्रायाय अन्तगमनाय उपवेशनं शयनं प्रायोपवेशनम् ॥ २६ ॥ २७ ॥

१४] ति० टी०–स्वामिभावे निग्रहानुग्रहकृद्राजभावे व्यवस्थितोऽपराधः कालातिक्रमरूपः गतान्स्वसमीपं प्राप्तान्॥ १४ ॥

रा० टी०–तदभावे न निर्वाह इत्याह—तीक्ष्ण इति । स्वामिभावे राजधर्मे व्यवस्थितः प्रकृत्या तीक्ष्णः सुग्रीवः अपराधकृतः गतान्संप्राप्तान् अस्मान् न क्षमिष्यति ॥ १४ ॥

१५] ति० टी०–अप्रवृत्तौ प्रवृत्तिप्रतिपादनाभावे । पापं वधरूपम् ॥ १५ ॥

रा० टी०–अप्रवृत्ताविति । सीतायाः अप्रवृत्तौ प्रवृत्त्यभावे सति सुग्रीवः पापं वधं करिष्यत्येव तस्माद् इह अस्मिन् स्थाने पुत्रादींस्त्यक्त्वा तदास्थां संत्यज्य प्रायोपवेशनं गन्तुम् अद्यैव क्षमं युक्तम् । सार्धश्लोक एकान्वयी ॥ १५ ॥

---

१ कर्तव्यमिति रा. पाठः । २ तस्मिन्निति गो. पाठः । ३ प्रायोपविशनं हि नः इति गो. पाठः ।

त्यक्त्वा पुत्रांश्च दारांश्च धनानि च गृहाणि च । ध्रुवं नो [1]हिंसते राजा सर्वान्प्रतिगतानितः ॥ १६ ॥
वधेनाप्रतिरूपेण श्रेयान्मृत्युरिहैव नः । न चाहं यौवराज्येन सुग्रीवेणाभिषेचितः ॥ १७ ॥
नरेन्द्रेणाभिषिक्तोऽस्मि रामेणाक्लिष्टकर्मणा । स पूर्वं बद्धवैरो मां राजा दृष्ट्वा व्यतिक्रमम् ॥ १८ ॥
घातयिष्यति दण्डेन तीक्ष्णेन कृतनिश्चयः । किं मे सुहृद्भिर्व्यसनं पश्यद्भिर्जीवितान्तरे ॥
इहैव प्रायमासिष्ये पुण्ये सागररोधसि ॥ १९ ॥
एतच्छ्रुत्वा कुमारेण युवराजेन भाषितम् । सर्वे ते वानरश्रेष्ठाः करुणं वाक्यमब्रुवन् ॥ २० ॥
तीक्ष्णः प्रकृत्या सुग्रीवः प्रियारक्तश्च राघवः । [2][3]समीक्ष्याकृतकार्यांस्तु तस्मिंश्च समये गते ॥ २१ ॥
अदृष्टायां च वैदेह्यां दृष्ट्वा चैव समागतान् । राघवप्रियकामाय घातयिष्यत्यसंशयम् ॥ २२ ॥
न क्षमं चापराद्धानां गमनं स्वामिपार्श्वतः । [4]प्रधानभूताश्च वयं सुग्रीवस्य समागताः ॥ २३ ॥
इहैव सीतामन्वीक्ष्य प्रवृत्तिमुपलभ्य वा । नो चेद्गच्छाम तं वीरं गमिष्यामो यमक्षयम् ॥ २४ ॥

गो० टी०–अप्रवृत्ताविति । अप्रवृत्तौ अवार्तायाम् । प्रायोपविशनमिति गुणाभाव आर्षः ॥ २८ ॥ २९ ॥

१६] ति० टी०–पुत्रादि त्यक्त्वा प्रायोपवेशनं गन्तुं कर्तुं क्षमं युक्तमित्यन्वयः । तत्र हेतुः—ध्रुवमिति ॥ १६ ॥

रा० टी०–ध्रुवमिति । इतः गतान् नोऽस्मान् राजा सुग्रीवो ध्रुवं हिंसते हिनस्ति हनिष्यति अतः अप्रतिरूपेण अपराधाभावादसदृशेन वधेन असदृशवधात् इह मृत्युरेव श्रेयान् ॥ १६ ॥

१७] ति० टी०–अप्रतिरूपेणापराधमूलत्वेनास्य वधस्याप्रतिरूपत्वम् । नन्व युवराजत्वेनाभिषिच्य कथमसौ त्वां हनिष्यतीत्यत आह—न चाहमिति ॥ १७ ॥

रा० टी०–नन्व 'विषदृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इतिन्यायेन युवराजत्वेनाभिषेचितं त्वां सुग्रीवः कथं हनिष्यतीत्यत आह—नेति । यौवराज्येन युवराजत्वेन सुग्रीवेणाहं नाभिषेचितः किं तु रामेणाभिषिक्तोऽस्मि ॥ १७ ॥

गो० टी०—त्वां यौवराज्ये कृतवान् सुग्रीवः कथं हिंस्यादित्यत्राह—न चाहमिति ॥ ३० ॥ ३१ ॥

१८] ति० टी०–पूर्वं मां प्रति बद्धवैरः स राजा सुग्रीवो व्यतिक्रममाज्ञाभङ्गं दृष्ट्वा घातयिष्यत्येव ॥ १८ ॥

रा० टी०–स्ववधस्यावश्यकत्वमाह—स इति । पूर्वं बद्धवैरः वालिवैरद्वारा बद्धः संपादितः वैरो येन स राजा सुग्रीवः व्यतिक्रमम् अतीतकालं मां दृष्ट्वा कृतनिश्चयो वधविषयकनिश्चयवान् सन् तीक्ष्णेन दण्डेन घातयिष्यति ॥ १८ ॥

१९–२०] ति० टी०–जीवितान्तरे राजाज्ञया जीवितनाशावधौ काले प्राप्ते मम व्यसनं पश्यद्भिरपि सुहृद्भिः किं कार्यमिति किं साध्यमित्यर्थकं शेषः । यदेवमतः—इहैवेति ॥१९॥२०॥

रा० टी०–किमिति । जीवितान्तरे जीवनावधिमध्ये मे व्यसनं राजहस्तात् मरणं पश्यद्भिः सुहृद्भिः किं कर्तव्यमिति शेषः, न किमपीत्यर्थः । एतेन मत्सुहृदामप्यधिकः खेदो भविष्यतीति सूचितम् अतः इह अस्मिन् पुण्ये सागररोधसि प्रायमासिष्ये ॥ १९ ॥

रा० टी०–एतदिति । कुमारेणाङ्गदेन एतत् भाषितं श्रुत्वा वानरश्रेष्ठाः करुणं वाक्यमब्रुवन् ॥ २० ॥

गो० टी०–किमिति । मे जीवितान्तरे जीवितावधौ व्यसनं पश्यद्भिः सुहृद्भिः किं सुहृदो मद्व्यसनप्रदर्शनेन क्लेशयित्वा मम किं प्रयोजनमित्यर्थः ॥ ३२–३६ ॥

२१–२२] ति० टी०–प्रियायां रक्तोऽतिरक्तः । तस्मिन्समयेऽन्वेषणावधिकाले ॥ २१ ॥ २२ ॥

रा० टी०–तद्वाक्याकारमाह–तीक्ष्ण इति । राघवः प्रियारक्तः प्रियाविषयकात्यनुरागवान् सुग्रीवाचरितवधवारणानर्ह इति तात्पर्यम् अतः तस्मिन् संकेतिते समये गते सति अकृतकार्यान् अस्मान् समीक्ष्य अनुमानेन निश्चित्य वैदेह्याम् अदृष्टायां सत्यां समागतान् राघवप्रियकामाय प्रकृत्या तीक्ष्णः सुग्रीवः घातयिष्यति । अर्धचतुष्टयमेकान्वयि ॥ २१ ॥ २२ ॥

२३] ति० टी०–अपराद्धानां कृतापराधानाम् । स्वामिपार्श्वतः स्वामिपार्श्वे सुग्रीवस्य प्रधानभूताः सेवका वयमिह समागताः ॥ २३ ॥

२४] ति० टी०–उपलभ्य वा गच्छाम । नो चेदिहैव स्थित्वा यमगृहं गमिष्यामः ॥ २४ ॥

रा० टी०–नेति । अपराद्धानाम् अबुद्धिपूर्वमपि जातापराधानां स्वामिपार्श्वतः स्वामिपार्श्वे गमनं न क्षमम् अतः समागताः सुग्रीवस्य प्रधानभूताः सेवका इति शेषः । वयं सीतामन्विष्य प्रवृत्तिं वृत्तान्तमुपलभ्य च वीरं सुग्रीवं गच्छामः नो चेद्वृत्तान्तज्ञानाभावे इहैव देहं त्यक्त्वेति शेषः यमक्षयं यमगृहं गच्छाम गच्छेम । अर्धचतुष्टयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–इहैवेति । सीतामन्विष्य तस्याः प्रवृत्तिं वृत्तान्तमुपलभ्य वीरं तं गच्छाम नो चेदिहैव यमक्षयं यमगृहं गमिष्यामः ॥ ३६–३८ ॥

१ हिंसितेति गो. पाठः । २ सक्त इति गो. पाठः । ३ अर्धमेतद् गो. नास्ति । ४ अन्विष्येति गो. पाठः ।

प्लवङ्गमानां तु भयार्दितानां श्रुत्वा वचस्तार इदं बभाषे ।
अलं विषादेन बिलं प्रविश्य वसाम सर्वे यदि वो रोचते वः ॥ २५ ॥
इदं हि मायाविहितं सुदुर्गमं प्रभूतपुष्पोदकभोज्यपेयम् ।
इहास्ति नो नैव भयं पुरन्दरान्न राघवाद्वानरराजतोऽपि वा ॥ २६ ॥
श्रुत्वाऽङ्गदस्यापि वचोऽनुकूलमूचुश्च सर्वे हरयः प्रतीताः ।
यथा न हन्येम तथा विधानमसक्तमद्यैव विधीयतां नः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ।

तारमतेऽङ्गदादिभिरनुसृतेऽन्यवानरास्ततो व्यावर्तयन्हनुमान्युक्त्युपन्यासेनाङ्गदं भीषयमाणः सुग्रीवसौजन्य प्रशसस्ततो भयाभाव च प्रतिपादयस्तदन्तिकगमनमेव श्रेयस्करमिति प्रतिपादयति ।

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि । अथ मेने हृतं राज्यं हनूमानङ्गदेन तत् ॥ १ ॥
बुद्ध्या ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम् । चतुर्दशगुणं मेने हनूमान्वालिनः सुतम् ॥ २ ॥
आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः । शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया ॥ ३ ॥

२५] ति० टी०–बिलं स्वयंप्रभाया बिलम् ॥ २५ ॥

२६] ति० टी०–कथमत्र प्राणत्राणमत आह—इदं हीति । नो इति लोकोक्तौ ॥ २६ ॥

रा० टी०–प्लवङ्गमानामिति । भयार्दितानां प्लवङ्गमानां वचः श्रुत्वा यदि वो रोचते तर्हि मायाविहितमिदं बिलं प्रविश्य सर्वे वयं वसाम इह बिले पुरन्दरादिभ्यो नो भयं न अतो विषादेन अलं न कर्तव्यमित्यर्थः इदं वचस्तारो बभाषे । अर्धचतुष्टयमेकान्वयि ॥ २५ ॥ २६ ॥

२७] ति० टी०–अङ्गदस्यापि अपिना तारस्य । असक्तमविलम्बम् ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः ॥५३॥

रा० टी०–श्रुत्वेति । अङ्गदस्य अपिना तारस्य अनुकूलमविरोधं वचः श्रुत्वा प्रतीतास्तद्वचने जातविश्वासाः सर्वे हरयः यथा वयं न हन्येम तथा विधानं कृत्यमसक्तं प्राणापहारके आसक्तिरहितं यथा भवति तथा अद्यैव नोऽस्माभिर्विधीयतामित्यर्थः ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

गो० टी०–श्रुत्वेति । अङ्गदस्याप्यनुकूलं तारस्य वचनं श्रुत्वेत्यन्वयः । विधानं कार्यम् कर्मणि ल्युट् असक्तम् अविलम्बम् ॥ २७ ॥

अस्मिन् सर्गे सार्धैकोनचत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१] ति० टी०–ताराधिपतिवर्चसि तारे तथा ब्रुवति तुशब्दादङ्गदे प्रतिषेधाकरणात्तदनुमन्यमाने सति । अथानन्तरमङ्गदेन राज्यं सुग्रीवीयं कपिराज्यं हृतमिति मेने । तद्राज्यं स्वयंप्रभाबिलराज्यमित्यर्थ इत्यन्ये ॥ १ ॥

रा० टी०–अङ्गदं प्रति हनुमदुक्तिं वर्णयितुं हनुमद्विचारमाह–तथेत्यादिभिः । ताराधिपवर्चसि चन्द्रतेजःसदृशतेजोवति तारे तथा अङ्गदानुकूल्येन ब्रुवति सति अङ्गदेन राज्यं सुग्रीवकपिराजत्वं हृतमथ इति हनुमान्मेने एतेन तयोरुक्तिर्न समीचीनेति हनुमन्निश्चयः सूचितः अतिबुद्धिमद्भिः सर्वं सुसाध्यमिति तस्य तात्पर्यम् ॥ १ ॥

गो० टी०–अथ हनुमता अङ्गदमतभेदनपूर्वकमङ्गदस्य सुग्रीवसमीपगमनाय नियोजनं चतुष्पञ्चाशे–तथेत्यादि । राज्यं हृतं मेने राज्यं कर्तुं सामर्थ्यमस्तीति मेन इत्यर्थः ॥१॥

२–३] ति० टी०–नन्वङ्गदे कथं राज्यापहारचिन्ताऽत आह—बुद्ध्येति । अष्टाङ्गयाऽष्टगुणया । तेऽत्र गुणाः 'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥' इति प्रसिद्धाः । चतुर्बलं सामदानभेदनिग्रहरूपोपायचतुष्टयजम् । चतुर्दशगुणम् 'देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानयोगश्च सम्यक्कार्यानुबन्धिता ॥ दक्षता प्रणिपातश्च शास्त्रज्ञानानुसारिता । शौर्यं शक्तिश्च सत्त्वं च कृतज्ञत्वं च तद्गुणाः ॥' इति प्रसिद्धाः ।

१ पेयकमिति गो. पाठः । २ हिरण्येमेति गो. पाठः । ३ हनुमानेति गो. पाठः

बृहस्पतिसमं बुद्ध्या विक्रमे सदृशं पितुः । शुश्रूषमाणं तारस्य शुक्रस्येव पुरन्दरम् ॥ ४ ॥
भर्तुरर्थे परिश्रान्तं सर्वशास्त्रविशारदः[1] । अभिसंधातुमारेभे हैनूमानङ्गदं ततः[2] ॥ ५ ॥
स चतुर्णामुपायानां[3] द्वितीयमुपवर्णयन् । भेदयामास तान्सर्वान्वानरान्वाक्यसंपदा ॥ ६ ॥
तेषु सर्वेषु भिन्नेषु ततोऽभीषयदङ्गदम् । भीषणैर्विविधैर्वाक्यैः कोपोपायसमन्वितैः[4] ॥ ७ ॥
त्वं समर्थतरः पित्रा युद्धे तारेय वै ध्रुवम्[5] । दृढं धारयितुं शक्तः कपिराज्यं यथा पिता ॥ ८ ॥

शसहिष्णुता । सर्वविज्ञानिता दाक्ष्यमूर्जः संहतमन्त्रता ॥ अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षित्वमचापलम् ॥' इत्युक्तचतुर्दशगुणयुक्तम् ॥ २ ॥ ३ ॥

४] ति० टी०–तारस्य वचः शुश्रूषमाणं यतोऽपश्यत्ततो राज्यं हृतं मेने । शुक्रस्येव पुरन्दरम् विपरीतोपदेशग्रहे उपमेषा । शुक्रशब्दोऽत्र बृहस्पतिपर इति कश्चित् ॥ ४ ॥

रा० टी०–बुद्ध्येति । अष्टाङ्गया अष्टगुणयुक्तया बुद्ध्या युक्तं चतुर्बलैः समन्वितं चतुर्दशगुणं चतुर्दशसङ्ख्याकगुणविशिष्टं शुक्लपक्षादौ श्रिया वर्धमानं शशिनमिव तेजोबलपराक्रमैरापूर्यमाणं बुद्ध्या बृहस्पतिसमं शुक्रस्य वचः शुश्रूषमाणं पुरन्दरमिव तारस्य वचः शुश्रूषमाणं विक्रमे पितुः सदृशमङ्गदं मेने । श्लोकत्रयमेकान्वयि । बुद्धेरष्टगुणास्तु 'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ।' चतुर्बलानि तु सामदानभेदनिग्रहरूपोपायाः । चतुर्दश गुणास्तु 'देशकालज्ञता दाढर्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानतादाक्ष्यमूर्जः संहतमन्त्रता ॥ अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षित्वमचापलम्' इति ॥२–४॥

गो० टी०–बुद्ध्या हीति । अष्टाङ्गया 'ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः' इत्युक्ताष्टाङ्गयुक्तया । चतुर्बलसमन्वितं बाहुबलमन्त्रबलोपायबलबन्धुबलयुक्तम् । चतुर्दशगुणम् 'देशकालज्ञता दाढर्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानिता दाक्ष्यमूर्जः संहतमन्त्रता ॥ अविसंवादिता शौर्यं शक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षत्वमचापलम् ॥' इत्युक्तचतुर्दशगुणयुक्तम् ॥ २ ॥

गो० टी०–आपूर्यमाणमित्यादि । तारस्य शुश्रूषमाणं नटस्य शृणोतीतिवत्कारकशेषत्वात् षष्ठी । शुक्रस्येव पुरन्दरमिति पुरंदरशब्दसन्निधानादत्र शुक्रशब्दो बृहस्पतिपरः, यद्वा कस्यांचिदवस्थायां हितमुपदिशतः शुक्रस्य वचनं पुरन्दरः श्रुतवानित्यवगम्यते 'गुरोरिव पुरंदरम्' इति क्वचित्पाठः । अभिसंधातुम् अनुकूलयितुम् ॥ ३–५ ॥

५] ति० टी०–भर्तुः सुग्रीवस्यार्थेऽर्थकरणे परिश्रान्तं विमुखम् । सर्वशास्त्रविशारद इति हनुमद्विशेषणम् । अभिसंधातुं तारादिभ्यो भेदयितुम् ॥ ५ ॥

रा० टी०–भर्तुरिति । भर्तुः सुग्रीवस्य अर्थे प्रयोजनसाधने परिश्रान्तं जातश्रमं निहतचित्तमित्यर्थः, अङ्गदम् अभिसंधातुं भर्तुरर्थे संयोजयितुं हनुमानारेभे ॥ ५ ॥

६] ति० टी०–स इति । अभिसंधित्सुर्हनुमानित्यर्थः । द्वितीय उपायो भेदस्तमुपवर्णयन् हेतौ शता तदुपायावलम्बनहेतुना तान्सर्वानङ्गदानुवर्तिनः । वाक्यसंपदा भेदजननक्षमन्यायोपेतेन 'हीनाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः' इत्यादिवाक्यसमूहेन ॥ ६ ॥

रा० टी०–स इति । स हनुमान् चतुर्णामुपायानां सामदानभेदनिग्रहरूपाणां तृतीयं भेदं वाक्यसंपदा युक्तियुक्तवचनसमूहेन उपवर्णयन् सर्वान् अङ्गदपक्षीयान् वानरान् भेदयामास 'हीनाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः' इत्यादिवचनैः अङ्गदसंमतेः पृथक् चकार ॥ ६ ॥

गो० टी०–स इति । चतुर्णां सामादीनां तृतीयं भेदम् 'साम दानं च भेदश्च दण्डश्चेति यथाक्रमम्' इति क्रमनियमात्॥६॥

७]ति० टी०–कोपोपायो दण्डस्तत्समन्वितैः । 'कोपापायसमन्वितैः' इति पाठ्यः पाठः । कोपापनयनसामर्थ्ययुक्तैरभीषयन्न्यायप्रदर्शनपूर्वं भयमुत्पादयामास ॥ ७ ॥

रा० टी०–तेष्विति । तेषु अङ्गदपक्षीयेषु भिन्नेषु सत्सु कोपोपायसमन्वितैः कोपोपायेन दण्डेन समन्वितैः युक्तैः अत एव विभीषणैः भयप्रापकैः वाक्यैः अङ्गदमभीषयत् ॥ ७ ॥

गो० टी०–तेष्विति । कोपरूप उपायः कोपोपायः दण्डः तत्समन्वितैः ॥ ७ ॥

८] ति० टी०–भीषणमेव स्तुतिपूर्वं करोति—त्वमिति । त्वं पित्रा सुग्रीवेण युद्धे समर्थतरः । यद्वा त्वं पित्रा सदृश इति शेषः अत एव युद्धे समर्थतर इत्यर्थः । दृढं धारयितुं शक्तः । अस्य यदि सर्वे कपयस्त्वामनुवर्तयन्तीति शेषः । कपिराज्यं किष्किन्धायां वा ऋक्षबिले वा ॥ ८ ॥

रा० टी०–तत्प्रकारमाह–त्वमिति । तारेय हे अङ्गद ! त्वं युद्धे पित्रा सदृश इति शेषः अत एव समर्थतरः अत एव कपिराज्यं धारयितुं पिता इव त्वं समर्थः तथापि नित्यमस्यिरचित्ताः चञ्चलमनसः कपयस्त्वयाऽऽज्ञाप्यं इह वासं पुत्रदारं विना न विषहिष्यन्ति करिष्यन्ति । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०–त्वमिति । पित्रा पितुः ॥ ८ ॥

१ शास्त्रविदां वरमिति गो. पाठः । २ हनुमानिति गो. पाठः। ३ तृतीयमिति गो. रा. पाठः। ४ बहुभिरिति गा. पाठः। ५ ध्रुवमिति गो. पाठः।

नित्यमस्थिरचित्ता हि कपयो हरिपुङ्गव । नाज्ञाप्यं विषहिष्यन्ति पुत्रदारं विना त्वया ॥ ९ ॥
त्वां नैते ह्यनुरज्ञेयुः प्रत्यक्षं प्रवदामि ते । यथाऽयं जाम्बवान्नीलः सुहोत्रश्च महाकपिः ॥ १० ॥
नह्यहं ते इमे सर्वे सामदानादिभिर्गुणैः । दण्डेन नै त्वया शक्याः सुग्रीवादपकर्षितुम् ॥ ११ ॥
विगृह्यासनमप्याहुर्दुर्बलेन बलीयसा । आत्मरक्षाकरस्तस्मान्न विगृह्णीत दुर्बलः ॥ १२ ॥
यां चेमां मन्यसे धात्रीमेतद्बलमिति श्रुतम् । एतल्लक्ष्मणबाणानामीषत्कार्यं विदारणम् ॥ १३ ॥
स्वल्पं हि कृतमिन्द्रेण क्षिपता ह्यशनिं पुरा । लक्ष्मणो निशितैर्बाणैर्भिन्द्यात्पत्रपुटं यथा ॥ १४ ॥
लक्ष्मणस्य च नाराचा बहवः सन्ति तद्विधाः । वज्राशनिसमस्पर्शा गिरीणामपि दारकाः ॥ १५ ॥

९] ति० टी०–न च तदस्तीत्याह—नित्यमिति । स्वभावादिति भावः । अस्थैर्ये कारणान्तरमप्याह–पुत्रदारं विनेति। पुत्रदाराणां किष्किन्धावर्तिनां सुग्रीवायत्तत्वात्त्वया सह बिलेऽवस्थाने तद्वियोगस्य स्पष्टत्वात् । निगृह्य स्थापनमप्यशक्यमित्याह— त्वयाऽऽज्ञाप्यं त्वत्कर्तृकमाज्ञापनं न सहिष्यन्ति । त्वत्तोऽप्यधिकबलत्वादिति भावः ॥ ९ ॥

गो० टी०–नित्यमिति । आज्ञाप्यं आज्ञापनम् भावे कृत्यप्रत्ययः । पुत्रदारान् पुत्रदारैर्विरहिताः । त्वयेति कर्तरि तृतीया अस्य आज्ञाप्यमित्यनेन संबन्धः ॥ ९ ॥

१०] ति० टी०–पुत्रदारं हित्वा एते त्वां नानुरज्ञेयुस्त्वयि नानुरक्ता भवेयुः । उक्तमर्थं स्पष्टं यथा भवति तथा प्रवदामि प्रदर्शयामि । तदेव दर्शयति—अयं जाम्बवानिति ॥ १० ॥

११] ति० टी०–अहमिति स्वनिर्देशः । ते इमे सर्वे सामदानादिभिर्गुणैरुपायैस्त्वया सुग्रीवादपकर्षितुं शक्या न हि नापि दण्डेन ॥ ११ ॥

रा० टी०–त्वामिति । यथा जाम्बवदादयस्त्वां सुग्रीवविरोधित्वेन ज्ञायमानं न अनुरज्ञेयुस्तथा अहं न इमे सर्वे वानराश्च न इत्यहं ते प्रत्यक्षं प्रवदामि अत एव सामदानादिभिर्दण्डेन च सुग्रीवादपकर्षितुं पृथक्कर्तुं न शक्याः एतेन सुग्रीवस्यातिप्राबल्यं व्यञ्जितम्। श्लोकद्वयमेकान्वयि॥१०॥११॥

गो० टी०–त्वामिति । अयं जाम्बवान्नीलः सुहोत्रश्च एते त्वां यथा नानुयुज्ञेयुः नानुवर्तेन् तथाऽहमपि नानुवर्ते हि । त इमे सर्वे सामादिभिः सुग्रीवादपकर्षितुं न शक्याः ॥ १० ॥११॥

१२] ति० टी०–नन्वेवं गच्छत यूयमपि, एकेनैव मया स्थेयमत आह—विगृह्येति । दुर्बलेन सह विगृह्य बलीयसाऽऽसनं स्थितिः शक्येत्याहुः न तु दुर्बलस्य बलीयसा विगृह्यासनं शक्यम् तस्मादात्मरक्षाकरः आत्मरक्षाकरणेच्छुः पुरुषो दुर्बलः सन्बलीयसा न विगृह्णीत ॥ १२ ॥

रा० टी०–नन्वेवं भवन्तः सुग्रीवमेवानुसरन्तो गच्छन्तु एक एवाहमत्र स्थास्यामीत्यत आह–विगृह्येति । बलीयसा पुरुषेण सह विगृह्य वैरं संपाद्य दुर्बलेन आसनं स्थितिं कर्तुं न शक्यं तस्मात् आत्मरक्षाकरो दुर्बलो बलीयसा न विगृह्णीत इत्याहुरार्षा इति शेषः कर्तुं शक्यमित्यध्याहृतम् । नेति बलीयसेति च आवर्तते ॥ १२ ॥

गो० टी०–विगृह्यासनमिति । बलीयसः प्रबलस्य दुर्बलेन समं विगृह्य आसनमप्यवस्थानमपि कर्तव्यमाहुः न तु दुर्बलस्य बलीयसा तस्मात् आत्मरक्षाकरः स्वक्षेमकाम इति यावत्, दुर्बलः बलीयसा न विगृह्णीत विगृह्य नासीत ॥ १२ ॥

१३] ति० टी०–नन्वेषा गुहा न बलवतः साध्येत्याशङ्क्याह–यामिति । यामिमां गुहां धात्रीं रक्षिकां मन्यसे नेयं रक्षिकेति शेषः । कुतस्तत्राह—यदेतद्बिलमृक्षबिलं निर्भयमिति तारात्श्रुतम् एतदेतद्विषयविदारणं लक्ष्मणबाणानामीषत्कार्यमीषत्करम् स्वभाव आर्षः ॥ १३ ॥

रा० टी०–नन्वेषा गुहा न कस्माच्चिद्भीतिरिति तत्रैव वस्त्यामीत्यत आह–यामिति । यदेतत् बिलं स्मृतं तारेण ज्ञातमाहात्म्यम् अत एव यामिमां धात्रीं रक्षिकां मन्यसे तस्य विदारणं लक्ष्मणबाणानाम् ईषत्कार्यमीषत्करम्, परिश्रममन्तरा साध्यमित्यर्थः ॥ १३ ॥

गो० टी०–स्वतो बलाभावेऽपि दुर्गबलमस्तीत्याशङ्क्याह–यां चेति । यामिमां गुहां धात्रीं रक्षकां मन्यसे । एतद्बिलमिति तारात्श्रुतम् एतत् ऋक्षबिलं विदारणे विषये लक्ष्मणबाणानामीषत्कार्यम् अयत्नसाध्यमित्यर्थः ॥ १३ ॥

१४] ति० टी०–पुरा पूर्वं मायया भूतलान्तर्निर्मितैतत्पुरवर्तिमयत्रधार्थमशनिं तत्प्रदेशभुवि क्षिपतेन्द्रेण स्वल्पमेव कृतं मयत्रधमात्रं कृतम्, न तु पुरं भग्नम् । लक्ष्मणस्तु निशितैर्बाणैरेतत्पुरमपि पत्रपुटमिव भिन्द्यात् ॥ १४ ॥

रा० टी०–स्वल्पमिति । पुरा पूर्वं मयकर्तृकबिलस्थितिसमये अशनिं क्षिपता मयासुरभ्रातरमुद्दिश्य त्यजता इन्द्रेण स्वल्पं द्वाराकृतिच्छिद्रमात्रं कृतं लक्ष्मणस्तु बाणैः पत्रपुटमिव भिन्द्यात् ॥ १४ ॥

गो० टी०–स्वल्पमिति । पुरा बिलवासिनं मयसुरमुद्दिश्याशनिं वज्रं क्षिपतेन्द्रेण स्वल्पं कृतं द्वारमात्रं कृतम् । लक्ष्मणस्तु निशितैर्बाणैः पत्रपुटमिव भिन्द्याद्धि ॥ १४ ॥

१५] ति० टी०–कुतस्तत्राह—लक्ष्मणस्येति । तद्विधा

१ द्वारानिति गो. पाठः । २ युञ्जेयुरिति गो. पाठः । ३ वेति गो. पाठः । ४ बलीयस इति गो. पाठः । ५ विदारणे इति गो. पाठः । ६ क्षिति गो. पाठः । ७ दारणा इति गो. पाठः ।

अवस्थानं यदैव त्वमासिष्यसि परन्तप । तदैव हरयः सर्वे त्यक्ष्यन्ति कृतनिश्चयाः ॥ १६ ॥
स्मरन्तः पुत्रदाराणां नित्योद्विग्ना बुभुक्षिताः । खेदिता दुःखशय्याभिस्त्वां करिष्यन्ति पृष्ठतः ॥ १७ ॥
स त्वं हीनः सुहृद्भिश्च हितकामैश्च बन्धुभिः । तृणादपि भृशोद्विग्नः स्पन्दमानाद्भविष्यसि ॥ १८ ॥
अत्युग्रवेगा निशिता घोरा लक्ष्मणसायकाः । अपावृत्तं जिघांसन्तो महावेगा दुरासदाः ॥ १९ ॥
अस्माभिस्तु गतं सार्धं विनीतवदुपस्थितम् । आनुपूर्व्यात्तु सुग्रीवो राज्ये त्वां स्थापयिष्यति॥ २० ॥
धर्मराजः पितृव्यस्ते प्रीतिकामो दृढव्रतः । शुचिः सत्यप्रतिज्ञश्च सं त्वां जातु न नाशयेत् ॥ २१ ॥
प्रियकामश्च ते मातुस्तदर्थं चास्य जीवितम् । तस्यापत्यं च नास्त्यन्यत्तस्मादङ्गद गम्यताम्॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

इत्यस्य विवरणं वज्राशनीत्यादि । वज्रमिन्द्रकरस्थम्, अशनिर्मेघस्थः यद्वा तद्विधा वालिहन्तृबाणसदृशाः ॥ १५ ॥

रा० टी०–लक्ष्मणस्येति । वज्राशनिसमस्पर्शः अत एव गिरीणामपि दारकास्तद्विधा अशनेरपि निर्मापकाः लक्ष्मणस्य नाराचाः बाणविशेषाः बहवः सन्ति ॥ १५ ॥

गो० टी०–लक्ष्मणस्येति । तद्विधाः तादृशा अपरिच्छिन्नवैभवा इति यावत्, गिरीणामपि दारणाः बिलस्य किमुतेति भावः ॥ १५ ॥

१६] ति० टी०–यदैवात्र बिले त्वमवस्थानमासिष्यसि प्राप्स्यसि तदैव सर्वे हरयः कृतनिश्चयास्त्वां त्यक्ष्यन्ति ॥ १६ ॥

रा० टी०–अवस्थानमिति । यदा अवस्थानं बिले स्थितिमासिष्यसि निश्रेष्यसि तदैव कृतनिश्चयाः त्वत्त्यागविषयकनिश्चयवन्तः सर्वे हरयः त्यक्ष्यन्ति त्वामिति शेषः ॥ १६ ॥

गो० टी०–अवस्थान इति । अवस्थाने बिले । यद्वा विगृह्यावस्थाने आसिष्यसि स्थास्यसि विगृह्यावस्थानं यदाऽध्यवसिष्यसीत्यर्थः ॥ १६–१८ ॥

१७] ति० टी०–नित्योद्विग्ना रामलक्ष्मणसुग्रीवेभ्यः । बुभुक्षिताः पुत्रदारादिजसुखभोगेच्छवस्त्वया दुःखशय्याभिर्दुःखस्थित्यादिभिः खेदिताः सन्तस्त्वां पृष्ठतः करिष्यन्ति । सर्वथा त्यक्ष्यन्त्येवेत्यर्थः ॥ १७ ॥

रा० टी०–तत्र हेतुं वदन्नाह–स्मरन्त इति । नित्योद्विग्नाः सुग्रीवादिभ्यो नित्यं भीताः बुभुक्षिताः अत एव खेदिताः पुत्रदाराणां स्मरन्तः सर्वे वानराः दुःखशय्याभिः शयितमिति शेषः त्वां पृष्ठतः पृष्ठे करिष्यन्ति त्वां संत्यज्य सुग्रीवसमीपं गमिष्यन्तीत्यर्थः ॥ १७ ॥

१८] ति० टी०–स्पन्दमानात्तृणादपि लघुरिति शेषः । अत एव भृशोद्विग्नो भविष्यसि । यद्वा तादृशतृणात्तद्दृष्ट्वा भृशोद्विग्नः रामागमनशङ्केति भावः ॥ १८ ॥

रा० टी०–स इति । हितकामैः सुहृद्भिर्बन्धुभिश्च हीनः अत एव भृशोद्विग्नस्त्वं स्पन्दमानात् उड्डीयमानात् तृणादपि लघुर्भविष्यसि ॥ १८ ॥

१९] ति० टी०–अतोऽत्युग्रवेगा निशिता घोरा लक्ष्मणसायका अपावृत्तं व्युत्थितं त्वां जिघांसन्तो भवेयुः । सर्वत्रात्र लक्ष्मणनामग्रहणं तस्य क्रूरस्वभावत्वात्, ईदृशानां रामालक्ष्यत्वाच्च ॥ १९ ॥

रा० टी०–न चेति। अपवृत्तं रामकार्याद्विमुखं त्वां जिघांसन्तः लक्ष्मणसायकाः जातु कादाचित् न हिंस्युः न अवश्यं हिंस्युरित्यर्थः एतेन इह त्वया नैव स्थातव्यमिति सूचितम्॥१९॥

गो० टी०–न चेति। लक्ष्मणसायकाः अपवृत्तं वृत्तहीनम् स्वकार्याकरमित्यर्थः, त्वां न हिंस्युरिति न हिंस्युरेवेत्यर्थः॥१९॥

२०] ति टी०–एवं वास्तवं भयं प्रदर्श्य सुग्रीवसमाश्रयणमेव हितमित्याह—अस्माभिरिति । आनुपूर्व्याज्ज्येष्ठपुत्रत्वप्रयुक्तानुक्रमात् ॥ २० ॥

रा० टी०–ननु तत्र गमने सुग्रीवो हनिष्यत्यत आह—अस्माभिरिति । अस्माभिः सार्धं गतं विनीतवत् विनीतियुक्तमुपस्थितं त्वामानुपूर्व्यात् कालक्रमेण सुग्रीवो राज्ये स्थापयिष्यति ॥ २० ॥

गो०टी०–अस्माभिरिति। आनुपूर्व्यात् क्रमप्राप्तेः२०-२२

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

२१] ति० टी०–राज्येऽवस्थाने हेतुमाह—धर्मेति । धर्मराजो धर्ममार्गवर्ती राजा तथा प्रीतिकाम एव त्वयि, न तु त्वद्वधकामः ॥ २१ ॥

रा० टी०–धर्मराज इति । धर्मराजः सद्धर्मैः शोभमानः प्रीतिकामः दृढव्रतः अप्रच्युतसंकल्पः अत एव सत्यप्रतिज्ञः स सुग्रीवस्त्वा त्वां न नाशयेत् ॥ २१ ॥

२२] ति० टी०–इतश्च सर्वथैवमेवेत्याह—प्रियकाम

---

१ स्थाने इति गो. पाठः । २ न च जातु न हिंस्युस्त्वामिति गो. रा. पाठः । ३ अपवृत्तमिति गो. रा. पाठः । ४ काम इति गो. पाठः । ५ नेति गो. पाठः । ६ जिघांसतीति गो. पाठः । ७ त्विति रा. पाठः ।

पञ्चपञ्चाशः सर्गः ।

हनुमद्वर्णितसुग्रीवसौगुण्यमसहमानोऽङ्गदः सुग्रीवदोषानुद्घाट्यस्तद्गर्हणपूर्वं स्वप्रायोपवेशनिश्चय वानरान्प्रतिश्रावयन्प्रायमुपाविशत् । तथाभूतेऽङ्गदे सबाष्पमोक्षं सुग्रीवं विनिन्दन्तः कपिवीरा अपि रामवनप्रवेशादिस्वप्रायोपवेशान्तसकलवृत्तान्तोद्घोषणेन गिरिदरीः पूरयन्तः प्रायमुपाविशन् ।

श्रुत्वा हनुमतो वाक्यं प्रश्रितं धर्मसंहितम् । स्वामिसत्कारसंयुक्तमङ्गदो वाक्यमब्रवीत् ॥ १ ॥
स्थैर्यमात्ममनःशौचमानृशंस्यमथार्जवम् । विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते ॥ २ ॥
भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम्[1] । धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः[2] ॥ ३ ॥
कथं स धर्मं जानीते येन भ्रात्रा दुरात्मना[3] । युद्धायाभिनियुक्तेन बिलस्य पिहितं मुखम् ॥ ४ ॥
सत्यात्पाणिगृहीतश्च कृतकर्मा महायशाः । विस्मृतो राघवो येन स कस्य सुकृतं[5] स्मरेत् ॥ ५ ॥
लक्ष्मणस्य भयेनेह[4] नाधर्मभयभीरुणा । आदिष्टा मार्गितुं सीता धर्मस्तस्मिन्कथं भवेत् ॥ ६ ॥

इति । अस्य जीवितम् तदर्थं त्वन्मातुः प्रीतिसंपादनप्रयोजनम् गम्यताम् अस्माभिः सार्धमिति शेषः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

रा० टी०–प्रियेति । ते मातुः प्रियकामः सुग्रीवोऽस्तीति शेषः । अत एव तदर्थं त्वन्मातृप्रीतिसिद्धयर्थम् अस्य सुग्रीवस्य जीवितं जीवनम् । तत्र हेतुः—तस्य सुग्रीवस्य अन्यदपत्यं नास्ति तस्मात्गम्यताम् ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

१] ति० टी०–प्रश्रितं विनीतम् । स्वामिसत्कारसंयुक्तं सुग्रीवसन्मानयुक्तमिति हनुमद्वाक्यविशेषणम् ॥ १ ॥

रा० टी०–श्रुत्वेति । स्वामिसत्कारसंयुक्तं हनुमतो वाक्यं श्रुत्वा अङ्गदोऽब्रवीत् ॥ १ ॥

गो० टी०–अथ हरीणां प्रायोपवेशः पञ्चपञ्चाशे–श्रुत्वेत्यादि ॥ १ ॥

२] ति० टी०–आत्ममनसोः शौचं कामादिदोषराहित्यम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह—स्थैर्यमिति । सुग्रीवे स्थैर्यप्रभृतिः नोपपद्यते घटते ॥ २ ॥

गो० टी०–स्थैर्यमिति । स्थैर्यं स्थिरबुद्धिता । आत्ममनः शौचम् आत्मशुद्धिः मनसः शौचम् अन्तःकरणशुद्धिश्चेत्यर्थः । धैर्यं गाम्भीर्यम् ॥ २ ॥

३] ति० टी०–तदनुपपत्तिमेव दर्शयति–भ्रातुरिति । ज्येष्ठस्य भ्रातुर्भार्यां धर्मेण मातरं धर्मार्गेण वर्तमानां ज्येष्ठभ्रातृपत्नीं तां मातृतुल्यां जीवतो मम समक्षम् अनेन 'देवराच्च सुतोत्पत्तिम्' इत्यतोऽपि धर्मत्वं वारितम् । यद्वा जीवतो महिषीमिति महिषयुद्धकालिकस्वीकारपरम् । यः स्वीकरोति कथं स धर्मं जानीत इत्यन्वयः । एतेन हनूमदुक्तं धर्मराजत्वं प्रत्याख्यातम् । एतद्वचोऽङ्गदस्य केवलरोषमूलं त्रैवर्णिकातिरिक्तधर्मास्मरणमूलकम् ॥ ३ ॥

रा० टी०–तत्र हेतुं वदन्नाह–भ्रातुरिति । धर्मेण धर्मबुद्ध्या मातरं ज्येष्ठस्य भ्रातुर्भार्यां जुगुप्सितं यथा भवति तथा यः स्वीकरोति । युद्धाय युद्धं कर्तुं गच्छतेति शेषः भ्रात्रा अभिनियुक्तेन बिलमुखरक्षणाय नियोजितेन येन च बिलस्य मुखं पिहितं स सुग्रीवः धर्मं कथं जानीते । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–मनःशौचाभावमुपपादयति–भ्रातुरिति । स कथं धर्मं जानीत इति वक्ष्यमाणमाकृष्यते । जीवत इत्यनेन भ्रातुर्मरणानन्तरं तद्भार्यापरिग्रहः कुलधर्म इत्यवगम्यते ॥ ३ ॥

४] ति० टी०–स उक्तजुगुप्सितकर्मकारी । धर्माज्ञाने उपपत्त्यन्तरमप्याह–युद्धाय युद्धार्थं गच्छता भ्रात्राऽभिनियुक्तेन । विलरक्षणनियुक्तेनेत्यर्थः ॥ ४ ॥

गो० टी०–आनृशंस्याभावमुपपादयति–युद्धायेति । युद्धायाभिनियुक्तेन । द्वारान्निर्गतस्य शत्रोः युद्धाय वालिना नियुक्तेनेत्यर्थः ॥ ४ ॥

५] ति० टी०–सत्यादग्निसाक्षिकतया पाणिगृहीतो मित्रं कृतो राघवोऽपि येन विस्मृतः, स कस्य सुकृतमुपकारं स्मरेत् न कस्यापीत्यतः कथं कृतज्ञ इत्यर्थः ॥ ५ ॥

रा० टी०–सत्यादिति । सत्यात्सत्यमवलम्ब्य पाणिगृहीतः पाणिग्रहेण स्वीकृतः कृतकर्मा कृतोपकृतिः राघवः येन विस्मृतः सः सुग्रीवः कस्य सुकृतं स्मरेत् न कस्यापीत्यर्थः ॥ ५ ॥

गो० टी०–आर्जवाभावमुपपादयति–सत्यादिति । पाणिगृहीतः पाणौ गृहीतः ॥ ५ ॥

६] ति० टी०–नन्वेतत्कार्यं प्रकृतत्वात्कथं न कृतज्ञोऽत आह—लक्ष्मणस्येति । भयौपाधिक्येषा प्रवृत्तिर्न धर्म-

---

१ जुगुप्सितमिति रा. पाठः । २ महात्मनेति गो. पाठः । ३ त्विति गो. पाठः । ४ भयाधेनेति गो. पाठः । ५ सीतां धर्ममस्मिन्निति गो. पाठः ।

तस्मिन्पापे कृतघ्ने तु स्मृतिभिन्ने[1] चलात्मनि । आर्यः को विश्वसेज्जातु तत्कुलीनो[2] विशेषतः ॥ ७ ॥
राज्ये पुत्रं[3] प्रतिष्ठाप्य सगुणो[4] विगुणोऽपि वा । कथं शत्रुकुलीनं मां सुग्रीवो जीवयिष्यति ॥ ८ ॥
भिन्नमन्त्रोऽपराद्धश्च भिन्नशक्तिः[5] कथं ह्यहम् । किष्किन्धां प्राप्य जीवेयमनाथ इव दुर्बलः ॥ ९ ॥
उपांशुदण्डेन हि मां बन्धनेनोपपादयेत् । शठः क्रूरो नृशंसश्च सुग्रीवो राज्यकारणात् ॥ १० ॥
बन्धनाच्चावसादान्मे[6] श्रेयः प्रायोपवेशनम् । अनुजानन्तु मां सर्वे गृहं गच्छन्तु वानराः ॥ ११ ॥
अहं वः प्रतिजानामि[7] न गमिष्याम्यहं पुरीम्[8] । इहैव प्रायमासिष्ये श्रेयो मरणमेव मे ॥ १२ ॥
अभिवादनपूर्वं तु राजा कुशलमेव च । अभिवादनपूर्वं तु राघवौ बलशालिनौ ॥ १३ ॥
वाच्यस्तातो यवीयान्मे सुग्रीवो वानरेश्वरः । आरोग्यपूर्वं कुशलं वाच्या माता रुमा च मे ॥ १४ ॥
मातरं चैव मे तारामाश्वासयितुमर्हथ । प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी ॥ १५ ॥

मूलेति भावः । 'धर्ममस्मिन्' इति पाठे धर्मं धर्मधीमूलं प्रवर्तनमित्यर्थः ॥ ६ ॥

रा० टी०—ननु विस्मृतिश्चेत् कथं वयं प्रेषिताः इत्यत आह—लक्ष्मणस्येति । नाधर्मभयभीरुणा अधर्मभयभीतभिन्नेन येन सुग्रीवेण लक्ष्मणस्य भयेन हेतुना सीतां मार्गितुं स्वयमादिष्टास्तस्मिन् सुग्रीवे धर्मः कथं भवेत् ॥ ६ ॥

गो० टी०—कथं तर्हि सेनामानीतवान् सुग्रीव इत्याशङ्क्याह—लक्ष्मणस्येति । नाधर्मभयभीरुणा भयशब्दोऽत्र भयहेतुपरः अधर्मरूपभयहेतोर्भीरुणा न च किंतु लक्ष्मणस्य भयात् लक्ष्मणदण्डनिमित्तभयादित्यर्थः ॥ ६ ॥ ७ ॥

७] ति० टी०—स्मृतिभिन्ने स्मृतिमन्वादीनां भिन्ना त्यक्ता येन । चलात्मनि चञ्चलान्तःकरणे । तत्कुलीनो तज्ज्ञातिकोटिप्रविष्टः ॥ ७ ॥

रा० टी०—तस्मिन्निति । स्मृतिभिन्ने धर्मशास्त्रोक्तधर्मरहिते किंच उपकृतिविषयकस्मरणरहिते अत एव पापादिविशिष्टे तस्मिन् सुग्रीवे आर्यः बुद्धिमत्त्वादिना श्रेष्ठस्तत्कुलीनः तत्कुलजातः को विशेषतो विश्वसेत् न कोऽपीत्यर्थः ॥ ७ ॥

८] ति० टी०—तदेव विवृणोति—राज्ये इति । सुग्रीवः सगुणो निर्गुणो वाऽस्तु, न मे तद्विचारेण किंचिद्, अपि तु शत्रुकुलीनं मां पुत्रं राज्ये प्रतिष्ठाप्य कथं सुग्रीवो जीवयिष्यति न कथमपीत्यर्थः ॥ ८ ॥

रा० टी०—राज्य इति । सगुणो धर्मवान् विगुणः अधर्मवान् तद्विचारेण न किंचित्फलमित्यर्थः, सुग्रीवः पुत्रं जनिष्यमाणस्वतनयं राज्ये प्रतिष्ठाप्य प्रतिष्ठापयितुं विचार्य शत्रुकुलीनं मां कथं जीवयिष्यति ॥ ८ ॥

गो० टी०—तव यौवराज्यस्थापनं किं विस्मृतोऽसीत्यत्राह—राज्य इति । पुत्रः जनिष्यमाणः स्वपुत्रः ॥ ८ ॥

९] ति० टी०—इतोऽपि न जीवयिष्यतीत्याह—भिन्नेति । भिन्नो बिलप्रवेशरूपो मन्त्रो यस्य सः । एवं मन्त्रस्य यस्य कस्यापि श्रुत्वाच्छ्रवणेऽवश्यंभाविनि स्पष्टमपराद्धश्च भवामि । हीनशक्तिः सुग्रीवापेक्षया हीनबलः हनुमदुत्करीत्या सहायबलहीनश्च ९

रा० टी०—भिन्नेति । भिन्ना विनष्टा शक्तिः अन्वेषणसामर्थ्यं यस्य सः अत एव भिन्नः दूरीकृतो मन्त्रः तदुपदिष्टकालो येन अत एव अपराद्धोऽहं किष्किन्धां प्राप्य अनाथ इव कथं जीवेयम् ॥ ९ ॥

गो० टी०—भिन्नेति । भिन्नमन्त्रः प्रकाशितविगृह्यावस्थानमन्त्रः । अपराद्धः कृतापराधः, यद्वा पितृहिंसनेन संजातापराधः ॥ ९ ॥

१०] ति० टी०—उपांशुदण्डस्यैव रूपम्—बन्धनेनेति । पुत्र इति कृत्वा वधाभावः । अपराद्ध इति च बन्धननिश्चयः ॥ १० ॥

रा० टी०—उपांश्विति । सुग्रीवः राजकारणात् उपांशुदण्डेन अल्पवधोपायेन बन्धनेन सर्वकालं निरोधेन उपपादयेत् योजयेत् ॥ १० ॥

गो० टी०—उपांश्विति । उपांशुदण्डेन रहस्यदण्डरूपेण । उपपादयेत् प्रापयेत् ॥ १० ॥

११–१२] ति० टी०—तदेव हृदयेनाह—बन्धनादिति । अवसादो बन्धनजं दुःखम् ॥ ११ ॥ १२ ॥

रा० टी०—बन्धनादिति । बन्धनात् बन्धनजनितात् अवसादात् खेदात् प्रायोपवेशनमेव श्रेयः अतः सर्वे वानराः मामनुजानन्तु प्रायोपवेशनाय आज्ञापयन्तु गृहं गच्छन्तु च११

रा० टी०—मत्कर्तृककिष्किन्धागमनाय न यतितव्यमिति बोधयन्नाह—अहमिति । इह अस्मिन् समये मरणमेव श्रेयः अतः प्रायं प्रायोपवेशनमासिष्ये प्राप्स्यामि अतः किष्किन्धामहं न गमिष्यामि इति वः युष्माकमग्रेऽहं प्रतिजानामि प्रतिज्ञां करोमि ॥ १२ ॥

गो० टी०—बन्धनाद्धावसादान्म इति । वेति प्रसिद्धौ । बन्धनरूपावसादात् ॥ ११ ॥ १२ ॥

१३] ति० टी०—राजा सुग्रीवः कुशलमेव वाच्य इत्यनुकर्षः । न त्विदानीं दुःखवशादुक्तमित्यर्थः । राघवौ कुशलं वाच्यौ ॥ १३ ॥

१४–१५] ति० टी०—अथ मातुः कुशलविज्ञापनाशेष-

१ हीने इति गो. पाठः । २ जिजीविषुरिति गो. पाठः । ३ पुत्रः प्रतिष्ठाप्यः इति गो. पाठः । ४ निर्गुण इति गो. पाठः । ५ हीनेति गो. पाठः । ६ वेति गो. पाठः । ७ जानीतेति गो. पाठः । ८ नागमिष्यामीति गो. पाठः । ९ एतदार्धर्चद्वयं व्यत्यस्तं गो. पाठे ।

विनष्टमिह मां श्रुत्वा व्यक्तं हास्यति जीवितम् । एतावदुक्त्वा वचनं वृद्धांस्तानभिवाद्य च ॥ १६ ॥
विवेश चाङ्गदो भूमौ रुदन्दर्भेषु दुर्मुखः । तस्य संविशतस्तत्र रुदन्तो वानरर्षभाः ॥ १७ ॥
नयनेभ्यः प्रमुमुचुरुष्णं वै वारि दुःखिताः । सुग्रीवं चैव निन्दन्तः प्रशंसन्तश्च वालिनम् ॥ १८ ॥
परिवार्याङ्गदं सर्वे व्यवसन्प्रायमासितुम् । तद्वाक्यं वालिपुत्रस्य विज्ञाय प्लवगर्षभाः ॥ १९ ॥
उपस्पृश्योदकं सर्वे प्राङ्मुखाः समुपाविशन् । दक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः ॥ २० ॥
मुमूर्षवो हरिश्रेष्ठा एतत्क्षममिति स्म ह । रामस्य वनवासं च क्षयं दशरथस्य च ॥ २१ ॥
जनस्थानवधं चैव वधं चैव जटायुषः । हरणं चैव वैदेह्या वालिनश्च वधं तथा ॥
रामकोपं च वदतां हरीणां भयमागतम् ॥ २२ ॥
स संविशद्भिर्बहुभिर्महीधरो महाद्रिकूटप्रतिमैः प्लवङ्गमैः ।
बभूव संनादितनिर्झरान्तरो भृशं नदद्भिर्जलदैरिवाम्बरम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

तया, आरोग्यपूर्वकत्वविशेषाभिप्रेतस्या च पुनः सुग्रीवे कुशलविज्ञापनमाह–वाच्यस्तात इति ॥ १४ ॥ १५ ॥

रा० टी०–अभीति । बलशालिनौ राघवौ अभिवादनपूर्वकं प्रणाम पूर्वकं कुशलं वाच्यौ वानरेश्वरो वानरश्रेष्ठः यवीयान् कनिष्ठो वृद्धो राजा सुग्रीवश्च अभिवादनपूर्वं कुशलं वाच्यः । मे मातरं ताराम् आश्वासयितुमर्हथ । सार्धश्लोकद्वयमेकान्वयि॥१३॥१४॥

गो० टी०–अभिवादनेति । राघवौ कुशलं वाच्यावित्यनुषङ्गः ॥ १३ ॥ १४ ॥

रा० टी०–आश्वासने हेतुमाह–प्रकृत्येति । प्रकृत्या स्वभावेन प्रियपुत्रा सानुक्रोशा दयावती तपस्विनी सा तारा विनष्टं मां श्रुत्वा जीवितं जीवनं हास्यति त्यक्ष्यति । एतेनाश्वासनस्य प्राणरक्षाहेतुत्वं सूचितम् । अर्धद्वयमेकान्वयि ॥ १५ ॥

गो० टी०–प्रकृत्येति । तपस्विनी शोचनीया॥१५॥१६॥

१६–१७] ति० टी०–वृद्धाञ्जाम्बवदादीन् ॥ १६ ॥१७ ॥

रा० टी०–एतावदिति । दुर्मुखः उदासीनवदनोऽङ्गदः रुदन् वृद्धान् तान् एतावदुक्त्वा अभिवाद्य च भूमौ दर्भेषु विवेश॥१६॥

रा०टी०–तस्येति । संविशतस्तस्याङ्गदस्य समीपे दुःखिताः अत एव रुदन्तो वानरर्षभाः नयनेभ्यः उष्णं वारि प्रमुमुचुः॥१७॥

गो० टी०–तस्य संविशतस्तस्मिन् संविशति संवेशः शयनम् ॥ १७ ॥ १८ ॥

१८] ति० टी०–सुग्रीवं निन्दन्तः अङ्गदपक्ष्या इति शेषः १८

रा० टी०–सुग्रीवमिति । सुग्रीवं निन्दन्तः यस्य एक एव पुत्रः सोऽपि मुमूर्षुरिति तस्यातीव दुर्भगत्वमिति वदन्तः वालिनं प्रशंसन्तः वाली अतीव भाग्यवान् युद्धे रामसंमुखे मृतः इति वदन्तः सर्वे वानराः अङ्गदं परिवार्य प्रायमासितुं व्यवसन् व्यवस्यन् ॥ १८ ॥

१९–२०] ति०टी०–व्यवसन् व्यवास्यन्नित्यर्थः॥१९॥२०॥

रा० टी०–तदिति । प्लवगर्षभाः वालिपुत्रस्य तत् प्रायोपवेशनविषयकप्रतिज्ञाबोधकं वाक्यं विज्ञाय संस्मृत्य उदकमुपस्पृश्य समुपाविशन् ॥ १९ ॥

रा० टी०–दक्षिणेति । उदक्तीरं समुद्रस्य उत्तरतटं समाश्रिताः दक्षिणाग्रेषु दर्भेषु संस्थिताः इति शेषः, मुमूर्षवो हरिश्रेष्ठाः एतत् प्रायोपवेशनं क्षमं युक्तमित्यूचुरिति शेषः॥२०॥

गो० टी०–मतं तदिति । तत्र विन्ध्ये उदक्तीरं समुद्रस्योत्तरतीरम् एतत् प्रायोपवेशनम् क्षममिति मत्वेति शेषः॥१९॥२०

२१] ति टी०–हरिश्रेष्ठा अपि एतत्प्रायोपवेशनमेवास्माकमथ क्षमं युक्तमिति मन्यन्ते स्मेति शेषः । स्वामिनि म्रियमाणे तं परित्यज्यास्माकं गमनमयुक्तमिति तत्क्षमत्वव्यवसायः । रामस्य वनवासमित्यादिनाऽग्रिमसर्गार्थसंक्षेपः ॥ २१ ॥

२२] ति० टी०–भयमागतम् संपातिजं वक्ष्यमाणं भयमित्यर्थः ॥ २२ ॥

रा० टी०–रामस्येति । रामस्य वनवासादीन् वदतां हरीणां वानराणां भयं वक्ष्यमाणभीतिरागतं प्राप्तम् । अर्धचतुष्टयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०–रामस्येत्यादि । जनस्थानवधं जनस्थानस्थरक्षोवधम् आगतं भयं प्रायोपवेशनरूपभयनिमित्तं च वदतां वदत्सु च स महीधरो भृशं सन्नादितनिर्दरान्तरो बभूवेत्युत्तरेणान्वयः ॥ २१ ॥ २२ ॥

अस्मिन्सर्गे सार्धत्रयोविंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

२३] ति० टी०–भृशं नदद्भिः संपातिजभयादिति शेषः २३

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१ दुर्मना इति गो.पाठः। २ मतं तदिति गो. पाठः। ३ तत्रेति गो.पाठः। ४ रणे इति गो. पाठः। ५ निर्दरेति गो. पाठः। ६ उल्बणैरिति गो.पाठः।

षट्पञ्चाशः सर्गः ।

कपिकलकल श्रुत्वा विन्ध्यकन्दरनिर्गतः सपातिः कपिकुलं विलोक्य चिरतराहारपरिकल्पनहर्षाद्विधिं प्रशंसन्क्रमेण सर्वभक्षण प्रतिजज्ञे । तदाकर्ण्य खिन्नोऽङ्गदो रामकार्यसिद्धेः प्राक्प्राप्तप्राणसशयेभ्योऽस्मतो रामोपकाराय रावणहस्तात्प्राणमृत्युर्जटायुः प्रशस्यतर इत्युत्कीर्तयन्नेतद्विपन्मूलभूतां कैकेयी निनिन्द । आकर्ण्यैतन्निर्विण्णः सपातिरङ्गद प्रति स्वस्य जटायुरग्रजत्व विनिवेद्य तन्मरणवृत्तं पृच्छन्स्वस्य निर्दग्धपक्षत्वमुक्त्वाऽऽत्मान पर्वतादवतारयितुं प्रार्थयते ।

उपविष्टास्तु ते सर्वे यस्मिन्प्रायं गिरिस्थले । हरयो गृध्रराजश्च तं देशमुपचक्रमे ॥ १ ॥
संपातिर्नाम नाम्ना तु चिरंजीवी विहङ्गमः । भ्राता जटायुषः श्रीमान्विख्यातबलपौरुषः ॥ २ ॥
कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः । उपविष्टान्हरीन्दृष्ट्वा हृष्टात्मा गिरमब्रवीत् ॥ ३ ॥
विधिः किल नरं लोके विधानेनानुवर्तते । यथाऽयं विहितो भक्ष्यश्चिरान्मह्यमुपागतः ॥ ४ ॥
परम्पराणां भक्षिष्ये वानराणां मृतं मृतम् । उवाचैतद्वचः पक्षी तान्निरीक्ष्य प्लवङ्गमान् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः । अङ्गदः परमायस्तो हनूमन्तमथाब्रवीत् ॥ ६ ॥
पश्य सीतापदेशेन साक्षाद्वैवस्वतो यमः । इमं देशमनुप्राप्तो वानराणां विपत्तये ॥ ७ ॥
रामस्य न कृतं कार्यं नं कृतं राजशासनम् । हरीणामियमज्ञाता विपत्तिः सहसाऽऽगता ॥ ८ ॥

रा० टी०–स इति । संविशद्भिः महाद्रिकूटप्रतिमैः महाशैलभङ्गसदृक्षैः प्लवङ्गमैः सः वानरसमीपवर्ती महीधरः नदद्भिर्जलदैरम्बरमाकाशमिव सन्नादितं निर्झरान्तरं निर्झरमध्यं यस्य सः बभूव ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१–३] ति० टी०–गिरिस्थले गिरिप्रदेशे ॥ १–३ ॥

रा० टी०–भयमागतमित्युक्तम्, तत्स्वरूपं वर्णयितुमाह–उपेति । यस्मिन् गिरिस्थले सर्वे हरयः प्रायमुपविष्टाः तं देशं गृध्रराजः संपातिः उपचक्रमे जगाम ॥ १ ॥

गो० टी०–अथ संपातिसंवादः षट्पञ्चाशे–उपविष्टा इत्यादि । उपचक्रमे प्राप्तुमुपक्रान्तः ॥ १ ॥

रा० टी०–संपातिरिति । जटायुषः भ्राता नाम्ना संपातिः संपातिनामेत्यर्थः, विन्ध्यस्य कन्दरात् अभिनिष्क्रम्य हरीन्दृष्ट्वा हृष्टात्मा सन् गिरमब्रवीत् नाम प्रसिद्धमेतत् । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–संपातिरित्यादि । श्लोकद्वयमेकान्वयम् ॥ २ ॥ ३ ॥

४] ति० टी०–विधिः क्रियाफलम् । नरं प्राणिनं विधानेन प्राचीनकर्मानुसारेण । यथा तथथा तथोच्यत इत्यर्थः । अयमभिवरूपोऽस्माकं भक्ष्यश्चिरान्मह्यं स्वत एवोपागतः ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–विधिरिति । विधानेन पूर्वार्जितकर्मानुसारेण विधिः क्रियाफलं यथा नरमनुवर्तते प्राप्नोति तथा विहितः पूर्वार्जितकर्मणा निष्पादितः अयं भक्ष्यः मह्यमुपागतः अतः परम्पराणां क्रमेणाभिविष्टानां वानराणां मृतं मृतं वानरमहं भक्षिष्ये एतद्वचः प्लवङ्गमान् निरीक्ष्य पक्षी संपातिरब्रवीत् । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–विधिरिति । विधिः दैवम् विधानेन योगक्षेमसंपादनेन । यथा यस्मात्कारणात् ॥ ४ ॥

५] ति० टी०–यतः परम्पराणां पङ्क्तित उपविष्टानां वानराणां मध्ये मृतं मृतं क्रमाद्भक्षिष्ये तस्मादिति पूर्वेण संबन्धः ॥ ५ ॥

गो० टी०–परमिति । पराणां वानराणां मध्ये मृतं मृतं परं वानरं भक्षिष्य इत्येवं वच उवाचेत्यन्वयः ॥ ५ ॥

६] ति० टी०–परमायस्तः परमखिन्नः ॥ ६ ॥

रा० टी०–तस्येति । भक्ष्यलुब्धस्य लब्धं भक्ष्यं येन तस्य संपातेर्वचनं श्रुत्वा परमायस्तोऽतिखिन्नोऽङ्गदः हनुमन्तमब्रवीत् ॥ ६ ॥

गो० टी०–तस्येति । परमायस्तः परमोद्विग्न इत्यर्थः । अज्ञाता अचिन्तिता । स्नेहकारुण्यनिर्भराः स्नेहकारुण्याभ्यां बद्धाः । अन्योन्यम् अन्योन्यं प्रत्येकम् प्रत्येकम् परमां गतिं मुक्तिमित्यर्थः । रामलक्ष्मणयोरित्यादि । रामवनवासमारभ्य प्रायोपवेशपर्यन्तं यदस्ति तत्सर्वमिदं विकृतं कैकेय्या वरदानेन कृतं हीति संबन्धः इत्यङ्गदोऽब्रवीदिति संबन्धः ॥ ६–१६ ॥

७] ति० टी०–सीतापदेशेनेति । सीताव्याजेन प्राप्तप्रायोपवेशानामित्यर्थः । ' गृध्रापदेशेन ' इति पाठः छद्मगमः ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह–पश्येति । वैवस्वतो विवस्वत्पुत्रोपमः गृध्रापदेशेन गृध्रव्याजेन वानराणां विपत्तये इमं देशं साक्षादनुप्राप्तः ॥ ७ ॥

८] ति० टी०–अज्ञाताऽचिन्तिता ॥ ८ ॥

१ चिरंजीवीति गो. रा. पाठः । २ प्रख्यातेति गो. पाठः । ३ इदमिति गो. पाठः । ४ हनुमन्तमिति गो. पाठः । ५ गृध्रेति गो. पाठः । ६ राज्ञो न च वचः कृतमिति गो. पाठः ।

वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा । गृध्रराजेन यत्तत्र श्रुतं वस्तदशेषतः ॥ ९ ॥
तथा सर्वाणि भूतानि तिर्यग्योनिगतान्यपि । प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान्यथा वयम्॥ १० ॥
अन्योन्यमुपकुर्वन्ति स्नेहकारुण्ययन्त्रिताः । तेतस्तस्योपकारार्थं त्यजतात्मानमात्मना ॥ ११ ॥
प्रियं कृतं हि रामस्य धर्मज्ञेन जटायुषा । राघवार्थे परिश्रान्ता वयं संत्यक्तजीविताः ॥ १२ ॥
कान्ताराणि प्रपन्नाः स्म न च पश्याम मैथिलीम् । स सुखी गृध्रराजस्तु रावणेन हतो रणे
मुक्तश्च सुग्रीवभयाद्गतश्च परमां गतिम् ॥ १३ ॥
जटायुषो विनाशेन राज्ञो दशरथस्य च । हरणेन च वैदेह्याः संशयं हरयो गताः ॥ १४ ॥
रामलक्ष्मणयोर्वासमरण्ये सह सीतया । राघवस्य च बाणेन वालिनश्च तथा वधम् ॥ १५ ॥
रामकोपादशेषाणां रक्षसां च तथा वधम् । कैकेय्या वरदानेन इदं च विकृतं कृतम् ॥ १६ ॥
तदसुखमनुकीर्तितं वचो भुवि पतितांश्च निरीक्ष्य वानरान् ।
भृशचकितमतिर्महामतिः कृपणमुदाहृतवान्स गृध्रराजः ॥ १७ ॥

रा० टी०–रामस्येति । यैः रामस्य कार्यं न कृतं राजशासनं मासाभ्यन्तरे समागन्तव्यमिति सुग्रीवकृतनियोगश्च न कृतं तेषां हरीणामज्ञाता पूर्वमलक्षितेयं विपत्तिः आगता ॥ ८ ॥

९] ति० टी०–तिर्यग्योनिभूतानामस्माकमिव तिर्यग्योन्यन्तरस्यापि सीतानिमित्तं विपत्तिर्जातेत्याह—वैदेह्या इति। प्रत्यक्षं ह्रियमाणाया इति शेषः ॥ ९ ॥

रा० टी०–एतत्कर्तृकास्मद्भक्षणेऽस्माभिर्न शोचनीयमित्याह—वैदेह्या इति द्वाभ्याम् । वैदेह्याः प्रियकामेन जटायुषा यत् कर्म कृतं तत् वो युष्माकमशेषतः श्रुतम् ॥ ९ ॥

१०] ति० टी०–रामस्य प्रियं कुर्वन्तीत्यनेन तस्मिन्सर्वप्रेमास्पदत्वं सूचयता सर्वात्मत्वं सूचितम् ॥ १० ॥

रा० टी०–तथेति । तिर्यग्योनिगतानि जटायुप्रभृतीनि प्राणांस्त्यक्त्वाऽपि यथा रामस्य प्रियं कुर्वन्ति तथा वयं करिष्याम इति शेषः ॥ १० ॥

११] ति० टी०–सार्वात्म्यमेव द्रढयति–अन्योन्यमिति । स्नेहकारुण्ययन्त्रिताः रामे इति शेष. । सर्वस्य रामस्वात्तदीयस्नेहेनैव परस्परोपकारकरणमित्यर्थः । स्नेहविषयता रामातिरिक्तेनेत्यनेन सूचितम् । तत उक्तस्नेहादियन्त्रणतः । तस्य रामस्योपकारार्थमित्यस्य प्रवृत्ता इति शेषः ॥ ११ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अन्योन्यमिति । स्नेहकारुण्ययोर्वशं प्राप्ताः शिष्टा अन्योन्यमुपकुर्वन्ति ततो हेतोस्तस्य रामस्योपकारार्थमात्मना स्वस्वप्रयत्नेन आत्मानं देहं त्यजत ॥ ११ ॥

१२] ति० टी०–नन्वं प्राणत्यागेन कथं रामस्य संतोष अत आह—प्रियमिति । हि यतो जटायुषा प्राणांस्त्यजता प्रियं कृतमिति रामस्य मतमिति शेषः । तथास्मन्मरणेनापि रामस्तथा मंस्यतीति भावः ॥ १२ ॥

रा० टी०–नन्वं मरणमात्रेण कथं रामप्रीतिर्भवितेत्यत आह–प्रियमिति । धर्मज्ञेन जटायुषा रामस्य प्रियं प्रीतिः कृतं संपादितं मरणेनैवेति शेषः । एवं राघवस्यार्थे कान्ताराणि दुर्गमपथान् प्रपन्नाः प्राप्ता ये वयं मैथिलीं न पश्याम ते वयं परिश्रान्ताः अत एव त्यक्तजीविताः सन्तः रामप्रीतिं निष्पादयिष्याम इति शेषः । सार्धश्लोकः एकान्वयी ॥ १२ ॥

१३] ति० टी०–सुखीति । सुखित्वमेव परमगतिप्राप्त्या दर्शयति–रावणेनेत्यादि । मुक्तश्चेति । अनेन सर्वतिर्यग्योनिराजत्वं कपीन्द्रस्य सूचितम् । गतश्च परमां गतिम् रामानुग्रहादिति शेषः ॥ १३ ॥

रा० टी०–स इति । रणे रावणेन हतः अत एव परमां गतिमुत्तमस्थानं गतो गृध्रराजो जटायुः सुग्रीवभयान्मुक्तः अत एव सुखी आस्ते इति शेषः । सुग्रीवभयान्मुक्त इत्यनेन गृध्रादीनामपि सुग्रीव एव राजेति सूचितम् ॥ १३ ॥

१४–१५] ति० टी०–जटायुषो विनाशेन प्रागिति शेषः । यदि पुनर्मुहूर्तमपि युद्धे रावणं निरुन्ध्यात्तदा रामदृग्गोचरो रावणः सीतां न हरेदिति भावः । राज्ञो दशरथस्य च द्राग्विनाशेन । यदि पक्षमात्रमपि राजजीवनं स्यात्तदा रामं प्रत्यानयेदेवेति भावः । वैदेहीहरणं तु स्पष्टमेव वानराणां प्राणसंशयकारणम् ॥ १४ ॥ १५ ॥

१६] ति० टी०–विकृतमरण्यवासवालिवधरक्षोवधरूपम् । इदं चास्मन्मरणरूपं च कैकेय्या वरदानेनैव कृतमित्यर्थः॥१६॥

रा० टी०–जटायुष इति । जटायुषो दशरथस्य च विनाशेन वैदेह्या हरणेन च हरयो वयं संशयं रामस्य शीघ्रं सुखयोगोऽस्ति न वेति संदेहं गताः प्राप्ताः ॥ १४ ॥

रा० टी०–रामेति । रामलक्ष्मणयोररण्ये वासादि विकृतमस्मत्प्रायोपवेशादि च कैकेय्या वरदानेनैव कृतमवेहीति शेषः । अर्धचतुष्टयमेकान्वयि ॥ १५ ॥ १६ ॥

१७] ति० टी०–भृशचकितमतिः क्षुभितचित्तः । कृपणं दीनम् ॥ १७ ॥

१ तेनेति गो. पाठः । २ वास इति गो. पाठः । ३ वध इति गो. पाठः । ४ सभीक्ष्येति गो. पाठः । ५ चलितेति गो. पाठः । ६ राडिति गो. पाठः । ७ आत्मनेपदमत्र युक्तं भाति ।

तत्तु श्रुत्वा तथा वाक्यमङ्गदस्य मुखोद्गतम् । अब्रवीद्वचनं गृध्रस्तीक्ष्णतुण्डो महास्वनः ॥ १८ ॥
कोऽयं गिरा घोषयति प्राणैः प्रियतरस्य मे । जटायुषो वधं भ्रातुः कम्पयन्निव मे मनः ॥ १९ ॥
कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः । नामधेयमिदं भ्रातुश्चिरस्याद्य मया श्रुतम् ॥ २० ॥
इच्छेयं गिरिदुर्गाच्च भवद्भिरवतारितुम् । यवीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः ॥ २१ ॥
अतिदीर्घस्य कालस्य परितुष्टोऽस्मि कीर्तनात् । तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः ॥ २२ ॥
भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः । तस्यैव च मम भ्रातुः सखा दशरथः कथम् ॥ २३ ॥
यस्य रामः प्रियः पुत्रो ज्येष्ठो गुरुजनप्रियः । सूर्यांशुदग्धपक्षत्वान्न शक्नोमि [2]विसर्पितुम् ॥
इच्छेयं पर्वतादस्मादवतर्तुमरिन्दमाः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०–तदिति । अङ्गदकीर्तितं वानरैः कथितम् अङ्गदं दुःखरूपं तद्वचो निरीक्ष्य श्रुत्वा भुवि पतितान् वानराश्च निरीक्ष्य भृशचकितमतिर्गृध्रराजः संपातिः कृपणं वचः उदाहृतवान् ॥ १७ ॥

गो० टी०–तदसुखमिति । समीक्ष्य ज्ञात्वेत्यर्थः । ज्ञानं च वचनश्रवणं वानराणां दर्शनं च । अस्य श्लोकस्यानन्तरं सर्गसमाप्तिर्भवितुमर्हति ॥ १७ ॥

१८] ति० टी०–अस्यैव प्रपञ्चः—तस्विति ॥ १८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–तदिति । तथा तेन प्रकारेण अङ्गदस्य मुखोद्गतं तद्वाक्यं श्रुत्वा गृध्रोऽब्रवीत् ॥१८॥

गो० टी०–तस्विति । तीक्ष्णतुण्डः तीक्ष्णमुखः । 'वक्त्रास्ये वदनं तुण्डम्' इत्यमरः ॥ १८–२४ ॥

१९] ति० टी०–को घोषयति । स मया प्रष्टव्य इति शेषः ॥ १९ ॥

रा० टी०–तद्वचनाकारमाह–कोऽयमिति । मे मनः कम्पयन्निव मे भ्रातुर्जटायुषो वधं गिरा वाच्यरूपया कोऽयं घोषयति वदति ॥ १९ ॥

२०] ति० टी०–प्रश्नमेवाह—कथमिति ॥ २० ॥

रा० टी०–कथमिति । राक्षसगृध्रयोर्युद्धं कथमासीत् । अर्धं पृथक् ॥ २० ॥

रा० टी०–नामेति । भ्रातुरिदं जटायुरिति नामधेयं चिरस्य बहुकालतः श्रुतम् अतो भवद्भिः गिरिदुर्गादवतारितुमात्मानमिति शेषः, इच्छेयम् एतेन स्वस्य स्वत उत्तरणासामर्थ्यं व्यञ्जितम् ॥ २१ ॥

२१] ति० टी०–गिरिदुर्गाद्भवद्भिरवतारितुमिच्छेयम् आत्मानमिति शेषः । अवतारणफलमाह—यवीयस इति । कनिष्ठस्येत्यर्थः ॥ २१ ॥

२२–२३] ति० टी०–श्रोतुमिच्छेयम् युष्मत्समीपमागत्येति शेषः । अन्वयस्तु—यस्य रामः प्रियः पुत्र. स दशरथो मम भ्रातुस्तस्यैव जटायुषः सखा, अतस्तत्स्नेहात्प्रयतमानस्य तस्य जनस्थानवासिनस्तस्य प्रसिद्धविक्रमस्य जटायुषो विनाशः कथमभवदिति तस्य विनाशं श्रोतुमिच्छेयमिति । कथं सखेत्यन्वयस्तु नोचितः, तदुत्तरस्यायेऽभावात् ॥ २२ ॥ २३ ॥

रा० टी०–यवीयस इति । अतिदीर्घस्य कालस्यापगमे सतीति शेषः, यवीयसः कनिष्ठभ्रातुः कीर्तनात् अहं परितुष्टोऽस्मि । अर्धं पृथक् । तदिति । जनस्थाननिवासिनो भ्रातुः विनाशं विनाशप्रकारं श्रोतुमिच्छामि । अर्धद्वयमेकान्वयि ॥ २२ ॥

रा० टी०–तस्येति । यस्य राम. पुत्रः स मम भ्रातुः सखा दशरथः कथं लोकान्तरं गत इति शेषः ॥ २३ ॥

२४] ति०टी०–स्वस्यावतारणसापेक्षत्वे हेतुमाह–सूर्येति । अवतर्तुमवतारयितुम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०–नन्वं त्वमेव कुतो नोत्तरसीत्यत आह—सूर्येति । सूर्यांशुना दग्धः पक्षो यस्य तत्त्वात् हेतोः विसर्पितुं चलितुं न शक्नोमि अतः पर्वतादवतर्तुमवतारितुमिच्छेयं भवद्भिरिति शेषः ॥ २४ ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

गो० टी०–अत्र 'कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः । सखा दशरथः कथम्' इत्येवमनुवादात् पूर्वमिदमप्यङ्गदेनोक्तमिति ध्येयम् ॥ २५ ॥

अस्मिन्सर्गे पञ्चविंशतिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

---

१ तमस्येति गो. पाठः । २ उपेति गो. पाठः ।

सप्तपञ्चाशः सर्गः ।

सपातिं पर्वतादवतार्यन्नङ्गदस्तं प्रति रामवनप्रवेशादि स्वप्रायोपवेशान्तमुदन्तं निवेदयति ।

शोकाद्भ्रष्टस्वरमपि श्रुत्वा वानरयूथपाः । श्रद्दधुर्नैव तद्वाक्यं कर्मणा तस्य शङ्किताः ॥ १ ॥
ते प्रायमुपविष्टास्तु दृष्ट्वा गृध्रं प्लवङ्गमाः । चक्रुर्बुद्धिं तदा रौद्रां सर्वान्नो भक्षयिष्यति ॥ २ ॥
सर्वथा प्रायमासीनान्यदि नो भक्षयिष्यति । कृतकृत्या भविष्यामः क्षिप्रं सिद्धिमितो गताः ॥ ३ ॥
एतां बुद्धिं ततश्चक्रुः सर्वे ते हरियूथपाः । अवतार्य गिरेः शृङ्गाद्गृध्रमाहाङ्गदस्तदा ॥ ४ ॥
बभूवर्क्षरजो नाम वानरेन्द्रः प्रतापवान् । ममार्यः पार्थिवः पक्षिन्धार्मिकौ तस्य चात्मजौ ॥ ५ ॥
सुग्रीवश्चैव वाली च पुत्रौ धनबलावुभौ । लोके विश्रुतकर्माऽभूद्राजा वाली पिता मम ॥ ६ ॥
राजा कृत्स्नस्य जगत इक्ष्वाकूणां महारथः । रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ ७ ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या सह भार्यया । पितुर्निदेशनिरतो धर्म पन्थानमाश्रितः ॥ ८ ॥
तस्य भार्या जनस्थानाद्रावणेन हृता बलात् । रामस्य तु पितुर्मित्रं जटायुर्नाम गृध्रराट् ॥ ९ ॥

१] ति० टी०–भ्रष्टस्वरमपि भक्षणवचनस्वरापेक्षया भ्रष्टस्वरमित्यर्थः । तेन स्वरेण यद्यपि स निश्चितशोकः परितुष्टोऽस्मीति श्रद्धेयवचनो भवति तथापि न श्रद्दधुः, यतस्तस्य कर्मणा शङ्किताः । भक्षणार्थं वञ्चनमेव करोतीति बुद्धयेति भावः ॥ १ ॥

रा० टी०–संपातिवचनश्रवणानन्तरकालिकमङ्गदादिदृष्टान्तमाह—शोकादित्यादिभिः । शोकात् भ्रातृवधश्रवणजनितपश्चात्तापात् भ्रष्टस्वरमपि संपातिवचनं श्रुत्वा तस्य संपातेः कर्मणा भक्षणोद्देश्यकवचनक्रियया शङ्किताः वानरयूथपास्तद्वाक्यं नैव श्रद्दधुः ॥ १ ॥

गो० टी०–अथ संपातिप्रश्नोत्तरं सप्तपञ्चाशे–शोकादित्यादि । कर्मणा हिंसाकर्मणा ॥ १ ॥

२] ति० टी०–तदेवाह—चक्रुरित्यादि । अस्यार्थस्येतीति शेषः ॥ २ ॥

रा० टी०–ते इति । प्रायमुपविष्टास्ते प्लवङ्गमाः गृध्रं दृष्ट्वा सर्वान् नोऽस्मान् भक्षयिष्यति अयं गृध्र इति शेषः, इति रौद्रां बुद्धिं चक्रुः ॥ २ ॥

गो० टी०–त इति । रौद्राम् आत्मत्यागाध्यवसायरूपत्वेन क्रूराम् ॥ २–४ ॥

३] ति० टी०–सिद्धिं मरणरूपाम् ॥ ३ ॥

रा० टी०–सर्वथेति । प्रायमासीनान् नोऽस्मान् यदि भक्षयिष्यति तर्हि इतः अस्माद्भक्षणात् सिद्धिं रामकार्यसाधनहेतुकमरणजनितसंसिद्धिं गताः वयं सर्वथा सर्वप्रकारेण कृतकृत्याः भविष्यामः एतां बुद्धिं सर्वे हरियूथपाः चक्रुः । सार्धश्लोक एकान्वयी ॥ ३ ॥

४] ति० टी०–एतां बुद्धिं भक्षणाभीष्टत्वबुद्धिम् ॥ ४ ॥

रा० टी०–अवतार्येति । तदा निश्चयकाले गिरिश्रृङ्गादवतार्य अङ्गदो गृध्रमाह । अर्धं पृथक् ॥ ४ ॥

५] ति० टी०–क्रोडं घोषयतीति प्रथमप्रश्नोत्तरमाह—बभूवेति । आर्यः पितामहः । पार्थिवः वानराणामिति शेषः ॥ ५ ॥

६–९] ति० टी०–धनबलौ बहुबलौ । 'ओघबलौ' इति पाठान्तरम् ॥ ६—९ ॥

रा० टी०–तद्वचनाकारमाह—बभूवेत्यादिभिः । ऋक्षरजो नाम वानरेन्द्रः मम आर्यः पितामहो बभूव । तस्यात्मजौ पुत्रौ धनबलौ महापराक्रमौ सुग्रीवो वाली चोभौ बभूवतुरिति शेषः । विश्रुतकर्मा वाली मम पिता अभूत् । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–बभूवेत्यादि । आर्यः पितामहः । आत्मजौ औरसौ । ओघबलौ ओघसंख्याकपुरुषबलौ । ओघसंरूपा च पूर्वोक्ता ॥ ५–८ ॥

रा० टी०–आत्मानं बोधयित्वा स्वागमनकारणीभूतं रामं बोधयन्नाह–राजेति । कृत्स्नस्य निखिलस्य जगतो ब्रह्माण्डस्य राजा इक्ष्वाकूणां कुले जात इति शेषः, दाशरथिः दशरथपुत्रः पितुर्निदेशनिरतो रामः लक्ष्मणेन वैदेह्या च सह दण्डकावने प्रविष्टः । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

रा० टी०–तस्येति । तस्य रामस्य भार्या रावणेन जनस्थानात् हृता । अर्धं पृथक्–रामस्येति । रामस्य पितुर्दशरथस्य मित्रं जटायुर्नाम गृध्रराट् ह्रियमाणां सीतां ददर्श । अर्धद्वयमेकान्वयि ॥ ९ ॥

गो० टी०–रामस्य त्विति । रामस्य तु पितुर्मित्रमिति कथनात् मैत्रीप्रकारं तु न जानामीत्युक्तं भवति ॥ ९–१३ ॥

१ ते हरियूथपा इति गो. पाठः । २ वानरर्षभा इति गो. पाठः । ३ धार्मिक इति गो. पाठः । ४ ओघेति गो. पाठः । ५ चापीति गो. पाठः । ६ धर्म्यमिति गो. रा. पाठः ।

ददर्श सीतां वैदेहीं ह्रियमाणां विहायसा । रावणं विरथं कृत्वा स्थापयित्वा च मैथिलीम् ॥
परिश्रान्तश्च वृद्धश्च रावणेन हतो रणे ॥ १० ॥
एवं गृध्रो हतस्तेन रावणेन बलीयसा । संस्कृतश्चापि रामेण जगाम गतिमुत्तमाम् ॥ ११ ॥
ततो मम पितृव्येण सुग्रीवेण महात्मना । चकार राघवः सख्यं सोऽवधीत्पितरं मम ॥ १२ ॥
मम पित्रा [1]निरुद्धो हि सुग्रीवः सचिवैः सह । निहत्य वालिनं रामस्ततस्तमभिषेचयत् ॥ १३ ॥
स राज्ये स्थापितस्तेन सुग्रीवो वानरेश्वरः । राजा वानरमुख्यानां तेन प्रस्थापिता वयम् ॥ १४ ॥
एवं रामप्रयुक्तास्तु मार्गमाणास्ततस्ततः । वैदेहीं नाधिगच्छामो रात्रौ सूर्यप्रभामिव ॥ १५ ॥
ते वयं दण्डकारण्यं विचित्य सुसमाहिताः । अज्ञानात्तु प्रविष्टाः स्म धरण्या विवृतं बिलम् ॥ १६ ॥
मयस्य मायाविहितं तद्बिलं च विचिन्वताम् । व्यतीतस्तत्र नो मासो यो राज्ञा समयः कृतः ॥ १७ ॥
ते वयं कपिराजस्य सर्वे वचनकारिणः । कृतां संस्थामतिक्रान्ता भयात्प्रायमुपासिताः ॥ १८ ॥
क्रुद्धे तस्मिंस्तु काकुत्स्थे सुग्रीवे च सलक्ष्मणे । गतानामपि सर्वेषां तत्र नो नास्ति जीवितम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ।

कदाचनाह जटायुश्च परस्परबलं जिज्ञासमानौ खमुत्पत्यासूर्यमण्डलं संप्राप्तावथ सौरातपसङ्घट्टक्षतिं जटायुष रिरक्षिषुरह स्वपक्षातपत्र रचयन् स्वय दग्धपत्रो विन्ध्यगिरावपतमिति स्ववृत्तं संपातिरङ्गदाय निवेदयति । सीताहरणविषये जानासि किंचिदित्यङ्गदेन पृष्टः सपाती रावणेन ह्रियमाणा काचिद्युवती मया दृष्टा या रामेत्याक्रोशन्त्यासीत्ततोऽहं तर्कये भवेत्सा वैदेहीति प्रतिवदति । स्वदूरदर्शित्व प्रतिपादयन्संपातिर्लङ्कायाः शतयोजनवर्तित्व तत्र च रावणस्य जानक्याश्च वसतिं कथयति । जटायुषे जल दातु दर्शितेच्छ संपातिं कीशाः समुद्रं प्रापयन्निर्वर्तिततनिवाप च प्रत्यानयन् ।

इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः । सबाष्पो वानरान्गृध्रः प्रत्युवाच महास्वनः ॥ १ ॥

१०-१२] ति० टी०-'रावणेन विहायसि' इति पाठे ह्रियमाणामिति शेषः। स्थापयित्वा भूमाविति शेषः ॥१०-१२॥

रा०टी०-रावणमिति । रावणं विरथं कृत्वा मैथिलीं च स्थापयित्वा परिश्रान्तः वृद्धो जटायुः रावणेन हतः ॥ १० ॥

रा० टी०-एवमिति । रावणेन हतः पश्चात् रामेण संस्कृतः कृतप्रेतक्रियः गृध्रः उत्तमां गतिं जगाम ॥ ११ ॥

रा० टी०-तत इति । ततोऽनन्तरं राघवः मम पितृव्येण सुग्रीवेण सख्यं चकार सः कृतसख्यो रामो मम पितरमवधीत् ॥ १२ ॥

१३-१८] ति० टी०-स्वपितृवधे कारणमाह—ममेति । निरुद्धो निरुद्धराज्यः॥ १३-१८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०-ममेति । रामो वालिनं निहत्य मम पित्रा निरुद्धो यः सुग्रीवस्तमभिषेचयत् अभ्यषेचयत् ॥ १३ ॥

गो०टी०-निहत्येति। अभिषेचयत् अभ्यषेचयत्१४-१७

रा० टी०-स इति । तेन रामेण राज्ये स्थापितोऽत एव वानरमुख्यानां राजा यः सुग्रीवस्तेन वयं प्रस्थापिताः ॥१४॥

रा० टी०-एवमिति । एवमनेन प्रकारेण रामप्रयुक्ताः रामेण नियोजिताः अत एव मार्गमाणाः वयं रात्रौ सूर्यप्रभामिव वैदेहीं नाधिगच्छामः ॥ १५ ॥

रा० टी०-ते इति । ते अन्वेषणे नियुक्ताः वयं दण्डकारण्यं विचित्य विवृतमपि हितं धरण्याः बिलमज्ञानाद्धेतोः प्रविष्टाः १६

रा० टी०-मयस्येति । मयस्य मायाविहितं मायया रचितं बिलं विचिन्वतामस्माकं यः समयो राज्ञा कृतः स मासः तत्र बिले व्यतीतः ॥ १७ ॥

रा० टी०-ते इति । कपिराजस्य वचनकारिणो वयं सर्वे कृतां कपिराजेन संकेतितां संस्थां मर्यादाम् अतिक्रान्ताः अत एव प्रायमुपासिताः ॥ १८ ॥

रा० टी०-उपायान्तराभावे हेतुमाह-क्रुद्ध इति । सलक्ष्मणे सुग्रीवे काकुत्स्थे रामे च क्रुद्धे सति तत्र गतानां नोऽस्माकं जीवितं नास्ति ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

गो० टी०-ते वयमिति । संस्थां व्यवस्थाम् ॥१८॥१९

इति श्रीगोविन्दराजविचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१] ति० टी०-त्यक्तजीवितैस्त्यक्तजीवनाशभयैः । सबाष्पोऽश्रुपूर्णनयनः । 'सबाष्पान्' इति पाठान्तरम् ॥ १ ॥

१ गतश्चेति गो. पाठः । २ विरुद्ध इति गो. पाठः । ३ धर्मिण्या इति गो. पाठः । ४ उपास्महे इति गो. पाठः

यवीयान्स मम भ्राता जटायुर्नाम वानराः । यमाख्यात हतं युद्धे रावणेन बलीयसा ॥ २ ॥
वृद्धभावादपक्षत्वाच्छृण्वंस्तदपि मर्षये । न हि मे शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे ॥ ३ ॥
पुरा वृत्रवधे वृत्ते सै चाहं च जयैषिणौ । आदित्यमुपयातौ स्वो ज्वलन्तं रश्मिमालिनम्॥ ४ ॥
आवृत्याकाशमार्गेण जवेन स्वर्गतौ भृशम् । मध्यं प्राप्ते तु सूर्ये तु जटायुरवसीदति ॥ ५ ॥
तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम् । पक्षाभ्यां छादयामास स्नेहात्परमविह्वलम् ॥ ६ ॥
निर्दग्धपक्षः पतितो विन्ध्येऽहं वानरर्षभाः । अहमस्मिन्वसन्भ्रातुः प्रवृत्तिं नोपलक्षये ॥ ७ ॥
जटायुषस्त्वेवमुक्तो भ्रात्रा संपातिना तदा । युवराजो महाप्रज्ञः प्रत्युवाचाङ्गदस्तदा ॥ ८ ॥
जटायुषो यदि भ्राता श्रुतं ते गदितं मया । आख्याहि यदि जानासि निलयं तस्य रक्षसः ॥ ९ ॥
अदीर्घदर्शिनं तं वै रावणं राक्षसाधमम् । अन्तिके यदि वा दूरे यदि जानासि शंस नः ॥ १० ॥
ततोऽब्रवीन्महातेजा भ्राता ज्येष्ठो जटायुषः । आत्मानुरूपं वचनं वानरान्संप्रहर्षयन् ॥ ११ ॥

रा० टी०–अङ्गदवचनश्रवणानन्तरकालिकं संपातिवचनं वर्णयन्नाह–इतीति । वानरैः इति करुणं वाक्यमुक्तः अत एव सबाष्पः अश्रुसहितः गृध्रः प्रत्युवाच ॥ १ ॥

गो० टी०–अथ संपातिना सीतास्थानकथनमष्टपद्याशे–इत्युक्त इत्यादि ॥ १ ॥

२] ति० टी०–आख्यातारुयातवन्तः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–यवीयानित्यादिभिः । हे वानराः ! यं रावणेन हतं यूयमाख्यात स जटायुः यवीयान् कनिष्ठो मम भ्राता ॥ २ ॥

गो० टी०–यवीयानिति । आख्यात भूते लोट् ॥२॥३॥

३] ति० टी०–तदपि भ्रातृवधमपि ॥ ३ ॥

रा० टी०–वृद्धेति । वृद्धभावात् वृद्धत्वप्राप्तेः हेतोः भ्रातुर्वैरविमोक्षणे रावणवधे इत्यर्थः, मे मम शक्तिर्नास्ति अत एव तत् अप्रियं श्रृण्वन्नप्यहं मर्षये सहे ॥ ३ ॥

४-५] ति० टी०–अथ शक्तिर्नास्तीत्यनेन पूर्वं महती शक्तिरासीदिति सूचितम् । तदेवाह—पुरेति । पुरा पूर्वं वृत्रवधे वृत्ते सति स जटायुरहं च जयैषिणौ वृत्रवधेनेन्द्रस्यातिप्रबलत्वं निर्णीय तज्जयैषिणौ भूत्वा प्रथममाकाशमार्गेण स्वर्गं गतौ । ततो गरुडवद्वेगं जवेन तं विजित्यावृत्य प्रत्यावृत्याऽऽदित्यं दर्पादुपयातौ स्वः । अथ तमुपयातयोरावयोर्मध्ये जटायुः सवितरि मध्यं प्राप्तेऽवसीदति स्मेति कतकः । अन्ये तु–जयैषिणौ परस्परौ येनोत्पत्यादित्यः प्रथमं प्राप्यते स आवयोः प्रबल इति प्रतिज्ञापूर्वमिति शेष इत्याहुः । तेषामावृत्येति पदस्येन्द्रप्रसङ्गस्य चासंगतिः ॥ ४ ॥ ५ ॥

रा० टी०–पक्षाभावे हेतुमाह–पुरेत्यादिभिः । पुरा पूर्वं वृत्रवधे इन्द्रकर्तृकवृत्रासुरविघाते वृत्ते जाते सति जयैषिणौ स जटायुः अहं च जवेन वेगेन स्वः स्वर्गं गतौ इन्द्रजिगीषया प्राप्तौ । आवृत्य तं जित्वा परावृत्य रश्मिमालिनं किरणरूपमालाविशिष्टं स्वर्ज्वलन्तं प्रकाशयन्तमादित्यमुपयातौ समीपं प्राप्तौ । तत्र जटायुः सूर्ये मध्यं प्राप्ते सति अवसीदति सति खेदं प्राप्नोत् । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–पुरेति । परस्परवेगातिशयख्यापनपरावित्यर्थः । आदित्यमुपयातौ सूर्यसमीपं गतौ स्वः ॥ ४ ॥

गो० टी०–आवृत्येति । आवृत्या मण्डलमत्या । स्मशब्दस्य अवसीदतीत्यनेन संबन्धः ॥ ५ ॥

६] ति० टी०–छादयामास । अपरोक्षेऽपि लिङुत्तम आर्षः ॥ ६ ॥

रा० टी०–तमिति । सूर्यरश्मिभिः अर्दितं पीडितं परमविह्वलं भ्रातरं जटायुषं दृष्ट्वा अहं पक्षाभ्यां छादयामास अतिशोकेन विक्षिप्तचित्तत्वात्परोक्षक्रियानिर्देशः ॥ ६ ॥

गो० टी०–तमिति । छादयामास आच्छादयम् ॥६–९॥

७] ति० टी०–निर्दग्धपक्षः सूर्यकिरणैरिति शेषः । भ्रातुर्जटायुषः प्रवृत्तिमित्यन्वयः ॥ ७ ॥

रा० टी०–निर्दग्धेति । निर्दग्धः पक्षो यस्य सोऽहमस्मिन्विन्ध्ये पतितः अत एव वसन् सन् भ्रातुः प्रवृत्तिं वृत्तान्तं नोपलक्षये ॥ ७ ॥

८] ति० टी०–जटायुषो भ्रात्रेत्यन्वयः ॥ ८ ॥

रा० टी०–जटायुष इति । जटायुषो भ्रात्रा संपातिना एवमुक्तोऽङ्गदः प्रत्युवाच ॥ ८ ॥

९] ति० टी०–यदि जटायुषो रामभक्तस्य भ्राता, यदि च मत्कथितं रामवृत्तान्तरूपं वस्तु ते त्वया श्रुतम्, यदि च तस्य रक्षसो निलयं जानासि तर्ह्याख्याहीति प्रार्थने लोट् ॥ ९ ॥

रा० टी०–तद्वचनाकारमाह–जटायुष इति । ते गदितं कथितं मया श्रुतमतः जटायुषो भ्राता यदि त्वमसि यदि च रक्षसो रावणस्य निलयं जानासि तर्हि आख्याहि कथय ॥९॥

१०–११] ति० टी०–अदीर्घदर्शिनं भाव्यनर्थविचारास-

१ परस्परेति गो. पाठः । २ स्वरिति रा. पाठः । ३ मार्गे त्विति गो. पाठः । ४ स्मेति गो. पाठः । ५ दिनकर इति गो. पाठः । ६ विह्वल इति गो. पाठः । ७ पक्ष इति गो. पाठः । ८ प्राङ् इति गो. रा. पठः । ९ अधिपामिति गो. पाठः ।

निर्दग्धपक्षो गृध्रोऽहं गतेर्वीर्यः प्लवङ्गमाः । वाङ्मात्रेणापि रामस्य करिष्ये साह्यमुत्तमम् ॥ १२ ॥
जानामि वारुणांल्लोकान्विष्णोस्त्रैविक्रमानपि । [3]देवासुरविमर्दांश्च ह्यमृतस्य विमन्थनम् ॥ १३ ॥
रामस्य यदिदं कार्यं कर्तव्यं प्रथमं मया । जरया च हृतं तेजः प्राणाश्च शिथिला मम ॥ १४ ॥
तरुणी रूपसंपन्ना सर्वाभरणभूषिता । ह्रियमाणा मया दृष्टा रावणेन दुरात्मना ॥ १५ ॥
क्रोशन्ती राम रामेति लक्ष्मणेति च भामिनी । भूषणान्यपविध्यन्ती गात्राणि च विधुन्वती ॥ १६ ॥
सूर्यप्रभेव शैलाग्रे तस्याः कौशेयमुत्तमम् । असिते राक्षसे भाति यथा [7]विद्युदिवाम्बरे ॥ १७ ॥
तां तु सीतामहं मन्ये रामस्य परिकीर्तनात् । शृणुतां मे कथयतो निलयं तस्य रक्षसः ॥ १८ ॥
पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च । अध्यास्ते नगरीं लङ्कां रावणो नाम राक्षसः ॥ १९ ॥
इतो [6]द्वीपे समुद्रस्य संपूर्णे शतयोजने । तस्मिंल्लङ्का पुरी रम्या निर्मिता विश्वकर्मणा ॥ २० ॥
जाम्बूनदमयैर्द्वारैश्चित्रैः काञ्चनवेदिकैः । [8]प्रासादैर्हेमवर्णैश्च महद्भिः सुसमाकृता ॥ २१ ॥
प्राकारेणार्कवर्णेन महता च समन्विता । तस्यां वसति वैदेही दीना कौशेयवासिनी ॥ २२ ॥

मर्थं रावणमन्तिके दूरे वा तिष्ठन्तं यदि जानासि तदा नः शंस ॥ १० ॥ ११ ॥

रा० टी०–अदीर्घेति । अदीर्घदर्शिनम् आगाम्यनर्थावि-चारिणं रावणमन्तिके विद्यमानं यदि वा दूरे विद्यमानं यदि जानासि तर्हि शंस ॥ १० ॥

रा० टी०–तत इति । ततः अङ्गदकृतप्रश्नानन्तरं जटा-युषो ज्येष्ठो भ्राता आत्मानुरूपं वचनमब्रवीत् ॥ ११ ॥

गो० टी०–अदीर्घदर्शनामिति । अदीर्घदर्शनम् आगाम्य-नर्थानवेक्षकम् ॥ १०–१२ ॥

१२] ति० टी०–रामस्य साह्यम् रामकार्यप्रवृत्तानां युष्माकं सहायत्वमित्यर्थः ॥ १२ ॥

रा० टी०–तदाकारमाह–निर्दग्धेति । हे प्लवङ्गमाः ! नि-र्दग्धपक्षोऽहं वाङ्मात्रेण रामस्य साह्यं साहाय्यं करिष्ये ॥१२॥

१३] ति०टी०–वारुणाँल्लोकान् जलप्रधानांल्लोकान् । त्रैवि-क्रमांस्त्रिविक्रमावतारे आक्रान्तान्भूरादिलोकान् । देवासुरविम-र्दांस्तद्युद्धानि । हिश्चार्थे । अमृतस्य मन्थनं च अनेन च ब्रह्मा-हरादिक्षणमारभ्यैतत्क्षणपर्यन्तं सर्ववृत्तान्तज्ञत्वं स्वस्य निवेदि-तम् ॥ १३ ॥

१४–१७] ति० टी०–रामस्येदं कार्यं प्रथममवश्यं मया कर्तव्यम्, परंतु जरादिमत्त्वादशक्यमिति भावः ॥ १४—१७ ॥

रा० टी०–जानामीति । वारुणादीन् लोकान् देवासुर-विमर्दान् देवासुरकर्तृकयुद्धस्थानानि अमृतस्य मन्थनं च जानामि अतः यस्य मम जरया तेजो हृतं प्राणाश्च शिथि-लास्तेनापि मया रामस्य तत् इदं सीताबोधनरूपं कार्यं तत् प्रथमं कर्तव्यम् । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–जानामीति । वारुणान् लोकान् अतलवित-लादिलोकान् । त्रैविक्रमान् त्रिविक्रममितानुपरितनलोकानित्यर्थः महासुरविमर्दान् देवासुरसंग्रामान् ॥ १३ ॥ १४ ॥

रा० टी०–तद्बोधनमेवाह–तरुणीति । रूपसंपन्ना रामे-त्यादि क्रोशन्ती भूषणानि अपविध्यन्ती गात्राणि विधुन्वती रावणेन ह्रियमाणा तरुणी मया दृष्टा । श्लोकद्वयमे-कान्वयि ॥ १५ ॥ १६ ॥

रा० टी०–सूर्येति । तस्याः ह्रियमाणायाः उत्तमं कौ-शेयं पट्टवस्त्रविशेषः शैलाग्रे नीलशैलशिखरे सूर्यप्रभेव अम्बरे आकाशे विद्युदिव असिते नीले राक्षसे यथा यथावद्भाति अभात् ॥ १७ ॥

गो०टी०–तरुणीत्यादि । अपविध्यन्ती छेदयन्ती १५-१८

१८–१९] ति० टी०–तां तु रावणह्रियमाणत्वेन दृष्टाम् । सीतात्वेन ज्ञाने हेतुः—रामस्य परिकीर्तनम् ॥ १८ ॥ १९ ॥

रा० टी०–तामिति । रामस्य परिकीर्तनाद्धेतोस्तां ह्रिय-माणामहं सीतां मन्ये अतः तस्य रक्षसो निलयं कथयतो मे शृण्वताम् ॥ १८ ॥

रा० टी०–पुत्र इति । विश्रवसः साक्षात् औरसः पुत्रः वैश्रवणस्य भ्राता रावणो नाम राक्षसः लङ्कामध्यास्ते ॥ १९ ॥

गो० टी०–पुत्र इति । अध्यास्ते " अधिशीङ्स्थासां कर्म " इति नगर्याः कर्मत्वम् ॥ १९–२४ ॥

२०–२२] ति० टी०–सा च लङ्केशः शतयोजने शतयो-जनात्परतः स्थिते समुद्रस्य द्वीपे तिष्ठतीति शेषः । तस्मिन्द्वीपे सा लङ्कापुरी विश्वकर्मणा निर्मिता ॥२०–२२॥

रा० टी०–नन्वेतावता लङ्का कास्तीत्यत आह–इत इति । इतः अस्मात्स्थानात् शतयोजने पूर्णे सति तस्मिन्प्रसिद्धे समुद्रस्य द्वी-पे काञ्चनवेदिकैः सुवर्णमयवेदिकाविशिष्टैर्जाम्बूनदमयैर्द्वारैश्च हेम-वर्णैः प्रासादैश्च सुसमाकृता अर्कवर्णेन प्राकारेण समन्विता च

१ द्वीनेति गो. पाठः । २ त्विति गो. पाठः । ३ महासुरविमर्दान्विाऽप्यमृतस्य चेति गो. पाठः । ४ धून्वतीति गो. पाठः । ५ वा तडिदम्बुदे इति गो. पाठः । ६ द्वीपः इति गो. पाठः । ७ धर्ममेतत् गो. नास्ति । ८ सुसमाकृतेति गो. पाठः ।

रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता । जनकस्यात्मजां राज्ञस्तेस्यां द्रक्ष्यथ मैथिलीम् ॥ २३ ॥
[लङ्कायामथ गुप्तायां सागरेण समन्ततः । संप्राप्य सागरस्यान्तं संपूर्णं शतयोजनम् ॥
आसाद्य दक्षिणं तीरं ततो द्रक्ष्यथ रावणम् । तत्रैव त्वरिताः क्षिप्रं विक्रमध्वं प्लवङ्गमाः ॥]
ज्ञानेन खलु पश्यामि दृष्ट्वा प्रत्यागमिष्यथ । आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः॥२४॥
द्वितीयो बलिभोजानां ये च वृक्षफलाशनाः । भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह ॥ २५ ॥
श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् । बलवीर्योपपन्नानां रूपयौवनशालिनाम् ॥ २६ ॥
षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा । वैनतेयाच्च नो जन्म सर्वेषां वानरर्षभाः ॥ २७ ॥
गर्हितं तु कृतं कर्म येन स्म पिशिताशिनः । प्रतिकार्यं च मे तस्य वैरं भ्रातृकृतं भवेत् ॥ २८ ॥

विश्वकर्मणा निर्मिता या लङ्कापुरी तस्यां रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता वैदेही वसति । सार्धश्लोकत्रयमेकान्वयि ॥ २०-२२ ॥

२३] ति० टी०—तस्या मैथिली द्रक्ष्यथ ॥ २३ ॥

रा० टी०—जनकस्येति । सागरेण समन्ततो गुप्तायां तस्यां लङ्कायां जनकस्यात्मजां द्रक्ष्यथ । अर्धद्वयमेकान्वयि॥२३॥

२४] ति० टी०—एतदग्रे 'लङ्कायामभिगुप्तायां सागरेण समन्ततः । संप्राप्य सागरस्यान्ते संपूर्णे शतयोजने । आसाद्य दक्षिणं कूलं ततो द्रक्ष्यथ रावणम् । तत्र वै त्वरिताः क्षिप्रं विक्रमध्वं प्लवंगमाः ' । इत्यादिश्लोकद्वयं प्रक्षिप्तमिति कतकः । देवयोनित्वेन दिव्यज्ञानेन यूयं तां दृष्ट्वा प्रत्यागमिष्यथेत्यपि पश्यामि । अतो निःसंशयं गच्छतेति शेषः । अथ स्वस्य देवयोनित्वप्रदर्शनशेषतया पक्षिमार्गानाह—आद्य इति । पन्था आकाशमार्गः । अन्ये धान्यजीविनः पारावतादयः ॥ २४ ॥

रा० टी०—संप्राप्येति । शतयोजने संपूर्णे सति सागरस्यान्तं संप्राप्य दक्षिणं कूलमासाद्य गत्वा ततस्तत्र रावणं द्रक्ष्यथ ॥ २४ ॥

रा० टी०—तत्रेति । हे प्लवङ्गमाः ! त्वरिताः सन्तः क्षिप्रं विक्रमध्वम् । तत्र तस्यां लङ्कायां दृष्ट्वा सीतामिति शेषः, क्षिप्रं प्रत्यागमिष्यथ इति ज्ञानेन ज्ञानदृष्ट्या पश्यामि जानामि ॥२५॥

रा० टी०—अतिदूरवस्तुज्ञानोपपत्तये स्वजन्मनः प्राशस्त्यं बोधयन्नाह—आद्य इति । आद्यः प्रथमः पन्थाः आकाशमार्गः कुलिङ्गानां ये अन्ये धान्यजीविनः पारावतादयः तेषां च द्वितीयः तत ऊर्ध्वभागस्थः बलिभोज्यानां काकादीनां ये च वृक्षफलाशनाः शुकादयस्तेषां च द्वितीयो मार्गः ॥ २६ ॥

गो० टी०—तत्रैवेति । विक्रमध्वम् " वेः पादविहरणे " इत्यात्मनेपदम् । ज्ञानेन दिव्यज्ञानेन ॥ २५ ॥

गो० टी०—दूरस्थदर्शनं भवतः कुतो जातं तत्राह—आद्य इत्यादिना । कुलिङ्गानां भूमिप्रत्यासन्नगगनचारिणाम् । धान्यजीविनः पक्षिविशेषाः कुलिङ्गाः । ये चान्ये धान्यजीविन इति वचनात् । बलिभोजानां काकानाम् ॥ २६ ॥

२५] ति० टी०—बलिभोजाः काकाः, वृक्षफलाशनाः शुकादयः, भासाः पक्षिविशेषाः ॥ २५ ॥

रा० टी०—भासा इति । तृतीय तत ऊर्ध्वस्थमार्गं भासाः तदभिधपक्षिणः कुररैः सह क्रौञ्चाश्च गच्छन्ति चतुर्थं श्येनाः गच्छन्ति पञ्चमं गृध्रा गच्छन्ति ॥ २७ ॥

गो० टी०—भासा इति । भासाः जलवायसाः ' भासस्तु जलवायसः ' इति निघण्टुः । श्येनविशेषा इत्यप्याहुः ॥ २७ ॥

२६] ति० टी०—बलवीर्येत्यादि हंसविशेषणम् ॥ २६ ॥

रा० टी०—बलेति । षष्ठः पन्थास्तु बलवीर्योपपन्नानां हंसानाम् । वैनतेयगतिः विनतासुतमार्गस्तु परा ततोऽप्युत्तरदेशवर्तिनी ॥ २८ ॥

गो० टी०—बलेत्यादि । वैनतेयात् गरुडात् नः अस्माकं जन्म उत्पत्तिः तेन तस्य या सप्तमी गतिः सैवास्माकमपीत्यर्थः । नन्वारण्यकाण्डे—द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च । तस्माज्जातोऽहमरुणात्संपातिस्तु ममाग्रजः॥ इति वचनेन जटायुपोक्तेनेदं विरुद्धमिति चेत् न, वैनतेयादित्यस्य विनतापुत्रादरुणादित्यर्थ इत्यदोषात् वैनतेयगतिरित्यत्र वैनतेययोररुणगरुडयोर्गतिरित्यर्थः अनेन दिव्यज्ञानहेतुर्जन्मोत्कर्ष उक्तः ॥ २८ ॥

२७] ति० टी०—वैनतेयाद्विननापुत्रादरुणात् ' तस्माज्जातोऽहमरुणात्संपातिस्तु ममाग्रजः ' इत्यरण्ये जटायुवाक्यात् एवं दिव्यज्ञानेन युष्मदुत्तज्ञानम् ॥ २७ ॥

रा० टी०—नन्वेतावता कथमन्तर्भाव इत्यत आह—वैनतेयादिति । सर्वेषां नोऽस्माकं जन्म वैनतेयात् विनतासुतारुणात् अस्तीति शेषः । अर्धं पृथक् ॥ २९ ॥

२८] ति० टी०—युष्मत्सैहायकरणं च वैरशुद्ध्या स्वप्रयोजनमपीत्याह—गर्हितमिति । येन रावणेन परदाररहरणरूपं गर्हितं कर्म कृतं तस्य पिशिताशिनो भ्रातृकृतं वैरशुद्ध्यि यत्प्रतिकार्यं तच्च मे कृतं भवेत् । युष्मत्प्रवर्तनेनेति शेषः ॥२८॥

रा० टी०—गर्हितमिति । येन पिशिताशिना रक्षसा गर्हितं कर्म सीतापहरणादिरूपं कृतं तत् रक्षः प्रतिकार्यं हिंसनीयं

१ तत्रेति गो पाठः । २ श्लोकद्वयमेतदधिकं गो.रा.पाठे । ३ अन्ते संपूर्णे शतयोजने इति रा. पाठः । ४ भोज्यानामिति रा.पाठः । ५ फलाशिन इति गो. पाठः । ६ श्लोकोऽयं द्वात्रिंशत्कस्थाने गो. पाठे । ७ आंशनेति गो. पाठः । ८ भ्रातुरिति गो. पाठः । ९ महदिति रा.पाठः । १० साहाय्येति युक्त भाति ।

इहस्थोऽहं प्रपश्यामि रावणं जानकीं तथा । अस्माकमपि सौपर्णं दिव्यं चक्षुर्बलं तथा ॥ २९ ॥
तस्मादाहारवीर्येण निसर्गेण च वानराः । आयोजनशतात्साग्राद्वयं पश्याम नित्यशः ॥ ३० ॥
अस्माकं विहिता वृत्तिर्निसर्गेण च दूरतः । विहिता वृक्षमूले तु वृत्तिश्चरणयोधिनाम् ॥ ३१ ॥
उपायो दृश्यतां कश्चिल्लङ्घने लवणाम्भसः । अभिगम्य तु वैदेहीं समृद्धार्था गमिष्यथ ॥ ३२ ॥
समुद्रं नेतुमिच्छामि भवद्भिर्वरुणालयम् । प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः ॥ ३३ ॥
ततो नीत्वा तु तं देशं तीरे नदनदीपतेः । निर्दग्धपक्षं संपातिं वानराः सुमहौजसः ॥ ३४ ॥
[2]तं पुनः प्रापयित्वा च तं देशं पतगेश्वरम् । बभूवुर्वानरा हृष्टाः प्रवृत्तिमुपलभ्य ते ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

भवद्भिरिति शेषः । तेन तस्य हतस्य मे भ्रातुः वैरं कृतं छिन्नं भवेत् ॥ ३० ॥

गो० टी०–गर्हितमिति । येन पिशिताशिना गर्हितं कर्म सीतापहरणरूपं कृतम् मे भ्रातुर्हेतोः प्रतीकार्यं तस्य वैरं कृतं प्रतिकृतं भवेत् भवद्भिरिति शेषः । अयं श्लोकः चरणयोधिनामित्यनन्तरं निवेशनीय इत्याहुः ॥ ३२ ॥

२९] ति० टी०–नन्वं कथं लङ्कास्था सीतेति त्वया ज्ञाता तत्राह—इहस्थ इति । सौपर्णं सुपर्णलिङ्गकचक्षुष्मतीविद्यासिद्धिजम् सा च विद्या बह्वृचब्राह्मणे तृतीयपञ्चिकायामुक्ता॥२९॥

रा० टी०–इहस्थ इति । इहस्थोऽहं रावणं जानकीं च प्रपश्यामि । तत्र हेतुः–यथा सौपर्णं चक्षुर्बलं च दिव्यं तथा अस्माकमपि दिव्यम् ॥ ३१ ॥

गो० टी०–न केवलं दिव्यज्ञानं दिव्यचक्षुरप्यस्तीत्याह–इहस्थ इति । अपिशब्दो भिन्नक्रमः चक्षुरित्यनेन संबध्यते । सौवर्णमित्यनेन विशेषणेनातिदूरदर्शित्वमुक्तम् । आहारवीर्येण चक्षुष्याहारबलेनेत्यर्थः । निसर्गेण सौवर्णत्वनिबन्धनस्वभावेन ॥ २९ ॥ ३० ॥

३०] ति० टी०–तस्मादुक्तविद्यासिद्धेः । निसर्गेणाहारवीर्येण च मासविशेषाहारबलेन च । आङभिविधौ । साग्रात्किञ्चिदधिकायोजनशतात् ॥ ३० ॥

रा० टी०–तस्मादिति । तस्मादिव्यनेत्रत्वात् हेतोः निसर्गेण स्वाभाविकेन आहारवीर्येण युक्ता वयं साग्रात् किंचिदधिकात्किञ्चिदधिकम् आयोजनशतात् योजनशतमभिव्याप्य वयं नित्यशः पश्याम पश्यामः ॥ ३२ ॥

३१] ति० टी०–अस्माकं तु निसर्गेण जातिस्वभावेन दूरतो दूरवर्तिदर्शनबलसंपादकेन भक्ष्यविशेषेण वृत्तिर्विहिता धात्रेति शेषः । कुक्कुटादीनां तु स्वावासवृक्षमूल एव तावद्दूरदृष्टिमात्रसंपादिका च वृत्तिर्विहिता ॥ ३१ ॥

रा० टी०–नेत्रस्यापि दिव्यत्वे प्रयोजनमाह–अस्माकमिति । निसर्गेण जातिस्वभावेन दूरतःदूरतोऽवलोकितवस्तुना अस्माकं वृत्तिर्विहिता विधिनेति शेषः । प्रसङ्गादन्यवृत्तिमप्याह–चरणयोधिना कुक्कुटानां वृत्तिः वृक्षमूलेषु आवासवृक्षमूललभ्येषु विहिता ॥ ३२ ॥

गो० टी०–अस्माकमिति । वृत्तिः भक्ष्यग्रहणम् । चरणयोधिनां कुक्कुटानाम् पादमूले पादविकीर्णप्रदेशे वृत्तिः जीवनम् ॥ ३१ ॥

३२] ति० टी०–गमिष्यथ किष्किन्धामिति शेषः ॥३२॥

रा० टी०–प्रकृतमाह–उपाय इति । लवणाम्भसो लङ्घने कश्चिदुपायो दृश्यतामत एव वैदेहीमुपलभ्य समृद्धार्थाः सन्तो गमिष्यथ ॥ ३४ ॥

गो० टी०–एवं प्रासङ्गिकं परिसमाप्य प्रकृतमाह–उपाय इति । गमिष्यथेत्यत्र किष्किन्धामिति शेषः ॥ ३३ ॥

३३–३५] ति० टी०–नेतुं नाययितुम् ॥ ३३–३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०–समुद्रमिति । स्वर्गतस्य भ्रातुः उदकं प्रदास्यामि अतः वरुणालयं समुद्रं भवद्भिर्नेतुं प्राप्तुमात्मानमिति शेषः, इच्छामि ॥ ३५ ॥

गो० टी०–समुद्रमिति । नेतुमिच्छामि मामिति शेषः । भवद्भिरिति करणे तृतीया ॥ ३४ ॥

रा० टी०–तत इति । ततः संपातिवचनश्रवणानन्तरं प्रवृत्तिमुपलभ्य हृष्टाः महौजसो वानराः निर्दग्धपक्षं संपातिं नदनदीपतेस्तं प्रसिद्धं देशं नीत्वा ततः संपातिसंपादितकृत्यानन्तरं पतगेश्वरं संपातिं तमावासदेशं पुनः प्रापयित्वा प्राप्य बभूवुः स्थिता इति शेषः । श्लोकद्वयमेकान्वयि ॥ ३६ ॥३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

गो० टी०–तत इत्यादि । तीरं देशं तीरप्रदेशमित्यर्थः । तं देशं संपात्यावासभूतं देशं पुनः प्रत्यानयित्वा प्रवृत्तिं वृत्तान्तम् उपलभ्य ते वानराः हृष्टाः बभूवुः ॥ ३५ ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यानेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

---

१ पादेति गो पाठः । २ पुनः प्रत्यानयित्वेति गो पाठः ।

एकोनषष्टितमः सर्गः ।

रावणेन सीताया हरणस्य विषये जाम्बवता पृष्टः संपातिर्भक्ष्यान्वेषणाय सागरं संप्राप्य तत्र केनचिद्रक्षसा ह्रियमाणां कांचित्कनकप्रभा युवतीं दृष्ट्वा पश्चान्महर्षिवचसस्तयोः सीतारावणत्वं निश्चिन्वता सुपार्श्वनाम्ना मत्पुत्रेण मह्यमेतन्न्यवेदीति बभाष ।

ततस्तदमृतास्वादं गृध्रराजेन भाषितम् । निशम्य वैदतो हृष्टास्ते वचः प्लवगर्षभाः ॥ १ ॥
जाम्बवान्वानरश्रेष्ठः सह सर्वैः प्लवङ्गमैः । भूतलात्सहसोत्थाय गृध्रराजानमब्रवीत् ॥ २ ॥
क्व सीता केन वा दृष्टा को वा हरति मैथिलीम् । तदाख्यातु भवान्सर्वं गतिर्भव वनौकसाम् ॥ ३ ॥
को दाशरथिबाणानां वज्रवेगनिपातिनाम् । स्वयं लक्ष्मणमुक्तानां न चिन्तयति विक्रमम् ॥ ४ ॥
स हरीन्प्रीतिसंमुक्तान्सीताश्रुतिसमाहितान् । पुनराश्वासयन्प्रीत इदं वचनमब्रवीत् ॥ ५ ॥
श्रूयतामिह वैदेह्या यथा मे हरणं श्रुतम् । येन चापि ममाख्यातं यत्र चायतलोचना ॥ ६ ॥
अहमस्मिन्गिरौ दुर्गे बहुयोजनमायते । चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः ॥ ७ ॥
तं मामेवंगतं पुत्रः सुपार्श्वो नाम नामतः । आहारेण यथाकालं बिभर्ति पततां वरः ॥ ८ ॥

१] ति० टी०–तत इति । ते प्लवगर्षभा अमृतास्वादं गृध्रराजाभिभाषितं निशम्य हर्षादेव तद्वदतोऽनुवदन्तो हृष्टा बभूवुरित्यर्थः । वदत इत्यत्र द्रुमभाव आर्षः ॥ १ ॥

रा० टी०–संपातिप्रापणानन्तरकालिकवृत्तान्तमाह—तत इत्यादिभिः । अमृतास्वादम्..अमृतास्वादसदृशास्वादविशिष्टं वदता स्थिरेण गृध्रराजेन भाषित वचो निशम्य श्रुत्वा हृष्टाः प्लवगोत्तमाः ततः पूर्वस्थितिदेशे अतिष्ठन्निति शेषः ॥ १ ॥

गो० टी०–ततस्तदमृतास्वादमित्यारभ्य पञ्च सर्गाः प्रक्षिप्ताः सर्वकोशेष्वदर्शनात् तान् विनापि कथासंघट्टनात् पूर्वोक्तार्थविरोधस्फोरकत्वाच्च । तथापि ते व्याख्यास्यन्ते–तत इत्यादि । हृष्टाः रोमाञ्चाञ्चिताः बभूवुरिति शेषः ॥ १–१७ ॥

२] ति० टी०–अब्रवीत् लङ्कायां सीतादर्शनं त्वदेकसाक्षिकमन्यसाक्षिकमपि वेति दार्ढ्यायापृच्छदित्यर्थः । भूतलादुत्थाय प्रायोपवेशं त्यक्त्वेत्यर्थः ॥ २ ॥

रा० टी०–जाम्बवानिति । वानरश्रेष्ठः वानरेभ्योऽधिकवयस्कः जाम्बवान् भूतलात् उत्थाय संपातिसमीपं गत्वेत्यर्थः, गृध्रराजानं संपातिमब्रवीत् समासान्तविधेरनित्यत्वात् टजभावः ॥ २ ॥

३] ति० टी०–प्रश्नमेवाह—केति । सीतां को हरति स्म, ह्रियमाणा च केन दृष्टा, त्वयान्येनापि वा, हृता च क्व वर्तते इति सर्वं भवानाख्यातु । सामान्यतः श्रुत्वा प्रायोपवेशादुत्थितानां विशिष्य वदत्वित्यर्थः ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–केति । सीता क्व कस्मिन् स्थले अस्तीति शेषः, केन दृष्टा च हरणसमये इति शेषः, मैथिलीं को वा हरति अहरत्, तत्सर्वं भवान् आख्यातु वदतु अत एव वनौकसामस्माकं गतिर्विश्रामभूमिर्भव एतेन पूर्वसंपातिकथनसमये जाम्बवतः अतिशोकहेतुकानवधानता तद्वचनेऽप्रीतिर्वा सूचिता ॥ ३ ॥

४] ति० टी०–को जानकीहर्तां स्वयं रामबाणानां विक्रमं न चिन्तयतीत्यन्वयः ॥ ४ ॥

रा० टी०–क इति । वज्रवेगनिपातिनाम् अतिवेगविशिष्टवज्रवत्स्वयं निपतनशीलानां लक्ष्मणमुक्तानां दाशरथिबाणानां रामसंबन्धिशराणां विक्रमं को न चिन्तयति । एतेन तस्य विनाशोऽवश्यं भवितेति सूचितं तेनापहर्तुः अज्ञानातिशयः सूचितः ॥ ४ ॥

५] ति० टी०–प्रतिसंमुक्तांस्त्यक्तप्रायोपवेशान् । सीताश्रुतिसमाहितान्सीताविषयवृत्तान्तश्रवणे सावधानान्पुनराश्वासयन्नन्यसाक्षिकताप्रदर्शनेन भूयः स्वोक्तार्थं प्रत्यापयन् ॥ ५ ॥

रा० टी०–स इति । स संपातिः प्रतिसंमुक्तान् त्यक्तप्रायोपवेशनात् सीताश्रुतिसमाहितान् सीतावृत्तान्तश्रवणाय एकाग्रचित्तान् वानरान् आश्वासयन् सन् पुनरब्रवीत् ॥ ५ ॥

६] ति० टी०–वैदेह्या हरणं यथा मे मया श्रुतम्, येन च ममाख्यातम्, यत्र साऽऽयतलोचना वर्तते इति श्रुतम्, तदधीहेदानीं श्रूयताम् ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–श्रूयतामिति । यथा येन प्रकारेण वैदेह्या हरणं श्रुतं तं प्रकारं येन ममाग्रे आख्यातं कथितं तं च यत्रायतलोचना सीता अस्ति तं देशं च इह इदानीं मे श्रूयताम् ॥ ६ ॥

७–८] ति० टी०–तदेवाह—अहमिति । दुर्गे दुर्गमे क्षीणः प्राणो बलं पराक्रमश्च यस्य सः ॥ ७ ॥ ८ ॥

रा० टी०–अहमिति । क्षीणौ अल्पौ प्राणपराक्रमौ यस्य सोऽहं बहुयोजनम् आयते विस्तृते अस्मिन् गिरौ चिरात् बहुकालतो निपतितः ॥ ७ ॥

रा० टी०–तमिति । एवमनेन प्रकारेण तं पतितं मां नामतः प्रणामाय गतः प्राप्तः सुपार्श्वो नाम पुत्रः आहारेण यथाकालं बिभर्ति ॥ ८ ॥

१ मुदिता इति गो. वदता इति रा. पाठः । २ राजमथेति गो. पाठः । ३ प्रीतीति गो. पाठः । ४ वेति गो. पाठः । ५ गोविन्दपाठोऽपि तिलकशिरोमण्यन्यतरगृहीत एव युक्तोऽन्यथा पुनरुक्त्यापत्तेरिति भाति । ६ द्वितीयाविभक्तिकल्पनापेक्षया प्रथमैव युक्तेति भाति ।

तीक्ष्णकामास्तु गन्धर्वास्तीक्ष्णकोपा भुजङ्गमाः । मृगाणां तु भयं तीक्ष्णं ततस्तीक्ष्णक्षुधा वयम् ॥ ९ ॥
स कदाचित्क्षुधार्तस्य ममाहाराभिकाङ्क्षिणः । गतः सूर्येऽहनि प्राप्तो मम पुत्रो ह्यनामिषः ॥ १० ॥
स मयाऽऽहारसंरोधात्पीडितः प्रीतिवर्धनः । [क्षुत्पिपासापरीतेन कुमारः पततां वरः ॥
स ममाहारसंरोधात्पीडितं प्रीतिवर्धनः] । अनुमान्य यथातत्त्वमिदं वचनमब्रवीत् ॥ ११ ॥
अहं तात यथाकालमामिषार्थी खमाप्लुतः । महेन्द्रस्य गिरेर्द्वारमावृत्य सुसमाश्रितः ॥ १२ ॥
तत्र सत्त्वसहस्राणां सागरान्तरचारिणाम् । पन्थानमेकोऽध्यवसं संनिरोद्धुमवाङ्मुखः ॥ १३ ॥
तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभाम् । स्त्रियमादाय गच्छन्वै भिन्नाञ्जनचयोपमः ॥ १४ ॥
सोऽहमभ्यवहारार्थं तौ दृष्ट्वा कृतनिश्चयः । तेन साम्ना विनीतेन पन्थानमनुयाचितः ॥ १५ ॥
नहि सामोपपन्नानां प्रहर्ता विद्यते भुवि । नीचेष्वपि जनः कश्चित्किमङ्ग वत मद्विधः ॥ १६ ॥
स यातस्तेजसा व्योम संक्षिपन्निव वेगितः । अथाहं खेचरैर्भूतैरभिगम्य सभाजितः ॥ १७ ॥
दिष्ट्या जीवति सीतेति अब्रुवन्मां महर्षयः । कथंचित्सकलत्रोऽसौ गतस्ते स्वस्त्यसंशयम् ॥ १८ ॥

९] ति० टी०–तीक्ष्णकामाः 'ओकामा वै गन्धर्वा.' इति श्रुतेः । यथा कामादिविषये गन्धर्वादेस्तैक्ष्ण्यं स्वभावात्तत एव स्वभावादेव वयं पतगाः तीक्ष्णक्षुधा इत्यर्थः ॥ ९ ॥

रा० टी०–आहारेणैव भरणे हेतुं वदन्नाह–तीक्ष्णेति । गन्धर्वास्तीक्ष्णकामाः भवन्ति तेषु कामभोगाधिक्यमित्यर्थ. । भुजङ्गमाः सर्वाः तीक्ष्णकोपाः तेषु कोपाधिक्यमित्यर्थः । मृगाणां तु भयं तीक्ष्णं तेषु भयाधिक्यमित्यर्थः । ततस्तथा वयं तीक्ष्ण क्षुधा अस्माद्व क्षुधाया आधिक्यमित्यर्थः ॥ ९ ॥

१०] ति० टी०–यस्मादेवम्, अतः क्षुधार्तस्य, अत एवाहारकाङ्क्षिणो ममाहारार्थं सूर्येऽहन्यह्नि सूर्ये सूर्योदयकाले गतो मम पुत्रः सायमनामिषः प्राप्त आगतः ॥ १० ॥

रा० टी०–स इति । अहनि अहोनिमित्ते सूर्ये सति सूर्योदयकाले इत्यर्थः, गतः आहाराभिकाङ्क्षिणो मम पुत्रः अनामिषः आमिषरहितः सन् प्राप्तः मामिति शेषः ॥ १० ॥

११] ति० टी०–यत एवम्, अतः स मम प्रीतिवर्धनो मयाहारसंरोधात्पीडितो दुर्वचनेन खेदं प्रापितः सन्मामनुमान्य क्षमापयित्वा यथातत्त्वमिदं वक्ष्यमाणं वचनमब्रवीत् ॥ ११ ॥

रा० टी०–स इति । आहारसंरोधात् आहारस्याप्राप्तेरित्यर्थः, पीडितः मया भर्त्सितः पुत्रः अनुमान्य मां संप्रार्थ्य यथातत्त्वं याथार्थ्यमनतिक्रम्य इदमब्रवीत् ॥ ११ ॥

१२] ति० टी०–सुसमाश्रितः स्थितः ॥ १२ ॥

रा० टी०–तद्वचनाकारमाह–अहमिति । हे तात ! यथाकालं गमनकालमनतिक्रम्य आमिषार्थी खमाकाशमाप्लुतोऽहं महेन्द्रस्य गिरेः द्वारं निर्गममार्गमावृत्य सुसमाश्रितः संस्थितः १२

१३] ति० टी०–पन्थानं संनिरोद्धुमवसमित्यन्वयः॥१३॥

रा० टी०–तत्रेति । तत्र तस्मिन् समये सागरान्तरचारिणां सहस्राणां पन्थानं संनिरोद्धुम् अवाङ्मुखः एकोऽहं अध्यवसम् ॥ १३ ॥

१४] ति० टी०–सूर्योदयसमप्रभाम्युदयकालिकसूर्यसमप्रभाम् ॥ १४ ॥

रा० टी०–तत्रेति । तत्र तस्मिन् समये सूर्योदयसमप्रभाम् उदयकालिकसूर्यप्रभासदृशप्रभाविशिष्टां स्त्रियमादाय गच्छन् भिन्नाञ्जनचयोपमः विलक्षणाञ्जनसमूहसदृशः कश्चिज्जनो मया दृष्टः ॥ १४ ॥

१५] ति० टी०–तौ स्त्रीपुरुषौ । कृतनिश्चयः इमावेव हत्वा पितुरभ्यवहारार्थं नेष्यामीति कृतनिश्चय इत्यर्थः । ततस्तेन विनीतेन सता साम्नैव पन्थानमभियाचितोऽस्मि । अत एवासौ त्यक्त इति शेषः ॥ १५ ॥

रा० टी०–स इति । सः आमिषार्थी अहं स्त्रीपुरुषौ दृष्ट्वा अभ्यवहारार्थं त्वत्कर्तृकभोजनार्थं कृतनिश्चयः इमावेव हत्वा पितृकर्तृकभोजनार्थं नेष्यामीति निश्चयवानित्यर्थः, अहं विनीतेन तेन पुरुषेण साम्ना सामरूपोपायेन पन्थानमनुयाचितोऽभवम् अतः त्यक्तवानस्मीति शेषः ॥ १५ ॥

१६] ति० टी०–तत्र हेतुः–नहि सामेति ॥ १६ ॥

रा० टी०–त्यागे हेतुमाह–नेति । सामोपपन्नानां सामयुक्तानां प्रहर्ता हन्ता नीचेषु अपि जनेषु कश्चिन्न तद्विधः भवत्तुल्यजातसदृशः नेति किं वक्तव्यम् ॥ १६ ॥

१७] ति० टी०–अथ सस्त्रीकस्य तस्य गमनानन्तरं खेचरैर्भूतैः सिद्धचारणादिभिः सभाजितः पूजितोऽस्मि ॥१७॥

रा० टी०–स इति । तेजसा व्योम आकाशं संक्षिपन् व्याप्नुवन् इव सः गृहीतस्त्रीकः यातः अथानन्तरं खेचरैः भूतैः अभिगम्य प्राप्य सभाजितः प्रार्थ्यमानतयागेन प्रशंसितोऽहमभवमिति शेषः ॥ १७ ॥

गो० टी०–स यात इति । सभाजितः पूजितः ॥ १८ ॥

१८] ति० टी०–' दिष्ट्या जीवति सीता ' इति पाठः ।

---

१ गतसूर्ये इति गो. पाठः । २ वृद्धभावाच्च कोपाच्च परिभर्त्सित इति गो. पाठः । ३ श्लोकोऽयमधिकः गो. पाठे । ४ च समाश्रित इति गो. पाठः । ५ चयप्रभ इति गो. पाठः । ६ अर्थीति गो. पाठः । ७ क्वचिदिति गो. पाठः । ८ वेगत इति गो. पाठः । ९ जीवसि नातेति हीति गो.रा. पाठः।

एवमुक्तस्ततोऽहं तैः सिद्धैः परमशोभनैः । स च मे रावणो राजा रक्षसां प्रतिवेदितः ॥ १९ ॥
पश्यन्दाशरथेर्भार्यां रामस्य जनकात्मजाम् । भ्रष्टाभरणकौशेयां शोकवेगपराजिताम् ॥ २० ॥
रामलक्ष्मणयोर्नाम क्रोशन्तीं मुक्तमूर्धजाम् । एष कालात्ययस्तात इति वाक्यविदां वरः ॥ २१ ॥
एतदर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत् । तच्छ्रुत्वापि हि मे बुद्धिर्नासीत्काचित्पराक्रमे ॥ २२ ॥
अपक्षो हि कथं पक्षी कर्म किंचित्समारभेत् । यत्तु शक्यं मया कर्तुं वाग्बुद्धिगुणवर्तिना ॥ २३ ॥
श्रूयतां तत्र वक्ष्यामि भवतां पौरुषाश्रयम् । वाङ्मतिभ्यां हि सर्वेषां करिष्यामि प्रियं हि वः २४ ॥
यद्धि दाशरथेः कार्यं मम तन्नात्र संशयः । तद्भवन्तो मतिश्रेष्ठा बलवन्तो मनस्विनः ॥ २५ ॥
प्रहिताः कपिराजेन देवैरपि दुरासदाः । रामलक्ष्मणबाणाश्च विहिताः कङ्कपत्रिणः ॥ २६ ॥
त्रयाणामपि लोकानां पर्याप्तास्त्राणनिग्रहे । कामं खलु दशग्रीवस्तेजोबलसमन्वितः ॥
भवतां तु समर्थानां न किंचिदपि दुष्करम् ॥ २७ ॥

दिष्ट्या सीता त्वदृष्टिपथं प्राप्ता जीवति स्म त्वया तदनन्तरेषत्करत्वाद् एवं पूजयित्वा मां महर्षयोऽब्रुवन् । असौ त्वया दृष्टः पुरुषः सकलत्रः कथंचित्कुशली गतः, अतोऽसंशयं ते स्वस्त्यस्त्विति कतकः । अन्ये तु—'दिष्ट्या जीवसि तातेति' इति पाठः । हे तात ! त्वं दिष्ट्या रावणं प्राप्यापि जीवसीत्यब्रुवन् । यतोऽसौ सकलत्रः, अतोऽसंशयं त्वां संशयमप्रापय्य गतः अतस्ते स्वस्ति जातमित्यर्थमाहुः ॥ १८ ॥

रा० टी०—सभाजनप्रकारमाह—दिष्ट्येति । हे तात ! सकलत्रः असौ योगतः स कथंचित् जीवति त्वया त्यक्त इत्यर्थः, इति दिष्ट्या भाग्यम्, अतस्ते स्वस्ति इति महर्षयो मामब्रुवन् ॥ १८ ॥

गो० टी०—दिष्ट्येति । असौ सकलत्रः सरक्ष्यवर्गः अतः कथंचित् गतः अतस्ते स्वस्त्यासीत् असंशयम् इति मां महर्षयोऽब्रुवन्निति योजना ॥ १९ ॥

१९] ति० टी०—अथ स हर्तां रावण इति सा रामभार्येति चाहं प्रतिवेदितः ॥ १९ ॥

रा० टी०—एवमिति । ततः तस्यागानन्तरं परमशोभनैः सिद्धैरहमेवमुक्तः सः मया त्यक्तस्तु रक्षसां राजा रावणः सिद्धैः प्रतिवेदितः बोधितश्च चकारेण या ह्रियमाणा सा सीता प्रतिवेदिता दुष्टत्यागप्रशंसया हरणेनैवास्य विनाशो भवितेति महर्षीणां ज्ञानं सूचितम् ॥ १९ ॥

गो० टी०—स चेति । मे मया । प्रतिवेदितः ज्ञातः सुपार्श्ववचनमिदम् ॥ २० ॥ २१ ॥

२०–२२] ति० टी०—अतोऽहं भष्टाभरणत्वादिगुणां रामभार्यां पश्यन्स्थित इत्येष तावन्मे कालात्ययः कालातिपातहेतुरिति समग्रमेतदर्थं वाक्यविदां वरः सुपार्श्वो मे प्रत्यवेदयत् । तच्छ्रुत्वापीति । सामान्यतः पूर्वं मया दृष्टमपि पुत्राद्धर्ता रावणो हृता रामपत्नीति निश्चित्य श्रुत्वाऽपि ॥२०–२२॥

रा० टी०—पश्यन्निति । भष्टाभरणकौशेयां रामलक्ष्मणयोर्नाम क्रोशन्तीं दाशरथेः रामस्य भार्यां पश्यन् अतिष्ठमिति शेषः । हे तात ! एषः कालात्ययः इति एतद्धेतुकः एतदर्थं वाक्यविदां वरः सुपार्श्वः मे समीपे प्रत्यवेदयत् । सार्धश्लोकद्वयमेकान्वयी ॥ २० ॥ २१ ॥

रा० टी०—तदिति । तत् रावणस्य कर्म श्रुत्वाऽपि पराक्रमे मे बुद्धिः काचिन्नासीत् हि यतः अपक्षः पक्षरहितः पक्षी किंचित्कर्म कथं समारभेत् । अर्धद्वयमेकान्वयि ॥ २२ ॥

गो० टी०—एष इति । कालात्ययः कालातिक्रमहेतुः । रावणदर्शनमिति भावः ॥ २२–२४ ॥

२३] ति० टी०—वाग्बुद्धिभ्यां साध्यो यो गुण उपकारलक्षणस्तन्मात्रवर्तनशीलेन ॥ २३ ॥

रा० टी०—यदिति । वाग्बुद्धिगुणवर्तिना वचसा बुद्धिगुणेन समीचीनोपदेशादिना च वर्तनशीलेन मया यत्कर्तुं शक्यं तत् भवतां पौरुषाश्रयं पौरुषसाध्यं वक्ष्यामि । तत्र तत् श्रूयताम् ॥ २३ ॥

२४] ति० टी०—पौरुषाश्रयं पराक्रमप्रतिष्ठाभूतम् । किं चैष उपकारो न केवलं भवत्प्रयोजन एव, अपि तु स्वप्रयोजनफलोऽपीत्याह—वाङ्मतिभ्यामिति । दाशरथेः कार्यमुद्दिश्य वः सर्वेषां वाङ्मतिभ्यां यत्प्रियं करिष्यामि तन्ममैव कार्यम् अत्र संशयो न ॥ २४ ॥

रा० टी०—वागिति । दाशरथेः यत्कार्यं तन्ममैव अतः वाङ्मतिभ्यां सर्वेषां वः प्रियं करिष्यामि ॥ २४ ॥

गो० टी०—वागिति । सर्वेषां वः युष्माकं वाङ्मतिभ्यां प्रियं करिष्यामि हि । दाशरथेर्यत्कार्यं तन्ममैव ॥ २६–२८ ॥

२५] ति० टी०—तत्तस्मान्मया भवतां कार्यसिद्धेरसंशयं दृष्टत्वाद्भवन्तोऽवश्यं कार्यं यतन्तामिति शेषः ॥ २५ ॥

२६] ति० टी०—विहिताः विधात्रेति शेषः ॥ २६ ॥

२७] ति० टी०—त्राणनिग्रहे त्राणे निग्रहे च पर्याप्ताः ।

१ हरिन्नति गो. पाठः । २ तावदिति गो. पाठः । ३ कालेति गो. पाठः । ४ एतमिति गो. पाठः । ५ उपक्रमे इति गो. पाठः । ६ स्त्रिति गो. पाठः । ७ यशस्विन इति रा. पाठः । ८ प्रेषिता इति गो. पाठः । ९ निश्चिता इति गो. पाठः ।

तदलं कालसङ्गेन क्रियतां बुद्धिनिश्चयः । नहि कर्मसु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ।

जनितविश्वासः संपातिः पुनः श्रवणोत्कण्ठानङ्गदादीन्नीतावृत्तं निवेदयितुमुपक्रमते । सूर्योग्रतेजसा निर्दग्धपक्षोऽहं विन्ध्ये पतितो मूर्छितः षड्रात्रोत्तरं प्राप्तचेतनः पतनप्रदेशं विन्ध्यत्वेन निरधारयम् । ततश्चिरपरिचितादपि तस्मात्प्रदेशादह कथंचिदवतीर्य कंचिदाश्रमं प्रविष्टस्तत्र वसन्तं निशाकरनामानं मुनिमभ्यवादये । पादयोः प्रणमन्त मा निर्दग्धपक्षतया स मुनिः कथंचित्संपातित्वेनावधार्य पक्षतिप्ठोषकारणं पप्रच्छ ।

ततः कृतोदकं स्नातं तं गृध्रं हरियूथपाः । उपविष्टा गिरौ रम्ये परिवार्य समन्ततः ॥ १ ॥
तमङ्गदमुपासीनं तैः सर्वैर्हरिभिर्वृतम् । जनितप्रत्ययो हर्षात्संपातिः पुनरब्रवीत् ॥ २ ॥
कृत्वा निःशब्दमेकाग्राः शृण्वन्तु हरयो मम । तथ्यं संकीर्तयिष्यामि यथा जानामि मैथिलीम्॥ ३ ॥
अस्य विन्ध्यस्य शिखरे पतितोऽस्मि पुरानघ । सूर्यतापपरीताङ्गो निर्दग्धः सूर्यरश्मिभिः ॥ ४ ॥
लब्धसंज्ञस्तु षड्रात्राद्विशो विह्वलन्निव । वीक्षमाणो दिशः सर्वा नाभिजानामि किंचन ॥ ५ ॥
ततस्तु सागराञ्शैलान्नदीः सर्वाः सरांसि च । वनानि चैव प्रदेशांश्च निरीक्ष्य मतिरागता ॥ ६ ॥

समाहारद्वन्द्वः । यद्यपि दशग्रीवो लोकदृष्ट्या प्रबलः, तथापि भवतां रामलक्ष्मणसहायत्वेनैव समर्थानां सुकर एवेति भावः॥२७॥

रा० टी०–तदिति । कपिराजेन प्रहिताः मतिश्रेष्ठाः भवन्तः देवैरपि दुरासदाः सन्तीति शेषः । विहिताः चालिताः रामलक्ष्मणबाणाः त्रयाणामपि लोकानां त्राणनिग्रहे कामं पर्याप्ताः समर्था इत्यर्थः तत् तस्मात् हेतोः तेजोबलसमन्वितो यो दशग्रीवः तस्मिन् भवतां किंचिन्न दुष्करम् । श्लोकत्रयं संमिलितान्वयि ॥ २५—२७ ॥

२८] ति० टी०–कालसङ्गः कालविलम्बः । सज्जन्तेऽलसा भवन्ति ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्ड एकोनषष्टितमः सर्गः ॥५९॥

रा० टी०–तदिति । हि यतः बुद्धिमन्तो जनाः कर्मसु न सज्जन्ते अलसाः भवन्ति तत् ततः बुद्धिनिश्चयः बुद्धिजनितनिश्चयविशिष्टः सीतादर्शनोद्योग इत्यर्थः, क्रियताम् कालसंगेन कालविलम्बेन अलं न क्रियतामित्यर्थः ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

गो० टी०–तदिति । कालसङ्गेन कालविलम्बेन ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–वानरान्प्रति संपातिवचनान्तरं वर्णयितुमाह–तत इति । कृतस्नुदकस्नुदकक्रिया येन तं स्नातं रम्ये गिरौ स्थितं गृध्रं समन्ततः परिवार्य हरियूथपा उपविष्टाः संस्थिता अभवन्निति शेषः ॥ १ ॥

गो० टी०–ततः कृतोदकमित्यादि ॥ १ ॥

२] ति० टी०–जनितप्रत्ययः एष्यन्त्यन्वेषका इति निशाकरस्नुक्तरीत्या रामदूतागमनदर्शनान्निशाकरोक्तपक्षप्ररोहादिदर्शनाच्च निशाकरवचसि विश्वस्तः । हर्षात्पक्षलाभजनितहर्षादात्मानमुपासीनमङ्गदं प्रति पुनरब्रवीत् ॥ २ ॥

रा० टी०–तमिति । हरिभिर्वृतमुपासीनमङ्गदं जनितः उत्पादितः प्रत्ययः अङ्गदादिषु विश्वासो येन स संपातिः पुनरब्रवीत् ॥ २ ॥

गो० टी०–तमिति । जनितप्रत्ययः जनितविश्वासो यथा भवति तथाऽब्रवीदिति योजना वानरदर्शनरूपस्वकार्यतो जनितविश्वास इत्यर्थः ॥ २–४ ॥

३] ति० टी०–तथ्यं मैथिलीं जानामीति मद्वाक्यं सत्यं यथा भवद्भिः प्रतिपत्तव्यं तथा संकीर्तयिष्यामि ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–कृत्वेति । हे हरयः ! मैथिलीं यथा जानामि तथा तथ्यं संकीर्तयिष्यामि अतः निःशब्दं शब्दनिवृत्तिं कृत्वा एकाग्राः सन्तो मम मत्तः शृण्वन्तु ॥३॥

४–६] ति० टी०–सूर्यरश्मिभिर्निर्दग्धः, अत एव विवशः । षड्रात्रात्परं लब्धसंज्ञः विह्वलन्निव परमार्त एव सन् ॥४—६॥

रा० टी०–तत्संकीर्तनाकारमाह–अस्येत्यादिभिः । सूर्यतापपरीताङ्गः सूर्यकिरणतापयुक्तः अत एव सूर्यरश्मिभिर्निर्दग्धोऽहमस्य विन्ध्यस्य शिखरे पतितोऽस्मि ॥ ४ ॥

१ दुर्गे इति गो. पाठः । २ तत्त्वमिति गो. पाठः । ३ वने इति गो. पाठः । ४ सूर्यातपेति गो. पाठः । ५ उदधिवेलां च समीक्ष्य मतिरागमदिति गो. पाठः ।

हृष्टपक्षिगणाकीर्णः कन्दरोदरकूटवान् । दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति[2] निश्चितः ॥ ७ ॥
आसीच्चात्राश्रमं पुण्यं सुरैरपि सुपूजितम् । ऋषिर्निशाकरो नाम यस्मिन्नुग्रतपा भवत् ॥ ८ ॥
अष्टौ वर्षसहस्राणि तेनास्मिन्नृषिणा[3] गिरौ । वसतो मम धर्मज्ञे[4] स्वर्गते तु निशाकरे ॥ ९ ॥
अवतीर्य च विन्ध्याग्रात्कृच्छ्रेण विषमाच्छनैः[5] । तीक्ष्णदर्भां वसुमतीं दुःखेन पुनरागतः ॥ १० ॥
तमृषिं द्रष्टुकामोऽस्मि दुःखेनाभ्यागतो भृशम् । जटायुषा मया चैव बहुशोऽधिगतो हि सः ॥ ११ ॥
तस्याश्रमपदाभ्याशे वव्वुर्वाताः सुगन्धिनः[6] । वृक्षो नापुष्पितः कश्चिदफलो वा न दृश्यते[7] ॥ १२ ॥
उपेत्य चाश्रमं पुण्यं वृक्षमूलमुपाश्रितः । द्रष्टुकामः प्रतीक्षे[8] चैं भगवन्तं निशाकरम् ॥ १३ ॥
अथ पश्यामि दूरस्थमृषिं ज्वलिततेजसम् । कृताभिषेकं दुर्धर्षमुपावृत्तमुदङ्मुखम्[9] ॥ १४ ॥
तमृक्षाः सृमरा व्याघ्राः सिंहा नानासरीसृपाः[10] । परिवार्योपगच्छन्ति दातारं प्राणिनो यथा ॥ १५ ॥
ततः प्राप्तमृषिं ज्ञात्वा तानि सत्त्वानि वै ययुः[11] । प्रविष्टे राजनि यथा सर्वे सामात्यकं बलम् ॥ १६ ॥
ऋषिस्तु दृष्ट्वा मां तूष्णीं[12] प्रविष्टश्चाश्रमं पुनः । मुहूर्तमात्रान्निर्गम्य[13] ततः कार्यमपृच्छत ॥ १७ ॥

रा० टी०-लङ्घयेति । पञ्चमासादूर्ध्वलङ्घसंज्ञ- विवशः स्ववशरहितोऽहं विह्वलश्चेव दिशो वीक्षमाणश्च सन् किञ्चन नाभिजानामि ॥ ५ ॥

रा० टी०-तत इति । ततोऽनन्तरं सागरादीन् वीक्ष्य मतिर्विवेक आगता ॥ ६ ॥

गो० टी०-लङ्घसंज्ञस्त्विति । विह्वलश्चिव मूर्छन्निव निश्चयः ॥ ५ ॥ ६ ॥

७] ति० टी०-कन्दराण्युदरे यस्य स चासौ कूटवान् शृङ्गवानित्यर्थः ॥ ७ ॥

रा० टी०-तदाकारमाह-हृष्टेति । कन्दरा एव उदरं यस्य स एव कूटवानिति कर्मधारयः अयं विन्ध्यः इति निश्चितः मयेति शेषः ॥ ७ ॥

गो० टी०-हृष्टेति । अभूदिति शेषः ॥ ७ ॥

८] ति० टी०-यस्मिन्नाश्रमे उग्रतपाभवदिति संधिरार्षः ॥ ८ ॥

रा० टी०-आसीदिति । यस्मिन् निशाकरो नाम ऋषिः उग्रतपाः अभवत् तदिदं पुण्यमाश्रमं सुरैरपि सुपूजितमासीत् । दीर्घं आर्षः, असिद्धत्वाभावज्ञापनाद्वा आगमशास्त्रस्यानित्यत्वादडभावो वा ॥ ८ ॥

गो० टी०-आसीदिति । भवत् अभवत् ॥ ८ ॥

९] ति० टी०-निशाकरे ऋषौ स्वर्गते तेन विनाऽत्र गिरौ वसतो ममाष्टौ वर्षसहस्राणि गतानीति शेषः ॥ ९ ॥

रा० टी०-अष्टाविति । निशाकरे स्वर्गते सति अस्मिन् गिरौ तेन ऋषिणा विना वसतो मम अष्टौ वर्षसहस्राणि व्यतीतानीति शेषः ॥ ९ ॥

गो० टी०-अष्टाविति । वर्षसहस्राणि गतानीति शेषः ॥ ९—१७ ॥

१०] ति० टी०-अथ तत्स्थितिकालिकीं तदर्शनप्रवृत्तिमाह-अवतीर्येति । तीक्ष्णदर्भां तीक्ष्णाग्रा दर्भा यस्याम् ॥ १० ॥

रा० टी०-मुनिसंगमप्रकारं बोधयितुं पूर्ववृत्तमाह-अवतीर्येत्यादिभिः । विषमाद्विन्ध्याग्रादवतीर्य वसुमतीं पृथ्वीं पुनरागतोऽस्मीति शेषः ॥ १० ॥

११-१३] ति० टी०-तमृषिं द्रष्टुकामोऽस्मि द्रष्टुकामोऽभूवमित्यर्थः अत एव दुःखेन तदभ्याशमभ्यागतः नन्वं तद्वासोऽत्रेति त्वया कथं ज्ञातमत आह—जटायुषेति । अधिगतः प्राप्तः सेवित इत्यर्थः ॥ ११—१३ ॥

रा० टी०-तमिति । स ऋषिः जटायुषा मया च बहुशोऽधिगतः पूर्वं प्राप्तः अतः दुःखेनाभ्यागतोऽहं तमृषिं द्रष्टुकामः समवलोकनेच्छुरस्मि आसम् ॥ ११ ॥

रा० टी०-तदाश्रमचिह्नान्याह-तस्येति । आश्रमपदस्य श्रमनिवर्तकस्थानस्य अभ्याशे निकटे वाता ववुः अपुष्पितः अफलो वा कश्चिद्वृक्षो न दृश्यते ॥ १२ ॥

रा० टी०-उपेत्येति । निशाकरं द्रष्टुकामोऽहमाश्रममुपेत्य वृक्षमूलमुपाश्रितः सन् प्रतीक्षे प्रत्येक्षे ॥ १३ ॥

१४] ति० टी०-उदङ्मुखमुपावृत्तं समुद्रे ज्ञात्वोदङ्मुखतया प्रत्यावृत्तम् ॥ १४ ॥

रा० टी०-अथेति । कृताभिषेकं कृतस्नानम् उदङ्मुखमुपावृत्तमागच्छन्तं दूरस्थमृषिं पश्यामि अपश्यम् ॥ १४ ॥

१५] ति० टी०-तस्य स्वसेवायोग्यत्वप्रदर्शनाय तिर्यग्योनिसेव्यत्वं तपोमहिमजं दर्शयति—तमृक्षा इति ॥ १५ ॥

रा० टी०-तमिति । तमागच्छन्तमृषिं प्राणिनो दातारमिव ऋक्षादयः परिवार्य उपगच्छन्ति ॥ १५ ॥

१६-१७] ति० टी०-प्राप्तमाश्रममागतम् ॥ १६ ॥ १७ ॥

रा० टी०-तत इति । ततोऽनन्तरं प्राप्तं स्वाश्रम इति

१ कन्दरान्तरेति गो. पाठः । २ निश्चय इति गो. पाठः । ३ विनेति गो. पाठः । ४ धर्मज्ञा इति गो. पाठः । ५ वेति गो. पाठः । ६ वियता इति गो. पाठः । ७ ऽहमिति गो. पाठः । ८ अपश्यामेति गो. पाठः । ९ नागा इति गो. पाठः । १० धातारमिति गो. पाठः । ११ प्रीत इति गो. पाठः । १२ निष्क्रम्येति गो. पाठः ।

सौम्य वैकल्यतां दृष्ट्वा रोम्णां ते नावगम्यते । अग्निदग्धाविमौ पक्षौ प्राणाश्चापि शरीरके ॥ १८ ॥
गृध्रौ द्वौ दृष्टपूर्वौ मे मातरिश्वसमौ जवे । गृध्राणां चैव राजानौ भ्रातरौ कामरूपिणौ ॥ १९ ॥
ज्येष्ठोऽवितस्त्वं संपाते जटायुरनुजस्तव । मानुषं रूपमास्थाय गृह्णीतां चरणौ मम ॥ २० ॥
किं ते व्याधिसमुत्थानं पक्षयोः पतनं कथम् । दण्डो वायं धृतः केन सर्वमाख्याहि पृच्छतः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ।

निशाकरमुनि प्रति स्वपक्षदाहकारण विस्तरेण कथयन्सपातिर्गिरिशिखरात्पतनेन पक्षबलविहीनमपि जराजर्जरितमिद कलेवर मुञ्चामीति प्रतिजानीते ।

ततस्तदारुणं कर्म दुष्करं सहसा कृतम् । आचचक्षे मुनेः सर्वं सूर्यानुगमनं तथा ॥ १ ॥
भगवन्व्रणयुक्तत्वाल्लज्जया चाकुलेन्द्रियः । परिश्रान्तो न शक्नोमि वचनं परिभाषितुम् ॥ २ ॥

शेषः, ऋषिं ज्ञात्वा राजनि प्रविष्टे अन्तःपुरं गते सति सामात्यकम् अमात्यसहितं बलं सैन्यमिव तानि सत्त्वानि ययुः ॥१६॥

रा० टी०–ऋषिरिति । ऋषिस्तु मां दृष्ट्वा तुष्टः पुनराश्रमं प्रविष्टश्च मुहूर्तमात्रात् ततः आश्रमात् निर्गम्य कार्यं मम हिंसनहेतुमपृच्छत ॥ १७ ॥

१८] ति० टी०–ते रोम्णां वैकल्यं दृष्ट्वा नावगम्यते न प्रत्यभिज्ञायते भवानित्यर्थः वैकल्यमेवाह—अग्निदग्धौ ताविव अत एव शरीरकेऽल्पे शरीरे प्राणाः चाद्विक्रमबले अपि ते दग्धकल्पाः ॥ १८ ॥

रा० टी०–तत्प्रभाकारमाह–सौम्येति । हे सौम्य ! ते तव रोम्णां वैकल्यतामभावं दृष्ट्वा नावगम्यते प्रत्यभिज्ञायते भवानिति शेषः । वैकल्यताकारणमनुमिनोति इमौ तव पक्षौ अग्निदग्धौ अग्निदग्धाविव अत एव शरीरके अल्पशरीरे विद्यमानाः प्राणाश्चकारेण विक्रमादयोऽपि अग्निदग्धप्रायाः॥ १८ ॥

गो० टी०–सौम्येति । विकल एव वैकल्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् तस्य भावो वैकल्यता व्रणिता संजातव्रणा ते नावगम्यत इत्यत्र त इति भिन्नं पदम् । हे सौम्य ! ते रोम्णां वैकल्यतां दृष्ट्वा नावगम्यते रोमविकलत्वहेतुः स्वरूपमिति शेषः । अग्निदग्धाविति दृश्येते इति शेषः । व्रणितेत्यत्र दृश्यत इति शेषः ॥ १८–२१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१९] ति० टी०–अथ प्रत्यभिज्ञामूलामभिज्ञामाह—गृध्राविति ॥ १९ ॥

२०] ति० टी०–अवितो ज्ञातः । गृह्णीतामगृह्णीताम्॥२०॥

रा० टी०–यथाकथंचित् तं ज्ञात्वा आह–गृध्राविति । जवे वेगे मातरिश्वसमौ वायुसदृशौ गृध्राणां राजानौ भ्रातरौ मे मम दृष्टपूर्वौ द्वौ गृध्रौ मानुषं रूपमास्थाय गृहीत्वा मम चरणौ गृह्णीताम् । हे संपाते ! यस्य तव जटायुरनुजः स ज्येष्ठस्त्वम् अवितो मया ज्ञातः । श्लोकद्वयमेकान्वयि ॥१९॥२०॥

२१] ति० टी०–किं कीदृशम् । व्याधिसमुत्थानमिति षष्ठीतत्पुरुषः । अयं दण्डो व्रणकरः प्रहारः केन धृतः केन कृतः ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०–किमिति । किं ते व्याधिसमुत्थानं केनचित् दण्डो वाऽयं धृतः । ननु द्वयमपि नास्तीत्यत आह–तव पक्षयोः पतनं कथम् इति पृच्छतो मे सर्वं कारणजातमाख्याहि ॥२१॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षष्टितमः सर्गः ॥ ६० ॥

१] ति० टी०–तदारुणं कर्मेन्द्रेण युद्धरूपमनेन दुष्करं सहसा दर्पात्कृतं प्रथममाचचक्षे । तथा तदनन्तरकृतं सूर्यानुगमनं सर्वं प्रकृतविघ्न्यपतनप्रयोजनत्वेनाचचक्षे ॥ १ ॥

रा० टी०–मुनिकर्तृकप्रभानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । ततः ऋषिकृतप्रभश्रवणानन्तरं दुष्करम् अन्यैः कर्तुमशक्यं तत् इन्द्रकर्तृकपराभवरूपं दारुणं कर्म सूर्यानुगमनं च मुनेः समीपे आचचक्षे ॥ १ ॥

गो० टी०–ततस्तदित्यादि ॥ १ ॥ २ ॥

२] ति० टी०–तदेवाह–भगवन्निति । व्रणयुक्तत्वादिन्द्रयुद्धे वज्रप्रहारजव्रणयुक्तत्वात्परिश्रान्तस्तथा पक्षनाशफलकात्किञ्चित्कर्मकरणजलज्जयाऽऽकुलितेन्द्रियश्चाहं प्रतिभाषितुं सम्यगुत्तरं दातुं न शक्नोमि, तथापि कथंचिद्ब्रवीमीति शेषः ॥ २ ॥

रा० टी०–तत्कथनप्रकारमाह—भगवन्नित्यादिभिः । भगवन् हे मुने ! व्रणयुक्तत्वात् इन्द्रयुद्धे तत् वज्रकृतव्रणवत्त्वाद्धे-

१ त्वञ्चैव व्रणिता तेवेति गो. पाठः । २ हि त्वं तु इति गो. पाठः । ३ कृत इति गो. पाठः । ४ तदेति गो. पाठः । ५ व्याकुलेति गो. पाठः

अहं चैव जटायुश्च संघर्षाद्[1]दूर्वमोहितौ । आकाशं पतितौ दूराज्जिज्ञासन्तौ पराक्रमम् ॥ ३ ॥
कैलासशिखरे बद्ध्वा मुनीनामग्रतः पणम् । रविः स्यादनुयातव्यो यावदस्तं महागिरिम् ॥ ४ ॥
अप्यावां युगपत्प्राप्तावपश्याव[2] महीतले । रथचक्रप्रमाणानि नगराणि पृथक्पृथक् ॥ ५ ॥
क्वचिद्वादित्रघोषश्च क्वचिद्भूषणनिःस्वनः । गायन्तीः[3] स्माङ्गना बह्वीः पश्यावो रक्तवाससः ॥ ६ ॥
तूर्णमुत्पत्य चाकाशमादित्यपथमास्थितौ । आवामालोकयावस्तद्वनं शाद्वलसंस्थितम्[4] ॥ ७ ॥
उपलैरिव संछन्ना दृश्यते भूः शिलोच्चयैः । आपगाभिश्च संवीता सूत्रैरिव वसुंधरा ॥ ८ ॥
हिमवांश्चैव विन्ध्यश्च मेरुश्च सुमहागिरिः । भूतले संप्रकाशन्ते नागा इव जलाशये ॥ ९ ॥
तीव्रः स्वेदश्च खेदश्च भयं चासीत्तदावयोः । समाविशत मोहश्च ततो मूर्छा च दारुणा ॥ १० ॥
न च दिग् ज्ञायते याम्या न[5] चाग्नेयी न वारुणी । युगान्ते नियतो लोको हतो दग्ध इवाग्निना ॥ ११ ॥
मनश्च मे हतं भूयश्चक्षुः[6] प्राप्य तु संश्रयम् । यत्नेन महता ह्यस्मिन्[7]मनः संधाय चक्षुषी[8] ॥ १२ ॥

तोः परिश्रान्तः प्राप्तखेदः अत एव लज्जया आकुलेन्द्रियोऽहं वचनं परिभाषितुमत्यन्तं वक्तुं न शक्नोमि । अत्यन्तं वक्तुं न शक्नोमीत्यनेन किंचिद्भ्रवीमीति सूचितम् ॥ २ ॥

३] ति० टी०–संघर्षात्पतनविषयस्पर्धातः । गर्वमोहितावित्यनेन जयगर्वमोहितौ ॥ ३ ॥

४] ति० टी०–पणं बद्धा प्रतिज्ञां कृत्वा । प्रतिज्ञामेवाह—रविरिति । रवियावदस्तं महाद्रिं यायात्ततः प्रागावाभ्यां रविरनुयातव्योऽनुप्राप्तव्य इति प्रतिज्ञा ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–अहमिति । गर्वमोहितौ इन्द्रजयजनितगर्वविशिष्टौ अहं जटायुश्च संघर्षात् परस्परा-भिभवेच्छातः पराक्रमं स्वस्वबलं जिज्ञासन्तौ सन्तौ अस्तं महागिरिं रविः यावत् स्यात् यायात् तावदेव अनुयातव्यः आवाभ्यां प्राप्यः इति पणं कैलासशिखरे मुनीनामग्रतः बद्धा दूरादाकाशं पतितौ गतौ । श्लोकद्वयमेकान्वयि ॥३॥४॥

गो० टी०–अहमिति । पतितौ प्राप्तौ ॥ ३–९ ॥

५] ति० टी०–युगपत्प्राप्तौ आकाशमिति शेषः । अपश्याव दृष्टवन्तौ ॥ ५ ॥

रा० टी०–अथेति । अथ गमनानन्तरं युगपत् एक-कालावच्छेदेन प्राप्तौ आकाशं गतौ आवां महीतले विद्यमानानि पृथक् पृथक् नगराणि चक्रप्रमाणानि अपश्याव ॥ ५ ॥

६] ति० टी०–क्वचिदूर्ध्वदिक्प्रदेशविशेषे ॥ ६ ॥

रा० टी०–क्वचिदिति । क्वचित् वादित्रघोषादिः शुश्रुव इति शेषः । क्वचित् रक्तवाससः बह्वीः अङ्गनाः पश्यावः ॥६ ॥

७] ति० टी०–आकाशमाकाशपथादर्वाक्तनं भूवर्तिवनम् । शाद्वलसंस्थितं शाद्वलानां बालतृणवदेशानामिव संस्थानं यस्य तत् ॥ ७ ॥

रा० टी०–तूर्णमिति । आकाशम् आकाशपथादधोदेशं तूर्णम् उत्पत्य उल्लङ्घ्य आदित्यपदम् आस्थितौ आवां शाद्वलसंवृतं शाद्वलैर्बालतृणैः संवृतमाच्छादितमिव वनम् आलोकयाव, महातरवः दूरादलवदृश्यन्ते इत्यर्थः ॥ ७ ॥

८] ति० टी०–उपलैः सूक्ष्मपाषाणैः ॥ ८ ॥

रा० टी०–उपलैरिति । शिलोच्चयैः पर्वतैः संछन्ना भूः उपलैः सूक्ष्मप्रस्तरैरिव संछन्ना दृश्यते आपगाभिर्नदीभिः संवीता आच्छादिता वसुन्धरा सूत्रैरिव संवीता दृश्यते ॥ ८ ॥

९] ति० टी०–नागा गजाः ॥ ९ ॥

रा० टी०–हिमवानिति । हिमवदादयः जलाशये नागा गजा इव भूतले संप्रकाशन्ते ॥ ९ ॥

१०] ति० टी०–तदा सवितरि मध्यं प्राप्ते मोहो दिङ्मोहस्ततो मोहादनन्तरं दारुणा मूर्च्छा सेन्द्रियमन-उपप्लवो मूर्च्छा ॥ १० ॥

रा० टी०–तीव्र इति । तदा तादृशदर्शनसमये स्वेदादयः तीव्रं ततस्तस्माद्धेतोः मोहो मूर्छा च समाविशत् ॥ १० ॥

गो० टी०–तीव्र इति । मोहः चित्तविभ्रमः । मूर्च्छा इन्द्रियैः सह मनस उपप्लवः तमः अज्ञानम् ॥ १० ॥

११] ति० टी०–मोहमूर्च्छे एव प्रकाशयति—न चेति । युगान्ते नियतो नियतदाहोऽपि लोक आवाभ्यां तत्कालेऽग्निना दग्धो हत इव दृष्टोऽभूत् ॥ ११ ॥

रा० टी०–नेति । याम्यादिर्दिग् न ज्ञायत अत एव नियतः नियमेन स्थितोऽपि लोकः युगान्ते अग्निना दग्धः अत एव हतः निहत इव ज्ञायते ॥ ११ ॥

गो० टी०–न दिगिति । याम्येत्यादिकं दिगन्तराणामुपलक्षणम् । नियतो लोकः नियतसंनिवेशो लोकः । युगान्ते अग्निना दग्धो हत इव अदृश्यतेति शेषः ॥ ११ ॥

१२] ति० टी०–मनश्च मे भूयोऽभ्यधिकं संश्रयं चक्षुः

---

१ दर्पेति गो. पाठः । २ वीराविति गो. पाठः । ३ अथेति गो. रा. पाठः । ४ घोषाश्च ब्रह्मघोषाश्च शुश्रुव इति गो. पाठः । ५ चेति गो. पाठः । ६ पथमाश्रिताविति गो. पाठः । ७ संनिभमिति गो. पाठः । ८ महाङ्गग इति गो. पाठः । ९ विशतीति गो. पाठः । १० नाग्नेया न चेति गो. पाठः । ११ मनिवर्त्येति गो. पाठः । १२ पुनरिति गो. पाठः । १३ चक्षुषि इति गो. पाठः ।

यत्नेन महता भूयो भास्करः प्रतिलोकितः । तुल्यपृथ्वीप्रमाणेन भास्करः प्रतिभाति नौ ॥ १३ ॥
जटायुर्मामनापृच्छ्य निपपात महीं ततः । तं दृष्ट्वा तूर्णमाकाशादात्मानं मुक्तवानहम् ॥ १४ ॥
पक्षाभ्यां च मया गुप्तो जटायुर्न प्रदह्यत । प्रमादात्तत्र निर्दग्धः पतन्वायुपथादहम् ॥ १५ ॥
आशङ्के तं निपतितं जनस्थाने जटायुषम् । अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः ॥ १६ ॥
राज्याच्च हीनो भ्रात्रा च पक्षाभ्यां विक्रमेण च । सर्वथा मर्तुमेवेच्छन्पतिष्ये शिखराद्गिरेः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ।

मा देह त्याक्षीर्गच्छेश्वान्यत्र धृतरामावतारो भगवान्सीतान्वेषणार्थं वानरान्प्रेषयिष्यति तदाऽऽ स्थित्वा तान्प्रति सीताप्रवृत्तिं निवेदयतस्ते पुनः पक्षप्ररोहः स्यादहमपि रामदर्शनपर्यन्तमेव शरीरं धर्तास्मीति प्रणिधानदर्शिनिशाकरमुन्युक्तं सपातिस्तान्कपीन्प्रादिशति ।

एवमुक्त्वा मुनिश्रेष्ठमरुदं भृशदुःखितः । अथ ध्यात्वा मुहूर्तं च भगवानिदमब्रवीत् ॥ १ ॥

प्राप्य तेन सह हतं सौरतेजसा प्रतिहतदर्शनशक्तिकमभूत् । अस्मिन्सूर्ये पुनश्चक्षुषी मनश्च संधाय ॥ १२ ॥

१३] ति० टी०–कथं सूर्यो दृष्ट इत्यत्र तत्प्रकारमाह–तुल्य इति । पृथ्व्यत्र जम्बूद्वीपावच्छिन्ना बोध्या ॥ १३ ॥

रा० टी०–मन इति । चक्षुःसंश्रयं नेत्ररूपमाश्रयं प्राप्य मे मनः भूयो हतं चक्षुषा सह शैथिल्यं प्राप्तमित्यर्थः, अतः महता यत्नेन मनः चक्षुषी च संधाय सूर्योन्मुखे कृत्वा महता यत्नेन भास्करः प्रतिलोकितः भास्करः नौ आवयोः पृथ्वीप्रमाणेन तुल्यः प्रतिभाति । श्लोकद्वयमेकान्वयि ॥१२॥१३॥

गो० टी०–मनश्चेत्यादि । संश्रयम् आश्रयभूतं चक्षुरिन्द्रियम् सन्निवर्त्य स्वेन विप्रयुज्य भूयो भृशं हतं मे मनः महता यत्नेन अस्मिन् चक्षुषि पुनः संधाय महता यत्नेन भूयो रविः समवलोकित इति संबन्धः । 'हतं भूयः सन्निवर्त्य तु संश्रयम् । यत्नेन महता अस्मिन् पुनः सन्धाय चक्षुषि ॥ यत्नेन महता भूयो रविः समवलोकितः' इति पाठः॥१२॥१३॥

१४] ति० टी०–ततः सूर्यदर्शनानन्तरम् अनापृच्छ्य मोहवशादिति शेषः। तं दृष्ट्वेति । मोहात्पतन्तं जटायुं दृष्ट्वाऽऽकाशादात्मानं मुक्तवानिति सूर्यसमीपवर्त्याकाशप्रदेशादात्मानं स्वशरीरं जटायुरक्षणार्थं मुक्तवान् पक्षौ विस्तार्य पतितवानित्यर्थः ॥ १४ ॥

रा० टी०–जटायुरिति । जटायुर्मामनापृच्छ्य अपृष्ट्वा महीं पपात । तत्रिपतन्तं जटायुषमहं दृष्ट्वा आकाशात् सूर्यसमीपवर्तिगगनात् आत्मानं स्वशरीरं मुक्तवान् अहमप्यपतमित्यर्थः ॥ १४ ॥

गो० टी०–जटायुरिति । निपपात महीम् महीं प्रति निपपातेत्यर्थः । पतन्तं दृष्ट्वा अहमाकाशात् पूर्वाधिष्ठिताकाशप्रदेशात् आत्मानं तूर्णमुक्तवान् जटायुषो रक्षणार्थं तदुपरि सत्वरमागच्छमित्यर्थः ॥ १४ ॥

१५–१६] ति० टी०–प्रमादाज्जटायुपरित्राणविषयचित्ताभिषङ्गात् तत्र तस्मिन्काले निर्दग्धो निर्दग्धपक्षः अथ वायुपथात्पतन्नहमाशङ्केऽनुमितवान्, न तु प्रत्यक्षतो दृष्टवानित्यर्थः ॥ १५ ॥ १६ ॥

१७] ति० टी०–सर्वथा मर्तुमेवेच्छन् शिखरात्पतिष्य इत्याहेति शेषः ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे एकषष्टितमः सर्गः॥ ६१ ॥

रा० टी०–नन्वु जटायुः कथं न दग्ध इत्यत आह–पक्षाभ्यामिति । मया पक्षाभ्यां गुप्तः जटायुर्न प्रदह्यत प्रादह्यत । प्रमादात् अनवधानतया तत्र सूर्यसमीपे निर्दग्धः वायुपथात् पतन्नहं जनस्थाने निपतितं 'जटायुषमाशङ्के कथंचित् अजानाम् । सार्धश्लोक एकान्वयी ॥ १५ ॥

रा० टी०–अहमिति । विन्ध्ये पतितः अत एव जडीकृतः राज्यादिहीनोऽहं मर्तुमेव इच्छन् गिरेः शिखरात् पतिष्ये । सार्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

गो० टी०–पक्षाभ्यामिति । प्रमादात्सूर्यो धक्ष्यतीति बुद्धयवधानाभावात् ॥ १५–१७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

१] ति० टी०–एवमिति ॥ १ ॥

रा० टी०–संपातिवृत्तान्तनिवेदनानन्तरकालिकं वृत्तान्तमाह–एवमित्यादिभिः । मुनिश्रेष्ठमेवमुक्त्वा भृशदुःखितोऽहमरुदम् । अथ मद्रोदनदर्शनानन्तरं मुहूर्तं ध्यात्वा भगवान् अतिसमर्थो मुनिरिदमब्रवीत् ॥ १ ॥

१ रविः समवेति गो. पाठः । २ तुल्य इति गो. पाठः । ३ दह्यते इति गो. पाठः । ४ राज्येनेति गो. पाठः ।

पक्षौ च ते प्रपक्षौ च पुनरन्यौ भविष्यतः । चक्षुषी चैव प्राणाश्च विक्रमश्च बलं च ते ॥ २ ॥
पुराणे सुमहत्कार्यं भविष्यं हि मया श्रुतम् । दृष्टं मे तपसा चैव श्रुत्वा च विदितं मम ॥ ३ ॥
राजा दशरथो नाम कश्चिदिक्ष्वाकुवर्धनः । तस्य पुत्रो महातेजा रामो नाम भविष्यति ॥ ४ ॥
अरण्यं च सह भ्रात्रा लक्ष्मणेन गमिष्यति । तस्मिन्नर्थे नियुक्तः सन्पित्रा सत्यपराक्रमः ॥ ५ ॥
नैर्ऋतो रावणो नाम तस्य भार्यां हरिष्यति । राक्षसेन्द्रो जनस्थाने अवध्यः सुरदानवैः ॥ ६ ॥
सा च कामैः प्रलोभ्यन्ती भक्ष्यैर्भोज्यैश्च मैथिली। न भोक्ष्यति महाभागा दुःखमग्ना यशस्विनी ॥ ७ ॥
परमान्नं च वैदेह्या ज्ञात्वा दास्यति वासवः । यदन्नममृतप्रख्यं सुराणामपि दुर्लभम् ॥ ८ ॥
तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति । अग्रमुद्धृत्य रामाय भूतले निर्वपिष्यति ॥ ९ ॥
यदि जीवति मे भर्ता लक्ष्मणो वाऽपि देवरः । देवत्वं गच्छतोर्वाऽपि तयोरन्नमिदं त्विति ॥ १० ॥

गो० टी०–एवमुक्त्वेत्यादि ॥ १–४ ॥

२] ति० टी०–पक्षप्रपक्षौ सूक्ष्मपक्ष्महापक्षौ प्राणाः पुष्टप्राणाः । चक्षुषी उद्भूतशक्तिके ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–पक्षाविति । प्रपक्षौ तवात्यन्तस्वीकारविषयौ अन्यौ पक्षौ चक्षुषी च भविष्यतः प्राणादयश्च भविष्यन्ति भविष्यत इत्यस्य वचनविपरिणामेनान्यत्राप्यन्वयः ॥ २ ॥

३] ति० टी०–पुराणे नारदादिभिरुच्यमाने भविष्यरामचरितरूपे पुराणे श्रुत्वा विदितं तपसा दृष्टं च ॥ ३ ॥

रा० टी०–तत्र गमकमाह–पुराण इति । भविष्यं भविष्यत्कालिकं सुमहत् अत्यधिकं कार्यं मया श्रुतं श्रुत्वा च विदितं निश्चितं तपसा तपोबलेन दृष्टं साक्षात्कृतम् ॥ ३ ॥

४] ति० टी०–किं तत्राह—राजेत्यादि ॥ ४ ॥

रा० टी०–ननु किं तन्महत्कार्यमित्यत आह–राजेत्यादिभिः । दशरथो नाम कश्चिद्राजा भविष्यति तस्य पुत्रः रामो भविष्यति ॥ ४ ॥

५–६] ति० टी०–तस्मिन्नर्थेऽरण्यगमनरूपे ॥ ५ ॥ ६ ॥

रा० टी०–अरण्यमिति । सत्यपराक्रमो रामः तस्मिन् वनगमनरूपे अर्थे नियुक्तः सन् अरण्यं गमिष्यति ॥ ५ ॥

रा० टी०–नैर्ऋत इति । नैर्ऋतो निर्ऋतिकुलोद्भवः सुरदानवैरवध्यः रावणो नाम राक्षसेन्द्रः तस्य रामस्य भार्यां हरिष्यति ॥ ६ ॥

गो० टी०–अरण्यमिति । अस्मिन्नर्थे अरण्यगमने ॥ ५ ॥ ६ ॥

७] ति० टी०–प्रलोभ्यन्ती प्रलोभ्यमाना ॥ ७ ॥

रा० टी०–सेति । कामैः अन्येच्छाविषयभूतैः भक्ष्यैर्भोज्यैश्च प्रलोभ्यन्ती रावणेन प्रलोभ्यमाना दुःखमग्ना सा रामभार्या न भोक्ष्यति भोक्ष्यते ॥ ७ ॥

गो० टी०–सा चेति । काम्यन्त इति कामैः अपेक्षणीयैः प्रलोभ्यन्ती प्रलोभ्यमाना ॥ ७ ॥

८] ति० टी०–परमान्नं पायसम् ज्ञात्वा निराहारतामिति शेषः वासवो दास्यति स्वपुरुषद्वारेति शेषः ॥ ८ ॥

रा० टी०–परमेति । वासव इन्द्रः ज्ञात्वा रावणवृत्तं वैदेही न भुङ्क्ते इति विज्ञाय सुराणामपि दुर्लभम् अमृतप्रख्यं यदन्नं तत्परमान्नं पायसं वैदेह्याः वैदेह्यै दास्यति ॥ ८ ॥

गो० टी०–परमान्नमिति । ज्ञात्वा अनशनामिति शेषः ॥ ८–१३ ॥

९] ति० टी०–इन्द्रादिन्द्रपुरुषात्, न तु रावणपुरुषादिति विज्ञायाभूतलस्पर्शित्वादिरूपैर्देवचिह्नैः राम आगत्यैनं हत्वा त्वां नयिष्यति । संवत्सरतृप्तिकरमिदमन्नं भुक्त्वा देवकार्यसिद्धये मनुष्यभावं धृतवत्या प्राणा धर्तव्याः । 'दैवैरपि मनुष्यभावे आहारं विना जीवितुं न शक्यते' इत्यादिवचनैश्च निश्चित्येत्यर्थः । निर्वपिष्यति दास्यति । ननु त्रेतायामस्थिप्राणवासस्योक्तत्वाज्जीवितुं शक्यत एवेति चेन्न, तथा सत्यपि क्षीणतायां देहवैरूप्ये रावणस्यानुरागभङ्गेन तत्पुण्याक्षये तस्य वधो न स्यादिति रूपलावण्यायहानाय तद्दानेनादोषात् । रावणस्य तु तथैव रूपादिदर्शनेन महताहारायग्रहणेऽपि वन्यफलादीन्याहारं करोतीति बुद्ध्या तस्यां नामनुष्यत्वनिश्चयः । एतेनाहारं विनाऽपि पूर्वरूपादिसत्त्वज्ञानेन तस्य तस्यामनुष्यत्वबुद्धौ तत्संबन्धाद्रामेऽपि तत्त्वबुद्धौ रामतो रावणवधो न स्यादित्यपास्तम् ॥ ९ ॥

रा० टी०–तदिति । तत् इन्द्रप्रेषितमन्नं मैथिली प्राप्य इदमिन्द्रादागतमिति विज्ञाय अग्रम् अग्रभागमुद्धृत्य रामाय रामं तर्पयितुं भूतले निर्वपिष्यति दास्यति ॥ ९ ॥

१०] ति० टी०–दानमन्त्रः—यदीति । यदि जीवति तदाप्युपतिष्ठतु । कालान्तरे देवत्वं गच्छतोः प्राग्भवतोरप्युपतिष्ठत्विति शेषः ॥ १० ॥

रा० टी०–दानमन्त्रमाह—यदीति । मे भर्ता लक्ष्मणश्च यदि जीवति इहैव प्राणधारणानुकूल्यापारं करोति

१ भविष्यतीति गो. पाठः । २ नन्दन इति गो. पाठः । ३ अस्मिन्निति गो. पाठः । ४ जनस्थानादिनि गो. पाठः । ५ दुःखे मग्नेति गो. पाठः ।

एष्यन्ति [1]प्रेषितास्तत्र रामदूताः प्लवङ्गमाः । आख्येया राममहिषी त्वया तेभ्यो विहङ्गम ॥ ११ ॥
सर्वथा तु न गन्तव्यमीदृशः क्व गमिष्यसि । देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे ॥ १२ ॥
[2]उत्सहेयमहं कर्तुमद्यैव त्वां सपक्षकम् । इहस्थस्त्वं हि लोकानां हितं कार्यं करिष्यसि ॥ १३ ॥
त्वयाऽपि खलु तत्कार्यं तयोश्च नृपपुत्रयोः । ब्राह्मणानां [3]गुरूणां च मुनीनां वासवस्य च ॥ १४ ॥
इच्छाम्यहमपि द्रष्टुं भ्रातरौ रामलक्ष्मणौ । नेच्छे चिरं धारयितुं प्राणांस्त्यक्ष्ये कलेवरम् ॥
महर्षिस्त्वब्रवीदेवं दृष्टतत्त्वार्थदर्शनः ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।

एव वानरैः सम सभाषमाणस्यैव सपातेः शरीरं मनोज्ञाः पक्षाङ्कुरा समुदबृहन् । तद्वीक्ष्य कपिभ्यः प्रदर्शयन्प्राप्तामोदः सपातिः स्वपक्षत्यङ्कुरान्निदर्शनीकृत्यैवमेव भवत्कार्य सेत्स्यतीत्याश्वासयन्पक्षपरीक्षणायाकाशे उत्पपात । प्राप्तोत्साहाः कपयोऽपि दक्षिणाशामनु प्रतस्थिरे ।

एतैरन्यैश्च बहुभिर्वाक्यैर्[4]वाक्यविशारदः । मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स स्वमालयम् ॥ १ ॥

तर्हि इहैव तयोः इदमन्नं प्राप्नुयादिति शेषः, देवत्वं नित्यविहारवत्साकेतं गच्छतोर्वा इदमन्नं प्राप्नुयात् ॥ १० ॥

११] ति० टी०—तत्र लङ्कायाम् । गन्तुमेष्यन्त्यागमिष्यन्ति इहेति शेषः ॥ ११ ॥

१२] ति० टी०—न गन्तव्यम् इमं देशं विहायेति शेषः॥१२॥

रा० टी०—एष्यन्तीति । विहङ्गम हे संपाते ! प्रेषिताः रामदूताः प्लवङ्गमाः एष्यन्ति अतः तेभ्यः राममहिषी त्वया आख्येया बोधितव्या तत्र तस्मिन्काले त्वं स्वपक्षौ प्रतिपत्स्यसे प्राप्स्यसि अतः देशकालौ प्रतीक्षस्व ईदृशः पक्षादिहीनस्त्वं क्व गमिष्यसि ते गमनयोग्यो देशो नास्तीत्यर्थः । अतः सर्वथा त्वया न गन्तव्यम् । श्लोकद्वयमेकान्वयि ॥११॥१२॥

१३] ति० टी०—उत्सहेयम् यदि त्वया देवकार्यायेह स्थातव्यं स्यादिति शेषः । पक्षवत्त्वे हि चापल्याद्गन्तव्यमेवेतोऽन्यत्र त्वयेति भावः ॥ १३ ॥

रा० टी०—उत्सहेयमिति । यद्यपि त्वां सपक्षकं कर्तुम् अद्यैव उत्सहेयं तथापि न करोमीति शेषः । तत्र हेतुः—इहस्थस्त्वं लोकानां हितं सीताद्दृत्तान्तबोधनरूपं कार्यं करिष्यसि एतेन पक्षप्राप्तौ तव निश्चला स्थितिर्न भवितेति सूचितम् ॥१३॥

१४] ति० टी०—लोकानामेवेत्येव न, अपि तु तयोर्नृपपुत्रयोस्तत्कार्यं दूतानां सीताबोधनरूपं त्वयाऽपि कार्यं तवापि कर्तुमर्हम् तवापि देवांशत्वेन त्वद्धितमपि तदिति भावः । तत्कार्यस्य लोकसंबन्धित्वं दर्शयति—ब्राह्मणानामिति । तत्कार्यमिति शेषः ॥ १४ ॥

रा० टी०—त्वयेति । नृपपुत्रादीनां तत् हितं त्वयाऽपि कार्यं तेन संपातेः परमसज्जनत्वं सूचितम् ॥ १४ ॥

गो० टी०—त्वयापीति । नृपपुत्रयोः तत्प्रयोजनं त्वयाऽपि कार्यं कर्तव्यम् ब्राह्मणादीनां च कार्यामिति संबन्धः ॥१४॥१५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

१५] ति० टी०—इच्छाम्यहमिति । दृष्टतत्त्वार्थदर्शनो दृष्टं सिद्धं तत्त्वार्थदर्शनं यस्य स महर्षिरेवं भाव्यर्थमब्रवीत्, अतो हेतोरहमपि भ्रातरौ रामलक्ष्मणौ द्रष्टुमिच्छामि । यदि महर्षिरेवं मां प्रति नावक्ष्यत्तदा प्राणांश्चिरं धारयितुं नेच्छे नैच्छम्, अपि तु कलेवरं त्यक्ष्ये इत्येवैच्छमित्यर्थ इति कतकः । अन्ये तु—निशाकरवाक्यमेवेदम्, अहंपदार्थोऽपि स एवेत्याहुः ॥ १५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

रा० टी०—रामदर्शनस्य दुर्लभत्वं बोधयन्नाह—इच्छामीति । रामलक्ष्मणौ द्रष्टुं यद्यप्यहमपीच्छामि तथापि प्राणान् चिरं धारयितुं नेच्छे अतः कलेवरं त्यक्ष्ये । दृष्टे साक्षात्कृते तत्त्वार्थदर्शने ब्रह्मवेदी येन स महर्षिः एवमब्रवीत् । सार्धश्लोक एकान्वयी ॥ १५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

१] ति० टी०—एतैरिति । मां प्रशस्य भाविदेवकार्यसाधकत्वेन स्तुत्वाऽभ्यनुज्ञाप्यामन्त्र्य ॥ १ ॥

रा० टी०—मुनिकर्तृकोपदेशानन्तरकालिकं वृत्तान्तमाह—एतैरित्यादिभिः । वाक्यविशारदो मुनिः एतैरुक्तैः रामकार्यसाधकैः अन्यैश्चैतदुपयोगिभिर्बहुभिर्वाक्यैर्मां प्रशस्य सत्कारपू-

१ अन्वपकास्तस्या इति गो. पाठः । २ नोत्सहेयमिति गो. पाठः । ३ सुराणामिति गो. पाठः । ४ वाक्यविदां वर इति गो. पाठः ।

कन्दरात्तु विसर्पित्वा पर्वतस्य शनैः शनैः । अहं विन्ध्यं समारुह्य भवतः प्रतिपालये ॥ २ ॥
अद्य त्वेतस्य कालस्य वर्षं साग्रशतं गतम् । देशकालप्रतीक्षोऽस्मि हृदि कृत्वा मुनेर्वचः ॥ ३ ॥
महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे । मां निर्दहति संतापो वितर्कैर्बहुभिर्वृतम् ॥ ४ ॥
उदितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये । बुद्धिर्या तेन मे दत्ता प्राणानां रक्षणे मम ॥ ५ ॥
सोऽयं मेऽपनयते दुःखं दीप्तेवाग्निशिखा तमः । बुध्यता च मया वीर्यं रावणस्य दुरात्मनः ॥ ६ ॥
पुत्रः संतर्जितो वाग्भिर्न त्राता मैथिली कथम् । तस्या विलपितं श्रुत्वा तौ च सीताविनाकृतौ ॥ ७ ॥
न मे दशरथस्नेहात्पुत्रेणोत्पादितं प्रियम् । तस्य त्वेवं ब्रुवाणस्य संहतैर्वानरैः सह ॥ ८ ॥
उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम् । स दृष्ट्वा स्वां तनुं पक्षैरुद्भूतैररुणच्छदैः ॥ ९ ॥
प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत् । निशाकरस्य राजर्षेः प्रसादादभितौजसः ॥ १० ॥
आदित्यरश्मिनिर्दग्धौ पक्षौ पुंनरुपस्थितौ । यौवने वर्तमानस्य ममासीद्यः पराक्रमः ॥ ११ ॥
तमेवाद्यावगच्छामि बलं पौरुषमेव च । सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ॥ १२ ॥

र्वकमुक्त्वा अनुज्ञाप्य वृत्तान्तं बोधयितुं नियुज्य च स्वमालयमाश्रमं प्रविष्टोऽभवदिति शेषः ॥ १ ॥

गो० टी०–एतैरित्यादि ॥ १ ॥ २ ॥

२] ति० टी०–पर्वतकन्दरादहं शनैः शनैर्विसर्पित्वा निःसृत्य विन्ध्यं विन्ध्यशिखरम् ॥ २ ॥

रा० टी०–कन्दरादिति । पर्वतस्य कन्दरात् शनैः शनैर्विसर्पित्वा विसर्प्य निर्गत्य विन्ध्यपृष्ठं समारुह्य भवतः दिव्यलोकं प्राप्तस्य मुनेः प्रतिपालये वचनमिति शेषः ॥ २ ॥

३] ति० टी०–एतस्य कालस्य मुनिसंवादानन्तरकालस्य साग्रं वर्षशतं गतम् शतशब्दोऽनन्तवाची तेन किंचिदधिकाष्टवर्षसहस्राणीत्यर्थः, प्राक्तथैव तेनोक्तेः ॥ ३ ॥

रा० टी०–अद्यत्व इति । अद्यत्वे अस्मिन् काले तस्य मुन्युपदिष्टकालस्य साग्रशतं किंचिदधिकशतसंख्याकं वर्षं गतम् अहं तु मुनेर्वचो हृदि कृत्वा देशकालप्रतीक्षोऽस्मि । अत्र पूर्वोक्तानुरोधेन शतशब्दस्य अनन्तवाचकत्वं स्वीकृत्य किंचिदधिकाष्टवर्षसहस्राणीति भट्टैर्व्याख्यातम् ॥ ३ ॥

गो० टी०–अद्य त्विति । पूर्वं निशाकरमुनिप्रयाणानन्तरम् अष्टौ वर्षसहस्राणि व्यतीतानीत्युक्तवान् अतः साग्रं वर्षशतं गतमित्येतदष्टवर्षसहस्रोपलक्षणम् ॥ ३ ॥

४] ति० टी०–वितर्कैर्विचारैः । संतापः पक्षादिहीनजीवनजः ॥ ४ ॥

रा० टी०–महेति । महाप्रस्थानं पुनरावृत्तिरहितयात्रामासाद्य प्राप्य निशाकरे स्वर्गते सति बहुभिरनेकविधैः वितर्कैः रामकार्यसाधनविषयकविचारैर्वृतं मां संतापो मुनिवियोगजनितखेदो दहति ॥ ४ ॥

गो० टी०–महाप्रस्थानमिति । वितर्कैः विविधविचारैः ॥ ४—८ ॥

५] ति० टी०–निवर्तये स्मेति शेषः । मम प्राणानां रक्षणे तेन या मे बुद्धिर्दत्तेत्यन्वयः ॥ ५ ॥

रा० टी०–उदितामिति । मरणे उदितां उत्थितां बुद्धिं मुनिवाक्यैः निवर्तये । अर्थं पृथक् । बुद्धिरिति । मम प्राणानां रक्षणे रक्षणार्थं मुनिना या बुद्धिर्मह्यं दत्ता सा तमोन्धकारदीप्ताग्निशिखेव मे दुःखमपनयते दूरीकरोति । अर्धद्वयमेकान्वयि ॥ ५ ॥

६] ति० टी०–रावणस्य वीर्यं बुध्यता मत्पुत्रवीर्यादल्पमिति जानता ॥ ६ ॥

रा० टी०–बुध्यतेति । रावणस्य वीर्यं बुध्यता मया मैथिली त्वया कथं न त्रातेत्यादिभिर्वाग्भिः पुत्रो मया संतर्जितः एतेन स्वपुत्रबलापेक्षया रावणबलस्याल्पत्वं व्यञ्जितम्, तेन भवद्भिर्न भेतव्यमिति सूचितम् ॥ ६ ॥

७] ति० टी०–कथं न त्रातेति संतर्जितः । ननु सीतेत्यज्ञानादरक्षणमत आह–तस्या इति । हा राम ! हा लक्ष्मणेत्येवमात्मकं तस्या विलपितं श्रुत्वा तौ रामलक्ष्मणौ सीताविनाकृताविति सिद्धानां वचः श्रुत्वाऽनया विना कृतौ रामलक्ष्मणाविति सज्ञानम् एषा रामपत्नीति च सज्ञानमिति भावः ॥७॥

रा० टी०–स्वपश्चात्तापमाह–तस्या इति । तस्याः सीताया विलपितं श्रुत्वा तौ रामलक्ष्मणौ सीताविनाकृतौ श्रुत्वा सिद्धानां वचनादवगत्य मे दशरथस्नेहात् दशरथस्नेहं संस्मृत्य पुत्रेण मे प्रियं मैथिलीत्राणजनितप्रीतिः नोत्पादितमिति संतप्तामीति शेषः ॥ ७ ॥

८] ति० टी०–तस्मादशरथस्नेहादवश्यकर्तव्यं प्रियं मे पुत्रेण नोत्पादितम् ॥ ८ ॥

रा० टी०–तस्येति । तदा तद्वचनकथनावसरे वनचारिणां समक्षं संहतैः संघीभूतैर्वानरैः सह एवं ब्रुवाणस्य संपातेः पक्षौ उत्पेततुः आरुरुहतुः ॥ ८ ॥

९–१२] ति० टी०–अरुणच्छदैररुणवर्णपत्रैः ॥९–१२॥

रा० टी०–स इति । अरुणच्छदैः आरुण्यात्तै रक्तैरित्यर्थः,

---

१ साग्रं वर्षशतमिति गो. पाठः । २ रक्षणाय त्विति गो. पाठः । ३ अर्धमेतत् रा. नास्ति । ४ विनाकृताविति गो. पाठः । ५ संपाते इति गो. पाठः । ६ ऋषेर्निशाकरस्येव प्रभावादमितात्मन इति गो. पाठः । ७ मे पुनरुत्थितावितिगो. पाठः । ८ अन्विति गो. पाठः ।

पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः । इत्युक्त्वा तान्हरीन्सर्वान्संपातिः पतगोत्तमः ॥ १३ ॥
उत्पपात गिरेः शृङ्गाज्जिज्ञासुः खगमो गतिम् । तस्य तद्वचनं श्रुत्वा प्रीतिसंहृष्टमानसाः ॥
बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः ॥ १४ ॥
अथ पवनसमानविक्रमाः प्लवगवराः प्रतिलब्धपौरुषाः ।
अभिजिदभिमुखां दिशं ययुर्जनकसुतापरिमार्गणोन्मुखाः ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ।

दुस्तरसागरदर्शनेन विषीदतः वानरवीरानङ्गदोऽस्ति कस्यापि योजनशतविस्तीर्णसमुद्रलङ्घनसामर्थ्यमिति पप्रच्छ । अप्राप्तोत्तरश्च तत्पराक्रमप्रशंसापूर्वकं स्वस्योल्लङ्घनसामर्थ्यं वर्णयितुं प्रोत्साहयति ।

आख्याता गृध्रराजेन समुत्प्लुत्य प्लवङ्गमाः । संगताः प्रीतिसंयुक्ता विनेदुः सिंहविक्रमाः ॥ १ ॥
संपातेर्वचनं श्रुत्वा हरयो रावणक्षयम् । हृष्टाः सागरमाजग्मुः सीतादर्शनकाङ्क्षिणः ॥ २ ॥

उद्गतैः पक्षैः उपलक्षितां त्वां तदं दृष्ट्वा अतुलं प्रहर्षं लेभे वानरान् अब्रवीच्च ॥ ९ ॥

रा० टी०–तद्वचनाकारमाह–निशाकरस्येति । निशाकरस्य प्रसादात् दग्धौ पक्षौ पुनरुपस्थितौ यौवने वर्तमानस्य मम यः पराक्रम आसीत् तं बलं पौरुषं च अवगच्छामि प्राप्नोमि । अर्धचतुष्टयमेकान्वयि ॥ १० ॥ ११ ॥

रा० टी०–सर्वथेति । अयं मम पक्षलाभः वो युष्माकं सिद्धिप्रत्ययकारकः सिद्धिविषयकविश्वाससंपादकः अतः सर्वथा यत्नः क्रियतां सीतामधिगमिष्यथ ॥ १२ ॥

गो० टी०–स दृष्ट्वेति । अरुणच्छदैः अरुणबर्हिष्पत्रैः ॥ ९—१४ ॥

१३] ति० टी०–सिद्धिप्रत्ययः कार्यसिद्धिविश्वासः ॥१३॥

रा० टी०–इतीति । संपातिरिति हरीन् वानरान्कृत्वा खगमः पक्षिणो गतिं पूर्ववद्गमनं जिज्ञासुः सन् गिरेः शृङ्गात् उत्पपात उड्डिड्ये ॥ १३ ॥

१४] ति० टी०–गतिं जिज्ञासुरुत्थितपक्षैः प्राग्वत्खगतिं विज्ञातुमिच्छुः विक्रमसाध्येऽभ्युदये सीताधिगमनरूप उन्मुखाः १४

रा० टी०–तस्येति । तस्य संपातेः तद्वचनं श्रुत्वा प्रतिसंहृष्टमानसाः हरिशार्दूलाः विक्रमाभ्युदयोन्मुखाः विक्रमकारणीभूताभ्युदयविशिष्टाः बभूवुः ॥ १४ ॥

१५] ति० टी०–प्रतिलब्धं प्राप्तं पौरुषं पौरुषप्रवृत्तिकालो यैस्ते । अभिजिदभिमुखामभिजिन्नक्षत्रसंमुखां दिशं दक्षिणाम् । यद्वाभिजित् बाहुलकात्कर्मणि क्विप् । अभिजेतव्यो रावणः संमुखो यस्यां तां दिशम् ॥ १५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः ॥६३॥

रा० टी०–अथेति । प्रतिलब्धपौरुषाः सीतावृत्तान्तश्रवणेन प्राप्तस्वस्वबलाः पवनसमानविक्रमा वायुवेगाः अत एव जनकसुतापरिमार्गणोन्मुखाः प्लवङ्गवराः अभिजित् रामकर्तृकसर्वराक्षसविजयः अभिमुखः संमुखं प्रचलितो यां तां दक्षिणां दिशं ययुः ॥ १५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–अथेति । अभिजिदभिमुखाः अभिजिन्मुहूर्तप्रतीक्षकाः ॥ १५ ॥

एवं प्रक्षिप्ताः पञ्च सर्गा गताः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

१] ति० टी०–आख्याता आख्यातसीतावृत्तान्ताः । संगता मिलिताः ॥ १ ॥

रा० टी०–वानराणां वृत्तान्तमाह–आख्याता इत्यादिभिः । गृध्रराजेन आख्याताः उक्तसीतावृत्तान्ताः अत एव प्रीतिसंयुक्ताः सङ्गताः संघीभूताः प्लवङ्गमाः समुत्प्लुत्य विनेदुः हर्षसूचकस्वजातीयशब्दं चक्रुः ॥ १ ॥

गो० टी०–एवं कृतोदर्कं संपातिं स्वस्थानमानीय प्रकृतकार्याय वानरा गता इत्याह—आख्याता इति । समुत्प्लुत्य हर्षेण तत्र लङ्घनं कृत्वा संगम्य पुनरन्योन्यं समेत्य विनेदुः॥१॥

२] ति० टी०–रावणक्षयं रावणनाशं रावणगृहं चोरिश्योक्तं वचनं श्रुत्वा ॥ २ ॥

रा० टी०–सम्पातेरिति । रावणस्य क्षयं विनाशगृहोभयविशिष्टं संपातेर्वचनं श्रुत्वा सीतादर्शनकाङ्क्षिणो हरयः सागरमाजग्मुः ॥ २ ॥

१ स इति गो. पाठः । २ प्रीतिसंहृष्टेति गो. पाठः । ३ समुत्प्लुत्येति गो. पाठः । ४ संगम्येति गो. पाठः ।

अभिगम्य तु तं देशं ददृशुर्भीमविक्रमाः । कृत्स्नं लोकस्य महतः प्रतिबिम्बमवस्थितम् ॥ ३ ॥
दक्षिणस्य समुद्रस्य समासाद्योत्तरां दिशम् । संनिवेशं ततश्चक्रुर्हरिवीरा महाबलाः ॥ ४ ॥
[सत्त्वैर्महद्भिर्विकृतैः क्रीडद्भिर्विविधैर्जले । व्यत्यस्तैः सुमहाकायैरूर्मिभिश्च समाकुलम्]
प्रसुप्तमिव चान्यत्र क्रीडन्तमिव चान्यतः । क्वचित्पर्वतमात्रैश्च जलराशिभिरावृतम् ॥ ५ ॥
संकुलं दानवेन्द्रैश्च पातालतलवासिभिः । रोमहर्षकरं दृष्ट्वा विषेदुः कपिकुञ्जराः ॥ ६ ॥
आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः । विषेदुः सहिताः सर्वे कथं कार्यमिति ब्रुवन् ॥ ७ ॥
विषण्णां वाहिनीं दृष्ट्वा सागरस्य निरीक्षणात् । आश्वासयामास हरीन्भयार्तान्हरिसत्तमः ॥ ८ ॥
[तान्विषादेन महता विषण्णान्वानरर्षभान् । उवाच मतिमान्काले वालिसूनुर्महाबलः ॥]
न विषादे मनः कार्यं विषादो दोषवत्तरः । विषादो हन्ति पुरुषं बालं क्रुद्ध इवोरगः ॥ ९ ॥
यो विषादं प्रसहते विक्रमे समुपस्थिते । तेजसा तस्य हीनस्य पुरुषार्थो न सिध्यति ॥ १० ॥
तस्यां रात्र्यां व्यतीतायामङ्गदो वानरैः सह । हरिवृद्धैः समागम्य पुनर्मन्त्रममन्त्रयत् ॥ ११ ॥
सा वानराणां ध्वजिनी परिवार्याङ्गदं बभौ । वासवं परिवार्येव मरुतां वाहिनी स्थितम् ॥ १२ ॥
कोऽन्यस्तां वानरीं सेनां शक्तः स्तम्भयितुं भवेत् । अन्यत्र वालितनयादन्यत्र च हनूमतः ॥ १३ ॥

गो० टी०–संपातेरिति । हरयः संपातेर्वचनं श्रुत्वा सीतादर्शनकाङ्क्षिणः सन्तः रावणक्षयं रावणनिलयभूतं लङ्काद्वीपमुद्दिश्य सागरं तन्मार्गभूतं सागरम् आजग्मुरिति संबन्धः ॥ २ ॥

३] ति० टी०–तं देशं सागरतीररूपं देशमभिगम्य । यत्रेत्यादिः । यत्र महतो लोकस्य सचन्द्रार्कग्रहस्य कृत्स्नं प्रतिबिम्बं स्थितं तं समुद्रं ददृशुः । 'प्रतिबिम्बमवस्थितम्' इति प्राचीनः पाठः । 'प्रतिबिम्बमिव स्थितम्' इत्याधुनिकपाठो न युक्तः कृत्स्नलोकप्रतिबिम्बभावाप्रसिद्धेः ॥ ३ ॥

रा० टी०–अभीति । तत्प्रसिद्धं देशं समुद्रतीरमभिगम्य महतो लोकस्यालोककारणीभूतस्य सूर्यचन्द्रादेः कृत्स्नं प्रतिबिम्बं यत्रावस्थितमेव तं समुद्रं भीमविक्रमाः वानराः ददृशुः इव एवार्थे ॥ ३ ॥

गो० टी०–अभिक्रम्येति । प्रतिबिम्बमिव प्रतिनिधिमिव । इदं तटविशेषणं सर्वलोकस्थसमस्तवस्तुसंपूर्णमित्यर्थः । 'प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात् ॥' इत्यमरः ॥ ३ ॥

४] ति० टी०–तस्य च दक्षिणसमुद्रस्योत्तरां दिशमाश्रित्य संनिवेशमवस्थितिस्थलं चक्रुः ॥ ४ ॥

रा० टी०–दक्षिणस्येति । दक्षिणस्य समुद्रस्य उत्तरां दिशमासाद्य प्राप्य ततस्तत्र संनिवेशमुपवेशनस्थानं हरिवीराः चक्रुः ॥ ४ ॥

गो० टी०–दक्षिणस्येति । सन्निवेशं स्थानम् ॥ ४ ॥

५-६] ति० टी०–प्रसुप्तमिव चान्यत्र निस्तरङ्गप्रदेशे । अन्यतोऽन्यत्र पर्वतमात्रैस्तत्तद्गृहैर्जलराशिभिरूर्मिभिः ॥५॥६॥

रा० टी०–प्रसुप्तमिति । क्वचित्तरङ्गाभावस्थले प्रसुप्तं निश्चलत्वात् प्रसुप्तसदृशम् अन्यत्र अल्पतरङ्गस्थले क्रीडन्तमिव क्वाचन्महातरङ्गस्थले पर्वतमात्रैः गिरिपरिमितैः जलराशिभिरावृतं दानवेन्द्रैः संकुलम् अत एव रोमहर्षकरं सागरमिति शेषः, कपिकुञ्जराः दृष्ट्वा विषेदुः विषादं प्राप्नुवन् । श्लोकद्वयमेकान्वयि ५-६

गो० टी०–सत्त्वैरित्यादि । विषादेन विषादकारणेन । विषादोऽयं प्रसहते अभिभवति । न सिद्धयतीत्यनन्तरम् इतिकरणं बोध्यम् ॥ ५-२२ ॥

७] ति० टी०–ब्रुवन्नब्रुवन् ॥ ७ ॥

रा० टी०–आकाशमिति । वानराः आकाशमिव दुष्पारं दानवेन्द्रादिरूपविघ्नवत्त्वेन तरितुमशक्यं सागरं प्रेक्ष्य विषेदुः कार्यं सीतान्वेषणं कथं सिध्येदिति शेषः, इति ब्रुवन् अब्रुवंश्च ॥ ७ ॥

८] ति० टी०–हरिसत्तमोऽङ्गदः ॥ ८ ॥

रा० टी०–विषण्णामिति । वाहिनीं वानरसेनां सागरस्य निरीक्षणात् विषण्णां दृष्ट्वा भयार्तान् हरीन् यूथपाश्च हरिसत्तमोऽङ्गद आश्वासयामास ॥ ८ ॥

९] ति० टी०–विषादो दोषवत्तर इत्यस्य विवरणम्—विषादो हन्तीत्यादि ॥ ९ ॥

रा० टी०–आश्वासनप्रकारमाह–नेति । विषादः दोषवत्तरः अतिदोषवान् भवतीति शेषः, अत एव बाल क्रुद्धमुरग इव विषादः पुरुषं हन्ति अतः विषादे मनो न कार्यम् ॥ ९ ॥

१०-१३] ति० टी०–विषादं प्रसहते प्रसह्य विषादे प्रवर्तते । तेजसा हीनस्य विषादवशादिति भावः ॥ १०-१३ ॥

रा० टी०–य इति । विक्रमे पराक्रमसमये यो विषादं प्रसहते आश्रयते तेजसा हीनस्य तस्य पुरुषार्थो न सिध्यति १०

१ क्रम्येति गो. पाठः । २ इवेति गो. रा. पाठः । ३ श्लोकोऽयमधिकः गो. पाठे । ४ सहमेति गो. पाठः । ५ अधिकोऽयं श्लोकः गो. पाठे । ६ तम इति गो. पाठः । ७ विषादो यमिति गो. पाठः । ८ स्थितेति गो. रा. पाठः ।

ततस्तान्हरिवृद्धांश्च तच्च सैन्यमरिन्दमः । अनुमान्याङ्गदः श्रीमान्वाक्यमर्थवदब्रवीत् ॥ १४ ॥
क इदानीं महातेजा लङ्घयिष्यति सागरम् । कः करिष्यति सुग्रीवं सत्यसंधमरिन्दमम् ॥ १५ ॥
को वीरो योजनशतं लङ्घयेत प्लवङ्गमः । इमांश्च यूथपान्सर्वान्मोचयेत्को महाभयात् ॥ १६ ॥
कस्य प्रसादाद्दारांश्च पुत्रांश्चैव गृहाणि च । इतो निवृत्ताः पश्येम सिद्धार्थाः सुखिनो वयम् ॥ १७ ॥
कस्य प्रसादाद्रामं च लक्ष्मणं च महाबलम् । अभिगच्छेम संहृष्टाः सुग्रीवं च वनौकसम् ॥ १८ ॥
यदि कश्चित्समर्थो वः सागरप्लवने हरिः । स ददात्विह नः शीघ्रं पुण्यामभयदक्षिणाम् ॥ १९ ॥
अङ्गदस्य वचः श्रुत्वा न कश्चित्किंचिदब्रवीत् । स्तिमितेवाभवत्सर्वा सा तत्र हरिवाहिनी ॥ २० ॥
पुनरेवाङ्गदः प्राह तान्हरीन्हरिसत्तमः । सर्वे बलवतां श्रेष्ठा भवन्तो दृढविक्रमाः ॥
व्यपदेशकुले जाताः पूजिताश्चाप्यभीक्ष्णशः ॥ २१ ॥
नहि वो गमने सङ्गः कदाचित्कस्यचिद्भवेत् । ब्रुवध्वं यस्य या शक्तिः प्लवने प्लवगर्षभाः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

रा० टी०–तस्यामिति । रात्र्यां व्यतीतायां सत्यां हरिवृद्धैर्वानरैः सह अङ्गदः समागम्य मन्त्रं सर्वसंमतिम् अमन्त्रयत् अकरोत् ॥ ११ ॥

रा० टी०–सेति । वासवमिन्द्रं परिवार्य मरुतां देवानां स्थिता वाहिनी सेनेव वानराणां ध्वजिनी सेना अङ्गदं परिवार्य बभौ ॥ १२ ॥

रा० टी०–क इति । वालितनयात् अन्यत्र अन्यः हनूमतश्चान्यत्रान्यः कोऽन्यस्तां त्रिविधरचनया संस्थितां वानरीं सेनां स्तम्भयितुं शक्तः समर्थो न भवेत् ॥ १३ ॥

१४] ति० टी०–अनुमान्याभिपूज्य ॥ १४ ॥

रा० टी०–संमतिकरणप्रकारं वर्णयन्नाह–तत इति । ततः ससैन्यसर्ववानरसङ्गमनानन्तरं हरिवृद्धान् तत्सैन्यं च अनुमान्य सत्कृत्य अर्थवद्वाक्यम् अङ्गदोऽब्रवीत् ॥ १४ ॥

१५–२०] ति० टी०–सत्यसंधं सत्या संधा सीताप्रत्यर्पणप्रतिज्ञा यस्य तादृशम् ॥ १५–२० ॥

रा० टी०–तद्वचनाकारमाह–क इत्यादिभिः । को महातेजाः सागरं लङ्घयिष्यति, अत एव सुग्रीवं सत्यसंधं करिष्यति ॥ १५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–क इति । कः प्लवङ्गमः योजनशतं सागरं लङ्घयेत्, अत एव इमान् यूथपान् महाभयात् राजभीतेः को मोचयेत् ॥ १६ ॥

रा० टी०–कस्येति । कस्य प्रसादात् कृपातः सिद्धार्थाः प्राप्तसीतादर्शनाः अत एव सुखिनः वयम् इतो निवृत्ताः सन्तः दारादीन् पश्येम ॥ १७ ॥

रा० टी०–कस्येति । कस्य प्रसादात् रामादीन् अभिगच्छेम ॥ १८ ॥

रा० टी०–यदीति । सागरप्लवने वो युष्माकं मध्ये यदि कश्चित्समर्थः तर्हि अभयदक्षिणां दशतु सागरं तरिष्यामीति वदत्वित्यर्थः ॥ १९ ॥

रा० टी०–अङ्गदस्येति । अङ्गदस्य वचः श्रुत्वा कश्चिद्वानरः किंचिन्नाब्रवीत्, अत एव सर्वा हरिवाहिनी सेना स्तिमिता निश्चलैवाभवत् । इव एवार्थे ॥ २० ॥

२१] ति० टी०–व्यपदेशकुले त्रिगतोऽपदेशः कलङ्को यस्मात्तादृशे कुले । पूजिता राज्ञा महाबलत्वेन सत्कृताः ॥२१॥

२२] ति० टी०–सङ्गः प्रतिबन्धः । ब्रुवध्वं ब्रूध्वम् ॥२२॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः ॥६४॥

रा० टी०–पुनरिति । हरिसत्तमोऽङ्गदः हरीन् पुनः प्राह । तद्वचनाकारमाह–सर्वे भवन्तः दृढः पराभवितुमशक्यः विक्रमो येषाम् अत एव बलवतां श्रेष्ठाः अत एव पूजिताः सर्वैः सत्कृताः व्यपदेश्यकुले जाताः कलङ्करहितवंशे उत्पन्नाः यूयं स्थेति शेषः, अत एव वो युष्माकं मध्ये कस्यचित् कदाचिदपि गमने सङ्गः प्रतिबन्धो न भवेत्, अतः हे प्लवगर्षभाः यस्य वानरस्य या शक्तिस्तां ब्रुवध्वं ब्रूध्वम् । सार्धश्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–पुनरेवेत्यादि । सङ्गः प्रतिहतिः । ब्रुवध्वमित्यार्षो निर्देशः ॥ २३ ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥ ६४ ॥

१ लङ्घयेच्च प्लवङ्गमा इति गो. पाठः । २ मोक्षयेदिति गो. पाठः । ३ प्रभावादिति गो. पाठः । ४ महाबलमिति गो. पाठः । ५ व्यपदेश्येति गो. पाठ । ६ क्वचिदिति गो. पाठः ।

पञ्चषष्टितमः सर्गः ।

अङ्गदपृष्टा गजादयः कपियूथपा एकैकेनोत्तरोत्तरं दशयोजनवृद्धिक्रमेण दशयोजनतो नवतियोजनपर्यन्तां प्लवने स्वस्वशक्तिं न्यवेदयन् । तेनैवपृष्टो जाम्बवान्स्वीयां शतयोजनोल्लङ्घनशक्तिं निवेद्य प्रतिनिवर्तने सशयमदर्शयत् । स्वीयलङ्घननिवर्तनशक्तिं वर्णयन्तं तं भृत्योचितेऽस्मिन्कार्ये न स्वामिना प्रयतितव्यमिति जाम्बवान् निषेधति । गत्यन्तराभावात्पुनः प्रायोपवेशनमेव वरमिति निर्णीय प्रकृतकार्यसाधनेऽङ्गदेन पृष्टो जाम्बवांस्तदङ्गीकृत्य हनुमन्तं प्रवर्तयति ।

अथाङ्गदवचः श्रुत्वा ते सर्वे वानरर्षभाः । स्वं स्वं गतौ समुत्साहमूचुस्तत्र यथाक्रमम् ॥ १ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः । मैन्दश्च द्विविदश्चैव ऋक्षराजो जाम्बवांस्तथा ॥ २ ॥
आबभाषे गजस्तत्र प्लवेयं दशयोजनम् । गवाक्षो योजनान्याह गमिष्यामीति विंशतिम् ॥ ३ ॥
शरभो वानरस्तत्र वानरांस्तानुवाच ह । त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः ॥ ४ ॥
ऋषभो वानरस्तत्र वानरांस्तानुवाच ह । चत्वारिंशद्गमिष्यामि योजनानां न संशयः ॥ ५ ॥
वानरांस्तु महातेजा अब्रवीद्गन्धमादनः । योजनानां गमिष्यामि पञ्चाशत्तु न संशयः ॥ ६ ॥
मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह । योजनानां परं षष्टिमहं प्लवितुमुत्सहे ॥ ७ ॥
ततस्तत्र महातेजा द्विविदः प्रत्यभाषत । गमिष्यामि न संदेहः सप्ततिं योजनान्यहम् ॥ ८ ॥
सुषेणस्तु महातेजाः सत्त्ववान्कपिसत्तमः । अशीतिं प्रतिजानेऽहं योजनानां पराक्रमे ॥ ९ ॥
तेषां कथयतां तत्र सर्वांस्ताननुमान्य च । ततो वृद्धतमस्तेषां जाम्बवान्प्रत्यभाषत ॥ १० ॥
पूर्वमस्माकमप्यासीत्कश्चिद्गतिपराक्रमः । ते वयं वयसः पारमनुप्राप्ताः स्म सांप्रतम् ॥ ११ ॥

१-३] ति० टी०-अथेति ॥ १-३ ॥

रा० टी०-अङ्गदवचनश्रवणानन्तरकालिकं वानरकर्तृकस्वस्वपराक्रमवचनमुपक्रमते-अथेति । अङ्गदवचः श्रुत्वा गजादयः सर्वे वानरर्षभाः गतौ गमने स्वस्वं सप्तुत्साहं यथाक्रममूचुः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

रा० टी०-गमनोक्तिक्रममाह-आबभाष इत्यादिभिः । तत्र तेषु वानरेषु मध्ये दशयोजनं प्लवेयमेकवारोत्प्लुत्यादशयोजनं स्वभावतो गच्छामीत्यर्थः । गजः तन्नामा आबभाषे एवमुत्तरेष्वप्यर्थो बोध्यः ॥ ३ ॥

गो० टी०-ततोऽङ्गदवच इत्यादि । गतौ गमनविषये । यद्यपि गजादयोऽपि शतयोजनलङ्घने शक्ताः 'भूतले सागरे वाऽपि शैलेषु च वनेषु च । पातालस्यापि मध्ये वा न ममाच्छिद्यते गतिः ॥' इति सुग्रीवसंनिधौ वानरयूथपैः स्वस्वशक्तेः ख्यापितत्वात् 'नहि वो गमने सङ्गः कदाचित्कस्यचित्क्वचित्' इति पूर्वमङ्गदोक्तेश्च । तथापि रावणाधिष्ठितलङ्काप्रवेशसीतान्वेषणादिकं दुष्करमन्येनेति तत्साधकहनुमत्प्रोत्साहनाय तथोक्तवन्त इति ध्येयम् ॥ १-९ ॥

४-८] ति० टी०-त्रिंशदित्यर्थे त्रिंशतमित्यार्षम् ॥४-८॥

रा० टी०-योजनानां विंशतिं गमिष्यामीति गवाक्ष आह । शरभ इति । त्रिंशतं गमिष्यामीति शरभ आह त्रिंशतमित्यार्षमिति भट्टाः ॥ ४ ॥

रा० टी०-ऋषभ इति । ऋषभः चत्वारिंशत् उवाच ॥५॥

रा० टी०-वानरानिति । गन्धमादनः पञ्चाशत् अब्रवीत् ॥ ६ ॥

रा० टी०-मैन्द इति । मैन्दः षष्टिमाह ॥ ७ ॥

रा० टी०-तत इति । द्विविदः सप्ततिं प्रत्यभाषत ॥ ८ ॥

९] ति० टी०-पराक्रमे गमने ॥ ९ ॥

रा० टी०-सुषेण इति । सुषेणः 'अशीतिं प्रतिजाने' इति प्रत्यभाषतेत्यनुकर्षः ॥ ९ ॥

१०] ति० टी०-वृद्धतमस्तेषामिति निर्धारणे षष्ठी ॥१०॥

रा० टी०-तेषामिति । कथयतां तेषां मध्ये वृद्धतमः जाम्बवान् तान् कथयतः सर्वान् अनुमान्य सत्कृत्य प्रत्यभाषत ॥ १० ॥

गो० टी०-तेषामिति । तेषां कथयतां तेषु कथयत्सु सत्सु ॥ १०-१३ ॥

११] ति० टी०-स्म स्मः इत्यर्थः ॥ ११ ॥

रा० टी०-तत्प्रतिभाषणप्रकारमाह-पूर्वमिति । येषामस्माकं कश्चित् यत्किंचित् परिमितः गतिपराक्रमः पूर्वमासीत् ते वयं वयसः पारं वृद्धत्वमित्यर्थः, अनुप्राप्ताः । एतेन इदानीं गतिपराक्रमस्य अल्पत्वं सूचितम् ॥ ११ ॥

१ तत इति गो. पाठः । २ वानरोत्तमा इति गो. पाठः । ३ सुषेण इति गो.पाठः । ४ गवय इति गो. पाठः । ५ शरभस्तानुवाचाथ वानरान्वानरर्षभ इति गो. पाठः । ६ प्लवङ्गमा इति गो. पाठः । ७ वानर इति गो. पाठः । ८ हरिश्रेष्ठः प्रोक्तवान्कपिसत्तमानिति गो. पाठः । ९ योजनाना तु प्लवेयं प्लवगेश्वरा इति गो. पाठः ।

किं तु नैवं गते शक्यमिदं कार्यमुपेक्षितुम् । यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ ॥ १२ ॥
सांप्रतं[1] कालमस्माकं या गतिस्तां निबोधत । नवतिं योजनानां तु गमिष्यामि न संशयः ॥ १३ ॥
तांश्च[2] सर्वान्हरिश्रेष्ठाञ्जाम्बवानिदमब्रवीत् । न खल्वेतावदेवासीद्गमने मे पराक्रमः ॥ १४ ॥
मया[3] वैरोचने यज्ञे प्रभविष्णुः सनातनः । प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविक्रमः[4] ॥ १५ ॥
स इदानीमहं वृद्धः प्लवने मन्दविक्रमः । यौवने[6] च तदासीन्मे बलमप्रतिमं परम्[7] ॥ १६ ॥
संप्रत्येतावदेवाद्य शक्यं मे गमने स्वतः[8] । नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति ॥ १७ ॥
अथोत्तरमुदारार्थमब्रवीदङ्गदस्तदा । अनुमान्य तदा प्राज्ञो जाम्बवन्तं महाकपिम्[9] ॥ १८ ॥
अहमेतद्गमिष्यामि योजनानां शतं महत् । निवर्तने तु मे शक्तिः स्यान्न वेति न निश्चितम्[10] ॥ १९ ॥
तमुवाच हरिश्रेष्ठं जाम्बवान्वाक्यकोविदः । ज्ञायते गमने शक्तिस्तव हर्यृक्षसत्तम ॥ २० ॥
कामं शतसहस्रं वा नह्येष विधिरुच्यते । योजनानां भवाञ्शक्तो गन्तुं प्रतिनिवर्तितुम् ॥ २१ ॥

१२] ति० टी०–एवंगते कृच्छ्रप्राप्तौ । यदर्थं कृतनिश्चयावस्मत्प्रतिष्ठिततयैतद्विषये कृतनिश्चयौ ॥ १२ ॥

रा० टी०–किमिति । एवमनेन प्रकारेण गते वयसि व्यतीतेऽपि यदर्थमुद्दिश्य कपिराजो रामश्च कृतनिश्चयौ तत्कार्यमुपेक्षितुमनादर्तुं न शक्यम् ॥ १२ ॥

१३-१६] ति० टी०–सांप्रतं कालं संप्रति काले ॥ १३—१६ ॥

रा० टी०–सांप्रतमिति । सांप्रतं कालं संप्रतिकाले या गतिः गमनसामर्थ्यं तां निबोधत । बोध्यमेवाह–योजनानां नवतिं गमिष्यामि ॥ १३ ॥

रा० टी०–तानिति । तान् उक्तस्वगमनपरिमाणान् हरिश्रेष्ठान् जाम्बवानिदमब्रवीत् । तद्वचनाकारमाह–गमने मे पराक्रमः एतावदेव नासीत् अधिक आसीत्, इत्यर्थः ॥ १४ ॥

रा० टी०–तदाधिक्यमेवाह–मयेति । पूर्वं वैरोचने विरोचनसुतानुष्ठिते यज्ञे त्रिविक्रमं शीघ्रं त्रिलोकीगमनवत् यथा भवति तथा क्रममाणः वर्धमानचरणेन सह गच्छन् प्रभविष्णुः सर्वत्र व्याप्तः सनातनो विष्णुः मया प्रदक्षिणीकृतः, एतेन स्वस्याप्रतिहतगमनत्वं सूचितम् ॥ १५ ॥

रा० टी०–स इति । यस्य मे अप्रतिमम् उपमारहितं तद्बलमासीत् सोऽहमिदानीं वृद्धः अत एव प्लवने मन्दविक्रमोऽस्मीति शेषः ॥ १६ ॥

गो० टी०–न खल्वित्यादि । त्रयाणां विक्रमाणां समाहारः त्रिविक्रमम् ॥ १४–१५ ॥

१७-२०] ति० टी०–एतावता प्लवनेन ॥ १७—२० ॥

रा० टी०–संप्रतीति । संप्रति अस्मिन् काले स्वतो गमने एतावत्पूर्वोक्तमेव शक्यं सामर्थ्यमस्तीति शेषः, अतः एतावता अस्य सीतादर्शनरूपस्य कार्यस्य सिद्धिर्न भविष्यति १७

रा० टी०–अथेति । अथानन्तरमुदारार्थं विपुलार्थकम् उत्तरं श्रेष्ठमिदं वचः महाकपिं जाम्बवन्तमनुमान्य अङ्गदोऽब्रवीत् । ऋक्षाणामपि कपिजातिविशेषात् न सामानाधिकरण्यविरोधः । आकपिं कपिमभिव्याप्य महः पूजा यस्येत्यर्थो वा, महांश्चासौ अकपिः कपिसदृशः ऋक्ष इत्यर्थः, तमिति वा ॥१८॥

रा० टी०–तद्वचनाकारमाह–अहमिति । एतत्सागरसंबन्धि योजनानां शतमहं महत्प्रशंसनीयं यथा भवति तथा गमिष्यामि निवर्तने तु मे शक्तिः स्यात् न वा इति न निश्चितम् एतेन स्वकर्तृकराक्षसकर्मकजये संशयो ध्वनितः समुद्रान्तरेषु मध्ये मध्ये गिरिद्वीपानां सत्त्वात् एतादृशभयङ्कारराक्षसैरासेवितत्वाच्च नान्यदिग्गतवानराणामेवं विचार इत्यूह्यम् । किंचेदं स्वस्य वीर्याणां न्यूनत्वेन वर्णनं हनुमत्पराक्रमदर्शनविषयकोत्कटेच्छया बोध्यम् अत एव 'स्वद्वीर्यं द्रष्टुकामा हि सर्वा वानरवाहिनी' इति वक्ष्यमाणजाम्बवद्वाक्यं सानुकूलम् ॥ १९ ॥

रा० टी०–तमिति । वाक्यकोविदो जाम्बवान् तमङ्गदमुवाच । तद्वचनाकारमाह–हे हर्यृक्षसत्तम ! तव गमने शक्तिर्ज्ञायते अस्माभिरिति शेषः ॥ २० ॥

गो० टी०–ज्ञायत इति । हर्यृक्षसत्तमेति ऋक्षत्वं वानरावान्तरजातिः अतः सुग्रीवादेः ऋक्षराजत्वमिति ॥ २० ॥

२१] ति० टी०–काममिति । शतसहस्रमपि योजनानां गन्तुं त्वं कामं समर्थः, तथापि स्वामिनस्तवैष विधिः प्लवनं न युक्तमित्युच्यते, अस्माभिरिति शेषः । इममेवार्थं प्रपञ्चयति—योजनानामिति । शतसहस्रमिति शेषः । गन्तुं प्रतिनिवर्तितुं च शक्त इत्यर्थः ॥ २१ ॥

रा० टी०–ज्ञानमेवाह–काममिति । योजनानां शतसहस्रं शतं सहस्रं वा गन्तुं प्रतिनिवर्तितुं च कामं यथेच्छं भवान् शक्तः तथापि एषः भवन्मात्रोत्प्लवः विधिर्न उच्यते अस्माभिरिति शेषः ॥ २१ ॥

गो० टी०–काममिति । भवान् योजनानां शतं सहस्रं वा गन्तुं प्रतिनिवर्तितुं च कामं शक्तः । एष विधिः भृत्यैः स्वामिप्रस्थापनं नोच्यते न विधीयते ॥ २१ ॥

---

१ कालभेदेनेति गो. पाठः । २ त्विति गो. पाठः । ३ पुनरिति गो. पाठः । ४ महाबलेश्चैव यज्ञे इति गो. पाठः । ५ त्रिविक्रममिति गो. पाठः । ६ यौवनमिति रा पाठ. । ७ परैरिति गो.पाट. । ८ एतावती शक्तिं गमने सर्वथाप्यहमिति गो.पाठः । ९ कपिरिति गो.पाठः । १० निश्चितेति गो.पाठः ।

नहि प्रेषयिता तात स्वामी प्रेष्यः कथंचन । भवताऽयं जनः सर्वः प्रेष्यः प्लवगसत्तम ॥ २२ ॥
भवान्कलत्रमस्माकं स्वामिभावे व्यवस्थितः । स्वामी कलत्रं सैन्यस्य गतिरेषा परंतप ॥ २३ ॥
अपि[1] वै तस्य कार्यस्य भवान्मूलमरिन्दम । तस्मात्[3]कलत्रवत्तात प्रतिपाल्यः[4] सदा भवान् ॥ २४ ॥
मूलमर्थस्य संरक्ष्यमेष कार्यविदां नयः[9] । मूले हि सति सिध्यन्ति गुणाः[10] सर्वे फलोदयाः ॥ २५ ॥
तद्भवानस्य कार्यस्य साधनं सत्यविक्रम । बुद्धिविक्रमसंपन्नो हेतुरत्र[11] परंतप ॥ २६ ॥
गुरुश्च गुरुपुत्रश्च त्वं[12] हि नः कपिसत्तम । भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने ॥ २७ ॥
उक्तवाक्यं महाप्राज्ञं जाम्बवन्तं महाकपिः[13] । प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः ॥ २८ ॥
यदि नाहं गमिष्यामि नान्यो वानरपुङ्गवः[14] । पुनः खल्विदमस्माभिः[15] कार्यं प्रायोपवेशनम् ॥ २९ ॥
नह्यकृत्वा हरिपतेः[16] संदेशं तस्य धीमतः । तत्रापि गत्वा प्राणानां न[17] पश्ये परिरक्षणम् ॥ ३० ॥
स हि प्रसादे चात्यर्थकोपे[18] च हरिरीश्वरः । अतीत्य तस्य संदेशं विनाशो गमने भवेत्[19] ॥ ३१ ॥
तत्तथा[20] ह्यस्य कार्यस्य न भवत्यन्यथा गतिः । तद्भवानेव दृष्टार्थः संचिन्तयितुमर्हति ॥ ३२ ॥
सोऽङ्गदेन तदा वीरः प्रत्युक्तः प्लवगर्षभः । जाम्बवानुत्तमं वाक्यं प्रोवाचेदं ततोऽङ्गदम् ॥ ३३ ॥

२२] ति० टी०–प्रेषयिता स्वामी न प्रेष्यः । प्रेष्यैरिति शेषः ॥ २२ ॥

रा० टी०–विध्यभावमेव द्योतयन्नाह–नहीति । हे तात! प्रेषयिता प्रेषणशीलः स्वामी प्रेष्यः कथंचन न अतः सर्वोऽयं जन एव भवता प्रेष्यः ॥ २२ ॥

गो० टी०–तदेव विवृणोति–नहीति ॥ २२ ॥

२३] ति० टी०–भवान्कलत्रम् । कलत्रवद्दृढस्वीयत्वबुद्ध्या यावत्स्वप्राणबलं परिपाल्य इत्यर्थः । स्वामिभावे स्वामित्वे एतेन लोके कलत्रस्य भर्ता संसारव्यवहारविषये आज्ञाप्यस्तत्प्रभुत्वं च कलत्रस्येति दर्शितम् तस्मात्स्वामी सैन्यस्य कलत्रवत्परिपाल्यः स्वामिना च कलत्रेण भर्त्रेव सैन्यमाज्ञाप्यम् एषा गतिः लोकस्येति शेषः ॥ २३ ॥

रा० टी०–भवानिति । स्वामिभावे स्वामित्वे व्यवस्थितो भवान् अस्माकं कलत्रं जीवत् रक्ष्यः किंचकं सुखं लाति ददाति तदेव त्रं रक्षाकर्तृ सुखदाता त्राता चेत्यर्थः, सामान्ये नपुंसकम् । एवं सैन्यस्य स्वामी सेनाधीशः कलत्रम् अर्थद्वयं पूर्ववत् । एषा गतिः महतां पन्थाः ॥ २३ ॥

गो० टी०–भवानिति । कलत्रं रक्षणीयं वस्तु॥२३–३३॥

२४] ति० टी०–तदेव स्पष्टमाह—तस्मात्कलत्रवदिति ॥ २४ ॥

रा० टी०–अपीति । एतस्य सीतान्वेषणरूपस्य कार्यस्य भवानेव मूलं तस्मादेतोः भवान् कलत्रवत् सदा प्रतिपाल्यः । किंच कलत्रयोः सुखदानऋणयोर्वत् स्थैर्यं यस्मिन् तत्संबोधनम् । वन्ध्यावद्भवयोरैक्यम् ॥ २४ ॥

२५] ति० टी०–नयो निश्चयः । गुणा गुणभूताः अप्रधानभूता इति यावत् । तादृशाः फलोदयाः फलोत्पत्तयः सिध्यन्ति ॥ २५ ॥

रा० टी०–मूलरक्षणे शिष्टाचारं प्रमाणयति–मूलमिति । मूले द्रव्यादौ सति फलोदयाः प्रमोदादिफलप्रापकाः सर्वे गुणाः रूपादयः सिध्यन्ति अतः अर्थस्य कार्यस्य मूलं रक्ष्यमेषः कार्यविदां नयः नीतिः ॥ २५ ॥

२६] ति० टी०–साधनपदस्यैव व्याख्या–हेतुरिति॥२६॥

२७–२८] ति० टी०–गुरुर्युवराजत्वात् ॥ २७ ॥ २८ ॥

रा० टी०–निगमयति–तदिति । बुद्धिविक्रमसंपन्नो गुर्वादिर्भवान् अस्य कार्यस्य साधनं साधयिता अत एव हेतुरस्तीति शेषः, अत एव भवन्तमाश्रित्य अर्थसाधने वयं समर्थाः । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

रा० टी०–उक्तेति । जाम्बवन्तमुत्तरं वाक्यमब्रूत इवाच ॥ २८ ॥

२९] ति० टी०–यद्यहं न गमिष्यामि, अन्यश्च न गमिष्यति, तदा पुनर्मरणमेव ज्याय इति भावः ॥ २९ ॥

रा० टी०–तद्वचनाकारमाह–यदीति । यदि अहं न गमिष्यामि अन्यो वा नरपुङ्गवो वा न गमिष्यति तर्हि अस्माभिः पुनः प्रायोपवेशनं कार्यम् ॥ २९ ॥

३०] ति० टी०–तस्य धीमतो हरिपतेः संदेशमकृत्वा प्राणानां परिरक्षणं न पश्यामि । तत्रापि लङ्कायामपि गत्वा गमनस्याकृत्यभावात्तत्र पश्यामीत्यन्वयः ॥ ३० ॥

रा० टी०–तत्र हेतुमाह–नहीति । हरिपतेः सुग्रीवस्य संदेशमकृत्वा असंसाध्य तत्र सुग्रीवसमीपे गत्वा प्राणानां परिरक्षणं न पश्ये पश्यामि ॥ ३० ॥

३१] ति० टी०–सुग्रीवः प्रसादेऽत्यर्थकोपे चेश्वरः निग्रहानुग्रहाधिकृत इति भावः । गमने किष्किन्धागमने ॥३१॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–स इति । हरिः सुग्रीवः प्रसादे कोपे च ईश्वरः समर्थः तस्य संदेशमतीत्य अकृत्वा गमने सति विनाशो भवेत् ॥ ३१ ॥

३२–३३] ति० टी०–तत्तस्मादस्य कार्यस्य समुद्रलङ्घ-

---

१ एतदार्धर्चं व्याख्यातं गो.पाठे । २ चेति गो.पाठः । ३ यस्मादिति रा.पाठः । ४ पुष्पेति गो.पाठः । ५ हित इति रा.पाठः । ६ कपिमिति रा. पाठः । ७ मान्ये वानरपुङ्गवा इति गो. पाठः । ८ पश्यामीति गो. पाठः । ९ नेति गो. पाठः । १० अत्यर्थमिति गो. रा. पाठः । ११ यथेति गो. पाठः ।

तस्य ते वीरकार्यस्य न किंचित्परिहास्यते । एष संचोदयाम्येनं यः कार्यं साधयिष्यति ॥ ३४ ॥
ततः प्रतीतं प्लवतां वरिष्ठमेकान्तमाश्रित्य सुखोपविष्टम् ।
संचोदयामास हरिप्रवीरो हरिप्रवीरं हनुमन्तमेव ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

जाम्बवान् हनुमन्तं वायोः सकाशादञ्जनायां सभवं हनुमन्नामप्राप्तिकारणं ब्रह्मादिभ्यो वरलाभं च तवेति कथयन्प्रभाववर्णनपूर्वकं कपिकुलविषदपनोदनाय जलधितरणे तं प्रवर्तयति ।

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम् । जाम्बवान्समुदीक्ष्यैवं हनूमन्तमथाब्रवीत् ॥ १ ॥
वीर वानरलोकस्य सर्वशास्त्रविदां वर । तूष्णीमेकान्तमाश्रित्य हनूमन्किं न जल्पसि ॥ २ ॥
हनूमन्हरिराजस्य सुग्रीवस्य समो ह्यसि । रामलक्ष्मणयोश्चापि तेजसा च बलेन च ॥ ३ ॥
अरिष्टनेमिनः पुत्रो वैनतेयो महाबलः । गरुत्मानिव विख्यात उत्तमः सर्वपक्षिणाम् ॥ ४ ॥
बहुशो हि मया दृष्टः सागरे स महाबलः । भुजङ्गानुद्धरन्पक्षी महाबाहुर्महाबलः ॥ ५ ॥

नस्य गतिः प्राप्तिरन्यथा यथा न भवत्यसिद्धा यथा न भवति हि निश्चयेन तथा भवानेव तदुद्दिश्य संचिन्तयितुमर्हति यतो भवान्दृष्टार्थः बुद्धिमत्त्वाच्चिरदृष्टत्वाच्चापरोक्षीकृतसमस्तकृत्याकृत्यतत्त्वार्थ इत्यर्थः ॥ ३२ ॥ ३३ ॥

रा० टी०–तदिति । तत् तस्मात् हेतोः अस्य सीतादर्शनरूपस्य कार्यस्य अन्यथा असिद्धिर्यथा न भवति तथा दृष्टार्थः विज्ञातसकलपदार्थः अत एव गतिराश्रयो भवानेव तत् कर्तव्यं संचिन्तयितुमर्हति ॥ ३२ ॥

रा० टी०–स इति । अङ्गदेन प्रत्युक्तो जाम्बवान् अङ्गदं प्रोवाच ॥ ३३ ॥

३४] ति०टी०–कार्यस्य न परिहास्यते शेषे षष्ठी अनुष्ठानमिति शेषो वा । एषः, एषोऽहमित्यर्थः । एनं तम् ॥ ३४ ॥

रा० टी०–तद्वचनाकारमाह–तस्येति । यस्ते कार्यं साधयिष्यति तमेनं हनुमन्तमेषोऽहं संचोदयामि अतस्ते कार्यस्य किंचिद् अङ्गं न परिहास्यते गमिष्यति नङ्क्ष्यतीत्यर्थः ॥ ३४॥

३५] ति० टी०–एकान्तमाश्रित्येति । यूथाद्गद्दिः क्वचिदिति शेषः ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रा० टी०–तत इति । प्रतीतमतिविश्वस्तं प्लवतां वरिष्ठं हनुमन्तं हरिवीरो जाम्बवान् संचोदयामास ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

गो० टी०–तत इति । प्रतीतं प्रख्यातम् ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

१] ति० टी०–अनेकेति ॥ १ ॥

रा० टी०–हनुमन्तं प्रति जाम्बवतो वचनमेवाह–अनेकेत्यादिभिः । अनेकशतसाहस्रीं हरिवाहिनीं वानरसेनामेवं विषण्णां दुःखितां जाम्बवान् समुदीक्ष्य दृष्ट्वा हनुमन्तमथ मङ्गलमब्रवीत् ॥ १ ॥

गो० टी०–अनेकेत्यादि ॥ १–३ ॥

२] ति० टी०–एवमब्रवीदित्येवंशब्दार्थः—वीर वानरेति । वानरलोकस्य वीरेत्यन्वयः निर्धारणे षष्ठी । यद्वा हे वीर ! वानरलोकस्य कृत्यमुद्दिश्य किं न जल्पसीत्यन्वयः॥ २ ॥

रा० टी०–तद्वचनाकारमाह–वीरेत्यादिभिः । हे वीर ! हनुमन् एकान्तमाश्रित्य तूष्णीं स्थित इति शेषः वानरलोकस्य कल्याणं किं किमर्थं त्वं न जल्पसि कल्याणमित्यध्याहृतम्॥२॥

३] ति० टी०–बलेन च समः इत्यनुकर्षः ॥ ३ ॥

रा० टी०–नन्वहं न तथोग्य इत्यत आह–हनुमन्निति । हे हनुमन् ! त्वं तेजआदिना सुग्रीवादीनां समः सदृशोऽसि ॥३॥

४] ति० टी०–अरिष्टनेमिनः काश्यपस्य नान्तत्वमार्षम् । सर्वपक्षिणामुत्तमो गरुत्मानिव भवान्सर्वोत्तमो विख्यात इत्यन्वयः ॥ ४ ॥

५] ति० टी०–महाबल इत्येकत्र बलं शारीरं परत्रान्तरमिति भेदः ॥ ६ ॥

---

१ हीयते इति गो. पाठः । २ हनुमन्तमिति गो. पाठः । ३ विशारदेति गो. पाठः । ४ हनुमन्निति गो. पाठः । ५ इतीति गो. रा. पाठः । ६ भुजगानिति गो. पाठः । ७ महावेगो महायशा इति गो. पाठः ।

पक्षयोर्यद्बलं तस्य भुजवीर्यबलं तव । विक्रमश्चापि तेजश्च न ते तेनापहीयते ॥ ६ ॥
बलं बुद्धिश्च तेजश्च सत्त्वं च हरिपुङ्गव । विशिष्टं सर्वभूतेषु किमात्मानं न सज्जसे ॥ ७ ॥
अप्सराऽप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला । अञ्जनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८ ॥
विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि । अभिशापादभूत्तात कपित्वे कामरूपिणी ॥ ९ ॥
दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः । [कपित्वे चारुसर्वाङ्गी कदाचित्कामरूपिणी ।]
मानुषं विग्रहं कृत्वा रूपयौवनशालिनी ॥ १० ॥
विचित्रमाल्याभरणा कदाचित्क्षौमधारिणी । अचरत्पर्वतस्याग्रे प्रावृडम्बुदसंनिभे ॥ ११ ॥
तस्या वस्त्रं विशालाक्ष्याः पीतं रक्तदशं शुभम् । स्थितायाः पर्वतस्याग्रे मारुतोऽपहरच्छनैः ॥ १२ ॥
स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ । स्तनौ च पीनौ सहितौ सुजातं चारु चाननम् ॥ १३ ॥

रा० टी०–अरिष्टनेमिन इति । गरुत्मान् इति विख्यातः सर्वपक्षिणामुत्तमः महाबलः अतिबलवान् महाबलः स्वपक्षाभ्यां त्रिलोक्या आच्छादनसमर्थः पक्षी सागरे भुजङ्गान् महासर्पान् उद्धरन् बहुशोऽनेकवारं यो वैनतेयो मया दृष्टः तस्य पक्षयोर्यद्बलं तत् तव भुजवीर्यबलं भुजवीर्यबलसदृशं, तेन हेतुना ते विक्रमस्तेजश्च न अपहीयते केनापि दूरीक्रियते । श्लोकत्रयमेकान्वयि ॥ ४–६ ॥

गो० टी०–अरिष्टनेमिन इति । अरिष्टनेमिनः काश्यपस्य नकारान्तत्वमार्षम् ॥ ४ ॥ ६ ॥

६] ति० टी०–'भुजवीर्यबलं तव' इति प्राचीनपाठे तस्य पक्षयोर्यद्बलं तव च यद्भुजवीर्यबलम् । उभयं तुल्यमिति शेषः । ते विक्रमश्च तेजश्च तेन गरुत्मता नापहीयते न न्यूनो भवति ॥ ६ ॥

गो० टी०–पक्षयोरिति । अत्र समानपदमध्याहार्यम् । विक्रमादिकं तेन गरुत्मता समानं नावहीयते न न्यूनं भवति । तेनेति पञ्चम्यर्थे तृतीया ॥ ६ ॥

७ ति० टी०–विशिष्टमात्मानमभिजनबलपराक्रमवैभवविशिष्टमात्मानं किं न सज्जसे । समुद्यतोद्यमाय किं न सज्जीकरोषीत्यर्थः ॥ ७ ॥

रा० टी०–बलमिति । सर्वभूतेषु सर्वजनबलादिषु मध्ये तव बलादि विशिष्टमधिकमस्तीति शेषः, अतः आत्मानं स्वस्वरूपं किं किमर्थं न सज्जसे स्मरसि ॥ ७ ॥

गो० टी०–बलमिति । विशिष्टं श्रेष्ठम् ॥ ७ ॥

८] ति० टी०–तदेव बोधयति—अप्सराऽप्सरसामिति । अप्सरा इत्येकवचनान्तोऽपि । संधिरार्षः । अप्सरा इत्यावन्त आर्ष इत्यन्ये । पुञ्जिकस्थलेति नाम्ना या विख्याता सैव केसरिणः पत्न्यञ्जनेति नाम्ना ख्याता ॥ ८ ॥

रा० टी०–नन्वं कथं ममैवं बलादिप्राप्तिरित्यत आह–अप्सरा इत्यादिभिः । विख्याता प्रसिद्धा अप्सरसां श्रेष्ठा या पुञ्जिकस्थला अप्सरा सा अञ्जनेति परिख्याता सती केसरिणो हरेर्वानरस्य पत्नी अभवदिति शेषः । अप्सरा अप्सरसामित्यत्रैकत्वं संहिता चात एव निर्देशात् ॥ ८ ॥

गो० टी०–अप्सरेति निर्देश आर्षः ॥ ८–११ ॥

९] ति० टी०–तस्या वानरपत्नीत्वे हेतुः—अभिशापादिति । ऋषिशापाद्वानरीजन्मा । कपित्वे कपिशरीरत्वेऽपीत्यर्थः कामरूपिणी देवतास्वभावाद्यत्तेरिति भावः ॥ ९ ॥

रा० टी०–नन्वं अप्सरःश्रेष्ठा वानरस्य पत्नी कथमभवदित्यत आह–विख्यातेति । रूपेण अप्रतिमा असदृशी अप्सरःश्रेष्ठा अभिशापात् शापवशात् कपित्वे कपिजातौ जाताऽपीति शेषः, कामरूपिणी कथंचित् तदृषिप्रसादवशात् कामरूपधारणसमर्था अभूत् ॥ ९ ॥

१०] ति० टी०–कुत्र तज्जन्मेत्यत्राह—दुहितेति ॥ १० ॥

११] ति० टी०–अम्बुदसंनिभे इति पर्वताग्रविशेषणम् ॥ ११ ॥

रा० टी०–दुहितेति । कुञ्जरस्य तदभिधस्य वानरेन्द्रस्य दुहिता विचित्रमाल्याभरणा क्षौमधारिणी पट्टवस्त्रविशेषधारणशीला अञ्जना कदाचित्कस्मिँश्चित्समये प्रावृडम्बुदसंनिभे प्रावृट्कालिकमेघसदृशे पर्वतस्याग्रे मानुषं विग्रहं देहं कृत्वा अचरत् । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

१२] ति० टी०–रक्ता दशाः प्रान्ततन्तवो यस्य तत् ॥ १२ ॥

रा० टी०–तस्या इति । पर्वतस्याग्रे स्थितायास्तस्याः अञ्जनायाः पीतरक्तदशं पीतरक्ताः दशाः प्रान्तभागा यस्य तत् वस्त्रं मारुतः शनैरपाहरत् स्थानादचालयत् ॥ १२ ॥

गो० टी०–तस्या इति । रक्तदशं रक्ताग्रम् ॥ १२–१४ ॥

१३] ति० टी०–सुसंहतौ सुसंश्लिष्टौ सहितौ परस्परसंलग्नौ पीनौ च स्तनौ ददर्श ॥ १३ ॥

रा० टी०–स इति । सः चालितवस्त्रः पवनः वृत्तौ सुसंहतौ अत्यन्तं संश्लिष्टौ तस्याः ऊरू सहितौ परस्परसंलग्नौ पीनौ स्तनौ च सुजातमाननं मुखं च ददर्श ॥ १३ ॥

---

१ तावद्भुजबलमिति गो. पाठः । २ देवश्रेष्ठेति गो. पाठः । ३ अवेति गो. पाठः । ४ बुध्यस इति गो. पाठः । ५ वानरीति गो. पाठः । ६ अर्धमेतदधिकं गो. पाठे । ७ महार्हक्षौमवासिनीति गो पाठः । ८ पीतरक्तेति रा. पाठः । ९ ऽपाहरदिति रा. पाठः ।

तां बैलादायतश्रोणीं तनुमध्यां यशस्विनीम् । दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः ॥ १४ ॥
स तां भुजाभ्यां दीर्घाभ्यां पर्यष्वजत मारुतः । मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम् ॥ १५ ॥
सा तु तत्रैव संभ्रान्ता सुव्रता वाक्यमब्रवीत् । एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६ ॥
अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत । न त्वां हिंसामि सुश्रोणि माभूत्ते मनसो भयम् ॥ १७ ॥
मनसाऽस्मि गतो यत्त्वां परिष्वज्य यशस्विनि । वीर्यवान्बुद्धिसंपन्नस्तव पुत्रो भविष्यति ॥ १८ ॥
महासत्त्वो महातेजा महाबलपराक्रमः । लङ्घने प्लवने चैव भविष्यति मया समः ॥ १९ ॥
एवमुक्ता ततस्तुष्टा जननी ते महाकपे । गुहायां त्वां महाबाहो प्रजज्ञे प्लवगर्षभ ॥ २० ॥
अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने । फलं चेति जिघृक्षुस्त्वमुत्पत्याभ्युत्पतो दिवम्॥ २१ ॥
शतानि त्रीणि गत्वाथ योजनानां महाकपे । तेजसा तस्य निर्धूतो न विषादं गतस्ततः ॥ २२ ॥

१४] ति०टी०–पवनः काममोहितः आसीदिति शेषः॥१४॥

रा० टी०–तामिति । आयतश्रोणीं दीर्घश्रोणीविशिष्टां तामञ्जनां बलात् दृष्ट्वैव पवनः काममोहितोऽभवदिति शेषः॥१४॥

१५] ति० टी०–मारुतस्तां पर्यष्वजत । मन्मथाविष्टसर्वाङ्गः कामाक्रान्तकृत्स्नज्ञानकर्मेन्द्रियः, अत एव तां गतात्मा तद्गर्भप्रविष्टात्मतेजा बभूव । देवत्वाद्विनापि योनिसंबन्धं निजतेजःप्रवेशनमिति बोध्यम् ॥ १५ ॥

रा० टी०–स इति । मन्मथेन आविष्टं सर्वमङ्गं यस्य अत एव गतः अञ्जनायां संसक्तः आत्मा मनो यस्य स पवनः अनिन्दितां तामञ्जनां भुजाभ्यां पर्यष्वजत ॥ १५ ॥

गो० टी०–स तामिति । तां गतात्मा तद्गतचित्तः तां पर्यष्वजतेति संबन्धः ॥ १५ ॥ १६ ॥

१६] ति० टी०–एकः पतिर्यस्यास्तद्व्रतं तं धर्मम् ॥१६॥

रा० टी०–सेति । तत्र तस्मिन्समये सुवृत्ता शोभनवृत्तविशिष्टा अत एव संभ्रान्ता दुष्कृतकर्मणा उद्विग्नचित्ता सा अञ्जना इदं प्रसिद्धमेकपत्नीव्रतम् एकः पतिर्यस्याः तस्याः मम व्रतं पुरुषान्तरासंस्पर्शनरूपसंकल्पं नाशयितुं विध्वंसितुं क इच्छतीति वाक्यमब्रवीत् ॥ १६ ॥

१७] ति० टी०–त्वां न हिंसामि योनिसंबन्धेन तावकमेकपत्नीव्रतं न नाशयामि । अनेन बलात्परपुरुषेणाङ्गिङ्गनादावपि न पातिव्रत्यभङ्गः, किं तु योनिभोगेनैवेति सूचितम् ॥ १७ ॥

रा० टी०–अञ्जनाया इति । मारुतः प्रत्यभाषत । तद्वचनाकारमाह–हे सुश्रोणि ! त्वामहं न हिंसामि हिनस्मि अधर्माश्रयत्वेन हिंसितप्रायां न करोमीत्यर्थः, अतस्ते मनसो भयं मा भूत् ॥ १७ ॥

गो० टी०–न त्वामिति । न हिंसामि पातिव्रत्यान्न प्रच्यावयामि ॥ १७ ॥

१८] ति० टी०–यस्मात्त्वां परिष्वज्य मनसा मानसभोगेनैव त्वां गतोऽस्मि स्वतेजसा त्वद्गर्भं प्राप्तोऽस्मि, तस्मादीदृशस्ते पुत्रो भविष्यति ॥ १८ ॥

रा० टी०–तत्र गमकमाह–मनसेति । यस्मात् त्वां परिष्वज्य मनसा गतः भोगकर्तृत्वेन प्राप्तः अतः वीर्यवान् बुद्धिसंपन्नः निखिलवृत्तान्तज्ञस्तव पुत्रो भविष्यति । मनसेत्युक्त्या व्रतभङ्गाभावो ध्वनितः ॥ १८ ॥

गो० टी०–न केवलं पातिव्रत्यभङ्गाभावः श्रेयोऽपि भविष्यतीत्याह–वीर्यवानिति ॥ १८—२० ॥

१९] ति० टी०–मया मारुतेन ॥ १९ ॥

रा० टी०–महेति । महासत्त्वादिविशिष्टस्तव सुतः लङ्घनादौ मया समो भविष्यति ॥ १९ ॥

२०] ति० टी०–ततस्तुष्टा मनसा महादैवततेजःसंक्रमकथनात् गुहायां तत्पर्वतगुहायाम् तदानीमेवेति भावः ॥२०॥

रा० टी०–एवमिति । एवमुक्त्वा अत एव तुष्टा ते जननी गुहायां त्वां प्रजज्ञे जनयामास ॥ २० ॥

२१] ति० टी०–फलमिति। जिघृक्षुरुत्पत्योत्प्लुत्य दिवमभ्युत्पतः । 'उत्प्लुत्याभ्युत्थितो दिवम्' इति पाठान्तरे उत्प्लुत्य दिवमभ्युत्थित इति योजना । उदयकालिकभास्करस्याम्रफलवद्रक्तवृत्तत्वात्फलबुद्धिविषयत्वम् । यथा जातमात्राजादिबालानां प्राचीनवासनया स्तनपानादौ प्रवृत्तिः तथैवास्य जातमात्रस्य वानरोचितफलादानप्रवृत्तिरिति बोध्यम् ॥ २१ ॥

रा० टी०–अभ्युत्थितमिति । ततः उत्पत्यनन्तरं महावने अभ्युत्थितं प्रकाशितं सूर्यं दृष्ट्वा फलमिदमिति बुद्ध्या जिघृक्षुर्बालस्त्वम् उत्पत्य उत्प्लुत्य दिवम् अभ्युत्थितो गतः ॥२१॥

२२] ति० टी०–तस्य रवेस्तेजसा निर्धूतः क्षिप्तोऽपि ततो वायुबलवत्त्वान्न विषादं गतः ॥ २२ ॥

रा० टी०–शतानीति । अथानन्तरं योजनानां शतानि त्रीणि 'अङ्कानां वामतो गतिः' इतिन्यायेन शताधिकत्रिसहस्राणि गत्वा तस्य सूर्यस्य तेजसा निर्धूतः आक्रान्तोऽपि त्वं विषादं खेदं न गतः । शतानि त्रीणि इत्यस्य त्रिशतपरत्वेन व्याख्याने तु बहुयोजनसाहस्रम् इत्युत्तरकाण्डे वक्ष्यमाणं विरुध्येत । अनेकशतयोजनानाम् उपलक्षणमिति भूषणोक्तिस्तु न युक्ता त्रीणि इत्यस्य वैयर्थ्यापत्तेः ॥ २२ ॥

गो० टी०–शतानीति । शतानि त्रीण्येतदनेकशतयोज-

१ विशालेति गो. पाठः । २ सुभग इति गो.पाठः । ३ यशस्विनीमिति गो पाठः । ४ प्लवगर्षभमिति गो.पाठः । ५ उत्प्लुत्याभ्युद्गत इति गो.पाठः। ६ अभ्युत्थित इति रा. पाठः ।

त्वामप्युपगतं तूर्णमन्तरिक्षं महाकपे । क्षिप्तमिन्द्रेण ते वज्रं कोपाविष्टेन तेजसा ॥ २३ ॥
तदा शैलाग्रशिखरे वामो हनुरभज्यत । ततोऽभिनामधेयं ते हनुमानिति कीर्तितम् ॥ २४ ॥
ततस्त्वां निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् । त्रैलोक्यं भृशसंक्रुद्धो न ववौ वै प्रभञ्जनः ॥ २५ ॥
संभ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षुभिते सति । प्रसादयन्ति संक्रुद्धं मारुतं भुवनेश्वराः ॥ २६ ॥
प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ । अशस्त्रवध्यतां तात समरे सत्यविक्रम ॥ २७ ॥
वज्रस्य च निपातेन विरुजं त्वां समीक्ष्य च । सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम् ॥ २८ ॥
स्वच्छन्दतश्च मरणं तव स्यादिति वै प्रभो । स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ॥ २९ ॥
मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः । त्वं हि वायुसुतो वत्स प्लवने चापि तत्समः ॥ ३० ॥
वयमद्य गतप्राणा भवानस्मासु सांप्रतम् । दाक्ष्यात्पराक्रमसपन्नः कपिराज इवापरः ॥ ३१ ॥
त्रिविक्रमे मया तात सशैलवनकानना । त्रिःसप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम् ॥ ३२ ॥
तदौषधयोऽस्माभिः संचिता देवशासनात् । निर्मथ्यममृतं याभिस्तदानीं नो महद्बलम् ॥ ३३ ॥

नानाम्लेच्छलक्षणं बहुयोजनसाहस्रं क्रामत्येष इत्युत्तरकाण्डे वक्ष्यमाणत्वात् ॥ २१—३० ॥

२३] ति० टी०—तूर्णं शीघ्रमन्तरिक्षमुपगतं प्राप्तं त्वां दृष्ट्वेन्द्रेण ते तव शरीरे वज्रं क्षिप्तम् ॥ २३ ॥

रा० टी०—तत्रेति । तत्र तेजोनिर्धूतत्वेऽपि तूर्णं शीघ्रं त्वमन्तरिक्षमुपगतः अत एव कोपाविष्टेन चेतसा उपलक्षितेन इन्द्रेण ते तुभ्यं वज्रं क्षिप्तम् ॥ २३ ॥

२४] ति० टी०—तदा तस्मिन्काले ॥ २४ ॥

रा० टी०—तदेति । तदा वज्रसंयोगसमये वामो हनुः तव वक्त्रैकदेशः अभज्यत ततस्तस्माद्धेतोः ते नामधेयं हनुमान् इति कीर्तितम् ॥ २४ ॥

२५-२७]ति०टी०—त्रैलोक्यं न ववौ न गच्छति स्म २५-२७

रा० टी०—तत इति । ततोऽनन्तरं त्वां निहतं दृष्ट्वा भृशसंक्रुद्धः प्रभञ्जनो वायुः त्रैलोक्ये न ववौ चचाल, स्वशक्तीः समाकृष्य एकत्रैव तस्थावित्यर्थः ॥ २५ ॥

रा० टी०—संभ्रान्ता इति । त्रैलोक्ये क्षुभिते वायुसंचाराभावात् क्षोभं प्राप्ते सति भुवनेश्वराः ब्रह्मप्रभृतयः संक्रुद्धं मारुतं प्रसादयन्ति प्रासादयन्त ॥ २६ ॥

रा० टी०—प्रसादित इति । पवने प्रसादिते सति समरे अशस्त्रवध्यतां शस्त्रवध्यत्वाभावं वरं ब्रह्मा तुभ्यं ददौ ॥ २७ ॥

२८-२९] ति० टी०—वज्रस्य निपातेन चाद्रिरौ निपातेन च । विरुजं तज्जनितपीडाभाववन्तम् तेनाप्यनुत्पादितव्यथमिति यावत् ॥ २८ ॥ २९ ॥

रा० टी०—वज्रस्येति । वज्रस्य निपातेनापि विरुजं रुजारहितं त्वां समीक्ष्य प्रीतात्मा सहस्रनेत्रः तव मरणं स्वच्छन्दतः स्वाधीनतया स्यात् इत्युत्तमं वरं ददौ । सार्धः श्लोक एकान्वयी ॥ २८ ॥

रा० टी०—स इति । त्वं केसरिणः क्षेत्रजः पुत्रः मारुतस्य औरसः पुत्रः अत एव तेजसा अपिना पराक्रमादिना च तत्समः वायुसदृशोऽसीति शेषः । अर्धद्वयमेकान्वयि ॥ २९ ॥

३०] ति० टी०—मारुतस्यौरस इति तथा दर्शितं प्राक् ३०

३१] ति० टी०—कपिराजः सुग्रीवः ॥ ३१ ॥

रा० टी०—त्वमिति । दाक्ष्यविक्रमसंपन्नः अत एव अपरः कपिराजः सुग्रीव इव वायुसुतस्त्वं प्लवने अपिना पराक्रमादौ च तत्समोऽसीति शेषः, वयं तु अद्य गतप्राणाः अतः सांप्रतमिदानीं नोऽस्मान् भवान् त्रातु । सार्धश्लोक एकान्वयी ॥ ३० ॥ ३१ ॥

३२] ति० टी०—त्रिविक्रमे त्रिविक्रमावतारसमये ॥ ३२ ॥

३३] ति० टी०—देवशासनात्संचिताः याभिः सागरे प्रक्षिप्यामृतं निर्मथ्यं निर्मथनेन लभ्यम् ॥ ३३ ॥

रा० टी०—नन्वु त्वमपि विख्यातपौरुषोऽसीति मामेव किमर्थं प्रोत्साहयसीत्यत आह—त्रिविक्रम इति । त्रिविक्रमे त्रिषु लोकेषु विक्रमे वामनचरणगमने सति सशैलवनकानना पृथिवी त्रिलोकीभूमिः त्रिःसप्तकृत्वः एकविंशतिवारं प्रदक्षिणं परिक्रान्ता तदा परिक्रमणसमये याभिः अमृतं निष्पन्नं ताः ओषधयः देवशासनात् संचिताः तदा नोऽस्माकं महद्बलमासीत् । श्लोकद्वयमेकान्वयि ॥ ३२ ॥ ३३ ॥

गो० टी०—त्रिविक्रम इति । पृथिवीत्यनेनाण्डकटाहमध्य उक्तः । तस्याः त्रिःसप्तकृत्वः क्रमणं मध्यप्रदेशे । यद्वा यावती महाबलिभूमिः तावती पृथिवी अत्र विवक्षिता । तस्याः प्रदक्षिणं तद्बहिःप्रदेशेन संगच्छते । यद्वा क्रमणानन्तरं जाम्बवान् विजयघोषणार्थं पृथिवीमात्रप्रदक्षिणं कृतवानिति प्रसिद्धिः । अन्यत्सर्वमतिरोहितार्थम् ॥ ३१—३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

१ तावदापतत इति गो. तत्राप्युपगत इति रा. पाठः । २ क्रोधाविष्टेनेति गो. पाठः । ३ भीमेति गो. पाठः । ४ हीति गो. रा. पाठः । ५ कीर्त्यते इति गो. पाठः । ६ त्रैलोक्ये इति गो. पाठः । ७ क्षोभिते इति गो. पाठः । ८ ते भूयादिति गो. पाठः । ९ भवान्नस्त्रास्विति गो. पाठः । १० पक्षिराज इति गो. पाठः । ११ तथेति गो. पाठः । १२ निष्पन्नमिति गो. पाठः । १३ तदासीदिति गो. पाठः ।

स इदानीमहं वृद्धः परिहीनपराक्रमः । सांप्रतं कालमस्माकं भवान्सर्वगुणान्वितः ॥ ३४ ॥
तद्विजृम्भस्व विक्रान्त प्लवतामुत्तमो ह्यसि । त्वद्वीर्यं द्रष्टुकामा [1]हि सर्वा वानरवाहिनी ॥ ३५ ॥
उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम् । परा हि सर्वभूतानां हनुमन्या गतिस्तव ॥ ३६ ॥
विषण्णा हरयः सर्वे [2]हनुमन्किमुपेक्षसे । विक्रमस्व महावेग विष्णुस्त्रीन्विक्रमानिव ॥ ३७ ॥
ततः [3]कपीनामृषभेण चोदितः प्रतीतवेगः पवनात्मजः कपिः ।
प्रहर्षयंस्तां हरिवीरवाहिनीं चकार रूपं [4]पवनात्मजस्तदा ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।

जलधिमुल्लङ्घयितुं धृतबृहद्रूपो हनुमान्कपिभयोत्सारणाय निजप्रभावमनुवर्णयन्महेन्द्राचलमारुह्य सागरमुत्तरितुं व्यवस्यति ।

तं दृष्ट्वा जृम्भमाणं ते क्रमितुं शतयोजनम् । [5]वेगेनापूर्यमाणं च सहसा वानरोत्तमम् ॥ १ ॥
सहसा शोकमुत्सृज्य प्रहर्षेण समन्विताः । विनेदुस्तुष्टुवुश्चापि [6]हनूमन्तं महाबलम् ॥ २ ॥

३४] ति० टी०–सांप्रतं कालमिति सप्तम्यर्थे द्वितीया । अस्माकमिति निर्धारणे षष्ठी । अस्मिन्काले ऽस्माकं मध्ये भवानेव सर्वगुणान्वित इत्यर्थः ॥ ३४ ॥

रा० टी०–स इति । सः प्रसिद्धबलोऽहमिदानीं वृद्धः अत एव परिहीनपराक्रमोऽस्मीति शेषः, अत एव सांप्रतं काल्मस्मिन् समये अस्माकं मध्ये भवानेव सर्वगुणान्वितः अस्तीति शेषः ॥ ३४ ॥

३५] ति० टी०–तद्विजृम्भस्व निःसीमनिजबलविजृम्भणं कुरु ॥ ३५ ॥

रा० टी०–तदिति । विक्रान्तः अतिविक्रमविशिष्टः अत एव प्लवतामुत्तमः यतस्त्वमसि तत्तस्माद् विजृम्भस्व उत्प्लवस्व हि यतः वानरवाहिनी त्वद्वीर्यं द्रष्टुकामाऽस्तीति शेषः । एतेन पूर्वं स्वस्वपराक्रमाणां न्यूनतया वर्णनं त्वत्पराक्रमदर्शनार्थमेवेति ध्वनितम् ॥ ३५ ॥

३६ ति० टी०–उत्तिष्ठ लङ्घयस्वेत्यत्र हेतुः—परा हीति । हे हनुमन् ! परा श्रेष्ठतरा या तव गतिर्लङ्कागिरिपगमनं सा सर्वभूतानामुपकाराय न केवलमस्माकमेवेति शेषः ॥ ३६ ॥

रा० टी०–उत्तिष्ठेति । हे हरिशार्दूल ! त्वमुत्तिष्ठ महार्णवं लङ्घयस्व च हि यतः तव गतिः समुद्रमुत्प्लुत्य गमनं सर्वभूतानां परा रक्षिका ॥ ३६ ॥

३७] ति० टी०–विषण्णा अर्थस्य स्वासाध्यत्वादीनाः । किमुपेक्षसे तानिति शेषः ॥ ३७ ॥

रा० टी०–विषण्णा इति । ये हरयो विषण्णाः तान् किं किमर्थमुपेक्षसे उपेक्षणं न युक्तमित्यर्थः, अतः त्रीन्विक्रमान् कर्ता विष्णुरिव त्वं विक्रमस्व ॥ ३७ ॥

३८] ति० टी०–कपीनामृषभेण । कपिशब्दोऽत्र छत्रिन्यायेन ऋक्षसाधारणः । रूपं समुद्रतरणोचितमहाविग्रहम् । प्रकृतेस्तद्ह्रस्यत्वाद्रूपमहत्त्वस्वल्पत्वकरणं न युक्तपन्नम् । एवं जाम्बवता हनुमदभिजनपराक्रमादिज्ञापनं तस्य सहजबलाविर्भावाय । तथा ज्ञापनं हि तस्य तदाविर्भावकारणमिति दैवकृतः समयः । यद्यपीतरदिक्त्रयप्रेषितवानराणामपि सप्तसमुद्रपरवर्त्युदयास्ताचलादिपर्यन्तगमनमुपदिष्टं तथापि तन्मार्गे समुद्रमध्ये विंशतित्रिंशदादियोजनेषु पर्वतानां सत्त्वात्तद्बलम्बेन प्लवने न तथा कष्टम्, इह तु निरवलम्बं शतयोजनप्लवनमन्यासाध्यमिति भावः । अत्रत्या मध्यपर्वतास्तु राक्षसैर्भङ्क्त्वा मज्जिता दुर्गसिद्धये । प्लवाश्च मज्जिताः, अत एवात्र सुग्रीवेण ते नोक्ताः, अत एव चत्वारिंशे सर्गे पूर्वदिक्प्रेषितवानरान्प्रति समुद्रान्तरगतदेशमुपक्रम्य 'गिरिभिर्ये च गम्यन्ते प्लवनेन च' इत्युक्तम् ॥ ३८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

रा० टी०–तत इति । ततोऽनन्तरं कपीनामृषभेण जाम्बवता चोदितः प्रेरितः अत एव प्रतीतवेगः स्मृतस्ववेगादिः हनुमान् हरिवाहिनीं प्रहर्षयन् सन् आत्मनो महद्विशालं रूपं चकार ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

१–२] ति० टी०–अथ गृहीतमहाविग्रहस्य हनुमतो वानरबलाश्वासनाय निजबलप्रख्यापनपूर्वं समुद्रलङ्घनाय महे-

१ इयं सर्ववानरेति गो. पाठः । २ हनूमन्निति गो. पाठः । ३ तु वै जाम्बवता प्रेति गो. पाठः । ४ महदात्मन इति गो. पाठः । ५ वीर्येणेति गो. पाठः । ६ हनुमन्तामिति गो. पाठः ।

प्रहृष्टा विस्मिताश्चापि ते वीक्षन्ते समन्ततः । [२]त्रिविक्रमं कृतोत्साहं नारायणमिव प्रजाः ॥ ३ ॥
संस्तूयमानो हनुमान्व्यवर्धत महाबलः । समाविध्य च लाङ्गूलं हर्षाद्बलमुपेयिवान् ॥ ४ ॥
तस्य संस्तूयमानस्य वृद्धैर्वानरपुङ्गवैः । तेजसाऽऽपूर्यमाणस्य रूपमासीदनुत्तमम् ॥ ५ ॥
यथा विजृम्भते सिंहो [४]विघृते गिरिगह्वरे । मारुतस्यौरसः पुत्रस्तथा संप्रति जृम्भते ॥ ६ ॥
अशोभत मुखं तस्य जृम्भमाणस्य धीमतः । [५]अम्बरीषोपमं दीप्तं विधूम इव पावकः ॥ ७ ॥
हरीणामुत्थितो मध्यात्संप्रहृष्टतनूरुहः । अभिवाद्य हरीन्वृद्धान्हनूमानिदमब्रवीत् ॥ ८ ॥
[६]आरुजन्पर्वताग्राणि हुताशनसखोऽनिलः । बलवानप्रमेयश्च वायुराकाशगोचरः ॥ ९ ॥
तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः । मारुतस्यौरसः पुत्रः प्लवनेनास्मि तत्समः ॥ १० ॥
उत्सहे य [७]हि विस्तीर्णमालिखन्तमिवाम्बरम् । मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः ॥ ११ ॥
बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे । समाप्लावयितुं लोकं सपर्वतनदीह्रदम् ॥ १२ ॥

न्द्रपर्वतारोहणमाह—तमिति । जृम्भमाणं वर्धमानम् । ते वानराः ॥ १ ॥ २ ॥

रा० टी०–प्रहर्षणप्रकारमाह–तमित्यादिभिः । शतयोजनं शतयोजनपरिमितं समुद्रं क्रमितुमुल्लङ्घितुं जृम्भमाणं वर्धमानमित्यर्थः वेगेनापूर्यमाणं तं प्रसिद्धं महाबलं हनुमन्तं दृष्ट्वा शोकमुत्सृज्य प्रहर्षेण समन्विता वानराः विनेदुः तुष्टुवुश्च । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–तं दृष्ट्वेत्यादि । जृम्भमाणं वर्धमानम्॥१–६॥

३] ति० टी०–कृतोत्साहम्, त्रिलोकीविक्रमणे इति शेषः३

रा० टी०–प्रहृष्टा इति । ते वानराः कृतोत्साहं त्रिलोकविक्रमणविषयकोत्साहविशिष्टं नारायणं प्रजा इव समन्ततो वीक्षन्ते हनुमन्तमिति शेषः ॥ ३ ॥

४–६] ति० टी०–समाविद्ध्यास्फाल्य ॥ ४–६ ॥

रा० टी०–संस्तूयमान इति । संस्तूयमानो वानरैरिति शेषः हनुमान् लाङ्गूलं हर्षात् समाविध्य प्रस्तार्य बलं स्वमहापराक्रमम्[८]पेयिवान् सस्मार ॥ ४ ॥

रा० टी०–तस्येति । तेजसा आपूर्यमाणस्य वर्धमानस्य तस्य हनुमतो रूपं स्वरूपमनुत्तममत्युत्तममासीत् ॥ ५ ॥

रा० टी०–यथेति । विघृते विस्तीर्णे गिरिगह्वरे यथा सिंहो विजृम्भते गात्रविनामं करोति तथा मारुतस्यौरसः पुत्रः संप्रति जृम्भते ॥ ६ ॥

७–८] ति० टी०–अम्बरीषं भाष्ट्रं तदुपमम्, अत एव दीप्तं प्रज्वलत्। अङ्गारवर्णप्रतप्तभाष्ट्रोपममिति यावत्। स्वयं च विधूमः पावक इवाशोभत । 'अम्बरीषोपमं दीप्तं विधूम इव पावकः' इति प्राचीनः पाठः ॥ ७ ॥ ८ ॥

रा० टी०–अशोभतेति । तस्य हनूमतः विधूमः पावक इव दीप्तं ज्वलम् अम्बरीषोपमं सूर्यसदृशं यथा भवति तथा अशोभत । अम्बरीषशब्दार्थस्तु अम्बरिणामाकाशवतां नक्षत्रगणानामीषः तेजसा पराभूतत्वं यस्मादिति अम्बरिणः सर्वलोकान् आकाशचारिणो वा ईषति स्वतेजसा प्राप्नोतीति वा॥७॥

रा० टी०–हरीणामिति। हरीणां मध्यात् स्थितो हनूमान् हरीन् अभिवाद्य प्रणम्येदमब्रवीत् ॥ ८ ॥

गो० टी०–अशोभतेति । आदीप्तमम्बरीषमिव स्थितम् जृम्भमाणस्य तस्य मुखं विधूमः पावक इव अशोभत । अम्बरीषं भाष्ट्रम् 'स्त्रीवेऽम्बरीषं भाष्ट्रो ना' इत्यमरः ॥ ७ ॥ ८ ॥

९] ति० टी०–आरुजन्नत्यन्तं भिन्दानः । हुताशनस्य सख्योच्यमानगुणो यो वायुर्गमनशीलोऽनिलोऽस्ति ॥ ९ ॥

१०] ति० टी०–तस्य मारुतस्याहमौरसः पुत्रः प्लवनेन गुणेन तत्समोऽस्मि ॥ १० ॥

रा० टी०–आरुजन्निति । पर्वताग्राणि अरुजन् अत्यन्तं विदारयन् न निलीयते इत्यनिलः नित्य इत्यर्थः, यो वायुः तस्यौरसः पुत्रोऽहं प्लवनेन धर्मेण तत्समोऽस्मि । श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०–आरुजदित्यादि । अनिलः गमनशीलः "अने प्राणने" इत्यस्मादौणादिक इलप्रत्ययः । शीघ्रवेगस्य शीघ्राः वैनतेयादयः तेषां वेग इव वेगो यस्य सः तस्य । तत्साम्यमसहमानस्ततोऽप्याधिक्यमाह—शीघ्रगस्येति । यद्वा शीघ्रवेगस्य अत एव शीघ्रगस्य ॥ ९ ॥ १० ॥

११–१२] ति० टी०–मेरुं गिरिमसङ्गेन मध्ये विश्रामाय क्वचित्क्षणमपि स्थितिराहित्येनैव सहस्रशः परिगन्तुमुत्सहे । एकेनैव वेगेन सहस्रवारं प्रदक्षिणं कर्तुं शक्नोमीत्याशयः११॥१२

रा० टी०–उत्सहेयमिति । अम्बरमाकाशमालिखन्तमिव विस्तीर्णं सहस्रशो मेरुम् असङ्गेन विश्रमाय किंचित्स्पर्शराहित्येन परिगन्तुं भ्रमयितुम् उत्सहेयम् ॥ ११ ॥

रा० टी०–बाहुवेगेन इति । बाहुवेगेन प्रणुन्नेन चालितेन सागरेण लोकं समाप्लावयितुमहमुत्सहे ॥ १२ ॥

---

१ चैव वीक्षन्ते स्मेति गो. पाठः । २ त्रिविक्रमकृतोत्साहमिति गो. पाठः । ३ च बलमेयिवानिति गो. पाठः । ४ विवृद्ध इति गो. पाठः । ५ अम्बरीषमिवादीप्तमिति गो. पाठः । ६ हनुमानिति गो. पाठः । ७ अरुजदिति गो. पाठः । ८ प्लवने नास्ति मत्समं इति गो. पाठः। ९ स्थिति रा .पाठः। १० मिन्दान इति युक्तं भाति ।

ममोरुजङ्घावेगेन भविष्यति समुत्थितः । समुत्थितमहाग्राहः समुद्रो वरुणालयः ॥ १३ ॥
पन्नगाशनमाकाशे पतन्तं पक्षिसेवितम् । वैनतेयमहं शक्तः परिगन्तुं सहस्रशः ॥ १४ ॥
उदयात्प्रस्थितं वापि ज्वलन्तं रश्मिमालिनम् । अनस्तमितमादित्यमहं गन्तुं समुत्सहे ॥ १५ ॥
ततो भूमिमसंस्पृष्ट्वा पुनरागन्तुमुत्सहे । प्रवेगेनैव महता भीमेन प्लवगर्षभाः ॥ १६ ॥
उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान् । सागरांश्शोषयिष्यामि दारयिष्यामि मेदिनीम्॥ १७ ॥
पर्वतांश्चूर्णयिष्यामि प्लवमानः प्लवङ्गमः । हरिष्याम्युरुवेगेन प्लवमानो महार्णवम् ॥ १८ ॥
लतानां विविधं पुष्पं पादपानां च सर्वशः । अनुयास्यति मामद्य प्लवमानं विहायसा ॥ १९ ॥
भविष्यति हि मे पन्था स्वातेः पन्था इवाम्बरे । चरन्तं घोरमाकाशमुत्पतिष्यन्तमेव चं ॥ २० ॥

गो० टी०–उत्सहेयमिति । विस्तीर्णमिति मेरुविशेषणम् । वानरसेनामवनिष्टस्यर्थं स्वोत्कर्षमपि स्वयं निवेदयति ॥ ११–१३ ॥

१३] ति टी०–समुत्थितोऽतिक्रान्तवेलः ॥ १३ ॥

रा० टी०–ममेति । समुत्थिता महाग्राहाः यस्मिन् स समुद्रः ममोरुजङ्घावेगेन समुत्थितः त्यक्तमर्यादो भविष्यति॥१३॥

१४] ति० टी०–पक्षिसेवितं पक्षिराजं वैनतेयमाकाशे पतन्तमहमपि सहस्रशः परिगन्तुं शक्तः । तस्यैकपातं यावदहं सहस्रवारं पतितुं शक्त इति यावत् ॥ १४ ॥

रा० टी०–पन्नगेति । पक्षिसेविते आकाशे पतन्तं पन्नगाशनं पन्नगभक्षकं वैनतेयं सहस्रशो वारं परिगन्तुं शक्तोऽहमस्मीति शेषः, यावत्कालेन यावद्देशं तेनैकवारमुत्पत्यते तावत्कालेन तावद्देशं सहस्रशो वारमुत्पतितुं समर्थोऽस्मीत्यर्थः॥१४॥

गो० टी०–पन्नगेति । पन्नगाशनं स्वोचिताहारलाभाय निरवधिकत्वरासंपन्नम्, यद्वा आहारग्रहणत्वरया सर्वेषां भयावहं पतन्तं न तु वर्तमानम् आकाशे स्वोचितक्षेत्रे । पक्षिसेवित इति स्वपरिकरसंपत्तिरुच्यते । वैनतेयं विनतापुत्रम् अनेन कौमारावस्थायां बलवेगोत्कर्षः सूच्यते । अहं तस्यापि प्राणदातुः पुत्रः । परिगन्तुं परितो गन्तुं प्रदक्षिणीकर्तुं सहस्रशः एकयत्नेन सहस्रशः आजानसिद्धसामर्थ्योऽस्मि ॥ १४ ॥

१५] ति० टी०–उदयगिरेः प्रस्थितमनस्तमितमेव गन्तुं गत्वा स्पष्टुमुत्सहे ॥ १५ ॥

रा० टी०–उदयादिति । हे प्लवगर्षभाः ! महता प्रवेगेनोपलक्षितोऽहमुदयात् उदयाचलात्प्रस्थितं रश्मिमालिनं ज्वलन्तं मध्याह्नवर्तिनमित्यर्थः, आदित्यं गन्तुं गत्वा स्पष्टुं समुत्सहे ततः स्पर्शानन्तरं भूमिमागत्येति शेषः, असंस्पृष्ट्वा विश्रमार्थं भूमिस्पर्शमलब्ध्वा अनस्तमितं श्रमाभाववत् यथा भवति तथा आदित्यमागन्तुं प्राप्तुमुत्सहे । सविशेषणमादित्यमुभयान्वयि । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–उदयादिति । उदयात् प्रस्थितम् उदयगिरेर्निर्गच्छन्तम् आदित्यं स्वस्थानात् प्राप्य तेन सह गन्तुं प्रारभ्य ततः पूर्वमेवास्तगिरिमासाद्यानस्तमितं ज्वलन्तं रश्मिमालिनमादित्यमभिगन्तुं प्रत्युद्गन्तुं समुत्सहे । ज्वलन्तमित्यनेन मध्याह्न एवाभिगमनं सूच्यते ॥ १५ ॥

१६] ति० टी०–ततस्तं स्पृष्ट्वा पुनः प्रत्यावृत्य भूपर्यन्तमागत्य ध्रुवमस्पृष्ट्वैव पुनस्तदभिमुखं गन्तुमुत्सहे । प्रवेगेन प्रस्तुतैकयत्नेन । एवं च शतयोजनगमनागमनयोर्न कश्चित्प्रयास इति ध्वनितम् ॥ १६ ॥

गो० टी०–तत इति । ततः सूर्यप्रत्युद्गमनानन्तरं भूमिमसंस्पृश्य कुत्राप्यविश्रम्य भीमेन महता प्रवेगेन प्रारब्धवेगेनैव पुनरागन्तुं पुनरप्येकवारं सूर्यमभिगन्तुमुत्सहे इत्यर्थः। शतयोजनस्थां लङ्कां गन्तुं किमुतेति भावः ॥ १६ ॥

१७–१८]ति०टी०–आकाशगोचरा ग्रहर्क्षादयः॥१७॥१८॥

रा० टी०–उत्सहेयमिति । आकाशगोचरान् अतिक्रान्तुमुत्सहे । सागरान् शोषयिष्यामि शोषयितुमुत्सहे शोषणपूर्वकोत्साहो धात्वर्थः एवमुत्तरत्रापि तत्तद्धात्वर्थपूर्वक उत्साहोऽर्थः अत एव न शोषादिप्रतिज्ञावाक्यत्वमेतस्य ॥ १७ ॥

रा० टी०–पर्वतानिति । उरुवेगेन महार्णवं प्लवमानोऽहं हरिष्यामि पारं प्राप्स्यामि ॥ १८ ॥

गो० टी०–उत्सहेयमिति । आकाशगोचरान् ग्रहनक्षत्रादीन् ॥ १७ ॥ १८ ॥

१९] ति० टी०–लतानां विविधं पुष्पं पादपानां च पुष्पं हरिष्यामीत्यन्वयः । तच्च पुष्पं वायुवेगेनाहृतं मामनुयास्यति ॥ १९ ॥

रा० टी०–लतानामिति । लतादीनां पुष्पं विहायसा आकाशेन प्लवमानं मामनुयास्यति प्राप्स्यति पुष्पादीनि ग्रहीष्यामीत्यर्थः, अत एव अम्बरे आकाशे मम पन्थाः स्वातेः पन्थाः छायापथ एव भविष्यति गृहीतफलपुष्पादीनां छायापथगतनक्षत्रगणतुल्यतया उपमानोपमेयभावः । सार्धश्लोक एकान्वयी ॥ १९ ॥

गो० टी०–लतानामिति। पुष्पमिति जात्येकवचनम्॥१९

२०] ति० टी०–स्वातेः पन्था इति । स्वातिपथश्छा-

१ जङ्घावेगेनेति गो. पाठः । २ उच्छ्रितेति गो. पाठः । ३ सेविते इति गो. रा. पाठः । ४ चेति रा. पाठः । ५ अमीति गो. पाठः । ६ संस्पृश्येति गो. पाठः । ७ सागरमिति गो. पाठः । ८ प्लवङ्गमा इति गो. पाठः । ९ वेति गो. पाठः ।

द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः । महामेरुप्रतीकाशं मां द्रक्ष्यध्वं प्लवङ्गमाः ॥ २१ ॥
दिवमावृत्य गच्छन्तं ग्रसमानमिवाम्बरम् । विधमिष्यामि जीमूतान्कम्पयिष्यामि पर्वतान् ॥
सागरं शोषयिष्यामि प्लवमानः समाहितः ॥ २२ ॥
वैनतेयस्य वा शक्तिर्मम वा मारुतस्य वा । ऋते सुपर्णराजानं मारुतं वा महाबलम् ॥
न तद्भूतं प्रपश्यामि यन्मां प्लुतमनुव्रजेत् ॥ २३ ॥
निमेषान्तरमात्रेण निरालम्बनमम्बरम् । सहसा निपतिष्यामि घनाद्विद्युदिवोत्थिता ॥ २४ ॥
भविष्यति हि मे रूपं प्लवमानस्य सागरम् । विष्णोः क्रमाणस्य तदा त्रीन्विक्रमानिव ॥ २५ ॥
बुद्ध्या चाहं प्रपश्यामि मनश्चेष्टा च मे तथा । अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवङ्गमाः ॥ २६ ॥
मारुतस्य समो वेगे गरुडस्य समो जवे । अयुतं योजनानां तु गमिष्यामीति मे मतिः ॥ २७ ॥
वासवस्य सवज्रस्य ब्रह्मणो वा स्वयंभुवः । विक्रम्य सहसा हस्तादमृतं तदिहानये ॥ २८ ॥
लङ्कां वापि समुत्क्षिप्य गच्छेयमिति मे मतिः । तमेवं वानरश्रेष्ठं गर्जन्तमिमितप्रभम् ॥ २९ ॥
प्रहृष्टा हरयस्तत्र समुदैक्षन्त विस्मिताः । तेषास्य वचनं श्रुत्वा ज्ञातीनां शोकनाशनम् ॥ ३० ॥

यापथ इत्युच्यते स तु प्रकीर्णबहुनक्षत्रः । मम पन्था अपि प्रकीर्णबहुपुष्पकः । चरन्तं मार्गमध्ये इत्याकाशं प्रत्युत्पतिष्यन्तमेव ॥ २० ॥

रा० टी०—चरन्तमिति । हे वानराः ! आकाशं चरन्तं प्रस्थितवन्तम् उत्पतिष्यन्तम् ऊर्ध्वं गच्छन्तं निपतन्तं समुद्रपारदेशं प्राप्नुवन्तं मां सर्वभूतानि द्रक्ष्यन्ति । अर्धद्वयमेकान्वयि ॥ २० ॥

गो० टी०—भविष्यतीति । स्वातेः पन्थाः परिपूर्णतारच्छायापथः ॥ २०-२२ ॥

२१] ति० टी०—निपतन्तं परे पारे इति शेषः । द्रक्ष्यन्ति अनेनोत्पतनपतनयोरेककालत्वोक्त्याऽतिवेगः सूचितः ॥ २१ ॥

रा० टी०—महेति । अम्बरमाकाशं ग्रसमानमिव मां द्रक्ष्यध्वं द्रक्ष्यध्वे ॥ २१ ॥

२२] ति० टी०—अम्बरं ग्रसमानमिव मां द्रक्ष्यध्वमित्यन्वयः ॥ २२ ॥

रा० टी०—विधमिष्यामीति । सागरं शोषयिष्यामि २२

२३] ति० टी०—वैनतेयस्य वेति । त्रयाणामेवैषा सर्वभूतातिशायिनी शक्तिः, नान्यस्येति भावः । प्लुतं मां तौ ऋते यद्यनुव्रजेत्तद्भूतं न पश्यामि ॥ २३ ॥

रा० टी०—वैनतेयस्येति । शक्तिः प्लवनसामर्थ्यं वैनतेयादित्रयस्यैव अतः सुपर्णराजानं मारुतं वा ऋते विना प्लुतं मां यत्प्राणिमात्रमनुव्रजेत् तद्भूतमुत्पक्षं न प्रपश्यामि । सार्धश्लोक एकान्वयी ॥ २३ ॥ २४ ॥

गो० टी०—वैनतेयस्येति । मम या शक्तिः सा मारुतस्य वैनतेयस्य वेति संबन्धः ॥ २३-२४ ॥

२४] ति० टी०—विद्युदुपमया शैघ्र्येण बहुदेशव्याप्तिर्ध्वन्यते ॥ २४ ॥

रा० टी०—निमेषेति । निरालम्बनं शून्यमम्बरं घनाद् उत्थिता विद्युदिव निमेषान्तरमात्रेण निपतिष्यामि व्याप्स्यामीत्यर्थः ॥ २५ ॥

२५] ति० टी०—तदा त्रिविक्रमावतारकाले ॥ २५ ॥

रा० टी०—भविष्यतीति । तदा बलिराज्यप्राप्तिसमये त्रीन् विक्रमान् लोकान् प्रक्रममाणस्य विष्णोः रूपमिव मे रूपं भविष्यति ॥ २६ ॥

२६] ति० टी०—'सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' इति न्यायेनाह—बुद्ध्येति । निश्चयात्मकान्तःकरणेनेत्यर्थः । तथा मे मनश्चेष्टा मनोव्यापारोऽनुमानरूपः । किं पश्यसि किंविषया च ते मनश्चेष्टेत्यत्राह—द्रक्ष्यामीति ॥ २६ ॥

रा० टी०—बुद्ध्येति । अहं वैदेहीं द्रक्ष्यामि इति बुद्ध्या निश्चयात्मकान्तःकरणवृत्त्याहं प्रपश्यामि निश्चिनोमि । तत्र हेतुः—तथा निश्चयजनिका मे मनश्चेष्टा मनसोऽतीवप्रसादोऽस्तीत्यर्थः, अतः प्रमोदध्वम् ॥ २७ ॥

२७] ति० टी०—वेगजवौ पर्यायौ । अयुतमित्यनेनाप्रमेयबलत्वं प्रकाश्यते, न तु परिच्छेदः । वस्तुतस्तदभावात् । रावणोऽपि वक्ष्यति—'न मारुतस्तिन्न गतिप्रमाणम्' इति ॥ २७ ॥

रा० टी०—मारुतस्येति । योजनानामयुतमहं गमिष्यामि इति मे मतिर्निश्चयः ॥ २८ ॥

२८] ति० टी०—वासवस्येति । वासवहस्ते स्वर्गिभोग्यममृतं ब्रह्मणो हस्ते च योगिभोग्यममृतम् । तदानयनवचोऽत्युक्त्यलंकारपरम् ॥ २८ ॥

रा० टी०—वासवस्येति । वासवादेः हस्तात् तत्प्रसिद्धममृतमिह आनये आनयनसमर्थोऽस्मि ॥ २९ ॥

२९-३०] ति० टी०—समुत्क्षिप्य स्वस्थानादुत्पाटनपूर्वकं गृहीत्वा । यद्वा ततः परतोऽपि गच्छेयमित्यर्थः ॥ २९ ॥ ३० ॥

---

१ मेघेति गो. पाठः । २ च द्रक्ष्यत वानरा इति गो. पाठः । ३ सेति गो. पाठः । ४ येति गो. पाठः । ५ जवमिति गो. पाठः । ६ सागरे इति गो. पाठः । ७ वीति गो. पाठः । ८ अमितौजसमिति गो पाठः । ९ तस्य तदिति गो. पाठः ।

उवाच परिसंहृष्टो जाम्बवान्प्लवगेश्वरः । वीरकेसरिणः पुत्र [1]वेगवन्मारुतात्मज ॥ ३१ ॥
ज्ञातीनां विपुलः शोकस्त्वया तात प्रणाशितः । तव कल्याणरुचयः कपिमुख्याः समागताः ॥ ३२ ॥
मङ्गलान्यर्थसिद्ध्यर्थं करिष्यन्ति समाहिताः । ऋषीणां च प्रसादेन कपिवृद्धमतेन च ॥ ३३ ॥
गुरूणां च प्रसादेन [2]संप्लव त्वं महार्णवम् । स्थास्यामश्चैकपादेन यावदागमनं तव ॥ ३४ ॥
त्वद्गतानि च सर्वेषां [3]जीवनानि वनौकसाम् । ततश्च हरिशार्दूलस्तानुवाच वनौकसः ॥ ३५ ॥
[4]कोऽपि लोके न मे वेगं प्लवने धारयिष्यति । एतानीह नगस्यास्य शिलासंकटशालिनः ॥ ३६ ॥
शिखराणि महेन्द्रस्य स्थिराणि च महान्ति च । येषु[5] वेगं [6]गमिष्यामि महेन्द्रशिखरेष्वहम् ॥ ३७ ॥
नानाद्रुमविकीर्णेषु धातुनिष्पन्दशोभिषु । एतानि मम [7]वेगं हि शिखराणि महान्ति च ॥ ३८ ॥
प्लवतो धारयिष्यन्ति योजनानामितः शतम् । ततस्तु[8] मारुतप्रख्यः स हरिर्मारुतात्मजः ॥
आरुरोह नगश्रेष्ठं महेन्द्रमरिमर्दनः ॥ ३९ ॥
वृतं नानाविधैः पुष्पैर्मृगसेवितशाद्वलम् । लताकुसुमसंबाधं नित्यपुष्पफलद्रुमम् ॥ ४० ॥
सिंहशार्दूलसेवितं मत्तमातङ्गसेवितम् । मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसंकुलम् ॥ ४१ ॥

रा०टी०—कङ्कां सप्तत्रिंशत्तमेऽपि गच्छेयमिति मे मतिर्निश्चयः। अर्धं पृथक्—तमिति । तत्र तस्मिन्समये प्रहृष्टाः हरयस्तं हनूमन्तं विस्मिताः सन्तः सम्प्रैक्षन्त ॥ २० ॥

रा० टी०—तदिति । अस्य हनुमतो वचनं श्रुत्वा जाम्बवान् उवाच ॥ ३१ ॥

३१] ति० टी०—वेगवन्निति संबुद्धिः ॥ ३१ ॥

रा० टी०—तद्वचनाकारमाह—वीरेति । हे वीर ! ज्ञातीनामस्माकं शोकस्त्वया प्रणाशितः ॥ ३२ ॥

३२] ति० टी०—त्वत्संबन्धिन्यां कल्याणबुद्धौ रुचिरभिलाषो येषां ते । यद्वा तव कल्याणं वाञ्छितारः ॥ ३२ ॥

रा० टी०—तवेति । कल्याणरुचयः कल्याणसंपादकशोभाविशिष्टाः समाहिताः एकाग्रचित्ताः समागताः कपिमुख्यास्तव अर्थसिद्ध्यर्थं मङ्गलानि करिष्यन्ति ॥ ३३ ॥

३३] ति० टी०—वृद्धमतमाशीर्वादः ॥ ३३ ॥

रा० टी०—ऋषीणामिति । ऋष्यादिप्रसादादिना त्वं महार्णवं प्लव ॥ ३४ ॥

३४-३५] ति० टी०—तव यावदागमनमेकपादेन स्थास्यामः त्वरया प्रियं श्रोतुमेकपादेन स्थित्वा तपश्चरिष्याम इत्यर्थः ॥ ३४ ॥ ३५ ॥

रा० टी०—स्थास्याम इति । त्वद्गतानि गमनानि वनौकसां जीवनानि अतः यावत्त्वागमनं तावत् एकपादेन स्थास्यामः ॥ ३५ ॥

रा० टी०—तत इति । ततः जाम्बवद्वचनश्रवणानन्तरं हरिशार्दूलो हनुमान् वनौकस उवाच । तद्वचनाकारमाह—प्लवने सति मे वेगं कोऽपि न धारयिष्यति निवारयितुं समर्थो न भविष्यतीत्यर्थः ॥ ३६ ॥

गो० टी०—स्थास्याम इति । स्थास्यामश्चैकपादेन तथा सत्वराः स्मेत्यर्थः ॥ ३५ ॥

३६-३७] ति० टी०—प्लवने सति मम वेगं न कोऽपि धारयिष्यति । शिलासंकटं शिलासमूहः अत एव एतानि स्थिराणि शिखराणीत्यन्वयः ॥ ३६ ॥ ३७ ॥

३८] ति० टी०—धातुनिष्पन्दो धातुसमूहः ॥ ३८ ॥

रा० टी०—एतानीति । धातुनिष्पन्दशोभिषु धातुसमूहशोभावत्सु येषु महेन्द्रशिखरेषु अहं गमिष्यामि तानि एतानि शिलासंकटशालिनः शिलासमूहविशिष्टस्य अस्य नगस्य महेन्द्रस्य गिरेः महान्ति शिखराणि स्थिराणि पृथूनि अतः इतः प्लवतो मम वेगमेतानि शिखरानि धारयिष्यन्ति । अर्धषट्कमेकान्वयि ॥ ३७—३९ ॥

गो० टी०—नेयमित्यादि । शिलासंकटशालिनः शिलातुङ्गप्रदेशभूयिष्ठस्य 'संकटो दन्तुरे तुङ्गे विपद्रोगविशेषयोः' इति विश्वः ॥ ३६-३९ ॥

३९] ति० टी०—मारुतप्रख्यस्तत्सदृशः ॥ ३९ ॥

रा० टी०—तत इति । मारुतप्रख्यः पवनसदृशोऽरिमर्दनो हनुमान् पुष्पैर्वृतं सलिलोत्पीडैर्निर्झरैः संकुलं व्याप्तं नगश्रेष्ठं महेन्द्रमारुरोह । अर्धषट्कमेकान्वयि ॥ ४०—४२ ॥

४०] ति० टी०—मृगैः सेवितं शाद्वलं तृणपरिणतो यस्य॥४०॥

४१] ति० टी०—सलिलोत्पीडो निर्झरः ॥ ४१ ॥

गो० टी०—वृतमित्यादि । सलिलोत्पीडैः सलिलप्रवाहैः संकुलम् ॥ ४०-४४ ॥

---

१ हरिसत्तमेति गो. पाठः । २ हनुमन्निति गो. पाठः । ३ मारुतात्मजः इति रा. पाठः । ४ वीति गो. पाठः । ५ मङ्गलं कार्येति गो. पाठः । ६ प्लवस्वेति गो. पाठः । ७ जीवितानीति गो. पाठः । ८ त्विति गो. रा. पाठः । ९ नेयं मम मही वेगं लङ्घने इति गो. पाठः । १० क्ष्विति गो. पाठः । ११ करिष्यामीति गो. पाठः । १२ निष्पेषं पादयोः प्लवतां वरः इति गो. पाठः। १३ तमिति गो. पाठः । १४ वृक्षैरिति गो. पाठः। १५ चरितमिति गो. पाठः ।

महद्भिरुच्छ्रितः शृङ्गैर्महेन्द्रस्य महाबलः । विचचार हरिश्रेष्ठो महेन्द्रसमविक्रमः ॥ ४२ ॥
बाहुभ्यां पीडितस्तेन महाशैलो महात्मना । ररास सिंहाभिहतो महान्मत्त इव द्विपः ॥ ४३ ॥
मुमोच सलिलोत्पीडान्विप्रकीर्णशिलोच्चयः । वित्रस्तमृगमातङ्गः प्रकम्पितमहाद्रुमः ॥ ४४ ॥
नानागन्धर्वमिथुनैः पानसंसर्गकर्कशैः । उत्पतद्भिर्विहङ्गैश्च विद्याधरगणैरपि ॥ ४५ ॥
त्यज्यमानमहासानुः संनिलीनमहोरगः । शैलशृङ्गशिलोत्पातस्तदाऽभूत्स महागिरिः॥ ४६ ॥
निःश्वसद्भिस्तदा तैस्तु भुजगैरर्धनिःसृतैः । सपताक इवाभाति स तदा धरणीधरः ॥ ४७ ॥
ऋषिभिस्त्राससंभ्रान्तैस्त्यज्यमानः शिलोच्चयः । सीदन्महति कान्तारे सार्थहीन इवाध्वगः ॥ ४८ ॥
स वेगवान्वेगसमाहितात्मा हरिप्रवीरः परवीरहन्ता ।
मनः समाधाय महानुभावो जगाम लङ्कां मनसा मनस्वी ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

४२] ति० टी०–उच्छ्रितो महाबलो हनुमान्महेन्द्रस्य महद्भिः शृङ्गैर्विचचार शृङ्गाच्छृङ्गान्तरं जगाम ॥ ४२ ॥

रा० टी०–महद्भिरिति । उच्छ्रितः उर्ध्वं प्राप्तो हनुमान् महेन्द्रस्य शृङ्गैर्विचचार शृङ्गेष्वेवोत्प्लुत्योप्लुत्य गच्छतीत्यर्थः ४२

४३-४४] ति० टी०–रराम स्ववर्तिप्राणिशब्देनेति शेषः ॥ ४३ ॥ ४४ ॥

रा० टी०–बाहुभ्यामिति । महात्मना तेन हनुमता बाहुभ्यां पीडितो महाशैलः सिंहाभिहतो मत्तो द्विपो गज इव रराम अतिभीतस्ववर्तिसिंहादिनादेन नादितोऽभूदित्यर्थः ॥ ४४ ॥

रा० टी०–मुमोचेति । विप्रकीर्णाः प्रक्षिप्ताः शिलोच्चयाः पाषाणसमूहा यस्य स महेन्द्राचलः सलिलोत्पीडान् निर्झरान् मुमोच निर्झरा दुतं पेतुरित्यर्थः ॥ ४५ ॥

गो०टी०–वित्रस्तमृगमातङ्ग इत्यादि । पानसंसर्गकर्कशैः पानसंसर्गदृढैः 'कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढम्' इत्यमरः । पानप्रवृत्तौ दृढाभिनिवेशैरित्यर्थः । उद्घातः समूहः ॥ ४५-४८ ॥

४५] ति० टी०–पाने संसर्गे च कर्कशैरत्यासक्तैः । गन्धर्वाणां तथात्वं च स्वभावः ॥ ४५ ॥

४६-४८] ति० टी०–शैलशृङ्गस्य शिलानामुत्पातः पतनं यस्मिन्सः ॥ ४६-४८ ॥

रा० टी०–नानेति । पानसंसर्गेण मादकरससंबन्धेन कर्कशैः उत्कटचित्तैः गन्धर्वमिथुनैः विहङ्गैश्च विद्याधरगणैश्च त्यज्यमानो महासानुर्यस्य सः शैलशृङ्गशिलानामुत्पातः पतनं यस्मात् स महागिरिरभूत् । अर्धचतुष्टयमेकान्वयि ॥ ४६ ॥ ४७ ॥

रा० टी०–निश्वसद्भिरिति । तदा तस्मिन् काले धरणीधरः स महेन्द्रः निश्वसद्भिः भीत्या निश्वासं प्राप्नुवद्भिः अत एव अर्धनिस्सृतैः कथमिदं जातमिति दर्शनाय निस्सारितोर्ध्वभागैः भुजगैः सपताकः पताकाभिः सहित इव आभाति ॥४८॥

रा० टी०–ऋषिभिरिति । त्राससंभ्रान्तैः त्रासहेतुभिरृद्धिप्रैः ऋषिभिस्त्यज्यमानः शिलोच्चयः पर्वतः महति कान्तारे सार्थहीनोऽध्वग इव सीदन्नास्त इति शेषः ॥ ४९ ॥

गो०टी०–ऋषिभिरिति । सार्थहीनः अभूदिति शेषः॥४९॥

४९] ति० टी०–मनसा जगाम सस्मारेत्यर्थः ॥ ४९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ॥६७॥

स रामः प्रीयतां मय्यमन्तर्यामी कृजाधवः ।
शबरी स्वपदं नीता येन पम्पाऽवलोकिता ॥

रा० टी०–स इति । वेगे समाहितः दृढीकृतः आत्मा मनो यस्य स वेगवान् महानुभावः अतिप्रभावविशिष्टो हनुमान् मनः समाधाय लङ्कां मनसा जगाम प्राप ॥ ६० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रामानुग्रहजन्येयं किष्किन्धाविवृत्तिः परा ।
समाप्तिमगमत् श्रीमान् रामायणशिरोमणिः ॥

गो० टी०–स इति । वेगसमाहितात्मा वेगविषये समर्पितमनाः । मनः समाधाय मनः समाहितं कृत्वा ॥ ६० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

इत्थं शठारिगुरुवर्यपदारविन्द-
सेवारसाधिगतसर्वरहस्यबोधः ।
गोविन्दराजविबुधः प्रथुरे बुधानां
कैष्किन्धकाण्डविषयां विततान टीकाम् ॥ १ ॥

---

१ उच्छ्रितमिति गो. पाठः । २ महेन्द्रं स इति गो. पाठः । ३ पादाभ्यामिति गो. पाठः । ४ महात्मन इति गो. पाठः । ५ रराजेति गो. पाठः। ६ नागेति गो. रा. पाठः । ७ च विहगैरिति गो. पाठः ८ चलेति गो. पाठः । ९ उद्घातेति गो. पाठः ।

इति श्रीवाल्मीकिरामायणे विवृतित्रयसनाथं
किष्किन्धाकाण्डं समाप्तम् ।

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

RÂMÂYAN

OF

VÂLMÎKI

WITH THREE COMMENTARIES CALLED

TILAKA, SHIROMANI, and BHOOSHANA

WITH NUMEROUS READINGS AND NOTES

SUNDARKANDA

EDITED BY

SHASTRI SHRINIVAS KATTI MUDHOLKAR

SANSKRITA ADHYAPAKA IN THE ELPHINSTONE COLLEGE,—BOMBAY.

(All Rights Reserved)

PRINTED AND PUBLISHED BY MANILAL UCHARAM DESAI AT


THE GUJARATI PRINTING PRESS

No. 8, SASSOON BUILDINGS-CIRCLE, FORT,

BOMBAY.

SHAKA 1838 A. D. 1916

Price Rs. 3-0-0



साथ दृष्ट्वा हरिश्रेष्ठं विनीतवदवस्थितम् ।
मैथिली चिन्तयामास विस्मयं परमं गता ॥ ३ ॥
अहो भीममिदं सत्वं वानरस्य दुरासदम् ।
दुर्निरीक्ष्यमिदं मत्वा पुनरेव मुमोह सा ॥ ४ ॥

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

रामायणतिलक-रामायणशिरोमणि-गोविन्दराजीयरामायण-भूषणेतिटीकात्रयोपेतम् ।

सुन्दरकाण्डम् ।

एल्फिन्स्टन्कॉलेज्संज्ञकांग्लपाठशालायां संस्कृताध्यापकैर्मुधोळकरोपाह्व-

कट्टी-श्रीनिवासशास्त्रिभिः

संशोधितं पाठान्तरैः सनाथीकृतं स्थलविशेषेषु टिप्पणीभिः समलंकृतं च ।

मुम्बय्याम्

'गुजराती' मुद्रणालयाधिपतिना स्वीये मुद्रणालये मुद्रयित्वा प्रकाशितम् ।

शकः १८३८, ख्रिस्ताब्दः १९१६.

मूल्यं रूपकत्रयम् ।

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीये(भूषणे)ति-
टीकात्रयसमलंकृतम्

सुन्दरकाण्डम् ।

प्रथमः सर्गः ।

सीतामन्वेष्टुं लङ्कां जिगमिषुर्हनुमान् महेन्द्रशिखरादुत्प्लुत्य जलमध्यादुद्गत्य स्वशिखरे विश्राममर्थयमानं मैनाकं करतलसंस्पर्शेनेन संमान्य स्ववलपरिरक्षया वरदानपूर्वकं देवैः प्रेषितां निर्ऋतिरूपधारिणीं सुरसां मुखं व्यादाय परिपालयन्तीं धृतसूक्ष्मरूपस्तदुदरं प्रविश्यापि अहिंसित्वैव बहिर्निरगच्छत् । तथैव सिंहिकाख्यनिर्ऋतीं मुखं व्यादाय ग्रसितुं प्रतिपालयन्तीं स्वीकृतसूक्ष्मदेहस्तदुदरं प्रविश्य विदारणपूर्वकं व्यापादयत् । अथ च राक्षसजनसंभ्रमं वारयिष्यन्निजदेहं तनूकृत्य लङ्काबहिःस्थलम्बगिरिशिखरे न्यपतत् ।

ततो रावणनीतायाः सीतायाः शत्रुकर्षणः । इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥

तिलकटीका ।

सुन्दरे यस्य दासोऽब्धिं तीर्त्वा दृष्ट्वा च मैथिलीम् ।
दृष्टा सीतेत्यभ्यवोचत्तं रामं नौमि चिद्घनम् ॥

१] अथ समुद्रकूर्दनमिच्छति स्म—तत इति । ततः शत्रुकर्षणो हनुमान्रावणनीतायाः सीतायाः पदमवस्थितिस्थानमन्वेष्टुं चारणैर्देवजातिविशेषैराचरिते क्रियमाणसंचारे पथ्याकाशमार्गे गमनायेयेष ॥ १ ॥

रामायणशिरोमणिः ।

स्वस्ति श्रीमनुवंशवर्धनपरं सर्वेश्वरैः संस्तुतं
श्रीरामं सह लक्ष्मणं सुरतरुप्रख्यं सदा मारुतिम् ।
सीताध्यानपरायणं सुरनुतं ज्ञानप्रदं सत्कृतं
रामेणाखिलराजराजितपदा वन्देऽप्यभीष्टप्रदम् ॥ १ ॥
वन्दे त्रिवेणीं निखिलार्थवेणीं
वन्दे प्रयागं सुविशालयागम् ।
वन्दे महान्तं गुरुमार्यभान्तं
वन्दे गणेशं सुखसर्वदेशम् ॥ २ ॥
वाल्मीकेश्चरणौ नत्वा तदीयरचिते परे ।
सुन्दरे विवृतिं कुर्मो रामायणशिरोमणिम् ॥ ३ ॥
यस्य सान्निध्यमात्रेण ब्रह्मत्वं प्राप्यते जनैः ।
तं वन्दे सर्वदातारं त्रिवेणतिटमुत्तमम् ॥ ४ ॥
सीतारामसमारम्भां शुकाचार्यादिमध्यगाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ ५ ॥

रा० टी०—जाम्बवत्कर्तृकसागरतरणोद्देश्यकप्रोत्साहनानन्तरकालिकं वृत्तान्तमाह—तत इत्यादिभिः । ततः स्ववीर्यस्मरणानन्तरं सीतायाः पदं स्थितिप्रदेशमन्वेष्टुं चारणैर्देवजातिविशेषैः आचरिते अतिसंचारविशिष्टे पथि आकाशमार्गे प्राप्तुमिति शेषः, इयेष ववाञ्छ ॥ १ ॥

भूषणटीका ।

तत्त्वज्ञानसमुच्चयो घनदयासारस्य सारो महा-
निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागस्मृतेः ।
अक्लेशः परिपाक एव जगतामक्ष्ण्यपुण्यावले-
रस्माकं निधिरक्षयो विजयते श्रीमान् शठारिर्गुरुः ॥ १ ॥

१ कर्शन इति गो. पाठः ।

दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन्कर्म वानरः । समुदग्रशिरोग्रीवो गवां पतिरिवाबभौ ॥ २ ॥
अथ वैदूर्यवर्णेषु शाद्वलेषु महाबलः । धीरः सलिलकल्पेषु विचचार यथासुखम् ॥ ३ ॥
द्विजान्वित्रासयन्धीमानुरसा पादपान्हरन् । मृगांश्च सुबहून्निघ्नन्प्रवृद्ध इव केसरी ॥ ४ ॥
नीललोहितमाञ्जिष्ठपद्मवर्णैः सितासितैः । स्वभावसिद्धैर्विमलैर्धातुभिः समलंकृतम् ॥ ५ ॥
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः । यक्षकिंनरगन्धर्वैर्देवकल्पैः सपन्नगैः ॥ ६ ॥
स तस्य गिरिवर्यस्य तले नागवरायुते । तिष्ठन्कपिवरस्तत्र ह्रदे नाग इवाबभौ ॥ ७ ॥

श्रीरामायणभूषायै प्रवृत्तो रामभक्तितः ।
व्याख्यां सुन्दरकाण्डस्य तिलकं कलयाम्यहम् ॥ २ ॥

उक्तं परत्वासाधारणं समस्तकल्याणगुणाकरत्वं किष्किन्धाकाण्डे अत्र सर्वसंहर्तृत्वमुच्यते वक्ष्यति हि–'तत् ब्रह्मा स्वयंभूः' इत्यादिना । यद्वा पूर्वस्मिन्काण्डे सर्वथा मित्ररक्षणं कार्यमित्युक्तम् अत्र दूतेन पतिव्रतया चैवं वर्तितव्यमित्यर्थः प्रतिपाद्यते । यद्वा पूर्वत्र सर्वरक्षणप्रवृत्तस्य विष्णोराचार्यरूपपुरुषकारलाभ उक्तः । अधुना आचार्यकृत्यमुच्यते । तत्र प्रथमे सर्गे शिक्षणीयशिष्यान्वेषणमुपपाद्यते—तत इत्यादि । ततः जाम्बवत्प्रोत्साहनानन्तरं चारणाः संघचारिणो देवगायकाः तैराचरिते पथि आकाशे रावणनीतायाः सीतायाः पदं स्थानमन्वेष्टुमियेष शत्रुकर्शनः तदन्वेषणविरोधिनिरसनसमर्थः । यद्वा चारणाचरिते पथि गत्वा सीतायाः पदमन्वेष्टुमियेष । यद्वा यथापाङ्क्तमेवान्वयः आकाशेऽपि पदन्यासान्वेषणसमर्थोऽयमिति बुद्धिचातुर्यातिशय उच्यते। अनेन शिष्यस्थानान्वेषणपरगुरुस्वरूपमुच्यते । ततः मुद्राप्रदानपूर्वकभगवदनुज्ञालाभानन्तरं शत्रुकर्शनः । 'गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥' इत्युक्तरीत्या अज्ञाननिवर्तनशीलो गुरुः चारयन्ति आचारयन्ति धर्मानिति चारणाः पूर्वाचार्याः तैराचरिते पथि 'महाजनो येन गतः स पन्थाः' इत्युक्तसदाचारे स्थित इति शेषः । रावयति असत्प्रलापान्कारयतीति रावणः अविवेकः तेन नीतायाः स्ववशं प्रापितायाः सीतायाः अनादिभगवत्परतन्त्रचेतनस्य सीताशब्देनायोनिजत्वोक्तेः स्त्रीलिङ्गेन पारतन्त्र्योक्तेश्च स्त्रीप्रायमितरत्सर्वमिति न्युक्तम् पदं स्थानं संसारमण्डलमन्वेष्टुं सात्त्विकसंभाषणादि चिह्नं वा । तथोक्तम्–'विष्णोः कटाक्षश्चाद्वेष आभिमुख्यं च सात्त्विकैः । संभाषणं पडेतानि त्वाचार्यप्राप्तिहेतवः' इति । यद्वा पदं व्यवसायमन्वेष्टुं कस्य चेतनस्य भगवत्प्राप्तावध्यवसाय इत्यन्वेष्टुमियेष । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । अत्रैकादशसहस्रश्लोका गताः । द्वादशसहस्रस्यादिमोऽयं श्लोकः। अत्र गायत्र्याः द्वादशमक्षरं प्रयुक्तम् तदवलोकनीयं विद्वद्भिः ॥ १ ॥

२]ति० टी०–निष्प्रतिद्वन्द्वं सहायान्तररहितं प्रतिबन्धरहितं च अन्यैर्दुष्करं कर्म लङ्घनपूर्वं सीतान्वेषणकर्म । समुदग्रमुन्नतं शिरो ग्रीवा च यस्य सः, अत एव गवां पतिर्वृष इवाबभौ॥२॥

रा० टी०–दुष्करमिति । दुष्करमन्यैः कर्तुमशक्यम् अत एव निर्गतः प्रतिद्वन्द्वः द्वितीयः कर्ता विघ्नो वा यस्य तत्कर्म चिकीर्षन् समुदग्रं सम्यग् उन्नतं शिरोग्रीवं यस्य स हनूमान् गवाम्पतिः महावृषभ इव आबभौ ॥ २ ॥

गो० टी०–दुष्करमिति । निष्प्रतिद्वन्द्वं यथा भवति तथा दुष्करं चिकीर्षन् समुदग्रशिरोग्रीवः समुन्नतशिरोग्रीवः गवां पतिः वृषभः ॥ २ ॥

३-४]ति० टी०–वैदूर्यवर्णशाद्वलप्रदेशस्य समुद्रजलवच्छयामत्वमृदुत्वाभ्यामुरसा प्लवनसदृशक्रियाकालिकोरःपेषणेन प्रवृद्धः केसरीव विचचार ॥ ३ ॥ ४ ॥

रा० टी०–अथेति । सलिलकल्पेषु राशीभूतत्वेन सागरजलसदृशेषु वैदूर्यवर्णेषु वैदूर्यवर्णसदृशवर्णविशिष्टेषु शाद्वलेषु गिरिकोमलतृणेषु यथासुखम् अथ समङ्गले महाबलो हनूमान् द्विजान् पक्षिणः वित्रासयन् उरसा पादपान् हरन् विदारयन् मृगांश्च निघ्नन् प्रवृद्धः केसरी सिंह इव विचचार । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–अथेति । शाद्वलानां सलिलकल्पत्वं वैदूर्यवर्णतया ॥ ३ ॥

गो० टी०–द्विजानिति । केसरीव बभाविति शेषः ॥४॥

५-७]ति० टी०–नीललोहितो रक्तश्यामः । माञ्जिष्ठः कृष्णपाण्डुर इति कतकः । माञ्जिष्ठः पाटल इत्यन्ये । पद्मवर्णः प्रसिद्धः । सितासितैः कल्माषैः कृष्णपाण्डुरैरिति यावत् । स्वभावसिद्धैः शैलस्वभावसिद्धैरुक्तरूपैर्धातुभिः समलंकृतम् । कामरूपित्वादिविशेषणवद्दिव्यर्क्षादिभिरभीक्ष्णमाविष्टं यत्तस्य गिरिवर्यस्य तलं तत्र नागवरैरासमन्तायुते तिष्ठन्स कपिर्ह्रदे नाग इवाबभौ । गिरौ ह्रदसाम्यं श्यामलत्वेन ॥ ५-७ ॥

रा० टी०–नीलेति । नीललोहिताः अरुणत्वश्यामत्वोभयाक्रान्ताः पद्मवर्णाः पद्मरागाः सितासिताः कल्माषाः सर्वे मणिविशेषाः तैः स्वभावसिद्धैर्गिरिस्वभावनिष्पन्नैः विमलैर्धातुभिश्च समलंकृतं कामरूपिभिः यक्षादिभिराविष्टं यत् तस्मिन् नागवरायुते तस्य गिरिवर्यस्य तले तिष्ठन् सन् कपिवरो हनू-

१ वैदूर्येति गो. पाठः । २ विद्विषैश्चित्रैरिति गो. पाठः । ३ चेति गो. पाठः ।

स सूर्याय महेन्द्राय पवनाय स्वयंभुवे । भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ॥ ८ ॥
अञ्जलिं प्राङ्मुखं कुर्वन्पवनायात्मयोनये । ततो हि वव्रृधे गन्तुं दक्षिणो दक्षिणां दिशम् ॥ ९ ॥
प्लवगप्रवरैर्दृष्टः प्लवने कृतनिश्चयः । ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥ १० ॥
निष्प्रमाणशरीरः सँल्लिलङ्घयिषुरर्णवम् । बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ॥ ११ ॥
स चचालाचलश्चाशु मुहूर्तं कपिपीडितः । तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ॥ १२ ॥
तेन पादपमुक्तेन पुष्पौघेण सुगन्धिना । सर्वतः सँवृतः शैलो बभौ पुष्पमयो यथा ॥ १३ ॥
तेन चोत्तमवीर्येण पीड्यमानः स पर्वतः । सलिलं संप्रसुस्राव मँदमत्त इव द्विपः ॥ १४ ॥
पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः । रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥ १५ ॥

मान् ह्रदे नागो गज इव आबभौ । श्लोकत्रयमेकान्वयि ॥ ६—७ ॥

गो० टी०—नीलेति । अत्र यच्छब्दोध्याहार्यः यदेवंविधं तलं तत्र तिष्ठन्तित्यन्वयः । पत्रवर्णैः पत्रश्यामैः । 'पालाशो हरितो हरित्' इति हलायुधः । सितासितैः कल्माषैः स्वभावविहितैः स्वतःसिद्धैः ॥ ६—७ ॥

८] ति० टी०—स्वयंभुवे पवनाय पूयते येन स्वज्ञानेन योगिवृन्दं स पवनो भगवान्प्रत्यक्तत्त्वभूतो रामः । एतेन सकलविघ्ननिवारणायेष्टदेवतापार्थनापूर्वं यात्रा कर्तव्येति सदाचारो बोधितः ॥ ८ ॥

रा० टी०—स इति । सूर्यादिभ्योऽञ्जलिं कृत्वा स हनूमान् गमने मतिं बुद्धिं चकार ॥ ८ ॥

गो० टी०—स सूर्यायेति । स्वयंभुवे चतुर्मुखाय भूतेभ्यः देवयोनिभ्यः ॥ ८ ॥

९] ति० टी०—आत्मयोनये पवनाय स्वजनकवायव इत्यर्थः । दक्षिणः कुशलः ॥ ९ ॥

रा० टी०—अञ्जलिमिति । दक्षिणः सर्वकार्यकुशलो हनूमान् आत्मयोनये स्वप्रादुर्भूतिकारणाय पवनायाञ्जलिं कृत्वा ववृधे ॥ ९ ॥

गो० टी०—अञ्जलिमिति । आत्मयोनये स्वकारणभूताय दक्षिणः समर्थः हनुमान् प्राङ्मुखः सन् आत्मयोनये पवनाय अञ्जलिं कृत्वा ततो दक्षिणां दिशं गन्तुं ववृधे इत्यन्वयः । हिः पादपूरणे । अञ्जलिं प्राङ्मुखः कुर्वन्निति पाठस्त्वयुक्तः शतृप्रत्ययेन प्राङ्मुखविशिष्टाञ्जलिकरणदक्षिणदिग्गमनोद्योगयोरेककालिकत्वप्रतीत्या विरोधात् नहि प्राङ्मुखस्यैव सतो दक्षिणदिग्गमनोद्योगो युज्यते ॥ ९ ॥

१०] ति० टी०—रामवृद्धयर्थं रामाभ्युदयाय ॥ १० ॥

रा० टी०—प्लवगेति । प्लवगप्रवरैः दृष्टोऽवलोकितो हनूमान् पर्वसु समुद्र इव ववृधे ॥ १० ॥

गो० टी०—प्लवङ्गेति । रामवृद्धयर्थं रामप्रयोजनार्थम् ॥ १० ॥

११] ति० टी०—निष्प्रमाणशरीरः परिच्छेदातिक्रान्तदेहः । पीडयामास लिलङ्घयिषासंनाहवशतः ॥ ११ ॥

रा० टी०—निष्प्रमाणेति । निष्प्रमाणमियत्तारहितं शरीरं यस्य सः अर्णवं सलिलं लिलङ्घयिषुः हनूमान् चरणाभ्यां पर्वतं पीडयामास ॥ ११ ॥

गो० टी०—निष्प्रमाणेति । निष्प्रमाणशरीरः निर्मर्यादशरीरः बाहुभ्यामित्युक्तिर्बाहुरस्य चतुर्भिः संचारात् ॥ ११ ॥

१२] ति० टी०—एकेन पीडनव्यापारेण मुहूर्तपर्यन्तं चलनम् । अशातयत् । पर्वतः कर्ता, चलनं करणम् ॥ १२ ॥

रा० टी०—स इति । कपिपीडितः अचलः स महेन्द्रः चचाल अत एव पुष्पिताग्राणां तरूणां पुष्पम् अशातयत् अपातयदित्यर्थः ॥ १२ ॥

गो० टी०—स चचालेति । चापीत्येकमव्ययमप्यर्थकम् अशातयत् अगच्छत् स्वार्थे णिच् ॥ १२—१४ ॥

१३] ति० टी०—पुष्पमयो यथा पुष्पप्रचुरः स्वयमिवेत्यर्थः ॥ १३ ॥

रा० टी०—तेनेति । सुगन्धिना शोभनगन्धविशिष्टेन पादपमुक्तेन तरुभ्यः पतितेन पुष्पौघेन संवृतः महेन्द्रः पुष्पमयः संजनितः प्रचुरपुष्पवानिव बभौ ॥ १३ ॥

१४] ति० टी०—उत्तमवीर्येण तेन पीड्यमानः स पर्वतः सलिलं प्रसुस्राव ॥ १४ ॥

रा० टी०—तेनेति । उत्तमवीर्येण हनुमता पीड्यमानः स महेन्द्रः मदमत्तो द्विप इव सलिलं संप्रसुस्राव ॥ १४ ॥

१५] ति० टी०—उक्तार्थस्यैव विवरणम्—पीड्यमान इति । काञ्चनाञ्जनराजतीस्तदाभा रीतीः स्रोतःप्रकारान्निर्वर्तयामास । तदाभत्वमुपाधिकृतम् ॥ १५ ॥

रा० टी०—पीड्यमान इति । बलिना हनुमता पीड्यमानो महेन्द्रः काञ्चनाञ्जनराजतीः काञ्चनादिमयीः रीतीः रेखाः निर्वर्तयामास प्रकाशयामास ॥ १५ ॥

गो० टी०—पीड्यमान इति । रीतीः रेखाः काञ्चनाञ्ज-

१ प्राङ्मुख इति गो. पाठः । २ प्लवङ्गेति गो. पाठः । ३ चापीति गो. पाठः । ४ संवृत इति गो. रा. पाठः । ५ मदं मत्त इति गो. पाठः

मुमोच च शिलाः शैलो विशालाः समनःशिलाः। मध्यमेनार्चिषा जुष्टो धूमराजिरिवानलः ॥ १६ ॥
हरिणा[1] पीड्यमानेन पीड्यमानानि सर्वतः। गुहाविष्टानि सत्त्वानि विनेदुर्विकृतैः स्वरैः[2] ॥ १७ ॥
स महान्सत्त्वसंनादः शैलपीडानिमित्तजः। पृथिवीं पूरयामास दिशश्चोपवनानि च ॥ १८ ॥
शिरोभिः पृथुभिर्नागा व्यक्तस्वस्तिकलक्षणैः। वमन्तः पावकं घोरं ददंशुर्दशनैः शिलाः ॥ १९ ॥
तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः। जज्वलुः पावकोद्दीप्ता विभिदुश्च सहस्रधा ॥ २० ॥
यानि त्वौषधजालानि तस्मिञ्जातानि पर्वते। विषघ्नान्यपि नागानां न शेकुः शमितुं विषम् ॥ २१ ॥
भिद्यतेऽयं गिरिर्भूतैरिति मत्त्वा तपस्विनः। त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैः सह ॥ २२ ॥
पानभूमिगतं हित्वा हैममार्षसनभाजनम्। पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ॥ २३ ॥
लेह्यानुच्चावचान्भक्ष्यान्मांसानि विविधानि च। आर्षभाणि च चर्माणि खड्गाश्च कनकत्सरून् ॥ २४ ॥

नरजतगर्भाश्च शिलास्तु विदीर्यमाणास्तु दृश्यमानास्तास्ता भेदधारा इत्यर्थः ॥ १५ ॥

१६] ति० टी०–किं च स शैलः समनःशिला विशालाः शिला मुमोच निर्पीडनात्। अत एव मध्यमेन मध्यभागेनार्चिषा ज्वालया जुष्टो योऽनलस्तस्य धूमराजिरिव बभावित्यर्थः। यस्येत्यध्याहारः 'धूमराजिरिव' इति ह्रस्वपाठः। तीर्थस्तु—मध्यमेनार्चिषा मध्यमाख्ययाग्निजिह्वया जुष्टो विशिष्टोऽग्निर्धूमराजिरिव धूमनिचयानिवेत्यर्थः 'धूमराजीरिव' इति च पाठ इत्याह॥१६॥

रा० टी०–मुमोचेति। शैलः समनःशिलाः मनःशिलासहिताः शिलाः मुमोच। तत्र दृष्टान्तः, मध्यमेन मध्यभागेन अर्चिषा ज्वालया जुष्टः संयुक्तः अनलः धूमराजीः धूमपङ्क्तीरिव ॥ १६ ॥

गो० टी०–मुमोचेति। समनःशिलाः धातुविशेषसहिताः मध्यमेनार्चिषा मध्यमया ज्वालया पार्श्वज्वाला हि न धूमनिवर्तिका ॥ १६ ॥

१७] ति० टी०–हरिणा हनुमता पीड्यमानेन पर्वतेन पीड्यमानानि सत्त्वानि ॥ १७ ॥

रा० टी०–हरिणेति। हरिणा हनूमता पीड्यमानेन पीडितेन पर्वतेन पीड्यमानानि गुहाविष्टानि सत्त्वानि प्राणिनः विकृतैः स्वरैर्विनेदुः ॥ १७ ॥

गो० टी०–गिरिणेति। विकृतैः विकृतिमद्भिः दैन्यव्यञ्जकैरित्यर्थः ॥ १७ ॥

१८] ति० टी०–'स महासत्त्व—' इति पाठे महासत्त्वा महाजन्तवस्तेषां संनाद इति तीर्थः। 'स महान्सत्त्वसंनादः' इति पाठान्तरम् ॥ १८ ॥

रा० टी०–स इति। शैलपीडानिमित्तजः शैलपीडारूपनिमित्ताज्जनितः स प्रसिद्धः महान् सत्त्वसंनादः पृथिव्यादीनि पूरयामास ॥ १८ ॥

गो० टी०–स इति। सत्त्वसंनादः भूतसंनादः ॥ १८ ॥

१९] ति० टी०–स्वस्तिकः फणास्थनीलरेखा तच्चिह्नैः शिरोभिरुपलक्षिताः। ददंशुः पीडाजनितक्रोधवशात् ॥ १९ ॥

रा० टी०–शिरोभिरिति। व्यक्तानि स्वस्तिकलक्षणानि फणास्थितनीलरेखारूपचिह्नानि येषु तैः पृथुभिः स्थूलैः शिरोभिः पावकं वमन्तो नागाः दशनैर्दंष्ट्राभिः शिलाः ददंशुः ॥ १९ ॥

गो० टी०–शिरोभिरिति। स्वस्तिकं नाम फणोपरि दृश्यमानार्धचन्द्रकं ददंशुरिति। दंशनं कोपव्यापारः ॥ १९ ॥

२०] ति० टी०–सविषैस्तैः सर्पैर्दष्टाः सत्यः पावकोद्दीप्ता इव जज्वलुः। विभिदुर्भिन्ना बभूवुश्च ॥ २० ॥

रा० टी०–ता इति। सविषैर्विषसहितैस्तैर्नागैर्दष्टा महाशिलाः पावकोद्दीप्ता इव जज्वलुः सहस्रधा विभिदुश्च ॥ २० ॥

गो० टी०–ता इति। विभिदुः भिन्नाः ॥ २० ॥

२१] ति० टी०–शमितुं शमयितुम् ॥ २१ ॥

रा० टी०–यानीति। विषघ्नानि यानि औषधजालानि औषधसमूहाः यस्मिन् पर्वतजातानि तान्यपि नागानां विषं शमितुं न शेकुः ॥ २१ ॥

गो० टी०–यानीति। अत्र तानीत्यध्याहार्यं, शमितुं शमयितुम् ॥ २१ ॥

२२] ति० टी०–भूतैर्ब्रह्मरक्षःप्रभृतिमहाभूतैः ॥ २२ ॥

रा० टी०–भिद्यते इति। अयं गिरिः भूतैर्भुवि पृथिव्यामुत्तैर्व्याप्तैर्देवविशेषैः भिद्यते इति मत्वा त्रस्तास्तपस्विनः विद्याधराश्च तस्माद्गिरेः उत्पेतुः ॥ २२ ॥

गो० टी०–भिद्यत इत्यर्धमेकम। उत्पेतुरित्यनुषज्यते २

गो० टी०–त्रस्ता इत्यादिसार्धश्लोकद्वयमेकान्वयम। अ सवभाजनं मद्यपात्रं पात्राणि भोजनपात्राणि आर्षभाणि चर्मा ऋषभचर्मपिनद्धानि खेटकानि त्सरुः मुष्टिबन्धनम् ॥२३॥२४

२३] ति० टी०–हित्वेत्यत्र विद्याधराः कर्तारः ॥ २३

२४] ति० टी०–आर्षभाणि ऋषभचर्मनिर्मितानि चर्मणि फलकानि। त्सरुः खड्गमुष्टिः ॥ २४ ॥

रा० टी०–पानेति। पानभूमिगतं पानभूमौ प्राप्तं हैसुवर्णमयम् आसवभाजनं मद्यपात्रं पात्राणि तद्भिन्नभाजनानि च कर्काश्च लेह्यादीनि च आर्षभाणि ऋषभचर्मपिनद्धा

१ राजीरिति गो. रा. पाठः। २ गिरिणेति गो. पाठः। ३ भूतानीति गो. पाठः। ४ महासत्त्वेति गो. पाठः। ५ सर्पा इति गो. पाठः। ६ आ वेति गो. रा. पाठः।

कृतकण्ठगुणाः क्षीवा रक्तमाल्यानुलेपनाः । रक्ताक्षाः पुष्करक्षाश्च गगनं प्रतिपेदिरे ॥ २५ ॥
हारनूपुरकेयूरपारिहार्यधराः स्त्रियः । विस्मिताः सस्मितास्तस्थुराकाशे रमणैः सह ॥ २६ ॥
[दर्शयन्तो महाविद्यां विद्याधरमहर्षयः । सहितास्तस्थुराकाशे वीक्षाञ्चक्रुश्च पर्वतम् ॥
शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् । चारणानां च सिद्धानां स्थितानां विमलेऽम्बरे ॥]
एष पर्वतसंकाशो हनुमान्मारुतात्मजः । तितीर्षति महावेगः समुद्रं वरुणालयम् ॥ २७ ॥
रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करम् । समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ २८ ॥
इति विद्याधरा वाचः श्रुत्वा तेषां तपस्विनाम् । तमप्रमेयं ददृशुः पर्वते वानरर्षभम् ॥ २९ ॥
दुधुवे च स रोमाणि चकम्पे चानलोपमः । ननाद च महानादं सुमहानिव तोयदः ॥ ३० ॥
आनुपूर्व्या च वृत्तं तल्लाङ्गूलं लोमभिश्चितम् । उत्पतिष्यन्विचिक्षेप पक्षिराज इवोरगम् ॥ ३१ ॥
तस्य लाङ्गूलमाविद्धमतिवेगस्य पृष्ठतः । ददृशे गरुडेनेव ह्रियमाणो महोरगः ॥ ३२ ॥

चर्माणि फलकानि कनकत्सरून् स्वर्णमयमुष्टिविशिष्टान् खड्गांश्च हित्वा कृताः प्रकटिताः कण्ठगुणाः स्वरविशेषा यैस्ते पुष्करक्षाः पद्मदलायतनेत्राः क्षीवाः मत्ताः विद्याधरा इति शेषः, गगनं प्रतिपेदिरे प्रापुः । श्लोकत्रयमेकान्वयि ॥ २३–२५ ॥

२५] ति० टी०–कृताः कण्ठेषु गुणाः स्रजो यैस्ते । क्षीवा मत्ताः । पुष्करं पद्मम् ॥ २५ ॥

गो० टी०–कृतेति । कृतकण्ठगुणाः कृतकण्ठस्रजः क्षीवाः मत्ताः रक्ताक्षाः मधुपानात्पुष्करक्षाः स्वभावत इत्यर्थः ॥ २५ ॥

२६–२८] ति० टी०–पारिहार्यशब्दः श्रेष्ठवाचीति कतकः । पारिहार्यो वलय इति तीर्थः । एतदर्थे ' दर्शयन्तो महाविद्यां विद्याधरमहर्षयः । सहितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतम् ॥ शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् । चारणानां च सिद्धानां स्थितानां विमलेऽम्बरे ॥ ' इति श्लोकद्वयं प्रक्षिप्तं क्वचिदिति कतकः ॥ २६–२८ ॥

रा० टी०–हारेति । हारादिधराः स्त्रियः रमणैर्विद्याधरैः सह आकाशे तस्थुः । तत्र पारिहार्यशब्दः श्रेष्ठवाचीति कतकः, वलयवाचीति तीर्थः ॥ २६ ॥

गो० टी०–हारेति । पारिहार्यं वलयं तस्थुः तस्थुश्च ॥ २६ ॥

रा० टी०–दर्शयन्त इति । महाविद्यां महाविद्याजनितनिरवलम्बनस्थितिरूपां स्वशक्तिं दर्शयन्तः सहिता मिलिता विद्याधरमहर्षयः आकाशे तस्थुः पर्वतं वीक्षाञ्चक्रुर्विशेषेण ददृशुश्च । अम्बरे स्थितानामृष्यादीनां शब्दं शुश्रुवुश्च । श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

रा० टी०–तच्छब्दाकारमाह–एष इति । दुष्करम् अन्यैः कर्तुमशक्यं कर्म चिकीर्षन् कर्तुमिच्छन् महावेगो हनुमान् समुद्रं तितीर्षति प्लोतुमिच्छति समुद्रस्य पारं प्राप्तुमिच्छति च । श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०–दर्शयन्त इति । दर्शयन्तः प्रयोजयन्तः महाविद्याम् अणिमाद्यष्टमहासिद्धिम् विद्याधरमहर्षयः विद्याधराः महर्षय इवेत्युपमितसमासः " उपमितं व्याघ्रादिभिः सामान्याप्रयोगे " इत्यनुशासनात् विद्याधरश्रेष्ठा इत्यर्थः । विद्याधरा महर्षयश्चेति द्वन्द्वसमासो न युक्तः । इति विद्याधराः श्रुत्वेत्युपरितनश्लोके विद्याधराणामेवोपादानात् ॥ २७ ॥

गो० टी०–शुश्रुवुरिति । सा पुनरत्राकाशस्थितिः शुश्रुवुः विद्याधरा इति शेषः । इति विद्याधराः श्रुत्वेत्युपसंहारात् २८ ॥ २९

गो० टी०–समुद्रं तितीर्षतीत्युक्तम् । तस्य प्रयोजनकथनायोक्तमनुवदति–रामार्थमिति ॥ ३०–३२ ॥

२९] ति० टी०–तेषां तपस्विनामाकाशचारितपस्विनां वाचः ' एष पर्वतसंकाशः ' इत्यादिश्लोकद्वयरूपाः श्रुत्वा विद्याधरास्तमप्रमेयं ददृशुः । तद्वाक्यश्रवणात्पूर्वं तु भूतैरयं गिरिर्भिद्यत इति ज्ञातवन्तः ॥ २९ ॥

रा० टी०–इतीति । विद्याधरास्तपस्विनाम् ऋष्यादीनामिति वाचः श्रुत्वा पर्वते तं हनुमन्तं ददृशुः ॥ ३१ ॥

३०] ति० टी०–दुधुवे च । स हनुमान् ॥ ३० ॥

रा० टी०–दुधुवे इति । स हनुमान् रोमाणि दुधुवे चकम्पे किंचिच्चचाल च महान् तोयदो मेघ इव ननाद च ॥ ३२ ॥

३१] ति० टी०–आनुपूर्व्याद्वृत्तं त्रिवलयं लाङ्गूलं विचिक्षेपेत्यन्वयः ॥ ३१ ॥

रा० टी०–आनुपूर्व्यादिति । आनुपूर्व्यात्क्रमशः वृत्तं वर्तुलं लोमभिश्चितं निबिडं तत्प्रसिद्धं लाङ्गूलमुत्पतिष्यन्सन् पक्षिराज उरगमिव चिक्षेप ॥ ३३ ॥

गो० टी०–आनुपूर्व्येणेति । आनुपूर्व्येण वृत्तं क्रमेण वृत्तम् ॥ ३३ ॥ ३४ ॥

३२] ति० टी०–आविद्धमास्फालितं भुग्नं च ॥ ३२ ॥

रा० टी०–तस्येति । आविद्धं प्रवृद्धमातिवेगस्य तस्य हनूमतः पृष्ठतः पश्चाद्भागे विद्यमानं लाङ्गूलं गरुडेन ह्रियमाणो महोरग इव ददृशे ॥ ३४ ॥

---

१ श्लोकावेतावधिकौ गो. रा. पाठे । २ श्रुत्वा वचस्तेषां महात्मनामिति गो. पाठः । ३ पूर्व्येण वृत्तं चेति गो. पाठः ।

बाहू संस्तम्भयामास महापरिघसंनिभौ । आससाद कपिः कट्यां चरणौ संचुकोच च ॥ ३३ ॥
संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधराम् । तेजः सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ॥ ३४ ॥
मार्गमालोकयन्दूरादूर्ध्वप्रणिहितेक्षणः । रुरोध हृदये प्राणानाकाशमवलोकयन् ॥ ३५ ॥
पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः । निकुच्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ॥ ३६ ॥
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् । यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ॥ ३७ ॥
गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् । नहि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम्॥ ३८॥
अनेनैव हि वेगेन गमिष्यामि सुरालयम् । यदि वा त्रिदिवे सीतां न द्रक्ष्यामि कृतश्रमः ॥ ३९ ॥
बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् । सर्वथा कृतकार्योऽहमेष्यामि सह सीतया ॥ ४० ॥
आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम्। एवमुक्त्वा तु हनुमान्वानरो वानरोत्तमः ॥ ४१ ॥

३३] ति० टी०–बाहू संस्तम्भयामासेत्युत्प्लवनसंनाहाभिनयः । बाह्वोः संस्तम्भनं नाम पर्वतोपरि दृढप्रतिष्ठापनम् । कपिः कट्यां कटिप्रदेशे आससाद कायप्रसारणात्कृशोऽभूत् । उरःशिरसोरूर्ध्वप्रसारणे सपृष्ठचरणभागस्याधःसंकोचने तथात्वं कटिदेशस्येति बोध्यम् ॥ ३३ ॥

रा० टी०–बाहू इति । कपिः बाहू संस्तम्भयामास दृढीचकार । कट्यामाससाद प्राप अतिसंकुचितशरीरो बभूव चेत्यर्थः, चरणौ संचुकोच आचुकुञ्च ॥ ३५ ॥

गो०टी०–लङ्घनोद्योगकालिकावस्थां वर्णयति–बाहू इत्यादिना । बाहू संस्तम्भयामास निश्चलीचकार कट्यां ससाद शरीरं संचुकोचेत्यर्थः । चरणौ संचुकोच च ॥ ३५ ॥

३४] ति० टी०–भुजौ संहृत्यांसप्रदेशे संकुच्य । शिरोधरां ग्रीवां कण्ठदेशे संकुच्य । तेजः पराभिभवसामर्थ्यम् सत्त्वं बलं शारीरम् वीर्यमान्तरं बलम् ॥ ३४ ॥

रा० टी०–संहृत्येति । वीर्यवान् स हनुमान् भुजौ संहृत्य अंसप्रदेशे प्रापय्य शिरोधरां ग्रीवां संहृत्य कण्ठदेशे प्रापय्य तेजःप्रभृतीनि आविवेश ससार ॥ ३६ ॥

गो० टी०–संहृत्येति । संहृत्य संकोच्य ॥ ३६ ॥

३५] ति० टी०–दूरान्मार्गमालोकयन्, अत एवोर्ध्वप्रणिहितेक्षणः । हृदये प्राणप्रतिष्ठास्थाने ॥ ३५ ॥

रा० टी०–मार्गमिति । मार्गमालोकयन् आलोकयितुम ऊर्ध्वं प्रणिहितेक्षणः ऊर्ध्वकृतदृष्टिर्हनुमान् आकाशमवलोकयन् सन् हृदये प्राणान् रुरुधे ॥ ३७ ॥

गो० टी०–मार्गमिति । प्राणान् उच्छ्वासरूपान् प्राणनिरोधो व्योमोत्पतनार्थम ॥ ३७–३९ ॥

३६] ति० टी०–कर्णौ निकुच्य संकुच्य । उत्पतनसंनाहवशाद्धि कर्णसंकोचो भवति ॥ ३६ ॥

रा० टी०–पद्भ्यामिति । उत्पतिष्यन् स हनुमान् पद्भ्यां दृढमवस्थानं स्थितिविशेषं कृत्वा कर्णौ निकुच्य संकुच्य वानरान् इदं वचनमब्रवीत् । सार्धश्लोक एकान्वयी ॥ ३८ ॥

३७] ति० टी०–श्वसनस्य वायोरिव विक्रमो वेगो यस्सः ॥ ३७ ॥

रा० टी०–तद्वचनाकारमाह—यथेत्यादिभिः । राघवेनिर्मुक्तः श्वसनविक्रमः पवनवेगः शरः यथा गच्छेत् तद्वलङ्कां गमिष्यामि ॥ ३९ ॥

३८] ति० टी०–तद्वद्गमिष्यामि अनेन तद्वदेव गत्वकृतकार्य आगमिष्यामीति सूचितम् । तस्यैव प्रपञ्चः—नहीत्यादि ॥ ३८ ॥

रा० टी०–नहीति । लङ्कायां यदि न पश्यामि तदा अनेनैव वेगेन सुरालयं स्वर्गं गमिष्यामि ॥ ४० ॥

गो० टी०–नहीति । हिशब्दः पादपूरणे ॥ ४० ॥

३९] ति० टी०–अनेनैव एवंविधेनैव ॥ ३९ ॥

रा० टी०–यदीति । कृतश्रमोऽहं यदि त्रिदिवे सीतां द्रक्ष्यामि तदा राक्षसराजानं रावणं बद्ध्वा आनयिष्यामि आनिष्यामि एतेन बद्धः सन् सीतावृत्तान्तं कथयिष्यत्येवेति सूचितम्, समासान्तविधेरनित्यत्वाद्बहुव्रीहिभावः ॥ ४१ ॥

गो० टी०–यदीति । अकृतश्रमः अप्राप्तश्रमः । राक्षसराजानमित्यत्र टजभाव आर्षः । आनयिष्यामि आनिष्यामि ॥ ४१–४४ ॥

४०] ति० टी०–आनयिष्याम्यानेष्यामि । सीतया सह मिलित्वेति शेषः ॥ ४० ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–सर्वथेति । सीतासीतादर्शनेन सर्वथा कृतकार्यः सोऽहं हृ प्रसिद्धमेष्यामि । अथवा तदर्शनालाभे सरावणां लङ्कामानमिष्यामि आनेष्यामि वा ॥ ४२ ॥

४१] ति० टी०–समुत्पाट्येति ओषधिपर्वतोत्पाटनवदिति भावः ॥ ४१ ॥

रा० टी०–एवमिति । अविचारयन् उत्पतनं किंदपि श्रमजनकमित्यगणयन् हनुमान्वानरान् एवमुक्त्उत्पपात । अथ अतः आत्मानं सुपर्णं शोभितपक्षवन्तं पराजमिव मेने । सार्धश्लोक एकान्वयी ॥ ४३ ॥

१ उर्ध्वमिति गो. पाठः ।

उत्पपाताथ वेगेन वेगवानविचारयन् । सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ॥ ४२ ॥
समुत्पतति वेगात्तु वेगात्ते नगरोहिणः । संहृत्य विटपान्सर्वान्समुत्पेतुः समन्ततः ॥ ४३ ॥
स मत्तकोयष्टिभकान्पादपान्पुष्पशालिनः । उद्वहन्नुरुवेगेन जगाम विमलेऽम्बरे ॥ ४४ ॥
ऊरुवेगोत्थिता वृक्षा मुहूर्तं कपिमन्वयुः । प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥ ४५ ॥
तमूरुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः । अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ॥ ४६ ॥
सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः । हनूमान्पर्वताकारो बभूवाद्भुतदर्शनः ॥ ४७ ॥
सारवन्तोऽथ ये वृक्षा न्यमज्जँल्लवणाम्भसि । भयादिव महेन्द्रस्य पर्वता वरुणालये ॥ ४८ ॥
स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः । शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥ ४९ ॥
विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः । व्यवशीर्यन्त सलिले निवृत्ताः सुहृदो यथा ॥ ५० ॥

४२] ति० टी०–अविचारयँल्लङ्घनक्लेशलेशमप्यगणयन् । तस्यैव प्रपञ्चनम्—**सुपर्णमित्यादि** ॥ ४२ ॥

रा० टी०–**समिति** । वेगात्समुत्पतति सति नगरोहिणः शैलस्थतरवः विटपान् स्वशाखाः संहृत्य वेगात्समुत्पेतुः । अर्धद्वयमेकान्वयि ॥ ४४ ॥

४३] ति० टी०–वेगाद्धनुमति समुत्पतति सति ते नगरोहिणः पर्वतस्थवृक्षाः सर्वान्विटपान्सर्वाः शाखाः संहृत्य संक्षिप्य वेगात्समुत्पेतुः ॥ ४३ ॥

गो० टी०–**समुत्पततीति** । तस्मिन् हनुमति वेगात्समुत्पतति सति नगरोहिणः शैलरुहा वृक्षाः विटपान् संहृत्य आदाय समुत्पेतुरित्यर्थः ॥ ४५ ॥

४४–४५] ति० टी०–मत्ताः कोयष्टिभा येषु तान् । कोयष्टिकोयष्टिभौ पर्यायौ ॥ ४४ ॥ ४६ ॥

रा० टी०–**स इति** । मत्ताः कोयष्टिका येषु तान् पुष्पशालिनः पादपान् वेगेन उद्वहन् उर्ध्वं प्रापयन् विमले अम्बरे जगाम ॥ ४५ ॥

रा० टी०–**ऊर्विति** । ऊर्ववेगेन उत्थिता वृक्षा दीर्घमध्वानं प्रस्थितं स्वबन्धुं बान्धवा इव मुहूर्तं कपिमन्वयुः अनुजग्मुः४६

गो० टी०–संग्रहेणोक्तं विवृणोति–**स मत्तेत्यादिना** । कोयष्टिभकः कोयष्टिः ॥ ४६ ॥ ४७ ॥

४६] ति० टी०–सालाः सर्जवृक्षाः । सैन्यशब्दोऽर्धचर्चादिः ॥ ४६ ॥

रा० टी०–**तमिति** । ऊरुवेगोन्मथिता अन्ये केचन पादपाः सैन्याः महीपतिमिव हनुमन्तमनुजग्मुः । सैन्यशब्दोऽर्धचर्चादिः ॥ ४७ ॥

गो० टी०–**तमिति** । तमूरुवेगेति पाठः । ऊरुवेगेन उन्मथिताः सालाः सालवृक्षाः अन्ये नगोत्तमाः अन्ये वृक्षश्रेष्ठाः सैन्याः सेनायां समवेताः पुरुषाः 'सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते' इत्यमरः ॥ ४८ ॥ ४९ ॥

४७] ति० टी०–पर्वताकारः तत्त्वं बृहत्त्वेन पुष्पितवृक्षवत्त्वेन च ॥ ४७ ॥

रा० टी०–**सुपुष्पितेति** । पादपैरन्वितः कपिः अद्भुतदर्शनो बभूव ॥ ४८ ॥

४८] ति० टी०–सारवन्तो गुरुत्वातिशययुक्ताः खदिरादयस्ते गुरुत्वाल्लवणाम्भसि न्यमज्जन् । अर्वाग्न्ये लघवः सहैव गता इति बोध्यम् । महेन्द्रस्य भयात्पक्षच्छेदभयात्पर्वता इव न्यमज्जन् ॥ ४८ ॥

रा० टी०–**सारवन्त इति** । सारवन्तो गुरुत्ववन्तो ये वृक्षाः ते महेन्द्रस्य भयात् वरुणालये पर्वता इव लवणाम्भसि न्यमज्जन् । सारवन्त इत्यनेन लघूनां परिभ्रमणमेवेति सूचितम् 'सारो बले स्थिरांशे च' इति कोशः ॥ ४९ ॥

गो० टी०–**सारवन्त इति** । सारवन्तः स्थिरांशवन्तः 'सारो बले स्थिरांशे च' इत्यमरः ॥ ५० ॥

४९] ति० टी०–नानाकुसुमैः स्वानुयायिद्रुमीयैः । साङ्कुरकोरकैः कानिचित्कुसुमान्यङ्कुरितानि, कानिचित्कोरकरूपाणि, कानिचिद्विकसितानीत्यर्थः ॥ ४९ ॥

रा० टी०–**स इति** । साङ्कुरकोरकैः अङ्कुरकोरकसहितैः कुसुमैः स्वानुयायितरुसंबन्धिपुष्पैः कीर्णः आकीर्णः कपिः खद्योतैः पर्वत इव शुशुभे । अत्राङ्कुरः कलिकात्वम्, कोरको विकसितत्वम् ॥ ५० ॥

गो० टी०–**स नानाकुसुमैरिति** । मेघसंकाशः स कपिरित्यन्वयः । खद्योतैः रात्रावितिं शेषः ॥ ५१ ॥

५०] ति० टी०–तस्य हनुमतो वेगेन विमुक्तास्ततो विभक्तास्ते वृक्षाः सलिले व्यवशीर्यन्त । आर्षोऽडभावः । सुहृदो यथा, बन्धुप्रस्थापनार्थं गताः सुहृदो यथा तान्प्रस्थाप्य निवर्तन्ते तद्वत् ॥ ५० ॥

रा० टी०–**विमुक्ता इति** । तस्य हनुमतो वेगेन विमुक्ता विमोचिता वियोजिता इत्यर्थः, द्रुमाः पुष्पाणि मुक्त्वा सलिले व्यवशीर्यन्त । तत्र दृष्टान्तः निवृत्ताः प्रस्थितं बन्धुमनुपायागताः सुहृदो यथा ॥ ५१ ॥

गो० टी०–**विमुक्ता इति** । अवशीर्यन्त अवाशीर्यन्त आगमशास्त्रस्यानित्यत्वादडभावः, स्थितवन्त इत्यर्थः । निवृ-

१ तस्मिन्निति गो. पाठः । २ वेगोद्धता इति गो. पाठः । ३ शाला इति रा. पाठः । ४ अवशीर्यन्तेति गो. पाठः ।

लघुत्वेनोपपन्नं तद्विचित्रं सागरेऽपतत् । द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ॥ ५१ ॥
[ताराचितमिवाकाशं प्रबभौ स महार्णवः ।]
पुष्पौघेण सुगन्धेन नानावर्णेन वानरः । बभौ मेघ इवोद्यन्वै विद्युद्गणविभूषितः ॥ ५२ ॥
तस्य वेगसमुद्धूतैः पुष्पैस्तोयमदृश्यत । ताराभिरिव रामाभिरुदिताभिरिवाम्बरम् ॥ ५३ ॥
तस्याम्बरगतौ बाहू दृश्येते प्रसारितौ । पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्यावि[1] पन्नगौ ॥ ५४ ।
पिबन्निव बभौ चापि सोर्मिजालं महार्णवम् । पिपासुरिव चाकाशं ददृशे स महाकपिः ॥ ५५ ।
तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः । नयने विप्रकाशेते पर्वतस्थाविवानलौ ॥ ५६ ॥
पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले । चक्षुषी संप्रकाशेते चन्द्रसूर्याविव स्थितौ ॥ ५७ ॥
मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ । संध्यया समभिस्पृष्टं यथा स्यात्सूर्यमण्डलम् ॥ ५८ ॥
लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते । अम्बरे वायुपुत्रस्य शक्रध्वज इवोच्छ्रितम् ॥ ५९ ।

त्ताः बन्धूननुगम्य निवृत्ताः सुहृत्पक्षे सलिल इति सामीप्ये सप्तमी । 'उदकान्तात् स्निग्धो बन्धुमनुव्रजेत्' इत्युक्तेः ॥ ५२ ॥

५१] ति० टी०–अपतदिति छेदः । यदपतत्तल्लघुत्वेनोपपन्नमुपपत्तिमत् ॥ ५१ ॥

रा० टी०–लघुत्वेनेति । कपिवायुसमीरितं पुष्पं यतो लघुत्वेनोपपन्नं युक्तं तत् तस्माद्धेतोः विचित्रं साहित्यरहितमित्यर्थः सागर अपतत् ॥ ५२ ॥

गो०टी०–लघुत्वेनेति । लघुत्वेनोपपन्नं लघुत्वेन युक्तम् ५३

५२] ति० टी०–सर्ववर्णानां विद्युत्तु सत्त्वान्नानावर्णपुष्पोद्यानवद्धस्य सविद्युद्गणमेघोपमा ॥ ५२ ॥

रा० टी०–पुष्पौघेणेति । पुष्पौघेण पुष्पसमूहैः विद्युद्गणविभूषित उद्यन्मेघ इव बभौ ॥ ५३ ॥

गो० टी०–तारेत्यर्धमेकं वाक्यम् । ताराचितमिव आकाशं प्रबभौ स महार्णवः ॥ ५४ ॥

गो० टी०–पुष्पौघेणेति । अनुबद्धेन व्याप्तेन ॥५५–५७॥

५३–५४] ति० टी०–रामाभी रमणीयाभिः ॥५३॥५४॥

रा० टी०–तस्येति । तस्य हनुमतः वेगसमुद्धूतैः वेगेन पतितैः पुष्पैरुपलक्षितं तोयमुदिताभिस्ताराभिरुपलक्षितमम्बरमिव अदृश्यत ॥ ५४ ॥

रा० टी०–तस्येति । अम्बरगतौ प्रसारितौ तस्य हनुमतो बाहू पर्वताग्राद्विनिष्क्रान्तौ विनिर्गतौ पञ्चास्यौ पन्नगाविव ददृशाते ॥ ५५ ॥

५५] ति० टी०–विवृतवक्त्रत्वात्पिबन्निवेति । अधोवक्त्रत्वे इयमुत्प्रेक्षा । ऊर्ध्ववक्त्रत्वे आकाशं पिपासुरिवेति ॥ ५५ ॥

रा० टी०–पिबन्निति । महाकपिः हनुमान् सोर्मिजालम् ऊर्मिसमूहसहितं महार्णवम् आकाशं च पिपासुः पातुमिच्छुरिव ददृशे, ऊर्ध्वमुखत्वे आकाशं पिपासुरिव अधोमुखत्वे महार्णवं पिपासुरिव प्रतीयत इत्यर्थः ॥ ५६ ॥

गो० टी०–पिबन्निवेति । अर्णवं पिबन्निव आकाशं पिपासुरिवेत्याभ्यामस्य महानुद्योगः सूच्यते । लङ्कनवेगेन सह क्षीयमाणे सागरविस्तारे स पीयमान इव भवति एवमस्य च । ततोऽतिवेगेन गच्छन् स महार्णवं पिबन्निव बभौ तथा आकाशमपीत्याहुः ॥ ५८ ॥ ५९ ॥

५६] ति० टी०–विप्रकाशेते विशेषेण प्रकाशेते स्म अनलौ दावानलौ ॥ ५६ ॥

रा० टी०–तस्येति । वायुमार्गानुसारिणः वायुमार्गेणाहनमनशीलस्य तस्य हनुमतः विद्युत्प्रभाकारे विद्युत्प्रभासदृशप्रभोत्पादके नयने पर्वतस्थौ अनलौ दावानलाविव प्रकाशेते ॥५

५७] ति० टी०–पिङ्गे पिङ्गलवर्णे परिमण्डले परिवद्धप्रभामण्डले स्थितौ चन्द्रसूर्याविव एकगिरावुदये पिङ्गलमण्डलतयाऽवस्थितौ चन्द्रसूर्याविवेत्यर्थः ॥ ५७ ॥

रा० टी०–पिङ्ग इति । पिङ्गाक्षाणां वानराणां मुख्यस्य हनुमतः परि चतुर्दिक्षु मण्डलं प्रभा ययोस्ते चक्षुषी स्थिते एकत्र विद्यमानौ चन्द्रसूर्याविव संप्रकाशेते ॥ ५८ ॥

गो० टी०–पिङ्गे इति । पिङ्गे पिङ्गलवर्णे पिङ्गाक्षवानराणां मुख्यस्य परिमण्डले मण्डलाकारे । चन्द्रसूर्यावित्युपमा ॥ ६० ॥

५८–५९] ति० टी०–नासिकया युक्तमिति शेषः संध्याकालिकं सूर्यमण्डलं यथा तथा बभावित्यर्थः ॥५८॥५

रा० टी०–मुखमिति । ताम्रया नासिकया युक्तं तामरुणं तस्य मुखं संध्यया समभिस्पृष्टं संयुक्तं सूर्यमण्डलं यथा स्यात् तथा आबभौ ॥ ५९ ॥

गो०टी०–मुखमिति। तत्सूर्यमण्डलं सन्ध्यासूर्यमण्डलम्

रा० टी०–लाङ्गूलमिति । समाविद्धम् उन्नतीकृतमुच्छ्रितं शक्रध्वजमिव शोभते ॥ ६० ॥

गो० टी०–लाङ्गूलमिति । समाविद्धम् उन्नतीकृतम् ॥ ६२ ॥ ६३ ॥

१ अधमतदधिकं गा. पाठे । २ अनुबद्धेनेति गो. पाठः । ३ आकाश इति गो. पाठः । ४ समाधूतैरिति गो. पाठः । ५ उदितावितिं गो. पा ६ तदिति गो. पाठः । ७ उच्छ्रित इति गो. पाठः ।

लाङ्गूलचक्रो हनुमाञ्शुक्रदंष्ट्रोऽनिलात्मजः । व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ॥ ६० ॥
स्फिग्देशेनोतिताम्रेण रराज स महाकपिः । महता दारितेनेव गिरिर्गैरिकधातुना ॥ ६१ ॥
तस्य वानरसिंहस्य प्लवमानस्य सागरम् । कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ ६२
खे यथा निपतत्युल्का उत्तरान्ताद्विनिःसृता दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः ॥ ६३ ॥
पतत्पतङ्गसंकाशो व्यायतः शुशुभे कपिः प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया ॥ ६४ ॥
उपरिष्टाच्छरीरेण छायया चावगाढया सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ॥ ६५ ॥
यं यं देशं समुद्रस्य जगाम स महाकपिः स तु तस्याङ्गवेगेन सोन्माद इव लक्ष्यते ॥ ६६ ॥
सागरस्योर्मिजालानामुरसा शैलवर्ष्मणा अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः ॥ ६७ ॥

६०] ति० टी०–शुक्रदंष्ट्रत्वं स्वरूपकथनमात्रम्, न तु परिवेषिभास्करोपमोपयोगि ॥ ६० ॥

रा० टी०–लाङ्गूलेति । लाङ्गूलचक्रः चक्राकारलाङ्गूलविशिष्टः शुक्रदंष्ट्रो हनुमान् परिवेषी मण्डलवान् भास्कर इव व्यरोचत ॥ ६१ ॥

६१] ति० टी०–स्फिग्देशेन कटिप्रदेशेन । तन्मात्रस्यातिताम्रत्ववर्णनादन्यत्राल्पवद्वर्णत्वम्, अत एव दारितगैरिकधातुयुक्तगिर्युपमा ॥ ६१ ॥

रा० टी०–स्फिगिति । अभितास्रेण अत्यरुणेन स्फिग्देशेन कट्यधोभागेनोपलक्षितः स हनुमान् दारितेन विदारितेन गैरिकधातुनोपलक्षितो गिरिरिव रराज ॥ ६२ ॥

गो० टी०–स्फिग्देशेनेति । स्फिग्देशेन वालमूलप्रदेशेन ॥ ६४ ॥

६२] ति० टी०–जीमूत इति सप्तम्यन्तमिति कतकः । गर्जति जगर्ज ॥ ६२ ॥

रा० टी०–तस्येति । सागरं प्लवमानस्य तस्य हनुमतः, कच्छान्तरगतः कच्छमध्ये प्राप्तो वायुः जीमूतो मेघ इव गर्जति जगर्ज । जीमूते इति सप्तम्यन्तमिति कतक इति भट्टाः तत्रारुचिर्बीजं तु विनिगमनाविरहः ॥ ६३ ॥

गो० टी०–तस्येति । गर्जति अगर्जत् ॥ ६२ ॥

६३] ति०टी०–उत्तरान्तादुत्तरोर्ध्वदिग्भागात्। सानुबन्धा सूक्ष्मोल्कान्तरानुबद्धा इदं विशेषणं पुच्छसाहित्यात् ॥ ६३ ॥

रा० टी०–खे इति । उत्तरान्तात् उत्तरोर्ध्वदिक्प्रदेशाद्विनिःसृता सानुबन्धा पुच्छाकृतितेजोविशेषयुक्ता उल्का यथा खे अकाशे निपतति गच्छति तथा सः लाङ्गूलविशिष्टः कपिकुञ्जरो हनुमान् दृश्यते ॥ ६४ ॥

गो० टी०–खे यथेति । सानुबन्धा सपुच्छा । उल्का हि पुच्छयुक्ता निपतति ॥ ६६ ॥

६४] ति० टी०–पतत्पतङ्गसंकाशो गच्छत्सूर्यसंकाशो व्यायतो दीर्घः कपिर्वस्त्रेण बध्यमानया कक्ष्यया गजमध्यबन्धनरज्ज्वा युक्तः प्रवृद्धो मातङ्ग इव बभौ । ‘ कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ’ इति ॥ ६४ ॥

रा० टी०–पतदिति । व्यायतोऽतिदीर्घः पतत्पतङ्गसंकाशः प्रचलत्सूर्यसदृशः कपिः सलाङ्गूलो हनुमान् बध्यमानया गजशरीरसंबद्धया कक्ष्यया गजबन्धनेनोपलक्षितः प्रवृद्धो महान्मातङ्ग इव शुशुभे ॥ ६६ ॥

गो० टी०–पतदिति । पतङ्गः सूर्यः व्यायतो दीर्घः । प्रवृद्ध इव दीर्घ इव कक्ष्यायां बध्यमानायां हि मातङ्गो दीर्घो भवति ॥ ६७ ॥

६५] ति० टी०–उपरिष्टात्खे गच्छता स्वशरीरेणाधः सागरेऽवगाढया स्वस्य छायया प्रतिबिम्बेन लक्षितः स सागरे मारुताविष्टा नौरिवासीत् । नौश्चोपरि विद्यमानपदार्थेन सह सागरे वायुवशाद्वेगेन चञ्चला गच्छतीति तदुपमा ॥ ६६ ॥

रा० टी०–उपरिष्टादिति । उपरिष्टात् उपरि विद्यमानेन शरीरेण सागरे अवगाढया सागरजलसंलग्नया छायया च उपलक्षितः कपिः मारुताविष्टा शीघ्रनिर्गमायोपरिबद्धमारुतावरोधनकर्तृवस्त्रविशेषहेतुकवायुयुक्ता नौरिवासीत् ॥ ६६ ॥

गो० टी०–उपरिष्टादिति । नौर्जलावगाढेनाधोभागेन व्योमावगाढेन चोर्ध्वभागेन गच्छति । अयं च उपरिगतशरीरेणाधोजलावगाढच्छायया चैकाकारः सन् मारुतपूरितकठा नौरिवासीत् ॥ ६८ ॥

६६] ति० टी०–सोन्माद इव सापस्मार इव घूर्णनफेनवमनविक्रोशनादिविकारसाम्यात् ॥ ६६ ॥

रा० टी०–यं यमिति । स हनुमान् समुद्रस्य यं यं देशं जगाम स देशस्तस्य हनुमतो वेगेन सोन्मादः अपस्मारादिरोगसहित इव लक्ष्यते । आघूर्णन् बहुफेनः अतिशब्दवानभवदित्यर्थः ॥ ६७ ॥

गो० टी०–यं यमिति । सोन्माद इव समुद्वर्ष इव समुद्धतजल इत्यर्थः ॥ ६९ ॥

६७] ति० टी०–ऊर्मिजालानामभिघ्नन्, कर्मणः शेषत्वविवक्षया षष्ठी । तान्यभिघ्नन्निति यावत् । शैलसदृशेन अनेन सागरोर्मीणामत्युन्नतत्वं सूचितम् ॥ ६७ ॥

रा० टी०–सागरस्येति । शैलवर्ष्मणां पर्वताकाराणां

१ चक्रेण महानिति गो. पाठः । २ अभीति गो. रा. पाठः । ३ निपतन्तीति गो. रा. पाठः । ४ ह्युत्तरेति गो. पाठः । ५ स तस्योर्वीति गो. पाठः । ६ वर्ष्मणामिति गो. रा. पाठः ।

कपिवातश्च बलवान्मेघवातश्च [1]निर्गतः । सागरं भीमनिर्ह्रादं कम्पयामासतुर्भृशम् ॥ ६८ ॥
विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि । पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ॥ ६९ ॥
मेरुमन्दरसंकाशान्[2]उद्गतान्सुमहार्णवे । [3]अत्यक्रामन्महावेगस्तरङ्गान्गणयन्निव [4] ॥ ७० ॥
तस्य वेगसमुद्धूतं[5] जलं सजलदं तदा । अम्बरस्थं विबभ्राजे[6] शरदभ्रमिवाततम् ॥ ७१ ॥
तिमिनक्रझषाः कूर्मा दृश्यन्ते विवृतास्तदा । वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ॥ ७२ ॥
क्रममाणं समीक्ष्याथ भुजगाः सागरंगमाः[7] । व्योम्नि तं कपिशार्दूलं सुपर्णमिव[8] मेनिरे[9] ॥ ७३ ॥
दशयोजनविस्तीर्णा त्रिंशद्योजनमायता । छाया वानरसिंहस्य जवे चारुतराऽभवत् ॥ ७४ ॥
श्वेताभ्रघनराजीववायुपुत्रानुगामिनी । तस्य सा शुशुभे छाया [10]पतिता लवणाम्भसि ॥ ७५ ॥
शुशुभे स महातेजा महाकायो महाकपिः । वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ॥ ७६ ॥

सागरस्य ऊर्मिजालानाम् उरसा उरोवेगेन अभिघ्नन् सन् महावेगः स हनुमान् पुप्लुवे । ऊर्मिजालानामित्यत्र कर्मणः शेषत्वविवक्षया षष्ठी ॥ ६८ ॥

गो० टी०–सागरस्येति । शैलवर्ष्मणां शैलतुल्यानाम् 'वर्ष्म देहप्रमाणयोः' इति सज्जनः ॥ ७० ॥ ७१ ॥

६८] ति० टी०–कपिवातः कपिनोत्थापितो वातः । मेघवातो मेघमण्डलगो वातः ॥ ६८ ॥

रा० टी०–कपीति । निर्गतः प्रादुर्भूतः बलवान् कपिवातः प्रचलितकपिशरीरहेतुकवायुः मेघवातः मण्डलप्राप्तो वायुश्च सागरं भृशं कम्पयामासतुः ॥ ६९ ॥

६९] ति० टी०–रोदसी द्यावापृथिव्यौ विकिरन्निव पृथक्क्षिपन्निव ॥ ६९ ॥

रा० टी०–विकर्षन्निति । बृहन्ति अतिस्थूलानि ऊर्मिजालानि विकर्षन् सहैव नयन् सन् रोदसी द्यावापृथिव्यौ लवणाम्भसि विकिरन् प्रक्षिपन्निव कपिशार्दूलः पुप्लुवे ॥ ७० ॥

गो० टी०–विकर्षन्निति । विकिरन्निव विभजन्निव रोदसी द्यावापृथिव्यौ ॥ ७२ ॥

७०] ति० टी०–अतीत्यातीत्य गमनाद्गिणयन्निवेत्युत्प्रेक्षा ॥ ७० ॥

रा० टी०–मेर्विति । महावेगो हनुमान् सुमहार्णवे उद्गतान् प्रादुर्भूतान् मेरुमन्दरसंकाशान् तरङ्गान् गणयन् संख्यातान् कुर्वन् इव अत्यक्रामत् निरगच्छत् ॥ ७१ ॥

गो० टी०–मेर्विति । अतिक्रामत् अत्यक्रामत् ॥ ७३ ॥

७१] ति० टी०–तस्य वेगेन समुद्धूतमूर्ध्वक्षिप्तम्, अत एव सजलदं जलदसहचरं मेघमण्डलपर्यन्तमूर्ध्वं गतमम्बरस्थं जलमाततं विततं शरदभ्रमिव शरन्मेघ इव बभौ । शुक्लत्वादिति भावः ॥ ७१ ॥

रा० टी०–तस्येति । तस्य हनुमतो वेगेन समुद्धूतम् ऊर्ध्वं प्रक्षिप्तम् अत एव सजलदं जलदेन सह स्थितम् अम्बरस्थजलम् आततं विस्तृतं शारदाभ्रमिव विबभ्राजे ॥ ७२ ॥

गो० टी०–तस्येति । तस्य हनुमतः वेगेन ऊरुवातेन समुद्धूतं समुत्थापितं सजलदं जलं जलदो जलं चोद्धृतमित्यर्थः ॥ ७४ ॥

७२–७३] ति० टी०–विवृता वेगाज्जलोत्सारणेन व्यक्तदेहाः । वस्त्रापकर्षणेन वस्त्रापहारेण शरीराण्यवयवाः ॥७२॥७३॥

रा० टी०–तिमीति । वस्त्रापकर्षणेन शरीरिणां मनुष्यादीनां शरीराणीव विवृता जलरूपप्रावरणरहितास्तिम्यादयो दृश्यन्ते ॥ ७३ ॥

रा० टी०–क्रममाणमिति । सागरङ्गमाः भुजगाः व्योम्नि क्रममाणं तं कपिशार्दूलं सुपर्णमिव मेनिरे ॥ ७४ ॥

गो० टी०–तिमीति । तिमयो महामत्स्याः नक्राः ग्राहाः झषाः मकराः विवृताः जलविभेदेन प्रकाशिताः ॥ ७५ ॥ ७६ ॥

७४] ति० टी०–छायाप्रमाणवर्णनेन तच्छरीरप्रमाणमपि वर्णितप्रायम् । इयं माध्याह्निकी छाया ॥ ७४ ॥

रा० टी०–दशेति । दशयोजनविस्तीर्णा दशयोजनपरिमितविस्ताराविशिष्टा त्रिंशद्योजनमायता दीर्घा वानरसिंहस्य छाया जवे वेगे सति चारुतरा अतिरमणीया अभवत् ॥ ७५ ॥

गो० टी०–दशयोजनविस्तीर्णेति । ननु त्रिंशद्योजनायतत्वे चतुर्थपदेऽपि लङ्काप्राप्तिः स्यात् मैनाकसंवादसुरसासंवादादिकं च विरुध्येत । नहि बिम्बादधिकपरिमाणत्वं प्रतिबिम्बस्य संभवतीति न शङ्कनीयं छायाशब्दो हि नात्र प्रतिबिम्बपरः किन्त्वनातपपरः । प्रातरेव हि समुद्रतरणमुक्तम् तदा तस्य छाया समुद्रे तथाप्रमाणा दृश्येतैव ॥ ७७ ॥

७५–७६] ति० टी०–श्वेताभ्रघना राजीवश्वेताभ्रयुक्त मेघपङ्क्तिवत्तस्य च्छाया शुशुभे । शुक्लदंष्ट्रादिना नानावर्णत्वादुक्तोपमानिर्वाहः ॥ ७५ ॥ ७६ ॥

रा० टी०–श्वेतेति । लवणाम्भसि पतिता वायुपुत्रानुगामिनी तस्य वायुपुत्रस्य छाया श्वेताभ्रघनराजीव श्वेताभ्रसंलग्ना घनराजी मेघपङ्क्तिरिव शुशुभे ॥ ७६ ॥

१ निःसृत इति गो. पाठः । २ निर्वाधमिति गो. पाठः । ३ उद्धतान्स इति गो. पाठः । ४ अतिक्रामन्निति गो. पाठः । ५ वभ्राजेति गो. पाठः । ६ शारदेति रा. पाठः । ७ प्लवमानमिति गो. पाठः । ८ भुजङ्गाः सागरालया इति गो. पाठः । ९ सुपर्ण इतीति गो. पाठः । १० विततेति गो. पाठः ।

येनासौ याति बलवान्वेगेन कपिकुञ्जरः । तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ॥ ७७ ॥
आपाते पक्षिसङ्घानां पक्षिराज इव व्रजन् । हनुमान्मेघजालानि प्रकर्षन्मारुतो यथा ॥ ७८ ॥
पाण्डुरारुणवर्णानि नीलमञ्जिष्ठकानि च । कपिनाऽऽकृष्यमाणानि महाभ्राणि चकाशिरे ॥ ७९ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः । प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव दृश्यते ॥ ८० ॥
प्लवमानं तु तं दृष्ट्वा प्लवगं त्वरितं तदा । ववृषुस्तत्र पुष्पाणि देवगन्धर्वदानवाः ॥ ८१ ॥
ततापनहि तं सूर्यः प्लवन्तं वानरेश्वरम् । सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥ ८२ ॥
ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा । जगुश्च देवगन्धर्वाः प्रशंसन्तो वनौकसम् ॥ ८३ ॥
नागाश्च तुष्टुवुर्यक्षा रक्षांसि विविधानि च । प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमम् ॥ ८४ ॥
तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति । इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ ८५ ॥
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः । करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ॥ ८६ ॥

रा० टी०–शुशुभे इति । महातेजाः स हनुमान् निरालम्बे वायुमार्गे पक्षवान् पर्वत इव शुशुभे ॥ ७७ ॥

गो० टी०–श्वेताभ्रेति । अभ्रघनः अभ्रमूर्तिः ॥७८॥७९॥

७७] ति० टी०–द्रोणी हर्म्यादौ जलनिर्गमकाष्ठयन्त्रं तज्जलधारायुक्त इव कृतो द्रोणीकृतः । मेघेषु तदाघातेन तेभ्यो जलस्रवणादिति भावः ॥ ७७ ॥

रा० टी०–येनेति । येन मार्गेण असौ कपिकुञ्जरो याति तेन मार्गेण अर्णवः सहसा शीघ्रं द्रोणीव कृतः हर्म्यादौ जलनिर्गमनाय काष्ठयन्त्रे इव प्रापित इत्यर्थः ॥ ७८ ॥

गो० टी०–येनेति । द्रोणी कटाहः ॥ ८० ॥

७८] ति० टी०–आपतन्त्यस्मिन्नित्यापातो मार्गः । पाण्डुरत्वादिगुणकानि मेघजालानि प्रकर्षन्मारुतो यथा तथा बभूवेति शेषः ॥ ७८ ॥

रा० टी०–आपात इति । पक्षिसंघानाम् आपाते आपतनमार्गे पक्षिराज इव व्रजन् हनुमान् मेघजालानि प्रकर्षन् सहैव नयन् सन् मारुत इव बभूवेति शेषः ॥ ७९ ॥

गो० टी०–आपात इति । आपाते मार्गे ॥ ८१–८४ ॥

७९–८०] ति० टी०–कपिनाऽऽकृष्यमाणानि महाभ्राणि चकाशिरे । मारुतेनाकृष्यमाणानीवेति शेषः ॥ ७९॥८० ॥

रा० टी०–पाण्डुरेति । कपिना आकृष्यमाणानि पाण्डुरत्वादिवर्णविशिष्टानि महाभ्राणि चकाशिरे ॥ ८० ॥

रा० टी०–प्रविशन्निति । अभ्रजालानि प्रवेशादि कुर्वन् अत एव प्रच्छन्नः प्रकाशश्च कपिश्चन्द्रमा इव दृश्यते ॥ ८१ ॥

८१] ति० टी०–तत्र प्लवगे ॥ ८१ ॥

रा० टी०–प्लवमानमिति । प्लवमानं तं हनुमन्तं दृष्ट्वा देवगन्धर्वदानवाः पुष्पवर्षाणि ववृषुः ॥ ८२ ॥

८२–८३] ति० टी०–तं नहि तापेत्यन्वयः । वायुः सिषेवे श्रमापनयनायेति भावः ॥ ८२ ॥ ८३ ॥

रा० टी०–तापेति । सूर्यः रामकार्यार्थसिद्धये प्लवन्तम् अत एव हितं वानरेश्वरं न तापं तदा वायुः सिषेवे ॥ ८२ ॥

रा० टी०–ऋषय इति । वनौकसमेनं हनुमन्तमृषयस्तुष्टुवुः प्रशंसन्तो देवगन्धर्वाः जगुश्च ॥ ८४ ॥

गो० टी०–तापेति । रामकार्यं सीतान्वेषणं तदेवार्थः प्रयोजनं तस्य सिद्धये लाभाय तद्धेतुभूतहनुमच्छ्रमनिवर्तनायेत्यर्थः ॥ ८२ ॥ ८३ ॥

८४] ति० टी०–कपिवरं विगतक्लमं वीक्ष्य नागादयस्तुष्टुवुः ॥ ८४ ॥

रा० टी०–नागा इति । विगतक्लमम् अन्यासाध्यव्यापारवत्त्वेऽपि क्लमरहितं कपिवरं प्रेक्ष्य नागादयस्तुष्टुवुः ॥ ८९ ॥

गो० टी०–नागा इति । रक्षांसि दिक्पालकरक्षस्संबन्धीनि ॥ ८७ ॥

८५] ति० टी०–इक्ष्वाकुकुलस्य स्वोत्पादकस्य मानं सत्कारमर्थयते तथाभूतः ॥ ८५ ॥

रा० टी०–तस्मिन्निति । हनूमति प्लवमाने सति इक्ष्वाकुकुलमानार्थी इक्ष्वाकुकुलस्य स्वजन्मकारणीभूतस्य मानं सत्कारमर्थयते तच्छीलः सागरश्चिन्तयामास ॥ ८६ ॥

गो० टी०–तस्मिन्निति । मानार्थी बहुमानार्थी । स्वयं सागरत्वादिति भावः ॥ ८८ ॥

८६] ति० टी०–विवक्षतां वागिन्द्रियवत्प्राणिनाम् । सर्ववाच्यः सर्वं वाच्यं निन्दा यस्मिंस्तादृशो भविष्यामि सर्वनिन्दास्पदं भविष्यामीत्यर्थः ॥ ८६ ॥

रा० टी०–तच्चिन्तास्वरूपमाह–साहाय्यमिति । हनूमतः साहाय्यं यदि नाहं करिष्यामि तर्हि विवक्षतां कुत्सितजननिन्दां वक्तुमिच्छतां जनानां सर्ववाच्यः सर्वात्मना वक्तव्यः निन्दनीय इत्यर्थः, भविष्यामि ॥ ८७ ॥

गो० टी०–साहाय्यमिति । सर्ववाच्यः सर्वप्रकारेण निन्द्यः विवक्षतां वक्तुमिच्छताम् ॥ ८९–९१ ॥

---

१ माज्जिष्ठेति गो. रा. पाठः । २ लक्ष्यते इति गो. पाठः । ३ ववर्षुः पुष्पवर्षाणीति गो. पाठः । ४ वानरोत्तममिति गो. पाठः । ५ जगमुरिति रा. पाठः । ६ महौजसमिति गो. पाठः । ७ विबुधाः खगा इति गो. पाठः ।

अहमिक्ष्वाकुनाथेन सागरेण विवर्धितः । इक्ष्वाकुसचिवश्चायं नार्हत्यवसादितुम् ॥ ८७ ॥
तथा मया विधातव्यं विश्रमेत यथा कपिः । शेषं च मयि विश्रान्तः सुखी सोऽतितरिष्यति ॥ ८८ ॥
इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमम्भसि । हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ॥ ८९ ॥
त्वमिहासुरसङ्घानां देवराज्ञा महात्मना । पातालनिलयानां हि परिघः संनिवेशितः ॥ ९० ॥
त्वमेषां ज्ञातवीर्याणां पुनरेवोत्पतिष्यताम् । पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ९१ ॥
तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुम् । तस्मात्संचोदयामि त्वामुत्तिष्ठ गिरिसत्तम ॥ ९२ ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् । हनूमान्रामकार्यार्थी भीमकर्मा खमाप्लुतः ॥
[अस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः । मम इक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥
कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् । कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ॥
सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि । अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वर ॥
चामीकरमहानाभ देवगन्धर्वसेवित । हनुमांस्त्वयि विश्रान्तस्ततः शेषं गमिष्यति ॥
काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् ।] श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ ९३ ॥

८७] ति० टी०–उक्तमेव विवृणोति—अहमिति । तत्तस्मादेषोऽवसादितुमवसत्तुं श्रमं गन्तुं नार्हति । सागरेण विवर्धित इत्युक्त्या कश्चिद्देशः सगरखातस्याप्येतत्संबद्ध इति ज्ञायते ॥ ८७ ॥

रा० टी०–तत्र हेतुं वदन्नाह–अहमिति । इक्ष्वाकुनाथेन सगरेणाहं विवर्धितः तत्तस्माद्धेतोः अवसादितुं श्रमं प्राप्तुम् अयम् इक्ष्वाकुसचिवः नार्हति ॥ ८८ ॥

८८] ति० टी०–शेषं मार्गशेषम् ॥ ८८ ॥

रा० टी०–तथेति । यथायं कपिः विश्रमेत तथा मया विधातव्यं मयि मद्विहितविश्रान्तिस्थाने विश्रान्तः निवर्तितश्रमः अत एव सुखी स हनुमान् शेषं मार्गम् अतितरिष्यति ॥८९॥

८९] ति० टी०–अम्भसि स्वाम्भसि छन्नं हिरण्यनाभं हिरण्यप्रधानम् तन्मयमिति यावत् । 'नाभिः प्रधाने कस्तूर्याम्' इति ॥ ८९ ॥

रा० टी०–इतीति । समुद्रः इति साध्वीं मतिं कृत्वा अम्भसि जले छन्नं हिरण्यनाभं सुवर्णप्रधानं तन्मयमित्यर्थः, मैनाकमुवाच । 'नाभिः प्रधाने कस्तूर्याम्' इति कोषः ॥९०॥

गो० टी०–इतीति । हिरण्यनाभं हिरण्यशृङ्गं नाभिशब्दो ह्यध्यक्षवाची शृङ्गं च पर्वतस्याध्यक्षमेव । 'नाभिरध्यक्षकस्तूर्योः' इति दर्पः ॥ ९२ ॥

९०] ति० टी०–परिघ इति पक्षच्छेदभयात्समुद्रप्रवेशानन्तरं पातालस्थराक्षसनिरोधार्थं द्वारनिरोधकपरिघवन्मैनाकः स्थापित इत्यर्थः ॥ ९० ॥

रा० टी०–तद्वचनाकारमाह–त्वमिति । पातालनिलयानां मार्गनिरोधाय परिघः परिघत्वेन परिकल्पितस्त्वं देवराज्ञा देवराजेन संनिवेशितः निर्गमबिले संस्थापितः ॥ ९१ ॥

गो० टी०–त्वमिति । परिघः अर्गलम् । 'परिघो मुद्गलेऽर्गले' इति दर्पः ॥ ९३ ॥

९१] ति० टी०–ज्ञातवीर्याणां देवराजेनेति शेषः । एषां मत्तराणाम् ॥ ९१ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–त्वमिति । ज्ञातवीर्याणाम् एषां पुनरप्युत्पतिष्यताम् असुरसंघानां पातालस्य द्वारमावृत्य तिष्ठसि ॥ ९२ ॥

गो० टी०–परिघत्वमेवाह–त्वमेषामिति ॥ ९४ ॥

९२] ति० टी०–शक्तिस्ते अस्तीति शेषः । तस्मात्पिहितपातालमुख एव सन्वर्धितुं शक्त्या वर्धमानः सन्नूर्ध्वमुत्तिष्ठ ॥ ९२ ॥

रा० टी०–तिर्यगिति । हे शैल ! तिर्यगादिषु वर्धितुं ते शक्तिरस्तीति शेषः । तस्मात् त्वां संचोदयामि अतस्त्वमुत्तिष्ठ९३

गो० टी०–तिर्यगिति । शक्तिः अस्तीति शेषः॥९५॥९६॥

९३] ति० टी०–उपर्येति तवोपरिप्रदेशं प्राप्नोति । तस्माद्विश्रामाय त्वमुत्तिष्ठेति पूर्वेणान्वयः । एतदुत्तरम् 'हनुमान्रामकार्यार्थी भीमकर्मा खमाप्लुतः । श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥' इति प्राचीनः पाठः । अत्र खमाप्लुतः इत्यनन्तरं केचिच्छ्लोकाः प्रक्षिप्ताः परैरिति कतकः । यतो रामकार्यार्थी यतश्च श्राम्यति ततस्तस्य श्रमं समीक्ष्योत्थातुमर्हसि ॥ ९३ ॥

रा० टी०–तत्प्रयोजनमाह–स इति । खमाकाशमाप्लुतः प्राप्तः स प्रसिद्धः एष हनुमान् त्वामुपर्येति तवोपरिदेशं प्राप्नोति अतः प्लवगेन्द्रस्य श्रमं समीक्ष्य उत्थातुमर्हसि । सार्धश्लोक एकान्वयी ॥ ९४ ॥ ९५ ॥

गो० टी०–अस्येति । इक्ष्वाकोः कुले वंशे वर्तते शुश्रूषत

१ सगरेणेति गो. पाठः । २ नावसीदितुमर्हतीति गो. पाठः । ३ सुखेनातिपतिष्यतीति गो. पाठः । ४ पातालतलवासिनाम् । देवराज्ञा गिरिश्रेष्ठेति गो. पाठः । ५ जातेति गो. पाठः । ६ कार्यार्थमिति गो. पाठः । ७ एते सार्धचत्वारः श्लोकाः गो. अधिकाः ।

हिरण्यनाभो मैनाको निशम्य लवणाम्भसः । उत्पपात जलात्तूर्णं महाद्रुमलताव्रतः ॥ ९४ ॥
स सागरजलं भित्त्वा बभूवात्युच्छ्रितस्तदा । यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ ९५ ॥
स महात्मा मुहूर्तेन पर्वतः सलिलावृतः । दर्शयामास शृङ्गाणि सागरेण नियोजितः ॥ ९६ ॥
शातकुम्भमयैः शृङ्गैः सकिंनरमहोरगैः । आदित्योदयसंकाशैरुल्लिखद्भिरिवाम्बरम् ॥ ९७ ॥
तस्य जाम्बूनदैः शृङ्गैः पर्वतस्य समुत्थितैः । आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभम् ॥ ९८ ॥
जातरूपमयैः शृङ्गैर्भ्राजमानैर्महाप्रभैः । आदित्यशतसंकाशः सोऽभवद्गिरिसत्तमः ॥ ९९ ॥
समुत्थितमसङ्गेन हनूमानग्रतः स्थितम् । मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ १०० ॥
स तमुच्छ्रितमत्यर्थं महावेगो महाकपिः । उरसा पातयामास जीमूतमिव मारुतः ॥ १०१ ॥
स तदासादितस्तेन कपिना पर्वतोत्तमः । बुद्ध्वा तस्य हरेर्वेगं जहर्ष च ननाद च ॥ १०२ ॥

इति इक्ष्वाकुकुलवर्ती तस्य पूज्यतमास्तव मत्संबन्धादिति भावः। यद्वा त्वदुपकारकवायुपुत्रमुद्दिश्य ॥ ९७ ॥

गो० टी०–कुर्विति । कार्यं प्रयोजनं विश्रान्त्यादि कर्तव्यं कार्यमकृतं सतां मन्युं कोपम् उदीरयेत् प्रेरयेत् उत्पादयेत् ॥ ९८ ॥ ९९ ॥

गो० टी०–चामीकरेति । चामीकरमहानाभ स्वर्णमयमहाश्रृङ्ग ॥ १०० ॥

गो० टी०–काकुत्स्थस्येति । काकुत्स्थस्यानृशंस्यं रामस्य सीताविषयां दयाम् ॥ १०१ ॥

९४–९६] ति० टी०–लवणाम्भसः वचो निशम्येत्यर्थः ॥ ९४—९६ ॥

रा० टी०–हिरण्येति । मैनाकः लवणाम्भसः वचनमिति शेषः, निशम्य श्रुत्वा जलात् तूर्णमुत्पपात ॥ ९६ ॥

रा० टी०–उत्पतनप्रकारमाह–स इति । स मैनाकः सागरजलं भित्त्वा अत्युच्छ्रितो बभूव । तत्र दृष्टान्तः–जलधरं मेघं भित्त्वा दिवाकरो यथा ॥ ९७ ॥

रा० टी०–स इति । सागरेण नियोजितः स मैनाकः मुहूर्तेन शृङ्गाणि दर्शयामास ॥ ९८ ॥

गो० टी०–हिरण्यनाभ इति । निशम्य वचनमिति शेषः ॥ १०२–१०४ ॥

९७] ति० टी०–एतदुत्तरम् 'शातकुम्भमयैः' इत्यादि । अत्रापि द्विश्लोकप्रक्षेपः परेषाम् । हिरण्यनाभत्वविवरणम्–शातकुम्भमयैरिति । आदित्योदयसंकाशैरिति उपलक्षित इति शेषः ॥ ९७ ॥

रा० टी०–शातकुम्भैरिति । सकिंनरमहोरगैः किन्नरमहोरगसहितैः शातकुम्भमयैः सुवर्णप्रचुरैः आदित्योदयसंङ्काशैः आदित्योदयेन प्रकाशमानैः उदयकालिकादित्यसदृशैर्वा अम्बरमुल्लिखद्भिरिव शृङ्गैर्मैनाकः शुशुभे इति शेषः ॥ ९९ ॥

गो० टी०–शातकुम्भेति । शातकुम्भनिभैः स्वर्णसदृशैः आदित्योदयसंकाशैः आदित्योदयतुल्यैरित्यर्थः । शृङ्गैरुपलक्षितः शृङ्गाणि दर्शयामासेति योजना ॥ १०२ ॥

९८–९९] ति० टी०–शस्त्रसंकाशं शस्त्रवच्छ्याममाकाशं काञ्चनप्रभमभवत् ॥ ९८ ॥ ९९ ॥

रा० टी०–तस्येति । समुत्थितैः तस्य शृङ्गैः शस्त्रसंकाशं श्यामत्वेन खड्गसदृशमाकाशं काञ्चनप्रभम् अभवत् ॥ १०० ॥

रा० टी०–जातेति । गिरिसत्तमः स मैनाकः जातरूपमयैः सुवर्णप्रचुरैः अत एव महाप्रभैः अत एव भ्राजमानैः अतिशोभितैः शृङ्गैः स्वशिखरैः आदित्यशतसंकाशोऽभवत् ॥ १०१ ॥

गो० टी०–तस्येति । शस्त्रसंकाशं नीलमित्यर्थः । 'शस्त्रमायुधलोहयोः' इति विश्वः ॥ १०६ ॥ १०७ ॥

१००] ति० टी०–असङ्गेनाविलम्बेन ॥ १०० ॥

रा० टी०–तमिति । असङ्गेन विलम्बराहित्येन लवणतोयस्य मध्ये उत्थितं मैनाकं विघ्नोऽयमिति निश्चितः निश्चितवान् हनुमानासीदिति शेषः ॥ १०२ ॥

१०१] ति० टी०–पातयामास तमत्यर्थमुच्छ्रितं दृष्ट्वा तच्छृङ्गं पातयामासेत्यर्थः ॥ १०१ ॥

रा० टी०–स इति । स हनुमान् उच्छ्रितमुत्थितं तं मैनाकं जीमूतं मारुत इव उरसा पातयामास ॥ १०३ ॥

गो० टी०–तमिति । निश्चितः निश्चितवान् । कर्तरि निष्ठा ॥ १०८ ॥ १०९ ॥

१०२] ति० टी०–सादितोऽवसादितः अधःकृत इति यावत् । 'जहर्ष च ननाद च' इति प्राचीनः पाठः । बलवैभवं दृष्ट्वा जहर्ष स्वोत्थानप्रयोजनावेदनाय ननाद शब्दं कृतवान् । 'ननन्द' इति त्वाधुनिककल्पितः पाठः ॥ १०२ ॥

रा० टी०–स इति । तेन हनुमता आसादितः विद्धः पर्वतोत्तमः स मैनाकः हरेर्हनुमतो वेगं बुद्ध्वा जहर्ष ननाद च१०४

गो० टी०–स इति । जहर्ष विसिष्मिये ॥ ११० ॥

१ नाभ इति गो. पाठः । २ युत इति गो. पाठः । ३ अभ्युत्थित इति गो. पाठः । ४ निर्भैरिति गो. पाठः । ५ आलिखद्भिरिति गो. पाठः । ६ तप्तेति गो. पाठः । ७ स्वयंप्रभैरिति गो. पाठः । ८ तमिति गो. पाठः । ९ पातित इति गो पाठः । १० कपेरिति गो. पाठः । ११ ननन्देति गो.पाठः।

तमाकाशगतं वीरमाकाशे समुपस्थितः । प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् ॥ १०३ ॥
मानुषं धारयन्रूपमात्मनः शिखरे स्थितः । दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम ॥ १०४ ॥
निपत्य मम शृङ्गेषु सुखं विश्रम्य गम्यताम् । राघवस्य कुले जातैरुदधिः परिवर्धितः ॥ १०५ ॥
स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः । कृते च प्रतिकर्तव्यमेष धर्मः सनातनः ॥ १०६ ॥
सोऽयं तत्प्रतिकारार्थी त्वत्तः संमानमर्हति । त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ॥ १०७ ॥
योजनानां शतं चापि कपिरेष खमाप्लुतः । तव सानुषु विश्रान्तः शेषं प्रक्रमतामिति ॥ १०८ ॥
तिष्ठ त्वं हरिशार्दूल मयि विश्रम्य गम्यताम् । तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु ॥ १०९ ॥
तदास्वाद्य हरिश्रेष्ठ विश्रान्तोऽर्थं गमिष्यसि । अस्माकमपि संबन्धः कपिमुख्य त्वयाऽस्ति वै ॥
प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ॥ ११० ॥
वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज । तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ॥ १११ ॥

१०३-१०४] ति० टी०-तदेव विवृणोति-तमिति ॥ १०३ ॥ १०४ ॥

रा० टी०-तमिति । मानुषं रूपं धारयन् आत्मनः शिखरे शृङ्गे स्थितः आकाशे समुपस्थितः प्राप्तः प्रीतः पर्वतो मैनाकः आकाशगतं कपिं तं हनुमन्तं वाक्यमब्रवीत् । सार्धश्लोक एकान्वयी ॥ १०३ ॥

रा० टी०-तद्वचनाकारमाह-दुष्कृतमिति । हे वानरोत्तम ! त्वमिदं दुष्कृतं कर्म कृतवान् अतः मम शृङ्गेषु निपत्य यथासुखं विश्रम्य गम्यताम् ॥ १०६ ॥

गो०टी०-तमिति । प्रीतः प्रीतियोतकव्यापारः १११-११३

१०५] ति० टी०-राघवस्य कुले जातैः सगरपुत्रैः ॥ १०५ ॥

रा० टी०-नन्वं कथं तवैतद्वृद्धिर्जातेत्यत आह-राघवस्येति । राघवस्य कुले जातैः सगरैरुदधिः परिवर्धितः अतः सागरः सगरपरिवर्धित उदधिः रामहिते युक्तं त्वां प्रत्यर्चयति । तत्र हेतुः-कृते उपकृते प्रत्युपकारः कर्तव्यमेष सनातनो धर्मः, सामान्ये नपुंसकम् । सार्धश्लोकः संमिलितान्वयी ॥ १०७ ॥ १०८ ॥

१०६] ति० टी०-कृतमुपकारः ॥ १०६ ॥

१०७] ति० टी०-सोऽयं राघवकुलजः सागरस्तत्प्रतिकारार्थी तत्कुलप्रत्युपकारार्थी । त्वत्तः सत्क्रियमाणाद्वारभूतात्संमानं राघवकुलपूजामर्हति । त्वन्निमित्तं त्वत्सत्कारार्थं प्रचोदितः प्रेरितः ॥ १०७ ॥

रा० टी०-नन्वं तेन तव किमित्यत आह-स इति । तत्प्रतिकारार्थी तस्योपकृतस्य प्रतिकारं प्रत्युपकारमर्थयते तच्छीलः स सागरः त्वत्तः सन्मानं सत्कारमर्हति अत एव त्वन्निमित्तमनेन सागरेण बहुमानादहं प्रचोदितः त्वद्विश्रमणार्थं प्रेरितोऽस्मि ॥ १०९ ॥

गो० टी०-कृत इति । कृते उपकारे त्वत्प्रतिकारार्थी त्वदातिथ्यकरणापेक्षी त्वत्तः संमानमर्हतीति त्वया तत्कृतातिथ्यपरिग्रह एवास्य संमाननमित्यर्थः ॥ ११४ ॥

१०८] ति० टी०-प्रेरणाप्रकारः—योजनानामिति । योजनानां शतमपि प्रक्रमितुं खमाप्लुत एष कपिः शेषं प्रक्रान्तावशेषं तव सानुषु विश्रान्तः सन्प्रक्रमतामिति यतः प्रेरितोऽस्मि, अतो मयि तिष्ठ । स्थित्वा विश्रम्य पश्चाद्गम्यतामिति योजना । अत्र 'तिष्ठ त्वम्' इत्यर्धं प्रक्षिप्तमिति केचित् ॥ १०८ ॥

गो० टी०-चोदनाप्रकारमाह—योजनानामिति । प्रक्रमतामिति प्रचोदित इति पूर्वेणान्वयः ॥ ११५ ॥ ११६ ॥

१०९] ति० टी०-तत्तस्मात्यदिदं कन्दादि मयि बहु दृश्यते तदास्वाद्येत्यन्वयः ॥ १०९ ॥

रा० टी०-तिष्ठेति । त्वं मयि तिष्ठ विश्रम्य गम्यतां च । अर्धं पृथक् । तदेव भङ्ग्यन्तरेणाह-योजनमिति । योजनानां शतं प्रक्रमितुमिति शेषः । खमाप्लुत एष भवान् मम सानुषु विश्रान्तः सन् शेषमध्वानं प्रक्रमताम् । अर्धद्वयमेकान्वयि ॥ ११० ॥

गो० टी०-तदिति । तत्प्रसिद्धं कन्दः करहाटः मूलं पादः । तत्तस्मात् ॥ ११७ ॥

११०] ति० टी०-अस्माकमपि संबन्धस्त्वत्साहाय्यकरणप्रयोजक इति शेषः । तं संबन्धं वक्तुमाह—प्रख्यात इति । भवान्महागुणपरिग्रहः बहुव्रीहिरयम्, अतस्त्रिषु लोकेषु प्रख्यातः ॥ ११० ॥

रा० टी०-तदिति । तदुक्तहेतोः तदुत्तममिदं कन्दमूलफलमास्वाद्य विश्रान्तः सन् गमिष्यसि ॥ १११ ॥

रा० टी०-अस्माकमिति । हे कपिमुख्य ! यतः यस्त्वं महागुणानां स्वामिसेवानुकूलानां परिग्रहः परिगृहीता अत एव त्रिषु लोकेषु विख्यातः अतः तेन त्वया सह अस्माकमपि संबन्धोऽस्ति ॥ ११२ ॥

गो० टी०-अस्माकमिति । प्रख्यात इति संबन्धविशेषणं महागुणानां परिग्रहो यस्मिन्स तथा ॥ ११८-१२२ ॥

१११] ति० टी०-तादृशं त्वां ये वेगवन्तः प्लवगाः सन्ति तेषां मुख्यतमं मन्ये ॥ १११ ॥

---

१ दुष्कृतमिति रा. पाठः । २ विश्रमस्व यथासुखमिति गो. पाठः । ३ अर्धमेतत्पूर्वतनश्लोकात्प्राक् गो. रा. पाठे । ४ त्विति गो. पाठः ।

अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता। धर्मं जिज्ञासमानेन किं पुनर्यादृशो भवान् ॥ ११२ ॥
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः। पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ॥ ११३ ॥
पूजिते त्वयि धर्मज्ञे पूजां प्राप्नोति मारुतः। तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ॥ ११४ ॥
पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन्। तेऽपि[3] जग्मुर्दिशः सर्वा गरुडा इव वेगिनः ॥ ११५ ॥
ततस्तेषु प्रयातेषु देवसङ्घाः सहर्षिभिः। भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ॥ ११६ ॥
ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः। पक्षांश्चिच्छेद वज्रेण तदा[4] ततः शतसहस्रशः ॥ ११७ ॥
स मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट्। ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना ॥ ११८ ॥
अस्मिल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम। गुप्तपक्षः समग्रश्च तव पित्राभिरक्षितः ॥ ११९ ॥
ततोऽहं मानयामि त्वां मान्योऽसि मम मारुते। त्वया ममैष[5] संबन्धः कपिमुख्य महागुणः ॥ १२० ॥
अस्मिन्नेवंगते[6] कार्ये सागरस्य ममैव च। प्रीतिं प्रीतमनाः कर्तुं[7] त्वमर्हसि महामते ॥ १२१ ॥
श्रमं मोक्षय पूजां च गृहाण हरिसत्तम। प्रीतिं च मम[8] मान्यस्य प्रीतोऽस्मि तव दर्शनात्॥ १२२ ॥
एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत्। प्रीतोऽस्मि कृतमातिथ्यं मन्युरेषोऽपनीयताम्॥ १२३ ॥
त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते। प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरा[9] ॥ १२४ ॥

रा० टी०–वेगवन्त इति। हे मारुतात्मज! वेगवन्तः प्लवन्तो ये प्लवङ्गाः तेषां मुख्यतमं त्वामहं मन्ये ॥ ११३ ॥

११२] ति० टी०–भवान्यादृशस्तादृशः पूज्य इति किं पुनरिति योजना ॥ ११२ ॥

रा० टी०–त्वं तु ममातीव पूज्य इति बोधयितुमाह–अतिथिरिति। धर्मं जिज्ञासमानेन ज्ञातुमिच्छता विजानता च प्राकृतोऽपि अतिथिः पूजार्हः पूजनीयः, यादृशः प्राकृतविलक्षणो भवान् पूजार्ह इति किं वक्तव्यम् ॥ ११४ ॥

११३] ति० टी०–विवक्षितप्राशस्त्यमेवाह–त्वं हीति११३

रा० टी०–त्वमिति। मारुतस्य त्वं पुत्रः अत एव वेगेन तस्यैव सदृशोऽसीति शेषः ॥ ११५ ॥

११४–११७] ति० टी०–हनुमद्वारकमारुतपूजायां कारणान्तरमप्याह–शृणु चापीति ॥ ११४–११७ ॥

रा० टी०–पूजित इति। त्वयि पूजिते सति मारुतः पूजां प्राप्नोति तस्मात्त्वं पूजनीय एव। ननु मारुतपूजया तव किमित्यत आह—अत्र मारुतपूजायां कारणं शृणु ॥ ११६ ॥

रा० टी०–कारणमेवाह–पूर्वमित्यादिभिः। कृतयुगे पूर्वमुत्पत्तिसमये पर्वताः पक्षिणः पक्षविशिष्टाः अभवन् ते पर्वता वेगिनो गरुडा इव सर्वा दिशः जग्मुः ॥ ११७ ॥

रा० टी०–तत इति। ततः सर्वदिग्गमनानन्तरम् ऋषिभिः सह देवसंघाः भूतानि अन्ये प्राणिनश्च तेषां पर्वतानां पतनशङ्कया भयं जग्मुः ॥ ११८ ॥

रा० टी०–तत इति। ततः भीतिप्राप्त्यनन्तरं शतक्रतुः ततस्तेषां शतसहस्रशः पर्वतानां पक्षान् चिच्छेद ॥ ११९ ॥

गो० टी०–संबन्धं विवृणोति–पूर्वमित्यादिना। पक्षिणः पक्षवन्तः। हिः पादपूरणे ॥ १२३—१२६ ॥

११८–११९] ति० टी०–क्षिप्त आकाशमुत्क्षिप्तः१८॥१९

रा० टी०–स इति। सः शातितपक्षो देवराट् क्रुद्धः सन् मामुपागतः प्राप्तः अत एव महात्मना श्वसनेन वायुना क्षिप्तः अत्यूर्ध्वं प्रापितः ततः इन्द्रगमनानन्तरम् अस्मिन् लवणतोये प्रक्षिप्तः अत एव तव पित्रा गुप्तः पक्षसमग्रो यस्य अत एव अभिरक्षितोऽहमस्मीति शेषः। श्लोकद्वयमेकान्वयि१२०॥१२१

गो० टी०–अस्मिन्निति। समग्रः समग्रपक्षः गुप्तसमग्रपक्षश्च यथा भवामि तथा अभिरक्षितोऽस्मीत्यर्थः॥१२७–१३१॥

१२०] ति० टी०–तत उक्तकारणादेष संबन्धः पूजाप्रयोजकः स्वरक्षकपुत्रत्वरूपः ॥ १२० ॥

रा० टी०–तत इति। ततः उक्तहेतोः त्वया सह मम एष संबन्धः अत एव महागुणस्त्वं मम मान्योऽसि अत एव त्वां मानयामि पूजयामि ॥ १२२ ॥

१२१] ति० टी०–अस्मिन्कार्ये प्रत्युपकाररूपे। एवंगते सति चिरात्प्राप्ते सति। मया सप्रेम्णेति शेषः। त्वं पूजास्वीकारेण तयोः प्रीतिं कर्तुमर्हसि ॥ १२१ ॥

रा० टी०–अस्मिन्निति। सागरस्य मम च एवमुक्तप्रकारेण कार्ये स्वपितृकर्तृकोपकारे गते ज्ञाते सति प्रीतमनास्त्वं प्रीतिं कर्तुमर्हसि ॥ १२३ ॥

१२२] ति० टी०–मान्यस्य वायुसंबन्धात्तव पूज्यस्य मम प्रीतिं कुर्विति शेषः ॥ १२२ ॥

रा० टी०–श्रममिति। श्रमं मोक्षय दूरीकुरु पूजां गृहाण च मम प्रीतिं च गृहाण जानीहि अहं तु मान्यस्य तव दर्शनात् प्रीतोऽस्मि ॥ १२४ ॥

१२३–१२४] ति० टी०–मन्युः पूजानङ्गीकारजं दैन्यम् ॥ १२३ ॥ १२४ ॥

१ त्वादृशो महानिति गो. पाठः। २ हीति गो. पाठः। ३ऽनिलवेगिन इति गो. पाठः। ४ तत्रेति गो. पाठः। ५ पक्षसमग्र इति गो. रा. पाठः। ६ मे ह्येष इति गो. पाठः। ७ कपे इति गो. पाठः। ८ बहु मन्यस्वेति गो. पाठः। ९ऽन्तरे इति गो. पाठः।

इत्युक्त्वा पाणिना शैलमालभ्य हरिपुङ्गवः । जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव ॥ १२५ ॥
स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः । पूजितश्चोपपन्नाभिराशीर्भिरभिनन्दितः ॥ १२६ ॥
अथोर्ध्वं दूरमागत्य हित्वा शैलमहार्णवौ । पितुः पन्थानमासाद्य जगाम विमलेऽम्बरे ॥ १२७ ॥
भूयश्चोर्ध्वं गतिं प्राप्य गिरिं तमवलोकयन् । वायुसूनुर्निरालम्बो जगाम कपिकुञ्जरः ॥ १२८ ॥
तद्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् । प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥ १२९ ॥
देवताश्चाभवन्हृष्टास्तत्रस्थास्तस्य कर्मणा । काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥ १३० ॥
उवाच वचनं धीमान्परितोषात्सगद्गदम् । सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः ॥ १३१ ॥
हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशम् । अभयं ते प्रयच्छामि गच्छ सौम्य यथासुखम्॥ १३२ ॥

रा० टी०–एवमिति । एवमुक्तः मैनाकेन प्रार्थितः कपिश्रेष्ठः तमब्रवीत् । तद्वचनाकारमाह–त्वया आतिथ्यं कृतं परितोषकवचनेनैव सत्कारः कृत इत्यर्थः, अत एव प्रीतोऽस्मि अत एव एषः विश्रान्त्यकारणादिजनितो मन्युर्दैन्यमपनीयताम् ॥ १२५ ॥

रा० टी०–नन्वित्यादि किमर्थं न क्रियते इत्यत आह–त्वरत इति । मे कालः त्वरते मां त्वरयति यतः अहो दिनमतिवर्तते एतेन दिन एव लङ्घा गन्तव्येति सूचितम् । इत्वन्तरमाह–इह अस्मिन् अन्तरा सागरतरणमध्ये मया न स्थातव्यम् इति प्रतिज्ञा दत्ता कृता, वानरसमीपे इति शेषः ॥१२६॥

गो० टी०–प्रीतोऽस्मीति । कृतमातिथ्यं तव दर्शनादिनेति भावः । मन्युः कोपः मत्कृता पूजा न गृहीतेति कोपो निरस्यतामित्यर्थः । कार्यकालः त्वरते शीघ्रं गच्छति मां प्रेरयति । अहश्चाप्यतिवर्तते अत्र विलम्बः क्रियते चेदिदमहोऽतिवर्तत इत्यर्थः । इह समुद्रे अन्तरे मध्ये मया न स्थातव्यमिति वानरसन्निधौ प्रतिज्ञा कृता ॥ १२२ ॥ १२३ ॥

१२५] ति० टी०–शैलमालभ्य स्पृष्ट्वा । प्रहसन्निवेति एतावत्प्लवनेऽपि श्रममारोप्य वृथाऽयं प्रयास एतयोरिति प्रहासः ॥ १२५ ॥

रा० टी०–इतीति । हरिपुंगवः इत्युक्त्वा पाणिना शैलमालभ्य संस्पृश्य अकाशमाविश्य प्रहसन्निव जगाम । इव एवार्थे ॥ १२७ ॥

गो० टी०–इत्युक्त्वेति । प्रहसन्निव प्रसन्नमुख इवेत्यर्थः ॥ १३४ ॥

१२६] ति० टी०–उपपन्नाभिस्तत्काले युक्ताभिः॥१२६॥

रा० टी०–स इति । पर्वतसमुद्राभ्यां बहुमानात्पूजितः अवेक्षितः उपपन्नाभिः योग्याभिः आशीर्भिः अभिनन्दितश्च स हनुमान् दूरमूर्ध्वमाप्लुत्य अत एव शैलमहार्णवौ स्वसत्कारार्थमागतगिरिसागरौ हित्वा पितुर्वायोः पन्थानमासाद्य प्राप्य । अथ जगाम मङ्गलगमनं चकार । श्लोकद्वयमेकान्वयि १२८-१२९

१२७] ति० टी०–अथोर्ध्वं यत्र देशे स्थितस्ततोऽपि बहूर्ध्वम् । पितुः पन्थानं वायुमार्गम् ॥ १२७ ॥

गो० टी०–अथेति । हित्वा शैलमहार्णवौ मूर्तिमन्तौ तौ हित्वेत्यर्थः । अनेन शैलवत्समुद्रोऽपि मूर्तिमत्तया तत्रादृश्यतेति सूचितम् ॥ १३५ ॥ १३६ ॥

१२८] ति० टी०–भूय ऊर्ध्वं ततोऽपि बहूर्ध्वं तं गिरिमध्यःप्रदेशवर्तिनमवलोकयन् ॥ १२८ ॥

रा० टी०–भूय इति । भूयोऽधिकाम् ऊर्ध्वगतिं प्राप्य गिरिं तं नराकृतिसमुद्रं च अवलोकयन् निरालम्बः वायुसूनुर्जगाम ॥ १३० ॥

१२९] ति० टी०–तद्वितीयं कर्माविश्रम्यैव पुनरत्यूर्ध्वं पतनरूपं कर्म ॥ १२९ ॥

रा० टी०–तदिति । सुदुष्करम् अन्यैः कर्तुमशक्यं द्वितीयम् । उत्प्लवनापेक्षया द्वित्वसंख्यापूरकं विश्रान्त्यकरणरूपं कर्म दृष्ट्वा सुरादयः प्रशशंसुः ॥ १३१ ॥

गो० टी०–तद्द्वितीयमिति । द्वितीयं समुद्रलङ्घनापेक्षया द्वितीयं तत्पर्वतजयरूपं कर्म ॥ १३७ ॥

१३०–१३१] ति० टी०–तत्रस्था मैनाकस्था गगनस्था वा । तस्य काञ्चनस्य काञ्चनमयस्य सुनाभस्य शोभनमध्यस्य मैनाकस्य कर्मणा जलादुत्थानरूपेण देवता इन्द्रश्च तुष्टः ॥ १३० ॥ १३१ ॥

रा० टी०–देवता इति । सुनाभस्य अतिशोभनमध्यभागस्य तस्य मैनाकस्य कर्मणा विश्रान्तदानप्रार्थनादिरूपक्रियया तत्रस्थाः हनुमत्कर्मदर्शनाय तत्र स्थिताः देवता वासवश्च हृष्टा अभवन् ॥ १३२ ॥

रा० टी०–उवाचेति । परितोषात् हनुमत्परितोषणात् हेतोः शचीपतिः गद्गदं स्खलद्वाग्विशिष्टं वच उवाच ॥ १३३ ॥

१३२] ति० टी०–अभयं स्वकृतपक्षच्छेदशङ्काजनितभयाभावम् ॥ १३२ ॥

रा० टी०–तद्वचनाकारमाह—हिरण्येति । हे शैलेन्द्र ! अहं परितुष्टोऽस्मि अतः ते तुभ्यम् अभयं मत्कर्तृकपक्षच्छेदशङ्काहेतुकभयाभावं प्रयच्छामि ददामि अतः यथासुखं गच्छ विचर ॥ १३४ ॥

१ अनिलात्मज इति गो. पाठः । २ उत्पत्येति गो. पाठः । ३ आस्थायेति गो. पाठः । ४ निरालम्बे इति गो. पाठः । ५ विमलेऽम्बरे इति गो. पाठः । ६ तिष्ठेति गो. पाठः ।

साह्यं कृतं ते सुमहद्विश्रान्तस्य हनूमतः । क्रमतो योजनशतं निर्भयस्य भये सति ॥ १३३ ॥
रामस्यैष [2]हितायैव याति दाशरथेः [3]कपिः । सत्क्रियां कुर्वता [4]शक्त्या तोषितोऽस्मि दृढं त्वया॥१३४॥
[5]सं तत्प्रहर्षमलभद्विपुलं पर्वतोत्तमः । देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् ॥ १३५ ॥
स वै दत्तवरः शैलो बभूवावस्थितस्तदा । हनूमांश्च मुहूर्तेन व्यतिचक्राम सागरम् ॥ १३६ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । अब्रुवन्सूर्यसंकाशां सुरसां नागमातरम् ॥ १३७ ॥
अयं वातात्मजः श्रीमान्प्लवते सागरोऽपरि । हनूमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर ॥ १३८ ॥
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् । दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभःस्पृशम् ॥ १३९ ॥
बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् । त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥ १४० ॥
एवमुक्ता तु सा देवी दैवतैरभिसत्कृता । समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ॥ १४१ ॥
विकृतं च विरूपं च सर्वस्य च भयावहम् । प्लवमानं हनूमन्तमाट्टत्येदमुवाच ह ॥ १४२ ॥
मम भक्ष्यः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभः । अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् ॥ १४३ ॥
वैर एष पुरा दत्तो मम धात्रेति सत्वरा । व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः ॥ १४४ ॥

१३३-१३५] ति० टी०-निर्भयस्यापि भये सतीवोपचारार्थं साह्यं कृतं यतः, अतः परितुष्टः इत्यन्वयः १३३-१३५

रा० टी०-अभयप्रदाने हेतुमाह—साह्यमिति । निर्भयस्य सुग्रीवादन्यतो भयरहितस्य वानरसमूहस्य भये सुग्रीवाद्धीतौ प्राप्ते सति योजनशतं क्रमतो गच्छतो विश्रान्तस्य श्रमाभाववतो हनूमतः साह्यं त्वया कृतम् ॥ १३३ ॥

रा० टी०-रामस्येति । यः कपिः रामस्य हितायैव याति तस्य सत्क्रियां शक्त्या कुर्वता त्वया दृढमत्यन्तं तोषितोऽस्मि ॥ १३६ ॥

रा० टी०-स इति । स मैनाकः परितुष्टं शतक्रतुं दृष्ट्वा विपुलं तत्प्रहर्षमलभत् ॥ १३७ ॥

गो० टी०-साह्यमिति । भये सति समुद्रलङ्घनेऽस्य किं भविष्यतीत्यस्माकं भये सतीत्यर्थः॥ १४१-१५३ ॥

१३६] ति० टी०-अवस्थितः जलान्तरमग्न इत्यर्थः । सागरं मैनाकाधिष्ठितसागरप्रदेशम् ॥ १३६ ॥

रा० टी०-स इति । दत्तो वरो यस्मै स शैलः अवस्थितो बभूव, हनुमान् समुहूर्तेन सागरं व्यतिचक्राम च॥१३८॥

१३७-१३८] ति० टी०-अथ देवैर्लङ्कां प्रविष्टस्य हनुमतः कायक्षमबलपरीक्षणार्थं सुरसाप्रवर्तनम्—तत इत्यादि ॥ १३७ ॥ १३८ ॥

१३९] ति० टी०-नभःस्पृशमिति पुंस्त्वमार्षम् । वक्त्रशब्दोऽर्धर्चादिर्वा ॥ १३९ ॥

रा० टी०-तत इति । ततः हनुमत्प्लवनसमये नागमातरं सुरसां देवादयोऽब्रुवन् ॥ १३९ ॥

रा० टी०-तद्वचनाकारमाह-अयमिति । वातात्मजोऽयं हनुमान् सागरं परिप्लवते तस्य हनूमतः विघ्नं प्लवनविघातं राक्षसं रूपम् आस्थाय कृत्वा नभस्पृशं वक्त्रं मुखं च कृत्वा मुहूर्तमाचर कुरु । श्लोकद्वयमेकान्वयि ॥ १४० ॥ १४१ ॥

१४०-१४१] ति० टी०-बलं ज्ञानबलमुपायबलं च पराक्रमं च ज्ञातुमिच्छामहे । तदेव विवृणोति—त्वामिति ॥ १४० ॥ १४१ ॥

१४२] ति० टी०-' भयस्य च भयावहम् ' इति पाठे सर्वलोकभयस्यापीत्यर्थः ॥ १४२ ॥

रा० टी०-तत्प्रयोजनमाह—बलमिति । पराक्रमं शत्रुविघातकं भूयो अधिकम् अस्य बलं ज्ञानेन्द्रिययोः सामर्थ्यं ज्ञातुमिच्छामहे । ननु विघ्नाचरणेन तज्ज्ञानं कथं भविष्यतीत्यत आह-उपायेन त्वां विजेष्यति विषादं गमिष्यति वा एतेन विजयविषादाभ्यां क्रमेण बलाबलयोर्ज्ञानं भविष्यत्येवेति सूचितम् ॥ १४२ ॥

रा० टी०-एवमिति । दैवतैः एवमुक्ता अभिसत्कृता समुद्रमध्ये विद्यमाना सुरसा विकृतं छिन्ननासिकत्वाद्यनेकविकारविशिष्टम् अत एव विरूपं शुभरूपाद्विरुद्धम् अत एव सर्वस्य भयावहं भीतिप्रापकं राक्षसं वपुः बिभ्रती तं प्लवमानं हनूमन्तम् आट्टत्य इदमुवाच । श्लोकद्वयमेकान्वयि ॥ १४३ ॥ १४४ ॥

१४३] ति० टी०-ईश्वरैर्देवैः ॥ १४३ ॥

रा० टी०-तद्वचनाकारमाह-ममेति । ईश्वरैः मम भक्ष्यः त्वं प्रदिष्टः अतस्त्वां भक्षयिष्यामि अतः ममाननं प्रविश॥१४५॥

१४४] ति० टी०-एष वरः पुर आगतस्य वदनप्रवेशरूपः इत्युक्त्वेति शेषः । सत्वरा त्वरासहिता सा सुरसा ॥ १४४ ॥

रा० टी०-ननु अनपराधिनो मम भक्षणं किमर्थमिच्छसी-

१ विक्रान्तस्येति गो. पाठः । २ हि दूत्येनेति गो. पाठः । ३ हरिरिति गो. पाठः । ४ तस्येति गो. पाठः । ५ ततः प्रहर्षमगमदिति गो. पाठः । ६ समभिति गो. पाठः । ७ एष श्लोको गो. नास्ति ।

एवमुक्तः सुरसया [1]प्रहृष्टवदनोऽब्रवीत् । रामो दाशरथिर्नाम प्रविष्टो दण्डकावनम् ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ १४५ ॥
[2]अस्य कार्यविपक्तस्य बद्धवैरस्य राक्षसैः । तस्य सीता हृता भार्या रावणेन यशस्विनी ॥ १४६ ॥
तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् । कर्तुमर्हसि रामस्य साह्यं विषयवासिनि ॥ १४७ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् । आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥ १४८ ॥
एवमुक्ता हनुमता सुरसा कामरूपिणी । अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम ॥ १४९ ॥
[3]तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना सा नागमाता हनूमतः ॥ १५० ॥
[4]निविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ १५१ ॥
व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ १५२ ॥

त्यत आह–वर इति । एष समागतमात्रभक्षणरूपः वरः धात्रा मम मह्यं पुरा दत्तः इत्युक्त्वेति शेषः, विपुलं विस्तीर्णं मुखं व्यादाय मारुतेः पुरः अग्रे स्थिता बभूवेति शेषः ॥१४६॥

१४५] ति० टी०–प्रहृष्टवदनः । दत्तभक्षणवरायां अपि सकाशात्तिरस्तारोपायज्ञानजो हर्षः ॥ १४५ ॥

रा० टी०–एवमिति । सुरसया एवमुक्तः प्रहृष्टवदनो हनुमान् अब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह–राम इत्यादिभिः । रामो नाम दाशरथिः लक्ष्मणेन वैदेह्या च सह दण्डकावनं प्रविष्टः । अर्धद्वयमेकान्वयि ॥ १४७ ॥ १४८ ॥

१४६] ति० टी०–कार्यविपक्तस्य मायामृगवधे प्रसक्तस्य । बद्धवैरस्य शूर्पणखाविरूपकरणादिकर्मणेति शेषः ॥ १४६ ॥

रा० टी०–अन्येति । अन्यकार्यविपक्तस्य देवादिकार्यसाधनाशक्तस्य अत एव राक्षसैर्बद्धवैरस्य तस्य वनं प्रविष्टस्य रामस्य भार्या रावणेन हृता ॥ १४९ ॥

गो० टी०–अन्येति । अन्यकार्यविपक्तस्य मारीचमृगग्रहणव्यासक्तस्य ॥ १५४ ॥

१४७] ति० टी०–रामसाह्यकरणे हेतुः–रामस्य विषयवासिनीति । तस्य सर्वाधिपतित्वात् ॥ १४७ ॥

रा० टी०–तस्या इति । तस्याः सीतायाः सकाशं समीपमहं गमिष्ये अतः रामस्य विषये देशे वस्तुं शीलमस्याः सा त्वं रामस्य साह्यं साहाय्यं कर्तुमर्हसि । एतेन मां न भक्षयेति सूचितम् ॥ १५० ॥

गो० टी०–तस्या इति । विषयवासिनी रामराज्यवासिनी ॥ १५५ ॥ १५६ ॥

१४८] ति० टी०–रामं चेति । दृष्ट्वा वृत्तान्तं च विज्ञाप्येति शेषः ॥ १४८ ॥

रा० टी०–पक्षान्तरमाह–अथवेति । अथवा भक्षणस्यावश्यकत्वे मैथिलीं रामं च दृष्ट्वा ते वक्त्रमागमिष्यामि इति ते तवाग्रे सत्यं प्रतिशृणोमि प्रतिजानामि ॥ १५१ ॥

१४९] ति० टी०–कश्चिदपि मां नातिवर्तेत् अभक्षितो न गच्छेदित्यर्थः परस्मैपदमार्षम् ॥ १४९ ॥

रा० टी०–एवमिति । हनुमता एवमुक्ता सुरसा मां कश्चित् नातिवर्तेत् एषः मम वरः ब्रह्मणा दत्त इति शेषः । एतेन त्वां भक्षयिष्याम्येवेति सूचितम् ॥ १५२ ॥

गो० टी०–एवमिति । नातिवर्तेन्मां ममाननमप्रविश्य न गच्छेत् अतिवर्तेदित्यत्र परस्मैपदमार्षम् । अत्र इतिकरणं द्रष्टव्यम् । अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो ममेत्यस्यानन्तरं तद्दृष्ट्वा व्यादितं वक्त्रं वायुपुत्रः सत्त्वद्धिमानित्यादिश्लोका द्रष्टव्याः । मध्ये तं प्रयान्तमित्यादयः केचन श्लोकाः प्रक्षिप्ताः असङ्गताश्च शतयोजनायतत्वे वानरैर्लङ्कावासिभिश्च ज्ञातः स्यादिति विरोधात् । त इमे प्रक्षिप्तश्लोकाः ॥ तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे । इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा । तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥ चकार सुरसा चास्यं विंशद्योजनमायतम् । हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥ चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् । बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं षष्टियोजनमायतम् । तथैव हनुमान्वीरः सप्ततीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रमशीतियोजनोच्छ्रितम् । हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं शतयोजनमायतमिति १५७

१५०] ति० टी०–तं प्रयान्तं पुनरागच्छामीत्युक्त्या वरदानं श्रुत्वाऽपि प्रयाणोन्मुखम् । हनुमतस्तस्य बलं जिज्ञासमाना सुरसा वाक्यमब्रवीत् ॥ १५० ॥

रा० टी०–तमिति । प्रयान्तं हनुमन्तं समुद्वीक्ष्य हनुमतो बलं जिज्ञासमाना सुरसा अब्रवीत् ॥ १५३ ॥

१५१–१५२] ति० टी०–निविश्येति । प्रविश्यैव गन्तव्यम् यदि शक्तिरस्तीत्यर्थः, इत्यब्रवीदित्यन्वयः ॥१५१॥१५२॥

---

१ प्राञ्जलिर्वानरर्षभः । प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत् इति गो. पाठः । २ अन्येति गो. रा. पाठः । ३ एतदादि शतयोजनमायतमित्यन्तं श्लोकदशकं गो. प्रक्षिप्तमित्युपक्षिप्तम् । ४ वै इति गो. पाठः । ५ प्रविश्येति गो. पाठः ।

अब्रवीत्कुरु वै वक्त्रं येन मां [1]विषहिष्यसि । इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायताम् ॥ १५३ ॥
दशयोजनविस्तारो [2]हनूमानभवत्तदा । [[3]तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥]
चकार सुरसाऽप्यास्यं विंशद्योजनमायतम् ॥ १५४ ॥
[[4]हनूमांस्तु ततः क्रुद्धः त्रिंशद्योजनमायतः । चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् ॥
बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः । चकार सुरसा वक्त्रं षष्टिं योजनमुच्छ्रितम् ॥
तदैव हनुमान्वीरः सप्ततिं योजनोच्छ्रितः । चकार सुरसा वक्त्रमशीतिं योजनोच्छ्रितम् ॥
हनुमाननलप्रख्यो नवतिं योजनोच्छ्रितः । चकार सुरसा वक्त्रं शतयोजनमायतम् ॥]
[5]तदृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः स बुद्धिमान् । [6]दीर्घजिह्वं सुरसया [7]सुभीमं नरकोपमम् ॥ १५५ ॥
स संक्षिप्यात्मनः कायं जीमूत इव मारुतिः । तस्मिन्मुहूर्ते हनुमान्बभूवाङ्गुष्ठमात्रकः ॥ १५६ ॥
सोऽभिपद्याथ [8]तद्वक्त्रं निष्पत्य च महाबलः [9]। अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ १५७ ॥
प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायणि नमोऽस्तु ते । गमिष्ये यत्र वैदेही सत्यश्चासीद्वरस्तव [10]॥ १५८ ॥
तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव । अब्रवीत्सुरसा देवी स्वेन रूपेण वानरम् ॥ १५९ ॥

रा० टी०–तद्वचनाकारमाह–निविश्येति । एषः मुखे-प्रवेशनरूपः वरः धात्रा मम दत्तः अतः मे वदनं मुखं निविश्य त्वया गन्तव्यमित्युक्त्वेति शेषः, सत्वरा वेगवती सा सुरसा वक्त्रं व्यादाय मारुतेः पुरः अग्रे स्थिता बभूवेति शेषः । सार्ध-श्लोक एकान्वयी ॥ १५४ ॥

रा० टी०–एवमिति । सुरसया एवमुक्तः वानरपुङ्गवो हनुमान् येन यादृशेन मां विसहिष्यसि ग्रसिष्यसि तादृशं वक्त्रं कुरु इत्यब्रवीत् । अर्धद्वयमेकान्वयि ॥ १५५ ॥

१५३] ति० टी०–दशयोजनमायतां आयतवक्त्रामि-त्यर्थः ॥ १५३ ॥

१५४] ति० टी०–' चकार सुरसाऽप्यास्यं विंशद्योजन-मायतम् ' इत्यनन्तरम् ' तं दृष्ट्वा व्यादितं त्वास्यम् ' इति प्राचीनः पाठः । अत्र ' तदृष्ट्वा मेघसंकाशं विंशद्योजनमायतम् । हनुमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥ चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् । बभूव हनुमान्वीरः पञ्चाशद्योजनो-च्छ्रितः ॥ चकार सुरसा वक्त्रं षष्टियोजनमुच्छ्रितम् । तदैव हनुमान्वीरः सप्ततिं योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रमशी-तियोजनोच्छ्रितम् । हनुमाननलप्रख्यो नवतिं योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं शतयोजनमायतम् ॥ ' इति श्लोकास्तु प्रक्षिप्ता इति कतकः ॥ १५४ ॥

रा० टी०–इतीति । दशयोजनमायतां दशयोजनविस्तृत-मुखां सुरसां हनुमान् इत्युक्त्वा दशयोजनविस्तारोऽभवत् । तदा तस्मिन्काले दशयोजनमायतं मेघसंकाशं तं हनुमन्तं दृष्ट्वा सुरसाऽपि विंशद्योजनमायतम् आस्यं मुखं चकार । ततः सुरसाया विंशद्योजनविस्तृतमुखदर्शनानन्तरं क्रुद्धो हनुमांस्तु त्रिंशद्योजनमायतो बभूवेति शेषः । सार्धश्लोकद्वयमेका-न्वयि ॥ १५६–१५८ ॥

गो० टी०–प्रकृतं विलिख्यते–तदृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सबुद्धिमान् । सुसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः १५८-१५९

१५५–१५७] ति० टी०–व्यादितं व्यात्तम् । दीर्घजिह्व-त्वादिगुणविशिष्टं व्यात्तं तत्तस्या आस्यं दृष्ट्वेत्यन्वयः १५५–१५७

रा० टी०–चकारेति । सुरसा तथा तेन प्रकारेण चत्वा-रिंशदुच्छ्रितं चत्वारिंशद्योजनपरिमितं वक्त्रं चकार । हनुमांस्तु पञ्चाशद्योजनोच्छ्रितो बभूव ॥ १५९ ॥

रा० टी०–चकारेति । सुरसा षष्टिं योजनमुच्छ्रितं चकार । तदैव हनुमान् सप्ततिं योजनोच्छ्रितो बभूवेति शेषः ॥ १६० ॥

रा० टी०–चकारेति । अशीतिं योजनोच्छ्रितं सुरसा चकार । हनुमान् नवतिं योजनोच्छ्रितः । अशीतिमित्यस्य नव-तिमित्यस्य च बहिर्भूतत्वेऽप्यन्वय आर्षः ॥ १६१ ॥

रा० टी०–चकारेति । सुरसा शतयोजनमायतं चकार । तस्मिन् मुहूर्ते जीमूतो मेघ इव हनुमान् अङ्गुष्ठमात्रको बभूव । सार्धश्लोक एकान्वयी ॥ १६२ ॥

रा० टी०–स इति । अङ्गुष्ठमात्रकशरीरो हनुमान् तद्वक्त्रं सुरसामुखमभिपद्य प्राप्य निष्पत्य वक्त्रान्निर्गम्य च अन्तरिक्षे स्थितः सन् इदमब्रवीत् । अर्धद्वयमेकान्वयि ॥ १६३ ॥

१५८–१५९] ति० टी०–इदं वचनमितीदंशब्दार्थः । प्रविष्ट इति । दाक्षायणि दक्षप्रजापतिसंताने, अत एव नतिः । सत्य आसीत् सत्यो जात इत्यर्थः । वदनप्रवेशरूप-त्वात्तस्य ॥ १५८ ॥ १५९ ॥

रा० टी०–तद्वचनाकारमाह–प्रविष्ट इति । हे दाक्षायणि ! ते वक्त्रमहं प्रविष्टोऽस्मि अतः तव वरः सत्य आसीत् अतः यत्र वैदेही तत्र गमिष्ये ते नमोऽस्तु ॥ १६४ ॥

---

१ विषाहिष्यसे इति गो.पाठः । २ आयत इति गो.पाठः । ३ बभूव हनुमांस्तदेति गो.पाठः । ४ अर्धमेतत् रा.पाठे अधिकम् । ५ एतदादि श्लोक-चतुष्टयं रा. अधिकम् । ६ श्लोकोऽयं रा.नास्ति । ७ अर्धमेतत् गो.नास्ति । ८ सुघोरमिति गो गृहीत पा.। ९ ऽभिपत्येति गो.पा.। १० जव इति गो.पाठः।

अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् । समानय च वैदेहीं राघवेण महात्मना ॥ १६० ॥
तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् । साधुसाध्विति भूतानि प्रशशंसुस्तदा हरिम् ॥ १६१ ॥
स सागरमनाधृष्यमभ्येत्य वरुणालयम् । जगामाकाशमाविश्य वेगेन गरुडोपमः ॥ १६२ ॥
सेविते वारिधाराभिः पतगैश्च निषेविते । चरिते कैशिकाचार्यैरैरावतनिषेविते ॥ १६३ ॥
सिंहकुञ्जरशार्दूलपतगोरगवाहनैः । विमानैः संपतद्भिश्च विमलैः समलंकृते ॥ १६४ ॥
वज्राशनिसमस्पर्शैः पावकैरिव शोभिते । कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरधिष्ठिते ॥ १६५ ॥
वहता हव्यमत्यन्तं सेविते चित्रभानुना । ग्रहनक्षत्रचन्द्रार्कतारागणविभूषिते ॥ १६६ ॥
महर्षिगणगन्धर्वनागयक्षसमाकुले । विविक्ते विमले विश्वे विश्वावसुनिषेविते ॥ १६७ ॥
देवराजगजाक्रान्ते चन्द्रसूर्यपथे शिवे । विताने जीवलोकस्य विमले ब्रह्मनिर्मिते ॥ १६८ ॥
बहुशः सेविते वीरैर्विद्याधरगणैर्वृते । जगाम वायुमार्गं च गरुत्मानिव मारुतिः ॥ १६९ ॥
हनुमान्मेघजालानि प्रार्कषन्मारुतो यथा । कालागुरुसवर्णानि रक्तपीतसितानि च ॥ १७० ॥
कपिना कृष्यमाणानि महाभ्राणि चकाशिरे । प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ १७१ ॥
प्रावृषीन्दुरिवाभाति निष्पतन्प्रविशंस्तथा । प्रदृश्यमानः सर्वत्र हनूमान्मारुतात्मजः ॥ १७२ ॥
भेजेऽम्बरं निरालम्बं पक्षयुक्त इवाद्रिराट् । प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी ॥ १७३ ॥

रा० टी०–तमिति । राहुमुखात् चन्द्रमिव वदनान्मुक्तं दृष्ट्वा स्वेन रूपेणोपलक्षिता सुरसा वानरमब्रवीत् ॥ १६९ ॥

गो० टी०–प्रविष्टोऽस्मीति । दक्षस्यापत्यं दाक्षायणी तत्त्वं च पूर्वं वरप्रदानकथनसमये तयैव कथितमित्यनुवादात् कल्प्यते ॥ १६०–१६४ ॥

१६०] ति० टी०–अथ साऽनुगृह्णाति—अर्थसिद्ध्यै इति । राघवेण त्वद्विज्ञापितवृत्तान्तेन समानय संगमय १६०

रा० टी०–तद्वचनाकारमाह–अर्थेति । यथासुखं गच्छ राघवेण सह वैदेहीं समानय संगमयस्व ॥ १६६ ॥

१६१–१६२] ति० टी०–तत्तृतीयं सुरसावक्त्रान्निष्क्रमणरूपम् ॥ १६१ ॥ १६२ ॥

रा० टी०–तदिति । तत् पूर्वोक्तकर्मद्वयात् तृतीयं कर्म सुरसामुखान्निर्गमक्रियां दृष्ट्वा हरिं हनूमन्तं साधु साध्विति प्रशशंसुः ॥ १६७ ॥

रा० टी०–स इति । स हनूमाननाधृष्यं वरुणालयं सागरं तत्समीपम् अभ्येत्य प्राप्य आकाशमाविश्य जगाम ॥ १६८ ॥

१६३] ति० टी०–वारिधाराभिरेवितत्वादिविशेषणके चन्द्रसूर्यपथे जगामेत्यन्वयः एकोनसप्ततितमेन । पतगैः पक्षिभिः कैशिकं गाननृत्यविद्या तदाचार्यैस्तुम्बुरुप्रभृतिगन्धर्वैश्चरिते सेविते । ऐरावतम् ऋजुदीर्घमिन्द्रधनुरिति तीर्थः, गजविशेष इत्यन्ये ॥ १६३ ॥

रा० टी०–मार्गं वर्णयन्नाह–सेविते इत्यादिभिः । वारिधाराभिः सेविते युक्ते पतगैः पक्षिविशेषैः निषेविते कैशिकानां गाननृत्यादिविद्यानामाचार्यैस्तुम्बुरादिगन्धर्वैश्च चरिते ऐरावतैः ऋजुदीर्घेन्द्रचापैर्गजविशेषैर्वा निषेविते ॥ १६९ ॥

गो० टी०–आकाशगमनमिति दुष्करमित्यसमर्थं कथयितुम् आकाशस्वरूपं वर्ण्यते–सेविते इत्यादिना श्लोकसप्तकेन । कैशिकाचार्यैः कैशिके रागविशेषे आचार्यैः विद्याधरविशेषैरित्यर्थः । वज्राशनिसमाघातैः पावकैः वज्राशनिसमाघातैर्हेतुभिर्जातैः पावकैः हव्यं वहता देवेभ्यो हव्यवहनार्थं गतेन चित्रभानुना वह्निना विश्वे विश्वगते व्यापक इत्यर्थः । देवराजगजाक्रान्ते ऐरावतभिन्नदिग्गजाक्रान्ते । विताने वितानतुल्ये । विततं इति वितानविशेषणम् ॥ १६२–१७३ ॥

१६४] ति० टी०–पतगोरगाः पक्षिसर्पाः ॥ १६४ ॥

रा० टी०–संपतद्भिर्गच्छद्भिः सिंहादिभिः समलंकृते १७०॥

१६५] ति० टी०–वज्राशनिसमस्पर्शैस्तद्वत्प्राणहरैः पावकैः पञ्चाग्निभिरिव स्वर्गजिद्भिरधिष्ठिते । 'समाघातैः' इति पाठे ताभ्यां तुल्य आघातोऽभिघातो येषां तैरित्यर्थः ॥१६५॥

रा० टी०–वज्राशनिसमः स्पर्शो येषां तैः पावकैः पञ्चाग्निभिरिव स्वर्गजिद्भिः अधिष्ठिते अत एव शोभिते ॥ १७१ ॥

१६६] ति० टी०–चित्रभानुना पञ्चाग्निभिन्नोऽयमग्निश्चित्रभानुः ॥ १६६ ॥

रा० टी०–अत्यन्तं हव्यं वहता चित्रभानुना वह्निविशेषेण सेविते ॥ १७२ ॥

१६७] ति० टी०–विश्वे विश्वाश्रये । विश्वावसुर्गन्धर्वराजः ॥ १६७ ॥

रा० टी०–विविक्ते विलक्षणे विश्वे जगदाश्रयीभूते विशाले वा ॥ १७३ ॥

१६८–१७३] ति० टी०–देवराजानां गजाः पुण्डरीकादयः । वितानोऽवकाशावरणवस्त्रे 'चांदवा' इति प्रसिद्धे ॥१६८–१७३॥

१ समानयस्वेति गो. पाठः । २ समाघातैरिति गो. पाठः । ३ उपेति गो. पाठः । ४ अलंकृते इति गो. पाठः । ५ अत्यर्थमिति गो. पाठः । ६ विततं इति गो. पाठः । ७ गणैर्वरैरिति गो. पाठः । ८ त्रिति गो. पाठः । ९ एतद्ग्रन्थौ सार्धश्लोकौ गो. न स्तः ।

मनसा चिन्तयामास प्रवृद्धा कामरूपिणी । अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता॥ १७४ ॥
इदं मम महासत्त्वं चिरस्य वशमागतम् । इति संचिन्त्य मनसा छायामस्य समाक्षिपत्॥ १७५ ॥
छायायां गृह्यमाणायां चिन्तयामास वानरः । समाक्षिप्तोऽस्मि सहसा पङ्गुकृतपराक्रमः ॥ १७६ ॥
प्रतिलोमेन वातेन महानौरिव सागरे । तिर्यगूर्ध्वमधश्चैव वीक्षमाणस्तदा कपिः ॥ १७७ ॥
ददर्श स महासत्त्वमुत्थितं लवणाम्भसि । तं दृष्ट्वा चिन्तयामास मारुतिर्विकृताननाम् ॥ १७८ ॥
कपिराज्ञा यथाख्यातं सत्त्वमद्भुतदर्शनम् । छायाग्राहि महावीर्यं तदिदं नात्र संशयः ॥ १७९ ॥
स तां बुद्ध्वाऽर्थतत्त्वेन सिंहिकां मतिमान्कपिः । व्यवर्धत महाकायः प्रावृषीव बलाहकः ॥ १८० ॥
तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः । वक्त्रं प्रसारयामास पातालाम्बरसंनिभम् ॥ १८१ ॥
घनराजीव गर्जन्ती वानरं समभिद्रवत् । स ददर्श ततस्तस्या विकृतं सुमहन्मुखम् ॥ १८२ ॥

रा० टी०–जीवलोकस्य वितानं वितानसदृशं ॥ १७४ ॥

रा० टी०–वायुमार्गं मारुतिर्हनुमान् गरुत्मान् गरुड इव जगाम । सप्तकमेकान्वयि ॥ १७५ ॥

रा० टी०–हनूमानिति । हनुमान् मेघजालानि मारुत इव प्राकर्षत् अत एव महाभ्राणि चकाशिरे ॥ १७६ ॥

रा० टी०–प्रविशन्निति । अभ्रजालानि पुनः पुनः प्रविशन्निष्पतंश्च सन् हनुमान् प्रावृषि प्रावृट्कालिकमेघ इन्दुरिवाभाति ॥ १७७ ॥

रा० टी०–प्रदृश्यमान इति । सर्वत्र सर्वैः प्रदृश्यमानो हनुमान् निरालम्बमम्बरं पक्षयुक्तोऽद्रिराडिव भेजे ॥ १७८ ॥

रा० टी०–प्लवमान इति । प्लवमानं तं हनुमन्तं दृष्ट्वा प्रवृद्धा बलादिनाऽतिदृढिं प्राप्ता सिंहिका नाम राक्षसी चिन्तयामास ॥ १७९ ॥

१७४] ति० टी०–आशिता कृतभोजना ॥ १७४ ॥

रा० टी०–चिन्ताप्रकारमाह–अद्येति । इदं महासत्त्वं चिरस्य बहुकालात् मम वशमागतम् अतः दीर्घस्य कालस्य बहुकालपर्यन्तम् आशिता कृतभोजनाऽहं भविष्यामि ॥१८०॥

गो० टी०–अद्येति । दीर्घस्य कालस्य दीर्घकाले गते सति अद्य आशिता आशित्री भुक्तवती भविष्यामि ॥ १७४ ॥

१७५] ति० टी०–समाक्षिपच्छाया । छायाग्रहणेन तद्बस्तुनिरोधशक्तिस्तस्या ब्रह्मदत्ता ॥ १७५ ॥

रा० टी०–इतीति । इति संचिन्त्य अस्य हनुमतः छायां समाक्षिपत् अगृह्णात् छायायां गृह्यमाणायां वानरश्चिन्तयामास ॥ १८१ ॥

गो० टी०–इतीति । समाक्षिपत् सम्यग्गृहीतवती ॥१७५॥

१७६] ति० टी०–पङ्गुकृतः स्तब्धगतिः पराक्रमो यस्य ॥ १७६ ॥

रा० टी०–चिन्ताप्रकारमाह–समिति । प्रतिलोमेन विपरीतेन वातेन सागरे महानौरिव समाक्षिप्तः केनचित् गृहीतोऽहं सहसा पङ्गुकृतपराक्रमोऽस्मि ॥ १८२ ॥

गो० टी०–समाक्षिप्त इति । पङ्गुकृतपराक्रमः कुण्ठितगतिः । प्रतिलोमेन प्रतिकूलेन ॥ १७६–१७८ ॥

१७७] ति० टी०–महानौर्यथा पङ्गुकृतपराक्रमा स्तब्धगतिः प्रतिलोमेन वातेन क्रियते । गम्यदेशगतिनिरोध एवात्र स्तब्धगतित्वम् । यद्वा तेन यथा विपरीतगतिवारणाय यन्त्रैः स्तब्धगतिः कार्यते, तथाऽहं केनचित्स्तब्धगतिः कृतः ॥ १७७ ॥

रा० टी०–तिर्यगिति । तिर्यगादौ वीक्षमाणः कपिः लवणाम्भसि महासत्त्वं ददर्श ॥ १८३ ॥

१७८–१७९] ति० टी०–महासत्त्वं स्त्रीरूपं प्राणिनम् ॥ १७८ ॥ १७९ ॥

रा० टी०–तामिति । विकृताननां तां सिंहिकां दृष्ट्वा चिन्तयामास । अर्धं पृथक् ॥ १८४ ॥

रा० टी०–चिन्ताप्रकारमाह–कपीति । अद्भुतदर्शनं छायाग्राहि सत्त्वं प्राणी कपिराज्ञा यथा यथावत् आख्यातं तदिदमेव अत्र संशयो न समासान्तविधेरनित्यत्वाट्टजभावः ॥१८२॥

गो० टी०–छायाग्राहीति । तदिदं छायाग्राहि कपिराजेन कथितं नात्र संशय इति योजना ॥ १७९ ॥ १८० ॥

१८०] ति० टी०–अर्थतत्त्वेन छायाग्रहणरूपार्थक्रियया १८०

रा० टी०–स इति । अर्थतत्त्वेन अर्थस्य सुग्रीवोपदिष्टच्छायाग्रहणरूपवस्तुनः तत्त्वेन याथार्थ्येन तां सिंहिकां बुद्ध्वा प्रावृषि बलाहको मेघ इव स हनुमान् व्यवर्धत ॥ १८६ ॥

१८१–१८२] ति० टी०–पातालाम्बरसंनिभं पातालाकाशमध्यभागसदृशम् ॥ १८१ ॥ १८२ ॥

रा० टी०–तस्येति । महाकपेः वर्धमानं कायमुद्वीक्ष्य सा सिंहिका पातालाम्बरसंनिभं पातालाम्बरयोरन्तरालतुल्यं वक्त्रं प्रसारयामास ॥ १८७ ॥

रा० टी०–घनेति । घनराजी मेघपङ्क्तिरिव गर्जन्ती सिंहिका वानरं समभिद्रवत्, आगमशास्त्रस्यानित्यत्वादडभावः । ततोऽनन्तरं कायमात्रं सिंहिकाशरीरपरिमितं सुमहत् स्वप्रसन-

१ हि मे महदिति गो. पाठः । २ तामिति रा. पाठः । ३ आननमिति गो. पाठः । ४ राजेन कथितमिति गो. पाठः । ५ ऽन्तेरिति गो. पाठः । ६ विकृतमिति गो. पाठः ।

कायमात्रं च मेधावी मर्माणि च महाकपिः । स तस्या विकृते वक्त्रे वज्रसंहननः कपिः ॥ १८३ ॥
संक्षिप्य मुहुरात्मानं निपपात[1] महाकपिः । आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः १८४ ॥
ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा । ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः॥ १८५ ॥
उत्पपाताथ वेगेन मनःसंपातविक्रमः । तां तु दिष्ट्या च धृत्या च दाक्षिण्येन निपात्य सः[2]१८६ ॥
कपिप्रवीरो[3] वेगेन वव्रृधे पुनरात्मवान्[4] । हृतहृत्सा हनुमता पपात विधुराम्भसि ॥
स्वयंभुवैव हनुमान्सृष्टस्तस्या निपातने ॥ १८७ ॥
तां हतां वानरेणाशु पतितां वीक्ष्य सिंहिकाम् । भूतान्याकाशचारीणि तमूचुः प्लवगोत्तमम् ॥ १८८ ॥
भीममद्य कृतं कर्म महत्सत्त्वं त्वया हतम् । साधयार्थमभिप्रेतमरिष्टं प्लवतां वर ॥ १८९ ॥

योग्यमित्यर्थः, तस्याः मुखं मर्माणि भेदनाय मर्मस्थलानि च स हनुमान् ददर्श । सार्धश्लोक एकान्वयी ॥ १८८ ॥

गो० टी०-घनराजीवेति । समभिद्रवत् समभ्यद्रवत् ॥ १८१ ॥

गो० टी०-स ददर्शेति । कायमात्रं देहप्रमाणम् ॥१८२॥

१८३-१८५] ति० टी०-कायमात्रं स्वशरीरकवलनपर्याप्तं शरीरप्रमाणमित्यर्थं इति तीर्थः । मात्रशब्दोऽल्पवाचीति कतकः । मर्माणि च भेदनार्थं ददर्शेत्यन्वयः । तस्या वक्त्र आत्मानं मुहुः संक्षिप्याधिकं संकुच्य निपपातेत्यन्वयः ॥ १८३-१८५ ॥

रा० टी०-स इति । स हनुमान् तस्याः सिंहिकायाः वक्त्रे आत्मानं स्वशरीरं संक्षिप्य सूक्ष्मं कृत्वा निपपात॥१८९॥

रा० टी०-अस्य इति । राहुणा ग्रस्यमानं पूर्णचन्द्रमिव तस्या आस्ये मुखे निमज्जन्तं हनुमन्तं सिद्धचारणा ददृशुः१९०

गो० टी०-स इति । मुहुः संक्षिप्य संनिकर्षात्तुगुणं संकुच्य ॥ १८३ ॥ १८४ ॥

रा० टी०-तत इति । ततः प्रवेशानन्तरं मनस्संपातवत् मनोगमनवत् विक्रमो गमनं यस्य स हनुमान् तीक्ष्णैर्नखैस्तस्या मर्माणि उत्कृत्य शैथिल्यसंपादनार्थं किंचित् भित्त्वा उत्पपात मुखद्वारा तच्छरीरात्निर्जगाम ॥ १९१ ॥

गो० टी०-तत इति । ततः तेन रूपेण मनस्संपातविक्रमः मनोवेगतुल्यगतिः ॥ १८९ ॥

१८६] ति० टी०-मनःसंपातविक्रमो मनोवेगतुल्यवेगः । दिष्ट्या दैवानुग्रहेण । 'दृष्ट्वा' इति पाठे सूक्ष्मदर्शनेनेत्यर्थः । धृत्या सहजधैर्येण । दाक्षिण्येन कालोचितकृत्यचातुर्येण च तां निपात्य निहत्य वेगेनोत्पपात ॥ १८६ ॥

रा० टी०-तामिति । दिष्ट्या दैवादीनां भाग्योदयेन धृत्या स्वधैर्येण च दाक्षिण्येन अतिनिपुणतया च तां सिंहिकां निपात्य शैथिल्यप्रापणपूर्वकं पातयित्वा आत्मवान् अतिप्रयत्नवान् कपिप्रवीरः स हनुमान् पुनर्वव्रृधे ॥ १९२ ॥

गो० टी०-तामिति । दृष्ट्या दूरादेव दर्शने । धृत्या अस्य नियमनजननधार्ष्ट्येन दाक्षिण्येन पाटवेन ॥ १८६ ॥

१८७-१८८] ति० टी०-नन्वु प्रथमप्रवृत्तवेगस्य सुरसादिभिः कुण्ठीभावे सति कथं पुनराकाशगमनं तत्राह—आत्मवान्वायोरिव स्वाधीन एव तद्गमनविषयो यत्नः । प्रथमं त्वाकाशमार्गप्राप्तिमात्राय महेन्द्रपर्वतालम्बनमितरजनप्रतारणाय वेत्याहुः । हृतहृद्धस्तहृदयलक्षणप्राणस्थाना, अत एव विधुरा प्राणशून्याम्भसि पपात । अत्र कविरुत्प्रेक्षते—तस्याश्छायाग्रहणमात्रेण भक्षणादिशक्तिमत्यायाः सिंहिकाया, निपातने निपातनिमित्तं रावणनाशाय स्वात्मरूपरामवत्स्वस्वरूपो हनुमान्सृष्टः ॥ १८७ ॥ १८८ ॥

रा० टी०-हृतेति । हनुमता हृतं विवेकराहित्यं प्रापितं हृत् हृदयं यस्याः सा अत एव विधुरा गर्वेभ्यो विमुक्ता सा सिंहिका अम्भसि सागरजले पपात । तत्र हेतुः-तस्या निपातने स्वयंभुवा ब्रह्मणा हनुमान् एव सृष्टः निर्मितः ॥ १९३ ॥

रा० टी०-तामिति । सिंहिकां हतां ताडितां वीक्ष्य आकाशचारीणि भूतानि तं हनुमन्तमूचुः ॥ १९४ ॥

गो० टी०-हृतहृदिति । विधुरा आर्ता ॥ १८७ ॥

१८९] ति० टी०-महत्सत्त्वं महाबला राक्षसी रावणवदशक्यसंहारा त्वया संहृतेत्यर्थः । अरिष्टं बाधारहितम् 'रिष हिंसायाम्' ॥ १८९ ॥

रा० टी०-तद्वचनाकारमाह-भीममिति । भीमं भयङ्करं सत्त्वं यत्त्वया हतं गर्वविध्वंसपूर्वकं ताडितं तन्महत्कर्म कृतम् । अतः अभिप्रेतमिच्छाविषयीभूतमर्थम् अरिष्टं निर्बाधं यथा भवति तथा साधय । अत्र सिंहिकायाः प्राणवियोगपरत्वेन व्याख्यानं हेयमेव परमधर्मज्ञहनुमतोऽत्र स्त्रीप्राणवियोगकर्तृत्वस्यासंभवात् अत एव सुरसावधाभावः सङ्गच्छते अत एव वक्ष्यमाणलङ्काकर्मैकप्रहारसमये स्त्री चेति मन्यमानेन नातिक्रोधः स्वयं कृत इत्युक्तिः संगच्छते अत एव न संदर्भशुद्धिरिति दिक् ॥ १९९ ॥

गो० टी०-भीममित्यादि । अरिष्टं शुभं यथा भवति तथा यस्य सिंहिकारूपसत्त्वस्य दृष्टिः आयतिक्षमसूक्ष्मेक्षणं मतिः अर्थतत्त्वनिश्चयः । क्रियावत्त्वं दाक्ष्यं यथा तव तथा यस्य चत्वारि सन्ति तत्त्वया हतम् । तान्येव चत्वार्याह-धृतिरिति । या धृतिः स्वकर्मसु स्वानुकूल्यकार्येषु नावसीदति या

---

१ निष्पपात महाबल इति गो. पाठः । २ चेति गो. पाठः । ३ स कपिप्रवरो वेगादिति गो. पाठः । ४ अर्धमेतत् गो. नास्ति ।

यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव । धृतिर्दृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति ॥ १९० ॥
स तैः संपूजितः पूज्यः प्रतिपन्नप्रयोजनैः । जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥ १९१ ॥
प्राप्तभूयिष्ठपारस्तु सर्वतः परिलोकयन् । योजनानां शतस्यान्ते वनराजीं ददर्श सः ॥ १९२ ॥
ददर्श च पतन्नेव विविधद्रुमभूषितम् । द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥ १९३ ॥
सागरं सागरानूपान्सागरानूपजान्द्रुमान् । सागरस्य च पत्नीनां मुखान्यपि विलोकयत् ॥ १९४ ॥
स महामेघसंकाशं समीक्ष्यात्मानमात्मवान् । निरुन्धन्तमिवाकाशं चकार मतिमान्मतिम् ॥ १९५ ॥
कायवृद्धिं प्रवेगं च मम दृष्ट्वैव राक्षसाः । मयि कौतूहलं कुर्युरिति मेने महामतिः ॥ १९६ ॥
ततः शरीरं संक्षिप्य तन्महीधरसंनिभम् । पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ॥ १९७ ॥
तद्रूपमतिसंक्षिप्य हनूमान्प्रकृतौ स्थितः । त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो हरिः ॥ १९८ ॥

दृष्टिर्नावसीदति या मतिर्नावसीदति यद्दाक्ष्यं नावसीदति एतानि चत्वारि यस्य सन्ति तत्त्वया हतमिति योजना ॥१८८॥१८९॥

१९०] ति० टी०–निर्बाधं कर्मसाधनहेतुमाह—यस्य त्विति ॥ १९० ॥

रा० टी०–यस्येति । यथा तव एतानि धृत्यादीनि चत्वारि सन्ति तथा यस्य सन्ति स कर्मसु क्रियासु न सीदति न दुःखं प्राप्नोति ॥ १९६ ॥

१९१] ति० टी०–स तैः संपूजितस्तैः पूर्वोक्तभूतैः । प्रतिपन्नप्रयोजनैरभिमतं साधयेत्यनुमत्यानुऽगृहीतकार्यैः॥१९१॥

रा० टी०–स इति । पूज्यः सर्वेषां पूजनीयः अत एव तैः आकाशचारिभिः संपूजितः अत एव प्रतिपन्नं निश्चितं प्रयोजनं सीतादर्शनं येन, प्रतिपन्नं सिद्धं यस्येति वा स हनूमान् पन्नगाशनवत् आकाशमाविश्य जगाम ॥ १९७ ॥

गो० टी०–स इति । संभावितः पूजितः । प्रतिपन्नप्रयोजनः प्राक्प्रतिभासितकार्यसारः स च स्त्रीत्वे दोषे समानेऽपि सुरसाया जयप्रतिपत्तिः सिंहिकाया वधप्रतिपत्तिश्च ॥ १९० ॥

१९२] ति० टी०–प्राप्तभूयिष्ठः प्राप्तकल्पः पारो येन सः ॥ १९२ ॥

रा० टी०–प्राप्तेति । प्राप्तः भूयिष्ठो बहुः पारो येन स हनूमान् योजनानां शतस्यान्ते विद्यमानां वनराजीं ददर्श॥१९८॥

गो० टी०–प्राप्तेति । प्राप्तभूयिष्ठपारः पाप्तप्रायतीरः१९१

१९३] ति० टी०–पतन्नेव गच्छन्नेव मलयोपवनानि । अनेनोत्तरतीर इव दक्षिणतीरेऽपि मलयाख्यः पर्वतोऽस्तीति गम्यते ॥ १९३ ॥

रा० टी०–ददर्शेति । शाखामृगश्रेष्ठो हनूमान् पतन् गच्छन् सन्नेव विविधद्रुमभूषितं द्वीपं मलयोपवनानि च सागरं च सागरस्य अनूपान् देशांश्च सागरस्य पत्नीनां नदीनां मुखानि सङ्गमस्थलानि विलोकयन् सन् ददर्श । अर्धचतुष्टयमेकान्वयि ॥ १९९ ॥ २०० ॥

गो० टी०–ददर्शेति । मलयोपवनानि लङ्कामलय इति दक्षिणतीरे स्थितमलयः तस्योपवनानि ॥ १९२ ॥

१९४] ति० टी०–सागरं दक्षिणतीरसमीपवर्तिसागरम् । अनूपः कच्छदेशः । सागरस्य पत्नीनां लङ्काद्वीपादागत्य सागरं प्रविशन्तीनां नदीनां मुखानि संगमस्थानानि विलोकयद्दयवलोकयत् ॥ १९४ ॥

गो० टी०–सागरमिति । सागरस्य पत्नीनां नदीनां विकूटोत्पन्नानाम् । आत्मानं स्वशरीरम् । मतिं चकार मेन इति यावत् ॥ १९३ ॥ १९४ ॥

१९५] ति० टी०–आत्मानं स्वशरीरं महत्त्वादाकाशं निरुन्धन्तमिव । मतिं कर्तव्यनिश्चयम् ॥ १९६ ॥

रा० टी०–स इति । स हनूमान् आकाशं निरुन्धन्तमिव महामेघसंकाशम् आत्मानं स्वदेहं समीक्ष्य मतिं चिन्तां चकार ॥ २०१ ॥

१९६] ति० टी०–कौतूहलम् आश्चर्यधिया दिदृक्षामित्यर्थः ॥ १९६ ॥

रा० टी०–चिन्तास्वरूपमाह–कायेति । मम कायवृद्धिं प्रवेगं च दृष्ट्वैव मयि कौतूहलम् आश्चर्यं कुर्युरिति महामतिर्हनुमान् मेने ॥ २०२ ॥

गो० टी०–कथं मेन इत्यत्राह–कायवृद्धिमिति ॥१९६॥

१९७] ति० टी०–प्रकृतिं निजमाकारम् । वीतमोहो वीतो नष्टो वासनावशादागतः कामादिमोहो यस्य सः । आत्मवाञ्जीवन्मुक्तयोगी । प्रकृतिम् भगवदनन्यतत्त्वतालक्षणस्वभावमित्यर्थः ॥ १९७ ॥

रा० टी०–तत इति । ततो विचारानन्तरं महीधरसंनिभं शरीरं संक्षिप्य अल्पत्वं प्रापय्य प्रकृतिं स्वाकृतिं पुनरापेदे । तत्र दृष्टान्तः–वीतमोहः विगतरागः आत्मवान् योगी शरीरं संक्षिप्य तिरस्कृत्य प्रकृतिं नित्यानन्दस्वभावमिव ॥ २०३ ॥

गो० टी०–तत इति । पुनः प्रकृतिमापेदे पुनर्निजाकारं प्राप्तवान् ॥ १९६ ॥

१९८] ति० टी०–अतिसंक्षिप्यातिसंकोच्य । त्रीन्क्रमान्पदानि विक्रम्य प्रक्षिप्य बलेर्वीर्यस्य हरो हरिरिव प्रकृतौ स्थितः ॥ १९८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–तदिति । तत्प्रस्तुतं रूपम् अतिसंक्षिप्य त्रीन् क्रमान् लोकान् विक्रम्य परिमाय बलिवीर्यहरः बलेर्वीर्यस्य ध्वंसकः हरिर्वामन इव प्रकृतौ स्थितः ॥ २०४ ॥

१ संभावित इति गो.पाठः । २ प्रयोजन इति गो. रा. पाठः। ३ राजिमिति गो.पाठः । ४ आनूपमिति गो.पाठः। ५ विलोकयन्निति गो.रा.पाठः ।

स चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरम् ।
परैरशक्यं प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः ॥ १९९ ॥
ततः स लम्बस्य गिरेः समृद्धे विचित्रकूटे निपपात कूटे ।
सकेतकोद्दालकनारिकेले महाभ्रकूटप्रतिमो महात्मा ॥ २०० ॥
ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि ।
कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान् ॥ २०१ ॥
स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनम् ।
निपत्य तीरे च महोदधेस्तदा ददर्श लङ्कामरावतीमिव ॥ २०२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

रक्षोगणपरिरक्षितलङ्कया दुष्प्रवेशत्वं विचिन्तयन्हनुमान्देहं संकोचयंश्चन्द्रोदयसमये तां प्रविवेश

स सागरमनाधृष्यमतिक्रम्य महाबलः । त्रिकूटस्य[2] तटे लङ्कां स्थितः[3] स्वस्थो ददर्श ह ॥ १ ॥

गो० टी०–उक्तं शरीरसंक्षेपं दृष्टान्तार्थमनुवदति–तद्रूपमिति ॥ १९७ ॥

१९९] ति० टी०–चारुनानाविधरूपधारी नानावर्णाकृतिरूपधारी । तच्च तद्व्यानेषु स्पष्टम् । परैरशक्यं समुद्रतीरमासाद्येत्यन्वयः । समीक्षितात्मा समालोकितातिप्रमाणस्वशरीरः, समवेक्षितार्थ आलोचितानन्तरकार्यः, प्रतिपन्नरूपोऽङ्गीकृतस्वल्पदेहः अभूदिति शेषः ॥ १९९ ॥

रा० टी०–स इति । चारुनानाविधरूपधारी ततस्स्वरूपः समीक्षितः ज्ञातः आत्मा अन्वेषणयत्नो येन अत एव समवेक्षितः निश्चितः अर्थः सीताप्राप्तिर्येन स महाभ्रकूटप्रतिमः महामेघसमूहसदृशो महात्मा हनुमान् परैरशक्यं तरितुमिति शेषः, परं समुद्रतीरं समासाद्य प्राप्य ततः समुद्रतीरात् लम्बस्य लम्बाभिधस्य गिरेः समृद्धे फलपुष्पादिभिः प्रवृद्धे सकेतकोद्दालकनारिकेले केतकादिसहिते विचित्रकूटे विचित्राणि कूटानि शिखराणि यस्मिंस्तस्मिन् कूटे प्रधानशिखरे निपपात । श्लोकद्वयमेकान्वयि ॥ २०५ ॥ २०६ ॥

गो० टी०–स चार्विति । प्रतिपन्नरूपः प्रतिपन्नस्वभावशरीरः अभूदिति शेषः । समीक्षितात्मा समीक्षितदेहः समवेक्षितार्थः निरूपितकार्यः । पूर्वोक्तोपसंहारश्लोक एषः ॥ १९८ ॥

२००] ति० टी०–लम्बस्य लम्बाख्यस्य विचित्राणि कूटान्यवान्तरशिखराणि यस्य तादृशे कूटे प्रधानशिखरे । उद्दालकः श्लेष्मातकः ॥ २०० ॥

गो० टी०–तत इति । लम्बस्य लम्बमानस्यैव स्थितस्य अविज्ञाताग्रस्येत्यर्थः । विचित्रकूटे विविधाश्चर्यसमूहे । 'कूटस्त्वस्त्रियां पुञ्जपालयोः' इति दर्पणः । उद्दालकाः श्लेष्मातकाः ॥ १९९ ॥

२०१–२०२] ति० टी०–गिरिवर्यमूर्ध्नि स्थितामिति शेषः । उपसंहरति––कपिस्त्विति । स कपिरुच्यमानविशेषणं सागरमतिक्रम्य तस्मिंल्लम्बाख्यपर्वते मृगादीन्व्यथयन्पीडयन्निपपात । निपत्य च ततः प्राचीनं रूपं विधूय महोदधेस्तीरेऽमरावतीमिव स्थितां लङ्कां ददर्श ॥ २०१ ॥ २०२ ॥

इति श्रीरामभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०–तत इति । समुद्रतीरं समुद्रतीरवर्तिनीं गिरिवर्यमूर्ध्नि विद्यमानां लङ्कां समीक्ष्य अवलोक्य संप्राप्य मनसा गत्वा रूपं स्वदेहं विधूय तिरोधाय कपिर्हनूमान् तस्मिन् गिरिवर्याभिधे पर्वते मृगद्विजान् मृगपक्षिणः व्यथयन् सन् ततः लम्बगिरिपर्वतात् निपपात ॥ २०७ ॥

गो० टी०–व्यथयन् मृगद्विजानित्यादिविशेषं वक्तुमुक्तमर्थमनुवदति–ततस्त्विति । समुद्रतीरं तीरोपर्याकाशं विधूय रूपं पूर्वरूपं विहाय । वृत्तमुपजातिः ॥ २०० ॥ २०१ ॥

अस्मिन्सर्गे सार्धैकाधिकद्विशतश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

रा० टी०–उपसंहरन्नाह–स इति । दानवपन्नगैः आयुतं व्याप्तं सागरं निष्क्रम्य उल्लङ्घ्य महोदधेस्तीरे निपत्य संप्राप्य अमरावतीमिव विद्यमानां लङ्कां ददर्श ॥ २०८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

१] ति० टी०–त्रिकूटस्य लम्बापरपर्यायस्य पर्वतस्य तटे स्थितः स्वस्थो भूत्वा लङ्कां ददर्श ॥ १ ॥

---

१ अशक्य इति गो. पाठः । २ त्रिकूटशिखरे इति गो. पाठः । ३ स्थितामिति गो. पाठः ।

ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान् । अभिवृष्टस्ततस्तत्र बभौ पुष्पमयो हरिः ॥ २ ॥
योजनानां शतं श्रीमांस्तीर्त्वाऽप्युत्तमविक्रमः । अनिःश्वसन्कपिस्तत्र न ग्लानिमधिगच्छति ॥ ३ ॥
शतान्यहं योजनानां क्रमेयं सुबहून्यपि । किं पुनः सागरस्यान्तं संख्यातं शतयोजनम् ॥ ४ ॥
स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः । जगाम वेगवाँल्लङ्कां लङ्घयित्वा महोदधिम् ॥ ५ ॥
शाद्वलानि च नीलानि गन्धवन्ति वनानि च । मैथुमन्ति च मध्येन जगाम नगवन्ति च ॥ ६ ॥
शैलांश्च तरुसंछन्नान्वनराजीश्च पुष्पिताः । अभिचक्राम तेजस्वी हनूमान्प्लवगर्षभः ॥ ७ ॥
स तस्मिन्नचले तिष्ठन्वनान्युपवनानि च । स नगाग्रे स्थितां लङ्कां ददर्श पवनात्मजः ॥ ८ ॥
सरलान्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् । प्रियालान्मुचुलिन्दांश्च कुटजान्केतकानपि ॥ ९ ॥
प्रियङ्गून्गन्धपूर्णांश्च नीपान्सप्तच्छदांस्तथा । असनान्कोविदारांश्च करवीरांश्च पुष्पितान् ॥ १० ॥
पुष्पभारनिबद्धांश्च तथा मुकुलितानपि । पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ॥ ११ ॥
हंसकारण्डवाकीर्णा वापीः पद्मोत्पलावृताः । आक्रीडान्विविधान्रम्यान्विविधांश्च जलाशयान् १२ ॥
संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः । उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ १३ ॥

रा० टी०–तीर्णसागरस्य हनुमतो वृत्तान्तमेवाह–स इत्यादिभिः । अनाधृष्यं धर्षयितुमशक्यं सागरं स हनुमान् अतिक्रम्य त्रिकूटस्य गिरिवर्याभिधस्य तटे स्वस्थः स्थितः सन् लङ्कां ददर्श ॥ १ ॥

गो० टी०–स सागरमित्यादि ॥ १–३ ॥

२] ति० टी०–पुष्पमयः पुष्पमयवानर इव ॥ २ ॥

रा० टी०–तत इति । ततः तत्र स्थित्यनन्तरं पादपमुक्तेन तरुभिः त्यक्तेन पुष्पवर्षेण अभिवृष्टः ततः तस्माद्धेतोः पुष्पमयः हरिर्हनुमान् तत्र त्रिकूटतटे बभौ ॥ २ ॥

३] ति० टी०–अनिःश्वसन्श्रमजश्वासरहितः । तदेवाह–न ग्लानिमिति । कविवाक्यमेतत् ॥ ३ ॥

रा० टी०–योजनानामिति । उत्तमविक्रमः कपिः हनुमान् योजनानां सुबहूनि शतानि अहं क्रमेयं क्रामेयं क्रमितुं शक्त इत्यर्थः, अतः संख्यातं बहुभिर्ज्ञातं शतयोजनपरिमितं सागरस्यान्तं सुबहुसागरं क्रमेयं पुनरिति किं विचार्येति शेषः, अनिःश्वसन् श्रमहेतुकनिःश्वासरहितः सन् योजनानां शतं तीर्त्वाऽपि तत्र तरणसमये ग्लानिं नाधिगच्छति अध्यगच्छत् प्राप्नोत् । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

४] ति० टी०–अहं योजनानां बहूनि शतान्यपि क्रमेयं क्रामेयं क्रमितुं शक्तः । शतयोजनमिति संख्यातं सागरस्यान्तं परं पारं क्रामेयमिति का गणना ममेति । मन्यते स्मेति शेषः । हनुमदभिप्रायानुवादः कवेः ॥ ४ ॥

गो० टी०–समुद्रलङ्घने कृतो ग्लानिं नाध्यगच्छदित्यत्राह–शतानीति ॥ ४ ॥ ५ ॥

५] ति० टी०–जगाम लङ्कां पर्वतशिखरादवरुह्येति शेषः ॥ ५ ॥

रा० टी०–स इति । स हनुमान् महोदधिं तीर्त्वा लङ्कां जगाम ॥ ५ ॥

६] ति० टी०–मध्येन जगाम मध्यमार्गेण वनादीन्पश्यञ्जगाम । नगवन्ति वृक्षवन्ति प्राशस्त्ये मतुप् ॥ ६ ॥

रा० टी०–शाद्वलानीति । शाद्वलानि कोमलदूर्वादिविशिष्टानि नीलानि मधुमन्ति मधुविशिष्टानि नगवन्ति गिरिखण्डवन्ति वनानि मध्येन मध्यवर्तिमार्गेण जगाम, हनुमानिति शेषः॥६॥

गो० टी०–शाद्वलानीति । गण्डवन्ति स्थूलोपलवन्ति । नामैकदेशे नामग्रहणेन गण्डशब्देन गण्डशैल उच्यते ॥ ६॥ ७ ॥

७] ति० टी०–शैलाँल्लम्बगिरिपादरूपान् ॥ ७ ॥

रा० टी०–शैलानिति । शैलान् वनराजीः वनपङ्क्तीश्च हनुमान् अभिचक्राम विचचार ॥ ७ ॥

८] ति० टी०–स तस्मिँल्लम्बपर्वते तिष्ठँल्लङ्कायां वनान्युपवनानि च ददर्श । अपि च स पवनात्मजस्तां लङ्कां नगाग्रे पर्वताग्रस्थितां ददर्श ॥ ८ ॥

रा० टी०–स इति । तस्मिन्नचले गिरिवर्यसमीपे तिष्ठन् स हनुमान् वनान्युपवनानि नगाग्रे गिरिवर्यशिखरे स्थितां लङ्कां च ददर्श ॥ ८ ॥

गो० टी०–स इति । स तस्मिन्नित्यर्थे ददर्शेत्यपकृष्यते॥८॥

९] ति० टी०–अस्यैव प्रपञ्चः–सरलानित्यादि । मुचुलिन्दा जम्बीरा इत्याहुः ॥ ९ ॥

१०–११] ति० टी०–गन्धपूर्णान्गन्धाढ्यान् ॥१०॥११॥

१२–१३] ति० टी०–रावणतपोबलात्तस्यां सर्वे वृक्षाः सर्वदा पुष्पिता इति न कश्चिद्विरोधः । आक्रीडाः क्रीडापर्वताः इति कतकः, साधारणोद्यानान्याक्रीडा इत्यन्ये । राज्ञामसाधारणान्युद्यानान्याक्रीडा इति तीर्थः ॥ १२ ॥ १३ ॥

१ यथेति गो. पाठः । २ गण्डवन्तीति गो. पाठः । ३ ५ तामिति गो. पाठः । ४ आयुताः इति गो. पाठः ।

समासाद्य च लक्ष्मीवाँल्लङ्कां रावणपालिताम् । परिखाभिः सपद्माभिः सोत्पलाभिरलंकृताम्॥ १४ ॥
सीतापहरणात्तेन रावणेन सुरक्षिताम् । समन्ताद्विचरद्भिश्च राक्षसैरुग्रधन्वभिः ॥ १५ ॥
काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम् । गृहैश्च [2]गिरिसंकाशैः शारदाम्बुदसंनिभैः ॥ १६ ॥
पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् । अट्टालकशताकीर्णां पताकाध्वज[3]शोभिताम् ॥ १७ ॥
तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविराजितैः । ददर्श हनुमाँल्लङ्कां [5]देवो देवपुरीमिव ॥ १८ ॥
गिरिमूर्ध्नि स्थितां लङ्कां पाण्डुरैर्भवनैः शुभैः । ददर्श स कपिः श्रीमान्पुरीमाकाशगामिव ॥ १९ ॥
पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा । प्लवमानामिवाकाशे ददर्श हनुमान्कपिः ॥ २० ॥
वप्रप्राकारजघनां विपुलाम्बुवनाम्बराम् । शतघ्नीशूलकेशान्तामट्टालकावतंसकाम् ॥ २१ ॥

रा० टी०–दर्शनमेव विशदयन्नाह–**सरलानित्यादिभिः** । लक्ष्मीवान् कपिकुञ्जरो हनूमान् परिखाभिरलंकृतां लङ्कां तत्समीपं समासाद्य प्राप्य सरलान् ददर्श । तत्र सुचुलिन्दा जम्बीराः, आक्रीडाः क्रीडागिरयः इति कतकः उद्यानविशेषा एवेत्यन्ये । राज्ञामसाधारणान्युद्यानान्याक्रीडा इति तीर्थः । श्लोकषट्कमेकान्वयि ॥ ९–१४ ॥

गो० टी०–**सरलानिति** । यूपसरलान् कर्णिकारान्परिव्याधान् खर्जूरान्कण्टकिच्छदान् प्रियालान् धनुःपटान् सुचुलिन्दान् जम्बीरान् कुटजान् प्रियङ्गून् फलिनः गन्धपूर्णान् नीपान् असनान् कोविदारान् चमरिकान् आक्रीडान् सर्वसाधारणक्रीडास्थानानि उद्यानानि राजयोग्यानि सर्वर्तुफलपुष्पितैः सर्वर्तुषु फलपुष्पाढ्येषां सञ्जातानीति तैः ॥९–१३॥

१४] ति० टी०–समासाद्य लङ्कां लङ्कासमीपं प्राप्य वक्ष्यमाणविशेषणां लङ्कां ददर्शेत्यन्वयः ॥ १४ ॥

गो० टी०–**समासाद्येति** । समासाद्य ददर्शेति क्रियाभेदाल्लङ्कापदाट्टत्तिः । लक्ष्मीवान् जयहेतुकान्तिमान् उत्पलानि पद्मव्यतिरिक्तानि सरसिजानि सीतापहरणम् अर्थः प्रयोजनं यस्य तेन सुरक्षितत्वे हेतुरयम् विचरद्भिश्चेत्यत्र चकारो भिन्नक्रमः राक्षसैश्च सुरक्षिताम् ग्रहसंकाशैः नवग्रहतुल्यैः पाण्डुराभिः सुधालिप्तभूमिकत्वात्सितताभिः प्रतोलीभिः वीथीभिः अट्टालकाः अट्टाः पताकाध्वजमालिनीं लतादिरेखाविचित्रितपटविशिष्टाः पताकाः मत्स्यमकराद्याकारा ध्वजाः । व्रीह्यादित्वादिनिः । लतापङ्क्तयः लताकाररेखाः ॥ १४–२० ॥

१५–१६] ति० टी०–सीतापहरणात् सीतां लङ्कायामपहृत्य स्थापनाद्धेतोरित्यर्थः । राक्षसाश्च रक्षणे करणभूताः ॥ १५ ॥ १६ ॥

१७] ति० टी०–प्रतोल्यो रथ्याः । तासां पाण्डुरत्वमुच्चत्वं च तत्रत्यसौधसंबन्धकृतम् । अट्टालकाः प्राकारशिरांसि । पताका ध्वजपटस्तद्युक्तध्वजशोभिताम् ॥ १७ ॥

१८] ति० टी०–लतापङ्क्तिस्तदाकारचित्रविशेषास्तया विराजितैः शोभमानैस्तोरणैर्युक्तां देव इन्द्रो देवपुरीममरावतीमिव । अनेन परनगरादिकृतशोभाभावः सूचित इति बोध्यम् १८

रा० टी०–**सीतेति** । सीतापहरणात् सीतापहरणपूर्वकस्थानात् हेतोः रावणेन राक्षसैश्च सुरक्षितां काञ्चनेन प्राकारेण वृतां गृहैः उच्चाभिः पाण्डुराभिः सुधादिसंस्कृतत्वेन पाण्डुरवर्णविशिष्टाभिः प्रतोलीभिः रथ्याभिश्चाभिसंवृताम् अट्टालकशताकीर्णाम् अनन्ताट्टालकपूर्णां लतापङ्क्तिविराजितैः लतापङ्क्तिवद् शोभितैः तोरणैर्बहिर्द्वारैरुपलक्षितां लङ्कां देवपुरीं देव इव हनुमान् ददर्श । श्लोकचतुष्टयमेकान्वयि ॥१५–१८॥

१९] ति० टी०–गिरिमूर्ध्नस्थत्वादाकाशगपुरोपमेयता लङ्कायाः ॥ १९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—**गिरीति** । आकाशगा आकाशादूर्ध्वं गो गमनं यस्याः तां पुरीमिव श्रीमान् हनुमान् लङ्कां ददर्श ॥ १९ ॥

२०] ति० टी०–गिरिमूर्ध्नस्थत्वादेवाकाशे प्लवमानामिव । लङ्कां द्रष्टुर्हनूमत इव तद्वर्णनप्रसक्तस्य कवेरप्याश्चर्यमग्नतया ददर्शेति पुनरुक्तिर्न दोषाय । विस्मयेन पुनः पुनर्ददर्शेति वा तात्पर्यम् ॥ २० ॥

रा० टी०–**पालितामिति** । आकाशे प्लवमानां गच्छन्तीमिव हनूमान् ददर्श ॥ २० ॥

२१] ति० टी०–लङ्कां स्त्रीत्वेन वर्णयति—**वप्रेति** । वप्रः प्राकाराभ्यन्तरवेदिका तद्युक्तप्राकारजघनाम् । विपुलाम्बुः समुद्रो वनानि चाम्बरं वासो यस्यास्ताम् । अत्राम्बुशब्देन परिखान्तर्जलमिति तीर्थः ॥ २१ ॥

रा० टी०–लङ्कां स्त्रीत्वेन प्रकल्पयन्नाह–**वप्रेति** । वप्रः प्राकारोऽन्तरवेदिका च जघने यस्याः विपुलाम्बुः सागरः वनानि चाम्बराणि यस्याः शतघ्न्यः शूलानि च केशा यस्याः अट्टालकाः वतंसाः कर्णभूषणानि यस्याः, विश्वकर्मणा निर्मितां मनसा ब्रह्मेच्छामात्रेण कृतामिव लङ्कां तदवयवीभूतमुत्तरद्वारमासाद्य प्राप्य वानरो हनूमान् चिन्तयामास । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

१ धन्विभिरिति गो. रा. पाठः । २ ग्रहेति गो. पाठः । ३ मालिनीमिति गो. पाठः । ४ विचित्रितैरिति गो. पाठः । ५ दिवीति गो. पाठः । ६ कपिश्रेष्ठः पुरमाकाशगं येथेति गो. पाठः । ७ अट्टालकवतंसकामिति गो. रा. पाठः ।

मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा । द्वारमुत्तरमासाद्य चिन्तयामास वानरः ॥ २२ ॥
कैलासनिलयप्रख्यमालिखन्तमिवाम्बरम् । [1]ध्रियमाणमिवाकाशमुच्छ्रितैर्भवनोत्तमैः ॥ २३ ॥
संपूर्णां राक्षसैर्घोरै [[4]र्नागैर्भोगवतीमिव । अचिन्त्यां सुकृतां स्पष्टां कुबेराध्युषितां पुरा ॥
दंष्ट्रिभिर्बहुभिः शूरैः शूलपट्टिशपाणिभिः । रक्षितां राक्षसैर्घोरै] गुहामाशीविषैरिव ॥
तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः । रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ २४ ॥
आगत्यापीह हरयो भविष्यन्ति निरर्थकाः । नहि युद्धेन वै लङ्का शक्या जेतुं सुरैरपि ॥ २५ ॥
इमां त्वविषमां लङ्कां दुर्गां रावणपालिताम् । प्राप्यापि सुमहाबाहुः किं करिष्यति राघवः ॥ २६ ॥
अवकाशो न सान्त्वस्तु राक्षसेष्वभिगम्यते । न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ २७ ॥
चतुर्णामेव हि गतिर्वानराणां [6]तरस्विनाम् । वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ २८ ॥
यावज्जानामि वैदेहीं यदि जीवति वा नवा । तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥ २९ ॥

गो० टी०–वप्रेति । वप्रेत्यादावपि ददर्श हनुमान् कपिरित्यनुवर्तते । वप्रं प्राकारमूर्तिकः प्राकारः सालः विपुलाम्बुपरिघारूपं नवाम्बरं यस्याः सा शतघ्नी यन्त्रविशेषः वतंसः अवतंसः । भागुरिमतेनाल्लोपः वस्तुतो विश्वकर्मणा निर्मितां विचार्यमाणे केनापि मनसा निर्मितामिव स्थितामित्युत्प्रेक्षा ॥ २१ ॥

२२] ति० टी०–विश्वकर्मणा निर्मितां तेनापि मनसा कृतामिव स्थिताम् । द्वारमुत्तरमासाद्य समुद्रदक्षिणतटे प्लवनेन तस्यैव प्रथमं प्राप्तेः । चिन्ता वक्ष्यमाणप्रकारा ॥ २२ ॥

गो० टी०–द्वारमिति । उत्तरं द्वारमासाद्य चिन्तयामास मनसा निरूपयामास वैदेहीदर्शनोपायमिति शेषः ॥२२॥

२३] ति० टी०–कैलासो निलयः स्थानं यस्यालकाद्वारस्य तत्प्रख्यमुत्तरद्वारम् । उच्छ्रितैर्भवनोत्तमैरम्बरमालिखन्तमिव । आकाशं ध्रियमाणमिवाकाशधारणं कुर्वदिव ॥ २३ ॥

२४] ति० टी०–एतद्ग्रे 'संपूर्णां राक्षसैर्घोरैर्गुहामाशीविषैरिव' इति पाठः, इतरत्प्रक्षिप्तमिति कतकः राक्षसैः संपूर्णां नगरीं महतीं गुप्तिं रिपुं रावणं च सागरं च निरीक्ष्य चिन्तयामास सादरं चिन्तयामासेत्यर्थः ॥ २४ ॥

रा० टी०–चिन्तामेव भङ्ग्यन्तरेणाह–कैलासेति । कैलासनिलयप्रख्यं कैलासशृङ्गगृहसदृशम् अत एव अम्बरमाकाशमालिखन्तमिव भवनोत्तमैराकाशं ध्रियमाणमिव द्वारविशेषमिति शेषः, आशीविषैर्गुहामिव राक्षसैः संपूर्णां लङ्कां च तस्याः लङ्कायाः महतीं गुप्तिं च सागरं च घोरं रावणं च निरीक्ष्य वानरो हनुमान् चिन्तयामास । सार्धश्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–कैलासेत्यादि । ङीयमानां गच्छन्तीम् 'ङीङ्' विहायसागतौ इत्यस्माच्छानच् ॥ २३—३० ॥

२५] ति० टी०–चिन्ताप्रकारः–आगत्यापीति । अपिना आगमनस्यैवाशक्यता सूचिता । एवंव सागरनिरीक्षणेन सूचिता । सुरैरपि जेतुमशक्या यदतः ॥ २५ ॥

रा० टी०–चिन्ताकारमाह–आगत्येति । यतः सुरैरपि युद्धेन जेतुं लङ्का न शक्या अतो हरयः वानराः आगत्यापि निरर्थका भविष्यन्ति ॥ २५ ॥

२६] ति० टी०–इमां त्विति । अविषमां न विद्यते विषमा यतस्ताम् । प्राप्यापीत्यपिना पदातित्वादागमनमेवाशक्यमिति सूच्यते । किं करिष्यति राघवः प्रायो राघवस्यापि दुःसाध्येत्यर्थः ॥ २६

रा० टी०–इमामिति । न विद्यते विषमः राक्षसस्वभावात् विरुद्धस्वभावो रक्षको यस्याः अत एव दुर्गां रावणपालितां लङ्कां राघवोऽपि प्राप्य किं करिष्यति ॥ २६ ॥

२७] ति० टी०–अवकाशो नेति । उपचितार्थत्वाद्बलदर्पपराक्रमसंपन्नत्वात्सुस्निग्धदृढप्रकृतित्वाच्च न सामादीनामवकाश इति भावः ॥ २७ ॥

रा० टी०–अवकाश इति । राक्षसेषु सामादीनां युद्धस्य च अवकाशावसरो न दृश्यते । एतेन तेषामविरोधित्वोपचितार्थत्वबलदर्पपराक्रमसंपन्नत्वदृढप्रकृतिकत्वानि सूचितानि ॥२७॥

२८] ति० टी०–पूर्वम् 'आगत्यापीह हरयः' इत्युक्तम्, इदानीं सर्ववानरागमनासंभव एवेत्याह–चतुर्णामेवेति॥२८॥

रा० टी०–युद्धस्यावकाशाभावे हेतुं वदन्नाह–चतुर्णामिति । वालिपुत्रादीनां चतुर्णामेव गतिः एतेन युद्धयोग्यसैन्यप्राप्तेरसंभवः सूचितः ॥ २८ ॥

२९] ति० टी०–ननु जानकीजीवनज्ञाने तन्मोक्षणाय बलाबलादिचिन्ता, अतस्तद्दर्शनचिन्तैव प्रथमं युक्तेत्याह—यावज्जानामीति । "यावत्पुरा–" इति लट् ज्ञास्ये इत्यर्थः । तत्रैव जानकीदर्शनविषये एव प्रथममिति शेषः । प्रथमं तां दृष्ट्वा पश्चाच्चिन्त्यं तत्तदानीमेव चिन्तयामीति शेषः ॥ २९ ॥

रा० टी०–इदानीं चिन्तनस्य न प्रयोजनमित्याह–याव-

१ शिखरप्रख्यामिति गो. पाठः । २ लिखन्तीमिति गो. पाठः । ३ ड्रियमानामिति गो. पाठः । ४ सार्धोऽयं श्लोकोऽधिकः गो. पाठे । ५ सान्त्वस्येति गो. पाठः । ६ महात्मनामिति गो. पाठः ।

ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः । [1]गिरेः शृङ्गे स्थितस्तस्मिन्रामस्याभ्युदयं ततः॥ ३० ॥
अनेन रूपेण मया न शक्या रक्षसां पुरी । प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥ ३१ ॥
[2]महौजसो महावीर्या [3]बलवन्तश्च राक्षसाः । वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ ३२ ॥
लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया । प्राप्तकालं प्रवेष्टुं मे कृत्यं साधयितुं महत् ॥ ३३ ॥
तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः । हनूमांश्चिन्तयामास विनिःश्वस्य मुहुर्मुहुः ॥ ३४ ॥
केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् । अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३५ ॥
न विनश्येत्कथं कार्यं रामस्य विदितात्मनः । एकामेकस्तु पश्येयं रहिते जनकात्मजाम् ॥ ३६ ॥
भूताश्चार्था [5]विनश्यन्ति देशकालविरोधिताः । विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥

दिति । वैदेही जीवति न वा इदानीं संशय एवेत्यर्थः, अतः यदि जीवति तदा जनकात्मजां दृष्ट्वा अन्वेषणेनावलोक्य वैदेहीं यावत् यदि जानामि जीवितात्वेन निश्चेष्यामि तदा तत्र सीतासमीपे एव चिन्तयिष्यामि । वैदेहीत्यध्याहृतम्, जीवतीत्यावर्तते ॥ २९ ॥

गो० टी०–एवं विचार्य नायमेतद्विचारकाल इत्यनुशेते–यावदिति । यावत् यदा जीवति वा न वेति वैदेहीं जानामि तत्रैव काले तां जनकात्मजां दृष्ट्वा चिन्तयिष्यामि । यद्वा यावच्छब्दोऽवधारणे जानाम्येव जीवति वा नवेति जानाम्येव । यदि जीवति तदा तां जनकात्मजां दृष्ट्वा तत्रैव तत्काल एव चिन्तयिष्यामीत्यन्वयः ॥ ३१ ॥

३०] ति० टी०–रामस्याभ्युदयं तदभ्युदयरूपसीतान्वेषणोपायम् ॥ ३० ॥

रा० टी०–चिन्तान्तरमाह–तत इति । ततोऽनन्तरं गिरेः शृङ्गे स्थितो रामस्याभ्युदये रतो हनुमान् मुहूर्तं चिन्तयामास ॥ ३० ॥

गो० टी०–तत इति । चिन्तयामास वैदेहीदर्शनोपायमिति शेषः ॥ ३२–३४ ॥

३१–३२] ति०टी०–चिन्ताप्रकारः–अनेनेति॥३१॥३२॥

रा० टी०–चिन्ताकारमाह–अनेनेति । अनेन स्वकीयेन रूपेण प्रवेष्टुं रक्षसां पुरी लङ्कां न शक्या ॥ ३१ ॥

रा० टी०–महौजस इति । जानकीं परिमार्गता मया राक्षसाः वञ्चनीया स्वस्वरूपगोपनेन प्रलम्भनीयाः ॥ ३२ ॥

३३] ति० टी०–लक्ष्यं कार्यप्रवृत्त्यानुमेयम । तच्च तदलक्ष्यं चेन्द्रियागोचरमित्यर्थः । महत्कृत्यं सीतान्वेषणरूपं साधयितुं तेन रूपेण लङ्कापुरीं प्रवेष्टुं प्राप्तकालमुचितम् ॥३३॥

रा० टी०–लक्ष्येति । प्राप्तः कालः समयो यस्य तन्महत्कृत्यं साधयितुं लक्ष्यालक्ष्येण कार्यहेतुकानुमित्या लक्ष्येण रूपेण चक्षुषा अलक्ष्येण रूपेण रात्रौ मया प्रवेष्टुं लङ्कापुरी शक्येति शेषः ॥ ३३ ॥

गो० टी०–लक्ष्यालक्ष्येति । लक्ष्यशरीरत्वे राक्षसा गृह्णीयुः अलक्ष्यशरीरत्वे सर्वा लङ्का न विचेतुं शक्या । कृत्यं साधयितुं प्रवेष्टुं कृत्यसाधनाय प्रवेष्टुं प्राप्तकालं युक्तम् ॥ ३९ ॥

३४–३५] ति० टी०–तेन रूपेणाप्यन्वेषणं कथं घटतेति पुनश्चिन्तयति—तां पुरीमिति ॥ ३४ ॥ ३५ ॥

रा० टी०–चिन्तान्तरमाह तामिति । सुरासुरैः दुराधर्षां तादृशीं पुरीं दृष्ट्वा मुहुर्मुहुः विनिःश्वस्य हनुमान् चिन्तयामास ॥ ३४ ॥

रा० टी०–तदाकारमाह–केनेति । केनोपायेन रावणेन अदृष्टोऽहं मैथिलीं पश्येयम् ॥ ३५ ॥

गो० टी०–तामिति । विनिश्चित्य सीतान्वेषणप्रकारं विनिश्चित्य । मुहुर्मुहुस्तमेव चिन्तयामासेत्यर्थः ॥ ३६ ॥ ३७ ॥

३६] ति० टी०–नेति । रहिते एकान्ते कथं पश्येयमित्यन्वयः ॥ ३६ ॥

रा०टी०–उक्तवञ्चनाया आवश्यकत्वमित्यभिप्रेत्याह–नेति । रामस्य कार्यं न विनश्येत् अतः रहिते राक्षसासेवितस्थले विद्यमानाम् एकां जनकात्मजामेकोऽहं कथं पश्येयम् ॥ ३६ ॥

गो० टी०–न विनश्येदिति । एकश्च पश्येयमिति । अत्रापि कथमित्यनुषञ्जनीयम् । रहिते एकान्ते ॥ ३८ ॥

३७] ति० टी०–ननु सीतादर्शने किमर्थमेकान्तापेक्षा तत्राह—भूताश्चेति । भूतार्थाः सिद्धप्रायकार्याणि विक्लवं कातरमविमृश्यकारिणं दूतमासाद्य देशकालाभ्यामुचितप्रवृत्तिहीनाभ्यां विरोधिताः सन्तः सूर्योदये तम इव विनश्यन्ति अतोऽसहायेन मयैतादृशे देशे काले कार्ये च गुप्तमेव प्रवर्तितव्यमिति भावः ॥ ३७ ॥

रा० टी०–दूताधीनमेव राजकार्यमतो दूतेन अनवधानतया न भवितव्यमिति बोधयन्नाह–भूता इति । भूताः सिद्धा अर्थाः राजकार्याणि विक्लवम् असमीक्ष्यकारिणं दूतमासाद्य प्राप्य देशकालविरोधिता उचितदेशकालयोर्विरोधं प्राप्ताः सन्तः सूर्योदये तम इव विनश्यन्ति ॥ ३७ ॥

गो० टी०–पण्डितेन मुहुर्मुहुर्विचार्य कार्याणि कर्तव्यानि नतु पण्डितमानिना सकृद्विचार्य कर्तव्यानि । तथा सति दोषः

१ गिरिशृङ्गे इति गो.पाठः। २ ऽभ्युदये रत इति गो.रा.पाठः। ३ उग्रौजस इति गो.पा.। ४ मायावन्त इति रा.पाठः। ५ विपद्यन्ते इति गो.पाठः।

अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते । घातयन्तीह कार्याणि दूताः पण्डितमानिनः ॥ ३८ ॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् । लङ्घनं च समुद्रस्य कथं नु न भवेद्वृथा ॥ ३९ ॥
मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः । भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ ४० ॥
नहि शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः । अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ ४१ ॥
वायुरप्यत्र नाज्ञातश्चरेदिति मतिर्मम । नै ह्यत्राविदितं किंचिद्रैक्षसां भीमकर्मणाम् ॥ ४२ ॥
इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः । विनाशमुपयास्यामि भर्तुरर्थश्च हाँस्यति ॥ ४३ ॥
तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः । लङ्कामभिपतिष्यामि राघवस्यार्थसिद्धये ॥ ४४ ॥

स्यादित्याह–भूताश्चेति । भूताश्चार्थाः सम्यगुपायप्रयोगान्निष्पन्नप्राया अप्यर्थाः विक्लवम् अधीरम् अविमृश्यकारिणम् दूतमासाद्य देशकालविरोधिताः सन्तः मयीदृशे तमो यथा तम इव तदृतस्याविमृश्यकारित्वेन सद्य एव विपद्यन्ते नश्यन्तीत्यर्थः ॥ ३९ ॥

३८] ति० टी०–न केवलं कार्यहानिः, किं त्वन्यदपि स्यादित्याह—अर्थानर्थान्तरे इति । अर्थानर्थान्तरे कार्याकार्यविषये निश्चितापि स्वामिना सचिवैः सह निश्चितापि बुद्धिर्न शोभते । विक्लवं दूतमासाद्येति शेषः । तदेव द्रढयति—घातयन्तीति । एवं सति लोको मत्स्वामिनं बुद्धिशून्यमपि जानीयादित्याशयः ॥ ३८ ॥

रा० टी०–कुत्सितदूतलाभे राजमन्त्रा अपि निरर्थकाः भवन्तीति बोधयन्नाह–अर्थेति । पण्डितमानिनः पण्डितंमन्याः अविवेकिन इत्यर्थः, दूताः कार्याणि घातयन्ति अतः इह अविवेकिदूतप्राप्तौ अर्थानर्थान्तरे कर्तव्याकर्तव्यविषये निश्चितापि बुद्धिः न शोभते ॥ ३८ ॥

गो० टी०–न केवलं कार्यहानिः किंतु साम्यादीनां बुद्धिशून्यतापि स्यादित्याह–अर्थेति । अत्रापि विक्लवं दूतमासाद्येत्यनुवर्तते । अर्थानर्थान्तरे अर्थानर्थयोः प्रयोजनसाधनयोः कार्याकार्ययोः । अन्तरे विषये निश्चिता राज्ञा सचिवैश्च निर्णीता बुद्धिः विक्लवं दूतमासाद्य न शोभते अनर्थकारिणी भवतीत्यर्थः । इदमेव समर्थयते–घातयन्तीति ॥ ४० ॥

३९] ति० टी०–यदेवम, अतः कार्यं राजकार्यं न विनश्येत् । वैक्लव्यं बुद्धिहीनता तत्प्रसिद्धिः स्वस्य स्वस्वामिनश्च ॥ ३९ ॥

रा० टी०–नेति । कार्यं सीतालाभः कथं न विनश्येत् अत एव वैक्लव्यं दूतदोषः कथं न भवेत् मयि प्राप्नुयात् अत एव समुद्रस्य लङ्घनं वृथा कथं न भवेत् ॥ ३९ ॥

गो० टी०–प्रागुक्तदोषाः स्वस्मिन्कथं न स्युरिति चिन्तयति–न विनश्येदिति । कार्यं रामकार्यं कथं केनोपायेन न विनश्येत् । किमद्यापराह्ण एव लङ्कां प्रवेष्टव्या उत रात्रौ । किमनेनैव महता रूपेण प्रवेष्टव्या उत ह्रस्वेन रूपेणेत्यर्थः । वैक्लव्यं ममापाण्डित्यं कथं न भवेत् ॥ ४१ ॥

४०] ति० टी०–रावणानर्थं रावणवधम् ॥ ४० ॥

रा० टी०–वैयर्थ्यसंभावनायां हेतुमाह–मयीति । रक्षोभिर्मयि दृष्टे सति रावणानर्थं रावणविघातमिच्छतो रामस्येदं सीतालाभरूपकार्यं व्यर्थं भवेत् । एतेन रामदूतं मां ज्ञात्वा सीतामतियत्नां करिष्यतीति सूचितम् ॥ ४० ॥

गो० टी०–अपराह्णप्रवेशदोषमाह–मयीति ॥ ४२ ॥

४१] ति० टी०–अदर्शनेन संचारश्च सर्वथाऽशक्य इत्याह–नहीति ॥ ४१ ॥

रा० टी०–स्वस्यालक्ष्यत्वे अनुपपत्तिमाह–नहीति । राक्षसैः अविज्ञातेन जनेन राक्षसरूपेण अन्येन केनचिद्रूपेण वा क्वचित्स्थातुं नैव शक्यम् । एतेन लङ्कायाः राक्षसव्याप्यत्वं राक्षसानां चातिनिपुणत्वं बोधितम् ॥ ४१ ॥

गो० टी०–महता रूपेण प्रवेशं निराचष्टे—नहीति । स्वेन रूपेण स्वाभाविकमहता रूपेण ॥ ४३–४५ ॥

४२] ति० टी०–रक्षसामविदितं रक्षोभिरविदितं न किंचिदस्ति कृत्रिमरूपमिति शेषः । अतः प्राकृतसहजकपिरूपेणैव स्थातव्यमिति भावः ॥ ४२ ॥

रा० टी०–वायुरिति । हि यतः अत्र लङ्कायां रक्षसाम् अविदितं किंचित्र अतः नाज्ञातः राक्षसैरविदितः वायुरपि अत्र न चरेत् चरितुं शक्नुयात् इति मम मतिर्निश्चयः ॥ ४२ ॥

४३–४४] ति० टी०–किं च यावदस्तमयं स्वगोपनमेवोचितमित्याह—इहेति । स्वेन रूपेण संवृतः सन्युक्तः सन्निहाहि देशे च यदि तिष्ठामि तदा स्पष्टं परैरवगम्यमानत्वाद्विनाशमुपयास्यामि भर्तुरर्थहानिश्च । तस्मादासायमत्रैव क्वचिद्विरिगुहायां निःशङ्कं स्थित्वा रजन्यामपि स्वेन रूपेणैव, परंतु ह्रस्वतां गतो भूत्वा लङ्कामभिपतिष्यामीत्यन्वयः ॥ ४३ ॥ ४४ ॥

रा० टी०–इहेति । स्वेन रूपेण संवृतः विशिष्टः सन् यदि तिष्ठामि तर्हि विनाशं क्षतादिकमुपयास्यामि अत एव भर्तुरर्थः हास्यति भर्तारं त्यक्ष्यति विनङ्क्ष्यतीत्यर्थः ॥ ४३ ॥

रा० टी०–तदिति । तदुक्तहेतोः राघवस्यार्थसिद्धये स्वेन रूपेण ह्रस्वतां लघुरूपं गतः प्राप्तोऽहं लङ्कामभिपतिष्यामि प्रवेक्ष्यामि । एतेन वायुतोऽपि स्वसामर्थ्याधिक्यं व्यञ्जितम॥४४॥

१ हीति गो. पाठः । २ न ह्यस्तीति गो. पाठः । ३ राक्षसानां बलीयसामिति गो. पाठः । ४ हीयते इति गो. पाठः ।

रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदाम् । प्रविश्य भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ ४५ ॥
इति [2]निश्चित्य हनुमान्सूर्यस्यास्तमयं कपिः । आचकाङ्क्ष तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ ४६ ॥
सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः । वृषदंशकमात्रोऽथ [3]बभूवाद्भुतदर्शनः ॥ ४७ ॥
प्रदोषकाले हनुमांस्तूर्णमुत्पत्य वीर्यवान् । प्रविवेश पुरीं रम्यां प्रविभक्तमहापथाम् ॥ ४८ ॥
प्रासादमालाविततां स्तम्भैः काञ्चनसंनिभैः । शातकुम्भनिभैर्जालैर्गन्धर्वनगरोपमाम् ॥ ४९ ॥
सप्तभौमाष्टभौमैश्च स ददर्श महापुरीम् । स्थलैः स्फटिकसंकीर्णैः कार्तस्वरविभूषितैः ॥
[वैडूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः ।] तैस्तैः शुशुभिरे तानि भवनान्यत्र रक्षसाम् ॥ ५० ॥
काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् । लङ्कामुद्योतयामासुः सर्वतः समलंकृताम् ॥ ५१ ॥
अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः । आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५२ ॥

गो० टी०–परिशेषाद्रात्रौ ह्रस्वरूपेणैव प्रवेष्टव्यमित्याह—तदहमिति ॥ ४६–४८ ॥

४५–४६] ति० टी०–प्रथमतः पुरीं प्रविश्य ततः सर्वं भवनं रावणगृहं प्रविश्य ॥ ४५ ॥ ४६ ॥

रा० टी०–रावणस्येति । रात्रौ रावणस्य पुरीं प्रविश्य सर्वं भवनं च प्रविश्य जनकात्मजां द्रक्ष्यामि ॥ ४५ ॥

रा० टी०–इतीति । वैदेह्याः दर्शनोत्सुकोऽयं हनुमान् इति निश्चित्य सूर्यस्यास्तमस्तत्त्वम् आचकाङ्क्ष ॥ ४६ ॥

४७] ति० टी०–वृषान्मूषकान्दशतीति वृषदंशको मार्जारस्तन्मात्रस्तत्प्रमाणः ॥ ४७ ॥

रा० टी०–सूर्य इति । अद्भुतानि ब्रह्माश्चर्याणि पश्यति अद्भुतं दर्शनं यस्येति वा स मारुतिः स्वशरीरं संक्षिप्य तिरोधाय वृषदंशकमात्रः वृषाणां मूषकाणां दंशको मार्जारः तन्मात्रः तत्परिमाणो बभूव 'वृषो गव्याम्बुवर्षयोः' इति हैमः ॥ ४७ ॥

गो० टी०–सूर्य इति । स्वेन रूपेण वृषदंशकमात्रः बिडालप्रमाणः ॥ ४९ ॥

४८] ति० टी०–प्रविवेश पुरीमिति प्रवेशपूर्वकान्वेषणसंक्षेपोक्तिः ॥ ४८ ॥

रा० टी०–प्रदोषेति । प्रदोषकाले तूर्णमुत्पत्य उत्प्लुत्य प्रविभक्ता महापथा राजमार्गाः यस्यां तां पुरीं प्रविवेश ॥ ४८ ॥

गो० टी०–प्रदोषकाल इति । प्रविवेश प्रवेष्टुमुपक्रान्तः चतुर्थे सर्गे प्रवेशस्य वक्ष्यमाणत्वात् । लङ्कादर्शनं तु त्रिकूटदर्शनस्थित्या ॥ ४८ ॥

४९] ति० टी०–तृतीयान्तेषु उपलक्षितामिति शेषः ॥ ४९ ॥

५०] ति० टी०–सप्तेति । भूमीनां समूहैः सप्तसंख्यावयवयुक्तैरुपलक्षिताम् । स्फटिकसंकीर्णैः स्फटिकरत्नखचितैः स्थलैरित्यर्थः । स्थलं भूः । ' तलैः ' इति पाठेऽपि स एवार्थः । तैस्तैः प्रासादैरिति शेषः ॥ ५० ॥

रा० टी०–पुरीमेव वर्णयन्नाह–प्रासादेति । प्रासादमालाभिः विततां विस्तृतां काञ्चनसंनिभैः स्तम्भैः शातकुम्भनिभैर्जालैश्च उपलक्षितां गन्धर्वनगरोपमां गन्धर्वनगरसदृशीं यैर्यैः रक्षसां तानि भवनानि शुशुभिरे तैस्तैः सप्तभौमाष्टभौमैः सप्तभूमिकाष्टभूमिकैः स्फटिकसंकीर्णैः स्फटिकमणिरचितैः कार्तस्वरविभूषितैः सुवर्णखचितैः स्थलैरुपलक्षितां पुरीं ददर्श हनुमान् इति शेषः । सार्धश्लोकद्वयमेकान्वयि ॥ ४९ ॥ ५० ॥

गो० टी०–प्रासादेत्यादि । काञ्चनराजतैः स्तम्भैः शातकुम्भमयैर्जालैश्च उपलक्षिताम् । गन्धर्वनगरोपमामिति गन्धर्वनगरं नाम नानारत्नमयगोपुरप्रासादादियुक्तनगरादिवद्भ्रमानमभ्रचित्रम् तद्वदाश्चर्यावहामित्यर्थः । यथोक्तम् ' अनेन रत्नाकृति खे विराजते पुरं पताकाध्वजतोरणान्वितम् । यदा तदा हस्तिमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा ' इति । सप्तभूमाष्टभूमैश्चेति । भूमिशब्देन आसनशयनादियोग्यं तलमुच्यते । सप्त भूमयो येषां ते सप्तभूमाः । "कृष्णादक्रपाण्डुसंख्यापूर्वाया भूमेरजिन्यते ' इत्यच् समासान्तः । एवमष्टभूमाः । सप्तभूमादिशब्देन तादृशाः प्रासादविशेषा उच्यन्ते । यद्वा प्रासादैरिति शेषः । तैरुपलक्षिताम् ॥ ५१–५२ ॥

५१] ति० टी०–रक्षसां तोरणानि रक्षोगृहद्वारस्थतोरणानि ॥ ५१ ॥

रा० टी०–काञ्चनानीति । रक्षसां संबन्धीनि काञ्चनानि विचित्राणि तोरणानि सर्वतः समलंकृतां लङ्कामुद्योतयामासुः ॥ ५१

५२] ति० टी०–अचिन्त्यामशक्यान्वेषणचिन्ताम् । अयं विषादहेतुः । अद्भुताकारामिति हर्षहेतुः ॥ ५२ ॥

रा० टी०–अचिन्त्यामिति । अद्भुतः आकारो यस्यास्तामत एव अचिन्त्यामद्भुतनिर्माणादिना चिन्तयितुमशक्यां लङ्कां वैदेह्या दर्शनोत्सुको हनुमान् विषण्णः वृत्तान्तालाभादुदासीनचित्तः हृष्टः शुभशकुनादिना हर्षयुक्तश्चासीत् ॥ ५२ ॥

गो० टी०–अचिन्त्येति । विषण्णः हृष्टश्चेति । अचि-

१ विचिन्वन्निति गो. पाठः । २ संचिन्त्येति गो. पाठः । ३ सन्निति गो. पाठः । ४ उत्प्लुत्येति गो. पाठः । ५ स्विति गो. पाठः । ६ राजतैरिति गो. पाठः । ७ मयैरिति गो. पाठः । ८ तलैरिति गो. पाठः । ९ अर्धमेतदधिकं गो. पाठे ।

सपाण्डुराविद्धविमानमालिनीं महार्हजाम्बूनदजालतोरणाम् ।
यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः सुपालिताम् ॥ ५३ ॥
चन्द्रोऽपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् ।
ज्योत्स्नावितानेन वितत्य लोकानुत्तिष्ठतेऽनेकसहस्ररश्मिः ॥ ५४ ॥
शङ्खप्रभं क्षीरमृणालवर्णमुद्वृच्छमानं व्यवभासमानम् ।
ददर्श चन्द्रं स कपिप्रवीरः पोप्लूयमानं सरसीव हंसम् ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

निशि लङ्कां प्रविशन्तं हनुमन्तं लङ्काभिमानिनी महाराक्षसी प्रत्यक्षीभूय पाणितलेनाभिहत्य प्रत्यषेधत् । अथो हनुमता नारीति वाममुष्टिना मन्दं ताडितापि विह्वला कपिना त्वयि पराजितायां लङ्काविनाशसमयः संप्राप्त इति विद्वीति ब्रह्मणो वचो निवेदयन्ती पुरःप्रवेशमन्वजानात् ।

स लम्बशिखरे लम्बे लम्बतोयदसंनिभे । सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः ॥ १ ॥
निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः । रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २ ॥

न्त्या दुष्प्रवेशेति च विषण्णः यतोद्भुताकारा अतो विस्मयनीयतया हृष्टः ॥ ५६ ॥

५३] ति० टी०—पाण्डुरा सुधाधवला आविद्धा परस्परसंविद्धा विमानानां सप्तभूमिकप्रासादानां मालाऽस्यामस्ति तां प्रविवेशेति शेषः ॥ ५३ ॥

रा० टी०—स इति । पाण्डुराविद्धमालिनीं पाण्डुराणां पाण्डुरवर्णानाम् आविद्धानां परस्परं संमिलितानां विमानानां सप्तभूमिकप्रासादानां माला समूहोऽस्ति अस्यां तां महार्हजाम्बूनदाः तन्मयाः जालतोरणाः यस्यां, यशस्विनीं स्वकीययशोवर्धिकां क्षपाचरैः राक्षसैः सुपालितां लङ्कां प्रविवेशेति शेषः ॥ ५३ ॥

गो० टी०—स इति । पूर्वश्लोकेनायमेकान्वयः । सुधाधवलनिम्नोन्नतविमानाकारभवनमालिनीमित्यर्थः ॥ ५६ ॥

५४] ति० टी०—मध्यगतः खमध्यगतः । अनेकसहस्रेत्यनेन पूर्णत्वम् । अनेकेत्यस्यैव सहस्रेत्यनेन विवरणम् । उत्तिष्ठते आर्षस्तङ् । ज्योत्स्नावितानेन लोकान्वितत्यावार्य सम्यगवलोकनसाधनतयाऽस्य हनुमतः साचिव्यं साहाय्यं कुर्वन्निव । ननु खमध्यगतस्य प्रदोषे उदयोऽष्टम्यां न तदा पूर्णत्वम्, पूर्णस्य तु न खमध्यगतस्योदय इति चेन्न । शुक्लैकादश्यां खमध्यसमीपगतत्वेन मध्यगतत्वोपचारात्पूर्णत्वं च पूर्णकल्पत्वेन व्यवहृतम् । यद्वानेकन्यूनाः सहस्रं रश्मयो यस्येति मध्यमपदलोपितत्पुरुषगर्भो बहुव्रीहिः । अत एव रात्रिशेषे हनुमत्यशोकवनिकास्थे सीतासविधे रावणस्यागमनकाले दीपिकावर्णनं कृतम् । तेन हि तदा चन्द्रास्तानुमानम् । सा चेयं मार्गशीर्षस्य फाल्गुने लङ्कां प्रविष्टायाः सीतायाः ' वर्तते दशमो मासो द्वौ तु शेषौ प्लवंगम ' इति हनुमन्तं प्रति वचनात् । हरणदिन एव च सीताया लङ्काप्रवेशनं रामभयादिति स्पष्टमेव ॥ ५४ ॥

५५] ति० टी०—पोप्लूयमानं भृशं प्लवमानम् ॥ ५५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०—चन्द्र इति । तारागणैः सह अनेकसहस्ररश्मिश्चन्द्रोऽपि अस्य हनुमतः साचिव्यं साहाय्यं कुर्वन्निव ज्योत्स्नावितानेन चन्द्रिकासमूहेन मध्यगतः लङ्कामध्ये प्राप्तान् लोकान् राक्षसान् वितत्य व्याप्य विराजन् प्रकाशयन् सन् उत्तिष्ठते ॥ ५४ ॥

रा० टी०—शङ्खेति । शङ्खप्रभमत एव क्षीरमृणालवर्णं व्यवभासमानं प्रकाशयन्तमुद्वृच्छमानम् उदयमानं चन्द्रं सरसि पोप्लूयमानं हंसमिव ददर्श ॥ ५५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

गो० टी०—इदानीं चन्द्रोदयकाल इत्याह—चन्द्रोऽपीति । मध्यगतः सन्निधानात्तारागणमध्यगतः । तारागणैरिति सहयोगे तृतीया । ज्योत्स्नावितानेन लोकं वितत्य व्याप्य उत्तिष्ठते आविर्भवति स्म । "उदोऽनूर्ध्वकर्मणि" इत्यात्मनेपदम्॥५७॥५८॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

१-२] ति० टी०—लम्बशिखरे ऊनतशिखरे लम्बे ल-

---

१ उद्विद्धेति गो. पाठः । २ समावृतामिति गो. पाठः । ३ लोकमुत्तिष्ठते नैकेति गो. पाठः । ४ हरीति गो. पाठः ।

शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम् । सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३ ॥
सुपुष्टबलसंपुष्टां यथैव विटपावतीम् । चारुतोरणनिर्यूहां पाण्डुरद्वारतोरणाम् ॥ ४ ॥
भुजगाचरितां गुप्तां शुभां भोगवतीमिव । तां सविद्युद्घनाकीर्णां ज्योतिर्गणनिषेविताम् ॥ ५ ॥
चण्डमारुतनिर्ह्रादां यथा चाप्यमरावतीम् । शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६ ॥
किङ्किणीजालघोषाभिः पताकाभिरलंकृताम् । आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७ ॥
विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः । जाम्बूनदमयैर्द्वारैर्वैदूर्यकृतवेदिकैः ॥ ८ ॥
मणिस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः । तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः ॥ ९ ॥
वैदूर्यकृतसोपानैः स्फाटिकान्तरपांसुभिः । चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १० ॥

म्बाख्यपर्वते, अत एव लम्बतोयदसंनिभे । सत्त्वं सत्त्वगुणमपेक्षितबलं च । रजस्तमःप्रधानरक्षोजयाय सत्त्वगुणाश्रयणम् । मेधावी कालोचितविचारज्ञः ॥ १ ॥ २ ॥

रा० टी०–हनुमत्कर्तृकलङ्कापवेशनमेव वर्णयति–स इत्यादिभिः । लम्बतोयदसंनिभे महामेघसदृशे लम्बे विस्तीर्णे लम्बशिखरे लम्बाभिधगिरिशिखरसमीपे सत्त्वं प्रवेशनयोग्यशरीरं गतिमास्थाय निश्चित्य महासत्त्वोऽतिबलवान् हनुमान् निशि लङ्कां प्रविवेश। सार्धश्लोक एकान्वयी। लङ्कां वर्णयन्नाह–रम्येत्यादिभिः । रम्यकाननतोयाभ्यामाढ्यां पूर्णाम् ॥ १ ॥ २ ॥

गो० टी०–स लम्बेत्यादि । लम्बे लम्बाख्ये । लम्बशिखरे लम्बगिरिशिखरे इति चाहुः । यद्वा लम्बे लम्बमान इव स्थिते लम्बशिखरे त्रिकूटशिखरे सत्त्वं व्यवसायम् धैर्यमिति यावत् । विवेश प्राप ॥ १ ॥ २ ॥

३] ति० टी०–सागरोपमनिर्घोषां सागरशब्दसदृशरवशब्दवतीम् ॥ ३ ॥

रा० टी०–शारदाः शरत्कालप्रभवाः ये अम्बुधरा मेघाः तत्प्रख्यैः श्वेतत्वेन तत्सदृशैः राजतैरित्यर्थः, भवनैरुपशोभितां सागरोपमः निर्घोषः राक्षसस्वनो यस्याम् ॥ ३ ॥

गो० टी०–शारदेत्यादि । विटपावतीम् अलकाम् । निर्यूहो मत्तवारणः । पाण्डुरद्वारतोरणां पाण्डुरे द्वारतोरणे यस्यास्ताम् । अभूदिति शेषः ॥ ३–८ ॥

४] ति० टी०–विटपावत्यलकापुरी । निर्यूहो मत्तवारणः । चारुस्तोरणस्थनिर्यूहो यस्यास्ताम् । पाण्डुरे सुधाधवले द्वारे तोरणं यस्यां ताम् ॥ ४ ॥

रा० टी०–सुपुष्टानि यानि बलानि सैन्यानि तैः संपुष्टां दृढां विटपावतीं यथा अलकापुरीसदृशीं चारुतोरणेषु बहिर्द्वारेषु निर्यूहा मत्तगजा यस्यां पाण्डुराः सुधासंस्कारादिना श्वेताः द्वारतोरणाः अन्तर्द्वारबहिर्द्वारे यस्यां ताम् ॥ ४ ॥

५] ति० टी०–भुजगैराचरितां कृतसंचाराम् । भोगवतीं सर्पनगरीम् । सविद्युद्भिर्घनैर्व्याप्ताम् । ज्योतिषां ग्रहर्क्षादीनां गणैर्निषेवितामित्युत्तरान्वयि ॥ ५ ॥

रा० टी०–भुजगानां नागानामाचरितं रक्षणार्थं संचारो यस्यां तामत एव गुप्तां नागैरभिरक्षितां भोगवतीं सर्पपुरीमिव सविद्युद्भिर्घनै राक्षसमायानिर्मितविद्युत्सहितमेघैः आकीर्णां व्याप्तां ज्योतिर्गणैर्निषेवितां ॥ ५ ॥

६] ति० टी०–चण्डमारुतानां परिवहादीनां शब्दो यस्यां तादृशीममरावतीमिव स्थिताम् । अत्रामराः सन्त्यस्यामित्यमरावती द्यौः असंज्ञायामपि 'मतौ बह्वचः' इत्यापों दीर्घः न त्विंद्रपुर्यमरावती उक्तलक्षणाभावात् लङ्कायां उक्तसादृश्यं च सालंकारराक्षसवत्त्वाद्भूयस्त्वाच्चेति कृतकः शातकुम्भेन स्वर्णमयेन ॥ ६ ॥

रा० टी०–चण्डमारुतस्य निर्ह्रादो यस्याम् अमरावतीं यथा संपत्त्या इन्द्रपुरीसदृशीं शातकुम्भेन सुवर्णप्राकारेण अभिसंवृताम् ॥ ६ ॥

७] ति० टी०–किङ्किणीजालैः क्षुद्रघण्टिकासमूहैः शब्दो यासां ताभिः ॥ ७ ॥

रा० टी०–पताकाभिरलंकृतां रावणपालितां पुरीमासाद्य प्राप्य हृष्टो हनुमान् प्राकारमभिपेदिवान् प्राप्तवान्। सार्धपञ्चकमेकान्वयि ॥ ७ ॥

८] ति० टी०–वैदूर्यमणिभिः कृता वेदिकाश्चत्वरा येषु तादृशैर्द्वारैः ॥ ८ ॥

९] ति० टी०–मणिस्फटिकमुक्ताभिश्च कृतवेदिकैर्द्वारैः सर्वत उपलक्षिताम् कुट्टिमो निबद्धा भूः निर्यूहो मत्तवारणः राजतामलपाण्डुरै रजतमयामलपाण्डुरोपरिप्रदेशैः । सर्वत्र द्वारं विशेष्यम् ॥ ९ ॥

१०] ति० टी०–वैदूर्यमणिभिः कृतानि सोपानानि येषु तैः । स्फाटिका स्फटिकरचिता अन्तर्मध्यप्रदेशा अपांसवश्च येषु तैर्द्वारैः । चारुसंजवनैः सभाभिरुपेतैर्द्वारैः खमुत्पतितैरिव शुभैर्गृहैरुपलक्षितैर्द्वारैः ॥ १० ॥

रा० टी०–विस्मयेति । वैदूर्यैस्तदभिधमणिभिः कृता वेदिका येषु तैर्मणिकुट्टिमैर्मणिमयबद्धभूमिभिर्भूषितैर्जाम्बूनदमयैः मणिस्फटिकमुक्ताभिः शोभितैरिति शेषः, तप्तहाटक-

१ घुष्टामिति गो. पाठः । २ मार्गेति गो. पाठः । ३ मन्दमारुतसंचारां यथेन्द्रस्येति गो. पाठः । ४ वज्रेति गो. पाठः ।

क्रौञ्चबर्हिणसंघुष्टै राजहंसनिषेवितैः । तूर्याभरणनिर्घोषैः सर्वतः परिनादिताम् ॥ ११ ॥
वस्त्रोकसारप्रतिमां समीक्ष्य नगरीं ततः । खमिवोत्पतितां लङ्कां जहर्ष हनुमान्कपिः ॥ १२ ॥
तां समीक्ष्य पुरीं लङ्कां राक्षसाधिपतेः शुभाम् । अनुत्तमामृद्धिमतीं चिन्तयामास वीर्यवान् ॥ १३ ॥
नेयमन्येन नगरी शक्या धर्षयितुं बलात् । रक्षिता रावणबलैरुद्यतायुधपाणिभिः ॥ १४ ॥
कुमुदाङ्गदयोर्वापि सुषेणस्य महाकपेः । प्रसिद्धेयं भवेद्भीमेन्द्रद्विविदयोरपि ॥ १५ ॥
विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः । ऋक्षस्य कपिमुख्यस्य मम चैव गतिर्भवेत् ॥ १६ ॥
समीक्ष्य च महाबाहो राघवस्य पराक्रमम् । लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥ १७ ॥
तां रत्नवसनोपेतां गोष्ठागारावतंसिकाम् । यन्त्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८ ॥
तां नष्टतिमिरां दीपैर्भास्वरैश्च महाग्रहैः । नगरीं राक्षसेन्द्रस्य स ददर्श महाकपिः ॥ १९ ॥

निर्यूहैः प्रतप्तसुवर्णमयमत्तगजविशिष्टैः राजता रजतमया अमलपाण्डुरा उपरिप्रदेशा येषु ते वैदूर्यकृतानि सोपानानि येषु स्फटिकेन निर्मितमन्तर्येषु अत एव न पांशुधूली येषु तान्येव तानीति कर्मधारयः तैश्चारुसंजवनैः रमणीयसभाभिरुपेतैः युक्तैः क्रौञ्चबर्हिणानां संघुष्टानि येषु ते राजहंसनिषेवितैः स्वयमुत्पतितैरिव शुभैर्द्वारैरुपलक्षितां पुरीमालोक्य विस्मयाविष्टहृदय आसीदिति शेषः । सार्धश्लोकत्रयमेकान्वयि ॥८–१०॥

गो० टी०–पुनर्हर्षहेतूनाह—जाम्बूनदमयैरित्यादिना । जाम्बूनदमयैर्द्वारैरित्यादौ सहयोगे तृतीया । वज्रस्फटिकमुक्ताभिरित्यत्रापि कृतवेदिकैरिति संबध्यते । राजतामलपाण्डुरैः अवयवैः, स्फाटिकान्तरपांसुभिः स्फटिकमयाङ्गणपांसुभिः । सञ्जवनं चतुश्शालम् । वस्त्रोकसारा अलका । यद्वा वस्त्रोकसारा पूर्वदिगवस्थिता शक्रपुरी ‘ वस्त्रोकसारा शक्रस्य पूर्वस्यां दिशि वै पुरी ’ इति पुराणवचनात् ॥ ९–१४ ॥

११] ति० टी०–संघुष्टैः कृतघोषैर्द्वारैः ॥ ११ ॥

१२-१४] ति० टी०–वस्त्रोकसाराऽलका तत्सदृशीम् । ह्रस्व आर्षः । जाम्बूनदमयद्वारत्वादिना सादृश्यम् । खमिवोत्पतिताम् । गिरिमूर्ध्नि प्रतिष्ठितत्वात् ॥ १२–१४ ॥

रा० टी०–तूर्येति । तूर्याणामाभरणानां नूपुरादीनां च निर्घोषैः सर्वतः परिनादिताम् अत एव वस्त्रोकसारप्रतिमाम् अलकासदृशीं समुत्पत्तितामिव लङ्कां समीक्ष्य हनुमान् जहर्ष । सार्धश्लोक एकान्वयी ॥ ११ ॥ १२ ॥

रा० टी०–तामिति । अनुत्तमां सर्वश्रेष्ठाम् ऋद्धिमतीं सकलर्द्धिविशिष्टां राक्षसाधिपतेः रावणस्य पुरीं लङ्कां समीक्ष्य वीर्यवान् हनूमान् चिन्तयामास ॥ १३ ॥

रा० टी०–चिन्ताकारमाह–नेति । उद्यतायुधाः पाणयो येषां तैः रावणबलैः रक्षिता इयं लङ्का अन्येन रामभिन्नेन जनेन बलात् पराक्रमात् धर्षयितुं न शक्या ॥ १४ ॥

१५] ति० टी०–अनेन धर्षयितुमशक्या किम, सर्वथा नेत्याह–कुमुदेत्यादि । प्रसिद्धा प्रकर्षेण सिद्धगतिका ॥१५॥

रा० टी०–तत्र हेतुमाह–कुमुदेति । प्रसिद्धा इयं लङ्का, कुमुदादीनामेव गतिः प्राप्या भवेत् अन्येषां न गतिरित्यर्थः, तेन नगरीपराभवस्य अशक्यत्वं सूचितम् । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–प्रसिद्धेयमिति । इयं लङ्का विदिता भवेत्॥१५॥

१६] ति० टी०–कुशपर्वण इति कुशपर्वसदृशलोमवत इत्यर्थकमृक्षस्य विशेषणम् । अतिदीर्घकठोरलोमावृतत्वात्कपिमुख्यस्येति विशेषणं च । तस्यैव मम चैव गतिः । अस्यामिति शेषः ॥ १६ ॥

गो० टी०–विवस्वत इति । गतिस्तु सुग्रीवस्य कुशपर्वणः केतुमालस्य मम चैव भवेत् । पूर्वं नीलादीनामेव गतिरुक्ता । अत्र त्वन्येषामित्युक्तिश्चिन्ताप्रकारविशेषः ॥ १६ ॥ १७ ॥

१७] ति० टी०–रामस्य पराक्रमं लक्ष्मणस्य विक्रान्तं शौर्यं च समीक्ष्येदृश्यपि तदीयबाणैरीषत्करध्वंसेति विचार्य प्रीतिमानभूदविषण्णोऽभूत् ॥ १७ ॥

रा० टी०–चिन्तान्तरमाह–समीक्ष्येति । राघवस्य रामस्य लक्ष्मणस्य च पराक्रमं विक्रान्तं वेगं च समीक्ष्य संचिन्त्य कपिः प्रीतिमान् अभवत् । एतेन तत्पराक्रमविक्रान्तयोः सर्वोत्कर्षत्वं ध्वनितम् ॥ १७ ॥

१८] ति० टी०–रत्नवसनोपेतां रत्नप्राकारवाससं च । गोष्ठान्यागाराणि चावतंसो यस्यास्ताम् । गोष्ठं गोशाला । इदं वाजिशालादेरप्युपलक्षणम् । यन्त्राणि प्राकारोपरि स्थापितानि क्षेपण्यादीनि तद्गृहस्तनीम् ॥ १८ ॥

१९] ति० टी०–तां प्रसिद्धां लङ्काम् । भास्वरैश्च महाग्रहैः चाचन्द्रार्किरणैः ॥ १९ ॥

रा० टी०–तामिति । रत्नवसनोपेतां रत्नं रत्नाकरः रत्नमयप्राकारादिश्च तदेव वसनं तेन उपेतां युक्तां गोष्ठा अगाराणि अवतंसः कर्णभूषणं यस्याः तां यन्त्रागाराणि प्राकारोपरि स्थापितनिःक्षेपणीप्रभृतीनां गृहाण्येव स्तनानि यस्याः तां दीपैः प्रकाशकैः दीपचन्द्रादिभिः भास्वरैः प्रकाशमानैर्महागृहैर्मणिभवनैश्च नष्टतिमिरां ध्वस्तान्धकारां तां चोरूपराक्षसा-

१ पतितुंकामामिति गो. पाठः । २ रम्यामिति गो. पाठः । ३ युतामिति गो. पाठः । ४ धारिभिरिति गो. पाठः । ५ केतुमालस्येति गो. पाठः ।

अथ सा हरिशार्दूलं प्रविशन्तं महाकपिम् । नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥ २० ॥
सा तं हरिवरं दृष्ट्वा लङ्का रावणपालिता । स्वयमेवोत्थिता तत्र विकृताननदर्शना ॥ २१ ॥
पुरस्तात्तस्य वीरस्य वायुसूनोरतिष्ठत । मुञ्चमाना महानादमब्रवीत्पवनात्मजम् ॥ २२ ॥
कस्त्वं केन च कार्येण इह प्राप्तो वनालय । कथयस्वेह यत्तत्त्वं यावत्प्राणा धरन्ति ते ॥ २३ ॥
न शक्यं खल्विदं लङ्का प्रवेष्टुं वानर त्वया । रक्षिता रावणबलैरभिगुप्ता समन्ततः ॥ २४ ॥
अथ तामब्रवीद्वीरो हनुमानग्रतः स्थिताम् । कथयिष्यामि तत्तत्त्वं यन्मां त्वं परिपृच्छसे ॥ २५ ॥
का त्वं विरूपनयना पुरद्वारेऽवतिष्ठसे । किमर्थं चापि मां क्रोधान्निर्भर्त्सयसि दारुणे ॥ २६ ॥
हनुमद्वचनं श्रुत्वा लङ्का सा कामरूपिणी । उवाच वचनं क्रुद्धा परुषं पवनात्मजम् ॥ २७ ॥
अहं राक्षसराजस्य रावणस्य महात्मनः । आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् ॥ २८ ॥
न शक्यं मामवज्ञाय प्रवेष्टुं नगरीमिमाम् । अद्य प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया ॥ २९ ॥
अहं हि नगरी लङ्का स्वयमेव प्लवङ्गम । सर्वतः परिरक्षामि अतस्ते कथितं मया ॥ ३० ॥

श्रितां तां प्रसिद्धां राक्षसेन्द्रस्य नगरीं ददर्श । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०–तामिति । तां रक्षेत्यत्र ददर्शेत्यपकृष्यते । नत्वेकं वाक्यं श्लोकद्वयं तच्छब्दद्वयप्रयोगात्प्रथमे श्लोके स्त्रीसाम्योक्तेश्च ॥ १८—२३ ॥

२०] ति० टी०–सा नगरी स्वेन रूपेणाधिष्ठातृदेवतारूपेण युक्ता ददर्श ॥ २० ॥

रा० टी०–अथेति । अथ प्रवेशानन्तरं प्रविशन्तं हरिशार्दूलं नगरी रुद्धा स्वेन अधिष्ठात्रीत्वेन रूपेण ददर्श ॥ २० ॥

२१] ति० टी०–स्वयमेवोत्थिता । अनन्यप्रेरितेति यावत् ॥ २१ ॥

२२] ति० टी०–अतिष्ठत देवतारूपं प्रकाशितवती ॥ २२ ॥

रा० टी०–दर्शनप्रकारमाह–सेति । सा लङ्का हरिवरं दृष्ट्वा स्वयमेव उत्थिता महानादं मुञ्चमाना च सती वायुसूनोः पुरस्तात् अग्रे अतिष्ठत् इदमब्रवीच्च । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

२३] ति० टी०–वनालय वानर ! तत्त्वं सत्यात् ॥ २३ ॥

रा० टी०–तद्वचनाकारमाह–क इति । वनालय हे वानर! त्वं कः कस्य पुत्रादिरित्यर्थः । केन कार्येण च त्वम् इह प्राप्तः यावत्प्राणास्ते त्वां धरन्ति न त्यजन्तीत्यर्थः, तावत् तत्त्वं यथार्थं कथयस्व ॥ २३ ॥

२४–२५] ति० टी०–त्वयैषा प्रवेष्टुं न शक्यम् । क्षुद्रुपहन्तुं शक्यमितिवत् । 'न शक्या' इति पाठस्तु सुगम एव ॥ २४ ॥ २५ ॥

रा० टी०–नन्वु किमर्थं पृच्छसीत्यत आह–नेति । रावणबलैः समन्ततोऽभिगुप्ता व्याप्ता अत एव रक्षिता इयं लङ्का त्वया प्रवेष्टुं न शक्या । किंच अभितश्चतुर्दिक्षु गुप्ता राक्षसविजातीयनिरीक्षणार्थमलक्षरूपेण स्थिताः राक्षसाः यस्यास्ताम् ॥ २४ ॥

रा० टी०–अथेति । अथ तत्प्रश्नश्रवणानन्तरं यत्त्वं पृच्छसि तदहं कथयिष्यामि इति हनुमान् अब्रवीत् । कथयामीत्यपहाय कथयिष्यामीत्युक्त्या अहमपि किंचित्पृच्छामीति सूचितम् ॥ २५ ॥

गो० टी०–नेति । अभिगुप्ता समावृतेत्यर्थः । अतो न रक्षितेत्यनेन पुनरुक्तिः ॥ २४–३३ ॥

२६–२७] ति० टी०–अथ तया पृष्टो हनुमांस्तां प्रति तत्प्रश्नोत्तरकथनं प्रतिज्ञाय, सरसावेषा पूज्या वा सिंहिकावद्वध्या वेति निर्णेतुं पृच्छति—का त्वमिति ॥ २६ ॥ २७ ॥

रा० टी०–तत्प्रश्नाकारमाह–केति । विरूपनयना त्वं पुरद्वारे अवतिष्ठसे सा का किंनामादिरित्यर्थः; मां च किमर्थं क्रोधात् निर्भर्त्सयसि ॥ २६ ॥

रा० टी०–हनुमदिति । हनुमद्वचनं श्रुत्वा क्रुद्धा कामरूपिणी लङ्का परुषं वचनमब्रवीत् ॥ २७ ॥

२८–२९] ति० टी०–आज्ञाप्रतीक्षा नियोगपरिपालिका ॥ २८ ॥ २९ ॥

रा० टी०–तद्वचनाकारमाह–अहमिति । दुर्धर्षा धर्षयितुमशक्या अहं रावणस्य आज्ञाप्रतीक्षा सती इमां नगरीं रक्षामि ॥ २८ ॥

रा० टी०–नेति । माम् अवज्ञाय अनादृत्य इमां नगरीं प्रवेष्टुं न शक्यं कैश्चिदिति शेषः, अतः मया निहतः अत एव प्राणैस्त्यक्तस्त्वं स्वप्स्यसे स्वप्स्यसि ॥ २९ ॥

३०] ति० टी०–अथापि का त्वं तत्राह—अहं हीति । स्वयम् स्वदेवतास्वरूपेणेत्यर्थः ॥ ३० ॥

रा० टी०–अहमिति । हे प्लवङ्गम ! अहं स्वयं स्वेन रूपेण नगरी लङ्काऽस्मीति शेषः, अतः सर्वतः परिरक्षामि अत एव मया कथितं परुषमुक्तम् ॥ ३० ॥

१ बलैरिति गो. पाठः । २ कपिवर्यरयेति गो. पाठः । ३ ते तत्त्वमिति गो. पाठः । ४ पृच्छसीति गो. पाठः । ५ रुद्धेति गो. पाठः । ६ दारुणेति गो. पाठः । ७ इवयेति गो. पाठः । ८ नगरी त्वयेति गो. पाठः । ९ ह्येतत्ते इति गो. पाठः ।

लङ्कायां वचनं श्रुत्वा हनूमान्मारुतात्मजः । यत्नवान्स हरिश्रेष्ठः स्थितः शैल इवापरः ॥ ३१ ॥
स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुङ्गवः । आबभाषेऽथ मेधावी सत्त्ववान्प्लवगर्षभः ॥ ३२ ॥
द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकारतोरणाम् । इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ॥ ३३ ॥
वनान्युपवनानीह लङ्कायाः काननानि च । सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे ॥ ३४ ॥
तस्य तद्वचनं श्रुत्वा लङ्का सा कामरूपिणी । भूय एव पुनर्वाक्यं बभाषे परुषाक्षरम् ॥ ३५ ॥
मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिताम् । न शक्यं ह्यद्य ते द्रष्टुं पुरीयं वानराधम ॥ ३६ ॥
ततः स हरिशार्दूलस्तामुवाच निशाचरीम् । दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ॥ ३७ ॥
ततः कृत्वा महानादं सा वै लङ्का भयंकरम् । तलेन वानरश्रेष्ठं ताडयामास वेगिता ॥ ३८ ॥
ततः स हरिशार्दूलो लङ्कया ताडितो भृशम् । ननाद सुमहानादं वीर्यवान्मारुतात्मजः ॥ ३९ ॥
ततः संवर्तयामास वामहस्तस्य सोऽङ्गुलीः । मुष्टिनाऽभिजघानैनां हनुमान्क्रोधमूर्च्छितः ॥ ४० ॥
स्त्री चेति मन्यमानेन नातिक्रोधः स्वयं कृतः । सा तु तेन प्रहारेण विह्वलाङ्गी निशाचरी ॥
पपात सहसा भूमौ विकृताननदर्शना ॥ ४१ ॥
ततस्तु हनुमान्वीरस्तां दृष्ट्वा विनिपातिताम् । कृपां चकार तेजस्वी मन्यमानः स्त्रियं चै ताम्॥ ४२ ॥

३१] ति० टी०–यत्नवाँल्लङ्काधिष्ठातृत्वेनावगतत्वात्तद्विजयोपाये यत्नवान् ॥ ३१ ॥

रा० टी०–लङ्कायां इति । यत्नवान् अतिप्रयत्नशीलो हनुमान् अपरशैल इव स्थित इति शेषः ॥ ३१ ॥

३२] ति० टी०–स्त्रीरूपविकृतां विकृतस्त्रीरूपाम् । अथ लब्धप्रश्नोत्तरस्तत्प्रश्नोत्तरमाह—आबभाष इति ॥ ३२ ॥

रा० टी०–स इति । स्त्रीरूपं विकृतं यस्याः तां कर्मधारयो वा, किंच स्त्रीरूपेण विकृतां प्रकटितां तां लङ्कां स हनुमान् आबभाषे ॥ ३२ ॥

३३] ति० टी०–द्रक्ष्यामीत्यर्थमिह संप्राप्त इत्यन्वयः । दर्शनं प्रयोजनमुद्दिश्येत्यर्थः ॥ ३३ ॥

रा० टी०–तद्भाषणप्रकारमाह–द्रक्ष्यामीति । साट्टप्राकारतोरणाम् अट्टादिसहितां नगरीम् अहं द्रक्ष्यामि इत्यर्थमिह संप्राप्तः । दर्शने हेतुः मे परं कौतूहलमाश्चर्यं भातीति शेषः॥३३॥

३४] ति० टी०–वनं कृत्रिमम्, काननमकृत्रिमम् ॥३४॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–वनानीति । इह अस्मिन् समये लङ्कायां वनादीनि द्रष्टुं मे आगमनम्। तत्र वनमकृत्रिमं, काननं कृत्रिमम् इति न पौनरुक्त्यम् ॥ ३४ ॥

गो० टी०–वनानीति । उपवनानि गृहोद्यानानि काननानि शून्यारण्यानि ॥ ३४ ॥

३५–३६] ति० टी०–भूयोऽधिकं परुषाक्षरं वाक्यं पुनर्बभाष इति संबन्धः ॥ ३५ ॥ ३६ ॥

रा० टी०–तस्येति । तस्य हनूमतः तद्वचनं श्रुत्वा लङ्का परुषाक्षरं पुनर्बभाषे ॥ ३५ ॥

गो० टी०–तस्येति । भूयः अतिशयेन परुषाक्षरमित्यन्वयः ॥ ३५ ॥

रा० टी०–तद्वचनाकारमाह–मामिति । राक्षसेश्वरपालितां मामनिर्जित्य इयं लङ्का ते द्रष्टुं न शक्या ॥ ३६ ॥

गो० टी०–मामिति । शक्यमित्येतदव्ययम् । तदाह कालिदासः–'शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् । अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः' इति । पुरीरूपं वस्तु शक्यमिति शक्यपुर्योः सामानाधिकरण्यं वा ॥ ३६ ॥

३७] ति० टी०–अनिर्जित्य द्रष्टुं न शक्यमित्युक्तेऽपि कस्यापि वस्तुनोऽग्रहणपूर्वकं केवलं दर्शनमात्रे तव का क्षतिरित्याशयेनाह—ततः स इति । स हनूमान् ॥ ३७ ॥

रा० टी०–तत इति । ततस्तद्वचनश्रवणानन्तरं पुरीं दृष्ट्वा अहं यथागतं यास्ये किंचन न ग्रहीष्यामीत्यर्थः, इति निशाचरीं लङ्कामुवाच ॥ ३७ ॥

गो० टी०–तत इति । यास्ये यास्यामि । इत्युवाचेति संबन्धः ॥ ३७ ॥

३८] ति० टी०–वेगिता संजातवेगा ॥ ३८ ॥

रा० टी०–तत इति । ततः हनुमद्वचनश्रवणानन्तरं सा लङ्का वानरश्रेष्ठं हनूमन्तं तलेन ताडयामास ॥ ३८ ॥

गो० टी०–तत इति । वेगिता संजातवेगा ॥ ३८ ॥

३९] ति० टी०–महानादं ननादेति निर्भयत्वद्योतनम्॥३९॥

रा० टी०–तत इति । ततः लङ्काकर्तृकताडनानन्तरं लङ्कया ताडितो हरिशार्दूलः सुमहानादं यथा भवति तथा ननाद ॥ ३९ ॥

गो०टी०–तत इति । संवर्तयामास संकोचयामास३९–४४

४०] ति० टी०–अङ्गुलीः संवर्तयामास । मुष्टिं बबन्धेत्यर्थः ॥ ४० ॥

रा० टी०–तत इति । ततः स्वकृतमहानादानन्तरं वामहस्तस्य अङ्गुलीः संवर्तयामास एकीचकार मुष्टिं बबन्धेत्यर्थः एनां लङ्कां मुष्टिनाऽभिजघान च ॥ ४० ॥

४१–४२] ति० टी०–वामहस्तमुष्टिबन्धे आशयमाह—

१ ह्रीति गो. नास्ति, शक्येति रा. पाठः । २ भयावहमिति गो. पाठः । ३ कपीति गो. पाठः । ४ प्राश इति गो. पाठः । ५ स्त्रिति गो. पाठः ।

ततो वै भृशमुद्विग्ना लङ्का सा गद्गदाक्षरम् । उवाचागर्वितं वाक्यं हनुमन्तं प्लवङ्गमम् ॥ ४३ ॥
प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम । समये सौम्य तिष्ठन्ति सत्त्ववन्तो महाबलाः ॥ ४४ ॥
अहं तु नगरी लङ्का स्वयमेव प्लवङ्गम । निर्जिताऽहं त्वया वीर विक्रमेण महाबल ॥ ४५ ॥
इदं च तथ्यं शृणु मे ब्रुवन्त्या वै हरीश्वर । स्वयं स्वयंभुवा दत्तं वरदानं यथा मम ॥ ४६ ॥
यदा त्वां वानरः कश्चिद्विक्रमाद्वशमानयेत् । तदा त्वया हि विज्ञेयं रक्षसां भयमागतम् ॥ ४७ ॥
स हि मे समयः सौम्य प्राप्तोऽद्य तव दर्शनात् । स्वयंभूविहितः सत्यो न तस्यास्ति व्यतिक्रमः ॥ ४८ ॥
सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः । रक्षसां चैव सर्वेषां विनाशः समुपागतः ॥ ४९ ॥
तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम् । विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ॥ ५० ॥
प्रविश्य शापोपहतां हरीश्वरः पुरीं शुभां राक्षसमुख्यपालिताम् ।
यदृच्छया त्वं जनकात्मजां सतीं विमार्ग सर्वत्र गतो यथासुखम् ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

स्त्री चेति । तेन प्रहारेण वाममुष्टिकृतसदयताडनेनापीत्यर्थः । विकृताननदर्शना विकृतवक्त्रदृष्टिः ॥ ४१ ॥ ४२ ॥

रा० टी०–स्त्रीति । इयं स्त्री क्रोधानर्हेत्यर्थः । इति स्वयं मन्यमानेन हनुमता अतिक्रोधो न कृतः । अर्धं पृथक् । सेति । तेन हनुमत्कर्तृकेण प्रहारेण विह्वलाङ्गी निशाचरी सा लङ्का विकृताननं दर्शयति सा सती भूमौ सहसा पपात । अर्धद्वयमेकान्वयि ॥ ४१ ॥

रा० टी०–तत इति । ततः लङ्काया निपातनानन्तरं वीरो हनुमान् तान्दृष्ट्वा स्त्रियं मन्यमानः सन् कृपां चकार कृपालुत्वचेष्टया तस्थावित्यर्थः ॥ ४२ ॥

४३] ति०टी०–उद्विग्ना भीता । अगर्वितं गर्वरहितम्॥४३॥

रा० टी०–तत इति । ततः निपतनानन्तरं भृशमुद्विग्ना लङ्का अगर्वितं गद्गदाक्षरं वाक्यमुवाच ॥ ४३ ॥

४४] ति०टी०–त्रायस्व मा प्राणनाशं कुर्वित्यर्थः । तत्र हेतुः–समय इति । स्त्री न हन्तव्येति शास्त्रमर्यादायामित्यर्थः॥ ४४ ॥

रा० टी०–तद्वचनाकारमाह–प्रसीदस्वेति । यतः सत्त्ववन्तः पुरुषा समये प्रार्थनाकाले तिष्ठन्ति अनुग्रहं कुर्वन्तीत्यर्थः, अतः प्रसीदस्व अत एव त्रायस्व ॥ ४४ ॥

गो० टी०–प्रसीदेति । समये स्त्रीवधवर्जनव्यवस्थायाम् । सत्त्ववन्तः धैर्यवन्तः ॥ ४४ ॥

४५] ति० टी०–यद्यप्यहं लङ्काधिष्ठातृदेवतात्वाद्दुर्जया, तथापि त्वया निर्जिता ॥ ४५ ॥

रा० टी०–अहमिति । लङ्काऽहं विक्रमेण स्वयं त्वयैव निर्जिताऽस्मीति शेषः, इदं महान् खेदोयम ॥ ४५ ॥

गो० टी०–अहमिति । अहं त्वित्यर्थं भिन्नं वाक्यम् । एकवाक्यत्वेऽहंशब्दस्य पुनरुक्तिः ॥ ४६ ॥ ४७ ॥

४६] ति० टी०–इदं च तथ्यं शृणु । त्वदनुग्रहार्थमुच्यमानमित्यर्थः । वरदानं दत्तम् कृतमित्यर्थः ॥ ४६ ॥

रा० टी०–इदमिति । हे हरीश्वर! तथ्यं ब्रुवन्त्या मम वचो यथावत् शृणु । तद्वचनाकारमाह—स्वयंभुवा ब्रह्मणा मम वरदानं दत्तम् ॥ ४६ ॥

४७] ति० टी०–रक्षसां भयमिति । एवं च मज्जयोऽयं सर्वरक्षोजयसूचक इति भावः ॥ ४७ ॥

रा० टी०–तद्वरदानाकारमाह–यदेति । यदा कश्चिद्वानरः विक्रमात्त्वां वशमानयेत् तदा आगतं रक्षसां भयं विनाशः त्वया विज्ञेयम ॥ ४७ ॥

गो० टी०–वरदानस्वरूपमाह—यदेति । अत्र रावणस्य दिग्विजये नन्दिकेश्वरादिभिर्लङ्कायाः सद्योविनाशशापे दत्ते सा ब्रह्माणं गत्वा प्रार्थयामास विनाशो मे माभूदिति । स च तस्यै वरमदात् तव सद्यो विनाशो न भविष्यति यदा तु वानरस्त्वामभिभविष्यति तदा तु विनाशो भविष्यतीति कथोचीयते ॥ ४८–५१ ॥

४८–४९] ति० टी०–न तस्यास्ति व्यतिक्रमः भगवदत्तवरस्य रावणस्य स्वकृताधिक्षेपक्षुभितनन्दिकेश्वरशापात्तु सद्यः प्राप्तो विनाशः, स्वयंभूवरवशाद्वानरास्कन्दनपर्यन्तं प्रतिबद्ध इति कथात्रानुसंधेयेति तीर्थः ॥ ४८ ॥ ४९ ॥

रा० टी०–स इति । तव दर्शनात् त्वत्कर्तृकदर्शनपूर्वकपराभवात् स राक्षसविनाशकारी समयः प्राप्तः । तत्र हेतुः–स्वयंभूविहितः ब्रह्मणोक्तः सत्यः अतस्तस्य समयस्य व्यतिक्रमो विपर्ययो नास्ति अतः सीतानिमित्तं रावणस्य रक्षसां च विनाशः समुपागतः ॥ ४८ ॥ ४९ ॥

५०] ति० टी०–विधत्स्वानुतिष्ठ ॥ ५० ॥

रा० टी०–तदिति । तत् राक्षसविनाशस्यावश्यकत्वाद्धेतोः पुरीं लङ्कां प्रविश्य यानि यानि कार्याणि वाञ्छसि तानि सर्वकार्याणि विधत्स्व ॥ ५० ॥

५१] ति० टी०–शापोपहतां सत्यसंकल्पभगवद्वचनेन न-

१ स्वयंभुवा पुरेति गो. पाठः ।

चतुर्थः सर्गः ।

लङ्कायां वामपादप्रथमनिक्षेपणपूर्वं प्रविशन्हनुमान्नगरान्तर्वाद्यमाननानावादित्रादि शृण्वन्ननेकविधायुधधारिमूलबलं विलोकयंश्चान्तःपुरमाविवेश ।

स निर्जित्य पुरीं लङ्कां श्रेष्ठां तां कामरूपिणीम् । विक्रमेण महातेजा हनूमान्कपिसत्तमः ॥ १ ॥
अद्वारेण महावीर्यः प्राकारमवपुप्लुवे । निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः ॥ २ ॥
प्रविश्य नगरीं लङ्कां कपिराजहितंकरः । चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि ॥ ३ ॥
प्रविष्टः सत्त्वसंपन्नो निशायां मारुतात्मजः । स महापथमास्थाय मुक्तपुष्पविराजितम् ॥ ४ ॥
ततस्तु तां पुरीं लङ्कां रम्यामभिययौ कपिः । हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्कृतैः ॥ ५ ॥
वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः । गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ ६ ॥

न्दिकेश्वरशापेन च प्रापितनाशकालां हरीश्वरस्त्वं प्रविश्य यदृच्छया सर्वत्र रावणान्तःपुरपर्यन्तं यथासुखं गतः सन्सतीमप्रच्युतपातिव्रत्यां जानकीं विमार्गान्वेषय । अनेन च वचनेन सीताऽकल्मषात्र पुरे वर्तत इत्युपदिष्टम् ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०–उपसंहरन्नाह–प्रविश्येति । हरीश्वरस्त्वं शापोपहतां पुरीं लङ्कां यदृच्छया प्रविश्य सतीं पतिव्रताशिरोमणिं सर्वत्रगः सन् यथासुखं विमार्ग ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

गो० टी०–प्रविश्येति । शापो नन्दिकेश्वरादिकृतः । यदृच्छयेत्यस्य गत इति संबन्धः । यदृच्छयात्र प्राप्तस्त्वमित्यर्थः ॥ ५२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०–स इति ॥ १ ॥

२] ति० टी०–प्राकारमद्वारेणावपुप्लुवे । शत्रोः पुरं ग्रामं गृहं वा । ' अद्वारेण प्रविशेच्छत्रुविनाशाय ' इति नीतिस्मृतेरिति भावः ॥ २ ॥

रा० टी०–लङ्कापराभवानन्तरकालिकं हनुमद्वृत्तान्तमाह–स इत्यादिभिः । स प्रसिद्धो हनूमान् निशि विक्रमेण लङ्कां पुरीं निर्जित्य अद्वारेण द्वारमार्गभिन्नेन उत्पथेनेत्यर्थः, प्राकारमवपुप्लुवे लङ्कां विवेश च । श्लोकद्वयमेकान्वयि॥१॥२॥

गो० टी०–स निर्जित्येत्यादि । अद्वारेणेत्यनेन लङ्कापरिभवो राक्षसैर्न ज्ञातुं शक्य इति द्योत्यते ॥ १ ॥

३] ति० टी०–अद्वारेण प्रवेशेऽपि सव्यं पादं वामपादं प्रथमतश्चक्रे, यतः स तु प्रथमनिक्षिप्तवामपादस्तु शत्रूणां मूर्धन्येव निहितो भवति । तथा विजयप्रदो भवतीति भावः । उक्तं च—' प्रयाणकाले स्वगृहप्रवेशे विवाहकालेऽपि च दक्षिणाङ्घ्रिम् । कृत्वाऽग्रतः शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः' इति ॥ ३ ॥

रा० टी०–प्रविश्येति । कपिराजहितङ्करः सुग्रीवहितस्य कारकः स हनूमान् नगरीं लङ्कां प्रविश्य पुरो दक्षिणचरणनिधानेन प्रवेशं कृत्वा अथात एव सव्यं वामपादं शत्रूणां मूर्धनि चक्रे । प्रथमं दक्षिणपादस्य पुरो निधाने वामः पादः शत्रुविध्वंसको भवतीति प्रसिद्धम् । शत्रुपराभवं चक्रे इत्यर्थः । तथाहि–'प्रयाणकाले स्वगृहप्रवेशे विवाहकालेऽपि च दक्षिणाङ्घ्रिम् । कृत्वाऽग्रतः शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालवे' इति ॥ ३ ॥

गो० टी०–प्रविश्येति । चक्र इति । शत्रुदेशप्रवेशे प्रथमं सव्यपादः कार्यः स तु शत्रोर्मूर्ध्नि कृतो भवेदिति राजशास्त्रम् । अनेन प्रथमं सव्यं पादं लङ्कायां कृतवानित्यर्थः सिद्धः । तदाह बृहस्पतिः–'प्रयाणकाले च गृहप्रवेशे विवाहकालेऽपि च दक्षिणाङ्घ्रिम् । कृत्वाग्रतः शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः' इति ॥ २–४ ॥

४] ति० टी०–महापथं राजमार्गम् ॥ ४ ॥

रा० टी०–प्रविष्ट इति । ततस्तस्यां निशायां प्रविष्टो मारुतात्मजः मुक्तपुष्पैर्विराजितं विभूषितं महापथं राजमार्गमास्थाय लङ्कामभिययौ । सार्धश्लोक एकान्वयी ॥ ४ ॥

५] ति० टी०–हसितैरट्टहासैरुत्पन्ना ये उत्कृष्टनिनदास्तूर्यघोषैः पुरस्कृतास्तैरुपलक्षिताम् ॥ ५ ॥

६] ति० टी०–वज्राणामङ्कुशानां निकाशाः प्रतिमा येषु गृहेषु तैर्बभासे । वज्रनिर्मितानि जालानि गवाक्षाणि तद्विभूषितैर्गृहैः ॥ ६ ॥

रा० टी०–हसितेति । तूर्यघोषपुरस्कृतैः अग्रे स्थापिततूर्यघोषैः हसितानामट्टहासानामुत्कृष्टनिनदैर्महास्वनैर्वज्राणामङ्कुशानां च निकाशा प्रतिमा येषु तैः वज्रनिर्मितैर्जालैर्गवाक्षैः पक्षिप्रवेशनिवारकावरणविशेषैर्वा विभूषितैः शोभितैः गृहमेधैः

१ कुञ्जर इति रा. पाठः । २ बाहुरिति गो. पाठः । ३ सरैरिति गो. पाठः ।

प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः । सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ॥ ७ ॥
वर्धमानगृहैश्चापि सर्वतः सुविभूषितैः । तां चित्रमाल्याभरणां कपिराजहितंकरः ॥ ८ ॥
राघवार्थे चरञ्श्रीमान्ददर्श च ननन्द च । भवनाद्भवनं गच्छन्ददर्श कपिकुञ्जरः ॥ ९ ॥
विविधाकृतिरूपाणि भवनानि ततस्ततः । शुश्राव रुचिरं गीतं त्रिस्थानस्वरभूषितम् ॥ १० ॥
स्त्रीणां मदनविद्धानां दिवि चाप्सरसामिव । शुश्राव काञ्चीनिनदं नूपुराणां च निःस्वनम् ॥ ११ ॥
सोपाननिनदांश्चापि भवनेषु महात्मनाम् । आस्फोटितनिनादांश्च क्ष्वेडितांश्च ततस्ततः ॥ १२ ॥
शुश्राव जपतां तत्र मन्त्रान्रक्षोगृहेषु वै । स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः ॥ १३ ॥
रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि । राजमार्गं समावृत्य स्थितं रक्षोगणं महत् ॥ १४ ॥

मेघाकारगृहैश्च रम्या पुरी अम्बरैः अम्बरवर्तिगृहाकारमेघैर्यौरिवाभासे । सार्धश्लोक एकान्वयी ॥ ५ ॥ ६ ॥

गो० टी०–हसितेति । तूर्यघोषपुरस्सरैः हसितोत्कृष्टनिनदैः हसितानामुत्कृष्टस्वरैः युक्तेत्यर्थः । वज्राङ्कुशनिकाशैः वज्रमङ्कुशो यस्य सः वज्राङ्कुशः ऐरावतः तत्तुल्यैः तद्वच्छुभ्रैरित्यर्थः, वज्राङ्कुशतुल्यसंस्थानैर्वा । वज्रजालविभूषितैः वज्रो रत्नविशेषः । गृहमेघैः गृहश्रेष्ठैः । "उपमितं व्याघ्रादिभिः" इत्युपमितसमासः ॥ ५ ॥

७] ति० टी०–पद्मादिसंज्ञकं संस्थितं संस्थानं येषां तैः ॥ ७ ॥

रा० टी०–प्रेति । सिताभ्रसदृशैः चित्रैरनेकविधैः पद्मस्वस्तिकानां पद्माद्यभिधचित्राणां संस्थितं विन्यासो येषु तैः पद्मादिसंज्ञकैर्वा रक्षोगणगृहैर्वर्धमानगृहैः वर्धमानाभिधभवनैश्च लङ्का प्रजज्वाल शुशुभे । तथाहि 'चतुःशालं चतुर्द्वारं सर्वतोभद्रसंज्ञकम् । पश्चिमद्वाररहितं नन्द्यावर्ताह्वयं तु तत् ॥ दक्षिणद्वाररहितं वर्धमानं धनप्रदम् । प्राग्द्वाररहितं स्वस्तिकाख्यं पुत्रधनप्रदम्' । सार्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–प्रजज्वालेत्यादि । पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः । वर्धमानगृहैः वर्धमाननाम्ना संस्थानेन संस्थितैः गृहैः । तल्लक्षणानि वराहमिहिरसंहितायां व्यक्तानि विस्तरभयान्न लिख्यन्ते ॥ ६–९ ॥

८] ति० टी०–वर्धमानगृहैर्वर्धमाननामकसंस्थानवद्गृहैः । 'चतुःशालं चतुर्द्वारं सर्वतोभद्रसंज्ञितम् । पश्चिमद्वाररहितं नन्द्यावर्ताह्वयं तु तत् ॥ दक्षिणद्वाररहितं वर्धमानं धनप्रदम् । प्राग्द्वाररहितं स्वस्तिकाख्यं पुत्रधनप्रदम् ॥' इत्युक्तेः । हितंकर इत्यार्षः ॥ ८ ॥

रा० टी०–तामिति । चित्रमाल्याभरणां तां लङ्कां राघवस्यार्थे चरन् हनुमान् ददर्श ननन्द च हितंकर इति अस्मादेव निर्देशात्साधु ॥ ८ ॥

९] ति० टी०–चरंस्तां ददर्शेत्यन्वयः ॥ ९ ॥

रा० टी०–भवनादिति । भवनात् भवनं भवनान्तरं गच्छन् सन् विविधाकृतिरूपाणि भवनानि ददर्श ततस्ततः तत्र तत्र त्रिस्थानस्वरैः उरःकण्ठशिरोरूपस्थानत्रयजनितमन्द्रमध्यमतारस्वनविशेषैः भूषितं गीतं शुश्राव च । सार्धश्लोक एकान्वयी ॥ ९ ॥ १० ॥

गो० टी०–शुश्रावेति । त्रिस्थानस्वरभूषितं त्रिस्थानेषु उरःकण्ठशिरस्सु भवैः स्वरैर्भूषितं ते च मन्द्रमध्यतारा: ॥ १० ॥

१०–११] ति० टी०–विविधाकृतिरूपाणि विविधा आकारा रूपाणि वर्णाश्च येषां तानि भवनानि ददर्शेति पूर्वेणान्वयः । त्रिस्थानस्वरभूषितमुरःकण्ठशिरोरूपस्थानत्रयजैर्मन्द्रमध्यतारस्वरैर्भूषितम् ॥ १० ॥ ११ ॥

१२] ति० टी०–सोपाननिनदान्सोपानसंचरत्कान्ताजनकाञ्चीमञ्जीरनिनदान् । यद्वा सोपानेषु पदाघातजशब्दान् । आस्फोटितं विलासार्थं करास्फालनं तज्जन्यनिनादान् । क्ष्वेडितान्सिंहनिनादान् ॥ १२ ॥

रा० टी०–स्त्रीणामिति । महात्मनां भवनेषु दिवि अप्सरसामिव मदनविद्धानां स्त्रीणां काञ्चीनिनदं नूपुराणां निःस्वनं च सोपाननिनदान् पादाघातहेतुकसोपानजनितस्वनांश्च आस्फोटितनिनदान् आस्फोटितानां विहारार्थं करास्फालनानां निनादांश्च क्ष्वेडितान् सिंहस्वनान् विहारकालकपरस्परपरिहासवचनानि वा शुश्राव । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–शुश्राव काञ्चीनिनदमित्यादि । सोपाननिनदांश्च मणिहेमकृतानां सोपानानां नूपुरादिताडनेन ये निनादाः संभवन्ति तान् । आस्फोटितनिनादान् व्यत्यस्तकरतलाभ्यां भुजाग्रास्फालनशब्दान् क्ष्वेलितान् सिंहनादान् ॥ ११ ॥

१३–१४] ति० टी०–मन्त्रान्वेदमन्त्रान् । स्वाध्यायेऽदृष्टार्थे निरतान् ॥ १३ ॥ १४ ॥

रा० टी०–शुश्रावेति । तत्र तस्मिन् समये जपतां पठतां मन्त्रान् रक्षोगृहेषु शुश्राव स्वाध्यायनिरतान् वेदपाठपरायणान् यातुधानान् रक्षोविशेषान् रावणस्तवसंयुक्तान् रावणस्तुतिकर्तॄन् गर्जतो राक्षसांश्च राजमार्गं समावृत्य स्थितं रक्षोगणं च ददर्श । श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–शुश्राव जपतामिति । मन्त्रान् ऋग्वेदादीन् ॥ १२ ॥
गो० टी०–स्वाध्यायनिरतान् ब्रह्मभागपाठनिरतान् ॥ १३ ॥
गो० टी०–राजमार्गमिति । मध्यमे गुल्मे नगरमध्य-

१ भूषितेति गो. पाठः । २ अर्थमिति गो. पाठः । ३ पवनात्मज इति गो. पाठः । ४ बलमिति गो. पाठः ।

ददर्श मध्यमे गुल्मे राक्षसस्य चरान्बहून् । दीक्षिताञ्जटिलान्मुण्डान्गोजिनाम्बरवाससः ॥ १५ ॥
दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा । कूटमुद्गरपाणींश्च दण्डायुधधरानपि ॥ १६ ॥
एकाक्षानेकवर्णांश्च [1]चैलदेकपयोधरान् । करालान्भुग्नवक्त्रांश्च [2]विकटान्वामनांस्तथा ॥ १७ ॥
धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् । परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् ॥ १८ ॥
नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् । नातिगौरान्नातिकृष्णान्नातिकुब्जान्न वामनान् ॥ १९ ॥
विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः । [3]ध्वजिनः पताकिनश्चैव ददर्श विविधायुधान् ॥ २० ॥
शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः । क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः ॥ २१ ॥
स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान् । नानावेषसमायुक्तान्यथास्वैरचरान्बहून् ॥ २२ ॥

स्थितसैन्यसमाजे । चरान् स्वजनवृत्तान्तजिज्ञासया प्रधानप्रेरितान् प्रणिधीन् ॥ १४ ॥

१५] ति० टी०—मध्यमे गुल्मे मध्यमकक्ष्याप्रदेशे । चरान्नगरवृत्तान्तावेदकगूढचारान् । दीक्षितजटिलमुण्डा गृहिनियतयः गोजिनं गवाजिनं तद्वाससः अम्बरवाससो विवाससः नतु लङ्कायां भारतखण्डाद्बहिर्भावेन कर्मभूमित्वाभावात्कथं तत्र रक्षसां दीक्षितत्वमिति चेन्न । नित्यकर्मस्वन्यदेशेऽप्यधिकारात् । रावणादेस्तपोमाहात्म्यात्तत्र काम्यकर्मसिद्धिरपीत्यन्यत् । 'यथा त्वष्टुरमेन्द्रमेव सोममाजहे' इत्यादिशतपथोक्तरीत्या । एतेन देवानामीपद्विकृतानपि यज्ञान्दर्शयतीति भाष्यरीत्या चाङ्गवैकल्येऽप्यनुष्ठितात्कर्मणो वृत्रोत्पत्तिरूपकामनासिद्धिस्तथा प्रकृते देशरूपाङ्गवैकल्येऽपि तत्सिद्धिः । रक्षसामपि देवयोनित्वात् ॥ १५ ॥

१६] ति० टी०—अरिष्टनिवारणपूर्वकमनुष्ठाननिर्वाहाय दर्भमुष्टिप्रहरणत्वं केषांचित् 'यथा वज्रं हरेः पाणौ तथा विप्रकरे कुशः' इति स्मृतेः । कृत्यायुत्पादनद्वारा शत्रुमारकतयाग्निकुण्डानामायुधत्वम् । कूटोऽयस्कारकूट आयुधविशेषः ॥१६॥

१७-१८] ति० टी०—एकपयोधरान्परभागे सूक्ष्मसंनिवेशस्तेनापि रहितान् । विकटान्विकटाङ्गान् ॥ १७ ॥ १८ ॥

रा० टी०—ददर्शेति । मध्यमे गुल्मे मध्यकक्षायां राक्षसस्य चरान् पुरवृत्तान्तबोधकप्रच्छन्नचारान् दीक्षितान् गृहीतयोग दीक्षावतः गृहस्थानित्यर्थः, गावः किरणा अजिनं चर्म अम्बरमाकाशं वासो वस्त्रं येषां तान् किरणवस्त्रत्वेन शीतनिवारकवस्त्राभावः आकाशवस्त्रत्वेन च नग्नत्वं फलति । किंच गोजिनं गवां चर्म अम्बरं च वासो येषां तान् जटिलान् मुण्डान् यतींश्च ददर्श । दर्भमुष्टयः प्रहरणानि विघ्ननिवारका येषां तान् अग्निकुण्डान्येव आयुधानि कृत्यायुत्पादकत्वेन शस्त्राणि येषां तांश्च कूटाः रिपुणा चालयितुमशक्याः मुद्गराः पाणौ येषां तांश्च दण्डरूपायुधधरांश्च ददर्श । तत्र विकटाः विषमावयवाः । श्लोकचतुष्टयमेकान्वयि ॥ १५-१८ ॥

गो० टी०—दीक्षितानित्यादि । गोजिनाम्बरधारिणः वृषभचर्मरूपवस्त्रधारिणः । दर्भमुष्टिप्रहरणान् 'यथा वज्रं हरेः पाणौ तथा विप्रकरे कुशः' इति स्मरणादिति भावः । अग्निकुण्डायुधान् जयार्थं होमशीलान् । कूटमुद्गरपाणीन् कूटो नामायस्कारकूटसदृश आयुधविशेषः 'कूटोऽस्त्री पुञ्जमायाद्रिश्छद्मायोघनवेश्मसु । छले बाणान्तरे दम्भे भग्नश्लङ्कृषे तु ना ॥' इति शब्दरत्नाकरे । मुद्गरो दुघणः 'मुद्गरो दुघणो घनः' इति वैजयन्ती । करालान्भीमान् 'करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च' इति भागुरिः । भुग्नवक्त्रान् कुटिलवक्त्रान् 'आविद्धं कुटिलं भुग्नम्' इत्यमरः । विकटान् विषमाङ्गान् । शतघ्नी शतशङ्कुरयोगदा 'अयःकण्टकसंछन्ना शतघ्नी परिकीर्तिता' इति वैजयन्ती । मुसलम् आयसोऽरत्निप्रमाणको दण्डः 'मुसलं त्वायसो दण्डो धार्योऽरत्निप्रमाणकः' इति शब्दरत्नाकरे । परिघः दण्डविशेषः । नातिदीर्घातिह्रस्वकानित्यत्र हकारोपरि ऋकारोच्चारणं वृत्तभङ्गपरिहाराय । एवं ध्वजिन इति वक्तव्ये ध्वजीनित्युक्तिश्च छन्दोभङ्गपरिहारायैव ॥ १५-१९ ॥

१९] ति० टी०—नातिदीर्घातिह्रस्वाकारान् । वृत्तभङ्गो रेफहकारसंयोगपरो गुरुर्लघुकार्यकारीति न ॥ १९ ॥

२०] ति० टी०—छन्दोभङ्ग आर्षः ॥ २० ॥

रा० टी०—नेति । नातिस्थूलान् अतिस्थूलाभिन्नान् उचितस्थौल्यविशिष्टान् इत्यर्थः । एवमुत्तरत्रापि विरूपादींश्च ददर्श । दीर्घातिह्रस्वकानित्यत्र ह्रस्वेत्यनुशासनात् गुरुत्वाभावः । ध्वजिनः पताकिनश्चेत्यत्र छन्दोभङ्ग आर्ष इति भट्टाः । पताकाध्वजिनश्च' इति क्वाचित्कः पाठः । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

२१] ति० टी०—वृक्षायुधा वल्कलकुटाद्यायुधाः । पट्टिशाशनी आयुधविशेषे । क्षेपणी भिन्दिपालः ॥ २१ ॥

रा० टी०—शक्तीति । शक्त्यायुधादीन् ददर्श ॥ २१ ॥

गो० टी०—शक्तीत्यादि । पट्टिशः तीक्ष्णधारो लोहदण्डः 'पट्टिशो यो दीर्घदण्डस्तीक्ष्णधारः क्षुरोपमः' इति निघण्टुः । क्षेपणी क्षेपणीयः । वेषः अलङ्कारः । यथास्वैरगतान् यथेष्टचारिणः ॥ २०-२२ ॥

२२] ति० टी०—यथास्वैरचरान्यथेष्टं स्वैरविहारं गतान् २२

रा० टी०—स्रग्विण इति । यथास्वैरचरान् यथावत्स्वै-

---

१ लम्बोदरेति गो. पाठः । २ वक्त्रांश्चेति गो. रा. पाठः । ३ ध्वजीनिति गो. पाठः । ४ गतानिति गो. पाठः ।

तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् । शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ॥ २३ ॥
रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः । स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् ॥ २४ ॥
राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् । पुण्डरीकावतंसाभिः परिखाभिः समावृतम् ॥ २५ ॥
प्राकारावृतमत्यन्तं ददर्श स महाकपिः । त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितम् ॥ २६ ॥
वाजिहेषितसंघुष्टमद्भुतैश्च हयैस्तथा । रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः ॥ २७ ॥
वारणैश्च चतुर्दन्तैः श्वेताभ्रनिचयोपमैः । भूषितैः रुचिरद्वारं मत्तैश्च मृगपक्षिभिः ॥ २८ ॥
रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः । राक्षसाधिपतेर्गुप्तमाविवेश गृहं कपिः ॥ २९ ॥
स हेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितान्तम् ।
परार्ध्यकालागुरुचन्दनार्हं स रावणान्तःपुरमाविवेश ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

च्छाविहारनिरतान् तीक्ष्णशूलधरादीन् च अधिपतिना रावणेन निर्दिष्टमाज्ञापितम् अव्यग्रं व्यग्रताराहितम् आरक्षं समंतादक्षकं मध्यमं मध्यकक्षावर्ति शतसाहस्रं लक्षसंख्याकं रक्षश्च अन्तःपुराग्रतः अन्तःपुराग्रे प्राप्तः कपिः ददर्श । सार्धश्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

२३] ति० टी०–अव्यग्रं सावधानम् । आरक्षमासमन्तादन्तःपुररक्षकं सैन्यम् । मध्यमं मध्यमकक्ष्यास्थितम्॥२३॥

गो० टी०–शतति । शतसहस्रमेव शतसाहस्रं स्वार्थे अण् । आरक्षम् गुल्मम् । अन्तःपुराग्रतः अन्तर्नगराग्रतः । रक्षोधिपतिनिर्दिष्टम् मध्यमगुल्मभूतं रावणमूलबलं ददर्शेत्यर्थः ॥ २३ ॥

२४] ति० टी०–अन्तःपुराग्रतो रावणान्तःपुरगृहस्याग्रतः । तद्गृहमारक्षावस्थितिगृहं दृष्ट्वा । स प्रकृतः प्रसिद्धः कपिः ॥ २४ ॥

२५–२६] ति० टी०–राक्षसेन्द्रस्य गृहमुच्यमानविशेषणं ददर्श । पुण्डरीकावतंसाभिः श्वेतपद्मभूषिताभिः ॥ २५ ॥ २६ ॥

२७] ति० टी०–विमानैः पुष्पकादिभिः । विचित्रवर्णादिमत्त्वाद्बहुत्वं ह्यानाम् । हयगजैर्हयाकारैर्गजैः स्वल्पगजैरितियावत् ॥ २७ ॥

२८] ति० टी०–द्वारमित्यस्य ददर्शेति शेषः ॥ २८ ॥

२९] ति० टी०–विवेशासासाद ॥ २९ ॥

रा० टी०–स इति । स महाकपिः महाकपित्वसहितः सः हनूमान् तत् लक्षसंख्याकरक्षः दृष्ट्वा अद्रिमूर्ध्नि प्रतिष्ठितं संस्थितं पुण्डरीकावतंसाभिः श्वेतपद्मैः भूषिताभिः परिखाभिः समावृतं विख्यातं प्रसिद्धं महाहाटकाः तन्मयास्तोरणा यस्मिन् तत् राक्षसेन्द्रस्य गृहं ददर्श । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २९ ॥

गो० टी०–स तदेत्यादिश्लोकद्वयमेकान्वयम् । स कपिः तत् आरक्षं दृष्ट्वा सः राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । क्रियाभेदात्तच्छब्दद्वयम् ॥ २४ ॥ २९ ॥

रा० टी०–त्रिविष्टपेति । दिव्यनादैः स्तुतिशब्दैर्विनादितं वाजिहेषितैरश्वशब्दैः संघुष्टं हयादिभिः रुचिराणि द्वाराणि यस्य तत् सहस्रशो यातुधानैः रक्षितं गुप्तं विजातीयैरलक्षितं त्रिविष्टपनिभं स्वर्गसदृशं राक्षसाधिपतेर्गृहं कपिर्हनुमान् आविवेश । सार्धश्लोकत्रयमेकान्वयि ॥ २६–२९ ॥

गो० टी०–त्रिविष्टपेत्यादि । यानैः शिबिकादिभिः विमानैः व्योमयानैः हयगजैरित्यत्र गजशब्दः द्विदन्तगजपरः अतो न वारणैरित्यनेन पुनरुक्तिः । मृगपक्षिभिश्च भूषितमित्यन्वयः । रक्षिभिर्यातुधानैर्गुप्तमिति संबन्धः । आविवेश जगाम गृहप्रवेशस्य दूरे वक्ष्यमाणत्वात् ॥ २६–२८ ॥

३०] ति० टी०–हेमतप्तवर्णं स्वर्णं तत्सहितेन जाम्बूनदेन षोडशवर्णस्वर्णेन निर्मितं चक्रवालं प्राकारमण्डलं यस्य । महार्हमुक्तामणिभिर्भूषितोऽन्तःशिरोभागो यस्य । परार्ध्याभ्यामुत्तमाभ्यां कालागुरुचन्दनाभ्यामर्होऽर्हणं पूजा यस्य तदन्तःपुरमाविवेश । स हनुमान् ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–स इति । स हनूमान् सहेमा सुवर्णसहितेन जाम्बूनदेन सुवर्णविशेषेण रचितं चक्रवालं प्राकारमण्डलं यस्य तत् महार्हमुक्तामणिभिर्भूषितः अन्तः अन्तर्भागो यस्य तत् परार्ध्यकालागुरुचन्दनैः अर्हं पूजितं रावणान्तःपुरमाविवेश ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

गो० टी०–सहेमेति । हेम अन्यत्र जातं सुवर्णम् । जाम्बूनदं जम्बूनद्यां जातम् चक्रवालं प्राकारमण्डलम् रावणान्तःपुरं रावणान्तर्नगरम् ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

---

१ परिखाभिरलंकृतमिति गो. पाठः । २ हेषितसंघुष्टं नादितं भूषणैस्तदेति गो. पाठः । ३ भूषितमिति गो. पाठः ।

पञ्चमः सर्गः ।

गगनाङ्गणमारोहति भगवति शीतभानौ नानाविधान्निट्चरान्निशाचरीश्च विलोकयन्नपि सीतामपश्यन्हनुमांश्चिन्तां प्रपेदे ।

ततः स मध्यंगतमंशुमन्तं ज्योत्स्नावितानं मुहुरुद्वमन्तम् ।
ददर्श धीमान्भुवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १ ॥
लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥ २ ॥
या भाति लक्ष्मीर्भुवि मन्दरस्था यथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥ ३ ॥
हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ।
वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥ ४ ॥

१] ति० टी०–अथ ' चन्द्रोऽपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् । ज्योत्स्नावितानेन निपत्य लोकानुत्तिष्ठतेऽनेकसहस्ररश्मिः ॥ शङ्खप्रभाक्षीरमृणालवर्णं क्षुद्र-म्यमानं प्लवभासमानम् । ददर्श चन्द्रं स कपिप्रवीरः पोप्लूय-मानं सरसीव हंसम् ॥ ' इति श्लोकद्वयं प्रक्षिप्तम् ॥ १ ॥ २ ॥ ततोऽन्तःपुरप्रवेशोत्तरं रात्रेः प्रथमयामस्य समाप्तिकल्पत्वमवेति बोध्यम् मध्यंगतं व्योममध्यं तारामध्यं च प्राप्तम् अंशुमन्तं शीतांशुम् भानुमन्तं सूर्ययोगेन प्रकाशवत्किरणवन्तम् । गोष्ठे भ्रमन्तं मत्तं वृषमिव ॥ १ ॥

रा० टी०–अन्तःपुरप्रवेशानन्तरकालिकं हनुमद्वृत्तान्त-माह–तत इत्यादिभिः । ततः अन्तःपुरप्रवेशानन्तरं धीमान् स हनूमान् मध्यं तारागणमन्तः गतं प्राप्तं भानुमन्तं सूर्यमिव ज्योत्स्नावितानं चन्द्रिकाविस्तारं भुवि उद्वमन्तं कुर्वन्तं गोष्ठे भ्रमन्तं वृषमिव अंशुमन्तं चन्द्रमसं ददर्श । इव उभयान्वयी॥१॥

गो० टी०–ततः स मध्यमित्यादि । दिवि आकाशे मध्यं गतम् आकाशमध्यगतमित्यर्थः । लङ्काप्रवेशे चन्द्रोद-योक्तेः रावणनगरप्रवेशे अर्धरात्र इति सूच्यते । उत्तरश्लोके अभियान्तमित्यनेनाभिगमनमुच्यते दक्षिणां दिशं गच्छतो-ऽभिमुखत्वासंभवात् किन्तु गमनमात्रम् सप्तदशे सर्गेऽपि प्रजगाम नभश्चन्द्र इति प्रकर्षेण गमनवचनं नभोमध्यातीतत्व-माचष्टे अंशुमन्तमिति चन्द्र एवोच्यते भानुमन्तं दीप्तिम-न्तम् वृषं श्वेतम् । अस्मिन्सर्गे च्छेकानुप्रासः नतु यमकम् अर्थभेदाभावात् । तदुक्तं काव्यप्रकाशे ' भिन्नार्थानां ष्यादीनां वर्णानां विवृत्तिर्यमकम् ' इति ॥ १ ॥

२] ति० टी०–पापानि पापजनकदुःखानि नाशयन्तम् लोकाह्लादजनकत्वात् समेधयन्तं वर्धयन्तम् विराजयन्तं प्रकाशयन्तम् अभितो यान्तमन्तःपुरदर्शनसाधनत्वेन स्वमध्यं प्राप्तम् ॥ २ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–लोकस्येत्यादिभिः । लोकस्य पापानि निशि जायमानचुरादीनि विनाशयन्तं महोद-धिं समेधयन्तं भूतानि विराजयन्तं प्रकाशयन्तमभियान्तं शीतांशुं चन्द्रमसं ददर्श ॥ २ ॥

गो० टी०–लोकस्येति । पापानि दुःखानि ॥ २ ॥

३] ति० टी०–भुवि मन्दरस्था भात्यधिकसंनिधाना भवति। पुष्करस्था अहीति शेषः । सेदानीं निशाकरस्थेति पर्या-यालंकारः पादचतुष्टये स्था इत्येकपदयमकं च भुवि मन्दरे प्रदोषे सागरेऽधिकलक्ष्मीसंनिधानमृषिवचनादेवावसेयम् ॥ ३ ॥

रा० टी०–येति । भुवि पृथिव्यां मध्ये या लक्ष्मीर्मन्द-रस्था सती यथा भाति प्रकाशते प्रदोषेषु च सागरस्था या यथा प्रकाशते तोयेषु च पुष्करस्था सती या यथा प्रकाशते सा चारुनिशाकरस्था सती तथैव रराज । मन्दरसागरयोर-धिकलक्ष्मीप्रकाशो महात्मनां प्रत्यक्ष इति गम्यते ॥ ३ ॥

गो० टी०–येति । भुवि मन्दरो लक्ष्मीवान् प्रदोषेषु सागरः तोयेषु पद्मं श्रीमत् तद्वत्तदानीं चन्द्रो विशिष्टल-क्ष्मीको बभूवेत्यर्थः । अत्रान्यस्यान्यत्र संबन्धान्मन्दरादिलक्ष्मी-रिवास्य लक्ष्मीरिति सादृश्याक्षेपान्निदर्शनालङ्कारः । तदुक्तं काव्यप्रकाशे निदर्शनायाम् ' अभिमान्यस्तु संबन्ध उपमा-परिकल्पकः ' इति ॥ ३ ॥

४] ति० टी०–हंसो यथेति । किंचिदाधारप्रतिष्ठितशुक्ल-वस्तुत्वमात्रेणाम्बरस्थचन्द्रे सादृश्यमिति कतकः । कुञ्जरोऽप्यत्र श्वेत एव अम्बरमपि तत्किरणैरेव श्वेतमिति बोध्यम् । अम्बरस्थोऽम्बरमध्यस्थः ॥ ४ ॥

रा० टी०–हंस इति । राजतपञ्जरस्थादिः हंसादिरिव अम्बरस्थः चन्द्रोऽपि बभ्राज ॥ ४ ॥

गो० टी०–हंस इति । राजतपञ्जरस्थः गगनगर्भस्य ज्योत्स्नाक्षालितत्वात् मन्दरकन्दरस्थः तस्य श्वेतगिरित्वात् गर्वितकुञ्जरस्थः नीलरूपस्य नभस उपर्यवस्थानात् । अत्र पुष्ट-त्वादीनां साधारणधर्माणामनुपादानाल्लुप्तोपमालंकारः ॥ ४ ॥

१ महदिति गो. पाठः ।

स्थितः ककुद्मानिव तीक्ष्णशृङ्गो महाचलः श्वेत इवोर्ध्वशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गो विभाति चन्द्रः परिपूर्णशृङ्गः ॥ ५ ॥
विनष्टशीताम्बुतुषारपङ्को महाग्रहग्राहविनष्टपङ्कः ।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को रराज चन्द्रो भगवाञ्शशाङ्कः ॥ ६ ॥
शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रस्तथा प्रकाशो विरराज चन्द्रः ॥ ७ ॥
प्रकाशचन्द्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः
रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान्प्रदोषः ॥ ८ ॥

५] ति० टी०–परिपूर्णशृङ्गः परिपूर्णकलङ्करूपहरिणशृङ्ग इत्यर्थः । जाम्बूनदबद्धेति स्वरूपकथनमात्रम् ॥ ५ ॥

रा० टी०–स्थित इति । तीक्ष्णशृङ्गः ककुद्मान् वृष इव स्थितः ऊर्ध्वशृङ्गः श्वेतो महाचलः हिमगिरिरिव जाम्बूनदबद्धशृङ्गः सुवर्णबद्धदन्तः हस्तीव परिपूर्णशृङ्गः उत्थितशृङ्गाकारङ्ककवान् इत्यर्थः, चन्द्रो विभाति ॥ ५ ॥

गो० टी०–स्थित इति । परिपूर्णशृङ्गः परिपूर्णकलः । अत्र शृङ्गशब्दस्य विषाणार्थभेदेऽपि बिम्बप्रतिबिम्बभावेनौपम्यम् ॥ ५ ॥

६] ति० टी०–विनष्टः शीताम्बुतुषाररूपः शीतलजलबिन्दुसंपर्करूपः पङ्को यस्य तम् । तत्त्वं च वर्षाकालस्यातीतत्वाद्वस्तुतो हिमकालेऽपि विनष्टः शीतलजलबिन्दुसंपर्करूपः पङ्को यस्य तमित्यर्थः हिमालयस्यातिदूरत्वादिति भावः । विनष्टेति द्वितीयार्थे प्रथमामङ्गीकृत्येदम् । महाग्रहस्य सूर्यस्य ग्राहेण किरणसंक्रमेण विनष्टो विनाशितः पङ्कस्तमो येन सः, अत एव प्रकाशलक्ष्म्याश्रयेण हेतुना निर्मलाङ्को व्यक्तस्फुरल्लाञ्छनो रराज गगनमध्यं प्राप्येति शेषः ॥ ६ ॥

रा० टी०–विनष्टेति । विनष्टः हिमालयस्य दूरत्वात् अपगतः शीताम्बुतुषाररूपपङ्कः यस्य सः महाग्रहः सूर्यः तस्य ग्राहः किरणसंक्रमः तेन विनष्टः विनाशितः पङ्कस्तमो येन । किंच महान्तो ये ग्रहग्राहाः ग्रहवशकर्तारः महाग्रहा इत्यर्थः, ते विनष्टपङ्का निरस्तप्रकाशकत्वगर्वा येन सः प्रकाशलक्ष्म्याश्रयेण प्रकाशरूपसंपत्त्याश्रयेण निर्मलः अङ्को लाञ्छनं यस्य स शशाङ्को रराज ॥ ६ ॥

गो० टी०–विनष्टेति । शीताम्बु हिमाम्बु तुषाराः पृषताः पङ्कः तमः विनष्टाः शीताम्बुतुषारा एव पङ्कः यस्मिन् तथा । 'तुषारः शीकरे हिमे' इति विश्वः । महाग्रहाणां शुक्रबृहस्पत्यादीनां ग्राहेण ग्रहणेन आच्छादनेन विनष्टः पङ्को मलं यस्य सः महाग्रहग्राहविनष्टपङ्कः स्वतेजसा महाग्रहतिरस्कारेण व्यक्तनैर्मल्य इत्यर्थः। यद्वा महाग्रहः सूर्यः तस्य ग्राहेण किरणपरिग्रहेण विनष्टः विनाशितः पङ्कः तमः येन सः । तदा तरणिकिरणसंक्रमणेन देदीप्यमानमण्डल इत्यर्थः । तदुक्तं वराहमिहिरेण ' सलिलसमे शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः' इति । प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः तेजस्समृद्धियोगात्स्पष्टकलङ्कः । अतिधवले चन्द्रे परभागयोगेन कलङ्कस्याप्यौज्ज्वल्यं भवतीत्यर्थः । शशाङ्क इति । भूच्छायामयः शशरूपः अङ्कः यस्य सः तथा ' लोकच्छायामयं लक्ष्म तवाङ्के शशसन्निभम् ' इति हरिवंशोक्तेः । भगवान्महाप्रभाववान् ॥ ६ ॥

७] ति० टी०–शिलातलं गुहाबहिःस्थम् ॥ ७ ॥

रा० टी०–शिलेति । शिलातलादीन्प्राप्य मृगेन्द्रप्रभृतिरिव चन्द्रो विरराज ॥ ७ ॥

गो० टी०–शिलेति । प्रकाशः प्रकाशमानः ॥ ७ ॥

८] ति० टी०–प्रकाशयुक्तचन्द्रस्योदयेनोर्ध्वमागमनेन नष्टो नाशितोऽन्तर्गृहेऽपि दोषस्तिमिरजो येन तथाभूतः प्रदोषो रजनीमुखं यामादूर्ध्वतनम् प्रवृद्धा वर्धिता रक्षसां पिशिताशनरूपा दोषा येन पिशितभक्षणस्य दोषत्वमविहितजीवहिंसाहेतुत्वात् । रामाणामभिरामविषयको रमणविषयक ईरितो निरस्तश्चित्तदोषः प्रणयकलहरूपो येन स्वर्गस्य सुखस्य प्रकाशो यतः, अत एव भगवान्पूज्यो रराजेत्यनुकर्षः ॥ ८ ॥

रा० टी०–प्रकाशेति । प्रकाशचन्द्रस्योदयेन नष्टो दोषस्तमो यस्य अत एव रामाणां स्त्रीणामभिरामाय ईरितः प्राप्तः चित्तदोषः पुरुषमनोत्यासक्तिर्यस्मिन् प्रवृद्धा रक्षस्सु पिशिताशदोषा यस्मिन् स्वर्गेऽपि प्रकाशः शोभनत्वेन प्रख्यातिर्यस्य भगवान् धर्मात्मभ्यः सफलैश्वर्यदातेत्यर्थः, प्रदोषः रराजेत्यनुकृष्यते–यद्वा प्रदोषे चन्द्रनियन्तृत्वमारोप्याह–प्रकाशेति । प्रकाशचन्द्रस्य प्रकाशविशिष्टचन्द्रमसः उदयेन नष्टो विनाशितः दोषः स्त्रीविषयकपुरुषदयाभावो येन प्रवृद्धाः रक्षस्सु पिशिताशदोषाः रुधिरपानरूपदुर्गुणाः यस्मिन् रामस्याभिरामाय सीतया सह रमणाय ईरितः चन्द्रो दापनेन प्रापितः चित्तदोषः सीताविषयकराममनोत्यासक्तिरूपदोषो दोषाभासो येन अत एव स्वर्गस्य सुखविशेषस्य प्रकाशः धर्मात्मसुप्रापकः अत एव भगवान् समर्थः प्रदोषो रराजेत्यनुकृष्यते ॥ ८ ॥

१ रराजेति गो. पाठः ।

तन्त्रीस्वराः कर्णसुखाः प्रवृत्ताः स्वपन्ति नार्यः पतिभिः सुपृक्ताः[1] ।
नक्तञ्चराश्चापि तथा प्रवृत्ता विहर्तुमत्यद्भुतरौद्रवृत्ताः[2] ॥ ९ ॥
मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसंकुलानि ।
वीरश्रिया चापि समाकुलानि ददर्श धीमान्स कपिः कुलानि ॥ १० ॥
परस्परं चाधिकमाक्षिपन्ति भुजांश्च पीनानधिविक्षिपन्ति[3] ।
मत्तप्रलापानधिविक्षिपन्ति मत्तानि चान्योन्यमधिक्षिपन्ति ॥ ११ ॥
रक्षांसि वक्षांसि च विक्षिपन्ति गात्राणि कान्तासु च विक्षिपन्ति ।
रूपाणि चित्राणि च विक्षिपन्ति दृढानि चापानि च विक्षिपन्ति ॥ १२ ॥
ददर्श कान्ताश्च समालभन्त्यस्तथापरास्तत्र पुनः स्वपन्त्यः ।
सुरूपवक्त्राश्च[4] तथा हसन्त्यः क्रुद्धाः पराश्चापि विनिःश्वसन्त्यः ॥ १३ ॥

गो० टी०–प्रकाशेति । प्रकाशेन चन्द्रोदयेन नष्टः दोषः तिमिरं यस्मिन्सः प्रवृद्धः रक्षसां पिशिताशनानां च दोषः सञ्चाररूपो यस्मिन्स तथा रामाभिः अभिरामैः कान्तैश्च ईरितः त्यक्तः चित्तदोषः कोपाभिमानरूपः यस्मिन् स्वर्गप्रकाशः स्वर्गतुल्यः तद्वदानन्दावह इत्यर्थः । भगवान् श्रीमान् 'भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु' इत्यमरः । प्रदोषगत इति शेषः ॥ ८ ॥

९] ति० टी०–सुपृक्ता भेदग्रहाविषयाः । 'स्ववृत्ताः' इति पाठे स्वं स्वीयं सहजपातिव्रत्यलक्षणं वृत्तं चारित्रं यासां ताः । नक्तंचरा उलूकादयो राक्षसाश्च तथा विहर्तुं प्रवृत्ताः ॥ ९ ॥

रा० टी०–तन्त्रीति । कर्णसुखाः श्रोत्रानन्दप्रदाः तन्त्रीस्वरा वीणानादाः प्रवृत्ता पतिभिः सुपृक्ताः संयुक्ता नार्यः राक्षसपत्न्यः स्वपन्ति अत्यद्भुतरौद्रवृत्ता नक्तञ्चरा राक्षसा विहर्तुं प्रवृत्ताः ॥ ९ ॥

गो० टी०–तन्त्रीति । स्पष्टम् ॥ ९ ॥

१०] ति० टी०–ऐश्वर्यादिमत्ताः प्रमत्ता मद्यादिना येषु तानि, अत एव समाकुलानि रक्षसां गृहाणि रथाश्चेति सर्वयानोपलक्षणम् । भद्रासनं स्वर्णपीठम् ॥ १० ॥

रा० टी०–मत्तेति । मत्तैः ऐश्वर्यादिहेतुकमदविशिष्टैर्युक्ताः प्रमत्ता मद्यपानादिहेतुकमदविशिष्टाः सन्ति येषु तानि रथादिभिः संकुलानि व्याप्तानि वीरश्रिया वीरसंपत्त्या च समाकुलानि व्याप्तानि समाकुलानि परस्परं संमिलितानि कुलानि भवनसमूहान् कपिः स हनुमान् ददर्श । भद्रासनं स्वर्णपीठम्॥१०॥

गो० टी०–मत्तेति । मत्ताः मधुमदशीलाः प्रमत्ताः प्रस्तुतकार्यविस्मारिणः मत्तप्रमत्तजनयोगात् कुलान्यपि तथोच्यन्ते । कुलानि गृहाणि समाकुलानि समाकुलजनानि वीरश्रिया वीरलक्ष्म्या । वीर इति भिन्नं पदं वा कपिविशेषणम् ॥१०॥

११] ति० टी०–आक्षिपन्त्युत्तरप्रत्युत्तरं कुर्वन्ति । अधिविक्षिपन्ति परस्परमित्यनुकर्षः । मत्तप्रलापानधिकं विक्षिपन्ति मुञ्चन्ति भर्त्सयन्ति वा । मत्तानि रक्षांसीत्याकर्षः । अधिक्षिपन्ति तिरस्कुर्वन्ति ॥ ११ ॥

१२] ति० टी०–वक्षांसि विक्षिपन्ति परस्परमास्फालयन्ति । गात्राणां हस्तादीनां कान्तासु क्षेपो न्यासः । चित्राणि रूपाणि नानाविधवेषान्विक्षिपन्ति कुर्वन्ति कान्ताप्रीतये संपादयन्ति । धनुषां विक्षेपो विस्फारणम् । ईदृशानि रक्षांसि ददर्श । शत्रुत्वान्येतानि ॥ १२ ॥

रा० टी०–परस्परमिति । मत्तानि रक्षांसि परस्परम् अधिकमाक्षिपन्ति उत्तरप्रत्युत्तराभ्याम् आक्षेपवचनमुच्चारयन्ति अत एव भुजान् अधिविक्षिपन्ति परिक्षिपन्ति अत एव मत्तप्रलापान् अधिविक्षिपन्ति अधिकमुच्चारयन्ति अत एव अन्योन्यम् अधिक्षिपन्ति तिरस्कुर्वन्ति अत एव वक्षांसि विक्षिपन्ति ताडयन्ति कान्तासु स्वस्वपत्नीषु गात्राणि करादीनि विक्षिपन्ति संस्थापयन्ति रूपाणि प्रशस्तरूपविशिष्टानि चित्राणि विक्षिपन्ति कुर्वन्ति चापानि विक्षिपन्ति आक्षिपन्तीत्यादीनां शत्रुत्वे तु मत्तानि रक्षांसि ददर्शेति पूर्वेणोत्तरेण वान्वयो बोध्यः । श्लोकद्वयं संमिलितान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–परस्परं चेत्यादिश्लोकद्वयमेकान्वयम् । ददर्शेति संबध्यते । आक्षिपन्तीत्यादीनि शत्रुत्वानि रक्षोविशेषणानि । आक्षिपन्ति अपहसन्ति अधिविक्षिपन्ति अन्योन्यस्योपरि दधति अधिविक्षिपन्ति अधिकं मुञ्चन्ति अधिक्षिपन्ति भर्त्सयन्ति विक्षिपन्ति विस्फारयन्ति चित्राणि रूपाणि विविधान् वेषान् । विक्षिपन्ति वितन्वन्ति । चापानि चापान् विक्षिपन्ति विस्फारयन्ति ॥ ११ ॥ १२ ॥

१३] ति० टी०–समालभन्त्यः चन्दनादीनीति शेषः । द्वितीयार्थे इमाः प्रथमाः । तत्रासंस्ताश्च ददर्शेति शेषो वा॥१३॥

रा० टी०–ददर्शेति । समालभन्त्यः चन्दनायनुलेपं कुर्वन्त्यः 'समालम्भोऽनुलेपनम्' इत्यमरः । अपराः अन्याः स्वपन्त्यः अपराः स्वरूपवक्त्रा अवलोक्येति शेषः, हसन्त्यः परा विनि-

---

१ स्वना इति गो. पाठः । २ वृत्ता इति गो. पाठः । ३ निक्षिपन्तीति गो. पाठः । ४ स्वरूपेति गो. रा. पाठः ।

महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा सुसद्भिः ।
रराज वीरैश्च विनिःश्वसद्भिर्हृदा भुजङ्गैरिव निःश्वसद्भिः ॥ १४ ॥
बुद्धिप्रधानान्रुचिराभिधानान्संश्रद्दधानाञ्जगतः प्रधानान् ।
नानाविधानान्रुचिराभिधानान्ददर्श तस्यां पुरि यातुधानान् ॥ १५ ॥
ननन्द दृष्ट्वा स च तान्सुरूपान्नानागुणानात्मगुणानुरूपान् ।
विद्योतमानान्स च तान्सुरूपान्ददर्श कांश्चिच्च पुनर्विरूपान् ॥ १६ ॥
ततो वरार्हाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः ।
प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सुस्वभावाः[1] ॥ १७ ॥
स्त्रियो ज्वलन्तीस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः ।
ददर्श काश्चित्प्रमदोपगूढा यथा विहङ्गा विहगोपगूढाः[2] ॥ १८ ॥

स्वसन्त्यः कान्ता ददर्श अपराः स्वरूपवक्त्रा इति कान्ताविशेषणत्वे तु नावलोक्येति शेषप्रयोजनं समुदायस्य कर्मतयाऽन्वयात् । 'तथाचोत्पत्तयः शुभाः' इत्यादाविव न द्वितीया ॥१३॥

गो० टी०–ददर्शेति । समालभन्त्यः अङ्गरागेणानुलिम्पन्त्यः 'समालपन्त्य' इति च पाठः । सर्वत्र व्यत्ययेन द्वितीयार्थे प्रथमा ॥ १३ ॥

१४] ति० टी०–सुसद्भिः सुतरां सन्तो विभीषणादयस्तै रराज । पुरमिति शेषः विनिःश्वसद्भिः स्वापेक्षितयोद्बलभावात्॥१४॥

रा० टी०–महागजैरिति । नदद्भिर्महागजैः सुपूजितैः सुसद्भिः विभीषणादिभिः विनिःश्वसद्भिर्भुजङ्गैरुपलक्षितो महाह्रद इव रराज ॥ १४ ॥

गो० टी०–महागजैरिति । सा पुरीति शेषः । सुसद्भिः सुतरां सद्भिः विनिःश्वसद्भिः युद्धयोग्यवीरालाभात् ॥ १४ ॥

१५] ति० टी०–बुद्धिः प्रधानं प्रधानगुणो येषाम् रुचिरमभिधानं वचनं येषाम् सम्यक्श्रद्दधानानास्तिकान् रुचिराभिधानान्रुचिरनाम्नः । नानाप्रकारं विधानं वेषादेर्येषां तान् ॥ १५ ॥

रा० टी०–बुद्धीति । बुद्धिप्रधानान् अतिबुद्धिमतः रुचिराभिधानान् शोभनवचनान् संश्रद्दधानान् गुरुवाक्यादौ विश्वासयुक्तान् जगतः इतस्ततो गच्छतः नानाविधान् येषां तान् रुचिराभिधानान् शोभननामयुक्तान् प्रधानान् यातुधानान् तस्यां लङ्कायां ददर्श ॥ १५ ॥

गो० टी०–बुद्धीति । बुद्धिप्रधानान् बुद्ध्या श्रेष्ठान् प्रधानबुद्धीन्वा उत्तमबुद्धीनित्यर्थः, रुचिराभिधानान् शोभनव्यवहारान्संश्रद्दधानान् आस्तिकान् । नानाविधानान्नानाकारान् । रुचिराभिधानान् हृद्यनाम्नः ॥ १५ ॥

१६] ति० टी०–आत्मगुणानुरूपांस्तदुचितव्यवहारवतः । कांश्चित्पुनर्विरूपानपि विद्योतमानान्सुरूपानिव ददर्शेत्यर्थः॥१६॥

रा० टी०–ननन्देति । सुरूपान् आत्मगुणानुरूपान् आत्मगुणेन रामसेवकत्वेन अनुरूपान् स्वसदृशान् विद्योतमानान् विभीषणादीन् दृष्ट्वा स तान् चोरत्वेन सहितान् सुरूपान् विरूपांश्च ददर्श ॥ १६ ॥

गो० टी०–ननन्देति । आत्मगुणानुरूपान् आत्मगुणानुरूपव्यवहारान् ॥ १६ ॥

१७] ति० टी०–वरार्हाः श्रेष्ठविभूषणादियोग्या उत्तमोत्तमरूपाश्च । भावाः कटाक्षादयः । अनुभावः प्रभावः । भावोऽन्तःकरणम् । तारास्तारकाः ॥ १७ ॥

रा० टी०–तत इति । ततोऽनन्तरं वरार्हाः उत्तमपूजनसामग्रीमतीः सुविशुद्धः भावोऽन्तःकरणं यासाम् अत एव सुस्वभावाः महानुभावाः अतिप्रभाववतीः प्रियेषु प्रीत्युत्पादकेषु पानेषु सक्तः भावो मनो यासां ताः तारा इव तारकासदृशीः तेषां स्त्रियः तत्र लङ्कायां ददर्श ॥ १७ ॥

गो० टी०–तत इति । वराणां श्रेष्ठानाम् अर्हाः वरार्हाः । सुविशुद्धभावाः कान्तेषु निर्मलहृदयाः महानुभावाः पातिव्रत्यरूपमहाप्रभावाः । यद्वा महानुभावाः अनुभावाः कटाक्षभुजक्षेपादयः सुप्रभावाः शोभनवैभवाः ॥ १७ ॥

१८] ति० टी०–ज्वलन्ती रूपसंपदा ज्वलन्तीरिव । त्रपा लज्जा । प्रमदेन हर्षेणोपगूढाः संबद्धा यथा विहंगाः विहंगीरित्येवार्थः । इन्द्रनीलमणिमयोर्ध्वगेहेषु नीलतमःसदृशेषु शयनात्तत्सादृश्यम् ॥ १८ ॥

रा० टी०–श्रियेति । श्रिया रूपादिसंपत्त्या ज्वलन्तीः प्रकाशमानाः त्रपया लज्जया उपगूढाः युक्ताः रमणोपगूढाः पत्यालिङ्गिताः अत एव प्रमदोपगूढाः प्रमोदाविशिष्टाः काश्चित् स्त्रियः विहगेन पक्षिविशेषेणोपगूढा विहङ्गा इव ददर्श । अत्युन्नतप्रासादेषु शयनादीदृगुपमानोपमेयभावः ॥ १८ ॥

गो० टी०–श्रियेति । प्रमदोपगूढाः हर्षोपगूढाः । विहङ्गाः विहङ्गीः ॥ १८ ॥

१ प्रभावा इति गो. पाठः । २ श्रियेति गो. रा. पाठः । ३ कुसुमेति गो. पाठः ।

अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियाङ्कं[1] सुसुखोपविष्टाः ।
भर्तुः परा धर्मपरा निविष्टा ददर्श धीमान्मदनोपविष्टाः[2] ॥ १९ ॥
अप्रावृताः काञ्चनराजिवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः ।
पुनश्च काश्चिच्छशलक्ष्मवर्णाः कान्तप्रहीणा रुचिराङ्गवर्णाः ॥ २० ॥
ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीतियुक्ताः सुमनोभिरामाः[3] ।
गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः स ददर्श रामाः ॥ २१ ॥
चन्द्रप्रकाशाश्च हि वक्त्रमाला वक्राः[4] सुपक्ष्माश्च सुनेत्रमालाः ।
विभूषणानां च ददर्श मालाः शतह्रदानामिव चारुमालाः ॥ २२ ॥
नत्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजाताम् ।
लतां प्रफुल्लामिव साधुजातां ददर्श तन्वीं मनसाऽभिजाताम् ॥ २३ ॥

१९] ति० टी०–भर्तुः परा उत्कृष्टत्वेनाभिमताः । धर्मपरा भर्तृसेवालक्षणधर्मतत्पराः । निविष्टा ऊढाः । ‘ निवेशः शिविरोद्वाहविन्यासेषु ’ इति कोशः । मदन उपविष्टो यासु मदनाश्रया इत्यर्थः ॥ १९ ॥

रा० टी०–अन्या इति । अन्या उक्ताभ्यो भिन्ना हर्म्यतलोपविष्टाः मदनोपविष्टाः कामयुक्ताः अत एव तत्र हर्म्ये प्रियाङ्केषु सुखोपविष्टाः भर्तुः पराः तत्पिकाः तत्र हेतुर्धर्मपरेषु पतिसेवारूपधर्मेषु आनिविष्टाः स्त्रियः धीमान् हनुमान् ददर्श ॥ १९ ॥

गो० टी०–अन्या इति । निविष्टाः ऊढाः पाणिगृहीता इत्यर्थः । ‘ निवेशः शिविरोद्वाहन्यासेषु ’ इति विश्वः ॥ १९ ॥

२०] ति० टी०–अप्रावृता उत्तरीयहीनाः काञ्चनराजिवर्णाः कनकरेखाकाराः परार्ध्या उत्तमाः तपनीयवर्णास्तप्तस्वर्णवर्णाः शशलक्ष्मा चन्द्रः कान्तप्रहीणाः प्रियवियुक्ताः रुचिराङ्गवर्णाः सुन्दरदेहकान्तयः प्रथमं ददर्श ॥२०॥

रा० टी०–अप्रावृता इति । अप्रावृताः प्रावरणरहिताः कान्तप्रहीणाः पतिरहिताः अत एव काञ्चनराजिवर्णाः सुवर्णरेखासदृशीः कृशाङ्गीरित्यर्थः, काश्चिद्ददर्श । परार्ध्याः अत्युत्तमाः तपनीयवर्णाः सुवर्णवर्णसदृशवर्णविशिष्टाः अतः एव शशलक्ष्मवर्णाः चन्द्रकान्तीः अत एव रुचिराङ्गवर्णाः काश्चिद्ददर्शेति पूर्वेणान्वयः ॥ २० ॥

गो० टी०–अप्रावृता इति । अप्रावृताः अनवकुण्ठिताः काञ्चनराजिवर्णाः कनकरेखाकाराः तपनीयवर्णाः तप्तकाञ्चनवर्णाः शशलक्ष्मवर्णाः चन्द्रपाण्डुराः । कान्तप्रहीणाः विरहिण्यः ॥ २० ॥

२१] ति० टी०–प्रियान्प्राप्य प्रीतियुक्ता आसन् । सुमनोभिः पुष्पैरभिरामाः, अत एव हृष्टाः परमया शोभयाऽभिरामाः स्वस्वकान्तमनोहरा रामा गृहेषु ददर्श । ‘प्रसमीक्ष्य रामाः’ इति पाठे प्रियान्प्राप्य तान्समीक्ष्य प्रीतियुक्ता रामास्तैः प्रिये रम्यमाणाः, अत एव गृहेषु हृष्टा रामाः । ददर्शेति शेषः ॥२१॥

रा० टी०–तत इति । ततोऽनन्तरं मनोभिरामान् प्रियान् प्राप्य सुप्रीतियुक्ताः अत्यन्तप्रीतिविशिष्टाः सुमनोभिरामाः अत्यन्तमनोभिरामदाढ्यैः परमाभिरामाः अतिसुन्दरीः हृष्टाः रामाः गृहेषु ददर्श ॥ २१ ॥

गो० टी०–तत इति । प्रियान्प्राप्य अभिसृत्य । सुप्रीतियुक्ताः मनोभिरामाः रामाः प्रसमीक्ष्य गृहेषु रामाश्च ददर्श । अभिसारिकाः कुलपालिकाश्च ददर्शेत्यर्थः ॥ २१ ॥

२२] ति० टी०–चही पादपूरकौ । वक्त्रमाला वक्त्रसमूहाः वक्राः वक्त्रप्रेक्षणाः । सुपक्ष्माः शोभनपक्ष्मयुक्ता नेत्रमाला ददर्श । शतह्रदानां माला इव भूषणानां माला ददर्श । ‘वक्त्राक्षिपक्ष्मा’ इति पाठेऽक्षिपक्ष्मधिकम् । वक्त्रपक्ष्मा इत्येवोचितम् । पक्ष्मसु वक्त्रत्वमपि किमित्यपि चिन्त्यम् ॥ २२ ॥

रा० टी०–चन्द्रेति । चन्द्रप्रकाशाः चन्द्रसदृशप्रकाशविशिष्टाः वक्त्रमालाः मुखसमूहान् वक्राः कुटिलनिरीक्षणाः सुपक्ष्माः शोभनपक्ष्मविशिष्टाः सुनेत्रमालाश्च शतह्रदानां चारुमाला इव विभूषणानां मालाश्च ददर्श ॥ २२ ॥

गो० टी०–चन्द्रेति । वक्त्रनेत्रदर्शनं मानुषीत्वराक्षसीत्वविवेकार्थम् । आभरणदर्शनं स्वदृष्टसीताभरणतुल्याभरणदर्शनार्थम् ॥ २२ ॥

२३] ति० टी०– पथि स्थिते धर्ममार्गस्थे । नत्वेव ददर्शेत्यन्वयः । साधुजातामिति लताविशेषणम् । मनसाभिजातां धात्रा मनसा सृष्टाम् ॥ २३ ॥

रा० टी०–नेति । मनसा परमात्मसंकल्पमात्रेण पथि सनातनधर्ममार्गे स्थिते राजकुले अभिजातां प्रादुर्भूतां परममत्यैश्वर्यप्रापकमभिजातं प्राकट्यं यस्याः ताम् अत एव साधुजातां शोभनप्राकट्यवतीं किं च साधोः साधुतायाः रामकर्तृकमहात्मोपकृतेरित्यर्थः जातं जन्म यस्याः तां प्रजातां प्रफुल्ल-

१ प्रियाङ्केष्वेति गो. रा. पाठः । २ मदनाभिविष्टा इति गो. पाठः । ३ प्रसमीक्ष्य रामा इति गो. पाठः । ४ वक्त्राक्षिपक्ष्मा इति गो. पाठः ।

सनातने वर्त्मनि संनिविष्टां [1]रामेक्षणीं तां मदनाभिविष्टाम् ।
भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यः पराभ्यश्च सदा विशिष्टाम् ॥ २४ ॥
उष्णार्दितां सानुसृतास्रकण्ठीं पुरा वराहोत्तमनिष्ककण्ठीम् ।
सुजातपक्ष्माभिरक्तकण्ठीं वने प्रवृत्तामिव नीलकण्ठीम् ॥ २५ ॥
अव्यक्तरेखामिव चन्द्रलेखां पांसुप्रदिग्धामिव हेमरेखाम् ।
क्षतप्ररूढामिव [2]वर्णरेखां वायुप्रभग्नामिव [3]हेमरेखाम् ॥ २६ ॥
सीतामपश्यन्मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य ।
बभूव [4]दुःखोपहतश्चिरस्य प्लवङ्गमो मन्द इवाचिरस्य ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

लतामिव तन्वीं सूक्ष्माङ्गीं सनातने परंपराप्राप्ते वर्त्मनि पतिव्रताधर्मे सन्निविष्टाम् अत एव रामेक्षणीं राममात्रेक्षणकर्त्रीं मदने वियोगेन प्राप्तदैन्ये अभिविष्टां स्थितां श्रीमत् भर्तुर्मनः अनु प्रविष्टां पराभ्यः स्त्रीभ्यो लक्ष्म्यादिभ्यः सदा नित्यं विशिष्टामधिकाम् उष्णार्दितां वियोगजनिततापपीडिताम् अत एव सानुसृतास्रैः निरन्तरनिस्सृतबाष्पैः सहितः कण्ठो यस्याः तां पुरा संयोगकाले वरः अर्हः प्रशंसा यस्य तेन उत्तमनिष्केण विशिष्टभूषणेन युक्तः कण्ठो यस्यास्तां सुजातपक्ष्मां शोभनपक्ष्मविशिष्टां अभिरक्तः मधुरस्वरत्वेनानुरागोत्पादकः कण्ठो यस्यास्तां नीलकण्ठीं मयूरीमिव वने प्रवृत्तां सीतां नैव ददर्श । श्लोकत्रयमेकान्वयि ॥ २३–२५ ॥

गो० टी०–न त्वित्यादि । परमाभिजाताम् अत्यन्ताभिरामाम् साधुजातां सुरूपाम् मनसाभिजाताम् अयोनिजामित्यर्थः ॥ २३ ॥

२४] ति० टी०–सनातने वर्त्मन्यविच्छेदप्रवृत्ते पातिव्रत्यमार्गे । राममीक्षते ध्यायति रामेक्षणी ताम् मदनेन रामविषयेणाभिविष्टां व्याप्ताम् श्रीमद्भर्तुर्मनोऽनुप्रविष्टाम् । अनेन परस्परानुरागो ध्वनितः ॥ २४ ॥

गो० टी०–सनातन इत्यादि । सनातने अविच्छिन्ने वर्त्मनि पातिव्रत्यधर्मे रामेक्षणे अन्तो निश्चयो यस्यास्ताम् । श्रीमत्सीताचिन्तनश्रीमत् विशिष्टाम् उत्कृष्टाम् ॥ २४ ॥

२५] ति० टी०–उष्णार्दितां विरहतापपीडिताम् अनुसृतास्रेण प्रवृत्तबाष्पेण सह वर्तमानः कण्ठो यस्यास्ताम् अत्र ङीषार्षः । 'कण्ठाम्' इति वा पाठः । पुरा रामसंनिधिकाले वराणामुत्तमभूषणानामर्हः, अत एवोत्तमनिष्क उत्तमभूषणः कण्ठो यस्यास्ताम् । अभिरक्तो मधुरस्वरः कण्ठो यस्यास्ताम् । नीलकण्ठी मयूरी ॥ २५ ॥

गो० टी०–उष्णेति । सानुसृतास्रकण्ठीम् अनुगतास्रेण अनुगतबाष्पेण कण्ठेन सह वर्तमानाम् । पुरा रामपार्श्वावस्थानकाले वराहोत्तमनिष्ककण्ठीं वराहः उत्तमश्च निष्कः कण्ठे यस्याः ताम् उरःकण्ठसंबन्धी भूषणविशेषो निष्कः । अभिरक्तकण्ठीं स्निग्धकण्ठीम् ॥ २५ ॥

२६] ति० टी०–अव्यक्ताद्यादिनाऽस्पष्टा रेखा रेखाकारो यस्यास्ताम् प्रदिग्धां रूपिताम् क्षतप्ररूढां क्षतेन प्ररूढामुत्पन्नां वर्णरेखां बाणव्रणचिह्नं तद्वद्रामस्येदानीं रावणस्य वा ॥ २६ ॥

रा० टी०–अव्यक्तेति । न व्यक्ता रेखा कलङ्को यस्यां तां चन्द्ररेखां द्वितीयाचन्द्रमिव पांसुप्रदिग्धां धूलीधूसरां हेमरेखामिव क्षतेन बाणकृतहिंसनेन प्ररूढां निष्पन्नां वर्णरेखां वर्णनीयव्रणचिह्नमिव वायुप्रभग्नां वायुना चालितां मेघरेखामिव रामस्य पत्नीं सीतां चिरस्य बहुकालमपश्यन् सन् प्लवङ्गमो हनुमान् अचिरस्य अल्पकालं दुःखोपहतः सन् मन्दः शिथिल इव बभूव । श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

गो० टी०–अव्यक्तेति । अव्यक्तरेखाम् अव्यक्तस्वरूपां चन्द्ररेखां चन्द्रकलामिव स्थिताम् अत्यन्तकृशत्वे कान्तिहीनत्वे च दृष्टान्तोऽयम् । पांसुप्रदिग्धां पांसुकलुषितां हेमरेखां कनकशलाकामिव स्थिताम् । स्वतःशुद्धस्वभावस्य आगन्तुकमालिन्ये । दृष्टान्तोऽयम् क्षतप्ररूढां क्षतेन प्ररूढाम् औषधादिना समाहिताम् अन्तःशल्यदोषवतीं बहिस्समाहिताम् बाणरेखां बाणक्षतिमिव स्थिताम् अन्तर्वेदनातिशये दृष्टान्तोऽयम् । वायुप्रभग्नामिव मेघलेखां पुनरसमाधेयशैथिल्ये दृष्टान्तोऽयम् ॥ २६ ॥

२७] ति० टी०–चिरस्य चिरमित्यर्थेऽव्ययम् । चिरमन्विष्याप्यपश्यन्नचिरस्य सद्यो मन्द इवान्वेषणाद्यकुशल इव दुःखोपहतो बभूव । अत्र सर्गे यमकालंकारः ॥ २७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

---

१ रामेक्षणान्तामिति गो. पाठः । २ बाणेति गो. पाठः । ३ मेघेति गो. रा. पाठः । ४ दुःखाभिहत इति गो. पाठः ।

षष्ठः सर्गः ।

हनुमान्पुनर्लङ्कालङ्करणभूतं रावणनिवासमेत्य तदन्तिकस्थप्रहस्तादिभवनेषु वैदेहीमन्विष्य रावणगृहं प्राविशत् ।

स निकामं विमानेषु [1]विचरन्कामरूपधृक् । विचचार कपिर्लङ्कां लाघवेन समन्वितः ॥ १ ॥
आससाद [3]च लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् । प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥ २ ॥
रक्षितं राक्षसैर्भीमैः [4]सिंहैरिव महद्वनम् । समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥ ३ ॥
रूप्यकोपहितैश्चित्रैस्तोरणैर्हेमभूषणैः । विचित्राभिश्च कक्ष्याभिर्द्वारैश्च [5]रुचिरावृतम् ॥ ४ ॥
गजास्थितैर्महामात्रैः शूरैश्च विगतश्रमैः । उपस्थितमसंहार्यैर्हयैः स्यन्दनयायिभिः ॥ ५ ॥
सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतीः । घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥ ६ ॥
बहुरत्नसमाकीर्णं परार्ध्यासनभूषितम् । महारथसमावापं महारथमहासनम् ॥ ७ ॥

गो टी०–सीतामिति। चिरस्यापश्यन् चिरकालं निरीक्ष्याप्यपश्यन्। अचिरस्य अचिरेण सपदीत्यर्थः। मन्दो मुग्ध इव दुःखाभिहतो बभूव 'मुग्धो मन्दो विवर्णश्च' इति हलायुधः॥२७॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

१]**ति० टी०**–विमानेषु सप्तभूमिप्रासादेषु। लाघवेन शैघ्र्येण१

रा० टी०–सीतान्वेषणमेव वर्णयन्नाह–स इत्यादिभिः। लाघवेनातिवेगेन समन्वितः कपिर्हनुमान् विमानेषु सप्तभूमिकप्रासादेषु विचरन् सन् निकामं यथेच्छं लङ्कां विचचार ॥१॥

गो० टी०–स निकाममित्यादि । विमानेषु विषण्णः विमानेषु सीतामदृष्ट्वा विषण्ण इत्यर्थः। लाघवेन वेगेन ॥१॥२॥

२] **ति० टी०**–राक्षसेन्द्रनिवेशनमाससाद ॥ २ ॥

रा० टी०–आससादेति । लक्ष्मीवान् अतिवीर्यसंपत्तिविशिष्टो हनुमान् प्राकारेणाभिसंवृतं राक्षसेन्द्रनिवेशनमाससाद प्राप ॥ २ ॥

३] **ति० टी०**–चकाशे चन्द्रसाहित्याद्व्यक्तान्वेषणक्रियो बभूवेत्यर्थः ॥ ३ ॥

रा० टी०–रक्षितमिति। सिंहैर्महद्वनमिव राक्षसैः रक्षितं भवनं समीक्षमाणः कपिकुञ्जरश्चकाशे ॥ ३ ॥

गो० टी०–रक्षितमिति । चकाशे जहर्षेत्यर्थः॥ ३ ॥

४] **ति०टी०**–रूप्यकं रजतं तेनोपहितैः शोभार्थं लिखितैः४

रा० टी०–रूप्यकेति । रूप्यकेण रजतेन उपहितैर्लिखितैः चित्रैः हेमभूषितैः तोरणैर्बहिर्द्वारैश्च रुचिरैः द्वारैरन्तर्द्वारैश्च कक्ष्याभिश्च आवृतम् ॥ ४ ॥

गो० टी०–रूप्यकेत्यादि । रूप्यकोपहितैः रजतनिर्मितैः कक्ष्याभिः प्रकोष्ठैः असंहार्यैः अवध्यैः स्यन्दनयायिभिः स्यन्दनवाहकैः । सिंहव्याघ्रतनुत्राणैः सिंहव्याघ्रचर्मपरिवृतैरित्यर्थः। महारथसमावासं महारथानां रक्षसामाकरं महारथमहास्वनं महतां रथानां महान् स्वनः यस्मिन्। अन्तपालैः बाह्यरक्षिभिः। राक्षसेन्द्रनिवेशनं राक्षसेन्द्राः राक्षसश्रेष्ठाः निविशन्ते समीपे निवसन्त्यस्मिन्निति राक्षसेन्द्रनिवेशनमित्यर्थः। अन्यथा वक्ष्यमाणवेश्मपदेन पुनरुक्तिः स्यात्। संह्रादः शब्दः। समुद्रस्वनवन्निःस्वनतीति समुद्रस्वननिःस्वनम् पचाद्यच्। तत् प्रसिद्धम् राजगुणसंपन्नं राजोपचारैर्धूपादिभिः संपन्नम्। अगुरुचन्दनैरित्यत्रापि संपन्नमिति संबध्यते । पर्वसु हुतं होमो यस्मिन् तत् पर्वहुतम् । समुद्रमिव निस्स्वनं मिःशब्दम् । रावणभीत्या जनकोलाहलरहितमित्यर्थः। समुद्रस्वनमिति तु बाह्यकक्ष्यापेक्षया ॥ ४–१४ ॥

५] **ति० टी०**–गजास्थितैर्गजारूढैः । महामात्रैर्हस्तिपकैः उपस्थितं युक्तम् असंहार्यैरप्रतिहतवेगैः, स्यन्दनयायिभिः स्यन्दनवाहकैः प्रशस्तैरित्यर्थः ॥ ५ ॥

रा० टी०–गजेति । गजास्थितैः गजारूढैः महामात्रौ असंहार्यैः संहर्तुमशक्यैः शूरैश्च स्यन्दनयायिभिः रथवाहकैर्हयैश्च उपस्थितं संप्राप्तम ॥ ५ ॥

६] **ति० टी०**–सिंहव्याघ्रतनुत्राणत्वादिरथविशेषणम् । दन्तादिविकारा दान्ताद्यस्तत्स्थप्रतिमास्ता धरद्भिरिति शेषः । घोषवत्त्वं किङ्किणीभिः ॥ ६ ॥

रा० टी०–सिंहव्याघ्रैः सिंहव्याघ्रचर्मनिर्मितानि तनुत्राणानि वर्माणि येषु तैः दान्तकाञ्चनराजतीः दन्तादिमयीः प्रतिमाः संधारयद्भिरिति शेषः, घोषवद्भिश्चित्रैः रथैः सदा विचरितं संप्राप्तम६॥

७] **ति० टी०**–महतां रथानामावापः स्थानं समन्तात्यस्मिंस्तत् । महारथानाम् 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते ॥' इत्युक्तलक्षणमहारथानां महासनं सदा वासस्थानम् ॥ ७ ॥

रा० टी०–बहुरत्नसमाकीर्णं परार्ध्यासनैर्भूषितं महारथानाम् 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते' इत्यादावुक्तानां समावापः सदा स्थितिर्यस्मिन् अत एव महारथानां महासनानि यस्मिन् तत् ॥ ७ ॥

---

१ विषण्ण इति गो. पाठः । २ पुनरिति गो. पाठः । ३ अथेति गो. पाठः । ४ घोरैरिति गो. पाठः । ५ भूषितैरिति गो. पाठः । ६ रुचिरैर्वृतमिति गो. पाठः । ७ भाजनमिति गो. पाठः ।

दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः । विविधैर्बहुसाहस्रैः परिपूर्णं समन्ततः ॥ ८ ॥
विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् । मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ ९ ॥
मुदितप्रमदारत्नं राक्षसेन्द्रनिवेशनम् । वराभरणसंह्रादैः समुद्रस्वननिःस्वनम् ॥ १० ॥
तद्राजगुणसंपन्नं मुख्यैश्च वरचन्दनैः । महाजनसमाकीर्णं सिंहैरिव महद्वनम् ॥ ११ ॥
भेरीमृदङ्गाभिरुतं शङ्खघोषविनादितम् । नित्यार्चितं पर्वसुतं पूजितं राक्षसैः सदा ॥ १२ ॥
समुद्रमिव गम्भीरं समुद्रसमनिःस्वनम् । महात्मनो महद्वेश्म महारत्नपरिच्छदम् ॥ १३ ॥
महारत्नसमाकीर्णं ददर्श स महाकपिः । विराजमानं वपुषा गजाश्वरथसंकुलम् ॥ १४ ॥
लङ्काभरणमित्येव सोऽमन्यत महाकपिः । चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च सर्वशः । वीक्षमाणोऽप्यसंत्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥
अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् । ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ १७ ॥
अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् । विभीषणस्य च तथा पुप्लुवे स महाकपिः ॥ १८ ॥
महोदरस्य च तथा विरूपाक्षस्य चैव हि । विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च ॥ १९ ॥
बहुदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः । शुकस्य च महावेगः सारणस्य च धीमतः ॥ २० ॥
तथा चेन्द्रजितो वेश्म जगाम हरियूथपः । जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ २१ ॥
रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च । वज्रकायस्य च तथा पुप्लुवे स महाकपिः ॥ २२ ॥
धूम्राक्षस्यार्थसंपातेर्भवनं मारुतात्मजः । विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥ २३ ॥
शुकनाभस्य चक्रस्य शठस्य कपटस्य च । ह्रस्वकर्णस्य दंष्ट्रस्य लोमशस्य च रक्षसः ॥ २४ ॥

८]ति०टी०–दृश्यैर्दर्शनीयैः अत एव परमोदारैरतिसुन्दरैः ८

रा० टी०–परमोदारैः अतिमहद्भिः अत एव दृश्यैर्विविधैः अनेकप्रकारैः तैस्तैः प्रसिद्धैः प्रसिद्धैः बहुसाहस्रैः मृगपक्षिभिः परिपूर्णम् ॥ ८ ॥

९] ति० टी०–अन्तपालैः पर्यन्तरक्षकैः ॥ ९ ॥

रा० टी०–विनीतैः अन्तपालैर्बहिःस्थित्या रक्षकैः रक्षोभिः सुरक्षितं मुख्याभिः प्रधानाभिर्वरस्त्रीभिः परिपूर्णम् ॥ ९ ॥

१०] ति० टी०–राक्षसेन्द्राणां महापार्श्वादीनां निवेशनानि यस्मिंस्तत् । भूषणशब्दैः समुद्रस्वनसदृशनिःस्वनम् ॥१०॥

रा० टी०–मुदितानि प्रमदारत्नानि श्रेष्ठप्रमदा यस्मिन् तत् राक्षसेन्द्राणां निवेशनं प्रवेशो यस्मिन् वराभरणसंह्रादैः उत्तमभूषणनिःस्वनैः समुद्रस्वनसदृशः निस्वनो यस्मिन् तत् १०॥

११] ति०टी०–तद्राजगुणसंपन्नं तैः प्रसिद्धैः राजभवनगुणैः छत्रचामरादिभिः संपन्नम् । वरचन्दनैश्च संपन्नमित्यनुकर्षः ११

रा० टी०–तद्राजगुणसंपन्नं तैः प्रसिद्धैः राजगुणैः राजकीयपदार्थैः संपन्नं युक्तं वरचन्दनैश्च संपन्नमिति शेषः, सिंहैर्महद्वनमिव महाजनसमाकीर्णम् ॥ ११ ॥

१२] ति० टी०–पर्वसु सुतः सोमो यस्मिन्यज्ञार्थे तत्पर्वसुतम् । राक्षसैः सदा पूजितं स्वपूजनीयदेवताकम् ॥ १२ ॥

रा० टी०–भेरीमृदङ्गैः अभिरुतं शब्दितं पर्वसु सुतं सोमसवनं यस्मिन् तत् राक्षसैः पूजितं कृतसंमार्जनादिकम् ॥ १२ ॥

१३-१४] ति० टी०–परिच्छदोऽलंकारः । महात्मनो रावणस्य महद्वेश्म ददर्शेत्यन्वयः ॥ १३ ॥ १४ ॥

रा० टी०–समुद्रमिव गम्भीरं महारत्नानि महारत्नमयाः परिच्छदाः अलङ्कारादयो यस्मिन् ॥ १३ ॥

रा० टी०–महात्मनो रावणस्य वपुषा विराजमानं महत् विशालं महात्मनो वेश्म गृहं महाकपिर्हनुमान् ददर्श दशानामेकत्वान्वयः ॥ १४ ॥

१५] ति० टी०–अमन्यत तद्रावणवेश्मेति शेषः । रावणस्य रावणभवनस्य समीपतस्तत्प्राकारप्रदेशेषु ॥ १५ ॥

रा० टी०–लङ्केति । तत्र तस्मिन्समये हनुमान् इतीदं गृहं लङ्काभरणममन्यत रावणस्य समीपतो रावणभवनसमीपे चचार च ॥ १५ ॥

गो०टी०–चचारेति । रावणस्य रावणगृहस्य॥१५-२२॥

१६] ति० टी०–गृहाद्गृहं राजवेश्म । महाप्राकारान्तर्वर्ति प्रधानरक्षसामेकस्य गृहादपरं गृहमित्यर्थः ॥ १६ ॥

रा० टी०–गृहादिति । राक्षसानां गृहात् गृहं गृहान्तरं सर्वशः उद्यानानि च प्रासादांश्च वीक्षमाणः असंत्रस्तः संत्रासरहितः हनूमान् चचार ॥ १६ ॥

१७-२४] ति० टी०–अस्यैव प्रपञ्चः—अवप्लुत्येत्यादि ॥ १७-२४ ॥

१ ऽगुरुचन्दनैरिति गो. पाठः । २ महाजनैरिति गो. पाठ । ३ हुतमिति गो. पाठः । ४ समुद्रमिवेति गो. रा. पाठः । ५ वानर इति गो.पाठः । ६ ऊदेति गो. पाठः । ७ गृहमिति गो. पाठः । ८ वज्रेति गो. रा. पाठः । ९ महातेजा इति गो. पाठः । १० चेति गो. पाठः । ११ नासस्य वक्रस्येति गो. पाठः । १२ विकटस्येति गो. पाठः । १३ ब्रह्मेति गो. पाठः । १४ रोमशस्येति गो. पाठः ।

3611O

युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य सादिनः । विद्युज्जिह्वद्विजिह्वानां[1] तथा हस्तिमुखस्य च ॥ २५ ॥
करालस्य विशालस्य[2] शोणिताक्षस्य चैव हि । पुप्लुवमानः[3] क्रमेणैव[4] हनुमान्मारुतात्मजः ॥ २६ ॥
तेषु तेषु महार्हेषु भवनेषु महायशाः । तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः ॥ २७ ॥
सर्वेषां समतिक्रम्य भवनानि समन्ततः । आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम्[5] ॥ २८ ॥
रावणस्योपशायिन्यो ददर्श हरिसत्तमः । विचरन्हरिशार्दूलो राक्षसीर्विकृतेक्षणाः[6] ॥ २९ ॥
शूलमुद्गरहस्ताश्च शक्तितोमरधारिणः । ददर्श विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे[7] ॥ ३० ॥
राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान् । रक्ताञ्श्वेतान्सितांश्चापि हरींश्चापि महाजवान् ॥ ३१ ॥
कुलीनान्रूपसंपन्नान्गजान्परगजारुजान्[8] । शिक्षितान्गजशिक्षायामैरावतसमान्युधि ॥ ३२ ॥
निहन्तॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः । क्षरतश्च यथा मेघान्स्रवतश्च यथा गिरीन् ॥ ३३ ॥
मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे परैः । सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ॥ ३४ ॥
हेमजालैरविच्छिन्नास्तरुणादित्यसंनिभाः । ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३५ ॥

रा० टी०–अवप्लुत्येति । महावेगो हनुमान् प्रहस्तस्य तदभिधराक्षसस्य निवेशनं गृहमवप्लुत्य ततोऽन्यत् महापार्श्वस्य वेश्म पुप्लुवे ॥ १७ ॥

रा० टी०–अथेति । मेघप्रतीकाशं मेघसदृशम् ॥ १८ ॥

रा० टी०–महोदरस्येति । सार्धश्लोक एकान्वयी॥१९॥

गो० टी०–विद्युज्जिह्वेन्द्रजिह्वानामिति बहुवचनं तन्नाम्नां बहूनां सत्त्वात् ॥ २३–२८ ॥

रा० टी०–शुकस्येति । इन्द्रजितः मेघनादस्य वेश्म जगाम ॥ २० ॥

रा० टी०–जाम्बुमालेरिति । अर्धं पृथक् ॥ २१ ॥

रा० टी०–रश्मीति ॥ २२ ॥

रा० टी०–धूम्रेति । क्रमेण धूम्राक्षादीनां भवनेषु प्लवमानो हनुमान् ऋद्धिमतां तेषां राक्षसानां भवनानां वा ऋद्धिं ददर्श । श्लोकपञ्चकमेकान्वयि ॥ २३–२७ ॥

२५–२८] ति० टी०–विद्युज्जिह्वद्विजिह्वानामिति बहुवचनमार्षम् । तयोरित्यर्थः ' विद्युज्जिह्वेन्द्रजिह्वानाम् ' इति वा पाठान्तरम् ॥ २५–२८ ॥

रा० टी०–सर्वेषामिति । सर्वेषां भवनानि समतिक्रम्य अथ पुनः राक्षसेन्द्रनिवेशनमाससाद ॥ २८ ॥

२९] ति० टी०–उपशायिन्यः । ' उपशायोपशायश्च पर्यायशयनार्थकाः ' । पर्यायेण शयनस्थानरक्षिका इत्यर्थ इत्याहुः ॥ २९ ॥

रा० टी०–रावणस्येति । रावणस्य उपशायिन्यः उपशायिनीः समीपशयनशीलाः पर्यङ्करक्षिका इत्यर्थः, राक्षसीः हरिसत्तमः हरयः सत्तमाः यस्य सः बहुमहावानराधीश इत्यर्थः, हरिशार्दूलो ददर्श ॥ २९ ॥

गो० टी०–रावणस्येति । उपशायिन्यः पर्यायशायिनीः । रावणे शयाने जाग्रतीरित्यर्थः ॥ २९ ॥ ३० ॥

३०] ति० टी०–गुल्मान्राक्षसीसमूहान् ॥ ३० ॥

रा० टी०–शूलेति । रक्षःपतेर्गृहे गुल्मान्राक्षसीसमूहान्ददर्श ॥ ३० ॥

३१] ति० टी०–हरीनश्वान् ॥ ३१ ॥

३२–३३] ति० टी०–परगजारुजाञ्शत्रुगजानारुजन्ति भञ्जयन्ति तान् ॥ ३२ ॥ ३३ ॥

रा० टी०–राक्षसानिति । सितान् बद्धान् रक्तान् श्वेतांश्च हरीन् अश्वांश्च परगजारुजान् रिपुगजविनाशकान् अत एव परसैन्यानां निहन्तॄन् क्षरतो वर्षतो मेघानिव स्रवतः प्रस्रवतो गिरीन् यथाप्रस्रवं गिरिसदृशान् समरे परैर्दुर्धर्षान् गजांश्च ददर्श । सार्धश्लोकत्रयमेकान्वयि ॥ ३१–३३ ॥

गो० टी०–रक्तानित्यादि । सितान् बद्धान् " षिञ्, बन्धने " इत्यस्मात् क्तः । हरीन् अश्वान् परगजानारुजन्ति पीडयन्तीति परगजारुजान् । क्षरतश्चेति श्लोकः पूर्वोक्तगजविशेषकः । क्षरतः किंचिद्वर्षतः स्रवन्मदत्वे दृष्टान्तः स्रवतः निर्झरिणः ॥ ३१–३३ ॥

३४] ति० टी०–मेघस्तनितनिर्घोषत्वादिविशिष्टान्गजान्ददर्शेत्यन्वयः । सहस्रं वाहिनीरनेकसेनाः ॥ ३४ ॥

३५] ति० टी०–हेमजालैरविच्छिन्नाः सर्वतो भूषिता इति शिबिकाविशेषणम् ॥ ३५ ॥

रा० टी०–सहस्रमिति । जाम्बूनदपरिष्कृताः सुवर्णभूषिताः सहस्रं बह्वीः वाहिनीः सेनाः हेमजालैरपि छन्नाः सर्वतो भूषिता इत्यर्थः, तरुणादित्यसंनिभाः विविधाकाराः शिबिकाश्च रावणस्य निवेशने कपिर्ददर्श । अर्धचतुष्टयमेकान्वयि॥३४॥३५॥

गो० टी०–सहस्रमिति । वाहिनीः सेनाः पदातीनित्यर्थः । जाम्बूनदं जम्बूनदीप्रभवं स्वर्णम् हेम केवलस्वर्णम् । उभयविधस्वर्णमयाभरणयुक्ता इत्यर्थः ॥ ३४ ॥ ३५ ॥

---

१ नादिन इति गो. पाठः । २ जिह्वेन्द्रजिह्वानामिति गो. पाठः । ३ पिशाचयोरिति गो. पाठः । ४ क्रममाण इति गो. पाठः । ५ चैवेति गो.पाठः । ६ निष्ठितानिति गो. पाठः । ७ हेमजालपरीति गो. पाठः । ८ अपि छन्ना इति रा. पाठः ।

शिबिका विविधाकाराः स कपिर्मारुतात्मजः । लतागृहाणि चित्राणि चित्रशालागृहाणि च ॥ ३६ ॥
क्रीडागृहाणि चान्यानि दारुपर्वतकानि च । कामस्य गृहकं रम्यं दिवागृहकमेव च ॥ ३७ ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने । स मन्दरसमप्रख्यं मयूरस्थानसंकुलम् ॥ ३८ ॥
ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् । अनन्तरत्ननिचयं निधिजालं समन्ततः ॥
धीरनिष्ठितकर्मान्तं गृहं भूतपतेरिव ॥ ३९ ॥
अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च । विरराज चैव तद्वेश्म रश्मिवानिव रश्मिभिः ॥ ४० ॥
जाम्बूनदमयान्येव शयनान्यासनानि च । भाजनानि च शुभ्राणि ददर्श हरियूथपः ॥ ४१ ॥
मध्वासवकृतक्लेदं मणिभाजनसंकुलम् । मनोरममसंबाधं कुबेरभवनं यथा ॥ ४२ ॥
नूपुराणां च घोषेण काञ्चीनां निःस्वनेन च । मृदङ्गतलनिर्घोषैर्घोषवद्भिर्विनादितम् ॥ ४३ ॥
प्रासादसंघातयुतं स्त्रीरत्नशतसंकुलम् । सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहम् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

३६] ति० टी०–शिबिका ददर्शेत्यनुकर्षः । चित्रशालागृहाणि चित्रयुक्तशालावन्ति गृहाणि ॥ ३६ ॥

३७] ति० टी०–दारुनिर्मिताः क्रीडापर्वता दारुपर्वतकानि क्लीबत्वमार्षम् । कामस्य गृहकं रतिगृहकम् दिवागृहकं दिनविहारगृहम् सर्वत्रात्यन्तस्वार्थिकः कन् ॥ ३७ ॥

रा० टी०–लतेति । चित्राणि लतागृहाणि चित्रशालागृहाणि विचित्रशालारूपवेश्मानि च दारुनिर्मिताः पर्वताः येषु तानि क्रीडागृहाणि च कामस्य गृहकं रतिवेश्म दिवागृहकं दिवसविहारगृहं च रावणस्य निवेशने ददर्श । अर्धचतुष्टयमेकान्वयि ॥ ३६ ॥ ३७ ॥

गो० टी०–शिबिका इत्यादि । दारुपर्वतकान् क्रीडापर्वतकान् कामस्य गृहकं रतिगृहम् दिवागृहकं दिवाविनोदस्थानम् 'रावणस्य निवेशन' इति पाठः ॥ ३६ ॥ ३७ ॥

३८] ति० टी०–मयूरस्थानैः क्रीडामयूरस्थानैः संकुलं व्याप्तम् ॥ ३८ ॥

रा० टी०–स इति । स हनुमान् मन्दरतलप्रख्यं मन्दराचलतलसदृशं मयूरस्थानैः क्रीडाहेतुकमयूरस्थितिभिः संकुलं व्याप्तं ध्वजयष्टिभिराकीर्णं व्याप्तं भवनोत्तमं ददर्श ॥ ३८ ॥

गो० टी०–स इत्यादि । मयूरस्थानं क्रीडामयूरविश्रमस्थानम् । कपोतानामिव मयूराणामपि स्थानानि शिलाभिः कल्प्यन्त इति प्रसिद्धम् । धीरनिष्ठितकर्मान्तं धीरैः कृतकल्पकर्मकम् । भूतपतेः प्रमथाधिपस्य ॥ ३८ ॥ ३९ ॥

३९–४१] ति० टी०–निधिजालम् निधिजालवदित्यर्थः । धीरनिष्ठितकर्मान्तं धीरैर्निर्भयस्थिरचित्तैर्निष्ठितं निर्वर्तितं कर्मणो निधिरक्षादिकर्मणोऽन्तं महिषादिबलिरूपं यस्मिन् । कश्चित्तु—कर्मान्तमिति पठित्वा धीरैर्निष्ठितस्यानुष्ठितस्य कर्मणस्तपोरूपस्यान्तं फलरूपमित्यर्थमाह । भूतपतेर्महेश्वरस्य यक्षेश्वरस्य वा ॥ ३९–४१ ॥

रा० टी०–अनन्तेति । अनन्तरत्नानां निचयो यस्मिन् निधिजालं निधिसमूहविशिष्टं धीरैः निष्ठितम् अनुष्ठितकर्मान्तं निधिरक्षककर्मावयवो यस्मिन् भूतपतेर्ब्रह्मणः गृहमिव गृहसदृशं रत्नानाम् अर्चिर्भिः रावणस्य तेजसा च उपलक्षितं तद्वेश्म रश्मिभिः किरणैः रश्मिमान् सूर्य इव विरराज । श्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

रा० टी०–जाम्बूनदेति । जाम्बूनदमयानि शयनादीनि ददर्श ॥ ४१ ॥

गो० टी०–अर्चिर्भिरिति । रश्मिमान् सूर्यः ॥ ४० ॥ ४१ ॥

४२] ति० टी०–मध्वासवयोरवान्तरभेदस्ताभ्यां कृतक्लेदम् आर्द्रमित्यर्थः ॥ ४२ ॥

४३–४४] ति० टी०–घोषवद्भिर्मृदङ्गातिरिक्तैरपि घोषवद्भिर्वाद्यैर्विनादितम् ॥ ४३ ॥ ४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

रा० टी०–मध्वेति । मध्वासवाभ्यां कृतः क्लेदः आर्द्रत्वं यस्मिन् असंबाधं संबाधारहितं विशालमित्यर्थः, कुबेरभवनं यथा कुबेरभवनसदृशं नूपुरघोषादिभिः घोषवद्भिर्वाद्यान्तरैश्च विनादितं प्रासादसंघातैर्युतं संव्यूढाः विशालाः कक्ष्या यस्मिन् तत् महागृहं हनुमान् प्रविवेश । श्लोकत्रयमेकान्वयि ॥ ४२–४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०–मध्वासवेति । मध्वासवकृतक्लेदं मध्वासवैः मधुविकारमद्यैः कृतक्लेदं कृतसेकम् । घोषवद्भिः नादवद्भिः ।

१ पर्वतकानपीति गो. पाठः । २ गिरीति गो. तलेति रा. पाठः । ३ अनेकरत्नसंकीर्णमिति गो. पाठः । ४ कर्मान्तमिति गो. पाठः । ५ अयेति गो. पाठः । ६ मुख्यानीति गो. पाठः । ७ निनदेनेति गो. पाठः ।

सप्तमः सर्गः ।

प्रसङ्गाद्रावणभवनं तत्रस्थं पुष्पकविमानं च कविर्वर्णयति ।

स वेश्मजालं बलवान्ददर्श व्यासक्तवैदूर्यसुवर्णजालम् ।
यथा महत्प्रावृषि मेघजालं विद्युत्पिनद्धं सविहङ्गजालम् ॥ १ ॥
निवेशनानां विविधाश्च शालाः प्रधानशङ्खायुधचापशालाः ।
मनोहराश्चापि पुनर्विशालाः ददर्श वेश्मादिषु चन्द्रशालाः ॥ २ ॥
गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि ।
सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥ ३ ॥
तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि ।
महीतले सर्वगुणोत्तराणि ददर्श लङ्काधिपतेर्गृहाणि ॥ ४ ॥
ततो ददर्शोच्छ्रितमेघरूपं मनोहरं काञ्चनचारुरूपम् ।
रक्षोधिपस्यात्मबलानुरूपं गृहोत्तमं ह्यप्रतिरूपरूपम् ॥ ५ ॥

नादश्च दीर्घशब्दस्य विरामसमयसंभवो ध्वनिः । व्यूढकक्ष्यं विशालप्रकोष्ठम् ॥ ४२ ॥ ४३ ॥

अस्मिन्सर्गे सार्धचतुश्चत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति०टी०–अथ रावणप्रधानगृहं वर्णयति—स इति। व्यासक्तानि संबद्धानि वैदूर्यखचितानि च सुवर्णजालानि स्वर्णगवाक्षाणि यस्मिंस्तत् । सविहंगजालमिति गृहमेघयोर्विशेषणम् ॥ १ ॥

रा० टी०–पुरीमेव वर्णयन्नाह–स इत्यादिभिः । बलवान् स हनुमान् व्यासक्तानि खचितानि वैदूर्याणि येषु तान्येव सुवर्णजालानि स्वर्णमयगवाक्षाणि यस्मिन् सविहङ्गजालं विहङ्गसमूहसहितं वेश्मजालं गृहसमूहं विद्युत्पिनद्धं प्रावृषि मेघजालमिव ददर्श ॥ १ ॥

गो० टी०–स वेश्मजालमित्यादि । व्यासक्तवैदूर्यसुवर्णजालम् वैदूर्यघटितसुवर्णमयजालकरम्भम् ॥ १ ॥

२] ति० टी०–प्रधानैः प्रशस्तैः शङ्खादिभिः शालन्ते शोभन्ते तादृशीर्निवेशनानां शाला अवान्तरगृहाणि ददर्श । पुनश्च विशालाश्चन्द्रशाला ददर्श । वेश्मादिष्वौत्तरित्यादद्रितुल्यवेश्मसु । चन्द्रशालाः शिरोगृहाणि, चन्द्रकान्तमणिबद्धशाला वा २

रा० टी०–निवेशनानामिति । प्रधानैः शङ्खायुधचापैः शालन्ते शोभन्ते ताः निवेशनानां गृहाणां विविधाः शालाः अवान्तरगृहाणि मनोहराः विशालाश्च वेश्मादिषु अद्रिसदृशवेश्मसु चन्द्रशालाः शिरोगृहाणि चन्द्रकान्तमणिसंबद्धावान्तरगृहाणि वा पुनर्ददर्श ॥ २ ॥

गो० टी०–निवेशनानामिति । निवेशनानां शालाः गृहान्तःशालाः । प्रधानैर्मुख्यैः शङ्खायुधचापैः शालन्ते प्रकाशन्त इति प्रधानशङ्खायुधचापशालाः पचाद्यच् । वेश्मादिषु हर्म्यप्रासादादिषु । चन्द्रशालाः शिरोगृहाणि ॥ २ ॥

३] ति० टी०–वसु धनम् । स्वबलेत्यत्र स्वशब्दो रावणवाची कुबेराद्रावणेन लङ्कायां आच्छिद्य गृहीतत्वात् । यद्वा स्वशब्दो हनुमद्वाची । स्वबलेनार्जितानि लब्धप्रवेशानि ॥ ३ ॥

रा० टी०–गृहाणीति । नानावसुभिः अनेकविधधनैः राजितानि देवासुरैरपि सुपूजितानि अतिप्रशंसितानि स्वबलार्जितानि रावणबलेन कुबेरात्प्राप्तानि गृहाणि कपिर्ददर्श ॥ ३ ॥

गो० टी०–गृहाणीति । नानावसुराजितानि नानारत्नराजितानि ॥ ३ ॥

४] ति० टी०–प्रयत्नेनाभितः सम्यगाहितानि यथायोगं स्थापितानि प्रयत्नाभिसमाहितानि विश्वकर्मकृतान्यपि मायया विचित्ररचनादक्षेण मयेन निर्मितानीव ॥ ४ ॥

रा० टी०–तानीति । प्रयत्नेन अभिसमाहितानि चतुर्दिक्षु क्रमेण संनिवेशितानि मयेन साक्षान्निर्मितानीव विश्वकर्मणा निर्मितत्वेऽपि अनेकमायामयत्वान्मयनिर्मितसदृशानीत्यर्थः, सर्वगुणोत्तराणि सर्वगुणैः श्रेष्ठानि गृहाणि ददर्श ॥४॥

गो० टी०–तानीति । प्रयत्नाभिसमाहितानि प्रयत्नेन यथायोगं स्थापितानि । मयेनेति विश्वकर्मा लक्ष्यते । महीतले निर्मितानि इवशब्देन मयस्य निर्मातृत्वव्याजमात्रम् रावणप्रयत्नेनैव निर्मितानीत्यर्थः । यद्वा अन्यानि गृहाणि विश्वकर्मनिर्मितानि इमानि तु मयं व्याजीकृत्य स्वयमुपायप्रदर्शनमुखेन निर्मितानीति पूर्वगृहेभ्यो विशेष उच्यते ॥ ४ ॥

५] ति० टी०–गृहोत्तमं प्रधानगृहेष्वप्युत्तमम् अप्रतिरूपरूपं निरुपमरूपम् ॥ ५ ॥

महीतले स्वर्गमिव प्रकीर्णं श्रिया ज्वलन्तं बहुरत्नकीर्णम् ।
नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसाऽवकीर्णम् ॥ ६ ॥
नारीप्रवेकैरिव दीप्यमानं तडिद्भिरभ्भोधरमर्च्यमानम् ।
हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे सुकृतं विमानम् ॥ ७ ॥
यथा नगाग्रं बहुधातुचित्रं यथा नभश्च ग्रहचन्द्रचित्रम् ।
ददर्श युक्तीकृतचारुमेघचित्रं विमानं बहुरत्नचित्रम् ॥ ८ ॥
महीकृता पर्वतराजिपूर्णा शैलाः कृता वृक्षवितानपूर्णाः ।
वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं केसरपत्रपूर्णम् ॥ ९ ॥
कृतानि वेश्मानि च पाण्डुराणि तथा सुपुष्पा अपि पुष्करिण्यः ।
पुनश्च पद्मानि सकेसराणि वनानि चित्राणि सरोवराणि ॥ १० ॥
पुष्पाह्वयं नाम विराजमानं रत्नप्रभाभिश्च विघूर्णमानम् ।
वेश्मोत्तमानामपि चोत्तमानं महाकपिस्तत्र महाविमानम् ॥ ११ ॥

६] ति० टी०–प्रकीर्णं पातितम्, रत्नकीर्णं रत्नपूर्णम्, रजसा पुष्परजसा ॥ ६ ॥

रा० टी०–तत इति । उच्छ्रितमेवस्य रूपमाकार इव रूपं यस्य काञ्चनस्य चारुरूपमिव रूपं यस्य तत् रक्षोधिपस्य रावणस्य आत्मबलानुरूपं तद्बलसदृशम् अत एव अप्रतिरूपम् उपमारहितं रूपं स्वरूपं यस्य तत् महीतले प्रकीर्णं पतितं स्वर्गमिव कुसुमावकीर्णं कुसुमैर्व्याप्तं रक्षोधिपस्य गृहोत्तमम् उत्तमं गृहं रजसा पुष्पाणामिति शेषः, अवकीर्णं व्याप्तं गिरेरग्रमिव ददर्श । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–तदन्तर्वर्तिपुष्पकविमानं दर्शयति–तत इति । अप्रतिरूपरूपम् अप्रतिमसौन्दर्यं प्रकीर्णं दैवाच्च्युतम् । रजसा पुष्परजसा । नारीप्रवेकैः नारीश्रेष्ठैः 'प्रवेकाद्युत्तमोत्तमाः' इत्यमरः । इवशब्दो वाक्यालंकारे । अर्च्यमानं सर्वैरिति शेषः । हंसप्रवेकैर्वाह्यमानं सुकृतां पुण्यकृतां विमानमिव स्थितमित्यन्वयः । युक्तीकृतमेघचित्रं पुञ्जीकृतमेघचित्रं चित्रमेघसंघातसदृशमित्यर्थः, विमानरत्नं पुष्पकम् ॥ ५–८ ॥

७] ति० टी०–नारीप्रवेकैर्नारीश्रेष्ठैः इवश्चार्थे । तडिद्भिरर्च्यमानं युज्यमानमम्भोधरं मेघमिव । हंसश्रेष्ठैर्वाह्यमानं वह्यमानं विमानमिव ॥ ७ ॥

८] ति० टी०–नानावर्णैरयुक्तोऽपि तद्युक्तः कृतो युक्तीकृतः स चासौ चारुमेघश्च तद्वद्विचित्रं विमानं पुष्पकाख्यम् ॥८॥

रा० टी०–नारीति । तडिद्भिरर्च्यमानमम्भोधरं मेघमिव नारीप्रवेकैः नारीश्रेष्ठैर्दीप्यमानं हंसप्रवेकैः हंसश्रेष्ठैः खे वाह्यमानं विमानमिव सुकृतं शोभनं कृतं कृतिः रचना यस्मिन् तत् नगाग्रं शैलाग्रं भागमिव युक्तीकृतेन युक्त्या निर्मितेन चारुमेघेन चित्रं विमानं ददर्श । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

९] ति० टी०–यत्र पुष्पके मही अनेकजनानामाधारस्थानं पर्वतराज्या पूर्णम् । पर्वतादयश्चात्र मणिस्वर्णादिनिर्मिताः, न त्विदं चित्ररूपमिति भ्रमितव्यम् अनन्तवानरसेनाया निर्बाधं तत्रावस्थानस्य वक्ष्यमाणत्वात् । किं च स्वामीच्छानुसारेण संकोचविकासौ तस्य वक्ष्यति स्वेच्छया हनुमद्देहवत् । वितानं समूहः । एकावल्यलंकारः ॥ ९ ॥

रा० टी०–महीति । यत्र विमाने मही स्थितिभूमिः पर्वतराजिपूर्णा कृता निर्मितपर्वतैः पूरितेत्यर्थः, शैलास्तु वृक्षवितानैः तरुसमूहैः पूर्णाः कृताः पुष्पं च केसरपत्राभ्यां पूर्णं कृतम् एकावल्यलङ्कृतिः ॥ ९ ॥

गो० टी०–महीति । यत्रेति शेषः । यत्र विमाने । पर्वतराजिपूर्णा मही कृता चित्ररूपेण लिखिता । एवमुत्तरत्रापि बोध्यम् । अत्र पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषत्वादधिकालङ्कारः ॥ ९ ॥

१०] ति० टी०–कृतानि अस्य यत्रेत्यादि शेषः ॥ १० ॥

रा० टी०–यस्मिन् पाण्डुराणि वेश्मानि गृहाणि कृतानि सुपुष्पाः शोभनपुष्पविशिष्टाः पुष्करिण्यः सरस्यः कृताः सकेसराणि पद्मानि कृतानि चित्राणि सरोवराणि वरसरोयुक्तानि वनानि कृतानि ॥ १० ॥

गो० टी०–कृतानीति । अत्रापि यत्रेत्यध्याहार्यम् । पुष्कराणि पुष्करिण्यः ॥ १० ॥

११] ति० टी०–पुष्पाह्वयं नाम ददर्शेत्यन्वयः । वेश्मोत्तमानां देववेश्मभूतविमानानां मध्ये उत्तमानं सौभाग्यपरमकाष्ठां प्राप्तम् ॥ ११ ॥

रा० टी०–तत् रत्नप्रभाभिः विराजमानं विघूर्णमानमितस्ततो भ्रमन्तं वेश्मोत्तमानां वेश्मीभूतदेवविमानानां मध्ये

१ अम्भोदवदिति गो. पाठः । २ सुकृतामिति गो. पाठः । ३ मेघचित्रं विमानरत्नमिति गो. पाठः । ४ सुपुष्पाण्यपि पुष्कराणीति गो. पाठः । ५ धन्यानीति गो. पाठः । ६ तथा वनानीति गो. पाठः । ७ विवर्धमानमिति गो. पाठः ।

कृताश्च वैदूर्यमया विहङ्गा रूप्यप्रवालैश्च तथा विहङ्गाः ।
चित्राश्च नानावसुभिर्भुजङ्गा जात्यानुरूपास्तुरगाः शुभाङ्गाः ॥ १२ ॥
प्रवालजाम्बूनदपुष्पपक्षाः सलीलमावर्जितजिह्मपक्षाः ।
कामस्य साक्षादिव भान्ति पक्षाः कृता विहङ्गाः सुमुखाः सुपक्षाः ॥ १३ ॥
नियुज्यमानाश्च गजाः सुहस्ताः सकेसराश्चोत्पलपत्रहस्ताः ।
बभूव देवी च कृता सुहस्ता लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥ १४ ॥
इतीव तद्गृहमभिगम्य शोभमानं सविस्मयो नगमिव चारुकन्दरम् ।
पुनश्च तत्परमसुगन्धि सुन्दरं हिमात्यये नगमिव चारुकन्दरम् ॥ १५ ॥

उच्चः अधिकः मानः सत्कारो यस्य तत् पुष्पाह्वयं नाम महाविमानं महाकपिर्ददर्श इत्यनुकृष्यते । श्लोकत्रयमेकान्वयि॥११॥

गो० टी०–पुष्पेति । पुष्पाह्वयं पुष्पकम् उच्चमानम् अधिकमानम् सर्वत्र ददर्शेत्यन्वयः ॥ ११ ॥

१२] ति० टी०–कृताश्चेति । तत्र विमान इति शेषः । नानावसुभी रूप्यस्वर्णाद्यैः । जात्यानुरूपा जातितुरङ्गसदृशाः । तुरगविशेषणं चैतत् ॥ १२ ॥

रा० टी०–कृता इति । तस्मिन् विमाने वैदूर्यमयाः विहङ्गाः कृताः रूप्यप्रवालैश्च विहङ्गाः कृताः नानावसुभिः अनेकविधमणिभिः चित्राः भुजङ्गा कृताः अनुरूपाः विमानस्थितियोग्याः जात्या शोभनजात्योपलक्षिताः शुभाङ्गाः तुरगाः अश्वाः कृताः ॥ १२ ॥

गो० टी०–कृताश्चेति । यत्रेति शेषः । नानावसुभिः नानारत्नैः । जात्यानुरूपाः जात्या सदृशाः । स्पष्टजातिस्वभावा इत्यर्थः ॥ १२ ॥

१३] ति० टी०–प्रवालजाम्बूनदकृतानि पुष्पाणि पक्षेषु येषाम् । आवर्जिताः संकुचिता जिह्मा वक्राः पक्षा येषां ते । साक्षात्कामस्य पक्षा इव येषां पक्षा भान्ति तदुद्दीपकत्वात् । तादृशा उच्यमानगुणा विहंगास्तत्र कृताः ॥ १३ ॥

रा० टी०–प्रवालेति । प्रवालैः जाम्बूनदपुष्पैश्च युक्ताः पक्षाः येषाम् अत एव सुपक्षाः शोभनपक्षविशिष्टाः सलीलं लीलापूर्वकम् आवर्जिताः शिल्पविशेषेण मक्षिकादिवर्जनक्रियाविशिष्टाः जिह्मपक्षाः येषां ते सुमुखाः विहङ्गाः कृताः अत एव तेषां पक्षाः कामस्य कामाश्रयीभूतमनसः पक्षाः प्रग्रहीतार इव भान्ति तत्पक्षदर्शनमात्रेण विमाने स्थितिः प्रतीयत इत्यर्थः ॥ १३ ॥

गो० टी०–प्रवालेति । प्रवालजाम्बूनदकृतानि पुष्पाणि पक्षेषु येषां ते प्रवालजाम्बूनदपुष्पपक्षाः । सलीलमावर्जितजिह्मपक्षाः सलीलमालम्बितवक्रपक्षाः । कामस्य पक्षा इव कामस्य सहाया इव ॥ १३ ॥

१४] ति० टी०–नियुज्यमाना व्याप्रियमाणाः । वक्ष्यमाणाया लक्ष्म्या अभिषेके इति शेषः । हस्ताः शुण्डा । पद्माकरविहारिगजाकारनिर्माणात्सकेसरत्वमुत्पलपत्रहस्तत्वं च तेषां तादृशा गजास्तत्र कृता बभूवुरिति शेषः , पद्मिनि पद्मवत्सरसि ॥ १४ ॥

रा० टी०–नियुज्यमाना इति । पद्मिनि पद्मविशिष्टे विमानसरसि उत्पलपत्रहस्ताः अत एव सकेसराः गजा नियुज्यमानाः निर्मिता बभूवुः पद्महस्ता पद्मयुक्तकरा अत एव सुहस्ता शोभनहस्तविशिष्टाः देवीः अतिप्रकाशविशिष्टा लक्ष्मीः कृता निर्मिता बभूव बभूवेति वचनविपरिणामेन पूर्वान्वय्यपि ॥ १४ ॥

गो० टी०–नियुज्यमाना इति । नियुज्यमानाः स्वयमेवात्मानं नियोजयन्तः कर्मकर्तरि यक् । यत्र विमाने पद्मिनि पद्माकरे । स्वयमेवोत्पलपत्राभिषेककर्मणि प्रवर्तमानाः सुहस्ताः शोभनशुण्डादण्डाः सकेसराः कृतजलावगाहत्वेनाङ्गलग्नकिञ्जल्काः । उत्पलपत्रहस्ताः उत्पलपत्रवर्षिणः । गजाश्च कृताः तदभिषिच्यमाना पद्महस्ता अत एव सुहस्ता लक्ष्मीश्च कृता बभूवेत्यर्थः ॥ १४ ॥

१५] ति० टी०–इतीवेवंप्रकारं चारुकन्दरं चारुगुहं नगमिव पर्वतमिव चारुदर्शनं तद्गृहमभिगम्य सविस्मयः बभूवेति शेषः । हिमात्यये वसन्ते परमसुगन्धिचारुकन्दरं नगमिव वृक्षमिव कन्दरोऽत्र कोटरः । पुनश्चाभिगम्य सविस्मयोऽभूदिति शेषः परिच्छेदानवगमादिति भावः ॥ १५ ॥

रा० टी०–इतीवेति । चारुकन्दरं शोभनकोटरविशिष्टं परमसुगन्धि नगं वृक्षमिव सुन्दरं परमसुगन्धि नगं पर्वतमिव तत् गृहं पुनः पुनरभि गम्यसविस्मयः विस्मयसहितः अभवदिति शेषः ॥ १५ ॥

गो० टी०–इतीवेति । इवशब्दो वाक्यालंकारे । तद्गृहं तस्य रावणस्य गृहम् । सविस्मयः अभूदिति शेषः । नगं पर्वतमिव स्थितम् । शोभनं शोभमानम् । चारुशोभनं चारुमङ्गलम् । इतीवेत्येकनिपातो वा प्रकारार्थः । इतीव तद्गृहम् अभिगम्य अभिगत्य अद्भुतदर्शनात्पुनश्चाभिगम्य सविस्मयोऽभूदिति योजना । रुचिरा वृत्तमिदम् ' चतुर्भैरिह रुचिरा जभस्जगाः' इति लक्षणात् ॥ १५ ॥

---

१ पक्षा इवेति रा. पाठः । २ त्विति गो. पाठः । ३ शोभनमिति गो. पाठः ।

ततः स तां कपिरभिपत्य पूजितां चरन्पुरीं दशमुखबाहुपालिताम् ।
अदृश्य तां जनकसुतां सुपूजितां सुदुःखितां पतिगुणवेगनिर्जिताम् ॥ १६ ॥
ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः ।
अपश्यतोऽभवदतिदुःखितं मनः सचक्षुषः प्रविचरतो महात्मनः ॥ ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

पुनः पुष्पकविमानं विस्तरतो वर्णयति ।

स तस्य मध्ये भवनस्य [3]संस्थितो महद्विमानं मणिरत्नचित्रितम् ।
प्रतप्तजाम्बूनदजालकृत्रिमं ददर्श [4]धीमान्पवनात्मजः कपिः ॥ १ ॥
[5]तदप्रमेयप्रतिकारकृत्रिमं कृतं स्वयं साध्विति विश्वकर्मणा ।
दिवं गते वायुपथे प्रतिष्ठितं व्यराजतादित्यपथस्य लक्ष्म [6]तत् ॥ २ ॥

१६] ति० टी०–अभिपत्याभिपत्य चरन्संचरन् । पतिगुणवेगनिर्जितां पतिगुणवेगेन पतिगुणनिरन्तरध्यानेन निर्जितां निर्जितदुःखामदृश्यादृष्ट्वा दुःखितोऽभूदिति शेषः । आर्षो ल्यप् १६

रा० टी०–तत इति । दशमुखबाहुनिर्जितां रावणेन वशीकृतां पूजिताम् अतिप्रशंसाविशिष्टां पुरीं लङ्कामभिपत्य प्राप्य चरन् सीतान्वेषणार्थम् इतस्ततो विचरन् सन् सुपूजितां महात्मभिः अतिप्रशंसितां सुदुःखितां वियोगदुःखं प्राप्तां पतिगुणवेगनिर्जितां पतिगुणानां समाधिकरहितवात्सल्यादीनां वेगेन स्मरणजनितोद्वेगेन निर्जितां स्थातुमशक्यां जनकसुताम् अदृश्य अदृष्ट्वा दुःखितोऽभवदिति शेषः ॥ १६ ॥

गो० टी०–तत इति । अदृश्य अदृष्ट्वा । ऋषिनिपातनान्नञ्पूर्वेऽपि ल्यप् । सुदुःखितः अभूदिति शेषः । पतिगुणवेगनिर्जितां भर्तृगुणजवेन वशीकृताम् ॥ १६ ॥

१७] ति० टी०–बहुविधभावितात्मनो नानाप्रकारेण सर्वजगत्पूजितस्वभावस्य स्वभाववाच्यात्मशब्दः । कृतात्मनो शिक्षितान्तःकरणस्य सुवर्त्मनः शोभननीतिमार्गवर्तिनः सचक्षुषः श्रुतिस्मृतिन्यायरूपचक्षुःसहितस्य ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—तत इति । बहुविधेन दास्याद्यनेकप्रकारभावनया भावितः परिशीलितः आत्मा परात्मा रामो येन तस्य अत एव सचक्षुषः अप्राकृतचक्षुर्विशिष्टस्य कृतात्मनः कृतान्वेषणप्रयत्नस्य सुवर्त्मनः शोभनमार्गावलम्बिनः प्रविचरतः जनकसुताम् अपश्यतः महात्मनो हनुमतो मनः अतिदुःखितमभवत् ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

गो० टी०–ततस्तदेति । बहुविधभावितात्मनः बहुविधं यथा भवति तथा चिन्तितात्मनः कृतात्मनः निशितबुद्धेः सुवर्त्मनः सदाचारसंपन्नस्य सचक्षुषः दूरसूक्ष्मादिदर्शनेषु अप्रतिहतनयनतेजसः महात्मनः महाधैर्यस्य ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

१] ति० टी०–अथ विशिष्य पुष्पकं वर्णयितुमाह—स इति । मणिरत्नैर्मणिश्रेष्ठैश्चित्रितं प्रतप्तजाम्बूनदजालानां तन्मयगवाक्षाणां कृत्रिमं कृतिर्यस्मिंस्तत्तस्य भवनस्य रावणगृहस्य मध्ये महद्विमानं पुष्पकं ददर्श ॥ १ ॥

रा० टी०–विमानमेव वर्णयन्नाह–स इत्यादिभिः । स हनुमान् प्रतप्तजाम्बूनदजालेन कृत्रिमं रचितं महद्विमानं ददर्श १

गो० टी०–पूर्वोक्तविमानवर्णनं विस्तृणीते–स तस्येत्यादि । प्रतप्तजाम्बूनदजालकृत्रिमं निष्टप्तस्वर्णविशेषकृतकृत्रिमपक्ष्यादिकम् ॥ १ ॥

२] ति० टी०–अप्रमेयप्रतिकारकृत्रिममप्रमेयैरपरिच्छेद्यसौन्दर्यादिभिः प्रतिकारैः प्रतिमादिभिः कृत्रिमं निर्दृत्तचित्रशोभम् । पाठान्तरं त्वसांप्रदायिकमिति कतकः । विश्वकर्मणा च स्वयं साध्विति कृतम् मन्निर्मितेष्विदमतिसाध्वित्यनुमोदितमित्यर्थः । दिवमाकाशं गते वायुपथे प्रतिष्ठितम्, वायुपथस्यैवादित्यपथत्वात्तस्य चिह्नभूतम् ॥ २ ॥

रा० टी०–तदिति । अप्रमेयैः सौन्दर्यादिभिः प्रमातुमशक्यैः प्रतिकारैः प्रतिमाभिः कृत्रिमं रचितम् विश्वकर्मणा स्वयं साधु निर्मितमितिहेतोर्दिवङ्गते वायुपथे प्रतिष्ठितम् अत एव आदित्यपथस्य लक्ष्मवत् बोधकमिव तद्विमानं व्यराजत । आदित्यपथ इति वायुपथस्य नामान्तरमिति न विरोधः ॥ २ ॥

१ निर्जितामिति रा.पाठः। २ स्थिति गो.पाठः। ३ संस्थितमिति गो.पाठः। ४ वीर इति गो.पाठः । ५ तदप्रमेयाप्रतीति गो.पाठः । ६ वदिति गो.पाठः।

न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न महार्घरत्नवत् ।
न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्न महाविशेषवत् ॥ ३ ॥
तपःसमाधानपराक्रमार्जितं मनःसमाधानविचारचारिणम् ।
अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषनि[1]र्मितम् ॥ ४ ॥
मनः समाधाय तु शीघ्रगामिनं दुरासदं मारुततुल्यगामिनम् ।
महात्मनां पुण्यकृतां महर्द्धिनां यशस्विनामभ्युदामिवालयम् ॥ ५ ॥
विशेषमालम्ब्य विशेषसंस्थितं विचित्रकूटं बहुकूटमण्डितम् ।
मनोभिरामं शरदिन्दुनिर्मलं विचित्रकूटं शिखरं गिरेर्यथा ॥ ६ ॥

गो० टी०–तदिति । अप्रमेयाप्रतिकारकृत्रिमम् अपरिच्छेयाप्रतिक्रियकृत्रिमम् । तत्र हेतुमाह–कृतं स्वयं साध्विति । विश्वकर्मणा स्वयं निर्मात्रा विश्वकर्मणा इदं साधु सुन्दरमिति श्लाघापूर्वं कृतम् । सर्वत्राप्रतिहतसंचारं चैतदित्याह–दिवं गतम् आकाशं गतम् । वायुपथप्रतिष्ठितं वायुमार्गभूतान्तरिक्षस्थितम् । मध्ये भवनस्य संस्थितमिति पूर्वमुक्तत्वात् । भूतलप्रत्यासन्नान्तरिक्षस्थितमित्यर्थः । आदित्यपथस्य लक्ष्मवत् । लक्ष्म लक्ष्मणं व्यावर्तकं व्यराजत प्रचकाश इत्यर्थः ॥२॥

३] ति० टी०–तत्र तादृशं किंचित्र यत्प्रयत्नतो न कृतम्, अपि तु सर्वं प्रयत्नकृतमेवेत्यर्थः । यदवयवजातं महार्घरत्नवन्न बहुमूल्यरत्नवत्र तादृशं किंचिदपि तत्र न । ये विशेषा रचनाविशेषास्तत्र नियताः प्रतिष्ठितास्ते सुरेषु सुरविमानेष्वपि न । महाविशेषो गुणाधिक्यम् ॥ ३ ॥

रा० टी०–नेति । यत् संस्थानं प्रयत्नतो न कृतं तत् तत्र विमाने किंचित्र सर्वं प्रयत्नतः कृतमित्यर्थः, यत् महार्हरत्नवत् न तत् तत्र किञ्चित्र यत् महाविशेषवत् अतिरचनाविशिष्टं न तत् किञ्चित्र अत एव ते पुष्पकविमानस्थरचनासदृशा विशेषाः महारचनाः सुरेषु सुरविमानेष्वपि न ॥ ३ ॥

गो० टी०–न तत्रेति । ते विशेषाः तद्विमानस्थितविशेषाः । सुरेष्वपि सुरालयेष्वपि ॥ ३ ॥

४] ति० टी०–तपसोपवासादिना समाधानेन भगवति चित्तसमाधानेन लब्धो यः पराक्रमस्तेन रावणार्जितम् । मनःसमाधानेन यत्र विचारो गमनस्य तत्र संचरणशीलं मनःसंकल्पितदेशगमनशीलम् । संस्थानविशेषा रचनाविशेषाः । ततस्ततस्तस्मात्तस्मादाहृतेन तुल्येन दिव्यविमाननिर्माणोचितेन विशेषेण विशिष्टपदार्थेन निर्मितम् ॥ ४ ॥

रा० टी०–तप इति । तपस्समाधानाभ्यां कृच्छ्रवान्द्रायणादिदेवविशेषध्यानाभ्यां जातेन पराक्रमेण अर्जितं रावणेन प्राप्तं मनस्समाधानस्य एकाग्रमनसः विचारेण गमनेनैव चारोगमनमस्त्यस्मिन् तम् अर्धर्चादित्वात्पुंस्त्वं संज्ञापूर्वकविधेरनित्यत्वाल्लुगभावो वा । अनेकैर्बहुभिः संस्थानविशेषैः विलक्षणावयवैः निर्मितं ततस्ततः मनोवेगत्वात् विलक्षणावयवविशिष्टत्वाच्च हेतोः तुल्यविशेषयोर्निर्मितिः प्रक्षेपो यस्मात् समाधिकरहितमित्यर्थः ॥ ४ ॥

गो० टी०–तपस्समाधानेत्यादि पञ्चश्लोकी कुलकम् । सर्वत्र ददर्शेति संबन्धः । तपस्समाधानपराक्रमार्जितं तपस्समाधानेन तपोऽनुष्ठानेन पराक्रमेण च अर्जितम् । मनस्समाधानविचारचारिणं समाधानमभिसंधानम् कर्मणि चैतत् विचारो विविधा गतिः मनोभिसंहितविविधगतिचारिणम् । अनेकसंस्थानविशेषनिर्मितम् अनेकैः संस्थानविशेषैः विमानगोपुरादिसन्निवेशैः निर्मितम् ततस्ततस्तुल्यविशेषदर्शनम् तत्र तत्र तुल्यं विशेषदर्शनं यस्मिन् ॥ ४ ॥

५] ति० टी०–मनः समाधाय स्वामिमनोऽनुरुध्य तु शीघ्रगामित्वादिधर्मकं दुरासदम् पापिभिरिति शेषः । 'दुरावरम्' इति पाठे अशुभिर्दुर्निवारमित्यर्थः । महर्द्धिनाम् दीर्घाभावश्छान्दसः एवं तुल्यगामिनमित्यत्र पुंस्त्वम् विमानशब्दोऽर्चादिर्वा । अभ्युदां महासुखानां पुण्यकृतामेवालयमास्पदम् इवशब्द एवार्थे । अत्र तस्याचेतनत्वेऽपि तदभिमानिदेवतायाश्चित्तज्ञत्वादिति बोध्यम् ॥ ५ ॥

रा० टी०–मनस्समाधाय स्वामिमनोनुसृत्यैव शीघ्रगामि दुरासदं पराभवितुमशक्यं महर्द्धिनां महत् ऋद्धं तपोलब्धिरस्ति येषु तेषाम् एतेन दीर्घाभाव आर्ष इति भट्टोक्तिश्चिन्त्या महात्मनामभ्युदाम् अत्यानन्दानामालयमिव ॥ ५ ॥

गो० टी०–मनस्समाधाय मन एकाग्रीकृत्य । स्वयं मनःस्वीति यावत् । दुरावरं दुर्वारम् । महर्द्धिनां महर्द्धीनाम् अपि मापं मपं कुर्याच्छन्दोभङ्गं न कारयेत्' इत्युक्तरीत्या वृत्तभङ्गभिया ह्रस्वोच्चारणम् । अभ्युदाम् इन्द्रादीनाम् ॥ ५ ॥

६] ति० टी०–विशेषं गतिविशेषमालम्ब्य । विशेषे व्योमलक्षणदेशविशेषे संस्थितम् विचित्राणामाश्चर्यवस्तूनां कूटं समवायभूतम् बहुभिः कूटैः शालाभिर्मण्डितम् गिरेर्विचित्रावान्तरशृङ्गवच्छिखरमिव ॥ ६ ॥

रा० टी०–विशेषं विशेषगमनादि आलम्ब्य विशेषे वायुपथे संस्थितं विचित्राणि कूटानि शिखराणि यस्मिन् तत् बहुकूटमण्डितं समीपस्थबहुकूटैः शोभितम् अत एव मनोभिरामं विचित्रकूटं गिरेः शिखरं यथा शृङ्गमिव ॥ ६ ॥

१ महार्हेति रा. पाठः । २ दर्शनमिति गो. पाठः ।

वहन्ति यैत्कुण्डलशोभिताननाः महाशना व्योमचरा निशाचराः ।
विवृत्तविध्वस्तविशाललोचना महाजवा भूतगणाः सहस्रशः ॥ ७ ॥
वसन्तपुष्पोत्करचारुदर्शनं वसन्तमासादपि चारुदर्शनम् ।
स पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः ॥ ८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

रावणभवने सीतामन्वेषयन्हनुमांस्तत्र स्थितपुष्पकविमानमारुह्यानेकावस्थापन्नप्रसुप्तनारीगणान्विलोकयति ।

तस्यालयवरिष्ठस्य मध्ये [1]विमलमायतम् । ददर्श भवनश्रेष्ठं हनुमान्मारुतात्मजः ॥ १ ॥
अर्धयोजनविस्तीर्णमायतं योजनं [3]महत् । भवनं राक्षसेन्द्रस्य बहुप्रासादसंकुलम् ॥ २ ॥
मार्गमाणस्तु वैदेहीं सीतामायतलोचनाम् । सर्वतः परिचक्राम हनूमानरिसूदनः ॥ ३ ॥
उत्तमं राक्षसावासं हनुमानवलोकयन् । आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ ४ ॥

गो० टी०–विशेषमिति । विशेषमालम्ब्य विशेषसंस्थितं विशेषं गृहीत्वा विशेषेण संस्थितम् । सविशेषविशेषणसंस्थितमिति यावत् । सविशेषसंस्थानविशेषविशिष्टमित्यर्थः । कूटानां विचित्रत्वबहुत्वे विशेषणद्वयेन दर्शयति–विचित्रेत्यादिना । विचित्रकूटं शिखरं गिरेर्यथा । कूटम् अवान्तरशृङ्गं शिखरं महाशृङ्गमिति प्रयोगादवधार्यते ॥ ६ ॥

७] ति० टी०–उच्यमानविशेषणा भूतगणा यद्वहन्ति तद्विमानं तत्र ददर्शेत्यन्वयः । विवृत्तानि निघृर्णानि विध्वस्तानि त्यक्तनिमेषाणि विशालानि लोचनानि येषाम् । निशाचरा निशास्वप्यहरविशेषं चरन्ति ते ॥ ७ ॥

रा० टी०–निशाचराः निशायामधिकं चरणशीलाः विवृत्तानि आघूर्णितानि विध्वस्तानि निमेषरहितानि विशालानि लोचनानि येषां ते सहस्रशो भूतगणा यं वहन्ति तत् ॥ ७ ॥

गो० टी०–वहन्तीति । यं यत् आर्षो व्यत्ययः । महाशनाः महाकाया इत्यर्थः । व्योमचराः व्योमचरसदृशसंस्थानाः विवृतविध्वस्तविशाललोचनाः विवृत्तानि वर्तुलानि विध्वस्तानि भुग्नानि विशालानि लोचनानि येषां ते तथा महाजवाः महाजवा इव स्थिताः भूतगणाः गोपुरवाहका इव प्रतिमारूपेण स्थिताः अन्यथा रावणान्तःपुरे पुरुषसञ्चारायोगात् कामगस्य विमानस्य वहनासंभवाच्च । यद्वा शिविकावाहका इव भूतगणा अधोभागे वहन्ति तद्वारेणैव कामगत्वमपि चेतनप्रेरणं विना अचेतनसंचारस्यात्यन्तमनुचितत्वाच्च ॥ ७ ॥

८] ति० टी०–वसन्तपुष्पोत्करचारुदर्शनं वसन्तकालिकपुष्पसमूहेन चारुदर्शनम् ॥ ८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टमः सर्गः ॥ ८ ॥

रा० टी०–वसन्तपुष्पोत्करेण वसन्तकालिकपुष्पसमूहेन चारु दर्शनं यस्य अत एव वसन्तमासात् वसन्तकालादपि चारु दर्शनं यस्य तत् विमानसत्तमं पुष्पकं वानरवीरसत्तमो हनुमान् ददर्श । श्लोकपञ्चकमेकान्वयि ॥ ८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डेऽष्टमः सर्गः ॥ ८ ॥

गो०टी०–वसन्तेति । उत्करः समूहः ॥ ८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेऽष्टमः सर्गः ॥ ८ ॥

१] ति० टी०–तस्येति । आलयवरिष्ठस्य लङ्कामध्यवर्तिनो गृहसमूहवतो महागृहस्य ॥ १ ॥

रा० टी०–अन्वेषणमेव वर्णयन्नाह–तस्येत्यादिभिः । आलयवरिष्ठस्य महाभवनस्य मध्ये विमलं रजःप्रभृतिमलरहितम् आयतं भवनं ददर्श ॥ १ ॥

गो० टी०–तस्येत्यादि । आलयवरिष्ठस्य पुष्पकस्य ॥ १ ॥

२-३] ति० टी०–अर्धयोजनविस्तीर्णं तिर्यक्प्रमाणम् ॥ २ ॥ ३

रा० टी०–अर्धेति । अर्धयोजनविस्तीर्णं योजनम् एकयोजनपरिमितमायतं दीर्घं राक्षसेन्द्रस्य भवनं सीतां मार्गमाणो हनुमान् परिचक्राम । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो०टी०–तद्भवनं कियत्प्रमाणमित्यत्राह–अर्धयोजनेति २

गो० टी०–मार्गमाण इति । सर्वतः पुष्पकादन्यत्र सर्वत्र । पुष्पकारोहणस्य पश्चाद्वक्ष्यमाणत्वात् ॥ ३ ॥

४] ति० टी०–आवासं बहुराक्षससाधारणं वासस्थानम् । राक्षसेन्द्रनिवेशनं तन्मात्रवासस्थानम् ॥ ४ ॥

रा० टी०–उत्तममिति । राक्षसावासं राक्षसानां गृहं

१ यमिति गो. रा. पाठः । २ विपुलमिति गो. पाठः । ३ हि तदिति गो. पाठः ।

चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च । परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥ ५ ॥
राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् । आहृताभिश्च विक्रम्य राजकन्याभिराहृतम् ॥ ६ ॥
तन्नक्रमकराकीर्णं तिमिङ्गिलझषाकुलम् । वायुवेगसमाधूतं पन्नगैरिव सागरम् ॥ ७ ॥
या हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने । सा[1] रावणगृहे रम्या[2] नित्यमेवानपायिनी ॥ ८ ॥
या च राज्ञः कुबेरस्य यमस्य वरुणस्य च । तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्वि[3]ह ॥ ९ ॥
तस्य हर्म्यस्य मध्यस्थवेश्म चान्यत्सुनिर्मितम्[4] । बहुनिर्यूहसंयुक्तं ददर्श पवनात्मजः ॥ १० ॥
ब्रह्मणोऽर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा । विमानं पुष्पकं नाम सर्वरत्नविभूषितम् ॥ ११ ॥
परेण तपसा लेभे यत्कुबेरः पितामहात् । कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥ १२ ॥
ईहामृगसमायुक्तैः कार्तस्वरहिरण्मयैः । सुकृतैराचितं स्तम्भैः प्रदीप्तमिव च श्रिया ॥ १३ ॥

अवलोकयन् सन् लक्ष्मीवान् शौर्यादिसंपत्तिविशिष्टो हनुमान् उत्तमं राक्षसेन्द्रनिवेशनं रावणमुख्यगृहम् आससाद प्राप॥४॥

गो० टी०–उत्तममिति । राक्षसेन्द्रनिवेशनं पुष्पकमध्यस्थालयादन्यन्मूलस्थानम् । राक्षसीभिरित्यादिश्लोकद्वये आससादेति संबध्यते । रावणस्य निवेशनमिति पुनरुपादानमपूर्वविशेषणविवक्षया । नक्रः कुम्भीरः तिमिङ्गिलः महामत्स्यः झषः केवलमत्स्यः ॥ ४–९ ॥

५] ति० टी०–परिक्षिप्तं युक्तम् । ईदृशगजादिसत्त्वेऽप्यसंबाधत्वेनातिविस्तृतत्वं सूच्यते ॥ ५ ॥

६] ति० टी०–राक्षसीभी राक्षसजातिजाभिः पत्नीभिराहृतम् तथा विक्रम्याहृताभी राजकन्याभिश्चाहृतम् ॥ ६ ॥

७] ति० टी०–पन्नगैर्युतं सागरमिव तत्पश्यति स्म ॥७॥

रा० टी०–निवेशनमेव वर्णयन्नाह–चतुरित्यादिभिः । चतुर्विषाणैः दन्तचतुष्टयविशिष्टैः त्रिविषाणैश्च द्विरदैः परिक्षिप्तं परिवृतम् उदायुधैः राक्षसैरिति शेषः, राक्षसीभिश्च रक्ष्यमाणम् आहृताभिः पत्नीभिः राजकन्याभिश्च आहृतं नक्रमकराकीर्णं पन्नगैर्युतं सागरमिव सागरसदृशं तत् रावणस्य निवेशनं ददर्शेति शेषः । श्लोकत्रयमेकान्वयि ॥ ५–७ ॥

८] ति० टी०–लक्ष्मीः शोभा । रावणगृहे लङ्कायाम् ॥८॥

रा० टी०–येति । या लक्ष्मीः वैश्रवणे कुबेरे हरिवाहने हरितास्वरूपवाहनवति इन्द्रे च सा अनपायिनी विनाशरहिता लक्ष्मीः रावणगृहे नित्यमेव वसतीति शेषः ॥ ८ ॥

९] ति० टी०–ऋद्धिरैश्वर्यं तद्विशिष्टा ततोऽप्यधिका ॥९॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–येति ! कुबेरादिगृहे यादृशी ऋद्धिः तादृशी तद्विशिष्टा ततोऽधिका वा रक्षोगृहेष्वस्ति ॥ ९ ॥

१०] ति० टी०–तस्य हर्म्यस्यार्धयोजनविस्तीर्णत्वादिधर्मणः । वेश्म सस्त्रीकशयनगृहमिति कतकः । वेश्म पुष्पकाख्यमिति तीर्थः अत्र तीर्थव्याख्या ज्यायसी । निर्यूहो मत्तवारणः ॥ १० ॥

रा० टी०–तस्येति । तस्य अर्धयोजनविस्तीर्णत्वादिमतः हर्म्यस्य मध्यस्थं सुनिर्मितं बहुनिर्यूहैर्मत्तगजैः संयुतमन्यद्विलक्षणं वेश्म पुष्पकं ददर्श ॥ १० ॥

गो० टी०–तस्य हर्म्यस्येत्यादि । पूर्वमुक्तार्थस्यापि पुनरुपन्यासः पुष्पकस्य मध्ये रावणस्य निवासभवनमन्यद्स्तीत्यस्यार्थस्य स्पष्टीभावार्थम् । निर्यूहः मत्तवारणः ॥ १० ॥

११–१२] ति० टी०–पुनर्हनुमदारोहणशेषतया पुष्पकं वर्णयति—ब्रह्मणोऽर्थे इति । भगवतो लीलाफलकमित्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–ब्रह्मण इति । दिवि स्वर्गे ब्रह्मणोऽर्थे यत्पुष्पकं विश्वकर्मणा कृतं यच्च कुबेरः तपसा पितामहाल्लेभे तत्पुष्पकं राक्षसेश्वरो रावणः कुबेरं जित्वा लेभे । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–ब्रह्मणोऽर्थ इत्यादि । ब्रह्मणोऽर्थे कृतं यत्कुबेरस्तपसा लेभे तद्वेश्म ददर्शेति पूर्वेण संबन्धः ॥ ११ ॥

गो० टी०–कुबेरमित्यादि । ईहामृगसमायुक्तैः टंकप्रतिकृतियुक्तैः कार्तस्वरहिरण्मयैः कार्तस्वरं सुवर्णं हिरण्यं रजतम् 'कृताकृतं हेमरूप्यं हिरण्यमभिधीयते' इति रजतस्यापि हिरण्यत्वाभिधानात् । जालवातायनैः जालानि तिर्यग्ऊर्ध्वविन्यस्तफलकघटितानि वातायनानि केवलानि रन्ध्राणि अर्थवैशद्यार्थमेकार्थे शब्दद्वयप्रयोगो वा । महानीलाः सिंहलद्वीपोद्भवनीलरत्नानि । महाधनैः महामूल्यैः । निस्तुलाभिः सुष्टत्ताभिः । तलेन निर्मितेनेति शेषः । आदित्यतरुणोपमं तरुणादित्योपमम् एतदन्ते लेभे तद्राक्षसेश्वर इति संबध्यते । अन्यथा कूटागारैरित्यनेन पुनरुक्तिः स्यात् ॥ १२–१९ ॥

१३] ति० टी०–कार्तस्वरहिरण्ये स्वर्णजातिविशेषौ रूप्यस्वर्णे इति कश्चित् । ईहामृगो टंकस्तत्प्रतिमायुक्तैः ॥ १३॥

रा० टी०–ईहेति । ईहामृगाः टंकाः तैस्तत्प्रतिमाभिः समायुक्तैः कार्तस्वरहिरण्मयैः सुकृतैः शोभनकृत्या निर्मितैः स्तम्भैः राजितं श्रिया शोभया प्रदीप्तमिव । कार्तस्वरहिरण्ययोः अवान्तरभेदात् न पौनरुक्त्यम् ॥ १३ ॥

---

१ चेन्द्रे इति गो. रा. पाठः । २ रावणस्य गृहे इति रा. पाठः । ३ सर्वेति गो. पाठः । ४ अपीति रा. पाठः । ५ मध्यस्थमिति गो. पाठः ।

मेरुमन्दरसंकाशैरुल्लिखद्भिरिवाम्बरम् । कूटागारैः शुभागारैः सर्वतः समलंकृतम् ॥ १४ ॥
ज्वलनार्कप्रतीकाशैः सुकृतं विश्वकर्मणा । हेमसोपानयुक्तं च चारुप्रवरवेदिकम् ॥ १५ ॥
जालवातायनैर्युक्तं काञ्चनैः स्फाटिकैरपि । इन्द्रनीलमहानीलमणिप्रवरवेदिकम् ॥ १६ ॥
विद्रुमेण विचित्रेण मणिभिश्च महाधनैः । निस्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितम् ॥ १७ ॥
चन्दनेन च रक्तेन तपनीयनिभेन च । सुपुण्यगन्धिना युक्तमादित्यतरुणोपमम् ॥ १८ ॥
[कूटागारैर्वराकारैर्विविधैः समलंकृतम् ।]
विमानं पुष्पकं दिव्यमारुरोह महाकपिः । तत्रस्थः सर्वतो गन्धं पानभक्ष्यान्नसंभवम् ॥ १९ ॥
दिव्यं संमूर्छितं जिघ्रन्रूपवन्तमिवानिलम् । स गन्धस्तं महासत्त्वं बन्धुर्बन्धुमिवोत्तमम् ॥ २० ॥
इत एहीत्युवाचेव तत्र यत्र स रावणः । ततस्तां प्रस्थितः शालां ददर्श महतीं शिवाम् ॥ २१ ॥
रावणस्य महाकान्तां कान्तामिव वरस्त्रियम् । मणिसोपानविकृतां हेमजालविराजिताम् ॥ २२ ॥

१४] ति० टी०–कूटागारैर्गुप्तस्वल्पगृहैः शुभागारैर्विहारयोग्यगृहैः ॥ १४ ॥

१५] ति० टी०–चार्व्यः सुन्दराः प्रवराः श्रेष्ठा वेदिका यस्मिंस्तत् ॥ १५ ॥

रा० टी०–मेरुमिति । मेरुमन्दरसंकाशैः अत एव अम्बरमाकाशमुल्लिखद्भिरिव ज्वलनार्कप्रतीकाशैः कूटागारैः अपरिज्ञेयगृहैः शुभागारैर्विहारोचितगृहैः समलंकृतम् विश्वकर्मणा सुकृतं निर्मितम् हेमसोपानैर्युक्तं चार्व्यो मनोहराः प्रवराः उन्नताः वेदिकाः यस्मिन् तत् ॥ १४ ॥ १५ ॥

१६] ति० टी०–जालवातायनयोः काञ्चनकार्तस्वरयोर्मध्वासवयोश्च कंचिद्भेदं परिकल्प्य निर्वाहः एवमिन्द्रनीलमहानीलयोरपि ॥ १६ ॥

रा० टी०–काञ्चनैः स्फाटिकैश्च जालैर्वातायनैर्गवाक्षैश्च युक्तम् इन्द्रनीलमहानीलमणिभ्यां प्रवरा प्रकाशितेत्यर्थः, वेदिका यस्मिन् इन्द्रनीलमहानीलयोः अवान्तरभेदान्न पौनरुक्त्यम् ॥ १६ ॥

१७] ति० टी०–निस्तुलाभिर्वर्तुलाभिर्निरुपमाभिर्वा । तलेन कुट्टिमप्रदेशेन ॥ १७ ॥

रा० टी०–विद्रुमादिना निस्तुलाभिः उपमारहिताभिर्मुक्ताभिश्च उपलक्षितेन तलेन कुट्टिमप्रदेशेन अभिविराजितम् ॥ १७ ॥

१८] ति० टी०–आदित्यतरुणोपमं तरुणादित्यसदृशम् १८

रा० टी०–तपनीयनिभेन सुवर्णवर्णेन पुण्यगन्धिना रक्तेन चन्दनेन युक्तम् आदित्यतरुणोपमं तरुणादित्यसदृशं पुष्पकं विमानं महाकपिरारुरोह । सार्धश्लोकपञ्चकमेकान्वयि ॥ १८ ॥

१९] ति० टी०–तत्रस्थः पुष्पकविमानस्थः ॥ १९ ॥

रा० टी०–तत्रेति । तत्रस्थः तद्विमानस्थितो हनुमान् संमूर्छितं व्याप्तं दिव्यपानादिसंभवं गन्धं रूपवन्तमनिलमिव जिघ्रत् अजिघ्रत् ॥ १९ ॥

गो० टी०–तत्रस्थ इति । जिघ्रत् अजिघ्रत् ॥ २० ॥ २१ ॥

२०] ति० टी०–संमूर्छितं व्याप्तं गन्धवहमनिलमपि तद्गन्धेन रूपवन्तमिव गन्धद्रव्यरूपमिव तद्वायुसंबन्धात्स गन्धः स्वयं महासत्त्वमुत्तमं बन्धुं बन्धुरिव जिघ्रन्नभूत् गन्धापारोक्ष्यात्तद्वहवायुरप्यपरोक्ष इवाभूत् ॥ २० ॥

रा० टी०–स इति । यत्र रावणस्तत्र विद्यमानः स गन्धः महासत्त्वं हनुमन्तं बन्धुरुत्तमं बन्धुमिव इतः अत्र एहि इति उवाच इव ॥ २० ॥

२१] ति० टी०–यत्र स रावणस्तत्र स्थाने इत एहीत्युवाचेव उक्तगुणवायुः कर्ता दिव्यगन्धेन रावणशयनगृहं ज्ञातवानित्यर्थः ततस्तस्मात्पुष्पकादवरुह्य गन्धानुमितां तां रावणशयनशालां प्रस्थितस्तां शालां ददर्श यत्तु पुष्पकस्यैव सा शाला तत इत्यस्य तदनन्तरमित्यर्थ इति, तच्चिन्त्यम् प्रस्थित इति पदस्वारस्याद्, अर्धयोजनविस्तीर्णमित्यादिना मूलालयप्रदर्शनोपक्रमाच्च । मूलालयं दृष्ट्वा तद्बहिःस्थं पुष्पकमन्विष्य तत्स्थ एव रावणशयनगृहं तद्गृहवर्त्ययुमाय पुष्पकादवरुह्य तं प्रति स्थितस्तां ददर्शेत्येव न्याय्यमिति कतकः । यत्त्वित्यादिनोक्ता व्याख्यैव युक्तेति मम भाति ' अवतीर्य विमानाच्च हनुमान्मारुतात्मजः ' इत्यग्रे उपसंहारात् ॥ २१ ॥

२२] ति० टी०–महाकान्तामतिरमणीयामित्यर्थकं शालाविशेषणम् कान्तां कमनीयाम् तां शालामेव विशिनष्टि—मणीत्यादिना श्रियः संजननीमिवेत्यन्तेन । मणिकृतसोपानानि विशेषेण कृतानि यस्याम् ॥ २२ ॥

रा० टी०–तत इति । ततः रावणसमीपात् प्रस्थितो हनुमान् कान्तां शोभितां वरस्त्रियमिव रावणस्य महाकान्ताम् अतीच्छाविषयीभूतां मणिसोपानविकृतां मणिमयेन सोपानेन विशेषतो रचितां हेमजालविराजितां शालां ददर्श । सार्धश्लोक एकान्वयी ॥ २१ ॥ २२ ॥

गो० टी०–ततस्तामित्यादि । दन्तान्तरितरूपिकां दन्तैः व्यवहितरूपिकाम् अन्तरान्तरा कृतदन्तफलकामिति यावत् । सुबहुस्तम्भभूषिताम् अवान्तरबहुस्तम्भभूषिताम्

---

१ कारैरिति गो. पाठः । २ संयुक्तमिति गो. रा. पाठः । ३ अर्धमेतदधिकं गो. पाठे । ४ स सदेति गो. पाठः । ५ षितामिति गो. पाठः ।

स्फाटिकैराततलां दन्तान्तरितरूपिकाम् । मुक्तावज्रप्रवालैश्च रूप्यचामीकरैरपि ॥ २३ ॥
विभूषितां मणिस्तम्भैः सुबहुस्तम्भभूषिताम् । समैर्ऋजुभिरत्युच्चैः समन्तात्सुविभूषितैः ॥ २४ ॥
स्तम्भैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव । महत्या कुथयाऽऽस्तीर्णां पृथिवीलक्षणाङ्क्या ॥ २५ ॥
पृथिवीमिव विस्तीर्णां स राष्ट्रगृहशालिनीम् । नादितां मत्तविहगैर्दिव्यगन्धाधिवासिताम् ॥ २६ ॥
पराध्यास्तरणोपेतां रक्षोधिपनिषेविताम् । धूम्रामगुरुधूपेन विमलां हंसपाण्डुराम् ॥ २७ ॥
पैत्रपुष्पोपहारेण कल्माषीमिव सुप्रभाम् । मनसो मोदजननीं वर्णस्यापि प्रसादिनीम् ॥ २८ ॥
तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव । इन्द्रियाणीन्द्रियार्थैस्तु पञ्चपञ्चभिरुत्तमैः ॥ २९ ॥
तर्पयामास मातेव तदा रावणपालिता । स्वर्गोऽयं देवलोकोऽयमिन्द्रस्यापि पुरी भवेत् ॥
सिद्धिर्वेयं परा हि स्यादित्यमन्यत मारुतिः ॥ ३० ॥
प्रध्यायत इवापश्यत्प्रदीपांस्तत्र काञ्चनान् । धूर्तानिव महाधूर्तैर्दैवनेन पराजितान् ॥ ३१ ॥

'सुबहुस्तम्भभूषितैः' इति पाठे सुबहुस्तम्भैः स्तम्भदार्ढ्यकारिपट्टैरलंकृतामित्यर्थः अत्युच्चैः अत्यन्तोन्नतैः दिवम् आकाशं कुथया आस्तरणेन पृथिवीलक्षणाङ्क्या सरित्समुद्रगिरिवनादिभिः पृथिवीलक्षणैरङ्कितया । कल्माषीं शबलवर्णाम् वसिष्ठधेनुमिव सर्वकामप्रदत्वेन कल्माषीसादृश्यम् वर्णस्यापि प्रसादिनीं वर्णोत्कर्षकरीमित्यर्थः । तां शोकनाशिनीमिति । ततस्तामिति वर्तमाने पुनस्तच्छब्द उपसंहारार्थः । तां प्रति प्रस्थितः ददर्शेति वा संबन्धः ॥ २२–२९ ॥

२३] ति० टी०–तलं कुट्टिमभूः । दन्तान्तरितरूपिकामिति । दन्तैरन्तरितानि मध्ये मध्ये निर्मितानि रूपाणि यस्यां सा चामीकरैरप्यन्तरितरूपिकामित्युत्कर्षः ॥ २३ ॥

२४] ति० टी०–बहुत्वबोधनाय पुनः स्तम्भानुवादः बहुत्वं च विपुलत्वम् समन्तात्सुविभूषितैः रत्नादिभिरिति शेषः ॥ २४ ॥

२५] ति० टी०–अत्युच्चैः पक्षैरिवात्युच्चैः स्तम्भैर्दिवं संप्रस्थितामिवेत्युत्प्रेक्षात्र । कुथया विशालविचित्रकम्बलास्तरणेन । पृथिवीलक्षणं चतुरस्रत्वम् ॥ २५ ॥

२६] ति० टी०–सराष्ट्रगृहशालिनीमिति पृथिवीविशेषणम् ॥ २६ ॥

२७] ति० टी०–हंसपाण्डुरां हंसवत्पाण्डुराम् ॥ २७ ॥

२८] ति० टी०–कल्माषीं शबलवर्णां वसिष्ठगौः । अनेन सर्वानन्ददायित्वं रिपूणामधृष्यत्वं च सर्वमनोरथपूरकत्वं च सूच्यते । वर्णस्य देहकान्तेः प्रसादिनीं संपादिकाम् ॥२८॥

रा० टी०–स्फाटिकैरिति । स्फाटिकैराततं तलं कुट्टिमभूमिर्यस्यां सा तां दन्तान्तरितैः प्रतिमध्यभागविन्यासितगजदन्तैः रूपकं प्रशस्तरूपं यस्याः सा तां मुक्तादिभिर्विभूषितां शोभनाः स्तम्भाः येषु तैः स्थलविशेषैर्भूषितां समैः समानाकारैः ऋजुभिर्वक्रतारहितैः पक्षैरिव अत्युच्चैः स्तम्भैः दिवं संप्रस्थितामिव पृथिवीलक्षणाङ्क्या पृथिवीलक्षणानां तरुसरित्समुद्रादीनामङ्को रेखा यस्यां तया महत्या विशालया कुथया चित्रकम्बलास्तरणेन आस्तीर्णाम् अत एव पृथिवीमिव मत्तविहगैर्नादितां परार्ध्यैरुत्तमैः आस्तरणैः आस्तरणान्तरैरुपेतां युक्तां हंसवत्पाण्डुरवर्णां पत्रादिनोपहारे कल्माषीं शबलवर्णां वसिष्ठधेनुमिव सुप्रभां सर्वकामप्रदात्रीमित्यर्थः, वर्णस्य शरीरशोभाया अपि प्रसादिनीं शोकनाशिनीं श्रियः संपत्तेः सञ्जननीमुत्पादिकामिव ददर्श । सार्धश्लोकषट्कानां पूर्वेणान्वयः ॥ २३–२८ ॥

२९] ति० टी०–तां शालां ददर्शेति पूर्वेण संबन्धः । पञ्चभिरिन्द्रियार्थैः शब्दस्पर्शरूपरसगन्धैः पञ्चेन्द्रियाणि श्रोत्रत्वक्चक्षूरसनघ्राणानि तर्पयामास हनुमत इति शेषः रावणपालिता शालेति शेषः स्वर्गो ज्योतिष्टोमादिकफलभोगभूमिः देवलोको वायुवरुणादिलोकः इन्द्रस्य पुर्यमरावती ॥ २९ ॥

रा० टी०–इन्द्रियाणीति । तदा रावणपालिता शाला पञ्चभिरिन्द्रियार्थैः शब्दस्पर्शरूपरसगन्धैः पञ्चेन्द्रियाणि श्रोत्रत्वक्चक्षूरसनाघ्राणानि मातेव तर्पयामास ॥ २९ ॥

गो० टी०–इन्द्रियाणीति । हनुमत इति शेषः ॥ ३० ॥

३०] ति० टी०–परा गान्धर्वी सिद्धिस्तन्मायेत्यर्थः ॥३०॥

रा० टी०–स्वर्ग इति । मारुतिः अयं स्वर्गो भवेदित्यामन्यत ॥ ३० ॥

गो० टी०–स्वर्गोऽयमिति । सामान्यतः स्वर्गोऽयम् । तत्रापि देवलोकः त्रयस्त्रिंशद्देवानां लोकः तत्रापीन्द्रस्य पुरी अमरावती परा सिद्धिः ब्रह्मणः स्थानमित्युत्तरोत्तरोत्कर्षः ॥ ३१ ॥

३१] ति० टी०–प्रध्यायतो ध्याननिष्ठान् । धूर्तोऽक्षदेवनस्तत्रातिसमर्थो महाधूर्तः महाधूर्तेन देवनेन पराजितो हि धूर्तो धननाशाद्ध्यायन्निवास्ते काञ्चनान्दीपान्काञ्चनदीपस्तम्भस्थदीपान् विपुलदीपाग्रे क्षुद्रदीपप्रभा इव रावणतेजोभिभूतानपश्यदित्यर्थः ॥ ३१ ॥

१ मालिनीमिति गो. पाठः । २ चित्रामिति गो. पाठः । ३ मनःसंह्लादेति गो. पाठः । ४ प्रसादिनीमिति गो. पाठः । ५ इयमिति गो. पाठः ।

दीपानां च प्रकाशेन तेजसा रावणस्य च । अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत ॥ ३२ ॥
ततोऽपश्यत्कुथासीनं नानावर्णाम्बरस्रजम् । सहस्रं वरनारीणां नानावेषविभूषितम् ॥ ३३ ॥
परिवृत्तेऽर्धरात्रे तु पाननिद्रावशंगतम् । क्रीडित्वोपरतं[1] रात्रौ प्रसुप्तं[2] बलवत्तदा ॥ ३४ ॥
तत्प्रसुप्तं विरुरुचे निःशब्दान्तरभूषितम्[3] । निःशब्दहंसभ्रमरं यथा पद्मवनं महत् ॥ ३५ ॥
तासां संवृतदान्तानि[4] मीलितोक्षीणि[5] मारुतिः । अपश्यत्पद्मगन्धीनि वदनानि सुयोषिताम् ॥ ३६ ॥
प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये[6] । पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥ ३७ ॥
इमानि मुखपद्मानि नियतं मत्तषट्पदाः । अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनः पुनः ॥ ३८ ॥
इति वीमन्यत श्रीमानुपपत्त्या महाकपिः । मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ ३९ ॥
सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता । शरदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता ॥ ४० ॥
स च ताभिः परिवृतः शुशुभे राक्षसाधिपः । यथा ह्युडुपतिः श्रीमांस्ताराभिरिव संवृतः ॥ ४१ ॥

रा० टी०–प्रध्यायत इति । काञ्चनान् काञ्चनमयान् प्रदीपान् मङ्गलार्थं स्तम्भप्रदेशेषु संस्थापितदीपान् देवनेन द्यूतेन महाद्यूतैः अतिवञ्चितैः पराजितान् अत एव ध्यायतः धनविध्वंसात् नयननिमीलनादिचेष्टया ध्यानमिव कुर्वतो द्यूतानिव अपश्यत् । रावणातितेजसा पराभूतत्वात् दीपा न प्रकाशन्ते इत्यर्थः ॥ ३१ ॥

गो० टी०–प्रध्यायत इति । प्रध्यायत इव निश्चलतया प्रकृष्टध्यानयुक्तानिव द्यूतान् अक्षद्यूतान् देवनेन द्यूतेन ॥ ३२ ॥

३२] ति० टी०–प्रदीप्ताग्निज्वाला ज्वालिता अनेनाग्निमोऽग्निदाहः सूचितः ॥ ३२ ॥

रा० टी०–दीपानामिति । दीपादीनां प्रकाशादिना प्रदीप्ता प्रज्वलिता लङ्केति शेषः, इत्यभ्यमन्यत ॥ ३२ ॥

गो० टी०–दीपानामिति । प्रदीप्ता शाला दग्धेति अभ्यमन्यत ॥ ३३ ॥

३३] ति० टी०–कुथासीनमास्तीर्णकुथायां शयानम् ॥ ३३ ॥

रा० टी०–तत इति । कुथासीनम् आस्तृतकुथाश्च शयानं नानावर्णाः अम्बरस्रजो यस्य तत् नारीणां सहस्रमपश्यत् संज्ञापूर्वकविधेरनित्यत्वादम्लुग्विरहः भागुरिमतेन वा समाधेयम् ॥ ३३ ॥

गो० टी०–तत इत्यादि । कुथासीनं कुथशयितम् । नानावर्णाम्बरस्रजमिति हलन्तस्य स्रक्छब्दस्य भागुरिमतेन टाबन्तत्वादजन्तत्वोपपत्तिः ॥ ३४ ॥ ३५ ॥

३४] ति० टी०–बलवत्प्रसुप्तमपश्यदित्यनुकर्षः ॥ ३४ ॥

रा० टी०–परीति । अर्धरात्रे प्रवृत्ते प्राप्ते तु क्रीडितोपरतं क्रीडितात् क्रीडाया निवृत्तं पाननिद्रावशं तम् अत एव बलवद्दृढं प्रसुप्तं नारीसहस्रं रात्रौ अपश्यत् इत्यनुकृष्यते ॥ ३४ ॥

३५] ति० टी०–तत्प्रसुप्तं प्रसुप्तजनं रावणगृहं निःशब्दान्तरैर्निर्गतस्वस्वशब्दभेदैर्नूपुरसिञ्जिन्यादिभिर्भूषितम् ॥ ३५ ॥

रा० टी०–तदिति । निःशब्दः शब्दरहितः अन्तरो मध्यभागो यस्य तस्मिन् भूषितं प्रसुप्तं तत् नारीसहस्रं निःशब्दा हंसभ्रमरा यस्मिन् तत्पद्मवनमिव विरुरुचे ॥ ३५ ॥

गो० टी०–तदिति । निःशब्दान्तरभूषणं निःशब्दविशेषाणि भूषणानि यस्य । 'अथान्तरं रन्ध्रेप्यपरव्यवधानयोः । अवकाशावसरयोरवसानविनार्थयोः । विशेषमध्यतादर्थ्येषु' इति दर्पः । अतिनिद्रापरवशत्वेन निश्चलाङ्गतया निःशब्दभूषणमित्यर्थः ॥ ३६ ॥ ३७ ॥

३६] ति० टी०–निद्रितत्वात्संवृतानि संवृतपक्ष्माणि तादृशानि च तानि दान्तानि ग्लानानि मीलिताक्षीण्यतिसंवृतपक्ष्माणि स्वर्गदेवलोकादेरिव संवृतमीलितयोरपि भेदो बोध्यः । यद्वा संवृतदान्तानीत्यस्यैव व्याख्यानं निमीलिताक्षीणीति । यद्वा संवृतत्वमोष्ठयोः ॥ ३६ ॥

रा० टी०–तासामिति । संवृता आच्छादिता दन्ता येषु तानि सुयोषितां वदनानि अपश्यत् ॥ ३६ ॥

३७] ति० टी०–क्षपाक्षये पद्मानीव प्रबुद्धानि भूत्वा पुना रात्रौ संवृतपत्राणि पद्मानीव बभूवुरित्यन्वयः ॥ ३७ ॥

रा० टी०–प्रबुद्धानीति । तासां वदनानीति शेषः क्षपाक्षये निशापगमे प्रबुद्धानि विकसितानि भूत्वा रात्रौ पुनः संवृतपत्राणि पद्मानि इव बभुः ॥ ३७ ॥

गो० टी०–प्रबुद्धानीति । अत्र वदनानीत्यनुषज्यते तासां वदनानि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि सङ्कुचितपत्राणि पद्मानीव बभुः ॥ ३८ ॥

३८] ति० टी०–मुखानि दृष्ट्वा हनुमतो जातां संभावनामाह—इमानीति । फुल्लानि प्रार्थयन्तीत्यन्वयः । नियतं नित्यम् ॥ ३८ ॥

३९–४१] ति० टी०–उपपत्त्या युक्त्या । सलिलोद्भवैः पद्मैः ॥ ३९–४१ ॥

रा० टी०–इमानीति । इमानि प्रदृश्यमानानि मुखप-

---

१ क्रीडितोपरतमिति रा. पाठः । २ सुप्त्वापेति गो. पाठः । ३ भूषणमिति गो. पाठः । ४ दन्तानीति गो. रा. पाठः । ५ ऽक्षाणीति गो. पाठः । ६ चेति गो. पाठः ।

याश्चयवन्तेऽम्बरात्तारा: पुण्यशेषसमाहृता: । इमास्ता: संगता: कृत्स्ना इति मेने हरिस्तदा ॥ ४२ ॥
ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम् । प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ॥ ४३ ॥
व्याहृत्तकचपीनस्रक्प्रकीर्णवरभूषणा: । पानव्यायामकालेषु [2]निद्रोपहतचेतस: ॥ ४४ ॥
व्याहृत्ततिलका: काश्चित्काश्चिदुद्भ्रान्तनूपुरा: । पार्श्वे गलितहाराश्च काश्चित्परमयोषित: ॥ ४५ ॥
मुक्ताहारवृताश्चान्या: काश्चित्[3]प्रस्रस्तवाससः । व्याविद्धरशनादामा: किशोर्य इव वाहिता: ॥ ४६ ॥
अकुण्डलधराश्चान्या विच्छिन्नमृदितस्रज: । गजेन्द्रमृदिता: फुल्ला लता इव महावने ॥ ४७ ॥

यानि फुल्लानि अम्बुजानीव पट्पदाः पुनः पुनः प्रार्थयन्ति नित्यं तत्र स्थातुं प्रयाचन्त इत्यर्थः, इत्येव अमन्यत अन्वमिनोत् अत एव तानि वदनानि उपपत्त्याऽनुमानयुक्त्या सलिलोद्भवैः कमलैः समानि मेने। अर्धचतुष्टयमेकान्वयि॥३८॥३९॥

रा० टी०–सेति । स्त्रीभिर्विराजिता शाला ताराभिरभिशोभिता द्यौरिव शुशुभे ॥ ४० ॥

रा० टी०–स इति । ताभिः स्त्रीभिः परिवृतः स रावणः ताराभिः संवृत उडुपतिरिव शुशुभे ॥ ४१ ॥

गो० टी०–इमानीति । प्रार्थयन्ति प्रार्थयेरन् मधुरसलुब्धतया अत्र पुनः पुनः पतेपुरित्यर्थः व्यत्ययेन परस्मैपदम् अनुदात्तत्वेनात्मनेपदत्वात् नियतं नूनम् उपपत्त्या युक्त्या उपपत्तिमेवाह–मेन इति । तानि मुखानि गुणतः सौरभादिगुणैः सलिलोद्भवैः पद्मैः ॥ ३९–४३ ॥

४२] ति० टी०–पुण्यशेषसमाहृतास्तयुक्ताः संगता एकदेशमिलिताः अनेन सौन्दर्यात्युक्तिरूपोऽनुक्त्यलंकारः॥ ४२ ॥

रा० टी०–या इति । तदा तस्मिन् काले पुण्यशेषसमाहृता भोगावशिष्टपुण्यैर्युक्ता यास्तारा अम्बरात् स्वर्गात् च्यवन्ते ता एव कृत्स्नाः सकला इमाः प्राप्ता इति हरिर्हनुमान् मेने॥४२॥

४३] ति० टी०–तदेवाह—ताराणामिति । प्रभा देहकान्तिः वर्णो रूपम्, प्रसादस्त्वौज्ज्वल्यम् ॥ ४३ ॥

रा० टी०–ताराणामिति । महतीनां ताराणां प्रभा वर्णप्रसादा इव योषितां प्रभावर्णप्रसादा विरेजुः ॥ ४३ ॥

गो० टी०–ताराणामिति । प्रभा कान्तिः वर्णः रूपम् प्रसादः प्रसन्नता ॥ ४४ ॥

४४] ति० टी०–व्याहृत्ताः कचाः पीनस्रजश्च यासां ताश्च प्रकीर्णानीतस्ततः स्रस्थानि वरभूषणानि यासां ताः पानव्यायामकालेषु पानानन्तरकालिकगाननृत्यरत्यादिकीडाकालेषूक्तगुणाः, अत एव श्रमान्निद्रोपहतचेतसः ॥ ४४ ॥

रा० टी०–व्याहृत्तेति । पानव्यायामकालेषु पानकालेषु अधररसपानसमयेषु व्यायामकालेषु रतिसमयेषु व्याहृत्ता मर्दिताः कुचाः पीनस्रजश्च यासां ता अत एव प्रकीर्णानि परिक्षिप्तानि वरभूषणानि यासां ताः द्वयोः कर्मधारयः निद्रोपहतचेतसः बभूवुरिति शेषः ॥ ४४ ॥

गो० टी०–व्याहृत्तेति । पानव्यायामकालेषु पानानन्तरं भाविरतिव्यापारसमयेषु व्याहृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः विपर्यस्तगुरुपीनस्रजः प्रकीर्णवरभूषणाश्च सत्यः निद्रापहृतचेतसः विरेजुः ॥ ४५ ॥

४५] ति० टी०–उक्तं भूषणप्रकिरणमेव प्रपञ्चयति—व्यावृत्तेति । उद्भ्रान्ताः स्वस्थानात्स्खलिता नूपुरा यासां ताः । पार्श्वे एकस्मिन्गलिता विस्रस्ता हारा यासां ताः ॥ ४५ ॥

रा० टी०–व्यावृत्तेति । काश्चित् व्याहृत्तानि अपमार्जितानि तिलकानि सिन्दूरकस्तूर्यादिरेखा यासां ताः काश्चित् उद्भ्रान्ताः स्वस्थानात्प्रस्खलिताः नूपुराः यासां ताः काश्चित् पार्श्वे समीपे गलितहाराश्च परमयोषितो दृश्यन्त इति शेषः ॥ ४५ ॥

गो० टी०–व्यावृत्ततिलका इति । व्याहृत्ततिलकाः उन्मृष्टतिलकाः उद्भ्रान्तनूपुराः स्वस्थानानवस्थितनूपुराः ॥४६॥

४६] ति० टी०–मुक्ताहारैर्वृताः छिन्नमुक्ताहाराः व्याविद्धं विक्षिप्तं रशनादाम काञ्चीगुणो यासां ताः एवं भूषणबन्धराहित्येन शयने उपमा । वाहिताः किशोर्य इव कृतभारवहनाः श्रान्ताः किशोर्यो वडवा यथाध्वश्रमापनयनाय लुण्ठनेन व्यत्यस्तपल्ययनबन्धाः शेरते तद्वत् ॥ ४६ ॥

रा० टी०–मुक्तेति । अन्याः मुक्ताहारैर्वृताः आच्छन्नाः केशादिग्रथितमुक्ताहारवत्य इत्यर्थः, काश्चित्प्रशस्तवाससः प्रच्युतवसनाः काश्चिद्व्याविद्धरशनादामाः प्रच्युतकाञ्चीगुणा अत एव वाहिताः प्रपतितभाराः किशोर्यः वडवा इव यथोत्तारितभारा वडवा निर्मुक्तबन्धनाः सत्यः श्रमापनयनाय भुवि लुठन्ति तथा अदृश्यन्तेति शेषः ॥ ४६ ॥

गो० टी०–मुक्ताहारेति । मुक्ताहारावृताः मुक्ताहारैरावृत्ताः छिन्नमुक्ताहारा इत्यर्थः व्याविद्धरशनादामाः छिन्नकाञ्चीगुणाः किशोर्यः प्रथमवयस्का वडवाः वाहिताः मार्गश्रमनिवृत्त्यर्थं भूमौ प्रवेष्टनं कारिताः सर्वत्र रेजुरित्यन्वयः ॥ ४७ ॥ ४८ ॥

४७] ति० टी०–अकुण्डलधराः कुण्डलधरणरहिताः गलितकुण्डला इति यावत् विच्छिन्ना आमृदिताश्च स्रजो यासां ताः अत्र रेजुरित्यनुकर्षः ॥ ४७ ॥

रा० टी०–अकुण्डलेति । अकुण्डलधराः कुण्डलधारणरहिताः प्रच्युतकुण्डला इत्यर्थः, विच्छिन्नाः आमृदिताश्च स्रजो यासां ताः अन्याः गजेन्द्रमृदिताः फुल्ला लता इव अदृश्यन्तेति शेषः ॥ ४७ ॥

---

१ गुरुपीनेति गो.; कुचपीनेति रा. पाठः । २ निद्रापहृतेति गो. पाठः । ३ विस्रस्तेति गो. पाठः ।

चन्द्रांशुकिरणाभाश्च हाराः कासांचिदुद्गताः हंसा इव बभुः सुप्ताः स्तनमध्येषु योषिताम् ॥ ४८ ॥
अपरासां च वैदूर्याः कादम्बा इव पक्षिणः हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ॥ ४९ ॥
हंसकारण्डवोपेताश्चक्रवाकोपशोभिताः आपगा इव ता रेजुर्जघनैः पुलिनैरिव ॥ ५० ॥
किङ्किणीजालसंकाशास्ता हेमविपुलाम्बुजाः भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥ ५१ ॥
मृदुष्वङ्गेषु कासांचित्कुचाग्रेषु च संस्थिताः बभूवुर्भूषणानीव शुभा भूषणराजयः ॥ ५२ ॥
अंशुकान्ताश्च कासांचिन्मुखमारुतकम्पिताः उपर्युपरि वक्त्राणां व्याधूयन्ते पुनः पुनः ॥ ५३ ॥
ताः पताका इवोद्धूताः पत्नीनां रुचिरप्रभाः नानावर्णसुवर्णानां वक्त्रमूलेषु रेजिरे ॥ ५४ ॥

४८] ति० टी०–अंशवः प्रभाः, किरणास्तदाधाराः। अंशवः सूक्ष्मरश्मयः, किरणाः स्थूलरश्मय इत्यन्ये। वैपरीत्येन स्थिता हारा मुक्ताहाराः ॥ ४८ ॥

रा० टी०–चन्द्रेति । चन्द्रांशूनां सोमकिरणानामाभा इव आभा येषां ते योषितां स्तनमध्येषु उद्गताः संस्थिताः हाराः सुप्ताः हंसा इव बभुः ॥ ४८ ॥

गो० टी०–चन्द्रांश्विति । चन्द्रांशुकिरणाभाः अंशुः सूर्यः। 'अथांशुः स्यान्मयूखे सवितर्यपि' इति दर्पणः । चन्द्रसूर्ययोः किरणानामिवाभा येषां ते तथा उत्कटाः स्थूलाः ॥४९–५१॥

४९] ति० टी०–वैदूर्या वैदूर्यमणिमालाः कादम्बाः कलहंसाः अत्र कादम्बशब्देन कारण्डवपदवाच्यो जलकाक उच्यते अन्यथा वैदूर्योपमानत्वमसंगतं स्यात् । हेमसूत्राणि च अत्रापि स्तनमध्योद्गतानीत्यनुकर्षः । चक्रवाकानां पीतत्वसादृश्यादुपमानत्वम् ॥ ४९ ॥

रा० टी०–अपरासामिति । अपरासां वैदूर्याः वैडूर्यहाराः कादम्बाः जलकाकाः पक्षिण इव अभवन् अन्यासां हेमसूत्राणि चक्रवाका इव पीतत्वेन चक्रवाकसदृशाः अभवन् ॥ ४९ ॥

५०] ति० टी०–स्त्रीषु नानावर्णभूषणानि हंसादिस्थानीयानि । स्त्रीकटीपुरोभागो जघनम् ॥ ५० ॥

रा० टी०–हंसेति । पुलिनैरिव जघनैरुपलक्षिताः ताः स्त्रियः हंसैः कारण्डवैर्जलकाकैश्चोपेताः चक्रवाकोपशोभिताः आपगा नद्य इव रेजुः ॥ ५० ॥

५१] ति० टी०–किङ्किणीजालसंकाशास्तद्वन्मुकुलितनयनास्तत्स्थाने च नद्यां मुकुलितकुमुदानि हेमविपुलाम्बुजत्वेन वक्त्रनिगरणम् उपमाने तु न निगरणम् 'किङ्किणीजालसंबाधाः' इति पाठे किङ्किणीजालसंबाधत्वमुभयत्रापि स्पष्टमेव । शब्दवत्त्वसाधर्म्यात्किङ्किणीशब्देन लहरीणामप्युक्तेः । भावा विलासा एव स्वाभिप्रेतसुरतभावो वा ग्राहो यासां ताः यशोऽतिगुणवत्त्वकृतयश एव तीरं यासां ताः यशःशब्देन लक्षणया कान्तिरित्यन्ये । सुप्ता नार्यो नद्य इव बभुः ॥ ५१ ॥

रा० टी०–किङ्किणीति । किङ्किणीजालान्येव संकोशा मुकुलानि यासु हेमानि हेमाभरणान्येव विपुलाम्बुजानि यासु ताः भावा शृङ्गारचेष्टाः एव ग्राहाः यासु ताः यशांसि पत्यनुकूलवर्तनजनितकीर्तयः तीराणि यासु ता सुप्ताः ताः स्त्रियः नद्य इव बभुः ॥ ५१ ॥

गो० टी०–अथासां नदीसमार्धिं दर्शयति–किङ्किणीति । किङ्किणीजालसंकोशाः किङ्किणीजालान्येव संकोशा मुकुलानि यासां ताः एतत्स्थाने सत्कोशा इति पाठान्तरदर्शनात्संकोशशब्दो मुकुलवाचीत्यवगम्यते भावाः शृङ्गारचेष्टाः त एव ग्राहाः नक्राः यासां ताः सुप्तिदशायामपि वासनावशाद्भावाभिव्यञ्जकसंस्थानवत्त्वाद्भावग्राहा इत्युक्तम् यशस्तीराः यशःशब्देन यशोहेतुभूता पर्यन्तप्रसृतप्रभोच्यते सैव तीरं यासां ताः ॥ ५२ ॥

५२] ति० टी०–भूषणराजयो विमर्दजनितरेखाः । 'भूषणराशयः' इति पाठेऽप्ययमेवार्थो लक्षणादिना बोध्यः ॥५२॥

रा० टी०–मृदुष्विति । कासाञ्चित् पतितभूषणानामित्यर्थः, कुचाग्रेषु संस्थिताः भूषणराजयः भूषणजनितरेखा भूषणानीव बभूवुः ॥ ५२ ॥

गो० टी०–मृदुष्विति । संस्थिताः लग्नाः भूषणराजयः भ्रमराणीव भ्रमरा इव व्यत्यय आर्षः कामुका इव बभूवुः 'भ्रमरः कामुके भृङ्गे' इति दर्पणः । केचित्तु भूषणानीति पाठं कल्पयित्वा भूषणराजयः भूषणविमर्दकृतरेखाः विस्रस्तभूषणानामपि कासांचिद्भूषणानीव बभूवुरित्यर्थ इत्याहुः ॥ ५२ ॥

५३] ति० टी०–वक्त्राणामुपर्युपरीत्यन्वयः ॥ ५३ ॥

रा० टी०–अंशुकान्ता इति । कासाञ्चित् स्त्रीणां मुखमारुतेन मुखश्वासेन कम्पिताः अंशुकान्ताः पटप्रदेशाः वक्त्राणामुपर्युपरि पुनः पुनर्व्याधूयन्ते कम्पन्ते पश्यः साधुत्वमत एव निर्देशात् एको परिशब्दार्थो व्याधूननान्वयी वा अधिकं कम्पन्त इति तदर्थः ॥ ५३ ॥

गो० टी०–अंश्विति । मुखमारुतकम्पिताः अंशुकान्ताः सूक्ष्मवस्त्रदशाः उपर्युपरि वक्त्राणां वक्त्राण्युपर्युपरि त्रिषु पर्यादिषु त्रिषु । द्वितीयाम्रेडितान्तेषु' इति द्वितीयाभाव आर्षः । व्याधूयन्त इति श्यन्नार्षः धूनातेः क्र्यादित्वात् ॥ ५४ ॥

५४] ति० टी०–व्याधूयमानमंशुकान्तमुत्प्रेक्षते—ता इति । विधेयमपेक्ष्य स्त्रीलिङ्गनिर्देशः । पत्नीनाम्, अर्थाद्राव-

---

१ उत्कटा इति गो. पाठः। २ कारण्डवाकीर्णा इति गो. पाठः । ३ संकोशा इति गो. रा. पाठः ।

ववल्गुश्चात्र कासांचित्कुण्डलानि शुभार्चिषाम् । मुखमारुतसंकम्पैर्मन्दं मन्दं च योषिताम् ॥ ५५ ॥
शर्करासवगन्धः[1] स प्रकृत्या सुरभिः सुखः । तासां वदननिःश्वासः सिषेवे रावणं तदा ॥ ५६ ॥
रावणाननशङ्काश्च काश्चिद्रावणयोषितः । मुखानि च[2] सपत्नीनामुपाजिघ्रन्पुनः पुनः ॥ ५७ ॥
अत्यर्थं सक्तमनसो रावणे ता वरस्त्रियः । अस्वतन्त्राः सपत्नीनां प्रियमेवाचरंस्तदा ॥ ५८ ॥
बाहू उपनिधायान्याः पारिहार्यविभूषिताः[3] । अंशुकानि च रम्याणि प्रमदास्तत्र शिश्यिरे ॥ ५९ ॥
अन्या वक्षसि चान्यस्यास्तस्याः काचित्पुनर्भुजम्[4] । अपरा त्वङ्कमन्यस्यास्तस्याश्चाप्यपरा कुचौ[5] ॥ ६० ॥

णस्य । अनेकवर्णवत्सुवर्णतन्तुनिर्मितवाससां पताका इवेत्यन्वयः ॥ ५४ ॥

रा० टी०–ता इति । नानापाकादिवशेन अनेकविधानि वर्णानि येषां तानि सुवर्णानि तन्मयाभरणानि यासां तासां पत्नीनां रावणस्त्रीणां वक्त्रमूलेषु रुचिरप्रभाः ताः अंशुकान्तव्यक्तयः उद्भूताः पताका इव रेजिरे ॥ ५४ ॥

गो० टी०–ता इति । विधेयत्वात् स्त्रीलिङ्गता । नानावर्णसुवर्णानां नानाविधशोभनवर्णानाम् ॥ ५४ ॥

५५] ति० टी०–शुभार्चिषां कासांचिद्योषितां कुण्डलानि मुखमारुतसंकम्पैर्मुखमारुतसंसर्गकृतचलनैर्मन्दं मन्दं ववल्गुः । तेन कुण्डलानामतिलघुता, तेन तासां सौकुमार्यातिशयो व्यङ्ग्यः ॥ ५५ ॥

रा० टी०–ववल्गुरिति । शुभार्चिषां शोभनदीप्तिमतीनां कासाञ्चित् योषितां कुण्डलानि मुखमारुतसंकम्पैर्मन्दं मन्दं ववल्गुः चकम्पिरे । एतेन कुण्डलानामतिलघुत्वं सूचितं तेन तासां भारासहिष्णुत्वं सूचितं तेन सौकुमार्यातिशयो ध्वनितः ॥५५॥

गो० टी०–ववल्गुरिति । उपधानपरिसरे धनमणिखचिततया लम्बमानानि कुण्डलानि मन्दं मन्दं चेलुरित्यर्थः ॥ ५६–५८ ॥

५६] ति० टी०–शर्करासव आसवविशेषस्तद्योगात्तद्गन्धः प्रकृत्या च सुरभिः, अत एव सुखस्तासां वदननिःश्वासो रावणं सिषेवे यद्वा प्रकृत्या असुरभिरपि वायुरिति शेषः । तासां वदननिःश्वासस्तद्युक्तः अर्शआद्यजन्तम् अत एव शर्करासवगन्धो रावणं सिषेवे ॥ ५६ ॥

रा० टी०–शर्करेति । शर्करासवस्य आसवविशेषस्य गन्धः सुगन्धो यस्मिन् सः प्रकृत्या स्वभावतोऽपि सुरभिः शोभनगन्धविशिष्टः अत एव सुखः सुखप्रदः स प्रसिद्धः तासां वदननिःश्वासः रावणं सिषेवे ॥ ५६ ॥

५७] ति० टी०–रावणाननशङ्काः मदनिद्रोभयजचित्तवैवश्यात् सपत्नीनां च सपत्नीनामपि मुखान्युपाजिघ्रन् ॥ ५७ ॥

रा० टी०–रावणेति । काश्चित् रावणयोषितः रावणाननशङ्का रावणमुखमिदमिति भ्रान्तिविशिष्टाः सत्यः सपत्नीनां मुखानि पुनः पुनरुपाजिघ्रन् ॥ ५७ ॥

५८] ति० टी०–ननु सपत्नीभिः कृतं मुखाघ्राणं ताः कथमसहन्तेत्यत आह—अत्यर्थमिति । अत्यासक्तेरेवास्वतन्त्रा मदपारवश्याच्च तथाभूता वरस्त्रियः सपत्नीभिराघ्रातमुखा अपि सपत्नीनां प्रियमेवाचरन्, ता अपि तासां मुखानि रावणमुखशङ्कयोपाजिघ्रन्नित्यर्थः ॥ ५८ ॥

रा० टी०–ननु तदाघ्राणं घ्रायमाणमुखाः कथं न निवारयामासुरित्यत आह–अत्यर्थमिति । रावणे अत्यर्थमत्यन्तं सक्तमनसः अत एव अस्वतन्त्राः ता रावणसंबन्धिन्यो वरस्त्रियः सपत्नीनां प्रियं तदाघ्राणसहनं स्वकर्तृकाघ्राणं च आचरन् अकुर्वन् । अत्यर्थं सक्तमनस इत्यनेन रावण एव जिघ्रतीति तासामपि भ्रान्तिः सूचिता ॥ ५८ ॥

गो० टी०–अत्यर्थमिति । रावणे अत्यर्थं सक्तमनसः अस्वतन्त्राः पाननिद्रापरवशाः ताः सपत्नीभिराघ्रातमुखाः वरस्त्रियः तदा मुखाघ्राणसमये सपत्नीनां प्रियमेवाचरन्रावणोऽजिघ्रदिति बुद्ध्या स्वयमप्यजिघ्रन्नित्यर्थः । अथवा कथं सपत्न्योपि सह स्वपन्तीत्याशङ्क्याह–अत्यर्थमिति ॥ ५९ ॥

५९] ति० टी०–पारिहार्यो वलयः उपनिधायोपधानं कृत्वा अंशुकानि चोपनिधायेत्यनुकर्षः ॥ ५९ ॥

रा० टी०–बाहूनिति । अन्याः प्रमदाः पारिहार्यैः वलयैः विभूषितान् बाहून् अंशुकानि वस्त्राणि च उपनिधाय उपबर्हणत्वेन प्रकल्प्य शिश्यिरे ॥ ५९ ॥

गो० टी०–बाहूनिति । पारिहार्यो वलयः । अंशुकानि च उपनिधायेत्यनुषज्यते ॥ ६० ॥

६०] ति० टी०–अन्येत्यादिश्लोकद्वये शिश्यिर इति पदं यथायोगं वचनविपरिणामेन योज्यम् उपनिधायेति पदं च ॥६०॥

रा० टी०–अन्येति । अन्या काचित् अन्यस्याः तस्याः पूर्वोक्तायाः वक्षसि भुजमुपनिधाय शिश्ये इति शेषः एवमुत्तरत्रापि यथायोग्यं शेषकल्पना । अपरा अन्यस्याः कुचौ उपनिधाय शिश्ये ॥ ६० ॥

गो० टी०–अन्या वक्षसि चान्यस्या इत्यादिश्लोकद्वये शिश्यिर इत्येतद्वचनविपरिणामेन यथायोगं संबध्यते उपनिधायेति च ॥ ६१ ॥ ६२ ॥

१ संसर्गादिति गो. पाठः । २ स्विति गो. पाठः । ३ गन्धैश्चेति गो. पाठः । ४ स्मेति गो. पाठः । ५ भूषितानिति गो. पाठः । ६ भुजाविति गो. पाठः ।

ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः । परस्परनिविष्टाङ्ग्यो मदस्नेहवशानुगाः ॥ ६१ ॥
[1]अन्योन्यस्याङ्गसंस्पर्शात्प्रीययाणाः सुमध्यमाः । एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः ॥ ६२ ॥
अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा । मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥ ६३ ॥
लतानां माधवे मासि फुल्लानां वायुसेवनात् । अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ॥ ६४ ॥
[2]प्रैतिवेष्टितसुस्कन्धमन्योन्यभ्रमराकुलम् । आसीद्वनमिवोद्भूतं स्त्रीवनं रावणस्य तत् ॥ ६५ ॥
उचितेष्वपि सुव्यक्तं न तासां योषितां तदा । [3]विवेकं शक्यमाधातुं भूषणाङ्गाम्बरस्रजाम् ॥ ६६ ॥
रावणे सुखसंविष्टे ताः स्त्रियो विविधप्रभाः । ज्वलन्तः काञ्चना दीपाः [4]प्रेक्षन्तो निमिषा इव ॥ ६७ ॥

६१] ति० टी०–स्नेहोऽत्र रावणीयः ॥ ६१ ॥

६२] ति० टी०–एकीकृतभुजाः परस्परसंबद्धभुजाः ॥ ६२ ॥

रा० टी०–ऊरू इति । अन्योऽन्यस्य ऊर्वादि समाश्रिताः अत एव परस्परनिविष्टाङ्ग्यः मदस्नेहेन वशानुगाः अत एव अन्योन्यस्य अङ्गसंस्पर्शात् प्रीयमाणाः एकीकृतभुजाः सर्वा योषितः सुषुपुः । अर्धचतुष्टयमेकान्वयि ॥ ६१ ॥ ६२ ॥

६३] ति० टी०–अत एवाह— अन्योन्येति । माला पुष्पमाला । उपमेये मत्तषट्पदस्थानीयाः कचभारा नेत्रद्वन्द्वानि च ॥ ६३ ॥

रा० टी०–अन्योऽन्येति । अन्योऽन्यभुज एव सूत्रं तेन ग्रथिता स्त्रीमालामत्ताः षट्पदा भ्रमराः यस्यां सा सूत्रे ग्रथिता माला इव शुशुभे उपमेये षट्पदप्रतिनिधयः कचकुचोपरिभागादयः ॥ ६३ ॥

गो० टी०–अन्योन्येति । मालेव पुष्पमालेव । मत्तषट्पदस्थानीयाः केशाः ॥ ६३ ॥

६४] ति० टी०–लतानां वनमिवेत्यन्वयः । अन्योन्यसंबन्धेन मालाकारेण ग्रथितमिव ॥ ६४ ॥

६५] ति० टी०–प्रतिवेष्टिता वृक्षाणां नायकानां च शोभनाः स्कन्धा येन तत् अन्योन्यं धावन्तो ये भ्रमरास्तैराकुलम् स्त्रीणामपि पद्मिनीत्वाद्भ्रमराकुलत्वम् केशपाशनेत्रादयो वा तासु भ्रमराः स्त्रीवनं स्त्रीसमूहः ॥ ६५ ॥

रा० टी०–लतानामिति । वायुसेवनात् हेतोः उद्भूतम् अन्योन्यमालाग्रथितं मालाकारेण संबद्धम् अत एव प्रतिवेष्टिता अन्योन्यश्लिष्टाः सुस्कन्धाः शाखा यस्मिन् तत् अत एव संसक्ताः परस्परं मिलिताः कुसुमोच्चया यस्मिन् अत एव अन्योन्यभ्रमरैः आकुलं व्याप्तं माधवे वसन्ते मासि लतानां वनमिव रावणस्य स्त्रीवनमासीत् । उपमानविशेषणानि उपमेयेऽपि योजनीयानि । तत्र वायुशब्देन मारुतेर्ग्रहणं कुसुमशब्दः वेण्यादिग्रथितकुसुमपरः भ्रमरशब्दः चिकुरपरः ' भ्रमरश्चिकुरः ' इति विश्वः । अर्धचतुष्टयमेकान्वयि ॥ ६४ ॥ ६५ ॥

गो० टी०–लतानामित्यादिश्लोकद्वयमेकान्वयम् । तद्रावणस्य स्त्रीवनं लतानां वनमिवासीदिति संबन्धः । विशेषणान्युभयत्र योज्यानि । वायुसेवनाद्धेतोः अन्योन्यमालाग्रथितम् अन्योन्यमालारूपेण ग्रथितं सुखसुखमारुतसेवनादन्योन्यमालाग्रथितमिति स्त्रीपक्षे । संसक्तकुसुमोच्चयम् अन्योन्यसंसक्तनीवीकम् संसक्तकुसुमसमूहं चेत्यर्थः व्यतिवेष्टितसुस्कन्धम् अन्योन्यपरिवेष्टितांसम् अन्योन्यपरिवेष्टितप्रकाण्डं च अन्योन्यं भ्रमरैश्चिकुरैराकुलम् भ्रमरैः भृङ्गैराकुलं च 'भ्रमरश्चिकुरे भृङ्गे' इति विश्वः ॥ ६४ ॥ ६५ ॥

६६] ति० टी०–तासां योषितामुचितेषु स्थानेषु सुव्यक्तं प्रतिष्ठितानामपि भूषणाङ्गाम्बरस्रजां विवेकमाधातुं कर्तुं न शक्यम् अपरिमितत्वात् । भूषणभूष्ययोरैकरूप्यात्परस्परसंग्रथितत्वेन सुप्तत्वाच्चेमान्यस्या भूषणानीमान्यस्यास्या इति विवेकः कर्तुमशक्य इति भ्रान्तिमानलंकारोऽत्र व्यङ्ग्यः ॥ ६६ ॥

रा० टी०–उचितेष्वपि उचितेषु योग्येषु सुव्यक्तं सुस्फुटं विन्यस्तानामिति शेषः, तासां योषितां संबन्धिनीनाम् भूषणाङ्गाम्बरस्रजां विवेकम् इमे भूषणादयः अस्या अन्यस्या वेति निश्चयमाधातुं कर्तुं न शक्यम् एतेनान्योन्यसंश्लेषः सूचितः ॥ ६६ ॥

गो० टी०–उचितेष्वितति । उचितेषु स्थानेषु स्थितानामपि भूषणाङ्गाम्बरस्रजां साधारण्यादेकतामापन्नानामिति भावः । विवेकः सुव्यक्तमाधातुं न शक्यः अन्योन्यसंग्रथितत्वेन सुप्तत्वात् । इमा अस्या भूषणाङ्गाम्बरस्रजः इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थः ॥ ६६ ॥

६७] ति० टी०–सुखसंविष्टे सुखसुप्ते काञ्चनाः काञ्चनस्तम्भाः दीपा दीपस्थाग्निपुरुषाः कर्तारः स्त्रियः कर्म अनेन रावणे जाग्रति तेषामपि तद्दर्शने भयं सूचितम् ॥ ६७ ॥

रा० टी०–रावणेति । रावणे सुखसंविष्टे सुप्ते सतीत्यर्थः ज्वलन्तः काञ्चना दीपाः तदभिमानिदेवविशेषाः अनिमिषा निमेषरहिताः सन्तः विविधप्रभाः ताः रावणसंबन्धिनीः स्त्रियः प्रेक्षन्ते एतेन रावणजागरणसमये तत्स्त्रीदर्शनं देवानामपि दुर्लभमिति व्यञ्जितं तेन रावणस्य प्रतापातिशयः सूचितः ॥ ६७ ॥

गो० टी०–रावण इति । सुखसंविष्टे सुखसुप्ते काञ्चनाः काञ्चनदीपस्तम्भस्था दीपाः अनिमिषाः सन्तः प्रेक्षन्त इव अनेन रावणस्य जाग्रदवस्थायां दीपैरपि ताः स्त्रियो निश्चलं द्रष्टुमशक्या इति गम्यते ॥ ६७ ॥

१ श्लोकोऽयं गो. नास्ति । २ व्यतीति गो. पाठः । ३ विवेक इति गो. पाठः । ४ प्रेक्षन्तानिमिषा इति गो. पाठः ।

राजर्षिविप्रदैत्यानां[1] गन्धर्वाणां च योषितः । रक्षसां[2] चाभवन्कन्यास्तस्य कामवशंगताः ॥ ६८ ॥
युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः । समदा मदनेनैव मोहिताः काश्चिदागताः ॥ ६९ ॥
न तत्र काश्चित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः ।
न चान्यकामापि न चान्यपूर्वा विना वराहीं जनकात्मजां तुं[3] ॥ ७० ॥
न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता ।
भार्याऽभवत्तस्य न हीनसत्त्वा न चापि कान्तस्य न कामनीया ॥ ७१ ॥
बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी ।
इमा महाराक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः ॥ ७२ ॥

६८] ति० टी०–राजर्षयो विप्रदैत्याश्च अस्य ब्रह्मराक्षसत्वादस्ति विप्रकन्याविवाहेऽधिकारः । कामवशंगताः सत्यस्तस्य योषितोऽभवन् । अनेन तासामप्यनुरागः सूचितः ॥ ६८ ॥

रा० टी०–नन्वेवंविधस्त्रीणां प्राप्तिः कथं तस्येत्यत आह–राजर्षीति । राजर्षिप्रभृतीनां कन्याः कामवशं गताः सत्यः तस्य रावणस्य योषितोऽभवन् । कन्या इत्युक्त्या रावणस्याधर्मसंसर्गाभावो ध्वनितः तेन ब्रह्मराक्षसत्वादुक्तकन्याविवाहयोग्यत्वं रावणस्य ध्वनितम् ॥ ६८ ॥

गो० टी०–अथ सीतयैकया अकाम्यत्वं वक्तुं सर्वस्त्रीकाम्यत्वमाह–राजर्षीत्यादिना श्लोकत्रयेण । तस्य कामवशंगताः तं प्रति यः कामः तस्य वशंगताः तं कामयित्वा स्वयमेवागतास्ताः न तु तेन कामयित्वा हृता इत्यर्थः ॥ ६८ ॥

६९] ति० टी०–अस्य बहुस्त्रीप्राप्तिर्बलात्स्वारस्याच्चेत्याह—युद्धेत्यादि । सर्वा इति बाहुल्याभिप्रायम् आसां हरणे एतद्बन्धुभिर्युद्धं भविष्यतीति युद्धकामनापूर्वं हृताः । काश्चित्समदास्तरुण्यो मदनमोहिताः स्वयमेवैनं हृतवत्यः ॥ ६९ ॥

रा० टी०–तदागमनप्रकारमाह–युद्धेति । सर्वा बहवः स्त्रियः युद्धकामेन हरणहेतुकतत्पित्रादिभिः युद्धमिच्छता रावणेन हृताः समदाः काश्चित्तु मदनेनैव मोहिताः सत्यः आगताः स्वयं प्राप्ताः एतेन रावणस्य सौन्दर्यातिशयः सूचितः ॥ ६९ ॥

गो० टी०–हृताश्च काश्चन श्रूयन्ते तत्र कथमित्यत्राह–युद्धेति । ताश्च हृताश्च तासां संबन्धिभिः सह युद्धं भविष्यतीति युद्धं कामयित्वाऽनेन हृताः नतु ताः कामयित्वा हृताः ॥ ६९ ॥

७०] ति० टी०–अस्यैव विवरणम्—न तत्र काश्चिदिति । वीर्योपपन्नेनापि तेन तत्र ताश्च मध्ये काश्चित्प्रमदाः प्रसह्य न हृताः, किं तु गुणेन निरतिशयैश्वर्यवीर्यसौन्दर्यादिगुणेन स्वत एव लब्धाः तत्र लङ्कायामन्यकामा च नाहृता, अन्यपूर्वा च नाहृता कथमेवं प्रत्यक्षापलापस्तत्राह–विनेति । वराहीं श्रेष्ठरामार्हाम् ॥ ७० ॥

रा० टी०–जनकात्मजाहरणं रावणविघातार्थमेवेति द्योतयन्नाह–नेति । वराहीं श्रेष्ठपूजायोग्यां जनकात्मजां विना गुणेन अतिसौन्दर्यादिनोपलक्षिता अपि काश्चित् अनिच्छन्त्यः प्रमदाः वीर्योपपन्नेन रावणेन प्रसह्य हठात् न लब्धाः गृहीताः अन्यकामाः पत्यन्तरमिच्छन्त्यो न लब्धाः स्वैतरेच्छावत्यो न हृता इत्यर्थः, अन्यपूर्वा विवाहिता आत्ममात्रमिच्छन्त्योऽपीत्यर्थः, न लब्धा एतेन रावणविध्वंसोऽचिरं भवितेति सूचितम् ॥ ७० ॥

गो० टी०–अनुमेवार्थं विवृणोति–न तत्रेति । तत्र ताश्च काश्चिदपि प्रमदाः प्रसह्य वीर्येण न लब्धाः किंतु स्वसंवादेनैवेत्यर्थः वीर्योपपन्नेन रावणेन न लब्धाः अपि तु गुणेन लब्धाः अन्यकामा च काचित्तत्र नास्ति अन्यपूर्वा च न । अन्यत्रासक्ता च न काचिदित्यर्थः ॥ ७० ॥ ७१ ॥

७१] ति० टी०–उपचार उत्तमाम्बरभूषणमाल्यादिः । कान्तस्य रावणस्य कामनीया मनोज्ञा न तादृशी च न ॥ ७१ ॥

रा० टी०–नेति । अकुलीना निषिद्धकुलोत्पन्ना तस्य रावणस्य भार्या नाभवत् हीनरूपा च नाभवत् अदक्षिणा अकुशलापि नाभवत् अनुपचारयुक्ता उत्तमभूषणरहिता नाभवत् हीनसत्त्वा हीनबलापि न कान्तस्य रावणस्य न कामनीया अनीप्सितापि भार्या नाभवत् ॥ ७१ ॥

७२] ति० टी०–अथ सीताप्येतत्स्वयन्तर्गता न वेति विकल्प्याद्ये रावणस्य भद्रमेवेति बुद्धिर्हनूमतो जातेत्याह–बभूवेति । साधुबुद्धेर्हरीश्वरस्येति बुद्धिर्बभूव इमा महाराक्षसराजभार्याः, यथा तद्युक्ताः राघवधर्मपत्न्यपीदृशी एतदन्तर्गतैतद्युक्ता च यदि स्यात्तदास्य रावणस्य सुजातं भद्रमेव भवति रावणसुकृतेति मया निवेदिते सति सीतायां मृतायामिव राघवस्योपेक्षणाद्रावणवधयत्नाप्रसक्तेरिति भावः ॥ ७२ ॥

रा० टी०–बभूवेति । इमा राक्षसराजभार्याः यथा स्वपतिस्मरणादिषु निरताः ईदृशी तथा रामस्मरणादिनिरता यदि राघवधर्मपत्नी तत्स्मरणादीनां विघ्नो न कृतः स्यादित्यर्थः तदा अस्य रावणस्य सुजातं कल्याणमेवेत्यर्थः, इति साधुबुद्धेर्हरीश्वरस्य बुद्धिर्निश्चयो बभूव ॥ ७२ ॥

गो० टी०–बभूवेति । राघवधर्मपत्नी ईदृशी यदि स्वयंवरात्पूर्वमेवास्य धर्मपत्नी चेत् अस्य सुजातं सुकृतम्

१ पितृदैत्येति गो. पाठः । २ राक्षसानां च याः कन्या इति गो. पाठः । ३ तामिति गो. पाठः ।

पुनश्च सोऽचिन्तयदौत्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता ।
अथायमस्यां कृतवान्महात्मा लङ्केश्वरः कष्टमनार्यकर्म ॥ ७३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

हनुमान्पुष्पकविमाने नानालंकरणोपशोभितोपकरणभासुरशयनोत्तमशायिनं बहुविधाभरणविभूषितवपुषं रावणं ददर्श । तदविदूरतः पणवमृदङ्गवेणुवीणाढक्कादिनानातोद्यालिङ्गितवपुषां सुस्त्यनवस्थाङ्गप्रत्यङ्गानां शैलूषीणां मध्येऽद्भुतशयनशायिनीमुज्ज्वलाभरणोपशोभितां मन्दोदरीं दृष्ट्वा सेयं सीतेति मत्वा संजातहर्षः पुच्छचुन्बनादि कापेयमाविश्चकार ।

तत्र दिव्योपमं मुख्यं स्फाटिकं रत्नभूषितम् । अवेक्षमाणो हनुमान्ददर्श शयनासनम् ॥ १ ॥

इयमसाध्वी बुद्धिः कापेयत्वप्रमादकृता न तु स्वयं तस्य बुद्धिरिति द्योतयितुं साधुबुद्धेरित्युक्तम् एवं प्रमादोपस्थितबुद्ध्या पश्चात्तापोऽभूदित्याह—पुनश्च सोऽचिन्तयदार्तरूप इति । यद्वा इमाः राक्षसराजभार्याः यथा स्वभर्त्रा विशिष्टाः सकलभोगयुक्ताश्च तथा राघवधर्मपत्नी ईदृशी यदि स्वभर्त्रा सहिता भोगयुक्ता च यदि तदास्य रावणस्य सुजातं शोभनं जन्मेति साधुबुद्धेः परसमृद्धिपरस्य हरीश्वरस्य स्वयमाधिपत्यार्हस्य बुद्धिर्बभूव । अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत्तदास्य शोभनं जन्म स्यादिति बुद्धेर्जातेत्यर्थः ॥ ७२ ॥

७३] ति० टी०—यदीत्यनेन सूचितमस्य पक्षस्यात्यन्तासंभावितत्वमाह—**पुनश्चेति** । पक्षान्तरं च सोऽचिन्तयत् विचारेण निश्चितवानित्यर्थः । चिन्ताप्रकारः—हि प्रसिद्धमेतत् यत्सीता देवी गुणतः पातिव्रत्यादिगुणैर्विशिष्टा अथ यत इत्यर्थे यतो महात्मा महाबलो लङ्केश्वरः निरवधिकैश्वर्यवैशिष्ट्यमनेन सूचितम् । ईदृशोऽस्यां जानक्यामनार्यकर्मोपहरणरूपं कर्म आर्तरूपः परिगृहीतमायारूपः सन्कष्टं सक्लेशं यथा भवति तथा कृतवान् । यद्येषा ऐश्वर्यादौ सरागा स्यात्तदा स्वरसत एव नयनं स्यात्, न च तदस्ति अस्माभिस्तद्विक्रोशनादेव रावणेन क्लेशपूर्वं नयनस्य चानुभवादित्याशयः । 'आर्तरूपः' इति पाठे आर्तं संजातपीडं रूपं यस्येत्यर्थं हनुमद्विशेषणम् आन्तरपीडासूचकरूप इत्यर्थः ॥ ७३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०—**पुनरिति** । गुणतः सर्वसद्गुणैर्विशिष्टा सर्वतोऽधिका सीताऽस्तीति ध्रुवं निश्चितम् । अथ अतः महात्मा लङ्केश्वरः यत् अस्यां सीतायामनार्यकर्मं अपहरणरूपक्षुद्रक्रियां कृतवान् तत्कष्टम् अनुचितं तद्विघातकमित्यर्थः ॥ ७३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

गो० टी०—किंच चिन्तान्तरमाह—**पुनश्चेति** । अथ सः हनुमान् । सीता गुणतः पातिव्रत्यादिगुणतः ध्रुवं विशिष्टा हि अस्याम् एतद्विषये महात्मा महाकुलप्रसूतोऽपि अयं लङ्केश्वरः अनार्यकर्म अपहरणरूपं कर्म कृतवान् कष्टमिति आर्तरूपः अत्यन्तमार्तः "प्रशंसायां रूपप्" पुनश्चाचिन्तयत् । वैदेह्याः दृढव्रतत्वात्पातिव्रत्यभङ्गो न भवेदेव अपि तु मिथ्यापवादमेवोत्पादितवानिति भृशं दुःखितः सन् चिन्तितवानित्यर्थः । यद्वा बभूवेत्यादि । राक्षसराजपत्नीवत्सीता स्वभर्त्रा संगता चेत्सीतापहरणं न कृतवांश्चेत्तदास्य सुजातमित्युक्तम् । तत्र निरतिशयसौन्दर्यादिशालिन्या मैथिल्याः रक्षःस्त्रीसाम्यं चिन्तयता मया हीनोपमा कृतेति पश्चात्तापयुक्तः सन् अचिन्तयत् । हि यस्मात्सीता गुणतः विशिष्टा अतः आर्तस्वरूपः सन्नचिन्तयत् मया हीनोपमैव कृतेत्यचिन्तयत् । अथ अथापि अस्यां सीतायाम् अनार्यकर्म धर्षणरूपं कर्म कृतवान् कष्टं सर्वमिदं लङ्केश्वर्यं भ्रष्टं भविष्यतीत्यचिन्तयच्चेत्यर्थः । यद्वा राघवधर्मपत्नी यथा रावणेन बलादानीता तथा राक्षसराजभार्याः बलात्सुग्रीवेण बन्दीकृताश्चेदस्य हरीश्वरस्य सुग्रीवस्य सुजातं हीति साधुबुद्धेः सन्मन्त्रिबुद्धेः अस्य हनुमतः बुद्धिर्बभूवेत्यर्थः । यद्वा इमा राक्षसराजभार्याः यथा रावणेनुरक्ताः ईदृशी राघवधर्मपत्नी यदि एवमनुरक्ता चेत् अस्य सुजातमिति साधुबुद्धेरपि बुद्धिर्बभूव ऐश्वर्यातिशयदर्शनविस्मयादिति भावः अत एव वक्ष्यति—अहो वीर्यमित्यादिना । एवं हठादुक्त्वानुशयितवानित्याह—**पुनश्चेति** । हि यस्मात्सीता गुणतः पातिव्रत्येन विशिष्टा सर्वोत्कृष्टा अतः आर्तरूपः किं मया व्याहृतमित्यनुतप्तः सन् अस्यामनार्यकर्म कृतवानित्यचिन्तयत् ॥ ७३ ॥

अस्मिन्सर्गे त्रिसप्ततिः श्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

१] ति० टी०—तत्र शालायाम् । दिव्योपमं दिवि भवेन स्वर्गवर्तिपदार्थेनैवोपमा यस्य तत् शयनस्यासनं पल्यङ्कप्रतिष्ठापनवेदिका अवेक्षमाण इतस्ततः पश्यन् ॥ १ ॥

१ आर्तरूप इति गो. पाठः

दान्तकाञ्चनचित्राङ्गैर्वैदूर्यैश्च वरासनैः । महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २ ॥
तस्य चैकतमे देशे [1]दिव्यमालोपशोभितम् । ददर्श पाण्डुरं छत्रं ताराधिपतिसंनिभम् ॥ ३ ॥
जातरूपपरिक्षिप्तं चित्रभानोः समप्रभम् । अशोकमालाविततं ददर्श परमासनम् ॥ ४ ॥
वालव्यजनहस्ताभिर्वीज्यमानं समन्ततः । गन्धैश्च विविधैर्जुष्टं वरधूपेन धूपितम् ॥ ५ ॥
परमास्तरणास्तीर्णमाविकाजिनसंवृतम् । दामभिर्वरमाल्यानां समन्तादुपशोभितम् ॥ ६ ॥
तस्मिञ्जीमूतसंकाशं प्रदीप्तोज्ज्वलकुण्डलम् । लोहिताक्षं महाबाहुं महारजतवाससम् ॥ ७ ॥
लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना । संध्यारक्तमिवाकाशे तोयदं सतडिद्गुणम् ॥ ८ ॥
वृतमाभरणैर्दिव्यैः सुरूपं कामरूपिणम् । सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मन्दरम् ॥ ९ ॥
क्रीडित्वोपरतं रात्रौ वराभरणभूषितम् । प्रियं राक्षसकन्यानां राक्षसानां सुखावहम् ॥ १० ॥

२-३] ति० टी०-तस्यैव वर्णनम्-दान्तेत्यादि । गजदन्तमयानि स्वर्णमयानि च चित्राणि चित्रयुतान्यङ्गानि पादादिरूपाणि येषां तैर्महार्हास्तरणोपेतैर्बहुमूल्यास्तरणयुक्तैः वैदूर्यैरित्युपलक्षणम् वैदूर्यैः पद्मरागादिनिर्मितैर्वरासनैः स्त्रीशयनपल्यङ्कैर्महाधनैर्बहुमूल्यैरुपपन्नम् ॥ २ ॥ ३ ॥

रा० टी०-दर्शनान्तरमाह-तत्रेत्यादिभिः । अवेक्षमाणः सीतान्वेषणं कुर्वन् हनुमान् दिव्योपमं स्वर्गस्थशयनासनसदृशं स्फाटिकं स्फटिकमणिमयं रत्नभूषितं महार्हास्तरणोपेतैर्बहुमूल्यास्तरणयुक्तैर्दान्तकाञ्चनचित्राङ्गैः दन्तमयत्वकाञ्चनमयत्वाभ्यां चित्राण्यङ्गानि पादादीनि येषां तैर्वैदूर्यैर्वैदूर्यमणिमयैश्च महाधनैर्बहुमूल्यकैर्वरासनैरल्पपर्यङ्करूपपन्नं महापर्यङ्कावरोहणाय संयोजितं मुख्यं शयनासनं महापर्यङ्कं ददर्श । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०-तत्र दिव्योपममित्यादि । शयनासनं शयनस्यासनं खट्वामित्यर्थः । दान्तेति । दान्तानि दन्तविकारभूतानि काञ्चनानि काञ्चनमयानि च अत एव चित्राणि नानावर्णानि अङ्गानि येषां तैः प्रान्ते दन्तमयैः ततः परं काञ्चनमयैः सर्वत्र वैडूर्यनिर्मितैरित्यर्थः महाधनैः महामूल्यैः वरासनैः शयनावरोहणकाले विश्रमाय स्थापितैः उपपन्नम् आवृतम् ॥ १ ॥ २ ॥

रा० टी०-तस्येति । तस्य महापर्यङ्कस्य एकतमे एकस्मिन्देशे दिव्यमाल्योपशोभितं ताराधिपतिसन्निभं पाण्डुरं श्वेतं छत्रं ददर्श ॥ ३ ॥

गो० टी०-तस्येति । एकतमे देशे शिरोभाग इत्यर्थः ॥ ३ ॥

४] ति० टी०-परमासनं पल्यङ्कस्तस्यैकदेशे ददर्श । अशोकपुष्पमालायुक्तम् यद्वा यत्संनिधाने शोकाभावस्तादृशमालायुतम् । चित्रभानुरग्निः ॥ ४ ॥

५] ति० टी०-वालव्यजनं चामरम् । ननु संभोगगृहे तत्रापि निद्राणस्य कथं वालव्यजनवीजनम्, कथं च हनुमतस्ताभिरदर्शनमिति चेन्न यन्त्रनिर्मितस्त्रीप्रतिमादिभिस्तत्रापि तत्संभवात् ॥ ५ ॥

६] ति० टी०-आविकाजिनमूर्णायुचर्म तद्धि परममृदुलम् तेन संवृतं संवृतपर्यन्तप्रदेशम् माल्यं पुष्पम् ॥ ६ ॥

रा० टी०-जातरूपेति । जातरूपेण सुवर्णेन परिक्षिप्तं निर्मितं चित्रभानोः सूर्यस्य समप्रभम् अशोकमालाविततं शोकापहारकमालाभिः संयुतं विविधैर्गन्धैश्चन्दनैर्जुष्टम् आविकाजिनेन स्वाभाविकातिकोमलोर्णायुचर्मणा संवृतम् आस्तीर्णं वरमाल्यानां मनोहरसुगन्धादिनोत्तमपुष्पाणां दामभिर्मालाभिः उपशोभितं वालव्यजनहस्ताभिः समन्ततो वीज्यमानं परमासनं महापर्यङ्कस्थपर्यङ्कविशेषं ददर्श । श्लोकत्रयमेकान्वयि ॥ ४-६ ॥

गो० टी०-उक्तमेव पर्यङ्कं पुनर्वर्णयन्नाह-जातरूपेत्यादिना । चित्रभानोः सूर्यस्य आविकाजिनम् ऊर्णायुचर्म तेन पर्यङ्कस्योपरि फलका संधीयते । वरमाल्यानाम् अशोकातिरिक्तपुष्पाणाम् ॥ ४-६ ॥

७] ति० टी०-तस्मिन् प्रसुप्तमिति शेषः । महारजतं स्वर्णं तत्तन्तुनिर्मितवासोधारिणम् ॥ ७ ॥

रा० टी०-तस्मिन्निति । जीमूतसंकाशं श्यामत्वेन मेघसदृशं प्रदीप्तानि उज्ज्वलकुण्डलानि यस्य महारजतं स्वर्णतन्तुनिर्मितं वासो यस्य ॥ ७ ॥

गो० टी०-तस्मिन्नित्यादि । महारजतवाससम् हेमचित्रितवाससं महारजतं हेम महारजनवाससमिति पाठे कुसुम्भरागरञ्जितवस्त्रमित्यर्थः । सवृक्षवनगुल्माढ्यं सवृक्षैर्वनैः गुल्मैश्चाढ्यम् प्रसुप्तं निश्चलमित्यर्थः ॥ ७-१२ ॥

८] ति० टी०-रावणस्य तडित्स्थानीयं सौवर्णं वासः ॥ ८ ॥

रा० टी०-लोहितेन रक्तेन चन्दनेन अनुलिप्ताङ्गं सतडिद्गुणं तडिद्रूपगुणसहितं संध्यारक्तं संध्याहेतुकारुण्यविशिष्टम् आकाशे तोयदं मेघमिव तडिदुपमेयत्वं स्वर्णवस्त्रस्य ॥ ८ ॥

९-१०] ति० टी०-सवृक्षवनगुल्माढ्यं पुष्पसहितवृक्षवनगुल्माढ्यं मन्दरमिव स्थितम् बाहवो यस्य वृक्षाः, नासादयो गुल्माः ॥ ९ ॥ १० ॥

रा० टी०-दिव्यैः आभरणैः वृतं सवृक्षवनैर्वृक्षसमूहसहितैर्गुल्मैर्लतविशेषैराढ्यं मन्दरमिव ॥ ९ ॥

१ सोऽद्रिमालाविभूषितमिति गो. पाठः । २ पाण्डुरच्छत्रमिति गो. पाठः । ३ उत्तमेति गो. पाठः । ४ गणमिति गो. पाठः ।

पीत्वाऽप्युपरतं चापि ददर्श स महाकपिः भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ॥ ११ ॥
निःश्वसन्तं यथा नागं रावणं वानरोत्तमः[1] आसाद्य परमोद्विग्नः सोपासर्पत्सुभीतवत् ॥ १२ ॥
अथारोहणमासाद्य वेदिकान्तरमाश्रितः क्षीबं[2] राक्षसशार्दूलं प्रेक्षते स्म महाकपिः ॥ १३ ॥
शुशुभे राक्षसेन्द्रस्य स्वपतः शयनं शुभम् गन्धहस्तिनि[3] संविष्टं यथा प्रस्रवणं महत् ॥ १४ ॥
काञ्चनाङ्गदसंनद्धौ ददर्श स महात्मनः विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्रध्वजोपमौ ॥ १५ ॥
ऐरावतविषाणाग्रैरापीडनकृतव्रणौ वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ ॥ १६ ॥
पीनौ समसुजातांसौ संगतौ बलसंयुतौ सुलक्षणनखाङ्गुष्ठौ स्वङ्गुलीयैकलक्षितौ ॥ १७ ॥
संवृतौ[4] परिघाकारौ वृत्तौ करिकरोपमौ विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षाविवोरगौ ॥ १८ ॥
शशक्षतजकल्पेन सुशीतेन सुगन्धिना चन्दनेन पराध्यैन स्वनुलिप्तौ स्वलंकृतौ ॥ १९ ॥

रा० टी०–प्रसुप्तं सुरूपं शोभनरूपविशिष्टं क्रीडित्वा उपरतं निवृत्तं पीत्वाऽपि उपरतं वराभरणभूषितं कामरूपिणं रावणं तस्मिन् परमासने ददर्श । सार्धश्लोकचतुष्टयमेकान्वयि ॥ १० ॥

११] ति० टी०–पीत्वाप्युपरतम् अपिना क्रीडित्वाप्युपरतम् ॥ ११ ॥

१२] ति० टी०–यथा नागं गजमिव निःश्वसन्तं रावणमासाद्य प्राप्य परमोद्विग्नोऽयं पापी देवीं हृतवानित्येतत्समीपेऽवस्थानमनुचितमिति खिन्नचित्तोऽपासर्पत् । सुभीतवत्सुभीतो यथा भयहेतोः पिशाचादेः संमुखे स्थातुमशक्तोऽपसर्पति तद्वत् ॥ १२ ॥

रा० टी०–भास्वरे इति । भास्वरे प्रकाशमाने शयने प्रसुप्तं नागमिव निःश्वसन्तं रावणं वानरोत्तमो हनुमान् आसाद्य प्राप्य परमोद्विग्नः भविष्यदेतदैश्वर्यध्वंसहेतुकोद्वेगविशिष्टः सन् सुभीतवत् उपासर्पत् एतेन हनुमतो दयालुत्वातिशयः सूचितः । सार्धश्लोक एकान्वयी ॥ ११ ॥ १२ ॥

१३] ति० टी०–आरोहणं सोपानम् । वेदिकान्तरं सोपानवेदिकान्तरं सोपानपर्वमध्यम् ॥ १३ ॥

रा० टी०–अथेति । अथ उपसर्पणानन्तरं वेदिकान्तरमासाद्य प्राप्य आरोहणं सोपानमाश्रितः सन् क्षीबं मत्तं राक्षसशार्दूलं प्रेक्षते स्म ॥ १३ ॥

गो० टी०–अथेति । अथ अपसर्पणानन्तरम् आरोहणं सोपानम् आसाद्य अधिरुह्य वेदिकान्तरम् सोपानपर्वमध्यम् ॥ १३ ॥

१४] ति० टी०–यस्य गन्धेनान्ये गजाः पलायन्ते स गन्धगजः मत्तगजेन नितरां संविष्टमधिष्ठितं महत्प्रस्रवणमिव १४

रा० टी०–शुशुभे इति । स्वपतो राक्षसेन्द्रस्य शयनं गन्धहस्तिना संनिविष्टं प्रविष्टं प्रस्रवणं गिरिविशेष इव शुशुभे॥१४॥

गो० टी०–शुशुभ इति । यस्य गन्धेनान्ये हस्तिनो भीता भवन्ति स गन्धहस्ती । प्रस्रवणं निर्झरम् ॥ १४ ॥

१५] ति० टी०–महात्मनो महाशरीरस्य । विक्षिप्तौ प्रसारितौ ॥ १५ ॥

रा० टी०–काञ्चनेति । काञ्चनाङ्गदाभ्यां संनद्धौ संयुक्तौ विक्षिप्तौ राक्षसेन्द्रस्य भुजौ ददर्श ॥ १५ ॥

गो० टी०–काञ्चनाङ्गदेत्यादि । विक्षिप्तौ प्रसारितौ विष्णुचक्रपरिक्षतौ विष्णुः उपेन्द्रः संगतौ देहानुरूपौ संहतौ दृढसंधिबन्धौ विक्षिप्तौ शयने निहितौ पञ्चाङ्गुलिमत्तया पञ्चशीर्षावित्युक्तम् एतदन्तस्य ददर्शेत्यनेनान्वयः अत्र द्विभुजत्वैकमुखत्वोक्तिः स्त्रीणां कामनीयत्वाय ॥१५–१८॥

१६] ति० टी०–आपीडने युद्धे कृतव्रणौ कृतव्रणाकिणौ वज्रेणोल्लिखितौ क्षतौ पीनांसौ ययोस्तौ वज्रचक्रयोरप्यसाध्यमृत्युरिति भावः ॥ १६ ॥

रा० टी०–भुजावेव वर्णयन्नाह–ऐरावतेति । ऐरावतविषाणाग्रैः आपीडने युद्धे कृतं व्रणं ययोस्तौ वज्रेण उल्लिखितौ प्राप्तक्षतौ पीनांसौ ययोः विष्णुचक्रेण परिक्षतौ युद्धे प्राप्तव्रणौ ॥ १६ ॥

१७–१८]ति० टी०–समौ सुजातौ चांसौ संगतौ दृढसंधिबन्धौ स्वङ्गुलीयकलक्षितौ शोभनाङ्गुलीयकभूषितौ १७॥१८

रा० टी०–पीनौ स्थूलौ समौ सुजातौ सुन्दरौ अंसौ ययोः सङ्गतौ शरीरसदृशौ बलसंयुतौ बलिष्ठौ सुलक्षणं नखाङ्गुष्ठं ययोः स्वङ्गुलीयकलक्षितौ शोभनाङ्गुलीयकैर्लक्षितौ ॥ १७ ॥

रा० टी०–संहतौ पुष्टौ वृत्तौ वर्तुलौ अत एव करिकरोपमौ शुण्डादण्डसदृशौ पञ्चशीर्षौ उरगाविव ॥ १८ ॥

१९]ति० टी०–शशस्य क्षतजं रक्तमतिलोहितवर्णम्॥१९॥

रा० टी०–शशक्षतजकल्पेन शशरुधिरसदृशेन पराध्यैन अत्युत्तमेन चन्दनेन स्वनुलिप्तौ स्वलंकृतौ शोभनालङ्कारविशिष्टौ ॥ १९ ॥

गो० टी०–शशक्षतजेत्यादि । यक्षादीन् रावयितुं शीलमनयोरस्तीति तथा ददर्शेति पुनरभिधानं विशेषणान्तरविवक्षया ॥ १९–२१ ॥

---

१ वानरर्षभ इति गो. पाठः । २ सुप्तमिति गो. पाठः । ३ शयनोत्तममिति गो. पाठः । ४ संविष्टे इति गो. पाठः । ५ तलेति गो. पाठः । ६ संहताविति गो. पाठः ।

उत्तमस्त्रीविमृदितौ गन्धोत्तमनिषेवितौ । यक्षपन्नगगन्धर्वदेवदानवराविणौ ॥ २० ॥
ददर्श स कपिस्तस्य बाहू शयनसंस्थितौ । मन्दरस्यान्तरे सुप्तौ महाही रुषिताविव ॥ २१ ॥
ताभ्यां स परिपूर्णाभ्यामुभाभ्यां राक्षसेश्वरः । शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥ २२ ॥
चूतपुंनागसुरभिर्बकुलोत्तमसंयुतः । मृष्टान्नरससंयुक्तः पानगन्धपुरःसरः ॥ २३ ॥
तस्य राक्षसराजस्य निश्चक्राम महामुखात् । शयानस्य विनिःश्वासः पूरयन्निव तद्गृहम् ॥ २४ ॥
मुक्तामणिविचित्रेण काञ्चनेन विराजता । मुकुटेनापवृत्तेन कुण्डलोज्ज्वलितानानम् ॥ २५ ॥
रक्तचन्दनदिग्धेन तथा हारेण शोभिना । पीनायतविशालेन वक्षसाभिविराजता ॥ २६ ॥
पाण्डुरेणापविद्धेन क्षौमेण क्षतजेक्षणम् । महार्हेण सुसंवीतं पीतेनोत्तरवाससा ॥ २७ ॥
माषराशिप्रतीकाशं निःश्वसन्तं भुजङ्गवत् । गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥ २८ ॥
चतुर्भिः काञ्चनैर्दीपैर्दीप्यमानं चतुर्दिशम् । प्रकाशीकृतसर्वाङ्गं मेघं विद्युद्गणैरिव ॥ २९ ॥
पादमूलगताश्चापि ददर्श सुमहात्मनः । पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ॥ ३० ॥

२०] ति० टी०–उत्तमस्त्रीणां विमृदितं विमर्दनमालिङ्गनादि ययोस्तौ ॥ २० ॥

रा० टी०–उत्तमस्त्रीभिः विमृदितौ शनैर्निपीडितौ यक्षादीनां राविणौ ॥ २० ॥

२१–२२] ति० टी०–ददर्शात्यादरेण ददर्श नातः पुनरुक्तिः महाही महासर्पौ अत्र द्विभुजत्वकथनायुद्धादिकाल एव विंशतिभुजत्वं दशशीर्षत्वं चेति बोध्यम् ॥ २१ ॥ २२ ॥

रा० टी०–मन्दरस्यान्तरे सुप्तौ रुषितौ कुद्धौ महाही इव शयनसंस्थितौ तस्य रावणस्य बाहू कपिर्ददर्श । श्लोकषट्कमेकान्वयि ॥ २१ ॥

रा० टी०–ताभ्यामिति । परिपूर्णाभ्यां सल्लक्षणैर्युक्ताभ्यामुभाभ्यां भुजाभ्यामचलसंकाशो राक्षसेन्द्रः शृङ्गाभ्यां मन्दर इव शुशुभे ॥ २२ ॥

गो० टी०–ताभ्यामिति । परिपूर्णाभ्याम् दीर्घवृत्ताभ्यामित्यर्थः ॥ २२ ॥

२३–२४] ति० टी०–बकुलोत्तमसंयुत उत्तमबकुलगन्धयुतः । अयं पुरुषविशेषश्चासधर्म इति कतकः । चूतादिसुरभित्वं तु तदधिवासितवस्तुसेवनात् । मृष्टान्नरससंयुक्तः षड्सोत्तमान्नगन्धोपेतः पानं मधु राक्षसत्वादेव वामाचारेण पूजाकरणान्मधुपानम् ॥ २३ ॥ २४ ॥

रा० टी०–चूतेति । चूतपुन्नागसुरभिः चूतपुन्नागसुरभिसदृशसुरभिविशिष्टः बकुलोत्तमसंयुतः उत्तमबकुलगन्धमिश्रः मृष्टान्नरससंयुक्तः मृष्टान्नरसगन्धविशिष्टः पानगन्धः सुरादिसुरभिः पुरस्सरो यस्य स राक्षसराजस्य विनिःश्वासः राक्षसराजस्य मुखात् निश्चक्राम । श्लोकद्वयमेकान्वयि ॥२३॥ २४ ॥

गो० टी०–चूतेत्यादि । निःश्वासस्य चूतादिसुरभित्वं तदधिवासितरसावल्यादिमधुसेवनात् । मृष्टान्नरससंयुक्तः षड्सपदार्थगन्धयुक्तः पानगन्धपुरस्सरः पीयत इति पानं मधु तद्गन्धयुक्तः ॥ २३ ॥ २४ ॥

२५–२६] ति० टी०–अपवृत्तेन निद्रावशात्पर्यस्तेन विराजता मुकुटेन उपलक्षितमिति शेषः । शोभिना हारेण शोभनहारवता वक्षसोपलक्षितमिति शेषः ॥ २५ ॥ २६ ॥

रा० टी०–मुक्तेति । काञ्चनेन स्वर्णमयेन विराजता शोभमानेन अपवृत्तेन परिवर्तनादिना विपर्यस्तेन मुकुटेनोपलक्षितं कुण्डलाभ्यामुज्ज्वलितमाननं यस्य ॥ २५ ॥

रा० टी०–रक्तचन्दनदिग्धेन अरुणचन्दनलिप्तेन शोभिना हारेण चाभिविराजता पीनायतविशालेन वक्षसोपलक्षितम् २६

गो० टी०–मुक्तामणीति । अपवृत्तेन स्थानात् किञ्चिच्चलितेन अपविद्धेन पर्यस्तेन क्षौमेण उत्तरीयरूपेण विद्युद्गणैरिव विद्युत्समूहैरिव । रावणं तस्य पत्नीश्च ददर्शेत्यन्वयः ॥ २५–२९ ॥

२७] ति० टी०–अपविद्धेन पर्यस्तेन पाण्डुरेण क्षौमेण परिधानीयेन कटेरधः संवीतम् पीतेनोत्तरीयेण सुसंवीतमित्यर्थः ॥ २७ ॥

रा० टी०–अपविद्धेन विपर्यस्तेन पाण्डुरेण क्षौमेण पट्टवस्त्रविशेषेण सुसंवीतं पीतेनोत्तरवाससा च संवीतम् ॥ २७ ॥

२८] ति० टी०–तोयान्ते तोयमध्ये ॥ २८ ॥

रा० टी०–माषराशिप्रतीकाशं हरितनीलवर्णत्वेन माषराशिसदृशं भुजङ्गवत् निःश्वसन्तं गाङ्गे गङ्गासंबन्धिनि महति तोयान्ते कुञ्जरमिव प्रसुप्तम् ॥ २८ ॥

२९] ति० टी०–काञ्चनैः काञ्चनस्तम्भगैः चतुर्दिशं चतुर्दिक्षु दीप्यमानम् अत्यन्तसंयोगे द्वितीया 'विद्युद्गणैरिव' इति पाठे पुंस्त्वमार्षम् ॥ २९ ॥

रा० टी०–चतुर्दिशं चतुर्दिक्षु दीपैर्दीप्यमानं "कालाध्वनो" इति द्वितीया । अत एव विद्युद्गणैर्मेघमिव प्रकाशीकृतसर्वाङ्गं रावणम् ॥ २९ ॥

३०] ति टी०–उक्तगुणं रावणं ददर्श पादमूलगास्तत्पत्नीश्च ददर्श । रक्षःपतेर्गृह इत्युत्तरान्वयि ॥ ३० ॥

१ रुषिताविति गो. पाठः । २ सिंहस्येति गो. पाठः । ३ उत्तमेति गो. पाठः । ४ दीप्यमानचतुर्दिशमिति गो. पाठः ।

शशिप्रकाशवदना वैरकुण्डलभूषणाः । अम्लानमाल्याभरणा ददर्श हरियूथपः ॥ ३१ ॥
नृत्यवादित्रकुशला राक्षसेन्द्रभुजाङ्कगाः । वराभरणधारिण्यो निषण्णा ददृशे कपिः ॥ ३२ ॥
वज्रवैदूर्यगर्भाणि श्रवणान्तेषु योषिताम् । ददर्श तापनीयानि कुण्डलान्यङ्गदानि च ॥ ३३ ॥
तासां चन्द्रोपमैर्वक्त्रैः शुभैर्ललितकुण्डलैः । विराजत विमानं तन्नभस्तारागणैरिव ॥ ३४ ॥
मदव्यायामखिन्नास्ता राक्षसेन्द्रस्य योषितः । तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ॥ ३५ ॥
अङ्गहारैस्तथैवान्या कोमलैर्नृत्यशालिनी । विन्यस्तशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥ ३६ ॥
काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते । महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥ ३७ ॥
अन्या कक्षगतेनैव मडुडुकेनासितेक्षणा । प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥ ३८ ॥
पटहं चारुसर्वाङ्गी न्यस्य शेते शुभस्तनी । चिरस्य रमणं लब्ध्वा परिष्वज्येव कामिनी ॥ ३९ ॥

रा० टी०–सप्रियभार्यस्य प्रियभार्यासहितस्य पत्नीश्च रक्षःपतेर्गृहे स्थितो हनूमान् ददर्श। श्लोकषट्कमेकान्वयि ॥३०॥

गो० टी०–पादेति । रक्षःपतेर्गृह इति परशेषः॥३०॥३१॥

३१] ति० टी०-अम्लानमाल्याभरणाः देवकन्या इत्यर्थः ॥ ३१ ॥

रा० टी०–पत्नीरेव वर्णयन्नाह–शशीति । कपिर्ददर्श॥३१॥

३२] ति० टी०–राक्षसेन्द्रभुजावङ्कं च गच्छन्ति तास्तथा प्रिया इति यावत् धारिण्यो धारिणीः निषण्णाः शयिताः ॥३२॥

रा० टी०–नृत्येति । निषण्णाः पत्न्यो ददृशेसमुदायस्य कर्मतया अन्वयात् न द्वितीया ॥ ३२ ॥

गो० टी०–नृत्येति । राक्षसेन्द्रस्य भुजम् अङ्कं गच्छन्तीति राक्षसेन्द्रभुजाङ्कगा उत्सङ्गोपवेशनालिङ्गनाभ्यां लालिता इत्यर्थः वराभरणधारिण्य इति द्वितीयार्थे प्रथमा निषण्णाः शयानाः ददृश इत्यात्मनेपदमार्षम् ॥ ३२ ॥

३३] ति० टी०–बाहूपधानत्वादङ्गदानामपि श्रवणान्ते दर्शनं बोध्यम् ॥ ३३ ॥

रा० टी०–वज्रेति । वज्रवैदूर्यगर्भाणि कुण्डलानि अङ्गदानि च श्रवणान्तेषु ददर्श अङ्गदानां श्रवणान्ते दर्शनं तु बाहोरुपबर्हणत्वात् ॥ ३३ ॥

गो० टी०–वज्रेति । श्रवणान्तेष्वङ्गददर्शनं बाहूपधाय शयनात् ॥ ३३–३५ ॥

३४] ति० टी०–विमानं मञ्चकविशेषः पुष्पकमित्यन्ये विराजत व्यराजत ॥ ३४ ॥

रा० टी०–तासामिति । ललितानि कुण्डलानि येषु तैः वक्त्रैः विमानं पर्यङ्कविशेषः तारागणैर्नभ इव विराजत व्यराजत ॥ ३४ ॥

३५] ति० टी०–मदव्यायामेन रतिजेन ॥ ३५ ॥

रा० टी०–मदेति । मदव्यायामेन मदहेतुका तिरत्येतर्थः, खिन्नाः प्राप्तपीडाः योषितः तेषु तेषु अन्यसङ्गमहेतुकेषु अवकाशेषु प्रसुप्ता बभूवुरिति शेषः ॥ ३५ ॥

३६] ति० टी०–कोमलैरकर्कशैः अङ्गहारैरङ्गविक्षेपैः नृत्यशालिनीति वासनाबलेन नृत्याभिनयोपेततया सुप्तवतीत्यर्थः । विशेषेण न्यस्तं शुभं येषु धात्रा तादृशानि सर्वाण्यङ्गानि यस्याः ॥ ३६ ॥

रा० टी०–अङ्गेति । विन्यस्तानि विधिना निर्मितानि संस्थापितानि वा शुभान्यङ्गानि यस्याः सा कोमलैरङ्गहारैरुपलक्षिता प्रसुप्ता अन्या नृत्यनिपुणा योषित् नृत्यशालिनी जाग्रद्वासनावशात् नृत्याश्रयीभूता प्रतीताऽभवदिति शेषः ॥ ३६ ॥

गो० टी०–अङ्गहारैरिति । अङ्गहारः नृत्तविशेषादङ्गविक्षेपविशेषः । तथोक्तं भरतशास्त्रे 'अङ्गानां योग्यदेशेषु हरणेन यथोचितम् । अङ्गनिर्वर्तनीयत्वादङ्गहारस्तथोच्यते ।' इत्यादि । कोमलैः सुकुमारैः । नृत्तशालिनी सुषुप्त्यवस्थायामपि वासनाबलेन नृत्तसन्निवेशविशिष्टा स्थितेत्युच्यते ॥ ३६ ॥

३७] ति० टी०–महानदीप्रकीर्णा महानद्यां प्रकीर्णपुष्पपत्रा दैवात्संगतं पोतं प्लवमाश्रिता नलिनी पद्मिनीव । पोतस्थानेऽत्र वीणा ॥ ३७ ॥

रा० टी०–काचिदिति । वीणां परिष्वज्य प्रसुप्ता काचित् योषित् महानदीप्रकीर्णा महानद्यां प्रक्षिप्ता पोतमाश्रिता अकस्मात् नौकासंनिहिता नलिनी कमलिनीव संप्रकाशते॥३७॥

गो० टी०–काचिद्वीणामिति । महानदीप्रकीर्णा महानदीप्रसृता नलिनी समूलनालदलं पद्मजालकम् पोतं यानपात्रम् । वीणां परिष्वज्य प्रसुप्ता काचित् नद्यां प्लवमाना यदृच्छया पोतसंयुक्ता नलिनीव प्रकाशत इत्यर्थः ॥ ३७ ॥

३८] ति० टी०–मडुडुको वाद्यभेदः ॥ ३८ ॥

रा० टी०–अन्येति । अन्या कक्षगतेन मडुकेन वाद्यभेदेन बालपुत्रा बालपुत्रसहितेव भाति ॥ ३८ ॥

गो० टी०–अन्येति । मडुडुकेन वाद्यविशेषेण ॥३८॥३९॥

३९] ति० टी०–न्यस्य आलिङ्ग्येत्यर्थः ॥ ३९ ॥

रा० टी०–पटहमिति । चारुसर्वाङ्गी अन्या चिरस्य

---

१ चार्विति गो. पाठः । २ भूषिता इति गो. पाठः । ३ हरिरिति गो. पाठः । ४ विरराजेति गो. पाठः । ५ नृत्तेति गो. पाठः । ६ पीडयति गो. पाठः । ७ भामिनीति गो. पाठः ।

काचिद्वीणां परिष्वज्य सुप्ता कमललोचना । वरं प्रियतमं गृह्य सकामेव [3]हि कामिनी ॥ ४० ॥
विपञ्चीं परिगृह्यान्या नियता नृत्यशालिनी । निद्रावशमनुप्राप्ता सहकान्तेव भामिनी ॥ ४१ ॥
अन्या कनकसंकाशैर्मृदुपीनैर्मनोरमैः । मृदङ्गं [4]परिविद्ध्याङ्गैः प्रसुप्ता मत्तलोचना ॥ ४२ ॥
भुजपाशान्तरस्थेन कक्षगेन कृशोदरी । पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥ ४३ ॥
डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा । प्रसुप्ता तरुणं वत्समुपगुह्येव भामिनी ॥ ४४ ॥
काचिदाडम्बरं नारी भुजसंभोगपीडितम् । कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥ ४५ ॥
कलशीमपविद्ध्यान्या प्रसुप्ता भाति भामिनी । वसन्ते पुष्पशबला मालेव [5]परिमार्जिता ॥ ४६ ॥
पाणिभ्यां च कुचौ काचित्सुवर्णकलशोपमौ । उपगुह्यावला सुप्ता निद्रा[6]बलमुपागता ॥ ४७ ॥
अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना । अन्यामालिङ्ग्य सुश्रोणीं [7]निद्रावशमुपागता ॥ ४८ ॥
आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः । निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥४९॥

बहुकालात् रमणं पतिं लब्ध्वा अत एव परिष्वज्य कामिनीव पटहं न्यस्य परिष्वज्य शेते ॥ ३९ ॥

४०] ति० टी०–काचिदिति ॥ ४० ॥

रा० टी०–काचिदिति । काचित् प्रियतमं गृह्य गृहीत्वा सकामा कामिनीव वीणां परिष्वज्य सुप्ता ॥ ४० ॥

गो टी०–काचिद्वंशमिति । वंशं वेणुम् ॥ ४० ॥

४१-४२] ति० टी०–विपञ्ची वीणाविशेषः ॥ ४१ ॥४२॥

रा० टी०–विपञ्चीमिति । काचित् भामिनी विपञ्चीं वीणाविशेषं परिगृह्य सहकान्तेव निद्रावशं प्राप्ता ॥ ४१ ॥

रा० टी०–अन्येति । अन्या कनकसंकाशैरङ्गैः मृदङ्गं परिविध्य निपीड्य प्रसुप्ता बभूवेति शेषः ॥ ४२ ॥

गो० टी०–विपञ्चीमिति । विपञ्ची सप्ततन्त्री । षट्तन्त्री वीणा ॥ ४१ ॥ ४२ ॥

४३] ति० टी०–मदकृतश्रमा मदवती अर्शआद्यच् । वादनेन कृतश्रमा च ॥ ४३ ॥

रा० टी०–भुजेति । भुजरूपपाशान्तरस्थेन कक्षगेन कक्षं प्राप्तेन पणवेन मर्दलेन सह अनिन्द्या काचित् सुप्ता ॥४३॥

गो० टी०–भुजेति । पणवेन मर्दलेन ॥ ४३ ॥

४४] ति० टी०–डिण्डिमं परिगृह्यालिङ्ग्य । आसक्तडिण्डिमा पृष्ठदेशसंबद्धान्यडिण्डिमा । तरुणं रमणं वत्सं पुत्रं च परिगृह्य प्रसुप्तेव ॥ ४४ ॥

रा० टी०–डिण्डिममिति । आसक्तडिण्डिमा अन्या तरुणं वत्समुपगुह्येव डिण्डिमं परिगृह्य प्रसुप्ता ॥ ४४ ॥

गो० टी०–डिण्डिममिति । यथा पूर्वा तथैवासक्तडिण्डिमान्या तं डिण्डिमं परिगृह्य परिष्वज्य प्रसुप्ता कथमिव । तरुणं वत्समुपगुह्येव डिण्डिमः पणवभेदः । यद्वा अन्या भामिनी डिण्डिमं परिगृह्यावलम्ब्य तथैव आसक्तडिण्डिमा आलिङ्गितान्यडिण्डिमा तरुणं रमणमुपगुह्य वत्सं पुत्रं परिगृह्यैव प्रसुप्ता यद्वा डिण्डिमं परिगृह्य वादनार्थं परिगृह्य तथैव वादनकाल एव आसक्तडिण्डिमा अन्या तरुणं वत्समुपगुह्येव प्रसुप्ता ॥ ४४ ॥

४५] ति० टी०–आडम्बरं वाद्यभेदः । भुजसंभोगेन भुजाश्लेषेण पीडितमाश्लिष्टं कृत्वा ॥ ४५ ॥

रा० टी०–काचिदिति । काचित्नारी आडम्बरं वाद्यविशेषं भुजसंभोगेन भुजालिङ्गनेन पीडितं कृत्वा प्रसुप्ता ॥४५॥

गो० टी०–काचिदिति । आडम्बरं तूर्यभेदम् । भुजसंभोगपीडितम् भुजपरिणाहपीडितं भुजपरिश्लेषपीडितं वा॥४५॥

४६-४८] ति० टी०–कलशीं जलसंभृतामपविध्य पर्यस्य । स्वपर्यस्तकलशोदकार्द्रशरीरा नारी वसन्ते परिमार्जिता ग्लानिपरिहाराय कृतजलसेका पुष्पशबला शबलपुष्पमालेव भाति ॥ ४६-४८ ॥

रा० टी०–कलशीमिति । प्रसुप्ता कलशीं जलपूर्णघटीमपविध्य हस्तप्रक्षेपादिना विपर्यास्य परिमार्जिता प्रसुप्ता पुष्पशबला शबलितपुष्पान्या परिमार्जिता ग्लानिदूरीकरणाय कृतमार्जना पुष्पमालेव भाति ॥ ४६ ॥

रा० टी०–पाणिभ्यामिति । काचिदबला पाणिभ्यां कुचौ उपगुह्य निद्रावशमुपागता ॥ ४७ ॥

रा० टी०–अन्येति । अन्या अन्यां सुश्रोणीमालिङ्ग्य निद्रावशमुपागता ॥ ४८ ॥

गो० टी०–कलशीमिति । अपविध्य पर्यस्य । अनेन सलिलसंबन्धः सूच्यते । परिमार्जिता सलिललवसंमार्जिता । अपविद्धकलशनिर्गलितगन्धोदकसिक्ता काचित् वसन्ते म्लानिपरिहाराय सलिललवसमुक्षिता मालेव बभावित्यर्थः । पुष्पशबलेत्यनेन कलशस्थजलस्य कुङ्कुमादिरससिक्तत्वमुच्यते सर्वाभरणभूषितत्वं वा इयं च रावणस्य करकधारिणीति गम्यते ॥ ४६-४८ ॥

४९] ति० टी०–आतोद्यानि वाद्यानि ॥ ४९ ॥

रा० टी०–आतोद्यानीति । अन्या वरस्त्रियः कामुकान्

१ वंशमिति गो. पाठः । २ रह इति गो. पाठः । ३ चेति गो. पाठः । ४ परिपीडेति गो. पाठः । ५ पार्श्वेति गो. पाठः । ६ बलपरा.जितेति गो. वशेति रा. पाठः । ७ प्रसुप्ता मदविह्वलेति गो. पाठः ।

तासामेकान्तविन्यस्ते शयानां शयने शुभे । ददर्श रूपसंपन्नामथ तां स कपिः स्त्रियम् ॥ ५० ॥
मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषिताम् । विभूषयन्तीमिव [2]च स्वश्रिया भवनोत्तमम् ॥ ५१ ॥
गौरीं कनकवर्णाभामिष्टामन्तःपुरेश्वरीम् । कपिर्मन्दोदरीं तत्र शयानां चारुरूपिणीम् ॥ ५२ ॥
स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः । तर्कयामास सीतेति रूपयौवनसंपदा ॥
हर्षेण महता युक्तो ननन्द हरियूथपः ॥ [दृष्टा सीतेति तत्राऽभूद्दीनश्चारित्रदर्शनात् ।] ॥ ५३ ॥
आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम ।
स्तम्भानरोहन्निपपात भूमौ निदर्शयन्स्वां प्रकृतिं कपीनाम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ।

मन्दोदर्या जातां सीतात्वबुद्धिं युक्तिपर्यालोचनेन निवर्तयन्हनुमान्पानभूमिगतं रावणं परितः प्रसुप्ता नानावस्थाः स्त्रियोऽनेकविधपानपात्रादिकं चावालोकयत् । परदारदर्शनजन्यदुरितं विशङ्क्य वशीकृतमनस्कत्वात्तत्संसर्गं निराकुर्वंस्तत्रालब्धसीताशुद्धिरन्यत्रान्वेषणञ्चोपक्रमते ।

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा । जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ [1] ॥

परिष्वज्य कामिन्य इव आतोद्यानि वाद्यविशेषान् कुचैर्निपीड्य सुप्ताः ॥ ४९ ॥

गो० टी०–आतोद्यानीति । आतोद्यानि 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः ॥ ४९ ॥ ५० ॥

५०–५१] ति० टी०–अथ प्रधानमहिषीदर्शनम्—तासामिति । एकान्तविन्यस्ते तासां शयनात्पृथग्विन्यस्ते । तां स्त्रियं वक्ष्यमाणगुणां स्त्रियम् ॥ ५०॥५१ ॥

रा० टी०–तासामिति । तासां समीपे एकान्तविन्यस्ते शयने शयानां रूपसंपन्नां ताम् उत्तमां स्वश्रिया सुशोभया भवनोत्तमं विभूषयन्तीं गौरीं गौरवर्णाम् इष्टां रावणोत्कटेच्छाविषयीभूताम् अन्तःपुरेश्वरीं स्त्रियं ददर्श । सार्धश्लोकद्वयमेकान्वयि ॥ ५० ॥ ५१ ॥

गो० टी०–मुक्तामणीत्यादि । किमिव गौरीमित्याह–कनकवर्णाङ्गीमिति । इष्टां रावणस्येति शेषः ॥५१–५३॥

५२] ति० टी०–गौरीं पीताम्, अत एव कनकवर्णाभाम्, इष्टां रावणस्यातिप्रियाम्, अन्तःपुरस्त्रीणामीश्वरीम्, कपिर्मन्दोदरीं ददर्शेत्यन्वयः ॥ ५२ ॥

रा० टी०–कपिरिति । सः कपिः तत्र शयानां मन्दोदरीं दृष्ट्वा रूपयौवनसंपदा अद्भुतरूपादिना सीतेति तर्कयामास ५२॥५३

५३] ति० टी०–तर्कयामास संभावयामास । पृथगेकान्ते परममञ्जेऽतिरूपाया दर्शनात्प्रायेणेयं सीतेति संभावना इत्यतः । तदेवाह—रूपयौवनसंपदा न त्वौचित्यालोचनं कृतवानिति भावः । हर्षो सुखविकासादिः आनन्दो मानसः ॥ ५३ ॥

रा० टी०–हर्षेणेति । चारित्रदर्शनात् अनुचिताचरणावलोकनात् दीनोऽपि हरियूथपः सीतेति दृष्ट्वा निश्चित्य महता हर्षेण आगमनप्रयोजनसिद्धिजनितसंतोषेण युक्तः सन् ननन्द । एतेन तादृशानन्देन दैन्यं पराभूतमिति सूचितम् ॥ ५४ ॥

गो० टी०–हर्षेणेत्यर्धम्। हर्षेण युक्तः ननन्द उत्तरोत्तरमानन्दमवापेत्यर्थः ॥ ५४ ॥

५४] ति० टी०–आनन्दं कार्यद्वाराह—आस्फोटयामासेति । आस्फोटपुच्छचुम्बनादि जातिधर्मः । जगाम स्तम्भानित्यनुकर्षः । सर्वा अप्येताश्चेष्टा उपांशीति बोध्यम् एवं चेष्टायां हेतुः—स्वां कपीनां प्रकृतिं निदर्शयन्निति ॥५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

रा० टी०–आस्फोटयामासेति । स्वां स्वकीयां कपीनां प्रकृतिं दर्शयन् आस्फोटनादिकम् आनन्दसूचकस्वजातिधर्मं चकार अत एव स्तम्भान् अरोहत् निपपात च ॥ ५५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०–तदेवोपपादयति–आस्फोटयामासेति । चिक्रीड ननर्तेति यावत् । स्वां प्रकृतिं स्वासाधारणं चापल्यम् ॥ ५५ ॥

अस्मिन्सर्गे सार्धचतुःपञ्चाशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

१] ति० टी०–अवधूय च तां बुद्धिं सीतासंभावनया

१ अपरामिति गो. पाठः । २ तदिति गो. पाठः । ३ वर्णाङ्गीमिति गो. पाठः । ४ अर्धमेतदधिकं रा. पाठे ।

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी । न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुम् ॥ २ ॥
नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् । न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ॥ ३ ॥
अन्येयमिति निश्चित्य भूयस्तत्र चचार सः । पानभूमौ हरिश्रेष्ठः सीतासंदर्शनोत्सुकः ॥ ४ ॥
क्रीडितेनापराः क्लान्ता गीतेन च तथाऽपराः । नृत्येन चापराः क्लान्ताः पानविप्रहृतास्तथा ॥ ५ ॥
मुरजेषु मृदङ्गेषु [4]चेलिकासु च संस्थिताः । तथाऽऽस्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥ ६ ॥
अङ्गनानां सहस्रेण भूषितेन विभूषणैः । रूपसंलापशीलेन युक्तगीतार्थभाषिणा ॥ ७ ॥
देशकालाभियुक्तेन युक्तवाक्याभिधायिना । रताधिकेन संयुक्तां ददर्श हरियूथपः ॥ ८ ॥
[6]अन्यत्रापि वरस्त्रीणां रूपसंलापशायिनाम् । सहस्रं युवतीनां तु प्रसुप्तं स ददर्श ह ॥ ९ ॥

प्रवृत्तां कापेयविषयां बुद्धिमवधूय त्यक्त्वाऽवस्थितः स्थिरतास्वभावे प्रतिष्ठितः सीतां प्रति तद्विषयामितरामन्यां चिन्तां पूर्वचिन्ताविघटिकां जगाम ॥ १ ॥

रा० टी०—मन्दोदर्यां जातसीताबुद्धिनिवारकं हनुमतः चिन्तान्तरमुपक्रमते—अवधूयेति । तां इयं सीतेत्येतद्रूपां बुद्धिम् अवधूय वक्ष्यमाणहेतुभिर्दूरीकृत्य सीतां प्रति परां चिन्तां जगाम ॥ १ ॥

गो० टी०—अवधूयेत्यादि । तां बुद्धिं मन्दोदर्यां सीताबुद्धिम् । अवस्थितो बभूव स्वस्थचित्तो बभूव ॥ १ ॥

२] ति०टी०—तामेव चिन्तामभिनयति—न रामेणेति॥२॥

रा० टी०—चिन्ताप्रकारमाह—नेति । रामेण वियुक्ता सीता स्वापादि कर्तुं नार्हति ॥ २ ॥

गो० टी०—न रामेणेत्यादि । त्रिदशेष्वपीत्यनन्तरम् अन्येयमित्यर्धम् । पानभूमौ ततोऽन्यत्रेत्यर्थः ॥ २ ॥ ३ ॥

३] ति० टी०—अन्यं नरं पुरुषमुपस्थातुमङ्गीकर्तुं नार्हति नाध्यवस्यति । तत्र हेतुः—नहि रामेति ॥ ३ ॥

रा० टी०—नेति । अन्यं नरं सुराणामीश्वरं च उपस्थातुं स्वस्थचित्ततया समीपे आसितुं नार्हतीति शेषः । ननु रामश्चमात्तिष्ठतु इत्यत आह—त्रिदशेष्वपि रामसमः कश्चिन्न विद्यते॥३॥

४] ति० टी०—यदेवम्, अतोऽन्येयमनुभूतेति निश्चित्य तत्र गृहे पानभूमौ पानशालायां चचार । पुनः सम्यगन्वेषणायेति शेषः ॥ ४ ॥

रा० टी०—अन्येति । इयम् अन्या सीताभिन्ना इति निश्चीय सीतासंदर्शनोत्सुको हनुमान् पानभूमौ चचार ॥ ४ ॥

५] ति० टी०—अथ पानभूमौ दर्शनप्रकारः—क्रीडितेनेति । क्रीडितेनाक्षादिक्रीडया क्लान्ताः सत्यस्तथैव निद्रिता इति शेषः । विप्रहता अतिनिद्रिताः स्त्रियः ददर्शेति शेषः ॥ ५ ॥

रा० टी०—क्रीडितेनेति । अपराः क्रीडितेन क्लान्ताः बभूवुरिति शेषः, अपराः नृत्येन क्लान्ताः अपराः पानविप्रहताः अतिपानवतीरित्यर्थः, ददर्शेति शेषः ॥ ५ ॥

गो० टी०—क्रीडितेनेत्याद्यपराः स्त्रिय इत्यन्तमेकं वाक्यम् । ददर्शेत्यनुषज्यते क्रीडितेन क्रीडया भावे निष्ठा विप्रहताः क्लान्ता इत्यर्थः संस्थिताः उपधानीकृत्य शयिताः संविष्टाः सुप्ताः ॥ ४ ॥ ५ ॥

६] ति० टी०—मुरजेषु मृदङ्गेषु । चेलिकासु चेलिका वाद्यविशेष इत्याहुस्तेषु प्रसक्ता एव संस्थिताः स्थिता एव निद्रिताः संविष्टाः । सुप्ता ददर्शेति शेषः । आकर्षो वा ॥ ६ ॥

रा० टी०—मुरजेष्विति । अपराः मुरजादिषु वाद्यविशेषेषु संस्थिता आस्थावत्यः सत्यः तथा निद्रितात्वेन आस्तरणमुख्येषु संविष्टाः ददर्शेति शेषः ॥ ६ ॥

७] ति० टी०—रूपसंलापशीलेन निद्रोद्भवशान्तस्यास्तस्या रूपविषयो यः संलापो वर्णनं तच्छीलेन युक्तं यथा भवति तथा गीतार्थस्य भाषणशीलेन ॥ ७ ॥

८] ति० टी०—देशकालाभियुक्तेन तद्विषयपरिज्ञानकुशलेन युक्तवाक्यस्य देशकालोचितवाक्यस्याभिधानशीलेन एतत्सर्वं निद्रोद्भवशादेव बोध्यम् । रताधिकेनोत्तमक्रीडावता संयुक्तां पानभूमिं ददर्श ॥ ८ ॥

रा० टी०—अङ्गनानामिति । विभूषणैर्भूषितेन युक्तगीतार्थभाषिणा उचितोक्तार्थकथनशीलेन देशकालाभियुक्तेन देशकालाभिज्ञेन युक्तवाक्याभिधायिना उचितवाक्यकथनशीलेन रताधिकेन अधिकरतिविशिष्टेन अङ्गनानां सहस्रेण संयुक्तां पानभूमिं ददर्श । श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०—तत्र सीताया अदर्शनात्पुनरपि रावणस्थानमागत्य ददर्शेत्याह—अङ्गनानामिति । रूपसंलापशीलेन स्वसौन्दर्यवर्णनशीलेन रावणविषयरूपप्रशंसाशीलेन वा युक्तगीतार्थभाषिणा युक्तम् उपपन्नं गीतार्थं भाषितुं शीलमस्येति युक्तगीतार्थभाषी तेन देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः अङ्गनानां सहस्रेण रताभिरतसंसुप्तमित्यन्वयः रतशब्देन बाह्यसुरतमुच्यते अभिरतशब्देन करणबन्धादिकमुच्यते रताभिरतश्चासौ संसुप्तश्च तं तथा ज्ञानानुलिप्तादिवत्समासः क्रीडास्वेदेन सुप्तमित्यर्थः । रावणमिति शेषः॥६–८॥

९] ति० टी०—अन्यत्रापीत्यादिश्लोकद्वयं नव्याः प्रमादान्न

---

१ पानभूमाविति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ मुरवेष्विति गो. पाठः । ४ पीठिकास्विति गो. पाठः । ५ रताभिरतसंसुप्तमिति गो. पाठः । ६ एतदादिश्लोकद्वयं गो. नास्ति । ७ निश्चित्येति साधु ।

देशकालाभियुक्तं तु युक्तवाक्याभिधायि तत् । रताविरतसंसुप्तं ददर्श हरियूथपः ॥ १० ॥
तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः । गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥ ११ ॥
स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् । करेणुभिर्यथारण्ये परिकीर्णो महाद्विपः ॥ १२ ॥
सर्वकामैरुपेतां च पानभूमिं महात्मनः । ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥ १३ ॥
मृगाणां महिषाणां च वराहाणां च भागशः । तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥ १४ ॥
रौक्मेषु च विशालेषु भाजनेष्वप्यभक्षितान् । ददर्श कपिशार्दूलो मयूरान्कुक्कुटांस्तथा ॥ १५ ॥
वराहवाध्रीणसकान्दधिसौवर्चलायुतान् । शल्यान्मृगमयूरांश्च हनुमानन्ववैक्षत ॥ १६ ॥

पठन्ति अन्यत्रापि पानभूमित्रे रावणशयनगृहे बहिःस्थां पानभूमिं दृष्ट्वा पुनरभ्यन्तरे शयनस्थान आगत्यान्वेषणम् रूपविषयो यः संलापो वर्णनं तत्पूर्वं शयानानां युवतीनां वरस्त्रीणां सहस्रमुच्यमानगुणं ददर्श ॥ ९ ॥

रा० टी०–अन्यत्रेति । अन्यत्र अन्यपानभूमावपि प्रसुप्तं युवतीनां सहस्रं ददर्श ॥ ९ ॥

१०] ति० टी०–तत्पूर्वदृष्टम् रताविरतसंसुप्तं रतान्ते विरतसुप्तं गाढसुप्तम् ॥ १० ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–देशेति । रताविरतसंसुप्तं रताविरतेन रत्यनिवृत्तिजनितश्रमेण संसुप्तं युवतीनां सहस्रमिति शेषः, ददर्श । अत्र अन्यत्रापीत्यादिश्लोकद्वयं नव्याः प्रमादान्न पठन्तीति भट्टैरुक्तम् ॥ १० ॥

११] ति० टी०–तासां मध्ये इति ॥ ११ ॥

रा० टी०–तासामिति । तासां स्त्रीणां मध्ये राक्षसेश्वरः रावणः गवां मध्ये वृष इव शुशुभे ॥ ११ ॥

१२] ति० टी०–स इति ॥ १२ ॥

रा० टी०–स इति । ताभिः स्त्रीभिः परिवृतः सः रावणः करेणुभिः परिकीर्णः परिवृतः महाद्विप इव शुशुभे ॥ १२ ॥

गो० टी०–स इति । परिकीर्णः परिवृतः ॥ ९ ॥

१३] ति० टी०–सस्त्रीकरावणगृहे पुनः सम्यगन्विष्य, पुनर्बहिः पानभूमिमागत्य विचिनोति—सर्वकामैरिति । पूर्वं नृत्यादियुक्ततत्स्थस्त्रीमात्रदर्शनम्, इदानीं तस्याः सर्वकामोपेतत्वदर्शनम् ॥ १३ ॥

रा० टी०–सर्वेति । सर्वकामैरुपेतां रक्षःपतेः पानभूमिं ददर्श ॥ १३ ॥

गो० टी०–सर्वकामैरिति । पानभूमेः पुनर्दर्शनोक्तिस्तत्रत्यपदार्थकथनाय ॥ १० ॥

१४–१५] ति० टी०–तदेव प्रपञ्चयति—मृगाणामिति ॥ १४ ॥ १५ ॥

रा० टी०–मृगाणामिति । भागशो न्यस्तानि मृगादीनां मांसानि पानभूमौ ददर्श ॥ १४ ॥

गो० टी०–मृगाणामिति । मयूरादिशब्दाः भागशः पिण्डशः ॥ ११ ॥

रा० टी०–रौक्मेष्विति । रौक्मेषु स्वर्णमयेषु भाजनेषु अभक्षितान् अनुच्छिष्टानित्यर्थः, मयूरान् कुक्कुटांश्च तत्तन्मांसानीत्यर्थः, कपिशार्दूलो हनुमान् ददर्श ॥ १५ ॥

गो० टी०–रौक्मेष्विति । मयूरादिशब्दाः मयूरादिविकारमांसपराः ॥ १२ ॥

१६] ति० टी०–पुनः पुनर्वराहादिमृगादिकथनं बहुस्थलवर्तितया भूयस्त्वप्रकाशनाय । वाध्रीणसः पक्षिविशेषः 'कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः । स वै वाध्रीणसः प्रोक्तः' इति विष्णुधर्मोक्तेः । छागविशेषो वा 'त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धप्रजापतिम् । वाध्रीणसं च तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि ॥' इति स्मृतेः । मुखकर्णौ च पानसमये जलं स्पृशन्ति यस्य स त्रिपिबः । 'वाध्रीणसः खड्गमृगः' इति हलायुधः । दध्ना सौवर्चलेन लवणविशेषेण च आयुतान्संस्कृतान् ॥ १६ ॥

रा० टी०–वराहेति । दध्ना सौवर्चलेन लवणविशेषेण च आयुतान् यथायोग्यं संभिश्रान् वराहादीनन्ववैक्षत । तत्र वाध्रीणसः पक्षिविशेषः तथाहि 'कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः । स वै वाध्रीणसः प्रोक्तः' इति विष्णुधर्मोक्तवचनम् । छागविशेषश्च । तथाहि 'त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वाध्रीणसं च तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि' इति स्मृत्यन्तरम् । त्रिपिबशब्दार्थस्तु त्रिभिर्मुखकर्णैः पिबतीति प्रसिद्धश्च पानसमये छागानां कर्णयोरपि जलस्पर्शः मृगपरोऽपि 'वाध्रीणसः खड्गमृगः' इति हलायुधः । अत्र त्यमयूरशब्दस्य मयूरावान्तरजातिपरत्वान्न पौनरुक्त्यम् । एषैव गतिरन्यत्रापि ॥ १६ ॥

गो० टी०–वराहेति । वाध्रीणसाः छागविशेषाः–'त्रिपिबं त्विन्द्रियक्षीणं यूपस्याग्रचरं तथा । रक्तवर्णं च राजेन्द्र छागं वाध्रीणसं विदुः' इति स्मृतेः । पक्षिविशेष इत्यन्ये खड्गमृग इत्यपरे 'वाध्रीणसः खड्गमृगः' इति हलायुधः । दधिसौवर्चलायुतान् दधिसौवर्चलाभ्यां संस्कृतानित्यर्थः । सौवर्चलं रुचकाख्यो लवणविशेषः ' सौवर्चलेऽरुचके ' इत्यमरः । शल्यान् श्वाविदः 'श्वाविद्तु शल्यः' इत्यमरः । मृगमयूरादीनां पुनः कथनं प्रदेशभेदात् ॥ १३ ॥

१ हरीति गो. पाठः । २ वाध्रीणसेति गो. पाठः ।

कृकलान्विविधांश्छागान्छशकानर्धभक्षितान् । महिषानेकशल्यांश्च छेदांश्च कृतनिष्ठितान् ॥ १७ ॥
लेह्यानुच्चावचान्पेयान्भोज्यान्युच्चावचानि च । तथाम्ललवणोत्तंसैर्विविधै रागखाण्डवैः ॥ १८ ॥
महानूपुरकेयूरैरपविद्धैर्महाधनैः । पानभाजनविक्षिप्तैः फलैश्च विविधैरपि ॥ १९ ॥
कृतपुष्पोपहारा भूरधिकां पुष्यति श्रियम् । तत्र तत्र च विन्यस्तैः सुश्लिष्टशयनासनैः ॥ २० ॥
पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते । बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ॥ २१ ॥
मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् । दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि ॥ २२ ॥
शर्करासवमाध्वीकाः पुष्पासवफलासवाः । वासचूर्णैश्च विविधैर्मृष्टास्तैस्तैः पृथक्पृथक् ॥ २३ ॥

१७] ति० टी०–कृकलकृकरौ समौ पक्षिविशेषवाचकौ एकशल्या मत्स्यविशेषाः कृतनिष्ठितान्कृतं निष्ठितं निष्ठानं पाको येषां तान् ॥ १७ ॥

रा० टी०–कृकरानिति । कृकरान् पक्षिविशेषान् 'कुररक्रकरौ समौ' इत्यमरः विविधान्छागाँश्च शशकान् अर्धभक्षितान्महिषाँश्च एकशल्यान् मत्स्यविशेषांश्च कृतनिष्ठितान् परिपक्वान् मेषांश्च अम्ललवणौ उत्तंसौ जिह्वाशैथिल्यपरिहारकौ येषु तैः विविधैः रागखाण्डवैः सह लेह्यादींश्चान्ववैक्षतेति पूर्वेणान्वयः रागखाण्डवाश्च 'सितामध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्वेत्कृतो रागः सान्द्रश्वेत्खाण्डवः स्मृतः' इत्यादिनोक्ताः । श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–ऋकरानिति । ऋकरान् पाक्षिविशेषान् 'कृकणकृकरौ समौ' इत्यमरः सिद्धान् पक्वान् एकशल्यान्मत्स्यविशेषान् कृतनिष्ठितान् पर्याप्तपक्वान् 'योगपर्याप्तयोः कृतम्' इत्यमरः ॥ १४ ॥ १९ ॥

१८] ति० टी०–अम्लरसो लवणरसश्चोत्तंसो जिह्वाजाड्यपरिहारकर्ता येषु भक्ष्यमाणेषु तैः । रागखाण्डवैः 'सितामध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्वेत्कृतो रागः सान्द्रश्वेत्खाण्डवः स्मृतः ॥' इत्युक्तैः केशरादिभिः कृतवर्णाः षड्रसोपेताः । पूपा रागखाण्डवा इत्यन्ये ॥ १८ ॥

गो० टी०–तथेत्यादि । आम्ललवणोत्तंसैः आम्लप्रधानैः लवणप्रधानैश्च रागषाडवैः रागयुक्तैः षाडवैः । रागः श्वेतसर्षपः । 'रागः सिद्धार्थको ज्ञेयः' इति सूदशास्त्रम् । षाडवाः षड्रससंयोगकृता भक्ष्यविशेषाः । प्रदीपे त्वन्यथोक्तम्–'सितामध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्वेत्कृतो रागः सान्द्रश्वेत् षाडवः स्मृतः' इति ॥ १६–१८ ॥

१९] ति० टी०–महाधनैर्बहुमूल्यैः ॥ १९ ॥

रा० टी०–महेति । अपविद्धैः विपर्यस्तैर्महानूपुरकेयूरैः विक्षिप्तैः पानभाजनैश्च फलैश्च उपलक्षिता कृतः पुष्पोपहारः पुष्पबलिर्यस्यां सा भूः अधिकां श्रियं पुष्यति पोषयति । सार्धश्लोक एकान्वयी ॥ १९ ॥

२०] ति० टी०–सुश्लिष्टैः सुकृतसंधिबन्धैः ॥ २० ॥

रा० टी०–तत्रेति । विन्यस्तैः संस्थापितैः सुश्लिष्टैः संमिलितैः शयनासनैरुपलक्षिता पानभूमिः वह्निं विनाऽपि प्रदीप्तेवोपलक्ष्यते । अर्धद्वयमेकान्वयि ॥ २० ॥

२१] ति० टी०–उक्तैः सौवर्णरत्नमयशयनासनैः पानभूमिः प्रदीप्तेवोपलक्ष्यते । बहुप्रकारैर्बहूपादानभेदैः, अत एव विविधैर्विविधरसवद्भिः वरसंस्कारेण श्रेष्ठसंस्कारकद्रव्ययोगेन संस्कृतैः ॥ २१ ॥

२२] ति० टी०–कुशलसंयुक्तैर्निपुणपाचकपक्वैर्मांसैः सहोच्यमानगुणाः सुरा ददर्श । तत्र दिव्याः सुरा वृक्षेभ्यः कदम्बादिभ्यः स्वतः प्रादुर्भूताः । कृतसुराः शौण्डिकैरुत्पादिताः ॥२२॥

२३] ति० टी०–कृतसुरावान्तरभेदानाह–शर्करासवेत्यादि । शर्करोपादानक आसवः शर्करासवः, मधूपादानको माध्वीकः द्राक्षोपादानक इत्यन्ये मधूकपुष्पादिजः पुष्पासवः, खर्जूरफलादिजः फलासवः वासचूर्णैः सुगन्धद्रव्यचूर्णैर्मृष्टाधिवासिताः दृष्टा इति शेषः ॥ २३ ॥

रा०टी०–बह्निति । बहुप्रकारैरितस्ततः संस्थापितैः विविधैः अनेककक्रियादिना अनेकविधैः वरसंस्कारैर्दधिकाश्मीरादिभिः संस्कृतैः कुशलसंयुक्तैः निपुणपक्वृभिः संपादितैः पृथक् पृथक् पानभूमिं गतैः मांसैः सहिताः प्रसन्नाः स्वच्छा विविधा दिव्याः वृक्षकोटरादिद्वारा वरुणादिप्रेषिताः सुराः तैस्तैः तत्तदुपयोगित्वेन प्रसिद्धैः विविधैर्वासचूर्णैर्मृष्टाः संस्कृताः शर्करासवप्रभृतयः कृतसुरा अपि अदृश्यन्तेति शेषः । तत्र शर्करासवः शर्कराजनितः माध्वीको मधुजनितः पुष्पासवः मधूकपुष्पादिकृतः फलासवः खर्जूरफलादिजनित इति विवेकः । सार्धश्लोकद्वयमेकान्वयि ॥ २१–२३ ॥

गो० टी०–बहुप्रकारैरित्यादि । कुशलसंयुक्तैः समर्थसूदसंयोजितैः एवंभूतैः मांसैः सह दृष्टा इति वक्ष्यमाणेनान्वयः । दिव्याः अमृतमथनोद्भूतवारुणीजातीयाः प्रसन्नाः निष्कल्मषाः कृतसुराः कृत्रिमसुराः कृत्रिमसुरा एवाह–शर्करेति । शर्करासवाः शर्करया कृताः माध्वीकाः मधुना कृताः पुष्पासवाः पुष्पमकरन्दकृताः फलासवाः फलरसकृताः तथोक्तमर्णवे–'पानकं द्राक्षमाधूकं खार्जूरं तालमै-

१ ऋकरानिति गो. कृकरानिति रा. पाठः । २ सिद्धांश्चकोरानिति गो. पाठः । ३ छागानिति गो. पाठः । ४ विविधानीति गो. पाठः । ५ षाड्वैरिति गो. पाठः । ६ अधिकमिति गो. पाठः । ७ सुश्लिष्टैरिति गो. पाठः । ८ माध्वीकपुष्पेति गो. पाठः ।

संतता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः । हिरण्मयैश्च कैलशैर्भाजनैः स्फाटिकैरपि ॥ २४ ॥
जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता । राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ॥ २५ ॥
पानश्रेष्ठां तथा भूमिं कपिस्तत्र ददर्श ह । सोऽपश्यच्छातकुम्भानि सीधोर्मणिमयानि च ॥ २६ ॥
तानि तानि च पूर्णानि भाजनानि महाकपिः । क्वचिदर्धावशेषाणि क्वचित्पीतान्यशेषतः ॥ २७ ॥
क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह । क्वचिद्भक्ष्यांश्च विविधान्क्वचित्पानं विभागतः ॥ २८ ॥
क्वचिदर्धावशेषाणि पश्यन्वै विचचार ह । शयनान्यत्र नारीणां शून्यानि बहुधा पुनः ॥
परस्परं समाश्लिष्य काश्चित्सुप्ता वराङ्गनाः ॥ २९ ॥
काचिच्च वस्त्रमन्यस्या अपहृत्योपगुह्य च । उपगम्याबला सुप्ता निद्राबलपराजिता ॥ ३० ॥
तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् । नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥ ३१ ॥
चन्दनस्य च शीतस्य सीधोर्मधुरसस्य च । विविधस्य च माल्यस्य पुष्पस्य विविधस्य च ॥ ३२ ॥

क्षवम् । मधूत्थं शीधुमाध्वीकं मैरेयं नारिकेलजम्' इति । वासचूर्णैरधिवासचूर्णैः सह दृष्टाः हनुमतेति शेषः । बहुप्रकारैर्मांसैः सह सुराः वासचूर्णैः सह हनुमता तत्र पानभूमौ दृष्टा इति सम्बन्धः । तैस्तैरित्यादुत्तरशेषः तैस्तैर्मांसविशेषैः सुराविशेषैर्वासचूर्णैश्च पृथक्पृथक् संततेति संबन्धः । बहुसंस्थितैः बहुसंस्थानैः हिरण्मयैरिति अत्रापि संततेति पूर्वेणान्वयः हिरण्मयैः रजतमयैः 'कृताकृतं हेमरूप्यं हिरण्यमभिधीयते' इति वचनात् । तैस्तैः पृथक्पृथक् संतता बहुसंस्थितैर्माल्यैर्हिरण्मयैः स्फाटिकैरपि भाजनैः संतता जाम्बूनदमयैरन्यैः करकैश्चाभिसंवृता भूमिः शुशुभ इति संबन्धः ॥ १९–२३ ॥

२४] ति० टी०–अथ भूमिवर्णनम्—बहुषु देशेषु संस्थितैर्माल्यैः संतता व्याप्ता भूमिः शुशुभे उच्यमानविशेषणैः करकैर्घटैश्च संतता ॥ २४ ॥

रा० टी०–संततेति । बहुसंस्थितैः अनेकप्रकारैः माल्यैः कलशैर्भाजनैश्च संतता व्याप्ताः करकैर्द्विमुखपात्रैरभिसंवृता भूमिः शुशुभे । सार्धश्लोक एकान्वयी ॥ २४ ॥

२५] ति० टी०–राजतादिषु कुम्भेषु ॥ २६ ॥

रा० टी०–राजतेष्विति । रजतमयादिषु कुम्भेषु पानानि पेयानि श्रेष्ठानि यस्यां तां भूमिं कपिर्ददर्श । अर्धद्वयमेकान्वयि २५

२६] ति० टी०–पानश्रेष्ठां संभृतप्रशस्तपानाम् । सीधोर्मयस्य भाजनानीत्यन्वयः ॥ २६ ॥

रा० टी०–स इति । सीधोर्मयस्य मणिमयानि शातकुम्भानि पूर्णानि भाजनानि पानपात्राणि च महाकपिरपश्यत् २६

गो० टी०–सोऽपश्यदिति । शीधोः मयस्य ॥ २४ ॥

२७] ति० टी०–भाजनानि पानभाजनानि । अर्धावशेषाण्यर्धावशिष्टपानानि पीतानि पीतासवानि ॥ २७ ॥

रा० टी०–दर्शनप्रकारमाह–क्वचिदिति । अर्धावशेषादीनि ददर्श ॥ २७ ॥

गो० टी०–क्वचिदिति । पानानि पानपात्राणि ॥ २६ ॥

२८] ति० टी०–नैव प्रपीतानि पूर्णासवान्येव पानानि पानभाजनानि । विभागतो विभागेन पानं ददर्श । इदमस्मुकमिदमस्मुकमिति विभज्य ददर्शेत्यर्थः ॥ २८ ॥

२९] ति० टी०–शून्यानि पतिशून्यानि, अत एव परस्परं समाश्लिष्येति ॥ २९ ॥

३०] ति० टी०–अपहृत्य बलादृहीत्वोपगुह्य प्राप्तृत्य उपगम्य तच्छयनस्थानं प्राप्य तां च पश्यन्विचचारेति संबन्धः ॥ ३० ॥

रा० टी०–क्वचिदिति । भक्ष्यादीनि शून्यानि नारीणां शयनानि च पश्यन् विचचार । सार्धश्लोक एकन्वयी॥२८॥२९॥

रा० टी०–परस्परमिति । काश्चित् समाश्लिष्य सुप्ताः निद्राबलपराजिता काचिदबला वस्त्रमपहृत्य उपगम्य तत्समीपं प्राप्य उपगुह्य तामालिङ्ग्य सुप्ता । सार्धश्लोकः संमिलितान्वयी ॥ ३० ॥

गो० टी०–क्वचिद्भक्ष्यानित्यादिनिद्राबलपराजिता इत्यन्तमेकं वाक्यम् । क्वचित्प्रभिन्नैरित्यादिषु सहयोगे तृतीया हेतौ तृतीया वा प्रभिन्नत्वादालोलितत्वाच्च संपृक्तमाल्यानि माल्यमिश्राणीत्यर्थः । परस्परमित्यादि । पश्यन्वै विचचारेति पूर्वेणान्वयः ॥ २६–२९ ॥

३१] ति० टी०–गात्रजं गात्रस्थम् ॥ ३१ ॥

रा० टी०–तासामिति । गात्रजं गात्रस्थमित्यर्थः । चित्रं वस्त्रमाल्यं मन्दमनिलं प्राप्येव उच्छ्वासवातेन अत्यर्थं न स्पन्दते ॥ ३१ ॥

गो० टी०–तासामिति । गात्रजं गात्रस्थं मन्दमनिलं प्राप्येव अत्यर्थं न स्पन्दत इत्यन्वयः ॥ ३० ॥

३२] ति० टी०–अथ पानभूमितोऽपि बहिरागत्य तत्र स्थिते पुष्पके प्रवृत्तिकाल इव निर्गमकालेऽपि बहुगन्धो वायुर-

१ विविधैरिति गो. पाठः । २ स इति गो. पाठः । ३ राजतानीति गो. पाठः । ४ सर्वंश्च इति गो. पाठः । ५ पानानि भागश्च इति गो. पाठः । ६ अन्यस्याः स्वपन्त्याः परिधाय च । आहृत्य चेति गो. पाठः ।

बहुधा मारुतस्तस्य गन्धं विविधमुद्वहन् । ज्ञानानां चन्दनानां च धूपानां चैव मूर्छितः ॥ ३३ ॥
प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा । श्यामावदातास्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः ३४ ॥
काश्चित्काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये । तासां निद्रावशत्वाच्च मदनेन विमूर्छितम् ॥ ३५ ॥
पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि । एवं सर्वमशेषेण रावणान्तःपुरं कपिः ॥
ददर्श स महातेजा न ददर्श च जानकीम् ॥ ३६ ॥
निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः । जगाम महतीं शङ्कां धर्मसाध्वसशङ्कितः ॥ ३७ ॥
परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् । इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥ ३८ ॥
न हि मे परदाराणां दृष्टिर्विषयवर्तिनी । अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३९ ॥
तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः । निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ४० ॥

न्यस्त्रियश्चाहभूता इत्याह—चन्दनस्य चेत्यादि । पानभूम्यादिकमपि पुष्पकस्थमेवेत्यन्ये । सीधुर्मद्यम् ॥ ३२ ॥

रा० टी०—चन्दनस्येति । चन्दनादीनां गन्धमुद्वहन् मारुतो ववावितिं शेषः । सार्धश्लोक एकान्वयी ॥ ३२ ॥३३॥

गो० टी०—चन्दनस्येत्यादि । उद्वहन् प्रववावित्यपकृष्यते ॥ ३१ ॥

३३] ति टी०—'ज्ञानानां चन्दनानाम्' इति पाठे ज्ञानार्हचन्दनानामित्यर्थः । विविधं गन्धमुद्वहन्प्रववौ, अत एव सुरभिर्गन्धो विमाने मूर्छितो व्याप्तः ॥ ३३ ॥

रा० टी०—रसानामिति । रसादीनां तद्गन्धैर्मूर्छितः प्रवृद्धः सुरभिर्गन्धः प्रववौ प्रव्याप 'ज्ञानानां चन्दनानाम्' इति पाठे ज्ञानार्हचन्दनार्हमित्यर्थ इति भट्टाः ॥ ३४ ॥

गो० टी०—रसानामिति । रसादीनां सुरभिर्गन्धः विमाने मूर्छितः व्याप्तः सन् प्रववौ चचार ॥ ३२ ॥

३४] ति० टी०—तत्रान्याः । बहिः प्रतिष्ठितपुष्पके इत्यर्थः ॥ ३४ ॥

रा० टी०—श्यामेति । श्यामावदातादयो याः प्रमदाः तासां निद्रावशत्वात् हेतोः मदनेन तद्धेतुकातिरत्या विमूर्छितं तासां रूपमाकृतिः प्रसुप्तानां रात्रौ मुकुलितानां पद्मिनीनामिवासीत् । श्लोकद्वयमेकान्वयि ॥ ३५ ॥ ३६ ॥

गो० टी०—श्यामा इति । वदाताः अवदाताः । भागुरिमतेनाल्लोपः शुभा इत्यर्थः ॥ ३३ ॥

३५-३६] ति० टी०—राक्षसालये आन्तरमध्यबहिःकक्षोपलक्षिते । सर्वत्र निद्रावशत्वान्मदनेन तद्धेतुकरत्यार्धमूर्छितं क्लान्तं तासां रूपं प्रसुप्तानां रात्रौ मुकुलितानां पद्मिनीनां नलिनीनां यथा रूपं तथैवासीत् । एवंप्रकारेण ददर्श॥३५॥३६॥

रा० टी०—एवमिति । कपिः रावणान्तःपुरमशेषेण ददर्श जानकीं च न ददर्श ॥ ३७ ॥

गो० टी०—तासामिति । चकारोऽप्यर्थकः । निद्रापरवशानामपि तासां रूपं प्रसुप्तानां पद्मिनीनां रूपमिव रम्यमासीदित्यर्थः ॥ ३४ ॥ ३५ ॥

३७] ति० टी०—ततो निरीक्षणानन्तरम् । 'नेक्षेत नग्नां परस्त्रियम्' इति शास्त्रस्मरणादिति शेषः । तदेवाह—धर्मेति । धर्मलोपनिमित्तं यत्साध्वसं भयं तेन शङ्कितः भीत इत्यर्थः॥३७॥

रा० टी०—निरीक्षमाण इति । ताः स्त्रियो निरीक्षमाणो महाकपिः धर्मसाध्वसेन धर्मलोपहेतुकभयेन शङ्कितः सन् महतीं शङ्कां चिन्तां जगाम ॥ ३८ ॥

गो० टी०—निरीक्षमाण इत्यादि । धर्मसाध्वसशङ्कितः धर्मलोपभयाच्छङ्कितः परदारावरोधस्य परदारारूपान्तःपुरस्य न हीति मे दृष्टिः कदाचिदपि परदाराणां विषयवर्तिनी नहि परदारसंबन्धिविषयपरा नहीत्यर्थः । तथाप्ययं परदारपरिग्रहः दृष्टः इदमसंगतमित्यर्थः ॥ ३७-३८ ॥

३८] ति० टी०—धर्मलोपं दर्शयति—परदारेति । परदारावरोधस्य दारशब्दः स्त्रीसामान्यवाची, अवरोधशब्दः स्वधर्मयुक्तकुलस्त्रीवाची । प्रसुप्तस्य । अनेन नग्नप्रायत्वं सूचितम् तत्समये वसनानां विपर्यासात् ॥ ३८ ॥

रा० टी०—चिन्ताकारमाह-परेत्यादिभिः । परदारावरोधस्य परस्त्रीसमूहस्य निरीक्षणं धर्मलोपं करिष्यति ॥ ३९ ॥

३९] ति० टी०—मे दृष्टिः परदाराणामग्रयावद्विषयवर्तिनी न । किं च परदारपरिग्रहस्तद्वानतिपापी रावणश्च दृष्टः तादृशदर्शनमपि धर्मलोपकारीति भावः ॥ ३९ ॥

रा० टी०—नन्वु पापदृष्ट्या परदारावलोकनं दोषावहं तव तु नेत्यत आह—नेति । हि यद्यपि मम दृष्टिः परदाराणां विषयवर्तिनी विषयप्रवर्तिका न तथापि परदारपरिग्रहः सीतापहारकः अयं रावणो मया दृष्टः एतेनैतदर्शनजनितपापस्य परिहारो न दृश्यते इति सूचितम् ॥ ४० ॥

४०] ति० टी०—अथ पुनर्विचारेण तदलोपबुद्धिरप्युत्पन्नेत्याह—तस्येति । अन्या चिन्ता पूर्वचिन्ताविरोधिनी निश्चिते प्रमाणप्रतिपन्ने एकान्ते सिद्धान्ते तद्विषयज्ञाने चित्तं यस्य सः, अत एव सा चिन्ता कार्यनिश्चयदर्शिनी कर्तव्याकर्तव्यनिर्णयसमर्था ॥ ४० ॥

१ रसानामिति गो. रा. पाठः । २ चिन्तामिति गो. पाठः

कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः । न तु मे मनसा किंचिद्वैकृत्यमुपपद्यते ॥ ४१ ॥
मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने । शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ४२ ॥
नान्यत्र हि मया शक्या वैदेही परिमार्गितुम् । स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥ ४३ ॥
यस्य सत्त्वस्य या योनिस्तस्यां तत्परिमार्गते । न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥ ४४ ॥
तदिदं मार्गितं तावच्छुद्धेन मनसा मया । रावणान्तःपुरं सर्वं दृश्यते न च जानकी ॥ ४५ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान् । अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४६ ॥
तामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः । अपक्रम्य तदा वीरः प्रस्थातुमुपचक्रमे ॥ ४७ ॥
स भूयः संवृतः श्रीमान्मारुतिर्यत्नमाश्रितः । आपानभूमिमुत्सृज्य तां विचेतुं प्रचक्रमे ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥

रा० टी०–तस्येति । निश्चितेन संसर्गबुद्ध्या एतद्दर्शनाकरणात् यत्नान्तरेण स्वामिकार्यस्यासाध्यत्वाच्चैतद्दर्शनमपि न दोषावहमिति निश्चयेन एकान्तं स्थिरं चित्तं यस्य तस्य चिन्ता हनुमतः कार्यनिश्चयदर्शिनी अन्वेषणबुद्धिसंपादिका अन्या चिन्ता प्रादुरभूत् ॥ ४१ ॥

गो० टी०–तस्येति । निश्चितैकान्तचित्तस्य नियतैकरूपचित्तस्य ॥ ३९ ॥

४१] ति० टी०–तां चिन्तामभिनयति—कामामिति । विश्वस्ता इतरालोकनशङ्कारहिताः । वैकृत्यं विकारः स्वार्थे ष्यञ् नोपपद्यते न प्राप्नोति ॥ ४१ ॥

रा० टी०–तदाकारं वर्णयितुमाह–काममिति । येन मया रावणस्य स्त्रियो दृष्टास्तस्य मे मनसः वैकृत्यं विकारो न उपपद्यते प्राप्नोति ॥ ४२ ॥

गो० टी०–काममिति । वैकृत्यं विकारः । उपपद्यते उत्पद्यते ॥ ४० ॥

४२] ति० टी०–ततः किं तत्राह––मनो हीति । शुभाशुभास्ववस्थासु पुण्यपापकर्मस्विन्द्रियाणां प्रवर्तने मनो हेतुः मनसोऽसत्सदर्थरागद्वेषत इन्द्रियप्रवृत्तिर्हि पापाय, इयं तु मम प्रवृत्तिर्न पापाय, यतस्तन्मे मनः सुष्ठु व्यवस्थितं परदारेषु न रागवत् पुण्यपापव्यवस्थायां च स्वचित्तमेव साक्षीति भावः ॥ ४२ ॥

रा० टी०–ननु किं तेनेत्यत आह–मन इति । यत् मनः शुभाशुभासु धर्माधर्मसंपादिकासु अवस्थासु क्रियासु इन्द्रियाणां प्रवर्तने मन एव हेतुः तत् मे मनः सुव्यवस्थितं धर्मे संस्थितम् । एतेनाधर्मशङ्का नास्तीति सूचितम् ॥ ४२ ॥

गो० टी०–मन इति । शुभाशुभास्ववस्थासु शुभकरणाशुभकरणेषु विषये इन्द्रियाणां प्रवर्तने मन एव हेतुः सुव्यवस्थितं न तदभिलाषि जातमित्यर्थः ॥ ४१ ॥

४३] ति० टी०–किं च राजाज्ञानुष्ठानरूपसेवकीयपरमधर्मान्यथानुपपत्त्यापि न दोष इत्याह–नान्यत्रेति । तत्र हेतुः–स्त्रियो हीति । सदा संपरिमार्गणे मार्गणव्यवहारे । लोकैरिति शेषः ॥ ४३ ॥

रा० टी०–ननु वशीकृतेन्द्रियाणामपि स्त्रीसन्निधावागमनमनुचितमित्यत आह–नेति । अन्यत्र परिमार्गितुं वैदेही न शक्या हि यतः संपरिमार्गणे सम्यक्परिमार्गणसमये स्त्रियः स्त्रीष्वेव दृश्यन्ते अन्वेष्यन्ते ॥ ४४ ॥

गो० टी०–ननु परदारदर्शनमपि परिहरणीयं तत्किमर्थं कृतं तत्राह–नान्यत्रेति । अन्यत्र स्त्रीव्यतिरिक्ते संपरिमार्गणे कर्तव्ये । स्त्रीष्वेव हि स्त्रियो दृश्यन्ते ॥ ४२ ॥

४४–४६] ति० टी०–सजातीयेष्वेव मार्गणं प्रसिद्धमित्याह—यस्येति । सत्त्वस्य प्राणिनो या योनिर्या समानजातिः परिमार्गते लोक इति शेषः । तत्रैवोपपत्तिमाह—न शक्यमिति । एतेन रावणदर्शनजोऽपि दोषः परिहृतः४४–४६

रा०टी०–विजातीयेष्वन्वेषणमनुचितमिति बोधयितुमाह–यस्येति । यस्य सत्त्वस्य प्राणिनो या योनिः तस्यामेव तत्परिमार्ग्यते[1] अत एव नष्टा प्रमदा मनुष्यस्त्री मृगीषु परिमार्गितुं न शक्यम् सामान्ये नपुंसकम् ॥ ४५ ॥

गो०टी०–यस्येति। योनिः जातिः सजातीय इत्यर्थः४३।४४

रा० टी०–तदिति । तत् उक्तहेतोः रावणान्तःपुरं परिमार्गितं जानकी तु न दृश्यते ॥ ४६ ॥

रा० टी०–देवेति । देवकन्यादीनवेक्षमाणो हनुमान् जानकीं नैवापश्यत ॥ ४७ ॥

गो० टी०–देवेति । अपश्यत अपश्यत् ॥ ४५ ॥ ४६ ॥

४७] ति० टी०–अपक्रम्य रावणान्तःपुरबहिःकक्षात इति शेषः ॥ ४७ ॥

रा० टी०–तामिति । तां सीतामपश्यन् कपिः अन्याः स्त्रियः पश्यन् सन् अपक्रम्य उत्प्लुत्य प्रस्थातुमुपचक्रमे ॥ ४८ ॥

४८] ति० टी०–तां सीतामन्यत्र विचेतुं प्रचक्रमे ॥४८॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्ड एकादशः सर्गः ॥ ११ ॥

१ मार्ग्यत इति गो रा. पाठः । २ ध्यातुमिति गो. पाठः । ३ तु परमिति गो. पाठः ।

द्वादशः सर्गः ।

चित्रगृहनिकुञ्जादिनानास्थानेष्वन्विष्याप्यप्राप्तसीतादर्शनो हनुमांस्तस्या रावणेन प्रमापणादि संभाव्याकृतकार्यतया स्वयत्नवैफल्यं मन्वानः सुग्रीवदर्शनादिषु निर्विण्णोऽपि निर्वेदस्यानर्थापादकत्वं विचिन्त्यानिर्वेदस्यैव फलोत्पादकत्वं निश्चिन्वन्पुनरप्यन्वेष्टुमारभते । अन्विष्टाखिलप्रदेशोऽप्यलब्धसीतादर्शनः पुनश्च विषीदति ।

स तस्य मध्ये भवनस्य [1]संस्थितो लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रतिदर्शनोत्सुको न चैव तां पश्यति चारुदर्शनाम् ॥ १ ॥
स चिन्तयामास ततो महाकपिः प्रियामपश्यन्रघुनन्दनस्य ताम् ।
ध्रुवं [2]नु सीता [3]म्रियते यथा न मे विचिन्वतो दर्शनमेति मैथिली ॥ २ ॥
सा राक्षसानां प्रवरेण [4]बाला स्वशीलसंरक्षणतत्परा सती ।
अनेन नूनं प्रति दुष्टकर्मणा हता भवेदार्यपथे [5]परे स्थिता ॥ ३ ॥
विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः ।
समीक्ष्य तां राक्षसराजयोषितो भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४ ॥

रा० टी०–स इति । यत्रमास्थितो मारुतिः आपानभूमिमुत्सृज्य त्यक्त्वा विचेतुं प्रचक्रमे ॥ ४९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥

गो० टी०–स भूयस्तु परमिति । तत् रावणान्तःपुरम् ॥ ४७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

१] ति० टी०–अथ बहुदुःखचिन्ताकुलोऽन्विष्टमेव पुनः पुनरन्वेषयति स्मेत्याह–स तस्येति । तस्य भवनस्य रावणभवनस्य निशागृहा रात्रिनिवासगृहास्तान्विचेतुं जगाम ॥ १ ॥

रा० टी०–अन्वेषणान्तरमुपक्रमते–स इति । तस्य रावणस्य भवनस्य मध्ये संस्थितो हनुमान् सीतां प्रति दर्शनोत्सुकः सन् लताच्छादितवेश्मानि चित्रगृहान् अनेकविधचित्रलिखितभवनानि निशागृहान् रात्रिनिवासयोग्यभवनानि च जगाम सीतां च नैव पश्यति ॥ १ ॥

गो० टी०–स तस्येत्यादि । निशागृहान् रात्रिनिवासयोग्यगृहान् । गृहाः पुंसि च भूम्न्येवेति पुँल्लिङ्गत्वम् । पश्यति अपश्यत् ॥ १ ॥

२] ति० टी०–न म्रियते न जीवति स्म । 'ध्रुवं नु सीता म्रियते' इति क्वचित्पाठः । तत्र हेतुः–यथेति यत इत्यर्थः ॥ २ ॥

रा० टी०–समिति । ततः तस्मिन् समये रघुनन्दनस्य प्रियाम् अपश्यन् महाकपिः संचिन्तयामास । चिन्ताकारमाह–यथा यथावद्विचिन्वतो मम दर्शनं दृष्टिपथं मैथिली न एति अतः ध्रुवं नित्यमपि स्वजीवनं न म्रियते एतेन सीतायाः अघटितघटनापटीयस्त्वं व्यञ्जितम् ॥ २ ॥

गो० टी०–स इति । यथा यस्मात्कारणात् विचिन्वतो मे मैथिली दर्शनम् नैति तस्मात् म्रियते ममार । यद्वा अथवा नेति वाक्यं पठनीयम् तदा अपश्यन्निति हेतुगर्भम् अदर्शनान्मृता वा अथवा दर्शनं नैति । कुत्रचित् गहने प्रदेशे स्थिता वेत्यर्थः ॥ २ ॥

३] ति० टी०–स्वशीलं पातिव्रत्यम् । प्रतिदुष्टकर्मणा प्रति इष्टं दुष्टं कर्म यस्य तेन सकलसज्जनानर्थकारिणेत्यर्थः । आर्यपथे आर्याणां पतिव्रतानां मार्गे ॥ ३ ॥

रा० टी०–चिन्तान्तरमाह–सेति । परे सर्वोत्कृष्टे आर्यपथे महात्मनां रीतौ स्थिता अत एव स्वशीलस्य स्वपतिमात्रनिष्ठत्वस्य संरक्षणे तत्परा अत एव सती पतिव्रताशिरोमणिः सा सीता प्रतिदुष्टकर्मणा सर्वं प्रति दुष्टाचरणेन अनेन रावणेन हता भवेत् ॥ ३ ॥

गो० टी०–सेति । प्रतिदुष्टकर्मणा अतिदुष्टकर्मणा वीप्सायां प्रतिः । 'प्रति प्रतिनिधौ वीप्सालक्षणादौ' इत्यमरः । परे उत्कृष्टे आर्यपथे सन्मार्गे ॥ ३ ॥

४] ति० टी०–रावणस्यातुरागात्स्त्रीविधदोषाद्वा तद्द्वेषप्रवृत्तावपि स्वयमेव भयान्नष्टेत्याह–विरूपेति । दीर्घाणि विरूपाणि दर्शनानि यासां ताः दीर्घपदेन कर्मधारयो वा । राक्षसराजयोषितस्तदाज्ञाकारिणीः ॥ ४ ॥

रा० टी०–चिन्तान्तरमाह—विरूपेति । विरूपाणि छिन्नैकनासिकादिमन्ति शरीराणि यासामत एव विकृताः विविधविकारविशिष्टाः अत एव दीर्घाः बृहच्छरीराः विरूपाणां राक्षसानां दर्शनं निरन्तरं दृष्टिर्यासु ता एव ता इति

---

१ मारुतिरिति गो. पाठः । २ ह्रीति गो.पाठः । ३ म्रियत इति गो. पाठः । ४ जानकीति गो.पाठः । ५ वरे इति गो.पाठः । ६ सति गो.पाठः ।

सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य कालं सह वानरैश्चिरम् ।
न मेऽस्ति सुग्रीवसमीपगा गतिः सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५ ॥
दृष्टमन्तःपुरं सर्वं दृष्टा राक्षसयोषितः । न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६ ॥
किं नु मां वानराः सर्वे गतं वक्ष्यन्ति संगताः । गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः ॥ ७ ॥
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् । ध्रुवं प्रायमुपोसिष्ये कालस्य व्यतिवर्तने ॥ ८ ॥
किं वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः । गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९ ॥
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् । भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः ॥ १० ॥

कर्मधारयः अत एव विवर्चसः भयंकरवर्चोविशिष्टा राक्षसराजयोषितः ताः राक्षसीः समीक्ष्यावलोक्य जनकेश्वरात्मजा भयाद्विनष्टा ॥ ४ ॥

गो० टी०–विरूपेति । विरूपाणि न्यूनाधिकानि रूपाणि शरीरावयवाः यासां ताः विकृताः विकृतवेषाः विवर्चसो निस्तेजस्काः महाननाः अतिविशालमुखाः दीर्घाणि विरूपाणि दर्शनानि चक्षूंषि यासां ताः राक्षसराजयोषितः रावणस्याज्ञाकारिण्यः स्त्रियः ॥ ४ ॥

५–६] ति० टी०–पौरुषं समुद्रलङ्घनरूपपराक्रमसाध्यं प्रयोजनम् । कालं विहृत्य सुग्रीवकृतं कालमतिक्रम्य सुग्रीवसमीपं गम्यते यया सा गतिर्मार्गो नास्ति । तत्र हेतुः–सुतीक्ष्णेति ॥ ५ ॥ ६ ॥

रा० टी०–चिन्तान्तरमाह–सीतामिति । वानरैः सह चिरंकालं विहृत्य सीताम् अदृष्ट्वा अत एव पौरुषं पुरुषार्थम् अनवाप्य अप्राप्य सुग्रीवसमीपगा सुग्रीवसमीपप्रापिका मे गतिर्मार्गो नास्ति तत्र हेतुः–वानरः सुग्रीवः तीक्ष्णदण्डः बलवांश्च ॥ ५ ॥

रा० टी०–दृष्टमिति । राक्षसयोषितो दृष्ट्वा सर्वमन्तःपुरं मया दृष्टं सीता तु न दृश्यते अतः मम श्रमः समुद्रलङ्घनादिजनितखेदः वृथा ॥ ६ ॥

गो० टी०–सीतामिति । पौरुषं शत्रुविषयपराक्रमम् । चिरं कालं विहृत्य अतिक्रम्येत्यर्थः । एवंभूतस्य मे सुग्रीवसमीपगा तत्समीपगामिनी गतिः मार्गः नास्ति सुग्रीवसमीपगतिः ममायोग्येत्यर्थः । तत्र हेतुमाह–सुतीक्ष्णेति । यत इति शेषः ॥ ५ ॥ ६ ॥

७] ति० टी०–अस्तु सुग्रीवसमीपगमनवार्ता, अङ्गदादिसमीपगमनमपि दुर्लभमित्याह–किं न्विति । किं नु वक्ष्यन्तीति चिन्तां कृत्वा पुनर्विचार्य यद्वक्तव्यं तत्स्वयमेवाह–वदसीत्यादि । वदस्वेति वक्ष्यन्तीत्यर्थः ॥ ७ ॥

रा० टी०–किमिति । गतं सीतासंदेशं विना प्राप्तं मां हे वीर ! तत्र लंकायां गत्वा त्वया किं कृतं तत् नो वदस्व इति किं नु वक्ष्यन्ति प्रक्ष्यन्त्येवेत्यर्थः ॥ ७ ॥

गो० टी०–किमिति । किन्विति सामान्येन निर्वेदोक्तिः । विशेषतश्चाह–गत्वेति । इत्युक्त इति शेषः । वदस्व न इत्युक्तः किम् प्रवक्ष्यामि । यद्वा किन्त्विति पाठः । पूर्ववदर्धत्रयमेकं वाक्यम् किन्त्विति पूर्वस्माद्विशेषोक्तिः । मां वानराः वदस्व न इति वक्ष्यन्ति तदा अदृष्ट्वा किं प्रवक्ष्यामीति योजना ॥ ७ ॥

८] ति० टी०–किं प्रवक्ष्यामि तान्प्रतीति शेषः । न किमपीत्यर्थः । यदेवम् अतो–ध्रुवमिति । कालस्य सुग्रीवकल्पितस्य व्यतिवर्तनेऽतिक्रमे ॥ ८ ॥

रा० टी०–नन्वं किं तेनेत्यत आह—अदृष्ट्वेति । जनकात्मजाम् अदृष्ट्वा अहं किं प्रवक्ष्यामि नोत्तरमस्तीत्यर्थः, अतः कालस्य सुग्रीवपरिकल्पितसमयस्य व्यतिवर्तने उल्लङ्घने स्थितोऽहं प्रायं प्रायोपवेशनं ध्रुवमासिष्ये ॥ ८ ॥

गो० टी०–तर्हि अत्रैव कालविलम्बः क्रियतां तत्राह—ध्रुवमिति । कालस्य व्यतिवर्तने अस्मदागमनकालेऽतीते प्रायमुपैष्यन्ति । जाम्बवत्प्रभृतय इति शेषः ॥ ८ ॥

९] ति० टी०–किं वा वक्ष्यति माम् धिक्करिष्यतीत्यर्थः। समागता मिलिता अन्ये वानराश्च धिक्करिष्यन्ति ॥ ९ ॥

रा० टी०–किमिति । समुद्रस्य पारम् उत्तरतीरं गतं प्राप्तं मां जाम्बवान् किं वक्ष्यति वानराश्च किं वक्ष्यन्तीति वचनविपरिणामेनान्वयः ॥ ९ ॥

गो० टी०–सामान्येन निर्वेदं प्रतिवक्ति–किं वेति । समुद्रलङ्घनरूपं महत्कर्म कृतवन्तं मां ते किं वक्ष्यन्ति किमपि वक्ष्यन्ति । यद्वा मद्वृत्तान्तं प्रशंसन् जाम्बवान् तदुत्साहकोऽङ्गदस्तदुपश्रुण्वन्तोऽन्ये च मां किं वा जुगुप्सितं वक्ष्यन्ति । 'किं पृच्छायां जुगुप्सने' इत्यमरः ॥ ९ ॥

१०] ति० टी०–एवं क्षणमात्रं निर्विद्य पुनरुत्साहमवलम्ब्याह–अनिर्वेद इति । निर्वेदः करणग्रामस्य प्रवृत्तिवैमुख्यं तदभाव उत्साहः ॥ १० ॥

रा० टी०–स्वामिकार्यविघातः दुःसहः इत्युत्साहावलम्बिचिन्तान्तरमाह–अनिर्वेद इत्यादिभिः । अनिर्वेदः कृत्यात् निवृत्तिर्यस्मात् सः उत्साह इत्यर्थः श्रियः संपत्तेः मूलं कारणम् अत एव अनिर्वेदः परं सुखं परमसुखहेतुः अत एव यत्र विचयोऽन्वेषणं न कृतः तत्र भूयो विचेष्यामि ॥ १० ॥

गो० टी०–चिरं निर्वेदे कार्यहानिः स्यादिति मत्वा अनि-

१ रावणेति गो. पाठः । २ एष्यन्ति इति गो. पाठः । ३ अर्धमेतत् गो. नास्ति ।

अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः । करोति सफलं जन्तोः कर्म यच्च करोति सः ॥ ११ ॥
तस्मादनिर्वेदकरं यत्नं चेष्टेऽहमुत्तमम् । अदृष्टांश्च विचेष्यामि देशान्रावणपालितान् ॥ १२ ॥
आपानशाला विचितास्तथा पुष्पगृहाणि च । चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च ॥ १३ ॥
निष्कुटान्तररथ्याश्च विमानानि च सर्वशः । इति संचिन्त्य भूयोऽपि विचेतुमुपचक्रमे ॥ १४ ॥
भूमीगृहांश्चैत्यगृहान्गृहातिगृहकानपि । उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः क्वचित् ॥ १५ ॥
अपवृण्वंश्च द्वाराणि कपाटान्यवघट्टयन् । प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्निव ॥ १६ ॥
सर्वमप्यवकाशं स विचचार महाकपिः । चतुरङ्गुलमात्रोऽपि नावकाशः स विद्यते ॥
रावणान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥ १७ ॥
प्राकारान्तरवीथ्यश्च वेदिकाश्चैत्यसंश्रयाः । श्वभ्राश्च पुष्करिण्यश्च सर्वं तेनावलोकितम् ॥ १८ ॥
राक्षस्यो विविधाकारा विरूपा विकृतास्तथा । दृष्टा हनुमता तत्र न तु सा जनकात्मजा ॥ १९ ॥
रूपेणाप्रतिमा लोके परा विद्याधरस्त्रियः । दृष्टा हनुमता तत्र न तु राघवनन्दिनी ॥ २० ॥
नागकन्या वरारोहाः पूर्णचन्द्रनिभाननाः । दृष्टा हनुमता तत्र न तु सा जनकात्मजा ॥ २१ ॥

वेदमवलम्बते–अनिर्वेद इति । अनिर्वेद उत्साहः तत्कृतं तत्प्रयुक्तं यत्नं चेष्टे करोमीत्यर्थः । यत्करोति जन्तुरिति सिद्धम् । जन्तोः सबन्धि तत्सर्वं कर्म सः अनिर्वेद एव सफलं करोतीत्यन्वयः ॥ १० ॥ ११ ॥

११] ति०टी०–यत्कर्म स करोति तत्कर्म सफलं करोति ११

रा० टी०–उत्साहस्य संपत्तिमूलत्वमुपपादयन्नाह–अनिर्वेद इति । सर्वार्थेषु निखिलकर्तव्येषु प्रवर्तकः सोऽनिर्वेदः यत् कर्म जन्तुः करोति तत् जन्तोः कर्म सफलं करोति ॥ ११ ॥

१२–१३] ति० टी०–अनिर्वेदकरमुत्साहजननं यत्नं चित्तस्थैर्यं चेष्टे करोमि ॥ १२ ॥ १३ ॥

१४] ति० टी०–निष्कुटान्तररथ्या गृहारामध्यगता वीथीः । विमानानि पुष्पकादीनि ॥ १४ ॥

रा० टी०–तस्मादिति । तस्मात् अनिर्वेदस्य फलसंपादकत्वात् हेतोः अनिर्वेदकरम् अनिर्वेदेनोत्थापितं यत्नमहं चेष्टे करोमि । चेष्टामेवाह–अदृष्टान् देशान् विचेष्यामि ॥ १२ ॥

रा० टी०–आपानेति । आपानशालाप्रभृतयो मया विचिताः अतः अन्यत्र विचेतव्यमित्यर्थः, इति संचिन्त्य विचेतुमुपचक्रमे । तत्र निष्कुटान्तररथ्याः गृहारामवीथ्यः भूमीगृहाः भुवोऽन्तराले निर्मितभवनानि गृहात् गृहकाः गृहोपरिविद्यमानगृहाणीति कतकः मुख्यगृहाद्दूरे विहारार्थं निर्मितानीति तीर्थः । सार्धश्लोक एकान्वयी ॥ १३ ॥ १४ ॥

गो० टी०–भूयस्तावदित्यादि । आपानेति । एता विचिताः अथापि पुनर्विचेष्यामीत्यनुषज्यते ॥ १२ ॥

गो० टी०–निष्कुण्टाः गृहारामाः अन्तररथ्याः अवान्तरवीथ्यः ॥ १३ ॥

गो० टी०–भूमीति । भूमीगृहान् भूमीबिलगृहान् । चैत्यगृहान् चतुष्पथमण्डपान् । गृहानतिगृहान् गृहानतीत्य दूरे स्वैरविहारार्थं निर्मितान् गृहान् ॥ १४ ॥

१५] ति० टी०–भूमीगृहान्भूबिलगृहान् । गृहातिगृहका गृहोपरिगृहा इति कतकः । गृहानतीत्यानतिदूरे स्वैरविहारार्थं निर्मितगृहा इति तीर्थः । विचेतुमुपचक्रमे इत्यनुकर्षः । उत्पतन्नुत्पतमारुहेन् । निपतनमवरोहः ॥ १५ ॥

१६] ति० टी०–निष्पतनं निष्क्रमणम् । अवघट्टनं संवरणम् ॥ १६ ॥

१७] ति० टी०–यं स कपिर्न जगाम स तादृशश्चतुरङ्गुलमात्रोऽप्यवकाशो न विद्यते ॥ १७ ॥

रा० टी०–उत्पतन्निति । उत्पतनादि कुर्वन् महाकपिः अवकाशम् अन्वेषितातिरिक्तदेशमपि विचचार अत एव यमवकाशं महाकपिर्न जगाम सोऽवकाशो देशः चतुरङ्गुलमात्रोऽपि न विद्यते । अर्धषट्कमेकान्वयि ॥ १६–१७ ॥

गो० टी०–उत्पतन्नित्यादि । उत्पतन्निपतन् पूर्वमुच्चस्थानान्यधिरुह्य ततोवरोहन् अवघाटयन् पाटयन् निष्पतन् निर्गच्छन् प्रपतन्नुत्पतन् बिलगृहादीनि नीचस्थानानि प्रथममधिरुह्य ततः समुद्गच्छन् ॥ १६–१७ ॥

१८–१९] ति० टी०–प्राकारान्तरवीथ्यः प्राकारमध्यवर्तिमन्त्रिकुपारादिगृहवीथ्यः चैत्यश्चतुष्पथवर्तिवृक्षः श्वभ्रा गर्ताः ॥ १८ ॥ १९ ॥

रा० टी०–प्राकारेति । प्राकारान्तरवीथ्यादि सर्वं तेन हनुमताऽवलोकितं चैत्यः चतुष्पथवर्ती तरुः ॥ १८ ॥

रा० टी०–राक्षसस्य इति । विविधाकाराः राक्षस्यः हनुमता दृष्टाः जनकात्मजा तु न दृष्टा ॥ १९ ॥

गो० टी०–प्राकारेति । प्राकारान्तररथ्याः प्राकारमध्यवर्तिवीथ्यः । वेदिकाश्चैत्यसंश्रयाः चैत्यवृक्षमूलपीठिकाबन्धाः ॥ १८–२१ ॥

२०–२१] ति० टी०–राघवनन्दिनी रामप्रिया ॥ २० ॥ २१ ॥

१ कृतमिति गो. पाठः । २ भूयस्तावदिति गो. पाठः । ३ पुनरिति गो. रा. पाठः । ४ अपावृण्वन्निति गो. रा. पाठः । ५ घाटयन्निति गो. पाठः । ६ रथ्याश्चेति गो. पाठः । ७ दीर्घिका इति गो. पाठः । ८ सीता सुमध्यमेति गो. पाठः । ९ आरोहन्निति युक्तं भाति ।

प्रमथ्य राक्षसेन्द्रेण नागकन्या बलाद्धृताः । दृष्ट्वा हनुमता तत्र न सा जनकनन्दिनी ॥ २२ ॥
सो पश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः । विषसाद महाबाहुर्हनूमान्मारुतात्मजः ॥ २३ ॥
उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च । व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागतः ॥ २४ ॥
अवतीर्य विमानाच्च हनूमान्मारुतात्मजः । चिन्तामुपजगामाथ शोकोपहतचेतनः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।

पुष्पकविमानान्निर्गतो हनुमान्विद्युद्वेगेन सर्वतोऽन्विष्याप्यलब्धसीतादर्शनस्तस्या विनाशमेवादर्शने हेतुत्वेनोत्प्रेक्षते । जानक्या अनुपलब्धौ रामे निवेदितानिवेदिताप्यनेकमहानर्थादिकेति विचिन्त्य प्रतिप्रयाणान्निवृत्तः प्रायोपवेशनं प्राणमोक्षणं रावणमारणं वा यावद्विचिन्तयति तावदेकां वनवाटिकामनन्वेषितां निर्धार्य तामन्वेष्टुमुपक्रान्तः स्वोद्योगसाफल्यापादनार्थमृषिदेवगणब्रह्मादीन्प्रार्थयते ।

विमानात्तु स संक्रम्य प्राकारं हरियूथपः । हनूमान्वेगवानासीद्यथा विद्युद्घनान्तरे ॥ १ ॥
संपरिक्रम्य हनुमान्रावणस्य निवेशनान् । अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥ २ ॥
भूयिष्ठं लोलिता लङ्का रामस्य चरता प्रियम् । नहि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥ ३ ॥
पल्वलानि तटाकानि सरांसि सरितस्तथा । नद्योऽनूपवनान्ताश्च दुर्गाश्च धरणीधराः ॥ ४ ॥

रा० टी०–रूपेणेति । रूपेण अप्रतिमाः विद्याधरस्त्रियः हनूमता दृष्टाः राघवनन्दिनी सीता तु न दृष्टा ॥ २० ॥

रा० टी०–नागेति । नागकन्या दृष्टाः जनकात्मजा न दृष्टा ॥ २१ ॥

२२–२४] ति० टी०–प्रमथ्य नागकन्या बलाद्धृता इत्यनेन बन्दीकृतानां ग्रहणम्, पूर्वं तूदानां नागकन्यानां ग्रहणम्, अतो न पुनरुक्तिः ॥ २२—२४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—प्रमथ्येति ॥ २२ ॥

रा० टी०–स इति । अन्याः स्त्रियः पश्यन् तां सीताम् अपश्यंश्च महाबाहुरतिप्रयत्नवान् महाबाहुर्हनुमान् विषसाद २३

रा० टी०–उद्योगमिति । वानरेन्द्राणाम् उद्योगमन्वेषणं सागरस्य प्लवनं च व्यर्थं निष्फलं वीक्ष्य अनिलसुतः चिन्तामुपागतः ॥ २४ ॥

गो० टी०–प्रमथ्येति । प्रमथ्य प्रसह्य । बलाद्धृता नागकन्या इत्यभिधानादत्र बन्दीकृतानां ग्रहणम् । पूर्वश्लोके ऊढानां नागकन्यानामित्यपुनरुक्तिः ॥ २२–२५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

२५] ति० टी०–अवतीर्य विमानाच्चेति । पुनरारुह्यावरुह्य चेत्यर्थः । विमान एवैतत्सर्वदर्शनमिति तत्त्वम् ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–अवतीर्येति । हनुमान् शोकोपहतचेतनः सन् चिन्तामुपजगाम ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥

१] ति० टी०–वेगवान्हनुमान्विमानात्प्राकारं संक्रम्य घनान्तरे यथा विद्युत्सशोभा आसीत्तथासीत् । प्राकारस्येन्द्रनीलकृतत्वमनेन ध्वन्यते ॥ १ ॥

रा० टी०–अन्वेषणान्तरमाह—विमानादित्यादिभिः । स हनुमान् विमानात्प्राकारं संक्रम्य संप्राप्य घनान्तरे विद्युदिव वेगवान् आसीत् ॥ १ ॥

गो० टी०–विमानादित्यादि । इदानीं विमानादवतरणोक्त्या मध्ये विमानमधिरूढ इत्यवगम्यते । वेगवत्त्वे दृष्टान्तमाह–विद्युदिति ॥ १ ॥

२] ति० टी०–रावणस्य निवेशनान्गृहान्संपरिक्रम्य पुनः परिक्रमणेन दृष्ट्वा जानकीं चादृष्ट्वाऽब्रवीत् । आत्मनैवेति बोध्यम् ॥ २ ॥

रा० टी०–समिति । हनुमान् रावणस्य निवेशनान् गृहान् संपरिक्रम्य अन्वेषणार्थं संप्राप्य अब्रवीत् ॥ २ ॥

गो० टी०–संपरिक्रम्येति । संपरिक्रम्य प्राकारमिति शेषः । अब्रवीत् स्वयमिति शेषः ॥ २ ॥

३-४] ति० टी०–भूयिष्ठं लोलिता बहुशोऽन्विष्टा ॥३॥४॥
रा० टी०–तद्वचनाकारमाह–भूयिष्ठमिति । प्रियं चरता

१ मुहुर्धीमानिति गो. पाठः । २ उपागमदिति गो. पाठः । ३ स्त्रिति गो. पाठः । ४ निवेशनादिति गो. पाठः । ५ लोडितेति रा. पाठः ।

लोलिता वसुधा सर्वा न चैं पश्यामि जानकीम् । इह संपातिना सीता रावणस्य निवेशने ॥
आख्याता गृध्रराजेन न च सा दृश्यते न किम् ॥ ५ ॥
किं तु सीताथ वैदेही मैथिली जनकात्मजा । उपतिष्ठेत विवशा रावणेन हृता बलात् ॥ ६ ॥
क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः । बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥ ७ ॥
अथवा ह्रियमाणायाः पथि सिद्धनिषेविते । मन्ये पतितमार्यायाः हृदयं प्रेक्ष्य सागरम् ॥ ८ ॥
रावणस्योरुवेगेन भुजाभ्यां पीडितेन च । तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥ ९ ॥
उपर्युपरि सा नूनं सागरं क्रमतस्तदा । विचेष्टमाना पतिता समुद्रे जनकात्मजा ॥ १० ॥
आहो क्षुद्रेण चानेन रक्षन्ती शीलमात्मनः । अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ११ ॥

मया लङ्का भूयिष्ठमत्यन्तं लोहिता अन्विष्टा हि तथापि वैदेहीं नैव पश्यामि ॥ ३ ॥

गो० टी०-भूयिष्ठमिति । लोलिता बहुशोन्विष्टेत्यर्थः॥३॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-पल्वलानीति । पल्वलादयः मया लोलिताः । सार्धश्लोक एकान्वयी ॥ ४ ॥

गो० टी०-पल्वलानीत्यादि । सरितः क्षुद्रनद्यः । अनुपवनान्ताः जलप्रायवनप्रदेशाः ॥ ४ ॥ ५ ॥

५] ति० टी०-नन्वनुपलब्धिप्रमाणादभावनिश्चय एवास्त्वत आह-इहेति । रावणनिवेशने एवाख्याता तद्वचश्च प्रमाणम् दृश्यते तु न किमिदमिति ॥ ५ ॥

रा० टी०-अलाभस्याश्चर्यं मत्वा आह-इहेति । इह अस्मिन् रावणस्य निवेशने सीता स्थितेति शेषः, गृध्रराजेनाख्याता सा सीता किं कथं न दृश्यते अत्र कारणं न पश्यामीत्यर्थः । अर्धद्वयमेकान्वयि ॥ ५ ॥

६] ति० टी०-बहुप्रकारं चिन्तयति-किं न्विति । पूर्वदृष्टां मन्दोदरीं सौन्दर्यादिगुणैः पुनः सीतात्वेन संभाव्य तन्निरासकवाक्यम् । रावणेन बलाद्धृता विवशा सती सीतोपतिष्ठेत रावणमिति शेषः । 'रावणं दुष्टचारिणम्' इति पाठे तु यथाश्रुतमेव । इदं किं तु कुत्सितं तु, यतः सा मैथिली सा सीता लाङ्गलपद्धतिजत्वेनायोनिजा । वैदेही जगत्प्रशस्तविदेहवंशसंबद्धा । जनकात्मजा ब्रह्मवित्पुत्री ॥ ६ ॥

रा० टी०-दृष्टमन्दोदरीं सीतात्वेनाशङ्क्य निराकरोति-किमिति । बलात् रावणेन हृता सीता उपतिष्ठेत रावणसमीपं तिष्ठेत् किं नेत्यर्थः । एतेन सा न सीतेति सूचितम् ॥ ६ ॥

गो० टी०-किन्विति । सीता अयोनिजा । वैदेही जन्मभूमिप्रयुक्तातिशयवती । मैथिली आचारप्रधानकुलोत्कर्षवती । अथशब्दः समुच्चये । एवंभूता जनकात्मजा दुष्टचारिणं रावणं विवशा कामपरवशा सती उपतिष्ठेत किं तु नेत्यर्थः ॥ ६ ॥

७] ति० टी०-तर्ह्यदर्शनं कुतस्तत्र हेतूत्प्रेक्षते-क्षिप्रमिति । एते पक्षा दुःखातिशयात्संपातिवचनविस्मरणमूलकाः बिभ्यतः कराद्भष्टेति शेषः । रामबाणानाम् आघातादिति शेषः । शेषे षष्ठी वा ॥ ७ ॥

रा० टी०-चिन्तान्तरमाह-क्षिप्रमिति । रामबाणानां रामबाणेभ्यो बिभ्यतः अत एव सीतामादाय क्षिप्रमुत्पततः रक्षसः समीपात् अन्तरा मध्ये पतिता भवेत् इति मन्ये ॥७॥

गो० टी०-अथास्या अदर्शने हेतूनुत्प्रेक्षते-क्षिप्रमित्यादिना । रामबाणानां रामबाणेभ्यः ॥ ७ ॥

८] ति० टी०-रामपरोक्षं तथा भयायोगात्पक्षान्तरम्-अथवेति । हृदयं पतितं मनउत्क्रान्तम् । मनउत्क्रमणस्यैव मरणत्वात् ॥ ८ ॥

रा० टी०-पातस्यासंभवं मत्वा पक्षान्तरमाह-अथवेति । सिद्धनिषेविते पथि ह्रियमाणाया अत एव सागरं प्रेक्ष्य भीताया इति शेषः, सीतायाः हृदयं मनः पतितम् उत्क्रान्तं मनउत्क्रमणस्य मरणत्वान्मृतेत्यर्थः, इत्यहं मन्ये ॥ ८ ॥

गो० टी०-अथवेति । सागरं प्रेक्ष्य भीतं हृदयं सागरे पतितमिति मन्ये। हृदयस्य भयस्थानत्वेन तन्मूलतया तच्छरीरं लक्ष्यते ॥ ८ ॥

९] ति० टी०-पीडितेन पीडनेन ॥ ९ ॥

रा० टी०-चिन्तान्तरमाह-रावणस्येति । उरुवेगेन रावणस्य भुजाभ्यां पीडितेन गाढं ग्रहणेन हेतुना तया सीतया जीवितं त्यक्तम् इति मन्ये ॥ ९ ॥

गो० टी०-रावणस्येति । पीडितेन पीडनेन ॥ ९ ॥

१०] ति० टी०-विचेष्टमाना विलुठन्ती ॥ १० ॥

रा० टी०-चिन्तान्तरमाह-उपरीति । सागरम् उपरि उपरि क्रमतो रावणस्य समीपे विचेष्टमाना लुण्ठन्ती जनकात्मजा समुद्रे पतिता ॥ १० ॥

गो० टी०-उपर्युपरीति । उपर्युपरि सागरं सागरस्य सन्निहितोपरिप्रदेशे । "उपर्यध्यधसः सामीप्ये" इति द्विर्वचनम् "धिगुपर्यादिषु त्रिषु" इति द्वितीया ॥ १० ॥

११] ति० टी०-ननु सर्वमेतदसंभावितं रावणेन सर्वापायरहितहरणस्येपत्करत्वादतः पक्षान्तरमाह-आहो इति । अथवेत्यर्थः ॥ ११ ॥

रा० टी०-चिन्तान्तरमाह-अहो इति । आत्मनः शीलं पातिव्रत्यं रक्षन्ती अबन्धुः बन्धुरहिता सीता क्षुद्रेण अनेन रावणेन भक्षिता ॥ ११ ॥

---

१ त्विति गो. पाठः । २ पश्यामि तामहमिति गो. पाठः । ३ न्विति गो. रा. पाठः । ४ रावणं दुष्टचारिणमिति गो. पाठः । ५ वेति गो. पाठः । ६ अहो इति गो. रा. पाठः । ७ वेति गो. पाठः ।

अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा । अदुष्टा दुष्टभावाभिर्भक्षिता सा भविष्यति ॥ १२ ॥
[[1]संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् । रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥
हा राम लक्ष्मणेत्येवं हाऽयोध्ये चेति मैथिली । विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥]
अथवा निहिता मन्ये रावणस्य निवेशने । भृशं लालप्यते बाला पञ्जरस्थेव सारिका ॥ १३ ॥
जनकस्य कुले जाता रामपत्नी सुमध्यमा । कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥ १४ ॥
विनष्टा वा प्रणष्टा वा मृता वा जनकात्मजा । रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥ १५ ॥
निवेद्यमाने दोषः स्यान्नदोषः स्यादनिवेदने । कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥ १६ ॥

गो० टी०–अहो इति खेदे ॥ ११ ॥

१२] ति० टी०–ननु बहुभक्षणसामग्रीमास्वादनुरागवत्त्वाच्च तेन भक्षणमसंभावितमत आह—अथवेति । सापत्न्यदुःखादिति भावः ॥ १२ ॥

रा० टी०–चिन्तान्तरमाह—अथवेति । दुष्टभावाभिः क्रूरस्वभावाभिः राक्षसेन्द्रस्य पत्नीभिः सा सीता भक्षिता भविष्यति ॥ १२ ॥

गो० टी०–अथवेति । दुष्टभावाभिः सापत्न्यप्रयुक्तक्रोधाभिः ॥ १२ ॥ १३ ॥

१३] ति० टी०–एतदुत्तरम् 'संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् । रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥ हा राम लक्ष्मणेत्येव हाऽयोध्येति च भामिनी । विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥' इत्यादि श्लोकद्वयं प्रक्षिप्तमिति कतकः । ननु सपत्नीभिरत्यशक्यं भक्षणं रावणेन स्वभोगार्थमानीतत्वादत आह—अथवेति । निहिता गुप्ततया स्थापिता इति मन्ये । नायमपि पक्षो युक्त इत्याह—भृशमिति । एवमपि सा बाला पञ्जरस्था सारिकेव भृशं मुहुर्मुहु रामेति लालप्यते लालप्येत । न च तदृश्यत इति भावः ॥ १३ ॥

रा० टी०–चिन्तान्तरमाह—संमिति । संपूर्णचन्द्रप्रतिमं पूर्णचन्द्रसदृशं रामस्य वक्त्रं ध्यायती ध्यायन्ती सीता पञ्चत्वं मरणं गता ॥ १३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—हेति । हा ! रामेत्यादि बहु विलप्य न्यस्तदेहा भविष्यति ॥ १४ ॥

गो० टी०–हा रामेति । न्यस्तदेहा त्यक्तदेहा भविष्यति । भवेदित्यर्थः ॥ १४ ॥

रा० टी०–चिन्तान्तरमाह–अथवेति । रावणस्य निवेशने क्वचित् गोप्यस्थले निहिता पञ्जरस्था सारिका इव भृशं लालप्यते मरणभावपरीक्षार्थं किंचित् वक्तुं प्रेर्यते ॥ १५ ॥

गो० टी०–अथवेति । निहिता भूगृहादौ गूढं स्थापिता । लालप्यते मुहुर्मुहुः प्रलपति ॥ १५ ॥

१४] ति० टी०–ननु तर्हि रावणसमीप एव भवेत्संपातिवचनप्रामाण्यात् मया तु सम्यङ् नान्विष्टमित्याशङ्क्याह–जनकस्येति । तस्मादेतदप्ययुक्तमिति भावः ॥ १४ ॥

रा० टी०–चिन्तान्तरमाह—जनकस्येति । रामपत्नी रावणस्य वशं कथं व्रजेत् प्राप्नुयात् न प्राप्नुयादित्यर्थः ॥ १६ ॥

गो० टी०–एवं निरुद्ध्यमानाऽपि सीता रावणस्य वशं न व्रजेदित्याह–जनकस्येति । कथं व्रजेत् न व्रजेदेवेत्यर्थः ॥ १६ ॥

१५] ति० टी०–नन्वनेन विचारेणालम्, यथानुभूतं निवेद्यतां तत्राह–विनष्टेति । अस्य क्वचिद्वर्तत इति शेषः । 'णश अदर्शने' इति धात्वनुसाराददृष्टा सती क्वचिदस्तीति वक्तुमशक्यमक्षमम् सर्वतोऽन्विष्टत्वात् । प्रणष्टा प्रगतं नष्टमदर्शनं यस्याः सा दृष्टेत्यर्थः । एतदपि न वक्तुं क्षमम् स्वयमदृष्टत्वात् । एवं मृतेत्यपि वक्तुं न शक्यम् तत्साधकदृढतरप्रमाणाभावात् । तस्मादाप्तस्याग्रे किमपि वक्तुं न शक्यम् । दृश्यदेशे मायया दर्शनं विनाशः, अदृश्यदेशेऽवस्थापनं प्रणाश इति तु तीर्थः ॥ १५ ॥

रा० टी०–ननु शीघ्रं गत्वा यथावृत्तं रामसन्निधावुच्यतामित्यत आह—विनष्टेति । विनष्टा अत्रैव क्वचिद्गोपितात्वेन अदृष्टा प्रणष्टा वा इतोऽन्यत्र विद्यमानात्वेन अदृष्टा वा मृता लोकान्तरं प्राप्ता वा प्रियभार्यस्य रामस्याग्रे निवेदयितुं कथयितुं न क्षमम्, त्रयाणामप्यनिश्चितत्वात् किंचिद्वक्तुं न शक्यते इत्यर्थः । सामान्ये नपुंसकम् ॥ १७ ॥

गो० टी०–ननु किं चिन्तया गत्वा यथावृत्तं निवेद्यतामित्याशङ्क्य तदनुचितमित्याह–विनष्टेति । विनष्टा भूगृहादौ स्थापनेनादर्शनं गता "णश, अदर्शने" इति धातोर्निष्ठा । प्रणष्टा सम्भ्रमपतनादिना त्यक्तजीविता "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम् । मृता रामविरहदुःखासहिष्णुतया स्वयं मृता ॥ १७ ॥

१६] ति० टी०–तदेव स्पष्टयति—निवेद्यमाने इति । न दृष्टेति निवेद्यमाने दोषो वक्ष्यमाणरामप्राणत्यागरूपः । अनिवेदने स्वामिवञ्चनारूपो दोषः । तस्मान्निवेदनानिवेदनरूपमुभयमपि विषमं दुरनुष्ठेयं प्रतिभाति ॥ १६ ॥

रा० टी०–निवेद्यमाने इति । निवेद्यमाने अन्यतमं कथ्यमाने दोषो मिथ्यासंसर्गित्वं स्यात् अनिवेदनेऽपि दोषः मूर्खत्वादिः स्यात् अतः विषममशक्यत्वमित्यर्थः, निवेदनानिवेदनयोरिति शेषः, मे प्रतिभाति अतो मया कथं कर्तव्यम् ॥ १८ ॥

१ श्लोकद्वयमेतदधिकं गो. पाठे । २ नूनमिति गो. पाठः । ३ सीतेति गो. पाठः । ४ मृता सीतेति गो. पाठः ।

अस्मिन्नेवंगते कार्ये प्राप्तकालं क्षमं च किम् । भवेदिति मतिं भूयो हनुमान्प्रविचारयन् ॥ १७ ॥
यदि सीतामदृष्ट्वाऽहं वानरेन्द्रपुरीमितः । गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ १८ ॥
ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति । प्रवेशश्चैव लङ्कायां राक्षसानां च दर्शनम् ॥ १९ ॥
किं वा वक्ष्यति सुग्रीवो हरयो वापि संगताः । किष्किन्धामनुसंप्राप्तं तौ वा दशरथात्मजौ ॥ २० ॥
गत्वा तु यदि काकुत्स्थं वक्ष्यामि परुषं वचः । न दृष्टेति मया सीता ततस्त्यक्ष्यति जीवितम् ॥ २१ ॥
परुषं दारुणं तीक्ष्णं क्रूरमिन्द्रियतापनम् । सीतानिमित्तं दुर्वाक्यं श्रुत्वा स न भविष्यति ॥ २२ ॥
तं तु कृच्छ्रगतं दृष्ट्वा पञ्चत्वगतमानसम् । भृशानुरक्तमेधावी न भविष्यति लक्ष्मणः ॥ २३ ॥
विनष्टौ भ्रातरौ श्रुत्वा भरतोऽपि मरिष्यति । भरतं च मृतं दृष्ट्वा शत्रुघ्नो न भविष्यति ॥ २४ ॥
पुत्रान्मृतान्समीक्ष्याथ न भविष्यन्ति मातरः । कौसल्या च सुमित्रा च कैकेयी च न संशयः ॥ २५ ॥
कृतज्ञः सत्यसंधश्च सुग्रीवः प्लवगाधिपः । रामं तथागतं दृष्ट्वा ततस्त्यक्ष्यति जीवितम् ॥ २६ ॥
दुर्मना व्यथिता दीना निरानन्दा तपस्विनी । पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् ॥ २७ ॥

गो० टी०–निवेद्यमान इति । निवेद्यमाने वक्ष्यमाणो दोषः स्यात् । दोषः स्यादनिवेदने यथादृत्तानिवेदने स्वामिवञ्चनदोषः स्यात् । विषमं परस्परविरुद्धम् ॥ १८ ॥

१७] ति० टी०–एतदनन्तरं कविवाक्यम्–अस्मिन्निति । कार्ये एवंगते सति दुर्निरूपे सतीत्यर्थः । प्राप्तकालं कालोचितं किं क्षमं किं वक्तुं युक्तं भवेदिति भूयो मतिं तद्विषयं पक्षं विचारयन्नभूदिति शेषः ॥ १७ ॥

रा० टी०–अस्मिन्निति । कार्ये कर्तव्ये एवंगते अशक्यत्वं प्राप्ते सति किमपि क्षममुचितकृत्यं प्राप्तकालं भवेदिति निश्चयं प्रविचारयन् कुर्वन्नास्तेति शेषः ॥ १७ ॥

गो० टी०–अस्मिन्निति । हनुमान् अस्मिन्कार्ये एवं गते एवं विषमत्वं प्राप्ते सति किं प्राप्तकालं कालोचितम् क्षमं समर्थं च भवेदिति मतं पक्षम् भूयः प्रविचारयत् ॥१९॥२०॥

१८–१९] ति० टी०–विचारमेव प्रपञ्चयति–यदीति । को भविष्यति न कोऽपीत्यर्थः ॥ १८ ॥ १९ ॥

रा० टी०–निश्चयस्यासत्त्वे दोषमाह—यदीति । यदि सीतामदृष्ट्वा वानरेन्द्रपुरीं गमिष्यामि ततो मे पुरुषार्थः को भविष्यति न कोऽपीत्यर्थः ॥ २० ॥

रा० टी०–ममेति । लङ्घनादि व्यर्थं भविष्यति ॥ २१ ॥

गो० टी०–पुरुषार्थाभावमाह–ममेदमिति ॥ २१॥२२ ॥

२०] ति० टी०–वक्ष्यति असाध्वेव वक्ष्यतीत्यर्थः ॥२०॥

रा० टी०–किमिति । सुग्रीवप्रभृतिः किं वक्ष्यति धिक् त्वामिति कथयिष्यतीत्यर्थः ॥ २२ ॥

२१] ति० टी०–न दृष्टेत्यप्रियं यदि वक्ष्यामि । ततस्तच्छ्रवणानन्तरम् ॥ २१ ॥

रा० टी०–सीतादृत्तान्ताप्राप्तौ सर्वेषां विध्वंसो भवितेति बोधयन्नाह–गत्वेति । काकुत्स्थं रामं गत्वा प्राप्य सीता न दृष्टेति परुषं यदि वक्ष्यामि ततः कथनात् जीवितं त्यक्ष्यति॥२३॥

गो० टी०–निवेद्यमाने दोषः स्यादित्येतदुपपादयति–गत्वेत्यादिना । अप्रियमिति छेदः ॥ २३ ॥

२२–२५] ति० टी०–परुषं कर्णकठोरम्, अत एव दारुणं भयंकरम् तीक्ष्णमसह्यम् क्रूरमुग्रम् इन्द्रियाणां तापनं संतापकम् सीतानिमित्तं सीताविषयम् स रामः ॥ २२–२५ ॥

रा० टी०–परुषमिति । परुषं रूक्षम् अत एव दारुणं हृदयविदारकम् अत एव इन्द्रियतापनम् अत एव तीक्ष्णं सोढुमशक्यम् अत एव क्रूरं सीतानिमित्तं सीतादर्शनाभावबोधकमित्यर्थः, दुर्वाक्यं स रामः श्रुत्वा न भविष्यति इहलोके न स्थास्यति ॥ २४ ॥

गो० टी०–परुषमिति । परुषं श्रवणकटुकम् दारुणं भयंकरम् क्रूरम् उग्रम् तीक्ष्णम् असह्यम् इन्द्रियतापनम् इन्द्रियक्षोभकम् सीतानिमित्तं सीताविषयम् ॥ २४ ॥

रा० टी०–तमिति । कृच्छ्रगतं कष्टं प्राप्तम् अत एव पञ्चत्वे मरणसदृशे गतं मानसं यस्य तं रामं दृष्ट्वा भृशानुरक्तः तद्विषयकात्यनुरागवान् लक्ष्मणः न भविष्यति ॥ २५ ॥

रा० टी०–विनष्टाविति । भ्रातरौ विनष्टौ श्रुत्वा भरतोऽपि मरिष्यति लोकान्तरं गमिष्यति ॥ २६ ॥

रा० टी०–पुत्रानिति । कौशल्याप्रभृतयः मातरो न भविष्यन्ति ॥ २७ ॥

गो० टी०–तं त्विति । पञ्चत्वगतमानसं मरणे कृतनिश्चयम् ॥ २५–३२ ॥

२६–२७] ति० टी०–ततो दिविस्थरामदर्शनात्॥२६॥२७॥

रा० टी०–कृतज्ञ इति । तथागतं रामं दृष्ट्वा सुग्रीवो जीवितं त्यक्ष्यति ॥ २८ ॥

रा० टी०–दुर्मना इति । भर्तृशोकेन पीडिता रुमा जीवितं त्यक्ष्यति ॥ २९ ॥

१ मामिति गो.पाठः। २ वा समागता इति गो. पाठः। ३ समन्विति गो.पाठः। ४ परमप्रियमिति गो. पाठः। ५ भृशानुरक्तो मेधावीति गो.रा.पाठः।

वालिजेन तु दुःखेन पीडिता शोककर्शिता । पञ्चत्वमागता राज्ञी तारा ऽपि न भविष्यति ॥ २८ ॥
मातापित्रोर्विनाशेन सुग्रीवव्यसनेन च । कुमारोऽप्यङ्गदस्तस्माद्विजहिष्यति जीवितम् ॥ २९ ॥
भर्तृजेन तु दुःखेन [2]अभिभूता वनौकसः । शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥ ३० ॥
सान्त्वेनानुप्रदानेन मानेन च यशस्विना । लालिताः कपिनाथेन [4]प्राणांस्त्यक्ष्यन्ति वानराः ॥३१॥
न वनेषु न शैलेषु न निरोधेषु वा पुनः । क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ॥ ३२ ॥
सपुत्रदाराः सामात्या भर्तृव्यसनपीडिताः । शैलाग्रेभ्यः पतिष्यन्ति [5]सँमेषु विषमेषु च ॥ ३३ ॥
विषमुद्बन्धनं वापि प्रवेशं ज्वलनस्य वा । उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ॥ ३४ ॥
घोरमारोदनं मन्ये गते मयि भविष्यति । इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ॥ ३५ ॥
सोऽहं नैव गमिष्यामि किष्किन्धां नगरीमितः । नहि शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ॥ ३६ ॥
मय्यगच्छति चेहस्थे धर्मात्मानौ महारथौ । आशया तौ धरिष्येते वानराश्च [6]तरस्विनः ॥ ३७ ॥
हस्तादानो मुखादानो नियतो वृक्षमूलिकः । वानप्रस्थो भविष्यामि [7]अदृष्ट्वा जनकात्मजाम् ॥ ३८ ॥

२८] ति० टी०-वालिजेन वालिमरणजेन । पञ्चत्वमागता पञ्चत्वं प्राप्तुं निश्चयवती ॥ २८ ॥

रा० टी०-वालिजेनेति । वालिजेन वालिवधजनितेन दुःखेन पीडिता अत एव पञ्चत्वम् आगता मरणे कृतनिश्चया तारापि न भविष्यति ॥ २० ॥

२९-३० [ति० टी०-तस्मात्तदनन्तरम् ॥ २९ ॥ ३० ॥

रा० टी०-मातेति । तस्माद् तदनन्तरम् अङ्गदोऽपि जीवितं विजहिष्यति विहास्यति ॥ ३१ ॥

रा० टी०-भर्तृजेनेति । भर्तृजेन स्वस्वामिविघातजनितेन दुःखेन अभिभूताः वनौकसः तलैः पाण्यन्तर्भागैर्मुष्टिभिश्च शिरांसि अभिहनिष्यन्ति ॥ ३२ ॥

३१] ति० टी०-यशस्विना कपिनाथेन सान्त्वादिभिर्लालिताः प्राणांस्त्यक्ष्यन्ति ॥ ३१ ॥

रा० टी०-सान्त्वेनेति । कपिनाथेन सुग्रीवेण सान्त्वादिना करणेन लालिताः वानराः प्राणांस्त्यक्ष्यन्ति अत एव कपिकुञ्जराः समेत्य एकीभूय क्रीडां नानुभविष्यन्ति प्राप्स्यन्ति । श्लोकद्वयमेकान्वयि ॥ ३३ ॥ ३४ ॥

गो० टी०-सान्त्वेनेति । मानेन प्रत्युत्थानादिना ॥३३॥

३२] ति० टी०-निरोधेषु गुहादिसंवृतदेशेषु ॥ ३२ ॥

गो० टी०-न वनेष्विति । निरोधेषु गृहादिसंवृतप्रदेशेषु ॥ ३४ ॥ ३५ ॥

३३] ति० टी०-सपुत्रदारा इत्यादेः कपिकुञ्जरा इति विशेष्यम् ॥ ३३ ॥

रा० टी०-मरणप्रकारमाह-सेति । भर्तृव्यसनपीडिताः वानराः शैलाग्रेभ्यः पतिष्यन्ति विषं वा प्रचरिष्यन्ति भक्षयिष्यन्ति उद्बन्धनादि वा प्रचरिष्यन्ति करिष्यन्ति शस्त्रं वा प्रचरिष्यन्ति स्वस्वशरीरे प्रवेशयिष्यन्ति । श्लोकद्वयमेकान्वयि ३५॥३६

३४-३६] ति० टी०-शस्त्रं शस्त्रघातं प्रचरिष्यन्ति करिष्यन्ति ॥ ३४-३६ ॥

गो० टी०-विषमिति । प्रचरिष्यन्ति करिष्यन्तीत्यर्थः । शस्त्रं शस्त्रपतनम् ॥ ३६ ॥

रा० टी०-उपसंहरन्नाह—घोरमिति । मयि गते सति आरोदनादि भविष्यति इत्यहं मन्ये ॥ ३७ ॥

रा० टी०-स इति । मैथिलीं मैथिलीवृत्तान्तलाभं विना सुग्रीवं द्रष्टुं नैव शक्ष्यामि अत एव इतः लङ्कायाः किष्किन्धां नैव गमिष्यामि ॥ ३८ ॥

गो० टी०-घोरमिति । आरोदनम् आसमन्ताद्रोदनम् ॥ ३७-३९ ॥

३७] ति० टी०-अगच्छति गमनरहिते । आशया सीतावृत्तान्तश्रवणप्रत्याशया धरिष्येते प्राणानिति शेषः ॥ ३७ ॥

रा० टी०-लङ्कायामेव स्थितौ गुणोऽप्यस्तीति आह—मयीति । इहस्थे मयि अगच्छति सति धर्मात्मानौ रामलक्ष्मणौ आशया धरिष्येते प्राणानिति शेषः, अत एव वानराः सुग्रीवाङ्गदप्रभृतयश्च धरिष्यन्ते ॥ ३९ ॥

३८] ति० टी०-हस्तादानो हस्तपतितफलादिग्राहकः, तद्भोजीति यावत् एवं मुखादानो मुखपतितभोजी नियतो नियतेन्द्रियः वृक्षमूलिको वृक्षमूलनिवासी ॥ ३८ ॥

रा० टी०-स्वस्थितिप्रकारमाह-हस्तेति । हस्तादानः हस्तप्राप्तफलादिग्रहीता मुखादानः मुखपतितफलादिग्राहको वा वृक्षमूलिकः वृक्षमूलनिवसनशीलः नियतः यतचित्तः वानप्रस्थः अहं भविष्यामि ॥ ४० ॥

गो० टी०-हस्तेति । हस्तादानः हस्तपतितभोजी । मुखादानः मुखपतितभोजी वृक्षमूलिकः वृक्षमूलवासी ॥ ४० ॥

१ कस्माद्धारयिष्यतीति गो. पाठः । २ ह्यभीति गो. पाठः । ३ राजेनेति गो. पाठः । ४ समेत्येति रा. पाठः । ५ मनस्विन इति गो. पाठः । ६ ह्यदृष्ट्वेति गो. पाठः ।

सागरानूपजे देशे बहुमूलफलोदके । [1]चितिं कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतम् ॥ ३९ ॥
उपविष्टस्य वा सम्यग्लिङ्गिनं साधयिष्यतः । शरीरं भक्षयिष्यन्ति वायसाः श्वापदानि च ॥ ४० ॥
इदमप्यृषिभिर्दृष्टं निर्याणमिति मे मतिः । सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीम् ॥ ४१ ॥
सुजातमूला सुभगा कीर्तिमाला यशस्विनी । प्रभग्ना चिररात्राय[3] मम सीतामपश्यतः ॥ ४२ ॥
तापसो वा भविष्यामि नियतो वृक्षमूलिकः । नेतः प्रतिगमिष्यामि तामदृष्ट्वाऽसितेक्षणाम् ॥ ४३ ॥
यदि तुं[4] प्रतिगच्छामि सीतामनधिगम्य ताम् । अङ्गदः सहितः सर्वैर्वानरैर्न[5] भविष्यति ॥ ४४ ॥
विनाशे बहवो दोषा जीवन्प्राप्नोति भद्रकम् । तस्मात्प्राणान्धरिष्यामि ध्रुवो[6] जीवति संगमः ॥ ४५ ॥

३९] ति० टी०–अरणीसुतमग्निम् ॥ ३९ ॥

रा० टी०–सागरेति । बहुमूलफलोदके बहुमूलादिविशिष्टे सागरानूपजे सागरजलसमीपजे देशे चितिं कृत्वा समिद्धं प्रज्वलितम् अरणीसुतम् अरणीनिष्पन्नवह्निं प्रवेक्ष्यामि ॥४१॥

गो० टी०–सागरानूपज इति । बहुमूलफलोदक इति स्वरूपकथनम् अरणीसुतम् अरण्युत्पन्नम् ॥ ४१ ॥

४०] ति० टी०–उपविष्टस्य प्रायमुपविष्टस्य । लिङ्गिनं प्राणलिङ्गिनं लिङ्गशरीरवन्तं वात्मानं साधयिष्यतः शरीरेण वियोजयिष्यतः । 'लिङ्गिनीम्' इति पाठे प्राणलिङ्गिनीं चितिम् । चैतन्यमित्यर्थः ॥ ४० ॥

रा० टी०–उपेति । लिङ्गिनम् ऊर्ध्वगतिसाधकचिह्नं सम्यक् साधयिष्यतः अत एव उपविष्टस्य चितां प्रविष्टस्य मम शरीरं वायसाः श्वापदानि च भक्षयिष्यन्ति ॥ ४२ ॥

गो० टी०–उपविष्टस्येति । उपविष्टस्य प्रायोपविष्टस्य । लिङ्गिनीं लिङ्गं संन्यासः अनशनं तद्वती लिङ्गिनी तां साधयिष्यतः । लिङ्गिनमिति क्वचित्पाठः । तत्र लिङ्गं शरीरं तद्वान् लिङ्गी आत्मा तं साधयिष्यतः शरीरादात्मानं मोचयिष्यत इत्यर्थः । श्वापदानि श्वापदाः व्याघ्रादयः ॥ ४२ ॥

४१] ति० टी०–इदं वक्ष्यमाणम् । आपः अप इत्यर्थः॥४१॥

रा० टी०–इदमिति । जानकीं न पश्यामि चेत् आपः अपः प्रवेक्ष्यामि । तत्र हेतुः इदं जलप्रवेशेन मयि निर्याणम् ऋषिभिर्दृष्टम् उत्तमत्वेन निर्दिष्टम् ॥ ४३ ॥

गो० टी०–न चैवमात्मत्यागे दोष इत्याह–इदमिति । निर्याणं मारणम् आपः अपः ॥ ४३ ॥

४२] ति० टी०–सीतामपश्यतो मम यशस्विनी यशःसंपादिका । मृतस्य ख्यातिर्यशः सुजातमूला सुजातकारणवती कीर्तिरूपा माला । जीवतः सा कीर्तिः चिररात्रायेत्यव्ययम् चिरायेत्यर्थः । चिराय भग्ना आत्यन्तिकलयं गतेत्यर्थः । तीर्थस्तु—'चिररात्रीयं मम' इति पाठं प्रकल्प्य सीतान्वेषणोपयुक्तत्वेन शोभनमूला सीतान्वेषणसौकर्यापादकचन्द्रिकया सुभगा सीतान्वेषणसहकारिणीति सर्वैः क्रियमाणा कीर्तिरेव माला यस्याः सेयं चिररात्री चिरकालविशिष्टा दीर्घा रात्रिः स्वस्य लङ्काप्रवेशरात्रिः प्रभग्ना निष्फला जातेत्यर्थः । अनेन रामकार्यसहकारिणी स्वेच्छया रात्रिरप्यात्मानं वर्धितवतीति सूच्यत इत्याह ॥ ४२ ॥

रा० टी०–सुजातेति । चिररात्राय बहुकालं सीताम् अपश्यतो मम सुजातमूला सुजातं रामसुग्रीवसंबन्धहेतुकवार्ताहरत्वेन निष्पन्नं मूलं यस्याः सा सुभगा शोभनैश्वर्यदात्री यशस्विनी मुद्रिकादानोपलक्षितरामप्रीतिपात्रस्वहेतुकातियशोविशिष्टा कीर्तिमाला प्रभग्ना अतः तापसो विचारपरो भविष्यामि तां सीतामदृष्ट्वा इतो न प्रतिगमिष्यामि । श्लोकद्वयमेकान्वयि ॥ ४४ ॥ ४५ ॥

गो० टी०–सुजातेति । सुजातमूला आदौ लङ्काधिदेवताजयेन शोभनप्रारम्भा सुभगा चन्द्रोदयेन रम्या कीर्तिमाला मम कीर्तिमयमाला यशस्विनी हनुमतो लङ्काप्रवेशरात्रिरिति लोके विख्याता । चिररात्री जागरणेन दीर्घभूता रात्रिः प्रभग्ना समाप्ता एवं कल्याणीयं रात्रिः सीतामपश्यतो मे व्यर्थैव जातेत्यर्थः । "कृदिकारादक्तिनः" इति ङीषः ॥ ४४ ॥

४३] ति० टी०–तापसो जटाकाषायादिचिह्नो यतिः॥४३॥

गो० टी०–आत्मत्यागापेक्षया तापसभाव एव ज्यायानित्याह–तापस इति । वाशब्दोऽवधारणे 'वा स्याद्धिकल्पोपमयोरिवार्थे च समुच्चये' इति विश्वः ॥ ४५ ॥

४४] ति० टी०–अदृष्ट्वा गमने निश्चितमासन्नं दोषमाह–यदि त्विति । न भविष्यति न जीविष्यति ॥ ४४ ॥

रा० टी०–यदीति । अङ्गदो न भविष्यति इह लोके न स्थास्यति ॥ ४६ ॥

गो० टी०–मा भूत्सुग्रीवसमीपगमनम् अङ्गदादिभिः संयुज्यतामित्याशङ्क्याह–यदीत इति ॥ ४६ ॥

४५] ति० टी०–एवमगमने निश्चिते मरणजीवितयोः किं श्रेयस्तत्राह—विनाश इति । दोषा बहवः प्रागुक्ताः । चिरं मदगमने सीताविनाशनिश्चयेन रामादयो न स्थुरेव, आत्मघातादयश्च । जीवंस्तु ममात्मा भद्रकं प्राप्नोति । वक्ष्यमाणनानाविधोपायाश्रयणेन, तस्मात्प्राणान्धरिष्यामि, यतो मयि जीवति सति संगमः सुखसंगमो रामादीनां ध्रुवः संभावित इत्यर्थः ।

१ चितामिति गो. पाठः । २ लिङ्गिनीमिति गो. पाठः । ३ रात्रीममिति गो. पाठः । ४ इत इति गो. पाठः । ५ जीवितसंगम इति गो.पाठः ।

एवं बहुविधं दुःखं मनसा धारयन्बहु । नाध्यगच्छत्तदा पारं शोकस्य कपिकुञ्जरः ॥ ४६ ॥
[1]ततो विक्रममासाद्य धैर्यवान्कपिकुञ्जरः । रावणं वा वधिष्यामि दशग्रीवं महाबलम् ॥
काममस्तु हृता सीता प्रत्याचीर्णं भविष्यति ॥ ४७ ॥
अथवैनं समुत्क्षिप्य उपर्युपरि सागरम् । रामायोपहरिष्यामि पशुं पशुपतेरिव ॥ ४८ ॥
इति [2]चिन्तासमापन्नः सीतामनधिगम्य ताम् । ध्यानशोकपरीतात्मा चिन्तयामास वानरः ॥ ४९ ॥
यावत्सीतां न पश्यामि रामपत्नीं यशस्विनीम् । तावदेतां पुरीं लङ्कां विचिनोमि पुनः पुनः ॥ ५० ॥
संपातिवचनाच्चापि रामं यद्यानयाम्यहम् । अपश्यन्राघवो भार्यां निर्दहेत्सर्ववानरान् ॥ ५१ ॥
इहैव नियताहारो वत्स्यामि नियतेन्द्रियः । न मत्कृते विनश्येयुः सर्वे ते नरवानराः ॥ ५२ ॥

काव्यलिङ्गमत्रालंकारः । तीर्थस्तु—'अत्र जीवितसंगमः' इति पाठं कल्पयामास ॥ ४५ ॥

रा० टी०–चिन्तान्तरमाह—विनाश इति । विनाशे मद्विध्वंसे बहवो दोषाः उभयकुलविध्वंसो भविष्यतीत्यर्थः तस्मात्प्राणान् धरिष्यामि । नन्वेवं तव प्राणधारणेऽपि जानकीवृत्तान्तालाभे वानरैः सुग्रीवसमीपगमने तत्प्राणविघातः गमनाभावे वृत्तान्तलाभानापत्त्या उभयकुलविनाशो भविष्यत्येवेति किं तव प्राणधारणेनेत्यत आह—जीवति सति । संगमः सुखप्राप्तिर्ध्रुवो निश्चितः अतः जीवन्ममात्मा भद्रकं कल्याणं प्राप्नोति प्राप्स्यति ॥ ४७ ॥

गो० टी०–विनाश इति । बहवो दोषाः पूर्वोक्ताः सर्वविनाशादयः । संगमः श्रेयःसंगमः ॥ ४७ ॥ ४८ ॥

४६] ति० टी०–इतः परं कविवाक्यम्–एवमित्यादि४६

रा० टी०–एवमिति । एवम् अनेन प्रकारेण बहुविधं दुःखं मनसा बहु धारयन् विचारयन् शोकस्य पारं नाध्यगच्छत् ॥ ४८ ॥

४७] ति० टी०–कपिकुञ्जर इत्यस्य इति चिन्तयामासेति शेषः । ध्रुवो जीवति संगम इत्युक्तेराशयं हनूमानाह–रावणं वेति । नन्वेवं रावणवधेन किं साधितं स्यात्तत्राह—प्रतीति । प्रत्याचीर्णं वैरनिर्यातनं कृतं भविष्यतीत्यर्थः एवं कृत्वा गमने सर्वेषां सुखमित्याशयः ॥ ४७ ॥

रा० टी०–तत इति । ततः शोककाले धैर्यवान् कपिकुञ्जरः विक्रमं युद्धोत्साहम् आसाद्य प्राप्य वा अथवा रावणं वधिष्यामि । नन्वेवं रावणवधेऽपि सीताप्राप्त्यभावे तव किं सेत्स्यतीत्यत आह—सीता हृताऽस्तु प्रत्याचीर्णं वैरनिर्यातनं तु कामं भविष्यति इति चिन्तयामासेति शेषः । सार्धश्लोक एकान्वयी ॥ ४९ ॥ ५० ॥

गो० टी०–रावणमिति । प्रत्याचीर्णं प्रत्याचरितम् । प्रतिकृतमिति यावत् ॥ ४९ ॥

४८] ति० टी०–नन्वेवं मया हत इतीदं वचोऽविश्वसनीयं स्यात्सीतालाभेन रामदुःखानिवृत्तिश्चेत्यतः पश्चान्तरम्–अथवेति । एवं सति तल्लाभोऽपि संभाव्यत इत्याशयः ॥ ४८ ॥

रा० टी०–चिन्तान्तरमाह—अथवेति । अथवा एनं रावणं सागरमुपर्युपरि समुत्क्षिप्य पशुपतेः पशुपतये पशुमिव रामाय उपहरिष्यामि ॥ ५१ ॥

गो० टी०–अथ वेति । पशुं पशुपतेरिवेति पशुपतेः अग्नेः पशुम् अजमिव । "इमं पशुं पशुपते ते अग्र आ बध्नाम्यग्ने" इति श्रुतेः । अनेन सुप्रापत्वमुक्तम् ॥ ५० ॥

४९–५०] ति० टी०–रावणस्य बद्धा नयनेऽपि सीतां राक्षसा हन्युरिति तदलाभ एवेत्यतः शोकपरीतः पश्चान्तरं चिन्तयामास–यावत्सीतामिति । वर्तमानसमीपे लट् ॥४९॥५०॥

रा० टी०–इतीति । सीताम् अनधिगम्य अप्राप्य इति उक्ताकारां चिन्तां समापन्नः अत एव ध्यानशोकपरीतात्मा चिन्ताजनितशोकविशिष्टमनाः वानरश्चिन्तयामास ॥ ५२ ॥

गो० टी०–इतीति । प्रथमं चिन्ता विचारः ततो ध्यानं ज्ञातव्यविषयनिरन्तरप्रत्ययः ततश्चिन्तेति दुरन्तचिन्तोच्यते ॥ ५१ ॥

रा० टी०–एतच्चिन्ताकारमाह—यावदिति । यावत् रामपत्नीं न पश्यामि तावत् लङ्कां पुनः पुनर्विचिनोमि ॥५१॥

गो० टी०–चिन्ताप्रकारमाह–यावदिति ॥ ५२ ॥

५१] ति० टी०–नन्वत्रावस्थितिनिश्चये पुनः पुनरन्वेषणं सफलं स्यादत आह—संपातिवचनादिति । तद्वचनविश्वासादेवेत्यर्थः । तत्तु तत्पक्षप्ररोहान्निश्चितं प्रमाणम् । नन्वेवं तद्वचनविश्वासादेव रामं प्रति सीतात्रास्तीत्युक्त्वा शीघ्रं स एवानेयः, किमनेन कालविलम्बेनेत्यत्राह—रामं यदीति । रावणे हतेऽपि मय्येवान्विष्यमाणा न दृश्येत रामेणापि तददर्शने रामः सर्ववानरनाशं करिष्यतीति भावः ॥ ५१ ॥

रा० टी०–नन्वेवं संपातिवचनं प्रमाणीकृत्य रामामिहानय किं कालविलम्बकारकान्वेषणेनेत्यत आह–संपातीति । संपातिवचनादेव यदि रामम् आनयामि तर्हि भार्याम् अपश्यन् केनचित्कारणेनानवलोकयन् राघवः सर्ववानरान् निर्दहेत्॥५४॥

गो० टी०–यदि पूर्वमेव संपातिवचनप्रामाण्येन रामोऽत्रानीयेत तदा महान् प्रमादः स्यादित्याह—संपातीति॥५३–५६॥

५२] ति० टी०–तस्मादिहैव नियताहारो वत्स्यामि । विनश्येयुः सीतामदृष्ट्वा मद्गमनानन्तरमिति भावः ॥ ५२ ॥

१ मुहुरिति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ चिन्तां समेति गो. रा. पाठः ।

अशोकवनिका चापि[1] महतीयं महाद्रुमा । इमामधिगमिष्यामि नहीयं विचिता मया ॥ ५३ ॥
वसून्रुद्रांस्तथादित्यानश्विनौ मरुतोऽपि च[2] । नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्धनः ॥ ५४ ॥
जित्वा तु राक्षसान्देवीमिक्ष्वाकुकुलनन्दिनीम्[3] । संप्रदास्यामि रामाय[4] सिद्धीमिव तपस्विने ॥ ५५ ॥
स मुहूर्तमिव ध्यात्वा चिन्ताविग्रथितेन्द्रियः । उदतिष्ठन्महाबाहुर्हनूमान्मारुतात्मजः[5] ॥ ५६ ॥
नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु[6] चन्द्राग्निमरुद्गणेभ्यः[7] ॥ ५७ ॥
स तेभ्यस्तु नमस्कृत्वा सुग्रीवाय च मारुतिः । दिशः सर्वाः समालोक्य सोऽशोकवनिकां प्रति[8] ॥ ५८ ॥
स गत्वा मनसा पूर्वमशोकवनिकां शुभाम् । उत्तरं चिन्तयामास वानरो मारुतात्मजः[9] ॥ ५९ ॥
ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला । अशोकवनिका पुण्या सर्वसंस्कारसंस्कृता ॥ ६० ॥
रक्षिणश्चात्र विहिता नूनं रक्षन्ति पादपान् । भगवानपि[10] विश्वात्मा नातिक्षोभं प्रवायति ॥ ६१ ॥

रा० टी०–ननु अन्वेषणेऽपि यदि सीताया अलाभः तर्हि किं करिष्यसीत्यत आह–इहेति । इहैव वत्स्यामि तत्र हेतुः मत्कृते सीतावृत्तान्तलाभाभावसूचकमद्वचनश्रवणनिमित्तं नरवानराः न विनश्येयुः ॥ ५९ ॥

५३] ति० टी०–एवं चिन्ताकुलोऽनन्विष्टं देशं दृष्ट्वा संपातिवचनात्तत्र सीतास्थितिं निश्चिन्वान आह–अशोकेति ॥५३॥

रा० टी०–अशोकेति । इयम् अशोकवनिका महती अतः मम मया न विचिता अतः इमाम् । अधिगमिष्यामि विचेष्यामि ॥ ५६ ॥

५४] ति० टी०–तत्राप्यप्राप्तिशङ्कया तद्दर्शनप्रतिबन्धकदुरितक्षयाय देवानुकूल्यं संपादयति–वसूनिति । चाद्रामादीन् ५४

रा० टी०–वसूनिति । वस्वादीनि नमस्कृत्वा रक्षसां शोकवर्धनोऽहं गमिष्यामि ॥ ५७ ॥

५५] ति० टी०–तपस्विने सिद्धीमिव तपःफलमिव तपःप्रसन्ना देवतेति शेषः ॥ ५२ ॥

रा० टी०–जित्वेति । राक्षसान् जित्वा तपस्विने सिद्धीः तपःफलानीव देवीं सीतां रामाय संप्रदास्यामि ॥ ५८ ॥

गो० टी०–जित्वा त्विति । सिद्धिं तपःफलम्॥५७॥५८॥

५६] ति० टी०–चिन्तया विग्रथितानि संबद्धानि व्याकुलानीन्द्रियाणि यस्य सः ॥ ५६ ॥

रा० टी०–स इति । चिन्तया विग्रथितानि व्याप्तानि इन्द्रियाणि यस्य स हनूमान् मुहूर्तं ध्यात्वा आत्मानुसंधानं कृत्वेव उदतिष्ठत् ॥ ५९ ॥

५७] ति० टी०–प्रतिज्ञातं नमस्कारमनुतिष्ठति–नमोऽस्तु रामायेति । अनेन रामस्य भगवदवतारत्वं सूचितम । रुद्रादिनमस्कारेण विराजो भगवतो नतिः ॥ ५७ ॥

रा० टी०–तात्कालिकं हनुमत्कृतमङ्गलमाह–नम इति । रामादिभ्यः नमोऽस्तु इत्युवाचेति शेषः ॥ ६० ॥

गो० टी०–सर्वान् देवान्नमस्यन्ति रामस्यार्थे यशस्विन इत्युक्तरीत्या अभिमतलाभत्वरया सर्वान्नमस्करोति–नमोऽस्त्विति ॥ ५९ ॥

५८] ति० टी०–स्वामित्वात्सूर्यांशत्वाच्च सुग्रीवनतिः । अशोकवनिकां गतः मनसेति शेषः 'अशोकवनिकां प्रति' इति पाठे गत इत्यध्याहारः ॥ ५८ ॥

रा० टी०–स इति । सः मारुतसदृशः स हनूमान् तेभ्यः पूर्वोक्तेभ्यो नमस्कृत्वा सुग्रीवाय नमस्कृत्वा सर्वा दिशः समालोक्य अशोकवनिकां गतः 'सो वायुः परदेशदूरगमनश्च' इत्यभियुक्तोक्तः ॥ ६१ ॥

गो० टी०–स तेभ्यस्त्वित्यादिश्लोकद्वयमेकान्वयम् । नमस्कृत्यालोकनरूपक्रियाभेदात्तच्छब्दद्वयम् । नमस्कृत्य अशोकवनिकां प्रति उद्दिश्य सर्वा दिशः समालोक्य अशोकवनिकां परिच्छेत्तुं तस्याः सर्वा दिशो दृष्ट्वा तास मनसा गत्वा उत्तरं चिन्तयामासेति योजना । अशोकशब्दः संक्षेपे व्याख्यातः॥६०॥६१॥

५९] ति० टी०–उत्तरं गमनोत्तरकर्तव्यकृत्यम् ॥ ५९ ॥

रा० टी०–स इति । हनूमान् पूर्वं मनसा अशोकवनिकां गत्वा उत्तरं चिन्तयामास ॥ ६२ ॥

६०] ति० टी०–चिन्ताहेतुं दर्शयति–ध्रुवमिति । वनाकुला काननावृता संस्काराः खननसकाद्रूपदृढसंस्काराः अत्र ध्रुवं रक्षोबहुलेत्युत्प्रेक्षया चन्द्रस्ततः सूचितः अन्यथा तत्प्रकाशेन निश्चय एव स्यात् ॥ ६० ॥

रा० टी०–चिन्ताकारमाह–ध्रुवमिति । सर्वसंस्कारसंस्कृता अशोकवनिका रक्षोबहुला बहुराक्षसविशिष्टा ध्रुवं भविष्यति ॥ ६३ ॥

गो० टी०–ध्रुवमिति । रक्षोबहुला रक्षकराक्षसबहुला वनाकुला जलावृता द्रुमषण्डमण्डिता वा सर्वसंस्कारैः कर्षणतृणनिरसनादिभिः संस्कृता कृतातिशयाधाना अशोकवनिका ध्रुवं चिन्त्या भविष्यति अवश्यमन्वेषणीया भवेदित्यर्थः ॥६२॥

६१] ति० टी०–अत्राशोकवनिकायां विहिता नियुक्ताः । विश्वात्मा वायुः ॥ ६१ ॥

१ चेयमिति गो. पाठः । २ वसुरुद्रानिति गो. पाठः । ३ सर्वानिति गो. पाठः । ४ यथा सिद्धिमिति गो. पाठः । ५ तेजा इति गो. पाठः । ६ चन्द्रार्केति गो. पाठः । ७ ह्यशोकेति गो. पाठः । ८ चिन्त्येति गो. पाठः । ९ सर्वानेति गो. पाठः ।

संक्षिप्तोऽयं मयात्मा च रामार्थे रावणस्य च । सिद्धिं दिशन्तु[1] मे सर्वे देवाः सर्षिगणास्त्विह ॥ ६२ ॥
ब्रह्मा स्वयंभूर्भगवान्देवाश्चैव तपस्विनः । सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ॥ ६३ ॥
वरुणः पाशहस्तश्च सोमादित्यौ तथैव च । अश्विनौ च महात्मानौ मरुतः सर्व एव च ॥ ६४ ॥
सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः । दास्यन्ति मम ये चान्येऽप्यदृष्टाः[3] पथि गोचराः ॥ ६५ ॥

तदुन्नसं पाण्डुरदन्तमव्रणं शुचिस्मितं पद्मपलाशलोचनम् ।
द्रक्ष्ये तदार्यावदनं कदा न्वहं प्रसन्नताराधिपतुल्यवर्चसम्[4] ॥ ६६ ॥
क्षुद्रेण[5] हीनेन नृशंसमूर्तिना सुदारुणालंकृतवेषधारिणा[6] ।
बलाभिभूता ह्यबला तपस्विनी कथं नु मे दृष्टिपथेऽद्य सा भवेत् ॥ ६७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०–रक्षिण इति । विहिताः नियुक्ताः रक्षिणः पादपान् ध्रुवं रक्षन्ति अतः विश्वात्मा वायुरपि अतिक्षोभं यथा भवति तथा न प्रवाति ॥ ६४ ॥

गो० टी०–रक्षिण इति । अत्र अशोकवनिकायाम् । विहिताः नियुक्ताः । सर्वात्मा सर्वमाप्नोतीति सर्वात्मा वायुः । सोऽपि नातिक्षोभं प्रवाति अतिकम्पनपूर्वकं नात्र सञ्चरतीत्यर्थः ॥ ६३ ॥

६२] ति० टी०–मयात्मा शरीरमित्यर्थः । रावणस्य अर्थे इत्यनुकर्षः रावणकर्तृकदर्शनपरिहारायेत्यर्थः ॥ ६२ ॥

रा० टी०–समिति । रामार्थे रावणस्य वनिकायामयं मयात्मा देहः संक्षिप्तः प्रवेशितः मे सिद्धिं तु सर्षिगणा देवा दिशन्तु किंच संक्षिप्तशब्दस्य लघ्वीकृत इत्यर्थः रावणस्य समासघटकीभूतार्थेऽन्वयः सविशेषणानामित्यस्य तु न विषयः अर्थस्य विशेष्यत्वात् रावणसंबद्धार्थशब्दस्य विनाशपरत्वं वनिकानिरीक्षणार्थमित्यध्याहारो वा ॥ ६५ ॥

गो० टी०–एवंभूतप्रदेशे भवतः कथं गमनमित्याशङ्क्याह–संक्षिप्त इति । मया अयमात्मा देहः रामार्थे रामप्रयोजनसिद्ध्यर्थम् रावणस्य चार्थे रावणादृश्यत्वार्थं च संक्षिप्तः अल्पीकृतः । एवं मया कार्यानुकूलो यत्नः कृतः कार्यसिद्धिं तु देवा विधास्यन्तीत्याह–सिद्धिमिति । संविधास्यन्ति ददत्वित्यर्थः ॥ ६४ ॥

६३–६४] ति० टी०–पुनः सर्वात्मना कार्यसिद्धये स्मरति—ब्रह्मेत्यादि । देवा भगवदवयवदेवाः । तानेव दर्शयति–अग्निश्चेत्यादि । सिद्धिं दिशन्त्वित्यन्वयः ॥ ६३ ॥ ६४ ॥

रा० टी०–ब्रह्मेति । ब्रह्मादयो मम सिद्धिं दास्यन्ति ये पथि गोचरा मार्गरक्षका अदृष्टा इदानीं मया न स्मृताः तेऽपि सिद्धिं दास्यन्ति । श्लोकत्रयमेकान्वयि ॥ ६६–६८ ॥

गो० टी०–ब्रह्मेत्यादि । शर्वः रुद्रः ॥ ६५ ॥ ६६ ॥

६५] ति० टी०–भूतानां प्रभुः प्रजापतिः । दास्यन्ति तेषामप्यस्यार्थस्येष्टत्वादिति भावः । पूर्वं प्रार्थना, इदानीं तु तन्निश्चयः । पथि गोचरा अदृष्टा अपि पथि मार्गे गोचरत्वेन सिद्धिदत्वेन शास्त्रेऽदृष्टा अनुक्ताः, अपिना दृष्टाश्च ये तेऽपि सिद्धिं दास्यन्ति ॥ ६५ ॥

गो० टी०–उक्तमर्थं पुनः संग्रहेणाह–सिद्धिं सर्वाणि भूतानीति । भूतानां प्रभुः उक्तब्रह्मरुद्रायधिपतिः परिशेषाद्विष्णुरित्यवगम्यते । पन्थाः गोचरः येषां ते पथिगोचराः मार्गवर्तिनः ॥ ६७ ॥

६६] ति० टी०–उच्छ्रिता नासा यस्मिंस्तत्पाण्डुरम् । वियोगवशात् अव्रणमनवद्यम् ॥ ६६ ॥

रा० टी०–तदिति । उन्नसमुन्नतनासं पाण्डुरा दन्ता यस्मिन् अव्रणं विस्फोटकादिहेतुकव्रणरहितं तत् रामसुखात् श्रुतम् आर्यावदनम् सीतामुखं कदा द्रक्ष्ये ॥ ६९ ॥

गो० टी०–तदिति । तत्तस्मात्कारणात् । उन्नता नासिका यस्य तदुन्नसम् । "उपसर्गाच्च" इति समासान्तोच्प्रत्ययः नसादेशश्च । अव्रणम् अनवद्यम् । तत् अभिज्ञातत्वेन रामेण निवेदितम् ॥ ६८ ॥

६७] ति० टी०–सुदारुणोऽप्यलंकृतवेषधारी विश्वसनीयवेषधारी तेन ॥ ६७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०–क्षुद्रेणेति । अलंकृतवेषधारिणा स्वकल्पितवेषविशिष्टेन रावणेन बलाभिभूता हठात् हृता सा सीता मे दृष्टिपथे कथं भवेत् ॥ ७० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०–क्षुद्रेणेति । सुदारुणालंकृतवेषधारिणा सुदारुणत्वेऽप्यापातप्रसन्नवेषधारिणा ॥ ६९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

---

१ दिशन्तु मे इति गो. पाठः । २ शर्व इति गो. पाठः । ३ ह्यदृष्टा इति गो. पाठः । ४ दर्शनमिति गो. पाठः । ५ पापेनेति गो. पाठः । ६ कर्मणेति गो. पाठः ।

चतुर्दशः सर्गः ।

अशोकवनिकाप्राकारमवप्लुत्य प्राकारस्थ एव वनरामणीयकं पश्यन्वनं प्रविश्य वृक्षाद्वृक्षान्तरेष्ववप्लुत्य शाखाधूननेन पुष्पपर्णादीनि शातयन्सीतां विचिन्वानो हनुमान्मध्येवनं काञ्चनवेदिकामध्यवर्तिकाञ्चनवृक्षपरिवृतं कंचिच्छिंशुपावृक्षं ददर्श । तदुपान्ताद्वहन्तीं सरितं दृष्ट्वा संध्योपास्त्यायथमत्र सीतागमनं भवेदिति संभावयञ्छिंशुपामधिरुह्य पर्णनिबिडविटपेषु निलीयावस्थितोऽभूत् ।

स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् । अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥ १ ॥
स तु संहृष्टसर्वाङ्गः प्राकारस्थो महाकपिः । पुष्पिताग्रान्वसन्तादौ ददर्श विविधान्द्रुमान् ॥ २ ॥
सालानशोकान्भव्यांश्च चम्पकांश्च सुपुष्पितान् । उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि ॥ ३ ॥
तथाम्रवर्णसंपन्नांल्लताशतसमन्वितान् । ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकाम् ॥ ४ ॥
स प्रविश्य विचित्रां तां विहगैरभिनादिताम् । राजतैः काञ्चनैश्चैव पादपैः सर्वतो वृताम् ॥ ५ ॥
विहगैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् । उदितादित्यसंकाशां ददर्श हनुमान्बली ॥ ६ ॥
वृतैर्नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः । कोकिलैर्भृङ्गराजैश्च मत्तैर्नित्यनिषेविताम् ॥ ७ ॥
प्रहृष्टमनुजां काले मृगपक्षिमदाकुलाम् । मत्तबर्हिणसंघुष्टां नानाद्विजगणायुताम् ॥ ८ ॥

१] ति० टी०–ध्यात्वोत्प्लवनं निश्चित्य तां सीतां मनसाऽधिगम्य ध्यात्वा तस्य रावणस्य वेश्मनो वेश्मप्राकारात्प्राकारं वनप्रकारमवप्लुत उत्प्लवनेन प्राप्तः ॥ १ ॥

रा० टी०–अशोकवनिकान्वेषणमुपक्रमते–स इति । स हनुमान् मुहूर्तं ध्यात्वा वनिकागमनप्रकारं संचिन्त्य तां सीतां मनसा अधिगम्य प्राप्य तस्य रावणस्य वेश्मनः वेश्मप्राकारात् प्राकारम् अशोकवनिकाया इति शेषः, अवप्लुतः उत्प्लुत्या प्राप्तः ॥ १ ॥

गो० टी०–स मुहूर्तमित्यादि । इवशब्दो वाक्यालंकारे । प्राकारम् अशोकवनिकाप्राकारम् तस्य वेश्मनः रावणस्य गृहात् अवप्लुतः प्राप्तः ॥ १ ॥

२] ति० टी०–संहृष्टसर्वाङ्गः पुलकितसर्वाङ्गः । वसन्तादौ वसन्तादिसर्वर्तुषु संनिहितैः पुष्पैः पुष्पिताग्रान् ॥ २ ॥

रा० टी०–स इति । प्राकारस्थः स हनुमान् वसन्तादौ चैत्रे किंच वसन्तः आदीयते नित्यं प्रतीयते यस्यां तस्यां भूमौ पुष्पिताग्रान् द्रुमान्ददर्श ॥ २ ॥

गो० टी०–स त्विति । संहृष्टसर्वाङ्गः पुलकितसर्वाङ्गः । वसन्तादौ पौर्णमास्या मासान् संपाद्येति पक्षमनुसृत्य फाल्गुनपौर्णमासीप्रपूर्वदिनत्वेन वसन्तादाविति युक्तम् । सालान् सर्जकान् भव्यान् शुभानित्यशोकविशेषणम् यद्वा भवं रुद्रमर्हन्तीति भव्यान् रुद्रप्रियपुष्पान् वृक्षविशेषान् । उद्दालकान् बहुवारकान् । नागवृक्षान् नागकेसरवृक्षान् । कपिमुखान् मर्कटकान् ॥ २–४ ॥

३] ति० टी०–भव्यान्न्युजफलान् । उद्दालका वृक्षविशेषाः । नागवृक्षान्नागकेसरवृक्षान् । कपिमुखान्कपिमुखाकारफलवतः । चूतविशेषणमेतत् ॥ ३ ॥

रा० टी०–द्रुमाणां नामानि निर्दिशन्नाह—सालानिति । आम्रवनसंछन्नान् आम्रवनैराततान् लताशतसमावृतान् अनेकलताभिः संयुक्तान् शालादीन् ददर्शेत्यनुकृष्यते । सार्धश्लोक एकान्वयी ॥ ३ ॥

४] ति० टी०–ज्यामुक्तः रामेणेति शेषः ॥ ४ ॥

रा० टी०–ज्येति । ज्यामुक्तः नाराच इव पुष्पवाटिकां पुप्लुवे ॥ ४ ॥

५] ति० टी०–विचित्रां विचित्रपर्यन्ताम् । राजतै रजतादिसंस्कृतैस्तद्वर्णैर्वा ॥ ५ ॥

६] ति० टी०–चित्रकाननां चित्रद्रुमखण्डाम् । उदितादित्यसंकाशाम् पुष्पैरिति शेषः ॥ ६ ॥

७] ति० टी०–पुष्पोपगफलोपगैः पुष्पफलयुतैः ॥ ७ ॥

८] ति० टी०–काले सर्वस्मिन्नपि प्रहृष्टमनुजां मुखविकासादिलिङ्गकहर्षवज्जनाम् मृगादीन्मदेनाकुलयति ताम् 'प्रहृष्टमनुजे काले' इति पदद्वये सप्तम्यन्तपाठे, तादृक्काले वसन्तप्राग्भवे तत्संनिहिते काले इत्यर्थः ॥ ८ ॥

रा० टी०–स इति । स हनुमान् चित्रकाननां चित्रकाननविशिष्टां विहगादिभिर्विचित्रां तां विचित्रमध्याम् उदितादित्यसंकाशां काले सर्वसमये पुष्पाणि उपगानि संप्राप्तानि येषु फलानि उपगानि येषु पुष्पाणि उपगच्छन्ति फलान्युपगच्छन्तीति वा ते एव ते इति कर्मधारयः तैर्वृक्षैर्वृतां कोकिलादिभिर्नित्यं निषेवितां राजपुत्रीं सीतां मार्गमाणा प्रहृष्टा मनुजा जन्तवो यस्यां मृगपक्षिमदैराकुलां तां पुष्पवाटिकां प्रविश्य ददर्श समवलुलोके । श्लोकचतुष्टयमेकान्वयि ॥ ५—८ ॥

गो० टी०–स प्रविश्येत्यादि । काञ्चनैः काञ्चनमयैरिव स्थितैः । चित्रकाननां चित्रावान्तरवनाम् चम्पकवनं चूतवन-

१ वणसंछन्नामिति गो. वनसंछन्नानिति रा. पाठः । २ समावृतामिति गो. रा. पाठः । ३ कपिरिति गो. पाठः । ४ वृतामिति गो. रा. पाठः । ५ मनुजे इति गो. पाठः । ६ समाकुले इति गो. पाठः ।

मार्गमाणो वरारोहां राजपुत्रीमनिन्दिताम् । सुखप्रसुप्तान्विहगान्बोधयामास वानरः ॥ ९ ॥
उत्पतद्भिर्द्विजगणैः पक्षैर्वातैः समाहताः । अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः ॥ १० ॥
पुष्पावकीर्णः शुशुभे हनूमान्मारुतात्मजः । अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ॥ ११ ॥
दिशः सर्वाभिधावन्तं वृक्षखण्डगतं कपिम् । दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ॥ १२ ॥
वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः । रराज वसुधा तत्र प्रमदेव विभूषिता ॥ १३ ॥
तरस्विना ते तरवस्तरसा बहु कम्पिताः । कुसुमानि विचित्राणि सस्रजुः कपिना तदा ॥ १४ ॥
निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः । निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥
हनूमता वेगवता कम्पितास्ते नगोत्तमाः । पुष्पपत्रफलान्याशु मुमुचुः फलशालिनः ॥ १६ ॥
विहङ्गसङ्घैर्हीनास्ते स्कन्धमात्राश्रया द्रुमाः । बभूवुरगमाः सर्वे मारुतेन विनिर्धुताः ॥ १७ ॥
विधूतकेशी युवतिर्यथा मृदितवर्णका । निपीतशुभदन्तोष्ठी नखैर्दन्तैश्च विक्षता ॥ १८ ॥
तथा लाङ्गूलहस्तैस्तु चरणाभ्यां च मर्दिता । तेनैवाशोकवनिका प्रभग्नवनपादपा ॥ १९ ॥

मित्येवंविधवनवतीम् । पुष्पाण्युपगच्छन्तीति पुष्पोपगाः पुष्पसंपन्नाः तैः फलोपगैः फलसंपन्नैः । प्रहृष्टमनुजे काले वसन्ते । वसन्तस्य शुचुमन्मथत्वात् प्रहृष्टमनुजत्वम् ॥ ५–९ ॥

९] ति० टी०–बोधयामास शाखाच्छङ्क्रमणेनेति भावः॥९॥

रा० टी०–मार्गमाण इति । प्रसुप्तान् विहगान् तदुपलक्षितविहगादीन् बोधयामास ॥ ९ ॥

१०–११] ति० टी०–पक्षैरुत्पतद्भिरित्यन्वयः । समाहताः वृक्षा इति शेषः । पुष्पवृष्टयः पुष्पवृष्टीः ॥ १० ॥ ११ ॥

रा० टी०–उत्पतद्भिरिति । पक्षैः उत्पतद्भिः उड्डीयमानैर्द्विजगणैः पक्षिसमूहैः समाहता अनेकवर्णास्तरवः पुष्पवृष्टयः पुष्पवृष्टीर्मुमुचुः ॥ १० ॥

रा० टी०–पुष्पेति । पुष्पावकीर्णः प्रपतितपुष्पैराछन्नः हनूमान् पुष्पमयो गिरिरिव शुशुभे ॥ ११ ॥

गो० टी०–उत्पतद्भिरिति । साला वृक्षाः 'अनोकहः कुटः सालः' इत्यमरः । पुष्पवृष्टयः पुष्पवृष्टीः ॥ १०–१४ ॥

१२–१३] ति० टी०–सर्वाभिधावन्तमिति संधिरार्षः । वसन्त इति मेनिरे इति अन्यस्येह वनेऽशक्यप्रवेशत्वाद्वसन्त एव वृक्षसंचारोचितं कपिरूपमास्थाय चरतीति मेनिरे इत्यर्थः । एतेन द्रष्टृणां तस्मिन्विमतिनिवृत्तिरीश्वरानुग्रहादिति सूचितम् ॥ १२ ॥ १३ ॥

रा० टी०–दिश इति । सर्वा दिशः अभिधावन्तम् । अत एव वृक्षखण्डगतं वृक्षसमूहेषु प्राप्तं कपिं दृष्ट्वा सर्वाणि भूतानि रक्षांसि वसन्तः कपिरूपेण समागतक्रतुराजोऽयमिति मेनिरे ॥ १२ ॥

रा० टी०–वृक्षेभ्य इति । पृथग्विधैरनेकप्रकारैः वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा वसुधा भूषिता प्रमदा इव रराज ॥१३॥

१४] ति० टी०–बहुप्रकारं कम्पिताः ॥ १४ ॥

रा० टी०–तरस्विनेति । तरस्विना हनूमता तरसा वेगेन बहुकम्पितास्तरवो विचित्राणि कुसुमानि ससृजुः ॥१४॥

१५–१६] ति० टी०–निर्धूतपत्राणि शिखराण्यग्राणि च येषां ते । धूर्ता अक्षधूर्ताः ॥ १५ ॥ १६ ॥

रा० टी०–निर्धूतेति । निर्धूतानि पत्रशिखराणि मुख्यपत्राणि येषाम् अत एव शीर्णाः पुष्पफलद्रुमाः पुष्पफलपल्लवा येषां ते तरवः पराजिताः अक्षे पराभूताः अत एव निक्षिप्तवस्त्राभरणाः धूर्ता इव आसन् इति शेषः ॥ १५ ॥

रा० टी०–हनूमतेति । हनूमता कम्पिता नगोत्तमा उत्तमवृक्षाः पुष्पादीनि मुमुचुः ॥ १६ ॥

गो० टी०–निर्धूतेति । धूर्ताः अक्षधूर्ताः ॥ १५ ॥ १६ ॥

१७] ति० टी०–स्कन्धमात्रस्याश्रयाः न तु पुष्पादीनाम्, अत एवागमा असेव्याः । मारुतेन तत्पुत्रेण हनूमता विनिर्धुता इति ह्रस्व आर्ष इति कतकस्तद्वृथा ह्रस्वस्यापि धुञः सत्त्वात् ॥ १७ ॥

रा० टी०–विहङ्गेति । मारुतेन हनुमता विनिर्धुताः विनिर्धूताः अत एव विहङ्गसङ्घैर्हीनाः अत एव स्कन्धमात्राश्रयाः अत एव अगमाः गन्तुमयोग्याः बभूवुः ॥ १७ ॥

गो० टी०–विहङ्गेति । स्कन्धमात्राश्रयाः पुष्पादीनामनाश्रया इत्यर्थः । अत एव अगमाः अगम्याः असेव्या इत्यर्थः । निर्धूताः कम्पिताः ॥ १७ ॥

१८] ति० टी०–वर्णको विलेपनम् । निपीतः शुभदन्तयुक्त ओष्ठो यस्याः सा ॥ १८ ॥

१९] ति०टी०–लाङ्गूलहस्तैरित्यत्रैकत्वाभाव आर्षः॥१९॥

रा० टी०–विधूतेति । विधूताः प्रकम्पिताः केशाः यस्याः निपीतौ शुभदन्तौ ओष्ठौ च यस्याः नखैर्दन्तैश्च विक्षता मृदितवर्णका विगताङ्गरागा युवतिर्यथा तथा लाङ्गूलहस्तैः चरणाभ्यां च मर्दिता तथा तेनैव हेतुना भग्नपादपा अशोकवनिका अभवदिति शेषः । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

१ साला इति गो. पाठः । २ऽभिप्रकम्पिता इति गो. पाठः । ३ पर्णेति गो. पाठः । ४ निर्धूतकेशीति गो. पाठः । ५ निष्पीतेति गो. पाठः । ६ चेति गो. पाठः । ७ बभूवेति गो. पाठः ।

महालतानां दामानि व्यधमत्तरसा कपिः । यथा प्रावृषि [1]वेगेन मेघजालानि मारुतः ॥ २० ॥
स तत्र मणिभूमीश्च [2]राजतीश्च मनोरमाः । तथा काञ्चनभूमीश्च [3]विचरन्ददृशे कपिः ॥ २१ ॥
वापीश्च विविधाकाराः पूर्णाः परमवारिणा । महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः ॥ २२ ॥
मुक्ताप्रवालसिकताः स्फाटिकान्तरकुट्टिमाः । काश्चनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ॥ २३ ॥
[4]बुद्धपद्मोत्पलवनाश्चक्रवाकोपशोभिताः । नत्यूहरुतसंघुष्टा हंससारसनादिताः ॥ २४ ॥
दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समन्ततः । अमृतोपमतोयाभिः शिवाभिरुपसंस्कृताः ॥ २५ ॥
लताशतैरवततां संतानकुसुमावृताः । नानागुल्मावृतवनाः [5]करवीरकृतान्तराः ॥ २६ ॥
ततोऽम्बुधरसंकाशं प्रवृद्धशिखरं गिरिम् । विचित्रकूटं कूटैश्च सर्वतः परिवारितम् ॥ २७ ॥
शिलागृहैरवततं नानावृक्षसमावृतम् । ददर्श कपिशार्दूलो रम्यं जगति पर्वतम् ॥ २८ ॥
ददर्श च नगात्तस्मान्नदीं निपतितां कपिः । अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ॥ २९ ॥
जलेन पतिताग्रैश्च पादपैरुपशोभिताम् । वार्यमाणामिव क्रुद्धां प्रमदां प्रियबन्धुभिः ॥ ३० ॥

गो० टी०–निर्धूतकेशीति । मृदितवर्णका मृष्टाङ्गरागाः । 'अङ्गरागः समालम्भो वर्णकश्च विलेपनम्' इत्युक्तेः । निष्पीतशुभदन्तोष्ठी निष्पीततया शुभदन्ततुल्योष्ठी । महालतानामिति । लतानां दामानि प्रतानानि ॥ १८–२० ॥

२०–२१] ति० टी०–दामानि जालानि ॥ २० ॥२१॥

रा० टी०–महेति । प्रावृषि मेघजालानि मारुत इव महालतानां दामानि जालानि कपिर्व्यधमत् ॥ २० ॥

रा० टी०–स इति । कपिः ददृशे ॥ २१ ॥

गो० टी०–स तत्रेत्यादि । नत्यूहाः दात्यूहाः । संतानकाः कल्पवृक्षाः तैः [6]आवृताः । घनाः निबिडाः । नानागुल्मावृताश्च ताः घनाश्चेति समासः । करवीरकृतान्तराः करवीरैः कृतविशेषाः ॥ २१–२६ ॥

२२] ति० टी०–उच्यमानविशिष्टा वापीर्ददर्श । श्लोकपञ्चकमेकं वाक्यम् ॥ २२ ॥

२३] ति० टी०–मुक्ताप्रवालरूपा एव सिकता यासाम् । आन्तरकुट्टिमा अभ्यन्तरनिबद्धभूमिपुटाः ॥ २३ ॥

२४] ति० टी०–नत्यूहो दात्यूहः ॥ २४ ॥

२५] ति० टी०–द्रुमयुक्ताभिस्तीरद्रुमयुक्ताभिः । वापीनां सरिदुपस्कृतत्वं नित्यं पूर्णजलत्वाय ॥ २५ ॥

२६] ति० टी०–संतानः कल्पवृक्षः । गुल्मावृतवनाः । वनं जलम् । करवीरैः कृतमन्तरं गवाक्षस्थानीयं यासां ताः२६

रा० टी०–वापीरिति । विविधाकाराः अनेकविधावयवाः परमवारिणा पूर्णाः महार्हैः प्रशंसनीयैः मणिसोपानैः उपपन्नाः युक्ताः मुक्ताप्रवालान्येव सिकता यासु स्फाटिकाः स्फटिकमयाः आन्तरकुट्टिमाः अभ्यन्तरनिबद्धभूमयः यासु तरुभरुपशोभिताः बुद्धानि विकसितानि पद्मोत्पलवनानि यासु नत्यूहानां दात्यूहानां रुतेन शब्देन संघुष्टा दीर्घाभिः विशालाभिः अमृतोपमतोयाभिः अत एव शिवाभिः सरिद्भिः उपसंस्कृताः नित्यं पूर्णत्वाय प्रापिताः लताशतैरवततां व्याप्ताः संतानकुसुमैः कल्पवृक्षपुष्पैरावृताः नानागुल्मैरावृतं वनं जलं यासां करवीरैः कृतम् अन्तरं छिद्रं यासु ताः वापीः ददर्श ततोऽनन्तरम् अम्बुधरसंकाशं मेघसदृशं प्रवृद्धानि शिखराणि यस्य तं विचित्राणि कूटानि यस्य तं कूटैः अन्यपर्वतशृङ्गैश्च सर्वतः परिवारितं शिलागृहैः शिलामयभवनैः अवततं व्याप्तं जगति लोके रम्यं मनोहरं पर्वतं पर्वभिः अनेकग्रन्थिभिः तन्यते वर्ध्यते स तं गिरिं च ददर्श। सप्तकमेकान्वयि ॥२२–२८॥

२७] ति० टी०–ततो वापीदर्शनानन्तरम् ॥ २७ ॥

२८] ति० टी०–जगति लोके रम्यं सुन्दरवस्तुभ्योऽपि परमसुन्दरम् । तीर्थस्तु—जगतीपर्वतमित्यर्थः ह्रस्व आर्षः मृत्पर्वतमिति यावदिति व्याचक्षाण उपेक्ष्य एव ॥ २८ ॥

गो० टी०–तत इत्यादि । जगति लोके रम्यम् एतत्सदृशं रम्यं किंचिन्नास्तीत्यर्थः । पर्वतं ददर्शेत्यन्वयः ॥ २७ ॥ २८ ॥

२९] ति० टी०–निपतितां निःसृताम् । समुत्पत्य कोपादुत्थाय पतितां भूमिशयिताम् ॥ २९ ॥

रा० टी०–ददर्शेति । प्रियस्य अङ्कात् समुत्पत्य पतितां प्रियामिव तस्मात् नगात् निपतितां नदीं ददर्श ॥ २९ ॥

गो० टी०–अथ नद्या कुपितया निर्गतया सख्यासान्त्वनेन पुनरागतया साम्यं दर्शयति–ददर्श चेति । पुनरावृत्ततोयां वृक्षाग्रप्रतिहत्या पुनः पर्वताभिमुखतोयप्रवाहाम् । उपमाने उपमेये चान्वयाय ददर्शेति पदद्वयम् ॥ २९–३१ ॥

३०] ति० टी०–जलेन पतिताग्रैः पादपैः परिणाहवशादधःप्रसृतशाखाद्वारेण जलनिपतिताग्रत्वं वृक्षाणां कूलात्पातेन वा । प्रियं प्रति क्रुद्धां प्रियसमीपादन्यत्र जिगमिषुं प्रियबन्धुभिः सखीभिर्वार्यमाणां प्रमदामिव ॥ ३० ॥

---

१ विन्ध्यस्येति गो. पाठः । २ राक्षसीरिति गो. पाठः । ३ ददर्श विचरन्निति गो. पाठः । ४ फुल्लेति गो. पाठः । ५ उपकूजिता इति गो. पाठः । ६ घना इति गो. पाठः । ७ वृक्षैरिति गो. पाठः ।

पुनरावृत्ततोयां च ददर्श स महाकपिः । प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् ॥ ३१ ॥
तस्यादूरात्स पद्मिन्यो नानाद्विजगणायुताः । ददर्श कपिशार्दूलो हनूमान्मारुतात्मजः ॥ ३२ ॥
कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा । मणिप्रवरसोपानां मुक्तासिकतशोभिताम् ॥ ३३ ॥
विविधैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् । प्रासादैः सुमहद्भिश्च निर्मितैर्विश्वकर्मणा ॥ ३४ ॥
काननैः कृत्रिमैश्चापि सर्वतः समलंकृताम् । ये केचित्पादपास्तत्र पुष्पोपगफलोपगाः ॥ ३५ ॥
सच्छत्राः सवितर्दीकाः सर्वे सौवर्णवेदिकाः । लताप्रतानैर्बहुभिः पर्णैश्च बहुभिर्वृताम् ॥ ३६ ॥
काञ्चनीं शिंशपामेकां ददर्श स महाकपिः । वृतां हेममयीभिस्तु वेदिकाभिः समन्ततः ॥ ३७ ॥
सोऽपश्यद्भूमिभागांश्च नगप्रस्रवणानि च । सुवर्णवृक्षानपरान्ददर्श शिखिसंनिभान् ॥ ३८ ॥
तेषां द्रुमाणां प्रभया मेरोरिव महाकपिः । अमन्यत तदा वीरः काञ्चनोऽस्मीति सर्वतः ॥ ३९ ॥
तान्काञ्चनान्वृक्षगणान्मारुतेन प्रकम्पितान् । किङ्किणीशतनिर्घोषान्दृष्ट्वा विस्मयमागमत् ॥ ४० ॥

३१] ति० टी०–अत एव कान्तस्य प्रसन्नां पुनरुपस्थितां कान्तामिव, पुनरावृत्ततोयां वृक्षाद्यप्रतिघातात्परावृत्तजलां ददर्श ॥ ३१ ॥

रा० टी०–जले इति । प्रियबन्धुभिर्वार्यमाणाम् अन्यत्र गमननिरोधाय प्रार्थ्यमानां क्रुद्धां प्रमदामिव जले निपतिताग्रैः पादपैस्तरुभिरुपशोभितां कान्तस्योपरि प्रसन्नाम् अत एव पुनरुपस्थितां प्राप्तां कान्तामिव पुनरावृत्ततोयां परावृत्तजलां तां नदीं ददर्श । श्लोकद्वयमेकान्वयि ॥ ३० ॥ ३१ ॥

३२] ति० टी०–तस्य पर्वतस्य । पद्मिन्यः पद्मिनीरकृत्रिमदीर्घिकाः ॥ ३२ ॥

रा० टी०–तस्येति । तस्य पर्वतस्य अदूरात्समीपे पद्मिन्यः पद्मिनीः पद्मविशिष्टसरः ददर्श ॥ ३२ ॥

गो० टी०–तस्येति । तस्य पर्वतस्य पद्मिन्यः पद्मिनीः कृत्रिमां क्रियया निर्वृत्तां नानामितामित्यर्थः ॥ ३२–३५ ॥

३३] ति० टी०–उच्यमानविशेषणां कृत्रिमां दीर्घिकामपि ददर्श । सिकतशोभितामित्यत्र ह्रस्व आर्षः ॥ ३३ ॥

रा० टी०–कृत्रिमामिति । शीतेन वारिणा पूर्णां मुक्ता एव सिकताः ताभिः शोभितां ह्रस्व आर्षः ॥ ३३ ॥

३४] ति० टी०–प्रासादैरित्यस्य युतामिति शेषः ॥३४॥

रा० टी०–मृगसंघैर्विचित्रां चित्राणि काननानि यस्यां तां विश्वकर्मणा निर्मितैः प्रासादैः कृत्रिमैः काननैश्च सर्वतः समलंकृतां कृत्रिमां दीर्घिकां च ददर्श । सार्धश्लोकद्वयमेकान्वयि ॥ ३४ ॥

३५] ति० टी०–ये केचित्तत्र वृक्षास्ते सर्वेऽपि पुष्पफलोभययुता एवेत्यर्थः ॥ ३५ ॥

रा० टी०–ये इति । तत्र दीर्घिकासमीपे ये केचित्पादपाः सन्तीति शेषः ते सर्वे पुष्पोपगफलोपगाः पुष्पादिप्राप्तिमन्तः सच्छत्राः छत्राकारस्थितिमन्तश्च सवितर्दीकाः अधोभागे राजतादिवेदिकासहिताः सौवर्णवेदिकाश्च सन्ति । सौवर्णवेदिका इत्यस्य सुवर्णदातारः कल्पवृक्षविशेषा इत्यर्थो वा । अर्धद्वयमेकान्वयि ॥ ३५ ॥

गो० टी०–ये केचिदिति । सच्छत्राः सवितानाः इत्यर्थः । सवितर्दिकाः सवेदिकाः । सौवर्णवेदिकाः वितर्दिकारोहणार्थं सुवर्णमयसोपानवेदिकायुक्ताः ॥ ३६–३९ ॥

३६] ति० टी०–सच्छत्राश्छत्राकारसंस्थानवन्तः । तेन शीतलच्छायत्वं सूचितम् । सवितर्दीकाः सवेदिकाः । सौवर्णवेदिकाः राजतादिमहावेदिकोपरि कृतसौवर्णवेदिका इत्यर्थः । लतेत्यर्धमुत्तरान्वयि ॥ ३६ ॥

३७–३८] ति० टी०–एकां मुख्यां वृक्षान्तरसंबन्धरहितां च, काञ्चनीं तद्वर्णां शिंशपाम् । 'पिच्छिला गुरुशिंशपा' इति कोशः ॥ ३७ ॥ ३८ ॥

रा० टी०–लतेति । लताप्रतानादिभिर्वृताम् एकां स्वसजातीयरहितां हेममयीभिर्वेदिकाभिर्वृतां काञ्चनीं शिंशुपां वृक्षविशेषं ददर्श । सार्धश्लोक एकान्वयी ॥ ३६ ॥ ३७ ॥

रा० टी०–स इति । भूमिभागादीन् अपश्यत् शिखिसन्निभान् अग्निसदृशान् सुवर्णवृक्षान् ददर्श ॥ ३८ ॥

३९] ति० टी०–मेरोः प्रभया दिवाकर इव, तेषां द्रुमाणां प्रभया काञ्चनोऽस्मीत्यमन्यत । काञ्चनवर्णमात्मशरीरं वीक्षते स्मेत्यर्थः ॥ ३९ ॥

रा० टी०–तेषामिति । मेरोरिव द्रुमाणां प्रभयोपलक्षितो महाकपिः अहं काञ्चनोऽस्मीत्यमन्यत ॥ ३९ ॥

४०] ति० टी०–तान्काञ्चनानिति । किङ्किण्यस्तेषु फलादिवत्सहजाः, अत एव विस्मयमागमत् ॥ ४० ॥

रा० टी०–तानिति । मारुतेन प्रकम्पितान् किङ्किणीशतनिर्घोषान् फलादिवत्स्वाभाविकस्वावयवीभूतानेककिङ्किणीनिःस्वनसहितान् उरुगुणान् मधुस्रवादिगुणविशिष्टान् तरुणाङ्कुरपल्लवान् तरुणाङ्कुरादिविशिष्टान् तान् तरून् दृष्ट्वा विस्मयमागमत् । सार्धश्लोक एकान्वयि ॥ ४० ॥

१ हनुमानिति गो. पाठः । २ गतेति गो. पाठः । ३ दिवाकर इति गो. पाठः । ४ वानर इति गो. पाठः । ५ तां काञ्चनैस्तरुगणैर्मारुतेन च वीजितामिति गो. पाठः । ६ निर्घोषानिति गो. पाठः ।

[1]पताग्रान्रुचिरांस्तरुणाङ्कुरपल्लवान् । तामारुह्य महावेगैः शिंशपां[3] पर्णसंवृताम् ॥ ४१ ॥
इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसाम् । इतश्चेतश्च दुःखार्तां संतपन्तीं[4] यदृच्छया ॥ ४२ ॥
अशोकवनिका चेयं दृढं रम्या दुरात्मनः । चन्दनैश्चम्पकैश्चापि बकुलैश्च विभूषिता ॥ ४३ ॥
इयं च नलिनी रम्या द्विजसङ्घनिषेविता । इमां सा राजमहिषी नूनमेष्यति जानकी ॥ ४४ ॥
सा रामा राजमहिषी राघवस्य प्रिया सदा । वनसंचारकुशला ध्रुवमेष्यति[6] जानकी ॥ ४५ ॥
अथवा मृगशावाक्षी वनस्यास्य विचक्षणा । वनमेष्यति सांद्येह[7] रामचिन्तासुकर्शिता[8] ॥ ४६ ॥
रामशोकाभिसंतप्ता सा देवी वामलोचना । वनवासरता नित्यमेष्यते वनचारिणी ॥ ४७ ॥
वनेचराणां सततं नूनं स्पृहयते पुरा । रामस्य दयिता चार्या[9] जनकस्य सुता सती ॥ ४८ ॥

गो० टी०—तानिति । काञ्चनैस्तरुगणैः उपलक्षितां तां शिंशुपाम् । किङ्किणीशतनिर्घोषाम् । किङ्किण्यः क्षुद्रघण्टिकाः तासां निर्घोषो यस्याः । यद्वा किङ्किणीभिः शतमनन्ताः निर्घोषा यस्याः सा ताम् ॥ ४० ॥

४१] ति० टी०—तेषां तरुधर्ममप्याह—सुपुष्पिताग्रानिति । तरुणाः कोमला अङ्कुराः पल्लवाश्च येषां तान्दृष्ट्वा विस्मयं प्राप्त इत्यन्वयः । तां यस्याः पर्यन्तवृक्षा एवंभूतास्तामारुह्य । चिन्तयामासेति शेषः ॥ ४१ ॥

रा० टी०—तामिति । तां शिंशुपामारुह्य चिन्तयामासेतिः शेषः । अर्धं पृथक् ॥ ४१ ॥

गो० टी०—स पुष्पिताग्रमित्यायासर्गसमाप्त्येकं वाक्यम् । इतो द्रक्ष्यामि इमामारुह्य द्रक्ष्यामि ल्यब्लोपे पञ्चमी । दुरात्मनः रावणस्य । अथवेति पक्षान्तरे । विचक्षणा तापापनोदनचतुरा । अस्य वनस्याशोकवनस्य । इह वनं नलिनीपरिसरवर्तिवनम् । रामचिन्तातुकर्शिता सती एष्यति । रामविश्लेषजनिततापापनोदनार्थमेतद्वनप्रदेशमागमिष्यतीत्यर्थः । सा आर्येति पदच्छेदः । एष्यते एष्यति । वनेचराणां स्पृहयते वनेचरेभ्यः स्पृहयते । संध्याकाले मनः यस्याः सा संध्याकालमनाः सन्ध्योपासनतत्परेत्यर्थः । संध्यार्थं एष्यति प्रतिदिनमिति शेषः । पर्णघने पर्णसमूहे । महात्मा स हनुमान् पुष्पिताग्रत्वादिविशिष्टां तामारुह्य इतो द्रक्ष्यामीत्यारभ्य आगमिष्यति सावश्यमिमां शिवजलां नदीमित्यन्तेन यः प्रकार उक्तः एवमुक्तप्रकारेण मत्वा मनुजेन्द्रपत्नीं प्रतीक्षमाणः अवेक्षमाणः मार्गमाणः । सुपुष्पिते पर्णघने निलीनश्च सन् सर्वं ददर्शेत्यन्वयः ॥ ४१—५२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे श्रृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

४२] ति० टी०—इत इति । आगतामिति शेषः । तदेव स्पष्टयति—इतश्चेतश्चेति ॥ ४२ ॥

रा० टी०—चिन्ताकारमाह—इत इति । दुःखार्ताम् अत एव इतश्चेतः इतस्ततः यदृच्छया संपतन्तीम् अत एव इङ्गाप्यागतामिति शेषः वैदेहीं द्रक्ष्यामि ॥ ४२ ॥

४३] ति० टी०—रम्येयमशोकवनिका दुरात्मनो रावणस्यैव दृढं ध्रुवम् । राक्षसान्तरस्यैवंविधतदसंभवात् ॥ ४३ ॥

४४] ति० टी०—नलिनी चेयं रम्या सा च राजमहिषीत्वादम्यप्रिया, अत एवेमां नलिनीं नूनमेष्यति ॥ ४४ ॥

रा० टी०—अशोकेति । रम्या रमणीयचन्दनादिभिर्विभूषिता यस्यामियं रम्या नलिनी सेयमशोकवनिका शोकनिवर्तिकात्वेन तदभिधा अतः इमां जानकीं नूनमेष्यति एतेनैतन्नामश्रुत्या तत्र गमने ममापि शोकविध्वंसो भवितेति निश्चयवती सीतावश्यं भवेदिति सूचितम् । श्लोकद्वयमेकान्वयि॥४३॥४४॥

४५] ति० टी०—अरामा रामवियुक्ता । राजमहिषीत्वादेवोद्यानवनसंचारकुशला ॥ ४५ ॥

रा० टी०—सेति । वनसंचारकुशला सा जानकी ध्रुवमेष्यति ॥ ४५ ॥

४६-४७] ति० टी०—अयमेवार्थ आदरेण बुद्धिस्थैर्यार्थं त्रिरावर्त्यते—अथ वेति । सर्वथेत्यर्थः । न तु पक्षान्तरमिदम् तत्त्वासंभवात् ॥ ४६ ॥ ४७ ॥

४८] ति० टी०—अशोकवनिकान्तःशिंशपाप्रदेशे सीताया आगमने हेत्वन्तरमुन्नयति—वनेचराणामिति । मृगपक्ष्यादीनामित्यर्थः ॥ ४८ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—अथवेति । रामचिन्तासु कर्शिता अथवा अत एव अस्य वनस्य विचक्षणा वनसंबन्ध्यन्वेषणादिकुशला सा सीता वनमेष्यति एतेन केनाचिद्रूपेण कश्चिद्रामानुचरो मदन्वेषणार्थं तत्रागच्छेदिति सीतासंभावना सूचिता ॥ ४६ ॥

रा० टी०—स्वाभाविकतयाऽप्यत्रागमनं तस्याः संभवतीत्याह—रामेति । वनेचराणां पक्ष्यादीनां पुरा स्पृहयते तद्विषयकातिप्रीतिमतीत्यर्थः, अत एव वनवासरता वनवासविषयकप्रीतिमती अत एव वनचारिणी सा सीता एष्यते एष्यति । श्लोकद्वयमेकान्वयि ॥ ४७ ॥ ४८ ॥

१ स पुष्पिताग्रां रुचिरां तरुणाङ्कुरपल्लवामिति गो. पाठः । २ बाहुरिति गो. पाठः । ३ शिंशुपामिति गो. रा. पाठः । ४ संपतन्तीमिति गो. रा. पाठः । ५ सतीति गो. पाठः । ६ नूनमिति गो. पाठः । ७ सार्येहेति गो. पाठः । ८ Sनुकर्शितेति गो. पाठः । ९ भार्येति गो. पाठः ।

संध्याकालमनाः श्यामा ध्रुवमेष्यति जानकी । नदीं चेमां शुभजलां संध्यार्थे वरवर्णिनी ॥ ४९ ॥
तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा । शुभायाः पार्थिवेन्द्रस्य पत्न्या रामस्य संमता ॥ ५० ॥
यदि जीवति सा देवी ताराधिपनिभानना । आगमिष्यति सावश्यमिमां शीतजलां नदीम् ॥ ५१ ॥
एवं तु गत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेन्द्रपत्नीम् ।
अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ।

शिंशुपाग्रेऽवस्थाय सर्वतश्चक्षुषी प्रचारयन्हनुमांश्चैत्यप्रासादगतां यथावर्णितगुणावस्थोपलक्षितां तां विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं निर्धारयति ।

स वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् । अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत ॥ १ ॥
संतानकलताभिश्च पादपैरुपशोभिताम् । दिव्यगन्धरसोपेतां सर्वतः समलंकृताम् ॥ २ ॥
तां स नन्दनसंकाशां मृगपक्षिभिरावृताम् । हर्म्यप्रासादसंबाधां कोकिलाकुलनिःस्वनाम् ॥ ३ ॥
काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् । बह्वासनकुथोपेतां बहुभूमिगृहायुताम् ॥ ४ ॥

४९] ति० टी०–संध्या दिनरात्र्योः संधिरूपानुष्ठानकालो यस्य कर्मणस्तत्र मनो यस्याः सा, तथा संध्यार्थे संध्याकालक्रियमाणस्नानार्थं । पूर्ववदेवात्रापि युक्तस्यैवार्थस्यावृत्तिः । रात्रिशेषे हनुमतोऽस्य वचसः प्रवृत्तेः संध्याशब्देनात्र प्रातःकालो विवक्षितः । तत्र कर्तव्यस्नानादौ चास्त्येव स्त्रीणामप्यधिकार इति कथं स्त्रीणां संध्यावन्दनमिति परास्तं वेदितव्यम् किं च सम्यग्भगवद्ध्यानस्यैव संध्यापदार्थत्वेनास्त्येव तत्र स्त्रिया अधिकारः । गायत्रीमन्त्रेण तदर्थस्मरणपूर्वकध्याने तु द्विजस्यैवाधिकार इत्यन्यत् ॥ ४९ ॥

रा० टी०–आगमने हेत्वन्तरमाह–संध्येति । संध्याकालः समयो यस्य तस्मिन् स्नानजपादौ मनो यस्याः सा श्यामा नित्यं षोडशवार्षिकीत्वेन प्रतीयमाना जानकी संध्यार्थे सान्ध्यकर्मनिष्टत्यर्थम् इमां नदीं ध्रुवमेष्यति ॥ ४९ ॥

५०–५१] ति० टी०–या रामस्य पत्नी, संमता च पतिव्रतेति सर्वजनस्य, तस्याः शुभाया इयं नगशोकवनिका चानुरूपा योग्या ॥ ५० ॥ ५१ ॥

रा० टी०–तस्या इति । पार्थिवेन्द्रस्य रामस्य संमता या पत्नी तस्याः एव इयमशोकवनिका अनुरूपा योग्या ॥ ५० ॥

रा० टी०–चिन्तान्तरमाह–यदीति । सा सीता यदि जीवति तर्हि साऽवश्यम् अवश्यत्वसहितम् आगमिष्यति ॥ ५१ ॥

५२] ति० टी०–प्रतीक्षमाणः सीताया आगमनमिति शेषः । अवेक्षमाण इतस्ततोऽवलोकयन् । पर्णघने सुपुष्पिते शिंशपावृक्षे निलीनः सन्सर्वं वनं ददर्शेत्यन्वयः ॥ ५२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

रा० टी०–एवमिति । मनुजेन्द्रपत्नीं तदागमनं प्रतीक्षमाणः अत एव अवेक्षमाणः अन्वेषणं कुर्वन् पर्णानि घनानि यस्मिन् तस्मिन् सुपुष्पिते शिंशुपाह्वतरौ निलीनो हनुमान् सर्वं वनं ददर्श ॥ ५२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

१] ति० टी०–वीक्षमाण इतस्ततोऽवलोकयन् । तत्रस्थः शिंशपास्थः । मार्गमाणो मैथिलीहेतुनाधो दृष्ट्वा महीमवेक्षमाणः सर्वां तामशोकवनिकामन्ववैक्षत ॥ १ ॥

रा० टी०–शिंशुपोपरिस्थितहनुमदन्वेषणप्रकारमाह–स इत्यादिभिः । तत्रस्थः शिंशुपाह्वतरौ स्थितः सः हनूमान् मैथिलीं मार्गमाणः अत एव अवेक्षमाणः इतस्ततोऽवलोकयन् अत एव महीम् अवेक्षमाणश्च सन् सर्वां दिशम् अन्ववैक्षत ॥ १ ॥

गो० टी०–स वीक्षमाण इत्यादि । सः तत्रस्थः शिंशुपास्थः मैथिलीं मार्गमाणः मैथिलीमार्गणाद्धेतोः "लक्षणहेत्वोः क्रियायाः" इति शानच् । वीक्षमाणः विविधं चक्षुर्विक्षिपन् महीं चावेक्षमाणः सर्वां ताम् अशोकवनिकाम् अन्ववैक्षतेत्यन्वयः ॥ १ ॥

२] ति० टी०–तां विशिनष्टि—संतानकेति । संतानकलताभिः सहितैः पादपैरित्यर्थः ॥ २ ॥

३] ति० टी०–तां स ददर्शेत्यन्वयः । नन्दनसंकाशां तद्वच्चन्दनद्राक्षायनेकोपादेयवस्तुमतीम् ॥ ३ ॥

४] ति० टी०–बह्वासनैः कुथैरास्तरणैश्चोपेताम् । उपर्युपरि भूमियुक्ता गृहा बहुभूमिगृहाः ॥ ४ ॥

१ मत्रेति गो. पाठः ।

सर्वर्तुकुसुमै रम्यैः फलवद्भिश्च पादपैः । पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम् ॥ ५ ॥
प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत । निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत् ॥ ६ ॥
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः । समूलपुष्पराचितैरशोकैः शोकनाशनैः ॥ ७ ॥
पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम् । कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ॥ ८ ॥
स देशः प्रभया तेषां प्रदीप्त इव सर्वतः । पुंनागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ॥ ९ ॥
विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः । शातकुम्भनिभाः केचित्केचिदग्निशिखप्रभाः ॥ १० ॥
नीलाञ्जननिभाः केचित्तत्राशोकाः सहस्रशः । नन्दनं विबुधोद्यानं चित्रं चैत्ररथं यथा ॥ ११ ॥
अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यश्रिया युतम् । द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् ॥ १२ ॥
पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा । सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः ॥ १३ ॥
नानानिनादैरुद्यानं रम्यं मृगगणद्विजैः । अनेकगन्धप्रवहं पुण्यगन्धं मनोहरम् ॥ १४ ॥

५] ति० टी०–सर्वर्तुषु कुसुमानि येषां तैः पादपैर्युक्ताम् । सूर्योदयप्रभामुद्यत्सूर्यसमकान्तिम् ॥ ५ ॥

६–१०] ति० टी०–तत्रस्थः शिंशपास्थो मारुतिरशोकपुष्पैः प्रदीप्तामिवोदैक्षतेत्युत्प्रेक्षा । असकृच्छतशो विनिष्पतद्भिश्चित्रैः पुष्पाण्यवतंसवत्प्रतीयमानानि येषां तैर्विहगैर्निर्बिडशाखामपि निष्पत्रशाखां क्रियमाणाम् बहुपक्षिपक्षपिहितपर्णतया पत्ररहितशाखामिवेत्यर्थः । तथोच्यमानविशेषणैरशोकैः पुष्पभारेण पुष्पसमूहेन जनितातिभारैः, अत एवातिभारवशादतिप्रह्वशाखतया भूमिं स्पृशद्भिः कर्णिकारैः किंशुकैश्च युतः स देशस्तेषां प्रभया प्रदीप्त इव ॥ ६–१० ॥

रा० टी०–संतानकेति । संतानकादिभिः उपशोभिताम् अत एव नन्दनसंकाशां नन्दनवनसदृशीं वापीभिरुपशोभितां बहुभिः आसनैः कुथैः महाराजस्थितियोग्यकम्बलविशेषैरुपेतां सर्वर्तुकुसुमैः पादपैः अशोकानां श्रिया च सूर्योदयप्रभाम् असकृत् विनिष्पतद्भिर्विहगैर्निष्पत्रशाखामिव क्रियमाणां चित्रैः पुष्पावतंसकैरुपलक्षितैः समूलपुष्पराचितैः समूलानि मूलसहितानि यानि पुष्पाणि तैः रचितैः पुष्पभारेण अतिपुष्पधारणेन अतिभारो येषां तैर्मेदिनीं स्पृशद्भिरिव शोकनाशनैरशोकैरशोकविशेषैः प्रदीप्तामिव अशोकवनिकां तत्रस्थः शिंशुपायां स्थितो मारुतिः समुदैक्षत । सप्तकमेकान्वयि ॥ २–८ ॥

रा० टी०–स इति । पुन्नागादयः शोभन्ते अत एव स देशः तेषां प्रभया प्रदीप्त इव । सार्धश्लोक एकान्वयी ॥ ९ ॥

रा० टी०–शातेति । केचित् शातकुम्भनिभाः सुवर्णघटसदृशाः तत्र सहस्रशः अशोकाः अशोभन्तेति शेषः । अर्धद्वयमेकान्वयि ॥ १० ॥

गो० टी०–संतानकलताभिरित्यादि । बह्वासनैः कुथैः आस्तरणैश्चोपेताम् । भूमिगृहाणि बिलगृहाणि । सर्वर्तुकुसुमैः पादपैः रम्यामित्यन्वयः । सूर्योदयप्रभाम् उद्यत्सूर्यप्रभाम् । विहगैः निष्पत्रशाखां क्रियमाणामिव स्थिताम् युगपत्पातिपक्षिपक्षविहतपत्रतया पत्ररहितशाखामिव स्थितामित्यर्थः । पुष्पावतंसकैः चञ्चुपुटलग्नपुष्पालंकृतैरित्यर्थः । आमूलेति । आमूलं पुष्पैर्निचितैः व्याप्तैः पुन्नागादौ तथा दृष्टम् । पुष्पभारः पुष्पसमूहः स एवातिभारो येषां तैः अशोकैरित्यादावुपलक्षणे तृतीया अशोकादिभिरुपलक्षितां समुदैक्षतेति पूर्वेणान्वयः ॥ २–१० ॥

११] ति० टी०–नीलाञ्जननिभा इति । एवमुक्त्याऽशोकानामनेकवर्णपुष्पवत्त्वं सूचितम् । विबुधोद्यानं नन्दनम्, यथा नन्दनमाह्लादकं तद्वदाह्लादकम् चैत्ररथं कुबेरवनं यथा चित्रं तद्वच्चित्रम् ॥ ११ ॥

१२] ति० टी०–तदुभयमप्यतिवृत्तमिवातिक्रम्येव स्थितम् । पुष्परूपज्योतिर्गणैरायुतम् ॥ १२ ॥

१३] ति० टी०–पुष्परूपै रत्नशतैः ॥ १३ ॥

१४] ति० टी०–मृगादिभिः स्वीयैर्नानाविधैः शब्दै रम्यं कृतम् । एवंविशेषणकमुद्यानमशोकवनिकान्तर्गतं ददर्शेत्यनुकर्षः ॥ १४ ॥

रा० टी०–नन्दनमिति । विबुधोद्यानं नन्दनवनमिव नन्दनम् आनन्दकं चैत्ररथं कुबेरवनमिव चित्रं यथेत्युभयान्वयि अतिवृत्तम् उपमानीभूतवनद्वयाभ्यामधिकं द्वितीयमाकाशमिव पुष्परूपज्योतिर्गणैः आयुतं व्याप्तं पञ्चमं सागरमिव पुष्परूपानेकरत्नैश्चित्रं सर्वेषु ऋतुषु पुष्पाणि येषु तैः पादपैः निचितं व्याप्तं नानानिनदैः अनेकविधनिनादविशिष्टैः मृगगणद्विजैः रम्यं गन्धाढ्यं द्वितीयं गन्धमादनमिव अनेकगन्धप्रवहम् अत एव पुण्यगन्धैर्मनोहरम् उद्यानं शुशुभे इति शेषः । श्लोकचतुष्टयमेकान्वयि ॥ ११–१४ ॥

गो० टी०–पुनरशोकवनं विविधोपमानदर्शनेन वर्णयति–नन्दनमित्यादिना श्लोकचतुष्टयेन । उद्यानम् अशोकवनम् ।

१ रम्यामिति गो.पाठः । २ आमूलपुष्पनिचितैरिति गो. पाठः । ३ शिखोपमा इति गो. पाठः । ४ विविधोद्यानमिति गो. पाठः । ५ रम्यं श्रिया वृतमिति गो. पाठः । ६ रममिति गो. पाठः ।

शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम् । अशोकवनिकायां तु तस्यां वानरपुङ्गवः ॥ १५ ॥
स ददर्शाविदूरस्थं[1] चैत्यप्रासादमूर्जितम्[2] । मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम् ॥ १६ ॥
प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम् । मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया ॥ १७ ॥
[3]निर्मलं[4] प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम् । ततो मलिनसंवीतां राक्षसीभिः समावृताम्[5] ॥ १८ ॥
उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः । ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम् ॥ १९ ॥
मन्दप्रख्यायमानेन[6] रूपेण रुचिरप्रभाम्[7] । पिनद्धां धूमजालेन शिखामिव विभावसोः ॥ २० ॥
पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा । सपङ्कामनलंकारां विपद्मामिव पद्मिनीम् ॥ २१ ॥
[8]पीडितां[9] दुःखसंतप्तां परिक्षीणां[10] तपस्विनीम्[11] । ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम्[12] ॥ २२ ॥
अश्रुपूर्णमुखीं दीनां कृशामनशनेन च । शोकध्यानपरां दीनां[13] नित्यं दुःखपरायणाम्[14] ॥ २३ ॥
प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम् । स्वगणेन मृगीं हीनां श्वगणेनावृतामिव ॥ २४ ॥

अत्र ददर्शेत्यपकृष्यते । नन्दनम् इन्द्रक्रीडावनम् विविधोद्यानं विविधवृक्षषण्डम् चैत्ररथं कुबेरक्रीडावनम् नन्दनमतिवृत्तमिव अतिक्रम्य स्थितमिव । चैत्ररथं यथा चैत्ररथमिव चित्रमित्यन्वयः । आकाशसाम्ये साधारणधर्ममाह-पुष्पेति । एवं सागरौपम्ये पुष्परत्नेति ॥ ११-१४ ॥

१५] ति० टी०-शैलेन्द्रो हिमवान् । तस्यां पूर्ववर्णितायाम् ॥ १५ ॥

१६-१७] ति० टी०-चैत्यं वर्तुलाकारत्वाद्बुद्धायतनमिव प्रासादम् । स्तम्भसहस्रेणाधारभूतेन स्थितम् ॥ १६ ॥ १७ ॥

रा० टी०-अशोकेति । ऊर्जितम् अत्युच्छ्रितं स्तम्भसहस्रेण स्थितं कैलासवत्पाण्डुरं प्रवालैः कृतानि सोपानानि यस्मिन् चक्षूंषि मुष्णन्तं चोरयन्तमिव श्रिया द्योतमानं निर्मलं प्रांशुभावत्वात् अत्युन्नतत्वात् अम्बरमुल्लिखन्तमिव चैत्यप्रासादं वर्तुलाकारप्रासादविशेषम् अशोकवनिकायां ददर्श । अर्धषट्कमेकान्वयि ॥ १५-१७ ॥

गो० टी०-अशोकवनिकायामित्यादि । चैत्यप्रासादं चैत्यं बुद्धमन्दिरं तदाकारं प्रासादम् । प्रांशुभावत्वात् दीर्घस्वभावत्वात् ॥ १५-१७ ॥

१८-१९] ति० टी०-प्रांशुभावत्वादुच्चस्वभावत्वात् । ततस्तदर्शनानन्तरम् । मलिनवासःसंवीतत्वादिविशेषणवतीं सीतां दूरादेव तन्मूलस्थां ददर्शेत्युत्कर्षः ॥ १८ ॥ १९ ॥

रा० टी०-तत इति । ततः प्रासाददर्शनानन्तरं मलिनसंवीतां मलिनवस्त्रेणाच्छादितां राक्षसीभिः समावृतां पुनः पुनर्निःश्वसन्तीं शुक्लपक्षादौ चन्द्ररेखामिव अमलां दोषसंसर्गरहितां सीतां ददर्श । सार्धश्लोक एकान्वयी ॥ १८ ॥ १९ ॥

गो० टी०-तत इत्यादि । मलिनसंवीतां मलिनवस्त्रेणावृताम् मलिनैरङ्गैः संवीतां वा । शुक्लपक्षादावित्यनेन वर्धिष्णुत्वं द्योतितम् । मन्दं प्रख्यायमानेन इदं तदिति कथञ्चित्प्रत्यभिज्ञायमानेन रूपेणोपलक्षिताम् । पिनद्धामिति मलिनसंवीतत्वे उपमा । पिनद्धां बद्धाम् उत्तरीयराहित्यं द्योतयितुमेकेनेत्युक्तिः । सपङ्कां भूमेराविर्भवन्तीमिव स्थिताम् । अनलंकारां पङ्कं निवर्त्य अलंकुर्वतो सन्निधानादलंकाररहिताम् । विपद्मामिव पद्मिनीं रामागमनेष्ययमाश्रयो नोत्सादयितुमर्हतीत्येवं मन्यमानाम् । पद्मरहिताम् सरसीमिव स्थिताम् । ग्रहेण क्रूरग्रहेण । द्वितीय इवशब्दो वाक्यालंकारे । अश्विति । कृशां दीनामिति पुनः पुनरुक्तिः कार्श्यदैन्ययोरतिशयप्रदर्शनाय । अत्र उपवासकृशां कृशामनशनेनेत्युक्त्या पूर्वकाण्डान्ते इन्द्रदत्तपायसाशनवृत्तान्तः कल्पित इति तत्रैवोक्तम् । नीलनागाभयाऽऽकृष्टसर्पतुल्यया । नीरदापाये शरदि ॥ १८-२५ ॥

२०] ति० टी०-मन्दप्रख्यायमानेन इदमिदमितीदं तदिति वा कथंचिदूह्यमानेन रूपेण स्वरूपेणोपलक्षिताम् ॥ २० ॥

रा० टी०-मन्देति । मन्दं प्रख्यां दैन्यबोधनमयते प्राप्नोति तेन रूपेण रुचिरप्रभा यस्या तां धूमजालेन पिनद्धाम् आच्छादितां विभावसोरग्नेः शिखामिव ॥ २० ॥

२१] ति० टी०-क्लिष्टेन जीर्णेन पांसुष्वास्तरणेन वा क्लिष्टेन । सपङ्कां मलवच्छरीराम् । पद्मिनी लक्ष्मीर्लता च॥२१॥

रा० टी०-क्लिष्टेन जीर्णतया प्रतीतेन पीतेन एकेन उत्तमवाससा संवीताम् अनलङ्काराम् अलङ्कृतिरहिताम् अत एव विपद्मां पद्मरहितां पद्मिनीं सरसीमिव सपङ्कां मलिनाम् ॥२१॥

२२-२३] ति० टी०-अङ्गारकेणेव तत्तुल्येन ग्रहेण केतुना पीडितां रोहिणीमिव ॥ २२ ॥ २३ ॥

२४] ति० टी०-प्रियं जनं रामलक्ष्मणसुग्रीवादिरूपं जनम् । श्वगणेन शुनां गणेन ॥ २४ ॥

रा० टी०-दुःखसन्तप्तां वियोगजनितदुःखाक्रान्तामत एव अङ्गारकेण भौमेन ग्रहेण पीडितां रोहिणीमिव पीडिताम् ॥२२॥

रा० टी०-अत एव अश्रुपूर्णमुखीम् अत एव दीनां क्षीणां

१ ददर्श विदूरस्थमिति रा. पाठः । २ उच्छ्रितमिति गो. पाठः । ३ विमलमिति गो. पाठः । ४ मन्दमिति गो. पाठः । ५ व्रीडितामिति गो. पाठः । ६ म्लानामिति गो. पाठः । ७ नित्यदुःखेति रा. पाठः ।

नीलनागाभया वेण्या जघनं गतयैकया । नीलया नीरदापाये वनराज्या महीमिव ॥ २५ ॥
सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् । तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम्॥ २६ ॥
तर्कयामास सीतेति कारणैरुपपादिभिः । ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ॥ २७ ॥
यथारूपा हि दृष्टा सा तथारूपेयमङ्गना । पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ॥ २८ ॥
कुर्वतीं प्रभया देवीं सर्वा विततिमिरा दिशः । तां नीलकण्ठीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम्॥ २९ ॥
सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा । इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥ ३० ॥
भूमौ सुतनुमासीनां नियतामिव तापसीम् । निःश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव ॥ ३१ ॥

तत्त्वेन प्रतीयमानाम् अत एव दीनां प्राप्तग्लानिम् अत एव अनशनेन भोजनाभावेन कृशाम् अत एव शोकध्यानपरां शोकहेतुकचिन्ताक्रान्तां प्रियं जनम् अपश्यन्तीं राक्षसीगणं पश्यन्तीम् अत एव स्वगणेन स्वकीययूथेन हीनां श्वगणेन शुनां समुदायेन च आवृताम् अत एव नित्यदुःखपरायणां मृगीमिव दीनाम् ॥ २३ ॥ २४ ॥

२५-२६] ति० टी०-जघनं पृष्ठभागं गतया प्राप्तयैकया हरणदिनकृतैकसंस्कारत्वया । यद्वा पुरोभागीयवेणीद्वयराहित्येन पृष्ठलम्बयैकया वेण्या नीलनागाभया नीलसर्पतुल्यया वेण्योपलक्षितां अनेन तत्स्पर्शेऽन्यस्य मरणमेवेति सूचितम् । मेघापाये नीलया वनराज्योपलक्षितां महीमिव स्थिताम् ॥ २५ ॥ २६ ॥

रा० टी०-नीलनागाभयाकृष्णसर्पसदृश्याजघनं पृष्टान्तदेशं गतया प्राप्तया एकया केशविन्यासाभावेन जटीभूतया वेण्या उपलक्षितां नीरदापाये घनापगमे नीलया वनराज्या महीमिव स्थितां सीतां ददर्शेत्यनुकृष्यते । श्लोकपट्कमेकान्वयि ॥ २५ ॥

रा० टी०-सुखार्हामिति । सुखार्हां सुखयोग्यां व्यसनानां दुःखानाम् अकोविदाम् अविज्ञात्रीं दुःखसंतप्तां तां सीतां विलोक्य उपपादिभिः सीताबोधनसमर्थैः कारणैः इयं सीतेति तर्कयामास । सार्धश्लोक एकान्वयी ॥ २६ ॥

गो० टी०-तामिति । उपपादिभिः उपपादनशीलैः मन्दप्रख्यायमानेनेत्यारभ्य सीतां समीक्ष्य उपपादिभिः कारणैः सीतेति तर्कयामासेत्यन्वयः ॥ २६ ॥

२७] ति० टी०-उपपादिभिः सीतात्वनिश्चयोपपादनसमर्थैः । तत्कारणं प्रत्यभिज्ञानमाह—ह्रियमाणेति । यथारूपा दृष्टा यादृग्वेषवर्णादिमत्यनुभूता तथारूपेयम् । भेदे हि प्रत्यभिज्ञानमनुपपन्नमिति भावः ॥ २७ ॥

रा० टी०-तर्कणप्रकारमाह-ह्रियमाणेति । तेन रावणेन ह्रियमाणा सा सीता तदा हरणसमये यथारूपा दृष्टा तथारूपैव इयमङ्गना एतेनेयं सीतैव भवितुमर्हतीति सूचितम् ॥ २७ ॥

गो० टी०-एवं लिङ्गैः सीतेति विचार्य प्रत्यभिज्ञयाऽपि तथा तर्कयामासेत्याह-ह्रियमाणेति । इति तर्कयामासेति शेषः ॥ २७ ॥

२८] ति० टी०-पूर्णचन्द्राननत्वादिगुणवतीं निरीक्ष्य तस्य बुद्धिः संदिदिहे इत्यष्टात्रिंशच्छ्लोकेनान्वयः । सुभ्रूं सुभ्रुवम् ॥ २८ ॥

रा० टी०-सीतामेव वर्णयन्नाह-पूर्णेति । पूर्णचन्द्राननां पूर्णचन्द्रसदृशाननविविष्टां चारू मनोहरौ वृत्तौ वर्तुलौ पयोधरौ यस्यास्ताम् ॥ २८ ॥

गो० टी०-पूर्णचन्द्राननामित्यारभ्य विद्यां प्रशिथिलामित्यन्तमेकं वाक्यम् । सुभ्रूं सुभ्रुवम् उवङभाव आर्षः । कुर्वन्तीमिति । दश मासान् स्नानेन विना मलिनापि प्रभया दिशः विततिमिराः कुर्वन्तीमिति प्रभातिशयोक्तिः । सुप्रतिष्ठितां सुप्रतिष्ठितपादतलाम् न राजतीं न राजन्तीम् तां प्रसिद्धाम् स्मृतिं मन्वाद्युक्तिम् संदिग्धां संदिग्धार्थाम् ऋद्धिं संपदम् निपतितां क्षीणाम् विहताम् अविश्वासबहुलाम् प्रतिहताम् अलब्धकार्याम् सोपसर्गां सविघ्नाम् सकलुषां सकालुष्याम् भावप्रधानो निर्देशः अभूतेन असत्येन रामोपरोधव्यथितां रामप्राप्तिनिरोधेन व्यथिताम् । पुनः सीताशब्दो व्यवहितानुस्मरणार्थः । आम्नायानां वेदानाम् अयोगेन असंबन्धेन प्रशिथिलाम् अप्राप्तप्रतिष्ठाम् विद्यां वेदबाह्यविद्याम् । यद्वा आम्नायानाम् अभ्यासानामभावेन प्रशिथिलाम् अस्थिरपदां विद्यामिव सीतां निरीक्ष्य तस्य हनुमतो बुद्धिः संदिदिहे इत्यन्वयः । कार्श्यमालिन्यादिना तिरोहितरूपत्वादिति भावः ॥ २८-३८ ॥

२९] ति० टी०-सर्वा दिशो वितिमिराः कुर्वतीम् नीलकण्ठीं सौभाग्यसूचकेन्द्रनीलमणिमयकण्ठस्थभूषणप्रभया तद्वर्णकण्ठाम् सुप्रतिष्ठितां सुप्रतिष्ठितसर्वावयवसंस्थानाम्॥२९॥

रा० टी०-प्रभया स्वशरीरकान्त्या सर्वाः दिशः वितिमिराः कुर्वतीं बिम्बोष्ठीम् ॥ २९ ॥

३०] ति० टी०-चन्द्रप्रभासादृश्यं सर्वानन्दकरत्वेन॥३०॥

रा० टी०-मन्मथस्य संबन्धिनीं रतिं यथा अतिरूपात्वेन तत्सदृशीं सर्वस्य जगतः इष्टां पूज्याम् ॥ ३० ॥

३१] ति० टी०-नियतां भूशयनादिरूपनियमवतीम् तापसीमिव भूमावासीनाम्, भुजगेन्द्रवधूसादृश्यं दुष्प्रधृष्यत्वेन रक्षःकुलनाशकत्वेन च ॥ ३१ ॥

१ वै इति गो. पाठः । २ केशीमिति गो. पाठः ।

शोकजालेन महता विततेन न राजतीम् । संसक्तां धूमजालेन शिखामिव विभावसोः ॥ ३२ ॥
तां स्मृतीमिव संदिग्धामृद्धिं निपतितामिव । विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥ ३३ ॥
सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव । अभूतेनापवादेन कीर्तिं निपतितामिव ॥ ३४ ॥
रामोपरोधव्यथितां रक्षोगणनिपीडिताम् । अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ॥ ३५ ॥
बाष्पाम्बुपरिपूर्णेन कृष्णवक्त्राक्षिपक्ष्मणा । वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥ ३६ ॥
मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् । प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥ ३७ ॥
तस्य संदिदिहे बुद्धिस्तथा सीतां निरीक्ष्य च । आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥ ३८ ॥
दुःखेन बुबुधे सीतां हनुमाननलंकृताम् । संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥ ३९ ॥
तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् । तर्कयामास सीतेति कारणैरुपपादयन् ॥ ४० ॥
वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् । तान्याभरणजालानि गात्रशोभीन्यलक्षयत् ॥ ४१ ॥

रा० टी०—नियतां यतचित्तां तापसीमिव भूमौ आसीनां भुजगेन्द्रवधूमिव भीरुम् ॥ ३१ ॥

३२] ति० टी०—न राजतीमराजतीम् । विभावसोः शिखामिव पातिव्रत्यतेजसा ज्वलन्तीम् ॥ ३२ ॥

रा० टी०—विततेन विस्तृतेन महता शोकजालेन न राजतीम् ईषद्दीप्ताम् अत एव धूमजालेन संसक्तां संबद्धां विभावसोः अग्नेः शिखामिव ॥ ३२ ॥

३३] ति० टी०—स्मृतीमिवेति दीर्घ आर्षः । संदिग्धामर्थसंदेहवतीम् ऋद्धिमैश्वर्यम् निपतिताम् अन्यायवशादिति भावः । विहताम् नास्तिकबुद्ध्येति भावः । प्रतिहताम् स्वविषयालाभादिति भावः ॥ ३३ ॥

रा० टी०—संदिग्धाम् अर्थनिश्चयविषयकसंदेहविशिष्टां स्मृतीं स्मृतिमिव संदिग्धां शरीरस्थितिविषयकसंदेहविशिष्टां निपतितां भीत्या चौरादिभिः क्वचिन्निःक्षिप्ताम् ऋद्धिं मण्यादिसमूहमिव विहतां नास्तिकबुद्ध्या अनादृतां श्रद्धामिव प्रतिहतां लाभाभावान्निवृत्ताम् आशामिव ॥ ३३ ॥

३४] ति० टी०—सोपसर्गां सविघ्नाम् । सकलुषां रागद्वेषादिकालुष्यवतीम् । अभूतेनापवादेन केवलमारोपितेन कलङ्केन ॥ ३४ ॥

रा० टी०—सोपसर्गां विघ्नैः संयुक्तां सिद्धिमिव सकलुषां संशयादिना विशिष्टां बुद्धिमिव अभूतेन अजातेन अपवादेन मिथ्याभूतकलङ्केनेत्यर्थः, निपतितां कीर्तिमिव ॥ ३४ ॥

३५] ति० टी०—रामोपरोधो रामसेवाप्रतिबन्धः ॥३५॥

३६]ति०टी०—कृष्णानि वक्त्राणि चाक्षिपक्ष्माणि यत्र तेन३६

रा० टी०—रामोपरोधेन रामसेवानिरोधेन व्यथितां रक्षोगणनिपीडितां रक्षःसमूहवेदेशवासेन प्राप्तपीडाम् अत एव कृष्णवक्त्राक्षिपक्ष्मणा नेत्रेण ततस्ततो वीक्षमाणां पुनः पुनर्निःश्वसन्तीम् ॥ ३५ ॥ ३६ ॥

३७] ति० टी०—संस्कारस्नानराहित्यान्मलपङ्कधरत्वम् । त्वगादिमलरूपः पङ्कः । नक्षत्रराजश्चन्द्रः ॥ ३७ ॥

३८] ति० टी०—संदिदिहे प्रत्यभिज्ञाबाधकात्कार्श्यमालिन्यादितिरोहितरूपत्वात्संदेहः । आम्नायोऽभ्यासः ॥ ३८ ॥

रा० टी०—मलपङ्कधरां स्नानाभावादिनिष्पन्नमलरूपपङ्कयुतां मण्डनार्हां शोभायोग्याम् अमण्डितां वियोगेन शोभारहिताम् अत एव कालमेघैरावृतां नक्षत्रराजस्य चन्द्रमसः प्रभामिव आम्नायानाम् अभ्यासानाम् अयोगेन प्रशिथिलां विद्यामिव तां सीतां निरीक्ष्य तस्य हनुमतो बुद्धिः संदिदिहे । सार्धश्लोकदशकमेकान्वयि ॥ ३७ ॥ ३८ ॥

३९] ति० टी०—बाधकस्याकिंचित्करत्वमाह—दुःखेनेति । दुःखबोध्यत्वे हेतुः—अनलंकृतामिति । संस्कारेणेति स्नानानुलेपनादिरङ्गसंस्कारः । वाचो व्याकरणज्ञानादिजः संस्कारः । देव्या अर्थान्तरगतत्वं देशान्तरगतत्वम् । वाचस्तु विवक्षितार्थादन्यार्थबोधकत्वम् । वाचोऽर्थो यथा व्याकरणाद्यभ्यासदुःखेन व्युत्पत्तिं संपाद्य बुध्यते, तद्वत्सीतां कष्टेन बुबुधे ३९

रा० टी०—दुःखेनेति । संस्कारेण यथोचितस्नानादिरूपसंस्कृत्या हीनाम् अत एव अर्थान्तरं गतां वाचमिव अनलंकृतां सीतां दुःखेन बुबुधे ॥ ३९ ॥

गो० टी०—दुःखेनेति । संस्कारः शब्दव्युत्पत्तिः तेन हीनाम् अत एव विवक्षितार्थान्तरं गतां विपरीतार्थामित्यर्थः। संस्कारहीनतया प्रतिपिपादयिषितार्थं वक्तुमशक्नुवतीमिवविवक्षितमर्थं बोधयन्तीं वाचमिव । सम्यग्व्युत्पत्त्यभावादर्थान्तरं गतां व्युत्पत्त्यनन्तरं स्वार्थं प्रतिपादयन्तीमिव स्थितामित्यर्थः ॥ ३९ ॥ ४० ॥

४०] ति० टी०—कारणैरुपपादयन्सीतानिश्चयहेतुभिरुपपत्तिमन्तं संपादयन् ॥ ४० ॥

रा० टी०—तामिति । तां सीतां समीक्ष्य कारणैर्हेतुभिरुपपादयन् सन् इयं सीतेति तर्कयामास अनुमानेन निश्चयं चकार ॥ ४० ॥

४१] ति० टी०—इदानीं सीतात्वोपपादकमाह—वैदे-

१ हरणकशितामिति गो. पाठः । २ क्लिति गो. पाठः । ३ उपपादिभिरिति गो. पाठः । ४ शाखेति गो. पाठः ।

सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ । मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥ ४२ ॥
श्यामानि चिरयुक्तत्वात्तथा संस्थानवन्ति च । तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४३ ॥
तत्र यान्यवहीनानि तान्यहं नोपलक्षये । यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४४ ॥
पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम् । उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४५ ॥
भूषणानि च मुख्यानि दृष्टानि धरणीतले । अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ ४६ ॥
इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरम् । तथाप्येनूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ ४७ ॥

ह्या इति । तदा स्वप्रस्थानसमये । 'गात्रशोभीनि' इति पाठः कतकसंमतः । येष्वङ्गेषु यान्याभरणजालान्यकीर्तयत्तान्याभरणजालानि तत्तद्गात्रशोभीन्यलक्षयदिति प्रत्यभिज्ञाप्रामाण्यं सिद्धम् । तीर्थस्तु—'शाखाशोभीनि' इति पाठं प्रकल्प्य रामविश्लेषसमये भूषणधारणस्यानुचितत्वाद्वैदेह्या भूषणानि स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीति गम्यत इति व्याचख्यौ, तत्तूत्तरश्लोकयोर्हस्तेष्विति तथा श्यामानि चिरयुक्तत्वादिति पदस्वरसविरुद्धम् । किंचैवं तदङ्गे रामोक्ताभरणाभावादसीतात्वमेव स्यात् ॥ ४१ ॥

रा० टी०—तत्प्रकारमाह—वैदेह्या इति । तदा प्रस्थानसमये वैदेह्या अङ्गेषु यान्याभरणजालानि रामोऽन्वकीर्तयत् तानि गात्रशोभीनि अलक्षयत् अपश्यत् ॥ ४१ ॥

गो० टी०—वैदेह्या इति । शाखायां शोभन्त इति शाखाशोभीनि भर्तृविरहकाले भूषणधारणस्यानुचितत्वात् स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीत्यर्थः । कर्णवेष्टौ कुण्डले । 'कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनम्' इति सज्जनः । श्वदंष्ट्रः त्रिकर्णकाख्यः पुष्पाकारः कर्णपार्श्वभूषणविशेषः त्रिकर्णकः श्वदंष्ट्रश्चेत्यभिधानरत्नमाला । हस्तेषु हस्तावयवेषु श्यामानि विरहतापौष्ण्यवशाच्छ्यामीभूतानि । तथा चिरयुक्तत्वात् चिरभृतत्वात् संस्थानवन्ति हस्तेषु तत्तदाभरणसंस्थानानि दृश्यन्त इत्यर्थः ॥ ४१ ॥ ४२ ॥

४२] ति० टी०—अथ कस्मिन्गात्रे किमाभरणं दृश्यते तत्राह—सुकृताविति । सुकृतौ निर्मितौ कर्णवेष्टौ कुण्डले । श्वदंष्ट्रौ कर्णाभरणविशेषौ त्रिकर्णकापरनामानौ । सुसंस्थितौ कर्णरूपाङ्गे सुप्रतिष्ठितौ । उपलक्षये इति शेषः । हस्तेषु हस्तावयवेषु च यानि मणिविद्रुमचित्राण्याभरणानि रामेणोक्तानि तथैव सुस्थितान्युपलक्षये ॥ ४२ ॥

रा० टी०—आभरणान्येवाह—सुकृताविति । सुकृतौ निपुणतया निर्मितौ कर्णवेष्टौ कुण्डले श्वदंष्ट्रौ शुनां दंष्ट्राकृती कर्णाभरणविशेषौ च मणिविद्रुमैश्चित्राणि चिरयुक्तत्वात् श्यामानि तथासंस्थानवन्ति रामोक्तावयवविन्यासयुक्तानि हस्तेष्वाभरणानि एतानि सर्वाणि यानि रामोऽन्वकीर्तयत् तान्येव अहं मन्ये एतेन तद्युक्तत्वात्सीतैवेयमिति सूचितम् । श्लोकद्वयमेकान्वयि ॥ ४२ ॥ ४३ ॥

४३] ति० टी०—चिरयुक्तत्वाच्चिरकालमसंस्कृतदेहस्थितत्वेनासंस्कृतत्वात् श्यामान्यपि श्यामवर्णान्यपि तथासंस्थानवन्ति रामोक्तसंनिवेशवन्ति । यानि रामोऽन्वकीर्तयत्तान्येवेमानीति मन्ये ॥ ४३ ॥

गो० टी०—तान्येवेत्यर्धमेकं वाक्यम् ॥ ४३ ॥

४४] ति० टी०—इतोऽप्येवमित्याह—तत्रेति । रामोपदिष्टेषु यान्याभरणान्यवहीनानि पतितानि । ऋष्यमूकादावित्यर्थः ॥ ४४ ॥

रा० टी०—हेत्वन्तरमाह—तत्रेति । तत्र रामाज्ञापिताभरणेषु यानि अवहीनानि ऋष्यमूकादौ पतितान्यहं नोपलक्षये यानि न अवहीनानि तानि एव इमानि संशयः अत्र संदेहो न ॥४४॥

गो० टी०—तत्रेति । तत्र ऋश्यमूके यान्यवहीनानि पतितानि तान्यहं नोपलक्षये अत्रेति शेषः । अस्याः सीतायाः सकाशाद्यानि नावहीनानि न पतितानि तानीमानि तत्तुल्यत्वात् ॥ ४४ ॥

४५] ति० टी०—कानि त्यक्तानीति त्वयावगतानि तत्राह—पीतमिति । कनकपट्टाभत्वेन स्वर्णतन्तुमात्रनिष्पन्नत्वं तस्य सूच्यते । नगासक्तं वृक्षासक्तम् ॥ ४५ ॥

रा० टी०—अन्तरीयवस्त्रमात्रधारणमपि हेतुरिति बोधयन्नाह—पीतमिति । कनकपट्टस्याभा दीप्तिर्यस्मिन् तत्पीतमुत्तरीयं नगासक्तं वृक्षे संसक्तं प्लवङ्गमैर्वानरैस्तदा आसञ्जनसमये दृष्टम् ॥ ४५ ॥

गो० टी०—पीतमित्यादि । प्लवङ्गमैः सुग्रीवादिप्लवङ्गमैः यदुत्तरीयं दृष्टं यानि भूषणानि दृष्टानि तानि सर्वाण्यनयैव अपविद्धानि पातितानि । नगासक्तमित्यनेन पतनदशायामुत्तरीयाग्रं वृक्षे किञ्चित्सक्तमिति द्योत्यते ॥ ४५ ॥ ४६ ॥

४६] ति० टी०—ऋष्यमूके वस्त्रभूषणत्यागोऽप्यनयैव कृत इत्याह—अनयैवेति ॥ ४६ ॥

रा० टी०—भूषणानीति । अनयैव अपविद्धानि परिक्षिप्तानि भूषणानि दृष्टानि ॥ ४६ ॥

४७] ति० टी०—इदं वसनम् अन्तरीयवस्त्रमित्यर्थः । चिरभृतत्वात्क्लिष्टवत्तरं शयनादिना मृदितं तथापि तद्वर्णम् । स पीतो रागः । अनूनमप्रच्युतम् क्लीबत्वमार्षम् अर्धर्चादिर्वा वर्णशब्दः । तथा श्रीमच्छोभावत् । यथेतरत् अस्मद्गृहीतमुत्तरीयमित्यर्थः ॥ ४७ ॥

रा० टी०—इदमिति । यद्यपि चिरगृहीतत्वाद्वेतोरिदं

१ ऽपि नूनमिति गो. रा. पाठः ।

इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया । प्रनष्टापि सती यस्य मनसो न प्रणश्यति ॥ ४८ ॥
इयं सा यत्कृते रामश्चतुर्भिरिह तप्यते । कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ ४९ ॥
स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः । पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ५० ॥
तस्या देव्या यथारूपमङ्गप्रत्यङ्गसौष्ठवम् । रामस्य च यथारूपं तस्येयमसितेक्षणा ॥ ५१ ॥
अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् । तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥ ५२ ॥
दुष्करं कृतवान्रामो हीनो यदनया प्रभुः । धारयत्यात्मनो देहं न शोकेनावसीदति ॥ ५३ ॥
[दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् । सीतां विना महाबाहुर्मुहूर्तमपि जीवति ॥]

वसनं क्लिष्टवत्तरम् अतिबाधिताभं तथापि तद्वर्णं पीतवर्णविशिष्टं तथा श्रीमत् बह्वैश्वर्यलभ्यं यथा इदम् अन्तरीयं तथा इतरत् तद्वृक्षासक्तोत्तरीयमपि ॥ ४७ ॥

गो० टी०–इदमिति । इतरत् उत्सृष्टम् । तदुत्तरीयं यथा यादृशवर्णयुक्तं यथा श्रीमत् इदम् इदानीं धार्यमाणं तद्वर्णं तथा श्रीमत् नवमिति योजना ॥ ४७ ॥

४८] ति० टी०–एवं जातनिश्चय आह––इयमिति । प्रनष्टा दर्शनमप्राप्तापि यस्य रामस्य मनसस्तु न प्रणश्यति नादृष्टा भवति नित्यं संनिहिता भवतीत्यर्थः ॥ ४८ ॥

रा० टी०–इयमिति । प्रनष्टापि यस्य रामस्य मनसः सती महिषी न प्रणश्यति तस्य रामस्य सा प्रिया श्रिया इयमेव॥४८॥

गो० टी०–इयमिति । या रामस्य प्रिया सती महिषीति कृत्वा प्रनष्टापि अस्य रामस्य मनसः सकाशात् न प्रणश्यति सदा मनसा दृष्टा भवतीत्यर्थः । सा कनकवर्णाङ्गी इयम् मया परिदृश्यमानेत्यर्थः ॥ ४८ ॥

४९] ति० टी०–सेयमेव । के चत्वारस्तत्राह–कारुण्येनेति ॥ ४९ ॥

रा० टी०–इयमिति । चतुर्भिः कारुण्यादिभिर्यत्कृते यदर्थं रामस्तप्यते सा इयमेव ॥ ४९ ॥

गो० टी०–इयं सेति । रामः कारुण्यादिभिश्चतुर्भिः यत्कृते परितप्यते सेयम् । कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति–स्त्रीति । आपत्काले स्त्रियो रक्षणीयाः तत्र कृतमिति कारुण्यात्परितप्यते । आनृशंस्यमक्रूरत्वम् आश्रितसंरक्षणैकस्वभावत्वमिति यावत् । तस्मात् आश्रिता न रक्षितेति परितप्यते । अथो वा एष आत्मनो यत्पत्नीत्युक्तरीत्या आत्मार्धभूता पत्नी नष्टेति शोकेन परितप्यते । प्रिया नष्टेति मदनेन परितप्यत इति योजना ॥ ४९ ॥ ५० ॥

५०] ति० टी०–परितापहेतुकारुण्यादि स्वयमेव दर्शयति—स्त्रीति । प्रणष्टा परेण पीडिता मया च सती सा न रक्षिता । आपदि स्त्रियो रक्ष्या इत्युक्तेस्तदकरणकृतकारुण्यात्परितापः । वनं प्रस्थितमपि मामाश्रिता सा च न रक्षितेति आनृशंस्यत आश्रितसंरक्षणस्वभावत्वेन तदकरणात्परितापः । पत्नी सर्वधर्मसाधनभूता नष्टेति धर्मनाशचिन्ताशोकेन परितापः । प्रियेति परमरूपलावण्यादिमती परमसुखसाधनभूता नष्टेति पूर्वसंभोगादिस्मरणजमदनेन सर्वेसिद्धसर्वेन्द्रियपरितापः ॥ ५० ॥

रा० टी०–कारुण्यादीनि यथाविभागं हेतुत्वेन प्रकल्प्याह–स्त्रीति । स्त्री आपत्काले संरक्षणीयकान्ता प्रनष्टा इतिहेतोः कारुण्यात्, आश्रिता प्रनष्टा इत्यानृशंस्यतः क्रूरत्वापवादात्, पत्नी नित्यसंयोगवतीत्वेन सकलधर्महेतुभूता प्रनष्टेति शोकेन च प्रिया प्रनष्टेति मदनेन च संतप्तोऽभवदिति शेषः ॥ ५० ॥

५१] ति० टी०–अस्या यथा रूपादि तथा रामस्य, यथा रामस्य रूपादि तथास्या अपि, अतः सोऽस्या योग्यः, इयं च तस्य योग्येत्यर्थः अनेनोभयोरन्योन्यमानुरूप्यं दर्शितम् ॥ ५१ ॥

रा० टी०–अस्या इति । अस्याः यथा रूपादि तथा तस्य रामस्यास्तीति शेषः । यथा रामस्य रूपादि तथा अस्या अस्ति अनयोरेव परस्परं सादृश्यमस्तीत्यर्थः अत इयं रामस्यैव ॥ ५१ ॥

गो० टी०–अथानयोरन्योन्याभिरूप्यानुगुण्यमाह–अस्या इति । अस्याः सीतायाः रूपं शरीरम् अङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधम् तथाविधमेव रामस्यापि रूपम् अङ्गप्रत्यङ्गसौष्ठवं च । तथा रामस्य रूपमङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधम् तथाविधमेवास्या रूपमङ्गप्रत्यङ्गसौष्ठवं च अतः इयमसितेक्षणा तस्य योग्येति शेषः ॥ ५१ ॥

५२] ति० टी०–अथान्योन्यानुरागमाह–अस्या देव्या इति । येनास्याश्चित्तं रामे सक्तं तस्य चास्यां तेनेयं स च जीवति । चित्तसंनिधानेन वियोगाभावादिति भावः । मुहूर्तमपीत्यस्यान्यथेत्यादिः––न जीवेदिति च शेषः ॥ ५२ ॥

रा० टी०–अस्या इति । अस्याः मनः तस्मिन् रामे तस्य रामस्य च मनः अस्यां तेन हेतुना इयं स च जीवति मुहूर्तमपि अन्यथा न जीवेदित्यर्थः ॥ ५२ ॥

गो० टी०–तथाऽनयोरन्योन्यस्यानुरागमाह–अस्या इति । अस्या देव्या मनस्तस्मिन्रामे प्रतिष्ठितम् तेन हेतुना इयं मुहूर्तमपि जीवति । तस्य च मनोऽस्यां प्रतिष्ठितं तेन कारणेन स मुहूर्तमपि जीवति । तयोरन्योन्यमनोनिवेशनाभावे मुहूर्तजीवनमपि न घटत इति भावः ॥ ५२ ॥

५३] ति० टी०–दुष्करमिति । अत्र तेनेति वर्तते ।

१ याऽस्येति गो० पाठः । २ परितप्यत इति गो. पाठः । ३ श्लोकोऽयमधिकः गो. पाठे ।

एवं सीतां तथा दृष्ट्वा हृष्टः पवनसंभवः । जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।

सीतायाः शुभशीललक्षणादि प्रशंसन्हनुमान्यस्याः कृते खरविराधादयो हताः सेयमप्येतादृशीं दुरवस्थामनुभवतीति परिशोचति ।

प्रशस्य तु प्रशस्तव्यां सीतां तां हरिपुङ्गवः । गुणाभिरामं रामं च पुनश्चिन्तापरोऽभवत् ॥ १ ॥
स मुहूर्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः । सीतामाश्रित्य तेजस्वी हनूमान्विललाप ह ॥ २ ॥
मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया । यदि सीता [2]हि दुःखार्ता कालो हि दुरतिक्रमः ॥ ३ ॥

तेन चित्तसंनिधानेन । दुष्करं किं कृतवांस्तत्राह—धारयतीति । वर्तमानसामीप्ये लट् दधारेत्यर्थः ॥ ५३ ॥

रा० टी०—दुष्करमिति । अनया हीनः रामः आत्मनो देहं धारयति शोकेन च न अवसीदति सर्वविस्मारकखेदं प्राप्नोति तत् दुष्करं कृतवान् ॥ ५३ ॥

गो० टी०—माल्यवति शैले रामस्य सीताविरहक्लेशातिशयं निशाम्य हन्त वसिष्ठशिष्यः कस्याश्चित् स्त्रियाः कृते कथमेवमभूदिति विनिन्द्य परिहसितवान् स्वयं विरक्ततया संप्रत्यस्या वैलक्षण्यातिशयदर्शनेन विशेषज्ञतया एतद्विरहे रामस्य देहधारणं सर्वात्मना अशक्यमित्याह—दुष्करमिति । दुष्करं कृतवान् रामः इमां विधुज्य समाधानपरो रामः प्रकाममशक्यं कृत्यमकरोत् । हीनो यदनया प्रभुः अनया विना देहं धृत्वाऽवस्थित इति यत्तदत्यन्तमशक्यम् । प्रभुः गजाश्वादिकं शिक्षयितुं राज्यं पालयितुं च जानाति । न प्रणयधारायां प्रथमांशमपि श्रुतवान् । धारयत्यात्मनो देहम् । किमिदं याचितकं शरीरं धारयति स्वस्येव हि देहोऽयं देहं भोगायतनं हीदं न दुःखायतनम् "दिह, उपचये" इत्यस्माद्धातोः "इगुपध—" इत्यादिना कः तेनायमर्थो लभ्यते । सीताशरीरस्य परतन्त्रतया तत्त्यक्तुमयुक्तं नतु स्वाधीनशरीरस्य धारणं युक्तमिति भावः । विशेषज्ञेनापि कथमिदं त्यक्तुं शक्यं तत्राह—न शोकेनावसीदति ॥ ५३ ॥

५४] ति० टी०—सीतामेवमेवंगुणां तथा मलिनवासःसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपातिव्रत्यधर्मवतीं दृष्ट्वा हृष्टः सन्रामं सस्मार, स्मृतं च तं प्रशशंस । एवं पातिव्रत्यगुणवत्पत्नीलाभेन भाग्योत्तरो रामः । ईदृश्या वियोगेनेदृशी पीडा, ईदृशीप्राप्तय उद्यमश्लोचित एवेति । चात्सीतां च प्रशशंस । बलवता भव्येन प्रभुणा हृताऽपि यैवं पातिव्रत्यात्तदेवैव सर्वोत्तमेत्येवं प्रशशंस ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०—एवमिति । तदा तस्मिन् काले एवं सीतां दृष्ट्वा हृष्टः पवनसंभवः रामं मनसा जगाम प्रशशंस च ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो० टी०—उक्तमर्थं किञ्चिद्विशेषान्तरेण दर्शयति—दुष्करं कुरुत इति ॥ ५४ ॥

गो० टी०—एवमिति । एवं दृष्ट्वा मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपतिव्रताधर्मयुक्तां सीतां दृष्ट्वा हृष्टः सन् मनसा रामं जगाम सस्मार तं प्रभुं बुद्धिस्थं रामं प्रशशंस च । पुनः प्राप्त्युपयुक्तपतिव्रताधर्मनिष्ठत्वदर्शनात् भाग्योत्तरो राम इत्यस्तौषीत् । यद्वा एतादृशसौन्दर्यवतीं सीतां दृष्ट्वा एतद्विरहितस्य महान् शोकः प्राप्तः अतः युक्तमेव कृतवान् राम इत्यस्तौषीत् ॥ ५५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

१] ति० टी०—सीतां प्रशस्य प्रशंसा च प्रागुक्तरूपा । चिन्तापरः सीताविषयदुःखेनेति भावः ॥ १ ॥

रा० टी०—हनुमत्कर्तृकरामप्र[illegible]—प्रशस्येति । हरिपुङ्गवो हनूमान् सीतां प्रशस्य गुणैरभिरामं रामं संस्मृत्य चिन्तापरोऽभवत् ॥ १ ॥

गो० टी०—प्रशस्य त्वित्यादि । प्रशस्तव्यां प्रशंसितव्याम् रामं सीतां च । प्रशस्येति अस्या देव्या इत्यादिनोभयोरपि प्रशंसितत्वात् ॥ १ ॥

२] ति० टी०—सीतामाश्रित्य सीताम्उद्दिश्य ॥ २ ॥

रा० टी०—स इति । स हनुमान् मुहूर्तं ध्यात्वा सीतां सीतादुःखमाश्रित्यावलोक्य विललाप विविधमुवाच ॥ २ ॥

गो०टी०—स इति । सीतामाश्रित्य सीतां विषयीकृत्य॥२॥

३] ति० टी०—गुरुभिर्विनीतस्य शिक्षितस्य लक्ष्मणस्य गुरुप्रिया गुरो रामस्य पत्नीत्वात् । तद्वदेव परमोपास्यत्वेनाभीष्टा सीताऽयोनिजा निःसीमपातिव्रत्या रामपत्न्यपि यदि दुःखार्ता दुःखपीडिता, तर्हि कालो दुरतिक्रम इति हि निश्चि-

---

१ तदेति गो. पाठः । २ ऽपीति गो. पाठः ।

रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः । नात्यर्थं क्षुभ्यते देवी गङ्गेव जलदागमे ॥ ४ ॥
तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् । राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥ ५ ॥
तां दृष्ट्वा नवहेमाभां लोककान्तामिव श्रियम् । जगाम मनसा रामं वचनं चेदमब्रवीत् ॥ ६ ॥
अस्या हेतोर्विशालाक्ष्या हतो वाली महाबलः । रावणप्रतिमो वीर्ये कबन्धश्च निपातितः ॥ ७ ॥

तमित्यर्थः । दुःखोपायघटकत्वस्य काल एव प्रसिद्धत्वादिति भावः । ननु न दुःखं सुखं वा कालमात्रजन्यम्, कर्मानुष्ठानवैफल्यापत्तेः । तत्सापेक्षकालजन्यत्वेऽपीश्वरावतारसीतारामयोः कर्माभावात्कथं दुःखमिति चेन्न । वस्तुतस्तु तयोर्दुःखाभावेऽपि लोकानुग्रहाय गृहीतमनुष्यदेहयोस्तेषां मनुष्यत्वाभावबुद्धिप्रतिबन्धाय नटवद्व्यवहारमभिनयतोः सुखदुःखादिकालिकसुखविकासाद्यभिनयेन तन्मायामोहितस्यैव देवांशस्य हनूमतोऽभिनीतकार्यदर्शनेन तत्कारणानुमानाद्दुःखार्तत्वाद्युक्तेः सामञ्जस्यात् । यथा च परेणोद्बोधनं विना हनूमतः स्वबलपराक्रमांशे मोहः, तथानयोर्भगवत्स्वरूपत्वे इदानीं तस्य मोह इति वक्तुं शक्यत्वात् पश्चात्तु भगवदिच्छयैव तस्य तयोः स्वरूपज्ञानेऽपि न किंचिदवद्यम् ॥ ३ ॥

रा० टी०—तदाकारमाह—मान्येति । गुरुभिर्विनीतस्य शिक्षितस्य लक्ष्मणस्य गुरुप्रिया गुरोः रामस्य प्रिया सीता यदि दुःखार्ता तर्हि कालः परमात्मसंकेतः दुरतिक्रमः अतिक्रमितुमशक्यः ॥ ३ ॥

गो० टी०—मान्येति । गुरुविनीतस्य गुरुभिः शिक्षितस्य । गुरुप्रिया रामप्रिया । कालो हि दुरतिक्रमः कालो दुरतिक्रम एवेत्ययमर्थः सिद्धो भवतीत्यर्थः । हिशब्दोऽवधारणे अव्ययानामनेकार्थत्वात् । जगद्रक्षकरामलक्ष्मणगुप्तायाः सीतायाः अपि यदीदृशं दुःखं प्राप्तं तदा कालो दुरतिक्रम एवेति भावः ॥ ३ ॥

४] ति० टी०—नन्वेवंविधदुःखातिशये जीवनहानिरेव स्यादत आह—रामस्येति । सलक्ष्मणो राम एवंविधे दुर्गे स्थितामपि मां दिव्यास्त्रैः समुद्रमपि येनकेनाप्युपायेनोल्लङ्घ्यागत्यात्रायास्यतीति तस्य व्यवसायज्ञा पराक्रमज्ञा सती नात्यन्तं क्षुभ्यते नैराश्यमूलकं प्राणत्यागसंपादकं क्षोभं न प्राप्नोतीत्यर्थः । जलदागमे वर्षाकालेऽपि गङ्गा यथेतरक्षुद्रनदीवदुर्धरवेगं न प्राप्नोति तद्वत् ॥ ४ ॥

रा० टी०—रामस्येति । देवी सीता यतो रामस्य लक्ष्मणस्य च व्यवसायज्ञा अनिवार्यपराक्रमविज्ञात्री अतोऽत्यर्थमत्यन्तं न क्षुभ्यते । तत्र दृष्टान्तः जलदागमे वर्षतौ गङ्गा प्रयागस्थजाह्नवीव ॥ ४ ॥

गो० टी०—रामस्येति । व्यवसायज्ञा स्वयत्नं विहाय तद्व्यवसायमेव प्रेक्षमाणा एतद्व्रतं मम अप्यहं जीवितं जह्यामित्येवं रामव्यवसायं जानन्तीत्यर्थः । लक्ष्मणस्य च धीमतः । रामे मायामृगानुसारिण्यपि मारीचोऽयमिति तदानीमपि निश्चितवतो लक्ष्मणस्य । यद्वा । सर्वेश्वरादप्याश्रितसंरक्षणे समुद्युक्तस्य । नात्यर्थं क्षुभ्यते । अत्यर्थमिति क्षोभाभावविशेषणं क्षोभविशेषणत्वे यत्किंचित्क्षोभः प्राप्तः स्यात् । सत्तानाशकाले प्राप्तेऽपि क्षोभलेशरहितेत्यर्थः । देवी रामेण शिरसा वोढव्यवाल्लभ्यवती । गङ्गेव जलदागमे क्षोभहेतौ सत्यपि यथा गङ्गा न क्षुभ्यते तथेत्यर्थः ॥ ४ ॥

५] ति० टी०—तुल्यशीलवयोवृत्तां रामतुल्यस्वभाववयश्चारित्राम् अभिजनः कुलम् । लक्षणं सामुद्रिकोक्तम्, अत एव सीताया रामस्य पुरुषान्तरे रुयन्तरे चाप्रवृत्तिः स्वभावमूलेति सूचितम् ॥ ५ ॥

रा० टी०—तुल्येति । तुल्यानि रामशीलादिसदृशानि शीलं वयश्च वृत्तमाचरणं च यस्याः तुल्ये अभिजनः कुलं लक्षणं सामुद्रिकोक्तसुलक्षम यस्याः तां वैदेहीं राघव एवार्हति अत एव इयं वैदेही एव तं राघवमर्हति ॥ ५ ॥

गो० टी०—तुल्येति । तुल्यशीलवयोवृत्तां शीलं स्वभावः । अस्या देव्या मनस्तस्मिँस्तस्य चास्यां प्रतिष्ठितमिति प्रक्रियया तुल्यस्वभावां तुल्यवयस्कां षोडशवार्षिकस्य द्वादशवार्षिकी तुल्या अन्यथा वैरस्यापत्तेः शास्त्रविरोधाच्च । अत एव विष्णुः—'वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणो वरः । व्यष्टवर्षोऽष्टवर्षां वा वयोमात्रावरा च या ॥' इति तुल्यवृत्ताम् । दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितमिति रामवृत्तम् । 'पापानां वा शुभानां वा वधार्हाणां द्रवङ्गम । कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥' इत्युक्तवत्याः सीताया वृत्तेन तुल्यम् तुल्यशब्दोऽनुरूपपरः । रामानुरूपशीलवयश्चारित्रामित्यर्थः । तुल्याभिजनलक्षणाम् अभिजनः कुलं लक्षणं सामुद्रिकं सार्वभौमलक्षणवतो भार्यया यैः सामुद्रिकलक्षणैर्भाव्यं तैर्युक्तामित्यर्थः । एवंविधत्वाद्राघवो वैदेहीमर्हति वैदेही राघवमर्हति । लोके सौन्दर्यादिमतः सौन्दर्यादिसर्वसहिता न लभ्यते । सौन्दर्यादिमत्या न सौन्दर्यादिसर्ववान् अनयोस्तु सर्वं संपन्नमिति विस्मयते । असितेक्षणेत्यधिकविशेषणदानाद्रामापेक्षया सीताया नयनसौन्दर्यमधिकमित्युच्यते । अत एव रामो वक्ष्यति । न जीवेयं क्षणमपि विना तामसितेक्षणामिति ॥ ५ ॥ ६ ॥

६] ति० टी०—मनसा रामं जगाम अस्याः स एवानुरूप इति सस्मारेत्यर्थः । नवहेमाभाम् नवां तरुणीं हेमाभां चेत्यर्थः ॥ ६

रा० टी०—तामिति । लोकः कान्तः शोभावान् यया यत्कान्त्यैव सर्वः प्रकाशते इत्यर्थः, तां श्रियमिव नवहेमाभां तां सीतां दृष्ट्वा मनसा रामं जगाम इदमब्रवीच्च ॥ ६ ॥

७] ति० टी०—अस्या हेतोः सर्वात्मना स्वसदृश्याः प्राप्त्यर्थमित्यर्थः ॥ ७ ॥

विराधश्च हतः संख्ये राक्षसो भीमविक्रमः । वने रामेण विक्रम्य महेन्द्रेणेव शम्बरः ॥ ८ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ ९ ॥
खरश्च निहतः संख्ये त्रिशिराश्च निपातितः । दूषणश्च महातेजा रामेण विदितात्मना ॥ १० ॥
ऐश्वर्यं वानराणां च दुर्लभं वालिपालितम् । अस्या निमित्ते सुग्रीवः प्राप्तवाँल्लोकविश्रुतः ॥ ११ ॥
सागरश्च मयाक्रान्तः श्रीमान्नदनदीपतिः । अस्या हेतोर्विशालाक्ष्याः पुरी चेयं निरीक्षिता ॥ १२ ॥
यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् । अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ॥ १३ ॥
राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा । त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलाम् ॥ १४ ॥
इयं सा धर्मशीलस्य जनकस्य महात्मनः । सुता मैथिलराजस्य सीता भर्तृदृढव्रता ॥ १५ ॥
उत्थिता मेदिनीं भित्त्वा क्षेत्रे हलमुखक्षते । पद्मरेणुनिभैः कीर्णा शुभैः केदारपांसुभिः ॥ १६ ॥
विक्रान्तस्यार्यशीलस्य संयुगेष्वनिवर्तिनः । स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी ॥ १७ ॥
धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः । इयं सा दयिता भार्या राक्षसीवशमागता ॥ १८ ॥

रा० टी०–तद्वचनाकारमाह—अस्या इत्यादिभिः अस्याः हेतोर्वाली हतः वीर्ये रावणप्रतिमो रावणसदृशः कबन्धश्च निपातितः ॥ ७ ॥

गो० टी०–अस्या हेतोरिति । "सर्वनाम्नस्तृतीया च" इति षष्ठी अनया हेतुनेत्यर्थः ॥ ७–१० ॥

८–१० [ति० टी०–दूषणान्तरक्षोनिपातश्चैतदासक्त्या शूर्पणखानिरासमूलत्वादन्वेषणप्रतिबन्धसंभावनामूलकत्वाच्चैतन्मूल एव । शम्बरोऽयं प्रद्युम्नहतान्य एव महेन्द्रपदेन तत्तुल्यप्रद्युम्ने लक्षणा वा ॥ ८–१० ॥

रा० टी०–विराध्र इति । महेन्द्रेण शम्बर इव विराधश्च हतः अस्या हेतोरित्यनुकृष्यते एवमुत्तरेष्वपि ॥ ८ ॥

रा० टी०–चतुरिति । रक्षसां चतुर्दश सहस्राणि निहतानि ॥ ९ ॥

रा० टी०–खर इति । खरादिर्निहतः ॥ १० ॥

११–१२] ति० टी०–अस्या निमित्ते सप्तम्यर्थे षष्ठी । अस्यां निमित्तभूतायां सत्यामित्यर्थ इति तीर्थः ॥ ११ ॥ १२ ॥

रा० टी०–ऐश्वर्यमिति । वालिपालितम् अत एव दुर्लभम् अन्यैरलभ्यं वानराणामैश्वर्यं वानरनिरूपितेश्वरत्वम् अस्या निमित्ते सुग्रीवः प्राप्तवान् ॥ ११ ॥

रा० टी०–सागर इति । निरीक्षिताऽवलोकिता ॥ १२ ॥

गो० टी०–ऐश्वर्यमिति । अस्या निमित्ते "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति षष्ठी सप्तम्यर्थे । अस्यां निमित्ते सत्यामित्यर्थः ॥ ११ ॥ १२ ॥

१३] ति० टी०–परिवर्तयेदधरोत्तरं कुर्यात् । संहरेदिति यावत् ॥ १३ ॥

रा० टी०–यदीति । अस्याः कृते प्राप्तये समुद्रान्तां मेदिनीं जगत् त्रिलोकीं वा परिवर्तयेत् भ्रामयेत् तर्हि युक्तमेव इति मे मतिर्निश्चयः ॥ १३ ॥

गो० टी०–यदीति । परिवर्तयेत् अधरोत्तरां कुर्यात् । अस्याः कृते एतदर्थम् । जगच्चापि न केवलं मेदिनीं सर्वलोकानपि परिवर्तयेदित्यर्थः ॥ १३ ॥

१४] ति० टी०–एवं मतेर्युक्तत्वमुपपादयति—राज्यं वेति । त्रैलोक्यराज्यसीताप्राप्त्योः कतरदुत्कृष्टमिति विचारे आद्यं द्वितीयकोटिशतांशेन सादृश्यमपि नार्हतीत्यर्थः ॥ १४ ॥

रा० टी०–तत्र हेतुमाह—राज्यमिति । त्रिषु लोकेषु राज्यमधिकमिति शेषः, सीता वाऽधिकेति विचार्यमाणे सतीति शेषः, सकलं त्रैलोक्यराज्यं सीतायाः कलां षोडशांशमपि नाप्नुयात् ॥ १४ ॥

गो० टी०–राज्यं वेति । राज्यमुत्कृष्टं वा सीता उत्कृष्टा वा इति विचार्यमाण इति शेषः । कलां लेशम् ॥ १४ ॥

१५–१६] ति०टी०–आधिक्यमेवोपपादयति–इयमिति । अनेन कुलम्, भर्तृदृढव्रतेत्यनेन चारित्र्यातिशयः । मेदिनीं भित्त्वेत्यनेनायोनिजतयाऽमानुषदिव्यरूपत्वं दर्शितम् ॥ १५ ॥ १६ ॥

रा० टी०–इयमिति । भर्तृदृढव्रतेयं सीता हलमुखेन क्षते आकृष्टे क्षेत्रे मेदिनीं भित्त्वा पद्मरेणुनिभैः केदारपांसुभिः कीर्णा व्याप्ता सती उत्थिता । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०–इयमिति । भर्तृदृढव्रता भर्तरि दृढव्रता । केदारपांसुभिः यज्ञक्षेत्रपांसुभिः ॥ १५ ॥ १६ ॥

१७] ति० टी०–आर्यशीलस्य पूज्यशीलस्य । अनेन महाकुलीनपाणिग्रहणं दर्शितम् ॥ १७ ॥

१८] ति० टी०–यच्छेषतयैवं प्राशस्त्यं दर्शितं तस्य कालस्य दुरतिक्रमत्वमाह—इयं सेति । राक्षसीवशमागता कालप्राबल्यादिति भावः । 'फलमत उपपत्तेः' इति व्याससूत्रेणापि कालात्मनो भगवत एव कर्मफलप्रापणसामर्थ्यं दर्शितम् ॥ १८ ॥

रा० टी०–विक्रान्तस्येति । विक्रान्तस्य अतिपराक्रम-

१ सत्कृतामिति गो. पाठः ।

सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता । अचिन्तयित्वा कष्टानि प्रविष्टा निर्जनं वनम् ॥ १९ ॥
संतुष्टा फलमूलेन भर्तुश्शुश्रूषणापरा[1] । या परां भजते प्रीतिं वनेऽपि भवने यथा ॥ २० ॥
सेयं कनकवर्णाङ्गी नित्यं सुस्मितभाषिणी । सहते यातनामेतामनर्थानामभागिनी ॥ २१ ॥
इमां तु शीलसंपन्नां द्रष्टुमिच्छति राघवः । रावणेन प्रमथितां प्रपामिव पिपासितः ॥ २२ ॥
अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति । राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीम् ॥ २३ ॥
कामभोगैः परित्यक्ता हीना बन्धुजनेन च । धारयत्यात्मनो देहं तत्समागमकाङ्क्षिणी ॥ २४ ॥
नैषा पश्यति राक्षस्यो नेमान्पुष्पफलद्रुमान् । एकस्थहृदया नूनं राममेवानुपश्यति ॥ २५ ॥
भर्ता नाम परं नार्याः भूषणं[3] शोभनं भूषणादपि । एषा हि रहिता तेन शोभनार्हा[4] न शोभते ॥ २६ ॥

विशिष्टस्य आर्यशीलस्य क्षत्रियपरमधर्मप्रवृत्तिस्वभावस्य अत एव संयुगेषु संग्रामेषु अनिवर्तिनो दशरथस्य एषा ज्येष्ठा स्नुषा धर्मज्ञस्य रामस्य दयिता अतिप्रिया भार्या इयं सीता राक्षसीवशम् आगता प्राप्ता । श्लोकद्वयमेकान्वयि ॥१७॥१८॥

गो० टी०–विक्रान्तस्येति । आर्यशीलस्य श्रेष्ठस्वभावस्य ॥ १७ ॥ १८ ॥

१९] ति० टी०–भर्तृस्नेहबलात्कृता बलात्प्रवर्तिता॥१९॥

रा० टी०–सर्वानिति । भर्तृस्नेहबलात् सर्वान् भोगान् परित्यज्य कष्टानि अचिन्तयित्वा च कृता सहगमनविषयकप्रयत्नवती सीता वनं प्रविष्टा ॥ १९ ॥

गो० टी०–सर्वानिति । सर्वान् भोगान् भुज्यन्ते इति भोगाः शुकसारिकाकन्तुकप्रभृतिभोगसाधनानि मातृप्रभृतींश्च परित्यज्य परि विशेषेण पुनस्तत्राशालेशं विनैव त्यक्त्वा । अयं च परित्यागो न स्ववशेनेत्याह—भर्तृस्नेहबलात्कृता । अभिमतविषयस्नेहातिरेकस्तदितरमखिलमपि त्याजयति हि । त्यक्तेषु स्मरणाभावेऽपि गन्तव्यदेशीयदुःखं वा किं स्मरति नेत्याह—अचिन्तयित्वा दुःखानि । रामातिरिक्तवस्त्वनुभवे हि दुःखानुभवसंभावनेति भावः । प्रविष्टा निर्जनं वनम् भोगस्यैकान्तस्थलमिति ह्यस्या हृदि लग्नमिति भावः । यातनां तीव्रवेदनाम् । अनर्थानामभागिनी आपदामनर्हेत्यर्थः ॥ १९–२१ ॥

२०] ति० टी०–भर्तृशुश्रूषणापरा । सन्नन्तात्स्वार्थे णिचि "व्यासश्रन्थ–" इति युच् ॥ २० ॥

२१] ति० टी०–पूर्ववदेवाह—सेयमिति । यातनां राक्षसीभिः संपाद्यमानतीव्रदुःखम् । अनर्थानामापदाम् ॥२१॥

रा० टी०–संतुष्टेति । भर्तृशुश्रूषणापरा पतिशुश्रूषणे निरता या सीता भवने इव वनेऽपि परां प्रीतिं भजते अनर्थानां दुःखानाम् अभागिनी प्राप्त्ययोग्येत्यर्थः सेयं सीता एतां यातनां सहते । शुश्रूषणेति युजन्तम् । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

२२–२३] ति० टी०–शीलसंपन्नामीदृशदुःखेऽपि चारित्र्यप्रच्यवरहिताम् । प्रमथितां प्रमथितामपि । प्रपा पानीयशाला ॥ २२ ॥ २३ ॥

रा० टी०–इमामिति । रावणेन प्रमथितां हिंसितप्रायाम् इमां सीतां पिपासितः प्रपामिव राघवो द्रष्टुमिच्छति ॥ २२ ॥

रा० टी०–अस्या इति । मेदिनीं पृथ्वीं पुनः प्राप्य राज्यपरिभ्रष्टः राजा इव अस्याः सीतायाः लाभात् राघवः प्रीतिमेष्यति प्राप्स्यति ॥ २३ ॥

गो० टी०–इमामिति । प्रपां पानीयशालिकाम् ' प्रपा पानीयशालिका ' इत्यमरः ॥ २२ ॥ २३ ॥

२४] ति० टी०–काम्यन्त इति कामाः, भुज्यन्त इति भोगाः स्रक्चन्दनादयः, तैस्त्यक्ता तत्समागमकाङ्क्षिणी । 'एति जीवन्तमानन्दो नरं वर्षशतादपि' इति न्यायेनेति भावः ॥२४॥

रा० टी०–कामेति । कामभोगैः परित्यक्ता सीता तत्समागमकाङ्क्षिणी रामसमागमविषयकोत्कटेच्छावती सती आत्मनो देहं धारयति ॥ २४ ॥

गो० टी०–कामेति । काम्यन्त इति कामाः ते च ते भोगाश्च स्रक्चन्दनादयः तैः ॥ २४ ॥

२५] ति० टी०–राक्षस्यः राक्षसीरित्यर्थः । एकस्मिन्लक्ष्ये तिष्ठति तादृशं हृदयं यस्याः सा । किं तदेकं लक्ष्यं तत्राह—नूनं राममेवेति ॥ २५ ॥

रा० टी०–नेति । एकस्थहृदया एषा सीता राममेवानुपश्यति अतः राक्षस्यो राक्षसीः पुष्पफलद्रुमांश्च न पश्यति २५

गो० टी०–नैषेति । नैषा पश्यति राक्षस्यः राक्षसीर्न पश्यति नेमान् पुष्पफलद्रुमान् रामविरहक्लेशातिशयेन राक्षसीदर्शनवत्पुष्पफलवतां द्रुमाणामपि दर्शनमस्या असह्यमित्यर्थः । एकस्थहृदया एकाग्रचित्ता राममेवानुपश्यति ध्यायतीत्यर्थः रामागमनसंभावनावती दिशोऽवलोकयतीति वार्थः । यद्वा इंगेरन्तरेण रामानुभवेन परिसरवर्ती कोऽपि पदार्थो न दृष्टिपथं गच्छतीत्यर्थः ॥ २५–२७ ॥

२६] ति० टी०–राममेवेत्यत्र बीजमाह–भर्ता नामेति । शोभनं शोभा ॥ २६ ॥

रा० टी०–भर्तेति । भर्ता भूषणादप्यधिकं भार्याशोभनं स्त्रीशोभाहेतुः अतः शोभनार्होऽपि एषा सीता तेन रामेण रहिता सती न शोभते ॥ २६ ॥

---

१ दुःखानीति गो. पाठः । २ शुश्रूषणे रतेति गो. पाठः । ३ भूषणमिति गो. पाठः । ४ भूषणार्हेति गो. पाठः ।

दुष्करं कुरुते रामो हीनो यदनया प्रभुः । धारयत्यात्मनो देहं न दुःखेनावसीदति ॥ २७ ॥
इमामसितकेशान्तां शतपत्रनिभेक्षणाम् । सुखार्हां दुःखितां ज्ञात्वा ममापि व्यथितं मनः ॥ २८ ॥
क्षितिक्षमा पुष्करसंनिभेक्षणा या रक्षिता राघवलक्ष्मणाभ्याम् ।
सा राक्षसीभिर्विकृतेक्षणाभिः संरक्ष्यते संप्रति वृक्षमूले ॥ २९ ॥
हिमहतनलिनीव नष्टशोभा व्यसनपरम्परया निपीड्यमाना ।
सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना ॥ ३० ॥
अस्या हि पुष्पावनताग्रशाखाः शोकं दृढं वै जनयन्त्यशोकाः ।
हिमव्यपायेन च शीतरश्मिरभ्युत्थितो नैकसहस्ररश्मिः ॥ ३१ ॥
इत्येवमर्थं कपिरन्ववेक्ष्य सीतेयमित्येव तु जातबुद्धिः ।
संश्रित्य तस्मिन्निषसाद वृक्षे बली हरीणामृषभस्तरस्वी ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षोडशः सर्गः ॥ १६ ॥

२७] ति० टी०–एतदेकहृदयत्वज्ञानादेव रामः प्रभुर्यज्जीवनरूपं दुःखेनावसादनाभावरूपं च दुष्करं कुरुते ॥ २७ ॥

रा० टी०–दुष्करमिति । अनया हीनो रामः यदात्मनो देहं धारयति दुःखेन अवसीदति च न तत् दुष्करं कुरुते ॥२७॥

२८] ति० टी०–ममापि तिर्यग्योनेरपि विषयानभिज्ञस्यापि ॥ २८ ॥

रा० टी०–इमामिति । आसिताः कृष्णाः केशाः यस्याः तां, तां प्रसिद्धां इमां दुःखितां ज्ञात्वा ममापि मनो व्यथितम् ॥२८॥

गो० टी०–इमामिति ! आसतः कशान्तः यस्यास्तां केशानामग्रे नैल्यं स्त्रीणां दुर्लभम् । अतस्तदेवाह—असितकेशान्तां गुडालकाद्वृतस्यापि व्यामोहकरीम् । शतपत्रनिभेक्षणां यद्यपीयमसितेक्षणा तथापि संस्थानविशेषे उपमेयं कमलपत्राक्षस्यापि व्यामोहदायिनीम् । सुखार्हां रामोत्सङ्गे स्थातुमर्हाम् । दुःखितां राक्षसीमध्ये स्थितां दृष्ट्वा ममापि व्यथितं मनः शाखामृगस्य ममापि मनो व्यथितं किमुत परमदयालो रामस्येति भावः । शोकहर्षयोरपदस्य ममापि मनो व्यथितं किं पुनः कामिन इति वा ॥ २८ ॥ २९ ॥

२९] ति० टी०–क्षितितुल्या क्षमा यस्याः सा । दृष्टिमात्रेण रावणस्याभस्मीकरणात् । संरक्ष्यते परैरनपहाराय गोप्यत इत्यर्थः ॥ २९ ॥

रा० टी०–क्षितीति । क्षितेरिव क्षमा यस्याः सा या सीता राघवलक्ष्मणाभ्यां रक्षिता सा सीता विकृतेक्षणाभिः राक्षसीभिः वृक्षमूले संरक्ष्यते ॥ २९ ॥

३०] ति० टी०–कृपणां शोच्याम् ॥ ३० ॥

रा० टी०–हिमेति । व्यसनस्य दुःखस्य परम्परया निपीड्यमाना अत एव हिमेन हता नलिनी कमलिनी इव जनकसुता सहचरेण चक्रकेन रहिता चक्रवाकीव कृपणां शोचनीयां दशां प्राप्ता ॥ ३० ॥

गो० टी०–हिमहतेति । हिमहतेति विशेषणेन नलिन्याः पूर्वं बहुकालशोभितत्वं सिद्धं तद्वन्नष्टशोभा द्वादशवर्षं निष्प्रतिबन्धं भोगान् भुञ्जानाया आगन्तुको हि विश्लेषः तेन हि नष्टशोभेत्युक्तम् । व्यसनपरंपरया विरह इव संश्लेषोऽपि मध्ये मध्ये नागत्य निवृत्तः व्यसनमेव नैरन्तर्येण वृत्तम् । अतिपीड्यमाना अतिक्रम्य पीड्यमाना आश्रयाननुरूपं व्यसनमनुभवतीत्यर्थः । सहचररहितेव चक्रवाकी लाभकालमवगम्य दुःखं सोढुमसमर्था चक्रवाकीसाम्येनायमर्थो लभ्यते सा हि रात्रिविरामकालं प्रबुध्य दुःखं सोढुमदक्षेति प्रसिद्धम् जनकसुता एवं व्यसनं भविष्यतीति ज्ञात्वा न संवर्धिता केवलं सुखसंवर्धितेत्यर्थः । कृपणां दशां प्रपन्ना । पूर्वोक्तनलिन्यादिकं नोपमानं भवितुमर्हति । किंचिदुक्तिमात्रम् । वाङ्मनसाऽपरिच्छेद्यां दुर्दशां प्राप्तेत्यर्थः ॥ ३० ॥

३१] ति० टी०–न केवलमशोक एव शोकजनकश्चन्द्रोऽपीत्याह—हिमेति । हिमव्यपायेन वसन्तसमीपप्राक्कालेनोपलक्षितः । यद्वा लङ्कायां हिमव्यपायेन शीताभावेनाभ्युत्थितोऽतिप्रकाशतया स्थितः, अत एव नैकसहस्ररश्मिरभ्युत्थितः उदयं प्राप्तः । शीतरश्मिश्च शोकं जनयतीत्यनुकर्षः ॥ ३१ ॥

रा० टी०–अस्या इति । पुष्पैरवनताः अग्रशाखाः येषां ते अस्याः वनिकायाः अशोकाः हिमव्यपायेन अतिहिमस्याभावात् अभ्युत्थितः प्रकाशितः अनेकसहस्ररश्मिः चन्द्रश्च अस्याः सीतायाः दृढं शोकं जनयन्ति ॥ ३१ ॥

गो० टी०–अस्या इति । हिमव्यपायेन वसन्तेन । नैकसहस्ररश्मिरभ्युत्थितः । मन्दरश्मिः सूर्यापेक्षया मन्दकरः चन्द्र इति यावत् । शोकं जनयतीति वचनविपरिणामेन संबन्धः ॥ ३१ ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

३२] ति० टी०–सीतेयमित्येवेयं सीतैवेति जातबुद्धिस्ता-

१ दृष्ट्वेति गो.पाठः। २ संनिभाक्षीति गो.पाठः। ३ ऽतिपीड्यमानेति गो.पाठः। ४ मन्देति गो.पाठः । ५ निविष्टबुद्धिरिति गो. सुजातेति रा. पाठः ।

सप्तदशः सर्गः ।

भगवति चन्द्रमस्याकाशमध्यमधिरोहति घोरविकृताननाभी राक्षसीभिः समन्ततो वेष्टितां जानकीं दृष्ट्वा हर्षनिर्भरलोचनो हनूमान्मनसा रामलक्ष्मणावभिवाद्य शिंशुपाग्रे निगूढस्तस्थौ ।

ततः कुमुदखण्डाभो [1]निर्मलं निर्मलोदयः प्रजगाम नभश्चन्द्रो हंसो नीलमिवोदकम् ॥ १ ॥
साचिव्यमिव कुर्वन्स प्रभया निर्मलप्रभः चन्द्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजम् ॥ २ ॥
स ददर्श ततः सीतां पूर्णचन्द्रनिभाननाम् शोकभारैरिव न्यस्तां भारैर्नावमिवाम्भसि ॥ ३ ॥
दिदृक्षमाणो वैदेहीं हनूमान्मारुतात्मजः स ददर्श विदूरस्था राक्षसीर्घोरदर्शनाः ॥ ४ ॥
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा अकर्णां शङ्कुकर्णां च मस्तकोच्छ्वासनासिकाम् ॥ ५ ॥

मेव बुद्धिं संश्रित्य ततः परानुष्ठेयचिकीर्षया तस्मिन्शिंशपावृक्ष-एव निषसाद तद्रात्रिशेषं परदिनं च स्थित इत्यर्थः । एवं च सरावणान्तःपुरा सर्वापि लङ्का यामत्रयेण समुद्रलङ्घनदिनरात्रावेव विचिता, तुर्ये यामेऽशोकवनिकाप्रवेश इति बोध्यम् ॥३२॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०–इतीति । इति अनेन प्रकारेण इयं सीतैव इति जातबुद्धिः कपिः अर्थं प्रयोजनसिद्धिम् अन्ववेक्ष्य तस्मिन् शिंशुपाभिधे वृक्षे संश्रित्य निषसाद ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षोडशः सर्गः ॥ १६ ॥

१] ति० टी०–ततस्तर्हिनापगमोत्तरम् कुमुदखण्डं कुमुदसमूहस्तदाभः श्वैत्येन निर्मलं नभो जगाम नभसो निर्मलत्वं स्वच्छनीलवर्णत्वम् । अत एवाह—हंसो नीलमुदकमिवेति । नभसो नीलत्वं प्रतीत्या कविसंप्रदायेन च बोध्यम् नभो जगाम किंचिन्नभउपरिभागं जगामेत्यर्थः ॥ १ ॥

रा० टी०–हनुमत्कर्तृकस्पष्टदर्शनं वर्णयितुमाह–तत इति । कुमुदखण्डाभः कुमुदसमूहसदृशः निर्मलोदयः चन्द्रः निर्मलं नभः प्रजगाम । तत्र दृष्टान्तः, हंसो नीलमुदकमिव ॥ १ ॥

गो० टी०–तत इत्यादि । प्रजगाम प्रकर्षेण जगाम आकाशपरभागं प्राप्त इत्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०–साचिव्यमिव सीतादर्शनादौ प्रभया स्वकान्त्या साचिव्यमिव साहाय्यकमिव दिवा क्वचिदेकान्तप्रदेशे स्थितत्वान्निद्राव्याकुलत्वाच्च न सम्यग्राक्षसीनां सीतायाश्च दर्शनम् रात्रौ चन्द्रोदये सति तु पुनः समीपदेश आगत्य स्थितस्य सम्यक्सर्वदर्शनम् ॥ २ ॥

रा० टी०–साचिव्यमिति । शीतै रश्मिभिरुपलक्षितः निर्मलप्रभश्चन्द्रमाः प्रभया स्वकान्त्या साचिव्यं साहाय्यमिव कुर्वन् पवनात्मजं सिषेवे ॥ २ ॥

३] ति० टी०–शोकभारैर्न्यस्तामधोनीतामिव निमज्जमानामिव ॥ ३ ॥

रा० टी०–स इति । स हनुमान् शोकभारैः न्यस्तां नतामिव अत एव भारैर्न्यस्तामम्भसि नावमिव प्रतीयमानां सीतां ददर्श ॥ ३ ॥

गो० टी०–स इति । शोकभारैर्न्यस्तामिव आक्रान्तामिव स्थिताम् अत एव भारैर्न्यस्तां नावमिव स्थिताम् ॥ ३ ॥

४] ति० टी०–दिदृक्षमाणः प्रकटतया तां द्रष्टुमिच्छुः ॥४॥

रा० टी०–दिदृक्षमाण इति । वैदेहीं दिदृक्षमाणोऽत्यन्तमवलोकनेच्छुः हनुमान् अविदूरस्थाः राक्षसीः ददर्श ॥ ४ ॥

गो० टी०–दिदृक्षमाण इत्यादि । कर्णौ प्रावरणे शिरस आच्छादकौ यस्याः सा कर्णप्रावरणा ताम् शङ्कुवत्कर्णौ यस्यास्तां शङ्कुकर्णाम् मस्तकोच्छ्वासनासिकाम् ऊर्ध्वमुखनासिकामित्यर्थः अतिकायोत्तमाङ्गीम् अत्रातिकायशब्देन महत्त्वमुच्यते महाशिरस्कामित्यर्थः ध्वस्तकेशीं स्वल्पकेशीम् अकेशीम् अनुत्पन्नकेशीम् केशकम्बलधारिणीं कम्बलरूपकेशधारिणीम् लम्बे कर्णललाटे यस्याः सा लम्बकर्णललाटाताम् चुबुके ओष्ठः यस्याः सा चुबुकोष्ठी ताम् ह्रस्वदीर्घाम् अधःकाये ऊर्ध्वकाये च क्वचित् ह्रस्वां क्वचिद्दीर्घामित्यर्थः । कुब्जां स्थगुमतीम् विकटां स्थूलजङ्घाम् करालां दन्तुराम् ‘ करालो दन्तुरे तुङ्गे ’ इत्यमरः । भुग्नवक्त्रां निम्नवक्त्राम् विकृताननां नासिकोष्ठविरहिताननामित्यर्थः एतदन्तस्य पूर्वेण ददर्शेत्यनेनान्वयः ॥ ४–८ ॥

५] ति० टी०–कर्णप्रावरणामिति विशालकर्णाम् । मस्तकोच्छ्वासनासिकामूर्ध्वमुखनासाम् ॥ ५ ॥

रा० टी०–दर्शनप्रकारमाह–एकेत्यादिभिः । एकाक्षीप्रभृतीः रोमहर्षणदर्शनाः ताः राक्षसीः ददर्श । तस्य शिंशुपाभिधतरोः अधस्तात् देवीं सीतां च ददर्श तत्र कर्णाविव प्रावरणौ शरीराच्छादकौ यस्याः अतिविशालकर्णविशिष्टामित्यर्थः, मस्तके उच्छ्वासहेतुभूतनासिका यस्यास्तां तन्वीं सूक्ष्मां

---

१ षण्डेति गो. पाठः । २ निर्मलो निर्मलं स्वयमिति गो. पाठः

अतिकायोत्तमाङ्गीं च तनुदीर्घशिरोधराम् । ध्वस्तकेशीं तथाऽकेशीं केशकम्बलधारिणीम् ॥ ६ ॥
लम्बकर्णललाटां च लम्बोदरपयोधराम् । लम्बोष्ठीं चिबुकोष्ठीं च लम्बास्यां लम्बजानुकाम्॥ ७ ॥
ह्रस्वां दीर्घां च कुब्जां च विकटां वामनां तथा । करालां भुग्नवक्त्रां च पिङ्गाक्षीं विकृताननाम् ॥ ८ ॥
विकृताः पिङ्गलाः कालीः क्रोधनाः कलहप्रियाः। कालायसमहाशूलकूटमुद्गरधारिणीः ॥ ९ ॥
वैराहमृगशार्दूलमहिषाजशिवामुखाः । गजोष्ट्रहयपादाश्च निखातशिरसोऽपराः ॥ १० ॥
एकहस्तैकपादाश्च खरकर्ण्यश्वकर्णिकाः । गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः ॥ ११ ॥
अतिनासाश्च काश्चिच्च तिर्यक्श्वासा अनासिकाः । गजसंनिभनासाश्च ललाटोच्छ्वासनासिकाः ॥ १२ ॥
हस्तिपादा महापादा गोपादाः पादचूलिकाः । अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः ॥ १३ ॥
अतिमात्रास्यनेत्राश्च दीर्घजिह्वाननास्तथा । अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ॥ १४ ॥
हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः । शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥
कैरालधूम्रकेशिन्यो राक्षसीर्विकृताननाः । पिबन्ति सततं पानं सुरामांससदाप्रियाः ॥ १६ ॥
मांसशोणितदिग्धाङ्गीर्मांसशोणितभोजनाः । ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः ॥ १७ ॥
स्कन्धवन्तमुपासीनाः परिवार्य वनस्पतिम् । तस्याधस्ताच्च तां देवीं राजपुत्रीमनिन्दिताम् ॥ १८ ॥
लक्षयामास लक्ष्मीवान्हनूमाञ्जनकात्मजाम् । निष्प्रभां शोकसंतप्तां मलसंकुलमूर्धजाम् ॥ १९ ॥
क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव । चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ॥ २० ॥

दीर्घा स्थूला शिरोधरा ग्रीवा यस्यास्तां चिबुकौ चिबुकसंबद्धौ ओष्ठौ यस्यास्ताम् ॥ ५ ॥

६] ति० टी०–अतिकायोत्तमाङ्गीमतिप्रवृद्धोपरिभागदेहवतीम् तनुदीर्घशिरोधराम् अस्थूलदीर्घग्रीवामित्यर्थः शारीरकेशैः कम्बलधारिणीमिव ॥ ६ ॥

७] ति० टी०–चिबुके संबद्ध ओष्ठो यस्यास्ताम् ॥ ७ ॥

८] ति० टी०–विकटां वक्त्रशरीराम् । करालां भयंकरकृष्णवर्णाम् ॥ ८ ॥

रा० टी०–निखातशिरसः कबन्धवत् उरःप्रदेशप्राप्तशिरसः किंच निखातेन खातविशेषेण युक्तानि शिरांसि यासां ताः हरेः सिंहस्येव कर्णौ यासां पादचूलिकाः पादयोः संलग्नाः चूलाः शिरःकेशाः यासां ताः सुरामांसानि सदा प्रियाणि यासाम् अतएव पानं मद्यादि सततं पिबन्तीःस्कन्धवन्तं वनस्पतिं परिवार्य उपासीना इत्यर्थः । चतुर्दशश्लोका एकान्वयिनः ॥ ६–१८ ॥

९] ति० टी०–विकृतत्वादिगुणाश्च या राक्षस्यस्तत्र स्थितास्ता ददर्शेति वक्ष्यमाणनान्वयः । कूटोऽयस्कारकूटाभ आयुधविशेषः ॥ ९ ॥

गो० टी०–विकृता इत्यादेरुत्तरेण ददर्शेत्यनेनान्वयः । एता एकाक्ष्यादिराक्षसीभ्योऽन्याः विकृताः विकृतवेषाः ॥ ९ ॥

१०] ति० टी०–निखातशिरसः कबन्धवदुरःप्रदेशगतशिरसः ॥ १० ॥

गो० टी०–निखातशिरसः गात्रान्तर्वर्तिशिरसः ॥ १० ॥

११] ति० टी०–हरिकर्णीः सिंहकर्णीः ॥ ११ ॥

१२] ति० टी०–गजसंनिभनासाः शुण्डादण्डापेतनासाः१२

गो० टी०–हरिकर्णीः कपिकर्णीः ॥ ११ ॥ १२ ॥

१३–१५] ति० टी०–पादचूलिकाः पादे संलग्ना चूडा शिरःकेशा यासां ताः पादे वा चूडाकाराः केशा यासां ताः अतिमात्रमतिप्रमाणम् ॥ १३ ॥ १५ ॥

गो० टी०–पादे चूडिका यासां ताः पादचूडिकाः 'शिखा चूडा केशपाशी' इत्यमरः ॥ १३–१५ ॥

१६–१७] ति० टी०–सुरामांससदाप्रियाः सुरामांसे सदा प्रिये यासां ताः ॥ १६ ॥ १७ ॥

गो० टी०–राक्षसीर्विकृताननाः इत्यत्र पुनः राक्षसीपदमविस्म रणार्थम् ॥ १६ ॥ १७ ॥

१८–१९] ति० टी०–स्कन्धवन्तं प्रशस्तशाखोपशाखावन्तं वृक्षं शिंशपावृक्षं परिवार्य तन्मूलादीपदूर आसीनाः स्थिताः । तस्याधस्तात्तन्मूलसमीपे ॥ १८ ॥ १९ ॥

रा० टी०–लक्षयामासेति । हनुमान् शोकसंतप्तां निष्प्रभां जनकात्मजां लक्षयामास ॥ १९ ॥

गो० टी०–तस्याधस्तादित्यादि । लक्ष्मीवान् सीतादर्शनजनितशोभायुक्तः । च्युतां स्थानाच्चलिताम् चारित्रव्यपदेशाढ्यां पातिव्रताधमाचरणख्यातिसंपन्नाम् । भर्तृदर्शनेन दुर्गतां दरिद्राम् भर्तृदर्शनरहितामित्यर्थः । भर्तृवात्सल्यभूषणां वात्सल्यपदमत्र स्नेहमात्रवाचि । पयोदान्ते वर्षान्ते चन्द्ररेखायाः स्पष्टास्पष्टत्वद्योतनायेदं विशेषणम् । असंस्पर्शात् उद्वर्तनादिसंस्काररहित्यात् अयुक्ताम् अनारोपिततन्त्रीम् वल्लकीं वीणाम् ॥ १८–२२ ॥

२०] ति० टी०–दिवश्च्युतां भूमौ पतितां तारामिव ।

१ वाराहेति रा. पाठः । २ मुखीरिति गो. पाठः । ३ पादीरिति गो. पाठः । ४ अनासा अतिनासाश्च तिर्यग्नासा विनासिकाः इति गो. तिर्यङ्नासा अनासिका इति रा. पाठः । ५ उदरा इति रा. पाठः । ६ सुकरीति गो. पाठः । ७ कराला धूम्रकेशीश्चेति गो. पाठः । ८ पिबन्तीरिति गो. पाठः । ९ सदा मांससुराप्रिया इति गो. पाठः ।

भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषिताम् । राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ॥ २१ ॥
वियूथां सिंहसंरुद्धां बद्धां गजवधूमिव । चन्द्ररेखां पयोदान्ते शारदाभ्रैरिवावृताम् ॥ २२ ॥
क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् । सैं तां भर्तृहितेर्३ युक्तामयुक्तां रक्षसां वशे ॥ २३ ॥
अशोकवनिकामध्ये शोकसागरमाप्लुताम् । ताभिः परिवृतां तत्र सग्रैहामिव रोहिणीम् ॥ २४ ॥
ददर्श हनुमांस्तत्र लतामकुसुमामिव । सा मलेन च दिग्धाङ्गी वपुषा चाप्यलंकृता ॥
मृणाली पङ्कदिग्धेव विभाति च न भाति च ॥ २५ ॥
मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् । संवृतां मृगशावाक्षीं ददर्श हनुमान्कपिः ॥ २६ ॥
तां देवीं दीनवदनामदीनां भर्तृतेजसा । रक्षितां स्वेन शीलेन सीतामसितलोचनाम् ॥ २७ ॥
तां दृष्ट्वा हनुमान्सीतां मृगशाबनिभेक्षणाम् । मृगकन्यामिव त्रस्तां वीक्षमाणां समन्ततः ॥ २८ ॥
दहन्तीमिव निःश्वासैर्वृक्षान्पल्लवधारिणः । संघातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम्॥ २९ ॥
तां क्षामां सुविभक्ताङ्गीं विनाभरणशोभिनीम् । प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ॥ ३० ॥

चारित्रव्यपदेशः पातिव्रत्यजकीर्तिः । भर्तृदर्शनं दुर्गतं दुर्लभं यस्यास्ताम् ॥ २० ॥

२१] ति० टी०–उत्तमभूषणजशोभाहीनामपि भर्तृवात्सल्येन तत्प्रियत्वेन शोभावतीम् । विनाकृतां रहिताम् ॥२१॥

२२] ति० टी०–पयोदान्ते वर्षान्ते । अनेन दुःखस्यात्यल्पावशिष्टत्वं सूच्यते ॥ २२ ॥

रा० टी०–तामेव वर्णयन्नाह–क्षीणेति । क्षीणपुण्याम् अत एव निपतितां तारामिव चारित्रव्यपदेशेन मुख्याचरणेन आढ्यां भर्तृदर्शनं दुर्गतं दुष्प्रापं यस्याः तां भर्तृवात्सल्येन पत्युरतिप्रीत्या भूषितां राक्षसाधिपेन संरुद्धाम् अत एव बन्धुभिर्विनाकृताम् अत एव सिंहसंरुद्धां वियूथां यूथहीनां बद्धां स्वयूथविषयकातिस्नेहयुक्तां गजवधूमिव पयोदान्ते वर्षापाये शारदाभ्रैरावृतां चन्द्ररेखामिव असंस्पर्शात् पतिस्पर्शराहित्यात् क्लिष्टरूपां पराभूतस्वरूपाम् अत एव अयुक्तां वादकहीनां वल्लकीं वीणामिव भर्तृहिते युक्तां रक्षसां वशे अयुक्ताम् अयोग्यां शोकसागरमाप्लुतां सग्रहां क्रूरग्रहविशिष्टां रोहिणीमिव ताभिः पूर्वोक्तराक्षसीभिः परिवृताम् अकुसुमितां कुसुमरहितां लतामिव तां सीतां स हनूमान् ददर्श । सार्धश्लोकपञ्चकमेकान्वयि ॥ २०–२४ ॥

२३] ति० टी०–असंस्पर्शाद्भर्तृस्पर्शाभावात्, अत एवायुक्तां वीणावादकवादनक्रियारहितां वल्लकीं वीणामिव स्थिताम् । अयुक्तां रक्षसां वशे रक्षोधीनत्वेऽयोग्याम् ॥ २३ ॥

२४] ति० टी०–शोकसागरमाप्लुतां तत्र मग्नाम् । ताभी राक्षसीभिः सग्रहां क्रूरग्रहाविष्टाम् ॥ २४ ॥

गो० टी०–सीतामित्यादिपरशेषः । राक्षसीवशे अयुक्ताम् अनवस्थिताम् तद्वचनान्यशृण्वन्तीमित्यर्थः ; लतां कुसुमितामिव तथा दर्शनीयामित्यर्थः ॥ २३–२५ ॥

२५–२६] ति० टी०–अकुसुमलतासादृश्यमाभरणत्यागात् वपुषा स्वरूपीयसहजसौन्दर्येण । कारकदीपकमत्रालंकारः, समुच्चयश्च ॥ २५ ॥ २६ ॥

२७–२८] ति० टी०–भर्तृतेजसा भर्तृपराक्रमानुसंधानेनादीनहृदयाम् ॥ २७ ॥ २८ ॥

२९] ति० टी०–दुःखस्य दुःखसागरस्य । अत्राधेयेनाधारनिगरणम् ॥ २९ ॥

३०] ति० टी०–क्षामां कृशाम् । विनाभरणशोभिनीमाभरणानुग्रहमनपेक्ष्यैव सौन्दर्येण शोभमानाम् ॥ ३० ॥

रा० टी०–सेति । मलेन दिग्धं प्रवृद्धमङ्गं यस्याः सा वपुषा शरीरकान्त्या अलंकृता पङ्कदिग्धा कर्दमसंलग्ना मृणाली इव विभाति न भाति च । अर्धद्वयमेकान्वयि ॥ २५ ॥

रा० टी०–मलिनेति । मलिनेन अत एव परिक्लिष्टेन बाधितशोभेन वस्त्रेण संवृतां मृगशावाक्षीं मृगबालनयनसदृशनयनविशिष्टां दीनवदनां क्षीणमुखां भर्तृतेजसा रामतेजःस्मरणेन अदीनां दैन्यरहितचित्तां स्वेन स्वकीयेन शीलेन भर्तृविषयकसमाधिना रक्षिताम् असितलोचनां तां सीतां ददर्श । अर्धचतुष्टयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०–मलिनेनेत्यादिश्लोकद्वयमेकं वाक्यम् ॥२६॥२७॥

रा० टी०–तामिति । त्रस्तां मृगकन्यामिव समन्ततो वीक्षमाणां निःश्वासैर्वृक्षान् दहन्तीमिव शोकानां संघातमिव दुःखस्य दुःखोदधेः उत्थितां तामूर्मिमिव सुविभक्तानि अङ्गानि यस्यास्तां विनाऽऽभरणेन शोभिनीं प्रेक्ष्यमैथिलीं प्रेक्ष्य चासौ मैथिली चेति कर्मधारयस्तां सीतां दृष्ट्वा मारुतिः अतुलं प्रहर्षं लेभे । श्लोकत्रयमेकान्वयि ॥ २८–३० ॥

गो० टी०–तामित्यादिश्लोकत्रयमेकं वाक्यम् । क्षमां क्षमामिव स्थिताम् निगीर्याध्यवसानादभेदोक्तिः । तां दृष्ट्वा

---

१ भूषणामिति गो. पाठः । २ सीतामिति गो. पाठः । ३ वशे इति गो. पाठः । ४ राक्षसीवशे इति गो. पाठः । ५ संग्रहामिति गो. पाठः । ६ देवीं लतां कुसुमितामिवेति गो. पाठः । ७ क्षमामिति गो. पाठः ।

हर्षजानि च सोऽश्रूणि तां दृष्ट्वा मदिरेक्षणाम् । मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ॥ ३१ ॥
नमस्कृत्वाऽथ रामाय लक्ष्मणाय च वीर्यवान् । सीतादर्शनसंहृष्टो हनुमान्संवृतोऽभवत् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ।

शिंशुपाविटपाग्रस्थो हनुमानपररात्रे मदनपरवशं शतशःप्रमदावृतं सीतासविधं प्राप्नुवन्तं रावणं दृष्ट्वा तस्याङ्गप्रत्यङ्गस्फुटावलोकनाय शाखाग्रात्तूष्णीमवरुह्य शाखाधःप्रदेशे गूढं निलीय तस्थौ ।

तथा विप्रेक्षमाणस्य वनं पुष्पितपादपम् । विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाऽभवत् ॥ १ ॥
षडङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् । शुश्राव ब्रह्मघोषान्स विरात्रे ब्रह्मरक्षसाम् ॥ २ ॥
अथ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः । प्राबोध्यत महाबाहुर्दशग्रीवो महाबलः ॥ ३ ॥
विबुध्य तु महाभागो राक्षसेन्द्रः प्रतापवान् । स्रस्तमाल्याम्बरधरो वैदेहीमन्वचिन्तयत् ॥ ४ ॥
भृशं नियुक्तस्तस्यां च मदनेन मदोत्कटः । न तु तं राक्षसः कामं शशाकात्मनि गूहितुम् ॥ ५ ॥
स सर्वाभरणैर्युक्तो बिभ्रच्छ्रियमनुत्तमाम् । तां नगैर्विविधैर्जुष्टां सर्वपुष्पफलोपगैः ॥ ६ ॥
वृतां पुष्करिणीभिश्च नानापुष्पोपशोभिताम् । सदा मत्तैश्च विहगैर्विचित्रां परमाद्भुतैः ॥ ७ ॥

तां प्रेक्ष्येत्यनयोर्विशेषणविशेष्यभेदान्न पौनरुक्त्यम् । दूरप्रयुक्तस्यानुस्मरणार्थं वा पुनरुक्तिः ॥ २८-३० ॥

३१] ति० टी०-राघवं नमश्चक्रे इति । भगवतो राघवस्यानुग्रहादेवेयं मया दृष्टेति पुनः पुनः स्मृत्वा नमस्कारः ॥३१॥

रा० टी०-हर्षेति । तां सीतां दृष्ट्वा हर्षजानि अश्रूणि मुमोच राघवं नमश्चक्रे च ॥ ३१ ॥

गो० टी०-हर्षजानीति । राघवं नमश्चक्रे उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्वान्नमस्करोति देवानित्यादाविव द्वितीया ॥ ३१ ॥

३२] ति० टी०-संवृतोऽभवद्राक्षसीनां दर्शनपरिहाराय सूक्ष्मरूपमवलम्ब्य वृक्षमूलसमीपशाखासु निलीनोऽभवत् ॥३२॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

रा० टी०-नमस्कृत्वेति । सीतादर्शनसंहृष्टो हनुमान् रामाय लक्ष्मणाय च नमस्कृत्वा संवृतः शाखाविशेषे निलीनोऽभवत् ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

गो० टी०-नमस्कृत्वेति । संवृतः राक्षस्यदर्शनाय शिंशुपापर्णैर्गूढोऽभूत् ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

१] ति० टी०-तथेति । किंचिच्छेषापरयाममात्रशेषा । विचिन्वतस्तस्याः स्पष्टदर्शनाय राक्षसीनिद्रारूपमवसरमन्वेषयतः ॥ १ ॥

रा० टी०-हनुमद्वृत्तान्तमेवाह-तथेत्यादिभिः । वैदेहीं विचिन्वतः अत एव तथा उक्तप्रकारेण वनं विप्रेक्षमाणस्य हनुमतो निशा किंचिच्छेषा अभवत् ॥ १ ॥

गो० टी०-तथेत्यादि । विप्रेक्षमाणस्य विचिन्वतश्च । विप्रेक्षमाणे विचिन्वति च तस्मिन्नित्यर्थः । " यस्य च भावेन-" इत्यर्थे षष्ठी ॥ १ ॥

२-३] ति० टी०-विरात्रे रात्रिविपर्यासे । अपररात्र इत्यर्थः । ब्रह्मरक्षसां ब्रह्म वेदस्तज्ज्ञरक्षसाम् तदेव स्पष्टीकृतम्-षडङ्गेत्यादिना ॥ २ ॥ ३ ॥

रा० टी०-षडङ्गेति । षडङ्गवेदविदुषां वेदवेदितॄणाम् अत एव क्रतुप्रवरयाजिनां ब्रह्मरक्षसां ब्राह्मणराक्षसानां ब्रह्मघोषान् वेदनिनदान् विरात्रे रात्र्यवसाने शुश्राव हनुमानिति शेषः ॥ २ ॥

रा० टी०-अथेति । मङ्गलवादित्रैः माङ्गलिकवाद्यवद्भिः राक्षसैः कर्तृभिः श्रोत्रमनोहरैः शब्दैः दशग्रीवः प्राबोध्यत ॥ ३ ॥

गो० टी०-षडङ्गेति । विरात्रे अपररात्रे " अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः " इत्यत्र चकारादव्ययादुत्तरस्य रात्रिशब्दस्य समासान्तोऽच्प्रत्ययः । ब्रह्मरक्षसां ब्राह्मणत्वविशिष्टरक्षसाम् ब्रह्मघोषान् वेदघोषान् ॥ २-४ ॥

४] ति० टी०-निद्रावशादेव स्रस्तमाल्याम्बरधरः ॥ ४ ॥

रा० टी०-विबुध्येति । स्रस्तमाल्याम्बरधरो राक्षसेन्द्रः विबुध्य वैदेहीमन्वचिन्तयत् ॥ ४ ॥

५-७] ति० टी०-भृशं नियुक्तो गाढाभिनिवेशितचित्तः । कामे कामवेगम् । इष्टशेषु तीर्थस्यान्यथायोजनं भ्रान्त्यैव । रक्षसस्तमोगुणाविष्टस्य भगवन्मायामोहितस्याकृत्येष्वेव प्रवृत्तेः तथा क्रियमाणं भगवद्ध्यानमपि पापभोगोत्तरं जन्मान्तरे

१ घोषांश्चेति गो.पाठः। २ प्राबुध्यतेति गो.पाठः। ३ यथाकालमिति गो.पाठः। ४ स इति गो.पाठः। ५ बहुभिरिति गा.पाठः। ६ अद्भुतामिति गा.पाठः

ईहामृगैश्च विविधैर्वृतां दृष्टिमनोहरैः । वीथीः संप्रेक्षमाणश्च मणिकाञ्चनतोरणाम् ॥ ८ ॥
नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम् । अशोकवनिकामेव प्राविशत्संततद्रुमाम् ॥ ९ ॥
[3]अङ्गनाः शतमात्रं तु तं व्रजन्तमनुव्रजन् । महेन्द्रमिव पौलस्त्यं देवगन्धर्वयोषितः ॥ १० ॥
दीपिकाः काञ्चनीः काश्चिज्जगृहुस्तत्र योषितः । वालव्यजनहस्ताश्च तालवृन्तानि चापराः ॥ ११ ॥
[4]काञ्चनैश्चैव भृङ्गारैर्जहुः सलिलमग्रतः । [5]मण्डलाग्रा बृसीश्चैव गृह्यान्याः पृष्ठतो ययुः ॥ १२ ॥
काचिद्रत्नमयीं [6]पात्रीं पूर्णां पानस्य भ्राजतीम् । दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना ॥ १३ ॥
राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभम् । सौवर्णदण्डमपरा गृहीत्वा पृष्ठतो ययौ ॥ १४ ॥
निद्रामदपरीताक्ष्यो रावणस्योत्तमस्त्रियः । अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥ १५ ॥

उत्तमफलायेति बोध्यम्, अत एव ऋक्षाश्वमेधनाम्नो राज्ञो दानस्तावको ऋङ्मन्त्रः—'न युष्मे वाजबन्धवो निनित्सुश्च न मर्त्यः । अवद्यमधि दीधरत ॥' इति । तस्यार्थः—वाजमित्यन्ननाम । अन्नदानेन ये सर्वेषां बन्धवस्तेषां संबोधनं हे वाजबन्धवः ! युष्मे युष्मास्वधि । सप्तम्यर्थानुवाद्यधिः । निनित्सुश्च न निन्दनेच्छाशीलोऽपि मर्त्योऽवद्यं न दीधरत्र धारयति । भगवदनुसंधानेनैव निष्पापत्वादिति । एवं च भगवतो निन्दावरुद्धभावेन ध्यानमपि नरकभोगोत्तरं जन्मान्तरे उत्तमफलाय अत एवास्य मरणोत्तरं चतुर्थचतुर्युग्यां चेदिराजकुले जन्म, चतुर्विंशतिचतुर्युग्यां रामावतार इति हरिवंशोक्तेस्तावत्पर्यन्तं चैतत्पापफलभोग इत्यथोयातामिति बोध्यम् ॥ ५–७ ॥

८–९] ति० टी०–वीथीरशोकवनिकामार्गगमनवीथीः८॥९

रा० टी०–भृशमिति । मदेन मादकसुरापानादिना मदोत्कटः उत्कटैन्द्रियविशिष्टोऽपि राक्षसः यतस्तस्यां सीतायां भृशमत्यन्तं नियुक्तः संस्थापितचित्तः अतः तं सीतागोपनविषयकं काममिच्छामात्मनि मनसि गृहितुं नियमितुं न शशाक ५

गो० टी०–भृशमिति । नियुक्तः प्रेरितः ॥ ५ ॥

रा० टी०–स इति । अनुत्तमाम् अत्युत्तमां श्रियं बिभ्रत्स रावणः सर्वपुष्पफलान्युपगच्छन्ति तैर्नगैस्तरुभिर्जुष्टां सततद्रुमां नित्यं द्रुमविशिष्टामशोकवनिकां वीथीः मार्गान् संप्रेक्षमाणः सन् प्राविशत् । श्लोकचतुष्टयमेकान्वयि ॥ ६–९॥

गो० टी०–स इत्यादि । वीथीः उद्यानवीथीः॥ ६–९ ॥

१०] ति० टी०–अङ्गनाः शतमात्रमित्यवधारणे इति कतकः । देवादियोषितो महेन्द्रमिव पौलस्त्यं रावणमनुव्रजन् । अडभाव आर्षः ॥ १० ॥

रा० टी०–अङ्गना इति । देवगन्धर्वयोषितो महेन्द्रमिव व्रजन्तं पौलस्त्यं तं रावणं शतमात्रमङ्गनाः अनुव्रजन् अन्वव्रजन् ॥ १० ॥

गो० टी०–अङ्गनेति । महेन्द्रं देवगन्धर्वयोषित इव व्रजन्तम् तम् अङ्गनाशतमात्रम् अनुव्रजत् अन्वव्रजत् ॥ १० ॥

११] ति० टी०–काञ्चनीः काञ्चनदण्डाः । वालव्यजनहस्ता इत्यस्यान्वयव्रजन्निति शेषः तालवृन्तानीत्यस्य जगृहुरिति । अनेन लङ्कायां हेमन्तशिशिरयोरपि शीताभावो ध्वनितः॥११॥

रा० टी०–अङ्गनागमनप्रकारमाह—दीपिका इत्यादिभिः । काश्चिद्दीपिका जगृहुः काश्चित्तालवृन्तानि जगृहुः काश्चित् बालव्यजनहस्ताः चामरकरा अगच्छन्निति शेषः॥११॥

गो० टी०–दीपिका इति । तालवृन्तानि व्यजनानि ११

१२] ति० टी०–भृङ्गारैः कलशैः । धत्तूरकुसुमसदृशजलपात्रैरित्यर्थ इति तीर्थः । मण्डलाग्रा वृत्तपर्यन्ताः बृसीरासनविशेषान् तपस्विनामिमे तृणादिना, अस्य तु स्वर्णनेति विशेषः ॥ १२ ॥

रा० टी०–काञ्चनैरिति । काश्चित् काञ्चनैः भृङ्गारैः कलशैः अग्रतः अग्रे सलिलं जहुः प्रापयामासुः, अन्याः मण्डलाग्राः मण्डलाकाराग्रे अग्राग्रे यासां ताः बृसीः आसनविशेषान् गृह्य गृहीत्वा पृष्ठतो ययुः ॥ १२ ॥

गो० टी०–काञ्चनैरिति । भृङ्गारैः कनकालुकाभिः । 'भृङ्गारः कनकालुका' इत्यमरः । मण्डलाग्रान् असिविशेषान् 'मण्डलाग्रो नतार्थकः' इति वैजयन्ती । बृसीम् आस्तरणम् । गृह्य गृहीत्वा ॥ १२ ॥

१३–१५] ति० टी०–पानस्य पूर्णां पानेन पूर्णाम् शेषे षष्ठी । भ्राजतीं देदीप्यमानाम् । दक्षिणाऽनुकूला॥१३-१५॥

रा० टी०–काचिदिति । पूर्णां पेयपूरितां रत्नमयीं पानस्य पात्रीं दक्षिणेनैव पाणिना काचिदक्षिणा निपुणा जग्राह ॥ १३ ॥

रा० टी०–राजेति । अपरा छत्रं गृहीत्वा पृष्ठतो ययौ॥१४॥

रा० टी०–निद्रेति । निद्रामदेन परीतानि युक्तानि अक्षीणि यासां ताः रावणस्य उत्तमाः स्त्रियः विद्युल्लताः घनमिवानुजग्मुः ॥ १५ ॥

गो० टी०–काचिदिति । पानस्य पूर्णां पीयत इति पानं मधु तस्य पूर्णां तेन पूर्णाम् । " पूरणगुण–" इत्यादिना सहितार्थयोगे षष्ठीसमासनिषेधज्ञापकादत्र षष्ठी । स्थालीं पात्रीम् ॥ १३–१५ ॥

१ तारणा इति गो. पाठः । २ अङ्गनाशतमात्रं तु तं व्रजन्तमनुव्रजादिति गो. पाठः । ३ काञ्चनैरपीति गो. पाठः । ४ मण्डलाग्रान्बृसीं चैवेति गो. पाठः । ५ स्थालीमिति. गो. पाठः । ६ भामिनीति गो. पाठः । ७ उत्तमाः स्त्रिय इति गो. रा. पाठः ।

व्याविद्धहारकेयूराः समामृदितवर्णकाः । समागलितकेशान्ताः सस्वेदवदनास्तथा ॥ १६ ॥
घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः । स्वेदक्लिष्टाङ्गकुसुमाः समाल्याकुलमूर्धजाः ॥ १७ ॥
प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः । बहुमानाच्च कामाच्च प्रियभार्यास्तमन्वयुः ॥ १८ ॥
स च कामपराधीनः पतिस्तासां महाबलः । सीतासक्तमना मन्दो मन्दाञ्चितगतिर्बभौ ॥ १९ ॥
ततः काञ्चीनिनादं च नूपुराणां च निःस्वनम् । शुश्राव परमस्त्रीणां कपिर्मारुतनन्दनः ॥ २० ॥
तं चाप्रतिमकर्माणमचिन्त्यबलपौरुषम् । द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः ॥ २१ ॥
दीपिकाभिरनेकाभिः समन्तादवभासितम् । गन्धतैलावसिक्ताभिर्धियमाणाभिरग्रतः ॥ २२ ॥
कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् । समक्षमिव कन्दर्पमपविद्धशरासनम् ॥ २३ ॥
मथितामृतफेनाभमरजोवस्त्रमुत्तमम् । सपुष्पमवकर्षन्तं विमुक्तं सक्तमङ्गदे ॥ २४ ॥
तं पत्रविटपे लीनः पत्रपुष्पशतावृतः । समीपमुपसंक्रान्तं विज्ञातुमुपचक्रमे ॥ २५ ॥
अवेक्षमाणस्तु तदा ददर्श कपिकुञ्जरः । रूपयौवनसंपन्ना रावणस्य वरस्त्रियः ॥ २६ ॥

१६] ति० टी०–व्याविद्धाः स्थानादीषच्चलिताः । सम्यगामृदितो मृष्टो वर्णकोऽनुलेपनं यासां ताः ॥ १६ ॥

१७] ति० टी०–समाल्याः सपुष्पा आकुला मूर्धजा यासां ताः ॥ १७ ॥

१८] ति० टी०–मदिरलोचना मदकरवीक्षणाः । बहुमानाद्भृतृकृतसंमानात् । कामात्स्वीयात् ॥ १८ ॥

रा० टी०–व्याविद्धेति । व्याविद्धाः स्वस्वस्थानात् किंचिच्चलिता इत्यर्थः, हारकेयूरा यासां समामृदितवर्णकाः अपगताङ्गरागाः समागलितकेशान्ताः प्रस्खलितकेशान्तभागाः सस्वेदानि स्वेदविशिष्टानि वदनानि यासां ताः मदशेषेण निद्रया च घूर्णन्त्यः स्वेदेन क्लिष्टानि बाधितानि अङ्गकुसुमानि यासां ताः समाल्या मालासहिता आकुलाः किंचित्कम्पिताः मूर्धजाः केशा यासां ताः प्रियाऽऽभा दीप्तिर्यासां ता एवार्याः नार्यो रावणपत्न्यः बहुमानात् रावणकृतातिसत्कारात् कामात् सीतादर्शनेच्छातश्च हेतोः तं रावणमन्वयुः । श्लोकत्रयमेकान्वयि ॥ १६–१८ ॥

गो० टी०–व्याविद्धेति । व्याविद्धाः व्यत्यस्ततया न्यस्ताः । समामृदितवर्णकाः संमृष्टानुलेपनाः 'अङ्गरागः समालम्भो वर्णकश्च विलेपनम्' इति निघण्टुः ॥ १६–१८ ॥

१९–२०] ति० टी०–मन्दो दुर्मतिः । मन्दं यथा तथाञ्चिता गतिर्यस्य ॥ १९ ॥ २० ॥

रा० टी०–स इति । कामपराः तद्भार्याः तासामधीनः ता अधीना यस्येति वा स तासां पतिः महाबलः स रावणः सीतायां सीतादर्शने आसक्तं मनो यस्य मन्दाञ्चिता मन्दत्वं प्राप्ता गतिर्यस्य सः मन्दः सीताहरणकर्तृत्वज्ञापितमन्दमतिविशिष्टः स रावणो बभौ ॥ १९ ॥

रा० टी०–तत इति । ततस्तस्मिन्समये परमस्त्रीणां काञ्चीनिनादं नूपुराणां निस्स्वनं च मारुतनन्दनः शुश्राव ॥ २० ॥

गो० टी०–स चेति । मदेनाञ्चिता गतिर्यस्य स मदाञ्चितगतिः ॥ १९ ॥ २० ॥

२१] ति० टी०–द्वारदेशमशोकवनिकाप्राकारदेशम् ॥ २१ ॥

रा० टी०–तमिति । अप्रतिमकर्माणं सीताहरणकर्तृत्वेन स्वसदृशगर्हितकर्मरहितं द्वारदेशमनुप्राप्तं तं रावणं हनुमान् ददर्श ॥ २१ ॥

गो० टी०–तं चेत्यादि । द्वारदेशम् अशोकवनद्वारदेशम् । गन्धतैलं गन्धवासिततैलम् । समक्षं प्रत्यक्षम् । अपविद्धशरासनम् अधृतशरासनम् मथितामृतफेनाभं मथितम् तक्रम् अमृतं धारोष्णं तयोर्यत् फेनं तदाभम् 'निरम्बु घोलं मथितं धारोष्णं त्वमृतं पयः' इत्युभयत्र वैजयन्ती । विमुक्तं स्वस्थानात्प्रचलितम् अङ्गदे सक्तं वस्त्रं सलीलं यथा भवति तथा अनुकर्षन्तमित्यन्वयः ॥ २१–२४ ॥

२२] ति० टी०–दीपिकाभिर्भासितम् । रात्रिशेषसत्त्वात् द्वादश्यां यामावशिष्टरात्रौ चन्द्रस्यास्तगमनाच्च ॥ २२ ॥

२३] ति० टी०–जिह्मा दिगुणके ईक्षणे यस्य तम् समक्षं प्रत्यक्षं कन्दर्पमिव स्थितम् अपविद्धशरासनं त्यक्तेक्षुचापम् ॥ २३ ॥

२४] ति० टी०–अमृतं पयः मथितपयःफेनवच्छुक्ला आभा यस्य तत् अरजो धौतम् सपुष्पं पुष्पमालासहितं विमुक्तं विशिष्टमुक्तावन्तम् । यद्वा स्थानाच्युतमङ्गदे सक्तं वस्त्रमवकर्षन्तमङ्गदादाकृष्य यथास्थाने स्थापयन्तम् । 'सपुष्पमवकर्षन्तम्' इत्येव पाठः । तीर्थस्तु–एतद्योजनाशक्त्या 'सलीलमवकर्षन्तम्' इति पाठं कल्पयति ॥ २४ ॥

२५–२६] ति० टी०–पत्रविटपे निबिडपत्रशाखायाम् विज्ञातुमयमसुक इति विशेषेण ज्ञातुम् । 'निध्यातुम्' इति पाठेऽप्ययमेवार्थः ॥ २५ ॥ २६ ॥

१ स्विति गो. पाठः । २ प्रिया भार्या इति गो. पाठः । ३ स कपिर्मारुतात्मज इति गो. पाठः । ४ कर्माणमिति गो. पाठः । ५ सलीलमन्विति गो. पाठः । ६ तत इति गो. पाठः ।

ताभिः परिवृतो राजा सुरूपाभिर्महायशाः । तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनम् ॥ २७ ॥
क्षीबो विचित्राभरणः शङ्कुकर्णो महाबलः । तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः ॥ २८ ॥
वृतः परमनारीभिस्ताराभिरिव चन्द्रमाः । तं ददर्श महातेजास्तेजोवन्तं महाकपिः ॥ २९ ॥
रावणोऽयं महाबाहुरिति संचिन्त्य वानरः । सोऽयमेव पुरा शेते पुरमध्ये गृहोत्तमे ॥
अवप्लुतो महातेजा हनूमान्मारुतात्मजः ॥ ३० ॥
स तथाप्युग्रतेजाः स निर्भूतस्तस्य तेजसा । पैत्रे गुह्यान्तरे सक्तो मतिमान्संवृतोऽभवत् ॥ ३१ ॥
स तामसितकेशान्तां सुश्रोणीं संहतस्तनीम् । दिदृक्षुरसितापाङ्गीमुपावर्तत रावणः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०–दीपिकाभिरिति । गन्धतैलैः अवसिक्ताभिः अग्रतो म्रियमाणाभिः दीपिकाभिः समन्तादवभासितं कामदर्पमदैः कामः परद्रव्याद्यपहरणेच्छा, दर्पः स्वात्यैश्वर्यजनितगर्वः, मदः तज्जनितानन्दः तैर्युक्तं जिह्मे कापट्यबोधके ताम्रे अरुणे ईक्षणे नेत्रे यस्य तम् अपविद्धशरासनं त्यक्तकुसुमबाणं समक्षं प्रत्यक्षं कन्दर्पमिव मथितामृतफेनस्य आभा इव आभा यस्य तत् अतिश्वेतमित्यर्थः, अरजः रजोहीनं सपुष्पम् अनेकविधपुष्पविशिष्टं विमुक्तं विशेषमुक्ताविशिष्टम् अङ्गदे सक्तम् उत्तमं वस्त्रम् अवकर्षन्तं समीपमुपसंक्रान्तं प्राप्तं तं रावणं पत्रविटपे विपुलपत्रविशिष्टशाखायां लीनः अत एव पत्रपुष्पाणां शतैरावृतो हनुमान् विज्ञातुमुपचक्रमे 'निध्यातुं' इतिपाठेऽप्ययमेवार्थ इति भट्टाः । श्लोकचतुष्टयमेकान्वयि ॥ २२–२५ ॥

रा० टी०–अवेक्षमाण इति । अवेक्षमाणो विशेषज्ञानाय रावणं निरीक्षमाणः कपिकुञ्जरः रावणस्य वरस्त्रियो ददर्श ॥ २६ ॥

गो० टी०–तामिति । पत्रविटपे पत्रवति विटपे लीनः छन्नः पत्रपुष्पघनावृतः पत्रपुष्पसमूहावृतः इवशब्दो वाक्यालंकारे । यद्वा दूरे समागतमपि तेजसा समीपे संक्रान्तमिव स्थितम् तं निध्यातुं द्रष्टुमुपचक्रमे 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः ॥ २५ ॥ २६ ॥

२७] ति० टी०–प्रमदानां क्रीडार्हं वनं प्रमदावनम् ॥ २७ ॥

रा० टी०–ताभिरिति । सुरूपाभिस्ताभिः स्त्रीभिः परिवृतः मृगद्विजसंघुष्टं प्रमदावनं नारीविहारारण्यं प्रविष्टः क्षीबो मत्तः शङ्कुकर्णः स्तब्धीभूतश्रोत्रविशिष्टः विश्रवसः पुत्रस्तेन हनुमता दृष्टः । श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–ताभिरिति । प्रमदावनम् अन्तःपुरोद्यानम् २७

२८–२९] ति० टी०–शङ्कुकर्णनामा तद्वनरक्षी राक्षसस्तेन विश्रवसः पुत्रो राक्षसो रावणो दृष्टः नान्येन केनापि पुरुषेणेत्यर्थः ॥ २८ ॥ २९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–वृत इति । ताराभिः चन्द्रमा इव नारीभिर्यो वृतः तं रावणं महाकपिर्ददर्श ॥ २९ ॥

गो० टी०–क्षीब इति । क्षीबः मत्तः । शङ्कुकर्णः गर्वेण स्तब्धकर्ण इत्यर्थः ॥ २८ ॥ २९ ॥

३०] ति० टी०–यः पुरमध्ये पुरा शेते शयितः सोऽयमेवेत्यन्वयः तस्मादावणोऽयमिति संचिन्त्यावप्लुतः । स्वाश्रितशाखाया अत्यूर्ध्वशाखान्तर इति शेषः ॥ ३० ॥

रा० टी०–रावण इति । पुरमध्ये गृहोत्तमे यः पुरा शेते स रावणोऽयमेव इति संचिन्त्य अयं मद्बुद्धिस्थो हनुमान् अवप्लुतः स्वाधिष्ठितशाखायाः उर्ध्वशाखां प्राप्तः । सार्धश्लोक एकान्वयी ॥ ३० ॥

गो० टी०–रावणोऽयमिति । अवप्लुतः अवरूढः रावणचेष्टाः सर्वा द्रष्टुं पूर्वस्थानादधःशाखां समाश्रित इत्यर्थः ॥ ३० ॥

३१] ति० टी०–यद्यपि स समुद्रलङ्घनकर्ता, स मारुतात्मजो हनुमानुग्रतेजा तथापि तस्य रावणस्य तेजसा निर्भूतस्तस्य पुरोऽवस्थातुमशक्नुवन्पत्रे पत्रबहुले अत एव गुह्यान्तरे शाखान्तरे सक्तः स्थितः । तत्राप्यत्यल्पशरीरतया संवृतो गुप्तोऽभवत् सर्वमायातिरस्कारकमायावतस्तस्य दृष्ट्यर्थे मायायाल्पशरीरादिमत्त्वेन स्थातुमशक्यत्वादेवं करणम् ॥ ३१ ॥

रा० टी०–स इति । यद्यपि स हनुमान् उग्रतेजास्तथापि तस्य रावणस्य तेजसा सनिर्भूतः कार्यविशेषसाधनाय निर्भूतत्वसहितः सन् गुह्यान्तरे छन्नशाखान्तरे सक्तः सन् संवृतोऽभवत् ॥ ३१ ॥

गो० टी०–स इति । सः हनुमान् तथा पूर्वोक्तरीत्या उग्रतेजाः सन्नपि तस्य रावणस्य तेजसा निर्भूतः सन् पत्रगुह्यान्तरे पत्रगूढप्रदेशे संवृतोऽभवत् गूढोऽभवत् ॥ ३१ ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेऽष्टादशः सर्गः ॥ १८ ॥

३२] ति० टी०–उपावर्तत समीपं प्राप्तः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०–स इति । सतां सज्जनानां दर्शनयोग्याम् ।

१ अर्धमेतत् गो. नास्ति । २ पत्रगुह्यान्तर इति गो. पाठः । ३ ऽपाङ्गामिति गो. पाठः ।

एकोनविंशः सर्गः ।

रावणभयेन वेपमानायाः परिम्लानायाश्च जानक्यास्तात्कालिकमवस्थाविशेषं वर्णयितुमपारयन्निव कविरनेकोपमानैस्तां विशिनष्टि । प्राप्तो रावणस्तामावर्जयितुमुपक्रमते ।

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता । रूपयौवनसंपन्नं भूषणोत्तमभूषितम् ॥ १ ॥
ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् । प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २ ॥
ऊरुभ्यामुदरं छाद्य[1] बाहुभ्यां च पयोधरौ । उपविष्टा विशालाक्षी रुदती[2] वरवर्णिनी ॥ ३ ॥
दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः[3] । ददर्श दीनां[4] दुःखार्तां नावं सन्नामिवार्णवे ॥ ४ ॥
असंवृतायामासीनां धरण्यां संशितव्रताम् । छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥ ५ ॥
मलमण्डनदिग्धाङ्गीं[5] मण्डनार्हाममण्डनाम् । मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥ ६ ॥
समीपं राजसिंहस्य रामस्य विदितात्मनः । संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ७ ॥
शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् । दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ॥ ८ ॥

असितकेशान्तां सीतां दिदृक्षुः रावणः उपावर्तत तत्समीपं प्राप ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

१-२] ति० टी०–ततो हनुमतः प्लवनानन्तरम् । तस्मिन्नेव कालेऽपररात्ररूपे आगमनकाल एव रावणं दृष्ट्वा ततोऽनन्तरं प्रावेपत ॥ १ ॥ २ ॥

रा० टी०–रावणदर्शनानन्तरकालिकं सीतावृत्तान्तमाह–तस्मिन्नित्यादिभिः । तस्मिन् हनुमत्प्लवनसंबन्धिनि काले एव राजपुत्री ततः सा सीता भूषणोत्तमभूषितं ततस्तं रावणं दृष्ट्वैव प्रवाते कदली इव प्रावेपत । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–तस्मिन्नित्यादिश्लोकद्वयमेकान्वयम् । ततः रावणागमनानन्तरम् । तस्मिन्नेव काले तदागमनानन्तरकाल एव । भूषणोत्तमभूषितं रूपयौवनसंपन्नं रावणं ततो दृष्ट्वैव तत्र दूरदेश एव दृष्ट्वा प्रावेपतेति संबन्धः ॥ १–३ ॥

३] ति० टी०–रुदत्युपविष्टाऽभूत् । भीतस्वभावोक्त्या स्वभावोक्तिरत्रालंकारः ॥ ३ ॥

रा० टी०–ऊरुभ्यामिति । वरवर्णिनी सीता ऊरुभ्यामुदरं बाहुभ्यां पयोधरौ च छाद्य आच्छाद्य रुदती सती उपविष्टा ॥ ३ ॥

४] ति० टी०–सन्नां शीर्णाम् । शीर्णनौस्थं जनमिवेत्यर्थः ॥ ४ ॥

५] ति० टी०–असंवृतायामास्तरणरहितायाम् । संशितव्रतां रावणवधाय तीक्ष्णं व्रतमिव कुर्वाणाम् ॥ ५ ॥

रा० टी०–दशेति । अर्णवे सन्नां निमग्नां नावमिव दुःखार्तां दुःखसागरे निमग्नाम् अत एव दीनां संशितव्रतां देवादिरक्षणाय दृढसंकल्पाम् अत एव छिन्नां भूमौ प्रपतितां वनस्पतेः शाखामिव असंवृतायां धरण्यामासीनां मलमण्डनेन मलरूपभूषणेन दिग्धं व्याप्तमङ्गं यस्याः अमण्डनां भूषणरहितां वैदेहीं दशग्रीवो ददर्श । सार्धश्लोकद्वयमेकान्वयि ॥ ४ ॥ ९ ॥

गो० टी०–दशग्रीवस्त्वित्यादि । मलमण्डनचित्राङ्गीं मलरूपमण्डनेन चित्राङ्गीम् मलावृतामप्याश्चर्यावहदेहामित्यर्थः । मृणाली पङ्कदिग्धेवेत्यत्र येत्यध्याहार्यम् ॥ ४–६ ॥

६] ति० टी०–मलेन मण्डनस्थानेषु दिग्धाङ्गीं रूषिताङ्गीम् । 'चित्राङ्गीम्' इति पठित्वा मलरूपेण मण्डनेन चित्राङ्गीं कर्बुरामित्यर्थं तीर्थ आह । संन्यासित्वादुचितैव तस्य मलेऽपि मण्डनत्वबुद्धिः । ईदृशीं यां ददर्श सा पङ्कदिग्धा मृणालीव विभाति न विभाति च । स्वरूपशोभयातिमलावरणाच्च न विभातीत्यर्थः ॥ ६ ॥

रा० टी०–मृणालीति । पङ्कदिग्धा मृणाली इव विभाति न विभाति च सीतेति शेषः । अर्धं पृथक् ॥ ६ ॥

७] ति० टी०–संकल्पस्तच्चिन्तनं तदूपाश्वसंयुक्तैर्मनोरथैरामसमीपं यान्तीमिव ॥ ७ ॥

रा० टी०–समीपमिति । संकल्पहयैः संकल्परूपाश्वैः संयुक्तैर्मनोरथैर्विदितात्मनः सामान्यतः प्रसिद्धस्वरूपस्य रामस्य समीपं यान्तीमिव शुष्यन्तीमिव ॥ ७ ॥

गो० टी०–समीपमित्यादि । आविष्टां मणिमन्त्राद्यभिभूताम् धूप्यमानां सन्तप्यमानाम् धूमः केतुरिव धूमकेतुः (?) । केतुना ग्रहेणेत्यर्थः । यद्वा ग्रहेण ग्राहकेण आच्छादकेनेति धूमकेतुर्विशिष्यते ॥ ७–९ ॥

८] ति० टी०–अपश्यन्तीं तामिव ॥ ८ ॥

रा० टी०–दुःखस्यान्तमपश्यन्तीम् ॥ ८ ॥

१ आच्छाद्योदरमूरुभ्यामिति गो. पाठः । २ रुदन्तीति गो. पाठः । ३ गणे इति रा. पाठः । ४ सीतामिति गो. पाठः । ५ चित्राङ्गीमिति गो. पाठः ।

चेष्टमानामथाविष्टां पन्नगेन्द्रवधूमिव । धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥ ९ ॥
वृत्तशीले कुले जातामाचारवति धार्मिके । पुनः संस्कारमापन्नां जातामिव च दुष्कुले ॥ १० ॥
[अभूतेनापवादेन कीर्तिं निपतितामिव । आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥]
सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् । प्रज्ञामिव परिक्षीणामाशां प्रतिहतामिव ॥ ११ ॥
आयतीमिव विध्वस्तामाज्ञां प्रतिहतामिव । दीप्तामिव दिशं काले पूजामपहृतामिव ॥ १२ ॥
पौर्णमासीमिव निशां तमोग्रस्तेन्दुमण्डलाम् । पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव ॥ १३ ॥
प्रभामिव तमोध्वस्तामुपक्षीणामिवापगाम् । वेदीमिव परामृष्टां शान्तामग्निशिखामिव ॥ १४ ॥
उत्कृष्टपर्णकमलां वित्रासितविहङ्गमाम् । हस्तिहस्तपरामृष्टामाकुलामिव पद्मिनीम् ॥ १५ ॥

९] ति० टी०–आविष्टां मन्त्रायवरुद्धाम् धूप्यमानां संतप्यमानाम् धूमवर्णेन केतुना ॥ ९ ॥

रा० टी०–आविष्टाम् औषधादिना निरुद्धां चेष्टमानां विविधं चेष्टां कुर्वतीं पन्नगेन्द्रवधूमिव धूमकेतुना ग्रहेण धूप्यमानां संताप्यमानां रोहिणीमिव ॥ ९ ॥

१०] ति० टी०–वृत्तमाचारः, शीलं सत्स्वभावः, तद्युते विहितकर्मानुष्ठानवति च कुले जाताम् तादृश एव कुले पुनः संस्कारं पाणिग्रहणसंस्कारमापन्नामपि दुष्कुले जातामुत्पन्नां तत्रैव प्राप्तसंस्कारामिव च मलिनां स्थितताम् । स्त्रीणां विवाहस्यैवोपनयनद्वितीयजन्मस्थानत्वादिति भावः ॥ १० ॥

रा० टी०–वृत्तम् अतिशयेन प्रवृत्तं शीलं यस्मिन् तदेव कुलं तस्मिन् जातां दुष्कुले राक्षसकुले जातामिव राक्षसपुरस्थितात्वेन तत्र जातात्वेन प्रतीयमानामित्यर्थः, पुनः संस्कारम् आपन्नां प्राप्तामिव तत्संसर्गाभाववत्स्थित्या कृतसंस्कारात्वेन प्रतीयमानामित्यर्थः ॥ १० ॥

गो० टी०–वृत्तेति वृत्तं दृढं शीलं स्वभावो यस्य तत् तच्च तत् कुलं च तस्मिन् आचारवति समयाचारवति धार्मिके यज्ञादिधर्मप्रधाने एवंभूते कुले जाताम् संस्कारमापन्नां विवाहरूपसंस्कारमापन्नाम् अतः संस्कारद्वारा दुष्कुले पुनर्जातामिव स्थिताम् कुमाराणामुपनयनमिव कुमारीणां विवाहो द्वितीयं जन्म 'वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः' इति स्मृतेः ॥ १० ॥ ११ ॥

११] ति०टी०–सन्नां क्षीणाम् विमानितामनादृताम् ॥ ११ ॥

रा० टी०–सन्नां दुर्जनेन अन्यथा कथ्यमानां विमानिताम् अनादृतां श्रद्धामिव परिक्षीणां वितण्डादिना अन्यथा कीर्त्यमानां प्रज्ञामिव ॥ ११ ॥

गो० टी०–सन्नां क्षीणाम् श्रद्धामिव विमानिताम् अवमानितामित्यर्थः । अवमाने हि कृते अवमन्तरि श्रद्धा मन्दीभवति पूजामिव परिक्षीणां स्वल्पपूजाद्रव्यामित्यर्थः । प्रतिहतां निष्फलाम् ॥ १२ ॥

१२] ति० टी०–आयती धनादिप्राप्तिः । आज्ञा राज्ञ इति शेषः । काले उत्पातकाले । पूजां देवपूजाम् ॥ १२ ॥

रा० टी०–प्रतिहतां विषयालाभान्निवृत्तनाशामिव विध्वस्तां कथञ्चिन्निवारिताम् । उत्तरकालकवृद्धिमिव प्रतिहतां केनचिदकृताम् । आज्ञां राजानुशासनमिव काले उत्पातसमये दीप्तां दिशमिव अपहृतां कथञ्चित् अन्यथा कृतां पूजामिव ॥ १२ ॥

गो० टी०–आयतीं धनलाभम् । विध्वस्तां मन्दीभूताम् प्रतिहताम् अननुष्ठिताम् दीप्तां दाहयुक्ताम् काले उत्पातकाले । पूजामपहृतामिव । अत्र पूजाशब्देन पूजाद्रव्यमुच्यते ॥ १३ ॥

१३] ति० टी०–पौर्णमासीं तत्संबन्धिनीम् । तमो राहुः ॥ १३ ॥

रा० टी०–तमसा राहुणा ग्रस्तमिन्दुमण्डलं यस्यां तां पौर्णमासीं निशामिव विध्वस्तां हिमादिना परिणतां पद्मिनीमिव हतशूरां चमूमिव ॥ १३ ॥

गो० टी०–विध्वस्तां हिमादिहताम् तमोध्वस्तां तमःसंवृताम् उपक्षीणां स्वल्पजलामित्यर्थः ॥ १४ ॥

१४] ति० टी०–प्रभां रविप्रकाशम् । तमोऽन्धकारः । परामृष्टां वेदवेदिरहितपतितैराक्रान्ताम् ॥ १४ ॥

रा० टी०–तमोध्वस्ताम् अन्धकारावृतां प्रभां सूर्यप्रकाशमिव उपक्षीणां वृष्टिनिवृत्त्या अल्पीभूताम् आपगां गङ्गामिव परामृष्टां चाण्डालेन स्पृष्टां देवीं तत्प्रतिमामिव ॥ १४ ॥

गो० टी०–परामृष्टां शूद्रादिभिरिति शेषः ॥ १५ ॥

१५] ति० टी०–उत्कृष्टानि त्रुटितानि पर्णानि कमलानि यस्याः सा ॥ १५ ॥

रा० टी०–हस्तिहस्तपरामृष्टाम् अत एव उत्कृष्टानि परिध्वस्तानि पर्णानि कमलानि च यस्यास्ताम् अत एव वित्रासिता विहङ्गमा यस्यां ताम् अत एव आकुलां कलुषीकृतां पद्मिनीं सरसीमिव ॥ १५ ॥

गो० टी०–उत्कृष्टपर्णकमलाम् उद्धृतपत्रकमलाम् ॥ १६ ॥

---

१ वेष्टमानामिति गो. पा.। २ श्लोकोऽयमधिकः गो. पा.। ३ पूजामिति गो. पा.। ४ अर्धमेतत् वेदीमिवेत्यस्मादर्धादग्रे गो. पा.। ५ राहुरिति गो. पा.।

पतिशोकातुरां शुष्कां नदीं विस्राविताामिव । परया मृजया हीनां कृष्णपक्षे निशामिव ॥ १६ ॥
सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् । तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् ॥ १७ ॥
गृहीतां लालितां स्तम्भे यूथपेन विनाकृताम् । निःश्वसन्तीं सुदुःखार्तां गजराजवधूमिव ॥ १८ ॥
एकया दीर्घया वेण्या शोभमानामयत्नतः । नीलया नीरदापाये वनराज्या महीमिव ॥ १९ ॥
उपवासेन शोकेन ध्यानेन च भयेन च । परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् ॥ २० ॥
आयाचमानां दुःखार्तां प्राञ्जलिं देवतामिव । भावेन रघुमुख्यस्य दशग्रीवपराभवम् ॥ २१ ॥
समीक्षमाणां रुदतीमनिन्दितां सुपक्ष्मताम्रायतशुक्ललोचनाम् ।
अनुव्रतां राममतीव मैथिलीं प्रलोभयामास वधाय रावणः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

१६-१७] ति०टी०–विस्रावितां रोधोभङ्गादिनाऽन्यतः प्रापितजलाम्, अत एव शुष्काम्, मृजयाङ्गशुद्ध्या हीनाम्॥१६॥१७॥

रा० टी०–पतिशोकातुराम् । अत एव विस्रावितां अन्यत्र वाहिताम् अत एव शुष्कां नदीमिव परया शरीरशोभानिष्पादिकया मृजया उद्वर्तनादिना हीनाम् अत एव कृष्णपक्षे निशामिव ॥ १६ ॥

गो० टी०–विस्रावितां रोधोभङ्गादिना अन्यनिर्गमितजलामित्यर्थः। मृजया उद्वर्तनाद्यङ्गशोधनेन ॥ १७ ॥

रा० टी०–उष्णेन घर्मादिना तप्यमानाम् अचिरोद्धृतां मृणालीमिव ॥ १७ ॥

गो० टी०–सुजाताङ्गीं सुन्दराङ्गीम् ॥ १८ ॥

१८] ति० टी०–गृहीतां धृताम् । पश्चात्स्तम्भे लालितां बद्धाम् । कश्चित्तु—'गृहीतामालिताम्' इति पठित्वा आलितामालानितामित्यर्थमाह ॥ १८ ॥

रा० टी०–यूथपेन विना कृताम् अत एव निःश्वसन्तीं गजराजवधूमिव ॥ १८ ॥

गो० टी०–आलितां बद्धाम् ॥ १९ ॥ २० ॥

१९] ति० टी०–अयत्नत इति । केशसंस्काराभावादयत्नतः सिद्धयेति शेषः ॥ १९ ॥

रा० टी०–नीलया वनराज्या महीमिव एकया वेण्या शोभमाना ॥ १९ ॥

२०] ति० टी०–अल्पाहारां जलमात्राहाराम् अज्ञातयात्रस्य ग्रहीतुमशक्यत्वात् देवराजतः पायसलाभेन तदनपेक्षणाच्च ॥ २० ॥

रा० टी०–उपवासादिना कृशां कृशावयवाम् अत एव परिक्षीणां परिक्षीणमनस्काम् अल्पाहाराम् अल्पः अतिसूक्ष्मः वायुरित्यर्थः, आहारो यस्यास्ताम् ॥ २० ॥

गो० टी०–अल्पाहारां तोयमात्राहारामित्यर्थः । यद्वा अल्पाहारां मितभोजिनीमित्युत्तमस्त्रीलक्षणमुच्यते ॥ २१ ॥

२१] ति० टी०–तपोधनत्वादेव रघुमुख्यस्य सकाशाद्दशग्रीवपराभवमायाचमानां प्रार्थयन्तीम्, अत एव भावेनान्तरध्यानेन देवतामिव एवार्थे इव । स्वकुलदेवतामेवोद्दिश्य प्राञ्जलिं कृतनमस्काराम् ॥ २१ ॥

रा० टी०–दशग्रीवपराभवम् आयाचमानां मनोगतराघवाद्याचयन्तीम् अत एव प्राञ्जलिं देवतां चेष्टाराहित्येन देवप्रतिमामिव रघुमुख्यस्य भावेनातिचिन्तनयोपलक्षिताम् ॥२१॥

गो० टी०–आयाचमानामिति । रघुमुख्यस्य कर्तुः दशग्रीवपराभवं भावेन मनसा आयाचमानां प्रार्थयन्तीमिव स्थिताम् ॥ २२ ॥

२२] ति० टी०–क्रोधेन रोदनेन वा ताम्रप्रान्ते आयते शुक्ले च लोचने यस्यास्ताम् । वधाय तावन्मात्रफलकमेव, न तु स्वेष्टफलकमिति तात्पर्यम् ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०–समीक्षमाणाम् इतस्ततो राममवलोकयन्तीं सुपक्ष्माणि ताम्रायतानि शुक्लानि रोदनेन शुक्लत्वमापन्नानि लोचनानि यस्यास्तां राममुद्दिश्य अतीव अनुव्रतां मैथिलीं रावणः प्रलोभयामास वञ्चनावचनमुच्चारयामास । षोडशानां श्लोकानामेकत्रान्वयः ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

गो०टी०–समीक्षमाणां रक्षकं समीक्षमाणाम् । सुपक्ष्मेति । अन्ते ताम्रं मध्ये शुक्लमस्या लोचनमित्युच्यते ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

---

१ पक्षनिशामिति गो. पाठः । २ आलितामिति गो. पाठः ।

विंशः सर्गः ।

चाटुवचनोपन्यासैः सीतां प्रति प्रलोभयन्रावणः प्ररोचनपूर्वं स्वाङ्गीकारं प्रार्थयते ।

स तां परिवृतां दीनां निरानन्दां तपस्विनीम् । साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥ १ ॥
मां दृष्ट्वा नागनासोरु गूहमाना स्तनोदरम् । अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ २ ॥
कामये त्वां विशालाक्षि बहु मन्यस्व मां प्रिये । सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ॥ ३ ॥
नेह [2]किंचिन्मनुष्या वा राक्षसाः कामरूपिणः । व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥ ४ ॥
स्वधर्मो रक्षसां भीरु सर्वदैव न संशयः । गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥ ५ ॥
एवं [3]चैवमकामां त्वां न च स्प्रक्ष्यामि मैथिलि । कामं कामः शरीरे मे यथाकामं प्रवर्तताम् ॥ ६ ॥
देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये । प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७ ॥

१] ति० टी०–परिवृतां राक्षसीभिरिति शेषः । साकारैः साभिप्रायैः 'आकारस्त्विङ्गिताकृती' । न्यदर्शयत् स्वाभिप्रायमिति शेषः ॥ १ ॥

रा० टी०–सीतां प्रति रावणोक्तिं वर्णयितुमाह–स इति । स रावणः परिवृतां राक्षसीभिरिति शेषः, अत एव निरानन्दामत एव दीनां सीतां साकारैरभिप्रायसहितैः अभिप्रायबोधकैरित्यर्थः, वाक्यैः न्यदर्शयत अब्रवीत् । 'आकारस्त्विङ्गिताकृती' इति कोशः ॥ १ ॥

गो० टी०–स तामित्यादि । साकारैः सेङ्गितैः 'आकारावित्विङ्गिताकृती' इत्यमरः । न्यदर्शयत स्वाभिप्रायमिति शेषः सीतायै स्वाभिप्रायं प्रकाशितवानित्यर्थः ॥ १ ॥

२] ति० टी०–नागो गजः । स्तनोदरं गूहमाना भयादिव । भयादेवात्मानं स्वशरीरमदर्शनं नेतुमिच्छसि । तत्किमिति शेषः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह—मामिति । हे नागनासोरु! मां दृष्ट्वा भयादिव स्तनोदरं गूहमाना त्वम् आत्मानम् अदर्शनं दर्शनाभावं नेतुं प्रापयितुमिच्छसि तत्किमर्थमिति शेषः ॥ २ ॥

गो० टी०–मां दृष्ट्वेति । अदर्शनं अदृश्यत्वम् ॥ २ ॥

३] ति० टी०–नैवं भीतिर्मत्तस्ते युक्तेत्याह—कामय इत्यादि ॥ ३ ॥

रा० टी०–कामये इति । हे विशालाक्षि ! त्वां त्वद्दर्शनम् अहं बहु कामये अतो मां मन्यस्व स्वदर्शनाभिलाषिणं जानीहीत्यर्थः ॥ ३ ॥

गो० टी०–मां दृष्ट्वा भीतिर्न कर्तव्येत्याह–कामय इति॥३॥

४] ति० टी०–किमिदानीं मदतिरिक्तपुरुषान्तरजं तव भयम्, उत मम स्पर्शे धर्महानिजम् । नाद्य इत्याह—नेहेति । मत्तो मदागमनात्समुत्थितं पुरुषान्तरागमनसंभावनया जातं भयं व्यपसर्पतु अन्येषामभावात् ॥ ४ ॥

रा० टी०–नन्वहं राक्षसेभ्यो बिभेम्येवेत्यत आह–नेति । मत्तः मद्भयात् इह केचित् मनुष्यादयो न अतः समुत्थितं ते भयं व्यपसर्पतु अपगच्छतु ॥ ४ ॥

गो० टी०–अन्ये च भयहेतवोऽत्र न सन्तीत्याह–नेहेति ४

५] ति० टी०–नान्त्य इत्याह—स्वधर्म इति । तं स्वधर्ममाह—गमनं वेति । आनुकूल्यं संपाद्येति शेषः । संप्रमथ्य बलात्कृत्य एवं स्वधर्मत्वान्मम नाधर्मः बलात्कारे चास्वतन्त्रत्वात्क्रियया अपि न दोष इति भावः ॥ ५ ॥

रा० टी०–नन्वु परदारापहर्तृत्वे नातिपापित्वात् त्वत्कर्मकदर्शनाद्विभेमीत्यत आह–स्वधर्म इति । परस्त्रीणां हरणं संप्रमथ्य हत्वा गमनं प्रक्षेपणं वा रक्षसां सर्वदैव स्वधर्मः । एतेन स्वधर्माचरणवत्कर्मकं दर्शनं न निषिद्धमिति सूचितम् ॥ ५ ॥

गो० टी०–परदारेच्छा दोष इत्याशङ्क्याह–स्वधर्म इति। संप्रमथ्य बलात्कृत्य। कामम् अत्यन्तम् यथाकामं यथेच्छम् ॥ ५ ॥ ६ ॥

६] ति० टी०–एवं च एवमपि बलात्कारपक्षे तव मम च दोषाभावेऽपि तस्य पक्षस्य रसाभासंपादकत्वात्, अत एवमकामामनेन प्रकारेण मयि कामरहितां त्वां मद्विश्लेषेच्छावतीं च न च, न तु स्प्रक्ष्यामि । 'एवं चैतदकामां त्वाम्' इति पाठे एतद्दक्षोधर्मत्वम् । एवं चैवमेव मदुक्तरीतिकमेव, तथाप्युक्तप्रकारेण त्वामकामां न स्प्रक्ष्यामीत्यर्थः । नन्वेवं सति दुःसहा कामपीडा तव स्यात्तत्राह—काममिति । कामो मन्मथो यथाकामं यथेच्छं कामं तद्विषयेच्छां प्रवर्ततां प्रवर्तयत्वित्यर्थः ॥ ६ ॥

रा० टी०–नन्वु मत्कर्तृकावलोकनाभावेऽपि त्वत्कर्तृकदर्शनस्य निरोधाभावान्न काचिद्धानिरित्यत आह—एवमिति । काममत्यन्तम् अकामां मत्कर्तृकावलोकनविषयकेच्छारहितां त्वां नैव स्प्रक्ष्यामि चक्षुर्विषयतां नेष्यामि शरीरे कामः त्वत्कर्मकदर्शनविषयकेच्छा तु यथाकामं प्रवर्तताम् । एवं त्वर्थे ॥ ६ ॥

७] ति० टी०–अतः सर्वथा भयं न कार्यमित्याह—

१ पतिव्रतामिति गो. पाठः । २ केचिदिति गो. पाठः । ३ चैतदकामां तु न त्वामिति गो. पाठः ।

एकवेणी अधःशय्या ध्यानं मलिनमम्बरम् । अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८ ॥
विचित्राणि च माल्यानि चन्दनान्यगुरूणि च । विविधानि च वासांसि दिव्यान्याभरणानि च ॥ ९ ॥
महार्हाणि च पानानि शयनान्यासनानि च । गीतं नृत्यं च वाद्यं च लभ मां प्राप्य मैथिलि ॥ १० ॥
स्त्रीरत्नमसि मैवं भूः कुरु गात्रेषु भूषणम् । मां प्राप्य हि कथं वा स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥
इदं ते चारुसंजातं यौवनं ह्यतिवर्तते । यदतीतं पुनर्नैति स्रोतः स्रोतस्विनामिव ॥ १२ ॥
त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वकृत् । नहि रूपोपमा ह्यन्या तवास्ति शुभदर्शने ॥ १३ ॥
त्वां समासाद्य वैदेहि रूपयौवनशालिनीम् । कः पुनर्नातिवर्तेत साक्षादपि पितामहः ॥ १४ ॥
यद्यत्पश्यामि ते गात्रं शीतांशुसदृशानने । तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥

देवीति । देवि सर्वान्तःपुरपूज्ये ! इह मयि मद्विषये प्रणयस्व संमाननं कुरु संमानने नयतेरात्मनेपदम् ॥ ७ ॥

रा० टी०–देवीति । हे देवि ! मयि विश्वसिहि विश्वासं कुरु अतः इह अस्मिन् स्थाने भयं न कार्यं तत्त्वेन स्वानुचरबुद्ध्या प्रणयस्व संमाननं कुरु अत एव एवम् अनेन प्रकारेण शोकलालसा शोकव्याप्ता मा भूः ॥ ७ ॥

गो० टी०–देवीति । प्रणयस्व स्नेहं कुरु ॥ ७ ॥

८] ति० टी०–अधःशय्या भूशयनम् । नौपयिकानि न पुरुषार्थोपयुक्तानि ॥ ८ ॥

रा० टी०–एकेति । अस्थाने स्वस्थानभिन्नेऽपि एतान्येकवेण्यादीनि तेन औपायकानि युक्तानि ॥ ८ ॥

गो० टी०–एकवेणीति । एकवेणी असीमन्नितत्तवेणी धराशय्या भूशयनम् औपयिकानि युक्तानि ' युक्तमौपयिकम् ' इत्यमरः ॥ ८–१० ॥

९–१०] ति० टी०–मां प्राप्य विचित्रमाल्यादीनि लभस्वेत्यर्थः ॥ ९ ॥ १० ॥

रा० टी०–विचित्राणीति । हे मैथिलि ! मां प्राप्य स्वानुचरत्वेन ज्ञात्वा माल्यादीनि लभ लभस्व । श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

११] ति० टी०–अनर्हा भूषणानामिति शेषः । सुविग्रहे ! इति संबुद्धिः ॥ ११ ॥

रा० टी०–स्त्रीति । हे सुविग्रहे ! यतस्त्वं स्त्रीरत्नं सर्वस्त्रीश्रेष्ठमसि अत एवमुदासीनत्वादिविशिष्टा मा भूः अतः गात्रेषु भूषणं कुरु हि यतः मां प्राप्य अनर्हा अपूजिता त्वं कथं स्याः ॥ ११ ॥

गो० टी०–स्त्रीरत्नमिति । मां प्राप्य हीति । हिः पादपूरणे अव्ययो वा । हे सुविग्रहे ! मां प्राप्यापि कथमनर्हा स्याः ॥ ११ ॥ १२ ॥

१२] ति० टी०–अतिवर्ततेऽतिक्रम्य गच्छति । स्रोतस्विनो जलप्रवाहाः । स्रोतस्तेन प्रवहज्जलम् । अतो भुङ्क्ष्व भोगानिति शेषः ॥ १२ ॥

रा० टी०–भूषणधारणसमयोऽयमेवेति बोधयन्नाह–इदमिति । अतीतं गतं स्रोतस्विनां महाप्रवाहाणां स्रोतः अल्पप्रवाह इव संजातं निष्पन्नं चारु शोभनं यौवनं युवावस्था अतिवर्तते । एतेन भूषणादीनि धारयेति सूचितम् ॥ १२ ॥

१३] ति० टी०–रूपकर्ता दिव्यरूपस्रष्टा त्वां कृत्वा निर्मायोपरतो दिव्यरूपनिर्माणाद्विरत इति मन्ये । उत्प्रेक्षायां हेतुः—हि यतस्तव रूपोपमा नास्ति । यदि पुनः स उत्तमरूपनिर्माणे यतेत, न तथापि तवोपमेत्याशयः ॥ १३ ॥

रा० टी०–त्वामिति । रूपकर्ता विश्वकृत् ब्रह्मा त्वां कृत्वा तद्रूपं सर्वोत्कृष्टत्वेन निर्माय उपरतो निवृत्तः इत्यहं मन्ये अतस्तव रूपोपमा तव रूपसदृशी अन्या नास्ति ॥ १३ ॥

गो० टी०–त्वामिति । उपरतः निवृत्तः अत्रेतिकरणं द्रष्टव्यम् । उत्तरोत्तरं सातिशयं रूपं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतः परं सातिशयं रूपं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति मन्य इत्यर्थः ॥ १३ ॥

१४] ति० टी०–को नातिवर्तेत क्षुभ्येतेत्यर्थः । 'कः पुमानतिवर्तेत' इति पाठे कामवशतामतिक्रम्य को वर्तेतेत्यर्थः ॥ १४ ॥

रा० टी०–ननु त्वत्सेवामनाकाङ्क्षन्तीं मां किमर्थं बहूच्यते इत्यत आह–त्वामिति । हे वैदेहि ! त्वां समासाद्य प्राप्य पितामहोऽपि नातिवर्तेत स्वौद्धत्यं न प्रकाशयेत् तर्हि अन्यः कोऽतिवर्तेत ॥ १४ ॥

गो० टी०–त्वामिति । कः अतिवर्तेत न कोऽपीत्यर्थः ॥ १४—१९ ॥

१५] ति० टी०–निबध्यते बद्धं जायते ॥ १५ ॥

रा० टी०–यद्यदिति । हे शीतांशुसदृशानने ! यद्यत्ते गात्रं पश्यामि तस्मिन् तस्मिन् मम चक्षुर्निबध्यते एतेन तच्चरणादीनां मनोहरत्वं व्यञ्जितम् ॥ १५ ॥

---

१ धरेति गो. रा. पाठः । २ नृत्तमिति गो. पाठः । ३ अपीति गो. पाठः । ४ न्विति गो. पाठः । ५ व्यतीति गो. पाठः । ६ शीघ्रमपामिति गो. पाठः । ७ खन्येति गो. पाठः ।

भव मैथिलि भार्या मे मोहमेतं विसर्जय । बह्वीनामुत्तमस्त्रीणां [आहृतानामितस्ततः ।
सर्वासामेव भद्रं ते] ममाग्रमहिषी भव ॥ १६ ॥
लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि मे । तानि ते भीरु सर्वाणि राज्यं चैव ददामि ते ॥ १७ ॥
विजित्य पृथिवीं सर्वां नानानगरमालिनीम् । जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥
नेह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् । पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥
असकृत्संयुगे भग्ना मया विमृदितध्वजाः । अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥
इच्छ मां क्रियतामद्य प्रतिकर्म तवोत्तमम् । सुप्रभाण्यवसज्जन्तां तवाङ्गे भूषणानि हि ॥ २१ ॥
साधु पश्यामि ते रूपं सुयुक्तं प्रतिकर्मणा । प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ॥ २२ ॥
भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च । यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥ २३ ॥
ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च । मत्प्रसादाल्ललन्त्याश्च ललतां बान्धवास्तव ॥ २४ ॥
ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशस्विनि । किं करिष्यसि रामेण सुभगे चीरवाससा ॥ २५ ॥

१६-१७] ति० टी०-मोहं नैतद्दशा भविष्यामीति बुद्धिम् ॥ १६ ॥ १७ ॥

रा० टी०-भवेति । हे भवमैथिलि ! भवति भावयति नितरां स्वपतिं चिन्तयति सा एव मैथिली तत्संबोधनम् अग्रस्य सर्वोत्कृष्टस्य रामस्य महिषी त्वं मम बह्वीनामुत्तमस्त्रीणां भार्या सेव्या भव अत एव तं विद्यमानं मे मोहं वैचित्यं विसर्जय त्याजय ॥ १६ ॥

रा० टी०-लोकेभ्य इति । यानि रत्नानि प्रमथ्य रिपून् जित्वा लोकेभ्यो मे मया हृतानि तानि सर्वाणि एतत् राज्यं च अहं ते ददामि अतः ते तवैव त्वत्स्वामिनीका एव अस्मदादय इत्यर्थः ॥ १७ ॥

१८] ति० टी०-तव हेतोस्त्वत्प्रीत्यर्थम् ॥ १८ ॥

रा० टी०-नन्वु बन्धुवर्गं विहायाहं न स्थास्यामीत्यत आह-विजित्येति । सर्वां पृथिवीं विजित्य तव हेतोः तव जनकाय प्रदास्यामि एतेन तमपि आनेष्यामीति ध्वनितम् ॥ १८ ॥

१९] ति० टी०-प्रतिबलो युद्धे जेता ॥ १९ ॥

रा० टी०-नेति । यो मे प्रतिबलः प्रतिद्वन्द्वो भवेत् तम् अन्यं लोके नैव पश्यामि अतः आहवे अप्रतिद्वन्द्वं मे वीर्यं त्वं पश्य जानीहि ॥ १९ ॥

२०] ति० टी०-प्रत्यनीकेषु प्रतिसैनिकभावेषु ॥ २० ॥

रा० टी०-वीर्यमेवाह-असकृदिति । असकृद्भद्भुवारं मया विमृदितानि ध्वजानि येषां ते भग्नाः अङ्गभङ्गं प्राप्ताः अत एव प्रत्यनीकेषु प्रतिसैनिकभावेषु स्थातुम् अशक्ताः सुरासुरा अभवन्नित्यन्तं शेषः ॥ २०

गो० टी०-असकृदिति । विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु शत्रुषु मध्ये ॥ २० ॥

२१] ति० टी०-प्रतिकर्मप्रसाधनम् अलंकरणमिति यावत् ॥ २१ ॥

रा० टी०-इच्छेति । माम् इच्छ सेवकत्वेनाकाङ्क्ष एतेन ते भयं नास्तीति सूचितम् अत एव उत्तमं प्रतिकर्म भोजनादिकृत्यं क्रियतां सुप्रभाणि भूषणानि तवाङ्गेषु अवसज्जन्ताम्॥२१॥

गो० टी०-इच्छेति । प्रतिकर्म अलंकारः 'प्रतिकर्म प्रसाधनम्' इत्यमरः । अवसज्यन्ताम् अर्प्यन्ताम् । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयम् ॥ २१ ॥ २२ ॥

२२-२३] ति० टी०-प्रतिकर्मणा युक्तं ते रूपं पश्यामि भाविकमत्रालंकारः । दाक्षिण्येन मद्विषयककृपया । प्रतिकर्माभिसंयुक्ता भवेति शेषः ॥ २२ ॥ २३ ॥

रा० टी०-साध्विति । प्रतिकर्मणा कर्तव्यभोजनादिनिखिलक्रियया सुयुक्तं ते रूपं पश्यामि पश्येयम् । अर्धं पृथक् । प्रतीति । प्रतिकर्माभिसंयुक्ता अत एव दाक्षिण्येनोपलक्षिता त्वं भोगान् राज्यैश्वर्याणि यथाकामं भुङ्क्ष्व पिब दिव्यरसास्वादं कुरु रमस्व दासीभूतमन्दोदर्यादिभिः विहरस्व । अर्धद्वयमेकान्वयि ॥ २२ ॥

गो० टी०-प्रतिकर्मेति । दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव 'दक्षिणे सरलोदारौ' इत्यमरः ॥ २३ ॥

रा० टी०-यथेष्टमिति । प्रयच्छ देहि मयि विस्रब्धा सती ललस्व योग्यवस्तुषु वाञ्छां कुरु अत एव धृष्टं यथा स्यात्तथा आज्ञापयस्व च ॥ २३ ॥

गो० टी०-यथेष्टमिति । ललस्व प्रीतिं कुरु । "लल, ईप्सायाम्" इति धातुः ॥ २४ ॥ २५ ॥

२४] ति० टी०-ललस्वेप्सां कुरु । मत्प्रसादान्मयि प्रसादात् । ललन्त्या मदीप्साजनितप्रभावेण वर्धमानायाः ॥ २४ ॥

रा० टी०-मदिति । मत्प्रसादात् मद्विषयककृपातः ललन्त्यास्तव बान्धवाः अपि ललन्ताम् । अर्धं पृथक् ॥ २४ ॥

२५] ति० टी०-ऋद्धिं पराकमादिसंपदम्, श्रियं धनादिसंपदम् ॥ २५ ॥

१ एनमिति गो. पाठः । २ पादद्वयमेतदधिकं गो. पाठे । ३ वै इति गो. पाठः । ४ मे इति गो. पाठः । ५ चैतदहं च ते इति गो. पाठः । ६ सप्रभेति गो. पाठः । ७ सज्यन्तामिति गो. पाठः । ८ ललन्तां बान्धवा इति गो. रा. पाठः । ९ वाससेति गो. पाठः ।

निक्षिप्तविजयो रामो गतश्रीर्वनगोचरः । व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥
नहि वैदेहि रामस्त्वां द्रष्टुं वाप्युपलभ्यते । पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २७ ॥
न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः । हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि । मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ॥
क्लिष्टकौशेयवसनां तन्वीमप्यनलंकृताम् । त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥
अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः । यावत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३१ ॥
मम ह्यसितकेशान्ते त्रैलोक्यप्रवरस्त्रियः । तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३२ ॥
यानि वैश्रवणे सुष्ठु रत्नानि च धनानि च । तानि लोकांश्च सुश्रोणि मया भुङ्क्ष्व यथासुखम् ३३ ॥
न रामस्तपसा देवि न बलेन च विक्रमैः । न धनेन मया तुल्यस्तेजसा यशसाऽपि वा ॥ ३४ ॥

रा० टी०—ननु तर्हि राममपीहानय इत्यत आह—ऋद्धिमिति । त्वं मम ऋद्धिं श्रियं च पश्य चीरवासिना चीराच्छादितेन रामेण किम् ॥ २५ ॥

गो० टी०—एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना । निक्षिप्तविजयः त्यक्तविजय इत्यर्थः । स्थण्डिलशायी भूतलशायी ॥ २६ ॥

२६] ति० टी०—निक्षिप्तविजयो निरस्तविजयसाधनः, अत एव गतश्रीत्वादिगुणः । जीवनस्यैव संदेहे पराक्रमादिसंभावना दूरत इत्यर्थः ॥ २६ ॥

रा० टी०—शूर्पणखाविरूपादिकरणजनिततापशान्तये रामविषयकसीतातिप्रीतिं निवारयितुमाह—निक्षिप्तेति । निक्षिप्तस्तव हरणादिना विनष्टः विजयः विजयसामग्र्युत्साहादिर्यस्य अत एव गतश्रीः रामः जीवति न वा इत्यहं शङ्के विचारयामि ॥ २६ ॥

२७] ति० टी०—द्रष्टुं वापि प्राप्तिस्तु दूरतरेत्यर्थः । उपलभ्यते । व्यत्ययेन श्यन्प्रत्ययः समर्थो भवतीत्यर्थः । 'उपलप्स्यते' इति पाठे समर्थो भविष्यतीत्यर्थः । पुरोबलाकैः अग्रेसरबलाकैः ॥ २७ ॥

रा० टी०—ननु जीवति चेदानयेत्यत आह—न हीति । हे वैदेहि ! रामः त्वां द्रष्टुमपि नोपलभ्यते संभाव्यते । तत्र दृष्टान्तः पुरोऽग्रे बलाका बकपङ्क्तयो येषां तैर्मेघैराततां ज्योत्स्नामिव ॥ २७ ॥

गो० टी०—नहीति । वाशब्दोऽवधारणे द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं न प्राप्स्यसीत्यर्थः (?) । पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते महामेघेष्वेव बलाकासंचारवर्णनात् ॥२७॥

२८–२९] ति० टी०—इन्द्रहस्तगतां कीर्तिं कीर्तितुल्यां भार्यामिन्द्रहृतां नारदमुखेन प्रार्थनया यथा हिरण्यकशिपुः प्राप्तवान्, नैवं त्वां रामः प्राप्स्यतीति भावः । इयं च कथा भागवते प्रसिद्धेति तीर्थः ॥ २८ ॥ २९ ॥

रा० टी०—नेति । मम हस्तात् त्वां प्राप्तुं राघवो नार्हति । तत्र दृष्टान्तः इन्द्रहस्तगतां कीर्तिं हिरण्यकशिपुरिव ॥ २८ ॥

रा० टी०—दौरात्म्यं निवारयितुमाह—चार्विति । सुपर्णः पन्नगमिव मे मनस्त्वं हरसि ॥ २९ ॥

गो० टी०—न चापीति । हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतच्छ्रीभागवते प्रसिद्धम् 'व्यलुम्पन् राजशिबिरमसय राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥' इत्यादिप्रह्लादवचनात् ॥ २८–३० ॥

३०] ति० टी०—स्वेषु दारेषु मन्दोदर्यामपि ॥ ३० ॥

रा० टी०—अनलंकृतामिति । अनलंकृतां त्वां त्वद्दुःखमित्यर्थः, दृष्ट्वा स्वेषु दारेषु रतिं प्रीतिम् अहं नोपलभामि अतिदुःखितं मनः क्वापि न प्रवर्तते इत्यर्थः । एतेन रावणस्य दयालुत्वं सूचितम् ॥ ३० ॥

३१–३४] ति० टी०—ऐश्वर्यमाधिपत्यम् ॥ ३१–३४ ॥

रा० टी०—अन्तरिति । अन्तःपुरनिवासिन्यः सर्वगुणान्विताः मम भार्याः यावत्यः सन्ति सर्वासां तासामैश्वर्यं तन्निरूपितेश्वरत्वं कुरु स्वस्मिन्संपादय ॥ ३१ ॥

रा० टी०—ममेति । हे असितकेशान्ते हे अबद्धकेशभागे! अप्सरसः श्रियमिव त्रैलोक्य प्रवरस्त्रियः त्वां परिचरिष्यन्ति ३२

गो० टी०—अन्तःपुरेति । ऐश्वर्यम् अन्तःपुरैश्वर्यम् । स्वामिनीत्वं कुरु प्राप्नुहीत्यर्थः ॥ ३१ ॥ ३२ ॥

रा० टी०—यानीति । मयोपार्जितानि वैश्रवणे कुबेरे यानि रत्नानि धनानि च तानि मां विष्णुलोकलक्ष्मीं च लोकांश्च भुङ्क्ष्व स्वाधीनत्वं प्रापयेत्यर्थः ॥ ३३ ॥

रा० टी०—रामविषयकाशां निवर्तयितुमाह—नेति । रामः तपआदिना मया तुल्यो न एतेन स इह नागमिष्यतीति सूचितम् ॥ ३४ ॥

गो० टी०—यानीति । भुङ्क्ष्व स्वाधीनं कुरु ॥३३॥३४॥

१ लप्स्यत इति गो. पाठः । २ सुस्थिति गो. पाठः

पिब विहर रमस्व भुङ्क्ष्व भोगान्धननिचयं प्रदिशाभि मेदिनीं च ।
मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३५ ॥
कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि ।
कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ।

मध्ये तृणप्रक्षेपेण दुःसंसर्गं निवार्य साम्ना हितोपदेशपूर्वकं रावणं प्रबोधयन्ती सीता रामगुणान्प्रस्तुत्य तेन सख्यविरोधाभ्यां जायमानशुभाशुभफलं प्रदर्श्य तस्मै आत्मसमर्पणेन सख्यं संपादयेत्युपदिशति ।

तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः । आर्ता दीनस्वरा दीनं प्रत्युवाच ततः[1] शनैः ॥ १ ॥
दुःखार्ता रुदती सीता वेपमाना तपस्विनी । चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥ २ ॥
तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता । निवर्तय मनो मत्तः स्वजने प्रीयतां[2] मनः ॥ ३ ॥

३५-३६] ति० टी०–प्रदिश देह्यभितो मेदिनीमपीष्टेभ्यो देहि । लल ईप्सावती भव । ललन्तु प्राप्नुवन्तु समस्तेप्सिता भवन्तु । प्रश्लिष्टोऽयम् ॥ ३५ ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

रा० टी०–उपसंहरन्नाह—पिबेति द्वाभ्याम् । मयि मत्समीपे विद्यमानान् भोगादीन् पानादिकर्मीभूतान् कुरु प्रदिश यथेच्छं देहि च त्वयि समेत्य त्वत्समीपं प्राप्य ते बान्धवाः यथासुखं ललन्तु वाञ्छया भोगादीन् प्राप्नुवन्तु ॥ ३५ ॥

रा० टी०–कुसुमितेति । कुसुमितैस्तरुजालैः सन्ततानि व्याप्तानि समुद्रतीरजानि मया सर्वसंपत्त्या सह सहितानि काननानि कनकविमलहारभूषिताङ्गी त्वं विहर ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

गो० टी०–पिबेति । पिब मयमिति शेषः विहर संचर विहारशब्दस्य संचारेऽपि प्रयोगात् ॥ ३५ ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

१] ति० टी०–तस्येति । दीनमिति क्रियाविशेषणम् ॥ १ ॥

रा० टी०–रावणं प्रति सीतोक्तिमाह–तस्येत्यादिभिः । रक्षसस्तस्य रावणस्य तदुक्तं वचनं श्रुत्वा आर्ता दुःखिता अत एव दीनस्वरा सीता दीनं यथा भवति तथा शनैः प्रत्युवाच ॥ १ ॥

गो० टी०–तस्येत्यादि ॥ १ ॥

२] ति० टी०–पतिमेव चिन्तयन्ती प्रत्युवाचेति संबन्धः ॥ २ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–दुःखार्तेति । पतिमेव चिन्तयन्ती शुचिस्मिता सीता अन्तरतः मध्ये तृणं कृत्वा प्रत्युवाच । सार्धश्लोक एकान्वयी ॥ २ ॥

गो० टी०–दुःखार्तेत्यादि । तृणमिति रावणस्य साक्षात्संभाषणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति पुनरभिधानं वचनप्रकारविशेषकथनार्थम् । दुःखार्तायां अपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मितवत् प्रतीयमानत्वात् ॥ २ ॥ ३ ॥

३] ति० टी०–तृणमन्तरतः कृत्वा परपुरुषस्य साक्षात्संभाषणानर्हत्वात् भूम्यां किंचिदन्तर्धाय मूत्रादिविसर्जनवत्तृणान्तरेण तस्य मुखे प्रत्युत्तरदानम् । कथमस्य दुरात्मनो रजस्तमोभिभूतस्य मयि दुराशेति शुचिस्मिता । प्रत्युवाचेति पुनरभिधानं प्रकारविशेषकथनार्थम् । एतेन तृणीकृतप्राणतया तृणतुल्यतया रावणस्य ग्रहणाच्च निभयप्रत्युत्तरदानमिति बोध्यम् । तदेवाह—निवर्तयेति । मत्तो मनो निवर्तय । स्वजने प्रीयतां प्रीतिं कुरु । स्वजनः स्वभार्यादिः । कुद्धोक्त्या मनःपदादेः पौनरुक्त्यं न दोषभाक् । वर्णनीयमर्यादाभावाच्च कवेरपि तादृशं न दोषाय ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–निवर्तयेत्यादिभिः । मत्तः मत्प्रार्थनातः मनो निवर्तय स्वजने मनः क्रियताम् । तत्र हेतुः–पापकृत्वं सिद्धिमिव मां प्रार्थयितुं न युक्तः । अर्धद्वयमेकान्वयि ॥ ३ ॥

१ शनैर्वच इति गो. पाठः । २ क्रियतामिति गो. पाठः ।

न मां प्रार्थयितुं युक्तस्त्वं सिद्धिमिव पापकृत् । अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् ॥ ४ ॥
कुलं संप्राप्तया पुण्यं कुले महति जातया । एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ ५ ॥
रावणं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् । नाहमौपयिकी भार्या परभार्या सती तव ॥ ६ ॥
साधु धर्ममवेक्षस्व साधु साधुव्रतं चर । यथा तव तथाऽन्येषां रक्ष्या दारा निशाचर ॥ ७ ॥
आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् । अतुष्टं स्वेषु दारेषु चपलं चपलेन्द्रियम् ॥
नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥
इह सन्तो न वा सन्ति सतो वा नानुवर्तसे । यथा हि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

४] ति० टी०–सिद्धिं ब्रह्मलोकप्राप्तिम् । एकपत्न्या पतिव्रतया । अकार्यं परपुरुषस्पर्शरूपम् ॥ ४ ॥

रा० टी०–अकार्यमिति । महति कुले जातया अत एव पुण्यं कुलं संप्राप्तया विवाहविधिना संगतया एकपत्न्या पतिव्रतयेत्यर्थः, मया विगर्हितं पतिविरोधिकर्तृकत्वेन निन्दितं कार्यं कुत्सितस्त्रीभिः कर्तव्यं पूजनं मया अकार्यं न कारयितव्यम् ॥ ४ ॥

गो० टी०–अकार्यमिति । एकः पतिर्यस्याः सा एकपत्नी तया । " नित्यं सपत्न्यादिषु " इति ङीप् ॥ ४ ॥

५] ति० टी०–तं प्राप्तया विवाहसंबन्धेनेति शेषः ॥ ५ ॥

रा० टी०–एवमिति । रावणमेवमुक्त्वा वैदेही रावणं पृष्ठतः कृत्वा भूयोऽब्रवीत् ॥ ५ ॥

गो० टी०–एवमिति । पृष्ठतः कृत्वा अनादृत्येत्यर्थः ॥५॥

६] ति० टी०–पृष्ठतः कृत्वा पराङ्मुख्य स्थित्वा । औपयिकी भोगयोग्या । तत्र हेतुः—सती परभार्येति ॥ ६ ॥

रा० टी०–तद्वचनाकारमाह–नेति । तव भार्याभिः परभार्या अत्यन्तं सेविता सती औपयिकी तदक्षणोपायसाधिका अहं न भविष्यामीति शेषः, अत एव साधुधर्मं साधु अवेक्षस्व चिन्तय अत एव साधुव्रतं संकल्पं चर कुरु ॥ ६ ॥

गो० टी०–नाहमिति । सती अहं तव औपयिकी युक्ता भार्या न किंतु परिहार्या । साधूनां सतां धर्मं साधुधर्मम् साधूनां व्रतं साधुव्रतम् साधु सम्यक् चर ॥ ६ ॥

७] ति० टी०–धर्मं साध्विति पश्य । साधूनां व्रतं चर । यथा तव मन्दोदर्याः परपरिग्रहेण दुःखम्, एवमन्येषामपि स्वदाराणां परपरिग्रहे दुःखमिति ज्ञात्वाऽन्येषां दारा रक्ष्याः परिहार्याः ॥ ७ ॥

रा० टी०–धर्ममेवाह–यथेति । हे निशाचर! दाराः यथा तव रक्ष्याः तथा अन्येषामपि रक्ष्याः अतः आत्मानम् उपमां उपमानं कृत्वा स्वेष दारेष्वेव रम्यताम् अन्यदारनिरोधे मनो न कुर्वित्यर्थः ॥ ७ ॥

गो० टी०–यथेति । आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्तथान्येषां दारा रक्ष्याः । तस्मात् स्वेषु दारेषु रम्यताम् ॥ ७ ॥

८] ति० टी०–यथा स्वदाराणां स्वस्मिन्नेव रत्येहाऽमुत्र सुखमिति स्वस्य निश्चयः तथा परेषामपीत्यर्थः, आत्मानमेव दृष्टान्तीकृत्य स्वेष्वेव दारेषु रम्यताम् अन्यथोभयोरपि धर्मलोप इति भावः । विपक्षे बाधकान्तरमप्याह—अतुष्टमिति । निकृतिप्रज्ञं निकृतिर्न्यक्कारः साधुकृतधिक्कारस्तदास्पदप्रज्ञम् पराभवमजयरूपम् ॥ ८ ॥

रा० टी०–अतुष्टमिति । स्वेषु दारेषु स्वदारपरिहासादिषु अतुष्टम् अत एव चपलेन्द्रियं चालितचक्षुरादिकरणम् अत एव चपलम् अत एव निकृता सद्भिर्धिक्कृता प्रज्ञा बुद्धिर्यस्य तं जनं परदाराः परदारवञ्चनदोषाः पराभवं नयन्ति एतेन परदारवञ्चनं त्वया न कर्तव्यमिति सूचितम् ॥ ८ ॥

गो० टी०–अतुष्टमिति । अतुष्टम् अतृप्तम् । निकृतिप्रज्ञम् निकृतौ शाठ्ये प्रज्ञा यस्य तम् । पराभवम् आयुरैश्वर्यादिक्षयरूपम् ॥ ८ ॥

९] ति० टी०–इह लङ्कानगरे सन्त इहलोकपरलोकहितवक्तारो न वा नैव सन्ति । सत्सु वा तेषु तान्नानुवर्तसे तत्समीपं न गच्छसि गतोऽपि वा न पृच्छसि यथा ते विपरीता बुद्धिः। आचारवर्जिता विहितकर्मविमुख्यविहितसंमुखी च॥९॥

रा० टी०–इहेति । इह लङ्कायां सन्तो महात्मानो न सन्ति वा सतो विद्यमानान् वा महात्मनो नानुवर्तसे अत एव ते बुद्धिः यथा यथावद्विपरीता विरुद्धकर्मविषयिणी अत एव आचारवर्जिता अस्तीति शेषः एतेन त्वया महात्मानोऽनुसर्तव्या इति सूचितम् ॥ ९ ॥

गो० टी०–इह सन्त इति । इह अतिविशालेऽपि दुर्जनसंकुले देशे सन्तः त्वामनर्थान्निवारयन्तः न सन्ति वा न सन्ति किम् सन्त्येव । श्रीविभीषणप्रभृतीनां संभवात्र सन्तीति कथं वक्तुं शक्यम् । सतो वा नानुवर्तसे ' तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इत्युक्तरीत्या प्रणिपातमन्तरेण न ते उपदिशन्ति । त्वं च तत्पादेषु कदाचिदपि न प्रणतवानसि । कथमिदं भवती जानातीत्याशङ्क्याह–तथाहीति । तथाहि विपरीता ते बुद्धिः तव बुद्धिवैपरीत्यमेव तव शिष्टानानुवर्तनं सूचयतीत्यर्थः । परबुद्धेरप्रत्यक्षत्वात् कथं मदीया बुद्धिस्त्वया ज्ञायत इत्यत्राह–आ-

१ युक्तं सुसिद्धिमिति गो. पाठः । २ राक्षसमिति गो. पाठः । ३ तथेति गो. पाठः ।

वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विचक्षणैः । राक्षसानामभावाय त्वं वा न प्रतिपद्यसे ॥ १० ॥
अकृतात्मानमासाद्य राजानमनये रतम् । समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ॥ ११ ॥
तथैव त्वां समासाद्य लङ्का रत्नौघसंकुला । अपराधात्तवैकस्य न चिराद्विनशिष्यति ॥ १२ ॥
स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः । अभिनन्दन्ति भूतानि विनाशे पापकर्मणः ॥ १३ ॥
एवं त्वां पापकर्माणं वक्ष्यन्ति निकृता जनाः । दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ॥ १४ ॥
शक्या लोभयितुं नाहमैश्वर्येण धनेन वा । अनन्या राघवेणाहं भास्करेण यथा प्रभा ॥ १५ ॥
उपधाय भुजं तस्य लोकनाथस्य सत्कृतम् । कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् ॥ १६ ॥

चारवर्जितेति । आचारवर्जिता तव दुरनुष्ठानमेव तव बुद्धिं द्योतयतीति भावः ॥ ९ ॥

१०] ति० टी०–सत्पुरुषत उपदेशसत्त्वेऽपि समूलोन्मूलनं चिकीर्षुर्दैववशात्त्वं न शृणोषीत्याह—वच इति । विचक्षणैर्भाविकार्यपर्यालोचनचतुरैः पथ्यं हितोदर्कं वच उक्तमपि मिथ्याप्रणीतात्मा तद्वचो मिथ्यावस्तुभूतमसारभूतमित्यश्रद्धया प्रणीतः प्राप्त आत्मा बुद्धिर्येन तादृशो राक्षसानामभावाय नाशाय न प्रतिपद्यसे न परिगृह्णासि ॥ १० ॥

रा० टी०–वच इति । वा अथवा मिथ्या असद्वस्तुषु प्रणीतः प्राप्तः आत्मा मनो यस्य स त्वं विचक्षणैर्विवेकिभिः उक्तं पथ्यं हितं वचः राक्षसानामभवाय विध्वंसाय न प्रतिपद्यसे गृह्णासि ॥ १० ॥

गो० टी०–वच इति । पूर्वश्लोके रावणस्याभाव उपन्यस्तः । अनेन राक्षसाभावपक्ष उपन्यस्यते–मिथ्याप्रणीतात्मा मिथ्यास्निग्धात्मा स्नेहीति भावयन्निवेति यावत् । त्वं विचक्षणैः साधुभिरुक्तं पथ्यं हितं वचः राक्षसानामभावाय न प्रतिपद्यसे नाङ्गीकरोषि वा । राक्षसेषु स्नेहं भावयन् तद्विनाशमेव हृदि कृत्वा साधुवचनं न शृणोषीत्यर्थः ॥ १०–१२ ॥

११] ति० टी०–ननु मया सज्जनोपदेशाग्रहे कुतो राक्षसनाशप्रसङ्ग इत्यत्रोत्तरं वक्तुं लोकस्थितिमाह—अकृतेति । अकृतात्मानं सदुपदेशाग्राहिबुद्धिम् ॥ ११ ॥

१२] ति० टी०–तथैवेति । राजापराधतोऽशेषप्रजानाशस्य लोकप्रसिद्धत्वादिति भावः ॥ १२ ॥

रा० टी०–अकृतेति । न कृतः स्वास्थ्यं प्रापितः आत्मा मनो येन तम् अत एव अनये रतं राजानमासाद्य समृद्धानि राष्ट्राणि नगराणि च यथा विनश्यन्ति तथा इयं लङ्का त्वां समासाद्य एकस्य तवैवापराधात् शीघ्रं विनशिष्यति विनङ्क्ष्यति । अर्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

१३] ति० टी०–किं च सज्जनोपदेशमशृण्वतो नाशं सज्जनोऽनुमोदत इत्याह—स्वकृतैरिति । स्वकृतैर्दुष्कृतैर्हन्यमानस्यावश्यप्राप्तनाशस्यादीर्घदर्शिनो भाव्यनर्थदर्शनासमर्थस्य विनाशे उपस्थिते भूतानि सर्वप्राणिनो नन्दन्ति ॥ १३ ॥

रा० टी०–स्वकृतैरिति । हे रावण ! अदीर्घदर्शिनः भविष्यदनर्थज्ञानाभाववतः अत एव स्वकृतैः स्वोपार्जितैः कर्मभिर्हन्यमानस्य तव विनाशे भूतानि सर्वे प्राणिनः अभिनन्दन्ति अभिनन्दिष्यन्ति ॥ १३ ॥

गो० टी०–स्वकृतैरिति । रावणादीर्घदर्शिन इत्यत्र रावणेति संबुद्धिः । निकृताः त्वया वञ्चिताः ॥ १३ ॥ १४ ॥

१४] ति० टी०–एवं निराकृतास्त्वया क्लेशिताः सर्वे जनाः । एतद्व्यसनं स्वबुद्धिप्राप्तनाशम् ॥ १४ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–एवमिति । एवं विनाशं प्राप्तं पापकर्माणं त्वां निकृताः त्वत्तः प्राप्तक्लेशाः जनाः रौद्रोऽयं रावणः एतद् व्यसनं प्राप्तः दिष्ट्या भाग्यमेतत् इति हर्षिताः वक्ष्यन्ति ॥ १४ ॥

१५] ति० टी०–ऐश्वर्यं कुर्वित्यादि यदुक्तं रावणेन प्रलोभनाय तत्प्रत्याख्याति—शक्येति । अनन्या भिन्नत्वाभाववती ॥ १५ ॥

रा० टी०–शक्येति । भास्करेण प्रभा इव राघवेणाहमनन्या अन्यत्र स्थातुमशक्येत्यर्थः, अतः ऐश्वर्येण धनेन च लोभयितुं नाहं शक्या ॥ १५ ॥

गो० टी०–शक्येति । अनेन रावणोक्तप्रलोभनानामुत्तरमुच्यते । ऐश्वर्येण अन्तःपुरस्त्रीणामीश्वरत्वेन धनेन आभरणादिना वा लोभयितुं वञ्चयितुम् अहं न शक्या । अत्र हेतुमाह—अनन्येति । अहं नित्यानपायिनी राघवेण रघुकुलावतीर्णेन विष्णुना अनन्या अविभक्ता यत्र यत्र कुले विष्णुरवतरति तत्र तत्रावतीर्णा लक्ष्मीरित्यर्थः । तृतीयया तत्परतन्त्रा चास्मीति द्योत्यते । न केवलं तस्य परतन्त्राहं प्रत्युत तस्याप्यतिशयावहेति दृष्टान्तेन द्योतयति—भास्करेणेति । प्रभा हि भास्करस्याप्यतिशयभावहेति तथैव हि मारीचो भवन्तं प्रति निवेदितवान् । अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजेति । किं तद्धितवचनमपि मोहेन विस्मृतोऽसीति तत्त्वमाह ॥ १५ ॥

१६] ति० टी०–प्रलोभनाशक्यत्वमेव स्पष्टयति–उपधायेति । उपधानं कृत्वेति सह शयित्वेति यावत् । कस्यचिदतत्त्वभूतस्य ॥ १६ ॥

रा० टी०–उपधायेति । लोकनाथस्य सकलभुवनाधि-

१ इयमिति गो. पाठः ।

अहमौपयिकी भार्या तस्यैव च धरापतेः । व्रतस्नातस्य [2]विद्येव विप्रस्य विदितात्मनः ॥ १७ ॥
साधु रावण रामेण मां समानय दुःखिताम् । वने वा[3]सितया सार्धं करेण्वेव गजाधिपम् ॥ १८ ॥
मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता । व[4]धं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः ॥ १९ ॥

पतेः रामस्य भुजं बाहुं सत्कृतं यथा भवति तथोपधाय अन्यस्य रामभिन्नस्य भुजं कौटिल्यं कथमुपधास्यामि धारयिष्यामि सहिष्यामीत्यर्थः ॥ १६ ॥

गो० टी०–उपधायेति । लोकनाथस्य सर्वैर्ब्रह्मादिदेवगणैः स्वस्वपदप्राप्तये नाथ्यमानस्य याच्यमानस्य । " नाथृ, याच्ञायाम् " इति धातुः । तस्य रामस्य सत्कृतं भुजं दक्षिणं भुजामित्यर्थः उपधाय उपधानीकृत्य तेन तत्परिष्वक्तत्वं गम्यते । एवं श्लाघिताहम् अन्यस्य ततो भोगं याचमानस्य कस्यचिदनामधेयस्य क्षुद्रस्य त्वादृशः भुजम् असत्कृतं कथं नामोपधास्यामि न कथंचिदपीत्यर्थः ॥ १६ ॥

१७] ति० टी०–औपयिकी योग्या । व्रतस्नातस्य ब्रह्मचर्यव्रतपूर्वकं कृतसमावर्तनस्य यथाशास्त्रं मत्पाणिग्रहणं कृतवतो विदितात्मनो ज्ञातस्वतत्त्वस्य ज्ञातपुरुषार्थसाधनस्य च तस्यैवाहं योग्या विप्रस्य विद्येव ब्रह्मविद्येव ब्रह्मविद्या यथा ब्राह्मणस्यैवासाधारणं स्वं न्यायप्राप्तं तद्वत् संन्यासे तस्यैवाधिकाराद्ब्रह्मविद्यायां ब्राह्मणस्यैवाधिकार इति भावः । अन्ये तु––विप्रपदं त्रैवर्णिकपरम्, त्रैवर्णिकस्यैव ब्रह्मविद्यायामधिकारः, अत एव 'धीरस्य' इति क्वचित्पाठ इत्याहुः॥१७॥

रा० टी०–अहमिति । धरापतेः निखिलब्रह्माण्डाधिपतेः विदितात्मनः सामान्यतः प्रसिद्धस्वरूपस्य रामस्य व्रतस्नातस्य विप्रस्य विद्येव औपयिकी योग्या भार्याहमस्मि ॥ १७ ॥

गो० टी०–अहमिति । अहं तु शीलवयोवृत्ता तस्यैव तुल्यशीलवयोवृत्तस्य वसुधापतेः औपयिकी उचिता भार्या । 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति भूमिनाथस्याहं लक्ष्मीदेव्युचितेति हृदयम् । कथमिव व्रतस्नातस्य वेदव्रतैः स्नातस्य धीरस्य धीमतः ब्राह्मणस्य विदितात्मनः आत्मज्ञानवतः विद्येव योगाभ्यासरूपविद्येव ॥ १७ ॥

१८] ति० टी०–हे रावण ! मां रामेण समानय तदेव ते साधु । वने वासितया कामुकया करेण्वा सार्धं गजाधिपमिव । उपमानोपमेयवाक्ययोर्वैषम्यं तु क्रुद्धविरहिण्युक्तित्वान्न दोषावहम् । करेणुं गजाधिपेनेति तु वक्तुमुचितम् ॥ १८ ॥

रा० टी०–नन्वु इदानीं मम कल्याणं कथं स्यादित्यत आह–साध्विति । हे रावण ! दुःखितां मां साधु यथा भवति तथा रामेण समानय संयोजय । तत्र दृष्टान्तः वासितया वासितां युवतिं करेण्वा करेणुं गजाधिपं गजाधिपेनेव 'वासिता युवतिः प्रोक्ता' इति कोशः ॥ १८ ॥

गो० टी०–पथिचोरं पानीययाचकवदावणमर्थयते—साध्विति । साधु रावण ! मद्वियोगेन त्वत्कौर्यमधिकं जातमिति भावः । एवमुत्कटकौर्यं प्रति याचनात् स्वस्यातिशयो व्यज्यते । रामेण सर्वाङ्गसुन्दरेण मां तस्यानन्याहीं तद्वियोगे जीवितं धारयितुमशक्ताम् । नच क्षीतेत्यादि । समानय संगमय । तत्र हेतुः–दुःखितामिति । करेण्वा गजवध्वा वासितया यौवनगतया 'वासिता युवतिः प्रोक्ता कलभः करिपोतकः' इति वचनात् । यद्वा वासितयेति पाठः । वने वासितया बद्धया । अत्र विभक्तिव्यत्यासः कार्यः । वने वासितां करेणुं गजाधिपेनेवेति । वस्तुतस्तु यथान्यास एवान्वेति । रामेण संगमनं नाम रामाह्वानम् । नहि पुनरपि रामस्थानं तेन नेतुमीष्टे । किंत्वत्र राममाहूय समर्पणमेव अत एव करेण्वा गजाधिपमित्युक्तम् ॥ १८ ॥

१९] ति० टी०–बुद्ध्यन्तरं चोपदिशति—मित्रमिति । स्थानं परीप्सता लङ्कां रिरक्षयिषता आत्मनो बन्धं च घोरं सकलकुटुम्बपीडाकरमनिच्छता त्वया पुरुषर्षभोऽसौ रामो मित्रं कर्तुमौपयिकं युक्तम् ॥ १९ ॥

रा० टी०–मित्रमिति । स्थानं स्वपुरं परीप्सता रक्षेच्छुना वधं च अनिच्छता त्वया पुरुषर्षभो रामः मित्रं कर्तुमौपयिकं योग्यः ॥ १९ ॥

गो० टी०–एवं रावणे जननीत्वप्रतिपत्तिं विहाय कानिचिदसंगतानि जल्पति देवी खिन्ना सती कोऽयमस्य स्वभावः कथमस्य कोप्युपदेष्टा सेत्स्यतीति इह सन्तो न वा सन्तीत्यादिना विचिन्त्य दयावती स्वयमेवोपदिशति मातृत्वप्रयुक्तत्वात्सलयेन—मित्रमिति । रामं शरणं गच्छेत्युक्ते तत्र रावणः सहेत दुर्मानितया आत्मसद्बुद्ध्यनुसारेण मित्रमित्याह । किंच शरणागतं स्वस्याधीनं मन्यते देवी देवश्च । अत एव रामो वक्ष्यति । मित्रभावेन संप्राप्तं न त्यजेयं कथंचनेति । इमं च तथाह । मित्रमिति । रामः मित्रं कर्तुं युक्तमित्यर्थः । मित्रशब्दापेक्षया औपयिकमिति नपुंसकनिर्देशः । स्थानं परीप्सता मार्गचोरस्यापि भूमौ पदानि स्थापयित्वा चौर्यं कर्तव्यम् । तवापि यदि स्थानमभीप्सितं तर्हि तमेव भजेत्यर्थः । शरणागतिदैन्यादपि मरणमेव वरमिति यदि मन्यसे तदानीं तद्भजनं कर्तव्यमित्याह—वधं चानिच्छता घोरं तव सम्यङ् मरणं न दास्यति । त्वां संस्थास्य त्वत्समक्षं त्वत्संतानजान् हिंसित्वा ततस्ते चित्रवधं करिष्यति तं यदि नेच्छसि तदा प्रत्तव्या इत्यर्थः । त्वया तत्प्रतीकारावलोकनेन त्वयाऽवश्यं तच्छरणागतिः कर्तव्या । एवं स रक्षक इत्यत्र किं प्रमाणं तत्राह–असौ निरन्तरप्रत्ययेनास्या रामः प्रत्यक्ष इव भासते । रावणस्यापि मायामृगानुसरणसमये तदाकारदर्शनजभयेन वृक्षे वृक्षे च पश्या-

१ वसुधापतेरिति गो. पाठः । २ धीरस्य विद्येवेति गो. पाठः । ३ वाञ्छितयेति गो. पाठः । ४ वधमिति गो. २. पाठः ।

विदितः सर्वधर्मज्ञः शरणागतवत्सलः । तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥ २० ॥
प्रसादयस्व त्वं चैनं शरणागतवत्सलम् । मां चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि ॥ २१ ॥
एवं हि ते भवेत्स्वस्ति संप्रदाय रघूत्तमे । अन्यथा त्वं हि कुर्वाणः परां प्राप्स्यसि चापदम्॥ २२ ॥
वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम् । त्वद्विधं न तु संक्रुद्धो लोकनाथः स राघवः ॥ २३ ॥
रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् । शतक्रतुविसृष्टस्य निर्घोषमशनेरिव ॥ २४ ॥
इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः । इषवो निपतिष्यन्ति रामलक्ष्मणलक्षिताः ॥ २५ ॥
रक्षांसि निहनिष्यन्तः पुर्यामस्यां न संशयः । असंपातं करिष्यन्ति पतन्तः कङ्कवाससः ॥ २६ ॥
राक्षसेन्द्र महासर्पान्स रामगरुडो महान् । उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥ २७ ॥
अपनेष्यति मां भर्ता त्वत्तः शीघ्रमरिन्दमः । असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः ॥ २८ ॥

मीत्युक्तरीत्या पुरस्थित इव भासते । पुरुषर्षभः मत्कृतापराधेन कथं मामङ्गीकरिष्यतीत्येवं त्वया न चिन्तनीयम् आनुकूल्यलेशे सति सर्वमपराधं विस्मरिष्यति पुरुषधौरेयत्वात् । मित्रकरणप्रकारमाह–प्रसादयस्वेति । त्वं चेत्यनेनाहमपि प्रसादयिष्यामीति सिद्धम् । प्रयतो भूत्वा मनःकालुष्यं त्यक्त्वेत्यर्थः । निर्यातयितुं प्रत्यर्पयितुम् ॥ १९–२१ ॥

२०] ति० टी०–कथमेवमपराद्धस्य मे तेन मैत्री तत्राह––विदित इति । यतः––सर्वधर्मज्ञ इति । शत्रुरपि शरणागतो रक्षणीय इति धर्मज्ञत्वेन शरणागतवत्सलत्वेन च विदितः प्रसिद्धः, अतस्तेन मैत्री भवतु तेन मैत्री प्राप्तकालेत्यर्थः ॥ २० ॥

रा० टी०–विदित इति । शरणागतवत्सलो यो रामः तेन सह तव मैत्री भवतु ॥ २० ॥

२१] ति० टी०–अत एनं शरणागतवत्सलं त्वं प्रसादयस्व, मां चास्मै निर्यातयितुं दातुमर्हसि ॥ २१ ॥

रा० टी०–प्रसादयस्वेति । एनं रामं प्रसादयस्व अस्मै रामाय मां निर्यातयितुं दातुं त्वमर्हसि ॥ २१ ॥

२२] ति० टी०–संप्रदायेति । मामिति शेषः ॥ २२ ॥

रा० टी०–एवमिति । एवम् अनेन प्रकारेण रघूत्तमे संप्रदाय प्रापय ते स्वस्ति भवेत् अन्यथा कुर्वाणस्त्वं पराम् आपदं प्राप्स्यसि ॥ २२ ॥

गो० टी०–एवमिति । संप्रदाय स्थितायेति शेषः ॥२२॥

२३] ति० टी०–मत्प्रत्यर्पणं विना सर्वथा तव जीवनं नास्तीत्याह—वर्जयेदिति । त्वद्विधप्राणान्न नाशयेदित्यर्थः । राघवो न तु वर्जयेन्नाशयेदेव ॥ २३ ॥

रा० टी०–वर्जयेदिति । उत्सृष्टं त्यक्तं वज्रम् अन्तकश्च त्वद्विधं वर्जयेत् न हन्यात् संक्रुद्धो राघवस्तु न वर्जयेत् हन्यादेवेत्यर्थः ॥ २३ ॥

गो० टी०–वर्जयेदिति । उत्सृष्टम् इन्द्रमुक्तं वज्रम् अन्तकश्च त्वद्विधं वर्जयेत् । राघवस्त्वद्विधं न वर्जयेदिति संबन्धः२३

२४] ति० टी०–महास्वनं महान्तं नादम् नादो हि कश्चिच्छब्दधर्मः प्रतिशब्दरूपः । श्रोष्यसि यदि मां न ददासीति भावः ॥ २४ ॥

रा० टी०–रामस्येति । शतक्रतुविसृष्टस्य इन्द्रेण त्यक्तस्य अशनेर्महास्वनं निर्घोषमिव रामस्य धनुषः शब्दं त्वं श्रोष्यसि ॥ २४ ॥

गो० टी०–रामस्येति । महास्वनं महानादं नादो नाम स्वरावयवविशेषः ॥ २४ ॥

२५] ति०टी०–रामलक्ष्मणलक्षिताः तन्नामाङ्का इत्यर्थः२५

रा० टी०–इहेति । ज्वलितास्या उरगा इव रामलक्ष्मणलक्षिताः ताभ्यां विसृष्टाः इषवः इह लङ्कायां निपतिष्यन्ति २५

गो० टी०–इहेति । रामलक्ष्मणलक्षणाः रामलक्ष्मणनामाङ्काः । असंपातम् अनवकाशम् ॥ २५ ॥ २६ ॥

२६] ति० टी०–कङ्कवाससो बाणाः । असंपातमनवकाशम् । 'असंबाधम्' इति पाठे राक्षससंमर्दरहितम् ॥ २६ ॥

रा० टी०–रक्षांसीति । अस्यां पुर्यां पतन्तः अत एव रक्षांसि निहनिष्यन्तः कङ्कवाससः कङ्कपत्रविशिष्टपुङ्खाः बाणा असंपातमवकाशरहितं करिष्यन्ति ॥ २६ ॥

२७] ति० टी०–राक्षसेन्द्ररूपान्महासर्पान् । उद्धरणशैघ्र्ये उपमा––वैनतेय इवेति ॥ २७ ॥

रा० टी०–राक्षसेन्द्रेति । राक्षसेन्द्ररूपमहासर्पान् सः प्रसिद्धः महान् रामरूपगरुडः उद्धरिष्यति हनिष्यति अत एव त्रिभिः क्रमैः पादैः असुरेभ्यः श्रियं विष्णुरिव उरगान् वैनतेय इव भर्ता रामो मामपनेष्यति दूरीकरिष्यति त्वत्तः । अर्धचतुष्टयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–राक्षसेन्द्रमहासर्पानिति । रूपकोक्तमेवोपमयाप्याह–वैनतेय इति ॥ २७ ॥

२८] ति० टी०–'न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः' इत्यस्योत्तरमाह—अपनेष्यतीति ॥ २८ ॥

गो० टी०–न चापि मम हस्तात्त्वां प्राप्तुमर्हतीत्युक्तस्यो-

१ वधर्मिति गो. पाठ. । २ रावणेति गो. पाठः । ३ लक्ष्मणा इति गो. पाठः । ४ परिनिघ्नन्त इति गो. पाठः । ५ समन्तत इति गो. पाठः ।

जनस्थाने हतस्थाने निहते रक्षसां बले । अशक्तेन त्वया रक्षः कृतमेतदसाधु वै ॥ २९ ॥
आश्रमं तत्तयोः शून्यं प्रविश्य नरसिंहयोः । गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम ॥ ३० ॥
नहि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया । शक्यं संदर्शने स्थातुं शुना शार्दूलयोरिव ॥ ३१ ॥
तस्य ते विग्रहे ताभ्यां युगग्रहणमस्थिरम् । वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य [2]विग्रहे ॥ ३२ ॥
क्षिप्रं तव सनाथो मे रामः सौमित्रिणा सह । तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥ ३३ ॥
गिरिं कुबेरस्य गतोऽथ[3]वालयं सभां गतो वा वरुणस्य राज्ञः ।
असंशयं दाशरथे[4]र्विमोक्षसे महाद्रुमः कालहतोऽशनेरिव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

त्तरमाह–अपनेष्यतीति । जनस्थान इति । एतत् युद्धं विना चौर्येणापहरणम् ॥ २८ ॥ २९ ॥

२९] ति० टी०–हतस्थाने हतास्पदे ॥ २९ ॥

रा० टी०–जनेति । रक्षसां बले निहते सति अत एव जनस्थाने हतस्थाने निष्टत्तराक्षसनिवासे सति अशक्तेन त्वया एतत् अपहरणरूपमसाधु कर्म कृतम् ॥ २९ ॥

३०] ति० टी०–नरसिंहयोः शून्यमाश्रमं प्रविश्य यत्कृतं तदसाधुत्ति किलेत्यर्थः । गोचरं गतयोर्मायामृगवृत्तान्तं ज्ञातुं गतयोः । गोचरं वनप्रदेशं गतयोरिति वार्थः॥३०॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–आश्रममिति । गोचरं मायामृगं हन्तुं वनप्रदेशं गतयोः भ्रात्रोः शून्यमाश्रमं प्रविश्य त्वयाऽहमपनीता ॥ ३० ॥

गो० टी०–आश्रममिति । गोचरं गतयोः बाह्यदेशं गतयोः ॥ ३० ॥ ३१ ॥

३१] ति० टी०–यस्माद्रामलक्ष्मणयोर्गन्धमुपाघ्राय शार्दूलयोः संदर्शने शुनेव समक्षं स्थातुं त्वया न शक्यम् ॥ ३१ ॥

रा० टी०–न हीति । शार्दूलयोर्गन्धमुपाघ्राय शुनेव रामलक्ष्मणयोर्गन्धमुपाघ्राय संदर्शने दृष्टिपथे स्थातुं त्वया न शक्यम् ॥ ३१ ॥

३२] ति० टी०–तस्याधमबलस्याधमकृत्यस्य च तेऽप्येऽपि ताभ्यां विग्रहे कलहे प्रसक्ते सति युगग्रहणं सहायसंपत्तिरास्थिरा जनस्थानबलसहायसंपत्तिवत् तस्मात्तेन युद्धे तव निग्रह एव वृत्रसंबन्धिन एकस्य बाहोर्द्वाभ्यामिन्द्रबाहुभ्यां युद्धे वृत्रबाहुपराजयवत् । वज्रच्छिन्नैकबाहुर्वृत्रो बहुकालमिन्द्रेण सहैकबाहुना युद्धं कृतवान्पराजितश्चेति भागवते प्रसिद्धम् ॥३२॥

रा० टी०–तस्येति । ताभ्यां रामलक्ष्मणाभ्यां सह विग्रहे सति ते तव युगग्रहणं संयुगेन लभ्यं विजय इत्यर्थः अस्थिरं न भविष्यतीत्यर्थः । तत्र दृष्टान्तः–विग्रहे सति इन्द्रबाहुभ्यां वृत्रस्यैकस्य छेदादवशिष्टबाहोः स्थितिरिव । स्थितिरित्यध्याहृतम् एकस्य इन्द्रच्छेदितत्वाद्बहुकालमेकेन बाहुना युद्धं प्रवृत्तमित्यन्यत्र प्रसिद्धम् । एतेनोपमालङ्कारेण तवापि बाहुच्छेदो भवितेति ध्वनितम् ॥ ३२ ॥

गो० टी०–तस्य त इति । तस्य ते असमर्थतया चोरवृत्तेस्तव ताभ्यां रामलक्ष्मणाभ्यां विग्रहे सति युद्धे सति युगग्रहण संयुगे जयग्रहणम् अस्थिरम् असंभावितम् । यद्वा युगग्रहणं युद्धारम्भः अस्थिरम् अध्रुवम् किंतु ताभ्यां प्रसह्य वधस्ते सिद्ध इति दृष्टान्तेनाह–वृत्रस्येवेति । वृत्रस्य एकस्य बाहोर्द्वाभ्यामिन्द्रस्य बाहुभ्यां सह विग्रहे सति निग्रह इवाजय इव । वृत्रस्यैकेन बाहुना इन्द्रस्य द्वयोर्बाह्वोरिव एकेन त्वया तयोर्द्वयोर्जयो न शक्य इत्यर्थः ॥ ३२ ॥

३३] ति० टी०–मे नाथः स राम इत्यन्वयः ॥ ३३ ॥

रा० टी०–क्षिप्रमिति । स प्रसिद्धो मे नाथो रामः अल्पं तोयमादित्य इव शरैः तव प्राणान् आदास्यते ॥ ३३ ॥

गो० टी०–क्षिप्रमिति । सः नाथ इति पदच्छेदः॥ ३३ ॥

३४] ति० टी०–कुबेरस्यालयं कैलासम् । कैलासवरुणसभे ऊर्ध्वाधस्थसकललोकोपलक्षणम् । कालहतस्त्वमशनेः संबन्धान्महाद्रुम इव दाशरथेः संबन्धाद्विमोक्षसे प्राणानिति शेषः । ' विमोक्ष्यसे ' इति पाठः पाठ इति कतकः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

रा० टी०–गिरिमिति । कुबेरस्य आलयं गिरिं गतः अथवा वरुणस्य सभां गतोऽपि त्वं कालहतः कालस्यापि निवारकस्य दाशरथेः रामस्य बाणादिति शेषः विमोक्ष्यसे प्राणांस्त्यक्ष्यसि, तत्र दृष्टान्तः अशनेः प्रक्षेपात् द्रुम इव ॥३४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

गो० टी०–गिरिं कुबेरस्य गतोपधाय वेति । अपधाय अपक्रम्य । कुबेरस्य गिरिं कैलासम् ' कैलासस्थानमलका' इत्यमरः ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

---

१ त्विति गो. पाठः । २ निग्रहः इति गो. पाठः । ३ऽपधाय वांते गो. पाठः । ४ नेति गो. पाठः ।

द्वाविंशः सर्गः ।

सीताकृतगर्हणेन क्रुद्धो रावणो मासद्वयं प्रतीक्ष्य त्वां मारयामीति जानकीं भीषयते । ततो रावणस्त्रीभिर्नेत्रसंकेतादिभिः कृताश्वासा पुना रावणं गर्हति । घोरविकृतनानाकृती राक्षसीस्तर्जनसान्त्वनादिना जानक्या आवर्जने विनियुज्य तर्जनोद्यतं रावणं धान्यमालिनी नाम तत्पत्नी ततो निवर्तयति । स च विमोहितः सान्तःपुरिकाभिरन्तर्गृहं प्रविशति ।

सीताया वचनं श्रुत्वा परुषं राक्षसेश्वरः । प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥ १ ॥
यथा यथा सान्त्वयिता वश्यः स्त्रीणां तथा तथा । यथा यथा प्रियं वक्ता परिभूतस्तथा तथा ॥ २ ॥
संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः । द्रवतो मार्गमासाद्य हयानिव सुसारथिः ॥ ३ ॥
वामः कामो मनुष्याणां यस्मिन्किल निबध्यते । जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥ ४ ॥
एतस्मात्कारणान्न त्वां घातयामि वरानने । वधार्हामवमानार्हां मिथ्या प्रव्रजने रताम् ॥ ५ ॥
परुषाणि हि वाक्यानि यानि यानि ब्रवीषि माम्। तेषु तेषु वधो युक्तस्तव मैथिलि दारुणः ॥ ६ ॥
एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः । क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ॥ ७ ॥
द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः । ततः शयनमारोह मम त्वं वरवर्णिनि ॥ ८ ॥

१] ति० टी०–प्रियदर्शनां सीतां प्रत्यनुनयोक्तिं कृत्वा ततो विप्रियमाहेति संबन्धः ॥ १ ॥

रा० टी०–सीतावचनश्रवणानन्तरकालिकं सीतां प्रति रावणोक्तिमाह–सीताया इति । सीतायाः परुषं वचनं श्रुत्वा सीतां प्रत्युवाच ॥ १ ॥

गो० टी०–सीताया इत्यादि ॥ १ ॥

२] ति० टी०–लोके स्त्रीणां सान्त्वयिता पुमान्यथा यथा सान्त्वयति तथा तथा तत्तत्सान्त्वानुसारेण स स्त्रीणां वश्य इष्टो भवति, त्वयि तु यथा यथाऽहं प्रियं वक्ताऽभूवं तथा तथा त्वया परिभूत एवास्मीति शेषः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–यथा यथेति । यथा यथा सान्त्वयिता सान्त्ववचनवक्ता तथा तथा तत्तद्वचनानुसारेण वश्यः प्रियो भवति जन इति शेषः, अहं तु स्त्रीणां युष्माकं यथा यथा प्रियं वक्ता तथा त्वया परिभूतोऽस्मीति शेषः ॥ २ ॥

गो० टी०–सान्त्वयिता अनुनेता ॥ २ ॥

३] ति० टी०–एवं च त्वद्विषये न्यायप्राप्तमुत्पन्नं क्रोधं क्रोधकार्यं वधं त्वद्विषये समुत्थितः कामो नियच्छति निरुणद्धि। तत्र दृष्टान्तः—द्रवत इति । अमार्गमासाद्य द्रवतो धावतो हयान्सुसारथिरिव ॥ ३ ॥

रा० टी०–समिति । समुत्थितः कामः त्वत्सेवाविषयकोत्कटेच्छा त्वयि विषये मे क्रोधं सन्नियच्छति निवारयति । तत्र दृष्टान्तः–मार्गमासाद्य प्राप्य द्रवतो हयान् सुसारथिरिव॥३॥

गो० टी०–सन्नियच्छतीति । सन्नियच्छति निरुणद्धि । द्रवतः धावतः । अमार्गमिति च्छेदः ॥ ३ ॥

४] ति० टी०–नन्वु विपरीतं क्रोध एव किं न कामं रुणद्धीत्यत्र कामस्यौत्कट्यादित्याह—वाम इति। क्रूर इत्यर्थः। सभ्ये कौर्ये सुन्दरे च वामः ' इति कोशः । कामक्रौर्यमेवाह—यस्मिन्निति । परमक्रोधविषयेऽपि यत्र जने कामो निबध्यते तत्र जनेऽनुक्रोशो दया स्नेहश्च जायते । तस्मात्क्रोधात्काम उत्कटक्रूरत्ववानित्यर्थः ॥ ४ ॥

रा० टी०–तन्निवारकत्वे हेतुमाह–वाम इति । यस्मिन् जने वामः सुन्दरः उत्कट इत्यर्थः, काम इच्छा निबध्यते चिरं तिष्ठति तस्मिन् जने अनुक्रोशः दया स्नेहश्च जायते एतेनाक्रोशस्नेहयोः क्रोधविध्वंसकत्वं सूचितम् ॥ ४ ॥

गो० टी०–वाम इति । वामः प्रतिकूलः मनुष्याणां प्राणिनाम् अनुक्रोशः कृपा । परिभवादिप्रदानेन मनुष्याणां प्रतिकूलः कामः यस्मिन् जने निबध्यते तस्मिँस्त्वनुक्रोशः स्नेहश्च जायते किल । मिथ्याप्रव्रजिते कपटेन वन्यवृत्तिभाजि रामे रतां सक्ताम् ॥ ४—६ ॥

५–७] ति० टी०–एतस्मादिति । उत्कटकामविषयत्वादित्यर्थः । मिथ्या प्रव्रजने निष्प्रयोजनमेव भोगत्यागरूपप्रव्रजनमार्गे रताम् । ' मिथ्याप्रव्रजिते ' इति पाठे रामे रतामित्यर्थः ॥ ५–७ ॥

रा० टी०–एतस्मादिति । एतस्मादुक्तात् कारणात् मिथ्याप्रव्रजने कापट्यविशिष्टवनगमनवति रामे रताम् अत एव वधार्हाम् अत एव अवमानार्हां त्वां न घातयामि ॥ ५ ॥

रा० टी०–वधार्हात्वमुपपादयन्नाह–परुषाणीति । यानि यानि परुषाणि वाक्यानि मां ब्रवीषि तेषु तेषु वाक्येषु श्रुतेष्विति शेषः तव वधो युक्तः ॥ ६ ॥

रा० टी०–एवमिति । रावणः एवमुक्त्वा सीताम् उत्तरमब्रवीत् ॥ ७ ॥

गो० टी०–एवमिति । क्रोधसंरम्भसंयुक्तः क्रोधप्रणयाभ्यां संयुक्तः ॥ ७ ॥

८] ति० टी०–अवधिः ' मासान्द्वादश भामिनि ' इत्या-

१ प्रव्रजिते इति गो. पाठः ।

द्वाभ्यामूर्ध्वं तु मासाभ्यां भर्तारं मामनिच्छतीम् । मम त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति खण्डशः॥ ९ ॥
तां भर्त्स्यमानां संप्रेक्ष्य राक्षसेन्द्रेण जानकीम् । देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः ॥ १० ॥
ओष्ठप्रकारैरपरा [3]नेत्रैर्वक्त्रैस्तथापराः । सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ॥ ११ ॥
ताभिराश्वासिता सीता रावणं राक्षसाधिपम् । उवाचात्महितं वाक्यं वृत्तशौटीर्यगर्वितम् ॥ १२ ॥
नूनं न ते जनः कश्चिदस्मिन्निःश्रेयसे स्थितः । निवारयति यो न त्वां कर्मणोऽस्माद्विगर्हितात्॥ १३ ॥
मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः । त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसाऽपि कः ॥ १४ ॥
राक्षसाधम रामस्य भार्यामिततेजसः । उक्तवानसि यत्पापं क्व गतस्तस्य मोक्ष्यसे ॥ १५ ॥

रण्यकाण्डोक्तस्तन्मध्ये द्वौ मासाववशिष्टौ तौ मया रक्षणीयौ । यद्यपि ' वर्तते दशमो मासो द्वौ तु शेषौ प्लवंगम ' इति सीता वक्ष्यति, तथाप्यल्पान्तरत्वान्मासद्वयरक्षणोक्तिरविरुद्धा ॥ ८ ॥

रा० टी०–तदुत्तराकारमाह–द्वावित्यादिभिः। योऽवधिः मया कृतः 'मासान् द्वादश भामिनी' इत्यनेन अरण्यकाण्डे निश्चितः तन्मध्ये अवशिष्टाविति शेषः द्वौ मासौ रक्षितव्यौ ततोऽनन्तरं मम शयनं महास्वापं मरणमित्यर्थः आरोह जानीहीत्यर्थः। एतेन रामस्मृतिं त्यक्त्वा स्वौदासीन्यं न त्यक्ष्यसि तर्हि त्वत्सन्निधावहं स्वप्राणांस्त्यक्ष्यामीति सूचितम् ॥ ८ ॥

गो० टी०–द्वौ मासाविति । ते मया योऽवधिः कृतः मासान् द्वादश भामिनीत्यारण्यकाण्डोक्तैर्द्वादशमासात्मकोऽवधिः कल्पितः अत्र द्वौ मासाववशिष्टौ तौ द्वौ मासौ मे मया रक्षितव्यौ प्रतीक्षणीयौ ततः तस्मात्कारणात् मम शयनमारोहेत्यन्वयः प्रातराशार्थं मासद्वयान्तर्गतरात्रिसमाप्त्यनन्तरं हिंसायां कालविलम्बं विना प्रातःकालिकाशनार्थमित्यर्थः। आरभन्ते आलभन्ते रलयोरभेदः ' आलम्भः स्पर्शहिंसयोः ' इत्यमरः। महानसे पाकशालायाम् ॥ ८—१० ॥

९] ति० टी०–प्रातराशः प्रातःकालिकं भोजनम् ॥ ९ ॥

रा० टी०–स्वस्य मरणकातरत्वे पक्षान्तरमाह–द्वाभ्यामिति । द्वाभ्यां मासाभ्यामूर्ध्वं भर्तारं रामं मां लङ्काश्रियमनिच्छन्तीं त्वां च मम प्रातराशार्थं मत्कर्तृकप्रातर्भोजनार्थं सूदाः पाककर्तारः खण्डशः छेत्स्यन्ति ॥ ९ ॥

१०] ति० टी०–देवगन्धर्वकन्याः । सीतावदेव बलादाकृता इत्यर्थः ॥ १० ॥

रा० टी०–तामिति । भर्त्स्यमानां तां जानकीं प्रेक्ष्य विकृतमीक्षणं यासां ता देवगन्धर्वकन्या विषेदुः खेदं प्रापुः॥१०॥

११] ति० टी०–ओष्ठप्रकारैर्वराकोऽयं किं करिष्यति न भेतव्यमित्येवौष्ठाग्रोत्क्षेपणैः नेत्रैर्भ्रूनिमीलनोन्मीलनवद्भिः वक्त्रैर्मुखचलनैः सीतामाश्वासयामासुः ॥ ११ ॥

रा० टी०–ओष्ठैति । अपराः काश्चित् ओष्ठप्रकारैः क्षुद्रो रावणः किं करिष्यतीत्यादिबोधकाधरप्रचालनैः अपरा नेत्रैः वक्त्रैश्च सीतामाश्वासयामासुः ॥ ११ ॥

गो० टी०–ओष्ठप्रकारैरिति । ओष्ठप्रकारैः रुरुदिषतामोष्ठेषु भङ्गस्फुरणादयो ये विकारास्ते ओष्ठप्रकाराः ओष्ठभङ्गादिरूपसंज्ञादिभिरित्यर्थः एवं वक्त्रनेत्रैः वक्त्रनेत्रसंज्ञादिभिरित्यर्थः११

१२] ति० टी०–आत्महितं रावणात्मनो हितम् । वृत्तेन सदाचारेण, शौटीर्येण पतिशौर्येण च संजातगर्वम् ॥ १२ ॥

रा० टी०–ताभिरिति । ताभिः कन्याभिः आश्वासिता सीता वृत्तशौण्डीर्याभ्यां शोभनाचारपतिशौर्याभ्यां गर्वितम् आत्महितं वाक्यमुवाच ॥ १२ ॥

गो० टी०–ताभिरिति । वृत्तशौण्डीर्यगर्वितं वृत्तं पातिव्रत्यं तस्य शौण्डीर्यं बलं तेन गर्वितमिति क्रियाविशेषणम् १२

१३] ति० टी०–अस्मिन्नगरे ते तव निःश्रेयसस्याभ्युदयसंपादने स्थितो जनो नूनं न कश्चिदस्ति यस्मात्त्वामस्माद्विगर्हितात्कर्मणो न कोऽपि निवारयति ॥ १३ ॥

रा०टी०–तद्वचनाकारमाह–नूनमिति। निःश्रेयसि त्वत्कल्याणे स्थितः आस्थावान् यः कश्चिज्जनः स अस्मिन् लङ्कानगरे नास्ति अत एव विगर्हितात् निन्दितादस्मात् दुरुक्तिरूपात् कर्मणः त्वां न निवारयति ॥ १३ ॥

गो० टी०–नूनमिति । ते निःश्रेयसे स्थितः कश्चिज्जनः नास्ति यः अस्माद्विगर्हितात् कर्मणस्त्वां निवारयति स चापि नास्ति नूनमिति योजना। तवेष्टप्रापकः अनिष्टनिवारकश्च नास्तीत्यर्थः ॥ १३ ॥ १४ ॥

१४] ति० टी०–मनसाऽपि कः प्रार्थयेत् । किं पुनर्वचसेति भावः ॥ १४ ॥

रा० टी०–मामिति । शचीपतेः शचीमिव धर्मात्मनः पत्नीं मां त्वदन्यः मनसाऽपि कः प्रार्थयेत् पतिराहित्येन स्थापयितुमिच्छेत् न कोऽपीत्यर्थः ॥ १४ ॥

१५] ति० टी०–यत्पापं मम शयनमारोहेत्यादिरूपम् । क्व गतो मोक्ष्यसे । तत्साध्यसमूलनाशस्य त्वया परिहारोऽशक्य इत्यर्थः ॥ १५ ॥

रा० टी०–राक्षसेति । हे राक्षसाधम ! रामस्य भार्यां मां यत् पापं पापहेतुभूतं रामविषयकपरुषवचनम् उक्तवानसि तस्य तस्मात् पापात् क्व गतः सन् मोक्षसे ॥ १५ ॥

गो० टी०–राक्षसाधमेति । तस्य मोक्ष्यसे तस्मान्मोक्ष्यसे ॥ १५ ॥

---

१ प्रातराशार्थमारभन्ते महानसे इति गो. पाठः । २ तर्ज्यमानामिति गो. पाठः । ३ वक्त्रनेत्रैरिति गो. पाठः । ४ शौण्डीर्यैति गो. रा. पाठः । ५ अस्ति निःश्रेयसे इति गो. पाठः । ६ शापमिति गो. पाठः ।

यथा दृप्तश्च मातङ्गः शशश्च सहितौ वने । तथा द्विरदवद्रामस्त्वं नीच शशवत्स्मृतः ॥ १६ ॥
स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे । चक्षुषो विषये तस्य न यावदुपगच्छसि ॥ १७ ॥
इमे ते नयने क्रूरे विकृते कृष्णपिङ्गले । क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः ॥ १८ ॥
तस्य धर्मात्मनः पत्नीं स्नुषा दशरथस्य च । कथं व्याहरतो मां ते न जिह्वा पाप शीर्यति ॥ १९ ॥
असंदेशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्माहतेजसा ॥ २० ॥
नापहर्तुमहं शक्या तस्य रामस्य धीमतः । विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च । अपोह्य रामं कस्माच्चिद्दारचौर्यं त्वया कृतम् ॥ २२ ॥
सीताया वचनं श्रुत्वा रावणो राक्षसाधिपः । विवृत्य नयने क्रूरे जानकीमन्ववैक्षत ॥ २३ ॥
नीलजीमूतसंकाशो महाभुजशिरोधरः । सिंहसत्त्वगतिः श्रीमान्दीप्तजिह्वाग्रलोचनः ॥ २४ ॥

१६] ति० टी०–दृप्तो मातङ्गः शशश्च यदा वने दैवात्सहितौ युयुत्सू भवतस्तयोश्च शशो यथातिक्षुद्रस्तथा रामेण संयुगे त्वं शशवत्क्षुद्रः । रामो गजवदित्यर्थः ॥ १६ ॥

रा० टी०–यथेति । यथा यदा दृप्तो मातङ्गो हस्ती शशश्च वने सहितौ स्थितौ भवतः तथा तदा द्विरदवत् हस्तिवत् महान् रामः शशवत् क्षुद्रस्त्वं स्मृतः उपमितः भवेरिति शेषः ॥ १६ ॥

गो० टी०–यथेति । यथा मातङ्गः शशश्च सहितः युयुत्सादिना संगतः तथान्योन्यसंगतौ रामस्त्वं च । अत्र रावणः स्वस्य मातङ्गसाम्यमुक्तमिति भ्रान्तेरिति परिहरति–तथेति । तत्र गज इव रामः, शश इव त्वम् ॥ १६ ॥

१७–१९] ति० टी०–स त्वं रामादतिक्षुद्रः । क्षिपन्निन्दन् । इह तदसंनिधौ यावन्नोपगच्छसि तावदिह निन्दन्न लज्जसे इत्यन्वयः ॥ १७–१९ ॥

रा० टी०–स इति । तस्य रामस्य चक्षुषोर्विषये यावत्त्वं न गतः तावदेव इक्ष्वाकुनाथं क्षिपन् निन्दन् त्वं न लज्जसे एतेन त्वमतीव निर्लज्जेरिति सूचितम् ॥ १७ ॥

रा० टी०–इमे इति । हे अनार्य ! मां निरीक्षतः क्रूरदृष्ट्या ऽवलोकयतः ते नयने क्षितौ कस्मान्न पतिते ॥ १८ ॥

रा० टी०–तस्येति । हे पाप ! धर्मात्मनो रामस्य पत्नीं मां व्याहरतः दुरुक्तमुच्चारयतस्ते जिह्वा कथं न शीर्यति पतति ॥ १९ ॥

गो० टी०–स त्वामिति । इक्ष्वाकुनाथं क्षिपन् मायामृगव्याजेन दूरं निस्सारयन् इह स्वजनेषु न तावदुपगच्छसि यद्युपगच्छसि तदा तत्प्रभावं वेत्स्यसीत्यर्थः ॥ १७—१९ ॥

२०] ति० टी०–ननु न पतिते न शीर्यतीत्युक्तिर्यदि पातिव्रत्यमूला, तर्हि तथानिग्रहं कस्मान्न करोषीत्यत्राह—असंदेशादिति । शापविषये रामाज्ञाभावात् । शापसामर्थ्येऽपि तपोनुपालनाद्धेतोरपि भस्माहेण भस्मजनकत्वशक्तिमता तेजसा स्वीयपातिव्रत्यतेजसा न भस्म कुर्मि करोमि ॥ २० ॥

रा० टी०–असंदेशादिति । रामस्य असंदेशात् दाहविषये आज्ञाभावात् तपसः तपश्चर्यायाः अनुपालनाच्च भस्माहेतेजसा त्वां भस्म न कुर्मि करोमि ॥ २० ॥

गो० टी०–असंदेशादिति । रामस्य भर्तुः असंदेशात् अपकारिषु शपेथा इति संदेशाभावात् तपसः पातिव्रत्यरूपस्य कुर्मि करोमि । उत्वविकरणप्रत्ययलोपावार्षौ । भस्माहं भस्मीकरणार्हं । तेजसा पातिव्रत्यप्रभावेन ॥ २० ॥

२१] ति० टी०–अहं तस्य रामस्य भार्या त्वयापऽहर्तुं न शक्या, अथाप्ययं विधिरपहरणरूपविधिस्तव वधार्थाय दैवेन विहितोऽत्र न संशयः ॥ २१ ॥

रा० टी०–नेति । तस्य रामस्य भार्याऽहं त्वयाऽपहर्तुं न शक्या तथापि तव वधार्थाय विधिः अपहरणकारणीभूतहेममयकुरङ्गादिविधानं विहितः दैवादिभाग्येनेति शेषः ॥ २१ ॥

गो० टी०–नेति । तस्य रामस्य तस्मात् रामात् । विधिः चौर्येणापहरणं विहितः दैवेनेति शेषः ॥ २१ ॥

२२–२३] ति० टी०–शूरेणेत्यायुपहासोक्तिः । अपोह्य मारीचमायया ऽपसार्य कस्माद्दारचौर्यं त्वया कृतम्, तस्मादत्यन्तमशूरस्त्वमित्युपहासः । चिदिति पादपूरणे ॥ २२ ॥ २३ ॥

रा० टी०–ननु अपहरणशक्तिर्मयि नास्तीति कथं त्वया ज्ञातमित्यत आह–शूरेणेति । चिताः राशीकृताः दाराः येन तत्सबोधनं शूरत्वादिविशिष्टेन त्वया रामम् अपोह्य मायया दूरं प्रापय्य चौर्यं त्वया कस्मात्कृतम् ॥ २२ ॥

गो० टी०–शूरेणेति । बलैः समुदितेन बलेन सर्वश्रेष्ठेनेत्यर्थः । अपोह्य रामं मृगच्छद्मनाऽपवाह्य ॥ २२ ॥

रा० टी०–सीताया इति । रावणः सीतायाः वचनं श्रुत्वा क्रूरे नयने विवृत्य जानकीम् अन्ववैक्षत ॥ २३ ॥

गो० टी०–सीताया इति । विवृत्य विवर्त्य ॥ २३ ॥

२४] ति० टी०–सिंहसत्त्वगतिः सिंहवत्सत्त्वं पराक्रमो गतिश्च यस्य सः । ' सिंहसंहननः ' इति पाठान्तरम् ॥ २४ ॥

रा० टी०–रावणं वर्णयन्नाह–नीलेत्यादिभिः । नीलजीमूतसंकाशः नीलमेघसदृशः सिंहवत् सत्त्वं पराक्रमो गतिर्गमनं च यस्य दीप्तानि जिह्वोग्रलोचनानि यस्य सः ॥ २४ ॥

गो० टी०–नीलजीमूतेति । सिंहस्येव बलगमने यस्यासौ सिंहसत्त्वगतिः । जिह्वाग्रं लोचने च दीप्तानि यस्य सोऽयं दीप्तजिह्वाग्रलोचनः । कोपेन चलम् अग्रं यस्य तत् चलाग्रं च तत्

१ विरूपे इति गो. पाठः । २ व्यवशीर्यते इति गो. पाठः । ३ कस्माद्धीति गो. पाठः । ४ जिह्वाग्रेति गो. पाठः ।

चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः । रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः ॥ २५ ॥
श्रोणीसूत्रेण महता मेचकेन सुसंवृतः । अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः ॥ २६ ॥
ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः । शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥ २७ ॥
तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषितः । रक्तपल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः ॥ २८ ॥
स कल्पवृक्षप्रतिमो वसन्त इव मूर्तिमान् । श्मशानचैत्यप्रतिमो भूषितोऽपि भयंकरः ॥ २९ ॥
अवेक्षमाणो वैदेहीं कोपसंरक्तलोचनः । उवाच रावणः सीतां भुजङ्ग इव निःश्वसन् ॥ ३० ॥
अनयेनाभिसंपन्नमर्थहीनमनुव्रते । नाशयाम्यहमद्य त्वां सूर्यः संध्यामिवौजसा ॥ ३१ ॥
इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः । [2]संददर्श ततः सर्वा राक्षसीर्घोरदर्शनाः ॥ ३२ ॥
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा । गोकर्णीं हस्तिकर्णीं च लम्बकर्णीमकर्णिकाम् ॥ ३३ ॥
हस्ति[3]पद्यश्वपद्यौ च गोपदीं पादचूलिकाम् । एकाक्षीमेकपादीं च पृथुपादीमपादिकाम् ॥ ३४ ॥
अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीम् । अतिमात्रास्यनेत्रां च दीर्घजिह्वा[4]नखामपि ॥ ३५ ॥
अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम् । यथा मद्वशगा सीता क्षिप्रं भवति जानकी ॥ ३६ ॥

मुकुटं च तेन प्रांशुः दीर्घः । चित्रमाल्यवत्त्वेऽपि रक्तमाल्यवत्त्वं तत्प्राचुर्यादुक्तम् । तप्ताङ्गदविभूषणः तप्तशब्देन तेजिष्ठत्वमुक्तम् । मेचकेन नीलेन । अमृतोत्पादनद्धेन अमृतोत्पादनार्थं नद्धेन । ताभ्यां प्रसिद्धाभ्याम् ॥ २४–२७ ॥

२५] ति० टी०–चलमग्रं यस्य तादृशमुकुटवान् ॥२५ ॥

रा० टी०–चलम् अग्रम् अग्रभागो यस्य स मुकुटो यस्य सः प्रांशुः अत्युन्नतशरीरः ॥ २५ ॥

२६] ति० टी०–श्रोणीसूत्रेण कटिसूत्रेण रशनयेत्यर्थः । इन्द्रनीलनद्धमुखारक्तमणियुक्तत्वाच्च तस्य मेचकत्वम् । भुजङ्गो वासुकिः स हि नीलवर्ण इत्याहुः ॥ २६ ॥

रा० टी०–मेचकेन नीलमण्यादिना जटिलत्वेन मयूरचन्द्रकवर्णेन श्रोणिसूत्रेण सुसंवृतः 'मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान्' इति मेदिनी । तत्र दृष्टान्तः अमृतोत्पादने समुद्रमन्थनसमये भुजङ्गेन नद्धः संबद्धो मन्दर इव ॥ २६ ॥

२७–२८] ति० टी०–ताभ्यां प्रसिद्धपराक्रमाभ्याम् । भुजद्वयमेव सर्वदा, युद्धादौ स्वेच्छया दशभुजत्वमिति द्विवचनम् वामदक्षेषु भुजत्वजात्यैकवचनमित्यन्ये ॥ २७ ॥ २८ ॥

२९–३०] ति० टी०–वसन्त इव भूषितोऽपि श्मशानचैत्यप्रतिमस्तदुभयवत्परिहार्यदर्शनः । चैत्यं बुद्धायतनम्, अत एव भयंकरः ॥ २९ ॥ ३० ॥

रा० टी०–अचलसंकाशो राक्षसेश्वरः परिपूर्णाभ्याम् अतिपुष्टाभ्यां ताभ्यां प्रसिद्धाभ्यां भुजाभ्यां शृङ्गाभ्यां मन्दर इव शुशुभे रावणस्य कामरूपत्वात् भुजद्वयमात्रवत्त्वमपि न विरुध्यते । श्लोकचतुष्टमेकान्वयि ॥ २७ ॥

रा० टी०–तरुणेति । कुण्डलाभ्यां विभूषितः कल्पवृक्षप्रतिमः कल्पतरुसदृशः अत एव मूर्तिमान् वसन्त इव भूषितोऽपि भयङ्करः अत एव श्मशानचैत्यप्रतिमः दर्शनायोग्यत्वेन श्मशानचैत्यसदृशः वैदेहीमवेक्षमाणो रावणः उवाच । श्लोकत्रयमेकान्वयि ॥ २८–३० ॥

गो० टी०–तरुणेत्यादि । अलंकृतत्वे कल्पकसाम्यम् । भयंकरत्वे पुनश्चैत्यसाम्यम् । चैत्यं श्मशानवृक्षः श्मशानमण्डपो वा । सीताया अत्यन्तभयंकरत्वज्ञापनाय रावणवर्णनं कृतम् ॥ २८–३१ ॥

३१–३२] ति० टी०–अनयेनानीत्या युक्तम् । अर्थहीनं प्रयोजनहीनं व्रतं रामं वा । अनुव्रते इति संबोधनम् । ईदृशीं त्वां नाशयामि । सूर्य उदितः संध्यां तत्कालिकमन्धकारमिव ॥ ३१ ॥ ३२ ॥

३३–३६] ति० टी०–एकाक्षीति द्विरुपादानं व्यक्तिभेदात् ॥ ३३–३६ ॥

रा० टी०–तद्वचनाकारमाह–अनयेनेति । अनयेन नीतिराहित्येन अभिसंपन्नम् अत एव अर्थहीनं रामम् अनुव्रते तत्परिशीलनशीले संध्यां तिमिरं सूर्य इव त्वां नाशयामि॥३१॥

रा० टी०–इतीति । रावणः मैथिलीमित्युक्त्वा एकाक्षीप्रभृतीः राक्षसीः संदिदेश । सार्धश्लोकचतुष्टयमेकान्वयि । तत्रैकैकाक्षीशब्दस्य अल्पनेत्रकार्थकत्वान्न पौनरुक्त्यम् ॥३२–३५॥

रा० टी०–तदाज्ञापनाकारमाह–यथेति । जानकी यथा मद्वशगा अहं वशगो यस्याः सा यथा भवति तथा सर्वाः प्रत्येकं वा समेत्य संघीभूय वा क्षिप्रं कुरुत । अर्धद्वयमेकान्वयि ॥ ३६ ॥

गो० टी०–इत्युक्त्वेत्यादि । प्रधानाप्रधानभूते द्वे एकाक्ष्यौ अतो न पुनरुक्तिः । अथवा अक्षम् इन्द्रियम् । एकाक्षीम् एकैकेन्द्रियां श्रोत्रनासादावेकमात्रवतीत्यर्थः ॥ ३२–३६ ॥

---

१ उत्पादनद्धेन भुजगेनेति गो. पाठः । २ संदिदेशेति गो. रा. पाठः । ३ पाद्यश्वपाद्यौ च गोपादीमिति गो. पद्याश्वेति रा. पाठः । ४ जिह्वामजिह्विकामिति गो. पाठः ।

तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य वै । प्रतिलोमानुलोमैश्च सामदानादिभेदनैः ॥ ३७ ॥
आवर्जयत वैदेहीं दण्डस्योद्यमनेन च । इति प्रतिसमादिश्य राक्षसेन्द्रः पुनः पुनः ॥ ३८ ॥
काममन्युपरीतात्मा जानकीं प्रति गर्जत । उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी ॥ ३९ ॥
परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् । मया क्रीड महाराज सीतया किं तवानया ॥ ४० ॥
विवर्णया कृपणया मानुष्या राक्षसेश्वर । नूनमस्यां महाराज न [3]देवा भोगसत्तमान् ॥ ४१ ॥
[4]विद्धत्यमरश्रेष्ठास्तव बाहुबलार्जितान् । अकामां कामयानस्य शरीरमुपतप्यते ॥ ४२ ॥
[5]इच्छतीं कामयानस्य प्रीतिर्भवति शोभना । एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली ॥
प्रहसन्मेघसंकाशो राक्षसः स न्यवर्तत ॥ ४३ ॥
प्रस्थितः स दशग्रीवः कम्पयन्निव मेदिनीम् । ज्वलद्भास्करसंकाशं प्रविवेश निवेशनम् ॥ ४४ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च [8]तास्ततः । परिवार्य दशग्रीवं [9]प्रविशुस्ता गृहोत्तमम् ॥ ४५ ॥
स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः ।
विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश रावणः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

३७] ति० टी०–भो राक्षस्यः! यूयं प्रत्येकं तथा कुरुत, सर्वा मिलित्वा वा तथा कुरुत । प्रतिलोमानुलोमैः प्रतिकूलानुकूलव्यवहारैः ॥ ३७ ॥

रा० टी०–प्रतीति । प्रतिलोमानुलोमैः अननुकूलानुकूलक्रियाभिः सामादिभिश्च दण्डस्य उद्यमनेन उद्योगेन च वैदेहीम् आवर्जयत रामासक्तिं न्यवारयत ॥ ३७ ॥

गो० टी०–प्रतिलोमेति । प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः । सामदानादिभेदनैः सामदानमुख्यैर्भेदैः प्रथमप्रयुक्तसामदानैरित्यर्थः । आवर्जयत वशीकुरुत ॥ ३७ ॥ ३८ ॥

३८] ति० टी०–आवर्जयतानुकूल्यं संपादयत ॥ ३८ ॥

रा० टी०–इतीति । काममन्युना इच्छासंपादककोधेन परीतः आत्मा मनो यस्य स रावणः इति प्रतिसमादिश्य जानकीं प्रति गर्जत अगर्जत ॥ ३८ ॥

३९] ति० टी०–प्रतिगर्जत प्रत्यगर्जत् । उपगम्य समीपमागम्य । ततोऽतिसंतर्जनं दृष्ट्वा । सीतायां दययेति शेषः ॥ ३९ ॥

रा० टी०–उपेति । ततोऽनन्तरं राक्षसी राक्षसीस्वामिनी मन्दोदरी धान्यमालिनी तदभिधरावणकनिष्ठपत्नी च राक्षसीशब्देन मन्दोदर्या ग्रहणं तु वानरान्प्रति वक्ष्यमाणहनुमद्वचनानुरोधेन उपगम्य रावणसमीपं प्राप्य इदमब्रवीत् ॥ ३९ ॥

गो० टी०–उपगम्येति । धान्यमालिनी रावणस्य कनिष्ठपत्नी । इदं मन्दोदर्या अप्युपलक्षणम् उत्तरत्र वानरान् प्रति हनुमद्वचने तथा वक्ष्यमाणत्वात् ॥ ३९ ॥ ४० ॥

४०] ति० टी०–परिष्वज्य परिष्वङ्गेन प्रहारादिप्रवृत्तिं निरुध्य ॥ ४० ॥

रा० टी०–तद्वचनाकारमाह–मयेति । हे महाराज! मया क्रीड विहर सीतया सीतासंवादेन तव किं न किमपीत्यर्थः ४०

४१–४२] ति० टी०–अमरश्रेष्ठा इन्द्रादयो भोगसत्तमान्न विदधति नानुमन्यन्ते । दैवहतेयमदृष्टहीनेति भावः ॥ ४१ ॥ ४२ ॥

रा० टी०–नूनमिति । हे महाराज! तव बाहुबलार्जितान्भोगसत्तमान् दिव्यभोगान् अस्यां सीतायां सीतार्थम् अमरश्रेष्ठाः देवा ब्रह्माणः न विदधति अस्या राज्यभोगो ब्रह्मणा न लिखित इत्यर्थः । आदराद्बहुवचनम् ॥ ४१ ॥

रा० टी०–अकामामिति । अकामां राज्यादीच्छारहितां व्यक्तिं कामयानस्य इच्छामुत्पादयतः शरीरमुपतप्यते इच्छतीं कामयानस्य शोभना प्रीतिर्भवति ॥ ४२ ॥

गो० टी०–नूनमिति । अस्याः सीतायाः अमरश्रेष्ठो ब्रह्मा दिव्यान् भोगान्न विदधाति । अस्या दिव्यभोगे भाग्यं नास्तीत्यर्थः ॥ ४१—४६ ॥

४३–४४] ति० टी०–सम्यक्षिप्तोऽन्यतोऽपसारितः प्रहसन् धान्यमालिन्योचितव्यवहारदर्शनेनावश्यप्राप्तस्त्रीप्रहारापकीर्तिपरिहारेण च प्रसन्न इत्यर्थः ॥ ४३ ॥ ४४ ॥

रा० टी०–एवमिति । राक्षस्या एवमुक्तः अत एव समुत्क्षिप्तः अन्यत्र प्रचलितः राक्षसः सन्न्यवर्तत सीतासंवादात् उपारमत् ॥ ४३ ॥

रा० टी०–प्रस्थित इति । प्रस्थितो दशग्रीवः निवेशनं स्वगृहं प्रविवेश ॥ ४४ ॥

४५–४६] ति० टी०–प्रविशुः प्रविविशुः ॥ ४५ ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

---

१ चेति गो. पाठः । २ पर्यंतजेयदिति गो. पाठः । ३ दिव्यानिति गो. पाठः । ४ विदधात्यमरश्रेष्ठ इति गो. पाठः । ५ इच्छन्तीमिति गो. पाठः । ६ वर्णाभमिति गो. पाठः । ७ सर्वत इति गो. पाठः । ८ विविशुस्तदिति गो. रा. पाठः । ९ भास्वरमिति गो. पाठः

त्रयोविंशः सर्गः।

रावणयोजिता एकजटाद्या राक्षस्यो रावणं प्रशंसन्त्यः सीतां प्रति तत्स्वीकारं रोचयन्ते ।

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः । संदिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह ॥ १ ॥
निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते । राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥
ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्च्छिताः । परं परुषया वाचा वैदेहीमिदमब्रुवन् ॥ ३ ॥
पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः । दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे ॥ ४ ॥
ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् । आमन्त्र्य क्रोधताम्राक्षी सीतां करतलोदरीम् ॥ ५ ॥
प्रजापतीनां षण्णां तु चतुर्थोऽयं[1] प्रजापतिः । मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६ ॥
पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः । नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ॥ ७ ॥
तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः । तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥ ८ ॥
मयोक्तं चारुसर्वाङ्गि वाक्यं किं नानुमन्यसे । ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् ॥ ९ ॥

रा० टी०–देवेति । देवकन्यादयः गृहोत्तमं विविशुः ॥४५॥

रा० टी०–उपसंहरन्नाह–स इति । मदनेन सुरादिना मोहितः रावणः लोकरावयिता स रावणः मैथिलीं सीतां परिभर्त्स्य विहाय च स्वं वेश्म प्रविवेश ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०–सर्गार्थं संग्रहेण दर्शयति–स इति ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१–२] ति० टी०–शत्रून्रावयति हाहाशब्दं कारयति स शत्रुरावणः ॥ १ ॥ २ ॥

रा० टी०–रावणगमनानन्तरकालिकं वृत्तं वर्णयितुमाह–इतीति । शत्रुरावणो रावणः मैथिलीमित्युक्त्वा राक्षसीः संदिश्य च निर्जगाम ॥ १ ॥

रा० टी०–निष्क्रान्त इति । निष्क्रान्ते अन्तःपुरान्निर्गते रावणे पुनरन्तःपुरं च गते सति भीमरूपा राक्षस्यः सीतां समभिदुद्रुवुः जग्मुः ॥ २ ॥

गो० टी०–इत्युक्त्वेत्यादि ॥ १–९ ॥

३] ति० टी०–ततः परं रावणगमनादनन्तरम् । लोकोक्तौ वा परमिति ॥ ३ ॥

रा० टी०–तत इति । ततो रावणगमनात्परमनन्तरं क्रोधमूर्च्छिता राक्षस्यः सीतामुपागम्य परुषया वाचा इदमब्रुवन् ॥ ३ ॥

४] ति० टी०–भार्यात्वं भार्याभावं न बहु मन्यसे मोहादिति शेषः ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–पौलस्त्यस्येत्यादिभिः । हे सीते ! पौलस्त्यस्य दशग्रीवस्य भार्या मन्दोदर्यादिः त्वं बहु न मन्यसे तत्कर्तृकपूजां न स्वीकरोषीत्यर्थः, तत्कृतः, तत्कृत इति शेषः । सुबन्तस्य कर्मतया अन्वयात्र द्वितीया यत्तदोरध्याहारो वा ॥ ४ ॥

५] ति० टी०–ततः सर्वसाधारणैतद्वाक्यप्रयोगोत्तरमेकजटा विशिष्याब्रवीत् । करतलोदरीम् अतुन्दिलामित्यर्थः ॥५॥

रा० टी०–नन्वु राक्षसीकर्तृकपूजामहं न ग्रहीष्यामीत्युत्थापितसीताशङ्कां निवर्तयितुं वचनान्तरमुपक्रमते–तत इति । ततः तदुक्त्यनन्तरं करतलोदरीं सूक्ष्मोदरविशिष्टामित्यर्थः, सीतामामन्त्र्य संबोध्य क्रोधताम्राक्षी एकजटानाम राक्षसी अब्रवीत् ॥ ५ ॥

६–७] ति० टी०–' मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः' इत्युक्तानां षट्प्रजापतीनां चतुर्थः पुलस्त्यः ॥ ६ ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह–प्रजापतीनामित्यादिभिः । पुलस्त्य इति नाम्ना विश्रुतो विख्यातः अयमेतद्वंशप्रवर्तकः ब्रह्मणो मानसः पुत्रः षण्णां 'मरीचिरत्र्यङ्गिरसः पुलस्त्यः पुलहः क्रतुः' इत्युक्तानां प्रजापतीनां मध्ये चतुर्थः प्रजापतिः ॥ ६ ॥

रा० टी०–पुलस्त्यस्येति । पुलस्त्यस्य मानसः सुतो विश्रवा नाम ॥ ७ ॥

गो० टी०–प्रजापतीनामिति । ' मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ' इति षट् प्रजापतयः । तेषां चतुर्थः पुलस्त्यः ॥ ६–१२ ॥

८] ति० टी०–तस्य पुत्र इत्यनेन कुलीनत्वं सूचितम् ॥८॥

रा० टी०–तस्येति । तस्य विश्रवसः पुत्रो रावणः तस्य रावणस्य भार्याः पत्नीः भवितुं पूज्यात्वेन प्राप्तुं त्वमर्हसि ॥८॥

९] ति० टी०–किं किमर्थम् । ततः कुलनिरूपणानन्तरम् ॥ ९ ॥

---

१ य इति गो.

विवृत्य[1] नयने कोपान्मार्जारसदृशेक्षणा । येन देवास्त्रयस्त्रिंशद्देवराजश्च [2]निर्जितः ॥ १० ॥
तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि । वीर्योत्सिक्तस्य शूरस्य सङ्ग्रामेष्वनिवर्तिनः ॥
बलिनो वीर्ययुक्तस्य भार्यात्वं किं न लिप्ससे ॥ ११ ॥
प्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः । सर्वासां च महाभागां त्वामुपैष्यति रावणः ॥ १२ ॥
समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम् । अन्तःपुरं तदुत्सृज्य त्वामुपैष्यति रावणः ॥ १३ ॥
अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत् । असकृद्धीमवीर्येण नागा गन्धर्वदानवाः ॥
निर्जिताः समरे येन स ते पार्श्वमुपागतः ॥ १४ ॥
तस्य सर्वसमृद्धस्य रावणस्य महात्मनः । किमर्थं[3] राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे[4] ॥ १५ ॥
तंतस्तां[5] दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् । यस्य सूर्यो न तपति भीतो यस्य स मारुतः ॥
न वाति स्मायतापाङ्गि किं त्वं तस्य न तिष्ठसे[6] ॥ १६ ॥
पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात् । शैलाः सुस्रुवुः[7] पानीयं जलदाश्च यदेच्छति ॥ १७ ॥
तस्य नैर्ऋतराजस्य राजराजस्य भामिनि । किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥ १८ ॥
साधु ते तत्त्वतो देवि कथितं साधु भामिनि । गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०–मयेति । मयोक्तं किं किमर्थं न अनुमन्यसे । अर्धं पृथक् । ततोऽनन्तरं मार्जारसदृशेक्षणा हरिजटानाम राक्षसी अब्रवीत् । अर्धद्वयमेकान्वयि ॥ ९ ॥

१०] ति० टी०–येनेत्यनेन पराक्रमातिशयसूचनम् ॥ १० ॥

रा० टी०–तद्वचनाकारमाह–येनेत्यादिभिः । येन देवा देवराजश्च निर्जिताः तस्य भार्याः पत्नीः भवितुं पूज्यात्वेन प्राप्तुं त्वमर्हसि ॥ १० ॥

११] ति० टी०–न लिप्ससे नेच्छसीत्यर्थः ॥ ११ ॥

रा० टी०–वीर्येति । वीर्योत्सिक्तस्य उद्धतवीर्यस्य रावणस्य भार्या मन्दोदरीप्रभृतिः किं किमर्थं न लिप्स्यसे वाञ्छसि । द्वितीयायास्तृत्पत्तिः पूर्ववत् ॥ ११ ॥

१२–१५] ति० टी०–सर्वासां मध्ये बहुमतां महाभागामतिभाग्यवतीं मन्दोदरीमपि त्यक्त्वा त्वामुपैष्यति॥१२–१५॥

रा० टी०–तत्र हेतुमाह–प्रियामिति । प्रियामतिप्रीतिविषयीभूतां बहुमतां बहुभिराकाङ्क्षितां भार्यामतिदीप्तिहेतुभूतां राजलक्ष्मीमित्यर्थः, त्यक्त्वा सर्वासां लक्ष्म्यादीनां मध्ये महाभागां त्वां रावण उपैष्यति प्रापयिष्यति ॥ १२ ॥

रा० टी०–समृद्धमिति । स्त्रीसहस्रेण समृद्धमन्तःपुरमुत्सृज्य स्वाधीनत्वं निवर्त्य त्वामुपैष्यति प्रापयिष्यति ॥ १३ ॥

रा० टी०–असकृदिति । येन गन्धर्वदानवा असकृन्निर्जिताः स रावणः ते पार्श्वं चरणसमीपमुपागतः अतिभाग्यं तवेत्यर्थः ॥ १४ ॥

रा० टी०–तस्येति । तस्य भार्यात्वं किमर्थं नेच्छसे सेविकात्वेन वाञ्छसि ॥ १५ ॥

गो० टी०–प्रियामिति । सर्वासां मध्ये प्रियां बहुमताम् महाभागां च भार्यां मन्दोदरीं त्यक्त्वा त्वामुपैष्यति ॥१३–१७॥

१६] ति० टी०–यस्य भीतः सूर्यो न तपतीत्यर्थः । न तिष्ठसे वशे इति शेषः ॥ १६ ॥

रा० टी०–यस्येति । यस्य यस्माद्भीतः सूर्यो न तपति मारुतो न वाति च तस्य पूजायामिति शेषः, त्वं किं किमर्थं न तिष्ठसे आस्थां करोषि ॥ १६ ॥

गो० टी०–यस्येति । यस्य यमात् । तस्य न तिष्ठसि तस्मै न तिष्ठसे । प्रकाशनार्थेऽप्यार्षत्वात्परस्मैपदं षष्ठी च ॥ १८ ॥

१७] ति० टी०–यदेच्छति तदा सुस्रुवुरित्यर्थः ॥ १७ ॥

१८] ति० टी०–भार्यार्थे भार्यात्वनिमित्तम् ॥ १८ ॥

रा० टी०–पुष्पेति । यस्य भयात् यदा इच्छति तदैव तरवो पुष्पवृष्टिं मुमुचुः शैलाः गिरयः जलदाश्च पानीयं सुस्रुवुः तस्य भार्यार्थे तद्भार्याणां कल्याणार्थं बुद्धिं निश्चयं त्वं किं कथं न कुरुषे । अर्धचतुष्टयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–पुष्पवृष्टिमित्यादि । शैलाश्च जलदाश्च पानीयं रावणः यदेच्छति तदा स्रुवन्तीति विपरिणम्यते ॥ १९॥२० ॥

१९] ति० टी०–साधु कथितं साधु गृहाण । न भविष्यसि मारयाम इत्यर्थः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०–साध्विति । हे भामिनि ! तत्त्वतः यथार्थं साधु

---

१ विवरयेति गो. पाठः । २ निर्जिता इति गो. पाठः । ३ अयेति गो. पाठः । ४ अर्धमेतत् रा. नास्ति ५ त्विति गो. पाठः । ६ तिष्ठसीति गो. पाठः । ७ च सुस्रुरिति । गो. पाठः ।

चतुर्विंशः सर्गः ।

राक्षसीभिस्तर्जिताऽपि दृढहृदया सीता शच्यरुन्धतीप्रमुखाः पतिव्रता दृष्टान्तीकृत्य मरणाप्रेरपि न मे परपुरुषपरिग्रहः स्यादित्यकातरं प्रतिभाषते । परुषभाषणैर्नानायुधोद्यमनैश्च राक्षसीभिर्भीष्यमाणां रुदतीं च सीतां शिंशपास्थो हनुमान्निरूपणोति ।

ततः सीतां समस्तास्ता राक्षस्यो विकृताननाः । परुषं पैरुषानर्हामूचुस्तद्वाक्यमप्रियम् ॥ १ ॥
किं त्वमन्तःपुरे सीते सर्वभूतमनोरमे । महार्हशयनोपेते न वासमनुमन्यसे ॥ २ ॥
मानुषे मानुषस्यैव भार्यात्वं बहु मन्यसे । प्रत्याहर मनो रामान्नैवं जातु भविष्यति ॥ ३ ॥
त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरम् । भर्तारमुपसंगम्य विहरस्व यथासुखम् ॥ ४ ॥
मानुषी मानुषं तं तु राममिच्छसि शोभने । राज्याद्भ्रष्टमसिद्धार्थं विक्लवन्तमनिन्दिते ॥ ५ ॥
राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा । नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ ६ ॥
यदिदं लोकविद्विष्टमुदाहरत संगताः । नैतन्मनसि वाक्यं मे किल्बिषं प्रतितिष्ठति ॥ ७ ॥
न मानुषी राक्षसस्य भार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ८ ॥
दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः । तं नित्यमनुरक्ताऽस्मि यथा सूर्यं सुवर्चला ॥ ९ ॥

कथितं वाक्यं मद्वचनं साधु गृहाण स्वीकुरु अन्यथा न भविष्यसि राक्षस्यो हनिष्यन्तीत्यर्थः ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

गो० टी०–साध्विति । साधु ते कथितम् साधु गृहाणेति साधुशब्दद्वयस्य निर्वाहः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

१–२] **ति० टी०**–तत इति ॥ १ ॥ २ ॥

रा० टी०–सीतां प्रति संघीभूतराक्षसीनां परुषोक्तिमाह–तत इत्यादिभिः । ततः तदुक्त्यनन्तरं समस्ताः राक्षस्यः परुषानर्हां सीतां परुषमप्रियं वाक्यमूचुः ॥ १ ॥

रा० टी०–तदाकारमाह–किमिति । हे सीते! महार्हशयनैरुपेते सर्वभूतमनोहरे अन्तःपुरे वासं स्वामिनीत्वेन स्थितिं किं किमर्थं नानुमन्यसे । अत्रत्यवचनानां परुषत्वं रामवियोगपोषकत्वेनेति बोध्यम् ॥ २ ॥

गो० टी०–तत इत्यादि ॥ १ ॥ २ ॥

३–५] **ति० टी०**–प्रत्याहर निवर्तय । एवं त्वदभीष्टं रामसंगमरूपं वस्तु जातु कदाचिदप्यतःपरं न भविष्यति । अत्र रामागमनस्य तव वा तत्र गमनस्य प्रसक्त्यभावादिति भावः । यद्वातः परं जातु कदाचिदप्येवं भावश्चेद्भवती न भविष्यति मारयाम इत्यर्थः ॥ ३–५ ॥

रा० टी०–मानुषीति । मानुषी मनुवंशजाता मानुषस्य मनुवंशजातस्य भार्या त्वं यं बहुमन्यसे तस्मात् रामात् मनः प्रत्याहर । तत्र हेतुः–एवं त्वदीप्सितरामसङ्गम इत्यर्थः, जातु कदाचिदपि न भविष्यति ॥ ३ ॥

रा० टी०–त्रैलोक्येति । त्रैलोक्यवसुभोक्तारं भर्तारं मत्पतिम् उपसंगम्य तत्कर्तृपूजात्वेन संप्राप्य यथासुखं विहरस्व ॥ ४ ॥

रा० टी०–मानुषीति । राज्यात् भ्रष्टं मानुषं रामं मानुषी त्वमिच्छसि एतेन नैतद्युक्तमिति सूचितम् ॥ ५ ॥

गो० टी०–मानुषीति । न त्वं जातु भविष्यसि तस्येति शेषः । मानुषीति हेतुगर्भम् । मानुषी त्वं मानुषं तमिच्छसि ॥ ३–६ ॥

६] **ति० टी०**–नेत्राभ्याम् उपलक्षितेति शेषः । इदं वचनं युष्मद्वचोऽनङ्गीकारे । मारणं चेच्छीघ्रं तदेव क्रियतामित्यर्थः । किं वक्ष्यमाणम् ॥ ६ ॥

रा० टी०–राक्षसीनामिति । राक्षसीनां वचः श्रुत्वा सीता इदमब्रवीत् ॥ ६ ॥

७–८] **ति० टी०**–लोकविद्विष्टं लोकविद्विष्टपरपुरुषसङ्गार्थकम् । संगता समेताः । किल्बिषं किल्बिषजनकार्थकम् ॥ ७ ॥ ८ ॥

रा० टी०–तदाकारमाह–यदिति । लोकविद्विष्टं शास्त्रादिविरुद्धम् अत एव किल्बिषं पापमयम् इदं रामवियोगपोषकं यद्वाक्यं संगताः यूयमुदाहरथ तदेतत् वाक्यं मे मनसि न प्रतितिष्ठति ॥ ७ ॥

रा० टी०–नेति । हे भार्याः हे रावणपत्न्यः ! मानुषी मनुष्यस्त्री राक्षसस्य पुरे भवितुं स्थातुं नार्हति अतः वो वचः न करिष्यामि अतः सर्वाः यूयं मां खादत ॥ ८ ॥

गो० टी०–यदिदमिति । किल्बिषं पापावहम् ॥ ७ ॥ ८ ॥

९] **ति० टी०**–गुरुरुपास्यदेवता । सुवर्चला सूर्यपत्नी । सूर्याभिमुखपुष्पवती काचिदोषधिरित्यन्यः ॥ ९ ॥

---

१ उपागम्येति गो. पाठः । २ परुषा नार्य ऊचुरिति गो. पाठः । ३ हरे इति गो. रा. पाठः । ४ न त्वमिति गो. पाठः । ५ भविष्यसीति गो. पाठः । ६ विक्लवं त्वमिति गो. पाठः । ७ उदाहरथेति गो. पाठः । ८ प्रतिभाति व इति गो. पाठः ।

यथा शची महाभागा शक्रं समुपतिष्ठति । अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥ १० ॥
लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा । सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥ ११ ॥
सौदासं मदयन्तीव केशिनी सगरं यथा । नैषधं दमयन्तीव भैमी पतिमनुव्रता ॥ १२ ॥
तथाहमिक्ष्वाकुवरं रामं पतिमनुव्रता । सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्छिताः ॥
भर्त्सयन्ति स्म परुषैर्वाक्यै रावणचोदिताः ॥ १३ ॥
अवलीनः स निर्वाक्यो हनुमाञ्शिंशपाद्रुमे । सीतां संतर्जयन्तीस्ता राक्षसीरशृणोत्कपिः ॥ १४ ॥
तामभिक्रम्य [1]संरब्धा वेपमानां समन्ततः । भृशं संलिलिहुर्दीप्तान्प्रलम्बान्दशनच्छदान् ॥ १५ ॥
ऊचुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान् । नेयमर्हति भर्तारं रावणं राक्षसाधिपम् ॥ १६ ॥
[2]सा भर्त्स्यमाना भीमाभी राक्षसीभिर्वराङ्गना [3] । सा बाष्पमपमार्जन्ती शिंशपां तामुपागमत् ॥ १७ ॥
ततस्तां शिंशपां सीता राक्षसीभिः समावृता । अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता ॥ १८ ॥
तां कृशां दीनवदनां मलिनाम्बरवाससीम् । भर्त्सयाञ्चक्रिरे भीमा राक्षस्यस्ताः समन्ततः ॥ १९ ॥
ततस्तु विनता नाम राक्षसी भीमदर्शना । अब्रवीत्कुपिताकारा कराला निर्णतोदरी ॥ २० ॥

रा० टी०-दीन इति । दीनो राज्यहीनो वा उत्प्रेक्षितदीनत्वादिविशिष्टः यो मे भर्ता स एव गुरुः अत एव तं पतिं सूर्यं सुवर्चला तत्पत्नीव नित्यमनुरक्ताऽस्मि ॥ ९ ॥

गो० टी०-दीनो वेति । सुवर्चलेत्यादिबहुदृष्टान्तप्रदर्शनं स्वस्याः पातिव्रत्यदार्ढ्यद्योतनाय ॥ ९–१३ ॥

१०–११] ति० टी०-अतिदुःखसमयेऽपि दृढव्रतत्वद्योतनायानेकसाध्वीनामुपन्यासो दृष्टान्तविधयेत्याहुः ॥१०॥११॥

१२–१३] ति० टी०-भैमी दमयन्ती नैषधं पतिं यथाऽनुव्रता ॥ १२ ॥ १३ ॥

रा० टी०-तदेव बहुभिर्दृष्टान्तैः द्रढयति–यथेत्यादिभिः । शचीप्रभृतिः शक्रप्रभृतिं यथा समुपतिष्ठति तथा इक्ष्वाकुवरं राममहमनुव्रता समुपतिष्ठामि । सार्धश्लोकत्रयमेकान्वयि॥१०–१२॥

रा० टी०-सीताया इति । रावणचोदिताः गमनसमये रावणेन प्रेरिताः राक्षस्यः भर्त्सयन्ति स्म ॥ १३ ॥

१४] ति० टी०-अवलीनश्छन्नः । निर्वाक्यो मौनी । शिंशपाद्रुमे स्थित इति शेषः । सीतां तर्जयन्ती राक्षसीस्तद्वाक्यान्यशृणोत् ॥ १४ ॥

रा० टी०-अवेति । शिंशुपाद्रुमे अवलीनः निर्वाक्यः मौनीभूतः स हनुमान् सीतां तर्जयन्तीः राक्षसीः तद्वाक्यानि अशृणोत् ॥ १४ ॥

गो० टी०-अवलीन इति । अवलीनः छन्नः । राक्षसीरशृणोत् राक्षसीवाक्यान्यशृणोदित्यर्थः ॥ १४ ॥

१५] ति० टी०-वेपमानां तामभिक्रम्य तत्समीपमागत्य संरब्धाः क्रुद्धास्ता राक्षस्यो दशनच्छदाँल्लिलिहुर्लेहनं कुर्वन्ति स्म ॥ १५ ॥

रा० टी०-तामिति । वेपमानां तां सीतां समन्ततोऽभिक्रम्य प्राप्य दीप्तान् प्रकाशितान् प्रलम्बान् दशनच्छदान् स्वस्वाधरान् भृशं संलिलिहुः संलेहनं चक्रुः ॥ १५ ॥

गो० टी०-तामभिक्रम्येत्यादि । नेयमर्हतीत्यत्रेतिकरणं बोध्यम् । अस्य ऊचुरित्यनेन संबन्धः ॥ १५ ॥ १६ ॥

१६] ति० टी०-परश्वधान्गृहीत्वोचुश्च । नेयं रावणं भर्तारमर्हति अपि त्वस्माकं भक्षणमेवार्हतीति भावः ॥ १६ ॥

रा० टी०-ऊचुरिति । परमक्रुद्धाः राक्षस्यः आशु शीघ्रं परश्वधान् प्रगृह्य इयं सीता भर्तारमस्मत्पतिं रावणं नार्हति तत्पूजायोग्या न भवति इत्यूचुः ॥ १६ ॥

१७] ति० टी०-भर्त्स्यमानैवंप्रकारेण पीड्यमाना । अभूदिति शेषः । तां शिंशपां हनूमदधिष्ठितशिंशपाम् । अत्यन्तं तन्मूलसमीपमित्यर्थः ॥ १७ ॥

रा० टी०-सेति । राक्षसीभिर्भर्त्स्यमाना सा सीता अभवदिति शेषः, अत एव बाष्पमश्रु अपमार्जन्ती सीता तां हनुमदधिष्ठितदेशसमीपवर्तिनीं शिंशुपां शिंशुपामूलमुपागमत् ॥ १७ ॥

गो० टी०-संभर्त्स्यमानेति । ' सा भर्त्स्यमाना इतिपाठे भर्त्सनोपगमनरूपक्रियाभेदात्तच्छब्दद्वयम् । तां हनुमदधिष्ठितां शिंशुपाम् ॥ १७–१९ ॥

१८–१९]ति०टी०-ततस्तन्मूलगमनानन्तरम् ॥१८॥१९॥

रा० टी०-तत इति । राक्षसीभिः समावृता सीता शिंशुपामधिगम्य तस्थौ ॥ १८ ॥

रा० टी०-तामिति । तां सीतां राक्षस्यो भर्त्स्ययाञ्चक्रिरे ॥ १९ ॥

२०] ति० टी०-निर्णतोदर्यतिनिम्नोदरी ॥ २० ॥

रा० टी०-तत इति । ततस्तस्मिन् समये निर्णतोदरी अतिनिम्नोदरविशिष्टा कुपितः कोपबोधकः आकारो यस्याः सा विनता नाम राक्षसी अब्रवीत् ॥ २० ॥

१ संकुद्धेति गो. पाठः । २ समिति गो. पाठः । ३ वरानेति गो. पाठः । ४ धारिणीमिति गो. पाठः ।

सीते पर्याप्तमेतावद्भर्तुः स्नेहः प्रदर्शितः । सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥ २१ ॥
परितुष्टाऽस्मि भद्रं ते मानुषस्ते कृतो विधिः । ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ॥ २२ ॥
रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् । विक्रान्तमुपतन्तं च सुरेशमिव वासवम् ॥ २३ ॥
दक्षिणं त्यागशीलं च सर्वस्य प्रियवादिनम् । मानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय ॥ २४ ॥
दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता । अद्यप्रभृति लोकानां सर्वेषामीश्वरी भव ॥ २५ ॥
अग्नेः स्वाहा यथा देवी शची वेन्द्रस्य शोभने । किं ते रामेण वैदेहि कृपणेन गतायुषा ॥ २६ ॥
एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि । अस्मिन्मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम् ॥ २७ ॥
अन्या तु विकटा नाम लम्बमानपयोधरा । अब्रवीत्कुपिता सीतां मुष्टिमुद्यम्य तर्जती ॥ २८ ॥
बहून्यप्रतिरूपाणि वचनानि सुदुर्मते । अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि ॥ २९ ॥
न च नः कुरुषे वाक्यं हितं कालपुरस्कृतम् । आनीताऽसि समुद्रस्य पारमन्यैर्दुरासदम् ॥ ३० ॥
रावणान्तःपुरे घोरे प्रविष्टा चासि मैथिलि । रावणस्य गृहे रुद्धा अस्माभिस्त्वभिरक्षिता ॥ ३१ ॥
न त्वां शक्तः परित्रातुमपि साक्षात्पुरन्दरः । कुरुष्व हितवादिन्या वचनं मम मैथिलि ॥ ३२ ॥

गो० टी०–ततस्तां विनता नामेति । निर्णतोदरी उन्नतोदरी ॥ २० ॥

२१] ति० टी०–अतिकृतमतिमात्राचरणम् । श्रीरपि समैव ज्यायसीति लोकोक्तिरिति भावः । व्यसनं दुःखम् ॥२१॥

रा० टी०–तद्वचनाकारमाह–सीते इति । हे सीते ! भर्तुः स्नेहः पर्याप्तं यथा भवति तथा प्रदर्शितः इतः परं स्नेहं न कुर्वित्यर्थः । तत्र हेतुः—सर्वत्र सर्वस्मिन् काले अतिकृतम् अत्यन्तं संपादितं स्नेहनं व्यसनाय दुःखाय उपकल्पते ॥२१॥

गो० टी०–सीत इति । अतिकृतम् अतिमात्रकृतम्॥२१॥

२२] ति० टी०–मानुषो मनुष्यज्ञात्युचितो विधिरनुष्ठानं ते त्वया कृतम् । एतावदेवालमित्यर्थः ॥ २२ ॥

रा० टी०–परीति । यतस्त्वया मानुषः मनुष्योचितः विधिः धर्मप्रबोधनं कृतः अतः परितुष्टाऽस्मि अतस्ते भद्रं कल्याणं ममापि पथ्यं वचः शृणु ॥ २२ ॥

गो०टी०–परितुष्टाऽस्मीति । मानुषो विधिः कृतः मनुष्यजात्युचितपातिव्रत्यप्रकटनं कृतम् एतावत्कालमित्यर्थः २२-२८

२३] ति० टी०–सुरेशं वासवमिव ॥ २३ ॥

रा०टी०–तद्वचनाकारमाह–रावणमित्यादिभिः । वासवमिव विक्रान्तं विक्रमवन्तं रूपवन्तं सर्वरक्षसां भर्तारं भर्तारमस्मत्पतिं रावणं भज तत्प्रार्थनास्वीकारेण प्रसादय ॥ २३ ॥

२४–२७] ति० टी०–कृपणं दीनम् ॥ २४–२७ ॥

रा० टी०–दक्षिणमिति । मानुषं रामं त्यक्त्वा दक्षिणं निपुणं रावणमाश्रयस्व चरणसन्निधिं प्रापय ॥ २४ ॥

रा० टी०–दिव्येति । वैदेहि त्वं दिव्याङ्गरागा सती अद्यप्रभृति लोकानाम् ईश्वरी भव ॥ २५ ॥

रा० टी०–अग्नेरिति । अग्नेः स्वाहेव इन्द्रस्य शचीव रामस्य पत्नी या त्वं तस्यास्ते गतायुषा रामेण किम् ॥ २६ ॥

रा० टी०–एतदिति । एतदुक्तं वाक्यं यदि त्वं न करिष्यसि तर्हि सर्वाः वयं त्वां भक्षयिष्यामहे ॥ २७ ॥

२८] ति० टी०–तर्जती तर्जयन्ती ॥ २८ ॥

रा० टी०–अन्येति । लम्बमानौ पयोधरौ यस्याः सा विकटा नाम अन्या सीतां मुष्टिम् उद्यम्य तर्जती तर्जन्ती सती अब्रवीत् ॥ २८ ॥

२९] ति० टी०–अनुक्रोशो दया । मृदुत्वमल्पप्रमाणत्वम् ॥ २९ ॥

रा० टी०–तद्वचनाकारमाह–बहूनीति । हे सुदुर्मते ! अप्रतिरूपाणि राक्षसायोग्यानि तव वचनानि अनुक्रोशात् दयातः मृदुत्वात् सरलस्वभावत्वाच्च सोढानि ॥ २९ ॥

गो० टी०–बहूनीति । सोढानि रावणेनेति शेषः ॥२९॥

३०] ति० टी०–कालपुरस्कृतं कालोचितं नो वाक्यं न च कुरुषे । नैतत्ते हितमिति शेषः । तदेवोपपादयति—आनीताऽसीति ॥ ३० ॥

३१–३२] ति० टी०–गृहे रुद्धा चासि । अस्माभिरभिरक्षिता रक्षितनिरोधा ॥ ३१ ॥ ३२ ॥

रा० टी०–नेति । अन्यैर्दुरासदं समुद्रस्य पारं या त्वमानीताऽसि अत एव रावणान्तःपुरे प्रविष्टाऽसि अत एव रावणस्य गृहे अवरुद्धाऽसि अत एव अस्माभी रक्षिताऽसि सा त्वं कालपुरस्कृतं कालोचितं हितं नो वाक्यं न कुरुषे अनुचितमेतदित्यर्थः । अर्धचतुष्टयमेकान्वयि ॥ ३० ॥ ३१ ॥

रा० टी०–वचनाकरणे दोषमाह–नेति । त्वाम् अस्मदनुमतिहीनामित्यर्थः त्रातुं पुरन्दरोऽपि न शक्तः अतो मम वचनं कुरुष्व ॥ ३२ ॥

गो०टी०–न चेति । कालपुरस्सरं कालानुरूपम् ३०–३२

---

१ निदर्शित इति गो. पाठः । २ रूपवन्तमिति गो. पाठः । ३ दर्शनमिति गो. पाठः । ४ गर्जतीति गो. पाठः । ५ अप्रियेति गो. पाठः । ६ पुरःसरमिति गो. पाठः । ७ पुरं घोरमिति गो. पाठः । ८ रुद्धामस्माभिश्च सुरक्षितामिति गो. पाठः ।

अलमश्रुनिपातेन[1] त्यज[2] शोकमनर्थकम् । भज प्रीतिं प्रहर्षं च त्यजैन्तीं नित्यदैन्यताम् ॥ ३३ ॥
सीते राक्षसराजेन परिक्रीड यथासुखम्[3] । जानीमहे यथा भीरु स्त्रीणां यौवनमध्रुवम् ॥ ३४ ॥
यावन्न ते व्यतिक्रामेत्तावद्दुःखमवाप्नुहि[4] । उद्यानानि च रम्याणि पर्वतोपवनानि च ॥ ३५ ॥
सह राक्षसराजेन चर त्वं मदिरेक्षणे[5] । स्त्रीसहस्राणि ते देवि वशे स्थास्यन्ति सुन्दरि[6]॥ ३६ ॥
रावणं भज भर्तारं भर्तारं सर्वरक्षसाम्[7] । उत्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि ॥ ३७ ॥
यदि मे व्याहृतं वाक्यं न यथावत्करिष्यसि[8] । ततश्चण्डोदरी नाम राक्षसी क्रूरदर्शना ॥ ३८ ॥
भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत्[9] । इमां हरिणशावाक्षीं त्रासोत्कम्पपयोधराम्[10] ॥ ३९ ॥
रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानयम्[11] । यकृत्प्लीहं महत्क्रोडं हृदयं च सबन्धनम्[12] ॥ ४० ॥
गात्राण्यपि तथा शीर्षं खादेयमिति मे मतिः[13] । ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत्[14] ॥ ४१ ॥

३३-३४] ति० टी०-प्रीतिं स्नेहम् रावणे प्रहर्षमानन्दम् नित्यदैन्यतां निरन्तरदीनत्वम् स्वार्थे ष्यञ् ॥ ३३ ॥ ३४ ॥

रा० टी०-अलमिति । अश्रुनिपातेन अलम् अतः अनर्थकं शोकं त्यज प्रीतिं प्रहर्षं च भज तां प्रत्यक्षीभूतां नित्यदैन्यतां निरन्तरदैन्यं त्यज । दैन्यताशब्दःस्वार्थिक-ष्यञन्तः ॥ ३३ ॥

रा० टी०-सीते इति । हे सीते ! राक्षसराजेन राक्षस-राजत्वेनोपलक्षिता त्वं स्त्रीणां मध्ये यथासुखं परिक्रीड । तत्र हेतुः-यौवनं युवावस्था अध्रुवं चलमित्यर्थः, राज्यभोगादियोग्या युवावस्थैवेति भावः ॥ ३४ ॥

गो० टी०-भजेति । प्रीतिं रावणविषयप्रीतिम् । प्रहर्षं कालकृतमनोविकासम् ॥ ३४-३७ ॥

३५-३६] ति० टी०-व्यतिक्रामेत् यौवनमिति शेषः । उद्यानानि चरेत्युत्तरस्थेनान्वयः । तेषु क्रीडेत्यर्थः ॥ ३५ ॥३६॥

रा० टी०-यावदिति । यावत् ते यौवनमिति शेषः, न व्यतिक्रामेत् विनश्येत् तावत्सुखं राक्षसराज्यमवाप्नुहि । अर्धं पृथक्—उद्यानानीति । राक्षसराजेन राक्षसराजत्वेन सह सहिता त्वमुद्यानादीनि चर ॥ ३५ ॥

रा० टी०-स्त्रीति । स्त्रीसहस्राणि ते वशे स्थास्यन्ति अतः सर्वरक्षसां भर्तारं भर्तारमस्मत्पतिं रावणं भज तत्प्रार्थ-नास्वीकारेण प्रसादय ॥ ३६ ॥

३७] ति० टी०-उत्पाटनं स्थानादपकर्षणम् ॥ ३७ ॥

रा० टी०-उत्पाट्येति । यदि मे व्याहृतमुक्तं यथावत् न करिष्यसि तर्हि ते हृदयमुत्पाट्य भक्षयिष्याम्येव ॥ ३७ ॥

गो० टी०-उत्पाट्येति । उत्पाट्य वा उत्पाट्यैव ३८॥३९

३८-३९] ति० टी०-यदीत्यर्धं पूर्वान्वयि ॥३८॥३९॥

रा० टी०-तत इति । महच्छूलं भ्रामयन्ती चण्डोदरी नाम राक्षसी अब्रवीत् ॥ ३८ ॥

रा० टी०-तद्वचनाकारमाह-इमामिति । रावणेन हृता-मत एव त्रासोत्कम्पपयोधरामिमां दृष्ट्वा मे दौर्हृदः क्रूरकर्म-कारकेच्छाविशेषोऽभूत् ॥ ३९ ॥

गो० टी०-इमामिति । दौर्हृदः इच्छा ॥ ४० ॥

४०-४१] ति० टी०-गर्भिण्या गर्भकृत इच्छाविशेषो दौर्हृदम् । यकृद्दक्षिणभागस्थः कालखण्डाख्यो मांसविशेषः । 'स्नायुः स्त्रियां कालखण्डयकृती च समे उभे' इति कोशः । प्लीहं हृदयवामभागस्थो गुल्माख्यो मांसविशेषः । यद्यपि तद्वाचकः प्लीहा इत्याकारान्तः, तथाप्यदन्तत्वमार्षम् । मह-त्क्रोडं भुजान्तरम् । 'अथोत्पीडम्' इति पाठे उत्पीडं हृदयो-परिस्थितमांसबन्धनम् । हृदयं नाडीबन्धनसहितं सुकुलाकारं हृत्पुण्डरीकाख्यम् ॥ ४० ॥ ४१ ॥

रा० टी०-दौर्हृदमेव प्रकटयति-यकृदिति । यकृत्प्लीहं यकृत् दक्षिणभागस्थः कालखण्डाभिधः मांसविशेषः प्लीहा हृदय-वामभागस्थो गुल्माभिधो मांसविशेषः तयोः समाहारद्वन्द्वः अच्प्रत्ययेत्यत्र अजिति योगविभागादच् तत् महत् क्रोडं भुजान्तरं सबन्धनं हृदयनाडीबन्धनसहितं हृदयं च गात्राणि च शीर्षं च खादेयमिति मे मतिर्निश्चयः ॥ ४० ॥

रा० टी०-तत इति । ततः प्रघसा नाम राक्षसी अब्र-वीत् । तदाकारमाह-नृशंसायाः क्रूराया अस्याः कण्ठं पीड-यामः किं किमर्थमास्यते संस्थाप्यते ॥ ४१ ॥

गो० टी०-यकृदिति । क्वचिद्दक्षिणभागस्थः कालखण्डा-ख्यो मांसपिण्डो यकृत् 'स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे' इत्यमरः । प्लीहा तु गुल्माख्यो वामभागस्थो मांस-पिण्डविशेषः नकारान्तस्य प्लीहन्शब्दस्य अकारान्तत्वमा-र्षम् 'अन्त्रं पुरीतदुल्मस्तु प्लीहा पुंसि' इत्यमरः । उत्पीडं तस्यो-परि स्थितम् मांसम् । हृदयम् पद्मकोशप्रतीकाशं मांसम् । बन्धनं तस्य धारणमधोमांसम् 'उत्क्रोडम्' इति पाठे उत्क्रोडो हृदयस्य स्थानम् । अन्त्रं पुरीतत् ॥ ४१-४३ ॥

---

१ प्रपातेनेति गो. पाठः । २ त्यजैतामिति गो. त्यज तामिति रा. पाठः । ३ सुखमिति गो. रा. पाठः । ४ सप्तेति गो. पाठः । ५ क्रोधमूर्छितेति गो. पाठः । ६ लोलाक्षीमिति गो. पाठः । ७ अभूदिति गो. पाठः । ८ अथोत्पीडमिति गो. पाठः । ९ अन्त्राणीति गो. पाठः ।

[कण्ठमस्या नृशंसायाः पीडयाम किमास्यते । निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ॥
नात्र कश्चन संदेहः खादतेति स वक्ष्यति । ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ॥]
विशस्येमां ततः सर्वान्समान्कुरुत पिण्डकान् । विभजाम ततः सर्वा विवादो मे न रोचते ॥ ४२ ॥
पेयमानीयतां क्षिप्रं माल्यं च विविधं बहु । ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत् ॥ ४३ ॥
अजामुख्या यदुक्तं वै तदेव मम रोचते । सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी ॥ ४४ ॥
मानुषं मांसमासाद्य नृत्यामोऽथ निकुम्भिलाम् । एवं निर्भर्त्स्यमाना सा सीता सुरसुतोपमा ॥
राक्षसीभिर्विरूपाभिर्धैर्यमुत्सृज्य रोदिति ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ।

राक्षसीगणसंतर्जनं सोढुमसमर्था जानक्यशोकशाखामालम्ब्य रामादीनाक्रोशन्त्यश्रुधाराभिराप्लुतनेत्रा प्ररोदिति ।

अथ तासां वदन्तीनां परुषं दारुणं बहु । राक्षसीनामसौम्यानां रुरोद जनकात्मजा ॥ १ ॥
एवमुक्ता तु वैदेही राक्षसीभिर्मनस्विनी । उवाच परमत्रस्ता बाष्पगद्गदया गिरा ॥ २ ॥

४२] ति० टी०–प्रघसावाक्यम्—विशस्येमामिति । मध्ये 'कण्ठमस्या नृशंसायाः पीडयामः किमास्यते । निवेद्यतां ततो राज्ञे मानुषी सा मृतेति च ॥ नात्र कश्चित् संदेहः खादतेति स वक्ष्यति । ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत्' ॥ इति श्लोकद्वयं प्रक्षिप्तमिति कतकः । पिण्डकान्मांसखण्डान् । विवादः अनया सहेति शेषः ॥ ४२ ॥

रा० टी०–ननु कण्ठपीडनेन किमित्यत आह–निवेद्यतामिति । ततः कण्ठपीडनानन्तरं मानुषी सा सीता मृतेति राज्ञे रावणाय निवेद्यतां सः श्रुतवृत्तान्तो राजा यूयं खादतेति वक्ष्यति अत्र कश्चन संदेहो न ॥ ४२ ॥

रा० टी०–तत इति । अजामुखी नाम राक्षसी अब्रवीत् । तदाकारमाह–इमां सीतां विशस्य हत्वा पिण्डकान् मांसखण्डान् समान् यथाराक्षसीसमविभागान् कुरु ॥ ४३ ॥

रा० टी०–समविभागकरणे प्रयोजनमाह–विभजाम इति । सर्वाः वयं विभजामः स्वस्वभागं ग्रहीष्यामः । तत्र हेतुः–मे मह्यं विवादो न रोचते अतः पेयादिकमानीयताम् ४४

गो० टी०–ततस्त्वजामुखी नामेत्यादि । पीलुकान् मांसखण्डान् । पेयं लेह्यं चास्या उपदंशत्वेनोच्यते ॥४४॥४५॥

४३] ति० टी०–शूर्पणखेयमन्या ॥ ४३ ॥

रा० टी०–तत इति । शूर्पनखी नाम राक्षसी अब्रवीत् इयं न रावणभगिनी संज्ञाया अभावान्न ङीन्निषेधादि । तदाकारमाह–अजामुख्या यदुक्तं मम तदेव रोचते ॥ ४५ ॥

गो० टी०–ततः शूर्पणखा नामेत्यादि । निकुम्भिला नाम लङ्कायाः पश्चिमद्वारप्रदेशवासिनी भद्रकाली ॥ ४६॥४७॥

४४] ति०टी०–अजामुखसदृशमुखत्वया प्रघसयेत्यर्थः ४४

रा० टी०–सुरेति । सर्वशोकविनाशिनी सुरा आनीयतां मानुषं मांसमासाद्य प्राप्य निकुम्भिलां लङ्कापश्चिमभागवर्तिभद्रकालीं गत्वेति शेषः नृत्यामः ॥ ४६ ॥

४५] ति० टी०–निकुम्भिला नाम लङ्कायाः पश्चिमभागवर्तिनी भद्रकाली तां नृत्यामस्तत्समीपं गत्वा नृत्यामः सुरसुतोपमा देवकन्योपमा रोदित्यरुदत् ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

रा० टी०–एवमिति । निर्भर्त्स्यमाना सुरसुतोपमा सुरसुतासदृशी सीता धैर्यमुत्सृज्येव रोदिति । एवमिवार्थे॥४७॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

गो० टी०–एवमिति । रोदिति अरुदत् ॥ ४८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

१] ति० टी०–परुषं वदन्तीनां वचः श्रुत्वेति शेषः ॥१॥

रा० टी०–भर्त्सितसीतावृत्तान्तमेवाह–अथेत्यादिभिः । परुषं वदन्तीनां राक्षसीनां मध्ये जनकात्मजा रुरोद ॥ १ ॥

गो० टी०–तथा तासां वदन्तीनामित्यादि । तासां वदन्तीनां तासु वदन्तीषु ॥ १ ॥

२] ति० टी०–पूर्वसर्गोक्तरीत्योक्ता मनस्विनी पातिव्रत्ये दृढमनाः ॥ २ ॥

रा० टी०–एवमिति । राक्षसीभिः एवमुक्ता वैदेही बाष्पगद्गदया गिरा उवाच ॥ २ ॥

गो० टी०–एवमुक्तेति । मनस्विनी पातिव्रत्ये दृढमनाः२

१ श्लोकद्वयमेतदधिकं गो. रा. पाठे । २ सर्वा इति गो.पाठः । ३ पीलुकानिति गो.पाठः । ४ लेह्यमुच्चावचमिति गो. पाठः । ५ तथेति गो. पाठ ।

न मानुषी राक्षसस्य भार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३ ॥
सा राक्षसीमध्यगता सीता सुरसुतोपमा । न शर्म लेभे शोकार्ता रावणेनेव भर्त्सिता ॥ ४ ॥
वेपते स्माधिकं सीता विशन्तीवाङ्गमात्मनः । वने यूथपरिभ्रष्टा मृगी कोकैरिवार्दिता ॥ ५ ॥
सा त्वशोकस्य विपुलां शाखामालम्ब्य पुष्पिताम् । चिन्तयामास शोकेन भर्तारं भग्नमानसा ॥ ६ ॥
सा स्नापयन्ती विपुलौ स्तनौ नेत्रजलस्रवैः । चिन्तयन्ती न शोकस्य तदान्तमधिगच्छति ॥ ७ ॥
सा वेपमाना पतिता प्रवाते कदली यथा । राक्षसीनां भयत्रस्ता विवर्णवदनाऽभवत् ॥ ८ ॥
तस्याः सा दीर्घबहुला वेपन्त्याः सीतया तदा । ददृशे कम्पिता वेणी व्यालीव परिसर्पती ॥ ९ ॥
सा निःश्वसन्ती शोकार्ता कोपोपहतचेतना । आर्ता व्यसृजदश्रूणि मैथिली विललाप च ॥ १० ॥
हा रामेति च दुःखार्ता हा पुनर्लक्ष्मणेति च । हा श्वश्रूमम कौसल्ये हा सुमित्रेति भामिनी ॥ ११ ॥
लोकप्रवादः सत्योऽयं पण्डितैः समुदाहृतः । अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥ १२ ॥
यत्राहमार्याभिः क्रूराभी राक्षसीभिरिहार्दिता । जीवामि हीना रामेण मुहूर्तमपि दुःखिता ॥ १३ ॥
एषाऽल्पपुण्या कृपणा विनशिष्याम्यनाथवत् । समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४ ॥

३] ति० टी०-कामं खादतेति । अयं सर्वः सीताप्रलापो गृहीतमनुष्यशरीरतया नटवदनुकरणरूप इति बोध्यम् ॥ ३ ॥

रा० टी०-तदाकारमाह--नेति । मानुषी मनुष्यसंबन्धिनी भार्या राक्षसस्य भवने भवितुं स्थातुं नार्हति अतः वो वचो न करिष्यामि अतो मां खादत ॥ ३ ॥

गो० टी०-न मानुषीति । खादत भक्षयत ॥ ३ ॥

४] ति० टी०-शर्म न लेभे इव शोकार्तैव ॥ ४ ॥

रा०टी०-सेति । राक्षसीमध्यगता सीता शर्म सुखं न लेभे४

गो० टी०-सा राक्षसीति । शर्म सुखम् ॥ ४ ॥

५] ति० टी०-आत्मनोऽङ्गं विशन्तीव भीत्यातिसंकुचितशरीरा कमठवदभूदित्यर्थः । कोकैर्वृकैः ॥ ५ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-वेपते इति । आत्मनोऽङ्गम् आविशन्तीव कमठवत् सङ्कुचितशरीरेत्यर्थः, सीता कोकैः वृकैः अर्दिता वृकी इव वेपते स्म ॥ ५ ॥

गो० टी०-वेपत इति । कोकैः ईहामृगैः । ' कोकस्त्वीहामृगो वृकः ' इत्यमरः ॥ ५ ॥

६-७] ति० टी०-अशोकस्याशोकवनिकासंबन्धिनः शिंशपावृक्षस्य तत्समीपवर्तिनोऽशोकस्यैव वा ॥ ६ ॥ ७ ॥

रा० टी०-सेति । अशोकस्य अशोकसदृशस्य शिंशुपायाः विपुलां शाखामालम्ब्य शोकेन उपलक्षिता अतः भग्नमानसा सा सीता भर्तारं चिन्तयामास । अशोकशब्दः आचाराक्विबन्तप्रकृतिककर्तृक्विबन्तः इवार्थकः तुशब्दो वा ॥ ६ ॥

गो० टी०-सा त्विति । अशोकस्य हनुमदधिष्ठितशिंशुपासन्निहितस्य ॥ ६ ॥

रा० टी०-सेति । चिन्तयन्ती राक्षसीदुरुक्तिं स्मरन्ती अत एव नेत्रजलस्रवैः स्तनौ स्नापयन्ती सा सीता शोकस्यान्तं निवृत्तिं नाधिगच्छति ॥ ७ ॥

गो० टी०-सा स्नापयन्तीति । अन्तम् अवधिम् । अधिगच्छति अध्यगच्छत् ॥ ७ ॥

८] ति० टी०-राक्षसीनां राक्षसीभ्यः ॥ ८ ॥

रा० टी०-सेति । राक्षसीनां भयत्रस्ता अत एव प्रवातकदलीव वेपमाना अत एव पतिता सा सीता विवर्णवदना अभवत् ॥ ८ ॥

गो० टी०-सा वेपमानेति । राक्षसीनां राक्षसीभ्यः ॥८॥

९-१०] ति० टी०-सीतयेति षष्ठ्यर्थे तृतीया । परिसर्पती परितः प्रसर्पन्ती ॥ ९ ॥ १० ॥

रा० टी०-तस्या इति । तस्याः भीतायाः वेपन्त्याः सीतया सीतायाः दीर्घबहुला अतिदीर्घा कम्पिता सा प्रसिद्धा वेणी परिसर्पती परिसर्पन्ती व्याली सर्पिणी इव ददृशे ॥ ९ ॥

गो० टी०-तस्या इति । सीतयेति व्यत्ययेन षष्ठ्यर्थे तृतीया । परिसर्पती परिसर्पन्ती हुमभाव आर्षः ॥ ९ ॥

रा० टी०-सेति । शोकोपहतचेतना सा सीता अश्रूणि व्यसृजत् विललाप च ॥ १० ॥

गो० टी०-सा निःश्वसन्तीति । दुःखार्ता राक्षसीवचनश्रवणजदुःखार्ता । आर्ता रामविरहार्ता ॥ १० ॥

११] ति० टी०-हा सुमित्रेतीत्यत्रेकारलोप आर्षः ॥११॥

रा० टी०-विलापाकारमाह-हेत्यादिभिः । हा रामेत्यायुवाचेति शेषः, हा सुमित्रेतीत्यत्र संधिरार्षत्वात् नसुनेत्यत्र नकारप्रश्लेषेण त्रिपाद्याः क्वचिदसिद्धत्वाभावज्ञापनाद्वा ॥ ११ ॥

गो० टी०-हा रामेति । सुमित्रेत्यत्र संबुद्धावाप एकारादेशाभाव आर्षः ॥ ११ ॥

१२] ति० टी०-अकाले दैवाविहितस्वेच्छाकाले ॥ १२ ॥

१३-१४] ति० टी०-यत्राहमिति । यस्मादहमित्यर्थः ॥ १३ ॥ १४ ॥

१ च तर्जितेति गो. रा. पाठः । २ कम्पिनीति गो. पाठः । ३ दुःखार्ता शोकेति गो. पाठः । ४ हेति गो. पाठः । ५ श्वश्रु ममेति गो. पाठः । ६ अहमेवमिति गो. पाठः ।

भर्तारं तमपश्यन्ती राक्षसीवशमागता । सीदामि खलु शोकेन कूलं तोयहृतं यथा ॥ १५ ॥
तं पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम् । धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६ ॥
सर्वथा तेन हीनाया रामेण विदितात्मना । तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवनम् ॥ १७ ॥
कीदृशं तु महापापं मया[2] देहान्तरे कृतम् । येनेदं प्राप्यते घोरं[3] महादुःखं सुदारुणम् ॥ १८ ॥
जीवितं त्यक्तुमिच्छामि शोकेन महता वृता । राक्षसीभिश्च रक्षन्त्या रामो नासाद्यते मया ॥ १९ ॥
धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् । न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०–लोकेति । यत्र यतः आभिः राक्षसीभिः अर्दिता रामेण च हीना अत एव दुःखिता अहं मुहूर्तमपि जीवामि अतः पण्डितैः समुदाहृतः अकाले मृत्युर्दुर्लभः अयं लोकप्रवादः सत्यः । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०–लोकप्रवाद इत्यादिश्लोकद्वयमेकं वाक्यम् । अकाले अप्राप्तकाले । दुर्लभ इत्यत्र इतिकरणं बोध्यम् । यत्र यतः लोकप्रवाद इत्यादिश्लोकद्वयमेकं वाक्यम् । दुर्लभ इत्यत्रेतिकरणं द्रष्टव्यम् । यत्र यतः । एवं पाठक्रमः । केषुचित्कोशेषु व्युत्क्रमस्तु लेखकप्रमादकृतः ॥ १२ ॥ १३ ॥

रा० टी०–एषेति । अल्पपुण्येव एषाऽहं विनशिष्यामि विनङ्क्ष्यामि । तत्र दृष्टान्तः–वायुवेगैरहृता पूर्णा समुद्रमध्ये नौरिव ॥ १४ ॥

गो० टी०–एषेति । पूर्णा पदार्थैरिति शेषः ॥१४॥१५॥

१५] ति० टी०–तोयहृतं नदीपूररुग्णम् ॥ १५ ॥

रा० टी०–भर्तारमिति । भर्तारमपश्यन्ती अत एव राक्षसीवशमागता अहं तोयहृतं कूलमिव शोकेन सीदामि॥१५॥

१६] ति० टी०–पद्मदलं विकसितं पद्मं तस्य पत्रमिवाक्षिणी यस्य तम् ॥ १६ ॥

रा० टी०–तमिति । सिंहविक्रान्तवत् गच्छति तच्छीलः तं मे नाथं ये पश्यन्ति ते धन्याः ॥ १६ ॥

गो० टी०–मम धनं सर्वेषां स्वं भविष्यतीत्याह–तमिति । तं 'बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते' इति प्रसिद्धम् । आत्मगुणानुक्त्वा विग्रहगुणानाह–पद्मदलपत्राक्षं दलतीति दलं निकसितपद्माक्षमित्यर्थः । यद्वा दलतीति दलं गर्भपत्रम् । विस्पष्टार्थमेकार्थे शब्दद्वयं वा । सिंहविक्रान्तगामिनं विक्रान्तं विक्रमः गमनं तद्वत् गच्छतीति तथा ॥ १६ ॥ १७ ॥

१७–१८] ति० टी०–तीक्ष्णं विषं वत्सनाभादिकमास्वाद्य स्थितस्येव मे मम जीवनं दुर्लभम् ॥ १७ ॥ १८ ॥

रा० टी०–सर्वथेति । रामेण हीनायाः अत एव तीक्ष्णं विषम् आस्वाद्य भक्षयित्वा विषमानाया इव मम जीवनं सर्वथा दुर्लभम् ॥ १७ ॥

रा० टी०–कीदृशमिति । येन कर्मणा इदं महद्दुःखं प्राप्यते तत् देहान्तरे देहमध्ये पापमिव कीदृशं कर्म मया कृतं संचितम् ॥ १८ ॥

गो० टी०–कीदृशं त्विति । पुरा जन्मान्तरे पूर्वजन्मनि । घोरं सुदारुणम् अत्यन्तघोरमित्यर्थः ॥ १८ ॥

१९] ति० टी०–जीवितं त्यक्तुमिच्छामि । तदपि न शक्यमिति शेषः । रामोऽपि नासाद्यते च ॥ १९ ॥

रा० टी०–जीवितमिति । राक्षसीभिः रक्ष्यन्त्या रक्ष्यमाणया मया रामो नासाद्यते प्राप्यते अतः महता शोकेन वृताऽहं जीवितं जीवनं त्यक्तुमिच्छामि ॥ १९ ॥

गो० टी०–जीवितमिति । रक्ष्यन्त्या रक्ष्यमाणया॥१९॥

२०] ति० टी०–एवं परवशतया दुःखानुभवे हेतुमाह—धिगिति । मनुष्यस्य विषोद्बन्धनादिना देहत्यागेऽपरमार्थप्राप्तेः परमदुःखस्यापि सोढव्यत्वादप्रयोजको मनुष्यदेह इत्यर्थः । राक्षस्यादिपरतन्त्रतां च मनुष्यत्वप्रयुक्तां धिक् । यद्यत्र मनुष्यदेहे । आत्मच्छन्देनात्मेच्छया जीवितं परित्यक्तुं न शक्यम॥२०॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०–नित्यात्वेन स्वमरणाभावं संस्मृत्याह–धिगिति । यत् यस्मात् आत्मच्छन्देन स्वाधीनतया जीवितं परित्यक्तुं न शक्यं तस्मात् मानुष्यं नित्यमनुष्यत्वं धिगस्तु अत एव परवश्यतां धिग् अन्यतरस्याभावे एवं दुःखं न स्यादिति तात्पर्यम् ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

गो० टी०–धिगिति । परवश्यतां भर्तृपरतन्त्रताम् । परस्वभूतं शरीरं न स्वेच्छया त्यक्तुं शक्यमित्यर्थः । आत्मच्छन्देन मदिच्छया ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

१ जीवितमिति गो. पाठः । २ पुरा जन्मान्तरे इति गो. पाठः । ३ दुःखं मया घोरमिति गो. पाठः

षड्विंशः सर्गः ।

राक्षसीभिस्तर्ज्यमाना जानकी मारणेऽपि नैवाहं तदङ्गीकारमनुमंस्ये इति प्रतिजानाना स्वनयनार्थं रामानागमने कारणानि विकल्पयन्ती बहुशो विलपति ।

प्रसक्ताश्रुमुखी त्वेवं ब्रुवती जनकात्मजा । अधोगतमुखी बाला विलप्तुमुपचक्रमे ॥ १ ॥
उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती । उपावृत्ता किशोरीव विचेष्टन्ती महीतले ॥ २ ॥
राघवस्य प्रमत्तस्य रक्षसा कामरूपिणा । रावणेन प्रमथ्याहमानीता क्रोशती बलात् ॥ ३ ॥
राक्षसीवशमापन्ना भर्त्स्यमाना च दारुणम् । चिन्तयन्ती सुदुःखार्ता नाहं जीवितुमुत्सहे ॥ ४ ॥
नहि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः । वसन्त्या राक्षसीमध्ये विना रामं महारथम् ॥ ५ ॥
अश्मसारमिदं नूनमथवाप्यजरामरम् । हृदयं मम येनेदं न दुःखेन विशीर्यते ॥ ६ ॥
धिङ्मामनार्यामसतीं याऽहं तेन विना कृता । मुहूर्तमपि जीवामि जीवितं पापजीविका ॥ ७ ॥
चरणेनापि सव्येन न स्पृशेयं निशाचरम् । रावणं किं पुनरहं कामयेयं निशाचरम् ॥ ८ ॥

१] ति० टी०–प्रसक्तानि प्रवृत्तान्यश्रूणि मुखे यस्याः सा एवं ब्रुवती वक्ष्यमाणरीत्या ब्रुवती । विलप्तुं विलपितुम् ॥ १ ॥

२] ति० टी०–उन्मत्ता भूताविष्टा प्रमत्ता पित्तोद्रेकादिना भ्रान्तचित्तेव दिङ्मोहादिना मूर्च्छितचित्तेव शोचती शोचन्ती । उपावृत्ता श्रमापनयनाय परिवर्तनशीला । किशोरीव वडवेव ॥ २ ॥

रा० टी०–सीतावृत्तान्तमेवाह–प्रसक्तेत्यादिभिः । प्रसक्तानि प्रवृत्तानि अश्रूणि मुखे यस्याः सा अत एव अधोगतमुखी जनकात्मजा एवं ब्रुवती उन्मत्ता भूतैराविष्टेव प्रमत्ता पित्तादिदोषदूषितत्वेन प्रमादविशिष्टेव भ्रान्तचित्ता दिग्भ्रमादिजनितभ्रान्तिविशिष्टचित्तविशिष्टेव शोचती शोचन्ती उपावृत्ता श्रमापनोदाय लुण्ठितुं प्रवृत्ता किशोरी अश्वकन्येव महीतले विचेष्टन्ती जनकात्मजा विलप्तुं विलपितुमुपचक्रमे । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–प्रसक्तेत्यादि । उन्मत्तेति । उन्मत्ता चित्तविभ्रमवती ' उन्मादश्चित्तविभ्रमः ' इत्युक्तेः । प्रमत्ता अनवधाना 'प्रमादोनवधानता इत्यमरः' । भ्रान्तचित्ता अनवस्थितचित्ता । उपावृत्ता श्रमापनोदनार्थं वेष्टिता किशोरीव वडवेव ॥ १॥ २ ॥

३] ति० टी०–कामरूपिणा रक्षसा मारीचेन प्रमत्तस्यासंनिधानं प्राप्तस्य राघवस्य संबन्धिन्यहं रावणेन प्रमथ्य प्रपीड्य क्रोशन्ती बलादानीताऽस्मि ॥ ३ ॥

रा० टी०–विलापाकारमाह–राघवस्येत्यादिभिः । तस्य प्रसिद्धस्य राघवस्य प्रमत् तत्सामर्थ्यादिविज्ञात्री अहं रावणेन प्रमथ्य संन्यासिवेषेण संक्लेश्य क्रोशती क्रोशन्ती सती बलादानीताऽऽहृता ॥ ३ ॥

गो० टी०–राघवस्येत्यादि । प्रमत्तस्य अनवहितस्य ॥ ३ ॥ ४ ॥

४] ति० टी०–किं च राक्षसीवशमापन्ना, भर्त्स्यमाना राक्षसीभिः, चिन्तयन्ती रामम् ॥ ४ ॥

रा० टी०–राक्षसीति । राक्षसीवशमापन्ना अत एव सुदुःखार्ता चिन्तयन्ती रामामिति शेषः, अहं जीवितुं नोत्सहे॥४॥

५–६] ति० टी०–अर्थैर्धनैः ॥ ५ ॥ ६ ॥

रा० टी०–नहीति । रामं विना वसन्त्या मे जीवितादिना अर्थो न ॥ ५ ॥

रा० टी०–अश्मसारेति । येन ममेदं हृदयं दुःखेन न विदीर्यते तेन हेतुना इदमश्मसारमजरामरं वा मन्ये इति शेषः ॥ ६ ॥

गो० टी०–न हीति । मे जीवितैर्जीवनैः कोऽप्यर्थो नास्ति । केवलजीवितस्यानपेक्षितत्वेऽप्यर्थसहितत्वेन तदपेक्षा स्यात् नेत्याह–नैवार्थैर्न च भूषणैः भूषणैरर्थैश्च सहितैर्जीवनैर्मे नार्थः । कुत इत्यत्राह–वसन्त्या इति । राक्षसीमध्यवासाद्रामविरहाच्च सर्वोपकरणसहितमपि जीवितं नापेक्षितमित्यर्थः ॥ ५–१० ॥

७] ति० टी०–असतीमसतीवत्परगृहस्थाम् । जीवामि जीवितं रक्षामीत्यर्थः । 'पाकं पचति' इतिवत्प्रयोगः ॥ ७ ॥

रा० टी०–धिगिति । तेन रामेण विना रहिता कृता अत एव पापः दुःखप्रदः जीवो जीवनं यस्याः साऽहं मुहूर्तमपि जीवितं जीवनं जीवामि धारयामि अतो नार्यामार्यहीनामत एवासतीमविद्यमानप्रायां मां धिक् ॥ ७ ॥

८] ति० टी०–एतदुत्तरम्—चरणेनेति । मध्ये द्वौ श्लोकौ प्रक्षिप्तौ । सव्येन वामेन ॥ ८ ॥

रा० टी०–ननु रावणसमर्पितैश्वर्येण शोकः किमर्थं न कथञ्चिन्निवार्यते इत्यत आह–चरणेनेति । निशाचरं निशाचराधिपत्यं सव्येन चरणेनापि न स्पृशेयम् अतः विगर्हितं निन्दितं रावणं रावणैश्वर्यं किं कथं कामयेयम् ॥ ८ ॥

---

१ मुखेति गो. पाठः । २ सुदारुणमिति गो. पाठः । ३ अवशीर्यत इति गो. पाठः । ४ रक्षामीति गो. पाठः । ५ विगर्हितमिति गो. पाठः ।

प्रत्याख्यानं न जानाति नात्मानं नात्मनः कुलम्। यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ॥ ९ ॥
छिन्ना भिन्ना प्रभिन्ना वा दीप्ता वाग्नौ प्रदीपिता। रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरम् ॥ १० ॥
ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः। सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् ॥ ११ ॥
राक्षसानां जनस्थाने सहस्राणि चतुर्दश। एकेनैव निरस्तानि स मां किं नाभिपद्यते ॥ १२ ॥
[निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा। समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥
विराधो दण्डकारण्ये येन राक्षसपुंगवः। रणे रामेण निहतः स मां किं नाभिपद्यते ॥]
कामं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा। न तु राघवबाणानां गतिरोधो भविष्यति ॥ १३ ॥
किं नु तत्कारणं येन रामो दृढपराक्रमः। रक्षसाऽपहृतां भार्यामिष्टां यो नाभिपद्यते ॥ १४ ॥

९] ति० टी०–प्रत्याख्यानं मया क्रियमाणं निराकरणं न जानाति। काममोहादिति शेषः। नृशंसस्वभावेन क्रूरस्वभावेन। मां प्रार्थयितुं राक्षसीद्वारा स्वानुकूलां कर्तुम् ॥ ९ ॥

रा० टी०–प्रत्याख्यानमिति। नृशंसस्वभावेनोपलक्षितो यो रावणः मां प्रार्थयितुं मन्निष्यस्थितिं याचितुमिच्छति सः प्रत्याख्यानं राक्षसदेशो मया स्थातुमशक्य इति मदुक्तिं न जानाति गृह्णातीत्यर्थः, अत एव आत्मानं रामं आत्मनः कुलं च न जानाति विचारयति ॥ ९ ॥

गो० टी०–प्रत्याख्यातमिति। प्रत्याख्यातं प्रत्याख्यानम् भावे निष्ठा। आत्मानं स्वस्वरूपम् ॥ ११ ॥

१०] ति० टी०–छिन्ना रज्जुवत्, भिन्ना भित्तिवत्, प्रभिन्ना घटवत्, दीप्ता अग्नौ दीप्तशूल्यमांसवत्, प्रदीपिता प्रदीप्ता गृहादिवत्, वश्चिरं प्रलापेन किम्। रावणं नोपतिष्ठेयमित्येव निश्चयसत्त्वात् ॥ १० ॥

रा० टी०–छिन्नेति। छिन्ना शूलादिना कृतच्छिद्रा वा भिन्ना खड्गादिना द्विधाभावं प्रापिता वा प्रभिन्ना कुठारादिना अवयवशः खण्डिता वा अग्नौ दीप्ता भक्षणाय भर्जिता वा प्रदीप्ता अत्यन्तं दाहिता वाऽहं रावणं रावणैश्वर्यं नोपतिष्ठेयं राक्षसपुरे न वसेयमित्यर्थः ॥ १० ॥

गो० टी०–छिन्नेति। छिन्ना विखण्डतया कृता। भिन्ना दलिता। विभक्ता अवयवशः कृता दीप्तेव अग्नौ प्रदीपिता वा[1] १२

११] ति० टी०–अथ स्वापत्स्थैर्ये कारणानि संभावयति—ख्यात इति। प्रसिद्धः प्रशस्तगुणः ईदृशोऽपि राघवो मद्भाग्यसंक्षयादेव मयि निरनुक्रोशो दयाहीनः संपन्न इति शेषः। इति शङ्के ॥ ११ ॥

रा० टी०–ख्यात इति। ख्यातत्वादिविशिष्टो राघवः मद्भाग्यसंक्षयात् निरनुक्रोशः दयारहितः इति शङ्के नेत्यर्थः काकुः ॥ ११ ॥

गो० टी०–एवं पातिव्रत्यदार्ढ्यमुक्त्वा रामस्यानागमने कारणानि बहुधा शङ्कते-ख्यात इत्यादिना। प्राज्ञः दोषवत्यपि गुणदर्शी। न तेऽम्बा मध्यमा माता गर्हितव्या कथंचनेत्युक्तम्। कृतज्ञः कथंचिदुपकारेण कृतेनैकेन तुष्यतीत्युक्तरीत्या स्वाश्रितैः कृतं किंचित्कारं सर्वदा मनसि कुर्वन्नित्यर्थः। सानुक्रोशः किंचित्कारकरणे भृशं भवति दुःखित त्युक्तरीत्या तेषां व्यसने सति अतिदुःखितः राघवः। जनित्वार्जितानां गुणान्तराणामुपसंग्रहणमिदम्। सद्वृत्तः परस्मृद्धयैकप्रयोजनः ख्यातः एवं शत्रुगोष्ठ्यामपि प्रसिद्धः निरनुक्रोशः शङ्के अस्यामप्यवस्थायां सुखप्रदानाभावान्नृशंसमाशङ्के। मद्भाग्यसंक्षयात् मद्भाग्यविपर्ययेणैवं वैपरीत्यं जातम् १३

१२] ति० टी०–न च तस्य मद्विमोक्षणाशक्तिरित्याह—राक्षसानामिति। नाभिपद्यते न प्राप्नोति ॥ १२ ॥

रा० टी०–राक्षसानामिति। येन निरस्तानि स रामः मां किं किमर्थं नाभिपद्यते ॥ १२ ॥

गो० टी०–एकमात्रसहायः स किं करिष्यतीत्यत्राह–राक्षसानामिति। जनस्थाने रक्षसां चतुर्दश सहस्राणि एकेन येन रामेण निरस्तानि घातितानि सः नाभिपद्यते न रक्षति १४

१३-१४] ति० टी०–एतदुत्तरम्–कामं मध्ये इति। 'मध्ये निरुद्धा रावणेनाहमल्पवीर्येण रक्षसा। समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ विराधो दण्डकारण्ये येन राक्षसपुंगवः। रणे रामेण निहतः स मां नाभ्यवपद्यते ॥' इति श्लोकौ प्रक्षिप्ताविति कतकः। काममन्येषां दुष्प्रधर्षणा भवतु, न तु रामबाणानां गतिरोधो भविष्यति। आत्रह्मलोकं रामबाणगत्यप्रतिरोधस्य भार्गवादिविषये प्रसिद्धतरत्वादिति भावः। एतेनातिदुर्गस्थानस्थितत्वान्न मोक्षणमित्यपास्तम् ॥ १३॥१४॥

रा० टी०–निरुद्धेति। यद्यपि मे भर्ता रावणं हन्तुं समर्थः तथापि अहं निरुद्धा एतेनात्र कारणं दुरूहमिति ध्वनितम् ॥ १३ ॥

रा० टी०–विराध इति। येन विराधो निहतः स रामः मां नाभ्यवपद्यते किमर्थमिति शेषः ॥ १४ ॥

रा० टी०–काममिति। समुद्रस्य मध्ये इयं लङ्का यद्यपि कामं दुष्प्रधर्षणा तथापि रामबाणानां गतिरोधो न भविष्यति १५

गो० टी०–प्रबलो रावणः कथं निरस्य इत्यत्राह–निरुद्धेति ॥ १५ ॥

---

१ विभक्तेति गो. पाठः। २ येनैकेनेति गो. पाठः। ३ श्लोकद्वयमेतदधिकं गो. रा. पाठे। ४ गतिरोधी ह विद्यते इति गो. पाठः। ५ त्विति गो. रा. पाठः। ६ नाभ्यवपद्यते इति गो. रा. पाठः।

इहस्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः । जानन्नपि स तेजस्वी धर्षणां मर्षयिष्यति ॥ १५ ॥
हृतेति मां योऽधिगत्य राघवाय निवेदयेत् । गृध्रराजोऽपि स रणे रावणेन निपातितः ॥ १६ ॥
कृतं कर्म महत्तेन मां तदाऽभ्यवपद्यता । तिष्ठता रावणवधे वृद्धेनापि जटायुषा ॥ १७ ॥
यदि मामिह जानीयाद्वर्तमानां हि राघवः । अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ १८ ॥
निर्दहेच्च पुरीं लङ्कां निर्दहेच्च महोदधिम् । रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ १९ ॥
ततो निहतनाथानां राक्षसीनां गृहे गृहे । यथाहमेवं रुदती तथा भूयो न संशयः ॥ २० ॥
अन्विष्य रक्षसां लङ्कां कुर्याद्रामः सलक्ष्मणः । नहि ताभ्यां रिपुर्दृष्टो मुहूर्तमपि जीवति ॥ २१ ॥
चिताधूमाकुलपथा गृध्रमण्डलमण्डिता । अचिरेणैव कालेन श्मशानसदृशी भवेत् ॥ २२ ॥

गो० टी०–सामर्थ्यं निदर्शयति–विराध इति ॥ १६ ॥

गो० टी०–अस्तु रामः समर्थः तथापि समुद्रमध्यस्थां लङ्कां दुष्प्रधर्षेत्याशङ्क्याह–काममिति । गतिरोधि गतिप्रतिबन्धकम् किंचिदिति शेषः ॥ १७ ॥

रा० टी०–किमिति । येन कारणेन अपहृतां भार्यां रामो नाभ्युपपद्यते तत्कारणं किम् ॥ १६ ॥

गो० टी०–एतत्कलितमाह–किन्त्विति ॥ १८ ॥

१५] ति० टी०–तस्मादत्र मत्स्थित्यज्ञानमेव मद्विमोक्षणप्रवृत्त्यभावे कारणमित्याह—इहस्थामिति । मर्षयिष्यतीत्यत्र काकुः । जानंश्चेद्ववेत्तदा मर्षयिष्यति । अपि तु न सहिष्यत्येवेत्यर्थः ॥ १५ ॥

रा० टी०–इहेति । तेजस्वी रामः इहस्थां मां न जानीते । तत्र हेतुः–जानन्नपि धर्षणां रावणप्रागल्भ्यं सहिष्यति काकानेत्यर्थः इति शङ्के ॥ १७ ॥

गो० टी०–इहेति । लक्ष्मणपूर्वज इत्यनेन निरङ्कुशत्वादिप्रसक्त्यभावः सूच्यते । मर्षयिष्यतीत्यत्र काकुरनुसंधेया॥१५॥

१६] ति० टी०–संभावितं ज्ञानकारणं च विहतमित्याह—हृतेति । हृतेत्यधिगत्य ज्ञात्वा यो मां राघवाय निवेदयेत्सोऽपीत्यन्वयः ॥ १६ ॥

रा० टी०–इहस्थितिविषयकज्ञानाभावे हेतुमाह—हृतेति । योऽधिगत्य ज्ञात्वा हृतेति मां राघवाय निवेदयेत् स गृध्रराजोऽपि निपातितः अतः को मद्वृत्तं श्रावयेदिति तात्पर्यम् ॥ १८ ॥

गो० टी०–इहास्तीत्यज्ञाने हेतुमाह–हृतेति ॥ २० ॥

१७] ति० टी०–अभ्यवपद्यताऽनुगृह्णतेन । रावणवधे तिष्ठता रावणवधार्थं यतता (?) । ‘ रावणद्वन्द्वे ’ इति पाठे रावणेन सह द्वन्द्वयुद्ध इत्यर्थः ॥ १७ ॥

रा० टी०–प्रसङ्गसङ्गत्या आह–कृतमिति । मामभ्यवपद्यता अत एव रावणवधे तद्वधार्थं तिष्ठता वृद्धेनापि जटायुषा महत् कर्म कृतम् । ‘ रावणद्वन्द्व ’ इति पाठान्तरम् ॥ १९ ॥

गो० टी०–प्रसङ्गादाह–कृतमिति । अभ्यवपद्यता रक्षता । रावणद्वन्द्वे रावणद्वन्द्वयुद्धे ॥ २१–२३ ॥

१८–१९] ति० टी०–मामिति । इहस्थां माम् ॥१८॥१९॥

रा० टी०–यदीति । इह वर्तमानां मां राघवो यदि जानीयात् तदा अभिक्रुद्धः सन् लोकं राक्षसपुरमराक्षसं राक्षसरहितं कुर्यात् लङ्कां निर्दहेच्च अत एव रावणस्य कीर्तिं नाम च नाशयेच्च । श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

२०] ति० टी०–यथाहमिदानीमेवं रुदती वर्ते, भूयो मत्तोऽधिकं मृतभर्तृकत्वादाक्षस्यो रुदत्यो भविष्यन्तीत्यत्र न संशय इत्यर्थः ॥ २० ॥

रा० टी०–तत इति । ततो राक्षसविध्वंसानन्तरं रुदती याऽहं तस्या रोदनं यथा तथा गृहे गृहे निहतनाथानां राक्षसीनां रोदनं भविष्यतीति शेषः ॥ २२ ॥

गो० टी०–तत इति । अहं यथा एवं रुदती रुदन्त्यस्मि तथा निहतनाथानां राक्षसीनाम् गृहे गृहे भूयः भूरि रुदन्त्यः भविष्यन्तीत्यर्थः ॥ २४ ॥

२१] ति० टी०–ननु ज्ञाने खल्विदं संभाव्येत, ज्ञानमेव तु दुर्लभं तत्राह—अन्विष्येति । अचिन्त्यसामर्थ्यत्वाद्दैवानुग्रहाच्च लङ्कामप्यन्विष्य मां ज्ञात्वा रक्षसां कुर्यात् विनाशमिति शेषः । विनाशस्येपत्करत्वमाह—नहीति ॥ २१ ॥

रा० टी०–अन्विष्येति । हि यतः ताभ्यां रामलक्ष्मणाभ्यां दृष्टो रिपुः मुहूर्तमपि न जीवति अतः लङ्कामन्विष्य रक्षसां विध्वंसमिति शेषः, कुर्यात् ॥ २३ ॥

गो० टी०–अन्विष्येति । रक्षसां लङ्कामन्विष्य कुर्यात् रिपुनाशनामिति शेषः ॥ २५ ॥ २६ ॥

२२] ति० टी०–निश्चित एवायमर्थ इत्याह—चितेति । भवेत लङ्केति शेषः ॥ २२ ॥

रा० टी०–चितेति । चिताधूमैराकुला व्याप्ताः पन्थानो यस्यां सा अचिरेणैव कालेन श्मशानसदृशी भवेत् लङ्केति शेषः ॥ २४ ॥

१ हीति गो. पाठः । २ तथेति गो. पाठः । ३ द्वन्द्वे इति गो. पाठः । ४ स इति गो. पाठः । ५ विधमेदिति गो. पाठः । ६ शोषयेदिति गो. पाठः । ७ संकुलेति गो. पाठः । ८ तु लङ्केयमिति गो. पाठः ।

अचिरेणैव कालेन प्राप्स्याम्येनं मनोरथम् । दुष्प्रस्थानोऽयमाभाति सर्वेषां वो विपर्ययः ॥ २३ ॥
यादृशानि तु दृश्यन्ते लङ्कायामशुभानि तु । अचिरेणैव कालेन भविष्यति हतप्रभा ॥ २४ ॥
नूनं लङ्का हते पापे रावणे राक्षसाधिपे । शोषमेष्यति दुर्धर्षा प्रमदा विधवा यथा ॥ २५ ॥
पुण्योत्सवसमृद्धा च नष्टभर्त्री सराक्षसा । भविष्यति पुरी लङ्का नष्टभर्त्री यथाङ्गना ॥ २६ ॥
नूनं राक्षसकन्यानां रुदतीनां गृहे गृहे । श्रोष्यामि नचिरादेव दुःखार्तानामिह ध्वनिम् ॥ २७ ॥
सान्धकारा हतद्योता हतराक्षसपुङ्गवा । भविष्यति पुरी लङ्का निर्दग्धा रामसायकैः ॥ २८ ॥
यदि नाम स शूरो मां रामो रक्तान्तलोचनः । जानीयाद्वर्तमानां यां राक्षसस्य निवेशने ॥ २९ ॥
अनेन तु नृशंसेन रावणेनाधमेन मे । समयो यस्तु निर्दिष्टस्तस्य कालोऽयमागतः ॥ ३० ॥
स च मे विहितो मृत्युरस्मिन्दुष्टे न वर्तते । अकार्यं ये न जानन्ति नैर्ऋताः पापकारिणः ॥ ३१ ॥

२३] ति० टी०–रक्षोऽनर्थवन्ममार्थोऽपि निश्चित एवेत्याह—अचिरेणेति । युष्माकमनर्थोऽपि निश्चित इति च राक्षसीः प्रत्याह—दुष्प्रस्थान इति । दुर्निमित्तप्रवृत्तिरियं विपर्ययः, एतद्विपरीतज्ञानमिति भाति ॥ २३ ॥

रा० टी०–राक्षसीरुद्दिश्याह–अचिरेणेति । वो युष्माकं विपर्ययः शास्त्रविरुद्धः दुष्प्रस्थानः दुर्मार्गो भाति अतः एतदुक्तं मनोरथमचिरेणैव कालेन प्राप्स्यामि ॥ २३ ॥

गो० टी०–अचिरेणेति । दुष्प्रस्थानः दुर्मार्गः दुराचार इति यावत् ॥ २७ ॥

२४] ति० टी०–तामेवाह—यादृशानीति । यादृशानि दृश्यन्ते तैरेव हतप्रभा भविष्यतीति ज्ञायत इत्यर्थः ॥ २४ ॥

रा० टी०–यादृशानीति । लङ्कायां यादृशानि अशुभानि कर्माणि दृश्यन्ते तैः अचिरेणैव कालेन लङ्का हतप्रभा भविष्यति ॥ २६ ॥

गो० टी०–यादृशानीति । अशुभानि अशुभसूचकानि । हतप्रभेत्यत्र लङ्केत्यनुकर्षः । लङ्का अचिरेण कालेन हतप्रभा भविष्यतीत्यत्र यादृशानि सूचकानि स्युः इह लङ्कायाम् तादृशान्यशुभानि दृश्यन्त इत्यन्वयः ॥ २८ ॥

२५] ति० टी०–शोषम् ऐश्वर्यादेरिति शेषः ॥ २५ ॥

रा० टी०–नूनमिति । पापे रावणे हते सति विधवा पतिरहिता प्रमदा इव दुर्धर्षाऽपि लङ्का शोषं विनाशमेष्यति॥२७॥

गो० टी०–नूनमिति । दुर्धर्षेति लङ्काविशेषणम् ॥ २९ ॥

२६] ति० टी०–पुण्योत्सवसमृद्धा च । अयेति शेषः॥२६॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–पुण्येति । नष्टभर्त्री अङ्गना इव लङ्का नष्टभर्त्री भविष्यति ॥ २८ ॥

गो० टी०–पुण्येति । पुण्योत्सवेभ्यः समुत्था निकृत्तपुण्योत्सवेत्यर्थः सराक्षसी राक्षसीजनमात्रयुक्तेत्यर्थः इयं लङ्कापुरी नष्टभर्त्री सराक्षसी अर्थात् हतराक्षसा नष्टभर्त्री अङ्गना यथा अङ्गनेव पुण्योत्सवसमुत्था भविष्यतीत्यन्वयः ॥ ३० ॥ ३१ ॥

२७] ति० टी०–ध्वनिं रोदनशब्दम् । 'दुःखार्तानामिव' इति पाठः ॥ २७ ॥

रा० टी०–नूनमिति । रुदतीनां राक्षसकन्यानां ध्वनिं गृहे गृहे श्रोष्याम्येव । इव एवार्थे ॥ २९ ॥

२८] ति० टी०–सान्धकारालक्ष्मीसहिता ॥ २८ ॥

२९] ति० टी०–यदि राक्षसस्य निवेशने वर्तमानां यां मां रामो जानीयात्तदा लङ्कापुरी रामसायकैर्निर्दग्धा भविष्यतीत्यन्वयः ॥ २९ ॥

रा० टी०–सेति । रक्तान्तलोचनो रामः राक्षसस्य निवेशने वर्तमानां मां यदि जानीयात् तदा लङ्का रामसायकैर्दग्धा अत एव दग्धा राक्षसपुङ्गवा यस्याम् अत एव हतद्योता अत एव सान्धकारा भविष्यति । श्लोकद्वयमेकान्वयि ॥ ३० ॥३१॥

गो० टी०–सान्धकारेत्यादि । यदीति । स रामः रावणस्य निवेशने मां वर्तमानाम् जानीयाद्यदि तदा लङ्का निर्दग्धा भविष्यतीति पूर्वेण संबन्धः ॥ ३२ ॥ ३३ ॥

३०] ति० टी०–नन्वहं लङ्कानाशेऽपि मम जीवनं कथं स्यादिति चिन्तयति—अनेनेति । समयो द्वादशमासरूपः तस्य कालः किंचिदधिकमासद्वयावशिष्टत्वादत्यासन्नकाल इत्यर्थः३०॥

रा० टी०–अनेनेति । अधमेन रावणेन यः समयः मद्विघाताय द्वादशमासरूपकालः निर्दिष्टः तस्य कालः समाप्तिः अयं समीपस्थः सन्नागतः ॥ ३२ ॥

गो० टी०–अनेनेति । समयः द्वादशमासात्मकः संकेतः तस्य कालः आगतः सन्निहितः मासद्वयमात्रपरिशेषादिति भावः ॥ ३४ ॥

३१] ति० टी०–अस्मिन्काले दुष्टेन रावणेन स कालो मे मृत्युर्विहितः वर्तत इत्यर्थः । ननु ततः परमपि स्त्रीत्वात्त्वां न हिंस्युस्तत्राह—अकार्यमिति । ये राक्षसा अकार्यमिदं कर्तव्यमिदमकर्तव्यमिति न जानन्ति ते नैर्ऋताः पापकारिणः स्युः ॥ ३१ ॥

रा० टी०–स इति । दुष्टेन रावणेन यो मे मृत्युर्विहितः

१ आख्यातीति गो. पाठः । २ विपर्ययमिति गो. पाठः । ३ इहेति गो. पाठः । ४ अधमे इति गो. पाठः । ५ यास्यतीति गो. पाठः । ६ समुत्थेति गो. पाठः । ७ सराक्षसीति गो. पाठः । ८ रुदन्तीनामिति गो. पाठः । ९ हि रावणस्येति गो. पाठः । १० अर्धमेतत् गो. नास्ति ।

अधर्मात्तु महोत्पातो भविष्यति हि सांप्रतम् । नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः ॥ ३२ ॥
ध्रुवं मां प्रातराशार्थं राक्षसः कल्पयिष्यति । साऽहं कथं करिष्यामि तं विना प्रियदर्शनम् ॥ ३३ ॥
रामं रक्तान्तनयनमपश्यन्ती सुदुःखिता । [यदि कश्चित्प्रदाता मे विषस्याद्य भवेदिह ।]
क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३४ ॥
नाजानाज्जीवतीं रामः स मां भरतपूर्वजः । जानन्तौ तु न कुर्यातां नोर्व्यां हि परिमार्गणम् ॥ ३५ ॥
नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः । देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ३६ ॥
धन्या देवाः सगन्धर्वा सिद्धाश्च परमर्षयः । मम पश्यन्ति ये वीरं रामं राजीवलोचनम् ॥ ३७ ॥
अथवा नहि तस्यार्थो धर्मकामस्य धीमतः । मया रामस्य राजर्षेर्भार्यया परमात्मनः ॥ ३८ ॥

स मृत्युः ये नैर्ऋताः अकार्यं न जानन्ति तेषां समीपे इति शेषः अस्मिन् काले वर्तते ॥ ३३ ॥

गो० टी०–अकार्यमिति । पापकारिणः ये नैर्ऋताः अधर्महेतोः अकार्यं न जानन्ति तैर्महोत्पातः संभविष्यति॥३५॥

३२] ति० टी०–अपि च सांप्रतं संपादितात्परदारहरणलक्षणादधर्मात्त्वधर्मादेव योऽयं महोत्पातो वर्तते तेनैते सर्वथा न भविष्यन्ति । नन्वोऽत्रानुकर्ष इति कतकः यदेवमतः—नैत इति । यतो न विजानन्ति न गणयन्ति ॥ ३२ ॥

रा० टी०–अधर्मादिति । ये एते राक्षसाः धर्मं न विजानन्ति तेषाम् अधर्मात् मद्वधोपायजनितपापात् महोत्पातः सकलराक्षसविनाशकारकः शकुनविशेषः सांप्रतं शीघ्रमेव भविष्यति ॥ ३४ ॥

गो० टी०–एतदेव निवृणोति–नैत इति ॥ ३६ ॥ ३७ ॥

३३] ति० टी०–राक्षसस्तस्मादयं रावणोऽपि मां ध्रुवं प्रातराशार्थं कल्पयिष्यति, साहं कथं करिष्यामि । प्राप्तविशसनकाला तत्काल इति शेषः ॥ ३३ ॥

रा० टी०–ध्रुवमिति । राक्षसः प्रातराशार्थं प्रातःकालिकभोजनार्थं मां ध्रुवं कल्पयिष्यति । अर्थं पृथक्–सेति । सा प्राप्तराक्षसकर्तृकविघातसमये राममपश्यन्ती अहं रामं विना कथं करिष्यामि । अर्धद्वयमेकान्वयि ॥ ३९ ॥

३४] ति० टी०–उक्तमेवाह—राममिति । कथं करिष्यामीति शेषः ॥ ३४ ॥

रा० टी०–यदीति । अथ राक्षसकर्तृकविघातात्पूर्वमेव यदि कश्चित् पतिना पत्या पतिनाविना विद्यमानायाः मे मह्यं विषं प्रदाता भवेत् विषदानादिना विघातसमर्थो भवेदित्यर्थः, तदा वैवस्वतं विवस्वतो ध्येयं देवं नित्यप्रमोदं राममहं पश्येयम् ॥ ३६ ॥

गो० टी०–यदीति । पतिनेति नाभाव आर्षः ॥ ३८ ॥

३५] ति० टी०–तदेवं वीरतरस्य रामस्य स्वानन्वेषणे कारणान्युत्प्रेक्षते—नाजानादिति । स रामो लक्ष्मणश्च प्रायेण मां जीवतीं जीवन्तीं नाजानात् । यदि जानीयातां तदा जानन्तौ तावुर्व्यां भूमौ परिमार्गणं न कुर्यातामिति न, किं तु कुर्यातामेव । अतो मृतेति मत्वा तूष्णीं तिष्ठत इति भावः ॥ ३५ ॥

रा० टी०–नेति । जीवतीं जीवन्तीं मां जानन्तौ तौ रामलक्ष्मणौ परिमार्गणमन्वेषणं न कुर्यातां नो कुर्यातामेवेत्यर्थः, अतः मां जीवतीं लक्ष्मणपूर्वजः स रामः नाजानात् ॥ ३७ ॥

गो० टी०–नाजानादिति । जीवतीं जीवन्तीम् । न न कुर्यातां कुर्यातामेव । तदाह वामनः–'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ इति॥ ३९–४१ ॥

३६] ति० टी०–अथवा मद्वियोगेन रामो देहं न्यस्तवानित्याह—नूनमिति ॥ ३६ ॥

रा० टी०–नूनमिति । मम शोकेन देहम् ऐश्वर्यवृद्धिं महीतले त्यक्त्वा इतो महीतलात् देवलोकं लक्ष्मणाग्रजो यातः नूनमित्याशङ्क्यायाम् ॥ ३८ ॥

३७] ति० टी०–एवं च देवलोकस्था धन्या इत्याह—धन्या इति । मम वीरमित्यन्वयः ॥ ३७ ॥

रा० टी०–धन्या इति । मम रामं ये पश्यन्ति ते देवादयो धन्याः ॥ ३९ ॥

३८] ति० टी०–ननु त्वज्जीवनाभावनिश्चयप्रमाणोपलम्भं विना कथं रामेण देहस्त्यक्त इत्यतः पक्षान्तरमाह—अथ वेति । धर्मकामस्य हि भार्ययार्थः अयं तु न तथा । तदेवाह—धीमत आत्मानात्मविवेकवतः, अत एव परमात्मनः परमात्मब्रह्मात्मना स्थितस्य जीवन्मुक्तस्य तस्य मया नार्थः । अनेन वैराग्यादप्रवृत्तिरिति सूचितम् ॥ ३८ ॥

रा० टी०–ननु नित्यपरिपूर्णकामस्य रामस्य त्वया किं साध्यं यतस्त्वदर्थं यतेत इत्यत आह–अथेति । परमात्मनः धर्मकामस्य नित्यं धर्ममनस्कस्य रामस्य अथ भार्यया माङ्गलिकक्रियया अर्थः प्रयोजनं नहि नास्त्येवेत्यर्थः, एतेन भार्यां विना धर्मसिद्धिर्न भवतीति ध्वनितम् । तथाच श्रुतिः–"यत् कर्तव्यं तदनया सह " इति ॥ ४० ॥

गो० टी०–अथवेति । धर्मकामस्य तस्य कामानपेक्षिण इत्यर्थः । मया भार्यया कोऽर्थः । परमात्मनः उत्कृष्टस्वभावस्य ॥ ४२ ॥

१ अर्धमेतत् गो. रा. अधिकम् । २ लक्ष्मणेति गो. पाठः । ३ ममेति गो. पाठः । ४ नाथमिति गो. पाठः

दृश्यमाने भवेत्प्रीतिः सौहृदं नास्त्यदृश्यतः । नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥ ३९ ॥
किं वा[1] मय्यगुणाः केचित्किं वा भाग्यक्षयो[2] हि मे। या[3] हि सीता वरार्हेण हीना रामेण भामिनी ॥ ४० ॥
श्रेयो मे जीवितान्मर्तुं विहीनाया महात्मना । रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥ ४१ ॥
अथवा न्यस्तशस्त्रौ तौ वने मूलफलाशनौ । भ्रातरौ हि नरश्रेष्ठौ चरन्तौ[4] वनगोचरौ ॥ ४२ ॥
अथवा राक्षसेन्द्रेण रावणेन दुरात्मना । छद्मना घातितौ[5] शूरौ भ्रातरौ रामलक्ष्मणौ ॥ ४३ ॥
साहमेवंविधे[6] काले मर्तुमिच्छामि सर्वतः[7] । न च मे विहितो मृत्युरस्मिन्दुःखेऽतिवर्तति[8] ॥ ४४ ॥
धन्याः खलु महात्मानो मुनयः सत्यसंमताः[9] । जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये[10] ॥ ४५ ॥

३९] ति० टी०–सर्वदा जीवन्मुक्तेनाङ्गीकार एव न कृतः स्यात्, तादृशे कृतेऽङ्गीकारे त्वेवंविधस्त्यागोऽनुचित इत्यतो दूरवासात्स्नेहनाशेनाप्रवृत्तिरित्याह—दृश्यमान इति। सौहृदं प्रीतिः । नास्त्यदृश्यतो ममादृश्यत्वान्मयि तन्नास्ति नष्टमित्यर्थः । अयमपि पक्षोऽसंगतः । ईदृशगुणवता कृतप्रीतेर्नाशनायोगादित्याह—नाशयन्तीति । कृतघ्ना एव प्रपन्नजनस्नेहमसंनिकर्षान्नाशयन्ति, नैवं रामोऽकृतघ्नत्वात्स्वस्य प्रकृतित्वेन प्राकृतप्रपञ्चभोक्तृत्वेन च तस्याकृतघ्नतौचित्यं वनवासादौ सङ्गदानाच्च ॥ ३९ ॥

रा० टी०–ननु बहुकालतस्त्वददर्शनात् रामस्य त्वयि प्रीतिर्नास्तीत्यत आह—दृश्यमान इति । कृतघ्नाः अदृश्यतः अदृश्यमानस्य सौहृदं नाशयन्ति अतः दृश्यमाने एव प्रीतिः कृतघ्नमैत्री भवेत् रामस्तु सौहृदं न नाशयिष्यति ॥ ४१ ॥

गो० टी०–दृश्यमान इति । सौहृदं नास्त्यपश्यतः अदृश्यमाने प्रीतिर्न भवति । तस्माददृश्यायां मयि रामस्य किं प्रीतिर्नासीदित्यर्थः । एवमाशङ्क्य तं प्रतिषेधति–नाशयन्तीति । कृतघ्नाः प्रथममुत्पन्नां प्रीतिं नाशयन्ति । न तु रामो नाशयिष्यति मयि प्रीतिमिति शेषः ॥ ४२ ॥

४०–४१] ति० टी०–अतः पक्षान्तरम्—किं वेति । मयि तदुपेक्षाहेतवः केचनागुणा दोषाः स्युः अयमपि पक्षो न युक्तः स्वापरिज्ञातस्वापचाराभावात् तस्मात्प्राग्भवीयदुष्कर्मजो भाग्यक्षय एव हेतुरित्याह—किं वेति । अतोऽक्लिष्टचारित्रादिगुणाद्रामाद्याऽहं त्राणार्हा सीताख्या भामिनी, एतावत्पर्यन्तं सा हि यत इदानीं वरार्हेणोत्तमवस्तुयोग्येन रामेण हीनास्मि, अतस्तस्या मम तेन महात्मना हीनाया मर्तुं श्रेयो मरणं ज्यायः ॥ ४० ॥ ४१ ॥

रा० टी०–आशङ्क्यान्तरमाह–किमिति । या सीता अहं रामेण हीना तस्यां मयि केचित् अगुणाः दोषाः किं वा भाग्यक्षयः ॥ ४२ ॥

गो० टी०–किंन्विति । न गुणाः दुष्कृतानि ॥ ४४ ॥

रा० टी०–श्रेय इति । महात्मनः रामात् विहीनायाः मे जीवितात् मर्तुं प्रयतनमेव श्रेयः ॥ ४३ ॥

गो० टी०–श्रेय इति । मर्तुमिति भावार्थे तुमुन् मरणमित्यर्थः । महात्मनः रामाद्विहीनायाः महात्मना रामेण हीनायाः । तृतीयार्थे पञ्चमी ॥ ४५ ॥

४२] ति० टी०–भाग्यक्षयनिश्चयस्य कर्तुमशक्यत्वात्पक्षान्तरम्—अथ वेति । शस्त्रग्रहणमूलत्वात्सर्वथाऽनर्थस्य हिंसारहिते तपस्येव यावज्जीवं वर्तितव्यमिति धिया न्यस्तशस्त्रौ जातौ ॥ ४२ ॥

रा० टी०–अथवेति । अथवा न्यस्तशस्त्रौ त्यक्तशस्त्रास्त्रौ सन्तौ भ्रातरौ रामलक्ष्मणौ वनगोचरौ अभवतामिति शेषः४४

गो० टी०–अथवेति । न्यस्तशस्त्रौ संवृत्तौ किमिति संबन्धः ॥ ४६ ॥

४३] ति० टी०–इदमप्यसंभावितं रक्षोभिः कृतवैरेण क्षत्रियेण तस्यागायोगादतः पक्षान्तरम्—अथवेति । छद्म वञ्चना सा रक्षसां प्रसिद्धैव ॥ ४३ ॥

रा० टी०–शङ्क्यान्तरमाह—अथवेति । अथवा रावणेन छद्मना कापट्येन शूरौ घातितौ ॥ ४५ ॥

गो० टी०–अथवेति । सादितौ हतौ ॥ ४७ ॥

४४] ति० टी०–अतिवर्ततीत्यतिशयेन वर्तमाने ॥ ४४ ॥

रा० टी०–सेति । सा रामवियुक्ताऽहम् अकाले प्रक्षेपाभाववति अस्मिन् दुःखे अतिवर्तति अत्यन्तं वर्तमाने सति सर्वतः सर्वथा मर्तुमिच्छामि परं तु मे मृत्युर्न विहितः ॥४६॥

गो० टी०–साहमिति । वर्तति वर्तमाने ॥ ४८ ॥

४५] ति० टी०–अथ तस्या दुःखनाशकारणं विवेकज्ञानमेवेत्याह—धन्या इति । सत्यं ब्रह्मसंमतमात्मत्वेन येषां ते अनेन संसारतरणसामर्थ्यं दर्शितम्, अत एव जितात्मनो जितान्तःकरणाः, अत एव महात्मानः प्राप्तमहात्मैक्याः, अत एव महाभागाः पूर्वजन्मार्जितनिष्कामधर्मरूपमहाभाग्यवन्तः मुनयो ध्यानशीलास्ते धन्याः । तत्र हेतुः—येषां कर्मजन्ये प्रियाप्रिये न स्तः ॥ ४५ ॥

रा० टी०–धन्या इति । येषां प्रियाप्रिये न स्तः ते सत्यसंमताः ब्रह्ममात्रनिष्ठाः मुनयो धन्याः ॥ ४७ ॥

---

१ अपश्यत इति गो. पाठः । २ नु मे नेति गो. पाठः । ३ ममेति गो. पाठः । ४ अहं सीदामि रामेण हीना मुख्येनेति गो. पाठः । ५ अशिनाविति रा. पाठः । ६ संहृताविति गो. पाठः । ७ सादिताविति गो. पाठः । ८ गते इति गो. पाठः । ९ सर्वथेति गो. पाठः । १० दुःखेऽपीति गो. पाठः । ११ त्यक्तकिल्बिषा इति गो. पाठः ।

प्रियान्न संभवेद्दुःखमप्रियादधिकं भवेत् । ताभ्यां हि ते वियुज्यन्ते नमस्तेषां महात्मनाम् ॥ ४६ ॥
साऽहं त्यक्ता [1]प्रियेणैव रामेण विदितात्मना । प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ।

स्वापोद्बुद्धा त्रिजटा सीतां तर्जयन्ती राक्षसीः प्रति मयाद्य रामाभ्युदयारवणापकर्षसूचकः स्वप्नो दृष्टोऽतो निवर्तध्वं सीतातर्जनादिति ता अपसारयति । अथ ताभिः प्रार्थिता सा स्वप्नवृत्तं निवेद्य सीताविजयाशंसकं शुभशकुनं दर्शयति ।

इत्युक्ताः सीतया घोरं राक्षस्यः क्रोधमूर्च्छिताः । काश्चिज्जग्मुस्तदाख्यातुं रावणस्य दुरात्मनः ॥ १ ॥
ततः सीतामुपागम्य राक्षस्यो [3]भीमदर्शनाः । पुनः परुषमेकं [4]अर्थमनर्थार्थमथाब्रुवन् ॥ २ ॥
अद्येदानीं तवानार्ये सीते पापविनिश्चये । राक्षस्यो भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३ ॥

गो० टी०–धन्या इति । महात्मानः महाधैर्याः त्यक्तकिल्बिषाः त्यक्तपापाः जितात्मानः जितान्तःकरणाः महाभागाः महाभाग्याः ॥ ४९ ॥

४६] ति० टी०–प्रियाप्रियाभावं विवृणोति–प्रियादिति । येषां मुक्तानां प्रियाद्वियुज्यमानादुखं न संभवेत् । अप्रियात्संयुज्यमानादधिकं प्रियवियोगादप्यधिकं दुःखं न भवेत् । 'अप्रियादधिकं भयम्' इति पाठे संयुज्यमानादप्रियादधिकं महद्भयमपि न भवेदित्यर्थः । ताभ्यां प्रियवियोगजदुःखाप्रियसंयोगजदुःखभयान्यतराभ्यां ये वियुज्यन्ते तेषां महात्मनां मामिका नमस्क्रियाऽस्तु । तेषां नमस्कारेण तत्तुल्यता ममापि स्यादित्याशयः ॥ ४६ ॥

रा० टी०–ननु प्रियाप्रियाभावेन किमित्यत आह—प्रियादिति । प्रियात् अधिकं दुःखम् अवश्यं भाविवियोगे सति क्लेशः न संभवेत् अप्रियात् अवश्यंभाविसंयोगे सत्यपि नभवेत् प्रियाप्रिययोरभावादिति शेषः, अतः ताभ्यां प्रियाप्रियाभ्यां ये वियुज्यन्ते तेषां महात्मनां तेभ्यो महात्मभ्यो नमः ॥ ४८ ॥

गो० टी०–प्रियादिति । प्रियान्न संभवेद्दुःखं किंतु सुखमेव भवेदित्यर्थः । प्रियात् अनुकूलवस्तुनः अप्रियात् प्रतिकूलवस्तुनः । अधिकं भयं अधिकं दुःखम् । ताभ्यां प्रियाप्रियाभ्याम् । नमस्तेषां त एव सर्वोत्तमा इत्यर्थः ॥ ५० ॥

४७] ति० टी०–रामेण त्यक्तान्विष्य न मोचिता प्रियेणैव संतोषेणैव प्राणांस्त्यक्ष्यामि । रावणे त्यक्तायाः प्राणत्यागस्यैव परमप्रियत्वात् ॥ ४७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

रा० टी०–सेति । प्रियेण रामेण त्यक्ता अत एव रावणस्य वशं गता प्राप्ताऽहं प्राणान् त्यक्ष्यामि त्यक्तुमिच्छामि ॥ ४९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

गो० टी०–साऽहमिति । साऽहं तद्विलक्षणाहम् केवलप्रियपरेत्यर्थः । प्रियेण त्यक्ता अप्रियं प्राप्ता । प्राणांस्त्यक्ष्यामीत्यर्थः ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

१] ति० टी०–इत्युक्ता मरिष्य इत्युक्ताः । तदाख्यातुं मरणनिश्चयं कथयितुम् ॥ १ ॥

रा० टी०–सीताविलापानन्तरकालिकं राक्षसीनां वृत्तान्तमाह—इतीत्यादिभिः । इति अनेन प्रकारेण सीतया घोरमुक्ताः अत एव क्रोधमूर्छिताः काश्चिद्राक्षस्यः तत्सीतोक्तमाख्यातुं कथयितुं रावणस्य समीपं जग्मुः ॥ १ ॥

गो० टी०–इत्युक्ता इत्यादि । तत् मरणाध्यवसायम् ॥ १ ॥

२] ति० टी०–एकार्थम् वाक्यमिति शेषः । अनर्थार्थं स्वेषामनर्थमात्रप्रयोजनकम् ॥ २ ॥

रा० टी०–तत इति । ततः बहूनां राक्षसीनां रावणसमीपगमनानन्तरं भीमदर्शनाः राक्षस्यः एकार्थं समानतात्पर्यकं परुषं वाक्यम् अनर्थार्थं स्वानर्थनिमित्ताय अब्रुवन् ॥ २ ॥

गो० टी०–तत इत्यादि । एकार्थं पूर्वोक्तवचनैरेकाभिधेयम । अनर्थार्थम् अनर्थफलकम् । एकाक्ष्यादयः पूर्वोक्तार्थमेव परुषवचनं पुनरब्रुवन्नित्यर्थः । अथ अस्मिन् दिने । इदानीम् अस्मिन् क्षणे । भक्षयिष्यन्तीत्यब्रुवन्निति पूर्वेण संबन्धः ॥ २ ॥ ३ ॥

३] ति० टी०–तदेव वाक्यमाह—अद्येदानीमिति । अथ दिने इदानीमस्मिन्क्षणे पापनिश्चये कृतमरणनिश्चयेऽस्मासु रक्षिकास्विदानीं तदसंभवान्मासं मासमात्रम् । इदमवधिकालोपलक्षणम् । भयातिशयार्थमेवमुक्तिः । यथासुखं स्थितायास्तदनन्तरं रावणाज्ञयैतत्तव शरीरं राक्षस्यो भक्षयिष्यन्ति ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह—अद्येति । अथ अस्मिन् दिने इदानीं अस्मिन् क्षणे पापः पापकारणीभूतहिंसासंपादकः यस्तव विनिश्चयस्तस्मिन्सति एतत्तव मांसं राक्षस्यो भक्षयिष्यन्ति ॥ ३ ॥

---

१ प्रियाद्वैणेति गो. पाठः । २ घोरा इति गो. पाठः । ३ घोरेति गो. पाठः । ४ एवार्थमिति रा. पाठः ।

सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा । राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत् ॥ ४ ॥
आत्मानं खादतानार्या न सीतां भक्षयिष्यथ । जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः । राक्षसानामभावाय भर्तुरस्या भवाय च ॥ ६ ॥
एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्च्छिताः । सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः ॥ ७ ॥
कथयस्व त्वया दृष्टः स्वप्नोऽयं कीदृशो निशि । तासां श्रुत्वा तु वचनं राक्षसीनां मुखोद्गतम् ॥ ८ ॥
उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् । गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ॥ ९ ॥
युक्तां वाजिसहस्रेण स्वयमास्थाय राघवः । शुक्लमाल्याम्बरधरो लक्ष्मणेन समागतः ॥ १० ॥
स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता । सागरेण परिक्षिप्तं श्वेतपर्वतमास्थिता ॥ ११ ॥
रामेण संगता सीता भास्करेण प्रभा यथा । राघवश्च पुनर्दृष्टश्चतुर्दन्तं महागजम् ॥ १२ ॥

४] ति० टी०–अनार्याभिः क्रूराभिः । वृद्धा धर्मज्ञानयोगवयोभिर्वृद्धा । प्रबुद्धेत्यनेन तावत्पर्यन्तं सुप्तवतीति गम्यते ॥ ४ ॥

रा० टी०–सीतामिति । अनार्याभिः क्षुद्राभिः ताभिः राक्षसीभिः संतर्जितां सीतां दृष्ट्वा प्रबुद्धा त्यक्तस्वापा त्रिजटा राक्षसी अब्रवीत् ॥ ४ ॥

गो० टी०–सीतामित्यादि । त्रिजटा विभीषणपुत्री । शयानेत्यनेन स्वप्नवृत्तान्तकथनत्वरोच्यते ॥ ४–६ ॥

५] ति० टी०–आत्मानं स्वशरीरं भक्षयिष्यथेति । अवधिकालात्परमपीति शेषः ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह–आत्मानमिति । हे आनार्याः ! आत्मानं स्वशरीरं खादत जनकस्य सुतां सीतां न भक्षयिष्यथ ॥ ५ ॥

६] ति० टी०–कुतोऽवगतमेतत्तत्राह—स्वप्न इति । दारुणः क्रूरः राक्षसानामभावाय दृष्टः तथा रोमहर्षणोऽत्यद्भुतो रोमाञ्चकरः । अन्योऽस्या भर्तुर्भवाय दृष्ट इत्यर्थः ॥ ६ ॥

रा० टी०–तत्र हेतुमाह–स्वप्न इति । अथ अस्मिन् रात्रिशेषे राक्षसानामभावाय विनाशाय अस्याः सीतायाः भर्तुः भवाय अभ्युदयाय च दारुणः स्वप्नो मया दृष्टः ॥ ६ ॥

७–८] ति० टी०–पूर्वं क्रोधमूर्च्छिताः पश्चात्त्रिजटावचनाद्भीता इत्यर्थः ॥ ७ ॥ ८ ॥

रा० टी०–एवमिति । त्रिजटया एवमुक्ता अत एव भीता राक्षस्यः त्रिजटामिदमब्रुवन् ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह–कथयस्वेति । त्वया दृष्टः स्वप्नः कीदृशः त्वं कथय स्वस्वप्नमित्यर्थतो लब्धम् । अर्धं पृथक् । राक्षसीनां मुखोद्गतं वचनं श्रुत्वा स्वप्नसंश्रितं स्वापबोधकं वचनं काले प्रातःकाले त्रिजटोवाच । अर्धद्वयमेकान्वयि ॥ ८ ॥

गो० टी०–एवमुक्ता इत्यादि । निशीत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ७ ॥

गो० टी०–तासामिति । काले उषःकाले यः स्वप्नः तत्संश्रितम् ॥ ८ ॥

९–१०] ति० टी०–काले प्रातःकाले । स्वप्नसंश्रितं प्रातःकालदृष्टस्वप्नदृष्टार्थविषयकम् अनेन स्वप्नस्य शीघ्रफलदत्वं सूचितम् । तत्र सीतायाः पीडानिवृत्तये तदभ्युदयसूचकं स्वप्नं प्रथममाह—गजदन्तेति । शिबिकां वाजिसहस्रयुक्तत्वविशेषणाद्विमानमित्यर्थः । तामास्थाय गच्छन्मया दृष्टः । समागतः सहितः ॥ ९ ॥ १० ॥

रा० टी०–तद्वचनाकारमाह–गजेत्यादिभिः । गजदन्तमयीं वाजिसहस्रेण युक्ताम् अन्तरिक्षगतां शिबिकाम् आस्थाय लक्ष्मणेन सह शुक्लमाल्याम्बरधरो राघवः स्वयं समागतः इति स्वप्ने दृष्टमिति शेषः । सार्धश्लोक एकान्वयी ॥ ९ ॥ १० ॥

गो० टी०–गजदन्तमयीमिति । आगतः लङ्कामिति शेषः ॥ ९–११ ॥

११] ति० टी०–सागरेण क्षीरसागरेण । परिक्षिप्तमावृतम् ॥ ११ ॥

रा० टी०–स्वप्न इति । शुक्लाम्बरावृता सागरेण क्षीराब्धिना परिक्षिप्तं परिवेष्टितं श्वेतपर्वतम् आस्थिता भास्करेण प्रभा इव रामेण सङ्गता सीता स्वर्गगङ्गासदृशी सीता वैदेही स्वप्ने मया दृष्टा । सार्धश्लोक एकान्वयी । एकः सीताशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । 'सीता लाङ्गलपद्धतिः । वैदेही-स्वर्गगङ्गासु ' इति मेदिनी ॥ ११ ॥

१२] ति० टी०–संगता तत्रैव पर्वत इति शेषः । एतेन लङ्कायामेव रामस्य सीतादर्शनं सूचितम् । स्वप्नान्तरमाह—राघवश्चेति । पुनः स्वप्नान्तर इत्यर्थः ॥ १२ ॥

रा० टी०–स्वप्नान्तरमाह—राघव इति । शैलसंकाशं श्वेतपर्वतसदृशं चतुर्दन्तं दन्तचतुष्टयविशिष्टं महागजमारूढः सहलक्ष्मणो राघवो यश्चकास स पुनर्दृष्टः । अर्धद्वयमेकान्वयि ॥ १२ ॥

गो० टी०–राघवश्चेति । महागजमारूढ इति शिबिकात इति शेषः । तथोक्तं स्वप्नाध्याये–' आरोहणं गोष्टपकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम् । विष्ठाजलेपो रुदितं मृतं च

१ शयानेति गो. पाठः । २ मुखाच्युतमिति गो. पाठः । ३ हंसेति गो. पाठः । ४ सहेति गो. पाठः । ५ श्वेतमिति गो. पाठः ।

आरूढः शैलसंकाशं चकास सहलक्ष्मणः । ततस्तु[1] सूर्यसंकाशौ दीप्यमानौ स्वतेजसा ॥ १३ ॥
शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ । ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दन्तिनः ॥ १४ ॥
भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता । भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ॥
चन्द्रसूर्यौ[2] मया दृष्टौ[3] पाणिभ्यां परिमार्जती ॥ १५ ॥
ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः । सीतया च विशालाक्ष्या लङ्कायाः उपरिस्थितः ॥
पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् । [इहोपयातः[4] काकुत्स्थः सीतया सह भार्यया]॥ १६ ॥
शुक्लमाल्याम्बरधरो लक्ष्मणेन सहागतः । ततोऽन्यत्र मया दृष्टो रामः सत्यपराक्रमः[5] ॥ १७ ॥
लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् । आरुह्य पुष्पकं दिव्यं विमानं सूर्यसंनिभम् ॥ १८ ॥
उत्तरां दिशमालोच्य[6] प्रस्थितः पुरुषोत्तमः । [एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः ॥
लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया । नहि रामो महातेजाः शक्यो जेतुं सुरासुरैः ॥
राक्षसैर्वाऽपि चान्यैर्वा स्वर्गः पापजनैरिव ।] रावणश्च मया दृष्टो मुण्डस्तैलसमुक्षितः[7] ॥ १९ ॥

स्वप्नेष्वगम्यागमनं च धन्यम्' इति । चचार सीतां प्रतीति शेषः ॥ १२ ॥ १३ ॥

१३] ति० टी०–चकास शुशुभे ॥ १३ ॥

रा० टी०–तत इति । ततोऽनन्तरं स्वतेजसा दीप्यमानौ अत एव सूर्यसंकाशौ सूर्यसदृशौ जानकीं पर्युपस्थितौ तौ रामलक्ष्मणौ शुक्लमाल्याम्बरधरौ दृष्टाविति शेषः ॥ १३ ॥

१४] ति० टी०–जानकीं पर्युपस्थितौ जानकीसमीपं प्राप्तौ । नगस्य श्वेतपर्वतस्य । दन्तिनः स्कन्धमाश्रितौ । तदुक्तम्—'आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम् । ध्रुवमर्थलाभदम्' इति ॥ १४ ॥

रा० टी०–तत इति । ततोऽनन्तरं तस्य श्वेतस्य नगस्य गिरेरग्रे भर्तुरङ्कात्समुत्पत्य आकाशस्थस्य भर्त्रा परिगृहीतस्य दन्तिनो गजस्य स्कन्धमाश्रिता जानकी दृष्टेति शेषः । सार्धश्लोक एकान्वयी ॥ १४ ॥ १५ ॥

गो० टी०–ततस्तस्य नगस्याग्र इति । अत्र द्वादशसहस्रं श्लोका गताः । त्रयोदशसहस्रादिमोऽयं श्लोकः गायत्र्यास्त्रयोदशाक्षरमत्र बोध्यम् ॥ १४ ॥

१५] ति० टी०–प्रथमं भर्तुरङ्के गत्वा ततः समुत्पत्य संकुर्च भर्त्रा परिगृहीतस्य धृतालानस्य गजस्य स्कन्धमाश्रिता । सूर्याचन्द्रमसौ पाणिभ्यां परिमार्जती । तदुक्तम्—'आदित्यमण्डलं वापि चन्द्रमण्डलमेव वा । स्वप्ने गृह्णाति हस्ताभ्यां महद्राज्यं समाप्नुयात् ।' इति ॥ १५ ॥

रा० टी०–स्वप्नान्तरमाह—चन्द्रेति । चन्द्रसूर्यौ पाणिभ्यां परिमार्जती सीता कुमाराभ्यां विशालाक्ष्या सीतया चास्थितो लङ्कायाः उपरि स्थितो गजोत्तमश्च मया दृष्टौ पुमान्स्त्रियेत्येकशेषः 'आदित्यमण्डलं वापि चन्द्रमण्डलमेव वा । स्वप्ने गृह्णाति हस्ताभ्यां महद्राज्यं समाप्नुयात्' इति स्वप्ननिर्णयः । सार्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०–भर्तुरिति । चन्द्रसूर्यौ पाणिना परिमार्जतीति । अत्र स्वप्नाध्यायवचनम्–'आदित्यमण्डलं वातु चन्द्रमण्डलमेव वा । स्वप्ने गृह्णाति हस्ताभ्यां राज्यं संप्राप्नुयान्महत् इति ॥ १५–१७ ॥

१६] ति० टी०–पाण्डुरर्षभेति । पाण्डुरवृषभाष्टकयुक्तेन रथेन ॥ १६ ॥

रा० टी०–स्वप्नान्तरमाह—पाण्डुरेति । पाण्डुरा ये ऋषभा वृषभाः तैर्युक्तेन अत एव अष्टयुजा अष्टानां वृषभानां युक् योगो यस्मिन् तेन रथेन लक्ष्मणेन सहागतः सत्यपराक्रमो रामः ततोऽन्यत्र समुद्रतीरे इत्यर्थः, मया दृष्टः । सार्धश्लोक एकान्वयी ॥ १७ ॥ १८ ॥

१७] ति० टी०–शुक्लमाल्याम्बरधरो रामो लक्ष्मणेन सहेहागत इत्यन्वयः । अन्यत्र स्वप्नान्तरे ॥ १७ ॥

गो० टी०–अयमिह स्वप्नक्रमः । शिबिकास्थितो रामो दृष्टः श्वेतपर्वतस्था सीता च ततः शिबिकाया गजमारुह्य लक्ष्मणेन सह पर्वतमभ्येत्य ततः सीतां गजस्कन्धेऽधिरोप्य लङ्कायाः उपरि स्थित्वा ताभ्यां सहाष्टर्षभयुक्तेन रथेनेहागत्य स्वं देशं प्रति ताभ्यां पुष्पकमधिरुह्यागत इति । अन्ये श्लोकाः प्रक्षिप्ताः । तेन ते न व्याख्याता इत्याहुः । लक्ष्मणेन सह भ्रात्रेति । एतत्पादस्यानन्तरं, सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् । उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ इति पाठक्रमः । विमाने पुष्पके स्थितः । साण्डं त्रिभुवनमित्यारभ्य रामः सत्यपराक्रम इत्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासंगतश्च । विष्णुरेव स्वयंभूत्वेति प्रक्षिप्तवचनस्य विष्णुपराक्रम इत्यनेन विरोधात् ॥ १८–२१ ॥

१८] ति० टी०–आरुह्य पुष्पकमित्येतद्गावि स्पष्टमेव दृष्टम् ॥ १८ ॥

१९] ति० टी०–अत्र मध्ये 'साण्डं भुवनम्' इत्यादयो

१ चचारेति गो. पाठः । २ तौ नरशार्दूलाविति गो. ताविति रा. पाठ । ३ दृष्टेति गो. पाठः । ४ अर्धमेतदधिकं गो. पाठे । ५ श्लोकोऽयं गो. नास्ति । ६ आलोक्य जगामेति गो. पाठः । ७ श्लोकद्वयमेतदधिकं गो. पाठे । ८ क्षितावितिति गो. पाठः ।

रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः । विमानात्पुष्पकाद्य रावणः पतितः [1]क्षितौ ॥ २० ॥
कृष्यमाणः स्त्रिया मुण्डो दृष्टः कृष्णाम्बरः पुनः । रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ॥ २१ ॥
पिबंस्तैलं हसन्नृत्यन्भ्रान्तचित्ताकुलेन्द्रियः । गर्दभेन ययौ शीघ्रं दक्षिणां दिशमाश्रितः ॥ २२ ॥
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः । पतितो [3]विशिरा भूमौ गर्दभाद्भयमोहितः ॥ २३ ॥
सहसोत्थाय संभ्रान्तो भयार्तो मदविह्वलः । उन्मत्तरूपो दिग्वासा दुर्वाक्यं प्रलपन्बहु ॥ २४ ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् । मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ॥ २५ ॥
प्रस्थितो दक्षिणामाशां प्रविष्टोऽकर्दमं ह्रदम् । कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ॥ २६ ॥
काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति । एवं तत्र मया दृष्टः कुम्भकर्णो महाबलः ॥ २७ ॥
रावणस्य सुताः सर्वे मुण्डास्तैलसमुक्षिताः । वराहेण दशग्रीवः शिशुमारेण चेन्द्रजित् ॥ २८ ॥
उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् । एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ॥
[शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः । शङ्खदुन्दुभिनिर्घोषैर्नृत्तगीतैरलंकृतः ॥
आरुह्य शैलसंकाशं मेघस्तनितनिःस्वनम् । चतुर्दन्तं गजं दिव्यमास्ते तत्र विभीषणः ॥]
चतुर्भिः सचिवैः सार्धं वैहायसमुपस्थितः ॥ २९ ॥

बहवः श्लोका रामानुजसंप्रदायपुस्तकेषु दृश्यन्ते ते प्रक्षिप्ता इति कतकादयोऽन्ये च । अथ रावणानर्थसूचकः स्वप्नः—रावणश्चेति । मुण्डो मुण्डितमुण्डः ॥ १९ ॥

रा० टी०—स्वप्नान्तरमाह—लक्ष्मणेनेति । लक्ष्मणेन सीतया च सह पुरुषोत्तमो रामः दिव्यं विमानं पुष्पकमालोच्यारुह्य च उत्तरां दिशं प्रस्थितः । सार्धश्लोक एकान्वयी ॥ १९ ॥

रा० टी०—रामैश्वर्यसूचकं स्वप्नमुक्त्वा रावणविध्वंससूचकं स्वप्नमाह—रावण इत्यादिभिः । मुण्डितो मुण्डितकेशस्तैलसमुक्षितः तैलेन लिप्ताङ्गो रावणो दृष्टः । अर्धं पृथक् ॥ २० ॥

गो० टी०—रावणश्चेति । पिबन्निति । तैलसमुक्षित इत्यनेन तैलमित्युपस्थाप्यते । करवीरकृतस्रज इत्यकारान्तत्वमार्षम् । हलन्ताद्वा इत्यापो विधानात् स्रक्कृच्छब्दस्यावन्तत्वेन वा निर्वाहः ॥ २२–३० ॥

२०] ति० टी०—पिबन्निति । तैलमिति शेषः । करवीरकृतस्रज इति विमानादित्यस्य विशेषणम् । करवीरेत्यारभ्य स्वप्नान्तरम् ॥ २० ॥

रा० टी०—स्वप्नान्तरमाह—रक्तेति । रक्तवासाः पिबन्मद्यमिति शेषः, रावणः पुष्पकाद्विमानात् क्षितौ पतितः इति दृष्टमिति शेषः ॥ २१ ॥

२१–२४] ति० टी०—रथेनेत्यादि स्वप्नान्तरम्॥२१–२४॥

रा० टी०—स्वप्नान्तरमाह—कृष्यमाण इति । खरयुक्तेन रथेनोपलक्षितः स्त्रिया कृष्यमाणः कृष्णाम्बरो दृष्टः रावण इति शेषः ॥ २२ ॥

रा० टी०—स्वप्नान्तरमाह—पिबन्निति । तैलपानादि कुर्वन् शीघ्रमाश्रितो रावणः गर्दभेन दक्षिणां दिशं ययौ ॥२३॥

रा० टी०—स्वप्नान्तरमाह—पुनरिति । भयमोहितो रावण अवाक्शिराः सन् भूमौ पतितः ॥ २४ ॥

रा० टी०—सहसेति । संभ्रान्तः उद्विग्नचित्तः उन्मत्तरूपः उन्मत्तवदाचरणः दिग्वासाः नग्न इत्यर्थः रावणः, सहसोत्थाय बहुवाक्यं प्रलपन् सन् आस्तेति शेषः ॥ २६ ॥

२५]ति०टी०—मलानि पङ्कानि च यस्मिंस्तत्तिमिरम्॥२५॥

रा० टी०—स्वप्नान्तरमाह—दुर्गन्धमिति । दुष्टो गन्धो यस्मिन् अत एव दुःसहं घोरं तीक्ष्णं तिमिरम् अन्धकाररूपं नरकोपमं यमपुरस्थनरकविशेषसदृशं नरकं प्रविश्य तत्र तस्मिन् नरके आशुमग्नः रावणो दृष्ट इति शेषः ॥ २६ ॥

२६–२८] ति० टी०—अकर्दमं जलकर्दमेनापि रहितम् ॥ २६–२८ ॥

रा० टी०—स्वप्नान्तरमाह—प्रस्थित इति । अकर्दमम् उपलक्षणतया कर्दमजलरहितं ह्रदं प्रविष्टः । अर्धं पृथक् । स्वप्नान्तरमाह—कण्ठे इति । रक्तवासिनी अरुणवस्त्रा काली नीलवर्णविशिष्टा कर्दमलिप्ताङ्गी प्रमदा दशग्रीवं कण्ठे बद्ध्वा याम्यां दिशं प्रकर्षति ॥ २७ ॥

रा० टी०—एवमिति । एवमनेन प्रकारेण दक्षिणामाशां दिशं प्रयातः कर्दमं कर्दममयं ह्रदं प्रविष्टः कुम्भकर्णः तत्र स्वप्ने मया दृष्टः ॥ २८ ॥

रा० टी०—रावणस्येति । मुण्डाः मुण्डितकेशाः तैलसमुक्षिताः तैलाभ्यक्ताः रावणस्य सर्वे सुताः दृष्टा इति शेषः । अर्धं पृथक् । स्वप्नान्तरमाह—वराहेणेति । वराहादिना दशग्रीवादयः दक्षिणां दिशं प्रयाताः । अर्धद्वयमेकान्वयि ॥ २९ ॥

२९] ति० टी०—वैहायसं खेचरत्वम् ॥ २९ ॥

---

१ भुवीति गो. पाठः । २ आस्थित इति गो. पाठः । ३ऽवाक्शिरा इति गो. रा. पाठः । ४ इवेति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ धृष्टा इति गो. पाठः । ७ श्लोकद्वयमेतदधिकं गो. पाठे ।

समाजश्च महान्वृत्तो गीतवादित्रनिःस्वनः । पिबतां रक्तमाल्यानां रक्षसां रक्तवाससाम् ॥ ३० ॥
लङ्का चेयं पुरी रम्या सवाजिरथकुञ्जरा । सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ ३१ ॥
[लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता । दग्धा रामस्य दूतेन वानरेण तरस्विना ॥]
पीत्वा तैलं प्रमत्ताश्च प्रहसन्त्यो महास्वनाः । लङ्कायां भस्मरूक्षायां सर्वा राक्षसयोषितः ॥ ३२ ॥
कुम्भकर्णादयश्चेमे सर्वे राक्षसपुंगवाः । रक्तं निवसनं गृह्य प्रविष्टा गोमयह्रदम् ॥ ३३ ॥
अपगच्छत पश्यध्वं सीतामाप्नोति राघवः । घातयेत्परमामर्षी युष्मान्सार्धं हि राक्षसैः ॥ ३४ ॥
प्रियां बहुमतां भार्यां वनवासमनुव्रताम् । भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ॥ ३५ ॥
तदलं क्रूरवाक्यैश्च सान्त्वमेवाभिधीयताम् । अभियाचाम वैदेहीमेताद्धि मम रोचते ॥ ३६ ॥
यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते । सा दुःखैर्बहुभिर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ ३७ ॥
भर्त्सितामपि याचध्वं राक्षस्यः किंविवक्षया । राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ ३८ ॥

रा० टी०–विभीषणस्य शुभसूचकं स्वप्नमाह–एक इति । चतुर्भिः सचिवैः सार्धं वैहायसमाकाशमुपस्थितः श्वेतच्छत्रः एको विभीषणो मया दृष्टः ॥ ३० ॥

गो० टी०–एवं रावणविनाशसूचकमुक्त्वा विभीषणस्य राज्यप्राप्तिसूचकमाह—एकस्तत्र मया दृष्टः श्वेतच्छत्र इत्यादिना । वैहायसं विमानम् ॥ ३१–३८ ॥

३०–३१] ति० टी०–एतदग्रे श्लोकद्वयं प्रक्षिप्तमिति कतकः । गीतवादित्रनिःस्वन इति बहुव्रीहिः । अयमपि विभीषणविषयो भाव्यर्थः स्पष्टमनुभूतः । पिबतां तैलादि पिबतां रक्षसां वासभूता लङ्का सागरे पतितेत्वन्वयः ॥ ३० ॥ ३१ ॥

रा० टी०–विभीषणातिरिक्तसर्वराक्षसानामनिष्टसूचकं स्वप्नमाह–समाज इति । गीतवादित्रयोर्निःस्वनो यस्मिन् सः रक्तमाल्यानां रक्षसां महान् समाजः वृत्तः प्रवृत्तः ॥ ३१ ॥

३२] ति० टी०–भस्मरूक्षायां भस्मना रूक्षायाम् ॥३२॥

रा० टी०–लङ्केति । इयं लङ्का भग्नगोपुरतोरणा सती सागरे पतिता ॥ ३२ ॥

रा० टी०–पीत्वेति । सर्वा राक्षसयोषितः भस्मरूक्षायां भस्मना रूक्षत्वविशिष्टायां लङ्कायां तैलं पीत्वा प्रमत्ताः आसन्निति शेषः ॥ ३३ ॥

३३] ति० टी०–निवसनं न्यग्भूतम् कुत्सितं वस्त्रमित्यर्थः ॥ ३३ ॥

रा० टी०–स्वप्नान्तरमाह–कुम्भेति । सर्वे कुम्भकर्णादयः रक्तं निवसनं कुत्सितवस्त्रमित्यर्थः, गृह्य गृहीत्वा गोमये ह्रदे प्रविष्टाः ॥ ३४ ॥

३४] ति० टी०–यदेवम्, अतोऽपगच्छत तत्क्लेशदानं त्यक्त्वान्यतोऽपसरत । राघवश्च सीतामाप्नोत्येव पश्यध्वम् । अनपगमे बाधकमाह—घातयेदिति । युष्मान्सीताक्लेशदात्रीः ॥ ३४ ॥

रा० टी०–स्वप्नमुक्त्वा राक्षसीनां कर्तव्यमाह–अपेति । अपगच्छत सीताभर्त्सनात् निवर्तध्वम् । तत्र हेतुमाह–राघवः सीतामाप्नोति इति पश्यध्वं पश्यत जानीत । ननु किं तेनेत्यत आह–परमामर्षी राघवः राक्षसैः सार्धं युष्मान् सीताभर्त्सनकर्त्रीः घातयेत् ॥ ३५ ॥

गो० टी०–अपगच्छतेति । अपगच्छत अपसरत । नश्यध्वम् अदर्शनं प्राप्नुत आत्मनेपदमार्षम् । सीतामाप सीतामचिरेणाप्स्यतीत्यर्थः । सर्वैः राक्षसैः सार्धम् घातयेत् व इति सिद्धम् । अपगच्छत नश्यध्वमित्युक्तेः रावणमित्यध्याहारो वा ॥ ३९ ॥

३५–३७] ति० टी०–भर्त्सितां युष्मत्कृतभर्त्सनादिमतीम् । नानुमंस्यति नानुमंस्यते न क्षमिष्यते, अतस्तत्कर्त्रीर्वो घातयेदिति भावः ॥ ३५–३७ ॥

रा० टी०–प्रियामिति । वनवासमनुव्रतां भर्त्सितां तर्जितां भार्यां राघवो नानुमंस्यति सहिष्यते ॥ ३६ ॥

रा० टी०–तदिति । तदुक्तहेतोः क्रूरवाक्यैरलं सान्त्वं सान्त्वनवचनमेव अभिधीयतां वैदेहीमभियाचाम प्रार्थयाम एतदेव मम रोचते ॥ ३७ ॥

रा० टी०–सुस्वप्नफलमाह–यस्या इति । यस्याः दुःखितायाः एवंविधः स्वप्नो दृश्यते सा बहुभिर्दुःखैर्मुक्ता सती अनुत्तमं प्रियं प्राप्नोति ॥ ३८ ॥

गो० टी०–प्रियामिति । नानुमंस्यति न सहिष्यत इत्यर्थः ॥ ४० ॥

गो० टी०–तदलमिति । अभियाचाम । अभयमिति शेषः ॥ ४१ ॥ ४२ ॥

३८] ति० टी०–हे राक्षस्यः किं विवक्षया कुत्सितभर्त्सनादिवचनेच्छया अलमिति शेषः । तत्र हेतुः—राघवादिति ॥ ३८ ॥

---

१ मया दृष्ट इति गो. पाठः । २ श्लोकोऽयमधिकः गो. पाठे । ३ नृत्ता इति गो. पाठः । ४ प्रविष्टा राक्षसस्त्रिय इति गो. पाठः । ५ ह्रदे इति गो. पाठः । ६ नश्यध्वमिति गो. पाठः । ७ आप स इति गो. पाठः । ८ सर्वैरिति गो. पाठः । ९ व इति गो. पाठः ।

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा । अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥ ३९ ॥
अपि चास्या विशालाक्ष्या न किंचिदुपलक्षये । विरूपमपि चाङ्गेषु[1] सूक्ष्ममपि लक्षणम् ॥ ४० ॥
छायावैगुण्यमात्रं तु शङ्के दुःखमुपस्थितम् । अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ४१ ॥
अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् । राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ ४२ ॥
निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् । दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ॥ ४३ ॥
ईषच्च हृषितो वास्या दक्षिणायाः ह्यदक्षिणः । अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ॥ ४४ ॥
करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः । [2]वेपन्कथयतीवास्या राघवं पुरतः स्थितम् ॥ ४५ ॥

रा० टी०–भर्त्सितमिति । भर्त्सितामपि सीतां याचध्वं भर्त्सनजनितापराधं क्षमापयध्वं राक्षसानां राघवात् घोरं भयमुपस्थितम् अतः विवक्षया बहुवक्तुमिच्छया किम् एतेन सीताप्रसादनं कर्तव्यमेवेति सूचितम् ॥ ३९ ॥

गो० टी०–भर्त्सितामिति । किं विवक्षया अस्माभिस्तदा भर्त्सिता कथं प्रसन्ना भविष्यतीति वक्तुमिच्छया किम् । शङ्का न कर्तव्येत्यर्थः ॥ ४३ ॥

३९] ति० टी०–नन्वेवं क्लेशिता कथमस्माकं प्रसन्ना स्यात्तत्राह—प्रणिपातेति ॥ ३९ ॥

रा० टी०–प्रसादनफलमाह–प्रणिपातेति । हे राक्षस्यः ! प्रणिपातप्रसन्ना मैथिली भयात्त्रातुमलं समर्था ॥ ४० ॥

गो० टी०–कुत इत्यत आह–प्रणिपातप्रसन्नेति ४४॥

४०] ति० टी०–सीताया अभ्युदयसूचकं प्रत्यक्षनिमित्तमपि दर्शयति—अपि चेति । द्वितीयमपिचेति पादपूरणे । विरूपं लक्षणं सूक्ष्ममपि किंचिन्नोपलक्षय इत्यर्थः ॥ ४० ॥

रा० टी०–सीताभ्युदयसूचकं शरीरलक्षणमाह–अपीति । अस्याः सीतायाः अङ्गेषु विरूपं निषिद्धरूपं रूपवैपरीत्यमित्यर्थः, नोपलक्षये । किंच सुसूक्ष्ममपि किंचित् लक्षणं आपत्तिस्थिरीकारकचिह्नं नोपलक्षये पश्यामि ॥ ४१ ॥

गो० टी०–स्वप्रदर्शनकथनेन सीतायाः शोभनं भावीत्यभिधाय शरीरलक्षणप्रदर्शननापि शुभं भावीत्याह—अपि चेति। लक्षणं दुःखप्राप्तिहेतुभूतं रेखोपरेखादिकम् ॥ ४५ ॥

४१] ति० टी०–किं तु स्नानानुलेपनाद्यभावमूलकशोभावैगुण्यमात्रात्मकं दुःखमुपस्थितमित्युत्प्रेक्षते, न तु सुखवैवर्ण्यदक्षिणाक्षिस्पन्दादिदुर्निमित्तलेशोऽपीत्यर्थः । वैहायसमुपस्थितां स्वप्ने तथा दृष्टाम् ॥ ४१ ॥

रा० टी०–छायेति । वैहायसम् उपस्थितां स्वप्ने आकाशस्थात्वेन दृष्टाम् अदुःखार्हां दुःखायोग्याम् इमां देवीं सीताम् उपस्थितं दुःखं छायावैगुण्यमात्रं राहुच्छायाकृतवैगुण्यसदृशं यथा राहुकर्तृकचन्द्रग्रासः [1]प्रातिभासिक एव तथेदं दुःखमपीत्यर्थः ॥ ४२ ॥

गो० टी०–तर्हि कुतस्तादृशदुःखानुभव इत्यत्राह—छायेति । छायावैगुण्यामात्रम् उपलक्षय इत्यनुषज्यते । वैहायसं विमानम् उपस्थितां प्राप्ताम् दिव्यभोगार्हामिति यावत् । अन्वयस्तु छायावैगुण्यमात्रं तूपलक्षये अतः अदुःखार्हां दिव्यभोगार्हामिमां दुःखम् उपस्थितमिति शङ्के इति । अत्र छायावैगुण्यं नाम कान्तिवैकल्यम् 'छाया त्वनातपे कान्तौ' इत्यमरः । यद्वा छायात्राऽनातपः तद्वैगुण्यं तस्य विपमत्वम् सर्वलक्षणलक्षितायां अपि छायावैगुण्यमेतावद्दुःखकरमासीदिति भावः ॥ ४६ ॥ ४७ ॥

४२] ति० टी०–अत एवास्या अर्थसिद्धिमिष्टसिद्धिमुपस्थितां पश्यामि रावणनाशं रामविजयं च पश्यामि ॥४२॥

रा० टी०–अर्थेति । राक्षसेन्द्रविनाशं राघवस्य विजयं च अत एव उपस्थितां वैदेह्याः अर्थसिद्धिं च अहं पश्यामि ४३

४३] ति० टी०–अपि चास्या महत्प्रियं श्रोतुं निमित्तभूतं मत्स्यप्रवत्सूचकमेतत्स्फुरच्चक्षुश्च दृश्यते । वाममिति शेषः ॥ ४३ ॥

रा० टी०–निमित्तेति । अस्याः सीतायाः महत्प्रियं श्रोतुं निमित्तभूतं पद्मपत्रमिवायतं स्फुरच्चक्षुश्च दृश्यते ॥ ४४ ॥

गो० टी०–इदानीं रामवार्ताश्रवणसूचकमाह—निमित्तभूतमिति । चक्षुरिति । अदक्षिणमित्येतदत्राप्यनुषज्यते । हृषितो वा हृष्ट इव पुलकित इव । पद्मपत्रमित्यनेन रोगादिदृष्टहेत्वन्तररहित्यमुक्तम् । अकस्मात् दृष्टहेत्वन्तरं विना ॥४८॥५०॥

४४] ति० टी०–हृषितः पुलकितः । वेति वाक्यालंकारे । अदक्षिणो वामः ॥ ४४ ॥

रा० टी०–ईषदिति । दक्षिणायाः अतिनिपुणायाः अस्याः सीतायाः अदक्षिणः दक्षिणभिन्नः वाम इत्यर्थः, एको दक्षिणबाहुसदृशः बाहुः हृषितः हर्षं प्राप्तः भाविहर्षसूचक इत्यर्थः अत एव प्रकम्पते ॥ ४५ ॥

४५] ति० टी०–वेपन्वेपमानः स्फुरन्नित्यर्थः । राघवमस्याः पुरःस्थितमिव सूचयति ॥ ४५ ॥

रा० टी०–करेणुहस्तेति । करेणुहस्तप्रतिमः शुण्डादण्डसदृशः अत एव अनुत्तमः अतिश्रेष्ठः अस्याः ऊरुः वेपन् प्रस्फुरन् सन् पुरतः स्थितं राघवं कथयतीव ॥ ४६ ॥

---

१ स्विति गो. पाठः । २ वेपमानः सूचयतीति गो. पाठः ।

पक्षी च शाखानिलयं प्रविष्टः पुनः पुनश्चोत्तमसान्त्ववादी ।
सुस्वागतां वाचमुदीरयाणः पुनः पुनश्चोदयतीव हृष्टः ॥ ४६ ॥

४६] ति० टी०–पक्षी काकादिः शाखानिलयं शाखास्थनीडं प्रविष्टो वारंवारमुत्तमसान्त्ववाद्युत्तमशान्तस्वरवादी सुस्वागतां शोभनस्य स्वागतं प्राप्तिर्यस्यां तादृशीं वाचं कथयन्पुनःपुनश्चोदयतीव शोभनप्राप्तिं सूचयतीव । शोभनमागतं प्रत्युद्गच्छेति सीतां पुनः पुनः प्रेरयतीव वा ॥ ४६ ॥

रा० टी०–पक्षीति । शाखानिलयं शाखास्थितस्वस्वनीडं प्रविष्टः पुनः पुनरुत्तमसान्त्ववादी उत्तमसान्त्वनवचनशीलः हृष्टः पक्षी वायसादिः सुशोभनं स्वागतं वियुक्तजनागमनं यया तां वाचम् उदीरयाणः सन् पुनः पुनश्चोदयति आनन्दं प्राप्नुहीति सीतां प्रेरयतीव ॥ ४७ ॥

गो० टी०–एवं देहनिमित्तमुक्त्वा शाकुनमप्याह—पक्षीति । पक्षी पिङ्गलिका शाखानिलयः प्रहृष्टः । पुनः पुनश्चोत्तमसान्त्ववादी भूयो भूयो मधुरवादी उत्तरोत्तरमुत्तमसान्त्वस्वरवादी वा । सुस्वागतां शोभनबन्ध्वागमनमिति यावत् । ' बन्धुस्वस्वजनास्समाः ' इत्यमरः । वाचं स्वरमुदीरयानः चोदयतीव रामागमनं कथयतीव । यद्वा पूर्वोक्तराघव एव कर्म । राघवमुपपादयतीवेत्यर्थः । आचार्यास्तु पक्षावस्य स्त इति पक्षी गरुत्मान् । भूम्नि प्रशंसायां च मत्वर्थीयः । तदुक्तम्—' भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः ' इति । तथाच पक्षौ विस्तार्य प्रदक्षिणं संचरन् । शाखानिलयः कुसुमितपल्लवितशाखायां दृढतरं स्थितः । आर्द्रतरतरुभाग एव शाखात्वव्यपदेशः । प्रदक्षिणभ्रमणम् आर्द्रशाखावरोहणम् दृढतरावस्थानं च शुभशंसीत्यर्थः । प्रहृष्टः तत्र फलभोजनादिना संतुष्टः । पुनः पुनश्चोत्तमसान्त्ववादी उत्तरोत्तरं सान्त्ववचनं कुर्वन्निव स्थितः । मा शुचः सखः समागमिष्यति ते भर्ता नायमवसरः शोकस्य इत्येवं सान्त्वयन्निव स्थितः । तदुपरि सुस्वागतां वाचमुदीरयानः । एतावन्मात्रं न भवति तस्य संतापातिरेक इति कथयन्निव स्थितः । विरहक्लिष्टायाः सुस्वागतवचनं हि नाम प्रतियोगिनः संतापातिशयकथनमेव । उक्तं हि—'तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव । गलपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ' इति । पुनः पुनश्चोदयतीव प्रियागमने निश्चिते मज्जनालंकरणादिकं किमर्थं न करोषीत्येवं सीतां चोदयतीवेत्युत्प्रेक्षा । हृष्टः नायकागमनकालिकहर्षः स्वस्यैवेत्येतद्वैलक्षण्यं हर्षिततनूरुहैः सूचयन्निव स्थितः । इदं हि रामायणमुत्तमं काव्यं तथाहि काव्यम् तावत्त्रिविधम् उत्तमं मध्यममधमं चेति । यत्र वाच्यातिशायिव्यङ्ग्यं तदुत्तमम् स एव ध्वनिरित्युच्यते । यत्र वाच्यानतिशायि व्यङ्ग्यं तन्मध्यं काव्यम् तदेव गुणीभूतव्यङ्ग्यमित्युच्यते । यत्र व्यङ्ग्यमेव नास्ति तदधमम् तदेव चित्रमित्युच्यते । व्यङ्ग्यं च पदगतं वाक्यगतं प्रबन्धगतं चेति त्रिविधं भवति । एतत्काण्डरूपप्रबन्धेन अनादिभगवत्संबन्धवतश्चेतनस्योज्जीवने प्रवृत्तस्याचार्यस्य प्रवृत्तिरभिव्यज्यते । उक्तश्चायमर्थस्ततो रावणनीताया इति श्लोके । अत्र लङ्कापदेन शरीरं द्योतितम् । एकाक्षीप्रभृतय इन्द्रियाणि । रावणकुम्भकर्णावहंकारममकारौ । इन्द्रजित्प्रभृतयः कामक्रोधलोभमोहमदमात्सर्यदम्भादयः । तादृशलङ्कानिरुद्धसीतासदृशश्चेतनः । तस्य भगवज्ज्ञानोपदेष्टाचार्यतुल्यो मारुतिः । तादृशाचार्यलक्षणमनेन श्लोकेन सूच्यते । पक्षी पक्षिशब्देन गमनसाधनत्वात् ज्ञानकर्मणी उच्येते । तदुक्तम्—'उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां नियता परमा गतिः ' इति । ज्ञानकर्मणोरङ्गाङ्गिभावेनात्र समुच्चयो विवक्षितः " ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन " इति श्रुतेः । अनेनाचार्यशब्दनिर्वचनमुक्तम् 'आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते ' इति ॥ शाखाशब्देन वेदशाखा उच्यन्ते निलयशब्देन तदेकपरत्वं त्यागे प्रत्यवायश्रवणात् । तदुक्तं शिक्षायाम्–'अधीतमपि यो वेदं विमुञ्चति नराधमः । भूणहा स तु विज्ञेयो वियोनिमधिगच्छति ' इति । किंच निलय इत्यनेन तदर्थविषयकश्रवणमननदिध्यासनरूपतदनुष्ठानान्युच्यन्ते । अनेनाचार्यलक्षणमुक्तम् । तथाहुः–' आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयः शुचिः ॥ गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवंलक्षणसंपन्नो गुरुरित्यभिधीयते ' इति । प्रहृष्टः सदा संतुष्टहृदयः । अनेन सर्वदा सेवनीयत्वमुक्तम् । तथोक्तम्–' आह्लादशीतनेत्राम्बुपुलकीकृतगात्रवान् । सदा परगुणाविष्टो द्रष्टव्यः सर्वदेहिभिः" इति पुनः पुनश्चोत्तमसान्त्ववादी । उत्तमः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इत्युक्तः परमात्मा तद्विषयं सान्त्वं शिष्येभ्यो वदतीत्युत्तमसान्त्ववादी । 'त्वं मेहं मे कुतस्तत्तदपि कुत इदं वेदमूलप्रमाणादेतच्चानादिसिद्धादनुभवविभवात्तर्हि साकोश एव । क्वाक्रोशः कस्य गीतादिषु मम विदितः कोऽत्र साक्षी सुधीः स्याद्वन्त त्वत्पक्षपाती स इति नकलहे मृग्यमध्यस्थवर्त्मम् ॥' इत्युक्तरीत्या भगवति मनुष्याणां कलहे । ' यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः । तेन चेदपि वादस्ते मा गङ्गां मा कुरून् गमः ॥' इति सान्त्ववादशील इत्यर्थः । पुनः पुनरित्यनेन कर्षकः कदाचिन्न फलितमित्येतावता यथा कृषिं न परित्यजति पुनः पुनस्तत्रैव प्रवर्तते तथाचार्योऽपि कदाचित् स्ववचनाश्रवणेऽपि न निवर्तते इत्युक्तम् अनेनाचार्यस्य भगवतोऽप्यतिशय उक्तः । स हि पार्थाय गीतामुपदिश्य पुनराश्रमेधिके तेन पूर्वोक्तमर्थं विस्मृत्य पुनः पृष्टो नाहं वक्ष्यामीत्युक्तवान् " नूनमश्रद्धानोऽसि दुर्मेधाश्चासि पा-

१ यान इति गो. रा. पाठः ।

तैतः सा ह्रीमती बाला भर्तुर्विजयहर्षिता । अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।

रावणराक्षसीगणविहितभर्त्सनतर्जन्याद्यसहिष्णुः सीता बहु विलप्य यावद्वेष्मुद्बन्धनेनासुमोक्षणउद्युङ्क्ते तावदननुभूतपूर्वः शुभशकुन आविरासीत् ।

सा राक्षसेन्द्रस्य वचो निशम्य तद्रावणस्याप्रियमप्रियार्ता ।
सीता वितत्रास यथा वनान्ते सिंहाभिपन्ना गजराजकन्या ॥ १ ॥
सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च ।
कान्तारमध्ये विजने विसृष्टा बालेव कन्या विललाप सीता ॥ २ ॥
सत्यं वतेदं प्रवदन्ति लोके नाकालमृत्युर्भवतीति सन्तः ।
यत्राहमेवं परिभर्त्स्यमाना जीवामि यैस्मात्क्षणमप्यपुण्या ॥ ३ ॥
सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे ।
[3]विदीर्यते यत्र सहस्रधाऽद्य वज्राहतं शृङ्गमिवाचलस्य ॥ ४ ॥

ण्डव " इत्यादिना । किंच सुस्वागतां वाचमुदीरयानः । सुष्ठु संप्रदायाविच्छेदो यथा तथाचार्यपरम्परया स्वस्मै आगतां वाचम् अष्टाक्षरादिमन्त्रराजरूपाम् निर्हेतुक्यैव दयया समुदीरयन् । आचार्याणामसावसाविति भगवत्त इति गुरुपरम्पराया अनुसंधेयत्वमनेन सूचितम् । पुनः पुनश्चोदयतीव उक्तार्थस्यानुष्ठानाय चोदनां दर्शयति । अन्यथा ह्युपदेशोऽप्यनर्थक एव स्यात् । अत एवाहुराचार्याः—स्खलित्ये शासितारमिति । हृष्टः । एतेन शिष्यशिक्षणं स्वप्रयोजनमाचार्यस्येत्युक्तम् ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

४७] ति० टी०—तत्त्रिजटोक्तम् ॥ ४७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०—तत इति । ततः त्रिजटावचनश्रवणानन्तरं भर्तुर्विजयहर्षिता विजयश्रवणेन प्राप्तहर्षा ह्रीमती कुलोचितलज्जाविशिष्टा सा सीता यदि तथ्यं भवत्युक्तं तथ्यं सत्यं तर्हि वो युष्माकं शरणं रक्षिका अहं भवेयमित्यवोचत् ॥ ४८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

१] ति० टी०—पुनर्दुःखपारमदृष्ट्वेव सीताप्रलापः—सेति ॥ १ ॥

रा० टी०—त्रिजटावचनश्रवणानन्तरकालेऽपि रावणोक्तिस्मृतिजनितसीताविलापं वर्णयन्नाह—सेत्यादिभिः । रावणस्य तत्परुषम् अत एव अप्रियं वचो निशम्य संस्मृत्य अप्रियार्ता अप्रियेण प्रियसंयोगाभावेन आर्ता दुःखिता सा सीता वितत्रास त्रासं प्राप । तत्र दृष्टान्तः—वनान्ते वनमध्ये सिंहाभिपन्ना सिंहवशं प्राप्ता गजराजकन्या यथा ॥ १ ॥

गो० टी०—सा राक्षसेन्द्रस्येत्यादि ॥ १ ॥ २ ॥

२] ति० टी०—विसृष्टा बाला कन्येव महादुर्भिक्षक्षोभवशाद्बालकन्यायाः परित्यागः ॥ २ ॥

रा० टी०—सेति । राक्षसीमध्यगता भृशमत्यन्तं वाग्भिः रावणतर्जिता सा सीता विजने जनरहिते कान्तारमध्ये निर्विडवनमध्यभागे विसृष्टा त्यक्ता कन्या इव विललाप ॥ २ ॥

३–४] ति० टी०—यस्मादपुण्या पुण्यरहिता ॥ ३ ॥४ ॥

रा० टी०—तदाकारमाह—सत्यमित्यादिभिः । यत्र यस्मात् एवं परिभर्त्स्यमाना अत एव पुण्या ज्ञानाद्यभावेन शुद्धिरहिता अहं किञ्चित्क्षणमपि जीवामि तस्मात् लोके अकालमृत्युर्न भवतीतीदं सन्तः सत्यं प्रवदन्ति ॥ ३ ॥

रा० टी०—सुखादिति । यत् यतः सुखात्प्रियसंयोगात् विहीनमत एव बहुदुःखपूर्णमिदं हृदयं वज्राहतं शैलस्य शृङ्गमिव सहस्रधा न विदीर्यते तस्मात् स्थिरं शैलशृङ्गादप्यतिदृढम् एतेनात्मविघातकरणेच्छा सूचिता ॥ ४ ॥

गो० टी०—सत्यमिति । यत्र येन किंचिज्जीवामि कृतिसंज्ञं जीवामि ॥ ३ ॥ ४ ॥

१ श्लोकोऽयं गो. नास्ति । २ किंचिदिति गो. रा. पाठः । ३ विशीर्यते नन्नेति गो. यन्नेति रा. पाठः ।

नैवास्ति नूनं मम दोषमत्र वध्याहमस्याप्रियदर्शनस्य ।
भावं न चास्याहमनुप्रदातुमलं द्विजो मन्त्रमिवाद्विजाय ॥ ५ ॥
तस्मिन्ननागच्छति लोकनाथे गर्भस्थजन्तोरिव शल्यकृन्तः ।
नूनं ममाङ्गान्यचिरादनार्यः शैरैः[1] शितैश्छेत्स्यति राक्षसेन्द्रः ॥ ६ ॥
दुःखं बतेदं ननु दुःखिताया मासौ चिरायाभिगमिष्यतो द्वौ ।
बद्धस्य वध्यस्य यथा निशान्ते राजोपरोधादिव तस्करस्य ॥ ७ ॥
हा राम हा लक्ष्मण हा सुमित्रे हा राममातः सह मे जनन्यः[3] ।
एषा विपद्याम्यहमल्पभाग्या महार्णवे नौरिव मूढवाता ॥ ८ ॥

५] ति० टी०—नन्वेवं प्राणत्यागे आत्महननदोषः स्यादत आह—नैवेति । अत्रेदृशे विषये प्राणत्यागेऽपि न दोषमस्ति । दोषमिति क्लीबत्वमार्षम् । यतोऽहमस्य वध्या । एवं च दुर्मरणजनितदोषस्य दुर्वारत्वेन दोषाभावोक्तिरिति भावः । आत्मघातिब्राह्मणहतयोर्दाहादावनधिकारश्रवणस्य तुल्यत्वादिति बोध्यम् । नन्वेवं रावणाङ्गीकार एव क्रियतामत आह—भावमिति । अद्विजाय शूद्राय द्विजो मन्त्रमिवाहं स्वीयं भावमान्तरमस्यानुप्रदातुमनुकूलतया समर्पयितुं नालं न समर्था । एवं च पातिव्रत्यस्य प्राणत्यागेन रक्षणात्सर्वदोषनिस्तार इति भावः ॥ ५ ॥

रा० टी०—नन्वात्मघातदोषप्रसङ्ग इत्यत आह—नैवेति । यतः अप्रियदर्शनस्य रावणस्याहं वध्या अतः अत्रात्मविघाते मम दोषं न ककुदोषणी इतिभाष्यप्रयोगात् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्याच्च दोषशब्दस्य नपुंसकत्वमपि । नन्वस्य प्रार्थनास्वीकारेणात्मविघातं निवारयेत्यत आह—अस्य रावणस्य भावं ममैवावस्थानरूपमभिप्रायं प्रदातुं स्वीकर्तुं नाहमलं समर्था । तत्र दृष्टान्तः—द्विजः अद्विजाय शूद्राय मन्त्रं वेदमिव ॥ ५ ॥

गो० टी०—नन्वात्महनने महान्दोषः स्यादित्याशङ्क्याह—नैवेति । दोषं दोषः आर्षं नपुंसकत्वम् । अत्र आत्महनने कथमदोष इत्याशङ्क्य रावणकृतान्मरणादात्मनैव मरणं श्रेय इत्याह—वध्येति । अप्रियदर्शनस्य अस्य रावणस्य दुर्मरणत्वाविशेषेऽपि दुष्टराक्षसेन मरणमतिकष्टमिति भावः । तर्हि तदनुप्रवेशेनात्मा रक्ष्यताम् " सर्वत आत्मानं गोपायेत् " इति श्रुतेरित्याशङ्क्याह—भावमिति । अस्य अस्मिन्रावणे भावं हृदयम् अनुप्रदातुं नालं न शक्ता । रामस्वत्वादस्य न ह्यन्यस्य स्वमन्योन्यस्मै दातुमर्हतीति भावः अनर्हश्चायं भावोन्यप्रदानस्येत्यनुमर्थं दृष्टान्तमुखेनाह—द्विज इति । मन्त्रं वेदम् । अद्विजाय शूद्राय ॥ ५ ॥

६] ति० टी०—ननु तथाप्यात्मघातेऽतिदोषात्सोऽयुक्त इत्याशङ्क्य सत्यम्, विचित्रवधाद्भिमीत्याह—तस्मिन्ननागच्छतीति । तस्मिन्रामेऽनागच्छति सति । अवधिकालादर्वागिति शेषः । ममाङ्गानि जीवन्त्या एव छेत्स्यति । निरुद्धाया विशसने दृष्टान्तः—गर्भेति । शल्यं शस्त्रं तेन कृणत्तीति शल्यकृन्त आम्बष्ठवैद्यः । आर्षत्वात्साधु । स यथा गर्भस्थजन्तुं व्याधिरूपं जीवन्तं कृणत्ति तद्वत् । एतच्छ्लोकद्वयं कतकेनेत्थं व्याख्यातम्—अन्यायप्राप्तवधेऽपि मम दोषो नेत्याह—नैवेति । यद्यप्यहं वध्या भवामि मम दोषो न, एवं भावाप्रदानेन पातिव्रत्यरक्षणात्सर्वदोषनिस्तार इत्यर्थः । किं च मरणप्राप्तिः पाश्चिकीत्याह—तस्मिन्निति । अनागच्छत्येव वधप्रसक्तिर्नान्यथेति भावः । अनागमनपक्षे प्राप्तविशसने दृष्टान्तः—गर्भस्थेति ॥ ६ ॥

रा० टी०—तस्मिन्निति । लोकनाथे तस्मिन् रामे अनागच्छति सति अनार्यः क्षुद्रो रावणः ममाङ्गानि गर्भस्थजन्तोः दितिगर्भस्थपवनस्य अङ्गानि शल्यकृन्त इन्द्र इव छेत्स्यति शल्यकृन्त इत्यत्र शोभुम्बार्षः ॥ ६ ॥

गो० टी०—नूनमिति । अनागच्छति मासद्वयादर्वागिति शेषः । गर्भस्थजन्तोः निरुद्धनिर्गमस्य गर्भस्थजन्तोः । शल्यकृन्तः नापितः ॥ ६ ॥

७] ति० टी०—चिराय भर्तृवियोगदुःखिताया मे इदं विशसनदुःखमपि बतागमिष्यति, यतो द्वौ मासौ विशसनावधिभूतौ कतिपयदिनावधिकावप्यभिगमिष्यतः शीघ्रं गमिष्यतः किल । तत्र वधप्राप्तौ दृष्टान्तः—बद्धस्येति । तस्करस्य वध इवेति शेषः ॥ ७ ॥

रा० टी०—दुःखमिति । चिराय बहुकालं दुःखितायाः मम राजापराधात् बद्धस्य अत एव निशान्ते वध्यस्य तस्करस्येदं दुःखमिव द्वौ मासौ अभिगमिष्यतः मासद्वयान्ते रावणकर्तृकमद्बधस्य निश्चितत्वात् आगामि मासद्वयं प्रातर्बद्धस्य चोरस्य निशान्तभाग इवेत्यर्थः ॥ ७ ॥

गो० टी०—दुःखमिति । चिराय दुःखितायाः मम द्वौ मासौ वधस्यावधिभूतौ अभिगमिष्यतः । इदं दुःखं बत । कस्य दुःखमिव राजापराधात् बद्धस्य तथा निशान्ते वध्यस्य तस्करस्येव दुःखम् । यथेति पाठे इवशब्दो वाक्यालंकारे ॥ ७ ॥

८] ति० टी०—सह श्वश्रूभ्यां सह या मे जनन्यस्ताश्च हा युष्मानदृष्ट्वा स्मृत्वैवाहं विपद्यामि । मूढवाता मोहास्पदमहावात्यादेवातयुक्ता ॥ ८ ॥

१ शस्त्रैरिति गो. पाठः । २ राजापराधादिति गो. पाठः । ३ जनन्येति गो. पाठः ।

तरस्विनौ धारयता मृगस्य सत्त्वेन रूपं मनुजेन्द्रपुत्रौ ।
नूनं विशस्तौ मम कारणात्तौ सिंहर्षभौ द्वाविव वैद्युतेन ॥ ९ ॥
नूनं स कालो मृगरूपधारी मामल्पभाग्यां लुलुभे तदानीम् ।
यत्रार्यपुत्रौ[1] विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च ॥ १० ॥
हा राम सत्यव्रत दीर्घबाहो हा पूर्णचन्द्रप्रतिमानवक्त्र ।
हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११ ॥
अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे ।
पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२ ॥

रा० टी०–हेति । हा राम ! एषा त्वत्तो वियुक्ता अत एव अल्पभाग्याऽहं मूढः चित्तविभ्रामकः वातो यस्यां सा महार्णवे नौरिव सह भवद्भिरिति शेषः विपश्यामि विनश्यामि ॥ ८ ॥

गो० टी०–हा रामेति । मूढो वात्यारूपो वातो यस्याः सा मूढवाता वात्याहतेत्यर्थः 'मूढस्तन्द्रितवात्ययोः' इति विश्वः ॥ ८ ॥

९] ति० टी०–मृगस्य रूपं धारयता सत्त्वेन राक्षसरूपजीवेन मम कारणाद्विशस्तौ नूनम् । वैद्युतेन विद्युत्संबन्धितेजसा ॥ ९ ॥

रा० टी०–तरस्विनाविति । मृगस्य रूपं धारयता वैद्युतेन अशनिना इव सत्त्वेन जन्तुविशेषेण सिंहर्षभौ सिंहश्रेष्ठाविव तरस्विनौ मनुजेन्द्रपुत्रौ मम कारणाद्विशस्तौ हिंसितौ नूनं किम् ॥ ९ ॥

गो० टी०–तरस्विनाविति । मृगस्य रूपं धारयता सत्त्वेन जन्तुना मम कारणात् मन्निमित्तं विशस्तौ हिंसितौ । द्वौ सिंहर्षभाविव द्वौ सिंहाविव द्वौ वृषभाविवेत्यर्थः । वैद्युतेन अशनिना ॥ ९ ॥

१०] ति० टी०–सर्वं चेदं दुःखं स्वकृतानर्थमूलमित्याह–नूनमिति । लुलुभे विमोहयति स्म । अहं विससर्ज विसृष्टवती । अपरोक्षेऽपि चित्तविक्षेपादिना पारोक्ष्यमारोप्य लिट् ॥ १० ॥

रा० टी०–नूनमिति । मृगरूपधारी यः अल्पभाग्यां मां लुलुभे तदानीं तस्मिन् समये एव यत्र यत्समीपे लक्ष्मणपूर्वजं रामं रामानुजं च मूढाऽहं विससर्ज प्रैषयं स कालः नूनं किम् ॥ १० ॥

गो० टी०–नूनमिति । लुलुभे प्रलोभयामास । यत्र यस्मिन् काले । विससर्जेति सृजेर्लिट्युत्तमपुरुषैकवचनम् । रामानुजं लक्ष्मणपूर्वजं च । परस्परस्य सदृशावित्युक्तपरस्परसादृश्यात् । बाल्यात् प्रभृति सुस्निग्धतया च परस्परानिरूपकभूतौ ॥ १० ॥ ११ ॥

११] ति० टी०–हा रामेत्यादौ हे राम! मां हा । अहं शोचे इत्यर्थः । हा जीव मम प्राणरूप ! हितो हितकरः प्रियश्चेत्यस्य त्वमिति शेषः ॥ ११ ॥

रा० टी०–हेति । हा राम ! जीवलोकस्य हितः प्रियश्च त्वं मां राक्षसानां वध्यां न वेत्सि किमिति शेषः ॥ ११ ॥

१२] ति० टी०–धर्मो रक्षतीति सर्वाविवादसिद्धमपि मां प्रति निष्फलमित्याह—अनन्यदेवत्वमिति । पत्येकदेवत्वमित्यर्थः । इयं क्षमा शापेन संहारशक्तावप्येवं पीडासहनरूपा । पत्यतिरिक्ते कामासक्तिराहित्यं पतिव्रतात्वम् । कृतमुपकृतम् ॥ १२ ॥

रा० टी०–अनन्येति । मम अनन्यदेवत्वं पत्येकपूजिकात्वं क्षमा रावणापराधसहनं च पतिव्रतात्वं पत्येकनिष्ठत्वं च कृतघ्नेषु मानुषाणां कृतमुपकार इव विफलं विनष्टप्रायम् ॥ १२ ॥

गो० टी०–अनन्यदेवत्वमिति । अनन्यदेवत्वम् आश्रयणीया देवतान्यास्ति सा रक्षिष्यतीति बुद्धिर्मे नास्ति । नारायणमुपागमदित्यत्राप्यप्राधान्येन सह पत्न्येति युक्तम् । नारायणमाराधयतो रामस्य परिचारिकास्मीत्यर्थः । इयं क्षमा च । रावणपरुषाक्षराणि राक्षसीनां तर्जनभर्त्सनादीनि राममधुरालापश्रवणकुतूहलेन त्वहं क्षान्तवती । भूमौ च शय्या । तवाङ्के समुपाविशमित्येवंविधभोगः कदाचिदपि किल सेत्स्यतीत्याशया हि मया भूमौ शयनं क्रियते । नियमश्च धर्मे । रक्षकत्वधर्मोऽपि तस्मिन्नेवेति मनीषया हि मया स्थितम् । न त्वां कुर्मि दशग्रीव भस्म भस्माई तेजसेत्युक्तिरपि तं दृष्ट्वैव । पतिव्रतात्वम् एतद्व्रतं ममेत्युक्तं व्रतं विना मम किंचिद्व्रतं नास्तीत्यर्थः । पत्युर्व्रतमेव व्रतं यस्याः सा पतिव्रता तस्या भावः पतिव्रतात्वम् । विफलं ममेदम् अमोघमपि माघमासात् । कस्येवेति चेत्तत्राह–कृतं कृतघ्नेष्विव मानुषाणाम् । आत्मानं मानुषं मन्य इत्युक्तरीत्या मानुषत्वं रामस्याप्यस्ति । अतस्तादितरमानुषाणां मध्ये कृतघ्नेषु कृतं कायमिव । अस्य किं मूलमिति चेत् ममेदं तस्मिन्न काचिन्न्यूनता ममैव दुष्कृतमत्र हेतुः ॥ १२ ॥ १३ ॥

१ पुत्रमिति गो. पाठः ।

मोघं हि धर्मश्चरितो ममायं तथैकपत्नीत्वमिदं निरर्थकम् ।
या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा ॥ १३ ॥
पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च ।
स्त्रीभिस्तु मन्ये विपुलेक्षणाभिः संरंस्यसे वीतभयः कृतार्थः ॥ १४ ॥
अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा ।
मोघं चरित्वाऽथ तपो व्रतं च त्यक्ष्यामि धिग्जीवितमल्पभाग्याम् ॥ १५ ॥
संजीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वाऽपि ।
विषस्य दाता न तु मेऽस्ति कश्चिच्छस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६ ॥
[इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरन्ती ।
प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥]
शोकाभितप्ता बहुधा विचिन्त्य सीताऽथ वेणीग्रथनं गृहीत्वा ।
उद्बद्ध्य वेण्युद्ग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलम् ॥ १७ ॥

१३] ति० टी०–उक्तमेवार्थं दुःखातिशयादावर्तयति—मोघं हीति । त्वया हीना तव संगमने च निराशा ॥ १३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–मोघमिति । त्वया हीना सङ्गमने आगामिसङ्गमे निराशा याऽहं त्वां न पश्यामि तस्याः मम धर्मः मोघं चरितः एकपत्नीत्वम् एकैवाहं रामपत्नीत्यभिमानश्च निरर्थकम् ॥ १३ ॥

१४] ति० टी०–इदानीं तयोरवधमेव निश्चित्य मत्राशात्तयोर्न कोऽपि नाशः, अपि तु ममैवेत्याह—पितुरिति । पितुर्वचनमकृत्वा वनान्निवृत्तिर्न, मध्ये व्रतत्यागो नेत्याह—चरितव्रतश्चेति ॥ १४ ॥

रा० टी०–निरर्थकत्वमेवोपपादयन्ती आह—पितुरिति । वीतभयः निवर्तितऋषित्रासः अत एव कृतार्थस्त्वं विपुलेक्षणाभिः स्त्रीभिः तत्काळिकविवाहविधिनार्जितभार्याभिस्त्वं रंस्यसे इत्यहं मन्ये । एतेन रामस्य भार्यान्तरं नास्तीति सूचितम् ॥ १४ ॥

गो० टी०–पितुरिति । पितुर्निदेशम् आज्ञाम् नियमेन अविच्छेदेन कृत्वा चरितव्रतः चरितवन्यवृत्तिव्रतः वनान्निवृत्तश्च सन् स्त्रीभिस्तु मत्तोऽपि विलक्षणाभिः स्त्रीभिः त्वं रंस्यसे वीतभयः गतवनवासभयः कृतार्थः निष्पन्नसर्वपुरुषार्थः मद्विनाशेन पुनर्बह्वीरूढा रंस्यस इति भावः ॥ १४ ॥

१५] ति० टी०–विनाशाय मरणान्तदुःखाय । अल्पभाग्यां मां धिक् ॥ १५ ॥

रा० टी०–अहमिति । त्वय्येव जातः उत्पन्नः कामः इच्छा यस्याः सा अत एव विनाशेनापि अये त्वत्प्राप्तौ निबद्धः संलग्नः भावोऽभिप्रायो यस्याः साऽहं मोघं त्वत्प्राप्तिरूपफलाभावेन निरर्थकं तपो व्रतं च चरित्वा जीवितं जीवनं त्यक्ष्यामि अतः अल्पभाग्यां मां धिक् ॥ १५ ॥

गो० टी०–अहं त्विति । त्वयि जातकामा अत एव त्वयि निबद्धभावा निबद्धहृदया । विनाशाय त्वयि निबद्धभावेति दुःखातिरेकोक्तिः । तपः अनशनम् व्रतं नियमम् । अल्पभाग्या जन्मान्तरसुकृतरहिता । इदानीमनुष्ठितानां तपोव्रतादीनां जन्मान्तरफलदत्वेन मोघत्वोक्तिः । अत एवाल्पभाग्येत्युक्तम् ॥ १५ ॥

१६] ति० टी०–वेश्मनि राक्षसस्येत्येतदनन्तरम् । 'इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरन्ती । प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥' इत्येकः श्लोकः प्रक्षिप्तः ॥ १६ ॥

रा० टी०–नन्वं क्षिप्रं कुतो न त्यजसीत्यत आह—संजीवितमिति । विषेण शितेन शस्त्रेण वा क्षिप्रं संजीवितं त्यजेयं परन्तु दाता कश्चिन्नास्ति ॥ १६ ॥

गो० टी०–सा जीवितमिति । वेश्मनि राक्षसस्य । एवं सम्यङ्मरणकारी क्रूरस्यास्य गृहे कथं लभ्येत इति भावः ॥ १६ ॥

१७] ति० टी०–यमस्य मूलं समीपम् ॥ १७ ॥

रा० टी०–इतीवेति । इतीव अनेन प्रकारेण सर्वात्मना राममनुस्मरन्ती प्रवेपमाना अतिदुःखेन प्रकम्पं प्राप्नुवन्ती देवी सीता बहुधा अनेकप्रकारं विलप्य पुष्पितं नगोत्तमं शिंशपाम् आससाद तत्र तस्थौ ॥ १७ ॥

रा० टी०–शोकेति । शोकाभितप्ता सीता बहुधा विचिन्त्य वेणीग्रथनं गृहीत्वा वेण्युद्ग्रथनेन वेणीरूपोद्बन्ध-

१ मोघ इति गो. पाठः । २ निरर्थमिति गो. पाठः । ३ भाग्येति गो. पाठः । ४ हीति गो. पाठः । ५ श्लोकोऽयमधिकः गो. रा. पाठे ।

उपस्थिता सा मृदुसर्वगात्री शाखां गृहीत्वा च नगस्य तस्य ।
तस्यास्तु रामं परिचिन्तयन्त्या रामानुजं स्वं च कुलं शुभाङ्ग्याः ॥ १८ ॥
तस्या विशोकानि तदा बहूनि धैर्यार्जितानि प्रवराणि लोके ।
प्रादुर्निमित्तानि तदा बभूवुः पुराऽपि सिद्धान्युपलक्षितानि ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।

कविः शुभशकुनान्निर्दिशति । पुरोपलब्धपुलकशकुनसाजात्यात्तेषां शुभत्वं निर्धारयन्ती सीता प्रहर्षमनुभवति ।

तथागतां तां व्यथितामनिन्दितां व्यतीतहर्षां परिदीनमानसाम् ।
शुभां निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपसेविनः ॥ १ ॥

नेन उद्धृत्य गलं बद्धा यमस्य कालस्यापि नियन्तुः मूलं समीपं शीघ्रमहं गमिष्यामीति चिन्तयामासेति शेषः ॥ १८ ॥

गो० टी०–इतीत्येवमादि । शोकेति । वेण्युद्ग्रथनं वेणीबन्धनम् । यमस्य मूलं यमस्य समीपम् । अत्रेतिकरणं बोध्यम् । इति विचिन्त्य नगोत्तमां शिंशुपामाससाद । शिंशुपां तामुपागमदिति पूर्वमुक्तम् । तस्य सामीप्येन गमनमत्रोच्यते । पुष्पितं शुभसूचनम् । यद्वा पुष्पितमाससाद अग्निप्रवेशं कुर्वन्तीवेत्यर्थः ॥ १७ ॥ १८ ॥

१८]ति०टी०–तस्या नगस्य शाखां गृहीत्वोपस्थितायाः१८

रा० टी०–उपस्थितेति । मृदूनि सर्वगात्राणि यस्याः सा सीता नगस्य तस्य शिंशुपाभिधस्य शाखां गृहीत्वा उपस्थिता बभूवेति शेषः । अथ पृथक्—तस्या इति । रामादिकं परिचिन्तयन्त्याः तस्याः सीतायाः शङ्का रामागमनसंभावनानिमित्तं येषु तानि धैर्यार्जितानि धैर्यसंपादकानि सिद्धानि प्रसिद्धानि पुरा मिथिलायां रामागमनसमये उपलक्षितानि दृष्टानि प्रवराणि श्रेष्ठानि निमित्तानि शकुनाः तदाकाले शाखावलम्बेनोपस्थितिसमये प्रादुर्बभूवुः । प्रादुस्तो व्यवहितेन प्रयोग आर्षः । सार्धश्लोक एकान्वयी ॥ १९ ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०–उपस्थितेत्यर्धमेकं वाक्यम् । नगस्य शाखां गृहीत्वा उपस्थिता ॥ १९ ॥

१९] ति०टी०–विशोकानि विशोककराणि, धैर्यार्जितानि धैर्यस्यार्जितमर्जनं संपादनं यैस्तानि, लोके प्रवराणि प्रसिद्धानि, पुरापि सिद्धानि संवादीनि निमित्तानि प्रादुर्बभूवुः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०–तस्यास्त्विति । स्वं च कुलं विचिन्तयन्त्या इत्यनेन दुर्मरणात् भीतत्वं व्यज्यते । शोकानिमित्तानि शुभसूचकानीत्यर्थः । धैर्यार्जितानि अर्जितधैर्याणि धैर्यकराणीत्यर्थः । लोके प्रवराणि लोके प्रसिद्धानीत्यर्थः । प्रवरं हि प्रसिद्धं भवति । प्रादुर्बभूवुरित्यन्वयः । पुरापि सिद्धान्युपलक्षितानि पूर्वमपि फलव्याप्तत्वेन दृष्टानि । तान्युत्तरसर्गे विवरिष्यति॥२०॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेऽष्टाविंशः सर्गः ॥ २८ ॥

१] ति० टी०–तथेति । उपसेविनः सेवकास्त इव ॥ १ ॥

रा० टी०–निमित्ताकारं दर्शयितुमाह–तथेति । तथा तेन प्रकारेण गतां शोकां प्राप्तां व्यथिताम् अत एव व्यतीतहर्षां निवृत्तानन्दाम् अत एव परिदीनमानसाम् अनिन्दितां शुभां तां सीतां शुभानि निमित्तानि श्रिया जुष्टं नरमुपसेविन इव भेजिरे सिषेविरे ॥ १ ॥

गो० टी०–तथागतामित्यादि । तथागतां रहस्यं च प्रकाशं चेत्युक्तरीत्या सर्वं यथावत्साक्षात्कृतवतो मुनेरपि तथाशब्दप्रयोगादित्थमिति परिच्छिद्य वक्तुमशक्यदुःखाम् । तां धर्मिस्वरूपातिरिक्तयत्किंचिदतिशयरहिताम् । व्यथिताम् "आशंसायां भूतवच्च" इति निष्ठा । तथा च पूर्वोक्तं सर्वं धर्मिस्वरूपमात्रम् । इतः परमेव व्यसनानि भविष्यन्तीति मन्यमानाम् । समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥ इत्युक्तं भोगजातं सर्वमकिंचित्करमासीत् । दुःखमेव निरूपकमासीत् । अनिन्दितां रामविरहे यथा स्थातव्यं तथा स्थिताम् । एवमवस्थाने निन्दितैव भवति । व्यपेतहर्षां हर्षः पूर्वमस्यां वसित्वा गत इति न ज्ञातामित्यर्थः । व्यपाश्रयमुपसर्गाभ्यां तथा प्रती-

१ गात्रेति गो. पाठः । २ शोकानिमित्तानि तथेति गो. शङ्कानिमित्तानीति रा. पाठः । ३ व्यपेतेति गो. पाठः । ४ उपजीविन इति गो. पाठः ।

चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता । गूढेन चरता तावदवेक्षितमिदं मया ॥ ४ ॥
राक्षसानां विशेषश्च पुरी चेयं [1]निरीक्षिता । राक्षसाधिपतेरस्य प्रभावो रावणस्य च ॥ ५ ॥
यथा तस्याप्रमेयस्य सर्वसत्त्वदयावतः । समाश्वासयितुं भार्यां पतिदर्शनकाङ्क्षिणीम् ॥ ६ ॥
अहमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम् । अदृष्टदुःखां [2]दुःखस्य न ह्यन्तमधिगच्छतीम् ॥ ७ ॥
यदि ह्यहं सतीमेनां शोकोपहतचेतनाम् । अनाश्वास्य गमिष्यामि दोषवद्गमनं भवेत् ॥ ८ ॥
गते हि मयि तत्रेयं राजपुत्री यशस्विनी । परित्राणमपश्यन्ती जानकी जीवितं त्यजेत् ॥ ९ ॥
यथा च स महाबाहुः पूर्णचन्द्रनिभाननः । समाश्वासयितुं न्याय्यः सीतादर्शनलालसः ॥ १० ॥
निशाचरीणां प्रत्यक्षमक्षमं चाभिभाषितम् । कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहम् ॥ ११ ॥
अनेन रात्रिशेषेण यदि नाश्वास्यते मया । सर्वथा नास्ति संदेहः परित्यक्ष्यति जीवितम् ॥ १२ ॥

वद्भूनि सहस्राणि अयुतानि च सर्वासु दिक्षु मार्गन्ते सा इयं मया आसादिता प्राप्ता ॥ ३ ॥

गो० टी०-यामिति । सर्ववानराभिलषितोऽर्थो मयैकेन लब्ध इति विस्मितवान् ॥ ३ ॥

४] ति० टी०-चारेण चारात्मना प्रवर्तमानेन । इदं वक्ष्यमाणम् ॥ ४ ॥

रा० टी०-चारेणेति । सुप्रयुक्तेन स्वामिना नियुक्तेन अत एव शत्रोः शक्तिम् अवेक्षता अत एव गूढेन रूपेण चरता चारेण मया तावत्प्रथमम् इदं वृत्तमवेक्षितं ज्ञातम् ॥४॥

गो० टी०-चारेणेति । इदं वक्ष्यमाणम् । तावत्कार्यस्यैव ॥ ४ ॥ ६ ॥

५] ति० टी०-राक्षसानामिति । राक्षसानां विशेषः, तारतम्यमैश्वर्यादिकृतम् । अस्य रावणस्य प्रभावश्चावेक्षितः ॥ ५ ॥

रा० टी०-राक्षसानामिति । राक्षसानां विशेषः न्यूनाधिकभावो रावणस्य प्रभावश्च निरीक्षित इति लिङ्गविपरिणामेनान्वयः ॥ ५ ॥

६] ति० टी०-अप्रमेयस्यापरिच्छेयस्वरूपस्यापरिच्छेयगुणस्य च सर्वसत्त्वदयावतः सर्वं सत्त्वं बलं दया च यस्य सर्वसत्त्वेषु दयावत इति वा । दयावत्त्वादेव सीतार्थे त्रैलोक्यानाशनं रामस्य । समाश्वासयितुं । युक्तमिति शेषः ॥ ६ ॥

रा० टी०-यथेति । अप्रमेयस्य इयत्तारहितप्रभावस्य सर्वसत्त्वदयावतः रामस्य आश्वासयितुं योग्यामिति शेषः, पतिदर्शनकाङ्क्षिणीं भार्यां न दृष्टं दुःखं यया दुःखस्यान्तमवसानम् अगच्छतीम् अगच्छन्तीमेनां सीताम् अहमाश्वासयामि आश्वासयिष्यामि । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०-युक्तमिति । समाश्वासयितुं युक्तं न्याय्यम् ॥६॥

७] ति० टी०-आश्वासयामि वर्तमानसामीप्ये भविष्यति लट् । नहि नापि ॥ ७ ॥

गो० टी०-अहमिति । आश्वासयामि " वर्तमानसामीप्ये वर्तमानवद्वा " इति लट् ॥ ७ ॥ ८ ॥

८] ति० टी०-दोषवत्कार्यहानिदोषवत् ॥ ८ ॥

रा० टी०-तत्र हेतुमाह-यदीति । एनां सतीम् अनाश्वास्य यथहं गमिष्यामि तदा मे गमनं दोषवद्दोषविशिष्टं भवेत् ॥ ८ ॥

९] ति० टी०-तदेवाह—गते हीति । तत्र रामसमीपे ॥ ९ ॥

रा० टी०-दोषाकारमाह-गते इति । तत्र तस्मिन् मयि गते सति परित्राणं स्वरक्षाम् अपश्यन्ती जानकी जीवितं त्यजेत् ॥ ९ ॥

गो० टी०-दोषवत्त्वमुपपादयति-गते हीति ॥ ९ ॥

१०] ति० टी०-आश्वासयितुं सीतासंदेशकथनेन तथेयमप्याश्वासयितुं न्याय्येति शेषः ॥ १० ॥

रा० टी०-यथेति । सीतादर्शनलालसः स रामः यथावत्समाश्वासयितुं सीतासंदेशकथनेन बोधयितुं युक्तः । एतेन सीतासंभाषणमवश्यं कर्तव्यमिति सूचितम् ॥ १० ॥

गो० टी०-मयेति । समाश्वासयितुं न्याय्यः सीतासंदेशकथनेनेति शेषः ॥ १०-१२ ॥

११] ति० टी०-सीतासमाश्वासनं च कष्टमित्याह-निशाचरीणामिति । तासां प्रत्यक्षं सीताया अभिभाषणमक्षममयोग्यम्, अत इदं कार्यं कथं कर्तव्यमित्येवं कृच्छ्रगतोऽस्मि ॥ ११ ॥

रा० टी०-सीतासमाश्वासनं दुष्करमित्याह-निशाचरीणामिति । निशाचरीणां प्रत्यक्षं अभिभाषितम् अभिभाषणम् अक्षमं न योग्यम् । अतः इदमनुशासनं मया कथं कर्तव्यमिति चिन्तया कृच्छ्रगतोऽहमस्मीति शेषः ॥ ११ ॥

१२] ति० टी०-कालविलम्बश्चाश्वासनस्यायुक्त इत्याह-अनेनेति ॥ १२ ॥

रा० टी०-अनेनेति । अनेन रात्रिशेषेण यदि सर्वथा नाश्वास्यते तर्हि जीवितं परित्यक्ष्यति संदेहः अत्र संशयो नास्ति ॥ १२ ॥

१ अवेक्षितेति गो. पाठः । २ युक्तमिति गो. पाठः । ३ दुःखार्तां दुःखस्यान्तमगच्छतीमिति गो. पाठः । ४ अप्यहमिमां देवीमिति गो. पाठः । ५ अविन्दन्तीति गो. पाठः । ६ अनई चापि भाषणमिति गो. पाठः ।

रामस्तु यदि पृच्छेन्मां किं मां सीताऽब्रवीद्वचः । किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमाम् ॥ १३ ॥
सीतासंदेशरहितं मामितस्त्वरया गतम् । निर्दहेदपि काकुत्स्थः क्रोधतीव्रेण चक्षुषा ॥ १४ ॥
यदि वोद्योजयिष्यामि भर्तारं रामकारणात् । व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥ १५ ॥
अन्तरं त्वहमासाद्य राक्षसीनामवस्थितः । शनैराश्वासयाम्यद्य संतापबहुलामिमाम् ॥ ॥ १६ ॥
अहं ह्यतितनुश्चैव वानरश्च विशेषतः । वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥ १७ ॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् । रावणं मन्यमाना मां सीता भीता भविष्यति ॥ १८ ॥
[वानरस्य विशेषेण कथं स्यादभिभाषणम् ।]
अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् । मया सान्त्वयितुं शक्या नान्ययेयमनिन्दिता ॥ १९ ॥
सेयमालोक्य मे रूपं जानकी भाषितं तथा । रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासमुपैष्यति ॥ २० ॥

१३-१४] ति० टी०-संभाषणं चावश्यकमित्याह-रामस्त्विति । मामुद्दिश्य सीता किमब्रवीदिति चेद्रामो मां पृच्छेदित्यन्वयः ॥ १३ ॥ १४ ॥

रा० टी०-राम इति । सीता मां किमब्रवीत् इति रामो यदि मां पृच्छेत्तदा सुमध्यमां सीताम् असंभाष्य किं प्रतिब्रूयाम् ॥ १३ ॥

रा० टी०-सीतेति । सीतासंदेशरहितं मां काकुत्स्थो रामः निर्दहेदपि ॥ १४ ॥

गो० टी०-रामश्चेति । सीताब्रवीद्वच इत्यत्रेतिकरणं द्रष्टव्यम् ॥ १३ ॥ १४ ॥

१५] ति० टी०-यथेनामसंभाष्यैव भर्तारं स्वस्वामिनं सुग्रीवं रामकारणाद्यदि वोद्योजयिष्याम्युद्योगं कारयिष्यामि तर्हि तदागमनं व्यर्थं स्यात् । अनाश्वासितया सीतया ततः प्रागेव देहत्यागादिति भावः ॥ १५ ॥

रा० टी०-आश्वासनमन्तरा महाननर्थो भविष्यतीति निश्चित्याह-यदीति । रामकारणात् रामप्रयोजनाद्धेतोः यदि भर्तारं सुग्रीवम् उद्योजयिष्यामि तर्हि ससैन्यस्य तस्य सुग्रीवस्यागमनं व्यर्थं भविष्यति एतेन आश्वासनमन्तरा सीता जीवनं नैव भविष्यतीति सूचितम् तेन सीताऽवश्यमाश्वासनीयेति व्यञ्जितम् ॥ १५ ॥

गो० टी०-यदि चेति । भर्तारं सुग्रीवम् । व्यर्थम् अनाश्वास्य गमने तदागमनपर्यन्तं देव्याः प्राणानवस्थानादिति भावः ॥ १५ ॥

१६] ति० टी०-अन्तरमवकाशं तासामनवधानसमयम् ॥ १६ ॥

रा० टी०-अन्तरमिति । राक्षसीनां मध्ये अवस्थितोऽहम् अन्तरमवकाशं राक्षसीनामवधानतामित्यर्थः आसाद्य प्राप्य संतापबहुलां सीतां शनैराश्वासयामि ॥ १६ ॥

गो० टी०-अन्तरमिति । राक्षसीनाम् अन्तरम् अवकाशं विच्छेदं वा । राक्षस्यसन्निधानसमयमित्यर्थः ॥ १६ ॥

१७] ति० टी०-तत्राश्वासनोपायं निश्चिनोति-अहं ह्यीति । अतितनुरतिसूक्ष्मवानरतनुरेव सन्मानुषीं मनुष्यशरीरसाध्यां संस्कृतां व्याकरणसंस्कारवतीम् ॥ १७ ॥

रा० टी०-अहमिति । वानरः वानररूपोऽहम् अतितनुः अतिसूक्ष्मशरीरः सन् संस्कृतां व्याकरणसंस्कारयुक्तां वाचमुदाहरिष्यामि ॥ १७ ॥

गो० टी०-अहं त्विति । अतितनुः अतिसूक्ष्मतनुः । संस्कृतां प्रयोगसौष्ठवलक्षणसंस्कारयुक्ताम् ॥ १७ ॥

१८] ति० टी०-संस्कृतकथने दोषमाशङ्क्य मनुष्यभाषयैव व्यवहर्तव्यमिति निश्चिनुते-यदीति ॥ १८ ॥

रा० टी०-वानररूपत्वे हेतुमाह-यदीति । यदि द्विजातिर्ब्राह्मण इव संस्कृतां वाचं प्रवक्ष्यामि तदा मां रावणं मन्यमाना सीता भीता भविष्यति एतेनापहरणसमयकृततद्रूपस्य स्मृतिर्भविष्यतीति सूचितम् ॥ १८ ॥

गो० टी०-गीर्वाणभाषया व्यवहारे दोषमाह-यदीति ॥ १८ ॥

१९] ति० टी०-तदेवाह-अवश्यमेवेति ॥ १९ ॥

रा० टी०-ननु वानरवाक्येनैवोच्यतामित्यत आह-अवश्यमिति । मानुषमेव वाक्यं मयावश्यं वक्तव्यम् अन्यथा इयं सान्त्वयितुं न शक्या ॥ १९ ॥

गो० टी०-अथ मानुषभाषया व्यवहर्तव्यत्वं निश्चिनोति-अवश्यमिति । अत्र वाक्यस्य मानुषत्वं कोसलदेशवर्तिमनुष्यसंबन्धित्वं विवक्षितम् । तादृग्वाक्यस्यैव देवीपरिचितत्वात् ॥ १९ ॥

२०] ति० टी०-अथ वृक्षान्तरितेनैवेयं मया वक्तव्येति निश्चयं कुर्वन्पुरतो गत्वाऽभिभाषणे दोषपरम्परामुपन्यस्यति-सेयमिति । मे रूपं वानरीयं पुरतो दृष्ट्वा भाषितं च मानुषं श्रुत्वा विरुद्धव्यापारदर्शनाद्रावणोऽयमिति मत्वा त्रासं गमिष्यति ॥ २० ॥

रा० टी०-सेति । मे रूपं वानरस्वरूपं भाषितं मनुष्यवचनं च आलोक्य ज्ञात्वा पूर्वं रक्षोभिः त्रासिता सीता भूयः

१ क्रुद्धस्तीव्रेणेति गो. पाठः । २ इहेति गो. पाठः । ३ आश्वासयिष्यामीति गो. पाठः । ४ अर्धमेतदधिकं गो. पाठे ।

ततो जातपरित्रासा शब्दं कुर्यान्मनस्विनी । जानाना[1] मां विशालाक्षी रावणं कामरूपिणम् ॥ २१ ॥
सीतया च कृते शब्दे सहसा राक्षसीगणः । नानाप्रहरणो घोरः समेयादन्तकोपमः ॥ २२ ॥
ततो मां संपरिक्षिप्य सर्वतो विकृताननाः[4] । वधे च ग्रहणे चैव कुर्युर्यत्नं महाबलाः[5] ॥ २३ ॥
तं[3] मां शाखाः प्रशाखाश्च स्कन्धांश्चोत्तमशाखिनाम्[6] । दृष्ट्वा च परिधावन्तं भवेयुः परिशङ्किताः ॥ २४ ॥
मम रूपं च संप्रेक्ष्य वने विचरतो महत् । राक्षस्यो भयवित्रस्ता भवेयुर्विकृतस्वराः ॥ २५ ॥
ततः कुर्युः समाह्वानं राक्षस्यो रक्षसामपि । राक्षसेन्द्रनियुक्तानां राक्षसेन्द्रनिवेशने ॥ २६ ॥
ते शूलशरनिस्त्रिंशविविधायुधपाणयः । आपतेयुर्विमर्देऽस्मिन्वेगेनोद्वेगकारणात्[7] ॥ २७ ॥
संरुद्धस्तैस्तु परितो विधमे[8] राक्षसं बलम् । शक्नुयां न तु संप्राप्तुं परं पारं महोदधेः ॥ २८ ॥
मां वा गृह्णीयुरावृत्य बहवः शीघ्रकारिणः[2] । स्यादियं चागृहीतार्था मम च ग्रहणं भवेत्[3] ॥ २९ ॥

पुनः त्रासं राक्षसस्यैवायं रूपविशेष इति विचारजनितखेद-मुपेष्यति ॥ २० ॥

गो० टी०–एवं मानुषभाषया व्यवहर्तव्यत्वं निश्चित्य संप्रति तयापि भाषयाऽनेन वानररूपेण पुरः स्थित्वाभिभाषणे दोषो-ऽस्तीति विचारयति—सेयमिति ॥ २० ॥

२१] ति० टी०–किं ततस्तत्राह–ततो जातेति । शब्द-मार्तशब्दम् ॥ २१ ॥

रा० टी०–तत इति । ततोऽनन्तरं जातपरित्रासा सीता मां रावणं जानाना सती शब्दं कुर्यात् ॥ २१ ॥

गो० टी०–तत इति । जानमाना जानाना मुमागम आर्षः ॥२१–२३॥

२२] ति० टी०–समेयान्मत्संमुखो गच्छेन्मिलितो भवेद्वा ॥ २२ ॥

रा० टी०–शब्दकरणे दोषमाह–सीतयेति । सीतया शब्दे कृते सति नानाप्रहरणः राक्षसीगणः समेयात् ॥ २२ ॥

२३] ति०टी०–संपरिक्षिप्य सर्वतश्चक्षुर्विक्षेपेण ज्ञात्वा॥२३

रा० टी०–तत इति । ततोऽनन्तरं मां सर्वतः संपरिक्षिप्य चक्षुःप्रक्षेपेणावलोक्य वधे ग्रहणे च यत्नं कुर्युः ॥ २३ ॥

२४] ति० टी०–शाखाः परिधावन्तं मां दृष्ट्वेत्यन्वयः॥२४॥

रा० टी०–तमिति । उत्तमशाखिनां शाखादीन् धावन्तं मां दृष्ट्वा परिशङ्किताः भवेयुः शाखादीनां स्थूलसूक्ष्मादिभेदेन भे-दान्न पौनरुक्त्यम् ॥ २४ ॥

गो० टी०–गृह्णेति । प्रशाखाः उपशाखाः । विपरिधा-वन्तं मामिति शेषः ॥२४–२६॥

२५] ति० टी०–ताभिरप्रधर्षणार्थं परिगृहीतं मम मह-द्रूपं संप्रेक्ष्य भयवित्रस्ता भयेन मदर्शनजशरीरकम्पादियुताः सत्यस्रस्तचित्ता विकृतस्वरा भवेयुः । न केवलमयं शाखा-मृगः, अपि तु कश्चन कामरूपी शत्रुपक्ष्य इति शङ्किताः स्युरित्यर्थः ॥ २५ ॥

रा० टी०–ममेति । वने विचरतो मम रूपं संप्रेक्ष्य भय-वित्रस्ता राक्षस्यो विकृतस्वरा भवेयुः ॥ २५ ॥

२६] ति० टी०–ततः किं तत्राह—ततः कुर्युरिति । राक्षसेन्द्रनिवेशने रक्षणाय राक्षसेन्द्रेण नियुक्तानामाह्वानं कुर्युः ॥ २६ ॥

रा० टी०–तत इति । ततः कृतविकृतस्वरानन्तरं राक्ष-स्यः राक्षसेन्द्रनिवेशने राक्षसेन्द्रनियुक्तानां रक्षसां समाह्वानं कुर्युः ॥ २६ ॥

२७] ति० टी०–उद्वेगकारणात् । आसामुद्वेगरूपा-न्निमित्तादस्मिन्देशे वेगेन विमर्दं विमर्दायापतेयुरित्यर्थः ॥२७॥

रा० टी०–ते इति । शूलादिपाणयस्ते अस्मिन् विमर्दं विमर्दहेतुभूते शब्दे सति उद्वेगकारणात् उद्वेगकरणार्थं वेगेन आपतेयुः ॥ २७ ॥

गो० टी०–त इति । उद्विग्नकारिणः उद्वेगकारिणः ॥२७॥

२८] ति० टी०–न शक्नुयाम् । युद्धश्रान्त्येति भावः॥२८॥

रा० टी०–संरुद्ध इति । तैः राक्षसबलैः संरुद्धोऽहं राक्षसं बलं विधमे विनाशयामि परन्तु महोदधेः पारं प्राप्तुं न शक्नुयां सीतया मम संभाषणादि ज्ञात्वा राक्षसैः सीताया अपि वधे समुद्रपारयोग्यता न भविष्यतीति तात्पर्यम् ॥ २८ ॥

गो० टी०–संरुद्ध इति । तैः परितः संरुद्धः अत एव रक्षसां बलम् विधमन् प्रहरन् अहं महोदधेः परं पारं प्राप्तुं न शक्नुयामित्यन्वयः ॥ २८ ॥

२९] ति० टी०–अगृहीतार्था मत्तोऽज्ञातमदागमनप्रयो-जना ॥ २९ ॥

रा० टी०–मामिति । शीघ्रकारिणः बहवो राक्षसाः यदि मां गृह्णीयुः ग्रहणात्कूलव्यापारं कुर्युः मम च ग्रहणं भवेत् तदा इयं सीता अगृहीतार्था अज्ञातमदागमनप्रयोजना भवेत् ॥२९॥

गो० टी०–मामिति । अगृहीतार्था अविदितरामसंदे-शार्था ॥ २९ ॥ ३० ॥

---

१ जानमानेति गो. पाठः । २ यथाबलमिति गो. पाठः । ३ गृह्णेति गो. पाठः । ४ विकृतानना इति गो. पाठः । ५ शक्नोति गो. पाठः । ६ उद्विग्नकारिण इति गो. पाठः । ७ विधमन्निति गो. पाठः ।

हिंसाभिरुचयो हिंस्युरिमां वा जनकात्मजाम् । विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदम् ॥ ३० ॥
उद्देशे नष्टमार्गेऽस्मिन्राक्षसैः परिवारिते । सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥ ३१ ॥
विशस्ते वा गृहीते वा रक्षोभिर्मयि संयुगे । नाशं पश्यामि रामस्य सहायं कार्यसाधने ॥ ३२ ॥
विमृशंश्च न पश्यामि यो हते मयि वानरः । शतयोजनविस्तीर्णं लङ्घयेत महोदधिम् ॥ ३३ ॥
कामं हन्तुं समर्थोऽस्मि सहस्राण्यपि रक्षसाम् । न तु शक्ष्याम्यहं प्राप्तुं परं पारं महोदधेः ॥ ३४ ॥
असत्यानि च युद्धानि संशयो मे न रोचते । कश्च निःसंशयं कार्यं कुर्यात्प्राज्ञः ससंशयम् ॥ ३५ ॥
एष दोषो महान्हि स्यान्मम सीताभिभाषणे । प्राणत्यागश्च वैदेह्या भवेदनभिभाषणे ॥ ३६ ॥
भूताश्चार्था विरुद्ध्यन्ति देशकालविरोधिताः । विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥
अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते । घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥ ३८ ॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं मम । लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ३९ ॥

३०] ति० टी०–इमां वेति । एतदर्थं किलायमागत इत्याशयेनेति शेषः ॥ ३० ॥

रा० टी०–हिंसेति । वा यदि हिंसाभिरुचयो राक्षसाः जनकात्मजां हिंस्युस्तततस्तदा इदं सीतालाभरूपं रामसुग्रीवयोः कार्यं विपन्नं विनष्टं स्यात् ॥ ३० ॥

३१] ति० टी०–कार्यविपदमेवोपपादयति–उद्देशे समुल्लङ्घनप्राप्यदेशे । नष्टमार्गे प्रकारान्तरेणैतत्प्राप्तिसंपादकमार्गरहिते ॥ ३१ ॥

रा० टी०–उद्देश इति । नष्टः अन्यैः अपरिज्ञातः मार्गो यस्मिन् तस्मिन् अत एव गुप्ते अपरिज्ञाते सागरेण परिक्षिप्ते चतुर्दिक्षु व्याप्ते राक्षसैः परिवारिते अस्मिन् उद्देशे उत्कृष्टस्थले जानकी वसति तेनान्यैर्द्रष्टुमप्यशक्यमिति सूचितम् ॥ ३१ ॥

गो० टी०–उद्देश इति । उद्देशे प्रदेशे नष्टमार्गे अदृष्टमार्गे उक्तविशेषणे उद्देशे वसतीत्यन्वयः ॥ ३१ ॥

३२–३३] ति० टी०–विशस्ते हते ॥ ३२ ॥ ३३ ॥

रा० टी०–विशस्त इति । रक्षोभिर्मयि विशस्ते हिंसिते गृहीते वा सति रामस्य कार्यसाधने अन्यं सहायं न पश्यामि एतेन सर्वेषां शोकग्रस्तत्वेन क्षीणबलादिमत्त्वं सूचितम् ॥ ३२ ॥

गो० टी०–विशस्ते वेति । सहाय एव साहाय्यः[1] तम् । कार्यसाधने सीतादर्शननिवेदनलक्षणकार्यसाधने ॥ ३२ ॥

रा० टी०–विमृशन्निति । यो वानरः महोदधिं लङ्घयेत तं विमृशन् विचारयन्नहं न पश्यामि ॥ ३३ ॥

गो० टी०–विमृशन्निति । यो लङ्घयेत तं न पश्यामीत्यन्वयः ॥ ३३ ॥ ३४ ॥

३४]ति० टी०–न तु शक्ष्यामि । युद्धश्रान्त्येति भावः॥३४॥

रा० टी०–नन्वेवं त्वमेव कार्यं साधयेत्यत आह—काममिति । रक्षसां सहस्राणि अनन्तराक्षसान् हन्तुं कामं समर्थोऽस्मि तथापि महोदधेः परं पारं प्राप्तुं न शक्ष्यामि सीतामरणशङ्क्या क्षीणशक्तिर्भविष्यामीति तात्पर्यम् ॥ ३४ ॥

३५] ति० टी०–किं च युद्धे जयोऽपि संदिग्ध इत्याह–असत्यानीति । अनिश्चितजयानि । संशयः संशयितजयफलकयुद्धव्यापारः । अरुचिहेतुप्राज्ञत्वमेव दर्शयति–कश्चेति । निःसंशयं निर्णीतफलकम् । प्राज्ञो मादृशः ससंशयं संशयितफलकम् । न कोऽपीत्यर्थः ॥ ३५ ॥

रा० टी०–ननु राक्षसविघातानन्तरं जानकीप्राप्तिर्भविष्यत्येवेति किं संशयेनेत्यत आह—असत्यानीति । युद्धानि इदानीं राक्षसैः संग्रामाः असत्यानि जानकीजीवनविषयकसंशयाविष्टत्वेन असत्स्वरूपाणि सन्तीति शेषः एतेन इदानीं युद्धं न कर्तव्यमिति सूचितम् । इदानीं युद्धान्निवृत्तिरेव वरेति बोधयन्नाह–निःसंशयं संशयरहितं कार्यं संशयसहितं कः प्राज्ञः कुर्यात् न कोऽपीत्यर्थः ॥ ३५ ॥

गो० टी०–असत्यानीति । असत्यानि अनिश्चितजयापजयानि । क्लेशस्तु भूयानिति भावः । ततो नैतन्मम मतमित्याह–संशय इति । संशयः संशयितार्थः । स च संग्रामः अथापि तथाकरणे स एव कार्यहन्ता बुद्धिहीनो निन्दाभाजनं चेत्याशयेनाह–कश्चेति । प्राज्ञः कः ससंशयं कार्यम् निःसंशयं निर्विचारं कुर्यात् ॥ ३५ ॥

३६] ति० टी०–सीताभिभाषणे । पुरतः स्थित्वेति शेषः ॥ ३६ ॥

रा० टी०–एष इति । सीताभिभाषणे वैदेह्याः प्राणत्यागः राक्षसकर्तृकप्राणत्याजनम् अनभिभाषणे च प्राणत्यागः शोककर्तृकप्राणत्याजनम् एष महान् दोषो मम स्यात् ॥ ३६ ॥

गो० टी०–प्राणत्यागश्चेति । अनभिभाषणे रामसंदेशानिवेदने । एष दोषः पूर्वोक्तसीतासंत्रासाक्रोशतन्निमित्तराक्षसागमनादिः । सीताभिभाषणे वानररूपेण पुरः स्थित्वाऽभिभाषणे ॥ ३६ ॥

३७–३९] ति० टी०–भूताः सिद्धप्रायाः । भूता इत्यादिश्लोकावत्रैव काण्डे द्वितीयसर्गे व्याख्यातौ ॥ ३७–३९ ॥

रा० टी०–भूता इति । भूताः सिद्धप्रायाः अर्थाः विक्लव-

१ साहाय्यमिति गो. पाठः । २ नश्यन्तीति गो. पाठः । ३ भवेदिति गो. पाठः ।

कथं नु खलु वाक्यं मे शृणुयान्नोद्विजेत च[1] । इति संचिन्त्य हनुमांश्चकार मतिमान्मतिम् ॥ ४० ॥
राममक्लिष्टकर्माणं स्वबन्धुमनुकीर्तयन् । नैनामुद्वेजयिष्यामि तद्बन्धुगतचेतनाम्[2] ॥ ४१ ॥
इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः । शुभानि धर्मयुक्तानि वचनानि समर्पयन् ॥ ४२ ॥
श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन्गिरम् । श्रद्धास्यति यथा सीता तथा सर्वं समादधे ॥ ४३ ॥
इति स बहुविधं महाप्रभावो[3] जगतिपतेः प्रमदामवेक्षमाणः ।
मधुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिंशः सर्गः ॥ ३० ॥

मनवधानं दूतमासाद्य प्राप्य देशकालविरोधिताः सन्तः सूर्योदये तम इव विरुध्यन्ति अन्यथा भवन्ति । एतेन दूतैरतिसावधानतया भवितव्यमिति सूचितम् ॥ ३७ ॥

गो० टी०–भूताश्चेति । भूताश्चार्थाः निष्पन्नार्थाः । विक्लवम् अविवेकिनम् दूतमासाद्य देशकालविरोधिताः सन्तः सूर्योदये तमो यथा विनश्यति तथा विनश्यन्तीति संबन्धः॥३७॥

रा० टी०–अर्थेति । हि यदि पण्डितमानिनो दूताः कार्याणि घातयन्ति तर्हि अर्थानर्थान्तरे कर्तव्याकर्तव्यविषये निश्चितापि स्वामिसचिवैर्निश्चयं प्रापितापि बुद्धिर्न शोभते यतः पण्डितमानिनः पण्डितंमन्याः दूताः कार्याणि घातयन्ति ॥ ३८ ॥

गो० टी०–अर्थेति । अत्र विक्लवं दूतमासाद्येत्यनुषज्यते । अर्थानर्थान्तरे कार्याकार्यविषये । निश्चितापि स्वामिना सचिवैः सह निश्चितापि बुद्धिः विक्लवं दूतमासाद्य न शोभते अकिंचित्कराभिभवतीत्यर्थः । एतदेवोपपादयति—घातयन्तीति ३८

रा० टी०–न विनश्येत्यादिश्लोकद्वयमष्टाविंशतितमे सर्गे व्याख्यातम् ॥ ३९ ॥ ४० ॥

गो० टी०–प्रागुक्ता दूतदोषाः स्वस्मिन्यथा न स्युस्तथा कर्तव्यमित्याह—न विनश्येदिति । कार्यं स्वामिकार्यं कथं केन प्रकारेण न विनश्येत् । वैक्लव्यं बुद्धिहीनता मम कथं न भवेत् । समुद्रलङ्घनं कथं न वृथा भवेत् । तथा कर्तव्यमिति शेषः ॥ ३९ ॥

४०] ति० टी०–शृणुयात् सीतेति शेषः ॥ ४० ॥

गो० टी०–कथमिति । अथ सीतेत्यध्याहार्यम् । हनुमान् मे वाक्यं सीता कथं केन प्रकारेण श्रुणुयात्कथं नोद्विजेतेति विचार्य मतिमान् प्रशस्तमतिः मतिं तत्कालोचितकर्तव्यविषयां चकार निष्पादयामास ॥ ४० ॥

४१] ति० टी०–स्वबन्धुम् । सीताया इति शेषः । स चासौ बन्धुश्चेति तद्बन्धुः । तद्बन्धौ रामे गता चेतना चित्तं यस्याः सा ॥ ४१ ॥

रा० टी०–स्वनिश्चयमाह—राममिति । अक्लिष्टकर्माणं क्लेशकारककियारहितं स्वबन्धुं स्वस्याः सीतायाः बन्धुं प्रियं राममनुकीर्तयन्नहं तद्बन्धुगतमानसाम् एनां नोद्वेजयिष्यामि ॥ ४१ ॥

गो० टी०–राममिति । स्वबन्धुं राममनुकीर्तयन् "लक्षणहेत्वोः" इति हेत्वर्थे शतृप्रत्ययः । नैनामुद्वेजयिष्यामि एनां मद्रूपप्रदर्शनमन्तरेण रामस्य कीर्तनेनैवानुद्विग्नां करिष्यामीत्यर्थः । तद्बन्धुगतमानसां स चासौ बन्धुश्च तद्बन्धुरामः तद्गतमानसाम् ॥ ४१–४३ ॥

४२] ति० टी०–वचनानि समर्पयन्रागसंदेशवचनान्युच्चारयन् ॥ ४२ ॥

रा० टी०–इक्ष्वाकूणामिति । इक्ष्वाकूणां वरिष्ठस्य रामस्य धर्मयुक्तानि वचनानि संदेशवाक्यानि समर्थयन् उच्चारयन् सन् तिष्ठामीति शेषः ॥ ४२ ॥

४३] ति० टी०–यथेयं श्रद्धास्यति तथा सर्वं समादधे सम्यगभिधास्ये ॥ ४३ ॥

रा० टी०–श्रावयिष्यामिति । मधुरां गिरं प्रब्रुवन् सन् सर्वाणि रामसंदेशवचनानि श्रावयिष्यामि यथा येन प्रकारेण सीता श्रद्धास्यति रामवचनत्वेन श्रद्धां करिष्यति तथा सर्वं सीतायाः आशङ्कितजातं समादधे प्रत्युत्तरयामि ॥ ४३ ॥

४४] ति० टी०–जगतिपतेरिति ह्रस्व आर्षः ॥ ४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०–इतीति । जगतिपतेर्जगतीपतेर्निखिलब्रह्माण्डस्वामिनो रामस्य प्रमदामवेक्षमाणः अत एव द्रुमविटपान्तरं तरुशाखामध्यम् आस्थितो हनुमान् मधुरं शोभनवर्णादिजनितमाधुर्यविशिष्टम् अवितथं मृषासंसर्गशून्यं वाक्यं जगाद॥४४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रिंशः सर्गः ॥ ३० ॥

गो० टी०–इतीति । जगतिपतेरिति दीर्घाभाव आर्षः जगादेति वक्ष्यमाणसर्गार्थसंग्रहः ॥ ४४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

१ वेति गो. पाठः । २ मानसामिति गो. पाठः । ३ महानुभाव इति गो. पाठः ।

एकत्रिंशः सर्गः ।

शिंशपास्थेन हनुमता मानुषीं भारतीमाश्रित्य रामजननादारभ्य स्वीयसीतादर्शनान्तं प्रतिपादितवृत्तं श्रुत्वा हर्षनिर्भरा सीता सर्वतश्चक्षुश्चालनेन निर्वर्णयन्ती शिंशुपाशाखास्थं हनुमन्तं विलोकयति ।

एवं बहुविधां चिन्तां चिन्तयित्वा महामतिः । संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १ ॥
राजा दशरथो नाम रथकुञ्जरवाजिमान् । पुण्यशीलो महाकीर्तिरिक्ष्वाकूणां महायशाः ॥ २ ॥
[राजर्षीणां गुणश्रेष्ठस्तपसा चर्षिभिः समः । चक्रवर्तिकुले जातः पुरन्दरसमो बले ॥]
अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः । मुख्यस्येक्ष्वाकुवंशस्य लक्ष्मीवाँल्लक्ष्मिवर्धनः ॥ ३ ॥
पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः । पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी ॥ ४ ॥
तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः । रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥ ५ ॥
रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता । रक्षिता जीवलोकस्य धर्मस्य च परंतपः ॥ ६ ॥
तस्य सत्याभिसंधस्य वृद्धस्य वचनात्पितुः । सभार्यः सह च भ्रात्रा वीरः प्रव्रजितो वनम् ॥ ७ ॥
तेन तत्र महारण्ये मृगयां परिधावता । राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ ८ ॥
जनस्थानवधं श्रुत्वा निहतौ खरदूषणौ । ततस्त्वमर्षापहृता जानकी रावणेन तु ॥ ९ ॥

१-२] ति० टी०-चिन्तां चिन्तयित्वा चिन्तां कृत्वा कर्तव्यमर्थं निश्चित्येति यावत् । संश्रवे सम्यक्श्रवणयोग्ये समीपदेशे । यत्रोक्तं सीतैव शृणुयान्नान्य इत्यर्थः । व्याजहार वृत्तान्तमिति शेषः ॥ १ ॥ २ ॥

३] ति० टी०-मुख्यस्य राजवंशेषु श्रेष्ठस्य । लक्ष्मिवर्धन इति ह्रस्व आर्षः ॥ ३ ॥

रा० टी०-सीतां श्रावयितुं हनुमत्कर्तृकदशरथादिसंकीर्तनमाह-एवमित्यादिभिः । महामतिः हनुमान् वैदेह्याः संश्रवे संश्रवणार्थं मधुरं वाक्यं व्याजहार ॥ १ ॥

गो० टी०-एवमित्यादि । चिन्तां चिन्तयित्वा चिन्तां कृत्वा कर्तव्यमर्थं निश्चित्येत्यर्थः । संश्रवे सम्यक् श्रूयतेऽस्मिन्निति संश्रवः समीपं समीपे व्याजहार । यद्वा पाठ्ये गेये च मधुरमिति संश्रवे श्रवणे मधुरं ज्ञानप्रसरणद्वारा इन्द्रियेभ्यो निस्सृत्य विषयान् गृहीत्वा तदनन्तरं हि रसो जायते लोके अत्र न तथा यत्र शब्दसंसर्गो जायते तत्र रसो जायत इत्यतिशयोक्तिः । मधुरं ज्ञानमपि तद्वारा रसजनकं वाक्यं पूर्वापरनिरूपणं विना स्वयं रसजनकं वैदेह्याः वैदेहीनिमित्तम् । कुलानुरोधेन देहे निस्स्पृहायाः देहमपि दत्त्वा रसावहत्वमुच्यते ॥ १ ॥

रा० टी०-तद्वचनाकारमाह-राजेत्यादिभिः । घृणी दयावान् अत एव अहिंसारतिः अत एव अक्षुद्रः क्षुद्रसंसर्गरहितः मुख्यस्येक्ष्वाकुवंशस्य लक्ष्मिवर्धनः लक्ष्मीवर्धनः लक्ष्म्याः प्रवर्धनः अत एव लक्ष्मीवान् पार्थिवव्यञ्जनैः राजचिह्नैः युक्तः पृथुश्रीः अतिशोभावान् चतुरन्तायां च चतुःसमुद्रपर्यन्तायां पृथिव्यां विश्रुतः ख्यातः राजा बभूवेति शेषः । श्लोकत्रयमेकान्वयि ॥ २-४ ॥

गो० टी०-राजेत्यादि । वितरणविक्रमादिजनितत्वेन कीर्तियशसोर्भेदोऽवगन्तव्यः । पार्थिवव्यञ्जनैः राजलक्षणैः ॥ २-७ ॥

४-६] ति० टी०-पार्थिवव्यञ्जनैः छत्रचामरादिभिर्बाह्यैः सामुद्रिकोक्तैः शारीरैश्च राजचिह्नैर्युक्तः । सुखदो मित्राणाम्४-६

रा० टी०-तस्येति । स्ववृत्तादेः रक्षिता तस्य दशरथस्य रामो नाम ज्येष्ठः पुत्रः सत्याभिसंधस्य सत्यप्रतिज्ञस्य तस्य दशरथस्य पितुर्वचनात् वनं प्रव्रजितः समागतः । श्लोकत्रयमेकान्वयि ॥ ५-७ ॥

७] ति० टी०-सत्याभिसंधस्य सत्यसंकल्पस्य ॥ ७ ॥

गो० टी०-तस्येति । तस्य पितुर्वचनाद्वनं प्रव्राजितः गतः स्वार्थे णिच् ॥ ८ ॥

८] ति० टी०-मृगयामुद्दिश्य धावता ॥ ८ ॥

रा० टी०-तेनेति । मृगयां परिधावता तेन रामेण बहवो राक्षसा निहताः ॥ ८ ॥

गो० टी०-तेनेति । मृगयां परिधावता मृगयामुद्दिश्य परिधावता । अनेन लीलया खरादिवधः सूच्यते ॥ ९ ॥

९] ति० टी०-जनस्थानवधं खरदूषणौ निहतौ च श्रुत्वा रावणेनामर्षापहृता वैरेणापहृता तु ॥ ९ ॥

रा० टी०-जनेति । खरदूषणौ निहतौ श्रुत्वा अत एव जनस्थानवधं विध्वंसं श्रुत्वा मायया मृगरूपेण रामं वञ्चयित्वा जानकी रावणेन अमर्षापहृता अमर्षेणापहृता । सार्धश्लोक एकान्वयी ॥ ९ ॥

---

१ कपिरिति गो. पाठः । २ ऋजुरासीदिति गो. पाठः । ३ श्लोकोऽयमधिकः गो. पाठे । ४ धर्मस्येति गो. पाठः । ५ चेति गो. पाठः । ६ व्राजित इति गो. पाठः । ७ हतौ चेति गो. पाठः ।

वञ्चयित्वा वने रामं मृगरूपेण मायया । स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम् ॥ १० ॥
आससाद वने मित्रं सुग्रीवं नाम वानरम् । ततः स वालिनं हत्वा रामः परपुरञ्जयः ॥ ११ ॥
आयच्छत्कपिराज्यं तु सुग्रीवाय महात्मने । सुग्रीवेणाभिसंदिष्टा हरयः कामरूपिणः ॥ १२ ॥
दिक्षु सर्वासु तां देवीं विचिन्वन्तः सहस्रशः । अहं संपातिवचनाच्छतयोजनमायतम् ॥ १३ ॥
तस्या हेतोर्विशालाक्ष्याः समुद्रं वेगवान्प्लुतः । यथारूपां यथावर्णां यथालक्ष्मवतीं च ताम् ॥ १४ ॥
अश्रौषं राघवस्याहं सेयमासादिता मया । विरराम[1]वमुक्त्वा स वाचं वानरपुङ्गवः ॥ १५ ॥
जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता । ततः सा वक्त्रकेशान्ता सुकेशी केशसंवृतम् ॥
उन्नम्य वदनं भीरुः [2]शिंशपामन्ववैक्षत ॥ १६ ॥

निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य ।
स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरन्ती ॥ १७ ॥
सा तिर्यगूर्ध्वं च तथा ह्यधस्तान्निरीक्षमाणा तमचिन्त्यबुद्धिम् ।
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थम् ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–जनस्थानेति । जनस्थानपदं जनस्थानरक्षोवधम् अमर्षेणापहृता अमर्षापहृता । मृगरूपेण मृगसौन्दर्येण प्रशस्तमृगेण वा । " प्रशंसायां रूपप् " ॥१०–१४॥

१०–१३] ति० टी०–मायया मृगरूपेण मारीचेन करणेन । रामं वञ्चयित्वेत्यर्थः ॥ १०–१३ ॥

रा० टी०–स इति । सीतां मार्गमाणः स रामः सुग्रीवं नाम वानरं मित्रमाससाद प्राप चकारेत्यर्थः । अर्धद्वयमेकान्वयि ॥ १० ॥

बालिनं हत्वा कपिराज्यं सुग्रीवाय प्रायच्छत् ॥ ११ ॥

रा० टी०–सुग्रीवेणेति । सुग्रीवेणाभिसंदिष्टाः सर्वे हरयः सर्वासु दिक्षु तां सीतां विचिन्वन्तो वर्तन्त इति शेषः ॥ १२ ॥

रा० टी०–अहमिति । वेगवानहं संपातिवचनात् सीताबोधकसंपातिवाक्यं संश्रुत्य तस्याः सीताया हेतोः समुद्रं प्लुतः ॥ १३ ॥

१४] ति० टी०–तस्या हेतोस्तदन्वेषणहेतोः । यथारूपां यादृग्रूपां यादृग्वर्णां यादृक्चिह्नवतीं च । तां सीताम् ॥ १४ ॥

रा० टी०–यथेति । यथारूपां यादृशरूपविशिष्टां यथालक्ष्मवतीं यादृशचिह्नविशिष्टां तां सीतां राघवस्य राघवादहमश्रौषं तादृशी सेयं कान्ता मया आसादिता प्राप्ता ॥ १४ ॥

गो० टी०–यथारूपामिति । यथारूपां यादृशशरीराम् । यथावर्णां यादृशरूपाम् । यथालक्ष्मीं यादृशकान्तिम् । राघवस्य राघवात् ॥ १५ ॥ १६ ॥

१५] ति० टी०–राघवस्य मुखादहमश्रौषं सेयमासादिता दृष्टा इहेति शेषः ॥ १५ ॥

रा० टी०–विरराम इति । स हनूमान् एवमुक्त्वा विरराम जानकी तु तच्छ्रुत्वा परमं विस्मयं गता प्राप्ता । चस्त्वर्थौ॥१५॥

१६–१८] ति० टी०–केशसंवृतम् असंस्कारतः प्रकीर्णत्वात् ॥ १६–१८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

रा० टी०–तत इति । ततः रामवार्ताश्रवणानन्तरं सा सीता केशसंवृतं वदनमुन्नम्य उर्ध्वं कृत्वा शिंशुपामन्ववेक्षत ॥ १६ ॥

गो० टी०–तत इति । सुकेशी नीलसूक्ष्मकेशी । वक्त्रम्णः पूर्वमुक्तत्वात् ॥१७॥१८॥

रा० टी०–निशम्येति । सीता कपेर्वचनं निशम्य अत एव सर्वा दिशो वीक्ष्य सर्वात्मना सर्वप्रकारेण राममनुस्मरन्ती सती परमं प्रहर्षं जगाम ॥ १७ ॥

रा० टी०–सेति । तिर्यगादिनिरीक्षमाणा सा सीता अचिन्त्यबुद्धिं पिङ्गाधिपतेः सुग्रीवस्य अमात्यं वातात्मजम् उदयस्थमुदयगिरिस्थितं सूर्यमिव ददर्श ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–सेति । पार्श्वम् आकाशं भूमिं चावेक्षमाणा । अधस्तादित्यनेन यथा भूमिं भित्त्वा कश्चिन्नरः रामनामानि कीर्तयेत्तथान्यत्रापीत्यपिना संभावनोच्यते । शिंशुपावृक्षस्याधस्तात्तिर्यगूर्ध्वमिति वा तमचिन्त्यबुद्धिं ददर्श । तद्वृत्तवलोकनात् पूर्वं तस्य हृदयमेवं परिच्छिनत्ति स्म । इह लङ्कायां प्रवि-

१ तदिति गो. पाठः । २ शिंशुपावृक्षमिति गो. पाठः ।

द्वात्रिंशः सर्गः ।

प्रत्यक्षदृष्टमपि हनुमन्तं स्वाप्नं विभाव्य स्वप्ने कपिदर्शनमनर्थावहमिति मन्वाना सीता रामादिकुशलं परिचिन्त्याथ कारणान्तरैस्तस्या स्वाप्निकत्वं निश्चिन्वाना हनुमदुक्तस्य याथार्थ्यसिद्धये ब्रह्मादीन्प्रार्थयते ।

ततः शाखान्तरे लीनं दृष्ट्वा चलितमानसा । वेष्टितार्जुनवस्त्रं तं विद्युत्संघातपिङ्गलम् ॥ १ ॥
सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम् । फुल्लाशोकोत्करा भासं तप्तचामीकरेक्षणम् ॥ २ ॥
सोऽथ दृष्ट्वा हरिश्रेष्ठं विनीतवदवस्थितम् । मैथिली चिन्तयामास विस्मयं परमं गता ॥ ३ ॥
अहो भीममिदं सत्त्वं वानरस्य दुरासदम् । दुर्निरीक्ष्यमिदं मत्वा पुनरेव मुमोह सा ॥ ४ ॥
विललाप भृशं सीता करुणं भयमोहिता । राम रामेति दुःखार्ता लक्ष्मणेति च भामिनी ॥ ५ ॥
रुरोद सहसा सीता मन्दमन्दस्वरा सती । सार्थं दृष्ट्वा हरिवरं विनीतवदुपागतम् ॥
मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ ६ ॥

सा वीक्षमाणा पृथुभग्नवक्त्रं शाखामृगेन्द्रस्य यथोक्तकारम् ।
ददर्श पिङ्गप्रवरं महार्हं वातात्मजं बुद्धिमतां वरिष्ठम् ॥ ७ ॥

श्यावरोधारामम्मध्यप्रवेशेनायं निपुणतरमतिरिति निश्चितवतीत्यर्थः । पिङ्गाधिपतेरमात्यं स्वरविशेषेणायं वानरः तत्रापि न स्वतन्त्रः किन्तु स्वसजातीयस्य राज्ञः कस्यचिदमात्योऽयम् तद्राज्यकार्यमेतदस्तगतमिति निश्चितवती । वातात्मजं रामप्राणहेतुभूतमत्प्राणनहेतुत्वेन सर्वप्राणिप्राणनहेतुत्वेन वायुपुत्रोऽयमित्यवगतवती । सूर्यमिवोदयस्थं रामदिवाकरस्योदयसूचकमुदयगिरिस्थमरुणमिव स्थितम् । सूरः सूर्यः 'सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः । सूरसूतोरुणोऽरुरित्युक्तेः सूरस्य संबन्धी सूर्यः दिगादित्वाद्यत् । भवतापि संबन्धः विशेष एव । यद्वा सूर्यशब्देन तत्संबन्ध्यरुणो लक्ष्यते । सूर्योऽरुणे च सूर्ये 'च' इति निघण्टुरस्तीत्याहुः। औचित्यादत्र सूर्योऽरुणः ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

१-३] ति० टी०-लीनं दृष्ट्वाऽस्फुरन्तं दृष्ट्वा चलितमानसाऽदृष्टरूपोऽयमपि मायामृगो वेति चलितचित्ता । पुनः सम्यङ्निरीक्ष्योच्यमानविशेषणं कपिं ददर्श । वेष्टितं परिहितमर्जुनवर्णं वस्त्रं येन तम् ॥ १-३ ॥

रा० टी०-हनुमद्वचनश्रवणानन्तरकालिकं सीतावृत्तान्तमाह-तत इत्यादिभिः । ततः हनुमद्वचनश्रवणसमये वेष्टितं धृतमर्जुनवस्त्रम् अर्जुनवर्णसदृशवर्णविशिष्टपटो येन तं विद्युत्संघातवत् पिङ्गलं शाखान्तरे शाखामध्ये लीनं हनुमन्तं दृष्ट्वा चलितमानसाऽभवदिति सीतेति च शेषः ॥ १ ॥

गो० टी०-ततः शाखान्तरे लीनमित्यादि श्लोकद्वयमेकान्वयम् । दृष्ट्वा पूर्वं सामान्यतो दृष्ट्वा भयाच्चलितमानसा सतीति विशेषतो ददर्श । वेष्टितार्जुनवस्त्रं वेष्टितधवलवस्त्रम् तं पूर्वोक्तम् ॥ १-४ ॥

रा० टी०-सेति । फुल्लाशोकोत्करवदाभासो यस्य तं तप्तचामीकरेक्षणं तप्तसुवर्णवर्णवस्त्रविशिष्टं हनुमन्तं ददर्श निरन्तरमवलुलोके ॥ २ ॥

रा० टी०-सेति । विनीतवत् आविनीतोक्त्या अवस्थितं हरिश्रेष्ठं दृष्ट्वा परमं विस्मयं गता मैथिली चिन्तयामास ॥ ३ ॥

४] ति० टी०-वानरस्य निर्धारणे षष्ठी जातावेकवचनम् वानराणां मध्ये इदं सत्त्वं जीवः, भीमं प्राकृतप्राणिभयावहम्, अत एव तैर्दुरासदं दुर्निरीक्ष्यं चेति मत्वा पुनरपि मायैवेयमिति भयान्मुमोह ॥ ४ ॥

रा० टी०-चिन्ताकारमाह-अहो इति । वानरस्य इदं सत्त्वं शरीरं भीमं रक्षसां भयंकरम् अत एव दुरासदं ग्रहीतुमशक्यम् अत एव दुर्निरीक्ष्यमिदमिति मत्वापि पुनर्मुमोह रामातिस्मृत्या वैचित्यं प्राप । एवोऽप्यर्थे ॥ ४ ॥

५] ति० टी०-अथ भयमोहिता सती भृशं करुणं दीनं विललाप । विलापप्रकारः—रामेत्यादि ॥ ५ ॥

रा० टी०-विललापेति । भयमोहिता भयं मोहितं यया सापि सीता दुःखार्ता सती भृशं विललाप ॥ ५ ॥

६] ति० टी०-मन्दमन्दस्वरा । अस्य दैवगत्या वास्तवत्वे राक्षस्यो मा जानन्त्वित्यतिमन्दस्वररोदनम् । विनीतवद्विनीततयोपस्थितम् । स्वप्नः जाग्रत्कल्पः स्वप्न इत्यर्थः ॥६॥

रा० टी०-रुरोदेति । मन्दत्वरा सती मन्दं मन्दं रुरोद अर्धं पृथक्। मन्दस्वरेत्यनेनेमं वानरं राक्षस्यो न जानन्त्वित्यभिप्रायः सूचितः । सेति । विनीतवदुपागतं हरिवरं दृष्ट्वा स्वप्नोऽयमिति चिन्तयामास तर्कयामास । अर्धद्वयमेकान्वयि ॥६॥

गो० टी०-रुरोदेत्यर्धम् । मन्दं राक्षस्यः श्रुत्वा किमिदमिति विचारयिष्यन्तीति भयेनेति भावः ॥ ५ ॥ ६ ॥

७] ति० टी०-स्वप्नत्वचिन्तापूर्वकमेव पुनर्दर्शनमुपन्य-

१ अर्धमेतत् गो. नास्ति । २ रूपमिति गो. पाठः । ३ बहुधेति गो. पाठः । ४ तमिति गो. पाठः । ५ श्रेष्ठमिति गो. पाठः । ६ उपस्थितमिति गो. पाठः । ७ भुग्नेति गो. रा. पाठः ।

सा तं समीक्ष्यैव भृशं [1]विपन्ना गतासुकल्पेव बभूव सीता ।
चिरेण संज्ञां प्रतिलभ्य चैवं विचिन्तयामास विशालनेत्रा ॥ ८ ॥
स्वप्नो मयायं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः ।
स्वस्त्यस्तु रामाय सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः ॥ ९ ॥
स्वप्नो [2]हि नायं नहि मेऽस्ति निद्रा शोकेन दुःखेन च पीडितायाः ।
सुखं हि मे नास्ति यतो विहीना तेनेन्दुपूर्णप्रतिमाननेन ॥ १० ॥
रामेति रामेति सदैव बुद्ध्या विचिन्त्य वाचा ब्रुवती तमेव ।
तस्यानुरू[3]पं च कथां तँदर्था[4]मेवं प्रपश्यामि तथा शृणोमि ॥ ११ ॥

स्यति–सेति । किमिदं वाक्यं राक्षस्यः श्रुतवत्य इति परितो वीक्षमाणा सा पृथुभग्नं वज्रप्रहाराद्वक्रं यस्य तम् । शाखामृगेन्द्रस्य यथोक्तकारमाज्ञाकरम् । यद्वा यथोक्तवेष्टितार्जुनवक्षाश्याकारम् छान्दसो ह्रस्वः पिङ्गप्रवरं कपिश्रेष्ठमिति निश्चयेन ददर्श ॥ ७ ॥

रा० टी०–सेति । पृथु अधिकं भग्नं वज्रेण कृतव्रणं वक्रं यस्य तं मृगेन्द्रस्य सुग्रीवस्य यथोक्तकारम् अज्ञापितमात्रकारकं पिङ्गप्रवरं वानरश्रेष्ठं महार्हं वातात्मजं वीक्षमाणा सा सीता ददर्श केनोक्तमिति विचारयामास ॥ ७ ॥

गो० टी०–सेति । वीक्षमाणा विचारयन्ती । ददर्श पुनरनुकूलोऽयं स्यादिति ददर्शेत्यर्थः । भुग्नवक्रं वक्रमुखम् यथोक्तकारम् आज्ञाकरम् ॥ ७ ॥

८] ति० टी०–सा तं कपिरूपं रावणमित्येव समीक्ष्य भृशं विसंज्ञा चित्तक्षोभाद्गतासुकल्पेव ॥ ८ ॥

रा० टी०–सेति । सा सीता तं हनूमन्तं समीक्ष्य रावणत्वेन वितर्क्य गतासुकल्पा गतप्राणसदृशी भृशमत्यन्तं विपन्ना चेष्टारहिता बभूव चिरेण किंचिद्विलम्बतः संज्ञां प्रतिलभ्य विचिन्तयामास ॥ ८ ॥

गो० टी०–सा तमिति । विसंज्ञा मूर्च्छिता । गतासुकल्पा मृतप्राया । इवशब्दो वाक्यालङ्कारे । चिरेण संज्ञां प्रतिलभ्य कालेनैव प्रबोधकेन प्रबुद्धवतीत्यर्थः । विकृतवानरवेषदर्शनेन मूर्च्छिता पुनः कालेन प्रबुद्धेत्यर्थः ॥ ८ ॥

९] ति० टी०–एवं चिन्तयामासेत्यत्रैवंशब्दार्थः–स्वप्न इत्यादि । दृश्यमानोऽयं स्वप्नो मया विकृत एव दृष्टः । कुतस्तत्राह–शाखामृग इत्यादि । एवं दुःस्वप्नं मत्वा स्वस्ति प्रार्थयते । जनकस्य तद्दृश्यस्य ॥ ९ ॥

रा० टी०–विचिन्ताकारमाह—स्वप्न इत्यादिभिः । विकृतः चित्तविकारेणोत्पन्नः शास्त्रगणैर्वचनसमूहैर्निषिद्धः शाखामृगः शाखामृगदर्शनादिमयः अयं स्वप्नो मया दृष्टः एतेन स्वप्नश्रेदृयमनिष्टकारको भविष्यतीति सूचितम् । दुःस्वप्नजनितारिष्टनिवारणायाह–रामादये स्वस्त्यस्तु ॥ ९ ॥

गो० टी०–स्वप्न इति । स्वप्ने स्वप्नस्थाने । स्वप्ने वानरदर्शनं बन्धुविनाशकरमिति भावः । ९ ॥

१०] ति० टी०–अथ स्वप्नहेत्वभावान्नायं स्वप्न इत्याह–स्वप्नो हीति । स्वप्नस्य निद्रामूलत्वान्निद्रायाश्च सुखमूलत्वाद्रामवियोगेन च मे सुखाभावादिति भावः ॥ १० ॥

रा० टी०–स्वप्नकारणाभावादयं न स्वप्न इति निश्चित्याह–स्वप्न इति । इन्दुपूर्णप्रतिमाननेन तेन रामेण यतोऽहं विहीना अतो मे सुखं नास्ति अत एव शोकेन दुःखेन च पीडितायाः मे निद्रा नास्ति अत एव अयं वानरदर्शनादिः स्वप्नो न कारणाभावात्कार्यस्यासंभव इति तात्पर्यम् ॥ १० ॥

गो० टी०–एवं दर्शनस्य स्वप्नत्वं संभाव्य पुनर्यथार्थ्यमाह—स्वप्नोऽपीति । स्वप्नाभावे हेतुमाह—नहि मेऽस्ति निद्रेति । निद्राभावे हेतुः—शोकेनेत्यादि । एवं प्रतिबन्धकेन निद्राभावमुक्त्वा सुखरूपहेत्वभावाच्च न निद्रेत्याह—सुखं हीति । इन्दुपूर्णप्रतिमाननेन पूर्णेन्दुप्रतिमाननेन ॥ १० ॥

११] ति० टी०–सदा रामेति विचिन्त्य वाचा तमेव ब्रुवन्त्यहं तस्य चिन्तनादेरनुरूपं यथा तथा शृणोमि । श्रूयमाणां च कथां तथा तेन प्रकारेण तदर्थामेव चिन्ताद्यनुरूपार्थामेव पश्यामि ॥ ११ ॥

रा० टी० ननु एवं दुःखप्राप्तौ कथं तव जीवनमित्यत आह—रामेतीति । तं राममेव बुद्ध्या विचिन्त्य संस्मृत्य सदैव रामेति रामेति ब्रुवती अहं तस्य रामस्य अनुरूपं योग्यं वस्तु प्रपश्यामि विचारयामि मनसा रामाय समर्पयामीत्यर्थः । तदर्थां रामबोधिकां कथां वचनं शृणोमि एतेनेदमेव मम जीवनमिति सूचितम् । कथां शृणोमीत्यस्य नाप्रसिद्धिः त्रिजटया कदाचिदागतविभीषणानुचरीभिश्च रामकथायाः कथ्यमानत्वात् ॥ ११ ॥

गो० टी०–रामेति । सदैव बुद्ध्या विचिन्त्य तमेव राममेव वाचा ब्रुवती । तस्यानुरूपां विचिन्तितस्याभिवदनस्यानुरूपां कथां तथा शृणोमि । तमर्थं कथार्थमेवं प्रपश्यामि । एवम् उक्तप्रकारेण जानामीत्यन्वयः । तदर्थामिति पाठे अयमर्थः ।

१ विसंज्ञेति गो. पाठः । २ऽपीति गो. पाठः । ३ रूपामिति गो. पाठः । ४ तमर्थमिति गो. पाठः

अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा ।
विचिन्तयन्ती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥ १२ ॥
मनोरथः स्यादिति चिन्तयामि तथापि बुद्ध्यापि[1] वितर्कयामि ।
किं कारणं तस्य हि नास्ति रूपं सुव्यक्तरूपश्च वदत्ययं माम् ॥ १३ ॥
नमोऽस्तु वाचस्पतये सवज्रिणे स्वयंभुवे चैव हुताशनाय ।
अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथास्तु नान्यथा ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

तस्यानुरूपां रामकीर्तनस्यानुरूपाम् । तदर्थां स रामोऽर्थोभिधेयो यस्याः ताम् ॥ ११ ॥

१२] ति० टी०–उक्तमेवार्थं विवृणोति–अहं हीति॥१२॥

रा० टी०–नन्वेवं किमर्थं शोचसीत्यत आह–अहमिति। तं राममेव विचिन्तयन्ती अहं मनोभवेन मनोनिष्ठभावनया तस्य रामस्य यथापि पश्यामि शृणोमि च तथापि तद्गतसर्वभावा तस्मिन् रामे गतः सन्निविष्टः सर्वः प्रत्यक्षादिना संपादितो भावो भावना यस्याः साऽहमद्य पीडितास्मि एतेन प्रत्यक्षतो रामलाभमन्तरा दुःखनिवृत्तिर्न भविष्यतीति सूचितम् ॥ १२ ॥

गो० टी०–उक्तमर्थं विवृणोति–अहं हीति ॥ १२ ॥

१३] ति० टी०–अथ मनोरथमात्रमेतदिति संभाव्य तदपि नेति निश्चिनोति–मनोरथ इति । मनोराज्यमित्यर्थः । स नेत्याह–तथापीति । तथैवेत्यर्थः । यथा मनोरथोन्नीतोऽर्थस्तं तथैव बुद्ध्यापि निश्चयात्मकान्तःकरणवृत्त्यापि विषयीकृतं तर्कयामि । मनोराज्यं संकल्पविकल्पपरं चञ्चलवृत्तिरूपम्, बुद्धिस्तु निश्चयात्मिका स्थिरा चेति विरुद्धमित्यर्थः । नन्वेवं तर्हि मनोराज्यत्वमेवास्त्वितरदेवारोपितं तत्राह–किं कारणमिति । मनोराज्यत्वाभाव इति शेषः । उत्तरं तस्य हि मनोराज्यभूतार्थस्य नास्ति रूपमनुभवार्हं रूपं नास्तीति हि प्रसिद्धम् । प्रकृते तु दृश्यं रूपमस्तीत्याह–सुव्यक्तेति । यो मां वदति सुव्यक्तरूपो दृश्यते सुव्यक्तरूपं च वदति यत इत्यर्थः । मनोराज्यार्थो दृष्टनष्टो बाह्येन्द्रियजस्थिरानुभवानर्हः । अतो वास्तव एवायमिति भावः ॥ १३ ॥

रा० टी०–नन्वेवं स्वाप्निकत्वाभावेऽपि मनोरथोऽयं भवेदित्यतो निराकुर्वती आह–मनोरथ इति । अयं मनोरथः स्यादिति चिन्तयामि तर्कयामि तथापि बुद्ध्या निश्चयात्मकान्तःकरणवृत्त्या वितर्कयामि विचारेण निश्चिनोमि । तदाकारमाह तस्य मनोरथस्य रूपं चकारेण वचनाश्रयेऽपि नास्ति अयं वानरस्तु सुव्यक्तरूपः सन् मां वदति अतः किं किमपि कारणं मनोरथत्वे हेतुर्नास्ति ॥ १३ ॥

गो० टी०–मनोरथ इति । प्रथमम् इदं रामनामकथयितृदर्शनं मनोरथः अभिलाषमात्रमिति चिन्तयामि । तथापि तथा चिन्तायां सत्यामपि बुद्ध्या वितर्कयामि मनोरथो न भवतीति विचारयामि किं कारणमिति चेत्तस्य मनोरथस्य रूपं नास्ति अयं वानरस्तु सुव्यक्तरूपश्च मां वदति च तस्मान्मनोरथो न भवेदेवेत्यर्थः ॥ १३ ॥

१४] ति० टी०–एवं हनुमद्वचसो वास्तवत्वं निर्णीयानाप्तप्रणीतत्वेन मिथ्यार्थकत्वस्यापि संभवात्तद्व्याहृतये देवान्प्रणमति–नमोऽस्त्विति । वाचस्पतित्वेन वाचः सत्यत्वसंपादनयोग्यता । वज्रिणोऽपि बृहस्पतितः सत्यवाग्रूपशब्दपारायणग्रन्थरूपमन्त्रलाभात्तदुपासकत्वेन वाचः सत्यत्वसंपादनयोग्यता । स्वयंभुवे सत्यादिरूपब्रह्मणे । वागधिष्ठातृदेवतात्वाच्चाग्नये नतिः ॥ १४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

रा० टी०–नमइति। अनेन वनौकसा ममाग्रतोऽग्रे यदुक्तं तत्तथास्तु अन्यथा न भवेत् एतदर्थमेव वाचस्पत्यादिभ्यो नमोऽस्तु ॥ १४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

गो० टी०–अनेनोक्तं सत्यमस्त्विति देवताः प्रार्थयते–नम इति । हुताशनाय च अग्नये च ॥ १४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

१ चेति गो. पाठः ।

त्रयस्त्रिंशः सर्गः ।

तस्यां निश्चितसीतात्वोऽपि हनुमांस्तन्मुखाच्छ्रुश्रूषुः सुरस्त्रीत्वादिनानाविकल्पैः प्रश्नपूर्वकं सीताऽसि तर्ह्याचक्ष्वेति पृच्छति । रावणकृतस्वापहरणान्तं निखिलवृत्तं निवेदयन्ती सीता रावणेन निश्चितमारणस्य मासद्वयावशेषस्तदवधिमोचनाभावे स्वयमेव जीवितं त्यक्ष्यामीति प्रतिजानीते ।

सोऽवतीर्य द्रुमात्तस्माद्द्रुमप्रतिमाननः । विनीतवेषः कृपणः प्रणिपत्योपसृत्य च ॥ १ ॥
तामब्रवीन्महातेजा हनूमान्मारुतात्मजः । शिरस्यञ्जलिमाधाय सीतां मधुरया गिरा ॥ २ ॥
का नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि । द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दिता ॥ ३ ॥
किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् । पुण्डरीकपलाशाभ्यां विप्रकीर्णमिवोदकम् ॥ ४ ॥
सुराणामसुराणां च नागगन्धर्वरक्षसाम् । यक्षाणां किंनराणां च का त्वं भवसि शोभने ॥ ५ ॥
का त्वं भवसि रुद्राणां मरुतां वा वरानने । वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ ६ ॥
किं नु चन्द्रमसा हीना पतिता विबुधालयात् । रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणाधिका ॥ ७ ॥
[कॅा त्वं भवसि कल्याणि त्वमनिन्दितलोचने ।]
कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे । वसिष्ठं कोपयित्वा त्वं वाऽसि कल्याण्यरुन्धती ॥ ८ ॥

१] ति० टी०–स इति । अत्यूर्ध्वशाखातः सीतासंमुखशाखायामवतीर्य द्रुमशब्दस्तदवयवपरः अत एवाग्रे 'द्रुमाश्रितम्' इति वक्ष्यति । कृपणो मातुः सीताया दुःखदर्शनादीनः । दूरात्प्रणिपत्य तत उपसृत्य समीपमागत्य ॥ १ ॥

रा० टी०–जानकीवचनश्रवणानन्तरकालिकं हनुमद्वृत्तान्तमाह–स इत्यादिभिः । विद्रुमप्रतिमं विद्रुमसदृशमाननं यस्य स हनूमान् शिरसि अञ्जलिमाधाय धृत्वा मधुरया गिरा अब्रवीत् । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–सोऽवतीर्येत्यादि । स राक्षसीषु सुप्तासु लब्धावसर इत्यर्थः । कृपणः सीताशौरथ्यदर्शनेन दीनः । जानन्नपि वैदेह्यैव वाचयितुमब्रवीत् ॥ १–३ ॥

२] ति० टी०–राक्षसीनां निशाजागरतो निद्राजाड्याश्रिजटास्वप्नश्रवणजन्यभयेनात्मत्राणाय सीतैकशरणत्वेनोपेक्षणाच्च दैवानुग्रहाच्चाप्रत्यूहः सीताहनूमतोः संलाप इति बोध्यम॥२॥

३] ति० टी०–अथ लिङ्गैः सीतेति निश्चयेऽपि तयैवसाक्षाद्वाचयितुमजानान इव पृच्छति—का न्विति ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–केत्यादिभिः । द्रुमस्य शाखामवलम्ब्य या त्वं तिष्ठसि सा त्वं काऽसि ॥ ३ ॥

४] ति० टी०–विप्रकीर्णं भिन्नघटादिव प्रसृतम् ॥ ४ ॥

रा० टी०–किमिति । विप्रकीर्णं स्फुटितघटादिभ्यो निःसृतमुदकमिव नेत्राभ्यां वारि किमर्थं स्रवति ॥ ४ ॥

गो० टी०–किमर्थमिति । तव नेत्राभ्याम् आनन्दाश्रुयोगार्हाभ्याम् किमर्थं कस्य कुलच्छेदाय यद्वा किमर्थं किं चेतासि कृत्वा । पुण्डरीकेत्यादि । इन्तैतत्सौन्दर्यं प्रणयिना रामेण दृष्टमासीदिति भावः ॥ ४ ॥

५] ति० टी०–का न्वित्यादिश्लोकद्वयोक्तार्थस्यैव प्रपञ्चः–सुराणामिति । सुरादिजातिमध्ये त्वं का किंजातीया ॥ ५ ॥

रा० टी०–सुराणामिति । हे शोभने ! सुरादीनां मध्ये त्वं का भवसि रुद्राणां मरुतां वा मध्ये का त्वं भवसि । ननु त्वमेव विचारयेत्यत आह–मे मम तु वसूनामग्रीनां देवता त्वं प्रतिभासि । किंच सुराद्यन्यतमानां का काचित् देवता त्वं मे प्रतिभासि । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–सुराणामित्यादिषु निर्धारणे षष्ठी । का त्वं कस्य संबन्धिनीत्यर्थः ॥ ५–७ ॥

६] ति० टी०–देवता प्रतिभासि दिव्यरूपलक्षणवत्त्वादिति भावः ॥ ६ ॥

७] ति० टी०–कान्त्या रोहिणीत्वाशङ्क्य । श्रेष्ठैः सर्वैर्गुणैरधिका । एतदग्रे 'का त्वं भवसि कल्याणि त्वमनिन्दितलोचने' इत्यर्धं प्रक्षिप्तम् ॥ ७ ॥

रा० टी०–तत्रापि दृढतरगमकाभावादाह–किमित्यादिभिः । विबुधालयात् पतिता अत एव चन्द्रमसा हीना ज्योतिषां श्रेष्ठा रोहिणी किं त्वमसि ॥ ७ ॥

८] ति० टी०–कोपाद्वेति । अत्रापि किं न्विति संबध्यते । कोपादिना वसिष्ठं कोपयित्वेहागता कल्याण्यरुन्धती किं नु वासि । पातिव्रत्यादरुन्धतीत्वशङ्क्या ॥ ८ ॥

रा० टी०–केति । हे अनिन्दितलोचने । अस्माल्लोकात् अस्मं परोक्षं देशं गतं प्राप्तं त्वं प्राकृतभिन्नं जनं या त्वमनुशोचसि सा त्वं काऽसि ॥ ८ ॥

रा० टी०–कोपादिति । कोपात् यदि वा मोहात् भर्तारं वशिष्ठं कोपयित्वा गता त्वमरुन्धती वासि ॥ ९ ॥

---

१ अनिन्द्यते इति गो. पाठः । २ वेति गो. पाठः । ३ श्रेष्ठसर्वगुणान्विते ति गो. पाठः । ४ अर्धमेतदधिकं गो. रा. पाठे । ५ नेति गो. पाठः ।

को नु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे । अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि ॥ ९ ॥
रोदनादतिनिःश्वासाद्भूमिसंस्पर्शनादपि । न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥ १० ॥
व्यञ्जनानि [3]हि ते यानि लक्षणानि च लक्षये । महिषी भूमिपालस्य राजकन्या च मे मता ॥ ११ ॥
रावणेन जनस्थानाद्बलात्[4]प्रमथिता यदि । सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः ॥ १२ ॥
यथा हि तव वै दैन्यं रूपं चाप्रतिमानुषम् । तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवम् ॥ १३ ॥
सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता । उवाच वाक्यं वैदेही हनूमन्तं द्रुमाश्रितम् ॥ १४ ॥
पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः । स्नुषा दशरथस्याहं शत्रुसैन्यप्रणाशिनः ॥ १५ ॥
दुहिता जनकस्याहं वैदेहस्य महात्मनः । सीतेति[6] नाम्ना चोक्ताऽहं भार्या रामस्य धीमतः ॥ १६ ॥
समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ १७ ॥
ततस्त्रयोदशे वर्षे राज्ये चेक्ष्वाकुनन्दनम् । अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥ १८ ॥

गो० टी०–का त्वमिति । हे कल्याणि ! त्वं का । अनिन्दितलोचने ! त्वं का भवसीति योजना ॥ ८ ॥

गो० टी०–कोपाद्वेति । वसिष्ठं कोपयित्वेत्यत्रापि पतिता विवुधालयादित्यनुषज्यते । नासीत्यत्र काकुरनुसंधेया ॥ ९ ॥

९] ति० टी०–अथ शोककारणं पुत्रादिवियोगोऽन्यद्वेति पृच्छति–को नु पुत्र इति । अस्माल्लोकादमुं लोकं परलोकं गतं यं त्वमनुशोचसि स पुत्रादिः को न्विति योजना ॥ ९ ॥

रा० टी०–क इति । ते पुत्रादिः कः । अथ पृथक्—रोदनादिति । रोदनादिना त्वां देवीं देवस्त्रियं न मन्ये किंतु राज्ञो रामस्य संज्ञावधारणात् अत्यन्तं नामग्रहणात् यानि व्यञ्जनानि बोधकानि ते लक्षणानि असाधारणचिह्नानि लक्षये तेभ्यश्च भूमिपालस्य निखिलब्रह्माण्डाधिपतेः रामस्य महिषी राजकन्या जनकराजपुत्री च मे मम मता निश्चिता । श्लोकद्वयं संमिलितान्वयि ॥ १० ॥ ११ ॥

गो० टी०–को न्विति । अमुं लोकं गतम् । यमिति शेषः । परलोकं गतं यं पुत्रं पितरं भ्रातरं भर्तारं वाऽनुशोचसि स क इत्यर्थः । गता त्वमित्यपि पाठः । तस्मात् स्वर्गादमुं मनुष्यलोकं गता या त्वमनुशोचसि तस्यास्ते को वा पुत्रादिरिति योजना ॥ १० ॥

१०] ति० टी०–इदानीं देवयोनित्वशङ्कां स्वयमेव निवर्तयति–रोदनादिति । अश्रुसंबन्धो भूस्पर्शश्च देवानां नास्तीति श्रुतम, तद्वत्त्वात्त्वां देवीं न मन्ये । किं च राज्ञो रामस्य संज्ञावधारणान्नामग्रहणात् ॥ १० ॥

गो० टी०–रोदनादिति । देवीं देवस्त्रियम् । संज्ञावधारणात् संज्ञायते अनयेति संज्ञा लक्षणम् राजलक्षणनिश्चयादित्यर्थः ॥ ११ ॥

११–१२] ति० टी०–भूमिपालस्य रामस्य महिषीति मे मतिः, यतो व्यञ्जनानि राममहिषीत्वप्रकाशकानि ते सान्द्रिकलक्षणानि च लक्षये, अतो रावणेन जनस्थानाद्बलात्प्रमथिता प्रमथ्य हृता यदि सीता त्वं तदा पृच्छतो ममाचक्ष्व तत्त्वं ब्रूहि । ते भद्रमस्तु ॥ ११ ॥ १२ ॥

गो० टी०–व्यञ्जनानीति । व्यञ्जनानि स्तनजघनादीनि । व्यञ्जनं तेमने चिह्ने इमश्रुण्यवयवेऽपि च इति विश्वः । लक्षणानि, शुभावर्तरेखादिसान्द्रादिकलक्षणानि ॥ १२ ॥ १३ ॥

रा० टी०–रावणेनेति । जनस्थानात् रावणेन प्रमथिता सीता यदि त्वमसि तदा पृच्छतो मे आचक्ष्व ॥ १२ ॥

१३–१५] ति० टी०–अनुक्तेऽपि त्वत्स्वरूपनिश्चयो ममास्तीति प्रौढ्याह–यथा हीति । अपरोक्षानुभवविषयामित्यर्थः ॥ १३–१५ ॥

रा० टी०–यथेति । यथा यथावत् तव दैन्यं वियोगदुःखजनितदीनता अतिमानुषं मानुषानतिक्रान्तम् अत्यद्भुतमित्यर्थः तव रूपं च तपसा अन्वितस्तव वेषश्च अस्तीति शेषः अतस्त्वं राममहिष्येव ॥ १३ ॥

गो० टी०–यथेति । यथा यादृशम् ॥ १४ ॥

रा० टी०–सेति । सा सीता तस्य हनूमतो वचनं श्रुत्वा रामकीर्तनहर्षिता सती द्रुमाश्रितं हनूमन्तमुवाच ॥ १४ ॥

गो० टी०–सेति । द्रुमाश्रितं द्रुममूलाश्रितम् । सोवतीर्येति द्रुमावतरणस्य पूर्वमुक्तत्वात् । यद्वा पूर्वमग्रादवतरणमुक्तमिति ज्ञेयम् ॥ १५ ॥

रा० टी०–तद्वचनाकारमाह—पृथिव्यामित्यादिभिः । विदितात्मनः प्रख्यातस्वरूपस्य राजसिंहानां मुख्यस्य दशरथस्य स्नुषाऽहमस्मि ॥ १५ ॥

गो० टी०–पृथिव्यामिति । शत्रुसैन्यप्रतापिनः शत्रुषु जीवत्सु न मे श्वशुरो जीवितवान् । स चेदिदानीं वर्तेत कथमहमेतादृशीमवस्थां प्राप्नुयामिति भावः ॥ १६ ॥

१६–१८] ति० टी०–अहं नाम्ना सीता इति ॥१६–१८॥

रा० टी०–दुहितेति । महात्मनो जनकस्याहं दुहिता

---

१ अर्धमेतद् कोपाद्वेत्यस्मात्प्राक् रा. पाठे । २ त्वामिति गो.रा. पाठः । ३ चेति गो. पाठः । ४ अपहृतेति गो.पाठः । ५ प्रतापिन इति गो. पाठः । ६ च नाम नाम्नाहमिति गो. पाठः ।

तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने । कैकेयी नाम भर्तारमिदं वचनमब्रवीत् ॥ १९ ॥
न पिबेयं न खादेयं प्रत्यहं मम भोजनम् । एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ २० ॥
यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम । तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ॥ २१ ॥
स राजा सत्यवाग्देव्या[1] वरदानमनुस्मरन् । मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् ॥ २२ ॥
ततस्तं स्थविरो राजा सत्यधर्मे व्यवस्थितः । ज्येष्ठं यशस्विनं पुत्रं रुदन्राज्यमयाचत ॥ २३ ॥
स पितुर्वचनं श्रीमानभिषेकात्परं प्रियम् । मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ २४ ॥
दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतम् । अपि जीवितहेतोर्हि[4] रामः सत्यपराक्रमः ॥ २५ ॥
स विहायोत्तरीयाणि महार्हाणि महायशाः । विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥ २६ ॥

सीतेति नाम्ना उक्ता जनैरभिहिता रामस्य भार्याऽहमस्मीति शेषः ॥ १६ ॥

गो० टी०–दुहितेति । सीता च नामेत्यत्र नामशब्दः प्रसिद्धौ ॥ १७ ॥

रा० टी०–समा इति । मानुषान् मनुष्यसंबन्धिनो भोगान् पदार्थान् भुञ्जानाऽहं राघवस्य निवेशने द्वादश समाः वर्षाणि अवसमिति शेषः ॥ १७ ॥

गो० टी०–समा इति । अहम् एतादृशावस्था अहम् तत्र मम श्वशुरगृहे द्वादश समाः द्वादश संवत्सरान् अत्यन्तसंयोगे द्वितीया । तेनाविच्छिन्नैकरूपभोगभोक्तृत्वमुच्यते । मानुषा नित्यनेन नात्मनो मानुषत्वं स्वाभाविकमिति सूच्यते । भोगान् भुञ्जाना अनुभवन्ती कामयन्त इति कामाः भोगोपकरणानि स्रक्चन्दनादीनि तेषां समृद्धं समृद्धिः भावे निष्ठा तदस्यास्तीति सर्वकामसमृद्धिनी । " अत इनि ठनौ " इति इनिप्रत्ययः । अभवमिति शेषः ॥ १८ ॥ १९ ॥

रा० टी०–तत इति । ततः तत्र त्रयोदशे वर्षे इक्ष्वाकुनन्दनं राममभिषेचयितुं प्रचक्रमे ॥ १८ ॥

१९] ति० टी०–नाम प्रसिद्धमित्यर्थः ॥ १९ ॥

रा० टी०–तस्मिन्निति । राघवस्याभिषेचने संभ्रियमाणे सति कैकेयी भर्तारमब्रवीत् ॥ १९ ॥

गो० टी०–तस्मिन्निति । संभ्रियमाणे संभारान् संपादयति सति । राघवस्याभिषेचने रामाभिषेकनिमित्तम् । देवी महिषी ॥ २० ॥

२०] ति० टी०–प्रत्यहं यन्मम भोजनं भोज्यं वस्तु तन्न पिबेयं न खादेयमित्यन्वयः ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–नेति । एष रामाभिषेकः मम जीवितस्यान्तः अतः यदि रामोऽभिषिच्यते तर्हि प्रत्यहं प्रतिदिनं यन्मम भोजनम् उदरे प्रापणीयं तत् न पिबेयं न खादेयम् ॥ २० ॥

गो० टी०–न पिबेयमिति । भुज्यत इति भोजनं खाद्यं पेयं च । रामो यद्यभिषिच्यते तदा मम संबन्धि यत् भोजनं तन्न पिबेय न खादेयम् एषः अयमभिषेकः जीवितस्यान्तश्च॥२१॥

२१–२२]ति० टी०–तद्देवासुरे युद्धे वरदानरूपम्॥२१-२२

रा० टी०–यदिति । यत् तत् औदार्यपोषकत्वेन अनुत्तमं वाक्यं त्वया उक्तं तत् वितथं व्यर्थं न कार्यमतो राघवो वनं गच्छतु ॥ २१ ॥

गो० टी०–यत्तदिति । तत्पूर्वोक्तं यद्वरदानरूपं वाक्यं तन्न वितथं कार्यं चेत्तदा रामो वनं गच्छतु ॥ २२ ॥

रा० टी०–स इति । सत्यवाक् स राजा देव्याः वरदानमनुस्मरन् सन् क्रूरं वियोगबोधकत्वेन घातुकम् अत एव अप्रियं कैकेय्या वचनं श्रुत्वा मुमोह ॥ २२ ॥

गो० टी०–स इति । देव्या संबन्धि स्वकृतं वरदानं स्मृत्वा कैकेय्याः वचनं श्रुत्वा मुमोह ॥ २३ ॥ २४ ॥

२३] ति० टी०–राज्यमयाचत । भरताय दातुमिति शेषः ॥ २३ ॥

रा० टी०–तत इति । ततस्तस्मात् हेतो रुदन् राजा ज्येष्ठं पुत्रं राज्यं वनराज्यमयाचत ॥ २३ ॥

२४] ति० टी०–अभिषेकादपि परमधिकं प्रियं यथा भवति तथा मनसा पूर्वमङ्गीकृत्य वाचाप्यङ्गीकृतवान् ॥ २४ ॥

रा० टी०–स इति । स रामः अभिषेकात् परमधिकं प्रियं पितुर्वचनं पूर्वं मनसा आसाद्य अङ्गीकृत्य वाचापि प्रतिगृहीतवान् ॥ २४ ॥

गो० टी०–स इति । अभिषेकात्परं प्रियं पितुर्वचनं विना स याचनारूपं पूर्वं मनसा आसाद्य अङ्गीकृत्य अथ वाचा प्रतिगृहीतवान् । मनःपूर्वकमङ्गीकृतवानित्यर्थः ॥ २५ ॥ २६ ॥

२५] ति० टी०–सीता रामं स्तौति–दद्यादिति ॥२५॥

रा० टी०–दद्यादिति । यो रामः यत् दद्यात् तत् जीवितहेतोरपि न प्रतिगृह्णीयात् स रामः उत्तरीयाणि राज्यं च मनसा विसृज्य त्यक्त्वा समादिशत् वनगमनबोधकवचनमकथयत् । श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

२६] ति० टी०–समादिशद्बहुप्रकारं रक्षणाय निवेदितवान् ॥ २६ ॥

गो० टी०–स इति । उत्तरीयाणि वासांसि । जनन्यै

१ देवीति गो. पाठः । २ त्विति गो. पाठः । ३ न ब्रूयात्किंचिदप्रियमिति गो. पाठः । ४ वेति गो. पाठः ।

साऽहं तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी । नहि मे तेन हीनाया वासः स्वर्गेऽपि रोचते ॥ २७ ॥
प्रागेव तु महाभागः सौमित्रिर्मित्रनन्दनः । पूर्वजस्यानुयात्रार्थे कुशचीरैरलंकृतः ॥ २८ ॥
ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः । प्रविष्टाः स्म पुराऽदृष्टं वनं गम्भीरदर्शनम् ॥ २९ ॥
वसतो दण्डकारण्ये तस्याहममितौजसः । रक्षसापहृता भार्या रावणेन दुरात्मना ॥ ३० ॥
द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः । ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ३१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ।

स्वप्रश्नस्य समुचितोत्तरप्राप्त्या स्वस्मिञ्जानक्या आश्वासं संभावयन्हनुमान्स्वस्य रामदूतत्वं निवेदयन्रामलक्ष्मणकर्तृककुशलप्रश्नान्निवेदयति । पादाभिवादनार्थं समीपमुपसर्पन्तं हनुमन्तं वेषान्तरितं रावणं मन्वाना सीता विनिन्दति । स्वस्मिन्रावणत्वशङ्कां निराकरिष्णुर्हनुमान्स्वस्य सुग्रीवसचिवत्वं हनुमदिति नाम च निवेद्य स्ववचःश्रद्धेयत्वे प्रार्थयते ।

तस्यास्तद्वचनं श्रुत्वा हनूमान्हरिपुंगवः । दुःखाद्दुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ॥ १ ॥

कौसल्यायै । मां समादिशत् तन्निकटे त्वया स्थातव्यमित्युक्तवानित्यर्थः ॥ २७ ॥

२७-२८] ति० टी०-तस्याग्रतः प्रस्थिता वनचारिणी । अभूवमिति शेषः ॥ २७ ॥ २८ ॥

रा० टी०-सेति । तेन रामेण हीनाया यस्या मे स्वर्गेऽपि वासो न रोचते साऽहं वनचारिणी सती तस्य रामस्य अग्रतः प्रस्थिता ॥ २७ ॥

गो० टी०-साऽहमिति । अग्रतः प्रस्थाने हेतुमाह—न हीति ॥ २८ ॥

रा० टी०-प्रागिति । सौमित्रिः पूर्वजस्य रामस्यानुयात्रार्थे प्रागेव कुशचीरैरलंकृतोऽभवदिति शेषः ॥ २८ ॥

गो० टी०-प्रागेवेति । प्रागेव यद्यपि रामानन्तरमेव लक्ष्मणेन द्रुमचीरादिस्वीकारः तथापि तस्य त्वरातिशयव्यञ्जनाय तथोक्तिः । महाभागः अहं सर्वं करिष्यामीति प्रतिज्ञानुसारेण सर्वविधकैङ्कर्यकरणोचिताभिषेकविघ्नहेतुभाग्यसंपन्नसौमित्रिः । सृष्टस्त्वं वनवासायेत्युक्तत्वात् गर्भे संजातः मित्रनन्दनः स लक्ष्मणः सर्वविधकैङ्कर्यकर्तेत्यनुकूलैरभिनन्दनीयः । पूर्वजस्येत्यादि । रामैकैङ्कर्यानुरूपत्वेन द्रुमचीरादीनामलंकरणत्वमित्यर्थः ॥ २९ ॥

२९-३०] ति० टी०-भर्तुर्दशरथस्य पुरा अदृष्टमिति छेदः ॥ २९ ॥ ३० ॥

रा० टी०-ते इति । भर्तुः पालयितुर्दशरथस्य आदेशमाज्ञां बहुमान्य अत्यन्तं सत्कृत्य पुरा पूर्वमदृष्टं वनं वयं प्रविष्टाः स्म ॥ २९ ॥

गो०टी०-ते वयमिति । पुराऽदृष्टं पूर्वमदृष्टम् । अत्र गम्भीरशब्देन दुष्प्रवेशत्वं दर्शनशब्देन स्वरूपमप्युच्यते ॥३०॥३१ ॥

रा० टी०-वसत इति । दण्डकारण्ये वसतः तस्य रामस्य भार्याऽहं रक्षसाऽपहृता ॥ ३० ॥

३१] ति० टी०-जीवितानुग्रहो जीवितानुग्रहकरः कालः कृतः परिच्छिन्नः ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०-द्वाविति । [द्वाभ्यां मासाभ्यामूर्ध्वं ते जीवितं त्यक्ष्यामि त्याजयिष्यामीति वदतेति शेषः ?] तेन रक्षसा द्वौ मासौ मे जीवितानुग्रहः जीवनावधिरित्यर्थः कृतः । किंच द्वौ मासौ जीवितानुग्रहः कृतः अतः ततः ताभ्यां मासाभ्यामूर्ध्वं जीवितं त्यक्ष्यामि रामानागमने त्यक्तुमिच्छामि ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

गो० टी०-द्वाविति । द्वौ मासौ द्विमासरूपः कालः मे जीवितानुग्रहः जीवितानुग्राहकः जीवितधारणानुकूलः कृतः । त्यक्ष्यामि स्वयमेवेति भावः ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

१] ति० टी०-दुःखाद्दुःखाभिभूताया इत्यनुगार्षः । दुःखपरंपराखिन्नाया इत्यर्थः ॥ १ ॥

रा० टी०-सीतावचनश्रवणानन्तरकालिकां हनुमदुक्तिमाह-तस्या इत्यादिभिः । दुःखाभिभूतायाः तस्याः सीतायाः वचनं श्रुत्वा दुःखात् दुःखं प्राप्य हनुमान् सान्त्वं सान्त्वनमुत्तरमब्रवीत् ॥ १ ॥

गो० टी०-तस्या इत्यादि । दुःखात् दुःखाभिभूतायाः उत्तरोत्तरं दुःखं प्राप्तायाः ॥ १ ॥

१ यूथप इति गो. पाठः ।

अहं रामस्य संदेशादेवि दूतस्तवागतः । वैदेहि कुशली रामः स त्वां कौशलमब्रवीत् ॥ २ ॥
यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः । स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥ ३ ॥
लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः । कृतवाञ्छोकसंतप्तः शिरसा तेऽभिवादनम् ॥ ४ ॥
सा तयोः कुशलं देवी निशम्य नरसिंहयोः । प्रीतिसंहृष्टसर्वाङ्गी हनूमन्तमथाब्रवीत् ॥ ५ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा । एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६ ॥
तयोः समागमे तस्मिन्प्रीतिरुत्पादिताद्भुता । परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७ ॥
तस्यास्तद्वचनं श्रुत्वा हनूमान्मारुतात्मजः । सीतायाः शोकतप्तायाः समीपमुपचक्रमे ॥ ८ ॥
यथा यथा समीपं स हनूमानुपसर्पति । तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९ ॥

२] ति० टी०–तव समीपमिति शेषः ॥ २ ॥

रा० टी०–वचनाकारमाह–अहमित्यादिभिः । रामस्य दूतोऽहं संदेशात् हेतोः तव समीपमागतः । अर्थं पृथक् । ननु कः संदेश इत्यत आह–वैदेहीत्यादिभिः । हे वैदेहि ! कुशली रामः त्वां कौशलं स्वकुशलमब्रवीत् अकथयत् किंच त्वां त्वत्-कौशलमब्रवीत् अपृच्छत् । अर्धद्वयमेकान्वयि ॥ २ ॥

गो० टी०–अहमिति । तव दूतः त्वां प्रति प्रेषितो दूतः ॥ २ ॥

३-४] ति० टी०–ब्राह्ममस्त्रं यो वेद । अनेन सर्वास्त्रपारगत्वमुक्तम् । तदस्त्रदेवताया ब्रह्मणः सर्वजगत्समष्टित्ववत्तदस्त्रस्यापि सर्वास्त्रसमष्टित्वात् । वेदांश्चेत्यनेन सर्वकर्ममार्गपारगत्वम् वेदविदां वर इत्यनेन ज्ञानमार्गपारगत्वमुक्तम् ॥ ३ ॥ ४ ॥

रा० टी०–हर्षातिशयेन पुनरपि तदेवाह–य इति । वेदविदां वरः अत एव ब्राह्ममस्त्रं वेदांश्च यो वेद स रामः कौशलमब्रवीत् ॥ ३ ॥

गो० टी०–य इति । वेद वेत्ति । वेदविदां वेदार्थज्ञानवताम् ॥ ३ ॥ ४ ॥

रा० टी०–लक्ष्मण इति । लक्ष्मणोऽभिवादनं ते कृतवान् ॥ ४ ॥

५] ति० टी०–संहृष्टसर्वाङ्गी पुलकितसर्वाङ्गी ॥ ५ ॥

रा० टी०–सेति । सा सीता तयोः रामलक्ष्मणयोः कुशलं निशम्य प्रतिसंहृष्टसर्वाङ्गी सती हनूमन्तमब्रवीत् ॥ ५ ॥

गो० टी०–सेति । प्रीतिसंहृष्टसर्वाङ्गी प्रीत्या पुलकितसर्वाङ्गी ॥ ५ ॥

६] ति० टी०–असंभावितमपि रामप्रसङ्गं जीवितधारणेन प्राप्तत्वात्तत्संवादिनीं लौकिकीं गाथां स्तौति—कल्याणीति । गाथायाः संवादित्वदर्शनजो हर्षो बतेत्यनेन सूच्यते । कल्याणी सत्यार्थेति मा मां प्रतिभाति । मज्ज्ञानविषया भवतीत्यर्थः । गाथां पठति–एतीति । जीवन्तमेवेत्येव, अतो बहुदुःखं सोढ्वाऽपि जीवितव्यमिति भावः ॥ ६ ॥

रा० टी०–तदाकारमाह–कल्याणीति । जीवन्तं नरं जनं वर्षशतादपि आनन्दः एति प्राप्नोति इयं लौकिकी गाथा कल्याणी सत्येत्यर्थः ॥ ६ ॥

गो० टी०–दुःखबाहुल्येऽपि रामदर्शनप्रत्याशया कृच्छ्रेण जीवन्त्याः देव्याः जीवनफलस्य लब्धत्वात्तत्संवादिनीं गाथां स्तौति—कल्याणीति । कल्याणी सत्यार्था । मा प्रतिभाति मां प्रतिभाति । वर्षशतादपीत्यन्ते इतिकरणं बोध्यम् ॥ ६ ॥

७] ति० टी०–तस्मिंस्तस्मिन्काले रामलक्ष्मणकुशलवचःश्रवणकाले तयो रामलक्ष्मणयोः समागमकाल इव सीतायास्तेन वचसाऽद्भुताचिन्त्यस्वरूपा प्रीतिरुत्पादिता । किं च तयोः सीताहनुमतोस्तस्मिन्समागमे परस्परस्याद्भुता प्रीतिरुत्पादिता देवी दृष्टेति हनुमतः प्रीतिः रामदूतो दृष्ट इति देव्याः प्रीतिः अतस्तौ विश्वस्तौ भूत्वा परस्परेणालापं चक्रतुः ॥ ७ ॥

रा० टी०–तयोरिति । तयोः सीताहनुमतोः समागते सति अद्भुता प्रीतिः उत्पादिता प्रादुर्भूता अत एव विश्वस्तौ तौ परस्परेणालापं चक्रतुः ॥ ७ ॥

गो० टी०–तयेति । तया सीतया । तस्मिन् हनुमति विषये अद्भुता प्रीतिरुत्पादिता । परस्परेणेत्यादिकं वक्ष्यमाणस्य सर्गस्य संग्रहः ॥ ७ ॥

८] ति० टी०–तद्वचनं कल्याणीत्यादिसीतावचनम् । समीपमुपचक्रमे तच्छाखातोऽप्यर्वाचीनां शाखामवरुह्य समीपं गन्तुं यत्नवानभूदित्यर्थः ॥ ८ ॥

रा० टी०–तस्या इति । तस्याः सीताया वचनं श्रुत्वा हनुमान् समीपमुपचक्रमे जगाम ॥ ८ ॥

गो० टी०–तस्या इति । उपचक्रमे गन्तुमिति शेषः । प्रापेति वाऽर्थः ॥ ८ ॥

९] ति० टी०–परिशङ्कते परिशङ्कते स्म । रामकुशलकथनेन विश्वस्तापि रावणमायाबाहुल्यस्मरणेनाविश्वासादिति भावः ॥ ९ ॥

रा० टी०–यथेति । हनुमान् यथा यथा समीपमुपसर्पति तथा तथा सीता रावणं परिशङ्कते ॥ ९ ॥

गो० टी०–यथा यथेति । रावणं परिशङ्कते—रामकुशलकथनेन संजातरावणमायास्मरणा पुनः शङ्कितवतीत्यर्थः ॥ ९ ॥

---

१ प्रीतीति गो. पाठः । २ हरियूथप इति गो. पाठः । ३ दीनाया इति गो. पाठः ।

अहो धिग्धिक्कृतमिदं कथितं हि यदस्य मे । रूपान्तरमुपागम्य स एवायं हि रावणः ॥ १० ॥
तामशोकस्य शाखां तु विमुक्त्वा शोककर्शिता । तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥ ११ ॥
[हनुमानतिदुःखार्तां तां दृष्ट्वा भयमोहिताम् ।]
अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् । सा चैनं भयसंत्रस्ता भूयो नैनमुदैक्षत ॥ १२ ॥
तं दृष्ट्वा वन्दमानं च सीता शशिनिभानना । अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥ १३ ॥
मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् । उत्पादयसि मे भूयः संतापं तन्न शोभनम् ॥ १४ ॥
स्वं परित्यज्य रूपं यः परिव्राजकरूपवान् । जनस्थाने मया दृष्टस्त्वं स एव हि रावणः ॥ १५ ॥
उपवासकृशां दीनां कामरूप निशाचर । संतापयसि मां भूयः संतापं तन्न शोभनम् ॥ १६ ॥
अथवा नैतदेवं हि यन्मया परिशङ्कितम् । मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥ १७ ॥
यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते । पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे ॥ १८ ॥

१०]ति० टी०–यदस्य यदनेन कथितं कथनं कृतं वार्ता कृता इदं धिग्धिक् कथितमिति भावे निष्ठा । तत्र हेतुमाह–रूपान्तरमिति । यः पूर्वं मायया मामपाहरत्स एव रावणो रूपान्तरं प्राप्य वर्तत इत्यर्थः ॥ १० ॥

रा० टी०–परिशङ्कास्वरूपमाह–अहो इति । रूपान्तरमुपागम्य प्राप्य स रावण एवायं हि यदि तदा अस्य अनेन यत् कथितं कथनम् इदं कृतं तत् अहो आश्चर्यं धिक् धिक् च॥१०॥

गो० टी०–अहो इति । मे मया अस्य पुरतः यत्कथितं तत् दुष्कृतम् अनुचितं कृतम इदम् अनालोच्य् कथनं धिक् । अहो इति खेदे । खेदहेतुमाह—रूपान्तरमिति । वर्तत इति शेषः ॥ १० ॥

११] ति० टी०–अशोकस्य अशोकवनस्थशिंशपावृक्षस्येत्यर्थः ॥ ११ ॥

रा० टी०–तामिति । तां गृहीताम् अशोकस्य अशोकवनिकास्थशिंशुपायाः शाखां विमुक्त्वा विमुच्य शोककर्शिता सीता तस्यां पूर्वमध्यासितायां धरण्यां समुपाविशत् ॥११॥

गो० टी०–तामशोकस्येति । यद्यपि पूर्वं शिंशुपाशाखावलम्बनमुक्तं तथापि शिंशुपाशाखा अशोकसंवलितेति क्वचिच्छिंशुपेत्युच्यते क्वचिदशोक इति अतो न कश्चिद्दोषः ॥ ११ ॥

१२-१३] ति० टी०–तां धरण्युपविष्टामवन्दत नमस्कृतवान् । एनं दृष्ट्वा भयसंत्रस्ता भूयः पुनरेनं नापश्यत् ॥१२॥१३॥

रा० टी०–अवन्दतेति । ततोऽनन्तरं महाबाहुर्हनुमान् तां जनकात्मजाम् अवन्दत शङ्कापनयनाय वन्दनामकरोत् सा सीता तु भयसंत्रस्ता रावणशङ्काजनितभययुक्ता सती एनं हनुमन्तं भूयो न उदैक्षत ॥ १२ ॥

रा० टी०–तामिति। वन्दमानं तं हनुमन्तं दृष्ट्वा दीर्घमुच्छ्वस्य मधुरस्वरा सीता अब्रवीत् ॥ १३ ॥

गो० टी०–हनुमानिति । भयवित्रस्ता भयहेतुना वित्रस्ता ॥ १२ ॥ १३ ॥

१४]ति०टी०–भूयः संतापं यदुत्पादयसि तन्न शोभनम्१४

रा० टी०–वचनाकारमाह–मायामित्यादिभिः । मायां कपटं प्रविष्टः आश्रितः सन् मायावी स्वयं रावणस्त्वं यदि भूयः संतापमुत्पादयसि तर्हि तन्न शोभनम् ॥ १४ ॥

गो० टी०–मायामिति । मायावी स्वत एव मायावान् । " अस्मायामेधास्रजो विनिः " इति विनिप्रत्ययः । इदानीं मायां प्रविष्टः आश्रितः स्वयं रावणः सन् मम संतापमुत्पादयसीति यदि उत्पादयसीति यत् तत्संतापोत्पादनं ते न शोभनम् । तवाप्यभीष्टविरहसंतापो भविष्यतीत्यर्थः ॥ १४-१६ ॥

१५-१६] ति० टी०–तवैवंरूपकरणमपि सुकरमेवेत्याह–स्वं परित्यज्येति ॥ १६ ॥ १६ ॥

रा० टी०–स्वमिति। स्वं राक्षसीयं रूपं परित्यज्य परिव्राजकरूपवान् सन् यो रावणो जनस्थाने मया दृष्टः स त्वं किम् । एवः किमर्थे ॥ १५ ॥

रा० टी०–उपवासेति । उपवासकृशाम् अत एव दीनां क्षीणचित्तां मां सम्यक् तापो यस्मिन् तत् यथा भवति तथा भूयः संतापयसि प्रवर्तयसि तत् न शोभनम् ॥ १६ ॥

१७] ति० टी०–एवं रावणदौरात्म्याद्धनुमन्तं रावणमाशङ्क्य तद्दर्शनजानन्तमात्मनो मनःप्रसादमालोच्य तां शङ्कां निराचष्टे–अथवेति । यन्मया परिशङ्कितं रावणत्वमेतदेवं नयतस्तव दर्शनान्मम मनसः प्रीतिरुत्पन्ना । रावणत्वे हि सा नोत्पद्येतेति भावः ॥ १७ ॥

रा० टी०–इदानीमनुमानतो नायं रावण इति निश्चित्य पक्षान्तरमाह–अथवेति । हि यतः तव दर्शनात् मम मनसः प्रीतिरुत्पन्ना अतः यत् मया परिशङ्कितं तन्नैवास्ति ॥ १७ ॥

गो० टी०–हनुमन्तं रावणमाशङ्क्य तज्जनितमनःप्रसादमालोच्य तां शङ्कां निराचष्टे–अथवेति । मया यत् परिशङ्कितम् एतन्नैवं हि नैवमेव । कुत इत्यत आह–मनस इति ॥१७-१९॥

१८] ति० टी०–तव मयि रामदूतत्वनिश्चयः कथं स्या-

१ दुष्कृतमिति गो. पाठः । २ अर्धमेतदधिकं गो. पाठे । ३ वित्रस्तेति गो. पाठः । ४ नैवाभ्युदैक्षतति गो. पाठः । ५ धृगिति गो. पाठः । ६ असीति गो. पाठः । ७ संतप्तामिति गो. पाठः ।

गुणान्रामस्य कथय प्रियस्य मम वानर । चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥ १९ ॥
अहो स्वप्नस्य सुखता याहमेव चिराहृता । प्रेषितं नाम पश्यामि राघवेण वनौकसम् ॥ २० ॥
स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् । पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी ॥ २१ ॥
नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् । न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥ २२ ॥
किं नु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् । उन्मादजो विकारो वा स्यादयं मृगतृष्णिका ॥ २३ ॥
अथवा नायमुन्मादो मोहोऽप्युन्मादलक्षणः । संबुध्ये चाहमात्मानमिमं चापि वनौकसम् ॥ २४ ॥

दिति चेत्तत्राह–यदीति । पृच्छामीति । रामकथामिति शेषः । तदेवाह–प्रिया रामकथा हीति ॥ १८ ॥

रा० टी०–यदीति । आगतः त्वं यदि रामस्य दूतः तर्हि त्वां रामकथाः पृच्छामि ते भद्रमस्तु ॥ १८ ॥

१९] ति० टी०–चित्तं हरसि चित्तं शिथिलयसि । विश्वासहेत्वसंपादनादिति भावः । रयो नदीवेगः ॥ १९ ॥

रा० टी०–गुणानिति । हे वानर ! मम प्रियस्य रामस्य गुणान् त्वं कथय । नन्व रामगुणान् न जानामीत्यत आह–नदीकूलं रयो वेग इव मे चित्तं त्वं हरसि एतेन मच्चित्तापकर्षकत्वं रामगुणज्ञानामेवेति सचितम् ॥ १९ ॥

२०] ति० टी०–रामदूतदर्शनं नेदं तदागमनस्यात्रासंभावितत्वात्प्रायेणायं स्वप्नोऽथापि मेऽसौ सुखावह इत्याह–अहो इति । या चिराहृताहमेव राघवेण प्रेषितं वनौकसं पश्यामि नाम । अस्वप्नत्वे त्वन्यासामपि दर्शनं स्यादित्याशयः ॥ २० ॥

रा० टी०–रामदूतागमनस्यासंभवमाशङ्क्याह-अहो इति । स्वप्नस्य सुखता सुखम् अहो आश्चर्यं यतः चिरं बहुकालात् आहृता अन्यत्र प्रापिताऽहं राघवेण प्रेषितं वनौकसं पश्यामि ॥ २० ॥

गो० टी०–इह रामदूतागमनमत्यन्तासंभावितमिति मत्वा पुनर्बहुधा शङ्कते–अहो इत्यादिना ॥ २० ॥

२१] ति० टी०–अथ रामादिदर्शनत्वरूपस्वप्नोऽपि मे न जायत इति खिद्यति–स्वप्नेऽपीति । मत्सरी मत्सरेण मत्समीपं सोऽपि नायातीति भावः ॥ २१ ॥

रा० टी०–स्वप्न इति । मत्सरी सगर्वः सोऽपि प्रायो नायातीति तात्पर्यम् ॥ २१ ॥

गो० टी०–स्वप्नेऽपीति । स्वप्नेऽपि यद्यहं वीरम् राक्षसीमध्यवासकृतं दुःखं स्वप्नदृष्टोपि निवर्तयितुं क्षम इति वीर्यातिशयोक्तिः । राघवं सहलक्ष्मणम् । विश्लेषदशायामुभयोर्दर्शनात् स्वप्नदर्शनेऽप्युभयोर्दर्शनं भवेत् । यद्वा तदानीमुभयोर्विश्लेषात्तौ किं परस्परं संयुक्तौ न वेति शङ्कते–पश्येयं नावसीदेयम् एवमुभयोः स्वप्ने दर्शनेऽपि महद् दुःखं निवर्तेत । कथंचिज्जीवितं धारयेयम् । स्वप्नोऽपि मम मत्सरी । मदृशां विज्ञाय राम इव स्वप्नोऽपि मयि मात्सर्यं करोति ॥ २१ ॥ २२ ॥

२२] ति० टी०–स्वप्नत्वमस्य नेत्याह–नाहं स्वप्नमिति । प्राप्तश्चाभ्युदय इति । तथा मनःसंतोषोदयात्प्राप्तप्राय इत्यर्थः । तस्मान्न स्वप्नः ॥ २२ ॥

रा० टी०–इदानीमनुमानेन नायं स्वप्न इति निश्चित्याह–नेति । इमं स्वप्नम् अहं न मन्ये हि यतः स्वप्ने वानरं दृष्ट्वा अभ्युदयः प्राप्तुं न शक्यः मम तु अभ्युदयः अभ्युदयहेतुभूतः मनःप्रसादः प्राप्तः ॥ २२ ॥

२३] ति० टी०–पुनरुत्प्रेक्षते—किं न्विति । चित्तमोहो निरन्तररामध्यानजनितस्तत्प्रेषितदूतदर्शनसंभाषणादिविषयो भ्रमः । वातगतिर्भूतावेशादिजनितो भ्रमः । उन्मादो विरहिणां पित्तोद्रेकरूपावस्थाविशेषजो भ्रमः । मृगतृष्णिका तद्वत्प्रत्यक्षो भ्रमः ॥ २३ ॥

रा० टी०–किमिति । अयं समागमः चित्तमोहः स्यात् इयं वातगतिः वायुविकारो वा उन्मादजः भूतावेशादिहेतुकोन्मादजनितो विकारो वा अयं मृगतृष्णिका वा स्यात् ॥ २३ ॥

गो० टी०–एवं यथार्थस्वप्नपक्षौ निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते–किं नु स्यादिति । चित्तमोहः रामक्षेमवार्ताश्रवणकुतूहलकन्दलितनिरन्तरचिन्तासंततिपरिणतिविशेषरूपः । कोऽपि मनसो विभ्रम इत्यर्थः । असत्यश्चित्तसंकल्पो वा । वातगतिः उपवासादिप्रयुक्तधातुक्षोभजो वातविकाररूपो भ्रमः । तदध्यारोपो वा यथा स्वरूपस्य वायोः पांशुपुञ्जरूपविशेषोऽध्यारोपः उन्मादजो विकारो वा । उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः तज्जो विकारो भ्रमः । मृगतृष्णिका अन्यस्यान्यरूपेणावभासः । चित्तमोहोन्मादावप्रकृतिस्थप्रतिभासविशेषौ । वातगतिमृगतृष्णिके तु प्रकृतिस्थस्य ॥ २३ ॥

२४] ति० टी०–बाधराहित्याद्भ्रमचतुष्टयमपि निरस्यति—अथवेति । मोहोऽप्युन्मादस्य लक्षणमिव लक्षणं यस्य सः । एवं चोन्मादनिराकरणात्सोऽपि निरस्तः । अर्थतो भूतावेशोऽपि निरस्तः । यतोऽहमात्मानमिमं समीपस्थं वनौकसं च संबुध्ये सम्यग्जानामि । निर्बाधं जानामीत्यर्थः । उक्तानां सर्वेषामविवेकलक्षणत्वान्मम विवेकसत्त्वात्तेऽसंभाविताः । मृगतृष्णाभ्रमोऽपि दूरत्वदोषाज्जायते, वानरश्च समीप एवेति स पक्षोऽप्ययुक्त इति भावः ॥ २४ ॥

रा० टी०–इदानीं तत्तद्भ्रमाभावबोधकहेतुमुपलभ्य तान्निरस्यति–अथवेति । अथवा उन्मादः उन्मादजो विकारः उन्मादलक्षणः मोहः उन्मादलक्षणसदृशलक्षणविशिष्टः अपिना वातगतिर्वा नायम् तत्र हेतुः–अहम् आत्मानं वनौकसं च संबुध्ये सम्यक् जानामि मोहादौ सम्यग्ज्ञानं न भवतीति तात्पर्यम् ॥ २४ ॥

इत्येवं बहुधा सीता संप्रधार्य बलाबलम् । रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् ॥ २५ ॥
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा । न प्रतिव्याजहाराथ वानरं जनकात्मजा ॥ २६ ॥
सीताया निश्चितं बुद्ध्वा हनूमान्मारुतात्मजः । श्रोत्रानुकूलैर्वचनैस्तदा तां संप्रहर्षयन् ॥ २७ ॥
आदित्य इव तेजस्वी लोककान्तः शशी यथा । राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥ २८ ॥
विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः । सत्यवादी मधुरवाग्देवो वाचस्पतिर्यथा ॥ २९ ॥
रूपवान्सुभगः श्रीमान्कन्दर्प इव मूर्तिमान् । स्थानक्रोधे प्रहर्ता च श्रेष्ठो लोके महारथः ॥ ३० ॥
बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः । अपक्रम्याश्रमपदान्मृगरूपेण राघवम् ॥ ३१ ॥
शून्ये येनापनीताऽसि तस्य द्रक्ष्यसि तत्फलम् । अचिराद्रावणं संख्ये यो वधिष्यति वीर्यवान् ॥ ३२ ॥
क्रोधप्रमुक्तैरिषुभिर्ज्वलद्भिरिव पावकैः । तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः ॥ ३३ ॥
त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत् । लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥ ३४ ॥
अभिवाद्य महाबाहुः स त्वां कौशलमब्रवीत् । रामस्य च सखा देवि सुग्रीवो नाम वानरः ॥ ३५ ॥
राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् । नित्यं स्मरति ते रामः ससुग्रीवः सलक्ष्मणः ॥ ३६ ॥
दिष्ट्या जीवसि वैदेहि राक्षसीवशमागता । नचिराद्रक्ष्यसे रामं लक्ष्मणं च महारथम् ॥ ३७ ॥
मध्ये वानरकोटीनां सुग्रीवं चामितौजसम् । अहं सुग्रीवसचिवो हनूमान्नाम वानरः ॥ ३८ ॥
प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् । कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ॥ ३९ ॥

गो० टी०–अनन्तरोक्तचतुष्टयं निराकरोति–अथवेत्यादिना । अथवा अयं वानरतद्भाषणादिप्रतिभासः उन्मादो न । मोहोऽप्युन्मादलक्षणः उन्मादस्य लक्षणमिव लक्षणं यस्य सः तथोक्तः । अतः उन्मादनिराकरणेनैव सोऽपि निराकृत इत्यर्थः । अनयोर्निराकरणमितरपक्षद्वयनिराकरणस्योपलक्षणं कृत इत्यत आह–संबुध्य इति । अहम् आत्मानमिमं वनौकसं चापि संबुध्ये सम्यक् जानामि ॥ २४ ॥

२५–२६]ति०टी०–बलाबलम् बलं रक्षसां कामरूपबलम्, अबलं रामदूतस्य वानरस्यात्रागमनसामर्थ्याभावः ॥२५॥२६॥

रा० टी०–इतीति । इति अनेन प्रकारेण बहुधा बहुप्रकारं बलाबलं संप्रधार्य विचार्य रक्षसां कामरूपत्वाद्धेतोस्तं हनूमन्तं राक्षसाधिपं मेने ॥ २५ ॥

रा० टी०–एतामिति । तदा तस्मिन् समये एतामुक्तां बुद्धिं निश्चयं कृत्वा वानरं प्रति न व्याजहार ॥ २६ ॥

गो० टी०–इत्येवमिति । बलाबलं मोहत्वादीनामबलत्वं रावणत्वस्य बलवत्त्वं च ॥ २५ ॥ २६ ॥

२७] ति० टी०–निश्चितं रावणत्वनिश्चयम् । श्रोत्रानुकूलैर्वचनै रामगुणकथनरूपैः । विश्वासार्थं गुणान्रामस्य कथयति । सीतोक्तिरिति भावः । संप्रहर्षयन्वक्ष्यमाणं वचः । कथयामासेति शेषः ॥ २७ ॥

रा० टी०–सीताया इति । सीतायाः सीतया निश्चितं बुद्ध्वा श्रोत्रानुकूलैः श्रोत्रसुखजनकैर्वचनैः रामगुणबोधकवाक्यैः तां सीतां प्रहर्षयन्नुवाचेति शेषः ॥ २७ ॥

गो० टी०–सीताया इति । संप्रहर्षयत्संप्राहर्षयत् ॥२७॥

२८–२९] ति० टी०–राजा धनधान्यादिप्रदानेन सर्वलोकस्य रञ्जकः ॥ २८ ॥ २९ ॥

रा०टी०–तद्वचनाकारमाह—आदित्य इत्यादिभिः २८

रा० टी०–विक्रमेणेति वाचस्पतिर्बृहस्पतिः ॥ २९ ॥

गो० टी०–आदित्य इत्यादि । राजेति । कुबेरस्य सर्वलोकराजत्वमुक्तम् । “ राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे ” इति । सत्यमधुरवाक्त्वं बृहस्पतेर्वाचस्पतित्वादेव रूपवान् सौन्दर्यवान् सुभगः रमणीयः श्रीमान् कान्तिमान् स्थाने क्रोधस्थाने क्रोधः यस्यासौ स्थानक्रोधः प्रहर्ता क्रोधविषये प्रहर्ता । आदित्य इवेत्यादिना उक्तैर्विशेषणैर्विशिष्टो राम इति योज्यम् ॥ २८–३० ॥

३०] ति० टी०–स्थानक्रोध उचितक्रोधविषये । क्रोधौचित्ये प्रहर्तेति यावत् ॥ ३० ॥

रा० टी०–रूपवानिति । मूर्तिमान् कन्दर्प इव रूपादिमान् स्थानक्रोधे उचितकोपे प्रहर्ता दण्डदायकः ॥ ३० ॥

३१–३९] ति० टी०–तं राघवमाश्रमादपकृष्य शून्य आश्रमे येनापनीता तस्य रक्षसस्तत्फलं त्वदपहारपापफलं तेनानुभूयमानं द्रक्ष्यसि । तदेवाह–अचिरादिति । ‘नचिरात्’ इति पाठान्तरम् । यो वधिष्यति तेनेत्यर्थः ॥ ३१–३९ ॥

रा० टी०–बाह्विति । यस्य बाहुच्छायां रक्षणे इत्यर्थः लोकः सर्वजनः अवष्टब्धः संस्थितः तं राघवं मृगरूपेण अश्र-

१ कृष्येति गो. रा. पाठः । २ नेति गो. पाठः । ३ रोषेति गो. पाठः । ४ रामस्त्वामिति गो. पाठः । ५ बलमिति गो. पाठः ।

त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् । नाहमस्मि तथा देषि यथा मामवगच्छसि ॥
विशङ्का त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ।

दूतयाथार्थ्यं विज्ञातुकामया जानक्या पृष्टो हनुमांस्तयोरङ्गलक्षणादि निरूपयन्स्त्रीयोत्पत्तेरारभ्य सुग्रीवसाचिव्यादि सीतादर्शनान्तं स्ववृत्तं कथयति ।

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात् । उवाच वचनं सान्त्वमिदं मधुरया गिरा ॥ १ ॥
क्व ते रामेण संसर्गः कथं जानासि लक्ष्मणम् । वानराणां नराणां च कथमासीत्समागमः ॥ २ ॥
यानि रामस्य चिह्नानि लक्ष्मणस्य च वानर । तानि भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥ ३ ॥

मपदात् श्रमनिवर्तकस्थानात् अपकृष्य अन्यत्र प्रापय्य शून्ये येन त्वमपनीतासि तस्य रक्षसः तत् तादृशकर्मजनितं फलं द्रक्ष्यसि । सार्धश्लोक एकान्वयी ॥ ३१ ॥

रा० टी०–तत्फलाकारं बोधयन्नाह–अचिरादिति । अचिरात् शीघ्रं क्रोधप्रयुक्तैर्ज्वलद्भिः पावकैरिवेषुभिः यो रावणं वधिष्यति तेन प्रेषितो दूतोऽहम् इह अस्मिन् काले त्वत्सकाशमागतः । सार्धश्लोक एकान्वयी ॥ ३२ ॥ ३३ ॥

रा० टी०–त्वदिति । त्वद्वियोगेन दुःखार्तः स रामः त्वां कौशलमब्रवीत् । अथं पृथक् । लक्ष्मण इति । कौशलं कुशलमब्रवीत् ॥ ३४ ॥

रा० टी०–रामस्येति । रामस्य सखा सुग्रीवः कौशलमब्रवीत् ॥ ३५ ॥

रा० टी०–नित्यमिति । ते त्वां रामो नित्यं स्मरति "अधीगर्थ" इति षष्ठी । हे वैदेहि राक्षसीवशमागता त्वं दिष्ट्या भाग्यवशेन जीवसि ॥ ३६ ॥

रा० टी०–नेति । रामं लक्ष्मणं च वानरकोटीनाम् अनेककोटिसंख्याकवानराणां मध्ये सुग्रीवं च नचिरात् शीघ्रं द्रक्ष्यसे ॥ ३७ ॥

रा० टी०–नन्वं त्वं कोऽसीत्यत आह–अहमिति । सुग्रीवसचिवो हनूमानहं लङ्कां प्रविष्टोऽस्मीति शेषः ॥ ३८ ॥

रा० टी०–कृत्वेति । अहं रावणस्य मूर्ध्नि पदन्यासं कृत्वा अनादृत्येत्यर्थः, त्वां द्रष्टुमुपयातः ॥ ३९ ॥

गो० टी०–बाहुच्छायामित्यादि । लोकः महात्मनो यस्य बाहुच्छायाम् अवष्टब्धः आश्रितः । तं मृगरूपेण प्रशस्तमृगेण हेतुना आश्रमपदादपकृष्य शून्ये येनापनीतासि तस्य रावणस्य यत्फलं मरणरूपं तत् द्रक्ष्यसीति योजना । यद्वा बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः असावादित्य इव तेजस्वीत्येवं योजना ॥ ३१–४० ॥

४०] ति० टी०–यथा मामवगच्छसि मायावी रावण इति, न तथाऽहमस्मि ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०–नेति । यथा येन प्रकारेण मां त्वमवगच्छसि शङ्कसे तथाऽहं नास्मि अतः विशङ्का त्यज्यताम् अत एव एषा त्वं वदतो मम श्रद्धत्स्व मद्वचने श्रद्धां कुर्वित्यर्थः ॥४०॥४१॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०–नाहमिति । वञ्चनार्थं परिगृहीतवेष इति मां यथाऽवगच्छसि तथा नास्मीत्यर्थः ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

१–२] ति० टी०–तां त्विति । आदित्य इवेत्यादिकाम् ॥ १ ॥ २ ॥

रा० टी०–हनुमद्वचनश्रवणानन्तरकालिकां सीतोक्तिमाह–तामिति । वैदेही वानरर्षभात् रामकथां श्रुत्वा सान्त्वं वचनमुवाच ॥ १ ॥

रा० टी०–तदाकारमाह–क्वेत्यादिभिः । ते तव रामेण संसर्गो भाषणादिसंबन्धः क्व कस्मिन्देशेऽभवदिति शेषः । समागमः सङ्गमः कथमासीत् नरवानराचरणयोः परस्परं विरुद्धत्वात्संसर्गो न संभवतीति तात्पर्यम् ॥ २ ॥

गो० टी०–तां त्वित्यादि ॥ १ ॥ २ ॥

३] ति० टी०–तानि रामलक्ष्मणचिह्नानि । भूयोऽधिकं विशिष्य समाचक्ष्व, येन मां शोको न समाविशेत् ॥ ३ ॥

रा० टी०–यानीति । चिह्नानि भूयः समाचक्ष्व कथयतो मां शोको न समाविशेत् ॥ ३ ॥

गो० टी०–यानीति । लिङ्गानि चिह्नानि ॥ ३ ॥

१ लिङ्गानीति गो. पाठः ।

कीदृशं तस्य संस्थानं रूपं तस्य च कीदृशम् । कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४ ॥
एवमुक्तस्तु वैदेह्या हनूमान्मारुतात्मजः । ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५ ॥
जानन्ती बत दिष्ट्या मां वैदेहि परिपृच्छसि । भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६ ॥
यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै । लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥ ७ ॥
रामः कमलपत्राक्षः पूर्णचन्द्रनिभाननः । रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे ॥ ८ ॥
तेजसाऽऽदित्यसंकाशः क्षमया पृथिवीसमः । बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९ ॥
रक्षिता जीवलोकस्य स्वजनस्य[2] च रक्षिता । रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥ १० ॥
रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता । मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥ ११ ॥

४-५] ति० टी०-संस्थानमवयवसंनिवेशः । रूपमाकारो नीलपीतादिवर्णश्च ॥ ४ ॥ ६ ॥

रा० टी०-चिह्नाकारं विभज्य पृच्छति-कीदृशमिति । तस्य रामलक्ष्मणस्य च संस्थानमवयवसंनिवेशः रूपं च कीदृशम् ऊरुप्रभृति कथं कीदृशं मे मह्यं शंस कथय ॥ ४ ॥

रा० टी०-एवमिति । वैदेह्या एवमुक्तो हनुमान् रामं यथातत्त्वं याथार्थ्यमनतिक्रम्य आख्यातुं कथयितुमुपचक्रमे ॥ ५ ॥

गो० टी०-कीदृशमिति । संस्थानम् अवयवसंनिवेशः । रूपम् आकारः वर्णः कान्तिर्वा ॥ ४ ॥ ५ ॥

६-७] ति० टी०-जानन्ती दिष्ट्या दैवेन रामदूतं मां जानन्ती यदि पृच्छसि रावणशङ्कां त्यक्त्वा तदा त्वया यानि संस्थानादीनि पृष्टानि यथा च मया लक्षितानि दृष्टानि तानि सर्वाणि वदतो मत्तः शृणु ॥ ६ ॥ ७ ॥

रा० टी०-तद्वचनाकारमाह-जानन्तीति । संस्थानं जानन्ती त्वं मां दिष्ट्या भाग्यवशेन परिपृच्छसि ॥ ६ ॥

रा० टी०-यानीति । तानि चिह्नानि वदतो मे शृणु॥७॥

गो० टी०-जानन्तीत्यादि । बतेत्यामन्त्रणे । जानन्ती त्वं दिष्ट्या मां परिपृच्छसीति संबन्धः । लक्षितानि त्वया दृष्टानि मे मत्तः ॥ ६ ॥ ७ ॥

८-१०] ति० टी०-रूपदाक्षिण्यसंपन्नः प्रसूत इति । जन्मना सहैवोक्ता वक्ष्यमाणाश्च गुणा जाता इत्यर्थः ॥८-१०॥

रा० टी०-तत्कथनमेवाह-राम इत्यादिभिः । रामः रूपदाक्षिण्याभ्यां संपन्नः सन्नेव प्रसूतः प्रादुर्भूतः न तु प्रादुर्भूत्यनन्तरं रूपदाक्षिण्यं जातमित्यर्थः, तेन तयोर्नित्यत्वं व्यञ्जितम् ॥ ८ ॥

गो० टी०-राम इति । रामः सर्वाङ्गसुन्दरः । कमलपत्राक्षः कान्तिप्रवाहे आवर्त इव अत्यन्तमाकर्षकनयनशोभः । तादृशनयनसौन्दर्यसीमाभूमिमाह—सर्वसत्त्वमनोहरः[1] । तिर्यग्जातितया विटपाद्विटपं प्लवतो ममापि चित्तापहारकः अविशेषज्ञस्यापि मनोहर इत्यर्थः । रूपदाक्षिण्यसंपन्नः रूपमित्येतद्विग्रहगुणानामुपलक्षणम् दाक्षिण्यमित्यात्मगुणानामुपलक्षणम् देहगुणैरात्मगुणैश्चान्यून इत्यर्थः । संपन्नः प्रसूतः इदं सर्वं नागन्तुकं किंतु औत्पत्तिकमित्यर्थः । अत्युत्कटं वदसि किमेवंविधोपरोऽप्यस्ति न वेत्यपेक्षायामाह—जनकात्मज इति । भवती च तादृशीत्यर्थः ॥ ८ ॥

रा० टी०-इषुवत्सविता गच्छतीति वदुपमेयत्वेन बहुव्रीहिणोपमानत्वेन वा । रामं बोधयन्नाह-तेजसेति ॥ ९ ॥

गो० टी०-संग्रहेणोक्तान् गुणान्विवृणोति—तेजसेत्यादिना ब्रह्मचर्यव्रते स्थितः गृहस्थस्यास्य ब्रह्मचर्यं नाम ऋतोरन्यत्र स्त्रीसङ्गमत्यागः । तदाह मनुः—' षोडशर्तुर्निशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् । ब्रह्मचार्येव पर्वाण्याश्चतस्रश्च विवर्जयेत् ॥ ' प्रचारज्ञः प्रयोगज्ञः । ऐहिकामुष्मिकानां कर्मणां प्रचारं गतिं हेतुफलभावव्यवस्थां तत्त्वतो जानातीत्यर्थं इत्याहुः । राजविद्याविनीतश्च चतस्रो राजविद्याः 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः ॥ ' इत्युक्ताः । ताभ्यो विनीतः शिक्षितः श्रुतवान् अवधृतवान् । शीलसंपन्नः सदाचारसंपन्नः । पूर्वं यज्ञादिकर्मानुष्ठातृत्वमुक्तमिति न पुनरुक्तिः । वेदेषु यजुर्व्यतिरिक्तवेदेषु । अनेन स्वस्य यजुर्वेदत्वं सूचितम् । एवमात्मगुणानभिधाय विग्रहगुणानाशास्ते-विपुलांस इत्यादिना । गूढजत्रुः अस्पष्टभुजसंध्यस्थिः । समः अन्यूनातिरिक्तदेहप्रमाणः ॥ ९-१६ ॥

रा० टी०-रक्षितेति । जीवन्ति जीवयन्तीति च व्युत्पत्त्या जीवशब्देन जीवेश्वरयोर्ग्रहणम् । लोका निखिलब्रह्माण्डानि समाहारद्वन्द्वः तस्य रक्षिता श्रुतिश्च "तमीश्वराणां परमं महेश्वरम्" इत्यादि ॥ १० ॥

११] ति० टी०-रामो भामिनि लोकस्येति । सर्वस्य कर्ता हर्ता भर्ता चेति शेषः । अनेन सृष्टिस्थितिसंहारकर्तृत्वरूपं ब्रह्मलक्षणं रामस्योक्तं गूढम् । एवं ज्ञानं तत्क्षणं भगवतैव स्वमायातिरस्करिणीनिरासादिति बोध्यम् । लोकस्य मर्यादानां वर्णाश्रममर्यादानां कर्ता, भगवदवतारत्वात् । कारयिता कालात्मना, अवतीर्णरूपेण चातुर्वर्ण्यरक्षिता च ॥ ११ ॥

रा० टी०-राम इति । चातुर्वर्ण्यस्य लोकस्य राम एव रक्षिता साक्षात् विष्ण्वादिद्वारा च पालयिता ॥ ११ ॥

---

१ सर्वसत्त्वमनोहर इति गो. पाठः । २ °स्याभीति गो. पाठः ।

अर्चिष्मानर्चितोऽत्यर्थं ब्रह्मचर्यव्रते स्थितः । साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२ ॥
राजनीत्यां विनीतश्च ब्राह्मणानामुपासकः । ज्ञानवाञ्शीलसंपन्नो विनीतश्च परंतपः ॥ १३ ॥
यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः । धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः ॥ १४ ॥
विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः । गूढजत्रुः सुताम्राक्षो रामो नाम जनैः श्रुतः ॥ १५ ॥
दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् । समश्च सुविभक्ताङ्गो वर्णं श्यामं समाश्रितः ॥ १६ ॥
त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः । त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः॥ १७ ॥
त्रिवलीमाँरुयवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान् । चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुःसमः ॥ १८ ॥

१२] ति० टी०–अत एवार्चिष्मानादित्यरूपः सन्नर्चितः त्रैवार्णिकैरिति शेषः । ब्रह्मचर्यव्रते गृहस्थोचितपर्वादिवर्जनपूर्वकमृतुगमनलक्षणे स्थितः । वस्तुतस्तु गार्हस्थ्येऽप्यस्खलितरेताः । मनःसंकल्पेनैव देव्या रतिप्रीतेः संतानस्य च संपादनमिति भावः । साधूनामुपकारज्ञ उपकर्तव्यकालज्ञः कर्मणां स्वरूपस्यानुष्ठानस्य च तत्त्वज्ञाता ॥ १२ ॥

रा० टी०–अर्चिष्मानिति । अर्चिष्मान् अतिप्रकाशवान् श्रुतिश्च " तस्य भासा सर्वमिदं विभाति " अत एव अत्यर्थमत्यन्तमर्चितः ईश्वरैरपि पूजितः ब्रह्मचर्यव्रते स्वकृतमर्यादादेतुभूतवेदोक्तनियमे स्थितः उपकारज्ञः उपकारमेव जानाति न त्वपकारमित्यर्थः, सः कर्मणां प्रचारज्ञः यथावत्प्रवृत्तिज्ञाता ॥ १२ ॥

१३] ति० टी०–ब्राह्मणानां वसिष्ठादीनाम् ॥ १३ ॥

रा० टी०–राजेति । ज्ञानवान् नित्यं निखिलानां विज्ञाता ॥ १३ ॥

१४] ति० टी०–यजुर्वेदविनीतश्च । चादन्येषामपि संग्रहः । विनीतो निरतः ॥ १४ ॥

रा० टी०–यजुरिति । यजुर्वेदविनीतः उपलक्षणया सर्ववेदेषु निष्णातः ॥ १४ ॥

१५] ति० टी०–एवमात्मगुणानुक्त्वा देहगुणानाह—विपुलांस इति ॥ १५ ॥

रा० टी०–विपुलांस इति । विपुलौ मांसलौ अंसौ यस्य ॥ १५ ॥

१६] ति० टी०–समो विस्तारायामसमः ॥ १६ ॥

रा० टी०–दुन्दुभीति । समः समहस्तादिविशिष्टः॥१६॥

१७]ति० टी०–त्रिस्थिरस्त्रिषु स्थानेषु स्थिरः । ' ऊरुश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः ' इत्युक्तेः । त्रिषु प्रलम्बः ' प्रलम्बा यस्य स धनी त्रयो भूमुष्कबाहवः ' इति सामुद्रिकोक्तेः । मुष्को वृषणः । त्रिषु समः समत्ववयव इत्यर्थः । ' केशाग्रं वृषणं जानु समं यस्य स भूपतिः ' इत्युक्तेः । त्रिषु चोन्नतः । ' नाभ्यन्तःकुक्षिवक्षोभिरुन्नतैः क्षितिपो भवेत् ' । त्रिः ताम्रस्त्रिषु ताम्रः । ' नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रस्त्रिभिः सुखी' । त्रिषु स्निग्धः । ' स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत् ॥ ' त्रिषु गम्भीरः ' स्वरे गतौ च नाभौ च गम्भीरस्त्रिषु शस्यते' ॥ १७ ॥

रा० टी०–त्रिस्थिर इति । त्रयः ऊर्वादयः स्थिराः यस्य सः तथाहि–' ऊरुश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः ' इति लक्षणानुशासनम् । त्रयः भूवृषणबाहवः प्रलम्बा यस्य सः तथाहि ' प्रलम्बा यस्य स धनी त्रयो भूमुष्कबाहवः ' इति सामुद्रिकः । मुष्कं वृषण इति तव्याख्या । त्रीणि केशाग्रादीनि समानि यस्य सः तथाहि–'केशाग्रं वृषणं जानु समं यस्य स भूपतिः ' इति त्रिषु नाभ्यादिषु उन्नतः ' नाभ्यन्तःकुक्षिवक्षोभिरुन्नतैः क्षितिपो भवेत् ' त्रयः नेत्रान्तादयः ताम्रा अरुणा यस्य सः तथाहि–' नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रस्त्रिभिः सुखी ' इति त्रिषु पादरेखाः शिरोरुहाः ' तथालिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत् ' त्रिषु स्वरादिषु नित्यशो गम्भीरः तथाहि ' स्वरे गतौ च नाभौ च गम्भीरस्त्रिषु शस्यते' ॥ १७ ॥

गो० टी०–त्रिस्थिर इति । त्रिषु स्थानेषु स्थिरः । तथोक्तम् सामुद्रिके—' ऊरुश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिरा ' इति । त्रिप्रलम्बः त्रिषु प्रलम्बः ' दीर्घभूबाहुमुष्कस्तु चिरजीवी धनी नरः ' इति वचनात् । अन्यत्र तु ' त्रयश्च यस्य वियन्ते प्रलम्बा मेदुबाहवः ' इति । त्रिसमः त्रिषु समः ' केशाग्रं वृषणं जानु समा यस्य स भूपतिः ' इति वचनात् । त्रिषु चोन्नतः। तदाह वराहमिहिरः—' उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभयः क्षितिपाः । हृदयं न वेपनं पृथु समोन्नतं मांसलं च नृपतीनाम् ' इति । त्रिताम्रः त्रिषु ताम्रः । ' श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी पादौ करावपि सुरक्तनखात्मरेखौ ' इति वचनात् । 'नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रस्त्रिभिः सुखी' इति च । त्रिषु स्निग्धः 'स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत् ' इति सामुद्रिकवचनात् । त्रिषु गम्भीरः । अत्र वररुचिः—'स्वरः सत्त्वं च नाभिश्च गम्भीरः शस्यते बुधैः' इति । ब्राह्मे तु–' स्वरे गतौ च नाभौ च गम्भीरस्त्रिषु शस्यते ' इति । नित्यश इति सर्वत्र विशेषणीयम् तेन रोगायुपाधिकृतरागादिनिवृत्तिः ॥ १७ ॥

१८] ति० टी०–त्रिवलीमानुदरे कण्ठे उभयत्र वा वलीत्रयवान् । त्रिष्ववनतो निम्नः । निम्नत्वं निम्नगत्वम् । तच्च निम-

१ उपासितेति गो. पाठः । २ श्रुतवानिति गो. पाठः । ३ देवीति गो. पाठः । ४ वानिति गो. रा. पाठः ।

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः । महोष्ठहनुनासश्च पञ्चस्निग्धोऽष्टवंशवान् ॥ १९ ॥

ग्रपादतलमध्यत्वम्, निमग्रपादरेखात्वम्, निमग्रस्तनचूचुकत्वं च । चतुर्व्यङ्गश्चतुर्ह्रस्वः । 'ग्रीवा प्रजननं पृष्ठं ह्रस्वे जङ्घे च पूजिते' । त्रिशीर्षवानावर्तत्रययुक्तशीर्षः । 'आवर्तत्रययुक्तं यस्य शिरः क्षितिभृतामयं नाथः' चतुष्कलः चतस्रः कलाश्चतुर्वेदप्राप्तिसूचकाङ्गुष्ठमूलरेखा यस्य सः । 'मूलेऽङ्गुष्ठस्य रेखानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं वेदरेखा द्विजन्मनाम्॥' चतुर्लेखो ललाटे चतूरेखायुक्तः । 'ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिः क्रमात् ॥' चतुष्किष्कुः किष्कुश्चतुर्विंशत्यङ्गुलात्मको हस्तश्चतुर्हस्तप्रमाणः । पण्णवत्यङ्गुलोत्सेध इति यावत् । चतुःसमः । 'बाहुजानुरुगण्डानि चत्वार्यथ समानि च' इति । बाहूरुजानुगण्डौ समावित्यर्थः ॥ १८ ॥

रा० टी०—त्रिवलीवानिति । त्रिवलीवान् उदरे कण्ठे च वलीत्रयविशिष्टः त्रिषु पादतलपादरेखास्तनचूचुकेषु अवनतः चत्वारि ग्रीवादीनि व्यङ्गानि ह्रस्वानि यस्य सः तथाहि 'ग्रीवा प्रजननं पृष्ठं ह्रस्वे जङ्घे च पूजिते' इति त्रिशीर्षवान् आवर्तत्रयविशिष्टशिरोविशिष्टः तथाहि 'आवर्तत्रययुक्तं यस्य शिरः क्षितिभृतामयं नाथः' चतस्रः चतुर्वेदप्राप्तिसूचिका कला अङ्गुष्ठरेखा यस्य सः तथाहि 'मूलेऽङ्गुष्ठस्य रेखानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं वेदरेखा द्विजन्मनाम्' ललाटे चतस्रो लेखा यस्य तथा हि 'ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिः क्रमात्' इति चत्वारः किष्कव उत्सेधपरिच्छेदकत्वेन यस्मिन् किष्कुः चतुर्विंशत्यङ्गुलात्मको हस्तः हस्तचतुष्टयपरिमितः पण्णवत्यङ्गुलोत्सेध इति फलितम् । चत्वारो बाहवादयः समा यस्य तथाहि—'बाहुजानुरुगण्डानि चत्वार्यथ समानि च' इति ॥ १८ ॥

गो० टी०—त्रिवलीवान् उदरे वलित्रयवान् कण्ठवलित्रयवान्वा । अत्र गर्गः—स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धासमांसोपचिता सुवृत्ता । न चातिदीर्घा चतुरङ्गुला च ग्रीवा सुदीर्घा भवतीह धन्या' इति । व्यवनतः त्रीण्यवनतानि निम्नानि यस्यासौ व्यवनतः तानि स्तनचूचुकपादरेखाः । अत्र मिहिरः—'पीनोपचितैर्निम्नैः क्षितिपतयश्चूचुकैः स्तनैः सुखिनः । स्निग्धा निम्ना रेखा धनिनां तद्वत्यत्ययेन निःस्वानाम्' इति । चत्वारि व्यङ्गानि ह्रस्वानि यस्यासौ चतुर्व्यङ्गः । अत्र वररुचिः—ग्रीवाप्रजननं पृष्ठं ह्रस्वं जङ्घा च पूज्यते' इति । यद्वा चत्वारो व्यङ्गाः विकलाः यस्य सः चतुर्व्यङ्गः ते च शिराविकलः पादः रोमान्तरविकलो रोमकूपः दैर्घ्यविकलो मेढ्रः मांसविकलो बस्तिः । अत्र नारदः—'पादैः प्रस्वेदरहितैः शिराहीनश्च पार्थिवः । एकरोमा भवेद्राजा द्विरोमा पण्डितो भवेत् ॥ त्रिरोमा चतुरोमा च भवेद्भाग्यविवर्जितः । समपादोपविष्टस्य गुल्फं स्पृशति मेहनम्॥ यस्येश्वरं तं जानीयात्सुखिनं चैव मानवम् । निर्मांसः संहतो बस्तिर्येषां ते सुखभागिनः ॥' इति । त्रिशीर्षवान् त्रिभिर्लक्षणैर्युक्तं शीर्षं तदस्यास्तीति त्रिशीर्षवान् । तानि लक्षणान्यावर्ताः । 'आवर्तत्रयरुचिरं यस्य शिरः स क्षितिभृतां नेता' इति कथनात् । यद्वा त्रिप्रकारं समवृत्तं छत्राकारं विशालं च शीर्षमस्यास्तीति त्रिशीर्षवान् । अत्र नारदः—' समवृत्तशिराश्चैव छत्राकारशिरास्तथा । एकच्छत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति ॥' चतस्रः कलाः वेदाः यस्य चतुष्कलः । अत्र शरीरलक्षणप्रकरणे कलाशब्दस्तत्सूचकरेखापरः । अत्र नन्दी—'मूलेऽङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनाम्' इति ॥ चतुर्लेखः ललाटे पादयोः पाण्योश्चतस्रो लेखा रेखा यस्य च चतुर्लेखः । ' ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिकाः शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा' इति कात्यायनः । ' यस्य पादतले वज्रध्वजशङ्खाङ्कुशोपमाः । रेखाः सम्यक् प्रकाशन्ते मनुजेन्द्रं तमादिशेत्' इति नारदः । ' पाणौ चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः' इति ब्रह्मा । चत्वारः किष्कवः यस्य स चतुष्किष्कुः । चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः । पण्णवत्यङ्गुलोत्सेध इत्यर्थः । ' पण्णवत्यङ्गुलोत्सेधो यः पुमान् स दिवौकसः' इति ब्राह्मपुराणवचनम् । चतुःसमः चत्वारः समा यस्य स चतुःसमः ते च बाहुजानुरुगण्डाः । तदुक्तं ब्रह्माण्डे—' बाहुजानुरुगण्डाश्च चत्वार्यथ समानि च' इति ॥ १८ ॥

१९] ति० टी०—चतुर्दशसमद्वन्द्व इति समपरिमाणचतुर्दशाङ्गद्वन्द्वः । तदुक्तम्—' भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुकौ । कूर्परे मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः । स्कन्धौ गण्डौ तथा दन्ता ऊरू ज्ञेयौ च जत्रुणी ॥' इत्यन्यत्र पाठः । चतुर्दंष्ट्र इति । चतस्रो दंष्ट्रा दन्तपङ्क्तिद्वये प्रतिपार्श्वं शास्त्रोक्तलक्षणा यस्य सः । तच्च—' स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः शुभाश्चतस्र' इति । दंष्ट्राणां तीक्ष्णत्वं क्रमुकादिखण्डनसमर्थत्वम् । चतुर्गतिरिति । सिंहशार्दूलगजवृषभैश्चतुर्भिस्तुल्या गतिर्यस्य सः । महोष्ठहनुनासश्चेति । महत्प्रशस्तमोष्ठहनुनासं यस्य सः । तत्रौष्ठस्य प्राशस्त्यं बिम्बफलादिवदरुणत्वे सति मांसलत्वम् । हनोस्तु परिपूर्णमांसलोन्नतत्वम् । नासिकायास्तु दीर्घोन्नततरुचिरपुटत्वम् । पञ्चस्निग्ध इति । पञ्चवाग्वक्रनखलोमत्वचं स्निग्धं यस्य सः । अष्टवंशवान्प्रशस्ताष्टवंशाख्याववयववान् । वंशशब्देन दैर्घ्यं विवक्षितम् । ' बाहू च नलकावूरू जङ्घे चेत्यष्टवंशकाः' । नलकावङ्घ्र्याविति तीर्थः ॥ १९ ॥

रा० टी०—चतुरिति । चतुर्दशसंख्याकाः समद्वन्द्वाः समत्वसमानाधिकरणीभूतद्वन्द्वत्वविशिष्टा यस्य सः तथाहि ' भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुकौ । कूर्परे मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयौ स भूपतिः ।' चतस्रो दंष्ट्रादयः यथाशास्त्रं दन्तपङ्क्ति-

दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् । षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ २० ॥

द्वयप्रतिपार्श्ववर्तिन्यो यस्य सः तथाहि ' स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः शुभाश्चतस्रः ' इति चतुर्णां सिंहशार्दूलगजवृषभाणां गतिरिव गतिर्यस्य सः महत् प्रशंसितम् औष्ठहनुनासं यस्य सः तत्रौष्ठस्य प्राशस्त्यं बिम्बफलादिसदृशारुणत्वसमानाधिकरणीभूतमांसलत्वेन, हनोस्तु परिपूर्णमांसलोन्नतत्वेन, नासिकायास्तु दीर्घोन्नतरुचिरपुटत्वेन । पञ्च वाग्वक्त्रनखलोमत्वचः स्निग्धा यस्य सः पूर्वं त्रयाणां स्निग्धत्वोक्तावपीदानीं पञ्चानां स्निग्धत्वोक्तिः मतभेदप्रदर्शनाय तेन सर्वमते रामावयवानां सुलक्षणत्वं बोधितम् वक्ष्यमाणषडुन्नतत्वेऽप्येषैव गतिः अष्टौ वंशा दैर्घ्यविशिष्टा बाह्वादयः सन्ति अस्य तथाहि ' बाहू च नलकावरू जङ्घे चेत्यष्ट वंशकाः ' । नलकावङ्गुल्याविति तीर्थः ॥ १९ ॥

गो० टी०–चतुर्दशसमद्वन्द्वः चतुर्दशसंख्यानि समानि द्वन्द्वानि यस्य सः । तथात्र सामुद्रिकम् ' भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः ' इति । चत्वारो दंष्ट्राकारा दन्ता यस्य स चतुर्दंष्ट्रः । तदाह मिहिरः— ' स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ' इति । चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभाणां गतिरिव गतिर्यस्य सः ' गजसिंहगती वीरौ शार्दूलवृषभोपमौ ' इति बालकाण्डोक्तेः । महोष्ठहनुनासश्च ओष्ठस्य महत्त्वं बन्धुजीवबिम्बफलारुणमांसलत्वं हनोस्तु परिपूर्णमांसलत्वम् नासिकाया दीर्घतुङ्गत्वम् । तथाच संहिता–' बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपधृत् । पूर्णमांसलहनुस्तु भूमिपस्तुङ्गतुण्डरुचिराकृतिस्तथा ॥' इति । तुण्डशब्देन नासिकोच्यते । पञ्चस्निग्धः पञ्च स्निग्धाः अवयवाः यस्य सः ते च वाक्यवक्त्रनखलोमत्वचः, केशनेत्रदन्तत्वक्पादतलानि वा । अत्र वररुचिः— ' चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचःस्नेहेन शयनं पादस्नेहेन वाहनम् ' इति । ' स्निग्धनीलमृदुकुञ्चितास्तथा मूर्धजाः सुखकराः समं शिरः' इति मिहिरः । पूर्वं त्रिषु स्निग्ध इत्युक्तेः । अत्र पञ्चस्निग्ध इतीदं मतभेदमाश्रित्योक्तम् । अष्टवंशवान् अष्टौ वंशाः आयतावयवा यस्य सः आयताष्टावयव इत्यर्थः । अत्र सामुद्रिकम्–पृष्ठवंशः शरीरं च हस्तपादाङ्गुली करौ । नासिका चक्षुषी कर्णौ प्रजनो यस्य चायताः' इति । प्रजनस्यायतत्वमार्जवम् ॥ १९ ॥

२०] ति० टी०–दशपद्मः । ' सुखनेत्रास्यजिह्वोष्ठतालुस्तननखं करौ । पादौ च दश पद्मानि पद्माकाराणि यस्य च ॥ ' इति । आस्यमोष्ठमध्यम् । दशबृहत् । तानि तु—'उरः शिरो ललाटं च ग्रीवा बाह्वंसनाभयः । पादौ पृष्ठं श्रुती चैव विशालास्ते सुखप्रदाः ॥ ' इति । त्रिभिः श्रीयशस्तेजोभिर्व्याप्तो युक्तः । द्विशुक्लवान् । 'द्वौ शुक्लौ तु शुभौ शुक्लौ वंशौ मातुः पितुस्तथा ' इत्युक्तेः । षडुन्नतः । तानि च—'कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्तु सुखप्रदाः ॥' इति । पूर्वं त्र्युन्नतास्निग्धत्वमुक्तम्, अत्र पञ्चस्निग्धत्वं षडुन्नतत्वं चोभयमपि मतभेदादविरुद्धम् । एवं नानामतप्रदर्शनं रामस्य नानामतसंमतसर्वलक्षणयुक्तत्वसूचनाय । नवतनुर्नवसु सूक्ष्मः । तानि च—' सूक्ष्माण्यङ्गुलिपर्वाणि केशरोमनखत्वचः । शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः ॥ ' इति प्रोक्तं षट्कम् । मृदुश्मश्रुत्वं सूक्ष्मदृष्टित्वं सूक्ष्मबुद्धित्वं चेति नव सूक्ष्मत्वम् । दृष्टेः सौक्ष्म्यं रत्नपरीक्षान्तसूक्ष्मदर्शनचातुर्यम् । बुद्धेः सूक्ष्मत्वं तत्त्वसाक्षात्कारसमर्थत्वम् । त्रिभिर्व्याप्नोति धर्मार्थकामैः कालं यथोचितं व्याप्नोति । त्रिवर्गसेवीत्यर्थः ॥ २० ॥

रा० टी०–दशेति । दश पद्मानि पद्माकाराणि यस्य सः तथाहि ' सुखनेत्रास्यजिह्वोष्ठतालुस्तननखं करौ । पादौ च दश पद्मानि पद्माकाराणि यस्य च ' इति आस्यमोष्ठमध्यमिति तद्व्याख्या दश उरःप्रभृतीनि बृहन्ति यस्य तथाहि ' उरः शिरो ललाटं च ग्रीवा बाह्वंसनाभयः । पादौ पृष्ठं श्रुती चैव विशालास्ते सुखप्रदाः ' इति षट् कक्षप्रभृतयः उन्नता यस्य तथाहि ' कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नतास्ते सुखप्रदाः ' इति नवाङ्गुलिपर्वादीनि तन्नि सूक्ष्माणि यस्य तथाहि–सूक्ष्माण्यङ्गुलिपर्वाणि केशलोमनखत्वचः। शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः ' इति त्रिभिः श्रीयशःप्रतापैर्व्याप्तः भुवनेषु पूर्णः द्वौ पितृवंशमातृवंशौ शुक्लौ शुद्धौ तद्वान् संग्रहानुग्रहे अर्जनदानयो रतः राघवः त्रिभिर्ब्रह्मादित्रितयकृतिद्वारा व्याप्नोति अत्र व्युत्क्रमेण व्याख्यान संदर्भशुद्धये ॥ २० ॥ २१ ॥

गो० टी०–दशपद्मः दशपद्माकारावयवाः यस्य सः दशपद्मः ' सुखनेत्रास्यजिह्वोष्ठतालुस्तननखाः करौ । पादौ च दश पद्मानि पद्माकाराणि यस्य च ' इति । दश बृहत् दशबृहदवयवा यस्य सः । ते च—' उरः शिरो ललाटं च ग्रीवा बाह्वंसनाभयः । पार्श्वपृष्ठस्वराश्चेति विशालास्ते शुभप्रदाः । ' इति सामुद्रिकम् । ब्राह्मे तु—'शिरोललाटे श्रवणे ग्रीवा वक्षश्च हृत्तथा । उदरं पाणिपादौ च पृष्ठं दश बृहन्ति च ॥' इति त्रिभिर्व्याप्तः । त्रिभिर्व्याप्तिश्च यस्य स्यात्तेजसा यशसा श्रियेति ब्राह्मोक्तरीत्या त्रिभिर्व्याप्तः । द्विशुक्लवान् द्वौ दन्तनेत्रे शुक्ले यस्य सः द्विशुक्लवान् । षडुन्नतः षट् उन्नता अवयवा यस्य सः । ते च—' कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नताङ्गाः शुभप्रदाः ॥ ' इति वररुचिः । अत्र मतभेदेनोक्तेर्न पुनरुक्तिः । मतभेदश्रवणं च रामस्य सकलशास्त्रोक्तमहापुरुषलक्षणपरिपूर्णत्वद्योतनाय । नवतनुः नव तनवः सूक्ष्मा यस्य । तानि च—' केशश्मश्रुनखलोमत्वगङ्गुलिपर्वशेफोबुद्धिदर्शनानि । सूक्ष्माण्यङ्गुलिपर्वाणि केशलोमनखत्वचः । शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः ॥ ' इति वररुचिः । त्रिभिर्व्याप्नोति त्रिभिः

सत्यधर्मरतः श्रीमान्संग्रहानुग्रहे रतः । देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१ ॥
भ्राता चास्य[1] च द्वैमात्रः सौमित्रिरमितप्रभः[2] । अनुरागेण रूपेण गुणैश्चापि तथाविधः ॥ २२ ॥
सप्तुवर्णच्छविः श्रीमान्रामः श्यामो महायशाः[3] । तावुभौ नरशार्दूलौ त्वद्दर्शनकृतोत्सवौ ॥ २३ ॥
विचिन्वन्तौ महीं कृत्स्नामस्माभिः सह संगतौ[4] । त्वामेव मार्गमाणौ तौ विचरन्तौ वसुंधराम् ॥ २४ ॥
ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम्[5] । ऋष्यमूकस्य मूले तु बहुपादपसंकुले ॥ २५ ॥
भ्रातुर्भयार्तमासीनं सुग्रीवं प्रियदर्शनम्[6] । वयं च हरिराजं तं सुग्रीवं सत्यसंगरम् ॥ २६ ॥
परिचर्यामहे राज्यात्पूर्वजेनावरोपितम्[7] । ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ ॥
[ऋष्यमूकस्य शैलस्य रम्यं देशमुपागतौ] । स तौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः ॥ २७ ॥
[8]अभिप्लुतो गिरेस्तस्य शिखरं भयमोहितः । ततः स शिखरे तस्मिन्वानरेन्द्रो व्यवस्थितः ॥ २८ ॥
तयोः समीपं मामेव प्रेषयामास सत्वरम् । तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू ॥ २९ ॥
रूपलक्षणसंपन्नौ कृताञ्जलिरुपस्थितः । तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ ॥ ३० ॥
पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ । निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने ॥ ३१ ॥
तयोरन्योन्यसंभाषाद्दृढं प्रीतिरजायत । तत्र तौ कीर्तिसंपन्नौ हरीश्वरनरेश्वरौ ॥ ३२ ॥

पूर्वाह्णमध्याह्नापराह्णैः कालैः धर्मार्थकामान् व्याप्नोति अनुतिष्ठतीति । तदुक्तं ब्राह्मे—'धर्मार्थकामाः कालेषु त्रिषु यस्य स्वनिष्ठिताः' इति ॥ २० ॥

२१] ति० टी०–संग्रहानुग्रहे संग्रहो धनबलादीनाम्, अनुग्रहस्ताभ्यां प्रजारक्षणम्, तदुभयनिष्ठः ॥ २१ ॥

गो० टी०–संग्रहानुग्रह इति । संग्रहः अर्जनम् । अनुग्रहः फलदानम् ॥ २१ ॥

२२–२३] ति० टी०–द्वैमात्रः राममात्रपेक्षया द्वितीया माता द्विमाता । तस्या अपत्यमित्यर्थः । भिन्नोदरभ्रातेत्यर्थः । 'वैमात्रः' इति पाठान्तरम् ॥ २२ ॥ २३ ॥

रा० टी०–भ्रातेति । अस्य रामस्य सौमित्रिर्भ्राता द्वैमात्रः राममात्रपेक्षया द्वितीयमातृजनित इत्यर्थः अनुरागादिभिस्तथाविधः रामसदृशः ॥ २२ ॥

रा० टी०–स इति । सुवर्णच्छविः गौरः स लक्ष्मणः श्यामो रामश्च त्वद्दर्शनसमुत्सुकौ अत एव विचिन्वन्तौ सन्तौ अस्माभिः सह संगतौ बभूवतुरिति शेषः । सार्धश्लोक एकान्वयी ॥ २३ ॥

गो० टी०–भ्राता च तस्येति । द्वैमात्रः सपत्नीपुत्रः ॥ २२ ॥ २३ ॥

२४] ति० टी०–अस्माभिः सुग्रीवमन्त्रिभिरित्यर्थः । उक्तमेव विस्तरेणाह—त्वामेवेति ॥ २४ ॥

रा० टी०–त्वामिति । तौ रामलक्ष्मणौ पूर्वजेन ज्येष्ठभ्रात्रा अवरोपितं विवासितम् अत एव भ्रातुर्भयात् ऋष्यमूकस्य मूले आसीनं तं प्रसिद्धं सुग्रीवं ददर्शतुः ददृशतुः । अर्धचतुष्टयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–त्वामेवेति । मृगपतिं सुग्रीवम् । पूर्वजेन वालिना । अवरोपितं राज्यादिति शेषः ॥ २४–२६ ॥

२५–२६] ति० टी०–मृगपतिं शाखामृगपतिं सुग्रीवम्, पूर्वजेन वालिनाऽवरोपितं राज्याद्भ्रंशितम् ॥ २५ ॥ २६ ॥

रा० टी०–वयमिति । वयं तु सत्यः कापट्यरहितः संगरः संग्रामो यस्य तं सुग्रीवं परिचर्यामहे परिचरामः । सार्धश्लोक एकान्वयी ॥ २६ ॥ २७ ॥

२७] ति० टी०–परिचर्यामहे तङ्श्यनावार्षौ । परिचराम इत्यर्थः । अवरोपितं राज्येन हीनं कृतम्, पाणिनौ । पाणी इति यावत् ॥ २७ ॥

रा० टी०–तत इति । ततो रामसंदर्शनानन्तरं तौ रामलक्ष्मणौ दृष्ट्वा भयमोहितः वालिभीत्या विवेकरहितः सुग्रीवः गिरेः शिखरमभिप्लुतः उत्प्लुत्य प्राप्तः । सार्धश्लोक एकान्वयी ॥ २८ ॥

गो० टी०–तत इति । पाणिनाविति नान्तत्वमार्षम् ॥ २७–२९ ॥

२८–२९] ति० टी०–अभिप्लुत उत्प्लुत्यारूढः ॥ २८ ॥ २९ ॥

रा० टी०–तत इति । शिखरे व्यवस्थितो वानरेन्द्रः तयो रामलक्ष्मणयोः समीपं मामेव प्रेषयामास । अर्धद्वयमेकान्वयि ॥ २९ ॥

रा० टी०–ताविति । सुग्रीववचनात् तौ रामलक्ष्मणौ अहमुपस्थितः ॥ ३० ॥

३०–३२] ति० टी०–मया परिज्ञाततत्त्वार्थौ मया विज्ञाताशेषवृत्तान्तौ विज्ञापिताशेषवृत्तान्तौ च ॥ ३०–३२ ॥

रा० टी०–ताविति । परिज्ञातः तत्त्वार्थः सत्यवृत्तान्तो

---

१ तस्येति गो. पाठः । २ अपराजित इति गो. पाठः । ३ अभीति गो. पाठः । ४ पृष्ठे इति गो. पाठः । ५ अर्धमेतदधिकं गो. पाठे । ६ अवेति गो. पाठः । ७ लापादिति गो. पाठः ।

परस्परकृताश्वासौ कथया पूर्ववृत्तया । तं ततः सान्त्वयामास सुग्रीवं लक्ष्मणाग्रजः ॥ ३३ ॥
स्त्रीहेतोर्वालिना भ्रात्रा [1]निरस्तं पुरुतेजसा । ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः ॥ ३४ ॥
लक्ष्मणो वानरेन्द्राय सुग्रीवाय न्यवेदयत् । स श्रुत्वा वानरेन्द्रस्तु लक्ष्मणेनेरितं वचः ॥ ३५ ॥
तदासीन्निष्प्रभोऽत्यर्थं ग्रहग्रस्त इवांशुमान् । ततस्त्वद्वात्रशोभीनि रक्षसा ह्रियमाणया ॥ ३६ ॥
यान्याभरणजालानि पातितानि महीतले । तानि सर्वाणि रामाय आनीय हरियूथपाः ॥ ३७ ॥
संहृष्टा दर्शयामासुर्गतिं [2]तु न विदुस्तव । तानि रामाय दत्तानि मयैवोपहृतानि च ॥ ३८ ॥
स्वनवन्त्यवकीर्णानि तस्मिन्वि[3]हतचेतसि । तान्यङ्के[4] दर्शनीयानि कृत्वा बहुविधं तदा ॥ ३९ ॥
तेन देवप्रकाशेन देवेन परिदेवितम् । [[5]पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः ।]
प्रादीपयद्दाशरथेस्तदा शोकहुताशनम् ॥ ४० ॥
शायितं च चिरं तेन दुःखार्तेन महात्मना । मयाऽपि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः॥ ४१ ॥
तानि दृष्ट्वा महार्हाणि दर्शयित्वा मु[6]हुर्मुहुः । राघवः सहसौमित्रिः सु[7]ग्रीवे संन्यवेशयत् ॥ ४२ ॥

याभ्यां तौ पुरुषर्षभौ रामलक्ष्मणौ पृष्ठमारोप्य तं सुग्रीवाधिष्ठितं देशं मया प्रापितौ तत्त्वेन यथार्थकथनेन सुग्रीवाय निवेदितौ च । सार्धश्लोक एकान्वयी ॥ ३१ ॥ ३२ ॥

रा० टी०–तयोरिति । तयो रामसुग्रीवयोः संभाषात् भृशं प्रीतिरजायत । अर्धं पृथक्–तत्रेति । तत्र तस्मिन् समये प्रीतिसंपन्नौ पूर्ववृत्तया कथयोपलक्षितौ हरीश्वरनरेश्वरौ परस्परकृताश्वासौ बभूवतुरिति शेषः । अर्धद्वयमेकान्वयि ॥ ३३ ॥

३३] ति० टी०–पूर्ववृत्तया स्वीयस्वीयवृत्तान्तगोचरया ॥ ३३ ॥

रा० टी०–तमिति । पुरुतेजसा महातेजोविशिष्टेन भ्रात्रा स्त्रीहेतोः अनुजस्त्रीपरिग्रहार्थं निरस्तं सुग्रीवं लक्ष्मणाग्रजः सान्त्वयामास ॥ ३४ ॥

३४–३५] ति० टी०–स्त्रीहेतोः सुग्रीवस्त्रीपरिग्रहार्थम् । पुरु महत्तेजो यस्य तेन । त्वन्नाशजं त्वदपहारजम् ॥३४॥३५॥

रा० टी०–तत इति । ततः सुग्रीववृत्तान्तश्रवणानन्तरं त्वन्नाशजं त्वददर्शनजनितं रामस्य शोकं लक्ष्मणः सुग्रीवाय न्यवेदयत् ॥ ३५ ॥

रा० टी०–स इति । लक्ष्मणेनेरितं वचो वानरेन्द्रः श्रुत्वा ग्रहग्रस्तोंशुमानिव निष्प्रभोऽभूत् शुशोचेत्यर्थः ॥ ३६ ॥

गो० टी०–स श्रुत्वेति । अत्यर्थं निष्प्रभ इति आत्मवद्रामस्यापि दुःखहेतुश्रवणादिति भावः । यद्वा रामापेक्षया अत्यन्तनिष्प्रभः । रामः सीताविरहेण निष्प्रभोऽभूत् सुग्रीवस्तु तयोः साहित्यादर्शनाद्रामक्लेशदर्शनाच्चात्यर्थं निष्प्रभोऽभूत् ॥ ३६ ॥ ३७ ॥

३६–३७] ति० टी०–निष्प्रभः खिन्नचित्तः । त्वद्वात्रं शोभयितुं शीलं येषां तानि ॥ ३६ ॥ ३७ ॥

रा० टी०–तत इति । रक्षसा ह्रियमाणया त्वया यान्याभरणजालानि पातितानि तानि सर्वाणि आनीय हरियूथपाः दर्शयामासुः परन्तु तव गतिं स्थानं न विदुः । अर्धचतुष्टयमेकान्वयि ॥ ३७ ॥ ३८ ॥

गो० टी०–तानीत्यादि । आनीय हरियूथपा इति पूर्वं सुग्रीवेणानयनमुक्तं तद्धरियूथपद्वारेत्यत्रोच्यते । गतिं रावणस्थानम् ॥ ३८ ॥

३८] ति० टी०–दर्शयामासुः सुग्रीवाज्ञयेति शेषः ॥३८॥

रा० टी०–तानीति । तस्मिन् रामे विहतचेतसि सति यान्याभरणजालानि रामाय दत्तानि वानरैरिति शेषः, तानि स्वनवन्ति पतनकाले स्वनविशिष्टानि मयैवोपहृतानि ॥ ३९ ॥

गो० टी०–तानीति । दत्तानि सुग्रीवेणेति शेषः । मयैवोपहृतानि पूर्वं पतनकाल इति शेषः । इदानीं हरियूथपैरानीतत्वोक्तेः । स्वनवन्ति आकाशात्पतनकाले ॥ ३९ ॥ ४० ॥

३९] ति० टी०–मयैवोपहृतानि च प्रथममिति शेषः । अवकीर्णानि भूमौ पातनार्त्किंचिद्विशीर्णानि । तानि दत्तानि गृहीत्वा शोकात्तस्मिन्विहतचेतसि प्रथमार्थे सप्तमी । विहतचेताः मूर्च्छितचेता अभूदित्यर्थः ॥ ३९ ॥

रा० टी०–तानीति । तानि आभरणानि अङ्के कृत्वा तेन रामेण बहुविधं परिदेवितं तदा तस्मिन् काले दाशरथेः परिदेवितं शोकहुताशनमस्मच्छोकवह्निं प्रादीपयत् अत एव दुःखार्तेन तेन महात्मना शयितं शयनं भूमौ पतितमित्यर्थः, वाक्यैर्बोधकवचनैर्मया अपिना सुग्रीवादिना च पुनः पुनः उत्थापितः । सार्धश्लोकद्वयमेकान्वयि ॥ ४०–४२ ॥

४०] ति० टी०–देवप्रकाशेन देवावतारेण, अत एव देवेन परिदेवितं प्रादीपयत् । आभरणदर्शनमिति शेषः ॥४०॥

४१–४२]ति०टी०–शायितं शोकाद्भूमौ पतितम्४१॥४२

रा० टी०–तानीति । तान्याभरणानि पुनः पुनर्दृष्ट्वा दर्शयित्वा च राघवः सुग्रीवे संन्यवेशयत् ॥ ४२ ॥

---

१ निरस्त इति रा. पाठः । २ उर्विति गो. पाठः । ३ गतेति गो. पाठः । ४ अर्धमेतदधिकं गो. पाठे । ५ बाहुरिति गो. पाठः । ६ पुनः पुनरिति गो. पाठः । ७ सुग्रीवेणेति गो. पाठः ।

स तवादर्शनादार्ये राघवः परितप्यते । महता ज्वलता नित्यमग्निनेवाग्निपर्वतः ॥ ४३ ॥
त्वत्कृते तमनिद्रा च शोकश्चिन्ता च राघवम् । तापयन्ति महात्मानमग्न्यगारमिवाग्नयः ॥ ४४ ॥
तवादर्शनशोकेन राघवः परिचाल्यते । महता भूमिकम्पेन महानिव शिलोच्चयः ॥ ४५ ॥
काननानि सुरम्याणि नदीप्रस्रवणानि च । चरन्न रतिमाप्नोति त्वामपश्यन्नृपात्मजे ॥ ४६ ॥
स त्वां मनुजशार्दूलः क्षिप्रं प्राप्स्यति राघवः । सामित्रबान्धवं हत्वा रावणं जनकात्मजे ॥ ४७ ॥
सहितौ रामसुग्रीवावुभावकुरुतां तदा । समयं वालिनं हन्तुं तव चान्वेषणं प्रति ॥ ४८ ॥
ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः । किष्किन्धां समुपागम्य वाली युद्धे निपातितः ॥ ४९ ॥
ततो निहत्य तरसा रामो वालिनमाहवे । सर्वर्क्षहरिसङ्घानां सुग्रीवमकरोत्पतिम् ॥ ५० ॥
रामसुग्रीवयोरैक्यं देव्येवं समजायत । हनूमन्तं च मां विद्धि तयोर्दूतमुपागतम् ॥ ५१ ॥
स्वं राज्यं प्राप्य सुग्रीवः स्वानानीय महाकपीन् । त्वदर्थं प्रेषयामास दिशो दश महाबलान् ॥ ५२ ॥
आदिष्टा वानरेन्द्रेण सुग्रीवेण महौजसः । अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीम् ॥ ५३ ॥
ततस्ते मार्गमाणा वै सुग्रीववचनातुराः । चरन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ ५४ ॥

गो० टी०–शयितमिति । शयितं मूर्छितम् ॥ ४२ ॥

गो० टी०–तानीति । सुग्रीवे संन्यवेदयत् सुग्रीवहस्ते न्यस्तवानित्यर्थः ॥ ४३ ॥

४३–४७] ति० टी०–अग्निपर्वतः संवर्ताख्यकालाग्निनिवासभूतः पर्वतोऽग्निपर्वतः । 'तत्र माल्यवतः शृङ्गे दृश्यते हव्यवाट् सदा । नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ ॥' इति भीष्मपर्वणि भारतोक्तेः ॥ ४३–४७ ॥

रा० टी०–स इति । हे आर्ये ! राघवः तवादर्शनात् ज्वलता अग्निना अग्निपर्वतः कालाग्निनिवासभूतगिरिरिव नित्यं परितप्यते ॥ ४४ ॥

रा० टी०–त्वदिति । त्वत्कृते त्वदर्थम् अनिद्रादयः अग्न्यगारमग्नय इव राघवं तापयन्ति ॥ ४५ ॥

रा० टी०–तवेति । तवादर्शनशोकेन महता भूमिकम्पेन महान् शिलोच्चय इव राघवः परिचाल्यते ॥ ४६ ॥

रा० टी०–काननानीति । त्वामपश्यन् राघवः काननादीनि चरन्नपि रतिं प्रीतिं नाप्नोति ॥ ४७ ॥

रा० टी०–स इति । स राघवः रावणं हत्वा त्वां क्षिप्रं प्राप्स्यति ॥ ४८ ॥

गो० टी०–स तवेति । अग्निपर्वतो नाम मेरुशिखरवर्ती कश्चिद्गिरिः । उक्तं च भारते—'अत्र माल्यवतः शृङ्गे दृश्यते हव्यवाट् सदा । नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ ॥' इति ॥ ४४ ॥ ५१ ॥

४८–५३] ति० टी०–सहितौ सख्यं प्राप्तौ । समयं प्रतिज्ञाम् ॥ ४८–५३ ॥

रा० टी०–सहिताविति । सहितौ एकीभूतौ उभौ रामसुग्रीवौ वालिनं हन्तुं तवान्वेषणं प्रति अन्वेषणं कर्तुं च समयं प्रतिज्ञाम् अकुरुताम् ॥ ४९ ॥

रा० टी०–तत इति । ततः प्रतिज्ञाकरणानन्तरं कुमाराभ्यां रामलक्ष्मणाभ्यां किष्किन्धां समुपागम्य युद्धे वाली निपातितः हतः ॥ ५० ॥

रा० टी०–तत इति । रामः वालिनं निहत्य सुग्रीवं निखिलऋक्षादीनां पतिमकरोत् ॥ ५१ ॥

रा० टी०–रामेति । एवमुक्तप्रकारेण रामसुग्रीवयोः ऐक्यं सख्यं समजायत मां तु तयोर्दूतं हनूमन्तं विद्धि जानीहि ॥ ५२ ॥

रा० टी०–स्वमिति । सुग्रीवः स्वं राज्यं प्राप्य अत एव स्वान् स्वकीयान् महाकपीन् आनीय त्वदर्थं प्रेषयामास ॥ ५३ ॥

रा० टी०–आदिष्टा इति । सुग्रीवेणादिष्टाः वानरेन्द्रा सर्वतः सर्वां महीं प्रस्थिताः ॥ ५४ ॥

गो० टी०–ननु वानराणां नराणां च कथमासीत्समागम इति वामदक्षिणहस्तवैषम्यमप्यविजानानां शाखायाः शाखामाप्लुत्य जीवतां तिरश्चां वसिष्ठशिष्यतया निरतिशयाचारसंपन्नयोश्चक्रवर्तिपुत्रयोश्च कथं समागमो जात इति पृष्टं तस्य किमुत्तरमुक्तमित्यत्राह–रामसुग्रीवयोरिति । रामसुग्रीवयोरैक्यमेवं समजायत । एवमिति प्रत्यक्षनिर्देशः । स्वानुजे विद्यमानेऽपि यथाहं सुग्रीवदूतोऽन्तःपुरकार्यसमाधानायागतः तथा तयोरैक्यं मैत्री जातेत्यर्थः । यद्वा एवं समजायत अहमप्येवं दृष्टवान् । न योग्यतामवगच्छामीत्यर्थः ॥ ५२–५४ ॥

५४] ति० टी०–सुग्रीववचनातुराः सुग्रीवाज्ञाभीताः ५४

---

१ प्रवीति गो. पाठः । २ नदीरिति गो. पाठः । ३ तथेति गो. पाठः । ४ देवीति रा. पाठः । ५ इहेति गो. पाठः । ६ स्वराज्यमिति गो. पाठः ७ समानीय हरीश्वरानिति गो. पाठः । ८ महौजसेति गो. पाठः ।

अङ्गदो नाम लक्ष्मीवान्वालिसूनुर्महाबलः । प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः ॥ ५५ ॥
तेषां नो विप्रणष्टानां विन्ध्ये पर्वतसत्तमे । भृशं शोकपरीतानामहोरात्रगणा गताः ॥ ५६ ॥
ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च । भयाच्च कपिराजस्य प्राणांस्त्यक्तुमुपस्थिताः ॥ ५७ ॥
विचित्य गिरिदुर्गाणि नदीप्रस्रवणानि च । अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं व्यवस्थिताः ॥५८॥
ततस्तस्य गिरेर्मूर्ध्नि वयं प्रायमुपास्महे । दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुंगवान् ॥ ५९ ॥
भृशं शोकार्णवे मग्नः पर्यदेवयदङ्गदः । तव नाशं च वैदेहि वालिनश्च तथा वधम् ॥ ६० ॥
प्रायोपवेशमस्माकं मरणं च जटायुषः । तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षताम् ॥ ६१ ॥
कार्यहेतोरिहायातः शकुनिर्वीर्यवान्महान् । गृध्रराजस्य सोदर्यः संपातिर्नाम गृध्रराट् ॥ ६२ ॥
श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत् । यवीयान्केन मे भ्राता हतः क्व च निपातितः ॥ ६३ ॥
एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः । अङ्गदोऽकथयत्तस्य जनस्थाने महद्वधम् ॥ ६४ ॥
रक्षसा भीमरूपेण त्वामुद्दिश्य यथार्थतः । जटायोस्तु वधं श्रुत्वा दुःखितः सोऽरुणात्मजः ॥ ६५ ॥
त्वामाह स वरारोहे वसन्तीं रावणालये । तस्य तद्वचनं श्रुत्वा संपातेः प्रीतिवर्धनम् ॥ ६६ ॥

रा० टी०–तत इति । सुग्रीववचनातुराः अत एव मार्गमाणाः त्वामन्वेषयन्तः वयं ततस्तां वसुधां चरामः अन्ये च वानराश्चरन्ति ॥ ५५ ॥

गो० टी०–तत इति । सुग्रीववचनातुराः सुग्रीवाज्ञाभीताः । 'सुग्रीववचनानुगाः' इति च पाठः ॥ ५५ ॥

५५] ति० टी०–त्रिभागबलसंवृत्तः सेनायास्त्रिष्वंशेष्वेकांशसेनापरिवृत इत्यर्थः ॥ ५६ ॥

रा० टी०–अङ्गद इति । त्रिभागबलसंवृतः प्रेषितावशिष्टसेनाभागत्रयविशिष्टः चतुर्थांश एव किष्किन्धायामवशिष्ट इत्यर्थः किंच त्रयो भागा गता यस्याः तदेव बलं तेन संवृतः अङ्गदः प्रस्थितः ॥ ५६ ॥

गो० टी०– अङ्गद इति । त्रिभागबलसंवृतः तृतीयांशेन बलेन सैन्येन संवृत इत्यर्थः । वृत्तिविषये पूरणार्थत्वं संख्याशब्दस्येष्यते ॥ ५६ ॥

५६–६०]ति० टी०–विन्ध्ये विप्रणष्टानां बिलमध्येऽदर्शनं प्राप्तानाम् । गता इति । समयात्परेऽपीति शेषः ॥ ५६–६० ॥

रा० टी०–तेषामिति । पर्वतसत्तमे विन्ध्ये विप्रनष्टानामप्राप्तत्वद्वृत्तान्तानामित्यर्थः, अत एव शोकपरीतानां नोऽस्माकम् अहोरात्रगणाः बहूनि दिनानि गता व्यतीताः ॥ ५७ ॥

रा० टी०–ते इति । ते अप्राप्तत्वद्वृत्तान्ता वयं कार्यनैराश्यात्त्वद्वृत्तान्तविषयकाशाभावात् कालस्य अतिक्रमेण संकेतितसमयस्य व्यतीतत्वेन च कपिराजस्य भयात् प्राणान् त्यक्तुं वयमुपस्थिताः ॥ ५८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–विचित्येति । गिरिदुर्गादीनि विचित्य देव्याः तव पदं स्थितिमनासाद्य प्राणान् त्यक्तुं वयं व्यवस्थिताः ॥ ५९ ॥

रा० टी०–तत इति । ततः तस्मिन् गिरेर्मूर्ध्नि वयं प्रायमनशनव्रतमुपास्महे । अथ पृथक्–दृष्ट्वेति । वानरपुङ्गवान् प्रायोपविष्टान् दृष्ट्वा तव नाशमदर्शनं च दृष्ट्वा ज्ञात्वा वालिवधं च दृष्ट्वा संस्मृत्य अस्माकं प्रायोपवेशं च जटायुषो मरणं च दृष्ट्वा संस्मृत्य शोकार्णवे मग्नोऽङ्गदः पर्यदेवयत् व्यलपत् । अर्धचतुष्टयमेकान्वयि ॥ ६० ॥

गो० टी०–तेषामिति । विप्रणष्टानां बिले अदर्शनं गतानाम् ॥ ५७ ॥

गो० टी०–ते वयमिति । कालस्य सुग्रीवकल्पितमासस्य । कपिराजस्य सुग्रीवात् ॥ ५८–५९ ॥

गो० टी०–दृष्ट्वेत्यादिश्लोकद्वयमेकं वाक्यम् । परिदेवनकर्माह—तवेति ॥ ६० ॥ ६१ ॥

६१] ति० टी०–निराशानां त्वत्प्राप्त्याशारहितानाम् । स्वामिसंदेशात्तत्संदिष्टकालात्ययाद्धेतोर्मुमूर्षताम् ॥ ६१ ॥

रा० टी०–तेषामिति । स्वामिसंदेशान्निराशानाम् अत एव मुमूर्षतां तेषां नोऽस्माकं कार्यहेतोः इह अस्मत्समीपे आयातः वीर्यवान् शकुनिः पक्षी गृध्रराजस्य जटायुषः सोदर्यः संपातिः भ्रातृवधं श्रुत्वा कोपात् कोपं प्राप्य इदमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ ६१ ॥ ६२ ॥

गो० टी०–तेषामिति । स्वामिसंदेशात् मासादूर्ध्वमनागतानां भयमित्येवंरूपात् । तेषां कार्यहेतोः ॥ ६२—६७ ॥

६२] ति० टी०–कार्यहेतोः कार्यसिद्ध्यर्थमिवायातः । दैवादिति शेषः ॥ ६२ ॥

६३] ति० टी०–क्व देशे इति शेषः ॥ ६३ ॥

रा० टी०–तद्वचनाकारमाह–यवीयानिति । यवीयान्कनिष्ठो मे भ्राता केन हतः क्व निपातितः एतत् भवद्भिरुक्तं श्रुत्वेति शेषः आख्यातुं किंचित् कथयितुमिच्छामि ॥ ६३ ॥

६४-६६] ति० टी०–आख्यातुमित्यसमानकर्तृकेऽपि तुमुन्नार्षः ॥ ६४–६६ ॥

१ प्रनष्टानामिति रा. पाठ. । २ व्येति गो. पाठः । ३ गिरीति गो. पाठः । ४ यथातथमिति गो. पाठः । ५ जटायुष इति गो. पाठः । ६ संपातिरिति रा. पाठः । ७ त्वां शशंसेति गो. पाठः ।

अङ्गदप्रमुखाः सर्वे ततः प्रस्थापिता वयम् । विन्ध्यादुत्थाय संप्राप्ताः सागरस्यान्तमुत्तमम् ॥ ६७ ॥
त्वद्दर्शने कृतोत्साहा हृष्टाः पुष्टाः प्लवङ्गमाः । अङ्गदप्रमुखाः सर्वे वेलोपान्तमुपागताः ॥ ६८ ॥
चिन्तां जग्मुः पुनर्भीमां त्वद्दर्शनसमुत्सुकाः । अथाहं हरिसैन्यस्य सागरं दृश्य सीदतः ॥ ६९ ॥
व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः । लङ्का चापि मया रात्रौ प्रविष्टा राक्षसाकुला ॥ ७० ॥
रावणश्च मया दृष्टस्त्वं च शोकनिपीडिता । एतत्ते सर्वमाख्यातं यथावृत्तमनिन्दिते ॥ ७१ ॥
अभिभाषस्व मां देवि दूतो दाशरथेरहम् । तन्मां रामकृतोद्योगं त्वन्निमित्तमिहागतम् ॥ ७२ ॥
सुग्रीवसचिवं देवि बुद्ध्यस्व पवनात्मजम् । कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः ॥ ७३ ॥
गुरोराराधने युक्तो लक्ष्मणः शुभलक्षणः । तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः ॥ ७४ ॥
अहमेकस्तु संप्राप्तः सुग्रीववचनादिह । मयेयमसहायेन चरता कामरूपिणा ॥ ७५ ॥
दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा । दिष्ट्याऽहं हरिसैन्यानां त्वन्नाशमनुशोचताम् ॥ ७६ ॥
अपनेष्यामि संतापं तवाधिगमशासनात् । दिष्ट्या हि न मम व्यर्थं सागरस्येह लङ्घनम् ॥ ७७ ॥
प्राप्स्याम्यहमिदं देवि त्वदर्शनकृतं यशः । राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते ॥ ७८ ॥

रा० टी०–अङ्गद इति । तस्य जटायुषो जनस्थाने त्वामुद्दिश्य त्वदर्थं रक्षसा रावणेन कृतमिति शेषः, महद्वधमङ्गदोऽकथयत् ॥ ६४ ॥

रा० टी०–जटायोरिति । जटायोर्वधं श्रुत्वा दुःखितोऽरुणात्मजः संपातिः रावणालये वसन्तीं त्वामाह ॥ ६५ ॥

रा० टी०–तस्येति । तस्य संपातेः वचनं श्रुत्वा प्रस्थापिताः कृतप्रस्थाना वयं विन्ध्यादुत्थाय सागरस्यान्तं तटं संप्राप्ताः । सार्धश्लोक एकान्वयी ॥ ६६ ॥ ६७ ॥

६७–६९] ति० टी०–अन्तं तटम् ॥ ६७–६९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–त्वदिति । त्वद्दर्शने कृत उत्साहो यैस्ते सर्वे प्लवङ्गमाः वेलोपान्तमुपागताः ॥ ६८ ॥

रा० टी०–चिन्तामिति । त्वद्दर्शनसमुत्सुकाः अङ्गदप्रमुखाः चिन्तां सागरोल्लङ्घनसंशयं जग्मुः । अथानन्तरं सीदतो हरिसैन्यस्य भयं व्यवधूय योजनशतं शतसंख्यांकं सागरं प्लुतः रात्रौ लङ्का च प्रविष्टा । श्लोकद्वयं संमिलितान्वयि ॥६९–७१॥

गो० टी०–विन्ध्यादिति । हृष्टाः उत्साहवन्तः तुष्टा आनन्दवन्तः ॥ ६८ ॥

गो० टी०–अङ्गदप्रमुखा इति । वेलोपान्तं वेला सिन्धुपूरः तस्योपान्तम् । ‘ वेलाम्बुधेस्तीरवृद्धयोः कालमर्यादयोरपि’ इति दर्पः ॥ ६९ ॥ ७२ ॥

७०–७२] ति० टी०–प्लुतः प्लुतवान् ॥ ७०–७२ ॥

रा० टी०–अभीति । यस्मात् दाशरथेरहं दूतः तत्तस्मात् रामकृतोद्योगं रामार्थकोद्योगविशिष्टम् अत एव त्वन्निमित्तमिहागतं सुग्रीवसचिवं मां बुध्यस्व अत एव मामभिभाषस्व । सार्धश्लोक एकान्वयी ॥ ७२ ॥

गो०टी०–तं मामिति । रामकृतोद्योगं रामकृतोत्साहम् ७३–७४] ति० टी०–पवनात्मजत्वेन लङ्घनसामर्थ्यम् ॥ ७३ ॥ ७४ ॥

रा० टी०–कुशलीति । काकुत्स्थो रामः लक्ष्मणश्च कुशली ॥ ७३ ॥

रा० टी०–तस्येति । तव भर्तुर्हितेऽरतोऽहं सुग्रीववचनादिह संप्राप्तः ॥ ७४ ॥

गो० टी०–कुशलीति । गुरोः ज्येष्ठस्य आराधने शुश्रूषणे रतः लक्ष्मणश्च कुशली ॥ ७४ ॥ ७५ ॥

७५] ति० टी०–एकः संप्राप्तः । अर्थाच्छेषाः समुद्रतीर एवासते । कामरूपिणा । अनेन रावणान्तःपुराद्यन्वेषणसामर्थ्यं सूचितम् ॥ ७५ ॥

रा० टी०–मयेति । त्वन्मार्गविचयैषिणा मया दक्षिणादिगनुक्रान्ता ॥ ७६ ॥

गो० टी०–मयेयमिति । विचयैषिणा अन्वेषणेच्छुना ॥ ७६ ॥

७६] ति० टी०–त्वन्नाशं त्वददर्शनम् ॥ ७६ ॥

रा० टी०–दिष्ट्येति । त्वन्नाशं त्वददर्शनम् उपलभ्येति शेषः, अनुशोचतां हरिसैन्यानां संतापं तवाधिगमशंसनात् त्वत्प्राप्तिकथनात् अपनेष्यामि दिष्ट्यैतत् ॥ ७६ ॥

गो० टी०–दिष्ट्येति । तवाभिगमशंसनात् त्वत्समीपप्राप्तिकथनात् ॥ ७७–७९ ॥

७७–७८] ति० टी०–अधिगमो दर्शनम् ॥ ७७ ॥ ७८ ॥

रा० टी०–दिष्ट्येति । त्वद्दर्शनकृतं यशः प्राप्स्यामि अत एव मम सागरस्य लङ्घनं न व्यर्थम् ॥ ७७ ॥

रा० टी०–राघव इति । राघवः रावणं हत्वा त्वामभिपत्स्यते ॥ ७८ ॥

---

१ दर्शनकृतोत्साहा इति गो. पाठः । २ उपस्थिता इति गो. पाठः । ३ भीता इति गो. पाठः । ४ तथेति गो. पाठः । ५ प्रेक्ष्येति गो. पाठः । ६ परिप्लुतेति गो. पाठः । ७ देवि सागरेति गो. पाठः । ८ दिष्ट्येति गो. पाठः ।

सपुत्रबान्धवं हत्वा रावणं राक्षसाधिपम् । माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः ॥ ७९ ॥
ततो गच्छति गोकर्णं पर्वतं केसरी हरिः । स च देवर्षिभिर्दिष्टः पिता मम महाकपिः ॥
तीर्थे नदीपतेः पुण्ये शम्बसादनमुद्धरन् ॥ ८० ॥
यस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि । हनूमानिति विख्यातो लोके स्वेनैव कर्मणा ॥ ८१ ॥
विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः । अचिरात्त्वामितो देवि राघवो नयिता ध्रुवम् ॥ ८२ ॥
एवं विश्वासिता सीता हेतुभिः शोककर्शिता । उपपन्नैरभिज्ञानैर्दूतं तमधिगच्छति ॥ ८३ ॥
अतुलं च गता हर्षं प्रहर्षेण तु जानकी । नेत्राभ्यां वक्त्रपक्ष्माभ्यां मुमोचानन्दजं जलम् ॥ ८४ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् । अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ८५ ॥
हनूमन्तं कपिं व्यक्तं मन्यते नान्यथेति सा । अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ॥ ८६ ॥
एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि । किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८७ ॥

७९] ति० टी०–तिर्यग्देहस्य तव कथं पवनात्मजत्वमिति शङ्कामपनयन्नाह—माल्यवान्नामेति ॥ ७९ ॥

रा० टी०–ननु वानरस्य तव वातात्मजत्वं कथमित्यत आह–माल्यवानिति । केसरी हरिर्वानरः माल्यवान्नाम यो गिरिः ततस्तस्माद्गिरेः गोकर्णं पर्वतं गच्छति अगच्छत् ॥७९॥

गो० टी०–बुद्ध्यस्व पवनात्मजमिति पवनात्मजत्वमुक्तं तत्कथं वानरस्येत्यपेक्षायामाह—माल्यवानिति । गच्छति अगच्छत् ॥ ८० ॥

८०] ति० टी०–गोकर्णं तदाख्यम् । दिष्टः शम्बसादनाख्यासुरवधायाज्ञप्तः । उद्धरन्नुद्धृतवान् अवधीदित्यर्थः । भूतेऽपि लटः शतार्षः ॥ ८० ॥

रा० टी०–स इति । देवर्षिभिर्दिष्टः आज्ञप्तः यस्य हरिणो अनेकवानराधिपतेः क्षेत्रे वातेनाहं जातः स महाकपिर्मम पिता नदीपतेः समुद्रस्य तीर्थे जले शम्बसादनं तदभिधासुरमुद्धरन् अनाशयत् भूतेऽपि लटः शतार्ष इति भट्टाः । हरि इत्यत्र बीह्यादित्वा दिनिः । सार्धश्लोक एकान्वयी ॥ ८० ॥

गो० टी०–स चेति । सः गोकर्णं गतः । देवर्षिभिः तत्रत्यैः दिष्टः नियुक्तः । शम्बसादनं तीर्थोपद्रवकारिणमसुरं शम्बसादनाख्यम् उद्धरत् उदहरत् देवर्षिप्रार्थनया अवधीदित्यर्थः ॥ ८१ ॥

८१] ति० टी०–स्वेनैवोत्पत्तिकालप्रवृत्तेन कर्मणा पराक्रमेण ॥ ८१ ॥

रा० टी०–हनूमानिति । स्वेन कर्मणा हनूमानिति विख्यातः योऽहं तेन मया तव विश्वासार्थं भर्तुर्गुणाः उक्ताः॥८१॥

गो० टी०–तस्येति । हरिणः हरेः केसरिणः क्षेत्रे पत्न्यामञ्जनायां जातः । पितुर्देशान्तरगमनकाले जातः । अनेनान्यक्षेत्रे कथमन्येनोत्पादनमिति शङ्का परास्कृता ॥ ८२ ॥

८२] ति० टी०–भर्तुस्त्वद्भर्तुः रामस्य नयिता नेता ॥८२॥

रा० टी०–अचिरादिति । अचिरात् शीघ्रं राघवस्त्वामितो नयिता नेता ॥ ८२ ॥

गो० टी०–विश्वासार्थमिति । नयिता नेता ॥ ८३ ॥

८३–८५] ति० टी०–उपपन्नैर्वास्तवैः । अभिज्ञानैः रामलक्ष्मणचिह्नैः । अधिगच्छत्यध्यगच्छत् ॥ ८३–८५ ॥

रा० टी०–एवमिति । उपपन्नैः युक्तैर्बोधकरहितैरित्यर्थः अभिज्ञानैर्बोधकैर्हेतुभिर्विश्वासिता सत्यं कथयतीति विश्वासं प्रापिता सीता तं हनूमन्तं दूतमधिगच्छति अध्यगच्छत् अज्ञानात् ॥ ८३ ॥

रा० टी०–अतुलमिति । अतुलं हर्षं गता प्राप्ता जानकी हर्षेण आनन्दजं जलं मुमोच ॥ ८४ ॥

रा० टी०–चार्विति । राहुमुक्तः उडुराट् चन्द्र इव तस्याः वदनमशोभत ॥ ८५ ॥

गो० टी०–एवमिति । अवगच्छति अवागच्छत् ॥ ८४–८८ ॥

८६] ति० टी०–अन्यथा नेति मायाकपिर्नेत्यर्थः ॥८६॥

रा० टी०–हनूमन्तमिति । सा सीता हनूमन्तम् अन्यथा रावणत्वादिना न मन्यते अमन्यत अथानन्तरं प्रियदर्शनां तां सीताम् उत्तरं श्रेष्ठमिदं वचनमुवाच ॥ ८६ ॥

८७] ति० टी०–सर्वमुत्तरं सर्वं प्रत्युत्तरमाख्यातमित्यन्वयः । अथ सीतायै चिकीर्षितं पृच्छति—किं करोमीति । वर्तमानसामीप्ये लटौ । प्रतियामि प्रतियास्ये रामसमीपम्, किं करोमि किं करिष्ये, कथं वा रोचते चिकीर्षितमिति शेषः ॥ ८७ ॥

रा० टी०–तदाकारमाह–एतदिति । हे मैथिलि ! एतत् भवत्या पृष्टं सर्वमाख्यातम् अतः समाश्वसिहि अहं तु प्रतियामि रामसमीपं गमिष्यामि अतः किं करोमि कथं ते रोचते तद्वदेत्यर्थः ॥ ८७ ॥

---

१ मित्रेति गो. पाठः । २ उद्धरदिति गो. पाठः । ३ तस्येति गो. पाठः । ४ ऽनघे इति गो. पाठः ।

हतेऽसुरे संयति शम्बसादने कपिप्रवीरेण महर्षिचोदनात् ।
ततोऽस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ।

स्वस्मिन्नाश्वासं द्रढयितुं हनुमान्रामाङ्गुलीयकं जानक्यै प्रददाति । तल्लाभहृष्टा सा हनुमन्तं प्रशंस्य रामादिकुशलं पृच्छति । एतावत्पर्यन्तं रामानागमनात्स्वस्यामप्रीतिं विशङ्क्य जातक्रोधां तां परिसान्त्वयि तुं हनुमानवस्थानापरिज्ञानमेवानागमने हेतुरित्यभिधत्ते । तस्यां रामस्य प्रीत्यतिशयं द्योतयन्हनुमान् रामस्य शोकावस्थां प्रतिपादयँस्त्वत्प्राप्तये सोऽतिप्रयत्नमातनोतीति कथयन्समाश्वासयति ।

भूय एव महातेजा हनूमान्[1]पवनात्मजः । अब्रवीत्प्रश्रितं वाक्यं सीताप्रत्ययकारणात् ॥ १ ॥
वानरोऽहं महाभागे दूतो रामस्य धीमतः । रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ २ ॥
प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना । समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥ ३ ॥
गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषितम्[2] । भर्तारमिव संप्राप्तं जानकी मुदिताभवत् ॥ ४ ॥

८८] ति० टी०—नहि रावण आत्मानं कथमपि कपिपुत्र इति ब्रूयादिति ज्ञापनपूर्वकं कपित्वनिश्चयाय पुनः स्वजन्मानुवादः—हतेऽसुर इति । ततः शम्बसादनासुरवधप्रीतमहर्षेः प्रसादत इत्यर्थः । तत्प्रतिमः वायुसदृश इत्यर्थः ॥८८॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०—उपसंहरन्नाह—हते इति । कपिप्रवीरेण शम्बसादने असुरे हते सति ततः तस्य क्षेत्रे वायुप्रभवः प्रभावतः तत्प्रतिमः वायुसदृशः वानरोऽहमस्मि ॥ ८८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

गो० टी०—देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति द्योतयितुं स्वमाहात्म्यमाह—हत इति । ततः असुरवधोपकारात् ॥ ८८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

१] ति० टी०—अथ दृढतरविश्वासाय रामाङ्गुलीयकं दातुमाह—भूय इति । प्रत्ययो विश्वासः ॥ १ ॥

रा० टी०—सीतां प्रति हनुमत उक्त्यन्तरमाह—भूय इति। पवनात्मजो हनुमान् सीताप्रत्ययकारणात् सीतायाः विश्वासहेतोः भूयोऽब्रवीत् ॥ १ ॥

गो० टी०—भूय इत्यादि ॥ १ ॥

२] ति० टी०—वानरोऽहं नान्यः । रामस्य नाम नामाक्षराणि तैरङ्कितं चिह्नितम् ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—वानर इत्यादिभिः । हे देवि! अहं रामस्य दूतः इत्यवेहीति शेषः। तव प्रत्ययार्थमानीतं तेन रामेण दत्तमिदमङ्गुलीयकं पश्य च अत एव क्षीणः दुःखफलः दुःखफलकः समयो यस्याः सा त्वमसि अत एव समाश्वसिहि । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०—इत्थं संदेशकथनादिना देवीं विश्वास्याभिज्ञानाङ्गुलीयकदानेन दृढं विश्वासयति—वानरोऽहमित्यादिना ॥ २ ॥ ३ ॥

३] ति० टी०—क्षीणं दुःखरूपं पापफलं यस्याः सा । असि शीघ्रमेव भविष्यसि ॥ ३ ॥

४] ति० टी०—विभूषितं विभूषणम् । भर्तारं प्राप्तेवेत्यन्वयः ॥ ४ ॥

रा० टी०—गृहीत्वेति । भर्तुः करविभूषणं गृहीत्वा भर्तारं संप्राप्तेव जानकी मुदिताऽभवत् ॥ ४ ॥

गो० टी०—गृहीत्वेति । गृहीत्वा देशान्तरादागतं बन्धुं दृष्ट्वेव स्वयं गृहीतवती । प्रेक्षमाणा वर्तमानार्थेन शानचा दत्तदृष्टिं न विचालितवतीत्युच्यते । सा पूर्वं रावणत्वेन शङ्कितवती भर्तुः करविभूषणं पाणिग्रहणकाले हस्तस्पृष्टमाभरणं करविभूषणमित्यनेन भोगातिशयात् प्रणयकोपे प्रवृत्ते परस्परमालोकनभाषणादिविरहदशायां काङ्क्षिते भाषणे मानातिशयेन मौने कृते रामोऽङ्गुलीयकं भूमौ च्यावयति स्म । तदा व्याजेन च्युतमङ्गुलीयकमिति सीतयाऽभिहिते प्रणयकोपशैथिल्यात् परस्परसंश्लेषो भूयोऽप्यभूत् । एवं घटकभूतं करविभूषणं भर्तारमिव संप्राप्ता अङ्गुलीयकदर्शनात्तस्य कान्तस्य करं स्मृतवती तत्स्मृत्या बाहुं तत्स्मरणेन तद्विग्रहम् । एवं भावनाप्रकर्षेण तं पुरःस्थितमिव मत्वा तमालिङ्गितवती । जननीबुद्ध्या मुनिः संप्रोक्षेवत्याह जननीकृतभोगस्यावर्ण्यत्वात् । जानकी शोकहर्षाभ्यां क्लेष्टुमनर्हे कुले जाता । मुदिताऽभवत् इयमिदानीं मुदिता उदर्के किं भविष्यतीति न जान इत्याहर्षिः ॥ ४ ॥ ५ ॥

१ मारुतेति गो. पाठः । २ भूषणमिति गो. रा. पाठः ।

चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् । बभूव हर्षोदग्रं च राहुमुक्त इवोडुराट् ॥ ५ ॥
ततः सा ह्रीमती बाला भर्तुः संदेशहर्षिता । परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ॥ ६ ॥
विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम । येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥ ७ ॥
शतयोजनविस्तीर्णः सागरो मकरालयः । विक्रमश्लाघनीयेन क्रमता गोष्पदीकृतः ॥ ८ ॥
नहि त्वां प्राकृतं मन्ये वानरं वानरर्षभ । यस्य ते नास्ति संत्रासो रावणादपि संभ्रमः ॥ ९ ॥
अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् । यद्यसि प्रेषितस्तेन रामेण विदितात्मना ॥ १० ॥
प्रेषयिष्यति दुर्धर्षो रामो नह्यपरीक्षितम् । पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥ ११ ॥
दिष्ट्या च कुशली रामो धर्मात्मा सत्यसंगरः । लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥ १२ ॥
कुशली यदि काकुत्स्थः किं न सागरमेखलाम् । महीं दहति कोपेन युगान्ताग्निरिवोत्थितः ॥ १३ ॥
अथवा शक्तिमन्तौ तौ सुराणामपि निग्रहे । ममैव तु न दुःखानामस्ति मन्ये विपर्ययः ॥ १४ ॥

५] ति० टी०–'बभूव हर्षोदग्रं च' इति पाठः ॥ ५ ॥

रा० टी०–चार्विति । राहुमुक्त उडुराडिव तस्याः वदनं हर्षोदग्रम् अतिहर्षितं बभूव ॥ ५ ॥

६] ति० टी०–ह्रीमत्यङ्गुलीयसांनिध्ये भर्तृसांनिध्यादिव किंचिल्लज्जावती । प्रियं कृत्वाऽऽदरं कृत्वा ॥ ६ ॥

रा० टी०–तत इति । ततोऽनन्तरं भर्तुः संदेशहर्षिता सा सीता महाकपिं प्रियं प्रीतिविषयीभूतं कृत्वा प्रशशंस॥६॥

गो० टी०–तत इति । प्रियं कृत्वा संमानं कृत्वा ॥ ६ ॥

७] ति० टी०–विक्रान्तः शूरः । समर्थो देशकालोचितकृत्यचतुरः । प्राज्ञो धर्मार्थविषयकसर्वशास्त्रार्थतत्त्वज्ञः । पदं स्थानम् ॥ ७ ॥

रा० टी०–प्रशंसाकारमाह–विक्रान्त इति । येन हेतुना एकेन त्वया राक्षसपदं प्रधर्षितं तेन हेतुनाऽविक्रान्तत्वादिविशिष्टस्त्वं मयाऽवोधीति शेषः ॥ ७ ॥

गो० टी०–विक्रान्तस्त्वमिति । विक्रान्त इत्यादिपदत्रयेण तद्व्युत्क्रमेण ज्ञानशक्तिबलान्युच्यते । इदं राक्षसपदमिति प्रज्ञोक्ता । त्वयैकेनेति सामर्थ्यम् । प्रधर्षितमिति विक्रमः ॥७॥८॥

८] ति० टी०–क्रमता क्रामता ॥ ८ ॥

रा० टी०–शतेति । विक्रमः श्लाघनीयो यस्य तेन क्रमता त्वया शतयोजनविस्तीर्णः सागरः गोष्पदीकृतः ॥ ८ ॥

९] ति० टी०–संत्रासः समुद्रादिति शेषः । रावणादपि संभ्रमश्चित्तक्षोभः ॥ ९ ॥

रा० टी०–नेति । यस्य ते रावणादपि संत्रासः संभ्रमश्च नास्ति तं त्वां प्राकृतं न मन्ये ॥ ९ ॥

गो० टी०–नहीति । प्राकृतं क्षुद्रम् । संभ्रमः व्यग्रता ॥९॥

१०–१२] ति० टी०–यदि यस्मात्तेन प्रेषितोऽसि तस्मान्मया समभिभाषितुं संभाषणं कर्तुमर्हसेऽर्हसि ॥ १०–१२ ॥

रा० टी०–अर्हसे इति । यदि रामेण प्रेषितस्त्वमसि तर्हि मया समभिभाषितुमर्हसे ॥ १० ॥

रा० टी०–प्रेषयिष्यतीति । दुर्धर्षो रामः विशेषतः विशेषं पराक्रममविज्ञाय अपरीक्षितं परीक्षारहितं दूतं मत्सकाशं न प्रेषयिष्यति ॥ ११ ॥

रा० टी०–दिष्ट्येति । कुशली कुशलविशिष्टः ॥ १२ ॥

गो० टी०–अर्हस इति । यद्यपीतिनिपातसमुदायो यस्मादित्यर्थे । अन्ययानामनेकार्थत्वात् ॥ १०–१२ ॥

१३] ति० टी०–ननु तदूतागमनेन तद्वचसा च कुशलावगतेः किं पुनर्दिष्ट्येत्यादि तत्प्रश्नेनेति शङ्कायां प्रभाशयं दर्शयति—कुशली यदीति । यदि कुशली त्वया कथ्यते तदा मत्कृते सागरमेखलां महीं किं न दहतीत्यर्थः ॥ १३ ॥

रा० टी०–कुशलीति । यदि काकुत्स्थः कुशली तर्हि कोपेन ज्ञातपृथिव्यपराधजनितकोपेन महीं किं नु न दहति दहत्येवेत्यर्थः । एतेन एवं शक्तिसत्त्वे रावणं कुतो न निहन्तीति सूचितम् । किं च कोपेन रावणापराधज्ञानजनितकोपेन महीं लङ्काभूमिं किं नु दहति ॥ १३ ॥

गो० टी०–अथ प्रणयरोषेण दूतसंनिधौ रामं गर्हते—कुशलीति । काकुत्स्थः परपरिभवासहकुले जातः । अनेन परपरिभव एव परिहरणीयः न स्वीय इति नियमोऽस्ति किम् । किंतु सागरमेखलां महीं दहति । अत्र काकुत्स्थः दहति किंतु न दहतीत्यर्थः । सागरमेखलामिति विशेषणेन द्रवद्रव्यस्यैकेन कठिनद्रव्यस्य चैकेन बाणेन भवितव्यम् । किम् सागरं सलिलमेव तैलं कृत्वा महीं दग्धुं समर्थो न किमित्यर्थः । यद्वा स्वपत्नीं वा सुरक्षितपरिधानां करोतीति भावः । अनादिकृतमर्यादा मही कथं दग्धुं शक्येत्यत्राह–युगान्तेति । मही मर्यादा तत्प्रलयनरागपर्यन्तैवेति भावः । 'किं न सागरमेखलाम्' इत्यपि पाठः । काकुत्स्थः कुशली यदि तदा महीं किं न दहति शक्तश्चेद्दहत्येव न दहति अतो न शक्त इत्यर्थः ॥ १३ ॥

१४] ति० टी०–ननु केवलं महीमेवेति किमुच्यत इत्याशयेन पक्षान्तरम्—अथवेति । तथा शक्तिमन्तौ यदि

१ अशोभत विशालाक्ष्या इति गो. पाठः । २ नापीति गो. पाठः । ३ ऽपीति गो. पाठः ।

कच्चिन्न व्यथते रामः कच्चिन्न परितप्यते । उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥ १५ ॥
कच्चिन्न दीनः संभ्रान्तः कार्येषु च न मुह्यति । कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः ॥ १६ ॥
द्विविधं त्रिविधोपायमुपायमपि सेवते । विजिगीषुसुहृत्कच्चिन्मित्रेषु च परंतपः ॥ १७ ॥
कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते । कच्चित्कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः ॥ १८ ॥
कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः । कच्चित्पुरुषकारं च दैवं च प्रतिपद्यते ॥ १९ ॥
कच्चिन्न विगतस्नेहो विवासान्मयि राघवः । कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति राघवः ॥ २० ॥
सुखानामुचितो नित्यमसुखानामनूचितः । दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति ॥ २१ ॥
कौसल्यायास्तथा कच्चित्सुमित्रायास्तथैव च । अभीक्ष्णं श्रूयते कच्चित्कुशलं भरतस्य च ॥ २२ ॥

तर्हि किमिति तूष्णीं तिष्ठतस्तत्राह—ममेवेति । दुःखानां दुःखहेतुपापानां विपर्ययो नाशो नाशापि संहृत इत्यर्थः ॥१४॥

रा० टी०—तत्र हेतुमुपलभ्य पक्षान्तरमाह—अथवेति । सुराणामपि निग्रहे शक्तिमन्तौ तौ रामलक्ष्मणौ स्त एव तथापि मम दुःखानां विपर्ययो विनाशकालो नेवास्तीत्यहं मन्ये॥१४॥

गो० टी०—पक्षान्तरमाह—अथवेति ॥ १४ ॥

१५] ति० टी०—मम दुःखक्षय ईषत्करः, अपि तु तस्य सुखावस्थानमेव मुख्यमित्याशयेनाह—कच्चिदिति । उत्तराणि कार्याणि मद्विमोचनफलानि ॥ १५ ॥

रा० टी०—कच्चिदिति । रामः कच्चिन्न व्यथते कच्चिन्न परितप्यते वा अत एव कार्याणि कर्तव्याणि उत्तराणि दुःखोत्तारकाणि प्रयतनानि कुरुते ॥ १५ ॥

गो० टी०—कच्चिदिति । न व्यथितः न कृशः । उत्तराणि कार्याणि मत्प्राप्तिसाधकानि कच्चित्कुरुते ॥ १५ ॥

१६] ति० टी०—न दीनो न संभ्रान्त इत्युपपन्नः । पुरुषकार्याणि पुरुषकारान् ॥ १६ ॥

रा० टी०—कच्चिदिति । कच्चिन्न दीनः संभ्रान्तो वा न अत एव कच्चिन्न मुह्यति अत एव पुरुषकार्याणि पुरुषेण कर्तव्यानि कुरुते ॥ १६ ॥

गो० टी०—कच्चिन्न दीन इति । न दीनः कच्चित्संभ्रान्तः सन् कार्येषु न मुह्यति कच्चिदित्यन्वयः । पुरुषकार्याणि पुरुषेण कर्तव्यानि ॥ १६ ॥

१७] ति० टी०—द्विविधं सौम्यासौम्यरूपप्रकारद्वयवत्। त्रिविधोपायं धर्मार्थकामलक्षणत्रिविधपुरुषार्थानां प्राप्त्युपायभूतमुपायं सामाद्युपायमपि सेवते कच्चित् तथा मित्रेषु च विजिगीषुसुहृत्कच्चित् विजिगीषुसुहृदिति बहुव्रीहिः तत्पुरुषश्चेति कतकः । सुहृत्परंतपो रामो विजिगीषुः संस्त्रिविधोपायं सामदानभेदरूपमुपायं दण्डोपायं च मित्रेषु च चादमित्रेषु च द्विविधं यथा भवति तथा सेवते कच्चित् । मित्रेषु सामदाने अमित्रेषु भेददण्डौ चेत्येवं विभज्य प्रयुङ्क्ते कच्चिदित्यर्थ इति तीर्थः ॥ १७ ॥

रा० टी०—द्विविधमिति । मित्रेषु चकारेण अमित्रेषु च सुहृदपि रामः विजिगीषुः सन् द्विविधं द्वौ ऐहिकामुष्मिकपालनधर्मौ विदधाति पालयति तं त्रिविधोपायं त्रयाणां ब्रह्मविष्णुमहेश्वराणां विधाय तत्प्रार्थितनिष्पादकत्वेन पोषणाय उपायं यत्नम् उपायं झटिति मङ्गलप्रापकं यथा भवति तथा सेवते कुरुते कच्चित् ॥ १७ ॥

गो० टी०—तान्येवाह—द्विविधमिति । परन्तपो रामः मित्रेषु विषये सुहृत्सन् द्विविधं सामदानरूपमुपायमपि सेवते कच्चित् । चकारेणामित्राः समुच्चीयन्ते अमित्रेषु विषये विजिगीषुः सन् त्रिविधोपायं दानभेददण्डान् सेवते प्रयुङ्क्ते कच्चित् । सुहृत्सु कदाचिदपि भेददण्डौ न कार्यौ शत्रुषु न सामेति भावः । योजनान्तरे विजिगीषुसुहृत्पदयोः प्रयोजनं मृग्यम् ॥१७॥

१८] ति० टी०—मित्राणि लभते स्वयत्नेनामित्रैश्च स्वयत्नतोऽभिगम्यते । कल्याणमित्रः सौम्यमित्रः । मित्रैः पुरस्कृतो बहुमतः कच्चित् ॥ १८ ॥

रा० टी०—कच्चिदिति । कल्याणं मित्रं यस्य सः अत एव मित्रैः पुरस्कृतः स रामः मित्राणि लभते कच्चित् अमित्रैः रिपुभिः अभिगम्यते पराभूतिमूलकशरणप्रार्थनया प्राप्यते कच्चित्॥१८॥

गो० टी०—कच्चिन्मित्राणीति । अभिगम्यते लभ्यते । मित्रस्य कंचिदुपकारं कृत्वा स्वयमुपकारं मित्रादपेक्षते कच्चिदित्यर्थः । कल्याणमित्रः पुरस्कृतमित्र इत्यर्थः ॥ १८ ॥

१९] ति० टी०—आशास्त्याशास्ते प्रार्थयत इत्यर्थः ॥१९॥

रा० टी०—कच्चिदिति । देवानां प्रसादं तद्विषुवधजनिततत्प्रसन्नतामाशास्ति आशास्ते इच्छति दैवं देवसंबन्धि पुरुषस्य पुरुषार्थस्य कारं विध्वंसं प्रतिपद्यते स्मृतिविषयत्वेन प्राप्नोति स्मरतीत्यर्थः ॥ १९ ॥

गो० टी०—कच्चिदाशास्तीति । आशास्ति आशास्ते । पुरुषकारं स्वबलम् । एकैकस्यानर्थहेतुत्वादिति भावः॥१९॥२०॥

२०] ति० टी०—विवासाद्विदूरवासात् ॥ २० ॥

रा० टी०—कच्चिदिति । विवासात् हेतोः राघवः मयि विगतस्नेहो न कच्चित् अस्माद्व्यसनात् दुःखहेतुभूतनिरोधान्मोचयिष्यति ॥ २० ॥

२१-२२] ति० टी०—अनूचित इति छान्दसो दीर्घः । उत्तरं दुःखम् दुःखादुःखमित्यर्थः ॥ २१ ॥ २२ ॥

१ प्रसादादिति गो. पाठः । २ वानरेति गो. पाठः ।

मन्निमित्तेन मानार्हः कच्चिच्छोकेन राघवः । कच्चिन्नान्यमना रामः कच्चिन्मां तारयिष्यति ॥ २३ ॥
कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः । ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते ॥ २४ ॥
वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति । मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥ २५ ॥
कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः । अस्त्रविच्छरजालेन राक्षसान्विधमिष्यति ॥ २६ ॥
रौद्रेण कच्चिदस्त्रेण रामेण निहतं रणे । द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनम् ॥ २७ ॥
कच्चिन्न तद्धेमसमानवर्णं तस्याननं पद्मसमानगन्धि ।
मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन ॥ २८ ॥
धर्मोपदेशात्त्यजतः स्वराज्यं मां चाप्यरण्यं नयतः पदातेः[1] ।
नासीद्यथा यस्य न भीर्न शोकः कच्चित्स धैर्यं हृदये करोति ॥ २९ ॥
न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्ति मया समो वा[2] ।
तावद्धयहं दूत जिजीविषेयं यावत्प्रवृत्तिं शृणुयां प्रियस्य ॥ ३० ॥

रा० टी०-सुखानामिति । उचितो योग्यः अनुचितः अनुचितः अनर्हः रामः उत्तरं परं दुःखमासाद्य सीदति न कचित् ॥ २१ ॥

रा० टी०-कौशल्याया इति । कौशल्यादेः कुशलं श्रूयते कचित् रामेणेति शेषः ॥ २२ ॥

गो० टी०-सुखानामिति । अनुचित इति दीर्घ आर्षः । उत्तरम् उत्कृष्टम् ॥ २१ ॥ २२ ॥

२३-२६] ति० टी०-मन्निमित्तेन मद्वियोगनिमित्तेन शोकेन । कच्चित्परितप्यत इति शेषः ॥ २३-२६ ॥

रा० टी०-मदिति । मन्निमित्तेन शोकेनोपलक्षितः कचित् अत एव अन्यमना न कचित् ॥ २३ ॥

रा० टी०-कच्चिदिति । मत्कृते मन्मोचनार्थम् ॥ २४ ॥

रा० टी०-वानरेति । सुग्रीवः कच्चिदेष्यति ॥ २५ ॥

रा० टी०-कच्चिदिति । लक्ष्मणो राक्षसान् विधमिष्यति ॥ २६ ॥

गो० टी०-मन्निमित्तेनेति । मन्निमित्तेन मया हेतुना । अन्यमनाः कार्यान्तरासक्तः ॥ २३ ॥

गो० टी०-कच्चिदक्षौहिणीमिति । ध्वजिनीं सेनाम् ॥ २४-२७ ॥

२७] ति० टी०-रौद्रेणामोघकूरेण ॥ २७ ॥

रा० टी०-रौद्रेणेति । रामेण निहतं रावणमल्पेन कालेन द्रक्ष्यामि कचित् ॥ २७ ॥

२८] ति० टी०-हेमसमानवर्णं हेमवर्णवत्स्पृहणीयशोभम् ॥ २८ ॥

रा० टी०-कच्चिदिति । तस्य रामस्याननं मया विना वातेन पद्ममिव न शुष्यति कचित् ॥ २८ ॥

गो० टी०-कच्चिन्न तदिति । हेमशब्देन तद्वर्ण उच्यते । अभेदेन हेमवत्स्पृहणीयमित्यर्थः । मया विनेति जलक्षयस्थानम्, शोकदीनमित्यातपस्थानम् ॥ २८ ॥

२९] ति० टी०-धर्मोपदेशाद्धर्मोद्देशात् । धर्ममुद्दिश्येति यावत् । न भीर्न शोकः । मम नयनान्नभीः, राज्यत्यागान्न शोकः । भयं च मद्रक्षानिमित्तम् । यस्य व्यथा वनवासखेदश्च नासीत्स इदानीं धैर्यं करोति कचित् ॥ २९ ॥

रा० टी०-धर्मेति । धर्मोपदेशात् धर्मपालनार्थं स्वं राज्यं त्यजतः अत एव मामप्यरण्यं नयतः यस्य भीः शोकश्च नासीत् स धैर्यं करोति कचित् ॥ २९ ॥

गो० टी०-धर्मोपदेशादिति । धर्मोपदेशाद्धर्मोद्देशार्थम् धर्ममुद्दिश्येत्यर्थः । यद्वा धर्मव्याजाद्धेतोः राज्यत्यागाद्यथा नासीत् । अरण्यसंचाराद्वीर्नासीत् । मत्पादसंचाराच्छोको नासीत् । सः तादृशधैर्ययुक्तो रामो मद्विश्लेषेऽपि हृदये धैर्यं करोति कचित् ॥ २९ ॥

३०] ति० टी०-धैर्यत्यागे मद्वियोग एव हेतुरित्याह—न चास्येति । मातापित्रादौ नास्य मत्समोऽपि स्नेहः, अधिकस्तु कुतः । मम तच्छक्तिरूपत्वात् वस्तुतस्तयोस्तस्याभावाच्च । हनूमन्नहमपि तावज्जिजीविषेयम् । प्रवृत्तिं वार्तां प्रवृत्तिमार्गे रतिं च । निवृत्तिमार्गरतौ ममापि कार्याक्षमत्वेनादर्शनरूपो नाश एवेति भावः ॥ ३० ॥

रा० टी०-नेति । अस्य रामस्य स्नेहाद्धेतोः मया समः सदृशः विशिष्टः अधिको वा मात्रादिर्नास्ति अतः प्रियस्य रामस्य प्रवृत्तिं वार्तां यावत् शृणुयां तावत् जिजीविषेयं जीवितुमिच्छेयम् ॥ ३० ॥

गो० टी०-धैर्याकरणे हेतुमाह—न चास्येति । प्रवृत्तिं मदानयनवार्ताम् । प्रणयरोषपक्षे किमेष पितृवचनपरिपालनाय वनं प्राप्तः न । किंतु ममैव हिंसायै इति भावः । रामस्यैव दोषः न ममेति सीतयोक्ते वयमेव किं सम्यक् स्थितवन्तः रामविश्लेषानन्तरक्षणे न तनुस्त्यक्ता हीत्येवं हनुमदाशयं ज्ञात्वाह—न चास्येति । रामस्य मात्रादयः अन्यो बन्धुश्च स्नेहाद्विशिष्टा न भवन्ति । लोके कस्यचिन्माता पिता भ्रातेत्येवं स्नेहो

१ चेति गो. पाठः । २ पदातिमिति गो. पाठः

इतीव देवी वचनं महार्थं तं वानरेन्द्रं मधुरार्थमुक्त्वा ।
श्रोतुं पुनस्तस्य वचोऽभिरामं रामार्थयुक्तं विरराम रामा ॥ ३१ ॥
सीताया वचनं श्रुत्वा मारुतिर्भीमविक्रमः । शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
न त्वामिहस्थां जानीते रामः कमललोचनः । तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥ ३३ ॥
श्रुत्वैव चे वचो मह्यं क्षिप्रमेष्यति राघवः । चमूं प्रकर्षन्महतीं हर्यृक्षगणसंयुताम् ॥ ३४ ॥
विष्टम्भयित्वा बाणौघैरक्षोभ्यं वरुणालयम् । करिष्यति पुरीं लङ्कां काकुत्स्थः शान्तराक्षसाम्॥ ३५ ॥
तत्र यद्यन्तरा मृत्युर्यदि देवा महासुराः । स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ॥३६॥
तवादर्शनजेनार्ये शोकेन परिपूरितः । न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ३७ ॥

विसृत्वरो भवति नचैवं रामस्य मात्रादिषु संभावितः । सर्वोऽपि मय्येकमार्गः कृतः । यावत्प्रियस्य प्रवृत्तिं शृणुयां शृणोमि तावज्जिजीविषेयं जीवेयम । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं जीवनमिहाभिधीयते । रामः न मांसं राघवो भुङ्क्ते इत्युक्तरीत्या भोजनम , अनिद्रः सततं राम इति निद्रां च हित्वा समुद्रं बद्ध्वा समागच्छन् तापातें प्रपां गते तस्यां भिन्नपानीयपात्रायां सत्यामिव मयि नष्टायां न जीवेत् । अतस्तदागमनपर्यन्तं मयि जीवितव्यं परतन्त्रशरीरत्वात् । तदागमनानन्तरमपि यदि जीविष्यामि तदेत्थंवदेदिति भावः । एतावत्पर्यन्तं वानरेति संबोध्य संप्रति दूतेत्याह—रामविषयप्रणयरोषस्य दूतपर्यन्तं व्यापनात् । तेन प्रहितः खलु भवानपीति भावः । प्रणयरोषाभावपक्षेऽपि न चास्येति । अस्य माता चास्मिन्स्नेहात् मत्तः न विशिष्टा मया न समा च । यथाऽहमस्मिन् स्निग्धा तथा नान्य इत्यर्थः । एतदेवोत्तरार्धेन समर्थयति—तावदिति ॥ ३० ॥

३१–३२] ति० टी०—रामार्थयुक्तं रामप्रयोजनयुक्तम् । रामरूपाभिधेयेन युक्तं तद्बोधकमिति वा ॥ ३१ ॥ ३२ ॥

रा० टी०—इतीवेति । देवी सीता इतीव वचनमुक्त्वा रामार्थयुक्तं तस्य हनुमतो वचः श्रोतुं रामा सीता विरराम ॥३१॥

रा० टी०—सीताया इति । मारुतिः सीताया वचनं श्रुत्वा अञ्जलिं शिरसि आधाय उत्तरं श्रेष्ठं वाक्यमब्रवीत् ॥३२॥

गो० टी०—इतीवेति । इतीव पूर्वं कतिपयानर्थान् विविच्योक्तवान् । संप्रति प्रणयधारासूक्ष्ममृषीणामपदं हि तत इतीवेत्याह । देवी । वल्लभाया व्यवहारो बहिष्ठानां न प्रतिभाति हि वचनं महार्थं न केवलं बहिष्ठानां देशिकानामस्माकमपीत्यर्थः । महार्थमित्युक्तेः तं वानरेन्द्रम् । सुग्रीवस्य शेषत्वेऽभिषिक्तत्वेऽपि पारतन्त्र्ये हनुमानभिषिक्त इत्यर्थः । मधुरार्थं माधुर्येण मध्ये हनुमान्न वक्तुमारभतेति भावः । उक्त्वा स तदीयाश्च यथाऽभिवर्धन्ते तथोक्त्वा श्रोतुं पुनस्तस्य वचोभिरामं स्ववचनानुरूपोत्तरं श्रोतुं रामार्थयुक्तं रामप्रयोजनयुक्तम् । रामरूपाभिधेययुक्तं वा विरराम स्वयं चिरभाषणात्स्वामिन्यां भाषमाणायां मध्ये भृत्येनोक्त्ययोगाच्च तूष्णींभूतस्यावकाशप्रदानमकरोत् । रामा पारम्पर्यं विना साक्षाद्वचःसौन्दर्यदर्शनं रामेण न लब्धं हीति मुनिः खिद्यति ॥ ३१ ॥ ३२ ॥

३३] ति० टी०—न जानीते न जानीत इव । अनुह्लादद्दैत्यनीतां शचीं पुरन्दर इव ॥ ३३ ॥

रा० टी०—तदाकारमाह—नेत्यादिभिः । इहस्थां त्वां रामो न जानीते तेन हेतुना शचीं पुरन्दर इव त्वामाशु नानयति ॥ ३३ ॥

गो० टी०—न त्वामिति । रामः न जीवेयं क्षणमपि विना तामसितेक्षणामित्यध्यवसायी कथं नागच्छेत् । कमललोचने त्वन्नयनसौन्दर्यं दर्पणतलेऽपि किं न दृष्टवती भवती । एतत्सौन्दर्यवतीं कथं त्वां विना स तिष्ठेत् तेन अनेन हेतुना आशु त्वां नानयति । शचीं पुरन्दर इव अनुह्लादहस्तगतां शचीमिन्द्रः कंचित्कालमविज्ञाय ज्ञानानन्तरं यथा आनीतवान् तथेति भावः ॥ ३३ ॥

३४] ति० टी०—मह्यं मत्तः ॥ ३४ ॥

रा० टी०—श्रुत्वेति । मह्यं मम वचः श्रुत्वैव राघव एष्यति ॥ ३४ ॥

गो० टी०—श्रुत्वेति । मह्यं मम । व्ययेन षष्ठ्यर्थे चतुर्थी ॥ ३४ ॥

३५] ति० टी०—विष्टम्भयित्वा संस्तभ्य । सेतुं बद्ध्वेति यावत् ॥ ३५ ॥

रा० टी०—विष्टम्भयित्वेति । वरुणालयं समुद्रं विष्टम्भयित्वा विष्टभ्य संस्तभ्य सेतुं बद्ध्वेत्यर्थः लङ्कां बाणौघैः शान्तराक्षसां करिष्यति ॥ ३५ ॥

गो० टी०—समुद्रं कथमतिक्रमिष्यतीत्यत्राह—विष्टम्भयित्वेति । विष्टम्भयित्वा स्तब्धं कृत्वेत्यर्थः ॥ ३५ ॥

३६–३७] ति० टी०—तत्र तत्कर्मप्रवृत्तावन्तरा विघ्नत्वेन यदि मृत्युप्रभृतयोऽपि स्थास्यन्ति तदा तानपि वधिष्यति॥३७॥

रा० टी०—तत्रेति । तत्र लङ्काविध्वंसनसमये पथि-अन्तरा मार्गमध्ये मृत्युः सुरादयो वा यदि स्थास्यन्ति विघ्नकारित्वेनेति शेषः । तदा स रामस्तानपि वधिष्यति ॥ ३६ ॥

रा० टी०—तवेति । शोकेन परिपूरितो रामः शर्म न लभते ॥ ३७ ॥

गो० टी०—तत्रेति । स्थास्यन्ति प्रतिबन्धकतयेति शेषः ॥ ३६ ॥ ३७ ॥

१ लोचने इति गो. पाठः । २ त्विति गो. पाठः । ३ हर्यृक्षेति रा. पाठः । ४ कुलामिति गो. पाठः । ५ स परिप्लुत इति गो. पाठः ।

मन्दरेण च ते देवि शपे मूलफलेन च । मलयेन च विन्ध्येन मेरुणा दर्दुरेण च ॥ ३८ ॥
यथा सुनयनं वल्गु बिम्बोष्ठं चारुकुण्डलम् । मुखं द्रक्ष्यसि रामस्य पूर्णचन्द्रमिवोदितम् ॥ ३९ ॥
क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ । शतक्रतुमिवासीनं नागपृष्ठस्य मूर्धनि ॥ ४० ॥
न मांसं राघवो भुङ्क्ते न चैव मधु सेवते । वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥ ४१ ॥
नैव दंशान्न मशकान्न कीटान्न सरीसृपान् । राघवोऽपनयेद्गात्रात्त्वद्गतेनान्तरात्मना ॥ ४२ ॥
नित्यं ध्यानपरो रामः नित्यं शोकपरायणः । नान्यच्चिन्तयते किंचित्स तु कामवशं गतः ॥ ४३ ॥
अनिद्रः सततं रामः सुप्तोऽपि च नरोत्तमः । सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते ॥ ४४ ॥

३८] ति० टी०–स्वोक्तेऽर्थे देव्या विश्वासार्थं स्ववासस्थानमन्दरादिभिः स्वजीवनसाधनैर्मूलफलैश्च शपथं करोति—मन्दरेण चेति । दर्दुरः पर्वतविशेषः ॥ ३८ ॥

रा० टी०–अत्र दृढविश्वासार्थमाह–मन्दरेणेति ॥ ३८ ॥

गो० टी०–गिरीणां स्वजीवनस्थानत्वात्तैः शपति—मलयेनेति । दर्दुरो नाम मलयपरिसरवर्ती चन्दनप्रभवः कश्चित्पर्वतः ॥ ३८ ॥

३९] ति० टी०–यथा रामस्य मुखं द्रक्ष्यसि तथा मन्दरादिभिः शपे इत्यन्वयः ॥ ३९ ॥

रा० टी०–बिम्बावोष्ठौ यस्मिन् तत् रामस्य मुखं यथावत् द्रक्ष्यसि मन्दरादिना शपे अस्मिन् विषये शपथं करोमि। श्लोकद्वयमेकान्वयि ॥ ३९ ॥

गो० टी०–यथेति । तथा शप इति पूर्वेणान्वयः ॥३९॥

४०] ति० टी०–प्रस्रवणे गिरौ विद्यमानमपीह द्रक्ष्यसीत्यर्थः । नागपृष्ठस्य मूर्धन्यैरावतोपरि स्थितमिन्द्रमिव मत्पृष्ठगं रामं द्रक्ष्यसीत्यर्थः । 'नाकपृष्ठस्य' इति पाठः । स्वर्गस्योपरीत्यर्थ इति तीर्थः ॥ ४० ॥

रा० टी०–क्षिप्रमिति । नागा गजा पृष्ठे पार्श्वे इत्यर्थः यस्य तस्य ऐरावतस्य मूर्धनि आसीनं शतक्रतुमिव प्रस्रवणे गिरौ आसीनं रामं क्षिप्रं द्रक्ष्यसि द्रुतमागमिष्यतीत्यर्थः॥४०॥

गो० टी०–क्षिप्रमिति । नाकपृष्ठो नाम इन्द्रस्यासाधारणस्वर्गस्थानविशेषः ॥ ४० ॥

४१–४३] ति० टी०–सुविहितमारण्यकशास्त्रबोधितम् । भक्तमोदनम् । पञ्चमम् कालं प्राप्येति शेषः । प्रातःसंगवमध्याह्नापराह्णात्पञ्चमं सायाह्नं प्राप्येत्यर्थः । यद्वा प्रातःसायं प्रातःसायमिति कालचतुष्टयं त्यक्त्वा पञ्चमे प्रातःकाल इत्यर्थः, दिनद्वयमतीत्य भुङ्क्ते इत्यर्थः ॥ ४१–४३ ॥

रा० टी०–नेति । राघवः मांसं सुग्रीवसंसर्गेण वनेऽपि प्राप्तराज्यभोगं न भुङ्क्ते करोति अत एव मधु क्षौद्रं न सेवते किंतु सुविहितं ब्रह्मचर्यविधावुक्तं वन्यं फलादिरूपमन्नं पञ्चमं पूर्वभोज्यापेक्षया पञ्चममश्नाति पञ्चमं कालं सायाह्नं प्राप्येति शेष इति भट्टाः ॥ ४१ ॥

गो० टी०–न मांसमिति । 'दृङ्मनःसङ्गसंकल्पजागराः कृशतारतिः । हीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश ' इति दशावस्थास्वरतिरनेनोच्यते । मांसाद्यभोजनम् अरत्या ततः पूर्वं तद्भोजनोक्तेः । वन्यं वने भवं कन्दमूलादिकं सुविहितं वानप्रस्थयोग्यत्वेन विहितम् । भक्तम् अन्नम् । पञ्चमं प्रातःसंगवमध्याह्नापराह्णसायंरूपेषु कालेषु पञ्चमकालिकं शरीरधारणमात्रोपयुक्तं भुङ्क्ते इत्यर्थः ॥ ४१ ॥

रा० टी०–नेति । अन्तरात्मना मनसा त्वद्गतेन हेतुना दंशादीन् गात्रान्नापनयेत् अपनयति ॥ ४२ ॥

रा० टी०–नित्यमिति । कामवशं त्वद्विषयकोत्कटेच्छाधीनत्वं गतः प्राप्तः अत एव नित्यं शोकपरायण अत एव नित्यं ध्यानपरः त्वद्विषयकस्मृतौ निरतो रामः अन्यं किंचित् पदार्थं न चिन्तयते ॥ ४३ ॥

गो० टी०–अथ मनःसङ्गावस्थामाह—नैवेति । दंशास्तु वनमक्षिकाः तान् मशकांश्चेत्यनेन दंशमशकापरिज्ञानमुक्तम् । कीटसरीसृपोक्त्या उपरिशरीरं चरतामनिवृत्तिरुच्यते । तत्र हेतुः त्वद्गतेनान्तरात्मना । परकायप्रविष्टस्य कथं त्यक्तशरीरविकृतिज्ञानम् तत्र स्थितः खलु तत्रत्यपीडां ज्ञास्यतीति भावः ॥ ४२ ॥ ४३ ॥

४४] ति० टी०–प्रायोऽनिद्र एव । कथंचित्सुप्तोऽपि सीतेति वदन्नेव प्रतिबुध्यते ॥ ४४ ॥

रा० टी०–अनिद्र इति । अनिद्रः प्रायेण निद्रारहितो रामः सुप्तः कथंचित् किंचित् स्वापं प्राप्तोऽपि सीतेति मधुरां वाणीं व्याहरन्सन् प्रतिबुध्यते ॥ ४४ ॥

गो० टी०–तथास्य जागरावस्थामाह—अनिद्र इति । अनिद्रः सततं रामः निद्रया सर्वदा कालक्षेपार्होऽपि संततमनिद्रोऽभूत् । सुप्तोऽपि चेत्यनेन परगतार्थानुसंधानाभाव उच्यते । नरोत्तमः अभिमतविश्लेषे तथावस्थानमेव हि पुरुषोत्तमत्वस्य लक्षणमिति भावः । सीतेति । अप्राकृतसौन्दर्याद्यनुसंधानेन वासनावशाद्विलपति मधुरां वाणीम् । वासनावशाद्विलपत्यपि शब्दस्वभावाद्रसना जलस्यन्दिनी भवतीत्यर्थः । प्रतिबुध्यते क्लेशहीनदशाविगमात्पुनरपि बाधकोद्दीपनसंदर्शनेन बाधार्हः स्थित इत्यर्थः ॥ ४४–४६ ॥

---

१ पादशो व्यत्यस्तोऽयं श्लोकः गो. पाठे । २ नाकेति गो. पाठः । ३ अपीति गो. पाठः ।

दृष्ट्वा फलं वा पुष्पं वा यच्चान्यत्स्त्रीमनोहरम् । बहुशो हा प्रियेत्येवं श्वसंस्त्वामभिभाषते ॥ ४५ ॥
स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः ।
धृतव्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥ ४६ ॥
सा रामसंकीर्तनवीतशोका रामस्य शोकेन समानशोका ।
शरन्मुखेनाम्बुदशेषचन्द्रा निशेव वैदेहसुता बभूव ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

सप्तत्रिंशः सर्गः ।

स्ववियोगजनितरामशोकातिरेकश्रवणखिन्ना जानकी रामं शीघ्रमत्र प्रापयेति हनुमन्तं प्रार्थयते । सीताशोकासहनो हनुमानेहि पृष्ठारोपणेनाहं त्वां रामसमीपं प्रापयामीति तथा विधातुमुद्युङ्क्ते । लघुरूपत्वादेतत्करणे शङ्कितां सीतां प्रत्याययितुं हनुमान्पृथुशरीरं विधत्ते । अनेकवचनोपन्यासैस्तेन सह गमनं निषेधयन्ती जानकी राममत्र शीघ्रमानयेति हनुमन्तं प्रेरयति ।

सा सीता वचनं श्रुत्वा पूर्णचन्द्रनिभानना । हनूमन्तमुवाचेदं धर्मार्थसहितं वचः ॥ १ ॥
अमृतं विषसंपृक्तं त्वया वानर भाषितम् । यच्च नान्यमना रामो यच्च शोकपरायणः ॥ २ ॥
ऐश्वर्यं वा सुविस्तीर्णं व्यसने वा सुदारुणे । रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ३ ॥

४५–४६] ति० टी०–स्त्रीमनोहरं स्त्रीसंनिधाने मनोहरं स्त्रीणां मनोहरं वा । श्वसन्दीर्घोच्छ्वासं त्यजन् ॥ ४५ ॥ ४६ ॥

रा० टी०–दृष्ट्वेति । स्त्रीमनोहरं स्त्रीणां प्रियं फलं पुष्पं वा यदन्यत्पत्त्रादि तदपि वा दृष्ट्वा त्वां स्मरन् सन् हा प्रियेत्येवं बहुशोऽभिभाषते ॥ ४५ ॥

रा० टी०–स इति । नित्यं परितप्यमानः त्वद्वियोगजनितदुःखं प्राप्नुवन् अत एव सीतेति त्वामेव अभिभाषमाणो रामः तवैव लाभाय कृतप्रयत्नोऽस्तीति शेषः ॥ ४६ ॥

४७] ति० टी०–रामसंकीर्तनेनानिद्रः सततं राम इत्यादिना वीतशोका । न मांसं राघवो भुङ्क्ते इत्युक्तेन रामशोकेन समानशोका । अम्बुदशेषश्चन्द्रो यस्यां सा शरत् । लुप्तषष्ठीकम् । शरदो निशेव प्रकाशाप्रकाशयुक्तशरन्निशेव हर्षशोकवती बभूव ॥ ४७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०–सेति । रामसंकीर्तनेन वीतः संकीर्तनकालमानं निवृत्तः शोको यस्याः सा रामशोकेन समानः शोको यस्याः सा वैदेहसुता सा सीता शरन्मुखे शरत्प्राप्तौ अम्बुदशेषसहितचन्द्रो यस्यां सा निशा इव बभूव अभ्रच्छन्नत्वाऽच्छन्नत्वविशिष्टचन्द्रहेतुकप्रकाशाप्रकाशविशिष्टरात्रिरिव शोकनिवृत्तिप्राप्तिभ्यां प्रकाशाप्रकाशविशिष्टाऽभवदित्यर्थः ॥ ४७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

गो० टी०–सा रामेति । रामसद्भावातिशङ्कया कश्चिच्छोकः सीतायाः रामविरहेण कश्चिच्छोकः । तत्राद्यो हनुमदुक्त्या निवृत्तः द्वितीयस्तु वर्तत इत्याह—रामस्य शोकेन समानशोका तद्विरहकृतत्वेन तत्तुल्यशोका अधिकशोकस्तु निवृत्त इति भावः । यद्वा रामसंकीर्तनेन वीतशोकाऽपि नैव दंशान्न मशकानित्यादिश्रवणेन रामतुल्यशोका प्रकाशाप्रकाशशरन्मुखनिशेवाभूदित्यर्थः ॥ ४७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

१] ति० टी०–वचनं हनूमत इत्यादि ॥ १ ॥

रा० टी०–हनूमन्तं प्रति सीतोक्तिमाह–सेत्यादिभिः । सीता वचनं हनुमद्वाक्यं श्रुत्वा हनूमन्तमुवाच । तदाकारमाह–अमृतमित्यादिभिः । हे वानर ! अन्यमना रामो नेति यत् शोकपरायणोऽस्तीति यच्च त्वयाभिमावितं तत् विषसंपृक्तं विषेण संमिश्रम् अमृतं प्रतीयते इति शेषः ॥ १ ॥ २ ॥

गो० टी०–सीतेत्यादि ॥ १ ॥

२] ति० टी०–यच्चान्यमना इति वाक्यमाख्यायते तदमृतम् । यच्च शोकपरायण इति वाक्यमाख्यायते तद्विषम् ॥ २ ॥

गो० टी०–अमृतमिति । यच्च नान्यमना इत्यमृतत्वे हेतुः । यच्छोकपरायण इति विषसंसृष्टत्वे ॥ २ ॥

३] ति० टी०–ऐश्वर्यं व्यसने इति च विषयसप्तमी ॥ ३ ॥

रा० टी०–इदानीं रावणस्य अत्यैश्वर्यवत्त्वेऽपि विध्वंसो भविष्यतीति बोधयन्ती आह–ऐश्वर्य इति । ऐश्वर्यं व्यसने

---

१ स्मरन्निति रा. पाठः । २ दृढेति गो. पाठः । ३ साम्बुदेति गो. पाठ० । ४ सीता तदिति गो. पाठः ।

विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम । सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥ ४ ॥
शोकस्यास्य कथं पारं राघवोऽधिगमिष्यति । प्लवमानः परिक्रान्तो हतनौः सागरे यथा ॥ ५ ॥
राक्षसानां वधं कृत्वा सूदयित्वा च रावणम् । लङ्कामुन्मथितां कृत्वा कदा द्रक्ष्यति मां पतिः ॥ ६ ॥
स वाच्यः संत्वरस्वेति यावदेव न पूर्यते । अयं संवत्सरः कालस्तावद्धि मम जीवितम् ॥ ७ ॥
वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम । रावणेन नृशंसेन समयो यः कृतो मम ॥ ८ ॥
विभीषणेन च भ्रात्रा मम निर्यातनं प्रति । अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ॥ ९ ॥
मम प्रतिप्रदानं हि रावणस्य न रोचते । रावणं मार्गते संख्ये मृत्युः कालवशंगतम् ॥ १० ॥
ज्येष्ठा कन्या कैकला नाम विभीषणसुता कपे । तया ममैतदाख्यातं मात्रा प्रहितया स्वयम् ॥ ११ ॥
अविन्ध्यो नाम मेधावी विद्वान्राक्षसपुङ्गवः । धृतिमाञ्छीलवान्वृद्धो रावणस्य सुसंमतः ॥ १२ ॥
रामक्षयमनुप्राप्तं रक्षसां प्रत्यचोदयत् । न च तस्य स दुष्टात्मा शृणोति वचनं हितम् ॥ १३ ॥
आशंसेयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः । अन्तरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥ १४ ॥

वा विश्यमानं पुरुषं रज्ज्वा बद्धेव कृतान्तः कालः परिकर्षति ताभ्यामन्यत्र करोतीत्यर्थः एतेन रावणविध्वंसोऽवश्यं भवितेति सूचितम् ॥ ३ ॥

गो० टी०–रामवियोगो न स्वबुद्धिकृत इत्याह—ऐश्वर्यं इति । कृतान्तः दैवम् ॥ ३ ॥

४] ति० टी०–विधिर्दैवम् । असंहार्योऽशक्यप्रतिक्रियः । अत्र स्वीयमेव दुःखं दृष्टान्तयति ॥ ४ ॥

रा० टी०–विधिरिति । विधिः परमात्मनियोगः प्राणिनाम् असंहार्यः अपरिहरणीयः अत एव सौमित्रिप्रभृतीन् व्यसनैः वियोगदुःखैः मोहितान् पश्य ॥ ४ ॥

गो० टी०–विधिरिति । विधिः दैवम् । असंहार्यः अनिवार्यः ॥ ४–७ ॥

५–६] ति० टी०–हतनौः पुरुषः परिक्रान्तः कृतपराक्रमो बाहुभ्यां प्लवमानो यथा सागरे पारमतिक्लेशेनाधिगच्छति तथा राघवोऽपि कथंचित्तमधिगमिष्यति ॥ ५ ॥ ६ ॥

रा० टी०–शोकस्येति । सागरे हता विनष्टा नौर्यस्य अत एव प्लवमानः बाहुभ्यां संतरन् परिक्रान्तः अतिपराक्रमवान् पुरुष इव शोकस्य सागरे प्लवमानो राघवः शोकस्य पारं कदा अधिगमिष्यति ॥ ५ ॥

रा० टी०–राक्षसानामिति । पतिः रामः मां कदा द्रक्ष्यति ॥ ६ ॥

७–८] ति० टी०–स रामः ॥ ७ ॥ ८ ॥

रा० टी०–स इति । संवत्सरः द्वादशमासात्मकोऽयं कालः यावन्न पूर्यते तावदेव मम जीवितम् अतः संत्वरस्वेति स रामः त्वया वाच्यः ॥ ७ ॥

रा० टी०–अवशिष्टमासं बोधयन्ती आह–वर्तत इति । रावणेन यः समयो मम समीपे कृतः तस्य दशमो मासो वर्तते द्वौ तु शेषौ वर्तेते ॥ ८ ॥

गो०टी०–वर्तत इति । दशमो मासः दशममासान्तः॥८॥

९–१०] ति० टी०–निर्यातनं पुनः समर्पणम्, न च तत् तस्मिन्नित्यर्थः ॥ ९ ॥ १० ॥

रा० टी०–विभीषणेनेति । भ्रात्रा विभीषणेन मम निर्यातनं मत्कर्मकरामोद्देश्यकसमर्पणं प्रति अनुनीतः प्रार्थितोऽपि स रावणः तत् तत्र मतिं न कुरुते ॥ ९ ॥

रा० टी०–ममेति । कालवशं गतं रावणं संख्ये संग्रामे मृत्युर्मार्गते अत एव रावणस्य मम प्रतिप्रदानं न रोचते॥१०॥

गो०टी०–विभीषणेनेति । निर्यातनं प्रत्यर्पणम्॥९–१२॥

११–१२] ति० टी०–कन्याऽजातपुरुषसंबन्धा । एतद्विभीषणानुनयनम्, इदमेवाग्रे रामश्रुतं भिवीषणस्य निःशङ्कपरिग्रहाभिषेकयोर्बीजम् ॥ ११ ॥ १२ ॥

रा० टी०–नन्वेतत्त्वया कथं ज्ञातमित्यत आह–ज्येष्ठेति । विभीषणसुता विभीषणादुत्पन्ना अनला नाम ज्येष्ठा कन्याऽस्तीति शेषः मात्रा अभिहितया कथितया तया अनलया मम समीपे एतत् स्वयमाख्यातं कथितम् ॥ ११ ॥

रा० टी०–अविन्ध्य इति । रावणस्य सुसंमतः मेधावित्वादिविशिष्टः अविन्ध्यो नाम राक्षसः रामात् रक्षसां प्राप्तं क्षयं प्रत्यचोदयत् अकथयत् एतेन सीतां रामाय समर्पयेति तेन प्रार्थितमिति सूचितम् । सदुष्टात्मा रावणस्तु हितं तस्य वचनं न शृणोति । श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

१३] ति० टी०–रामक्षयम् रक्षसां रामात्क्षयं प्राप्तमित्यर्थः ॥ १३ ॥

१४] ति० टी०–पतिः प्राप्स्यत इत्यत्र हेतुः—अन्तरात्मेति । तस्मिन्रामे ॥ १४ ॥

रा० टी०–आशंसेयमिति । हि यतः मे अन्तरात्मा शुद्धः तस्मिन् रामे च बहवो गुणाः अतः पतिः रामः क्षिप्रं संप्राप्स्यते ॥ १४ ॥

१ कदेति गो. पाठः । २ श्रान्त इति गो. पाठः । ३ उन्मूलितामिति गो. पाठः । ४ऽनलेति गो. रा. पाठः । ५ एतदादि श्लोकद्वयं गो. नास्ते । ६ रामादिति रा. पाठः । ७ असंशयमिति गो. पाठः ।

उत्साहः पौरुषं सत्त्वमानृशंस्यं कृतज्ञता । विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ १५ ॥
चतुर्दश सहस्राणि राक्षसानां जघान यः । जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य नोद्विजेत् ॥ १६ ॥
न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः । अहं तस्यानुभावज्ञा शक्रस्येव पुलोमजा ॥ १७ ॥
शरजालांशुमाञ्छूरः कपे रामदिवाकरः । शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥ १८ ॥
इति संजल्पमानां तां रामार्थे शोककर्शिताम् । अश्रुसंपूर्णवदनामुवाच हनुमान्कपिः ॥ १९ ॥
श्रुत्वैव च वचो मह्यं क्षिप्रमेष्यति राघवः । चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ २० ॥
अथवा मोचयिष्यामि त्वामद्यैव स राक्षसात् । अस्माद्दुःखादुपारोह मम पृष्ठमनिन्दिते ॥ २१ ॥
त्वां तु पृष्ठगतां कृत्वा संतरिष्यामि सागरम् । शक्तिरस्ति हि मे वोढुं लङ्कामपि सरावणाम् ॥ २२ ॥
अहं प्रस्रवणस्थाय राघवायाद्य मैथिलि । प्रापयिष्यामि शक्राय हव्यं हुतमिवानलः ॥ २३ ॥
द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणम् । व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा ॥ २४ ॥
त्वदर्शनकृतोत्साहमाश्रमस्थं महाबलम् । पुरंदरमिवासीनं नगराजस्य मूर्धनि ॥ २५ ॥

१५] ति० टी०—उत्साहः कार्येषु स्थिरप्रयत्नरूप उद्योगः पौरुषं तज्जन्यः पुरुषव्यापारः सत्त्वं बलम् आनृशंस्यमक्रूरता श्रितजनदाक्षिण्यमिति यावत् । विक्रमः शौर्यम् प्रभावो दिव्यान्नसंपज्जन्यो महिमा ॥ १५ ॥

रा० टी०—गुणानेवाह—उत्साह इति । उत्साहादयः राघवे सन्ति ॥ १५ ॥

गो० टी०—उत्साह इति । लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहः पौरुषं तादृक्कार्यकरणम् सत्त्वं बलम् आनृशंस्यम् अक्रूरत्वम् कृतज्ञता उपकारज्ञत्वम् विक्रमः शौर्यम् प्रभावः शक्तिः ॥ १३ ॥ १४ ॥

१६] ति० टी०—तत्सत्त्वानुमापककार्यमाह—चतुर्दशेति १६

रा० टी०—चतुर्दशेति । यः भ्रात्रा विना राक्षसानां चतुर्दश सहस्राणि जघान तस्य समरे को न उद्विजेत् संचलेत् ॥ १६ ॥

१७] ति० टी०—व्यसनैर्व्यसनदातृभी राक्षसैस्तुलयितुमुपमितुम् । तस्य तत्त्वं च मम प्रत्यक्षमेवेत्याह—अहं तस्येति । तदपत्त्वादिति गूढम् ॥ १७ ॥

रा० टी०—नेति । स रामः व्यसनैः व्यसनप्रापकराक्षसैः तुलयितुं तोलयितुं न शक्यः शक्रस्य पुलोमजेव तस्य रामस्य अनुभावज्ञाहमस्मि ॥ १७ ॥

गो० टी०—न स इति । तुलयितुं चालयितुम् ॥ १५—२२ ॥

१८—१९] ति० टी०—शरजालेत्यादि परम्परितरूपकमिदम् ॥ १८ ॥ १९ ॥

रा० टी०—शरेति । हे कपे ! शरजालांशुमान् शरसमूहरूपकिरणविशिष्टः रामदिवाकरः रामसूर्यः शत्रुरक्षोमयं शत्रुरूपराक्षसप्रचुरं तोयम् उपशोषं नयिष्यति नेष्यति प्रापयिष्यति ॥ १८ ॥

रा० टी०—इतीति । इति संजल्पमानां तां सीतां हनुमान् उवाच ॥ १९ ॥

२०] ति० टी०—मह्यं मम मत्तो वा ॥ २० ॥

रा० टी०—तदाकारमाह—श्रुत्वेति । मह्यं मम वचः श्रुत्वैव राघवः क्षिप्रमेष्यति ॥ २० ॥

२१—२३] ति० टी०—तव रामसंगमे रामस्येहानयनं व्यर्थमेव प्रकारान्तरेणैव तस्य संभवादित्याह—अथवेति । सोऽहं राक्षसाद्राक्षसकृतादस्माद्दुःखान्मोचयिष्यामीत्यन्वयः ॥ २१—२३ ॥

रा० टी०—पक्षान्तरमाह—अथवेति । हे अनिन्दिते ! मम पृष्ठम् उपारोह अतः सराक्षसात् राक्षससहितात् अस्मात् दुःखात् अथैव मोचयिष्यामि । किंच सोऽहं राक्षसात् राक्षसजन्यात् दुःखात् मोचयिष्यामि ॥ २१ ॥

रा० टी०—ननु पृष्ठारोहणमात्रेण कथं दुःखापगमो भविष्यतीत्यत आह—त्वामिति । सरावणां रावणसहितां लङ्कां वोढुं हि यतो मे शक्तिरस्ति अतः पृष्ठगतां त्वां कृत्वा सागरं संतरिष्यामि ॥ २२ ॥

रा० टी०—अहमिति । प्रस्रवणस्थाय राघवाय त्वामिति शेषः शक्राय हुतं हव्यमनल इव प्रापयिष्यामि ॥ २३ ॥

२४] ति० टी०—दैत्यवधे व्यवसाययुक्तं विष्णुमिव स्थितम् ॥ २४ ॥

रा० टी०—द्रक्ष्यसीति । दैत्यवधे व्यवसायसमायुक्तमुत्साहसहितं विष्णुमिव त्वदर्शने कृतः उत्साहो येन तं गिरिराजस्य मूर्धनि आसीनं पुरन्दरमिव आश्रमस्थं राघवमयैव द्रक्ष्यसि । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

२५] ति० टी०—नगराजस्य श्रेष्ठस्य प्रस्रवणगिरेरित्यर्थः ॥ २५ ॥

---

१ तस्य प्रभावज्ञेति गो. पाठः । २ कर्षितामिति रा. पाठः । ३ त्विति गो. पाठः । ४ हर्यक्षेति गो. पाठः । ५ वरानने इति गो. पाठः । ६ नाकेति गो. पाठः ।

पृष्ठमारोह मे देवि मा विकाङ्क्षस्व शोभने । योगमन्विच्छ रामेण शशाङ्केनेव रोहिणी ॥ २६ ॥
कथयन्तीव शैशिना संगमिष्यसि रोहिणी । मत्पृष्ठमधिरोह त्वं तराकाशं महार्णवम् ॥ २७ ॥
नहि मे संप्रयातस्य त्वामितो नयतोऽङ्गने । अनुगन्तुं गतिं शक्ताः सर्वे लङ्कानिवासिनः ॥ २८ ॥
यथैवाहमिह प्राप्तस्तथैवाहमसंशयम् । यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसम् ॥ २९ ॥
मैथिली तु हरिश्रेष्ठाच्छ्रुत्वा वचनमद्भुतम् । हर्षविस्मितसर्वाङ्गी हनूमन्तमथाब्रवीत् ॥ ३० ॥
हनूमन्दूरमध्वानं कथं मां नेतुमिच्छसि । तदेव खलु ते मन्ये कपित्वं हरियूथप ॥ ३१ ॥
कथं चाल्पशरीरस्त्वं मामितो नेतुमिच्छसि । सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ ॥ ३२ ॥
सीतायास्तु वचः श्रुत्वा हनूमान्मारुतात्मजः । चिन्तयामास लक्ष्मीवान्नवं परिभवं कृतम् ॥ ३३ ॥
न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा । तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ ३४ ॥
इति संचिन्त्य हनुमांस्तदा प्लवगसत्तमः । दर्शयामास सीतायाः स्वरूपमरिमर्दनः ॥ ३५ ॥
स तस्मात्पादपाद्धीमानाप्लुत्य प्लवगर्षभः । ततो वर्धितुमारेभे सीताप्रत्ययकारणात् ॥ ३६ ॥

गो० टी०-त्वद्दर्शनेति । नाकराजस्य मूर्धनि नाकपृष्ठसंज्ञस्य मूर्धनि । 'नगराजस्य' इति पाठे मेरोरित्यर्थः ॥ २३ ॥

२६] ति० टी०-मा विकाङ्क्षस्व मोपेक्षां कुर्वित्यर्थः॥२६॥

रा० टी०-पृष्ठमिति । हे देवि ! शशाङ्केन रोहिणी इव रामेण योगमन्विच्छ निश्चिनु अत एव पृष्ठमारोह मा विकाङ्क्षस्व औदासीन्यं नोत्पादय ॥ २६ ॥

गो० टी०-पृष्ठमिति । मा विकाङ्क्षस्व मोपेक्षिष्ठाः॥ २४॥

२७-२८] ति० टी०-कथयन्तीव संगन्तव्यो राम इति वचनं कथयन्तीव । शशिना रोहिणीव संगमिष्यसीत्यन्वयः । एतद्वचनसमकालमेव रामसमीपं प्रापयिष्यामीत्यर्थः । यथा तद्वचने न प्रयासः, एवमनायासेन त्वां नयामीत्यर्थो वा । आकाशं तन्मार्गमवलम्ब्य महार्णवं तरेत्यन्वयः ॥२७ ॥ २८॥

रा० टी०-पौलोमीति । मत्पृष्ठमधिरोह अत एव महार्णवमिवाकाशं तर ॥ २७ ॥

रा० टी०-नहीति । इतस्त्वां नयतो मे गतिमनुगन्तुं सर्वे लङ्कानिवासिनो न शक्ताः ॥ २८ ॥

२९] ति० टी०-त्वामुद्यम्य पृष्ठे कृत्वा विहायसं यास्यामि पश्य ॥ २९ ॥

रा० टी०-यथेति । यथाहम् इह प्राप्तस्तथैव त्वामुद्यम्य स्वपृष्ठे संस्थाप्य विहायसं यास्यामि ॥ २९ ॥

गो० टी०-कथयन्तीवेति । चन्द्रेण कथयन्तीव चन्द्रेण भाषमाणेव तरेत्यन्वयः ॥ २९-२७ ॥

३०] ति० टी०-हर्षविस्मितसर्वाङ्गी हर्षपुलकितसर्वाङ्गी ॥ ३० ॥

रा० टी०-मैथिलीति । अद्भुतं वचनं श्रुत्वा हर्षविस्मितसर्वाङ्गी मैथिली हनूमन्तमब्रवीत् ॥ ३० ॥

गो० टी०-मैथिली त्विति । हर्षविस्मितसर्वाङ्गी हर्षेण पुलकितसर्वाङ्गी ॥ २८-३१ ॥

३१-३२] ति० टी०-तदेव दृश्यमानमेव ॥३१ ॥ ३२॥

रा० टी०-तदाकारमाह—हनूमन्निति । हे हनूमन् । दूरमध्वानं वोढुं मां कथमिच्छसि इच्छा न युक्तेत्यर्थः । तत्र हेतुः यतः तत्प्रसिद्धं कपित्वं कपिसामर्थ्यं लघु मन्ये ॥ ३१ ॥

रा० टी०-कथमिति । अल्पशरीरस्त्वं मां नेतुं कथमिच्छसि ॥ ३२ ॥

३३] ति० टी०-नवं परिभवमल्पशरीरोऽशक्त इत्येवंरूपम् ॥ ३३ ॥

रा० टी०-सीताया इति । सीतायाः वचनं श्रुत्वा कृतं सीतया संपादितं नवं प्रथमं परिभवं स्वानादरं ज्ञात्वेति शेषः चिन्तयामास ॥ ३३ ॥

३४-३५] ति० टी०-कामत इच्छाकृतम् ॥३४ ॥ ३५॥

रा० टी०-तदाकारमाह—नेति । मे सत्त्वं बलं प्रभावं च वैदेही न जानाति तस्माद्धेतोः मम यद्रूपं तत् कामतः स्वेच्छया पश्यतु ॥ ३४ ॥

रा० टी०-इतीति । प्लवगसत्तमो हनुमान् इति संचिन्य वैदेह्या वैदेह्यै स्वरूपं दर्शयामास ॥ ३५ ॥

गो० टी०-'न मे जानाति सत्त्वं वा प्रभावं वाऽसितेक्षणा । तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ ' इति पाठः । अन्यथा पाठे वक्ष्यमाणेन विरोधः स्यात् ॥ ३२ ॥

गो० टी०-इति संचिन्त्येति । स्वरूपं स्वस्य शरीरम्॥३३॥

३६] ति० टी०-तस्मात्पादपाच्छिंशपातः । शरीरदृढौ तद्वारजातशाखाभङ्गध्वनिना राक्षसो ज्ञास्यन्तीति तत आप्लुतिः ॥ ३६ ॥

रा० टी०-स इति । स हनूमान् तस्याः प्रत्ययकारणात् प्रतीतिहेतोः पादपात् आप्लुत्य वर्धितुमारेभे ॥ ३६ ॥

गो० टी०-एतदेवाह-स तस्मादिति । अयं श्लोको वर्धनार्थं वृक्षादवरोहणं दर्शयति स्म । अनेन सोऽवतीर्य द्रुमा-

१ पौलोमीव सहेन्द्रेण सूर्येणेव सुवर्चलेति रा. पाठः । २ चन्द्रेण सूर्येण च महार्चिषेति गो. पाठः । ३ रुद्धेति गो. पाठः । ४ आकाशमाहार्णवाविति गो. पाठः । ५ असंशय इति गो. पाठः । ६ वोढुमिति गो. पाठः । ७ वैदेह्या इति रा. पाठः ।

मेरुमन्दरसंकाशो बभौ दीप्तानलप्रभः । अग्रतो व्यवतस्थे च सीताया वानरर्षभः ॥ ३७ ॥
हरिः पर्वतसंकाशस्ताम्रवक्त्रो महाबलः । वज्रदंष्ट्रनखो भीमो वैदेहीमिदमब्रवीत् ॥ ३८ ॥
सपर्वतवनोद्देशां साट्टप्राकारतोरणाम् । लङ्कामिमां सनाथां वा नयितुं शक्तिरस्ति मे ॥ ३९ ॥
तदवस्थाप्यतां बुद्धिरलं देवि विकाङ्क्षया । विशोकं कुरु वैदेहि राघवं सहलक्ष्मणम् ॥ ४० ॥
तं दृष्ट्वाचलसंकाशमुवाच जनकात्मजा । पद्मपत्रविशालाक्षी मारुतस्यौरसं सुतम् ॥ ४१ ॥
तव सत्त्वं बलं चैव विजानामि महाकपे । वायोरिव गतिश्चापि तेजश्चाग्नेरिवाद्भुतम् ॥ ४२ ॥
प्राकृतोऽन्यः कथं चेमां भूमिमागन्तुमर्हति । उदधेरप्रमेयस्य पारं वानरयूथप ॥ ४३ ॥
जानामि गमने शक्तिं नयने चापि ते मम । अवश्यं संप्रधार्याशु कार्यसिद्धिरिवात्मनः ॥ ४४ ॥
अयुक्तं तु कपिश्रेष्ठ मया गन्तुं त्वया सह । वायुवेगसवेगस्य वेगो मां मोहयेत्तव ॥ ४५ ॥
अहमाकाशमासक्ता उपर्युपरि सागरम् । प्रपतेयं हि ते पृष्ठाद्भूयो वेगेन गच्छतः ॥ ४६ ॥
पतिता सागरे चाहं तिमिनक्रझषाकुले । भवेयमाशु विवशा यादसामन्नमुत्तमम् ॥ ४७ ॥

इति पूर्वं द्रुमाग्रात्सीतासमीपस्थशाखायामवतरणमुक्तम् । अत्र भूमाविति बोध्यम् ॥ ३४ ॥

३७-३८] ति० टी०-अग्रतो व्यवतस्थे योग्यपुरोदेशे स्थितः ॥ ३७ ॥ ३८ ॥

रा० टी०-मेरुरिति । वानरर्षभो हनुमान् मेरुमन्दरसंकाशः सन् बभौ सीताया अग्रतोऽग्रे व्यवतस्थे च ॥ ३७ ॥

रा० टी०-हरिरिति । वज्रवत् दंष्ट्रा नखानि यस्य स हनुमान् वैदेहीमिदमब्रवीत् ॥ ३८ ॥

गो० टी०-मेरुमन्दरेति । अग्रतो व्यवतस्थे । संभाषणाय वृक्षमूलगतो बभूवेत्यर्थः ॥ ३७—३७ ॥

३९] ति० टी०-सनाथां सरावणाम् । नयितुं नेतुम् ३९

रा० टी०-तद्वचनाकारमाह—सेत्यादिभिः । सनाथां रावणसहितामिमां लङ्कां नयितुं मे शक्तिरस्ति ॥ ३९ ॥

४०-४१] ति० टी०-अवस्थाप्यतां समर्थोऽयमिति निश्चीयताम् । विकाङ्क्षया संदेहेनालम् । विशोकं कुरु मत्पृष्ठेन तत्र गत्वेति शेषः ॥ ४० ॥ ४१ ॥

रा० टी०-तदिति । तत् मम सामर्थ्यसत्त्वात् हेतोः बुद्धिर्निश्चयः अवस्थाप्यतां विकाङ्क्षया उपेक्षया अलं न कर्तव्यमित्यर्थः अत एव राघवं विशोकं कुरु ॥ ४० ॥

रा० टी०-तमिति । अचलसंकाशं तं हनुमन्तं दृष्ट्वा जनकात्मजोवाच ॥ ४१ ॥

गो० टी०-तदिति । अवस्थाप्यतां निश्चलीक्रियताम् । विकाङ्क्षया उपेक्षया ॥ ३८—४१ ॥

४२] ति० टी०-विजानामि एवंविधत्वद्रूपदर्शनात्प्राग्व्यनुमानादिति भावः ॥ ४२ ॥

रा० टी०-तदाकारमाह-तवेति । तव सत्त्वाद्यहं विजानामि ॥ ४२ ॥

४३] ति० टी०-तदेवानुमानं दर्शयति—प्राकृत इति ॥ ४३ ॥

रा० टी०-प्राकृत इति । उदधेः पारम् इमां भूमिं लङ्कां च अन्यः त्वद्भिन्नः क आगन्तुमर्हति ॥ ४३ ॥

४४] ति० टी०-तवैव ममाप्यात्मनः कार्यसिद्धिरवश्यं संप्रधार्या विचार्या, त्वया तु स्वबलवैभवेन विचारिता कार्यसिद्धिः ॥ ४४ ॥

रा० टी०-जानामीति । गमने समुद्रलङ्घने मम नयने च ते शक्तिं जानामि तथापि आत्मनः कार्यसिद्धिः अवश्यं संप्रधार्या विचारणीया ॥ ४४ ॥

गो० टी०-जानामीति । संप्रधार्या विचारणीया ॥४२॥

४५] ति० टी०-भवत्यास्तर्हि को विचारस्तत्राह-अयुक्तं त्विति ॥ ४५ ॥

रा० टी०-अयुक्तमिति । हे कपिश्रेष्ठ ! त्वया सह मया गन्तुमयुक्तम् । तत्र हेतुः वायुवेगवत् सवेगस्य वेगत्वसहितस्य तव वेगः मां मोहयेत् वैचित्त्यं प्रापयेत् ॥ ४५ ॥

गो० टी०-स्वप्रापणे प्रधानं दोषं हृदि कृत्वा आपाततो दोषमाह—अयुक्तमिति ॥ ४३ ॥

४६-४७] ति० टी०-उपर्युपरि सागरं सागरस्योपरीत्यर्थः ॥ ४६ ॥ ४७ ॥

रा० टी०-अहमिति । सागरमुपर्युपरि आकाशमासक्ताहं भूयो वेगेन गच्छतस्तव पृष्ठात् प्रपतेयम् ॥ ४६ ॥

रा० टी०-पतितेति । सागरे पतिताऽहं विवशा सती यादसां जलजन्तूनामन्नमाशु भवेयम् ॥ ४७ ॥

गो० टी०-अहमिति । उपर्युपरि सागरमिति " उपर्यध्यधसः सामीप्ये " इति द्विर्वचनम् धिगुपर्यादिष्विति द्वितीया ॥ ४४ ॥

---

१ वानरोत्तम इति गो. पाठः । २ भीमेति गो. पाठः । ३ गतिमिति गो. पाठः । ४ अर्हसीति गो. पाठः । ५ पुङ्गवेति गो. पाठः । ६ हीति गो. पाठः । ७ आपन्ना हीति गो. पाठः । ८ भयादिति गो. पाठः ।

न च शक्ष्ये त्वया सार्धं गन्तुं शत्रुविनाशन । कलत्रवति संदेहस्त्वयि स्यादप्यसंशयम् ॥ ४८ ॥
ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः । अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ॥ ४९ ॥
तैस्त्वं परिवृतः शूरैः शूलमुद्गरपाणिभिः । भवेस्त्वं संशयं प्राप्तो मया वीर कलत्रवान् ॥ ५० ॥
सायुधा बहवो व्योम्नि राक्षसास्त्वं निरायुधः । कथं शक्ष्यसि संयातुं मां चैव परिरक्षितुम् ॥ ५१ ॥
युध्यमानस्य रक्षोभिस्तैस्तैः क्रूरकर्मभिः । प्रपतेयं हि ते पृष्ठाद्भयार्ता कपिसत्तम ॥ ५२ ॥
अथ रक्षांसि भीमानि महान्ति बलवन्ति च । कथंचित्सांपराये त्वां जयेयुः कपिसत्तम ॥ ५३ ॥
अथवा युध्यमानस्य पतेयं विमुखस्य ते । पतितां च गृहीत्वा मां नयेयुः पापराक्षसाः ॥ ५४ ॥
मां वा हरेयुस्त्वद्धस्ताद्विशसेयुरथापि वा । अनवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥ ५५ ॥
अहं वापि विपद्येयं रक्षोभिरभितर्जिता । त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥ ५६ ॥
कामं त्वमपि पर्याप्तो निहन्तुं सर्वराक्षसान् । राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः ॥ ५७ ॥
अथवाऽऽदाय रक्षांसि न्यसेयुः संवृते हि माम् । यत्र ते नाभिजानीयुर्हरयो नापि राघवः ॥ ५८ ॥

गो० टी०–पतितेति । यादसां जलजन्तूनाम् ॥ ४९ ॥

४८–४९] ति० टी०–इतोऽपि गमनमयुक्तं त्वया सहेत्याह—न चेति । कलत्रवति स्त्रिया सह गन्तरि संदेहः राक्षसानामिति शेषः ॥ ४८ ॥ ४९ ॥

रा० टी०–नेति । कलत्रवति स्त्रीसहिते त्वयि संदेहः गमनसंशयः स्यात् अतः त्वया सार्धं गन्तुमहं न शक्ष्ये ॥४८॥

रा० टी०–संशये कारणमाह–ह्रियमाणामिति । ह्रियमाणां मां दृष्ट्वा रावणेन आदिष्टा राक्षसा अनुगच्छेयुः ॥४९॥

गो० टी०–न चेति । कलत्रवति रक्ष्यवति त्वयि संदेहः स्यात् । मयि रक्ष्यायां त्वयि विपत्संदेहः स्यादित्यर्थः ॥ ४६ ॥

गो० टी०–एतदेव प्रपञ्चयति–ह्रियमाणामित्यादिना ४७

५०] ति० टी०–संशयं प्राणसंशयम्, तैस्त्वं परिवृतो भवेः । ततस्त्वं संशयं प्राप्तो भवेरिति त्वंशब्दद्वयनिर्वाहः ॥५०॥

रा० टी०–तैरिति । तैः राक्षसैः परिवृतः मया कलत्रवाँस्त्वं संशयं प्राप्तो भवेः ॥ ५० ॥

गो० टी०–तैरिति । त्वं तैः परिवृतो भवेः । कलत्रवान् रक्ष्यवान् त्वं संशयं प्राप्तश्च भवेरिति योजना ॥ ४८ ॥

५१–५२] ति० टी०–तत्र हेतूनाह—सायुधा इति । व्योम्नि निरालम्बप्रदेश इत्यर्थः ॥ ५१ ॥ ५२ ॥

रा० टी०–सायुधा इति । राक्षसाः सायुधाः त्वं तु निरायुधः अतः संपातुं मां परिरक्षितुं च कथं शक्ष्यसि ॥५१॥

रा० टी०–युध्यमानस्येति । रक्षोभिः युध्यमानस्य ते पृष्ठात् प्रपतेयम् ॥ ५२ ॥

गो० टी०–सायुधा इति । संयातुं सम्यग्योढुम ॥४९॥

गो० टी०–पूर्वश्लोकोक्तं समर्थयति—युध्यमानस्येत्यादिना ॥ ५० ॥

५३] ति० टी०–कथंचिन्महता यत्नेन । सांपराये युद्धे जयेयुः तस्याव्यवस्थितत्वादिति भावः ॥ ५३ ॥

रा० टी०–अथेति । संपराये युद्धे अथ यदि रक्षांसि कथंचित् त्वां जयेयुः तदा पापराक्षसा मां नयेयुः अथवा यदि युध्यमानस्य अत एव विमुखस्य मदुपरि दृष्टिरहितस्य ते समीपे पतेयं पतितां मां नयेयुश्च । श्लोकद्वयमेकान्वयि ॥५३॥५४॥

गो० टी०–अथेति । साम्पराये युद्धे ॥ ५१ ॥

५४] ति० टी०–अथ त्वं जेष्यसि एवमपि पतने महाननर्थ इत्याह—अथवेति । पतेयम् तव पृष्ठादिति शेषः । तत्र हेतुः—विमुखस्येति । युद्धपारवश्यान्मदवेक्षणविमुखस्येत्यर्थः ॥ ५४ ॥

गो० टी०–अथवेति । विमुखस्य युद्धपरवशस्येत्यर्थः ॥ ५२—५६ ॥

५५–५६ ति० टी०–विशसेयुः रामविषयकद्वेषवशात् । तत्संतोषनाशार्थमित्यर्थः ॥ ५५ ॥ ५६ ॥

रा० टी०–मामिति । जयपराजयौ अनवस्थौ अनिश्चितौ दृश्येते अस्य जयः पराजयो वा इत्यत्र निश्चयाभाव इत्यर्थः अतः वा तव जयाभावपक्षे संकुद्धाः राक्षसाः मां हरेयुर्विशसेयुर्हिंस्युर्वा ॥ ५५ ॥

रा० टी०–अहमिति । यद्यपि सर्वराक्षसान्निहन्तुं त्वं पर्याप्तोऽसि त्वया शस्तैर्हिंसितैः राक्षसैः राघवस्य यशोऽपि अहीयेत् न हीयेत् तथापि रक्षोभिरभितर्जिताऽहं वा यदि विपद्येयं तदा त्वत्प्रयत्नः निष्फल एव भवेत् । श्लोकद्वयमेकान्वयि ॥ ५६ ॥ ५७ ॥

५७ ति० टी०–यशो हीयेत्स्वयं प्रत्याहर्तुमशक्त इत्यपयशोवृद्धिः स्यादिति भावः । शस्तैर्हिंसितैः ॥ ५७ ॥

५८ ति० टी०–राक्षसैः स्वग्रहणपक्षे दोषान्तरमाह–अथवेति । संवृते गुप्ते ॥ ५८ ॥

रा० टी०–अथवेति । अथवा यदि यत्र हरयो राघवश्च मां न जानीयुः तत्र संवृते आच्छादिते स्थले मामादाय रक्षांसि

१ तवेति गो. पाठः । २ संपराय इति रा. पाठः । ३ असीति गो. पाठः । ४ राघवाविति गो. पाठः ।

आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः । त्वया हि सह रामस्य महानागमने गुणः ॥ ५९ ॥
मयि जीवितमायत्तं राघवस्यामितौजसः । भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥ ६० ॥
तौ निराशौ मदर्थे च शोकसंतापकर्शितौ । सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राणसंग्रहम् ॥ ६१ ॥
भर्तुर्भक्तिं[3] पुरस्कृत्य रामादन्यस्य वानर । नाहं स्प्रष्टुं[4] स्वतो गात्रमिच्छेयं वानरोत्तम ॥ ६२ ॥
यदहं गात्रसंस्पर्शं रावणस्य गता बलात् । अनीशा किं करिष्यामि विनाथा विवशा सती ॥ ६३ ॥
यदि रामो दशग्रीवमिह हत्वा सराक्षसम् । मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥ ६४ ॥
श्रुताश्च[5] दृष्टा हि मया पराक्रमा महात्मनस्तस्य रणावमर्दिनः[6] ।
न देवगन्धर्वभुजङ्गराक्षसा भवन्ति रामेण समा हि संयुगे ॥ ६५ ॥
समीक्ष्य तं संयति चित्रकार्मुकं महाबलं वासवतुल्यविक्रमम् ।
सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानिलेरितम् ॥ ६६ ॥
सलक्ष्मणं राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितम् ।
सहेत को वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम् ॥ ६७ ॥

न्यसेयुः तदा मदर्थोऽयं तवारम्भः प्रयत्नः निरर्थकः स्यादिति शेषः । अतः त्वया सह रामस्यागमने एव महान् गुणः । श्लोकद्वयमेकान्वयि ॥ ५८ ॥ ५९ ॥

गो० टी०-अथवेति । संहते गूढप्रदेशे ॥ ५६ ॥ ५७ ॥

५९ ति० टी०-आरम्भः समुद्रतरणादिरूपः एवं स्वगमनपक्षे दोषमुक्त्वा राघवानयनपक्ष एव गुणवानित्याह—त्वया हीति ॥ ५९ ॥

६०] ति० टी०-रामेण मदप्राप्तौ सर्वनाशप्रसङ्ग इत्याह—मयि जीवितमिति । भ्रातॄणां लक्ष्मणादीनाम् । राजकुलस्य सुग्रीवकुलस्य ॥ ६० ॥

रा० टी०-स्वलाभाभावे दोषान्तरमाह—मयीति । राघवादेः जीवितं मयि आयत्तं मल्लाभाधीनमित्यर्थः, अतः मदर्थं शोकसंतापकर्शितौ तौ रामलक्ष्मणौ सर्वर्क्षहरिभिः सह प्राणसंग्रहं प्राणानां रक्षणं त्यक्ष्यतः । श्लोकद्वयमेकान्वयि ॥ ६० ॥ ६१ ॥

गो० टी०-मयीति । तव राजकुलस्य सुग्रीवराजकुलस्य ॥ ५८—६० ॥

६१] ति० टी०-प्राणसंग्रहं प्राणसंबन्धम् ॥ ६१ ॥

६२] ति० टी०-हनुमता सह गमनाभावे कारणान्तरमाह—भर्तुरिति । रावणगात्रस्पर्शस्तु न स्वत इत्याह—यदहमिति ॥ ६२ ॥

रा० टी०-हनुमता सह गमनाभावे मुख्यं हेतुमाह—भर्तुरिति । स्वतः स्वेच्छया रामाज्ञां विनेत्यर्थः, रामादन्यस्य गात्रं स्प्रष्टुं नेच्छेयम् ॥ ६२ ॥

६३] ति० टी०-अनीशा स्त्रीत्वात्स्वयमसमर्था, विवशा विचेष्टा, विनाथाऽसंनिहितरामलक्ष्मणा । हा सीते ! लक्ष्मणेति मारीचवाक्यं श्रुत्वा रामानर्थशङ्कया लक्ष्मणस्यापि प्रस्थापनादिति भावः ॥ ६३ ॥

रा० टी०-यदिति । रावणस्य गात्रसंस्पर्शं बलात् हठात् यदहं गता तत् अनाथा नाथरहिता अत एव अनीशा सामर्थ्यरहिताऽहं किं करिष्यामि ॥ ६३ ॥

गो० टी०-यदहमिति । अनीशा स्वयं किंचित्कर्तुमसमर्था विनाथा विगतस्वामिका विवशा विचेष्टा ॥ ६१ ॥ ६२ ॥

६४] ति० टी०-तत्तस्य सदृशं स्वमहिम्ना सगणं शत्रुं हत्वा मत्रयनम् सगणरावणवधार्थमवावतारात् तस्य च मदमनेऽसंभवात्, एवं च स्वकार्यानिष्पत्त्या गतायामपि कुद्धयेदिति गूढम् ॥ ६४ ॥

रा० टी०-यदीति । रामः यदि दशग्रीवं हत्वा मां गृह्य गृहीत्वा गच्छेत् तत् तस्य रामस्य सदृशं भवेत् ॥ ६४ ॥

६५-६७] ति० टी०-तादृशबलं च तस्य मया सुविदितमित्याह—श्रुताश्चेति । विश्वामित्रयज्ञादौ कृता वालिवधादयश्च श्रुताः अन्ये दृष्टाः ॥ ६५-६७ ॥

रा० टी०-रामस्य ध्रुवं विजयो भविष्यतीति बोधयन्ती आह—श्रुता इति । यैः पराक्रमैः देवादयः रामेण समा न ते पराक्रमाः मया श्रुता दृष्टा निश्चिताश्च ॥ ६५ ॥

रा० टी०-समीक्ष्येति । अनिलेरितं दीप्तं हुताशनमिव राघवं समीक्ष्य को विषहेत् ॥ ६६ ॥

रा० टी०-सेति । हे वानरमुख्य ! आजौ संग्रामे मर्दयति रिपून् विनाशयति तं दिशागजमिव व्यवस्थितं युगान्तसूर्यप्रतिमं शराः अर्चींषि यस्य तं रामं संयुगे संग्रामे कः सहेत ॥ ६७ ॥

गो० टी०- श्रुता इति । प्रथमहिशब्दो गुणप्रसिद्धौ । द्वितीयो निस्समत्वप्रसिद्धौ ॥ ६३—६५ ॥

---

१ महात्मन इति गो. पाठः । २ त्विति गो. पाठः । ३ भर्तृभक्तिमिति गो. पाठः । ४ न स्पृशामि शरीरं तु पुंसो वानरपुङ्गवेति गो. पाठः ५ सबान्धवमिति गो. पाठः । ६ श्रुता हि दृष्टा श्रेति गो. पाठः ।

स मे कपिश्रेष्ठ सलक्ष्मणं प्रियं सयूथपं क्षिप्रमिहोपपादय ।
चिराय रामं प्रति शोककर्शितां कुरुष्व मां वानरवीर हर्षिताम् ॥ ६८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥३७॥

अष्टात्रिंशः सर्गः ।

रामप्रत्ययनार्थं हनुमताऽभिज्ञानं याचिता जानकी काकासुरवृत्तं निवेद्यैतत्त्वमभिज्ञानत्वेन निवेदयेत्यादिशति तथा रामलक्ष्मणयोरभिवादनकुशलप्रश्नान्निवेद्य संकेतितकालस्य मासद्वयावशेषेऽप्यहमेकमासमेव प्राणान्धारयामीति प्रतिज्ञायाभिज्ञानान्तरत्वेन स्वचूडामणिं प्रयच्छति च ।

ततः स कपिशार्दूलस्तेन वाक्येन तोषितः । सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥ १ ॥
युक्तरूपं त्वया देवि भाषितं शुभदर्शने । सदृशं स्त्रीस्वभावस्य साध्वीनां विनयस्य च ॥ २ ॥
स्त्रीत्वान्न त्वं समर्थासि सागरं व्यतिवर्तितुम् । मामधिष्ठाय विस्तीर्णं शतयोजनमायतम् ॥ ३ ॥
द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते । रामादन्यस्य नार्होमि संसर्गमिति जानकी ॥ ४ ॥
एतत्ते देवि सदृशं पत्न्यास्तस्य महात्मनः । का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशम् ॥ ५ ॥

६८] ति० टी०-अथ निश्चितं कर्तव्यमाह—स मे इति । सयूथपं ससुग्रीवमुपपादयानय । चिरकालं शोककर्शितां रामस्यात्रागमनेन हर्षितां कुरुष्व । समूलसकलनाशेनेति भावः ॥ ६८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०-स इति । हे कपिश्रेष्ठ ! सयूथपं यूथपतिसुग्रीवसहितं मे प्रियं क्षिप्रमिह उपपादय प्रापय अत एव चिराय बहुकालं रामं प्रति शोककर्शितां मां हर्षितां कुरुष्व ॥ ६८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

गो० टी०-स इति । हर्षितां हर्षमासादिताम् । उत्तरोत्तरहर्षवतीमित्यर्थः । अनया भक्तिक्रया उपायान्तरं स्वरूपविरुद्धं भगवत्प्राप्तौ स एवोपाय इति दर्शितः ॥ ६६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

१] ति० टी०-तेन वाक्येन सीतयोक्तेन वाक्येन ॥ १ ॥

रा० टी०-सीतावचनश्रवणानन्तरकालिकां सीतां प्रति हनुमदुक्तिमाह—तत इत्यादिभिः । तेन सीतोक्तेन वाक्येन तोषितः कपिशार्दूलः तत् सीतोक्तं वाक्यं श्रुत्वा उवाच ॥ १ ॥

गो० टी०-ततः स इत्यादि । तच्छ्रुत्वा तेन वाक्येन हर्षितः वाक्यमुवाच ॥ १ ॥

२] ति० टी०-स्त्रीस्वभावस्य भीरुत्वादेः साध्वीनां पतिव्रतानां विनयस्य वृत्तस्य सदृशं युक्तरूपमतिशयेन युक्तम् ॥२॥

रा० टी०-युक्तेति । स्त्रीस्वभावस्य भीरुत्वादेः साध्वीनां पतिव्रतानां च विनयस्य विनीतेश्च सदृशं योग्यं यत्त्वया भाषितं तत् युक्तरूपं तवातीव योग्यम् ॥ २ ॥

गो० टी०-युक्तरूपमिति । युक्तरूपं युक्ततरमित्यर्थः प्रशंसायां रूपप् । प्राशस्त्यं चात्र प्रकृत्यर्थवैशिष्ट्यम् । स्त्रीस्वभावस्य भीरुत्वादेः साध्वीनां पतिव्रतानाम् विनयस्य वृत्तस्य ॥ २ ॥

३-४] ति० टी०-वचनस्य युक्तरूपतां प्राशस्त्यं दर्शयति-स्त्रीत्वादिति । शतयोजनं सागरं व्यतिवर्तितुं तर्तुं विस्तीर्णमतिबृहच्छरीरमपि मामधिष्ठायेत्यन्वयः । 'स्त्री त्वं न तु समर्थं हि' इति पाठे त्वं स्त्री न तु समर्थम् । न समर्थेत्यर्थः । लिङ्व्यत्यय आर्ष इति तीर्थः । स्त्रीणां भीरुस्वभावत्वादिति भावः ॥ ३ ॥ ४ ॥

५] ति० टी-ईदृशं वचनं त्वया सह न यास्यामीत्येतद्वचनम् । त्वद्विनेदृश्यामापदीदृशं वचः का ब्रूयात् ॥ ५ ॥

रा० टी०- युक्तत्वमेव स्फुटयन्नाह—स्त्रीत्वादिति । स्त्रीत्वाद्धेतोः मामधिष्ठाय ममोपरि स्थित्वापि सागरं व्यतिवर्तितुं न समर्थासि ॥ ३ ॥

रा० टी०-द्वितीयमिति । रामात् अन्यस्य संसर्गं नार्होमि एतत् द्वितीयं कारणं यद्ब्रवीषि तत् महात्मनः तस्य रामस्य पत्न्याः ते सदृशं हि यतः ईदृशं वचनं त्वामृते का ब्रूयात् न कापीत्यर्थः । श्लोकद्वयमेकान्वयि ॥ ४-५ ॥

गो० टी०-स्त्रीत्वमिति । विस्तीर्णं मामधिष्ठाय शतयोजनमायतं सागरम् व्यतिवर्तितुं तर्तुं स्त्री त्वं न समर्थं हि । स्त्री न समर्थेत्यर्थः यद्वा सागरस्य शतयोजनम् आयतं विस्तीर्णं

१ मुख्येति गो. पाठः । २ हर्षित इति गो. पाठः । ३ स्त्रीत्वं न तु समर्थं हीति गो. पाठः । ४ विस्तीर्णे इति रा. पाठः । ५ संस्पर्शमिति गो. पाठः ।

श्रोष्यते चैव काकुत्स्थः सर्वं निरवशेषतः । चेष्टितं यत्त्वया देवि भाषितं च ममाग्रतः ॥ ६ ॥
कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया । स्नेहप्रस्कन्नमनसा मयैतत्समुदीरितम् ॥ ७ ॥
लङ्घाया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः । सामर्थ्यादात्मनश्चैव मयैतत्समुदीरितम् ॥ ८ ॥
इच्छामि त्वां समानेतुमद्यैव रघुनन्दिना । गुरुस्नेहेन भक्त्या च नान्यथा तदुदाहृतम् ॥ ९ ॥
यदि नोत्सहसे यातुं मया सार्धमनिन्दिते । अभिज्ञानं प्रयच्छ त्वं जानीयाद्राघवो हि यत् ॥ १० ॥
एवमुक्ता हनुमता सीता सुरसुतोपमा । उवाच वचनं मन्दं बाष्पप्रग्रथिताक्षरम् ॥ ११ ॥
इदं श्रेष्ठमभिज्ञानं ब्रूयास्त्वं तु मम प्रियम् । शैलस्य चित्रकूटस्य पादे पूर्वोत्तरे पदे ॥ १२ ॥
तापसाश्रमवासिन्याः प्राज्यमूलफलोदके । तस्मिन्सिद्धाश्रिते देशे मन्दाकिन्यविदूरतः ॥ १३ ॥

च मामधिष्ठायापि स्त्रीत्वम् व्यतिवर्तितुम् अपगन्तुं न समर्थं हि । सागरस्य शतयोजनं यावत्तावदायतम् तथा विस्तीर्णं च मामधितिष्ठन्त्या अपि तव स्त्रीत्वं भीरुत्वं नापगच्छतीत्यर्थः॥३–५॥

६] ति० टी०–चेष्टितं व्यापारो विलापादिरूपः ॥ ६ ॥

रा० टी०–श्रोष्यते इति । यत्त्वया चेष्टितं रोदनादि कृतं भाषितं च तत्सर्वं काकुत्स्थो रामः निरवशेषतः श्रोष्यते ॥ ६॥

गो० टी०–श्रोष्यत इति । त्वया चेष्टितम् उद्बन्धनादिकम् । भाषितं रावणं तृणीकृत्य फणितम् । मम प्रत्युत्तरत्वेन कथितं च ॥ ६ ॥

७] ति० टी०–कारणैर्बहुभिरुपपन्नं यत्त्वया मद्ग्रतो भाषितं तद्रामाग्र उच्यमानगुणकेन मयेरितं काकुत्स्थो निरवशेषतः श्रोष्यत इत्यन्वय इति कतकः ॥ ७ ॥

रा० टी०–नन्वस्यैवोचितत्वे त्वया कथं सह गमनं प्रार्थितमित्यत आह—कारणैरिति । हे देवि! रामप्रियचिकीर्षया शीघ्रं रामप्रीतिवाञ्छया बहुभिः कारणैः कारणान्तरैश्च स्नेहेन प्रस्कन्नं द्रवीभूतं मनो यस्य तेन मया एतत्समुदीरितम् ॥ ७ ॥

गो० टी०–कारणैरिति । बहुभिः कारणैः बहुभिरुपायैः। स्नेहप्रस्कन्नमनसा स्नेहशिथिलमनसा ॥ ७ ॥

८] ति० टी०–रामसमीपनयनोक्तौ हेतुमाह–लङ्घाया इति । रामेण पत्या लङ्घाया दुष्प्रवेशत्वान्महोदधेर्दुस्तरत्वाच्चात्मनः सामर्थ्यसत्त्वाच्च ॥ ८ ॥

रा० टी०–कारणान्येव स्फुटयन्नाह—लङ्घाया इति । लङ्घायाः दुष्प्रवेशत्वाद्धेतोः मया एतत्समुदीरितम् एतेन रामस्यागमने श्रमो भविष्यतीति सूचितम् ॥ ८ ॥

गो० टी०–लङ्घाया इति । दुष्प्रवेशलङ्घाप्रवेशे दुस्तरसागरतरणे च मम शक्तिरस्तीति ज्ञापयितुमेवमुक्तमित्यर्थः ॥८॥

९] ति० टी०–इच्छामीत्यादिसमुदीरितं मयेति शेषः । रघुनन्दिना रघूंस्तद्वंश्यान्नन्दयति तेन रामेण समानेतुमित्यन्वयः । तदपि गुरो रामस्य स्नेहेन त्वयि भक्त्या चोक्तम्, न तु निजबलगर्वादित्यर्थः ॥ ९ ॥

रा० टी०–इच्छामीति । रघुनन्दिना रामेण त्वां समानेतुं संयोजयितुम् अद्यैव इच्छामि अत एव एतत् उदाहृतं कथितम् ॥ ९ ॥

गो० टी०–इच्छामीति । रघुबन्धुना रघुवंश्येन । सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाःसमा इत्यमरः । रघुवंश्यानां बन्धुना तत्कीर्तिसंपादकेनेत्यर्थः । समानेतुं संगमयितुम् इच्छामि ऐच्छम् ॥ ९ ॥

१०] ति० टी०–यदीति । उक्तरीत्यायुक्तत्वपर्यालोचनयेत्यर्थः ॥ १० ॥

रा० टी०–यदीति । मया सार्धं यातुं यदि नोत्सहसे तर्हि यत् यतः राघवो जानीयात् मत्कर्तृकत्वदर्शनं बुध्येत तदभिज्ञानं चिह्नं त्वं प्रयच्छ ॥ १० ॥

गो० टी०–यदीति ॥ १० ॥

११] ति० टी०–एवमुक्ता प्रत्यभिज्ञां देहीत्युक्ता । मन्दमुपांशु । एकान्तवृत्तान्तस्मरणजो बाष्पः ॥ ११ ॥

रा० टी०–एवमिति हनुमता एवमुक्ता सीता बाष्पैः प्रग्रथितानि अक्षराणि यस्मिन् तद्वचनं मन्दं शनैरुवाच ॥११॥

गो० टी०–एवमिति । बाष्पप्रग्रथिताक्षरं बाष्पेण विग्रिताक्षरम् । एकान्तवृत्तान्तस्मरणात् बाष्पः ॥ ११ ॥

१२] ति० टी०–इदं रहस्यवृत्तान्तकथनरूपम् । रहस्यवृत्तान्तत्वादेवान्याज्ञातत्वेन श्रेष्ठम् । तदेवाह–शैलस्येति । पूर्वोत्तरे ईशानदिक्स्थे पादे प्रत्यन्तपर्वतरूपे पदे स्थाने ॥१२॥

१३] ति० टी०–मन्दाकिन्यविदूरतो मन्दाकिनीसमीपे । सिद्धाश्रिते बहुमूलादिमति देशे तापसाश्रमवासिन्या मम यद्वृत्तं तच्छ्रेष्ठमभिज्ञानं त्वं ब्रूया इति संबन्धः ॥ १३ ॥

रा० टी०–तद्वचनाकारमाह–इदमित्यादिभिः । इदं वक्ष्यमाणम् अभिज्ञानं मम प्रियं यथा भवति तथा त्वं ब्रूयाः । अर्धं पृथक् अभिज्ञानमेवाह–शैलस्येत्यादिभिः । चित्रकूटस्य शैलस्य पूर्वोत्तरे ईशानकोणे विद्यमाने पादे विभूतिप्रापके प्राज्यानि अधिकानि मूलफलोदकानि यस्मिन् सिद्धाश्रिते मन्दाकिन्या अदूरतः समीपे तस्मिन् प्रसिद्धे अदेशे कृतदेशभिन्ने पदे स्थाने विद्यमानाया ममाङ्के नानापुष्पसग-

१ बन्धुनेति गो. पाठः । २ एतदिति गो. पाठः । ३ तदिति गो. पाठः । ४ पुरेति गो. पाठः । ५ आश्रमे इति गो. पाठः । ६ मन्दाकिन्या ह्यदूरत इति गो. पाठः ।

तस्योपवनखण्डेषु नानापुष्पसुगन्धिषु । विहृत्य सलिले क्लिन्नो ममाङ्के समुपाविशः ॥ १४ ॥
ततो मां स समायुक्तो वायसः पर्यतुण्डयत् । तमहं लोष्टमुद्यम्य वारयामि स्म वायसम् ॥ १५ ॥
दारयन्स च मां काकस्तत्रैव परिलीयते । न चाप्युपारमन्मांसाद्भक्षार्थी बलिभोजनः ॥ १६ ॥
उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणे । स्रंसमाने च वसने ततो दृष्टा त्वया ह्यहम् ॥ १७ ॥
त्वया विहसिता चाहं क्रुद्धा संलज्जिता तदा । भक्ष्यगृद्धेन काकेन दारिता त्वामुपागता ॥ १८ ॥
ततः श्रान्ताहमुत्सङ्गमासीनस्य तवाविशम् । क्रुध्यन्तीवै प्रहृष्टेन त्वयाऽहं परिसान्त्विता ॥ १९ ॥
बाष्पपूर्णमुखी मन्दं चक्षुषी परिमार्जती । लक्षिताऽहं त्वया नाथ वायसेन प्रकोपिता ॥ २० ॥

न्धिषु तस्य चित्रकूटस्य उपवनखण्डेषु विहृत्य सलिले क्लिन्नस्त्वं समुपाविशः । सार्धश्लोकद्वयमेकान्वयि ॥ १२–१४ ॥

गो० टी०–इदमित्यादि श्लोकद्वयमेकान्वयम् । चित्रकूटस्य पादे चित्रकूटपर्यन्तपर्वते । मन्दाकिन्या अदूरे सिद्धैराश्रिते प्राज्यमूलफलोदके तस्मिन्देशे तापसाश्रमवासिन्याः तापसाश्रमे वसन्त्या मम इदं वक्ष्यमाणं श्रेष्ठमभिज्ञानं प्रियं प्रति त्वं ब्रूया इति योजना ॥ १२ ॥ १३ ॥

१४] ति० टी०–समुपाविष्टोऽभूः ॥ १४ ॥

गो० टी०–रामाय सीतया वक्तव्यं वचनं हनुमन्तं प्रत्युच्यते—तस्येत्यादि ॥ १४ ॥

१५] ति० टी०–ततोऽनन्तरं स त्वदनुभवसिद्धः समायुक्तो विकाराभियुक्तः सन्पर्यतुण्डयत् । स्तनान्तर इति शेषः । यद्वा मांससमायुक्तः मांसेच्छायुक्त इत्यर्थः ॥ १५ ॥

रा० टी०–तत इति । ततोऽनन्तरं मांससमायुक्तः मांसेन विशिष्टो वायसः मां पर्यतुण्डयत् गृहीतमांसेन मामताडयदित्यर्थः तं वायसं लोष्टमुद्यम्य वारयामि स्म ॥ १५ ॥

गो० टी०–तत इति । मांससमायुक्तः मांसप्रतिलुब्धः । आयुक्तकुशलाभ्यां चेत्यत्र आयुक्तशब्दस्य तात्पर्यपरतया व्याख्यानात् । लोष्टं मृत्पिण्डम् । पर्यतुण्डयत्पर्यखण्डयत् । स्तनान्तर इति शेषः । " तुडि ' तोडने " इत्ययं धातुश्चौरादिकः ॥ १५ ॥

१६] ति० टी०–तत्रैव परिलीयते वार्यमाणोऽपि न देशान्तरं गच्छति स्म, न च मांसान्मांसविदारणाद्भक्षार्थ्युपारमत् । यद्ययं वस्तुतो न मांसार्थीत्युच्यते तदेतं योज्यम् । स वायसो मांसाद्भक्षार्थीव इवाध्याहारः ल्यब्लोपे पञ्चमी मांसमुपगृह्य भक्षार्थीव । यद्वा मांसभोजने भक्षार्थीव पुनःपुनर्विलेखनान्न विरराम ॥ १६ ॥

रा० टी०–दारयन्निति । बलिभोजनः स काकः भक्षार्थी मन्मांसभक्षणकाम इव चेष्टार्थे मां दारयन् दारयितुं तत्रैव परिलीयते पर्यलीयत् मांसान्मांसप्रक्षेपात्तु नोपारमत् उपारमत् १६

गो० टी०–दारयन्निति । परिलीयते अन्तर्हितो भवति स्म । बलिभोजनः काकः ॥ १६ ॥

१७–१८] ति० टी०–अथ पक्षिणे कुद्धायां मयि रशनां वासोदार्ढ्यायोत्कर्षन्त्यां तदानीं वसने स्रंसमाने सति त्वयाहं स्रस्तवसना दृष्टा, ततस्त्वया विहसिता, तदा तत्परिहासकाले कुद्धा सम्यग्लज्जिता च । भक्ष्यगृद्धेन भक्ष्यलुब्धेनैव काकेन दारिता सती त्वामुपागता ॥ १७ ॥ १८ ॥

रा० टी०–उत्कर्षन्त्यामिति । पक्षिणे वायसाय कुद्धायाम् अत एव रशनामुत्कर्षन्त्यां मयि वसने स्रंसमाने सति त्वयाऽहं दृष्टा ॥ १७ ॥

गो० टी०– उत्कर्षन्त्यामिति । उत्कर्षन्त्यां च रशनां काकोत्सारणार्थमिति शेषः ॥ १७ ॥

रा० टी०–त्वयेति । भक्ष्यगृध्रेण भक्षणीयमांसाभिकाङ्क्षिणा च काकेन दारिता विदारितेव त्वामुपागता प्राप्ताऽहं तदा वसनस्रंसनकाले त्वया विहसिता अत एव संलज्जिता अतः कुद्धा अभवमिति शेषः ॥ १८ ॥

गो० टी०–त्वयेति । भक्ष्यगृध्नेन भक्षलोलुपेन दारिता विदारिता त्वामुपागता पुनरुत्सङ्गमाविशमित्येताभ्यां काकोत्सारणार्थमङ्कादुत्थानमनुधावनं च कृतम् देव्येत्यवगम्यते ॥ १८ ॥ १९ ॥

१९] ति० टी०–तदनन्तरं वायसापसारणेन श्रान्ताहमासीनस्य ते उत्सङ्गमाविशम् । ततः परिहासमात्रं कृत्वा तूष्णीं तिष्ठति भवति कुद्धयन्त्यहं प्रहृष्टेन त्वया परिसान्त्विता॥१९

रा० टी०– तत इति । ततोऽनन्तरं त्वया परिसान्त्विता कुद्धयन्तीवाहम् आसीनस्य तवोत्संगमाविशम् ॥ १९ ॥

२०] ति० टी०–अतएव बाष्पपरिपूर्णमुखी, चक्षुषी च मन्दं परिमार्जती हे नाथ, वायसेन प्रकोपितेति त्वया लक्षिताऽस्मि ॥ २० ॥

रा० टी०–बाष्पेति । वायसेन प्रकोपिता अत एव बाष्पपूर्णमुखी अत एव चक्षुषी परिमार्जती अहं त्वया लक्षिता अभवमिति शेषः ॥ २० ॥

गो० टी०–बाष्पेति । रामाङ्के केवलं स्थितास्मि । तदा काको मां किंचिददारयत् । तं दृष्ट्वा तत्पलायनार्थं स्वयमायासं कुर्वन्तीं तदशक्त्या रुदन्तीं मां रामः परिहासपूर्वकं सान्त्वितवानित्यर्थः । अनेन स्वरक्षणे स्वयं प्रवृत्तश्चेदीश्वर उपेक्षते स्वयमप्रवृत्तौ स रक्षतीति द्योतितम् ॥ २०–२३ ॥

१ सलिलक्लिन्ना तवांके समुपाविशमिति गो. पाठः । २ पक्षिणीति गो. पाठः । ३ स्रंस्यमाने गो. पाठः । ४ आसीनस्य च ते श्रान्ता पुनरुत्सङ्गमिति गो. पाठः । ५ चेति गो. पाठः ।

परिश्रमाच्चै सुप्तौ हे राघवाङ्केऽस्म्यहं[3] चिरम् । पर्यायेण प्रसुप्तश्च ममाङ्के भरताग्रजः ॥ २१ ॥
स तत्र पुनरेवाथ वायसः समुपागमत् । ततः सुप्तप्रबुद्धां मां राघवाङ्कात्समुत्थिताम् ॥
वायसः सहसाऽऽगम्य विरराद स्तनान्तरे ॥ २२ ॥
पुनः पुनरथोत्पत्य विरराद स मां भृशम् । ततः समुत्थितो रामो मुक्तैः शोणितबिन्दुभिः॥२३॥
[वायसेन ततस्तेन बलवत्क्लिश्यमानया । स मया बोधितः श्रीमान्सुखसुप्तः परन्तपः ॥]
स मां दृष्ट्वा महाबाहुर्विलुप्तां स्तनयोस्तदा । आशीविष इव क्रुद्धः श्वसन्वाक्यमभाषत ॥ २४ ॥
केन ते नागनासोरु विक्षतं वै स्तनान्तरम् । कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ २५ ॥
वीक्षमाणस्ततस्तं वै वायसं समवैक्षत । नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम्॥ २६ ॥
पुत्रः किल स शक्रस्य वायसः पततां वरः । धरान्तरं गतः शीघ्रं पवनस्य गतौ समः ॥ २७ ॥

२१] ति० टी०–अथ हे राघव, अहं तवाङ्के परिश्रमात्सुप्तास्मि भरताग्रज, त्वं च पर्यायेण ममाङ्के सुप्तः ॥ २१ ॥

रा० टी०–परीति । परिश्रमात् हेतोः पर्यायेण क्रमेण हे राघव तवाङ्केऽहं चिरं प्रसुप्तास्मि ममाङ्के भरताग्रजश्च प्रसुप्तः ॥ २१ ॥

२२] ति० टी०–स तत्रेति । त्वयि स्वपति मयि जाग्रत्यामित्यर्थः । सुप्तप्रबुद्धां राघवाङ्के सुप्त्वा ततः प्रबुद्धाम्, अत एव राघवाङ्कादुत्थितां वायसः पुनरागम्य स्तनान्तरे विरराद व्यलिखत् ॥ २२ ॥

रा० टी०–स इति । स वायसः काकः पुनः समुपागमत् अर्थं पृथक् । तत इति । सुप्तप्रबुद्धाम् अत एव राघवाङ्कात्समुत्थितां मां वायस आगम्य स्तनान्तरे विरराद भेदनानुकूलव्यापारं चकार सार्द्धश्लोक एकान्वयी ॥ २२ ॥

२३] ति० टी०–एतदन्तमभिज्ञानवचनानुवादः । अथ हनूमते शेषवृत्तान्तकथनम्––तत इति । ततः पुनः पुनर्विलेखनाद्धेतोर्मुक्तैः शोणितबिन्दुभी रामः समुत्थितोऽभूत् । सुखसुप्तोऽपीति शेषः ॥ २३ ॥

२४–२५] ति० टी०–तदा स्तनयोर्विलुप्तां मां दृष्ट्वा क्रुद्धः । अनेन पूर्वपर्याये केवलं रामः काकचेष्टानुद्धया परिहासमेव कृतवानिति सूचितम् ॥ २४ ॥ २५ ॥

रा० टी०–पुनरिति । पुनरुत्पत्य मां पुनर्विददार अथ अनन्तरं ततः पुनः पुनर्विदारणात् हेतोः समुत्थितो रामः स्तनयोर्विलुप्तां रुधिरमयमांसयुक्ततुण्डेन ताडिताम् अत एव मुक्तैः मांसात् च्युतैः शोणितबिन्दुभिरुपलक्षितां मां दृष्ट्वा क्रुद्ध आशीविष इव श्वसन् सन् अभाषत । अर्धंचतुष्टयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–वायसेन ततस्तेन बलवत् क्लिश्यमानया । स मया बोधितः श्रीमान्सुखसुप्तः परन्तपः । स निखिललोकविदितनिरतिशयसौन्दर्यप्रसिद्धः मया बोधितः । मयैवाहं हता स्वापकालिकश्रीविशेषानुभवात् । लोके कश्चित्संचारदशायां सुन्दर इव भाति शयने दुर्लक्षणादिभिर्दोषा दृश्यन्ते न तथायम् । श्रीमान् स्वापकालिकश्रीरुच्यते । सुखसुप्तः तत्त्वानुगुणैव हि सुप्तिरपि । परन्तपः शयनमेव सकलशत्रुनिवर्तनक्षममित्यर्थः । सुप्तः श्रीमान् । लोके स्थानगमनशयनादिदशायाम् रूपवानिव लक्ष्यते कश्चित् । संशयने प्रकाशितप्रच्छन्नदोषतया जुगुप्सितो भवति । अयं तु शयनावस्थायामेव नीराजना कर्तव्या दृष्टिदोषपरिहारायेत्येवं स्थितः ॥ २४ ॥

गो० टी०–स मामिति । विलुप्तां दारिताम् ॥ २५ ॥

रा० टी०–भाषणाकारमाह–केनेति । हे नागनासोरु शुण्डादण्डसदृशोरुविशिष्टे ते स्तनान्तरं केन विक्षतं ताडितम् अत एव पञ्चवक्त्रेण भोगिना सर्पेण कः क्रीडति ॥ २५ ॥

गो० टी०–केनेति । पञ्चवक्त्रेण व्यात्तमुखेन । " पचि, विस्तारे " इत्यस्मात्पचाद्यच् । कार्यातिशयद्योतनार्थं वा पञ्चसंख्याकवक्त्रोक्तिः नागनासोरु नागहस्तोरु । कुपितपञ्चवक्त्रक्रीडासमं तव स्तनविदारणमिति भावः॥ २६ ॥ २७ ॥

२६] ति० टी०–वीक्षमाणः । इतस्ततः प्रान्तदेशमित्यर्थः ॥ २६ ॥

रा० टी०–वीक्षमाण इति । वीक्षमाणः इतस्ततो लोकयन् रामः सरुधिरैर्दारितपक्षादिरुधिरविशिष्टैर्नखैरुपलक्षितं मामभि मत्सम्मीये मुखं संमुखमेव स्थितं वायसं समवैक्षत॥२६॥

२७] ति० टी०–देवि । कोऽसावेवंविधो वायस इति हनूमतः शङ्कायामाह––पुत्र इति । शक्रपुत्रो जयन्तः स तु वायसः वायसरूपधारीत्यर्थः । धरान्तरं गतो भूमिबिलं प्राप्तः । शीघ्रगतौ पवनस्य समः । धरान्तरचारित्वं तु पवनादस्य विशेषः । नहि वायुस्तत्संचारीति कतकः ॥ २७ ॥

रा० टी०–ननु सावधानजनशरीरस्य काककर्तृकविदारणं लोके न दृष्टमिति कोऽयमीदृशः काक इति हनुमतः शङ्कां दूरीकुर्वती आह—पुत्र इति । गतौ पवनस्य समः अत एव शीघ्रं धरान्तरं गतो वायसः शक्रस्य पुत्रः एतेन रामपराक्रमपरीक्षार्थं शक्रप्रेरणयैवायमागत इति ध्वनितम् ॥ २७ ॥

१ प्रेति गो. रा. पाठः । २ चेति गो. पाठः । ३ ऽप्यहमिति गो. पाठः । ४ रामस्यांकादिति गो. पाठः । ५ विददारेति गो. पाठः । ६ विददारेति गो. रा. पाठः । ७ श्लोकोऽयमधिकः गो. पाठे । ८ उदैक्षतेति गो. पाठः ।

ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः । वायसे कृतवान्क्रूरां मतिं मतिमतां वरः ॥ २८ ॥
स दर्भसंस्तरादाशु ब्रह्मणोऽस्त्रेण योजयत् । स दीप्त इव कालाग्निर्जज्वालाभिमखो द्विजम्॥ २९ ॥
स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति । ततस्तु वायसं दर्भः सोऽम्बरेऽनुजगाम ह ॥ ३० ॥
अनुसृष्टस्तदा काको जगाम विविधां गतिम् । त्राणकाम इमं लोकं सर्वं वै विचचार ह ॥ ३१ ॥
स पित्रा च परित्यक्तः सर्वैश्च परमर्षिभिः । त्रींल्लोकान्संपरिक्रम्य तमेव शरणं गतः ॥ ३२ ॥

गो० टी०–नन्वु वायसमात्रे किमर्थमस्त्रं मुक्तमित्याशङ्क्याह–पुत्रः किलेति । इदं रक्षणानन्तरं तेनैवोक्तमिति शेषम् । किलेति प्रसिद्धौ । इन्द्रपुत्रत्वेन प्रसिद्धो जयन्त एव वायसरूपेणागत इत्याहुः । वायसरूपोऽन्यः पुत्र इत्यप्याहुः॥२८॥२९॥

२८] ति० टी०–कोपेन संवर्तिते विवर्तिते ईक्षणे येन सः ॥ २८ ॥

रा० टी०–तत इति । महाबाहुः रामस्तस्मिन् वायसे क्रूरां क्रूरात्वेन प्रतीयमानां मतिं कृतवान् ॥ २८ ॥

२९–३०] ति० टी०–दर्भसंस्तरात् । संस्तरणार्थंगृहीतदर्भमुष्टेरेकमिति शेषः । योजयत् । ब्रह्मास्त्रदेवतामन्त्रेणायोजयदित्यर्थः ॥ २९ ॥ ३० ॥

रा० टी०–स इति । स रामः दर्भसंस्तरात् दर्भमयास्तरणतः कोपेन सीताङ्गस्पर्शहेतुकपरमकल्याणप्राकट्यकारकस्वीकृतक्रोधाभासेन संवर्तिते ईक्षणे यस्य स महाबाहुः रामः तस्मिन् वायसे वायसकल्याणार्थं क्रूरां भयकारिणीं कठिनामनिवार्यामित्यर्थो वा मतिं कृतवान् क्रूरौ कठिनभीषणावित्यनेकार्थः ॥ [स इति । स रामः दर्भसंस्तरात् दर्भमयास्तरणात् गृह्य गृहीत्वा एकं दर्भमिति शेषः ब्रह्मणोऽस्त्रेण अस्त्रत्वसंपादकेन दृष्टिविशेषादिना अयोजयत् स योजितो दर्भः द्विजं वायसमभिमुखः सन् कालाग्निरिव जज्वाल] ॥ २९ ॥

रा० टी०–स इति । स रामः वायसं प्रति दर्भं चिक्षेप ततोऽनन्तरं स दर्भः वायसमुद्दिश्य अम्बरेऽनुजगाम ॥ ३० ॥

गो० टी०–स दर्भमिति । संस्तरात् आस्तरणात् गृह्य गृहीत्वा अस्त्रेण अस्त्रमन्त्रेण योजयत् अयोजत् अभिमन्त्रितवानित्यर्थः । द्विजं काकम् ॥ ३०–३१ ॥

३१] ति० टी०–विविधां गतिं जगामेत्येतद्विवृणोति—त्राणेति । इमं लोकं भूलोकादिसत्यलोकान्तम् ॥ ३१ ॥

रा० टी०–अनुसृष्ट इति । अनुसृष्टः बाणेनानुगतः अत एव त्राणकामः काकः विविधां गतिम् आश्रयं जगाम चिन्तयामास अत एव सर्वं लोकं विचचार ॥ ३१ ॥

गो० टी०–अनुसृष्ट इति । अनुसृष्टः अनुसृतः । विविधां गतिं विविधं स्थानम् । लोककामः लोकयितृकामः । रक्षकापेक्षीत्यर्थः ॥ ३२ ॥

३२] ति० टी०–पित्रा परित्यक्तः । स्वर्गेऽपीति शेषः । पित्रेत्युपलक्षणं ब्रह्मान्तानाम् ॥ ३२ ॥

रा० टी०–स इति । सः स्वपित्रादिसमीपं गतः पित्रा महर्षिभिश्च परित्यक्तः रामबाणभिया अरक्षितः वायसः शरणं सर्वरक्षकं रामं गतः प्राप्तः ॥ ३२ ॥

गो० टी०–भगवद्व्यतिरिक्ता बान्धवाभासा न रक्षका इत्याह–स पित्रेति । सः पुरुषकारभूतायामपि कृतापराधः सः आर्द्रापराधः पित्रा च परित्यक्तः अस्त्रक्षतिभीततया प्रथमं पितरं रक्षकं गतः तेन त्रैलोक्याधिपतिना च त्यक्तः इन्द्रो महेन्द्रः सुरनायको वेति तस्यासमर्थत्वोक्तेः । परित्यक्तः त्यागोऽपि नापाततः बुद्धिपूर्वं त्यक्तः त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेदिति न्यायात् । यद्वा परित्यक्तः भार्यापुत्रादिभिःसह त्यक्तः । चकारेण माता समुच्चीयते । न केवलं हितपरेण पित्रा प्रियपरया मात्रा च परित्यक्तः । सीता नारी जनस्यास्य योगक्षेमं विधास्यतीति तवरक्षकभूतायामपि सापराधत्वादिति भावः । पित्रपेक्षया मातुर्वात्सल्यातिशयात्तामेव प्रथमं गच्छति स्म ततः पितरम् । पित्रा त्यागवचनान्मात्रा त्यागः सिद्ध एवेति चकारेण सूचितम् । पितृभ्यां त्यागेऽपि बान्धवा न त्यजन्ति किं पितरौ सर्वथा त्यक्ष्यत इति तैरपि त्यक्त इत्याह—'सुरैश्च कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' इति रामनयने रक्ते तेऽपि बिभ्यति हि । एवं पूर्वसजातीयैस्त्यक्तत्वेऽपि परिगृहीतपक्षिरूपसजातीयैः किं त्यक्तः इत्यपेक्षायां तथेत्याह—चकारेण । पक्षिणोऽपि प्रयाचन्ते सर्वभूतातुकम्पिनमिति पक्षिणामपि शरण्यत्वात् । स्वनायकगरुडस्वामित्वाच्च पक्षिभिरपि परित्यक्तः । स महर्षिभिः । पित्रादिबन्धूनामरक्षकत्वेऽपि आनृशंस्यप्रधाना महर्षयो रक्षिष्यन्तीति गतः । तैरपि प्रकामं दूरदर्शिभिः परित्यक्तः । आनृशंस्यविषयव्यवस्थास्तीति तैस्त्यक्त इत्यर्थः । एतदङ्गीकारे वयमपि संसर्गदोषेण नश्येम । अस्माभिस्त्यागेऽनन्यगतिकत्वाद्राम एनं स्वीकरिष्यतीति तैस्त्यक्तः महर्षिभिः यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसमिति विष्णुद्वेषेण चण्डालत्वात् । चण्डालः पक्षिणां काक इत्युक्तेश्च चण्डालो नास्मद्वाटमागच्छेदिति त्यक्तः । एवं रक्षकान्तरादर्शनान्नष्टगजो घटमप्यन्वेषत इति न्यायेन स्वैरविचरतद्वारान्सर्वान् गृहान् गत इत्याह–त्रींल्लोकान् संपरिक्रम्य परिक्रम्य एतदेव नवकृत्वो गतः । संपरिक्रम्य गृहस्थैरविज्ञाततया कवाटमूलेषु लीनश्चेत्यर्थः । अपि कदाचित् कृपैषामुत्पत्स्यतेति मत्वा पुनः पुनर्गत इत्यर्थः ।

१ ब्राह्मणेति गो. पाठः । २ सृष्ट इति गो. पाठः । ३ लोकेति गो. पाठः । ४ स महर्षिभिरिति गो. पाठः ।

स तं निपतितं भूमौ शरण्यः शरणागतम् । वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३३ ॥
[[1]न शर्म लब्ध्वा लोकेषु तमेव शरणं गतः ।]
परिद्यूनं [2]विवर्णं च पतमानं तमब्रवीत् । मोघमस्त्रं [3]न शक्यं तु ब्राह्मं [4]कर्तुं तदुच्यताम्॥ ३४ ॥
[[5]हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोऽब्रवीत् ।]
ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् । दत्त्वा [6]तु दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः॥ ३५ ॥
स रामाय नमस्कृत्वा राज्ञे दशरथाय च । विसृष्टस्तेन वीरेण प्रतिपेदे स्वमालयम् ॥ ३६ ॥
मत्कृते काकमात्रेऽपि ब्रह्मास्त्रं समुदीरितम् । कस्माद्यो [7]मां हरत्त्वत्तः क्षमसे तं महीपते ॥ ३७ ॥

अस्त्रं निष्कास्य कवाटबन्धनं सर्वैः कृतमित्यर्थः । ततः किं कृतमित्यत्राह—तमेव शरणं गतः । रक्षकत्वेन प्राप्तापेक्षया हिंसकत्वेन स्थितस्य सुखमेव शीतलमित्यवस्थितः अतस्तमेव शरणं गतः । यदि वा रावणः स्वयमित्येवं स्थितो हि रामः तमेव सर्वलोकशरण्यमेव तमेव दोषो यद्यपि न त्यजेयमिति स्थितम् । शरणं गतः निवासं गतः न तूपायतया गतः निवासवृक्षः साधूनामित्युक्तेः ॥ ३३ ॥

३३] ति० टी०—पर्यपालयत् । प्राणरक्षणेनेति शेषः ३३॥

रा० टी०—स इति । शरण्यः शरणहितः स रामः शरणागतम् अत एव भूमौ पतितं वधार्हमपि तं वायसं कृपया पर्यपालयत् सीताङ्गस्पर्शमात्रेण तत्कल्याणप्रकटनमपहाय कोपप्रकटनद्वारा किमर्थं कृतमिति तु न भ्रमितव्यं प्रार्थनयैव परमकल्याणं क्रियत इति स्वाभाविकपरमात्मरीतेः । करुणावानपि व्यक्तं शक्तः स्वाम्यपि देहिनाम् । अप्रार्थितो न गोपायेत् इति तत्प्रार्थनामतिरिति पुराणम् ॥ ३३ ॥

गो० टी०—स तमिति । स रक्षणैकस्वभावः । तं प्रतिकूल्यैकनिरतं भूमौ निपतितं देवजातितया भूमिमस्पृशन्नपि भूमौ पतितं भूमौ दुष्पुत्रं पितरि शिक्षमाणे स यथा मातुः पादयोः पतति तथापतत् । शरण्यः सर्वावस्थास्वपि शरणवरणार्हः शरणागतम् अनन्यगतिकतया स्वमुपागतम् वधार्हमपि रामसिद्धान्तेनापि वधार्हम् काकुत्स्थः कृपया पर्यपालयत्कुलोचितस्वभावेन रक्षितवान् । कृपया अस्मदाशारब्धं कार्यं प्रबलकर्मणा न समाप्यते तथा तेनारब्धमपि कृपया न पूर्यत इति भावः ॥ ३४ ॥

३४] ति० टी०—परिद्यूनं क्षीणशक्तिम् । ब्राह्ममस्त्रं मोघं कर्तुं न शक्यमतस्तदुच्यताम् तत्संहार्यं वस्तु भार्गववदुच्यतामित्यर्थः ॥ ३४ ॥

रा० टी०—परिद्यूनमिति । परिद्यूनं क्षीणसामर्थ्यम् अत एव विवर्णं विकृतवर्णविशिष्टं पतमानं तं वायसं ब्राह्ममस्त्रं मोघं सर्वथा मिथ्या कर्तुं न शक्यं तत्तस्माद्धेतोः उच्यतां तन्मिथ्यात्वाभावोपायः कथ्यतामिति रामोऽब्रवीत् ॥ ३४ ॥

गो० टी०—न शर्मेत्यादि । परिद्यूनं परितप्तम् । तदुच्यतामित्यनन्तरम् हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोऽब्रवीदित्यर्थमनुसंधेयम् ॥ ३५–३७ ॥

३५] ति० टी०—स दक्षिणाक्ष्यस्य संहार्यं भवत्विस्युक्तः परिरक्षितः परिरक्षितवान् । आत्मानमिति शेषः ॥ ३५ ॥

रा० टी०—तत इति । ततोऽनन्तरं तस्य अपराधिनः काकस्य मम दक्षिणमक्षि स शरः अस्त्रं हिनस्तिस्म इति दक्षिणं नेत्रं दत्त्वा अस्त्रायेति शेषः प्राणेभ्यः परिरक्षितः एतेन ममाक्षि गृह्यतामिति तत्प्रार्थना सूचिता ॥ ३५ ॥

३६] ति० टी०—स जयन्तः ॥ ३६ ॥

रा० टी०—स इति । तेन रामेण विसृष्टः त्यक्तः स वायसः रामाय नमस्कृत्वा स्वः स्वर्गे दशरथाय दशरथमनुकूलयितुं नमस्कृत्वा स्वमालयं प्रतिपेदे दशरथाय नमस्कृत्वेत्यनेन पलायनसमये दशरथोपदेशादेव रामशरणमागत इति ध्वनितं तेन तस्मिन्काले आखेटायान्यतमार्थं तस्यापि साकेतात्त्रिलोकीमध्ये आगमनं जातमिति ध्वनितम् तेन शक्रादिभिरयमुपदेशो न कृतइति ध्वनितं तेन दशरथस्य सार्वकालिकयाथार्थ्यज्ञानवत्त्वेन व्यतिरेकालंकारो ध्वनितः तेन शरणागतरक्षकत्वस्य परंपरयास्मिन्नपि सिद्धत्वमिति सूचितं परंपरया रक्षकत्वं त्वस्मिन्मर्यादापालनायेति बोध्यम् ॥ ३६ ॥

गो० टी०—स रामायेति । दशरथाय स्वलोकस्थतया पूर्वमेव मित्रभूताय ॥ ३८ ॥

३७] ति० टी०—एवं हनूमते रामैकसंवेद्यमभिज्ञानमुक्त्वा संदेशान्तरमाह—मत्कृते इति । कस्मात्क्षमसे इत्यवान्तरवाक्यान्ते इत्युक्तवतीति ब्रूहीति वाक्यशेषो द्रष्टव्य इति कतकः । बुद्धिस्थं राममेव सोपालम्भं संबोध्य प्रार्थयते इति तीर्थः । त्वत्तस्त्वत्सकाशाद्यो मा मामहरद्धृतवान् ॥ ३७ ॥

रा० टी०—मदिति । मत्कृते मत्परितोषार्थं काकमात्रे निखिलकाके ब्रह्मास्त्रं ब्रह्मास्त्रनिष्पाद्यत्वं दक्षिणाक्षिहीनत्वमित्यर्थः येन त्वया समुदीरितं प्रापितं स त्वं त्वत्तो यो मां हरत् अहरत् तं कस्मात् क्षमसे ॥ ३७ ॥

गो० टी०—मत्कृत इति । समुदीरितं प्रयुक्तम् । हरत् अहरत् ॥ ३९ ॥

---

१ अर्धमेतदधिकं गो. पाठे । २ विषण्णं च स तमायान्तमिति गो. पाठः । ३ कर्तुमिति गो. पाठः । ४ अस्त्रमिति गो. पाठः इति गो. पाठः । ६ मां हरदिति गो. रा. पाठः ।

स कुरुष्व महोत्साहां कृपां मयि नरर्षभ । त्वया नाथवती नाथ अनाथा इव दृश्यते ॥ ३८ ॥
आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतम् । जानामि त्वां महावीर्यं महोत्साहं महाबलम्॥ ३९ ॥
अपारवारमक्षोभ्यं गाम्भीर्यात्सागरोपमम् । भर्तारं ससमुद्राया धरण्या वासवोपमम् ॥ ४० ॥
एवमस्त्रविदां श्रेष्ठो बलवान्सत्त्ववानपि । किमर्थमस्त्रं रक्षःसु न योजयसि राघव ॥ ४१ ॥
न नागा नापि गन्धर्वा न सुरा न मरुद्गणाः । रामस्य समरे वेगं शक्ताः प्रतिसमीहितुम् ॥ ४२ ॥
तस्य वीर्यवतः कच्चिद्व्यस्ति मयि संभ्रमः । किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान्॥ ४३ ॥
भ्रातुरादेशमादाय लक्ष्मणो वा परंतपः । कस्य हेतोर्न मां वीरः परित्राति महाबलः ॥ ४४ ॥
यदि तौ पुरुषव्याघ्रौ वाष्णेयेन्द्रसमतेजसौ । सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ ४५ ॥
ममैव दुष्कृतं किंचिन्महदस्ति न संशयः । समर्थावपि तौ यन्मां नावेक्षेते परंतपौ ॥ ४६ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् । अथाब्रवीन्महातेजा हनूमान्हरियूथपः ॥ ४७ ॥

३८] ति० टी०–मम महोत्साहरूपां मयि कृपां कुरु । त्वया नाथवत्यपि मल्लक्षणा नार्यनाथेव दृश्यत इत्यर्थः ॥ ३८॥

रा० टी०–स इति । सः सदा मत्परितोषकस्त्वं महोत्साही अत्युत्साहविशिष्टां मयि कृपां कुरुष्व तत्र हेतुः त्वयैव नाथवती अनाथा इव दृश्यते मम तनुरिति शेषः ॥ ३८ ॥

गो० टी०–स इति । सः परदुःखं दृष्ट्वा न सहामहे इत्युक्तवान् । त्वं महोत्साहः एतदनुष्ठानर्यन्तं कुर्वन् मयि अत्यन्तदुःखितायां कृपां परदुःखासहिष्णुत्वं प्रकाशयितमर्हसि । नरोत्तम एवं न करोषिचेत्तव नरोत्तमत्वस्य हानिरेव स्यात् । तस्मादेतद्वचनमनुष्ठानपर्यन्तं कृत्वा मां जीवयित्वा तव नरोत्तमत्वं परिपालयेति भावः । अनाथा इव अनाथेव आर्षो गुणाभावः । आनृशंस्यं परो धर्मः । नावारोपणानन्तरं वेतनाभ्यर्थनवत्संश्लेषदशायां तवात्यन्ताभिमतो धर्मः क इति मया पृष्टे परदुःखं चेत्तदसहिष्णुत्वमेव परमो धर्म इति ममाभिमतं तथैव मत्स्वभाव इति त्वया रहस्योद्वेदनं कृतम । त्वत्त एव न तु दूतमुखेन मया श्रुतः । इदं श्रवणमात्रपर्यवसायि जातं न त्वनुष्ठानपर्यवसायीति रामं पृच्छेति भावः एवं पृच्छन्त्याः सीतायाः प्रत्युत्तरं दिशतो रामस्य च कोऽभिप्राय इति चेदुच्यते । एतस्य संश्लेषस्य विच्छेदो भवति चेत् किं करिष्यामीति कातरतया पृष्टवती । सोऽपि मद्विरहक्लेशेन ताम्यन्तीं त्वां न कदाचिदपि पश्येयमित्युक्तवान् । अयमर्थोऽप्यरण्यकाण्डे अप्यहं जीवितं जह्यामिति श्लोकप्रघट्टिकादौ दर्शितः ॥४०॥४१॥

३९] ति० टी०–आनृशंस्यं दया । न च शक्योऽयमर्थ इति चेत्तत्राह–जानामीति ॥ ३९ ॥

रा० टी०–नन्वत्र तव रक्षणे मम न किंचित्प्रयोजनमित्यतः आह–आनृशंस्यमिति । आनृशंस्यं निर्हेतुककृपापरो धर्मः इति त्वत्त एव मया श्रुतम् एतेन प्रयोजनाभावेऽपि स्वकृपया पालयेति सूचितम । नन्वत्र बलवन्तो राक्षसाः मया कथं निरसनीयाः इत्यत आह–महावीर्यत्वादिविशिष्टम् अपारवारं पारवाररहितं स्वतेजसा सर्वत्र परिपूर्णमित्यर्थः गाम्भीर्याद्धेतोः सागरोपमं ससमुद्रायाः धरण्याः निखिलब्रह्माण्डभूमेः भर्तारम् अत एव वासवः इन्द्र उपमा यस्य तं त्वामहं जानामि अर्धचतुष्टयमेकान्वयि ॥ ३९ ॥ ४० ॥

गो० टी०–जानामीति । अपारपारं दुरधिगमपारम् असीममित्यर्थः दुरधिगमगुणसीमेत्यर्थो वा । पाराः कर्मसमाप्तयो यस्य स तथोक्तः निरवधिकापदान इत्यर्थः॥४२॥४३॥

४०–४१] ति० टी०–अपारवारं मर्यादारहितम् । देशकालादिपरिच्छेदहीनमित्यर्थः । जानामीत्यनुकर्षः ॥ ४० ॥४१॥

रा० टी०–एवमिति । हे राघव रक्षस्सु अस्त्रं किमर्थं न मोचयसि ॥ ४१ ॥

४२] ति० टी०–अथ हनूमन्तं सामान्यतो रामवैभवमाह–न नागा इति । प्रतिसमीहितुम् । प्रतिभटतया स्थित्वा निरोद्धुमित्यर्थः । ' प्रतिसमाधितुम् ' इति पाठान्तरम् । तत्रार्षत्वं शरणम् । उक्त एवार्थः ॥ ४२ ॥

रा० टी०–नेति । नागादयः समरे रामस्य वेगं प्रतिसमीहितुं निरोद्धुं न शक्ताः ॥ ४२ ॥

गो० टी०–न नागा इति । प्रतिसमाधितुं प्रतिबद्धुम॥४४॥

४३–४७] ति० टी०–' मम संभ्रमः ' इति पाठे मम प्राप्तये संभ्रम इत्यर्थः ॥ ४३–४७ ॥

रा० टी०–तस्येति । वीर्यवतः तस्य रामस्य यदि मयि संभ्रमः आदरः तर्हि राक्षसान् क्षयं कुतो न नयति प्रापयति संभ्रमं त्वरमिच्छन्ति भयमुद्वेगमादरम्, इति कोशः ॥ ४३ ॥

रा० टी०–भ्रातुरिति । भ्रातुरादेशमाज्ञामादाय लक्ष्मण एव कस्य हेतोर्न परित्राति ॥ ४४ ॥

रा० टी०–यदीति । पुरुषव्याघ्रौ तौ रामलक्ष्मणौ यदि सुराणामपि दुर्धर्षौ तर्हि मां किमर्थमुपेक्षतः ॥ ४५ ॥

रा० टी०–ममेति । समर्थौ अपि यद्यस्मात् मां नावेक्षेते अतः ममैव किञ्चिद्दुष्कृतमस्ति अत्र संशयो न ॥ ४६ ॥

---

१ महोत्साह इति गो. पाठः । २ त्वनाथेति गो. पाठः । ३ श्रुत इति गो. पाठः । ४ पारमिति गो. पाठः । ५ सत्यवान्बलवानिति गो. पाठः । ६ नासुरा इति गो. पाठः । ७ समाधितुमिति गो. पाठः । ८ मारुतात्मज इति गो. पाठः ।

त्वच्छोकविमुखो रामो देवि सत्येन [1]ते शपे । रामे दुःखाभिपन्ने तु लक्ष्मणः परितप्यते ॥ ४८ ॥
कथंचिद्भवती दृष्टा न कालः परिशोचितुम् । इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि शोभने ॥ ४९ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ । त्वद्दर्शनकृतोत्साहौ [3]लोकान्भस्मीकरिष्यतः ॥ ५० ॥
हत्वा च समरक्रूरं रावणं सहबान्धवम् । राघवस्त्वां विशालाक्षि त्वां पुरीं प्रति नेष्यति ॥ ५१ ॥
ब्रूहि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः । सुग्रीवो वापि तेजस्वी हरयो वा समागताः ॥ ५२ ॥
इत्युक्तवति तस्मिंश्च सीता पुनरथाब्रवीत् । [[5]उवाच शोकसंतप्ता हनुमन्तं प्लवङ्गमम् ।]
कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ॥ ५३ ॥

रा० टी०–वैदेह्या इति । वैदेह्या वचनं श्रुत्वा हनूमान् अब्रवीत् ॥ ४७ ॥

गो० टी०–तस्येति । संभ्रमः भाववृत्तिः ॥ ४६ ॥४६॥

गो० टी०–यदि ताविति । उपेक्षतः उपेक्षेते । यदि तौ संगताविति शेषः ॥ ४७ ॥

गो० टी०–ममैवेति । समर्थौ विरोधिवर्गसमूल्य मद्रक्षणानुगुणशक्तिमन्तौ परन्तपौ इतः पूर्वं प्रतिपक्षनिर्दहनं कुर्वन्तौ एवंभूतावपि तौ मां प्राणपर्यन्तं रक्षणप्रवृत्त्यर्हदशां प्राप्तां मां नावेक्षेते इति यत् न कटाक्षयत इति यत् अस्य निमित्तं तयोर्वा मयि वा किंचिद्भवितुमर्हति । तत्र तद्विषये तादृशनिमित्तप्रसक्तिर्नास्ते सामर्थ्यपरन्तपत्वादिदर्शनात् । परिशेषान्ममैव पापम् अस्य निमित्तं भवितुमर्हति । यद्वा ममैव द्विषतः पापकृत्यमित्युक्तरीत्या अन्यतो नागतमित्यर्थः । किंचित् न हि वयं सर्वज्ञा अस्माभिरज्ञातं किंचिद्भवितुमर्हति । महत्प्रारब्धफलतयाऽनुभवनेना दुष्परिहारम् अस्ति न संशयः कार्ये सति कारणे कैमस्ति संदेहः । यद्वा किंचिदनिर्वचनीयम् महदुष्कृतमस्तीत्यनेन किं त्वामन्यत वैदेह इत्यादिनोक्तो भगवदपचारः । उक्तं हि कीदृशं तु मया पापं पुरा देहान्तरे कृतमिति देहान्तरे बालशरीरे ॥ ४८ ॥

गो०टी०–वैदेह्या इति । साधु यथा तथा भाषितमुक्तम् ४९

४८] ति० टी०–कस्माद्राक्षसक्षयं न करोतीत्यस्योत्तरम्–त्वच्छोकेति । त्वद्वियोगजशोकेन सर्वकार्यविमुख इत्यर्थः ४८

रा० टी०–तद्वचनाकारमाह–त्वदिति । हे देवि हे सत्ये ! सत्यवादिनि रामः त्वच्छोकविमुखस्त्वच्छोकेन रामे दुःखाभिपन्ने सति लक्ष्मणः परितप्यते ते तुभ्यं शपे अत्र विश्वासार्थं शपथं करोमि ॥ ४८ ॥

गो० टी०–त्वच्छोकेति । त्वच्छोकाविमुखः त्वच्छोकेन विमुखः विषयान्तरपराङ्मुखः । प्रत्युत त्वय्येव दत्तचित्त इत्यर्थः ॥ ५० ॥ ५१ ॥

४९–५१] ति० टी०–यतः कथंचिद्भवती दृष्टा, अतः इमं मुहूर्तमारभ्य ते परिदेवितुं कालो न । कुतस्तत्राह—यतो दुःखानामन्तं द्रक्ष्यसि ॥ ४९–५१ ॥

रा० टी०–कथञ्चिदिति । यस्मात् कथञ्चित् भवती दृष्टा मयेति शेषः अतः इमं मुहूर्तम् आरभ्येति शेषः दुःखानामन्तं द्रक्ष्यसि किंच दुःखानामन्तं विध्वंसकमिममागामिनं मुहूर्तं द्रक्ष्यसि अतः परिशोचितुं कालः समयो न ॥ ४९ ॥

रा० टी०–ताविति । तौ रामलक्ष्मणौ लोकान् राक्षसजनान् भस्मीकरिष्यतः ॥ ५० ॥

रा० टी०–हत्वेति । राघवः रावणं हत्वा त्वां स्वां पुरीं प्रति नेष्यति ॥ ५१ ॥

गो० टी०–इममित्यादि । इमं मुहूर्तम् अस्मिन्मुहूर्ते । सप्तम्यर्थे द्वितीया ॥ ५२–५५ ॥

५२–५३] ति० टी०–नियोगसारं ब्रूहीत्याह—ब्रूहीति ॥ ५२ ॥ ५३ ॥

रा० टी०–ब्रूहीति । राघवप्रभृतिः यद्वाच्यः तत् समागताः रामसमीपं प्राप्ताः हरयश्च यद्वाच्याः तच्च त्वं ब्रूहि ॥ ५२ ॥

रा० टी०–इतीति । तस्मिन् हनुमति इति उक्तवति सति सीताऽब्रवीत् अहं पृथक् । तद्वचनाकारमाह–कौशल्येत्यादिभिः । कौशल्या यं सुषुवे तं ममार्थे उद्युक्तामिति शेषः रामं सुखं पृच्छ अभिवादय च ॥ ५३ ॥

गो० टी०–कौसल्येति । मनस्विनी लोकभर्तारं सुषुवे । लोके स्त्रियः इहलोकपरलोकयोः स्वरक्षणार्थं पुत्रान् सुवते नैवं मे श्वश्रूः मनस्विनी विपुलनमस्का सर्वलोकरक्षकः पुत्रो मे भवेदिति व्रतमनुष्ठाय लोकोपकाराय पुत्रं सूतवती । एवंभूतः कौसल्यासंकल्पः कथं मोघः स्यात् अहमत्र लोके न किमन्तर्भूता । तं ममार्थे सुखं पृच्छ । अस्मद्रक्षणं न मया प्रार्थ्यं तच्चिन्ता तस्यैव । अस्मत्त्वरा तु विलम्बासहिष्णुतया । तस्मात्तत्सत्ता चेन्मद्रक्षणस्य न कापि हानिः । अतस्तत्सत्तैवास्माभिराशास्यते । तेन तस्य सुखमस्ति किमिति मया पृष्टमिति वद । एवं च लोकवदस्माभिश्च तस्मात्किंचिदपेक्षितं चेत् लोकैर्यत्कार्यं तत् कार्यं मयापि कार्यमित्याह—शिरसा चाभिवादय । अहं तं शिरसा प्रणतवत्यस्मीति तमभिवादय । प्रणिपातं कुर्वित्यर्थः । कथं नायिका नायकं शिरसा प्रणमेदिति चेत् आचारप्रधानजनककुलनन्दिन्यैवमनुष्ठितमिति कि-

---

१ मे इति गो. पाठः । २ द्रक्ष्यन्तमनिन्दिते इति गो. पाठः । ३ लङ्कामिति गो. पाठः । ४ऽपीति गो. पाठः । ५ सुरसुतोपमेति गो. पाठः । अर्धमेतदधिकं गो. पाठे ।

तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय । स्रजश्च सर्वरत्नानि प्रिया याश्च वराङ्गनाः ॥ ५४ ॥
ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभम् । पितरं मातरं चैव संमान्याभिप्रसाद्य च ॥ ५५ ॥
अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजाः । आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमम्॥ ५६ ॥
अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने । सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः ॥ ५७ ॥
पितृवद्वर्तते रामे मातृवन्मां समाचरत् । ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः॥ ५८ ॥
वृद्धोपसेवी लक्ष्मीवाञ्शक्तो न बहुभाषिता । राजपुत्रप्रियश्रेष्ठः सदृशः श्वशुरस्य मे ॥ ५९ ॥
मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः । नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान्॥ ६० ॥
यं दृष्ट्वा राघवो नैव वृत्तमार्यमनुस्मरत् । स ममार्थाय कुशलं वक्तव्यो वचनान्मम ॥ ६१ ॥
मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः । यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत् ॥ ६२ ॥

मत्र प्रमाणं प्रष्टव्यं प्रणयरोषेणैवमाहेति चेन्न । हृतमद्वचनेन तस्य शान्तत्वात् । ननु ममार्थे मत्कार्यसिद्ध्यर्थं तं प्रणमेत्यर्थः किं न स्यादिति चेत्, ममार्थ इत्यस्योभयत्रान्वयात् । पूर्वमत्र मया पृष्टमिति पृच्छेत्यर्थस्यावश्यकत्वादत्रापि मया प्रणतमिति प्रणमेत्यस्य स्वरसत्वात् । संकुचिता किम् । तं ममार्थे सुखं पृच्छ । मम रक्षणं न प्रार्थनीयम् तस्य मनसितिष्ठत्वेव किंतु त्वया तस्य सुखजननेन भाव्यम् । तस्यावस्थाने अस्मद्रक्षणं भविष्यतीति तदेवाशास्यते । शिरसा चाभिवादय । अग्निसाक्षिकं गृहीतपाणिना च रक्षणं कार्यं तन्न क्रियते । इतरसाधारण्येन वा रक्षणं क्रियताम् । तैर्यत् क्रियते तन्मयाप्यभिवादनं क्रियते इत्यस्मदर्थमभिवादनं कुरु ॥ ५६ ॥

५४-५७]ति०टी०-ममार्थे मत्प्रतिनिधित्वेनेत्यर्थः । लक्ष्मणः पूर्वं मारीचवधाय गते रामे तत्पृष्ठगमनाय सम्यक्कृतपारुष्य इति ज्ञात्वा तस्य विमोचनप्रवृत्त्युपेक्षा मा भूदिति विशिष्य कुशलप्रश्नं ब्रूहीत्याह—स्रजश्चेति । दुर्लभमित्यत्र त्यक्त्वेत्यनुकर्षः ॥ ५४--५७ ॥

रा० टी०-स्रज इति । स्रजः विचित्रमालाः प्रियाः अतिप्रीतिविषयभूताः याः वराङ्गनास्ताश्च विशालायां विस्तीर्णायां पृथिव्याम् अपिशब्देन स्वर्गेऽपि दुर्लभमैश्वर्यं च अनुत्तमं सुखं च त्यक्त्वा पितरं मातरं च संमान्य सत्कृत्य अभिप्रसाद्य च यो राममनुप्रव्रजितः मात्रा प्रस्थापितः येन सुमित्रा सुप्रजा शोभनपुत्रवती काकुत्स्थं भ्रातरं पालयन् सन् आनुकूल्येन योऽनुगच्छति ॥ ५४ ॥ ५७ ॥

गो० टी०-स्रजश्चेति । सन्तीति शेषः । स्रगादयः सन्ति पृथिव्यां दुर्लभमैश्वर्यमप्यस्ति । तथा पितरं मातरं चैव समान्य सुमित्रा येन सुप्रजाः सः राममनुप्रव्राजितः ५७-५८

गो० टी०-आनुकूल्येनेति । आनुकूल्येन भक्त्येत्यर्थः५९

गो० टी०-सिंहस्कन्ध इति । समाचरन् परिचरन् ॥ ६०—६१ ॥

५८] ति० टी०-समाचरत्पर्यचरत् । दुर्वाक्यैरतिपीडां प्रापितो वीरो मां ह्रियमाणां केनचिद्धरिष्यमाणाम् । वर्तमान सामीप्ये लट् । न वेद, यदि वेद मयि तथा प्रलपन्त्यामपि निकट एव तिष्ठेत्, अतो मदुरदृष्टवशान्नावेदीदित्यर्थः ॥ ५८ ॥

रा० टी०-यः मां मातृवत् समाचरन् सन् रामे पितृवद्वर्तते ॥ ५८ ॥

रा० टी०-यः ह्रियमाणां मां तदा हरणकाले न वेद शक्तः समर्थोऽपि यो बहुभाषिता नित्यं न ॥ ५९ ॥

५९] ति० टी०-शक्तः समर्थः न बहुभाषिता मितभाषीत्यर्थः । राजपुत्रस्य रामस्य प्रियेषु श्रेष्ठः अतिप्रिय इत्यर्थः ॥ ५९ ॥

रा० टी०-मे श्वशुरस्य सदृशः यः रामस्य प्रियतरो भ्राता अत एव मत्तः ममापि प्रियः अतिप्रीतिविषयीभूतः ॥ ६० ॥

गो० टी०-वृद्धोपसेवीत्यादि । यस्यां धुरि यस्मिन्कार्यनिर्वाह इत्यर्थः ॥ ६२ ॥ ६३ ॥

६०] ति० टी०-तदेवाह-मत्त इति । मत्तोऽपीत्यर्थः । यस्यां धुरि यत्र कार्ये ॥ ६० ॥

रा० टी०-यस्यां धुरि सेवारूपकार्ये नियुक्तः तां नित्यमुद्वहति यं दृष्ट्वा वृत्तं पितृनिर्याणादि नैव अनुस्मरत् अन्वस्मरत् ॥ ६१ ॥

६१] ति० टी०-वृत्तं प्रमीतम् । पितृवद्रक्षकत्वात्तत्स्मरणाभावः । अनुस्मरदन्वस्मरत् । ममार्थाय मत्प्रयोजनोन्मुखाय । मम वचनाद्वक्तव्यः सीता त्वां कुशलं पृच्छतीति वक्तव्य इत्यर्थः ॥ ६१ ॥

रा० टी०-सलक्ष्मणः ममार्थाय यथा दुःखक्षयकरो भवेत् तथा कुशलं वक्तव्यः । सार्धाष्टकमेकान्वयि ॥ ६२ ॥

गो० टी०-यमिति । आर्यं श्वशुरं दशरथं नानुस्मरेत् । पितृवत्सम्यग्रक्षकत्वादिति भावः ॥ ६४ ॥

६२] ति० टी०-हि निश्चये । यथा दुःखक्षयकरो भवेद्दुःखक्षयहेतुप्रवृत्तिपरो भवेत्तथा वाच्य इत्यर्थः ॥ ६२ ॥

गो० टी०-यथा हीति । रामः यथा दुःखक्षयकरो भवे-

१ आचरन्निति गो. रा. पाठः । २ ममेति गो. पाठः । ३ स्मरेदिति गो. पाठः ।

त्वमस्मिन्कार्यनिर्वाहे[1] प्रमाणं हरियूथप । राघवस्त्वत्समारम्भान्मयि यत्नपरो भवेत् ॥ ६३ ॥
इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः । जीवितं धारयिष्यामि मासं दशरथात्मज[2] ॥ ६४ ॥
ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते । रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ॥
त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ॥ ६५ ॥
ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् । प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ६६ ॥
प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् । अङ्गुल्या योजयामास नह्यस्य प्राभवद्भुजः ॥ ६७ ॥

तथा वक्तव्यमित्यर्थः । कार्यनिर्योगे[1] कार्यसंपादने । प्रमाणं व्यवस्थापकः ॥ ६५ ॥

६३-६४] ति० टी०-किं बहुनास्य कार्यस्य निर्वाहे त्वं प्रमाणम् । यथा कार्यनिर्वाहो भवति तथा कुर्वित्यर्थः । यत एवमतः-राघव इति ॥ ६३ ॥ ६४ ॥

रा० टी०-त्वमिति । हे हरियूथप त्वत्समारम्भात् त्वदुत्साहनात् राघवः मयि यत्नपरो भवेत् अतः अस्मिन् कार्यनिर्वाहे कार्यसाधने त्वमेव प्रमाणम् ॥ ६३ ॥

रा० टी०-इदमिति । हे दशरथात्मज मासम् अवधिभूतमासपर्यन्तं जीवितं धारयिष्यामि मासात् ऊर्ध्वं न जीवेयम् इति सत्येन सत्यं ते अहं ब्रवीमि इदं मम वचः मे नाथं रामं त्वं ब्रूयाः सार्धश्लोक एकान्वयी ॥ ६४ ॥

गो० टी०-राघव इति । त्वत्समारम्भात्त्वदुत्साहात् ६६ ॥

गो० टी०-इदमित्यादि । ऊर्ध्वं मासात् । रावणकृतमासद्वयावधिं न सहिष्य इति भावः । निकृत्या वञ्चनेन । पातालादिव कौशिकम् । अत्रेति करणं द्रष्टव्यम् । इदं च ब्रूया इति पूर्वेणान्वयः । कौशिकः इन्द्रः तत्सम्बन्धिनी श्रीः कौशिकी तामिव । एवं ब्रह्मपुराणे श्रूयते । पुरा वृत्रवधे ब्रह्महत्याभिभूतं निःश्रीकमिन्द्रं भगवान्नारायणो देवैः सह वैष्णवेनाश्वमेधेन निष्कल्मषं कृत्वा त्रैलोक्यराज्येऽभिषिच्य पुरातनीं पौरंदरीं श्रियमुपाहृतवत् । ततोऽशरीरवाक्याद्वाक्षतीर्थवर्तिनीं तामुपश्रुत्य स देवदेवो देवाश्च तत्र जग्मुः । ततस्तान् दृष्ट्वा सा श्रीः पातालं प्रविवेश । तत्र प्रवेष्टुमशक्नुवन्तो देवाः पुनरप्यशरीरं वाक्यं युष्माभिः सर्वलक्षणसंपन्नस्तां प्रतिनेतुमर्हतीत्युपश्रुत्य तमेव पुरुषोत्तमं प्रार्थयामासुः । स तत्र प्रविश्य पातालात्तां समुद्धृत्य तैः सह शक्राय प्रादादिति । महाभारते तु उतथ्यस्य भार्यां यमुनायां स्नान्तीं वरुणो हृत्वा पातालमनयत् । तामुतथ्यो नारदेन याचित्वा तामलब्ध्वा कुपितः पातालह्रदशोषेण तामवापेति श्रूयते । सा कौशिकीति केचित्कथयन्ति ॥ ६७-६९ ॥

६५] ति० टी०-ऊर्ध्वं मासादिति । रावणदत्तावध्यवशिष्टं किंचिदधिकं मासद्वयमपि न सहिष्य इति भावः । तत्समाप्तौ त्वदनागमनेऽनार्योऽनार्यमेवाचरेत्, अतोऽवागेव मरणं ज्याय इति शीघ्रमागमनायैवमुक्तिरिति बोध्यम् । निकृत्या राक्षसीकर्तृकनिग्रहेणोपरुद्धाम् । पातालादिव कौशिकीं पातालमग्नां भुवं भगवानिव त्रातुमर्हसि । गाथ्यायाः सांख्यायनगोत्रत्ववद्भूः कौशिकीति कतकः । कौशिकी देवेन्द्रश्रीः । पुरा किल वृत्रवधाभिभूतस्येन्द्रस्य लक्ष्मीं पातालं प्रविष्टां देवप्रार्थितो नारायण उद्धृत्य पुनरिन्द्राय प्रायच्छदिति पुराणगाथेति तीर्थः ६५ ॥

रा० टी०-रावणेनेति । पापकर्मणा रावणेनोपरुद्धाम् अत एव निकृत्या राक्षसीकृतपीडयोपलक्षितां मां त्रातुमर्हसि तत्र दृष्टान्तः पातालात् उद्धृतां कौशिकीं कौशिकगोत्रपृथ्वीमिव यथा वराहः पृथिवीं ररक्ष तथेत्यर्थः ॥ ६५ ॥

६६] ति० टी०-चूडामणिं शिरोरत्नम् ॥ ६६ ॥

रा० टी०-तत इति । ततोऽनन्तरं वस्त्रगतं दिव्यं चूडामणिं शिरोरत्नं मुक्त्वा उन्मुच्य राघवाय प्रदेय इत्युक्त्वेति शेषः हनुमते ददौ ॥ ६६ ॥

६७] ति० टी०-अङ्गुल्या योजयामास दधार । चूडामण्यधिष्ठानहेमपुष्पस्य केशप्रवेशार्थं यद्रन्ध्रं तत्राङ्गुलिं प्रवेशयामासेत्यर्थः । ननु तदा सूक्ष्मरूपत्वात्तत्र भुजासञ्जनमेवोचितमत आह-नहीति । अस्य भुजः सूक्ष्मोऽपि न प्राभवत् तद्रन्ध्रे न प्राविशदित्यर्थः । निषेधस्य प्रसक्तिमूलकत्वात्प्रसक्तेश्च सूक्ष्मरूप एव संभवात् पूर्वं देव्यै प्रदर्शितं महद्रूपं विहाय सूक्ष्मरूपेणैव स्थित इति गम्यत इति तीर्थः । कतकस्तु-अङ्गुल्या योजयामास । सूक्ष्मवासोवद्धमङ्गुल्यां दृढं बबन्धेत्यर्थः । अस्य बन्धने भुजो न प्राभवत्, व्यक्ततया सर्वानुभवप्रसङ्गाद्रौपनीयत्वाच्च भुजो नोचितोऽभूदित्यर्थ इत्याह ॥ ६७ ॥

रा० टी०-प्रतीति । वीरो हनूमान् मणिरत्नं प्रतिगृह्य अङ्गुल्या योजयामास तद्रतच्छिद्रे अङ्गुलिं प्रवेशयामासेत्यर्थः । ननु हनुमद्रूपस्य सूक्ष्मत्वात् भुजेनैव कृतो न धृतवानित्यत आह अस्य हनुमतो भुजो न प्राभवत् तच्छिद्रप्रवेशार्हो नाभवदित्यर्थः ॥ ६७ ॥

गो० टी०-प्रतिगृह्येति । मणिरत्नं मणिश्रेष्ठम् । अंगुल्या योजयामास । चूडामणेरधिष्ठानस्य पृष्ठे या केशसरणिः तत्राङ्गुलं प्रावेशयदित्यर्थः । एवं तनीयसी किमङ्गुलिरित्यत्राह-न हीति । अस्य हनुमतः भुजः न प्राभवन्न स्थूलोऽभवत् । न तदानीं स महाकायः भुजश्च न स्थूलः तेनाङ्गुलिस्तनीयसीत्यर्थः । एतेन देव्यै प्रदर्शितं महद्रूपं विहाय पुरप्रवेशकालिकं सूक्ष्मरूपमङ्गीकृतवानित्यवगम्यते ॥ ७० ॥

---

१ निर्योगे इति गो. पाठः । २ सत्तमेति गो. पाठः । ३ आत्मजः इति गो. पाठः ।

मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च । सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः॥६८॥
हर्षेण महता युक्तः सीतादर्शनजेन सः । हृदयेन गतो रामं लक्ष्मणं च सलक्षणम् ॥ ६९ ॥
मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् ।
[२]गिरिवरपवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ।

चूडामणिं गृहीत्वा प्रयाणोन्मुखं हनुमन्तं प्रति जानकी स्वकुशलं निवेद्य मन्त्रयनाय रामलक्ष्मणौ प्रोत्साहयेति संदिशति । दुस्तरसागरतरणे राघववीराणां शङ्कमानां सीतां वानरप्रभावं संवर्ण्य कैमुत्येन तेषां तरणं समर्थयन्हनुमान्नो चेत्स्वपृष्ठारोपणेन तांस्तारयामीति प्रतिज्ञाय तां समाश्वासयति ।

मणिं दत्त्वा ततः सीता हनूमन्तमथाब्रवीत् । अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥ १ ॥
मणिं दृष्ट्वा तु रामो वै त्रयाणां संस्मरिष्यति । वीरो जननी मम च राज्ञो दशरथस्य च ॥ २ ॥

६८-६९] ति० टी०-पार्श्वतः स्थितः सीतासमीपे स्थितः ॥ ६८ ॥ ६९ ॥

रा० टी०-मणीति । कपिवरो हनुमान् प्रणतः सन् पार्श्वतः पार्श्वे स्थितः॥ ६८ ॥

रा० टी०-हर्षेणेति । सीतादर्शनजेन हर्षेण युक्तो हनूमान् हृदयेन मनसा रामं गतः प्राप्तः ॥ ६९ ॥

गो० टी०-मणिरत्नमिति । प्रणतः नम्रगात्रः॥७१-७२॥

७०] ति० टी०-महार्हं बहुमूल्यम् । प्रभावात्सामर्थ्यविशेषात् । राक्षसीभिर्यथा न ज्ञायते तथा धृतम् । गिरिवरपवनावधूतमुक्तः पर्वतश्रेष्ठोर्ध्वभागोत्थपवनकम्पितः, पश्चात्तेन कम्पेन मुक्तः, स इव सुखितमनाः । अयमपि पूर्वं सीताया अदर्शनेन दुःखवशात्कम्पितः, ततस्तद्दर्शनेन ततः कम्पान्मुक्तः, अतः सुखितमनाः प्रतिसंक्रमं लङ्कादुर्गप्राकारं प्राप्तुं प्रपेदे । यत्नमारभतेत्यर्थः॥ ७० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०-मणीति । जनकनृपात्मजया धृतं बद्धं प्रभावात् अतिसामर्थ्यात् हेतोर्महार्हमतिपूज्यं मणिवरमुपगृह्य गिरिवरपवनेन शैलश्रेष्ठोर्ध्वभागसंबन्धिवातेन अवधूतः कम्पितः मुक्तः पश्चादवधूतिरहित इव सुखितमनाः महावातस्थानीयसीतादर्शनाभावनिवृत्त्या प्राप्तानन्दो हनुमान् प्रतिसंक्रमं निर्गमं प्रपेदे प्रारभत । मुक्तान्तशब्दः आचारक्विबन्तप्रकृतिकर्तृक्विबन्तो लाक्षणिको वा ॥ ७० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे अष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०-मणिवरमिति । पवनावधूतमुक्तः महावातकम्पितः तेन रहितश्चेत्यर्थः । प्रतिसंक्रमं प्रतिप्रयाणं प्रपेदे प्राप्तुमुद्युक्तः । अस्मिन्सर्गे सार्धत्रिसप्ततिश्लोकाः ॥ ७३ ॥

इतिश्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

१] ति० टी०-रामस्याभिज्ञातम् रामेणाभिज्ञातमित्यर्थः १॥

रा० टी०-प्रस्थानकाले हनुमन्तं प्रति सीतोक्तिमाह-मणिमित्यादिभिः । सीता मणिं दत्त्वा हनुमन्तमब्रवीत् । तदाकारमाह-एतत् मया दत्तमभिज्ञानं चिह्नं रामस्य रामेण तत्त्वतोऽभिज्ञातम् अत एव वीरो रामः मणिं दृष्ट्वा जनन्यादीनां त्रयाणां संस्मरिष्यति एव पाणिग्रहणसमये दशरथसन्निधौ मम जननी मणिं मह्यं ददाविति पौराणिकी कथा सूचिता श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०-मणिमित्यादि । अभिज्ञातं सम्यक्ज्ञातम् ॥१॥

२] ति० टी०-त्रयाणां संस्मरिष्यति । कर्मणि शेषे षष्ठी । त्रीनाह-जनन्या इति । अयं मणिर्विवाहकाले मज्जनन्या हस्तान्मत्पित्रादाय दशरथहस्ते मम शिरोभूषणतया दत्त इति मम जनन्याश्च मत्पितुर्दशरथस्य चेति त्रयाणां स्मारक इति भावः॥२॥

गो० टी०-मणिमित्यादि । त्रयाणामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी । विवाहकाले शिरोमणिदातृत्वात्पित्रोः ग्रहीतृत्वाच्च मम स्मरणमिति भावः । पाणिग्रहणोत्सवे मम श्वशुराभ्यां प्रथमं शिरोभूषणतया एष दत्तः । अतः त्रीनस्मान् युगपत् स्मरिष्यतीत्यर्थ इत्याह कश्चित् । तदनुचितम् । मच्छिरस्तनमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले तथा बद्धमधिकं मूर्ध्नि शोभते । इत्युपरि वक्ष्यमाणत्वाद्विवाहकाले रामजनन्या अनागमनाच्च ॥ २—३ ॥

१ शरीरेण तु विष्टितः इति गो. पाठः । २ गिरिविवेति गो. पाठः ।

स भूयस्त्वं समुत्साहचोदितो हरिसत्तम । अस्मिन्कार्यसमुत्साहे प्रचिन्तय यदुत्तरम् ॥ ३ ॥
त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम । तस्य चिन्तय यो यत्नो दुःखक्षयकरो भवेत् ॥ ४ ॥
हनूमन्यत्नमास्थाय दुःखक्षयकरो भव । स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः ॥ ५ ॥
शिरसाऽऽवन्द्य वैदेहीं गमनायोपचक्रमे । ज्ञात्वा संप्रस्थितं देवी वानरं पवनात्मजम् ॥ ६ ॥
बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् । हनुमन्कुशलं ब्रूयाः सहितौ रामलक्ष्मणौ ॥ ७ ॥
सुग्रीवं च सहामात्यं सर्वान्वृद्धांश्च वानरान् । ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ॥ ८ ॥
यथा च स महाबाहुर्मां तारयति राघवः । अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ९ ॥
जीवन्तीं मां यथा रामः संभावयति कीर्तिमान् । तत्त्वया हनुमन्वाच्यं वाचा धर्ममवाप्नुहि ॥ १० ॥
नित्यमुत्साहयुक्तस्य वाचः श्रुत्वा मयेरिताः । वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ ११ ॥
मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः । पराक्रमे मतिं वीरो विधिवत्संविधास्यति ॥ १२ ॥
सीतायास्त्वद्वचः श्रुत्वा हनूमान्मारुतात्मजः । शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ १३ ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः । यस्ते युधि विजित्यारीञ्शोकं व्यपनयिष्यति ॥ १४ ॥

३] ति० टी०–स त्वमस्मिन्समुत्साहे भूयश्चोदितो भविष्यसि तदत्र कार्यसमुत्साहप्रचोदितः सन्यदुत्तरमुत्तरकर्तव्यं तच्चिन्तय ॥ ३ ॥

रा० टी०–स इति । समुत्साहे मणिदर्शनजनितरामयुद्धोत्साहसमये भूयोऽधिकं त्वं चोदितो रामेण प्रेरितो भविष्यसीति शेषः अत एव अस्मिन् कार्यसमुत्साहे तज्जनितप्रेरणे यत् उत्तरं कर्तव्यं तत् प्रचिन्तय ॥ ३ ॥

४] ति० टी०–मम का चिन्तने शक्तिरिति चेत्तत्राह—त्वमिति । निर्योगो निर्वाहः । यस्तस्य रामस्य यत्नो दुःखक्षयकरो भवेत्तं चिन्तय ॥ ४ ॥

रा० टी०–त्वमिति । अस्मिन् समुपस्थिते कार्यस्य निर्योगे निर्वाहे त्वमेव प्रमाणं त्वदधीनोऽयमित्यर्थः अतः यो यत्नो दुःखक्षयकरो भवेत् तस्य चिन्तय कर्मत्वाविवक्षया षष्ठी ॥४॥

गो० टी०–त्वमिति । कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः । चिन्तयतस्तस्य । तवेति शेषः ॥ ४ ॥

५–८] ति० टी०–यत्नमास्थायेति यत्नं रामप्रवृत्त्यर्थमित्यर्थः ॥ ५–८ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–हनूमन्निति । अर्धं पृथक् स इति । तथेति प्रतिज्ञाय आवन्द्य च मारुतिर्गमनायोपचक्रमे । अर्धद्वयमेकान्वयि ॥ ५ ॥

रा० टी०–ज्ञात्वेति । वानरं प्रस्थितं ज्ञात्वा मैथिली अब्रवीत् ॥ ६ ॥

रा० टी०–तदाकारमाह–हनूमन्नित्यादिभिः । रामादीन् कुशलं ब्रूयाः । सार्धश्लोकः संमिलितान्वयी ॥ ७ ॥ ८ ॥

गो० टी०–स तथेति । आवन्द्येति पदच्छेदः ॥ ५ ॥ ६ ॥

गो० टी०–कुशलमिति । ब्रूया इति । धर्मसंहितं धर्मसहितम् । धर्मपुरस्सरम् कुशलं ब्रूया इत्यर्थः ॥ ७ ॥ ८ ॥

९] ति० टी०–अम्बूनि संरुध्यन्ते यस्मिन्नित्यम्बुसंरोधः समुद्रः । दुःखरूपात्समुद्रादित्यर्थः । यथा तारयति तथा समाधातुं यत्नं कर्तुम् ॥ ९ ॥

रा० टी०–यथेति । राघवः दुःखाम्बुसंरोधात् दुःखसागरात् यथा मां तारयति तथा समाधातुमर्हसि ॥ ९ ॥

गो० टी०–यथेति । दुःखाम्बुसंरोधात् । अम्बूनि संरुध्यन्ते अनेनेत्यम्बुसंरोधः जलधिः । समाधातुं राममनुकूलयितुम् ॥ ९ ॥

१०–११] ति० टी०–वाचा वाकृतसाहाय्येन ॥१०॥११॥

रा० टी०–जीवन्तीमिति । रामः जीवन्तीं मां यथा संभावयति तत् तथा वाच्यः वाचा उक्त्यापि धर्मं सेवकरीतिमवाप्नुहि ॥ १० ॥

रा० टी०–नित्यमिति । मयेरिताः वाचः श्रुत्वा मदवाप्तये नित्यमुत्साहयुक्तस्य दाशरथेः पौरुषं वर्धिष्यते प्रादुर्भविष्यति ॥ ११ ॥

गो० टी०–जीवन्तीमिति । जीवन्तीं संभावयति जीवन्तीं करोतीत्यर्थः । तत्तथा अव्ययमेतत् । वचनस्य प्रयोजनमाह—वाचेति । वाचायमं वाचिकधर्मम् ॥ १० ॥

गो० टी०–तमेव धर्ममुपपादयति द्वाभ्यां—नित्यमित्यादि ॥ ११–१५ ॥

१२–१४] ति० टी०–उक्तमेवादराय पुनराह—मत्संदेशयुता इति ॥ १२–१४ ॥

रा० टी०–मदिति । राघवः मत्संदेशयुता वाचः त्वत्तः श्रुत्वैव पराक्रमे मतिं विधिवत्संविधास्यति ॥ १२ ॥

रा० टी०–सीताया इति । हनूमान् शिरसि अञ्जलिमाधाय उत्तरमब्रवीत् ॥ १३ ॥

रा० टी०–तदाकारमाह–क्षिप्रमित्यादिभिः । यः शोकं व्यपनयिष्यति व्यपनेष्यति स काकुत्स्थः क्षिप्रमेष्यति ॥ १४ ॥

१ समुत्साहे इति गो. पाठः । २ समारम्भे इति गो. पाठः । ३ सदुत्तरमिति रा. पाठः । ४ एतदर्धद्वयं व्यत्यस्तं गो. पाठे । ५ चिन्तयत इति गो. पाठः । ६ मारुतात्मजमिति गो. पाठः । ७ तथेति गो. पाठः । ८ युक्ताश्चेति गो. पाठः । ९ वचनमिति गो. पाठः ।

नहि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा । यस्तस्य वेमतो बाणान्स्थातुमुत्सहतेऽग्रतः ॥ १५ ॥
अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् । स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः ॥ १६ ॥
स हि सागरपर्यन्तां महीं साधितुमर्हति । त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा सम्यक्सत्यं सुभाषितम् । जानकी बहु मेने तं वचनं चेदमब्रवीत् ॥ १८ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः । भर्तृस्नेहान्वितं वाक्यं सौहार्दादनुमानयत् ॥ १९ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम । कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ २० ॥
मम चैवाल्पभाग्यायाः सांनिध्यात्तव वानर । अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २१ ॥
ततो हि हरिशार्दूल पुनरागमनाय तु । प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ २२ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् । दुःखादुःखपरामृष्टां दीपयन्निव वानर ॥ २३ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः । सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वरः ॥ २४ ॥
कथं नु खलु दुष्पारं तरिष्यति महोदधिम् । तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ २५ ॥

१५] ति० टी०-वमतः । बाणान्विसृजत इत्यर्थः ॥ १५ ॥

रा० टी०-नहीति । बाणान् वमतः त्यजतः तस्य रामस्य अग्रतः यः स्थातुमुत्सहते तं मर्त्यादिषु न पश्यामि ॥ १५ ॥

१६] ति० टी०-पर्जन्य इन्द्रः ॥ १६ ॥

रा० टी०-अर्केति । तव हेतोः अर्कादिकमपि रणे सोढुं विशेषतः सर्वेभ्योऽधिकः स रामः शक्तः ॥ १६ ॥

गो० टी०-अप्यर्कमिति । पर्जन्यम् इन्द्रम् । पर्जन्यौ रसदब्देन्द्रावित्यमरः ॥ १६ ॥

१७-१८] ति० टी०-महीं साधितुमर्हति । जेतुमुद्युङ्क्ते इत्यर्थः । किमर्थं तत्राह—त्वन्निमित्त इति । त्वत्प्राप्तिप्रयोजन इत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०-स इति । स रामः महीं सकलभूमिं साधितुं नियोजयितुमर्हति अतः त्वन्निमित्तः रामस्य जयः भवितैवेति शेषः ॥ १७ ॥

रा० टी०-तस्येति । तस्य सम्यक् सुभाषितं वचनं श्रुत्वा तद्वचनं जानकी सत्यं मेने भर्तृस्नेहान्वितं प्रस्थितं हनुमन्तं सौहार्दात् पुनः पुनर्वीक्षमाणा सती बहु अनुमानयत् अन्वमन्यत अतिसत्कृतिमकरोदित्यर्थः, इदं वाक्यमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०-स हीति । त्वन्निमित्त इति । जयः भविष्यतीति शेषः ॥ १७ ॥

गो० टी०-तस्येति । सम्यक्सोपपत्तिकम् । सत्यं परमार्थम् । सुभाषितं श्रुतिमधुरम् ॥ १८ ॥

१९-२०] ति० टी०-भर्तृस्नेहान्वितं रामस्नेहान्वितम् । वाक्यं हनुमद्वाक्यं सौहार्दादामप्रेम्णानुमानयदपूजयत् ॥ १९ ॥ २० ॥

रा० टी०-तद्वचनाकारमाह-यदीति । हे वीर यदि मन्यसे निश्चिनोषि तर्हि संवृते आच्छादिते कस्मिंश्चित् देशे एकाहं वस श्वः परदिने विश्रान्तः सन् गमिष्यसि गन्तासि ॥ २० ॥

गो० टी०-वचनं चेदमब्रवीदित्युक्तं विवृणोति-ततस्तमिति । भर्तृस्नेहान्वितम् आत्मनि यो भर्तुः स्नेहस्तेनान्वितम् । स्वविषयभर्तृस्नेहप्रकाशकमिति यावत् । अनुमानयदन्वमानयत् । वक्ष्यमाणोक्तिरूपं संमानवचनमब्रवीदित्यर्थः १९-२२

२१] ति० टी०-मोक्षणं भवेत् । अत्र स्थित्वा श्वो गमने इति शेषः ॥ २१ ॥

रा० टी०-निवासे प्रयोजनान्तरमाह-ममेति । तव सांनिध्याद्धेतोः मुहूर्तं शोकस्य मोक्षणं विध्वंसो भवेत् ॥ २१ ॥

२२] ति० टी०-ततो हीति । ततोऽपीत्यर्थः । एकाहवासोत्तरं गमनेऽपि पुनरागमनाय तु संदेह एव, तत्संदेहे सति मम प्राणानामपि संदेह एव ॥ २२ ॥

रा० टी०- तत इति । ततोऽनन्तरमपि यदि पुनरागमनाय संशयः तर्हि मम प्राणानामपि संदेहो न स्यात् स्यादेवेत्यर्थः ॥ २२ ॥

२३] ति० टी०-तदाह—तवेति । तथा च मज्जीवनमसंभावितमेव पुनरनागमने इति भावः । दुःखादुःखपरामृष्टामतिदुःखप्राप्ताम् । दीपने कर्ता शोकः ॥ २३ ॥

रा० टी०-कञ्चित्कालं स्थितावपि दुःखनिवृत्तिर्न भविष्यतीति बोधयन्ती आह-तवेति । तवादर्शनजः दर्शनविध्वंसजनितः शोकः दुःखादुःखपरामृष्टाम् अतिदुःखितामित्यर्थः, मां दीपयन् दहन्निव परितापयेत् ॥ २३ ॥

गो० टी०-तवेति । दुःखादुःखपरामृष्टां पूर्वदुःखादधिकेन दुःखेन स्पृष्टाम् । दीपयन्निव वर्धयन्निवेत्यर्थः ॥ २३ ॥

२४-२५] ति० टी०-अयं संदेहो ममाग्रतः पुरस्तादिव तिष्ठति । कोऽयं तत्राह-त्वत्सहायेष्विति । साक्षात्साधकस्य तव सहायभूतेषु मिलितेषु हर्यृक्षेषु हरीश्वरः सुग्रीवः कथमुदधिं तरिष्यति सैन्यानि कथं तरिष्यन्ति तौ वा कथं तरिष्यत इत्यर्थः ॥ २४ ॥ २५ ॥

१ क्षिपत इति गो. पाठः । २ शासितुमीहते इति गो. पाठः । ३ऽथेति गो. पाठः । ४ गते इति गो. पाठः । ५ शार्दूले इति गो. पाठः । ६ हरीश्वरेति गो. पाठः ।

त्रयाणामेव भूतानां सागरस्येह लङ्घने । शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ २६ ॥
तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे । किं पश्यसे समाधानं त्वं हि कार्यविदां वरः ॥ २७ ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने । पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः ॥ २८ ॥
बलैः समग्रैर्युधि मां रावणं जित्य संयुगे । विजयी स्वपुरं यायात्तत्तस्य सदृशं भवेत् ॥ २९ ॥
बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः । मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ ३० ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः । भवेदाहवशूरस्य तथा त्वमुपपादय ॥ ३१ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् । निशम्य हनुमाञ्शेषं वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः । सुग्रीवः सत्यसंपन्नस्तवार्थे कृतनिश्चयः ॥ ३३ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः । क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥ ३४ ॥
तस्य विक्रमसंपन्नाः सत्त्ववन्तो महाबलाः । मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ ३५ ॥

रा० टी०–अयमिति । त्वत्सहायेषु हर्यृक्षेषु समहान् हरीश्वरः सुग्रीवः हर्यृक्षसैन्यानि तौ रामलक्ष्मणौ च कथं तरिष्यन्ति अयं संदेहः ममाग्रतः तिष्ठति । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–अयमिति । अयं वक्ष्यमाणः तिष्ठतीव । मूर्तिभूत इत्यर्थः ॥ २४–२६ ॥

२६] ति० टी०–एवंसंदेहे बीजमाह–त्रयाणामेवेति ॥ २६

रा० टी०–संशये हेतुमाह–त्रयाणामिति । इह अस्मिन् लोके भूतानां वैनतेयादीनां त्रयाणामेव सागरस्य लङ्घने शक्तिः स्यात् ॥ २६ ॥

२७] ति० टी०–किं समाधानं पश्यसि कं कार्यसिद्ध्युपायं पश्यसि ॥ २७ ॥

रा० टी०–तदिति । तदुक्तहेतोः दुरतिक्रमे कार्यनिर्योगे कार्यसाधके अस्मिन् सागरतरणसंशये किं समाधानं पश्यसे २७

गो० टी०–तदस्मिन्निति । समाधानं परिहारम् ॥ २७ ॥

२८] ति० टी०–ननु किं तैरागतैरहमेव पर्याप्तोऽस्य कार्यस्येत्यत्राह–काममिति । त्वया कार्यसाधने तव यशस्यो यशस्करः फलोदयो जयरूपफलप्राप्तिर्भवति, न तु रामस्येत्यर्थः २८

रा० टी०–स्वनिश्चयमाह–काममिति । अस्य कार्यस्य साधने एकस्त्वमेव पर्याप्तः अतः यशस्यः यशस्करः फलोदयः विजयप्राप्तिः ते तवैव त्वदायत्तेत्यर्थः ॥ २८ ॥

गो० टी०–अहमेव साधयिष्यामीत्याशङ्क्याह—काममिति । हे परवीरघ्न त्वम् अस्य कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपस्य परिसाधने कामं पर्याप्तः शक्तः । एवं चेत्फलोदयः शक्तिसमृद्धिः ते यशस्यः तव यशस्करः । न तु ममेति भावः ॥ २८ ॥

२९] ति० टी०–किं तर्ह्युचितं तत्राह–बलैरिति । समग्रैर्बलैः सहागत्य रावणं संयुगे जित्वा विजयी सन्मां गृहीत्वा यायात्तत्तस्य रामस्य सदृशं भवेत् ॥ २९ ॥

रा० टी०–बलैरिति । बलैरुपलक्षितः रामः संयुगे संग्रामे रावणं जित्य जित्वा विजयी सन् स्वपुरं यायात् मया सह गच्छेत् तत्कर्म तस्य रामस्य सदृशं भवेत् ॥ २९ ॥

गो० टी०–तर्हि तव किं यशस्यमित्याकाङ्क्षायामाह–बलैरिति । जित्य जित्वा । मां गृहीत्वेति शेषः । यायात् रामइति च शेषः ॥ २९ ॥

३०] ति० टी०–आदरात्पुनराह–बलैस्त्विति ॥ ३० ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–बलैरिति । काकुत्स्थो रामः लङ्कां बलैः सैन्यैः संकुलां कृत्वा यदि मां नयेत् तर्हि तत्तस्य सदृशं भवेत् ॥ ३० ॥

गो० टी०–एतत्र केवलं मम रामस्यापीत्याह–शरैरिति ३०

३१] ति० टी०–विक्रान्तं पराक्रमः ॥ ३१ ॥

रा० टी०–तदिति । तदुक्तहेतोः आहवशूरस्य तस्य रामस्य अनुरूपं योग्यं विक्रान्तं विक्रमः यथा भवेत् तथा त्वमुपपादय ॥ ३१ ॥

गो० टी०–तदिति । तस्य अनुरूपं विक्रान्तं यथा भवेत्तथा उपपादय कुरु ॥ ३१ ॥

३२] ति० टी०–तदुक्तं सीतावाक्यम् । प्रश्रयः स्नेहः । शेषं शिष्टं प्रकृतोत्तरं वाक्यमब्रवीत् ॥ ३२ ॥

रा० टी०–तदिति । अर्थोपहितं अर्थसाधकं प्रश्रितं सस्नेहं हेतुसंहितं हेतुभिर्ग्रथितं शेषमवशिष्टं वाक्यं सीतावचनं निशम्य श्रुत्वा उत्तरं वाक्यमब्रवीत् ॥ ३२ ॥

गो० टी०–तदर्थोपहितमिति । अर्थोपहितम् अर्थयुक्तम् सहितम् परस्परसंगतम् हेतुसंहितं युक्तियुक्तम् शेषं पूर्वमनुक्तम् उत्तरं वाक्यमब्रवीत् ॥ ३२–३४ ॥

३३–३४] ति० टी०–तदेव वाक्यमाह–देवीति ॥ ३३ ॥ ३४

रा० टी०–तदाकारमाह–देवीति । हे देवि तवार्थे कृतनिश्चयः वानरसहस्राणां कोटीभिरभिसंवृतः सुग्रीवः क्षिप्रमेष्यति । श्लोकद्वयमेकान्वयि ॥ ३३ ॥ ३४ ॥

३५] ति० टी०–कथमेष्यतीत्यत आह—तस्य विक्रमेति । मनःसंकल्पवदतिदूरपतनशीलाः ॥ ३५ ॥

१ अस्येति गो. पाठः । २ तु मे स्याद्यशस्करमिति गो. पाठः । ३ शरैरिति गो. पाठः । ४ सहितमिति गो. पाठः ।

येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः । न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ ३६ ॥
असकृत्तैर्महोत्साहैः ससागरधराधरा । प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ ३७ ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः । मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसंनिधौ ॥ ३८ ॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः । नहि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ ३९ ॥
तदलं परितापेन देवि शोको व्यपैतु ते । एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥ ४० ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ । त्वत्सकाशं महासङ्घौ नृसिंहावागमिष्यतः ॥ ४१ ॥
तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ । आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ ४२ ॥
सगणं रावणं हत्वा राघवो रघुनन्दनः । त्वामादाय वरारोहे स्वपुरीं प्रति यास्यति ॥ ४३ ॥
तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी । नचिराद्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥ ४४ ॥
निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे । त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ४५ ॥
क्षिप्रं त्वं देवि शोकस्य पारं द्रक्ष्यसि मैथिलि । रावणं चैव रामेण द्रक्ष्यसे निहतं बलात् ॥ ४६ ॥
एवमाश्वास्य वैदेहीं हनूमान्मारुतात्मजः । गमनाय मतिं कृत्वा वैदेहीं पुनरब्रवीत् ॥ ४७ ॥
तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् । लक्ष्मणं च धनुष्पाणिं लङ्काद्वारमुपागतम् ॥ ४८ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् । वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ॥ ४९ ॥

रा० टी०—सागरतरणशङ्कां निवारयन्नाह—तस्येति । मनःसंकल्पवत् संपातो द्रुतगमनं येषां ते हरयः तस्य सुग्रीवस्य निदेशे स्थिताः सन्तीति शेषः एतेन वानरतरणविषये शङ्का न कार्येति ध्वनितम् ॥ ३५ ॥

गो० टी०—तस्येति । मनःसंकल्पसंपाताः मनोव्यापारतुल्यगमनाः । न सज्जते न विलम्बते ॥ ३५-३७ ॥

३६] ति० टी०—तदेव स्पष्टमाह—येषामिति । न सज्जते न प्रतिबद्धा भवति ॥ ३६ ॥

३७] ति० टी०—सागरैर्धराधरैश्च सहिता ॥ ३७ ॥

रा० टी०—तेषां पराक्रमं स्फुटयन्नाह—येषामिति । येषामुपर्यादिषु गतिर्न सज्जते ये च महत्सु कर्मसु न सीदन्ति तैर्वायुमार्गानुसारिभिः सागरधराधरसहिता भूमिः प्रदक्षिणीकृता । श्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

३८] ति० टी०—प्रत्यवरो हीनबलपराक्रमः ॥ ३८ ॥

रा० टी०—मदिति । मद्विशिष्टा मत्तोऽधिकाः तुल्याश्च वनौकसः सुग्रीवसन्निधौ सन्ति मत्तः प्रत्यवरः हीनस्तत्र कश्चिन्नास्ति ॥ ३८ ॥

गो० टी०—मद्विशिष्टाश्चेति । प्रत्यवरः हीनः । पूर्वं चतुर्णामेवात्र गतिरिति विचारप्रकारमात्रमुक्तम् अत्र तु परमार्थः । यद्यपि बले हनुमानधिकः तथापि वेगे सुग्रीवसन्निहिता नीलादयः सर्वे तुल्या एवेति नानृतोक्तिः ॥३८-३९॥

३९] ति० टी०—एकोत्पातेनैकोत्प्लवनेन ॥ ४० ॥

रा० टी०—तेषामधिकत्वोक्तौ प्रयोजनमाह—अहमिति । तावत् यदि अहमिह प्राप्तः तर्हि महाबलाः प्राप्स्यन्तीति किं वक्तव्यम् । ननु तेषां बलवत्त्वे किं गमकमित्यत आह—हि यतः प्रकृष्टा नैव प्रेष्यन्ते इतरे नीचा एव प्रेष्यन्ते प्रेषणाभावस्तेषां बलवत्त्वे गमकमिति तात्पर्यम् ॥ ३९ ॥

४०-४२] ति० टी०—ननु भवत्त्वेवं हरीणामागमनम्, राघवयोः कथं तत्राह—ममेति । महासङ्घौ महासमुदाययुक्तौ ॥ ४१ ॥ ४२ ॥

रा० टी०—तदिति । एकोत्पातेन एकयोत्प्लुत्या ते वानरा लङ्कामेष्यन्ति अतः ते परितापेनालं न कर्तव्य इत्यर्थः शोको व्यपैतु अपगच्छतु ॥ ४० ॥

रा० टी०—रामलक्ष्मणोत्प्लवनशङ्कां निवारयन्नाह—ममेति । महासङ्घौ अतिसमूहविशिष्टौ नृसिंहौ रामलक्ष्मणौ मत्पृष्ठगतौ स्थितौ सन्तौ त्वत्सकाशमागमिष्यतः ॥ ४१ ॥

रा० टी०—ताविति । सायकैः शरैर्विधमिष्यतः विनाशयिष्यतः ॥ ४२ ॥

गो० टी०—तदलमिति । एकोत्पातेन एकयत्नेन ॥४०-४१

गो० टी०—तौ हीति । विधमिष्यतः दहिष्यतः ॥४२-४३

४३] ति० टी०—रघूणामानन्दजनकमपत्यम् ॥ ४३ ॥

रा० टी०—सेति । पुरीमयोध्याम् ॥ ४३ ॥

४४-४९] ति० टी०—कालकांक्षिणी दिवसगणनतत्परा ॥ ४४-४९ ॥

रा० टी०—तदिति । नचिरात् शीघ्रं रामं द्रक्ष्यसे तत् तस्मात् काङ्क्षिणी भव समाश्वसिहि च ॥ ४४ ॥

रा० टी०—निहत इति । त्वं रामेण समेष्यसि संगमं प्राप्स्यसि ॥ ४५ ॥

१ सत्त्वानिति गो. पाठः । २ पुरमिति गो. स्वामिति रा.पाठः । ३ ऽस्मिन्निति गो. पाठः । ४ यास्यसीति गो.पाठः। ५ उपस्थितमिति गो. पाठः।

शैलाम्बुदनिकाशानां लङ्कामलयसानुषु । नर्दतां कपिमुख्यानामार्ये यूथान्यनेकशः ॥ ५० ॥
स तु मर्मणि घोरेण ताडितो मन्मथेषुणा । न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५१ ॥
रुद मा देवि शोकेन मा भूत्ते मनसो भयम् । शचीव भर्त्रा शक्रेण सङ्गमेष्यसि शोभने ॥ ५२ ॥
रामाद्विशिष्टः कोऽन्योऽस्ति कश्चित्सौमित्रिणा समः।अग्निमारुतकल्पौ तौ भ्रातरौ तव संश्रयौ ॥ ५३ ॥
नास्मिंश्चिरं वत्स्यसि देवि देशे रक्षोगणैरध्युषितेऽतिरौद्रे ।
न ते चिरादागमनं प्रियस्य क्षमस्व मत्संगमकालमात्रम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।

जानकी मनःशिलया तिलकरचनं काकायेषिकामोचनं च प्रत्यभिज्ञानत्वेन हनुमते संदिश्याभिवाद्य प्रयाणोन्मुखं तं स्वीयदुरवस्थानिवेदनचोदनपूर्वकमाशिषा संयोज्य गन्तुमनुमनुते ।

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः । उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ १ ॥
त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर । अर्धसंजातसस्येव वृष्टिं प्राप्य वसुंधरा ॥ २ ॥

रा० टी०-क्षिप्रमिति ॥ ४६ ॥

रा० टी०-एवमिति । हनुमान् पुनरब्रवीत् ॥ ४७ ॥

रा० टी०-तद्वचनाकारमाह-तमित्यादिभिः । लङ्काद्वारमुपागतं प्राप्तम् ॥ ४८ ॥

रा० टी०-नक्षेति । तान् वानरान् क्षिप्रं द्रक्ष्यसि ॥४९॥

गो० टी०-तदिति । कालकांक्षणा भव दिवसगणनाया तत्परा भवेत्यर्थः । नचिरात् अचिरात् ॥ ४४-४६ ॥

गो० टी०-एवमिति । पुनरब्रवीदिति । दार्ढ्याय पुनरुक्तिः ॥ ४७—४९ ॥

५०] ति० टी०-यूथान्यनेकशः द्रक्ष्यसीति शेषः ॥५०॥

रा० टी०-शैलेति । शैलाम्बुदनिकाशानां शैलाम्बुदसदृशानां यूथानि द्रक्ष्यसीत्यनुकृष्यते ॥ ५० ॥

गो० टी०-शैलाम्बुदेति । द्रक्ष्यसीति शेषः ॥ ५०-५१ ॥

५१-५२] ति० टी०-रामस्य सर्वथा त्वत्प्राप्तिचिन्तैवास्ते इत्याह—स इति ॥ ५१ ॥ ५२ ॥

रा० टी०-स इति । मन्मथेषुणा मदनिवर्तकबाणसदृशेन शोकेनेत्यर्थः, ताडितो रामः सिंहार्दितो द्विपो हस्तीव शर्म न लभते ॥ ५१ ॥

रा० टी०-रुदेति । शक्रेण शचीव भर्त्रा सह सङ्गमेष्यसि अतो मा रुद रुदिहि ॥ ५२ ॥

गो० टी०-मा रुद इति । मा रुदः रोदनं मा कुरु ॥५२-५३

५३] ति० टी०-सौमित्रिणा समः कश्चित् । कोऽपि नास्तीति शेषः ॥ ५३ ॥

रा० टी०-नन्विहातिबलवन्तो राक्षसा इति कथं सङ्गम इत्यत आह-रामादिति । रामाद्विशिष्टः समश्च सौमित्रिणा समो विशिष्टश्च कोऽन्योस्ति न कोऽपीत्यर्थः, तौ भ्रातरौ तव संश्रयौ स्त इति शेषः प्रत्यासत्त्या तयोरेव तृतीयान्तत्वेन पञ्चम्यन्तत्वेन चान्वयः ॥ ५३ ॥

५४] ति० टी०-मत्संगमकालमात्रं मया रामस्य यः संगमस्तत्कालमात्रं क्षमस्व प्रतीक्षस्वेत्यर्थः ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनचत्वारिंशः सर्गः ॥३९॥

रा० टी०-नेति । ते प्रियस्य चिरादागमनं न शीघ्रमेवागमनमित्यर्थः, अतः अस्मिन्देशे चिरं न वत्स्यसि अतः मत्संगमकालमात्रं क्षमस्व ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

गो० टी०-नास्मिन्निति । मत्संगमकालमात्रं मम रामेण संगमकालमात्रम् ॥ ५४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥३९॥

१] ति० टी०-आत्महितमात्मदुःखोद्धारप्रयोजनम् ॥ १ ॥

रा० टी०-हनुमद्वचनश्रवणानन्तरं हनुमन्तं प्रति सीतोक्तिमाह-श्रुत्वेति । सीता वाक्यमुवाच ॥ १ ॥

गो० टी०-श्रुत्वेत्यादि ॥ १ ॥

२] ति० टी०-अर्धसंजातान्यर्धं वयःप्राप्तानि, ततः परं जलाभावादासन्नशोषाणि सस्यानि यस्याः सा यथा दैवात्संपन्नवृष्ट्या संपन्नसस्या भवति तथाहमपि प्राप्तजीवितनाशामृतोपमात्त्वदर्शनाद्धृतजीविते[1]ति भावः ॥ २ ॥

१ ऽप्रियमिति गो. पाठः ।

यथा तं पुरुषव्याघ्रं गात्रैः शोकाभिकर्शितैः । संस्पृशेयं सकामाहं तथा कुरु दयां मयि ॥ ३ ॥
अभिज्ञानं च रामस्य दद्या हरिगुणोत्तम । क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम्॥ ४ ॥
मनःशिलायास्तिलको गण्डपार्श्वे निवेशितः । त्वया प्रणष्टे तिलके तं किल स्मर्तुमर्हसि ॥ ५ ॥
स वीर्यवान्कथं सीतां हृतां समनुमन्यसे । वसन्तीं रक्षसां मध्ये महेन्द्रवरुणोपम ॥ ६ ॥
एष चूडामणिर्दिव्यो मया सुपरिरक्षितः एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७ ॥
एष निर्यातितः श्रीमान्मया ते वारिसंभवः अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ ८ ॥
असह्यानि च दुःखानि वाचश्च हृदयच्छिदः राक्षसैः सह संवासे त्वत्कृते मर्षयाम्यहम् ॥ ९ ॥
धारयिष्यामि मासं तु जीवितं शत्रुसूदन मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १० ॥
घोरो राक्षसराजोऽयं दृष्टिश्च न सुखा मयि त्वां च श्रुत्वा विषज्जन्तं न जीवेयमपि क्षणम् ॥ ११ ॥

रा० टी०–तदाकारमाह–त्वामित्यादिभिः । दृष्टिं वर्षणं प्राप्य अर्घसंजातसस्या वसुन्धरेव त्वां दृष्ट्वा प्रहृष्यामि ॥ २ ॥

गो० टी०–त्वामिति । अर्घसंजातसस्या अर्घोत्पन्नसस्या ॥ २–३ ॥

३] ति० टी०–सकामा तत्स्पर्शेच्छावती ॥ ३ ॥

रा० टी०–यथेति । सकामा उत्कटेच्छावती अहं यथा संस्पृशेयं तथा मयि दयां कुरु ॥ ३ ॥

४] ति० टी०–अभिज्ञानं चूडामण्यात्मकं दद्या देहि । तथा कोपात्काकस्यैकाक्षिशातनीमिषीकां क्षिप्त्वा काको रक्षित इत्यपरमभिज्ञानं दद्याः । श्रावयेत्यर्थः ॥ ४ ॥

रा० टी०–अभिज्ञानमिति । अभिज्ञानं चूडामणिं रामस्य रामाय दद्याः अभिज्ञानान्तरमाह–काकस्य एकाक्षिनाशिनीमिषीकां चाभिज्ञानं दद्या कथयेरित्यर्थः ॥ ४ ॥

गो० टी०–अभिज्ञानं चेति । काकस्यैकाक्षिशातनीं क्षिप्ताम् इषीकाम् इषीकतृणरूपमभिज्ञानं पूर्वोक्तं दद्याः । अन्यच्च वक्ष्यामीति भावः । तदेवाह–मन इति । तिलके पूर्वतिलके प्रणष्टे सति । गण्डपार्श्वे गण्डस्थले गण्डशैलपार्श्वे वा । मनःशिलायास्तिलकः मनःशिलाकृततिलकः । तत् मनःशिलातिलकनिर्माणं स्मर्तुमर्हसि । इदमप्यभिज्ञानं दद्या इति योजना ॥ ४–६ ॥

५] ति० टी०–अथाभिज्ञानान्तरमाह संदेशरूपेण—मनःशिलाया इति । पूर्वतने तिलके नष्टे सति त्वया रामेण मम गण्डपार्श्वे मनःशिलातिलको निवेशितः, तं किल । स्वकृततिलकमित्यर्थः । स्मर्तुमर्हसि । इति मयोक्तमिति ब्रूहीति शेषः ॥ ५ ॥

रा० टी०–मनः शिलाया इति । मम तिलके प्रनष्टे सति मनश्शिलायास्तिलकः गण्डपार्श्वे गण्डैकदेशे निवेशितः तं तिलकं स्मर्तुमर्हसि इदमप्यभिज्ञानं दद्या इति शेषः ॥ ५ ॥

६] ति० टी०–अथ केवलसंदेशान्तरमाह–स वीर्यवानिति । अनुमन्यसे । सहस इत्यर्थः ॥ ६ ॥

रा० टी०–स इति । स रामस्त्वं हृतां सीतां कथं समनुमन्यसे सहसे ॥ ६ ॥

७] ति० टी०–दिव्य एष चूडामणिरेतावत्कालं सुपरिरक्षितः, एतं व्यसने त्वामिव दृष्ट्वा प्रहृष्यामि । एतत्संनिधाने रक्षोभिभवासंभवादिति भावः ॥ ७ ॥

रा० टी०–एष इति । एषः पित्रा दत्तः चूडामणिः मया संरक्षितः । तत्र हेतुः व्यसने राक्षसकर्तृकपीडायां सत्यां त्वामिव एतं मणिं दृष्ट्वा प्रहृष्यामि ॥ ७ ॥

गो० टी०–एषइति । प्रहृष्यामीति । अस्य चूडामणेस्त्वया बहुशो लालितत्वेन त्वत्स्मारकत्वादिति भावः ॥ ७ ॥

८] ति० टी०–स एष निर्यातितो दत्तः । त्वत्प्रत्ययाभिज्ञानार्थमिति शेषः । अतः शीघ्रमागमने एव कुशलम्, अन्यथा परमं दुःखमिति भावः ॥ ८ ॥

रा० टी०–एष इति । वारिसंभवः एषः मणिः मया निर्यातितः त्वत्प्रत्यभिज्ञानार्थं प्रेषितः अतः परम् अवधिकालादुत्तरं शोकलालसा शोकाक्रान्तचित्ताहं जीवितुं न शक्ष्यामि॥८॥

गो० टी०–एष निर्यातित इति । वारिसंभवः । रत्नं हि रत्नाकरे उत्पद्यते । अतः परं मासात्परम् ॥ ८–१० ॥

९–१०] ति० टी०–त्वत्कृते त्वत्प्राप्तिप्रत्याशया । मर्षयामि सहामि ॥ ९ ॥ १० ॥

रा० टी०–असह्यानीति । त्वत्कृते त्वत्प्राप्तिनिमित्तं दुःखादीनि मर्षयामि ॥ ९ ॥

रा० टी०–धारयिष्यामीति । मासादूर्ध्वम् अवधिभूतदिनात्परं न जीविष्ये जीवितास्मि ॥ १० ॥

११] ति० टी०–यतोऽयं घोरस्तस्य दृष्टिश्च, चाद्बुद्धिः, न सुखा अवधिकालादूर्ध्वकृतविनाशनिश्चया, अतस्तत्पूर्वमेव मरणौचित्यादवधिकालस्याधिकत्वेऽपि मासादूर्ध्वमेव न जीविष्यामि । किं च त्वां विषज्जन्तं विलम्बं कुर्वन्तं यदि शृणुयां तदा तथा श्रुत्वा मासादर्वागेव क्षणमपि न जीवेयमित्युक्तमिति ब्रूहीति शेषः ॥ ११ ॥

१ उपमः इति गो. पाठः । २ समिति रा. पाठः । ३ राक्षसीनां सुघोराणामिति गो. पाठः ।

वैदेह्या वचनं श्रुत्वा करुणं साश्रुभाषितम् । अथाब्रवीन्महातेजा हनूमान्मारुतात्मजः ॥ १२ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे । रामे शोकाभिभूते तु लक्ष्मणः परितप्यते ॥ १३ ॥
दृष्ट्वा कथंचिद्भवती न कालः परिदेवितुम् । इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ १४ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रावनिन्दितौ । त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ १५ ॥
हत्वा तु समरे रक्षो रावणं सहबान्धवैः । राघवौ त्वां विशालाक्षि स्वां पुरीं प्रेति नेष्यतः ॥ १६ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते । प्रीतिसंजननं भूयस्तस्य त्वं दातुमर्हसि ॥ १७ ॥
साब्रवीद्दत्तमेवाहो मयाभिज्ञानमुत्तमम् । एतदेव हि रामस्य दृष्ट्वा यत्नेन भूषणम् ॥ १८ ॥
श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति । स तं मणिवरं गृह्य श्रीमान्प्लवगसत्तमः ॥ १९ ॥
प्रणम्य शिरसा देवीं गमनायोपचक्रमे । तमुत्पातकृतोत्साहमवेक्ष्य हरियूथपम् ॥ २० ॥
वर्धमानं महावेगमुवाच जनकात्मजा । अश्रुपूर्णमुखी दीना बाष्पगद्गदया गिरा ॥ २१ ॥
हनूपन्निसहसंकाशौ भ्रातरौ रामलक्ष्मणौ । सुग्रीवं च सहामात्यं सर्वान्ब्रूया अनामयम् ॥ २२ ॥
यथा च स महाबाहुर्मां तारयति राघवः । अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ २३ ॥
[1]इदं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ।
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ २४ ॥

रा० टी०–घोर इति । अयं राक्षसराजः घोरः अतिक्रूरः अत एव मयि सुखासुखहेतुभूता दृष्टिर्न हन्तुमेवेच्छतीत्यर्थः एतेन जीवनं दुर्लभमिति सूचितम् । हेत्वन्तरमाह–विषजन्तं त्वां श्रुत्वा क्षणमपि न जीवेयं जीवितुमिच्छेयम् ॥ ११ ॥

गो० टी०–घोर इति । विषजन्तं विलम्बमानम् ११–१३

१२] ति० टी०–वचनयुक्तसंदेशरूपम् ॥ १२ ॥

रा० टी०–वैदेह्या इति । हनुमानब्रवीत् ॥ १२ ॥

१३] ति०टी०–त्वच्छोकविमुखस्त्वत्स्थित्यपरिज्ञानजशोकेन त्वद्दुद्धारप्रवृत्तिविमुखः, न तु ज्ञातवेति सत्येन ते शपे ॥१३॥

रा० टी०–तद्वचनाकारमाह–त्वदित्यादिभिः । अयं पूर्वमपि पठितो व्याख्यातश्च एवमुत्तरश्लोका अपि ॥ १३ ॥

१४–१६] ति० टी०–कथंचिद्भवती दृष्टा, अतः परं शोचितुं न कालः । इमं मुहूर्तम् । अस्मिन्नचिरकाले इत्यर्थः॥१४–१६

रा० टी०–दृष्टेति ॥ १४ ॥

रा० टी०–ताविति ॥ १५ ॥

रा०टी०–हत्वेति ॥ १६ ॥

गो० टी०–कथंचिदिति । इमं मुहूर्तम् अस्मिन्मुहूर्ते ॥ १४–२३ ॥

१७–१८] ति० टी०–यत्त्वभिज्ञानं राम एव विशिष्य जानीयाच्च तस्य प्रीतिसंजननं तद्भूयः पुनरधिकं च दातुमर्हसि ॥ १७ ॥ १८ ॥

रा० टी०–यदिति । प्रीतिसंजननं प्रीत्युत्पादकं यदभिज्ञानं भूयो विजानीयात् तत् त्वं भूयो दातुमर्हसि ॥ १७ ॥

रा० टी०–सेति । उत्तममभिज्ञानं भूषणं मया दत्तमेव अतः एतदेव दृष्ट्वा रामस्य श्रद्धेयं तव वाक्यं भविष्यति इति सा सीता अब्रवीत् । सार्धश्लोक एकान्वयी ॥ १८ ॥

१९] ति० टी०–श्रद्धेयं विश्वसनीयम् ॥ १९ ॥

रा० टी०–स इति । स हनुमान् गमनायोपचक्रमे । अर्धद्वयमेकान्वयि ॥ १९ ॥

२०–२१]ति० टी०–उत्पाते उत्प्लवने कृतोत्साहम् २०-२१

रा० टी०–तमिति । उत्पाते सागरोत्प्लवने कृतः उत्साहो येन अत एव वर्धमानं हनुमन्तम् अश्रुपूर्णमुखी जनकात्मजा उवाच । सार्धश्लोक एकान्वयी ॥ २० ॥ २१ ॥

२२] ति० टी०–अनामयमारोग्यम् ॥ २२ ॥

रा० टी०–तद्वचनाकारमाह–हनूमन्निति । हे हनुमन् अनामयं कुशलं रामादीन् ब्रूयाः २२ ॥

२३–२४] ति० टी०–त्वं समाधातुमित्यस्य तथेत्यादिः । समाधानं संविधानम्, ' अथापि स महाबाहुः ' इति पाठे यथेत्यपि पूरणीयमेव । यद्यपि श्रुतवृत्तान्तः स्वयमेव यतिष्यते तथापि त्वमपि यथा मां शीघ्रं तारयसि तथा संविधानं कुर्वित्यर्थः ॥ २३ ॥ २४ ॥

रा० टी०–यथेति । अयं पूर्वं व्याख्यातः ॥ २३ ॥

रा० टी०–इदमिति । रामस्य समीपं गतस्त्वं मम शोकवेगं रक्षोभिः परिभर्त्सनं च ब्रूयाः ॥ २४ ॥

गो० टी०–इमं चेति । शिवश्च तेऽध्वास्तु हरिप्रवीरेति । शिवः अव्याहत इत्यर्थः ॥ २४ ॥

---

१ तथेति गो. पाठः । २ दुःखेति गो. पाठः । ३ क्रूरमिति गो. पाठः । ४ बान्धवमिति गो. पाठः । ५ प्रापयिष्यत इति गो. पाठः । ६ इतीति गो. पाठः । ७ मत्केशेति गो. रा. पाठः । ८ पुङ्गवमिति गो. पाठः । ९ ह्यनामयमिति गो. पाठः । १० इममिति गो. पाठः ।

स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः ।
तदल्पशेषं प्रसमीक्ष्य कार्यं दिशं ह्युदीचीं मनसा जगाम ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ।

मारुतिर्जानक्या गृहीतसंदेशोऽपि राक्षसबलपरीक्षारूपं कार्यमवशिष्टं मन्यमानस्तदुपायत्वेन प्रमदावनभञ्जनं निश्चित्य तदकरोत् ॥

स च वाग्भिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया । तस्मादेशादपाक्रम्य चिन्तयामास वानरः ॥ १ ॥
अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा । त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते ॥ २ ॥

२५] ति० टी०–तत्कार्यं लङ्कागमनप्रयोजनमल्पशेषम् । देवीदर्शनरूपस्य महतः प्रधानकृत्यस्य निष्पन्नत्वात्परबलदर्शनरूपस्यानुषङ्गिकत्वादल्पशेषत्वमित्याशयः ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–स इति । राजपुत्र्याः प्रतिपादितः उक्तः अर्थो यस्मै अत एव कृतार्थः अत एव परिहृष्टचेताः स हनुमान् कार्यम् अल्पशेषं किञ्चिदवशिष्टं प्रसमीक्ष्य विचार्य उदीचीं दिशं मनसा जगाम ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

गो० टी०–स इति । अल्पावशेषम् अल्पावशिष्टम् । प्रसमीक्ष्य विचार्य ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चत्वारिंशः सर्गः ॥४०॥

१] ति० टी०–तस्मादेशादपाक्रम्य सीतासमीपात्किंचिद्दूरं गत्वा ॥ १ ॥

रा० टी०–प्रस्थानानन्तरकालिकां हनुमतश्चिन्तामाह–स इत्यादिभिः । तया सीतया प्रशस्ताभिर्वाग्भिः पूजितः स हनुमान् गमिष्यन् सन् तस्मात् देशादपक्रम्य निर्गत्य चिन्तयामास ॥ १ ॥

गो० टी०–स चेत्यादि । अल्पेति । अभिगम्य तु वैदेहीं निलयं रावणस्य चेत्युक्तकार्यद्वये सीतादर्शनरूपं कार्यं जातम् । इदं कार्यं रावणनिलयपरिज्ञानरूपम् । अल्पशेषम् अल्पावशिष्टम् । सान्तःपुरलङ्कायाः सम्यक् परिज्ञातत्वेऽपि राक्षसबलाबलरावणहृदयापरिज्ञानात्कार्यस्याल्पशेषत्वोक्तिः । इह राक्षसबलाबलरावणहृदयपरिज्ञानरूपकार्ये । त्रीनुपायानतिक्रम्य सामदानभेदानतिक्रम्य चतुर्थो लक्ष्यते साधनतया दण्ड एव दृश्यत इत्यर्थः । उपपत्तिपूर्वकमेतदेव विवृणोति—न सामेति । अनित्यो विजयो यस्मादृश्यते युद्ध्यमानयोः । पराजयश्च संग्रामे तस्मायुद्धं विवर्जयेत् । इति युद्धस्याव्यवस्थितफलकत्वेऽपि सर्वं बलवतः पथ्यमिति न्यायेन सर्वातिशायिबलपराक्रमस्य मम पराजयप्रसङ्ग एव नास्तीत्यभिप्रायेणाह—पराक्रम इति । मम तु इह रक्षोविषये पराक्रम एव रोचत इति संबन्धः । अभिगम्य तु वैदेहीं निलयं रावणस्य चेत्यनुज्ञातस्यातिरिक्तकार्यकरणे दोषमाशङ्क्य परिहरति–कार्य इति । कार्ये विहिते कर्तव्ये बहूनि कार्याणि । न हीति । अल्पस्यापि कर्मणः एको हेतुः साधको न किमुत महतः कर्मण इति भावः । बहुधा बहुभिर्हेतुभिः । पूर्वोक्तसमर्थनायाह—इहैवेति । अहमिहैव । परात्मसंमर्दविशेषतत्त्ववित्परात्मनोर्युद्धतारतम्यतत्त्ववित् । कृतनिश्चयः कृतबलाबलनिश्चयः सन् यदि प्लवगेश्वरालयं व्रजेयं ततः । भर्तृशासनम् सीतादर्शनरावणनिलयसम्यक्परिज्ञानविषयं शासनम् । तावत्साकल्येन कृतं स्यात् । अन्यथा राक्षसबलाबलं कीदृशमिति भर्त्रा पृष्टे निरुत्तरः स्यामिति भावः । कथं न्विति । युद्धं कथं सुखागतं सुखेन प्राप्तं भवेत्तथा कर्तव्यमित्यर्थः । युद्धस्य फलमाह—तथैवेत्यादिना सार्द्धश्लोकेन । तथैव खलु युद्धकरणे खलु स दशाननः । रणे आत्मबलं स्वपक्षबलं मां च । सारवत् मानयेत्परिच्छिन्द्यात् । बलप्रयायिना सेनान्या सह वर्तत इति सबलप्रयायी तम् । तस्य हृदिस्थितं मतं सीताविषयाध्यवसायं बलं च मत्वा । सुखेन इतः अस्मात् स्थानात् पुनः व्रजे व्रजिष्यामि । इदमिति । नेत्रमनःकान्तं वर्तत इति शेषः । तत इति । समादेक्ष्यति नियोजयिष्यति । इदम् अव्यवहितोत्तरकालिकम् । कपीश्वरालयमित्यनन्तरामितिकरणं द्रष्टव्यम् । इति चिन्तयामासेत्यन्वयः ॥ १–१३ ॥

२] ति० टी०–चिन्तयामासेत्युक्तां चिन्तां दर्शयति—अल्पशेषमिति । इयं सीता दृष्टेतीदं प्रधानकार्यं निष्पन्नमिति आनुषङ्गिकं परबलदर्शनमवशिष्टमित्यल्पशेषत्वम् । इह कार्ये परबलज्ञानलक्षणे त्रीनुपायान्सामादीनतिक्रम्य चतुर्थो दण्ड एव साधनत्वेन दृश्यते ॥ २ ॥

रा० टी०–चिन्ताकारमाह–अल्पेत्यादिभिः । इयं सीता

१ अल्पावशेषमिति गो. पाठः । २ अपक्रम्येति गो. पाठः

न साम रक्षःसु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते ।
न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेष ममेह रोचते ॥ ३ ॥
न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते ।
हतप्रवीराश्च रणे तु राक्षसाः कथंचिदीयुर्यदिहाद्य मार्दवम् ॥ ४ ॥
कार्ये कर्मणि [2]निर्वृत्ते यो बहून्यपि साधयेत् । पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥ ५ ॥
नह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः । यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ६ ॥
इहैव तावत्कृतनिश्चयो ह्यहं व्रजेयमद्य प्लवगेश्वरालयम् ।
परात्मसंमर्दविशेषतत्त्ववित्ततः कृतं स्यान्मम भर्तृशासनम् ॥ ७ ॥

दृष्टा प्रधानकार्यं सिद्धमित्यर्थः इदं परबलदर्शनरूपं कार्यमल्पशेषं स्वल्पं सत् शिष्यते इह परबलदर्शनरूपकार्ये तु यतः त्रीन् सामादीन् उपायान् अतिक्रम्य त्यक्त्वा चतुर्थो दण्ड एव उपायः दृश्यते ॥ २ ॥

३] ति० टी०–तत्र युक्तिमाह—नेति। ऋजु साम फलाय न शरेषु तदाह—रक्षःस्विति । बलदर्पिता भेदसाध्या न । भेद उपायः । बलवन्तो हि कुतोऽप्यनिष्टं न गणयन्तीत्यर्थः॥३॥

रा० टी०–तदेवोपपादयन्नाह–नेत्यादिभिः । रक्षस्सु साम गुणाय न कल्पते तेषामतिक्रूरत्वात्सामानर्हत्वमित्यर्थः । अर्थोपचितेषु अतिधनवत्सु दानं गुणाय न कल्पते तेषामल्पधनाकाङ्क्षाभावादिति भावः । बलदर्पिता जना भेदसाध्या भेदेनानुकूल्यं प्रापयितुं न शक्या अत एष राक्षसगर्वनिवारकः पराक्रम एव मम रोचते ॥ ३ ॥

४] ति० टी०–अस्य कार्यस्य परबलाशयपरिज्ञानरूपस्य सर्वातिशायिपराक्रमवतो मम पराजय एव नास्तीत्याशयेनाह–पराक्रमादृते इति । विनिश्चयो निश्चितोपायः । स्वबलप्रकाशने प्रयोजनान्तरमप्यस्तीत्याह—हतेति । अथ हताः प्रवीराः श्रेष्ठा येषां ते राक्षसा यस्मादिह भाविनि रणे मार्दवमेकैकैर्वैवं पराक्रमः कृतस्तादृशैरनेकैः कथमस्माकं जयाशेति रणप्रवृत्तिराहित्यं प्राप्नुयुः, अतः पराक्रमात्परबलस्य मनोभङ्गरूपं कार्यं सिद्ध्यतीत्याशयः ॥ ४ ॥

रा०टी०–नेति । पराक्रमात् ऋते विना अस्य सीताप्राप्तिरूपस्य कार्यस्य विनिश्चयः विनिश्चायकः कश्चित्सामादिर्नोपपद्यते अतः इहास्मिन् समये राक्षसाः कथञ्चित् केनाप्युपायेन यदि हतप्रवीराः तर्हि मार्दवं किंचिन्नम्रतामीयुः । एतेन नम्रीभूय यदि सीतां रामाय समर्पयेत्तर्हि राक्षसकुलविध्वंसो न भवेदिति सूचितं तेन हनुमतो दयालुत्वं व्यक्तम् ॥ ४ ॥

५] ति० टी०–ननु स्वामिसंदिष्टकार्यातिरिक्तकार्यकरणे दोषः, स्वामिना हि 'अभिगम्य तु वैदेहीं निलयं रावणस्य च' इत्येतावदेव संदिष्टमित्याशङ्क्य संदिष्टकार्याविरोधेन स्वामिहितं कार्यान्तरसाधनं कृतस्यालंकार इत्याह—कार्ये इति । कार्ये प्रधानकार्ये निर्वृत्ते । स कार्यं कर्तुमर्हति, न तु संदिष्टमात्रस्य कथंचित्साधक इत्याशयः ॥ ५ ॥

रा० टी०–नन्वभिगम्य तु वैदेहीं निलयं रावणस्य चेत्यादिना दर्शनमात्रनियुक्तेन त्वया नाज्ञापितराक्षसवधः किमर्थमभिकाङ्क्ष्यते इत्यत आह–कार्यं इति । कार्ये स्वाम्याज्ञप्तकर्तव्ये कर्मणि निर्वृत्ते सिद्धे सति यो बहूनि कृतकार्यपोषकतया विपुलकार्याणि साधयेत् साधितुमिच्छेत् सः पूर्वकार्याविरोधेन साधितकार्यप्रातिकूल्यरहितेन कार्यं कर्तुमर्हति ॥ ५ ॥

६] ति० टी०–उक्तमेव विवृणोति—नह्येति । यस्तु स्वल्पस्यापि कर्मणोऽतिशयितयत्नेन सिद्धिहेतुर्भवत्यसावेको मुख्यः साधको हेतुर्न भवति, अपि तु यो ह्यर्थं प्रयोजनमल्पेन यत्नेन बहुधा कर्तुं वेद स एवार्थसाधने समर्थः ॥ ६ ॥

रा० टी०–ननु कार्ये निष्पन्ने क्रियान्तरकरणं निरर्थकमित्यत आह–नहीति । स्वल्पस्यापि कर्मणः रामकार्यस्य सीताप्राप्तेरित्यर्थः, साधको हेतुरेक एव न बहवः सन्तीत्यर्थः । सीतादर्शनमात्रेण रामकार्यसिद्धिर्न भवतीति तात्पर्यम् अतः अर्थं रामकार्यसाधकहेतुं बहुधा बहुप्रकारेण यो वेद स एव अर्थसाधने समर्थः ॥ ६ ॥

७] ति० टी०–तस्मादन्यदपि स्वाम्यभीष्टं कृत्वैव गन्तव्यमित्याह—इहैवेति । यद्यप्यहमिहैव सीतान्वेषण एव तावत्प्रथमं कृतनिश्चयः, तथापि यदि परात्मसंमर्दविशेषतत्त्ववित्परस्यात्मनः स्वस्य च संमर्दे युद्धे यो विशेषस्तत्तत्त्ववित्त्वा यदि प्लवगेश्वरालयं सुग्रीवालयं व्रजेयं ततस्तदा भर्तृशासनं सम्यक्कृतं स्यात् । अन्यथा राक्षसबलं कीदृशमिति पृष्टे निरुत्तरः स्यामिति भावः ॥ ७ ॥

रा० टी०–इहेति । इह अस्मिन्नागमने एव परमात्मसंमर्दविशेषतत्त्ववित् परस्य शत्रोः आत्मनो मनसः यः संमर्दविशेषः आत्यन्तिको ध्वंसः तस्य तत्त्ववित् याथार्थ्यवेदिता अत एव कृतः निश्चयः जानकीप्राप्तिविषयकनिश्चयविशेषो येन सोऽहं यदि व्रजेयं ततस्तदा भर्तृशासनं कृतं स्यात् अन्यथा भर्तृशासनकरणे न्यूनता स्यादिति तात्पर्यम् ॥ ७ ॥

१ प्लवेति गो. पाठः । २ निर्दिष्टे इति गो. पाठः । ३ यदि व्रजेयमिति गो. पाठः ।

कथं नु खल्वद्य भवेत्सुखागतं प्रसह्य युद्धं मम राक्षसैः सह ।
तथैव खल्वात्मबलं च सारवत्समानयेन्मां च रणे दशाननः ॥ ८ ॥
ततः समासाद्य रणे दशाननं समन्त्रिवर्गं सबलं सयायिनम् ।
हृदि स्थितं तस्य मतं बलं च सुखेन मत्वाहमितः पुनर्व्रजे ॥ ९ ॥
इदमस्य नृशंसस्य नन्दनोपममुत्तमम् । वनं नेत्रमनःकान्तं नानाद्रुमलतायुतम् ॥ १० ॥
इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः । अस्मिन्भग्ने ततः कोपं करिष्यति स रावणः ॥ ११ ॥
ततो महत्साश्वमहारथद्विपं बलं समानेष्यति राक्षसाधिपः ।
त्रिशूलकालायसपट्टिशायुधं ततो महद्युद्धमिदं भविष्यति ॥ १२ ॥
अहं चैतैः संयति चण्डविक्रमैः समेत्य रक्षोभिरभङ्गविक्रमः ।
निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि हरीश्वरालयम् ॥ १३ ॥
ततो मारुतवत्क्रुद्धो मारुतिर्भीमविक्रमः । ऊरुवेगेन महता द्रुमान्क्षेप्तुमथारभत् ॥ १४ ॥
ततस्तद्द्रुमान्वीरो बभञ्ज प्रमदावनम् । मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम् ॥ १५ ॥

८] ति० टी०–एवं निश्चितार्थो युद्धप्रवृत्तिप्रकारं चिन्तयति—कथं न्विति । अद्य खलु ममेहागतमागमनं सुखागतं सुखफलक्रमागमनं कथं भवेत्, तथा राक्षसैः सह प्रसह्य स्वयमेव बलात्कृत्य युद्धं च कथं मम भवेत्, तथा तथैव करणे सति सारवद्दृढितं स्वबलं मां च स दशाननः कथं मानयेच्छ्लाघयेत् । यद्वा तथैव युद्धकरणे खलु दशानन आत्मबलं मां च सारवत्समानयेत्सम्यक्परिच्छिन्द्यादित्यर्थेन युद्धफलमुक्तम् ॥८॥

रा० टी०–उपायमेव चिन्तयति-कथमिति । राक्षसैः सह मम युद्धं कथं भवेत् तथा सारवद्बलवत् आत्मबलं स्वसेनां मां च रणे दशाननः स रावणः कथं मानयेत् प्रशंसेत् ॥ ८ ॥

९] ति० टी०–ततो मद्बलवशादेव मां रणे समासाद्य वर्तमानं सबलं सयायिनं ससारथिम् । अन्तर्भावितण्यर्थाद्यातेर्णिनौ यापयिता यापी सारथिस्तेन सहितं रावणं ज्ञात्वा हृदि स्थितं तस्य मतमभीष्टं बलं च सुखेनाक्लेशतो मत्वा ज्ञात्वा पुनरितो व्रजे व्रजिष्ये । 'सबलं सयायिनम्' इति पाठः । 'सबलप्रयायिनम्' इत्याधुनिककल्पितः पाठः ॥ ९ ॥

रा० टी०–युद्धेच्छायां प्रयोजनमाह–तत इति । ततः तस्मिन् रणे सयायिनं ससारथिं दशाननं समासाद्य प्राप्य तस्य रावणस्य हृदि स्थितं मतमभिप्रायं बलं च मत्वा ज्ञात्वा इतः लङ्कायाः पुनर्व्रजे ॥ ९ ॥

१०–११] ति० टी०–अथ प्रसह्य रणप्रवर्तनोपायं चिन्तयति—इदमिति । अस्येदं वनं नेत्रमनःकान्तं भवति, अत इदं विध्वंसयामि ॥ १० ॥ ११ ॥

रा० टी०–विचारेण निश्चितमाह–इदमिति । नानाद्रुमलतायुतम् इदं वनम् अस्य रावणस्य मनःकान्तं मनसः प्रियमस्तीति शेषः ॥ १० ॥

रा० टी०–इदमिति । इदं वनं शुष्कं वनमनल इव विध्वंसयिष्यामि अस्मिन् भग्ने सति रावणः कोपं करिष्यति यदि त्वेतच्छ्लोकघटकस्येदमित्यस्य कामदमित्यर्थस्तदा पूर्वस्यार्धाहेवान्वयः एवं च पूर्वत्रास्तेरध्याहारस्य न प्रयोजनम् ॥ ११ ॥

१२] ति० टी०–समानेष्यति मां प्रति युद्धाय प्रापयिष्यति । महद्युद्धं मन्मनस्तोषकृत् ॥ १२ ॥

रा० टी०–तत इति । ततः वनविध्वंसानन्तरं साश्वमहारथद्विपम् अश्वमहारथद्विपसहितं त्रिशूलादीनि आयुधानि यस्मिन् तन्महद्बलं राक्षसाधिपः समानेष्यति अत एव ततस्तस्मिन् समये महद्युद्धं भविष्यति ॥ १२ ॥

१३] ति० टी०–ततो हरीश्वरालयं गमिष्यामीति चिन्तयामासेत्यन्वयः ॥ १३ ॥

रा० टी०–अहमिति । चण्डविक्रमैः रक्षोभिः संयति संग्रामे समेत्य संयुध्य रावणचोदितं तद्बलं निहत्य हरीश्वरालयं सुखं गमिष्यामि ॥ १३ ॥

१४–१५] ति० टी०–तत एवंनिश्चयानन्तरम् ॥१४–१५॥

रा० टी०–तत इति । ततोऽनन्तरं क्रुद्धः आश्रितकोपः भीमविक्रमो मारुतिः महता ऊरुवेगेन मारुतवत् द्रुमान् क्षेप्तुमारभत् ॥ १४ ॥

रा० टी०–तत इति । ततोऽनन्तरं प्रमदावनं प्रमदाकुलवनिकां बभञ्ज ॥ १५ ॥

गो० टी०–तत इति । ततः तेन चिन्तितेन हेतुना ॥१४॥

१ संमानयेदिति गो. पाठः । २ सबलप्रयायिनमिति गो. पाठः । ३ दशानन इति गो. पाठः । ४ समादेक्ष्यतीति गो. पाठः । ५ त्विति गो. पाठः । ६ असह्येति गो. पाठः । ७ कपीति गो. पाठः ।

तद्वनं मथितैर्वृक्षैर्भिन्नैश्च सलिलाशयैः । चूर्णितैः पर्वताग्रैश्च बहुधा प्रियदर्शनैः ॥ १६ ॥
नानाशकुन्तविरुतैः प्रभिन्नसलिलाशयैः । ताम्रैः किसलयैः क्रान्तैः क्रान्तद्रुमलतायुतैः ॥ १७ ॥
न बभौ तद्वनं तत्र दावानलहतं यथा । व्याकुलावरणा रेजुर्विह्वला इव ता लताः ॥ १८ ॥
लतागृहैश्चित्रगृहैश्च सादितैर्व्यालैर्मृगैरार्तरवैश्च पक्षिभिः ।
शिलागृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्वनम् ॥ १९ ॥
सा विह्वलाशोकलताप्रताना वनस्थली शोकलताप्रताना ।
जाता दशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥ २० ॥
ततः स कृत्वा जगतीपतेर्महान्महद्वचलीकं मनसो महात्मनः ।
युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमाश्रितः कपिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०–तत्तस्त्विति । प्रमदावनम् अन्तःपुरवनम् । प्रमदावनमन्तःपुरोचितमित्यमरः ॥ १५ ॥

१६–१७] ति० टी०–पर्वताग्रैः क्रीडापर्वताग्रैः । उपलक्षितमिति शेषः ॥ १६ ॥ १७ ॥

रा० टी०–तदिति । मथितैः सलिलाशयैर्भिन्नैर्भञ्जितैर्वृक्षैश्च चूर्णितैः पर्वताग्रैश्च तद्वनमप्रियदर्शनं बभूव ॥ १६ ॥

रा० टी०–नानेति । नानाशकुन्तविरुतैः पक्षिणामुत्कटशब्दैः प्रभिन्नसलिलाशयैश्च क्रान्तैर्म्लानैः किसलयैश्च क्रान्तद्रुमलतानामयुतैश्च उपलक्षितं दावानलहतमिव तद्वनं तत्र तस्मिन् समये न बभौ । सार्धश्लोक एकान्वयी ॥ १७ ॥

गो० टी०–तद्वनमिति । पर्वताग्रैः क्रीडापर्वताग्रैः१६॥१७

१८] ति० टी०–व्याकुलं स्रस्तमावरणं यासां ताः, अत एव विह्वलाः स्त्रिय इव ता लता रेजुः ॥ १८ ॥

रा० टी०–व्याकुलेति । व्याकुलानि संचलितानि आवरणानि यासां ताः लताः विह्वला नार्य इव रेजुः ॥ १८ ॥

गो० टी०–व्याकुलावरणा इति । व्याकुलावरणाः आवरणादुपघ्नाद्व्याकुलाः विह्वलाः स्त्रिय इव ॥ १८ ॥

१९] ति० टी०–सादितैर्विशीर्णैः । व्यालैः शार्दूलैः ॥१९॥

रा० टी०–लतेति । सादितैर्विध्वंसितैः लतागृहादिभिः आर्तः रवो येषां तैः व्यालैः शार्दूलैः पक्षिभिश्च उन्मथितैः प्रचालितैः शिलागृहैः गृहैस्तदितरनिर्मितभवनैश्च प्रनष्टरूपं तन्महद्वनमभूत् ॥ १९ ॥

गो० टी०–लतागृहैरित्यादि । व्यालमृगैः श्वापदादिहिंस्रमृगैः निर्धुतैः पीडितैः गृहैः केवलगृहैः ॥ १९ ॥

२०] ति० टी०–प्रमदावनस्यान्तःपुरविहारोचितवनस्य । 'स्यादेतदेव प्रमदवनमन्तःपुरोचितम्' इत्यमरः । दशास्यस्य प्रमदानां स्त्रीणां कामसंवर्धनद्वारावनस्य रक्षकस्यास्य वनस्य सा विह्वलाशोकलताप्रताना चञ्चलाशोकलतासमूहवती, वनस्थली तृणगुल्मलताजलाशयादियुक्ता भूमिः । कपेर्बलाच्छोच्यत इति शोका शोच्यलताप्रताना जाता दृष्टचित्तशोकजनिका जातेत्यर्थः ॥ २० ॥

रा० टी०–सेति । विह्वलाः अशोकलताप्रतानाः विस्तृताशोकलताः यस्यां सा वनस्थली प्रमदस्य उत्कृष्टमदस्य अवनं रक्षणं यस्मिन् तस्य नित्यं मदविशिष्टस्येत्यर्थः, दशास्यप्रमदावनस्य रावणस्त्रीसमूहस्य कपेर्बलात् शोकरूपलताप्रतानः लताविस्तारो यस्यां सा जाता ॥ २० ॥

गो० टी०–सेति । शोच्यत इति शोकः । प्रतानं विततिः । अशोकम् अशोच्यम् लताप्रतानं यस्यां सा अशोकलताप्रताना । दशास्यप्रमदावनस्य भोगवर्धनेन रावणवनितारक्षकस्य प्रमदावनस्य अन्तःपुरोद्यानस्य सा वनस्थली तृणगुल्मलतादिविशिष्टप्रदेशः कपेर्बलाद्धि विह्वला लुलिता शोकलताप्रताना च जाता । यद्वा शोकलताः शोकरताः रलयोरभेदः अप्रतानाः अप्सु प्रतानाः कमलकल्हारादयोऽस्यां सा शोकलताप्रताना म्लानजलजेति यावत् । दशास्यप्रमदावनस्य रावणप्रमदावनस्य । "ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्" इति बहुलवचनाद्ध्रस्वाभावः । दशास्यप्रमदावनस्य वनस्थलीत्यत्र शिलापुत्रकस्य शरीरमितिवदुपचारात् षष्ठी । प्रमदावनस्य सीतारूपप्रमदापालकस्य वनस्थली कपेर्बलाद्विह्वला शोकलताप्रताना च जाता । अशोकलतेत्युपलक्षणम् ॥ २० ॥

२१] ति० टी०–जगतीपते राज्ञो रावणस्य । व्यलीकमप्रियम् ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०–तत इति । बहुभिर्महाबलैर्युयुत्सुः अत एव श्रिया युद्धोत्साहसंपत्त्या ज्वलन् एकः महान् कपिः स हनुमान्

---

१ बभूवाप्रियदर्शनमिति गो. पाठः । २ प्रभिन्नैरिति गो. पाठः । ३ युतमिति गो. पाठः । ४ नाशितैर्महीरुगैर्व्यालमृगैश्च निर्धुतैरिति गो. पाठः । ५ स तस्य कृत्वार्थपतेर्महाकपिरिति गो. पाठः ।

द्विचत्वारिंशः सर्गः ।

हनुमत्कृतप्रमदवनभङ्गं दृष्ट्वा राक्षस्यः सीतां कोऽयमित्यपृच्छन् । तया च नाहं जानामि प्रायो राक्षस एव भवेदित्युक्ताश्च काश्चन द्रुतं गत्वा सीतावासातिरिक्तसर्ववननाशं रावणाय न्यवेदयन् । तेन च प्रेषितान् किंकरसंज्ञकान् बहून् राक्षसान् मारुतिर्जघान । तच्छ्रुत्वा रावणः प्रहस्तपुत्रं प्रेषयति ॥

ततः पक्षिनिनादेन वृक्षभङ्गस्वनेन च । बभूवुस्त्रासंसंभ्रान्ताः सर्वे लङ्कानिवासिनः ॥ १ ॥
विद्रुताश्च भयत्रस्ता विनेदुर्मृगपक्षिणः । रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २ ॥
ततो गतायां निद्रायां राक्षस्यो विकृताननाः । तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिम् ॥ ३ ॥
स तां दृष्ट्वा महाबाहुर्महासत्त्वो महाबलः । चकार सुमहद्रूपं राक्षसीनां भयावहम् ॥ ४ ॥
ततस्तु गिरिसंकाशमतिकायं महाबलम् । राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ॥ ५ ॥
कोऽयं कस्य कुतो वायं किंनिमित्तमिहागतः । कथं त्वया सहानेन संवादः कृत इत्युत ॥ ६ ॥
आचक्ष्व नो विशालाक्षि माभूत्ते सुभगे भयम् । संवादमसितापाङ्गि त्वया किं कृतवानयम् ॥ ७ ॥
अथाब्रवीत्तदा साध्वी सीता सर्वाङ्गशोभना । रक्षसां कामरूपाणां विज्ञाने का गतिर्मम ॥ ८ ॥

जगतीपतेः रावणस्य मनसः महव्यलीकम् अप्रियं दुःखकारणमित्यर्थः, कृत्वा संपाद्य तोरणं बहिर्द्वारमाश्रितः स्थितः ॥२१॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०–स इति । अर्थपतेः राज्ञो रावणस्य । मनसः व्यलीकम् अप्रियम् पीडनं वा । अलीकं त्वप्रियाकार्यवैलक्ष्यान्नृतपीडन इति निघण्टुः । युयुत्सुः योद्धुमिच्छुः । तोरणम् उद्यानबहिर्द्वारम् तोरणोऽस्त्री बहिर्द्वारमित्यमरः ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–हनुमत्कर्तृकवनिकाविध्वंसानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । पक्षिनिनादादिना सर्वे लङ्कानिवासिनः त्रासेन भयेन संभ्रान्ताः उद्विग्नचित्ताः बभूवुः ॥ १ ॥

गो० टी०–ततः पक्षीत्यादि ॥ १–४ ॥

२] ति० टी०–प्रतिपेदिरे प्राप्तानि ॥ २ ॥

रा० टी०–विद्रुता इति । भयत्रस्ताः अत एव विद्रुताः मृगपक्षिणः विनेदुः रक्षसां समीपे क्रूराणि भयंकराणि निमित्तानि शकुनाः प्रतिपेदिरे प्रापुः ॥ २ ॥

३–४] ति० टी०–गतायां निद्रायाम् । वनभङ्गध्वनिनेत्यर्थः ॥ ३ ॥ ४ ॥

रा० टी०–तत इति । निद्रायां गतायां सत्यां भग्नं वनं महाकपिं च ददृशुः ॥ ३ ॥

रा० टी०–स इति । स हनुमान् ताः राक्षसीः दृष्ट्वा राक्षसीनां भयावहं रूपं चकार ॥ ४ ॥

५] ति० टी०–जनकात्मजां पप्रच्छुः । तस्या निर्निद्रतायावस्थानं मत्वेति भावः ॥ ६ ॥

रा० टी०–तत इति । ततोऽनन्तरं गिरिसंकाशं वानरं दृष्ट्वा राक्षस्यो जनकात्मजां पप्रच्छुः ॥ ५ ॥

गो० टी०–ततस्तमित्यादि । उतशब्दो वार्थे । उताप्यर्थविकल्पयोरित्यमरः । संवादो वा कथं कृत इति पप्रच्छुरिति पूर्वेण सम्बन्धः । कः किन्नामकः कस्य कस्य सम्बन्धी पुरुषः कुतः कस्मादेशादागतः किंनिमित्तं किं प्रयोजनमुद्दिश्य संवादं किं कृतवान् किमुद्दिश्य कृतवान् । सर्वस्यापि पप्रच्छुरिति पूर्वेणान्वयः ॥ ५–७ ॥

६] ति० टी०–त्वयानेन कथं संवादः कृत इति च पप्रच्छुः । यद्यपि ता निद्रिता वनभङ्गध्वनिना जागरिता इति संवादज्ञानस्यैवाभावात्तत्कथं प्रश्नो निरवसरः, तथापि निद्रामध्ये किंचिज्जागरणेऽपि संवादश्रवणेऽपि देवमायया पुनर्निद्रेति तत्प्रश्नोपपत्तिरित्याहुः । सीतायास्तदर्शनेऽपि निर्भयप्रसन्नमुखतयावस्थानदर्शनादयं कश्चिदेतत्परिचित एतद्वृत्तान्तज्ञानार्थमेव प्रायेणागत इति संभाव्यानया संवादकरणं च संभाव्य तत्प्रश्ननिर्वाह इति कतकः ॥ ६ ॥

७] ति० टी०–अथ विशिष्य संवादं पृच्छति—संवादमिति ॥ ७ ॥

रा० टी०–तत्प्रश्नाकारमाह–क इति । अयं कः किंनामेत्यर्थः, त्वया सह संवादः कथं कृतः इत्याचक्ष्व कथय नच संवादसमये तासां निद्रितत्वेन संवादज्ञानाभावात् कथं तद्विषयकः प्रश्न इति वाच्यं संवादसमये किञ्चिन्निद्रापगमेन सीतासुखप्रसादहेतुकतत्सम्बन्ध्यनुमानेन वा तज्ज्ञानसंभवात् । श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

८] ति० टी०–का गतिरुपायः ॥ ८ ॥

रा० टी०–अथेति । अथ राक्षसीप्रश्नश्रवणानन्तरं सीता अब्रवीत् । तद्वचनाकारमाह–कामरूपाणां रक्षसां विज्ञाने विशे-

१ तामिति रा. पाठः । २ तमिति गो. पाठः । ३ सुन्दरीति गो. पाठः । ४ भीमेति गो. पाठः ।

यूयमेवास्य जानीत योऽयं यद्वा करिष्यति । अहिरेव अहेः[3] पादान्विजानाति न संशयः ॥ ९ ॥
अहमप्यतिभीतास्मि[1] नैव जानामि को ह्यहम् । वेद्मि राक्षसमेवैनं कामरूपिणमागतम् ॥ १० ॥
वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता द्रुतम्[4] । स्थिताः काचिद्वृताः काश्चिद्रावणाय निवेदितुम् ॥११॥
रावणस्य समीपे तु राक्षस्यो विकृताननाः । विरूपं वानरं भीमं रावणाय न्यवेदिषुः ॥ १२ ॥
अशोकवनिकामध्ये राजन्भीमवपुः कपिः । सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः ॥ १३ ॥
न च तं जानकी सीता हरिं हरिणलोचना । अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥ १४ ॥
वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा । प्रेषितो वापि रामेण सीतान्वेषणकाङ्क्षया ॥ १५ ॥
[6]तेनैवाद्भुतरूपेण यत्तत्तव मनोहरम् । नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् ॥ १६ ॥
न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः । यत्र सा जानकी [7]देवी स तेन न विनाशितः ॥ १७ ॥
जानकीरक्षणार्थं वा श्रमाद्वा नोपलक्ष्यते[8] । अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता ॥ १८ ॥
चारुपल्लवपत्राढ्यं यं सीता स्वयमास्थिता । प्रवृद्धः शिंशपावृक्षः स च तेनाभिरक्षितः ॥ १९ ॥

पतो ज्ञापने मम का गतिः राक्षसानाम् अविश्वस्तत्वेनान्यकर्तृकबोधाश्रयत्वस्यासंभवात् राक्षसा एव सर्वं जानन्तु इत्यर्थः ८

गो० टी०–अथाब्रवीदित्यादि । अयं यः यादृशः । यद्वा कार्यं करिष्यति तद्यूयमेवाभिजानीतेति संबन्धः । नैनं जानामीति । विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे । मित्रस्य चार्थेष्वनृतं वदेयुः पञ्चानृतान्याहुरपातकानि । इति स्मरणादसत्योक्तिः ॥ ८–१० ॥

९–१०] ति० टी०–युष्माकमेवैतत्स्वरूपज्ञानमुचितमित्यत्र न्यायमाह—अहिरेवेति ॥ ९ ॥ १० ॥

रा० टी०–यूयमिति । अस्य जात्यादि योऽयं वा यत्करिष्यति वा तत् यूयमेव जानीत । तत्र दृष्टान्तः अहेः सर्पस्य पादान् अहिरेव विजानाति ॥ ९ ॥

रा० टी०–अहमिति । अहमप्यतिभीता हनुमदर्थं भयं प्राप्ताऽस्मीति तात्पर्यम् । अतः कोऽयम् इति नैव जानामि बोधयामि परन्तु आगतमेनं राक्षसं राक्षससदृशं कामरूपिणं वेद्मि बोधयामि ॥ १० ॥

११–१२] ति० टी०–वैदेह्या वचनमज्ञानप्रतिपादकम् । अनेनात्मत्राणादौ मृषावादो न दोषायेति ध्वनितम् । काश्चिद्विद्रुताः, काश्चिद्वृतं स्थिता एव, काश्चिद्रावणाय निवेदितुं गताः ॥ ११ ॥ १२ ॥

रा० टी०–वैदेह्या इति । वैदेह्या वचनं श्रुत्वा काश्चिद्राक्षस्यः स्थिताः तूष्णीं बभूवुरित्यर्थः काश्चित्तु रावणाय निवेदितुं द्रुतं गताः ॥ ११ ॥

रा० टी०–रावणस्येति । राक्षस्यः रावणस्य समीपे गत्वेति शेषः, रावणाय रावणं बोधयितुं वानरं न्यवेदिषुः ॥१२॥

गो० टी०–वैदेह्या इति । दिशः दिक्षु वनस्य पार्श्वेष्वित्यर्थः विद्रुताः विलीनाः । निवेदितुं निवेदयितुम् ॥ ११–१५ ॥

१३] ति० टी०–सीतया कृतसंवादत्वज्ञानं यथा तथोक्तम् ॥ १३ ॥

रा० टी०–निवेदनप्रकारमाह–अशोकेति । सीतया कृतः संवादो येन सोऽमितविक्रमः कपिः तिष्ठति ॥ १३ ॥

१४–१५] ति० टी०–न निवेदयितुमिच्छति । प्रायेणेयं तं जानातीति तासामाशयः ॥ १४ ॥ १५ ॥

रा० टी०–नेति । तं हरिं वानरम् अस्माभिः पृष्टापि जानकी निवेदयितुं बोधयितुं नेच्छति ॥ १४ ॥

रा० टी०–स्वोत्प्रेक्षितमाह–वासवस्येति । वासवादन्यतरस्य दूतो भवेत् रामेण प्रेषितो वा दूतो भवेत् ॥ १५ ॥

१६] ति० टी०–प्रमृष्टं नाशितम् ॥ १६ ॥

रा० टी०–ननु किं तदागमनेनेत्यत आह–तेनेति । यत्तव प्रमदावनं तत् तेन वानरेण प्रमृष्टं विध्वंसितम् ॥ १६ ॥

गो० टी०–तेन त्विति । प्रमृष्टं भग्नमित्यर्थः ॥१६–१९॥

१७] ति० टी०–उद्देशः प्रदेशः ॥ १७ ॥

रा० टी०–नेति । तेन वानरेण यः कश्चिदुद्देशः स्थलं न विनाशितः स तत्र वनिकायां नास्ति यत्र देशे सा जानकी स देशस्तु तेन न विनाशितः ॥ १७ ॥

१८] ति० टी०–कः श्रम इति । महावनं भग्नवतस्तस्य श्रमोऽसंभावित इत्यर्थः । अतः सा जानक्येव तेनाभिरक्षिता तदाभयदक्षाभङ्ग्येति शेषः ॥ १८ ॥

रा० टी०–तन्मात्रविनाशाभावे को हेतुरित्यत आह–जानकीति । नोपलक्ष्यते निश्चीयते पूर्वपक्ष एव सिद्धान्त इति निश्चित्याह–अथवेति । तस्य अतिभयङ्करस्य कः श्रमः श्रमो न संभवतीत्यर्थः अतः तेन सा सीतैवाभिरक्षिता ॥ १८ ॥

१९] ति० टी०–तस्यैवार्थस्य स्थिरीकरणाय पुनः प्रतिपादनम्—चार्विति । तेनाभिरक्षितः । सीतारक्षणार्थमिति शेषः ॥ १९ ॥

१ अभीति गो. पाठः । २ ह्यहेरिति गो. पाठः । ३ अस्येति गो. पाठः । ४ दिश इति गो. पाठः । ५ आख्यातुमुपचक्रमुरिति गो. पाठः । ६ तेम वद्भुतेति गो. पाठः । ७ सीतेति गो. पाठः । ८ लभ्यते इति गो. पाठः ।

तस्योग्ररूपस्योग्रं त्वं दण्डमाज्ञातुमर्हसि । सीता संभाषिता येन वनं तेन विनाशितम् ॥ २० ॥
मनःपरिगृहीतां तां तव रक्षोगणेश्वर । कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥ २१ ॥
राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः । चिताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः । दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥ २३ ॥
आत्मनः सदृशान्वीरान्किंकरान्नाम राक्षसान् । व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥ २४ ॥
तेषामशीतिसाहस्रं किंकराणां तरस्विनाम् । निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः ॥ २५ ॥
महोदरा महादंष्ट्रा घोररूपा महाबलाः । युद्धाभिमनसः सर्वे हनूमद्ग्रहणोन्मुखाः ॥ २६ ॥
ते कपिं तं समासाद्य तोरणस्थमवस्थितम् । अभिपेतुर्महाभागाः पतङ्गा इव पावकम् ॥ २७ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः । आजघ्नुर्वानरश्रेष्ठं शरैरादित्यसंनिभैः ॥ २८ ॥
मुद्गरैः पट्टिशैः शूलैः प्रासतोमरपाणयः । परिवार्य हनूमन्तं सहसा तस्थुरग्रतः ॥ २९ ॥
हनूमानपि तेजस्वी श्रीमान्पर्वतसंनिभः । क्षितावाविध्य लाङ्गूलं ननाद च महाध्वनिम् ॥ ३० ॥
स भूत्वा तु महाकायो हनूमान्मारुतात्मजः । पुच्छमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ३१ ॥

रा० टी०–चार्विति । यं सीता आस्थिता स शिंशुपावृक्षः तेन वानरेणाभिरक्षितः ॥ १९ ॥

२०] ति० टी०–आज्ञातुमाज्ञापयितुम् । सीता संभाषितेत्यनेन सापराधग्रहस्त्वं बोधितम् ॥ २० ॥

रा० टी०–तस्येति । येन सीता संभाषिता वनंच विनाशितं तस्योग्रं दण्डमाज्ञातुमर्हसि ॥ २० ॥

गो० टी०–तस्येति । हे उग्र ! त्वम् आज्ञातुम् आज्ञापयितुम् ॥ २०—२१ ॥

२१] ति० टी०–तद्भाषणस्यापराधत्वमुपपादयति—मन इति । त्यक्तजीवितस्त्यक्तजीविताशः । राजपरिग्रहभाषणं पुंसोऽपराध इति भावः ॥ २१ ॥

रा० टी०–मन इति । तव मनःपरिगृहीतां मनसा निरुद्धां तां सीतां यस्त्यक्तजीवितो न स्यात् स कोऽभिभाषेत न कोऽपीत्यर्थः ॥ २१ ॥

२२–२४] ति० टी०–संवर्तिते विवर्तिते ईक्षणे नेत्रे येन सः ॥ २२–२४ ॥

रा० टी०–राक्षसीनामिति । कोपेन संवर्तिते आघूर्णिते ईक्षणे यस्य स रावणः चिताग्निरिव जज्वाल ॥ २२ ॥

रा० टी०–तस्येति । अश्रुबिन्दवः सार्चिषो ज्वालासहिताः स्नेहबिन्दवः इव प्रापतन् ॥ २३ ॥

रा० टी०–आत्मन इति । हनूमतो निग्रहार्थं किंकरान् नाम किङ्करनामकान् राक्षसान् व्यादिदेश ॥ २४ ॥

गो० टी०–राक्षसीनामिति । संवर्तितेक्षणः परिवर्तितेक्षणः ॥ २२–२३ ॥

गो० टी०–आत्मन इति । नाम प्रसिद्धौ । किंकरानिति प्रसिद्धानित्यर्थः ॥ २४ ॥

२५–२६] ति० टी०–अशीतेः साहस्रम् स्वार्थेऽण् । कूटोऽयस्कारः कूटसदृशाय आयुधविशेषः ॥ २५ ॥ २६ ॥

रा० टी०–तेषामिति । किङ्कराणां मध्ये अशीतिसाहस्रं किङ्करास्तस्मात् भवनात् निर्ययुः ॥ २५ ॥

रा० टी०–महोदरा इति । निर्गताः सर्वे किङ्कराः युद्धाभिमनसो बभूवुरिति शेषः ॥ २६ ॥

गो० टी०–किंकराणां संख्यां निर्दिशति–तेषामिति॥२५

गो० टी०–निर्ययुरिति । सर्व इति विशेष्यम् । कूटो नाम अयस्कारकूटसदृश आयुधविशेषः । मुद्गरः दुघणः ॥२६॥

२७] ति० टी०–अवस्थितं युद्धाय संनद्धम् ॥ २७ ॥

रा० टी०–ते इति । ते किङ्करा अवस्थितं सावधानं तोरणस्थं कपिं समासाद्य समीपमागत्य पावकं पतङ्गा इव अभिपेतुः ॥ २७ ॥

गो०टी०–त इति । अवस्थितं युद्धाय सन्नद्धमित्यर्थः २७

२८–२९]ति० टी०–काञ्चनाङ्गदैः काञ्चनपट्टबन्धैः२८-२९

रा० टी०–ते इति । ते किङ्कराः गदाभिः काञ्चनाङ्गदैः काञ्चनपट्टबद्धैः परिघैश्च शरैश्च आजघ्नुः ॥ २८ ॥

रा० टी०–मुद्गरैरिति । मुद्गरादिभिरुपलक्षिताः प्रासतोमरपाणयः किङ्कराः हनूमन्तं परिवार्य अग्रतस्तस्थुः ॥ २९ ॥

गो० टी०–ते गदाभिरिति । परिघैः परिघपातनैः काञ्चनाङ्गदैः काञ्चनपट्टैः ॥ २८ ॥

गो० टी०–मुद्गरैरिति । पट्टिशो नाम लोहदण्ड. तीक्ष्णधारः क्षुरोपम आयुधविशेषः अत्रेत्थंभूतलक्षणे तृतीया । प्रासः कुन्तः तोमरः आयुधविशेषः ॥ २९ ॥

३०–३१] ति० टी०–क्षितावाविध्य । लाङ्गूलमिति स्वभावोक्तिरलंकारः ॥ ३० ॥ ३१ ॥

१ उग्र त्वमिति गो. पाठः । २ तद्वनं चेति गो. पाठः । ३ हुताग्निरिति गो. पाठः । ४ अस्रेति गो. पाठः । ५ शूरानिति गो. पाठः । ६ कपीन्द्रमिति गो. पाठः । ७ वेगा इति गो. पाठः । ८ जघ्नुरिति गो. रा. पाठः । ९ शक्तिभिरिति गो. पाठः । १० स्वनमिति गो. पाठः । ११ स्विति गो. पाठः । १२ धृष्टमिति गो. पाठः ।

तस्यास्फोटितशब्देन महता चानुनादिना[1] । पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयत् ॥ ३२ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ३३ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः । हनूमान्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ३४ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् । शिलाभिश्च प्रहरतः पादपैश्च सहस्रशः ॥ ३५ ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् । समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ३६ ॥
तस्य संनादशब्देन तेऽभवन्भयशङ्किताः । ददृशुश्च हनूमन्तं संध्यामेघमिवोन्नतम् ॥ ३७ ॥
स्वामिसंदेशनिःशङ्कास्ततस्ते राक्षसाः कपिम् । चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ ३८ ॥
स तैः परिवृतः शूरैः सर्वतः स महाबलः । आससादायसं भीमं परिघं तोरणाश्रितम् ॥ ३९ ॥
स तं परिघमादाय जघान रजनीचरान् । सपन्नगमिवादाय स्फुरन्तं विनतासुतः ॥ ४० ॥

रा० टी०-हनुमानिति । लाङ्गूलं क्षितावाविध्य उच्चैः पातयित्वा महास्वनं यथा भवति तथा ननाद ॥ ३० ॥

रा० टी०-स इति । शब्देन लङ्कां पूरयन् सन् पुच्छमास्फोटयामास प्राधुनोत् ॥ ३१ ॥

गो० टी०-हनुमानिति । श्रीमानिति तात्कालिकहर्षकृतकान्तिरुच्यते ॥ ३० ॥

गो० टी०-स इति । धृष्टमिति क्रियाविशेषणम् ॥ ३१ ॥

३२] ति० टी०-अनुनादिना प्रतिध्वनिमता ॥ ३२ ॥

रा० टी०-तस्येति । अनुनादिना प्रतिध्वनिकारकेण आस्फोटितशब्देन आस्फोटनजनितत्वेन विहङ्गाः पेतुः इदं वक्ष्यमाणमुच्चैरघोषयत् स्वाभाविकोच्चारणेनापूरयत् हनुमानिति शेषः ॥ ३२ ॥

गो० टी०-तस्येत्यादि । सानुनादिना सप्रतिध्वनिना यद्वा अनुनादिनः पर्वतगुहादय तत्सहितेन यद्वा सानुषु प्रतिध्वनिं कुर्वता उच्चैश्चेदमघोषयदिति । स हनुमान् इदं वक्ष्यमाणं वचनमुच्चैरघोषयत् ॥ ३२ ॥

३३-३४]ति०टी०-जयति सर्वोत्कर्षेण वर्तते॥३३॥३४॥

रा० टी०-घोषणाकारमाह—जयतीत्यादिचतुर्भिः । रामादिर्जयति ॥ ३३ ॥

रा० टी०-ननु कोऽसीत्यत आह—दास इति । रामस्य दासः शत्रुसैन्यानां निहन्ता हनुमानहमस्मि ॥ ३४ ॥

गो० टी०-घोषणवचनमाह—जयतीत्यादि । अभिपालितः वालिवधेन । अक्लिष्टकर्मण इत्यनेन स्वदास्यं न कर्मकृतं किन्तु स्वरूपप्रयुक्तमित्युच्यते । प्रतिबलं समानबलम् । प्रहरतः राक्षसानिति शेषः । प्रहारमात्रेण वा हनुमद्विशेषणम् । अर्दयित्वेति । मिषतां पश्यताम् अनादरे षष्ठी ॥ ३३-३६ ॥

३५] ति० टी०-प्रतिबलं प्रतिस्पर्धार्हबलवत् ॥ ३५ ॥

रा० टी०-ननु रावणस्यातिबलत्वत्वादिह तव का शक्तिरित्यत आह-नेति । सहस्रशः शिलादिभिः प्रहरतो मे युद्धे रावणसहस्रं प्रतिबलं प्रतियोद्धा न भवेत् ॥ ३५ ॥

३६] ति० टी०-मिषतामित्यनादरे षष्ठी ॥ ३६ ॥

रा० टी०-अर्दयित्वेति । लङ्कामर्दयित्वा मैथिलीमभिवाद्य प्रणम्य समृद्धार्थः सिद्धप्रयोजनोऽहं सर्वरक्षसां मिषतामवलोकयतां सतां गमिष्यामि रामसमीपमिति शेषः, अनादरद्योतिका षष्ठी ॥ ३६ ॥

३७] ति० टी०-संनादशब्देनास्फोटशब्दजप्रतिध्वनिना सिंहनादेन च ॥ ३७ ॥

रा० टी०-तस्येति । तस्य हनूमतः सन्नादशब्देन पूरितत्वेन ते राक्षसाः भयशङ्किता अभवन् उन्नतं संध्यामेघमिव हनूमन्तं ददृशुश्च ॥ ३७ ॥

गो० टी०-तस्येति । संध्यामेघमिवेति रक्तवर्णत्वात् ३७

३८] ति० टी०-स्वामिनो रामस्य संदेशेन नामग्रहणेन कस्यायं भट इति संदेहरहिताः । किं च स्वामिसंदेशेन रावणाज्ञयातिघोरेणाप्यनेन योद्धव्यमेवेति निश्चयात्पक्षान्तरशङ्कारहिताः प्रहरणैरायुधैरभिपेतुः प्राहरन्नित्यर्थः ॥ ३८ ॥

रा० टी०-स्वामीति । स्वामिसंदेशेन जयतीत्यादिना रामनामोच्चारणेन निर्गता शङ्का कोऽयमिति संशयो येषां किंच रावणाज्ञया युद्धविषयकशङ्कारहिताः चित्रैरनेकविधैः प्रहरणैरुपलक्षिता राक्षसाः अभिपेतुः ॥ ३८ ॥

गो० टी०-स्वामिसंदेशेति । ततस्तत इति । अनेनास्य समीपं सहसा गन्तुमशक्या इत्यवगम्यते ॥ ३८ ॥ ३९ ॥

३९] ति०टी०-तोरणाश्रितं तोरणसमीपे स्थापितम्॥३९॥

रा० टी०-स इति । तैः राक्षसैः सर्वतः परिवृतः स हनूमान् तोरणाश्रितं बहिर्द्वारे संस्थापितमायसं परिघमाससाद जग्राह ॥ ३९ ॥

४०] ति० टी०-स प्रसिद्धो विनतासुतः पन्नगमादायेव स हनूमांस्तं परिघमादायेति योजना ॥ ४० ॥

रा० टी०-स इति । स प्रसिद्धो हनूमान् विनतासुतो गरुडः पन्नगमिव परिघमादाय रजनीचरान् जघान ॥ ४० ॥

गो० टी०-स पन्नगमिति । सपरिघत्वमात्रे दृष्टान्तः ।

---

१ सानुनादिनेति गो. पाठः । २ त्विति गो. पाठः ।

विचचाराम्बरे वीरः परिगृह्य च मारुतिः । सूदयामास वज्रेण दैत्यानिव सहस्रदृक् ॥ ४१ ॥
स हत्वा राक्षसान्वीरः किंकरान्मारुतात्मजः । युद्धाकाङ्क्षी महावीरस्तोरणं समवस्थितः ॥ ४२ ॥
ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः । निहतान्किंकरान्सर्वान्रावणाय न्यवेदयन् ॥ ४३ ॥
स राक्षसानां निहतं महाबलं निशम्य राजा परिवृत्तलोचनः ।
समादिदेशाप्रतिमं पराक्रमे प्रहस्तपुत्रं समरे सुदुर्जयम् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ।

रावणप्रेषितान्किंकरान्हत्वा चैत्यप्रासादमदृष्टं मन्यमानस्तद्भंसार्थं कृतोद्योगस्तमारुह्य तत्पालान्स्वहननोद्यतान्हत्वा रामनामगर्जनपूर्वकं स्वपराक्रमं प्रकटयंश्चैत्यस्तम्भमुत्पाट्य भ्रामयंस्तज्जनिताग्निना प्रासादं दग्ध्वान्तरिक्षगतोऽचिरेणेयं पुरी यूयं च नमविष्यथेत्यब्रवीत् ॥

ततः स किंकरान्हत्वा हनूमान्व्यायाममास्थितः । वनं भग्नं मया चैत्यप्रासादो न विनाशितः ॥ १ ॥
तस्मात्प्रासादमद्यैवमिमं विध्वंसयाम्यहम् । इति संचिन्त्य हनुमान्मनसा दर्शयन्बलम् ॥ २ ॥
चैत्यप्रासादमुत्प्लुत्य मेरुशृङ्गमिवोन्नतम् । आरुरोह हरिश्रेष्ठो हनूमान्मारुतात्मजः ॥ ३ ॥
आरुह्य गिरिसंकाशं प्रासादं हरियूथपः । बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः ॥ ४ ॥

परिगृह्य परिघमिति शेषः । स्फुरन्तं पन्नगमादाय विनतासुत इव स वीरो मारुतिः परिघं परिगृह्याम्बरे विचचारेति संबन्धः ॥ ४०—४१ ॥

४१-४२] ति० टी०-परिगृह्य परिघमिति शेषः ॥ ४१ ॥ ४२ ॥

रा० टी०-विचचारेति । वज्रेण दैत्यान् सहस्रदृगिन्द्र इव सूदयामास जघान राक्षसानिति शेषः ॥ ४१ ॥

रा० टी०-स इति । स हनुमान् राक्षसान् हत्वा युद्धाकाङ्क्षी सन् तोरणं समवस्थितः ॥ ४२ ॥

४३] ति० टी०-कतिचिद्धतावशेषा द्वित्राः ॥ ४३ ॥

रा० टी०-तत इति । भयात् मरणात् मुक्ताः कथञ्चिदवशिष्टाः कतिचित् राक्षसाः निहतान् किङ्करान् रावणाय न्यवेदयत् ॥ ४३ ॥

गो० टी०-तत इति । तस्मात् भयान्मुक्ताः दूरस्था इत्यर्थः ॥ ४२ ॥ ४३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

४४] ति० टी०-प्रहस्तपुत्रो जम्बुमाली ॥ ४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रा० टी०-स इति । स रावणः निहतं राक्षसानां बलं निशम्य परिवृत्तलोचनः सन् प्रहस्तपुत्रं समादिदेश ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१] ति० टी०-अथ रावणसंदिष्टसेनान्तरागमनात्पूर्वं तूष्णीं स्थित्वा न किंचित्प्रयोजनमिति विचार्य प्रासादभङ्गादि चिकीर्षति—तत इति । ध्यानं विचारः । चैत्यप्रासादो रक्षःकुलदेवताप्रासादः

२] ति० टी०-एवं प्रमदवनवत् ॥ २ ॥

रा० टी०-किंकराभिधराक्षसविध्वंसानन्तरकालिकं हनुमद्वृत्तान्तमाह-तत इत्यादिभिः । किंकरान् हत्वा ध्यानं विचारमास्थितः विचाराकारमाह-मया वनं भग्नं चैत्यप्रासादः राक्षसकुलदेवताधिष्ठानीभूतप्रासादविशेषः न विनाशितः तस्मात् बलं स्वपराक्रमं दर्शयन् सन् इमं प्रासादमपि विध्वंसयामि इति अनेन प्रकारेण मनसा संचिन्त्य अवर्ततेति शेषः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०-ततः स किंकरानित्यादि ॥ १ ॥

गो० टी०-वनमित्यादि । ध्वंसनफलमाह-दर्शयन् बलमिति । बलदर्शनार्थमित्यर्थः ॥ २ ॥

३-४] ति० टी०-प्रासादमुत्प्लुत्यारुरोह ॥ ३ ॥ ४ ॥

रा० टी०-चैत्येति । हनुमानुत्प्लुत्य मेरुशृङ्गमिवोन्नतं चैत्यप्रासादमारुरोह ॥ ३ ॥

रा० टी०-आरुह्येति । प्रासादमारुह्य उदितः प्रतिसूर्य इव हरियूथपो बभौ ॥ ४ ॥

गो० टी०-ध्वंसनप्रकारमाह—चैत्येति । चैत्यं देवायतनम् तद्रूपः प्रासादः चैत्यप्रासादः तम् । आप्लुत्य तोरणाल्लङ्घयित्वा । हरिश्रेष्ठो हनुमान् मारुतात्मज इत्यस्योत्तरश्लोकेनान्वयः । हरियूथपत्वेऽप्यहरिर्भविष्यतीति तद्व्यावृत्त्यर्थं हरि-

---

१ अर्धमेतत् गो. नास्ति । २ पुनरिति गो. पाठः । ३ समुपाश्रित इति गो. पाठः । ४ स्थानमाश्रित इति गो. पाठः । ५ आप्लुत्येति गो. पाठः ।

संप्रधृष्य तु दुर्धर्षश्चैत्यप्रासादमुन्नतम् । हनूमान्प्रज्वलँल्लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ५ ॥
स भूत्वा सुमहाकायः प्रभावान्मारुतात्मजः । धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ६ ॥
तस्यास्फोटितशब्देन महता श्रोत्रघातिना । पेतुर्विहङ्गमास्तत्र चैत्यपालाश्च मोहिताः ॥ ७ ॥
अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ८ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः । हनूमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ९ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् । शिलाभिश्च प्रहरतः पादपैश्च सहस्रशः ॥ १० ॥
धर्षयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् । समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥ ११ ॥
एवमुक्त्वा महाकायश्चैत्यस्थो हरियूथपः । ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् ॥ १२ ॥
तेन नादेन महता चैत्यपालाः शतं ययुः । गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परश्वधान्॥ १३ ॥
विसृजन्तो महाकाया मारुतिं पर्यवारयन् । ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ १४ ॥
आजग्मुर्वानरश्रेष्ठं बाणैश्चादित्यसंनिभैः । आवर्त इव गङ्गायास्तोयस्य विपुलो महान् ॥ १५ ॥
परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः । ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १६ ॥
प्रासादस्य महांस्तस्य स्तम्भं हेमपरिष्कृतम् । उत्पाटयित्वा वेगेन हनूमान्मारुतात्मजः ॥ १७ ॥
ततस्तं भ्रामयामास शतधारं महाबलः । तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत ॥ १८ ॥

श्रेष्ठ इत्युक्तम् । प्रतिसूर्यः द्वितीयसूर्य इत्यर्थः । अनेन सूर्योदयः सूचितः ॥ ३ ॥ ४ ॥

५] ति० टी०–संप्रधृष्य भङ्क्त्वा । पारियात्रः पर्वतविशेषः । औन्नत्यं साधारणो धर्मः ॥ ५ ॥

रा० टी०–समिति । चैत्यप्रासादं संप्रधृष्य पराभवं प्रापय्य लक्ष्म्या स्वविजयसंपत्त्या प्रज्वलन् हनुमान् पारियात्रोपम कुलाचलसदृशः अभवत् ॥ ५ ॥

गो० टी०–संप्रधृष्येति । संप्रधृष्य आक्रम्य । पारियात्रो नाम कुलपर्वतः ॥ ५—७ ॥

६] ति० टी०–धृष्टं निर्भयम् ॥ ६ ॥

रा० टी०–स इति । प्रभावात् स्वमहिमातिशयात् महाकायो भूत्वा शब्देन लङ्कां पूरयन् सन् धृष्टं यथा भवति तथा आस्फोटयामास चैत्यं प्रासादं विदारयामास ॥ ६ ॥

७–१२] ति० टी०–विहंगाश्चैत्यपालाश्च मोहिताः पेतुः ॥ ७–१२ ॥

रा० टी०–तस्येति । श्रोत्रघातिना तस्य प्रासादस्य स्फोटितशब्देन विमोहिता विहङ्गमाश्चैत्यपालाश्च पेतुः पृथिव्यामिति शेषः ॥ ७ ॥

रा० टी०–अस्त्रविदिति । अस्त्रवित् रामादिर्जयताम् इत्याद्येवमुक्त्वा चैत्यस्थः हनुमान् रक्षसां भयं जनयन् सन् ननाद । श्लोकपञ्चकमेकान्वयि ॥ ८–१२ ॥

गो० टी०–अस्त्रविज्जयतामित्यादि । चैत्यस्थान् चैत्यपालान् ॥ ८—१६ ॥

१३–१५] ति० टी०–शतं ययुः । अनेके इत्यर्थः१३–१५

रा० टी०–तेनेति । तेन शब्देन हेतुना विविधान् अस्त्रादीन् गृहीत्वा विसृजन्तः सन्तः महाकायाः शतं चैत्यपाला ययुः मारुतिं पर्यवारयँश्च । सार्द्धश्लोक एकान्वयी ॥ १३ ॥

रा० टी०–ते इति । काञ्चनाङ्गदैः काञ्चनपट्टाटत्तैः परिघैः वानरश्रेष्ठम् आजघ्नुः । अर्धद्वयमेकान्वयि ॥ १४ ॥

रा० टी०–आवर्त इति । गङ्गायाः तोयस्य महान् आवर्त इव विपुलो रक्षसां गणः हरिश्रेष्ठं परिक्षिप्य गदादिभिः संताड्य बभौ ॥ १५ ॥

१६] ति० टी०–परिक्षिप्येत्यंशे तोयस्यावर्त इवेति दृष्टान्तः ॥ १६ ॥

रा० टी०–तत इति । ततोऽनन्तरं वातात्मजः क्रुद्धोऽभवदिति शेषः । अर्धं पृथक् ॥ १६ ॥

१७] ति० टी०–महान्मारुतात्मज इत्यन्वयः ॥ १७ ॥

रा० टी०–प्रासादस्येति । महान् हनुमान् शतधारं तं प्रसिद्धं प्रासादस्य स्तम्भं वेगेन उत्पाटयित्वा उत्पाट्य भ्रामयामास तत्र तस्मिन् स्तम्भे अग्निः समभवत् अत एव प्रासादोऽदह्यत । श्लोकद्वयमेकान्वयि ॥ १७–१८ ॥

गो० टी०–प्रासादस्येति । पवनात्मजः भ्रामयामासेत्यन्वयः । शतधारं धारा कोटिः । वज्रवत् स्थितमित्यर्थः । यद्वा शतधा अरमिति च्छेदः । अरं शीघ्रम् ॥ १७ ॥

१८] ति० टी०–उत्पाटयित्वा तं शतधारं स्तम्भं भ्राम-

---

१ च दुर्धर्षमिति गो. पाठः । २ उत्तममिति गो. रा. पाठः । ३ त्विति गो. पाठः । ४ शब्देनेति गो. पाठः । ५ जघ्नुरिति गो. रा. पाठः । ६ महान्तस्येति गो. पाठः । ७ पवनेति गो. पाठः ।

दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः । स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् ॥ १९ ॥
[1]अन्तरिक्षस्थितः श्रीमानिदं वचनमब्रवीत् । मादृशानां सहस्राणि विसृष्टानि महात्मनाम् ॥ २० ॥
बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् । अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः । केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २२ ॥
सन्ति चौघबलाः केचित्सन्ति वायुबलोपमाः । अप्रमेयबलाः [2]केचित्तत्रासन्हरियूथपाः ॥ २३ ॥
ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः । शतैः शतसहस्रैश्च कोटिभिश्चायुतैरपि ॥ २४ ॥
आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः । नेयमस्ति पुरी लङ्का न यूयं न च रावणः ॥
[3]यस्य त्विक्ष्वाकुवीरेण [4]वद्धं वैरं महात्मना ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ।

रावणेन हनूमन्निग्रहार्थं प्रेषितस्य जम्बुमालिनो हनूमता युद्धे वधः ॥

संदिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली । जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥
रक्तमाल्याम्बरधरः स्रग्वी रुचिरकुण्डलः । महान्विवृत्तनयनश्चण्डः समरदुर्जयः ॥ २ ॥

यामास । तत्र च भ्राम्यमाणे स्तम्भान्तरेण घट्टनवशादग्निः समभवत्तेन प्रासादश्चाप्यदह्यत ॥ १८ ॥

गो० टी०–तत्रेति । अग्निः समभवत् । भ्रामितस्तम्भैः स्तम्भान्तरसंघट्टनादिति भावः ॥ १८ ॥ १९ ॥

१९–२०]ति० टी०–ततः स राक्षसशतं हत्वा दह्यमानं प्रासादं दृष्ट्वा चान्तरिक्षे स्थित इदं वचोऽब्रवीत् ॥ १९ ॥ २० ॥

रा० टी०–दह्यमान इति । स हनूमान् प्रासादं दह्यमानं दृष्ट्वा वज्रेण असुरान् इन्द्र इव राक्षसशतं हत्वा अन्तरिक्षस्थितः सन् इदमब्रवीत् । सार्द्धश्लोक एकान्वयी ॥ १९ ॥

रा० टी०–तद्वचनाकारमाह–मादृशानामित्यादिभिः । मादृशानां वानरेन्द्राणां सहस्राणि विसृष्टानि सुग्रीवेण प्रेषितानि सन्तीति शेषः अत एव अन्ये अस्मद्भिन्नाः वसुधामटन्ति वयं च अटामः सार्धश्लोक एकान्वयी ॥ २० ॥ २१ ॥

गो० टी०–राक्षसानामुत्साहभङ्गं कारयितुमाह–मादृशा नामित्यादि ॥ २०–२२ ॥

२१–२२] ति० टी०–एतदुक्तिप्रयोजनं च राक्षसहृदयपीडा ॥ २१ ॥ २२ ॥

रा० टी०–दशेति । केचिद्दशनागबलाः सन्तीति शेषः केचित् नागसहस्रस्य तुल्यबलविक्रमाः बभूवुः ॥ २२ ॥

२३–२५] ति० टी०–ओघबला ओघसंख्यातगजबलाः ॥ २३–२५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०–सन्तीति । केचिदोघबलाः ओघसंख्याकगजबलसदृशबलवन्तः सन्ति ॥ २३ ॥

रा० टी०–ईदृगिति । इदृग्विधैः शतादिसंख्याकैः हरिभिः सह वो युष्माकं निषूदनः सुग्रीवः आगमिष्यति । सार्धश्लोक एकान्वयी ॥ २४ ॥

रा० टी०–नेति । इक्ष्वाकुवीरेण महात्मना यस्येदं वैरं बद्धं प्रबद्धं तस्य इयं पुरी लङ्का नास्ति नङ्क्ष्यतीत्यर्थः यूयं न रावणश्च न । अर्धद्वयमेकान्वयि ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०–ओघबलाः ओघाख्यसंख्याकबलाः ॥२३–२५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

१–२] ति० टी०–अथ जम्बुमाल्यागमनं तद्वधश्च—संदिष्ट इति ॥ १ ॥ २ ॥

१ अन्तरिक्षे इति गो. पाठः । २ चान्ये इति गो. पाठः । ३ यस्मादिति गो. पाठः । ४ नाथेनेति गो. पाठः

धनुः शक्रधनुःप्रख्यं महद्दुचिरसायकम् । विस्फारयाणो वेगेन वज्राशनिसमस्वनम् ॥ ३ ॥
तस्य विस्फारघोषेण धनुषो महता दिशः । प्रदिशश्च नभश्चैव सहसा समपूर्यत ॥ ४ ॥
रथेन खरयुक्तेन तमागतमुदीक्ष्य सः । हनूमान्वेगसंपन्नो जहर्ष च ननाद च ॥ ५ ॥
तं तोरणविटङ्कस्थं हनूमन्तं महाकपिम् । जम्बुमाली महातेजा विव्याध निशितैः शरैः ॥ ६ ॥
अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना । बाह्वोर्विव्याध नाराचैर्दशभिस्तु कपीश्वरम् ॥ ७ ॥
तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् । शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना ॥ ८ ॥
तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् । यथाकाशे महापद्मं सिक्तं काञ्चनबिन्दुभिः ॥ ९ ॥
चुकोप बाणाभिहतो राक्षसस्य महाकपिः । ततः पार्श्वेऽतिविपुलां ददर्श महतीं शिलाम् ॥ १० ॥
तरसा तां समुत्पाट्य चिक्षेप जवबद्बली । तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ॥ ११ ॥

३] ति० टी०–धनुर्विस्फारयाणो विस्फारयमाणः विस्फारो ज्याघोषः ॥ ३ ॥

रा० टी०–रावणप्रेषितप्रहस्तपुत्रवृत्तान्तमाह—संदिष्ट इत्यादिभिः । राक्षसेन्द्रेण संदिष्टः रक्तमाल्याम्बरधरः रुचिराः सायका यस्मिन् तत् शक्रधनुःप्रख्यं धनुर्विस्फारयाणः प्रहस्तस्य सुतो धनुर्धरोऽनेकधनुर्धरविशिष्टो जम्बुमाली निर्जगाम । श्लोकत्रयमेकान्वयि ॥ १–३ ॥

गो० टी०–संदिष्ट इत्यादि । विघट्टनयनः मण्डलीकृतनयनः । रुचिरसायकं रुचिरसायकार्हम् । विस्फारयानः विस्फारयमाणः ज्याकर्षणं कुर्वन्नित्यर्थः । वज्राशनिसमस्वनमिति विस्फारणक्रियाविशेषणम् ॥ १–३ ॥

४]ति०टी०–समपूर्यत दिगादिसमुदायापेक्षमेकवचनम्॥४॥

रा० टी०–तस्येति । तस्य जम्बुमालिनो धनुषो महता विस्तारघोषेण दिक्प्रभृतिः समपूर्यत अन्यत्र वचनविपरिणामेनान्वयः ॥ ४ ॥

गो० टी०–तस्येति । नभः समपूर्यत दिशः प्रादेशश्च समपूर्यन्तेति विभक्तिविपरिणामेनानुषङ्गः ॥ ४ ॥ ५ ॥

५] ति० टी०– जहर्ष स्वबलानुरूपशत्रुप्राप्त्या ॥ ५ ॥

रा० टी०–रथेनेति । खरयुक्तेन रथेनागतं तं जम्बुमालिनमुदीक्ष्य स हनुमान् जहर्ष ननाद च ॥ ५ ॥

६] ति० टी०–तोरणविटङ्कस्तोरणस्तम्भयोरुपरितिर्यक्प्रतिष्ठापितकपोतपालिकादारु ॥ ६ ॥

रा० टी०–तमिति । तोरणविटङ्कस्थं तोरणविटङ्कः तोरणस्तम्भयोरुपरि तिर्यक्प्रतिष्ठापितकपोतपालिकाकाष्ठं तत्स्थं हनूमन्तं निशितैः शरैः जम्बुमाली विव्याध ॥ ६ ॥

गो० टी०–तमिति । तोरणविटङ्कं तोरणस्य कपोतपालिका । कपोतपालिकायां तु विटङ्कं पुन्नपुंसकमित्यमरः । स्तम्भोपरि तिर्यङ्निहितदार्वित्यर्थः ॥ ६ ॥

७] ति० टी०–कर्ण्यङ्कुशाकाराग्रशरविशेषः ॥ ७ ॥

रा०टी०–तदाकारमाह—अर्धेति । अर्धचन्द्रेण अर्धचन्द्राकारशरविशेषेण वदने एकेन कर्णिना अङ्कुशाकाराग्रभागकशरविशेषेण शिरसि दशभिर्नाराचैः शरविशेषैर्बाह्वोः कपीश्वरं विव्याध ॥ ७ ॥

गो० टी०–अर्धचन्द्रेणेति । एकेनेत्येतदर्धचन्द्रस्यापि विशेषणम् । अर्धचन्द्राकाराग्रशरेणेत्यर्थः कर्णिना कर्णवच्छरेण ॥ ७ ॥

८] ति० टी०–अम्बुजं रक्ताम्बुजम् ॥ ८ ॥

रा० टी०–तस्येति । शरेण अभिहतं तस्य हनूमतस्ताम्रं मुखं भास्कररश्मिना सूर्यकिरणेन विद्धं विकाशितं फुल्लमम्बुजमिव शुशुभे ॥ ८ ॥

गो० टी०–तस्येति । अम्बुजं रक्तपद्मम् । भास्कररश्मिना विद्धम् अत एव फुल्लमित्यर्थः ॥ ८ ॥

९–१०] ति० टी०–तत्तस्य रक्तम् । स्वत इति शेषः । रक्तेन क्षतजेन रञ्जितं मुखमाकाशे काञ्चनबिन्दुभी रक्ताशोकपुष्परसबिन्दुभिः सिक्तं महापद्मं महत्तरं रक्तपद्ममिवेत्यभूतोपमेयम् । अशोकः काञ्चनाह्वयः ॥ ९ ॥ १० ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–तदिति । रक्तेन रुधिरेण रञ्जितम् अत एव रक्तमत्यरुणं तस्य मुखं काञ्चनबिन्दुभिः सिक्तम् आकाशे महापद्ममिव शुशुभे ॥ ९ ॥

रा० टी०–चुकोपेति । राक्षसस्य बाणाभिहतो महाकपिः चुकोप पार्श्वे स्थितां अतिविपुलां विशालां महतीं गुर्वीं शिलां ददर्श च ॥ १० ॥

गो० टी०–तत्तस्येति । रक्तं स्वत एव रक्तम् । रक्तेन शोणितेन । महापद्मं रक्तोत्पलम् । चन्दनबिन्दुभिः रक्तचन्दनबिन्दुभिः ॥ ९ ॥

गो० टी०–चुकोपेत्यर्धम् । राक्षसस्य राक्षसविषये ॥ १०–१३ ॥

११] ति० टी०–ताडयामास बिभेद ॥ ११ ॥

रा० टी०–तरसेति । जववान् अतिवेगवान् स एव-

१ बाहुरिति गो. पाठः । २ तमिति गो. पाठः । ३ चन्दनेति गो. पाठः । ४ बलवदिति गो. पाठः

ततस्तेष्ववपन्नेषु भूमौ निपतितेषु च । तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितम् ॥ १४ ॥
विनेदुर्विस्वरं नागा निपेतुर्भुवि वाजिनः । भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाभवद्रथैः ॥ १५ ॥
स्रवता रुधिरेणाथ स्रवन्त्यो दर्शिताः पथि । विविधैश्च स्वनैर्लङ्का ननाद विकृतं तदा ॥ १६ ॥
स तान्प्रवृद्धान्विनिहत्य राक्षसान्महाबलश्चण्डपराक्रमः कपिः ।
युयुत्सुरन्यैः पुनरेव राक्षसैस्तदेव वीरोऽभिजगाम तोरणम् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।

ततः पञ्च सेनापतीन् रावणप्रेषितान्हत्वा हनूमान् पुनश्च तदेव तोरणमधिशिश्ये ॥

हतान्मन्त्रिसुतान्बुद्ध्वा वानरेण महात्मना । रावणः संवृताकारश्चकार मतिमुत्तमाम् ॥ १ ॥
स विरूपाक्षयूपाक्षौ दुर्धर्षं[2] चैव राक्षसम् । प्रघसं भासकर्णं च पञ्चसेनाग्रनायकान् ॥ २ ॥
संदिदेश दशग्रीवो वीरान्नयविशारदान् । हनूमद्ग्रहणे व्यग्रान्वायुवेगसमान्युधि[3] ॥ ३ ॥

रा० टी०–स इति । स प्रसिद्धो हनुमान् महाचमूं त्रासयन् सन् तेषु रक्षःसु वेगं चकार ॥ ११ ॥

रा० टी०–तलेनेति । परंतपो हनुमान् कांश्चित् राक्षसान् तलेन अभिहनत् अभ्यहन् कांश्चिच्च मुष्टिभिः अहनत् अहन् कांश्चित् नखैर्व्यदारयत् ॥ १२ ॥

रा० टी०–प्रममाथेति । कांश्चित् ऊरुभ्यां प्रममाथ केचिन्नादेन भुवि पतिताः ॥ १३ ॥

गो० टी०–स कृत्वेति । वेगं संहारोद्योगम् ॥ ११ ॥

गो० टी०–तलेनेति । पादैः कांश्चिदिति बहुवचनं वानराणां द्विपात्सु चतुष्पात्सु च ग्रहणात् ॥ १२–१४ ॥

१४] ति० टी०–भयार्दितं सदृश दिशो दुद्रावेति शेषः॥१४॥

रा० टी०–तत इति । तेषु अमात्यपुत्रेषु अवपन्नेषु विहिंसितेषु अत एव भूमौ निपतितेषु सत्सु तत्सैन्यं दशदिशोऽगमत् ॥ १४ ॥

१५] ति० टी०–नीडं रथस्थं रथ्याधिष्ठानस्थानम् ॥१५॥

रा० टी०–विनेदुरिति । नागाः गजाः विस्वरं यथा भवति तथा विनेदुः वाजिनो भुवि निपेतुः भग्नानि नीडध्वजच्छत्राणि येषां तैः रथैः कीर्णा व्याप्ता भूरभवत् तत्र नीडं रविस्थितिस्थानम् ॥ १५ ॥

गो० टी०–विनेदुरिति । नीडं ध्वजावयवविशेषणम् १५

१६–१७] ति० टी०–स्रवन्त्यो नद्यः । ननाद प्रतिध्वनिना रक्षोराक्षसीध्वनिना च ॥ १६ ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०–स्रवतेति । स्रवता प्रच्युतेन रुधिरेण स्रवन्त्यः नद्यः पथि दर्शिताः दृष्टाः रामो राज्यमचीकरदित्यादाविव णिच् । विविधैः स्वनैः राक्षसनादैः लङ्का विकृतं ननाद ॥१६॥

रा० टी०–स इति । महाबलः कपिः तान् राक्षसान् विनिहत्य अन्यैः पुनर्युयुत्सुः सन् तत् पूर्वमधिष्ठितं तोरणम् अभिजगाम ॥ १७ ॥

इति श्रीमद्वाल्मिकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

गो० टी०–स्रवतेति । स्रवन्त्यः नद्यः । विकृतं यथा तथा ननाद प्रतिध्वानवती बभूव ॥ १६ ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

१–२] ति० टी०–संवृताकारो निगृहीतान्तर्गतभयः । उत्तमां मतिं धैर्यविषयाम् ॥ १ ॥ २ ॥

३] ति० टी०–हनुमद्ग्रहणे संदिदेश । व्यग्रान्सर्वत्र कार्ये त्वरावतः ॥ ३ ॥

रा० टी०–मन्त्रिसुतवधानन्तरकालिकं रावणावृत्तान्तमाह–हतानित्यादिभिः । मन्त्रिसुतान्वानरेण हतान् बुद्ध्वा संवृतः आच्छादितः आकारः पूर्वाकृतियेन सः भीतियुक्ताकृतिविशिष्ट इत्यर्थः किंच संवृतः स्वीकृतः आकारः प्राप्तकिंचिद्भीतिहेतुकाकृतियेन स रावणः उत्तमां मतिं पुनर्युद्धनिश्चयमित्यर्थः चकार ॥ १ ॥

रा० टी०–स इति । सः कृतपुनर्युद्धनिश्चयो रावणः अव्यग्रान् धीरान् विरूपाक्षादीन् पञ्च सेनाग्रनायकान् हनुमद्ग्रहणे हनुमतो ग्रहणार्थं संदिदेश श्लोकद्वयमेकान्वयि ॥२॥३॥

१ सन्नेष्विति गो. पाठः । २ प्रधर्षमिति रा. पाठः । ३ ग्रहणव्यग्रानिति गो. पाठः ।

यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः । सवाजिरथमातङ्गाः स कपिः शास्यतामिति ॥ ४ ॥
यैश्चैश्च खलु भाव्यं स्यात्तमासाद्य वनालयम् । कर्म चापि समाधेयं देशकालाविरोधितम् ॥ ५ ॥
नह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् । सर्वथा तन्महद्भूतं महाबलपरिग्रहम् ॥ ६ ॥
वानरोऽयमिति ज्ञात्वा नहि शुद्ध्यति मे मनः । नैवाहं तं कपिं मन्ये यथेयं प्रस्तुता कथा ॥ ७ ॥
भवेदिन्द्रेण वा सृष्टमस्मदर्थं तपोबलात् । सनागयक्षगन्धर्वदेवासुरमहर्षयः ॥ ८ ॥
युष्माभिः प्रहितैः सर्वैर्मया सह विनिर्जिताः । तैरवश्यं विधातव्यं व्यलीकं किंचिदेव नः ॥ ९ ॥
तदेव नात्र संदेहः प्रसह्य परिगृह्यताम् । यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः ॥ १० ॥
सवाजिरथमातङ्गाः स कपिः शास्यतामिति । नावमन्यो भवद्भिश्च कपिर्धीरपराक्रमः ॥ ११ ॥
दृष्टा हि हरयः शीघ्रं मया विपुलविक्रमाः । वाली च सह सुग्रीवो जाम्बवांश्च महाबलः ॥ १२ ॥
नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः । नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः ॥ १३ ॥

गो० टी०–हतानित्यादि । संहृताकारः अन्तर्मनाः मतिं चिन्ताम् ॥ १ ॥

गो० टी०–स इति ॥ २ ॥ ३ ॥

४] ति० टी०–यात गच्छत ॥ ४ ॥

रा० टी०–आज्ञापनप्रकारमाह—यातेत्यादिभिः इति । हे सेनाग्रगाः महाबलपरिग्रहाः बृहत्सैन्यपरीतारः वाज्यादिसहिताः सन्तो यूयं यात तत्प्रयोजनमाह कपिः शास्यतां निगृह्यतामित्यर्थः ॥ ४ ॥

गो० टी०–यातेत्यादि । इति वक्ष्यमाणप्रकारेण । तमेवाह–यत्तैरित्यादिना । यत्तैः यतमानैः अप्रमत्तैरिति यावत् यतेः कर्तरि क्तः । समाधेयं परिहर्तव्यम् । देशकालविरोधिनं देशकालविरोधीत्यर्थः । महद्भूतं मन्य इत्यनुषज्यते । इन्द्रेण वा अन्यैर्वेति शेषः । वाशब्दस्य विकल्पार्थस्य प्रयोगात् ॥४–६ ॥

५] ति० टी०–यत्तैः सावसानैः । किं चात्र देशकालविरोधि कर्म न कार्यमित्याह—देशकालाविरोधितं तदविरुद्धम् । तदुचितमिति यावत् । समाधेयं कार्यम् ॥ ५ ॥

रा० टी०–यत्नैरिति । वनालयं वानरमासाद्य यत्नैरितिप्रयत्नविशिष्टैर्भवद्भिर्भाव्यं स्यात् देशकालाविरोधितं देशायनुरोधीत्यर्थः कर्म समाधेयं च ॥ ५ ॥

६–७] ति० टी०–यत्तैर्भाव्यमित्यत्र हेतुमाह—नहीति । तस्य कर्मणा तं प्रति तर्कयंस्तं कपिं न मन्ये । किं तर्हि मन्यसे तत्राह—सर्वथेति ॥ ६ ॥ ७ ॥

रा० टी०–अतिप्रयत्नेन स्थितौ हेतुमाह–नहीति । महाबलपरिग्रहं तं हतसेनायाः परिग्राहकं विध्वंसकमित्यर्थः तं कर्मणा तत्क्रियया प्रतितर्कयन्नहं कपिं न मन्ये किंतु भूतमत्र प्राप्तं तत् सर्वथा महदतिश्रेष्ठं मन्ये ॥ ६ ॥

८] ति० टी०–महतो भूतस्येह कः प्रसङ्गस्तत्राह—भवेदिति । सनागेति नागादिसहिता देवादय इत्यर्थः ॥ ८ ॥

९] ति० टी०–प्रहितैः सर्वैर्युष्माभिः सह मया विनिर्जिताः, अतस्तैरवश्यं नोऽस्माकं किंचिद्व्यलीकमप्रियं विधातव्यं विधातुं प्राप्तकालम् ॥ ९ ॥

रा० टी०–ननु तर्हि कोऽयमित्यत आह–भवेदिति । अस्मदर्थम् अस्मद्विनाशार्थं तपोबलादिन्द्रेण सृष्टं भवेत् । अर्थं पृथक् । तत्र हेतुं वदन्नाह–सेति । ये नागादिसहिता महर्षयः मया प्रहितैः प्रेषितैर्युष्माभिः सह एककालावच्छेदेन विनिर्जिताः तैर्नोऽस्माकं किंचित् व्यलीकमप्रियमवश्यं विधातव्यम् । सार्धश्लोक एकान्वयी ॥ ७ ॥ ८ ॥

गो० टी०–सनागेति । व्यलीकम् अप्रियम् ॥ ७ ॥ ८ ॥

१०] ति० टी०–तस्मात्तदेव तत्सृष्टभूतमेव परिगृह्यतां बद्धानीयताम् ॥ १० ॥

११] ति० टी०–सवाजिरथेत्यादिपुनर्वचनं स्थैर्यार्थम् ॥ ११ ॥

रा० टी०–तदिति । तदिन्द्रसृष्टमेव अत्र संदेहो न अतो महाबलपरिग्रहाः अत एव सवाजिरथमातङ्गाः यूयं यात प्रसह्य हठात् परिगृह्यताम् नन्वेकाकिनस्तस्यार्थे किमर्थमेवं प्रेषणमित्यत आह–धीरपराक्रमः कपिर्भवद्भिर्नावमान्यः तुच्छबुद्धया नानादर्तव्यः एतेन तस्य महाबलत्वं सूचितम् श्लोकद्वयं संमिलितान्वयि ॥ ९ ॥ १० ॥

गा० टी०–नावमान्यो भवद्भिश्च हरिर्धीरपराक्रमः इति । अत्र त्रयोदशसहस्रश्लोका गताः । अयं चतुर्दशसहस्रस्यादिः । धीति गायत्र्या चतुर्दशाक्षरम् ॥ ९–१० ॥

१२] ति० टी०–सर्वथा महद्भूतमित्यत्र हेतुं निश्चायकमाह—दृष्टा इति ॥ १२ ॥

रा० टी०–ननु वानररूपे कथमेवं पराक्रम इत्यत आह दृष्टा इति । विपुलविक्रमाः बाल्यादयो हरयः मया पूर्वं दृष्टाः । सार्धश्लोक एकान्वयी ॥ ११ ॥

१३] ति० टी०–ननु त्वदृष्टान्यतम एवायम्, नेत्याह

१ यत्नैरिति. रा. पाठः । २ कालविरोधिनमिति गो. पाठः । ३ श्लोकोऽयं गो. रा. नास्ति । ४ गन्धर्वा इति गो. पाठः । ५ अर्धश्लोकं गो. नास्ति ६ पूर्वमिति गो. रा. पाठः । ७ नैवमिति गो. रा. पाठः ।

न मतिर्न बलोत्साहो न रूपपरिकल्पनम् । महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम् ॥ १४ ॥
प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः । कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः ॥ १५ ॥
भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे । तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे ॥ १६ ॥
आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला । ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ॥ १७ ॥
समुत्पेतुर्महावेगा हुताशसमतेजसः । रथैश्च मत्तैर्नागैश्च वाजिभिश्च महाजवैः ॥ १८ ॥
शस्त्रैश्च [2]निशितैस्तीक्ष्णैः सर्वैश्चोपहिता[3] बलैः । ततस्तु ददृशुर्वीरा दीप्यमानं महाकपिम् ॥ १९ ॥
रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम् । तोरणस्थं महावेगं महासत्त्वं महाबलम् ॥ २० ॥
महामतिं महोत्साहं महाकायं महाभुजम् । तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः ॥ २१ ॥
तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः । तस्य पञ्चायसास्तीक्ष्णाः [5]सिताः पीतमुखाः शराः ॥
शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः । ॥ २२ ॥
स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः । उत्पपात नदन्व्योम्नि दिशो दश विनादयन् ॥ २३ ॥
ततस्तु दुर्धरो वीरः सरथः सज्जकार्मुकः । किरञ्शरशतैर्नानैरभिपेदे महाबलः ॥ २४ ॥

नैवेति । यथास्य भीमा गतिः समुद्लवनरूपा तथा तेषां नैव । यथा चास्य तेजआदि तथा तेषां न ॥ १३ ॥

१४]ति०टी०–रूपपरिकल्पनं यथेप्सितरूपपरिग्रहः॥१४॥

रा० टी०–ननु तेषामेवायमन्यतमोऽस्तु नाहं कपिं मन्ये इति कथमुच्यते इत्यत आह–नेति । एवं एतादृग् गतिप्रभृतिरेतेषां न अत इदं महत् सत्त्वं विज्ञेयम् अतो महत्प्रयत्नमास्थाय अस्य निग्रहः क्रियताम् श्लोकद्वयमेकान्वयि ॥१२॥१३॥

गो० टी०–नैवं तेषामिति । गतिः वेगः रूपपरिकल्पनं यथेष्टरूपग्रहणम् । महदिति । इत्थं महत्सत्त्वं किमपि कपिरूपं सत् व्यवस्थितमिति ज्ञेयमित्यर्थः ॥ ११–१६ ॥

१५] ति० टी०–प्रयत्नमित्यार्षं क्लीबत्वम् । कामम् । यद्यपीत्यर्थः ॥ १५ ॥

रा० टी०–काममिति । यद्यपि भवतामग्रतोऽग्रे रणाजिरे स्थातुमिन्द्रादयो न पर्याप्तास्तथापि नयज्ञेन जनेन आत्मा प्रयत्नेन रक्ष्यः हि यतो युद्धसिद्धिः चञ्चला अव्यवस्थिता । श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

१६–१९] ति० टी०–नयज्ञेन नीतिज्ञेन । आत्मा स्वदेहः । युद्धसिद्धिर्युद्धे जयः ॥ १६–१९ ॥

रा० टी०–ते इति । स्वामिवचनं परिगृह्य रथादिभिरुपहिता युक्तास्ते सेनाग्रगाः समुत्पेतुः । श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

रा० टी०–तत इति । उद्यन्तं रश्मिमन्तं सूर्यमिव स्वतेजोरश्मिमालिनम् अत एव दीप्यमानं महाकपिं वीरा ददृशुः१८

गो० टी०–ततस्तमित्यादि । स्वतेजोरश्मिमालिनं स्वतेजसा सूर्यम् रश्मिमन्तमिवेत्यत्र उपमा । अत्र रूपकमिति भिदा । तोरणस्थमिति । उत्साहः लोकोत्तरकार्येषु स्थैर्यान् प्रयत्नः । महासत्त्वं महाध्यवसायम् । द्रव्यासुव्यसायेषु सत्त्वमस्त्री तु जन्तुष्वित्यमरः । द्वितीयबलशब्दः शक्तिवचनः । बलं रूपेस्थिनि स्थौल्ये शक्तिरेतश्चमूषु चेति वैजयन्ती ॥ १७–१९ ॥

२०] ति० टी०–सत्त्वं चित्तम् ॥ २० ॥

रा० टी०–तोरणस्थमिति । तोरणस्थं तं हनूमन्तं समीक्ष्यैव सर्वासु दिक्षु अवस्थिताः ते राक्षसास्तैस्तैः प्रहरणै रायुधैः ततस्ततः स्वस्वाधिष्ठितदिशातः अभिपेतुः श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

२१] ति० टी०–दिक्षु सर्वास्ववस्थिताः । द्राक्षतत्समीपमागन्तुं चकिता इति भावः ॥ २१ ॥

२२] ति० टी०–तीक्ष्णा मर्मच्छिदः, पीतमुखाः फलभागे स्वर्णरूपिताः । उत्पलपत्राभा एव,न तु तत्पीडार्हा इत्यर्थः॥२२॥

रा० टी०–तस्येति । तस्य हनुमतः शिरसि पीतमुखाः स्वर्णपुङ्खा इत्यर्थः आयसाः पञ्चशराः दुर्धरेण राक्षसेन निपातिताः ॥ २१ ॥

गो० टी०–तस्येति । तीक्ष्णाः क्रूराः शिताः निशिताः पीतमुखाः समीचीनायसनिर्मितत्वेन पीतरेखाग्राः । उत्पलपत्राभाः उत्पलपत्राणि यथा निपात्यन्ते तथा निपातिता इत्यर्थः ॥ २०–२२ ॥

२३] ति० टी०–स्वयं नदन् । तेन नादेन दिशो नादयन्नित्यर्थः । उत्पपात तोरणादिति शेषः ॥ २३ ॥

रा० टी०–स इति । पञ्चभिः शरैः शिरसि आविद्धः स हनूमान् नदन् अत एव दशदिशो विनादयन् सन् व्योम्नि आकाशे उत्पपात ॥ २२ ॥

गो० टी०–स कपिरिति । वारयामास स्ववेगेन प्रापयामासेत्यर्थः ॥ २३ ॥

२४] ति० टी०–अभिपेदे प्राप्तः ॥ २४ ॥

रा० टी०–तत इति । ततः हनुमदुत्प्लवनानन्तरं दुर्धरः

१ मत्तैश्च मातङ्गैरिति गो. पाठः । २ विविधैरिति गो. पाठः । ३ क्षिता इति गो. पाठः । ४ तामिति गो. पाठः । ५ महोत्साहमिति गो. पाठः । ६ महावेगमिति गो. पाठः । ७ महाबलमिति गो. पाठः । ८ शिता इति गो. रा. पाठः । ९ शस्तैस्तीक्ष्णैरिति गो. पाठः ।

स कपिर्वारयामास तं व्योम्नि शरवर्षिणम् । वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ॥ २५ ॥
अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः । चकार[1] निनदं भूयो व्यवर्धत च [2]वीर्यवान् ॥ २६ ॥
स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः । निपपात महावेगो विद्युद्राशिर्गिराविव ॥ २७ ॥
ततः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम् । विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः ॥ २८ ॥
तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि । [3]तौ जातरोषौ दुर्धर्षावुत्पेततुरिन्दमौ ॥ २९ ॥
स ताभ्यां सहसोत्[4]पत्य विष्ठितो विमलेऽम्बरे । मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः ॥ ३० ॥
तयोर्वेगवतोर्वेगं [5]निहत्य स महाबलः । निपपात पुनर्भूमौ सुपर्ण [6]इव वेगितः ॥ ३१ ॥
स सालवृक्षमासाद्य समुत्पाट्य च वानरः । तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ॥ ३२ ॥
ततस्तांस्त्रीन्हतान्ज्ञात्वा वानरेण तरस्विना । अभिगम्य महावेगः प्रहस्य प्रघसो बली ॥ ३३ ॥
भासकर्णश्च संक्रुद्धः शूलमादाय वीर्यवान् । एकतः कपिशार्दूलं यशस्विनमवस्थितौ ॥ ३४ ॥
पट्टिशेन शिताग्रेण प्रघसः प्रत्यपोथयत् । भासकर्णश्च शूलेन राक्षसः कपिकुञ्जरम् ॥ ३५ ॥
स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः । अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ ३६ ॥
समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम् । जघान हनुमान्वीरो राक्षसौ कपिकुञ्जरः ॥
[10]गिरिशृङ्गसुनिष्पिष्टौ तिलशस्तौ बभूवतुः ॥ ३७ ॥
ततस्तेष्ववसन्नेषु सेनापांतेषु पञ्चसु । बलं तदवशेषं तु नाशयामास वानरः ॥ ३८ ॥
अश्वैरश्वान्गजैर्नागान्योधैर्योधान्रथे रथान् । स कपिर्नाशयामास सहस्राक्ष इवासुरान् ॥ ३९ ॥
हयैर्नागैस्तुरङ्गैश्च भग्नाक्षैश्च महारथैः । हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ४० ॥

तदभिधो राक्षसः शरशतैः किरन् सन् अभिपेदे तत्समीपं प्राप ॥ २३ ॥ २४ ॥

२५--२६] ति०टी०—कपिर्व्योम्नि स्थित्वा तं स्वनादेन हुंकारादिरूपेण वारयामासापयोदान्ते जलदानृवर्षाकालान्ते २५।२६

रा० टी०—स इति । स हनूमान् व्योम्नि शरवर्षिणं तं दुर्धरं पयोदान्ते वर्षान्तकाले मारुतो वृष्टिमन्तं पयोदमिव वारयामास ॥ २५ ॥

रा० टी०—अर्द्यमान इति । दुर्धरेण अर्द्यमानः अनिलात्मजः निनदं चकार व्यवर्धत च ॥ २६ ॥

गो० टी०—अर्द्यमानमिति । कदनं युद्धम् ॥ २४ ॥

२७–२९] ति० टी०—रथे निपपातेत्यन्वयः ॥२७–२९॥

रा० टी०—स इति । स हनूमान् दूरं विद्यमाने दुर्धरस्य रथे गिरौ विद्युदाशिरिव निपपात ॥ २७ ॥

रा० टी०—तत इति । ततो हनुमन्निपातानन्तरं मथिताः हिंसिताः अष्टौ अश्वाः यस्य तं भग्नाक्षकूबरं रथं विहाय दुर्धरः स्यक्तजीवितोऽभवदिति शेषः ॥ २८ ॥

रा० टी०—तमिति । तौ सहैवागतौ विरूपाक्षयूपाक्षौ तं दुर्धरं भुवि निपतितं दृष्ट्वा जातरोषौ सन्तौ उत्पेततुः ॥ २९ ॥

गो० टी०—स दूरमिति । विद्युदाशिः अशनिः ॥ २५ ॥

गो० टी०—तत इति । कूबरः युगन्धरः ॥ २६ ॥ २८ ॥

३०] ति० टी०—ताभ्यां कर्तृभ्यां मुद्गराभ्यां करणाभ्यामभिहतः ॥ ३० ॥

रा० टी०—स इति । अम्बरे आकाशे विष्ठितः स हनूमान् ताभ्यां विरूपाक्षयूपाक्षाभ्यां मुद्गराभ्यां करणाभ्यां वक्षसि अभिहतोऽभवदिति शेषः ॥ ३० ॥

३१–३३] ति० टी०—निहत्य वज्रवक्षस्त्वाद्व्यर्थीकृत्य॥३१॥

रा० टी०—तयोरिति । वेगवतोः तयोः राक्षसयोर्वेगं निहत्य निष्फलीकृत्येत्यर्थः महाबलो हनूमान् वेगितः सुपर्णो गरुड इव भूमौ नपुनर्निपपात ॥ ३१ ॥

रा० टी०—स इति । स भूमिं प्राप्तो हनूमान् शालवृक्षमासाद्य समुत्पाट्य च जघान ॥ ३२ ॥

रा० टी०—तत इति । वानरेण हतान् त्रीन् दुर्धरादीन् ज्ञात्वा एकतः एकदिशातः महावेगः प्रघसः एकतः भासकर्णश्च कपिशार्दूलं हनुमन्तमभिगम्य प्राप्य अवस्थितौ । श्लोकद्वयमेकान्वयि ॥ ३३ ॥ ३४ ॥

गो० टी०—तयोरिति । वेगं विनिहत्य परिहत्य॥२९–३८

३४–३५] ति० टी०—एकतोऽवस्थितावित्यन्वयः । परस्परसाहाय्यबुद्ध्यैकदेशे स्थितावित्यर्थः ॥ ३४ ॥ ३५ ॥

रा० टी०—पट्टिशेनेति । शितायेण पट्टिशेन प्रघसः शूलेन भासकर्णश्च कपिकुञ्जरं प्रत्ययोधयत् ॥ ३५ ॥

३६–४०] ति० टी०—विक्षतैर्गात्रैरुपलक्षितः॥३६–४०॥

१ कदनमिति गो. पाठः । २ वेगवानिति गो. पाठः । ३ समिति गो. पाठे । ४ उत्पत्येति गो. पाठः । ५ विनिहत्येति गो. पाठः । ६ समविक्रम इति गो. पाठः । ७ पेदे इति गो. पाठः । ८ अवस्थितामिति गो. पाठः । ९ सप्तममिति गो. पाठः । १० अर्धमेतत् गो. नास्ति ।

ततः कपिस्तान्ध्वजिनीपतीन्रणे निहत्य वीरान्सबलान्सवाहनान् ।
तथैव वीरः परिगृह्य तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।

हनुमता योद्धुमागतस्याक्षाभिधरावणपुत्रस्य वधः ॥

सेनापतीन्पञ्च स तु प्रमापितान्हनूमता सानुचरान्सवाहनान् ।
निशम्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताक्षिम् ॥ १ ॥
स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान्काञ्चनचित्रकार्मुकः ।
समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥ २ ॥
ततो महान्बालदिवाकरप्रभं प्रतप्तजाम्बूनदजालसंततम् ।
रथं समास्थाय ययौ स वीर्यवान्महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥

रा० टी०–स इति । ताभ्यां प्रवसभासकर्णाभ्यां विश्लेषतः गात्रैरुपलक्षितः अत एव असृजा रुधिरेण दिग्धाः व्याप्ताः तनूरुहा यस्य अत एव बालसूर्यसमप्रभः वानरः कुद्धोऽभवत् ॥ ३६ ॥

रा० टी०–सामीति । कपिकुञ्जरो हनुमान् समृगव्यालपादपं मृगव्यालपादपसहितं गिरेः शृङ्गं समुत्पाट्य राक्षसौ जघान ॥ ३७ ॥

रा० टी०–गिरीति । तौ राक्षसौ तिलशः गिरिश्लिष्टङ्गनिष्पिष्टौ बभूवतुः अथ पृथक् । तत इति । तेषु पञ्चसु सेनापतिषु अवसन्नेषु विनष्टेषु सत्सु अवशेषमपि बलं वानरो नाशयामास ॥ ३८ ॥

रा० टी०–विनाशनप्रकारमाह—अश्वैरिति । असुरान् सहस्राक्ष इव अश्वादिभिरश्वादीन् कपिनाशयामास ॥ ३९ ॥

रा० टी०–हतैरिति । हतैर्नागादिभिर्भग्नाक्षैर्महारथैश्च रुद्धमार्गा भूमिरभवदिति शेषः ॥ ४० ॥

४१] ति० टी०–ध्वजिनीपतीन्सेनापतीन् । परिगृह्याश्रित्य स्थित इति शेषः । कृतक्षणो लब्धावसरः ॥ ४१ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रा० टी०–तत इति । कपिर्हनुमान् रणे ध्वजिनीपतीन् निहत्य कृतक्षणः लब्धावसरः सन् तोरणं परिगृह्य प्रजाक्षये काल इव अतिष्ठदिति शेषः ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०–तत इति । ध्वजिनीपतीन् सेनापतीन् । कृतक्षणः दत्तावसरः । अभूदिति शेषः ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥४६॥

१] ति० टी०–प्रमापितान्मारितान् । समरोद्धतोन्मुखं समरोद्धतश्चासौ समरायोन्मुखश्च तमक्षं समक्षमवस्थितमक्षाख्यं कुमारं निशम्य दृष्ट्वा प्रसमैक्षत । दृष्ट्वा युद्धार्थमाज्ञापयामासेत्यर्थः ॥ १ ॥

रा० टी०–सेनापतिवधानन्तरकालिक रावणवृत्तान्तमाह–सेनेति । राजा स रावणः पञ्चसेनापतीन् प्रमापितान् विध्वंसितान् निशम्य श्रुत्वा समरोद्धतोन्मुखं समरोद्धताय महासंग्रामाय उन्मुखम् उद्युक्तम् अक्षतं क्षतिरहितम् अक्षम् अक्षाभिध कुमारं प्रसमैक्षत समवालोकत ॥ १ ॥

गो० टी०–सेनापतीनित्यादि । समीक्ष्य विज्ञाय॥ १॥

२] ति० टी०–तदेवाह—स इति । सदसि यज्ञशालायां द्विजातिमुख्यैर्हविषोदीरितः प्रेरितः पावक इव समुत्पपात॥२॥

रा० टी०–स इति । तस्य रावणस्य दृष्ट्यर्पणेन दृष्टिप्रचालनेनैव संप्रचोदितः प्रेरितः प्रतापवान् अक्षकुमारः सदसि यागशालायां द्विजातिमुख्यैर्हविषोदीरितः पावक इव समुत्पपात ॥ २ ॥

गो० टी०–स इति । द्विजातिमुख्यैः हविषा उदीरितः अभिवर्धितः पावक इवेत्यन्वयः ॥ २ ॥ ३ ॥

३] ति० टी०–महान्स इत्यन्वयः । जाम्बूनदजालेन तत्समूहेन संततं व्याप्तम् ॥ ३ ॥

१ समीक्ष्येति गो. पाठः । २ अग्रत इति गो. अक्षतमिति रा. पाठः । ३ महदिति गो. पाठः

ततस्तपःसंग्रहसंचयार्जितं प्रतप्तजाम्बूनदजालचित्रितम् ।
पताकिनं रत्नविभूषितध्वजं मनोजवाष्टाश्ववरैः सुयोजितम् ॥ ४ ॥
सुरासुराधृष्यमसङ्गचारिणं तडित्प्रभं व्योमचरं समाहितम् ।
सतूणमष्टासिनिबद्धबन्धुरं यथाक्रमावेशितशक्तितोमरम् ॥ ५ ॥
विराजमानं प्रतिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्चसा ।
दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥ ६ ॥
स पूरयन्खं च महीं च साचलां तुरङ्गमातङ्गमहारथस्वनैः ।
बलैः समेतैः सहतोरणस्थितं समर्थमासीनमुपागमत्कपिम् ॥ ७ ॥
स तं समासाद्य हरिं हरीक्षणो युगान्तकालाग्निमिव प्रजाक्षये ।
अवस्थितं विस्मितजातसंभ्रमं समैक्षताक्षो बहुमानचक्षुषा ॥ ८ ॥

रा० टी०–तत इति । प्रतप्तजाम्बूनदस्य जालेन संततं व्याप्तं रथं समास्थाय महान् नैर्ऋतर्षभः महाहरिं हनुमन्तं प्रति ययौ ॥ ३ ॥

४] ति० टी०–उक्तमेवार्थं विशिष्याह—तत इति । तपःसंग्रहस्य तपोनुष्ठानस्य संचयेन समूहयार्जितम् ॥ ४ ॥

रा० टी०–तत इति । तपःसंग्रहस्य तपश्चर्यायाः संचयेन अर्जितं प्राप्तं रत्नविभूषितो ध्वजो यस्मिन् मनोजवैरष्टभिरश्ववरैः सुयोजितम् ॥ ४ ॥

गो० टी०–ततो महदित्यनेनोक्तं विस्तरेणाह—ततस्तपः-संग्रहेत्यादिना । तपःसंग्रहसंचयार्जितं तपोनुष्ठानसमूहसंपादितम् समाहितं सज्जीकृतम् अष्टासिनिबद्धबन्धुरम् अष्टासिभिर्निबद्धम् अत एव बन्धुरम् सुन्दरम् 'बन्धुरं सुन्दरे नम्रे' इति विश्वः यद्वा अष्टासिभिर्निबद्धं बन्धुरं यस्य स तथा बन्धुरं फलकासंघाट इत्याहुः । अन्ये घण्टा इत्यप्याहुः । तदानीम् अष्टासिश्चासौ निबद्धबन्धुरश्चेति समासः । यथाक्रमावेशितशक्तितोमरं पङ्क्तितया स्थापितशक्तितोमरम् । प्रतिपूर्णवस्तुना समग्रोपकरणेन शरधनुःकवचादीन्युपकारणानि प्रतिपूर्णमस्तिनेति पाठे अस्तिना धनेनेत्यर्थः । हेमदाम्ना हेममयाश्वादिबन्धनरज्जुना । शशिसूर्यवर्चसा दामसु किंचित्सितवर्णं किंचित्सूर्यवत्पीतवर्णमित्यर्थः । प्रतिपूर्णवस्तुना शशिसूर्यवर्चसा हेमदाम्ना च विराजमानमित्यन्वयः । यद्वा क्वचिच्छशिवर्चसा क्वचित्सूर्यवर्चसा च विराजमानमित्यन्वयः । वितानादिषु शशिवर्चसा हेममयरथाङ्गेषु सूर्यवर्चसा । दिवाकराभमित्याकाशचारित्वे दृष्टान्तः अतो न रविप्रभमित्यनेन पुनरुक्तिः । तच्छब्दद्वयं च पूर्वानुस्मरणार्थम् ॥ ४–६ ॥

५] ति० टी०–अत एव व्योमचरमसंगचारिणम् पर्वतादिष्वपीति भावः । समाहितं सज्जम् । तूण इषुधिः । अष्टसु दिक्ष्वसिभिः सह निबद्धा बन्धुरा रथफलका यस्मिंस्तम् । यथाक्रमं यथास्थानमावेशितं शक्तितोमरं यस्मिंस्तम् ॥ ५ ॥

रा० टी०–असंगचारिणं निरालम्बगमनशीलम् अत एव व्योमचरम् समाहितं सम्यक् संस्थापितं सतूणमिषुधिसहितम् अष्टभिरसिभिर्निबद्धा बन्धुरा यस्य यथाक्रममावेशितानि शक्तितोमराणि यस्मिन् ॥ ५ ॥

६] ति० टी०–प्रतिपूर्णवस्तुना युद्धपरिकरवस्तुना । शशिसूर्यवर्चसा तद्दृश्यवर्चसा । हेमदामसहितेन वस्तुना विराजमानम् ॥ ६ ॥

रा० टी०–सहेमदाम्ना हेमदामसहितेन शशिसूर्यवर्चसा प्रतिपूर्णवस्तुना युद्धनिखिलसामग्र्या विराजमानं दिवाकराभं रथमास्थितः अमरतुल्यविक्रमः सोऽक्षयकुमारः निर्जगाम । श्लोकत्रयमेकान्वयि ॥ ६ ॥

७] ति० टी०–तोरणस्थितं तोरणाश्रयम् आसीनमुपविष्टम् ॥ ७ ॥

रा० टी०–स इति । स कुमारः तुरङ्गादिस्वनैः खादीन् पूरयन् सन् तोरणस्थितं तोरणावलम्बमासीनं कपिमुपागमत् ॥ ७ ॥

गो० टी०–स पूरयन्निति । सः अक्षः । हिः प्रसिद्धौ ॥ ७ ॥

८] ति० टी०–हरीक्षणः सिंहवत्क्रूरदृष्टिः । युगान्तकालाग्निवत्प्रजाक्षयेऽवस्थितं हरिं समासाद्य तमैक्षत विस्मितं च तं जातसंभ्रमं च वालोऽयं मां योद्धुमिच्छतीति विस्मयः रावणपुत्रत्वाच्च तत्र जातादरत्वम् ॥ ८ ॥

रा० टी०–स इति । हरीक्षणः सिंहवद्भयंकरदृष्टिः सोऽक्षकुमारः प्रजाक्षये कालाग्निभिवावस्थितं विस्मितेन कुमारोऽयं मया कथं योद्धुमिच्छतीति विस्मयेन जातः संभ्रम उद्वेगो यस्मिन् तं हनुमन्तमक्षः बहुमानचक्षुषा अतिगर्वदृष्ट्या ऐक्षत ॥ ८ ॥

गो० टी०–स तमिति । हरीक्षणः सिंहप्रेक्षणः । प्रजाक्षये अवस्थितं प्राणिनाशे प्रवृत्तम् विस्मितश्चासौ जातसंभ्रमश्च विस्मितजातसंभ्रमः ॥ ८ ॥

१ शोभितमिति गो. पाठः । २ रविप्रभमिति गो. पाठः । ३ संभ्रमः इति गो. पाठः

स तस्य वेगं च कपेर्महात्मनः पराक्रमं चारिषु रावणात्मजः ।
विचारयन्स्वं च बलं महाबलो युगक्षये सूर्य इवाभिवर्धत ॥ ९ ॥
स जातमन्युः प्रसमीक्ष्य विक्रमं स्थितः स्थिरः संयति दुर्निवारणम् ।
समाहितात्मा हनुमन्तमाहवे प्रचोदयामास शितैः शरैस्त्रिभिः ॥ १० ॥
ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुपराजयोचितम् ।
अवैक्षताक्षः समुदीर्णमानसं सबाणपाणिः प्रगृहीतकार्मुकः ॥ ११ ॥
स हेमनिष्काङ्गदचारुकुण्डलः समाससादाशुपराक्रमः कपिम् ।
तयोर्बभूवाप्रतिमः समागमः सुरासुराणामपि संभ्रमप्रदः ॥ १२ ॥
ररास भूमिर्न ततापः भानुमान्ववौ न वायुः प्रचचाल चाचलः ।
कपेः कुमारस्य च वीर्यसंयुगं ननाद च द्यौरुदधिश्च चुक्षुभे ॥ १३ ॥
स तस्य वीरः सुमुखान्पतत्रिणः सुवर्णपङ्खान्सविषानिवोरगान् ।
समाधिसंयोगविमोक्षतत्त्ववित्छरानथ त्रीन्कपिमूर्ध्न्यताडयत् ॥ १४ ॥
स तैः शरैर्मूर्ध्नि समं निपातितैः क्षरन्नसृग्दिग्धविवृत्तनेत्रैः ।
नवोदितादित्यनिभः शरांशुमान्व्यराजतादित्य इवांशुमालिकः ॥ १५ ॥

९] ति० टी०–अभिवर्धत तेजसाऽभ्यवर्धतेत्यर्थः ॥९॥

रा० टी०–स इति । रावणात्मजः सोऽक्षः कपेर्वेगम् अरिषु पराक्रमं च स्वं बलं पराक्रमं च विचारयन्न्यूनाधिकभावं चिन्तयन् सन् युगक्षये सूर्य इव अभिवर्धत अभ्यवर्धत ॥ ९ ॥

गो० टी०–स तस्येति । विधारयन् निर्धारयन् । विचारयन्निति च पाठः ॥ ९–१२ ॥

१०–११] ति० टी०–स्थिरः स्थितः सः प्रसमीक्ष्य विक्रमं संदर्शनीयपराक्रमम् । संयति रणे दुःखं निवारणं यस्य तं त्रिभिः शरैः प्रचोदयामास युद्धाय प्रेरयामास ॥ १० ॥११ ॥

रा० टी०–स इति । विक्रमं हनुमत्कर्तृकराक्षसविध्वंसादिं प्रसमीक्ष्य संचिन्त्य जातमन्युः अत एव संयति संग्रामे स्थितः समाहितात्मा एकाग्रचित्तः सोऽक्षः संयति दुर्निवारणं स्थिरं हनुमन्तं त्रिभिः शरैः प्रचोदयामास युद्धाय प्रेरयामास ॥ १० ॥

रा० टी०–तत इति । ततः बाणप्रक्षेपानन्तरं जितः श्रमः बाणवेगजनितखेदो येन अत एव समुदीर्णं युद्धाय प्रवृद्धं मानसं यस्य अत एव गर्वितं गर्वितत्वेन प्रतीयमानम् अत एव शत्रुपराजयोचितं शत्रुपराजययोग्यं तं हनुमन्तम् अक्षः गर्वितं प्रसमीक्ष्य विज्ञाय अवैक्षत ॥ ११ ॥

१२] ति० टी०–निष्कमुरोभूषणम् । आशुपराक्रमः । तीक्ष्णपौरुष इति यावत् । समागमो युद्धम् । संभ्रमप्रदो भयप्रदः ॥ १२ ॥

रा० टी०–स इति । हेमनिष्काङ्गदाभ्यां सहितं चारु कुण्डलं यस्य सः आशुपराक्रमः स कुमारः कपिं समाससाद । निष्कमुरोभूषणं तयोः अक्षहनूमतोः अप्रतिमः उपमारहितः समागमो बभूव ॥ १२ ॥

१३] ति० टी०–भूमिर्भूमिस्थप्राणिजातं ररास । वीर्यप्रवृत्तं संयुगम् । वीक्ष्येति शेषः ॥ १३

रा० टी०–ररासेति । कपेः, कुमारस्य च वीर्यसंयुगम् । अतिवीर्यहेतुकसंग्रामम् अवलोक्येति शेषः, भूप्रभृतिः रासप्रभृतिं न चकार ॥ १३ ॥

गो० टी०–ररासेति । न ततापः भानुमान् । सूर्योदयः पूर्वं सूचितः सः न तताप इत्युच्यते ॥ १३ ॥

१४] ति० टी०–समाधिर्लक्ष्यदर्शनम्, संयोगः शरसंधानम्, विमोक्षः संहितस्य त्यागः, तेषां तत्त्ववित् । अताडयदपातयत् ॥ १४ ॥

रा० टी०–स इति । तस्य बाणस्य समाधिसंयोगविमोक्षः तत्त्ववित् समाधिर्लक्ष्यदर्शनं संयोगः शरसंधानं विमोक्षः तस्य त्यागः तेषां तत्त्वस्य याथार्थ्यस्य वेदिता वीरः सोऽक्षकुमारः सुवर्णपुङ्खान् स्वर्णमयपुङ्खविशिष्टान् अत एव सुमुखान् उरगानिव त्रीन् पतत्रिणो बाणान् कपिमूर्ध्नि अताडयत् ॥ १४ ॥

गो० टी०–तत इति । समाधिसंयोगविमोक्षतत्त्ववित् समाधिः लक्ष्यवेदनं संयोगः शरसंधानं विमोक्षः तद्विसर्गः तेषां तत्त्ववित् यथार्थवित् ॥ १४ ॥

१५] ति० टी०–असृग्दिग्धश्चासौ विवृत्तनेत्रश्च । 'विवृत्तलोचनः' इति पाठे अवसरोचितचक्षुरित्यर्थः नवोदितादित्यसंनिभः । रक्तवर्ण इत्यर्थः । शरांशुमान्स्वमस्तकस्थशररूपांशुमान् । अंशुमालाधृत्सूर्य इव व्यराजत ॥ १५ ॥

१ पार्थिवात्मज इति गो. पाठः । २ धारयन्निति गो. पाठः । ३ हिमक्षय इति गो. पाठः । ४ वर्धते इति गो. पाठः । ५ स्थिरं स्थित इति गो. स्थिरमिति रा. पाठः । ६ वीक्ष्येति गो. पाठः । ७ लोचन इति गो. रा. पाठः ।

ततः प्लवङ्गाधिपमन्त्रिसत्तमः समीक्ष्य तं राजवरात्मजं रणे ।
उदग्रचित्रायुधचित्रकार्मुकं जहर्ष चापूर्यत चाहवोन्मुखः ॥ १६ ॥
स मन्दराग्रस्त इवांशुमाली विवृद्धकोपो बलवीर्यसंवृतः ।
कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥ १७ ॥
ततः स बाणासनशक्रकार्मुकः शरप्रवर्षो युधि राक्षसाम्बुदः ।
शरान्मुमोचाशु हरीश्वराचले बलाहको वृष्टिमिवाचलोत्तमे ॥ १८ ॥
कपिस्ततस्तं रणचण्डविक्रमं प्रवृद्धतेजोबलवीर्यसायकम् ।
कुमारमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षाद्धनतुल्यनिःस्वनः ॥ १९ ॥
स बालभावाद्युधि वीर्यदर्पितः प्रवृद्धमन्युः क्षतजोपमेक्षणः ।
समाससादाप्रतिमं रणे कपिं गजो महाकूपमिवावृतं तृणैः ॥ २० ॥
स तेन बाणैः प्रसभं निपातितैश्चकार नादं घननादनिःस्वनः ।
समुत्सहेनाशु नभः समारुजन्भुजोरुविक्षेपणघोरदर्शनः ॥ २१ ॥
तमुत्पतन्तं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् ।
रथी रथिश्रेष्ठतरः किरञ्छरैः पयोधरः शैलमिवाश्मवृष्टिभिः ॥ २२ ॥

रा० टी०–स इति । सममेककालावच्छेदेन मूर्ध्नि निपातितैः शरैः असृक् रुधिरं क्षरन् प्रस्रावयन् अत एव दिग्धे असृग्व्याप्ते विवृत्तलोचने स्वाभाविकविशालनेत्रे यस्य शरांशुमान् शररूपकिरणविशिष्टः अत एव नवोदितादित्यनिभः सः हनुमान् अंशुमालिकः चन्द्र इव व्यराजत ॥ १५ ॥

गो० टी०–स तैरिति । रक्तसिक्तत्वे दृष्टान्तो नवोदितेति । शराचितत्वे दृष्टान्त आदित्य इवांशुमालिक इति ॥१५॥

१६] ति० टी०–आपूर्यत व्यवर्धत ॥ १६ ॥

रा० टी०–तत इति । प्लवगाधिप एव मन्त्रिसत्तमो हनुमान् उद्ग्राणि अत्युत्तमानि चित्रायुधानि यस्य चित्राणि कार्मुकानि धनूंषि यस्य स एव स इति कर्मधारयः तं राजवरात्मजमक्षं समीक्ष्य जहर्ष अपूर्यत अवर्धत च ॥ १६ ॥

गो० टी०–तत इति । आपूर्यत व्यवर्धत ॥ १६ ॥

१७] ति० टी०–मन्दराग्रस्थत्वेन मध्यंदिनस्थत्वं लक्ष्यते ॥ १७ ॥

रा० टी०–स इति । विवृद्धकोपः मन्दराग्रस्थोंऽशुमाली सूर्य इव हनुमान् अक्षं कुमारं नेत्राग्निमरीचिभिः ददाह इव॥१७॥

गो० टी०–स इति । मन्दराग्रस्थः मन्दरो नाम भूमध्यपर्वतः । तदग्रे मध्याह्ने वर्तत इत्यौदयोक्तिः ॥ १७ ॥

१८] ति०टी०–बाणासनमेव शक्रकार्मुकं यस्य सः॥१८॥

रा० टी०–तत इति । बाणासनं धनुरेव शक्रकार्मुकं यस्य शर एव प्रवर्षः अतिवृष्टिर्यस्य स राक्षसाम्बुदः अक्षः हरीश्वराचले शरान् मुमोच । तत्र दृष्टान्तः अचलोत्तमे वृष्टिं बलाहक इव ॥ १८ ॥

गो० टी०–ततः स बाणासनेति । बाणासनचित्रकार्मुकः बाणाः अस्यन्ते क्षिप्यन्तेऽनेनेति बाणासनः बाणविमोक्षकचित्रकार्मुक इत्यर्थः ॥ १८–२२ ॥

१९] ति० टी०–तेजआदि सायकान्ताः प्रवृद्धा यस्य॥१९॥

रा० टी०–कपिरिति । रणचण्डविक्रमम् अक्षं कुमारं संयुगे प्रसमीक्ष्य कपिर्हर्षान्ननाद ॥ १९ ॥

२०] ति० टी०–तृणैरावृतं महाकूपं गजपातनार्थकृतगर्तम् ॥ २० ॥

रा० टी०–स इति । बालभावात् बालत्वाद्धेतोः वीर्यदर्पितः प्रवृद्धः मन्युर्यस्य क्षतजोपमे ईक्षणे यस्य सः अक्षः रणे अप्रतिमं कपिं तृणैरावृतं कूपमिव समाससाद प्राप॥२०॥

२१] ति० टी०–घननादनिःस्वनो मेघशब्दसदृशशब्दः । समुत्सहेन समुत्साहेन ह्रस्व आर्षः । भुजयोरूर्वोर्विक्षेपणेन घोरं दर्शनं यस्य सः॥ २१ ॥

रा० टी०–स इति । तेन कुमारेण प्रसभं निपातितैर्बाणैर्घननादनिःस्वनः भुजोरुविक्षपणेन घोरं दर्शनं यस्य स मारुतिः समुत्सहेन नभः समुत्साहेन नभस्थानपि समारुजन् । सन् नादं चकार । ह्रस्व आर्ष इति भट्टाः ॥ २१ ॥

२२] ति० टी०–समभिद्रवदभ्यद्रवत् ॥ २२ ॥

रा० टी०–तमिति । रथी रथसहितः रथिश्रेष्ठतरः राक्ष-

---

१ चित्रेति गो. पाठः । २ विक्रम इति गो. पाठः । ३ उत्पपातेति गो. पाठः । ४ मारुतिरिति गो. पाठः । ५ तम इति गो. पाठः

स ताञ्छरांस्तस्य हरिर्विमोक्षयंश्चचार वीरः पथि वायुसेविते ।
शरान्तरे मारुतवद्विनिष्पतन्मनोजवः संयति [1]भीमविक्रमः ॥ २३ ॥
तमात्तबाणासनमाहवोन्मुखं खमास्तृणन्तं [2]विविधैः शरोत्तमैः ।
अवैक्षताक्षं बहुमानचक्षुषा जगाम चिन्तां स च मारुतात्मजः ॥ २४ ॥
ततः शरैर्भिन्नभुजान्तरः कपिः कुमारवर्[3]र्येण महात्मना नदन् ।
महाभुजः कर्मविशेषतत्त्वविद्विचिन्तयामास रणे पराक्रमम् ॥ २५ ॥
अबालवद्बालदिवाकरप्रभः करोत्ययं कर्म [4]महान्महाबलः ।
न चास्य सर्वाहवकर्मशो[5]लिनः प्रमापणे मे मतिरत्र जायते ॥ २६ ॥
अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे ।
असंशयं कर्मगुणोदयादयं सनागयक्षै[6]र्मुनिभिश्च पूजितः ॥ २७ ॥
पराक्रमोत्साहविवृद्धमानसः समीक्षते मां [7]प्रमुखोऽग्रतः स्थितः ।
पराक्रमो ह्यस्य मनांसि कम्पयेत्सुरासुराणामपि शीघ्रका[8]रिणः ॥ २८ ॥

सानां प्रवरः सोऽक्षकुमारः अश्मवृष्टिभिः शैलं पयोधर इव उत्पतन्तं तं हनुमन्तं शरैः किरन् सन् समभिद्रवत् ॥ २२ ॥

२३-२४] ति० टी०-शरान्विमोक्षयन्व्यर्थीकुर्वन् । तदुपायः—शरान्तर इति ॥ २३ ॥ २४ ॥

रा०टी०-स इति। शरान्तरे शराणामन्तरं मध्यं यस्मिन् तस्मिन् संयति संग्रामे शरान्तरे शरमध्ये विनिष्पतन्नपि हरिः स हनुमान् तस्य कुमारस्य तान् शरान् विपोक्षयन् स्वकर्मकस्पर्शाभावं प्रापयन् सन् वायुसेविते पथि चचार ॥ २३ ॥

रा० टी०-तमिति । आत्तं बाणासनं धनुर्येन तं विविधैः शरोत्तमैः समास्तृणन्तम् अक्षं स हनुमान् बहुमानचक्षुषा सत्कारसूचकावलोकनेन अवेक्षत चिन्तां जगाम ॥ २४ ॥

गो० टी०-स तानिति । विमोक्षयन् शरीरे असंयोजयन् । लाघवातिशयेनेति भावः ॥ २३ ॥

गो० टी०-तमिति । आस्तृणन्तम् आच्छादयन्तम् । विशिखैः विविधाशिखैः । चिन्तां जगाम कथमेतादृशमेनं वधिष्यामीत्येवम् ॥ २४ ॥

२५] ति० टी०-एवं शरान्व्यर्थीकुर्वतोऽपि भुजान्तरभेदरूपकर्मविशेषतत्त्वज्ञः पराक्रमविशेषेण चिन्तयामास ॥ २५ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—तत इति । शरैर्भिन्नं भुजान्तरं यस्य स कपिः रणे पराक्रमम् अक्षकुमारबलवत्त्वं विचिन्तयामास ॥ २५ ॥

गो०टी०-इदमेवोपपादयति-ततः शरैरित्यर्धेन२५-२६

२६] ति० टी०-चिन्ताप्रकारः—अबालवदिति । सर्वाहवकर्मशालिनः सर्वप्रकाराहवकर्मशालिनः । अत्रास्मिन्काले ऽस्य प्रमापणे मे मतिर्न जायते । ' प्रमापणे मारुतिरत्र जायते ' इति पाठे ' अयं जनः ' इतिवत्स्वस्यैव हनुमता मारुतिरिति निर्देशः ॥ २६ ॥

रा० टी०-चिन्ताकारमाह-अबालवदिति । बालदिवाकरप्रभः अयं कुमारः अबालवत्कर्म करोति अतः सर्वाहवकर्मशालिनः आहवनिखिलक्रियाविज्ञातुः अस्य प्रमापणे विध्वंसने अत्र अस्मिन्समये मे मतिर्न जायते ॥ २६ ॥

२७] ति० टी०-समाहितोऽवहितः । अतिसहोऽतितिरणक्लेशसहः । कर्मगुणोदयाद्रणकर्मणो गुणोदयोत्कर्षस्य दर्शनाद्धेतोः पूजित इत्यर्थः ॥ २७ ॥

रा० टी०-अयमिति । महान् आत्मा प्रयत्नो यस्य सः वीर्यतो वीर्येण महान् समाहितः सावधानः संयुगे अतिसहः प्रहारायतिसहनशीलः अयमक्षः कर्मगुणोदयात् प्रहारादिक्रियाप्रकाशात् सनागयक्षैर्नागयक्षसहितैर्मुनिभिः पूजितो भवेदिति शेषः ॥ २७ ॥

गो० टी०-अयमिति । अतिसहः अतिसोढा । कर्मगुणोदयात् युद्धकर्मोत्कर्षाभिवृद्धेः ॥ २७-२९ ॥

२८] ति० टी०-पराक्रमविषयोत्साहेन विवृद्धं मानसं यस्य तादृशः सन्मां समीक्षते, न तु कातर्येणेत्यर्थः । प्रमुखो वीरमुख्यः ॥ २८ ॥

रा० टी०-पराक्रम इति । पराक्रमोत्साहाभ्यां विवृद्धं मानसं यस्य सः अत एव प्रमुख्यः योद्धृणां मुख्यः अग्रतः स्थितः कुमारः मां समीक्षते अतः शीघ्रकारिणोऽस्य पराक्रमः सुरासुराणामपि मनांसि कम्पयेत् ॥ २८ ॥

---

१ चण्डेति गो. पाठः । २ विशिखैरिति गो. पाठः । ३ वीरेणेति गो. पाठः । ४ महदिति गो. पाठः । ५ शोभिन इति गो. पाठः । ६ प्रमुखागत इति गो. पाठः । ७ गामिन इति गो. पाठः ।

न खल्वयं नाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रणे विवर्धते ।
प्रमापणं ह्यस्य ममाद्य रोचते न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥ २९ ॥
इति प्रवेगं तु परस्य तर्कयन्स्वकर्मयोगं च विधाय वीर्यवान् ।
चकार वेगं तु महाबलस्तदा मतिं च चक्रेऽस्य वधे तदानीम् ॥ ३० ॥
स तस्य तानष्ट वरान्महाहयान्समाहितान्भारसहान्विवर्तने ।
जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः ॥ ३१ ॥
ततस्तलेनाभिहतो महारथः स तस्य पिङ्गाधिपमन्त्रिनिर्जितः ।
सनीडभग्नीडः परिवृत्तकूबरः पपात भूमौ हतवाजिरम्बरात् ॥ ३२ ॥
स तं परित्यज्य महारथो रथं सकार्मुकः खड्गधरः खमुत्पतन् ।
ततोऽभियोगाद्दृषिरुग्रवीर्यवान्विहाय देहं मरुतामिवालयम् ॥ ३३ ॥
कपिस्ततस्तं विचरन्तमम्बरे पतत्रिराजानिलसिद्धसेविते ।
समेत्य तं मारुतवेगविक्रमः क्रमेण जग्राह च पादयोर्दृढम् ॥ ३४ ॥
स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवाण्डजेश्वरः ।
मुमोच वेगात्पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः ॥ ३५ ॥
स भग्नबाहूरुकटीपयोधरः क्षरन्नसृङ्निर्मथितास्थिलोचनः ।
संभिन्नसंधिः प्रविकीर्णबन्धनो हतः क्षितौ वायुसुतेन राक्षसः ॥ ३६ ॥

२९-३०] ति० टी०-उपेक्षितोऽयं न नाभिभवेत् । अभिभवेदेवेत्यर्थः । स्वकर्मयोगं स्वस्य कर्मणि योगं ज्ञानबलविशेषावस्थानलक्षणमुपायम् ॥ २९ ॥ ३० ॥

रा० टी०-नेति । यतोऽस्य रणे पराक्रमो विवर्धते अत उपेक्षितोऽयं मां नाभिभवेत् अभिभवेदेवेत्यर्थः अतः अस्य प्रमापणं नाशनं मम रोचते हि यतः वर्धमानोऽग्निः उपेक्षितुं न क्षमः ॥ २९ ॥

रा० टी०-इतीति । इति अनेन प्रकारेण परस्य शत्रोः प्रवेगं परस्य वधाय विध्वंसाय स्वकर्मयोगं च तर्कयन् सन् अस्य वधे मतिं चक्रे अत एव वेगं चकार ॥ ३० ॥

गो० टी०-इति प्रवेगमिति । परस्य शत्रोः प्रवेगम् तर्कयन् आलोचयन् स्वकर्मयोगं विधाय युद्धक्रमं च सङ्कल्प्य पूर्वमश्वान् हत्वा ततो रथं भङ्क्ष्यामीति निश्चित्येत्यर्थः॥३०॥

३१] ति० टी०-विवर्तने नानाविधमण्डलगमने । समाहिताञ्शिक्षितान्वायुसेविते पथि स्थितः स्थितांश्च ॥ ३१ ॥

रा० टी०-स इति । विवर्तने अनेकविधमण्डलगमने समाहितान् प्राप्तशिक्षानित्यर्थः भारसहान् वरान् तस्य कुमारस्य अष्ट महाहयान् तलप्रहारैः वायुसेविते पथि विद्यमानः कपिः जघान ॥ ३१ ॥

गो० टी०-स तस्येति । विवर्तने सव्यापसव्यभ्रमणेऽपि । भारसहान् रथभारसहान् ॥ ३१ ॥

३२] ति० टी०-नीडं रथ्यधिष्ठानस्थानम् ॥ ३२ ॥

रा० टी०-तत इति । तस्य हनूमतस्तलेनाभिहतः स भग्ननीडः भग्ननीडेन सहितः नीडं रथिस्थानं परिवृत्तः कूबरो यस्य हतवाजिः विध्वंसिताश्वः अत एव पिङ्गाधिपमन्त्रिणा सुग्रीवामात्येन निर्जितः पराभूतो महारथः सोऽक्षः भूमौ पपात ॥ ३२ ॥

गो० टी०-तत इति । तलेनाभिहतः अत एव पिङ्गाधिपमन्त्रिनिर्जितः हनुमता निर्जित इत्यर्थः । प्रभग्ननीडः प्रभग्नरथाङ्गः । कूबरः युगन्धरः । वाजिरिति इकारान्तत्वमार्षम्॥३२॥

३३] ति० टी०-मरुतामालयं स्वर्गमुत्पतन्नृषिरिव॥३३॥

रा० टी०-स इति । तं भग्नं रथं परित्यज्य खमुत्पतन् सन् सोऽक्षकुमारः तपोभियोगात् तपोऽतिबलात् देहं विहाय मरुतां देवानामालयमुत्पतन् ऋषिरिव बभूवेति शेषः ॥ ३३ ॥

गो० टी०-स तमिति । मरुतामालयमुत्पतन् ऋषिरिव अभवदिति शेषः ॥ ३३ ॥ ३४ ॥

३४] ति० टी०-पतत्रीति । गरुडवायुसिद्धसेविते तं समेत्य तं पादयोर्जग्राहेत्यन्वयः ॥ ३४ ॥

रा० टी०-कपिरिति । पतत्रिराजानिलसिद्धानां सेवितेऽम्बरे विचरन्तं तमक्षकुमारं क्रमेण समेत्य कपिर्हनूमान् पादयोर्दृढं जग्राह ॥ ३४ ॥

३५-३६] ति० टी०-समाविध्य भ्रामयित्वा । गृह्य इव । असंशिल्यपावार्षौ । गृहीत्वेवेत्यर्थः ॥ ३५ ॥ ३६ ॥

१ खेवेति गो. पाठः । २ अस्येति गो. पाठः । ३ महाकपिरिति गो. पाठः । ४ हयान्महाजवानिति गो. पाठः । ५ प्रेति गो. पाठः । ६ तुल्येति गो. पाठः । ७ रुध्येति गो. पाठः । ८ स भग्नेति गो. स भिन्नेति रा. पाठः ।

महाकपिर्भूमितले निपीड्य तं चकार रक्षोधिपतेर्महद्भयम् ।
महर्षिभिश्चक्रचरैः समागतैः समेत्य भूतैश्च सयक्षपन्नगैः ॥
सुरैश्च सेन्द्रैर्भृशजातविस्मयैर्हते कुमारे स कपिर्निरीक्षितः ॥ ३७ ॥
निहत्य तं वज्रिसुतोपमं रणे कुमारमक्षं क्षतजोपमेक्षणम् ।
तदेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ।

रावणेन हितमुपदिश्य प्रेषित इन्द्रजिद्धनुमन्तमभियौ । हनुमता लाघवातिशयाद्बाणानां मोघीकरणे तं ब्रह्मास्त्रेण बद्ध्वा मोचने शक्तमपि रावणदिदृक्षया तदनुवर्तमानमेनं रावणान्तिकं निनाय ।

ततस्तु रक्षोऽधिपतिर्महात्मा हनूमताक्षे निहते कुमारे ।
मनः समाधाय सदेवकल्पं समादिदेशेन्द्रजितं सरोषः ॥ १ ॥
त्वमस्त्रविच्छस्त्रभृतां वरिष्ठः सुरासुराणामपि शोकदाता ।
सुरेषु सेन्द्रेषु च दृष्टकर्मा पितामहाराधनसंजितास्त्रः ॥ २ ॥
त्वदस्त्रबलमासाद्य संसुराः समरुद्गणाः । न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ॥ ३ ॥

रा० टी०–स इति । वानरोत्तमः कपिः स हनुमान्तमक्षं गृहीत्वा गृहीत्वा सहस्रशोऽनेकवारं समाविध्य भ्रामयित्वा वेगान्महीतले सुमोच । तत्र दृष्टान्तः महोरगमण्डजेश्वरो गरुड इव ॥ ३५ ॥

रा० टी०–स इति । वायुसुतेन हतः अत एव भग्ना बाह्वादयो यस्य निर्मथितानि अस्थिलोचनानि यस्य भिन्नाः सन्धयो यस्य प्रविकीर्णानि बन्धनानि यस्य राक्षसः क्षितौ अपतदिति शेषः ॥ ३६ ॥

गो० टी०–स तमिति । गृह्य इवेत्यत्र गुणाभाव आर्षः॥३५॥

गो०टी०–स भग्नेति । प्रविकीर्णबन्धनः प्रविकीर्णकक्ष्यादिबन्धनः । प्रभिन्नसंधिरिति संधिबन्धभङ्गस्योक्तत्वात् ॥३६॥

३७] ति० टी०–चक्रचरैर्ज्योतिश्चक्रचरैर्ग्रहादिभिः समेत्य समागतैर्जातविस्मयैर्निरीक्षित इत्यन्वयः ॥ ३७ ॥

३८] ति० टी०–वज्रिसुतोपमं जयन्ततुल्यम् । कृतक्षणः पुनर्युद्धे कृतोत्साहः ॥ ३८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०–महाकपिरिति । तमक्षं भूमितले निपीड्य रक्षोधिपतेः महद्भयं चकार । अथ पृथक्–महर्षिभिरिति । कुमारे हते सति जातविस्मयैः महर्षिप्रभृतिभिः कपिः स हनुमान् निरीक्षितो बभूवेति शेषः । सार्धश्लोक एकान्वयी ॥३७॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

गो० टी०–महर्षिभिरिति । चक्रचरैः ज्योतिश्चक्रचरैः नभश्चक्रचरैर्वा ॥ ३७ ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥४७॥

१] ति० टी०–मनः समाधाय पुत्रनाशखिन्नमपि चेतो धीरतयाऽप्रकाशितभयं प्रतिष्ठाप्य ॥ १ ॥

रा० टी०–अक्षकुमारविघातानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । हनूमता अक्षे कुमारे निहते सति रक्षोधिपतिः स रावणः मनः समाधाय स्थिरीकृत्य शोकं विमुच्येत्यर्थः देवकल्पमिन्द्रजितं समादिदेश आज्ञापयामास ॥ १ ॥

गो० टी०–ततस्त्वित्यादि । मनः समाधाय धैर्यं कृत्वेत्यर्थः ॥ १ ॥

२] ति० टी०–पितामहाराधनेन संचितास्त्रः प्राप्तब्रह्मास्त्रोऽसीत्यर्थः ॥ २ ॥

रा० टी०–तदाज्ञापनप्रकारमाह–त्वमित्यादिभिः । पितामहाराधनेन संचितानि अस्त्राणि येन अत एव अस्त्रवित् निखिलास्त्रविज्ञाता अत एव शस्त्रभृतां मध्ये वरिष्ठः श्रेष्ठः अत एव सुरासुराणां विरुद्धसुरादीनां शोकदाता अत एव सेन्द्रेषु इन्द्रसहितेषु सुरेषु दृष्टं प्रसिद्धं कर्म यस्य स त्वमसीति शेषः२॥

गो० टी०–त्वमिति । अस्त्रवित् ब्रह्मास्त्रवित् । संचितास्त्रः संचितास्त्रविशेषः ॥ २ ॥

३] ति० टी०–सुरेश्वरसमाश्रिता अपि रणे स्थातुं न शेकुः ॥ ३ ॥

१ महास्त्रतैरिति गो. पाठः । २ उपमप्रभमिति गो. पाठः । ३ तमेवेति गो. पाठः । ४ स इति गो. पाठः । ५ तदेन्द्रेति गो. पाठः । ६ सरोषमिति गो. पाठः । ७ विदामिति गो. पाठः । ८ तवेति गो. पाठः । ९ नासुरा नेति गो. पाठः ।

न कश्चित्त्रिषु लोकेषु संयुगेन गतश्रमः । भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः ॥
देशकालप्रधानश्च त्वमेव मतिसत्तमः ॥ ४ ॥
न तेऽस्त्यशक्यं समरेषु कर्मणां न तेऽस्त्यकार्यं मतिपूर्वमन्त्रणे ।
न सोऽस्ति कश्चित्त्रिषु संग्रहेषु नै वेद यस्तेऽस्त्रबलं बलं च ॥ ५ ॥
ममानुरूपं तपसो बलं च ते पराक्रमश्चास्त्रबलं च संयुगे ।
न त्वां समासाद्य रणावमर्दे मनः श्रमं गच्छति निश्चितार्थम् ॥ ६ ॥
निहताः किंकराः सर्वे जम्बुमाली च राक्षसः । अमात्यपुत्रा वीराश्च पञ्च सेनाग्रगाँमिनः ॥ ७ ॥
बलानि सुसमृद्धानि साश्वनागरथानि च । महोदरश्चै शयितः कुमारोऽक्षश्च सूदितः ॥
न तुँ तेष्वेव मे सारो यस्त्वय्यरिनिषूँदन ॥ ८ ॥
इदं चै दृष्ट्वा निहँतं महद्बलं कपेः प्रभावं च पराक्रमं च ।
त्वमात्मनश्चापि निरीक्ष्य सारं कुरुष्व वेगं स्वबलानुरूपम् ॥ ९ ॥

रा० टी०-त्वदिति । त्वदस्त्रबलमासाद्य प्राप्य सुरेश्वरसमाश्रिता अपि सुरादयः समरे स्थातुं न शेकुः ॥ ३ ॥

गो० टी०-तवेति । तव अस्त्रबलमासाद्य असुराः न नश्यन्तीत्यर्थः ॥ ३ ॥

४] ति० टी०-कश्चित्त्वदन्यो न गतश्रमो न । सर्वे प्राप्तश्रमा इत्यर्थः । भुजवीर्याभिगुप्तस्तपसाऽभिरक्षितो देशकालप्रधानश्च मत्या सत्तमः प्रशस्ततरश्च त्वमेवेत्यन्वयः ॥ ४ ॥

रा० टी०-नेति । त्रिषु लोकेषु संयुगेन तव संग्रामेण गतश्रमः गतखेदः कश्चिन्न त्वत्संग्रामं संप्राप्य सर्वः पराजितो भवतीत्यर्थः, अतः भुजवीर्याभिगुप्तः स्वभुजबलेन रक्षितः तपसा स्वतपोबलेन अभिरक्षितश्च देशकालप्रधानः देशकालयोरभिज्ञः मतिसत्तमः त्वमेवासीति शेषः । सार्धश्लोक एकान्वयी ॥ ४ ॥

गो० टी०-न कश्चिदिति । त्रिषु लोकेषु तव संयुगेन गतश्रमः अप्राप्तश्रमः कश्चिन्न । सुप्सुपेति समासः । सर्वे प्राप्तश्रमा इत्यर्थः । हरिहयादयोऽपि श्रमं प्राप्नुवन्तीत्यर्थः । भुजवीर्येति । मतिसत्तमः मतिश्रेष्ठ इत्यर्थः ॥ ४ ॥

५] ति० टी०-समरेषु कर्तव्यानां कर्मणां मध्येऽशक्यं नास्ति । 'कर्मणा' इत्येव पाठः सांप्रदायिक इति कतकः । मतिपूर्वमन्त्रणे शास्त्रानुरूपबुद्धिपूर्वकर्तव्यराजकार्यविचारे तेऽकार्यं नास्ति कार्यासाधकविचारो नास्तीत्यर्थः । त्रिषु संग्रहेषु त्रिष्वपि लोकेषु । भोक्तृभिः कर्मणा संगृह्यन्त इति संग्रहा लोकास्तेषु । तेऽस्त्रबलं सहजं च बलं यो न वेद स कश्चिदपि नास्ति । सर्वप्रसिद्धबलद्वयबलवानित्यर्थः ॥ ५ ॥

रा० टी०-नेति । कर्मणां मध्ये किञ्चित्कर्म ते अशक्यं न मतिरूपमन्त्रणे मतिस्वरूपबोधने ते अकार्यम् अकर्तव्यं न यथोचितं सर्वं बोधयसीत्यर्थः, अत एव त्रिषु संग्रहेषु लोकेषु यस्ते अस्त्रबलं पौरुषं च न वेद स नास्ति ॥ ५ ॥

गो० टी०-नेति । समरेषु कर्मणा पुरुषकारेण ते अशक्यं नास्तीत्यर्थः तथा मतिपूर्वमन्त्रणे विवेकपूर्वविचारे अकार्यम् अज्ञातकार्यम् ज्ञातुमशक्यं कार्यं नास्तीत्यर्थः । संग्रहेषु संगृह्यन्ते भोग्यतया स्वीक्रियन्ते भोक्तृभिरिति संग्रहाः लोकाः तेषु त्रिष्वपि यस्तवास्त्रबलं शारीरं बलं च न वेद स नास्ति सर्वलोकप्रख्यातशस्त्रास्त्रबलसंपन्नस्त्वमित्यर्थः ॥ ५ ॥

६] ति० टी०-ममानुरूपं मत्सदृशम् । रणावमर्दे युद्धसंघर्षे । त्वां समासाद्य प्राप्य मे मनो जयविषये निश्चितार्थं सच्छ्रमं विषादं न गच्छति । त्वद्बलं स्मृत्वा श्वसिमीत्यर्थः॥६॥

रा० टी०-ममेति । ते तपोबलादि ममानुरूपं मत्तुल्यमस्तीति शेषः, अतः रणावमर्दे महासंग्रामे त्वां समासाद्य प्राप्य वियमानस्य मम मनः निश्चितार्थं निश्चितविजयं सत् श्रमं खेदं न गच्छति ॥ ६ ॥

गो० टी०-ममानुरूपमिति । रणावमर्दे रणसंकटे । निश्चितार्थं निश्चितजयरूपार्थं त्वाम् आसाद्य विचिन्त्य मे मनः श्रमं न गच्छति विषादं न गच्छतीत्यर्थः ॥ ६-८ ॥

७] ति० टी०-प्रकृतमाह—निहता इति ॥ ७ ॥

रा० टी०-तत्कर्तव्यं बोधयितुमाह-निहता इति । किंकरादयो निहताः ॥ ७ ॥

८-९] ति० टी०-हे अरिनिषूदन ! त्वयि मे यः सार उत्कर्षबुद्धिः स तेषु नत्वेवेत्यन्वयः । यद्वा मे सारः सर्वजगज्जयसामर्थ्यं स त्वय्येव त्वत्साहाय्यनिमित्त एव, न तु तेषु । न तु तत्साहाय्यनिमित्तक इत्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०-बलानीति । ते दयितः प्रियः सहोदरोऽक्षश्च सूदितो निहतः । ननु तर्हि ममापि वधः स्यादित्यत आह-नेति । मे मम संबन्धी यः सारो बलं त्वय्यस्ति सः तेषु निहतेषु नैवाअर्धं पृथक् । एतेनातिप्रबलत्वात्तव वधो न भविष्यतीति ध्वनितम्८॥

१ विभागश्च इति गो. पाठः । २ वै न वेद यस्तेऽस्त्रबलं बलं च ते इति गो. पाठः । ३ यायिन इति गो. पाठः । ४ ते दयित इति गो. पाठः । ५ हीति गो. पाठः । ६ निषूदन इति रा. पाठः । ७ मतिमदिति गो. पाठः । ८ समीक्ष्येति गो. पाठः ।

बलावमर्दैस्त्वयि संनिकृष्टे यथागते शाम्यति शान्तशत्रुः ।
तथा समीक्ष्यात्मबलं परं च समारभस्वास्त्रभृतां वरिष्ठ ॥ १० ॥
न वीर सेना गणशो च्यवन्ति न वज्रमादाय विशालसारम् ।
न मारुतस्यास्ति गतिप्रमाणं न चाग्निकल्पः करणेन हन्तुम् ॥ ११ ॥
तमेवमर्थं प्रसमीक्ष्य सम्यक्स्वकर्मसाम्याद्धि समाहितात्मा ।
स्मरंश्च दिव्यं धनुषोऽस्य वीर्यं व्रजाक्षतं कर्म समारभस्व ॥ १२ ॥

रा०टी०–इदमिति । निहतमिदं महद्बलं दृष्ट्वा कपेः प्रभावम् आत्मनः सारं बलं च निरीक्ष्य ज्ञात्वा स्वबलानुरूपं वेगं कुरुष्व ॥ ९ ॥

गो० टी०–न हीति । त्वयि मे यः सारः उत्कर्षप्रत्ययः सः तेषु नास्त्येव हीति योजना ॥ ९ ॥

गो० टी०–इदं हीति । इदं किङ्करा ध्यक्षकुमारान्तमारकम् मतिमत् प्रशस्तमतियुक्तम् । बलं शरीरम् । प्रभावम् अन्तःशक्तिम् । पराक्रमं पौरुषम् ॥ १० ॥

१०] ति० टी०–गते युद्धाय निर्गते त्वयि संनिकृष्टे सति बलावमर्दैरनेकबलप्रमथनैर्हेतुभिः शान्तशत्रुरुपशान्तबलः शत्रुर्यथा शाम्यति क्षीणो भवति तथाऽऽत्मबलं परबलं च समीक्ष्यारभस्व । ‘ बलावमर्दैः ’ इति ‘ शान्तशत्रुः ’ इति च पाठे इति कतकः । ‘ बलावमर्द ’ इति ‘ शान्तशत्रो ’ इति च पठित्वा हेऽस्त्रभृतां वरिष्ठ ! त्वयि युद्धाय गते संनिकृष्टे हनूमत्समीपं प्राप्ते, बलावमर्दः सेनानाशो यथा शाम्यति न भवति तथाऽऽरभस्वेत्यर्थ इति तीर्थः ॥ १० ॥

रा० टी०–बलेति । शान्तशत्रौ त्वयि सन्निकृष्टे युद्धसमीपे गते प्राप्ते सति बलावमर्दः मत्सेनाध्वंसः शाम्यति अतः यथा शाम्यति तथा समारभस्व ॥ १० ॥

गो० टी०–बलेति । शान्तशत्रौ शमितशत्रौ शत्रुशमनस्वभाव इति यावत् । “वा दान्तशान्त–” इत्यादिना निपातनाण्णिलोप इडभावश्च । त्वयि संनिकृष्टे कपेरासन्ने सति यथा बलावमर्दः सेनाक्षयः शाम्यति तथा आरभबलम् परं परबलं च समीक्ष्य समारभस्व । बलनाशात्पूर्वमेव शत्रुशान्तिं कुर्वित्यर्थः ॥ ११ ॥

११] ति० टी०–अथ तत्र सेनादिपरिग्रहो व्यर्थ इत्याह–न वीरेति । हे वीर ! सेना न ग्राह्याः यतस्ता गणशः सङ्घशः इत्यवन्ति पलायन्ते नश्यन्ति च । तथा विशालसारमतितैष्यकाठिन्यवत्, अत एव वज्रं तत्तुल्यमायुधजालमादायापि न प्रयोजनं गणशः प्रयुक्तस्य तस्यापि प्रच्यवादेव । गणशो च्यवन्तीत्यत्रोत्वमार्षम् । कुतस्तत्राह—नेति । मरुतोपत्यस्य मारुतस्य गतेः सामर्थ्यस्य प्रमाणं परिच्छेद एतावद्बलं निग्रहीतुं शक्त इति परिच्छेदो नास्ति, अतो लोके निखिलमपि बलं तस्याकिंचित्करमित्यर्थः । किं चाग्निकल्पोऽग्नितुल्योऽसौ करणेन शस्त्रादिरूपेण हन्तुं न शक्यः । ‘ जयत्यतिबलो रामः ’ इत्येतद्दोषणसमये । ‘ हनुमाञ्छत्रुसैन्यानां निहन्ता मारुतात्मजः ’ इत्युक्तेरिह रावणस्य मारुतस्येत्युक्तिनासमञ्जसा । पराक्रमातिशयदर्शनादुत्प्रेक्षामात्रेण तु किंचिदूनमिति प्रागुक्तम् । केचित्तु गणाच्छोचयतीति गणशोग्यनूमांस्तस्मिन्सेना नावन्ति, ततो न रक्षन्तीत्यर्थ इति वदन्ति, तत्रावतेस्त्रायतिसमानार्थत्वात्पञ्चमीप्राप्तौ सप्तम्यार्षी । तवोत्ववत् । एवं विशालसारमित्यत्र विश अलसारमिति च्छेदं कुर्वन्ति, अलसारं कुण्ठसारं वज्रं तत्तुल्यमप्यायुधमादाय न विशरणं न प्रविशेति च व्याचक्षते अलतेर्धातोः पर्याप्त्यर्थत्वेन पर्याप्तसारमिति व्याख्यातुं योग्यम् । कुण्ठेत्यर्थस्य ततोऽलाभात् ॥ ११ ॥

गो० टी०–न वीरेति । हे वीर ! गणशोचि गणानां शोचयितरि शोचतेर्ण्यन्तात्क्विप् एकदाऽनेकप्रहर्तरीत्यर्थः एवंभूते हनुमति निमित्ते सेनाः नावन्ति न रक्षन्ति युगपदनेकविनाशके सेना अप्रयोजिकेत्यर्थः । अतः सेनाभिः सह मागच्छेत्यर्थः । उपायान्तरं प्रतिषेधति—न वज्रमिति । अलसारं हनुमद्विषये जीर्णसारं वज्रं वज्राख्यमायुधविशेषम् आदाय न विश । तत्समीपमिति शेषः । तत्र हेतुमाह—न मारुतस्येति । अस्य गतिप्रमाणं मारुतस्य नास्ति । मारुतादप्यतिशयितगतिप्रमाण इत्यर्थः । अतस्तरसा यया कयापि दिशा समागम्य प्रहर्तरि न वज्रं किञ्चित्करमिति भावः । यदि समीपमागमिष्यति तदा मुष्ट्यादिभिरेव निहन्यत इत्याशङ्क्याह–न चेति । अग्निकल्पो हनुमान् करणेन मुष्ट्यादिना हन्तुं न शक्यः । अग्नितुल्ये मुष्ट्यादिप्रहाराप्रवृत्तेरिति भावः ॥ १२ ॥

१२] ति० टी०–किं बलावष्टम्भेन गन्तव्यमिति शङ्कायां तत्सविशेषमुपदिशति—तमिति । तं मदुक्तमर्थमेवमेव प्रसमीक्ष्यैवमेव तत्त्वमिति निश्चित्य, स्वकर्मसाम्यात्स्वेनैव कर्मणः प्रकृतकार्यस्य साम्यात्सिद्धेः संपादनीयत्वात्त्वं समाहितात्मा समाहितचित्तो भूत्वाऽस्य विषये दिव्यं धनुषो वीर्यं दिव्यास्त्रमोक्षसामर्थ्यं स्मरन्निश्चिन्वन्व्रज, गत्वा चाक्षतं परकीयप्रहारैर्हीनं यथा भवति तथा शत्रुपराभवकर्मारभस्व ॥ १२ ॥

रा० टी०–तमिति । स्वकर्मसाम्यात् स्वक्रियासादृश्यं संस्मृत्य समाहितात्मा एकाग्रचित्तस्त्वं तं स्वविजयरूपम् अर्थं प्रसमीक्ष्य निश्चित्य अस्य स्वकीयस्य धनुषो वीर्यं स्मरन् सन् व्रज अक्षतं परैरविनाश्यं कर्म समारभस्व च ॥ ११ ॥

१ मर्द इति गो. पाठः । २ क्षाम्यतीति गो. पाठः । ३ क्षत्राविति गो. रा. पाठः । ४ वरिष्ठः इति रा. पाठः । ५ श्लोकोऽयं रा. नास्ति । ६ गतेरिति गो. पाठः ।

न खल्विदं मतिश्रेष्ठ यत्त्वां संप्रेषयाम्यहम् । इयं च राजधर्माणां क्षत्रस्य च यतिर्मता ॥ १३ ॥
नानाशास्त्रेषु संग्रामे वैशारद्यमरिन्दम । अवश्यमेव बोद्धव्यं काम्यश्च विजयो रणे ॥ १४ ॥
ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः ।
चकार भर्तारमतित्वरेण रणाय वीरः प्रतिपन्नबुद्धिः ॥ १५ ॥
ततस्तैः स्वगणैरिष्टैरिन्द्रजित्प्रतिपूजितः । युद्धोद्धतकृतोत्साहः सङ्ग्रामं संप्रपद्यत ॥ १६ ॥
श्रीमान्पद्मविशालाक्षो राक्षसाधिपतेः सुतः । निर्जगाम महातेजाः समुद्र इव पर्वणि ॥ १७ ॥
स पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः स तु तीक्ष्णदंष्ट्रैः ।
रथं समायुक्तमसह्यवेगः समारुरोहेन्द्रजिदिन्द्रकल्पः ॥ १८ ॥
स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्रविदां वरः । रथेनाभिययौ क्षिप्रं हनूमान्यत्र सोऽभवत् ॥ १९ ॥
स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च । निशम्य हरिवीरोऽसौ संप्रहृष्टतरोऽभवत् ॥ २० ॥

गो० टी०–तर्हि कथं कर्तव्यं तत्राह—तमिति । तं पूर्वोक्तमर्थम् एवं सम्यक् प्रसमीक्ष्य विचार्य स्वकर्मसाम्यात्स्वकार्यसिद्ध्यर्थम् फलस्यापि हेतुत्वात्पञ्चमी साम्यं समत्वम् अन्यूनातिरिक्तत्वम् समाहितात्मा एकाग्रचित्तः दिव्यं धनुःसम्बन्धि अस्त्रवीर्यमस्त्रबलम् स्मरन् व्रज । अस्त्रबलं विना स निगृहीतुमशक्यः तेन तन्मन्त्रं स्मरन्नेव गच्छेति भावः॥१३॥

१३] ति० टी०–हे मतिश्रेष्ठ प्रशस्तबुद्धे! अहं त्वामतिप्रियं पुत्रमीदृशे संकटे प्रेषयामि इयं प्रेषणा नोचिता खलु, अथापीयं मती राजधर्माणामस्माकं तथा क्षत्रस्य क्षत्रियस्य च मतैव शास्त्रतः संमतैव ॥ १३ ॥

रा० टी०–नेति । यत् यया मत्या त्वाम् अहं संप्रेषयामि सा इयं मतिः यद्यपि श्रेष्ठा न तथापि राजधर्माणां क्षत्रस्य क्षत्रियस्य इयं मतिर्मता श्रेष्ठेत्यर्थः मतिश्रेष्ठेति भाट्टपाठे तु संबोधनं तत्रोचितेत्यध्याहर्तव्यम् ॥ १२ ॥

गो० टी०–न खल्विति । अहं त्वां संप्रेषयामीति यत् इयं मतिः न श्रेष्ठा खलु नोचितेत्यर्थः । इयं मतिः त्वत्प्रेषणविषया मतेः राजधर्माणां राजनीतिस्वरूपधर्माणाम् क्षत्रस्य तदनुष्ठातुः क्षत्रियस्य च मता उचिता यद्यपि बालस्य प्रेषणमनुचितं तथापि स्वीयेषु सत्सु प्रधानगमनं नीतिशास्त्रविरुद्धमिति त्वां प्रेषयामीति भावः ॥ १४ ॥

१४] ति० टी०–अथ राज्ञः क्षत्रियस्य च कृत्यमाह–नानेति । नानाशास्त्रेषु धर्मार्थनीत्यादिशास्त्रेषु संग्रामे च वैशारद्यम् । संपाद्यमिति शेषः । यस्य रणे विजयः काम्यो भवति तेनोक्तं नानाशास्त्रमवश्यं बोद्धव्यमेवेत्यर्थः । यद्वा परस्य नानाशास्त्रेषु यद्वैशारद्यमस्ति तद्योद्धावश्यमेव बोद्धव्यम, बुद्धापि रणे स्वस्य विजयः प्रार्थ्य एवाहं जेष्याम्येवेति बुद्ध्या युद्धमारभ्यमेव, न तु तादृशशत्रोरपि निवर्तितव्यमित्यर्थः । केचित्तु—'नानाशास्त्रैः' इति ' योद्धव्यम् ' इति च पठित्वा नानाशास्त्रकरणकसङ्ग्रामे वैशारद्यं सामर्थ्यं तवास्ति, अतस्त्वयाऽवश्यं योद्धव्यमेव, रणे जयश्च प्रार्थनीय एवेति व्याचक्षते ॥ १४ ॥

रा० टी०–नानेति । रणे विजयः काम्यः त्वया वाञ्छनीयः अतः नानाशास्त्रेषु उक्ते संग्रामे संग्रामप्रकारे वैशारद्यं नैपुण्यमवश्यमेव बोद्धव्यं त्वया संस्मरणीयम् ॥ १३ ॥

गो० टी०–नानेति । नानाशस्त्रैः वैशारद्यं प्रहरणसामर्थ्यम् अवश्यं बोद्धव्यम् स्मर्तव्यमित्यर्थः । रणे विजयश्च काम्यः प्रार्थनीयः । जयार्थं सर्वाण्यस्त्राणि स्मर्तव्यानीत्यर्थः ॥ १५ ॥

१५] ति०टी०–दक्षसुता देवाः । प्रदक्षिणं चकार । भर्तारं राजानं रावणम् । रणायातित्वरेणातित्वरया गन्तुं कृतबुद्धिः१५

रा० टी०–तत इति । पितुः रावणस्य वचनं निशम्य दक्षसुतानां देवानां प्रभाव इव प्रभावो यस्य स मेघनादः रणाय रणं गन्तुं भर्तारं रावणमतित्वरेण प्रदक्षिणं चकार ॥ १४ ॥

गो० टी०–तत इति । दक्षसुतप्रभावः दक्षसुता देवाः । तथोक्तम् विष्णुपुराणे–' मनसा त्वेव भूतानि पूर्वं दक्षोऽसृजत्तथा । देवानृषीन्सगन्धर्वानुरगान् पक्षिणस्तथा ' इति ॥ १६ ॥

१६] ति० टी०–स्वगणैरन्यैः सभास्थै राक्षसैः । युद्धे उद्धतश्चासौ कृतोत्साहश्च संप्रपद्यत संप्रापद्यत ॥ १६ ॥

रा० टी०–तत इति । स्वगणैः प्रतिपूजितः युद्धोद्धताय उद्धतयुद्धाय कृतः उत्साहो येन स मेघनादः संग्रामं संप्रपद्यत संप्रापद्यत गन्तुमारभत ॥ १६ ॥

गो० टी०–ततस्तैरिति । ' युद्धोद्धतः कृतोत्साह ' इति पाठः ॥ १७ ॥ १८ ॥

१७] ति० टी०–पर्वणीति । वर्धमान इति शेषः ॥१७॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–श्रीमानिति । राक्षसाधिपतेः सुतः पर्वणि समुद्र इव निर्जगाम ॥ १६ ॥ १७ ॥

१८–२०] ति० टी०–पक्षिराजोपमैरन्योन्यतुल्यवेगैश्च । व्यालैः सर्पैः ॥ १८–२० ॥

१ मतिः श्रेष्ठेति गो. रा. पाठः । २ शास्त्रैश्चेति गो. पाठः । ३ अदीनसत्त्व इति गो. पाठः । ४ युद्धोद्धतः इति गो. पाठः । ५ प्रत्यपद्यतेति गो. पाठः । ६ पलाशेति गो. पाठः । ७ पर्वस्विति गो. पाठः ।

[1]इन्द्रजिच्चापमादाय शितशल्यांश्च सायकान् । हनूमन्तमभिप्रेत्य जगाम रणपण्डितः ॥ २१ ॥
तस्मिंस्ततः संयति जातहर्षे रणाय निर्गच्छति बाणपाणौ ।
दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौद्रा बहुधा विनेदुः ॥ २२ ॥
समागतास्तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः ।
नभः समावृत्य च पक्षिसङ्घा विनेदुरुच्चैः परमप्रहृष्टाः ॥ २३ ॥
आयान्तं सरथं दृष्ट्वा [2]पूर्णमिन्द्रध्वजं कपिः । [3]ननाद च महानादं व्यवर्धत च वेगवान् ॥ २४ ॥
इन्द्रजित्स रथं दिव्यमाश्रितश्चित्रकार्मुकः । धनुर्विस्फारयामास तडिदूर्जितनिःस्वनम् ॥ २५ ॥
ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशङ्कौ ।
कपिश्च रक्षोऽधिपतेस्तनूजः सुरासुरेन्द्राविव बद्धवैरौ ॥ २६ ॥
स तस्य वीरस्य महारथस्य धनुष्मतः संयति संमतस्य ।
शरप्रवेगं व्यहनत्प्रवृद्धश्चचार मार्गे पितुरप्रमेयः ॥ २७ ॥

रा०टी०–सेति । पक्षिराजोपमया सहिताः तुल्यः परस्परं समो वेगो येषां ते एव ते इति कर्मधारयः तैश्चतुर्भिर्व्यालैः समायुक्तं रथम् इन्द्रकल्पः इन्द्रसदृशः इन्द्रजित् समारुरोह॥१८॥

रा० टी०–स इति । स इन्द्रजित् यत्र स हनुमान् अभवत् आतिष्ठत तत्र रथेनाभिययौ ॥ १९ ॥

रा० टी०–स इति । स हनुमान् तस्य इन्द्रजितः रथनिर्घोषं कार्मुकस्य ज्यास्वनं निशम्य श्रुत्वा संप्रहृष्टतरोऽभवत् ॥ २० ॥

गो० टी०–स इति । पक्षिराजोपमतुल्यवेगैः पक्षिराजोपमैः अन्योन्यतुल्यवेगैश्च व्यालैः हिंस्रपशुभिः सिंहैरिति यावत् सिंहाश्च रक्षसां वाहनानि भवन्ति ' सर्पाहिंस्रपशु व्यालौ ' इत्यमरः ॥ १९ ॥ २० ॥

गो० टी०–स तस्येति । ज्यास्वनमित्यत्र ज्या इति लुप्तषष्ठीविभक्तिकं पृथक्पदम् कार्मुकस्येत्यत्र स्वनमिति वा अध्याहारः ॥ २१ ॥ २२ ॥

२१] ति० टी०–शितशल्यांस्तीक्ष्णाग्रान् ॥ २१ ॥

रा० टी०–इन्द्रजिदिति । चापं शितशल्यान् तीक्ष्णाग्रभागान् सायकान् आदाय हनुमन्तमभिप्रेक्ष्य जगाम ॥ २१ ॥

२२] ति० टी०–संयति तद्विषये जातहर्षे । दिशश्चेत्युत्पातवर्णनम् रौद्रा मृगाः क्रोष्टृप्रभृतयः ॥ २२ ॥

रा० टी०–तस्मिन्निति । तस्मिन् इन्द्रजिति संयति संग्रामार्थं जातहर्षे अत एव रणाय निर्गच्छति सति सर्वा दिशः कलुषा बभूवुः रौद्राः क्रोष्टृादयो मृगाः विनेदुश्च ॥ २२ ॥

गो० टी०–तस्मिंस्तत इति । संयति युद्धे । जातहर्षे जातोत्साहे ॥ २३ ॥

२३] ति० टी०–चक्रचरा ग्रहाः परमप्रहृष्टा विनेदुरिति शुभनिमित्तम् ॥ २३ ॥

रा० टी०–समागता इति । तत्र तस्मिन् समये समागताः नागादयः नभः समावृत्य उच्चैर्विनेदुः ॥ २३ ॥

गो० टी०–समागता इति । चक्रचराः संचारिणः ॥ २४ ॥ २५ ॥

२४] ति० टी०–इन्द्रध्वजमिन्द्राकारचिह्नवद्ध्वजम्॥२४॥

रा० टी०–आयान्तमिति । स हनुमान् इन्द्रध्वजम् इन्द्राकारचिह्नवद्ध्वजविशिष्टं रथं दृष्ट्वा महानादं यथा भवति तथा ननाद व्यवर्धत च ॥ २४ ॥

२५–२६] ति० टी०–तडिदूर्जितनिःस्वनं तडिन्निभमूर्जितस्वनं च ॥ २५ ॥ २६ ॥

रा० टी०–इन्द्रजिदिति । दिव्यं रथमाश्रित इन्द्रजित् तडिदूर्जितनिःस्वनं तडिन्निःस्वनसदृशप्रवृद्धनिःस्वनविशिष्टं यथा भवति तथा धनुर्विस्फारयामास ॥ २५ ॥

रा० टी०–तत इति । समेतौ रणाङ्गणे प्राप्तौ रणनिर्विशङ्कौ तौ कपिः रक्षोऽधिपतेः तनूजश्च सुरासुरेन्द्राविव बद्धवैरौ अभवताम् ॥ २६ ॥

गो० टी०–इन्द्रजिरिति । तडिदूर्जितनिःस्वनम् । अत्र तडिच्छब्देन तत्सङ्घातोऽशनिरुच्यते विद्युत्सङ्घातनिःस्वनमिति पूर्वमुक्तत्वात् अशनिवद्दृढनिःस्वनमित्यर्थः ॥ २६ ॥

गो० टी०–तत इति । सुरासुरेन्द्राविव समेतावित्यन्वयः ॥ २७ ॥

२७] ति० टी०–व्यहनद्व्यचितवान् ॥ २७ ॥

रा० टी०–स इति । प्रवृद्धोऽप्रमेयो हनुमान् संयति संमतस्य धनुष्मतोऽस्य इन्द्रजितः शरप्रवेगं व्यहनत् व्यहन् अवञ्चयदित्यर्थः पितुर्वायोर्मार्गे चचार च ॥ २७ ॥

गो० टी०–स तस्येति । शरप्रवेगं व्यहनत् चचार चेत्यन्वयः ॥ २८–३० ॥

---

१ सुमहदिति गो. पाठः । २ तूर्णमिन्द्रजितमिति गो. तूर्णमिति रा. पाठः । ३ विननादेति गो. पाठः । ४ च पुत्र इति गो. पाठः । ५ अप्रमेये इति गो. पाठः ।

ततः शरानायततीक्ष्णशल्यान्सुपत्रिणः काञ्चनचित्रपुङ्खान् ।
मुमोच वीरः परवीरहन्ता सुसंततान्वज्रसमानवेगान् ॥ २८ ॥
ततः स तत्स्यन्दननिःस्वनं च मृदङ्गभेरीपटहस्वनं च ।
विकृष्यमाणस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ॥ २९ ॥
शराणामन्तरेष्वाशु व्यावर्तत महाकपिः । हरिस्तस्याभिलक्ष्यस्य मोक्षयंल्लक्ष्यसंग्रहम् ॥ ३० ॥
शराणामग्रतस्तस्य पुनः समभिवर्तत । प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ॥ ३१ ॥
तावुभौ वेगसंपन्नौ रणकर्मविशारदौ । सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमम् ॥ ३२ ॥
हनूमतो वेद न राक्षसोऽन्तरं न मारुतिस्तस्य महात्मनोऽन्तरम् ।
परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥ ३३ ॥
ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु ।
जगाम चिन्तां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥ ३४ ॥

२८-२९] ति० टी०-सुपत्रिणः कङ्कादिपक्षयुक्तान् सुसंततानविरतान् ॥ २८ ॥ २९ ॥

रा० टी०-तत इति । आयता एव तीक्ष्णशल्याः तीक्ष्णपुङ्खाः तान् सुपत्रिणः शोभनकङ्कपत्रविशिष्टान् सुसन्ततान् अतिदृढानित्यर्थः शरान् वीर इन्द्रजित् सुमोच ॥ २८ ॥

रा० टी०-तत इति । स हनूमान् तत्स्यन्दनस्य इन्द्रजिद्रथस्य निःस्वनं मृदङ्गादेः स्वनं च विकृष्यमाणस्य कार्मुकस्य धनुषो घोरं स्वनं च निशम्य श्रुत्वा पुनरुत्पपात ॥ २९ ॥

३०] ति० टी०-अभिलक्ष्यस्याभिमतलक्ष्यस्य लक्ष्यसंग्रहम् लक्ष्यत्वेन संग्रहणम् मोक्षयन्मोघीकुर्वन् व्यर्थीकुर्वन्निति यावत् शराणामन्तरेषु व्यावर्तत परिवर्तते स्मेत्यर्थः ॥ ३० ॥

रा० टी०-शराणामिति । अभिलक्ष्यस्य विचित्रकर्मकर्तृत्वेन सर्वतो दर्शनीयस्य तस्येन्द्रजितः शराणां लक्ष्यसंग्रहं लक्ष्यसंग्राहकत्वमीक्षयन् त्याजयन् अन्तरेषु वायुपथि मध्येषु व्यवर्तत विविधं पर्यटत् ॥ ३० ॥

गो० टी०-शराणामिति । अभिलक्ष्यस्य लक्ष्यवेधने प्रसिद्धस्य लक्ष्यसंग्रहं लक्ष्यसंग्रहणम् लक्ष्यविषयदृष्टिमिति यावत् मोघयन् वितथयन् ॥ ३१ ॥

३१-३२] ति० टी०-अभिवर्ततात्यवर्तत ततः शरमोक्षसमये पुनरुत्पपात ॥ ३१ ॥ ३२ ॥

रा० टी०-शराणामिति । पुनरनन्तरं तस्य शराणाम् अग्रतः अग्रे समभिवर्तत समभ्यवर्तत कदाचित् तच्छरं वञ्चयित्वा तच्छरेण सह धावन् धावन् ततोऽग्रे निर्गच्छतीत्यर्थः पुनः हस्तौ प्रसार्य उत्पपात ऊर्ध्वमगच्छत् ॥ ३१ ॥

गो० टी०-शराणामग्रत इति । समभिवर्तत समभ्यवर्तत उत्पपात चेत्यन्वयः ॥ ३२ ॥

रा० टी०-तावितिं । तौ हनुमदिन्द्रजितौ सर्वभूतमनोग्राहि निखिलप्राणिहृदयापकर्षकं युद्धं चक्रतुः ॥ ३२ ॥

गो० टी०-तावुभाविति । मनोग्राहि मनआकर्षकम् ॥ ३३ ॥

३३] ति० टी०-निर्विषहौ दुःसहवेगौ ॥ ३३ ॥

रा० टी०-हृदयापकर्षकत्वमेव स्फुटयन्नाह-हनुमत इति । राक्षसः हनूमतोऽन्तरमवकाशं न वेद हनुमत्कर्तृकशरवञ्चनसमयं नाजानादित्यर्थः तस्येन्द्रजितः अन्तरं शरप्रवाहोपरमाभावेन शरसंधानसमयं मारुतिर्न वेद अतः देवसमानविक्रमौ तौ परस्परं समेत्य निर्विषहौ असह्यौ बभूवतुः ॥ ३३ ॥

गो० टी०-हनूमत इति । अन्तरं छिद्रम् ॥ ३४ ॥

३४] ति० टी०-अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनूमति विहन्यमाने शरेभ्यः स्वयमेव मुच्यमाने शरैरभिघ्नमाने सतीत्यर्थः हन्तेर्गत्यर्थात्कर्मकर्तरि शानच् समाधिसंयोगेन ध्यानकारणेन तत्स्वरूपज्ञानाय समाहितात्मैकाग्रचित्तः ॥ ३४ ॥

रा० टी०-तत इति । ततः तेषु अमोघेषु शरेषु संपतत्सु सत्सु अत एव लक्ष्ये हनुमति विहन्यमाने ताड्यमाने सत्येव नतु प्राणैर्वियुक्ते सतीत्यर्थः महात्मा अति प्रयत्नवान् समाधेः संयोगेन अतिविचारकालप्राप्त्या समाहितः एकाग्रीकृतः आत्मा मनो येन सः इन्द्रजित् महतीं चिन्तां जगाम हन्तेस्ताडनार्थकत्वं तु माल्याहत इव द्विप इत्यादौ प्रसिद्धं तुशब्द एवार्थे ॥ ३४ ॥

गो० टी०-ततस्त्विति । अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति विहन्यमाने स्वयं तेभ्यो विमुच्यमाने सति हन्तेर्गत्यर्थात्कर्मकर्तरि लटश्शानजादेशः समाधिसंयोगसमाहितात्मा सम्यगाधीयत इति समाधिः लक्ष्यं तस्मिन् संयोगे शरसंधाने समाहितात्मा अप्रमत्तचित्तः स महात्मा इन्द्रजित् महतीं चिन्तां जगाम ॥ ३५ ॥

---

१ संनतान्वज्रनिपातेति गो. पाठः । २ घोरमिति रा. पाठः । ३ व्यवर्ततेति गो. रा. पाठः ।

ततो मतिं राक्षसराजसूनुश्चकार तस्मिन्हरिवीरमुख्ये
अवध्यतां तस्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थम् ॥ ३५ ॥
ततः पैतामहं वीरः सोऽस्त्रमस्त्रविदां वरः । संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥ ३६ ॥
अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् । निजग्राह महाबाहुं मारुतात्मजमिन्द्रजित् ॥ ३७ ॥
तेन बद्धस्ततोऽस्त्रेण राक्षसेन स वानरः । अभवन्निर्विचेष्टश्च पपात च महीतले ॥ ३८ ॥
ततोऽथ बुद्ध्वा स तदस्त्रबन्धं प्रभोः प्रभावाद्विगतालपवेगः[1] ।
पितामहानुग्रहमात्मनश्च विचिन्तयामास हरिप्रवीरः ॥ ३९ ॥
ततः स्वयंभुवैर्मन्त्रैर्ब्रह्मास्त्रं चाभिमन्त्रितम्[2] । हनूमांश्चिन्तयामास वरदानं पितामहात् ॥ ४० ॥
न मेऽस्य[3] बन्धस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् ।
इत्येवंमेवं विहितोऽस्त्रबन्धो मयाऽऽत्मयोनेरनुवर्तितव्यः ॥ ४१ ॥
स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च ।
विमोक्षशक्तिं परिचिन्तयित्वा पितामहाज्ञामनुवर्तते स्म ॥ ४२ ॥

३५-३६] ति० टी०-ततो ध्यानानन्तरमवध्योऽयमिति ध्यानेन ज्ञात्वा निग्रहार्थं बन्धनार्थं बन्धनमुद्दिश्य कथं निगच्छेत्कथं निश्चेष्टो भवेदिति मतिं विचारं चकार ॥ ३५॥३६ ॥

रा० टी०-तत इति । राक्षसराजसूनुः कपेरवध्यतां समीक्ष्य निग्रहार्थं तत्कृतोपद्रवनिवृत्त्यर्थं कथं कथञ्चित् निगच्छेत् बन्धनं प्राप्नुयादिति तस्मिन् हरिवीरमुख्ये मतिं निश्चयं चकार ॥ ३५ ॥

रा० टी०-तत इति । सुमहातेजा इन्द्रजित् हरिप्रवरं प्रति पैतामहमस्त्रं संदधे ब्रह्मास्त्रसंधानमकरोत् ॥ ३६ ॥

गो० टी०-तत इति । अवध्यतां तस्य कपेः समीक्ष्य निग्रहार्थं कथं निगच्छेत् नीचतां गच्छेदिति मतिं चकार ॥ ३६॥३७॥

३७-३८] ति० टी०-ब्रह्मास्त्रेणाप्यवध्यतां ज्ञात्वा तदस्त्रेण तं निजग्राह बबन्ध ॥ ३७ ॥ ३८ ॥

रा० टी०-अवध्य इति । अयं मारुतिरवध्य इति ज्ञात्वा निश्चित्य इन्द्रजित् मारुतात्मजं निजग्राह ॥ ३७ ॥

रा० टी०-तेनेति । राक्षसेन अस्त्रेण करणेन बद्धो वानरः निर्विचेष्टोऽभवत् अत एव महीतले पपात च ॥ ३८ ॥

गो० टी०-अवध्योऽयमिति । निजग्राह बबन्ध॥३८-४०

३९] ति० टी०-स हनुमान्स्वस्य तदस्त्रबन्धं ब्रह्मास्त्रबन्धं कृतं बुद्ध्वापि प्रभोर्ब्रह्मणः प्रभावाद्वरदानाद्विगतालपवेगो विगतोऽप्राप्तोऽल्पोऽपि वेगः पीडा येन तादृशः अभीतचित्त इति यावत् आत्मनः पितामहानुग्रहं मुहूर्तमात्रेण मदस्त्रनिरोधमुक्तिरित्येवंरूपम् ॥ ३९ ॥

रा० टी०-तत इति । प्रभो रामस्य प्रभावात् विगतो निवृत्तोऽल्पवेगो यस्मात् महावेग इत्यर्थः तदस्त्रबन्धं ब्रह्मास्त्रेण बन्धनं बुद्ध्वा आत्मन उपरि पितामहानुग्रहं मुहूर्तमात्रेण मदस्त्रात्ते विनिर्मुक्तिरित्याकारकानुग्रहविशेषं विचिन्तयामास॥३९॥

४०] ति० टी०-उक्तमेवार्थं स्पष्टयति—तत इति । स्वायंभुवैः स्वयंभूदेवत्यैरनेकविधैर्मन्त्रैरभिमन्त्रितं तत्सिद्धं भवति तादृशं ब्रह्मास्त्रं तत्कृतनिरोधं बुद्ध्वा पितामहाल्लब्धं वररूपं दानं प्रागुक्तरूपं चिन्तयामास ॥ ४० ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—तत इति । स्वायंभुवैः स्वयंभूदेवताकैः मन्त्रैरभिमन्त्रितं ब्रह्मास्त्रं पितामहात् वरदानं च चिन्तयामास ॥ ४० ॥

गो० टी०-तत इति । ब्रह्मास्त्रमभिमन्त्रितम् । विज्ञायेति शेषः ॥ ४१ ॥

४१] ति० टी०-लोकगुरोः प्रभावान्मे हनूमतोऽस्यास्त्रबन्धस्य विमोक्षणे शक्तिर्नास्तीत्येवं ध्यानेन ज्ञात्वा, एवमनुभूयमानप्रकारेण ममानेन विहित आत्मयोनेरस्त्रबन्धो मयानुवर्तितव्य एव मुहूर्तमात्रं सोढव्य एव ॥ ४१ ॥

रा० टी०-तदाकारमाह-नेति । लोकगुरोर्ब्रह्मणः प्रभावात् हेतोः अस्य बन्धस्य विमोक्षणे मे शक्तिर्नास्ति इति हेतोः एव विहितोऽस्त्रबन्धो मयानुवर्तितव्यः ॥ ४१ ॥

गो० टी०-न म इति । लोकगुरोः प्रभावात् अस्य बन्धस्य मोक्षणे मे शक्तिर्नास्तीत्येवं मत्वा एवं विहितः इन्द्रजिता अनेन प्रकारेण कृतः आत्मयोनेरस्त्रबन्धः मया अनुवर्तितव्य इत्यन्वयः ॥ ४२ ॥

४२] ति० टी०-विमोक्षशक्तिं मुहूर्तानन्तरभाविनीं तां चिन्तयित्वा मुहूर्तमात्रं पितामहाज्ञामनुवर्तते स्म ॥ ४२ ॥

रा० टी०-स इति । स हनुमान् वीर्यादिविमोक्षशक्तिं मुहूर्तानन्तरमस्त्रविमुक्तिसामर्थ्यं च परिचिन्तयित्वा परिचिन्त्य पितामहाज्ञामनुवर्तते स्म ॥ ४२ ॥

गो० टी०-स इति । पितामहानुग्रहं विमोक्षहेतुभूतमनुग्रहम् ॥ ४३ ॥

१ आत्मवेग इति गो. पाठः । २ चेति गो. नास्ति । ३ऽस्त्रेति गो. पाठः । ४ एव मस्त्रेति गो. पाठः ।

अस्त्रेणापि हि बद्धस्य भयं मम न जायते । पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च ॥ ४३ ॥
ग्रहणे चापि रक्षोभिर्[1]महन्मे गुणदर्शनम् । राक्षसेन्द्रेण संवादस्तस्माद्गृह्णन्तु मां परे ॥ ४४ ॥
स निश्चितार्थः परवीरहन्ता समीक्ष्यकारी विनिवृत्तचेष्टः ।
परैः प्रसह्याभिगतैर्निगृह्य ननाद तैस्तैः परिभर्त्स्यमानः ॥ ४५ ॥
ततस्ते[2] राक्षसा दृष्ट्वा [3]विनिश्चेष्टमरिन्दमम् । बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥ ४६ ॥
स रोचयामास परैश्च बन्धं प्रसह्य वीरैरभिगर्[4]हणं च ।
कौतूहलान्मां यदि राक्षसेन्द्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ ४७ ॥
स बद्धस्तेन वल्केन विमुक्तोऽस्त्रेण वीर्यवान् । अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते ॥ ४८ ॥
अथेन्द्रजि[5]त्तं द्रुमचीरबद्धं विचार्य वीरः कपिसत्तमं तम् ।
विमुक्तमस्त्रेण जगाम चिन्तामन्येन बद्धोऽप्यनुवर्ततेऽस्त्रम् ॥ ४९ ॥

४३] ति० टी०–भयं न जायते । तत्र हेतुः—पितामहेत्यादि । आदित्यग्रासप्रवृत्तिसमय एव त्रयानुग्रहः प्रागुक्तः ॥ ४३

रा० टी०–अस्त्रेणेति । पितामहादिना रक्षितस्य मम अस्त्रेण बद्धस्य बन्धनस्य बन्धनात् भयं न जायते ॥ ४३ ॥

गो० टी०–अस्त्रेणेति । स्वस्यादित्यग्रासानन्तरं पितामहमहेन्द्राभ्यामनिलेन च रक्षितत्वान्न मे भयमित्यर्थः ॥ ४४ ॥

४४] ति० टी०–मे महद्गुणदर्शनमस्तीति शेषः । राक्षसेन्द्रेण संवाद इति ॥ ४४ ॥

रा० टी०–इदं बन्धनं गुण एवेति बोधयन्नाह–ग्रहण इति । ग्रहणे सति राक्षसेन्द्रेण संवादो भवितेति शेषः अतो ग्रहणे महद् गुणदर्शनमस्ति तस्मात् परे राक्षसा मां गृह्णन्तु ॥ ४४ ॥

गो० टी०–ग्रहण इति । गुणदर्शनः गुणपर्यवसायी । संवादः ॥ ४५ ॥ ४६ ॥

४५] ति० टी०–निश्चितार्थः उक्तरीत्येति भावः । समीक्ष्यकारी विचारपूर्वकं कार्यकर्ता । अभिगतैरभिसृत्य गतैः परैः प्रसह्य बलाद्गृहीत्वा परिभर्त्स्यमानः सन्ननाद । पीडित इवेति भावः ॥ ४५ ॥

रा० टी०–स इति । निश्चितोऽर्थो येन सः समीक्ष्यकारी विचारपूर्वककरणशीलः विनिवृत्ता अस्त्रमहिम्नोपरता चेष्टा कामव्यापारो यस्य स हनुमान् अभिगतैः परितो वियमानैः परैः राक्षसैः निगृह्य परिभर्त्स्यमानः सन् ननाद स्वजातीयशब्दं चकार ॥ ४५ ॥

४६] ति० टी०–शणवल्कैस्तज्जन्यरज्जुभिः सहितै रज्जुरूपेण कृतैर्द्रुमचीरैर्द्रुमवल्कलैः ॥ ४६ ॥

रा० टी०–तत इति । राक्षसाः अरिन्दमं हनुमन्तं विनिश्चेष्टं दृष्ट्वा संहितैः रज्जुत्वेन निर्मितैः शणवल्कैः द्रुमचीरैः द्रुमान्तरवल्कैश्च बबन्धुः ॥ ४६ ॥

गो० टी०–ततस्तमिति । शणवल्कैः शणत्वग्भिः । संहतैः सज्जीकृतैः द्रुमचीरैः वल्कलैः ॥ ४७ ॥

४७] ति० टी०–कौतूहलान्मां द्रष्टुं व्यवस्येदिति निश्चितार्थो निश्चितकार्यतत्त्वः सन्स्वस्य तत्संभाषणापेक्षित्वाद्बन्धादिकं रोचयामास ॥ ४७ ॥

रा० टी०–स इति । राक्षसेन्द्रः कौतुकात् हेतोः मां द्रष्टुं यदि कदाचित् व्यवस्येत् निश्चिनुयात् इति हेतोः निश्चितः अर्थः रावणसमीपगमनं येन स हनुमान् प्रसह्य परैः कृतं बन्धनम् अभिगर्हणं दुरुक्तिं च रोचयामास ॥ ४७ ॥

गो० टी०–स इति । राक्षसेन्द्रः कौतूहलात् मां द्रष्टुं व्यवस्येदिति निश्चितार्थः सन् बन्धनादिकं रोचयामासेति संबन्धः ॥ ४८ ॥ ४९ ॥

४८] ति० टी०–अस्त्रबन्धमोक्षोऽपि तदैवाजायत इत्याह––स इति । वल्केन वल्कलेन तज्जन्यरज्ज्वैव बद्धः । अस्त्रेण तु विमुक्तः । कुतस्तत्राह–अस्त्रबन्धो मन्त्रबन्धोऽन्यं बन्धं नानुवर्तते इतरबन्धेन सह न तिष्ठति तस्मिन्सति मन्त्रबन्धो नश्यतीत्यर्थः ॥ ४८ ॥

रा० टी०–स इति । स हनुमान् तेन राक्षसकृतेन वल्केन तदुपादानकरज्ज्वा बद्धोऽपि अस्त्रेण विमुक्तः अभवदिति शेषः । तत्र हेतुमाह–अस्त्रबन्धः ब्रह्मास्त्रेण बन्धनम् अन्यं बन्धं बन्धनं न अनुवर्तते बन्धनान्तरमवलोक्य निवर्तत इत्यर्थः ॥ ४८ ॥

४९] ति० टी०–इममर्थमिन्द्रजिदपि ज्ञातवानित्याह––अथेति । अस्त्रेण विमुक्तं विचार्य ज्ञात्वान्येन बद्धोऽपि हनुमानस्त्रमनुवर्ततेऽस्त्रेण बद्ध इव वर्तत इत्यपि विचार्य चिन्तां जगामेति संबन्धः । ‘ नान्येन बन्धे ह्यनुवर्ततेऽस्त्रम् ’ इति पाठे चिन्तास्वरूपमिदम् । राक्षसैः स्वकृतबन्धनवशात्खेदं जगामेत्यर्थः ॥ ४९ ॥

रा० टी०–अथेति । अथ रज्जुबन्धनानन्तरम् इन्द्रजित् द्रुमचीरबद्धम् अत एव अस्त्रेण विमुक्तं कपिसत्तमं तं कपिः सन् चासौ तमन् रावणसभादर्शनमाकाङ्क्षन् च तं तं हनु-

१ महान्मे गुणदर्शनः इति गो. पाठः । २ तमिति गो. पाठः । ३ निर्विचेष्टमिति गो. पाठः । ४ निग्रहमिति गो. पाठः । ५ त्विति गो. पाठः । ६ नान्येनेति गो. पाठः ।

अहो महत्कर्म कृतं निरर्थं न राक्षसैर्मन्त्रगतिर्विमृष्टा ।
पुनश्च नास्त्रे विहतेऽस्त्रमन्यत्प्रवर्तते संशयिताः स्म सर्वे ॥ ५० ॥
अस्त्रेण हनुमान्मुक्तो नात्मानमवबुध्यते[1] । कृष्यमाणस्तु रक्षोभिस्तैश्च बन्धैर्निपीडितः ॥ ५१ ॥
हन्यमानस्ततः क्रूरै राक्षसैः कालमुष्टिभिः[2] । समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः ॥ ५२ ॥
अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तमस्त्रेण बद्धं द्रुमचीरसूत्रैः[3] ।
व्यदर्शयत्तत्र महाबलं तं हरिप्रवीरं सगणाय राज्ञे ॥ ५३ ॥
तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम् । राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ ५४ ॥
कोऽयं कस्य कुतो वापि[4] किंकार्यं कोऽभ्युपाश्रयः[5] । इति राक्षसवीराणां दृष्ट्वा संजज्ञिरे कथाः ॥ ५५ ॥
हन्यतां दह्यतां वापि भक्ष्यतामिति चापरे । राक्षसास्तत्र संक्रुद्धाः परस्परमथाब्रुवन् ॥ ५६ ॥
अतीत्य मार्गं सहसा महात्मा स तत्र रक्षोधिपपादमूले ।
ददर्श राज्ञः परिचारवृद्धान्गृहं महारत्नविभूषितं च ॥ ५७ ॥
स ददर्श महातेजा रावणः कपिसत्तमम् । रक्षोभिर्विकृताकारैः कृष्यमाणमितस्ततः ॥ ५८ ॥
राक्षसाधिपतिं चापि ददर्श कपिसत्तमः । तेजोबलसमायुक्तं तपन्तमिव भास्करम् ॥ ५९ ॥

मन्तं विचार्य विनिश्चित्य अन्येन बद्धोऽयम् अस्त्रमनुवर्तते अथ इति हतोः चिन्तां जगाम अत एव न पौनरुक्त्यम् यदि तु पूर्वं पठितस्य तमित्यस्य अमृतमित्यर्थः तदा कपिसत्तममित्येव छेदः 'तश्चौरामृतपुच्छेषु' इति कोशः ॥ ४९ ॥

गो० टी०–अथेन्द्रजित्त्विति । अन्येन शणवल्कलादिना बद्धः अस्त्रं नानुवर्तते । नास्त्रेण बद्ध इव वर्तत इत्यर्थः । अहो इति । मन्त्रगतिः ब्रह्मास्त्रमन्त्रपद्धतिः न विमृष्टा न पर्यालोचितेत्यर्थः बन्धान्तरेण सहानवस्थानरूपं ब्रह्मास्त्रस्वभावमनालोच्य शणबन्धादिकं राक्षसैः कृतमिति भावः । अस्त्रे विहिते ब्रह्मास्त्रे प्रतिहते अन्यदस्त्रं न प्रवर्तते न प्रभवतीत्यर्थः । तदेव ब्रह्मास्त्रं प्रयुज्यतामित्याशङ्क्याह–पुनश्चेति । पुनर्न प्रवर्तते । प्रयुक्तं ब्रह्मास्त्रं पुनर्न प्रभवतीत्यर्थः । सर्वे इत्यनन्तरमितिकरणं बोध्यम् । इति चिन्तां जगामेति पूर्वेण संबन्धः ॥ ५० ॥५१ ॥

५०] ति० टी०–चिन्तामाह—अहो इति । पाठान्तरे चिन्तान्तरमिदम् । मया कृतं महत्कर्म निरर्थं कृतं राक्षसैः, यतस्तैर्मन्त्रगतिर्न विमृष्टा न विचारिता । अन्यबन्धे मन्त्रबन्धो नश्यतीति न ज्ञातमित्यर्थः । पुनरस्त्रं तदेव प्रयोज्यं तत्राह-अस्त्रे ब्राह्मे विहते पुनरन्यदस्त्रं तदस्त्रप्रयोगान्तरं न प्रवर्तते, अतः सर्वे वयं संशयिताः संशयितजया एव । मुक्तोऽयं सर्वानपि हन्यादिति भावः ॥ ५० ॥

रा० टी०–चिन्ताकारमाह—अहो इति । यतः राक्षसैः मन्त्रगतिः मन्त्ररीतिः न विमृष्टा विज्ञाता अतः महत् कृतम् अतियत्नेन मया संपादितं कर्म निरर्थं व्यर्थं कृतम् । ननु पुनर्मन्त्रप्रयोगं कुर्वित्यत आह–अस्त्रे विहते दुरनुष्ठानेन निवृत्ते सति अन्यत् अस्त्रं न प्रवर्तते इति हेतोर्वयं सर्वे संशयिताः संशयं प्राप्ताः स्म॥५०॥

५१–५४] ति० टी०–अस्त्रविमोक्षं राहुमोक्षवदपरोक्षतया ज्ञातवानपि हनुमान्न तथा ज्ञापयतीत्याह—अस्त्रेणेति । अवबुध्यते अन्तर्भावितण्यर्थतया नावबोधयति स्म अस्त्रमोक्षं न प्रकाशयति स्मेत्यर्थः । तैर्बन्धैर्लौकिकबन्धैः, अत एव कृष्यमाणत्वादिगुणको राक्षसेन्द्रसमीपं प्राकृष्यत ॥ ५१–५४ ॥

रा० टी०–अस्त्रेणेति । अस्त्रेण मुक्तोऽपि हनुमान् आत्मानं न अवबुध्यते मुक्तत्वेन न जानाति अत एव रक्षोभिः कृष्यमाणः सन् बन्धैर्निपीडितोऽस्तीति शेषः ॥ ५१ ॥

रा० टी०–हन्यमान इति । कालमुष्टिभिः क्रूरैः राक्षसैः हन्यमानः स हनुमान् राक्षसेन्द्रस्य समीपं प्राकृष्यत ॥ ५२ ॥

रा० टी०–अथेति । अथानन्तरम् हरिप्रवीरं हनुमन्तं राज्ञे रावणाय व्यदर्शयन् ॥ ५३ ॥

रा० टी०–तमिति । राक्षसाः बद्धं कपिवरं रावणाय न्यवेदयन् ॥ ५४ ॥

गो० टी–अस्त्रेणेति । नावबुद्धयत नावधृतवान्॥५२–५७॥

५५] ति० टी०–कस्य सुत इति शेषः । कोऽभ्युपाश्रयः कस्याश्रयेणैवं निर्भय इत्यर्थः ॥ ५५ ॥

रा० टी०–क इति । अभ्युपाश्रयः अस्य सेव्यः कः इति राक्षसवीराणां कथाः परस्परमुक्तयः संजज्ञिरे बभूवुः ॥ ५५ ॥

५६] ति० टी०–यत्र रावणः स्थितस्तत्रत्या राक्षसा एवमब्रुवन्नित्यर्थः ॥ ५६ ॥

रा० टी०–हन्यतामिति । अपरे राक्षसाः हन्यतामित्याद्यब्रुवन् ॥ ५६ ॥

५७–५९] ति० टी०–परिचारवृद्धान् वृद्धान्परिचारकानित्यर्थः ॥ ५७–५९ ॥

१ बुध्यतेति गो. पाठः । २ काष्ठेति गो. पाठः । ३ वात्रेति गो. पाठः । ४ व्यपाश्रय इति गो. पाठः । ५ तत्रेति गो. पाठः ।

स रोषसंवर्तिततामृदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य ।
अथोपविष्टान्कुलशीलवृद्धान्समादिशत्तं प्रतिमुख्यमन्त्रीन्[1] ॥ ६० ॥
यथाक्रमं तैः स कपिश्च[2] पृष्टः कार्यार्थमर्थस्य च मूलमादौ ।
निवेदयामास हरीश्वरस्य दूतः सकाशादहमागतोऽस्मि ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ।

रावणस्य लक्षणसंपदमैश्वर्यं च विलोक्याश्चर्यवैवश्यं प्राप्तो हनुमान्स्वादयं सुरलोकस्यापि शास्ता यदि बलवताऽधर्मेण न भ्रश्येतेत्युत्प्रेक्षते ।

ततः स कर्मणा तस्य विस्मितो भीमविक्रमः । हनूमान्क्रोधताम्राक्षो[3] रक्षोधिपमवैक्षत ॥ १ ॥
भ्राजमानं महार्हेण काञ्चनेन विराजता । मुक्ताजालवृतेनाथ मुकुटेन महाद्युतिम् ॥ २ ॥
वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः । हैमैराभरणैश्चित्रैर्भनसेव प्रकल्पितैः ॥ ३ ॥

रा० टी०-अतीत्येति । महात्मा स हनुमान् मार्गमतीत्य अतिक्रम्य रक्षोऽधिपपादमूले परिचारवृद्धान् वृद्धपरिचारकान् महारत्नविभूषितं राज्ञो रावणस्य गृहं च ददर्श॥५७॥

रा० टी०-स इति । स प्रसिद्धो रावणः रक्षोभिः इतस्ततः कृष्यमाणं कपिसत्तमं ददर्श ॥ ५८ ॥

रा० टी०-राक्षसेति । तपन्तं भास्करमिव राक्षसाधिपतिं कपिसत्तमो ददर्श ॥ ५९ ॥

गो० टी०-अतीत्येति । परिचारवृद्धान् अमात्यवृद्धान् ॥ ५८-६१ ॥

६०] ति० टी०-वक्ष्यमाणसंक्षेपः—अथेति । मन्त्रीन् मन्त्रिण इत्यर्थः ॥ ६० ॥

रा० टी०-स इति । रोषेण संवर्तिते ताम्रदृष्टी अरुणनयने यस्य स दशाननः कपिं हनुमन्तमन्ववेक्ष्य उपविष्टान् संस्थितान् कुलशीलवृद्धान् मुख्यमन्त्रीन् मुख्यमन्त्रिणः तं हनुमन्तं प्रति समादिशत् प्रष्टुमाज्ञापयत् ॥ ६० ॥

६१] ति० टी०-कार्यं कर्तव्यमर्थस्तत्प्रयोजनं च । समाहारद्वन्द्वः अर्थस्य मूलमुक्तप्रयोजनप्रवर्तकम् । उत्तराशयस्तु दूत्यं कृत्यम्, प्रेरकः सुग्रीव इति ॥ ६१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रा० टी०-यथेति । तै रावणाज्ञप्तैर्मुख्यमन्त्रिभिः कार्यार्थं कार्यं कर्तव्यम् अर्थः कर्तव्यस्य प्रयोजनं च समाहारद्वन्द्वः अर्थस्य कार्यप्रवृत्तेर्मूलं कारणं च पृष्टः स हनुमान् हरीश्वरस्य सुग्रीवस्य सकाशात् समीपात् आगतः दूतोऽहमस्मीति निवेदयामास ॥ ६१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

गो० टी०-यथाक्रममिति । कार्यार्थं कर्तव्यार्थम् अर्थस्य कर्तव्यार्थस्य मूलं निमित्तं प्रेषयितारमित्यर्थः । अनयोर्विपृष्ट इत्यनेन संबन्धः श्लोकान्त इतिकरणं बोध्यम् । वक्ष्यमाणसंग्रहोऽयम् ॥ ६२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१-२] ति० टी०-तस्येन्द्रजितः । यत्तु रावणस्येति तत्र, तेन हनुमति कस्यापि कर्मणोऽकृतत्वादिति कतकः । पुत्रद्वारा स्वबन्धनकर्मणेत्यर्थ इति तीर्थः ॥ १ ॥ २ ॥

३] ति० टी०-वज्रसंयोगेन तद्घट्टनेन संयुक्तैर्घटितैर्महार्हमणिविग्रहैर्बहुमूल्यमणिप्रधानस्वरूपैः ॥ ३ ॥

रा० टी०-हनुमतो वृत्तमाह-तत इत्यादिभिः । ततः तस्मिन् समये तस्य इन्द्रजितः कर्मणा विस्मितः तस्य रावणस्य कर्मणा सीतापहरणक्रियया क्रोधताम्राक्षः स हनुमान् रक्षोधिपं रावणमवैक्षत कर्मणेति तस्येति चाव्ययोभयान्वयि ॥१॥

रा० टी०-भ्राजमानमिति । महार्हेण बहुमूल्येन काञ्चनेन सुवर्णमयेन मुक्ताजालवृत्तेन यथायोग्यं मुक्तासमूहविन्यस्तेन विराजता प्रकाशमानेन मुकुटेन वज्रस्य संयोगेन यथोचितं विन्यासेन संयुक्तैः महार्हमणीनां विग्रहैर्थयोचितं विघट्टनविशिष्टैर्मनसेव प्रकल्पितैः हैमैः हेममयैः आभरणैर्भ्राजमानम् अत एव महाद्युतिम् ॥ २ ॥ ३ ॥

गो० टी०-ततः स इत्यादि । कर्मणा तस्य विस्मितयुद्धार्थं रावणेनागन्तव्यमिति मया यत्नः कृतः । स तु नीतिज्ञ आसनस्थ एव इन्द्रजिन्मुखेन मां निबध्यानीतवानित्यानयनकर्मणा जातविस्मय इत्यर्थः ॥ १ ॥

गो० टी०-भ्राजमानमित्यादि । वज्रसंयोगसंयुक्तैः वज्रकीलनेन संबद्धैः । अत्र भ्राजमानमित्यनुषज्यते ॥ २ ॥

१ मन्त्रिमुख्यानिति गो. पाठः । २ वीति गो. पाठः । ३ रोषेति गो. पाठः ।

महार्हक्षौमसंवीतरक्तचन्दनरूषितम् । स्वनुलिप्तं विचित्राभिर्विधाभिश्च भक्तिभिः ॥ ४ ॥
[2]विचित्रं दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः । दीप्ततीक्ष्णमहादंष्ट्रं प्रलम्बं दशनच्छदैः ॥ ५ ॥
शिरोभिर्दशभिर्वीरो भ्राजमानं महौजसम् । नानाव्यालसमाकीर्णैः शिखरैरिव मन्दरम् ॥ ६ ॥
नीलाञ्जनचयप्रख्यं हारेणोरसि राजता । पूर्णचन्द्राभवक्त्रेण सबालार्कमिवाम्बुदम् ॥ ७ ॥
बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः । भ्राजमानाङ्गदैर्भीमैः पञ्चशीर्षैरिवोरगैः ॥ ८ ॥
महति स्फाटिके चित्रे रत्नसंयोगचित्रिते । उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ॥ ९ ॥
अलंकृताभिरत्यर्थं प्रमदाभिः समन्ततः । वालव्यजनहस्ताभिरारात्समुपसेवितम् ॥ १० ॥
दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा । मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥ ११ ॥
उपोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितम् । कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२ ॥
मन्त्रिभिर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभदर्शिभिः । आश्वास्यमानं सचिवैः सुरैरिव सुरेश्वरम् ॥ १३ ॥
अपश्यद्राक्षसपतिं हनूमानतितेजसम् । [11]वेष्टितं मेरुशिखरे सतोयमिव तोयदम् ॥ १४ ॥
स तैः संपीड्यमानोऽपि रक्षोभिर्भीमविक्रमैः । विस्मयं परमं गत्वा रक्षोधिपमवैक्षत ॥ १५ ॥
भ्राजमानं ततो दृष्ट्वा हनुमान्राक्षसेश्वरम् । मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६ ॥
अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः । अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥ १७ ॥

४] ति० टी०–भक्तिभिः शैवत्रिपुण्ड्रवद्रचनाविशेषैः ॥४॥

रा० टी०–महार्हक्षौमेण पट्टवस्त्रविशेषेण संवीतमाच्छादितं रक्तचन्दनेन रूषितं विविधाभिर्भक्तिभिः संवर्तीयकस्तूर्यादिभिः स्वनुलिप्तम् ॥ ४ ॥

गो० टी०–महार्हेति । भक्तिभिः पङ्क्तिभिः । इत्थंभूतलक्षणे तृतीया यथा पङ्क्त्यो भवन्ति तथानुलिप्त इत्यर्थः । पूर्णचन्द्राभवक्त्रेण पूर्णचन्द्रतुल्यनायकरन्ध्रेण वक्त्रं नायकरन्ध्रम् अभितोलग्नमुक्तामणिमण्डलम् केयूरं भुजोपरि धार्यमाणमाभरणम् अङ्गदं बाहुमध्यस्थाभरणम् । मन्त्रिभिः प्रशस्तमन्त्रैः अतः सचिवैरित्यपुनरुक्तिः ॥ ३–१६ ॥

५] ति० टी०–विचित्रमाश्चर्यभूतैर्दशनच्छदैः प्रलम्बं लम्बदशनच्छदवन्तम्

६] ति० टी०–शिरोभिर्दशभिरिति हनुमतो दर्शनकाले रणे इव भीषणरूपकरणादिति बोध्यम् ॥ ६ ॥

रा० टी०–भीमदर्शनैः रक्ताक्षैररुणनयनैर्विचित्रमाश्चर्यीभूतं दीप्ता प्रकाशिता तीक्ष्णा महादंष्ट्रा यस्य दशनच्छदैः ओष्ठैः प्रलम्बं प्रलम्बौष्ठवन्तमित्यर्थः । समस्तपाठे तु भ्राजमानमित्युत्तरेणान्वयः नानाव्यालसमाकीर्णैः अनेकसर्पव्याप्तैः शिखरैर्मन्दरमिव प्रलम्बदशनैर्दशभिः शिरोभिश्च भ्राजमानम् ॥ ५ ॥ ६ ॥

७] ति० टी०–हारेणोपलक्षितम् ॥ ७ ॥

रा० टी०–नीलाञ्जनचयवत् प्रख्या प्रतीतिर्यस्य उरसि राजता हारेण शोभितमिति शेषः पूर्णचन्द्राभवक्त्रेण पूर्णचन्द्रसदृशमुखेन च सबालार्कं बालार्कसहितमम्बुदमिव प्रतीयमानम् ॥ ७ ॥

८–११] ति० टी०–केयूराङ्गदयोरन्तरविशेष ऊह्यः ॥ ८–११ ॥

१२] ति० टी०–चतुर्भिः सागरैः परिवृतं तं कृत्स्नं लोकं भूमण्डलमिवेत्यर्थः ॥ १२ ॥

१३–१४] ति० टी०–मन्त्री बुद्धिसहायः । सचिवः कार्यसहायः ॥ १३ ॥ १४ ॥

रा० टी०–बद्धानि केयूराणि येषु तैः भ्राजमानाः अङ्गदाः येषु तैः चन्दनोत्तमरूषितैः पञ्चशीर्षैरुरगैरिव प्रतीयमानमिति शेषः, केयूरोऽङ्गदावान्तरभेदः ॥ ८ ॥

रा० टी०–रत्नसंयोगेन चित्रिते स्फाटिके स्फटिकनिर्मिते उत्तमास्तरणैरास्तीर्णे चित्रे आश्चर्यीभूते वरासने सूपविष्टम्॥९॥

रा० टी०–आरात् समीपे समन्ततो वीयमानाभिः प्रमदाभिः समुपसेवितम् ॥ १० ॥

रा० टी०–महापार्श्वेन स्थूलपार्श्ववता प्रहस्तेन रक्षसा मन्त्रतत्त्वज्ञैः मन्त्रिभिश्च मन्त्रिणा निकुम्भेन चोपोपविष्टं चतुर्भिः रक्षोभिः कृत्स्नं लोकं भुवनं परिवृतं तैर्मन्त्रतत्त्वज्ञैर्मन्त्रिभिः दुर्धरादिभिश्चतुर्भिरुपोपविष्टम् सचिवैः मन्त्रिभिः अन्यैर्मन्त्रिभिश्च सुरैः सुरेश्वरमिव आश्वास्यमानं मेरुशिखरे सतोयं तोयदमिव विष्ठितं राक्षसपतिं हनुमान् अपश्यत् त्रयोदशानामेकवान्वयः ॥ ११–१४ ॥

१५–१७] ति० टी०–रक्षोधिपमवैक्षत, न तु रक्षःकृतपीडामित्यर्थः ॥ १५–१७ ॥

रा० टी०–स इति । तैः रक्षोभिः संपीड्यमानोऽपि स हनुमान् विस्मयं गत्वा रक्षोधिपमवैक्षत ॥ १५ ॥

---

१ संवीतमिति गो. पाठः । २ विवृतैरिति गो. पाठः । ३ दंष्ट्रैरिति गो. पाठः । ४ वीरमिति गो. पाठः । ५ बालकमिति गो. पाठः । ६ पीनैरिति गो. पाठः । ७ कृत्स्नः परिवृतो लोक इति गो. पाठः । ८ बुद्धिभिरिति गो. पाठः । ९ अन्वास्येति गो. पाठः । १० रक्षोभिरिति गो. पाठः । ११ विष्ठितमिति गो. रा. पाठः ।

यद्यधर्मो न बलवान्स्यादयं राक्षसेश्वरः। स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८ ॥
अस्य क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः। सर्वे बिभ्यति खल्वस्माल्लोकाः सामरदानवाः ॥ १९ ॥
अयं ह्युत्सहते क्रुद्धः कर्तुमेकार्णवं जगत्। इति चिन्तां बहुविधामकरोन्मतिमान्कपिः ॥
दृष्ट्वा राक्षसराजस्य प्रभावममितौजसः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः।

रावणादिष्टः प्रहस्तो हनुमन्तं तत्स्वरूपं पृच्छन्वनभञ्जनराक्षसहननप्रयोजनं पप्रच्छ। स त्वक्षमगणयन्रावणमुद्दिश्यैव वनभञ्जनराक्षसक्षपणयोः त्वद्दर्शनात्मरक्षयोर्हेतुत्वं निदर्शयन्नात्मनो रामदूतत्वं कथयन्स्वस्य ब्रह्मवरात्तदस्त्रावश्यत्वेऽपि भवद्दर्शनार्थमस्त्रानुसरणं कृतमिति कथयति।

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम्। रोषेण महताविष्टो रावणो लोकरावणः ॥ १ ॥
शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसा वृतम्। किमेष भगवान्नन्दी भवेत्साक्षादिहागतः ॥ २ ॥
येन शप्तोऽस्मि कैलासे मया प्रहसिते पुरा। सोऽयं वानरमूर्तिः स्यात्किंस्विद्बाणोऽपि वासुरः ॥ ३ ॥

रा० टी०–भ्राजमामिति। भ्राजमानं राक्षसेश्वरं दृष्ट्वा तस्य राक्षसेश्वरस्य तेजसा मोहितः कर्तव्यविषयकविवेकरहितो हनुमान् चिन्तयामास ॥ १६ ॥

रा० टी०–चिन्ताकारमाह–अहो इति। राक्षसराजस्य रूपादिसर्वलक्षणयुक्तता च अहो आश्चर्यम् ॥ १७ ॥

गो० टी०–अहो इत्यादि ॥ १७ ॥

१८] ति० टी०–सर्वसंपत्तिमतोऽप्यधर्मवतो महान्दोष इत्याह—यदीति। बलवानेवंविधसमृद्धोऽप्युन्मूलनक्षमोऽधर्मो यद्यस्मिन्न स्यात्तदायं राक्षसेश्वरः शक्रस्य सुरलोकस्यापि विष्णुवद्रक्षिता स्यात्। यद्वा धर्म इत्यर्शआद्यजन्तम् अयं बलवान्राक्षसेश्वरो यद्यधर्मवान्न स्यात्तदा शक्रस्येत्यादि प्राग्वत्। अधर्महतत्वात्तु स्वप्रजानामपि नाशक एवेति भावः ॥ १८ ॥

रा० टी०–यदीति। अयं राक्षसेश्वरः यदि अधर्मः धर्मविरोधी न स्यात् तर्हि सुरलोकस्यापि रक्षिता स्यात् ॥ १८ ॥

गो० टी०–यदीति। अयं रावणकृतः अधर्मः बलवान्न स्याद्यदि तदायं राक्षसेश्वरः सशक्रस्य सुरलोकस्यापि रक्षिता स्यात् ॥ १८ ॥

१९–२०] ति० टी०–'के न बिभ्यति' इति पाठे के नेति पदच्छेदः ॥ १९ ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०–अस्येति। लोककुत्सितैः सर्वजननिन्दितैः नृशंसैः घातुकैः अत एव क्रूरैः अस्य कर्मभिः सामरदानवाः सर्वे लोकाः अस्मात् रावणाद्बिभ्यति ॥ १९ ॥

रा० टी०–अयमिति। क्रुद्धः अयं जगदेकार्णवं कर्तुम् उत्सहते समर्थो भवति इति बहुविधां चिन्तां राक्षसराजस्य प्रभावं दृष्ट्वाऽपि अकरोत्। सार्धश्लोक एकान्वयी ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकोनपञ्चाशत्तमः सर्गः ॥ ४९ ॥

गो० टी०–अस्येति। तेन कर्मभिः कृतेन पूर्वोक्तेनाधर्मेण हेतुना ॥ १९ ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१] ति० टी०–आविष्टः आसीदिति शेषः ॥ १ ॥

रा० टी०–हनुमद्दर्शनानन्तरकालिकं रावणवृत्तान्तमाह–तमित्यादिभिः। पिङ्गे अक्षिणी यस्य तं पुरतः स्थितं हनुमन्तम् उद्वीक्ष्य शङ्काहतात्मा शङ्काव्याप्तचित्तः स प्रसिद्धो रावणः दध्यौ चिन्तयामास। सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–तमुद्वीक्ष्येत्यादि। बाणः महाबलिसुतः। अनेन तेनापि किञ्चित् शप्तमिति गम्यते। अत्रेतिकरणं द्रष्टव्यम् ॥ १–४ ॥

२] ति० टी०–तेजसा वृतम्। दृष्ट्वेति शेषः। शङ्काहतात्मेत्युक्तां शङ्कामेवाह—नन्दी वानरमुख एष प्रमथगणाधिपः ॥ २ ॥

३] ति० टी०–शप्तः मन्मुखसदृशमुखैस्तव नाशो भविष्यतीति शापः। बलिसुतो बाणो वा महेश्वरभक्तत्वान्नन्दिना प्रेषित इति शङ्का ॥ ३ ॥

रा० टी०–चिन्ताकारमाह–किमित्यादिभिः। पुरा कैलासगमनसमये मया प्रहसिते वानरमुखसदृशमुखवत्त्वेन प्रहासं प्रापिते सति येनाहं शप्तः सन् मुखसदृशमुखैः त्वद्विनाशो भ-

१ ईश्वरमिति गो. पाठः। २ तेनेति गो. पाठः। ३ हरिरिति गो. पाठः। ४ कोपेनेति गो. पाठः। ५ संचालिते इति गो. पाठः।

स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् । कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥ ४ ॥
दुरात्मा पृच्छ्यतामेष कुतः किं वास्य कारणम् । वनभङ्गे च कोऽस्यार्थो राक्षसानां च तर्जने ॥ ५ ॥
मत्पुरीमप्रधृष्यां वै[1] गमने किं प्रयोजनम् । आयोधने वा किं कार्यं पृच्छ्यतामेष दुर्मतिः ॥ ६ ॥
रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् । समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥ ७ ॥
यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् । तत्त्वमाख्याहि मा ते भूद्भयं वानर मोक्ष्यसे ॥ ८ ॥
यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च । चारुरूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ॥ ९ ॥
विष्णुना प्रेषितो वापि दूतो विजयकाङ्क्षिणा । नहि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ १० ॥
तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे । अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ ११ ॥
अथ वा यन्निमित्तस्ते प्रवेशो रावणालये । एवमुक्तो हरिवरस्तदा रक्षोगणेश्वरम् ॥ १२ ॥
अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य च । धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥ १३ ॥

वितेत्युक्तोऽस्मि स भगवान् एष नन्दी वानरमूर्तिः सन् किमिहागतः स प्रसिद्धो बाणोऽसुरो वानरमूर्तिः सन् इहागतो वा । सार्धश्लोक एकान्वयी ॥ २ ॥ ३ ॥

४] ति० टी०–कालयुक्तं कालोचितम् ॥ ४ ॥

रा० टी०–स इति । राजा स रावणः मन्त्रिसत्तमं प्रहस्तं विपुलं गम्भीरम् अर्थवत् प्रयोजनविशिष्टम् इदमुवाच ॥ ४ ॥

५] ति० टी०–कुतः आगत इति शेषः । किं वा कारणम् को वास्य प्रेषक इत्यर्थः ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह–दुरात्मेत्यादिभिः । कुतः कस्मादागत इति शेषः । अस्यागमनस्य कारणं प्रयोजनं किं, वनभङ्गे राक्षसानां तर्जने च अस्य कोऽर्थः प्रयोजनम् इत्येष दुरात्मा पृच्छ्यताम् ॥ ५ ॥

गो० टी०–दुरात्मा पृच्छ्यतामिति । अस्य विवरणं कुत इत्यादि । कुतः कस्मादेशादागतः, किं वास्य कारणम्, अस्य कः प्रेरकः । मत्पुरीं प्रतीति शेषः । आयोधने युद्धे । किं कार्यं किं प्रयोजनम् ॥ ५–७ ॥

६–७] ति० टी०–मत्पुरीम् उद्दिश्येति शेषः । आयोधने किंकरादिभिर्युद्धे । यद्वा मत्पुरीगमने मत्पुरीप्राप्तावित्यर्थः । आर्षः षष्ठ्यभावः ॥ ६ ॥ ७ ॥

रा० टी०–मदिति । मत्पुरीं प्रतीति शेषः । गमने आगमने किं प्रायोजनम् आयोधने युद्धे वा ते किं कार्यम् इत्येष दुर्मतिः पृच्छ्यताम् ॥ ६ ॥

रा० टी०–रावणस्येति । रावणस्य वचः श्रुत्वा प्रहस्तोऽब्रवीत् । तदाकारमाह–हे कपे ! ते भद्रं कल्याणम् अतो भीर्भीतिर्न कार्या अतः समाश्वसिहि ॥ ७ ॥

८] ति० टी०–मोक्ष्यसे बन्धनादिति शेषः ॥ ८ ॥

रा० टी०–समाश्वासनप्रयोजनमाह–यदीत्यादिभिः । यदि तु त्वमिन्द्रेण प्रेषितः तर्हि तत्त्वं यथार्थमाख्याहि । तत्त्वकथने फलमाह–त्वं मोक्ष्यसे अस्माभिर्बन्धनादिति शेषः ॥८॥

गो० टी०–यदि तावत्त्वमिन्द्रेणेत्यादि । यदि वैश्रवणस्येत्यादेः दूतो विजयकाङ्क्षिणेत्यन्तस्य तत्त्वमाख्याहीति पूर्वेण संबन्धः ॥ ८ ॥ ९ ॥

९] ति० टी०–चाररूपं चाराणां प्रच्छन्नवेषत्वाच्छद्मकृतवानररूपम् ॥ ९ ॥

रा० टी०–यदीति । यदि वैश्रवणाद्यन्यतमस्य दूतः अत एव प्रेषितस्त्वं नोऽस्माकं पुरीं प्रविष्टः अथ वा अथापि यन्निमित्तः यदर्थं ते प्रवेशः तच्च तर्हि तत्त्वतः कथयस्व अनृतं वदतस्तव जीवितं जीवनं दुर्लभम् । ननु सामान्यवानर एवाहमित्यत आह–वानरं सामान्यवानरसंबन्धि ते तेजो न अद्भुतं तेजोऽस्तीत्यर्थः, ते रूपमात्रं तु वानरम् । सार्धश्लोकत्रयमेकान्वयि ॥ ९–११ ॥

१०–११] ति० टी०–कुत एवं चिन्ता तत्राह—नहीति । वानरमितीदमर्थार्ण्णन्तम् ॥ १० ॥ ११ ॥

गो० टी०–न हीत्यादि । अथवेति । यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेण संबन्धः ॥ १०॥११ ॥

१२] ति० टी०–अथ वेति । अथ चेत्यर्थः । यन्निमित्तो यत्प्रयोजनस्तत्कथयस्वेति संबन्धः । एवमुक्तः प्रहस्तेनेति शेषः । रक्षोगणेश्वरं प्रहस्तमलक्षीकृत्य रावणमेव तथाकृत्वाऽब्रवीदित्युत्तरेणान्वयः ॥ १२ ॥

रा० टी०–एवमिति । एवमुक्तः हरिवरो हनुमान् अब्रवीत् । तद्वचनाकारमाह–शक्राद्यन्यतमस्य दूतोऽहं नास्मि । अर्धद्वयमेकान्वयि ॥ १२ ॥

गो० टी०–एवमुक्त इत्यादि । रक्षोगणेश्वरमित्यनेन प्रष्टारं प्रहस्तं पृष्टतः कृतवानिति गम्यते । एषा वानरता राक्षसेन्द्रस्य तवेति शेषः । प्रतियुद्धाः प्रतिप्रहृताः । ममापीति तवेवेत्यर्थः ॥ १२–१६ ॥

१३] ति० टी०–वरुणस्य वा दूत इति शेषः । धनदेन विष्णुना च न मे सख्यम्, अतस्ताभ्यां चोदितो नास्मि॥१३॥

---

१ वेति गो. पाठः । २ निमित्तं ते इति गो. पाठः । ३ श्रेष्ठ इति गो. पाठः । ४ तस्येदमित्यर्थार्ण्णन्तमिति भावः ।

जातिरेव मम त्वेषा वानरोऽहमिहागतः । दर्शने राक्षसेन्द्रस्य तदिदं दुर्लभं मया ॥ १४ ॥
वनं राक्षसराजस्य दर्शनार्थे विनाशितम् । ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकाङ्क्षिणः ॥ १५ ॥
रक्षणार्थं च देहस्य प्रतियुद्धा मया रणे । अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ॥ १६ ॥
पितामहादेष वरो ममापि हि समागतः । राजानं द्रष्टुकामेन मयास्त्रमनुवर्तितम् ॥ १७ ॥
विमुक्तोऽप्यहमस्त्रेण राक्षसैस्त्वभिवेदितः । केनचिद्रामकार्येण आगतोऽस्मि तवान्तिकम् ॥ १८ ॥
दूतोऽहमिति विज्ञाय राघवस्यामितौजसः । श्रूयतामेव वचनं मम पथ्यमिदं प्रभो ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०–धनदेनेति । धनदेन कुबेरेण विष्णुना च मे सख्यं नास्ति अत एव धनदेन विष्णुना च न प्रचोदितोऽस्मि तयोरपि दूतो नास्मीत्यर्थः ॥ १३ ॥

१४–१५] ति० टी०–एषा वानराकृतिर्मम जातिरेव जन्मकृतैव, अतो वानर एवाहमिहागतः । वानरस्यात्रागमने किं प्रयोजनं तत्राह—दर्शन इति । राक्षसेन्द्रस्य तव दर्शने दर्शननिमित्तमिहागत इत्यर्थः । तदिदं तव दर्शनं दुर्लभं प्रकारान्तरेणाशक्यलाभमिति ज्ञात्वा तव दर्शनार्थे वनं विनाशितम् । अयं दर्शनोपायो भवत्येवेत्याह—ततः वनभङ्गाद्धेतोरित्यर्थः ॥ १४ ॥ १५ ॥

रा० टी०–जातिरिति । एषा वानरत्वरूपैव मम जातिः अत एव वानर एवाहं यस्येदं दर्शनं मया दुर्लभं तस्य राक्षसेन्द्रस्य तव दर्शनार्थमिहागतः अत एव राक्षराजस्य दर्शनार्थे वनं विनाशितम् । सार्धश्लोक एकान्वयी ॥ १४ ॥

रा० टी०–तत इति । ततः वनविध्वंसानन्तरं युद्धकाङ्क्षिणः प्राप्ताः राक्षसा मया देहस्य स्वशरीरस्य रक्षणार्थं रणे प्रतियुद्धाः प्रतिभटतया स्थिता युद्धाय प्रवर्तिताः ॥ १५ ॥

१६] ति० टी०–इदानीं युद्धप्रयोजनमाह—रक्षणार्थमिति । प्रतियुद्धा मया प्रतिभटतया स्थित्वा कृतयुद्धाः, नन्वेवं भावि बन्धाद्यपर्यालोच्य कथं युद्धं कृतं तत्राह–अस्त्रेति । अस्त्रैर्ब्रह्मास्त्रान्तैः, पाशैर्यमपाशान्तैः । एवं चेतरपाशकथापि दूरापास्तेत्युक्तम् । देवासुरैर्मिलितैरपीत्यर्थः ॥ १६ ॥

रा० टी०–अस्त्रेति । अस्त्रपाशैः अस्त्रैः पाशैश्च बद्धुं मुहूर्तादनन्तरं बन्धनं प्रापयितुं देवासुरैरप्यहं न शक्यः एष वरः पितामहात् मम मया समागतः प्राप्तः ॥ १६ ॥

१७] ति० टी०–कुतस्तवैवं बलं तत्राह–पितामहादिति। तदनुग्रहादित्यर्थः । ममापि न तु केवलं तवैवेत्यर्थः । एष वर इति । बलविशेषरूप इत्यर्थः । तर्हि कथं बन्धनमुपगतं तत्राह–राजानमिति । अस्त्रं ब्रह्मास्त्रमनुवर्तितं निवृत्तमप्यनुवर्तितमिव ॥ १७ ॥

रा० टी०–ननु बन्धनशक्त्यभावे कथं बन्धनं प्राप्तोऽसीत्यत आह–राजानमिति । राजानं रावणं द्रष्टुकामेन मया अस्त्रमनुवर्तितं बन्धनं प्राप्तमित्यर्थः, अत एव अस्त्रेण विमुक्तोऽप्यहं राक्षसैः अभिवेदितः त्वत्समीपे प्रापितः ॥ १७ ॥

गो० टी०–तर्हि कथं बद्धोऽसीत्याशङ्क्याह—राजानमिति । पीडितः बद्धः सन् । अस्त्रेण विमुक्तः । हिशब्दोऽवधारणे । ब्रह्मास्त्रस्य साधनान्तरासहत्वादिति भावः ॥ १७ ॥

१८] ति० टी०–तदेवाह—विमुक्त इति । विमुक्तोऽपि सास्त्र इवाभिवेदित आनीय तव ज्ञापितः एवं पीडामनुभूय मम दर्शने किं प्रयोजनं तत्राह—केनचिदिति । 'रामकार्येण' इति पाठः पाङ्क्तः ॥ १८ ॥

१९] ति० टी०–रामस्य तव च कः संबन्धस्तत्राह–दूत इति । ननु रामदूतेनापि सीतान्वेषणमेव कार्यम् एवंप्रयासेन मदर्शने किं फलं तत्राह—श्रूयतामिति । वचनं संदेशवचनम् । तत्कथनार्थमयं प्रयास इति भावः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०–ननु मदर्शने तव किं प्रयोजनमित्यत आह–केनचिदिति । राघवस्याहं दूतः इति विज्ञाय संस्मृत्य केनचित् रामकार्येण हेतुना तवान्तिकमागतोऽस्मि अतो मम वचनं श्रूयताम् । सार्धश्लोक एकान्वयी ॥ १८ ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चाशत्तमः सर्गः ॥ ५० ॥

गो० टी०–अस्तु सर्वमेतन्मदर्शनार्थं मदर्शनं वा किमर्थं तत्राह—केनचिदिति ॥ १८ ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

१ दुर्लभे तदिदमिति गो. पाठः । २ देव वरो ममाप्येषोऽभ्युपागत इति गो. पाठः । ३ ह्यहमिति गो. पाठः । ४ पीडित इति गो. पाठः ५ संप्राप्त इति गो. पाठः । ६ श्रूयतां चापीति गो. पाठः ।

एकपञ्चाशः सर्गः ।

हनुमान्रावणं प्रति रामवनागमनमारभ्य स्वीयसीतादर्शनान्तं सकलवृत्तं निवेद्य राममहिमानमनुवर्णयंस्तस्मै सीतायाः प्रत्यर्पणानर्पणे निजजीवितलाभनाशकारणत्वेनोत्कीर्तयति ।

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः । वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १ ॥
अहं सुग्रीवसंदेशादिह प्राप्तस्तवान्तिके । राक्षसेशं हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २ ॥
भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः । धर्मार्थसंहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३ ॥
राजा दशरथो नाम रथकुञ्जरवाजिमान् । पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४ ॥
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियतरः प्रभुः । पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५ ॥
लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया । रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६ ॥
तस्य भार्यां जनस्थाने भ्रष्टां सीतेति विश्रुता । वैदेहस्य सुतां राज्ञो जनकस्य महात्मनः ॥ ७ ॥
मार्गमाणस्तु तां देवीं राजपुत्रः सहानुजः । ऋष्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ॥ ८ ॥

१] ति० टी०–अथ सुग्रीवसंदेशकथनव्याजेन सामदण्डान्यतरविषयत्वनिश्चयाय न्यायानुसारी न वेति जिज्ञासति—तमित्यादि ॥ १ ॥

रा० टी०–रावणं प्रति हनुमदुक्तिमुपक्रमते–तमिति । महासत्त्वं तं रावणं समीक्ष्य अर्थवत् सप्रयोजनं वाक्यं हरिसत्तमो हनुमानुवाच ॥ १ ॥

गो० टी०–तं समीक्ष्येत्यादि । समीक्षणोक्तिक्रियाभेदात्तच्छब्दद्वयम् ॥ १ ॥

२] ति० टी०–भ्राता हरीश इति स्नेहप्रकाशिका लोकोक्तिः । कुशलमब्रवीत् अप्राक्षीदित्यर्थः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–अहमित्यादिभिः । सुग्रीवसंदेशात् हेतोः तवान्तिके अहं प्राप्तः । संदेशमेवाह–हे राक्षसेश ! भ्राता हितोपदेशकर्तृत्वेन भ्रातृसदृशः हरीशः सुग्रीवः त्वां कुशलमब्रवीत् ॥ २ ॥

गो० टी०–अहमिति । अहं रामदूत एव संदेशस्तु सुग्रीवस्येति भावः । सुग्रीवसंदेशात्सुग्रीवसंदेशाद्धेतोः संदेशप्रापणार्थमित्यर्थः ‘ संदेशवाग्वाचिकं स्यात् ’ इत्यमरः । इह लङ्कायाम् । भ्राता भ्रातृवद्धितकरः अब्रवीत् अप्राक्षीत् । यद्यपि सुग्रीवेण न संदिष्टं तथापि दूतोक्तं सर्वं स्वाम्युक्तमेवेत्याशयेनोक्तम् ॥ २ ॥

३] ति० टी०–क्षमं सुखसंपादकम् ॥ ३ ॥

रा० टी०–भ्रातुरिति । भ्रातुस्तव हितस्य सुग्रीवस्य समादेशं सम्यगादेश उपदेशो यस्मिन् तत् धर्मार्थसहितम् अत एव इह लोके अमुत्र परलोके च क्षमं योग्यं च वाक्यं शृणु३॥

गो० टी०–भ्रातुरिति । समादेशं संदेशरूपमिति वाक्यविशेषणम् । इह अस्मिल्लोके । अमुत्र परलोके । क्षमम् अभ्युदयसाधनम् ॥ ३ ॥ ४

४–६] ति० टी–अथ संदेशं वक्तुमुपोद्घातः—राजेति । पितेव बन्धुः रक्षक इत्यर्थः ॥ ४–६

रा० टी०–तद्वाक्यमेवाह–राजेत्यादिभिः । सुरेश्वरसमद्युतिः दशरथो नाम राजा अभवदिति शेषः ॥ ४ ॥

रा० टी०–ज्येष्ठ इति । धर्म्यं पन्थानमाश्रितः तस्य दशरथस्य ज्येष्ठः पुत्रः दण्डकावनं प्रविष्टः । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–धर्म्यं धर्मादनपेतम् “ धर्मपथ्यर्थन्यायादनपेते ” इति यत्प्रत्ययः ॥ ५–७ ॥

७] ति० टी०–भ्रष्टा मृताऽपहृता वेति विशिष्य न ज्ञातमित्यर्थः ॥ ७ ॥

रा० टी०–तस्येति । विश्रुता सर्वत्र प्रख्याता वैदेहस्य सुता तस्य रामस्य भार्या जनस्थाने नष्टा हृता ॥ ७ ॥

८] ति० टी०–तां मार्गमाणः स रामो ऋष्यमूकं प्राप्तः सुग्रीवेण संगतश्च । अनेनैव ज्ञायते नेदं सुग्रीवसंदेशवाक्यम् तदा हि ‘ मया चैव सुसंगतः ’ इत्येव वदेत् ॥ ८ ॥

रा० टी०–मार्गमाण इति । देवीं सीतां मार्गमाणः रामः ऋष्यमूकमनुप्राप्तः सुग्रीवेण संगतः सख्यं प्राप्तश्च ॥ ८ ॥

गो० टी०–स मार्गमाण इति । सुग्रीवेण मयेति शेषः । यद्वा लोके वक्तारः स्वात्मानमन्यमिव निर्दिशन्त्यौद्धत्यातिशयात् । यद्वा अत्रानुवादात्पूर्वं सुग्रीवेणैवं वक्तव्यमिति पठितं तथैव हनुमान् पठतीति समादेशप्राधान्यादन्यवाक्यमपि तथोच्यत इति केचित् प्राहुः । यद्वा सुग्रीवसंदेशस्य रामप्रयोजनपरत्वात्संदेशोपयोगितया रामसुग्रीवयोः सख्यादिकं दर्शयति–राजा दशरथ इत्यादिना ॥ ८—११ ॥

१ एवेति रा. पाठः । २ आलयमिति गो. पाठः । ३ इन्द्रेति गो. पाठः । ४ उपहितमिति गो. पाठः । ५ वने नष्टा सीता पतिमनुव्रतेति गो. स्थानान्नष्टेति रा. पाठः । ६ स मार्गमाण इति गो. पाठः । ७ समागत इति गो. पाठः । ८ अत्रात्मनेपदं युक्तमिति भाति ।

तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् । सुग्रीवस्यापि रामेण हरिराज्यं [1]निवेदितुम् ॥ ९ ॥
ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् । सुग्रीवः स्थापितो राज्ये [2]हर्यृक्षाणां गणेश्वरः ॥ १० ॥
त्वया विज्ञातपूर्वश्च वाली वानरपुङ्गवः । [3]सँ तेन निहतः संख्ये शरेणैकेन वानरः ॥ ११ ॥
स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः । हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ १२ ॥
तां हरीणां सहस्राणि शतानि नियुतानि च । दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥ १३ ॥
वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः । असङ्गगतयः शीघ्रा हरिवीरा महाबलाः ॥ १४ ॥
अहं तु हनुमान्नाम मारुतस्यौरसः सुतः । सीतायास्तु कृते तूर्णं शतयोजनमायतम् ॥ १५ ॥
समुद्रं लङ्घयित्वैवं त्वां दिदृक्षुरिहागतः । भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥ १६ ॥
तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः । परदारान्महाप्राज्ञ नोपरोद्धुं [4]त्वमर्हसि ॥ १७ ॥
नहि धर्मविरुद्धेषु बह्वपायेषु कर्मसु । मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १८ ॥

९-१०]ति०टी०-निवेदितुं प्रतिज्ञातमित्यनुकर्षः॥९॥१०॥

रा० टी०-तस्येति । तस्य रामस्य समीपे सीतायाः परिमार्गणे तेन सुग्रीवेण प्रतिज्ञातं रामेणापि सुग्रीवस्य हरिराज्यं निवेदितुं प्रतिज्ञातम् ॥ ९ ॥

रा० टी०-तत इति । ततः प्रतिज्ञाकरणानन्तरं तेन रामेण वालिनं हत्वा हर्यृक्षाणां गणेश्वरः तद्योग्यः सुग्रीवः राज्ये स्थापितः ॥ १० ॥

११-१५] ति० टी०-त्वया विज्ञातपूर्वो वालीति रावणं प्रति मर्मोक्तिस्तेन रामबलातिशयबोधनम् ॥ ११-१५ ॥

१६] ति० टी०-'त्वां दिदृक्षुरिहागतः' इति पाठः । त्वां सुग्रीवभ्रातरं रावणम् । तस्मिन्दृष्टे सर्वलोकदृष्टान्तज्ञः स सीतागतिं वक्ष्यतीति सुग्रीवेणोक्तत्वात्त्वां दिदृक्षुरिहागतः । दैवात्पङ्गुपरि गङ्गापातवत्तव गृहे भ्रमता मया जानकी दृष्टा॥१६॥

रा० टी०-त्वयेति । त्वया विज्ञातपूर्वः पौर्वकालिकत्वनिश्चयविज्ञानविषयीभूतः यो वाली सः एकेन शरेण निहतः ॥ ११ ॥

रा० टी०-स इति । सः कृतोपकारः सुग्रीवः सीतामार्गणे व्यग्रः सन् हरीन् संप्रेषयामास ॥ १२ ॥

रा० टी०-तामिति । हरीणां सहस्रादीनि मार्गन्ते ॥१३॥

रा० टी०-वैनतेय इति । तत्र तेषु वानरेषु केचित् वैनतेयसमाः केचित् असङ्गगगतयः आलम्बरहितगतिविशिष्टाः आकाशगामिन इत्यर्थः ॥ १४ ॥

रा० टी०-अहमिति । मारुतस्य औरसः मुख्यः सुतः हनुमान्नामाहं तु सीतायाः कृते सीतार्थं शतयोजनमायतं समुद्रं लङ्घयित्वा तां सीतां दिदृक्षुः सन् इह लङ्कायामागतः अत एव भ्रमता मया ते गृहे जनकात्मजा दृष्टा । श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०-स इति । सत्यसङ्गरः सत्यप्रतिज्ञः ' कर्बुरे च प्रतिज्ञाजिसंविदापत्सु सङ्गरः ' इत्यमरः ॥ १२ ॥

गो० टी०-तामिति । अधश्चोपरि चाम्बरे पाताले भूमौ आकाशे चेत्यर्थः ॥ १३ ॥

गो० टी०-वैनतेयेति । असङ्गगतय इति शीघ्रत्वे हेतुः ॥ १४ ॥

गो० टी०-अहं त्विति । औरसः सुतः क्षेत्रजत्वव्यावृत्तये औरसपदम् । सीतायास्तु कृते सीतालाभाय तां दिदृक्षुरिति योज्यम् ॥ १५ ॥ १६ ॥

१७] ति० टी०-अतः परं यद्वक्तव्यं मित्रपक्षस्य तद्वदामीत्याह—तद्भवानिति । दृष्टधर्मार्थो धर्मार्थतत्त्वसाक्षात्कारवान् । तपःकृतपरिग्रहस्तपोबलजातधनधान्यादिपरिग्रहः । यत एतादृशस्त्वम्, अतः परदारानुपरोद्धुं नार्हसि । दृष्टधर्मार्थतत्त्वत्वादेव महाप्राज्ञत्वम् ॥ १७ ॥

रा० टी०-तदिति । दृष्टौ साक्षात्कृतौ धर्मार्थौ येन सः तपसा कृतः परिग्रहः धनादिसंग्रहो येन सः अत एव भवान् पूज्यस्त्वं परदारान् उपरोद्धुं नार्हसि ॥ १७ ॥

गो०टी०-एवं सुग्रीवसंबन्धं प्रतिपाद्य सुग्रीवसंदेशं वदति—तद्भवानित्यादिना । दृष्टधर्मार्थः शास्त्रेण विदितधर्मार्थस्वरूप इत्यर्थः । तपःकृतपरिग्रहः तपसि विषये कृतस्वीकारः यद्वा तपसा स्वयं कृतपरिग्रहः । स्वारसिकतपस्क इति यावत् । हेतुगर्भं विशेषणे ॥ १७ ॥

१८] ति०टी०-नन्वनेन मम का हानिस्तत्राह—नहीति । धर्मविरुद्धत्वादेव बह्वपायेषु बह्वनर्थकारणेषु । ननु सर्वापायप्रतीकारसमर्थस्य किमनया विभीषिकयेत्यत आह—मूलघातिषु । समूलं नष्टस्य कथं प्रतीकारसामर्थ्यमिति भावः ॥ १८ ॥

रा० टी०-नहीति । धर्मात् वेदबोधितकर्मणः विरुद्धेषु अत एव बह्वपायेषु विपुलापायसंपादकेषु अत एव मूलघातिषु कर्मसु भवद्विधाः बुद्धिमन्तो न सज्जन्ते ॥ १८ ॥

गो० टी०-न हीति । धर्मविरुद्धेषु धर्मशास्त्रविरुद्धेषु । धर्म-

१ निवेदितमिति गो. पाठः । २ हर्यृक्षाणामिति रा. पाठः । ३ रामेणेति गो. पाठः । ४ त्वमेवमिति रा. पाठः ।

कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् । शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १९ ॥
न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन । राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ २० ॥
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुयायि च । मन्यस्व नरशार्दूले जानकी प्रतिदीयताम् ॥ २१ ॥
दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् । उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥
लक्षितेयं मया सीता तथा शोकपरायणा । गृहे यां नाभिजानासि पन्नगीम् ॥ २३ ॥
नेयं जरयितुं शक्या सा सुरैरमरैरपि । विषसंस्पृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २४ ॥
तपःसंतापलब्धस्ते सोऽयं धर्मपरिग्रहः । न स नाशयितुं न्याय्य आत्मप्राणपरिग्रहः ॥ २५ ॥

विरुद्धत्वेऽपि यत्सौख्यावहं तत्कार्यमित्यत्राह—बह्वपायेष्विति । बहुहानिकरेष्वित्यर्थः । अपायाः कथंचित्परिहियन्त इत्याशङ्क्याह—मूलघातिष्विति । स्वविनाशकरेष्वित्यर्थः । कर्मसु परदारापहारेषु न सज्जन्ते नोयुक्ता भवन्ति ॥ १८ ॥

१९] ति० टी०—मूलघातित्वमेव प्रपञ्चयति—कश्चेति १९

रा० टी०—नन्वकविरुद्धकर्मजनितपापं प्रायश्चित्तेनापनेताऽस्मीति तद्विरुद्धकर्माचरणे का नः क्षतिरित्यत आह—क इति। रामकोपानुवर्तिनां रामक्रोधाधीनानां लक्ष्मणमुक्तानां शराणामग्रतः स्थातुं देवासुरेष्वपि कः शक्तः न कोऽपीत्यर्थः ॥ १९ ॥

गो० टी०—कश्चेति । रामकोपानुवर्तिनां रामकोपानुसारेण निर्गतानामित्यर्थः ॥ १९ ॥

२०] ति० टी०—विद्येत विद्यते । व्यलीकमपराधम् ॥२०॥

रा० टी०—नेति । राघवस्य व्यलीकमपराधं कृत्वा यः सुखमवाप्नुयात् सः त्रिषु लोकेषु कश्चन न विद्येत विद्यते । एतेन प्रायश्चित्तेन देहान्तरभोग्यपापनिवृत्तावपि रामप्रसादनमन्तरा तव कल्याणं नैव भविष्यतीति सूचितम् ॥ २० ॥

गो० टी०—न चापीति । व्यलीकम् अप्रियम् ' व्यलीकं त्वप्रियेऽनृते ' इत्यमरः ॥ २० ॥

२१] ति० टी०—तत्तस्मात्त्रिकालहितम्, सीतादानेन पूर्वापराधनाशाद्वर्तमानैश्वर्यावियोगाद्भाविशुभहेतुत्वाच्च त्रिकालहितत्वम् । अर्थानुयायिनीति शास्त्रानुगतम् वाक्यं मयोच्यमानम् । 'नरशार्दूल' इति पाङ्क्तः पाठ इति कतकः । पुरुषश्रेष्ठ इत्यर्थः । तदेव वाक्यमाह—जानकी प्रतिदीयतामिति ॥ २१ ॥

रा० टी०—तदिति । नरशार्दूल हे पुरुषश्रेष्ठ ! तत् उक्तहेतोः त्रिकालहितं सर्वकाले हितकारकं धर्म्यं धर्मादनपेतम् अर्थानुयायि अर्थप्रापकं वाक्यं मन्यस्व अत एव जानकी प्रदीयताम् । ' नरदेवाय ' इति तीर्थपाठः ॥ २१ ॥

गो० टी०—तदिति । तत्तस्मात् अधर्मावहत्वात् रामापराधस्य परिहर्तव्यत्वाच्च । त्रिकालहितं भूतभविष्यद्वर्तमानकालहितम् । दारुणाधर्मस्य स्वपूर्वपुरुषविनाशकत्वेन तत्परिहारस्य भूतकालहितत्वं मन्यस्व । मत्वा प्रतिदीयतामिति योज्यम् ॥ २१ ॥

२२] ति० टी०—अत्र सीता नास्तीत्यपह्नवस्त्वशक्य इत्याह—दृष्टा हीति । यतस्त्वद्गृहे मया दृष्टा, अतोऽपलापोऽशक्य इति भावः । किं च यद्वानरकोटिभिरपि दुर्लभं सीतादर्शनं तन्मया लब्धम्, अतः शेषं शिष्टं यदुत्तरं कर्म सीतानयनरूपं तत्र तत्साधने राघवः स एव निमित्तं कारणम् । मत्कृत्यं त्वन्विष्य निवेदनमात्रमिति भावः ॥ २२ ॥

रा० टी०—दृष्टेति । देवी इयं सीता मया दृष्टा अत एव दुर्लभं दृतैः दुखेन लब्धं तत् यशः इह अस्मिन् काले मया लब्धं शेषमवशिष्टं यदुत्तरमुत्तरकालकं सीतानयनं तत्र राघव एव निमित्तं राघव एव नेष्यतीत्यर्थः ॥ २२ ॥

गो० टी०—जानकीहरणे किं मानं तत्राह—दृष्टा हीति । यत्सीतादर्शनं दुर्लभम् इतरवानरालभ्यं तल्लब्धम् । तर्हि सा नीयतामित्यत्राह—उत्तरमिति । सीतादर्शनोत्तरं यच्छेषं कर्म सीतानयनं तत्र राघवो निमित्तम् आज्ञप्तस्यैव मया कर्तव्यत्वादिति भावः ॥ २२ ॥

२३] ति० टी०—पुना रावणहितमाह—लक्षितेति । पन्नगीमिव स्वनाशिकां यां न जानासि सा मया शोकपरायणा लक्षिता । तदीयशोकाग्निनैव पन्नगीविषाग्निनेव त्वन्नगरं दग्धं भविष्यतीति भावः ॥ २३ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—लक्षितेति । गृहे स्थितां पन्नगीमिव यां त्वं नाभिजानासि यत्प्रभावं न वेत्सि सा सीता मया लक्षिता ॥ २३ ॥

गो० टी०—दृष्टयाऽपि मद्भक्तवदया सीतया रामः किं करिष्यतीत्याशङ्क्याह—लक्षितेयमिति । तथेति वाचामगोचरत्वोक्तिः । नेयं तव वश्या प्रत्युत पन्नगीव तव प्राणहारिणीति भावः ॥ २३ ॥

२४] ति० टी०—ओजसाऽऽहारशक्तिबलेन ॥ २४ ॥

रा० टी०—नेति । अत्यर्थमत्यन्तं विषसंस्पृष्टम् ओजसा भुक्तमन्नमिव अमरैरपि इयं सीता जरयितुं गोपयितुमित्यर्थः, न शक्या ॥ २४ ॥

गो० टी०—नेयमिति । ओजसा अमरपक्षे प्रतापने अन्नपक्षे जाठराग्निना ॥ २४ ॥

२५] ति० टी०—तपःसंतापेन तपःकरणेन यो लब्धो

---

१ ऽनुबन्धीति गो. पाठः । २ नरदेवायेति गो. नरशार्दूलेति रा. पाठः । ३ य इति गो. पाठः । ४ न्याय्यमिति गो. पाठः ।

अवध्यतां तपोभिर्यां भवान्समनुपश्यति । आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २६ ॥
सुग्रीवो न च[1] देवोऽयं न[2] यक्षो न च राक्षसः । मानुषो[3] राघवो राजन्सुग्रीवश्च हरीश्वरः ॥
तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २७ ॥
न तु धर्मोपसंहारमधर्मफलसंहितम्[4] । तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २८ ॥

धर्मपरिग्रहो धर्मसाध्यः परिग्रह ऐश्वर्यम्, आत्मप्राणपरिग्रहश्चात्मप्राणानां चिरकालं परिग्रह आयुर्वर्द्धिश्च स परदारपरिग्रहरूपपरमाधर्मेण नाशयितुं न न्याय्यः ॥ २५ ॥

रा० टी०–तप इति । तपःसंतापेन तपसः करणेन लब्धः यः कर्मपरिग्रहः धर्मसाधकः महैश्वर्यमित्यर्थः, सः यश्च आत्मप्राणपरिग्रहः स्वप्राणस्य परिग्रहः चिरजीवित्वमित्यर्थः स च नाशयितुं विध्वंसयितुं न न्याय्यः । एतेन सीतासमर्पणमन्तरा ते सर्वं विनङ्क्ष्यतीति ध्वनितम् ॥ २५ ॥

गो० टी०–तपःक्रच्छ्रलब्धमिष्टं महज्जीवनं वृथा मा नाशयेत्याह—तप इति । तपस्संतापः तपश्चर्या । ओदनपाकं पचतीतिवन्निर्देशः तेन लब्धः । परिगृह्यत इति परिग्रहः फलं धर्मपरिग्रहः धर्मफलम् । तादृशो योऽयमात्मप्राणपरिग्रहः आत्मनः प्राणानां च परिग्रहः स्वीकारः जीवनमिति यावत् । स नाशयितुं न न्याय्यं न युक्तम् । अव्ययमेतत् । तपःक्लेशलब्धं तद्व्यतिरिक्तधर्मफलभूतं च यज्जीवनमायुः तत्र विनाशयेत्यर्थः । चकाराभावादित्थमेव योजना ॥ २५ ॥

२६] ति० टी०–अपि च यां देवाद्यवध्यतां मन्यसे तत्रापि तपोजन्यसुकृतमेव कारणम्, अतो धर्महानिर्न कार्येति वदति—अवध्यतामिति । तत्राप्ययं महानयमेव तपोमयधर्मस्कन्ध एव हेतुरित्यर्थः ॥ २६ ॥

रा० टी०–ननु मम वरहेतुकावध्यत्वात्कथं विघात इत्यत आह–अवध्यतामिति । तपोभिः तपोहेतुकवरप्राप्त्या सुरादिभिः आत्मनो वध्यतां यां भवान् समनुपश्यति तत्र अयं महान् हेतुः कारणम् ॥ २६ ॥

गो० टी०–सर्वावध्यस्येह मे कोऽयमायुर्विनाशक इत्याशङ्क्य परिहरति—अवध्यतामिति । तपोभिरार्जितां सासुरैर्देवैर्याम् आत्मनोऽवध्यतां भवान् समनुपश्यति । तत्रापि अवध्यतायां सत्यामपि अयं वक्ष्यमाणः हेतुः भवद्वधहेतुरस्ति । महान् अपरिहार्यः ॥ २६ ॥

२७] ति० टी०–किं च देवाद्यवध्यस्यापि प्राणत्राणं दुष्करमित्याह—सुग्रीव इति । यस्माद्वरग्रहणवेलायां त्वच्छङ्कितहन्तृभ्योऽन्य एवायं रामश्च अतस्तस्मात्सुग्रीवात्ते प्राणत्राणे सामर्थ्यं नास्तीति भावः ॥ २७ ॥

रा० टी०–हेतुमाह–सुग्रीव इति । अयं सुग्रीवः राघवश्च देवादिर्न किं तु सुग्रीवो हरीश्वरः राघवश्च मानुषः नित्यमनुष्यः एतेन आभ्यां तवाभयदानं नास्तीति सूचितं तस्मात् प्राणपरित्राणं कथं करिष्यसि ॥ २७ ॥

गो० टी०–तमेव हेतुमाह—सुग्रीव इति । न च राक्षस इति पाठः सम्यक् । न च मानुष इति पाठे प्रतिषेधप्रसक्तिरपि नास्तीत्युच्यते । तृणभूता हि मे सर्वे प्राणिनो मानुषादय इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वात् । न च तिर्यञ्च इति न प्रसज्य च प्रतिषिध्यत इति भावः । तस्मात्सुग्रीवात् ॥ २७ ॥

२८] ति० टी०–ननु तपोबलान्मे सर्वतो जयो भविष्यतीत्यत आह—न त्विति । यः पुमानधर्मफलसंहितबलवत्तया फलोन्मुखाधर्मसंबद्धस्तं पुरुषं धर्मोपसंहारमपि धर्मोपसंग्रहवन्तमपि न त्वन्वेति, धर्मफलमिति शेषः । किं तु तदेव फलं फलोन्मुखाधर्ममेवान्वेति । ननु धर्मबलादधर्मनाशो भविष्यतीत्यत्राह—धर्मश्चेति । उत्कटोऽधर्मोत्तरभावी धर्मोऽधर्मस्य नाशनः । चादुत्कटाधर्मो धर्मनाशकः । एवं चास्याधर्मस्य त्वत्कृतसकलधर्मापेक्षयोत्कटत्वादुत्तरकालत्वाच्चायमेव त्वया प्राक्संचितस्य सकलधर्मस्य नाशक इति भावः । केचित्तु ' धर्मोपसंहारमधर्मफलसंहितम् ' इति पाठः । धर्मोपसंहारं धर्ममुपसंहियतेऽनेनेति धर्मफलं सुखं तदधर्मफलसंहितं न संभवत्यधर्मफलेन दुःखेन सहानुभवं न भवति, तत्तस्मादेव फलमन्वेति धर्मो धर्मफलं सुखमेवान्वेति, एवमधर्मो दुःखं दुःखरूपं फलमेवान्वेति । अग्रे ' धर्मो नाधर्मनाशनः ' इति पाठः । पूर्वकृतो धर्मोऽधर्मस्येदानीं कृतस्य न नाशनः । चादधर्मोऽपि धर्मनाशनो नेत्यर्थ इति वदन्ति । तत्रार्थसामञ्जस्यं व्युत्पत्तैर्विभाव्यम् ॥ २८ ॥

रा० टी०–ननु तपोबलात् मम विध्वंसो नैव भविष्यतीत्यत आह–न त्विति । यः अधर्मफलसंहितः अधर्मसिद्धिं प्राप्तः अधर्मकारीत्यर्थः, तं धर्मोपसंहारं धर्मवन्तमपि नान्वेति प्राप्नोति धर्मफलमिति शेषः, किंतु तदधर्मफलमेव अन्वेति । ननु सर्वेषां किञ्चिद्धर्मवत्त्वसत्त्वात् धर्मफलप्राप्तिः केषांचिदपि न स्यादित्यत आह–धर्मो विपुलसत्कर्मानुष्ठानम् अधर्मनाशनः अल्पाधर्मविध्वंसकः एतेन तवाधर्मस्यैवाधिक्यात् धर्मफलं नैव भविष्यतीति सूचितम् ॥ २८ ॥

गो० टी०–ननु किमनेनोपदेशेन कृतानि मया पापानि तैश्चावश्यं फलप्रदैर्भवितव्यमित्याशङ्क्याह—न त्विति । तुशब्द उक्तशङ्काव्यावर्तकः । धर्मः उपसंहियतेऽनेनेति धर्मोपसंहारं धर्मफलम् । फलेन धर्मस्योपसंहियमाणत्वात् । क्लीबत्वमार्षम् । तत् अधर्मफलसंहितं न भवति । कुत इत्यत्राह—तदेव फलमन्वेतीति । धर्मफलमेवानुवर्तते । नन्वधर्मे च विद्यमाने कथं

१ हीति गो. पाठः । २ नासुर इति गो. पाठः । ३ न दानवो न गन्धर्वो न यक्षो न च पन्नग इति गो. पाठः । ४ संहित इति गो. पाठः ।

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः । फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ २९ ॥
जनस्थानवधं बुद्ध्वा वालिनश्च वधं तथा । रामसुग्रीवसख्यं च बुद्ध्यस्व हितमात्मनः ॥ ३० ॥
कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् । लङ्कां नाशयितुं शक्तस्तस्यैष तु न निश्चयः ॥ ३१ ॥
रामेण हि प्रतिज्ञातं हर्यृक्षगणसंनिधौ । उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३२ ॥
अपकुर्वन्हि रामस्य साक्षादपि पुरन्दरः । न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३३ ॥
यां सीतेत्यभिजानासि येयं तिष्ठति ते गृहे । कालरात्रीति तां विद्धि सर्वलङ्कविनाशिनीम् ॥ ३४ ॥
तदलं कालपाशेन सीताविग्रहरूपिणा । स्वयं स्कन्धावसक्तेन[3] क्षेममात्मनि चिन्त्यताम् ॥ ३५ ॥

तत्फलाननुवृत्तिस्तत्राह—धर्मश्चाधर्मनाशन इति । च उक्तशङ्कानिवृत्त्यर्थः । विरोधिनि धर्मे जाग्रति कथमधर्मवार्तापीत्यर्थः "धर्मेण पापमपनुदति" इति श्रुतेः । यद्वा व्यत्ययो वा किं न स्यात्तत्राह—धर्मश्चेति चोऽवधारणे धर्म एवाधर्मनाशनः तथा श्रुतेः न त्वधर्मः प्रमाणाभावादिति भावः ॥ २८ ॥

२९] ति० टी०—ननु किं मे धर्मो व्यर्थ एव नेत्याह—प्राप्तमिति । तावत्प्रथमम् । इतः पूर्वमिति यावत् । अस्य परदारहरणरूपस्य । क्षिप्रमेव प्रपत्स्यसे 'अत्युत्कटैः पुण्यपापैः' इति न्यायादिति भावः ॥ २९ ॥

रा० टी०—ननु मत्तपसो वैयर्थ्यं स्यादित्यत आह—प्राप्तमिति । तावत् इतः पूर्वमेव धर्मफलं प्राप्तम् अतः अस्यापहरणरूपस्य अधर्मस्य फलं क्षिप्रमेव प्रपत्स्यसे ॥ २९ ॥

गो० टी०—ननु यदि धर्मः अधर्मनाशनः तर्हि प्राथमिक एव धर्मः आधुनिकानधर्मान्निवर्तयेदित्याशङ्क्याह—प्राप्तमिति । तावच्छब्दः कात्स्न्यर्वाची । कृत्स्नं धर्मफलम् । फलमस्येति । तथा च क्षिप्रं धर्ममाचर अन्यथा सद्यस्ते विनाशो भविष्यतीति भावः । अत्र कर्तव्यत्वेन विधीयमानो धर्मः सीताप्रदानपूर्वकरामविषयशरणागतिरेव । शरस्याशौर्यप्रवृत्त्या धर्मफलं सर्वं क्षीणमिति हनुमतावगतमिति मन्तव्यम् ॥ २९ ॥

३०] ति० टी०—अतः स्वहितं चिन्तयेत्याह—जनस्थानेति । सख्यं च बुद्ध्वाऽऽत्मनो हितं बुद्ध्यस्वेत्यन्वयः॥३०॥

रा० टी०—जनस्थानेति । जनस्थानवधादि बुद्ध्वा संस्मृत्य रामसुग्रीवसख्यमेव हितं बुध्यस्व ॥ ३० ॥

गो० टी०—मा भूद्मर्मापेक्षा कार्योपस्थितिरवेक्ष्यतामित्याह—जनस्थानेति । रामसुग्रीवसख्यं चेति परोक्षनिर्देशस्य गतिः पूर्वमुक्ता ।०

३१] ति० टी०—नन्वेवं कटुवादिनस्तव को रक्षकः इति चेत्तत्राह—काममिति । यथेष्टमित्यर्थः । तर्हि कुतस्तन्नाशं न करोषीत्यत्राह—तस्य यस्याहं दूतस्तस्य रामस्यैष मत्कर्तृकलङ्कानाशविषयो निश्चयो न । स्वाम्याज्ञां विना तदनुष्ठानमशक्यमिति भावः ॥ ३१ ॥

रा० टी०—काममिति । लङ्कां नाशयितुमहमेव शक्तः ननु कुतो न नाशयसीत्यत आह—तस्य रामस्य एषः मत्कर्तृकतादृशलङ्काविध्वंसविषयकः निश्चयो न ॥ ३१ ॥

गो० टी०—काममिति । कामम् अत्यन्तम् अहं सुग्रीवः । तन्नाशनम् तस्य रामस्य । निश्चयः निश्चयविषयः॥ ३१

३२] ति० टी०—तदीयनिश्चयाभावं स्पष्टयति—रामेणेति । स्वामिना स्वकर्तव्यत्वेन प्रतिज्ञातस्यार्थस्य सेवकेनानुष्ठानमयुक्तं कर्तुमिति भावः ॥ ३२ ॥

रा० टी०—रामेणेति । यैः सीता प्रधर्षिता तेषाममित्राणामुत्सादनं रामेण प्रतिज्ञातम् ॥ ३२ ॥

गो० टी०—कथमित्यत्राह—रामेणेति । हर्यृक्षगणसन्निधौ वृद्धसभायां प्रतिज्ञातमनतिक्रमणीयमिति भावः॥३२॥ ३३ ।

३३] ति० टी०—उक्तमेवार्थं दार्ढ्याय पुनरप्याह—अपकुर्वन्निति ॥ ३३ ॥

रा० टी०—अपेति । रामस्य अपकुर्वन् पुरन्दरोऽपि सुखं न प्राप्नुयात् ॥ ३३ ॥

३४] ति० टी०—कालरात्री महाप्रलयकर्त्री भगवतः शक्तिः ॥ ३४ ॥

रा० टी०—यामिति । यां सीतेत्येव अभिजानासि सा कालरात्री राक्षसविध्वंससमयनियामिका इति हेतोः तां सर्वलङ्काविनाशिनीं विद्धि जानीहि ॥ ३४ ॥

गो० टी०—यामिति । कालरात्रीति काचिच्छक्तिरिति वदन्ति । 'समी च कालरात्रिश्च भैरवी गणनायिका' इत्यमरशेषः ॥ ३४ ॥

३५] ति० टी०—विग्रहः शरीरम् । स्कन्धावसक्तेन स्कन्धसंबद्धकरणेन । आत्मन्यात्मत्राणे ॥ ३५ ॥

रा० टी०—तदिति । स्वयं स्कन्धावसक्तेन स्कन्धयोर्धृतेन सीताविग्रहरूपिणा कालपाशेन अलं न म्रियतामित्यर्थः तत्र हेतुः—आत्मनि आत्मार्थं क्षेमं चिन्त्यताम् ॥ ३५ ॥

गो० टी०—तदलमिति । कालपाशेन यमपाशेन । अतः सीतां रामाय देहीति हृदयम् ॥ ३५ ॥

१ बुद्ध्वा वालीति गो. पाठः । २ वशे इति गो. पाठः । ३ क्षममिति गो. पाठः

सीतायास्तेजसा दग्धां रामकोपप्रदीपिताम्[1] । दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥ ३६ ॥
स्वानि मित्राणि मन्त्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् । भोगान्दारांश्च लङ्कां च मा विनाशमुपानय ॥ ३७ ॥
सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम । रामदासस्य दूतस्य वानरस्य विशेषतः ॥ ३८ ॥
सर्वाँल्लोकान्समुसंहृत्य सभूतान्सचराचरान् । पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ ३९ ॥
देवासुरनरेन्द्रेषु यक्षरक्षोरगेषु[2] च । विद्याधरेषु नागेषु[3] गन्धर्वेषु मृगेषु[4] च ॥ ४० ॥
सिद्धेषु किंनरेन्द्रेषु पतत्रिषु च सर्वतः । सर्वत्र सर्वभूतेषु सर्वकालेषु नास्ति सः ॥ ४१ ॥
यो रामं प्रति युध्येत विष्णुतुल्यपराक्रमम्[5] । सर्वलोकेश्वरस्येहं कृत्वा विप्रियमीदृशम्[6] ॥
रामस्य राजसिंहस्य दुर्लभं तव जीवितम्[7] ॥ ४२ ॥

देवाश्च दैत्याश्च निशाचरेन्द्र गन्धर्वविद्याधरनागयक्षाः ।
रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥ ४३ ॥
ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा
इन्द्रो महेन्द्रः सुरनायको वा स्थातुं न शक्ता युधि राघवस्य[8] ॥ ४४ ॥
स सौष्ठवोपेतमदीनवादिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः ।
दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः[9] ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

३६-३७] ति० टी०-दह्यमानां वर्तमानसमीपे लट् । प्रतोलिका वीथिः ॥ ३६ ॥ ३७ ॥

रा० टी०-सीताया इति । दग्धां दग्धप्रायां रामकोपेन प्रदीपिताम् अत एव दह्यमानां पुरीं लङ्कां पश्य ॥ ३६ ॥

गो० टी०-सीताया इति । अट्टः अट्टालः प्रतोलिका वीथिका ॥ ३६ ॥

रा० टी०-स्वानीति । मित्रादीनि विनाशं मा उपानय प्रापय ॥ ३७ ॥

गो० टी०-स्वानीति । मन्त्रीन मन्त्रिणः इकारान्तत्वमार्षम् ॥ ३७ ॥

३८] ति० टी०-विशेषतः निष्कृष्योच्यमानं वचनमित्यर्थः। रामदासस्येत्यादिविशेषणत्रयेण राममहिमवेत्तृत्वं स्वस्य परोक्तवाक्यानुवादपूर्वं हितोपदेशाधिकारं नररक्षोतिरिक्तजात्यन्तरत्वेनापक्षपाततो न्याय्यवक्तृत्वं च सूचितम् ॥ ३८ ॥

रा० टी०-सत्यमिति । रामदासस्य मम वचनं विशेषतः शृणुष्व ॥ ३८ ॥

गो० टी०-सत्यमिति । रामदासस्येत्यनेन रामसामर्थ्यपरिज्ञानमुक्तम् दूतस्येत्यनेन हितोपदेशाधिकारः वानरस्येति माध्यस्थ्यम् ॥ ३८ ॥

३९-४०] ति० टी०-सभूतान्सर्वजातीयप्राणिसहितान् अनेन जगत्स्थित्युत्पत्तिसंहारकर्तृत्वं बोधितम्॥३९॥४०॥

रा० टी०-तद्वचनमेवाह-सर्वानिति । समुसंहृत्य रुद्रादिद्वारा विनाश्य स्रष्टुं कर्तुं शक्तः समर्थः ॥ ३९ ॥

रा० टी०-देवेति । विष्णुः तुल्यपराक्रमो यस्य तं रामं यः प्रतियुध्येत स नास्ति । सार्धश्लोकद्वयमेकान्वयि॥४०॥४१॥

गो० टी०-सर्वानिति । लोकान् भूरादीन् सभूतान् पृथिव्यप्तेजोवाय्वाकाशरूपपञ्चमहाभूतयुक्तान् सचराचरान् चतुर्मुखद्वारा सृष्टजङ्गमाजङ्गमयुक्तान् । संहृत्य प्रलयावसाने रुद्रद्वारा स्वयं च संहृत्य पुनः कल्पादौ तथैव " धाता यथापूर्वमकल्पयत् " इति श्रुत्युक्तरीत्या स्रष्टुं समर्थः । तत्र प्रमाणमाह—महायशा इति । "न तस्येशे कश्चन तस्य नाम महद्यशः" इति हि श्रुतिः । श्रुतिस्मृतिषु तथा प्रसिद्ध इत्यर्थः॥३९-४४॥

४१-४२ ति० टी०-सर्वत्र देशे ॥ ४१ ॥ ४२ ॥

रा० टी०-सर्वेति । रामस्य विप्रियं कृत्वा तव जीवितं दुर्लभम् ॥ ४२ ॥

४३] ति० टी०-उक्तमेवार्थं दार्ढ्याय पुनराह—देवाश्चेति ॥ ४३ ॥

रा० टी०-देवा इति । देवादयः रामस्य समरे स्थातुं न शक्ताः ॥ ४३ ॥

४४-४५] ति० टी०-रामद्रुहो देवताभिरपि न त्राणमित्याह—ब्रह्मेत्यादि । ब्रह्मा स्वयंभूरित्यनेन हिरण्यगर्भः सर्वादिरुक्तः, चतुराननस्ततः प्राप्तसृष्टृत्वाधिकारः त्रिनेत्रस्त्रिपुरा-

१ प्रपीडितामिति गो. पाठः । २ गणेष्विति गो. पाठः । ३ सर्वेषु इति गो. पाठः । ४ उरगेष्विति गो. पाठः । ५ एवमिति गो. पाठः । ६ उत्तममिति गो. पाठः । ७ त्रातुमिति गो. पाठः । ८ रामवध्यमिति गो. पाठः ।

द्विपञ्चाशः सर्गः ।

हनुमतः परुषोक्त्या क्रुद्धो रावणस्तद्वधमाज्ञापयति । दूतवधस्य शास्त्रनिषिद्धत्वं दर्शयन्विभीषणस्तं प्रतिषेधति ।

स तस्य वचनं श्रुत्वा वानरस्य महात्मनः । आज्ञापयद्वधं तस्य रावणः क्रोधमूर्च्छितः ॥ १ ॥
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना । निवेदितवतो दौत्यं नानुमेने विभीषणः ॥ २ ॥

न्तको रुद्रो वेत्यनेन संहाराधिकारी सुरनायको महेन्द्रो महैश्वर्यवानिन्द्रः । उपेन्द्रो विष्णुः पालनाधिकारी एवं त्रिमूर्तिभिरपि रक्षा न सिद्ध्यति रामस्यैव त्रिमूर्तित्वात् ॥४४॥४५॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

रा० टी०–ब्रह्मेति । ब्रह्मादयः स्थातुं न शक्ताः ॥ ४४ ॥

रा० टी०–स इति । अप्रतिमः सादृश्यरहितः स रावणः कर्परवचः निशम्य कोपविवृत्तलोचनः सन् महाकपेर्वधं समादिशत् ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकाधिकपञ्चाशत्तमः सर्गः ॥ ५१ ॥

गो० टी०–मा भूवन् शक्ताः सामान्यदेवाः ईश्वराः शक्ताः स्युरित्याशङ्क्याह—ब्रह्मेति । अत्र विशेषणान्तरोपादानं तेषां सामर्थ्यविशेषद्योतनार्थम् । एतत्प्रकर्षत्वपरिहाराय व्युत्क्रमेण योजनीयम् । इन्द्रः परमैश्वर्यवान् " इदि, परमैश्वर्ये " इत्यस्माद्धातोः " ऋज्रेन्द्राग्र० " इत्यादिना निपातनात्साधुत्वम् । त्रैलोक्याधिपतिरपि त्रातुं न शक्त इत्यर्थः तस्य त्रैलोक्याधिपतित्वेऽपि परनिरसनसामर्थ्याभावादशक्ततेत्यत्राह—महेन्द्र इति। वृत्रहननप्रसिद्धसामर्थ्योऽपि न शक्तः । यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वमिति श्रौत्रनिर्वचनम् । स्वयं चतुरोऽपि सहायसंपत्त्यभावान्न शक्त इत्यत्राह—सुरनायक इति । स्वतुल्यत्रयस्त्रिंशत्कोटिसुरगणसहायोऽपि न शक्त इत्यर्थः । मा भूत्क्षुद्र इन्द्रः शक्तः सर्वसंहारको रुद्रस्तु शक्तः स्यात्तत्राह—रुद्र इति । संहारकाले प्रजाः रोदयतीति रुद्रः "रोदेर्णिलुक् च" इति रप्रत्ययः । कालविशेषे संहारकोऽपीदानीमप्राप्तकालत्वादशक्तः इत्यत्राह—त्रिनेत्र इति । निष्टिलनयनदहनज्वालाविलोपितमदनोऽपीत्यर्थः । काकतालीयत्वशङ्काव्युदासायाह—त्रिपुरान्तक इति । प्रबलतरमहासुरसंहारकोऽपीत्यर्थः । मा भूत्तस्य शक्तिः " ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठाय " इत्युक्तरीत्या रुद्रस्यापि पिता ब्रह्मा शक्तः स्यात् तत्राह—ब्रह्मेति । बृंहतीति ब्रह्मा " बृहेरम् नलोपश्च " इति मनिन् अमागमो नकारलोपश्च। रुद्रपिता स्वयं कर्मवश्यः कथं शक्तस्यात्तत्राह—स्वयंभूरिति । कर्मवश्यत्वेऽपीतरसाधारण्येनानुत्पन्नः स्वयंभूः । स्वयंभूत्वेऽपि सहायसंपत्त्यभावात्कथं त्रायेतेत्यत्राह—चतुरानन इति । युगपदेव सर्वदोच्चारणसंपादितातिशयोऽपि न शक्तः । प्रत्येकमशक्तत्वेऽपि किं संभूयागताः शक्नुवन्ति तत्राह—न शक्ता इति । बहुवचनेनायमर्थो लभ्यते । वधमर्हतीति वध्यः दण्डादित्वाद्यः । रामस्य वध्यो रामवध्यः तं त्रातुं न शक्ताः । स्थानविनिग्रहस्य चेत्युचितवधार्हस्य त्राता कः । युधि युद्धे न शक्ताः किंतु शरणं गत्वा त्रातुं शक्ता इत्यर्थः । अत्र " हिरण्यगर्भः समवर्तताग्रे । न सत्र चासीच्छिव एव केवलः । इन्द्रो मायाभिः पुरुरूप ईयते " इति परदेवतात्वेन प्रसक्ताब्रिकादधिकत्वमुक्तम् । राम इत्यनेन वेदान्तोदितानां सद्ब्रह्मादिसामान्यशब्दानां हिरण्यगर्भशिवेन्द्रादिविशेषशब्दानां च व्यक्तिविशेषपरत्वं व्यञ्जितम् । त्रातृत्वेन प्रसक्तप्रधानदेवतानिराकरणप्रकरणे विष्णोरनुपादानात्पारिशेष्याद्राम एव विष्णुरिति प्रतिपादितम् । अस्माच्छ्लोकात्परं स सौष्ठवेति श्लोकः । तस्य तद्वचनमिति श्लोकस्तु उत्तरसर्गादिः । अत्र स प्रमादाल्लिखितः ॥ ४५ ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

१] **ति० टी०–स इति ॥ १ ॥**

रा० टी०–रावणं प्रति विभीषणोक्तिं वर्णयितुं प्रसङ्गमुत्थापयत्राह–स इति । तस्य हनुमतः वचनं श्रुत्वा क्रोधमूर्छितो रावणः तस्य हनुमतो वधमाज्ञापयत् ॥ १ ॥

गो० टी०–तस्य तद्वचनं श्रुत्वेति श्लोकः सर्गस्य प्रथमः१॥

२] **ति० टी०–दौत्यं** स्वीयं दूतकर्म यथावन्निवेदितवतो हनुमतोऽवध्यत्वं मत्वा रावणाज्ञप्तं वधं नानुमेने ॥ २ ॥

रा० टी०–वध इति । रावणेन वधे समाज्ञप्ते सति दौत्यं स्वनिष्ठदूतधर्मं निवेदितवतो हनुमतः वधे विभीषणो नानुमेनेऽनुमतिं चकार । वध इत्युभान्वयि ॥ २ ॥

गो० टी०–वध इति । दौत्यं दूतकर्म ब्राह्मणादेराकृतिगणत्वात् ष्यञ् तन्निवेदितवतः उक्तवतः । नानुमेने वधमित्यनुवर्तनीयम् । निवेदितमतौ दूत्यमिति पाठान्तरम् । मन्यत इति मतिः कार्यम् । निवेदितमतौ निवेदितकार्याशे यथार्थवादित्वेनावध्ये हनुमति दूत्यं दूतसंबन्धितया रावणादिष्टं वधम् । " दूतवणिग्भ्यां चेति वक्तव्यम् " इति भावकर्मणोर्विहितो यप्रत्ययः अर्थानुगुण्यात्संबन्धमात्रे गमयितव्यः ॥ २ ॥

१ तस्य तदिति गो. पाठः ।

तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् । विदित्वा चिन्तयामास कार्यं कार्यविधौ स्थितः ॥ ३ ॥
निश्चितार्थस्ततः साम्ना पूज्यं शत्रुजिदग्रजम् । उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४ ॥
क्षमस्व रोषं त्यज राक्षसेन्द्र प्रसीद [2]मे वाक्यमिदं शृणुष्व ।
वधं न कुर्वन्ति परावरज्ञा दूतस्य सन्तो वसुधाधिपेन्द्राः ॥ ५ ॥
[3]राजन्धर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् । तव चासदृशं वीर कपेरस्य प्रमापणम् ॥ ६ ॥
धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः । परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥ ७ ॥
गृह्यन्ते यदि रोषेण त्वादृशोऽपि [4]विचक्षणाः । ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ॥ ८ ॥
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद । युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ॥ ९ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः । [5]कोपेन महताऽऽविष्टो वाक्यमुत्तरमब्रवीत् ॥ १० ॥
न पापानां वधे पापं विद्यते शत्रुसूदन । तस्मादि[6]मं वधिष्यामि वानरं पापकारिणम् ॥ ११ ॥

३] ति० टी०–तच्च कार्यं दूतवधरूपम् । कार्यविधावुचितकृत्यसंपादने स्थितः । निश्चितबुद्धिरित्यर्थः ॥ ३ ॥

रा० टी०–तामिति । तं रावणं क्रुद्धमत एव उपस्थितं संप्राप्तं कार्यं दूतवधक्रियां च विदित्वा कार्यविधौ यथोचितकृत्यसंपादने स्थितः रावणेन संस्थापितः विभीषणः कार्यं स्वकर्तव्यं चिन्तयामास ॥ ३ ॥

गो० टी०–तमिति । तच्च कार्यं दूतवधरूपकार्यम् । कार्यम् अनन्तरानुष्ठेयम् । कार्यविधौ कार्यकरणे । स्थितः निश्चितार्थः । साध्वसाधुविवेकनिश्चितकार्य इत्यर्थः ॥ ३ ॥

४] ति० टी०–शत्रुजितं च तमग्रजं च ॥ ४ ॥

रा० टी०–निश्चितेति । निश्चितः अर्थो येन सः शत्रुजिद्विभीषणः पूज्यमग्रजम् अत्यर्थमत्यन्तं हितं वाक्यं साम्ना सामरूपोपायेन उवाच ॥ ४ ॥

गो० टी०–निश्चितार्थ इति । अपूज्येति छेदः ॥ ४ ॥

५] ति० टी०–प्रतिज्ञां त्यज्य रोषं क्षमस्वेत्यन्वयः । परावरज्ञाः सर्वकार्यविषयकोत्कर्षापकर्षज्ञाः सन्तो दूतस्य वधं न कुर्वन्ति ॥ ५ ॥

रा० टी०–तद्वचनाकारमाह–क्षमस्वेत्यादिभिः । हे राक्षसेन्द्र ! वसुधाधिपेन्द्राः दूतस्य वधं न कुर्वन्ति इदं मे वाक्यं शृणुष्व अत एव रोषं त्यज अत एव क्षमस्व दूतवाक्यं सहस्व॥५॥

गो० टी०–क्षमस्वेति । परावरज्ञाः त्याज्योपादेयविवेकयुक्ताः ॥ ५ ॥

६] ति० टी०–लोकवृत्तेर्लोकव्यवहारस्य प्रमापणं वधः॥६॥

रा० टी०–राजन्निति । हे राजन् ! कपेः प्रमापणं विघातनं धर्मविरुद्धं वेदोक्ताद्विपरीतम् अत एव लोकवृत्तेः लोकाचारात् गर्हितं निन्दितम् अत एव तव असदृशमयोग्यमस्तीति शेषः ॥ ६ ॥

गो० टी०–राज्ञेति । प्रमापणं मारणम् ॥ ६ ॥

७] ति० टी०–कृतज्ञत्वेनापकारिण्येव वधो न्याय्यो न तादृशेऽस्मिन् ॥ ७ ॥

रा० टी०–असदृशत्वमुपपादयन्नाह–धर्मज्ञ इति । धर्मज्ञत्वादिविशिष्टस्त्वमेवार्हसीति शेषः ॥ ७ ॥

गो० टी०–धर्मज्ञश्चेति । भूतानामिति निर्धारणे षष्ठी । भूतानां मध्ये ॥ ७ ॥

८] ति० टी०–त्वादृश इति क्विन्नन्तबहुवचनम् । शास्त्रविपश्चित्त्वं शास्त्रपाण्डित्यसंपादनम् श्रमः केवलं श्रम एव व्यर्थप्रयास एवेत्यर्थः ॥ ८ ॥

रा० टी०–गृह्यन्ते इति । त्वादृशो विचक्षणा अपि यदि दोषेण कर्त्रा गृह्यन्ते तदा शास्त्रविपश्चित्त्वं शास्त्रज्ञानं श्रम एव॥८॥

गो० टी०–गृह्यन्त इति । शास्त्रविपश्चित्त्वं विविधं पश्यतीति विपश्चित् तस्य भावः विपश्चित्त्वम् शास्त्रविषये विविधज्ञानोपेतत्वमिति यावत् ॥ ८ ॥

९–१०] ति० टी०–दूतदण्डे दूते विहितो दण्डः॥९॥१०॥

रा० टी०–तस्मादिति । तस्मात् मदुक्तहेतोः प्रसीद चित्तप्रसादं कुरु अत एव युक्तायुक्तं विनिश्चित्य दूतदण्डः दूतोचितक्रिया विधीयताम् ॥ ९ ॥

रा० टी०–विभीषणेति । रावणः उत्तरं वाक्यमब्रवीत् ॥ १० ॥

गो० टी०–तस्मादिति । दूतदण्डः दूतयोग्यदण्डः॥९–१२॥

११] ति० टी०–पापकारिणं राजद्रोहिणम् ॥ ११ ॥

रा० टी०–तद्वचनाकारमाह–नेति । शत्रुसूदन हे विभीषण ! पापानां पापकर्माचरणशीलानां वधे पापं न विद्यते तस्माद्धेतोः पापकारिणमिमं वधिष्यामि ॥ ११ ॥

१ ऽऽपूज्येति गो. पाठः । २ मद्वाक्यमिति गो. पाठः । ३ राजधर्मेति गो. पाठः । ४ विपश्चित इति गो. पाठः । ५ रोषेणेति गो. पाठः । ६ एनमिति गो. पाठः । ७ चारिणमिति गो. पाठः ।

अधर्ममूलं बहुदोषयुक्तमनार्यजुष्टं वचनं निशम्य ।
उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतां वरिष्ठः ॥ १२ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र धर्मार्थतत्त्वं[1] वचनं शृणुष्व ।
दूता न वध्याः समयेषु राजन्सर्वेषु सर्वत्र वदन्ति सन्तः ॥ १३ ॥
असंशयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयम् ।
न दूतवध्यां प्रवदन्ति सन्तो दूतस्य दृष्टा बहवो हि दण्डाः ॥ १४ ॥
वैरूप्यमङ्गेषु कशाभिघातो मौण्ड्यं[2] तथा लक्षणसंनिपातः ।
एतान्हि दूते प्रवदन्ति दण्डान्वधस्तु दूतस्य न नः श्रुतोऽस्ति ॥ १५ ॥
कथं च धर्मार्थविनीतबुद्धिः परावरप्रत्ययनिश्चितार्थः ।
भवद्विधः कोपवशे हि तिष्ठेत्कोपं न[3] गच्छन्ति हि सत्त्ववन्तः ॥ १६ ॥
न धर्मवादे न च लोकवृत्ते न शास्त्रबुद्धिग्रहणेषु वाऽपि[4] ।
विद्येत कश्चित्तव वीर तुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ १७ ॥

१२] ति० टी०–अधर्मस्य मूलमधर्ममूलम् । दोषोऽपकीर्तिरूपः ॥ १२ ॥

रा० टी०–अधर्मेति । बहुदोषयुक्तम् अत एव अधर्ममूलम् अत एव अनार्यजुष्टं क्षुद्रैः सेवितं वचनं रावणोक्तिं निशम्य श्रुत्वा परमार्थतत्त्वं परमार्थस्य निश्चायकं वाक्यं विभीषण उवाच ॥ १२ ॥

१३–१४] ति० टी०–समयेषु स्वस्वामिनियोगानुष्ठानकालेषु ॥ १३ ॥ १४ ॥

रा० टी०–तद्वचनाकारमाह–प्रसीदेति । हे लङ्केश्वर ! समयेषु स्वस्वामिनियोगकालेषु दूताः सर्वत्र सर्वदेशेषु न वध्याः इति सन्तो वदन्ति तत् धर्मार्थतत्त्वं वचनं शृणुष्व ॥ १३ ॥

गो० टी०–प्रसीदेति । सर्वेषु सर्वत्र सर्वदेशेषु सर्वजातिष्वित्यर्थः ॥ १३ ॥

रा० टी०–नन्वनेन शत्रुत्वमाचरितमिति नास्मिन् दूतत्वमात्रमिति नास्य वधे दोष इत्यत आह–असंशयमिति । हि यतः अप्रमेयं बहु अप्रियम् अनेन कृतम् अतोऽयं प्रवृद्धो महान् शत्रुः तथापि सन्तः दूतवध्यां दूतानां वधं न प्रवदन्ति अत एव दूतस्य दुष्टत्वे इति शेषः, बहवः दण्डाः दृष्टा शास्त्रेष्ववलोकिताः ॥ १४ ॥

गो० टी०–न केवलं दूतोऽयम् अक्षादिवधेन शत्रुश्च तथाच हन्तव्य इत्याशङ्क्याह—असंशयमिति । दूतवध्यां दूतवधम् । स्त्रियां भावे क्यप् हन्तेर्वधादेश आर्षः ॥ १४ ॥

१५] ति० टी०–मौण्ड्यं मुण्डनम् । लक्षणसंनिपातो दूतयोग्याङ्कनसंभृत इति तीर्थः । वैरूप्यादीनामेकैकं वा । तथा लक्षणानां संनिपातः सर्वानुष्ठानं वेत्यर्थ इत्यन्ये । नोऽस्माकं श्रुतोऽपि नास्ति दर्शनं तु दूरापास्तमिति भावः ॥ १५ ॥

रा० टी०–तद्दण्डाकारमाह–वैरूप्यमिति । अङ्गेषु वैरूप्यं नासिकाछेदादिना विरूपकरणं कशाभिघातः कशया तोत्रेण अभिघातः ताडनं मौण्ड्यं भ्रुकुट्यादिमुण्डनं लक्षणसंनिपातः ताम्रखण्डदाहादिना ललाटादौ चिह्नकरणम् एतान् दण्डान् दूते प्रवदन्ति दूतस्य वयम्तु नोऽस्माकं न श्रुतोऽस्ति ॥ १५ ॥

गो० टी०–वैरूप्यमिति । लक्षणसंनिपातः दूतयोग्याङ्कनसंबन्धः । नः अस्माभिः ॥ १५ ॥

१६] ति० टी०–परावरप्रत्ययनिश्चितार्थ उत्कर्षापकर्षज्ञानेन निश्चितकार्यः ॥ १६ ॥

रा० टी०–ननु क्रोधवशं प्राप्तस्य विवेको न भवतीत्यत आह–कथमिति । परावरप्रत्ययेन उत्कृष्टापकृष्टज्ञानेन निश्चितः अर्थो येन अत एव धर्मार्थयोर्विनीता निविष्टा बुद्धिर्यस्य सः भवद्विधः जनः कोपवशे कथं तिष्ठेत् हि यतः सत्त्ववन्तो जनाः कोपं न गच्छन्ति प्राप्नुवन्ति ॥ १६ ॥

गो० टी०–कथं चेति । धर्मार्थविनीतबुद्धिः धर्मार्थयोः शिक्षितबुद्धिः परावरप्रत्ययनिश्चितार्थः उत्कृष्टापकृष्टपरिज्ञाननिश्चितार्थः अस्मिन् विषये इदं कार्यं परम् इदमवरमिति विवेकनिश्चितकार्य इत्यर्थः । नियच्छन्ति निगृह्णन्ति । सत्त्ववन्तः व्यवसायवन्तः ॥ १६ ॥

१७] ति० टी०–किं च त्वं नोपदेश्योऽस्माकमित्याह—नेति । शास्त्राणां बुद्ध्या निश्चयात्मिकया ग्रहणेष्वित्यर्थः ॥ १७ ॥

रा० टी०–स्वविज्ञापितस्वीकरणायैतत्प्रशंसामाह–नेति । धर्मवादादौ तव तुल्यः कश्चिन्न विद्येत विद्यते अतः सर्वसुरासुराणां त्वमेवोत्तमोऽसि ॥ १७ ॥

रा० टी०–तत्र हेतुमाह–पराक्रमेति । पराक्रमोत्साहमन्त्रिणां पराक्रमोत्साहविशिष्टमनोविशिष्टानां सुरासुराणामपि

१ युक्तमिति गो. पाठः । २ मौड्यमिति गो. पाठः । ३ नियच्छन्तीति गो. पाठः । ४ चापीति गो. पाठः ।

[पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ।
त्वयाऽप्रमेयेण सुरेन्द्रसंघा जिताश्च युद्धेष्वसकृन्नरेन्द्राः ॥
इत्थंविधस्यामरदैत्यशत्रोः शूरस्य वीरस्य तवाजितस्य ।
कुर्वन्ति वीरा मनसाऽप्यलीकं प्राणैर्विमुक्ता न तु भोः पुरा ते ॥]

न चाप्यस्य कपेर्यातं कंचित्पश्याम्यहं गुणम्। तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥ १८ ॥
साधुर्वा यदि वाऽसाधुः परैरेष समर्पितः। ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ १९ ॥
अपि चास्मिन्हते नान्यं राजन्पश्यामि खेचरम्। [इह यः पुनरागच्छेत्परं पारं महोदधेः ।]
तस्मान्नास्य वधे यत्नः कार्यः परपुरंजय । भवान्सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ २० ॥
अस्मिन्विनष्टे नहि भूतमन्यं पश्यामि यस्तौ नरराजपुत्रौ ।
युद्धाय युद्धप्रियदुर्विनीतावुद्योजयेद्वै भवता विरुद्धौ ॥ २१ ॥
पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ।
त्वया मनोनन्दन नैर्ऋतानां युद्धाय निर्नाशयितुं न युक्तम् ॥ २२ ॥

दुर्जयेन अत एव अप्रमेयेण बलवत्त्वादिना इयत्तारहितेन त्वया सुरेन्द्रसंघाः नरेन्द्राश्च युद्धेषु असकृज्जिताः ॥ १८ ॥

रा० टी०–इत्थमिति । इत्थंविधस्य तव अलीकमपराधं पुरा प्राणैर्विमुक्ताः अपहृतसर्वस्वा इत्यर्थः वीराः मनसाऽपि न कुर्वन्ति ॥ १९ ॥

गो० टी०–न धर्मवादे इति । धर्मवादे धर्मशास्त्रे । लोकवृत्ते लौकिकाचारे । शास्त्रबुद्धिग्रहणेषु शास्त्रशब्देन शास्त्रार्थ उच्यते । शास्त्रार्थज्ञानतद्धारणेष्वित्यर्थः ॥ १७ ॥

१८] ति० टी०–एतदुत्तरम् 'पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन। त्वयाऽप्रमेयेण सुरेन्द्रसंघा जिताश्च युद्धेष्वसकृन्नरेन्द्राः ॥ इत्थंविधस्यामरदैत्यशत्रोः शूरस्य वीरस्य तवाजितस्य कुर्वन्ति वीरा मनसाप्यलीकं प्राणैर्विमुक्ता न तु भोः पुरा ते' ॥ इति श्लोकद्वयं प्रक्षिप्तमिति कतकः । न चाप्यस्य कपेरिति ॥ १८ ॥

रा० टी०–नेति । अस्य कपेर्यातं कंचित् गुणं न पश्यामि अतः परैरयं कपिः प्रेषितः तेषु अयं प्राणान्तः दण्डः पात्यताम् ॥ २० ॥

गो० टी०–न केवलं दूतस्य वधे शास्त्रविरोधः गुणमपि न किंचित्पश्यामि अतः एतत्प्रेषकेष्वेव वधरूपो दण्डः पात्यतामित्याह–न चेत्यादि। साधुर्वेति समर्पितः प्रेषितः॥१८॥१९॥

१९] ति० टी०–समर्पितः प्रेषितः ॥ १९ ॥

रा० टी०–साधुरिति । परैः रिपुभिः समर्पितः प्रेषितः अत एव परार्थं ब्रुवन् साधुर्वाऽसाधुर्वा एष दूतः वधं नार्हति२१

२०] ति० टी०–नान्यं पश्यामि । योऽत्रागच्छेदित्यर्थः ॥ २० ॥

रा० टी०–अपीति । अस्मिन् दूते हते सति अन्यं दूतं खेचरम् आकाशगमनशीलं न पश्यामि तस्मात् अस्य वधे यत्नो न कार्यः किंतु सेन्द्रेषु देवेषु तद्विध्वंसार्थं यत्नमास्थातुं भवान् अर्हति । सार्धश्लोक एकान्वयी ॥ २२ ॥

गो० टी०–अस्मिन्हते सति वृत्तान्तं निवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रुक्षयो न स्यात् विमुक्तेऽस्मिन् एतस्मिन्निवेदितवृत्तान्तयोस्तयोरिहागमनादयत्नेन तव शत्रुनाशो भवेदित्यभिप्रेत्याह—अपि चेत्यादिना । इह परं पारम् इह विद्यमानं महोदधेः परं पारम् इदं दक्षिणकूलमित्यर्थः॥२०॥२१॥

२१] ति० टी०–नन्वस्मिन्हतेऽन्यस्यानागमने च कामक्षतिर्विपरीतमिष्टमेवेदं तत्राह—अस्मिन्विनष्टे इति । तौ राजपुत्रौ । यो योद्धोद्योजयेत्तं न पश्यामि, ननु तदुद्योगाभावोऽपि ममेष्ट एव नेत्याह—युद्धप्रियेति संबोधनेन रणपराक्रमविजयकीर्ती तवेष्टे किल, ते उभे अप्येतद्विनाशे नश्यत इत्याशयः । रावणस्य रजःप्रकृतित्वात्तत्प्रकृत्यनुसारेण युद्धादिव्यापारेण प्रलोभनम् तत्प्रीत्यर्थमेव दुर्विनीतावित्यायुक्तिः ॥ २१ ॥

रा० टी०–ननु खेचरदूतरक्षणेन किं साध्यमित्यत आह–अस्मिन्निति । अस्मिन्दूते विनष्टे सति युद्धप्रियावेव दुर्विनीतौ दुष्करशिक्षौ नरराजपुत्रौ युद्धाय य उद्योजयेत् तं दूतमहं न पश्यामि ॥ २३ ॥

गो० टी०–अस्मिन्विनष्ट इति । दीर्घपथावरुद्धौ दूरमार्गेण निरुद्धगमनावित्यर्थः । एतच्छ्लोकानन्तरं पराक्रमोत्साहमनस्विनां चेति श्लोकः । ततो हिताश्चेति श्लोकः । अथ तदेकदेशेनेति श्लोकः । अथ निशाचराणामिति सर्गान्तश्लोकः । अयमेव पाठक्रमः समीचीनः । अन्येऽप्यत्र सर्गे श्लोकाः कल्पिता दृश्यन्ते ॥ २२–२४ ॥

२२] ति० टी०–हे नैर्ऋतानां मनोनन्दन ! सुरासुराणा-

---

१ श्लोकद्वयमेतदधिकं रा. पाठे । २ अर्धमेतदधिकं गो. पाठे । ३ दूतमिति गो. पाठः । ४ दीर्घपथावरुद्धाविति गो. पाठः । ५ युद्धायतिरिति गो. पाठः । ६ युक्तेति गो. पाठः ।

हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च महागुणेषु ।
मनस्विनः शस्त्रभृतां वरिष्ठाः कोपप्रशस्ताः[1] सुभृताश्च[2] योधाः ॥ २३ ॥
तदेकदेशेन बलस्य तावत्केचित्तवादेशकृतोऽद्य[3] यान्तु ।
तौ राजपुत्रावुपगृह्य मूढौ परेषु ते भावयितुं प्रभावम् ॥ २४ ॥
निशाचराणामधिपोऽनुजस्य विभीषणस्योत्तमवाक्यनिष्ठम्[4] ।
जग्राह बुद्ध्या सुरलोकशत्रुर्महाबलो[5] राक्षसराजमुख्यः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ।

रावणाज्ञप्ता निशाचराः पटखण्डैः संवेष्ट्य तैलासेचनपूर्वं प्रज्वलितवालं हनुमन्तमातोद्यघोषानुनादितलङ्कायां संचारयामासुः । राक्षसीमुखाच्छ्रुतैतद्वृत्तान्ता जानक्यग्निं प्रति सशपथं हनुमददाहं प्रार्थयते । गोपुरमारूढो हनुमान्स्वशरीरकृशीकरणेन बालाग्निमुन्मुच्य स्वीकृतपृथुशरीरस्तत्रत्यपरिघं प्रगृह्य तद्रक्षिरक्षांसि जघान ।

तस्य तद्वचनं श्रुत्वा दशग्रीवो महात्मनः । देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥ १ ॥
सम्यगुक्तं हि भवता दूतवध्या विगर्हिता । अवश्यं तु वधायान्यः क्रियतामस्य निग्रहः ॥ २ ॥

मपि दुर्जयेन त्वया पराक्रमे य उत्साहस्तत्र प्रशस्तमनोवतां नैर्ऋतानां मनो युद्धाय प्रवृत्तं निर्नाशयितुं न युक्तम् । नैर्ऋतानामित्यत्र मन इत्यत्र च तन्त्रम् । यद्वा तादृशानां नैर्ऋतानां मनोनन्दन ! तादृशेन त्वया युद्धापत्तिर्युद्धागमो नाशयितुं न युक्तमित्यर्थः ॥ २२ ॥

रा० टी०—ननु किं तयुद्धप्रवृत्त्येत्यत आह—**पराक्रमेति** । हे नन्दन राक्षसाभिरामदातः ! युद्धाय समुत्सुकमिति शेषः नैर्ऋतानां मनः निर्नाशयितुं त्वया न युक्तम् ॥ २४ ॥

२३] **ति० टी०**—ननु युद्धे कदाचिद्विपरीतमपि संभाव्येत तत्राह—**हिताश्चेति** । समाहिता दानादिभिर्वशीकृताः । सुभृताः सम्यक्पालिताः तादृशभृत्यवतो जय एव भावीति भावः ॥ २३ ॥

रा० टी०—**हिता इति** । महागुणेषु बहुगुणविशिष्टेषु कुलेषु जाताः शूराः नागाश्च सुभृताः अत्यन्तं पोषिताः ॥ २३ ॥

२४] **ति० टी०**—तत्तस्मादुपगृह्य आयान्त्विति शेषः । परेषु ते प्रभावं भावयितुं प्रकाशयितुम् युक्तमिति शेषः ॥ २४ ॥

रा० टी०—ननु किं तेनेत्यत आह—**तदिति** । तत् शराधिक्याद्धेतोः केचित्तवादेशकृतः बलस्य सैन्यस्य एकदेशेन सह किंचिद्बलं गृहीत्वेत्यर्थः, अद्य यान्तु रामसमीपमिति शेषः । गमनप्रयोजनमाह—परेषु शत्रुषु ते प्रभावं भावयितुं बोधयितुं मूढौ प्रियावियोगदुःखे अस्वस्थचित्तौ तौ रामलक्ष्मणौ उपगृह्य आयान्त्विति शेषः ॥ २६ ॥

गो० टी०—**तदिति** । तत्तस्मात्कारणात् । एकदेशेनेति सह योगे तृतीया । बलस्य सैन्यस्य ॥ २४ ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

२५] **ति० टी०**—उत्तमवाक्यनिष्ठं तत्प्रतिपाद्यमर्थतत्त्वं जग्राह ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०—**निशाचराणामिति** । राक्षसराजेषु मुख्यः निशाचराणामधिपो रावणः विभीषणस्येष्टमुत्तमवाक्यं बुद्ध्या अन्तःकरणवृत्त्या जग्राह ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्विपञ्चाशत्तमः सर्गः ॥ ५२ ॥

१] **ति० टी०**—तस्य विभीषणस्य ॥ १ ॥

रा० टी०—विभीषणवचनस्वीकारानन्तरकालिकं रावणवृत्तान्तमाह—**तस्येत्यादिभिः** । महात्मनो विभीषणस्य वचनं श्रुत्वा देशकालहितमुत्तरं वाक्यमब्रवीत् ॥ १ ॥

गो० टी०—**तस्येत्यादि** । देशकालहितं देशकालोचितमिति विभीषणवचनविशेषणम् ॥ १ ॥

२] **ति० टी०**—दूतवध्या दूतवधः । आर्षमिदं साधु॥२॥

रा० टी०—तद्वचनाकारमाह—**सम्यगित्यादिभिः** । दूतवध्या विगर्हितेति भवता सम्यगुक्तमतः वधादन्यः अस्य निग्रहः दण्डः क्रियताम् ॥ २ ॥

१ कोऽप्ययतस्ते इति गो. रा. पाठः । २ नागा इति रा. पाठः । ३ ऽभीति गो. पाठः । ४ वाक्यमिष्टमिति गो. पाठः । ५ महाबल इति गो. पाठः । ६ वधादन्य इति गो. रा. पाठः ।

कपीनां किल लाङ्गूलमिष्टं भवति भूषणम्। तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु ॥ ३ ॥
ततः पश्यन्त्वमुं दीनमङ्गवैरूप्यकर्शितम्। सुमित्रज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥ ४ ॥
आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम्। लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः। वेष्टन्ते तस्य लाङ्गूलं जीर्णैः कार्पासिकैः पटैः ॥ ६ ॥
संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः। शुष्कमिन्धनमासाद्य वनेष्विव हुताशनम् ॥ ७ ॥
तैलेन परिषिच्याथ तेऽग्निं तत्रोपपादयन्। लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानताडयत् ॥ ८ ॥
रोषामर्षपरीतात्मा बालसूर्यसमाननः। [लाङ्गूलं संप्रदीप्तं तु दृष्ट्वा तस्य हनूमतः।]
स भूयः संगतैः क्रूरै राक्षसैर्हरिपुंगवः ॥ ९ ॥

गो० टी०–सम्यगुक्तमिति। हतवध्या हतवधः ॥२॥३॥

३] ति० टी०–दग्धेन दाहकृतेनोपलक्षितो गच्छतु। स्वस्वामिसमीपमिति शेषः ॥ ३ ॥

रा० टी०–ननु को दण्डः इत्यत आह–कपीनामिति। लाङ्गूलं कपीनां भूषणम् अत एव इष्टं भवति अतः अस्य तत् लाङ्गूलं दीप्यतां दग्धेन लाङ्गूलेन विष्टः सन् गच्छतु ॥ ३ ॥

४] ति० टी०–ततः स्वीयसमीपगमनानन्तरम्। सुमित्राणि समसुखदुःखा, ज्ञातयो भ्रात्रादयः, बान्धवाः संबन्धिनः, सुहृज्जनाः स्निग्धजनाः, तत्सहिता बान्धवा इत्यर्थः ॥ ४ ॥

रा० टी०–तत इति। ततः पुच्छदाहानन्तरम् अङ्गवैरूप्येण कर्शितं दुःखितममुं वानरं ससुहृज्जनाः सुमित्रादयः पश्यन्तु तत्र मित्राणि तुल्यसुखदुःखवन्तः, ज्ञातयो भ्रात्रादयः, बान्धवाः संबन्धिनः, सुहृज्जनाः स्नेहवन्तः ॥ ४ ॥

गो० टी०–तत इति। समित्रेति। मित्राणि आप्ताः समसुखदुःखा वा सहाया वा ज्ञातयः भ्रात्रादयः बान्धवाः संबन्धिनः सुहृज्जनाः स्निग्धजनाः ॥ ४ ॥

५] ति० टी०–अथ रावणः स्वपुरदुर्गमहाबलमहैश्वर्याणि परेभ्यः प्रकाशयितुं सर्वपुरपरावर्तनं दीप्तपुच्छस्याज्ञापयदित्याह—आज्ञापयदिति। परिणीयतामित्याज्ञापयदिति योजना ॥ ५ ॥

रा० टी०–आज्ञापयदिति। प्रदीप्तेन लाङ्गूलेनोपलक्षितोऽयं सचत्वरं सर्वं पुरं रक्षोभिः परिणीयतामिति राक्षसेन्द्र आज्ञापयत् एतेनैतादृशदर्शनेन हतबान्धवानां राक्षसीनां दुःखशान्तिर्भविष्यतीति सूचितम् ॥ ५ ॥

गो० टी०–आज्ञापयदिति। प्रदीप्तेन लाङ्गूलेन युक्तो हनुमान् सचत्वरं सर्वं पुरं परिणीयतां परितो नीयताम् इत्याज्ञापयदित्यन्वयः ॥ ५–७ ॥

६] ति० टी०–वेष्टन्ते अवेष्टयन्तेत्यर्थः ॥ ६ ॥

रा० टी०–तस्येति। तस्य रावणस्य वचनं श्रुत्वा कोपकर्कशाः अतिकोपवन्तो राक्षसाः तस्य हनुमतो लाङ्गूलं कार्पासिकैः कार्पासोपादानकैः पटैः वेष्टन्ते अवेष्टन्त ॥ ६ ॥

७–८] ति० टी०–शुष्कमिति। आरण्यका यथा शुष्कमिन्धनमासाद्य हुताशनमुत्पादयन्ति तथा जीर्णपटवेष्टितलाङ्गूलं तैलेन परिषिच्य तत्र तेऽग्निमुपपादयन्नुदपादयन्नित्यर्थ इति कतकः। 'हुताशनः' इति पाठे हृद्यौ दृष्टान्तोऽयम्। उपपादयन्नित्यस्य समयोजयन्नित्यर्थः इत्यन्ये। तान्बद्ध्वा नेतॄन् ॥ ७ ॥ ८ ॥

रा० टी०–संवेष्ट्यमान इति। शुष्कमिन्धनमासाद्य वनेषु हुताशन इव व्यवर्धत ॥ ७ ॥

रा० टी०–तैलेनेति। ते रावणाज्ञप्ताः राक्षसाः तैलेन परिषिच्य तत्र लाङ्गूले अग्निमुपपादयन् प्रापयन् प्राज्वालयन्नित्यर्थः। अर्धं पृथक् ॥ ८ ॥

रा० टी०–लाङ्गूलेनेति। भूयः सङ्गतैः राक्षसैः प्रदीपितेन लाङ्गूलेन रोषामर्षपरीतात्मा हनुमान् राक्षसान् अताडयत्। सार्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०–लाङ्गूलेनेति। अपातयत् लाङ्गूलभ्रामणेन अद्रावयदित्यर्थः ॥ ८ ॥ ९ ॥

९] ति० टी०–संगतैर्मिलितै राक्षसैः। स भूयो निबद्ध इति शेषः ॥ ९ ॥

गो० टी०–स भूय इत्यादि। न मे शक्ताः न मे पर्याप्ता इत्यर्थः। मम निग्रहे न समर्था इति यावत्। यदीति। भर्तृहितार्थाय रामहितार्थाय चरन्तं प्रवर्तमानम् मामिति शेषः। भर्तृशासनात् रावणशासनात् यदि बध्नन्ति तावता मे निष्कृतिः प्रतिक्रिया न कृता। इदं बन्धनमकिञ्चित्करमिति भावः। सर्वेषामिति। रामस्य प्रीत्यर्थमिदं विषहिष्ये। रावणादिवधस्य स्वेनैव कर्तव्यत्वेन रामाभिमतत्वाद्राक्षसानामहमीदृशं बन्धनाकर्षणादिरूपं परिभवं सहिष्य इति भावः। रामस्य प्रीत्यर्थमित्यत्र छन्दोभङ्ग आर्षः। लङ्केति। लङ्का रात्रौ

१ इममिति गो. पाठः। २ कर्शिता इति गो. पाठः। ३ वेष्टयन्ति स्मेति गो. पाठः। ४ कार्पासकैरिति गो. पाठः। ५ हुताशन इति गो. रा. पाठः। ६ तत्राभ्युपादयन्निति गो. पाठः। ७ अपातयदिति गो. पाठः। ८ अर्धमेतदधिकं गो. पाठे। ९ एतदार्धद्वयं व्यत्यस्तं गो. पाठे। १० सत्तम इति गो. पाठः।

सहस्त्रीबालवृद्धाश्च जग्मुः [1]प्रीतिं निशाचराः । निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिम् ॥ १० ॥
कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः । छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥ ११ ॥
यदि भर्तृहितार्थाय चरन्तं भर्तृशासनात् । निबध्नन्ते [2]दुरात्मानो न तु मे निष्कृतिः कृता ॥ १२ ॥
सर्वेषामेव पर्याप्तो राक्षसानामहं युधि । किं तु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥ १३ ॥
लङ्का चारयितव्या [3]मे पुनरेव भवेदिति । रात्रौ नहि सुदृष्टा मे दुर्गकर्मविधानतः ॥ १४ ॥
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये । कामं [4]बध्नन्तु मे भूयः पुच्छस्योद्दीपनेन च ॥ १५ ॥
पीडां [5]कुर्वन्ति रक्षांसि न मेऽस्ति मनसः श्रमः । ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ॥ १६ ॥

दुर्गकर्मविधानतः दुर्गकर्मविधानाद्धेतोः न हि सुदृष्टा नैव सुदृष्टा । यद्वा दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः । न दृष्टेति हेतोर्मया लङ्का पुनश्चारयितव्या भवेत् विचरित्वा द्रष्टव्या भवेदित्यर्थः । अयं च प्रातःकालः न तूषःकालः प्रातःकालेऽपि तथा व्यवहारोपपत्तेः । **काममिति** । मनसः श्रम इत्यनन्तरमितिकरणं बोध्यम् ॥ १०–१६ ॥

१०] ति० टी०–अथ बन्धसंहारशक्तावपि स नोचित इत्यचिन्तयदित्याह—कृतवानिति ॥ १० ॥

रा० टी०–**सहेति** । निशाचराः प्रीतिं जग्मुः निबद्धो वीरस्तु तत्कालसदृशीं पुच्छदहनसमयोचितां मतिं कृतवान् ॥ १० ॥

११] ति० टी०–तां मतिमभिनयति—**काममिति** । निबद्धस्यापि निबद्धवदवस्थितस्यापि मे न शक्ताः । सर्वथा बन्धनादाविति शेषः । तदेव समर्थयति—**छित्त्वेति** ॥ ११ ॥

रा० टी०–तन्मत्याकारमाह–**काममिति** । निबद्धस्यापि मे समीपे राक्षसाः समर्था न अतः पाशान् राक्षसकृतबन्धनानि छित्त्वा इमान् राक्षसान् पुनर्हन्याम् ॥ ११ ॥

१२] ति० टी०–तर्हि कुतो न हन्यन्ते तत्राह—**यदीति** । भर्तुः रामस्य हितार्थाय हितनिमित्तं चरन्तं मां भर्तुः रावणस्य शासनाद्यदि ते मां निबध्नन्ते निबध्नन्तु केवलम्, न तु मे निष्कृतिः कृता, मया कृतस्य प्रतिक्रिया तु न कृता ॥ १२ ॥

रा० टी०–**यदीति** । भर्तृहितार्थाय चरन्तं मां भर्तृशासनात् रावणाज्ञातः यदीमे मां निबध्नन्ते तदाऽपि मे निष्कृतिः मत्कृतकर्मप्रतिक्रिया न कृता ॥ १२ ॥

१३] ति० टी०–यदि तां वधरूपां चिकीर्षेयुस्तदा सर्वान्हनिष्याम्येवेत्याह—**सर्वेषामिति** । यदि पर्याप्तस्तर्हि क्रियतां शत्रुवधस्तत्राह—**रामस्येति** । प्रीत्यर्थं सर्वराक्षसवधजप्रीत्यविघ्नार्थमीदृशबन्धनादिकम् ॥ १३ ॥

रा० टी०–**सर्वेषामिति** । यद्यपि राक्षसानां युधि अहं पर्याप्तः परिपूर्णः निहन्तुं समर्थ इत्यर्थः, तथाऽपि रामस्य प्रीत्यर्थं किंतु किंचित् ईदृशं कर्म विषहिष्ये ॥ १३ ॥

१४] ति० टी०–फलान्तरार्थमपि सोढव्यमेवेत्याह—**लङ्केति** । एतै रावणाज्ञया पुनरेव सकला लङ्का चारयितव्या चारणेन दर्शयितव्या, अतो विषहिष्ये । ननु दृष्टायाः किं पुनर्दर्शनेन तत्राह—**रात्राविति** । दुर्गकर्मविधानतो दुर्गस्य दुर्गमत्वस्वरूपकर्मविधानाद्धेतोः दुर्गाशे इति शेषः ॥ १४ ॥

रा० टी०–ननु सहनेन कथं रामप्रीतिरित्यत आह–**लङ्केति** । मम लङ्का पुनश्चारयितव्या भवेत् इति यतः रात्रौ दुर्गकर्मविधानतः दुर्गमक्रियया विधानात् हेतोर्न सुदृष्टा ॥ १४ ॥

१५] ति० टी०–निशाक्षये इत्यनेन सीतासंभाषणार्थं कतिपयदिनवासो गम्यते । तथा हि—फाल्गुने रावणेन सीतापहारः आश्विनशुक्लसमाप्तौ हनुमत्प्रेरणया पञ्चावधिदानेन वानरान्प्रति दूतप्रेषणम् ततः कार्तिकशुक्लप्रतिपदन्वेषणार्थं वानरप्रस्थानम् मार्गशुक्लदशम्यां संपातिदर्शनम् तदा सुग्रीवदत्तमासावधेर्गतत्वस्य वानरैरुक्तिः अद्य एकादश्यां हनुमतो लङ्कागमनम् तद्रात्रिशेषे सीतादर्शनम् ततो द्वादश्यां दिने स्थित्वा रात्रौ सीतायाः सम्यग्दर्शनम् तद्रात्रिशेषे तत्र रावणागमनम् तत्र रावणेन 'मासान्द्वादश भामिनि' इति स्वदत्तावधौ मासद्वयावशेषवचनं कतिपयदिनाधिक्यं तु मासत्वानवच्छिन्नत्वेनाल्पान्तरत्वात्र विवक्षितम् । ततस्त्रयोदश्यां प्रातः सीतया सह कथालापः तद्दिन एवाशोकवनिकाभङ्गादि चतुर्दश्यामक्षान्तवधो लङ्कादाहश्च, पूर्णिमायां वा । पूर्वं वासन्तिकवृक्षाणां पुष्पितत्वोक्तिस्तु तद्वर्षे क्षयमासेनोपपादिता उत्पातेन च लक्ष्मणस्य सुग्रीवनिकटे प्रेषणसमये रामेण मासचतुष्टयरूपकृतावधेरपगमोक्तिस्तु प्रागुपपादितरहस्येति दिक् । पुच्छस्योद्दीपनेन चेत्यस्योत्तरश्लोकेनान्वयः ॥ १५ ॥

रा० टी०–**अवश्यमिति** । निशाक्षये लङ्काऽवश्यं मया द्रष्टव्या अतः कामं मां बध्नन्तु पुच्छस्योद्दीपनेन पीडां कुर्वन्तु च । तत्र हेतुः–मे मनसः श्रमः खेदो नास्ति । सार्धश्लोक एकान्वयी ॥ १५ ॥

१६] ति० टी०–मनसः श्रमो मनःखेदो न मेऽस्तीति चिन्तयामासेत्यन्वयः । तत एवम् । तस्य चिन्तानन्तरमित्यर्थः ॥ १६ ॥

रा० टी०–**तत इति** । संवृतः आच्छादितः आकारो येन तं महाकपिं राक्षसाः परिगृह्य ययुः ॥ १६ ॥

गो० टी०–**ततस्त इति** । संवृताकारं गूढस्वभावम्

---

१ प्रीता इति गो. पाठः । २ बध्नन्त्येते इति गा. पाठः । ३ वै इति गो. पाठः । ४ बद्धस्येति गो. पाठः । ५ कुर्वन्त्विति गो. पाठः ।

परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् । शङ्खभेरीनिनादैश्च घोषयन्तः स्वकर्मभिः ॥ १७ ॥
राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् । अन्वीयमानो रक्षोभिर्ययौ सुखमरिन्दमः ॥ १८ ॥
हनूमांश्चारयामास राक्षसानां महापुरीम् । यथापश्यद्विमानानि विचित्राणि महाकपिः ॥ १९ ॥
संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान् । रथ्याश्च गृहसंबाधाः कपिः शृङ्गाटकानि च ॥ २० ॥
तथा रथ्योपरथ्याश्च तथैव च गृहान्तरान् । चत्वरेषु चतुष्केषु राजमार्गे तथैव च ॥ २१ ॥
घोषयन्ति कपिं सर्वे चार इत्येव राक्षसाः । [स्त्रीबालवृद्धा निर्जग्मुस्तत्र तत्र कुतूहलात् ।
तं प्रदीपितलाङ्गूलं हनुमन्तं दिदृक्षवः ॥] दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः ॥ २२ ॥
राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् । यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः ॥ २३ ॥
लाङ्गूलेन प्रदीप्तेन स एष परिणीयते । श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम् ॥ २४ ॥
वैदेही शोकसंतप्ता हुताशनमुपागमत् । मङ्गलाभिमुखी तस्य सा तदासीन्महाकपेः ॥ २५ ॥

महाकपिमिति बुद्ध्या महत्त्वम् कपिकुञ्जरमिति सजातीयश्रेष्ठत्वम् ॥ १७ ॥

१७-१८] ति० टी०-स्वकर्मभी राजद्रोहिणो दुष्टस्यैवं दण्ड इत्येवमादिभिर्घोषयन्तः पूर्ववृत्तान्तस्य सर्वान्प्रति प्रकटं प्रतिपादनं घोषणम् ॥ १७ ॥ १८ ॥

रा० टी०-शङ्खेति । शङ्खभेरीनिनादैर्घोषयन्तो राक्षसाः कपिकुञ्जरं तां पुरीं चारयन्ति स्म ॥ १७ ॥

गो० टी०-शङ्खेति । स्वकर्मभिः आस्फोटनसिंहनादैरित्यर्थः । तां पुरीं घोषयन्तः अत्यन्तसंयोगे द्वितीया चारयन्ति स्म तमिति शेषः ॥ १८ ॥

रा० टी०-अन्वीयमान इति । रक्षोभिरन्वीयमानो हनुमान् सुखं ययौ महापुरीं लङ्कां चारयामास चचार च॥१८॥

गो० टी०-अन्वीयमान इति । चारयामास शोधयामास ॥ १९ ॥

१९] ति० टी०-चारयामास स्वार्थे णिचू । चरणेन ददर्शेत्यर्थः ॥ १९ ॥

रा० टी०-अथेति । महांश्चासावकपिः कप्यन्तररहितः कपिर्हनुमान् विचित्राणि विमानादीनि अपश्यच्च । तत्र चत्वराः द्वारसमीपबहिर्बद्धाः संबाधाः निबिडा शृङ्गाटकानि चतुष्पथाः, उपरथ्याः स्वल्पवीथ्यः, गृहान्तराः गृहद्वयमध्यदेशाः । श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०-अथेति । चत्वरान् गृहबहिरङ्गणानि ॥ २० ॥

२०] ति० टी०-चत्वरान्द्वारसमीपे बहिर्बद्धान् । गृहैः संबाधा निबिडाः । शृङ्गाटकानि चतुष्पथान् ॥ २० ॥

गो० टी०-वीथीश्चेति । शृङ्गाटकानि चतुष्पथानि रथ्याः महावीथीः उपरथ्याः अवान्तरवीथीः गृहकान्तरान् गृहकाणि क्षुद्रगृहाणि अन्तराणि प्रच्छन्नद्वाराणि अन्तर्द्वाराणीत्यर्थः । 'तोरणोऽस्त्री बहिर्द्वारं प्रच्छन्नद्वारमन्तरम्' इति वैजयन्ती । अस्त्रीत्वमार्षम् ॥ २१ ॥

२१] ति० टी०-उपरथ्याः स्वल्पवीथ्यः गृहान्तरान्गृहद्वयमध्यभागान् । चतुष्केषु चतुष्पथेषु ॥ २१ ॥

रा० टी०-चत्वरेष्विति । चत्वरेषु अङ्गणेषु चतुष्केषु चतुष्पथेषु चचार । रामदूतोऽयमिति कपिं राक्षसाः घोषयन्ति अघोषयन्त ॥ २१ ॥

गो० टी०-चत्वरेष्विति । चत्वरेषु चतसृणां रथ्यानां संभेदेषु चतुष्केषु चतुस्तम्भमण्डपेषु चार एव चारीकः स्वार्थे कप्रत्ययः आर्षो दीर्घः ॥ २२ ॥ २३ ॥

२२] ति० टी०-'चारीकः' इति पाठेऽपि चार इत्येवार्थः आर्षं साधुत्वम् चारशब्दात्स्वार्थे आर्ष ईकः ॥ २२ ॥

रा० टी०-दीप्यमान इति । लाङ्गूले दीप्यमाने सति अप्रियं तद्दीपनं देव्याः सीतायाः समीपे शंसुः शशंसुः ॥ २२ ॥

गो० टी०-दीप्यमान इति । शंसुः शशंसुः । आर्षो द्विर्वचनाभावः ॥ २४ ॥

२३] ति० टी०-तस्य हनुमतो लाङ्गूलाग्रे दीप्यमाने तदप्रियं देव्याः शंसुः शशंसुः ॥ २३ ॥

रा० टी०-तच्छासनाकारमाह-य इति । यः त्वया कृतः संवादो येन सः कपिः प्रदीप्तेन प्रज्वलितेन लाङ्गूलेनोपलक्षितः सन् परिणीयते ॥ २३ ॥

गो० टी०-यस्त्वयेति । परिणीयते परितो नीयते ॥२५॥

२४] ति० टी०-परिणीयते परितोऽपनीयते । आत्मापहरणोपमं तादृग्दुःखजनकम् ॥ २४ ॥

रा० टी०-श्रुत्वेति । आत्मापहरणोपमं दुःखप्रापकत्वेन स्वापहरणसदृशं तद्वचनं श्रुत्वा शोकसंतप्ता वैदेही हुताशनं वह्निमुपागमत् मनसा प्राप्नोत् ॥ २४ ॥

गो० टी०-श्रुत्वेति । उपागमत् उपासितवती ॥ २६ ॥

२५] ति० टी०-उपागमद्ध्यानेनोपासितवती । यद्वा तत्र समीपे ज्वलमानमग्निमुपासितवती ॥ २५ ॥

१ तमिति गो. पाठः । २ वीथीरिति गो. पाठः । ३ गृहकान्तरानिति गो. पाठः । ४ चारीक इतीति गो. पाठः । ५ श्लोकोऽयमधिकः गो. पाठे ।

उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् । यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ॥ २६ ॥
यदि वा त्वेकपत्नीत्वं[1] शीतो भव हनूमतः ।
[यदि किंचिदनुक्रोशस्तस्य मय्यस्ति धीमतः । यदि वा भाग्यशेषो मे शीतो भव हनूमतः ॥
यदि मां वृत्तसंपन्नां तत्समागमलालसाम् । स विजानाति धर्मात्मा शीतो भव हनूमतः ॥
यदि मां तारयेदार्यः सुग्रीवः सत्यसंगरः । अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥]
ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः ॥ २७ ॥
जज्वाल मृगशावाक्ष्याः शंसन्निव शुभं कपेः । हनूमज्जनकश्चैव[2] पुच्छानलयुतोऽनिलः ॥
ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ २८ ॥
दह्यमाने च लाङ्गूले चिन्तयामास वानरः । प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥ २९ ॥
दृश्यते च महाज्वालः करोति च न मे रुजम् । शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः ॥ ३० ॥

रा० टी०–मङ्गलेति । सा सीता महाकपेर्हनुमतः मङ्गलाभिमुखी मङ्गलप्रापिका आसीत् अत एव प्रयता प्रयतचित्ता सती हव्यवाहनं वह्निमुपतस्थे ॥ २६ ॥

गो० टी०–मङ्गलाभिमुखीति । तस्य हनुमतः मङ्गलाभिमुखी अदाहपरा प्रयता शुद्धिमती 'पवित्रः प्रयतः पूतः' इत्यमरः ॥ २७ ॥

२६] ति० टी०–प्रयता शुद्धिमती ॥ २६ ॥

रा० टी०–तत्प्रकारमाह–यदीति । यदि पतिशुश्रूषाद्यस्ति मयीति शेषः, तदा हनुमतः शरीर इति शेषः, शीतो भव॥२६॥

गो० टी०–यद्यस्तीति । पतिशुश्रूषादिपदं तत्फलपरम् । शीतो भव तेनेति शेषः, एकपत्नीत्वं पातिव्रत्यम् ॥ २८ ॥

२७] ति० टी०–एकपत्नीत्वं पातिव्रत्यम् । शीतो भव हुताशनेति शेषः। अस्याः सीताछायात्वेऽपि स्वस्मिंस्तदभेदबुद्धिसत्त्वात्त्वेतदुक्त्यसंगतिः । ततः सीतोपासनानन्तरम्, तीक्ष्णार्चिरप्यनलः प्रदक्षिणशिखो जज्वाल ॥ २७ ॥

रा० टी०–तत इति । ततः सीताप्रार्थनानन्तरं तीक्ष्णमर्चिर्यस्य सोऽनलः कपेः शुभं शंसन्निव मृगशावाक्ष्याः सीताया अग्रे जज्वाल ॥ २७ ॥

गो० टी०–यदि किंचिदिति । किंचिदनुक्रोश इति समस्तं पदम् । तस्य रामस्य भाग्यशेषः । इदानीं निरन्तरदुःखानुभवात् भाग्यप्रसक्तिरेव नास्तीति मन्यमानाया इदं वचनम् ॥ २९ ॥

गो० टी०–मम पातिव्रत्यं यदि हनुमान् जानाति तदा शीतो भवेत्याह—यदि मामिति ॥ ३० ॥

गो० टी०–यदि मां तारयेदिति । मत्तारणे इदमेव ज्ञापकमिति भावः ॥ ३१ ॥

गो० टी०–तत इति । ततः सीतोपगमात् । कपेरनलः कपिवालाग्निः मृगशावाक्ष्याः सीतायाः शुभं शंसन्निव प्रदक्षिणशिखो जज्वालेत्यन्वयः ॥ ३२ ॥

२८] ति० टी०–तथा सीतायाः कपेः शिवं स्वकृतं शंसन्निवाभूत् । किं च हनुमज्जनकोऽनिलो वायुः पुच्छानलयुतोऽपि देव्याः संमुखे स्वास्थ्यकरः कपेः स्वास्थ्यमूचकः सन्प्रालेयानिलशीतलो ववौ ॥ २८ ॥

रा० टी०–हनुमदिति । हनुमज्जनकः हनुमत उत्पादकः पुच्छानलयुतः प्रालेयानिलः हिमसंबन्धिवायुसदृशशीतलः अनिलः देव्याः सीतायाः स्वास्थ्यकरः सन् ववौ ॥ २८ ॥

गो० टी०–हनुमदिति । अनिलश्च पुच्छानलयुतोऽपि प्रालेयानिलशीतलः हिममारुतवच्छीतलः सन् देव्याः सीतायाः स्वास्थ्यकरः सुखकरः ववौ । अस्मात्परं दह्यमाने च लाङ्गूल इति श्लोकः । अनयोः श्लोकयोर्मध्ये केचन श्लोकाः कतिपयकोशेषु दृश्यन्ते । बहुकोशेष्वदर्शनादर्थाधिक्याभावाच्च ते अनादरणीयाः ॥ ३३ ॥ ३४ ॥

२९] ति० टी०–सर्वतः प्रदीप्तोऽग्निरित्यन्वयः ॥ २९ ॥

रा० टी०–दह्यमान इति । लाङ्गूले दह्यमाने दहिनो वह्नेः अमानः दाहगर्वाभावः यस्मिन् अदह्यमाने सतीत्यर्थः, किंच लाङ्गूले लाङ्गूलसंबन्धिपटे दह्यमाने सति वानरश्चिन्तयामास । अर्धं पृथक् ॥ २९ ॥

रा० टी०–चिन्ताकारमाह–प्रदीप्त इति । सर्वतः प्रदीप्तोऽयमग्निः मां कस्मान्न दहति । अर्धं पृथक् । दृश्यते इति । लाङ्गूलाग्रे प्रतिष्ठितः महाज्वालोऽग्निर्यो दृश्यते स शिशिरस्य हिमस्य संपातः पिण्ड इव मे रुजं पीडां कस्मान्न करोति चकारः कस्मादित्यर्थे ॥ ३० ॥

गो० टी०–प्रदीप्त इति । रुजं पीडाम् । शिशिरस्येव संपातः शिशिरस्य चन्दनोशीरादेः संपातः संघट्ट इव स्थितः । अत्यन्तशीतल इत्यर्थः । एतेन हेतुविशेषं न पश्यामीत्युक्तम् ॥ ३१ ॥

३०] ति० टी०–लाङ्गूलाग्रे शिशिरस्य हिमस्य संपातः पिण्ड इव प्रतिष्ठित इत्यन्वयः ॥ ३० ॥

१ चास्त्येकपत्नीत्वमिति गो. पाठः । २ श्लोकत्रयमिदमधिकं गो. पाठे । ३ ऽपीति गो. पाठः ।

अथ वा तदिदं व्यक्तं यदृष्टं प्लवता मया । रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ ३१ ॥
यदि तावत्समुद्रस्य मैनाकस्य च धीमतः । रामार्थं संभ्रमस्तादृक्किमग्निर्न करिष्यति ॥ ३२ ॥
सीतायाश्चानृशंस्येन तेजसा राघवस्य च । पितुश्च मम सख्येन न मां दहति पावकः ॥ ३३ ॥
भूयः स चिन्तयामास मुहूर्तं कपिकुञ्जरः । कथमस्मद्विधस्येह बन्धनं राक्षसाधमैः ॥ ३४ ॥
प्रतिक्रियाऽस्य युक्ता स्यात्सति मह्यं पराक्रमे । ततश्छित्त्वा च तान्पाशान्वेगवान्वै महाकपिः ॥ ३५ ॥
उत्पपाताथ वेगेन ननाद च महाकपिः । पुरद्वारं ततः श्रीमाञ्शैलशृङ्गमिवोन्नतम् ॥ ३६ ॥
विभक्तरक्षःसंबाधमाससादानिलात्मजः । स भूत्वा शैलसंकाशः क्षणेन पुनरात्मवान् ॥ ३७ ॥
ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् । विमुक्तश्चाभवच्छ्रीमान्पुनः पर्वतसंनिभः ॥ ३८ ॥
वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् । स तं गृह्य महाबाहुः कालायसपरिष्कृतम् ॥
रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ॥ ३९ ॥

३१] ति० टी०–तत्रोपपत्तिं चिन्तयति—अथवेति। यस्मात्प्लवता मया सरितां पतौ रामप्रभावात्समुद्रे पर्वतरूपमाश्चर्यं दृष्टम् । ततो रामप्रभावादेवेदमपीत्यर्थः ॥ ३१ ॥

रा० टी०–तत्संभावनामाह–अथवेति । यत् यस्मात् रामप्रभावात् सरितां पतौ सरितां पतौ समुद्रे पर्वतः पर्वतरूपमाश्चर्यं प्लवता मया दृष्टं तत्तस्मादेव इदं वह्नेरशैत्यं व्यक्तं प्रकटीभूतम् ॥ ३१ ॥

गो० टी०–हेतुविशेषान्निश्चिनोति—अथवेत्यादिना । प्लवता मया सरितां पतौ । आर्षं विसंज्ञाकार्यम् । समुद्रमध्ये पर्वतः पर्वतरूपं यदाश्चर्यम् अद्भुतरूपम् वस्तु दृष्टं तद्वदिदमग्नेः शैत्यं रामप्रभावात् संजातं व्यक्तम् ॥ ३६ ॥

३२] ति० टी०–ननु समुद्रप्रेरणेन मैनाकोत्थानं प्रयुज्यते, अग्नेस्तु स्वभाववैपरीत्यं कुतस्तत्राह—यदीति । तावदिति वाक्यालंकारे । रामार्थं रामोपकारार्थं तादृक्संभ्रमो यद्यादरपूर्वकं त्वरा यदि, तदा रामेण नित्यमुपासितोऽग्नी रामोपकारार्थं कथमपि शैत्यं किं न करिष्यतीत्यर्थः ॥ ३२॥

रा० टी०–तदेव द्रढयन्नाह–यदीति । रामार्थं समुद्रस्य मैनाकस्य च यदि संभ्रमः मत्कर्मकादरः तर्हि अग्निः किं न करिष्यति संभ्रममिति शेषः करिष्यत्येवेत्यर्थः ॥ ३२ ॥

गो० टी०–एतदेवोपपादयति—यदीति । संभ्रमः त्वरा । किमग्निर्न करिष्यति संभ्रममिति शेषः । रामार्थं मैनाकस्य संभ्रमो यदि स्यादग्नेस्तादृशः संभ्रमः कुतो न भविष्यतीत्यर्थः॥३७॥

३३] ति० टी०–आनृशंस्यमाश्रितजनदया ॥ ३३ ॥

रा० टी०–सीताया इति । सीतायाः आनृशंस्येन स्वाभाविकातिशयकृपया पावको मां न दहति ॥ ३३ ॥

गो० टी०–सीताया इति । आनृशंस्येन दयया ॥ ३८ ॥

३४]ति०टी०–चिन्तयामास अनन्तरकर्तव्यमिति शेषः३४

रा० टी०–भूय इति । मुहूर्तं भूयः संचिन्तयामास । अर्धं पृथक् । चिन्ताकारमाह–कथमिति । अस्मद्विधस्य रामकृपापात्रस्येत्यर्थः, राक्षसाधमैर्बन्धनं कथं न संभवतीत्यर्थः, अतः मह्यं मम पराक्रमे सति अस्य बन्धनस्य प्रतिक्रिया मत्सदृशाचरणं युक्ता स्यात् ॥ ३४ ॥

गो० टी०–भूय इति । स चिन्तयामास अनन्तरकर्तव्यमिति शेषः ॥ ३९ ॥

३५] ति० टी०–प्रतिक्रिया लङ्कादहनरूपा । मह्यं मम ॥ ३५ ॥

रा० टी०–तत इति । ततश्चिन्तानन्तरं महाकपिः पाशान् बन्धनानि छित्त्वा अथ समङ्गलमुत्पपात ननाद च । क्रियाभेदान्न पौनरुक्त्यम् ॥ ३५ ॥

३६] ति० टी०–उत्पपात पुच्छाग्निना बन्धनेन च सहैवेति शेषः ॥ ३६ ॥

रा० टी०–पुरेति । ततोऽनन्तरं विभक्ता निवृत्ता रक्षःसंबाधा राक्षससंमर्दो यस्मिन् तत् पुरद्वारम् आससाद ॥३६॥

गो० टी०–चिन्तितमेवाह—उत्पपातेति । पुरद्वारमिति विभक्तरक्षस्संबाधं निवृत्तरक्षस्संचारम् ॥ ४० ॥

३७] ति०टी०–विभक्तरक्षःसंबाधं रक्षःसंमर्दरहितम्॥३७॥

रा० टी०–सिंहावलोकनन्यायेन बन्धनच्छेदप्रकारं वर्णयन्नाह–स इति । शैलसंकाशो भूत्वा वियमानो यो हनुमान् सः ह्रस्वतां प्राप्तः सन् बन्धनानि अवशातयत् न्यवर्तयत् ॥ ३७ ॥

३८–३९] ति० टी०–शैलसंकाशो महान्भूत्वा ह्रस्वतां प्राप्त इत्यनेन देहसौक्ष्म्यात्स्वयमेव बन्धगलनमुक्तम् एवंरीत्या बन्धनान्यवशातयद्दूरीकृतवान् विमुक्त्यनन्तरं पुनः पर्वताकारोऽभवत् ॥ ३८ ॥ ३९ ॥

रा० टी०–विमुक्त इति । इति विमुक्तः बन्धनान्निर्गतो हनुमान् पुनः पर्वतसंनिभोऽभवत् वीक्ष्यमाणः सन् परिघं ददृशे च ॥ ३८ ॥

रा० टी०–स इति । स हनुमान् कालायसपरिष्कृतं

१ एतदादिः सार्धः श्लोकः गो. नास्ति ।

स तान्निहत्वा रणचण्डविक्रमः समीक्षमाणः पुनरेव लङ्काम् ।
प्रदीप्तलाङ्गूलकृतार्चिमाली प्रकाशितादित्य इवार्चिमाली ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ।

लङ्कादहनस्य कार्यशेषत्वं निर्धारयन्हनुमान्निर्गत्य विभीषणभवनवर्ज्यमखिललङ्कां ददाह । लङ्कादहनदर्शनेन विस्मिता देवगन्धर्वादयः परं हर्षमाजग्मुः ।

वीक्षमाणस्ततो लङ्कां कपिः कृतमनोरथः । वर्धमानसमुत्साहः कार्यशेषमचिन्तयत् ॥ १ ॥
किं नु खल्ववशिष्टं मे कर्तव्यमिह साम्प्रतम् । यदेषां रक्षसां भूयः संतापजननं भवेत् ॥ २ ॥
वनं तावत्प्रमथितं प्रकृष्टा राक्षसा हताः । बलैकदेशः क्षपितः शेषं दुर्गविनाशनम् ॥ ३ ॥
दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमम् । अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः ॥ ४ ॥
यो ह्ययं मम लाङ्गूले दीप्यते हव्यवाहनः । अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥ ५ ॥

कालायसोपादानकं तं परिघं गृह्य गृहीत्वा रक्षिणो द्वारपालकान् सूदयामास जघान ॥ ३९ ॥

गो० टी०–स इति । अवशातयत् अवाशातयत् । अच्यावयदित्यर्थः ॥ ४१–४३ ॥

४०] ति० टी०–अर्चिमालीत्यत्र नीरेफतार्षी ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रा० टी०–स इति । स हनुमान् तान् राक्षसान् निहत्वा निहत्य प्रदीप्तलाङ्गूलेन कृता या अर्चिमाला अर्चिषां समूहः तद्वान् स हनुमान् अर्चिमाली आदित्य इव प्रकाशत प्राकाशत अत एव निर्देशादर्चिशब्दोऽपि कल्प्यते ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रिपञ्चाशत्तमः सर्गः ॥ ५३ ॥

गो० टी०–स तानिति । निहत्वा निहत्य ल्यबभाव आर्षः । लाङ्गूलकृतार्चिमाली लाङ्गूले कृतज्वालामालः । अर्चिमाली तेजःपुञ्जवानादित्य इव प्रकाशत प्राकाशत । अनित्यत्वादडभावः अर्चीतीकारान्तत्वमार्षम् ॥ ४४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१] ति० टी०–वीक्षमाण इति ॥ १ ॥

रा० टी०–हनुमत्कर्तृकलङ्काभस्मीकरणं वर्णयितुमाह—**वीक्षमाण इत्यादिभिः** । वर्धमानः समुत्साहो यस्य स हनुमान् कार्यशेषम् अवशिष्टकृत्यम् अचिन्तयत् ॥ १ ॥

गो० टी०–वीक्षमाण इत्यादि । कृतमनोरथः पर्याप्तमनोरथः ॥ १ ॥ २ ॥

२] ति० टी०–यदेषां भूयः संतापजननं भवेत्तादृशमवशिष्टं साम्प्रतं कर्तव्यं किमिति कार्यशेषमचिन्तयदित्यर्थः ॥ २ ॥

रा० टी०–चिन्ताकारमाह–**किमित्यादिभिः** । यत्कर्म रक्षसां भूयः संतापजननं भवेत् तदवशिष्टं किमपि कर्म कर्तव्यम् ॥ २ ॥

३] ति० टी०–तदेव निश्चिनोति—शेषं दुर्गविनाशनमिति ॥ ३

रा० टी०–अवशिष्टमेव प्रकटयन्नाह–**वनमिति** । प्रकृष्टाः बलवन्तः राक्षसाः हताः बलैकदेशः सेनायाः कश्चिदंशः क्षपितो विनाशितश्च अतः दुर्गविनाशनमेव शेषं पश्यामीति शेषः ॥ ३ ॥

गो० टी०–वनमिति । बलैकदेशः सेनैकदेशः क्षपितः नाशितः दुर्गविनाशनं पुरविनाशनम् शेषम् अवशिष्टम् ॥ ३ ॥

४] ति० टी०–कर्म समुद्रलङ्घनादि । सुखपरिश्रमं सफलप्रयासम् तपश्चर्यादिवदित्यर्थः । उक्तमेव विवृणोति—**अल्पेति** । अस्मिन्सीतान्वेषणप्रवृत्तिरूपे कार्ये यो मया कृतः श्रमः स त्वल्पेन यत्नेन स्वल्पयत्नेन साध्येन करिष्यमाणलङ्कादाहेन सफलो भविष्यति ॥ ४ ॥

रा० टी०–विनाशनफलमाह–**दुर्ग इति** । दुर्गे विनाशिते सति कर्म मम क्रिया सुखं सुखरूपः परिश्रमो यस्मिन् तत् भवेत् अतः अल्पयत्नेन साध्ये अस्मिन् दुर्गविनाशनरूपे कार्ये निष्पन्ने सतीति शेषः, मम श्रमः सफलः स्यात् ॥ ४ ॥

गो० टी०–दुर्ग इति । कर्म पूर्वोक्तं वनभङ्गादिकम् समुद्रलङ्घनं दृत्यं वा सुखपरिश्रमं सफलायासम् शक्यमेतदित्याह—**अल्पयत्नेनेति** । अस्मिन्कार्ये कृते सतीति शेषः ॥ ४ ॥

५] ति० टी०–तदेवाह—**यो हीति** । न्याय्यम् स्वस्य पीडाया अकरणादिति भावः ॥ ५ ॥

रा० टी०–सफलत्वे हेतुमाह–**य इति** । मम लाङ्गूले दीप्यते प्रकाशते यो हव्यवाहनो वह्निः अस्य संतर्पणमेभिर्गृहोत्तमैः कर्तुं न्याय्यम् ॥ ५ ॥

ततः प्रदीप्तलाङ्गूलः सविद्युदिव तोयदः । भवनाग्रेषु लङ्कायाः विचचार महाकपिः ॥ ६ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च वानरः । वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ ७ ॥
अवप्लुत्य महावेगः प्रहस्तस्य [1]निवेशनम् । अग्निं तत्र [2]विनिक्षिप्य श्वसनेन समो बली ॥ ८ ॥
ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् । मुमोच हनुमानग्निं कालानलशिखोपमम् ॥ ९ ॥
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः । शुकस्य च महातेजाः सारणस्य च धीमतः ॥ १० ॥
तथा चेन्द्रजितो वेश्म ददाह हरियूथपः । जम्बुमालेः सुमालेश्च ददाह भवनं ततः ॥ ११ ॥
रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च । ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ १२ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः । विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥ १३ ॥
करालस्य [3]विशालस्य शोणिताक्षस्य चैव हि । कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि ॥ १४ ॥
[4]नरान्तकस्य कुम्भस्य निकुम्भस्य [5]महात्मनः । यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च ॥ १५ ॥
वर्जयित्वा महातेजा विभीषणगृहं प्रति । क्रममाणः क्रमेणैव ददाह हरिपुंगवः ॥ १६ ॥
तेषु तेषु महार्हेषु भवनेषु महायशाः । गृहेष्वृद्धिमतामृद्धिं ददाह [6]कपिकुञ्जरः ॥ १७ ॥
सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् । आससादाथ लक्ष्मीवान्रावणस्य [7]निवेशनम् ॥ १८ ॥
ततस्तस्मिन्गृहे मुख्ये नानारत्नविभूषिते । मेरुमन्दरसंकाशे [8]नानामङ्गलशोभिते ॥ १९ ॥
प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम् । ननाद हनुमान्वीरो युगान्तजलदो यथा ॥ २० ॥

गो० टी०-केनोपायेनेदं सुकरमित्याशङ्क्य तमाह-यो हीति । यः अग्निः अतिशीतलतया मम महोपकारं कृतवान् अस्य संतर्पणं न्याय्यमित्यर्थः ॥ ५ ॥

६] ति० टी०-तोयदः संध्यातोयदः हनुमतो रक्तवर्णत्वात् ॥ ६ ॥

रा० टी०-तत इति । सविद्युत्तोयदो मेघ इव लङ्कायाः भवनाग्रेषु विचचार ॥ ६ ॥

गो० टी०-तत इत्यादि । अत्र बन्धविसंसनाय पूर्वं तनुसंकोचे कृतेऽपि कार्यार्थमग्निवर्तिः स्थापितेति बोध्यम् । सविद्युदिव तोयद इति सर्वत आवृत्य सञ्चारे दृष्टान्तः ॥६-९॥

७] ति० टी०-उद्यानानि गृहारामाः ॥ ७ ॥

रा० टी०-गृहादिति । राक्षसानां गृहात् उन्नतभवनात् गृहम् उद्यानानि गृहारामांश्च वीक्षमाणो हनुमान् प्रासादान् चचार ॥ ७ ॥

८-१३] ति० टी०-प्रहस्तस्य प्रधानमन्त्रित्वादादौ तद्गृहेऽग्निप्रक्षेपः प्रथमं तत्संभावनस्यौचित्यात् ॥ ८-१३ ॥

रा० टी०-तत्प्रकारमाह-अवप्लुत्येत्यादिभिः । महावेगो हनुमान् प्रहस्तस्य मुख्यमन्त्रिणः निवेशने भवने अवप्लुत्य महापार्श्वस्य वेश्म पुप्लुवे तत्राग्निं मुमोच च । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

रा० टी०-वज्रेति ॥ १० ॥

गो० टी०-वज्रदंष्ट्रस्येत्यादि सार्धश्लोकः ॥ १० ॥

रा० टी०-तथेति ॥ ११ ॥

गो० टी०-जम्बुमालेरित्यर्धम् ॥ ११ ॥

रा० टी०-रश्मीति ॥ १२ ॥

रा० टी०-युद्धोन्मत्तस्येति ॥ १३ ॥

गो० टी०-रश्मिकेतोरित्यादिपञ्चश्लोकी ॥ १२-१५ ॥

१४-१५] ति० टी०-भवनं ददाहेत्यनुकर्षः ॥ १४ ॥ १५ ॥

रा० टी०-करालस्येति ॥ १४ ॥

रा० टी०-नरान्तकस्येति ॥ १५ ॥

१६] ति० टी०-विभीषणेन स्वस्य वधतो रक्षणाद्विभीषणगृहं वर्जयित्वा प्रतिगृहं क्रमाणः इत्यन्वयः ॥ १६ ॥

रा० टी०-वर्जयित्वेति । हरिपुङ्गवो हनुमान् विभीषणगृहं प्रति वर्जयित्वा क्रमेण मुख्याद्यानुपूर्व्या क्रममाणः सन् ददाह ॥ १६ ॥

गो० टी०-वर्जयित्वेति । प्रतिवर्जयित्वेति संबन्धः ॥१६॥

१७-२०] ति० टी०-पूर्वं रावणाद्भीतोऽप्यग्निः सीतातेजःसंबन्धेन निःशङ्कं ददाहेत्युक्तं प्राक् ॥ १७-२० ॥

रा० टी०-तेष्विति । तेषु तेषु भवनेषु ऋद्धिमतां राक्षसानाम् ऋद्धिं ददाह ॥ १७ ॥

गो० टी०-तेषु तेष्विति । भवनेष्विति गृहविशेषणं समृद्धिमत्परम् । ऋद्धिं मणिमुक्ताप्रवालादिकाम् ॥ १७ ॥१८॥

रा० टी०-सर्वेषामिति । सर्वेषां भवनानि समतिक्रम्य रावणस्य निवेशनमाससाद ॥ १८ ॥

रा० टी०-तत इति । तस्मिन् रावणीये मुख्ये गृहे

---

१ निवेशने इति रा. पाठः । २ स निक्षिप्येति गो. पाठः । ३ पिशाचस्येति गो. पाठः । ४ श्लोकार्धयोर्व्यत्यासः गो. पाठे । ५ दुरात्मन इति गो. पाठः । ६ स महाकपिरिति गो. पाठः । ७ सर्वेति गो. पाठः ।

श्वसनेन च संयोगादतिवेगो महाबलः । कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥ २१ ॥
प्रदीप्तमग्निं पवनस्तेषु वेश्मसु चारयन् । [अभूच्छ्वसनसंयोगादतिवेगो हुताशनः ।]
तानि काञ्चनजालानि मुक्तामणिमयानि च ॥ २२ ॥
भवनानि व्यशीर्यन्त रत्नवन्ति महान्ति च । तानि भग्नविमानानि निपेतुर्वसुधातले ॥ २३ ॥
भवनानीव सिद्धानामम्बरात्पुण्यसंक्षये । संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम् ॥ २४ ॥
स्वे स्वे गृहपरित्राणे भग्नोत्साहोज्झितश्रियाम् । नूनमेषोऽग्निरायातः कपिरूपेण हा इति ॥ २५ ॥
क्रन्दन्त्यः सहसा पेतुः स्तनन्धयधराः स्त्रियः । काश्चिदग्निपरीताङ्ग्यो हर्म्येभ्यो मुक्तमूर्धजाः ॥ २६ ॥
पतन्त्यो रेजिरेऽभ्रेभ्यः सौदामन्य इवाम्बरात् । वज्रविद्रुमवैदूर्यमुक्तारजतसंहतान् ॥ २७ ॥
विचित्रान्भवनाद्धातून्स्यन्दमानान्ददर्श सः । नाग्निस्तृप्यति काष्ठानां तृणानां च यथा तथा ॥ २८ ॥

लाङ्गूलाग्रे प्रतिष्ठितं प्रदीप्तमग्निमुत्सृज्य युगान्तजलद इव ननाद। श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–तत इत्यादि । सर्वमङ्गलशोभितं सर्वमङ्गलद्रव्ययुक्तं ॥ १९ ॥ २० ॥

२१] **ति० टी०–**श्वसनेन संयोगात्सीताश्वासमिश्रितवायुसंयोगात्। अत एव वायोरपि निर्भयता ॥ २१ ॥

रा० टी०–श्वसनेनेति । श्वसनेन महावायुना संयोगाद्धेतोः महाबलो हुताशनः कालाग्निरिव जज्वाल पवनस्तु प्रदीप्तमग्निं वेश्मसु चारयन् संक्षिपन् सन् प्रावर्धत । सार्धश्लोक एकान्वयी ॥ २१ ॥

गो० टी०–श्वसनेनेति । पूर्वं रावणादिभीतावग्न्यनिलौ इदानीं राक्षसक्षयं देववलोदयं च प्रत्यासन्नं विदित्वा निश्शङ्कावभूतामिति भावः ॥ २१–२४ ॥

२२] **ति० टी०–**चारयन्निति हेतौ शता । यतश्चारयति स्म ततश्चारणाद्धेतोस्तानि व्यशीर्यन्तेत्यन्वयः ॥ २२ ॥

रा० टी०–तानीति । काञ्चनजालानि महान्ति भवनानि च व्यशीर्यन्त । काञ्चनजालानीति बहुव्रीहिणा भवनविशेषणं वा । अर्धद्वयमेकान्वयि ॥ २२ ॥

२३–२४] **ति० टी०–**भग्नविमानानि भग्नप्रासादानि ॥ २३ ॥ २४ ॥

२५] **ति० टी०–**भग्नोत्साहश्च ते उज्झितश्रियश्चेत्यर्थः । हा इति तुमुलः शब्दः संजज्ञे इत्यन्वयः ॥ २५ ॥

रा० टी०–तानीति । भग्नानि विमानानि येषां तानि भवनानि पुण्यसंक्षये सिद्धानां भवनानीव वसुधातले निपेतुः ॥२३॥

रा० टी०–संजज्ञ इति । भग्नः उत्सवो येषाम् उज्झिता श्रीर्येषां ते एव ते इति कर्मधारयः स्वे स्वे गृहपरित्राणे प्रधावतां राक्षसानां कपिरूपेण एषोऽग्निरेवायातः हा अतिकष्टम् इति तुमुलः शब्दः संजज्ञे प्रादुर्बभूव । सार्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०–संजज्ञ इत्यादि । 'स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियाम्' इति पाठः । स्वगृहस्य परित्राणे भग्नोत्साहोऽर्जितश्रियामिति पाठे उत्साहश्च ऊर्जितश्रीश्च उत्साहोर्जितश्रियौ भग्ने उत्साहोर्जितश्रियौ येषामिति विग्रहः । स्वगृहस्य परित्राणे भग्नोत्साहानां श्रीमतां राक्षसानामिति वार्थः । हा इति "निपात एकजनाङ्" इति प्रकृतिभावः ॥ २५ ॥

२६] **ति० टी०–**पेतुः अग्राविति शेषः ॥ २६ ॥

रा० टी०–क्रन्दन्त्य इति । अग्निपरीताङ्ग्यः स्तनन्धयधराः गृहीतशिशवः काश्चित् स्त्रियः क्रन्दन्त्यः सत्यः हर्म्येभ्यः पेतुः अभ्रेभ्यः पतन्त्यः सौदामिन्य इव अम्बरात् आकाशवर्तिप्रासादात् पतन्त्यो रेजिरे । सार्धश्लोक एकान्वयी ॥ २६ ॥

गो० टी०–क्रन्दन्त्य इति । काश्चित् स्त्रियः हर्म्येभ्यः पेतुरिति संबन्धः । सुकेशवंश्यानां जननमात्रे रुद्रेण मातृतुल्यत्ववरप्रदानेऽपि तदितरेषु तदभावात् स्तनन्धयधरत्वम् । अन्यजातीयाश्च राक्षसास्तत्र सन्त्येव ॥ २६ ॥

२७] **ति० टी०–**अभ्रेभ्यो मेघेभ्यः ॥ २७ ॥

रा० टी०–वज्रेति । वज्रादिसंहतान् वज्रादिसहितान् भवनात् स्यन्दमानान् विचित्रान् धातून् स्वर्णादीन् स हनुमान् ददर्श ॥ २७ ॥

गो० टी०–पतन्त्य इति । अम्बरात् पतन्त्यः अभ्रेभ्यो मेघेभ्यः पतन्त्यः सौदामिन्यः तडित इव रेजिरे ॥ २७ ॥

गो० टी०–वज्रेति । भवनानीति पुँल्लिङ्गत्वमार्षम् । धातून् सुवर्णादीन् । 'धातुस्तु गैरिकं स्वर्णं' इति दर्पः । स्यन्दमानान् स्यन्दतः । अग्नितप्तत्वेन द्रवीभूतस्वर्णादीनित्यर्थः ॥ २८ ॥

२८] **ति० टी०–**अग्निसंबन्धाद्भवनाद्धेमरजतादिधातून्स्यन्दमानान्ददर्श । यथा काष्ठतृणादिदाहादग्निर्न तृप्यति तथा राक्षसवधे क्रियमाणे हनुमान्किंचिदीषदपि न तृप्यति ॥ २८ ॥

रा० टी०–नेति । यथा काष्ठादीनां दाह इति शेषः अग्निः किंचित्र तृप्यति तथा राक्षसेन्द्राणां वधे हनुमान् न तृप्यति सकलराक्षसवधमिच्छतीत्यर्थः तेन सीतादुःखदर्शनासहिष्णुत्वं व्यञ्जितम् हनुमान् विशस्तानां हिंसितानां राक्षसानां धारणे

१ अचारयदिति गो. पाठः । २ श्लोकार्धमेतदधिकं गो. पाठे । ३ अवेति गो. पाठः । ४ स्वगृहस्येति गो. पाठः । ५ ऊर्जितेति गो. पाठः ६ परीतेभ्य इति गो. पाठः । ७ सौदामिन्य इति गो. पाठः । ८ संहितानिति गो. पाठः । ९ भवनानिति गो. पाठः ।

हनूमान्राक्षसेन्द्राणां वधे किंचिन्न तृप्यति । न हनूमद्विशस्तानां राक्षसानां वसुंधरा ॥ २९ ॥
हनूमता वेगवता वानरेण महात्मना । लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ ३० ॥

ततः स लङ्कापुरपर्वताग्रे समुत्थितो भीमपराक्रमोऽग्निः ।
प्रसार्य चूडावलयं प्रदीप्तो हनूमता वेगवतोपसृष्टः ॥ ३१ ॥
युगान्तकालानलतुल्यरूपः समारुतोऽग्निर्ववृधे दिवस्पृक् ।
विधूमरश्मिर्भवनेषु सक्तो रक्षःशरीराज्यसमर्पितार्चिः ॥ ३२ ॥
आदित्यकोटीसदृशः सुतेजा लङ्कां समस्तां परिवार्य तिष्ठन् ।
शब्दैरनेकैरशनिप्ररूढैर्भिन्दन्निवाण्डं प्रबभौ महाग्निः ॥ ३३ ॥
तत्राम्बरादग्निरतिप्रवृद्धो रूक्षप्रभः किंशुकपुष्पचूडः ।
निर्वाणधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेऽभ्राः ॥ ३४ ॥

इति शेषः वसुन्धरा च न तृप्यति निहतसर्वराक्षसवधरणमाकाङ्क्षतीत्यर्थः, तेन पतिवियोगजनितस्वसुतादुःखहेतुकदुःखाक्रान्तत्वं तस्याः सूचितम् । सार्धश्लोक एकान्वयी ॥२८॥२९॥

गो० टी०–नाग्निरिति । काष्ठानां तृणानां चेति संबन्धसामान्ये षष्ठी काष्ठैस्तृणैश्चेत्यर्थः "पूरणगुण–" इत्यादिना षष्ठी वा । अग्निः काष्ठैस्तृणैश्च न तृप्यति हविर्यथपः अग्नेः न तृप्यति अग्निना न तृप्यति अग्निप्रक्षेपणेन न तृप्यतीत्यर्थः । एवं वसुन्धरा विशस्तानां राक्षसानां विशस्तैः राक्षसैः न तृप्यतीति योज्यम् । अनेन राक्षसशवाकीर्णा भूरभूदित्यर्थः ॥ २९ ॥

२९–३०] ति० टी०–वसुंधरा नेति मृतराक्षसानां शयनाय लङ्काभूमिर्न पर्याप्ताऽभूदिति शेषः ॥ २९ ॥ ३० ॥

रा० टी०–हनूमतेति । रुद्रेण त्रिपुरमिव हनूमता लङ्कापुरं प्रदग्धम् ॥ ३० ॥

गो० टी०–क्वचिदिति । शिखाः ज्वालाः ॥ ३० ॥

गो०टी०–हनूमतेति । ननु एतावत्पर्यन्तमल्पबलतयाऽपि तस्य हनुमतः कथमेतादृशी शक्तिरित्यत्राह—रुद्रेण त्रिपुरं यथेति । ' विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरे ॥ ' इत्युक्तरीत्या विष्णवाप्यायिततेजसा रुद्रेण त्रिपुरं यथा दग्धं तथाऽनेनेति भावः ॥३१॥

३१] ति० टी०–लङ्कापुरपर्वताग्रे लङ्कापुराधारभूतत्रिकूटाचलशिखरे । चूडावलयं शिखासमूहम् । प्राप्तोऽभूदिति शेषः ॥ ३१ ॥

रा० टी०–तत इति । लङ्कापुरपर्वताग्रे त्रिकूटाचलशृङ्गे इत्यर्थः, हनूमतोपसृष्टः अत एव समुत्थितोऽग्निः चूडावलयं शिखासमूहं प्रसार्य प्रदीप्तो बभूवेति शेषः ॥ ३१ ॥

गो० टी०–ततस्त्विति । लङ्कापुरपर्वताग्रे लङ्कापुराधारत्रिकूटशिखरे । तद्वर्तित्वात्तस्यास्तथा निर्देशः । पर्वताग्रस्थलङ्कापुर इति परनिपातो वा । चूडावलयं ज्वालाजालमित्यर्थः । तत् प्रसार्य विस्तार्य । प्रदीप्तः विसृष्टः गृहेष्विति शेषः ॥ ३२ ॥

३२] ति० टी०–विधूमरश्मिर्विधूमज्वालः । रक्षःशरीररूपाज्येन समर्पिता संपादितार्चिर्ज्वालाविशेषो यस्य सः॥३२॥

रा० टी०–युगान्तेति । भवनेषु राक्षसगृहेषु सक्तः रक्षःशरीराज्येन समर्पितं प्राप्तमर्चियेन विधूमरश्मिः समारुतः मारुतसहितः युगान्तकालानलतुल्यरूपोऽग्निः दिविस्पृक् सन् ववृधे ॥ ३२ ॥

गो० टी०–युगान्तेति । दिविस्पृक् अभ्रंलिहः " हृषुभ्यां डेरलुग्वक्तव्यः " इति सप्तम्या अलुक् । रक्षःशरीराज्यसमर्पितार्चिः रक्षश्शरीराण्येवाज्यानि तैः समर्पितार्चिः उत्थापितज्वालः ॥ ३३ ॥

३३] ति० टी०–तिष्ठन् अभूदिति शेषः । अशनिप्ररूढैरशनिवत्प्रगल्भैः । महाग्निः प्रलयाग्निः ॥ ३३ ॥

रा० टी०–आदित्येति । अशनिप्ररूढैः अशनिशब्दवत्प्रकटितैरनेकैः शब्दैः अण्डं ब्रह्माण्डं भिन्दन् महाग्निः प्रलयवह्निरिव आदित्यकोटीसदृशः सुतेजा वह्निः लङ्कां परिवार्य तिष्ठन् प्रबभौ ॥ ३३ ॥

गो० टी०–आदित्यकोटीति । समाप्तां निःशेषाम् । अशनिप्ररूढैः अशनिवन्निष्ठुरैः । अण्डं ब्रह्माण्डम् ॥ ३४ ॥

३४] ति० टी०–आम्बरादम्बरपर्यन्तम् । रूक्षप्रभः क्रूरकान्तिः । किंशुकपुष्पवच्चूडा शिखा यस्य सः । निर्वाणानामधो विच्छिन्नानां खे एव वर्तमानानां धूमानामाकुला राजयो नीलोत्पलाभा अभ्राकाराः सत्यः प्रचकाशिरे ॥ ३४ ॥

रा० टी०–तत्रेति । तत्र तस्मिन् समये अम्बरात् अम्बरं प्राप्य रूक्षा राक्षसविघातकर्तृत्वेन क्रूरा प्रभा यस्य सः किंशुकपुष्पस्येव चूडा यस्य सोऽग्निः अतिप्रवृद्धो बभूवेति शेषः, नी-

१ क्वचित्किंशुकसंकाशाः क्वचिच्छाल्मलिसन्निभाः । क्वचित्कुङ्कुमसंकाशाः शिखा वह्नेश्चकाशिरे ॥ इति गो. पाठः । २ विसृष्ट इति गो. पाठः । ३ वेग इति गो. पाठः । ४ दिविस्पृगिति गो. रा. पाठः ।

वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणोऽनिलो वा ।
[1]रौद्रोऽग्निरर्को धनदश्च सोमो न वानरोऽयं स्वयमेव कालः ॥ ३५ ॥
किं ब्राह्मणः सर्वपितामहस्य [2]लोकस्य धातुश्चतुराननस्य ।
इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः ॥ ३६ ॥
किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः ।
अचिन्त्यमव्यक्तमनन्तमेकं स्वमायया सांप्रतमागतं वा ॥ ३७ ॥
इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे ।
सप्राणिसङ्घां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य ॥ ३८ ॥
ततस्तु लङ्का सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा ।
सपक्षिसङ्घा समृगा सवृक्षा रुरोद दीना तुमुलं सशब्दम् ॥ ३९ ॥
हा तात हा पुत्रक कान्त मित्र हा [3]जीवितेशाङ्ग हतं सुपुण्यम् ।
रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सु[4]भीतः ॥ ४० ॥
हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा ।
हनूमतः क्रोधबलाभिभूता बभूव शापोपहतेव लङ्का ॥ ४१ ॥

लोत्पलाभाः निर्वाणानां सर्वत्र प्रसृतानां धूमानाम् आकुलराजयः निबिडपङ्क्तयः अभ्रा इव प्रचकाशिरे ॥ ३४ ॥

गो० टी०–तत्रेति । अम्बरात् अम्बरपर्यन्तम् । किंशुकपुष्पचूडः तत्तुल्यशिखः । निर्वाणधूमाकुलराजयः पूर्वपूर्वदग्धभवनाग्निनिर्वाणसमयोत्थितधूमैः व्याप्तपङ्क्तयः । अत एव नीलोत्पलाभाः निर्वाणधूमानां नीलवर्णत्वादिति भावः । अभ्राः मेघाः । पुँल्लिङ्गत्वमार्षम् ॥ ३५ ॥

३५-३७] ति० टी०–वज्रित्वत्रिदशेश्वरत्वविशिष्टो महेन्द्र इत्यर्थः । रौद्रोऽग्नी रुद्रतृतीयनयनसंबन्ध्यग्निः ॥ ३५–३७ ॥

रा० टी०–वज्रीति । अयं वानरः स्वयं काल एव वज्र्याद्यन्यतमो न ॥ ३५ ॥

गो० टी०–अथ रक्षोवचनम्—**वज्रीत्यादि** । महेन्द्रः वज्रीत्यादि विशेषणं सामर्थ्यविशेषद्योतनार्थम् । उत्तरत्राप्येवमेव गतिः । यमकालयोर्मूर्तिभेदान्न पुनरुक्तिः । रक्षोपसंहारकर इत्यत्र आर्षः सलोपः । प्रकोपः प्रकोपकृतमूर्तिविशेषः ॥३६॥३७॥

रा० टी०–संभावनान्तरमाह–**किमिति** । सर्वपितामहत्वादिविशिष्टस्य ब्रह्मणः रक्षोपसंहारकरः प्रकोपः वानररूपधारी सन् इहागतः किम् ॥ ३६ ॥

रा० टी०–किमिति । स्वमायया रक्षोविनाशाय कपिरूपम् एत्य अचिन्त्यं चिन्तयितुमशक्यम् अत एव अव्यक्तम् अनन्तं देशकालवस्तुपरिच्छेदशून्यम् अत एव एकं प्रधानं वैष्णवं महाविष्णुसंबन्धि सुतेजो वा किम् ॥ ३७ ॥

गो० टी०–**किं वैष्णवमिति** । अत्राद्यो वाशब्दोऽवधारणे । 'वा स्याद्धिकल्पोपमयोरेवार्थे च समुच्चये' इति विश्वः । द्वितीयो वितर्के । अनन्तं त्रिविधपरिच्छेदरहितम् अव्यक्तं चक्षुराद्यगोचरम् । अचिन्त्यं केवलमनसोऽप्यविषयम् एकम् अद्वितीयं यद्वैष्णवं सुतेजः पूज्यं धाम तदेव स्वमायया स्वासाधारणयाऽऽश्चर्यशक्त्या कपिरूपमेत्य सांप्रतमागतं वा इति योजना । वैष्णवमिति स्वार्थे अण् । विष्णुशरीरान्तर्वर्तीति वार्थः । विशिष्टाः ज्ञानाधिकाः ॥ ३८–४० ॥

३८–३९] ति० टी०–विशिष्टा महाबलाः प्रहस्तादय इत्यर्थः । समीक्ष्य इत्येवमूचुरित्यन्वयः ॥ ३८ ॥ ३९ ॥

रा० टी०–इतीति । पुरीं लङ्कां दग्धां समीक्ष्य विशिष्टाः प्रधानाः बहवो रक्षोगणाः तत्र रावणसमीपे समेत्य इत्येवंपूर्वसंभावनामूचुः ॥ ३८ ॥

रा० टी०–तत इति । ततस्तस्मिन् समये प्रदग्धा लङ्का तदभिमानिदेवता सशब्दमधिकशब्दवत् यथा भवति तथा रुरोद ॥ ३९ ॥

४०] ति० टी०–सुपुण्यमतिशयितमर्जितं पुण्यम् ॥४०॥

रा० टी०–हेति । हा तातेत्यादि बहुधा ब्रुवद्भिः रक्षोभिः घोरतरः शब्दः कृतः ॥ ४० ॥

गो० टी०–**हा तातेति** । युगपदेव शोके दूराह्वाने च हाशब्दो वर्तते । हा जीवितमित्यत्र संबुद्ध्यलोप आर्षः । हतमिति शेष इत्यन्ये । "अभितःस्परितःसमयानिकषाहाप्रतियोगे वा" इति द्वितीया वा । दरिद्रैरशोच्यत्वाद्विशिनष्टि–भोगयुतं सुपुण्यमिति । सुखाढ्यं सुकृतैकफलं चेत्यर्थः । घोरतरः तीव्रतरः । अत एव सुभीमः भयङ्करः ॥ ४१ ॥

४१] ति० टी०–परिवृत्तयोधा पर्यस्तयोधा ॥ ४१ ॥

१ रुद्र इति गो. पाठः । २ सर्वस्येति गो. पाठः । ३ जीवितं भोगयुतमिति गो. भोगहृतमिति रा. पाठः । ४ भीम इति गो. पाठः ।

ससंभ्रमं त्रस्तविषण्णराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् ।
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुरोषोपहतामिवावनिम् ॥ ४२ ॥
भङ्क्त्वा वनं पादपरत्नसंकुलं हत्वा तु रक्षांसि महान्ति संयुगे ।
दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान्पवनात्मजः कपिः ॥ ४३ ॥
[[3]त्रिकूटशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ।
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवांशुमाली ॥]
स राक्षसांस्तान्सुबहूंश्च हत्वा वनं च भङ्क्त्वा बहुपादपं तत् ।
विसृज्य रक्षोभवनेषु चाग्निं जगाम रामं मनसा महात्मा ॥ ४४ ॥
ततस्तु तं वानरवीरमुख्यं महाबलं मारुततुल्यवेगम् ।
महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवगणाश्च सर्वे ॥ ४५ ॥
[4]देवाश्च सर्वे मुनिपुङ्गवाश्च गन्धर्वविद्याधरपन्नगाश्च ।
भूतानि सर्वाणि महान्ति तत्र जग्मुः परां प्रीतिमतुल्यरूपाम् ॥ ४६ ॥
भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे । दग्ध्वा [5]लङ्कापुरीं [6]भीमां रराज स महाकपिः ॥ ४७ ॥
[7]गृहाढ्यशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ।
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवार्चिमाली ॥ ४८ ॥

रा० टी०-हुताशनेति । हनुमतः क्रोधवलेन अभिभूता तिरस्कृता अत एव हुताशनज्वालसमावृता अत एव हतप्रवीरा अत एव परित्रस्ताः उद्विग्नचित्ताः योधाः भटाः यस्यां सा लङ्का शापोपहतेव बभूव ॥ ४१ ॥

गो०टी०-हुताशनेति । परित्रस्तयोधा परित्रस्तभटा ॥४२॥

४२-४७] ति० टी०-स्वयंभुरोषोपहताम् । स्वदिनान्त इति शेषः ॥ ४२-४७ ॥

रा० टी०-सेति । ससंभ्रमाः उद्वेगसहिताः अत एव त्रस्ताः भीताः अत एव विषण्णाः त्रयाणां कर्मधारयः राक्षसाः यस्यां तां समुज्ज्वलन्त्यः अतिप्रकाशयुक्ताः ज्वालाः यस्य स एव हुताशनः तेनाङ्किताम् अत एव स्वयंभुकोपोपहतां दिनान्ते स्वयंभुवः कोपेन विनष्टाम् अवनिमिव लङ्कां हनुमान् ददर्श अत्र स्वयंभुशब्दः शंभुपरः इति न संहारप्रकरणविरोधः ॥४२॥

गो० टी०-ससंभ्रमेति । 'हनुमान्महामनाः' इति पाठः । हनुमान् महात्मेति पाठे विषमवृत्तं वा । स्वयंभुकोपोपहतां प्रलये भगवता दग्धामित्यर्थः ॥ ४३ ॥

रा० टी०-भङ्क्त्वेति । वनादि भङ्क्त्वा रक्षांसि हत्वा लङ्कां दग्ध्वा हनुमान् तस्थौ ॥ ४३ ॥

गो०टी०-भङ्क्त्वेति । रत्नशब्दः श्रेष्ठवाची । तस्थौ संकल्पितकार्यस्य परिसमाप्तत्वादुपरतोद्योगोऽभूदित्यर्थः ॥४४॥४५॥

रा० टी०-स इति । स हनुमान् रक्षोभवनेषु अग्निं विसृज्य मनसा रामं जगाम ॥ ४४ ॥

गो० टी०-स इति । जगाम रामं मनसेति कृतकृत्यत्वाद्रामं गन्तुमियेषेत्यर्थः ॥ ४६ ॥

रा० टी०-तत इति । ततोऽनन्तरं वानरवीरमुख्यं हनुमन्तं सर्वे देवगणाः प्रतुष्टुवुः ॥ ४५ ॥

गो० टी०-ततस्तु तामिति । वरिष्ठमिति बलवतामिति शेषः ॥ ४७-५० ॥

रा० टी०-देवा इति । देवादयः परां प्रीतिं जग्मुः ॥४६॥

गो० टी०-देवाश्चेति । परामित्यस्य विवरणम्-अतुल्यरूपामिति । अस्मिन् सर्गे एकपञ्चाशच्छ्लोकाः । ततो महात्मेति श्लोकः स राक्षसानिति श्लोकोक्तार्थकतया बहुकोशेष्वदर्शनाच्च प्रक्षिप्तः बहुकोशेष्वेतत्सर्गसमाप्तिविपर्ययः उत्तरसर्गारम्भविपर्ययश्च दृश्यते ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥५४ ॥

रा० टी०-भङ्क्त्वेति । रराज शुशुभे ॥ ४७ ॥

४८] ति० टी०-गृहाढ्यानां गृहश्रेष्ठानां शृङ्गाग्रतले प्रासादाग्रभूमौ प्रदीप्तलाङ्गूलेन कृतार्चिर्माला यस्यास्ति सः ॥४८॥

रा० टी०-गृहेति । विचित्रे गृहाढ्यानां गृहश्रेष्ठानां शृङ्गाग्रतले परप्रासादभूमौ प्रतिष्ठितः अर्चिमाली आदित्य इव प्रदीप्तलाङ्गूलकृतार्चिमाली वानरराजसिंहः व्यराजत । अत एव निर्देशादर्चिशब्दोऽप्यस्तीति प्रतीयते ॥ ४८ ॥

१ ससंभ्रमत्रस्तेति गो. पाठः । २ कोपेति गो. पाठः । ३ श्लोकोऽयमधिकः गो. पाठे । ४ श्लोकोऽयं सर्गान्ते गो. पाठे । ५ नागयक्षा इति गो. पाठः । ६ लङ्कां पुरीमिति रा. पाठः । ७ रम्यामिति गो. पाठः । ८ श्लोकोऽयं गो. नास्ति ।

लङ्कां समस्तां [2]संपीड्य लाङ्गूलाग्निं [3]महाकपिः । निर्वापयामास तदा समुद्रे हरि[4]पुंगवः ॥ ४९ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः ॥ ५० ॥
[[5]तं दृष्ट्वा वानरश्रेष्ठं हनुमन्तं महाकपिम् । कालाग्निरिति संचिन्त्य सर्वभूतानि तत्रसुः ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ।

लङ्कां निःशेषतो भस्मीभूतां विलोक्य जानक्या अपि दाहं संभाव्यात्मानं धिक्कृत्य हनुमान् यावच्छोकाविष्टो भवति तावत्सिद्धचारणादिमुखात्तस्या दाहाभावं श्रुत्वा हर्षं प्राप ।

संदीप्यमानां वित्रस्तां त्रस्तरक्षोगणां पुरीम् । अवेक्ष्य हनुमाँल्लङ्कां चिन्तयामास वानरः ॥ १ ॥
तस्याभूत्सुमहांस्त्रासः कुत्सा चात्मन्यजायत । लङ्कां प्रदहता [6]कार्यं किंस्वित्कृतमिदं मया ॥ २ ॥
धन्याः खलु महात्मानो ये बुद्ध्या कोपमुत्थितम् । निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥ ३ ॥
क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि । क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ॥ ४ ॥
वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् । नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ॥ ५ ॥
यः समुत्पतितं क्रोधं क्षमयैव निरस्यति । यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ६ ॥
धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पापकृत्तमम् । अचिन्तयित्वा तां सीतामग्निदं स्वामिघातकम् ॥ ७ ॥

४९-५०] ति० टी०-समुद्रे निर्वापयामास लाङ्गूलप्रक्षेपणेनेति शेषः ॥ ४९ ॥ ५० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

रा० टी०-लङ्कामिति । समस्तां लङ्कां संपीड्य लाङ्गूलाग्निं समुद्रे निर्वापयामास ॥ ४९ ॥

रा० टी०-तत इति । लङ्कां प्रदग्धां दृष्ट्वा देवादयः परमं विस्मयं गताः ॥ ५० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

गो० टी०-लङ्कामित्यादि । लाङ्गूलाग्निं समुद्रे निर्वापयामासेत्यन्वयः ॥ १ ॥ २ ॥

१] ति० टी०-संदीप्यमानामिति ॥ १ ॥

रा० टी०-लाङ्गूलनिर्वापणानन्तरकालिकं हनुमतो वृत्तान्तमाह-संदीप्यमानामित्यादिभिः । संदीप्यमानाम् अत एव विध्वस्ताम् अत एव त्रस्ता रक्षोगणाः यस्यां तां लङ्कामवेक्ष्य तस्य हनुमतः त्रास उद्वेगोऽभूत् अत एव आत्मनि स्वात्मविषये कुत्सा निन्दा अजायत अत एव चिन्तयामास च । सार्धश्लोक एकान्वयी ॥ १ ॥

२] ति० टी०-कुत्सा चात्मन्यजायतेत्युक्तां कुत्सामाह-लङ्कामिति । किंस्वित्कर्म कृतम् कुत्सितमेव कृतमित्यर्थः ॥ २ ॥

रा० टी०-तच्चिन्ताकारमाह-लङ्कामित्यादि । लङ्कां प्रदहता मया इदं सीतादहनं किं मया कृतम् । अयं पृथक् ॥ २ ॥

गो० टी०-तस्येति । कुत्सा निन्दा ॥ ३—८ ॥

३] ति० टी०-उक्तकुत्सितकार्यमूलं कोप इति निश्चित्य तद्रहितान्स्तौति—धन्या इति । दुःखातिशयादेव महात्मपदपौनरुक्त्यं न दोषाय ॥ ३ ॥

रा० टी०-धन्या इति । ये महात्मानः अतिप्रयत्नशीलाः उत्थितं कोपमम्भसाऽग्निमिव बुद्ध्या निरुन्धन्ति ते महात्मानः पुरुषश्रेष्ठाः अत एव धन्याः ॥ ३ ॥

४] ति० टी०-'क्रुद्धः पापं न कुर्याद्यः' इति पाठे क्रुद्धो यः कश्चित्पापं कुर्यान्न तस्मि काकुः अपि तु कुर्यादेव अकरणमशक्यमेवेत्यर्थः । तदेव दर्शयति—क्रुद्धो हन्यादिति ॥ ४ ॥

रा० टी०-क्रोधे दोषानाह-क्रुद्ध इत्यादिभिः । क्रुद्धः गुरूनपि हन्यात् अतः कः क्रुद्धः पापं न कुर्यात्कुर्यादेवेत्यर्थः ॥ ४ ॥

५-७] ति० टी०-न जानातीत्येतदेव स्पष्टयति—नाकार्यमिति । क्रुद्धस्याकार्यमयुक्तबुद्ध्याऽकरणीयं न किंचिदप्यस्ति अतो गुरुहननाद्यपि करोत्येवेत्यर्थः ॥ ५-७ ॥

रा० टी०-वाच्येति । प्रकुपितो जनः वाच्यावाच्यं न विजानाति ॥ ५ ॥

रा० टी०-य इति । उरगो जीर्णां त्वचमिव समुत्पतितं कोपं यो निरस्यति स एव पुरुष उच्यते ॥ ६ ॥

---

१ श्लोकोऽयं पञ्चपञ्चाशसर्गारम्भे गो. पाठे । २ संदीप्येति गो. पाठः । ३ महाबल इति गो. पाठः । ४ सत्तम इति गो. पाठः । ५ श्लोकोऽयमधिकः गो. पाठे । ६ कर्मेति गो. पाठः । ७ ते पुरुषश्रेष्ठा इति गो. पाठः ।

यदि दग्धा त्विय सैवा नूनमार्यापि जानकी । दग्धा तेन मया भर्तुर्हितं कार्यमजानता ॥ ८ ॥
यदर्थमयमारम्भस्तत्कार्यमवसादितम् । मया हि दहता लङ्कां न सीता परिरक्षिता ॥ ९ ॥
ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः । तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥ १० ॥
विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते । लङ्कायाः कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ ११ ॥
यदि तद्विहतं कार्यं मया प्रज्ञाविपर्ययात् । इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते ॥ १२ ॥
किमग्नौ निपताम्यद्य आहोस्विद्वडवामुखे । शरीरमिह सत्त्वानां दद्मि सागरवासिनाम् ॥ १३ ॥
कथं नु जीवता शक्यो मया द्रष्टुं हरीश्वरः । तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १४ ॥
मया खलु तदेवेदं रोषदोषात्प्रदर्शितम् । प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ १५ ॥
धिगस्तु राजसं भावमनीशमनवस्थितम् । ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १६ ॥

रा० टी०–धिगिति । सीतामचिन्तयित्वा विस्मृत्य अन्यत्रानीत्येत्यर्थः, अग्निदम अग्नये ददाति अग्निं ददाति वस्तुमात्रे क्षिपति वा स तम् अत एव स्वामिघातकम अत एव पापकृत्तमं पापिश्रेष्ठं मां धिगस्तु ॥ ७ ॥

८] ति० टी०–धिगस्तु मामित्यनेनोक्तं स्वधिक्कारमाह—यदीति । इयं लङ्का सर्वापि ननं दग्धैव यदि जानक्यप्यत्र्या दग्धा स्यात्तदा तेनाजानता मया भर्तुः कार्यं हतं भवेत् ॥ ८ ॥

रा० टी०–यदीति । यदीयं लङ्का सर्वा दग्धा तर्हि जानक्यपि दग्धा तेन दाहेन मया भर्तुः कार्यं हतम् ॥ ८ ॥

गो० टी०–यदिति । जानक्यपि यदि दग्धेत्यन्वयः ॥ ९ ॥ १० ॥

९] ति० टी०–एतदेव विवृणोति—यदर्थमिति ॥ ९ ॥

रा० टी०–यदर्थमिति । यदि मया सीता न रक्षिता तर्हि यदर्थमयमन्वेषणादेरारम्भः तत्कार्यमवसादितं विनाशितम् ॥ ९ ॥

१०] ति० टी०–एतत्कार्यं लङ्कादाहरूपमीषत्कार्यमिवाप्रयाससाध्यकार्यमिव कृतमनुष्ठितमासीदत्र न संशयः । भर्तुः कार्यं तु मया सर्वथा नाशितमेवेत्याह—तस्येति । क्रोधाभिभूतेन मया सीतामपरिरक्षता कृतस्य सीतादर्शनरूपस्य कार्यस्य मूलक्षयः कृतः ॥ १० ॥

रा० टी०–ईषदिति । इदं लङ्कादाहादिकार्यमीषत्कार्यमिव मया कृतमासीत् तस्य रामकार्यस्य तु मूलक्षयः मूलविघातः मया कृतः ॥ १० ॥

गो० टी०–ईषत्कार्यमिति । इदं कार्यम् अन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत्कार्यम् ईषत्कार्यम् ईषदवशिष्टकार्यम् असमग्रप्रायमेव कृतमासीत् रामनिवेदनमात्रावशेषं कृतमासीदित्यर्थः । किं त्विदानीं क्रोधाभिभूतेन क्रोधान्धेन मया तस्य कार्यस्य मूलक्षयः कृतः न संशयः विफलीकृतमित्यर्थः ॥ ११ ॥

११-१२] ति० टी०–ननु सीताविनाशनिश्चयस्ते कथं तत्राह—विनष्टेति ॥ ११ ॥ १२ ॥

रा० टी०–विनष्टेति । हि यतः अदग्धः लङ्कायाः कश्चिदुद्देशः न प्रदृश्यते अतः सर्वा पुरी भस्मीकृता अतः जानकी विनष्टा ॥ ११ ॥

गो० टी०–सीतानाशे तत्तथैव स एव तु कुत इत्यत्राह—विनष्टेति ॥ १२ ॥

रा० टी०–यदीति । प्रज्ञाविपर्ययात् बुद्धिवैपरीत्यात् तत् रामसंबन्धि कार्यं मया यदि विहितं तदा ममापि प्राणसंन्यासः प्राणत्यागः इहैव रोचते ॥ १२ ॥

गो० टी०–यदीति । विहतं यदि सीतानाशाद्विनष्टं यदि। प्राणसंन्यासः प्राणत्यागः ॥ १३–१५ ॥

१३-१४] ति० टी०–वडवामुखेऽग्नावित्यन्वयः । दद्मि ददामि ॥ १३ ॥ १४ ॥

रा० टी०–किमिति । अग्नौ आहोस्वित् वा वडवामुखे वाडवाग्नौ किं निपतामि आहो वा सागरवासिनां सत्त्वानां सत्त्वेभ्यः शरीरं शकलीकृतदेहं दद्मि ददामि वा ॥ १३ ॥

रा० टी०–कथमिति । कार्यसर्वस्वघातिना मया द्रष्टुं कथं शक्यः ॥ १४ ॥

१५] ति० टी०–तदेवेदं कपित्वमनवस्थितमव्यवस्थितकार्यकारीति त्रिषु लोकेषु प्रसिद्धं दर्शितम् । रोषदोषाद्रक्षोविषयक्रोधदोषात् ॥ १५ ॥

रा० टी०–मयेति । त्रिषु लोकेषु प्रथितं प्रख्यातम् अनवस्थितम् अव्यवस्थितं यत्कपित्वं तदेवेदं रोषदोषात् मया प्रदर्शितम् ॥ १५ ॥

गो० टी०–मयेति । कपित्वं कापेयम् अनवस्थितं चापलात्मकमित्यर्थः ॥ १६ ॥

१६] ति० टी०–राजसं रजोगुणमूलम् भावं चेष्टाविशेषम् अनीशं कार्यासमर्थम् अत एवानवस्थितमव्यवस्थि-

१ लङ्केति गो. पाठः । २ नूनमिति गो. पाठः । ३ आहो इति गो. रा. पाठः ।

विनष्टायां तु सीतायां तावुभौ विनशिष्यतः । तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥ १७ ॥
एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः । धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥ १८ ॥
इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयः । भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः ॥ १९ ॥
तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः । रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥ २० ॥
इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे । पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ २१ ॥
अथ वा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा । न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ २२ ॥
नहि धर्मात्मनस्तस्य भार्यामभिततेजसः । स्वचरित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ २३ ॥
नूनं रामप्रभावेण वैदेह्याः सुकृतेन च । यन्मां दहनकर्मायं नादहद्धव्यवाहनः ॥ २४ ॥
त्रयाणां भरतादीनां भ्रातॄणां देवता च या । रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥ २५ ॥
यद्वा दहनकर्माऽयं सर्वत्र प्रभुरव्ययः । न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ॥ २६ ॥

तफलजनकं धिक् । यद्यस्मादीश्वरेणापि समर्थेनापि मया रागाद्रजोगुणमूलक्रोधवशात्सीता न रक्षिता, अतो धिक् ॥ १६ ॥

रा० टी०–धिगिति । यद्रागात् यद्वशात् मया सीता न रक्षिता तम् अनवस्थितमव्यवस्थितम् अत एव अनीशं कार्यजननासमर्थं राजसं रजोगुणसंबन्धिनं भावम् अनवधानतया स्थितिविशेषं धिगस्तु ॥ १६ ॥

गो० टी०–धिगस्त्विति । राजसं भावं रजोगुणनिबन्धनचेष्टाविशेषम् अनीशं नियामकरहितम् स्वतन्त्रमिति यावत् अनवस्थितं कुर्वत्स्वभावम् ईश्वरेणापि रक्षणसमर्थेनापि रागात् मात्सर्यात् 'रागोऽनुरागे मात्सर्ये रक्तवर्णे कुसुम्भके' इति यादवः । यद्वा रागात् रजोगुणात् आग्रहादिति यावत् ॥ १७—२१ ॥

१७-२०] ति० टी०–उभौ रामलक्ष्मणौ ॥ १७-२० ॥

रा० टी०–अरक्षणे दोषमाह–विनष्टायामित्यादिभिः१७

रा० टी०–एतदिति ॥ १८ ॥

रा० टी०–इक्ष्वाकुवंश इति ॥ १९ ॥

रा० टी०–तदिति । तत् सीतायाः अरक्षणाद्धेतोः लुप्तो विनाशितः धर्मार्थयोः संग्रहो येन अत एव भाग्यरहितः रोषदोषपरीतात्माऽहं लोकविनाशनः सकलजनविनाशनजनितपापवान् भविष्यामीति शेषः ॥ २० ॥

२१] ति० टी०–साक्षादुपलब्धान्यपरोक्षमनुभूतशुभफलान्युपपेदिरे । जातानि दृष्ट्वा पुनरचिन्तयदित्यर्थः ॥ २१ ॥

रा० टी०–इतीति । इति चिन्तयतः तस्य हनुमतः पूर्वमप्युपलब्धानि अनुभूतानि निमित्तानि शुभसूचकदक्षिणनेत्रस्फुरणादीनि उपपेदिरे प्रापुः अतः पुनरचिन्तयत् ॥ २१ ॥

गो० टी०–इतीति । निमित्तान्युपपेदिरे शुभशंसिनिमित्तानि प्रादुर्बभूवुरित्यर्थः ॥ २२ ॥

२२-२३] ति० टी०–चिन्तामेव दर्शयति—अथवेति । नाग्निरग्नौ प्रवर्तते इति अग्निरग्निं न दहतीत्यर्थः ॥ २२॥२३ ॥

रा० टी०–चिन्ताकारमाह–अथवेत्यादिभिः । स्वेन तेजसा तेजोरूपवह्निविशेषेण रक्षिता कल्याणी सीता न नशिष्यति नंक्ष्यति तत्र हेतुः अग्नौ अग्निर्न प्रवर्तते ॥ २२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–नहीति । स्वचरित्राभिगुप्तां स्वनिष्ठपरमपातिव्रतधर्मेण रक्षितां तस्य रामस्य भार्यां पावकः स्प्रष्टुं नार्हति ॥ २३ ॥

गो० टी०–एवं लोकदृष्ट्याऽनर्थमाशङ्क्य तत्त्वदृष्ट्या समाधत्ते–अथवेत्यादिना । नाग्निरग्नौ प्रवर्तते अग्निरग्निं न दहतीत्यर्थः ॥ २३ ॥ २४ ॥

२४] ति० टी०–दहनकर्मा भस्मीकरणसहजस्वभावो यत्तत्तत्प्रभावान्मां तत्सेवकं नादहत् तत एव तां स्प्रष्टुमपि नार्हतीत्यर्थः ॥ २४ ॥

रा० टी०–नूनमिति । रामप्रभावेण अव्याहतप्रतापेन वैदेह्याः सुकृतेन च अयं हव्यवाहनोऽग्निः यत् प्रयत्नवन्तं मां न अदहत् यन्मामित्यत्र कर्मधारयः यदिति सामान्ये नपुंसकं वा ॥ २४ ॥

गो० टी०–नूनमिति । दहनकर्मा भस्मीकरणस्वभावः यत्प्रभावादयं मां नादहत् स तामेव कथं दहतीत्यर्थः ॥२५–३०॥

२५] ति० टी०–त्रयाणां भरतलक्ष्मणशत्रुघ्नानां देवतात्वात्तस्यामग्र्यप्रवृत्ते रामभयाच्चेति भावः ॥ २५ ॥

रा० टी०–त्रयाणामिति । या भरतादीनां देवता पूज्या रामस्य च मनःकान्ता अत्यन्तमीप्सिता सा कथं विनशिष्यति ॥ २५ ॥

२६] ति० टी०–सर्वत्र प्रभुरपि यत्सेवकत्वान्मे लाङ्गूलं न दहति ततस्तां कथं धक्ष्यति ॥ २६ ॥

१ असंशयमिति गो. पाठः । २ चारित्रेति गो. पाठः । ३ प्रभावेनेति गो. पाठः

पुनश्चाचिन्तयत्तत्र हनूमान्विस्मितस्तदा । हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ॥ २७ ॥
तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि । असौ विनिर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ २८ ॥
स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम् । शुश्राव हनुमांस्तत्र चारणानां महात्मनाम् ॥ २९ ॥
अहो खलु कृतं कर्म दुर्विगाहं हनूमता । अग्निं विसृजता तीक्ष्णं भीमं राक्षससद्मनि ॥ ३० ॥
प्रपलायितरक्षःस्त्रीबालवृद्धसमाकुला । जनकोलाहलाध्माता क्रन्दतीवाद्रिकन्दरैः ॥ ३१ ॥
दग्ध्वेयं नगरी लङ्का साट्टप्राकारतोरणा । जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ ३२ ॥
इति शुश्राव हनुमान्वाचं तामृतोपमाम् । बभूव चास्य मनसो हर्षस्तत्कालसंभवः ॥ ३३ ॥
स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः । ऋषिवाक्यैश्च हनुमानभवत्प्रीतमानसः ॥ ३४ ॥

ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा ।
प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रा० टी०–यदिति । यत् यः अयं वह्निः मे लाङ्गूलं न दहति सः आर्यां सीतां कथं प्रधक्ष्यति ॥ २६ ॥

२७] ति० टी०–देवीप्रभावान्निन्द्यो मद्विश्रान्तिनिमित्तं गिरिदर्शनहेतुनातिप्रभाववतीं तां न दहतीत्याह–पुनश्चेति ॥ २७ ॥

रा० टी०–पुनरिति । तत्र तस्मिन् समये विस्मितो हनुमान् जलमध्ये सागरान्तर्देशे हिरण्यनाभस्य गिरेः प्रदर्शनं पुनरचिन्तयत् । एतेन पर्वतादीनामपि सर्वेषां रामाज्ञावशवर्तित्वं सूचितं तेन सीतायाः नाग्नेर्भीतिरिति सूचितम् ॥ २७ ॥

२८–२९] ति० टी०–विनिर्दहेत् दाहविषयवाक्यप्रयोगेणेति शेषः । तथा चिन्तयंश्चारणानां वाक्यं शुश्रावेति योजना ॥ २८ ॥ २९ ॥

रा० टी०–तपसेति । तपआदिना असौ सीता अग्निं विनिर्दहेत् अतः तां सीताम् अग्निर्न प्रधक्ष्यति ॥ २८ ॥

रा० टी०–स इति । तत्र तस्मिन् समये देव्याः सीतायाः धर्मपरिग्रहं धर्मे स्थितिं चिन्तयन् हनुमान् चारणानां शुश्राव वचनमिति शेषः ॥ २९ ॥

३०–३१] ति० टी०–दुर्विगाहम् केनाप्यसह्यमित्यर्थः ॥ ३० ॥ ३१ ॥

रा० टी०–तद्वचनाकारमाह–अहो इत्यादिभिः । राक्षससद्मनि अग्निं विसृजता त्यजता हनुमता दुर्विगाहम् अन्यैः कर्तुमशक्यम् अहो आश्चर्यं कर्म कृतम् ॥ ३० ॥

गो० टी०–अहो इत्यादि । विस्मयोऽद्भुत एव न इति । अयं विस्मयः अद्भुत एव अद्भुतमाश्चर्यं कल्याणं चेत्युणादिवृत्तिः । यद्वा विस्मयः आश्चर्यम् अद्भुतः अभूतपूर्व इत्यर्थः । अद्भुतः अद्भुतरसः तस्य स्थायी भावो विस्मयः । तथा च अद्भुत एव अद्भुतरसतां प्राप्त एव । महानयं विस्मयः । न विस्मयमात्र इत्यर्थः ॥ ३१—३३ ॥

रा० टी०–तत्कर्माह–प्रपलायितेति । प्रपलायितैः अतिपलायनं प्राप्तैः रक्षःप्रभृतिभिः समाकुला व्याप्ता जनकोलाहलैः ध्माता शब्दिता अत एव क्रन्दती रुदतीव अद्रिकन्दरैः सह इयं लङ्का दग्धा जानकी तु न दग्धा इति नोऽस्माकमद्भुतोऽभूतपूर्व एव विस्मयः । श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

३२]ति०टी०–विस्मय आश्चर्यम् । अद्भुतोऽभूतपूर्वः॥३२॥

३३] ति० टी०–तत्कालसंभवस्तत्कालजातचारणवाक्यजः ॥ ३३ ॥

रा० टी०–इतीति । इति वाचं हनुमान् शुश्राव अत एव तत्कालसंभवः तस्मिन् काले योग्यः अस्य हनुमतः मनसो हर्षो बभूव ॥ ३३ ॥

३४] ति०टी०–दृष्टार्थैर्दृष्टप्रत्यर्थैर्निमित्तैर्दक्षिणाक्षिस्पन्दनादिभिः कारणैः सीतारामप्रभावपातिव्रत्यादिरूपैर्ऋषिवाक्यैश्चारणवाक्यैः ॥ ३४ ॥

रा० टी०–स इति । दृष्टः बहुवारमनुभूतः अर्थः फलं येषां तैः निमित्तैः दक्षिणनेत्रस्फुरणादिभिः महागुणैः अद्भुतगुणप्रतिपादकैः कारणैः सीतास्थितिबोधकहेतुभिः ऋषिवाक्यैश्च हनुमान् प्रीतमानसोऽभवत् ॥ ३४ ॥

गो० टी०–स इति । निमित्तैः दक्षिणाक्षिस्पन्दादिभिः दृष्टार्थैः दृष्टफलसंवादैः कारणैः सीतापातिव्रत्यरामप्रभावादिभिः ऋषिवाक्यैः चारणवाक्यैः ॥ ३४ ॥

३५] ति०टी०–विदित्वा चारणादिवाक्यैः पुनरेव पुनरपि प्रत्यक्षतो दृष्ट्वा, प्रतिप्रयाणाय किष्किन्धां प्रति गन्तुं मतिं चकार ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रा० टी०–तत इति । अक्षताम् अदग्धां तां सीतां विदित्वा ज्ञात्वा प्रत्यक्षतः तां दृष्ट्वा च प्राप्तमनोरथार्थः प्राप्तौ

---

१ अपि सेति गो. पाठः । २ वाक्यमिति गो. पाठः । ३ दुष्करं ह्रीति गो. पाठः । ४ऽभीक्ष्णमिति गो. पाठः । ५ वेश्मनीति गो. पाठः । ६ कन्दरे इति गो. पाठः । ७ श्लोकोऽयं गो. नास्ति ।

षट्पञ्चाशः सर्गः ।

हनुमाञ्शिंशपातोऽवतीर्याभिवादनसमाश्वासनसंप्रश्नपूर्वकं सागरोत्तरतीरगमनायारिष्टगिरिं समारुह्य स्वचरणनिपीडनाद्गिरिवरस्य रसातलप्रवेशनेन ततः समुत्पपात ।

ततस्तु शिंशपामूले जानकीं पर्यवस्थिताम् । अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ १ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः । भर्तुः स्नेहान्विता वाक्यं हनूमन्तमभाषत ॥ २ ॥
यदि त्वं मन्यसे तात वसैकाहमिहानघ । क्वचित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चैवाल्पभाग्यायाः सांनिध्यात्तव वानर । शोकस्यास्याप्रमेयस्य मुहूर्तं स्यादपि क्षयः ॥ ४ ॥
गते हि हरिशार्दूल पुनः संप्राप्तये त्वयि । प्राणेष्वपि न विश्वासो मम वानरपुंगव ॥ ५ ॥
अदर्शनं च ते वीर भूयो मां दारयिष्यति । दुःखाद्दुःखतरं प्राप्तां दुर्मनःशोककर्शिताम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः । सुमहत्सु सहायेषु हर्यृक्षेषु महाबलः ॥ ७ ॥
कथं नु खलु दुष्पारं संतरिष्यन्ति सागरम् । तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यापि लङ्घने । शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे । किं पश्यसि समाधानं त्वं हि कार्यविशारदः ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने । पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥
बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः । मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १२ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः । भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १३ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् । निशम्य हनुमान्वीरो वाक्यमुत्तरमब्रवीत् ॥ १४ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः । सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ १५ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः । क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः ॥ १६ ॥
तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ । आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ १७ ॥
सगणं राक्षसं हत्वा न चिराद्रघुनन्दनः । त्वामादाय वरारोहे स्वां पुरीं प्रति यास्यति ॥ १८ ॥
समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी । क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे ॥ १९ ॥
निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे । त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ २० ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्युतः । यस्ते युधि विनिर्जित्य शोकं व्यपनयिष्यति ॥ २१ ॥
एवमाश्वास्य वैदेहीं हनूमान्मारुतात्मजः । गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ २२ ॥
राक्षसान्प्रवरान्हत्वा नाम विश्राव्य चात्मनः । समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम् ॥ २३ ॥
नगरीमाकुलां कृत्वा वञ्चयित्वा च रावणम् । दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥ २४ ॥
प्रतिगन्तुं मनश्चक्रे पुनर्मध्येन सागरम् । ततः स कपिशार्दूलः स्वामिसंदर्शनोत्सुकः ॥ २५ ॥

मनोरथार्थी येन मनोवेगवत्त्वसमानाधिकरणेप्सितार्थवानित्यर्थः हनुमान् प्रतिप्रयाणाय मतिं चकार ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

गो० टी०–तत इति । पूर्वं चारणवाक्यैर्विदित्वा पुनः प्रत्यक्षं दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चकार प्रतियास्यामीति संकल्पितवानित्यर्थः ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१–२५] ति० टी०–इत आरभ्य ' पुनर्मध्येन सागरम् '

१ अन्वितमिति रा. पाठः । २ एतदादिश्लोकाष्टकं गो. नास्ति । ३ तरिष्यतीति रा. पाठः । ४ शौरेः स्विति गो. पाठः । ५ तस्या इति गो. पाठः । ६ एतदादिश्लोकषट्कं गो. नास्ति । ७ वृत इति गो. पाठः । ८ विजित्यारीनिति गो. पाठः । ९ एतदादि सार्धं श्लोकद्वयं गो. नास्ति ।

आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः । तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ॥ २६ ॥
सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः । बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः ॥ २७ ॥
उन्मिषन्तमिवोद्धूतैर्लोचनैरिव धातुभिः । तोयौघनिःस्वनैर्[1] मन्द्रैः प्राधीतमिव सर्वतः ॥ २८ ॥

इत्यन्ताः सार्धचतुर्विंशतिश्लोकाः प्राग्व्याख्यातप्राया एव १-२६

रा० टी०–हनुमत्कर्तृकसीतादर्शनानन्तरकालिकां सीतां प्रति हनुमदुक्तिमाह–तत इति । दिष्ट्या भाग्यवशेन अक्षतां विनाशरहितां त्वां पश्यामि इति वाक्यं जानकीमभिवाय अब्रवीत् ॥ १ ॥

गो० टी०–तत इत्यादि ॥ १ ॥

रा० टी०–तत इति । तत आरभ्य पुनर्मध्येन सागरमित्यन्ताः सार्धत्रयोविंशतिश्लोकाः पूर्वमपि पठिताः इति तद्व्याख्यानेनैव व्याख्यातप्रायाः ॥ २—२४ ॥

गो० टी०–ततस्तमिति । प्रस्थितं प्रस्थानोद्युक्तम् ॥ २॥

गो० टी०–वनभङ्गाक्षवधादिना हनुमतः शक्तिं विज्ञाय असौ रामाय निवेद्य स्वयमेव सकलराक्षससंहारपूर्वकं मम नेता मा भूदित्यभिप्रायेणाह–कार्ममिति । अस्य कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपकार्यस्य बलोदयः सत्त्वप्रकर्षः, सैन्योत्थापनं वा ते यशस्यः यशस्करः न तु रामस्येति भावः ॥ ३ ॥

गो० टी०–तर्हि रामस्य किं यशस्करमित्यत्राह–शरैरिति। तत् स्वपराक्रमेण मत्रयनम् । तस्य काकुत्स्थस्य सदृशम् एतदेव ममाभिलषितम् । अन्यथा मे कथं वीरपत्नीत्वमिति भावः ॥ ४ ॥

गो० टी०–तच्च त्वदायत्तमेवेत्याह–तद्यथेति । विक्रान्तं विक्रमणम् ॥ ५—८ ॥

रा० टी०–तत इति । ततः गमनेच्छानन्तरं स्वामिसंदर्शनोत्सुकः स हनुमान् अरिष्टं तदभिधं गिरिश्रेष्ठमारुरोह । अर्धद्वयमेकान्वयि ॥ २५ ॥

गो० टी०–ततः स इति । अरिष्टम् अरिष्टाख्यम् ॥ ९ ॥

२६] ति० टी०–अरिष्टं तदाख्यम् । नीलाभिर्वनराजिभिः सपरिधानमिवेति शेषः ॥ २६ ॥

रा० टी०–गिरिमेव वर्णयन्नाह–तुङ्गेत्यादिभिः । तुङ्गाः उन्नताः ये पद्मकाः तैर्जुष्टाभिः वनराजिभिः शृङ्गान्तरविलम्बिभिः ॥ २६ ॥

गो० टी०–अथैनं गिरिं चतुर्दशधोत्प्रेक्षते–तुङ्गेत्यादिना। पद्मकाः पद्मवर्णवृक्षाः । परिधानालेख्यस्थानीयतया विशेषणमेति बोध्यम् । सपरिधानमिव स्थितमिति शेषः । उत्तरार्धे सोत्तरीयत्वोत्प्रेक्षणात् । बोध्यमानमिति । शुभैः तरुणैः करैः अंशुभिः हस्तैश्च बोध्यमानमिव स्थितम् । तत्र ज्ञापकमाह–उद्धूतैरिति । उद्धूतैः उद्गतैः लोचनैरिव स्थितैः धातुभिः उन्मिषन्तं पश्यन्तमिव स्थितम् । तोयौघनिःस्वनैः गिरिनदीघोषैः मन्द्रैः गम्भीरैः प्राधीतमिव प्राध्येतुं प्रवृत्तमिव । आदिकर्मणि कर्तरि क्तः अधीयानमिवेत्यर्थः । प्रस्रवणस्वनैः पर्वतमूलाद्बहिः प्रवहन्ति जलानि प्रस्रवणानि तेषां स्वनैः । प्रगीतमिव गातुं प्रवृत्तमिव गायन्तमिवेत्यर्थः । आदिकर्मणि कर्तरि क्तः । देवदारुभिरिति । ऊर्ध्वबाहुमिवेति तपोविशेष उच्यते । प्रपातजलनिर्घोषैः प्रपाताः भृगवः ‘ प्रपातस्तु तटो भृगुः’ इत्यमरः तेषां जलानि तेभ्यः पतन्तो निर्झरा इत्यर्थः तेषां निर्घोषैः प्राकृष्टमिव आक्रोशन्तमिव । पूर्ववत् क्तः । शरदि ये घना भवन्ति ते शरद्घनाः । शरत्कालपुष्पिणः सप्तच्छदादयः तैः शुभ्रीभूतैः जरया कम्पमानमिव स्थितमित्यर्थः । ‘शरद्घनैः’ इतिपाठे बहुवार्षिकवृक्षैरित्यर्थः शरवणैरिति वार्थः । तकारान्तोप्यस्ति । शरवणे जातस्य कृपाचार्यस्य शारद्वत इति नामदर्शनात् । कीचकैः कीचकाख्यैर्वेणुभिः । तदाहामरः– ‘ वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ’ इति । आशीविषोत्तमैः निःश्वसन्तमिव सर्पश्रेष्ठनिःश्वासैर्निःश्वसन्तमिव । अमर्षात् हनुमति क्रोधादित्यर्थः। नीहारकृतगम्भीरैः नीहारपूर्णैः गम्भीरैश्च गह्वरैः गुहाभिः ध्याननिरुद्धेन्द्रियस्थानीयैः ध्यायन्तमिव स्थितम् । निरुद्धेन्द्रियद्वारा ध्यानारूढमिव स्थितमित्यर्थः । मेघपादनिभैः मेघावरोहनिभैः पादैः प्रत्यन्तपर्वतैः प्रक्रान्तमिव गन्तुमुद्युक्तमिव । पूर्ववत् क्तः । जृम्भमाणमिव गात्रभङ्गं कुर्वाणमिव । अश्रमालिभिः मेघमालावद्भिः । बहुधा कीर्णैः हनुमत्पादस्पर्शन शिथिलैरित्यर्थः । धातुनिष्यन्दः धातुस्रावः । लतापादपानां संघातो यस्मिन्निति व्यधिकरणबहुव्रीहिः । रामदर्शनशीघ्रेण रामदर्शनत्वरावता ॥ १०—२१ ॥

२७] ति० टी०–सोत्तरीयमिव कण्ठासक्तोत्तरीयधारिणमिव । बोध्यमानमिव रविकिरणस्पर्शेन सर्वेषां तत्रत्यवस्तूनां विकासादिति भावः ॥ २७ ॥

रा० टी०–शृङ्गमध्ये स्थितैरम्भोदैर्मेघैः सोत्तरीयम् उत्तरीयधारिणमिव दिवाकरैर्बोध्यमानमिव ॥ २७ ॥

२८] ति० टी०–उद्धूतैर्लोचनसदृशैर्धातुभिरुन्मिषन्तमिवेत्युत्प्रेक्षा । प्राधीतमिवोच्चैः प्रारब्धाध्ययनमिव तत्स्वनानां महत्त्वात् ॥ २८ ॥

रा० टी०–उद्धूतैरुद्गतैः पक्ष्मरहितैरित्यर्थः लोचनैरिव धातुभिः उन्मिषन्तं विलोकयन्तमिव मन्द्रैः तोयौघनिःस्वनैः प्राधीतं प्रकृष्टाध्ययनविशिष्टमिव ॥ २८ ॥

---

१ मन्दैरिति रा. पाठः । २ पर्वतमिति गो. पाठः ।

स लिलङ्घयिषुर्भीमं सलीलं लवणार्णवम् । कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ।

लङ्कातटादुत्प्लुतो हनुमान्मार्गमध्ये संप्राप्तं मैनाकं संस्पृश्याग्रे गच्छन्महेन्द्रं विलोक्य बन्धुजनहर्षणायोच्चैर्जगर्ज । तच्छ्रवणेन सरभसमुत्थितान्कपिगणाञ्जाम्बवान्हर्षोद्घोषणतो हनुमतः कृतकार्यत्वं कथयति । महेन्द्रशिखरमवतीर्णो हनुमाञ्जाम्बवदादीनभिवाद्य सर्वान्प्रति संग्रहेण सीतादर्शनादिकं निवेदयति । अङ्गदो हनुमन्तं प्रशस्य सविस्तरं सीतादर्शनवृत्तान्तश्रवणोत्कः सर्वैः समं माहेन्द्रविशालशिलातलमाश्रयते ।

आप्लुत्यच महावेगः पक्षवानिव पर्वतः । भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम् ॥ १ ॥
सचन्द्रकुमुदं रम्यं सार्ककारण्डवं शुभम् । तिष्यश्रवणकादम्बमभ्रशैवलशाद्वलम् ॥ २ ॥
पुनर्वसुमहामीनं लोहिताङ्गमहाग्रहम् । ऐरावतमहाद्वीपं स्वातीहंसविलासितम् ॥ ३ ॥
वातसंघातजालोर्मिचन्द्रांशुशिशिराम्बुमत् । हनूमानपरिश्रान्तः पप्लुवे गगनार्णवम् ॥ ४ ॥

रा०टी०–तदेव स्पष्टयति–दशेति । दशयोजनानि विस्तारो यस्य स धराधरः धरण्याः समतां यातः प्राप्तो बभूव ॥ ५० ॥

५१] ति० टी०–कल्लोलैरास्फाल्यते स्पृश्यते तादृशो वेलान्तस्तीरप्रान्तो यस्य तं सागरं लिलङ्घयिषुर्नभ उत्पपातेति संबन्धः ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०–स इति । कल्लोलास्फालवेलान्तं तरङ्गैः स्फालिततीरोपान्तं भीमं लवणार्णवं सलीलं लीलापूर्वकं लिलङ्घयिषुः हरिः स हनुमान् नभः उत्पपात ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

गो० टी०–स इति । कल्लोलास्फालवेलान्तं तरङ्गैरास्फाल्यमानतीरोपान्तम् ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

१] ति० टी०–आप्लुत्योत्प्लुत्य । आधारं गगनमर्णवत्वेन वर्णयति—भुजङ्गेत्यादि । भुजङ्गादय एव विकसितानि कमलादीनि यस्मिन् ॥ १ ॥

२] ति० टी०–चन्द्ररूपेण कुमुदेन श्वेतोत्पलेन सहितम् अर्करूपकारण्डवाख्यजलपक्षिसहितम्, अभ्राणि मेघा एव शैवलानि शाद्वलानि च यत्र तम् ॥ २ ॥

३] ति० टी०–लोहिताङ्गो भौमः, महाग्रहो महाग्राहः, स्वातीरूपो हंसो विलासितः कृतविलासो यत्र तत् ॥ ३ ॥

४] ति० टी०–वातसंघातो वात्या तज्जालं तत्समूह एवोर्मयो यत्र तम् । चन्द्रकिरणरूपशीतलजलयुक्तम् । मनुवार्षः । अत्र सावयवरूपकम् । गगनस्यार्णवत्वेन चन्द्रादीनां कुमुदादित्वेन च रूपणात् ॥ ४ ॥

रा० टी०–प्लवनकालकं हनुमदवृत्तान्तमाह–आप्लुत्येत्यादिभिः । पक्षवान् पर्वत इव महावेगो हनुमान् भुजङ्गादय एव प्रबुद्धानि विकसितानि कमलोत्पलानि यस्मिन्, चन्द्ररूपकुमुदेन सहितम् अर्क एव कारण्डवः जलकुक्कुटः तेन सहितं तिष्यश्रवणावेव कादम्बाः कलहंसा यस्मिन्, अभ्रा एव शैवलाः शाद्वलाश्च यस्मिन्, पुनर्वसू एव महामीनौ यस्मिन्, लोहिताङ्गो भौम एव महाग्राहो बृहद्ग्राहो यस्मिन्, ऐरावत एव महाद्वीपो यस्मिन्, स्वात्येव हंसस्तेन विलासितं शोभितं वातसंघातानां वात्यानां जालं समूह एव ऊर्मयो यस्मिन्, चन्द्रांशव एव शिशिराम्बूनि शीतजलानि तद्वद्गगनार्णवं पक्षवान् पर्वत इव महावेगः अपरिश्रान्तो हनुमान् आप्लुत्य उत्प्लुत्य पप्लुवे । श्लोकचतुष्टयमेकान्वयि ॥ १–४ ॥

गो० टी०–उत्पपात नभो हरिरित्युक्तम् तल्लङ्घनं रूपकेण चतुर्भिर्वर्णयति—सचन्द्रेत्यादिना । कारण्डवः जलकुक्कुटः । कादम्बः कलहंसः । 'कादम्बः कलहंसः स्यात्' इत्यमरः । अभ्रशैवालशाद्वलं मेघस्य शैवालत्वेन पर्यन्तस्थशाद्वलत्वेन च रूपणम् । लोहिताङ्गः अङ्गारकः स एव महाग्रहः महाग्राहः यस्य तम् । ऐरावतस्याभ्रमातङ्गत्वेनाभ्रगामित्वात्तत्र संभवः । विलोलितम् अवगादम् । वातसङ्घातजातोर्मय एव चन्द्रांशवः तैः शीतलजलवद्भुजङ्गादीनां कमलोत्पलत्वेन रूपणं तत्तद्वर्णभेदेन । अत्र गगनस्यार्णवत्वेन चन्द्रादीनां तदवयवकुमुदादित्वेन च रूपणात्सावयवरूपकम् । तस्य नौरिवेत्युपमया तिलतन्दुलवत्संसृष्टिः ॥ १—४ ॥

---

१ अर्धमेतत् गो. नास्ति । २ अर्धमेतत् शिशिराम्बुमदित्यस्मादग्रे गो. पाठे । ३ जातोर्मीति गो. पाठः । ४ हनुमान्मारुतगतिर्महानौरिव सागरम् । अपारमपरिश्रान्तः इति गो. पाठः ।

ग्रसमान इवाकाशं ताराधिपमिवोल्लिखन् । हरन्निव सनक्षत्रं गगनं सार्कमण्डलम् ॥ ५ ॥
अपारमपरिश्रान्तश्चाम्बुधिं समगाहत । हनूमान्मेघजालानि विकर्षन्निव गच्छति ॥ ६ ॥
पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च । हरितारुणवर्णानि महाभ्राणि चकाशिरे ॥ ७ ॥
प्रविशन्नभ्रजालानि निष्क्रमंश्च पुनः पुनः । प्रकाशश्चाप्रकाशश्च चन्द्रमा इव दृश्यते ॥ ८ ॥
विविधाभ्रघनापन्नगोचरो धवलाम्बरः । दृश्यादृश्यतनुर्वीरस्तथा चन्द्रायतेऽम्बरे ॥ ९ ॥
ताक्ष्यर्यायमाणो गगने स बभौ वायुनन्दनः । दारयन्मेघवृन्दानि निष्पतंश्च पुनः पुनः ॥ १० ॥
नदन्नादेन महता मेघस्वनमहास्वनः । प्रवरान्राक्षसान्हत्वा नाम विश्राव्य चात्मनः ॥ ११ ॥
आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् । अर्दयित्वा महावीरान्वैदेहीमभिवाद्य च ॥ १२ ॥
आजगाम महातेजाः पुनर्मध्येन सागरम् । पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान् ॥ १३ ॥
ज्यामुक्त इव नाराचो महावेगोऽभ्युपागमत् । स किंचिदारात्संप्राप्तः समालोक्य महागिरिम् ॥ १४ ॥
महेन्द्रमेघसंकाशो ननाद स महाकपिः । स पूरयामास कपिर्दिशो दश समन्ततः ॥ १५ ॥
नदन्नादेन महता मेघस्वनमहास्वनः । स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः ॥ १६ ॥

५-६] ति० टी०-ताराधिपमुल्लिखन्निव नखैरिति शेषः । हरन्निव गृह्णन्निव ॥ ५ ॥ ६ ॥

रा० टी०-ग्रसमान इति । आकाशमन्तरिक्षं ग्रसमान इव ताराधिपं चन्द्रमसम् उल्लिखन्निव सनक्षत्रं सार्कमण्डलं गगनं हरन्निव मेघजालानि विकर्षन्निव हनुमान् गच्छति । श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०-अथ तदेवोत्प्रेक्षया वर्णयति—ग्रसमान इत्यादिना ॥ ५ ॥ ६ ॥

७-८] ति० टी०-महाभ्राणीत्यस्य कपिनाऽऽकृष्यमाणानीति शेषः ॥ ७ ॥ ८ ॥

रा० टी०-पाण्डरेति । पाण्डरादिवर्णविशिष्टानि महाभ्राणि चकाशिरे ॥ ७ ॥

रा० टी०-प्रविशन्निति । अभ्रजालानि प्रविशन् निष्क्रामंश्च हनुमान् प्रकाशोऽप्रकाशश्च चन्द्रमा इव दृश्यते ॥ ८ ॥

गो० टी०-पाण्डरेति । व्यक्ताव्यक्तवाचित्वेन अरुणशब्दयोः कथंचिदपौनरुक्त्यमुन्नेयम् । यद्वा 'अरुणः कृष्णलोहिते' इत्यमरशेषः । महाभ्राणि चकाशिरे । हनुमत्संपर्कादित्यर्थः । अन्यथा वाजपेयशरद्घनवदभ्रवर्णनस्यासंगतत्वापातः । हनुमतस्तेजस्वीत्यनेन मेघानां नानावर्णत्वापत्तिः सूर्येन्दुसंपर्कवत् ॥ ७ ॥ ८ ॥

९-१०] ति० टी०-प्रविशन्नित्युक्तमेवार्थं भङ्ग्यन्तरेणाह—विविधेति । विविधेष्वभ्रघनेष्वापन्नो गोचरो मार्गो येन सः । प्रवेशनिष्क्रमाभ्यां दृश्यादृश्यतनुः । अयं श्लोकः प्रक्षिप्त इति भाति ॥ ९ ॥ १० ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-विविधेति । विविधेषु अभ्रघनेषु निबिडाभ्रेषु आपन्नः प्राप्तः गोचरः मार्गो यस्य धवलमम्बरं यस्य स हनुमान् अम्बरे आकाशे चन्द्रायते ॥ ९ ॥

गो० टी०-विविधेति । विविधेष्वभ्रघनेषु मेघसंघातेषु आपन्नगोचरः प्राप्तविषयः । लब्धमार्ग इति यावत् । धवलाम्बरः शुक्लवासाः दृश्यादृश्यतनुः मेघान्तःप्रवेशनिष्क्रमणाभ्यामिति भावः । चन्द्रायते चन्द्र इवाचरति ॥ ९ ॥

रा० टी०-ताक्ष्येति । मेघवृन्दानि पुनः पुनर्दारयन् निष्पतन् निर्गच्छन् अत एव ताक्ष्यर्यायमाणो वायुनन्दनः बभौ ॥ १० ॥

गो० टी०-ताक्ष्यर्यायमाण इति । ताक्ष्यं इवाचरन् ताक्ष्यर्यायमाणः । उभयत्र "उपमानादाचारे" "कर्तुः क्यङ् सलोपश्च" इति क्यङ् ॥ १०—१३ ॥

११-१२] ति०टी०-मेघस्वनवन्महास्वनो यस्य सः ॥ ११ ॥ १२ ॥

रा० टी०-नदन्निति । मेघस्वनमहास्वनः हनुमान् राक्षसान् हत्वा आत्मनो नाम विश्राव्य प्रख्याय नगरीं लङ्कामाकुलां कृत्वा महता नादेन नदन् सन् मध्येन तदवच्छेदेन सागरमाजगाम । सार्धश्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

१३-१६] ति० टी०-सुनाभं मैनाकम् ॥ १३-१६ ॥

रा० टी०-पर्वतेन्द्रमिति । सुनाभं पर्वतेन्द्रं समुपस्पृश्य ज्यामुक्तो नाराच इव अभ्युपागमत् ॥ १३ ॥

गो० टी०-पर्वतेन्द्रमिति । सुनाभं मैनाकम् ॥ १४ ॥

रा० टी०-स इति । किंचित् आरात् समीपं संप्राप्तः स हनुमान् महेन्द्रं महागिरिं समालोक्य ननाद ॥ १४ ॥

---

१ मारुतस्यात्मजः श्रीमान्कपिर्व्योमचरो महानिति गो. पाठः । २ पाण्डरेति गो. पाठः । ३ निष्पतंश्चेति गो. निष्क्रामन्निति रा. पाठः । ४ प्रच्छन्नश्च प्रकाशश्चेति गो. पाठः । ५ तदेति गो. पाठः । ६ बभासे इति गो. पाठः । ७ बलं घोरमिति गो. पाठः । ८ ऽभ्युपागत इति गो. पाठः । ९ अनुसंप्राप्त इति गो. पाठः । १० संकाशमिति गो. पाठः । ११ हरिपुङ्गव इति गो. पाठः ।

ननाद सुमहानादं लाङ्गूलं चाप्यकम्पयत् । तस्य नानद्यमानस्य सुपर्णाचरिते पथि ॥ १७ ॥
फलतीवास्य घोषेण गगनं सार्कमण्डलम् । ये तु तत्रोत्तरे कूले समुद्रस्य महाबलाः ॥ १८ ॥
पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः । महतो वायुनुन्नस्य तोयदस्येव निःस्वनम् ॥
शुश्रुवुस्ते तदा घोषमूरुवेगं हनूमतः ॥ १९ ॥
ते दीनमनसः सर्वे शुश्रुवुः काननौकसः । वानरेन्द्रस्य निर्घोषं पर्जन्यनिनदोपमम् ॥ २० ॥
निशम्य नदतो नादं वानरास्ते समन्ततः । बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः ॥ २१ ॥
जाम्बवान्स हरिश्रेष्ठः प्रीतिसंहृष्टमानसः । उपामन्त्र्य हरीन्सर्वानिदं वचनमब्रवीत् ॥ २२ ॥
सर्वथा कृतकार्योऽसौ हनूमान्नात्र संशयः । नद्यस्याकृतकार्यस्य नाद एवंविधो भवेत् ॥ २३ ॥
तस्य बाहूरुवेगं च निनादं च महात्मनः । निशम्य हरयो हृष्टाः समुत्पेतुर्यतस्ततः ॥ २४ ॥
ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च । प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ॥ २५ ॥

गो० टी०-स इति । किंचिदनुसंप्राप्तः मैनाकात्परं कचित् प्रदेशं प्राप्तः ॥ १५ ॥ १६ ॥

रा० टी०-स इति । स हनुमान् नदन् सन् दशदिशः पूरयामास ॥ १५ ॥

रा० टी०-स इति । सुहृदामङ्गदादीनां दर्शने लालसा यस्य सः तं सुहृत्समीपवर्तिनं देशमनुप्राप्तः स हनुमान् ननाद लाङ्गूलमकम्पयच्च ॥ १६ ॥

गो० टी०-स तमिति । लालसः साभिलाषः । तं देशम् सुहृदावाससमीपप्रदेशम् ॥ १७ ॥

१७] ति०टी०-लाङ्गूलं चाप्यकम्पयदिति स्वभावोक्तिः१७॥

रा० टी०-तस्येति । सुपर्णाचरिते पथि नानद्यमानस्य तस्य हनुमतः आस्यघोषेण मुखनिर्गतशब्देन गगनं फलति भिद्यते इव ॥ १७ ॥

गो० टी०-तस्येति । नानद्यमानस्य पुनः पुनर्भृशं नदत इत्यर्थः । फलतीव दलतीव ॥ १८ ॥

१८] ति० टी०-फलतीव विशीर्यतीव ॥ १८ ॥

१९] ति० टी०-ये पूर्वसंविष्ठितास्ते तोयदनिःस्वनमिवोरुवेगं तज्जन्यं घोषं शुश्रुवुरित्यन्वयः ॥ १९ ॥

रा० टी०-ये इति । तत्र प्रसिद्धे समुद्रस्योत्तरे कूले पूर्वं संविष्ठिताः वायुपुत्रं दिदृक्षवः ये वानराः ते वायुनुन्नस्य वायुना प्रेरितस्य तोयदस्य मेघस्य निःस्वनमिव उरुवेगं हनुमतो घोषं शुश्रुवुः । अर्धचतुष्टयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०-ये त्वित्यादि । वातनुन्नस्य वातसंघट्टितस्य । घोषम् ऊरुवेगमिति ऊरुवेगजन्यं घोषमित्यर्थः ॥ १९ ॥ २० ॥

२०] ति० टी०-वानरेन्द्रस्य निर्घोषं तदीयसिंहनादम्॥२०॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-ते इति । ते वानराः निर्घोषं शुश्रुवुः ॥ २० ॥

गो० टी०-ते दीनमनस इति । अनिष्टश्रवणशङ्कयेति भावः ॥ २१—२४ ॥

२१-२३] ति० टी०-सुहृद्दर्शनकाङ्क्षिणस्तेन शब्देन हनुमानेवैतीति निश्चित्य तद्दर्शनलालसाः ॥ २१-२३ ॥

रा० टी०-निशम्येति । नदतो हनुमतो नादं निशम्य श्रुत्वा सर्वे वानराः उत्सुका बभूवुः ॥ २१ ॥

रा० टी०-जाम्बवानिति । हरीन् वानरान् उपामन्त्र्य संबोध्य इदमब्रवीत् ॥ २२ ॥

रा० टी०-तद्वचनाकारमाह-सर्वथेति । हि यतः अकृतकार्यस्य अस्य हनुमत एवंविधः नादो न भवेत् अतः असौ हनुमान् सर्वथा सर्वप्रकारेण कृतकार्यः अत्र संशयो न ॥२३॥

२४] ति० टी०-बाहूरुवेगं तज्जन्यशब्दम् निनादं च कण्ठशब्दं च ॥ २४ ॥

रा० टी०-तस्येति । तस्य हनुमतः बाहूरुवेगं निनादं च निशम्य श्रुत्वा हरयो यतस्ततः समुत्पेतुः ॥ २४ ॥

गो० टी०-तस्येति । निशम्य ज्ञात्वेत्यर्थः । यद्वा दृष्ट्वा चेत्यध्याहार्यम् । अन्यथा बाहूरुवेगपदानन्वयात् ॥ २५ ॥

२५] ति० टी०-नगाग्रात् स्वाश्रयादूर्ध्वदेशस्थानि नगाग्राणीत्यर्थः ॥ २५ ॥

रा० टी०-ते इति । ते हरयः नगाग्रात् तरूणामूर्ध्वदेशात् नगाग्राणि तरोरूर्ध्वदेशान् शिखरात् शिखाराणि च आप्लुत्येति शेषः, हनुमन्तं समपद्यन्त ॥ २५ ॥

१ हरिशार्दूल इति गो. पाठः । २ सुपर्णचरिते इति गो. पाठः । ३ तीरे इति गो. पाठः । ४ पुत्रमिति रा. पाठः । ५ गर्जितमिति गो. पाठः । ६ ततस्तत इति गो. पाठः ।

ते प्रीताः पादपाग्रेषु गृह्य शाखामवस्थिताः । वासांसि चै प्रकाशानि समाविध्यन्त वानराः॥ २६ ॥
गिरिगह्वरसंलीनो यथा गर्जति मारुतः । एवं जगर्ज बलवान्हनूमान्मारुतात्मजः ॥ २७ ॥
तमभ्रघनसंकाशमापतन्तं महाकपिम् । दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा ॥ २८ ॥
ततस्तु वेगवान्वीरो गिरेर्गिरिनिभः कपिः । निपपात गि रेस्तस्य शिखरे पादपाकुले ॥ २९ ॥
हर्षेणापूर्यमाणोऽसौ रम्ये पर्वतनिर्झरे । छिन्नपक्ष इवाकाशात्पपात धरणीधर ॥ ३० ॥
ततस्ते प्रीतमनसः सर्वे वानरपुंगवाः । हनूमन्तं महात्मानं परिवार्योपतस्थिरे ॥ ३१ ॥
परिवार्य च ते सर्वे परां प्रीतिमुपागताः । प्रहृष्टवदनाः सर्वे तँमागतमुपागमन् ॥ ३२ ॥
उपायनानि चादाय मूलानि च फलनि च । प्रत्यर्चयन्हरिश्रेष्ठं हरयो मारुतात्मजम् ॥ ३३ ॥
६विनेदुर्मुदिताः केचित्केचित्किलकिलां तथा । हृष्टाः पादपशाखाश्च आनिन्युर्वानरर्षभाः ॥ ३४ ॥
हनूमांस्तु गुरून्वृद्धाञ्जाम्बवत्प्रमुखांस्तदा । कुमारमङ्गदं चैव सोऽवन्दत महाकपिः ॥ ३५ ॥

गो० टी०–समुत्पेतुरित्युक्तं विवृणोति—ते नगाग्रादिति । नगाग्रात् वृक्षाग्रात् । समपश्यन्त संघीभूताः ॥ २६ ॥

२६–२७] ति० टी०–ते शाखां गृह्य गृहीत्वोर्ध्वदृशा हनुमन्निरीक्षणे पतनभिया शाखां गृहीत्वा धृत्वा पादपाग्रेषु तदग्रशाखासु स्थिताः । वासांसि समाविध्यन्त प्राकम्पयन्त । नृत्यान्तर इवेति भावः । प्रकाशानि निर्मलतया प्रकर्षेण शोभन्ते तादृशानि वासांसि ॥ २६ ॥ २७ ॥

रा० टी०–ते इति । शाखां गृह्य गृहीत्वा पादपाग्रेषु अवस्थिताः ते वानराः प्रकाशानि प्रकाशं प्राप्तानि वासांसि समाविध्यन्त प्राकम्पयन्त अतिहर्षहेतुकगात्रप्रकम्पनद्वारा वस्त्राण्यपि प्रकम्पितानि बभूवुरित्यर्थः ॥ २६ ॥

रा० टी०–गिरीति । गिरिगह्वरसंलीनः मारुतो यथा गर्जति प्रभूतशब्दं करोति एवं मारुतात्मजो जगर्ज ॥ २७ ॥

गो० टी०–त इति । प्रीता इति हेतुगर्भं विशेषणम् । यथा मनुष्याः दूरस्थस्वकीयानयनाय वासांसि धून्वन्ति तथा वानराश्चान्योन्याह्वानाय पुष्पितशाखाः गृहीत्वा प्रशाखाः प्राग्रशाखाः समाविद्ध्यन्त पर्यभ्रामयन् ॥ २७ ॥ २८ ॥

२८] ति० टी०–अभ्रं मेघस्तदुपरि यो मेघस्तत्संकाशम् । अत्युन्नतमेघसमूहसदृशमित्यर्थमन्ये । स्वजीवनदातृत्वेन स्वपूज्यत्वात्प्राञ्जलयः स्थिताः ॥ २८ ॥

रा० टी०–तमिति । आपतन्तं हनुमन्तं दृष्ट्वा सर्वे वानराः प्राञ्जलयः प्रणतिमूचकबद्धयुगुलकराः सन्तस्तस्थुः ॥ २८ ॥

गो० टी०–तमिति । अभ्रघनसंकाशम् अभ्रसमूहतुल्यम् ॥ २९ ॥

२९] ति० टी०–ततो गिरेररिष्टाख्याद्गिरेः प्लुतः कपिस्तस्य महेन्द्रस्य गिरेः शिखरे निपपात । अनेनाविश्रममागमनं ध्वनितम् ॥ २९ ॥

रा० टी०–तत इति । ततः प्राञ्जलिसर्ववानरकर्मकदर्शनानन्तरं गिरिनिभो हनुमान् गिरेः अरिष्टाभिधपर्वतात् गिरेः तस्य महेन्द्रस्य शिखरे निपपात ॥ २९ ॥

गो० टी०–ततस्त्विति । निपपात निर्भरमाक्रान्तवान् ॥ ३० ॥

३०–३३] ति० टी०–छिन्नपक्षो धरणीधर इवाकाशात्पपात हर्षेणापूर्यमाणः पूर्यमाणहृदयः । पर्वतनिर्झरे निर्झरप्रवर्तके शिखर इत्यर्थमेके । श्रमनिवृत्तये जल एव पतित इत्यन्ये ॥ ३०—३३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–हर्षेणेति । हर्षेणापूर्यमाणो हनुमान् पर्वतनिर्झरे बहुनिर्झरत्वात्पर्वते पर्वतस्य निर्झरे वा आकाशात् छिन्नपक्षो धरणीधर इव पपात ॥ ३० ॥

गो० टी०–हर्षेणेति । पपातेति । अच्छिन्नपक्षस्य पातासंभवाच्छिन्नपक्ष इत्युक्तम् ॥ ३१ ॥ ३२ ॥

रा० टी०–तत इति । सर्वे वानरपुङ्गवाः हनुमन्तं परिवार्य उपतस्थिरे ॥ ३१ ॥

रा० टी०–परीति । आगतं तं हनुमन्तं परिवार्य परां प्रीतिमुपागताः वानराः उपागमन् तत्समीपं प्रापुः ॥ ३२ ॥

रा० टी०–उपायनानीति । फलादीन्युपायनान्यादाय हरयः हरिश्रेष्ठं हनुमन्तं प्रत्यर्चयन् प्रत्यार्चयन् ॥ ३३ ॥

गो० टी०–प्रहृष्टवदना इति । प्रहृष्टवदनाः प्रसन्नमुखाः आसन्निति शेषः । अरोगं कुशलिनमित्यर्थः । उपायनानि उपहारान् ॥ ३३ ॥

३४–३५] ति० टी०–शाखानयनं हनुमत आसनार्थम् ॥ ३४ ॥ ३५ ॥

रा० टी०–विनेदुरिति । केचिद्वानरर्षभाः किलकिलां स्वजातीयशब्दं विनेदुः चक्रुः, केचित्पादपशाखा आनिन्युः॥३४॥

रा० टी०–हनूमानिति । हनुमान् जाम्बवत्प्रमुखान् अवन्दत ॥ ३५ ॥

१ शाखाः सुविष्ठिता इति गो. पाठः । २ इव प्रशाखाश्चेति गो. पाठः । ३ तस्थति गो. पाठः । ४ महेन्द्रस्येति गो. पाठः । ५ तमरोगमुपागतमिति गो. पाठः । ६ श्लोकोऽयं गो. नास्ति ।

सताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः । दृष्टा दे[1]वीति विक्रान्तः संक्षेपेण न्यवेदयत् ॥ ३६ ॥
निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् । रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा ॥ ३७ ॥
हनूमानब्रवीत्पृष्टस्तदा तान्वानरर्षभान् । अशोकवनिकासंस्था दृष्टा सा जनकात्मजा ॥ ३८ ॥
रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता । एकवेणीधरा बाला रामदर्शनलालसा ॥ ३९ ॥
उपवासपरिश्रान्ता मलिना जटिला कृशा । ततो दृष्टेति वचनं महार्थममृतोपमम् ॥ ४० ॥
निशम्य मारुतेः सर्वे मुदिता वानराभवन् । क्ष्वेडन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः॥ ४१ ॥
चक्रुः [2]किलकिलामन्ये प्रतिगर्जन्ति चापरे । केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः ॥ ४२ ॥
[3]आयताञ्चितदीर्घाणि लाङ्गूलानि प्रविव्यधुः । अपरे [4]तु हनूमन्तं [5]श्रीमन्तं वानरोत्तमम् ॥ ४३ ॥
आप्लुत्य गिरिशृङ्गेषु संस्पृशन्ति स्म हर्षिताः । उक्तवाक्यं हनूमन्तमङ्गदस्तु तदाऽब्रवीत् ॥ ४४ ॥
सर्वेषां हरिवीराणां मध्ये वाचमनुत्तमाम् । सत्त्वे वीर्ये न ते कश्चित्समो वानर विद्यते ॥ ४५ ॥
यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः । [6]जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम ॥ ४६ ॥

गो० टी०–हनुमांस्त्वित्यादि । कुमारमङ्गदं चेति । स्वामित्वादिति भावः ॥ ३४—३९ ॥

३६–४२] ति० टी०–ताभ्यां जाम्बवदङ्गदाभ्यां प्रसादितः प्रसन्नदृष्ट्याकारितात्मनिरीक्षणः ॥ ३६–४२ ॥

रा० टी०–स इति । ताभ्यां जाम्बवदङ्गदाभ्यां कपिभिश्च पूजितः अत एव प्रसादितः विक्रान्तः विक्रमवान् पूज्यो हनुमान् देवी सीता दृष्टेति न्यवेदयत् ॥ ३६ ॥

रा० टी०–निषसादेति । वालिनः सुतमङ्गदं हस्तेन गृहीत्वा महेन्द्रस्य गिरेः वनोद्देशे वनप्रदेशे निषसाद ॥ ३७ ॥

रा० टी०–हनूमानिति । पृष्टो हनुमान् सुघोराभिः राक्षसीभिः रक्ष्यमाणा अनिन्दिता निन्दासंसर्गरहिता रामदर्शनलालसा कृशा अशोकवनिकासंस्था जनकात्मजा मया दृष्टेति वानरर्षभान् अब्रवीत् । सार्धश्लोकद्वयमेकान्वयि ॥ ३८ ॥३९॥

रा० टी०–तत इति । दृष्टेति मारुतेर्वचनं निशम्य वानराः मुदिता अभवन् । संधिरार्षः, नसुनेत्यत्र नेति योगविभागेन त्रिपाद्या क्वचिदसिद्धत्वाभावज्ञापनाद्वा ॥ ४० ॥

गो० टी०–तत इति । भवन् अभवन् अनित्यत्वादडभावः ॥ ४० ॥

रा० टी०–प्रमोदचिह्नान्याह–**क्ष्वेडन्तीति** । क्ष्वेडनादीनि कुर्वन्ति ॥ ४१ ॥

गो० टी०–क्ष्वेलन्तीति । क्ष्वेलन्ति सिंहनादं कुर्वन्ति नदन्ति अव्यक्तशब्दं कुर्वन्ति । गर्जन्ति वृषभनादं कुर्वन्ति । किलिकिलां स्वजात्युचितकिलिकिलाशब्दम् ॥ ४१ ॥

रा० टी०–केचिदिति । केचित् आयताञ्चितानि विस्तारं प्राप्तान्येव लाङ्गूलानि प्रविव्यधुः ॥ ४२ ॥

गो० टी०–केचिदिति । अञ्चितायतदीर्घाणि अत्र दीर्घपदसन्निधानादायतपदं स्थूलपरम् । प्रविव्यधुः लाङ्गूलानुद्धृत्य भूमावताडयन्नित्यर्थः ॥ ४२ ॥

४३] ति० टी०–आयताञ्चितदीर्घाणि । आयामो विस्तारः, स्थौल्यमित्यन्ये ॥ ४३ ॥

रा० टी०–अपरे इति । अपरे तु आप्लुत्य हनुमन्तं संस्पृशन्ति ॥ ४३ ॥

गो० टी०–अपरे चेति । संस्पृशन्ति आलिङ्गन्तीत्यर्थः ॥ ४३ ॥ ४४ ॥

४४–४६] ति० टी०–गिरिशृङ्गेष्वाप्लुत्य । तेभ्य आप्लुत्येत्यर्थः ॥ ४४–४६ ॥

रा० टी०–उक्तेति । हरिवीराणां मध्ये अङ्गदो हनुमन्तमब्रवीत् ॥ ४४ ॥

रा० टी०–तद्वचनाकारमाह–सत्त्व इति । हे वानर ! यद्यस्मात्सागरमवप्लुत्य त्वमागतः अतः सत्त्वे वीर्ये च ते समः कश्चित्र विद्यते ॥ ४५ ॥

रा० टी०–जीवितस्येति । नो जीवितस्य जीवनस्य प्रदाता एकस्त्वमेव अत एव त्वत्प्रसादात् सिद्धार्था वयं राघवेण सह समेष्यामः तिष्ठामः ॥ ४६ ॥

गो० टी०–सत्त्व इति । अवप्लुत्य विस्तीर्णमित्यङ्गदेतरव्याहृत्तिः । पुनरागत इत्यङ्गदव्याहृत्तिः ॥ ४५–५० ॥

१ सीतेतीति गो. दृष्टेति रा. पाठः । २ किलिकिलामिति गो. पाठः । ३ अञ्चितायतेति गो. पाठः । ४ चेति गो. पाठः । ५ वानरा वारणोपममिति गो. पाठः । ६ एतदाद्यर्धद्वयं गो. नास्ति ।

त्वत्प्रसादात्समेष्यामः सिद्धार्था राघवेण ह । अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः॥ ४७ ॥
दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी । दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम् ४८
ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः । परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ॥ ४९ ॥
उपविष्टा गिरेस्तस्य शिलासु विपुलासु ते । श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ॥ ५० ॥
दर्शनं चापि लङ्कायाः सीताया रावणस्य च । तस्थुः प्राञ्जलयः सर्वे हनूमद्वदनोन्मुखाः ॥ ५१ ॥
तस्थौ तत्राङ्गदः श्रीमान्वानरैर्बहुभिर्वृतः । उपास्यमानो [2]विविधैर्दिवि देवपतिर्यथा ॥ ५२ ॥
हनूमता कीर्तिमता यशस्विना तथाङ्गदेनाङ्गदनद्धबाहुना ।
मुदा तदाध्यासितमुन्नतं महन्महीधराग्रं ज्वलितं श्रियाऽभवत् ॥ ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ।

कपिसेनया समुपविष्टेन जाम्बवता पृष्टो हनुमान्मैनाकावलोकनलङ्कागमनजानकीदर्शनपुनरागमनादि सकलवृत्तं व्यासेन निवेदयति ।

ततस्तस्य गिरेः [3]शृङ्गं महेन्द्रस्य [4]महाबलः । हनुमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् ॥ १ ॥
[5]प्रीतिमत्सूपविष्टेषु वानरेषु महात्मसु । तं ततः प्रतिसंहृष्टः प्रीतियुक्तं महाकपिम् ॥ २ ॥

४७-५१] ति० टी०-समेष्यामः संगता भविष्यामः । अहो इति । तव स्वामिभक्त्यादिकमाश्चर्यमित्यर्थः ॥४७-५१॥

रा० टी०-अहो इति । ते भक्त्यादिरहो आश्चर्यम् । दिष्ट्या भाग्योदयेन रामपत्नी त्वया दृष्टा ॥ ४७ ॥

रा० टी०-दिष्ट्येति । दिष्ट्या अस्मद्भाग्योदयेन काकुत्स्थो रामः शोकं त्यक्ष्यति ॥ ४८ ॥

रा० टी०-तत इति । अङ्गदप्रभृतीन् परिवार्य प्रमुदिताः वानराः विपुलाः विस्तीर्णाः शिलाः भेजिरे स्थित्यर्थं प्रापयामासुः ॥ ४९ ॥

रा० टी०-उपविष्टा इति । गिरेः शिलासु उपविष्टाः समुद्रलङ्घनादीनि श्रोतुकामाः अत एव हनुमद्वदनोन्मुखाः सर्वे अङ्गदप्रभृतयः तस्थुः । श्लोकद्वयमेकान्वयि ॥ ५० ॥५१॥

५२] ति० टी०-विविधैर्देवैरुपास्यमान इत्यर्थः ॥ ५२ ॥

रा० टी०-स्थितिप्रकारं बोधयन्नाह-तस्थाविति । विविधैर्देवैरुपास्यमानो देवपतिरिवाङ्गदस्तस्थौ ॥ ५२ ॥

५३] ति० टी०-कीर्तिमता हनुमता यशस्विनाङ्गदेनेत्यर्थः । ज्वलितं युक्तम् ॥ ५३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०-हनुमतेति । कीर्तिमता हनुमता यशस्विना अङ्गदनद्धबाहुना अङ्गदेन च अध्यासितम् अधिष्ठितमुन्नतं महीधराग्रं श्रिया शोभया ज्वलितं प्रकाशितमभवत् ॥ ५३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तपञ्चाशत्तमः सर्गः ॥ ५७ ॥

गो० टी०-हनूमतेति । कीर्तिमतेति हनुमद्विशेषणम् । यशस्विनेत्यङ्गदविशेषणम् । भृत्यकीर्त्या स्वामिनः कीर्तिः । अन्यथा पौनरुक्त्यात् । यद्वा बुद्धिमत्त्वजन्या कीर्तिः । शौर्यजन्यं यशः ॥ ५१

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१-२] ति० टी०-हनुमत्प्रमुखाः परस्परं मिलिता इति शेषः ॥ १ ॥ २ ॥

रा० टी०-वानराणां वृत्तान्तमाह-तत इत्यादिभिः । महेन्द्रस्य गिरेः शृङ्गे स्थिताः हनुमत्प्रमुखाः उत्तमां प्रीतिं जग्मुः ॥ १ ॥

गो० टी०-ततस्तस्येत्यादि ॥ १ ॥

रा० टी०-प्रीतीति । वानरेषु सुपविष्टेषु सत्सु प्रीतिसंहृष्टो जाम्बवान् कार्यवृत्तान्तं रामकार्यविषयकवृत्तम् अनिलात्मजमपृच्छत् । सार्धश्लोक एकान्वयी ॥ २ ॥

१ अर्धमेतत् गो. नास्ति । २ विबुधैरिति गो. पाठः । ३ शृङ्गे इति रा. पाठः । ४ महाबला इति गो. रा. पाठः । ५ अर्धमेतत् गो. नास्ति ।

जाम्बवान्कार्यवृत्तान्तमपृच्छदनिलात्मजम् । कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ॥ ३ ॥
तस्यां चापि कथं वृत्तः क्रूरकर्मा दशाननः । तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ॥ ४ ॥
संमार्गिता कथं देवी किं च सा प्रत्यभाषत । श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥ ५ ॥
यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् । रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ॥ ६ ॥
स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः । नमस्यञ्शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ७ ॥
प्रत्यक्षमेव भवतां महेन्द्राग्रात्खमाप्लुतः । उदधेर्दक्षिणं पारं काङ्क्षमाणः समाहितः ॥ ८ ॥
गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् । काञ्चनं शिखरं दिव्यं पश्यामि सुमनोहरम् ॥ ९ ॥
स्थितं पन्थानमावृत्य मेने विघ्नं च तं नगम् । उपसंगम्य तं दिव्यं काञ्चनं नगमुत्तमम् ॥ १० ॥
कृता मे मनसा बुद्धिर्भेत्तव्योऽयं मयेति च । प्रहृतस्य मया तस्य लाङ्गूलेन महागिरेः ॥ ११ ॥
शिखरं सूर्यसंकाशं व्यशीर्यत सहस्रधा । व्यवसायं च तं बुद्ध्वा सहोवाच महागिरिः ॥ १२ ॥
पुत्रेति मधुरां वाणीं मनः प्रह्लादयन्निव । पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः ॥ १३ ॥
मैनाकमिति विख्यातं निवसन्तं महोदधौ । पक्षवन्तः पुरा तत्र बभूवुः पर्वतोत्तमाः ॥ १४ ॥

गो० टी०–तमिति । कार्यवृत्तान्तं कार्यविषयवृत्तान्तम् सीतादर्शनविषयवृत्तान्तम् ॥ २ ॥

३] ति० टी०–कार्यविषयं वृत्तान्तम् ॥ ३ ॥

रा० टी०–तत्प्रश्नाकारमाह–कथमित्यादिभिः । देवी सीता तत्र लङ्कायां त्वया कथं दृष्टा दशाननो रावणः तस्यां सीतायां कथं वृत्तः प्रवृत्तः सेवते इत्यर्थः, एतत्सर्वं नस्त्वं तत्त्वतः प्रब्रूहि । सार्धश्लोक एकान्वयी ॥ ३ ॥ ४ ॥

गो० टी०–कथमिति । कथं केन प्रकारेण । कथंवृत्तः कीदृग्व्यापारः ॥ ३ ॥

४–५] ति० टी०–कथंवृत्तः कीदृग्व्यापारः ॥ ४ ॥ ५ ॥

रा० टी०–संमार्गितेति । देवी कथं संमार्गिता अन्वेषिता श्रुतार्थाः वयं कार्यविनिश्चयं कथं चिन्तयिष्यामः ॥ ५ ॥

गो० टी०–तत्त्वत इति । तत्त्वकथनस्य प्रयोजनमाह—श्रुतार्था इत्यादि ॥ ४ ॥

६–८] ति० टी०–चिन्तनीयनिश्चयमेवाह—यश्चेति । रक्षितव्यं रामसंनिधौ गोपनीयम् अवक्तव्यमिति यावत् । अवक्तव्यं च यत्तच्चिन्तयिष्यामः, अतस्तत्पृष्टं सर्वमात्मवान्भवान्व्याकरोतु ॥ ६—८ ॥

रा० टी०–य इति । तत्र रामसमीपे गतैः प्राप्तैरस्माभिः योऽर्थो वक्तव्यः यच्च रक्षितव्यं न वक्तव्यमित्यर्थः तद्भवान् व्याकरोतु कथयतु ॥ ६ ॥

गो० टी०–यश्चेति । तत्र रामसन्निधौ योऽर्थो वक्तव्यः वक्तुमर्हः यच्च रक्षितव्यं गोपनीयं तत् आत्मवान् बुद्धिमान् भवान्व्याकरोतु ॥ ५ ॥ ६ ॥

रा० टी०–स इति । तेन जाम्बवता नियुक्तः प्रेरितः स मनुमान् सीतायै नमस्यन् प्रत्यभाषत ॥ ७ ॥

गो०टी०–तत्प्रतिभाषणाकारमाह–प्रत्यक्षमित्यादिभिः। उदधेः सागरस्य परं पारं काङ्क्षमाणः प्राप्त्यर्थेनेच्छन्नहं भवतां प्रत्यक्षमेव खमाप्लुतः प्राप्तः ॥ ८ ॥

गो० टी०–प्रत्यक्षमेवेति । इदं न वक्तव्यमेवेति भावः । आप्लुतः आप्लुतोऽस्मि पारं गन्तुमिति शेषः । समाहितः एकाग्रः इत्येतद्भवतां प्रत्यक्षमेवेति संबन्धः ॥ ७ ॥

९]ति० टी०–विघ्नरूपमिवेत्युक्तं तदेवाह–काञ्चनमिति । पश्यामि दृष्टमित्यर्थः । तदाश्चर्यत्वादद्यापि पश्यामीत्यर्थः ॥ ९ ॥

रा० टी०–गच्छत इति । गच्छतो मे घोरं विघ्नरूपमिवाभवत् । अर्धं पृथक् । नन्वं किं तदित्यत आह–काञ्चनमिति । पन्थानमावृत्य स्थितं दिव्यं शिखरं प्रशस्तशिखरवन्तं काञ्चनं नगं पश्यामि अपश्यं तं नगमहं विघ्नं मेने । अर्धद्वयमेकान्वयि ॥ ९ ॥

गो० टी०–गच्छत इत्यादि । विघ्नरूपमिव वस्तुतो न तथेति भावः । पश्यामीत्यादौ व्यत्ययेन लट् । शिखरं विघ्नरूपमिवाभवत् तत् पश्यामीति योजना ॥ ८ ॥

१०-११] ति० टी०–मेने लिङुत्तमपुरुषैकवचनम् । उपसंगम्य प्राप्य ॥ ११ ॥ १२ ॥

रा० टी०–उपेति । काञ्चनं नगमुत्तमं उपसंगम्य अयं नगो मया भेत्तव्यः इति बुद्धिर्निश्चयः मे मनसा कृता ॥ १० ॥

रा० टी०–प्रहृतस्येति । मया लाङ्गूलेन प्रहृतस्य महागिरेः शिखरं सहस्रधा व्यशीर्यत ॥ ११ ॥

गो० टी०–स्थितमिति । मेने इति लिट्युत्तमपुरुषैकवचनं परोक्षत्वाद्यभावेऽपि छान्दसम् । अमनीषीत्यर्थः ॥ ९ ॥

गो० टी०–उपसंगम्येति । गमनदशायामुरसा पातयामासेति सूचितं विवृणोति–भेत्तव्योऽयमित्यादिना ॥ १० –१२ ॥

१२–१४] ति० टी०–व्यवसायं स्वभेदनरूपम् ॥ १२-१४ ॥

१ वा स इति गो. पाठः । २ अर्धमेतत् गो. नास्ति. । ३ प्रणम्येति गो. पाठः । ४ प्रहृतं चेति गो. पाठः । ५ पुत्रेति गो. पाठः ।

छन्दतः पृथिवीं चेरुर्बाधमानाः समन्ततः । श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः ॥ १५ ॥
वज्रेण भगवान्पक्षौ चिच्छेदैषां सहस्रशः । अहं तु मोचितस्तस्मात्तव पित्रा महात्मना ॥ १६ ॥
मारुतेन तदा वत्स प्रक्षिप्तो वैरुणालये । राघवस्य मया साह्ये वर्तितव्यमरिंदम ॥ १७ ॥
रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः । एतच्छ्रुत्वा मया तस्य मैनाकस्य महात्मनः ॥ १८ ॥
कार्यमावेद्य चैं गिरेरुद्धतं वै मनो मम । तेन चाहमनुज्ञातो मैनाकेन महात्मना ॥ १९ ॥
स चाप्यन्तर्हितः शैलो मानुषेण वपुष्मता । शरीरेण महाशैलः शैलेन च महोदधौ ॥ २० ॥
उत्तमं जवमास्थाय शेषमध्वानमास्थितः । ततोऽहं सुचिरं कालं जवेनाभ्यगमं पथि ॥ २१ ॥
ततः पश्याम्यहं देवीं सुरसां नागमातरम् । समुद्रमध्ये सा देवी वचनं चेदमब्रवीत् ॥ २२ ॥
मम भक्ष्यः प्रदिष्टस्त्वममरैर्हरिसत्तम । तंतस्त्वां भक्षयिष्यामि विहितस्त्वं हि मे सुरैः ॥ २३ ॥
एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः । विवर्णवदनो भूत्वा वाक्यं चेदमुदीरयन् ॥ २४ ॥
रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् । लक्ष्मणेन सह भ्रात्रा सीतया च परंतप ॥ २५ ॥

रा० टी०–व्यवसायमिति । व्यवसायं मत्कर्तृकस्वभेदनयनं बुद्धा मनः प्रह्लादयन्नेव हे पुत्र ! मातरिश्वनो वायोः सखायम् अत एव पितृव्यं महोदधौ निवसन्तं मैनाकमिति विख्यातं मां विद्धि जानीहि इति मधुरां वाणीं स गिरिरुवाच। अर्धचतुष्टयमेकान्वयि ॥ १२ ॥ १३ ॥

रा० टी०–तत्र निवासे कारणमाह–पक्षवन्त इति । पर्वतोत्तमाः पूर्वं पक्षवन्तो बभूवुः अत एव बाधमानाः सन्तः छन्दतः स्वाधीनतया पृथिवीं समन्ततश्चेरुः ॥ १४ ॥

रा० टी०–पितृव्यं चेति । पितृव्यत्वे हेतुमाह—सखायमिति । पितृसखत्वात् पितृव्यत्वव्यपदेश इत्यर्थः ॥ १३ ॥

गो० टी०–पक्षवन्त इति । छन्दतः यथेच्छम्॥१४॥१५॥

१५–१६] ति० टी०–छन्दतः स्वेच्छयेत्यर्थः । चरितं प्रजाबाधनरूपम् ॥ १५ ॥ १६ ॥

रा० टी०–श्रुत्वेति । महेन्द्रो नगानां चरितं श्रुत्वा वज्रेण पक्षौ चिच्छेद ॥ १५ ॥

रा० टी०–अहमिति । तदा तस्मिन् समये तव पित्रा अहं वरुणालये प्रक्षिप्तः अत एव तस्मात्पक्षच्छेदात् मोचितः१६

गो० टी०–अहं त्विति । मोक्षणप्रकारमाह–प्रक्षिप्तोऽस्मि महार्णव इति ॥ १६ ॥

१७] ति० टी०–मोचनप्रकारमाह—मारुतेनेति । साह्ये साहाय्ये ॥ १७ ॥

रा० टी०–राघवस्येति । धर्मभृतां श्रेष्ठः यो रामः तस्य राघवस्य साह्ये साहाय्ये मया वर्तितव्यम् ॥ १७ ॥

गो० टी०–रामस्य चेति । साह्ये साहाय्ये । साहाय्यकरणे हेतुमाह—रामो धर्मभृतां श्रेष्ठ इति ॥ १७ ॥

१८] ति० टी०–तत्र हेतुः—धर्मभृतां श्रेष्ठत्वादि ॥१८॥

रा० टी०–एतदिति । मैनाकस्यैतद्वचः श्रुत्वा मया कार्यं कर्तव्यमावेद्य बोधयित्वा विद्यमानस्य मम मनः उद्धतं प्रवृद्धमभवदिति शेषः ॥ १८ ॥

गो० टी०–एतच्छ्रुत्वेति । उद्यतम् उद्युक्तम् ॥ १८ ॥

१९] ति० टी०–उद्धतमग्रे चलितम् ॥ १९ ॥

रा० टी०–तेनेति । तेन मैनाकेन अहमनुज्ञातः सागरप्लवनाय आज्ञापितोऽभवमिति शेषः । अर्धं पृथक् ॥ १९ ॥

गो० टी०–तेन चेति । अनुज्ञातः अस्मीति शेषः । वपुष्मता पुष्कलवपुषा मानुषेण शरीरेणान्तर्हितः । शैलेन तु शरीरेण महोदधौ सागरोपरि स्थित इति शेषः । स वै दत्तवरः शैलो बभूवावस्थितस्तथेति प्रथमसर्गोक्तेः । प्रतिप्रयाणे च—पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवानित्युक्तम् । हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलीति रामेण चोक्तम् ॥ १९–२५ ॥

२०–२२] ति० टी०–सशैलो मानुषेण वपुष्मता प्रशस्तेन शरीरेण महाशैलोऽन्तर्हितः । शैलेन शिलारूपेण च महोदधावन्तर्हित इत्यन्वयः ॥ २०–२२ ॥

रा० टी०–स इति । वपुष्मता शोभनावयवविशिष्टेन शैलेन शिलामयेन मानुषेण मनुष्याकृतिना शरीरेणोपलक्षितः महान्तः शैलाः गिरयो यस्य गिरीणां राजेत्यर्थः, शैलः स मैनाकः महोदधौ अन्तर्हितः ॥ २० ॥

रा०टी०–उत्तममिति । उत्तमं जवं वेगमास्थाय शेषमवशिष्टमध्वानमास्थितोऽभवमिति शेषः, पथि तस्मिन् मार्गे सुचिरं कालमभ्यगमं च ॥ २१ ॥

रा० टी०–तत इति । ततोऽनन्तरं नागमातरं सुरसां समुद्रमध्ये अहं पश्यामि अपश्यं सा सुरसा चेदमब्रवीत्॥२२॥

२३–२५] ति० टी०–प्रदिष्टः विहित इत्यर्थः । विहितः प्रापित इत्यर्थः ॥ २३–२५ ॥

रा० टी०–तद्वचनाकारमाह–ममेति । अमरैः मम भक्ष्यः

१ चिच्छेद भगवान्पक्षान्वज्रेणेति गो. पाठः । २ ऽस्मि महार्णवे इति गो. पाठः । ३ रामस्य चेति गो. पाठः । ४ महात्मनेति रा. पाठः । ५ तु गिरेरुद्धतं चेति गो. पाठः । ६ वेगेनेति गो. पाठः । ७ मामभाषतेति गो. पाठः । ८ भक्ष इति गो. पाठः । ९ अत इति गो. पाठः । १० चिरस्य मे इति गो. पाठः । ११ उदीरयमिति गो. पाठः ।

तस्य सीता हृता भार्या रावणेन दुरात्मना । तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात्॥ २६ ॥
कर्तुमर्हसि रामस्य साहाय्यं विषये सति । अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ २७ ॥
आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते । एवमुक्ता मया सा तु सुरसा कामरूपिणी ॥ २८ ॥
अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम । एवमुक्तः सुरसया दशयोजनमायतः ॥ २९ ॥
ततोऽर्धगुणविस्तारो बभूवाहं क्षणेन तु । मत्प्रमाणाधिकं चैव व्यादितं तु मुखं तया ॥ ३० ॥
तं दृष्ट्वा व्यादितं त्वास्यं ह्रस्वं ह्यकरवं पुनः । तस्मिन्मुहूर्ते च पुनर्बभूवाङ्गुष्ठसंमितः ॥ ३१ ॥
अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् । अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः ॥ ३२ ॥
अर्थसिद्धौ हरिश्रेष्ठ गच्छ सौम्य यथासुखम् । समानय च वैदेहीं राघवेण महात्मना ॥ ३३ ॥
सुखी भव महाबाहो प्रीतास्मि तव वानर । ततोऽहं साधुसाध्वीति सर्वभूतैः प्रशंसितः ॥ ३४ ॥
ततोऽन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा । छाया मे निगृहीता च न च पश्यामि किंचन ॥ ३५ ॥

त्वं प्रदिष्टः ततः तस्माद्धेतोः त्वं सुरैर्विहितः प्रापितोऽतस्त्वां भक्षयिष्यामि ॥ २३ ॥

रा० टी०–एवमिति । सुरसया एवमुक्तोऽहम् इदमुदीरयमुदैरयम् ॥ २४ ॥

रा० टी०–तदाकारमाह–राम इत्यादिभिः ॥ २५ ॥

२६] ति० टी०–सकाशं समीपम् ॥ २६ ॥

रा० टी०–तस्येति । रामशासनात् गमिष्ये ॥ २६ ॥

२७-२८] ति० टी०–विषये सति तदीयदेशे सति विद्यमाने । मैथिलीदर्शननिवेदनार्थं रामं च दृष्ट्वा ॥ २७॥२८ ॥

रा० टी०–कर्तुमिति । विषये रामदेशे सति हे विद्यमाने साहाय्यं कर्तुमर्हसि। अर्थं पृथक्। ननु रामादहं न बिभेमीति त्वां भक्षयिष्याम्येवेत्यत आह–अथवेति । प्रतिशृणोमि प्रतिज्ञां करोमि । अर्धद्वयमेकान्वयि ॥ २७ ॥

रा० टी०–एवमिति । एष वरः देवानामिति शेषः॥२८॥

गो० टी०–कर्तुमिति । विषये सती स्वराज्ये वसन्ती ॥ २६–२८ ॥

२९] ति० टी०–नातिवर्तेत नातिक्रमेत । मां प्राप्तः । मदाहारतां प्राप्तो न गच्छेदित्यर्थः ॥ २९ ॥

३०] ति० टी०–अर्धगुणविस्तारोऽर्धस्य दशयोजनार्धस्य पञ्चयोजनस्य गुण आवृत्तिस्तद्विस्तारः । दशयोजनविस्तार इति यावत् । पूर्वं दशयोजनविस्तारोक्त्याऽऽनुगुण्येनैवं व्याख्यातम् ॥ ३० ॥

रा० टी०–एवमिति । दशयोजनमायतः स्वाभाविकदशयोजनविस्तृतोऽहं यस्मिन् काले सुरसया एवमुक्तस्तस्मिन् काले अर्धगुणविस्तारः पञ्चयोजनविस्तृतो बभूव तया सुरसया तु क्षणेनैव मत्प्रमाणाधिकं मत्प्रमाणादधिकं मुखं व्यादितं तदास्यं व्यादितं दृष्ट्वा अहं ह्रस्वं सूक्ष्मरूपमकरवम् ॥ २९ ॥ ३० ॥

गो० टी०–एवमुक्त इति । तत इति । अर्धगुणविस्तारः अत्रार्धशब्दः एकदेशवाची । किंचिदधिकविस्तारोऽभवमित्यर्थः । एवमेवार्थः प्रथमसर्गोक्तशतयोजनविस्तारस्तु विरुद्धः तद्ग्रन्थः कल्पितश्चेत्युक्तम् । मत्प्रमाणेति । व्यादितं व्यात्तम् ॥ २९ ॥

३१-३२] ति० टी०–ह्रस्वम् स्वशरीरमिति शेषः । तदेवाह—अङ्गुष्ठसंमित इति । देह इति शेषः ॥ ३१ ॥ ३२ ॥

रा० टी०–तस्मिन्निति । अङ्गुष्ठसंमितः योऽहं बभूव सः तद्वक्त्रमभिपत्य प्रविश्य क्षणात्निर्गतोऽस्मि । अर्धद्वयमेकान्वयि ॥ ३१ ॥

रा० टी०–अब्रवीदिति । स्वेन रूपेणोपलक्षिता देवी सुरसा मामब्रवीत् । अर्थं पृथक् ॥ ३२ ॥

गो० टी०–तदृष्ट्वेति । ह्रस्वत्वं विशेषयति—अङ्गुष्ठमात्रक इति ॥ ३० ॥ ३१ ॥

३३] ति० टी०–समानय मेलय ॥ ३३ ॥

रा० टी०–तद्वचनाकारमाह–अर्थेति । हे हरिश्रेष्ठ ! त्वं गच्छ वैदेहीं समानय संयोजय । सार्धश्लोक एकान्वयी ॥३३॥

गो० टी०–अर्थसिद्ध्या इति । समानय संयोजय ॥३३॥

३४-३५] ति० टी०–साधुसाध्वीति । अत्र दीर्घ आर्षः ॥ ३४ ॥ ३५ ॥

रा० टी०–तत इति । ततोऽनन्तरं साधु साध्वीति प्रशंसितोऽहं विपुलमन्तरिक्षं गरुड इव प्लुतः । साध्वीति दीर्घ आर्ष इति भट्टाः, विस्मयार्थेऽकारप्रश्लेषे तु नार्षकल्पना ॥३४॥

रा० टी०–छायेति । मे छाया निगृहीता कयाचिदिति शेषः, अतोऽहं किंचित्न पश्यामि । अर्थं पृथक् ॥ ३५ ॥

गो० टी०–ततोऽहमिति । साधु साध्वीति दीर्घश्छान्दसः ॥ ३३–३६ ॥

---

१ सती इति गो. पाठः । २ प्रमाणानुरूपं चेति गो. प्रमाणाधिकश्चैवेति रा. पाठः । ३ तमिति रा. पाठः । ४ चेति गो. पाठः । ५ मात्रक इति गो. पाठः । ६ सिद्धयै इति गो. रा. पाठः ।

सोऽहं विगतवेगस्तु दिशो दश विलोकयम् । न किंचित्तत्र पश्यामि येन मे[1] विहता गतिः ॥ ३६ ॥
अथ[2] मे बुद्धिरुत्पन्ना किंनाम गमने[3] मम । ईदृशो विघ्न उत्पन्नो रूपमत्र न दृश्यते ॥ ३७ ॥
अधोभागे तु[4] मे दृष्टिः शोचतः[5] पतिता तदा । तत्राद्राक्षमहं भीमां राक्षसीं सलिलेशयाम् ॥ ३८ ॥
प्रहस्य च महानादमुक्तोऽहं भीमया तया । अवस्थितमसंभ्रान्तमिदं वाक्यमशोभनम् ॥ ३९ ॥
क्वासि गन्ता महाकाय क्षुधिताया ममेप्सितः[6] । भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ॥ ४० ॥
बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः । आस्यप्रमाणादधिकं तस्याः कायमपूरयम् ॥ ४१ ॥
तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे । न तु[7] मां सा नु बुबुधे मम वा विकृतं[8] कृतम् ॥ ४२ ॥
ततोऽहं विपुलं रूपं संक्षिप्य निमिषान्तरात् । तस्या हृदयमादाय प्रपतामि नभःस्थलम्[9] ॥ ४३ ॥
सा विसृष्टभुजा भीमा पपात लवणाम्भसि[10] । मया पर्वतसंकाशा निकृत्तहृदया सती ॥ ४४ ॥
शृणोमि खगतानां च वाचः[11] सौम्या महात्मनाम् । राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ॥ ४५ ॥

३६-३८] ति० टी०-येन गतिर्विहता तत्किंचित्र पश्यामि नापश्यमित्यन्वयः ॥ ३६-३८ ॥

रा० टी०-स इति । येन मे गतिर्विहता तत् किंचित्र पश्यामि ॥ ३६ ॥

रा० टी०-अथेति । अथानन्तरं मे बुद्धिः चिन्तोत्पन्ना तदाकारमाह-अत्र यस्य रूपं न दृश्यते ईदृशः उत्पन्नः गमने विघ्नः किं नाम किंनामा ॥ ३७ ॥

रा० टी०-अध इति । शोचतो मम दृष्टिः अधोभागे पतिता तत्राधोभागे सलिलेशयां राक्षसीमद्राक्षम ॥ ३८ ॥

गो० टी०-अधोभागेनेति।सलिलेशयां सलिले स्थिताम३७

३९] ति० टी०-अवस्थितं निश्चेष्टम् । तथाप्यसंभ्रान्तं भयहीनं मां लक्षीकृत्येदं वाक्यमहमुक्तः इत्यन्वयः ॥ ३९ ॥

रा० टी०-प्रहस्येति । अवस्थितं निश्चेष्टतया विद्यमानमप्यसंभ्रान्तं मामालक्ष्येति शेषः, महानादं यथा भवति तथा प्रहस्य इदं तयाऽहमुक्तः ॥ ३९ ॥

गो० टी०-प्रहस्येति । अवस्थितं दृढभूतम् । असंभ्रान्तम् अव्ययम् ॥ ३८ ॥ ३९ ॥

४०] ति० टी०-ममेप्सितो भक्षस्त्वम्, अतो मे देहं प्रीणयेत्यन्वयः ॥ ४० ॥

रा० टी०-तद्वचनाकारमाह-क्वेति । क्षुधितायाः ममेप्सितो भक्ष्यस्त्वं क्व गन्तासि न गच्छेत्यर्थः । ननु किं करोमीत्यत आह-मे देहं प्रीणय तर्पय ॥ ४० ॥

४१] ति० टी०-प्रत्यगृह्णामङ्गीकृतवान् । तस्या आस्यप्रमाणादधिकं भवति यथा तथात्मनः कायमपूरयमवर्धयम४१

रा० टी०-बाढमिति । बाढमित्युक्त्वा तां वाणीं प्रत्यगृह्णाम् अतिष्ठमित्यर्थः । तस्याः आस्यप्रमाणात् अधिकं यथा भवति तथा कायं स्वशरीरम् अपूरयमवर्धयं च ॥ ४१ ॥

गो० टी०-बाढमिति । तस्याः आस्यप्रमाणादधिकं यथा तथा कायम् आत्मदेहम् अपूरयम् अवर्धयम् । मयि वृद्धे साप्यवर्धिष्टेत्यर्थः ॥ ४० ॥

४२] ति० टी०-मां सा न बुबुधे अयं कामरूपी सर्वविघ्ननिर्दलन इति मां न ज्ञातवतीत्यर्थः । मम कृतं विकृतं मया कृतं विकृतं विकारस्वरूपं वक्ष्यमाणसूक्ष्मरूपत्वं च न बुबुधे ॥४२॥

रा० टी०-तस्या इति । तस्याः आस्यं मुखं मम भक्षणे वर्धते सा तु मां मत्सामर्थ्यमित्यर्थः, न बुबुधे आविष्कृतं प्रकटितं मम कृतं रूपं च न बुबुधे ॥ ४२ ॥

गो० टी०-न चेति । अयं कामरूपीति माम् साधु सम्यक् न बुबुधे न ज्ञातवती । मम कृतं निकृतं मया कृतां निकृतिं वा न बुबुधे ॥ ४१ ॥

४३] ति० टी०-तदेवाह—तत इति । आदाय कर्तित्वा । प्रपतामि प्रापतम् ॥ ४३ ॥

रा० टी०-यत्र बुबुधे तद्रूपमाह-तत इति । ततोऽनन्तरं विपुलं बृहद्रूपं स्वशरीरं संक्षिप्य सूक्ष्मीकृत्य तस्याः हृदयमादाय संशोध्य ताडनेन हिंसाया अयोग्यं कृत्वेत्यर्थः नभस्तलं प्रयतामि प्रायतम् ॥ ४३ ॥

गो० टी०-निकृतिमेव दर्शयति-ततोऽहमिति ॥ ४२ ॥

४४] ति० टी०-विसृष्टभुजा विप्रकीर्णभुजा ॥ ४४ ॥

रा० टी०-सेति । मयाऽतिकृत्तहृदया ताडितान्तरा अत एव विसृष्टौ विकीर्णौ भुजौ यस्याः सा असती लवणाम्भसि निपपात ॥ ४४ ॥

गो० टी०-सेति । विसृष्टभुजा विसृष्टसन्धिकभुजा ॥४३॥

४५] ति० टी०-सिंहिका हनुमता हतेति युगतानां वाचः शृणोमि श्रुताः ॥ ४५ ॥

रा० टी०-शृणोमीति । सिंहिका राक्षसी हनुमता हता ताडितेति खगतानां महात्मनां वाचः शृणोमि अश्रुणवम्॥४५॥

१ऽपहृतेति गो. पाठः । २ तत इति गो. पाठः । ३ गगने इति गो. पाठः । ४ रूपं यत्रेति गो. पाठः । ५ नेति गो. पाठः । ६ शोचता पातितामयेति गो. पाठः । ७ ततोऽद्राक्षमिति गो. पाठः । ८ च मा साध्विति गो. पाठः । ९ निकृतमिति गो. विष्कृतमिति रा. पाठः । १० नभस्तलमिति रा. पाठः । ११ सिद्धानां चारणैः संहति गो. पाठः ।

तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् । गत्वा [1]च महदध्वानं पश्यामि नगमण्डितम् ॥ ४६ ॥
दक्षिणं तीरमुदधेर्लङ्का यत्र [2]गता पुरी । अस्तं दिनकरे याते रक्षसां निलयं [3]पुरीम् ॥ ४७ ॥
प्रविष्टोऽहमविज्ञातो रक्षोभिर्भीमविक्रमैः । तत्र प्रविशतश्चापि कल्पान्तघनसंप्रभा ॥ ४८ ॥
अट्टहासं विमुञ्चन्ती नारी काप्युत्थिता पुरः । जिघांसन्तीं ततस्तां तु ज्वलदग्निशिरोरुहाम् ॥ ४९ ॥
सव्यमुष्टिप्रहारेण पराजित्य सुभैरवाम् । प्रदोषकाले प्रविशं भीतयाऽहं तयोदितः ॥ ५० ॥
अहं लङ्कापुरी वीर निर्जिता विक्रमेण ते । यस्मात्तस्माद्विजेतासि सर्वरक्षांस्यशेषतः ॥ ५१ ॥
तत्राहं सर्वरात्रं तु विचरञ्जनकात्मजाम् । रावणान्तःपुरगतो न चापश्यं सुमध्यमाम् ॥ ५२ ॥
ततः सीतामपश्यंस्तु रावणस्य निवेशने । शोकसागरमासाद्य न पारमुपलक्षये ॥ ५३ ॥
शोचता च मया दृष्टं प्राकारेणाभिसंवृतम् । काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ५४ ॥
सप्राकारमवप्लुत्य पश्यामि बहुपादपम् । अशोकवनिकामध्ये शिंशपापादपो महान् ॥ ५५ ॥

गो० टी०–शृणोमीति । हतेत्यनन्तरमितिकरणं बोध्यम् ॥ ४४ ॥

४६–४८] ति० टी०–आत्ययिकं जातकालविलम्बम् । कृत्यं सीतादर्शनं स्मरन्नेव महदध्वानं गत्वोदधेर्दक्षिणं तीरं पश्यामि दृष्टवान् ॥ ४६–४८ ॥

रा० टी०–तामिति । तां हत्वा आत्ययिकं प्राप्तविलम्बमित्यर्थः, कृत्यं कार्यं स्मरन् सन् महदध्वानं गत्वा नगैः पर्वतैः मण्डितं यत्र लङ्कापुरी तत् उदधेर्दक्षिणं तीरं पश्यामि । सार्धश्लोक एकान्वयी ॥ ४६ ॥

रा० टी०–अस्तमिति । रक्षोभिः अविज्ञातोऽहं पुरीं लङ्कां प्रविष्टः ॥ ४७ ॥

रा० टी०–तत्रेति । तत्र लङ्कायां प्रविशतो मम पुरः अग्रे कल्पान्तघनसंनिभा एका नारी उत्थिता ॥ ४८ ॥

गो० टी०–तामिति । कृत्यमात्ययिकं स्मरन् । प्राणान्तिकं तत्कर्म विचिन्तयन्नित्यर्थः ॥ ४६—४८ ॥

४९] ति० टी०–मां जिघांसन्तीम् । ज्वलदग्नितुल्यकेशपाशाम् ॥ ४९ ॥

रा० टी०–जिघांसन्तीमिति । जिघांसन्तीं तां सव्यमुष्टिप्रहारेण पराजित्य तया उदितः कथितवृत्तान्तोऽहं प्रविशं प्राविशम् । सार्धश्लोक एकान्वयी ॥ ४९ ॥ ५० ॥

५०–५१] ति० टी–सुभैरवामतिशयेन भयंकररूपाम् । प्रविशं प्राविशम् ॥ ५० ॥ ५१ ॥

रा० टी०–तद्वचनाकारमाह–अहमिति । यस्मात् ते त्वया अहं निर्जिता तस्मात् सर्वरक्षांसि त्वं विजेताऽसि॥५१॥

गो० टी०–भीतयेत्यादि भीतया तया नार्या । अशेषत इत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ४९ ॥ ५० ॥

५२] ति० टी०–सर्वरात्रं सर्वां रात्रीम् । अल्पशेषायां रात्रावशोकवनिकायां दर्शनादेवमुक्तिः ॥ ५२ ॥

रा० टी०–तत्रेति । तत्र लङ्कायां सर्वरात्रं विचरन् सन् रावणान्तःपुरगतोऽहं जनकात्मजां नापश्यम् ॥ ५२ ॥

गो० टी०–तत्रेति । सर्वरात्रं सर्वां रात्रिम् । "अहः सर्व—" इत्यादिना समासान्तोऽच् । अत्यन्तसंयोगे द्वितीया । तत्र लङ्कायाम् । विचिन्वन् अनन्तरं रावणान्तःपुरमपि गतः सन् सुमध्यमां नापश्यम् ॥ ५१ ॥ ५२ ॥

५३] ति० टी०–उपलक्षय उपालक्षयम् ॥ ५३ ॥

रा० टी०–तत इति । रावणस्य निवेशने सीतामपश्यन्नहं शोकसागरमासाद्य पारं तं नोपलक्षये ॥ ५३ ॥

५४] ति० टी०–विकृष्टेन विप्रकृष्टोर्ध्वभागेन अत्युच्चेनेति यावत् । तादृशेन प्रासादेनावृतं किंचित्स्थानं मया दृष्टम् ॥ ५४ ॥

रा० टी०–शोचतेति । विकृष्टेन प्रकृष्टोर्ध्वभागेन प्राकारेण अभिसंवृतम् उत्तमं गृहोपवनं मया दृष्टम् ॥ ५४ ॥

गो० टी०–शोचता चेति । विकृष्टेन विप्रकृष्टेन अतिदीर्घेणेति यावत् ॥ ५३ ॥

५५] ति० टी०–ततः प्राकारमवप्लुत्य बहुपादपं गृहोपवनमुद्यानं पश्याम्यपश्यम् । महान्पादपो दृष्ट इति शेषः॥५५॥

रा० टी०–स इति । स दृष्टोपवनोऽहं बहवः पादपाः यत्समीपे तं प्राकारमवप्लुत्य अशोकवनिकामध्ये यो महान् शिंशुपापादपः तमारुह्य काञ्चनं काञ्चनवर्णविशिष्टकदलीवर्षं पश्यामि अपश्यम् । सार्धश्लोक एकान्वयी ॥ ५५ ॥

गो० टी०–स प्राकारमिति । बहुपादपम् अनेकपादनप्रमाणमिति प्राकारविशेषणम् ॥ ५४ ॥

---

१ चाहं महाध्वानमिति गो. पाठः । २ च सेति गो. पाठः । ३ पुरमिति गो. पाठः । ४ संनिभेति गो. रा. पाठः । ५ समावृतमिति गो. पाठः ।

तमारुह्य च पश्यामि काञ्चनं कदलीवनम् । अदूराच्छिंशपावृक्षात्पश्यामि वरवर्णिनीम् ॥ ५६ ॥
श्यामां कमलपत्राक्षीमुपवासकृशाननाम् । तदेकवासःसंवीतां रजोध्वस्तशिरोरुहाम् ॥ ५७ ॥
शोकसंतापदीनाङ्गीं सीतां भर्तृहिते स्थिताम् । राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृताम् ॥ ५८ ॥
मांसशोणितभक्ष्याभिर्व्याघ्रीभिर्हरिणीं यथा । सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ ५९ ॥
एकवेणीधरा दीना भर्तृचिन्तापरायणा । भूमिशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ ६० ॥
रावणाद्विनिवृत्तार्था मर्तव्ये कृतनिश्चया । कथंचिन्मृगशावाक्षी तूर्णमासादिता मया ॥ ६१ ॥
तां दृष्ट्वा तादृशीं नारीं रामपत्नीं यशस्विनीम् । तत्रैव शिंशपावृक्षे पश्यन्नहमवस्थितः ॥ ६२ ॥
ततो हलहलाशब्दं काञ्चीनूपुरमिश्रितम् । शृणोम्यधिकगम्भीरं रावणस्य निवेशने ॥ ६३ ॥
ततोऽहं परमोद्विग्नः स्वरूपं प्रत्यसंहरम् । अहं चैव शिंशपावृक्षे पक्षीव गहने स्थितः ॥ ६४ ॥
ततो रावणदाराश्च रावणश्च महाबलः । तं देशमनुसंप्राप्तो यत्र सीताभवत्स्थिता ॥ ६५ ॥

गो० टी०–अशोकेति । शिंशुपापादपः अस्तीति शेषः ॥ ५५ ॥

५६] ति० टी०–पश्यामीति प्राग्वत् । काञ्चनं तद्वर्णम् । अदूराच्छिंशपावृक्षाच्छिंशपावृक्षस्य समीपे ॥ ५६ ॥

५७–५८] ति० टी०–तदेकवासःसंवीतां तेन हरणकाले किष्किन्धायां पूर्वं दृष्टेनैवैकवाससा संवीताम् ॥ ५७ ॥ ५८ ॥

रा० टी०–अदूरादिति । शिंशुपावृक्षात् अदूरात् समीपे वरवर्णिनीं गौराङ्गीं श्यामां नित्यं षोडशवार्षिकत्वेन प्रतीयमानां तत्पौर्वकालिकं यदेकं वासः तेन संवीतां रजसा ध्वस्ताः श्यामाः शिरोरुहाः यस्याः तां भर्तृहिते स्थितां व्याघ्रीभिर्हरिणीमिव राक्षसीभिः अभिसंवृतां सीतामहं पश्यामि अपश्यम् । अर्धषट्कमेकान्वयि ॥ ५६–५८ ॥

गो० टी०–अदूरे शिंशुपावृक्षादित्यादि । शिंशुपावृक्षात् शिंशुपावृक्षस्य । श्यामां यौवनमध्यस्थाम् तदेकवासःसंवीतां येन वाससा हृता तेनैकवाससा संवीताम् यद्वा तेन तत्कालदृष्टेन पूर्वदृष्टेन एकेन वाससा संवीताम् वेषान्तरनिस्स्पृहामित्यर्थः । मानसिकत्वकायिकत्वभेदेन शोकसंतापयोर्भेदः ॥ ५६–५८ ॥

५९–६०] ति० टी०–व्याघ्रीपरिवृतां हरिणीमिव तामपश्यमिति संबन्धः । राक्षसीमध्ये ताभिरेव तर्ज्यमाना सा सदुःखा मया कथंचिदासादितेत्यन्वयः ॥ ५९ ॥ ६० ॥

रा० टी०–सति राक्षसीमध्ये मुहुर्मुहुस्तर्ज्यमाना हिमागमे पद्मिनीव विवर्णाङ्गी रावणात् विनिवृत्तः अर्थः रामसेवा यस्याः अत एव मर्तव्ये मरणे कृतो निश्चयो यया सा सीता कथंचित्तूर्णं मया आसादिता प्राप्ता । सार्धश्लोकद्वयमेकान्वयि ॥ ५९—६१ ॥

गो० टी०–सामयेति । आमयः खेदः तेन सह वर्तत इति सामया । मर्तव्ये मरणे "कृत्यल्युटो बहुलम्" इति साधुः ॥ ५९ ॥ ६० ॥

६१–६२] ति० टी०–रावणादिनिवृत्तो विनिवर्तितोऽर्थः सुखभोगरूपो यया । मर्तव्ये मरणे ॥ ६१ ॥ ६२ ॥

रा० टी०–तामिति । तां रामपत्नीं तादृशीम् उक्ततर्जनादिविशिष्टां दृष्ट्वा पश्यन् वृत्तान्तं निरीक्षमाणोऽहं तत्र तस्मिन् शिंशुपावृक्षे अवस्थितः ॥ ६२ ॥

गो० टी०–तां दृष्ट्वेति । पश्यन् परामृशन् ॥ ६१॥६२ ॥

६३] ति० टी०–शृणोमि श्रुतवान् । रावणस्य निवेशने तत्समीपे । यद्वा निवेशने सीतासमीपं प्रवेशनकाले ॥ ६३ ॥

रा० टी०–तत इति । ततोऽनन्तरं रावणस्य निवेशने अधिकगम्भीरं हलहलाशब्दं शृणोमि अशृणवम् ॥ ६३ ॥

६४–६५] ति० टी०–प्रत्यसंहरं सूक्ष्ममकरवम् । गहने पर्णसमूहगूढप्रदेशे स्थितः ॥ ६४ ॥ ६५ ॥

रा० टी०–तत इति । परमोद्विग्नोऽहं स्वरूपं स्वशरीरं प्रत्यसंहरं सूक्ष्ममकरवं शिंशुपावृक्षे गहने निबिडस्थले स्थितश्चाभवमिति शेषः ॥ ६४ ॥

रा० टी०–तत इति । ततोऽनन्तरं यत्र सीता स्थिताऽभवत् तत्र देशे रावणोऽनुसंप्राप्तः रावणदाराश्च अनुसंप्राप्ता-वचनविपरिणामेनान्यत्राप्यन्वयः ॥ ६५ ॥

गो० टी०–ततोऽहमिति । गहने पर्णगूढप्रदेशे । पर्णघने निलीन इत्यधस्तादप्युक्तेः ॥ ६३—६५ ॥

---

१ अदूरे शिंशुपेति गो. पाठः । २ भक्षाभिरिति गो. पाठः । ३ मर्तव्यकृतनिश्चयेति गो. पाठः । ४ प्रतिसंहरन्निति गो. पाठः । ५ तु शिंशुपेति गो. पाठः । ६ देशं समनुप्राप्तेति गो. पाठः ।

[1]तं दृष्ट्वाथ वरारोहा सीता रक्षोगणेश्वरम् । संकुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ॥ ६६ ॥
[2]त्रस्तां परमोद्विग्नां वीक्षमाणामितस्ततः[3] । त्राणं कंचिदपश्यन्तीं वेपमानां तपस्विनीम् ॥ ६७ ॥
तामुवाच दशग्रीवः सीतां परमदुःखिताम् । अवाक्शिराः प्रपतितो बहुमन्यस्व मामिति ॥ ६८ ॥
यदि चेत्त्वं तु मां दर्पान्नाभिनन्दसि गर्विते । [4]द्विमासानन्तरं सीते पास्यामि रुधिरं तव ॥ ६९ ॥
एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः । उवाच परमक्रुद्धा सीता वचनमुत्तमम् ॥ ७० ॥
राक्षसाधम रामस्य भार्यामिततेजसः । इक्ष्वाकुवंशनाथस्य स्नुषां दशरथस्य च ॥ ७१ ॥
अवाच्यं वदतो जिह्वा कथं न पतिता तव । किंस्विद्वीर्यं तवानार्य यो मां भर्तुरसंनिधौ ॥ ७२ ॥
अपहृत्यागतः पाप तेनादृष्टो महात्मना । न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे॥ ७३ ॥
[5]अजेयः सत्यवाक्शूरो रणश्लाघी च राघवः । जानक्या परुषं वाक्यमेवमुक्तो दशाननः ॥ ७४ ॥
जज्वाल सहसा कोपाच्चितास्थ इव पावकः । विवृत्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् ॥ ७५ ॥
मैथिलीं हन्तुमारब्धः स्त्रीभिर्हाहाकृतं तदा । स्त्रीणां मध्यात्समुत्पत्य तस्य भार्या दुरात्मनः॥ ७६ ॥

६६–७१] ति० टी०–परिरभ्य चेति । वित्रस्तेव बभूवेति शेषः ॥ ६६–७१ ॥

रा० टी०–तमिति । सीता रक्षोगणेश्वरं दृष्ट्वा ऊरू संकुच्य संकोच्य बाहुभ्यां स्तनौ परिरभ्य आच्छाद्येत्यर्थः, अवर्ततेति शेषः ॥ ६६ ॥

रा० टी०–वित्रस्तामिति । कञ्चित्राणं त्राणकारकमपश्यन्तीम् अत एव वित्रस्ताम् अत एव परमोद्विग्नाम् अत एव इतस्ततो वीक्षमाणां तां सीताम् अवाक्शिराः सन् प्रयतितो दशग्रीवः मां बहु अधिकसेवाकर्तृत्वेनाधिकं मन्यस्व दर्पात् मद्दर्पमवलोक्य यदि त्वं मां नाभिनन्दसि तर्हि द्विमासानन्तरं तव रुधिरं पास्यामि इत्युवाच । श्लोकत्रयमेकान्वयि ॥ ६७–६९ ॥

रा० टी०–एतदिति । रावणस्य एतत् रामवियोगस्थितिसूचकं वचः श्रुत्वोवाच ॥ ७० ॥

रा० टी०–तद्वचनाकारमाह—राक्षसेति । हे राक्षसाधम ! रामस्य भार्यां माम् अवाच्यं वदतस्तव जिह्वा कथं न पतिता । सार्धश्लोक एकान्वयी ॥ ७१ ॥

गो०टी०–वित्रस्तामिति । परमोद्विग्नाम् अतीवोद्भ्रान्तहृदयाम् । ततस्ततः वीक्षमाणां नानादिक्षु वीक्षमाणाम् । त्राणमित्यनुषज्यते । अवाक्शिराः अवनतमूर्धा प्रपतितः भूमाविति शेषः । द्वौ मासौ अन्तरमवधिः । ततः पास्यामीति योज्यम् ॥ ६६–७० ॥

७२] ति० टी०–किंस्वित् कुत्सितमित्यर्थः ॥ ७२ ॥

रा० टी०–तव बलवत्त्वादिगर्वोऽपि त्वदज्ञानकृत एवेति बोधयन्ती आह–किमिति । भर्तुरसंनिधौ विद्यमानां मां तेन भर्त्रा अदृष्टस्त्वमपहृत्यागतः अतः अजेयत्वादिविशिष्टो यो राघवः तस्य रामस्य सदृशो न। ननु नाहं स्वस्मिन् रामसादृश्यं वदामि किं तु तव दास्यं प्रार्थयामीत्यत आह–अस्य रामपरिग्रहस्य मम दास्येऽपि त्वं न युज्यसे । अर्धचतुष्टयमेकान्वयि ॥ ७२ ॥ ७३ ॥

गो० टी०–किंचिद्वीर्यमिति । किंचिद्वीर्यं कुत इत्याह—यो मामिति । भर्तुरसंनिधौ तेन भर्त्रा अदृष्टः सन् यो मामपहृत्यागतः तस्य तव किंचिद्वीर्यमिति योज्यम॥७१॥७२॥

७३–७४] ति० टी०–तदसंनिधावपहृत्य तेनादृष्ट इति लङ्कामागतः, अन्यथा तदैव ते हननं स्यादित्यर्थः । सादृश्यसंभावनाऽपि दूरापास्तेत्याह—दास्येऽपीति ॥ ७३ ॥ ७४ ॥

रा० टी०–जानक्येति । जानक्या एवं परुषं वाक्यमुक्तो दशाननः चितास्थः पावक इव जज्वाल ॥ ७४ ॥

गो० टी०–जानक्येति । घोरत्वसिद्ध्यै चितास्थ इत्युक्तम् ॥ ७३ ॥

७५]ति० टी०–चितास्थपावकत्वेनास्पृश्यता सूचिता ७५

रा० टी०–विवृत्येति । नयने विवृत्य दक्षिणं मुष्टिमुद्यम्य मैथिलीं हन्तुमारब्धः रावण इति शेषः, तदा स्त्रीभिर्हाहा कृतम् ॥ ७५ ॥

गो० टी०–विवृत्येति । आरब्धः रावण इति शेषः । हाहाकृतं हा हेत्येतत्कृतम् ॥ ७४ ॥

७६] ति० टी०–हाहाकृतं हाहेति कृतम् ॥ ७६ ॥

रा० टी०–स्त्रीणामिति । तस्य रावणस्य मन्दोदरी नाम या वरा भार्या तया स्त्रीणां मध्यात्समुत्पत्य स रावणः मधुरां वाणीमुक्तः अत एव प्रतिषेधितः । सार्धश्लोक एकान्वयी ॥ ७६ ॥ ७७ ॥

गो० टी०–स्त्रीणामिति । समुत्पत्य रावणसमीपं गतेति शेषः । मण्डोदरी मण्डनभूतोदरी । "मण्डि, भूषायाम्" इत्यस्माद्धातोः पचाद्यच् । मन्दोदरी वा । दडयोरभेदः दम्भो

---

१ तदिति गो. पाठः । २ महाबलमिति गो. पाठः । ३ ततस्तत इति गो. पाठः । ४ द्वौ मासावन्तरमिति गो. पाठः । ५ कुलेति गो. पाठः । ६ किंचिदिति गो. पाठः । ७ यशीयः सत्यवादी चेति गो. पाठः ।

वरा मन्दोदरी नाम तया स प्रतिषेधितः । उक्तश्च मधुरां वाणीं तया स मदनार्दितः ॥ ७७ ॥
सीतया तव किं कार्यं मनेन्द्रसमविक्रम । मया सह रमस्वाद्य मद्विशिष्टा न जानकी ॥ ७८ ॥
देवगन्धर्वकन्याभिर्यक्षकन्याभिरेव च । सार्धं प्रभो रमस्वेति[2] सीतया किं करिष्यसि ॥ ७९ ॥
ततस्ताभिः समेताभिर्नारीभिः स महाबलः । [3]उत्थाप्य सहसा नीतो भवनं स्वं निशाचरः ॥ ८० ॥
याते तस्मिन्दशग्रीवे राक्षस्यो विकृताननाः । सीतां निर्भर्त्सयामासुर्वाक्यैः क्रूरैः सुदारुणैः ॥ ८१ ॥
तृणवद्भाषितं तासां गणयामास जानकी । गर्जितं च तथा तासां सीतां प्राप्य निरर्थकम्॥ ८२ ॥
वृथा गर्जितनिश्चेष्टा राक्षस्यः पिशिताशनाः । रावणाय शशंसुस्ताः सीताव्यवसितं महत् ॥ ८३ ॥
ततस्ताः सहिताः सर्वा विहिताशा निरुद्यमाः । परिक्लिश्य[5] समस्तास्ता निद्रावशमुपागताः ॥ ८४ ॥
तासु चैव प्रसुप्तासु सीता भर्तृहिते रता । विलप्य करुणं दीना प्रशुशोच सुदुःखिता ॥ ८५ ॥
तासां मध्यात्समुत्थाप्य त्रिजटा वाक्यमब्रवीत्। आत्मानं खादत क्षिप्रं न सीतामसितेक्षणाम् ॥ ८६ ॥

दाडिममित्यादिवत् । यद्वा मन्दत्वं चालपत्वम् ' मूढालपापटु-निर्भाग्या मन्दाः ' इत्यमरः सूक्ष्मोदरी इत्यर्थः । मन्दा स्थूलपि-पीलिकेत्याचक्षते तस्या इव कृशमस्या उदरमित्यर्थः । ननु पूर्वं धान्यमालिन्या प्रतिषिद्ध इत्युक्तम् संप्रति मण्डोदर्येत्युच्यते विप्रतिषिद्धमिदम् मैवम् उभाभ्यामपि प्रतिषिद्धत्वेनान्यतरोक्तावविरोधात् । मण्डोदर्यादिनामपरिज्ञानं च हनुमतस्तदीयत्वव्यवहारात् ॥ ७६—७७ ॥

७७-८१] ति० टी०-मन्दोदरी नामेति । पूर्वं धान्यमालिन्या प्रतिषिद्धमित्युक्तम्, इदानीं मन्दोदर्येत्यभिधानादुभाभ्यामपीति कल्पनीयम् । यद्वा मन्दोदर्या एव नामान्तरं धान्यमालिनीत्युक्तम् ॥ ७७-८१ ॥

रा० टी०-तद्वचनाकारमाह-सीतयेति । सीतया तत्स्थापनप्रयत्नेन तव किं कार्यं न किमपीत्यर्थः, अतः सीतया तत्प्रार्थनया किं रिष्यसि न किमपीत्यर्थः, एतेन तत्स्थापनप्रयत्नं त्यजेति सूचितम् मया सह देवकन्यादिभिश्च सार्धं रमस्व सीतासंभाषणादिना कालविलम्बं न कुर्वित्यर्थः । ननु तस्याः पूजनार्थं मया सा प्रार्थ्यते इत्यत आह-मद्विशिष्टा अस्मत्पूज्येत्यर्थः जानकी न स्थास्यतीति शेषः । श्लोकद्वयमेकान्वयि ॥ ७८ ॥ ७९ ॥

रा० टी०-तत इति । ततोऽनन्तरं निशाचरः नारीभिरुत्थाप्य स्वं भवनं नीतः ॥ ८० ॥

गो० टी०-तत इति । ताभिः देवकन्याभिः । अनेन मण्डोदर्यादिवदन्यासामपि निवारयितृत्वमुक्तम् ॥ ७८ ॥

रा० टी०-यात इति । राक्षस्यः सीतां भर्त्सयामासुः ८१

गो० टी०-यात इति । क्रूरैः क्रूरशब्दैः । सुदारुणैः अर्थतोऽपि क्रूरैः ॥ ७९ ॥

८२] ति० टी०-निरर्थकम् आसीदिति शेषः ॥ ८२ ॥

रा० टी०-तृणवदिति । तासां राक्षसीनां भाषितं जानकी तृणवद्गणयामास अत एव तासां गर्जितं सीतां प्राप्य निरर्थकमभवदिति शेषः ॥ ८२ ॥

गो० टी०-तृणवदिति । तृणवत् गणयामासेत्यन्वयः८०

८३] ति० टी-सीताव्यवसितं महत् । मर्तव्यं न तु त्वमङ्गीकर्तव्य इत्येतद्रूपम् ॥ ८३ ॥

रा० टी०-वृथेति । वृथागर्जितेन गर्जितवैयर्थ्येन निश्चेष्टा राक्षस्यः सीतायाः महत् व्यवसितं रावणाय शशंसुः ॥ ८३ ॥

गो० टी०-वृथेति । वृथागर्जितनिश्चेष्टाः वृथागर्जितेन निर्व्यापाराः ॥ ८१ ॥

८४] ति० टी०-विहताशाः रावणानुकूल्यमस्माभिरवश्यं संपाद्यमिति तासामाशा, अत एव तद्विषये निरुद्यमाः । परिक्लिश्य । पूर्वव्यापारकृतः क्लेशः ॥ ८४ ॥

रा० टी०-तत इति । सर्वाः राक्षस्यः निरुद्यमाः सत्यः निद्रावशमुपागताः प्राप्ताः ॥ ८४ ॥

गो० टी०-ततस्ता इति । तूष्णीं रक्षतेति रावणोक्ता इति शेषः । परिक्षिप्य परिवार्य ॥ ८२ ॥

८५-८६] ति० टी०-विलप्य प्रशुशोच विलापपूर्वकं शोकं चकार ॥ ८५ ॥ ८६ ॥

रा० टी०-तास्विति । प्रसुप्तासु तासु सीता करुणं विलप्य प्रशुशोच ॥ ८५ ॥

रा० टी०-तासामिति । त्रिजटा अब्रवीत् । तद्वचनाकारमाह-आत्मानं खादत जनकस्यात्मजां न खादत एतेन सीताया विनाशाभावः राक्षसीनामासन्नविनाशश्च सूचितः । सार्धश्लोक एकान्वयी ॥ ८६ ॥

गो० टी०-तास्विति । सुदुःखिता प्रशुशोच उत्तरोत्तरं दुःखितवतीत्यर्थः ॥ ८३—८६ ॥

१ अर्धमेतत् गो. नास्ति । २ इहेति गो. पाठः । ३ प्रसाद्येति गो पाठः । ४ तदेति गो. पाठः । ५ विहिताशा इति रा. पाठः । ६ क्षिप्त्वा समन्तात्तामिति गो. पाठः । ७ उत्थायेति रा. पाठः । ८ सीता विनशिष्यतीति गो. पाठः ।

जनकस्यात्मजां साध्वीं स्नुषां दशरथस्य च । स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ ८७ ॥
रक्षसां च विनाशाय भर्तुरस्या जयाय च । अलमस्मान्परित्रातुं राघवाद्राक्षसीगणम् ॥ ८८ ॥
अभियाचाम वैदेहीमेतद्धि मम रोचते । यदि ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते ॥ ८९ ॥
सा दुःखैर्विविधैर्मुक्ता सुखमाप्नोत्यनुत्तमम् । प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ ९० ॥
अलमेषा परित्रातुं राक्षस्यो महतो भयात् । ततः सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ ९१ ॥
अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः । तां चाहं तादृशीं दृष्ट्वा सीताया दारुणां दशाम्॥ ९२ ॥
चिन्तयामास विश्रान्तो न च मे निर्वृतं मनः । संभाषणार्थे च मया जानक्याश्चिन्तितो विधिः॥ ९३ ॥
इक्ष्वाकुकुलवंशस्तु स्तुतो मम पुरस्कृतः । श्रुत्वा तु गदितां वाचं राजर्षिगणभूषिताम् ॥ ९४ ॥
प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना । कस्त्वं केन कथं चेह प्राप्तो वानरपुङ्गव ॥ ९५ ॥
का च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि । तस्यास्तद्वचनं श्रुत्वा अहमप्यब्रुवं वचः ॥ ९६ ॥
देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः । सुग्रीवो नाम विक्रान्तो वानरेन्द्रो महाबलः ॥ ९७ ॥
तस्य मां विद्धि भृत्यं त्वं हनूमन्तमिहागतम् । भर्त्रा संप्रहितस्तुभ्यं रामेणाक्लिष्टकर्मणा ॥ ९८ ॥
इदं तु पुरुषव्याघ्रः श्रीमान्दाशरथिः स्वयम् । अङ्गुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि ॥ ९९ ॥

८७] ति० टी०–रक्षोविनाशकत्वाद्रोमहर्षणः ॥ ८७ ॥

रा०टी०–तत्र कारणमाह–स्वप्न इति । अस्याः सीतायाः भर्तुर्जयाय च स्वप्नो मया दृष्टः । अर्थद्वयमेकान्वयि ॥ ८७ ॥

८८] ति० टी०–राक्षसीगणमस्मान्राक्षसीरूपानस्मान्परित्रातुमलमेषा सीतेति शेषः ॥ ८८ ॥

रा० टी०–अलमिति । अस्मान् परित्रातुम् अलं समर्था सीतेति शेषः, अतो वैदेहीमभियाचाम ॥ ८८ ॥

गो० टी०–अलमस्मात्परित्रातुमिति । अलं शक्ता 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः । परित्रातुम् एषेति शेषः ॥ ८७ ॥ ८८ ॥

८९–९०] ति० टी०–अभियाचाम स्वरक्षणमिति शेषः ॥ ८९ ॥ ९० ॥

रा० टी०–ननु स्वप्नस्य मिथ्यात्वात्किं तदर्शनेन सीताभर्तृविजयादीत्यत आह–यदीति । दुःखितायाः एवंविधः स्वप्नो यदि दृश्यते तर्हि सा दुःखिता दुःखैर्विमुक्ता सती सुखमाप्नोति एतेन स्वप्नस्य मिथ्यात्वेऽपि तदर्शनजनितफलस्य सत्यत्वं ध्वनितं मतान्तरे स्वप्नस्यापि सत्यत्वमित्यन्यदेतत् ॥ ८९ ॥

रा० टी०–प्रणिपातेति । राक्षस्यो राक्षसीः परित्रातुमलम् । यदि तु राक्षस्य इति संबोधनं तदाऽस्मानिति प्रत्यासत्या वक्तव्यम् ॥ ९० ॥

गो० टी०–अपराधिजनप्राणत्राणे हेतुमाह—प्रणिपातेति ॥ ८९ ॥

९१] ति० टी०–ततस्त्रिजटावाक्यानन्तरम् । क्रैतावद्राग्यमिति लज्जिता । तत्कथितस्वप्नसूचितरामविजयहर्षिता॥९१॥

रा० टी०–तत इति । ततोऽनन्तरं तत् स्वप्नदर्शनं यदि तथ्यं सत्यं तर्हि शरणं रक्षिका भवेयम् इति भर्तुर्विजयहर्षिता सीता अवोचत् ॥ ९१ ॥

गो०टी०–तत इति । ततः त्रिजटावाक्यानन्तरम् । भर्तुर्विजयहर्षिता त्रिजटाकथितस्वप्नसूचितरामविजयहर्षिता । तत् त्रिजटास्वप्नवाक्यम्। शरणं हि व इत्यत्रेतिकरणं द्रष्टव्यम् ॥९०॥

९२] ति० टी०–तत्रिजटावाक्यं यदि तथ्यं तदावश्यं शरणं भवेयमित्यवोचदिति संबन्धः ॥ ९२ ॥

रा० टी०–तामिति । तां सीतां तादृशीं सीताया दशां च दृष्ट्वा विश्रान्तोऽहं चिन्तयामास अत एव मे मनो न निर्वृतम् ॥ ९२ ॥

गो० टी०–तां चाहमिति । न च मे निर्वृतं किंतु दुःखितमित्यर्थः ॥ ९१ ॥

९३] ति० टी०–चिन्तयामासेति लिङुत्तमः । ईदृश्या अपीदृशं दुःखमिति चिन्तां कृतवानित्यर्थः । मे मनो न च निर्वृतं न चिन्तारहितं जातम् । विधिः प्रकारः ॥ ९३ ॥

रा० टी०–संभाषणार्थे इति । जानक्याः संभाषणार्थे विधिरुपायो मया चिन्तितः अत एव पुरस्कृतः सर्वैरग्रे उक्तः इक्ष्वाकुकुलवंशः मम मया स्तुतः ॥ ९३ ॥

गो०टी०–संभाषणार्थमिति । विधिः उपायः९२–१०१॥

९४–९७]ति० टी०–मम स्तुतो मया स्तुतः॥९४–९७॥

रा० टी०–श्रुत्वेति । गदितां वाचं श्रुत्वा देवी सीता कस्त्वमित्यादि मां प्रत्यभाषत । तस्याः वचनं श्रुत्वा अहमप्यब्रुवम् । सार्धश्लोकद्वयमेकान्वयि ॥ ९४–९६ ॥

रा० टी०–स्ववचनाकारमाह–देवीति ॥ ९७ ॥

९८–९९] ति० टी०–तुभ्यं भर्त्रा तव भर्त्रा ॥९८॥९९॥

१ आत्मजा साध्वी स्नुषेति गो. पाठः । २ यस्या इति गो. पाठः । ३ अर्धमेतत् गो. नास्ति । ४ विक्रान्त इति गो. पाठः । ५ भाषणार्थमिति गो. पाठः । ६ इक्ष्वाकूणां ह्रीति गो. पाठः । ७ तत इति गो. पाठः । ८ पूजितामिति गो. पाठः । ९ ऽहं प्रेषित इति गो. पाठः ।

तदिच्छामि त्वयाज्ञप्तं देवि किं करवाण्यहम् । रामलक्ष्मणयोः पार्श्वं नयामि त्वां किमुत्तरम्॥ १०० ॥
एतच्छ्रुत्वा विदित्वा च सीता जनकनन्दिनी । आह रावणमुत्पाट्य राघवो मां नयत्विति॥ १०१ ॥
प्रणम्य शिरसा देवीमहमार्यामनिन्दिताम् । राघवस्य मनोह्लादमभिज्ञानमयाचिषम् ॥ १०२ ॥
अथ मामब्रवीत्सीता गृह्यतामयमुत्तमः । मणिर्येन महाबाहू रामस्त्वां बहु मन्यते ॥ १०३ ॥
इत्युक्त्वा तु वरारोहा मणिप्रवरमुत्तमम् । प्रायच्छत्परमोद्विग्ना वाचा मां संदिदेश ह ॥ १०४ ॥
ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः । प्रदक्षिणं परिक्रामामिहाभ्युद्गतमानसः ॥ १०५ ॥
उत्तरं पुनरेवाह निश्चित्य मनसा तदा । हनूमन्मम वृत्तान्तं वक्तुमर्हसि राघवे ॥ १०६ ॥
यथा श्रुत्वैव न चिरात्तावुभौ रामलक्ष्मणौ । सुग्रीवसहितौ वीरावुपेयातां तथा कुरु ॥ १०७ ॥
यदन्यथा भवेदेतद्द्वौ मासौ जीवितं मम । न मां द्रक्ष्यति काकुत्स्थो म्रिये साहमनाथवत्॥ १०८ ॥
तच्छ्रुत्वा करुणं वाक्यं क्रोधो मामभ्यवर्तत । उत्तरं च मया दृष्टं कार्यशेषमनन्तरम् ॥ १०९ ॥
ततोऽवर्धत मे कायस्तदा पर्वतसंनिभः । युद्धाकाङ्क्षी वनं तस्य विनाशयितुमारभे ॥ ११० ॥
तद्भग्नं वनखण्डं तु भ्रान्तस्तत्र मृगद्विजम् । प्रतिबुद्ध्य निरीक्षन्ते राक्षस्यो विकृताननाः॥ १११ ॥

रा० टी०–तस्येति । संप्रहितः प्रेषितः ॥ ९८ ॥

रा० टी०–इदमिति ॥ ९९ ॥

१००] ति० टी०–त्वयाऽऽज्ञप्तं त्वत्कर्तृकमाज्ञापनम् । उत्तरं समुद्रोत्तरकूलस्थम् । यद्वा किमुत्तरं प्रत्युत्तरं किं ब्रूहीति शेषः ॥ १०० ॥

रा० टी०–तदिति । त्वयाऽऽज्ञप्तं तदुत्तरं किं किंचित् करवाणीत्यहमिच्छामि ॥ १०० ॥

१०१–१०३] ति० टी०–उत्पाट्य समूलं नाशयित्वा ॥ १०१–१०३ ॥

रा० टी०–एतदिति । राघव एव मां नयत्विति सीता आह ॥ १०१ ॥

रा० टी०–प्रणम्येति । देवीं सीतां प्रणम्याहमभिज्ञानमयाचिषम् ॥ १०२ ॥

रा० टी०–अथेति । येन रामस्त्वां बहु मन्यते स एष मणिः गृह्यतामिति सीता मामब्रवीत् ॥ १०३ ॥

१०४] ति० टी०–संदिदेश काकवृत्तान्तं तिलककरणं च राममात्रैकवेद्यं कथयामासेत्यर्थः ॥ १०४ ॥

रा० टी०–इतीति । इत्युक्त्वा मणिप्रवरं प्रायच्छत् संदिदेश च ॥ १०४ ॥

गो० टी०–इत्युक्त्वेति । वाचा मां संदिदेशेति । स्वरामैकवेद्यं प्रागुक्तं काकासुरवृत्तान्तं तिलकनिर्माणादिकं च संदिष्टवतीत्यर्थः ॥ १०२ ॥

१०५–१०७] ति० टी०–इहाभ्युद्गतमानस इहागन्तुं निश्चितमानसः । मम वृत्तान्तं त्वयाऽनुभूतं मद्विषयं रावणराक्षसीवृत्तान्तम् ॥ १०५–१०७ ॥

रा० टी०–तत इति । इह भवतां समीपे अभ्युद्गतं मानसं यस्य सोऽहं राजपुत्र्यै प्रणम्य प्रदक्षिणं परिक्रामं पर्यक्रामम् ॥ १०५ ॥

गो० टी०–तत इति । परिक्रामं पर्यक्रामम् । इहाभ्युद्गतमानसः इहाभ्युद्गते इहाभ्यागमने मानसं यस्य स तथा १०३

रा० टी०–उत्तरमिति । तदा उत्तरं निश्चित्य हे हनुमन् ! राघवे वृत्तान्तं वक्तुमर्हसीति पुनराह ॥ १०६ ॥

रा० टी०–वृत्तान्तमेवाह–यथेति । श्रुत्वैव रामलक्ष्मणौ यथा समुपेयातां तथा कुरु ॥ १०७ ॥

गो० टी०–उत्तरं पुनरेवेदं निश्चित्य मनसा तयेत्यादि । एतत् उपयानं यद्यन्यथा भवेत् यदि नोपेयातामित्यर्थः तदा द्वौ मासौ मम जीवितम् ततः परं न जीवामीत्यर्थः । न मां द्रक्ष्यसि मासद्वयाभ्यन्तरे मां न द्रक्ष्यति चेत् तदा म्रिय इति योज्यम् । मास शब्दोऽत्र पक्षपरः । "पक्षा वै मासा" इति श्रुतेः ॥१०४–१०६॥

१०८] ति० टी०–यद्यस्मादन्यथानागमने द्वौ मासौ मम जीवितं भवेत् अनाथवन्म्रिये । राक्षसीकृतवधेनेति भावः ॥ १०८ ॥

रा० टी०–यदिति । यत् यदि अन्यथा विलम्बो भवेत् तर्हि मां काकुत्स्थो न द्रक्ष्यति । तत्र हेतुः–द्वौ मासावेव मम जीवितं जीवनम् अनन्तरमनाथवन्म्रिये ॥ १०८ ॥

१०९–१११] ति० टी०–उत्तरं कार्यशेषं लङ्कानाशनरूपम् ॥ १०९–१११ ॥

रा० टी०–तदिति । तत् करुणं वाक्यं श्रुत्वा मां क्रोधो रावणं प्रति कोपोऽभ्यवर्तत । अनन्तरम् उत्तरं कार्यशेषम् अवशिष्टकार्यं मया दृष्टं विचारितम् ॥ १०९ ॥

१ उत्साद्येति गो. पाठः । २ अद्भुतमिति गो. पाठः । ३ पुनरेवेदमिति गो. पाठः । ४ तयेति गो. पाठः । ५ युद्धकांक्षीति गो. रा. पाठः । ६ तच्चेति गो. पाठः । ७ षण्डमिति गो. पाठः । ८ बुध्येति गो. पाठः ।

मां च दृष्ट्वा वने तस्मिन्समागम्य ततस्ततः । ताः समभ्यागता क्षिप्रं रावणायाचचक्षिरे ॥ ११२ ॥
राजन्वनमिदं दुर्गं तव भग्नं दुरात्मना । वानरेण ह्यविज्ञाय तव वीर्यं महाबल ॥ ११३ ॥
तस्य दुर्बुद्धिता राजंस्तव विप्रियकारिणः । वधमाज्ञापय क्षिप्रं यथासौ न पुनर्व्रजेत् ॥ ११४ ॥
तच्छ्रुत्वा राक्षसेन्द्रेण विसृष्टा बहुदुर्जयाः । राक्षसाः किंकरा नाम रावणस्य मनोऽनुगाः॥११५ ॥
तेषामशीतिसाहस्रं शूलमुद्गरपाणिनाम् । मया तस्मिन्वनोद्देशे परिघेण निषूदितम् ॥ ११६ ॥
तेषां तु हतशिष्टा ये ते गता लघुविक्रमाः । निहतं च मया सैन्यं रावणायाचचक्षिरे ॥ ११७ ॥
ततो मे बुद्धिरुत्पन्ना चैत्यप्रासादमुत्तमम् । तत्रस्थान्राक्षसान्हत्वा शतं स्तम्भेन वै पुनः॥ ११८ ॥
ललामभूतो लङ्कायाः मया विध्वंसितो रुषा । ततः प्रहस्तस्य सुतं जम्बुमालिनमादिशत्॥ ११९ ॥
राक्षसैर्बहुभिः सार्धं घोररूपैर्भयानकैः । तमहं बलसंपन्नं राक्षसं रणकोविदम् ॥ १२० ॥
परिघेणातिघोरेण सूदयामि सहानुगम् । तच्छ्रुत्वा राक्षसेन्द्रस्तु मन्त्रिपुत्रान्महाबलान् ॥१२१॥
पदातिबलसंपन्नान्प्रेषयामास रावणः । परिघेणैव तान्सर्वान्नयामि यमसादनम् ॥ १२२ ॥
मन्त्रिपुत्रान्हतान् श्रुत्वा समरे लघुविक्रमान् । पञ्च सेनाग्रगाञ्छूरान्प्रेषयामास रावणः ॥ १२३ ॥
तानहं सहसैन्यान्वै सर्वानेवाभ्यसूदयम् । ततः पुनर्दशग्रीवः पुत्रमक्षं महाबलम् ॥ १२४ ॥
बहुभी राक्षसैः सार्धं प्रेषयामास संयुगे । तं तु मन्दोदरीपुत्रं कुमारं रणपण्डितम् ॥ १२५ ॥
सहसा खं समुद्यन्तं पादयोश्च गृहीतवान् । तमासीनं शतगुणं भ्रामयित्वा व्यपेषयम् ॥ १२६ ॥

रा० टी०–तत इति । ततः मे कायोऽवर्धत ततः युद्धकाङ्क्ष्यहं वनं विनाशयितुमारेभे ॥ ११० ॥

रा० टी०–तदिति । भग्नं तद्वनखण्डं राक्षस्यः प्रतिबुध्य निरीक्षन्ते ॥ १११ ॥

गो० टी०–तच्छ्रुत्वेति । उत्तरम् अनन्तरम् । अनन्तरम् अनन्तरकर्तव्यम् उत्तरकार्यमित्यर्थः ॥ १०७–११६ ॥

११२–११३]ति० टी०–समागम्य मिलित्वा ११२॥११३

रा० टी०–मामिति । ताः राक्षस्यः समागम्य मां दृष्ट्वा क्षिप्रं समभ्यागताः एकीभूताः सत्यः रावणाय आचचक्षिरे ॥ ११२ ॥

रा० टी०–तद्वचनाकारमाह—राजन्निति । दुर्गं दुर्गमपि वनं तव वीर्यमविज्ञाय वानरेण भग्नम् ॥ ११३ ॥

११४–११७] ति० टी०–तस्य दुर्बुद्धितेति बहुव्रीहेस्तल् । न पुनर्व्रजेत् स्वदेशमिति शेषः ११४–११७ ॥

रा० टी०–तस्येति । तस्य वानरस्य दुर्बुद्धिता दुष्टबुद्धिरस्तीति शेषः, अतः यथा येन प्रकारेण असौ वानरः पुनर्न व्रजेत् जीवन्गच्छेत् यथा तेन प्रकारेण तव विप्रियकारिणः तस्य वानरस्य वधं क्षिप्रमाज्ञापय ॥ ११४ ॥

रा० टी०–तदिति । तत् राक्षसीवचनं श्रुत्वा किंकरा नाम राक्षसाः राक्षसेन्द्रेण विसृष्टाः प्रेषिताः ॥ ११५ ॥

रा० टी०–तेषामिति । तेषां किंकराभिधराक्षसानाम् अशीतिसाहस्रं परिघेण मया निषूदितम् ॥ ११६ ॥

रा० टी०–तेषामिति । तेषां राक्षसानां मध्ये ये हतशिष्टाः हननात् अवशिष्टाः ते मया निहतं सैन्यं रावणाय आचचक्षिरे ॥ ११७ ॥

११८] ति० टी०–चैत्यप्रासादम् विनाशयितुमिति शेषः ॥ ११८ ॥

रा० टी०–तत इति । ततोऽनन्तरं चैत्यप्रासादं विध्वंसितुमिति शेषः, मे बुद्धिः उत्पन्ना अत एव तत्रस्थान् शतं राक्षसान् हत्वा लङ्कायाः ललामभूतः अलंकारतां प्राप्तः चैत्यप्रासाद इति शेषः, मया विध्वंसितः । सार्धश्लोक एकान्वयी११८

गो० टी०–तत इति । ततो मे बुद्धिरुत्पन्ना वक्ष्यमाणकार्यविषयेत्यर्थः । तादृशं बुद्धिकार्यमाह—चैत्येत्यादिना । चैत्यप्रासादं नगरमध्यस्थप्रासादम् । ललामभूतः अलंकारभूतः ॥ ११६–११८ ॥

११९–१२६] ति० टी०–ललामभूतः चैत्यप्रासाद इति शेषः ॥ ११९–१२६ ॥

रा० टी०–तत इति । ततोऽनन्तरं बहुभिः राक्षसैः सह जम्बुमालिनमादिशत् ॥ ११९ ॥

रा० टी०–तमिति । जम्बुमालिनमहं सूदयामि असूदयम् ॥ १२० ॥

रा० टी०–तदिति । तत् हननं श्रुत्वा पदातिबलसंपन्नान् पदातिबलैः संयुक्तान् मन्त्रिपुत्रान् राक्षसेन्द्रः प्रेषयामास तानहं यमसादनं नयामि अनयम् । सार्धश्लोक एकान्वयी॥१२१॥१२२॥

१ विलयमिति गो. पाठः । २ भूशेति गो. पाठः । ३ तस्येति रा. पाठः । ४ शेषा इति गो. पाठः । ५ गत्वेति गो. पाठः । ६ महदिति गो. पाठः । ७ आक्रममिति गो. पाठः । ८ स वै इति गो. पाठः । ९ मवेति गो. पाठः । १० रावण इति गो. पाठः । ११ समुत्क्रान्तमिति गो. पाठः ।

तमक्षमागतं भग्नं निशम्य स दशाननः । [1]ततश्चेन्द्रजितं नाम द्वितीयं रावणः सुतम् ॥ १२७ ॥
व्यादिदेश सुसंक्रुद्धो बलिनं युद्धदुर्मदम् । तच्चाप्यहं बलं सर्वं तं च राक्षसपुंगवम् ॥ १२८ ॥
नष्टौजसं रणे कृत्वा परं हर्षमुपागतः । महतापि महाबाहुः प्रत्ययेन महाबलः ॥ १२९ ॥
प्रेहितो[2] रावणेनैष[3] सह वीरैर्मदोद्धतैः । सोऽविषह्यं हि मां बुद्ध्वा स्वसैन्यमृं[4] चावमर्दितम् ॥१३०॥
ब्रह्मणोऽस्त्रेण स तु मां प्रबद्ध्वा[5] चातिवेगिनः[6] । रज्जुभिश्चापि बध्नन्ति ततो मां तत्र राक्षसाः॥१३१ ॥
रावणस्य समीपं च गृहीत्वा मामुपागमन्[7] । दृष्ट्वा संभाषितश्चाहं रावणेन दुरात्मना ॥ १३२ ॥
पृष्टश्च लङ्कागमनं राक्षसानां च तं वधम् । तत्सर्वं च रणे[10] तत्र सीतार्थमुपजल्पितम्[11] ॥ १३३ ॥
तस्यास्तु[12] दर्शनाकाङ्क्षी प्राप्तस्त्वद्भवनं विभो । मारुतस्यौरसः पुत्रो वानरो हनुमानहम् ॥ १३४ ॥
रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् । सोऽहं दौत्येन रामस्य त्वत्सकाशमिहागतः ॥१३५॥
शृणु[13] चापि समादेशं यदहं प्रब्रवीमि ते । राक्षसेश हरीशस्त्वां वाक्यमाह समाहितम् ॥ १३६ ॥
सुग्रीवश्च महाभाग[14] स त्वां कौशलमब्रवीत्[15] । धर्मार्थकामसहितं हितं पथ्यमुवाच ह ॥ १३७ ॥
वसतो ऋष्यमूके मे पर्वते विपुलद्रुमे । राघवो रणविक्रान्तो मित्रत्वं समुपागतः॥ १३८ ॥

रा० टी०–मन्त्रीति । लघुविक्रमान् शीघ्रविक्रमकारिणः मन्त्रिपुत्रान् हतान् श्रुत्वा सेनाग्रगान् पञ्च प्रेषयामास ॥१२३॥

रा० टी०–तानिति । तान् सेनाग्रगान् अहमभ्यसूदयं ततोऽनन्तरम् अक्षं पुत्रं प्रेषयामास । सार्धश्लोक एकान्वयी ॥ १२४ ॥

रा० टी०–तमिति । खं समुद्यन्तं मन्दोदरीपुत्रभक्षं पादयोर्गृहीत्वानहं भ्रामयित्वा व्यपोषयम् । सार्धश्लोक एकान्वयी ॥ १२५ ॥ १२६ ॥

गो० टी०–तच्छ्रुत्वेति । पदातिबलसंपन्नान् पदातिप्रभृतिसैन्यसंपन्नान् ॥ ११९–१३१ ॥

१२७–१२८] ति० टी०–द्वितीयं प्रेषितपुत्रापेक्षया द्वितीयम् ॥ १२७ ॥ १२८ ॥

रा० टी०–तमिति । आगतं तमक्षं भग्नं हतं निशम्य इन्द्रजितन्नाम द्वितीयं सुतं सुसंक्रुद्धो रावणः व्यादिदेश । सार्धश्लोक एकान्वयी ॥ १२७ ॥

रा० टी०–तदिति । तत् इन्द्रजित्संबन्ध्यपि बलं तमिन्द्रजितं च नष्टौजसं कृत्वा परं हर्षमहमुपागतः ॥ १२८ ॥

१२९–१३०] ति० टी०–महता प्रत्ययेन विश्वासेन ॥ १२९ ॥ १३० ॥

रा० टी०–महतेति । महता प्रत्ययेन विश्वासेन वीरैः सह रावणेन प्रहितः प्रेषितः स एष इन्द्रजित् स्वसैन्यमवमर्दितं बुद्ध्वा अत एव मामविषह्यं बुद्ध्वा *बन्धितुमैच्छदिति शेषः । सार्धश्लोक एकान्वयी ॥ १२९ ॥ १३० ॥

१३१–१३२] ति० टी०–प्रबद्ध्वा प्रबद्धय । राक्षसेभ्य आर्पयदिति शेषः । बध्नन्त्यबध्नन् ॥ १३१ ॥ १३२ ॥

रा० टी०–ब्रह्मण इति । अतिवेगितः स इन्द्रजित् ब्रह्मणोऽस्त्रेण मां प्रबद्ध्वा प्रबध्य राक्षसेभ्यः समर्पयदिति शेषः, तत्र तस्मिन्समये राक्षसाः रज्जुभिश्चापि मां बध्नन्ति अबध्नन् ॥ १३१ ॥

रा० टी०–रावणस्येति । मां गृहीत्वा रावणस्य समीपमुपागमन् राक्षसा इति शेषः । रावणेन दुरात्मना दृष्ट्वाऽहं संभाषितः ॥ १३२ ॥

१३३] ति० टी०–सीतार्थमिति कथितमित्यर्थः ॥१३३॥

रा० टी०–पृष्ट इति । लङ्कागमनं राक्षसानां वधं च तत्प्रयोजनमित्यर्थः पृष्टोऽभवमिति शेषः, तत् गमनादि सर्वं सीतार्थम् इति मयोपजल्पितं कथितम् ॥ १३३ ॥

१३४–१३८] ति० टी०–तस्याः सीतायाः १३४–१३८

रा० टी०–तस्या इति । मारुतस्य औरसः पुत्रो हनुमानहं तस्याः सीतायाः दर्शनाकाङ्क्षी सन् त्वद्भवनं प्राप्तः॥१३४॥

गो० टी०–अस्याहमित्यादि । अस्याः सीतायाः । विसंधिरार्षः ॥ १३२ ॥ १३३ ॥

रा० टी०–रामेति । मां रामदूतं विद्धि अत एव दौत्येन कर्मणोपलक्षितः सन् त्वत्सकाशमागतः ॥ १३५ ॥

रा० टी०–शृण्विति । हे राक्षसेश ! यत् समाहितं वाक्यं हरीशस्त्वामाह तदहं ते तुभ्यं प्रब्रवीमि अतः समादेशं त्वं शृणु ॥ १३६ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–सुग्रीव इति । सुग्रीवस्त्वां कौशलमब्रवीत् हितं वाक्यमुवाच ॥ १३७ ॥

रा० टी०–तद्वचनाकारमाह–वसत इति । ऋष्यमूके वसतो मे मित्रत्वं राघवः समुपागतः ॥ १३८ ॥

---

१ तत इन्द्र इति गो. पाठः। २ उपागममिति गो. पाठः। ३ प्रेषित इति गो. पाठः। ४ एवेति गो. पाठः। ५ उत्कटैरिति गो. पाठः। ६ बलमिति गो. पाठः । ७ ब्राह्मेणास्त्रेणेति गो. पाठः । ८ प्राबध्नादिति गो. पाठः । ९ वेगित इति गो. रा. पाठः । १० नयन्निति गो. पाठः । ११ मयेति गो. पाठः। १२ इतीति गो. पाठः । १३ अस्याहमिति गो. पाठः। १४ श्लोकोऽयं गो. नास्ति । १५ तेजा इति गो. पाठः । १६ कुशलमिति गो. पाठः । * बद्धुमिति युक्तम्।

तेन मे कथितं राजन्भार्या मे रक्षसा हृता । [तत्र साहाय्यमस्माकं कार्यं सर्वात्मना त्वया ।
मया च कथितं तस्मै वालिनश्च वधं प्रति ॥] तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि ॥ १३९ ॥
वालिना हृतराज्येन सुग्रीवेण सहॅ प्रभुः । चक्रेऽग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः ॥१४०॥
तेन वालिनमाहर्त्य शरेणैकेन संयुगे । वानराणां महाराजः कृतः संप्लवतां प्रभुः ॥ १४१ ॥
तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह । तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः ॥ १४२ ॥
क्षिप्रमानीयतां सीता दीयतां राघवस्य च । यावन्न हरयो वीरा विधमन्ति बलं तव ॥ १४३ ॥
वानराणां प्रभावोऽयं[6] न केन विदितः पुरा । देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः ॥१४४॥
इति वानरराजस्त्वामाहेत्यभिहितो मया । मामैक्षत ततो रुष्टश्चक्षुषा प्रदहन्निव ॥ १४५ ॥
तेन वध्योऽहमाज्ञप्तो रक्षसा रौद्रकर्मणा । मत्प्रभावमविज्ञाय रावणेन दुरात्मना ॥ १४६ ॥
ततो बिभीषणो नाम तस्य भ्राता महामतिः । तेन राक्षसराजश्च याचितो मम कारणात् ॥ १४७ ॥
नैवं राक्षसशार्दूल त्यज्यतामेष निश्चयः । राजशास्त्रव्यपेतो हि मार्गः संलक्ष्यते त्वया ॥ १४८ ॥

गो० टी०–सुग्रीवश्चेति । धर्मार्थकामसहितमिति । तत्र धर्मसाहित्यात् हितं परत्र उपकारकम् अर्थसाहित्यात्पथ्यम् इहोपकारकं चेत्यर्थः ॥ १३४–१३७ ॥

१३९–१४०] ति० टी०–समयं प्रतिज्ञाम् १३९–१४०

रा० टी०–तेनेति । मे भार्या रक्षसा हृता अतः तत्र कार्ये मे साहाय्यहेतोः समयं कालनियमं कर्तुमर्हसि इति तेन रामेण मे कथितम् ॥ १३९ ॥

रा० टी०–वालिनेति । वालिना हृतं राज्यमप्यस्य तेन सुग्रीवेण मया सह अग्निसाक्षिकं सख्यं राघवश्चक्रे ॥ १४० ॥

१४१] ति० टी०–संप्लवतां सम्यक्प्लवतां प्रभुः अहमिति शेषः ॥ १४१ ॥

रा० टी०–तेनेति । तेन रामेण वालिनमाहत्य वानराणां महाराजः कृतोऽहमस्मीति शेषः ॥ १४१ ॥

१४२] ति० टी०–तस्य रामस्य । तेन रामसाहाय्यस्य कर्तव्यत्वेन तुभ्यं समीपं तव समीपं प्रस्थापितः । दूत इति शेषः । दूतप्रेषणं विना प्रथममेव युद्धस्याधर्मत्वादिति भावः ॥ १४२ ॥

रा० टी०–तस्येति । तस्य रामसाहाय्यमस्माभिः कार्यम् अतः तेन मया तुभ्यं तव समीपम् इतः प्रस्थापितः दूत इति शेषः ॥ १४२ ॥

१४३] ति० टी०–सीतादानाभावे बाधकमाह—यावदिति ॥ १४३ ॥

रा० टी०–प्रस्थापनप्रयोजनमाह–क्षिप्रमिति । हरयो वानराः यावत्ते बलं न विधमन्ति तावदेव राघवस्य सीता आनीयतां दीयतां च ॥ १४३ ॥

१४४–१४५] ति० टी०–वानराणामिति । एवं च लङ्कानाशने वानरा असमर्था न इति मन्तव्यमिति भावः । 'राघवाणाम्' इति पाठे मनुष्योऽसमर्थ इति न मन्तव्यमिति भावः ॥ १४४ ॥ १४५ ॥

रा० टी०–नन्वतिबलवतो मे वानराः किं करिष्यन्तीत्यत आह–वानराणामिति । निमन्त्रिताः प्रबलस्वरिपुघाताय दैवैराहूताः ये वानराः देवतानां सकाशं समीपं गच्छन्ति तेषां वानराणामयं प्रभावः केन साधारणेन जनेन न विदितः किं च के स्वर्गेऽपि न विदितो न विदित एव॥१४४॥

गो० टी०–सुग्रीवश्चेत्यादिना सुग्रीवोक्तं कियदनूद्य संप्रति शेषं स्वयं वक्तुं सन्नाह–वालिनेति ॥ १३८–१४२ ॥

रा० टी०–इतीति । वानरराजः इति त्वामाह अत एव मया त्वमभिहितः त्वमित्यध्याहृतम् ततः मदुक्तश्रवणानन्तरं रुष्टो रावणः चक्षुषा प्रदहन्निव मामैक्षत ॥ १४५ ॥

गो० टी०–इदं वचः सुग्रीवोक्तमेव मयोक्तमित्याह—इतीति ॥ १४३ ॥ १४४ ॥

१४६–१४७] ति० टी०–मत्प्रभावं वरदानं लब्ध्वा वध्यत्वरूपम् ॥ १४६ ॥ १४७ ॥

रा० टी०–तेनेति । तेन रावणेनाहं वध्य आज्ञप्तः १४६

रा० टी०–तत इति । तस्य रावणस्य विभीषणो नाम यो भ्राता तेन मम कारणात् राक्षसराजो याचितः ॥ १४७ ॥

गो० टी०–तत इत्यादि । नैवमिति । कर्तव्यमिति शेषः । राजशास्त्रं राजधर्मशास्त्रम् । वेदितव्यं वक्तव्यमित्यर्थः ॥ १४९–१५० ॥

१४८] ति० टी०–नैवम् अयमवध्य इत्यर्थः । एष निश्चय एतद्वधनिश्चयः संलक्ष्यते विचार्यते ॥ १४८ ॥

रा० टी०–तत्प्रकारमाह–नेति । एवं भवदुक्तं न अयं न वध्य इत्यर्थः, अतः एषः वधविषयको निश्चयः त्यज्यताम् । तत्र

---

१ राज्ञेति गो. पाठः । २ श्लोकोऽयं गो. पाठे अधिकः । ३ महेति गो. पाठः । ४ उत्पाट्येति गो. पाठः । ५ राघवायेति गो. पाठः । ६ हीति गो. पाठः । ७ कुद्ध इति गो. पाठः । ८ ऽसाविति गो. पाठः । ९ सेव्यते इति गो. पाठः ।

दूतवध्या न दृष्टा हि राजशास्त्रेषु राक्षस । दूतेन वेदितव्यं च यथाभिहितवादिना ॥ १४९ ॥
सुमहत्यपराधेऽपि दूतस्यातुलविक्रम । विरूपकरणं दृष्टं न वधोऽस्ति हि शास्त्रतः ॥ १५० ॥
विभीषणेनैवमुक्तो रावणः संदिदेश तान् । राक्षसानेतदेवाद्य लाङ्गूलं दह्यतामिति ॥ १५१ ॥
ततस्तस्य वचः श्रुत्वा मम पुच्छं समन्ततः । वेष्टितं शणवल्कैश्च पैट्टैः कार्पासकैस्तथा ॥ १५२ ॥
राक्षसाः सिद्धसंनाहास्ततस्ते चण्डविक्रमाः । तदा दीप्यन्त मे पुच्छं हनन्तः काष्ठमुष्टिभिः ॥ १५३ ॥
बद्धस्य बहुभिः पार्श्वयन्त्रितस्य च राक्षसैः । न मे पीडा भवेत्काचिद्दिदृक्षोर्नगरीं दिवा ॥ १५४ ॥
ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम् । अघोषयन्राजमार्गे नगरद्वारमागताः ॥ १५५ ॥
ततोऽहं सुमहद्रूपं संक्षिप्य पुनरात्मनः । विमोचयित्वा तं बन्धं प्रकृतिस्थः स्थितः पुनः ॥ १५६ ॥
आयसं परिघं गृह्य तानि रक्षांस्यसूदयम् । ततस्तन्नगरद्वारं वेगेन प्लुतवानहम् ॥ १५७ ॥
पुच्छेन च प्रदीप्तेन तां पुरीं साट्टगोपुराम् । दहाम्यहमसंभ्रान्तो युगान्ताग्निरिव प्रजाः ॥ १५८ ॥
विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते । लंकायाः कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १५९ ॥
दहता च मया लङ्कां दग्धा सीता न संशयः । रामस्य चैतन्महत्कार्यं मयेदं विफलीकृतम् ॥ १६० ॥
इति शोकसमाविष्टश्चिन्तामहमुपागतः । ततोऽहं वाचमश्रौषं चारणानां शुभाक्षराम् ॥ १६१ ॥
जानकी न च दग्धेति विस्मयोदन्तभाषिणाम् । ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् ॥ १६२ ॥

हेतुमाह-राजशास्त्रेण व्यपेतः विरुद्धः मार्गः त्वया संलक्ष्यते ज्ञायते एतेनायं वधः शास्त्रविरुद्ध इति सूचितम् ॥ १४८

१४९-१५२] ति० टी०-वेदितव्यं निवेदनीयम् । एवं चैवमुक्तिर्दूतस्य नापराध इत्यर्थः ॥ १४९-१५२ ॥

रा० टी०-तत्रापि हेतुमाह-दूतेति । राजशास्त्रे दूतवध्या दूतानां वधो न दृष्टा किंतु दूतेनोक्तमिति शेषः, वेदितव्यमेव ॥ १४९ ॥

रा० टी०-सुमहतीति । दूतस्यापराधे सुमहत्यपि विरूपकरणं दृष्टं वधो न दृष्टः ॥ १५० ॥

रा० टी०-विभीषणेनेति । विभीषणेनोक्तो रावणः एतत् लाङ्गूलमेव दह्यतामिति राक्षसान् संदिदेश ॥ १५१ ॥

रा० टी०-तत इति । तस्य रावणस्य वचः श्रुत्वा मम पुच्छं शणवल्कादिभिर्वेष्टितम् ॥ १५२ ॥

१५३-१६१] ति० टी०-हनन्तः मामिति शेषः । आर्षमेतत् ॥ १५३-१६१ ॥

रा० टी०-राक्षसा इति । सिद्धः सन्नाहो बन्धनं यैः ते राक्षसाः काष्ठमुष्टिभिर्हनन्तो घ्नन्तः सन्तो मे पुच्छमदीप्यन्त अदीपयन्त ॥ १५३ ॥

गो० टी०-राक्षसा इत्यादि । यन्त्रितस्य आवृतस्य १५१

रा० टी०-बद्धस्येति । बद्धस्यापि मम काचित्पीडा नाभवत् ॥ १५४ ॥

रा० टी०-तत इति । ते राक्षसाः नगरद्वारमागताः सन्तः अग्निसंवृतं मां राजमार्गे अघोषयन् ॥ १५५ ॥

गो० टी०-तत इति । नगरद्वारमागताः सन्तः राजमार्गे अघोषयन्निति योजना ॥ १५२-१५४ ॥

रा० टी०-तत इति । अहम् आत्मनो बन्धं विमोचयित्वा विमोच्य प्रकृतिस्थः सन् स्थितोऽस्मीति शेषः ॥ १५६ ॥

रा० टी०-आयसमिति । परिघं गृह्य गृहीत्वा रक्षांसि असूदयं ततोऽनन्तरं नगरद्वारमाप्लुतवान् ॥ १५७ ॥

रा० टी०-पुच्छेनेति । पुच्छेन पुरीं लङ्कां दहामि अदहम् ॥ १५८ ॥

गो० टी०-पुच्छेन चेति । अट्टं बलभिः ॥ १५५-१५८

रा० टी०-विनष्टेति । यतः पुरी लङ्का मया भस्मीकृता अत एव लङ्कायाः कश्चिदुद्देशः अदग्धो न दृश्यते अत एव जानकी विनष्टा ॥ १५९ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-दहतेति । मया सीता दग्धा अत एव रामस्य कार्यं मया विफलीकृतम् इति शोकसमाविष्टोऽहं चिन्तामुपागतः । सार्धश्लोक एकान्वयी ॥ १६० ॥

रा० टी०-तत इति । विस्मयपूर्वकमुदन्तं वृत्तान्तं भाषन्ते तच्छीलिनां चारणानां जानकी न दग्धेति वाचम श्रौषम् ॥ १६१ ॥

गो० टी०-अथाहमिति । विस्मयोदन्तभाषितां भाषितविस्मयोदन्ताम् उक्ताद्भुतवार्तामित्यर्थः । विस्मयवृत्तान्तव्यवहृतामिति वा ॥ १५९ ॥

१६२] ति० टी०-विस्मयकारी य उदन्तो वृत्तान्तस्तद्भाषिणां तं वदताम् ॥ १६२ ॥

---

१ यथार्थं हितेति गो. पाठः । २ अस्येति गो. पाठः । ३ जीर्णैः कार्पासजैरिति गो. पाठः । ४ दह्यन्तेति गो. पाठः । ५ निघ्नन्त इति गो. पाठः । ६ अर्धमेतत् गो. नास्ति । ७ भवदिति रा. पाठः । ८ आप्लुतवानहमिति गो. रा. पाठः । ९ लङ्कायामिति गो. पाठः । १० ह्रीति गो. पाठः । ११ वितथीकृतमिति गो. पाठः । १२ अथेति गो. पाठः । १३ भाषितामिति गो. पाठः ।

अदग्धा जानकीत्येवं निमित्तैश्चोपलक्षितम् । दीप्यमाने तु लाङ्गूले न मां दहति पावकः ॥ १६३ ॥
हृदयं च प्रहृष्टं मे वाताः सुरभिगन्धिनः । तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ १६४ ॥
ऋषिवाक्यैश्च दृष्टार्थैरभवं हृष्टमानसः । पुनर्दृष्टा[1] च वैदेही विसृष्टश्च तया पुनः ॥ १६५ ॥
ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः । प्रतिप्लवनमारेभे युष्मद्दर्शनकाङ्क्षया ॥ १६६ ॥
ततः श्वसनचन्द्रार्कसिद्धगन्धर्वसेवितम् । पन्थानमहमाक्रम्य भवतो दृष्टवानिह ॥ १६७ ॥
राघवस्य प्रसादेन भवतां चैव तेजसा । सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥ १६८ ॥
एतत्सर्वं मया तत्र यथावदुपपादितम् । तत्र यन्न कृतं शेषं तत्सर्वं क्रियतामिति ॥ १६९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०-तत इति । तां गिरं श्रुत्वा जानकी अदग्धेति मे बुद्धिर्निश्चयः उत्पन्ना निमित्तैः शुभसूचकशकुनैश्चोपलक्षितं तदेव निश्चितम् ॥ १६२ ॥

गो० टी०-तत इति । निमित्तैश्चोपलक्षिता शकुनादिभिश्च सीता न दग्धेति ज्ञातेत्यर्थः ॥ १६० ॥

१६३] ति० टी०-उपलक्षितम् तददहनमिति शेषः । निमित्तैः शुभसूचकैः । निमित्तान्याह—दीप्यमानेत्यादि १६३

रा० टी०-निमित्तान्येव बोधयन्नाह-दीप्यमान इति । न दहति अदहत् हृदयं च प्रहृष्टं सुरभिगन्धिनो वाता ववुरिति शेषः ॥ १६३ ॥

गो० टी०-दीप्यमान इति । हृदयं प्रहृष्टम् आसीदिति शेषः । सुरभिगन्धिनः आसन्निति शेषः ॥ १६१ ॥

१६४-१६५] ति० टी०-दृष्टार्थैर्दृष्टसंवादैः, महागुणैः कारणैर्मत्प्रवृत्तिकारणैः सीतारामरूपैः ॥ १६४ ॥ १६५ ॥

रा० टी०-तैरिति । दृष्टार्थैः पूर्वमनुभूतफलकैर्निमित्तैरुक्तैर्निमित्तैर्महागुणैः अस्मद्धितसंपादकैः सिद्धार्थैः ऋषिवाक्यैश्च हृष्टमानसोऽहमभवम् ॥ १६४ ॥

गो० टी०-तैरिति । दृष्टार्थैः दृष्टफलैः निमित्तैः शकुनैः कारणैः नेत्रस्फुरणादिभिः । महागुणैः फलव्याप्तैः । सिद्धार्थैः अबाधितार्थैः । तत्र हेतुत्वेन ऋषिपदोपादानम् ॥ १६२ ॥

रा० टी०-पुनरिति । पुनरनन्तरं वैदेही दृष्टा तया वैदेह्या विसृष्टः अत्रागमनाय आज्ञापितोऽभवमिति शेषः ॥१६५॥

गो० टी०-पुनरित्यर्धमेकं वाक्यम् । विसृष्टः प्रेषितोऽस्मि ॥ १६३ ॥

१६६-१६९]ति० टी०-आरेभे । लिङुत्तमः १६६-१६९

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०-तत इति । ततोऽनन्तरम् अरिष्टं पर्वतमासाद्य प्रतिप्लवनमारेभे ॥ १६६ ॥

गो० टी०-तत इति । तत्र लङ्कासमीपं सामीप्ये सप्तमी । तत्र वर्तमानम् अरिष्टं पर्वतम् ॥ १६४ ॥

रा० टी०-तत इति । श्वसनादिसेवितं पन्थानमाक्रम्य भवतो दृष्टवानहमस्मीति शेषः ॥ १६७ ॥

गो० टी०-तत इति । भवतो दृष्टवानिह भवतः युष्मान् इह समुद्रतीरे ॥ १६६ ॥

रा० टी०-राघवस्येति । राघवस्य प्रसादेन तेजसा च भवतां सुग्रीवस्य च कार्यार्थं कर्मव्यसिद्ध्यर्थं मया सर्वमनुष्ठितं संपादितम् ॥ १६८ ॥

रा० टी०-एतदिति । तत्र सागरादौ जातम् एतत्सर्वं कर्म मया उपपादितं यत् मया न कृतमत एव शेषमवशिष्टं तत्सर्वं क्रियतां भवद्भिरिति शेषः ॥ १६९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डेऽष्टपञ्चाशत्तमः सर्गः ॥ ५८ ॥

गो० टी०-राघवस्येति । भवतां चैव तेजसा भवदनुग्रहेणेत्यर्थः । सुग्रीवस्य च कार्यार्थम् स्वामिकार्यस्यावश्यकर्तव्यत्वादिति भावः । कार्यार्थं कार्यवस्तु क्लीबत्वमार्षम् । अस्यानुवादवाक्यविस्तरस्य प्रयोजनं वानराणां श्रवणकुतूहलातिशयप्रकाशनम् ॥ १६६ ॥ १६७ ॥

अस्मिन् सर्गे सार्धषट्पष्ट्युत्तरशतश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्यानेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

---

१ एवमिति गो. पाठः । २ लक्षितेति गो. पाठः । ३ दृष्ट्वा च वैदेहीमिति गो. पाठः । ४ पवनेति गो. पाठः ।

एकोनषष्टितमः सर्गः ।

वानरान्प्रत्याज्ञनेयः सीतादुरवस्थां निवेदयन्वैदेहीं प्रत्यानीयैव रामदर्शनमुचितमिति मन्वानो जाम्बवदादीनां पूर्ववीर्याणि वर्णयंस्तान्युद्धाय प्रोत्साहयति ।

एतदाख्याय तत्सर्वं हनूमान्मारुतात्मजः । भूयः समुपचक्राम वचनं वक्तुमुत्तरम् ॥ १ ॥
सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः । शीलमासाद्य सीताया मम च प्रीणितं मनः ॥ २ ॥
आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः । तपसा धारयेल्लोकान्क्रुद्धा वा निर्दहेदपि ॥ ३ ॥
सर्वथातिप्रकृष्टोऽसौ रावणो राक्षसेश्वरः । यस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ४ ॥
न तदग्निशिखा कुर्यात्संस्पृष्टा पाणिना सती । जनकस्य सुता कुर्याद्यत्क्रोधकलुषीकृता ॥ ५ ॥

१] ति० टी०–**एतदिति** । उत्तरं पराक्रमयुक्तत्वात्सर्वतोऽधिकम् ॥ १ ॥

रा० टी०–हनुमत्कर्तृकलङ्कात्तृत्तान्तवर्णनमुक्त्वा तत्कर्तृकतृत्तान्तरं वर्णयितुमुपक्रमते–**एतदिति** । हनुमान् तत्स्वाचरितमेतत्सर्वमाख्याय उत्तरं श्रेष्ठं वचनमुक्त्यन्तरं वक्तुं भूयः समुपचक्राम आरेभे ॥ १ ॥

गो० टी०–एतदिति । तदेतदाख्याय उत्तरं वचनं वक्तुमुपचक्रामेत्यन्वयः ॥ १ ॥

२] ति० टी०–संभ्रम आदरः उत्साह इत्यर्थः । सीतायाः शीलं सद्वृत्तं पातिव्रत्यमासाद्य दृष्ट्वा राघवोद्योगादेः साफल्यज्ञानेन मम मनः प्रीणितं तुष्टम् । 'मम च प्रवणं मनः' इति पाठेऽपि प्रवणं संतोषप्रवणमित्यर्थः ॥ २ ॥

रा० टी०–तदाकारमाह–**सफल इत्यादिभिः** । सीतायाः शीलं रामैकनिष्ठस्वभावम् आसाद्य विज्ञाय मम मनः प्रीणितं तृप्तम् अत एव राघवोद्योगः सुग्रीवस्य संभ्रमः राघवादरश्च सफलः ॥ २ ॥

गो० टी०–अथ संप्रत्येव रावणं जित्वा सीतया सहैवास्माभिः प्रतियातव्यमिति हृदि निधायाह–**सफल इति** । संभ्रमः त्वरा उत्साह इति यावत् । कुतः साफल्यमित्याशङ्क्य सीतापातिव्रत्योपलम्भादित्याह–**शीलमिति** । शीलं वृत्तम् पातिव्रत्यमिति यावत् । अहं तु प्रागेव तदेकशरण इत्याह–**मम चेति** । प्रवणं प्रह्वं तत्परमिति यावत् । सीताचारित्रस्य न किंचिदसाध्यमस्तीति भावः ॥ २ ॥

३] ति० टी०–सदृशम् पतिव्रतानामरुन्धत्यादीनां सदृशमित्यर्थः ॥ ३ ॥

रा० टी०–**आर्याया इति** । आर्यायाः सीतायाः सदृशं शीलं यस्या अस्ति सेति शेषः, तपसा स्वधर्मबलेन लोकान् धारयेत् वा यदि क्रुद्धा तर्हि निर्दहेदपि ॥ ३ ॥

गो० टी०–तर्हि तं दुरात्मानं रावणं स्पृशन्तमेव किमिति नादहदित्याशङ्क्य तस्यापि तपःसंपत्तिसद्भावादित्याह–**तपसेत्यादिना** । यद्वा रावणतपःकथनद्वारा सीतायाः पातिव्रत्यातिशयमाह–**तपसेत्यादिना** । तपसा अतिप्रवृद्ध इत्यन्वयः कोपप्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थोऽसौ रावणः सर्वथा महातपःसंपन्नः अत एव सीतास्पर्शेऽप्यविनाशित इत्यर्थः॥३॥

४] ति० टी०–तर्हि रावणं किमिति नादहदित्यत आह–**सर्वथेति** । अतिप्रकृष्टः महातपःसंपन्न इत्यर्थः । तां सीतां स्पृशतोऽपि यस्य गात्रं तपसा न नाशितमिति संबन्धः ॥ ४ ॥

रा० टी०–**सर्वथेति** । तां सीतां स्पृशतः अपहरणाय स्पर्शं कुर्वतः यस्य रावणस्य गात्रं पाणिः तपसा सीतातपोबलेन न विनाशितं सोऽसौ रावणः सर्वथा सर्वप्रकारेण अतिप्रकारेण अतिप्रकृष्टः प्रतिभातीति शेषः, एतेनेदं महदाश्चर्यमिति सूचितम् ॥ ४ ॥

५] ति० टी०–नैतावता सीतार्शीलं दुर्बलमित्याशङ्क्यमित्याह–**नेति** । यत्क्रुद्धा सीता कुर्यात्तत्स्पृष्टाऽग्निशिखापि न कुर्यात् । इयं तु भर्तुः पराक्रमकीर्तये नाद्यापि क्रुध्यतीति भावः । अक्रुद्धाया अपि स्पर्शमात्रेण प्राप्तो नाशस्तु रावणतपसा निवारित इति ध्येयम् ॥ ५ ॥

रा० टी०–तदेव पोषयन्नाह–**नेति** । क्रोधकलुषीकृता जनकस्य सुता यद्दहनं न कुर्यात्तद्दहनं पाणिसंस्पृष्टा अग्निशिखा न कुर्यात् एतेन सीतायाः सामर्थ्यातिशयः सूचितः तेन सीतायाः अधिकः कोपो न जात इति ध्वनितम् ॥ ५ ॥

गो० टी०–तर्हि सीताशीलं दुर्बलमस्माकं किमुपकरिष्यतीत्याशङ्क्य नेत्याह–**न तदिति** । सीताशीलमेव बलीयस्त्वादुपकरिष्यतीत्यर्थः । क्रोधकलुषीकृतेति वचनाद्भर्तुर्मुखेन वैरनिर्यातनं वीरपत्नीधर्मः । अन्यथा महालाघवं भर्तुरित्यापि पारतन्त्र्यपालनाय तादृक्क्रोधाकरणाद्रावणो जीवतीति गम्यते । एतदेवोक्तं प्राक्–असंदेशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसेति ॥४॥

---

१ प्रवणमिति गो. पाठः । २ अर्धमेतत् गो. नास्ति । ३ क्रुद्धो वेति गो. पाठः । ४ वृद्ध इति गो. पाठः । ५ राक्षसाधिप इति गो. पाठः । ६ ऽऽत्मजेति गो. पाठः

जाम्बवत्प्रमुखान्सर्वाननुज्ञाप्य महाकपीन् । अस्मिन्नेवंगते कार्ये भवतां च निवेदिते ॥
न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥ ६ ॥
अहमेकोऽपि पर्याप्तः सराक्षसगणां पुरीम् । तां लङ्कां तरसा हन्तुं रावणं च सराक्षसम् ॥ ७ ॥
किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः । कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः ॥ ८ ॥
अहं तु रावणं युद्धे ससैन्यं सपुरःसरम् । सहपुत्रं वधिष्यामि सहोदरयुतं युधि ॥
ब्राह्ममस्त्रं च रौद्रं च वायव्यं वारुणं तथा ॥ ९ ॥
यदि शक्रजितोऽस्त्राणि दुर्निरीक्ष्याणि संयुगे । तान्यहं निहनिष्यामि विधमिष्यामि राक्षसान् ॥
भवतामभ्यनुज्ञातो विक्रमो मे रुणद्धि तम् । मयाऽतुला विसृष्टा हि शैलवृष्टिर्निरन्तरा ॥ ११ ॥
देवानपि रणे हन्यात्किंपुनस्तान्निशाचरान् । भवतामननुज्ञातो विक्रमो मे रुणद्धि माम् ॥ १२ ॥
सागरोऽप्यतियाद्वेलां मन्दरः प्रचलेदपि । न जाम्बवन्तं समरे कम्पयेदरिवाहिनी ॥ १३ ॥

६] ति० टी०—इदानीं भृत्यजयस्यापि स्वामिसंबन्धित्वसत्त्वेन वयमेव सीतापातित्रत्यं सहायमासाद्य रावणं जित्वा देव्या सह राघवौ द्रक्ष्यामह इत्याह—**जाम्बवदिति** । जाम्बवदादीननुज्ञाप्यानुज्ञां कुर्वन्त्विति संप्रार्थ्य । अस्मिन्कार्ये सीतान्वेषणरूपे । एवंगते उक्तप्रकारं प्राप्ते । तत्प्रकारविशिष्टे च भवतां निवेदिते सति तौ पार्थिवात्मजौ वैदेह्या संद्रष्टुं न्याय्यमित्यब्रवीदिति शेषः ॥ ६ ॥

रा० टी०—**जाम्बवदिति** । एवमनेन प्रकारेण गते सिद्धिं प्राप्ते अस्मिन् कार्ये भवतां समीपे निवेदिते सति जाम्बवत्प्रमुखान् कपीन् अनुज्ञाप्य तदाज्ञां गृहीत्वेत्यर्थः, वैदेह्या सह पार्थिवात्मजौ द्रष्टुं न्याय्यमस्माकमिति शेषः । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०—एवं स्थिते युष्मदनुमत्या भृत्यविजयोऽपि स्वामिन एवेति कृत्वा सीतारामपदावलम्बादहमेव रावणं निर्जित्य सीतापुरस्कारेणैव राघवौ द्रक्ष्यामीत्याह—जाम्बवदिति ॥५॥६॥

७] ति० टी०—तया संदर्शने उपपत्तिमाह—अहमिति । एवं च राक्षसान्हत्वा देव्यानयनं कृत्वा देव्या सहैव तौ द्रक्ष्याम इत्यर्थः ॥ ७ ॥

८] ति० टी०—कृतास्त्रैर्देवांशत्वादस्त्रप्रयोगसमर्थैः ॥ ८ ॥

रा० टी०—नन्वेवं रामसुग्रीवयोर्लङ्कागमनमन्तरा कथमेव भविष्यतीत्यत आह—अहमिति । लङ्कां रावणं च हन्तुम् अहमेकः पर्याप्तो यदि तर्हि भवद्भिः सहितः पर्याप्तश्चेत् किं वक्तव्यम् । अर्धचतुष्टयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०—न चाशक्तिशङ्का कार्येति बहुधा प्रपञ्चयन्नाह—अहमित्यादिना ॥ ७–९ ॥

९] ति० टी०—उक्तमेवार्थं संभ्रमेण पुनराह—अहं त्विति । अहमेवेत्यर्थः ॥ ९ ॥

१०] ति० टी०—यद्यपि दुर्निरीक्ष्याणि तथापि तान्यहं निहनिष्यामि ब्रह्मणो वरदानान्निवारयामि । पराक्तैस्तैरेव राक्षसान्विधमिष्यामि निहनिष्यामि ॥ १० ॥

रा० टी०—तान्प्रोत्साहयितुं पुनः स्वपराक्रममाह—अहमिति । सैन्यादिविशेषणविशिष्टं रावणं युधि वधिष्यामि ॥९॥

रा० टी०—ब्राह्ममिति । ब्रह्मास्त्रादीनि शक्रजितो यदि यान्यस्त्राणि तानि च भवतामभ्यनुज्ञातोऽहं निहनिष्यामि अत एव राक्षसान् विधमिष्यामि । ननु कथमेवं भवतो निश्चय इत्यत आह—मे विक्रमः तं रावणं रुणद्धि पीडयतीत्यर्थः । अर्धचतुष्टयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०—ब्राह्ममित्यादि । अभ्यनुज्ञातः अभ्यनुज्ञानात् पञ्चम्यास्तसिः । मे विक्रमः तं रावणम् रुणद्धि हन्तीत्यर्थः ॥ १०–१२ ॥

११] ति० टी०—रुणद्धि रोत्स्यति ॥ ११ ॥

रा० टी०—**मयेति** । मया विसृष्टा प्रवर्तिता शैलवृष्टिः देवानपि हन्यात् राक्षसान् हन्यादिति किम् ॥ १२ ॥

१२] ति० टी०—भवतामननुज्ञातः अनुज्ञां विना मे विक्रमो राक्षसवधप्रवृत्तिमां रुणद्धीत्यर्थः । अतः पूर्वमेव मया न पराक्रान्तमित्यर्थः ॥ १२ ॥

रा० टी०—नन्वेवं सति तत्रैव रावणः कुतो न हतः इत्यत आह—**भवतामिति** । भवताम् अननुज्ञात आज्ञात आज्ञाया अभावाद्धेतोर्मे विक्रमो मां रुणद्धि हन्तुं न्यवारयदित्यर्थः । अर्धं पृथक् ॥ १३ ॥

१३] ति० टी०—इदानीं सर्वेऽपि भवन्तस्तद्वधे समर्था इत्याह—**सागरोऽपीति** ॥ १३ ॥

रा० टी०—अन्येषामपि सामर्थ्यं वर्णयन्नाह—**सागर इत्यादिभिः** । सागरो वेलां स्वावधिमतियात् अतियायात् अतिक्रमेत् मन्दरश्च प्रचलेत् जाम्बवन्तं तु अरिवाहिनी रिपुसेना न कम्पयेत् ॥ १४ ॥

---

१ हरीनिति गो. पाठः । २ महाबलमिति गो. पाठः । ३ शूरैरिति गो. पाठः । ४ ऐन्द्रमिति गो. पाठः । ५ दुर्निरीक्षाणीति गो. पाठः । ६ अर्धमेतत् गो. नास्ति ।

सर्वराक्षससङ्घानां राक्षसा ये च पूर्वजाः । अलमेकोऽपि[1] नाशाय वीरो वालिसुतः कपिः॥ १४ ॥
प्लवगस्योरुवेगेन नीलस्य च महात्मनः । मन्दरोऽप्यवशीर्येत किं पुनर्युधि राक्षसाः ॥ १५ ॥
सदेवासुरयक्षेषु गन्धर्वोरगपक्षिषु । मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १६ ॥
अश्विपुत्रौ महावेगावेतौ प्लवगसत्तमौ । एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ॥ १७ ॥
[[3]पितामहवरोत्सेकात्परमं दर्पमास्थितौ । अमृतप्राशिनावेतौ सर्ववानरसत्तमौ ॥
अश्विनोर्मानना[4]र्थं हि सर्वलोकपितामहः । सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा ॥
वरोत्सेकेन मुक्तौ च प्रमथ्य महतीं चमूम् । सुराणाममृतं वीरौ पीतवन्तौ प्लवङ्गमौ ॥
एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् । लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः]
मयैव निहता लङ्का दग्धा भस्मीकृता पुरी । राजमार्गेषु सर्वेषु[5] नाम विश्रावितं मया ॥ १८ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ १९ ॥
अहं कोसलराजस्य दासः पवनसंभवः । हनूमानिति सर्वत्र नाम विश्रावितं मया ॥ २० ॥
अशोकवनिकामध्ये रावणस्य दुरात्मनः । अधस्ताच्छिंशपामूले[6] साध्वी करुणमास्थिता ॥ २१ ॥
राक्षसीभिः परिवृता शोकसंतापकर्शिता । मेघरेखापरिवृता चन्द्ररेखेव निष्प्रभा ॥ २२ ॥
अचिन्तयन्ती वैदेही रावणं बलदर्पितम् । पतिव्रता च सुश्रोणी अवरुद्धा च जानकी ॥ २३ ॥

गो० टी०-सागरोऽपीत्यादि । अतियात् आर्षं ह्रस्वत्वम् ॥ १३ ॥

१४-१७] ति० टी०-ये च पूर्वजा राक्षसास्तेषां नाशायैकोऽपीत्यन्वयः ॥ १४-१७ ॥

रा० टी०-सर्वेति । सर्वराक्षससंघानां मध्ये ये पूर्वजाः अतिबला इत्यर्थः, तेषामपि नाशाय एकोऽप्यङ्गदोऽलम् ॥१५॥

रा० टी०-प्लवगस्येति । नीलस्योरुवेगेन मन्दरोऽपि अवशीर्येत ॥ १६ ॥

रा० टी०-सेति । देवादिसहितेषु गन्धर्वादिषु मध्ये मैन्दस्य द्विविदस्य वा प्रतियोद्धारं यूयं शंसत कथयत न कोऽपि प्रतियोद्धाऽस्तीत्यर्थः ॥ १७ ॥

रा० टी०-अश्वीति । अश्विपुत्रौ यौ प्लवगसत्तमौ तयोः प्रतियोद्धारं न पश्यामि ॥ १८

गो० टी०-सर्वेति । पूर्वकाः तेषामिति शेषः ॥१४-२१॥

१८] ति० टी०-मयैव निहता निहतप्राया । एवं च सर्वैर्मिलित्वा नाशनीयेति किं वाच्यमिति भावः । नामेति सुग्रीवादेरिति शेषः ॥ १८ ॥

रा० टी०-इदानीं राक्षसविघाते न बहुश्रम इति बोधयन्नाह--मयेति । मयैव लङ्का दग्धा अत एव भस्मीकृता राजमार्गेषु नाम च मया विश्रावितम् ॥ १९ ॥

गो० टी०-मयैवेति । दग्धत्वेप्यङ्गारावस्था भवति सापि नास्तीत्याह-भस्मीकृतेति ॥ २२ ॥

१९-२०] ति० टी०-तदेवाह-जयतीति ॥१७॥२०॥

रा० टी०-विश्रावणप्रकारमाह-जयतीति द्वाभ्याम् ॥ २० ॥ २१ ॥

गो० टी०-नामविश्रावणमेवाह-जयतीति । जयति सर्वोत्कर्षेण वर्तते । तदुक्तं हरिणा--'जयिर्जयाभिभवयोराद्यर्थेऽसावकर्मकः । उत्कर्षप्राप्तिराद्यार्थो द्वितीयेर्थे सकर्मकः ॥' इति ॥ २३ ॥ २४ ॥

२१-२२] ति० टी०-सीतादुःखविमर्शेऽपि संप्रत्येव समानेतुमुचितेत्याशयेन तदशां वर्णयति-अशोकेत्यादि २१॥२२

रा० टी०-द्रुतं प्रपतितं सीताहृत्तमाह—अशोकेति । राक्षसीभिः परिवृता अत एव मेघरेखया परिवृता आच्छादिता चन्द्ररेखेव निष्प्रभा रावणमचिन्तयन्ती अगणयन्ती सर्वात्मना राममनुरक्ता अत एव पुरन्दरे पौलोमीव रामेण रामातिस्मरणेन युक्तेति शेषः, अत एव अनन्यचिन्ता राक्षसीमध्ये मुहुर्मुहुः तर्ज्यमाना प्रमदानाम् अवनमतिरक्षा यस्मिन् पुरुषागम्ये इत्यर्थः, रावणस्याशोकवनिकामध्ये शिंशपामूले अधस्तात् निम्नदेशे राक्षसीभिः अवष्टब्धा निरुद्धा जानकी मया दृष्टा । सार्धश्लोकपञ्चकमेकान्वयि ॥ २२-२६ ॥

गो० टी०-अथ सीतादुर्दशाविमर्शेऽपि संप्रत्यसौ समानेतव्येत्याशयेन तदशां दर्शयति—अशोकेत्यादिना ॥२५-२६॥

२३] ति० टी०-अचिन्तयन्ती योग्यत्वेनागणयन्ती । अगणने हेतुः—पतिव्रतेति । अगणनाच्चावष्टब्धा निरुद्धा अस्तीति शेषः ॥ २३ ॥

१ रीति गो. पाठः । २ पनसस्येति गो. पाठः । ३ श्लोकचतुष्टयमेतदधिकं गो. पाठे । ४ पुनरिति गो. पाठः । ५ सर्वत्रेति गो. पाठः । ६ वृक्षे इति गो. पाठः ।

अनुरक्ता हि वैदेही रामे सर्वात्मना शुभा । अनन्यचिन्ता रामेण पौलोमीव पुरन्दरे ॥ २४ ॥
तदेकवासःसंवीता रजोध्वस्ता तथैव च । [शोकसंतापदीनाङ्गी सीता भर्तृहिते रता ।]
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ २५ ॥
राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदावने । एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ २६ ॥
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमोदये । रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥ २७ ॥
कथंचिन्मृगशावाक्षी विश्वासमुपपादिता । ततः संभाषिता चैव सर्वमर्थं प्रकाशिता ॥ २८ ॥
रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता । नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा ॥ २९ ॥
यन्न हन्ति दशग्रीवं स महात्मा दशाननः । निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ॥ ३० ॥
सा प्रकृत्येव तन्वङ्गी तद्वियोगाच्च कर्शिता । प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ ३१ ॥
एवमास्ते महाभागा सीता शोकपरायणा । यदत्र प्रतिकर्तव्यं तत्सर्वमुपकल्प्यताम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

२४] ति० टी०–रामेण रामप्रीत्यानन्यचिन्ता पौलोमीव नहुषरुद्धा पौलोमीव ॥ २४ ॥

गो० टी०–पतिव्रता चेत्यादि । पौलोमीव पुरन्दर इति नहुषनिर्बन्ध इति भावः ॥ २७–२९ ॥

२५–२७] ति० टी०–तदेकवास इति व्याख्यातम् । राक्षसीभिस्तर्ज्यमाना दृष्टेत्युत्तरेणान्वयः ॥ २५–२७ ॥

रा० टी०–एकेति । हिमोदये पद्मिनी कमलिनीव विवर्णाङ्गी रावणाद्धेतोर्विनिवृत्तः अर्थो रामसेवा यस्याः सा सीता कथंचित् विश्वासमुपपादिता प्रापिता । श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–सा मयेत्यादि । प्रमदावने अशोकवनिकायाम् । विनिवृत्तार्था त्यक्तप्रयोजना रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः । सर्वमर्थं रामोद्योगादिकं दर्शिता बोधिता ॥ ३०–३३ ॥

२८] ति० टी०–कथंचिदादौ तूष्णीं रामकथाप्रस्तावेन सर्वमर्थं रामसुग्रीववृत्तान्तम् ॥ २८ ॥

रा० टी०–तत इति । संभाषिता अत एव सर्वमर्थं प्रकाशिता प्रबुद्धा सीता रामसुग्रीवसख्यं श्रुत्वा प्रीतिमुपागता प्राप्ता ॥ २९ ॥

२९] ति० टी०–तदेवाह—रामसुग्रीवसख्यं चेति । नियतः समुदाचारो दृढपातिव्रत्यं भर्तर्युत्तमा भक्तिश्चास्ति॥२९॥

३०] ति० टी०–इयत्यापि सामग्र्या यद्दशाननं शापादिना न हन्ति तत्स दशाननो महात्मा तपोबलेन शापायोग्य इति भावः । अथापि सीतावरोधजन्यपापेन मृतप्राय एव स इत्याह—निमित्तमात्रमिति । अतोऽस्माभिरपि सुशक्यवध एव स इति भावः ॥ ३० ॥

रा० टी०–नियत इति । नियतः समुदाचारः सीतासदाचरणं भर्तरि रामे उत्तमा भक्तिश्च यस्मादशग्रीवं न हन्ति तस्माद्दशाननो महात्मा प्रतीयते इति शेषः, एतेन रावणो मृतप्राय एवेति सूचितम् अत एव रामः तस्य रावणस्य वधे निमित्तमात्रं भविष्यति । सार्धश्लोक एकान्वयी ॥ ३०॥३१॥

गो० टी०–नियत इति । समुदाचारः चारित्रमिति यावत् । नन्वेवंमाहात्म्या सीता स्वयमेव रावणं किमिति न हन्तीत्याशङ्क्याह–यत्र हन्तीति । दशग्रीवं न हन्तीति यत् तत्र कारणं स दशाननः महात्मा महानुभावः । शापनिबन्धनदुर्मरणाभावादिति भावः अतस्तस्य वधे रामस्तु राम एव निमित्तमात्रं भविष्यति तथा तस्योत्कर्षात् सीता तु निमित्तकारणमिति शेषः । भर्त्रैव वैरनिर्यातनं वीरपत्नीधर्मः अन्यथा भर्तुर्महल्लाघवमिति मनीषया न स्वयं हन्ति न त्वसामर्थ्यादिति भावः ॥ ३४ ॥ ३५ ॥

३१–३२]ति० टी०–तत्पापकारणमाह–सेति ॥३१ ३२॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकोनषष्टितमः सर्गः ॥५९॥

रा० टी०–सीतास्वरूपं निर्वक्ति—सेति । प्रकृत्यैव तन्वङ्गी सीता तद्वियोगात् रामवियोगजदुःखात् कर्शिता अतिकृशत्वं प्राप्ता अत एव प्रतिपत्पाठशीलस्य जनस्य विद्येव तनुतां गता ॥ ३२ ॥

रा० टी०–एवमिति । सीता एवमास्ते अतः अत्र समये यत्प्रतिकर्तव्यं तत् उपकल्प्यताम् ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

१ राममिति गो. रा. पाठः । २ चित्तेति गो. पाठः । ३ चेति गो. पाठः । ४ अर्धमेतदधिकं गो. पाठे । ५ हिमागम इति गो. पाठः । ६ च दर्शितेति गो. पाठः । ७ कृतागसमिति गो. पाठः ।

षष्टितमः सर्गः ।

स्वस्वीयपराक्रमप्रशंसाकृतोत्साहेऽङ्गदे रावणादिरक्षःक्षपणपूर्वकं सीतासमानयनं समुपक्रामति विरूढविमर्शो जाम्बवान्सयुक्तयुपन्यासं तं प्रतिषेधति ।

तस्य तद्वचनं श्रुत्वा वालिसूनुरभाषत । [[1]अयुक्तं तु विना देवीं दृष्ट्वद्भिश्च वानर ॥
समीपं गन्तुमस्माभी राघवस्य महात्मनः ।] [2]अश्विपुत्रौ महावेगौ बलवन्तौ प्लवङ्गमौ ॥ १ ॥
पितामहवरोत्सेकात्परमं दर्पमास्थितौ । अश्विनोर्माननार्थं हि सर्वलोकपितामहः ॥ २ ॥
सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा । वरोत्सेकेन मत्तौ च प्रमथ्य महतीं चमूम् ॥ ३ ॥
सुराणाममृतं वीरौ पीतवन्तौ महाबलौ । एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् ॥ ४ ॥
लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः । अहमेकोऽपि पर्याप्तः [3]सराक्षसगणां पुरीम् ॥ ५ ॥
तां लङ्कां तरसा हन्तुं रावणं च महाबलम् । किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः ॥ ६ ॥
कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः । वायुसूनोर्बलेनैव दग्धा लङ्केति नः श्रुतम् ॥ ७ ॥
दृष्टा देवी न चानीता इति तत्र [3]निवेदितुम् । [4]न युक्तमिव पश्यामि भवद्भिः ख्यातपौरुषैः ॥ ८ ॥
नहि वः प्लवने कश्चिन्नापि कश्चित्पराक्रमे । तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ ९ ॥
जित्वा लङ्कां सरक्षौघां हत्वा तं रावणं रणे । सीतामादाय गच्छामः सिद्धार्था हृष्टमानसाः ॥ १० ॥
तेष्वेवं हृतशेषेषु राक्षसेषु हनूमता । किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ ११ ॥

गो० टी०–फलितमुपसंहरति—एवमिति । उपपद्यताम् अनुष्ठीयताम् ॥ ३६ ॥

अस्मिन् सर्गे सार्धषट्त्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥५९॥

१—७] ति० टी०–तस्येति ॥ १—७ ॥

रा० टी०–हनुमद्वचनश्रवणानन्तरकालिकामङ्गदोक्तिं वर्णयन्नाह—तस्येति । तस्य हनुमतो वचनं श्रुत्वा वालिसूनुरङ्गदोऽभाषत । अर्धं पृथक् । तद्भाषणाकारमाह—अश्वीत्यादिभिः । महावेगौ अश्विपुत्रौ प्लवङ्गमौ पितामहवरोत्सेकाद्धेतोः परमं दर्पमास्थितौ स्त इति शेषः ॥ १ ॥

रा० टी०–सकारणं वरस्वरूपमाह—अश्विनोरिति । माननार्थं सर्वलोकपितामहः अनयोरश्विपुत्रयोः सर्वावध्यत्वं सर्वकर्तृकवध्यत्वाभावं दत्तवान् ॥ २ ॥

रा० टी०–वरोत्सेकेनेति । वरोत्सेकेन मत्तौ तावश्विपुत्रौ सुराणां चमूं प्रमथ्य अमृतं पीतवन्तौ अतः संक्रुद्धौ एतावश्विपुत्रावेव लङ्कां नाशयितुं शक्तौ अतः सर्वे वानराः तिष्ठन्तु । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

रा० टी०–अहमिति । अहमप्येकः लङ्कां रावणं च हन्तुं पर्याप्तो यदि तर्हि विजयैषिभिर्भवद्भिः सहितः पर्याप्तश्चेत्किं वक्तव्यम् । अर्धचतुष्टयमेकान्वयि ॥ ५ ॥ ६ ॥

रा० टी०–वायुसूनोरिति । वायुसूनोर्बलेनैव लङ्का दग्धा । अर्धं पृथक् ॥ ७ ॥

गो० टी०–तस्येत्यादि ॥ १ ॥

गो० टी०–अयुक्तं त्विति । वानरा इति संबोधनम् ॥ २–६ ॥

८] ति० टी०–दृष्ट्वा देवी नानीता इति तत्र रामसमीपे निवेदितुं न युक्तमिव पश्यामि ॥ ८ ॥

रा० टी०–दृष्टेति । देवी सीता दृष्टा आनीता तु न इति तत्र रामस्य समीपे भवद्भिर्निवेदितुं न युक्तमिव पश्यामि ॥८॥

९–१०] ति० टी०–तुल्यः अस्तीति शेषः ॥ ९ ॥ १० ॥

रा० टी०–नेति । हे हरिसत्तमाः ! वो युष्माकं प्लवनादौ तुल्यः सामरदैत्येषु कश्चित्र ॥ ९ ॥

रा० टी०–जित्वेति । सरक्षौघां राक्षससमूहवतीं लङ्कां जित्वा सीतामादाय वयं गच्छामः अत एव निर्देशात्संहितादन्तता वा कल्प्या ॥ १० ॥

११] ति० टी०–अन्यत्कर्तव्यं किमस्ति काकुरत्र अपि तु जानकीग्रहणपूर्वकगमनादन्यन्न किमपीत्यर्थः ॥ ११ ॥

रा० टी०–तेष्विति । हनुमता हतशेषेषु राक्षसेषु सत्सु जानकीं गृहीत्वा याम रामसमीपं यामः अन्यत् इतो भिन्नम् अत्र अस्मिन् समये किं कर्तव्यम् इदमेव कर्तव्यमित्यर्थः ॥ ११ ॥

---

१ श्लोकोऽयं गो. अधिकः । २ एतदादि सार्धं श्लोकषट्कं गो. नास्ति । ३ निवेदनमिति गो. पाठः । ४ अयुक्तमिति गो. पाठः । ५ श्लोकोऽयं गो. नास्ति । ६ वीरोष्विति गो. पाठः ।

रामलक्ष्मणयोर्मध्ये न्यस्याम जनकात्मजाम् । किं व्यलीकैस्तु तान्सर्वान्वानरान्वानरर्षभान् ॥ १२ ॥
वयमेव हि गत्वा तान्हत्वा राक्षसपुंगवान् । राघवं द्रष्टुमर्हामः सुग्रीवं सहलक्ष्मणम् ॥ १३ ॥
तमेवं कृतसंकल्पं जाम्बवान्हरिसत्तमः । उवाच परमप्रीतो वाक्यमर्थवदर्थवित् ॥ १४ ॥
नैषा बुद्धिर्ममहाबुद्धे यद्ब्रवीषि महाकपे । विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम् ॥ १५ ॥
नानेतुं कपिराजेन नैव रामेण धीमता । कथंचिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत् ॥ १६ ॥
राघवो नृपशार्दूलः कुलं व्यपदिशन्स्वकम् । प्रतिज्ञाय स्वयं राजा सीताविजयमग्रतः ॥ १७ ॥
सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति । विफलं कर्म च कृतं भवेत्तुष्टिर्न तस्य च ॥ १८ ॥
वृथा च दर्शितं वीर्यं भवेद्वानरपुङ्गवाः । तस्माद्गच्छाम वै सर्वे यत्र रामः सलक्ष्मणः ॥
सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने ॥ १९ ॥

न तावदेषा मतिरक्षमा नो यथा भवान्पश्यति राजपुत्र ।
यथा तु रामस्य मतिर्निविष्टा तथा भवान्पश्यतु कार्यसिद्धिम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

१२-१४] ति० टी०-न्यस्याम स्थापयाम । तान्सर्वान्किष्किन्धायामागतान्वानरान्व्यलीकैरप्रियैर्दुःखैः योजयित्वेति शेषः । तथा कृत्वा किं फलमिति शेषः । 'किं परिक्लेश्य तान्' इति पाठान्तरम् ॥ १२—१४ ॥

रा० टी०-रामेति । जनकात्मजां रामलक्ष्मणयोर्मध्ये न्यस्याम संस्थापयाम वानरर्षभान् सर्वान् वानरान् प्रति व्यलीकैः अप्रियैः रामादिकर्तृकौदासीन्यवचनैः किं न किमपीत्यर्थः ॥ १२ ॥

रा० टी०-उपसंहरन्नाह—वयमिति । वयमेव राक्षसपुङ्गवान् हत्वा राघवं द्रष्टुमर्हामः ॥ १३ ॥

रा० टी०-तमिति । एवमुक्तप्रकारेण कृतसंकल्पमङ्गदं जाम्बवान् अर्थवद्वाक्यमुवाच ॥ १४ ॥

१५] ति० टी०-नैषा बुद्धिः युक्तेति शेषः । तत्र हेतुमाह—विचेतुमिति ॥ १५ ॥

रा० टी०-तद्वचनाकारमाह—नेत्यादिभिः । यतः दक्षिणां दिशं विचेतुमेव वयमाज्ञप्ताः नानेतुं सीतामिति शेषः, अतः यद्ब्रवीषि तद्विषयिणी एषा बुद्धिर्निश्चयो न कर्तव्येति शेषः । सार्धश्लोक एकान्वयी ॥ १५ ॥

१६] ति० टी०-प्रथमं जय एव दुर्लभः, कथंचिज्जयेऽपि यदि न रोचयेत्तदा कार्यनाश इति भावः ॥ १६ ॥

रा० टी०-ननु सीतानयनाज्ञाया अभावेऽपि तदनुकूलाचरणात् तत्प्रीतिरेव भविष्यतीत्यत आह—कथंचित् अस्माभिर्निर्जितां रावणनिर्जयेनानीतां सीतां स्वकं कुलं स्ववीर्यगुप्तत्वरूपकुलधर्मं व्यपदिशन् कथयन् सन् राघवः कथंचिन्नाभिरोचयत् ॥ १६ ॥

१७] ति० टी०-अरुचौ हेतुः—कुलं व्यपदिशन्निति, प्रतिज्ञायेति च । अग्रतः कपिमुख्यानामित्यन्वयः ॥ १७ ॥

१८] ति० टी०-अरुचौ फलवैपरीत्यं दर्शयति—विफलमिति ॥ १८ ॥

रा० टी०-प्रतिज्ञायेति । कपिमुख्यानामग्रतः स्वकं स्वसंपाद्यं सीताविजयं सीताहेतुकस्वकर्तृकरावणपराभवपूर्वकस्वोत्कर्षप्राप्तिं प्रतिज्ञाय मिथ्या कथं करिष्यति न करिष्यतीत्यर्थः, अतः तस्य रामस्य तुष्टिर्न भवेत् अस्मत्कर्तृकसीतानयनेनेति शेषः, अतः कृतमपि कर्म विफलं भवेत् । सार्धश्लोक एकान्वयी ॥ १७ ॥ १८ ॥

१९] ति० टी०-अस्य कार्यस्य निवेदने मतिं कृत्वेति शेषः ॥ १९ ॥

रा० टी०-वृथेति । हे वानरपुङ्गवाः ! दर्शितं रावणविषये प्रकटितमपि वीर्यं वृथा आज्ञामन्तरा निरर्थकं भवेत् तस्मात् अस्य कृतस्य कार्यस्य सीतादर्शनस्य निवेदने बोधनार्थं यत्र रामः तत्र वयं सर्वे गच्छाम । सार्धश्लोक एकान्वयी ॥ १९ ॥

२०] ति० टी०-अथ जाम्बवानङ्गदक्रोधपरिहाराय तन्मतं बहुमान्य सुहृद्भावेन निवर्तयति—न तावदिति । हे राजपुत्र ! यथा भवान्पश्यति विचारयति एषा मतिर्नोऽस्माकमक्षमा न, किंतु युक्तैव । यथा रामस्य मतिर्निविष्टाऽवस्थिता तथा कार्यसिद्धिं भवान्पश्यत्वित्यर्थः ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०-स्वोक्ते अङ्गदसंमतिसंपादनार्थमाह—नेति । हे राजपुत्र ! यतो भवान् यथा यथावत् पश्यति विचारयति अतः

१ एतदादि श्लोकयुग्मं गो० नास्ति । २ एतदादि सार्धं श्लोकपञ्चकं गो० नास्ति ।

एकषष्टितमः सर्गः ।

महेन्द्रतः किष्किन्धाभिमुखं समुत्पतिताः कपयो मार्गप्राप्ते दधिमुखरक्षिते सुग्रीवप्रियतमे मधुवनेऽवतेरुः प्राप्ताङ्गदानुज्ञैः कीर्शैर्मधुवनफलोपभोगे प्रारब्धे संक्रुध्यागतं प्रतिषेद्धारं दधिमुखं ते नखदशनप्रहारैः प्रजहुः ।

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः । अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १ ॥
प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरःसराः । महेन्द्राग्रात्समुत्पत्य पुप्लुवुः प्लवगर्षभाः ॥ २ ॥
मेरुमन्दरसंकाशा मत्ता इव महागजाः । छादयन्त इवाकाशं महाकाया महाबलाः ३ ॥
सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् । हनूमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४ ॥
राघवेचार्थनिर्वृत्तिं कर्तुं च परमं यशः । समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५ ॥
प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः । सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६ ॥
प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः । नन्दनोपममासेदुर्वनं द्रुमशतायुतम् ॥ ७ ॥
यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् । अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८ ॥
यद्रक्षति महावीरः सदा दधिमुखः कपिः । मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९ ॥
ते तद्वनमुपागम्य बभूवुः परमोत्कटाः । वानरा वानरेन्द्रस्य मनःकान्तं महावनम् ॥ १० ॥

एषा मतिर्भवत्निश्चयो नोऽस्माकमक्षमा अयुक्ता न तथापि यथा येन प्रकारेण रामस्य मतिर्निश्चयः निविष्टा प्राप्ता तथा तेनैव प्रकारेण कार्यसिद्धिं भवान् पश्यतु विचारयतु ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

गो० टी०–अथ जाम्बवानङ्गदवाक्यं बहु मन्यमानः सुहृद्भावेन प्रतिषेधति—न तावदिति । अक्षमा अयुक्ता न किन्तु युक्तैवेत्यर्थः । यद्यपि सम्यगुक्तं समर्थैश्चापि रामाज्ञानुसारेण कर्तव्यम् न स्वातन्त्र्येणेत्यर्थः ॥ ७ ॥

अस्मिन्सर्गे सार्धपट्श्लोकाः

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१] ति ०टी०–अगृह्णन्त युक्तियुक्तत्वेनामन्यन्त ॥ १ ॥

रा० टी०–जाम्बवद्वचनश्रवणानन्तरकालिकं वानराणां वृत्तान्तमाह—तत इत्यादिभिः । अङ्गदप्रमुखा हनूमांश्च वनौकसः जाम्बवतो वाक्यमगृह्णन्त ॥ १ ॥

गो० टी०–तत इत्यादि ॥ १ ॥

२] ति० टी०–पुप्लुवुः प्लवन्तो जग्मुः ॥ २ ॥

३] ति० टी०–आकाशं छादयन्त इवेत्युत्प्रेक्षा ॥ ३ ॥

४] ति० टी०–सभाज्यमानं पूज्यमानम् । भूतैः सिद्धादिभिः । दृष्टिभिर्वहन्त इव प्रीतिपूर्वकानिमिषदर्शनाद्दृष्टीनां वाहकत्वोत्प्रेक्षा ॥ ४ ॥

५] ति० टी०–राघवे कार्यनिर्वृत्तिं कार्यसिद्धिं समाधाय निश्चित्य तस्यात्मनश्च परमं यशः कर्तुं च निश्चित्य पुप्लुवुरिति संबन्धः । कर्मसिद्धिभिः सीतादर्शनलङ्कादहनकर्मभिरुन्नता उन्नतचित्ताः ॥ ५ ॥

रा० टी०–प्रीतिमन्त इति । आकाशं छादयन्त इव मत्ता महागजा इव महाकायाः भूतैः सिद्धादिभिः सभाज्यमानं पूज्यमानं हनूमन्तं दृष्टिभिः अनिमिषावलोकनैः वहन्त इव समृद्धः संपन्नः अर्थः प्रयोजनं येषां ते कर्मसिद्धिभिः सीतादर्शनलङ्कादहनादिभिः उन्नता उद्गतचित्ताः वायुपुत्रपुरःसराः प्रीतिमन्तः सर्वे वानराः राघवे राघवस्य अर्थनिर्वृत्तिं कार्यसिद्धिं कर्तुं संपादयितुं परमं यशः समादाय प्राप्य महेन्द्रात्समुत्पत्य पुप्लुवुः जग्मुः । चतुर्णामेकत्रान्वयः ॥ २–५ ॥

गो० टी०–प्रीतिमन्त इत्यादि । सभाज्यमानं संपूज्यमानम् । वहन्त इव दृष्टिभिरिति । प्रीतिपूर्वकानिमिषदर्शनाद्दृष्टिष्वारोप्य नयन्त इवेत्युत्प्रेक्षा । अर्थनिर्वृत्तिम् अर्थसिद्धिम् समाधाय निश्चित्य संकल्प्य वा समृद्धार्थाः सिद्धकार्याः कर्मसिद्धिभिः कार्यसिद्धिभिः उन्नताः इतरेभ्य उत्कृष्टाः । रामप्रतीकारे रामप्रत्युपकारे । पुप्लुवुरिति पूर्वेण संबन्धः ॥२–७॥

६] ति० टी०–रामप्रतीकारे रामकर्तव्ये रावणप्रतीकारे निश्चितार्थाः अभूवन्निति शेषः ॥ ६ ॥

रा० टी०–प्रियेति । सर्वे प्रियाख्याने उन्मुखाः समुत्सुकाः बभूवुः । सर्वे रामप्रतीकारे रामार्थं रावणनिग्रहे निश्चितार्था अत एव सर्वे युद्धाभिनन्दिनश्च बभूवुरिति शेषः ॥ ६ ॥

७–८] ति० टी०–वनं सुग्रीवस्य मधुवनम् ॥ ७ ॥ ८ ॥

९] ति० टी०–दधिमुखस्तन्नामा ॥ ९ ॥

१०] ति० टी०–परमोत्कटास्तत्रत्यमधुपानादावत्युत्कटोत्कण्ठावन्तः । महावनाख्यं वनमित्यर्थः ॥ १० ॥

१ महेन्द्राद्रिं परित्यज्येति गो. पाठः । २ लतेति गो. पाठः । ३ वीर्य इति गो. पाठः ४ कान्ततमं महदिति गो. पाठः ।

ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् । कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११ ॥
ततः कुमारस्तान्वृद्धाञ्जाम्बवत्प्रमुखान्कपीन् । अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२ ॥
ते[1] निसृष्टाः कुमारेण धीमता वालिसूनुना । हरयः समपद्यन्त द्रुमान्मधुकराकुलान् ॥ १३ ॥
भक्षयन्तः सुगन्धीनि मूलानि च फलानि च । जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः ॥ १४ ॥
ततश्चानुमताः सर्वे सुसंहृष्टा[2] वनौकसः । मुदिताश्च ततस्ते च प्रनृत्यन्ति ततस्ततः ॥ १५ ॥
गायन्ति केचित्प्रहसन्ति केचिन्नृत्यन्ति केचित्प्रणमन्ति केचित् ।
पठन्ति[3] केचित्प्रचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् ॥ १६ ॥
परस्परं केचिदुपाश्रयन्ति[4] परस्परं केचिदपि[5]ब्रुवन्ति ।
द्रुमाद्द्रुमं केचिदभिद्रवन्ति क्षितौ नगाग्रान्निपतन्ति केचित् ॥ १७ ॥
महीतलात्केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसंपतन्ति ।
गायन्तमन्यः प्रहसन्नुपैति रुदन्तमन्यः प्ररुदन्नुपैति ॥ १८ ॥

रा० टी०–प्लवमाना इति । काननौकसः वानराः नन्दनोपमं नन्दनसदृशं वनमासेदुः प्रापुः ॥ ७ ॥

रा० टी०–यदिति । अभिरक्षितं सर्वतो रक्षायुक्तम् अत एव सर्वभूतानामधृष्यं यत् दधिमुखो नाम सुग्रीवस्य मातुलः रक्षति रक्षयति यच्च सुग्रीवस्य मनःकान्तं महावनम् अनेकवनिकाविशिष्टं मधुवनं नाम वनं तत् उपागम्य प्राप्य ते वानराः परमोत्कटा तत्रत्यमधुपानेनातिमत्ताः बभुवुः । श्लोकत्रयमेकान्वयि ॥ ८–१० ॥

गो० टी०–यत्तन्मधुवनमित्यादि । परमोत्कटाः परमोत्सुकाः ॥ ८–१०

११] ति० टी०–मधुपिङ्गला मधुपिङ्गलवर्णाः ॥ ११ ॥

रा० टी०–मधुपानप्रकारमाह—तत इति । मधुपिङ्गलाः मधुवत् पिङ्गलवर्णाः ते वानराः मधुवनं दृष्ट्वा कुमारं तद्रक्षकं मधून्ययाचन्त ॥ ११ ॥

गो० टी०–तत इति । मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः वानराः ॥ ११ ॥

१२] ति० टी०–अनुमान्य कृतानुमतिकान्कृत्वा । निसर्गमाज्ञाम् ॥ १२ ॥

रा० टी०–तत इति । कुमारः जाम्बवत्प्रमुखान् अनुमान्य सत्कृत्य निसर्गं स्वभावसिद्धं मधु पुष्पविशेषरसं तेषां भक्षणे भक्षणार्थं ददौ ॥ १२ ॥

गो० टी०–ततः कुमार इति । अनुमान्य अनुमतिं कारयित्वा । निसर्गं विसर्जनम् अनुमतिमिति यावत् ॥ १२ ॥

१३] ति० टी०–निसृष्टाः कृताज्ञाः ॥ १३ ॥

रा० टी०–ते इति । कुमारेण वालिसूनुनाऽङ्गदेन च निसृष्टाः प्रेरिताः ते हरयः मधुकरैः आकुलान् व्याप्तान् द्रुमान् समपद्यन्त प्राप्नुवन् ॥ १३ ॥

गो० टी०–ततश्चेति । पूर्वमेव सीतादर्शनात्प्रहृष्टाः ततः मधुवनभङ्गे अङ्गदेनानुमताः सन्तस्ततो मुदिताः तत्प्रेरिताः प्रनृत्यन्तोऽभवन् ॥ १३ ॥

१४] ति० टी०–भक्षयन्तः अभक्षयन्नित्यर्थः ॥ १४ ॥

रा० टी०–भक्षयन्त इति । मूलानि फलानि च भक्षयन्तो वानराः प्रहर्षं जग्मुः मदोत्कटाः बभूवुश्च ॥ १४ ॥

१५] ति० टी०–अनुमता मधुपानादौ कृतानुमतिकाः । हर्षमुदोर्बाह्याभ्यन्तरत्वकृतो भेदः ॥ १५ ॥

रा० टी०–तत इति । अनुमताः अङ्गदसंमतिविषयीभूताः सुसंहृष्टाः प्राप्तसंतोषाः अत एव मुदिताः सर्वे वानराः ततस्ततः तत्तत्तनुसंनिधौ नृत्यन्ति ॥ १५ ॥

१६] ति० टी०–तत्र बाह्यमानन्दसूचकमाह—गायन्तीति ॥ १६ ॥

रा० टी०–सर्वेषां तत्कालिकक्रियामाह—गायन्तीत्यादिभिः ॥ १६ ॥

गो० टी०–मधुवनभङ्गाभ्यनुज्ञानकृतं वानरहर्षविकारमेव वर्णयति सर्गशेषेण—'गायन्ति केचित् प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् । पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित्' इति पाठः । प्रणमन्ति अवाक्शिरसः पतन्ति । पतन्ति ऊर्ध्वपादाः पृष्ठेन पतन्ति ॥ १४—१७ ॥

१७] ति० टी०–अतिब्रुवन्ति विवादं कुर्वन्ति । नगाग्राद्वृक्षाग्रात् ॥ १७ ॥

रा०टी०–परस्परमिति।अतिब्रुवन्ति विवादं कुर्वन्ति१७॥

१८] ति० टी०–गानरोदनहासा मधुपानमत्तधर्माः॥१८॥

रा० टी०–महीतलादिति । उदीर्णवेगाः अतिवेगवन्तः केचित् महीतलात् महाद्रुमाग्राणि अभिसंपतन्ति ॥ १८ ॥

---

१ एतदादि श्लोकद्वयं गो. नास्ति । २ संप्रहृष्टा इति गो. पाठः । ३ पतन्ति केचिद्विचरन्तीति गो. पतन्तीति रा. पाठः । ४ उपाक्रमन्त इति गो. पाठः । ५ हसन्तमिति गो. पाठः ।

तुदन्तमन्यः प्रणुदन्नुपैति [नुदन्तमन्यः प्रणदन्नुपैति ।]
समाकुलं तत्कपिसैन्यमासीत् । [मधुप्रपानोत्कटसत्त्वचेष्टम् ।]
न चात्र कश्चिन्न बभूव मत्तो न चात्र कश्चिन्न बभूव दृप्तः ॥ १९ ॥
ततो वनं तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान् ।
समीक्ष्य कोपादधिवक्त्रनामा निवारयामास कपिः कपींस्तान् ॥ २० ॥
स तैः प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवृद्धवीरः ।
चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः ॥ २१ ॥
उवाच कांश्चित्परुषाण्यभीतमसक्तमन्यांश्च तलैर्जघान ।
समेत्य कैश्चित्कलहं चकार तथैव सान्त्वोपजगाम कांश्चित् ॥ २२ ॥
स तैर्मदात्प्रतिवार्यवेगैर्बलाच्च तेन प्रतिवार्यमाणैः ।
प्रधर्षणे त्यक्तभयैः समेत्य प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥ २३ ॥
नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः ।
मदात्कपिं ते कपयः समन्तान्महावनं निर्विषयं च चक्रुः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

१९–२०] ति० टी०–तुदन्तं व्यथयन्तम् । समाकुलमुत्कटमत्तचेष्टम् । दृप्तोऽतिमत्तः ॥ १९ ॥ २० ॥

रा० टी०–तुदन्तमिति । तुदन्तं व्यथयन्तमन्यः प्रणदन् अतिनादं कुर्वन्नुपैति प्राप्नोति अतः तत् कपिसैन्यं समाकुलं तुमुलमासीत् । तत्र हेतुः—यो मत्तो न बभूव सोऽत्र कश्चिन्न अत एव यो दृप्तो न बभूव सोऽप्यत्र न बभूव ॥ १९ ॥

रा० टी०–तत इति । परिभक्ष्यमाणं वनं विध्वंसितपत्रपुष्पान् द्रुमांश्च समीक्ष्य दधिवक्त्रनामा कपिः तान् विध्वंसनादिकर्तॄन् निवारयामास ॥ २० ॥

गो० टी०–समाकुलमिति । मधुप्रपानोत्कटसत्त्वचेष्टं मत्तचित्तचेष्टम् ॥ १८—२२ ॥

२१–२२] ति० टी०–प्रवृद्धैः प्रवृद्धमदैः ॥ २१ ॥ २२ ॥

रा० टी०–स इति । प्रवृद्धैः तैर्वानरैः परिभर्त्स्यमानो वनस्य गोप्ता स दधिवक्त्रनामा वानरेभ्यो वनस्य रक्षां प्रति भूयो मतिं चकार ॥ २१ ॥

रा० टी०–उवाचेति । अभीतं यथा भवति तथा कांश्चित् परुषाणि उवाच अन्यान् असक्तम् अत्यासंजनरहितं यथा भवति तथा तलैर्जघान कैश्चित् कलहं चकार कांश्चित् सान्त्वा सामरूपोपायेन जगाम ॥ २२ ॥

२३] ति० टी०–मदादप्रतिवार्यो निवारयितुमशक्यो वेगो येषां तैः । तेन दधिमुखेन बलात्प्रतिवार्यमाणैः । प्रधर्षणे दोषं राजदण्डमनवेक्ष्य, अत एव त्यक्तभयैः समेत्य प्रकृष्यते स्म २३

रा० टी०–स इति । अप्रतिवार्याः वेगाः येषां तैः अत एव तेन रक्षकेण अप्रतिवार्यमाणैः त्यक्तभयैः तैर्वानरैः उद्धर्षणे रक्षकपराभवे दोषं राजदण्डमनवेक्ष्य अपरिगणय्य समेत्य एकीभूय स रक्षकः बलात् प्रकृष्यते पुच्छादिग्रहणेन इतस्ततो नीयते ॥ २३ ॥

२४] ति० टी०–समापयन्तो मृतकल्पं कुर्वन्तः । महावनं निर्विषयं निर्गतमधुफलादिभोज्यम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

रा० टी०–नखैरिति । कपिं नखैस्तुदन्तो व्यथयन्तः समापयन्तः मृतप्रायं कुर्वन्तः ते कपयः समन्तान्महावनं निर्विषयं फलादिभ्यो रहितं चक्रुः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

गो० टी०–नखैरिति । निर्विषयं निर्गतमधुमूलादिभोग्यवस्तुकं चक्रुरित्यर्थः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

१ रुदन्तमिति गो. पाठः । २ प्रणदन्निति रा. पाठः । ३ पादोऽयमधिकः गो. पाठे । ४ °णि धृष्टेति गो. पाठः । ५ संपरिवार्यवाक्यैरिति गो. पाठः । ६ प्रधर्षित इति गो. उद्धर्षणे त्यक्तेति रा. पाठः । ७ तमिति गो. पाठः । ८ समग्रा इति गो. पाठः ।

द्विषष्टितमः सर्गः ।

हनुमता कृतानुमतिकाः कपयः सक्षोभं मधुवनं प्रविश्य कृतमधुपानाः संगीतकनृत्तादिक्षीवनृत्तं चेष्टयन्तः निषेधप्रवृत्तान्वनरक्षकांस्ताडयामासुः । ततो निर्गतेषु रक्षकेषु दधिमुखे तन्निवेद्य पुनस्तेन साकंनिषेद्धुं प्रवृत्तेष्वङ्गदो दधिमुखं संताड्य भूमौ निष्पिपेष । ततो निर्गता दधिमुखादयो वनरक्षकाः सुग्रीवाय तन्निवेदयितुं किष्किन्धामेत्य रामसमीपस्थंसुग्रीवचरणौ प्रणेमुः ।

तानुवाच हरिश्रेष्ठो हनूमान्वानरर्षभः । अन्यग्रमनसो यूयं मधु सेवत वानराः ॥ १ ॥
अहमावर्जयिष्यामि[1] युष्माकं परिपन्थिनः । श्रुत्वा हनूमतो वाक्यं हरीणां प्रवरोऽङ्गदः ॥ २ ॥
प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु । अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया ॥ ३ ॥
अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् । अङ्गदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ॥ ४ ॥
साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् । पूजयित्वाङ्गदं सर्वे वानरा वानरर्षभम् ॥ ५ ॥
जग्मुर्मधुवनं यत्र नदीवेग इव द्रुमम् । ते प्रविष्टा मधुवनं पालानाक्रम्य शैक्तितः[2] ॥ ६ ॥
अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् । पपुः सर्वे मधु तदा रसवत्फलमाददुः ॥ ७ ॥
उत्पत्य च ततः सर्वे वनपालान्समागतान् । ते[3] ताडयन्तः शतशः सक्ता[4] मधुवने तदा ॥ ८ ॥
मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते । पिबन्ति[5] कपयः केचित्सङ्घशस्तत्र हृष्टवत् ॥ ९ ॥

१] ति० टी०–पुनरुक्तमेव विस्तरेणाह—तानिति ॥१॥

रा० टी०–वानरकर्तृकरक्षकपराभवानन्तरकालिकं वृत्तान्तमाह—तामित्यादिभिः। हे वानराः ! युष्माकं परिपन्थिनः रिपून् अहम् आवर्जयिष्यामि अतो यूयं मधु सेवत पिबत इति वचो हनुमान् तान् वानरान् उवाच । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–तानित्यादि । तान् दधिमुखकलहव्याकुलितान् । अन्ये तु तानुवाचेत्यादिना पूर्वसर्गोक्तं संक्षेपेणानूद्य उपरि गच्छतीत्याचक्षते । अपरे तु सर्गमुखे केचिच्छ्लोकाः पतिता इत्याहुः ॥ १ ॥

२–३ ति० टी०–आवर्जयिष्यामि निवारयिष्यामि॥२॥३॥

रा० टी०–श्रुत्वेति । हनुमतो वाक्यं श्रुत्वा अङ्गदः प्रत्युवाच । तदाकारमाह—कृतकार्यस्य हनुमतः अकार्यमपि वाक्यम् अस्माभिरवश्यं कर्तव्यम् ईदृशं कार्यं कर्तव्यमिति किम् अतः मधु पिबत । अर्धचतुष्टयमेकान्वयि ॥ २ ॥ ३

गो० टी०–श्रुत्वेत्यादि । अङ्गेति संबोधने निपातः २॥३

४–५] ति० टी०–ईदृशमेतन्मात्रार्थकम् ॥ ४ ॥ ५ ॥

रा० टी०–अङ्गदस्येति । वानराः वचनं प्रत्यपूजयन् ॥ ४ ॥

गो० टी०–अङ्गदस्येति । अङ्गदस्य स्वामिनः मुखाद्वचनं हनुमदुक्तं श्रुत्वा ॥ ४ ॥

रा० टी०–पूजयित्वेति । अङ्गदं पूजयित्वा यत्र मधुवनं तत्र वानरर्षभाः सर्वे वानराः नदीवेग इव जग्मुः ॥ ५ ॥

गो० टी०–पूजयित्वेति । जग्मुर्मधुवनमिति प्रदेशभेदविवक्षया । यद्वा दधिमुखनिवारणेन भीतानां हनुमदङ्गदाभ्यां पुनरनुज्ञापनेन पुनर्जग्मुरित्यर्थः ॥ ५ ॥

६] ति० टी०–यत्र मधुवनं यत्र मार्गे गमनेन मधुवनं प्राप्यते तेन मार्गेण जग्मुः ॥ ६ ॥

७] ति० टी०–ते पटवो हनुमांश्च मैथिलीं दृष्ट्वाऽन्ये तन्मुखात्तां लङ्कास्थां श्रुत्वा महत्कार्यकरणेन भयराहित्यादतिसर्गादङ्गदानुज्ञानान्मधुवनं प्रविष्टाः पालान्बलादाक्रम्य बद्धा मधु पपू रसवत्फलं चाददुः, भक्षणार्थमिति शेषः ॥ ७ ॥

रा० टी०–ते इति । मैथिलीं दृष्ट्वा श्रुत्वा च आगताः सर्वे वानराः अतिसर्गात् अङ्गदाज्ञातः शक्तितः सामर्थ्यात् पालान् मधुवनरक्षकान् आक्रम्य मधु पपुः फलमाददुश्च । अत्र दर्शनं हनुमत्कर्तृकं श्रवणं त्वितरकर्तृकमिति विवेकः । सार्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०–त इति । वीर्यतः बलात् । अतिसर्गादङ्गदाभ्यनुज्ञानात् । दृष्ट्वा श्रुत्वा च मैथिलीं दर्शनश्रवणाभ्यां च हेतुना वनपालानाक्रम्य आक्षिप्य ॥ ६ ॥ ७ ॥

८–९] ति० टी०–मधुवने सक्ता भक्षणार्थं लग्नाः॥८॥९॥

रा० टी०–उत्पत्येति । समागतान् शतशो वनपालान् ताडयन्तः सर्वे वानराः ततस्तस्मिन् मधुवने सक्ता बभूवुरिति शेषः ॥ ८ ॥

गो० टी०–उत्पत्येति । सक्तान् वनपालने रतान् ॥ ८ ॥

रा० टी०–मधूनीति । संघशो वियमानाः केचित्कपयो द्रोणमात्राणि अष्टाढकप्रमाणानि मधूनि बाहुभिः परिगृह्य हृष्टवत् संतोषकारकं यथा भवति तथा पिबन्ति ॥ ९ ॥

१ वारयिष्यामीति गो. पाठः । २ वीर्यत इति गो. पाठः । ३ ताडयन्ति स्मेति गो. पाठः । ४ सक्तानिति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ महाकार्येति युक्तं भाति ।

घ्नन्ति स्म सहिताः सर्वे भक्षयन्ति तथापरे । केचित्पीत्वापविध्यन्ति मधूनि मधुपिङ्गलाः ॥ १० ॥
मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः । अपरे वृक्षमूलेषु शाखा गृह्य व्यवस्थिताः ॥ ११ ॥
अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते । उन्मत्तवेगाः प्लवगा मधुमत्ताश्च हृष्टवत् ॥ १२ ॥
क्षिपन्त्यपि तथान्योन्यं स्खलन्ति च तथापरे । केचित्क्ष्वेडान्प्रकुर्वन्ति केचित्कूजन्ति हृष्टवत् ॥ १३ ॥
हरयो मधुना मत्ताः केचित्सुप्ता महीतले । धृष्टाः केचिद्धसन्त्यन्ये केचित्कुर्वन्ति चेतरत् ॥ १४ ॥
कृत्वा केचिद्वदन्त्यन्ये केचिद्बुध्यन्ति चेतरत् । येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु ॥१५॥
तेऽपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः । जानुभिश्च प्रघृष्टाश्च देवमार्गं च दर्शिताः ॥ १६ ॥
अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः । हनूमता दत्तवरैर्हतं मधुवनं बलात् ॥
वयं च जानुभिर्घृष्टा देवमार्गं च दर्शिताः ॥ १७ ॥

गो० टी०–मधूनीति । मधूनि मधुपटलानि द्रोणमात्राणि द्रोणप्रमाणानि आढकप्रमाणानि घ्नन्ति स्म पीतावशिष्टानि मधुपटलानि भिन्दन्ति स्म ॥ ९ ॥

१०–११] ति० टी०–अपविद्धयन्ति प्रक्षिपन्ति मधूनि ते । मधुपटलानि ॥ १० ॥ ११ ॥

रा० टी०–घ्नन्तीति । मधुपिङ्गलाः सहिताः सर्वे वानरा मधूनि मधुपटलानि घ्नन्ति ताडयन्ति अपरे भक्षयन्ति पिबन्ति केचित्पीत्वा अपविध्यन्ति प्रक्षिपन्ति ॥ १० ॥

रा० टी०–मधूच्छिति । उत्कटाः मधुमत्ताः केचित् मधूच्छिष्टेन उच्छिष्टमधुना अन्योन्यं जघ्नुः अपरे शाखाः गृह्य गृहीत्वा वृक्षमूले व्यवस्थिताः ॥ ११ ॥

गो० टी०–केचिदिति । अपविध्यन्ति अवक्षिपन्ति । मधूच्छिष्टेन सिक्थकेन ' मधूच्छिष्टं तु सिक्थकम् ' इत्यमरः । उत्कटाः मत्ताः ॥ १० ॥ ११ ॥

१२–१३] ति० टी०–उन्मत्तवेगा उन्मत्तानां वेगो येषां ते । यद्वाऽतिशयितवेगा इत्यर्थः ॥ १२ ॥ १३ ॥

रा० टी०–अत्यर्थमिति । मधुमत्ताः अत एव मदग्लानाः मदहेतुकग्लानिविशिष्टाः अत एव उन्मत्तभूताः उन्मत्तत्वं प्राप्ताः प्लवगाः पर्णानि आस्तीर्य शेरते ॥ १२ ॥

गो० टी०–उन्मत्तभूता इति । हृष्टवत् हर्षयुक्तमिति क्रियाविशेषणम् । हृष्टार्हमिति वार्थः । क्षिपन्ति उत्क्षिप्य पातयन्ति स्खलन्ति पादेन नुदन्तीत्यर्थः ॥ १२ ॥

रा० टी०–क्षिपन्तीति । केचित् अन्योन्यं क्षिपन्ति क्षेपयन्ति अपरे स्खलन्ति केचित् क्ष्वेडान् विलासान् प्रकुर्वन्ति केचित् हृष्टवत् हर्षकारकं यथा भवति तथा कूजन्ति ॥ १३ ॥

गो० टी०–केचिदिति । क्ष्वेलां सिंहनादम् ' क्ष्वेला तु सिंहनादः स्यात् ' इत्यमरः । कूजन्ति पक्षिवच्छब्दायन्ते ॥१३॥

१४] ति० टी०–इतरद्रोदनम् ॥ १४ ॥

रा० टी०–हरय इति । मधुना मत्ताः केचित् हरयः हसन्ति अन्ये इतरत् रोदनादि कुर्वन्ति ॥ १४ ॥

१५] ति० टी०–केचिदन्यत्कृत्वान्यद्वदन्ति । केचिदुक्तवचनार्थं विद्यमानं परित्यज्यान्यमेव बुध्यन्ते ॥ १५ ॥

रा० टी०–कृत्वेति । केचित् कृत्वा किंचित्कर्म संपाद्य वदन्ति अन्ये केचित् इतरत् कृतकार्यात् भिन्नं कार्यं बुध्यन्ति । अर्धं पृथक् । ये इति । अत्र मधुवने दधिमुखस्य प्रेष्याः भृत्याः ये मधुपालाः स्युः अतिष्ठन् तेऽपि भीमैर्वानरैः प्रतिषिद्धाः सन्तः दिशो गताः पलायिताः । अर्धद्वयमेकान्वयि ॥ १५ ॥

गो० टी०–कृत्वेति । अन्ये अवाच्यं किंचिद्ग्राम्यं कर्म कृत्वा हसन्ति । इतरत्तद्विलक्षणं ग्राम्यं कर्म केचित्कुर्वन्ति । केचिदन्यत् ग्राम्यं कर्म कृत्वा अस्माभिरिदं कृतमिति वदन्ति उच्चारयन्ति । केचिदितरद् बुध्यन्ति एवं करिष्यामीति संकल्पयन्तीत्यर्थः ॥ १४ ॥ १५ ॥

१६–१७] ति० टी०–प्रतिषिद्धास्ताडनादिना निरस्ताः । जानुभिः प्रघृष्टा जानुषु गृहीत्वा आकृष्टाः । देवमार्गमपानद्वारमिति तीर्थः । देवमार्गं दर्शिताः पादौ गृहीत्वोर्ध्वं प्रक्षिप्ता इत्यर्थः । कर्णावङ्गुलीभिर्घृत्वोर्ध्वीकृता इति वार्थ इत्यन्ये १६-१७

रा० टी०–जानुभिरिति । जानुभिः जानुग्रहणैः प्रघृष्टाः आकृष्टा अनन्तरं देवमार्गम् आकाशं दर्शिताः प्रक्षेपेण प्रापिता इत्यर्थः अत एव परमोद्विग्राः केचित् रक्षकाः दधिमुखं गत्वा प्राप्य हनूमता दत्तः वरः यथेच्छं मूलफलादिस्वीकारो येभ्यः तैः मधुवनं हतं विनाशितं वयं च जानुभिर्घृष्टाः सन्तः देवमार्गं प्रदर्शिताः इति वचः अब्रुवन् । अर्धचतुष्टयमेकान्वयि ॥१६॥१७॥

गो० टी०–जानुभिरिति । जानुभिः प्रकृष्टाः जानून्यवलम्ब्य कृष्टा इत्यर्थः । देवमार्गम् अपानद्वारम् । देवशब्दो वायुवाची उपनिषदि वायुलोके देवलोकशब्दप्रयोगात् । दर्शिताः दर्शनं कारिताः दृशेरुपसंख्यानादणि कर्तुः कर्मत्वम् "प्यन्तात्कर्तुश्च कर्मणः" इति तस्यैवाभिधेयत्वं च ॥ १६–१८ ॥

१ पिबन्तीति गो. पाठः । २ शाखामिति गो. पाठः । ३ भूता इति गो. पाठः । ४ च तदेति गो. पाठः । ५ क्ष्वेलामिति गो. पाठः । ६ कृत्वेति गो. पाठः । ७ तु प्रकृष्टा इति गो. पाठः । ८ प्रेति गो. पाठः । ९ कृष्टा इति गो. पाठः ।

तदा दधिमुखः क्रुद्धो वनपस्तत्र वानरः । हतं मधुवनं दृष्ट्वा सान्त्वयामास तान्हरीन् ॥ १८ ॥
एतागच्छत गच्छामो वानरानतिदर्पितान् । बलेनावारयिष्यामि प्रभुञ्जानान्मधूत्तमम् ॥ १९ ॥
श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः । पुनर्वीरा मधुवनं तेनैव सहिता ययुः ॥ २० ॥
मध्ये चैषां दधिमुखः सुप्रगृह्य महातरुम् । समभ्यधावद्वेगेन सर्वे ते च प्लवङ्गमाः ॥ २१ ॥
ते शिलाः पादपांश्चैव पाषाणानपि वानराः । गृहीत्वाभ्यागमन्क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २२ ॥
[ते स्वामिवचनं वीराः हृदयेष्ववसज्य तत् । त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥
वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् । अभ्यक्रामँस्ततो वीरा पालास्तत्र सहस्रशः ॥]
बलान्निवारयन्तश्च आसेदुर्हरयो हरीन् । संदष्टोष्ठपुटाः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ २३ ॥
अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुङ्गवाः । अभ्यधावन्त वेगेन हनुमत्प्रमुखांस्तदा ॥ २४ ॥
सदृक्षं तं महाबाहुमापतन्तं महाबलम् । वेगवन्तं विजग्राह बाहुभ्यां कुपितोऽङ्गदः ॥ २५ ॥
मदान्धो नं कृपां चक्रे आर्यकोऽयं ममेति सः । अथैनं निष्पिपेषाशु वेगेन वसुधातले ॥ २६ ॥
स भग्नबाहूरुमुखो विह्वलः शोणितोक्षितः । प्रमुमोह महावीरो मुहूर्तं कपिकुञ्जरः ॥ २७ ॥
[ससमाश्वस्य सहसा संक्रुद्धो राजमातुलः । वानरान्वारयामास दण्डेन मधुमोहितान् ॥]
स कथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः । उवाचैकान्तमागत्य स्वान्भृत्यान्समुपागतान् ॥ २८ ॥

१८] ति० टी०–तान्स्वसंबन्धिनः पालान् ॥ १८ ॥

रा० टी०–तदेति । तदा रक्षकगमनानन्तरकाले मधुवनं हतं श्रुत्वा क्रुद्धो वनपो दधिमुखः तानागतान् हरीन् सान्त्वयामास ॥ १८ ॥

१९–२०] ति० टी०–एतागच्छत अग्रे इति शेषः गच्छामः वयमप्यागच्छाम इत्यर्थः ॥ १९ ॥ २० ॥

रा० टी०–सान्त्वप्रकारमाह—एतेति । यूयम् एत वानरान् गच्छत वयं गच्छामः मधूत्तमं प्रभुञ्जानान् वानरान् वयमावारयिष्यामः ॥ १९ ॥

रा० टी०–श्रुत्वेति । दधिमुखस्य वचनं श्रुत्वा तेन दधिमुखेन सह वानरर्षभाः मधुवनं पुनर्ययुः ॥ २० ॥

गो० टी०–इहेति । गच्छाम इति तैः साहित्येन बहुवचनम् आत्मनि बहुवचनं वा ॥ १९–२३ ॥

२१–२२] ति० टी०–सर्वे ते च । समभ्यधावन्निति शेषः ॥ २१ ॥ २२ ॥

रा० टी०–मध्य इति । तेषां प्रेष्याणां मध्ये स्थितः दधिमुखः महातरुं सुप्रगृह्य वेगेन समभ्यधावत् प्लवङ्गमाश्च समभ्यधावन् ॥ २१ ॥ २२ ॥

रा० टी०–तत्प्रकारमाह—ते इति । पाणिभिः शिलापादपांश्च गृहीत्वा यत्र कपिकुञ्जराः तत्र क्रुद्धाः सन्तोऽभ्यगमन् ॥ २३ ॥

२३–२५] ति० टी०–हरयः पालाः । हरीन्हनुमदादीन् ॥ २३–२५ ॥

रा० टी०–बलादिति । क्रुद्धाः अत एव संदष्टौष्ठपुटाः अत एव मुहुर्मुहुर्भर्त्सयन्तः वारयन्तो हरयः हरीन् आसेदुः प्रापुः ॥ २४ ॥

रा० टी०–अथेति । दधिमुखं दृष्ट्वा हनुमत्प्रमुखाः अभ्यधावन्त ॥ २५ ॥

रा० टी०–सेति । सदृक्षं ऋक्षसहितमापतन्तं तं दधिमुखम् अङ्गदो विजग्राह ॥ २६ ॥

२६–२८] ति० टी०–आर्यकः सुग्रीवमातुलत्वात्पूज्यः ॥ २६—२८ ॥

रा० टी०–मदान्धा इति । मदान्धो दधिमुखः ममायमार्यकः स्वामीति बुद्ध्या कृपां न चक्रे अथातः सोऽङ्गदः एनं दधिमुखं वेगेन वसुधातले निष्पिपेष ॥ २७ ॥

रा० टी०–स इति । भग्नबाहूरुमुखः अत एव शोणितोक्षितो दधिमुखः प्रमुमोह ॥ २८ ॥

रा० टी०–स इति । तैः अङ्गदप्रमुखैः कथंचिद्विमुक्तः स दधिमुखः एकान्तमागत्य स्वान् भृत्यानुवाच ॥ २९ ॥

१ तत इति गो. पाठः । २ श्रुत्वेति गो. पाठः । ३ इहेति गो. पाठः । ४ बलेति गो. पाठः । ५ बलेन वारयिष्यामो मधु भक्षयतो वयमिति गो. पाठः । ६ सहसेति गो. पाठः । ७ प्रगृह्य तरसेति गो. पाठः । ८ धावदिति गो. रा. पाठः । ९ चापि पर्वतांश्चापीति गो. पाठः । १० श्लोकद्वयमेतदधिकं गो. पाठे । ११ श्लोकोऽयं गो. नास्ति । १२ प्रमुखा इति गो. पाठः । १३ तं सवृक्षमिति गो. पाठः । १४ आर्यकं प्राहरत्तत्रेति गो. पाठः । १५ च नवेदैनमिति गो. पाठः । १६ मुमोह सहसेति गो. पाठः । १७ श्लोकोऽयमधिकः गो. पाठे । १८ आश्लिष्येति गो.पाठः ।

एतागच्छत गच्छामो भर्ता नो यत्र वानरः । सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ २९ ॥
सर्वं चैवाङ्गदे दोषं श्रावयिष्याम पार्थिवे । अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥ ३० ॥
इष्टं मधुवनं ह्येतत्सुग्रीवस्य महात्मनः । पितृपैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३१ ॥
स वानरानिमान्सर्वान्मधुलुब्धान्गतायुषः । घातयिष्यति दण्डेन सुग्रीवः ससुहृज्जनान् ॥ ३२ ॥
बद्ध्वा ह्येते दुरात्मानो नृपाज्ञापरिपन्थिनः । अमर्षप्रभवो रोषः सफलो मे भविष्यति ॥ ३३ ॥
एवमुक्त्वा दधिमुखो वनपालान्महाबलः । जगाम सहसोत्पत्य वनपालैः समन्वितः ॥ ३४ ॥
निमेषान्तरमात्रेण स हि प्राप्तो वनालयः । सहस्रांशुसुतो धीमान्सुग्रीवो यत्र वानरः ॥ ३५ ॥
रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च । समप्रतिष्ठां जगतीमाकाशान्निपपात ह ॥ ३६ ॥
स निपत्य महावीरः सर्वैस्तैः परिवारितः । हरिर्दधिमुखः पालैः पालानां परमेश्वरः ॥ ३७ ॥
स दीनवदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् । सुग्रीवस्याशु तौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।

दधिमुखे सुग्रीवं प्रति मधुवनविध्वंसं प्रस्तावयति लक्ष्मणः सुग्रीवं दधिमुखवृत्तं पृच्छति । तथा श्रुतदधिमुखवृत्तो लक्ष्मणः कपीनां हर्षोदयाज्जानक्याः शुद्धिं निर्धारयति । दधिमुखं समाश्वास्य तेऽङ्गदादीञ्छीघ्रं प्रेषयितुं तं संदिदिशुः ।

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः । दृष्ट्वोद्विग्नहृदयो वाक्यमेतदुवाच ह ॥ १ ॥
उत्तिष्ठोत्तिष्ठ किमात्त्वं पादयोः पतितो मम । अभयं ते प्रदास्यामि सत्यमेवाभिधीयताम् ॥ २ ॥

२९-३२] ति० टी०-भर्ता राजा ॥ २९—३२ ॥

रा० टी०-तदाकारमाह—एत इति । यत्र सुग्रीवः तत्र गच्छामः ॥ २९

रा० टी०-सर्वं इति । वयं सर्वं अङ्गदे दोषं पार्थिवे सुग्रीवसमीपे श्रावयिष्याम श्रावयिष्यामः अतः अमर्षी सुग्रीवः वानरान् अङ्गदादीन् घातयिष्यति ॥ ३१ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—इष्टमिति । हि यतएतत् विनाशितं मधुवनं सुग्रीवस्य इष्टम् अतः इमान् वानरान् सुग्रीवो घातयिष्यति । अर्धचतुष्टयमेकान्वयि ॥ ३२ ॥ ३३ ॥

गो० टी०-स इति । गतायुष इत्यधिक्षेपवचनम् ॥ ३४॥

३३-३५] ति० टी०-नृपाज्ञापरिपन्थिनस्तदाज्ञाविरुद्धकर्तारः । अमर्षप्रभवोऽक्षमाजन्यः ॥ ३३—३५ ॥

रा० टी०-वध्या इति । नृपाज्ञया परिपन्थिनः विरोधिनः एते वध्या अत एव मे रोषः सफलो भविष्यति ॥३४॥

रा० टी०-एवमिति । दधिमुखः एवमुक्त्वा जगाम॥३५॥

रा० टी०-निमेषेति । स दधिमुखः यत्र सुग्रीवः तत्र निमेषान्तरमात्रेण प्राप्तः ॥ ३६ ॥

गो० टी०-वध्या ह्येत इति । अमर्षप्रभवः अक्षमाजन्यः । रोषस्य तज्जन्यत्वं च यो यस्मै न सहते तस्मै क्रुद्ध्यतीति प्रसिद्धम् ॥ ३५ ॥ ३६ ॥

गो० टी०-निमेषान्तरेति । निमेषान्तरमात्रेण निमेषावकाशमात्रेण । वनालयः वानरः ॥ ३७ ॥

३६-३७] ति० टी०-समप्रतिष्ठां समतलाम् । जगतीं भूमिम् । दृष्ट्वेत्यनुकर्षः ॥ ३६ ॥ ३७ ॥

रा० टी०-राममिति । रामप्रभृतिं दृष्ट्वा समप्रतिष्ठां समतलां जगतीं भूमिं निपपात प्राप्नोत् ॥ ३७ ॥

गो० टी०-रामं चेति । समप्रतिष्ठां समतलाम् । जगतीं भूमिम् ॥ ३८-४० ॥

अस्मिन्सर्गे चत्वारिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

३८] ति० टी०-तौ सर्ववानरपूज्यौ चरणावित्यन्वयः३८

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

रा० टी०-समिति । तैः भृत्यैः परिवारितः दधिमुखः संनिपत्य दीनवदनो भूत्वा शिरसि अञ्जलिं कृत्वा मूर्ध्ना सुग्रीवस्य चरणौ प्रत्यपीडयत् । अर्धचतुष्टयमेकान्वयि ॥३८॥३९॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

१-२] ति० टी०-तत इति ॥ १ ॥ २ ॥

१ एत तिष्ठन्त्विति गो. पाठः । २ सर्वं इति रा. पाठः । ३ वध्या इति गो. पाठः । ४ भाविन इति गो. पाठः । ५ नो इति गो. पाठः । संनिपत्येति गो. पाठः । ७ शुभाविति गो. पाठः । ८ भवेद्वीर सर्वमिति गो. पाठः । ९ अभिधीयते इति रा. पाठः ।

[1]किं संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि । कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर ॥ ३ ॥
स [2]समाश्वासितस्तेन सुग्रीवेण महात्मना । उत्थाय स महाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत्॥ ४ ॥
नर्क्षरजसता[3] राजन्न त्वया न च[4] वालिना । वनं निसृष्टपूर्वं ते [5]नाशितं तत्तु वानरैः ॥ ५ ॥
[6]न्यवारयमहं सर्वान्सहैभिर्वनचारिभिः । अचिन्तयित्वा मां हृष्टा भक्षयन्ति पिबन्ति च ॥ ६ ॥
एभिः [7]प्रधर्षणायां च वारितं वनपालकैः । ममाप्यचिन्तयन्देव भक्षयन्ति [8]वनौकसः ॥ ७ ॥
शिष्टमत्रापविद्धयन्ति भक्षयन्ति तथापरे । निवार्यमाणास्ते सर्वे [9]भ्रुकुटिं दर्शयन्ति हि ॥ ८ ॥
इमे हि संरब्धतरास्तदा[10] तैः संप्रधर्षितः । निर्वार्यन्ते[11] वनात्तस्मात्क्रुद्धैर्वानरपुंगवैः ॥ ९ ॥
ततस्तैर्बहुभिर्वीरैर्वानरै[12] र्वानरर्षभाः । संरक्तनयनैः क्रोधाद्धरयः संप्रधर्षिताः ॥ १० ॥
पाणिभिर्निहताः केचित्केचिज्जानुभिराहताः । प्रकृष्टाश्च [13]तदा कामं देवमार्गं च दर्शिताः ॥ ११ ॥
एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि । कृत्स्नं मधुवनं चैव प्रकामं तैश्च[14] भक्ष्यते ॥ १२ ॥

रा० टी०-दधिमुखप्रणामानन्तरकालिकं वृत्तान्तमाह-तत इत्यादिभिः । वानरर्षभः सुग्रीवः निपतितं दृष्ट्वैव उद्विग्नहृदयः सन् उवाच ॥ १ ॥

रा० टी०-तदाकारमाह-उत्तिष्ठेति । अभयं रिपुहेतुकभयनिवृत्तिं ते प्रदास्यामि ॥ २ ॥

गो० टी०-तत इत्यादि । उद्विग्नहृदयः भीतहृदयः । मातुलस्यापि पादपतनं स्वामित्वानुसारेण ॥ १-३ ॥

३-४] ति० टी०-किंसंभ्रमात्कस्य भयात् इहागतोऽसीति शेषः । यत्कृत्स्नं हितं तद्ब्रूहि, यतस्त्वं सर्वमुचितमनुचितं च वक्तुमर्हसि ॥ ३ ॥ ४ ॥

रा० टी०-किमिति । यत् किं किञ्चित् हितं स्वस्य मम वा पथ्यं तद्वक्तुमर्हसि ब्रूहीत्यर्थः, मधुवने स्वस्ति च ब्रूहि । तत्र हेतुः संभ्रमादादरात् श्रोतुमिच्छामि ॥ ३ ॥

रा० टी०-स इति । सुग्रीवेण समाश्वासितः समहाप्राज्ञः महाप्रज्ञासहितः स दधिमुखः उत्थायाब्रवीत् प्राज्ञाशब्द स्वार्थिकाणन्तः ङीषभावस्त्वजादित्वात् ॥ ४ ॥

५-६] ति० टी०-नैव निसृष्टपूर्वं वानरेभ्यो यथेच्छभोगाय कदापि नानुज्ञातम् ॥ ५ ॥ ६ ॥

रा० टी०-तदाकारमाह-नेति । यद्वनम् ऋक्षरजःप्रभृतिभिर्निसृष्टपूर्वं यथेच्छभोगाय पूर्वं दत्तं न तद्वनं ते वानरैर्नाशितम् ॥ ५ ॥

रा० टी०-न्यवारयमिति । अहं न्यवारयं तथापि मामचिन्तयित्वा अपरिगणय्य भक्षयन्ति पिबन्ति ॥ ६ ॥

गो० टी०-नैवेति । न निसृष्टपूर्वं यथेच्छभोगाय न दत्तपूर्वम् । वानरैः अङ्गदप्रमुखैः । अन्यथा सुग्रीववाक्ये अङ्गदानुवादविरोधात् । भक्षितमिति वनैकदेशमधुपटलविषयम् ॥ ४ ॥

७] ति० टी०-एभिर्हनुमदाद्यैः प्रधर्षणायामारब्धायां वनपालकैर्वारितम्, ममापि । अपिनेतरान्पालकानचिन्तयन्नचिन्तयन्तः ॥ ७ ॥

रा० टी०-एभिरिति । एभिर्वनरक्षिभिः प्रधृष्यमाणाः भर्त्स्यमाना वारिताश्च ते वानराः भक्षयन्ति पिबन्ति च ॥७॥

गो० टी०-एभिरिति । अचिन्तयित्वा अगणयित्वा । मधूनीति फलानामुपलक्षणम् भक्षयन्ति पिबन्ति चेत्युक्तेः । यद्वा मधून्येव भक्षयन्ति भक्षवत्कुर्वन्तीत्यर्थः ॥ ५ ॥

८] ति० टी०-भ्रुकुटिं वक्रे भ्रुवौ ॥ ८ ॥

रा० टी०-शिष्टमिति । अपरे भक्षयन्ति शिष्टमवशिष्टम् अपविध्यन्ति प्रक्षिपन्ति च निवार्यमाणाः सन्तः भ्रुकुटिं दर्शयन्ति ॥ ८ ॥

गो० टी०-शिष्टमिति । शिष्टम् अवशिष्टम् मधुपटलम् । अत्र मधुवने । अपविध्यन्ति ध्वंसयन्ति भक्षयन्ति मधुपटलमित्यर्थः ॥ ६ ॥

९-१२] ति० टी०-इमे मदीयाः संरब्धतरा निवारणातियत्नवन्तः ॥ ९—१२ ॥

रा० टी०-इमे इति । संरब्धतराः निवारणफलकयत्नवन्तः इमे वानराः कुद्धैर्वानरपुङ्गवैः संप्रधर्षिताः सन्तः तस्माद्वनात् निर्वाप्यन्ते ॥ ९ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-तत इति । हरयः मदनुयायिवानराः बहुभिस्तैर्वानरैः संप्रधर्षिताः ॥ १० ॥

रा० टी०-तत्प्रकारमाह-पाणिभिरिति । प्रकृष्टाः प्रगृह्य आकृष्टाः सन्तः देवमार्गमाकाशं दर्शिताः प्रक्षेपेण प्रापिताः ॥ ११ ॥

---

१ श्लोकोऽयं गो. नास्ति । २ तु विश्वासित इति गो.पाठः । ३ रजसेति गो. रा. पाठः । ४ ऽपीति गो. पाठः । ५ भक्षितं तच्चेति गो. पाठः । ६ श्लोकोऽयं गो. नास्ति । ७ प्रधर्षिताश्चैव वानरा वनरक्षिभिरिति गो. प्रधृष्यमाणाश्च वारिता इति रा. पाठः । ८ मधूनि चिन्तयित्वेमामिति गो. पाठः । ९ चिन्तयित्वा ते इति रा. पाठः । १० पिबन्ति चेति गो. रा. पाठः । ११ भ्रुवौ वै इति गो. पाठः । १२ तथेति गो. पाठः । १३ धर्षिता इति गो. रा. पाठः । १४ निर्वाप्यन्तइति रा. वारयन्त इति गो, पाठः । १५ वानरर्षभेति गो. पाठः । १६ यथेति गो. पाठः । १७ प्रेति गो. पाठः ।

एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम् । अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ १३ ॥
किमयं वानरो राजन्वनपः प्रत्युपस्थितः । [1]किं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥१४॥
एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना । लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १५ ॥
आर्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः । अङ्गदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः ॥ १६ ॥
नैषामकृतकार्याणामीदृशः स्याद्व्यतिक्रमः । वनं यैरभिपन्नास्ते साधितं कर्म तैर्ध्रुवम् ॥ १७ ॥
वारयन्तो भृशं प्राप्ताः पाला जानुभिराहताः । तथा न गणितश्चायं कपिर्दधिमुखो बली ॥ १८ ॥
पतिर्मम वनस्यायमस्माभिः स्थापितः स्वयम् । दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ १९ ॥
नह्यन्यः साधने हेतुः कर्मणोऽस्य हनूमतः । कार्यसिद्धिर्हनुमति मतिश्च हरिपुङ्गवे ॥ २० ॥
व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम् । जाम्बवान्यत्र नेता स्यादङ्गदश्च महाबलः ॥ २१ ॥
हनूमांश्चाप्यधिष्ठाता न तत्र गतिरन्यथा । अङ्गदप्रमुखैर्वीरैर्हृतं मधुवनं किल ॥ २२ ॥
[2]विचित्यं दक्षिणामाशामागतैर्हरिपुङ्गवैः । आगतैश्च प्रहृष्टं तद्यथा मधुवनं हि तैः ॥ २३ ॥

रा० टी०–एवमिति । एवमुक्तप्रकारेण एते शूराः हताः तैर्वानरैः कृत्स्नं वनं भक्ष्यते अभक्ष्यत ॥ १२ ॥

गो० टी०–इमे हीति । हिशब्दः पादपूरणे संप्रधर्षणचिह्नस्य दृश्यमानत्वाभिप्रायेण प्रसिद्धिपरो वा ॥७–१३॥

१३–१६] ति० टी०–विज्ञाप्यमानम् दधिमुखेनेति शेषः ॥ १३—१६ ॥

रा० टी०–एवमिति । एवं विज्ञाप्यमानं सुग्रीवं लक्ष्मणोऽपृच्छत् ॥ १३ ॥

रा० टी०–तत्प्रश्नाकारमाह–किमिति । हे राजन् ! अयं वनपः किं किमर्थं प्रत्युपस्थितः किमर्थमभिनिर्दिश्य बोधयित्वा दुःखितः सन् अब्रवीत् ॥ १४ ॥

रा० टी०–एवमिति । एवमुक्तः सुग्रीव उवाच ॥ १५ ॥

रा० टी०–तदाकारमाह–आर्येति । अङ्गदप्रमुखैः मधु मधुवनसंबन्धिमूलफलादि भक्षितम् इति दधिमुखः कपिः संप्राह ॥ १६ ॥

गो० टी०–आर्येत्यादि । अङ्गदप्रमुखैरिति । अत्र विशिष्यानुवादादधिमुखवाक्ये वानरपुङ्गवैरित्यत्रापि विशेषपरत्वं बोध्यम् ॥ १४ ॥ १५ ॥

१७] ति० टी०–यद्यथा वनमभिपन्ना नाशयितुं प्रवृत्ताः१७

रा० टी०–नेति । अकृतकार्याणाम् अनिष्पादितमत्प्रयोजनानां वानराणाम् ईदृशो व्यतिक्रमो न स्यात् । यस्माद्धेतोस्ते वानराः वनमभिपन्नाः विध्वंसितुं प्रवृत्ताः तस्माद्धेतोः कर्म मत्प्रयोजनं ध्रुवं साधितं वानरैरिति शेषः ॥ १७ ॥

गो० टी०–नैषामिति । वनं प्रमथितं भग्नम् । धर्षितम् आक्रान्तम् । मधु च भक्षितम् । यथा येन प्रकारेण । एषामकृतकृत्यानामीदृश उपक्रमो न स्यादिति मन्य इति योजना ॥ १६ ॥ १७ ॥

१८] ति० टी०–वारयन्तः हेतौ शता वारणाद्धेतोर्जानुभिराहताः पालाः प्राप्ताः ॥ १८ ॥

१९] ति० टी०–देवी दृष्टेत्यत्र न संदेहः । तत्राप्यन्येन न, किं तु हनूमतेत्यर्थः ॥ १९ ॥

रा० टी०–वारयन्त इति । वारयन्तः प्राप्ताः पालाः वनरक्षकाः जानुभिर्भृशमाहता बभूवुरिति शेषः तथा वनस्य पतिः अस्माभिः स्थापितः अयं दधिमुखो न गणितः अतः देवी सीता दृष्टा तत्रापि हनूमतैव दृष्टा नान्येन संदेहः अत्र संशयो न । श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०–कृतकृत्यत्वं विशेषयति—वनमित्यादिना ॥ १८—२३ ॥

२०–२३] ति० टी०–अन्यः हनूमतोऽन्य इत्यर्थः । हरिपुंगवे हनूमति कार्यसिद्धिर्मतिश्च ॥ २०—२३ ॥

रा० टी०–हनुमत एव दर्शने हेतुं वदन्नाह–नेति । यस्मिन् व्यवसायादि प्रतिष्ठितं तस्मिन् हनुमत्येव कार्यसिद्धिः अतः अस्य दधिमुखवर्णितस्य कर्मणः वाटिकाविध्वंसस्य साधने हेतुर्मुख्यकारणं हनूमतोऽन्यो न इति मतिर्मम निश्चयः सार्धश्लोक एकान्वयी ॥ २० ॥

रा० टी०–कार्यसिद्धिमन्तरा वानरकर्तृकमधुवनविध्वंसस्यासंभवं द्योतयन्नाह–जाम्बवानिति । यत्र सैन्ये जाम्बवान्नेता मुख्यः अङ्गदो हरीश्वरः सर्ववानरनियन्ता हनूमान् अधिष्ठाता संमतिदाता तत्र सैन्ये अन्यथागतिः अन्याय्येन गमनं न संभवतीति शेषः ॥ २१ ॥

१ किमिति गो. पाठः । २ कृत्यानामिति गो. पाठः । ३ उपक्रम इति गो. पाठः । ४ यदेति गो. पाठः । ५ वानरैरिति गो. पाठः । ६ एतदादिः सार्धश्लोको गो. नास्ति । ७ मतिश्चैव तस्मिन्वानरपुङ्गवे इति गो. पाठः । ८ तस्येति गो. पाठः । ९ सार्धोऽयं श्लोकः षोडशोत्तरं गो. पाठे रा. नास्ति । १० निश्चित्येति गो. पाठः ।

धर्षितं च वनं कृत्स्नमुपयुक्तं तु वानरैः । पातिता वनपालास्ते तदा जानुभिराहताः ॥ २४ ॥
एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह । नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥ २५ ॥
दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः । अभिगम्य यथा सर्वे पिबन्ति मधु वानराः ॥ २६ ॥
न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ । वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः ॥ २७ ॥
ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः । श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्युताम् ॥ २८ ॥
प्राहृष्यत भृशं रामो लक्ष्मणश्च महायशाः । श्रुत्वा दधिमुखस्यैवं सुग्रीवस्तु प्रहृष्य च ॥ २९ ॥
वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत । प्रीतोऽस्मि सोऽहं यद्भुक्तं वनं तैः कृतकर्मभिः ॥ ३० ॥
धर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् । गच्छ शीघ्रं मधुवनं संरक्षस्व त्वमेव हि ॥
शीघ्रं प्रेषय सर्वांस्तान्हनूमत्प्रमुखान्कपीन् ॥ ॥ ३१ ॥

इच्छामि शीघ्रं हनुमत्प्रधानाञ्शाखामृगांस्तान्मृगराजदर्पान् ।
प्रष्टुं कृतार्थान्सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नम् ॥ ॥ ३२ ॥
प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा ।
अङ्गैः प्रहृष्टैः कार्यसिद्धिं विदित्वा बाह्वोरासन्नामतिमात्रं ननन्द ॥ ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०–अङ्गदेति । अङ्गदप्रमुखैर्वानरैः उपयुक्तं भोगोपयोगि कृत्स्नं मधुवनं हतं वनं वनपजातं धर्षितं च ॥ २२ ॥

२४-२५] ति० टी०–उपयुक्तं भुक्तम् ॥ २४ ॥ २५ ॥

रा० टी०–पातिता इति । जानुभिराहताः ते वनपालाः पातिताः एतदर्थं वक्तुं मधुरवाक् नाम्ना दधिमुखनामा इह प्राप्तः सार्धः श्लोक एकान्वयी ॥ २३ ॥ २४ ॥

२६] ति० टी०–यथा मधु पिबन्ति तथा सीता दृष्टेत्यन्वयः ॥ २६ ॥

रा० टी०–दृष्टेति । यतो वानराः अभिगम्य मधु यथा यथावत्पिबन्ति अतः सीता दृष्टा इति पश्य जानीहि ॥ २५ ॥

२७-२८] ति० टी०–दत्तवरं वरत्वेन दत्तम् ॥ २७ ॥ २८ ॥

रा० टी०–नेति । वैदेहीमदृष्ट्वा विश्रुता प्रख्याता वनौकसः दत्तवरम् अस्माभिः प्राप्ताभयं वनं न धर्षयेयुः ॥२६॥

गो० टी०–न चेति । वनमिति मधुवनधर्षणमेव सीतादर्शने लिङ्गमिति भावः । दत्तवरं दिव्यमित्यनेन ऋक्षरजसे ब्रह्मणा दत्तमित्यवगम्यते ॥ २४ ॥ २५ ॥

रा० टी०–तत इति । सुग्रीववदनात् च्युतां वाणीं श्रुत्वा राघवः प्रहृष्टोऽभवदिति शेषः ॥ २७ ॥

गो० टी०–श्रुत्वेति । द्वितीयसुग्रीवशब्दस्य शोभनग्रीव इत्यवयवार्थो विवक्षितः क्रियाभेदेनापुनरुक्तिर्वा ॥२६॥२७॥

२९] ति० टी०–एकः सुग्रीवशब्दः शोभनग्रीवपरः ॥२९॥

रा० टी०–प्राहृष्यतेति । एवं सुग्रीववचनसदृशं दधिमुखस्य वाक्यं श्रुत्वा रामः प्राहृष्यत सुग्रीवादीन् प्रहर्षयामास अन्तर्भावितण्यर्थः सुग्रीवः शोभनग्रीवाविशिष्टः सुग्रीवस्तु वनपालं पुनः प्रत्यभाषत । सार्धश्लोक एकान्वयी ॥ २८ ॥

३०-३१] ति० टी०–कृतकर्मभिः साधितकृत्यैः ॥३०-३१

रा० टी०–प्रतिभाषणाकारमाह–प्रीत इति । कृतकर्मभिः साधितास्मत्प्रयोजनैस्तैर्वानरैर्यद्वनं भुक्तं तेनाहं प्रीतोऽस्मि अतः कृतकर्मणां वानराणां धर्षितं प्रागल्भ्यं चेष्टितं ध्वंसानुकूलव्यापारश्च मर्षणीयं क्षन्तव्यम् ॥ २९ ॥

रा० टी०–गच्छेति । मधुवनं गच्छ त्वमेव संरक्षस्व हनुमत्प्रमुखान् शीघ्रं प्रेषय ॥ ३० ॥

३२] ति० टी०–तान्द्रष्टुमिच्छामि सीताधिगमे तत्प्राप्तौ कृतं प्रयत्नं च श्रोतुमिच्छामि ॥ ३२ ॥

रा० टी०–प्रेषणे हेतुमाह–इच्छामीति । मृगराजदर्पान् सिंहवद्दर्पविशिष्टान् कृतार्थान् शाखामृगान् द्रष्टुं शीघ्रमिच्छामि । तत्र हेतुः सीताधिगमे सीतादर्शनप्राप्त्यर्थं प्रयत्नं यत्नविशेषं श्रोतुं शीघ्रमिच्छामि ॥ ३१ ॥

गो० टी०–इच्छामीति । हनुमत्प्रधानान् हनुमत्प्रमुखान् कृतार्थान् कृतकृत्यान् प्रयत्नं प्रयासम् । तेभ्यः श्रोतुमिच्छामीत्यन्वयः ॥ २८ ॥

३३] ति० टी०–अथ सुग्रीवः स्वोद्योगसाफल्यदर्शनाद्भृशं ननन्देत्याह—प्रीतीति । प्रीत्या संतोषेण स्फीताक्षौ विक-

१ चेति गो. पाठः । २ वारयन्तश्च सहितास्तथेति गो. पाठः । ३ तथेति गो. पाठः । ४ बल इति गो. पाठः । ५ मर्षितमिति गो. पाठः । ६ श्लोकोऽयं गो. नास्ति । ७ संहृष्टैः कर्मेति गो. पाठः । ८ आसन्नां सोऽतिमात्रमिति गो. पाठः ।

चतुःषष्टितमः सर्गः ।

सुग्रीवेणाज्ञापितो दधिमुखो मधुवनमित्याज्ञाद क्षमयन्सुग्रीवस्त्वां शीघ्रमाह्वयतीति न्यवेदीत् । हनुमदादिभिः समं प्रस्थितोऽङ्गद; सुग्रीवमभिगम्य श्रीरामं सप्रणामं जानकीदर्शनादि निवेदयति ।

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः । राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १ ॥
स प्रणम्य च सुग्रीवं राघवौ च महाबलौ । वानरैः सहितः शूरैर्दिवमेवोत्पपात ह ॥ २ ॥
स यथैवागतः पूर्वं तथैव त्वरितं गतः । निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह ॥ ३ ॥
स प्रविष्टो मधुवनं ददर्श हरियूथपान् । विमदानुद्धतान्सर्वान्मेहमानान्मधूदकम् ॥ ४ ॥
स तानुपागमद्वीरो बद्धा करपुटाञ्जलिम् । उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ॥ ५ ॥
सौम्य रोषो न कर्तव्यो यदेभिः परिवारणम् । अज्ञानाद्रक्षिभिः क्रोधाद्भवन्तः प्रतिषेधिताः ॥ ६ ॥
श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु । युवराजस्त्वमीशश्च वनस्यास्य महाबल ॥ ७ ॥

सितनेत्रौ । संप्रहृष्टौ पुलकितगात्रौ सिद्धार्थाविव दृष्ट्वा संप्रहृष्टैः पुलकितैरङ्गैरुपलक्षितः कार्यसिद्धिं बाह्वोरासन्नां हस्तप्राप्तामिव विदित्वा ननन्द ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०–प्रीतीति । सिद्धार्थौ निष्पन्नप्रयोजनौ अत एव संप्रहृष्टौ अत एव प्रीत्या हनुमदादिविषयकातिस्नेहेन स्फीते अक्षिणी ययोः तौ कुमारौ रामलक्ष्मणौ दृष्ट्वा प्रहृष्टैः अङ्गैः दक्षिणनेत्रादिभिः करणैर्बाह्वोरासन्नां प्राप्तामिव कार्यसिद्धिं विदित्वा वानराणां राजा सुग्रीवः अतिमात्रम् अत्यतं ननन्द ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–अथ प्रत्युपकारार्थं सुग्रीवः स्वोद्योगसाफल्यदर्शनात् भृशं ननन्देत्याह–प्रीतिस्फीताक्षौ । संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा । अङ्गैः संहृष्टैः कर्मसिद्धिं विदित्वा बाह्वोरासन्नां सोऽतिमात्रं ननन्द । प्रीत्या संतोषेण । संप्रहृष्टौ रोमस्विति शेषः । हर्षितरोमाणाविति यावत् । “ हर्षेलोमसु ” इति विकल्पादिडभावः । एवम् अङ्गैः संहृष्टैरित्यत्रापि द्रष्टव्यम् । कर्मसिद्धिं बाह्वोरासन्नां हस्तप्राप्तां विदित्वा निश्चित्येत्यर्थः । जागतं वैश्वदेवीवृत्तम् । पञ्चाशैश्छित्त्वा वैश्वदेवी ममौ यावेति लक्षणात् । अस्मिन्सर्गे एकोनत्रिंशच्छ्लोकाः ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

१–३] ति० टी०–सुग्रीवेणेति ॥ १ ॥ ३ ॥

रा० टी०–सुग्रीवाज्ञाश्रवणानन्तरकालिकदधिमुखवृत्तान्तमाह–सुग्रीवेणेत्यादिभिः । सुग्रीवेणैवमुक्तो दधिमुखः राघवादीन् अभ्यवादयत् ॥ १ ॥

रा० टी०–स इति । वानरैः सहितः स दधिमुखः दिवमाकाशमार्गमुत्पपात ॥ २ ॥

रा० टी०–स इति । यथा त्वरितं पूर्वमागतः तथैव गतः गमनवान् स दधिमुखः गगनाद्भूमौ निपत्य वनं मधुवनं प्रविवेश ॥ ३ ॥

गो० टी०–सुग्रीवेणेत्यादि । सहितैः स्नेहातिरेकेणान्योन्यं युक्तैः । वानरैः सहितैरिति पाठः ॥ १—३ ॥

४–५] ति० टी०–विमदत्वसूचकम्—मेहमानान्मधूदकमिति । मेहमानान्मूत्रयतः । मधुपरिणामभूतमुदकं मधूदकम् । एवं मूत्रणान्मधूनां जीर्णता बोधिता, अत एव विमदान् ॥४॥५॥

रा० टी०–स इति । मधुवनं प्रविष्टः स दधिमुखः मधुरूपमुदकं मेहमानान् मूत्रयतः विमदान् हरियूथपान् ददर्श ॥४॥

गो० टी०–स प्रविष्ट इति । विमदानित्यत्र हेतुमाह मेहमानानिति । मेहमानान् मेहयतः मूत्रयत इत्यर्थः । एतेन मूत्रणान्मधूनि जीर्णानीति गम्यते । अत एव विमदत्वम् । मधूनि च उदकानि च मधूदकमिति द्वन्द्वैकवद्भावः । उदकानि चात्र अनुपानत्वेन पीतानि तादह वाग्भटः—अनुपानं हिमं वारि यवगोधूमयोर्हितम् । दध्नि मद्ये विसे क्षौद्रे कोष्णं पिष्टमयेषु चेति ॥ ४ ॥

रा० टी०–स इति । स दधिमुखः करपुटाञ्जलिं बद्धा हृष्टवत् हर्षकारकं वचनमङ्गदमुवाच ॥ ५ ॥

गो० टी०–स तानिति । करपुटाञ्जलिं करतलयोरञ्जलिम् । सम्यक् संयुक्तकरतलाञ्जलिमित्यर्थः ॥ ५ ॥

६–७] ति० टी०–एभी रक्षिभिरज्ञानात्क्रोधाच्च भवन्तः प्रतिषेधिता इति यदेतत्परिवारणं प्रति रोषो न कर्तव्य इत्यर्थः ॥ ६ ॥ ७ ॥

१ सहितैरिति गो. पाठः । २ उत्थितानिति गो. पाठः । ३ अभिवारित इति गो. पाठः । ४ अर्धमेतत् गो. नास्ति ।

मौर्ख्यात्पूर्वं कृतो रोषस्तद्भवान्क्षन्तुमर्हति । यथैव हि पिता तेऽभूत्पूर्वं हरिगणेश्वरः ॥ ८ ॥
तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम । आख्यातं हि मया गत्वा पितृव्यस्य तवानघ ॥ ९ ॥
इहोपयानं सर्वेषामेतेषां वनचारिणाम् । भवदागमनं श्रुत्वा सहैर्भिर्वनचारिभिः ॥ १० ॥
प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम् । प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः ॥ ११ ॥
शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः । श्रुत्वा दधिमुखस्यैतद्वचनं श्लक्ष्णमङ्गदः ॥ १२ ॥
अब्रवीत्तान्हरिश्रेष्ठो वाक्यं वाक्यविशारदः । शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः ॥ १३ ॥
अयं च हर्षादाख्याति तेन जानामि हेतुना । तत्क्षमं नेह नः स्थातुं कृते कार्ये परंतपाः ॥ १४ ॥
पीत्वा मधु यथाकामं विक्रान्ता वनचारिणः । किं शेषं गमनं तत्र सुग्रीवो यत्र वानरः ॥ १५ ॥

रा० टी०–तदाकारमाह–सौम्येति । हे सौम्य अज्ञानात् भवत्संपादितकार्यविषयकज्ञानाभावात् रक्षिभिः भवन्तः प्रतिषेधिताः अतः यदेभिः परिवारणम् एतत्करणकनिवारणं तत्संस्मृत्येति शेषः रोषो न कर्तव्यः किंच एभिर्वानरैः सह भवन्तः प्रतिषेधिताः अतो यत्परिवारणमस्मत्कर्तृकनिवारणं तत्संस्मृत्य रोषो न कर्तव्यः ॥ ६ ॥

गो० टी०–सौम्येति । एभिः वानरैः अभिवारितः अभिवारितोऽसीति यत् अत्रार्थे रोषो न कर्तव्यः । भवन्त इति पूजायां बहुवचनम् । न च हनुमदादिकमादाय बहुवचनम् उत्तरश्लोकेऽपि युवराजस्त्वमित्युक्तेः अज्ञानात्क्रोधात् । अज्ञानप्रयुक्तक्रोधादित्यर्थः अभिवारितमिति पाठे लिङ्व्यत्यय आर्षः । केचित्तु अज्ञानात् क्रोधाच्च भवन्तः प्रतिषेधिता इत्येतत् परिवारितं प्रतिवारणं प्रति रोषो न कर्तव्य इति योजयन्ति ॥६॥

रा० टी०–श्रान्त इति । दूरादनुप्राप्तः अत एव श्रान्तस्त्वं स्वकं मधु भक्षयस्व पिब स्वकीयत्वे हेतुः यतस्त्वं युवराजः अत एव अस्य वनस्य ईशः स्वामी असीति शेषः ॥ ७ ॥

गो० टी०–क्रोधाद्वारणे कृते कुतो रोषो न कर्तव्यः स्यादित्याशङ्क्य क्रोधस्याज्ञानकृतत्वादित्याह–युवराज इति । दोषः निवारणरूपापराधः ॥ ७ ॥

८] ति० टी०–रोषः कृतः । मदीयैरिति शेषः ॥ ८ ॥

रा० टी०–मौर्ख्यादिति । यथा पूर्वं ते पिता हरिगणेश्वरः तथा त्वं सुग्रीवोऽपि अन्यो न अतः मौर्ख्यात् अज्ञानात् पूर्वं कृतो यो रोषस्तत् क्षन्तुं भवानर्हति सार्धश्लोक एकान्वयी ॥ ८ ॥

९–१२] ति० टी०–तथा सुग्रीवस्त्वमपि त्वं च हरीश्वरः ॥ ९ ॥ १२ ॥

रा० टी०–आख्यातमिति । सर्वेषाम् एतेषां भवतामिहोपयानमागमनं तव पितृव्यस्य समीपे गत्वा मयाऽऽख्यातं कथितम् ॥ ९ ॥

रा० टी०–भवदिति । असौ सुग्रीवः वनं प्रधर्षितं श्रुत्वापि भवदागमनं श्रुत्वा प्रहृष्ट एव न तु रुष्टः ॥ १० ॥

रा० टी०–प्रहृष्ट इति । प्रहृष्टस्ते पितृव्यः तान् वानरान् शीघ्रं प्रेषय इत्युवाच ॥ ११ ॥

रा० टी०–श्रुत्वेति । अङ्गदः एतत् श्रुत्वा अब्रवीत्॥१२॥

गो० टी०–आख्यातं हीति । उपयातम् आगमनम् ॥ ८ ॥ ११ ॥

१३] ति० टी०–शङ्के दधिमुखस्य परावृत्यागमनात् १३

१४] ति० टी०–किं चायं हर्षादाख्याति । सुग्रीवसंदेशमिति शेषः । तेन च हेतुना जानामि रामेण श्रुतोऽयं वृत्तान्त इति । तत्तस्मादकार्ये वनविध्वंसनरूपे कृते सतीह स्थातुं नोऽस्माकं न क्षमं न युक्तम् ॥ १४ ॥

रा० टी०–तदाकारमाह–शङ्के इति । हे हरियूथपाः अयं दधिमुखः हर्षादाख्याति किंचित्कथयति तेन हेतुना अयम् अस्मदीयो वृत्तान्तः रामेण श्रुत इत्यहं शङ्के अनुमिनोमि जानामि निश्चिनोमि च हे परन्तपाः तत्तस्मादेतोः कार्ये कृते सति इह स्थातुं नोऽस्माकं न क्षमम् सार्धश्लोक एकान्वयी ॥ १३ ॥ १४ ॥

गो० टी०–शङ्क इति । अयं वृत्तान्तः अस्मदागमनवृत्तान्तः ॥ १२ ॥

१५] ति० टी०–किं शेषम् । न किमपि शिष्टमित्यर्थः । गमनम् । उचितमिति शेषः ॥ १५ ॥

रा० टी०–पीत्वेति । यथाकामं मधु पीत्वा विद्यमानाः ये वनचारिणः तेषां कृत्यं शेषमवशिष्टं किं न किंचिदित्यर्थः अतः यत्र सुग्रीवः तत्र गमनं कुरुतेति शेषः ॥ १५

गो० टी०–पीत्वेति । किं शेषं न किंचिदपि शिष्टमित्यर्थः । किंतु मे गुरुः सुग्रीवो यत्र वर्तते तत्र गमनमेव शेषमित्यर्थः । किंशेषं गमनं तच्च सुग्रीवो यत्र मे गुरुरिति पाठे

१ श्लोकोऽयं गो. नास्ति । २ यातमिति गो. पाठः । ३ स ह्यदिति गो. पाठः । ४ हरियूथपैरिति गो. पाठः । ५ इदमिति गो. पाठः । ६ अर्धमेतत गो. नास्ति । ७ मे गुरुरिति गो. पाठः ।

सर्वे यथा मां वक्ष्यन्ति समेत्य हरिपुङ्गवाः । तथास्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १६ ॥
नाज्ञापयितुमीशोऽहं युवराजोऽस्मि यद्यपि । अयुक्तं कृतकर्माणो यूयं धर्षयितुं बलात् ॥ १७ ॥
ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमुत्तमम् । प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १८ ॥
एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ । ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १९ ॥
तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् । सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥ २० ॥
सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः । स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ २१ ॥
त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् । क्वचिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २२ ॥
एवं तु वदतां तेषामङ्गदः प्रत्यभाषत । साधु गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः ॥ २३ ॥
उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः । कृत्वाऽकाशं निराकाशं यन्त्रोत्क्षिप्ता इवोपलाः ॥ २४ ॥

अस्माकं गमनं किंशेषं किंचिच्छेषम् । तच्च गमनशेषं च सुग्रीवो यत्र तत्र गमनमिति संबन्धः ॥ १३ ॥

१६] ति० टी०–कर्तव्ये कर्तव्येऽर्थे । भवद्भिः परवानहम् भवदधीन इत्यर्थः ॥ १६ ॥

रा ०टी०–सर्वे इति । सर्वे हरिपुङ्गवाः समेत्य यथा मां वक्ष्यन्ति तथाऽहं कर्ताऽस्मि । तत्र हेतुः कर्तव्ये भवद्भिरहं परवान् भवदधीन इत्यर्थः ॥ १६ ॥

गो० टी०–विनयपूर्वकं सर्वसंमेलेनं समर्थयते–सर्वे इति तथास्मि कर्ता आह्वानं करिष्यामीत्यर्थः कर्तव्ये कार्ये भवद्भिः अहं परवान् भवद्भिर्यथा नियुक्तं तथा करिष्यामि गन्तव्यमित्युक्ते गमिष्यामः स्थातव्यमित्युक्ते स्थास्याम इत्यर्थः ॥ १४ ॥

१७–१८] ति० टी०–यद्यप्यहं युवराजोऽस्मि युष्मानाज्ञापयितुं नेशश्च । तत्र हेतुः—कृतकर्माणो यूयम् कृतकर्मणो युष्मानित्यर्थ आर्षमिदम् । तथाप्यतः परं बलाद्धर्षयितुं न युक्तम् ॥ १७ ॥ १८ ॥

रा० टी०–नेति । यतः कृतकर्माणो यूयं धर्षयितुमयुक्तम् अतः यद्यप्यहं युवराजः तथाप्याज्ञापयितुं नेशोऽस्मि कृतकर्माणो यूयमिति समुदायस्य कर्मत्वविवक्षया तस्य प्रातिपदिकत्वाभावान्न द्वितीया ॥ १७ ॥

रा० टी०–ब्रुवत इति । एवं ब्रुवतोऽङ्गदस्य समीपं वनौकस इदमूचुः ॥ १८ ॥

गो० टी०–युवराजत्वात् भवानेव कर्तव्याकर्तव्यनियन्तेत्यत आह–नाज्ञापयितुमिति । ईशः स्वतन्त्रः । कृतकर्माणः कृतोपकाराः यूयं मया धर्षयितुम् अनादृतुं परतन्त्रीकर्तुमिति यावत् । अयुक्तम् अयुक्ता इत्यर्थः आर्षमव्ययमेतत् शक्यमितिवत्सामान्योपक्रमात्पुंसकैकत्वनिर्देश इत्यप्याहुः १५॥१६

१९] ति० टी०–अहम् । प्रभुरिति शेषः ॥ १९ ॥

रा० टी०–तदाकारमाह–एवमिति । हे राजन् यतः सर्वो जनः ऐश्वर्यमदमत्तः सन् अहमेव प्रभुरिति मन्यते अतः एवं भवद्वचनसदृशं कः प्रभुर्वक्ष्यति प्रभुरिति उभयान्वयि॥१९॥

गो० टी०–एवमिति । अहमिति मन्यते गर्विष्ठो भवतीति यावत् ॥ १७ ॥

२०] ति० टी०–सन्नतिर्विनयः भविष्यच्छुभयोग्यतां भाविनीं भाग्योन्नतिम् आख्याति सूचयति ॥ २० ॥

रा० टी०–तवेति । इदं वाक्यं तवैव सुसदृशं योग्यं हि युक्तमिदं यतः इयं सन्नतिः तव भविष्यच्छुभयोग्यतामाख्याति कथयति ॥ २० ॥

गो० टी०–तव चेति । सन्नतिः विनयः ॥ १८ ॥

२१–२२] ति० टी०–अत्र देशे प्राप्ता वयं यत्र सुग्रीवस्तत्र गन्तुं कृतक्षणाः कृतोत्साहाः ॥ २१ ॥ २२ ॥

रा० टी०–सर्व इति । हरिवीराणामव्ययः पतिः सुग्रीवो यत्र तत्र गन्तुं कृतक्षणाः जातोत्साहाः सन्तः वयं सर्वे प्राप्ताः२१

रा० टी०–त्वयेति । त्वया अनुक्तैः अनाज्ञापितैः हरिभिः पदात्स्थानात् पदं पादमात्रमपि गन्तुं न शक्यम् इदं सत्यं ब्रूमः ॥ २२ ॥

गो० टी०–सर्वे वयमिति । कृतक्षणाः कृतावसराः । अवसरप्रतीक्षा इति यावत् ॥ १९ ॥ २० ॥

२३] ति० टी०–महाबलास्ते गच्छाम इत्युक्त्वा खमुत्पेतुरित्यन्वयः ॥ २३ ॥

रा० टी०–एवमिति । एवं वदतां तेषां मध्ये अङ्गदः प्रत्यभाषत गमनाय आज्ञापयत् अत एव महाबलाः अङ्गदप्रभृतयः खमुत्पेतुः ॥ २३ ॥

गो० टी०–एवं त्विति । बाढमित्यङ्गीकारे । इतिशब्दः काकाक्षिन्यायेन पूर्वापरयोरन्वेति । एवं तेषां वदतां तेषु वदत्सु अङ्गदः बाढमिति प्रत्यभाषत । गच्छाम इत्युक्त्वापि उत्पपात ॥ २१ ॥

२४] ति० टी०–तत्र क्रममाह—उत्पतन्तमिति ।

---

१ यूथपा इति गो. पाठः । २ मयेति गो. पाठः । ३ अव्ययमिति गो. पाठः । ४ बाढमिति गो. पाठः । ५ अचलाइति गो. पाठः ।

अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् । तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः ॥ २५ ॥
विनदन्तो महानादं घना वातेरिता यथा । अङ्गदे समनुप्राप्ते सुग्रीवो वानरेश्वरः ॥ २६ ॥
उवाच शोकसंतप्तं रामं कमललोचनम् । समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ॥ २७ ॥
नागन्तुमिह शक्यं तैरतीतसमयैरिह । अङ्गदस्य प्रहर्षाच्च जानामि शुभदर्शन ॥ २८ ॥
न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते । युवराजो महाबाहुः प्लवतामङ्गदो वरः ॥ २९ ॥
यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः । भवेच्तु दीनवदनो भ्रान्तविप्लुतमानसः ॥ ३० ॥
पितृपैतामहं चैतत्पूर्वकैरभिरक्षितम् । न मे मधुवनं हन्याददृष्ट्वा जनकात्मजाम् ॥ ३१ ॥
कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत । दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ ३२ ॥

निराकाशं निरवकाशम् । यन्त्रेरित्यादिना दूरोत्पातेन शीघ्रगमनं सूचितम् ॥ २४ ॥

रा० टी०–उत्पतन्तमिति । उत्पतन्तमङ्गदप्रभृतिमनु ते अवशिष्टाः सर्वे हरियूथपाः आकाशं निराकाशमवकाशरहितं कृत्वा यन्त्रोत्क्षिप्ताः उपला इव उत्पेतुः ॥ २४ ॥

गो० टी०–उत्पतन्तमिति । निराकाशं निरवकाशम् २२

२५] ति० टी०–सहसोत्पत्य वातेरिता घना इव विनदन्तः जग्मुरिति शेषः । शीघ्रगत्या सादृश्यम् ॥ २५ ॥

रा० टी०–गमनप्रकारं बोधयन्नाह—अङ्गदमिति । ते जाम्बवत्प्रभृतयः प्लवङ्गमाः अङ्गदं हनुमन्तं च पुरतोऽग्रे कृत्वा सहसोत्पत्य वातेरिता घना इव महानादं यथा भवति तथा विनदन्तः सन्तः जग्मुरिति शेषः सार्धश्लोक एकान्वयी ॥ २५ ॥

गो० टी०–तेऽम्बरमिति । अत्र जग्मुरित्यध्याहार्यम् ॥ २३ ॥ २५ ॥

२६-२७] ति० टी०–समनुप्राप्ते निकटमागते सुग्रीवो राममुवाचेत्यन्वयः ॥ २६ ॥ २७ ॥

२८] ति० टी०–दृष्टत्वे हेतुः—नेति । अङ्गदप्रहर्षश्च हेत्वन्तरम् ॥ २८ ॥

रा० टी०–अङ्गदे इति । अङ्गदे समनुप्राप्ते दृश्यमाने सतीत्यर्थः सुग्रीवः राममुवाच ॥ २६ ॥

रा० टी०–तदाकारमाह—समिति । यतः अतीतसमयैः इहागन्तुं न शक्यम् अतः तदागमनादित्यर्थः, अङ्गदस्य प्रहर्षाच्च देवी सीता दृष्टेत्यहं जानामि निश्चिनोमि अतः समाश्वसिहि सार्धश्लोक एकान्वयी ॥ २७ ॥ २८ ॥

२९] ति० टी०–विनिपातितेऽसाधिते ॥ २९ ॥

रा० टी०–नेति । कृत्ये सीतादर्शने विनिपातिते अनिष्पादिते सति अङ्गदः मत्सकाशं नागच्छेत् यदि अङ्गदो नागच्छेत्तर्हि अन्ये नागच्छेयुरिति किं वक्तव्यमिति काव्यार्थापत्तिरलङ्कारो ध्वनितः ॥ २९ ॥

गो० टी०–नेति । विनिपातिते विघ्निते ॥ २९ ॥

३०] ति० टी०–यद्यपीति । अकृतकृत्यानामन्येषां वानराणां कपिस्वभावचाञ्चल्यादीदृशमधुवनभङ्गादिरूप उपक्रमो व्यापारो यद्यपि स्यात्तथाप्यङ्गदो दीनवदनत्वादिगुणको भवेत् ॥ ३० ॥

रा० टी०–नन्वसाधितकार्याणामप्यागमनं लोके दृष्टमित्यत आह–यद्यपीति । यद्यपि अकृतकृत्यानामपि ईदृशः उपक्रमः समीपागमनं स्यात् संभवेत् तथापि भ्रान्तिविप्लुतमानसः सन् सोऽङ्गदः दीनवदनो भवेत् एतेन दीनवदनाभावस्य सीतादर्शने लिङ्गत्वं बोधितम् ॥ ३० ॥

गो० टी०–यद्यपीति । अकृतकृत्यानाम् अकृतकार्याणाम् ईदृशः मधुवनभङ्गरूपः उपक्रमः उद्योगः यदि स्यात्तदाङ्गदो दीनवदनत्वादिविशिष्टो भवेत् ॥ ३० ॥

३१] ति० टी०–कुतस्तत्राह—पितृपैतामहं पितृपितामहक्रमागतम् ॥ ३१ ॥

रा० टी०–पितृ इति । जनकात्मजाम् अदृष्ट्वा मे मधुवनं न हन्यात् ॥ ३१ ॥

गो० टी०–पितृपैतामहमिति । पिता चासौ पितामहश्च । पित्रा ब्रह्मणा ऋक्षरजसे दत्तं पितृपैतामहम् । प्लवगेश्वरः अङ्गदः ॥ २८ ॥

३२] ति० टी०–कौसल्या सुप्रजाः । सीतास्थितिपरिज्ञानेन भवतो जीवनलाभादिदानीं कौसल्या सुपुत्रवत्यभूदिति भावः । तत्रापि हनूमतैव न तु ततोऽन्येनेत्यर्थः ॥ ३२ ॥

रा० टी०–कौसल्येति । देवी दृष्टा तत्रापि हनुमतैव अत एव कौशल्या सुप्रजा शोभनपुत्रवती अस्तीति शेषः अतः समाश्वसिहि ॥ ३२ ॥

गो० टी०–कौसल्येति । हे राम ! कौसल्या सुप्रजाः सुप्रजावती । "नित्यमसिच् प्रजामेधयोः" इत्यसिच्प्रत्ययः एवं देव्याः स्थानज्ञानेन भवतः सत्तालाभादिदानीं कौसल्या सुप्रजावती अभूदिति शेषः ॥ २९ ॥ ३० ॥

---

१ अर्धमेतत् गो. नास्ति । २ वानराधिप इति गो. पाठः । ३ शोकोपहतमिति गो. पाठः । ४ अतीते समये हि नः इति गो. पाठः । ५ अर्धमेतत् गो. नास्ति । ६ प्लवतां प्रवरोऽङ्गद इति गो. पाठः । ७ स इति गो. पाठः । ८ अदृष्टः प्लवगेश्वर इति गो. पाठः ।

नह्यस्य[1] कर्मणो हेतुः साधने तद्विधो[2] भवेत् । हनूमतीह[3] सिद्धिश्च मतिश्च मतिसत्तम ॥ ३३ ॥
व्यवसायश्च शौर्यं[4] च श्रुतं चापि प्रतिष्ठितम् । जाम्बवान्यत्र नेता स्यादङ्गदश्च हरीश्वरः[5] ॥ ३४ ॥
हनूमांश्चाप्यधिष्ठाता न तत्र[6] गतिरन्यथा । मा भूश्चिन्तासमायुक्तः संप्रत्यमितविक्रम ॥ ३५ ॥
यदा हि दर्पितोदग्राः संगताः काननौकसः । नैषामकृतकार्याणामीदृशः[7] स्यादुपक्रमः ॥ ३६ ॥
वनभङ्गेन जानामि मधूनां भक्षणेन च । ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे ॥ ३७ ॥
हनूमत्कर्मदृप्तानां नर्दतां[8] काननौकसाम् । किष्किन्धामुपयातानां सिद्धिं कथयतामिव ॥ ३८ ॥
ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः । आयताञ्चितलाङ्गूलः सोऽभवद्धृष्टमानसः ॥ ३९ ॥
आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः । अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ४० ॥
तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः[9] । निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ४१ ॥
हनूमांश्च महाबाहुः प्रणम्य शिरसा ततः । नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ४२ ॥
दृष्टा[10] देवीति हनुमद्वदनादमृतोपमम् । आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥ ४३ ॥
निश्चितार्थं ततस्तस्मिन्सुग्रीवं[11] पवनात्मजे । लक्ष्मणः प्रीतिमान्[12]प्रीतो बहुमानादवैक्षत ॥ ४४ ॥
प्रीत्या च परमोपेतो[13] राघवः परवीरहा । बहुमानेन महता हनूमन्तमवैक्षत ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणेवाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

३३-३४] ति० टी०-अस्य कर्मणः साधने तद्विधो हेतुरपरो न भवेन्नास्ति । इह हनूमत्येतत्कार्यसाधिका सिद्धिर्ब्रह्मवरजन्या मतिश्चास्ति । हि यतः । व्यवसाय उद्यमः नेता प्रधानः ॥ ३३ ॥ ३४ ॥

रा० टी०-हनुमत एव दर्शने हेतुमाह—नेति । तद्विधः परमोत्तमबुद्धिधारको हनुमान् अस्य वाटिकाविध्वंसरूपस्य कर्मणः साधने हेतुर्न भवेत् अतः हनुमत्येव सिद्धिः इतीह अस्मिन् समये मतिर्मम निश्चयः ॥ ३३ ॥

रा टी०-हनुमतः साधने योग्यतामाह—व्यवसाय इति । व्यवसायप्रभृति प्रतिष्ठितं हनुमतीत्यनुकृष्यते । अर्थं पृथक् ! जाम्बवानिति । यत्र सैन्ये जाम्बवत्प्रभृतिः नेत्रादिः तत्र अन्यथा गतिः उत्पथगमनं न स्यात् एतेन सीतादर्शनजनितानन्द एवोत्पथगमने हेतुरिति सूचितम् ॥ ३४ ॥

गो० टी०-जाम्बवानिति । यत्र कार्ये नेता मन्त्री बलेश्वरः सेनापतिः अधिष्ठाता संरक्षक इत्यर्थः । तस्य कार्यस्य गतिः सिद्धिः अन्यथा विपरीता न भवेत् । संप्रति चिन्तासंयुक्तो मा भूः ॥ ३१ ॥ ३२ ॥

३५] ति० टी०-अधिष्ठाता कार्यकरणोद्योगवान् ॥३५॥

रा० टी०-मेति । यदा यदि काननौकसः दर्पितोदग्राः प्रवृद्धदर्पाः सन्तः सङ्गताः तर्हि चिन्तासमायुक्तस्त्वं मा भूः॥३५॥

३६-३८] ति० टी०-यदाहि । यत इत्यर्थः ॥३६-३८॥

रा० टी०-उपसंहरन्नाह-नेति । अकृतकार्याणामेषामीदृश आनन्दहेतुकोपद्रवकारक उपक्रमो न स्यात् अत एव वनभङ्गादिना जानामि सीतादर्शननिष्पत्तिं निश्चिनोमि ॥ ३६ ॥

रा० टी०-तत इति । ततः सुग्रीवकर्तृकोक्त्यनन्तरं सिद्धिं कथयतामिव किष्किन्धामुपयातानां काननौकसाम् आसन्नं समीपवर्तिनं किलकिलाशब्दं शुश्राव । सार्धश्लोक एकान्वयी ॥ ३७ ॥ ३८ ॥

गो० टी०-तत इत्यादि । सिद्धिं कथयतामिव । उत्साहेनेति शेषः ॥ ३३ ॥

३९-४१] ति० टी०-आयताञ्चितलाङ्गूल इति स्वभावोक्त्यलंकारः ॥ ३९ ॥ ४१ ॥

रा० टी०-तत इति । कपीनां नादं श्रुत्वा हृष्टमानसः अत एव आयताञ्चितं लाङ्गूलं यस्य स सुग्रीवोऽभवत् ॥ ३९ ॥

रा० टी०-आजग्मुरिति । रामदर्शनकाङ्क्षिणस्ते हरय आजग्मुः समीपं प्राप्तुः ॥ ४० ॥

रा० टी०-ते इति । प्रहृष्टाः प्राप्तसंतोषाः अत एव मुदान्विताः अङ्गदप्रमुखाः समीपे निपेतुः ॥ ४१ ॥

गो० टी०-तत इति । आयताञ्चितलाङ्गूलः आयतः दीर्घीकृतः अञ्चितः माल्यवच्छृङ्गे समास्थापितः ॥ ३४ ॥३५॥

गो० टी०-त इति । प्रहृष्टाः सञ्जातपुलकाः ॥ ३६ ॥

४२-४५] ति० टी०-नियतां पातिव्रत्यसंपन्नाम् अक्षतां शरीरेण कुशलिनीम् ॥ ४२ ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

---

१ अन्य इति गो. पाठः । २ ऽस्य हनूमत इति गो. पाठः । ३ मति हीति गो. पाठः । ४ वीर्यं च सूर्ये तेज इव ध्रुवमिति गो. पाठः । ५ बलेश्वर इति गो. पाठः । ६ तस्येति गो. रा पाठः । ७ एतदादिः सार्धः श्लोकः गो. नास्ति । ८ नर्दतामिति गो. पाठः । ९ मुदान्विता इति गो. पाठः । १० श्लोकोऽयं गो. नास्ति । ११ सुग्रीव इति गो. पाठः । १२ प्रीतमिति गो. पाठः । १३ रममाणोऽथेति गो. पाठः ।

पञ्चषष्टितमः सर्गः ।

सीताप्रवृत्तिं प्रति रामेण पृष्टो हनुमान्त्रिंशशपामूले राक्षसीमध्ये तस्याः स्थितिं निवेदयंस्तदुक्ताभिज्ञाननिवेदनपूर्वकं संदेशं कथयति ।

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् । प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १ ॥
युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च । प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमे[1] ॥ २ ॥
रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् । रामे समनुरागं च यथा[2] च नियमः कृतः ॥ ३ ॥
एतदाख्याय[3] ते सर्वे[4] हरयो रामसंनिधौ । वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥ ४ ॥
क्व सीता वर्तते देवी कथं च मयि वर्तते । एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ५ ॥
रामस्य गदितं श्रुत्वा हरयो रामसंनिधौ । चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥ ६ ॥
श्रुत्वा तु वचनं तेषां हनूमान्मारुतात्मजः । प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ॥ ७ ॥

रा० टी०–हनूमानिति । हनुमान् प्रणम्य नियतां यतचित्तां अक्षतां विनाशरहितां देवीं सीतां राघवाय न्यवेदयत् ॥ ४२ ॥

रा० टी०–दृष्टेति । हनुमद्वदनान्निस्सृतम् अमृतोपमं दृष्ट्वा देवीति वचनमाकर्ण्य रामो हर्षमाप ॥ ४३ ॥

रा० टी०–निश्चितार्थमिति । पवनात्मजे निश्चितः अर्थः सीतादर्शनं येन तं सुग्रीवं हनुमन्तं च प्रीतिमान् लक्ष्मणोऽवैक्षत प्रीत्याऽतिप्रेम्णोपलक्षितः परमया लक्ष्म्या अपि परया सीतयेत्यर्थः, उपेतो मनसा संयुक्तो राघवश्च महता प्रशंसनीयेन बहुमानेनावैक्षत श्लोकद्वयं संमिलितान्वयि ॥ ४४–४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०–हनुमांश्चेति । नियतामिति । अक्षतत्वेऽप्यनियतत्वे वैयर्थ्यम् नियतत्वेऽपि क्षतत्वे च तथा । ततः आवश्यकमुभयं संग्रहेण दर्शयति ॥ अस्मिन्सर्गे सार्धैकोनचत्वारिंशच्छ्लोकाः ॥ ३७ ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥६४॥

१-२] ति० टी०–तत इति ॥ १ ॥ २ ॥

रा० टी०–वानरप्राप्त्यनन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । ते हनुमत्प्रभृतयः सीतायाः प्रवृत्तिं वृत्तान्तं प्रवक्तुमुपचक्रमुः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–तत इति । प्रवृत्तिं वार्तां ॥ १ ॥ २ ॥

३] ति० टी०–नियमो रावणकृतावधिरूपः । 'दशमो वर्तते मासो द्वौ तु शेषौ प्लवंगम' इति सीतोक्तेः । तं चेति शेषः ॥ ३ ॥

रा० टी०–तदुक्तिप्रकारं बोधयन्नाह–रावणेति । रावणान्तःपुरे रोधं निरोधं राक्षसीभिस्तर्जनं च सीतायाः इति शेषः यथा येन प्रकारेण नियमः दशमो वर्तते मासो द्वौ च शेषौ प्लवङ्गमेत्यादिनोक्तोऽवधिः कृतः सीतयेति शेषः एतत्सर्वं रामसंनिधौ ते हरय आख्याय अतिष्ठन्तेति शेषः सार्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०–रावणेति । रोधं निरोधम् । यश्चायं समयः कृतः । मासद्वयादूर्ध्वं हनिष्यामीति यः संकेतो रावणेन कृत इत्यर्थः । मासशब्दः पक्षपर इत्युक्तं प्राक् । तमिति शेषः ॥ ३—६ ॥

४–५] ति० टी०–रामसंनिधौ। स्थिता इति शेषः॥४-५॥

रा० टी०–वैदेहीमिति । अक्षताम् अहिंसितां वैदेहीं श्रुत्वा उत्तरं श्रेष्ठं वचनं रामोऽब्रवीत् । अर्धं पृथक् । तद्वचनाकारमाह–क्वेति । सीता क्व वर्तते मयि कथं केन भावेन वर्त्तते वैदेहीं प्रति वैदेहीसंबन्धि एतत्सर्वं यूयमाख्यात केन भावेन इत्युक्त्या दुतस्वकर्तृकरावणवधाभावजनितसीतामर्षविषयकसंभावना सूचिता । अर्धद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

६] ति० टी०–चोदयन्ति प्रेरयन्ति स्म ॥ ६ ॥

रा० टी०—रामस्येति । रामस्य वचनं श्रुत्वा हरयो वानराः सीतावृत्तान्तकोविदं हनुमन्तं चोदयन्ति वृत्तान्तकथनाय प्रेरयन्त ॥ ६ ॥

७] ति० टी०–सीतायै प्रणम्य तां दिशं प्रति च प्रणम्येत्याकर्षः ॥ ७ ॥

रा० टी०–श्रुत्वेति । हनुमान् तेषां वचनं श्रुत्वा सीतायै तां दक्षिणां दिशं प्रति च प्रणम्य यथा येन प्रकारेण सीताया दर्शनमभवदिति शेषः तथा वाक्यमुवाच । सार्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–श्रुत्वा त्वित्यादि । प्रणामश्च सीतायाः

---

१ चक्रमुरिति गो. रा. पाठः । २ यश्चायं समय इति गो. पाठः । ३ आख्यान्तीति गो. पाठः । ४ सर्वे इति गो. पाठः ।

उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा । [1]तं मणिं काञ्चनं दिव्यं दीप्यमानं स्वतेजसा॥ ८ ॥
दत्त्वा रामाय हनुमांस्ततः प्राञ्जलिरब्रवीत् । समुद्रं लङ्घयित्वाहं शतयोजनमायतम् ॥ ९ ॥
अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया । तत्र लङ्केति नगरी रावणस्य दुरात्मनः ॥ १० ॥
दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे । तत्र सीता मया दृष्टा रावणान्तःपुरे सती ॥ ११ ॥
[2]त्वयि संन्यस्य जीवन्ती रामा राम मनोरथम् । दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ १२ ॥
राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने । दुःखमा[3]पद्यते देवी त्वया वीर सुखोचिता ॥ १३ ॥
रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता । एकवेणीधरा दीना त्वयि चिन्तापरायणा ॥ १४ ॥
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे । रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥ १५ ॥
देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता मया । इक्ष्वाकुवंशविख्यातिं शनैः कीर्तयतानघ ॥ १६ ॥
सा मया नरशार्दूल [4]शनैर्विश्वासिता तदा । ततः संभाषिता देवी सर्वमर्थं च दर्शिता ॥ १७ ॥
रामसुग्रीवसख्यं च श्रुत्वा [5]हर्षमुपागता । नियतः समुदाचारो भक्तिश्चास्याः [6]सदा त्वयि॥ १८ ॥

स्मरणकृत इति बोध्यम् । सीताया दर्शनं यथेति । येन प्रकारेण सीतादर्शनं जातं तेन प्रकारेणोवाचेत्यन्वयः ॥ ७ ॥

८-९] ति० टी०-यथा येन प्रकारेण सीताया दर्शनं जातं तत्परं वाक्यमुवाचेत्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-तामिति । तं सीतया दत्तं मणिं रामाय दत्त्वा हनुमानब्रवीत् ॥ ८ ॥

रा० टी०-तद्वचनाकारमाह-समुद्रमिति । शतयोजनमायतं समुद्रं लङ्घयित्वा सीतां मार्गमाणोऽहम् अगच्छं सागरदक्षिणतीरमिति शेषः ॥ ९ ॥

गो० टी०-समुद्रमिति । दिदृक्षया न तु श्रोतुमिच्छया । मार्गमाण इत्यर्थः ॥ ८ ॥

१०]ति०टी०-दृक्ष्या दिदृक्षया तां मार्गमाणोऽगच्छम्१०॥

रा० टी०-तत्रेति । तत्र प्रसिद्धे दक्षिणस्य समुद्रस्य तीरे रावणस्य लङ्केति नगरी वसति अस्ति ॥ १० ॥

गो० टी०-तत्रेति । तत्र लङ्घने कृते सति ॥ ९ ॥

११]ति०टी०-तीरे दक्षिणसमुद्रसंबन्धिद्वीपसंनद्धतीरे११॥

रा० टी०-तत्रेति । तत्र लङ्कायां रावणान्तःपुरे सती सीता मया दृष्टा अहं पृथक् ॥ ११ ॥

गो० टी०-तत्र दृष्टेति । हे राम ! रामा सीता त्वयि मनोरथं स्वाभिलाषम् संन्यस्य जीवन्ती त्वदभिलाषेण धृतजीवितेत्यर्थः ॥ १० ॥ ११ ॥

१२] ति० टी०-हे राम, रामा सा सीता त्वयि मनोरथं सम्यङ् न्यस्य त्वदतिरिक्तविषयमनोरथाभाववती भूत्वा जीवन्ती धृतप्राणा मया दृष्टा ॥ १२ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-त्वयीति । राक्षसीमध्ये मुहुर्मुहुस्तर्ज्यमाना मनोरथं त्वयि संन्यस्य जीवन्ती रामा सीता मया दृष्टा ॥ १२ ॥

१३-१४] ति० टी०-सुखोचिता देवी त्वया विना दुःखमापद्यते इत्यन्वयः ॥ १३ ॥ १४ ॥

१५-१६] ति० टी०-अधःशय्या भूशयना ॥ १५-१६ ॥

रा० टी०-राक्षसीभिरिति । त्वया सुखोचिता अक्षता अहिंसिता सीता प्रमदावने राक्षसीभिः करणैर्दुःखमापद्यते प्राप्नोति ॥ १३ ॥

गो० टी०-दुःखमित्यर्थम् । असाद्यते आसीदति । आर्षो यत् ॥ १२ ॥

रा० टी०-रावणेति । राक्षसीभिः सुरक्षिता अधः भूमौ शय्या शयनं यस्याः हिमागमे पद्मिनीव विवर्णाङ्गी तत्त्वेन प्रतीयमाना रावणाद्धेतोः विनिवृत्तः अर्थः त्वत्सेवारूपपरमप्रयोजनं यस्या अत एव मर्तव्ये मरणे कृतः निश्चयो यया सा देवी सीता इक्ष्वाकुवंशविख्यातिं कीर्तयता मया कथञ्चित् मार्गिता श्लोकत्रयमेकान्वयि ॥ १४-१६ ॥

गो० टी०-रावणान्तःपुर इत्यादि । एकवेणीधरा त्रिधा विभागं विना बद्धः केशपाशः एकवेणीत्युच्यते । अधःशय्याः स्थण्डिलशायिनी मर्तव्ये मरणे कृतनिश्चया ॥१३-१५

१७] ति० टी०-सर्वमर्थं रामसुग्रीवसख्यादि दर्शिता ज्ञापिता ॥ १७ ॥

रा० टी०-सेति । सा मार्गिता सीता शनैर्विश्वासिता रामदूतोऽयमिति विश्वासं प्रापिता ततोऽनन्तरं संभाषिता कृतप्रश्ना अत एव सर्वमर्थं वृत्तान्तं दर्शिता बोधिता ॥ १७ ॥

गो० टी०-तत इति । सर्वमर्थं च दर्शिता सुग्रीवसख्यप्रभृतिसर्वमर्थं च बोधिता ॥ १६ ॥

१८] ति० टी०-नियत इति । समुदाचारो गोत्रास्खलनादिव्यवहारो भक्तिश्च त्वयि त्वय्येव सदा नियतः । नान्यत्रेत्यर्थः ॥ १८ ॥

---

१ अर्धद्वयमेतत् गो. नास्ति । २ संन्यस्य त्वयीति गो. पाठः । ३ आसाद्यते देवी तथाऽदुःखोचिता सतीति गो. पाठः । ४ विश्वासमुपपादितेति गो. पाठः । ५ प्रीतिमिति गो. पाठः । ६ तथेति गो. पाठः ।

एवं मया महाभाग दृष्टा जनकनन्दिनी । उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १९ ॥
अभिज्ञानं च मे दत्तं यथावृत्तं तवान्तिके । चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ २० ॥
विज्ञाप्यः पुनरप्येष रामो वायुसुत त्वया । अखिलेन यथादृष्टमिति मामाह जानकी ॥ २१ ॥
अयं चास्मै प्रदातव्यो यत्नात्सुपरिरक्षितः । ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥ २२ ॥
एष चूडामणिः श्रीमान्मया ते यत्नरक्षितः । मनःशिलायास्तिलकं तत्स्मरस्वेति चाब्रवीत् ॥ २३ ॥
[त्वया प्रणष्टे तिलके तं किल स्मर्तुमर्हसि ॥]
एष निर्यातितः श्रीमान्मया ते वारिसंभवः । एनं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥ २४ ॥
जीवितं धारयिष्यामि मासं दशरथात्मज । ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥ २५ ॥
इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी । रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥ २६ ॥

रा० टी०-रामेति । रामसुग्रीवसख्यं श्रुत्वा हर्षं प्रमोदमुपागता प्राप्ता । अर्धं पृथक्-**नियत इति** । अस्या मद्भक्तिस्थायाः सीतायास्त्वयि भक्तिः परप्रीतिः तथा समुदाचारः तदनुकूलानुचरणं नियतः नियमेन वर्तमानोऽस्तीति शेषः ॥ १८ ॥

गो० टी०-**नियत इति** । समुदाचारः परपुरुषाचिन्तकत्वादिः त्वयि भक्तिश्च । वर्तत इति शेषः । तपसा अनशनेन ॥ १७ ॥ १८ ॥

१९-२०] ति० टी०-उग्रेण तपसा त्वद्भक्त्या च युक्ता ॥ १९ ॥ २० ॥

रा० टी०-**एवमिति** । उग्रेण तपसा त्वद्भक्त्या च युक्ता जनकनन्दिनी एवमुक्तप्रकारेण मया दृष्टा ॥ १९ ॥

रा० टी०-**अभिज्ञानमिति** । चित्रकूटे वायसं जयन्तं प्रति तवान्तिके यद्वृत्तं वृत्तान्तं तदभिज्ञानं मत्संवादचिह्नं मे मह्यं दत्तं कथितमित्यर्थः ॥ २० ॥

गो० टी०-**अभिज्ञानमिति** । अभिज्ञानं चिह्नभूतं वाक्यम् तवान्तिके पूर्वं यथा येन प्रकारेण जातं तथा दत्तमित्यर्थः । तदेव दर्शयति—**चित्रकूट इति** । सदस्यवक्तव्यत्वात् सूचनोक्तिः ॥ १९ ॥

२१] ति० टी०-यथा दृष्टं राक्षसीतर्जनादि तद्विज्ञाप्येत्यन्वयः ॥ २१ ॥

रा० टी०-सीतायाः वचनान्तरमाह-**विज्ञाप्य इति** । वायुसुत यथा येन प्रकारेण त्वया दृष्टं तथा अखिलेन निश्शेषम् एषः मद्धृदये स्थितो रामः त्वया विज्ञाप्यः वक्तव्य इति मां जानकी आह ॥ २१ ॥

गो० टी०-**विज्ञाप्यश्चेति** । अखिलेनेति । रावणागमनादिकमित्यर्थः ॥ २० ॥

२२] ति० टी०-उपशृण्वतः सुग्रीवस्य समक्षं दातव्य इत्यब्रवीदिति शेषः ॥ २२ ॥

रा० टी०-**अयमिति** । एवं वचनानि उपशृण्वतः सुग्रीवस्य समीपे ब्रुवता त्वया यत्नात् त्वत्प्रयत्नं विज्ञाप्य सुपरिरक्षितः स्वदेह इति शेषः अयं वृत्तान्तसमूहः त्वया प्रदातव्यः वक्तव्य इत्यर्थः ॥ २२ ॥

गो० टी०-**अयं चास्मा इत्यादि** । सुग्रीवस्योपशृण्वतः सुग्रीवे समीपे शृण्वति सति एवं एष चूडामणिरित्या रभ्य रक्षसां वशमागतेत्यन्तवक्ष्यमाणप्रकारेण वचनानि रामं प्रति मयोक्तवचनानि ब्रुवता त्वया अयं मणिरित्यर्थः प्रदातव्यः ॥ २१-२४ ॥

२३] ति० टी०-**एष इति** । दत्तस्तं पश्य । यन्मनःशिलायास्तिलकं त्वया कृतं तत्स्मरस्वेति चाब्रवीत् ॥ २३ ॥

रा० टी०-**एष इति** । यत्नरक्षितः एष मया दत्तो यो मणिः तं तत् पूर्वं त्वया कृतं मनःशिलायाः तिलकं च स्मरस्व इत्यब्रवीत् सीतेति शेषः ॥ २३ ॥

२४] ति० टी०-एष वारिसंभवो मणिर्निर्यातितः प्रेषितः एनमेतत्त्वत्प्रेषितमङ्गुलीयकम् ॥ २४ ॥

रा० टी०-**एष इति** । यया मया वारिसंभवः एष मणिः निर्यातितः प्रेषितः सा व्यसने दुःखे स्थिताऽहम् एतत् त्वत्प्रेषिताङ्गुलीयकं त्वामिव पश्यामि ॥ २४ ॥

२५-२६] ति० टी०-मासात् । वियमानादृशमादूर्ध्वमित्यर्थः ॥ २५ ॥ २६ ॥

रा० टी०-**जीवितमिति** । मासादूर्ध्वं न जीवेयम् ॥ २५ ॥

रा० टी०-**इतीति** । सीता मामित्यब्रवीत् ॥ २६ ॥

गो० टी०-**इति मामिति** । मृगीवोत्फुल्ललोचना । त्रासातिशयादिति भावः ॥ २५ ॥

१ भागेति गो. पाठः । २ च नरव्याघ्र इति गो. पाठः । ३ इह यदिति गो. पाठः । ४ सुपरिरक्षित इति गो. पाठः । ५ तिलको गण्डपार्श्वे निवेशित इति गो. पाठः । ६ अर्धमेतदधिकं गो. पाठे । ७ एतमिति गो. एतदिति रा. पाठः ।

एतदेव मयाख्यातं सर्वं राघव यद्यथा । सर्वथा सागरजले संतारः प्रविधीयताम् ॥ २७ ॥
तौ जाताश्वासौ राजपुत्रौ विदित्वा तच्चाभिज्ञानं राघवाय प्रदाय ।
देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा संपूर्णं वायुपुत्रः शशंस ॥ ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

सीताप्रेषितचूडामणिं वक्षसि निक्षिप्य सकरुणं बहुधा विलपन्रामः पुनर्हनुमन्तं सीतावचनं निवेदयितुमनुयुङ्क्ते ।

एवमुक्तो हनुमता रामो दशरथात्मजः । तं मणिं हृदये कृत्वा रुरोद[1] सहलक्ष्मणः ॥ १ ॥
तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोककर्शितः । नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् ॥ २ ॥
यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला । तथा ममापि हृदयं मणिश्रेष्ठस्य दर्शनात् ॥ ३ ॥
मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे[2] । वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ॥ ४ ॥
अयं हि जलसंभूता मणिः प्रवरपूजितः[3] । यज्ञे परमतुष्टेन दत्तः शक्रेण धीमता ॥ ५ ॥

२७-२८] ति० टी०-संतारः संतारोपायः । प्रविधीयतां प्रविचार्यताम् ॥ २७ ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे पञ्चशष्टितमः सर्गः ॥ ६५ ॥

रा० टी०-एतदिति । यथा यथावत् तदेतत् सर्वमाख्यातम् अतः सागरजले संतारः संतरणोपायः प्रविधीयतां क्रियताम् ॥ २७ ॥

गो०टी०-एतदेवेति । सन्तीर्यतेऽनेनेति संतारः सेतुः२६॥

रा० टी०-ताविति । जाताश्वासौ प्राप्ताश्वासनौ राजपुत्रौ विदित्वा सर्वम् अभिज्ञानं प्रदाय देव्या सीतया आख्यातं संपूर्णं वायुपुत्रो वाचा शशंस ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

गो० टी०-ताविति । पूर्ववद्वैश्वदेवीवृत्तम् । समुद्ततरंगं सुरसानिरसनादिकम् अक्षवधलङ्कादहनादिकं सजातीयेभ्यः पूर्वमुक्तमपि प्रभुसंनिधावात्मश्लाघायां पर्यवस्येदिति नोक्तमिति ध्येयम् । स्ववृत्तान्तं सर्वमाख्यातवानिति सामान्येन वक्तुं युक्तत्वेऽप्यङ्गदसन्निधौ प्रपञ्चनं गोप्यविशेषगोपनार्थम् । अत्र त्वप्रपञ्चनम् अकथनीयाकथनार्थं चेति ज्ञेयम् ॥ २७ ॥

अस्मिन्सर्गे सार्धसप्तविंशतिश्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चशष्टितमः सर्गः ॥ ६५ ॥

१-२] ति० टी०-एवमिति ॥ १ ॥ २ ॥

रा० टी०-अभिज्ञानप्राप्त्यनन्तरकालिकं रामवृत्तान्तमाह एवमित्यादिभिः । रुरोद आनन्दाश्रूणि मुमोच ॥ १ ॥

रा० टी०-तमिति । शोककर्शितो राघवः तं हनुमत्समर्पितं मणिश्रेष्ठं दृष्ट्वा अश्रुपूर्णाभ्यां नेत्राभ्यामुपलक्षितः सन् सुग्रीवमब्रवीत् ॥ २ ॥

गो० टी०-एवमित्यादि ॥ १ ॥ २ ॥

३] ति० टी०-वत्सस्येत्यत्रापि दर्शनादिति संबध्यते । तथा स्नेहात्स्रवतीत्यनुकर्षः ॥ ३ ॥

रा० टी०-तदाकारमाह-यथेति । वत्सस्य दर्शनात् स्नेहात् वत्सला धेनुः यथा स्रवति तथा मणिश्रेष्ठस्य दर्शनात् मम हृदयमपि स्रवति ॥ ३ ॥

गो० टी०-यथैवेति । यथा वत्सला वत्से स्नेहवती धेनुः वत्सस्य स्नेहाद्वत्सविषयकस्नेहात् स्रवत्येव द्रवत्येव तथा मणिरत्नस्य मणिश्रेष्ठस्य दर्शनान्मम हृदयं द्रवति ॥ ३ ॥

४] ति० टी०-मे श्वशुरेण जनकेन वधूकाले वधूत्वसंपादके काले विवाहकाले वैदेह्याः शिरोभूषणाय सीतामानृहस्तादृहीत्वा दशरथहस्ते दत्तम् । तच्च तस्मिन्काले यथाधिकं शोभते तथा मूर्ध्नि बद्धमित्यर्थः ॥ ४ ॥

रा० टी०-मणीति । वधूकाले सीतावधूत्वप्राकट्यसमये मे श्वशुरेण वैदेह्या वैदेह्यै दत्तम् इदं मणिरत्नं मूर्ध्नि यथा यथावद्बद्धं सत् अधिकं शोभते अशोभिष्ट ॥ ४ ॥

गो० टी०-मणेरागतिमाह-मणिरत्नमिति । मे श्वशुरेण जनकेन वधूकाले वधूप्रतिग्रहकाले विवाहकाल इत्यर्थः । यथा शोभते तथा बद्धमित्यन्वयः ॥ ४ ॥

५] ति० टी०-जनकस्याप्येतदागमः कुतस्तत्राह—अयं हीति । प्रवरैः श्रेष्ठैर्देवैः पूजितः ॥ ५ ॥

रा० टी०-अयमिति । प्रवरैर्देवैः पूजितः जलसंभूतोऽयं मणिः यज्ञे परमतुष्टेन शक्रेण दत्तः जनकायेति शेषः ॥ ५ ॥

---

१ प्ररुरोद सलक्ष्मण इति गो. पाठः । २ रत्नस्येति गो. पाठः । ३ सज्जनेति गो. पाठः ।

इमं दृष्ट्वा मणिश्रेष्ठं तथा तातस्य दर्शनम् । अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६ ॥
अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः । अद्यास्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥ ७ ॥
किमाह सीता वैदेही ब्रूहि सौम्य पुनः पुनः । परासुमिव तोयेन सिञ्चन्ती वाक्यवारिणा ॥ ८ ॥
इतस्तु किं दुःखतरं यमिमं वारिसंभवम् । मणिं पश्यामि सौमित्रे वैदेहीमागतं विना ॥ ९ ॥
चिरं जीवति वैदेही यदि मासं धरिष्यति । क्षणं वीर न जीवेयं विना तामसितेक्षणाम् ॥ १० ॥
नय मामपि तं देशं यत्र दृष्टा मम प्रिया । न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ॥ ११ ॥
कथं सा मम सुश्रोणी भीरुभीरुः सती तदा । भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥ १२ ॥
शारदस्तिमिरोन्मुक्तो नूनं चन्द्र इवाम्बुदैः । आवृतो वदनं तस्या न विराजति सांप्रतम् ॥ १३ ॥
किमाह सीता हनुमंस्तत्त्वतः कथयस्व मे । एतेन खलु जीविष्ये भेषजेनातुरो यथा ॥ १४ ॥

गो० टी०–जनकेनापि कुतस्तल्लब्धं तत्राह—अयं हीति ॥ ५ ॥

६-७] ति० टी०–तथा यथा सीतादर्शनमवगतः प्राप्तस्तथा तातस्य दशरथस्य प्राप्तः तद्धस्ते जनकेन दानात्तस्य स्मरणम् तथा वैदेहस्य राज्ञो जनकस्य सपत्नीकस्य दर्शनं प्राप्त इत्यर्थः ॥ ६ ॥ ७ ॥

रा० टी०–इममिति । मणिश्रेष्ठं दृष्ट्वा तातस्य दशरथस्य तथा वैदेहस्य च दर्शनमद्यावगतः प्राप्तोऽस्मि ॥ ६ ॥

रा० टी०–अयमिति । अयं मणिः तस्याः सीतायामूर्ध्नि शोभते अतः अस्य मणेर्दर्शनेन तां सीतां प्राप्तामिव चिन्तये ॥ ७ ॥

गो० टी०–मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यतीति सीतयोक्तप्रकारेण स्मरति–इममिति । इमं दृष्ट्वा तातस्य दशरथस्य वैदेहस्य जनकस्य दर्शनमद्यावगतः प्राप्तोऽस्मि । तदा ताभ्यां तस्या मूर्ध्नि बद्धत्वादिति भावः । इह वैदेहग्रहणं सीताजनन्या अप्युपलक्षणम् । सीतावाक्ये वीरो जनन्या मम चेत्युक्तेः । तत्र त्रयाणां संस्मरिष्यतीति त्रयग्रहणं बहुमात्रोपलक्षणम् । इह वैदेहस्यापि स्मरणोक्तेः ॥ ६–८ ॥

८] ति० टी०–परासुं मूर्च्छितं मां जीवनाय वाक्यवारिणा सिञ्चन्ती किमाह तद्ब्रूहि ॥ ८ ॥

रा० टी०–किमिति । हे सौम्य परासुं मूर्च्छितं तोयेनेव वाक्यवारिणा सिञ्चन्ती सीता किमाह पुनः पुनर्ब्रूहि तद्वचनमिति शेषः ॥ ८ ॥

९] ति० टी०–वैदेहीं विना आगतं मणिं पश्यामि, इतः किं दुःखतरम् ॥ ९ ॥

रा० टी०–इत इति । वैदेहीं विना आगतम् इमं मणिं यत् पश्यामि तस्मादितः किं दुःखतरं न किमपीत्यर्थः ॥ ९ ॥

गो० टी०–इतस्त्विति । आगतं मणिमित्यन्वयः॥९–११

१०] ति० टी०–यदि मासं धरिष्यति जीविष्यति तदा चिरं जीवति जीविष्यतीत्यर्थः । तां विना यथाहं न जीवेयं तथा मां विना सापि न जीविष्यतीत्यर्थः ॥ १० ॥

रा० टी०–चिरमिति । यदि मासं धरिष्यति प्राणानिति शेषः तदा वैदेही चिरं जीवति अहं तु तां सीतां विना क्षणमपि न जीवेयं जीवितुमिच्छामि ॥ १० ॥

११] ति० टी०–प्रवृत्तिमुपलभ्य क्षणमपि न तिष्ठेयम् । स्थातुं न शक्यमित्यर्थः ॥ ११ ॥

रा० टी०–नयेति । प्रवृत्तिं वृत्तान्तम् उपलभ्य ज्ञात्वा क्षणमपि न तिष्ठेयम् अतः यत्र मम प्रिया दृष्टा तं देशं मामपि नय ॥ ११ ॥

१२] ति० टी०–भीरुभीरुरत्यन्तं भीरुः ॥ १२ ॥

रा० टी०–कथमिति । भीरुभीरुः अत्यन्तभीरुरित्यर्थः, मम प्रिया रक्षसां मध्ये कथं तिष्ठति ॥ १२ ॥

गो० टी०–कथमिति । भीरुभीरुः अत्यन्तभीरुः॥१२।१३

१३] ति० टी०–अम्बुदैरावृतस्तिमिरोन्मुक्तः शारदश्चन्द्र इव तस्या वदनं न राजति ॥ १३ ॥

रा० टी०–शारद इति । तिमिरोन्मुक्तः शशरहितः अम्बुदैरावृतः शारदश्चन्द्र इव तस्याः सीतायाः वदनं सांप्रतं न राजति ॥ १३ ॥

१४] ति० टी०–एतेन तद्वाक्यश्रवणरूपेण ॥ १४ ॥

रा० टी०–किमिति । सीता किमाह त्वं कथय तत्प्रयोजनमाह–भेषजेनौषधेनातुर इवाहं जीविष्ये ॥ १४ ॥

गो० टी०–किमाहेति । तत्त्वतः संकोचेन न किंचित् गोपनीयमिति भावः ॥ १४ ॥

---

१ यथेति गो. पाठः । २ अस्याश्चेति गो. पाठः । ३ यदिममिति गो. पाठः । ४ सौम्येति गो. पाठः । ५ आवृतमिति गो. पाठः । ६ राक्षसैरिति गो. पाठः ।

मधुरा मधुरालापा किमाह मम भामिनी । मद्विहीना वरारोहा हनुमन्कथयस्व मे ॥
दुःखादुःखतरं प्राप्य कथं जीवति जानकी ॥ ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।

हनूमता रामाय सीतोक्तस्य चित्रकूटवृत्तवायसवृत्तान्ताभिज्ञानस्य विस्तरेण कथनम् । सीतायाः करुणविलपनस्य स्वकृततत्सान्त्वनस्य चाभिधानम् ॥

एवमुक्तस्तु हनुमान्राघवेण महात्मना । सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥
इदमुक्तवती देवी जानकी पुरुषर्षभ । पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥
सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता । वायसः सहसोत्पत्य विददार स्तनान्तरम् ॥ ३ ॥
पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रजः । पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥
ततः पुनरुपागम्य विददार भृशं किल । ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५ ॥
वायसेन च तेनैवं सततं बाध्यमानया । बोधितः किल देव्या त्वं सुखसुप्तः परंतप ॥ ६ ॥
तां चैव दृष्ट्वा महाबाहो दारितां च स्तनान्तरे । आशीविष इव क्रुद्धस्ततो वाक्यं त्वमूचिवान् ॥ ७ ॥

१५] ति० टी०–मधुरा मधुराकारा ॥ १५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह–**मधुरेति** । मम भामिनी प्रिया किमाह कथं च जीवति तत् कथयस्व ॥ १५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

गो० टी०–**मधुरेति** । मधुरा सुन्दरी । मधुरालापा । येन तद्वचनानुवादेऽपि भवद्वचनं मधुरं भवतीत्यर्थः ॥ १५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

१] ति० टी०–एवमिति ॥ १ ॥

रा० टी०–रामं प्रति हनुमदुक्तिमाह–**एवमित्यादिभिः**। राघवेण एवमुक्तो हनुमान् सीतायाः सर्वं भाषितं राघवे तत्समीपे न्यवेदयत ॥ १ ॥

गो० टी०–एवमित्यादि ॥ १ ॥ २ ॥

२–७] ति०टी०–यथातथं यथापूर्वं वृत्तं तथोक्तवती२–७

रा० टी०–निवेदनप्रकारमाह–**इदमित्यादिभिः** । राघवे अभिज्ञानं मत्प्राप्तिचिह्नं यथातथं यथाजातं तथेत्यर्थः चित्रकूटे इदं पूर्ववृत्तं पूर्वकालवृत्तान्तं जानकी उक्तवती ॥ २ ॥

रा० टी०–इदमर्थमाह–**सुखेत्यादिभिः** । त्वया सार्धं सुखसुप्ता जानकी पूर्वं त्वदुत्थानात्पूर्वकाले उत्थिताऽभवदिति शेषः, वायसो जयन्तस्तु स्तनान्तरे विददार विदारणानुकूलव्यापारं चकार ॥ ३ ॥

रा० टी०–विदारणप्रकारं बोधयन्नाह–**पर्यायेणेति** । हे भरताग्रज देव्यङ्के पर्यायेण त्वं सुप्तः तदा पक्षी वायसः देव्याः व्यथां स्पर्शादिना अस्वास्थ्यं पुनः पुनर्जनयति । पुनः पुनर्जनयतीत्यनेनायं रावणवधयोग्योऽस्ति नवेति परीक्षार्थमागत इति व्यक्तम् ॥ ४ ॥

रा० टी०–**तत इति** । ततः बहुविधोपद्रवकरणानन्तरं पुनरुपागम्य प्राप्य भृशमत्यन्तं विददार विदारणानुकूलव्यापारं चकार ततोऽनन्तरं शोणितेन रुधिरबिन्दुना समुक्षित इव त्वं तस्याः तया बोधितः शोणितोक्षितसादृश्यं च अत्यरुणबिन्दुविशिष्टसीतापटविशेषाच्छादितत्वेन । समुक्षितशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः प्रातिभासिकं व्याख्यानं तु हेयमेव अप्राकृताङ्गस्य रुधिरस्रावहेतुभूतविदारित्वस्यासंभवात् । अत एव 'यो वेत्ति भौतिकं देहं रामस्य परमात्मनः । स सर्वस्माद्बहिः कार्यः श्रौतस्मार्तविधानतः ।' इत्यादि संगच्छते ॥ ५ ॥

रा० टी०–**वायसेनेति** । वायसेन बाध्यमानया देव्या सुखसुप्तो बोधितस्त्वं तां देवीं स्तनान्तरे दारितामिव दृष्ट्वा आशीविष इव क्रुद्धः कोपाभासवांस्त्वं हे मारुते स्तनान्तरे नखाग्रैः केन दारितमिव सरोषेण भोगिना कः क्रीडतीति वाक्यमूचिवान् चवैशब्दाविवार्थौ । श्लोकत्रयमेकान्वयि ॥६–८॥

१ अर्धमेतत् गो. नास्ति । २ स्तनान्तरे इति गो. रा. पाठः । ३ त्विति गो.पाठः । ४ निःश्वसन्नस्यभाषथा इति गो. पाठः ।

नखाग्रैः केन ते भीरु रौदितं वै स्तनान्तरम् । कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ ८ ॥
निरीक्षमाणः सहसा वायसं समुदैक्षथाः । नखैः सरुधिरैस्तीक्ष्णैस्तामेवाभिमुखं स्थितम् ॥ ९ ॥
सुतः किल स शक्रस्य वायसः पततां वरः । धरान्तरगतः शीघ्रं पवनस्य गतौ समः ॥ १० ॥
ततस्तास्मिन्महाबाहो कोपसंवर्तितेक्षणः । वायसे त्वं व्यधाः क्रूरां मतिं मतिमतां वर ॥ ११ ॥
स दर्भसंस्तरादृह्य ब्रह्मास्त्रेण न्ययोजयः । स दीप्त इव कालाग्निर्जज्वालाभिमुखं खगम् ॥ १२ ॥
सं त्वं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति । ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह ॥ १३ ॥
भीतैश्च संपरित्यक्तः सुरैः सर्वैश्च वायसः । त्रींल्लोकान्संपरिक्रम्य त्रातारं नाधिगच्छति ॥ १४ ॥
पुनरप्यागतस्तत्र त्वत्सकाशमरिन्दम । त्वं तं निपतितं भूमौ धरण्यां शरणागतम् ॥ १५ ॥
वधार्हमपि काकुत्स्थ कृपया परिपालयः । मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव ॥ १६ ॥
ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणम् । वायसस्त्वां नमस्कृत्य रामो दशरथस्य च ॥ १७ ॥
विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम् । एवमस्त्रविदां श्रेष्ठः सत्त्ववाञ्छीलवानपि ॥ १८ ॥
किमर्थमस्त्रं रक्षःसु न योजयसि राघव । न दानवा न गन्धर्वा नासुरा न मरुद्गणाः ॥ १९ ॥

गो० टी०-पूर्वं संकुचितं विस्तृणीते—सुखेत्यादिना । उभावपि पर्यायेण सुप्ताविति त्वया सार्धमित्युक्तम् ॥ ३-६ ॥

गो० टी०-तां त्वित्यादि । दारितां विदारिताम् ॥७-१९

८-९]ति० टी०-रादितम् । दारितमित्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०-निरीक्ष्यमाण इति । रुधिरैः रुधिरसदृशात्यरुणपटबिन्दुभिः शोभमानः निरीक्ष्यमाण इतस्ततोवलोकमानः स प्रबुद्धस्त्वं तां सीताम् अभिमुखं स्थितं वायसं समुदैक्षथाः ॥ ९ ॥

१०]ति० टी०-धरान्तरगतः पातालस्थः ॥ १० ॥

रा० टी०-सुत इति । गतौ पवनस्य समः वायसः शीघ्रं धरान्तर्गतः देशान्तरं प्राप्तः ॥ १० ॥

११]ति० टी०-व्यधा अकृथाः ॥ ११ ॥

रा० टी०-तत इति । ततोऽनन्तरं कोपेन सीताङ्गस्पर्शहेतुकपरमकल्याणप्राकट्यकारकस्वीकृतक्रोधाभासेन संवर्तिते ईक्षणे यस्य स त्वं वायसे वायसकल्याणार्थं क्रूरां भयकारिणीं कठिनामनिवर्त्यामित्यर्थो वा मतिं व्यधाः अगृह्णाः 'क्रूरौ कठिनभीषणौ' इति कोशः ॥ ११ ॥

१२]ति० टी०-दर्भसंस्तरादेकं कुशं गृह्य गृहीत्वेत्यर्थः ॥ १२ ॥

रा० टी०-स इति । स त्वं दर्भसंस्तरात् दर्भमयास्तरणात् गृह्य दर्भं गृहीत्वा ब्रह्मास्त्रेण ब्रह्मास्त्रत्वसंपादकदृष्टिविशेषेण न्ययोजयः स दर्भः दीप्तः कालाग्निरिव खगं यथा भवति तथाभिमुखं जज्वाल ॥ १२ ॥

१३-१५]ति० टी०-चिक्षेप चिक्षेपिथ । आर्षः प्रयोगः ॥ १३-१५ ॥

रा० टी०-स इति । यं दर्भं वायसं प्रति त्वं चिक्षेप स दर्भः वायसमनुजगाम ॥ १३ ॥

रा० टी०-भीतैरिति । भीतैः सुरैः संपरित्यक्तो वायसः त्रातारं नाधिगच्छति प्राप्नोत् ॥ १४ ॥

रा० टी०-पुनरिति । तत्र तस्यां धरण्यां त्वत्सकाशं पुनरप्यागतो यस्तं वधार्हमपि शरणागतं शरणाय स्वरक्षणायागतम् अत एव भूमौ निपतितं वायसं कृपया त्वं परिपालयः पर्यपालयः सीताङ्गस्पर्शमात्रेण तत्कल्याणप्रकटनमपहाय कोपप्रकटनद्वारा किमर्थं कृतमिति तु न भ्रमितव्यं, प्रार्थनयैव परमकल्याणं क्रियत इति स्वाभाविकपरमात्मरीतेः । तथाहि करुणावानपि व्यक्तं शक्तस्त्वामपि देहिनाम् । अप्रार्थितो न गोपायेदिति तत्प्रार्थनामतिरिति पुराणम् । सार्धश्लोक एकान्वयी ॥ १५ ॥

१६]ति० टी०-परिपालयः पर्यपालयः । शरीरावधेनेति भावः । इत्येवेति हेतोः ॥ १६ ॥

रा० टी०-मोघमिति । अस्त्रं मोघं सर्वथा विफलं कर्तुं न शक्यमिति हेतोरेव काकस्य दक्षिणमक्षि भवान् हिनस्ति ॥१६

१७-१९]ति० टी०-ततस्तदागमनोत्तरम् । हिनस्ति स्माहिनः ॥ १७-१९ ॥

रा० टी०-वायस इति । विसृष्टः वधान्मुक्तः काको धृष्टो वायसः त्वां नमस्कृत्य स्वगें दशरथस्य दशरथं च नमस्कृत्य

---

१ दारित खिति गो.रा.पाठः । २ चर इति गो. पाठः । ३ कृथा इति गो.पाठः । ४ वरः इति रा.पाठः । ५ दर्भमिति गो. पाठः । ६ मुख इति गो. पाठः । ७ क्षिप्तवाँस्त्वं प्रदीप्तं ह्रीति गो. पाठः । ८ स पित्रा चेति गो. पाठः । ९ च स महर्षिभिरिति गो. पाठः । १० एवेति गो. पाठः । ११ स इति गो. पाठः । १२ शरण्य इति गो. पाठः । १३ भवानिति गो. पाठः । १४ राम त्वां स इति गो. पाठः । १५ राज्ञे दशरथाय चेति गो.पाठः । १६ योजयति धरवाः इति गो. पाठः । १७ नागा नापीति गो. पाठः ।

तव राम रणे शक्तास्तथा प्रतिसमासितुम् । तवैव वीर्यवतः कच्चिन्मयि यद्यस्ति संभ्रमः ॥ २० ॥
क्षिप्रं सुनियतैर्बाणैर्हन्यतां युधि रावणः । भ्रातुरादेशमाज्ञाय लक्ष्मणो वा परंतपः ॥ २१ ॥
स किमर्थं नरवरो न मां रक्षति राघवः । शक्तौ तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ॥ २२ ॥
सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः । ममैव दुष्कृतं किंचिन्महदस्ति न संशयः ॥ २३ ॥
समर्थौ सहितौ यन्मां न रक्षेते परंतपौ । वैदेह्या वचनं श्रुत्वा करुणं साधुभाषितम् ॥ २४ ॥
पुनरप्यहमार्यां तामिदं वचनमब्रवम् । त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ २५ ॥
रामे दुःखाभिभूते च लक्ष्मणः परितप्यते । कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ २६ ॥
इदं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि । तावुभौ नरशार्दूलौ राजपुत्रौ परंतपौ ॥ २७ ॥
त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः । हत्वा च समरे रौद्रं रावणं सहबान्धवम् ॥ २८ ॥
राघवस्त्वां वरारोहे स्वपुरीं नयिता ध्रुवम् । यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ २९ ॥
प्रीतिसंजननं तस्य प्रदातुं तत्त्वमर्हसि । साभिवीक्ष्य दिशः सर्वा वेण्युद्ग्रथनमुत्तमम् ॥ ३० ॥
मुक्त्वा वस्त्राददौ मह्यं मणिमेतं महाबल । प्रतिगृह्य मणिं दोर्भ्यां तव हेतो रघुप्रिय ॥ ३१ ॥

स्वमालयं प्रतिपेदे दशरथं नमस्कृत्येत्यनेन पलायनसमये दशरथोपदेशेनैव रामशरणमागत इति ध्वनितम् । एतेन तस्मिन्काले आवेदाद्यन्यतमनिमित्तेन तस्य त्रिलोकीमध्ये आगमो जात इति ध्वनितम् ॥ १७ ॥

रा० टी०–एवमिति । रक्षस्तु अस्त्रं किमर्थं न योजयसि ॥ १८ ॥

रा० टी०–नेति । दानवादयः तव त्वां रणे प्रतिसमासितुं निवर्तयितुं न शक्ताः ॥ १९ ॥

गो० टी०–न नागा इति । प्रतिसमासितुं प्रतिमुखं स्थातुम् ॥ २०–२५ ॥

२०-२४] ति० टी०–हे राम! रणे तव त्वां प्रति समासितुं न शक्तास्तथा तद्वत् काकवदित्यर्थः । संभ्रम आदरः ॥ २०–२४ ॥

रा० टी०–तवेति । संभ्रम आदरो यद्यस्ति तर्हि रावणो हन्यताम् ॥ २० ॥

रा० टी०–भ्रातुरिति । लक्ष्मणो नरवरः सरामो वा मां किमर्थं न रक्षति ॥ २१ ॥

रा० टी०–शक्ताविति ॥ २२ ॥

रा० टी०–ममेति ॥ २३ ॥

रा० टी०–वैदेह्या इति । वैदेह्या वचनं श्रुत्वा इदमहमब्रवम् ॥ २४ ॥

२५] ति० टी०–त्वच्छोकविमुखस्त्वच्छोकेन कार्यान्तरविमुखः ॥ २५ ॥

रा० टी०–इदमर्थमाह—त्वदित्यादिभिः । त्वच्छोकेन विमुखः विकृतमुखत्वेन प्रतीयमानः सन् रामः परितप्यते रामे दुःखाभिभूते तत्त्वेन प्रतीयमाने सति लक्ष्मणः परितप्यते ॥ २५

गो० टी०–त्वच्छोकेति । त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः ॥ २६—२८ ॥

२६] ति० टी०–भवती मया दृष्टा । अतः परं परिशोचितुं न कालस्तव योग्य इति शेषः । चिरं लङ्कायामासितुं न कालो योग्य इति पाठान्तरेऽर्थः ॥ २६ ॥

रा० टी–कथञ्चिदिति । सीता भवती कथंचित् दृष्टा अतः परिशोचितुं कालो न । तत्र हेतुः—इदं मुहूर्तमारभ्येति शेषः दुःखानामन्तं विध्वंसं द्रक्ष्यसि ॥ २६ ॥

२७-२९] ति० टी०–इदं मुहूर्तम् । अस्मिन्नेव मुहूर्ते इत्यर्थः ॥ २७–२९ ॥

रा० टी०–ताविति ॥ २७ ॥

रा० टी०–हत्वेति । नयिता नेता ॥ २८ ॥

रा० टी०–यदिति । यत् येन रामो विजानीयात् मत्कर्तृकत्वदर्शनं निश्चिनुयात् तत् तस्य रामस्य प्रीतिसंजननमभिज्ञानं प्रदातुं त्वमर्हसि ॥ २९ ॥

गो० टी०–हत्वेति । नयते नेष्यते । वर्तमानसामीप्ये वर्तमानवत् प्रयोगः ॥ २९ ॥ ३० ॥

३०-३१] ति० टी०–वेण्युद्ग्रथनं वेण्यामुद्ग्रथनयोग्यम् ॥ ३० ॥ ३१ ॥

रा० टी०–सेति । सा सीता वेण्युद्ग्रथनं वेण्यामुद्ग्रथनार्हमेतं मणिं वस्त्रान्मुक्त्वा निष्कृष्य मह्यं ददौ ॥ ३० ॥

---

१ न च सर्वे इति गो. पाठः । २ राममिति गो. पाठः । ३ तस्येति गो. पाठः । ४ निशितैरिति गो. पाठः । ५ अवेक्षेते इति गो. पाठः । ६ साश्रिति गो. पाठः । ७ अस्मिन्मुहूर्ते इति गो. पाठः । ८ अनिन्दिताविति गो. पाठः । ९ स्वामिति गो. पाठः । १० नयते इति गो. पाठः । ११ त्वमिहार्हसीति गो. पाठः । १२ दिव्यमिति गो. पाठः । १३ रघूद्वहेति गो. पाठः ।

शिरसा संप्रणम्यैनामहमागमने त्वरे । गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी ॥ ३२ ॥
विवर्धमानं च हि मामुवाच जनकात्मजा । अश्रुपूर्णमुखी दीना बाष्पगद्गदभाषिणी ॥ ३३ ॥
ममोत्पतनसंभ्रान्ता शोकवेगसमाहता । मामुवाच ततः सीता सभाग्योऽसि महाकपे ॥ ३४ ॥
यद्द्रक्ष्यसि महाबाहुं रामं कमललोचनम् । लक्ष्मणं च महाबाहुं देवरं मे यशस्विनम् ॥ ३५ ॥
सीतयाप्येवमुक्तोऽहमब्रुवं मैथिलीं तथा । पृष्ठमारोह मे देवि क्षिप्रं जनकनन्दिनि ॥ ३६ ॥
यावत्ते दर्शयाम्यद्य ससुग्रीवं सलक्ष्मणम् । राघवं च महाभागे भर्तारमसितेक्षणे ॥ ३७ ॥
साब्रवीन्मां ततो देवी नैष धर्मो महाकपे । यत्ते पृष्ठं सिषेवेऽहं स्ववशा हरिपुङ्गव ॥ ३८ ॥
पुरा च यदहं वीर स्पृष्टा गात्रेषु रक्षसा । तत्राहं किं करिष्यामि कालेनोपनिपीडिता ॥ ३९ ॥
गच्छ त्वं कपिशार्दूल यत्र तौ नृपतेः सुतौ । इत्येवं सा समाभाष्य भूयः संदेष्टुमास्थिता ॥ ४० ॥
हनूमन्निसहसंकाशौ तावुभौ रामलक्ष्मणौ । सुग्रीवं च सहामात्यं सर्वान्ब्रूया अनामयम् ॥ ४१ ॥
यथा च स महाबाहुर्मां तारयति राघवः । अस्माद्दुःखाम्बुसंरोधात्तत्त्वमाख्यातुमर्हसि ॥ ४२ ॥
ईदृं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ।
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ ४३ ॥
एतत्तवार्या नृप संयता सा सीता वचः प्राह विषादपूर्वम् ।
एतच्च बुद्ध्वा गदितो यथा त्वं श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०–प्रतीति । मणिं प्रतिगृह्य आगमने आगमनार्थमहं त्वरे ॥ ३१ ॥

गो० टी०–साभिवीक्ष्य दिश इति । दिगवलोकनं राक्षस्यो दृष्ट्वा रावणाय वक्ष्यन्तीति भयेन वेण्यामुद्ग्रथ्यत इति वेण्युद्ग्रथनम् वेणीधार्यमित्यर्थः । मुक्त्वा वस्त्रादिति वस्त्राञ्चलेन ग्रथितं मणिं मुक्त्वा ततः ददावित्यर्थः ॥ ३१ ॥

अस्मिन्सर्गे सार्धसप्तत्रिंशच्छ्लोकाः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥६७॥

३२] ति० टी०–त्वरे त्वरावाञ्जात इत्यर्थः ॥ ३२ ॥

रा० टी०–गमन इति । अश्रुपूर्णमुखी सीता उवाच । सार्धश्लोक एकान्वयी ॥ ३२ ॥ ३३ ॥

३३–३८] ति० टी०–विवर्धमानम् । समुद्ततरणायेति शेषः ॥ ३३–३८ ॥

रा० टी०–वचनाकारं बोधयन्नाह—ममेति । ममोत्पतनेन संभ्रान्ता सीता रामं लक्ष्मणं च यत्त्वं द्रक्ष्यसि तस्मात्त्वं सभाग्योऽसि इति सीता मामुवाच। श्लोकद्वयमेकान्वयि ३४॥३५

रा० टी०–सीतयेति । यावत् राघवादीन् ते दर्शयामि तावत् मे पृष्ठमारोह इति सीतयोक्तोऽहमब्रुवम् । श्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

रा० टी०–सेति । स्ववशा रामाज्ञारहितेत्यर्थः, अहं यत्ते पृष्ठं सिषेवे स एष धर्मो न इति सा सीता मामब्रवीत् ॥ ३८॥

३९–४४] ति० टी०–कालेनोपनिपीडिता । परायत्तेति शेषः ॥ ३९–४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०–मच्छङ्कासंभावनया वचनान्तरमप्याह–पुरेति । कालेन परमात्मेच्छारूपसमयविशेषेण उपनिपीडिता प्राप्तपीडाऽहं यत् स्पृष्टा तत्र किं करोमि तस्मिन् काले न किञ्चित् कर्तुं योग्यमित्यर्थः ॥ ३९ ॥

रा० टी०–गच्छेति । संदेष्टुं वक्तुं भूय आस्थिता ॥४०॥

रा० टी०–तदाकारमाह–हनूमन्निति । ॥ ४१ ॥

रा० टी०–यथेति ॥ ४२ ॥

रा० टी०–इदमिति । अध्वा मार्गः शिवः कल्याणप्रदोऽस्तु ॥ ४३ ॥

रा० टी०–एतदिति । आर्या तव सीता एतदुक्तं वचः प्राह प्रियायाः एतद्वचो गदितस्त्वं बुद्ध्वा निश्चित्य समग्रां पतिव्रताग्रण्यां सीतां कुशलां श्रद्धत्स्व ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

---

१ संदिग्धेति गो. पाठः । २ सार्धषट्श्लोका गो. न सन्ति । ३ त्वं समाधातुमर्हसीति गो. पाठः । ४ इममिति गो. पाठः । ५ नृप राजसिंहेति गो. पाठः । ६ गदितं मयेति गो. पाठः ।

अष्टषष्टितमः सर्गः ।

हनूमता रामाय सीताकृतवानरकर्तृकसमुद्रतरणचिन्तोद्भावनस्य स्वकृततत्परिहारस्य च कथनम् ।

अथाहमुत्तरं देव्या पुनरुक्तः ससंभ्रमम् । तव स्नेहान्नरव्याघ्र सौहार्दादनुमान्य चै ॥ १ ॥
एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया । यथा मां प्राप्नुयाच्छीघ्रं हत्वा रावणमाहवे ॥ २ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम । कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चाप्यल्पभाग्यायाः सांनिध्यात्तव वानर । अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणम् ॥ ४ ॥
गते हि त्वयि विक्रान्त पुनरागमनाय वै । प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ ५ ॥
तँवादर्शनजं चापि भयं मां परितापयेत् । दुःखाद्दुःखपराभूतां दुर्गतां दुःखभागिनीम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः । सुमहांस्त्वत्सँहायेन हर्यृक्षेषु असंशयः ॥ ७ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् । तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्येह लङ्घने । शक्तिः स्याद्वैनतेयस्य वायोर्वा तव चानघ ॥ ९ ॥
तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे । किं पश्यसि समाधानं ब्रूहि वाँक्यविदां वर ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने । पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥

१] ति० टी०–तव स्नेहान्मयि सौहृदात्सुहृद्भावान्माम-नुमान्य संमान्य ससंभ्रमो गन्तुं सत्वरोऽहमुत्तरं कार्यं प्रति पुनः पुनरुक्तः ॥ १ ॥

रा० टी०–हनुमन्तं प्रति सीतावचनान्तराणि वर्णयितु-माह–अथेति । हे नरव्याघ्र तव स्नेहात् सौहार्दात् सर्वकालं कापट्यसंसर्गरहितान्तःकरणाच्च हेतोः अनुमान्य मां सत्कृत्य उत्तरं श्रेष्ठं वचः देव्या सीतया पुनरहमुक्तः ॥ १ ॥

गो० टी०–अथेत्यादि । हे नरव्याघ्र तव स्नेहात् मयीति शेषः । सौहार्दात् सुहृद्भावात् आप्तत्वादिति यावत् । अनुमान्य संमान्य । उत्तरं ततःपरम् उत्तरं कार्यं वा । पुन-र्देव्याहमुक्त इत्यन्वयः । ससंभ्रमः गमनत्वरान्वित इत्यर्थः ॥१।२॥

२–३] ति० टी०–यथा मां प्राप्नुयात्तथा यतस्वेति शेषः ॥ २ ॥ ३ ॥

रा० टी०–तदाकारमाह–एवमित्यादिभिः ॥ २ ॥

रा० टी०–यदीति ॥ ३ ॥

गो० टी०–यदि वेत्यादि । शोकविपाकस्य शोकदृद्धे-रित्यर्थः ॥ ३–९ ॥

४] ति० टी०–एकदिनवासफलमाह–मम चेति । तव सांनिध्यादल्पभाग्याया ममास्य महतः शोकविपाकस्य शोक-रूपस्य पापफलस्य मुहूर्तं मोक्षणं स्यादित्यन्वयः ॥ ४ ॥

रा० टी०–वासे हेतुमाह–ममेति । तव सांनिध्यात् अस्यानुभूयमानस्य मम शोकविपाकस्य अत्यन्तशोकस्य मुहूर्तं विमोक्षणं विध्वंसः स्यात् ॥ ४ ॥

५–६] ति० टी०–पुनरागमनाय प्रतीक्षमाणाया मम प्राणानामपि संदेहः स्यादिति योजना ॥ ५ ॥ ६ ॥

रा० टी०–गते इति । पुनरागमनायापि त्वयि गते सति मम प्राणानां संदेहः स्यात् ॥ ५ ॥

रा० टी०–तत्र हेतुमाह–तवेति । तवादर्शनजं दर्शनाभाव-जनितं भयं दुःखाद्दुःखेन दुःखपरंपरया पराभूताम् अत एव दुःखभागिनीं मां परितापयेत् ॥ ६ ॥

७] ति० टी०–उत्तरकार्यविषयाशुक्तिमाह–अयं चेति । असंशयो बाधकसंशयरहितः ॥ ७ ॥

रा० टी०–अयमिति । हे वीर त्वत्सहायेषु हर्यृक्षेषु असंशयः निश्चितमित्यर्थः अयं संदेहस्तिष्ठति ॥ ७ ॥

८–१०] ति० टी०–संदेहमेवाह–कथं न्विति ॥ ८–१० ॥

रा० टी०–इदमर्थमाह–कथमित्यादिभिः ॥ ८ ॥

रा० टी०–तत्र हेतुमाह–त्रयाणामिति ॥ ९ ॥

रा० टी०–तदिति । दुरतिक्रमे अस्मिन् कार्यनिर्योगे कार्यसाधने किं समाधानमुपायं पश्यसि जानासि तद्ब्रूहि ॥ १० ॥

गो० टी०–तदस्मिन्निति । कार्यनिर्योगे कार्यगतौ । दुरतिक्रमे दुर्निर्वहे ॥ १०—२२ ॥

११] ति० टी०–यद्यपि त्वमेव पर्याप्तः । सकलराक्षस-वधपूर्वं मन्मोचन इति शेषः । तथापीदृशो बलोदयस्तवैव य-शस्यो यशोवर्धकः स्यात् ॥ ११ ॥

रा० टी०–काममिति ॥ ११ ॥

१ भ्रम इति गो. पाठः । २ वै इति गो. पाठः । ३ वीर्यवन्निति गो. पाठः । ४ विक्रान्ते इति गो. पाठः । ५ तवादर्शनजः शोको भूय इति गो. पाठः । ६ सहायेष्विति गो, रा. पाठः । ७ हरीश्वरेति गो. पाठः । ८ अस्येति गो.पाठः । ९ तव वा मारुतस्य वेति गो. पाठः । १० कार्यैति गो. पाठः ।

बलैः समग्रैर्यदि मां हत्वा रावणमाहवे । विजयी स्वपुरीं रामो नयेत्तत्स्याद्यशस्करम् ॥ १२ ॥
यथाहं तस्य वीरस्य वनादुपधिना हृता । रक्षसा तद्भयादेव तथा नार्हति राघवः ॥ १३ ॥
बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः । मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १४ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः । भवत्याहवशूरस्य तथा त्वमुपपादय ॥ १५ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् । निशम्याहं ततः शेषं वाक्यमुत्तरमब्रवम् ॥ १६ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः । सुग्रीवः सत्त्वसंपन्नस्त्वदर्थे कृतनिश्चयः ॥ १७ ॥
तस्य विक्रमसंपन्नाः सत्त्ववन्तो महाबलाः । मनःसंकल्पसदृशा निदेशे हरयः स्थिताः ॥ १८ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः । न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ १९ ॥
असकृत्तैर्महाभागैर्वानरैर्बलसंयुतैः । प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ २० ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः । मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसंनिधौ ॥ २१ ॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः । नहि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ २२ ॥
तदलं परितापेन देवि मन्युरपैतु ते । एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥ २३ ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ । त्वत्सकाशं महाभागे नृसिंहावागमिष्यतः ॥ २४ ॥
अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यसि राघवम् । लक्ष्मणं च धनुष्मन्तं लङ्काद्वारमुपागतम् ॥ २५ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् । वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ॥ २६ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु । नर्दतां कपिमुख्यानां नचिराच्छ्रोष्यसे स्वनम् ॥ २७ ॥
निवृत्तवनवासं च त्वया सार्धमरिन्दमम् । अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् ॥ २८ ॥

१२] ति० टी०–यदि तु रामो रावणं हत्वा मां नयेत्, तदा तन्नयनं तस्य यशस्करं स्यात् अतस्तेनैवागत्य मोचनं युक्तमिति भावः ॥ १२ ॥

रा० टी०–बलैरिति ॥ १२ ॥

१३–१४] ति० टी०–उपधिना छलेन ॥ १३ ॥ १४ ॥

रा० टी०–यथेति । उपधिना कापट्येन रक्षसाऽपहृताऽहं यथा तद्भयान्न विनश्येयमिति शेषः तथा राघवोऽर्हति ॥ १३ ॥

रा० टी०–उक्तमेव भङ्ग्यन्तरेणाह–बलैरिति ॥ १४ ॥

१५] ति० टी०–यथा तस्यानुरूपं विक्रान्तं भवति तथा त्वमेवोपपादय ॥ १५ ॥

रा० टी०–भवन्तं प्रत्युक्त्वा मां प्रत्याह–तदिति ॥१५॥

१६–२२] ति० टी०–शेषं शिष्टम् ॥ १६–२२ ॥

रा० टी०–तदिति । अहम् । अर्थोपहितं तद्वाक्यं निशम्य श्रुत्वा शेषं स्थिरम् उत्तरं वाक्यमब्रुवम् ॥ १६ ॥

रा० टी०–तदाकारमाह–देवीति ॥ १७ ॥

रा० टी०–तस्येति । निदेशे आज्ञायाम् ॥ १८ ॥

रा० टी०–येषामिति ॥ १९ ॥

रा० टी०–असकृदिति ॥ २० ॥

रा०टी०–मदिति । प्रत्यवरो न्यूनबलः कश्चिन्नास्ति॥२१॥

रा० टी०–अहमिति । तत्रस्थानां महत्त्वे हेतुमाह–प्रकृष्टा महान्तो न प्रेष्यन्ते किंतु इतरे अवस्थादिना लघव एव प्रेष्यन्ते ॥ २२ ॥

२३–२८] ति० टी०–मन्युर्दैन्यम् ॥ २३—२८ ॥

रा० टी०–तदिति । यतः एकोत्पातेन केवलोत्प्लवनेन हरियूथपाः लङ्कामेष्यन्ति तत्तस्मात् हेतोस्ते परितापेनालं, न कर्तव्य इत्यर्थः ॥ २३ ॥

रा० टी०–रामकर्तृकोत्प्लवनस्यादृष्टत्वात् तदागमनं कथमिति तदाशङ्कां निवारयन्नाह–ममेति ॥ २४ ॥

रा० टी०–अरिघ्नमिति ॥ २५

रा० टी०–नखेति ॥ २६ ॥

रा० टी०–शैलेति ॥ २७ ॥

रा० टी०–निवृत्तेति । त्वया सार्धमभिषिक्तं राघवमयोध्यायां क्षिप्रं द्रक्ष्यसि ॥ २८ ॥

गो० टी०–तदलमिति । मन्युः दैन्यम् । मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः ॥ २३—२८ ॥

१ स्वामिति गो. पाठः । २ तत्रार्थे इति गो. पाठः । ३ संपाता इति गो. पाठः । ४ दर्पितैरिति गो. पाठः । ५ वै इति गो. पाठः । ६ वानरेद्राभानिति रा. पाठः ।

ततो मया वाग्भिरदीनभाषिणी शिवाभिरिष्टाभिरभिप्रसादिता ।
उवाह शान्तिं मम मैथिलात्मजा तवातिशोकेन तथातिपीडिता ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

२९] ति० टी०–पूर्वमुक्तया मदुक्त्या श्रुतेन त्वच्छोकेनातिपीडिताप्यदीनभाषिणी सा मया शिवाभिर्वाग्भिरभिप्रसादिता शान्तिं दुःखनिवृत्तिमुवाह । प्रापेत्यर्थः ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये सुन्दरकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

सुन्दरे सुन्दरीं सीतामक्षतां मारुतेर्मुखात् ।
श्रुत्वा हृष्टस्तथैवास्तु स रामः सततं हृदि ॥
मनोभिरामं नयनाभिरामं श्रोत्राभिरामं वचसोऽभिरामम् ।
एवं सदा सर्वगतोऽभिरामं वंदे सदा दाशरथिं च रामम् ॥
श्रीराम राम रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥
राम राम तव नाम निर्मलं चिन्तयामि भवबन्धमुक्तये ।
वन्दितं सुरनरेन्द्रमौलिभिर्ध्यायितं मनसि योगिभिः सदा ॥

रा० टी०–तत इति । ततस्तस्मिन् समये तवातिशोकेन अतिपीडिता मैथिलात्मजा इष्टाभिः ईप्सिताभिः वाग्भिः अभिप्रसादिता सती ममाग्रे शान्तिमुवाह प्राप ॥ २९ ॥

विष्ण्वादयो यस्य भिया त्रिलोकीं
संपालयन्ते नितरां सुरेशाः ।
तद्रामपादाब्जकृपाभिरत्र
समाप्तिनी सुन्दरकाण्डटीका ॥ १ ॥

वाल्मीकीयकृतिप्राप्तसुन्दरार्थप्रकाशकः
रामप्रीतिं सृजनयेत् रामायणशिरोमणिः ॥ २ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

गो० टी०–तत इति । तव शोकेनापि नैव दंशानित्यादिमदुक्त्या श्रुतेन तदा मम पुरस्तादभिपीडिता अदीनभाषिणी मया शिवाभिः इष्टाभिः वाग्भिः अभिप्रसादिता शान्तिं दुःखनिवृत्तिम् जगाम ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो
वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवारतः
पूर्वाचार्यकृता विलोक्य विविधा व्याख्या सुहृज्जानकी-
कान्तस्याप्रतिमाज्ञयैव तिलकं सौन्दर्यकाण्डे व्यधात् ॥ १ ॥

---

१ भाषिणेति गो. पाठः । २ जगामेति गो. पाठः । ३ ऽभीति गो. पाठः ।

इति श्रीवाल्मीकिरामायणे विवृतित्रयसनाथं
सुन्दरकाण्डं समाप्तम् ।

' गुजराती ' मुद्रणालयस्थानि क्रय्यसंस्कृतपुस्तकानि ।

मूल्यं मार्गव्ययः

१ **श्रीमद्भगवद्गीता** प्रथमो गुच्छः **Bhagavat-Geeta with 7 commentaries** श्रीमच्छंकराचार्यविरचितं **भाष्यम्**, आनन्दगिरिकृतं **शांकरभाष्यव्याख्यानम्**, **आनन्दतीर्थीय (माध्व) भाष्यम्**, जयतीर्थविरचिता **प्रमेयदीपिका** टीका, **रामानुजभाष्यम्**, पुरुषोत्तमजीप्रकाशिता **अमृततरङ्गिणी**, नीलकण्ठविरचितो **भावप्रदीपः**, एतैः समेता मञ्जुलैरायसाक्षरैर्मुद्रिता पृष्ठान्यष्टशतपरिमितानि सुचिक्कणानि । मूल्यम् रू. ६-०-० ०-७-०

२ **श्रीमद्भगवद्गीता** द्वितीयो गुच्छः **Bhagavat-Geeta with 8 other commentaries**—निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता–**'तत्त्वप्रकाशिका,'** श्रीमधुसूदनसरस्वतीकृता—**' गूढार्थदीपिका,'** श्रीशङ्करानन्दप्रणीता—**'तात्पर्यबोधिनी,'** श्रीधरस्वामिकृता—**' सुबोधिनी,'** श्रीसदानन्दविरचितः–**' भावप्रकाशः,'** श्रीधनपतिसूरिविरचिता–**' भाष्योत्कर्षदीपिका,'** दैवज्ञपण्डितश्रीसूर्यविरचिता—**' परमार्थप्रपा,'** पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः–**' अर्थसंग्रहः'** इत्येताभिर्व्याख्याभिः सहिता । अत्र श्लोकाः स्थूलतमाक्षरैष्टीकाश्च स्थूलाक्षरैर्मुद्रिताः, वृद्धा मा क्लेशिषतेति । मू. रू. १०-०-० ०-१५-०

३ **उत्तरगीता Uttara-Geeta with Gaudpadiya commentary**—गौडपादीयदीपिकाख्यव्याख्यायुता भगवत्पादश्रीशंकराचार्याणां परमगुरुभिः श्रीशुकाचार्याणां च शिष्यैः श्रीगौडपादाचार्यैः प्रणीतेयं व्याख्येत्येतावत्कथनमलमस्या महिमानमवगमयितुम् । मूल्यम् रू. ... ०-३-० ०-०-६

४ **श्रीमद्वाल्मीकिरामायणम् । Valmiki Ramayana with 3 well-known commentaries**, सर्वतन्त्रस्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो जीविकाप्रदातुः शृङ्गवेरपुराधीशस्य वीरमणेः श्रीरामराजस्य नाम्ना प्रणीतया **रामायणतिलकाख्यया टीकया**, पण्डितश्रीवंशीधर–शिवसहायाभ्यां प्रणीतया **रामायणशिरोमण्याख्यया टीकया**, श्रीगोविन्दराजप्रणीतया **भूषणाख्यया टीकया** च सह मुद्रयितुमारब्धमस्माभिः । तच्च सप्तभिः खण्डैः समापयिष्यामः ।

बालकाण्डम् । प्रथमं खण्डम् **Bal Kand** उपरिनिर्दिष्टटीकात्रयोपेतम् । मूल्यम् रू. ... ३-०-० ०-५-०

अयोध्याकाण्डम् । द्वितीयखण्डम् **Ayodhya Kand** उर्ध्वनिर्दिष्टटीकात्रयोपेतम् । मू. रू. ५-०-० ०-७-०

अरण्यकाण्डम् । तृतीयखण्डम् । **Aranya Kand** उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू. ... २-१२-० ०-४-०

किष्किन्धाकाण्डम् । चतुर्थखण्डम् । **Kishkindha Kand** उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू. २-१०-० ०-४-०

सुन्दरकाण्डम् । पञ्चमखण्डम् । **Sundar Kand** उपरिनिर्दिष्टटीकात्रयोपेतम् । मू. रू. ३-०-० ०-४-०

५ **स्तोत्रमुक्ताहारः—Stotra-muktahar containing 256 Stotras** अस्मिन् २५६ स्तोत्राणि संगृहीतानि । यद्यपि सन्ति भूरीणि स्तोत्रपुस्तकानि मुद्रितानि भूरिभिस्तथापि न तेष्वियतां स्तोत्ररत्नानां संग्रहः । अस्माभिः पूर्वमुद्रितानां स्तोत्राणां पुस्तकानि काश्यादिक्षेत्रेभ्यो भूयसा प्रयासेन द्रविणव्ययेन च समासाद्य तेभ्यश्च प्रसादगुणयुक्तानि स्तोत्राणि संकलय्य संशोध्य च तानि भाविकजनानां कृतेऽत्र समावेशितानि तदाशास्महे श्रद्धावन्तो जनाः सफलयिष्यन्ति प्रयत्नमस्माकममुमिति । मूल्यम् रू. ०-८-० ०-२-०

स्तोत्रमुक्ताहारः—द्वितीयोभागः । स्तोत्रसंख्या २५७—४१६ मूल्यम् रू.... ... ... ०-८-० ०-२-०

६ **संस्कारमयूखः—Samskar Mayukha** मीमांसकनीलकण्ठभट्टसुतशंकरभट्टकृतः । अत्र संस्काराणां स्वरूपं कालः इतिकर्तव्यता वर्णधर्मा आश्रमधर्माश्च विस्तरतो मूलवचनोपन्यासपुरःसरं निरूपिताः । मूलवचनानि चाप्रतिपत्तिविप्रतिपत्तिसंभावनास्थलेषु क्रमेण पर्यायशब्दप्रदर्शनेन मीमांसकाभिमतन्यायानुसरणेन च व्याख्यातानि । अन्ते कातीयसूत्रानुसारिप्रयोगाश्च दत्ताः । पूर्वं

वाराणस्यादिषु मुद्रितोऽप्ययं वर्णपदवाक्यभ्रंशविपर्ययादिदोषप्रचुरतयाऽप्रविभक्तविषयतया च भृशंदुर्बोधो विपरीतबोधकरश्चासीत्। अस्माभिस्तु ग्रन्थकृतैव पुनः शोधितस्य वर्धितस्य चास्य ग्रन्थस्य पुस्तकमाद्य विषयांश्च प्रविभज्य शोधने च महान्तमायासमास्थाय मुद्रितः। मू. रू. ०–१२–० ०–१–०

७ **आचारमयूखः—Achara Mayukha** नीलकंठभट्टकृतः। प्रातःस्मरणादिशयनान्तस्याह्निककियाकलापस्य निरूपणपरो ग्रन्थः मूल्यम् रू.। ०–८–० ०–१–०

८ **मनुस्मृतिः—Manu Smriti कुलूकभट्टकृतटीकया,** ग्रन्थान्तरेषु मनुनाम्नोल्लिखितैरिदानींतनमनुस्मृतिपुस्तकेष्वनुपलभ्यमानैः श्लोकैः, पद्यानां वर्णानुक्रमकोशेन, विषयानुक्रमेण च सहिता। सूक्ष्मेक्षिकया संशोधिता च। मू. रू. १–८–० ०–३–०

९ **विदुरनीतिः—Vidura-Niti with a commentary** संस्कृतटीकोपेता नीतिशास्त्राभ्यासिनां विद्यार्थिनामतीवोपयोगिनी। मू. रू. ०–४–० ०–१–०

१० **वेदान्तरहस्यम्—Vedanta Rahasya** वेदान्तवागीशभट्टाचार्यविरचितम्। अत्राद्वैतमतसिद्धान्तो निरूपितः। उपपत्तिश्च प्रदर्शिता। भाषाऽतिसरला प्रौढा च। मूल्यम् रू. ... ०–१–० ०–०–६

११ **विशिष्टाद्वैतमतविजयवादः–Vishishtadvaita-Mata-Vijaya-Vada** नरहरिपण्डितकृतः। अत्र विशिष्टाद्वैतमते परेषामाक्षेपान्निराकृत्य विशिष्टाद्वैत एवोपनिषदां तात्पर्यं व्यवस्थापितम्। मू. रू. ०–१–० ०–६–०

१२ **रघुवंशमहाकाव्यम्–Raghuvamsha With Mallinatha's commentary** श्रीकालिदासकृतम् मल्लिनाथकृतसंजीविन्याख्यटीकासहितम्। मू. रू. ०–१०–० ०–३–०

१३ **रघुवंशमहाकाव्यं**—Only First Five Sargas of the Same with Commentary मल्लिनाथकृतटीकोपेतम्। सर्गाः १–५ मूल्यम् रू. ०–४–० ०–१–०

१४ **कुमारसंभवं महाकाव्यम्–Kumar Sambhav with 3 known commentaries** कविवरश्रीकालिदासविरचितमिदं सप्तमसर्गपर्यन्तं मल्लिनाथकृत**संजीविन्या** चारित्र्यवर्धनकृत**शिशुहितैषिण्या** च संवलितं, तत आसमाप्ति सीतारामकृत**संजीविन्याऽलंकृतं** सुललितैरायसाक्षरैर्मुद्रितमतीव दर्शनीयमस्ति। मू. रू. १–४–० ०–२–०

१५ **कारिकावली सिद्धान्तमुक्तावलीसहिता–Karikavalee with Siddhanta-Muktavali and other notes** न्यायवैशेषिकदर्शनयोर्व्युत्पित्सूनां कृते प्रणीतेषु प्रकरणग्रन्थेषु सिद्धान्तमुक्तावलीसमुद्भासिता कारिकावली मूर्धाभिषिक्तेत्यत्र न विदुषां वैमत्यं किंतु तत्र दीधितिकृदुपसृतया विवेकसरण्या संक्षेपतः सूक्ष्मतमानामर्थानामुपनिबद्धतया प्रायः खिद्यन्ति नव्याश्छात्राः, इति तेषामुपकारायास्माभिः प्रायः सर्वेषु विषमस्थलेष्वतिविस्तृतां सरलां सुबोधां च टिप्पनीं पण्डित–जीवरामशास्त्रिभिः कारयित्वा तया सहेयं दृढतरेषु सुचिक्कणेषु पत्रेषु स्थूलाक्षरैर्मुद्रिता। सार्धशताभ्यधिकपत्रयुतामणीमां सर्वसौलभ्यायाल्पीयसा मूल्येन वितरामः। मू. रू. ०–७–० ०–१–३

१६ **वैशेषिकदर्शनम्–Vaisheshika Darshana with several commentaries** श्रीशंकरमिश्रकृत–**वैशेषिकसूत्रोपस्कार**—जयनारायणतर्कपञ्चाननभट्टाचार्यप्रणीत–**विवृति**–चन्द्रकान्तभट्टाचार्यप्रणीत—**भाष्य**सहितम्। मू. रू. २–०–० ०–३–०

१७ **वादार्थसंग्रहः** (प्रथमो भागः)—**Vadartha Samgraha** First Part अत्र शेषकृष्णकृतं स्फोटतत्त्वनिरूपणं, श्रीकृष्णभौनिकृता स्फोटचन्द्रिका, गोडबोलेकृतः प्रातिपदिकसंज्ञावादः, वाक्यवादः, हरियशोमिश्रकृता वाक्यदीपिकेति पञ्च ग्रन्थाः संकलिताः। पण्डितानां प्रौढच्छात्राणां च बहुतरमुपकारकः। मू. रू. ०–६–० ०–०–६

१८ **वादार्थसंग्रहः** (द्वितीयो भागः)—Second Part अत्र भवानन्दसिद्धान्तवागीशकृतं षट्कारकविवेचनम्, जयरामभट्टाचार्यकृतः कारकवादः समासवादश्च, एवकारवादश्चेति चत्वारो ग्रन्थाः सन्ति। मू. रू. ०–६–० ०–०–६

१९ **वादार्थसंग्रहः** (तृतीयो भागः)—Third Part अत्र कृष्णाचार्यकृतः '**वादसुधाकरः**' भौनिश्रीकृष्णकृतः '**लघुविभक्त्यर्थनिर्णयः**' रामकिशोरकृता–'**शाब्दबोधप्रकाशिका**' चेति शाब्दिकानां त्रयो ग्रन्थाः सन्ति। मू. रू. ०–८–० ०–१–०

२० **न्यायबिन्दुः—Nyayabindu** पूर्वमीमांसायाः अधिकरणार्थसंग्राहको ग्रन्थः। तत्सदुपाख्य- मूल्यं मार्गव्ययः
भट्टवैद्यनाथकृतः। टिप्पनीसहितः। मू. रू. १-४-० ०-२-०

२१ **महाभागवतम्—Maha Bhagavata** देवीपुराणम्। अस्मिन् भगवत्या ब्रह्मस्वरूपिण्या
महाकाल्या दाक्षायणी—गङ्गा—पार्वती—श्रीकृष्णेत्यवतारचतुष्टयचरितानि, महाकाल्या मूलस्थानं च
प्रधानतयोपवर्णितानि। प्रसङ्गाद्रामचरितं स्कन्दचरितं पाण्डवचरितं गणेशोत्पत्तिर्गङ्गावतरणं भगवतीगीता
ललितासहस्रनाम शिवसहस्रनामादयश्च विषया निरूपिताः। सार्धपञ्चसाहस्री संयतेहिम्। मू. रू. ... २-०-० ०-३-०

२२ **तैत्तिरीयोपनिषत्—Taittiriya-Upanishat** श्रीमच्छंकरभगवत्पादकृतभाष्येणानन्दगिरिकृतटीकायुतेन तैत्तिरीयविद्याप्रकाशेन च सहिता। मू. रू. १-०-० ०-२-०

२३ **दशरूपकम्—Dasha Rupaka** नाट्यशास्त्रं धनञ्जयविरचितमवलोकसहितं पञ्चनदीयपण्डितसुदर्शनाचार्यप्रणीतप्रभाख्यव्याख्यासहितं च। मू. रू. १-०-० ०-२-०

२४ **ब्रह्मसूत्रवृत्तिः-Brahma Sutra Vritti** अद्वैतमञ्जरी। भगवत्पाद (आद्यशंकराचार्य)
शिष्यकृता। मू. रू. ०-१२-० ०-२-०

२५ **चन्द्रालोकः—Chandraloka with a commentary** श्रीपीयूषवर्षजयदेवकविविरचितोऽलंकारग्रन्थः। पायगुण्डोपाह्ववैद्यनाथ(बाळंभट्ट)विरचित**रमाख्यव्याख्या**सहितः। मू. रू. ... ०-८-० ०-१-०

२६ **महाभारतविराटपर्व-Mahabharata-Virata Parva with eight commentaries** नीलकण्ठकृत**भारतभावदीप**-अर्जुनमिश्रकृत**दीपिका**-चतुर्भुजमिश्रकृत**प्रकाश**—सर्वज्ञनारायणकृत**भारतार्थप्रकाश**—विमलबोधकृत**दुर्घटार्थप्रकाशिनी**-रामकृष्णकृत**विरोधार्थभञ्जनी-विषमपदविवरण**-वादिराजतीर्थविरचित**लक्षाभरण**त्यष्टटीकोपेतं विपुलपाठभेदसहितं च। मू. रू. ३-८-० ०-६-०

२७ **चम्पूभारतम्—Champubharata** श्रीखण्डेइत्युपाह्वनारायणसूरिविरचितटीकासहितम्।
मू. रू. २-०-० ०-३-०

२८ **चन्द्रकान्त—Chandrakanta** (Hindi) (वेदान्त ज्ञानका मुखग्रन्थ) प्रथम भाग. यह वह ग्रन्थ है कि, जो नितान्त निर्भ्रान्त वेदान्त सिद्धान्तका एकांत प्रतिपादक "**चन्द्रकान्त**" मणि बम्बई प्रान्तके प्रसिद्ध साप्ताहिक '**गुजराती**' पत्रके मुख्य-आद्य संपादक गुजराती भाषाके सुविख्यात लेखक, अनेक ग्रन्थोंके निर्माता देशभक्तधुरीण, सारासारविवेकप्रवीण, वैश्यकुलभूषण श्रीमान् शेठ **इच्छाराम सूर्यराम** देसाईके शुद्ध हृदयमें देदीप्यमान प्रबोधरत्नभाण्डागारका चमचमाता हुआ एक अमूल्य रत्न है. कि. रू. २-८-० ०-४-०

२९ **युक्तिप्रकाश-Yukti Prakasha** (Hindi) विचारसागरका कर्ता साधु श्रीनिश्चलदासजीने किया हुआ यह ग्रन्थ हिन्दुस्तानी भाषामें है. इसमें वेदान्तके ३९ सिद्धान्त बहुत अच्छीतरहसे सिद्ध किये गये हैं. निश्चलदासकी वाणी सब जिज्ञासुलोकोंको ज्ञात होनेसे विशेष निरूपणकी कुछ जरूरत है नहीं. और जिज्ञासुलोकोंको ये ग्रन्थ बहुत उपयुक्त हैं. पक्की जिल्द और अच्छा कागज. १-०-० ०-२-०

नोंध—व्ही. पी. खरच जूदा पडेगा.

'**गुजराती**' मुद्रणालयाधिपतिः।
कोट सर्कल सासून बिल्डिंग-**मुंबई.**

73

RAMAYAN

OF

VÂLMÎKI

WITH THREE COMMENTARIES CALLED

T. SHIROMANI, and BHOOSHANA

WITH NUMEROUS READINGS AND NOTES

YUDDHA-KANDA

ROYAL ASIATIC SOCIETY OF BENGAL
LIBRARY

EDITED BY

SHASTRI SHRINIVAS KATTI MUDHOLKAR

SANSKRITA ADHYAPAKA IN THE ELPHINSTONE COLLEGE, BOMBAY.

(All Rights Reserved)

PRINTED AND PUBLISHED BY MANILAL ITCHARAM DESAI AT
THE GUJARATI-PRINTING PRESS
No. 5, SASSOON BUILDINGS CIRCLE, FORT,
BOMBAY.

1919

SUPPLIED by—
Poona Oriental Book House
330, A. Sadashiv Peth,
POONA

S
891.2103
R165m
v.6

SL. NO.
079452

561

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीयं(भूषणे)ति-
टीकात्रयसमलंकृतम्

युद्धकाण्डम् ।

प्रथमः सर्गः ।

श्रीरामो हनुमद्वाक्यं श्रुत्वानितरसाध्य सङ्कटोचितकार्यकरणेनातिहृष्टमनास्तं परिष्वज्य प्रशंसति ।

श्रुत्वा हनूमतो वाक्यं यथावदभिभाषितम् । रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥

तिलकटीका ।

युद्धं रक्षोगणान्हत्वा पुष्पकेण निजां पुरीम् ।
सीतया सह चागत्य रेजे रामोऽभिषेचितः ॥

१] एवं हनुमतः सकाशात्सीताक्षेमान्तं श्रुत्वा कृतकार्यं भृत्ये स्वामिन उचितां वृत्तिं लोकस्य उपदेशं हनुमन्तमभ्यौदित्याह—श्रुत्वेति । उत्तरं प्रियश्रवणानन्तरकालयोग्यम् ॥ १ ॥

रामायणशिरोमणिः ।

स्वस्ति श्रीरघुवंशभूषणमहं राजाधिराजं परं
श्रीमद्बापुखतेदितं परविभुं सुग्रीवसंसेवितम् ।
श्रीमल्लक्ष्मणलक्षितं जनकजां ध्यायन्तमार्यं सुखं
रामं नित्यसुखप्रदं सुरमुदं सर्वेश्वरं भजे ॥ १ ॥
नत्वा तच्चरणौ सुखौ सुखकरौ तत्सेवकं मारुतिं
वाल्मीकिं कविनायकं गुरुमहं रामायणे रामगे ।
वाल्मीकेरतिनिर्मितेऽद्भुततमे युद्धे करोम्यद्य तां
टीकां रामपदारविन्दरसिदां श्रीरामसंतोषिणीम् ॥२॥
नत्वा त्रिवेणीं निखिलार्थवेणीं
वेणीधरार्यार्चितपादवेणीम् ।
कुर्मः प्रयागे सकलार्थभागे
श्रीमद्रिवेणीतटविद्वदर्थे ॥ ३ ॥

श्रीमद्रामायणव्याख्या वाल्मीकिहृदयार्पिका ।
रामेच्छया प्रवृत्तेयं रामायणशिरोमणिः ॥ ४ ॥
सीतारामसमारम्भां शुकाचार्यादिमध्यगाम् ।
अस्मदाचार्यपर्यन्तां वन्देगुरुपरम्पराम् ॥ ५ ॥

हनुमत्कर्तृकसीतासंदेशकथया सुन्दरकाण्डं समाप्य तद्भवन-श्रवणानन्तरकालिकं रामहृदयान्तमाह—श्रुत्वेत्यादिभिः । यथावदभिभाषितं हनुमतो वाक्यं श्रुत्वा प्रीतिसमायुक्तो रामः उत्तरं वाक्यमब्रवीत् ॥ १ ॥

भूषणटीका ।

आद्यायै शठकोपदेशिकवरं प्राचार्यपारम्पर्य-
मध्यानस्य मनाग्दं कुशकुलाचार्यं मुनीनां वरम् ।
पूर्वाचार्यकृता विलोक्य बहुधा व्याख्याः सतां प्रीतये
कुर्वे संप्रति युद्धकाण्डविवृतिं श्रीमल्किरीटाभिधाम् ॥१॥

उक्तं पुरुषकारभूताया लक्ष्म्याः कृत्यं सुन्दरकाण्डे । अथोपायकृत्यं वक्तुं षष्ठः काण्ड आरभ्यते । तत्र स्वामिना कृतकार्ये भृत्ये एवं वर्तितव्यमित्यनुसंधायोपदेष्टुं सुग्रीवादीनामुत्साहं वर्धयन् समाहृतसीताक्षेमान्तं हनुमन्तं रामः सत्करोति प्रथमे सर्गे । अत्र गायत्र्यक्षरं मकारः । श्रुत्वेति । यथावत् यथावस्थितप्रकारेण । अभिभाषितम् उक्तम् । उत्तरं प्रियश्रवणोत्तरकालार्हम् ॥ १ ॥

कृतं हनूमता कार्यं सुमहद्भुवि दुर्लभम् । मनसाऽपि यदन्येन न शक्यं धरणीतले ॥ २ ॥
नहि तं परिपश्यामि यस्तरेत महोदधिम् । अन्यत्र गरुडाद्वायोरन्यत्र च हनूमतः ॥ ३ ॥
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् । अप्रधृष्यां पुरीं लङ्कां रावणेन सुरक्षिताम् ॥ ४ ॥
प्रविष्टः सत्त्वमाश्रित्य जीवन्को नाम निष्क्रमेत् । को विशेत्सुदुराधर्षां राक्षसैश्च सुरक्षिताम् ॥ ५ ॥
यो वीर्यबलसंपन्नो न समः स्याद्धनूमतः । भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् ॥
एवं विधाय स्वबलं सदृशं विक्रमस्य च ॥ ६ ॥
यो हि भृत्यो नियुक्तः सन्भर्त्रा कर्मणि दुष्करे । कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥ ७ ॥

२] ति० टी०–भुवि दुर्लभं भूलोके दुःखेन लभ्यं यद्वस्तु सीतारूपं तद्विषयं यत्कार्यमन्वेषणरूपं तद्धनुमता कृतं यद्धरणीतलेऽन्येन मनसापि न शक्यम् । कर्तुमिति शेषः । अतएव दुर्लभत्वमुक्तम् ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–कृतमित्यादिभिः । यत् कार्यमन्येन हनुमतो भिन्नेन मनसाऽपि साधितुमिति शेषो न शक्यम् अत एव दुर्लभं तत्कार्यं हनुमता कृतम् ॥ २ ॥

गो० टी०–अथ प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः । कर्मान्ते दासभृत्याश्च न कदाचन पुत्रकाः ॥ इति वचनान्कर्मान्ते दासं स्तौति–कृतमित्यादिना । अत्र महदित्यनेन सागरतरणमुच्यते सुमहदित्यनेन लङ्काप्रवेशः । दुर्लभमित्यनेन लङ्काधर्षणम् मनसापि न शक्यमित्यनेन पुनर्निर्गमः प्रथमं सागर एव न ततुं शक्यः तीर्त्वाऽपि तं लंका न प्रवेष्टुम् । प्रविश्यापि न धर्षयितुं धर्षयित्वापि न ततो निर्गन्तुमिति भावः ॥ २ ॥

३ ति० टी०–अन्याशक्यत्वमेवाह–नहीति ॥ ३ ॥

रा० टी०–कार्यस्याशक्यत्वे हेतुमाह–नहीति । यो महोदधिं तरेत तं गरुडादन्यत्र अन्यं न परिपश्यामि । किंच गरुडादेः अन्यत्र अन्यः यो महोदधिं तरेत तं न परिपश्यामि ॥ ३ ॥

गो० टी०–महत्त्वमुपपादयति—नहीति । गरुडवायुमिलित्वा तरेताम् । अयं त्वेक एवातरदित्यर्थः ॥ ३ ॥

४] ति० टी०–देवदानवयक्षाणामिति करणे शेषत्वेन विवक्षिते षष्ठी ॥ ४ ॥

रा० टी०–देवेति । रावणेन सुरक्षिताम् अत एव देवादीनामप्रधृष्यां लङ्कां सत्त्वं स्वबलमाश्रित्य प्रविष्टः को नाम जनः जीवन सन् निष्क्रमेत् न कोऽपीत्यर्थः । सार्धश्लोकस्यान्वयः ॥ ४ ॥

गो० टी०–सुमहत् मनसापि न शक्यमित्यनद्वयमप्युपपादयति–देवदानवेत्यादिना सार्धश्लोकेन । सत्त्वं बलम् आश्रित्य अस्मिन् जीवन निष्क्रमेत् निष्क्रामेत् । लङ्कां प्रविश्य स्वबलेन पुनर्निर्गच्छन हनुमतोऽन्यः कोपि नास्तीत्यर्थः ॥ ४ ॥

५] ति० टी०–तां प्रविष्टो निष्क्रामेत्पुनः स्वदेशमागच्छेत् । प्रवेशोऽपि दुर्लभ इत्याह—क इति । यो हनुमतः समो न स्यात्स को विशेदित्यन्वयः ॥ ५ ॥

रा० टी०–प्रवेशस्यैव दौर्लभ्यमाह–क इति । यो हनुमतः समो न स्यात् स कः विशेत् न कोऽपीत्यर्थः ॥ ५ ॥

गो० टी०–दुर्लभत्वमुपपादयति—को विशेदिति ॥५॥

६] ति० टी०–विक्रमस्य सदृशं स्वबलं स्वबलकार्यं समुद्रलङ्घनलङ्काप्रवेशरूपं विधाय हनुमता महदुत्कादधिकमपि सुग्रीवस्य भृत्यकार्यं सुग्रीवभृत्यत्वोचितं कार्यं सीतादर्शनवनभङ्गादिरूपं कृतम् ॥ ६ ॥

रा० टी०–भृत्येति । विक्रमस्य स्वदुत्तगतेः सदृशं स्वबलं स्वपौरुषमेवं विधाय प्रकटय्य महत् सुग्रीवस्य भृत्यकार्यं भृत्यैः कृत्यं हनुमता कृतम् ॥ ६ ॥

गो० टी०–न केवलं स्वामिनियुक्तकार्यकरणेन भृत्यकार्यं निर्व्यूढमनेन किन्त्वनियुक्तप्रकृतकार्यानुकूलकार्यान्तरकरणेनापि महत्कार्यं संसाधितमित्याह–भृत्येति । विक्रम अतिशक्तिः विक्रमस्त्वतिशक्तितेत्यमरः । विक्रमस्य सदृशम् स्वबलम्अशोकवनिकाभङ्गादिकम् पौरुषं स्वयम् आत्मनः स्वामिनियोगं विना विधाय सुग्रीवस्य भृत्यकार्यं भृत्येन कर्तव्यम् महत् अधिकम् कृतमित्यर्थः ॥ ६ ॥

७] ति० टी०–हनुमतो भृत्योत्तमत्वं दर्शयितुमुत्तमादिभृत्यानां लक्षणान्याह—यो हीति । यो भृत्यो भर्त्रा दुष्करे कर्मणि नियुक्तस्तत्कार्यं कृत्वा तदनुरागेणोक्तकार्याविरोधेन कार्यान्तरमपि कुर्यात्तं पुरुषोत्तमं भृत्यपुरुषेषु श्रेष्ठमाहुः ॥ ७ ॥

रा० टी०–हनुमतः उत्तमभृत्यत्वं बोधयितुमुत्तमादिभृत्यानां लक्षणमाह–य इत्यादिभिः । दुष्करे कर्मणि भर्त्रा नियुक्तः सन् यो भृत्यः तत्कर्म अनुरागेण अतिप्रीत्या कुर्यात् तं पुरुषोत्तमं भृत्यजनश्रेष्ठमाहुः तत्त्वविद इति शेषः । प्रीतिप्राकट्यं तु आज्ञापितकार्याविरोधिस्वामीष्सितकार्यान्तरकरणेनेति बोध्यम् ॥ ७ ॥

गो० टी०–हनुमत उत्तमभृत्यत्वं दर्शयितुमुत्तममध्यमाधंमभृत्यानां क्रमेण लक्षणमाह–यो हीत्यादिना । यो भृत्यः भर्त्रा स्वामिना दुष्करे कर्मणि नियुक्तः तत् कृत्वा अनुरा-

१ महार्णवमिति गो. पाठः । २ अप्यस्मिन गो. पाठः ।

यो नियुक्तः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरम् ॥ ८ ॥
नियुक्तो नृपतेः कार्यं न कुर्याद्यः समाहितः । भृत्यो युक्तः समर्थश्च तमाहुः पुरुषाधमम् ॥ ९ ॥
तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता । न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥ १० ॥
अहं च रघुवंशश्च लक्ष्मणश्च महाबलः । वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥ ११ ॥
इदं तु मम दीनस्य मनो भूयः प्रकर्षति । यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥ १२ ॥

णेण स्वामिभक्त्यतिशयेन । तदपेक्षितमनियुक्तमपि कार्यं कुर्यात् तं पुरुषोत्तमम् उत्तमभृत्यम् आहुः ॥ ७ ॥

८] ति० टी०–यस्तु युक्तो युक्त्या समर्थश्च सन्परं स्वामिसंदिष्टादधिकं नृपतेः प्रियं न कुर्यात्किं तु संदिष्टमेव कुर्यात्तं मध्यममाहुः । 'भृत्यस्तु यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्योऽभृत्यः समर्थोऽपि तमाहुर्मध्यमं नरम् । ' इति पाठे यः समर्थोऽपि भृत्यः परं कार्यं न कुर्यात्स भृत्य उक्तमात्रकरणादधिकाकरणाच्चाभृत्यः, अतस्तं मध्यममाहुः ॥ ८ ॥

रा० टी०–य इति । नियुक्तो युक्तो योग्यो यः समर्थो भृत्यः परम आज्ञापितकार्यादन्यत् नृपतेः प्रियं न कुर्यात् तं नरं भृत्यं मध्यममाहुः ॥ ८ ॥

गो० टी०–नियुक्त इति । नियुक्तो यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरमिति पाठः । भर्त्रा नियुक्तः यो भृत्यः युक्तः उत्साहयुक्तः समर्थश्च नृपतेः स्वामिनः प्रियं परं कार्यं स्वामिनिर्दिष्टादधिकं कार्यम न कुर्यात् तं मध्यमं नरं मध्यमभृत्यम आहुः । भृत्यस्तु यः परं कार्यं न कुर्यान्नृपतेः प्रियम । भृत्योऽभृत्यः समर्थोऽपि तमाहुर्मध्यमं नरमिति पाठान्तरम । तत्र त्वयमर्थः यस्तु भृत्यः समर्थोऽपि परं कार्यं न कुर्यात् उक्तमात्रमेव कुर्यात्स भृत्योऽभृत्यः उक्तानुष्ठानात् भृत्यः अधिकाकरणादभृत्यः । ततस्तं मध्यममाहुरिति ॥ ८ ॥

९] ति० टी०–यो नियुक्तो नृपतेरुक्तमपि कार्यं न कुर्यात्तमधममाहुः ॥ ९ ॥

रा० टी०–नियुक्त इति । नियुक्तः स्वामिना प्रेरितः समर्थः तदीप्सितकार्यसाधने सामर्थ्यवान् अत एव युक्तः तत्कार्यसाधने योग्यो यो भृत्यः नृपतेः कार्यं समाहितः सन् न कुर्यात्तं पुरुषाधमम् अधमभृत्यमाहुः ॥ ९ ॥

गो० टी०–नियुक्त इति । समाहितः कार्यान्तराव्यग्रः । युक्तः समर्थश्च यो भृत्यो नियुक्तोपि नृपतेः कार्यं नृपतेः उक्तमात्रमपि कार्यं सम्यङ्न कुर्यात् तं पुरुषाधमम् अधमभृत्यम आहुः ॥ ९ ॥

१०] ति० टी०–अथ हनमत उत्तमत्वं दर्शयति–तदिति । नियोगे सीतान्वेषणमात्रे । कृत्यमधिकमपि कृत्यं कृतम् अत उत्तमभृत्योऽयमिति भावः । उत्तमत्वे युक्तस्यन्तरमप्याह–न चात्मेति । रक्षोभिरपराजितत्वात् । सुग्रीवश्चापि तोषितः । अधिककार्यकरणादित्यर्थः ॥ १० ॥

रा० टी०–तदिति । नियोगे कृत्ये नियुक्तेन हनमता तन्नियोजितं सीतादर्शनं कृत्यं कृतम् आत्मा स्वस्वरूपं लघुतां न नीतः राक्षसाः पराभवं प्रापिता इत्यर्थः । एतेन अनाज्ञापितमपि कृतमिति सूचितम् अत एव सुग्रीवः चकारात् तन्मित्रवर्गश्च तोषितः एतेन हनमतोऽन्युत्तमत्वं ध्वनितम् ॥ १० ॥

गो० टी०–उक्तेषु त्रिविधभृत्येषूत्तमभृत्योऽयमित्याह–तदिति । तत् उत्तमभृत्यलक्षणलक्षितत्वात् नियुक्तेनेत्यस्मिन्निति नियोगः कार्यं तस्मिन्नियुक्तेन उत्तमभृत्येन कार्यं कर्तव्यं कार्यम हनुमता कृतम् । किंचात्मा स्वयं लघुतां न नीतः । राक्षसैरपराजितत्वात् । सुग्रीवश्चापि तोषितः उक्तकार्यातिरिक्तकार्यकरणात् ॥ १० ॥

११] ति० टी०–धर्मतः धर्मं प्राप्येत्यर्थः । एतेन स्वाज्ञापालनेन भृत्यस्य धर्मोऽपि सूचितः । मदादयः परिरक्षिताः सीतासमाचारालाभेन मत्ताश्च मत्ताश्च लक्ष्मणभरतादीनां च नाश इति सर्वनाशप्रसङ्ग इति भावः ॥ ११ ॥

रा० टी०–अहमिति । धर्मतः भृत्यधर्मं प्राप्य वैदेह्यादर्शनेन मदादयः परिरक्षिताः हनमतेति शेषः ॥ ११ ॥

गो० टी०–न केवलं सुग्रीवतोषणं धर्मपरिरक्षणं चास्माकमासीदित्याह–अहमिति । धर्मतः धर्मं । सम्यगर्थं तस्मिः । धर्मतः परिरक्षिताः धर्मं स्थापिताः धर्मस्थापनं चात्राधर्मान्मोचनम् । यदि हनुमता सीता न दृष्टेत सदाहं तावदात्मानं जह्याम् ततो लक्ष्मणादयश्च तत आत्महानिरूपोऽधर्मस्तेषां स्यादिति भावः । यद्वा वैदेह्यदर्शनरूपेण धर्मेण वयमेव सर्वे परिरक्षिताः निरपवादाः कृताः स्मेति भावः ॥ ११ ॥

१२] ति० टी०–एवं हनमत्कर्मणः सुखजनकत्वेऽपि तत्प्रत्युपकाराकरणजो विषादः सीताभवणजमानन्दमपि तिरोधाय मां संतापयतीत्याह–इदं त्विति । न कुर्मि न करोमि । सदृशं एतत्कृतप्रियसदृशं प्रियम ॥ १२ ॥

रा० टी०–इदमिति । इह अस्मिन् समये प्रियाख्यातुरस्य हनमतः सदृशं योग्यं प्रियं यदहं न कुर्मि करोमि तदिदमकरणं मम मनः भूयोऽधिकं प्रकर्षति खेदयति ॥ १२ ॥

गो० टी०–एवं निरतिशयानन्दकरं वचनं कथयतो हनु-

१ नियुक्तो य इति गो. पाठः ।

एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः । मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः ॥ १३ ॥
इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे । हनूमन्तं कृतात्मानं कृतवाक्यमुपागतम् ॥ १४ ॥
ध्यात्वा पुनरुवाचेदं वचनं रघुसत्तमः । हरीणामीश्वरस्यापि सुग्रीवस्योपशृण्वतः ॥ १५ ॥
सर्वथा सुकृतं तावन्मीतायाः परिमार्गणम् । सागरं तु समासाद्य पुनर्नष्टं मनो मम ॥ १६ ॥
कथं नाम समुद्रस्य दुष्पारस्य महाम्भसः । हरयो दक्षिणं पारं गमिष्यन्ति समागताः ॥ १७ ॥

मनः तत्सदृशप्रत्युपकारालाभात् विद्यते-इदं त्विति । प्रकर्षेति व्याकुलयति संतापयति वा । कुर्मि करोमि ॥ १२ ॥

१३] ति० टी०-तत्तुल्यप्रियान्तरमपश्यन्नात्मपरिष्वङ्गमेव तथापश्यन्नाह—एष इति । सर्वस्वभूतः । भगवदेहस्य शुद्धानन्दरूपत्वात्स्वालिङ्गनस्य सर्वस्वभूतत्वं बोध्यम् । 'आनन्द एव हि भगवतः सर्वस्वम् । आनन्द एव हि मायया रामादिदेहत्वेन भासते ' इति गीताभाष्यविष्णुसहस्रनामभाष्ययोर्भगवद्वाक्यैः स्पष्टमेवोक्तम् । ब्रह्माण्डपुराणादिषु चैवं परिष्वङ्गद्वारा ब्रह्मानन्दार्पणमेव हनुमते कृतमिति बोधितम् । तस्य हनुमत उत्तमभृत्यस्य हनुमतः ॥ १३ ॥

रा० टी०-ननु प्रियं क्रियतामित्यत आह-एष इति । इमं दानयोग्यं कालं प्राप्य सर्वस्वभूतः मम सर्वधनत्वं प्राप्तः एष परिष्वङ्गः ममालिङ्गनं महात्मनो हनुमतः दत्तोऽस्तु एतेन परिष्वङ्गानिरिक्तं हनुमदुपयोगिवस्त्वन्तरं नास्तीति सूचितं तेन रामपरिष्वङ्गप्राप्तेः परमपुरुषार्थत्वं सूचितम् ॥ १३ ॥

गो० टी०-स च संतापः सर्वस्वदानरूपेण प्रत्युपकारेण विना न शाम्यति । तस्य सर्वस्वदानस्य मया क्रियमाणः परिष्वङ्ग एव प्रतिनिधिर्भवतीत्याह-एष सर्वस्वभूतस्तु परिष्वङ्गो हनुमतः । मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः ॥ तुशब्दोऽवधारणे इमं प्रत्युपकारार्हं कालं प्राप्य मया दत्तोयं परिष्वङ्ग एव सर्वस्वभूतोस्तु । सर्वस्वदानसदृशोस्त्विति संबन्धः । एष स्वानुभवसिद्धः इच्छागृहीताभिमतोरुदेहत्वेन स्वस्य निरवधिकभोग्यतया स्थितः लोके स्वस्य स्वयं हि स्वाभिमतायैव शिक्षति सर्वस्वभूतः एतद्व्यतिरिक्तप्रदानेन इदं न दत्तमिति न्यूनतां स्यात् । एतत्प्रदाने तु सर्वं दत्तम् एतद्विग्रहस्य सर्वाश्रयत्वात् परिष्वङ्गो हनुमतः । अमृतादिनो हि तृणकवलादिकं न देयम । लोहो मे परमो राजस्त्रिलोकविग्रहे प्रेमवतः स एव दातव्यः । मया कालमिमं प्राप्य दत्तः । अयं किञ्चिदपि मत्तोऽपेक्षमाणो वर्तते । कदा मयास्मै किंचिद्दत्तं स्यादिति सोत्कण्ठेन मया स्थितं संप्रत्यपरिमेयसमयलाभादत्तवानस्मि । तस्य महात्मनः महाभावस्य महोदारस्येत्यर्थः । देहद्वयसुपकृतवत किञ्चिद्देहप्रदानमुचितमिति भावः । वैष्णवदशमस्कन्धसमये सीतां [1] [2] दत्वा अयोध्यायां स्वस्य इति दशायां रामदेहं न [3] दत्तवचनेनाजीवयद्भि । एवं देहदयं दत्तवतः किमेकदेहदानमुचितमिति भावः ॥ १३ ॥

१४] ति० टी०-प्रीतिहृष्टाङ्गः प्रीतिपुलकितगात्रः । हनुमन्तमित्यादि पूर्ववन्वयि ॥ १४ ॥

रा० टी०-इतीति । इत्युक्त्वा हनुमन्तं परिषस्वजे ॥ १४ ॥

गो० टी०-इत्युक्त्वेति । प्रीतिहृष्टाङ्गः प्रीत्या पुलकितगात्रः । महात्मानमित्यादिविशेषणानि परिष्वङ्गहेतवः ॥ १४ ॥

१५] ति० टी०-ध्यात्वा । सम्यगुत्तरणं कथं स्यादिति संचिन्त्येत्यर्थः । सुग्रीवस्येति सप्तम्यर्थे षष्ठी । शृण्वति सत्युवाचेत्यन्वयः ॥ १५ ॥

रा० टी०-ध्यात्वेति । ध्यात्वा सीतां सञ्चिन्त्य सुग्रीवस्य सुग्रीवे उपशृण्वतः उपशृण्वति सति रघुसत्तमः पुनरुवाच समीप इत्यध्याहृतं वा ॥ १५ ॥

गो० टी०-एवं हनुमन्तं स्तुत्वा सागरस्य दुस्तरत्वं विचार्य विषण्णः सन् प्रयासकृतं सीतान्वेषणं निरर्थकमिति मन्वान आह-ध्यात्वेति । एवकारो भिन्नक्रमः । ध्यात्वा दुस्तरं सागरं सर्ववानरवाहिनीसहितोहं कथं संतरिष्यामीति संचिन्त्य सुग्रीवस्योपशृण्वतः सुग्रीवे उपशृण्वत्येव । व्यत्ययेन सप्तम्यर्थे षष्ठी ॥ १५ ॥

१६] ति० टी०-सुकृतम् । अधिकस्यापि करणादित्यर्थः । समासाद्य दुस्तरत्वमालोच्य । पुनर्नष्टं सीतावृत्तान्तश्रवणेन हृष्टमपि पुनर्विषादं प्राप्तम् ॥ १६ ॥

रा० टी०-तद्वचनाकारमाह-सर्वथेति । यद्यपि सीतायाः परिमार्गणं सर्वथा सर्वप्रकारेण सुकृतं हनुमतेति शेषः तथापि सागरं समासाद्य उल्लङ्घनीयत्वेन संस्मृत्य मम मनः नष्टं सीताप्राप्तिनिश्चयं न करोतीत्यर्थः ॥ १६ ॥

गो० टी०-सर्वथेति । सर्वथा सर्वप्रकारेण सम्यगुत्तरणान्तःपुरप्रवेशादिना । सुकृतं तावत्सुष्ठु कृतमेव । परिमार्गणम् अन्वेषणम् । किं तु सागरं समासाद्य सागरस्य दुस्तरत्वमालोच्य । पुनर्नष्टं मनो मम । सीतावृत्तान्तश्रवणेन हृष्टमपि मे मनः पुनर्नष्टं प्रकृतं विषादं पुनः प्राप्तमित्यर्थः ॥ १६ ॥

१७] ति० टी०-समागता मिलिताः ॥ १७ ॥

रा० टी०-निश्चयाभावे हेतुमाह-कथमिति । समागताः हरयः समुद्रस्य दक्षिणं पारं कथं गमिष्यन्ति ॥ १७ ॥

गो० टी०-विषादमेव प्रकटयति-कथमिति । दुष्पारस्य दुष्प्रापतीरस्य । " पार-तीर, कर्मसमाप्तौ " इत्यस्माद्धातोः

१ कार्ष्णिमिति गो. पाठः । २ नन्दन इति गो. पाठः । ३ प्वेति गो. पाठः । ४ हित्वा इति गो. पाठः ।

यद्यप्येष तु वृत्तान्तो वैदेह्या गदितो मम । समुद्रपारगमने हरीणां किमिवोत्तरम् ॥ १८ ॥
इत्युक्त्वा शोकसंभ्रान्तो रामः शत्रुनिबर्हणः । हनूमन्तं महाबाहुस्ततो ध्यानमुपागमत् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

शोकसप्तमं रामं सुग्रीवो धैर्यदानादिना समुत्साहयति ।

तं तु शोकपरिद्यूनं रामं दशरथात्मजम् । उवाच वचनं श्रीमान्सुग्रीवः शोकनाशनम् ॥ १ ॥
किं त्वेवा तप्यते वीर यथान्यः प्राकृतस्तथा । मैवं भूस्त्यज संतापं कृतघ्न इव सौहृदम् ॥ २ ॥
संतापस्य च ते स्थानं नहि पश्यामि राघव । प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥ ३ ॥

स्वप्रत्ययः । महाम्भसः अगाधजलस्य । समाहिताः संगताः ॥ १७ ॥

१८] ति० टी०–किं चेष वितर्को न ममैव, किं तु सीताया अपीत्याह—यद्यपीति । यद्यपीत्यव्ययं । एष वृत्तान्तो मम वैदेह्यापि गदितः, अतो हरीणां पारगमने किमिवोत्तरम् । उत्तरकालोचितं कर्म किमित्यर्थः ॥ १८ ॥

रा० टी०–अयं संदेहः सीताया अप्यस्तीत्याह–यद्यपीति । हरीणां समुद्रपारगमने किमुत्तरम् उत्कर्षतरणोपायः ममैव वृत्तान्तः वैदेह्याऽपि गदितः अनेन तत्तरणोपायः निश्चेतव्य इति सूचितम् । यद्यपीति निपातोऽप्यर्थे ॥ १८ ॥

गो० टी०–सर्वेषामिल्लोकोक्ते विवृणोति–यद्यपीति । वैदेह्या वृत्तान्तः गदितो यद्यपि गदित एव । हरीणां समुद्रपारगमने उत्तरं किम उत्तरकालोचितं साधकं किम न किमपीत्यर्थः । इवशब्दो वाक्यालंकारे ॥ १८ ॥

१९] ति० टी०–शोकसंभ्रान्तः । ज्ञातेऽपि सीतावृत्तान्ते तत्प्राप्तिप्रतिबन्धपर्यालोचनया कलुषितान्तःकरण इत्यर्थः । ध्यानं ध्यानमिव तरणोपायविषयचिन्तामिव ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०–इतीति । अशोकसंभ्रान्तः वास्तवशोकसंभ्रान्तिरहितो रामः हनूमन्तमित्युक्त्वाध्यानं सीताप्राप्त्युपायविषयकचिन्तामुपागमत् प्राप्नोत् ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

गो० टी०–इत्युक्त्वेति । ध्यानमुपागमत् सागरतरणोपायचिन्तामकरोदित्यर्थः शत्रुनिबर्हणमहाबाहुपदाभ्यां सागरशोषणादिकमेवोपायमचिन्तयदिति द्योत्यते ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

१] ति० टी०–शोकपरिद्यूनं शोकसंतप्तम् ॥ १ ॥

रा० टी०–रामवचनश्रवणानन्तरकालिकां रामं प्रति सुग्रीवोक्तिमाह–तमित्यादिभिः । शोकपरिद्यूनं शोकसंतप्तमत्यन्तं प्रतीयमानं रामं शोकनाशनं वचनं सुग्रीव उवाच ॥ १ ॥

गो० टी०–एवं शोकसंभ्रान्तं राममालोक्य समदुःखतया तच्छोकमसहमानः सुग्रीवः॥ आपद्गुरुमार्गगमने कार्यकालात्ययेन च अप्रष्टोऽपि हितान्वेषी ब्रूयात्कल्याणभाषितम् ॥ इति नीतिशास्त्रमनुस्मरन् शोकनिवारकं वचनमुवाचेत्याह—तं त्विति । तुशब्दः पूर्वस्माद्विलक्षणपरः । तं तु शोकपरिद्यूनम् रामः प्रीतिसमायुक्त इति प्रीतियुक्तत्वदशायामेव शोकपरिद्यूनं शोकपरिप्लुतम् दशरथात्मजं महाराजपुत्रत्वेन शोकलेशानर्हं रामम् श्रीमान् 'शुचिता त्यागिता शौर्यं समानमसदृक्षता । अनुरागश्च दाक्षिण्यं सत्यता च सहोदराः ॥' इति कामन्दकोक्तरीत्या मित्रगुणभरित इत्यर्थः । शोकनाशने रामहृदयान्तर्गतशोकनिवर्तनक्षमं वचनमुवाच ॥ १ ॥

२] ति० टी०–प्राकृतो यथा तप्यति तथा त्वया किं तप्यत इत्यन्वयः । एवं संतप्तः कृतघ्नो यथा सौहृदं त्यजति तथा त्वं संतापं त्यज ॥ २ ॥

रा० टी०–तद्वचनाकारमाह–किमित्यादिभिः । अन्यः स्वतन्त्रादिभिन्नः प्राकृतो जनः यथा तप्यते तथा त्वया किं किमर्थं तप्यते एवम ईदृक्संतापविशिष्टः त्वं मा भूः अतः कृतघ्नः सौहृदमिव संतापं त्वं त्यज ॥ २ ॥

गो० टी०–किं त्वमिति । प्राकृतः क्षुद्रः । मैवं भूः प्राकृत इव मा भूः ॥ २ ॥

३] ति० टी०–स्थानं निमित्तम् । प्रवृत्तौ जीवने ॥ ३ ॥

रा० टी०–स्थाने हेतुमाह–संतापस्येति । प्रवृत्तौ सीतावृत्तान्ते उपलब्धायां ज्ञातायां रिपोरपहर्तुर्निलये ज्ञाते सति ते तव संतापस्य स्थानं समयं नैव पश्यामि ॥ ३ ॥

गो० टी०–निमित्ताभावमुपपादयति–संतापस्य चेति ।

१ त्वं संतप्यसे इति गो. पाठः ।

मतिमान्शास्त्रवित्प्राज्ञः पण्डितश्चासि राघव । त्यजेमां मयाकृतां बुद्धिं कृतात्मेवार्थदूषिणीम् ॥ ४ ॥
समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् । लङ्कामारोहयिष्यामो हनिष्यामश्च ते रिपुम् ॥ ५ ॥
निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः । सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ ६ ॥
इमे शूराः समर्थाश्च सर्वतो हरियूथपाः । त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥
एषां हर्षेण जानामि तर्कश्चापि दृढो मम ॥ ७ ॥

तेवधारणे । संतापस्य स्थानमेव निमित्तमेव न पश्यामि । तावत्पर्यन्तं सीतानुपलम्भनरूपं निमित्तमासीत् इदानीं तु नास्तीत्यर्थः । स्थानम् अवकाशः । अवकाशे स्थितौ स्थानमिमरः । प्रवृत्तौ सीतावृत्तान्ते । ' वार्ता प्रवृत्तिर्वृत्तान्तः ' त्यमरः ॥ ३ ॥

४] ति०टी०–शास्त्रवित्नीत्यादिशास्त्रज्ञः । मतिमान्भाव्यर्थानर्थयोग्यबुद्धिः प्राज्ञो विचारकुशलः पण्डितो विचारपूर्वं सद्धान्तप्रतिष्ठापनसमर्थः स त्वमिमां प्राक्तनां मत्यादिरहितप्राकृतजनोचितां बुद्धिं दीनबुद्धिं त्यज । कृतात्मा योगी यथेत्यस्य स्वेष्टस्य योग्यस्य दूषणीं दूषिकां कामादिविषयां बुद्धिं त्यजति तद्वत्त्वं त्यजेत्यर्थः ॥ ४ ॥

रा० टी०–मतिमानिति । यतस्त्वं मतिमत्त्वादिविशिष्टः अतः कृतात्मा प्राप्तस्वात्मसाक्षात्कारो जनः अर्थदूषणीं प्राकृतां बुद्धिं यथा त्यजति तथा इमां बुद्धिं त्यज ॥ ४ ॥

गो० टी०–त्वद्गुणपर्यालोचनायामपि न शोकावकाश इत्याह–मतिमानित्यादिना । मतिमान् आगामिगोचरज्ञानवान् । शास्त्रवित् नीतिशास्त्रज्ञः । प्रज्ञास्यास्तीति प्राज्ञः । ' प्रज्ञादिभ्यश्च " इत्यणप्रत्ययः ऋकारोपेज्ञ इत्यर्थः पण्डा नैर्णयात्मकं ज्ञानं साम्यं संजातेति पण्डितः परिच्छेनेत्यर्थः। [1]पापिकां पापयुक्ताम् अनुत्साहकारिणीमिति यावत् । इमां बुद्धिं त्यज । कृतात्मा योगी । अर्थदूषणीं मोक्षरूपपुरुषार्थनिवर्तिकां बुद्धिमिव ॥ ४ ॥

५] ति० टी०–समुद्रलङ्घनेऽपि चिन्ता न कार्येत्याह–समुद्रमिति । वक्ष्यमाणोपायेनेति शेषः । आरोहयिष्याम आरोक्ष्याम ॥ ५ ॥

रा० टी०–तत्र हेतुमाह–समुद्रमिति । समुद्रं लंघयित्वा ते रिपुं हनिष्यामः ॥ ५ ॥

गो० टी०–नापि सागरदुस्तरत्वं संतापनिमित्तमित्याह समुद्रमिति । न क्रमन्त इति नक्राः गजग्राहिमत्स्याः । महानक्रसमाकीर्णमपि समुद्रं लङ्घयित्वा लङ्कामारोहयिष्यामः । सेनामिति शेषः. ते रिपुं रावणम् हनिष्यामश्च । समुद्रलङ्घनलङ्कारोहणशत्रुवधार्थे न संतापः कार्य इत्यर्थः ॥ ५ ॥

६] ति० टी०–निरुत्साहत्वादिगुणको व्यसनदुःखपरम्परामधिगच्छति प्राप्नोति ॥ ६ ॥

रा० टी०–शोके दोषमाह–निरुत्साहस्येति । शोकेन पर्याकुलः व्याप्तः आत्मा मनो यस्य अत एव दीनस्य अत एव निरुत्साहस्य जनस्य सर्वार्थाः निखिलमनोरथाः व्यवसीदन्ति नश्यन्ति अत एव व्यसनं दुःखमधिगच्छति प्राप्नोति ॥ ६ ॥

गो०टी०–एवं कारणाभावाच्छोकस्य नावकाश इत्युक्तम् । सत्यपि कारणे स त्याज्य इत्याह–निरुत्साहस्येति । शोकपर्याकुलात्मनः शोकव्याकुलमनसः अत एव निरुत्साहस्य सर्वार्थाः सर्वप्रयोजनानि व्यवसीदन्ति नश्यन्ति सः शोकं व्यसनं चाप्नोति । शोकादनुत्साहः अनुत्साहादैन्यम् दैन्यादर्थनाशः । अर्थनाशाच्चापन्प्राप्यत इत्यर्थः । तस्माच्छोकस्त्याज्य इति भावः ॥ ६ ॥

७] ति० टी०–ननु किं बलादस्माकमुत्साहः स्यात्तदाह–इमे इति । सर्वतः समर्था इत्यन्वयः । मत्प्रियार्थमिमं कृतोत्साहा इति कथं ज्ञातं तत्राह—एषामिति । हर्षेण समुद्रतरणरावणप्रसङ्गे जायमानेन । तत्कार्यसुखविकासादिनानुमितेनेत्यर्थः । ममापि दृढस्तर्कः समुद्रतरणरावणहननादिविषयो दृढनिश्चय इत्यर्थः । तत्सर्वं ममेपत्करमिति भावः ॥ ७ ॥

रा० टी०–इमे इति । सर्वतः सर्वेषु कार्येषु समर्थाः शूराः इमे हरियूथपाः त्वत्प्रियार्थं पावकमपि प्रवेष्टुं कृतोत्साहाः सन्तीति शेषः ॥ ७ ॥

गो० टी०–नन्वेषामुत्साहं कथं जानासीत्यतआह—एषामिति । एषां हर्षेण हेतुना जानामि अनुमिनोमि उत्साहमिति शेषः अस्मिन् अनुमाने मम तर्को दृढः दोषरहित इत्यर्थः अतो रावणं यथा हत्वा सीतां समानेष्ये तथा यत्नं त्वं कर्तुमर्हसि । सार्धः श्लोक एकान्वयी ॥ ८ ॥

गो० टी०–नापि सहायानुपपत्तिः शोकनिमित्तमित्याह–इम इति । शूराः पराक्रमशालिनः । समर्थाः उपायकुशलाः । नः अस्माकं संबन्धिनः । सर्वे इमे हरियूथपाः त्वत्प्रियार्थं पावकमपि प्रवेष्टुं कृतोत्साहाः । किमुतान्यत्कर्तुमिति भावः॥७॥

गो० टी०–कुत एषामुत्साहस्त्वयावगत इत्याह–एषामिति । अर्धमेकं वाक्यम् । एषां यूथपानां हर्षेण मुखप्रसादानुमानेन जानामि । एषाम् उत्साहमिति शेषः । अस्मिन्नुत्साहे मम दृढः अप्रशिथिलः तर्कश्चास्ति ॥ ८ ॥

---

१ पापिकामिति गो. पाठः । २ सर्वे नो इति गो. पाठः । ३ अस्मिन्निति गो. पाठः ।

विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम् । रावणं पापकर्माणं तथा त्वं कर्तुमर्हसि ॥ ८ ॥
सेतुरत्र यथा बद्धयेद्यथा पश्येम तां पुरीम् । तस्य राक्षसराजस्य तथा त्वं कुरु राघव ॥ ९ ॥
दृष्ट्वा तां हि पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् । हतं च रावणं युद्धे दर्शनादेवधारय ॥ १० ॥
अबद्ध्वा सागरे सेतुं घोरे चै वरुणालये । लङ्का न मर्दितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ११ ॥
सेतुर्बन्धः समुद्रे च यावल्लङ्कासमीपतः । सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय ॥
तथा हि समरे वीरा हरयः कामरूपिणः ॥ १२ ॥
तदलं विक्लवां बुद्धिं राजन्सर्वार्थनाशनीम् । पुरुषस्य हि लोकेऽस्मिन्शोकः शौर्यापकर्षणः ॥ १३ ॥
यत्तु कार्यं मनुष्येण शौटीर्यमवलम्ब्यताम् । तदलंकरणायैव कर्तुर्भवति सत्वरम् ॥ १४ ॥

८] ति० टी०–यदेवम्, अतो यथा रिपुं हत्वा सीतां विक्रमेण समानेष्ये तथा तदुचितमुत्साहं त्वं कर्तुमर्हसीत्यर्थः ॥८॥

गो० टी०–फलितमाह–विक्रमेणेति । पापकर्माणं सीताहरणरूपपापकर्मयुक्तं ते रिपुं रावणं हत्वा सीतां विक्रमेण यथा समानेष्ये तथा त्वमुत्साहं कर्तुमर्हसि ॥ ८ ॥

९] ति० टी०–किं मया कार्यं तत्राह––सेतुरिति । अत्र समुद्रे । यथा तस्य राक्षसराजस्य तां पुरीं पश्येम तथा त्वं कुरु । दिव्यास्त्रालम्बनेनेति शेषः ॥ ९ ॥

रा० टी०–यत्त्वं बोधयस्याह—सेतुरिति । अत्र अस्मिन सागरे यथा सेतुर्बध्येत यथा च राक्षसराजस्य पुरीं लङ्कां पश्येम तथा त्वं कुरु ॥ ९ ॥

गो० टी०–तथा त्वं कर्तुमर्हसीत्युक्तं विशिनष्टि–सेतुरिति । अत्र समुद्रे सेतुर्यथा बध्येत यथा तां पुरीं पश्येम तथा त्वं कुरु । तथोपायं चिन्तयेत्यर्थः ॥ ९ ॥

१०] ति० टी०–त्रिकूटशिखरस्थां तां लङ्कां दृष्ट्वा दर्शनात्तदर्शनसमनन्तरमेव युद्धे रावणं हतं जानीहि ॥ १० ॥

रा० टी०–दृष्ट्वेति । पुरीं लङ्कां दृष्ट्वा दर्शनात् रावणदर्शनात् रावणदर्शनं प्राप्य युद्धे रावणं हतमवधारय जानीहि ॥ १० ॥

गो० टी०–दर्शनमात्रेण किं सेत्स्यति तत्राह–दृष्ट्वेति । तां पुरीं दृष्ट्वा दर्शनादेव हेतोः रावणं हतमवधारय ॥ १० ॥

११] ति० टी०–सेतुबन्धं विना प्रकारान्तरं लङ्काप्राप्तौ नास्ति सोऽपि कृत एवेति निश्चिन्वित्याह–अबद्ध्वेति ॥ ११ ॥

रा० टी०–अबद्ध्वेति । सेतुमबद्ध्वा सागरमजित्वेत्यर्थः सेन्द्रैः सुराद्यैरपि लङ्का मर्दितुं न शक्या एतेन समुद्रमर्यादारक्षकाणां देवादिभीतिदार्ढ्यं सूचितम् तेन तत्पराभवमन्तरा देवादीनामपि लङ्का दुर्गमेति ध्वनितम् ॥ ११ ॥

गो० टी०–सेतुर्बध्य इति कार्यं निर्बन्ध इत्याशङ्क्यान्यथाऽशक्यत्वमन्वयव्यतिरेकाभ्यामाह–अबद्ध्वेत्यादिश्लोकद्वयेन । अबद्ध्वा सागरं इत्यादि स्पष्टम् । सेतुरिति लङ्कासमीपतः लङ्कासमीपे । यावत् यावत्काले सेतुर्बद्धो भवति तावत्काले । सर्वं सैन्यं तीर्णं जितं चेत्युपधारय । कर्तरि निष्ठा ॥ १० ॥ १३ ॥

१२] ति० टी०–लङ्कासमीपमन्तत्समीपं यावत्सेतुबन्धः कृत एव सर्वं सैन्यं तीर्णमेवास्माभिर्जितं चेत्युपधारय निश्चिनु । तथानिश्चये हेतुमाह––तथा हीति । हि यतस्त्वाद्यशौर्यवन्तो हरय इमे दृश्यन्ते, यतस्ते कामरूपिणः ॥ १२ ॥

रा० टी०–यावत यस्मिन्काले लङ्कासमीपतः सेतुबन्धः तस्मिन काले एव सर्वं सैन्यं तीर्णं जितं रावणकर्मैकजयविशिष्टं चेत्युपधारय निश्चिनु हि यतः तथा तरणादियोग्याः हरयः सन्तीति शेषः । सार्धश्लोक एकान्वयी ॥१२॥१३॥

गो० टी०–तरणमात्रेण जयित्वे हेतुमाह–इमे हीति । अर्धमेकं वाक्यम् ॥ १२ ॥

१३] ति० टी०–तत्तस्माद्विक्लवां सर्वार्थनाशनीं बुद्धिमवलम्ब्यालं हि यतः शौर्यापकर्षणस्त्वत्राशकः ॥ १३ ॥

रा० टी०–तदिति । हि यतः शोकः शौर्यापकर्षणः शरत्वविघातकः तत्तस्माद्धेतोः विक्लवां शोकव्याप्तां बुद्धिमलं त्यजेत्यर्थः ॥ १३ ॥

गो० टी०–उपसंहरति–तदिति । तत् उक्तरीत्या शोकनिमित्तासंभवात् विक्लवा शोकपरवशा अत एव सर्वार्थनाशिनी बुद्धिः अलं मा भूत् । अलं भूषणपर्याप्तिवारणवाचकमित्यमरः । तत्र हेतुमाह–पुरुषस्येति । शौर्यापकर्षणः शौर्यनाशनः ॥ १३ ॥

१४] ति० टी०–मनुष्येण तु शौटीर्यं तद्युक्तं यत्कार्यं कर्तुं योग्यं तदेवावलम्ब्यताम् । अवलम्बयितुमुचितमित्यर्थः । यतः सत्वरं क्रियमाणं तत्कर्तुरलंकरणायैव भवति फलसाधनाय समर्थं भवति ॥ १४ ॥

रा० टी०–यदिति । यस्मात् सत्वरं सवेगं तत् शौण्डीर्यं शरत्वं कर्तुरलंकरणाय भवति अतो मनुष्येण यत् शौण्डीर्यं तदवलम्ब्यत इति भूषणपाठः ॥ १४ ॥

गो० टी०–न केवलं शोकत्यागः सत्त्वावलम्बनं च कार्यं

१ उपेति गो. पाठः । २ त्विति गो. पाठः । ३ सेतुर्बद्ध इति गो. पाठः । ४ वै इति गो. पाठः ।५ इमे इति गो. पाठः । ६ शूरा इति गो. पाठः । विक्लवा बुद्धिरिति गो. पाठः। ८ नाशिनीमिति गो. रा. पाठः । ९ शौण्डीर्यमवलम्बतेति गो. शौण्डीर्यमिति रा. पाठः । १० अर्धमेतत् गो. नास्ति ।

अस्मिन्काले महाप्राज्ञ सत्त्वमातिष्ठ तेजसा । शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम् ॥
विनष्टे वा प्रनष्टे वा शोकः सर्वार्थनाशनः ॥ १५ ॥
तत्त्वं बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः । मद्विधैः सचिवैः सार्धमरिं जेतुं समर्हसि ॥ १६ ॥
नहि पश्याम्यहं कंचित्त्रिषु लोकेषु राघव । गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ १७ ॥
वानरेषु समासक्तं न ते कार्यं विपत्स्यते । अचिराद्द्रक्ष्यसे सीतां तीर्त्वा सागरमक्षयम् ॥ १८ ॥
तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते । निश्चेष्टाः क्षत्रिया मन्दाः सर्वे चण्डस्य बिभ्यति ॥ १९ ॥
लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः । सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय ॥ २० ॥
लङ्घिते तत्र तैः [3]सैन्यैर्जितमित्येव निश्चिनु । सर्वं तीर्णं च मे सैन्यं जितमित्यवधार्यताम् ॥ २१ ॥

मित्याह–यस्त्विति । शौण्डीर्यं शौर्यम् । "शौण्डी, गर्वे" इति धातोरौणादिक ईरन्प्रत्ययः शौण्डीरश्शूरः अस्य भावः शौण्डीर्यं तत् अवलम्बता अवलम्बमानेन । शौर्यप्रधानेनेत्यर्थः । मनुष्येण पुरुषेण । यत्कार्यं संपाद्यं तत्सत्त्वं धैर्यम् बलं वा । तेजसा पराक्रमेण सह अस्मिन्काले आनिष्ट अवलम्बस्व ॥१६॥

१५] ति० टी०–अतो हे महाप्राज्ञ, त्वं तेजसा सह सत्त्वं गुणमातिष्ठ । विनष्टे सीतावददर्शनं गते प्रनष्टे दशरथवत्तथादर्शनं गते ॥ १५ ॥

रा० टी०–अस्मिन्निति । हि यतः त्वद्विधानां विनष्टादिविषयकः शोकः सर्वार्थनाशनः अतः तेजसोपलक्षितस्त्वं सत्त्वं धैर्यम् आनिष्ठ कुरु तत्र विनष्टो विध्वस्तः प्रनष्टोऽदर्शनं प्राप्त इति बोध्यम् । सार्धश्लोकः एकान्वयी ॥ १६ ॥

गो० टी०–ननु नायं शोकः सागरतरणादिनिमित्तकः किं तु सीतानवलोकनादिनिमित्त इत्यत्राह–शूराणामिति ॥ विनष्टे अन्तर्हिते । "णश, अदर्शने" इति धातोर्निष्ठा ॥ १५ ॥

१६] ति० टी०–उपसंहरति—तदिति ॥ १६ ॥

रा० टी०–तदिति । तदुक्तहेतोः बुद्धिमतां श्रेष्ठत्वं सचिवैः सार्धम् अरिं जेतुमिहास्मिन् समये समर्हसि ॥ १७ ॥

गो० टी०–पुनश्च रामं प्रोत्साहयति–त्वमिति । इह इदानीम् ॥ १८ ॥

१७] ति० टी०–जगत्सु पुष्कलं ते सामर्थ्यमस्तीत्याह–नहीति । निश्चेष्टत्वात् शक्नुयात् ॥ १७ ॥

रा० टी०–नहीति । गृहीतधनुषस्ते तवाभिमुखः सन् रणे यस्तिष्ठेत् त्वां जयेदित्यर्थः तं विनु ऊर्ध्वाधोमध्यवर्तिषु लोकेषु नैव पश्यामि ॥ १७ ॥

गो०टी०–न हीति । न हि तिष्ठेत् स्थातुं न शक्नुयात् ॥१७॥

१८] ति० टी०–सहायसंपन्नोऽपि जयं निश्चिन्वित्याह–वानरेष्विति । वानरेषु महाबलेषु तस्माद्दुःखेषु समासक्तं कर्तव्यत्वेन सक्तं कार्यं न विपत्स्यते न लङ्घिष्यति ॥ १८ ॥

रा० टी०–वानरेष्विति । वानरेषु समासक्तं तत्कर्तव्यत्वेन स्थितं ते कार्यं न विपत्स्यते विघ्नं न प्राप्स्यति अतः सीताम् अचिराद्द्रक्ष्यसे ॥ १८ ॥

गो० टी०–वानरेष्विति । वानरेषु समासक्तम् वानरमूलमित्यर्थः । न विपत्स्यते न विनङ्क्ष्यति ॥ २० ॥

१९] ति० टी०–तदिति । शोकमालम्ब्यालम् शोकं मालम्बस्वेत्यर्थः । क्रोधमालम्बेति यथाप्राप्तम् शत्रुविषयकमित्यर्थः । अन्वयव्यतिरेकाभ्यां शत्रुविषये कोप आवश्यक इत्याह—निश्चेष्टा इति । मन्दाः शत्रुविषये क्रोधहीनाः क्षत्रिया निश्चेष्टा भवन्ति । शत्रुकृतबन्धनादिनेति शेषः । चण्डस्य उचितकोपस्य सर्वं बिभ्यति ॥ १९ ॥

रा० टी०–तदिति । यतः निश्चेष्टाः उचितक्रोधहेतुकव्यापाररहिताः क्षत्रियाः मन्दाः भवन्ति चण्डस्य उचितक्रोधविशिष्टस्य क्षत्रियस्य तु सर्वं बिभ्यति तत्तस्मात् अलमत्यन्तं शोकमालम्ब्य वियमानस्त्वं क्रोधमालम्ब स्वीकुरु ॥ २० ॥

गो०टी०–उपसंहरति–तदिति । आलम्ब्यालम् । नालम्बस्वेत्यर्थः । "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः । क्रोधस्यालम्ब्यत्वे हेतुमाह–निश्चेष्टा इति । निश्चेष्टाः निरुद्योगाः क्षत्रियाः मन्दाः मन्दभाग्याः । चण्डस्य चण्डात् चण्डस्त्वत्यन्तकोपनः इत्यमरः ॥ २१ ॥

२०] ति० टी०–अस्माभिः सह नदीपतेर्लङ्घनार्थं लङ्घने हेतुमस्माभिरुपेतः सन्सूक्ष्मबुद्धिस्त्वं विचारय ॥ २० ॥

रा० टी०–लङ्घनार्थमिति । अस्माभिरुपेतो युक्तः सूक्ष्मबुद्धिस्त्वं समुद्रस्य लङ्घनोपायं विचारय ॥ २१ ॥

गो० टी०–एवं सेतुबन्धेन सर्वार्थसिद्धेः शोको न कार्य इत्युक्त्वा सेतुबन्धोपायो विचार्यतामित्याह–लङ्घनार्थमिति । लङ्घनार्थं लङ्घनहेतुम् अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धनुश्शास्त्रे वस्तुहेतुनिवृत्तिषु । इति वैजयन्ती ॥ २२ ॥

२१] ति० टी०–सर्वं तीर्णं जितमिति चावधार्यतामवधारय । तत्र सागरे लङ्घिते सति तैर्मदीयैः सैन्यैर्जितमिति निश्चिनु । पाठान्तरे समुद्रे लङ्घिते तैर्वानरैस्तस्य रावणस्य सैन्यं जितमिति निश्चिन्वित्यर्थः ॥ २१ ॥

रा० टी०–लङ्घित इति । तत्र तस्मिन्सागरे लङ्घिते सति तैः मत्सैन्यैः सैन्यं रावणसेनां जितमित्येव निश्चिनु

१ त्वं स्थिति गो. पाठः । २ अर्थमेतत् गो. नास्ति । ३ सैन्यमिति रा. पाठः । ४ उपधात्वेति गो. रा. पाठः ।

इमे हि हरयः शूराः समरे कामरूपिणः । तानरीन्विधमिष्यन्ति शिलापादपयोधिभिः ॥ २२ ॥
कथंचित्परिपश्यामि लङ्कितं वरुणालयम् । हतमित्येव तं मन्ये युद्धे शत्रुनिबर्हण ॥ २३ ॥
किमुक्त्वा बहुधा चापि सर्वथा विजयी भवान् । निमित्तानि च पश्यामि मनो मे संप्रहृष्यति ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

सुग्रीववचःश्रवणानन्तरं रामेण लङ्घनविषये पृष्टो हनुमांस्तत्सर्वं वृत्तं कथयति ।

सुग्रीवस्य वचः श्रुत्वा हेतुमत्परमार्थवत् । प्रतिजग्राह काकुत्स्थो हनूमन्तमथाब्रवीत् ॥ १ ॥
तपसा सेतुबन्धेन सागरोच्छोषणेन च । सर्वथापि समर्थोऽस्मि सागरस्यास्य लङ्घने ॥ २ ॥
कति दुर्गाणि दुर्गाया लङ्कायास्तेब्रवीष्व मे । ज्ञातुमिच्छामि तत्सर्वं दर्शनादिव वानर ॥ ३ ॥

अतः तीर्णं मे सैन्यं जितं जयाश्रय एव इत्यवधार्य निश्चिनु ॥ २२ ॥

गो०टी०–सेतुबन्धोपाये निर्णीते ततः परं सुकरमित्याह–सर्वमिति । अर्धमेकं वाक्यम् ॥ २३ ॥

२२] ति० टी०–तेषु जेतृत्वशक्तिमाह–इमे हीति ॥ २२ ॥

रा० टी०–इमे इति । इमे हरयः शिलापादपवृष्टिभिः अरीन् विधमिष्यन्ति ॥ २३ ॥

गो० टी०–उक्तेषु पूर्वोक्तं हेतुमत्त्ववदति–इमे हीति । विधमिष्यन्ति वक्ष्यन्ति ॥ २४ ॥

२३] ति० टी०–कथंचित्केनाप्युपायेन । वरुणालयं लङ्कितमेव पश्यामि ॥ २३ ॥

रा० टी०–कथञ्चिदिति । कथञ्चित् लङ्कितं वरुणालयं यदि परिपश्यामि तदा तं रावणं हतमित्येव मन्ये ॥ २४ ॥

गो० टी०–मा भूत्सेतुबन्धः प्रकारान्तरेणापि समुद्रं तीर्त्वा शत्रून् हनिष्यामीत्याह–कथंचिदिति । कथंचित् केनाप्युपायेन । नन्दतीति नन्दनः नन्द्यादित्वात् ल्युः समित्यां युद्धे नन्दन युद्धोत्सुकेति यावत् ॥ २३ ॥

२४] ति० टी०–निमित्तमेवाह–मन इति ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०–किमिति । यतः निमित्तानि शुभशकुनानि मे मनश्च संप्रहृष्यति अतः भवान् सर्वथा विजयी बहुधा उक्त्वा किं न किमपीत्यर्थः ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

गो० टी०–निमित्तानुसारेणापि भवतो जयसिद्धिरित्याह–किमुक्त्वेति । सर्वथा सेतुं बद्ध्वा अबद्ध्वा वा । निमित्तानि नेत्रस्फुरणादीनि । मनो मे संप्रहृष्यतीति मनःसंप्रहर्षश्च कार्यसिद्धिनिमित्तमिति भावः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

१] ति० टी०–सुग्रीववचनश्रवणानन्तरकालिकं हनुमन्तं प्रति रामवचनमाह—सुग्रीवस्येत्यादिभिः । हेतुमत् सकारणं परमार्थवत् परमार्थबोधकं सुग्रीवस्य वचः श्रुत्वा प्रतिजग्राह कर्तव्यत्वेन स्वीचकार अथानन्तरं हनुमन्तमब्रवीत् ॥ १ ॥

गो० टी०–एवं मानुषभावनानुसारेण समुद्रस्य दुस्तरत्वेन शोकापन्नोपि सुहृदुपदेशेन प्रतिष्ठापितधैर्यो रामः नीतिशास्त्रानुसारेण संहार्यशत्रुदुर्गसम्बन्धरूपशोधनाय पृच्छति–सुग्रीवस्येत्यादिना । सारग्राहित्वमाह–परमार्थवदिति । हेतुमत्युक्तिपुक्तम् वचः श्रुत्वा प्रतिजग्राह ॥ १ ॥

२] ति० टी०–तपसा तपःकार्यसंकल्पसिद्ध्या, अतएव सकलस्वपूर्ववर्तिप्राणिनां ब्रह्मलोकनयनं वक्ष्यमाणं संगच्छते । सेतुबन्धनेन गङ्गायां गाङ्गेयेन शरेणेव सागरोच्छोषणेन । दिव्यास्त्रबलत इति शेषः । सर्वथा सर्वप्रकारस्य लङ्घनोपायस्य विद्यमानत्वादित्याशयः ॥ २ ॥

रा० टी०–तद्वचनाकारमाह—तपसेत्यादिभिः । तपसा अवलोकनमात्रेण सेतुबन्धेन सागरोच्छोषणेन च अस्य सागरस्य लङ्घने सर्वथा समर्थोऽस्मि ॥ २ ॥

गो० टी०–तपसेति । तपसा तपःप्रभावेन । तरसेति पाठे तरसा वेगेन । लङ्घने तरणे ॥ २ ॥

३] ति० टी०–दुर्गाया गन्तुमशक्यायाः कति दुर्गाणि

१ क्षतरिष्यामस्ते बद्धमिति गो.पाठः। २ समितिनन्दनेति गो.पाठः। ३ परमार्थविदिति गो.पाठः। ४ स्विति गो.पाठः। ५ मूहि तानीति गो.पाठः।

बलस्य परिमाणं च द्वारदुर्गक्रियामपि । गुप्तिकर्म च लङ्कायाः रक्षसां सदनानि च ॥ ४ ॥
यथासुखं यथावच्च लङ्कायामसि दृष्टवान् । सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि ॥ ५ ॥
श्रुत्वा रामस्य वचनं हनूमान्मारुतात्मजः । वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत् ॥ ६ ॥
श्रूयतां सर्वमाख्यास्ये दुर्गकर्म विधानतः । गुप्ता पुरीभ्यथा लङ्का रक्षिता च यथा बलैः ॥ ७ ॥
राक्षसाश्च यथा स्निग्धा रावणस्य च तेजसा । परां समृद्धिं लङ्कायाः सागरस्य च भीमताम् ॥ ८ ॥
विभागं च बलौघस्य निर्देशं वाहनस्य च । एवमुक्त्वा कपिश्रेष्ठः कथयामास तैत्त्ववित् ॥ ९ ॥
हृष्टप्रमुदिता लङ्का मत्तद्विपसमाकुला । महती रथसंपूर्णा रक्षोगणनिषेविता ॥ १० ॥
दृढबद्धकपाटानि महापरिघवन्ति च । चत्वारि विपुलान्यस्या द्वाराणि सुमहान्ति च ॥ ११ ॥

जलगिरिस्थिनादिनानाप्रकारदुर्गेषु कतिप्रकाराणि दुर्गाणि सन्तीत्यर्थः । दर्शनादिवापरोक्षानुभवादिव ॥ ३ ॥

रा० टी०–कतीति । दुर्गाया दुर्गमाया लङ्काया दुर्गाणि कति सन्तीति शेषः तत्पृष्टं सर्वं दर्शनात् अवलोकनादेव ज्ञातुमिच्छामि अतः मे मह्यं तद्ब्रूहीत्यन्वयः ॥ ३ ॥

गो० टी०–एवमुपायचिन्तनेन समुद्रस्य दुस्तरत्वमविगणय्य दुर्गस्वरूपं पृच्छति–कतीति । दुर्गायाः दुष्प्रापायाः लङ्कायाः कति दुर्गाणि कति दुर्गप्राकाराः सन्तीत्यर्थः । जलगिरिस्थिलात्मकानि दुर्गाणि । तत् दुर्गविशेषवत्त्वं मे ब्रूहि । पूर्वमेवोक्तमित्याह–ज्ञातुमिति । तत्पूर्वं श्रुतं सर्वम्, दर्शनादिव प्रत्यक्षत इव विशदं ज्ञातुमिच्छामि । बलस्य सेनायाः । परिमाणम् इयत्ताम् । द्वारदुर्गक्रियां द्वारेषु दुर्गक्रियाम् कील्खननजलौघप्लवनकरणादिभिः दुर्गमत्वकरणम् । गुप्तिकर्म प्राकारपरिखादिनिर्माणम् । सदनानि गृहाणि ज्ञातुमिच्छामीति पूर्वेणान्वयः ॥ ३ ॥ ४ ॥

४] ति० टी०–परिमाणं संख्यापरिच्छेदम्, द्वारदुर्गक्रियां द्वाराणां दुष्प्रवेशत्वसंपादनम्, गुप्तिकर्म प्राकारादिषु यन्त्रादिस्थापनरूपम् । 'गुप्तिकर्मम' इति पाठे प्राकारादीनां रक्षाकर्ममित्यर्थः ॥ ४ ॥

रा० टी०–बलस्येति । बलस्य सैन्यस्य परिमाणमियत्तां द्वारदुर्गक्रियां द्वाराणां दुर्गाय दुष्प्रवेशाय क्रियां परिखादिविशेषनिर्मितिं लंकायाः गुप्तिकर्म रक्षणहेतुकप्राकारादिषु यन्त्रादिस्थापनं रक्षसां सदनानि च यथासुखं यथावद्वा लङ्कायां दृष्टवान् कुशलः तद्गमनादौ निपुणश्च त्वं सर्वमाचक्ष्व कथय । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

५] ति० टी०–यथासुखं यथादृष्टवानसि तत्सर्वं तत्त्वेनाचक्ष्व सर्वथा कुशलो ह्यसि । यथादृष्टप्रतिपादने इति शेषः॥५॥

गो० टी०–यथेति । यथासुखं निश्शङ्कम् । यथावत्तत्त्वेन लङ्कायां पूर्वोक्तं सर्वं दृष्टवानसि । तत्त्वेन दृष्टप्रकारेणैव आचक्ष्व व्याकुरु वद । सर्वथा द्रष्टुं वक्तुं च ॥ ५ ॥

६] ति० टी०–श्रुत्वाथाब्रवीदित्यन्वयः ॥ ६ ॥

रा० टी०–श्रुत्वेति । हनुमान् अब्रवीत् ॥ ६ ॥

गो० टी०–श्रुत्वेति । अथाब्रवीत्कात्स्न्येनाब्रवीत् । मङ्गलानन्तरारम्भप्रभृतिकात्स्न्येष्वथो अथेत्यमरः ॥ ६ ॥

७] ति० टी०–दुर्गकर्मविधानतो दुर्गत्वसंपादककर्मविधानेन यथा गुप्ता बलैर्यथा रक्षिता च तथाख्यास्ये ॥ ७ ॥

८] ति० टी०–रावणस्य तेजसा संपादितां परां समृद्धिमाख्यास्ये इत्येवं क्रमेणान्वयः ॥ ८ ॥

रा० टी०–तदाकारमाह—श्रूयतामित्यादिभिः । पुरी लङ्का यथा गुप्ता परैरज्ञाता यथा च बलैः रक्षिता यथा च दुर्गकर्म यथा च रावणस्य तेजसा राक्षसाः स्निग्धाः स्नेहविशिष्टाः तथा लङ्कायाः समृद्धिं च सागरस्य भीमतां च बलौघस्य पदातिसमूहस्य वाहनस्य च विभागं यथादेशं संस्थितिनिर्देशं संख्यां च आख्यास्ये त्वया सर्वं श्रूयताम् एवमुक्त्वा कपिश्रेष्ठः कथयामास । श्लोकत्रयमेकान्वयि ॥ ७–९ ॥

गो० टी०–श्रूयतामिति । दुर्गकर्मविधानतः दुर्गकर्म प्राकारपरिखाखननादि । तद्विधानतः तन्निर्माणेन गुप्तेति संबन्धः । राक्षसाः स्निग्धाः स्वामिनि भक्ताः । तेजसा संपादितामिति शेषः । विभागं तत्र तत्र विभज्य स्थापनम् । बलौघस्य चतुरङ्गबलसमूहस्य । निर्देशयते इयत्तया परिच्छिद्यतेऽनेनेति निर्देशः संख्या ताम् ॥ ७ ॥ ८ ॥

९–१०] ति० टी०–बलौघस्य पादातसङ्घस्य, वाहनस्य गजाश्वरथलक्षणस्य, निर्देशं संख्यापरिच्छेदम् ॥ ९ ॥ १० ॥

रा० टी०–कथनप्रकारमाह—हृष्टेत्यादिभिः । हृष्टैः हर्षविशिष्टैः राक्षसैः प्रमुदिता प्राप्तप्रमोदा मत्तद्विपैः समाकुला व्याप्ता रथैः संपूर्णा लङ्काऽस्तीति शेषः ॥ १० ॥

गो० टी०–एवमित्यर्धम् । एवमुक्त्वा उक्तरीत्या वक्ष्यमाणं संग्रहेण प्रतिज्ञाय ॥ ९ ॥

गो० टी०–हृष्टेति । हृष्टप्रमुदिता अत्यन्तहृष्टजना ॥ १० ॥

११] ति० टी०–परिघवन्त्यर्गलवन्ति । 'परिघो योगभेदे स्यान्नुद्गरेऽर्गलघातयोः' इति विश्वः । ईदृशानि द्वाराणि सन्तीत्यन्वयः ॥ ११ ॥

---

१ अपीति रा. पाठः । २ तत्त्वत इति गो. पाठः । ३ समाकुला इति गो. पाठः । ४ कवाटानीति गो. पाठः ।

तत्रेषूपलयन्त्राणि बलवन्ति महान्ति च । आगतं प्रेतिसैन्यं तैस्तत्र प्रतिनिवार्यते ॥ १२ ॥
द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः । शतशो रचिता वीरैः शतघ्नो रक्षसां गणैः ॥ १३ ॥
सौवर्णस्तु महांस्तस्याः प्राकारो दुष्प्रधर्षणः । मणिविद्रुमवैदूर्यमुक्ताविरचितान्तरः ॥ १४ ॥
सर्वतश्च महाभीमाः शीततोया महाशुभाः । अगाधा ग्राहवत्यश्च परिखा मीनसेविताः ॥ १५ ॥
द्वारेषु तासां चत्वारः संक्रमाः परमायताः । यन्त्रैरुपेता बहुभिर्महद्भिर्गृहपङ्क्तिभिः ॥ १६ ॥
त्रायन्ते संक्रमास्तत्र परसैन्यागते सति । यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः ॥ १७ ॥

रा० टी०—दृढेति । दृढं बद्धाः कपाटाः येषु महान्तः परिघाः सन्ति येषु तानि विपुलानि निर्गतानीति सुमहान्ति अतिप्रशंसनीयानि अस्याः लङ्कायाः चत्वारि द्वाराणि सन्तीति शेषः । 'परिघो योगभेदे स्यात् सुदृढर्गलघातयोः' इति विश्वः ॥ ११ ॥

गो० टी०—दृढेति । आयसकीलादिभिर्दृढघटितकवाटानि महापरिघवन्ति महार्गलवन्ति । 'अर्गले कवचे वंशे योगे प्राकारगोपुरे । अक्षे घटे मुद्गरे च परिघः परिपठ्यते' इति निघण्टुः । सुमहान्ति उन्नतानि ॥ ११ ॥

१२] ति० टी०—तत्र तेषु द्वारेषु । इषवश्चोपलाश्च तत्प्रक्षेपकयन्त्राणि । तैर्द्वारैरागतं परसैन्यं तत्र तेषु द्वारेषु प्रतिनिवार्यते ॥ १२ ॥

रा० टी०—तत्रेति । तत्र तेषु द्वारेषु बलवन्ति पृथूनि महान्ति विशालानि इषवो बाणाः उपलाः प्रक्षेपणप्रस्तराः यन्त्राणिसन्तीतिशेषः । तत्प्रयोजनमाह—तैरिषुप्रभृतिभिः आगतं प्रतिसैन्यं शत्रुसेना प्रतिनिवार्यते ॥ १२ ॥

गो० टी०—तत्रेति । तत्र तेषु द्वारेषु । उपलयन्त्राणि शरशिलाक्षेपकयन्त्राणि । बलवन्ति दृढानि महान्ति विपुलानि सन्तीति शेषः । तैः यन्त्रैः तत्र द्वारेषु प्रतिहन्यते प्रतिबध्यते ॥ १२ ॥

१३] ति० टी०—उक्तयन्त्रैः संस्कृताः सज्जाः, कालायसमया अयःसारमयाः । शतघ्नीप्रयोगेण घ्नन्तीति शतघ्न्यश्चतुर्हस्तप्रमाणलोहकण्टकयुता मुद्गरविशेषाः । शतघ्न्य । 'शतघ्नी च चतुर्हस्ता लोहकण्टकिनी गदा' इति वैजयन्ती ॥ १३ ॥

रा० टी०—द्वारेष्विति । संस्कृताः उचितसंस्कारविशिष्टाः भीमाः भयङ्कराः रक्षसां गणैः रचिताः शतशः शतघ्न्यः सन्तीति शेषः ॥ १३ ॥

गो० टी०—द्वारेष्विति । संस्कृताः सज्जीकृताः । शिलातीक्ष्णाः । कालायसमया अयस्सारमयाः । कीबभाव आर्षः । "अनोऽमायस्सरसां जातिसंज्ञयोः" इति समासान्तः । शतं घ्नन्तीति शतघ्न्यः मुद्गरविशेषाः । अमनुष्यकर्तृके च" इति टः । शतशः बहुशः रचिताः स्थापिताः ॥ १३ ॥

१४] ति० टी०—प्राकारो रक्षश्चित इत्याह—मणीति १४
रा० टी०—सौवर्ण इति । मण्यादिभिः विरचितानि अन्तराणि मध्यानि यस्य सः दुष्प्रधर्षणः धर्षयितुमशक्यः सौवर्णः सुवर्णमयः तस्याः प्राकारोऽस्तीति शेषः ॥ १४ ॥

गो० टी०—सौवर्ण इति । तस्याः प्राकारो दुष्प्रधर्षणः दुरारोह इत्यर्थः । मणयः पद्मरागाः ॥ १४ ॥

१५] ति० टी०—परिखाः पुरोवत्तत्प्रमाणाः ॥ १५ ॥

रा० टी०—सर्वत इति । महाभीमाः अतिभयङ्कराः शीतानि तोयानि यासु महान्ति अशुभानि विपुणमप्रशस्तानि विनाशा इत्यर्थः यासु अगाधाः तलस्पर्शरहिताः सर्वतः पुरस्य चतुर्दिक्षु परिखाः खाताः सन्तीति शेषः ॥ १५ ॥

गो० टी०—सर्वत इति । सर्वतः प्राकारमभितः परिखाः सन्तीति शेषः । शीततोयत्वेन दुष्पर्शत्वमुक्तम् ॥ १५ ॥

१६] ति० टी०—द्वारेषु चतुर्षु तासां परिखाणां मध्ये संक्रमा मञ्चरूपेण बद्धाः परमायता अतिविस्तृताः बहुभिर्महद्भिः शतघ्न्यादिभिर्गृहपङ्क्तिभिश्च युक्ताः एकैक एव चत्वारः संक्रमाः निर्गमप्रवेशार्थं मञ्चरूपेण बद्धाः सन्तीति शेषः ॥१६॥

रा० टी०—द्वारेष्विति । द्वारेषु द्वारसमीपप्रदेशेषु तासां परिखाणां मध्ये परमायताः अतिविस्तृताः बहुभिर्महद्भिर्यन्त्रैः शतघ्न्यादिभिर्गृहपङ्क्तिभिश्च युक्ताः एकैक एव चत्वारः संक्रमाः निर्गमप्रवेशार्थं मञ्चरूपेण बद्धाः सन्तीति शेषः ॥१६॥

गो० टी०—द्वारेष्विति । द्वारेषु द्वारसमीपप्रदेशेषु तासां परिखाणां सप्तमी । तासां परिखाणां संबन्धिनः परिखोपरिक्रमा इत्यर्थः । संक्रमाः दारुकलत्रनिर्मितसंक्रामार्गाः । संक्रम्यते क्रमणे सम्यक् द्वारसंक्रायन्त्यनेन इति शिवः । परमायताः अतिविपुलाः । यन्त्रैरिति । यन्त्रैः संक्रमावकीर्यन्ते । महद्भिरिति यन्त्रविशेषणम् । गृहपङ्क्तिभिः रक्षिजनावासस्थानपङ्क्तिभिः युक्ताः । सन्तीति शेषः ॥ १६ ॥

१७] ति० टी०—तत्र तेषु संक्रमेषु परसैन्यागते सति ते संक्रमास्तैर्यन्त्रैः प्राकारोपरि प्रतिष्ठापितैर्यन्त्रैस्त्रायन्ते रक्ष्यन्ते । 'ह्रियन्ते' इति पाठे ते संक्रमा नाश्यन्त इत्यर्थः । तैर्यन्त्रैः तासु परिखासु तन्मर्मघं प्राणिनां परसैन्यानि समन्ततोऽवकीर्यन्ते क्षिप्यन्ते ॥ १७ ॥

रा० टी०—यन्त्रप्रयोजनमाह—त्रायन्त इति । तैः संक्रमस्थैर्यन्त्रैः समन्ततः परिखासु अवकीर्यन्ते प्रक्षिप्यन्ते परसैन्यानीति शेषः अत एव परसैन्यागमे सति संक्रमाज्जायन्ते पुरं रक्षन्ते ॥ १७ ॥

---

१ परसैन्यं तु तत्र तैः प्रतिहन्यत इति गो. पाठः । २ तोयवहा इति गो. पाठः । ३ गमे इति गो. रा. पाठः ।

एकस्त्वकम्प्यो बलवान्संक्रमः सुमहाद्दृढः । काञ्चनैर्बहुभिः स्तम्भैर्वैदिकाभिश्च शोभितः ॥ १८ ॥
स्वयं प्रकृतिमापन्नो युयुत्सू राम रावणः । उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने ॥ १९ ॥
लङ्कापुनर्निरालम्बा देवदुर्गा भयावहा । नादेयं पार्वतं चान्यं कृत्रिमं च चतुर्विधम् ॥ २० ॥
स्थिता पारे समुद्रस्य दूरपारस्य राघव । नौपथश्चापि नास्त्यत्र [1]निरुद्देशश्च सर्वशः ॥ २१ ॥
शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा । वाजिवारणसंपूर्णा लङ्का परमदुर्जया ॥ २२ ॥
परिखाश्च शतघ्न्यश्च यन्त्राणि विविधानि च । शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः ॥ २३ ॥

गो० टी०–संक्रमाणामुपयोगमाह–त्रायन्त इति । तत्र द्वारप्रदेशेषु । परसैन्यागमे सति संक्रमाः त्रायन्ते । पुरीमिति शेषः । कथमित्यत्राह–यन्त्रैरिति । यन्त्रैः संक्रमफलकविक्षेपयन्त्रैः परिखासु परिखोपरि समन्ततः अवकीर्यन्ते क्षिप्यन्ते । सर्वथा परिखाजलोपरि फलका निक्षिप्यन्ते । शत्रुसैन्यागमे तु ता उपक्षिप्यन्ते । तेन दुर्गपरिखाजलेन प्राकारसमीपागमनं न शक्यत इति श्लोकतात्पर्यम् ॥ १७ ॥

१८] ति० टी०–एको मुख्यः संक्रमः प्राकारमध्यवर्ती साक्षात्पुरप्रवेशमार्गबहुतोऽकम्प्यो दृढः । तत्र हेतुः–बलवान्बहुलबलकृतरक्षः । अतो दृढप्रतिष्ठितः । तमेव दर्शयति—काञ्चनैरिति ॥ १८ ॥

रा० टी०–एक इति । बलवान् बहुसेनाविशिष्टः सुमहादृढः शैलिन्यसंसर्गरहित इत्यर्थः अत एव अकम्प्यः परैः कम्पयितुमशक्यः काञ्चनैः स्तम्भैर्वैदिकाभिश्च शोभितः एकः संक्रमोऽस्तीति शेषः एतेन तेनैव रावणो निर्गच्छतीति प्रविशति चेति सूचितम् ॥ १८ ॥

गो० टी०–एक इति । तेषु संक्रमेषु । एकः उत्तरद्वारस्थः बलवान् स्थौल्यवान् । सुमहादृढः अत्यन्तदृढसंपन्नः अत एवाकम्प्यः । स्तम्भैः संक्रमाधारार्थं परिखासु स्थापितैः स्तम्भैः वेदिकाभिः रक्षिजनाधारार्थाभिर्वेदिकाभिः ॥ १८ ॥

१९] ति० टी०–एवं पुरस्वरूपमुक्त्वा पुरपतेः स्वरूपमाह—स्वयमिति । युयुत्सुरपि प्रकृतिमापन्नोऽनुन्मत्तकरणः । अतिधीर इति यावत् । बलानामनुदर्शने उत्थित उद्युक्तः । अप्रमत्तः सावधानश्च ॥ १९ ॥

रा० टी०–पुरस्वरूपं संवर्ण्य तदधिपतिस्वरूपमाह—स्वयमिति । प्रकृतिं स्वस्वभावम् आपन्नः मद्यपानादापि स्वभावपरिणामरहित इत्यर्थः युयुत्सुः नित्यं योद्धुमिच्छुः रावणः बलानां सैन्यानामनुदर्शनेऽप्रमत्तः अनवधानरहितः सन् स्वयमेव उत्थितो भवतीति शेषः ॥ १९ ॥

गो० टी०–स्वयमिति । प्रकृतिमापन्नः मृगयादिव्यसनरूपविचाररहितः अप्रमत्तः सावधानः बलानां सैन्यानाम् अनुदर्शने प्रतिदिनमवलोकननिमित्तम् उत्थितः जागरूकः स्वयं युयुत्सुः सर्वदा युद्धोद्यतः । तिष्ठतीति शेषः ॥ १९ ॥

२०] ति० टी०–निरालम्बातिरूक्षणमहोच्चगिरिशिखरप्रतिष्ठितत्वेनारोहणालम्बनरहिता देवदुर्गा देवनिर्मितदुर्गरूपिणी, अतएव भयावहा । नादेयं दुर्गम् । तत्पर्वतसंभूतनद्याचतुर्दिक्त्वावरणात् । पार्वतं त्रिकूटरूपम् । कृत्रिमं प्राकाररूपं चतुष्प्राकारत्वेन प्राकाररूपम् । चतुर्विधं दुर्गमस्तीति शेषः ॥ २० ॥

रा० टी०–लङ्केति । निरालम्बा अतिचिक्कणात्यूच्चशैलशृङ्गप्रतिष्ठितात्वेन आरोहणालम्बहीना देवदुर्गा देवानामपि दुर्गमा भयावहा रिपुभयप्रापिका लङ्काऽस्तीति शेषः नादेयं चतुर्दिक्षु दुरवगाहनद्याद्यतत्त्वात्तत्संबन्धि पार्वतं दुर्गमपर्वतखण्डमयत्वात्तत्संबन्धिवान्यं दुर्गमवनाद्यतत्वात् तत्संबन्धि कृत्रिमं निर्मितप्राकारत्वेन राक्षसनिर्मितिविशिष्टंच चतुर्विधं दुर्गमस्तीति शेषः ॥ २० ॥

गो० टी०–लङ्केति । लङ्का पुनः लङ्का तु निरालम्बा टङ्कच्छेदमसृणीकृतत्रिकूटशिखरस्थितत्वादारोहणालम्बनरहितदेवदुर्गा देवैरपि दुष्प्रापा । लङ्का । नादेयादिरूपेण चतुर्विधं दुर्गं च चतुर्विधदुर्गप्राकारवर्तीत्यर्थः । नादेयं नद्यां भवम् जलदुर्गमित्यर्थः पार्वतं पर्वतस्थम् वनानां समूहो वन्यं तत्संबन्धि वान्यम् कृत्रिमं क्रियया निर्वृत्तम् प्राकारपरिखादिमत् स्थलमित्यक्षरार्थः ॥ २० ॥

२१-२३] ति० टी०–तत्रान्यदप्याह—स्थितेति । दूरपारस्य दूरे पारं परतीरं यस्य नौपथो नौमार्गः अत्र समुद्रे सर्वशो निरुद्देशः प्रदेशविभागरहितः समुद्र इति शेषः 'निरादेशः' इति पाठे निरादेशः सर्वदिक्संचाररहितप्रदेशः ॥ २१-२३ ॥

रा० टी०–स्थितेति । दूरः पारः परतीरं यस्य तस्य समुद्रस्य पारे परतटे स्थिता लङ्काऽस्तीति शेषः अत्र समुद्रे नौपथः नौकामार्गो नास्ति अत एव सर्वतः निखिलसमुद्रप्रदेशे निरुद्देशः संदेशप्रापियत्नाभावोऽस्तीति शेषः ॥ २१ ॥

गो० टी०–स्थितेति । दूरे पारं यस्य सः दूरपारः तस्य विशालस्येत्यर्थः । पारे दक्षिणतीरे स्थिता अत्र समुद्रे नौपथः नौसंचारश्च नास्ति अत एव सर्वतः निरादेशश्च आदेशो वार्तासंचारः तद्रहितः अयं देश इत्यर्थः ॥ २१ ॥

रा० टी०–शैलेति । शैलाग्रे शैलशृङ्गे रचिता अत एव

---

१ चेति गो. पाठः । २ पथोऽपि चेति गो. पाठः । ३ निरादेशश्च सर्वत्र इति गो. पाठः ।

अयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम् । शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः ॥ २४ ॥
नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम् । चतुरङ्गेण * सैन्येन योधास्तत्राप्यनुत्तमाः ॥ २५ ॥
प्रयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम् । चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः ॥ २६ ॥
न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम् । रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः ॥ २७ ॥
शतशोऽथ सहस्राणि मध्यमं स्कन्धमाश्रिताः । यातुधाना दुराधर्षाः साग्रकोटिश्च रक्षसाम् ॥ २८ ॥
ते मया संक्रमा भग्नाः परिखाश्चावपूरिताः । दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः ॥ २९ ॥
[बलैकदेशः क्षपितो राक्षसानां महात्मनाम् ।]
येन केन तु मार्गेण तराम वरुणालयम् । हतेति नगरी लङ्का वानरैरुपधार्यताम् ॥ ३० ॥

दुर्गा दुर्गमा अत एव परमदुर्जयः रिपुजयाभावो यस्याः सा लङ्कास्तीति शेषः ॥ २२ ॥

गो० टी०–वनगिरिदुर्गत्वमाह–शैलाग्र इति ॥ २२ ॥

रा० टी०–परिखा इति । परिखादयः लङ्कां शोभयन्ति ॥ २३ ॥

गो० टी०– कृत्रिमदुर्गत्वमाह–परिखा इति ॥ २३ ॥

२४] ति० टी०–शूलहस्ता एव न केवलम्, अपि तु खड्गाग्रयोधिनः खड्गैरग्रे युद्धयन्ते तादृशाः ॥ २४ ॥

रा० टी०–अयुतमिति । ये सर्वे दुराधर्षाः तेषां रक्षसामयुतम् अत्र लङ्कायां पूर्वद्वारमाश्रितमस्तीति शेषः ॥ २४॥

गो० टी०–विभागं च बलौघस्येति रामप्रश्नस्योत्तरमाह–अयुतमिति । अत्र लङ्कायां सर्वे पूर्वद्वारस्थाः अयुतं दशसहस्रम् अग्रे सेनाग्रे युध्यन्त इत्यग्रयोधिनः खड्गैरग्रयोधिनः सर्वे अयुतसंख्याकाः । सर्वेपि तथाविधा इत्यर्थः ॥ २४ ॥

२५] ति० टी०–नियुतं लक्षम् । चतुरङ्गेण सैन्येनोपलक्षिता योधास्तत्रापि दक्षिणद्वारेऽपि सन्ति । अनुत्तमाः प्रशस्ताः ॥ २५ ॥

रा० टी०–नियुतमिति । चतुरङ्गेण सैन्येन उपलक्षिताः ये तत्र लङ्कायां योधाः तेषां रक्षसां नियुतम् अत्र अस्मिन् समये दक्षिणद्वारमाश्रितमस्तीति शेषः ॥ २५ ॥

गो० टी०–नियुतमिति । अत्र लङ्कायाम् । चतुरङ्गेण सैन्येन सह रक्षसां नियुतं दक्षिणद्वारमाश्रितम । तत्र चतुरङ्गबलेषु योधाः पदातयः अनुत्तमाः अत्यन्तशूराः । भवन्तीत्यर्थः ॥ २५ ॥

२६] ति० टी०–प्रयुतं दशलक्षम् ॥ २६ ॥

रा० टी०–प्रयुतमिति । ये सर्वे सर्वास्त्रकोविदाः तेषां रक्षसां प्रयुतं दशलक्षं पश्चिमद्वारमाश्रितम ॥ २६ ॥

गो० टी०–प्रयुतमिति । सर्वे पश्चिमद्वारस्वामिनः । सर्वास्त्रकोविदाः समस्तास्त्रज्ञाः ॥ २६ ॥

२७] ति० टी०–कुलपुत्राः किंकराः । यद्वा योद्धृसत्कुले प्रसूताः ॥ २७ ॥

रा० टी०–न्यर्बुदमिति । ये कुलपुत्राः किङ्कराभिधा इत्यर्थः तेषां रक्षसां न्यर्बुदम् उत्तरद्वारमाश्रितमस्तीति शेषः ॥ २७ ॥

गो० टी०–न्यर्बुदमिति । अश्ववाहाश्चेति चकारेण गजवाहास्समुच्चीयन्ते कुलपुत्राः सत्कुलप्रसूताः विश्वसनीया इति यावत् । सुपूजिताः रावणेन बहुमताः किंकरा इति । शेषः ॥ २७ ॥

२८] ति० टी०–मध्यमं स्कन्धं पुरमध्यसेनानिवेशस्थानम् । साग्रा कोटिः सपादकोटिः ॥ २८ ॥

रा० टी०–शतश इति । शतशः सहस्राणि यातुधानाः राक्षसविशेषाः रक्षसां साग्रकोटिः पादसहितकोटिश्च मध्यमं पुरमध्यवर्तिनं स्कन्धं सेनानिवेशप्रवेशमाश्रिताः ॥ २८ ॥

गो० टी०–शतश इति । अथेति वाक्यान्तरे । शतशः सहस्राणि अनेकसहस्राणि दुराधर्षाः यातुधानाः राक्षसाः मध्यमं स्कन्धं नगरमध्यमस्थानम् । आश्रिताः सर्वसंख्यामाह साग्रेति । रक्षसां साग्रकोटिः पूर्णकोटिः अत्र लङ्कायाम । अस्तीति शेषः ॥ २८ ॥

२९] ति० टी०–यथेयं दुर्गा लङ्का कथमस्माभिर्ग्राह्येति शङ्कां निराचष्टे—ते मयेति । ते संक्रमाः परिखामार्गा मया भग्नाः परिखाश्चावपूरिताः शिलाद्रुकादिभिरिति शेषः । येन बलैकदेशक्षयोऽपि कृत इत्यर्थः ॥ २९ ॥

रा० टी०–ते इति । ते वर्णिताः संक्रमाः परिखाश्चि तमश्रविशेषाः मया भग्नाः परिखाः अवपूरिताः मञ्चसामग्र्या पाषाणादिना च पूर्णताः प्रापिताः प्राकाराः अवसादिताः विध्वंसिताः ॥ २९ ॥

गो० टी०–एवं दुर्गप्राकारवर्णनेन लघूनां पीतिमां भूदिति स्वकृतं दर्शयति–ते मयेति । परिखा इत्यादावपि तच्छब्दोनुसंधेयः ॥ २९ ॥

३०] ति० टी०–येन केन स्वाभ्युपेक्षेत्यनुसंधेन समुद्रं तराम । तत्रैवं सति वानरैः स्वयमेव लङ्का हतेत्युपधार्यतां निश्चीयताम् ॥ ३० ॥

रा० टी०–बलेति । राक्षसानां बलैकदेशः क्षपितः विनाशितः एतदर्धपाठः नभद्वसंमतः अत एव येन बलैकदे-

१ अर्धमेतदधिकं गो. रा. पाठे । २ चेति गो. पाठः । ३ अवेति गो. पाठः ।

अङ्गदो द्विविदो मैन्दो जाम्बवान्पनसो नलः । नीलः सेनापतिश्चैव बलशेषेण किं तव ॥ ३१ ॥
प्लवमाना हि गत्वा तां रावणस्य महापुरीम् । सपर्वतवनां भित्त्वा सखातां च सतोरणाम् ॥
सप्राकारां सभवनामानयिष्यन्ति राघव ॥ ॥ ३२ ॥
एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् । मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ।

हनुमद्वाक्यश्रवणोत्तरं कस्मिन्मुहूर्ते यात्रा कर्तव्येत्यादि च प्रश्नपूर्वकमेकं मुहूर्तं निश्चित्य शुभशकुनप्राप्तिं दर्शयति ।

श्रुत्वा हनूमतो वाक्यं यथावदनुपूर्वशः । ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ १ ॥
येनिवेदयसे लङ्कां पुरीं भीमस्य रक्षसः । क्षिप्रमेनां वधिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २ ॥

क्षयोऽपि कृत इति तैरुक्तम् । अथ पृथक्—येनेति । न केन भवदाज्ञापितेनेत्यर्थः मार्गेण वरुणालयम् अङ्गदादयो वयं तराम अतः वानरैरङ्गदादिभिरेव लङ्का हतेत्युपधार्तां निश्चीयताम् अतः बलशेषेण शेषसैन्यतरणचिन्तया तव किं प्रयोजनमिति शेषः, न किंचिदित्यर्थः । श्लोकद्वयमेकान्वयि ॥ ३० ॥ ३१ ॥

गो०टी०—बलैकदेश इति । इत्यर्धमेकान्वयम् । बलैकदेशः नाचतुर्थांश इत्यर्थः महात्मनां महाकायानाम् ॥ ३० ॥

गो० टी०—तपसा सेतुबन्धेनेत्येवं रामोक्तमेव सम्यगिगाह—येनेति । मार्गेण उपायेन तराम तरिष्यामः व्यत्यान लोट् । वरुणालयं समुद्रम् ॥ ३१ ॥

३१-३२] ति० टी०—किंचाशेषतरणोपायचिन्ता व्यर्थैव प्रलयेनेवाक्ष्यमाणेनैव कार्यसिद्धिरित्याह—अङ्गद इत्यादि । अङ्गदादय एव लङ्कां भित्त्वा सीतामानेष्यन्ति किं बलशेषेण तवेत्यन्वयः ॥ ३१ ॥ ३२ ॥

रा० टी०—प्लवमाना इति । प्लवमाना अङ्गदादयः रावणस्य महापुरीं तां लङ्कां गत्वा भित्त्वा च आनयिष्यन्ति आनेष्यन्ति । सार्धश्लोक एकान्वयी ॥ ३२ ॥

गो० टी०—पक्षान्तरमाह—अङ्गद इत्यादिसार्धश्लोकद्वयेन अङ्गदादयः प्लवमानाः समुद्रं लङ्घितवन्तः । सखातां सपरिखाम् सप्रतोरणां सबहिर्द्वारां आनयिष्यन्ति । बलशेषेण किम । उक्ताङ्गदादिव्यतिरिक्तबलशेषेण किं प्रयोजनमिति योजना ॥ ३२ ॥ ३३ ॥

३३] ति० टी०—एवमिति । एवं प्रधानैरेव कार्यसाधनमिष्टं चेत्क्षिप्रमिदानीमेवानयनेत्याज्ञापय । यदि बलानां सर्वसंग्रहं बलयेमलनुद्दिश्य बलानामपि पारनयनमिष्टं तदा युक्तेन यात्रोचितेन मुहूर्तेन प्रस्थानं स्वयावाभिरोचय ॥ ३३ ॥

इति श्रीरामायणे वीरसाये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०—एवमिति । बलानां सर्वसंग्रहं क्षिप्रमाज्ञापय एवं युक्तेन गमनयोग्येन मुहूर्तेन प्रस्थानमभिरोचय प्रापय॥३३

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

गो० टी०—एवमिति । सर्वसंग्रहम् संगृह्यत इति संग्रहः बलानां मध्ये सर्वसारभूतं बलम् अङ्गदादिकम् आज्ञापय । एवं प्लवमाना इत्याद्युक्तरीत्या आज्ञापयेत्यर्थः युक्तेन यात्रायोग्येन ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०—अनुपूर्वशोऽनुक्रमेण ॥ १ ॥

रा० टी०—हनुमद्वचनश्रवणानन्तरकालिकं रामवचनमाह—श्रुत्वेत्यादिभिः । अनुपूर्वशः यथाक्रमं हनुमतो वाक्यं श्रुत्वा रामोऽब्रवीत् ॥ १ ॥

गो० टी०—एवं लङ्कायां दुर्गकर्मबलपरिमाणादौ हनुमता कथिते रामः कियन्मात्रमिदमिति न्यक्कृत्य तदानीमेव दण्डयात्रामाज्ञापयति—श्रुत्वेति । महातेजाः महाबलः सत्यपराक्रमः अमोघविक्रमः आभ्यां निर्भयत्वे हेतुरुक्तः । अब्रवीत् सुग्रीवमिति शेषः ॥ १ ॥

२] ति० टी०—तत्राङ्गदादिमुखेन कार्यनिर्वहणमशक्यं मत्वा तत्प्रत्युत्तराय तदङ्गीकुर्वन्निव स्वमतमाह—यदिति । रक्षसः एनां पुरीं क्षिप्रमेव वधिष्यामीति यत्रिवेदयसे तत्सत्यमेव तथा ते शक्तिरस्त्येव तथापि ते तुभ्यं स्वमतं ब्रवीमीत्यर्थः ॥ २ ॥

रा० टी०—तदाकारमाह—यदित्यादिभिः । यथा लङ्कां निवेदयसे वध्यात्वेन ब्रवीषि तामेनां क्षिप्रं वधिष्यामि एतत्ते तुभ्यं सत्यं ब्रवीमि ॥ २ ॥

१ क्षयोऽपीति गो. पाठः । २ यानिति गो. पाठः । ३ मथिष्यामीति गो. पाठः ।

अस्मिन्मुहूर्ते सुग्रीवप्रयाणमभिरोचय[1] । युक्तो मुहूर्ते[2] विजये प्राप्तो मध्यं दिवाकरः ॥ ३ ॥
[अस्मिन्मुहूर्ते विजये प्राप्तमध्यं दिवाकरे ।]
सीतां हृत्वा तु मैथ्यातु[3] क्वासौ यास्यति जीवितः । सीता श्रुत्वाभियानं मे आशामेष्यति जीविते
जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वा मृतमिवातुरः[4] ॥ ॥ ४ ॥
उत्तराफाल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते[5] । अभिप्रयाम सुग्रीव सर्वानीकसमावृताः ॥ ५ ॥
निमित्तानि च पश्यामि यानि प्रादुर्भवन्ति[6][7] वै । निहत्य रावणं सीतामानयिष्यामि जानकीम् ॥ ६ ॥

गो० टी०–यामिति । निवेदयसे हनुमन्मुखेन निवेदयसि । मथिष्यामि शत्रूंश्चसंहरिष्यामि ॥ २ ॥

३] ति० टी०–तमेवाह—अस्मिन्निति । सुग्रीवप्रयाणमिति षष्ठीतत्पुरुषः । तमेवाह—पुनो मध्यमह्नो दिवाकरः प्राप्तोऽतो विजये विजयप्रदेऽभिजिदाख्ये मुहूर्ते युक्तः । मे निर्गम इति शेषः । एतदुत्तरम—' अस्मिन्मुहूर्ते विजये प्राप्ते मध्यं दिवाकरे ' इत्यर्धमधिकं कतकस्वरसात् ॥ ३ ॥

रा० टी०–हनुमन्तं प्रति उक्त्वा सुग्रीवं प्रत्याह–अस्मिन्निति । हे सुग्रीव यस्माद्दिवाकरो मध्यं प्राप्तः अतः विजये विजयकारके अस्मिन्मुहूर्ते युक्तः मम निर्गम इति शेषः अतः प्रयाणं निर्गमम अभिरोचय प्रीतिविषयं कुरु ॥३॥

गो० टी०–अस्मिन्निति । कुत इत्यत्राह–युक्त इति । युक्तः यात्राईः । तत्र हेतुः विजयः विजयायहः । विजयावहत्वे हेतुमाह–दिवाकरः । मध्यं दिने मध्यं प्राप्तः । अभिजिन्मुहूर्त इत्यर्थः । तदुक्तं विद्यामाधवीये–' आदौ गमित्रमस्वावरुजलविधाभिजिद्विधिश्चेन्द्राः । पेन्द्राग्निमूलवरुणार्यमभयतारा दिवा मुहूर्ताः स्युः ' इति । तत्राभिजिन्मुहूर्ता दक्षिणयात्रासु निषिद्धाः यथा ज्योतिषरत्नाकरे–' भूतौ दक्षिणयात्रायां प्रतिष्ठायां द्विजन्मनि । आधाने च ध्वजारोहे मृत्युदः स्यात्तदाभिजित् इति । उच्यते । लङ्का हि दक्षिणपूर्वस्यां किष्किन्धायाः । अतो नेयं दक्षिणयात्रेति नोक्तदोषः ॥ ३

४] ति० टी०–एतन्मुहूर्तप्रस्थितस्य ध्रुवो विजय इत्याह–सीतामिति । तदक्षः सीतां हृत्वा कामं यातु । स्वदेशमिति शेषः । अथाप्यसौ जीवितः सन् कर्तरि निष्ठा । जीवन्भूत्वा क्व यास्यति न क्वापि । अविलम्बं यात्राप्रयोजनमाह–सीतेति । श्रुत्वा सिद्धादिमुखतः । जीविताशाप्राप्तौ दृष्टान्तः–आतुरो जीवितान्ते जीवितनाशप्राप्तावमृतममृतत्वसाधनं दिव्यौषधं स्पृष्ट्वा द्रवरूपममृतं पीत्वा च यथा जीविताशामेति तद्वत् । ' जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वामृतमिवातुरः ' इति पाठ्यः पाठः ॥ ४ ॥

रा० टी०–सीतामिति । तदक्षः सीतां हृत्वा यातु यत्र क्वचित् स्वरक्षणार्थं गच्छतु परन्तु जीवितः सन् असौ राक्षसः क्व यास्यति हनिष्यामीत्यर्थः विषं पीत्वा आतुर इव सीता मे अभियानं प्रस्थानं श्रुत्वा शकुनादिना ज्ञात्वा जीवितान्ते प्राणापगमसमये अमृतं स्पृष्ट्वेव जीविते स्वजीवने आशामेष्यति प्राप्स्यति । सार्धश्लोक एकान्वयी ॥ ४ ॥

गो० टी०–मुहूर्तविशेषे प्रयाणस्य फलं दर्शयति–अस्मिन्निति । दिवाकरे मध्यं प्राप्ते विजयाख्ये अस्मिन्मुहूर्ते यास्यतो मे यास्यति मयि असौ रावणः सीतां हृत्वा जातु कदाचित् क्व यास्यति यत्र कुत्रापि यान्तं तं हनिष्यामीत्यर्थः। सीतां हृत्वा तु मे यात्विति पाठे यातु राक्षसः। नैर्ऋतो यातुरक्षसी इत्यमरः। यद्वा यातु गच्छतु। क्व यास्यतीत्यन्वयः॥४॥

गो० टी०–अथैव सागरतरणोपायचिन्तां विना निर्गमस्य कालमाह–सीतेति । मे अभियानं प्रस्थानं सीता श्रुत्वा जीविते आशामेष्यति । श्रवणं च विजयादिभ्य इति ज्ञेयम् । निर्गमं विना केवलं विचाराकुलेष्वस्मासु जीविते सा निराशा स्यादिति भावः । कथमिव विषं पीत्वा आतुरः पीडितः पुरुषः जीवितान्ते प्राणात्यये प्राप्ते अमृतं स्पृष्ट्वेव ॥ ४ ॥

५–६] ति० टी०–मम तारावलमस्तीत्याह–उत्तरेति । योक्ष्यते चन्द्र इति शेषः । पुनर्वसुजातस्य हस्तो वर्ततारा उत्तरा च सीताया जन्मतारा बहूनां जन्मतारायां तन्मोक्षनार्थयात्रायामवश्यं तन्मुक्तिरिति भावः । अयमान्तमासेन मार्गशीर्षकृष्णाष्टम्यां कृष्णसप्तम्यां वा । मार्गशीर्षपूर्णिमोत्तरं तदन्यतरस्मिन्नुत्तरफाल्गुनीलाभात् । अभिप्रयामेति प्रभे लोट् ॥ ५ ॥ ६ ॥

रा० टी०–यात्राकालस्य शोभनत्वं बोधयन्नाह–उत्तरेति । हे सुग्रीव अद्य उत्तराफाल्गुनी वर्तत इति शेषः स्वः इतः परदिनं तु हस्तेन योक्ष्यते योक्ता अतः सर्वानीकसमावृताः वयम् अभिप्रयाम ॥ ५ ॥

गो० टी०–तर्हि कदास्माभिः प्रस्थाप्यं तत्राह–उत्तरेति । अद्य दिने उत्तराफाल्गुनीनक्षत्रं वर्तते श्वः उत्तरदिने हस्तेन योक्ष्यते । चन्द्र इति शेषः । हस्तो रामस्य निधनतारा उत्तराफाल्गुनी तु साधनतारा अतोऽद्यैव सर्वानीकसमावृताः सन्तः अभिप्रयाम गच्छेम । अत्रोत्तराफाल्गुनीत्यनेन स दिवसः फाल्गुनपौर्णमासीत्यवगम्यते । इदमुत्तरत्र प्रतिपादयिष्यते॥६॥

रा० टी०–निमित्तानीति । यानि निमित्तानि प्रादुर्भवन्ति मङ्गलानि कुर्वन्ति तानि पश्यामि अतः रावणं निहत्य

---

१ रोचये इति गो. पाठः । २ मुहूर्तो विजय इति गो. पाठः । ३ अर्धमेतदधिकं गो. पाठे । ४ हृत्वेति गो. पाठः । ५ मे जास्यिति गो. पाठः । ६ यास्यत इति गो. पाठः । ७ विषमिति गो. पाठः । ८ फल्गुनीति गो. पाठः । ९ धन्यानीति गो. पाठः । १० चेति गो. पाठः ।

उपरिष्टाद्धि नयनं स्फुरमाणमिदं मम । विजयं समनुप्राप्तं शंसतीव मनोरथम् ॥ ७ ॥
ततो वानरराजेन लक्ष्मणेन सुपूजितः । उवाच रामो धर्मात्मा पुनरप्यर्थकोविदः ॥ ८ ॥
अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम् । वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ ९ ॥
फलमूलवता नीलशीतकाननवारिणा । पथा मधुमता चाशु सेनां सेनापते नय ॥ १० ॥
दूषयेयुर्दुरात्मानः पथि मूलफलोदकम् । राक्षसाः पथि रक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ॥ ११ ॥
निम्नेषु वनदुर्गेषु वनेषु च वनौकसः । अभिप्लुत्याभिपश्येयुः परेषां निहितं बलम् ॥ १२ ॥
यत्तु फल्गु बलं किंचित्तदत्रैवोपपद्यताम् । एतद्धि कृत्यं घोरं नो विक्रमेण प्रयुज्यताम् ॥ १३ ॥
सागरौघनिभं भीममग्रानीकं महाबलाः । कपिसिंहाः प्रकर्षन्तु शतशोऽथ सहस्रशः ॥ १४ ॥

तामानयिष्यामि आनेष्यामि प्रादुर्भवन्तीत्यत्रान्तर्भावितणिर्थः । यदि तु निमित्तशब्देन शुभशकुना उच्येरन् तदा नेयं कल्पना ॥ ६ ॥

गो० टी०–निमित्तानीति । यानि निमित्तानि धन्यानि नि प्रादुर्भवन्ति । अतो रावणं निहत्य सीतामानयिष्यामि । नकीमिति विशेषणेन जनकप्रीत्यर्थं चावश्यं सा आनेतति व्यज्यते ॥ ७ ॥

७–९] ति० टी०–मनोरथं मनोरथविषयं विजयं समप्राप्तमिव शंसतीत्यन्वयः ॥ ७–९ ॥

रा० टी०–निमित्तस्वरूपमाह–उपरिष्टादिति । उपरिष्टादुन्निभागे स्फुरमाणमिदं मम नयनं समनुप्राप्तं मम विजयं नोरथं मनोरथसिद्धिं सीताप्राप्तिं चेत्यर्थः शंसतीव ॥ ७ ॥

गो० टी०–उपरिष्टादिति । उपरिष्टादुपरिस्फुरमाणमिदं मम नयनम् मनोरथं मनोरथविषयभूतं जयम् समनुप्राप्तम् सम्यक् समीपे प्राप्तम् शंसतीव स्पष्टं बोधयतीत्यर्थः । थोक्तम् ज्योतिः शास्त्रे–'नेत्रस्याधः स्फुरणमसकृत्सङ्गरे भङ्गतुर्नेत्रोपान्ते हरति नयनं नेत्रमूले च मृत्युः । नेत्रस्योर्ध्वं रति सकलं मानसं दूरसञ्जातं वामे चैवं फलमविकलं दक्षिणे पिर्यात्यम् ।' इति एवं वचने विद्यमाने दक्षिणनयनमिति व्याख्यानं चिन्त्यम् ॥ ८ ॥

रा० टी०–तत इति । ततो रामवचनश्रवणानन्तरं वानरराजेन सुग्रीवेण च सुपूजितो रामः पुनरप्युवाच॥८॥

गो० टी०–तत इति । पूजितः युक्तमिति स्थापितः । अर्थकोविदः नीतिशास्त्रनिपुणः ॥ ९ ॥

रा० टी०–तदाकारमाह–अग्र इत्यादिभिः । अस्य गमिष्यमाणस्य बलस्य मार्गमवेक्षितुं वानराणां शतसहस्रेण वृतः नीलः अग्रे पूर्वं यातु ॥ ९ ॥

गो० टी०–नीतिशास्त्रमनुस्मरन् सेनासंविधानं दर्शयति–अग्र इति । स्पष्टम् ॥ १० ॥

१०] ति० टी०–शीतानि काननवारीणि यस्मिंस्तादृशेन पथा सेनापते नील सेनां नयेत्यन्वयः ॥ १० ॥

रा० टी०–नीलं प्रत्याह–फलेति । हे नील हे सेनापते फलमूलवता प्रशस्तफलमूलसमीपस्थेन शीतानि काननवारीणि वनसंबन्धिजलानि यस्मिन मधुमता प्रशस्तमधुसमीपस्थेन मार्गेण सेनां नय ॥ १० ॥

गो० टी०–मार्गमवेक्षितुं यात्विति सुग्रीवं प्रत्युक्तमात्रेण सन्निहितं नीलं प्रत्याह–फलेति ॥ ११ ॥

११] ति० टी०–दूषयेयुः विषादिनेति शेषः । नित्यमुद्यतः सदा सावधानः सन् ॥ ११ ॥

रा० टी०–दूषयेयुरिति । ये दुरात्मानो राक्षसाः पथि मूलफलोदकं दूषयेयुः तेभ्यः त्वं रक्षेथाः मूलादीनीति शेषः॥११॥

गो० टी०–मार्गशोधनप्रकारमाह–दूषयेयुरिति । दूषयेयुः विषादिनेति शेषः । परिरक्षेथा इत्यात्मनेपदमार्षम् । उद्यतः सावधान इत्यर्थः ॥ १२ ॥

१२] ति० टी०–वनदुर्गेषु वनात्मकेषु दुर्गेषु । वनेषुदुर्गवनेषु च । निम्नभूमौ निहितं गुप्तप्रहारार्थं लीनतया स्थापितम् ॥ १२ ॥

रा० टी०–निम्नेष्विति । निम्नेषु खातादिविशिष्टेषु वनदुर्गेषु वनेषु जलसमीपदेशेषु च परेषां राक्षसानां निहितं स्वरिपुविनाशाय संस्थापितं बलं सैन्यं वनौकसः अभिप्लुत्य चतुर्दिक्षूत्प्लुत्य अभिपश्येयुः ॥ १२ ॥

गो० टी०–शोधनानन्तरमाह–निम्नेष्विति । निम्नेषु गर्तप्रदेशेषु वनदुर्गेषु वनैः जलैः दुर्गेषु दुर्गमप्रदेशेषु । जीवनं भुवनं वनमित्यमरः । वनेषु काननेषु च निहितं रन्ध्रे प्रहारार्थं स्थापितम् बलं परसैन्यम् वनौकसः वानराः अभित उत्प्लुत्य पश्येयुः ॥ १२ ॥

१३–१४] ति० टी०–यच्च फल्गु निःसारं बलं बालवृद्धादिलक्षणं युद्धानर्हं तदत्रैव किष्किन्धायामेवोपपद्यतां तिष्ठतु हि यस्मादेतत्सः कृत्यं युद्धरूपं घोरम्, अतो विक्रमेण विक्रमोपलक्षणेन प्रयुज्यताम् । यात्विति शेषः ॥ १३ ॥ १४ ॥

रा० टी०–यदिति । एतत् युद्धादि नोऽस्माकं कृत्यं घोरम् अतः विक्रमेण अतिपराक्रमविशिष्टेन वानरेण प्रयुज्यतां

१ इदमिति गो. पाठः । २ चेति गो. पाठः । ३ तथेति रा. पाठः । ४ परीति गो. पाठः । ५ युज्यतामिति गो. पाठः । ६ युध्यतामिति गो. पाठः ।

गजश्च गिरिसंकाशो गवयश्च महाबलः । गवाक्षश्चाग्रतो यातु गवां इंश इवर्षभः ॥ १५ ॥
यातु वानरवाहिन्या वानरः पृतनां पतिः । पालयन्दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १६ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः । यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥ १७ ॥
यास्यामि बलमध्येऽहं बलौघमभिहर्षयन् । अधिरुह्य हनूमन्तमैरावतमिवेश्वरः ॥ १८ ॥
अङ्गदेनैष संयातु लक्ष्मणश्चान्तकोपमः । सार्वभौमेन भूतेशो द्रविणाधिपतिर्यथा ॥ १९ ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः । ऋक्षराजो महाँश्चाहुः कुक्षिं रक्षन्तु ते त्रयः ॥ २० ॥
राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः । व्यादिदेश महावीर्यो वानरान्वानरर्षभः ॥ २१ ॥

गमनं क्रियतामित्यर्थः यत्किंचित् फल्गुबलम् अल्पबलविशिष्टं तत् अत्र किष्किन्धायामेव उपपद्यतां संस्थाप्यताम् ॥ १३ ॥

गो० टी०-शोधनान्तरमाह-यदिति । यत्किंचिदलं फल्गु असारम् तत् अत्रैव किष्किन्धायामेव उपपुज्यतां स्थाप्यताम् किंचिदित्येतेन तादृशं बलमत्र दुर्लभमिति सूचितम् । अत्र युक्तिं वक्ति-एतदिति । एतत् घोरं कृत्यं विक्रमेण प्रयुद्ध्यताम् आर्षः शतृप्रत्ययः विक्रमेण शक्त्या ये युद्ध्यन्ते तेषामेव नान्येषामित्यर्थः । विक्रमेणोपपुज्यतामिति पाठे विक्रमेणोपपुज्यमानानाम् विक्रमयुक्तानामित्यर्थः क्रियापदन्वे संप्रधारणायां लोडुहित्तव्यः ॥ १४ ॥

रा० टी०-सागरेति । सागरौघनिभम् अतिघोषवत्तया सागरप्रवाहौघसदृशम् अथानीकम् अनीकाग्रभागं शतशः सहस्रशः कपिसिंहाः प्रकर्षन्तु नयन्तु ॥ १४ ॥

गो० टी०-अथ यत्र बलभागङ्कृतो ततो विस्तार्येदलमित्युक्तरीत्या बहवो बलिनोऽथ सेनां कर्षन्तित्याह-सागरेति। सागरौघनिभं सागरस्य प्रवाहो यदि भवेत्तुल्यमित्यर्थः । शतशोऽथ सहस्रशः शतशः सहस्रशश्च संघीभूयेत्यर्थः ॥ १५ ॥

१५-१६] ति० टी०-कपिसिंहानेवाह-गजश्चेति॥१५-१६

रा० टी०-कपिसिंहान् संक्षिप्य आह—गज इति । हृष्टो गवाम ऋषभ इव गजप्रभृतिरयतो यातु ॥ १५ ॥

गो० टी०-अथ सेनाबलाध्यक्षौ सर्वदिक्षु निवेशयेदित्युक्तरीत्या निवेशयति-गज इति । गवामिति गवामग्रे हृष्टा ऋषभा इवेति संबन्धः ॥ १६ ॥

रा० टी०-यात्विति । वानरवाहिन्याः वानरसेनायाः दक्षिणं पार्श्वं पालयन् वानरर्षभः वृद्धादिना वानरश्रेष्ठः पृतनां पतिः ऋषभो यातु ॥ १६ ॥

गो० टी०-यात्विति । दक्षिणं पश्चिमपार्श्वमित्यर्थः । 'यतश्च भयमाशङ्कि तां प्राचीं परिकल्पयेत्' इति कामन्दकोक्तेः । प्लवतां वानराणाम् ॥ १७ ॥

१७] ति० टी०-यस्य मदगन्धादन्ये गजाः पलायन्ते स गन्धहस्ती ॥ १७ ॥

रा० टी०-गन्धेति । वानरवाहिन्याः सव्यं वामं पार्श्वमधिष्ठितः पालयन्नित्यर्थः गन्धमादनो यातु ॥ १७ ॥

गो० टी०-गन्धेति । गन्धहस्ती मत्तगजः तरस्वी बलवान् सव्यं प्राचीभागम् अधिष्ठितः अधिष्ठाता कर्तेति कः ॥ १८ ॥

१८] ति० टी०-ईश्वर इन्द्रः ॥ १८ ॥

रा० टी०-यास्यामीति । हनूमन्तमधिरुह्य बलमध्ये अहं यास्यामि ॥ १८ ॥

गो० टी०-यास्यामीति । मध्यगमनप्रयोजनमाह-अभिहर्षयन्निति । प्रहर्षयेदलं व्यूहोद्यतैः । ईश्वरः इन्द्रः तथैवौचित्यात् । गवां पतिमिवेश्वर इति वा पाठः ॥ १९ ॥

१९] ति० टी०-अङ्गदेन वाहनभूतेन । सार्वभौमः कुबेरदिग्गजः भूतेशः कुबेरः यक्षेशत्वात् ॥ १९ ॥

रा० टी०-अङ्गदेनेति । अङ्गदेन वाहनभूतेनेत्यर्थः एष लक्ष्मणो यातु तत्र दृष्टान्तः—सार्वभौमेन तदधिष्ठितगजेन द्रविणाधिपतिः कुबेरो यथा ॥ १९ ॥

गो० टी०-अङ्गदेनेति । अङ्गदेन संयातु अङ्गदमारुह्य संयात्वित्यर्थः । सार्वभौमेन उत्तरदिग्गजेन भूतेशः यक्षेशः द्रविणाधिपतिः धनाधिपतिः । अत्र त्वं च शिबिकामारुह्य आवामागच्छेति सिद्धम ॥ २० ॥

२०-२१] ति० टी०-ऋक्षराजो जाम्बवानित्यन्वयः । कुक्षिं कुक्ष्युपलक्षितं सेनापृष्ठभागम् ॥ २० ॥ २१ ॥

रा० टी०-जाम्बवानिति । जाम्बवदादयत्रयः कुक्षिं तदुपलक्षितसेनापश्चाद्भागं रक्षन्तु ॥ २० ॥

गो० टी०-जाम्बवानिति । ऋक्षराजः जाम्बवद्भ्राता कुक्षिं पश्चाद्भागम् जाम्बवान् सुषेणः वेगदर्शी चेति त्रयः महासत्त्वः ऋक्षराजश्च कुक्षिं रक्षन्त्वित्यन्वयः ॥ २१ ॥

रा० टी०-राघवस्येति । राघवस्य वचः श्रुत्वा सुग्रीवो वानरान् व्यादिदेश ॥ २१ ॥

गो० टी०-राघवस्येति । व्यादिदेश रामोक्तं सर्वं कृत्स्नं स्यात्रापयामास ॥ २२ ॥

---

१ यात्विति गो. पाठः । २ हृष्टा इवर्षभा इति गो. पाठः । ३ वर इति गो. गतिरिति रा. पाठः । ४ सरव इति गो. पाठः । ५ बीर्यानि गो. पाठः ।

ते वानरगणाः सर्वे समुत्पत्य महौजसः । गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा ॥ २२ ॥
ततो वानरराजेन लक्ष्मणेन च पूजितः । जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥ २३ ॥
शतैः शतसहस्रैश्च कोटिभिश्चायुतैरपि । वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा ॥ २४ ॥
तं यान्तमनुयान्ती सा महती हरिवाहिनी । हृष्टाः प्रमुदिताः सर्वे सुग्रीवेणापि पालिताः ॥ २५ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः । क्ष्वेलन्तो निनदन्तश्च जग्मुर्वै दक्षिणां दिशम् ॥ २६ ॥
भक्षयन्तः सुगन्धीनि मधूनि च फलानि च । उद्वहन्तो महावृक्षान्मञ्जरीपुञ्जधारिणः ॥ २७ ॥
अन्योन्यं सहसा दृप्ता निर्वहन्ति क्षिपन्ति च । पतन्तश्चोत्पतन्त्यन्ये पातयन्त्यपरे परान् ॥ २८ ॥
रावणो नो निहन्तव्यः सर्वे च रजनीचराः । इति गर्जन्ति हरयो राघवस्य समीपतः ॥ २९ ॥
पुरस्तादृषभो नीलो वीरः कुमुद एव च । पन्थानं शोधयन्ति स्म वानरैर्बहुभिः सह ॥ ३० ॥
मध्येत्तु राजा सुग्रीवो रामो लक्ष्मण एव च । बलिभिर्बहुभिर्भीमैर्वृतैः शत्रुनिबर्हणः ॥ ३१ ॥

२२-२४] ति० टी०-गुहाभ्यः शिखरेभ्यः पूर्वस्मिन्प्रतिप्रदेशेभ्यः ॥ २२-२४ ॥

रा० टी०-ते इति । ते सुग्रीवेणाज्ञप्ताः सर्वे वानरगणाः गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे ॥ २२ ॥

गो० टी०-त इति । पुप्लुविरे प्लुतगतिं चक्रिरे ॥२३॥

रा० टी०-तत इति । वानरराजेन लक्ष्मणेन च पूजितः प्रार्थित इत्यर्थः ससैन्यो रामः दक्षिणां दिशं जगाम ॥२३॥

गो० टी०-तत इति । पूजितः पुरस्कृत इत्यर्थः धर्मात्मा नीतिरूपधर्मज्ञ इत्यर्थः ॥ २४ ॥

रा० टी०-गमनप्रकारमाह—शतैरिति । वारणाभैर्गजसदृशैः हरिभिर्वानरैः परिवृतो ययौ राम इति शेषः ॥ २४ ॥

गो० टी०-शतैरिति । ययौ राम इति शेषः ॥ २५ ॥

२५] ति० टी०-हर्षप्रमोदयोर्बाह्याभ्यन्तरकृतो भेदः ॥२५

रा० टी०-तमिति । यान्तं तं रामं हरिवाहिनी अनुयाति स्म । अर्थं पृथक् ॥ २५ ॥

रा० टी०-हृष्टा इति । हृष्टाः प्राप्तसंतोषाः अत एव प्रमुदिताः सर्वे वानराः आप्लवन्तः रक्षणार्थं सर्वदिक्षु गच्छन्तः प्लवन्तः सेनामाकर्षयन्तश्च सन्तः दक्षिणां दिशं जग्मुः सार्धश्लोक एकान्वयी ॥ २६ ॥

गो०टी०-तमिति । हरिवाहिनी पूर्वोक्तबलवानरभिन्ना२६

२६] ति० टी०-आप्लवन्तः समन्तादक्षणार्थं प्लवमानाः प्लवन्तोऽयं शोधनार्थं गच्छन्तः 'क्ष्वेला तु सिंहनादः स्यात्' इति निघण्टुः । गर्जो मेघादिसदृशः शब्दः निनादः सामान्यशब्दः ॥ २६ ॥

गो० टी०-गच्छतामवस्थाविशेषान् दर्शयति-दृप्ता इत्यादिना । दृप्ता गर्विताः आप्लवन्तः मण्डलाकारं भ्रमन्त इत्यर्थः गर्जन्तः मेघध्वनिं कुर्वन्तः घनगर्जितमिति प्रसिद्धिः क्ष्वेलन्तः सिंहनादं कुर्वन्तः क्ष्वेला तु सिंहनादः स्यात् इत्यमरः । निनदन्तः अव्यक्तं शब्दायमानाः "णद, अव्यक्ते शब्दे" इति धातुः । भक्षयन्तः पिबन्तः उद्वहन्तः विलासार्थं हस्ते धारयन्तः ॥ २७ ॥ २८ ॥

२७] ति० टी०-लीलार्थं महावृक्षानुद्वहन्तो मञ्जरीपुञ्जधारिणश्च । जग्मुरित्यनुकर्षः ॥ २७ ॥

रा० टी०-भक्षयन्त इति । फलानि भक्षयन्तः मञ्जरीपुञ्जधारिणः मञ्जरीसमूहवतः महावृक्षान् उद्वहन्तः लीलार्थं गृह्णन्तः सन्तः अन्योऽन्यं निर्वहन्ति क्षिपन्ति च । सार्धश्लोक एकान्वयी ॥ २७ ॥ २८ ॥

२८] ति० टी०-निर्वहन्ति विनोदार्थमेकमेके गृह्णन्ति तथा क्षिपन्ति च स्वमारूढं भूमौ पातयन्ति । पतन्तश्च भवन्ति केवलं गच्छन्तीत्यर्थः अन्ये उत्पतन्त्याकाशमार्गं गच्छन्ति ॥ २८ ॥

रा० टी०-पतन्त इति । अन्ये केचित् वानराः पतन्तश्चलन्तः सन्तः उत्पतन्ति उल्लवन्ते अपरे अपरान् पातयन्ति अर्धं पृथक् । रावण इति । नोऽस्माकं रावणो निहन्तव्यः रजनीचराः अन्ये राक्षसाश्च निहन्तव्याः इति राघवस्य समीपतः समीपे हरयो गर्जन्ति । अर्धद्वयमेकान्वयि ॥ २९ ॥

गो० टी०-अन्योन्यमिति । सहसा तरसा । निर्वहन्ति उद्वहन्ति क्षिपन्ति पातयन्ति अन्ये पतन्तः सन्तः परान् पातयितॄन् । आक्षिपन्ति । प्रतिकारकरणासामर्थ्येन परिभाषणं कुर्वन्तीत्यर्थः अपरे शक्ताः परान् पातयितॄन् पातयन्ति ॥ २९ ॥

२९] ति० टी०-नोऽस्माकम् । अस्माभिरिति यावत् 'कृत्यानां कर्तरि वा' इति षष्ठी ॥ २९ ॥

गो० टी०-रावण इति । नः अस्माभिरित्यर्थः ॥ ३० ॥

३०-३१] ति० टी०-पुरस्तादृषभ इति । अयमृषभो दक्षिणपार्श्वविनियुक्तादन्यो नीलसहकारी ॥ ३० ॥ ३१ ॥

---

१ युयुत्सव इति गो. पाठः । २ कोटीभिरयुतैरिति गो. पाठः । ३ याति स्मेति गो. पाठः । ४ दृप्ता इति गो. पाठः । ५ धावमानास्ते इति गो. पाठः । ६ पतन्तश्चोत्पतन्तीति गो. पाठः ।

हरिः शतबलिर्वीरः कोटिभिर्दशभिर्वृतः । सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम् ॥ ३२ ॥
कोटीशतपरीवारः केसरी पनसो गजः । अर्कश्च बहुभिः पार्श्वमेकं तस्याभिरक्षति ॥ ३३ ॥
सुषेणो जाम्बवांश्चैव ऋक्षैर्बहुभिरावृतौ । सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः ॥ ३४ ॥
तेषां सेनापतिर्वीरो नीलो वानरपुंगवः । संयतश्चरतां श्रेष्ठस्तद्बलं पर्यवारयत् ॥ ३५ ॥
दरीमुखः प्रजङ्घश्च जम्भोऽथ रभसः कपिः । सर्वतश्च ययुर्वीरास्त्वरयन्तः प्लवङ्गमान् ॥ ३६ ॥
एवं ते हरिशार्दूला गच्छन्ति बलदर्पिताः । अपश्यन्त गिरिश्रेष्ठं सह्यं गिरिशतायुतम् ॥ ३७ ॥
सरांसि च सुफुल्लानि तटाकानि वनानि च । रामस्य शासनं ज्ञात्वा भीमकोपस्य भीतवत् ॥ ३८ ॥
वर्जयन्नगराभ्याशांस्तथा जनपदानपि । सागरौघनिभं भीमं तद्वानरबलं महत् ॥ ३९ ॥

रा० टी०–पुरस्तादिति । बहुभिर्वानरैः सह ऋषभादयः पुरस्तात् पन्थानं शोधयन्ति स्म ॥ ३० ॥

गो० टी०–पुरस्तादिति । अत्र पूर्वं रामेण मार्गरक्षणाय ये नीलादयो नियुक्ताः तत्रोक्ते कुमुदादयस्तु रामभक्त्युत्साहेन स्वयमेव प्रवृत्ता इति ज्ञेयम् । ऋषभो दक्षिणपार्श्वरक्षणाय नियुक्तो भक्त्या पराक्रमातिशयेन च अत्रापि रक्षणं कृतवानिति ज्ञेयम् ॥ ३१ ॥

रा० टी०–मध्य इति । बहुभिर्वानरैर्वृतः सुग्रीवप्रभृतिः मध्ये गच्छतीति शेषः ॥ ३१ ॥

गो० टी०–मध्य इति । जाम्बवादिति शेषः ॥ ३२ ॥

३२] ति० टी०–सर्वां वाहिनीमवष्टभ्यैको रक्षः समन्ततो भ्रमन्रक्षति स्मेत्यर्थः ॥ ३२ ॥

रा० टी०–हरिरिति । दशभिः कोटिभिर्वृतः शतबलिः तदभिधः एको हरिः सर्वां हरिवाहिनीमवष्टभ्य स्ववशीकृत्य ररक्ष ॥ ३२ ॥

गो० टी०–हरिरिति । अवष्टभ्य अधिष्ठाय ॥ ३३ ॥

३३] ति० टी०–केसर्यादीनां चतुर्णां द्वौ द्वौ तस्य बलस्य दक्षिणं वामं चैकैकं पार्श्वमभिरक्षत इत्यर्थ इति कतकः । एष गजः पूर्वभागनियुक्तादन्य इति तीर्थः ॥ ३३ ॥

रा० टी०–कोटीति । कोटीशतपरीवारः शतकोटिपरीवारविशिष्टः केशरी पनसश्च तस्य बलस्य एकं दक्षिणमित्यर्थः, पार्श्वमभिरक्षति बहुभिर्वानरैर्वृतः गजोर्कश्च एकं वाममित्यर्थः पार्श्वमभिरक्षति योग्यतया पार्श्वावर्तते ॥ ३३ ॥

गो० टी०–कोटीति । गजस्याग्रभागनियुक्तस्यापि पार्श्वरक्षणं भक्त्यतिशयात् । अत्र कार्यकरणाक्षेसर्यादयश्च पूर्वं नियुक्ता एवेत्याहुः । अत्र पूर्वनियुक्तानां गन्धमादनादीनामप्युपलक्षणम् । एकं पार्श्वं सर्वं पार्श्वम् । अभिरक्षतीत्यस्य प्रत्येकमभिसंबन्धः । व्यत्ययेन लट् ॥ ३४ ॥

३४] ति० टी०–सुषेणजाम्बवन्तौ प्रायः सेनामध्ये वर्तमानं सुग्रीवं पुरः कृत्वा जघनं सेनापुच्छभागं संररक्षतुः ॥३४॥

रा० टी०–सुषेण इति । बहुभिः ऋक्षैरावृतौ सुषेणो जाम्बवांश्च सुग्रीवं पुरतोऽग्रे कृत्वा जघनं पश्चाद्भागं संररक्षतुः॥३४

गो० टी०–सुषेण इति । ऋक्षैश्च बहुभिर्वृतत्वे जाम्बवत एव तत्संबन्धात् सुषेणस्यापि । जघनं पश्चाद्भागम् ॥ ३५ ॥

३५] ति० टी०–पर्यवारयत् नगरादिपीडागन्धिनं यथा भवति तथा परिवार्यानयदित्यर्थः ॥ ३५ ॥

रा० टी०–तेषामिति । तेषां शतबल्यादीनां समीपं गच्छन् सचिव इति शेषः नीलः सेनापतिः तद्बलं पर्यवारयत् मार्गवर्तिपुरादिपीडानिवारणार्थं स्वेच्छाचारगमनात् न्यवारयदित्यर्थः ॥ ३५ ॥

गो० टी०–तेषामिति । संयतन् मार्गशोधनाय पुरो गच्छन्नपि पर्यपालयत् सेनापतित्वात् सर्वतो रक्षन्नित्यर्थः॥३६

३६] ति० टी०–सर्वतः वेगातिशयादिति भावः ॥ ३६ ॥

रा० टी०–दरीमुख इति । दरीमुखादयः प्लवङ्गमान् त्वरयन्तः सन्तः सर्वतो ययुः ॥ ३६ ॥

गो० टी०–दरीमुख इति । स्पष्टम् ॥ ३७ ॥

३७] ति० टी०–गच्छन्ति गच्छन्तश्च सह्यमपश्यन्त सर आदीनि चापश्यन्त । अत्र प्रथमदिनमस्य इति ज्ञायते ॥ ३७॥

रा० टी०–एवमिति । ते हरिशार्दूला एवं गच्छन्ति अगच्छन् अत एव गिरिशतैरावृतं व्याप्तं सह्यं तदभिधं गिरिश्रेष्ठं सरआदीनि च अपश्यन् । सार्धश्लोक एकान्वयी॥३७॥३८॥

गो० टी०–एवमित्यादि । अपश्यन् दृगादिति शेषः । सुफुल्लानि सुफुल्लपद्मकह्लाराणि ॥ ३८ ॥

३८] ति० टी०–भीतवत् । भीताः सन्त इत्यर्थः ॥३८॥

३९] ति० टी०–वर्जयद्भूर्जयित्वागच्छत् ॥ ३९ ॥

रा० टी०–रामस्येति । रामस्य शासनं नगरादिभ्यो दूरत एव गन्तव्यमित्याज्ञां ज्ञात्वा भीतवत् रामभीतिविशिष्टं तद्वानरबलं नगराभ्याशादीन् वर्जयत् सत् भीमघोषमर्णवमिव निःशब्दं निरन्तरं जगाम । श्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

---

१ कोटीभिरिति गो. पाठः । २ अतिबल इति गो. पाठः । ३ ऋक्षैश्च बहुभिर्वृतावितिं गो. पाठः । ४ संपतन्प्यतन्निति गो. पाठः । ५ पारयदिति गो. पाठः । ६ दरीति गो. रा. पाठः । ७ रम्य इति गो. पाठः । ८ गच्छन्त इति गो. पाठः । ९ वनानीति गो. पाठः ।

[1]निःससर्प महाघोरं भीमघोषमिवार्णवम् । तस्य दाशरथेः पार्श्वे शूरास्ते कपिकुञ्जराः ॥ ४० ॥
तूर्णमापुप्लुवुः सर्वे सदश्वा इव चोदिताः । कपिभ्यामुह्यमानौ तौ शुशुभाते नरर्षभौ ॥ ४१ ॥
महद्भ्यामिव संस्पृष्टौ ग्रहाभ्यां चन्द्रभास्करौ । ततो वानरराजेन लक्ष्मणेन सुपूजितः ॥ ४२ ॥
जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् । तमङ्गदगतो रामं लक्ष्मणः शुभया गिरा ॥ ४३ ॥
उवाच परिपूर्णार्थं पूर्णार्थप्रतिभानवान् । हृतामवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम् ॥ ४४ ॥
समृद्धार्थः समृद्धार्थामयोध्यां प्रतियास्यसि । महान्ति च निमित्तानि दिवि भूमौ च राघव ॥ ४५ ॥
शुभानि तव पश्यामि सर्वाण्येवार्थसिद्धये । अनुवाति शिवो वायुः सेनां मृदुहितः सुखः ॥ ४६ ॥
पूर्णवल्गुस्वराश्चेमे प्रवदन्ति मृगद्विजाः । प्रसन्नाश्च दिशः सर्वा विमलश्च दिवाकरः ॥ ४७ ॥

गो० टी०-रामस्येत्यादि । भीतवत् भीतम् । कर्तरि क्तप्रत्ययः । वर्जयत् । दूरतः परिहरत् उत्ससर्प जगामेति संबन्धः । सागरौघनिभमिति विपुलतायां साम्यम् । भीमघोष इवार्णव इति घोषे ॥ ३९ ॥ ४० ॥

४०-४१] ति० टी०-भीमघोषमर्णवमिव अर्धचंद्रादिरूपेण निःससर्प सह्यतो निःसृतम् ॥ ४० ॥ ४१ ॥

रा० टी०-तस्येति । कपिकुञ्जराः दाशरथेः पार्श्वे सदश्वा इव तूर्णमापुप्लुवुः ॥ ४१ ॥

गो० टी०-तस्येति । दाशरथेः पार्श्व इति । तन्मुखोल्लासायेति भावः ॥ ४१ ॥

रा० टी०-कपिभ्यामिति । कपिभ्यां हनुमदङ्गदाभ्यामुह्यमानौ तौ रामलक्ष्मणौ महद्भ्यां ग्रहाभ्यां संस्पृष्टौ चन्द्रभास्कराविव शुशुभाते ॥ ४२ ॥

गो० टी०-कपिभ्यामिति । हनुमदङ्गदाभ्यामुह्यमानौ रामलक्ष्मणौ महाग्रहाभ्यां शुक्रबृहस्पतिभ्याम् संस्पृष्टौ संयुक्तौ चन्द्रसूर्याविव शुशुभाते । अत्र उपमाने चतुर्ग्रहसंयोगस्य बहुजनविनाशहेतुत्वात् हनुमदङ्गदाभ्यां रामलक्ष्मणयोगस्य महासेनाविनाशकत्वं गम्यत इत्यलंकारेण वस्तुध्वनिः । सैन्यस्पर्शपदेन हनुमदङ्गदयोर्लाघवातिशयकथनात् पदगतवस्तुना वस्तुध्वनिः ॥ ४२ ॥

४२-४३] ति० टी०-महद्भ्यां ग्रहाभ्यां राहुकेतुभ्यां संस्पृष्टार्कभागे स्पृष्टौ चन्द्रभास्कराविव । 'महद्भ्यामर्कसंस्पृष्टौ' इति पाठान्तरम् ॥ ४२ ॥ ४३ ॥

रा० टी०-तत इति । पूजितः ससैन्यो रामः ततः निवासभूतप्रदेशात् दक्षिणां दिशं जगाम ॥ ४३ ॥

गो० टी०-पुनः सुदूरगमनमूचनायाह-तत इति । स्पष्टम् ॥ ४३ ॥

रा० टी०-तामिति । अङ्गदगतः अङ्गदोपरि स्थितः प्रतिभानवान् अतिविद्वान् स्मृतिमान् प्रशस्तस्तुतिविशिष्टः लक्ष्मणः रामभुवाच ॥ ४४ ॥

गो० टी०-तामिति । परिपूर्णमनोरथः । स्मृतिमान् निमित्तशास्त्रार्थस्मरणवान् प्रतिभानवान् तात्कालिकबुद्धिमान् ॥ ४४ ॥

४४-४५] ति० टी०-पूर्णार्थप्रतिभानवान्पूर्णस्यार्थस्य कार्यस्य शकुनैः प्रतिभानवान्ज्ञानवान् करिष्यमाणस्य कार्यस्य पूर्णत्वज्ञानवानित्यर्थः । परिपूर्णार्थमिति रामविशेषणम् ॥ ४४ ॥ ४५ ॥

रा० टी०-तदाकारमाह-हृतामिति । रावणं क्षिप्रं हत्वा वै हृतां वैदेहीमवाप्य अयोध्यां क्षिप्रं त्वं यास्यसि ॥४५॥

गो० टी०-वक्ष्यमाणनिमित्तश्रवणे श्रद्धामुत्पादयितुं प्रथमं तत्फलं दर्शयति-हृतामिति । रावणं हत्वा वैदेहीमवाप्येत्यसीति क्रमः ॥ ४५ ॥

रा० टी०-तत्र हेतुमाह-महान्तीत्यादिभिः । तवार्थसिद्धये अर्थसिद्धिं बोधयितुं विद्यमानानि महान्ति शुभानि निमित्तानि पश्यामि ॥ ४६ ॥

गो० टी०-कुतोयं निश्चय इत्याह-महान्तीति । महान्ति दुर्लक्ष्याणि दिवि भूमौ च यानि शुभानि निमित्तानि सर्वाणि तवार्थसिद्धये पश्यामि अर्थसिद्धिकराणि पश्यामीत्यर्थः ॥ ४६ ॥

४६] ति० टी०-सेनामनुवाति सेनापृष्ठभागेन वाति मृदुहितसुखपदैः क्रमेण मान्द्यशैत्यसौरभाण्युक्तानि ॥ ४६ ॥

रा० टी०-निमित्ताकारमाह-अनुवात्यादिभिः । मृदुहितः मृदुत्वेन हितकारी सुखः शैत्यसौगन्ध्याभ्यां सुखप्रदः अत एव शिवः मङ्गलप्रदो वायुः सेनामनुवाति इमे मृगद्विजाः पूर्णवल्गुस्वरान् अविच्छिन्नमधुरस्वरान् प्रवदन्ति ॥ ४७ ॥

गो० टी०-अनुवातीति । सुखः सुखकरः । शीत इत्यर्थः मृदुहितः । मृदुः मार्दवः हितः युक्तः । अनुकूल इत्यर्थः । शुभः भाविशुभसूचकः वायुः सेनाम् अनुवाति अनुसृत्य वाति । पूर्णवल्गुस्वराः अन्यूनापरुषस्वराः सन्तः प्रवदन्ति ॥ ४७ ॥

४७] ति० टी०-पूर्णा विच्छेदरहिता वल्गवः श्रोत्रसुखाः स्वरा येषां ते ॥ ४७ ॥

---

१ उदिति गो. पाठः । २ घोषं भीमघोष इवार्णव इति गो. पाठः । ३ नरोत्तमाविति गो. पाठः । ४ चेति गो. रा. पाठः । ५ पूर्णार्थः स्मृतिमानिति गो. रा. पाठः ।

उशना च प्रसन्नार्चिरनु त्वां भार्गवो गतः । ब्रह्मराशिर्विशुद्धश्च शुद्धाश्च परमर्षयः ॥
अर्चिष्मन्तः प्रकाशन्ते ध्रुवं सर्वे प्रदक्षिणम् ॥ ॥ ४८ ॥
त्रिशङ्कुर्विमलो भाति राजर्षिः सपुरोहितः । पितामहैः पुरोऽस्माकमिक्ष्वाकूणां महात्मनाम्॥ ४९ ॥

रा० टी०—प्रसन्ना इति । भार्गवो भृगुपुत्रः उशना शुक्रः त्वामनु त्वन्मङ्गलार्थं प्रसन्नार्चिर्गतः प्राप्तः ॥ ४८ ॥

गो० टी०—भौमनिमित्तान्युक्त्वा दिव्यनिमित्तान्याह—प्रसन्ना इत्यादि । त्वामनुगतः तवानुकूलदिशि स्थित इत्यर्थः। यद्वा अनुगतः पश्चाद्भागं गतः । पुरःशुक्रस्य यात्रासु प्रतिषेधादिति भावः । तथोक्तम् ज्यौतिषे—'प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नृपः । अपि शक्रेण सदृशो हतसैन्यो निवर्तते' इति ॥ उशनाच प्रसन्नार्चिरनु त्वां भार्गवो गत इत्यनेनावतारकाले जातकफलसूचनवद्रामस्यानुकूलं गोचरफलं दर्शयति विपरीतफलं राक्षसानां च । तथाहि किष्किन्धातः आग्नेयदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्यानुकूलः शुक्र इत्युच्यते सूर्यस्थराशेः पुरोराशिस्थो हि भवति शुक्रः । सूर्यश्च तदानीं मीनस्थः । उत्तराफल्गुनी ह्येति प्रयाणदिनकथनात् फाल्गुनपौर्णमास्यां हि रामस्य दण्डयात्रेति पूर्वमुक्तम् । तदाच शुक्रो मेषस्थः अतो रामस्य कर्कटलग्नमेषौ हि दशमोनुकूलः । पूर्वोक्तदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्य पश्चात् स्थितत्वाच्च शुक्रोनुकूल एव । शुक्रानुकूल्योक्तिर्बृहस्पत्यायानुकूल्योपलक्षणम् स च अवतारकाले कर्कटकस्थः तदपेक्षयाष्टात्रिंशद्वर्षे युद्धयात्राकालः । तथा च विरावण्या षट्त्रिंशद्वर्षेषु गतेषु रामस्याष्टात्रिंशद्वर्षे युद्धारम्भे गुरोः सिंहस्थितिः सिद्धा गुरुर्द्वितीयगतो रामस्यानुकूलः। शनिश्चावतारकाले तुलावर्गोत्तमस्थः। द्वितीयाद्यौ तुलाद्यधिकयोः पञ्चवर्षेण गतयोः सार्द्धवर्षद्वये नातीतेन धनुरतीत्य तदानीं मकरस्थितियोग्योपि कथं चिद्वृश्चिकवर्गोत्तमस्थ एव शनिः राहुस्तु अवतारकाले सिंहस्थः । तेनोक्तद्विगुणवर्षेष्वेवमेव कर्कटस्थितियोग्योप्यतिचारादिभिर्मिथुनस्थः तत्सप्तमे धनुषि केतुः । उक्तं चाचार्यैः—'मूले मूलवता स्पृष्टो धूप्यते धूमकेतुना' इति । धूमाकारः केतुर्धूमकेतुः तथाच धनुषि शनिकेतू रामस्य षष्ठस्थावनुकूलौ । अङ्गारकस्तु रामरावणयुद्धप्रसङ्गे, आक्रम्याङ्गारकस्तस्थौ विशाखे अपि चाम्बर इत्युक्त्या विशाखाचतुर्थपादे वृश्चिकराशौ तिष्ठति । रामस्य पञ्चमाङ्गारकत्वफलमिदम् । यदेतद्ब्रह्मास्त्रवज्रधरपरिघमोहादि, बुधस्य प्रतिमासं रोहिणीस्थत्वयोगेपि रामरावणयुद्धप्रसङ्गे, प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः इत्युक्तम् प्रजानामशुभावहत्वमतिचारवशादेव । स च रामस्य दशमस्थोनुकूलः। चन्द्रश्च उत्तराफल्गुनीस्थत्वात् कन्यास्थः अतस्तृतीयचन्द्रो रामस्यानुकूलः सूर्यो नवमस्थो रामस्थानुकूलः राहुस्तु मिथुनस्थत्वाद्वादशस्थ इति किंचिदपकः । राक्षसानामिदं सर्वं विपरीतम् । तथाहि । राक्षसानां हि लग्नं मूलम् तथाच धनं राशिः तदपेक्षया पञ्चमस्थः शुक्रः प्रतिकूलः जन्मराशिस्थौ शनिकेतू च प्रतिकूलौ राहुस्तु सप्तमस्थः किंचिदनुकूलः द्वादशस्थाङ्गारश्च प्रतिकूलः गुरुस्तु नवमस्थोनुकूलः चतुर्थस्थः सूर्यः पञ्चमस्थो बुधश्च नानुकूलौ दशमस्थश्चन्द्रः किंचिदनुकूलः एवं प्रायेण ग्रहगोचारफलं राक्षसानां विपरीतमेवेति । ब्रह्मराशिः अधीतसर्ववेद इत्यर्थः विशुद्धः पापपङ्कसंपृक्तः इदं द्वयमपि भार्गवविशेषणम् । परमर्षयः सप्तर्षयः । दक्षिणां दिशं प्रति गताः । प्रदक्षिणं तिष्ठद्ध्रुवप्रदक्षिणात्मानः । आवर्तमाना इति शेषः ॥ ४८ ॥ ४९ ॥

४८] ति० टी०—भार्गवो भृगुपुत्र उशना शुक्रोपि प्रसन्नार्चिस्त्वामनुगतोऽस्ति शुक्रमौढ्यं नास्तीत्युक्तं भवति । यतु पुरः शुक्रभावो ध्वनित इति तत्र । दक्षिणोत्तरगन्तॄणां कदापि पुरः शुक्रप्रसक्तेरभावात् । ब्रह्मराशिर्ध्रुवः । ब्रह्मणां सप्तर्षीणां राशिः पुञ्जीभावो यस्मिन्स तथा तस्माद्विशुद्धोऽमादिमालिन्यरहितः । तत्पुञ्जीभावमेव दर्शयति—शुद्धा अभ्रादिहीनाः शुद्धं ध्रुवं प्रदक्षिणं कुर्वाणा अर्चिष्मन्तः प्रशस्तार्चिषो भूत्वा प्रकाशन्ते ॥ ४८ ॥

रा० टी०—ब्रह्मराशिरिति । ब्रह्मणां सप्तर्षीणां राशिः समूहो यत्र स ध्रुवः विशुद्धः मालिन्यहेतुभूताभ्रादिरहितोऽभवदिति शेषः अत एव सर्वे सप्तापि परमर्षयः प्रदक्षिणं ध्रुवं प्रकाशन्ते प्रकाशयन्ते ॥ ४९ ॥

४९] ति० टी०—सपुरोहितः । भगवद्विश्वामित्रसहितस्वसमीपवर्तिसप्तर्षिमण्डलमध्यवर्तिवसिष्ठसहित इत्यर्थः । ईदृशविशंकुरस्माकं पितामहोऽस्माकं पुरो भाति तस्य दक्षिणदिक्स्थत्वात् । 'पितामहः पुरोऽस्माकम्' इति पाठ्यः पाठ इति कतकः ॥ ४९ ॥

रा० टी०—त्रिशङ्कुरिति । इक्ष्वाकूणाम् अस्माकं पितामहः सपुरोहितो विश्वामित्रसहितः त्रिशंकुः विमलः सन् अस्माकं पुरोऽग्रे भाति त्रिशङ्कोर्दक्षिणदिग्वर्तित्वेनोपपन्नमिदम् ॥ ५० ॥

गो० टी०—त्रिशङ्कुरिति । पुरोहितः विश्वामित्रः । सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनरिति बालकाण्डोक्तरीत्या विश्वामित्रसृष्टसप्तर्ष्यन्तर्गतवसिष्ठो वा । पितामहवरः पितामहेषु कूटस्थेषु श्रेष्ठः । इक्ष्वाकूणां प्रधानकूटस्थ इत्यर्थः ॥ ५० ॥

१ महवर इति गो० पाठः ।

विमले च प्रकाशेते विशाखे निरुपद्रवे । नैक्षत्रं परमस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५० ॥
नैर्ऋतं नैर्ऋतानां च नक्षत्रमभिपीड्यते । मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना ॥ ५१ ॥
सर्वं चैतद्विनाशाय राक्षसानामुपस्थितम् । काले कालगृहीतानां नक्षत्रं ग्रहपीडितम् ॥ ५२ ॥
प्रसन्नाः सुरसाश्चापो वनानि फलवन्ति च । प्रवान्ति नाधिका गन्धा यथर्तुकुसुमा द्रुमाः ॥ ५३ ॥
व्यूढानि कपिसैन्यानि प्रकाशन्तेऽधिकं प्रभो । देवानामिव सैन्यानि सङ्गामे तारकामये ॥
एवमार्य समीक्ष्यैतत्प्रीतो भवितुमर्हसि ॥ ॥ ५४ ॥

५०] ति० टी०–इक्ष्वाकूणां परं नक्षत्रं कुलनक्षत्रम् । विमलेऽङ्गारकादिदुष्टग्रहाक्रमणरहिते ॥ ५० ॥

रा० टी०–विमल इति । इक्ष्वाकूणामस्माकं नक्षत्रं निरुपद्रवे ग्रहाक्रान्तिरहिते विशाखे प्रकाशेते ॥ ५१ ॥

गो० टी०–विमले चेति । निरुपद्रवे क्रूरग्रहानाक्रान्ते । विशाखे इति द्विवचनं नक्षत्रद्वयात्मकत्वात् । विशाखाख्यं नक्षत्रवरमित्यर्थः[1] विशाखाया इक्ष्वाकुनक्षत्रत्वं ज्यौतिषदर्पणे दर्शितम् अभिन्यां यदि केतुरित्यारभ्य इक्ष्वाकुकुलनाथस्तु हन्यतो यदि भवेद्विशाखास्थस्त्रिभे ॥ ५१ ॥

५१] ति० टी०–अथ नैर्ऋतनक्षत्रपीडामाह—नैर्ऋतं निर्ऋतिदेवताकम् मूलः मूलमिति यावत् आर्षं पुंस्त्वम् अतिपीड्यतेऽत्यन्तं पीड्यते । केन तत्राह—मूलवतेति । मूलवतोधैर्दण्डाकारतयोल्मिषेण धूमकेतुना स्पृष्टो धूप्यते संजाततापो भवति ॥ ५१ ॥

रा० टी०–नैर्ऋतमिति । नैर्ऋतं निर्ऋतिदेवताकम् । अत एव नैर्ऋतानां नक्षत्रं मूलो मूलं मूलवता मूलनियामकेन धूमकेतुना स्पृष्टोऽत एव पीड्यते पीडोत्पाद्यते अत एव धूप्यते संतप्यते मूलेनेति शेषः ॥ ५२ ॥

गो० टी०–स्वाकून्प्रसूत्वा परप्रातिकूल्यमाह–नैर्ऋतमिति । नैर्ऋतं नैर्ऋतदेवतम् । नैर्ऋतानां राक्षसानाम् । किं तन्नैर्ऋतं तस्य पीडा केनेत्याकाङ्क्षायामाह–मूल इति । मूलवता अन्तिकवता । मूलं वशीकृतो स्वीये शीर्षे तारान्तिकादिष्विति वैजयन्ती । तेन धूमकेतुना स्पृष्टो मूलः मूलनक्षत्रम् धूप्यते संताप्यते । " धूप, संताप " इति धातुः ॥ ५२ ॥

५२] ति० टी०–यतः कालेऽन्तकाले कालगृहीतानां मृत्युगृहीतानां नक्षत्रं गृहपीडितं शन्यङ्गारकराह्वादिगृहपीडितं भवतीति शेषः ॥ ५२ ॥

रा० टी०–सर्वमिति । कालगृहीतानामेव नक्षत्रं ग्रहपीडितं भवति अतः काले अस्मिन् समये एतदृश्यमानं सर्वं मूलपीडनादि राक्षसानां विनाशाय समुपस्थितम् ॥ ५३ ॥

गो० टी०–ततः किमित्यत्राह–सर्वमिति । एतन्नक्षत्रपीडनमेव राक्षसानां विनाशाय सर्वम् अशुभसूचकनिमित्तजातं समुपस्थितमित्यर्थः तदेवोपपादयति–काल इति । कालगृहीतानां मृत्युगृहीतानां नक्षत्रम् काले अन्तकाले ग्रहपीडितं भवति ॥ ५३ ॥

५३] ति० टी०–उशना चेत्यायेतदन्तं सप्तं किंचित्कालं विश्रम्य फलमूलादि भुक्त्वा पुना रात्रौ गमनकाले लक्ष्मणेन प्रदर्श्यते । अतएव वक्ष्यति—' सा स्म याति दिवारात्रम् ' इति । सरसा आपः । सरसीत्यिति शेषः । गन्धा अजन्तः गन्धवन्तो वायवोऽधिका न प्रवान्ति मन्दं वान्तीत्यर्थः । द्रुमाः स्वस्वर्तुमनतिक्रम्य जातकुसुमाः ॥ ५३ ॥

रा० टी०–रिपुविध्वंसकनिमित्तान्युक्त्वा सोद्भवकारकनिमित्तान्याह–प्रसन्ना इति । सुरसाः शोभनरसविशिष्टाः अत एव प्रसन्नाः आपः सन्तीति शेषः फलवन्ति फलविशिष्टानि वनानि सन्ति गन्धाः शोभनगन्धविशिष्टाः वाताः अधिकाः अपेक्षातोऽतिरिक्ताः न प्रवान्ति द्रुमाः यथर्तुकुसुमाः ऋतुमनतिक्रम्य कुसुमविशिष्टाः सन्ति ॥ ५४ ॥

गो० टी०–पुनरपि विजयसूचकान्याह–प्रसन्ना इत्यादिना । द्रुमाः यथर्तुकुसुमाः ऋतुमनतिक्रम्य जातानि कुसुमानि येषां ते तथोक्ताः अकालकुसुमोत्पत्तिर्दुत्पातः स इदानीं नास्तीत्यर्थः । तथोक्तं वराहमिहिरेण–'शीतोष्णानां विपर्यासः फलपुष्पमकालजम् अशोष्याणां विशोषश्च फलं पाप्मासिकं भवेत् इति ॥ ५४ ॥

५४] ति० टी०–आमयशब्देन दुःखत्वाद्वधो लक्ष्यते । तारकस्य तारकासुरस्यामयो विनाशो यस्मिंस्तादृशे सङ्गामे देवसेनान्या व्यूढानि देवानां सैन्यानीव प्रकाशन्ते ॥ ५४ ॥

रा० टी०–व्यूढानीति । तारकस्य तन्नामकासुरस्य आमयो विध्वंसो यस्मिन् तस्मिन् संग्रामे व्यूढानि देवानां सैन्यानीव कपिसैन्यान्यधिकं प्रकाशन्ते ॥ ५५ ॥

रा० टी०–एवमिति । आर्य हे राम एवमेतत्फलकं निमित्तं समीक्ष्य प्रीतो भवितुमर्हसि इति अनेन प्रकारेण भ्रातरमाश्वास्य आश्वासनार्थं सौमित्रिरब्रवीत् ॥ ५६ ॥

गो० टी०–व्यूढानीति । व्यूढानि कृतव्यूहानि । तारकस्य तारकासुरस्य आमयो वधो यस्मिन् सः तारकामयः तस्मिन् । यद्वा तारकायाः बृहस्पतिपत्न्याः आमयो मनोव्याधिः यस्मिन् । तादृक्संग्रामसंज्ञेयम् । तथोक्तं श्रीविष्णु-

१ नक्षत्रवरमिति गो. पाठः । २ अभीति गो. पाठः । ३ अन्यधिकं गन्धानिति गो. पाठः । ४ समीक्ष्यैतानिति गो. पाठः ।

इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत् । अथादृत्य महीं कृत्स्नां जगाम हरिवाहिनी ॥ ५५ ॥
ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैरपि । कराग्रैश्चरणाग्रैश्च वानरैरुद्धतं रजः ॥ ५६ ॥
भीममन्तर्दधे लोकं निवार्य सवितुः प्रभाम् । सपर्वतवनाकाशं दक्षिणां हरिवाहिनी ॥ ५७ ॥
छादयन्ती ययौ भीमा घामिवाम्बुदसंततिः । उत्तरन्त्याश्च सेनायाः सततं बहुयोजनम् ॥ ५८ ॥
नदीस्रोतांसि सर्वाणि सस्यन्दुर्विपरीतवत् । सरांसि विमलाम्भांसि द्रुमाकीर्णांश्च पर्वतान् ॥ ५९ ॥
समान्भूमिप्रदेशांश्च वनानि फलवन्ति च । मध्येन च समन्ताच्च तिर्यक्चाधश्च साविशत् ॥ ६० ॥
समादृत्य महीं कृत्स्नां जगाम महती चमूः । ते हृष्टवेदनाः सर्वे जग्मुर्मारुतरंहसः ॥ ६१ ॥
हरयो राघवस्यार्थे समारोपितविक्रमाः । हर्षं वीर्यं बलोद्रेकान्दर्शयन्तः परस्परम् ॥ ६२ ॥
यौवनोत्सेकजाद्दर्पाद्विविधांश्चक्रुरध्वनि । तत्र केचिद्द्रुतं जग्मुरुत्पेतुश्च तथापरे ॥ ६३ ॥

पुराणे—एवं च तयोरतीवोग्रः संग्रामस्तारकानिमित्तस्तारकामयो नामाभवदिति ॥ ५५ ॥

गो० टी०—एवमिति । अथाभ्यात्रवीत् आश्वासनपूर्वकमब्रवीत् । अनेन प्रथमसर्गान्तोक्तः श्लोकोद्धृत इति ज्ञायते ॥ ५६ ॥

५५] ति० टी०—सौमित्रिः स्वयंनिमित्तेरेवाश्वास्य भ्रातुराश्वासाय हृष्टः सन्भ्रातरमब्रवीत् । 'आश्वास्य' इति पाठः ॥५५॥

रा० टी०—अथेति । अथ लक्ष्मणवचनश्रवणानन्तरं महीमाक्रम्य हरिवाहिनी जगाम अर्थं पृथक् । नखदंष्ट्रायुधैः ऋक्षादिभिः कर्तृभिः कराग्रादिभिः करणैरुद्धतमुत्थितं भीमं रजः सवितुः प्रभां निवार्य लोकमन्तर्दधे आच्छादयामास अर्धंचतुष्पदमेकान्वयि ॥ ५७ ॥ ५८ ॥

गो० टी०—कुतश्चित् सेनायाः दृग्गमनमाह—अथेति । ऋक्षवानरशार्दूलैः ऋक्षशार्दूलैः वानरशार्दूलैश्च । शार्दूलशब्दः श्रेष्ठवाची ॥ ५७ ॥

५६] ति० टी०—ऋक्षादयः कर्तारः कराग्रादीनि करणानि ॥ ५६ ॥

गो० टी०—कराग्रैरिति । अन्तर्दधे आच्छादयामास ॥ ५८ ॥

५७–५८] ति० टी०—उद्धतं भीमं रजो लोकमन्तर्दधेऽन्तर्हितमकरोत् । दक्षिणां दिशमिति शेषः ॥ ५७–५८ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—सपर्वतेति । घामम्बुदसन्ततिः अभ्रसमूह इव दक्षिणां दिशं छादयन्ती हरिवाहिनी ययौ ॥ ५९ ॥

गो० टी०—सपर्वतेति । हरिवाहिनी दक्षिणां महीम् अम्बुदसंततिर्घामिव छादयन्ती ययाविति संबन्धः ॥ ५९ ॥

रा० टी०—उत्तरन्त्यामिति । सेनायामुत्तरन्त्यां सत्यां सर्वाणि नदीस्रोतांसि बहुयोजनं विपरीतवत्तत्सस्यन्दुः वानरादिभिरत्यन्तमाहतत्वात् प्रवाहाभिमुखं चलुरित्यर्थः ॥ ६० ॥

गो० टी०—उत्तरन्त्यामिति । संततं निरन्तरं यथा भवति तथा उत्तरन्त्याम् । विपरीतवत् वैपरीत्यवत् भावप्रधानो निर्देशः । बहुयोजनं च यथा भवति तथा सस्यन्दुः ॥ ६० ॥

५९] ति० टी०—सर्वाणि नदीस्रोतांसि विपरीतवद्विपरीत्येन सस्यन्दुः । यथाचेष्टं धावतश्चन्द्रो धावतीव, तद्वत्सेनागतिनिर्दीप्रवाहेषु भान्त्या भाति स्मेत्यर्थ इति कतकः । वस्तुतो नदीषु वानराणां प्रवाहाभिमुखं तरणे नैराहत्यानि जलानि विपरीतवहनानीत्यर्थः ॥ ५९ ॥

६०] ति० टी०—साविशत् । अयं द्वितीयो वास इति प्रतीयते ॥ ६० ॥

रा० टी०—सरांसीति । सरआदीनि मध्यादिना सा चमूरावेशत् अयं द्वितीयो निवास इति प्रतीयत इति भट्टाः । सार्धश्लोक एकान्वयी ॥ ६१ ॥

गो० टी०—सरांसीत्यादिसार्धश्लोक एकान्वयः यथायोग्यं च संबन्धः सरांसि शीतलसलिलतया मध्येनाविशत् । पर्वतान् द्रुमाकीर्णतया तिर्यगाविशत् । समान् भूमिप्रदेशान् समन्तादाविशत् । वनानि फलवत्तया अध आविशत् ॥ ६१ ॥

६१] ति० टी०—पुनर्यात्रामाह—समाकृत्येति ॥ ६१ ॥

गो० टी०—समाकृत्येत्यर्थम् ॥ ६२ ॥

६२] ति० टी०—समारोपितविक्रमाः । एवमेव मया कर्तव्यमित्यमाध्येऽन्यर्थे खिन्नसंक्रमितविक्रमप्रकाराः ॥ ६२ ॥

गो० टी०—त इत्यादि । मारुतरंहसः वायुवेगाः समारोपितविक्रमाः अभिलषितविक्रमा इत्यर्थः । उद्रेकशब्दो निश्चयवाची । दर्पात् दर्पजव्यापारान् ॥ ६३ ॥ ६४ ॥

६३] ति० टी०—विविधान्प्रकारान् । तानेवाह—तत्रेति ॥ ६३ ॥

रा० टी०—त इति । मारुतरंहसो हरयः यौवनोत्सेकजाद् यौवनलब्धिजनितात् दर्पात् हेतोः परस्परं दर्पादि दर्शयन्तः सन्तः जग्मुः विविधान् बलोद्रेकान् विलासान् चक्रुश्च । श्लोकद्वयमेकान्वयि ॥ ६३ ॥ ६४ ॥

रा० टी०—विलासानाह—तत्रेत्यादिभिः । किलकिलां

१ महतीं चमूमिति गो. पाठः । २ वृता इति गो. पाठः । ३ उत्थितमिति गो. पाठः । ४ उत्तरन्त्यां च सेनायामिति गो. रा. पाठः । ५ मनस इति गो. पाठः । ६ दर्पवीर्यबलेति गो. पाठः । ७ यौवनोत्सेकजान्दर्पानिति गो. पाठः ।

केचित्किलकिलां चक्रुर्वानरा वनगोचराः । प्रास्फोटयंश्च पुच्छानि संनिजघ्नुः पदान्यपि ॥ ६४ ॥
भुजान्विक्षिप्य शैलांश्च द्रुमानन्ये बभञ्जिरे । आरोहन्तश्च शृङ्गाणि गिरीणां गिरिगोचराः ॥ ६५ ॥
महानादान्प्रमुञ्चन्ति क्ष्वेडामन्ये प्रचक्रिरे । ऊरुवेगैश्च ममृदुर्लताजालान्यनेकशः ॥ ६६ ॥
जृम्भमाणाश्च विक्रान्ता विचिक्रीडुः शिलाद्रुमैः । ततः शतसहस्रैश्च कोटिभिश्च सहस्रशः ॥ ६७ ॥
वानराणां सुग्रीवाणां श्रीमत्परिवृता मही । सा स्म याति दिवारात्रं महती हरिवाहिनी ॥ ६८ ॥
प्रहृष्टमुदिताः सर्वे सुग्रीवेणाभिपालिताः । वानरास्त्वरिता यान्ति सर्वे युद्धाभिनन्दिनः ॥
प्रमोक्षयिषवः सीतां मुहूर्तं क्वापि नावसन् ॥* ॥ ६९ ॥
ततः पादपसंबाधं नानावनसमायुतम् । सह्यपर्वतमासाद्य वानरास्ते समारुहन् ॥ ७० ॥
काननानि विचित्राणि नदीप्रस्रवणानि च । पश्यन्नपि ययौ रामः सह्यस्य मलयस्य च ॥ ७१ ॥
चम्पकांस्तिलकांश्चूतान्प्रसेकान्सिन्दुवारकान् । तिनिशान्करवीरांश्च भजन्ति स्म प्लवङ्गमाः ॥ ७२ ॥
अशोकांश्च करञ्जांश्च पुंनागान्नागकेसरान् । जम्बुकामलकाञ्छ्लेष्मातकान्भजन्ति स्म प्लवङ्गमाः ॥ ७३ ॥

स्वजातीयध्वनिं प्रास्फोटयन्निति पुच्छानि प्रास्फोटयन् भूमौ प्राक्षिपन् पदानि संनिजघ्नुश्च ॥ ६४ ॥

गो० टी०–तान् विवृणोति–तत्रेत्यादिना । किलकिलेति वानरशब्दानुकरणम् ॥ ६५ ॥

६४] ति० टी०–वानराणां हर्षाद्जनितशब्दः किलकिला प्रास्फोटयन्पुच्छानि भूमावताडयन् ॥ ६४ ॥

गो० टी०–प्रास्फोटयन्निति । प्रास्फोटयन् भूमावास्फालयन् संनिजघ्नुः । भूमाविति शेषः । भुजानिति । भुजान् विक्षिप्य प्रसार्य द्रुमान् शैलांश्च बभञ्जिरे ॥ ६६ ॥

६५] ति० टी०–विक्षिप्य प्रसार्य ॥ ६५ ॥

रा० टी०–भुजानिति । भुजान् शाखाः विक्षिप्य प्रसार्य द्रुमान् गिरिश्रृङ्गाणि च आरोहन्तः सन्तः शैलान् बभञ्जिरे ६६

गो० टी०–आरोहन्त इति । गिरिगोचराः गिरिचराः क्ष्वेलां सिंहनादम् ॥ ६७ ॥

६६–६७] ति० टी०–ममृदुर्मृदितवन्तः ॥ ६६ ॥ ६७ ॥

रा० टी०–महानादानिति । क्ष्वेडां हास्यविशेषमन्ये प्रचक्रिरे ॥ ६७ ॥

रा० टी०–जृम्भमाणा इति । विक्रान्ताः अतिपराक्रमवन्तः अत एव जृम्भमाणाः गात्रविक्षेपं कुर्वन्तः सन्तः शिलाद्रुमैस्तत्प्रक्षेपादिभिर्विचिक्रीडुः केचिदिति शेषः ॥ ६८ ॥

रा० टी०–तत इति । ततस्तदा वानराणां शतसहस्रादिभिः श्रीमत् अतिशोभाविशिष्टं यथा भवति तथा परिवृता मही बभूवेति शेषः ॥ ६९ ॥

गो० टी०–ऊरुवेगैरिति । ममृदुः मर्दनं चक्रुः ॥ ६८ ॥

गो० टी०–शतैरिति । श्रीमत्यथा भवति तथा परिवृता आसीदिति संबन्धः ॥ ६९ ॥

६८] ति० टी०–श्रीमत् लक्षतृतीयान्तम् । श्रीमद्भिरित्यर्थः । अयं तृतीयो वासः । दिवारात्रं मध्यरात्रे एव याममात्रं वास इत्याशयः ॥ ६८ ॥

रा० टी०–सेति । हरिवाहिनी दिवारात्रं याति सुग्रीवेण अभिपालिताः सर्वे वानराः प्रहृष्टाः मुदिताः अभवन्निति शेषः ॥ ७० ॥

गो० टी०–सा स्मेति । सेना इनेन स्वामिना सहिता७०

६९] ति० टी०–प्रमोक्षयिषवः । मोक्षशब्दात् " तत्करोति—" इति णौ सन्व्यापेऽभ्यासलोपे उप्रत्यये च रूपम् । प्रमोचयितुमिच्छावन्त इत्यर्थः । नावसन् । क्वेति शेषः ॥६९॥

रा० टी०–वानरा इति । सीताप्रमोक्षयिषवः सर्ववानराः त्वरिताः सन्तो यान्ति अत एव मुहूर्तमपि क्वापि नावसन् प्रमोक्षशब्दात् तत्करोतीति णिचि सन्युप्रत्यये च सिद्धं द्वित्वाभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् ॥ ७१ ॥

गो० टी०–वानरा इति । प्रमोक्षयिषवः मोचयितुमिच्छवः सनि द्विर्वचनाभाव आर्षः । " मोक्ष, निरसने " इत्यस्माद्धातोः सन् ॥ ७१ ॥

७०] ति० टी०–सह्यपर्वते तत्पर्वतदक्षिणभागं तमासाद्य ते वानराः समारुहन् । तच्छिखरमिति शेषः ॥ ७० ॥

रा० टी०–तत इति । पादपैः संबाधं निबिडं सह्यपर्वतमासाद्य प्राप्य वानराः समारुहन् समारोहन् सह्यपर्वतमासेदुर्मलयं च महीधरम् इति तीर्थपाठः ॥ ७२ ॥

गो० टी०–तत इति । ततः दिवारात्रान्ते ॥ ७२ ॥

७१–७३] ति० टी०–' सह्यपर्वतमासेदुर्मलयं च महीधरम् ' इति पाठान्तरं तीर्थलेखतम् ॥–७१–७३ ॥

---

१ शतैरिति गो. पाठः । २ त्विति गो. पाठः । ३ हृष्टा प्रमुदिता सेनेति गो. पाठः । ४ रक्षितेति गो. पाठः । ५ त्वरितमिति गो. पाठः । ६ नासतेति गो. पाठः । ७ मृगेति गो. पाठः । ८ आसेदुर्मलयं च महीधरमिति गो. पाठः । ९ [illegible]नि गो. पाठः । १० वकुलानिति गो. पाठः । ११ अङ्कोलानिति गो. पाठः । १२ हीपानिति गो. पाठः ।

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः । वायुवेगप्रचलिताः *पुष्पैरवकिरन्ति तान् ॥ ७४ ॥
मारुतः सुखसंस्पर्शो वाति चन्दनशीतलः । षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ ७५ ॥
अधिकं शैलराजस्तु धातुभिस्तु विभूषितः । धातुभ्यः प्रसृतो रेणुर्वायुवेगेन घट्टितः ॥ ७६ ॥
सुपद्मानरानीकं छादयामास सर्वतः । गिरिप्रस्थेषु रम्येषु सर्वतः संप्रपुष्पिताः ॥ ७७ ॥
केतकयः सिन्दुवाराश्च वासन्त्यश्च मनोरमाः । माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च पुष्पिताः ॥ ७८ ॥
चिरिबिल्वा मधूकाश्च वंजुला बकुलास्तथा । रक्तैकासितलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ ७९ ॥
चूताः पाटलिकाश्चैव कोविदाराश्च पुष्पिताः । मुचुलिन्दार्जुनाश्चैव शिंशपाः कुटजास्तथा ॥
[धैवाः शालमलयश्चैव रक्ताः कुरबकास्तथा ॥] ॥ ८० ॥
हिन्तालास्तिनिशाश्चैव चूर्णका नीपकास्तथा । नीलाशोकाश्च सरला अङ्कोलाः पद्मकास्तथा ॥ ८१ ॥

रा० टी०—काननानीति । पद्मरागमणिमयेषु [illegible] गिरिषु ॥ ७३ ॥

रा० टी०—चम्पकानिति । [illegible] ॥ ७४ ॥

रा० टी०—चन्दनशीतल इति । [illegible] ॥ ७५ ॥

रा० टी०—अधिकमिति । [illegible] ॥ ७६ ॥

रा० टी०—काननानीति । सत्यस्य मत्स्यस्य च काननानीत्यन्वयः । सत्यमत्स्यौ नाम मार्गशीर्षौ । तौ हि वर्षौ ७३

गो० टी०—बकुलानिति । बकुलान् केसरद्रुमान् । तिलकान् अरुष्करान् । वेतसः प्रसिद्धाः । अशोकाश्च । सिन्दुवारकान् निर्गुण्डीरान् । सरलाः पनिसाः । तिमिशान् तेमिरद्रुमान् ॥ ७४ ॥

गो० टी०—अङ्कोलानित्यादि । अङ्कोलान् निकोचकवृक्षान् पद्मकान् जलजपद्मान् पद्मकान् रक्तपद्मान् नीपान् कदम्बान् सिन्दुवारान् सप्तच्छदान् ज्ञातकुटजकाः प्रसिद्धाः नीपाः कदम्बाः ॥ ७५ ॥

७४] ति० टी०—प्रस्तरेषु पाषाणेषु । स्थितानिति शेषः ॥ ७४ ॥

रा० टी०—प्रस्तरेष्विति । प्रस्तरेषु स्थितान् तान् रामादीन् काननद्रुमाः पुष्पैरवकिरन्ति ॥ ७६ ॥

गो० टी०—प्रस्तरेष्विति । प्रस्तरेषु शिलासु । स्थिता इति शेषः । वायुवेगः वानरसंचारजन्यवायुवेगः ॥ ७६ ॥ ७७॥

७५] ति० टी० षट्पदैरनुकूजद्भिरलिरुतशब्दितो मारुतो वाति ॥ ७५ ॥

रा० टी०—मारुत इति । मधुगन्धिषु वनेषु षट्पदैरनुकूजद्भिः सुखसंस्पर्शः मन्द इत्यर्थः मारुतो वाति ॥ ७७ ॥

७६–७७] ति० टी०—धातुभ्यो गैरिकादिभ्यः ॥७६-७७॥

७८] ति० टी०—के पुष्पिता इत्याह—केतकय इत्यादि । गन्धपूर्णा गन्धाढ्याः । कुन्दगुल्माः कुन्दानां गुल्माः ॥ ७८ ॥

७९ ति० टी० रक्तैका रामाः ॥ ७९ ॥

८०–८१] ति० टी० तिलिपाः पीतकरञ्जकः ॥८०॥८१॥

रा० टी०—अधिकमिति । शैलराजस्तु धातुभिः अधिकं सुषिविविधोऽभवदिति शेषः । अथ प्रसृत इति । धातुभ्य इति । धातुभ्यः गैरिकादिभ्यः प्रसृतः पल्लवितः वायुवेगेन घट्टितः संघीभूतो रेणुः वानरानीकं आदधामास ॥ ७८ ॥

गो० टी०—वानराणां धातुरेणूत्पत्तिर्यथं वक्तुं पर्वतस्य धातुमत्तामाह—अधिकमिति । अधमेकं वाक्यम । शैलराजः सन्यः ॥ ७८ ॥

गो० टी०—धातुभ्य इति । विघट्टितः इत्यापितः ॥७९॥

रा० टी०—गिरिष्विति । गिरिप्रस्थेषु विद्यमानाः सर्वे केतकीप्रभृतयः पीयमाणैः पुष्पमधुनादिभ्यः प्रीतिं प्राप्नुवद्भिः प्रकूजैः पर्याकुलीकृताः अहदशकमेकादशेति ॥ ७९–८१ ॥

गो० टी०—गिरिप्रस्थेत्यादिसार्धश्लोकद्वयेनोक्तानां । पुष्पिता इत्यनन्तरविशेषणम् । अनन्तरस्य बहुशः प्रयोगः । वमन्ते पुष्पयन्तीति वासन्त्यः । इदं माधवीविशेषणम् । " कालात्साधुपुष्पयत्यन्यमानेषु " इत्यण् । गन्धैः पूर्णाः गन्धपूर्णाः । कुन्दाः गिरिविल्वाः बकमालाः मधूकाः गुडपुष्पा वा जुलाः पीलवः प्रियकाः वञ्जुलाः रक्तैकाः किन्दुकाश्च नागवृक्षाः नागकेसराः पाटलयः पाटलाः कोविदाराः चमरकाः मुचुलिन्दाः सप्तच्छदविशेषाः अर्जुनाः ककुभाः शिंशपाः सिंहलाः कुटजाः गवयलताः धवाः धूम्रपुष्पाः शालमलयः मोचाः ' सिंहलो पूरणी मोचा ' इत्यमरः । हिन्तालाः तालविशेषाः चूर्णकाः आमलकविशेषाः नीपकाः कदम्बाः वरणाः वारणाः पद्मकाः सुगन्धिपुष्पा वृक्षविशेषाः एवंभूता वृक्षाः प्लव्यमानैः प्लवंगैः पर्याकुलीकृता इत्यन्वयः ॥ ८० ॥ ८४ ॥

१ सिद्धि गो. पाठः । २ वायुवेगविघट्टित इति गो. पाठः । ३ पर्वत इति गो. पाठः । ४ बकुलाः प्रियका इति गो. पाठः । ५ रक्तैका इति गो. पाठः; रक्ताका इति रा. पाठः । ६ पाटलय इति गो. पाठः । ७ अर्धमेतदधिकं गो. पाठे । ८ वरणा इति गो. पाठः ।

प्रीयमाणैः प्लवङ्गैस्तु सर्वे पर्याकुलीकृताः । वाप्यस्तस्मिन्गिरौ रम्याः पल्वलानि तथैव च॥ ८२ ॥
चक्रवाकानुचरिताः कारण्डवनिषेविताः । प्लवैः क्रौञ्चैश्च संकीर्णा वराहमृगसेविताः ॥ ८३ ॥
ऋक्षैस्तरक्षुभिः सिंहैः शार्दूलैश्च भयावहैः । व्यालैश्च बहुभिर्भीमैः सेव्यमानाः समन्ततः ॥ ८४ ॥
पद्मैः सौगन्धिकैः फुल्लैः कुमुदैश्चौत्पलैस्तथा । वारिजैर्विविधैः पुष्पैः रम्यास्तत्र जलाशयाः ॥ ८५ ॥
तस्य सानुषु कूजन्ति नानाद्विजगणास्तथा । स्नात्वा पीत्वोदकान्यत्र जले क्रीडन्ति वानराः॥ ८६ ॥
अन्योन्यं प्लावयन्ति स्म शैलमारुह्य वानराः । फलान्यमृतगन्धीनि मूलानि कुसुमानि च ॥ ८७ ॥
बभञ्जुर्वानरास्तत्र पादपानां मदोत्कटाः । द्रोणमात्रप्रमाणानि लम्बमानानि वानराः ॥ ८८ ॥
ययुः पिबन्तः स्वस्थास्ते मधूनि मधुपिङ्गलाः । पादपानवभञ्जन्तो विकर्षन्तस्तथा लताः ॥ ८९ ॥
विधमन्तो गिरिवरान्प्रययुः प्लवगर्षभाः । वृक्षेभ्योऽन्ये तु कपयो नदन्तो मधुदर्पिताः ॥ ९० ॥
अन्ये वृक्षान्प्रपद्यन्ते मधुपिबन्त्यपि चापरे । बभूव वसुधा तैस्तु संपूर्णा हरिपुङ्गवैः ॥
यथा कलमकेदारैः पक्वैरिव वसुंधरा ॥ ॥ ९१ ॥
महेन्द्रमथ संप्राप्य रामो राजीवलोचनः । आरुरोह महाबाहुः शिखरं द्रुमभूषितम् ॥ ९२ ॥
ततः शिखरमारुह्य रामो दशरथात्मजः । कूर्ममीनसमाकीर्णमपश्यत्सलिलाकुलम् ॥ ९३ ॥

८२-८४] ति० टी०-प्रीयमाणैः उत्प्लुत्यदर्शनेनेति शेषः ॥ ८२ ॥ ८४ ॥

८५] ति० टी०-तत्र सह्यगिरिप्रान्ते ॥ ८५ ॥

रा० टी०-वाप्य इति । तस्मिन् गिरौ वाप्यः रम्याः पल्वलानि च रम्याणि सन्तीति शेषः लिङ्गविपरिणामेनान्वयः अर्धं पृथक् ॥ ८४ ॥

रा० टी०-रम्यत्वमेवोपपादयन्नाह—चक्रवाकेत्यादिभिः । चक्रवाकैः अनुचरिताः निषेविताः कारण्डवैर्जलकाकैर्निषेविताः ऋक्षादिभिः सेव्यमानाः पद्मादिभिरुपलक्षिताः अत एव रम्याः जलाशयाः सन्तीति शेषः तरक्षुर्मृगभक्षको जन्तुविशेषः । श्लोकत्रयमेकान्वयि ॥ ८३-८७ ॥

गो० टी०-वाप्य इत्यादि । जलाशया इत्यन्तमेकं वाक्यम् जलाशयाः जलपूर्णा इति वापीविशेषणम् अत्रापि पर्याकुलीकृता इत्यनुषज्यते । कारण्डवाः जलकुक्कुटाः प्लवैः जलकाकैः क्रौञ्चैः प्रसिद्धैः तीरचरमृगानाह—वराहेत्यादिना । तरक्षुभिः मृगादनैः व्यालैः दुष्टगजैः सौगन्धिकैः कल्हारैः वारिजैरिति । एवमिति शेषः ॥ ८५ ॥ ८७ ॥

८६] ति० टी०-तस्य सह्यस्य मलयस्य च ॥ ८६ ॥

रा० टी०-तस्येति । तस्य पर्वतस्य सानुषु द्विजगणाः पक्षिसमूहाः कूजन्ति वानराः अत्र जले स्नात्वा उदकानि पीत्वा क्रीडन्ति ॥ ८८ ॥

गो० टी०-तस्य सानुष्वित्यर्धमेकं वाक्यम् । कूजन्ति चक्रुः । तत्सैन्यदर्शनादिति भावः ॥ ८८ ॥

गो० टी०-स्नात्वेति । अत्र जले वापीजले । प्लावयन्ति सिञ्चन्ति ॥ ८९ ॥

८७-९०] ति० टी०-अमृतगन्धीन्यमृतोपमानि । अर्धं चतुर्थो वासः ॥ ८७ ॥ ९० ॥

रा० टी०-अन्योन्यमिति । वानराः शैलमारुह्य अन्योन्यं प्लावयन्ति स्म अर्धं पृथक् । फलानीति । तत्र तस्मिन् समये मदोत्कटाः वानराः पादपानां फलादीनि बभञ्जुः अर्धं चतुर्थो निवास इति भट्टाः ॥ ८९ ॥

गो० टी०-शैलमारुह्येत्युत्तरशेषः अमृतगन्धीनि अमृतस्वादूनि । मदोत्कटाः मदमत्ताः ॥ ९० ॥

रा० टी०-द्रोणेति । द्रोणमात्रं प्रमाणं येषां तानि लम्बमानानि मधूनि पिबन्तः स्वस्थास्ते वानराः ययुः जग्मुः॥९०।

गो० टी०-द्रोणमात्रेति । द्रोणमात्रप्रमाणानि द्रोणशिवद्वयं तत्प्रमाणमधुपूर्णानि मधूनि मधुपटलानि । मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः ॥ ९१ ॥

रा० टी०-गमनप्रकारं बोधयन्नाह—पादपानिति ॥९१

गो० टी०-पादपानिति । विधमन्तः दहन्तः "धमा शब्दाग्निसंयोगयोः" इति धातुः ॥ ९२ ॥

रा० टी०-वृक्षेभ्य इति । दर्पिताः अन्ये कपयः वृक्षेभ्यो मधु गृहीत्वा नदन्त आसनिति शेषः अन्ये वृक्षान् तरून् प्रपद्यन्ते अपरे मधु प्रपिबन्ति ॥ ९२ ॥

गो० टी०-वृक्षेभ्य इति । अन्ये वृक्षेभ्यः वृक्षेभ्योऽन्ये अत्रापि ययुरित्यनुषज्यते ॥ ९३ ॥

९१-९३] ति० टी०-पीतमधुभिर्हरिभिराहतश्च उपमा—यथेति । पक्वैः पक्वफलैः कलमकेदारैर्नीहिक्षेत्रैर्यथा भाति । इवशब्दस्तथार्थे । तथा तैः पूर्णा बहुधा बभूव॥९१॥९

१ प्लवमानैरिति गो. पाठः । २ शीता इति गो. पाठः । ३ गन्धानीति रा. पाठः । ४ कुसुमुरिति गो. पाठः । ५ हृष्टा इति गो. पाठ ६ नर्दन्त इति गो. पाठः । ७ प्रपतन्तीति गो. पाठः । ८ यूथपैरिति गो. पाठः । ९ अध्यारोहन्निति गो. पाठः । १० करमिति गो. पाठः ।

ते सह्यं समतिक्रम्य मलयं च महागिरिम् । आसेदुरानुपूर्व्येण समुद्रं भीमनिःस्वनम् ॥ ९४ ॥
अवरुह्य जगामाशु वेलावनमनुत्तमम् । रामो रमयतां श्रेष्ठः सुग्रीवः सलक्ष्मणः ॥ ९५ ॥
अथ धौतोपलतलां तोयौघैः सहसोत्थितैः । वेलामासाद्य विपुलां रामो वचनमब्रवीत् ॥ ९६ ॥
एते वयमनुप्राप्ताः सुग्रीव वरुणालयम् । इहेदानीं विचिन्त्या सा या नः पूर्वमुपस्थिता ॥ ९७ ॥
अतः परमतीरोऽयं सागरः सरितां पतिः । न चायमनुपायेन शक्यस्तरितुमर्णवः ॥ ९८ ॥
तदिहैव निवेशोऽस्तु मन्त्रः प्रस्तूयतामिह । यथेदं वानरबलं परं पारमवाप्नुयात् ॥ ९९ ॥
इतीव स महाबाहुः सीताहरणकर्शितः । रामः सागरमासाद्य वासमाज्ञापयत्तदा ॥ १०० ॥
सर्वाः सेना निवेश्यन्तां वेलायां हरिपुङ्गव । संप्राप्तो मन्त्रकालो नः सागरस्येह लङ्घने ॥ १०१ ॥

रा० टी०—बभूवेति । पक्वैः कलमकेदारैः शेवारोपनिशालिभिः यथावत्संपूर्णा उत्पन्नैश्च हरिपुङ्गवैः संपूर्णा वसुधा बभूव ९३

गो० टी०—बभूवेति । इवशब्दो वाक्यालंकारे । अन्ये तु । तत्र तदानीम् । पक्वैः कमलकेदारैः पक्वशालिक्षेत्रैः संपूर्णा वसुन्धरेव यथा भवेत् तथा तैर्हरिपुङ्गवैः संपूर्णा वसुधा बभूवेति योजयन्ति । अपरे तु । कलमकेदारेष्वथा कलमकेदारस्थैः हरिपुङ्गवैः संपूर्णा वसुधा । वसुन्धरा कलमकेदारभूमिर्बभूवेत्यर्थः । उपमानद्वित्वं व्यक्तिवैचित्र्यमुपमालाभाच्चकारार्थं पर्युपयन्ते कवयः । यथा उद्धृत्य मेघमुक्तेन पयो तायमथं मुनीन्द्रश्चित्रं संप्रणीतवान् । आलोकयामास हरिः पतन्तीमेतः स्मृतीर्वेदमिवाम्बुराशिमिति ॥ ९४ ॥

रा० टी०—महेन्द्रमिति । महेन्द्रं महेन्द्रसंबन्धि शिखरं संप्राप्य राम आरुरोह किंच महेन्द्रं संप्राप्य आरूढस्यर्थः । शिखरं तच्छृङ्गमारुरोह ॥ ९४ ॥

गो० टी०—महेन्द्रमिति । अथ सह्यमलयातिक्रमणानन्तरम् । राजीवलोचन इति समुद्रदर्शनाय महेन्द्रशिखरारोहणकुतूहलित्वमुक्तम् ॥ ९५ ॥

रा० टी०—तत इति । रामः शिखरमारुह्य सलिलाशयमपश्यत् ॥ ९५ ॥

गो० टी०—तत इति । स्पष्टम् ॥ ९६ ॥ ९७ ॥

९४] ति० टी०—तत्रानुक्तमपि रामवचनमन्यत्(स्मा?)द्रोध्यम् । आग्निवेश्योक्तेः । ते सर्वे वानरा आनुपूर्व्येण सेनासंनिवेशक्रमेण ॥ ९४ ॥

रा० टी०—ते इति । ते रामादयः आनुपूर्व्येण उचितक्रमेण समुद्रमासेदुः ॥ ९६ ॥

९५] ति० टी०—अवरुह्य महेन्द्रादित्यर्थः ॥ ९५ ॥

रा० टी०—तत्प्रकारमाह—अवरुह्येति । अवरुह्य महेन्द्राधोभागे प्राप्य वेलावनं समुद्रवर्ति काननं रामो जगाम ॥९७॥

गो० टी०—अवरुह्येति । वेलावनस्योत्तमत्वादवरुह्येत्युक्तम् । रमयतां श्रेष्ठ इत्यनेन समुद्रसंभ्रमप्रदर्शनेन लक्ष्मणादिरञ्जकत्वं व्यञ्जितम् ॥ ९८ ॥

९६] ति० टी०—सहसोत्थितैर्लहरीरूपेणागतैस्तोयौघैर्धौतं क्षालितमुपलतलं यस्यां ताम् ॥ ९६ ॥

रा० टी०—अथेति । तोयौघैर्धौतानि उपलतलानि यस्यां तां विपुलां विशालां वेलामासाद्य रामोऽब्रवीत् ॥ ९६ ॥

गो० टी०—अथेति । स्पष्टम् ॥ ९९ ॥

९७] ति० टी०—या पूर्वमुपस्थिता चिन्ता तरणविषया सेदानामपि प्रवर्तत इति शेषः ॥ ९७ ॥

रा० टी०—तदाकारमाह—एत इति । हे सुग्रीव वरुणालयं वयं प्राप्ताः अत एव या पूर्वं नो चिन्तिता सागरतरणविषयकचिन्तनं सैवेदानीमुपस्थिता प्राप्ता ॥ ९७ ॥

गो० टी०—एत इति । चिन्ता समुद्रतरणोपाय चिन्ता ॥ १०० ॥

९८] ति० टी०—अतीरोऽलभ्यपरतीरः अनुपायेनोपायरूपालम्बनहीनेन ॥ ९८ ॥

रा० टी०—तदाकारमाह—अत इति । परं रमणीयं तीरं यस्य स सरितां पतिः सागरः अयं राक्षसैरभिपूर्णः प्राप्तुमशक्यः किंच अयं सागरः परमतीरः उत्कृष्टराक्षससंपत्तिविशिष्टतीरवान् अनुपायेन उपायविशेषमन्तरायमर्णवस्तरितुं न शक्यः प्रथमपक्षे यमिति सामान्ये नपुंसकम्(?) ॥ १०० ॥

गो० टी०—अत इति । अतीरः अविद्यमानतीरः । अलभ्य इति यावत् । अनुपायेन उपायं विनेत्यर्थः । प्रस्तूय प्रतिपद्य तन्त्रसमासः ॥ १०१ ॥

९९,-१०१] ति० टी०—मन्त्रो विचारः॥ ९९ ॥ १०१ ॥

रा० टी०—तदिति । ततः तरणस्याशक्यत्वाद्धेतोः इह अस्मिन् काले इह अस्मिन् देशे एव निवेशः अस्मन्निवासोऽस्तु यथा वानरबलं परं पारं समुद्रपरतीरमवाप्नुयात् तथा प्रस्तूयतां विचार्यताम् ॥ १०१ ॥

गो० टी०—तदिति । मन्त्रः कार्यविचारः । प्रस्तूयताम् आरभ्यताम् । इति वक्ष्यमाणप्रकारेण ॥ १०२ ॥

रा० टी०—इतीवेति । इतीव अनेन प्रकारेण रामो बभाषे समाज्ञापयत् ॥ १०२ ॥

---

१ पूर्वं समुत्थितेति गो. पाठः । २ अस्येति गो. पाठः ।

स्वां स्वां सेनां समुत्सृज्य मा च कश्चित्कुतो व्रजेत् । गच्छन्तु वानराः शूरा ज्ञेयं छन्नं भयं च नः॥ १०२ ॥
रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः । सेनां निवेशयत्तीरे सागरस्य द्रुमायुते ॥ १०३ ॥
विरराज समीपस्थं सागरस्य च तद्वलम् । मधुपाण्डुजलः श्रीमान्द्वितीय इव सागरः ॥ १०४ ॥
वेलावनमुपागम्य ततस्ते हरिपुङ्गवाः । [1]निविष्टाश्च परं पारं काङ्क्षमाणा महोदधेः ॥ १०५ ॥
तेषां निविशमानानां सैन्यसंनाहनिःस्वनः । अन्तर्धाय महानादमर्णवस्य प्रशुश्रुवे ॥ १०६ ॥
सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता । त्रिधा निविष्टा महती रामस्यार्थपराभवत् ॥ १०७ ॥
सा महार्णवमासाद्य हृष्टा वानरवाहिनी । वायुवेगसमाधूतं पश्यमाना महार्णवम् ॥ १०८ ॥
दूरपारमसंबाधं रक्षोगणनिषेवितम् । पश्यन्तो वरुणावासं निषेदुर्हरियूथपाः ॥ १०९ ॥

गो० टी०–इतीति । इतीवेत्यनेन सेनानिवेशनियोगे सागरतरणोपायविचारः अहदयो हेतुः वस्तुतस्तु सीताहरणक्लेश एव हेतुरिति व्यज्यते ॥ १०३ ॥

रा० टी०–आज्ञापनमेव भङ्ग्यन्तरेणाह—सर्वा इति । सागरस्य लङ्घने नः अस्माकं मन्त्रकालः संप्राप्तः अतः सर्वाः सेनाः वेलायां निवेशयन्ताम् ॥ १०३ ॥

गो० टी०–सर्वा इति । स्पष्टम् ॥ १०४ ॥

१०२–१०३] ति० टी०–स्वां स्वां सेनां समुत्सृज्य कश्चिदपि कुतोऽपि हेतोर्मा व्रजेत् । यतो नोऽस्माकं छन्नं रक्षोमायाकृतत्वाद्गूढं भयमस्तीति ज्ञेयम । सावधानतया स्थेयमिति बोधितम्, अतोऽत्र शूराः सर्वे वानराः सेनारक्षार्थं गच्छन्तु । सेनायाश्चतुर्दिक्षु गत्वा तत्र स्थित्वा तां रक्षन्त्वित्यर्थः ॥ १०२ ॥ १०३ ॥

रा० टी०–स्वां स्वामिति सेनां समुत्सृज्य कश्चिदपि कुतः कश्चिदपि देशं मा व्रजेत् यतः छन्नं राक्षसकृतत्वात् अप्रकटितं नो भयं भयहेतुः ज्ञेयमस्तीति शेषः अतः शूराः वानराः गच्छन्तु भयहेत्वन्वेषणार्थं सेनायाश्चतुर्दिक्षु पर्यटन्तु ॥ १०४ ॥

गो० टी०–स्वां स्वामिति । कुतः कुतश्चिद्धेतोः शूराः वानराः गच्छन्तु सर्वतः संचरन्तु किमर्थमित्यत्राह ज्ञेयमिति । नः अस्माकम् भयं भयनिमित्तम् छन्नं ज्ञेयम् तत्र तत्र निलीनैः शत्रुभिः प्रायशः प्रहारसंभवादिति भावः ॥ १०४ ॥

रा० टी०–रामस्येति । द्रुमैरायुते व्याप्ते सागरस्य तीरे सुग्रीवः सेनां न्यवेशयत् ॥ १०५ ॥

गो० टी०–रामस्येति । द्रुमायुते द्रुमैर्युक्ते । मिश्रणार्थाद्यौतेर्निष्ठा ॥ १०६ ॥

१०४–१०५] ति० टी०–मधुपाण्डवो मधुपिङ्गला वानरा एव जले यस्य सः । मधुशब्दसमभिव्याहारात्पाण्डुशब्दः पिङ्गलवर्णवाची ज्ञेयः ॥ १०४ ॥ १०५ ॥

रा० टी०–विरराजेति । सागरस्य समीपस्थं तद्बलं मधुपाण्डुजलः द्वितीयः सागर इव विरराज ॥ १०६ ॥

गो० टी०–विरराजेति । सागरस्य समीपस्थं तद्बलम् । मधुपाण्डुजलः मधुवत्पिङ्गलजलः द्वितीयः सागर इव विरराजेत्युत्प्रेक्षा ॥ १०७ ॥

रा० टी०–वेलेति । महोदधेः परं पारं काङ्क्षमाणाः हरिपुङ्गवाः वेलावनमुपागम्य निविष्टाः बभूवुरिति शेषः ॥ १०७ ॥

गो० टी०–वेलेति । स्पष्टम् ॥ १०८ ॥

१०६] ति० टी०–समुद्रशब्दमन्तर्धाय सैन्यसंनाहस्य सैन्यसंचारस्य शब्दः शुश्रुवे ॥ १०६ ॥

रा० टी०–तेषामिति । निविशमानानां तेषां रामादीनां सैन्यसन्नाहस्य सेनासंचारस्य निःस्वनः अर्णवस्य महानादमन्तर्धाय प्रशुश्रुवे ॥ १०८ ॥

गो० टी०–तेषामिति । 'अन्तर्धाय' स्थित इति शेषः ॥ १०९ ॥

१०७] ति० टी०–त्रिधा निविष्टा ऋक्षगोलाङ्गूलवानररूपत्रिपृथभेदेन । ऋक्षगोलांगूलानामपि वानरावान्तरजातित्वात्सर्वेषां वानरत्वेनाप्युक्तिर्नासंगता । त्रिधा निविष्टा त्रिवलया निविष्टेत्यन्ये ॥ १०७ ॥

रा० टी०–सेति । रामस्यार्थपरा वानराणां ध्वजिनी सेना त्रिधा वानरावान्तरजातिविशिष्टऋक्षगोलांगूलवानरयूथभेदेनातिमहत् महत् लघुयूथभेदेन वा त्रिप्रकारा निविष्टाऽभवत् ॥ १०९ ॥

गो० टी०–सेति । त्रेधा त्रिप्रकारैः । वलयव्यायामेनेति यावत् । वानरगोपुच्छभल्लकभेदेन त्रेधेति वा ॥ ११० ॥

१०८] ति० टी०–पश्यमाना पश्यन्ती । हृष्टाभूदिति शेषः ॥ १०८ ॥

रा० टी०–सेति । सा वानरवाहिनी महार्णवमासाद्य महार्णवं पश्यमाना पश्यन्ती सती हृष्टाऽभवदिति शेषः ॥ ११० ॥

गो० टी०–सेति । पश्यमाना पश्यन्ती सती । हृष्टा अभूदिति शेषः ॥ १११ ॥

१०९] ति० टी०–असंबाधं मध्ये नियंत्याभयरहितं

---

१ वलामिति गो. पाठः । २ विनिविष्टा इति गो. पाठः ।

चण्डनक्रग्रहाघोरं क्षपादौ दिवसक्षये । हसन्तमिव फेनौघैर्नृत्यन्तमिव चोर्मिभिः ॥ ११० ॥
चन्द्रोदये समुद्भूतं प्रतिचन्द्रसमाकुलम् । चण्डानिलमहाग्राहैः कीर्णं तिमितिमिङ्गिलैः॥ १११ ॥
दीप्तभोगैरिवाकीर्णं भुजङ्गैर्वरुणालयम् । अवगाढं महासत्त्वैर्नानाशैलसमाकुलम् ॥ ११२ ॥
सुदुर्गं दुर्गमार्गं तमगाधमसुरालयम् । मकरैर्नागभोगैश्च विगाढा वातलोलिताः ॥
उत्पेतुश्च निपेतुश्च प्रहृष्टा जलराशयः ॥ ॥ ११३ ॥
अग्निचूर्णमिवाविद्धं भास्वराम्बुमहोरगम् । सुरारिनिलयं घोरं पातालविषयं सदा ॥ ११४ ॥

वक्ष्यमाणसकलविशेषणं वरुणावासं पश्यन्तो निपेदुरित्यन्वयः ॥ १०९ ॥

११०] ति० टी०–चण्डनक्रैरूपैर्ग्रहैर्महाघोरम् । क्षपादौ दिवसक्षये । तेन प्रदोषकाले चन्द्रोदये प्रवृद्धफेनौघैर्हसन्तमिव स्थितम् । उपलक्षणमिदम् ऊर्मिभिर्नृत्यन्तमिव स्थितम्॥११०॥

१११] ति० टी०–समुद्भूतं वृद्धम् । ऊर्मिस्थप्रतिचन्द्रैः समाकुलं व्याप्तम् । चण्डानिलतुल्यवेगैर्जलचरैर्महाग्राहैः । तिमिः ' अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः ' इति लक्षितः तिमिगिलस्तन्निगरणशक्तः तैः कीर्णं व्याप्तम् ॥ १११ ॥

रा० टी०–दुरिति । दूरः पारः परतटो यस्य न संबाधः क्षोभो यस्य अभ्युद्भूतैर्नक्रग्राहैर्घोरं भयङ्करं दिवसक्षये क्षपादौ सायंप्रारम्भे प्रदोषकाले इत्यर्थः। चन्द्रोदये सति समुद्भूतं प्रवृद्धमत एव ऊर्मिभिर्नृत्यन्तमिव फेनौघैर्हसन्तमिव प्रतिचन्द्रेण चन्द्रप्रतिबिम्बेन समाकुलं संपृक्तं चण्डानिलवत् महाग्राहैर्हिंसार्थमन्यत्ते ग्राहकैः तिमितिमिङ्गिलैः कीर्णं व्याप्तम् । अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः । तं यो गिलति मत्स्यः स तिमिङ्गिल इतीरितः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥ १११ ॥ ११२ ॥

गो० टी०–दूरपारमित्यादि । दूरं पारं यस्य दूरपारं विशालमित्यर्थः असंबाधं संबाधरहितम् अक्षोभ्यमित्यर्थः। रक्षोगणनिषेवितं समुद्रे रक्षांसि वसन्तीति प्रसिद्धिः । चण्डनक्रैः करणैः ग्रहः ग्रहणं यस्य स तथोक्तः तम् । 'मृगयौ ग्रहणे युद्धे पूतनादावनुग्रहे । उपरागे च निर्बन्धे स्वभावे च ग्रहः स्मृतः' इति विश्वप्रकाशः । दिवसक्षये क्षपादौ सन्ध्यायामित्यर्थः । घोरं वर्धमानत्वाद्रयङ्करम् समुद्भूतम् उल्लसितम् प्रतिवीचि प्रतिविम्बितचन्द्रत्वात् प्रतिचन्द्रैः समाकुलम् चण्डानिलमहाग्राहैः चण्डानिलतुल्यवेगमहाग्राहैरित्यर्थः । तिमयः शतयोजनायता महामत्स्याः । तानपि भक्षयितुं क्षमास्तिमिङ्गिलाः । तिमीन्गिरतीति व्युत्पत्तेः । " गृ, निगरणे " इति धातुः । ग्रोचि इति लत्वम् । तदुक्तं पुराणे–'अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः । तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति सागरे, इति । दीप्तभोगैः शिरोरत्नकान्त्या प्रकाशितफणैरिव स्थितैः । महासत्त्वैः जलगजशिशुमारादिभिः । सुदुर्गं यादोभिः दुर्गमार्गं दुर्गमम् । नौपथसञ्चारायोग्यमित्यर्थः । योगकरिभ्यां वरुणावासवरुणालयपदद्वयनिर्वाहः ॥ ११२ ॥ ११६ ॥

११२] ति० टी०–दीप्तभोगैरुज्ज्वलदेहैर्भुजंगैराकीर्णं वरुणालयं पातालमिव ॥ ११२ ॥

रा० टी०–दीप्ताः प्रकाशिताः भोगाः येषां तैर्भुजङ्गैराकीर्णं महासत्त्वैः जलचरान्तरैरवगाढं निविडम् अत एव दुर्गमार्गं मार्गरहितम् अत एव सुदुर्गं गन्तुमशक्यम् असुरालयम् असुरनिवासम् वरुणालयं पश्यन्त एव हरियूथपाः निषेदुः अर्थनवकर्मैकान्वयि । इवशब्द एवार्थे ॥ ११३ ॥ ११४ ॥

११३] ति० टी०–सुदुर्गं शोभनानि लङ्घादीनि दुर्गाणि यस्मिन् दुर्गमार्गं दुष्प्रापमार्गम् । दुष्प्रापपरपारप्राप्त्युपायमित्यर्थः ॥ ११३ ॥

रा० टी०–मकरैरिति । मकरादिभिर्विगाढाः वातेन लोलिताश्चञ्चलाः प्रहृष्टाः जलराशयः ऊर्मय इत्यर्थः । उत्पेतुर्निपेतुश्च ॥ ११५ ॥

गो० टी०–तदानीं सागरमुत्प्रेक्षते–मकरैरिति । नागभोगैः सर्पकायैः विगाढाः प्रविष्टाः । वातलोलिताः वायुचलिताः अत एव प्रहृष्टाः जलराशयः तरङ्गाः उत्पेतुश्च निपेतुश्च उत्पत्य निपेतुरिति भावः ॥ ११७ ॥

११४] ति० टी०–जलराशय ऊर्मिरूपाः भास्वराः फणामणिभिर्भासमाना अभ्युद्गतमहोरगा जलसर्पा यस्मिंस्तम् । अतएवाग्निचूर्णं विस्फुलिङ्गकणमाविद्धं क्षिप्तमिवात्र दृश्यत इति शेषः । सदा पातालविषयं पातालगोचरं सागरम् ॥ ११४ ॥

रा० टी०–अग्नीति । भास्वराः मणिगणैरवभासिताः अभ्युद्गतमहोरगाः यस्मिन् अत एव सदा घोरं पातालविषयं पातालपर्यन्तस्थापिनं सागरं समुद्दिश्य आविद्धं प्रक्षिप्तम् अग्निचूर्णं विस्फुलिङ्ग इव अदृश्यतेति शेषः ॥ ११६ ॥

गो० टी०–अथ सागराम्बरयोः सर्वथा साम्यं वर्णयति अग्निचूर्णमित्यादिना । रात्रौ सागरस्य सलिलक्षोभतः अग्निचूर्णा इव दृश्यन्त इति प्रसिद्धिः अतो भास्वराण्यम्बूनि शीकररूपाणि यस्य तथोक्तम् अत एवाविद्धं आकीर्णम् अग्निचूर्णमिव सागरे दृश्यते । अम्बरं च कीर्णैर्नक्षत्रैस्तथा दृश्यते । भास्वराम्बु विमलतुहिनं च । महान्त उरगा यस्मिन् तन्महोरगम् इदमप्युभयत्रापि समानम् । आकाशे गन्धर्वादीनामिव नागानामपि सञ्चारसम्भवात् । राक्षसादिकर्तृकमसम्बद्धम् । सुरारयः असुरा राक्षसाश्च तेषां निवेशे

१ यद्वमिति गो. पाठः । २ प्रवृद्धा इति गो. पाठः । ३ वद्धमिति रा. पाठः । ४ विषयमिति गो. पाठः । ५ विषममिति गो. पाठः ।

सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् । सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥ ११५ ॥
संपृक्तं नभसाप्यम्भः संपृक्तं च नभोऽम्भसा । तादृग्रूपे स्म दृश्येते तारारत्नसमाकुले ॥ ११६ ॥
समुत्पतितमेघस्य वीचिमालाकुलस्य च । विशेषो न द्वयोरासीत्सागरस्याम्बरस्य च ॥ ११७ ॥
अन्योन्यैराहताः सक्ताः सस्वनुर्भीमनिःस्वनाः । ऊर्मयः सिन्धुराजस्य महाभेर्य इवाम्बरे ॥ ११८ ॥
रत्नौघजलसंनादं विपक्तमिव वायुना । उत्पतन्तमिव क्रुद्धं यादोगणसमाकुलम् ॥ ११९ ॥
ददृशुस्ते महात्मानो वाताहतजलाशयम् । अनिलोद्धूतमाकाशे प्लवन्तमिवोर्मिभिः ॥ १२० ॥
ततो विस्मयमापन्ना हरयो ददृशुः स्थिताः । भ्रान्तोर्मिजालसंनादं प्रलोलमिव सागरम् ॥ १२१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥

आवामभूतम् इदमप्युभयत्र तुल्यम् । पातालविषमं पातालवत् गम्भीरम् इदमप्युभयत्र तुल्यम् घोरं भयङ्करम् इदमप्युभयत्र तुल्यम् । एवमुक्तविशेषणविशिष्टं सागरं सागरः अम्बरप्रख्यम् अम्बराभम् उक्तविशेषणविशिष्टमम्बरं च सागरोपममदृश्यतेत्याकृष्य योजना । न केवलं साम्यं सर्वथा साम्यं चेत्याह—सागरमिति । क्लीबत्वमार्षम् ॥११८॥११९॥

११५] ति० टी०-अम्बरप्रख्यं वैपुल्यातलत्वैः । तैरेव चाम्बरं सागरोपमम् । उपमेयोपमालंकारः । एवं सति यत्फलति तद्वाच्यत्वस्याह—निर्विशेषं परस्परातिरिक्तसदृशरहितम् ११५॥

रा० टी०-सागरमिति । सागरम् अम्बरप्रख्यं तारागणसदृशमण्यादिमत्त्वेनाकाशसदृशम् । अम्बरं तु सागरोपमं सागरवर्तिमण्यादिसदृशतारावत्त्वेन सागरसदृशमदृश्यत इति । अतः सागरमंबरं च निर्विशेषं विशेषाभाववददृश्यत ॥ ११७ ॥

११६] ति० टी०-तयोरेव समानधर्मान्तरमाह—संपृक्तमिति । संसृष्टम् । तुल्यमित्यर्थः । नभोम्भसोस्तुल्यरूपत्वात्तारारत्नसमाकुले मुक्ताश्रेष्ठैर्नक्षत्रश्रेष्ठैश्च समाकुले समुद्रनभसी तादृग्रूपे परस्परसदृशरूपे दृश्येते ॥ ११६ ॥

रा० टी०-धर्मान्तरेणापि तयोः सादृश्यमाह—संपृक्तमिति । संपृक्तं संवृद्धम् ॥ ११८ ॥

गो० टी०-प्रकारान्तरेणापि उक्तं साम्यं दर्शयति-संपृक्तमिति । संपृक्तं संसृष्टम् तुल्यवर्णमिति यावत् हिशब्दो हेतौ । तादृग्रूपे अन्योन्यतुल्यरूपे तारारत्नसमाकुले सागराम्बरे दृश्येते स्म ॥ १२० ॥

११७] ति० टी०-समुत्पतितमेघस्याम्बरस्य वीचिमालाकुलस्य सागरस्य चेत्यन्वयः ॥ ११७ ॥

रा० टी०-धर्मान्तरेणापि सादृश्यमाह—समिति । समुत्पतिताः मेघाः यस्मिन् तस्याम्बरस्य वीचिमालाकुलसागरस्य च द्वयोर्विशेषो नासीत् ॥ ११९ ॥

गो० टी०-समुत्पतितेति । मेघवीचिमालयोर्बिम्बप्रतिबिम्बभावेनोपमानत्वम् ॥ १२१ ॥

११८] ति० टी०-सक्ता निरन्तराः ॥ ११८ ॥

रा टी०-अन्योन्यैरिति । अन्योन्यैराहताः ताडिताः सक्ताः निरन्तराः अत एव भीमनिःस्वनाः सिन्धुराजस्य ऊर्मयः अम्बरे महाभेर्य इव सस्वनुः ॥ १२० ॥

गो० टी०-अन्योन्यमिति । प्रथमं सक्ताः अथ आहता इत्यन्वयः ॥ १२२ ॥

११९] ति० टी०-वायुना विपक्तं संवर्धम्, अतएव रत्नौघक्षेपकोर्मिमयजलसंनादवन्तम्, अतएव क्रुद्धमुत्पतन्तमिव स्थितम् ॥ ११९ ॥

रा० टी०-रत्नेति । वायुना विपक्तं संवर्धम् अत एव रत्नौघजलसन्नादं रत्नसमूहप्रक्षेपकोर्मिरूपजलसन्नादविशिष्टम् अत एव क्रुद्धमिवोत्पतन्तं ददृशुरित्यपकृष्यते ॥ १२१ ॥

गो० टी०-रत्नौघेत्यादिश्लोकद्वयम् । रत्नौघजलयोः सन्नादो यस्मिन् । अनेन वेगवद्वायुजनितक्षोभातिशयादन्तर्गतरत्नानामुद्गमनमवगम्यते । वायुना विपक्तमिव वायुना एकीभूतमिव यादोगणसमाकुलं यादांसि जलजन्तवः तेषां गणेन समाकुलम् वाताहतजलाशयं जलाशयः समुद्रः वाताहताश्चासौ जलाशयश्चेति कर्मधारयः तम् ऊर्मिभिः आकाशे वल्गन्तमिव स्थितम् । इतनिरूपणार्थमेव अनिलोद्धूतमिति पुनरुक्तिः ॥ १२३ ॥ १२४ ॥

१२०] ति० टी०-जलाशयः समुद्रः ॥ १२० ॥

रा० टी०-ददृशुरिति । वाताहतं वायुप्रायं जलाशयं सागरं द्वयोः कर्मधारयः ॥ १२२ ॥

१२१] ति० टी०-भ्रान्तानां घूर्णतामूर्मिजालानां संनादो यत्र तम्, अतएव प्रलोलं प्रचलदिव स्थितम् ॥ १२१ ॥

इति श्रीरामभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०-तत इति । भ्रान्तानां भ्रमिप्रायाणामूर्मिजालानां संनादो यस्मिन् तं सागरं प्रलोलं चञ्चलमिव ददृशुः । आकाशे अनिलोद्धूतम् अनिलेन प्रापितम् । ऊर्मिभिः

---

१ अन्योन्यमिति गो. पाठः । २ आहव इति गो. पाठः । ३ महोत्साहा इति गो. पाठः । ४ प्रवल्गन्तमिति गो. पाठः । ५ ददृशुरवस्थेति गो. पाठः ।

पञ्चमः सर्गः ।

रामो लक्ष्मणेन संभाषमाणः सीतां स्मृत्वा मूदनदहनदग्धो विलपति ।

सा तु नीलेन विधिवत्स्वारक्षा सुसमाहिता । सागरस्योत्तरे तीरे साधु सो विनिवेशिता ॥ १ ॥
मैन्दश्च द्विविदश्चोभौ तत्र वानरपुङ्गवौ । विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशम् ॥ २ ॥
निविष्टायां तु सेनायां तीरे नदनदीपतेः । पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ ३ ॥
शोकश्च किल कालेन गच्छता ह्यपगच्छति । मम चापश्यतः कान्तामहन्यहनि वर्धते ॥ ४ ॥
न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति चै । एतदेवानुशोचामि वयोऽस्या ह्यतिवर्तते ॥ ५ ॥

रलपन्तं किंचित्कथयन्तमिव महात्मानो वानरा दृष्ट्वुः तत्स्तदर्शनाद्विस्मयमापन्नाः ॥ १२३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥

गो० टी०—तत इति । विशेषाभिधानार्थत्वात्र पुनरुक्तिः शान्तोर्मिजलसन्नादमिति । घूर्णिततरङ्गजलसन्नादौ यस्मिन्नम । प्रलोलमिव उद्भ्रान्तमिव ॥ १२५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

१-३] ति० टी०—स्वारक्षा सुकृतमाममन्तादक्षणं यस्याः सा सुसमाहिता सम्यगर्चिता ॥ १-३ ॥

रा० टी०—सेनाशब्दान्तमेवाह—सेति । स्वैनैव आरक्षा समन्तादक्षणं यस्याः अत एव सुसमाहिता सेना नीलेन साधु यथा भवति तथा विनिवेशिता ॥ १ ॥

रा० टी०—मैन्द इति । मैन्दो द्विविदश्च रक्षार्थं सेनां सर्वतो दिशं विचेरतुः ॥ २ ॥

रा० टी०—निविष्टायामिति । सेनायां निविष्टायां सत्यां रामो लक्ष्मणमब्रवीत् ॥ ३ ॥

गो० टी०—एवं कृतज्ञत्वमित्रानुरोधित्वपरोपकारित्वमहोत्साहत्वादिशरण्यत्वौपयिका रामगुणा दर्शिताः । अथ रामस्य कारुण्यरूपं प्रधानगुणं दर्शयितुं सर्गान्तरमारभते—सा त्विति । स्वारक्षा आममन्तादक्षन्तीत्यारक्षाः शोभनाः आरक्षाः यस्याः सा तथोक्ता विधिवत् नीतिशास्त्रोक्तरीत्या । सुसमाहिता निराकुला निवेशिता ॥ १ ॥

गो० टी०—मैन्द इति । दिशमिति जात्येकवचनम् । दिश इत्यर्थः । "उभसर्वतसोः०" इत्यादिना द्वितीया । सर्वत इति सप्तम्यर्थे तसिः । दिशां सर्वेषु प्रदेशेष्वित्यर्थः ॥२॥३॥

४] ति० टी०—अथ समुद्रवेलावनाद्यपरीपकदर्शनात्परतीरस्थसीतास्मृत्या शोचति—शोकश्चेति । गच्छता कालेनेष्टान्तरवियोगजः शोकोऽपि गच्छतीति प्रसिद्धिः । मम प्रियाविरहजे शोके तु विपरीतमित्याह—मम चेति । चस्त्वर्थौ ॥४॥

रा० टी०—तदाकारमाह—शोक इत्यादिभिः । गच्छता कालेन शोकः अपगच्छति निवर्तते किल प्रसिद्धमेतत् । कान्तामपश्यतो मम शोकस्तु अहन्यहनि प्रतिदिनं वर्धते ॥ ४ ॥

गो० टी०—समुद्रवेलावनाद्युपरीपकदर्शनाद्दुर्वहं विरहशोकं सोढुमशक्नुवन् सौमित्रिं प्रत्याह—शोकश्चेत्यादिना । प्रथमश्चकारोवधारणे द्वितीयस्त्वर्थः शोकः इष्टवस्त्वन्तरवियोगजनितः शोकः गच्छता कालेन अपगच्छति किलेत्यैतिह्ये । गच्छत्येवेति प्रसिद्धमिति लौकिका वदन्ति । कान्तामपश्यतो मम तु शोकः अहन्यहनि वर्धते लौकिकशोकविलक्षणो मम शोक इति भावः ॥ ४ ॥

५] ति० टी०—स्ववचिरात्प्रत्याहरिष्यामः किं शोकेनेत्यत्र तत्रैव विप्रचित्तया दुःखमित्याह न मे इति । प्रिया दूरे स्थितेति दुःखं मे नास्ति जीवर्षभदिवत्सवत् । तथा हृतेत्यपि न दुःखम् प्रबलदुष्कर्मवशं प्राप्तत्वात् अपि त्वस्या वयः प्राणावस्थितिकालोऽतिवर्तते । मासद्वयमात्रं जीवनमित्यर्थः । तत्रापि बहुदिवसत्वाद्यात् । यद्वा वयो यौवनमिति प्राकृतवद्वादः ॥ ५ ॥

रा०टी०—शोकमेवाह—नेति । सीता हृता इति मे दुःखमत्यन्तशोको न प्रिया दूरे इत्यपि न नन्वहं किं दुःखमित्यत आह—अस्याः प्रियायाः वयः स्थितिनियमितकालः यदतिवर्तत एतदेवानुशोचामि एतेन प्रबलैनैतदुःखेन पूर्वदुःखं तिरोहितमिति सूचितम् ॥ ५ ॥

गो० टी०—नन्वहं शत्रुहतायां दूरे स्थितायामस्यां प्रत्याहरणसमर्थस्य तव किं शोकेनेत्याशङ्क्य न तद्विषयोऽयं शोकः किंतूपभोगयोग्यस्य प्रियावयसो वैफल्यानुस्मरणादित्याह—मम इति । दुःखमिति प्रिया दूरे स्थितेति मे न दुःखम् क्षणीवेन प्रस्थानेन तस्य नित्यत्वात् । प्रबलदुष्कृता हृतेति मे दुःखं नास्ति तस्य तन्निष्ठैः कृतनाशनोद्यत्वात् । एतदेवानुशोचामि इदमेकमेव शोकनिमित्तम वयोऽस्या अतिवर्तते मम यौवनं न प्रत्याहर्तुं शक्यमिति भावः । अत्र यौवनमतिवर्तत इति नार्थः नित्ययौवनत्वात्तस्याः किं वयोऽतिवर्तते व्यर्थतयैव यातीति भावः । मानुषभावानुसारेण चैवं वचनम् ॥ ५ ॥

१ सेनेति गो. पाठः । २ चेति गो. पाठः ।

वाहि वात यतःकान्ता तां स्पृष्ट्वा मामपि स्पृश । त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥ ६ ॥
तन्मे दहति गात्राणि विषं पीतमिवाशये । हा नाथेति प्रिया सा मां ह्रियमाणा यदब्रवीत् ॥ ७ ॥
तद्वियोगेन्धनवता तच्चिन्ताविपुलार्चिषा । रात्रिंदिवं शरीरं मे दह्यते मदनाग्निना ॥ ८ ॥
अवगाह्यार्णवं स्वप्स्ये सौमित्रे धनता विना । एवं च प्रज्वलन्कामो न मां सुप्तं जले दहेत् ॥ ९ ॥
वहेतत्कामयानस्य शक्यमेतेन जीवितुम् । यदहं सा च वामोरूरेकां धरणिमाश्रितौ ॥ १० ॥

६] ति० टी०–गत्वा तस्यां दिशि कथयेति शेषः वाहि गच्छ तत्र स्थितां तां स्पृष्ट्वा मामपि स्पृश । किमेतावता तत्रेत्यत्राह––त्वयीति । कान्तागतेन त्वयि मे गात्रसंस्पर्शो निदाघतप्तदेहस्यन्दे समागमो व्याधिविशेषशमक एवं त्वत्स्पर्शो गात्रीयाधिव्याधिशमकोऽस्त्येव । निदर्शनाया अलंकारः ॥ ६ ॥

गो० टी०–अत्यन्तशोकाद्गात्रं दाह्यत इत्याह–वाहीति । हे वात त्वं वाहि । तां सीतां स्पृष्ट्वा मामपि स्पृश । स्पर्शने हेतुमाह–त्वयि सीतास्पर्शविशिष्टे मे गात्रसंस्पर्शे चन्द्रे दृष्टिसमागमः अक्षसंयोगः यथा चन्द्रे दृष्टिसमागमः तापशामकः तथा सीतास्पर्शवति त्वयि मम स्पर्शोऽपि तापशामक इत्यर्थः ॥ ६ ॥

गो० टी०–प्रियास्पृष्टत्वकरणेन विनोदहेतुत्वात्तत्संपादनार्थं वायुं प्रार्थयते–वाहीति । हे वात ! मे कान्ता यत्र यत्र यस्यां तत्र वाहि गच्छ । तत्र गत्वा किं । इत्यपेक्षायामित्यत्राह––मामपीति । न चैतदयुक्तं मे स्पर्शनीति वक्तव्यं दर्शयति––दृष्टिसमागमः चन्द्रे इव दृष्टेर्यथा तत्र हेतुः तदङ्गसंस्पर्शोऽपि त्वयि सदृशत्व । यथा चन्द्रोऽपि चन्द्रे वर्तते तत्प्राप्तिहेतुः तथा तत्रापि स्थित्वा तदङ्गं मूर्तं तां स्पृशन्न मामेव स्पृशतात्रेत्यभिप्रायः । ६ ॥

७] ति० टी०–अथ तस्याः प्रलापमाह––तन्मे इति । ह्रियमाणा सा हा नाथेति यदब्रवीत्तन्मे । अनुमानेन मे आशये चित्ते स्थितमित्यर्थः । पीतविषमिव मे गात्राणि दहति ॥ ७ ॥

रा० टी०–तदिति । ह्रियमाणा सीता हा नाथेति यन्नामाब्रवीत्तन्मे आशये मनोरूपे करणे स्थितं सत् पीतं विषमिव मे गात्राणि दहति ॥ ७ ॥

गो० टी०–तत्रैकदा तथोक्तिवत्तेवमप्रलपत्या अधीरत्वं किंतु कारणान्तरमस्त्येवेत्याह–तदिति । तदब्रवं मे आशये हृदये स्थितं सत् । मदनः संभवमाणं सदित्यर्थः । पीतं विषमिव गात्राणि दहतीव । किं तदब्रवं तत्राह––हा नाथेति । सा सर्वेषु । अत्र परिस्थित्या मया सहागता । ह्रियमाणा सर्वो राक्षसेन । रावणस्थये । न त्वां मूर्तिमं दृशमीव भरम संभवमं तेजसोत्पन्नत्वात्तत्तुल्यत्वाच्च तत्कार्यकारित्वाच्च भस्मीकर्तुं समर्थोऽपि तस्य तदङ्गं भोगिच्छयैवेत्यत्र तत्संस्पर्शे मत्प्राणत्वमेव पुरस्कृत्य सौ तदङ्गं तत्रैव गात्राणि दहति । अतस्त्वामेवोद्दिश्य सीताविषयकारुण्यमित्यवगम्यते । यदङ्गमदुःखिता हि करुणम् ॥ ७ ॥

८] ति० टी०–रात्रिंदिवमिति निपातः ॥ ८ ॥

रा० टी०–तदिति । तस्याः प्रियायाः वियोग एवेन्धनं तद्वता तस्याः चिन्तैव विपुलार्चिर्यस्य तेन मदनाग्निना । मनोरूपकरणेन मे शरीरं रात्रिंदिवं दह्यते ॥ ८ ॥

गो० टी०–अथ संतापो जलप्रवेशं विना न शाम्यतीति वक्तुं तस्याग्रित्वं सावयवं रूपयति–तद्वियोगेति । मदनाग्निः पर्यायेणैव विषोत्पन्नत्वरूपम् । संततत्वेन चिन्तायाः ज्वालारूपणम् । रात्रिंदिवमिति । "अत्यन्त०" इत्यादिना सप्तमीसाधुत्वम् । शीतलाशीतलकालाग्निविशेषेण दहत इत्यर्थः ॥ ८ ॥

९] ति० टी०–सौमित्रे त्वमेवैव । विशेषेति शेषः । भवता विनाहमेक एवार्णवमवगाह्य स्वप्स्ये । एवं सति प्रज्वलत्कामो जले सुप्तं न दहेत् । जलस्याग्निविरोधित्वात् । मनोमूलत्वात्तस्य सप्तौ मनउपरमेणोपरमाभेति भावः । भवता विनेत्यत्रैव का कित्वेन निद्राप्राप्तौ ॥ ९ ॥

रा० टी०–अवगाह्येति । हे सौमित्रे लक्ष्मण भवता विना अर्णवमवगाह्य स्वप्स्ये तत्प्रदोजनमाह जलसुप्तं मां एवं प्रज्वलन् कामोऽभिलाषातिशयो न दहेत् । तिरोहितो निवर्तेतेत्यर्थः । भवता विनेत्युक्त्या ज्ञायतेऽयं विशेषः सचित्तस्य तेन त्वद्विनो मच्चित्तं नागच्छत्यिति हेतुः सूचितः तत्र सौ।। तिरोहितविषये तदानीं दिदृक्षाभावः सूचितः ॥ ९ ॥

गो० टी०–अवगाह्येति । सौमित्रे लक्ष्मणेत्यत्र भवता विना अर्णवमवगाह्य स्वप्स्ये । अनेन लक्ष्मणस्य शेषावतारत्वमुक्तम् । अर्णवशयने हि शेषिणोऽपि (?) । किं प्रयोजनमित्याह–कथंचिदिति । इदानीं प्रज्वलन् स कामः जले सुप्तं मां कथंचिदहेत् कृच्छ्राद्दहेत् । मन्दीभवेदित्यर्थः ॥ ९ ॥

१०] ति० टी०–यस्माद्दहं सा च वामोरूरेकां धरणिमाश्रितौ तेनैतत्कामयमानस्य बहु । एतेन जीवितुं शक्यम । कामुकस्य हि अभ्यासेन यथा जीवति तथैतेनापि जीवितुं शक्यम । एकभूलोकस्थत्वेन लाभसंभवमत्वादिति भावः ॥ १० ॥

रा० टी०–वद्धिति । यत् यस्मात् अहं वामोरूः सा सीता च एकां धरणिमाश्रितौ अतेन एकधरण्याश्रितत्वेन हेतुना एतत् प्रियासंयोजनं बहुकामयानस्य मे जीवितुं शक्यम ॥ १० ॥

१ स्थितां । २ ०मेवं । ३ कर्णेतिति गो. पाठः । ३ स मेति गो. पाठः ।

केदारस्येव केदारः सोदकस्य निरुदकः । उपप्लवेन जीवामि जीवन्तीं यच्छृणोमि ताम् ॥ ११ ॥
कदा नु खलु सुश्रोणीं शतपत्रायतेक्षणाम् । विजित्य शत्रून्दुर्धर्षाम् सीतां रक्षीतामिव श्रियम् ॥ १२ ॥
कदा सौम्यमुखं तस्याः पद्मकिञ्जल्कपाण्डुरम् । ईषदुन्नम्य वक्ष्यामि रमायनमिवातुरः ॥ १३ ॥
तौ तस्याः सहितौ पीनौ स्तनौ वाजिहरोपमौ । कदा नु खलु सोत्कम्पौ हंसन्त्या मां भजिष्यतः ॥ १४ ॥
सा नूनमसितापाङ्गी रक्षोमध्यगता सती । मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति ॥ १५ ॥
कथं जनकराजस्य दुहिता मम च प्रिया । राक्षसीमध्यगा शेते क्षुधा दशरथस्य च ॥ १६ ॥
अविशोभ्याणि रक्षांसि सा विशोभयति प्रिया । विधूय जलदाञ्जालाञ्छशिलेखा शरत्स्विव ॥ १७ ॥
स्वभावतनुका नूनं शोकेनानशनेन च । भूयस्तनुतरा सीता देशकालविपर्ययात् ॥ १८ ॥
कदा नु राक्षसेन्द्रस्य निशायोरसि सायकान् । शोकं प्रत्याहरिष्यामि शोकमुत्सृज्य मानसम् ॥ १९ ॥

गो० टी०—यौ पुनरुपप्लवात्मकत्वात् मम जीवनधारणहेतवौ सन्तौ सा तस्याश्चलत्वात् तयोरुपप्लवात्मकत्वमपि जानन् तत्रापि—यद्विश्वासादिति । आकूतेन । यौ स्तनौ मां कदा [१] भजिष्यतः सेविष्यतः इति यत् यत् एव तौ उपप्लवात्मकं मम जीवनं धारयतश्चित्तिनौ । मम जीवितुं कथमपि एकस्यापि [२] अभावे [३] अनयोरेकतरस्यापि [४] दुर्लभत्वात् शोकसाध्यं न भविष्यतीति । ॥ १० ॥

११] ति० टी०—यच्च सोदकस्य केदारस्येवोपप्लवेन मे जीवनं तच्चोपप्लवोपि केदारस्यैव मम जीवनं च भूयस्यति तत्रापि तत्रभवतीश्रवणादपि जीवामि ॥ ११ ॥

रा० टी०—केदारस्येति । यथा सोदकस्य [५] केदारस्य केदारस्य [६] उपप्लवेन [७] जीवनं [८] तथा [९] उपप्लवेन जीवामि ॥ ११ ॥

गो० टी०—केदारस्येति । यद्यपि तौ [१०] उपप्लवौ तथापि तेन । हि० इत्यनेन केदारः उक्तः । सो० अस्य । यस्य जलस्यानेन चोपप्लवेनेव जीवामि ॥ ११ ॥

१२] ति० टी०—सुश्रोणीं स्त्रियमिव सीतां सा रक्षोभिरपहृतां पुनर्लब्धामिव ॥ १२ ॥

रा० टी०—कदेति । अहम् विजित्य [११] सीतां पतिव्रतां स्त्रियं रक्षोभिरपहृतां पुनर्लब्धां सीतां ॥ १२ ॥

गो० टी०—कदेति । स्पष्टम् ॥

१३–१५] ति० टी०—स्पष्टम् ॥ १३ ॥ १४ ॥ १५ ॥

रा० टी०—कदेति । सुखाकारतया आनीं च यस्मिन् तत् पद्ममिव तस्याः आननं सकाशात् आतुरः रोगी रसायनं युक्तसिद्धपारदमिव कदा प्रक्ष्यामि ॥ १३ ॥

गो० टी०—कदा नु इति । रसायनं अरिष्टसिद्धिकर्मोषधविशेषम् [१२] आतुरः रोगी । आतुरोऽभिलोभान्ध इत्यमरः ॥ १३ ॥

रा० टी०—तावितति । हसन्त्याः तस्याः प्रियायाः सोत्कम्पौ स्तनौ मां कदा भजिष्यतः अश्नुतः ॥ १४ ॥

गो० टी०—तस्या इति । सहितौ स्निग्धौ ॥ १४ ॥

रा० टी०—सेति । असौ नाथो यस्याः सा सीता नाथहीनेव रक्षोमध्यगता सती त्रातारं मां कं कि नाधिगच्छति अधिगमिष्यति अधिगमिष्यतीत्यर्थः ॥ १५ ॥

गो० टी०—सेति । स्पष्टम् ॥ १५ ॥

रा० टी०—कथमिति । अयं प्रिया रक्षोमध्यगता सती कथं शेते ॥ १६ ॥

गो० टी०—कथमिति । स्पष्टम् ॥ १६ ॥

१७] ति० टी०—अविशोभ्याणि दुष्प्रधर्षाणि रक्षांसि विधूय मदाज्ञा लेषां विनाशं कृत्वा—अविशोभयतीति संबन्धः ॥ १७ ॥

रा० टी०—अविशोभ्याणीति । अत्र ईश्वरस्य जलधरान् विधूय अभिलंघ्य चन्द्रलेखा । रक्षांसि विधूय सा सीतेत्यन्वेष्यति ॥ १७ ॥

गो० टी०—कदेति । अविशोभ्यशब्दसाम्येन पदम् अविशोभ्याणि दुष्प्रधर्षाणि रक्षांसि ॥ १७ ॥

१८] ति० टी०—स्वभावतनुका पक्षाद्या कृशशरीरा देशकालविपर्ययाद्राक्षसीपुरे [१३] अन्नाभावात् [१४] देशकालसंबन्धात् ॥ १८ ॥

रा० टी०—स्वभावेति । स्वभावेन प्रकृत्या तनुः सूक्ष्मशरीरं यस्याः सा सीता देशकालविपर्ययात् सत्यसंपादकदेशकालयोरभावात् हेतोः शोकेन अनशनेन भोजनाभावेन च भूयस्तनुतरा अतिसूक्ष्मा [१५] प्रतीयतेति शेषः ॥ १८ ॥

गो० टी०—स्वभावेति । देशकालविपर्ययात् देशकालयोर्व्यत्ययात् । सुखावहदेशकालयोरभावात्तद्विरुद्धयोरसत्त्वात् सा भविष्यतः ॥ १८ ॥

१९] ति० टी०—प्रत्याहरिष्यामि । आनयिष्यामि शोकः । मानसं मनसि जातमानम् । प्रत्याहरणसंभावनया पुनरपि शोकोत्साहोत्कर्षः साधुत्वम् ॥ १९ ॥

रा० टी०—कदेति । राक्षसेन्द्रस्य उरसि सायकान् स

---

१ स्थितं गो. पाठः । २ विच्छेदेति गो. समुच्चाय्य प्रवासीमीति रा. पाठः । ४ तस्यास्तु संहतावितो गो. पा. ५ स्थितस्य इति गो. पाठः । ६ सा यमेति गो. पाठः । ७ कदाचिद्भोक्ष्येति गो. पाठः । ८ सीतां क्रिति गो. पाठः ।

कदा नु खलु मे साध्वी सीतामरसुतोपमा । सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं जलम्॥ २० ॥
कदा शोकमिमं घोरं मैथिलीविप्रयोगजम् । सहसा विप्रमोक्ष्यामि वासः शुक्लेतरं यथा ॥ २१ ॥
एवं विलपतस्तस्य तत्र रामस्य धीमतः । दिनक्षयान्मन्दवेपुर्भास्करोऽस्तमुपागतः ॥ २२ ॥
आश्वासितो लक्ष्मणेन रामः संध्यामुपासत । स्मरन्कमलपत्राक्षीं सीतां शोकाकुलीकृतः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ।

इत्थं लङ्कायां रावणो राक्षसैः सह युद्धे जयविषये मन्त्रयते ।

लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम् । राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना ॥
अब्रवीद्राक्षसान्सर्वान्किंचिदाकुलसूचकः ॥ ॥ १ ॥
पुरीं च प्रविशद्भिश्च लङ्का दुष्प्रसहा पुरी । तेन वानरमात्रेण दृष्टा सीता च जानकी ॥ २ ॥

२० विप्रयोगजं । लङ्कायां कृतं कर्म घोरं शोकं सीतालाभेनैव हता प्रत्याहरिष्यामि ॥ १९ ॥

गो० टी०—कदा नु खलीति । सीतां प्रत्याहरिष्यामि शोकं कदा नु शोकमुत्सृज्य रामवमिति । सीतां प्रत्याहृत्य कदा नु शोकमुत्सृज्य रामवमिति । आत्मनं व्याजहार स्वयमितीतिवत्तथा ॥ १९ ॥

२०] ति० टी०—मे कण्ठमालम्ब्येत्यन्वयः ॥ २० ॥

रा० टी०—कदेति । मे मम कण्ठमालम्ब्य सोत्कण्ठा सीता [illegible] ॥ २० ॥

गो० टी०—कदेति । [illegible] ॥ २० ॥

२१] ति० टी०—[illegible] मलिनम् ॥ २१ ॥

रा० टी०—कदेति । मोक्ष्यामि विप्रयोगजं [illegible] कदा विप्रमोक्ष्यामि ॥ २१ ॥

गो० टी०—कदेति । [illegible] ॥ २१ ॥ २२ ॥

२२] ति० टी०—दिनक्षयो [illegible] विप्रयोगं [illegible] ॥ २२ ॥

रा० टी०—एवमिति । तत्रैवं विलपतः दिनक्षयात् [illegible] भास्करो मन्दवपुरिव लोहितलेखाः सन् अस्तमुपागतः ॥ २२ ॥

२३] ति० टी०—सीतां स्मरन् हेतौ शतृप्रत्ययः [illegible] शोकाकुलीकृतो रामो लक्ष्मणेनाश्वासितः॥ २३ ॥

[illegible] श्रीमद्रामायणतिलके [illegible] काव्ये युद्धकाण्डे षष्ठः सर्गः ॥ ७ ॥

गो० टी०—आश्वासित इति । शोकेन आकुलीकृतः [illegible] आश्वासितः सन् संध्यामुपासत ॥ २३ ॥

[illegible] श्रीमद्रामायणे रामायणतिलके [illegible] काव्ये युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

१] ति० टी०—अथ कर्तुः प्रस्तुतप्रतिपित्सया [illegible] रामानयनवृत्तान्तमुपपत्तिं तल्लिङ्गवृत्तान्तकालिकः [illegible] उपवर्णयते तावत्—लङ्कायामिति । हनुमता शक्रेणेव कृतं घोरं कर्म दृष्ट्वा राक्षसानवीत् ॥ १ ॥

रा० टी०—लङ्कायामित्यादिभिः । राक्षसेन्द्रः [illegible] हनुमता कृतं घोरं कर्म दृष्ट्वा किंचित्वाकुलः सन् अब्रवीत् सर्वलोकभयंकरत्वी ॥ १ ॥

गो० टी०—एवं रामदूतान्तमुक्त्वा हनुमत्कर्तृकं [illegible] रक्षोवृत्तान्तं वक्तुमुपक्रमते—लङ्कां यामिति । घोरं दुर्दर्शम् । शक्रेणेव शक्रतुल्येन । "इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति विभक्तरलोपः ॥ १ ॥

२] ति० टी०—दाक्षीजभाव—धर्षितेति । अक्रान्तेत्यर्थः । वानरमात्रेण । एकेन निरायुधेन चेत्यर्थः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—धर्षितेत्यादिभिः । वानरमात्रेण सहायान्तररहितेनेत्यर्थः । दुष्प्रसहा अतितेजोविशिष्टेत्यर्थः लङ्का प्रविश्य [illegible] जनकसुता सीता च दृष्टा ॥ २ ॥

गो० टी०—धर्षितेति । वानरमात्रेण [illegible] तीयेन वानरेणेत्यर्थः ॥ २ ॥

[illegible] ॥ ६ ॥

प्रासादो धर्षितश्चैत्यः प्रवरा राक्षसा हताः । आविला च पुरी लङ्का सर्वो हनुमता कृतः ॥ ३ ॥
किं करिष्यामि भद्रं वः किं वो युक्तमनन्तरम् । उच्यतां नः समर्थं यत्कृतं च सुकृतं भवेत् ॥ ४ ॥
मन्त्रमूलं च विजयं प्रवदन्ति मनस्विनः । तस्माद्वै रोचये मन्त्रं रामं प्रति महाबलाः ॥ ५ ॥
त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः । तेषां तु समवेतानां गुणदोषौ वदाम्यहम् ॥ ६ ॥
मैत्रस्त्रिभिर्हि संयुक्तः समर्थैर्मन्त्रनिर्णये । मित्रैर्वापि समानार्थैरन्यैरपि च बौधकैः ॥ ७ ॥
सहितो मन्त्रयित्वा यः कर्मारभ्यान्प्रवर्तयेत् । दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ॥ ८ ॥
एकोऽर्थं विमृशेदेको धर्मं प्रकुरुते मनः । एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥ ९ ॥
गुणदोषौ न निश्चित्य स्वयत्वा दैवेष्वपाश्रयम् । करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः ॥ १० ॥

३] ति० टी०—आविला क्षोभिता ॥ ३ ॥

रा० टी०—प्रासादो इति । चैत्यः प्रासादः समरप्रधानभूतः प्रासादः । आविला क्षोभिता ॥ ३ ॥

४] ति० टी०—वो भद्रमस्तु, किं करिष्यामि, अनन्तरं वो युष्माकं किं युक्तम् योग्यालम्बनं किं स्यात् इति शेषः । यत्कर्मणि नः समर्थं भवेत्तत् अत्र युद्धे सम्यग्व्यवस्थितिं सामर्थ्यं भवेत्तदुच्यताम् ॥ ४ ॥

रा० टी०—किमिति । वो युष्माकं किं पुनः कर्तव्यविषयेऽत्र प्रारब्धे यत् कर्म अनन्तरं निश्चितं सत् सुकृतं सुसाधितं सफलं न यत्पर्यवसाने च भवेत् तत् नो अस्मभ्यम् उच्यतां अहं च किं करिष्यामि ॥ ४ ॥

गो० टी०—किं करिष्यामीति । अनन्तरं किं वा यत्नं यत्नः स्वयं हितैश्च समर्थैरिति तेन्यर्थो हितैश्च विशेषणम् । कृत्यस्य अनुष्ठितस्य सतः सुनिष्ठितम् सोपकरणकृतेषु सत्सु कार्यं किमु उच्यता करिष्यामि वो भद्रमस्तित्यर्थः ॥ ४ ॥

५] ति० टी०—सर्वत्र समर्थान्य तव को विचार इत्यत्र सामर्थ्यहेतुमाह—मन्त्रमूलमिति । मनस्विनः शूराः ॥ ५ ॥

रा० टी०—प्रभो योऽयमहं—मन्त्रेति । मनस्विनो विजयं मन्त्रमूलं मन्त्रकारणकं प्रवदन्ति तत्प्रसिद्धेः । रामं प्रति रामोद्देश्यकत्वे मन्त्रं रोचये अभिलाषपूर्वकं पृच्छामि ॥ ५ ॥

गो० टी०—यद्यवश्यत्व किं मन्त्रेणेत्याशङ्क्य सर्वेषामपि विजयस्य मन्त्रमूलत्वान्मन्त्रः कर्तव्य इत्याह—मन्त्रमूलमिति ॥ ५ ॥

६] ति० टी०—स्वस्योत्तमप्रभुत्वप्रत्यायनहेतुतया मन्त्रवैविध्यात्प्रभुवैविध्यमाह—त्रिविधा इति । पुरुषा मन्त्रापेक्षिणः प्रभुपुरुषाः समवेतानां संकीर्णैकार्थां लक्षणज्ञानं विना विवेक्तुमशक्यानां गुणदोषौ । उत्तमानां गुणो मध्यमानां गुणदोषाधमानां दोषश्चेति विवेकः ॥ ६ ॥

रा० टी०—स्वस्योत्तमत्वप्रतिपादनाय मन्त्रभेदकृतोत्तमत्वमाह—त्रिविधा इति । ये त्रिविधाः उत्तमाः तेषां समवेतानां लक्षणज्ञानमन्तरा विभागासिद्धौ अशक्यानां गुणदोषावहं वदामि ॥ ६ ॥

गो० टी०—मन्त्रस्य करणत्वेऽपि स्वयमेव संभवत्सु किं बहुभिर्मन्त्रिभिरुक्तैः बहुभिः सह मन्त्रयितुरुत्तमत्वं यत्कर्तृप्रतिज्ञार्थकेन मन्त्रयितृशब्देनाह—त्रिविधा इत्यादिना । समवेतानां संकीर्णैकार्थानाम् । लक्षणज्ञानं विना विवेक्तुमशक्यानां गुणदोषौ । उत्तमानां गुणः । अधमानां दोषः । लक्षणज्ञानं मिश्रणम् ॥ ६ ॥

७-८] ति० टी०—यस्य मन्त्र उत्तमानां गुणैर्मिश्रितः संयुक्तो भवति, यो वा मित्रादिभिस्त्रिभ्योऽधिकैरपि सहितो मन्त्रयित्वा कर्माण्यारभ्य प्रवर्तयेत् दैवे दैवसहाये च यत्नं कुरुते तमुत्तमं पुरुषमाहुः ॥ ७ ॥ ८ ॥

रा० टी०—मन्त्रिभिरिति । हितसंयुक्तैर्हितत्वविशिष्टैः मन्त्रिभिर्वा मन्त्रनिर्णये समर्थैः समानार्थैः तुल्यफलतुल्यसमाहितैर्मित्रैर्वा कार्यवद्भिः सहितो यो मन्त्रयित्वा कर्माण्यारभ्य लौकिकफलप्रारम्भान् प्रवर्तयेत् दैवे दैवकार्ये यत्नं च कुरुते तं पुरुषोत्तममाहुः । अर्थचतुष्टयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०—मन्त्रिभिरिति । हितसंयुक्तैः हितवद्भिः समानार्थैः समानफलवद्भिः । कर्माण्यारभ्य आरब्धव्यानि । दैवे दैवसहाये कृतेते ॥ ७ ॥ ८ ॥

९] ति० टी०—एकोऽर्थमिति । विचारोऽत्र गुणः इतरनिरपेक्षता दोषः ॥ ९ ॥

रा० टी०—एक इति । एक एव अर्थं कार्यं विमृशेत् विचारयेत् एक एव धर्मं मनः प्रकुरुते एक एव कार्याणि कुरुते च तं मध्यममाहुः ॥ ९ ॥

गो० टी०—एकोऽर्थमिति । धर्मं पुण्यादिदेवसाधनं मनः मनःपूर्वं यत्नम् ॥ ९ ॥

१०] ति० टी०—गुणदोषौ पुरुषायुष्यहितादिहानिमिष्टैः सह न निश्चित्य स्वयत्वा दैवेष्वपाश्रयं दैवोपायौ कृत

१ वेति गो. पाठः । २ प्रासादावा इति गो. पाठः । ३ मन्त्रिभिर्हितकृतैरिति वो. रा. पाठः । ४ यद्यहितेति गो. पाठः । ५ धर्मेति गो. पाठः

यथेमे पुरुषा नित्यमुत्तमाधममध्यमाः । एवं मन्त्रोऽपि विज्ञेय उत्तमाधममध्यमः ॥ ११ ॥
ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा । मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम् ॥ १२ ॥
बह्वीरपि मतीर्गत्वा मन्त्रिणामर्थनिर्णयः । पुनर्यत्रैकतां प्राप्तः स मन्त्रो मध्यमः स्मृतः ॥ १३ ॥
अन्योन्यमतिमास्थाय यत्र संप्रतिभाष्यते । न चैकमत्ये श्रेयोऽस्ति मन्त्रः सोऽधम उच्यते ॥ १४ ॥
तस्मात्सुमन्त्रितं साधु भवन्तो मतिसत्तमाः । कार्यं संप्रतिपद्यन्तामेतत्कृत्यं मतं मम ॥ १५ ॥
वानराणां हि धीराणां सहस्रैः परिवारितः । रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः ॥ १६ ॥

र्यं करिष्यामीत्युपक्रम्य तदप्यन्ते उपेक्षेत्निवर्तयेत्स नराधमः ॥ १० ॥

रा० टी०–गुणेति । गुणदोषौ न निश्चित्य मन्त्रिभिः सह विचारेणानिर्णीय दैवव्यपाश्रयं देवाश्रयत्वं च त्यक्त्वा कार्यं करिष्यामीत्युक्त्वेति शेषः । उपेक्षेत् त्यजेत् स नराधमः नराधमनरः ज्ञेय इति शेषः ॥ १० ॥

गो० टी०–गुणदोषाविति । गुणदोषौ हिताहिते अनिश्चित्य दैवव्यपाश्रयं त्यक्त्वा करिष्यामीत्युपक्रम्य यः कार्यमुपेक्षेत् उपेक्षेत न समाप्नुयात् ॥ १० ॥

११] ति० टी०–यद्वशात्प्रभुत्रैविध्यमुक्तं तस्य मन्त्रस्यादानीं त्रैविध्यमाह–यथेति ॥ ११ ॥

रा० टी०–यदाचरणेन राज्ञां त्रैविध्यं तन्मन्त्रस्यापि त्रैविध्यमाह—यथेत्यादिभिः । उत्तमाधममध्यमः उत्तमाधमाभ्यां सहितो मध्यमो मन्त्रोऽपि विज्ञेयः ॥ ११ ॥

गो० टी०–यथेति । स्पष्टम् ॥ ११ ॥

१२] ति० टी०–तानेव मन्त्रप्रकारानाह—ऐकमत्यमिति । शास्त्रदृष्टेन नीतिशास्त्रप्रतिपादितेन चक्षुषा नयचक्षुषा मन्त्रिणो यत्र मन्त्र ऐकमत्यमुपागम्य निरताः प्रतिष्ठितास्तं मन्त्रमुत्तममाहुः ॥ १२ ॥

रा० टी०–तदेव निष्पादयन्नाह–ऐकमत्यमित्यादिभिः । ऐकमत्यम् एकसंमतिमुपागम्य प्राप्य यत्र मन्त्रिणो निरताः तं मन्त्रमुत्तममाहुः ॥ १२ ॥

गो० टी०–उक्तत्रैविध्यं मन्त्रेष्वतिदिशति–ऐकमत्यमिति । ऐकमत्यम् एकां मतिमुपागम्य शास्त्रदृष्टेन स्वभ्यस्तशास्त्रेण राजदन्तादित्वात्परनिपातः तदूपेण चक्षुषा उपलक्षिताः मन्त्रिणः यत्र मन्त्रे निरताः तम् उत्तममन्त्रमाहुः ॥ १२]

१३] ति० टी०–बह्वीर्मतीर्गत्वा बहुविरुद्धमतिविषयतां प्राप्येत्यर्थः पुनर्वैमत्यानन्तरं राजभीत्याद्युपाधितो यत्र मन्त्र एकतामेकमत्यं प्राप्तः स मन्त्रो मध्यमः ॥ १३ ॥

रा० टी०–बह्वीरिति । यत्र यस्मिन् मन्त्रे अर्थनिर्णयः कृत्यनिश्चयः मन्त्रिणां बह्वीर्विरुद्धानेकविधाः मतीर्गत्वा पुनरेकतां प्राप्तः स मध्यमः स्मृतः ॥ १३ ॥

गो० टी०–बह्वय इति । यत्र मन्त्रे । मन्त्रिणां मतयः बह्वयः बहुधा भूत्वापि अर्थनिर्णये अर्थनिर्णयरूपफलविषये एकतां प्राप्ता भवन्ति स मन्त्रो मध्यमः स्मृतः । नीतिज्ञैरिति शेषः ॥ १३ ॥

१४] ति० टी०–अन्योन्यमति भिन्नभिन्नमतिमास्थाय यत्र मन्त्रे समन्तात्प्रति प्रतिस्पर्धया भाष्यते, कथंचित्कष्टेनैकमत्येऽपि श्रेयश्च नास्ति स मन्त्रोऽधमः ॥ १४ ॥

रा० टी०–अन्योन्यमिति । अन्योन्यमतिं विरुद्धपरस्परबुद्धिमास्थाय वियमानो यो मन्त्रः संप्रतिभाष्यते ऐकमत्यं एकमनौ सत्यां न संप्रतिभाष्यते सोऽधम उच्यते अत एव न श्रेयोऽस्ति तेन मन्त्रेणेति शेषः ॥ १४ ॥

गो० टी०–अन्योन्यमिति । यत्र मन्त्रे । मन्त्रिभिः अन्योन्यं मतिं स्वां स्वां बुद्धिम् आस्थाय प्रधानीकृत्य संप्रतिभाष्यते व्यवहियते । अनेनोत्तममन्त्रव्यावृत्तिरुक्ता । मध्यममन्त्रव्यावृत्त्यर्थमाह–न चेति । ऐकमत्ये तेषां मन्त्रिणां श्रेयश्च प्रीतिश्च नास्ति स मन्त्रोऽधम उच्यते ॥ १४ ॥

१५] ति० टी०–उपसंहरति—तस्मादिति । यत्कार्यं सुमन्त्रितं भवति तदेव साधु भवति । भवन्तश्च मन्त्रे मत्या उत्तमाः श्रेष्ठाः, अतो यत्कार्यं सुमन्त्रितं साधु भवति तत्कार्यं संप्रतिपद्यन्तामैकमत्येन निश्चिन्वन्तु । यदेव भवद्भिर्निश्चितं तदेव मम कृत्यं कर्तुं योग्यम् । मतमिष्टम् ॥ १५ ॥

रा० टी०–तस्मादिति । तस्मात् उक्तहेतोः सुमन्त्रितं सुमन्त्रेण निष्पन्नं कार्यं भवन्तः प्रतिपद्यन्तां प्रापयन्तु कर्मणि स्वरर्थः एतत् मन्त्रेणनिश्चितमेव कृत्यं मम मतं कर्तव्यत्वेनेष्टम् ॥ १५ ॥

गो० टी०–तस्मादिति । सुमन्त्रितं सुनिश्चितम् । साधु समीचीनम् । कार्यं संप्रतिपद्यन्ताम् ऐकमत्येन जानन्तु । एतत् ऐकमत्येन सुनिश्चितं कार्यम् मम कृत्यम् अतिशयेन कर्तव्यम् ॥ १५ ॥

१६] ति० टी०–विचारप्रयोजिका बहुभीतिश्च निश्चितास्माकमित्याह—वानराणामिति । अभ्येतीति वर्तमानसामीप्ये लट् अचिरादागमिष्यत्येवेत्यर्थः ॥ १६ ॥

रा० टी०–मन्त्रविषयं निरूपयन्नाह—वानराणामित्यादिभिः । वानराणां सहस्रैः बहुभिः परिवारितः अत एवास्माकमुपरोधको रामः लङ्कामभ्येति ॥ १६ ॥

---

१ मन्त्रो हि विज्ञेय उत्तमाधममध्यमा इति गो. पाठः । २ ह्यधोऽपि मतयो भूत्वेति गो. पाठः । ३ निश्चित्य इति गो. पाठः । ४ अत्र मति गो. पाठः । ५ वीराणामिति गो. पाठः ।

तरिष्यति च सुव्यक्तं राघवः सागरं सुखम् । तरसा युक्तरूपेण सानुजः सपदानुगः ॥ १७ ॥
समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा । तस्मिन्नेवंविधे[1] कार्ये विरुद्धे वानरैः सह ॥
हितं पुरे च सैन्ये च सर्वं संमन्त्र्यतां त्वया ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ।

रावणोक्त्यनन्तरं सर्वे राक्षसाः स्वबलप्रशंसिपूर्वकं विषादो न कर्तव्य इति समाश्वासयन्ति रावणम् ।

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः । ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम् ॥ १ ॥
द्विपत्पक्षमविज्ञाय नीतिवाक्यास्त्वबुद्धयः । राजन्परिघशक्त्यृष्टिशूलपट्टिशकुन्तलम् ॥ २ ॥
सुमहन्नो बलं कस्माद्विषादं भजते भवान् । त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ॥ ३ ॥

गो० टी०–गतं तु गतमेव किं मन्त्रकरणे इतः किं तस्मिन्नमित्यत आह–वानराणामिति । अभ्येति अभ्येष्यति । "वर्तमानसामीप्ये वर्तमानवद्वा" इति वर्तमाननिर्देशः । उपरोधकः उपरोद्धुम् । क्रियायां क्रियायां लुङ् ॥ १६ ॥

१७] ति० टी०–ननु कथं दुस्तरं सागरं स्थिते रामानुजे शङ्कत्यत्राह—तरिष्यतीति । सुव्यक्तं सुखं तरिष्यति । प्रथमान्तपाठे सागरस्य गोदापत्यं सागर इति रामविशेषणम् तदा सागरमिति द्वितीयान्तमन्यत्पदमध्याहार्यम् । को वा तरणोपायस्तस्येत्यत्राह—तरसेति । बलेन । तपोबलमन्त्रबलदिव्यास्त्राणामन्यतमेनेत्यर्थः । बलैर्वानरकोटिभिः सुग्रीवादिभिश्च सहितः ॥ १७ ॥

रा० टी०–तरिष्यतीति युक्तम् । अस्मदीयं रूपं स्वरूपं यस्य तेन किं च युक्तरूपेण स्वस्वरूपयोग्येन परिवारितः अत एवास्माकमुपरोधकः सागरं सुव्यक्तं तरिष्यति सागर इति प्रथमान्तपाठे रामविशेषणं तदा सागरमिति द्वितीयाध्याहार्यम् ॥ १७ ॥

गो० टी०–सागरं वियमाने कथमस्मानुपरोत्स्यति–तत्राह तरिष्यतीति । सार्धश्लोकः उच्छोषयति उच्छोषयिष्यति । अन्यत्सेतुबन्धादिकं वा करोति करिष्यति ॥ १७ ॥ १८ ॥

१८] ति० टी०–तदेवाह—समुद्रमिति । अन्यत्सेतुबन्धनम् । तस्मिन्नेवंविधे[2] एवंविधव्यापारे सति बहुभिर्वानरैः सह रामे विरुद्धे कार्ये विरुद्धं कर्तुमुद्यते सति यन्मम पुरे सैन्ये च हितं तत्त्वं संमन्त्र्यताम् ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

रा० टी०–तरणोपायमाह—समुद्रमिति । उच्छोषयिष्यति अन्यत् उपायान्तरं करोति करिष्यति । अयं पृथक् उपसंहरन्नाह–तस्मिन्निति । एवंविधे उक्तप्रकारे तस्मिन् राघवे कार्ये स्वकार्यार्थं वानरैः सह विरुद्धे सति पुराऽपरौ सर्वं हितं यथा भवति तथा संमन्त्र्यताम् ॥ १८ ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतिलकनाम्नि युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०–अस्मिन्निति । अस्मिन् कदाग्निरोधनरूपे कार्ये एवंगते उक्तरीत्या प्रवृत्ते वानरैः सह विरुद्धे विरोधे च प्राप्ते आधे निशा पुरापरौ हितं यत्तत्त्वं संमन्त्र्यतामित्यर्थः ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे सत्किरीटाख्याने युद्धकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति० टी०–तत्रादौ दुर्मन्त्रिणां दुर्मन्त्रमाह—इत्युक्त इति । यतो नीतिवाक्याः, अतएवाबुद्धयस्ते राक्षसा द्विपत्पक्षस्य रामसहायादेर्बलमविज्ञाय ज्ञात्वापि मोहादविमृश्य वा प्राञ्जलयः सन्तो रावणमूचुः ॥ १ ॥

रा० टी०–रावणवचनश्रवणानन्तरकालिकं रावणं प्रति अविचक्षणराक्षसानां वचनमाह—इतीत्यादिभिः । अबुद्धयः अत एव नीतिवाक्याः राक्षसाः द्विपत्पक्षं रामबलमविज्ञाय रावणमूचुः । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०–एवं रावणवचनमाकर्ण्य अविदितबलपराक्रमा भावा मदोद्धता राक्षसास्तद्बलज्ञापनपूर्वकं रावणं प्रशंसन्ति–इत्युक्ता इत्यादिना । सार्धश्लोक एकान्वयः । द्विपत्पक्षं द्विपद्बलम् । पक्षो मासार्धके पार्श्वे वृद्धे सूर्यनिरोधयोः । [illegible] परितो वृन्दे बले सन्निसहाययोः ॥ इति विश्वः ॥ १ ॥

२–३] ति० टी०–तदेवाह—राक्षसेति । [illegible] टिरसिः ॥ २ ॥ ३ ॥

रा० टी०–तदाकारमाह—राक्षसेत्यादिभिः । [illegible] अत्र परिघादिसंकर्षे सुमहत् नो बलमस्ति अतः भवान् किं कस्माद्भजते विषादं न करिष्यसीत्यर्थः ॥ २ ॥

---

१ कस्मिन्निति ति० पाठः । २ सर्वे इति गो० पाठः । ३ संकुलमिति गो, रा, पाठः ।

कैलासशिखरावासी यक्षैर्बहुभिरावृतः । सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः ॥ ४ ॥
स महेश्वरसख्येन श्लाघमानस्त्वया विभो । निर्जितः समरे रोषाल्लोकपालो महाबलः ॥ ५ ॥
विनिपात्य च यक्षौघान्विक्षोभ्य विनिगृह्य च । त्वया कैलासशिखराद्विमानमिदमाहृतम् ॥ ६ ॥
मयेन दानवेन्द्रेण त्वद्भयात्सख्यमिच्छता । दुहिता तव भार्यार्थे दत्ता राक्षसपुङ्गव ॥ ७ ॥
दानवेन्द्रो मैन्दनादो वीर्योत्सिक्तो दुरासदः । विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः ॥ ८ ॥
निर्जितास्ते महाबाहो नागा गत्वा रसातलम् । वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः ॥ ९ ॥
अक्षयाः बलवन्तश्च शूरा लब्धवराः पुनः । त्वया संवत्सरं युद्ध्वा समरे दानवा विभो ॥ १० ॥
स्वबलं समुपाश्रित्य नीता वशमरिन्दम । मायाश्चाधिगतास्तत्र बह्वयो वै राक्षसाधिप ॥ ११ ॥
शूराश्च बलवन्तश्च वरुणश्च सुता रणे । निर्जितास्ते महाभोग चतुर्विधबलादृताः ॥ १२ ॥

गो० टी०-राजदिति । परिघः परिणो हननक्षमो गदाविशेषः परिघः परिघातन इत्यमरः शक्तिः दीर्घयष्टिः ऋष्टिः असिः खड्गे तु निर्शिशचन्द्रहासासिकृत्य इत्यमरः । खलं सिद्धम् पट्टिशः खड्गविशेषः तैः संकुलं व्याप्तं बलमस्ति । समबले एवं विद्यमाने कस्माद्देतोः भवान् विषादं भजत इति शेषः । अत्र सुमहत्ये बलमित्यत्र बलं नास्तीति प्रामादैकभाष्यग्रन्थसन्धिकाविलोक्तिः ॥ २ ॥

रा० टी०-अतुलसाहसत्वहृदये तत्पराक्रमं वर्णयन्त आहुः-त्वयेति । भोगवतीं नागपुरीं गत्वा पन्नगा. त्वया निर्जिताः । अर्थं पृथक् ॥ ३ ॥

गो० टी०-तिष्ठतु सैन्यं त्वमेक एव क्षमस्तत्रक्षुद्विद्रावणक्षम इत्याशयेनाह-त्वयेत्यादिना । सार्धश्लोक एकान्वयः । भोगवतीं सर्पराजनगरीम् । कदनं युद्धम् ॥ ३ ॥ ४ ॥

४] ति० टी०-उच्यमानगुणो धनदस्ते त्वया सुमहत्कदनं युद्धं कृत्वा वश्यः कृतः ॥ ४ ॥

रा० टी०-कैलासेति । कैलासशिखरावासी धनदः सुमहत् कदनं युद्धं कृत्वा ते त्वया वश्यः कृतः ॥ ४ ॥

५] ति० टी०-तदेव प्रपञ्च्यते—स इति । महेश्वरसख्येन हेतुना स्वयं श्लाघमानोऽपि लोकपालोऽपि त्वया समरे रोषान्निर्जितः ॥ ५ ॥

रा० टी०-तदेव भङ्गयन्तरेणाह-स इति । महेश्वरसख्येन श्लाघ्यमानो लोकपालो धनदः त्वया निर्जितः ॥ ५ ॥

गो० टी०-स इति । स्पष्टम् ॥ ५ ॥

६] ति० टी०-न जयमात्रम्, अपि तु सर्वस्वापहारोऽपीत्याह—विनिपात्येति । इदं विमानं पुष्पकम् ॥ ६ ॥

रा० टी०-विनिपात्येति । यक्षौघान् विक्षोभ्य संचाल्य विनिपात्य च विनिहत्य च्यवयित्वा इदं पुष्पकं विमानं त्वया हृतम् ॥ ६ ॥

गो० टी०-विनिहत्येति । विमानं पुष्पकम् ॥ ६ ॥

७] ति० टी०-मयदुहिता मन्दोदरी ॥ ७ ॥

रा० टी०-मयेनेति । मयेन दुहिता स्वकन्या दत्ता ॥ ७ ॥

गो० टी०-मयेनेति । दुहिता मन्दोदरी । श्रूयते मयेनाभिजात्यधमाहृतेत्युत्तरे वक्ष्यति तथाप्यत्र प्रशंसायां भूतार्थत्वमुक्तम् ॥ ७ ॥

८] ति० टी०-कुम्भीनस्या रावणस्वसेति तीरः । तस्याः सुखावहो भर्तेत्यर्थः ॥ ८ ॥

रा० टी०-दानवेन्द्र इति । कुम्भीनस्याः कुम्भीनस्याः त्वद्भगिन्याः सुखावहः पतिः दानवेन्द्रो विगृह्य त्वया वशमानीतः ॥ ८ ॥

गो० टी०-दानवेन्द्र इति । दानवेन्द्रः मधुः । कुम्भीनसी रावणभगिनी । सुखमावहतीति सुखावहः भर्ता ॥ ८ ॥

९] ति० टी०-जटी नागविशेषः ॥ ९ ॥

रा० टी०-निर्जिता इति । रसातलं गत्वा वासुकिप्रभृतयो नागाः नागविशेषाः त्वया निर्जिताः अत एव वशमाहृताः प्रापिताः अत एव पूर्वेण न पौनरुक्त्यम् ॥ ९ ॥

गो० टी०-निर्जिता इति । जटी सर्पविशेषश्च नाम । त्वया भोगवतीमित्यत्र शङ्खादिभिश्चकारैः कटकादिभिश्चकारैरिति न पौनरुक्त्यम् ॥ ९ ॥

१०-११] ति० टी०-दानवाः कालकेयाः । तत्र तैः सह वासान्मायाश्चाधिगताः प्राप्ताः ॥ १० ॥ ११ ॥

रा० टी०-अक्षया इति । स्वबलमाश्रित्य संवत्सरं युद्ध्वा अक्षया अपि शूराः त्वया वशं नीताः तत्र तैः सह निवाससमये बह्वयो मायाश्चाधिगताः प्राप्ताः । श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०-अक्षया इत्यादिश्लोकद्वयमेकान्वयम् । लब्धवराः लब्धवरेति शेषः । अक्षयाः चूर्णीकरणेऽपि पुनरुत्पत्तिमत्त्वेन क्षयरहिता इत्यर्थः । दानवाः कालकेयाः तत्र कालकेयसकाशात् । बह्वयः बह्वयः । "वोतो गुणवचनात्" इति पक्षे ङीषभावः ॥ १० ॥ ११ ॥

१२] ति० टी०-चतुर्विधबलं रथगजतुरगपादातरूपम् ॥ १२ ॥

---

१ श्लाघ्यमान इति रा. पाठः । २ इत्येति गो. पाठः । ३ मधुर्नामेति गो. पाठः । ४ बह्व इति गो. पाठः । ५ बह्व्यः इति गो. पाठः ।

मृत्युदण्डमहाग्राहं शालपत्तीद्रुमयण्डितम् । कालपाशमहावीचिं यमकिङ्करपन्नगम् ॥ १५
मेघाब्यरेण दुर्धर्षं यन्तरीक्षमवस्थितम् । अवगाह्य त्वया राजन्यमस्य बलसागरम् ॥ १६
जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः । सुयुद्धेन च ते सर्वे लोकास्तत्र सुतोषिताः ॥ १७
क्षत्रियैर्वसुभिर्वीरैः वसुल्यपराक्रमैः । आसीद्वसुमती पूर्णा महद्भिरिव पादपैः ॥ १८
तया वीर्योत्साहैर्न समो रावणे रणे । प्रसन्न ते त्वया राजन्हताः समरदुर्जयाः ॥ १९
तिष्ठ या किं महाराज अनेन तव वानरान् । अयमेको महाराज इन्द्रजित्क्षपयिष्यति ॥ २०
अनेन वै महाराज साहेश्वरमनुत्तमम् । इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः ॥ २१
शक्तितोमरसीनं च विनिकीर्णान्त्रसैवलम् । गजकच्छपसंबाधमश्वमण्डूककर्कुलम् ॥ २२
रक्षोद्विपमकग्राहं मरुद्वसुमहोरगम् । रथावर्तमहातोयं पदातिपुलिनं महत् ॥ २३
अनेन हि समासाद्य देवानां बलसागरम् । गृहीतो दैवतपतिरिन्द्रो वापि प्रवेशितः ॥ २४

रा० टी०—शूरा इति । चतुर्भिश्चतुर्भागः वरुणस्य सुतः ते त्वया विजिताः ॥ १५ ॥

गो० टी०—दुरासदेति । दुरासदत्वात्तस्य स्वयमतुरन्तवदातिमेघेन अनुपायिनि बलानि पूर्वाणि येषां ते तथा ॥ १५ ॥

१६–२५] ति० टी०—मृत्युदण्ड एव महाग्राहो यस्मिन्त्वं [illegible] शालपत्तीद्रुमैः शोभितम् कालपाशा एव महावीचयो यमकिङ्करा एव पन्नगा यस्मिन् महासमुद्रे [illegible] अवगाह्य प्रविश्य [illegible] अस्य रावणस्य बलसागरस्य [illegible] अत एव दुरत्ययेन प्रतिघातेन [illegible] अतस्तेन त्वयैव सर्वे लोकाः सुतोषिताः । [illegible] ॥ १६–२५ ॥

गो० टी०—मृत्युदण्डेत्यादिश्लोकद्वयमेकान्वयम् । मृत्युदण्डः एव एक एव महाग्राहः महाग्रहः यस्मिन् । शालपत्तीद्रुमैः शालस्कन्धवृक्षैः [illegible] तत्रापविद्धाः न एव दुरासदैः दुर्निवारैः [illegible] पतितैः पुद्गलैः [illegible] ॥ १५ ॥ १६ ॥ १७] ति० टी०—[illegible] वसुभिः वीरैः क्षत्रियैः अनेकप्रभृतिभिः १६

१७] ति० टी०—तापि [illegible] त्वया हताः [illegible] वस्तु एतैः वीर्यादिभिः समः, अतस्तद्रूपेण का चिन्ता ॥ १७ ॥

रा० टी०—तयेति । तिर्यादिभिः । तेषां प्रसिद्धं जयिष्णूणां समः राघवो न ते क्षपिताः त्वया हताः एतेन त्वया न भेतव्यमिति सूचितम् ॥ १७ ॥

गो० टी०—तयेति । न समो राघव इति । तेभ्यो विहीनबलः एतेन विनाश इति भावः ॥ १७ ॥

१८] ति० टी०—एवं रावणं प्रशस्य सम्प्रति स्तुतिं तिष्ठ इति । हे महाराज ! त्व मनसोऽस्य किम्, तव तृप्तिता [illegible] अनेकं [illegible] जिघांसयिष्यति । महाराजेति [illegible] ॥ १८ ॥

रा० टी०—तव मया किं कर्तव्यमित्यत आह—तिष्ठेति । हे महाराज ! त्वं तिष्ठ तव अनेन किं न प्रयोजनमित्यर्थः कथं पश्य सैन्यं इत्यत आह—महाराजेति [illegible] इन्द्रजिदेष वानरान् क्षपयिष्यति हनिष्यति ॥ १८ ॥

गो० टी०—तिष्ठ इति । स्पष्टम् ॥ १८ ॥

१९] ति० टी०—कथमस्यैवं सामर्थ्यं तत्राह—अनेनेति । साहेश्वरं महेश्वरप्रीतिकरम् । इष्ट्वा कृत्वा ॥ १९ ॥

रा० टी०—इन्द्रजिदेति । बलवत्त्वे हेतुमाह—अनेनेति साहेश्वरं महेश्वरसम्बन्धि यज्ञमिष्ट्वा अनेनेन्द्रजिता वरः लब्धः ॥ १९ ॥

गो० टी०—अनेनेति । साहेश्वरं महेश्वरप्रीतिकरम्[1] ॥

२०] ति० टी०—देवानां सामरत्वेन कथमयं—त्यादि । विनिकीर्णानि व्याप्तानि ॥ २० ॥

२१–२५] ति० टी०—महत्सहायान्वयं ॥ २१ ॥

रा० टी०—वरप्रभावं दर्शयन्नाह—शक्तितोमरेत्यादि [illegible] शक्तितोमराः मीनाः यस्मिन् विनिकीर्णानि निःसार्य [illegible]

---

१ अनेनेवत गो. नास्ति । २ विलोकिता इति गो. पाठः । ३ वाहरिति गो. पाठः । ४ हीति गो. पाठः ।

पितामहनियोगाच्च मुक्तः शम्बरहन्त्रा । गतस्त्रिविष्टपं राजन्सर्वदेवनमस्कृतः ॥ २३ ॥
तमेव त्वं महाराज विसृजेन्द्रजितं सुतम् । यावद्वानरसेनां तां सरामां नयति क्षयम् ॥ २४ ॥
राजन्नापदयुक्तेयमागता प्राकृताज्जनात् । हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

प्रहस्तादिभिरात्मश्लाघनपूर्वकं रामादिवधप्रतिज्ञानेन रावणसमाश्वासनम् ॥ १ ॥

ततो नीलाम्बुदप्रख्यः प्रहस्तो नाम राक्षसः । अब्रवीत्प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥ १ ॥
देवदानवगन्धर्वाः पिशाचपतगोरगाः । सैवे धर्षयितुं शक्याः किं पुनर्मानवौ रणे ॥ २ ॥
सर्वे प्रमत्ताः विश्वस्ता वञ्चिताः स्म हनूमता । नहि मे जीवतो गच्छेज्जीवन्स वनगोचरः ॥ ३ ॥

मन्त्राणि शैवलाः यस्मिन् गजरूपैः कच्छपैः संवार्यं नित्यम् अक्षरूपपक्षैः संकुलं व्याप्तं रुद्रादित्याः महाग्राहाः यस्मिन् मरुतो वायवो वसवश्च महोरगाः यस्मिन् रथानामगजाः तोयौघा यस्मिन् पक्षतयः पुलिनानि यस्मिन् तं वानरीं महद्बलागरम् अतिक्रम्येन्द्रजिता समासाद्य संपीड्य वतपतिरिन्द्रः गृहीतः तद्वशं प्रवेशितश्च । श्लोकत्रयमेकान्वयि ॥ २०-२२ ॥

गो० टी०-सर्वे क्षोभरित्यादिश्लोकत्रयमेकान्वयम् । दैवतपतिः इन्द्रः ॥ २०-२२ ॥

२३] ति० टी०-पितामहस्य चतुर्मुखस्य रुद्रस्य यदियाता लब्धवरस्तनियोगात्तदाज्ञया । सर्वस्य जगतः प्रजापतिः पिता, भगवांश्चतुर्मुखरुद्रः पितामहः भगवान्हिरण्यगर्भः पितामहः, अतश्चादित्यरुद्रवसुप्रधानाः सर्वभ्रादेवताः सर्वस्यादेवताः सकलासुरसर्वप्रजोपास्यः सर्वस्वभूताश्चेति हेतवः । शम्बरं क्षयं हन्ति सः ॥ २३ ॥

रा० टी०-इन्द्रमोचने कारणमाह—पितामहेति । शम्बरहन्ता इन्द्रः पितामहनियोगात् आज्ञातो मुक्तः इन्द्रजिता समोचितः सन् त्रिविष्टपं स्वर्गं गतः ॥ २३ ॥

गो० टी०-पितामहेति । स्पष्टम् ॥ २३ ॥

२४] ति० टी०-क्षयं यावन्नयति । नेष्यतीत्यर्थः ॥ २४ ॥

रा० टी०-तमिति । यः सरामां रामसहितां यावद्वानरसेनां क्षयं नयति स यति तमिन्द्रजितं सुतं विसृजेत्यन्वयः ॥ २४ ॥

गो० टी०-तमिति । विसृज प्रेषय । यावन्नयति प्रेष्यति ॥ २४ ॥

२५] ति० टी०- प्राकृतजनवदयं राजन्नापदागता संभावितागमनेयमापद्विपत्तान्ता तेऽयुक्ता कर्तुमयोग्या । स्वयैषा चिन्ता त्वया हृदि नैव कार्या. यतस्त्वं राघवं वधिष्यस्येव ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा० टी०-राजन्निति । प्राकृतात् जनात् आगतेयमापत् अयुक्ता तव योग्या न अतः त्वया हृदि न कार्या स्मर्तव्येत्यर्थः । तत्र हेतुमाह—त्वं राघवं वधिष्यसि ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

गो० टी०-राजन्निति । अयुक्ता असंभाविता । प्राकृतात् क्षुद्रात् हनुमतः ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

१-२] ति० टी०-तत इति ॥ १ ॥ २ ॥

रा० टी०-रावणं प्रति प्रहस्तोक्तिमाह—तत इत्यादिभिः । नीलाम्बुदप्रख्यः सेनापतिः प्रहस्तो राक्षसः वाक्यमब्रवीत् ॥ १ ॥

गो० टी०-एवं मन्त्रिभिः सह संमन्त्र्य भूयोऽभिहिते सकलसचिवप्रधानः प्रहस्तः स्वाभिमतमर्थं राज्ञे निवेदयति—तत इति । स्पष्टम् ॥ १ ॥

रा० टी०-तदाकारमाह—देवेत्यादिभिः । देवादयः सर्वे प्रधर्षयितुमस्माभिः पराभावयितुं शक्याः तर्हि मानवौ किमु ॥ २ ॥

गो० टी०-देवेति । स्पष्टम् ॥ २ ॥

३] ति० टी०-नन्विदानीमेव वानरेणैकेन धर्षणे कृते कथं धर्षयितुं शक्या इति वचोऽत आह—सर्वे इति । प्रमत्ता भोगादिपरवशाः, विश्वस्ताः बहुभक्षणसंतर्पणतया निश्च-

---

१ निम इति गो. पाठः । २ न त्वामिति गो. पाठः । ३ शक्ता इति गो. पाठः । ४ वानर इति गो. पाठः ।

सर्वां सागरपर्यन्तां सशैलवनकाननाम् । करोम्यवानरां भूमिमाज्ञापयतु मे भवान् ॥ ४ ॥
रक्षां चैव विधास्यामि वानराद्य जनीचर । नागमिष्यति ते दुःखं किंचिदस्मापराधजम् ॥ ५ ॥
अब्रवीत्तमसंक्रुद्धो दुर्मुखो नाम राक्षसः । इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम् ॥ ६ ॥
अयं परिभवो भूयः पुरस्यान्तःपुरस्य च । श्रीमतो राक्षसेन्द्रस्य वानरेन्द्रप्रधर्षणम् ॥ ७ ॥
अस्मिन्मुहूर्ते गैत्वैको निवर्तिष्यामि वानरान् । प्रविष्टान्सागरं भीममम्बरं वा रसातलम् ॥ ८ ॥
ततोऽब्रवीत्सुसंक्रुद्धो वज्रदंष्ट्रो महाबलः । मयूखं परिघं घोरं मांसशोणितदूषितम् ॥ ९ ॥
किं नो हनूमता कार्यं कृपणेन तपस्विना । रामे तिष्ठति दुर्धर्षे सुग्रीवेऽपि सलक्ष्मणे ॥ १० ॥
अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम् । आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम् ॥ ११ ॥

कृतया स्थिताः, अतएव हनुमता वञ्चिताः स्म । आर्षो विलम्बोऽयं इति कतकः । प्रामादिकः परिभवो न न्यूनतायै इति भावः । मे जीवत इत्यार्षी पष्ठी प्रमादाभावविशिष्टजीवनवति मयि प्रहस्ते सति स जीवन् गच्छेदित्यर्थः ॥ ३ ॥

रा० टी०—तत्र तत्प्रेषितेनैकेन वानरेण सर्वे वयं पराभूताः इति कथमिदमुच्यते इत्यत आह—सर्वे इति । सर्वं सर्वे विध्वस्ताः अस्मत्पराभावका न सन्तीति विश्वासं प्राप्ताः अत एव प्रमत्ताः भोगासक्तात्मकत्वेन अनवधानाः अत एव हनुमता वञ्चिताः जीवतः साधयितृतया लिप्तो ममाग्रे वनगोचरो जीवन् गच्छेत् ॥ ३ ॥

गो० टी०—हनुमतः पौरुषं प्रत्यक्षतो दृष्ट्वा कथमेवमुच्यत इत्यत आह—सर्व इति । विध्वस्ताः परिभवितुमस्मान् कोऽपि न शक्त इति विश्वस्ताः विस्रब्धाः । प्रामादिकपरिभवो न दूषणमापादयतीति भावः । [करिष्यतीत्यनया विस्रब्धाः अत एव वञ्चिताः ।] वर्तते । जीवत इत्यनादरे षष्ठी ॥ ३ ॥

४] ति० टी०—रक्षांसि करिष्यामि ॥ ४ ॥

रा० टी०—सर्वामिति । नहिमवानरां करोमि अतो भवान् मामाज्ञापयतु ॥ ४ ॥

गो० टी०—सर्वामिति । स्पष्टम् ॥ ४ ॥

५] ति० टी०—आत्मापराधजं सीतापहरणापराधजम् ॥ ५ ॥

रा० टी०—रक्षामिति । वानराणां रक्षां विधास्यामि अतः आत्मापराधजं स्वापराधजनितं किंचिद्दुःखं ते नागमिष्यति ॥ ५ ॥

गो० टी०—रक्षामिति । आत्मापराधः सीताहरणरूपो ज्ञेयः ॥ ५ ॥

६] ति० टी०—न क्षमणीयं क्षमितुं न युक्तम् प्रतिक्रियैव कर्तव्येति भावः । इदंपदार्थमाह—सर्वेषामिति ॥ ६ ॥

रा० टी०—अब्रवीदिति । तसंक्रुद्धो दुर्मुखो नाम राक्षसः तं राक्षसेन्द्रं अब्रवीत् । तत्राकारमाह—नोऽस्माकं प्रधर्षणं वानरकर्तृकः परिभवः अस्माकं न क्षमणीयम् ॥ ६ ॥

गो० टी०—अब्रवीदित्यादि । हि यस्माद्वानरेण कृतमिदं नः प्रधर्षणरूपम् । भूयः तदुपरि पुरस्यान्तःपुरस्य च परिभवरूपम् अथ च राक्षसेन्द्रस्य प्रधर्षणरूपत्वात् न क्षमणीयमित्यर्थः ॥ ६ ॥ ७ ॥

७-८] ति० टी०—भूयः पुनः । पुरस्यान्तःपुरस्य च परिभवो दाहरूपो न क्षमणीय इत्यनुषङ्गः । वानरेन्द्रप्रधर्षणं तत्र राक्षसेन्द्रस्य दुःखमहमेक एव गत्वा भीरवो वानरास्तेनैव प्रहारेणाहत्य निवर्तयिष्यामि प्रधर्षणदुःखं निवर्तयिष्यामि ॥ ७ ॥ ८ ॥

रा० टी०—अयमिति । पुरान्तःपुरयोर्यो दाहादिकृतः परिभवः राक्षसेन्द्रस्य वानरेन्द्रप्रधर्षणं च अस्माकं न क्षमणीयमित्युच्यते ॥ ७ ॥

रा० टी०—अस्मिन्मिति । सागरान्तर्गतं प्रविष्टं वानरान् अस्मिन्मुहूर्ते एको गत्वा निवर्तयिष्यामि ॥ ८ ॥

गो० टी०—तत्रः किं करिष्यतीत्यत आह—अस्मिन्मिति । स्पष्टम् ॥ ८ ॥

९] ति० टी०—मांसशोणिताभ्यां स्वसंबन्धाभ्यां दूषितं भयजनकम् ॥ ९ ॥

रा० टी०—तत इति । मांसशोणिताभ्यां दूषितं तप्तं परिघं परिगृह्य तदब्रवीदुवाच ॥ ९ ॥

गो० टी०—तत इति । स्पष्टम् ॥ ९ ॥

१०] ति० टी०—कृपणेन दीनेन । प्रकाशसंचारं कृत्वा द्वारौ कृतकार्यत्वात् तपस्विना शोच्येन हनुमता किम् । तस्य हनुमतः तस्य हनूमतेन न प्रयोजनमिति भावः । कृपणादिशब्दानां पारुष्यमाधे लक्षणम्, न स्वार्थे मानुमांस्त्वादिशब्दवत् । तर्हि को हन्तव्यस्तत्राह—रामे तिष्ठति सुग्रीवे तिष्ठति सति किमनेन दीनेनेत्यर्थः ॥ १० ॥

रा० टी०—तदाकारमाह—किमिति त्यादिभिः । रामे तिष्ठति सति कृपणेन दीनेन तपस्विना शोच्येन हनुमता नोऽस्माकं किं कार्यं सीतायाः पुनः प्राप्त्या संतापपङ्केन हनुमता नोऽस्माकं किं कार्यं सीतया, अतोऽस्माकं पुनः इत्यर्थः ॥ १० ॥

गो० टी०—किमिति । हनुमता कृपणेन दीनेन तपस्विना शोच्येन ॥ १० ॥

११] ति० टी०—एकोऽहं—एक एवाहमिति ॥ ११ ॥

---

१ सर्वे गो० । २ मू० भिन्न गो० घ० पाठः । ३ हतेऽहे गो० पाठः । ४ करिष्यामीति गो० पाठः । ५ ३ वर्षे गो० घ० पाठः ।

इदं ममापरं वाक्यं शृणु राजन्यदीच्छसि । उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः ॥ १२ ॥
कामरूपधराः शूराः सुभीमा भीमदर्शनाः । राक्षसानां सहस्राणि राक्षसाधिप निश्चिताः ॥ १३ ॥
काकुत्स्थमुपसंगम्य [1]विष्टतं मानुषं वपुः । सर्वे ह्यसंभ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम् ॥ १४ ॥
प्रेषिता भरतेनैव भ्रात्रा तव यवीयसा । स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ॥ १५ ॥
ततो वयमितस्तूर्णं शूलशक्तिगदाधराः । चापबाणासिहस्ताश्च त्वरितास्तत्र यामहे ॥ १६ ॥
आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम् । अस्त्रशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् ॥ १७ ॥
एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ । अवश्यमपनीतेन जहतामेव जीवितम् ॥ १८ ॥
कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान् । अब्रवीत्परमक्रुद्धो रावणं लोकरावणम् ॥ १९ ॥
सर्वे भवन्तस्तिष्ठन्तु महाराजेन संगताः । अहमेको हनिष्यामि राघवं सहलक्ष्मणम् ॥ २० ॥
सुग्रीवं सहनूमन्तं सर्वांश्चैवात्र वानरान् । ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः ॥ २१ ॥

रा० टी०—अथेति । रामप्रभृतिं हत्वा हरिवाहिनीं विध्वंस्य पलायनं प्रापय्य आगमिष्यामि ॥ ११ ॥

गो० टी०—अथेति । स्पष्टम् ॥ ११ ॥

१२] ति० टी०—इदंपदार्थमाह—उपायेति ॥ १२ ॥

रा० टी०—इदमिति । उपायकुशल एव शत्रून् जयेदिति यमप्रायं वाक्यं शृणु ॥ १२ ॥

गो० टी०—इदमिति । वक्ष्यमाणवाक्यं किमित्याकाङ्क्षायामुपायप्रतिपादकं वाक्यं वक्तुमारब्धुपायं प्रशंसति—उपायेति॥१२॥

१३] ति० टी०—तत्र किं तवाह—कामेति । कामरूपत्वादिह पुंस्त्वमार्षम् ॥ १३ ॥

१४] ति० टी०—तत्रोपायः किं तवाह—काकुत्स्थमिति । विष्टतं स्पष्टम् । वपुः तनुमिति शेषः ॥ १४ ॥

रा० टी०—कामेति । हे राक्षसाधिप ! ये कामरूपधरा निश्चिताः कार्यविषयकनिश्चयवन्तः तेषां राक्षसां सहस्राणि विष्टतं स्पष्टं मानुषं वपुर्युक्तमिति शेषः । काकुत्स्थमुपसंगम्य असंभ्रमाः उद्वेगरहिता भूत्वा तत्र आत्रा भरतेन वयं प्रेषिता भवद्दानार्थमिति शेषः इति रघुसत्तमं ब्रुवन्तु । सार्धश्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०—विष्टतमुपायमेवाह—कामरूपेत्यादिना । निश्चिताः निश्चितवन्तः समर्था वा सहस्राणीति सहस्रशब्दस्य संख्येयपरत्वेऽपि शब्दस्वाभाव्यात्पुंसकत्वम् । किमिति ब्रूयुस्तत्राह—प्रेषिता इति । अभ्यन्ते इतिकरणं द्रष्टव्यम् १३॥१४॥

१५] ति० टी०—भरतप्रेषितत्ववचनेनापि किं तवाह—स हीति । सेनां वानरसेनां समुत्थाप्य गृहीत्वा स्वीयबुद्ध्या क्षिप्रमेवोपयास्यति । अस्मानिति शेषः ॥ १५ ॥

रा० टी०—उपायोक्त्या प्रयोजनमाह—स इति । सः श्रुतभरतसंदेशो रामः सेनां समुत्थाप्य सत्यज्येत्यर्थः क्षिप्रमेवोपयास्यति । अथ वृथा ॥ १५ ॥

१६–१७] ति० टी०—ततः किमिति प्रश्ने । मध्यमार्गं [illegible]—गमनमाह—तत इति । यामेति लौ-

म इति गो. पाठः । २ न्वं ।

रा० टी०—तेन किमित्यत आह—तत इति । ततः रामगमननिश्चयानन्तरं ते तव वयं तत्र यामः ॥ १६ ॥

गो० टी०—तत इति । ते वयं तत्र रामसमीपे याम । यामेति लोटि रूपम् ॥ १६ ॥

रा० टी०—तत्रोपि किमित्यत आह—आकाश इति । गणश आकाशे स्थित्वा अस्त्रादिभिरेतां हरिवाहिनीं यमक्षयं मृत्युगृहं प्रापयाम ॥ १७ ॥

गो० टी०—आकाश इति । स्पष्टम् ॥ १७ ॥

१८] ति० टी०—उक्तमर्थमुपसंहरति—एवं चेदिति । एवमस्मदुक्तमुपायं न करोत्युपायज्ञतया तदा रामलक्ष्मणौ दोषमनयं कैतवमुपसर्पेतां प्राप्नुयातां, तत्र दोषमेव दर्शयति अपनीतेन कैतवकृतप्रहारेणावश्यमेव जीवितं जहतामित्यर्थः ॥ १८॥

रा० टी०—एवमिति । एवमस्मत्कर्तव्यं यदि रामलक्ष्मणौ उपसर्पेतां जानीयातां तदा अपनीतेन सेनया त्यक्तत्वेन हेतुना जीवितं जहतां जहीतः त्यजतः ॥ १८ ॥

गो० टी०—एवं कृते किं स्यादित्याह—एवं चेदिति । रामलक्ष्मणौ अनयम् अस्मत्कृतकैतवापरिज्ञानेन विश्वासम् उपसर्पेतां ततस्तेन अपनीतेन अपयेन जीवितं जहतामेवेत्यर्थः ॥ १८ ॥

१९–२० ति० टी०—कौम्भकर्णिः कुम्भकर्णोपत्यम १९॥२०

रा० टी०—कौम्भकर्णिरिति । ततो वज्रदंष्ट्रवचनश्रवणानन्तरं निकुम्भो नाम कौम्भकर्णिरब्रवीत् ॥ १९ ॥

गो० टी०—कौम्भकर्णिरिति । स्पष्टम् ॥ १९ ॥

रा० टी०—तद्वचनाकारमाह—सर्वे इत्यादिभिः । महाराजेन रावणेन संगताः सहिता भवन्तस्तिष्ठन्तु अहमेको हनिष्यामि । सार्धश्लोक एकान्वयी ॥ २० ॥

गो० टी०—सर्वे इत्यादि सार्धश्लोकमेकं वाक्यम् ॥ २०॥

२१] ति० टी०—अत्र वानरान् । अस्त्रा सेना स्थिता-स्तानरानित्यर्थः ॥ २१ ॥

रा० टी०—तत इति । [illegible] हत्वा वज्रहनुरब्रवीत् ॥ २१ ॥

२ विष्टतो इति गो. पाठः । ३ स्येति गो. पाठः । [illegible] इति गो. पाठः

क्रुद्धः परिलिहन्नक्षौ जिह्वया वाक्यमब्रवीत् । स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः ॥ २२ ॥
एकोऽहं भक्षयिष्यामि तौ सर्वौ हरिवाहिनीम् । स्वस्थाः क्रीडन्तु निश्चिन्ता पिबन्तु मधु वारुणम् २३ ॥
अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम् । भोक्ष्यन्दं च हनूमन्तं सर्वांश्चैवात्र वानरान् ॥ २४ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

स्वस्वरूपमनुसंधेय सर्वत्र भगवान् निशाचरान्वारयित्वा विभीषणो नीतिशास्त्रज्ञं बलमुपकल्पते तच्छ्रुत्वा राक्षसः स्वबलमवधारयति

ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः । कुम्भघ्नो यज्ञकोपश्च महापार्श्वमहोदरौ ॥ १ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः । इन्द्रजित्तुश्च बलवान्सर्वे वै रावणात्मजाः ॥ २ ॥
प्रहस्तोऽथ निकुम्भश्च वज्रदंष्ट्रो महाबलः । धूम्राक्षोऽथ निकुम्भश्च दुर्मुखश्चैव राक्षसः ॥ ३ ॥
परिवार्यावशान्कृत्स्नान्प्रासाञ्शक्तिपरश्वधान् । चापानि च सुबाणानि खड्गांश्च विपुलान्बुधान् ४ ॥
प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः । अब्रुवन्रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ५ ॥
अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम् । कृपणं च हनूमन्तं कृत्वा तेन पराजिताः ॥ ६ ॥
तान्दुर्मतायुधान्सर्वान्वारयित्वा विभीषणः । अब्रवीत्प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ७ ॥
नयेनोपायसिद्धैस्तैर्योद्धुं शक्यते । तस्य विक्रमकालांस्तान्युक्तानाहुर्मनीषिणः ॥ ८ ॥

गो० टी०—तत इत्यादिभिर्विशेषणैरेकान्तरम् ॥ मधुवाणीं मधुरां वाचमाह । रणकृत्यं रणकर्म । [illegible] इत्यनुलोमतः ॥ २१ । २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे [illegible] काण्डे युद्धकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

२२] ति० टी०—मुक्तालम्बा[illegible] ॥ [illegible]

२३ टी०—[illegible]

२३–२४] ति० टी०—वारुणं मद्यं मधु । एतेन [illegible] ॥ २३ ॥ २४ ॥

कालकार्यात्र सर्गादि-छेदः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दराजविरचितायां श्रीमद्रामायणभूषणाभिधानायां व्याख्यायां युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

इति श्रीमद्वेङ्कटेशाचार्यपुत्रवरदविरचितायां रामायणतात्पर्यचन्द्रिकायां युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

१–३] ति० टी०—तत इति । कौम्भकर्णिरेवायं निकुम्भ एकः सहितस्तु पुनरुक्तः ॥ १–३ ॥

४] ति० टी०—सञ्जाणार्पाति बहुवचनेन । विपुलान्बुधान्मेघलक्षणान्वीन् ॥ ४ ॥

५] ति० टी०—समुत्पत्योत्थाय ॥ ५ ॥

गो० टी०—राक्षसं प्रति समुत्पन्नसंभ्रमानाहुरित्याह—तत इत्यादिभिः । निकुम्भादयो राक्षसाः परिवार्य, प्रगृह्य आदाय निकुम्भादिनामभिर्वक्ष्यमाणैः सर्वतः पौनरुक्त्यम् । विपुलान्बुधान् गम्भीरजलकालिमतः । श्लोकषट्केन कालानि ॥ १–५ ॥

गो० टी०—अथ निकुम्भप्रभृतयः सर्वेऽपि प्रधानाः अहमहमिकया समुत्थाय राक्षसीपुरतः स्वयोधं नीतिशास्त्रज्ञो विभीषणः रक्षिष्यतीत्याह—तत इत्यादिश्लोकषट्केन । राक्षसस्य । आद्यौ निकुम्भोपात्तौ निकुम्भसमानदुरन्तस्वभावौ । अन्यत्परस्य आत्मनश्च । समुत्थाय । प्रत्यर्थिनस्वबन्धून् । मित्रिकरणं द्रष्टव्यम् ॥ १ ॥ ६ ॥

६] ति० टी०—नीमवर्तीत्याह—अवेति ॥ ६ ॥

७ टी०—तद्वचनानन्तरमाह—अवेति ॥ ६ ॥

७] ति० टी०—विभीषणस्तान्सर्वान्वारयित्वा पुनः प्रत्युपवेश्य स्थापयित्वा रावणं प्रति प्राञ्जलिर्भूत्वा वाक्यमब्रवीत् ॥ ७ ॥

गो० टी०—वारयित्वेति । गृहीतायुधान् सान् घोरकर्मणो वान्सर्वान् वारयित्वा प्रत्युपवेश्य च विभीषणोऽब्रवीत् ॥ ७ ॥

गो० टी०—वारयित्वेति । क्रियाभेदाद्वारयित्वेत्यस्य न पुनरुक्तिः ॥ ७ ॥

८] ति० टी०—विविधोपायैः सामदानभेदकर्मैः । तस्य

---

१ वक्रमिति गो. पाठः । २ तान्सर्वान्दुरियुधवारयित्वेति गो. पाठः । ३ समुत्थाप्येति गो. पाठः । ४ अद्य इति गो. पाठः । ५ रामं च लक्ष्मणं च सुग्रीवं च हनूमन्तं च वधिष्यामः इति गो. पाठः । ६ राक्षसं प्रति गो. रा. पाठः [illegible] ७ प्रगृह्य इति गो. पाठः । ८ विपुलान्बुधान्मेघानिति गो. पाठः । ९ वारयित्वेति गो. पाठः । १० विपुलान्बुधान्मेघानिति गो. पाठः ।

इदं ममापरं वाक्यं शृणु राजन्यदीच्छसि । उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः ॥ १२ ॥
कामरूपधराः शूराः सुभीमा भीमदर्शनाः । राक्षसानां सहस्राणि राक्षसाधिप निश्चिताः ॥ १३ ॥
काकुत्स्थमुपसंगम्य विद्रुतं मानुषं वपुः । सर्वे ह्यसंभ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम् ॥ १४ ॥
प्रेषिता भरतेनैव भ्रात्रा तव यवीयसा । स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ॥ १५ ॥
ततो वयमितस्तूर्णं शूलशक्तिगदाधराः । चापबाणासिहस्ताश्च त्वरितास्तत्र यामहे ॥ १६ ॥
आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम् । अस्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् ॥ १७ ॥
एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ । अवश्यमपनीतेन जहतामेव जीवितम् ॥ १८ ॥
कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान् । अब्रवीत्परमक्रुद्धो रावणं लोकरावणम् ॥ १९ ॥
सर्वे भवन्तस्तिष्ठन्तु महाराजेन संगताः । अहमेको हनिष्यामि राघवं सहलक्ष्मणम् ॥ २० ॥
सुग्रीवं सहनूमन्तं सर्वांश्चैवात्र वानरान् । ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः ॥ २१ ॥

रा० टी०—अद्येति । रामप्रभृतिं हत्वा हरिवाहिनीं विजेतव्य पलायनं प्रापय्य आगमिष्यामि ॥ ११ ॥

गो० टी०—अद्येति । स्पष्टम् ॥ ११ ॥

१२] ति० टी०—इदंपदार्थमाह—उपायेति ॥ १२ ॥

रा० टी०—इदमिति । उपायकुशल एव शत्रून् जयेदिति ममापरं वाक्यं शृणु ॥ १२ ॥

गो० टी०—इदमिति । तद्वाक्यं किमित्याकाङ्क्षायामुपायप्रतिपादकं वाक्यं वक्तुमादावुपायं प्रशंसति—उपायेति॥१२॥

१३] ति० टी०—ततः किं तत्राह—कामेति । कामरूपेत्यादिषु पुंस्त्वमार्षम् ॥ १३ ॥

१४] ति० टी०—ततो किं तत्राह—काकुत्स्थमिति । विद्रुतं स्पष्टम् । वपुः सत्त्वेति शेषः ॥ १४ ॥

रा० टी०—कामेति । हे राक्षसाधिप ! ये कामरूपधरा निश्चिताः कार्यविषयकनिश्चयवन्तः तेषां राक्षसां सहस्राणि विद्रुतं स्पष्टं मानुषं वपुर्यत्रेति शेषः । काकुत्स्थमुपसंगम्य असंभ्रमा उद्वेगरहिता भूत्वा तव भ्रात्रा भरतेन वयं प्रेषिता भवद्दर्शनप्रार्थनार्थमिति शेष इति रघुसत्तमं ब्रुवन्तु । सार्धश्लोकद्वयमेकान्वयि ॥ १२ ॥ १४ ॥

गो० टी०—विश्वासकरणायमेवाह—कामरूपेत्यादिना । निश्चिता निश्चितवन्तः राक्षसा वा सहस्राणीति सहस्रशब्दस्य संख्यासमत्वेऽपि बहुत्वाभिधानपुंरुक्त्यम् । किमिति ब्रूयुस्तत्राह—प्रेषिता इति । अस्यान्ते इतिकरणं द्रष्टव्यम् १३॥१४॥

१५] ति० टी०—परतःप्रेषितत्ववचनेनापि किं तत्राह—स हीति । सेनां वानरसेनां समुत्थाप्य गृहीत्वा स्वीयत्वेन क्षिप्रमेवोपयास्यति । अस्मानिति शेषः ॥ १५ ॥

रा० टी०—सेनेति । प्रयोजनमाह—स इति । सः श्रुतभरतसंदेशो यतः सेनां समुत्थाप्य सोद्यमेत्यर्थः क्षिप्रमेवोपयास्यति । अथ पृथक् ॥ १५ ॥

१६–१७] ति० टी०—ततः किमिति प्रश्ने । मध्येमार्गं पलायनचिन्ता—गमनमाह—तत इति । यामेति लो-

रा० टी०—तेन किमित्यत आह—तत इति । ततः रामगमननिश्चयानन्तरं ते तव वयं तत्र याम ॥ १६ ॥

गो० टी०—तत इति । ते वयं तत्र समीपे याम । दामेति लोटि रूपम् ॥ १६ ॥

रा० टी०—ततोऽपि किमित्यत आह—आकाश इति । गणश आकाशे स्थित्वा अस्मशस्त्रमहावृष्ट्या हरिवाहिनीं यमक्षयं मृत्युपुरं प्रापयाम ॥ १७ ॥

गो० टी०—आकाश इति । स्पष्टम् ॥ १७ ॥

१८] ति० टी०—उक्तमन्वयकारणमिति भावः—एवं चेदिति । एवमस्मदुक्तमुपपन्नं यदि रामलक्ष्मणौ तावदुपसर्पेतां प्राप्नुयातां तदा अनयं कैतवमुपसर्पेतां प्राप्नुयातां, तत अपनीतेन कैतवकृतप्रहारणावश्यमेव जीवितं जहतामेव जहातामिति शेषः ॥ १८ ॥

रा० टी०—एवमिति । एवमस्मदुक्तमुपपन्नं यदि रामलक्ष्मणौ उपसर्पेतां जानीयातां तदा अपनयेनैव हेतुना व्यक्तत्वेन हेतुना जीवितं जहतां जहातां [illegible] ॥ १८ ॥

गो० टी०—एवं कृते किं स्यादित्याह—एवं चेदिति । रामलक्ष्मणौ अनयम् अस्मत्कृतकैतवापरिज्ञानेन विश्वासम् उपसर्पेतां सन्तेन अपनीतेन अपनयेन जीवितं जहतामेव जहातामेवेत्यर्थः ॥ १८ ॥

१९–२० ति० टी०—कौम्भकर्णिः कुम्भकर्णापत्यम १९॥२०

रा० टी०—कौम्भकर्णिरिति । ततो वज्रहनुवचनश्रवणानन्तरं निकुम्भो नाम कौम्भकर्णिरब्रवीत् ॥ १९ ॥

गो० टी०—कौम्भकर्णिरिति । स्पष्टम् ॥ १९ ॥

रा० टी०—तद्वचनाकारमाह—सर्वे इत्यादिभिः । महाराजेन रावणेन संगताः सहिता भवन्तस्तिष्ठन्तु अहमेको हनिष्यामि । सार्धश्लोक एकान्वयी ॥ २० ॥

गो० टी०—सर्वे इत्यादि सार्धश्लोकमेकं वाक्यम् ॥ २०॥

२१] ति० टी०—अत्र वानरान् । अस्यां सेनायां स्थितान्वानरानित्यर्थः ॥ २१ ॥

रा० टी०—तत इति । [illegible] इदम् वज्रहनुरब्रवीत् ॥ २१ ॥

१ इति गो. पाठः । २ च त्व.

२ विश्रुतो इति गो. पाठः । ३ स्मेति गो. पाठः । [illegible]

क्रुद्धः परिलिहन्भूक्तां जिह्वया वाक्यमब्रवीत् । स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः ॥ २२ ॥
एकोऽहं भक्षयिष्यामि तां सर्वां हरिवाहिनीम् । स्वस्थाः क्रीडन्तु निश्चिन्ता पिबन्तु मधु वारुणम् ॥ २३ ॥
अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम् । साङ्गदं च हनूमन्तं सर्वांश्चैवात्र वानरान् ॥ २४ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

स्वस्वरूपस्थनगरीरक्षणे सर्वेषां नियोगदानानन्तरमिन्द्रजिता निकुम्भिलायज्ञस्थितेन विभीषणेन नीतिपुरःसरं वचनमुपक्रमते तच्छ्रुत्वा रावणः स्वयमेवागच्छति ।

ततो निकुम्भो रभसः शूरैरभ्रमहाबलः । सुमाली यज्ञकोपश्च महापार्श्वमहोदरौ ॥ १ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः । इन्द्रजिच्च बलवांस्तत्रो वै रावणात्मजः ॥ २ ॥
प्रहस्तोऽथ निकुम्भश्च वज्रदंष्ट्रो महाबलः । धूम्राक्षोऽथ निकुम्भश्च दुर्मुखश्चैव राक्षसः ॥ ३ ॥
परिघान्पट्टिशान्शूलान्प्रासान्राजशक्तिपरश्वधान् । चापानि च सुबाणानि खड्गांश्च विपुलाम्बुधान् ४ ॥
प्रसृता परमक्रुद्धाः समुत्पत्य च राक्षसाः । अब्रुवन्रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ५ ॥
अद्य रामं सलक्ष्मणं सुग्रीवं च सलक्ष्मणम् । कृपणं च हनूमन्तं हत्वा वेगं प्रधर्षिता ॥ ६ ॥
तान्गृहीतायुधान्सर्वान्वारयित्वा विभीषणः । अब्रवीत्प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ७ ॥
नाप्युपायैस्त्रिभिरयं योऽर्थः प्राप्तुं न शक्यते । तस्य विक्रमकालांस्तान्युक्तानाहुर्नयैषिणः ॥ ८ ॥

गो० टी०—तत इत्यादिसार्धश्लोकत्रयमेकान्वयम् ॥ १ ॥ मधुवारणीं मधुरूपां वारुणीम् । रणकृत्यं रणकर्तव्यम् । शेषं स्पष्टम् इत्यष्टमसर्गार्थः ॥ २१ । २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे वाल्मीकीयाभिधाने युद्धकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

२२] ति० टी० सुग्रीवोऽप्रा-त्त ॥ २३ ॥

रा० टी० तत्रत्यानाह-स्वैरमित्यादिभिः ॥ २२ ॥

२३ २४] ति० टी०-वारुणं मद्यं मधु । शेषं स्पष्टम् ॥ २३ ॥ २४ ॥

फलकरीत्याख्ये सप्तविंशेऽहनि ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

रा० टी०-अहं मधु भक्षयिष्यामीत्यादि-स्वस्थाः इति । सर्वान्वानरान् अहमेको वधिष्यामि । सर्वे यूयं स्वस्थाः [illegible] इति श्रीगोविन्दराजविरचिते रामायणभूषणे युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

१-२] ति० टी०-तत इति । कौम्भकर्णिरेवायं निकुम्भः पौरुषे सदृशत्वं पुनराह ॥ १-३ ॥

४] ति० टी०-खड्गानीति बहुवचनात् । विपुलाम्बुधारान्निर्मलजलकान्तीन् ॥ ४ ॥

५] ति० टी०-सहुत्पत्योत्थाय ॥ ५ ॥

रा० टी०-रावणं प्रति महोल्कनराक्षसानामुक्तिमाह-तत इत्यादिभिः । विभीषणादीन् राक्षसान् परिवार्तीन् प्रसृत्य अभ्रुवन् निकुम्भादिनामग्रेसरा बहवो राक्षसाः पौनरुक्त्यम् । विपुलाम्बुधान् गम्भीरजलकान्तिमतः । श्लोकषट्कर्मकान्वयि ॥ १-८ ॥

गो० टी०-अथ निकुम्भादीनमेतत्सप्तसप्त-तं. सर्वेऽपि प्रधानाः अहमहमिकया समुत्थाय तत्रत्यवीरान्प्रति वयमेवं नीतिज्ञाश्चेति विभीषणः रीतिविद्यानित्याह-तत इत्यादिश्लोकषट्कमेकं तावत् । अतौ निकुम्भोपादानं निकुम्भसमानसरणत्वज्ञापनार्थम् । सम्भूत्यस्य भावतेत्य. समुत्थाय । प्रत्यर्पयित्वत्यन्तरं निर्विकल्पं द्रष्टव्यम् ॥ १ ॥ ६ ॥

६] ति० टी०-किमनुरोधतदाह-अद्येति ॥ ६ ॥

रा० टी०-तद्वचनतात्पर्यमाह-अद्येति ॥ ६ ॥

७] ति० टी०-विभीषणस्तत्सर्वान्वारयित्वा पुनः प्रत्युपवेश्य स्थापयित्वा रावणं प्रति प्राञ्जलिभूत्वा वाक्यमब्रवीत् ॥ ७ ॥

रा० टी०-तानिति । गृहीतायुधान् तान् वीरकर्मणि तान् सर्वान् वारयित्वा प्रत्युपवेश्य तं विभीषणोऽब्रवीत् ॥ ७ ॥

गो० टी०-तानिति । क्रियाभेदात्तानित्यत्र [illegible] पुनरुक्तिः ॥ ७ ॥

८] ति० टी०-त्रिभिरुपायैः सामदानभेदैरयं । तस्य

१ वक्तमिति गो. पाठः । २ तूष्णीम्भूतं हरियूथपानिति गो. पाठः । ३ मधुवारणीमिति गो. पाठः । ४ अङ्गदं चेति गो. पाठः । ५ धर्मं च हनूमन्तमिति गो. पाठः । ६ बलवा रक्षो महापार्श्वो महोदर इति गो. पाठः । ७ राक्षस इति गो. रा. पाठः [illegible] त्रिभि महोत्सा मन्त्रारम्भोपायैरिति गो. पाठः । ८ सुग्रीवाणामिति गो. पाठः । १० विपुलाम्बुधारानिति गो. पाठः ।

पुरा शरत्पूर्णशशिप्रसन्ननिशाप्रवाहपुलकानुलिप्तः ।
सृजत्यमोघान्विशिखान्वधाय ते प्रदीयतां दाशरथाय मैथिली ॥ २१ ॥
त्यजाशु कोपं सुखधर्मनाशनं भजस्व धर्मं रतिकीर्तिवर्धनम् ।
प्रसीद जीवेम सपुत्रबान्धवाः प्रदीयतां दाशरथाय मैथिली ॥ २२ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः । विसर्जयित्वा तान्सर्वान्प्रविवेश स्वकं गृहम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

पुनश्च विभीषणः गतः प्रविश्याग्रजमवसं दुरत्ययतान्दर्शयन् प्रातःकालभाषणेन तं प्रार्थयते ।

ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः । राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः ॥ १ ॥

२१-२२] ति० त्री०—नवाग्रपुङ्खलवान्युज्ज्वलान्यग्राणि फलभागाः पुङ्खभागाश्च येषाम् । पुरा सृजति अक्ष्यति ततः पुरा प्राक्षैथिली दीयताम् ॥ २१ ॥ २२ ॥

रा० टी०—पुरेति । नृपात्मजो राम. अमोघान् विशिखान् शरान् ते तवार्थ विसृजति क्षयति अतः पुरा शरक्षेपात् पूर्वमेव मैथिली प्रदीयताम् ॥ २१ ॥

गो० टी०—पुरेति । अयं भव्यं पुङ्खं शरबलम् नवे अभ्रपुङ्खे लग्नौ ते अत एव सुदृढान् पुरा सृजति अक्ष्यति । दाशरथ्यायेत्यत्र दाशरथेः "तस्येदम" इति संबन्धार्थे अण् । कर्मण्यधात्र पुनस्तम् दाशरथाय दाशरथये ॥ २२ ॥

रा० टी०—त्यजेति कोपं त्यज प्रसीद च अत एव मैथिली प्रदीयतामत एव सपुत्रबान्धवा वयं जीवेम ॥ २३ ॥

गो० टी०—त्यजेति । रतिः सुखम् ॥ २३ ॥

२३] ति० टी०—तान्सर्वान्प्रहस्तादिदुर्मन्त्रिणो विभीषणं च ॥ २३ ॥

अत्राष्टमस्यामार्याः कृतकरीत्या ॥

इति श्रीरामायणे श्रीरामीये सप्तव्याख्यतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०—विभीषणेति । सर्वान् विभीषणादीन् विसर्जयित्वा विसर्ज्य गृहं प्रविवेश ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरहस्यरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

गो० टी०—विभीषणेति । सर्वे प्रातःकालोचयिष्याम इति विभीषणप्रमुखान् विसृजन्नित्यर्थः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटीव्याख्याने दशमोऽध्यायः समाप्तः ॥ ९ ॥

१] ति० टी०—प्रत्युषसि प्रातःकाले प्राप्ते, प्राप्तो धर्मार्थयोर्निश्चयो येन स विभीषणो राक्षसाधिपते रावणस्य वेश्म राक्षभूतं वक्ष्यमाणविशेषणसमन्वितं प्रविवेशेति सप्तमश्लोकस्थेनान्वयः । भीमकर्मा रावणमपि सीता देयेति दुष्करवचनवक्ता ॥ १ ॥

रा० टी०—विभीषणकर्तृकरावणवेश्मप्रवेशो वर्ण्यतेऽनेन—तत इत्यादिभिः । ततः रावणनिद्रापगमश्रवणानन्तरं प्रत्युषसि प्रातःकाले प्राप्ते धर्मार्थयोर्निश्चयो यस्य स भीमाय भयंकराय रावणाय तद्बोधनायेत्यर्थः कर्म गमनं यस्य स विभीषणः राक्षसाधिपतेर्वेश्म प्रविवेशेत्यन्वयः ॥ १ ॥

गो० टी०—अथ द्वितीयो विभीषणः सर्वोत्तरकाले रावणस्योपदेष्टुं तद्गृहं गत इत्याह—तत इत्यादि । प्रविवेश महाद्युतिरित्यन्तमेकं वाक्यम् । ततः प्रत्युषसीत्यनेन तद्गृहाहानन्तरमेकमहो गतमित्यवगम्यते । प्राप्तधर्मार्थनिश्चयः सीताप्रदानमेवास्मार्कं धर्मोऽर्थश्चेति कृतनिश्चयः । भीमकर्मा परमार्थतो रावणस्य हितत्वेऽपि तदभिमतार्थविज्ञापनरूपमाहसकरणात् भीमकर्मेत्युक्तिः राक्षसाधिपतेः अग्रजस्य आलयं निवासभूतम् वेश्म प्रविवेशेति संबन्धः । शैलाग्रचयसंकाशं गिरिशिखरचयसदृशम् । अभ्रंकषशृङ्गयुक्तत्वादिति भावः शैलशृङ्गमिवोन्नतमित्यौन्नत्ये दृष्टान्तः । द्वाविंशतमहाकक्ष्यं द्वाविंशतिमहाप्रकोष्ठम् । कक्ष्या प्रकोष्ठ इत्यादिः काङ्क्ष्यां मध्येभवन्यक इत्यमरः । महाभिः सिद्धिभिः परिगृहीत इति महाजनपरिग्रहम् तत्परिग्रहितमित्यर्थः । महामात्रैः प्रधानैः महामात्राः प्रधानाः स्युरित्यमरः । आसपर्यापैः कार्यकरणदक्षैरिति महामात्रविशेषणम् व्याहृतीकृतमाहूतं चक्षुषातीकृतवायुम् शुक्लघोषमहाशंखं शुक्लयोगेन प्रहान् शोभां प्राप्य तथोक्तम् तूर्यनादानादितं तूर्यशब्देन [illegible]

१ श्र० तिति ग. पाठः त्यजेति गो० पाठः ।

शैलाग्रचयसंकाशं शैलशृङ्गमिवोन्नतम् । सुविभक्तमहाकक्षं महाजनपरिग्रहम् ॥ २ ॥
भौतिपुष्टिर्महामात्रैरनुरक्तैरधिष्ठितम् । राक्षसैरासनप्राप्तैः सर्वतः परिरक्षितम् ॥ ३ ॥
मत्तमातङ्गनिःश्वासैर्व्याकुलीकृतमारुतम् । शङ्खघोषमहाघोषं तूर्यसंबाधनादितम् ॥ ४ ॥
प्रमदाजनसंबाधं प्रजल्पितमहापथम् । तप्तकाञ्चननिर्यूहं भूषणोत्तमभूषितम् ॥ ५ ॥
मन्यर्वाणामिवावासमालयं मरुतामिव । रत्नसंचयसंबाधं भवनं भोगिनामिव ॥ ६ ॥
तं महारथमित्यादित्यस्तेजोविस्तरभित्रान् । अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः ॥ ७ ॥
पुण्यान्पुण्याहघोषांश्च वेदविद्भिरुदाहृतान् । शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान् ॥ ८ ॥
पूजितान्द्विजपात्रैश्च सर्पिर्भिः सुमनोक्षतैः । मन्त्रवेदविदो विप्रान्ददर्श स महाबलः ॥ ९ ॥
स पूज्यमानो रक्षोभिः प्रयुज्यमाने स्वस्तयने । आसनस्थं महाबाहुर्ववन्दे धनदानुजम् ॥ १० ॥

शैलाग्रचयसंकाशं [...] स्थानाग्रम् [...] तोयदिव्य [...] पर्वतसंघातं [...] संघातं संपूर्णम् [...] प्रासादं [...] विस्तृतरक्षितम् [...] विस्तरविभक्तभूमिभागं [...] प्रासादं [...] अभिविस्तृतया [...] विभक्तभूमिभागं [...] ॥ १ ॥ ७ ॥

२] ति० टी०—[...] ॥ २ ॥

३] ति० टी०—कैलासशैलशृङ्गमिव [...] ॥ ३ ॥

४] ति० टी०—[...] ॥ ४ ॥

५-६] ति० टी०—[...] ॥ ५ ॥ ६ ॥

रा० टी०—[...] ॥ ५ ॥ ६ ॥

७-८] ति० टी०—[...] ॥ ७ ॥ ८ ॥

रा० टी०—[...] ॥ ७ ॥ ८ ॥

९-१०] ति० टी०—[...] ॥ ९ ॥ १० ॥

गो० टी०—पुण्यानिति । [...] ॥ ८ ॥

९-१०] ति० टी०—[...] ॥ ९ ॥ १० ॥

रा० टी०—पूजितानिति [...] ॥ ९ ॥

गो० टी०—पूजितानिति । [...] ॥ ९ ॥

---

१ ‘कक्ष्यमिति गो० पाठः । २ साधुनादितमिति गो० पाठः । ३ यानिति गो० पाठः । ४ स्वस्तये मु० पाठः । ५ वान इति गो० पाठः ।

अयं हि दोषः सर्वस्य जनस्यास्योपलक्ष्यते । रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च ॥ २४ ॥
प्रैषणे चास्य मन्त्रस्य निवृत्ताः सर्वमन्त्रिणः । अवश्यं च मया वाच्यं यद्दृष्टमथवा श्रुतम् ॥
संविधाय यथान्यायं तद्भवान्कर्तुमर्हति ॥ ॥ २५ ॥
इति स्वमन्त्रिणां मध्ये भ्राता भ्रातरमूचिवान् । रावणं राक्षसां श्रेष्ठं धर्म्यमेतद्विभीषणः ॥ २६ ॥
हितं महार्थं मृदु हेतुसंहितं व्यतीतकालायतिसंप्रतिक्षमम् ।
निशम्य तद्वाक्यमुपस्थितज्वरः प्रसङ्गवानुत्तरमेतदब्रवीत् ॥ २७ ॥
भयं न पश्यामि कुतश्चिदप्यहं न राघवः प्राप्स्यति जातु मैथिलीम् ।
सुरैः सहेन्द्रैरपि संगरे कथं ममाग्रतः स्थास्यति लक्ष्मणाग्रजः ॥ २८ ॥
इत्येवमुक्त्वा सुरसैन्यनाशनो महाबलः संयति चण्डविक्रमः ।
दशाननो भ्रातरमाप्तवादिनं विसर्जयामास तदा विभीषणम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे दशमः सर्गः ॥ १० ॥

लोकहापि यदि व्याहृतम् तत्रापि तथापि मयि दोषम् अपश्यन्तं कर्तुं नार्हसि ॥ २३ ॥

२४] ति० टी०—अयं दोषः संतापहरदोषः तन्मूलदुर्निमित्तदोषश्चेत्यर्थः । सर्वस्य जनस्येत्यादि तृतीयार्थे षष्ठी सर्वेण जनेन रक्षआदिरूपेणोपलक्ष्यते दृश्यते । यद्वा सर्वस्य राक्षसादिरूपयेतदुर्निमित्तफलमुपलक्ष्यत इत्यर्थः ॥ २४ ॥

रा० टी०—तत्र हेतुमाह—अयमिति । दोषः दोषजनकः अयं दुर्निमित्तसमूहः रक्षःप्रभृतेः सर्वस्य जनस्य सर्वेण जनेन उपलक्ष्यते दृश्यते एतत्सीताप्रायश्चित्तकरणे सर्वेषां विध्वंसो भविष्यतीति ध्वनितम् ॥ २४ ॥

गो० टी०—अयमिति । अयं दोषः पूर्वोक्तदुर्निमित्तसन्तितोनेन । सर्वस्य जनस्य लक्ष्यते संबन्धसामान्ये षष्ठी सर्वेणापि दृश्यत इत्यर्थः ॥ २४ ॥

२५] ति० टी०—नन्वयं स्वदतिरिक्तः कोऽपीमं मन्त्रं न प्रयुङ्क्ते, तत्कथं त्वयीत्युक्त आह—प्रैषणे इति । अस्य मन्त्रस्य प्रैषणे प्रयोगे यद्यपि स्वद्व्यतिरिक्ते मन्त्रिणो निवृत्ताः, तथापि मया आत्मना यद्दृष्टं श्रुतं वा तत्सर्वं हितमात्मनो वाच्यमेव ममानपराधित्वात् ॥ २५ ॥

रा० टी०—तु स्वदुक्तमसंहतम् असम्बद्धम् सर्वेषां निवृत्तस्वान् भञ्जनहेतुमात्रत्वात् इदमुक्तं सर्वोत्तमतत्त्वात् विषभक्षणवत् इत्यत आह—प्रैषणे इति । अस्य मन्त्रस्य प्रैषणे प्रयोगे सर्वे मन्त्रिणो निवृत्ताः स्वद्व्यतिरिक्ताः एतेन निवृत्तानामपि मदुक्तं संगतमेवेति सूचितं हेतोर्हितानुबन्धयोर्वाक्यस्वरूपाभिव्यक्तिरित्यत्र ध्वनितम् । अनु स्वार्थमेवं वृद्धैरेमे गता न तु मृत्युरादित्यत आह—यद् दृष्टं स्वयं ज्ञातमथवा श्रुतमन्यतो ज्ञातं तत् मया वाच्यं सर्वत्रैव निश्चितम् ॥ २५ ॥

रा० टी०—संविधायेति । यन्मया उक्तं तत् यथान्यायं संविधाय विधाय भवान् कर्तुमर्हति इत्येवंरूपः स्वमन्त्रिणां मध्ये विद्यमानं भ्राता विभीषणं ऊचिवान् सर्वलोकैकान्वयी२६

गो० टी०—प्रश्नकादिषु नियमानेषु भवानेव किमुच्यते तत्राह—आप्तेति । तेषां चलचित्तमात्मानुसारित्वादिति भावः आप्तेन त्वां प्रति विज्ञापने च । स्वं पुनः कथं वक्ष्ये प्रारब्धसे तत्राह—अवश्यमिति । आहत्यादिति भावः ॥ २५ ॥

गो० टी०—संप्रधार्येत्यर्थम् ॥ यथान्यायं यथायोग्यं संप्रधाय यत्सम्येव निश्चित्य । तत्संप्रधारित्यर्थम् ॥ २६ ॥

२६] ति० टी०—स्वमन्त्रिणां स्वभ्रातृभिन्नानाम् ॥ २६ ॥

गो० टी०—इति श्लोकेति । इत्येवमुक्त्वा निश्चित्यान्वयः ऊचिवान् उक्तवान् । "क्वसुश्च" इति तेरः क्वसुप्रत्ययः ॥ २७ ॥

२७] ति० टी०—व्यतीतकाले, आयतौ भाविकाले च क्षमं हितम् । उपस्थितज्वरः प्राप्तरोषः, प्रसङ्गवान्सीताविषयकामपराङ्मुखान् ॥ २७ ॥

रा० टी०—हितमिति । व्यतीतकाले भाविनि भाविकाले च क्षमते वर्तमानकाले च हितम् अत एव क्षमं युक्तं हेतुभिः संयुक्तं महार्थं मृदु अकर्कशं तद्वाक्यं निशम्य श्रुत्वा उपस्थितज्वरः प्राप्तरोषः प्रसङ्गवान् रामेरामस्तो रावणः एतत् उत्तरमब्रवीत् सापः ॥

गो० टी०—हितमिति ॥ २७ ॥ प्रयोजनव्याप्तम् मृदु सान्त्वपूर्वम् हेतुसंहितं युक्तियुक्तम् व्यतीतकालायतिसंप्रतिक्षमं व्यतीतकालः भूतकालः आयतिः भविष्यत्कालः संप्रति वर्तमानकालः तत्र क्षमम् । अकीर्तिनाशकत्वेन सीताप्रहरणप्रायश्चित्तत्वेन वाप्यतीतकालक्षमम् इहलोकत्वेन वर्तमानकालक्षमम् धर्मावहत्वेनायतिक्षमम् । उपस्थितज्वरः प्राप्तक्रोध इत्यर्थः प्रसङ्गवान् परिगृहीतार्थभिनिवेशवान् ॥ २८ ॥

२८ २९] ति० टी०—कुतश्चिदुर्निमित्तात्सुरक्षणत्रो-त्येवम् ॥ २८ ॥ २९ ॥

इति श्रीरामायणे श्रीमत्यो रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे दशमः सर्गः ॥ १० ॥

---

१ त्रेति गो. पाठः । २ क्षान्तो इति गो. पाठः । ३ संप्रधार्येति गो. पाठः । ४ रामश्चेत्रमिति गो. पाठः ।

एकादशः सर्गः ।

सीताविरहदुर्भीषणविकृतभावमानाय कृते रावणे मन्त्रयितुं सभां प्रविशत्यपि प्रमुखा राक्षसा विभीषणश्च तं प्रविविक्षुः ।

स बभूव कृशो राजा मैथिलीकाममोहितः । असम्मानाच्च सुहृदां पापः पापेन कर्मणा ॥ १ ॥
अतीव कामसंपन्नो वैदेहीमनुचिन्तयन् । अतीतसमये काले तस्मिन्वै पृथि रावणः ॥
अमात्यैश्च सुहृद्भिश्च मैथ्यकालमसन्यत ॥ २ ॥
स हेमजालविततं मणिविद्रुमभूषितम् । उपगम्य विनीताश्वमास्थाय महारथम् ॥ ३ ॥
तमास्थाय रथश्रेष्ठं महापेत्रसमस्वनम् । प्रययौ राक्षसां श्रेष्ठो दशग्रीवः सभां प्रति ॥ ४ ॥
असिचर्मधराः योधाः सर्वायुधसमावृताः । राक्षसा रावणेन्द्रस्य पुरस्तादभिसंपतस्थिरे ॥ ५ ॥
नानावेषकृतवेषाश्च नानाभरणभूषिताः । पार्श्वतः पृष्ठतश्चैनं परिवार्य ययुस्तदा ॥ ६ ॥

रा० टी०-उत्तरस्वरूपाह—अथेति । अथ कृतस्मिन्नपि अर्थे न पश्यति अतो रावणो मैथिलीं प्रति प्रार्थयिषि न प्राप्स्यति । अयमर्थः हेतुमात्र-[illegible] सहितोऽपि लक्ष्मणाग्रजः [illegible] ३ [illegible] स्थानाने । तेन पूर्वावस्थापि स्वस्मादुत्कर्षवत्त्वं प्रतिपाद्यते ॥ २ ॥

गो० टी०-अथेति । अथ अनन्तरं पुरुषम् । [illegible] वहेन सीतां प्राप्स्यतीति पृथ विभीषणादिभि [illegible] सुहृद्भिरिति । कथं स्थितिं स्थास्यति । [illegible] कृतो योऽन्येन कृतस्तां सीतां प्राप्स्यतीति भावः ॥ २ ॥

रा० टी०-इतीति । यथेति [illegible] विभीषणं विसर्जयामास ॥ ३ ॥

इति श्रीगङ्गाधरीयरामायणव्याख्यायां [illegible]
मणौ युद्धकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०-सप्तदश वर्णानन्तरं कामसमर्थं रावणं । [illegible] दानं दर्शयति—इतीति । रावणः [illegible] पुष्पकविमानं पुष्पकविमम् । आस्थायेति पूर्ववदिदम् ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे व्याख्याने युद्धकाण्डव्याख्यायां दशमः सर्गः ॥ १० ॥

१] ति० टी०-कृशत्वे हेतु—मैथिलीकामेति । मैथिलीविषयकामेन मोहितः । हेतुमाह—असम्मानादिति । विभीषणादीनां कर्तृणामसम्मानाद्धेतोः [illegible] ॥ १ ॥

रा० टी०-विभीषणप्रविसर्जनानन्तरमेव रावणकृतान्तमाह—स इत्यादिभिः । मैथिलीकामेन मैथिलीविषयकोत्कटेच्छया मोहितः कर्तव्याविषयकनिश्चयाभावात् अत एव पापः रामसेवानिश्चेतारावुपयुक्तः राजा स रावणः पापेन कर्मणा हेतुभूतेन सुहृदां विभीषणादीनां कर्तृणामसम्मानाद्धेतोः [illegible] ॥ १ ॥

गो० टी०-अथ परेषुर्विभीषणप्रविसर्जनपरेऽहनि [illegible] रावणस्य निर्णयवैकल्यकरणाय समागमे दर्शयति—अथ [illegible] । पापः पापी । "गुणवचनेभ्यो मतुपो लुगिति" मतुपोलुक् । असम्मानात् अनादरात् । सुहृदां विभीषणादीनाम् [illegible] पापी विनाशकारी तृष्णी [illegible] ॥ १ ॥ पापेन कुत्सितेन [illegible] हेतौ तृतीया । मैथिलीकाममोहितेन इति हेतुगर्भविशेषणम् । तथा च मैथिलीविषयकामोदयात् पूर्वावस्थादपि पूर्वावस्थाद्वयात् [illegible] विनाकृतो बभूवेत्यर्थः ॥ २ ॥

२] ति० टी०-तस्मिन्काले [illegible] पृथि पृथिव्यां [illegible] विभीषणोत्कर्षिणात्मकपूर्वोक्तव्यापारादिभिर्विना पापादिभिः [illegible] प्राप्तकाले कामसंमोहितत्वादन्यत्र ॥ २ ॥

रा० टी०-अतीतेति । कामेन सीतासंभोगविषयकेण स्वोत्कण्ठया संपन्नः अत एव वैदेहीं तत्प्राप्तावुपायमनुचिन्तयन् रावणः काले तस्मिन् समये यदि रामेण सह युद्धे [illegible] समये समयाभावेऽपि प्राप्तकालमन्यत युद्धमिति शेषः सार्धश्लोक एकान्वयी ॥ २ ॥

गो० टी०-अतीतेति । तस्मिन् काले मन्त्रयोग्यकाले अतीतसमये अतीतावसरे सति पृथि च स्वयं युद्धे च प्रवर्तमाने अमात्यैश्च सुहृद्भिः मन्त्रिभ्यः प्राप्तकालमन्यत । सुहृद्भ्यस्तु कालेऽतीतसमये रामयुद्धकालेऽतीते सति [illegible] अमात्यादिभिः महान्तमपि प्राप्तकालं प्राप्तप्रायमपि [illegible] मेनेति । वै प्रसिद्धौ ॥ २ ॥

३-६] ति० टी०- अथैव निश्चयाय सभायां [illegible] स हेमेत्यादि ॥ ३ ॥ ६ ॥

रा० टी०-स इति । हेमजालेन वितनं [illegible] विनीताः अश्वा यस्मिन् तं महारथम् । [illegible] दाह ॥ ३ ॥

---

१ गो. तारित । २ मन्त्रेति पो. पाठः । ३ राक्षसेश इति गो. पाठः । ४ वेषेति गो. पाठः । ५ इति इति गो. पाठः । ६ [illegible]

भीतिरयाः शीघ्रं वर्मभिश्च वरायुधैः । अनूत्पतद्दशग्रीवमाक्रीडद्भिश्च राजभिः ॥ ७ ॥
दापरिघहस्ताश्च शक्तितोमरपाणयः । परश्वधधराश्चान्ये तथान्ये शूलपाणयः ॥
स्तूर्यसहस्राणां संजज्ञे निःस्वनो महान् ॥ ॥ ८ ॥
मुलः शङ्खशब्दश्च सभां गच्छति रावणे । स मेघघोषेण महान्सहसाभिनिनादयन् ॥ ९ ॥
जमार्गं श्रिया जुष्टं प्रतिपेदे महारथः । विमलं चातपत्रं च प्रगृहीतमशोभत ॥ १० ॥
ण्डुरं राक्षसेन्द्रस्य पूर्णस्तारापिणो यथा । हेममञ्जरिगर्भं च शुद्धस्फटिकविग्रहे ॥ ११ ॥
ामरव्यजने तस्य रेजतुः सव्यदक्षिणे । ते कृताञ्जलयः सर्वे रथस्थं पृथिवीस्थिताः ॥ १२ ॥
क्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववन्दिरे । राक्षसैः स्तूयमानः सञ्जयाशीर्भिररिंदमः ॥ १३ ॥
गाससाद महातेजाः सभां विरचितां तदा । सुवर्णरजतास्तीर्णां विशुद्धस्फटिकान्तराम् ॥ १४ ॥
वेराजमानो वपुषा रुक्मपट्टोत्तरच्छदाम् । तां पिशाचशतैः षड्भिरभिगुप्तां सदाभिभाम् ॥ १५ ॥

गो० टी०–स हेमेति । हेमजालविततं स्वर्णमयगवाक्षयुक्तम् स्वर्णसमूहनिर्मितमिति या विनीतार्थं शिक्षितारूपम् उपगम्य प्रदक्षिणीकृत्य ॥ ३ ॥

रा० टी०–तमिति । रथमेवमास्थाय सभां प्रति ययौ॥४॥
गो० टी०–तमिति । सभां मन्त्रशालाम् ॥ ४ ॥
रा० टी०–असीति । असिचर्मधराः सर्वायुधधराश्च तमाः राक्षसेन्द्रस्य पुरस्तादग्रे संप्रतस्थिरे ॥ ५ ॥
गो० टी०–असीति । चर्म खेटः ॥ ५ ॥
रा० टी०–नानेति । नानाविकृतवेषाः राक्षसाः एनं वर्णं परिवार्य ययुः ॥ ६ ॥
गो० टी०–नानाविकृतेति । ततः रावणालयात् । नानाविकृतवेषाः नानाविधतया विशिष्य कृतालंकाराः। राक्षसा ते घोषः ॥ ६ ॥

७] ति० टी०–आक्रीडद्भिर्गतिभेदेन क्रीडां कुर्वद्भिः॥ ७ ॥
रा० टी०–रथैरिति । गदादिहस्ता अतिरथाः रथैः इवारणैः उत्कृष्टगजैश्च क्रीडद्भिर्वाजिभिश्च दशग्रीवमनत्पेतुः । ऊर्ध्वलोक एकान्तगी ॥ ७ ॥ ८ ॥
गो० टी०–रथैरिति । आक्रीडद्भिः धारामण्डलगमनादिकं कुर्वद्भिः ॥ ७ ॥
गो० टी०–गदेति । अत्र प्रतिपदमन्वय इत्यनुषजनीयम् अनपेक्षेरिति च ॥ ८ ॥

८–९] ति० टी०–ततः प्रस्थानोत्तरम् ॥ ८ ॥ ९ ॥
गो० टी०–ततस्तूर्येति । ततः स्वालयात् ॥ ९ ॥
रा० टी०–तत इति । रावणे सभां गच्छति सति तूर्यसहस्राणां महान् निःस्वनः तुमुलः शङ्खशब्दश्च संजज्ञे ॥ ९ ॥
रा० टी०–स इति । स रावणः मेघघोषेण राजमार्गमभिनादयन् सन् प्रतिपेदे जगाम ॥ १० ॥
गो० टी०–स नेमीति । नेमिः रथचक्रधारा ॥ १० ॥

१०] ति० टी०–आतपत्रं छत्रम् ॥ १० ॥
रा० टी०–विमलमिति । प्रगृहीतं राक्षसेन्द्रस्यातपत्रं पूर्णस्ताराधिप इव अशोभत ॥ ११ ॥
गो० टी०–विमलमिति । भासा विमलमित्यर्थः ॥ ११
११] ति० टी०–अलंकाराय हेमनिर्मिता मञ्जर्यौ गर्भे यते । शुद्धस्फटिकविग्रहे तेनातिशुभ्रे ॥ ११ ॥
यथा
रा० टी०–हेमेति । हेम्नो निर्मिताः मञ्जर्यौ गर्भे ययोः अतिस्वच्छेन शुद्धस्फटिकवत् विग्रहौ स्वरूपे ययोः ते चामरव्यजशुक्ल
रावणस्य सव्यदक्षिणे सव्यदक्षिणपार्श्वयोः रेजतुः ॥ १२
तस्
गो० टी०–हेमेति । हेममञ्जरिगर्भे हेममञ्जरगर्भे । इवतत्यमार्षम् । शुद्धस्फटिकविग्रहे शुद्धस्फटिकसदृशाकारे चामरव्यजने । चामररूपव्यजने । सव्यदक्षिणे सव्यदक्षिणयोः "सर्वो द्वन्द्वो विभाषयैकवद्भवति" इत्येकवद्भावः ॥ १२ ॥
१२–१३] ति० टी०–सव्यदक्षिणे । समाहारद्वन्द्व सव्यदक्षिणपार्श्वयोरित्यर्थः ॥ १२ ॥ १३ ॥
रा० टी०–ते इति । राक्षसाः राक्षसश्रेष्ठं ववन्दिरे॥१
गो० टी०–त इति । स्पष्टम् ॥ १३ ॥
रा० टी०–राक्षसैरिति । जयाशीर्भिः जयबोधकार्थ वचनैः करणैः राक्षसैः स्तूयमानः सन् विरचितां विश्वकर्म निर्मितां सभाम् आससाद ॥ १४ ॥
गो० टी०–राक्षसैरिति । ऽविरचितां सदु निर्मिताम्
१४] ति० टी०–विरचितां । विश्वकर्मणेति शेष सुवर्णरजतास्तीर्णां तैः कृतसङ्गमामित्यर्थः विशुद्धा ट टिका अन्तरे मध्ये शोभार्थं यस्याः सा ॥ १४ ॥
१५] ति० टी०–विराजमानो वपुषेति प्रकृतरावणो वर्णनम् । रुक्मपट्टकृतपटुच्छदरूपस्तरच्छदो यस्यां ताम् पिशाचशतैः शूलपरिघादिभिर्युक्तैः रक्षिताम् सदाभिभां रुक्मप्रभयेति शेषः ॥ १५ ॥

१ अर्धमेतदधिकं गो. पाठे । २ पीति गो. पाठः । ३ पाच्छदमिति गो. पाठः । ४ कामिति गो. पाठः । ५ [illegible] गो. पाठः । ६ दामामिति गो. पाठः ।

प्रविवेश महातेजाः सुकृतां विश्वकर्मणा । तस्याः स वैदूर्यमयं प्रियकाजिनसंवृतम् ॥ १५ ॥
महत्सोपाश्रयं भेजे रावणः परमासनम् । ततः शशासैश्वर्यवद्भूतान्क्षुद्रपराक्रमान् ॥ १६ ॥
समानयत मे क्षिप्रमिहैतान्राक्षसानिति । कृत्यमस्ति महज्ज्ञाने कर्तव्यमिति शत्रुभिः ॥ १७ ॥
राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः । अनुगेहमवस्थाय विहारशयनेषु च ॥
उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत् ॥ १८ ॥
ते रथान्तैरा एके द्रुमानेके द्रुमाँयान् । नौगानेकेऽधिरुरुहुर्गन्धुमेके पदातयः ॥ १९ ॥
सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः । संपतद्भिर्विरुरुचे मरुत्पद्भिरिवाम्बरम् ॥ २० ॥
ते वाहनान्यवस्थाय यानानि विविधानि च । सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव ॥ २१ ॥

रा० टी०—सुवर्णेति । सुवर्णरजतैः आस्तीर्णां तन्निर्मितभूमिमतीत्यर्थः विशुद्धाः स्फटिकाः तन्मयप्रतिमादयः अन्तरे मध्ये यस्या रुक्मपट्टः उत्तरच्छदो यस्यां पङ्क्तिः पिशाचशतैरभिरक्षितां विश्वकर्मणा सुकृतां तां सभां वपुषा विराजमानो रावणः प्रविवेश श्लोकद्वयमेकान्वयि ॥ १५ ॥ १६ ॥

गो० टी०—सुवर्णेत्यादिश्लोकद्वयमेकान्वयम् । विशुद्धस्फटिकान्तरां निर्मलस्फटिकनिर्मितमध्यप्रदेशाम् रुक्मपट्टोत्तरच्छदां कनकमयपट्टप्रच्छदाम् ॥ १५ ॥ १६ ॥

१६] ति० टी०—तस्याः सभायाः मध्ये स रावणः वैदूर्यमयं वैदूर्यरत्ननिर्मितम् प्रियकारुरुमृगसंवलितां परममृदुनाजिनेन संवृतम् ॥ १६ ॥

रा० टी०—तस्या इति । वैदूर्यमयं वैदूर्यमणिनिर्मितं प्रियकाणाम् अतिमृदुचर्मवत्प्रियकाभिधमृगाणामजिनेन संवृतं सोपाश्रयम् उपधानसहितं तस्याः सभायाः परमासनं रावणो भेजे तत्र तस्थौ ॥ १६ ॥

गो० टी०—तस्यामिति । वैदूर्यमयं वैदूर्यपशुरूपं प्रियकाजिनसंवृतं प्रियकमृगस्याजिनेन संवृतम् प्रियको लोमभिर्युक्तो मृदुश्लक्ष्णश्चर्मणेनेति वैजयन्ती । सोपाश्रयं सावष्टम्भं सोपधानमिति यावत् ॥ १७ ॥

१७] ति० टी०—सोपाश्रयं सोपधानम् ईश्वरवदीश्वरार्हम् ॥ १७ ॥

१८] ति० टी०—शत्रुभिर्महत्कर्म कर्तव्यमस्मीति ज्ञाने, अतो राक्षसान्समानयतेति शशास ॥ १८ ॥

रा० टी०—तत इति । शत्रुभिः सह महत् कृत्यं कार्यं कर्तव्यमस्ति इत्यहं जाने अतः एतान् प्रसिद्धान् राक्षसान् क्षिप्रमिहानयत इति लघुपराक्रमान् इतान् ईश्वरवत् शशास सार्धश्लोक एकान्वयी ॥ ७१ ॥ १८ ॥

गो० टी०—तत इति । ईश्वरवत् राजार्हम् इह सभायां स्थितान् पतगरथान् इति ज्ञशासेत्यन्वयः तमेव प्रकारमाह—इत्यभिरयणेन । महत्यथो नथा समर्थं बलेन ज्ञानं प्राप्तं महत्कृत्यमस्मीति शशास । महद्भयो रावा-दिभ्यो ज्ञातमिति वा । महदित्यनेन तदानीं चारसूत्रेण रावण समुद्रतीरागमनं रावणो ज्ञातवानिति गम्यते ॥ १८ ॥ १९

१९] ति० टी०—राक्षसा इतरूपाः । अनुगेहमवस्था प्रविश्य विहारादिषु व्यासक्तानपि रक्षांसि रावणआज्ञया तत्तत्कर्म चोदयन्तः सन्तो लङ्कायां परिचक्रमुः ॥ १९ ॥

रा० टी०—राक्षसा इति । तद्वचः श्रुत्वा अनुगे निखिलगृहेषु उद्यानेषु च अवस्थाय विहारशैयेषु आसक्ता रक्षांसि अभीतवत् यथा भवति तथा चोदयन्तः सहसमना प्रेरयन्तो राक्षसाः लङ्कायां परिचक्रमुः सार्धश्लोक एकान्वयी ॥

गो० टी०—राक्षसा इत्यादि सार्धश्लोकः । विहरमाणा नामि शेषः । विहारो विहरणस्थानम् विहारादिषु आसक्त विहरमाणानि रक्षांसि अभीतवत् अभीताः चोदयन्त चोदनार्थं लङ्कायामनुगेहं परिचक्रमुरित्यन्वयः ॥ १७ ॥

२०] ति० टी०—ते आहूता राक्षसा स्थानवरू संचारिणः । अन्वरिति शेषः । इयाधिरुरुहुरित्यपकर्षः ॥ २० ॥

रा० टी०—ते इति । ते आहूताः एके राक्षसाः रथा चराः रथश्रेष्ठसंचारिणः सन्तः एके पदातय एव द्रुमान् एके नागान् गजान् आरुरुहुः ॥ २० ॥

गो० टी०—ते रथान् रुचिरानेके द्रुमानेके नागानन्येऽधिरुरुहुर्गन्धुमेके पदातयः ॥ २१ ॥

२१-२५] ति० टी०—परमाकीर्णा ॥ २१ ॥ २३

रा० टी०—सेति । स्थादिभिः परमाकीर्णा सा गरुत्मद्भिराकीर्णमम्बरमिव रुरुचे शुशुभे ॥ २१ ॥

गो० टी०—सेति । गरुत्मद्भिः पक्षिभिः ॥ २१ ॥

रा० टी०—ते इति । ते राक्षसाः वाहनानि यानानि स्थादीन् च अवस्थाय त्यक्त्वेति शेषः सिंहा गुहामिव पद्भिः सभां प्रविविशुः ॥ २२ ॥

गो० टी०—त इति । वाहनानि विविधादीनि । यान मश्वादीति अमरपाल्ये पद्भिर्विविशुः ॥ २१ ॥

---

१ ज्ञशासेति सो. पाठः । २ सार्धं समर्थमिह सो महर्षिणा गो. पाठः । ३ रथान्तैरा एके गो. पाठः । ४ द्रुमाँयान् गो.

राज्ञः पादौ गृहीत्वा तु राज्ञा ते प्रतिपूजिताः। पीठेष्वन्ये तु शोण्वन्ये भूमौ केचिदुपाविशन् ॥ २३ ॥
ते समेत्य सभायां वै राक्षसा राजशासनात्। यथार्हमुपतस्थुस्ते रावणं राक्षसाधिपम् ॥ २४ ॥
मन्त्रिणश्च यथामुख्या निश्चितार्थेषु पण्डिताः। अमात्याश्च गुणोपेताः सर्वज्ञा बुद्धिदर्शनाः ॥ २५ ॥
समीयुस्तत्र शतशः शूराश्च बहवस्तथा। सभायां हेमवर्णायां सर्वार्थेभ्य सुखाय वै ॥ २६ ॥
[रम्यायां राक्षसेन्द्रस्य समेयुस्तत्र संघशः।]

ततो महात्मा विपुलं सुयुग्यं रथं वरं हेमविचित्रिताङ्गम्।
शुभं समास्थाय ययौ यशस्वी विभीषणः संसदमग्रजस्य ॥ ॥ २७ ॥
स पूर्वजायावरजः शशंस नामाथ पश्चाच्चरणौ ववन्दे।
शुकः प्रहस्तश्च तथैव तेभ्यो ददौ यथार्हं पृथगासनानि ॥ ॥ २८ ॥
सुवर्णनानामणिभूषणानां सुवाससां संसदि राक्षसानाम्।
तेषां परार्ध्यागुरुचन्दनानां स्रजां च गन्धाः प्रववुः समन्तात् ॥ ॥ २९ ॥
न चुक्रुशुर्नानृतमाह कश्चित्सभासदो नापि जजल्पुरुच्चैः।
संसिद्धार्थाः सर्व एवोग्रवीर्या भर्तुः सर्वे ददृशुश्चाननं ते ॥ ॥ ३० ॥

२३-२४] ति० टी०—वृसी तृतासनम् ॥ २३ ॥ २४ ॥

रा० टी०—राज्ञ इति । राज्ञः पादौ गृहीत्वा विश्रमणा तत एव राज्ञार्चितपूजिताः ते राक्षसाः पीठादिषु उपाविशन् । दी कुशमयमासनम् ॥ २३ ॥

गो० टी०—राज्ञ इति । अन्ये पुरोहितादयः पीठेषु दुष्पणीश्चिकासनेषु अन्ये श्रोत्रियाः वृसीषु दर्भमयासनेषु क्षत्रियपुत्रादयः भूमौ सामान्यास्तरणमात्रयुक्तायां भूमौ ॥ २४ ॥

रा० टी०—ते इति । सभायां समेत्य यथार्हं यथायोग्यं रावणमुपतस्थुः तुष्टुवुः ॥ २४ ॥

गो० टी०—त इति । क्रियाभेदात्तच्छब्दद्वयम् । उपतस्थुः समीपे तस्थुः । यथार्हं यथाक्रमम् ॥ २४ ॥

२५] ति० टी०—यथामुख्या यथायोगं तत्तन्मन्त्रविषये मुख्याः निश्चितार्थेषु नीवि निधा आहितान्यादिः अर्थ निश्चयेषु विषयेषु । अमात्या उपमन्त्रिणः सर्वज्ञाः सर्वशास्त्रज्ञाः बुद्धिर्दर्शनं चक्षुर्येषां ते ॥ २५ ॥

रा० टी०—मन्त्रिण इति । निश्चितार्थेषु अर्थनिश्चयेषु पण्डिताः बुद्धिरेव दर्शनं ज्ञानचक्षुर्येषां ते मन्त्रिणः अमात्याश्च अराश्च सर्वार्थेभ्य स्वामिनिखिलकृत्यस्य सुखाय सुखपूर्वकसाधनाय तत्र सभायां यथावत्समीपुः। श्लोकद्वयमेकान्वयि २५॥२६

गो० टी०—मन्त्रिणश्चेत्यादिसार्धश्लोकः । यथा यथाक्रमम् यथामुख्या इत्यर्थः यद्वा यथामुख्यानननिक्रम्य स्थिताः अन्यत्रस्थानापेक्षम् निश्चितार्थेषु । अमात्याः कर्मणि-सहायाः मन्त्रिणः बुद्धिसहायाः यद्वा अमा सह निवर्त्तन्यमान्याः । " अव्ययाच्च " । आत्मा इत्यर्थः । बुद्धिदर्शनाः बुद्धिचक्षुषः ॥ २५ ॥

२६] ति० टी०—सर्वार्थेभ्य । निश्चयायेति शेषः । सुखाय क्षेमाय क्षणं विचारयितुम् ॥ २६ ॥

गो० टी०—अरा इत्युत्तरशेषः अन्यथा क्रियापदौनरुक्त्यम् । सभायामिति । सुखाय क्षेमाय क्षेमं निवारयितुम् "क्रियार्थोपपदस्य०" इत्यादिना चतुर्थी ॥ २७ ॥

२७] ति० टी०—सुयुग्यं शोभना युग्या अश्वा यस्मिंस्तम् । संसदं सभाम् ॥ २७ ॥

रा० टी०—तत इति । शोभनाः युग्याः अश्वा यस्मिन् ते रथं समास्थाय संसदं सभां विभीषणो ययौ ॥ २७ ॥

गो० टी०—तत इति । युग्या अश्वाः । युगं वहन्तीति "तद्वहति रथयुगप्रासङ्गम्" इति यत् ॥ २७ ॥

२८] ति० टी०—नामग्रहणपूर्वकं नमस्कारः कार्य इति सदाचारः । व्यग्रचित्ततया राज्ञः स्वागमनज्ञापनाय वा । तेभ्यः सभामागतेभ्यः सभ्येभ्यः पृथग्ददौ तत्तदासनस्थानं नीतवान् ॥ २८ ॥

रा० टी०—स इति । अवरजः सविभीषणः पूर्वजाय रावणाय नाम स्वामिधां शशंस पश्चात् चरणौ ववन्दे शुकः प्रहस्तश्च तथा तेन प्रकारेण नाम शशंस ववन्दे च तेभ्यो यथार्हमासनानि पृथक् ददौ रावण इति शेषः ॥ २८ ॥

गो० टी०—स इति । नाम शशंस । अभिवादनमकरोदित्यर्थः । शुकः प्रहस्तश्चेति । ववन्दाते इत्यर्थः ॥ २९ ॥

२९] ति० टी०—तेषां राक्षसानां यानि परार्ध्यागुरुचन्दनानि स्रजश्च तेषां गन्धा वायुसंबन्धात्प्रववुः ॥ २९ ॥

रा० टी०—सुवर्णेति । सुवर्णनानामणीनां भूषणानि येषां तेषां राक्षसानां संबन्धिनां परार्ध्यागुरुचन्दनानां स्रजां च गन्धाः प्रववुः ॥ २९ ॥

गो० टी०—सुवर्णेति । स्रजश्च गन्धाः परा गन्धाः ॥ ३० ॥

३०] ति० टी०—नीतिशास्त्रे [illegible]

---

१ निश्चयार्थेष्विति गो. पाठः । २ समेयुरिति गो. पाठः । ३ अर्थनिश्चयेषु गो. [illegible]

स रावणः शस्त्रभृतां मनस्विनां महाबलानां समितौ यशस्वी ।
तस्यां सभायां प्रभया चकाशे मध्ये वसूनामिव वज्रहस्तः ॥ ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे [illegible] आदिकाव्ये युद्धकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ।

[illegible] प्रहस्तं [illegible] सेनापतिं [illegible] प्रहस्तो [illegible] निवेदयितुं च आज्ञप्तः प्रस्थापयति ।

स तां परिषदं कृत्स्नां [illegible] प्रहस्तं वाहिनीपतिम् ॥ १ ॥
सेनापते यथा ते स्युः [illegible] ॥ २ ॥
स महस्तः प्रणीतात्मा विनीतात्मा [illegible] ॥ ३ ॥
ततो विनिःसृत्य [illegible] ॥ ४ ॥
विहितं वाहिनीनां [illegible] ॥ ५ ॥

[illegible] ॥ १ ॥

गो० टी०—स तामित्यादि । [illegible] ॥ २ ॥

[illegible] ३] ति० टी०—स इति ॥ ३ ॥

रा० टी०—सभामिलनवर्णनाद्रावणमाह—स इत्यादिभिः । स रावणः शस्त्रभृतां [illegible] ॥ १ ॥

गो० टी०—अथ सर्वेषामनन्तरं नायकत्वाभिषानपूर्वकं स्वाभिमतानुगामिनो रावणो मन्त्रयत्यते—स तामित्यादि । [illegible] ॥ २ ॥

[illegible] ३] ति० टी०—प्रणीतात्मा [illegible] ॥ ३ ॥

रा० टी०—स इति । प्रणीतात्मा [illegible] ॥ ३ ॥

गो० टी०—स इति । [illegible] ॥ ३ ॥

४] ति० टी०—ततश्च—नागभूतये इति ॥ ४ ॥

रा० टी०—तत इति । नागभूतये [illegible] ॥ ४ ॥

गो० टी०—तत इति । प्रसन्ने अग्नौ ॥ ४ ॥

५] ति० टी०—अभिमता अथाकुलचित्ता ॥ ५ ॥

रा० टी०—तदुक्तिमुक्तमाह—विहितमिति । [illegible] ॥ ५ ॥

---

१ वैदेहमसितं गो. पाठः । २ विचलितं गो. पाठः । ३ दृश्यन्तरेति गो. पाठः । ४ विहितमिति गो. पाठः । ५ वाहिनीति गो. पाठः ।

प्रहस्तस्य वचः श्रुत्वा राजा राज्यहितैषिणः । मुखेष्वसुः सुहृदां मध्ये व्याजहार स रावणः ॥ ६ ॥
प्रियाप्रिये हिते दुःखे लाभालाभे हिताहिते । धर्मकामार्थकृच्छ्रेषु मूढमस्य वेदितुम् ॥ ७ ॥
सर्वकृत्येषु मुख्यानि मन्त्रकर्माणि सर्वदा । मन्त्रकर्मनियुक्तानि न जातु विफलानि मे ॥ ८ ॥
सप्तोपायाः कर्मसिद्धिरिष्टा सामादयः । भवद्भिरहमत्यर्थं वृतः श्रियमवाप्तुयाम् ॥ ९ ॥
अहं तु खलु सम्मोहः समर्थयितुमुद्यतः । कुम्भकर्णस्य तु स्वप्नाश्रेयसमर्थमोदयम् ॥ १० ॥
अयं हि सुप्तः पञ्चाहान्कुम्भकर्णो महाबलः । सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः ॥ ११ ॥
इयं च दण्डकारण्यात्तस्य सोदर्या प्रिया । रक्षोभिश्चरितोद्देशादानीता जनकात्मजा ॥ १२ ॥
सा मे न क्षममारोढुमिच्छत्यचलमप्यमी । त्रिषु लोकेषु चान्या मे न सीतासदृशी स्त्रियः ॥ १३ ॥

गो० टी०-निहितार्थमिति । अभिप्रायः स्पष्टः । ६ ॥

प्रियाप्रिये [1] ... अर्थाश्च ते अस्तु नित्यदा ॥ ७ ॥

६] ति० टी०-प्रहस्तहितैषिणः प्रहस्तस्येव हितैषिणः ॥ ६ ॥

रा० टी०-प्रहस्तस्येति । राज्यहितैषिणः प्रहस्तस्येव हितैषिणः सुहृदां मध्ये व्याजहार ॥ ६ ॥

गो० टी०-प्रहस्तस्येति । मुखेष्वसुः मुखेषु संपादितं प्रथमं प्राणं ॥ ६ ॥

७] ति० टी०-प्रियाप्रियेषु ... संकटे ७ इति वैजयन्तः । लाभालाभयोः ... ॥ ७ ॥

रा० टी०-प्रियेति । धर्मकामार्थेषु ... मूढं मूर्खं ... ॥ ७ ॥

गो० टी०-प्रियाप्रिये ... प्रथमं ... संपादितं प्रथमं प्राणसंशयं करोतीत्यर्थः । ७ ॥

८-९] ति० टी०-मन्त्रकर्मनियुक्तानि ... ८ ॥

रा० टी०-मन्त्रकर्मेति । ... ॥ ८ ॥

गो० टी०-मन्त्रकर्मनियुक्तानि ... ॥ ८ ॥

रा० टी०-सप्तोपायाः ... ॥ ९ ॥

गो० टी०-सप्तोपायाः ... ॥ ९ ॥

१०-११] ति० टी०-समर्थयितुं स्वाभिमतं मां नियोजयितुं तत्र मां नियोजयन्तीति ... ॥ १० ॥ ११ ॥

रा० टी०-सप्तभिरिति । ... ॥ १० ॥ ११ ॥

गो० टी०-सप्तोपायैरिति ... ॥ १० ॥

गो० टी०-कुम्भकर्णस्य स्वप्नाश्रेयसमर्थयितुं ... ॥ ११ ॥

१२] ति० टी०-सीतासमर्पणं विना रामजयोपायो नास्तीत्यभिप्रायेणाह-इयं चेति । रक्षोभिश्चरितः सेवितो य उद्देशो देशो जनस्थानलक्षणस्तस्मात् ॥ १२ ॥

रा० टी०-अभिप्रेतं ... ॥ १२ ॥

गो० टी०-उत्तरत्र सीताप्रत्यर्पणं विना रामजयो विचार्यतामिति वक्तुकामस्तस्या दुरन्यत्वं ... ॥ १२ ॥

१३] ति० टी०-सीतासदृश्यन्या मे ... ॥ १३ ॥

रा० टी०-सेति । सा मयानीता सीता मे मह्यं प्रेषित-

---

१ [illegible] २ सुखे दुःखे लाभालाभाविति गो.पाठः ३ निष्फलानीति गो.पाठः ४ चरितोद्देशमिति गो.पाठः ५ म.

तनुमध्या पृथुश्रोणी शरदिन्दुनिभानना । हेमविग्रहनिभा सौम्या मायेव मयनिर्मिता ॥ १३ ॥
सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ । दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः ॥ १५ ॥
हुताग्निरर्चिःसंकाशामेनां सौरीमिव प्रभाम् । उन्नसं विमलं वल्गु वदनं चारुलोचनम् ॥ १६ ॥
पश्यंस्तदवशस्तस्याः कामस्य वशमेयिवान् । क्रोधहर्षसमानेन दुर्वर्णकरणेन च ॥ १७ ॥
शोकसंतापनित्येन कामेन कलुषीकृतः । सा तु संवत्सरं कालं मामयाचत भामिनी ॥ १८ ॥
प्रतीक्षमाणा भर्तारं रामायतलोचना । तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम् ॥ १९ ॥

यामारोढुं नेच्छति भूमावेव शेते इत्यर्थः । मद् तथाशयने व का हानिरित्यत आह—ये मया एतत् त्रिषु लोकेषु सीतासदृशी अन्या यथा स्यात्तथा न एतेन सीतावशीकरणं कृतज्ञत्वं सूचितं तेन तस्या भूमिशयनमनुचितमिति ध्वनितम् ॥ १३ ॥

गो० टी०—सेति । अन्यगामिनी मन्दगामिनी । त्यक्त्वामनिच्छन्तीं परिगृह्णतस्तवाग्निरित्याह—त्रिभिरिति ॥ १३ ॥

१४-१५] ति० टी०—ब्रह्मा निर्मिते यद्वित्यं एतिमा तद्विभा । मायेवेति । पतिक्षणमपूर्वार्थयोर्हो वस्तुनिर्मेयो माया ॥ १४ ॥ १५ ॥

रा० टी०—ननु अनुचितं नेव करोतीति तव तत्रापराधाभावात् किमर्थं तव शोक इत्यत आह—त्रिभिरिति । तनुमध्यत्वादिविशिष्टा निर्मिता मयमायेव या सीता तस्याः तावपि लोहितानि नखानि ययोस्तौ सुलोहिततलौ चरणौ श्लक्ष्णौ सुप्रतिष्ठितपादौ दृष्ट्वा मे शरीरजः शरीरजनकः कामोऽर्थात् दीप्यते संतप्यते । श्लोकद्वयमेकान्वयि । १४ ॥ १५ ॥

गो० टी०—असदृशत्वमुपपादयति—तनुमध्येत्यादिना । हेमविग्रहनिभा स्वर्णप्रतिमातुल्या सौम्या स्त्री मायेव प्रतिक्षणमपूर्ववदार्थयोद्यवस्तुवत् स्थिता ॥ १४ ॥

गो० टी०—क्रमेणारोहयतीत्याशङ्क्य मन्मथो विलम्ब न सहत इत्याह—सुलोहितेति । सुप्रतिष्ठितौ समतलौ दृष्ट्वा । स्थितस्येति शेषः । शरीरजः कामः ॥ १५ ॥

१६] ति० टी०—हुताग्निरर्चिःसंकाशामित्यर्थेऽपि दृष्ट्वा दीप्यते मे शरीरज इत्यनुषज्यते । उन्नसा नासिका यस्मिंस्तत् ॥ १६ ॥

रा० टी०—ननु तर्हि किमयं संतप्यते इत्यत आह—हुतेति । सौरीं सर्वसंवन्धिनीं प्रभामिव एनां सीतां लक्ष्येति शेषः तस्याः सीतायाः वदनं पश्यन् अवशः स्वतन्त्रोऽपि यो रामः कामस्य स्वप्राप्तिविषयकाकाङ्क्षायाः वशमेयिवान् सः रामः क्रोधं कोपं हर्षयति वर्धयति तेन सीतानिरीक्षणेन समानं जीवनं यस्य तेन दुर्वर्णस्य रामशरीरवैवर्ण्यस्य करणं यस्मिन् तेन शोकसंतापयोर्नित्यं नियमेन स्थितिर्येन तेन कामेन कलुषीकृतः श्यामः एतेन रामदुःखप्राप्तय एव सीतानिरोध इति ध्वनितम् । सार्धं श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०—सोपि निर्गुणतामित्याशङ्क्याह—हुतेत्यादि । अर्थोक्तेऽर्थे वाक्यम् । अनिच्छशब्दस्य इकारान्तत्वमार्षम् । सौरीमिव प्रभामित्यस्य हुतेत्यादिशेषपूरणेन सम्बन्धः ॥ १६ ॥

गो० टी०—उन्नसमिति । उन्नसा उन्नतनासिकम् "उपसर्गात्" इति नसादेशः । अवशः वितथः तदधीनः कथं निर्गृह्णीयामिति भावः । वल्गु सुन्दरम् ॥ १७ ॥

१७-१९] ति० टी०—अनशोऽस्यापि एव तस्या वक्त्रं पश्यंस्तिष्ठन्नाह । यद्यपि कैकेयीनिमित्तकक्रोधहर्षकारणयोरपि समानेन साधारणेनेत्यर्थः पक्षेण दुर्वर्णकरणेन कान्तिनाशकेन । शोकसंतापयोर्नित्येन नित्यप्रवर्तकेन । तनुमध्यादिविशिष्टा सीता किमर्थं दुःखनाशोपायं न करोतीत्यत आह—सेति । सा तु संवत्सरं कालं रामायतिपर्यन्तं सर्वं प्रतीक्षमाणा प्रमाणपरंपराघातं मयापि तथास्त्विति प्रतिज्ञातम् । बलात्कारं शापापमरणभियेत्यर्थः । कृतं मार्गं यथाचिन्तनेन अत इत्यत्र वस्तुतत्त्वम् । नहि सीतेव यावितुमर्हतीति, जानकी पुनः [illegible] ॥ १७ ॥ १९ ॥

गो० टी०—[illegible] हर्षयोः समानेन क्रोधे [illegible] कारणेन शोकसंतापनित्येन शोके मनोव्यापारे सीतापरंपरायां च नित्येन जीवनेन कामेन । कलुषीकृतः व्याकुलचित्तोऽभूत् ॥ १८ ॥

रा० टी०—ननु भर्तारं विना सा कथं जीवतीत्यत आह—सेति । भर्तारं प्रतीक्षमाणा सा सीता संवत्सरं वर्षपर्यन्तं काले स्वजीवनमयं मामयाचत अवदत् ॥ १८ ॥

गो० टी०—एवं सा प्रसक्तापि शब्दाभावोक्तयो नक्तं सा त्विति । संवत्सरं कालं संवत्सरो कालम् । संवत्सरो [illegible] तदा तत्र कश्चिन्मीत्यायाचते स्म । [illegible] वस्तुतो याचनमेव स्मा प्रतिज्ञा नादिति भावः ॥ १९ ॥

रा० टी०—तदिति । चारुनेत्रायाः सीतायाः प्रतिज्ञातं तद्वचः मया श्रुतमिति शेषः । अथ पृथक् । ननु रामस्य वनवासाज्ञानं रामाय सीतामदीयतामित्यत आह—श्रान्त इति । कामात् रामपराभवविषयकाभिलाषात् अहं श्रान्तः संतप्तो

१ [illegible] गो० टी० [illegible] २ ति० टी० [illegible] इति गो० पाठः ।

शान्तो दृष्ट्वा तवैतत् कामवृत्तं तप इवाध्वनि । कथं सामरमक्षोघ्नं तेरिष्यति वनौकसः ॥ २० ॥
बहुसत्त्वझषाकीर्णं तौ वा दशरथात्मजौ । अथवा कपिनैकेन कृतं नः कदनं महत् ॥ २१ ॥
दुर्जेयाः कार्यगतयो ब्रूत यस्य यथामति । मानुषाच्चो भयं नास्ति तथापि तु विमृश्यताम् ॥ २२ ॥
तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम् । ते मे भवन्तश्च तथा सुग्रीवप्रमुखान्हरीन् ॥ २३ ॥
पुरे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ । सीतायाः पदवीं प्राप्य संप्राप्तौ वरुणालयम् ॥ २४ ॥
अदेया च यथा सीता वध्यौ दशरथात्मजौ । भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतं चाभिधीयताम् ॥ २५ ॥
नहि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित् । सागरं वानरैस्तीर्त्वा निश्चयेन जयो मम ॥ २६ ॥

ज्ञातः तव दयान्तः अध्वनि हयः कशया ताडितो महाश्व इव यत्नेन सीतां न दास्यामीति सचिवम् । अर्थं पृथक् ॥ १९ ॥

गो० टी०-तन्मयेति । चारुनेत्रायाः इति प्रतिश्रवणहेतुः । नयनसौन्दर्यपराक्ष्येण तद्वचनमङ्गीकृतवानस्मीति भावः । अध्वनि दीर्घमार्गे ॥ २० ॥

२०] ति० टी०-तत्त्वेवं संवत्सरानन्तरं त्वद्वधे भविष्यत्येव, रामस्य स्त्रिताप्रसक्तिरेवेति का ते चिन्तेत्याशङ्क्य 'अपौरुषेऽपि रिपौपेक्ष्यः' इति नीतिशास्त्रपर्यालोचनया मन्त्रे प्रेरयामीत्याह-कथमिति । न कथमपीत्यर्थः ॥ २० ॥

रा० टी०-ननु बलवत्त्वे स एव ग्रहीष्यति किं तवादानेनेत्यत आह-कथमिति । वनौकसो दशरथात्मजौ च सागरं कथं तरिष्यतः तरणसाध्यार्थं तवा नास्तीत्यर्थः ॥ २० ॥

गो० टी०-[illegible]मेनामुपलप्स्यसे सासुपनेष्यामीत्यत्र व्यभिचारो ज्ञानस्यानिश्चितत्वात् आह-कथमिति । उत्तरन्ति उत्तरिष्यन्ति । सत्त्वानि अवध्यतिरिक्तजन्तवः ॥ २१ ॥

२१] ति० टी०-अथापि संभावनास्तीत्याह-अथवेति । एकेनापि कपिना महत्कदनं कृतम् ॥ २१ ॥

रा० टी०-ननु तदागमनाभावनिश्चये तव भयाभावात् किमर्थं सर्वान् पृच्छसीत्यतः पक्षान्तरमाह-अथवेति । एकेन वस्य कपिना नो अस्माकं कदनं विनाशः कृतम् अतः तस्य कार्यगतयः कार्याणां सिद्धयः दुर्ज्ञेयाः अतो यूयं यथामति ब्रूत ॥ २१ ॥

गो० टी०-तर्हि किमिदानीं विचार्यं तत्राह-अथवेति । यस्य यथामतिं तथा ब्रूतेत्यर्थः ॥ २२ ॥

२२] ति० टी०-अतः कार्यगतयो दुर्ज्ञेयाः, तस्मात्तस्य यथामति यद्वृत्तं तद्वृत्तं । सन्देहकपितो भीतस्य रामादपि क्रमेत ते भयमिति भयहेतुः सीता त्यक्तव्येत्याशङ्क्य भयाभावमाह-मानुषादिति ॥ २२ ॥

रा० टी०-स्वकीयानां भीतिं निवारयन्नाह-मानुषादिति । यद्यपि मानुषात् प्राकृतमनुष्यात् नो भयं नास्ति तथापि भवद्भिर्विमृश्यताम् अर्थं पृथक् । मानुषाद्भयाभावे हेतुमाह-तदेति । देवासुरे युद्धे युष्माभिः सहितोऽजयं अजयं रिपुरिति शपः । ते मे मम भवन्तः तथा साहाय्यलक्षणेन विद्यमाना एवेत्यर्थः । एतेन यदि देवादिभ्यो नास्माकं भीतिः तर्हि मनुष्येभ्यो तेभ्यः किं वक्तव्यमिति काकाक्षिगोलकन्यायेनोक्तिर्लक्षणया ध्वनिता ।

नन्विदानीं तु ते नात्र संनिहिता इति किमर्थमेवं मन्त्र इत्यत आह-सीतायाः पदवीमिह स्थितिं प्राप्य ज्ञात्वा सुग्रीवप्रमुखान् हरीन् पुरस्कृत्य वरुणालयमुल्लङ्घयितुं समुद्रस्य परे पारे नृपात्मजौ प्राप्तौ । सार्धश्लोक एकान्वयी ॥ २२ ॥ २३ ॥

गो० टी०-विभीषणमतव्याहत्यर्थं स्वमतमाह-मानुषादिति । सपादश्लोकमेकं वाक्यम् । मानुषात् भयाभावे हेतुमाह-तदेति । अजयामिति लङ्लुङ्लिटामेकवचनम् । इन्द्रे जितवति मे मनुष्यः किमासिति भावः । ते मे भवन्तश्च तथा ते देवासुरे युद्धे जेतारो भवन्तः तथा सहायभूताः वर्तन्त इत्यर्थः ॥ २३ ॥

२३-२४] ति० टी०-तथाभावहेतुमाह-तदेति । यैर्युष्माभिः सहितो देवानजयं ते भवन्तो मे तथा च तत्रैव सन्ति, अतो मानुषाच्च भयं यद्यपि तथापि विमृश्यतां विचार्यतामिति पूर्वश्लोकेनान्वयः । विमर्शं हनुमाह—सुग्रीवेति । नृपात्मजौ वृत्तं वरुणालयमतिक्रम्य सीतायाः पदवीं प्राप्यास्मिन्प्य सुग्रीवप्रमुखान्हरीन्पुरस्कृत्य समुद्रस्य परे पारे संप्राप्ताविति श्रुतम् ॥ २३ ॥ २४ ॥

गो० टी०-सुग्रीवप्रमुखान् हरीनित्युक्तत्वेपः । प्राप्तौ ज्ञातवन्तौ वरुणालयं समुद्रं संप्राप्तौ प्राप्तुतां नाम का नः क्षतिरिति भावः ॥ २४ ॥

२५] ति० टी०-अतः परं यथा सीतादेया, यथा च दशरथात्मजौ वध्यौ, तथैव मन्त्रो भवद्भिर्मन्त्र्यतां अथ सुनीतं सुनिश्चितं मन्त्रतत्त्वमभिधीयताम् ॥ २५ ॥

रा० टी०-स्वाभिमतविरोधिमत्त्वाभावायाह-अदेया चेति । यथा सीता अदेया दशरथात्मजौ च यथा वध्यौ तथा मन्त्रो भवद्भिर्मन्त्र्यताम् सुनीतं मन्त्रेण सुनिश्चितं यथा भवति तथा अभिधीयताम् । श्लोकत्रयमेकान्वयि ॥ २४-२५ ॥

गो० टी०-विमृश्यतामित्युक्तं विमर्शप्रकारं दर्शयति-अदेयेति । मन्त्रो मन्त्र्यताम् मन्त्रः क्रियतामित्यर्थः । सुनीतं सुनिश्चितम ॥ २५ ॥

२६] ति० टी०-निश्चितत्वाय एव शत्रुजय इत्याह-नहीति । जगति लोके कञ्चिदपि दुरत्यन्तजये शक्तिं न पश्यामि । अतस्तं मन्त्रबलेनैवोत्तीर्य सह सागरं नीत्वा-

१ उत्तरन्तीति गो. पाठः । २ संप्रेति गो. पाठः । ३ के इति गो.

तरक्कार्पणसंतप्तस्य निशम्य परिदेवितम् । कुम्भकर्णः प्रबुद्धोऽथ वचनं चेदमब्रवीत् ॥

यदा तु रामस्य सलक्ष्मणस्य प्रसह्य सीता खलु सा हृताऽभूत् ।
सकृत्समीक्ष्येन सुनिश्चितं तदा भजेत चित्तं यमुनेव यामुनम् ॥ २८ ॥

सर्वमेतन्महाराज कृतमप्रतिमं तव । विधीयेत महास्माभिरादावेवास्य कर्मणः ॥ २९ ॥
पायेन राजकार्याणि यः करोति दशानन । न स संतप्यते पश्चान्निश्चितार्थमतिर्नृपः ॥ ३० ॥
तूपायेन कर्माणि विपरीतानि यानि च । क्रियमाणानि दृश्यन्ते दीर्घ्यप्रयतेष्विव ॥ ३१ ॥

...यि शक्तिप्रसङ्गमपि न पश्यामि, अतो निश्चिन्तं भवान् ...वि ऊह इति योजना ॥ २६ ॥

रा० टी०—नहीति । वानरैः सार्धं नीत्या अन्यस्य रा...समभित्रस्य शक्तिम् असमञ्जसभावार्थं नेत्र प्रयत्नमि अतः निश्चयेन मयैव जयः ॥ २६ ॥

भो० टी०—मा भूदासन्न सङ्कटक्षणे मम जयः न प्रतिनत्सहायान्यस्य कस्यचित् स्यात्तवा—नहीति । सर्वान् सह सचिवैः तीर्त्वा आगत्येति शेषः । ...न पश्यामि अतो मम निश्चयेन जय एवास्तु ॥ २६ ॥

२७] ति० टी०—अथ ...कुम्भकर्णो बालत्वात्तस्य ...प्राप्तिरज्ञानात्त...कर्णेति । ...दशानन ...लोकप्रसिद्धम् । सकलो ...सकलः सर्वैः । सभायां ...इति शेषः ॥ २७ ॥

रा० टी०—नन्वेति । कालपर्यन्तस्य सीताविधिनिश्चय...स्वकृतविधेः कथमिदानीं विपरीतं निश्चय कुरुषे, मैवं प्रबुद्धोऽसि ...॥

गो० टी०—उच्यते । कालपर्यन्तस्य कालेन विधेः तस्य । कालानुसारात् विपरीतबुद्धिरित्यर्थः । ...देवेन ...देवेनेव । सकृत्समीक्ष्यकारिणेत्यर्थः ॥ २७ ॥

२८] ति० टी० तदेव तत्प्रकारम्—यदा वेति । यदा यस्मिन्काले रामस्य भोग्या सकृत्सामीक्षेण तात्पर्यालोचनविचारं कृत्वेत्यर्थः प्रायेण हृता तदैव ते चित्तं यमुना यामुनं ...मिव तुलितेन तत्रैव निश्चयमजनशीलम् । यथा यमुना श्रीकृष्णावतारसमये यादवैः सह स्वयं पूर्वयति, कालान्तरे तु सम्यं गतत्वात्तज्ज्ञस्य न पूर्णसंभवः, एवमस्मापि तद विचार्य स एव कार्यः, इदानीं त्वकालेविचारो जात एवेति विचारो विपरीत इति क्रीयता स्वयं योजि ॥ २८ ॥

रा० टी०—तदेवाकारयन्—यदेत्यादिभिः । यदा सीता इहानीता तदैव सकृत् सकलीकृत्य आत्मानं भवलोकस्य ...निश्चितं मन्त्रं तत्र चित्तं तत्रैव पूर्वीयात् । तत्र दृष्टान्तः—यथा यमुना श्रीकृष्णावतारसमये यादवैः सहाहर्दविशेषं भजति कृष्णावतारसमये प्राप्तोति कालान्तरे तत्र प्राप्तौ कृष्णमन्तरेण न भवेदिति तात्पर्यम् । अतः रामकोपस्य दुर्निवारणीयत्वं ध्वनितम् ॥ २८ ॥

गो० टी०—मन्त्रिभिर्विचारसहने समर्थैर्मन्त्रिणोऽपि ...एकोऽपि निश्चयकाले यत्र प्रकृते मनः । एकः कार्यार्थि... तमात्मसंबन्धं तत्रैवाकृत्यात्मकमन्त्रविषयभावेऽपि ...सीतात्र ...इति । यदा सकलसीदैव स्वयमेव निश्चि... रामस्य सीता इहानीता तदैव चित्तं यदा पूर्वमा यादवं ...त्रि...निश्चितं कर्तव्यं कर्म यत्र खलु । स एवास्माभिः ...निश्चय कृतः । इदानीं विचारणा सर्वा अत्र मेघनादमरणे ...॥ २८ ॥

२९] ति० टी०—अथ तयोरनन्तरम्—सर्वमिति । ...यदेतद्भवनाद्दशकण्ठ एतदारभ्य ...सर्वमेतत् महाराज त्वयाप्रतिममुक्तं मया । इदानीं विचारोऽपि निश्चय कृतस्य निश्चयेनेति । अन्य एवार्थः—अत्रापि पूर्वोक्त प्रकृतिकल्प ...यत्नसाध्यमेव तत्र मेघनादे तदा विचारोऽत्यधिकः अत्र निश्चयेति ...इदानीं विचारणा विचारेषु मन्त्रतत्रेतुरत्न ...मम इति ॥ २९ ॥

रा० टी०—अनुवादपूर्वकमेवं तत्प्रकारमुत्तरमाह—सर्वमिति । ...सर्वं तत्प्रतिममुक्तवानसि । ...एवं तत्प्रतिपादयन्—अनादरात्तस्य कर्मणः आरम्भादेव ...अपि तत्र विधेयत्व...आरम्भेण ...पूर्वं ...तथापरकालपर्यन्तं निश्चयेति ...॥ २९ ॥

गो० टी०—तदा कृते कि...सर्वमिति । कृतमिति कर्मणि निष्ठा ...सर्वं मन्त्रकर्म ...कर्मणः सीताहरणकर्मणश्च आदावेव यदि विधेयेन ...अप्रतिमं सम्यक्कृतं स्यादित्यर्थः ॥ २९ ॥

३०] ति० टी०—अथ तन्निश्चयस्य कृत निश्चि... पश्चात्तत्रितायाय मदवीत्याह—न्यायेनेति । अथवा ...सह निश्चितार्थमतिर्यत्रा यो नृपतिर्न्यायेन राजकार्याणि ...स तदर्थं कृत्वा पश्चात्र संतप्यते ॥ ३० ॥

रा० टी०—नन्वनुपदमेवास्य कर्तव्यमाह—न्यायेनेति । ...स्त्रिया मनोज्ञं निश्चयं प्राप्य अयोनिः ...स यो नृपः न्यायेन राजकार्याणि करोति ...संतप्यते ॥ ३० ॥

गो० टी०—अनयो विचार्य ...स्त्रिया...कृतस्य कालेनपरीतं सकृत्...न्यायेन विचारणेन ॥ ३० ॥

३१] ति० टी०—अन्यथा ...इति । कृतिभिः ...

तत्र [illegible] तिपातिमहाबलम् । अथ बुद्धिमतां वर्यो मामिदं वाक्यमब्रवीत् ॥ १३ ॥
अद्यप्रभृति यामन्यां बलाद्धारीं गमिष्यसि । तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ १४ ॥
इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् । नारोहये बलात्सीतां वैदेहीं शयने शुभे ॥ १५ ॥
सागरस्येव मे वेगो मारुतस्येव मे गतिः । नैतद्दाशरथिर्वेद यासादयति तेन माम् ॥ १६ ॥
को हि सिंहमिवासीनं सुप्तं गिरिगुहाशये । क्रुद्धं मृत्युमिवासीनं संबोधयितुमिच्छति ॥ १७ ॥
न मत्तो निर्गतान्बाणान्द्विजिह्वान्पन्नगानिव । रामः पश्यति सङ्ग्रामे तेन मामभिगच्छति ॥ १८ ॥
क्षिप्रं वैजयमैर्बाणैः शतधा कार्मुकच्युतैः । राममादीपयिष्यामि उल्काभिरिव कुञ्जरम् ॥ १९ ॥
तस्यास्य बलमादास्ये बलेन महता वृतः । उदितः सविता काले नक्षत्राणां प्रभामिव ॥ २०

रा० टी०–सेति । अनुक्ता एकादश्यामुपवासयुक्ता सा अकस्मात्ती मया विवस्त्रा पुरा गमनदर्शनजनितकोपादुत्तरहिता कृता ततोऽनन्तरं नलिनीव लोलिता क्रोधेन कम्पिता सती स्वयंभूभवनं प्राप्ता ॥ १२ ॥

गो० टी०–सेति । विवस्त्रा कृता सा मया भुक्तेत्यन्वयः ॥ १२ ॥ १३] ति० टी०–तच्च मम चरितं महात्मनस्तस्य मन्ये रक्षिणं ज्ञातमासीत् । मन्ये इति क्रियान्तप्रतिरूपकमव्ययम् । मन्ये शङ्के ध्रुवं प्रायो निश्चयार्था अमी मताः इति कतकः ॥ १३ ॥

रा० टी०–तदिति । तदुत्तरीयापहरणं महात्मनः तस्य रक्षणो ज्ञातमासीत् इत्यहं मन्ये अनुमानेनाजानाम् अथ तत्क्षणानन्तरं संकुपितो वेगा अब्रवीत् ॥ १३ ॥

गो० टी०–तस्येति । तत् धर्षणम् । मन्य इत्यनेन शापमात्रं मया श्रुतम् धर्षणश्रवणं तु मया ऊहितमिति गम्यते ॥ १३ ॥

१४–१५] ति० टी०–फलिष्यति विशीर्णा भविष्यति । क्वचिदेवमेव कुबेरपुत्रनलकूबरशापोऽपि रम्भानिबन्धनः श्रूयते तत्रोपपत्तिश्चिन्त्या । अस्य प्रथमत्वे तस्यां बलात्कारासंभवात्, तस्य प्रथमत्वेऽन्यां बलात्कारासंभवादिति केचित् । नलकूबरशापस्य तपोबलेनाकिंचित्करत्वाद्दृश्यमेव शापो ब्रह्मास्त्रवदप्रतिक्रियः पाश्चात्य इत्यन्ये ॥ १४ ॥ १५ ॥

रा० टी०–तदाकारमाह–अद्येति । अद्यप्रभृति इतः कालादारभ्य अन्यां नारीं यत्सकाशात् बलात् हठात् यदि गमिष्यसि तदा ते मूर्धा शतधा फलिष्यति दरिष्यति ॥ १४ ॥

रा० टी०–इतीति । इति हेतोः तस्य शापस्य शापात् भीतः इदमनायामियमपि भावं दास्यतीति भयं प्राप्तोऽहं शुभे शयने तयोपविष्टे बलात् नारोहये भूमावेव सा तिष्ठतीत्यर्थः ॥ १५ ॥

गो० टी०–अद्येत्यादि । अद्यप्रभृति एतत्क्षणमारभ्य । विशिष्टविशेषणमेतत् । तदा गमनकाल एव फलिष्यति विशीर्णा भविष्यति इति स्वैरप्रकारस्य शापस्य । शापादित्यर्थः । प्रकृतं मारभ्य बलात्कारो न बलादित्यनेन पौनरुक्त्यात् । किंतु प्रथमं शापस्यान्वयः । वैदेहीमित्यनेन महाकुलप्रसूतायां तस्यामपि भीतोऽभूत्स्वगम्यते ॥ १४ ॥ १५ ॥

१६] ति० टी०–अथ महापार्श्वोक्तस्त्रप्रावल्यमेव श्लाघते सागरस्येत्यादि । दाशरथिर्हि यस्मादेतन्मम बलं न वेद तेन मामासादयति ॥ १६ ॥

रा० टी०–नन्वेवं चेद्रामाय समर्पयेत्यत आह–सागरस्येति । एतेन रामाय दाने मे दौर्बल्यप्रख्यातिर्भविष्यतीत्यतो न दास्यामीति सूचितम् । नन्वेवं वेगादिविशिष्टेन त्वया गोढं रामः कथमागत इत्यत आह–एतद्धेत्यादि दाशरथिर्न वेद तेन हेतुना मामासादयति महत्खोत्पत्त्यनुकूल्यापारं करोति ॥ १६ ॥

गो० टी०–एवं न युक्ता बलात्कर्तुं सीतेत्युक्तस्या अस्माभिः सह कुम्भकर्णेनाजितौ योऽन्यत इति महापार्श्ववचनव्याख्यानपरे मयि विद्यमाने किमन्येनेति परिहारमाह–सागरस्येति । एतत् वेगगतिमत्त्वम् । आसादयति सेनामिति शेषः स्वार्थण्यन्तो वा । तेन अवेदनेन ॥ १६ ॥

१७] ति० टी०–को हि ज्ञातमङ्गल इति शेषः । गिरिगुहारूप आशये निवासे आसीनमेव सुप्तं सिंहमिव ॥ १७ ॥

रा० टी०–क इति । सुप्तमासीनं सिंहमिव कुद्धमासीनं मृत्युमिव मां संबोधयितुं क इच्छति रामव्यतिरिक्तः कोऽपि नेच्छतीत्यर्थः ॥ १७ ॥

गो० टी०–स्वप्रभावप्रवेदनेनाहितमाह–यस्त्वां सिंहमिवासीनं सिंहमिव स्थितमित्यर्थः । मृत्युमित्युपलक्षणं । अन्यथा प्रबोधयितुमिच्छति कुद्धं कोऽहम् । यथा सुप्तं सिंहं मृत्युं वा प्रबो पुरुषोऽभिज्ञ एव तद्वत् तूष्णीं स्थितं मां प्र पति भावः ॥ १७ ॥

१८] ति० टी०–न पश्यति न पश्यति स ॥ १८ ॥

रा० टी०–नेति । मत्तो निर्गतान् बाणान् रामो न पश्यति अपश्यन् तेन हेतुना मामभिगच्छति ॥ १८ ॥

गो० टी०–रामो मत्पराक्रमं न वेत्त्येव तस्मिन्नु मद्बाणवेगं वा जानाति नैवेत्याह–नेति । द्विजिह्वानाशीविषान् द्विजिह्वाविशेषान् ॥ १८ ॥

१९–२०] ति० टी०–अथापविष्यामि भस्मसात्क ॥ १९–२० ॥

१ तस्य तत्र उद्धेति गो. सदृशे क. पाठः । २ देत इति गो. पाठः । ३ नाशीवि [illegible] । ४ [illegible] । ५ [illegible] । ६ [illegible] । ७ वज्रोपमैरिति गो. पाठः ।

न वासवेनापि सहस्रचक्षुषा युधास्मि शक्यो वरुणेन वा पुनः ।
मया त्वियं बाहुबलेन निर्जिता पुरा पुरी वैश्रवणेन पालिता ॥ ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ।

पूर्वोक्तं रावणवचो निशम्य यावद्रामशरः रक्षःशिरांसि न हरन्ति तावदेव दातुमथ मैथिली देवेत्यादि रावणप्रहस्तादीनां उपदिशति ।

निशाचरेन्द्रस्य निशम्य वाक्यं स कुम्भकर्णस्य च गर्जितानि ।
विभीषणो राक्षसराजमुख्यमुवाच वाक्यं हितमर्थयुक्तम् ॥ १ ॥
हतो हि बाह्वन्तरभोगराशिश्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः ।
पञ्चाङ्गुलीपञ्चशिरो तिकायः सीतामहाहिस्तव केन राजन ॥ २ ॥

रा० टी०-क्षिप्रमिति । उल्काभिः दृढतरमिव कार्मुकच्युतैः शतधा बाणैः रामादीन्विष्यामि ॥ १० ॥

गो० टी०-क्षिप्रमिति । आदीपयिष्यामि सन्तापयिष्यामि उल्काभिः निर्गतज्वालकाष्ठैः । दृढतरमायसमुल्काः प्रदर्शयन्तीति प्रसिद्धिः ॥ १९ ॥

रा० टी०-तदिति । महता बलेन दुर्धर्षस्य अस्य रामस्य बलमादाय विनाशयिष्यामीत्यर्थः । तत्र दृष्टान्तः-सविता सूर्यो नक्षत्राणां प्रभामिव ॥ २० ॥

गो० टी०-एवं रामं पलाययित्वा तस्य सेनां हनिष्यामीत्याह-तच्चेति । आदास्ये खण्डयिष्ये । "दो. अवखण्डने" इति धातुः ॥ २० ॥

२१] ति० टी०-पुरा सङ्ग्रामेण न शक्यः । जेतुमिति शेषः । वैश्रवणेन पालितत्वेन पुष्पकवाहकत्वादपि भवता दुर्बलराव दृष्टेति सूचितम् ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०-नेति । पुरा जेतुमिति शेषः वासवादिभिर्न शक्योऽस्मि अत एव वैश्रवणेन कुबेरेण पालिता इव लङ्का मया निर्जिता ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणार्थदीपिकायां युद्धकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०-देवानामपजय्योऽसि कथं मनुष्यादीनां जय्यो भविष्यामीत्याशङ्क्याह-न वासवेनेति । सहस्रचक्षुषेति तत्सामानाधिकरण्येनोक्तिः । युधा युद्धेन न शक्योऽस्मि । जेतुमिति शेषः । उत्तरार्धेन कुबेरेणापि न जेतुं शक्य इति सिद्धवत् वैश्रवणेत्यादुक्तम् ॥ २१ ॥

१] ति० टी०-अ । विभीषणः प्रहस्तादिवचोऽतिदुर्बुद्धेरित्याह-निशाचरेन्द्रस्येति । वाक्यं रावणस्य गर्जितानि कुम्भकर्णस्य अर्थयुक्तं हितार्थम् ॥ १ ॥

रा० टी०-१ क्षणं प्रति विभीषणोक्तिमाह-निशाचरेन्द्रस्येति । राक्षसराजमुख्यं रावणम् अर्थपूर्तं अर्थप्रापकमत एव हितं वाक्यं विभीषण उवाच ॥ १ ॥

गो० टी०-एवं दर्शनविधिः प्रमुखितामुमारेण कथितः तदभ्रमाणो विभीषणः परमार्थं हितमुपदिशति-निशेति । स कुम्भकर्णस्येत्यः स इति शेषः । गर्जितानि निष्पंकत्वानि । अर्थयुक्तं कर्तव्यार्थबोधयुक्तम् ॥ १ ॥

२] ति० टी०-हृत इति । अभिध्यदेहोऽत्र भोगबाह्वन्तरे हृदयभाग एव भोगराशिः शरीरपरिणाहो यस्य सः चिन्तैव विषं यस्य सोभनं स्मितमेव तीक्ष्णे दंष्ट्रा यस्य अनुचितकृत्यदर्शनादिदं स्मितम् । तस्याः पञ्चाङ्गुल्य एव पञ्च शिरांसि यस्य स पञ्चाङ्गुलिपञ्चशिरास्तिकायश्च हृतभूतः सीतामहाहिस्तव केन हेतवे कृतः । कण्ठे इति शेषः । यद्वा केन हेतुना हृतः गृहीत इत्यर्थः ॥ २ ॥

रा० टी०-तदाचारमाह-हृत इत्यादिभिः । बाह्वोरन्तरे हृदयदेशे एव भोगराशिः शरीरपरिणाहो यस्य चिन्तैव विषं यस्य स्मितं रावणानुचितकृत्येषु ईषद्धास्य एव दंष्ट्रा यस्य पञ्चाङ्गुल्य एव पञ्च शिरांसि यस्य स एवंविधकायः सीतामहाहिस्तव त्वया केन हेतुना हृतः स्वीकृतः तत्परिहरणमर्हतीत्यर्थः ॥ २ ॥

गो० टी०-अन्येषां न तथा सीतेति रावणवर्णनं वक्तुं सीतामहाहिस्तेन रूपयति-हृत इति । बाह्वोरन्तरे तदेव भोगराशिः कृपापरिणाहो यस्य स तथा [illegible] स्मर इति भोगराशिः [illegible]

एवं विभीषणोक्तमाकर्ण्य सगर्वं भाषमाणमिन्द्रजितं यथार्थकठोरशब्दैर्धिक्कृत्य राघवप्रसादनमेव प्राप्तकालं दिदर्शयिषुरादितः स्वयमुपदिशति विभीषणः ।

बृहस्पतेस्तुल्यमतेर्निशम्य वस्तन्निशम्य यत्नेन विभीषणस्य ।
ततो महात्मा वचनं बभाषे तत्रेन्द्रजिन्नैर्ऋतयूथमुख्यः ॥ १ ॥
किं नाम ते तात कनिष्ठ वाक्यमनर्थकं वै बहुभीतवच्च ।
अस्मिन्कुले योऽपि भवेन्न जातः सोऽपीदृशं नैव वदेन्न कुर्यात् ॥ २ ॥
सत्त्वेन वीर्येण पराक्रमेण धैर्येण शौर्येण च तेजसा च ।
एकः कुलेऽस्मिन्पुरुषो विमुक्तो विभीषणस्तात कनिष्ठ एषः ॥ ३ ॥
किं नाम तौ मानुषराजपुत्रावस्माकमेकेन हि राक्षसेन ।
सुप्राकृतेनापि निहन्तुमेतौ शक्यौ कुतो भीषयसे स्म भीरो ॥ ४ ॥

१] ति० टी०—बृहस्पतेः गुरुणेत्यर्थः यत्नेन निशम्य दुःखेन श्रुत्वा । महात्मा महामनाः ॥ १ ॥

रा० टी०—विभीषणं प्रति इन्द्रजितो वचनमाह—बृहस्पतेरित्यादिभिः । विभीषणस्य वचो निशम्य नैर्ऋतयूथमुख्य इन्द्रजित् बभाषे ॥ १ ॥

गो० टी०—अथेन्द्रजितो दुर्बुद्धिसपत्नस्य दूषयति—बृहस्पतेरिति । ततो विभीषणवचनानन्तरम् । तत्र राक्षसेषु यत्नेन निशम्य । असहनमेवेति भावः ॥ १ ॥

२] ति० टी०—तातकनिष्ठेत्यसमस्तम् । भीतवद्भीतस्येवानेनैकमनुपादेयं वाक्यं किंनाम कस्मादुच्यते । अस्मिन्कुले पौलस्त्यकुले यो जातो न भवेत्, अपि तु सहजदुर्बलत्वादिमति मनुष्यादिकुले । सोऽपीदृशं वचो न वदेदीदृशं च न कुर्यात् । करोतेः क्रियासामान्यवचनत्वात् चिन्तयेदित्यर्थः । एवं च हीनजातेरपि हीनस्तव व्यापार इति भावः ॥ २ ॥

रा० टी०—तत्रादावाह—किमित्यादिभिः । हे तात ! कनिष्ठ बहुभीतवच्च भीतिसंपर्ककमनर्थकं ते वाक्यं किं कथम् अयुक्तमेतत्स्यात् । [illegible] अस्मिन् पौलस्त्यसंबन्धिनि कुले यो जातः [illegible] दुर्बलकुलोत्पन्न इत्यर्थः सोऽपि ईदृशं वदे[illegible] वदेत् न कुर्यात् किंच अस्मिन् कुले यो जा[illegible] न वदेत् न कुर्यात् वाक्यं निषेधोऽत्यन्तरायः ॥ ॥

गो० टी०—[illegible]मेति । हे तात ! ते कनिष्ठवाक्यम् अनयके [illegible] अनर्थकं व्यर्थम् । बहुभीतवच्च बहुभीतवदिति भावः । सुभी[illegible] सुभीतम् । किंनाम कस्मात् जुगुप्सितमित्यर्थः । नामशब्दः [illegible] । नाम प्रसिद्धौ । अप्रसिद्धमेवाह—कुलस्य [illegible] । तदेवोपपादयति—अस्मिन्निति । आयोगिकः [illegible] । अपि नतु । अस्मिन् कुले पौलस्त्यवंशे यो जातो न भवेत् अन्यस्मिन् कुले यो जातः सोऽपि ईदृशं वदेत् न कुर्यात् ईदृग्वचनार्थं नानुतिष्ठेत् । ईदृग्वचनं वक्तुश्चोत्तरुभयोरपि निन्दनीयम् । यद्वा हे तात कनिष्ठ । ते वाक्यं किं नाम । जुगुप्सितमित्यर्थः । जुगुप्सितत्वमेवाह—अस्मिन्निति । न कुर्यात् न चिन्तयेत् । अत्र करोतिश्चिन्ताक्रियायां वर्तते । मुख्यस्य करणार्थस्यालंभवात् सर्वधात्वर्थेषु करोत्यर्थस्य संभवाच्च ॥ २ ॥

३] ति० टी०—तदेवाह—सत्त्वेनेति । सत्त्वं बलम्, वीर्यं पराक्रमणशक्तिः, पराक्रमस्तत्कार्यम्, शौर्यं रणादपराङ्मुखत्वम्, धैर्यं तत्कारणं स्थैर्यम्, तेजः स्मृत्या भयंकरत्वम् एतैर्गुणैरेको विभीषण एव तातस्य कनिष्ठोऽस्मिन्कुले मुक्तः ॥ ३ ॥

रा० टी०—सत्त्वेनेति । सत्त्वादिना विमुक्तस्यक्तः एकः तातकनिष्ठः एषविभीषण एव ॥ ३ ॥

गो० टी०—एतदुक्तमेवस्वभावस्य सदृशमित्याह—सत्त्वेनेति । सत्त्वेन बलेन वीर्येण प्रभावेण वीर्यं बलं प्रभावो वेत्यमरः । पराक्रमेण उद्योगेन शौर्योद्योगौ पराक्रमावित्यमरः । शौर्येण साहसिक्येन धैर्येण स्थैर्येण तेजसा गर्वेण पराभिभवासहनेनेति यावत् ॥ ३ ॥

४] ति० टी०—हे भीरो ! प्राकृतेनैकेनापि राक्षसेन रणे तौ राजपुत्रौ हि यतो निहन्तुं शक्यौ, अतस्तौ किंनाम गृहीत्वास्माकुतो भीषयसे व्यर्थमेव । न तावता विभीम इत्यर्थः ॥ ४ ॥

रा० टी०—किमिति । हे भीरो ! अस्माकं मध्ये सुप्राकृतेन लघुनेत्यर्थः एकेनापि राक्षसेन निहन्तुं शक्यौ यावेतौ मानुषराजपुत्रौ तौ किंनाम गणयाद्दौ तेषां व्यर्थं अतः कुतः कस्मा द्धेतोः भीषयसे स्म ॥ ४ ॥

गो० टी०—[illegible] रावणं प्रत्युक्त्वा विभीषणं निर्भर्त्स[illegible] किंनामेत्यादि [illegible]

त्रिलोकनाथो ननु देवराजः शक्रो मया भूमितले निविष्टः ।
भयार्पिताश्चापि दिशः प्रपन्नाः सर्वे तदा देवगणाः समग्राः ॥ ५ ॥
ऐरावतो निःस्वनमुज्झदन्त निपातितो भूमितले मया तु ।
विकृष्य दन्तौ तु मया प्रसह्य विद्रावितो देवगणाः समग्राः ॥ ६ ॥
सोऽहं सुराणामपि दर्पहन्ता दैत्यात्तमानामपि शोककर्ता ।
कथं नरेन्द्रात्मजयोर्न शक्तो मनुष्ययोः प्राकृतयोः सुवीर्यः ॥ ७ ॥
अथेन्द्रकल्पस्य दुरासदस्य महौजसस्तद्वचनं निशम्य ।
ततो महार्थं वचनं बभाषे विभीषणः सत्त्वभृतां वरिष्ठः ॥ ८ ॥
न तात मन्ये तव निश्चयोऽस्ति बालस्त्वमद्याप्यविपक्वबुद्धिः ।
तस्मात्त्वयार्थात्मविनाशनाय बहु विप्रलप्तम् ॥ ९ ॥
पुत्रप्रवादेन तु रावणस्य त्वमिन्द्रजिन्मित्रमुखोऽसि शत्रुः ।
यस्येदृशं राघवतो विनाशं निशम्य मोहादनुमन्यसे त्वम् ॥ १० ॥

तौ राजपुत्रौ किं नाम न विचिदति अतिदुर्बलावित्यर्थः । कुत इत्याह—अस्माकमिति । अस्माकं कथ्ये सुप्राकृतेन अतिक्षुद्रेणापि लक्ष्मणेन सह समरे स्थातुं नितरां शक्तौ न स्वः । अतः भीरो कुतोऽस्मान् भीषयसे स्वयं भीतोऽस्मान् भीषयसे नास्माकं किंचित् भयमिति भावः । भयाभावे पूर्ववत् संबोधयति—त्रिलोकेति । नन्वियमामन्त्रणा । त्रिलोकनाथ इत्येश्वर्ययुक्तम् देवराज इति सैन्यस्वामित्वं दर्शितम् मया हेतुना । भूमितले निविष्टः स्थितः । निवेशित इत्यर्थः इत्यन्ये । ऐरावत इति । उज्झदन् उत्सृजन् । विकृष्य उत्पाट्य । तस्मात् सर्वे देवगणाः विद्रावितः । हेतुभेदेन देवानां भयान्तरमुक्तमिति न पुनरुक्तिः । स्वस्य प्रदर्शनफलमाह—सोऽहमिति । मनुष्ययोरिति देवासत्त्वयाकृतिः । प्राकृतयोरिति इन्द्रियाकृतिः । नरेन्द्रात्मजयोरिति वाक्योक्तिः । कथं न शक्तोऽसि अतः कुतो भीषयसे इति पूर्वेणान्वयः ॥ ५–७ ॥

५–६] ति० टी०—तदेवाह—त्रिलोकेति । अमिकं निविष्टः स्वर्गात्प्रच्याव्य भूमौ बन्दीकृत्य स्थापितः । भयार्पिता भयमर्पितं येषु ते महत्तभयाः सर्वे देवगणा दिशः प्रपन्नाः प्राप्ताः ॥ ५ ॥ ६ ॥

रा० टी०—तत्र विश्वासं संपादयितुं स्वपराक्रममाह—त्रिषु लोकेत्यादिभिः । मया शक्रो भूमितले निविष्टः स्थापितः तदा समग्राः स्वपरेहितसहिताः सर्वे देवगणाः भयार्पिताः सन्तः दिशः प्रपन्नाः सर्वदिक्षु पलायिताः ॥ ५ ॥

रा० टी०—ऐरावत इति । उज्झदन् ऐरावतः निःस्वनं यथा भवति तथा दन्तौ विकृष्य उत्पाट्य मया भूमौ निपातितः अत एव मया देवगणाः विद्रावितः ॥ ६ ॥

७–८] ति० टी०—कथं न शक्तः नियह इति शेषः ॥ ७ ॥ ८ ॥

रा० टी०—स इति । उक्तदीनां दर्पहन्ता शोककर्ता सुवीर्यः नरेन्द्रात्मजयोर्विनाशकं इति शेषः कथं न शक्तः ॥ ७ ॥

रा० टी०—अथेति । महौजस इन्द्रजितः वचनं निशम्य विभीषणो बभाषे ॥ ८ ॥

गो० टी०—अथेति । इन्द्रकल्पस्येत्यादिविशेषणत्रयेण पूर्वोक्तस्य यथार्थत्वमुक्तम् । सत्त्वभृतां वरिष्ठ इत्यनेनाभीरुत्वमुक्तम् । महत्तभिरित्यनेन वक्ष्यमाणार्थस्येन्द्रजिता दुर्ज्ञेयत्वमुक्तम् ॥ ८ ॥

९] ति० टी०—हे तात पुत्र, तव मन्त्रे निश्चयो नास्ति कृत्याकृत्यविचारविषयमामर्थ्ये नास्ति, यतस्त्वमद्याप्यविपक्वबुद्धिः अपरिणतबुद्धिः अतः अपरिणतबुद्धित्वात् बहिर्व्याप्तज्ञानपरिपाकचिह्नो बाल एव । तस्मात्त्वयार्थात्मविनाशनाय अर्थहीनं बहुवचो विप्रलपितम् यथा प्रलपितम् ॥ ९ ॥

९] रा० टी०—तदाकारयाह—त्वमित्यादिभिः । हे तात त्वं बालः अतः एव अविपक्वबुद्धिः अतः एव मन्त्रे तव निश्चयो नास्ति तस्मात्त्वं आत्मविनाशाय अर्थहीनं बहुवचो विप्रलपितम् ॥ ९ ॥

गो० टी०—न तावदिति । अनेन निकृष्टवयस्त्वमुक्तम् । बालत्वेऽपि कृत्याकृत्यविज्ञानं संभवति सापि नास्तीत्याह—अद्यापीति । अविपक्वबुद्धिः अपरिणतबुद्धिः । निश्चयाभावं दर्शयति—तस्मादिति । विप्रलपं विप्रलपितम् ॥ ९ ॥

१०] ति० टी०—हे इन्द्रजित्, पुत्रप्रवादेन पुत्रशब्देनोपलक्षितस्त्वं मित्रमुखो मित्रवदवभासमानो वस्तुतः शत्रुरसि । तदेवाह—यस्य रावणस्य राघवतः ईदृशं विनाशं निशम्यापि मोहात्मनुमन्यसे न धारयसि ॥ १० ॥

रा० टी०—पुत्रेति । यस्य रावणस्य राघवतो विनाशं निशम्य श्रुत्वा मोहादेतोः त्वमनुमन्यसे तत्र संमतिं करोषि तस्य रावणस्य पुत्रप्रवादेन पुत्रशब्देन मित्रमुखः मित्रतुल्यावयवः मानः शत्रुः त्वमसि ॥ १० ॥

---

१ तौ राजपुत्रौ नो. पाठः । २ दर्शयति गो. पाठः । ४ इत्येते नो. पाठः ।

त्वमेव वध्यश्च सुदुर्मतिश्च स चापि वध्यो य इहानयत्त्वाम् ।
बालं दृढं साहसिकं च योऽद्य प्रावेशयन्मन्त्रकृतां समीपम् ॥ ११ ॥
मूढोऽप्रगल्भोऽविनयोपपन्नस्तीक्ष्णस्वभावोऽल्पमतिर्दुरात्मा ।
मूर्खस्त्वमत्यन्तसुदुर्मतिश्च त्वमिन्द्रजिद्बालतया ब्रवीषि ॥ १२ ॥
को ब्रह्मदण्डप्रतिमप्रकाशानर्चिष्मतः कालनिकाशरूपान् ।
सहेत बाणान्यमदण्डकल्पान्समक्षमुक्तान्युधि राघवेण ॥ १३ ॥
धनानि रत्नानि सुभूषणानि वासांसि दिव्यानि मणींश्च चित्रान् ।
सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो० टी०—न केवलं स्वाज्ञानस्य स्वविनाश एव फलं किंतु पितृविनाशोऽपीत्याह—पुत्रेति । हे इन्द्रजित् त्वं पुत्रप्रवादेन पुत्रप्रसिद्ध्या । इत्थंभावे तृतीया । मित्रस्य सुखमिव सुखं यस्य सः तथोक्तः । मित्रद्रासमान इत्यर्थः । शत्रुरसि । शत्रुत्वमेवोपपादयति—यस्येति । त्वं यस्य रावणस्य ईदृशं पुत्रमित्रविनाशपर्यन्तं राघवतो रामात् विनाशं निशम्य मन्युसाच्चुल्या मोहादनुमन्यसे तस्य रावणस्य त्वं शत्रुरसीत्यर्थः । मोहादित्यनेन मित्रसुखत्वमुपपादितम् । अनुमन्यस इत्यनेन शत्रुत्वम् ॥ १० ॥

११] ति० टी०—तस्मात्त्वमेव वध्यः पुत्रोऽपि सन् । यश्च दृढानां मन्त्रकृतां सभीपं प्रावेशयत्यश्चानयदागमनार्थं प्रेरितवान्सोऽपि वध्यः ॥ ११ ॥

रा० टी०—त्वमिति । यस्त्वाम् इह अनयत् स वध्यः यश्च मन्त्रसमीपं प्रावेशयत् स वध्यः सुदुर्मतिस्त्वं च वध्यः ॥ ११ ॥

गो० टी०—एवमनुमोदनस्य दण्डमाह—त्वमेवेति । त्वमेव वध्यः दण्ड्यः किमित्यर्थः । किंतु यस्त्वां इह सभायाम् आनयत् प्रावेशयच्च स एव वध्यः ॥ ११ ॥

१२] ति० टी०—मूढः कृत्याकृत्यविवेकहीनः, अतएवाप्रगल्भो मतिप्रागल्भ्यरहितः अविनयेनोपपन्नो युक्तः । अल्पमतिर्दीर्घदर्शनाभावाद्धीः । दुरात्मा कामादिदुष्टान्तःकरणः । मूर्खः साहसप्रवृत्तिपर [illegible] सुदुर्मतिश्च ॥ १२ ॥

रा० टी०—मूढ इति । हे इन्द्रजित् ! मूढोऽविवेकी अत एव अप्रगल्भः पण्डितंकवद्विहीनः अत एव अविनयेन उपपन्नः अत एव तीक्ष्णः स्वभावो यस्य अत एव अल्पया अल्पविषयिण्या मतिर्यस्य अत एव दुरात्मा अगृहीतमनाः अत एव मूर्खः अभक्ष्यभक्षणादि त्वमसीति शेषः अत एव अत्यन्तसुदुर्मतिस्त्वं बालतया बालत्वेन हेतुना ब्रवीषि ॥ १२ ॥

गो० टी०—मूढ इति । एवं कृत्याकृत्यविवेकशून्यत्वं दर्शयन् नोपनाह—मूढ इति । एष कृत्याकृत्यविवेकशून्यः प्रागल्भः दृष्टः पण्डितमन्य इति शेषः । अविनयोपपन्नः अशिक्षित इत्यर्थः । तीक्ष्णस्वभावः क्रूरप्रकृतिः दुरात्मा दुष्टान्तःकरणः मूर्खः अविमृश्यकारी । अत्यन्तसुदुर्मतिः । प्रहस्तो दुर्मतिः महापार्श्वादिः सुदुर्मतिः त्वमत्यन्तसुदुर्मतिरित्यर्थः । त्वमेवंभूतोऽसि अतस्त्वं बालतया ब्रवीषि इति संबन्धः ॥ १२ ॥

१३] ति० टी०—ब्रह्मदण्डेन चतुर्मुखकरगृहीतेन प्रतिमा अमोघानलसंहारशक्त्या समानास्तत्समप्रकाशाश्च तान् । तस्यैव विवरणम्—अर्चिष्मत इति । कालनिकाशरूपान्कालाग्नितुल्यरूपान् ॥ १३ ॥

रा० टी०—क इति । ब्रह्मदण्डप्रतिमः ब्रह्मदण्डसदृशः प्रकाशो येषां तत्त्वेन प्रतीयमानानित्यर्थः कालनिकाशरूपान् कालसदृशस्वरूपान् यमदण्डं कल्पयन्ति रचयन्ति ये तान् राघवेण समक्षमुक्तान् अर्चिष्मतो बाणान् कः सहेत न कोऽपीत्यर्थः ॥ १३ ॥

गो० टी०—दुर्मतित्वे हेतुमाह—क इति । ब्रह्मदण्डप्रतिमप्रकाशान् ब्रह्मदण्डसदृशप्रभान् । ब्रह्मदण्डो नाम युगान्तसमुत्थितोऽग्निवर्णो धूमकेतुरित्येके । ब्रह्मशाप इत्यन्ये । अर्चिष्मत ज्वालावतः । 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः । कालनिकाशरूपान् अन्तकसदृशरूपान् समक्षमुक्तान् समीपे मुक्तान् १३

१४] ति० टी०—रत्नानि श्रेष्ठवस्तूनि निवेद्य समर्प्य ॥ १४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०—रावणं प्रत्याह—धनानीति । हे राजन् धनादीन् राघवाय निवेद्यैव वीतशोकाः सन्तः वयं वसेम ॥ १४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

गो० टी०—कृतस्याकृतस्य प्रायश्चित्तं राजानं प्रत्याह—धनानीति । रत्नानि श्रेष्ठवस्तूनि । 'रत्नं स्वजातौ श्रेष्ठेऽपि' इत्यमरः । धनानि द्रव्याणि ॥ १४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

---

१ मूढः प्रगल्भ इति गो. पाठः । २ मीति गो. पाठः ।

षोडशः सर्गः ।

एवं श्रवणकटुनापि नितान्तपथ्येन विभीषणोदीरितेनाक्षुद्रहृदयो रावणो न विरतोऽपि तु प्रदीप्तामर्षः परुषोक्तिभिस्तमभिधत्ते स्म । तमविध्यत् ।

मुनिविष्टं हितं वाक्यमुक्तवन्तं विभीषणम् । अब्रवीत्परुषं वाक्यं रावणः कालचोदितः ॥ १ ॥
वसेत्सह सपत्नेन क्रुद्धेनाशीविषेण वै । न तु मित्रप्रवादेन संवसेच्छत्रुसेविना ॥ २ ॥
जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस । हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा ॥ ३ ॥
प्रधानं साधकं वैद्यं धर्मशीलं च राक्षस । ज्ञातयोऽप्यवमन्यन्ते शूरं परिभवन्ति च ॥ ४ ॥
नित्यमन्योन्यसंहृष्टा व्यसनेष्वाततायिनः । अत्यन्तहृदया घोरा ज्ञातयस्तु भयावहाः ॥ ५ ॥

१] ति० टी०—सुनिविष्टं सुनिविष्टार्थतत्त्वम् ॥ १ ॥

रा० टी०—विभीषणं प्रति रावणोक्तिमाह—सुनिविष्टमित्यादिभिः । हितं वाक्यमुक्तवन्तं विभीषणं परुषं वाक्यं रावणोऽब्रवीत् ॥ १ ॥

गो० टी०—हृद्यं हितमुक्तवन्तं विभीषणं प्रति रावणस्य परुषभाषणं षोडशे—सुनिविष्टमिति । सुसन्निवेशम् अर्थाद्भुतसंधानविरहेऽपि श्रवणमात्रेणात्यन्तप्रीतिजनकम् तेनार्थस्यानुकूलत्वेऽपि अप्रियस्यापि पथ्यत्वात्सुकृतम् सुनिविष्टम् उक्तवन्तमिति क्रियाविशेषणं वा तेन मनस्युद्यं वेदनादरणीयं वा स्यात् मनसि सम्यक्तया यथा भवति तथा उक्तवन्तम् हितं न केवलं स्वार्थानिष्टम् अनिदंशानिस्वरणोपायतया पथ्यम् श्रवणकटुरूपेऽपि पथ्यत्वपर्यालोचनया अपरित्याज्यम् वाक्यं रावणकृत्यार्थपूर्णम् उक्तवन्तम् नासंवत्सरवासिने प्रत्यायितुमर्हतया गुरुपादसदनयुक्तस्य पादयोः पतितस्य वक्तव्यम् दत्तस्थां दृष्टोक्तवन्तं विभीषणम् । अन्येन चेदुक्तं परित्याज्यम् साक्षादनुजतया प्रत्यासत्तेश्चोक्तं कथं त्याज्यम् । परुषं वाक्यमब्रवीत् । श्रवणसमनन्तरं स्थितोऽस्मि गतसंवेह इति वा वक्तव्यम् त्वया महोपकारः कृत इति स्तोत्रं वा कर्तव्यम् सहजप्रत्युपकाराभावेनानुतापो वा कर्तव्यः तद्विहाय शत्रून् प्रति वक्तव्यमुक्तवान् । अब्रवीदित्यनेन यथा सुनिविष्टमुक्तं तथा मनसि सुष्ठ्यं यथा भवति तथा व्यक्तमुक्तवान् । एवमुक्तवन्तं प्रत्यपि परुषोक्तौ हेतुद्वयमाह—रावण इत्यादि । रावयति रोदयतीति रावणः परार्तिसायां जगद्विदितः रौतीति रवणः स एव रावणः स्वार्थेऽण्प्रत्ययः अस्थाने पदं दत्त्वा स्वयमप्याक्रन्दनित्यर्थः । कालचोदितः । धाता रामे शरणं गन्तेत्युक्तवान् कालस्तव कर्तव्यमिति स्वयं द्विधा भवेयमिति । अतः स्वप्रकृत्यनुगुणं कालमनुसृतवानिति भावः ॥ १ ॥

२] ति० टी०—सपत्नेनापि सह वसेत्, न तु मित्रप्रवादेन मित्रपदव्यवहारेण शत्रुसेविना शत्रुपक्षपातिना वसेत् सपत्ने चित्तस्य द्वेषकोऽयैव प्रतिष्ठा, मित्रप्रवादे तु द्वेषस्त्वेन स्निग्धत्वेन ज्ञाते परमदुःखमिति तत्सहवासनिषेधः शत्रुसेविनेत्यनेनोक्तः ॥ २ ॥

रा० टी०—उक्तप्रकारमाह—वसेदिति । सपत्नेन शत्रुणा सह कुपिते आशीविषेण महासर्पेणेव च सह वसेत् मित्रप्रवादेन मित्रत्वव्यवहारेण शत्रुसेविना सह तु नैव वसेत् एतेन विभीषणो राक्षसमर्तीति व्यवस्य निषेधोऽनेनेति ॥ २ ॥

गो० टी०—परुषमेवाह—वसेदिति । सपत्नेन बाह्यशत्रुणा मित्रप्रवादेन मित्रत्वव्यवहारेण शत्रुसेविना शत्रुपक्षपातिना सह वसेत् सहजशत्रुसहवासः सुदूरं परिहर्तव्य इति भावः अतस्तव्या अस्मात्तगरात् सर्वथा गन्तव्यमिति शेषः ॥ २ ॥

३] ति० टी०—शीलं ज्ञातीनां जानामि तदेव विवृणोति हृष्यन्तीति ॥ ३ ॥

रा० टी०—जानामीति । सर्वलोकेषु प्रसिद्धं ज्ञातीनां स्वभावं जानामि । न हि किंतु इत्यत आह—ज्ञातीनां व्यसनेषु दुःखेषु प्रायेण ज्ञातयः हृष्यन्ति ॥ ३ ॥

गो० टी०—अत्रशब्देनेति वक्ष्यमाणं विभिदेशयति—जानामीत्यादिभिः । सर्वलोकेषु सर्वजनेषु मध्ये शीलं स्वभावम् शीलमेवाह—हृष्यन्तीति । अस्मद्व्यसनेन उच्चरटपरस्त्वमेवं गर्जतीति भावः ॥ ३ ॥

४] ति० टी०—ज्ञाने वैद्यादिना प्राप्तराज्यं साधकम् राज्यप्राप्त्यादिरिति शेषः वैद्यं विद्यावन्तम् अवमन्यन्ते प्रजाजनोऽपि गुणाज्ञ इति शूरं परिभवन्ति च । रक्षमन्विष्येति शेषः ॥ ४ ॥

रा० टी०—प्रधानमिति । प्रधानं राज्यप्राप्त्यादिना मुख्यत्वविशिष्टं साधकं राजकार्यनिर्वाहकं वैद्यं प्राप्तविद्यं धर्मशीलं च शूरं च प्रजाः अवमन्यन्ते उपायेनानादरं कुर्वन्ति परिभवन्ति कुत्सार्थत्वेन पराभावयन्ति ॥ ४ ॥

गो० टी०—प्रधानमिति । ज्ञातयः प्रधानं स्वजातिश्रेष्ठम् साधकं कार्यसाधकम् वैद्यं विद्वांसम् प्राधान्यादिश्चैकैकगुणयोगेऽपि ज्ञातयोऽवमन्यन्ते न बहु मन्यन्ते अवमत्य परिभवन्ति चेत्यर्थः ॥ ४ ॥

५] ति० टी०—ज्ञातयो ज्ञातिरूपाः आततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव [illegible]

शृण्वन्ते हस्तिभिर्गीताः श्लोकाः पद्मवने पुरा । पाशहस्तान्नरान्दृष्ट्वा शृणुष्व गदतो मम ॥ ६ ॥
नाग्निर्नोन्यानि शस्त्राणि न नः पाशा भयावहाः । घोराः स्वार्थप्रयुक्तास्तु ज्ञातयो नो भयावहाः ॥ ७ ॥
उपायमेते वक्ष्यन्ति ग्रहणे नात्र संशयः । कृत्स्नाद्भयाज्ज्ञातिभयं सुकष्टं विदितं च नः ॥ ८ ॥
विद्यते गोषु संपन्नं विद्यते ह्रीतितो भयम् । विद्यते स्त्रीषु चापल्यं विद्यते ब्राह्मणे तपः ॥ ९ ॥
ततो नेष्टमिदं सौम्य यदहं लोकसत्कृतः । ऐश्वर्यमभिजातश्च रिपूणां मूर्ध्नि च स्थितः ॥ १० ॥

आततायिनः ॥' ते प्रच्छन्नहृदयाः प्रच्छन्नं तत्कार्यं प्रवृत्ताः, अतएव घोरा अन्योन्यं व्यसनेष्वपन्नु संहृष्टा भवन्ति, अत एव ज्ञातयो भयावहाः ॥ ५ ॥

रा० टी०–नित्यमिति । घोराः क्रूराः अत एव प्रच्छन्नहृदयाः अज्ञातान्तर्हृदयाः व्यसनेषु दुःखेषु प्राप्तेषु अन्योन्यसंहृष्टाः अत एव आततायिनः अत एव नित्यं सुभयावहा ज्ञातयो भवन्तीति शेषः ॥ ५ ॥

गो० टी०–एवं ज्ञातीनां ज्ञातिषु व्यसने हर्षः उक्तस्तेनैव श्लोकद्वयमुक्तम् । अथ भयावहत्वरूपं श्लोकान्तरमाह–नित्यमिति । प्रच्छन्नहृदयाः गदाभिप्रायाः अत एव नित्यमन्योन्यसंहृष्टाः बहिःसंहृष्टवन्त इव स्थिताः घोराः क्रूरकर्माणः अत एव व्यसनेषु सत्सु आततायिनः द्रोहकारिणः अतस्तत्वमस्मासु व्यसने प्रहर्तुमिच्छन्तीति भावः ॥ ५ ॥

६] ति० टी०–ज्ञातिभीतिं हस्तिगीतेन स्पष्टयति–श्रूयन्त इति । हस्तिभिः पद्मवनवर्तिदिव्यवनगजैः स्वबन्धनाय प्रवृत्तान् गृहीतपाशान् नरान् दृष्ट्वा पुरा पूर्वं हस्तिभिर्गीता ये श्लोकाः श्रूयन्ते तान् गदतो मम वक्त्राच्छृणु ॥ ६ ॥

रा० टी०–ज्ञातिभीतिः सार्वकालिकीति बोधयितुं हस्त्युक्तिमाह–श्रूयन्त इत्यादिभिः । पाशहस्तान् स्वबन्धनार्थं गृहीतपाशान् नरान् पद्मवने दृष्ट्वा हस्तिभिः पुरा गीताः श्लोकाः श्रूयन्ते कृतानां सुखतोऽश्रोपमित्यर्थः तत् गदतो मे शृणु ॥ ६ ॥

गो० टी०–उक्तं ज्ञातीनां भयावहत्वं हस्तिगीतेन संवादयति–श्रूयन्त इत्यादिना । क्वचित्पद्मवने । पाशहस्तान् पाशाः गजग्रहणकरणे ये हस्तेषु तेषां ते तथोक्तान् स्वबन्धनोद्युक्तानिति यावत् नरान् ज्ञातिगजगोप्तॄन् गजग्राहिपुरुषान् दृष्ट्वा हस्तिभिः गीताः पठिताः श्लोकाः श्रूयन्ते कृतपरंपरया तान् श्लोकान् गदतः वदतः मम मतः शृणु ॥ ६ ॥

७] ति० टी०–स्वार्थप्रयुक्ता. स्वार्थपरा हस्तिपकाधाराधारणे उत्तमभोजनलाभादित्यर्थपराः ॥ ७ ॥

रा० टी०–तदुक्तयाकारमाह–नेत्यादिभिः । अग्न्यादयो मे भयावहा न स्वार्थप्रयुक्ताः ज्ञातिविघातार्थमपि हस्तिपकहस्तोत्तमभोजनादिप्रयोक्तारो ज्ञातयस्तु नोऽस्माकं भयावहाः ॥७॥

गो० टी०–तानेव त्रीन् श्लोकानुपदर्शे–नाग्निरित्यादिना । नः अस्माकम् अग्निः आश्रयाणोऽपि न भयावहः अन्यानि लोकलक्षणानि अग्नितोऽपि क्षणान्नाशकराणि शस्त्राणि आयुधानि च न भयावहानि पाशाः मरणादप्यतिदुस्सहपारवश्यक्लेशकराश्च न भयावहाः किंतु घोरा निर्दयाः स्वार्थप्रयुक्ताः स्वप्रयोजनपराः ज्ञातयः भयावहाः अग्न्यादिभ्योऽप्यधिकं ज्ञातिभ्यो भयमित्यर्थः ॥ ७ ॥

८ ति० टी०–एते गजज्ञातिभूताः पूर्वगृहीता गजाः वक्ष्यन्ति करिष्यन्तीत्यर्थः नो विदितं च श्रुतशोऽनुभूतं चेत्यर्थः ॥ ८ ॥

रा० टी०–उपायमिति । एते हस्तिपकेभ्यः प्राप्तभोगाः गजाः अस्माकं ग्रहणे उपायं वक्ष्यन्ति अत्र संशयो न अतः कृत्स्नात् सर्वस्मात् भयात् ज्ञातिभयं सुकष्टमतिदुःखम् इति नोऽस्माकं विदितं ज्ञातम् ॥ ८ ॥

गो० टी०–उक्तं ज्ञातिभयातिरेकं सयुक्तिकमुपपादयति–उपायमिति । अस्माकं ग्रहणे एते ज्ञातिरूपा हस्तिनः उपायं वक्ष्यन्ति अत्रोपायकथने संशयो नास्ति अतः कृत्स्नादन्यादिभयात् ज्ञातिभयं सुकष्टम् प्रकृष्टं भयमित्यर्थः इदमस्माभिः विदितं ज्ञातं च ॥ ८ ॥

९] ति० टी०–संपन्नं द्रव्यकृष्यसाधनसंपत् ॥ ९ ॥

रा० टी–विद्यत इति । संपन्नं द्रव्यकृष्यसाधनसंपद्रूपं गोषु विद्यत एव स्त्रीषु चापल्यं विद्यत एव ब्राह्मणे तपो विद्यत एव ज्ञातितो भयं विद्यत एव ॥ ९ ॥

गो० टी०–स्त्रिष्वेव ज्ञातिषु कुतो भयसंभावनेत्याशङ्क्याह–विद्यत इति । गोसंपत्त्यायुपादानं दृष्टान्तार्थम् गोषु संपत् संपत्तिः तद्धेतुत्वमित्यर्थः विद्यते अस्ति " विद्, सत्तायाम् " इति धातुः । दमः इन्द्रियनिग्रहः चापल्यं चञ्चलत्वम् ज्ञातितः ज्ञातिषु भयं भयकरत्वम् ॥ ९ ॥

१०] ति० टी०–तत इति रावणवाक्यम् । अहं लोकसत्कृत इति यत्तत्तेनेष्टं न प्रियमिति मन्ये, तथैश्वर्यप्राप्त्यादिकमपि ॥ १० ॥

रा० टी०–रावणवाक्यमाह–तत इति । ततः गजोक्तिज्ञापितज्ञातिद्रोहस्य स्थिरत्वात् हेतोः यदहं लोकसत्कृतत्वादिविशिष्टः तदिदं ते नेष्टम् ॥ १० ॥

गो० टी०–प्रधानं साधनमिति श्लोकेन निश्चयति–तत इति । अहं लोकसत्कृतः ऐश्वर्यं च अभिजातः प्राप्तः रिपूणां मूर्ध्नि अवस्थितश्चेति यत् इदं ततः ज्ञातीनामसहिष्णुत्वात् तव नेष्टम् ॥ १० ॥

१ क ख घ ङ गो पाठः । २ क ख ग घ ङ इति गो० पाठः । ३ क ख ग घ ङ अत्र

यथा पुष्करपत्रेषु पतितास्तोयबिन्दवः । न श्लेषमभिगच्छन्ति तथानार्येषु सौहृदम् ॥ ११ ॥
यथा शरदि मेघानां सिञ्चतामपि गर्जताम् । न भवत्यम्बुसंक्लेदस्तथानार्येषु सौहृदम् ॥ १२ ॥
यथा मधुकरस्तर्षाद्रसं विन्दन्न तिष्ठति । तथा त्वमपि तत्रैव तथानार्येषु सौहृदम् ॥ १३ ॥
यथा मधुकरस्तर्षात्काशपुष्पं पिबन्नपि । रसमत्र न विन्देत तथानार्येषु सौहृदम् ॥ १४ ॥
यथा पूर्वं गजः स्नात्वा गृह्य हस्तेन वै रजः । दूषयत्यात्मनो देहं तथानार्येषु सौहृदम् ॥ १५ ॥
यैोऽन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतन्निशाचर । अस्मिन्मुहूर्ते न भवेत्त्वां तु धिक्कुलपांसन ॥ १६ ॥
इत्युक्तः परुषं वाक्यं न्यायवादी विभीषणः । उत्पपात गदापाणिश्चतुर्भिः सह राक्षसैः ॥ १७ ॥
अब्रवीच्च तदा वाक्यं जातक्रोधो विभीषणः । अन्तरिक्षगतः श्रीमान्भ्रातो वै राक्षसाधिपम् ॥ १८ ॥

११] ति० टी०—अनार्येषु क्रूरस्वभावेषु ॥ ११ ॥

रा० टी०—इदानीं विभीषणेन स्वकृतसौहृदस्य नैष्फल्यमाह—यथेत्यादिभिः । श्लेषं तत्र प्रविष्टत्वं यथा शाभिगच्छन्ति प्राप्नुवन्ति तथा अनार्येषु दुष्टस्वभावेषु सौहृदं नाभिगच्छति ॥ ११ ॥

गो० टी०—चिरं सह वसति विभीषणे कथमकार्यमाशङ्क्यम इत्यपेक्षायामनार्यस्य चिरसंवासोऽप्रयोजक इत्याह—यथेति । पुष्करपर्णेषु पद्मपत्रेषु पतितास्तोयबिन्दवः यथा श्लेषम् ऐक्यं नोपगच्छन्ति तथा अनार्येषु दुष्टेषु विषये संगतं संबन्धः । श्लेषम् स्नेहबन्धं नोपयातीत्यर्थः ॥ ११ ॥

१२] ति० टी०—यथा गर्जतां सिञ्चतामपि मेघानां संबन्धे पृथिव्या अम्बुसंक्लेदोऽम्बुव्याप्तता न भवति, तथानार्येषु सौहृदं निष्फलमिति भावः । यद्वा वर्षांसु गर्जतां सिञ्चतामपि मेघानां शरदि नाम्बुसंक्लेदस्तथानार्येषु सौहृदमल्पकालस्थायीत्यर्थः ॥ १२ ॥

रा० टी०—यथेति । वर्षासु सिञ्चतां सेककर्तृणां गर्जतामपि मेघानां अम्बुसंक्लेदः अम्बुना भूमेराद्रीभावः शरदि न भवति आर्द्रत्वं विनश्यतीत्यर्थः तथा ॥ १२ ॥

गो० टी०—दृष्टोपि स्नेहो न फलपर्यवसायीत्याह—यथेति । शरदि सिञ्चतां वर्षतां मेघानां संबन्धी अम्बुसंक्लेदः अम्बुसेचनम् यथा न भवति तथानार्येषु सौहृदम् । शरन्मेघवर्षणवदनार्येषु सौहृदमनुपकारकमित्यर्थः । हेतुस्तोयधारा न भवति यथा अनार्येषु सौहृदं तथा । शरदि मेघा इव अनार्याः आपाततः उपकुर्वन्त इव प्रतीयमाना वस्तुतो नोपकुर्वन्तीत्यर्थः ॥ १४ ॥

१३] ति० टी०—यथा मधुकरस्तर्षादभिलाषाद्रसं पुष्परसं विन्दन्नपि तत्रैव न तिष्ठति तथानार्येषु सौहृदमपि न तिष्ठति । त्वमपि तथा तादृशोऽनार्योऽसीत्यर्थः ॥ १३ ॥

रा० टी०—यथेति । मधुकरस्तर्षादभिलाषातिशयात् रसं विन्दन् प्राप्नुवन्नपि यथा न तिष्ठति तथा त्वमपि न तिष्ठसि तथा अनार्येषु सौहृदमपि न तिष्ठति ॥ १३ ॥

गो० टी०—सदुपजीविनस्त्वयि कथं स्नेहबन्धाभाव इत्याह—यथेति । यथा मधुकरः तर्षात् अभिलाषात् रसं मधुरस्यन्दम् विन्दन् पिबन् तत्र रसाधारे पुष्पे न तिष्ठति । तिष्ठति रसग्रहणोपकारं जानन् तत्र न निषीदतीत्यर्थः । त्वमपि तथा मधुकर इव । अनार्येषु दुर्जनेषु सौहृदम् न तिष्ठसि । उपकारानुविधेर्न ज्ञायत इत्यर्थान्तरन्यासः ॥ १३ ॥

१४] ति० टी०—काशपुष्पं सितोऽपि रसाद्भास्तथानार्येषु सौहृदं कृतं फलाभाव इति भावः ॥ १४ ॥

रा० टी०—यथेति । काशपुष्पं सितम्बुकरः अत्र काशपुष्पे रसं न विन्दन् तथा अनार्येषु सौहृदं कुर्वन् रसं फलं न विन्दत ॥ १४ ॥

१५] ति० टी०—यथा गजः पूर्वं स्नात्वा हस्तेन रजो गृहीत्वा यथात्मनो देहं दूषयति स्नानकृतनैर्मल्यं नाशयति, तथानार्येषु पूर्वं कृतं स्नेहं स्वयमेव नाशयन्तीत्यर्थः ॥ १५ ॥

रा० टी०—यथेति । गजः पूर्वं स्नात्वा नैर्मल्यं संपाद्य हस्तेन शुण्डेन रजः आगुञ्च आत्मनो देहं यथा दूषयति नैर्मल्यं विनाशयति तथा अनार्येषु प्राप्तं सौहृदं दूषयति स्वस्वकृतमिति शेषः ॥ १५ ॥

गो० टी०—तथापि कृतस्नेहः कुतोपलप्यते तत्राह—यथेति । अनार्येषु सौहृदं गजस्नानवदनैव दूष्यत इत्यर्थः ॥ १३ ॥

१६] ति० टी०—यस्त्वन्यो यथैवं ब्रूयात्तथा तस्मिन्नेवं न भवेत् जीवेत् । त्वां तु धिक् । सोदरत्वेन तथाप्रहीतृत्वेन धिक्शब्दविषय ते दण्ड इति भावः ॥ १६ ॥

रा० टी०—य इति । एवंविधं त्वद्वाक्यसदृशं वाक्यं योऽन्यो ब्रूयात् सोऽस्मिन् मुहूर्ते न भवेत् हि निहन्यामित्यर्थः । अतस्त्वां धिक् ॥ १६ ॥

गो० टी०—एवं सामान्येन विनिन्द्य साक्षादपि निन्द्यन्नन्य इति । अन्यः अनुजादन्यः एवंविधमतिपरुषं स्पष्टमेव वाक्यं ब्रूयात् वदेत् अस्मिन्मुहूर्तेऽस्मिन् क्षणे न भवेत् विनश्येत नाशयेयमिति यावत् । त्वां तु भ्रातरं धिक् त्यक्ष्यामीत्यर्थः । कुलपांसन राक्षसकुलावयवकर ॥

१७-१८] ति० टी०—एवं वाक्यं पूर्वोक्तम् ।

त्वं भ्रान्तोऽसि मे राजन्ब्रूहि मां यद्यदिच्छसि । ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः॥
इदं हि परुषं वाक्यं न क्षमाम्यग्रजस्य ते ॥ ॥ १९ ॥
सुनीतं हितकामेन वाक्यमुक्तं दशानन । न गृह्णन्त्यकृतात्मानः कालस्य वशमागताः ॥ २० ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः । अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ २१ ॥
बद्धं कालस्य पाशेन सर्वभूतापहारिणः । न नश्यन्तमुपेक्षे त्वां प्रदीप्तं शरणं यथा ॥ २२ ॥
दीप्तपावकसंकाशैः शितैः काञ्चनभूषणैः । न त्वामिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः ॥ २३ ॥

थानेऽप्येतैः सह नाशस्य दुर्वारत्वाज्ज्येष्ठोऽप्यसौ । 'उत्पथप्रतिपन्नस्य कार्याकार्यमजानतः । गुरोरप्यवलिप्तस्य परित्यागो विधीयते ॥' इति शास्त्रबलात्सर्वथा परित्याज्य एवेत्यालोच्य तस्मात् हित्वा स्वमुत्पपात चतुर्भिर्मन्त्रिभिः ॥ १७ ॥ १८ ॥

रा० टी०–इत्यादि । इति परुषमुक्तः न्यायवादी यथार्थवक्ता विभीषणः चतुर्भिः राक्षसैः सह उत्पपात ॥ १७ ॥

गो० टी०–इत्युक्त इति । न्यायवाद्यपि इति पूर्वोक्तरीत्या परुषमुक्तः सन् उत्पपात संतप्तसिकतामयभूमिस्थित इव मृतः ॥ १६ ॥

रा० टी०–अब्रवीदिति । अन्तरिक्षगतो विभीषणः राक्षसाधिपमब्रवीत् ॥ १८ ॥

गो० टी०–एवमाकाशे उत्पतनेऽपि पुनस्तस्मिन्नवतापेनापि नाम सम्बुद्धवेत् समीची मतिरिति हितोपदेशे प्रावर्ततेत्याह–अब्रवीदिति । अन्तरिक्षगतः श्रीभ्रान् । परित्यक्ता मया बन्धुमित्राणि च धनानि चेति समुत्थितस्य का नाम श्रीः । उच्यते । प्रतिकूलनिवृत्तिपूर्वकानुकूलरामविषयाभिमुख्यश्रीरस्तु इत्यर्थः ॥ १७ ॥

१९] ति० टी०–अथ सभासदां ज्येष्ठत्यागेनाधर्मोऽयमिति शङ्कानिरस्यर्थमाह–स त्वं भ्रान्त इत्यादि । ज्येष्ठस्त्वमित्युक्तोऽपि न धर्मपथे स्थितः । परदाराहरणादिरूपानेकाधर्मशालित्वात् । 'पतितैः सह संव्यवहारो न विद्यते' इति स्मृतेः पतितसमाचार्यं शास्त्रतो वा द्रष्टुं न गच्छेत्, न चास्मादुपयुञ्जीत । 'इच्छासंनिपाते उपसंगृह्य तूष्णीं व्रजेत्' इति स्मृतेश्चाग्रजस्यापि ते इदं परुषं वाक्यं न क्षमामि । अतः परमिह स्थितेति शेषः ॥ १९ ॥

रा० टी०–तदाकूतमाह–स त्वित्यादिभिः । यो धर्मपथे न स्थितः सोऽपि त्वं ज्येष्ठो भ्राता अत एव पितृसमः अत एव मान्योऽसि अतः यद्यदिच्छसि तत्तन्मां ब्रूहि सर्वं सहे इत्यर्थः ॥ १९ ॥

गो० टी०–स त्वमित्यर्धमेकं वाक्यम् । स त्वं परुषभाषी त्वम् । भ्राताऽसि प्रतिवक्तुमनर्होऽसि अतो यद्यदिच्छसि ब्रूहि ॥ १८ ॥

गो० टी०–तर्हि किमर्थमुद्वहनोऽसि प्रतिवचनाभावात् क्षमापि किमतो तत्राह–ज्येष्ठ इति । ज्येष्ठस्त्वं पितृसमः मान्यः किंतु धर्मपथे न स्थितोऽसि । अतस्त्वदुक्तमनृतं परुषं न क्षमामि न क्षमे ॥ १९ ॥

२०] ति० टी०–सुनीतं सुनिश्चितागामिफलबोधकं वाक्यं हितकामेनोक्तम् । तत्तु त्वया न गृहीतमिति शेषः । तादृश्येव लोकस्थितिरित्याह–न गृह्णन्तीति । सुनीतवाक्यार्थमिति शेषः ॥ २० ॥

रा० टी०–नन्वयं यदि सहनेच्छो तर्हि किमर्थं पराजयसे इत्यनआह–इदमिति अयमजय्यते समीपेऽपि इदं परुषं वाक्यं इन्द्रजिदादिवचनं न क्षमामि अर्थं पृथक् । सुनीतमिति । हे दशानन ! सुनीतं शोभननीतिविशिष्टं हितकामेन जनेन उक्तं वाक्यम् अकृतात्मानः चञ्चलचित्ताः कालस्य वशमागताः जनाः न गृह्णन्ति ॥ २० ॥

गो० टी०–स्ववाक्याश्रवणे निमित्तं सामान्यतो दर्शयति–सुनीतमिति । स्पष्टम् ॥ २० ॥

२१] ति० टी०–उक्तमेवार्थं पुनर्मारीचोक्तस्मरणेनाह–सुलभा इति ॥ २१ ॥

रा० टी०–पुरुषा इति । सततं प्रियवादिनः अहितमपि प्रियत्वेन वदनशीलाः जनाः सुलभाः बहवः सन्तीत्यर्थः अप्रियस्य श्रुतिकटोः पथ्यस्य वचनस्य श्रोता वक्ता च दुर्लभः ॥ २१ ॥

गो० टी०–सुलभा इति । प्रियवादिन इत्यूपलक्षणं प्रियश्रोतारश्च ॥ २१ ॥

२२] ति० टी०–सर्वभूतापहारिकालपाशेन बद्धं नश्यन्तं त्वां नोपेक्षे । अतो मया किंचिदितदुक्तमिति शेषः ॥ २२ ॥

रा० टी०–नन्वप्रष्टेन त्वया पथ्यमपि किमर्थमुक्तमित्यत आह–बद्धमिति । सर्वभूतापहारिणा कालस्य पाशेन तत्सदृशाधर्मेणेत्यर्थः, बद्धमत एव नश्यन्तं त्वाम् अहं नोपेक्षेयम् तत्र दृष्टान्तः–प्रदीप्तं दह्यमानं शरणं गृहं यथा ॥ २२ ॥

गो० टी०–तर्ह्यश्रोतारं प्रति किमर्थं वदसि तत्राह–बद्धमिति । सर्वभूतापहारिणा निर्दयेनेत्यर्थः । नोपेक्षेयम् नोपेक्षेय । शरणं गृहम् ॥ २२ ॥

२३] ति० टी०–निहतं त्वां द्रष्टुं नेच्छामि । अतएवोक्तमिति शेषः ॥ २३ ॥

रा० टी०–एतेन मरणान्तरमाह–नेच्छामीति । रामेण शरैः निहतं त्वां द्रष्टुं नेच्छामि ॥ २३ ॥

१ आर्षत्वे गो. पाठः । २ अनृतं त्वेति गो. पाठः । ३ [illegible]

शूराश्च बलवन्तश्च कृतास्त्राश्च नरा रणे। कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ २४ ॥
तन्मर्षयतु यच्चोक्तं गुरुत्वाद्धितमिच्छता। आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम् ॥
स्वस्ति तेऽस्तु गमिष्यामि सुखी भव मया विना ॥ २५ ॥
निवार्यमाणस्य मया हितैषिणा न रोचते ते वचनं निशाचर।
परान्तकाले हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्धिरीरितम् ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः।

एवं कठोरवचोनाराचनिर्भिन्नान्तःकरणो रामभेव शरण्यं मन्वानो विभीषणस्तत्क्षणादेवाकृत्रिम[illegible] नुगतो राघवमुपगम्य नरैः रावणानुचरः क्रोडपि राक्षसैः सहास्मान्हन्तुमागच्छतीत्यनुमानेनाह भारः स्वकृतान्ते [illegible] महता रवेणाकाशस्थ एव कथयति।

इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः। आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः ॥ १ ॥

गो० टी०–दीप्तेति। स्पष्टम् ॥ २३ ॥

२४] ति० टी०–कालाभिपन्ना अधर्मतः कालपाशबद्धाः ॥ २४ ॥

रा० टी०–शूरा इति। अस्त्रादिविशिष्टाः नराः कालाभिपन्नाः अधर्मसंपादकसमयवन्तः सन्तः वालुकसेतव इव सीदन्ति विनश्यन्ति ॥ २४ ॥

गो० टी०–शौर्यबलास्त्रशालिनो मे कृतो विपक्षाश्रयेत्याह–शूरा इति। कालाभिपन्नाः मृत्युगृहीताः सीदन्ति शिथिलन्ति वालुकाः सिकताः ॥ २४ ॥

२५–२६] ति० टी०–यदुक्तमप्रियमिव हितं मद्वचान्मर्षयतु क्षमताम्। मया विना सुखी भवेति स्वकृत्योक्तिः ॥ २५ ॥२६॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय
आदिकाव्ये युद्धकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०–तदिति। गुरुत्वात् तव ज्येष्ठत्वाद्धेतोः हितमिच्छता मया यदप्रियमुक्तं तत् भवान् मर्षयतु क्षमताम्। आत्मानं पुरीं च रक्ष, ते स्वस्त्यस्तु, अहं गमिष्यामि, मया विना रहितस्त्वं सुखी भव। सार्धश्लोकः सकान्वयी ॥ २५ ॥

गो० टी०–तदिति। मर्षयतु। भवानिति शेषः ॥ २५ ॥

गो० टी०–स्वस्तीत्यर्धम् ॥ २६ ॥

रा० टी०–निवार्यमाणस्येति। परान्तकाले मरणसमये तायुषो नराः जनाः सुहृद्भिरीरितं हितं वचो न गृह्णन्ति अतः हितैषिणा मया निवार्यमाणस्य ते वचनं मदुक्तं न रोचते ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे षोडशः सर्गः ॥ १६ ॥

गो० टी०–निवार्यमाण इति। स्पष्टम् ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटव्याख्याने षोडशः सर्गः ॥ १६ ॥

१] ति० टी०–अथ विभीषणस्य राममसमीपगमनम्–इतीति। पतन्तमाकाशमार्गे सर्वथा–इत्यादिश्लोकम्। रावणानुजो विभीषणो यत्र सलक्ष्मणो रामस्तत्राजगाम। इत्यथप्राप्तिः पक्षत्राहिसंबन्धेन गतं रावणं परित्यज्य जगद्गुरुं स्मरणमात्रेण सकलपापहरं गुरुं रामं प्रत्याजगामेत्याशयः ॥ १ ॥

रा० टी०–विभीषणकृतरावणोपेक्षणकवचनान्तकारलिङ्गविभीषणकृतान्तमाह–इतीत्यादिभिः। रावणानुजो विभीषणः इति परुषं वाक्यमुक्त्वा यत्र रामस्तत्र मुहूर्तेनाजगाम ॥ १ ॥

गो० टी०–' षष्ठ्यष्टमि. सर्गैः–आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम्। रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा। आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ' इत्येतेषु शरणागत्यङ्गेषु प्रविन्यासो विभीषणस्यानुकूल्यप्रातिकूल्यवर्जनेन दर्शितः। संकल्पः पुनः पुनरुपदेशादिना महाविश्वासश्च दर्शितः। अथ कार्पण्यप्रदर्शनपूर्वकं शरणागतिस्वरूपं दर्शयितुमुपक्रमते–इत्युक्त्वेत्यादिना। तत्र रावणेन तिरस्कृतस्य सत्यस्य देव एवास्माभिरित्याद्यः। परमधार्मिकस्य रामाश्रयस्तु कर्तव्य इति धार्मिकस्य विभीषणस्य धर्मे मतिरासीदित्यनुमितिः प्रस्तौति–इतीति। इत्युक्त्वा 'प्रतीयतां दाशरथाय मैथिली' इति कर्तव्यमौरुषम् 'यावन्न गृह्णन्ति शिरांसि बाणाः' इत्यकरणे प्रत्यवायं चोक्त्वा। परुषं सकोपकठोरं रावणस्य सत्यमारुतस्य विरुद्धिनि दुःखकरत्ववद्विभीषणोक्तिर्हितम्। आशयदोषेण परुषं वाक्यं हितपरिपूर्णम्। [illegible] हितज्ञो भ्राता भ्रातरमाप्तं परित्याजेत्यपयशो यावत्ता[illegible] परिमार्ष्टुं तावत्पर्यन्तमुक्त्वा। परुषत्वे हेतुः रावणमिति। प्रबलदुर्बलविचारसन्तरेण सर्वरावकस्य शङ्कवणोपवर्णने [illegible] भवत्येव। रावणानुजः रावणानुजत्वेऽपि सच्चोत्तरतया [illegible] हितशुक्रवानित्यूहिः स्तौति। हितकथने ज्येष्ठस्यानौ[illegible] क्तः। अत एवोक्तं मद्वचा–' पितृव्यापयशोमल निराकरि[illegible]

कृतिः । पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ अहं हि बालत्वेनाहुः पितरमेव च मन्त्रदम् ' इति । आजगाम रावणालयं स्वस्य संबन्धाभावेऽपि रामगोप्तृत्वेनाजगामेत्युक्तम् न तु जगामेति । क्षुद्रतेन ' वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसम् ' इति न्यायेनाङ्गारनिकरपरिक्षिप्ते वर्त्मनि पदन्यासवत् रावणसदनावस्थित्यनर्हत्वं विगर्हितबन्धनरक्षोनिलयस्य मातृरूपस्य श्रीमन्तरेण मध्यंदशादर्शनवदतिवेगागमनं चोक्तम् । यत्र रामः । रामापेक्षया तदेशसंबन्धस्य प्राप्यत्वमुक्तम् । ' सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः । यस्मिन्नमति काकुत्स्थः कुबेर इव नन्दने ' इतिवत् रामस्य लक्ष्मणो व्यावर्तक इति सलक्ष्मण इत्युक्तम् । यद्वा पुरुषकारसंविधमनेनोच्यते । अनेन श्लोकेन भगवद्विमुखानां देशस्य त्याज्यत्वं तत्संबन्धिदेशस्य परमप्राप्यत्वं चोक्तम् । यद्वा ' मा कार्षीति न चाकार्षीत् ' इत्यायुक्तीया भगवदंशत्वापि भागवताभिमानाभावे परित्याज्यत्वाल्लक्ष्मणसादृश्यमुक्तम् । ननु विश्रवःपितामहवरप्रदानविभवविदितनिखिलधर्मज्ञतेन ' विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ' इति तत्र तत्र धार्मिकतया प्रशंसितेन विभीषणेन ' त्वयेदं भ्राता पितृसमः ' इति पितृवदनुवर्तनीयो ज्येष्ठभ्राता बाल्यात् प्रभृति परिपोषकश्च सन् रावणः सपदि सन्निहिते शत्रौ क्षुद्रवह्निनेव दूरं कथं परित्यक्तः । त्यजतु नाम कथंचित् । अथापि न युक्तमभिगन्तुं तस्य प्रहर्तारम् । अभिगच्छतु नाम नोचितमस्य स्थानमखिलपितुम् । अभिलषतु नाम नौपयिकमस्य वरोपणं दातुम् । अत्र केचित् । रावणस्य नित्यविकरोपदूषितत्वात् ' गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ' इति स्मरणाद्विभीषणेन त्यक्तो रावण इत्याहुः । त्रयस्त्रिंशत्कुलकरैः पितामहप्रसादलब्धविज्ञानत्वाद्रामं सर्ववेदान्तवेद्यं सर्वलोकशरण्यं सर्वलोकेश्वरेश्वरं श्रुतप्राप्यं नारायणाख्यं परं ब्रह्म लोकानुग्रहेच्छयावतीर्णमिति निर्विविक्तस्वभावमजानन्ति । यथा मन्दोदरीप्रभृतयः एवं तत्राजानतोऽपि विशेषरामान्यधर्मप्राबल्यदौर्बल्यनिबन्धेन सामान्यधर्मपरित्यागो विशेषधर्मपरिग्रहश्चोपपद्यते । ज्येष्ठभ्रातृवर्तने हि वैयधिकरण्यमाश्रितया ज्येष्ठानुवर्तनद्वारा परमात्मागमने पर्यवसानस्य वक्तव्यत्वात् मोक्षपर्यवसानेऽपि परमात्मोपासनाङ्गत्वाच्च सामान्यधर्मः । रामानुवर्तने तु साक्षात्परमात्मस्मारावर्तनत्वात् तदाश्रितधर्मभाध्यत्वेन प्राधान्यात्च विशेषधर्मः । उभयोपाधिपरिपोषे सत्युभयधर्मानुवर्तनीयम् विरोधे तु सामान्यधर्मं परित्यज्य विशेषधर्मोऽनुवर्तनीयः अतो विभीषणोऽपि इयन्तं कालं क्रूरं रावणानुवर्तनधर्मपरित्यागेन यत्र रामानुवर्तनमपि किं सिद्ध्येदित्याशया तत्रैव हितं पुनः पुनरुपदिदेश एवमपि तस्यासुरप्रकृतित्वाज्जानतोऽपि रामवैरमिति निश्चित्य ततः परं एतदनुवर्तनेन स्वात्मविनाशकं रामविषयकं वैरं मय्यपि स्यादिति भीतः सन् ' वरं हुतवहज्वाला० ' इत्यादिन्यायेनात्यन्तदुःखदां तत्सङ्गतिं तत्याज विश्वेशधर्मं रामानुवर्तनं चाङ्गीचकारेत्यतोऽयं परो धर्म एवेति कृतघ्नशङ्का दूरोत्सारिता । नाप्ययं राज्यकाङ्क्षया रामं शरणमुपजगाम तदपेक्षाया अदर्शनात् । तथाहि शरणागतिसमये ' त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः ' इत्यन्यविषयवैराग्यस्य तेन कण्ठरवेणोक्तत्वात् । पश्चाद्रामाय विज्ञापने क्रियमाणे 'परित्यक्ता मया लङ्का मित्राणि च धनानि च । भवद्गतं मे राज्यं च जीवितं च सुखानि च' इति सर्वविधपुरुषार्थत्वेन त्वामेवाहमुपेयिवानिति कथनात् ' अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम् । राजानं त्वां करिष्यामि सत्यमेतत् ब्रवीमि ते ' इत्यनाकाङ्क्षितराजत्वकरणोक्तेः कुलङ्कुरामप्रीतिमात्रपरत्वाद्दुरूपानुपङ्क्तिकभोगप्रदानपरा । यथाहुः— 'आयुरारोग्यमर्थांश्च भोगांश्चैवानुपङ्क्तिकान् । ददाति ध्यायतां नित्यमपवर्गप्रदो हरिः ' इति । अतो यदुक्तं हनुमता ' राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः ' इति । यच्च रामेणोक्तं ' राज्यकाङ्क्षी विभीषणः ' इति तत्त्वं रामश्चक्ष्यविलाषयस्य सर्वीवस्य व्यामोहप्रशमनाय नीतिशास्त्रोक्तराजत्वान्तप्रदर्शनमात्रपरमिति मन्तव्यम् । हनुमद्रामलक्ष्मण्यस्य विभीषणवाक्यस्य चान्योन्यविरोधप्रसङ्गे ' अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः ' इतिन्यायेन विभीषणवाक्यस्य प्राबल्यात् । अतएव 'राजानं त्वां करिष्यामि' इति ब्रुवतां रामस्य प्रतिवचनमनुक्त्वा परिग्रहणमात्रमेव विभीषणः प्रार्थयामास । राक्षसानां वधे साहाय्यं लङ्कायाश्च प्रदाने । करिष्यामि यथाप्राणं प्रवक्ष्यामि च साहितम्' इति । तस्यानुमत्यभावेऽपि बलाद्राज्यस्वीकार उत्तरकाण्डे उक्तः— 'यावत् प्रजा धरिष्यन्ति तावत्त्वं वै विभीषण । राक्षसेन्द्र महावीर्य लङ्काप्यस्त्वं धरिष्यसि । शाधितस्त्वं मयिस्नेहेन कार्यं ते मम शासनम् । प्रजाः संरक्ष धर्मेण नोचेत् वक्तुमर्हसि' इति । इत्थमनन्यप्रयोजनत्वादस्मै रामः कुलधर्मं श्रीलङ्कानाथं ददौ । धर्मसंस्थापनार्थमेवावतीर्णस्य रामस्य नियोगनावतिष्ठां राक्षसजातिं सन्मार्गे प्रवर्तयितुं तस्य राज्याङ्गीकरणम् । इदमप्याज्ञानुविधायित्वात् कैङ्कर्यं कोटावन्तर्भूतमिति विभीषणतात्पर्यम् । अतो यथावद्दिदितार्थो लक्ष्मणोऽपि ' अहं तावन्महाराजे पितृत्वं नोपलक्षये । भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ' इति सोपाधिकपितरं दशरथं परित्यज्य निरुपाधिकसकलविधबन्धुं राममेव ' अप्रतस्ते गमिष्यामि पन्थानमकुतोभयम् । अहं सर्वं करिष्यामि जागतः स्वपतश्च ते ' इति रामपरिचरणमेव फलं प्रार्थयामास । 'स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः ' इति राघवं शरणमुपागतश्च । तथा विभीषणोऽपि सोपाधिकबन्धुं भ्रातरं परित्यज्य कैङ्कर्यापेक्षयैव सर्वविधसहजबन्धुं रामं शरणं गत इति बोधयम् । अत एव रामप्राप्त्यपेक्षया रावणपरित्यागवेलायामन्तरिक्षगतः श्रीमानिति प्रशंसितः । स तु नागवरः श्रीमान् लक्ष्मणो लक्ष्मसंपन्न इतिवत् । तस्माद्राधर्मशङ्का विभीषणे । ननु यतोवै [illegible] यशोवीर्यसुपालिन्य प्रविश्य कालयिता मया । बाहुभ्यां [illegible]

तं मेरुशिखराकारं दीप्तामिव शतह्रदाम् । गगनस्थं महीस्थास्ते ददृशुर्वानराधिपाः ॥ २ ॥
[1]ते चाप्यनुचरास्तस्य चत्वारो भीमविक्रमाः । तेऽपि वर्मायुधोपेता भूषणोत्तमभूषिताः ॥ ३ ॥
स च मेघाचलप्रख्यो वज्रायुधसमप्रभः । वरायुधधरो वीरो दिव्याभरणभूषितः ॥ ४ ॥
तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः । वानरैः सह दुर्धर्षश्चिन्तयामास बुद्धिमान् ॥ ५ ॥
चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह । हनुमत्प्रमुखान्सर्वानिदं वचनमुत्तमम् ॥ ६ ॥
एष सर्वायुधोपेतश्चतुर्भिः सह राक्षसैः । राक्षसोऽभ्येति पश्यध्वमस्मान्हन्तुं न संशयः ॥ ७ ॥

ज्यमनोरथः । प्राप्तप्रतिज्ञश्च स्थिरः सकामो राज्ये कृत इति नागपाशबन्धनसमये स्वस्य राज्यनाशकृतनिर्वेदः कथमुपपद्यते इति चेन्न । तत्रापि प्रतिष्ठाशब्दस्य रामैकैकुण्यपरत्वात् । नष्टराज्यमनोरथ इत्यत्रापि राज्यशब्दो ' भरतस्तं मे भ्राता च ' इत्युक्तैकैकुण्यसाम्राज्यपरः । तेन ' राज्ये प्राप्तेऽपि धर्मज्ञ लङ्कायां नात्र संशयः ' इति सुषेणोक्तं तु सदाशयकाशनकृतमिति न कश्चिदोषः इति प्राहुः । अत एव चतुरङ्गतो वक्ष्यति विभीषणः—' यदाज्ञप्तं महाबाहो त्वया गुरुनिदेशनम् । तत्तथानुष्ठितं वीर त्वद्बलाश्रयमन्यवत् ' इति ॥ १ ॥

२–४] ति० टी०–मेरुशिखराकारम् उच्चत्वपरीणाहत्वसन्नवहुलवैस्तडाकाख्यं दीप्तमग्निमन्तत्वात्सर्यां शतह्रदाम्वज्रम्–४

रा० टी०–तमिति । मेरुशिखराकारम् उच्चत्वपरीणाहतमणिमयकूटादिना मेरुशिखरसदृशम् शतह्रदाम् अनिप्रकाशत्वेन विद्युदग्निगर्भत्वेन वा गगनस्थं तं विभीषणं महीस्थाः वानराधिपा ददृशुः

गो० टी०–रावणसदृशमेघसदृशत्वसम्भव एव सुग्रीवादयो विभीषणमपञ्चमित्याह—तमिति । तं ददृशुरित्यत्र हेतुं पतितुमिवागच्छन्तम् मेरुशिखराकारम् इत्यत्रापि दीप्तत्व रत्नबहुत्वादिभिर्मेरुशिखरतुल्यम् । किंच प्रतिपक्षत्रासकत्वेन स्थिरत्वं स्थितत्वं प्रकाशमानत्वं पारमैश्वर्यज्ञापकत्वम् तेन रामस्य शृङ्गाभः रावणस्य शृङ्गभङ्गोच्यते । दीप्तामिव शतह्रदाम् । तेजिष्ठत्वगगनसंचाराभ्यां विद्युद्दान्तः । रामभक्ता वानरा नास्मान् प्रवेशयिष्यन्तीति कस्यः, अप्रवेशे जीवते न सिध्यतीति त्वरा चेत्यनेनेदं तेन गम्यते । गगनस्थमिति दूरत एव दृष्ट्वारिति भावः ॥ २ ॥

रा० टी०–स इति । मेघाचलप्रख्यः मेघाचलयोः सदृशः वज्रायुधसमा इन्द्रसदृशी प्रभा यस्य वरायुधधरः स विभीषणोऽस्तीति शेषः ॥ ३ ॥

रा० टी०–ये इति । ये तस्यानुचराः तेऽपि वर्मायुधोपेतत्वादिविशिष्टाः सन्ति ॥ ४ ॥

५–७] ति० टी०–आत्मपञ्चममात्मा पञ्चमो यस्य तं मन्त्रिचतुष्टयसहितं तमिति यावत् ॥ ५–७ ॥

रा० टी०–तमिति । आत्मा विभीषणः पञ्चमो यस्मिन् तं मन्त्रिचतुष्टयसहितमित्यर्थः । तं विभीषणं वानरैः सह सुग्रीवो दृष्ट्वा चिन्तयामास ॥ ५ ॥

गो० टी०–अथ दुर्धर्षो लङ्कापुरीदेशादागमनमायुधत्वाद्वै च दृष्ट्वा प्रहर्तुमेवागच्छतीति विचार्य तमर्थं वानरैः सह चिन्तयामासेत्यर्थः–तमिति । तत्र अत्यन्ताभिनिवेशेन शीघ्रमागमनम् । आत्मा स्वयम् आत्मना पञ्चमसङ्ख्यापूरकमित्यर्थः । अनुचरशब्देनोपलक्षणमिति मन्त्रिणो गृह्यन्ते इति यावत् । अनेनादिशब्दसङ्ख्यापूरणं च विभीषणस्य प्रधानत्वमुक्तम् । रामविषयप्रेमसम्बन्धतश्च समागम । सुग्रीवः गगनस्थदर्शनार्थं शीघ्रं त्रिः उच्चैः दर्शनेन वानरीं कथयामासेन्द्रयमूर्धस्थैरिति । वानराधिपः सुग्रीवः दर्शने वानरसेनाया अपि स्वस्यैव रक्षकत्वेन सावधिपतिरिति । वानरैः सह इत्यत्र पराक्रान्ता इत्युक्तेभ्यो वानरेभ्योऽपि वर्यः विभीषणोऽतीव रामाज्ञापकत्वेन च । दुर्धर्षः शरणागतस्यापि पक्षपातकृत्यादिव्यापारकत्वेन अनभिभवनीयः स्थितः । बुद्धिमान्वैरं च चिन्तयामास । स्वयं समर्थत्वेऽपि वानरबलमुख्य चिन्तनं कार्यसौकर्यात् । चारो वा शत्रुवेति चिन्तयामास । आगमनमृत्युविकल्पादिना निर्दिष्टत्वनिश्चयेऽपि रामविजयमाकाङ्क्षतेन चिन्तनमिति बुद्धेः प्राधान्यम् ॥३॥

रा० टी०–चिन्तयित्वेति । मुहूर्तं चिन्तयित्वा हनुमत्प्रमुखान् वानरान् इत्युवाच ॥ ६ ॥

गो० टी०–विभीषणं सपरिवारं मन्त्रिबलमेवं पुनः इति अस्मिन् मनसा निश्चित्य सचिवादीन् प्रति निर्णीतमाह–चिन्तयित्वेति । चिन्तायाः निर्णयान्तत्वादत्र चिन्तयित्वेति निर्णयवाची । अत्र चारो नापि दूतः अपि तु शत्रुरेवेति विशिष्य ॥ ४ ॥

रा० टी०–उक्तमेवार्थम्–एष इति । एष राक्षसः अस्मान् हन्तुमभ्येति ॥ ७ ॥

गो० टी०–स्वचिन्तितमेवाह–एष इति । एषः वायवकाल्पकौशेयश्च सर्वायुधोपेतः मनःस्थितक्रौर्यांशकुटुम्बकैः परिवारितपूर्णः अनुकूलस्य प्रतिकूलतानिश्चयवत् रामविषयप्रेमान्धतया एकायुधस्य बहुत्वनिश्चयः । एकायुधग्रहणञ्च दर्शनेन तदायुधसङ्ख्येऽपि नैपुण्यं ज्ञायत इति वा तथोक्तम् । रामभीतेऽपि ब्रह्मास्त्रसदृशशरणागतिरेतस्य हस्ते वियत इति वा । उक्तपात्र गदापाणिरित्यत्र सर्वायुधोपलक्षणमित्यत्र राक्षसः सर्वजातिरिति वत् क्रौर्यातिशयोक्तिः । अनुचरा च

---

[1] ते ' इत्यत्र स्थाने ये इति गो. पाठः । २ अभ्येति स. पाठः ।

सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः । शालानुद्यम्य शैलांश्च इदं वचनमब्रुवन् ॥ ८ ॥
शीघ्रं व्यादिश नो राजन्वधायैषां दुरात्मनाम् । निपतन्ति हता यावद्धरण्यामल्पचेतनाः ॥ ९ ॥
तेषां संभाषमाणानामन्योन्यं स विभीषणः । उत्तरं तीरमासाद्य स्वस्थ एव व्यतिष्ठत ॥ १० ॥
सं उवाच महाप्राज्ञः स्वरेण महता महान् । सुग्रीवं तांश्च संप्रेक्ष्य स्वस्थ एव विभीषणः ॥ ११ ॥
रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः । तस्याहमनुजो भ्राता विभीषण इति श्रुतः ॥ १२ ॥

भस्मात् हन्तुम् । अस्माञ्च कस्यचिद्धनने हि शेषं नीविष्यति मूलभूतरामहनने सर्वोच्छेनाश इति बहुवचनार्थः ॥ ७ ॥

८] ति० टी०–शालाद्रिशालवृक्षान् ॥ ८ ॥

रा० टी०–सुग्रीवस्येति । सर्वे वानरोत्तमाः शालान् शैलांश्चोद्यम्य इदमब्रुवन् ॥ ८ ॥

गो० टी०–वानराश्च सुग्रीववाक्यानुसारेणोद्योगं चक्रुरित्याह–सुग्रीवस्येत्यादिश्लोकद्वयेन । अल्पतेजस इति । अस्मद्भ्रातुरस्य राजकवलप्राया इत्यर्थः ॥ ६ ॥ ७ ॥

९] ति० टी०–यावद्वना निपतन्ति । निपतिष्यन्तीत्यर्थः ॥ ९ ॥

रा० टी०–तदाकारमाह–शीघ्रमिति । यावद्यस्मात् हताः सन्तः धरण्यां निपतन्ति निपतन्तु तस्माद्धेतोः एषां राक्षसानां वधाय नोऽस्मान् व्यादिश आज्ञापय ॥ ९ ॥

१०] ति० टी०–तेषामित्यनादरे षष्ठी । तानन्योन्यं संभाषमाणानवादृत्य रामस्य भगवतः परमदयालुत्वभावनया तेषामनादरः । स्वस्थ एव व्यतिष्ठतेति तिष्ठतेर्द्विप्रयोगो निर्भयत्वेनास्वस्थानसूचनाय ॥ १० ॥

रा० टी०–तेषामिति । तेषाम् अन्योन्यं संभाषमाणानां सतामुत्तरं तीरमासाद्य स्वस्थः स्वेन धृतिमत् ॥ १० ॥

गो० टी०–तेषामिति । अनादरे चेयं षष्ठी । वदन्तु नामैते वानरा यत् किंचित् । सर्वज्ञः परमकारुणिकः सर्वलोकशरण्यो रामो मामवश्यं रक्षिष्यत्येवेति महाविश्वासेन तेषामन्योन्यभाषणमनादृत्य प्रहरणोद्यतानामपि तेषामाभिमुख्येनागमनाम् । आगत्यापि निर्विशङ्कः सन् सर्वेषामात्मानं प्रकाशयन्नाकाशे एव स्थितवानित्यर्थः । अत्र स्वस्थो व्यतिष्ठतेति द्विप्रयोगो निर्भयत्वेन निष्कम्पावस्थानसूचनार्थः ॥ १० ॥

११] ति० टी०–महाप्राज्ञः । सर्वदोषाकररावणत्यागात्रिदुष्टसर्वगुणाकररामाश्रयणाच्च महाप्राज्ञत्वम् । अतएव महान्महता स्वरेण सर्वलोकशरण्यस्यातीवरक्षणाय स्वरमहत्त्वम् । वीरगम्भीरत्वं वा स्वरे महत्त्वम् तेन निर्भयत्वप्रकाशः॥११॥

रा० टी०–स इति । स विभीषणः सुग्रीवं तान् वानरांश्च संप्रेक्ष्य महता स्वरेण उवाच ॥ ११ ॥

गो० टी०–अथ पुरुषकारलेशमनपेक्ष्य सर्वानपि प्रतिबन्धिनो निवार्य मां रक्षिष्यतीति महाविश्वासशाल्यपि विभीषणः सहसा रामं शरणं नोपजगाम किंतु दूरत एव स्थितः। प्रातिकूल्यप्रवृत्तानेव सुग्रीवादीन् पुरुषकारभूतान् कृत्वोवाचेत्याह—**उवाच चेति** । उवाच च चकारेण स्वीकार स्वागमनमेव पर्याप्तं वचनमप्युक्तवान् । पद्भ्यामभिगमात्त्यागमनमपि धारयेति मन्यमानस्य तदुपरि वाक्यं श्रुते श्रवत् । महाप्राज्ञ इत्यनेनान्तरङ्गपुरुषकारेणैव कृपाद्रुरपि राजा शरण्यमुपगन्तव्य इति परिज्ञानं वानराणां मत्प्रतिकूलसंरम्भोपि न मद्दोषकृतः किंतु रामभक्तिप्रकर्षकारितः अतो गुण एवायमिति जानन्यदि रामपरिचारका एते नाङ्गीकुर्युः किं रामाङ्गीकारेण अतो रामाङ्गीकारादप्येतदन्तर्भाव एव मम पुरुषार्थ इति ज्ञानं च विवक्षितम् । स्वरेण महतेति । पुरुषकारभूतानां सर्वेषां सर्वलोकशरण्यस्य च स्वार्तरवश्रवणाय महास्वरप्रयोगः रामविषये चैवंविधार्तरवोच्चारणं भाग्याधिक्यस्यैवेति विवक्षया महानित्युक्तिः । यथोक्तं लक्ष्मीतन्त्रे–आकिंचन्यैकशरणाः केचिद्भाग्याधिकाः पुनः । मामेव शरणं प्राप्य मामेवान्ते समश्नुत इति ॥ ९ ॥

१२] ति० टी०–रावणो नामेत्यादिना तत्त्व रामानुकूल्यतत्प्रातिकूल्यरहितत्वादिना शरणागत्यङ्गत्वोपनम् । 'आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥ इत्युक्तैः रावणत्वेन सर्वलोकपीडकत्वम्, दुर्वृत्तत्वेनाकृत्यकर्तृत्वम्, राक्षसत्वेन जातिक्रौर्यम्, राक्षसेश्वर इत्यनेन भृत्यक्रौयम्,तद्भ्रातृत्वेन स्वस्यापि दोषवत्त्वकथनाद्गर्वहानिरूपकार्पण्यमुक्तम् ॥ १२ ॥

रा० टी०–तत्स्वरूपमाह–रावण इत्यादिभिः । रावणो नाम यो राक्षसेश्वरः तस्य भ्राता विभीषण इति श्रुतोऽहमस्मि ॥ १२ ॥

गो० टी०–अत्र प्रथमं स्वदोषान् पुरस्करोति—रावण इति । रावणं लोकरावणमिति न्यायेन रावयतीति व्युत्पत्तिसंभवान्नामैव क्रूरमित्यर्थः । न केवलं नामैव क्रूरं व्यापारोऽपि नृशंस इत्याह—दुर्वृत्त इति । जातिरपि तथाविधेत्याह—राक्षस इति । न केवलं स्वयमेव क्रूरः क्रूरानेकपरिकरसमवेतश्चेत्याह—राक्षसेश्वर इति । रावणस्यैवंविधत्वे तव किमायातमित्यत्राह—**तस्याहमिति** । यद्यहमप्युग्रः स्यां तर्हि तदाज्ञानुवर्तित्वेन धनदकुबेरादिवत् त्रिदशेश्वरः । अनुजत्वेन तन्मनीषिताः सर्वे दोषास्तदङ्गत्वेन मया कृता इति भावः ॥ १२ ॥

---

१ निपतन्तीति गो. पाठः । २ वैरे इति गो. पाठः । ३ क्रौर्य इति गो. पाठः । ४ रूप [illegible] । ५ रावण इति गो. पाठः ।

तेन सीता जनस्थानाद्धृता हत्वा जटायुषम् । रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता ॥ १३ ॥
तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम् । साधु निर्यात्यतां सीता रामायेति पुनः पुनः ॥ १४ ॥
स तच्च न प्रतिजग्राह रावणः कालचोदितः । उच्यमानं हितं वाक्यं विपरीतं इवौषधम् ॥ १५ ॥
सोऽहं परुषितस्तेन दासवच्चावमानितः । त्यक्त्वा पुत्रांश्च दाराश्च राघवं शरणं गतः ॥ १६ ॥
निवेदयत मां क्षिप्रं राघवाय महात्मने । सर्वलोकशरण्याय विभीषणमुपस्थितम् ॥ १७ ॥

१३] ति० टी०–दुर्लङ्घ्यत्वमेवाह—तेनेति । राक्षसीभिः सुरक्षितेत्यनेन सीतापाप्तित्वत्याहानिः सूचिता । अन्यथा हि तासां रक्षणानुपयोग इति भावः ॥ १३ ॥

रा० टी०–स्वागमने हेतुं वदितुमाह–तेनेति । तेन रावणेन हृता राक्षसीभिः सुरक्षिता सीताऽस्तीति शेषः ॥ १३ ॥

गो० टी०–राघवस्य तु प्रियापहारनिरोधादिभिः समाश्रितहननाद्य विशेषणैस्तेनापकृतमित्याह—तेनेति । स्पष्टम् । तथा न कृतम् । स्वस्य सपरिवारस्य विनाशार्थमेव कृतवान् रुद्धा च । प्रमादाद्धरणेऽपि पश्चात्तापेन पुनर्न त्यक्ता किंतूच्छ्वासनिःश्वाससंचारस्थले रुद्धा । विवशा न्यस्तपाणिपादाद्यचलनेन रामविश्लेषदुःखेन आश्वासकान्तराभावेन च स्वबलहानिं प्रकाशयन्ती स्थिता । रावणभोगपरंपरया दृष्टामेतादृशावस्थां विशिष्टां कृतवान् राक्षसीभिः सुरक्षिता । विकृतभयंकरवेषवचोभिरेकाक्ष्येककर्णीप्रभृतिभिः आश्वासकनवव्याकरणपण्डितस्यापि यथा न प्रवेशस्तथा रक्षिता ॥ १३ ॥

१४] ति० टी०–हेतुभिर्हेतुमद्भिः निर्यात्यतां दीयतामिति हेतुमद्भिर्वाक्यैः पुनः पुनः साधु न्याय्यमदर्शयमित्यन्वयः । अनेन यदानुकूल्यसंकल्पः प्रातिकूल्याभावश्च दर्शितः ॥ १४ ॥

रा० टी०–तमिति । सीता रामाय निर्यात्यतां दीयतामिति वाक्यैः न्यदर्शयम् अबोधयम् ॥ १४ ॥

गो० टी०–अस्त्वेवं ततः किमित्यत्राह—तमिति । हेतुभिर्वाक्यैः हेतुप्रतिपादकैर्वाक्यैः । न्यदर्शयम् अबोधयम् । बोधितमेवार्थमाह–साध्वियादि । निर्यात्यतां प्रत्यर्प्यताम् ॥१४॥

१५] ति० टी०–विपरीतो मुमूर्षुः ॥ १५ ॥

रा० टी०–स इति । उच्यमानं मयाऽ कथ्यमानं हितं वाक्यं विपरीतः मुमूर्षुरौषधमिव रावणो न प्रतिजग्राह ॥ १५ ॥

गो० टी०–स चेति । विपरीतः मुमूर्षुः ॥ १३ ॥

१६] ति० टी०–दासवदवमानितः । भ्रातापि सन्निति शेषः । शरणं गत इत्यनेनात्मनिक्षेपरूपमङ्गं दर्शितम् ॥ १६ ॥

रा० टी०–स इति । स हितोपदेष्टाऽहं तेन रावणेन परुषितः परुषवचनैः अवमानितश्च अतः पुत्रादीन् त्यक्त्वा पुरुषं रक्षकं राघवं गतः प्राप्तोऽस्मि ॥ १६ ॥

गो० टी०–परमोदारस्य निर्हेतुककरुणाकृतेन रावणावमानेन [illegible] तथा पुत्रपुरुषार्थभूतदारासम्पाद्यर्थं रामभेव शरणमुपगतोऽस्मीत्याह–सोऽहमिति । अत्र पुत्रान् दारानिति, परित्यक्ता मया लङ्का मित्राणि च धनानीति चेति वक्ष्यमाणानां लङ्कादारादीनामुपलक्षणम् । अत्र कलान्तराविदितादाक्षसानां कथं साधुमित्यादिवचनस्य स्वेनैव वक्ष्यमाणत्वात् रामपरिचरणस्यैव फलत्वपरत्वे, युक्तः ॥ १६ ॥

१७] ति० टी०–सर्वलोकशरण्याय । 'मम वंशानुरूपं धर्ममात्मा च भक्तिष्यति' इति ह्यस्मै ब्रह्मपुत्रेण विश्रवसा वरदानात्साधिकत्वेन ब्रह्मतत्त्वेन च, विभीषणस्य सर्वलोकदृष्टः सर्वलोकान्तर्यामिणश्चायमाकार इति ज्ञानात्सर्वलोकशरण्यत्वमहात्म्यज्ञानं रामविषये बोध्यम् । राघवाय किं भविष्यामीति दीक्षाकृतव्रतलक्ष्यमिदं कृतं गतः' इत्यादिवचनैः प्रसिद्धौदार्य रघुवंशजन्मनाय अनेनाधिप्रार्थितवैफल्यामावो ध्वनितः । क्षिप्रमित्यनेन शीतलछत्रमालिकं प्राप्य तृषितस्येव विलम्बासहत्वम् । तदपि मां शरणत्वेन प्राप्तं निवेदयत शरणागत इति ज्ञापयत । अनेन गोप्तृत्ववरणं रक्षिष्यत्यवश्यमेवेति विश्वासश्च दर्शितः ॥ १७ ॥

रा० टी०–निवेदयतेति । सर्वलोकशरण्याय निखिलजगद्रक्षणाय [illegible] प्राप्तं विभीषणं मां निवेदयत पूर्वं ब्रूयात ॥ १७ ॥

गो० टी०–सर्वं शरण्यस्य विशेष्यत्वमर्थसिद्धत्वात् तद्विज्ञापनाय पुरुषकारकृत्यानि प्रार्थयते—सर्वलोकशरण्यायेति । शरणं रक्षणं साधुः शरण्यः "तत्र साधुः" इति यत्प्रत्ययः । शरणं भवितुमर्हः शरण्य इति निरुक्तिः अनालोचितकुलविशेषादिशिक्षाशक्तेरशरण्यायोगेनाऽ अत. संचितविविधापराधस्य रावणस्यापि मादृशमात्रार्थमपि किमुत तत्संबन्धिनः परंतु कथ्यमानादेव सुग्रीवेण लब्धत्वात् मम त्वामिमुख्येनामतस्य दुरपनोदेऽलाभ इति भावः । अत्र शरण्याङ्गभूतं सुलभत्वपरत्वरूपं गुणद्वयं प्रार्थनाद्वयेन दर्शयति—राघवाय महात्मन इति । सुलभत्वेऽप्यधिकानां लोकानां प्रकर्षेऽप्यसुलभानां मेरुप्रभृतीनां चानुपादेयत्वादुभयमप्यपेक्षितम् । यत्तनिर्वेदयमित्यादिदानगोचरस्य परब्रह्मणः सकलमनुजतिर्यक्कुयवसाधारणाकारत्वमनुजावतारात् क्वेयमन्या सौलभ्यकाष्ठेति भावः । महात्मने एवमवतारेऽप्यजहत्स्वभावतया निखिलहेयप्रत्यनीकतया ज्ञानशक्त्याद्यनन्तकल्याणगुणैकतानाय निवेदयत अत्र प्रत्यक्षस्य स्वामिनश्च निवेदने प्रयोजनाभावात् स्वापराधपरिपूर्ति

तत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः । लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत् ॥ १८ ॥
विष्टः शत्रुसैन्यं हि प्राप्तः शत्रुरतर्कितः । निहन्यादन्तरं लब्ध्वा उलूको वायसानिव ॥ १९ ॥
न्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि । वानराणां च भद्रं ते परेषां च परंतप ॥ २० ॥
अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः । शूराश्च निकृतिज्ञाश्च तेषां जातु न विश्वसेत् ॥ २१ ॥
प्रणिधी राक्षसेन्द्रस्य रावणस्य भवेदयम् । अनुप्रविश्य सोऽस्मासु भेदं कुर्यान्न संशयः ॥ २२ ॥
अथ वा स्वयमेवैष छिद्रमासाद्य बुद्धिमान् । अनुप्रविश्य विश्वस्ते कदाचित्प्रहरेदपि ॥ २३ ॥

सुव्रफलभोगविरागः शरणागतिलक्षणतिरश्चोपायपरिग्रहः सर्वकृत्योभिलाषः तत्परिचारकान्तभावश्चेत्येतेऽर्था विज्ञापया इत्यर्थः । क्षिप्रमित्यनेन यावच्छरण्यः स्वयमेव परियहीतीति ततः पूर्वमेव विज्ञापनेन गृह्णामिः सदृत्कार्यमाचरणीमिति भावः। विभीषणम्। रावणवन्नाहं प्रतिकूलः किंतु विभीषणस्तु धर्मात्मेत्यनुकूल एव । उपस्थितम् । अतिहीनस्याप्युपगमनमेव हि रामाङ्गीकारे बीजमिति भावः ॥ १५ ॥

१८] ति० टी०–एतद्विभीषणोक्तम् । अथ लोकदृशानुपज्ञो न विश्वसनीय इति मत्वा राममपि तथैव बोधयतीत्याह—लक्ष्मणस्येति । संरब्धं संरम्भोपेतमिति क्रियाविशेषणम् ॥ १८ ॥

रा० टी०–एतदिति । सुग्रीवः एतत् विभीषणेनोक्तं वचनं संरब्धं कोपोपेतं यथा भवति तथा लक्ष्मणस्याग्रतोऽग्रे राममब्रवीत् ॥ १८ ॥

गो० टी०–अथ सुग्रीवो रामप्रेमातिशयजनिताद्भयामोहात् अतिस्नेहः पापशङ्कीति न्यायेन तस्य सर्वशक्तित्वमपि विस्मृत्य शरणागतत्वलो रामः शरणागतिशब्दश्रवणमात्रेण गृहकृत्यमेव परिगृह्णीयात् ततः क्रूरदृष्टेरस्य राम किमिव पापमाचरेदित्यस्थानभयशङ्काव्याकुलितः शीघ्रं रामसमीपं गत्वा स्वमानहृदयं लक्ष्मणमपि सहायीकृत्य विभीषणं नियोक्तुं स्वं विज्ञापयामासेत्याह—एतदिति । तुशब्देन पूर्वोक्तविशेष उच्यते । लघुविक्रमः शीघ्रगमनः । संरब्धं प्रेमभरात् त्वरितोदिताक्षरम् ॥ १६ ॥ १७ ॥

१९] ति० टी०–इदंपदार्थमाह—प्रविष्ट इति । कश्चिदस्मच्छत्रुः राक्षसत्वात्पूर्वं शत्रो रावणस्य सैन्यं प्रविष्ट इदानीमतर्कितागमन एव सत्यस्मत्सैन्यं प्राप्तः सोऽसावन्तरं लब्ध्वोलूको वायसानिव नो हन्यात् ॥ १९ ॥

रा० टी०–तदाशङ्क्याह–प्रविष्ट इत्यादिभिः । शत्रुसैन्यं प्रविष्टः पूर्वं शत्रुसैन्ये संस्थितः अत एव शत्रुः इदानीमतर्कितः अज्ञात एव प्राप्तः अस्मत्सैन्यसमागतः अतः अन्तरमवकाशं लब्ध्वा उलूको वायसानिव निहन्यात् ॥ १९ ॥

२०] ति० टी०–यदेवमतः—मन्त्र इति । वानराणां च परेषां च रक्षोनिग्रहार्थं त्वं मन्त्रे कार्याकार्यविचारे, व्यूहे सेनास्कन्दनिवेशे, नये सेनालयने । यद्वा विचार्य निश्चितानामुपायानां तत्तद्विषयप्रयोगे चारे पक्वबलहृत्तान्तज्ञावफलके चारपुरुषप्रवर्तने युक्तः सावधानो भवितुमर्हसि एवं सति ते भद्रमित्यर्थः ॥ २० ॥

रा० टी०–नन्विदानीं किं कर्तव्यमित्यत आह–मन्त्र इति । मन्त्रे कर्तव्याकर्तव्यविचारे व्यूहे यथोचितसेनासंस्थापने नये सेनाचालने च चारे वृत्तान्तलाभार्थं चारनियोगे च युक्तः सावधानो भवितुमर्हसि अत एव परेषां राक्षसरिपुत्वे प्राप्तानां वानराणां ते च भद्रम् ॥ २० ॥

गो० टी०–मन्त्र इति । मन्त्रः कार्याकार्यविचारः । व्यूहः सेनास्कन्दनिवेशः नयः विचार्य निश्चितानामुपायानां स्वस्वविषये पर्यालोचनं चारः गूढप्रेषणम् वानराणां परेषां राक्षसानां च मन्त्रादिषु विषये युक्तः अर्हसि भवितुमर्हसि वानराणां मन्त्रादीन् प्रयोजय शत्रूणां मन्त्रादीन्तु सम्यक् जानीहि एवं सति तव भद्रं भविष्यतीत्यर्थः ॥ २० ॥

२१] ति० टी०–उक्तमेवेतदित्याह—अन्तर्धानेति । अन्तर्धानगता अदृश्यसंचारस्वभावाः निकृतिज्ञाः कपटोपायेषु गूढविप्रियकरणाभिज्ञाः ॥ २१ ॥

रा०टी०–नन्वेवं स्वरक्षार्थमागतेनापि दास्यसे भीतिरित्याह–अन्तर्धानेति । अन्तर्धानेन अदृश्यत्वेन गतं गमनं येषां निकृतिज्ञाः गूढाभिप्रायवेदितारः ये एते राक्षसाः तेषां ज कदाचिदपि न विश्वसेत् ॥ २१ ॥

गो० टी०–अस्त्वेवं ततः किमित्याशङ्क्य प्रकृतं विपयति–अन्तर्धानेति । अन्तर्धानगताः अदृश्यचारिणः निकृतिज्ञाः कपटोपायवेदिनः ॥ १९ ॥

२२] ति० टी०–किं च योऽयमागतः स रावणप्रणिधिश्चार एव भवेत् । अस्तु किं ततस्तत्राह—अन्निर्भेदमङ्गादिविषये ॥ २२ ॥

रा० टी०–प्रणिधिरिति । अयं राक्षसेन्द्रस्य प्रणिधिश्चारो भवेत् अत एव स प्रणिधिः अस्मासु अनुप्रविश्य भेदरूपोपायं कुर्यात् ॥ २२ ॥

गो० टी०–विश्वासे वा किमयं करिष्यतीत्याशङ्क्य दण्डं वा करिष्यतीत्याह–प्रणिधिरिति । प्रणिधिः च यथार्हवर्णः प्रणिधिरुपसर्पश्चरः स्पशः । चारश्च गूढपुरुषमरः । भेदं मित्रभेदम् ॥ २० ॥

२३] ति० टी०–विश्वस्ते प्राप्तविश्वासे । अस्मद्भेदोपः ॥ २३ ॥

* तीर्थस्थे २८ श्लोके गो. पाठे । २ लेखित गो. पाठे ।

मित्राटविबलं चैव मौलैर्भृत्यबलं तथा । सर्वमेतद्बलं ग्राह्यं वर्जयित्वा द्विषद्बलम् ॥ २४ ॥
प्रकृत्या राक्षसो ह्येष भ्रातामित्रस्य वै प्रभो । आगतश्च रिपुः साक्षात्कथमस्मिन्न विश्वसेत् ॥ २५ ॥
रावणस्यानुजो भ्राता विभीषण इति श्रुतः । स्तुतिभिः राघ रक्षोभिर्भवन्तं शरणं गतः ॥ २६ ॥
रावणेन प्रणीतं हि तमवेहि विभीषणम् । तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ २७ ॥
राक्षसो जिह्मया बुद्ध्या संदिष्टोऽभिगतः प्रभो । प्रहर्तुं मायया लब्धो विश्वस्ते त्वयि चानघ ॥ २८ ॥
[प्रेषितः शत्रुसैन्यं हि प्राज्ञः शत्रुरतर्कितः । विस्रब्धान्तरं लब्ध्वा हन्ति वायसवत् ॥]
वध्यतामेष तीव्रेण दण्डेन सचिवैः सह । रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ २९ ॥

रा० टी०—स्वतर्कितान्तरमाह—अथवेति । अथवा एषः स्वयं रावण एव अतः एव अनुप्रविश्य विश्वस्ते प्रमत्तेऽस्मदादौ कदाचित्प्रहरेत् ॥ २३ ॥

गो० टी०—अथवेति । अपिः संभावनायाम् ॥ २३ ॥

२४] रि० टी०—नन्वेवमनाप्तागमेनास्मासु समरिते कथमेष भविष्यतीत्याशङ्क्य नेत्याह—मित्रेति । मित्राटविकैर्नरैः कैन प्रेषितं बलं मित्राटविबलम् मौलमाप्तबन्धुप्रहितं बलम् 'मूलं बलीकृतो स्वीये' इति कोशः । भृत्यबलं तत्कालभृतिदान-संपादितबलम् गौल्भृत्यबलमिति समाहारद्वन्द्वः द्विषत्प्रेषितं बलं द्विषद्बलम् ॥ २४ ॥

रा० टी०—नन्वेतद्विरोधित्वेनायमस्मत्सदाय एव स्थितीत्यत आह—मित्रेति । मित्राटविबलं मित्राणाम् अटवीनाम् अटवीनिवासिनामुदासीनानामित्यर्थः, बलं मौलं स्वाधीनभूतराजादिप्रेषितं भृत्यं तात्कालिकभृत्यदानेन संपादितम् द्वयोः समाहारद्वन्द्वः तदेव बलमिति कर्मधारयः एतत्सर्वं बलं ग्राह्यं द्विषद्बलं वर्जयित्वा शत्रुबलं न ग्राह्यमित्यर्थः 'मूलं बलीकृते स्वीये' इति कोशः ॥ २४ ॥

गो० टी०—शत्रुसकाशादागतस्याप्य परिग्रहे प्रकोपलक्षणमाकार्षीत् स्यादित्याशङ्क्य द्विषद्बलव्यतिरिक्तमेव बलं ग्राह्यमित्याह—मित्रेति । मित्रबलं मित्रसंबन्धिबलम् अटवीबलम् आटविकजनबलं बलम् मौलं परंपरागतं सैन्यम् । भृत्यबलं तात्कालिकभृतिप्रदानोपजीवि बलम् ॥ २४ ॥

२५] ति० टी०—अस्य द्विषद्बलत्वमेव दर्शयति—प्रकृत्येति । अमित्रस्य रावणस्य ॥ २५ ॥

रा० टी०—प्रकृत्येति । आगतो ह्येषः प्रकृत्या जात्या राक्षसः अमित्रस्य रिपोर्भ्राता अत एव रिपुः अतः अस्मिन् कथं विश्वसेत् विश्वासो न युक्त इत्यर्थः ॥ २५ ॥

गो० टी०—न केवलं द्विषद्बलत्वमात्रम् अन्येऽप्यपरिग्राह्यतायाहेतवः सन्तीत्याह—प्रकृत्येति । प्रकृत्या जात्येत्यर्थः ॥ २३ ॥

२६] ति० टी०—अमित्रभ्रातृत्वं तद्वचनादेव निश्चितमित्याह—रावणस्येति । इति तन्मुखादेव श्रुतमित्यर्थः ॥ २६ ॥

रा० टी०—नन्वेवं रावणभ्राताऽयमिति त्वया कथं ज्ञातमित्यत आह—रावणस्येति । विभीषणः अयं त्वयं भवद्भिः अस्मत्पक्षः इति वेत्तीत्यतः शेषः ॥ २६ ॥

गो० टी०—नन्वेवमनाप्तागमेनास्मासु समरिते कथमेष भविष्यतीत्याशङ्क्य नेत्याह—मित्रेति । मित्राटविकैर्नरैः कैन प्रेषितं बलं मित्राटविबलम् मौलमाप्तबन्धुप्रहितं बलम् 'मूलं बलीकृतो स्वीये' इति कोशः । भृत्यबलं तत्कालभृतिदान-संपादितबलम् गौल्भृत्यबलमिति समाहारद्वन्द्वः द्विषत्प्रेषितं बलं द्विषद्बलम् ॥ २४ ॥

२७] ति० टी०—इत्थमेतेन यथा न प्रतारणमित्याह—रावणेनेति । प्रणीतं प्रेषितमवेहि । अस्मत्पक्षे निग्रहं क्षमं मन्ये । क्षमवतां शूरक्षमावतां मध्ये वर ॥ २७ ॥

रा० टी०—रावणेनेति । तमवेहि विभीषणं रावणेन प्रहर्तुं प्रेषितम् इति शेषः तत्र विभीषणस्य क्षमं योग्यं निग्रहं हतौ मन्ये ॥ २७ ॥

२८] ति० टी०—नापि तद्दूतो रावणेन संदिष्टः सन्निहागतः ॥ २८ ॥

रा० टी०—राक्षस इति । जिह्मया कुटिलया संदिष्टः मायया लब्धः अयं रक्षसः विश्वस्ते त्वयि वर्तमानात् ॥ २८ ॥

गो० टी०—प्रणिधिप्रेषणेन नो हि करुष्यतीत्यत्राह—राक्षस इति । संदिष्टः रावणेनेति शेषः । प्रहर्तुं संदिष्ट इति संबन्धः ॥ २८ ॥

गो० टी०—यदा ह्यहं तदानीं कथमवगच्छेयं तत्राह—प्रविष्ट इति । प्राज्ञ इति हेतुगर्भं विशेषणम् । प्राज्ञत्वादनुचितविश्वासस्यापायमागम इति विचारितः अत एव शत्रोः मित्रे प्रविष्टः सन् सदादीनां अन्तरं छिद्रं लब्ध्वा हन्यादिति शत्रुः प्रविष्टः शत्रुरित्युक्तम् । प्रविष्टः शत्रुरतर्कितः कथं वत्स इत्युक्त्या तत्र दृष्टान्तमुपन्यस्यति—विस्रब्धेति । वायसवत् इति दृष्टान्तमूलेन प्रकटयति—उरग इति ॥ २८ ॥

२९] ति० टी०—अत एव वध्यताम् ॥ २९ ॥

रा० टी०—वध्यतामिति । यतः एष रावणस्य भ्राता अत एव सचिवैः दण्डेन वध्यताम् ॥ २९ ॥

गो० टी०—तर्हि किं कर्तव्यं तत्राह—वध्यतामिति ।

१ अवलेत्यमिति गो.पा. । २ मांक्षमिति गो. ग.पा. । ३ राक्षसेन्द्रस्येति गो.पा.। ४ ते इति गो.पा. । ५ रिपोरिति गो.क. । ६ कोऽयं वत्स इत्युक्त्वा तत्र दृष्टान्तमुपन्यस्यति गो.पा.। ७ प्रविष्टमिति गो. ग.पा.। ८ क्षमवत इति गो.पा.। ९ सचवेति गो.पा.। १० ति० टी० क्वेऽयं वत्स इत्युक्त्वा तत्र दृष्टान्तमुपन्यस्यति गो.पा.।

एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः । वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ ३० ॥
सुग्रीवस्य तु तद्वाक्यं श्रुत्वा रामो महाबलः । समीपस्थानुवाचेदं हनुमत्प्रमुखान्कपीन् ॥ ३१ ॥
यदुक्तं कपिराजेन रावणावरजं प्रति । वाक्यं हेतुमदत्यर्थं भवद्भिरपि चैव श्रुतम् ॥ ३२ ॥
सुहृदोऽर्थकृच्छ्रेषु युक्तं बुद्धिमता सदा । समर्थेनोपसंदेष्टुं शाश्वतीं भूतिमिच्छता ॥ ३३ ॥
इत्येवं परिपृष्टास्ते स्वं स्वं मतमनिन्दिताः । सोपचारं तदा राममूचुः प्रियचिकीर्षवः ॥ ३४ ॥
अज्ञातं नास्ति ते किंचित्त्रिषु लोकेषु राघव । आत्मानं पूजयन्राम पृच्छस्यस्मान्सुहृत्तया ॥ ३५ ॥

वधतां केवलनिरसने कृते मारीचवदनर्थकारी स्यादिति भावः । तीक्ष्णेन दृष्टेन वालिवदेकेन बाणेन न हन्तव्यः । किंतु शिरसि वर्ति कृत्वा दीपाराधनं कार्यम् । वाचैः सह प्रथमं लेखां शिरसि लिखा विभीषणदत्ते दत्वा ततोऽयं वध्यताम् । तत्र हेतुमाह—रावणस्येत्यादि ॥ २७ ॥

३०] ति० टी०—वाक्यकुशलं राममित्यन्वयः ॥ ३० ॥

रा० टी०—एवमिति । संरब्धः ईषत्कोपान्वितः वाक्यज्ञः सुग्रीवः वाक्यकुशलं राममेवमुक्त्वा मौनमुपागमत् ॥ ३० ॥

गो० टी०—एवं सुग्रीवो विभीषणविषयवक्तव्यमुक्त्वा अतः परमनेन यत्किंचिदुक्तं चेदुत्तरं वक्ष्याम इति तूष्णीं स्थित इत्याह—तदित्यादिना ॥ २८ ॥

३१] ति० टी०—अथ रामः शरणागतं श्रुत्वानिर्णीतमपि दोषं स्वयं वाक्यभङ्ग्यायुक्तत्वमालोच्य विचारं प्रस्तावयति—सुग्रीवस्येति ॥ ३१ ॥

रा० टी०—सुग्रीवस्येति । रामः सुग्रीवस्य वाक्यं श्रुत्वा हनुमत्प्रमुखानुवाच ॥ ३१ ॥

गो० टी०—अथ शरणागतवत्सलो रामः सुग्रीवस्य संरम्भप्रतिक्षेपाय यत्किंचिद्व्याजमपेक्षमाणो विभीषणस्य विभीषणादिरूपेण किंचिद्विलम्बेऽपि भावं निवेदयतेति वदतस्तस्य सदन्तर्भावार्थां च सम्यगालोच्य प्रतिक्षेपकमुखेनैव तदाश्रयणं कर्तुकामो हनुमदादीनुवाचेत्याह—सुग्रीवस्येति । स्पष्टम् ॥ २९ ॥

३२] ति० टी०—सुग्रीवस्य स्वाभिप्रायस्वहितैषित्वं च मन्त्रिभ्य आह—यदुक्तमिति । मन्त्रे स्थः इत्यादिनेति शेषः अत्यर्थं हेतुमदुक्तं यत्किमत् ॥ ३२ ॥

रा० टी०—तदाकारमाह—यदिति । कपिराजेन रावणावरजं विभीषणं प्रति हेतुमत् सहेतुकं यद् वाक्यमुक्तं तत् भवद्भिरपि अत्यर्थमत्यन्तं श्रुतम् ॥ ३२ ॥

गो० टी०—रामः सुग्रीवस्यनोपालनपूर्वकमन्यानपि सचिवान् स्वं स्वं मतं पृच्छति—यदुक्तमित्यादिश्लोकद्वयेन । हेतुमत् युक्तियुक्तम् अत्यर्थम् अर्थः प्रयोजनं तस्मादनपेतम् ॥ ३२ ॥

३३] ति० टी०—तस्य युक्तत्वमाह—सुहृदामिति । सुहृदां शाश्वतीं भूतिमिच्छता बुद्धिमता प्रशस्तबुद्धिना समर्थेन विचारसमर्थेन, सदार्थकृच्छ्रेषु कृत्याकृत्यसंशयेषु उपसंदेष्टुं सम्यगुपदेष्टुं युक्तम् उपदेशकरणमुचितमिति भावः ॥ ३३ ॥

रा० टी०—सुहृदामिति । सुहृदां शाश्वतीं भूतिमिच्छता बुद्धिमता प्रशस्तबुद्धिविशिष्टेन अत एव समर्थेन जनेन सुहृदामर्थकृच्छ्रेषु कर्तव्याकर्तव्यसंशयेषु सत्सु उपसंदेष्टुं युक्तम् अनेन विभीषणविषये यत्कर्तव्यं तदुक्तान्तोऽपि ब्रुवन्तीति सूचितम् ॥ ३३ ॥

गो० टी०—सुहृदेति । नर्मज्ञेन सुहृदोपदिष्टे सत्यन्यैस्तूष्णीं स्थातव्यम् अपि तु बुद्धिमता समर्थेन शाश्वतीं भूतिमिच्छता श्रेयस्कामेन सुहृदा सुहृत्स्वेष्वपि अर्थकृच्छ्रेषु कार्यसङ्कटेषु उपदेष्टुं युक्तमेव अतो यूयमपि वदतेत्यर्थः ॥ ३३ ॥

३४] ति० टी०—इत्येवमिति । मित्रैर्विभीषणे उपदेष्टव्यमेवेति यतः, अतो यूयमपि स्वस्वमतं ब्रूतेति पृष्टा इत्यः स्वं स्वं मतमुचुरित्यन्वयः ॥ ३४ ॥

रा० टी०—इतीति । इत्येवं परिपृष्टाः तेऽङ्गदप्रभृतयः स्वं स्वं मतमभिप्रेतं सोपचारं सत्कारपूर्वं यथा भवति तथा राममूचुः ॥ ३४ ॥

गो० टी०—इत्येवमिति । स्पष्टम् ॥ ३२ ॥

३५] ति० टी०—सोपचारमुचुरित्युक्तं तदोपचारं दर्शयति—अज्ञातमिति । आत्मानमस्माकमात्मानं आत्मतया सुहृद्भावप्रकाशनेन पूजयन्नित्यर्थः । यद्वा स्वं स्वकीयं शरीरोऽयं सुहृदित्याश्रयः कीर्तिं प्रथयन्नित्यर्थः ॥ ३५ ॥

रा० टी०—तदाकारमाह—अज्ञातमित्यादिभिः । यद्यपि त्रिषु ऊर्ध्वाधोमध्यवर्तिषु लोकेषु ते अतिरिक्तं किंचिन्नास्ति तथापि सुहृत्तया आत्मानं स्वशरीरभूतवानरमित्यर्थः पूजयन् अस्मान् पृच्छसि आत्मानमित्यत्र जात्यभिप्रायेणैकवचनम् किंच आत्मानं स्वं पूजयन् अयनतीव मर्यादापालको यदमन्त्रितं किंचित्र करोतीति प्रशंसयन् पृच्छसि ॥ ३५ ॥

गो० टी०—सोपचारप्रशंसावाक्यमेवाह—अज्ञातमिति । अत्र सर्वज्ञ इत्युक्ते प्रायिकत्वशङ्का स्यादिति तन्निरासार्थं व्यतिरेकोक्तिः । त्रिषु लोकेषु कृतकृत्यमकृतकं कृतकाकृतकमित्युक्तेषु । आत्मानं सुहृत्तया मन्यमानस्मान् पृच्छसीत्यन्वयः । अयं वानराणां सुहृदितीमां कीर्तिं लोके स्थापयितुं तवायं प्रश्न इत्यर्थः । पूजयन्निति पाठे तु अस्मान् प्रत्येक मानय[1]

१ यश इति गो. पाठः । २ इत्येवमिति गो. पाठः । ३ वदति गो. पाठः । ४ सुहृद इति गो. पाठः । ५ पूजयजानकीति गो. पाठः । ७ पूजयजानकीति गो. पाठः ।

त्वं हि सत्यव्रतः शूरो धार्मिकः दृढविक्रमः । परीक्ष्यकारी स्मृतिमान्विसृष्टात्मा सुहृत्सु च ॥ ३६ ॥
तस्मादेकैकशस्तावद्ब्रुवन्तु सचिवास्तव । हेतुतो मतिसंपन्नाः समर्थाश्च पुनःपुनः ॥ ३७ ॥
इत्युक्ते राघवेणाथ मतिमानङ्गदोऽग्रतः । विभीषणपरीक्षार्थमुवाच वचनं हरिः ॥ ३८ ॥
शत्रोः सकाशात्संप्राप्तः सर्वथा तर्क्य एव हि । विश्वासनीयः सहसा न कर्तव्यो विभीषणः ॥ ३९ ॥
छादयित्वात्मभावं हि चरन्ति शठबुद्धयः । हरन्ति च रन्ध्रेषु सोऽनर्थः सुमहान्भवेत् ॥ ४० ॥
अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत सः । गुणतः संशये कृत्ये दोषतस्तु विसर्जयेत् ॥ ४१ ॥

त्रस्मात् पूर्वोक्तसित्यर्थः । प्रत्येकं मानवाभिप्रायेण तत्तत्कार्येष्वेकवचनप्रयोगः । यद्वा । आत्मानम् आत्मशब्दात् । जानन् राजनीतिमिति यावत् । पूजयन् पालयेत् । यद्वा सुहृत्तया शोभनहृदयतया हेतुना आत्मानं स्वम् पूजयन् । कार्यविचारेषु अस्मदपेक्षया स्वयमेव शोभनहृदय इति स्वप्रभावमभिव्यञ्जयितुमिति भावः । अस्मन्मतानि पूर्वपक्षीकृत्य स्वमतमेव सिद्धान्तयितुमिति भावः ॥ ३३ ॥

३६] ति० टी०—सुहृत्सु निस्कृष्टात्मा कृतविश्वासः सत्यव्रतो रक्षःस्वपि शरणागतरक्षणव्रतपालकः ॥ ३६ ॥

गो० टी०—त्वमिति । सत्यव्रतत्वादिविशिष्टः परीक्ष्यकारी संमतिपूर्वककार्यनिष्पादनशीलः अत एव सुहृत्सु निस्कृष्टः अधीनीकृत इत्यर्थः आत्मा त्वत्प्रयत्नो येन स त्वं यतोऽसि तस्मात् मतिसंपन्नाः सचिवाः सभ्यास्त्वदधिष्ठिताः एकैकशो हेतुतस्तावत्ते ब्रुवन्तु । श्लोकद्वयमेकान्वयि । रामसमीपवर्तित्वेति-पक्षायां तवेत्यस्य सचिवान्वयित्वेऽपि न क्षतिरिति दिक् ३५।३६

गो० टी०—स्वपूजनार्थमस्मान् पृच्छसीत्यत्र हेतुमाह—त्वमिति । सत्यव्रतः शरणागतरक्षणव्रतस्य सापराधस्यापि विभीषणस्य विकल्पीकर्तुमशक्यत्वात् परीक्ष्यकारी सर्वतः स्वपि सभ्यगवेतुभिर्विमृश्याचरणशीलः सुहृत्सु निस्कृष्टात्मा मद्भक्तत्वेनात्मीकृतात्मस्वरूपः पूर्वश्लोके सुहृत्स्वभावमुक्तम् अत्र तु सुहृत्परतन्त्रत्वमिति भेदः ॥ ३४ ॥

३७] ति० टी०—तव सचिवा हेतुतो हेतुपूर्वकं ब्रुवन्तु विधिः ॥ ३७ ॥

गो० टी०—तस्मादिति । तस्मात् भवत उक्तगुणत्वात् सचिवाः क्रमेण हेतुतः युक्तिभिः ब्रुवन्तु ॥ ३७ ॥

३८] ति० टी०—इत्युक्ते इति । हनुमदादिमन्त्रिभिरिति शेषः । विभीषणपरीक्षार्थं तत्परीक्षाफलकं वचनं राघवाद्राज्यो युवराजत्वादग्रत उवाच ॥ ३८ ॥

रा० टी०—इतीति । इत्युक्ते हनुमदादिभिः कपिभिः सति विभीषणपरीक्षैव अर्थः तात्पर्यं यस्य तद्वचनं हरिवानरोऽङ्गदः अग्रतः प्रथमम् उवाच ॥ ३८ ॥

गो० टी०—ज्ञग्रीवानन्तरमङ्गदस्य युवराजतया प्राधान्यात् प्रथममुक्तौ जगादेत्याह—इत्युक्त इति । विभीषणपरीक्षार्थं सद्भावपरीक्षार्थं तदुक्तमिति शेषः ॥ ३८ ॥

३९] ति० टी०—तर्क्य एव शङ्कनीय एव विश्वासनीयो विश्वासयोग्यपुरुषप्रयोगार्हः सहसा न कर्तव्यः अपि तु तर्क्य एवेत्यर्थः ॥ ३९ ॥

गो० टी०—तस्मात्—पक्षात्—शत्रोरिति । यतः शत्रोः सकाशात् समागतः अतः स एव तर्क्यः परीक्षणीय एव अतः सहसा परीक्षामन्तरेण विश्वासनीयो विश्वासयोग्यो न कर्तव्यः ॥ ३९ ॥

रा० टी०—शत्रोरिति । अयं शत्रुसकाशादागतोऽपि शत्रोः सकाशात् प्राप्तत्वात्तत्कुलो जेति शङ्कनीय एव अतः सहसा परीक्षामन्तरेण विश्वासयोग्यो न कर्तव्यः किंतु परीक्ष्य एवेत्यर्थः इति तीक्ष्णप्रवाहिणेः ॥ ३९ ॥

४०] ति० टी०—तत्र हेतुमाह—छादयित्वेति । भावमन्तरम् ॥ ४० ॥

रा० टी०—तत्र हेतुमाह—छादयित्वेति । शठबुद्धयः भावं स्वाभिप्रायं छादयित्वा अन्यथा रन्ध्रेषु छिद्रेषु प्राप्तेषु सत्सु प्रहरन्ति च अतः सः विभीषणविश्वासः सुमहान् अनर्थः अर्थविघातकः भवेत् ॥ ४० ॥

गो० टी०—विश्वासकरणे अनिष्टमाह—छादयित्वेति । शठबुद्धयः कपिबुद्धयः आत्मभावं स्वाभिप्रायम् छादयित्वा स्वाभिप्रायमकथयित्वादिरूपमपि स्वप्रदर्शयित्वेत्यर्थः चरन्ति यावद्रन्ध्रलाभं सैरसंचारं कुर्वन्ति रन्ध्रेषु अन्यथाभावेषु सत्सु प्रहरन्ति हिंसन्ति ॥ ४० ॥

४१] ति० टी०—तस्य तस्य गुणदोषपरीक्षणेनार्थानर्थौ हिताहितौ निश्चित्य तदनुरूपं व्यवसायमुद्योगं भजेतेति प्रक्रमः । कस्मिन्नपि कृत्ये कीदृशं व्यवसायं तत्राह—गुण इति । गुणदर्शनेत्यर्थः ॥ ४१ ॥

रा० टी०—अर्थेति । अर्थानर्थौ अर्थसंपादकार्थविघातकौ विनिश्चित्य कस्मिंश्चित्कर्मणि नियोगेन विधाय व्यवसायं ग्रहणग्रहणादिरूपं भजेत कुर्यात । तत्कार्यं विभज्याह—गुणतः गुणनिश्चयात् संशये कृत्ये दोषतः दोषनिश्चयात् विसर्जयेत् ॥ ४१ ॥

गो० टी०—व्यायोपादानोपयुक्तं परीक्षाप्रकारमाह—अर्थानर्थाविति । अर्थानर्थौ गुणदोषौ विनिश्चित्य कस्मिंश्चित्कर्मणि नियोगेन निश्चित्य व्यवसायं स्वामतसंपादिकाम्

ति० गो० भट्ट० । १ गोम्य इति गो० पाठः । २ कर्मणीति गो० भट्ट० ।

इ दोषो महांस्तस्मिंस्त्यज्यतामविशङ्कितम् । गुणान्वापि बहून्ज्ञात्वा संग्रहः क्रियतां नृप ॥ ४२ ॥
भस्त्वथ निश्चित्य सार्थं वचनमब्रवीत् । क्षिप्रमस्मिन्नरव्याघ्र चारः प्रतिविधीयताम् ॥ ४३ ॥
थाय हि चारेण यथावत्सूक्ष्मबुद्धिना । परीक्ष्य च ततः कार्यो यथान्यायं परिग्रहः ॥ ४४ ॥
म्ववांस्त्वथ संप्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः । वाक्यं विज्ञापयामास गुणवद्दोषवर्जितम् ॥ ४५ ॥
द्वैराच्च पापाच्च राक्षसेन्द्राद्विभीषणः । अदेशकाले संप्राप्तः सर्वथा शङ्क्यतामयम् ॥ ४६ ॥
ो मैन्दस्तु संप्रेक्ष्य नयापनयकोविदः । वाक्यं वचनसंपन्नो बभाषे हेतुमुत्तरम् ॥ ४७ ॥
नुजो नाम तस्यैष रावणस्य विभीषणः । पृच्छ्यतां मधुरेणायं शनैर्नरपतीश्वर ॥ ४८ ॥
वमस्य तु विज्ञाय तत्त्वतस्त्वं करिष्यसि । यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ ॥ ४९ ॥

प भजेत तत्र गुणतः गुणनिश्चयेन संग्रहम् अङ्गीकारं दोषतः दोषनिश्चयेन तु विसर्जयेत् ॥ ४१ ॥

४२] ति० टी०—तदेव विशृणोति—यदि दोष इति॥४२॥

रा० टी०—लोकवृत्तान्तं प्रकृते नियोजयति—यदीति । यत्र विभीषणे यदि महान् दोषस्तर्हि त्यज्यताम् । बहून् गुणान् ज्ञात्वा निश्चयवान् यदि तर्हि संग्रहः क्रियताम् ॥ ४२ ॥

गो० टी०—ननु सर्वात्मना गुणी दोषी वा दुर्लभः अतः संग्रहत्यागव्यवस्थितिरित्यत्राह—यदीति । तस्मिन् भीषणे महान् दोषो यदि स्यात् तदा असौ अविशङ्कितम् त्यज्यताम् । बहून् गुणान् ज्ञात्वा संग्रहः क्रियतां वा । स्वल्पवत्त्वेऽपि बहुगुणो ग्राह्यः स्वल्पगुणवत्त्वेऽपि बहुदोषस्त्याज्य इति भावः ॥ ४० ॥

४३] ति० टी०—सार्थं सोपपत्तिकम् । चारो दूतः । तिविधीयतां प्रेष्यताम् ॥ ४३ ॥

रा० टी०—शरभ इति । निश्चित्य विभीषणविषये स्थैर्यं कृत्वा सार्थं वचनं शरभोऽब्रवीत् । तदाकारमाह—अस्मिन् विभीषणस्यापि चारः प्रतिविधीयतां प्रेष्यताम् ॥४३॥

गो० टी०—विनियोगं विना गुणदोषपरिज्ञानं न संभवति ग्रहश्च विनियोगे च भन्त्रहानिः स्यादिति पूर्वस्मादैलक्षण्यपरः । साध्यं साध्यार्थकम् । अनेनाङ्गदपक्षस्यासाध्यार्थत्वं द्योतितम् । अस्मिन् विभीषणविषये । प्रतिविधीयतां प्रेष्यताम् ॥ ४१ ॥

४४-४५] ति० टी०—प्रणिधाय चारं प्रेषयित्वा सूक्ष्मबुद्धिना चारेण च यथान्यायं परीक्ष्य ततः संग्रहः कार्यः ४४॥४५

रा० टी०—तत्रयोजनमाह—प्रणिधायेति । प्रणिधाय चारं संप्रेष्य ततश्चारेण परीक्ष्य गुणदोषौ ज्ञात्वा यथान्यायं युक्तोचितं परिग्रहः संग्रहः कार्यः ॥ ४४ ॥

गो० टी०—प्रणिधायेति । प्रणिधाय चारं प्रेषयित्वा । सूक्ष्मबुद्धिना चारेण यथावदीतिशास्त्रोक्तरीत्या परीक्ष्य ततो यथान्यायं न्यायादनपेतं न्याय्यं निर्णीतार्थमतिक्रम्य । परिग्रहः विभीषणपरिग्रहः कार्यः ॥ ४२ ॥

रा० टी०—ज्ञात्वेति । शास्त्रबुद्ध्या संप्रेक्ष्य विचार्य गुणवद्वाक्यं ज्ञात्वान् विज्ञापयाम ॥ ४५ ॥

गो० टी०—नियोगेन चारेण वा सार्थं परीक्ष्यः अविश्रम्भहेतूनां बहूनां संभवादिति ज्ञात्वान् पक्षान्तरमुपक्षिपति—ज्ञात्वानिति । गुणवत् युक्तिमत् । दोषवर्जितम् अनपायमिति पूर्वोक्तसद्वयपदार्थात् ॥ ४३ ॥

४६] ति० टी०—अदेशकाले स्वामिसंदेशं विहाय त्रिदशं आगमनेनानुचितदेशप्राप्तत्वम् । स्वामिनः संकटकाले तत्सहायानौचित्यादनुचितकालप्राप्तः, अतः शङ्क्यताम् । सर्वथा शङ्काविषयत्वेन त्यागार्हं एवायमिति भावः ॥ ४६ ॥

रा० टी०—वद्धेति । वद्धवैरात् राक्षसेन्द्रात् अदेशकाले संप्राप्तोऽयं विभीषणः सर्वथा शङ्क्यताम् ॥ ४६ ॥

गो० टी०—वद्धेति । वद्धवैरात् दृढवैरात् पापात् पापकर्मणः अदेशे कृतया सांप्रतिकभयाभावेन आगमनप्रयोजनरहिते । अकाले स्वामिपरित्यागानर्हकाले ॥ ४६ ॥

४७] ति० टी०—हेतुमन्तरमतिशयेन हेतुमत् ॥ ४७ ॥

रा० टी०—तत इति । नयापनयकोविदः नीतिनीतिविचारे चतुरः वचनसंपन्नः प्रशस्तवचनवान् मैन्दः हेतुमत्तरम् अतियुक्तिविशिष्टं वाक्यं बभाषे ॥ ४७ ॥

गो० टी०—सर्वथा शङ्क्यत्वेऽपि सुकरोपायेन गुणदोषपरीक्षया अवश्यं सुखोदर्कतन्त्रिहानिः स्यादिति मैन्दो मतान्तरमाह—तत इति । हेतुमत्तरम् अतिशयेन हेतुयुक्तम् ॥ ४७ ॥

४८] ति० टी०—अनुजो नामेति । नामेति प्रसिद्धौ । अतोऽयं मधुरेण सौम्यभावेनैव पृच्छ्यताम् । यद्वृत्तमु रावणस्य वृत्तान्तमिति शेषः ॥ ४८ ॥

रा० टी०—तदाकारमाह—अनुज इति । रावणस्याद्य एष विभीषणः मधुरेण सान्त्ववचनेन पृच्छ्यताम् वृत्तान्तमि शेषः ॥ ४८ ॥

गो० टी०—वचनमिति । मधुरेण वचसा रावणवचनमयं विभीषणः शनैः पृच्छ्यतामिति संबन्धः । पृच्छतामित्यत्र अज्ञाततुरुषमुखेनेति शेषः । तथैव इत्तमतावादात् ॥ ४६ ॥

४९] ति० टी०—अस्य बुद्धिपूर्वकदुष्टत्वादुष्टत्वान्यतरत्तत्र निर्णीय ततस्त्वं तत्तदुचितकृत्यं करिष्यसि ॥ ४९ ॥

---

१ अनुजेति गो. पाठः । २ वचनमिति गो. पाठः । ३ नरेश्वरेति गो. पाठः । ४ तत्तत्त्वत्वमिति गो. पाठः ।

अथ संस्कारसंपन्नो हनूमान्सचिवोत्तमः । उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥ ५० ॥
न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम् । अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन् ॥ ५१ ॥
न वादान्नापि संघर्षान्नाधिक्यान्न च कामतः । वक्ष्यामि वचनं राजन्यथार्थं राम गौरवात् ॥ ५२ ॥
अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव । तत्र दोषं प्रवक्ष्यामि क्रिया नह्युपपद्यते ॥ ५३ ॥
ऋते नियोगात्सामर्थ्यमवबोद्धुं न शक्यते । सहसा विनियोगोऽपि दोषवानिति भाति मे ॥ ५४ ॥

टी०–भावमिति । अस्य भावमभिप्रायं दोषं च बुद्धिपूर्वं विज्ञाय तत्त्वतः यथोचितमित्यर्थः यदि रोष्यसि तदा न दोष इति शेषः ॥ ४९ ॥

गो० टी०–भावमिति । एवंविधपरीक्षणेनास्य तत्त्वतो भावं विज्ञाय यदि दुष्टः तदा तदनुरूपम् अदुष्टश्चेत्तदनुरूपं च बुद्धिपूर्वं परीक्षापूर्वकम् करिष्यसीत्यर्थः ॥ ४७ ॥

५०] ति० टी०–अथ हनूमान्सुग्रीवोक्तं वध्यत्वं राजनीचत्वादत्यन्ताविचारमूलकमित्युपेक्ष्य गुणादिपरीक्षया परिग्रहत्यागरूपमङ्गदादिवच्चोत्तरवादपूर्वकं दूषयन्निदानीमेव दोषाभावनिर्णयस्य दुष्करत्वादविलम्बेन परिग्रह एव युक्त इत्याह–अथेति । संस्कारसंपन्नः सकलशास्त्रज्ञानजसंस्कारसंयुक्तः । श्लक्ष्णं श्लक्ष्णसंदर्भम् अर्थवत्प्रकटार्थवत्, लघु मितशब्दम् मधुरं श्रवणमात्रेण सुखकरम् ॥ ५० ॥

रा० टी०–अथेति । संस्कारसंपन्नः सकलशास्त्रीयज्ञानसंस्कारयुक्तो हनुमान् श्लक्ष्णम् काव्योक्तदोषरहितं लघुपुलाकरं मधुरमर्थवत् प्रशस्तार्थकं वचनमुवाच ॥ ५० ॥

गो० टी०–एवं सुग्रीवेणेदानीं वध्यत्वं प्रतिपादितम् । अङ्गदादिभिस्तु गुणदोषपरीक्षापूर्वकं परिग्रहपरित्यागो निदानितौ । अथ सचिवोत्तमो हनुमान् सुग्रीववत्तादृत्यन्ताविचारमूलत्वानोपेक्ष्य अङ्गदादिमतमेकैकवादपूर्वकं दूषयित्वा इदानीमेव दोषाभावस्य निर्णेतुं शक्यत्वात् सहसेति परित्याग इति सिद्धान्तयति सर्गशेषेण—अथेति । संस्कारः शास्त्राभ्यासदृढतरसंस्कारयुक्तः । लघु अविस्तृतम्॥४८॥

५१] ति० टी०–समर्थं सकलशास्त्रार्थतत्त्वनिरूपणक्षमम् । अतिशाययितुमभिभवितुम् ॥ ५१ ॥

रा० टी०–तत्त्वस्वरूपमाह–नेत्यादिभिः । मतिश्रेष्ठं तत्त्वं भवन्तम् अतिशाययितुं वचनेन पराभवितुं ब्रुवन् बृहस्पतिरपि न शक्तः ॥ ५१ ॥

गो० टी०–भवतः उपदेशार्थं न मम प्रवृत्तिः भवतः प्रकारोत्कृष्टत्वात् केनाप्याकारेणातिशयितस्य कस्यचिदभावादित्याह—न भवन्तमिति । स्पष्टम् ॥ ४९ ॥

५२] ति० टी०–वादात्तर्ककुशलत्वप्रकटनाद्धेतोः, संघर्षात्सचिवान्तरस्पर्धावशात्, आधिक्यादधिकबुद्धिमत्त्वाभिमानात्, कामतो वचनेच्छातः । यदेवम्, अतो यथार्थमेव वक्ष्यामि । गौरवात् कार्यगौरवानुरोधेनेत्यर्थः ॥ ५२ ॥

रा० टी०–नेति । न वादात् स्वप्रौढ्यप्रकटनहेतुकवचनात् न संघर्षात् सचिवान्तरस्पर्धातः नाधिक्यात् अधिकमतिमत्त्वाभिमानात् न च कामतः किंचिदृत्यादिविषयेच्छातः वक्ष्यामि किंतु गौरवात् कार्यस्य गुरुत्वाद्धेतोः यथार्थं वचनं वक्ष्यामि ॥ ५२ ॥

गो० टी०–न वादादिति । वादात् तर्ककौशलात् संघर्षात् सचिवेषु स्वर्धाभावात् आधिक्यात् अहं मतिमान् सर्वो चेन्द्रादिकस्यापि वादात् कामतः स्वेच्छातः विनियोगपरतन्त्राद्धेतोः । तर्हि किमर्थं प्रवृत्तिस्त्वत्र—गौरवादिति । सर्वं तत्त्वतो जानन्नपि ॥ ५२ ॥

५३] ति० टी०–तत्रादावदुष्टमपि दूषयति अर्थेत्यादि । अर्थानर्थनिमित्तं गुणदोषनिमित्तं यत् सचिवैरङ्गदादिभिरुक्तं तत्र दोषं प्रवक्ष्यामि । अङ्गदेनैवं परीक्षणीयमिति यदुक्तं तदयुक्तम् कि त्वेवं निश्चय इत्युक्तमित्यनुवादम् । तदेवाह–क्रिया च परीक्षणरूपा क्रियेहानीं नोपपद्यत इत्यर्थः ॥ ५३ ॥

रा० टी०–तत्रादावदुष्टमपि दूषयति–अर्थेत्यादिभिः । अर्थानर्थनिमित्तम् अर्थानर्थपरीक्षार्थं यत्तावत् सचिवैरङ्गदादिभिरुक्तं तत्र दोषं प्रवक्ष्यामि । दोषमेवाह–क्रिया परीक्षाकारको व्यापारः नोपपद्यते संपत्तिं न गच्छति ॥ ५३ ॥

गो० टी०–पूर्वोक्तं चतुः मतेषु प्रथमम् अङ्गदमतं दूषयति–अर्थानर्थेति । अर्थानर्थनिमित्तं निर्णयोपायः सचिवैः अङ्गदेन तात्कालिकसंक्षेपपरिज्ञाय नानातर्कबहुत्वचनं अ यदुक्तं तत्र दोषं प्रवक्ष्यामि । कुतः । क्रिया सर्वप्रकारेण क्रिया नोपपद्यते हि ॥ ५३ ॥

५४] ति० टी०–पुनराह—ऋते इति । नियोगाद्ऋते तमाश्रित्य सर्वं कृत्स्नमनिवेदनं नियोगं विना सामर्थ्यं हानोपादानयोग्यत्वं बोद्धं न शक्यते । तर्हि आगामयेति चेत्तत्राह–सहसा हठाद्विनियोगोऽपि राजसंनिधानप्रापणपूर्वं कृतान्तप्रतिपादनाद्यादात्मकरूपविनियोगोऽपि दोषवानेव प्रतिभाति, तस्मात्तत्समर्थद्वारा तदीयदुष्टत्वं ज्ञात्वा भयत्समीपानयनमुचितमिति भावः ॥ ५४ ॥

रा० टी०–अनुपपत्तिमेवाह–ऋते इति । नियोगात् कर्मसिद्धिकर्मे नियोजनात् ऋते विना सामर्थ्यं हिताहितसंपादकत्वसमर्थत्वमवश्यं न शक्यते । ननु तर्हि नियोगः क्रियतामित्यत आह–सहसा शीघ्रं विनियोगोऽपि दोषवान् प्रतिभाति यत्र नियुक्तः तमेव विघातयेत् महाननर्थः स्यादिति तात्पर्यम् ॥ ५४ ॥

गो० टी०–अनुपपत्तिमेव दर्शयति—ऋते इति ।

चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव । अर्थस्यासंभवात्तत्र कारणं नोपपद्यते ॥ ५५ ॥
अदेशकाले संप्राप्त इत्ययं यद्विभीषणः । विवक्षा तत्र मेऽस्तीयं तां निबोध यथामति ॥ ५६ ॥
एष देशश्च कालश्च भवतीह यथा तथा । पुरुषात्पुरुषं प्राप्य तथा दोषगुणावपि ॥ ५७ ॥
दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि । युक्तमागमनं ह्यत्र सदृशं तस्य बुद्धितः ॥ ५८ ॥
अज्ञातरूपैः पुरुषैः स राजन्पृच्छ्यतामिति । यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता ॥ ५९ ॥

तद्राजकार्येषु नियोगात् ऋते विना । "अन्यारादितरर्ते०" त्यादिना पञ्चमी । सामर्थ्यं साधुत्वम् । सहसा विनियोगः गुणदोषपरीक्षामन्तरेण कुत्रचिन्न्यसनं राजकार्ये विनियोजनम् । न मां प्रति दोषवान् भाति तथा च सत्यां गुणदोषपरीक्षायां नियोगः नियोगे सति गुणदोषपरीक्षणमित्यन्योन्याश्रयः । अतोऽनुपपन्नमङ्गदमतमिति भावः ॥ ५२ ॥

५५] ति० टी०—तर्हि शरभमतमेव तवापि किमिति दूषयसीत्याशङ्क्य तन्मतं दूषयति—चारेति । प्रणिहितमिति भावे क्तः । चारप्रेषणं युक्तमिति यदुक्तं तव सचिवैः शरभादिभिरपि नोपपद्यते इति शेषः । यतस्तत्र चारप्रेषणे कारणं नोपपद्यते तत्प्रयोजनं नास्ति । कुतः, अर्थस्यासंभवादेव तस्याध्यप्रयोजनासंभवादेव । अयं भावः—असंनिहितेऽप्रकटतान्ते तज्ज्ञानाय तत्प्रेषणम्, न तु प्रत्यक्षे प्रकटतया स्वदृष्टान्तवेदके इति ॥ ५५ ॥

रा०टी०—अङ्गदमतेऽनुपपत्तिमुक्त्वा शरभमतेऽनुपपत्तिमाह—चारेति । चारप्रणिहितं चारप्रेषणं यत्तवाद्ये सचिवैः शरभादिभिरुक्तं तत् अर्थस्य प्रयोजनस्य असंभवाद्धेतोः तत्र चारप्रणिधानकारणं नोपपद्यते ॥ ५५ ॥

शि० टी०—अथ शरभमतं प्रयोजनाभावेन खण्डयति—चारेति । अत्रेतिशब्दोऽध्याहर्तव्यः । चारप्रणिहितं चारप्रणिधानम् उक्तमिति तव सचिवैर्यदुक्तम् शरभेण यदुक्तमित्यर्थः । तत्र तस्मिन्नुक्ते अर्थस्य चारप्रयोजनस्य दुरतिरोहितदर्शनादेः संभवात् चारप्रणिधानलक्षणं कारणम् उपायः न युज्यत इत्यर्थः । अन्यामर्षे स्वचक्षुर्विषये सम्यक्परिदृश्यमाने व्यवहिते सप्रस्कन्दावस्थायिनि चास्मिन् परस्कन्धादितत्त्वदर्शनलक्षणचारप्रयोजनाभावादयमुपायो न युज्यत इति भावः । कारणं नोपपद्यत इति पाठे तु चारयितव्यस्यान्तःपुरसमाजतीर्दिव्यस्य विषयस्याभावाच्चारसंचारणं न घटत इत्यर्थः॥ ५३॥

५६] ति० टी०—अथ जाम्बवदुक्तमदेशकालप्राप्तिरूपं दूषणास्पदं स्वरूपाभिहत्या दूषयति—अदेशेति । अयं विभीषणोऽदेशकाले संप्राप्त इति तज्जाम्बवदुक्तं तत्र तद्विषय एष देशः कालश्च यथा भवति तथैव मे विवक्षास्तीत्ययमयः ॥ ५६ ॥

रा० टी०—जाम्बवदुक्तं दूषयति—अदेशेति । अयं विभीषणः अदेशकाले संप्राप्तः इति यत् जाम्बवदुक्तं तत्र देशकालादिका यथामति मे विवक्षाऽस्ति तां त्वं निबोध जानीहि ॥ ५६ ॥

गो० टी०—अदेशकाले संप्राप्त इत्यस्य जाम्बवन्मतसारत्वात्तन्निराकरणेन सर्वं निराकृतप्रायमिति तत्सिद्धया दूषयति—अदेशेति । सार्द्धश्लोक एकान्वयः ॥ विभीषणः अदेशकाले संप्राप्त इति यत् तत्र तद्विषये यथातथा याथातथ्येन । स एष देशः कालश्च भवतीति मे यथामति इयं विवक्षाऽस्ति तां निबोधेत्यन्वयः ॥ ५४ ॥

५७-५८] ति० टी०—तं विवक्षाविषयमाह—पुरुषादिति । पापात्पुरुषात्रावणादुत्तमं पुरुषं त्वां प्राप्य बुद्ध्या निश्चित्य, तथा द्वयोस्तयोर्दोषगुणावपि प्राप्य बुद्ध्या निश्चित्य, यत्र युक्तं कालोचितमागमनं कृतं तत्तस्यैव बुद्धितः सदृशम् । पुरुषादित्यौत्सर्गिकस्यैव विवरणम्—दौरात्म्यमिति । परदारापहरणाद्रावणे दौरात्म्यम् । त्वयि विक्रमं च कक्षपुटे रावणं कृत्वा चतुःसागरीं प्रदक्षिणं कृतवतो वालिन एकेनैव बाणेन त्वया हननादृष्ट्वेत्यर्थः ॥ ५७ ॥ ५८ ॥

रा० टी०—तद्वचनमेवाह—एष इति । दोषगुणौ रावणरामयोः अधर्मधर्मौ प्राप्य बुद्ध्या तथा पुरुषात् अधर्मविशिष्टरावणात् पुरुषं परमधर्मविशिष्टं रामं प्राप्य तिष्ठतीति शेषः अतः एषः रामसमीपवर्ती एव देशः तथा एषः धर्मबलवत्त्वरूपापकः कालश्च इह अस्मिन्समये यथा यथावद्भवति ॥ ५७ ॥

रा० टी०—तदेव स्पष्टमाह—दौरात्म्यमिति । रावणे दौरात्म्यं दुष्टप्रयत्नं त्वयि विक्रमं यो वालो रावणं कक्षपुटे कृत्वा सागराणां प्रदक्षिणं कृतवान् स एकेन बाणेन येन हतः तस्यातीव बलवत्त्वमिति दृष्ट्वा ज्ञात्वा विद्यमानस्य तस्य विभीषणस्यागमनं युक्तम् अत एव तस्य बुद्धितः बुद्धेः सदृशम् ॥ ५८ ॥

गो० टी०—विवक्षितमेव सोपपत्तिकं विशदयति—पुरुषादित्यादिनार्धश्लोकेन । पुरुषात् अधमपुरुषाद्रावणात् पुरुषं उत्तमपुरुषं भवन्तम् । प्राप्य मनसा विमृश्य । तथा दोषगुणावपि युवयोर्विमृश्य तथा रावणे दौरात्म्यं राक्षसकुलविनाशहेभूतसीतापहरणतत्प्रत्यर्पणानपेक्षित्वादिकम् त्वयि विक्रमं खरदूषणप्रमुखराक्षसवधादिकम् वालिवधपूर्वकसुग्रीवराज्यप्रदानम् अतिदुस्तरसमुद्रतरणोद्योगं च दृष्ट्वा तस्य बुद्धितः बुद्धेः सदृशं तस्य आगमनं युक्तमिति संबन्धः । यदा प्रतिकूलेदोषदर्शनमनुकूले गुणज्ञानं च स एव देशः कालश्च भवति । इदं तथ्यमिति भावः ॥ ५७ ॥

५९] ति० टी०—अथैवमुक्तमपि तद्वचनमनादरणीयत्वाद्गृहीतं तदीयगुणदोषावगमस्तव्याप्तिं च स्थिरीकर्तुं प्रारब्धेऽपि-

१ तस्येति गो० पाठः ।

पृच्छ्यमानो विशङ्केत सहसा बुद्धिमान्वचः । तत्र मित्रं मदुष्येत मिथ्या पृष्टं सुस्वागतम् ॥ ६० ॥
अशक्यं सहसा राजन्भावो बोद्धुं परस्य वै । अन्तरेण स्वरैर्भिन्नैर्नैपुण्यं पश्यतां भृशम् ॥ ६१ ॥
न त्वस्यब्रुवतो जातु लक्ष्यते दुष्टभावता । प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः ॥ ६२ ॥

पक्षे दोषान्तरमाह—अज्ञातेति अज्ञातकुलशीलप्रयोजनैः पुरुषैश्चारैः स विभीषणः पृच्छ्यतामिति यन्मैन्देनोक्तमत्र मे मया समीक्षिता सम्यक्परीक्षिता काचिदपेक्षा धीरस्ति ॥ ५९ ॥

रा० टी०—मैन्दोक्तिं निराकरोतीति—अज्ञातेति । अज्ञातरूपैः पृच्छ्यताम् इति यत् मैन्देनोक्तम् अत्र विषये मे मया समीक्षिता सम्यक् परीक्षिता प्रेक्षा बुद्धिरस्ति एतदपि निराकरोतीत्यर्थः ॥ ५९ ॥

गो० टी०—मैन्दमतं प्रतिक्षिपति श्लोकत्रयेण—अज्ञातेति। अज्ञातरूपैः अपरिचितस्वरूपस्वभावैः समीक्षिता सम्यक्परीक्षिता प्रेक्षा पुरिक्षणा बुद्धिः ॥ ५९ ॥

६०] ति० टी०—का सेत्यत्राह—पृच्छ्यमान इति । अज्ञातपुरुषेण को भवान्कुत आगत इत्यादि पृच्छ्यमानः पृष्टस्वरूपज्ञानरहितो बुद्धिमान्पुरुषस्तद्वचः सहसा शङ्कितं शङ्केत, नैनं जानामि केनायं प्रेषितः किमर्थं पृच्छतीति शङ्कां कुर्यादेव भवति केवलम्, न तूत्तरयति किंचित् । यदि तु पृष्टः शनैर्ज्ञानं भवति तदा सुस्वागतं सुस्वागतमित्यादि मित्रं चेन्मदुष्येत मित्रेण । किमर्थमेवं विचारयति पुरुषमुखेनेति मन्यस्तेऽहं भवति एवं च मित्रहानिरिति भावः ॥ ६० ॥

रा० टी०—निराकरणमेवाह—पृच्छ्यमान इति । पृच्छ्यमानः अज्ञातजनेन कस्त्वं कुत आगतः किमागमनप्रयोजनम् इत्यादिना पृष्टः बुद्धिमान् जनः वचः पृच्छकवचनं विशङ्केत किमर्थमयं पृच्छतीति शङ्कां प्रामुयात् न तु किंचिदुत्तरयेदित्यर्थः तत्र पृच्छकस्वरूपस्य मित्रप्रेष्यत्वादिना ज्ञाते सुस्वागतं मित्रं प्रदुष्येत् मित्रं मां किमर्थमेवं पृच्छतीति दुर्मुखं ब्रूयात् अत एव पृष्टं प्रश्नं मिथ्या भवेदिति शेषः । न च कं चारप्रेषणस्य वैयर्थ्यमिति वाच्यं चिरं तत्र स्थित्वा व्यवहारज्ञानेन तन्मित्रामित्रज्ञानेन च तत्पुरुषसरूपादिज्ञानादिना च सार्थकत्वात् ॥ ६० ॥

गो० टी०—कश्चिद्दूषणत्वेऽपि मित्रे दोषनिर्णयोपाय इत्याह—पृच्छ्यमान इति। बुद्धिमानपि पुमान् अपरिचितैः पृच्छ्यमानः सन् अविश्वासादेवैते पृच्छन्ति कस्मिन् वचनपक्षे को वानर्थः समापद्यत इति प्रतिवचनरूपं वच उद्दिश्य सहसा विविधां शङ्कां पाल्पयात् तथा सति सुस्वागतं स्वस्मिन्दोषराहित्येन विश्वासोपगतमपि मित्रम् मिथ्या पृष्टं सत् तेन प्रश्नेन हेतुना प्रदुष्येत दुष्टं भवेदित्यर्थः ॥ ५७ ॥

६१] ति० टी०—किं च तस्य शत्रुत्वे तदभिप्रायश्चारैरपि दुर्ज्ञेय इत्याह—अशक्यमिति । परस्य शत्रोर्भावश्चारैरपि सहसा द्राक्प्रश्नमात्रेण वेत्तुं ज्ञातुमशक्य एव अज्ञातेन पृष्ट उत्तरदानादनु शत्रुप्रहितत्वेन ज्ञाते प्रत्युत दण्डस्यापि प्रसङ्गात् । नन्वेवं जगति चारप्रेषणनैष्फल्यप्रसङ्ग इति चेन्न, बहुकालं तत्र स्थितौ तद्वचनैस्तद्व्यवहारैस्तत्प्रसङ्गे हावभावादिभिश्च तस्य शत्रुमित्रत्वज्ञानाय तत्प्रेषणसंभवात् । यदेवमतः—अन्तरेणेति । अन्तरेण स्वरैर्भिन्नैर्नैपुण्यं पश्यतां भृशम् इति प्राचीनः पाठः । अन्तरेण व्यवहारमध्ये भिन्नैः स्वरैर्लक्षणस्थैः कण्ठध्वनिभिर्नैपुण्यं सदसदन्यतरत्वनिश्चयं पश्यताम् कुरुताम् भवानिति शेषः । तत्र वाष्पकण्ठत्वं भीत्या पूर्वापरासंगतकथने चासत्यथा सत्यिति निश्चीयतामित्याशयः । 'अन्तः स्वभावैर्गीतैस्तैर्नैपुण्यं पश्यता भृशम्' इति पाठे भृशमत्यर्थं स्वस्मिन्नैपुण्यं पश्यता जानतापि प्रष्टुरन्तःस्वभावैरात्मनः प्रसक्तार्थत्वेऽपि गुप्ताभिप्रायैर्गीतैर्भाषितैः परस्वभावोऽभिप्रायः सहसा वेत्तुं न शक्य इत्यर्थः ॥ ६१ ॥

रा० टी०—अशक्य इति । हे राजन् ! सहसा शीघ्रं चारप्रेषणमात्रेण परस्य रिपोः भावोऽभिप्रायः बोद्धुमशक्यः अतः अन्तरेण स्वमैत्र्यमध्ये स्थापनेनेति शेषः भिन्नैः अस्मत्प्रियविषयतया रिपुप्रियविषयतया च भेदविशिष्टैः स्वरैः व्यापारैः नैपुण्यं तत्कौशलं भृशं पश्यतां यत्नतामिति शेषः तेन तदभिप्रायज्ञानं सुलभमिति तात्पर्यम् ॥ ६१ ॥

गो० टी०—कश्चिदभिप्रायोजनायमुपाय इत्याह—अशक्यमिति । भृशम् अत्यर्थम् स्वस्मिन्नैपुण्यं पश्यतापि मिथ्याप्रायैः अन्तःस्वभावैः अन्तर्हितस्वाभिप्रायैः परस्य गीतैः भाषितैः परावभिप्रायः सहसा ज्ञातुमशक्य इत्यर्थः । तथा प्रष्टुरभिप्रायं ज्ञात्वा । अहदयवाचामहृदया एव प्रतिवाचो भवन्तीति न्यायेन परणापि स्वाभिप्रायानाविष्करणादिति भावः ॥ ६१ ॥

६२] ति० टी०—नन्वस्यैव प्रभोः परीक्ष्यतामिति चेन्मया परीक्षित एवेत्याह—न त्वस्येति । दुष्टभावता वचनवेषादिभिर्दुष्टान्तःकरणता न लक्ष्यते, प्रसन्नवदनता च दृश्यते ॥ ६२ ॥

रा० टी०—ननु एतद्विषये त्वया किं निश्चितमित्यत आह—न त्वस्येति । ब्रुवतोऽस्य दुष्टभावता दुष्टस्वभावः जातु कदाचिदपि लक्ष्यते प्रत्युत प्रसन्नवदनं वदनप्रसादः लक्ष्यते तस्मात् मे संशयो नास्ति एतेन वदनप्रसादरूपहेतुनाऽस्मन्महदुद्योगदर्शनजनितप्रसादस्यास्य सूचितः तेन अस्मत्प्रियाकाङ्क्षावानयमिति ध्वनितम् ॥ ६२ ॥

गो० टी०—एवं पूर्वोक्तेषु पक्षेषु दोषाद्दूषणत्वं संप्रत्यात्मनः परीक्ष्य कथीकृतं पक्षमुपसंहरति—न त्वित्यादिना । ब्रुवतो बहुव्याहरतोऽस्य ॥ ६२ ॥

अशङ्कितमतिः स्वस्थो न शठः परिसर्पति । न चास्य दुष्टवागस्ति तस्मान्मे नास्ति संशयः ॥ ६३ ॥
आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम् । बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥ ६४ ॥
देशकालोपपन्नं च कार्यं कार्यविदां वर । सफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम् ॥ ६५ ॥
उद्योगं तव संप्रेक्ष्य मिथ्यावृत्तं च रावणम् । वालिनं च हतं श्रुत्वा सुग्रीवं चाभिषेचितम् ॥ ६६ ॥
राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः । एतावत्तु पुरस्कृत्य विद्यते तस्य संग्रहः ॥ ६७ ॥
यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति । प्रमाणं त्वं हि शेषस्य श्रुत्वा बुद्धिमतां वर ॥ ६८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तदशः सर्गः ॥ १७ ॥

६३] ति० टी०—अकार्यस्येव स्थैर्योक्त्याप्तः—अशङ्कितेति । अशङ्कितमतिर्निश्चितप्रणागमनमतौ रामप्रणागमनमेव मनोऽस्येति सुप्रतिष्ठितचित्तः, अत एव स्वस्थः सुस्थात्मा एव भूत्वायं परिसर्पति, न शठो दुष्टाभिप्रायवानिवेत्यर्थः । दुष्टवाग् दुष्टा अकार्यप्रेरणवती वाक् ॥ ६३ ॥

रा० टी०—अशङ्कितेति । न शङ्कितः असद्धितपक्षशङ्कावती मतिर्यस्य अत एव स्वस्थः अत एव शठः शठत्वं न परिसर्पति अस्मिन् प्राप्नोति अत एव अस्य दुष्टवागस्ति तस्मान्मे संशयो नास्ति ॥ ६३ ॥

गो० टी०—एवमस्थैर्यशङ्कानिरासस्य दुष्टत्वमुक्त्वा चेष्टाभाषणाभ्यां च तदर्थयति—अशङ्कितेति । शठः शठविप्रियकारी ॥ ६० ॥

६४] ति० टी०—नन्वयं शठोऽस्मान् वञ्चयतीत्याशङ्क्याह—आकार इति । आकार आन्तरो भावो यावच्छक्यं छाद्यमानोऽपि न सर्वात्मना निगूहितुं शक्यः । कुतस्तत्राह—बलादिति । भावं शठभावं साधुभावं च विवृणोत्येव । अन्तर्यामिदेवतेति शेषः सा हि तथालक्षणादिप्रेरणया तं प्रकटीकरोतीत्यर्थः । अस्य विरूपकरूपवादान्दिष्टत्वं निर्णीयत इति भावः ॥ ६४ ॥

रा० टी०—नन्वयं शठोऽस्मान्वञ्चयतीत्यत आह—आकार इति । आकारः स्वाभिप्रायः छाद्यमानः पुनःपुनर्निगूहितुमशक्योऽपि विनिगूहितुं सर्वथा छादयितुं न शक्यः अतएव नृणामन्तर्गतं भावमभिप्रायं बलाद्विवृणोति प्रकाशयत्येव आकारः इङ्गितादिः संलक्ष्यते ॥ ६४ ॥

गो० टी०—नन्वयं परमशठः पुरुषो भावं निगूहयति कथं तेन विनाभूय व्यनक्त्याकार इति । आकारः सुखविकारः ६१

६५] ति० टी०—नन्वदृष्टमात्रायां वेलायामत्रागमने किं प्रयोजनमित्याशङ्क्याह—देशेति । देशकालौचित्यज्ञानमेवेत्याह—देशेति । हे रामेति शेषः, अस्येदमत्रागमनरूपं कार्यं देशकालोपपन्नं देशकालाभ्यां युक्तं सत् किं चेदृशं कार्यं प्रयोगेणाभिसंहितवतुष्ठानेन संपादितत्वेन भावं क्षिप्रं सफलं कुरुते इत्यर्थः ॥ ६२ ॥

रा० टी०—नन्वकालस्थे अस्मिन् समये किमर्थमागत इत्यत आह—देशेति । कार्यविदां वर हे राम ! देशकालोपपन्नं देशकालाभ्यां युक्तं प्रयोगेण युक्तिविचारेण अभिसंहितं संपादितं कार्यं क्रिया सफलं फलसंयुक्तं कर्तारं कुरुते कर्तारमिति प्रत्याकलितव्याघातत्वम् एतेनेतदागमनं सफलमेवेति सूचितम् ॥ ६५ ॥

गो० टी०—एवं वेलाभावमुक्त्वा गुणमुचितत्वेनाप्यं दर्शयितुं रीतिमयीदां दर्शयति—देशेति । देशकालोपपन्नं देशकालाभ्यां युक्तम् । उचितेन देशकालयोरेव प्रयुक्तमित्यर्थः । कार्यं क्रिया । स्वकरं स्वोचितफलम् । क्षिप्रम् अप्रतिबन्धम् कुरुते कर्तारमिति शेषः ॥ ६५ ॥

६६-६७] ति० टी०—एतदेव विवृणोति—उद्योगमिति । उद्योगं रावणवधविषयम् मिथ्यावृत्तं मिथ्याबलगर्वितं पापवृत्तं च दृष्ट्वा रावणस्यधिकबलं वालिनं हतं श्रुत्वा बुद्धिपूर्वं वालिवधेन राज्यं हस्तीकर्तुमुद्योगेन मह्यं राज्यं दास्यति शरणागतवत्सलः सन्नेषा मां रक्षिष्यतीति बुद्धिपूर्वम् । उपसंहरति—एतावदिति ॥ ६६ ॥ ६७ ॥

रा० टी०—संशयाभावे हेतुं ब्रुवन् स्वानुमितमाह—उद्योगमित्यादिभिः । तवोद्योगं रावणं मिथ्यावृत्तं मृषोद्योगं च संप्रेक्ष्य ज्ञात्वा अभिषेचितं सुग्रीवं श्रुत्वा राज्यं लब्धुमार्यमाणः सन् बुद्धिपूर्वमेव इहागतः एतान् मदुपुरस्कृत्य मनसि निधाय तस्य विभीषणस्य संग्रहो गृह्यते श्लोकद्वयमेकान्वयि ॥ ६६ ॥ ६७ ॥

गो० टी०—एतेनाप्येवमेव कार्यं प्रयुक्तमित्याशयेनाह—उद्योगमिति । सार्धश्लोक एकान्वयः ॥ ६३ ॥

६८] ति० टी०—मया राक्षसस्यार्जवबुद्धिद्य त्वां प्रति यथाशक्त्युक्तम् अधिकं वक्तुं तु न युज्यते श्रुत्वा शेषस्य निर्णये तु त्वमेव प्रमाणम् ॥ ६८ ॥

इति श्रीरामाभिरामे श्रीमच्छ्रीमें रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तदशः सर्गः ॥ १७ ॥

---

१ सुग्रीवमेवेति गो. पाठः । २ गोमेति गो. पाठः । ३ वालिनश्च हतमिति गो. पाठः । ४ चेति गो. पाठः । ५ युज्यते इतेति गो. पाठः । ६ मिति गो. पाठः ।

अष्टादशः सर्गः ।

रामो विभीषणस्य आत्माश्रद्धात्वविषये सुग्रीवादिभिः सह विचारयन्ते सत्यत्वप्राह्यत्वं निर्णयति ।

अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य तत् । प्रत्यभाषत दुर्धर्षः शुतवानात्मनि स्थितम् ॥ १ ॥
मयापि चैतद्विवक्षास्ति काचित्प्रति विभीषणम् । श्रोतुमिच्छामि तत्सर्वं भवद्भिः श्रेयसि स्थितैः ॥ २ ॥
मित्रभावेन संप्राप्तं न त्यजेयं कथंचन । दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम् ॥ ३ ॥

रा० दी०—यथेति । श्रुत्वा तवाकूतमस्य हनूमतः सकाशात् । तत्तस्य विभीषणस्य आत्मनि प्रति प्रत्याशंसि प्रत्याशंसनविषयत्वेन स्थितं निश्चितं प्रत्यभाषत । प्रमाणं संवादः दृष्टश्चेत्यर्थः ॥ १८ ॥

इति श्रीगोविन्दराजविरचितायां वाल्मीकीयरामायणभूषायां रामायणचन्द्रिकायां युद्धकाण्डे सप्तदशः सर्गः ॥ १७ ॥

गो० टी०—कथितमपि—मतावादिति सावज्ञोक्त्या स्वकृत्यं विस्मरयति—यथेति । यद्यपि दर्शितमेव मतिकरं तथापि तत्र तत्र विशेषतस्तत्र तत्र यत्कर्तव्यं तत्तस्य भवितव्यं तत्तथेत्यर्थः प्रमाणं प्रमाणत्वेनाह ॥

इति श्रीगोविन्दराजविरचितायां रामायणभूषणे रामचन्द्रीयायां युद्धकाण्डव्याख्यायां सप्तदशः सर्गः ॥ १७ ॥

१] ति० टी०—अथेत्यादिना । तेजसः प्रभावस्य प्रचयमित्यर्थः । पुनरावृत्तिरादरार्थम् । आत्मनि स्थितं निश्चितं यथा तथा प्रत्यभाषत । प्रत्यवोचदित्यर्थः । प्रत्यभाषतेत्यत्र प्रतिशब्दस्यार्थमाह—प्रत्यभाषतेति । प्रत्यवोचदित्यर्थः ॥ १ ॥

रा० दी०—तदेवमहनूमत्प्रत्यक्षानन्तरमपि रामः स्वयमेव प्रतिपत्तिमान् सन्नित्याह—मयेति । मयापि चैतद्विवक्षास्ति मितं वाक्यमस्ति । अस्मदुक्तमेव प्रमाणयितुमिच्छामीत्यर्थः । अत्र हेतुमाह—श्रुतवानिति । वसिष्ठादिभ्यः श्रुतवान् सर्वज्ञत्वादात्मनि स्थितं चित्तावस्थितम् ॥ २ ॥

गो० टी०—तदेवं सुग्रीवादिभिः स्वमते प्रतिपादिते तानभिप्रसन्नमपि रामं पुनः प्रत्याचष्टे—अथेति । वायुसुतस्य हनूमतिति शेषः । प्रसन्नात्मा सुग्रीवादिवाक्यैः कलुषीकृतेऽपि मयि हनूमद्वाक्ये प्रसन्नस्वभावः दुर्धर्षः पूर्वपक्षैरक्षोभ्यः । तत्र हेतुमाह—श्रुतवानिति । वसिष्ठादिभ्यः श्रुतवान् सर्वज्ञत्वादात्मनि आत्मनि स्थितं चित्तावस्थितम् ॥ २ ॥

२] ति० टी०—ममापि भवद्भ्यो विलक्षणं विभीषणं प्रति काचिद्विवक्षास्ति तत्सर्वं मद्विवक्षितं मम श्रेयसि स्थितैर्भवद्भिः श्रोतुं श्रवणमनिहितं कर्तुमिच्छामि । इत्युक्तिः सर्वेषामपि सर्वमतप्रतिक्षेपकत्वमतश्रवणेन सुग्रीवादीनां व्याकुलचित्तता मा भूदिति तेषामनुपलालनाय ॥ २ ॥

रा० दी०—तदाकारमाह—ममेत्यादिभिः । विभीषणं प्रति ममापि काचिद्विवक्षा वक्तुमिच्छाऽस्ति तत् मद्विवक्षितं सर्वं श्रेयसि स्थितैर्भवद्भिः श्रोतुं भवत्कर्तृकश्रवणमिच्छामि ॥ २ ॥

गो० टी०—सर्वमतप्रतिक्षेपरूपेण स्वाक्येन स्थिते व्याकुलितमनसो भवेयुरिति शङ्कया रामः सचिवानुपच्छन्दयति—ममापीति । तुशब्दः पक्षान्तरव्यञ्जनमत्यक्षमपि व्यावर्तयति । ममापि विभीषणं प्रति काचिदुपपत्तेः सह परिगणनाय विवक्षा अस्ति अतः तत्सर्वं मद्विवक्षितं वा तु सादरेण सर्वमर्यादाग्रहं श्रेयसि स्थितैः अस्मच्छ्रेयोनिरतैः भवद्भिः सुग्रीवादिभिः श्रोतुमिच्छामि भवद्भिः श्रुत्वा परीक्षणं वा विधिते मम वाक्ये ॥ २ ॥

३] ति० टी०—[illegible] । मित्रभावेन मित्रत्वेनोक्तिः पक्षान्तरम् । मम वाक्यं यदि प्रौढ्या पूर्वपक्षयुक्त्या मद्वाक्यादि परिक्षार्थं स्यात्—तिष्ठति । रावणः मम शत्रुः इति प्रस्तुतवचनानुमितमित्यादिना विशेषेण स्पष्टं पक्षिभावेन प्राप्तं पतिमिव [illegible] । भवदुक्तमप्रहाणादि सर्वविधिनिषेधः सर्वथा हेयः । तत् शत्रुपक्षतया दुष्टं कथं न त्यजेयमित्याशङ्क्याह—दोष इति । अनुत्तरत्व दोष [illegible] । यद्यपि तस्य दोषः [illegible] ॥ ३ ॥

रा० दी०—[illegible] । मित्रभावेन मित्रत्वेनोक्तिः पक्षान्तरम् । मम वाक्यं यदि प्रौढ्या पूर्वपक्षयुक्त्या मद्वाक्यादि परिक्षार्थं स्यात्—तिष्ठति । रावणः मम शत्रुः इति प्रस्तुतवचनानुमितमित्यादिना विशेषेण स्पष्टं पक्षिभावेन प्राप्तं पतिमिव [illegible] । भवदुक्तमप्रहाणादि सर्वविधिनिषेधः सर्वथा हेयः । तत् शत्रुपक्षतया दुष्टं कथं न त्यजेयमित्याशङ्क्याह—दोष इति । अनुत्तरत्व दोष [illegible] । यद्यपि तस्य दोषः [illegible] ॥ ३ ॥

गो० टी०—[illegible] । मित्रभावेन मित्रत्वेनोक्तिः पक्षान्तरम् । मम वाक्यं यदि प्रौढ्या पूर्वपक्षयुक्त्या मद्वाक्यादि परिक्षार्थं स्यात्—तिष्ठति । रावणः मम शत्रुः इति प्रस्तुतवचनानुमितमित्यादिना विशेषेण स्पष्टं पक्षिभावेन प्राप्तं पतिमिव [illegible] । भवदुक्तमप्रहाणादि सर्वविधिनिषेधः सर्वथा हेयः । तत् शत्रुपक्षतया दुष्टं कथं न त्यजेयमित्याशङ्क्याह—दोष इति । अनुत्तरत्व दोष [illegible] । यद्यपि तस्य दोषः [illegible] ॥ ३ ॥

पापुच्यते न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्रविणः परित्यागे शक्तिसंभावनामपि न पश्याम्यहमीत्यर्थः । कथंचन दुष्टादृष्टानर्थशतानुबन्धिन्येव तत्परिग्रहस्य सुहृदामनभिमतत्वे मत्प्राणपरित्यागे प्रस्तुतेऽपीत्यर्थः । दोषो यद्यपि तस्य स्यात् । यद्यपि सुग्रीवादिभिरुक्ता दोषा नास्मिन् सन्ति सन्तु वा ततोऽपि भूयांसः अथाप्यशक्नुवन्नहं कथं करोमीत्यर्थः । स्याच्छब्दः दुष्टोऽपि शरणागतशब्दप्रयोक्ता मया परिग्रहीत इति मम महतो भवेदित्येवमर्थम् । अदुष्टपरिग्रहे गुणो बन्दः दुष्टपरिग्रहे तु मम शरणागतरक्षणधर्मे उपेक्षितो भवतीति भावः । करुणया दुष्टपरिग्रहे शिष्टगर्हा स्यादित्याशङ्क्याह—सतामनहितमिति । एतदुक्तमपि शरणागतस्य संग्रहणम् ज्ञानं शिष्टानाम् अनर्हितं गर्हितादन्यत् पूजितमित्यर्थः । पूजितत्वं च कपोतोपाख्यानादिभिः प्रपञ्चयिष्यते । एवं च शास्त्रेषु दोषाणां परित्यागहेतूक्तिः शरणागतव्यतिरिक्तविषयेति विषयव्यवस्थाभिप्रेता । अत एव दोषाधिक्येन यथार्हमप्यपि शरणागतस्य रक्षणमेव कार्यमिति श्रुतिस्मृत्योः—"तस्मादपि वधं प्राप्तं न प्रतिप्रयुञ्जन्ति" इति आत्मार्थयोजना । मित्रस्य खेदिनो भावि मित्रत्वम् । तेन आर्द्रचेतसावेन । अहेयमभिमुखभावे बलमदुष्टीकारे प्रयोजकं न तु पूर्णभक्तिरिति शेषः । तथोक्तम्—"त्वामामनन्ति कवयः करुणामृतार्द्रे ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः" इति । केचन तु दोषोक्तकोलस्थाः पूर्वं सदृशमभजन्त हि तन्नात्मत्वात् इति । यद्वा मित्रक्रियया । "भावो नीलादिवद्भावयोः । अन्यत्र भिप्रायेऽप्यस्य भूतो सिद्धन्पदार्थयोः । तदयुक्तम् 'शरणमुपागतो मित्रं दोषिणं न भवति चेत् सापि वीप्सोक्तिः इति । शरणागतिमात्रेणेति वक्तव्ये मित्रभावेनेत्युक्तिः । स्वार्थेणाय 'मित्रं स्निग्धदासि कुर्वत्यपि विषमबुद्धिर्जनानि भगवतोऽभिप्रायेण दोषाणि शरणागतिमभिवर्तमानस्य ' तेन नैर्घृण्यं भवतु ते यदि दोषिदुष्टिरसि ' इत्युक्तम् । यद्वा मित्रभावेन मित्रत्वेन हेतुना । सुहृदं सर्वभूतानामित्युक्तरीत्या अस्मदीयसहजसौहार्द प्रयुक्तमित्यर्थः । यद्वा मित्रभावेन आनुकूल्यसंकल्पादिपूर्वकमित्यर्थः । यद्वा मित्रायते इति मित्रम् । ईश्वरोपकारे परिनिष्ठ तत्सदृशोपकारप्रवृत्तस्य भावनेत्यर्थः । यद्वा विश्वसनीयरूपं मित्रम् तन्निष्ठं यत् विश्वास इत्युक्तत्वात् । विश्वासिनो भावनेत्यर्थः । संग्रामं लङ्काबालेशभावेन हीत्या हि ममातुलेनोत्क्रान्तया मम तत्रिवासमयत्ने प्राप्तेऽपि स्वयमेव प्राप्तं कथं त्यजेयम् । संग्रामं सख्युक्तप्राप्तम् । पादुके द्वारि विन्यस्य देववन्दनकारिण्यावेत्यत्र भिन्नप्राप्तिमन्तरेण परित्यक्ता मया लङ्का मित्राणि च बन्धूनि चेति विरोधनिवृत्तिपूर्वकं प्राप्तमित्यर्थः । यद्वा संग्राम्यतां प्राप्तां लङ्कां निवासः शरणं सुहृदां विनाशयेण इति न्यायेन मयि स्वकलत्रविषयबन्धुभावमाचरन्तम् । यद्वा मदन्तरङ्गानुचरपुरस्करेण प्राप्तम् । यद्वा संग्रामं लङ्कायां स्थित्वा राघवं शरणं गतोऽस्मीत्युक्ते चेत् अतन्द्रितत्वं पुष्पकीत्यणुकन्यायेन मम तत्र गन्तव्यतायामपि तत्त्वावगतेः पङ्क्तोत्परि गङ्गानिपतनवदस्मरप्रयोजनमेव कृतम् । संग्रामं प्राप्तिरेवास्माकमपेक्षिता । न तु स्तुत्यर्चनध्यानप्रणामादिः । समित्यनेन मानसवाचिककायिकरूपपूर्णप्रपदनमुच्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्रविणः परित्यागे शक्तिसंभावनामपि न पश्याम्यहमीत्यर्थः । संग्रामं न त्यजेयं, शरणागतस्यमास्तिनीयं वृषभैलेशकृपीवलं विनीतेत्युक्तरीत्या स्वाश्रितं प्रतिक्षमाणोऽहं कथं संग्रामं त्यजेयम् । न त्यजेयं तत्सम्बन्धेन स्वाश्रयविषयाकारापेक्षी कथं तमेव त्यजेयम । अतएव हि वृषाकपेरुपक्षपातेन तदनुजस्यापि मुक्तिदात्री । अत एव च मालाकारविषयपक्षपातेन पुष्पमन्त्रन्तिजातानां दीर्घसामुर्भविष्यतीत्युक्तवान् । न त्यजेयम् आगमनमात्रेण स्वाश्रयणीये त्यागसंभावना कुतः । संभावनायां लिङ् । त्यागसंभावनायां सत्यं साध्यसोयोगः । तस्य योगे स्वसत्ता चेत् साधनोयोगः स्यात् । सैव न सिद्धेति कथमुयोगः । तत्स्वीकारामावे स्वसत्ता न सिद्धति चेत् तत्स्वीकारेऽस्मत्सत्ता न सिद्धत्यतोऽस्मत्त्यागः स्यात् स कथमुपाश्रय इति चेत्तत्राह—कथंचन । अत्यन्तं जोषिनं जलमित्यत्र दीप्या नवप्रसवत्वात्सलेन वत्सला गौः पूर्वसन्धानिव [illegible] त्यक्ष्यामि न त्याक्षितम । यद्वा कथंचन सर्वदेशकालावस्थासु त्यागमहीत्यर्थः । यद्वा कथंचन शरणागतस्य गुणाभावेऽपि दोषप्राचुर्येऽपि तत्परिग्रहस्य सर्व [illegible] त्यजेयमिति दुष्टादृष्टानिष्टशतानुबन्धिन्येवेऽपि मत्प्राणपरित्यागेऽपीत्यर्थः किंच दोषो यद्यपि तस्य स्यात् । अस्मदपेक्षया अस्यात्यन्तमशक्तिर्मे भवतोऽभिप्रायेण तस्य दोषोऽस्तीत्यत्र । अङ्गीकारेऽस्य दोषभोग्यत्वं कथं स्यात्तस्य मे आश्रितदोषो दुरादिव इति सुकुमारस्य राजकुमारस्य शुनश्चिपुच्छस्येवादरस्य दोषभोग्यत्वम् । यद्वा दोषो यद्यपि स्यात् तस्य शरणागतस्य न दोषः पर्यवसानकालस्थो प्रोक्षं प्रदृश्येवं हास्य सर्वे पाप्मानः प्रदूयन्त इत्युक्तरीत्या दोषो न स्थित्येदित्याशयः । यद्वा दोषो यद्यपि स्यात् स तस्य हि शरणागतिरूपनिरतिशयगुणशालिनो दोषो न स्याज्यकोटिमारोहति सुरगन्धिसुमूलेशवत् । यद्वा दोषो यद्यपि तस्य दोषोऽस्ति चेत्तत्संबन्धी खलु दोषः स तत्मादोषः स्लाघ्यः स्यात् प्रार्थनायां लिङ् । अस्माभिः प्रार्थितः स्व । गुणवान् रक्षितश्चेत् गुणवत्तामतिकरः दोषवान् रक्षितश्चेच्छयोऽस्माकमिति भावः । यद्वा दोषो यद्यपि अस्मदपेक्षा तस्य स्यात् तस्यापेक्षितफलसिद्धिः स्यात् कपोतोपाख्यानागुणेयं योजनेति श्रीवत्साङ्कमिश्रा आहुः । कथं तत्रैतन्मन्निष्ठो निन्दन्तीत्यत्राह—सतामेतदगर्हितम् एतदाश्रितदोषङ्गीकरणं सतां अगर्हितम् अनिन्दितम् । अस्मत्पक्षपातानामस्थानभयशङ्किनां निन्दितत्वेऽपि परमार्थदर्शिनां कपोतादीनां च न निन्दितमिति भावः । यद्वा एवं दुष्टापरित्यागे प्रत्यवायपरिहारो वा पुरुषार्थसिद्धिर्वा पापक्षयो वेति चेदित्याह—सतामिति । सतामेतदगर्हितम् [illegible] स्वभावदोषानुसन्धानं [illegible]

सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च। ततः शुभतरं वाक्यमुवाच हरिपुंगवः ॥ ४ ॥
सै दुष्टो वाप्यदुष्टो वा किमेष रजनीचरः। ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत् ॥ ५ ॥
को नाम स भवेत्तस्य यमेव न परित्यजेत्। वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य तु ॥ ६ ॥
ईषदुत्स्मयमानस्तु लक्ष्मणं पुण्यलक्षणम्। इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः ॥ ७ ॥
अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च। न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः ॥ ८ ॥
अस्ति सूक्ष्मतरं किंचिदस्यापि प्रतिभाति मे। प्रत्यक्षं लौकिकं चापि वर्तते सर्वराजसु ॥ ९ ॥

यद्वा दुष्टजनपरिग्रहस्य शिष्टगर्हितत्वात्तत्परिहारेण तदुद्धरणमित्याशङ्क्य सत्यमेवदुष्टजनत्यागस्य शिष्टगर्हितत्वं तथापि प्रकृतविषये तस्य तत्त्वाभावात्तत्परित्यागविषयविशेषशास्त्रस्य सङ्कोचात्। दुष्टत्वादेव शरणागतस्य संरक्षणे शिष्टगर्हणा नास्ति प्रत्युत श्रेय एवेत्याह—सतामेतदगर्हितमिति। एतद् दुष्टशरणागतपरिरक्षणम्। सतां साधारण्यविशेषज्ञानामिदम्। अगर्हितं गर्हितादन्यत्। पुजनीयमित्यर्थः। सर्वज्ञस्येति काचिदशक्तिः। सर्वज्ञस्य किंचिदज्ञानं मित्रभावेनेति श्लोकेन दर्शितमिति गोविन्दवचनम् प्रत्युक्तवत् ॥ ३ ॥

४] ति० टी०—गर्हितत्वमेव ज्ञापयितुं सुग्रीवः प्राक्तनाक्षिप्तं स्वविवक्षितं दोषं विभीषणे कथयति—सुग्रीव इति। आभाष्यालप्य ततो विमर्शानन्तरम्। शुभतरं पक्षपातदोषाद्व्यधिकौ यः समर्थनरूपविधात्वे हेतुभूतौ दोषौ तत्प्रतिपादकत्वम्

रा० टी०—सुग्रीव इति। तद्वाक्यं रामवचनं विमृश्य विचार्य आभाष्य अनन्तरं च शुभतरं वाक्यं सुग्रीव उवाच ॥४॥

गो० टी०—अथ सुग्रीवो रामप्रकृतिमाकर्ण्य अतिसाहसमेतदित्यन्तं भीतभीतः प्राह—सुग्रीव इति। आभाष्य अनन्तरं। शुभतरं नीतिशास्त्ररहस्यमूलत्वात्सत्यमिति ध्वनिः। प्रत्यनिवन्धनत्वाच्च शुभतरं वाक्यमुवाच। अत्र लक्ष्मणमित्युक्तत्वादुपसंहारे सहलक्ष्मण इत्युक्तत्वाच्चोभयोरपि वचनमुभावपि प्रतिवचनं च बोध्यम् ॥ ४ ॥

५] ति० टी०—स एष रजनीचरो दुष्टो वा प्रागुक्तदोषयुक्तो वा अदुष्टो वा तद्रहितो वा तथाप्यसौ प्राज्ञैः। किं नेत्र प्राज्ञैः कृतघ्नत्वादित्याह—ईदृशमिति। प्रबलशत्रुसमागमजनितं व्यसनं प्राप्तं भ्रातरं यः परित्यजेदत्यजत् ॥ ५ ॥

रा० टी०—तदाकारमाह—सुदुष्ट इति। रजनीचर एष विभीषणः सुदुष्टो वा अदुष्टो वा किं तद्विचारो निरर्थक इत्यर्थः। अर्थं पृथक्। नन्वदुष्टत्वज्ञाने तत्सङ्ग्रहः प्रयोजनमित्यत आह—ईदृशमिति। ईदृशम् अतिप्रबलरिपुसमागमजनितं व्यसनं दुःखं प्राप्तं भ्रातरं यः परित्यजेत् स एषः यत्र परित्यजेत् तस्य एतस्य को भवेत् समये सर्वं परित्यक्तयोग्यमित्यर्थः एतेनैतदुष्टत्वस्य दुष्परिहरत्वात् अदुष्टत्वं दुर्लभमिति तात्पर्यम् ॥ ५ ॥

गो० टी०—सुदुष्ट इत्यर्धमेकं वाक्यम्। अस्माभिः पूर्वमुक्तेऽपि दोषैर्युक्तो भवतु वा मा कृतघ्नः स एष रजनीचरः किं किमर्थम् परित्याज्य एतेत्यर्थः ॥ ५ ॥

गो० टी०—कृतघ्नतामेवाह—ईदृशमिति। यं बन्धुमेष व्यसने प्राप्ते न परित्यजेत्स कस्यचित् भवेत् न कोपीत्यर्थः। भ्रातरं परित्यजन् सर्वानपि परित्यजेदेवेति भावः। ईदृशं व्यसनम् लङ्कादहनपुत्रवधादिकमाश्रम्य समुद्रतीरनिवेशपर्यन्तं व्यसनमित्यर्थः ॥ ६ ॥

६-७] ति० टी०—तस्याप्य को नाम स भवेत्, यमेष संकटे न परित्यजेत्, सम्यक्सम्मानयेदित्यर्थः। सर्वानीदृशसुहृत्परिवारकेऽयमतिकृतज्ञ इत्यर्थः। सर्वेषामसामर्थ्यं सर्वज्ञस्यानुचितम्, तथा लक्ष्मणमुद्दिश्येषदुत्स्मयमानो बालत्वेन सहजापरिज्ञानाद्वाक्यं तेनैव संमतमिति पक्षान्तरं कुर्वन्निति होवाच ॥ ६ ॥ ७ ॥

रा० टी०—यानरेति। वाक्यं अत्र सर्वान् लक्ष्मणं चोद्दिश्य ईषदुत्स्मयमानः काकुत्स्थः इदं वाक्यमुवाच। ईषदुत्स्मयमानः अनेन सदभिप्रायः सर्वोत्तमेन न ज्ञात इति सूचितम् ॥६॥

गो० टी०—अथ लक्ष्मणमभिप्रेत्य सुग्रीवस्य भीतिमपनेतुं हनूमदादीनां तेजोवृद्धये—वानराधिपतेरिति। सर्वं लोकोत्तरं ईषदुत्स्मयमानः धर्मरक्षणमिषं मम परमभक्तिं शरणागतसंरक्षणव्रतं च सम्यगपरिज्ञाय लौकिकचिह्नदर्शनमिति मन्वानं कुर्वन् ॥ ७ ॥

८] ति० टी०—सुग्रीवविभीषणपरिहाराय तद्वाक्यं प्रशस्योत्तरमाह—अनधीत्येति। हरीश्वरः सुग्रीवो यदुवाच ईदृशं वाक्यं वक्तुं न शक्यम् एतेन तद्वचनस्य सयुक्तिकत्वं ध्वनितम् ॥ ८ ॥

गो० टी०—एवं तद्वचनमुपलालयति—अनधीत्येति ॥ ८ ॥

९] ति० टी०—अथैतदुपर्यपि मम किंचिदतीत्याह—अस्तीति। अत्र भ्रातृपरित्यागरूपदोषोद्भावनेऽपि सर्वराजसु प्रत्यक्षं प्रत्यक्षसिद्धं लौकिकमन्तरः सर्वलोकप्रसिद्धं विद्यते मां प्रति भाति च तत्सूक्ष्मतरं किंचिदर्थरूपमस्ति ॥ ९ ॥

रा० टी०—नन्वं तर्हि सुग्रीवोक्तिं स्वीकृत्य विभीषणस्य

---

१ वेति गो. पाठः। २ वेति गो. पाठः। ३ यदवेति गो. पाठः। ४ मे इति गो. पाठः ५ वेति गो. पाठः। ६ विद्यत इति गो. पाठः

अभिप्राप्तास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः । व्यसनेषु प्रहर्तारस्तस्मादयमिहागतः ॥ १० ॥
अपापास्तत्कुलीनाश्च मानयन्ति स्वकान्हितान् । एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः ॥ ११ ॥
यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च । तत्र ते कीर्तयिष्यामि यथाशास्त्रमिदं शृणु ॥ १२ ॥
न वयं तत्कुलीनाश्च राज्यकाङ्क्षी च राक्षसः । पण्डिता हि भविष्यन्ति तस्माद्गच्छो विभीषणः ॥ १३ ॥

ज्ञनामित्यत आह—अस्तीति । अत्र विभीषणविषये सूक्ष्मतरम् अतिविचारासह्यं यदस्ति तत् किंचिद् मा मां यथा यथातत् प्रतिभाति महद्बुद्धिविषयो भवति यत् सर्वेषामस्य प्रत्यक्षं लौकिकं जनान्तरप्रत्यक्षं च वर्तते ॥ ९ ॥

गो० टी०—अस्तीति । सूक्ष्मतरं किंचित् अर्थजातमिति शेषः । तदेवार्थस्वरूपं विशिनष्टि—प्रत्यक्षमिति । प्रत्यक्षं दृष्टम् लौकिकं लोकसिद्धम् यत्सर्वेषामपि राजपुरुषाणां मे प्रतिभाति च तत्सूक्ष्मतरं किंचिद्धर्मस्वरूपमस्तीति संबन्धः ॥ ९ ॥

१०] ति० टी०—तदर्थरूपं प्रतिपादयितुं तदुपयुक्तां लोकस्थितिमाह—अभिप्रा इति । राज्ञामभिप्राः अत्रत्यो द्विषा कीर्तिताः । तत्कुलीना ज्ञातयः प्रातिदेश्या आसन्नदेशवासिनश्चेति ते द्विविधा अपि स्वविनोपेक्षातेः भाविनेऽस्मिन् आसन्नदेशवर्तिनश्च व्यसनेष्वाध्यात्मिकादित्रिप्रकारकेषु तस्य प्रहर्तारो भवन्तीति प्रसिद्धम् । अस्तु, किं तत इत्यत्राह—तस्मादिति । ज्ञातिप्रकारस्वपीडाप्रहृत्तज्ञातिभयात्तस्मात्राणार्थमित्यर्थः । यद्वा तस्माद्व्यसनप्रहर्तृज्ञातित्वाद्व्यसनेन रावणं प्रहर्तुमेव विभीषण इहागत इत्यर्थः ॥ १० ॥

रा० टी०—तदेव स्फुटयन्नाह—अभिप्रा इत्यादिभिः । तत्कुलीनाः स्वकुलप्रसूताः प्रातिदेश्याः तत्समीपदेशवासिनश्च [illegible] समुदितविषये अत्रवः कीर्तिताः अत एव व्यसनेषु दुःखसमये प्रहर्तारो भवन्ति तस्मात् ज्ञातिरूपपरिभवात् अत्रत्यैरत्र भवद्भिः सह तेन शत्रुनिष्ठप्रीतिविषयत्वेन यद्यपि मिष्टमागच्छेत् तदाप्यधिक दुःखजन्यात्विरोधसंभावना संभवेत् अयं तु पापाचरणरहितबन्धुत्वं स्वविपरीताचरणवत्त्वाद्यं निःसारित इति न दोषवानिति सूक्तिरत्नम् ॥ १० ॥

गो० टी०—तदेवार्थरूपं प्रपञ्चयन्नाह—अभिप्रा इति । तत्कुलीनाः ज्ञातयः प्रातिदेश्याः समनन्तरदेशाधिपाश्च व्यसनेषु [illegible] प्रत्यक्षेण अभिप्राः अत्रवः कीर्तिताः । तस्माद्भवद्भिरत्रत्यैरिति शेषः ॥ १० ॥

११] ति० टी०—अथ शत्रुनाशप्रयोजकमपि न ज्ञातित्वमत्र, किं तु [illegible] इत्याशङ्क्याह—अपापा इति । अपापाः परस्त्रीलक्षणपापचिन्तारहिताः । धर्ममार्गेण परस्त्रीविषयेऽनुत्सुका ज्ञातयो ये ते स्वकान्हितान्मानयन्ति । एष एतादृशो प्रायो बाहुल्येन लोके उपलक्ष्यते । नरेन्द्राणां तु शोभनादपि हितेभ्यपि ज्ञातिः शङ्कनीय एव । महत्तरराज्यैश्वर्यलोभसंभवात् । कुलक्षयादनिष्टचिन्तया भरतमाशङ्क्य [illegible] संभाव्य तं त्यक्त्वायमागतः । किं च 'यो हिंसार्थमभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन्नोत्तर' इत्यापस्तम्बोक्ते रावणनाशार्थमागमनेऽप्यस्य न दोष इत्याशयः ॥ ११ ॥

रा० टी०—ननु ज्ञातीनां त्रिपुटे लोकव्यवस्थासिद्धान्तदिशेदानां निरवलम्बनत्वमनिरियत्त आह—अपापा इति । अपापाः पापाचरणरहिताः तत्कुलीनाः स्वकुलप्रसूताः जना स्वकान् स्वकुलोद्भवानित्यर्थः हितान् मानयन्ति नरेन्द्राणां तु शोभनाः निर्दोषोऽपि एष ज्ञातिः प्रायः शङ्कनीयः तद्विनाशे तन्मैश्वर्यस्य तेन प्राप्तव्यत्वेन ज्ञातेः शङ्कनीयत्वात् इत्यनेषु तथाचरणाभावस्तु [illegible] शङ्कनीयत्वेनैव वक्ष्यति ॥ ११ ॥

गो० टी०—व्यसनिनं राजानं प्रहर्तुं ज्ञातयः समर्थाः कालान्तरमसंभाव्यम्—अपापा इति । अपापाः पापाचरणरहिताः तत्कुलीनाः तत्कुलप्रसूताः जना स्वकान् ज्ञातीन् मानयन्ति तेषामपि नरेन्द्राणां शोभनो गुणवानेव ज्ञातिः अयं शङ्कनीयः कस्मै पापचरणिष्यः शोभनोऽपि प्रायेण शङ्कनीयः पण्डितस्य नरेन्द्रस्य ताद्रूप्ये ज्ञातिः शङ्कनीय इति किमु वक्तव्यम् । अतोऽयं रावणेन शङ्कितः तेन सह विभीषणस्य [illegible] ॥ ११ ॥

१२] ति० टी०—[illegible] परिग्रहे रज्वप्रहारदोष अनन्तरमस्य [illegible] इति । अरिबलस्य शत्रुपक्षस्यात्मनि परिग्रहे यो दोषः स्वस्यात्मपक्षे उपकरणत्वेन यथाशास्त्रं यथात्मात्मपुरुषं कीर्तयिष्यामि तच्छृणु ॥ १२ ॥

रा० टी०—भ्रातृत्वादेतुकं नित्यं संभाव्यं निरस्य तदुक्तविभीषणपरिग्रहदोषं निरस्यन्नाह—अथ इति । त्रिपुटरूपायां यो दोषस्त्वयोक्तस्तत्र तद्विषये यथाशास्त्रं ते कीर्तयिष्यामि इदं मत्कीर्तितं [illegible] शृणु ॥ १२ ॥

गो० टी०—एवं रावणपरित्यागे हेतुमुक्त्वा स्वापरित्यागे हेतुं वक्तुं प्रतिजानीते—अस्तीति । अरिबलस्य विभीषणस्य दोषः को नाम स भवतस्तस्यादिनोक्तः । तत्र विषये । यथाशास्त्रं नीतिशास्त्रमनतिक्रम्य इदमुत्तरं—न वयमिति । न वयं तत्कुलीनाः राक्षसराज्यानर्हाः अस्माकं तद्राज्ये आकाङ्क्षाभावात् । मम रावणस्थेव तस्मिन्नरित्वशङ्कातिभक्तिर्नास्ति अतो नास्मान् त्यक्ष्यतीति भावः । किंच राक्षसो विभीषणस्तु राज्यकाङ्क्षी अस्वन्मुखेन रावणं घातयति अतः स्वकार्यविघातभयादपि नास्माकमपकारं करोतीत्यर्थः ॥ १३ ॥

१३] ति० टी०—[illegible]

अन्योन्यस्याश्च महतश्च ते भविष्यन्ति संगताः । प्रेतादश्च महानेषोऽन्योन्यस्य भयमागतम् ॥
इति भेदं गमिष्यन्ति तस्मात्त्वांस्तो विभीषणः ॥ १४ ॥
न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः । लक्ष्मणो वा पितुः पुत्रात् सुहृदो वा भवद्विधाः ॥ १५ ॥

ज्ञातयः चाप्राप्तिदेश्याश्च न भयामः अतोऽस्माभ्योद्विजन्तः भावान्नास्माकं प्रहारोऽनेन कार्यः, किं तु निजराज्यनेन स्वज्ञातिनिरासमस्मत्सुखेन संपाद्य कालुनि तदाह—राज्यकाङ्क्षीति अतो नेयमीश्वरविरोधं करिष्यति । नन्वेवमपि प्रधानत्वात्तावेव कथमेनं विचारकरणमत आह—दृष्टिहता इति । उत्कोचनव्यवहारेणेव्यर्थः परिहतो भविष्यन्तेव । एवं वैकल्यन्तेऽपि यदा कुम्भकर्णोऽपि तावत् रावणश्चातिराजस, एतमयमेवमार्थिकत्वेनेत्यर्थः इति भावः । उपसंहरति—तस्मादिति ॥ १३ ॥

रा० टी०—प्रतिज्ञातमाह—नेति । राज्यं हि लौकिकाः राज्यकाङ्क्षी यं तु न तत्कृतेनाः चकारस्य न लौकिकत्वात्, तेनायोग्यत्वात्मभ्रातृकाङ्क्षीति सचिवम तेन च न तद्वहविषया इति व्यतिरेकम राज्यकाङ्क्षीत्वेन सर्वार्थोपातेच्छा तस्मिन्नतरसि सूचितम तेन मैवंरूपं वक्तव्यं इत्यर्थः । ननु तमःप्रधानत्वात् राक्षसानां विवेकाभावात् ईदृग्विधेनेऽपि प्रोद्यन्नेवाह—पण्डिता. विवेकिनोऽपि भविष्यति भवन्ति भविष्यन्ति इत्येव तमउद्रेकात् तेषां ६२ तमःप्रधानेऽपि संस्कारवशात् क्वचित्वात् विवेको भवतीति भावः । तस्मादेवंविभीषणो वाच्यः ॥ १३ ॥

गो० टी०—ननु अन्ये राक्षसाः कथमेवं विपरीतबुद्धयो न इत्याशङ्क्य नार्थं पौरुषम इत्याह—पण्डिता इति । अतएवो वाक्यम । राक्षसा अपीत्यर्थः ॥ १३ ॥

१४] ति० टी०—उक्तहेत्वनुवादपूर्वं वाक्यत्वमुपसंहरति—अन्योन्यस्या इति सार्धेन । ते ज्ञातव्याऽन्यथा अकालनिग्रहवन्त इति यावत् । प्रहृष्टा अन्योन्यं संतृष्टाश्च वैरिणा संगताः परस्परमित्रिता भविष्यन्तीति सर्वलोकप्रसिद्धम् । तेभ्योऽन्ये तूक्तविपरीता इति प्रामुकरीत्या पापत्वख्यापनाभादिना भेदं गमिष्यन्ति, ततोऽनन्तरमन्य ज्ञातिलोकेऽपि लोकप्रसिद्धः प्रणादो युद्धरूपकोलाहलो भवति, अन्योन्यस्यो न्योन्यतो भयं त्रासतं भवतीति लोकस्थितिर्यतस्तस्मात् प्रेतो-वदकालमरणगतसौधात्रोऽपि केनचिन्निमित्तेनाथ प्राप्तैः अन्यमागतो त्रास एवेति कर्तव्याख्या । तीर्थस्तु—प्रेत एवोऽस्य इति पठित्वान्य भीतस्यैवैष महान्प्रणादः श्रूयते, अतस्ततो बलवतो रावणादस्य विभीषणस्य भयमागतमित्यात्मत्राणार्थमागतः परिव्राज्य एवेत्यर्थः इतरस्तु प्राक्तनेव व्याख्येयमित्याह ॥ १४ ॥

रा० टी०—अहणे एव हेत्वन्तरं वदन्नाह—अन्यथा इति । अहृता अस्माभिर्मिलितास्ते विभीषणप्रभृतयः अन्यथा [illegible] प्रहृष्टा भविष्यन्ति अत एव अन्योन्यस्य राक्षसेषु परस्परस्य भयागतमेवः प्रणादः कोलाहलश्च भविष्यति इतिहासेभेदं रिपाये गमिष्यन्ति राक्षसा इति एवः उत्पादितोभीषणो वाच्यः । 'प्रहृष्टाश्च ते' ति पाठे एवः विभीषणस्यहृतहेतुकः प्रणादः अन्योन्यस्य राक्षसेषु एव [illegible] भयागतं भविष्यति अत एव [illegible] भविष्यन्ति [illegible] ॥ १४ ॥

गो० टी०—एवं [illegible] विरुद्धयानवमेवं प्रति [illegible] विभीषणे अन्यथा इति सार्धश्लोकेन । ते ज्ञातयः [illegible] भविष्यन्त्यन्योन्यसंगताः [illegible] । अतएव [illegible] भेदं गमिष्यन्ति [illegible] । अतश्च भेदात्मके महान् प्रणादः [illegible] एव च भयागतं [illegible] ॥ १४ ॥

१५] ति० टी०—एवं [illegible] राक्षसेन विरुद्धयानवमेवं प्रतिबोधयन्तं विभीषणं अन्यथा इति सार्धश्लोकेन । ते ज्ञातयः [illegible] भविष्यन्त्यन्योन्यसंगताः [illegible] । अतएव [illegible] भेदं गमिष्यन्ति [illegible] । अतश्च भेदात्मके महान् प्रणादः [illegible] एव च भयागतं [illegible] ॥ १४ ॥

१५] ति० टी०—एवं [illegible] राक्षसेन विरुद्धयानवमेवं प्रतिबोधयन्तं विभीषणं अन्यथा इति सार्धश्लोकेन । ते ज्ञातयः [illegible] प्राप्तकालेषु [illegible] न तद्वत् । महिता ॥ एव [illegible] विरुद्धयानवमेवं प्रतिबोधयन्तं, स्वयं च भविष्यन्त्यन्योन्यसंगताः परस्परं [illegible] संगताः परस्परमित्रिता भविष्यन्तीति सर्वलोकप्रसिद्धम् । तेभ्योऽन्ये तूक्तविपरीता इति प्रामुकरीत्या पापत्वख्यापनाभादिना भेदं गमिष्यन्ति, ततोऽनन्तरमन्य ज्ञातिलोकेऽपि लोकप्रसिद्धः प्रणादो युद्धरूपकोलाहलो भवति, अन्योन्यस्यो न्योन्यतो भयं त्रासतं भवतीति लोकस्थितिर्यतस्तस्मात् प्रेतो-वदकालमरणगतसौधात्रोऽपि केनचिन्निमित्तेनाथ प्राप्तैः अन्यमागतो त्रास एवेति कर्तव्याख्या । तीर्थस्तु—प्रेत एवोऽस्य इति पठित्वान्य भीतस्यैवैष महान्प्रणादः श्रूयते, अतस्ततो बलवतो रावणादस्य विभीषणस्य भयमागतमित्यात्मत्राणार्थमागतः परिव्राज्य एवेत्यर्थः इतरस्तु प्राक्तनेव व्याख्येयमित्याह ॥ १४ ॥

रा० टी०—अहणे एव हेत्वन्तरं वदन्नाह—अन्यथा इति । अहृता अस्माभिर्मिलितास्ते विभीषणप्रभृतयः अन्यथा [illegible] प्रहृष्टा भविष्यन्ति अत एव अन्योन्यस्य राक्षसेषु परस्परस्य भयागतमेवः प्रणादः कोलाहलश्च भविष्यति इतिहासेभेदं रिपाये गमिष्यन्ति राक्षसा इति एवः उत्पादितोभीषणो वाच्यः । 'प्रहृष्टाश्च ते' ति पाठे एवः विभीषणस्यहृतहेतुकः प्रणादः अन्योन्यस्य राक्षसेषु एव [illegible] भयागतं भविष्यति अत एव [illegible] भविष्यन्ति [illegible] ॥ १४ ॥

गो० टी०—एवं [illegible]

एवमुक्तस्तु रामेण सुग्रीवः सहलक्ष्मणः। उत्थायेदं महाप्राज्ञः प्रणतो वाक्यमब्रवीत् ॥ १६ ॥
रावणेन प्रणिहितं तमवेहि निशाचरम्। तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ १७ ॥
राक्षसो जिह्मया बुद्ध्या संदिष्टोऽयमिहागतः। प्रहर्तुं त्वयि विश्वस्ते विश्वस्ते मयि वाऽनघ ॥ १८ ॥
लक्ष्मणे वा महाबाहो स वध्यः सचिवैः सह। रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ १९ ॥
एवमुक्त्वा रघुश्रेष्ठं सुग्रीवो वाहिनीपतिः। वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ २० ॥
स सुग्रीवस्य तद्वाक्यं रामः श्रुत्वा विमृश्य च। ततः शुभतरं वाक्यमुवाच हरिपुङ्गवम् ॥ २१ ॥
स दुष्टो वाऽप्यदुष्टो वा किमेष रजनीचरः। सूक्ष्ममप्यहितं कर्तुं मम शक्तः कथंचन ॥ २२ ॥

मामनुत्सृज्य तवैव राज्यं त्वमेव गृहाण अहं त्वदास्यं करिष्यामीति वदन्भरतादन्यः कश्चिदस्ति किमिति भावः। एवंविधप्रसक्त्यभावाल्लक्ष्मणस्यानुपादानम्। अत्र दृष्टान्तमाह—मद्विधा इत्यादिना। मद्विरहमावेण लोकान्तरं गतः पिता। तनुजापितृमानस्मत्सदृशः कश्चिदस्ति किमित्यर्थः। यद्वा मद्विधाः पितुः पुत्राः सन्तु वा मा वा भरतसमा भ्रातरस्त्वत्समाः सुहृदश्च न सन्तीत्यर्थः। सुहृदो वा भवद्विधाः। वर्षरात्रसमये स्थितेन मयात्यन्तकुपितेन लक्ष्मणेन चात्यन्तं परुषमुक्तेऽपि अस्मासु प्रेमातिशयमेव प्रकटयन् त्वत्समः को वास्तीति भावः। यद्वा मद्विधा वा पितुः पुत्रा न भवन्ति। निरतिशयपितृवात्सल्यभृतोऽस्मत्तुल्यो वास्तीत्यर्थः ॥ १५ ॥

१६] ति० टी०—एवं न्यायतो विभीषणस्य भ्रातृत्वं प्रतिपादितेऽपि प्रीत्यतिशयेनानिष्टसंभावनया स्वभक्तमेव सभ्यमित्याशयेनाह—एवमिति। सहलक्ष्मण इत्यनेनोभयोरैकमत्यं दर्शितम्। उत्थाय प्रणत इत्यन्वयः ॥ १६ ॥

रा० टी०—एवमिति। रामेण एवमुक्तः प्रणतः गृहाप्राज्ञः सर्वं न भवन्तीत्युक्त्या कश्चिद्वर्तनीति रामाभिप्रायाभिज्ञः सहलक्ष्मणः अतिस्नेहवत्त्वेन लक्ष्मण इतः सुग्रीवः उत्थाय इदमब्रवीत् ॥ १६ ॥

गो० टी०—अथ सुग्रीवो नीतिमुखेन विभीषणस्य त्याज्यतां प्रतिपादयितुमशक्तः परिग्रहे चाविदितभावोयं रामे कमनर्थमुत्पादयिष्यतीति प्रेमवशेन व्याकुलो विभीषणशरणागतिं निष्फलयन् लक्ष्मणेन स्वेन क्रियमाणं शरणागतिसिद्धये प्रकटयन्निव-यमानः शरणागतिपूर्वकं विभीषणनिग्रहं प्रार्थयते—एवमित्यादिचतुर्भिः श्लोकैः ॥ १६ ॥ १७ ॥

१७] ति० टी०—प्रणिहितमवेहि. न तु वैरस्यादागतमित्यर्थः। तद्भावमविभाव्यमित्याशयः ॥ १७ ॥

रा० टी०—तत्रा[1]ह—रावणेत्यादिभिः। तं विभीषणं रावणेन प्रणिहितं प्रेषितमवेहि अत एव तस्य विभीषणस्य निग्रहं दण्डं क्षमं योग्यमहं मन्ये ॥ १७ ॥

१८] ति० टी०—उक्तमेवाह—जिह्मयेति। कुटिलयेत्यर्थः। विश्वस्ते मयीत्युक्तिः स्वयमनादरेऽपि त्वाश्रितव्यसनमसहन्तुदमिति मत्त्वेति बोध्यम् ॥ १८ ॥

१९] ति० टी०—तादृशस्याप्यस्य दुष्टित्वे हेतुः रावणभ्रातृत्वम् ॥ १९ ॥

रा० टी०—तदेव स्फुटयन्नाह—राक्षसइति। राक्षसः जिह्मया कुटिलया बुद्ध्या युक्तो भवतीति शेषः अतः संदिष्टोऽस्मद्बलज्ञानाय भ्रात्राऽज्ञप्तः सन् त्वदादौ प्रहर्तुमयमिहागतः अतः रावणस्य सः प्रसिद्धो भ्राता सचिवैः सह वध्यः अर्थ चतुष्टयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०—राक्षस इत्यादि। अत्र मयि लक्ष्मण इति स्वस्य लक्ष्मणस्य चानर्थकथने स्वव्यसनादपि स्वाश्रितव्यसनं रामस्यात्यन्तासहनदुरमिति तत्प्रदर्शनेन विभीषणापरित्यहसमर्थनार्थम् ॥ १८ ॥ १९ ॥

२०] ति० टी०—मौनमुपागमत्। त्रिवाचोतम, अतोऽधिकं प्रभौ न वक्तुं युक्तमित्याशयेनेति शेषः ॥ २० ॥

रा० टी०—एवमिति। सुग्रीव एवमुक्त्वा मौनमुपागमत् ॥ २० ॥

गो० टी०—एवमुक्त्वेति। मौनमुपागमत् प्रणयरोषादिति भावः ॥ २० ॥

२१] ति० टी०—विमृश्य च रन्ध्रप्रहारदोषः सति संभवेऽप्यस्मास्वकिंचित्कर इति विचार्य ॥ २१ ॥

रा० टी०—स इति। रामः सुग्रीवस्य वाक्यं श्रुत्वा विमृश्य तत्त्वतो विचार्य च शुभतरं वाक्यमुवाच ॥ २१ ॥

गो० टी०—अथ रामः स्वस्य सर्वशक्तित्वप्रदर्शनेन सुग्रीवस्यातिशङ्कां निवार्य शरणागतरक्षणरूपस्य स्वव्रतस्य धर्मशास्त्रसिद्धत्वात्तस्यापरित्याज्यतां प्रतिपादयति—सुग्रीवस्य त्विति[2]त्यादिना ॥ विमृश्य मयि प्रेमातिशयेनैवमुक्तमिति विचार्य ॥ २१ ॥

२२] ति० टी०—तमेव निश्चयं दर्शयति—स दुष्ट इति। स एष दुष्टोऽदुष्टो वा यथाकथंचिदस्तु, अथापि मम सूक्ष्ममप्यहितं कर्तुं कथंचन कथमपि शक्तः किम् न कथमपि शक्त इत्यर्थः ॥ २२ ॥

रा० टी०—तदाकारमाह—स इति। स आगच्छतु एव रजनीचरः दुष्टोऽदुष्टो वा अत्रमेतद्विचारेण दुष्ट एव भवत्विति[3]त्यर्थः तथापि सूक्ष्मं किंचिदपि ममाहितं कर्तुं कथञ्चन केनापि

१ विभीषणमिति गो. पाठः। २ तथ इति गो. पाठः। ३ सुग्रीवस्य त्विति गो. पाठः। ४ [illegible] इति गो. पाठः।

पिशाचान्दानवान्यक्षान्पृथिव्यां चैव राक्षसान् । अङ्गुल्यग्रेण तान्हन्यामिच्छन्हरिगणेश्वर ॥ २३ ॥
श्रूयते हि कपोतेन शत्रुः शरणमागतः । अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ २४ ॥
स हि तं प्रतिजग्राह भार्याहर्तारमागतम् । कपोतो वानरश्रेष्ठ किंपुनर्मद्विधो जनः ॥ २५ ॥

प्रकारेण शक्तो न किंचित् कथञ्चन केनचित्प्रकारेण शक्तो न वेत्यर्थः काकुः ॥ २२ ॥

गो० टी०—सुग्रीवस्य भयं निवर्तयति—सुदुष्ट इति । स एष रजनीचरः सदुष्टो वा अदुष्टो वा भवतु किं तत्परिचर्यते । तदेव विवृणोति—सूक्ष्ममर्मेति । सूक्ष्ममर्मणीत्येकः साक्षात्पक्षे मदाश्रितेषु मांसलेषु निर्मांसेष्वपि न शक्त इति भावः ॥ २३ ॥

२३] ति० टी०—कुत इत्याक्षिप्तमित्यादि । अत्र प्रतिहत्यभावमाह—पिशाचानिति । अङ्गुल्यग्रेण अङ्गुल्या अग्रभागेणापि अहो सङ्कल्पमात्रेणैवेत्यर्थः । हन्यामित्यत्र हेतुगर्भत्वमाह—इच्छन्निति । यद्वा । विरोधिशमनहिमानं तावत्तिर्यक्प्रभावं प्रकटीकर्तुमिच्छन्नहं त्वां तत्र नैव दूरीकुर्यामित्यर्थः । देवभावोपलक्षितविभीषणेऽपि स्वयमस्य संशयं दर्शयति तत्परिपालनाय स्वविक्रमभावं स्वकर्तृत्वान्तर्धाय अङ्गुल्यादिदायां स्थित्या तद्भावप्रकटनायैव सीतानिर्योगप्रयत्नादनङ्गत्वाद्बलसहायसत्यम् वस्तुतो न व्यतिरिक्तसहायापेक्षा मम, मनुष्याणां संसारमण्डलादारभ्य तद्भयवहारकलितेति भावः ॥ २३ ॥

२३० टी०—तत्र हेतुमाह—पिशाचानिति । यच्छक्तिरुच्छन् तदा पिशाचादीन् अङ्गुल्यग्रेण इच्छामात्रेणैवेत्यर्थः हन्याम् ॥ २३ ॥

गो० टी०—कथं न शक्त इत्याकाङ्क्षायां स्वशक्तिं श्रयति—पिशाचानिति । पृथिव्यां निवसतीति शेषः । यं तावत्सकलैः स्वकीयैः सह तिष्ठ अहमेक एव पर्याप्त इत्याशयेनाह—अङ्गुल्यग्रेणेति । अङ्गुल्यग्रेण शस्त्राद्यादिप्रसङ्गाभावेन अङ्गुल्यग्रतन्निरपेक्षेण एकस्यामप्यङ्गुल्यामंशान्तरव्यापारपर्यायेतेन तत्रापि, ऋतपादादिविशेषविवक्षाभावेन अङ्गमात्रेण हन्यां हन्तुं शक्त न केवलं लङ्कामात्रनिवासिनो राक्षसान् किन्तु स्थानान्तरनिवासिनोपीति विवक्षया पृथिव्यां चैवेति निर्देशः न केवलमेकजातीयानामेव लक्ष्यत्वं किन्तु सर्वेषामपीत्यभिप्रायेणाह—तानिति । तर्हि लङ्कामात्रनिवासिनो राक्षसान्किमिति न हंसीत्यत्राह—इच्छन्निति । इच्छाभावादेव तद्भावाभावः न स्वशक्त्येति भावः ॥ २३ ॥

२४] ति० टी०—एवं रन्धे प्रहार्तारमिति दूरीकृत्य शरणागतरक्षणं परमो धर्म इति कपोताख्यानेन दर्शयति —श्रूयते हीति । भार्याहर्तृत्वात्कपोतशत्रुर्व्याधः शरणं गृहं स्वनिवासभूतोटजमागतो यथान्यायमर्चितोऽतिथ्यनयनशीतनिवारणाद्युपचारैर्मानितश्च प्रीतिः स्वैर्मांसैर्निमन्त्रितो भोजनाय प्रार्थितः २४

घातकत्वेन रिपुत्वेपि कपोतेन यथान्यायमर्चितः शीतनिवारणसामग्र्यादिभिः सत्कृतः स्वमांसैः स्वशरीरपलैर्निमन्त्रितश्च ॥ २४ ॥

गो० टी०—एवमस्मात्पकारशङ्का नास्तीत्युक्त्वा भवतु नायमपकारी तस्मादेतावत्पकारात्मम प्राणा गच्छन्तु वा कथमपि नायं निराश्रयः नापि परित्याज्यः किन्त्वयमस्य एवेति कपोतोपाख्यानेन प्रतिपादयति—श्रूयते हीति । प्रतिहत्यमशक्यत्वमित्यर्थः । कपोतेन धर्मांशिकारः अन्येन तिर्यङ्मात्रेण एतेनाप्यनुष्ठितत्वे किमु वक्तव्यमस्मात्मम । कपोतेन एतेनासहायेन कृतं किमुत ससहायैरस्माभिः अयं कपोतस्य शत्रुः स्वयं भार्यापहारी वैरी निर्भीकणत्वस्वभावं न त्यजति तथाप्यरण्ये विभक्तत्वौरूपेण शरणमागतः कपोताहरणादृष्टस्थलं यदृच्छया प्राप्तः । 'सोऽयमिह शिरसा वक्ष्याम्यहं वनस्पतिम् । शरणं हि गतोऽस्मीति तन्निहाभिनीम्' इति स्वाभिप्रायं वनस्पतिदेवतां प्रत्यवोचत न तु कपोतम् । विभीषणस्तु राघवे शरणं गत इति अत्यन्तकृतस्थरपुरावृत्तसंभावितशरणागतवत्सलत्वगुणं पुरस्कृत्य मां प्राप्तः, यद्वा शरणं आश्रितः परित्राणं गृहनिष्क्रयत्वेन वनस्पतिरूपं गृहं प्राप्तः न तु शरणागतिं चक्रे । शरणं गृहरक्षित्रोरित्यमरः । अश्रितत्वं त्यक्तवात्सहजशत्रुत्वात् भार्याहर्तृत्वाच्चाशक्यमिति पूर्वोक्तस्य महयोपायान्वेषणस्य च कर्तव्यत्वे प्राप्तेष्वपि देवतेन मत्या शीतनिवारणादिभिर्मानादि पूजितः । अर्चे तु वध्यतामेव तीक्ष्णेन दण्डेन सूचिवेधं संहरतनुवल्लिपर्यन्तं तमर्चयामः यथान्यायम् । यावत्पूजितेति क्रियाशेषम् इत्र समर्थादरणान्तर्विषादवेशं विना आहृतः बद्धा प्रियाचनादिभिः वञ्चनां विनेत्यर्थः । स्वैश्च मांसैर्निमन्त्रित । यद्वा कतिचिदाहारयानीय स्वकीयशरीरव्यान्तरेषु कतिपयानि पक्षीरैर्दत्वा तृप्त्या नोपचकार किन्त्वन्यैरात्मसंबन्धिभिन्नजातीयैः प्राणैरपार्थं धर्मसाधनमित्यादरणीयैः शरीरमांसैः शरणमुद्दिश्य इदमेकं महत्तप इति मत्वा बद्धायत्नात् पक्षिन् स्वनियन्त्रितः भोजनार्थं नियोजितः २४

२५] ति० टी०—एवंरीत्या स हि सोऽपि तिर्यग्जातुरपि भार्याहर्तारं शरणागतं प्रतिजग्राह नोपेक्षितवानिति शेषः किं पुनर्मद्विधो जनः सदसद्धर्महस्यवेत्ता कृतियो मूलाऽकृतापकारं शरणागतं न प्रतिगृह्णीयादित्यर्थः । शरणागतं कारुण्यापारेरसंदिग्धमेवेत्याशयः ॥ २५ ॥

२३० टी०—तर्हि किं तेनेष्यते आह—इच्छन्निति । स हि

ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा । शृणु गाथा पुरा गीता धर्मिष्ठा सत्यवादिना ॥ २६ ॥
बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् । न हन्यादानृशंस्यार्थमपि शत्रुं परंतप ॥ २७ ॥

अथाह तर्हि मद्विधः उत्तमकुलप्रसूत इत्यर्थः यदि प्रतिगृह्णाति तर्हि किं दुष्करमेवेत्यर्थः ॥ २५ ॥

गो० टी०—उक्तमेवार्थं दृढीकुर्वन् स्वस्य कैमुत्यमाह—स हि तमिति । स कपोतः वयमिव धर्मानुष्ठानयोग्यजातौ शरण्यवंशे वा नोत्पन्नः तं जात्या स्वभावेन च क्षुद्रसमाचारम् पक्षिणं कालसंमित इत्यलिकपक्षिजातिविरोधिनं तस्य कपोतस्यान्तिकं प्रति यदृच्छयाभ्येत्य पतितम् उपायान्तरशून्यम् विपरीतानुष्ठानैकनिरतम् अशुचाप्लवेन वा अशुचुलवादधर्मेण वाऽऽत्मानं पतितं प्रतिजग्राह स्वात्मत्वभावेनाङ्गीकृत्यावोचत् स्म । पुनश्लोके मद्विधेति सामान्येनोक्तमर्थं तद्धेतुप्रदर्शनेन विशिनष्टि—आर्यो हीत्यादिना । यमेव शरणं अत्यन्तवैदग्ध्यमात्मनि कार्यं दर्शयितुमाह । आत्मनः अस्पाङ्गीकाराय इतः शुपादानुष्ठानं कपोतावासद्रुमस्थं प्रत्यागमनमार्गमेव तावेना वनस्थनिवेदनं प्रत्यक्षं शरणशब्दं कपोतो नाश्रौषीत् । अत्र स द्वीन्द्रनेव कपोतानुवादे उक्तेऽपि पुनः कपोतग्रहणं क्रियाकर्तृविशेषणत्वात् इत्र नार्थं परिगृहीतकपोतशरीरो देवो मुनिर्वा किन्तु प्राकृतः कपोत इति ज्ञापनार्थम् । अयं कपोतः प्राकृतधर्मविधेर्योग्यतेत्यादिवत्तिर्यक्त्वेऽप्येवंधर्मानुष्ठानयोग्यो नत्वत्र कपोत इत्यनेन तिर्यक्त्वं शास्त्रानधिकारित्वं बुद्धिमत्त्वं च सूचितम् । अतश्चैव पुनरप्येकस्तिर्यक् शत्रुं किरातं रक्षेत्तेनां कथा श्रुत्वा । वानरः कश्चिच्छाखाद्रौतं स्वावासद्रुमशाखागतं किरातं स्वक्षं तदानीं वृक्षमूलस्थो व्याघ्रस्तस्मिन्वानरे क्षुधं निषादं समीक्ष्य त्वां रक्षामि वानरं पातयेत्युवाच ततः पार्श्वकैरितः किरातः स्वरक्षणकारिणं वानरं पातयामास अनन्तरं वानरं पतितं गृहीत्वा व्याघ्रः त्वां जग्धुं खोपकारिणं निषादं जहीति मनुष्यमांसकुत्सितत्वादुवाच । ततो धर्मविन्मा वानरः प्राणात्ययप्रदात्यादरं कृतज्ञतां कृत्वा व्याघ्रमुत्तरतरमारुह्य स्वस्यापकर्तारं किरातं पक्षाभ्यां गाढतरं तावत्त्रिजवाद्यवस्थितिर्हेतुना शरणागत इत्यरक्षत् । अथवानरापि पक्षिणः स्वजातिधर्मं इति शरणागतरक्षणं किमावलम्बसे किं पुनर्मद्विधो जनः । कपोतचरितं पश्यतां मादृशां किं वक्तव्यम् । मद्विधः शरणागतरक्षणाय स्वयमिक्ष्वाकुवंशे रघुवंशे जातः । पक्षिवैलक्षण्यानि लोकस्य चरता हितम् । पाण्डुरस्यातपत्रस्य छायायां जगतिं मनोरथकरीत्या लोकरक्षणदीक्षितस्य दशरथस्य पुत्रः क्षत्रियविद्याभिज्ञादिशिष्यः महायोगिना जनकेन कुलसंबन्धं रामो विग्रहवान् धर्म इति प्रशिष्टः मर्यादानां च लोकस्य कर्ता कारयिता च स इति सर्वलोकानुकृतधर्मानुष्ठानः अहं संप्रति शरणागतहिंसां कुर्यां लोकः कीदृग्विधः स्यात् । मद्विधः धर्मं हन्तं पश्चाद्दृश्यते । सामान्येन धर्मसेतुर्नृपाणामिति माद्दशानां संभवत्त्वेन स्थितः मद्विधः माद्दशः शरणागतत्यागं न करोति । अवध्यधोन्मुखानां रावणादीनां त्वत्तोऽनिष्टं कार्यं रोचते । जनः शरणागतत्यागकृत्कीदृशोऽपतिमान् स्यात् ॥ २५ ॥

२६] ति० टी०—नन्वत्र विपक्षदर्शनाद्धर्मानधिकृतकपोतत्वेनेदं कथं धर्मे प्रमाणं स्यादतो विधिमपि दर्शयति—ऋषेरिति । तद्गीतगाथायां प्रामाण्यप्रदर्शनाय सत्यवादिनेत्यन्तानि ऋषिविशेषणान्युक्तानि । सत्यवादिना चाधितार्थप्रतिपादनेन, अतएव तद्गीतगाथा धर्मिष्ठा धर्मैकपरेत्यर्थः ॥ २६ ॥

रा० टी०—नन्वविवेकरहितानां तिर्यग्योनीनां दृष्टान्तेन कथमेवं विधेय इत्यत आह—ऋषेरिति । परमर्षिणा निखिलवेदशास्त्रतत्त्वज्ञात्रा सत्यवादिना कण्वस्य तदभिधस्य ऋषेः पुत्रेण गीतां धर्मिणां धर्मप्रतिपादिकां गाथां शृणु प्रथमान्तपाठे तु वाक्यस्य कर्मत्वेनान्वयात् द्वितीया ॥ २६ ॥

गो० टी०—नन्वत्र शास्त्रानधिकारिणितिर्यग्योनिदृष्टान्तेन धर्मस्य न च चोदनामन्तरेण प्रकृतिमात्रेण धर्मत्वं सिद्धमित्याशङ्क्य कण्डुमुनिगाथया विधानं दर्शयति—ऋषेरिति । कण्वस्य पुत्रेणत्यनेन महाकुलप्रसूतत्वं सत्यवादिनेति यथार्थवादित्वं च सूचितम् सत्यवादिनेति यथार्थवादित्वं चोक्तयेतेन परमाप्तत्वं दर्शितम् वेदव्यासादिवित्वं च । पुरा गीतां कण्डुकथितत्वमिति न मन्तव्यम् । एवं च सा शास्त्रान्तरेण विद्यमानामेवेदानीं गीयमानां गीताम् । एतत्कृतत्वेपि सामवेदान्तर्गतसमस्तमन्त्रोपादानवाक्यं वेदैकदेशो धर्मोयमनुष्ठातव्यतिपादिकाम् अनेन परमप्रयोजनत्वमुक्तम् सत्यवादिनेति पदे अयाधितार्थप्रतिपादिनी गाथाम् अनेकार्थान्वितमुख्यवाक्यसंसर्गोत्पत्त्यै संकेतितशब्दां शृणु इतः पूर्वमेतदाख्यानाकर्णनेन खलु त्वमेवनाविलात्मासि एनाम् वहितमनाः शृणु ॥ २६ ॥

२७] ति० टी०—तां गाथामाह—बद्धेति । याचन्तम् शरणमित्यर्थः । आनृशंस्यार्थमघातुकत्वसिद्ध्यर्थमात्मरक्षण रूपपरमधर्मपालनार्थं वा ॥ २७ ॥

रा० टी०—गाथामेवाह—बद्धेति । बद्धोऽञ्जलिपुटो येन याचन्तं स्वरक्षणं प्रार्थयन्तं शरणागतं स्वगृहे प्राप्तं दीनं शत्रुमपि आनृशंस्यार्थमतिदूरत्वनिष्टत्यर्थमपि न हन्यात् मशकार्थे धूम इत्यादाविवार्थशब्दस्य निष्टत्यर्थकत्वं प्रसिद्धम अत एव अस्यार्थस्य प्रतिषेधो वक्तव्य इति वार्तिकेऽर्थशब्दस्य तथात्वं कैयटादिभिर्व्याख्यातम् किंच आनृशंस्यार्थं स्वस्मिन् क्रूरत्वसंसर्गाभावार्थमित्यर्थः ॥ २७ ॥

१ गाथां पुरा गीतां धर्मिष्ठां सत्यवादिनीमिति गो० रा० पाठः ।

आर्तो वा यदि वा दृप्तः परेषां शरणं गतः । अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥ २८ ॥
स चेद्भयाद्वा मोहाद्वा कामाद्वापि न रक्षति । स्वया शक्त्या यथान्यायं तत्पापं लोकगर्हितम् ॥ २९ ॥
विनष्टः पश्यतस्तस्य रक्षिणः शरणं गतः । आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ ३० ॥

गो० टी०-अथ कण्डूगाथायां चतुर्लोक्यामाद्यलोकेन पूर्णप्रपत्तेरसिद्धावपि गत्यन्तरशून्यतयात्मनिक्षेपाभिप्रायव्यञ्जकशरणागतिशकलतुल्याञ्जलिदानादिमात्रविधानमपि दानं न नयेत् तत्करणमनग्रहावहमित्याह—यद्वाञ्जलिपुटमिति । अनुकूलवृद्धिवाञ्छत्यभावेऽप्यञ्जलिमात्रमेवाह्यम् । अञ्जलिः प्रथमं मुद्रा क्षिप्रं देवप्रसादिनीति स्वतन्त्रस्याप्यस्य दयाजननी मुद्रा स्वीयम् । दानम् एवमञ्जलिदानमात्रं विनापि कार्पण्यशीलतया व्यवहारमेवाह्यम् । याचन्तम् अञ्जल्यादिभावेऽपि कार्पण्यादीनतनेपि दृष्टप्रार्थनमेवालम् । शरणागतम् अञ्जलिदानादिवैवश्यविशयाने रक्षकत्वेनावश्यलाभिगमनमेवालम् । पूर्वं स्वरक्षानिर्वाहकत्वेनागतिशकलत्वकृत्वा शरणागतमिति पूर्वकालिकतेति वा स्यात् । अपि शब्दं अञ्जल्यादिमपि न इच्छति । अर्थं शास्त्रार्थं मोक्षोपयोगिनं वा परलोकार्थं वा प्रत्यवायपरिहारार्थं वेत्यर्थः । एवं तेभ्यः प्राकृतेभ्योऽनन्तरमाह—आत्मस्वार्थमिति । अत्यात्मकत्वसिद्धमर्थमित्यर्थः । यशसोऽपीति तु काम्यवत्प्रतिषिद्धमर्थमिति शेषतः । यद्वा आत्मशब्दं स्वरक्षणपरः स्वरक्षणं दृष्टमदृष्टं तदुभयं तदुभयार्थं वा । यथोक्तं संहितायां—आत्मनोऽन्यं परो धर्मस्तत्र एव मया श्रुत इति । परेषामिति । कण्डूरपि कण्डेदानं प्रत्यनुकूलानीति गम्यते । एतेन शरणागते हि पौरुषप्रकटनेन प्रत्यर्थिषु खड्गं कर्कशमिति शेषः ॥ २८ ॥

२८] ति० टी०—आर्तो वा इमां वेति मुण्डोपोद्घातव्यर्थं वचनम् । परेषां शरणं भयाच्छरणागतोऽरिरपि पूर्वकृतवैरेऽपि कृतात्मना धर्मशास्त्रशिक्षितचित्तेन प्राणान्परित्यज्यापि रक्षणीयः ॥ २८ ॥

रा० टी०-तत्त्वेन लोकेन रिपुत्याग एव फलितो न संग्रह इत्यत आह—आर्त्त इति । परेषां रिपूणां भयादिति शेषः शरणं स्वसमिति गतः प्राप्तः आर्तः रक्षकान्तररहितत्वेन स्वरक्षार्थं त्यक्तरिपुत्वाभिमानः यदि वा दृप्तः कथञ्चिदरित्वाभिमानसहितोऽरिरपि कृतात्मनः यतचित्तस्य जनस्य प्राणान् परित्यज्यापि रक्षितव्यः ॥ २८ ॥

गो० टी०-पूर्वं न हन्यादिति स्वेन क्रियमाणं हननमात्रं प्रतिषिद्धम् । अत्र स्वेतरक्रियमाणशरणागतपीडायामपि शरणागते आर्तत्वदृप्तत्वविभागानालोचनेन प्राणान् हित्वा तद्रक्षणं कार्यमित्याह—आर्तो वेति । आर्तः स्वाभिमानसंभवे विलम्बाक्षमत्वीव्रसंवेगवान्वा । शरणागमनवेलायामपि स्वापराधनिमित्तभयादिमान् वेत्यर्थः । दृप्तस्तु विलम्बाविलम्बावनादृत्य फलसिद्धिमात्रसक्तः । अस्यां वेलायां विनम्बापराधभयशून्यो वा । स्वसमुत्थे संसारजुगुप्सासंभावनेन सत्य एव देहनिवृत्तिकाम आर्तः । दृप्तः शरीरावसाने मुक्तिकामः । यद्वा आकिञ्चन्यानन्यगतित्वपुरस्सरं प्रपन्न आर्तः । स्वोपजीव्यादिरूपेण शरण्योऽस्मीति ब्रुवन दृप्तः । परेषां शरणागतः स्वव्यतिरिक्तशरण्यान्तरं । यद्वा परेषामिति निर्धारणे षष्ठी परेषां मध्ये शरण्योऽसीति वरं वरयमानेति शरणागतिभिन्नस्वोपजीव्यत्वं प्रार्थनाकालेऽस्य विवक्षितमनसैव धर्मशास्त्रेणेति शेषः । प्राणान् परित्यज्य रक्षितव्यः । अरिरपि प्राणान्परित्यज्य स्वयं शरणागतरक्षणं कर्तव्यः । कृतात्मनेति विशेषणेन विरोधोक्तिर्यः इष्टविघातस्योक्तम् । शरणागतरक्षणशास्त्रस्य निरवकाशत्वात् सर्वेणास्माभिः सोपायेति शास्त्रेण सोपायत्वान्नातिरिक्तविषयत्वमिति भावः ॥ २८ ॥

२९] ति० टी०—तत्फलमेव पापमाह तस्य धर्मस्य विपक्षत्वात्तत्त्वं चोदितं । इमामपि शरणतया श्रितं इत्यर्थः । भयादकार्ये न शक्तिः शक्त्याभावाद्वा भयमुत्प्रेक्ष्य वधा द्वेषोक्तिः [ ] । कामाद्वा स्वस्यां शक्तौ सत्यां स्वया शक्त्या स्वसाध्यकेन स्वोपायेनेत्यर्थः । यथान्यायं न रक्षति यद्वा शरण्यत्वनिर्वाहं न करोति । यद्वा तत्त्वज्ञानाभावेन अशरण्यत्वबुद्ध्या

एवं दोषो महानत्र प्रपन्नानामरक्षणे । अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ॥ ३१ ॥
करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् । धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ॥ ३२ ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ ३३ ॥

पदारं च प्राप्नोतीत्याह—विनष्ट इति । यः शरणागतोऽरक्षितो विनष्टः स्यात्स पश्यतस्तस्य रक्षिणो रक्षार्थं कृतस्य समग्रमेव तस्य रक्षिणः सर्वं सुकृतमादाय गच्छेत् ॥ ३० ॥

रा० टी०—विनष्ट इति । रक्षिणः रक्षां कर्तुं योग्यस्य जनस्य पश्यतः सतः स्वयं गतः अरक्षितः सन् विनष्टश्चेत्तदा तस्य रक्षिणः सर्वं सुकृतमादाय गच्छेत् सर्वं सुकृतं विनश्यतीत्यर्थः ॥ ३० ॥

गो० टी०—न केवलमैहिकानर्थहेतुत्वमात्रं पूर्वसंचितसकलसुकृतविनाशकमपीत्याह—विनष्ट इति । यः कश्चिदकिंचित्करणनागतः तमरक्षिणस्तस्य पश्यतः रक्षकत्वेन ज्ञते सत्यं च तस्मिन्नपश्यति तेनारक्षणेन स्वशरणकाक्षाजिघृक्षेत् तस्य शरणकस्य संबन्धि अनादिकालसंचितं सर्वं सुकृतमादाय गच्छति अस्यारक्षकस्य समार्जितसकलसुकृतक्षयो भवतीत्यर्थः ॥ ३० ॥

३१] ति० टी०—एतदन्ता: कण्डुगाथाः । अथ रामायणम्—एवमिति । अतस्तत्रक्षणमस्वर्ग्यं स्वर्गप्रतिबन्धकम् बलवीर्यनाशनम् । तपोबलजं पढ्हीर्यं निग्रहानुग्रहसामर्थ्यं तेजोनाशकमित्यर्थः ॥ ३१ ॥

रा० टी०—एवमिति । अस्वर्ग्यं स्वर्गप्रतिबन्धकम् अपशस्यं यशोविनाशकं बलवीर्ययोः शरीरेन्द्रियबलयोर्विनाशकम् अरक्षणमिति शेषः एवमतः अत्र प्रपन्नानामरक्षणे महान् दोषः॥३१॥

गो० टी०—कण्डुवचनचतुःश्लोकीतात्पर्यं संग्रहेणाह—एवं दोषो महानत्र प्रपन्नानामरक्षणे इत्यर्धेन ॥ ३२ ॥

गो० टी०—विस्तरेणाह—अस्वर्ग्यमित्यार्धेन । अस्वर्ग्यं स्वर्गविरुद्धं नरकहेतुभूतमित्यर्थः अयशस्यम् अकीर्तिकरम् बलवीर्यविनाशनम् यशोः शारीरबलवीर्ययोः सतोरेव कारणागतो न रक्षितः तयोर्विनाशकमित्यर्थः । अत्र अरक्षणमिति विशेष्यमनुषज्यते ॥ ३२ ॥

३२] ति० टी०—यदेवमतः—करिष्यामीत्यादि वचनं कण्डुवाक्यरक्षणपरम्। धर्मिष्ठं जन्यतत्संबन्धेनातिशयितधर्मवत्। फलोदयकाले स्वर्ग्यं स्वर्गजनकम् ॥ ३२ ॥

रा० टी०—करिष्यामीति । धर्मिष्ठं प्रतिपादकत्वसंबन्धेन अतिशयितधर्मवत् एव फलोदये फलोत्पत्तिसमये स्वर्ग्यं स्वर्गप्रदं भवत्यतः अत एव यशस्यं यशस्करकम् अत एव तत्तस्मात् यथार्थं फलोदयेन करिष्यामि ॥ ३२ ॥

गो० टी०—स्वं शरणागतरक्षणे कण्डुवचनं प्रमाणयित्वा धर्मसंस्थापनपूर्वकस्तत्र मयैतदव्रतं पालनीयमित्याह—करिष्यामीति । उत्तरं श्लोकार्धम् ॥ ३२ ॥

गो० टी०—न केवलकरणे अस्वर्ग्यादित्वं करणे इत्याह—अन्या अहवः सन्तीत्यपि कण्डुवचनतात्पर्यमिति रामः स्वयमाह—धर्मिष्ठमिति । पापनिवर्तकत्वमेवोक्तं विवक्षितम् । फलहेतुधर्मोपतत्वस्य स्वर्ग्यमित्यनेनैव सिद्धत्वात् । फलोदये फलप्रदानकाले समुपस्थिते । स्वर्ग्यं स्वर्गहेतुरित्यर्थः । अत्र प्रतिपाद्यगते धर्मिष्ठत्वादिके प्रतिपादकवचने समुपचर्यते ॥ ३२ ॥

३३] ति० टी०—किं च परमकारुणिकस्य मम सर्वेषामभयदानरूपः कश्चित्संकल्पोऽस्तीत्याह—सकृदिति । सकृदेव इति पञ्चमी व्याख्येया । अभयप्रसक्तिम् । अभयं ददामि । अत्र वर्तमानप्रयोगेण नित्यसत्यसङ्कल्पत्वेनाभयदानस्य द्योत्यते । तदेवाह—एतन्मम व्रतमिति । दैन्यपरिपूहीतो नित्यनिजप्रतिष्ठितोऽयमहम् इत्यर्थः । अतः तात्कालिकमात्यन्तिकं चेत्यभयविषयभयप्रदानं प्रतिज्ञायते । तत्रात्यन्तिकं संसारभयोपरतिरूपम्, द्वितीयं तु शरणार्थिन आत्मीयतत्कृतसकलदुष्कृतनिवृत्तिरूपम्, इदं गीतातेषहनिमित्तकृतप्रकाशाभ्युपगमार्थम्। नन्वेवं सर्वेश्वरस्यापि तव निमित्ताभयप्रदानेन वैषम्यनैर्घृण्यादिदोषप्रसङ्गस्तत्राह—सकृदिति। अनेनोभयविधाभयप्रदानस्य साधनमुपदिश्यते। सकृदेकयैव वृत्त्या प्रपन्नाय परिगृह्णामीत्यर्थः। प्रकृष्टप्रतिपत्तिमते प्रतिपन्नौ प्रकर्षश्च चित्तान्तरत्वेन सा च तत्त्वमस्यादिवाक्यजन्या भगवतः स्वात्मत्वेन प्रतिपत्तिः। अयं च 'ज्ञानी त्वात्मैव मे मतः' इति गीतोक्तः। अयमेवात्यन्तिकाभयप्रदानोपायः। द्वितीयाभयप्रदानसाधनमाह—तवास्मीति च याचते इति। औपाधिकभेदभवत्वस्य त्वाहं भेदकस्त्वं मे स्वामी, अहं शिष्यस्त्वं गुरुः, अहं रक्ष्यस्त्वं रक्षकः, इत्येवमुपासनां कुर्वतः 'द्वितीयाद्धि भयं भवति' इति न्यायेनावश्यं प्राप्तभयस्य सर्वभूतेभ्यो यथा भयं न भवति तथा *यतामीति मे व्रतमित्यर्थः। अतथाभूतेभ्यस्तु न यच्छामीति। न नैर्घृण्यादिदोषप्रसङ्ग इति भावः ॥ ३३ ॥

रा० टी०—सार्वकालिकीं स्वप्रकृतिमाह—सकृदिति। सकृत् एकवारमपि तवास्मीति याचते प्रपन्नाय उपायान्तररहिततया शरणागताय जनाय सर्वभूतेभ्योऽभयं ददामि एतदभयदानं मम व्रतं निर्हेतुकः संकल्पः एतेन सर्वज्ञस्यापि स्वस्य शरणागतदोषादर्शिसर्वज्ञत्वेऽपि स्वस्य शरणागतत्यागासाधकत्वं सूचितम् ॥ ३३ ॥

गो० टी०—एवं, 'श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्'॥ इति याज्ञवल्क्योक्तधर्मप्रमाणेषु श्रुत इत्यनेन, तस्मादपि

* अत्रमभेदमभारोपितमिति [illegible]

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया । विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ॥ ३४ ॥
रामस्य तु वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः । [illegible] काकुत्स्थं सौहार्देनाभिपूरितः ॥ ३५ ॥
किमत्र चित्रं धर्मज्ञ लोकनाथशिखामणे । सत्त्वमार्ये समाधेयाः सत्त्ववान्सत्पथे स्थितः ॥ ३६ ॥

वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्यादिना श्रुतिः कपोताख्यानमुखेन स्मृतिः । कपोतादिना शिष्टाचारः । प्रतिपक्षनिरसनपूर्वकबलवदुपपादनेन स्वप्रियत्वं चेत्येवं चतुर्षु प्रमाणेषु प्रपन्नरक्षणरूपपरमधर्मविषयेषु दर्शितेषु संप्रति तत्र प्रमाणं पञ्चमं दर्शयति—सकृदेवेति । सकृदेव एकवाक्यतया । व्यवधानान्तरेणाऽऽवृत्तिः शास्त्रार्थः । सकृदेव हि शास्त्रार्थः कृतोऽन्यत्रान्तरमित्युक्तेः । प्रपन्नाय अन्यथा ज्ञानार्थ इति न्यायेनात्र मानसप्रपत्तिरुच्यते । तवास्मीति तु वाचिकी । उभयोरन्यतरेण युक्तायापीत्यर्थः । यद्वा प्रपन्नायेत्युपायः कथ्यते । तवास्मीति च याचत इति तच्छेषवृत्तिलक्षणफलविशेषप्रार्थना । एवंभूतायाधिकारिणे सर्वभूतेभ्य इति "भीत्रार्थानां भयहेतुः" इत्यपादानत्वम् । भयहेतुतया शङ्कितेभ्यः सर्वभूतेभ्यः अभयं भयाभावम् ददामि । अभयमेव मोक्षो नाम । अथ मोक्षमयं गतो भवति आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेतीति ब्रह्मविदाप्नोति परम् इत्यादिना श्रवणात् । एतत् तवास्मीति फलविशेष्याद्धेति पक्षस्याङ्गकृत्यम् । पक्षान्तरं वैवर्गिककलानामप्येतदुपलक्षणम् । स्वस्य नरकफलत्वात् । एतद्व्रतं मम व्रतवदिदं कर्त्यं चिदपि दयायां परित्यागायोग्यमित्यर्थः । अत्र सर्वभूतेभ्य इत्यपि चतुर्थी । प्रपन्नसंबन्धिभ्योपि सर्वभूतेभ्योऽभयं ददामि । पशुमनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदमित्युक्तेः ॥ ३५ ॥

३४-३५] लि० टी०—अथापरिपाल्यतावादिनं सुग्रीवमेव बलात्परिपाल्यतामङ्गीकारं कारयित्वा, तमेव तदानयनाय प्रेरयति—आनयेति । अस्य वाक्यार्थाभ्यां सुस्पष्टं शरणागतत्वम् । यदि वा रावण इति । कामरूपतयाकारान्तरावष्टम्भवानिति शेषः ॥ ३४ ॥ ३५ ॥

रा० टी०—आनयेति । अयं शरणं प्राप्तः विभीषणो वा यदि वा स्वयं रावणः स्यादिति शेषः तदापि एनमानय तत्र हेतुः—अस्याभयं मया दत्तम् ॥ ३४ ॥

गो० टी०—एवमुक्ते सत्यसंभवदुत्तरं प्रशान्तप्रेमान्ध्यतया प्रसन्नमुखं विभीषणाभिमुखं सुग्रीवमालोक्य तमेव तदानयने नियुङ्क्ते—आनयेममिति । निवेदयतेति सपदिवारान् युष्मान् पुरस्कारतया दत्तवन्तमेनं दयमेवानयत तथा सत्येतावत्पर्यन्तमस्वीकारकृतदुःखमस्य निवर्तेत । हरिश्रेष्ठ तस्य दुःखनिवृत्तये त्वमेव गत्वानयसि चेन्मयि स्नेहवद्भ्यो हरिभ्यः श्रेष्ठ अवज्ञामतिक्रम्य किमहं स्वीकरोमि । इत्यमभिप्रायेण [illegible] स्वप्रत्याख्यानपूर्वकं स्वनिकर्षकीर्तनपुरस्सरं चागतस्य मया मित्रभावेनैवास्मीति मन्तव्यमानेनाभयं दत्तम् । शरणलक्षणकाल एवेति शेषः । कपोतमानवेभ्यभिव्याकुलितं समाधत्ते—विभीषणो वेत्यादिना । विभीषणो वा । विभीषणस्तु धर्मीत्येति विभीषणस्वीकारो धर्मस्वीकारत्वेन नोक्तपदः । रावणस्य दुर्जनत्वेति रावणस्वीकारे दोषोक्तिः स्यादिति । विभीषणस्वीकारे तत्परिकरस्वीकार एव शङ्कितः स्यात् । रावणस्वीकारे तु लङ्कास्थाः स्त्रियोपि रक्षिताः स्युरिति मतम् । तदा । दुर्बोध । अस्माकमासतोऽस्मिन् युष्माकं प्रभुः सन्नु । एवं दुर्बुद्धं सुखं च भाविष्यतीति । यदि वा रावणः स्वयं पुत्रस्नेहेन विभीषणशङ्कां स्वयमेव स्वस्य मीमांसमानस्य स्वयमागतो रावणो वास्तु । यद्वा स्वस्य अयं यदि विभीषणो न भवति किंतु कामरूपी रावण एव विभीषणभूमिकां परिगृह्य वधायागतः तथापि तस्याभयं मया दत्तम् । त्वमपि रघुणैवं न तु विभीषण इति विज्ञापकायापि पुनर्नाऽनुसंधेयं [illegible] ॥ ३५ ॥

रा० टी०—काकुत्स्थमिति । सौहार्देनाभिपूरितः सुग्रीवः काकुत्स्थं प्रत्यभाषत ॥ ३५ ॥

गो० टी०—अथ सुग्रीवः कथिष्यमाणं रामस्य शरणागते स्वस्मिन् सौहार्दातिशयमालोक्य विस्मयपरस्सन् आह—रामस्येति । सौहार्देन प्रणोदितः । सर्वत्रापि दोषानवलोक्य शिष्टाचारपरिपालनार्थं पूर्वदेवो नानाप्रकारैरचनीयो यदि वा रावणः स्यादिति । एवं सत्यवद्रव्यं कोपि दोषोद्भावनं तिरस्य इति विस्मयत्व हेतुः । इत्यर्थः ॥ ३५ ॥

३६] लि० टी०—अथ सुग्रीवो विस्मयपरवश आह—किमत्रेति । धर्मज्ञ शरणागतरक्षणधर्मज्ञ, लोकनाथानां राज्ञां शिखामणे, सत्त्वमस्मिन्नेव शिक्षितव्यमार्ये कल्याणे प्रभावे, यथा इति यस्त्वर्थः, चित्रम् ॥ ३६ ॥

रा० टी०—तत्रकारमाह—किमिति । हे लोकनाथशिखामणे ! सत्त्वे सज्जनसमूहे स्थित त्वमत्र अस्मिन् समये आर्ये धर्मे सत्प्रभावेऽपि चित्रं किं वर्तते ॥ ३६ ॥

गो० टी०—एवं विस्मयाविष्टमुपक्रान्तो रामस्य स्वाभाविकान् कल्याणगुणौघानालोच्य सहजधर्मत्वादेतद्रामे नाश्चर्यकरमित्याह—किमिति । धर्मज्ञ धर्मसूक्ष्मतत्त्वज्ञ तव धर्मानुज्ञां किमाश्चर्यम् । लोकनाथ भृत्यवर्गसंरक्षणस्वामिनः किं चित्रम् । सुखावह स्वयमयाचमानमस्तकामस्य परप्रयोजनैकपरायणस्य सर्वसुखकारिणस्तव शरणागतेषु ममाश्रितेष्वस्माकं सुखकारित्वे कोत्र विस्मयः । आर्य समीचीनसत्त्ववान् प्रशस्ताध्यवसायवान् । इत्यनुध्यवसायेषु सत्त्वमुच्यते

अपचाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् । अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः ॥ ३७ ॥
तस्मादेनं सहास्माभिस्तुल्यो भवतु राघव । विभीषणो महाप्राज्ञः सख्येनं चाभ्युपैतु नः ॥ ३८ ॥
ततस्तु सुग्रीववचो निशम्य तद्वरीश्वरेणाभिहितं नरेश्वरः ।
विभीषणेनाशु जगाम संगमं पतत्रिराजेन यथा पुरन्दरः ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

तु जन्तुश्चित्यमरः । दृढव्रतस्य व्रतपरिपालनं किमद्भुतम् । यद्वा यत्नं बलं सर्वशक्तेरस्य समाश्रितभयनिवारणं किमाश्चर्यम् । तत्परे स्थितः । धर्मसंस्थापनार्थमेवावतीर्णस्य श्रीरामावतारस्य गरुडविशेषधर्मानुष्ठानं नाश्चर्यमित्यर्थः । एकवाक्यत्वेन धर्मज्ञत्वादिष्वन्यतम एव गुणः पर्याप्तः किमुत सर्वेऽपि समुदिता इति भावः ॥ ३८ ॥

३७-३८] ति० टी०—ममान्तरात्मापि विभीषणं शुद्धं वेत्ति । त्वद्वाक्यश्रवणादिति भावः । किं च सम्यक्चतुरणं हनुमता भावकृपाद्दुमानाच्च सर्वतः सुपरीक्षितश्चायं तस्मात् ॥ ३७ ॥ ३८ ॥

रा० टी०—ममेति । भावात् सख्यस्थितिहेतुकादनुमानात् सर्वतः सर्वप्रकारेण सुपरीक्षितः हनुमतेति शेषः अतः तं विभीषणं ममाप्यन्तरात्मा शुद्धं वेत्ति ॥ ३७ ॥

गो० टी०—किमस्मत्पर्यालोचनेन त्वन्मनःप्रवृत्तौ खलु विभीषणो ग्राह्यः स्यात्तत्राह—ममेति । मम बध्यतामेष नीयतां दण्ड्यतामित्यनुक्तावपि । न केवलमस्मिन्नर्थे मदन्तःकरणपर्यालोचनमेव प्रमाणम् । प्रमाणान्तराण्यपि सन्तीत्याह—अनुमानादिति । अनुमानात् लक्षणा हनुमतः चोक्तयुक्तिकदम्बात् भावात् भावयोपकान्मुखप्रसादादिलिङ्गात् । सर्वतः सर्वत्र अन्तर्बहिश्चेत्यर्थः । यद्वा अनुमानात् हृदयप्रकाशकमुखविकासादिलिङ्गात भावात्तात्पर्यनिश्चयरूपात् भावनात्मकत्वभावात् तत्रापि वक्ष्यमाणयुक्तावस्थायां न त्यजेयमिति कार्यैकरूपं सम्बोधयते । सुपरीक्षितः सङ्गदूषविपर्ययराहित्येन परीक्षितः । अन्तरात्मा अन्तःकरणम् । चार्थोऽपीति रामान्तःकरणसमुच्चयार्थः ॥ ३९ ॥

रा० टी०—तस्मादिति । तस्मात् शरणागतत्वाद्धेतोः नः सख्येन अभ्युपैतु प्राप्नोतु अत एव अस्माभिस्तुल्यो भवतु अस्मत्सेवाधिकारीति शेषः ॥ ३८ ॥

गो० टी०—पूर्वभागवेनमिति निगृह्यतदुत्तिष्ठति—तस्मादिति । क्षिप्रं पूर्वमज्ञानवशान्मया पापमाचरितम् । तत्त्वविचारे त्वयं क्षणमात्रं विलम्बानर्ह इति भावः । तुल्यो भवतु । निर्वेदयन मामिति पुरुषकारकरणायाभ्यर्थितानां नृणामस्माकं पुरुषकारत्वं संपादयितुमेव तवायं प्रयासः परेङ्गितः । इतःपरमस्माभिः पुरुषकारव्यापारः किमत इत्यर्थः । एवं विभीषणस्य पुरुषार्थमर्थयित्वा तत्तत्फलरूपं सख्यं पुरुषार्थमर्थयते—विभीषण इति । महाप्राज्ञः फलसाधनोपयोगिज्ञानवान् । न केवलं ममेव सर्वेषामेवं फलं समानमिति दर्शयितुं नः सख्येत्युक्तम् ॥ ३८ ॥

३९] ति० टी०—हरीश्वरेणाभिहितं तमानयायं विभीषण इति बोधितम् । पतत्रिराजेन । तदानीमेवोपेन्द्रेणेत्यर्थः ॥ ३९ ॥

इति श्रीराघवीये श्रीरामीये रामायणदीपिकाख्ये वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०—तत इति । नरेश्वरो रामः सुग्रीववचो निशम्य हरीश्वरेण अभिहितं बोधितं विभीषणेन संङ्गममाशु जगाम । तत्र दृष्टान्तः—पतत्रिराजेन गरुडानीतोपेन्द्रेण संगमं पुरन्दरो यथा ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणदीपिकायां युद्धकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

गो० टी०—एवं सुग्रीवस्य विभीषणज्ञानानन्तरं शरण्यस्य शरणागतसंगमविधेयं दर्शयति—तत इति । सुग्रीववचो निशम्य ततो हरीश्वरेणाभिहितं विभीषणेन संगमं जगामेत्यन्वयः । अभिहितं हे विभीषण राघवस्तवाभयं ददातीत्यादि रूपवस्तुपयाहीत्येवं सुग्रीवोक्तम् । नरेश्वरः संगमं जगामेति संगमोपि कर्तुरीप्सिततमत्वकथनेन रामस्यायं लाभ इति गम्यते । न त्यजेयं कथंचनेत्यादिभिः सुग्रीवादिवाक्यरूपविरोधिनिरसनपूर्वकं श्रीविभीषणस्वीकारं प्रतिश्रुत्य कथंचित्सुग्रीवादिवाक्यजनितं विलम्बमविषह्य त्वरया रक्षितुं स्वयमेव तेन संगत इत्याह—विभीषणेनाशु जगाम संगममिति । आशु त्वरितम् । आश्रितसंश्लेषे स्वयं त्वरावानिति भावः । पुरंदरो यथा पतत्रिराजेन संगमं स्वलाभममन्यत तथायमपीति दृष्टान्ताभिप्रायः । यद्वा सुग्रीवस्य बुद्धिः पुनर्विपरीता चेत्कार्यहानिरिति शीघ्रं जगाम ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ।

रामाद्गृहीताभयो मन्त्रिभिः सह भूमिगतवतीर्णो विभीषणो राक्षसैरन्यैर्निषेध्यमानोऽपि निर्भिक्षुत्वमाहं शरणमागत इति प्रार्थयमानः पुनः रामेण सादरं पृष्टः स सर्वं रावणवृत्तं कथयति ।

राघवेणाभये दत्ते संगतो रावणानुजः । विस्मयन्हरिवीरांश्च महाप्राज्ञो भूमिं समवलोकयत् ॥ १ ॥
खात्पपाताविनिं[1] हृष्टो भक्तैरनुचरैः सह । स तु रामस्य धर्मात्मा निपपात विभीषणः ॥ २ ॥
पादयोर्निपपाताथ चतुर्भिः सह राक्षसैः । अब्रवीच्च तदा वाक्यं रामं प्रति विभीषणः ॥ ३ ॥
धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणम् । अनुजो रावणस्याहं तेन चास्म्यवमानितः ॥ ४ ॥

१] ति० टी०—संगतो भक्तिप्रवणः । भूमिं समवलोकयन् अवरोहणायेति भावः ॥ १ ॥

रा० टी०—विभीषणवृत्तान्तमाह—राघवेणेत्यादिभिः । राघवेणाभये दत्ते सति महाप्राज्ञो विभीषणः अन्यैः सह खादवनिं पपात । सार्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०—पूर्वं शरण्यस्य शरणागतसंगमरूपकार्यमुक्त्वा शरणागतस्य शरण्यसेवाख्यपुरुषार्थलाभमाह—राघवेणेत्यादि । सार्धश्लोक एकान्वयः । अभये स्वापेक्षिते सर्वभूताभये दत्ते सत्यतः गुणैर्दास्यमुपागत इति न्यायेन पूर्वमनुक्तयोरप्यधिकानां रामकल्याणगुणानां साक्षात्कारेण सम्यग्बहुमानेनाङ्गः महाप्राज्ञः निरूपाधिपरिग्रहेण परमपुरुषार्थलाभाद्वेदशास्त्रव्यासातिशयजनितप्रज्ञातिशयस्य फलमिदानीं निर्वृत्तमिति भावः । भूमिं समवलोकयन् अन्तरङ्गचित्तवृत्तेः संमर्दनिरवकाशेऽपि रामपुरोहितैः सचिवैरेव भद्रमुखाभावस्य विभीषणस्य स्वापरिचयमध्ये दत्तं भूतलावलोकनं मन्यमानः खादवनीं पपातेति प्रायमिको दृष्टप्रमाण उक्तः । प्रणामायशब्दस्थानभाक्तां पश्चिम्यज्ञ पाणिपादशिरःप्रभृतिभिरष्टाङ्गैर्भूमिं प्राप्तवानित्यर्थः । नन्वपेक्षितमभयं दत्तमेव पुनः किमर्थं प्रणामेत्यत्राह—हृष्ट इति । रामस्य स्वरूपकार्यानुभवजनितहर्षविवशीकृतशरीर एव प्रणतः न तु किमपि प्रयोजनमुद्दिश्येत्यर्थः । भक्तैरनुचरैः सहेति । राघवं शरणं गतः निवेदयत मामिति विभीषणस्यैकस्यैवोपायप्रकाशश्रवणेपि तदन्वयिनां तद्भक्तिवशादेव रामपरिचरणं समानमित्युच्यते । उक्तं हि—[2] पशुमनुष्याः पक्षी वा ये च देवगणाश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम्' इति ॥ १ ॥

२] ति० टी०—हृष्टोऽभिमतलाभजनितप्रीतियुक्तः । रामस्य निपपात । पादयोरित्यनुकर्षः ॥ २ ॥

रा० टी०—स इति । शरणान्वेषी स्वरक्षणेच्छुः विभीषणः रामस्य पादयोर्निपपात ॥ २ ॥

गो० टी०—पूर्वं वाचिका प्रपत्तिः कृता सम्प्रति कायिकशरणागतिं प्रयुङ्क्ते—स त्विति । स तु पूर्वस्माद्विलक्षणः संशयविपर्ययनिवृत्त्या अनुकूलस्वनिर्णयविषय इत्यर्थः । धर्मात्मा सर्वात्मस्वात्मप्रत्युतत्वशरणागतिधर्मनिष्ठावान् । वध्यतामिति मत्कुलनाशाय न त्यज्यतामिति आत्मनेमिति अस्माभिरनुजा भवतीति चोक्तासु पत्नीष्वात्मव्यतिरिक्तेषु करुणाविशेषेण इत्यर्थः । अतः विभीषणः भक्तिमान् उक्तः । शरणान्वेषी कृतप्रणतस्वरूपः । विभीषण रामस्य यत्किञ्चित् पक्षपातविपरीतनीतिरामाभावात्तदादौ [3]अनुकूलस्य मातृवत्त्वं भीरुत्वमिति पक्षः । अनीरामात् पक्षिविलक्षणत्वात् खात् ॥ पक्षिवत् पक्षोत्थापनेन तथा पपात । चतुर्भिः सह राक्षसैः [4]करणात्मकैस्तत्परत्वैरित्यर्थः । तत्तानुकूल्यसंकल्पादिरूपैरनुकूलम् । धर्मात्मेति महाविश्वासः शरणान्वेषीति मोक्षानुकूलं पापान्तरासंनिक्षेप इति साधुशरणागतेः कृता भवति ॥ ३ ॥

३] ति० टी०—पूर्वमनुक्तेन पादप्रणामेन तं सन्निधिं प्राप्य तदाह—पादयोरिति । पादयोर्निपपातेत्यनेन शरणागतत्वमुक्तम् ॥ २ ॥

रा० टी०—अब्रवीदिति । विभीषणः धर्मयुक्तम् अतएव युक्तं योग्यम् अतएव सांप्रतं सम्यक् सीतां संप्रहर्षणं [5]तोषकरं वाक्यं रामं प्रत्युवाच ॥ ३ ॥

गो० टी०—एवं कायिकीं शरणागतिमुक्त्वा अथ वाचिकीं प्रपत्तिमाह—अब्रवीदिति । तदा पादपतनसमये तव सुग्रीवादीनां संशयमेवमकस्मादुत्पन्नं अतोहं रामं पूर्वं सुग्रीवादिपुरुषकारभूतान् प्रति सख्यादि आदृत्य । धर्मयुक्तं शरणागत्यनुकूलमनुकूल्यादिधर्मयुक्तम् पूर्वं सख्यैकारणिकशरण्यविषयत्वा योग्यम् साम्प्रतं सम्यक्प्रणम् पूर्वं रामपूर्वं इदानं गतदुष्प्रकृतिप्रज्ञानां सुग्रीवादीनां [6]प्रतिकूलभूतम् इदानीं सर्वसम्प्रहर्षणम् ॥ ३ ॥

४] ति० टी०—कथं यतिधर्मयुक्तम् सांप्रतं संप्रहर्षणं सर्वकालं संतोषकरमित्यत्राह—अनुज इत्यादिभिः । रावणस्यानुजोऽहं तेन रावणेन अवमानितः तिरस्कृतोस्मि अतः सर्वभूतानां शरण्यं शरणार्हं शरणं रक्षकं भयस्य गतं प्राप्तोऽस्मि ॥ ४ ॥

गो० टी०—अनुज इति । पूर्वं निवेदयतेत्यत्र पुरुषकारभूतान् प्रत्युक्तम् इदानीं साक्षाच्छरण्यं प्रतीति न पुनरुक्तिः

---

१ [1] खात्पपाताविनिं गो. पाठः । २ [2] इति गो. पाठः । ३ [3] करणान्वेषीति गो. पाठः । ४ [4] रामं वाक्यं तत्रेति गो. पाठः । ५ [5] चान्वेषि गो. पाठः ।

भवन्तं सर्वभूतानां शरण्यं शरणं गतः । परित्यक्ता मया लङ्का मित्राणि च धनानि च ॥ ५ ॥
भवद्भयं हि मे राज्यं जीवितं च सुखानि च । तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत् ॥ ६ ॥
दत्तमस्माभिरस्त्रेण लोचनाभ्यां विभीषण । आख्याहि यम तत्त्वेन राक्षसानां बलाबलम् ॥ ७ ॥
एतच्छ्रुत्वा तदा रामो राघवेणाहितकर्मणा । रावणस्य बलं सर्वमाख्यातुमुपचक्रमे ॥ ८ ॥
अक्षयः सर्वभूतानां लोकवीरगणक्षिणाम् । राजपुत्र दशग्रीवो वरदानात्स्वयंभुवः ॥ ९ ॥
रावणस्यानुजो भ्राता तस्य ज्येष्ठश्च वीर्यवान् । कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि ॥ १० ॥
राम भीमाभिसत्तस्य महस्तो यदि ते श्रुतः । कैलासे येन समरे मणिभद्रः पराजितः ॥ ११ ॥
बद्धगोधाङ्गुलित्रेण अभेद्यकवचो युधि । धनुरादाय यस्तिष्ठेदद्रश्यो भवतीन्द्रजित् ॥ १२ ॥

५] ति० टी०—सर्वेषामपि भूतानां शरण्यमित्यनेन तस्य सर्वे गुणदोषाः ज्ञातव्याः ॥ ५ ॥

रा० टी०—परित्यक्तेति । लङ्कामपि मया परित्यक्ता यत्र मे ज्येष्ठभ्रातरि भक्तिर्न प्रकाशिता ॥ ५ ॥

गो० टी०—भवन्तं सर्वभूतानामित्यनेनैव त्वमेव परमेश्वर इत्याह—परित्यक्तेति । लङ्का मयाभ्यर्थनया स्त्रीदासीरत्नानि धनानि च ब्रह्मणा स्वयम्भुवे तपसा प्रसन्नेन मह्यं दत्तानि मित्राणि च यानि मम सेवन्ते तानि सर्वाण्यपि परित्यक्तानि । किमर्थं भवन्तं राज्यमित्यादि । राज्यं मे भवद्भयं भवतो भयेन रक्ष्यमित्यर्थः । जीवितं सुखानि च भवत्सेवाधीनानीत्यर्थः । तस्मात्तद्वचनं भवदीयं वचनं श्रुत्वा रामो वचनमब्रवीत् ॥ ५ ॥

६] ति० टी०—ये राज्यं च भवद्भयमित्युक्त्या सर्वज्ञत्वेन दत्तो रावणवधं करिष्यतीति विभीषणमिति गम्यते ॥ ६ ॥

रा० टी०—तदेति । तस्य विभीषणस्य वचनं श्रुत्वा पूर्वं विभीषणं सान्त्वयित्वा लोचनाभ्यां विभीषण इव रामः राक्षसानां बलाबलं ज्ञातुमनसा अहमेवाहीति वचनमब्रवीत् । सर्वत्रैव पाठभेदो नास्ति ॥ ६ ॥ ७ ॥

गो० टी०—दत्तमस्माभिरित्यनेन स्वयमेव रामे स्नेहातिशयेन कौतुकेन मम बलाबलज्ञानमिति वाक्यम् सान्त्वयित्वा तथा मम दृष्टिसामर्थ्य एव स्थिरा भवति एतावत्पर्यन्तं मेघनादः अजेय इति सान्त्ववचनायुक्त्या लोचनाभ्यां विभीषण इव तस्य हृदयमार्गे कृत्वा अन्यदेवम् ज्ञातुमिच्छति ॥ ७ ॥

७—९] ति० टी०—विभीषणहृदयस्थान् संलापयति ७—९

गो० टी०—एवं विभीषणेन कौतुकेनैव प्रार्थिते कार्तिकेयदत्तं वरमाह ७ इति । तत्रापि तत्रैव कैलासे युद्धविति दर्शयति—अक्षयोऽहमिति । अत्र पूर्वमस्माभिरित्युक्त्या

रा० टी०—एतदिति । एतत्सर्वं रावणस्य बलमाख्यातुमुपचक्रमे ॥ ८ ॥

गो० टी०—एवमिति । स्पष्टम् ॥ ८ ॥

९] ति० टी०—तमेवाह—अक्षयश्च इत्यादिना । हे राजपुत्र ! यतस्त्वयो वरदानात् तेनोक्तं दृश्यसे तस्मात् ॥ ९ ॥

गो० टी०—अक्षयश्च इति । सर्वभूतानामित्यनेन तत्सन्तोषितमित्युक्तम् । राजपुत्रेति तदनुरूपं भवतीत्यर्थः । अतो भवान् ॥ ९ ॥

१०-११] ति० टी०—अस्यार्थं दर्शयति ॥ १० ॥ ११ ॥

रा० टी०—रावणेति । रावणस्यानुजः रावणस्यानुजश्चासौ ज्येष्ठो मम भ्राता कुम्भकर्णः युधि अक्षयत्वेन वरदानादिबलविशिष्टोऽस्तीति शेषः ॥ १० ॥

गो० टी०—रावणेति । प्रसिद्धम् सर्वत्रबलम् ॥ १० ॥

रा० टी०—रामेति । येन कैलासे मणिभद्रः पराजितः स प्रहस्तस्तस्य रावणस्य सेनापतिः यदि कदाचित् ते श्रुतो ज्ञातो दिति शेषः ॥ ११ ॥

गो० टी०—रामेति । कैलासे समरात् इति शेषः । मणिभद्रः कुबेरसेनापतिः । यदि वा श्रुत इति । ज्ञातमित इति शेषः ॥ ११ ॥

१२] ति० टी०—यदि गोधाचर्मणा अङ्गुलित्राणं येन स गोधाङ्गुलित्रः । अदृश्यो भवति । एष इति शेषः ॥ १२ ॥

रा० टी०—बद्धेति । बद्धं गोधाचर्मणाङ्गुलित्राणं येन 'गोधा ज्याघातवारणम्' न वक्षः शेषः कवचो यस्य स य इन्द्रजित् स युधि निश्चलः सन् अदृश्यो भवति ॥ १२ ॥

गो० टी०—बद्धेति । अङ्गुलीत्राणयुतकरस्याङ्गुलित्राणम् अङ्गुलित्रवत्त्वम् । गोधा तलं ज्याघातवारण इत्यमरः । अनेन निरन्तरशरमन्त्रायीति गम्यते । अदृश्यकवचः अभेद्यकवचः ।

---

१ मे सर्वत्र नास्ति गो. पाठः । २ उक्त इति रा. पाठः । ३ गत्वर्थधातुरत्रास्तीति शे. पाठः । ४ इति ति. टी. पाठः ।

सङ्गमे सुमहद्यूहे तर्पयित्वा हुताशनम् । अन्तर्धानगतः श्रीमानिन्द्रजिद्धन्ति राघव ॥ १३ ॥
महोदरमहापार्श्वौ राक्षसश्चाप्यकम्पनः । अनीकपास्तु तस्यैते लोकपालसमा युधि ॥ १४ ॥
दशकोटिसहस्राणि रक्षसां कामरूपिणाम् । प्रासशूलासिहस्तानां लङ्कापुरनिवासिनाम् ॥ १५ ॥
स तैस्तु सहितो राजा लोकपालानयोधयत् । सह दैवैस्तु ते सर्वा रावणेन दुरात्मना ॥ १६ ॥
विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः । अब्रवीद्दृष्य मनसा सर्वमिदं वचनमब्रवीत् ॥ १७ ॥
यानि कर्मापदानानि रावणस्य विभीषण । आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम् ॥ १८ ॥
अहं हत्वा दशग्रीवं सप्रहस्तं सहात्मजम् । राजानं त्वां करिष्यामि सत्यमेतच्छृणोतु मे ॥ १९ ॥
रसातलं वा प्रविशेत्पातालं वापि रावणः । पितामहगुहां वा स न मे जीवन्विमोक्ष्यते ॥ २० ॥
अहत्वा रावणं संख्ये सपुत्रजनबान्धवम् । अयोध्यां न प्रवेक्ष्यामि विभिर्मैत्रैर्भ्रातृभिः शपे ॥ २१ ॥

युधि अदृश्यो भवतीत्यन्वयः । हनुमदग्रहकत्वेन प्रसिद्धत्वात्तस्य रावणपुत्रत्वमुक्तम् ॥ १२ ॥

१३] ति० टी०—तदेवाह—संगे मे इति । सुमहद्यूहे उचितबलसंनिवेशवति ॥ १३ ॥

रा० टी०—संग्राम इति । सुमहान्तो व्यूहा यथोचितसेनासंनिवेशा यस्मिन् तस्मिन् संग्रामे हुताशनं वह्निं तर्पयित्वा अन्तर्धानगत इन्द्रजित् शत्रून् हन्ति अतः ॥ १३ ॥

गो० टी०—कुतोऽयमदृश्यत्वशक्तिः अहश्यश्च किं करोतीत्याह—संग्रामेति । सङ्ग्रामसमयकृतत्वाद्धे । तर्पयित्वेति होमैः प्रीणयित्वेत्यर्थः ॥ १३ ॥

१४] ति० टी०—अनीकपा इत्यसेनापतयः ॥ १४ ॥

रा० टी०—महोदरेति । युधि लोकपालसमा एते सर्वे इन्द्रप्रभृतयस्तस्येन्द्रजितोऽनीकपाः सेनापतयः सन्तीति शेषः अत इन्द्रजितो रावणपुत्रत्वादुक्तत्वेन्द्रजितं रावणपुत्रत्वेन रामो जानातीति विभीषणनिश्चयो ध्वनितः ॥ १४ ॥

गो० टी०—महोदर इत्यादि श्लोकद्वयम् । अनीकपा नायकाः । एते महोदरादयः दशकोटिसहस्राणि सन्तीति शेषः ॥ १४ ॥ १५ ॥

१५] ति० टी० दशकोटिसहस्राणि सन्तीति शेषः । इदं प्रधानराक्षसविषयम् ॥ १५ ॥

रा० टी०—दशेति । लङ्कापुरनिवासिनां रक्षसां दशकोटिसहस्राणि सन्तीति शेषः ॥ १५ ॥

१६–१७] ति० टी०—ते लोकपालाः ॥ १६ ॥ १७ ॥

रा० टी०—स इति । तैः राक्षसैः सहितः स रावणः लोकपालानयोधयत् देवैः सह ते लोकपालास्तु राक्षसैः ॥ १६ ॥

गो० टी०—स तैरित्यर्धम् ॥ १६ ॥

गो० टी०—न केवलं योधनं पराजिताश्च ते लोकपाला इत्याह—सह देवैरित्यर्धमेकं वाक्यम् । देवैः लोकपालभिन्नैः । ते लोकपालाः । महात्मत्वं महावीर्यत्वम् ॥ १७ ॥

रा० टी०—विभीषणस्येति । रघुसत्तमो विभीषणस्य वचः श्रुत्वा मनसाऽदृश्यं विचार्य च इदमब्रवीत् ॥ १७ ॥

गो० टी०—विभीषणेति । अदृश्यं आलोच्य । सर्वं वक्ष्यमाणप्रकारम् ॥ १७ ॥

१८] ति० टी०—यानीत्यादि यदि कर्मनिर्वर्तितशौर्यवीर्यं तत्त्वहमवगच्छामि, न तु तावति यदविष्यतीति भावः ॥ १८ ॥

रा० टी०—यानीति । यानि रावणस्य कर्मापदानानि कर्मनिर्वर्तितशौर्यवीर्याणीति । तत्त्वेन त्वया आख्यातानि सहजैः अस्त्रैः अस्त्रैश्च यानि जानामि तेन तन्मात्रेण तावत्तिरस्कारकर्मणीति सन्निधिं त्वयाऽनं कर्म कृतमिति ज्ञायते ॥ १८ ॥

गो० टी०—यानीति । कर्मापदानानि अवदानं कर्म कृतम्, ज्ञायते लक्ष्यते इत्यर्थः अवगच्छामि जानामि तेन कर्मणा तावत्तिरस्कारकर्मणीत्यर्थः ॥ १८ ॥

१९] ति० टी०—वधं च ते हि मे राजन्यिति तत्त्वयं सेतावित्यादिनोक्तं प्रति ज्ञापयति—अहमिति ॥ १९ ॥

रा० टी०—अहमिति । दशग्रीवं हत्वा त्वां राजानं करिष्यामि एतत् सत्यं शृणोति ॥ १९ ॥

गो० टी०—प्रतिज्ञातमर्थमाह—अहमित्यादिना ॥ १९ ॥

२०–२१] ति० टी०—रसातलं भूमेरितोऽधोलोकम् पातालमधोलोकस्यैवान्तर्गतं लोकम् । मे मम ॥ २० ॥ २१ ॥

रा० टी०—रसातलमिति । रसातलप्रभृतानि प्रवेशेऽपि सत्यं पुनः मे मम जीवन् मन् न प्रमोक्ष्यते न त्यक्ष्यते ॥ २० ॥

गो० टी०—रसातलमिति । भूमेरधम् पातालम् अधोलोकम् पितामहगुहां स्वयम्भूसमीपम् उपरितनलोकावधिकृतं सत्यलोकं वा मे भक्तः ॥ २१ ॥

रा० टी०—विभीषणस्य पार्श्वस्थितं प्रतिज्ञातं प्रतिज्ञातं—अहमिति । त्रिभिरतादिभिः शपे अत्यर्थं शपथं करोमि ॥ २१ ॥

---

१ संग्रामसमयेति गो. पाठः । २ महात्मत्वेति गो. पाठः । ३ विभीषणवचः श्रुत्वा रामो दृढपराक्रमः इति गो. पाठः । ४ सत्यमेवमिति गो.

श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः । शिरसावन्द्य धर्मात्मा वक्तुमेव प्रचक्रमे ॥ २२ ॥
राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे । करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् ॥ २३ ॥
इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम् । अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय ॥ २४ ॥
तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम् । राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद ॥ २५ ॥
एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद्विभीषणम् । मध्ये वानरमुख्यानां राजानं राजशासनात् ॥ २६ ॥
तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः । प्रचुक्रुशुर्महात्मानं साधुसाध्विति चाब्रुवन् ॥ २७ ॥
अब्रवीच्च हनूमांश्च सुग्रीवश्च विभीषणम् । कथं सागरमक्षोभ्यं तराम वरुणालयम् ॥
सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् ॥ ॥ २८ ॥
उपायैरभिगच्छाम यथा नदनदीपतिम् । तराम तरसा सर्वे ससैन्या वरुणालयम् ॥ २९ ॥

गो० टी०—उक्तमर्थं व्यतिरेकमुखेन दृढयन् सत्यमेतदहमपि त इत्युक्तं विवृणोति—अहत्वेति । संख्ये युद्धे तैः सिद्धैः शत्रुभिरिति हेतुविवक्षया तृतीया ॥ २२ ॥

२२] ति० टी०—अथ विभीषणो रामस्य स्वार्थसाधनप्रतिज्ञां श्रुत्वा स्वयमपि रामकार्यसाधनं प्रतिजानीते—शैरसेति ॥ २२ ॥

रा० टी०—श्रुत्वेति । रामस्य वचनं श्रुत्वा आवन्द्य नमस्कृत्य प्रवक्तुमेव प्रचक्रमे विभीषण इति शेषः ॥ २२ ॥

गो० टी०—स्वानभिमतराज्यप्रदानप्रतिज्ञानात् वन्दनपूर्वकं स्वाभिमतं कैङ्कर्यमेव प्रयोजनान्तरनिवृत्तयेऽर्थयते—श्रुत्वेत्यादिना । आवन्द्येति च्छेदः ॥ २३ ॥

२३] ति० टी०—साह्यं साहाय्यम् । वाहिनीं रावणवाहिनीम् ॥ २३ ॥

रा० टी०—तदाकारमाह—राक्षसानामिति । राक्षसानां वधे लङ्कायाः प्रधर्षणे च साह्यं ते साहाय्यं यथाप्राणं जीवनपर्यन्तमित्यर्थः करिष्यामि अत एव वाहिनीं रावणसेनां प्रवेक्ष्यामि ॥ २३ ॥

गो० टी०—राक्षसानामिति । साह्यं साहाय्यम् सहशब्दः सहायवाची । यथाप्राणं यथाबलम् ॥ २४ ॥

२४-२६] ति० टी०—परिष्वज्येत्यनेन मित्रत्वेन परिग्रहणं सूचितम् ॥ २४-२६ ॥

रा० टी०—इतीति । इति ब्रुवाणं विभीषणं रामः परिष्वज्य समुद्राज्जलमानय तेन जलेन प्रसन्ने मयि मत्समीपे रक्षसां राजानं कर्तुमिति शेषः विभीषणमभिषिञ्च इति लक्ष्मणमब्रवीत् । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०—एवं कैङ्कर्यव्यतिरिक्तफलमनाकांक्षाणं विभीषणं परिष्वङ्गेन वशीकृत्यानुपङ्क्तिकमपि फलं मत्प्रदत्तमङ्गीकर्तव्यमित्यभिप्रायेण लक्ष्मणमादिशति—इतीति तेनेति । तेन समुद्रजलेन महाप्राज्ञं कैङ्कर्यपर्यन्तस्वशेषत्वस्वरूपज्ञं मयि प्रसन्ने सतीत्यनेन अभिषेको विभीषणेनाकांक्षित इति गम्यते । मानद बहुमानप्रद मत्प्रसादे सति फलप्रदस्त्वमिति भावः ॥ २४ ॥ २६ ॥

रा० टी०—एवमिति । एवमुक्तः सौमित्रिर्वानरमुख्यानां मध्ये राजशासनादेतोः राजानं कर्तुं विभीषणमभ्यषिञ्चत्॥२६॥

गो० टी०—एवमिति । मध्ये वानरमुख्यानामित्यनेन महत्समाज कृतमलङ्घनीयमिति द्योत्यते । राजशासनादित्यनेनालङ्घनीयं राजशासनमिति विभीषणोऽनुमेन इति भाव्यते ॥ २७

२७] ति० टी०—प्रचुक्रुशुः सतोषाक्किलकिलाकुर्वन् ॥ २७

रा०टी०—तमिति । रामस्य तं विभीषणविषयकं प्रसादं प्रीतिं दृष्ट्वा ज्ञात्वा प्लवङ्गमाः प्रचुक्रुशुः हर्षसूचकस्वजातीयशब्दं चक्रुः महात्मानं रामं साधु साध्विति अब्रुवन् च ॥ २७ ॥

गो० टी०—तमिति । प्रचुक्रुशुः हर्षनादं चक्रुः महात्मानं रामम् अब्रुवन् प्राशंसन्नित्यर्थः ॥ २८ ॥

२८] ति० टी०—वानराणां सैन्यैः परिवृताः कथं केनोपायेन सागरं तराम ॥ २८ ॥

रा० टी०—अब्रवीदिति । हनुमान् सुग्रीवश्च विभीषणमब्रवीत् । अथ प्रश्नः । तदाकारमाह—वानराणां सैन्यैः परिवृता वयं सागरं कथं तराम । अर्धद्वयमेकान्वयि॥२८॥

गो० टी०—अथ समयान्तरे कुत्रचिदेकान्ते प्रदेशे हनुमत्सुग्रीवौ स्थलजं विभीषणं वानरसेनातरणोपायमप्रच्छतामित्याह—अब्रवीदिति । इदमर्धमेकं वाक्यम् ॥ २९ ॥

गो० टी०—कथमिति । दुस्तरत्वे हेतुरक्षोभ्यमिति तत्रापि हेतुर्वरुणालयमिति ॥ ३० ॥

२९] ति० टी०—ससैन्या वरुणालयं यथा तराम तथा कैरुपायैर्नदनदीपतिमभिगच्छाम मार्गप्राप्तये तद्देहेति शेषः ५

रा० टी०—तदेव भङ्ग्यन्तरेणाह—उपायैरिति । सैन्या ये वयं नदनदीपतिं वरुणालयमभिगच्छाम अभ्यगच्छाम प्राप्नुम ते वयं तरसा उपायैर्यथा तराम तथा ब्रूहीति शेषः किंच वरुणालयं यथा तराम यथा च उपायैरभिगच्छाम सीप्राप्नुयां तथा ब्रूहि ॥ ३० ॥

एवमुक्तस्तु धर्मात्मा प्रत्युवाच विभीषणः । समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ३० ॥
खानितः सगरेणायमप्रमेयो महोदधिः । कृतमर्हति रामस्य ज्ञातेः कार्यं महोदधिः ॥ ३१ ॥
एवं विभीषणेनोक्तं राक्षसेन विपश्चिता । आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ॥ ३२ ॥
ततश्चाख्यातुमारेभे विभीषणवचः शुभम् । सुग्रीवे विपुलग्रीवः सागरस्योपवेशनम् ॥ ३३ ॥
प्रकृत्या धर्मशीलस्य रामस्यास्याप्यरोचत । सलक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम् ॥ ३४ ॥
सत्क्रियार्थं क्रियादक्षं स्मितपूर्वमभाषत । विभीषणस्य मन्त्रोऽयं मम लक्ष्मण रोचते ॥ ३५ ॥
सुग्रीवः पण्डितो नित्यं भवान्मन्त्रविचक्षणः । उभाभ्यां संप्रधार्यार्थं रोचते यत्तदुच्यताम् ॥ ३६ ॥
एवमुक्तौ ततो वीरावुभौ सुग्रीवलक्ष्मणौ । समुदाचारसंयुक्तमिदं वचनमूचतुः ॥ ३७ ॥

गो० टी०—बुद्धिमन्तो भवन्त एव विचार्यन्तीत्याह—उपायं नाधिगच्छाम इति । सर्वे वयमिति शेषः ॥ २९ ॥

३०] ति० टी०—एवं प्रश्न उपायमाह—एवमिति॥३०॥

रा० टी०—एवमिति । एवमुक्तो धर्मात्मा विभीषणः प्रत्युवाच । तदाकारमाह—राजा रामः शरणं स्वगृहप्रायं समुद्रं गन्तुमर्हति ॥ ३० ॥

गो० टी०—समुद्रमित्यर्धम् । लक्ष्मणव्याहृत्यर्थे राजेत्युक्तिः ॥ ३० ॥

३१] ति० टी०—राघवेण शरणगमने समुद्राद्ग्रहमिश्रौ हेतुमाह—खानित इति । सगरेण । पुत्रैरिति शेषः । अयमुदकतीरसमीपः कतिपयोंऽशः । ज्ञातेः रामस्येत्यन्वयः ॥३१॥

रा० टी०—सागरस्य गृहप्रायत्वं हेतुं वदन्नाह—खानित इति । महामतिरयं महोदधिः सगरेण खानितः अतः ज्ञातेः रामस्य कार्यं कर्तुमर्हति ॥ ३१ ॥

गो० टी०—शरणवरणं व्याजीकृत्य समुद्रः प्रत्यासत्त्यतिशयात्मस्य उपायं दिशेदित्यभिप्रायेणाह—खानित इति । खानितः स्वपुत्रैरिति शेषः । न केवलमुत्पत्तिमात्रे तन्मूलं किं त्वतिशयोऽपि तदधीन इत्याह—अप्रमेयो महोदधिरिति । सगरेण रामकूलेन । महामतिः उपकारज्ञ इत्यर्थः॥ ३१ ॥

३२] ति० टी०—एवं विभीषणोक्तं श्रुत्वा यत्र रामो वर्तते तं देशं सलक्ष्मणः सुग्रीव आजगामेति संबन्धः ॥ ३२ ॥

रा० टी०—एवमिति । विभीषणेन एवमुक्तं कथितम अथ तदुक्तश्रवणानन्तरं सुग्रीवः यत्र रामस्तत्राजगाम ॥ ३२ ॥

गो० टी०—एवमिति । राक्षसेनेति स्थलशक्तोक्ता । विपश्चितेति तात्कालिकबुद्धिमत्ता आजगामेत्यनेन कालान्तरं देशान्तरे सुग्रीवादिप्रश्न इति गम्यते ॥ ३४ ॥

३३] ति० टी०—सागरस्योपवेशनं शरणगमनम् ॥३३॥

रा० टी०—तत इति । ततः रामसमीपागमनानन्तरं सागरस्योपवेशनं विभीषणवचः सुग्रीव आख्यातुमारेभे ॥३४॥

गो० टी०—ततश्चेति । विपुलग्रीव इत्यनेन कुलशीलसमृद्धत्वम् । आरेभ इत्यनेन आरम्भमात्र एव लक्ष्मणतया रामेण सहसा सुग्रीवाविवक्षितं ज्ञातमित्युच्यते । उपवेशनम् उपासनम्३३

३४] ति० टी०—अस्य सकलजगत्कारणभूतस्य रामस्य प्रकृत्येत्यादि । पुरुषकारलक्षणसागरकारणमवतीर्ण इति भावः ॥ ३४ ॥

रा० टी०—तदाख्यानानन्तरं तत्कालिकं रामहृदयान्तमाह—प्रकृत्येति । प्रकृत्या स्वभावतः धर्मशीलस्य राघवस्य अरोचत सुग्रीवोक्तं विभीषणवचनमिति शेषः । अर्थं पृथक् । स्म इति । महातेजाः स रामः लक्ष्मणं सुग्रीवादिसत्कारः अर्थः प्रयोजनं यस्य तद्वचनं क्रियादक्षः कर्मणि सुग्रीवं च स्मितपूर्वमभाषत । तदाकारमाह—अयं विभीषणस्य मन्त्रो मम रोचते । सार्धश्लोक एकान्वयः ॥ ३३ ॥ ३५ ॥

गो० टी०—प्रकृत्येत्यर्धमेकं ॥ ३४ ॥ अरोचत तदुपवेशनमित्यनुषङ्गः ॥ ३५ ॥

३५] ति० टी०—सत्क्रियार्थं विभीषणस्य पूजार्थं सलक्ष्मणं सुग्रीवं हरीश्वरमभाषतेत्यन्वयः ॥ ३५ ॥

गो० टी०—स इति । महातेजाः तात्कालिकहर्षप्रकाशकदेहकान्तिमान् । अन्यानभिज्ञाय सुग्रीवं प्रति वचने हेतुहरीश्वरमिति । सत्क्रियार्थं विभीषणसत्कारप्रयोजनाय । क्रियादक्षः स्वयं कार्यकरणसमर्थोऽपि ॥ ३५ ॥

गो० टी०—विभीषणस्येति । स्मितञ्च ॥ ३८ ॥

३६] ति० टी०—उभाभ्यामर्थे सति संप्रधार्य निश्चित्य यदुच्यते तदुच्यताम् ॥ ३६ ॥

रा० टी०—सुग्रीव इति । सुग्रीवो भवांश्च पण्डितः सर्वोभिज्ञः अत एव मन्त्रविचक्षणः मन्त्रेषु कुशलः अत एव उभाभ्यामर्थं संप्रधार्य निश्चित्य रोचते तदुच्यताम् ॥ ३६ ॥

गो० टी०—सुग्रीव इति । पण्डितः मन्त्रसमर्थः । उभाभ्यामिति चतुर्थी । अर्थं प्रयोजनम् । सम्प्रधार्य निश्चित्य यत्कार्यमुभाभ्यां रोचत तदुच्यतामिति सम्बन्धः ॥ ३६ ॥

३७] ति० टी०—समुदाचार उपचारः ३७ ॥

रा० टी०—एवमिति । एवमुक्तौ सुग्रीवलक्ष्मणौ समुदाचारेण सत्कारेण संयुक्तमिदं वचनमूचतुः ॥ ३८ ॥

गो० टी०—एवमिति । समुदाचारः अञ्जलिबन्धादुपचारः तत्संयुक्तमिति क्रियाविशेषणम् ॥ ४० ॥

---

१ सर्वत्र इदं गो. पाठः । २ ज्ञातेरिति गो. पाठः । ३ महामतिरिति गो. पाठः । ४ उक्त इति गो. पाठः । ५ राघवस्येति गो. रा. पाठः ।

सीयं हरिभिर्लङ्का प्राप्तुं शक्या कथंचन । देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः ॥ १२ ॥
स तदा राक्षसेन्द्रेण संदिष्टो रजनीचरः । शुको विहंगमो भूत्वा तूर्णमाप्लुत्य चाम्बरम् ॥ १३ ॥
स गत्वा दूरमध्वानमुपर्युपरि सागरम् । संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ॥ १४ ॥
सर्वमुक्तं यथादिष्टं रावणेन दुरात्मना । तत्प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः ॥ १५ ॥
प्रापयन्त तदा क्षिप्रं लोप्तुं हन्तुं च मुष्टिभिः । सर्वैः प्लवंगैः प्रसभं निगृहीतो निशाचरः ॥ १६ ॥
गगनाद्भूतले चाशु प्रतिगृह्यावतारितः । वानरैः पीड्यमानस्तु शुको वचनमब्रवीत् ॥ १७ ॥
न दूतान्घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः । यस्तु हित्वा मतं भर्तुः स्वमतं संप्रधारयेत् ॥
अनुक्तवादी दूतः सन्स दूतो वधमर्हति ॥ ॥ १८ ॥

राय गुरुदत्तारम्भः । हे महाराज ! त्वं कुलप्रसूतः । सूर्यपुत्रादिति भावः तेन निष्कारणवैरं त्वया कर्तुमनुचितमिति सूच्यते । महाबलः अल्पबलं राममवलम्बितुं नार्हसीत्यर्थः । इक्ष्वाकुजःसुतः ब्रह्मपौत्रत्वेन मम बन्धुभूतोसीत्यर्थः । तव रामावलम्बने कश्चिदर्थो नास्ति अनवलम्बने अनर्थश्च नास्ति अफलं वैरं तव नोचितमिति भावः । बालिसम्बन्धेन भ्रातृसमत्वान्मयैव प्रणयं कुर्वित्यभिप्रायेणाह—त्वया हीति ॥ ११ ॥

रा० टी०- ननु सीतापहारित्वात्त्वयि मम द्रोहो युक्त एवेत्यत आह–अहमिति । राजपुत्र्याः रामस्य भार्या यथाहमहरं तहिं तव हरणे तव किम् अकार्यमिति शेषः न किञ्चिदित्यर्थः अतः किंकिन्धां प्रति गम्यताम् ॥ ११ ॥

गो० टी०-सीतापहरणमेव त्वत्कृतो महाननर्थ इत्याह–अहमिति । राजपुत्रस्य तवेति पदाभ्यां नरवानरयोः कः संबन्ध इत्युक्तम् । श्रीमत इति सुग्रीवविशेषणम् । तत्र हरणविषये किं का हानिरित्यर्थः ॥ १२ ॥

१२] ति० टी०–मद्वचनमनादृत्यागतेनापि त्वयात्र किमपि न कर्तुं शक्यमित्याह–नहीयमिति ॥ १२ ॥

रा० टी०-एवं लङ्कागमनोद्योगो निरर्थक इति बोधयन्नाह–नहीति । इयं लङ्का हरिप्रभृतिभिः प्राप्तुं कथंचन न शक्या अत्र हरिपदवाच्यो विष्णुर्ज्ञेयः अत एवोत्तरत्र वानरैरित्यपपदम् ॥ १२ ॥

गो० टी०-आरब्धस्यान्तगमनमिति न्यायेन प्रक्रान्तं कार्यं कथं त्यक्ष्यतामित्याह–न हीति । उक्तमर्थं कैमुतिकन्यायेन दृढयति—देवैरिति । अत्र नरवचनात् पूर्वार्धे हरिपदं नरोपलक्षकं ज्ञेयम् । त्वमेवामुमर्थमारोचयेति भावः । इयं लङ्का प्राप्तुं न शक्येत्युक्तमर्थमनुपपन्नयते ॥ १२ ॥

१३] ति० टी०–शुको विहंगमो भूत्वा शुकपक्षी भूत्वा आप्लुत्य चाम्बरम् जगामेति शेषः

रा० टी०-तदेति । राक्षसेन्द्रेण संदिष्टः शुकः विहङ्गमः पक्षी भूत्वा अम्बरमाप्लुत्य सागरमुपर्युपरि दूरमध्वानं गत्वा अम्बरमेव संस्थित सन् सुग्रीवमिदमब्रवीत् । अर्धचतुष्टयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०-स इति । अम्बरमाप्लुत्य आजगामेति शेषः १४

१४] ति० टी०–सागरस्योपर्युपरि सागरस्यापीत्यर्थः देशे ॥ १४ ॥

गो० टी०-स गत्वेति । उपर्युपरि सागरं सागरस्याध्यवहितोपरि प्रदेशे "उपर्यध्यधसः सामीप्ये" इति द्वित्वनिपातः । आम्रेडितान्तत्वादध्वसवतसोरिति द्वितीया ॥ १५ ॥

१५] ति० टी०–यथादिष्टं सर्वमुक्तं वाक्यमनवशेषेण्यन्वयः तत्प्रापयन्तम् रावणोक्तं सुग्रीवायेत्यर्थः ॥ १५ ॥

रा० टी०–सर्वमिति । रावणेनोक्तं सर्वं तद्वचनं यथादिष्टं प्रापयन्तं कथयन्तमित्यर्थः वानरास्तूर्णमाप्लुत्य लोप्तुं पक्षौ च्छेत्तुं मुष्टिभिर्हन्तुं च प्रापयन्त ॥ १६ ॥

गो० टी०–तदिति । प्रापयन्तं श्रावयन्तम् । प्रापयन्त पर्यवारयन् ॥ १६ ॥

१६-१७] ति० टी०–प्रापयन्त गृहीतवन्तः । लोप्तुम् । पक्षाविति शेषः ॥ १६ ॥ १७ ॥

रा० टी०–स इति । निशाचरः खवर्त्तैर्निगृहीत आनीदिति शेषः । अथ पृथक्–गगनादिति । गगनात् प्रतिपृथ्व भूतलेऽवतारितः अत एव पीड्यमानः शुकोऽब्रवीत् । सार्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

गो० टी०–स तैरिति । निगृहीतः बद्धः ॥ १७ ॥

गो० टी०–वानरैरित्यादि । दूतोऽयमुक्तकारी वध्य एवेत्याशङ्क्य नार्हतथा अनुक्तकारीत्याशयेनाह–यस्त्विति॥१८॥१९

१८] ति० टी०–यथोक्तराजसंदेशवादिनो ममापराधो नास्तीत्याह–यस्त्विति । भर्तुर्मतं संदिष्टं मार्गं हित्वा स्वमतं तत्काले आत्मत्राणायमन्यदेव किंचिद्यदि भाषते तदा सोऽनुक्तवादी सन्वधमर्हति ॥ १८ ॥

रा० टी०–तदाकारमेवाह—नेत्यादिभिः । हे काकुत्स्थ ! दूतान् न घ्नन्ति राजान इति शेषः अतो वानराः वार्यन्ताम् । अथ पृथक् । ननु त्वया किमर्थं वानरापियमनुक्तमित्यत आह–य इति । यो भर्तुर्मतं हित्वा स्वमतं स्वसंमतिविषयीभूतं वचन

१ ऐरिति गो. पाठः । २ ऐरिति गो. पाठः । ३ हित्वेति गो. पाठः । ४ स तैरिति गो. रा. पाठः । ५ परिगम्य निपात्य इति गो. पाठः । ६ वार्यन्ते इति गो. पाठः ।

शुक्रस्य वचनं रामः श्रुत्वा तु परिदेवितम् । उवाच मावधिष्टेति व्रतः शाखामृगर्षभान् ॥ १९ ॥
स च पत्रलघुर्भूत्वा हरिभिर्दर्शितेऽभये । अन्तरिक्षे स्थितो भूत्वा पुनर्वचनमब्रवीत् ॥ २० ॥
सुग्रीव सत्त्वसंपन्न महाबलपराक्रम । किं मया खलु वक्तव्यो रावणो लोकरावणः ॥ २१ ॥
स एवमुक्तः प्लवगाधिपस्तदा प्लवङ्गमानामृषभो महाबलः ।
उवाच वाक्यं रजनीचरस्य चारं शुकं शोद्भ्रमदीनसत्त्वः ॥ २२ ॥
न मेऽसि मित्रं न तथानुकम्प्यो न चोपकर्तासि न मे प्रियोऽसि ।
अरिश्च रामस्य सहानुबन्धस्ततोऽसि वाच्यो न वधार्ह वध्यः ॥ २३ ॥
निहन्म्यहं त्वां ससुतं सबन्धुं सज्ञातिवर्गं रजनीचरेशम् ।
लङ्कां च सर्वां महता बलेन सैन्यैः करिष्यामि सलेप्य भस्म ॥ २४ ॥

प्रधारयेत् वञ्चनार्थं वदेत् सोऽनुचरवादी दूतः वधमर्हति । एतेन दूतधर्ममवेक्ष्यैव नयेदमुक्तमिति सूचितम् ॥ १८ ॥

१९–२०] ति० टी०–शुकस्य परिदेवितरूपं वचनं श्रुत्वा । मावधिष्ट मावधिज्ञमिति यावत् । एकवचनमार्षम् । रामेण क्षमा हरिभिरभये दर्शिते सति । पत्रलघुः पक्षबलेन शीघ्रगतिर्भूत्वा वचनमब्रवीत् । यतु—पत्रलघुः पक्षैर्लघुर्वृक्षपत्र इति तीर्थस्वम् । तादृशस्यान्तरिक्षगमनासंभवात्, रामवचनानुप्रवेशाच्च ॥ १९ ॥

रा० टी०–शुकस्येति । परिदेवितं रोदनरूपं शुकस्य वचनं श्रुत्वा मावधिष्टेति व्रतः व्रतः शाखामृगर्षभान् राम उवाच ॥ १९ ॥

गो० टी०–शुकस्येति । परिदेवितं परिदेवनरूपं वचनम् । मा वधिष्टेति प्रत्येकोक्त्यभिप्रायेणैकवचनम् । वधिष्टेत्यत्र आर्षः सन्धिः ॥ २० ॥

रा० टी०–स इति । सः रामेण क्षमाप्रिवारितः शुकः पक्षौ लघू यस्य तृनकिंचित्पक्षलोमेत्यर्थः स भूत्वा हरिभिरभये दर्शिते सति अन्तरिक्षे स्थितो भूत्वा पुनरब्रवीत् ॥ २० ॥

गो० टी०–स चेति । पत्रलघुः लघुपत्रः । वानरैः प्रायेण तृनपत्र इत्यर्थः । भये दर्शिते दर्शितेऽपि ॥ २१ ॥

२१] ति० टी०–लोकरावण इत्यनेन तत्संदेशं विनैव गमने ततो मे महद्भयमिति सूचितम् ॥ २१ ॥

रा० टी०–तदाकारमाह—सुग्रीवेति । हे सुग्रीव ! रावणो मया किं वक्तव्यः तद्देत्यर्थः ॥ २१ ॥

गो० टी०–स्ववाक्यश्रवणाय सुग्रीवं प्रशंसति—सुग्रीवेति । लोकरावण इत्यनेन प्रतिवचनमानादाने मां हनिष्यतीति भावः ॥ २२ ॥

२२] ति० टी०–वाक्यं प्रतिसंदेशवाक्यम् ॥ २२ ॥

रा० टी०–स इति । एवमुक्तः प्लवगाधिपः सुग्रीवः रजनीचरस्य चारं शुकमुवाच ॥ २२ ॥

गो० टी०–स एवमिति । लोके प्रतिदूतिरपि तज्जातीयो न भवति तद्द्वा॥ वानराणां प्लवङ्गमानामृषभः श्रेष्ठः । महाबलः तृणीकृतानेक इत्यर्थः । अदीनसत्त्वः अदीनमनस्कः अत एव प्रियोऽसि इत्यत्र [illegible] ॥ २२ ॥

२३] ति० टी०–अनुकम्प्यो दयापात्रम् । अरिश्च अत्यर्थमिति शेषः । अतः सहानुबन्धः स्वपुत्रविवादिविरिक्तः । अतः रामस्यारिश्चाहं वध्योऽसि । दयनीय अतः॥ २३ ॥

रा० टी०–तदाकारमाह—नेत्यादिभिः । न मित्रादिरसि नासि तथानुकम्प्यो दयनीयो नासि न चोपकर्तासि रामारिस्त्वमतोऽहं त्वां वधार्हं सहानुबन्धः पुत्रसचिवसहितस्त्वं वाच्यो वधार्होऽसि ॥ २३ ॥

गो० टी०–अनुकम्प्योऽसीत्यनेनोत्तरमाह—न मेऽसीति । मे मित्रं नासीत्यर्थः अनुकम्प्यः दयनीयश्च नासि मे उपकर्ता चासि मे प्रियोऽपि नासि अतः कथं वधार्हमसीति भावः प्रस्तुत मित्रानुकूलाद्वेष्यानीत्यत्र आरभ्यते । नन्वेवं तर्हि वधार्हत्वादिना किमेतं मत्संदूषणेनेति चेत्तत्राह—न मेऽसीति । नः अरिश्चेत्तर्हि वाच्यो मे त्वमसीति अरिमित्रस्याक्षम्यादिति भावः । इत्येवं मनसि कृत्वोक्तं वचनमिति । अनेनाहं यत्तदर्थं वार्यामित्येतदुत्तरम् ॥ २४ ॥

२४] ति० टी०–त्वां सचिववराग्रिम् । सर्वैः समेतैरित्यन्वयः ॥ २४ ॥

रा० टी०–निहन्मीति । सर्वं रामादिसमेतं बलेन च समेत्य आगत्याहं त्वां निहन्मि अत एव लङ्कां भस्म करिष्यामि ॥ २४ ॥

गो० टी०–सदीयं हरिभिर्वधूत्यन्योत्तरमाह—निहन्मीति । ज्ञातिवर्गः कुम्भकर्णादिः विभीषणस्तु न ज्ञातिरिति भावः । सुतादयः किमर्थं हन्तव्या इत्यपेक्षायां राजारं राजादित्याह—रजनीचरेशमिति । बलेन सत्वया ॥ २४ ॥

---

१ चेति । २ पाठ । ३ स्व इत्यपरिवर्तित इति गो० पाठः । ४ तूर्णमिति गो० पाठ । ५ स मे इति गो० पाठः ।

न मोक्ष्यसे रावण राघवस्य सैवैः सहेन्द्रैरपि मूढ गुप्तः ।
अन्तर्हितः सूर्यपथं गतोऽपि तथैव पातालमनुप्रविष्टः ॥
गिरीशपादाम्बुजसंगतो वा हतोऽसि रामेण सहानुजस्त्वम् ॥ २५ ॥
तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् । त्रातारं नानुपश्यामि न गन्धर्वं न चासुरम् ॥ २६ ॥
अवधीस्त्वं जराबृद्धं गृध्रराजं जटायुषम् । किं नु ते रामसांनिध्ये सकाशे लक्ष्मणस्य च ॥
हृता सीता विशालाक्षी यां त्वं गृह्य न बुध्यसे ॥ ॥ २७ ॥
महाबलं महात्मानं दुराधर्षं सुरैरपि । न बुध्यसे रघुश्रेष्ठं यस्ते प्राणान्हरिष्यति ॥ २८ ॥
ततोऽब्रवीद्वालिसुतोऽप्यङ्गदो हरिसत्तमः । नायं दूतो महाप्राज्ञ चारकः प्रतिभाति मे ॥ २९ ॥
तुलितं हि बलं सर्वमनेन तव तिष्ठता । गृह्यतां मागमल्पङ्क्रामेतद्धि मम रोचते ॥ ३० ॥
ततो राज्ञा समादिष्टाः समुत्क्रम्य वलीमुखाः । जगृहुश्च बबन्धुश्च विलपन्तमनाथवत् ॥ ३१ ॥

२५] ति० टी०—राघवस्य न मोक्ष्यसे राघवाश्च मोक्ष्यसे। अन्तर्हितोऽन्तर्धानशक्त्या ॥ २५ ॥

रा० टी०—नेति । सहेन्द्रैः सर्वदेवैर्गुप्तो रक्षितस्त्वं राघवस्य राघवाश्च मोक्ष्यसे अतः अन्तर्हितत्वादिकं प्राप्तोऽपि सहानुजस्त्वं रामेण हतो निहतप्रायोऽसि । सार्धश्लोक एकान्वयी ॥ २५ ॥

गो० टी०—मयि लङ्कात्यं सर्वस्वं करिष्यमि स्थलान्तरं गमिष्यामीति शङ्कायामाह—न मोक्ष्यस इति । राघवस्य राघवात् । पञ्चम्यर्थे षष्ठी । मूढेति संबुद्धिः । सूर्यपथं सूर्यद्वारं गतः सन् अन्तर्हितोपि न मोक्ष्यस ॥ २५ ॥

२६] ति० टी०—पिशाचादिषामेकैकं समुदितं च त्रातारं न पश्यामि, अतएव नञ्पञ्चकं चरितार्थम् ॥ २६ ॥

रा० टी०—तस्येति । तस्य रामस्योपरि तव त्रातारं नाहं मनुष्यमात्रः वानर इत्यर्थः अयं तुशब्द इवार्थे पिशाचप्रभृतिं न पश्यामि अत्र पञ्चमनकारसमर्थनार्थं प्रथममेकैकस्यानुपश्यामीत्यन्वयः पश्चात् समुदायस्येति वर्णयन्ति ॥ २६ ॥

गो० टी०—त्रिजगदीश्वरेपि त्रातुमर्हीश्वरे का वार्ता क्षुद्राणामित्याह—तस्येति । तस्य रामशरविद्धस्य ॥ २७ ॥

२७] ति० टी०—किं च तद्बलं त्वयैव ज्ञातमिति त्वत्कृतैवोक्त्या शङ्कते इत्याह—अवधीरिति । जराबृद्धं जरापूर्णं वृद्धं चिरकालिकं चिरकालिकोऽपि कश्चिदौषधसिद्ध्यादिना जरारहितो भवेत्, अचिरकालिकोऽपि कश्चिच्छापादिना जरायुक्तो भवेत्, अतश्चिरकालिकोपादानम् । किं नु न हता । यदि बलमस्तीति शेषः । न बुध्यसे स्वबलमिति शेषः ॥ २७ ॥

रा० टी०—अवधीरिति । जरया पूर्णो वृद्धो ज्ञानाधिक्यं ज्ञानवयोभ्यामधिकमित्यर्थः जटायुषं किं किमर्थमवधीः यां सीतां गृह्य गृहीत्वा रामसांनिध्ये लक्ष्मणस्य सकाशे समीपे च त्वं न बुध्यसे स्वमृत्युमिति शेषः सा सीता च त्वया किं हृता । सार्धश्लोक एकान्वयी ॥ २७ ॥ २८ ॥

गो० टी०—यदि रामसहाये स्थितोसि तर्हि ते जटायुषोवस्था स्यादित्याह—अवधीरिति । अहमेकं वाक्यम् । जरया वृद्धम् अतएवाशक्तम् असमर्थम् । जटायुषमवधीरिति यत्तव ते किं वीर्यमिति शेषः । नाहं तादृश इति भावः ॥२८॥

गो० टी०—भार्याहरणकाले किमप्यकुर्वन् रामः किमिदानीं करिष्यतीत्याह—किंन्विति । ते त्वया सन्निधिश्च सान्निध्यम् । विशालाक्षीत्यनेन सीताहरणं रामस्यात्यन्तासह्यमित्युच्यते । गृह्य गृहीत्वा । न बुध्यसे भाव्यनर्थमिति शेषः॥२७॥

२८] ति० टी०—रघूश्रेष्ठं महाबलत्वादिगुणकम् । न बुध्यसे इत्यर्थः ॥ २८ ॥

रा० टी०—महाबलमिति । यस्ते प्राणान् हरिष्यति तत्र बुध्यसे ॥ २९ ॥

गो० टी०—न बुध्यस इत्युक्तं विवृणोति—महाबलमिति । महात्मानं महापुरुषम् ॥ २७ ॥

२९] ति० टी०—अयं स्वामिसंदेशप्रापणमात्रकृत्यो दूत एव न, किं तु गूढतया परबलपरीक्षाप्रवृत्तिश्चार एव ॥ २९ ॥

रा० टी०—तत इति । ततोऽङ्गदोऽब्रवीत् । तदाकारमाह—अयं दूतः संदेशप्रापकमात्रो न किंतु चारकः अस्मद्बलपरीक्षाकर्ता मे प्रतिभाति ॥ ३० ॥

गो० टी०—तत इति । हरिसत्तमः इङ्गितप्रेक्षणादिज्ञ इति यावत् ॥ ३१ ॥

गो० टी०—नायमिति । चारकः चारः । स्वार्थे ठक् । दूतो हि न वध्यः चारस्तु वध्य एवेति भावः । तुलितं तुलया मितम् । परिच्छिन्नं ज्ञातमिति यावत् ॥ ३२ ॥

३०] ति० टी०—कुतस्तत्राह—तुलितं हीति । एवं प्रमाणमेवं व्यूहमिति सर्वं परिच्छिन्नमित्यर्थः ॥ ३० ॥

रा० टी०—तुलितमिति । तत्र समीपे तिष्ठतानेन सर्वं तव बलं तुलितम् अतोऽयं गृह्यतां यतो लङ्कां मागमत् गच्छेत् एतत् मम रोचते ॥ ३१ ॥

३१] ति० टी०—राज्ञा सुग्रीवेण ॥ ३१ ॥

---

१ अवधीरिति गो. पाठः । २ अपेक्षेत् गो. पाठः । ३ नेति गो. सहित । ४ नेति गो. पाठः । ५ [illegible] । ६ [illegible] । ७ [illegible]

शुक्रस्तु वानरैश्रेष्ठस्तत्र तैः संप्रपीडितः । व्याचुक्रोश महात्मानं रामं दशरथात्मजम् ॥
लुप्येते मे बलात्पक्षौ भिद्येते मे तथाक्षिणी ॥ ॥ ३२ ॥
यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम् । एतस्मिन्नन्तरे काले यन्मया शुभं कृतम् ॥
सर्वं तदुपपद्येथा जह्यां चेन्न दि जीवितम् ॥ ॥ ३३ ॥
नाघातयत्तदा रामः श्रुत्वा तत्परिदेवितम् । वानरानब्रवीद्रामो मुच्यतां दूत आगतः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ।

पारं जिगमिषुणा रामेण प्रार्थितोऽपि सरित्पतिर्न ददौ यदा मार्गं तदा रामः क्रुद्धः सन् सेतुकर्मकरणेन दुष्प्रधारिवसतोऽतिक्रान्तमर्यादतोयश्चासीत् ।

ततः सागरवेलायां दर्भानास्तीर्य राघवः । अङ्गदे चन्दनाक्तेऽङ्गे कृत्वा चोत्तरिते महीम् ॥ १ ॥
बाहुं भुजङ्गभोगाभमुपधायारिसूदनः । जातरूपमयैश्चित्रैर्भूषणैर्भूषितं सदा ॥ २ ॥
मणिकाञ्चनकेयूरमुक्ताप्रवरभूषणैः । शुभैः परमनारीणामभिमृष्टमनेकशः ॥ ३ ॥
चन्दनागुरुभिश्चैव पुरस्तादभिसेवितम् । बालसूर्यनिकाशैश्च चन्दनैरवलोभितम् ॥ ४ ॥

रा० टी०-तत इति । ततः अङ्गदचन्दनश्रवणानन्तरं वर्णाध्यायः कृत्वेत्यत्र जगृहुः ॥ ३० ॥

गो० टी०-तत इति । राजा रामोऽत्रेण ॥ ३३ ॥

३२] ति० टी०-लुप्येते लिप्येते ॥ ३२ ॥

रा० टी०-शुक्र इति । वानरैः संपीडितः शुकः रामं व्याचुक्रोश ॥ ३० ॥

रा० टी०-तदाकारणाह—लुप्येते इति । मे पक्षौ लुप्येते अतः क्षेत्रौ जीवितमहं जह्यां तर्हि यां रात्रिं यस्मिन् समये अहं जाये यां रात्रिं यस्मिन् समये मरिष्यामि एतस्मिन् जन्ममरणाद्यधिके अन्तरे मध्यवर्तिनि काले यदशुभं पापं मया कृतं तत्सर्वं त्वमुपपद्येथाः प्राप्नुयाः । अर्थचतुर्थ-मेकान्वयि ॥ ३४ ॥ ३२ ॥

गो० टी०-शुकस्त्वित्यादि । सार्धश्लोक एकान्वयः । चण्डैः अत्यन्तक्रोधनैः । पितृसंबन्धकीर्तनेन दया अनेनेति दशरथात्मजमित्युक्तम् । पक्षौ पूर्वोक्तप्रकारौ ॥ ३४ ॥

३३-३४] ति० टी०-रात्रिशब्दोऽहोरात्रपरः । यस्मिन् मरिष्यामि यस्मिन् च जातवानस्मि तदन्तरे काले जन्ममरणाद्यधिकाले यन्मयाऽशुभं कृतं तत्सर्वं त्वमुपपद्येथास्तं प्राप्नुयाः । यदीदृशं त्वयानिवारिततादृशो जीवितं जह्याम् ॥ ३३ ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे विंशः सर्गः ॥ २० ॥

गो० टी०-यामित्यादि । सार्धश्लोक एकान्वयः । रात्रिशब्दोऽहोरात्रवचनः यां च रात्रिं यस्मिंश्च दिवसे मरिष्यामि यस्मिन् जाये अजाये अविलम्बमागमशासनमित्यडभावः आर्षोऽयं प्रयोगः । तस्मिन् दिवसे जन्ममरणाद्यधिकाले मया यदशुभं कृतं पापं तत्सर्वं त्वमुपपद्येथाः प्राप्नुयाः । यदीदृशे प्रस्तावे त्वयानिवारिततादृशो जीवितं जह्याम् ॥ ३३ ॥ ३४ ॥

रा० टी०-भेति । [illegible] निर्भिद्यन्त्यवयवा यस्यां तां [illegible] प्रतीक्षमाणौ [illegible] निर्भिद्येते अतो [illegible] जह्यां [illegible] ॥ ३० ॥

इति श्रीमत्कान्तिकीरामाभरणाख्याने [illegible] विंशः सर्गः ॥ २० ॥

रा० टी०-नाघातयदिति । नाघातयत् अकालमृत्युमतयत् युद्धकाण्डे [illegible] ॥ ३० ॥

इति श्रीमोहनदासविरचितायां [illegible] विंशः सर्गः ॥ २० ॥

१-२] ति० टी०-तत इति । महीधरमिति कृ प्राङ्मुखो दर्भानास्तीर्य प्रतीक्षमाणे अङ्गदं कृतवान् ॥ १ ॥ २ ॥

३] ति० टी०-वाल्यादिदुःखप्रवाहस्तानेन भूषणादि-भिः । परमनारीणामेव कदाचन्नान्येषां स्पृष्टत्वाभावादुत्तमत्वं जनानां भुजंगने कथा स्वप्नवालकरणादिकालेऽभिदृष्टं स्यादतो भिन्नित्वम् ॥ ३ ॥

४] ति० टी०-पुरस्तात्पूर्वं बालसूर्यप्रकाशैरतिरक्तैः कुङ्कुमैरिति यावदित्यर्थः ॥ ४ ॥

---

१ चोत्तरिते गो० पाठः । २ अविलम्बमिति गो० पाठः । ३ चेति गो० पाठः । ४ अभिवाञ्छितमिति गो० पाठः ।

शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा । तक्षकस्येव संभोगं गङ्गाजलनिषेवितम् ॥ ५ ॥
संयुगे युगसंकाशं शत्रूणां शोकवर्धनम् । सुहृदां नन्दनं दीर्घं सागरान्तव्यपाश्रयम् ॥ ६ ॥
अस्यता च पुनः सव्यं ज्याघातविहतत्वचम् । दक्षिणो दक्षिणं बाहुं महापरिघसंनिभम् ॥ ७ ॥

५] ति० टी०–शयने तत्काले । सीताया उत्तमाङ्गेन शिरसा रामभुजार्पितेन शोभितम् । तक्षकस्य संभोगं शरीरं गङ्गाजलेन निषेवितम् । स्थितगङ्गाजलमित्यर्थः । अत्र गङ्गाजलस्थाने सीतागौरस्वात्पवित्रत्वाच्च ॥ ५ ॥

६] ति० टी०–संयुगे शत्रूणां शोकवर्धनम् युगसंकाशं युगवदीर्घम्, दीर्घे दीर्घकाले सुहृदां नन्दनं उत्सवप्रापकम् । सागरान्तभूचक्रं वै सागरान्तं प्रतिष्ठाभूतम् ॥ ६ ॥

७] ति० टी०–पुनः पुनः सव्यमस्यता शरान्निक्षिपता ज्याघातेन विहता त्वग्यत्र तादृशं सर्वभुजेभ्य उत्तमं गोसहस्रप्रदातारं दक्षिणं बाहुं भुजं तदवच्छिन्नम् । कूर्परादुपरिदेशो भुज इत्याहुः । उपधाय दक्षिणः स्वयमधिशिश्ये इत्यन्वयः॥७॥

रा० टी०–शुकवधनिवारणानन्तरकालिकं रामवृत्तान्तमाह—तत इत्यादिभिः । राघवः सागरवेलायां दर्भानासीनः प्राङ्मुखः सन् महोदधेः अञ्जलिं कृत्वा प्रणयमचकत्वेन संपाद्य भुजङ्गभोगाभं सर्पशरीरसदृशं भूषणैर्भूषितं मणिबन्धनमयकेयूरादिभिर्युक्तैः परमनारीणां समवेतजनकराजसुस्थाङ्गनानां भुजैरनेकधा बहुवारं पुरस्तात् विवाहसमये अभिमृष्टं श्रमापनयनहेतुकनिपीडनादौ स्पृष्टं किंच नारीभुजयोः पूज्यत्वाद्बहुवचनमिति नारीशब्देन सीतैव ग्राह्या किंच परनारीणां नारीमर्यादारहितानां नैष्किणां हनुमदादीनामित्यर्थः भुजैरभिमृष्टं सख्यभावनया स्पृष्टम् अत एव परमं तेषां तृणिकारकं किंच तत् अरीणां भुजैर्नाभिमृष्टं तत् परमत्वत्कृष्टम् अपालक्ष्य अ इति अनुपातुप्रकृतिकक्विबन्तप्रकृतिकामन्तं सामान्ये नपुंसकं दीर्घाभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् पुरातत्पूर्वं चन्दनागरुभिरभिलिप्तं बालसूर्यप्रकाशैः रक्तैरित्यर्थः इन्द्रनीलशोभितं पुरा पूर्वं शयने शयनसमये सीतायाः उत्तमाङ्गेन शिरसा शोभितं स्पृष्टसीताशिरस्कमित्यर्थः गङ्गाजलनिषेवितं गङ्गाजलेन सिक्तं तक्षकस्य संभोगं शरीरमिव एतेन राज्ञो स्वेदवत्त्वं सूचितं तेन किंचिच्छ्रमः सूचितः संयुगे संग्रामे युगसंकाशं रिपुविनाशकीभूतशरकलापवर्षीभूतकाष्ठविशेषसदृशम् अत एव शत्रूणां शोकवर्धनं दीर्घं आजानुलम्बं सागरान्तं व्यपाश्रयत् स्पृशति तं पुनः पुनरस्यता शरान् प्रक्षिपता ज्याघातेन विहता छिन्नविशिष्टा त्वक् यस्य तं गमकत्वात्समासः सव्यं वामं बाहुमुपधाय उपबर्हणत्वेन प्रकल्प्य गोसहस्रप्रदातारं प्रतिदिनं विपुलगोप्रदानशीलं दक्षिणं भुजं च उपधाय प्रतिशिश्ये गां स्वकीयां ज्ञात्वा मत्संनिधौ शेते इति परमभाग्यवानहमिति महोदधेः प्रसादाय शयनं चकार । सार्धश्लोकसप्तकमेकान्वयि ॥ १–७ ॥

गो० टी०–एवं प्रासङ्गिकं परिसमाप्य एकान्तरितपूर्वसर्गान्तोदितकथाशेषमुपक्षिपति–तत इत्यादि । सार्धश्लोक एकान्वयः । ततः शुकमोक्षणानन्तरम् सागरवेलायां शर्करा-प्रचुरायाम् दर्भान् शितायकुशान् आस्थाय राघवः सर्वशरण्यकुलप्रसूतः महोदधेः अञ्जलिं कृत्वा भुजगभोगाभम् अहिकायवदतिमृदुलं बाहुम् उपधाय उपधानीकृत्य । प्राङ्मुखः सन् प्रतिशिश्ये । प्रतीत्यनेन तदानीं सागराभिमुखमपरः सागर इव स्थित इत्यवगम्यते । अतिसुकुमारस्य कथमनेकदिनावनितलशयनम्, अखिलरक्षकस्य कथमन्यतो रक्षापेक्षेति वाल्मीकेः खेदो द्योत्यते ॥ १ ॥

गो० टी०–अधुनैवार्थं प्रपञ्चयति सार्धसप्तश्लोकैः–जातरूपमयैरित्यादि । जातरूपमयैः चकारादत्नमयैः एवकारोऽयोगव्यवच्छेदार्थः । पुरा अयोध्यावासकाले अवतारात्पूर्वं वा वरकाञ्चनेति परमनारीभुजविशेषणम् । भुजैः हस्तैः तदेकदेशलक्षणा । परमनारीणां सैरन्ध्रिकाणाम् अनेकधा स्नानालङ्करणादिषु चन्दनागरुकुङ्कुमप्रभृतिभिः बहुवारं पुरस्तात् । अभिमृष्टम् संस्पृष्टम् । अधिवासितं सज्ञानगम्यम् । बालसूर्येति विशेषणात् द्वितीयचन्दनशब्दो रक्तचन्दनपरः । तच्च कुङ्कुमम् । कुङ्कुमं तुरुष्कं प्रोक्तं लोहितं रक्तचन्दनमिति हलायुधः आदौ चन्दनागरुभ्यां चर्चितम् अथ कुङ्कुमैरिति योज्यम् । कश्चिदाह । परमनारीणामित्यनेन सीताव्यतिरिक्ताः भार्याः सन्तीति तन्न नहि बालकाण्डे कुत्रचिद्रामस्य दारान्तरोद्वाहः प्रतिपाद्यते प्रत्युत रामस्तु सीतया सार्धं विजहार बहूनृतून् । मनस्वी तदतस्तस्या नित्यं हृदि समर्पितः ॥ इति सीतया सह निरन्तरभोग एवोच्यते । अत एव सीताप्याह : समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी ॥ इत्यत्यन्तसंयोगे द्वितीयया निरन्तरभोगम् । तत्कुतोऽस्य दारान्तरावकाशः । ननु रामस्य दयिता भार्येति विशेषणाद्रोहिणी यथेति ताराणामन्यतमया रोहिण्या दृष्टान्तीकरणाच्च भार्यान्तरं तस्य व्यज्यत इति चेन्न । दयितो भ्रातुरितिवदनुगमनानर्हत्वाय तथा विशेषितत्वात् । किं भरतो रामस्य न दयितः । तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु । न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः ॥ इत्यादिविरोधात् । रामवाल्मीक्यातिशयेन सौकुमार्यातिशयेन च राजगृह एवावस्थाय दिव्यसुखानुभवयोग्यावपि सीतालक्ष्मणौ राममनुगताविति हि तत्र सूनिहृदयम् । रोहिणी त्वियमन्या प्रतिकाया नित्यानुगमनार्हत्वात् । ननु च । हृष्टाः खलु भविष्यन्ति रामस्य परमं प्रियं । अभिषेकमभिप्रेत्य [illegible]

गोसहस्रप्रदातारं नृपधाय भुजं महत् । अद्य मे तरणं वाथ मरणं सागरस्य वा ॥ ८ ॥
इति रामो धृतिं कृत्वा महाबाहुर्महोदधिम् । अधिशिश्ये च विधिवत्तत्रैवोऽत्र स्थितो मुनिः ॥ ९ ॥
तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले । नियमादुपवृत्तस्य निशास्तिस्रोऽभिजग्मुषः ॥ १० ॥
स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः । उपायत तदा रामः सागरं सरितां पतिम् ॥ ११ ॥

पत्न्यो बन्धवः सन्तीति गम्यते । छन्दरकाण्डेऽपि । स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्यसे वीतभयः कृतार्थ इति सीतया चोच्यते । अत्रापि । भुजैः परमनारीणामभिमृष्टमनेकशोऽस्माभिः । तस्माद्बाहवः पत्न्यो रामस्य सन्तीत्यवगम्यते । मैवं रामस्य परमाः स्त्रिय इति रामसंबन्धिन्यः कौसल्यातीतादासीप्रभृतय उच्यन्ते । पूजायां बहुवचनेन सीतेवोच्यते । ते स्तुता इतिवत् । नहि भरतस्यानेकाः स्त्रियः सन्तीत्यत्र प्रमाणमस्ति । त्वं रंस्यस इत्यत्रापि लौकिकरीतिमनुसृत्य सीतोक्तवती । परमनारीणामित्यत्रापि श्लेकस्त्रीणामित्यर्थ उक्तः । यद्वा अभिमृष्टम् अभिमर्शनार्हम् । आदरायां क्तः । परमनार्यः श्रीभूमिनीलाः । आत्मानं मानुषं राम एव हि पश्यन्ते ऋषिस्तु रामस्य विष्णुत्वं व्यक्तीकरोत्येव अज्ञे विष्णुः सनातन इत्याह । नन्वेवं राजसूयाश्वमेधायनुष्ठाना-न्यथावपत्या रामस्यानेकपत्न्यः कल्प्यन्ते । कामं कल्पन्तां न तु इह संबध्यन्ते । तासां केवलं धर्मार्थं हृतानां परिग्रहे-न्द्रं वागोग्यत्वात् । वस्तुतो न ताः केलव्याः सीतयैव पत्नि-मया यज्ञे पत्नीकार्यनिर्वाहस्योत्तरकाण्डे दर्शितत्वात् । न च पत्नीप्रतिनिधयभावे भट्टाचार्येण कथ्यत इति वाच्यम् । न हि वचनविरोधे न्यायः प्रभवतीति न्यायात् । वचनं च हैमा-द्रिमृतिनिबन्धने दर्शितम् । यदि दुष्टभार्यो दूरभार्यो वा स्यात्तदा दर्भपुञ्जीले तत्स्थाने निधायाग्निमाधाय कुर्यादिति । धर्मसंस्थापनार्थं प्रवृत्तस्य रामस्याचारादपरं किं नाम मानम-पेक्षणीयम् । वस्तुत आचार एव प्रथमं प्रमाणं श्रुत्या पूर्वा-चारं प्रदर्शैव कर्मविधानात् । आपस्तम्बोऽप्यत एव धर्मज्ञसमयः प्रमाणं वेदाश्चेत्याचारमेव प्रथमं प्रमाणमाह । अत एव स्मरन्ति च स्मर्तारः । श्रुतिर्विभिन्ना स्मृतयो विभिन्नाः न चातृषेर्दर्शनमस्ति किंचित् । धर्मस्य तत्त्वं निहितं गुहायां महा-जनो येन गतः स पन्था इति । तस्मात् चातुर्वर्ण्यं च लोक-स्मिन् स्वे स्वे धर्मे नियोक्ष्यतीत्युक्तरामाचार एव समीचीनं प्रमाणं तद्विरुद्धाश्च न्याया न प्रभवन्ति । यद्यपि राजसूया-श्वमेधानां महिषीवद्भावातापरित्यक्तिभ्यामपि भवितव्यम् । तथापि तल्लोपे तत्कार्यानुष्ठानमेव । तस्य कर्मवैकल्यहेतुत्वात् । यथा पङ्क्यन्धादेर्यज्ञे विष्णुक्रमाज्यावेक्षणादिलोपेन न यज्ञलोपः तत्तन्मात्रोच्चारणस्यैव कार्यत्वात् । तस्मात्केवलन्यायमश्चारेण-पन्यायमार्गो नानुसरणीयः । किन्तु सर्वाचारप्रवर्तकसर्वकर्म-धुरन्धरभगवदवताररामचन्द्राचार एव विवेकिभिरनुवर्तनीय इति सर्वमवदातम् । शयने हंसतूलिकामये तल्पे । गङ्गानिवे-शिनि महाकरे वर्तमानम् । तत्रस्थ संभोगं कामयिव स्थितम् सीतया उत्सारितं शोभितं चेति योजना । संप्रति यद्वे सुग्रीवादेः शोधयितुमशक्यत्वात् प्रतिभटनिवारकम् अत एव भवणां शोकजनकम् । सागरोक्ते पञ्चरात्रे सागरान्तः शुभप्रदेशे तस्य स्थानादेश आत्मबन्धुत्वम् सख्यम् आदक्षिणे यथा भवति तथा । अन्यथा दुष्ट स्थिरम् । न चैवं सत्यां व्याघा-तेन तरणेन प्रयोजनाभावात् व्याकिणाङ्गितमित्यर्थः । गहापरिघ-मर्शिनम् उत्तरपरिघबाहुत्वात् दृढम् । गोसहस्रप्रदातारं करणे कर्तृत्वोपचारः । यद्वा गोसहस्रप्रदातारं भुजोत्तमम् तमेव प्रायुङ्क्त । आत्मभावं आर्षः । एवंगुणं दक्षिणं बाहुमुपधाय दक्षिणः दाक्षिण्यवान् । महाबाहुः सर्वोपगप्रदः । रामः अद्य मे तरणं वा सागरस्य मरणं वा भवत्विति मतिं कृत्वा । विधिवत् शास्त्रोक्तरीत्या । प्रयतः कायिकवियमयुक्तः नियतः मानसनियमवान् मुनिः मानसनियमोपेतश्च सन् महोदधि-मधिशिश्ये अधिशिश्यिवान् इति योजना ॥ ८ ॥ ९ ॥

८] ति० टी०—भुजबाहुभुजशब्दपर्यायः पूर्वस्य व्यवहित-त्वेन विशेषणमित्यर्थः । अद्य विधिवदुपासनया प्रसन्नस्य सागरस्य प्रसादेन ते सीतालाभस्य तरणं वापि स्यात् । ततः परमुपकृते सागरस्य मनो मरणमेव स्यादिति धृतिं कृत्वा निश्चित्येति योजना ॥ ८ ॥

९] ति० टी०—मुनिर्मौनी । महोदधिम् । उदिश्येति शेषः ॥ ९ ॥

गो० टी०—तदेव अनुवदनेनाह—अद्येति । अद्य दिन-त्रयात्मकोपवासानन्तरकाले मे तरणं सागरप्रसादेनक्रमागे-दानादिनोत्तरणं वा सागरस्य मरणं प्रसादपूर्वकमार्गदानाय-भावे विघातो वा इति धृतिं निश्चयं कृत्वा मुनिर्मौनी सन् प्रयतः तरणं प्रति प्रयत्नवान् नियतो वर्तमानो रामः महोदधिं विधिवत् तीर्थोपवासविधिविशिष्टं यथा भवति तथा अधि-शिश्ये "अधिशीङ्" इति महोदधेः कर्मत्वम् । सार्धश्लोक एकान्वयी ॥ ८ ॥ ९ ॥

१०] ति० टी०—अभिजग्मतुरभिजग्मुः ॥ १० ॥

गो० टी०—तस्येति । नियमाद्व महीतले शुभस्य रामस्य तिस्रो निशाः अतिचक्रमुः ॥ १० ॥

गो० टी०—तस्येति । शुभस्य शयानस्य । नियमादुपवृ-त्तस्य अत एवाप्रच्युतनियमस्येत्यर्थः । तिस्रो निशा त्रीण्यहानि ॥ १० ॥

११] ति० टी०—लोऽकुल्यभेण ताम्रपर्णीत्यादिना [illegible]

[illegible] ८ तिस्रः इति गो. पाठः । ९ अधिचक्रमुरिति गो. ग. पाठः ।

न च दृश्यते रूपं मन्दो रामस्य सागरः । प्रयतेनापि रामेण यथार्हमभिपूजितः ॥ १२ ॥
समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः । समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् ॥ १३ ॥
अवलेपः समुद्रस्य न दर्शयति यः स्वयम् । प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता ॥ १४ ॥
असामर्थ्यफला ह्येते निर्गुणेषु सतां गुणाः । आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् ॥ १५ ॥
सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् । न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः ॥१६॥

टेस्तीर्थैः । नयज्ञः सामानुपायानां यथोचितं प्रयोक्ता, धर्मवत्सलः शरणागतरक्षणरूपे धर्मे प्रीतिमान् । उपासत पित्रत ॥ ११ ॥

रा० टी०—स इति । नयज्ञः अत एव त्रिरात्रोषितः तीर्थावासविधिना रात्रित्रयं स्थितः स रामः सागरमुपासत उपासत अध्यवसितवान्, इत्यर्थः ॥ ११ ॥

गो० टी०—तिस्रुष्वपि रात्रिषूपासनमविच्छिन्नमित्याह—स इति । त्रिरात्रोषितः त्रिरात्रं शयानः तत्र समुद्रतीरे पर्वशोः कृत एवं निर्बन्ध इत्याशङ्क्य धर्मप्रवर्तनार्थमित्याशयेनाह—नयज्ञो धर्मवत्सल इति । शरणागतधर्मे प्रीतिमान् । सन्तं प्रति स्वगोष्ठ्यां कान्तापुरुषकारकथनेन समाश्वयणदर्शनात् स्वयमपि तथैवाचरदिति भावः ॥ ११ ॥

१२] ति० टी०—शरणागतत्वेऽपि फलप्रदानाभिमुख्याभावात्कालक्षपणस्य चापराधत्वमाह—न चेति । मन्दो मन्दबुद्धिः ॥ १२ ॥

रा० टी०—नेति । रामेण यथार्हमभिपूजितोऽपि मन्दो मन्दप्रतिपत्तिप्रमोषविधिर्वा सागरः रूपं स्वस्वरूपं रामस्य न दर्शयते आत्मीकृत् एतेन तस्य रामप्रभावदर्शनाकाङ्क्षित्वं व्यक्तम् ॥ १२ ॥

गो० टी०—न चेति । न च दर्शयते आत्मानमिति शेषः । मन्दः अतः । ननु रामेण सम्यक्कृता शरणप्राप्तिः कुतो न फलिता तत्राह अनादरेणेति कृतत्वात् ब्राह्मणकृतराजसूयवत् । न हि शरणागतवत्सलाधिकारी रामः अकिंचनो हि तथाधिकारी ॥ १२ ॥

१३] ति० टी०—समुद्रस्य क्रुद्धः समुद्राय क्रुद्धः ॥ १३ ॥

गो० टी०—समुद्रस्येति । ततः आर्षनयाप्यनयमार्गादेतोः समुद्रस्य समुद्राय क्रुद्धो रामः समीपस्थं लक्ष्मणमुवाच ॥ १३ ॥

गो० टी०—समुद्रस्येति । समुद्रस्य समुद्रविषये संरम्भाधिक्ये सति रक्तान्ते लोचने यस्य सः रक्तान्तलोचनः अतस्तं प्रत्युक्तम् । शुभलक्षणम् स्वस्य हृदयकोपनवारणाय शुभलक्षणम् ॥ १३ ॥

१४] ति० टी०—अवलेपो गर्वः । वर्तत इति शेषः प्रशमश्चित्तप्रसादः, क्षमा अपराधसहिष्णुता, आर्जवं सरलवृत्तिः ॥ १४ ॥

गो० टी०—तदुक्तमाकारयाह—अवलेपः इति । यत् स्वयं न दर्शयति स्वस्वरूपं न प्रकटयति तत्समुद्रस्य अवलेपः गर्वः । अर्वं पृथक् । पराभावात् स्वकृतप्रार्थनादरयुक्तत्वमाह—प्रशम इति । प्रशमः शान्तिः क्षमा अपराधसहिष्णुत्वम् आर्जवं सरलवृत्तिः प्रियवादिता प्रियवचनम् एते सतां गुणा निर्गुणेषु निर्विद्युणवस्तु गर्वादिदोषविशिष्टेष्वित्यर्थः असामर्थ्यफलाः सामर्थ्यं फलनिष्पादनविषयकशक्तिः फलन्ति तद्विज्ञाः निष्फला भवन्तीत्यर्थः किंच असामर्थ्यफला असक्त्यनिष्पादका, अयमशक्त इति बोधका भवन्तीत्यर्थः ॥ १४ ॥

गो० टी०—अवलेप इति । स्वयं न दर्शयतीति यत् अर्थं समुद्रस्यावलेप इत्यन्वयः ॥ १४ ॥

१५] ति० टी०—एवं सतां गुणा निर्गुणेषु दत्तजलाञ्जलिषु अवलिप्तेषु तद्विषये, असामर्थ्यफलाः । सर्वत्रोत्सृष्टदण्डोऽपि दुष्टविषये प्रशमादिपरश्चेत्तमशक्तं मन्यन्त इत्यर्थः अतोऽहं दण्डस्यैव विषय इति भावः । आत्मप्रशंसिनं शौर्यादिगुणभेदेऽपि तद्वत्तया श्लाघमानम्, दुष्टं दुश्चरितम्, धृष्टमकर्मण्यत्वेऽपि साहसिकम्, विपरिधावकमितस्ततः स्वगुणख्यापनाय परिधावनशीलम् ॥ १५ ॥

रा० टी०—गर्वादिदोषविशिष्टेषु यानि भवन्ति भवन्ति तानि बोधयन्नाह—आत्मेति । आत्मप्रशंसिनं अकर्मण्यत्वेऽपि स्वप्रशंसाशीलम् अत एव दुष्टं निषिद्धाचरणशीलम् अत एव धृष्टं दुष्कर्मसाधनहेतुकलज्जाहीनं विपरिधावकं स्वगुणप्रख्यापनायेतस्ततो धावनशीलं सर्वत्र दण्डादिविषयेऽपि उत्सृष्टो दण्डो येन तं नरं राजानमित्यर्थः लोको सर्वत्राऽ जनः सत्कुरुते ॥ १५ ॥

गो० टी०—प्रशम इति । प्रशमः अक्रोधता क्षमा अपराधसहिष्णुता आर्जवं परचित्तानुसारित्वम् अक्रौटिल्यं वा प्रियभाषिता प्रियवादित्वमित्येते गुणा निर्गुणेषु असामर्थ्ये फलन्ति । असमर्थत्वबुद्धिं जनयन्तीत्यर्थः ॥ १५ ॥

गो० टी०—कं पुनः समर्थं निर्गुणं मन्यते तत्राह—आत्मेति । आत्मप्रशंसिनम् आत्मस्तुतिपरम् दुष्टं वञ्चकम् धृष्टं निर्भयमित्यर्थः विपरिधावकं सर्वप्रलायनकर्मम् सर्वत्र स्वगुणेषु निर्गुणेषु च उत्सृष्टदण्डं कृतदण्डम् । लोकः अज्ञो जनः ॥ १५ ॥

१६] ति० टी०—सर्वत्र प्राणिमात्रे उत्सृष्टदण्डं कृतदण्डम्, सत्कुरुते बहुमन्यते । कीर्तिर्देशान्तरख्यातिः, यशः स्वदेशख्यातिः न शक्यते प्राप्तुमित्यन्वयः ॥ १६ ॥

रा० टी०—नेति । साम्ना सामरूपोपायेन कीर्तिः [illegible]

प्राप्तुं लक्ष्मण लोकेऽस्मिन्सङ्गयो वा रणमूर्धनि । अद्य मद्बाणनिर्भिन्नैर्मकरैर्मकरालयम् ॥ १७ ॥
निरुद्धतोयं सौमित्रे पुवृद्धिः पश्य सर्वतः । भोगिनां पश्य भोगानि मया भिन्नानि लक्ष्मण ॥१८॥
महाभोगानि मत्स्यानां करिणां च करानिह । सशङ्खशुक्तिकाजालं सझषमकरं तथा ॥ १९ ॥
अद्य युद्धेन महता समुद्रं परिशोषये । शरया हि समायुक्तो मामयं मकरालयः ॥ २० ॥
असमर्थं विजानाति धिक्क्षमामीदृशे जने । न दर्शयति सम्भ्रान्तो मे सागरो रूपमात्मनः ॥ २१ ॥
चापमानय सौमित्रे शरांश्चाशीविषोपमान् । समुद्रं शोषयिष्यामि पङ्क्त्यां यान्तु प्लवंगमाः ॥ २२ ॥

न्तरव्याप्तिः प्राप्तुं न शक्यते यशः अल्पव्याप्तिर्जयो वा सामान्येन प्राप्तुं न शक्यते ॥ १६ ॥

गो० टी०—न सामान्येति । बलकृता प्रथा यशः । पराक्रमकृता कीर्तिः । जयो जेतव्यापि न सामान्या प्राप्तुं शक्यत इत्यर्थः । पञ्चमीतत्पुरुषोऽयम् ॥ १७ ॥

१७-१८] ति० टी०—रणमूर्धनि जयो वा न प्राप्तुं शक्य इत्युक्तवान् मद्बाणनिर्भिन्नैः, अतएव मृत्या सर्वतः पलवद्विर्मकरैर्मकरालयैर्निरुद्धतोयं प्रक्षालितोदकम् । भोगिनां भोगानि शरीराणि ॥ १७ ॥ १८ ॥

रा० टी०—अद्रेति । अद्य मदीप्सितस्य सर्वथा सिद्धिकाले मद्बाणेन निर्भिन्नैः अत एव सर्वतः प्लवद्भिः प्रसर्पद्भिर्मकरैः विरुद्धतोयं मकरालयं सागरं पश्य ॥ १७ ॥

गो० टी०—अद्रेति । मद्बाणनिर्भिन्नैः अतएव जलोपरि प्लवद्भिः मकरैः । निरुद्धतोयं व्याप्ततोयम् ॥ १८ ॥

रा० टी०—भोगिनामिति । मया भिन्नानि भोगिनां सर्पाणां भोगानि शरीराणि मत्स्यानां महाभोगानि च करिणां करान् च पश्य ॥ १८ ॥

गो० टी०—महाभोगानीति । भोगिनां महाकायानाम् वृत्ति मनुष्य । भोगः सुखे स्यादिभृतावहेश्च फणकाययोरिति यादवः । नागानां सर्पाणाम् महाभोगानि महाशरीराणि शङ्खस्थानीयान् करिणां मत्स्यानां गजाकारमत्स्यानाम् छिन्नानीति लिङ्गव्यत्ययेनानुषङ्गः । करान् शुण्डादण्डान् । मत्स्यविशेषो मकरः करिमकरो भवति तद्विशेषश्चेति हलायुधः ॥ १९ ॥

१९] ति० टी०—मत्स्यानां महाभोगानि महाशरीराणि । करिणां जलकरिणां करानिमान् । पश्येति शेषः । शङ्खजाशुक्तिकाजालसहितं समुद्रमित्यन्वयः ॥ १९ ॥

रा० टी०—सेति । शङ्खशुक्तिकाजालसहितं मीनमकरैः सहितं समुद्रं पुङ्खेन प्रहारेण परिशोषये तदीयपरिक्लाशयतिजया सागरस्यातिभीतिः स्यात्तेन द्रुतमागच्छेदिति व्यञ्जितम् ॥ १९ ॥

गो० टी०—सेति । स्पष्टः ॥ २० ॥

२०] ति० टी०—पुङ्खेन प्रहारेण ॥ २० ॥

रा० टी०—शमीति । शमया शमयुक्तं मामयं मकरालयः अस्माभिः विज्ञायते अत एव साक्षोपलक्षिताय मे मह्यं आत्मनो रूपं स्वाकारं न दर्शयति । सार्धश्लोक एकान्वयी ॥ २० ॥ २१ ॥

गो० टी०—अमेकजातीयानां भवतामीदृशो वृत्तिर्निरुद्धिस्तेनासङ्कुचाह-क्षमयेति । सागरोऽपि षड्तोप्येतावत्पर्यन्तं क्षमया मूर्तिमत्क्षमोस्मि । क्षमामकुर्वितां भवन्तं दृष्टमिति न्यायेन स्वयं प्रकटयति-मामिति । माम् इतरवैरेपेक्षेण स्थितम् । अतएव विजानाति कार्यकरणक्षमं मन्यते । विजानातिर्मन्यतेऽर्थः । अयमेव्यपिनिः कौसल्याधिपनिरितिवत् । स्वमात्मानं मन्यते । कौसल्याधिपनिरुक्तमन्यते इति न जानाति । धिक् अमाम् इतरां क्षमां नाङ्गीकुर्यात् । विनियोगकाले हि क्षमा स्वीकार्या । अन्य कोप एवाङ्गीकर्तव्यः । इक्ष्वाकूणां कदाचिदपि क्षमा किं नाङ्गीकृतेत्यर्थः । ईदृशे जने इति । ईदृशे जने प्रागल्भ्यसम्भवाभावात् ॥ २१ ॥

२१] ति० टी०—असमर्थम् । स्वविजय इति शेषः ॥ २१ ॥

गो० टी०—न दर्शयतीत्यर्थमेके वाक्यम् ॥ २१ ॥

२२] ति० टी०—स्वैकमवलम्ब्याह—चापमिति ॥ २२ ॥

रा० टी०—चापमिति । आर्द्र शरांश्चानय तत्प्रयोजनमाह-समुद्रं शो-यिष्यामि शेषं स्पष्टम् । पङ्क्त्यां यान्तु प्लवंगमाः ॥ २२ ॥

गो० टी०—अपि कदाचिदात्मानं दर्शयतीति कथनया समुद्रं वाचा निर्भर्त्स्य क्रमेणापि निर्भर्त्सयितुमुपक्रमते-चापमानयेति । एकम् विलम्ब्य करणं क्रियेण निर्भर्त्स्यं कार्यं कारयितुम् । अन्यथा सख्य एव शोषयेत् । चापमानय निर्गुणं वशीकर्तुं सगुणमानयेत्यर्थः । चापमानय अस्यालम्बनं नियन्तयितुं नयं चापमानय । समुद्रस्य प्रार्थनाप्रकारेण तस्मिन्नचिन्त्यसौहार्दवता लक्ष्मणेन क्रमं शिक्षयति क्रोधः । अत आह—सौमित्र इति । सुमित्रायाश्चनेनैव कर्तव्यं ज्येष्ठवचनं तु न कर्तव्यमिति नियमोऽपि । यद्वा सौमित्रे रामे प्रमादं माकार्षीरिति मात्रोपदिष्टं मा विस्मार्षीः । अथ चापमात्रमानीतं तदाह-शरांश्चेति । कोपप्रयोगाहंतु केषु चिदानीतेष्वाह—आशीविषोपमानिति । दृष्टिविषाः सर्पा आशीविषा इत्युच्यन्ते । किमर्थं शरानयनमिति विलम्ब्य सौमित्रिणा गूढ आह-सागरमिति । एकेनैव दग्धुं सामर्थ्येऽपि शरानिस्तुलितसत्त्वत्वेन [illegible]

१ लक्ष्मणेति गो. पाठः । २ द्विजानीति गो. पाठः । ४ सागरमिति रा. पाठः ।

अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम् । वेलासु कृतमर्यादं सहस्रोर्मिसमाकुलम् ॥ २३ ॥
निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् । महार्णवं क्षोभयिष्ये महादानवसंकुलम् ॥ २४ ॥
एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः । बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन् ॥ २५ ॥
संपीड्य च धनुर्घोरं कम्पयित्वा शनैर्जगत् । मुमोच विशिखानुग्रान्वज्रानिव शतक्रतुः ॥ २६ ॥
ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः । प्रविशन्ति समुद्रस्य जलं वित्रस्तपन्नगम् ॥ २७ ॥
तोयवेगः समुद्रस्य सनीनमकरो महान् । संबभूव महाघोरः समारुतरवस्तथा ॥ २८ ॥
महोर्मिजालचलितः शङ्खजालसमावृतः । संधूमः परिवृत्तोर्मिः सहसासीन्महोदधिः ॥ २९ ॥
व्यथिताः पन्नगाश्चासन्दीप्तास्या दीप्तलोचनाः । दानवाश्च महावीर्याः पातालतलवासिनः ॥ ३० ॥
ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तथा । विन्ध्यमन्दरसंकाशाः समुत्पेतुः सहस्रशः ॥ ३१ ॥
आवृणोत्तरङ्गौघः संभ्रान्तोरगराक्षसः । उद्वर्तितमहाग्राहः संघोषो वरुणालयः ॥ ३२ ॥

रानपि शोषयितुमिच्छया । कोपातिशयेन स्वबलमज्ञात्वा वा तादृशोक्तिः । शोषयिष्यामीति वदतः किं शरेणेति न शङ्कनीयम । छिन्नं भिन्नं शरैर्दीप्तमिति रामशराणां दाहकत्वसंभवात् । अन्वेषणेऽपि चतुर्थभूतं जगत्त्रिवारं करिष्यामीति भावः । सागरम् । वयमयं ज्ञातिविरोधमाचरन्ति तर्हि वयमपि ज्ञातिकृत्यं कुर्म इति भावः । सागरं शोषयिष्यामि अनेकक्रमसाध्यमेकं एव हरिष्यामि किं तत इत्याह–पद्भ्यामिति । एकैकस्य पदद्वयं गमनसाधनमिति द्विवचनम् । वानराणां हि द्वावेव पादौ द्वौ हस्तौ ग्रहणभक्षणादीनां ताभ्यामेव दर्शनात् । अनेन कृतस्य कार्यविच्छेदस्यानुरूपमसुं वानरपादाभ्यामेव दर्शयिष्यामीति भावः ॥ २३ ॥

२३] ति० टी०–वेलासु तीरेषु कृतमर्यादं तदलङ्घ्यं कृतनियमम् ॥ २३ ॥

रा० टी०–अद्येति । वेलासु कृता मर्यादास्थितिर्नियमो येन तम् । अक्षोभ्यमपि सागरं क्षोभयिष्यामि ॥ २३ ॥

गो० टी०–पश्चान्तरमाह–अद्येति । अर्धमेकं वाक्यम् ॥ २४

गो० टी०–पुनः पक्षान्तरमेवाह–वेलास्विति । वेलासु चतुर्षु तीरेषु । कृतमर्यादं कृतव्यवस्थम् । कदाचिदपि वेलामनतिवर्तमानमित्यर्थः । निर्मर्यादं करिष्यामि अव्यवस्थं करिष्यामि । भूतले प्लावयिष्यामीत्यर्थः ॥ २५ ॥

२४–२५] ति० टी०–निर्मर्यादं लङ्घितवेलम् ॥ २४ ॥ २५ ॥

रा० टी०–तत्रैव भङ्गयन्तरमाह–निर्मर्यादमिति । महार्णवैः संकुलं क्षोभयिष्ये ॥ २४ ॥

गो० टी०–समुद्रेण चिरपरिपोषिता दानवादय एते रक्षियन्तीत्याह–महार्णवमिति । दानवैः संकुलं क्षोभयिष्यामीत्यर्थः ॥ २५ ॥

रा० टी०–एवमिति । क्रोधेन विस्फारिते दीप्ते यस्य स रामः युगान्ताग्निरिव ज्वलन् सन् दुर्धर्षो बभूव ॥ २५ ॥

गो० टी०–एवमिति । विस्फारितेक्षणः विवर्तितनयनः ॥ २७ ॥

२६–२७] ति० टी०–घोरं धनुः अनेः संपीड्य संपीड्यपूर्वं सज्यं कृत्वा जगत्कम्पयित्वा । जगद्योपेक्षि शर ॥ २६ ॥ २७

रा० टी०–संपीड्येति । घोरं भयंकरं धनुः अनेः संपीड्य अत एव जगत् कम्पयित्वा शतक्रतुर्वज्रानिव विशिखान् बाणान्मुमोच ॥ २६ ॥

गो० टी०–संपीड्येति । संपीड्य दृढमुष्टिना मध्यमवलम्ब्य । कम्पयित्वा भयकम्पितं कृत्वा । जगत् जगन्मध्यवर्तिनः । वज्रानित्यत्रोपमा ॥ २८ ॥

रा० टी०–ते इति । ते रामेण मोचिताः सायकोत्तमाः वित्रस्तपन्नगं यथा भवति तथा समुद्रस्य जलं प्रविशन्ति ॥ २७ ॥

गो० टी०–त इति । तेजसा ज्वलन्त इत्यन्वयः । प्रविशन्ति प्राविशन् । विस्तपन्नगमिति क्रियाविशेषणम् ॥ २९ ॥

२८–३२] ति० टी०–समुद्रस्य तोयवेगः संक्षोभः । समारुतरवो वाणगणप्रवर्तितमारुतशब्दसहितः ॥ २८ ॥ ३२ ॥

रा० टी०–तोयेति । सनीनमकरः मीनादिसहितः समारुतरवः बाणवेगहेतुकप्रपञ्चमारुतजनितरवविशिष्टः समुद्रस्य स तोयवेगो महाघोरो बभूव ॥ २८ ॥

गो० टी०–तोयवेग इति । तोयवेगः तरङ्गविततिः । मारुतरवः वातजन्यरवः समारुतरवः वातसंघट्टनजन्यरवसहित इत्यर्थः ॥ ३० ॥

रा० टी०–महोर्मीति । महोर्मीणां जालेन समूहेन चलितः स धूमः बाणोत्थवह्निहेतुकधूमविशिष्टो महोदधिः परिवृत्तोर्मिः ऊर्मिरहितदेशेऽपि ऊर्मिविशिष्ट आसीत् ॥ २९ ॥

गो० टी०–महोर्मीति । तीरे महोर्मिमालावेष्टितः । अन्तस्तरङ्गजालाकृष्टशङ्खश्रुतिसमावृतः सज्यालशरप्रवेशेन सधूमः । मध्ये शराग्निशोषणेन परिवृत्तोर्मिश्चासीदित्यन्वयः ॥ ३१ ॥

---

१ सहसेति गो. पाठः । २ शरैरिति गो. पाठः । ३ सलिलं त्रस्तपन्नगमिति गो. पाठः । ४ सनक्रेति गो. पाठः । ५ संमिति गो. पाठः । ६ माकाविद्धत इति गो. पाठः । ७ श्रुत्तीति गो. पाठः । ८ सधूमपरीति गो. पाठः । ९ सरेति गो. पाठः । १० [illegible]

ततस्तु तं राघवमुग्रकर्मं प्रकर्षमाणं धनुरप्रमेयम् ।
सौमित्रिरुत्पत्य [1]विनिःश्वसन्तं मामेति वोक्त्वा धनुराललम्बे ॥ ३३ ॥
[2]एतद्धिनापि ह्युदधेस्तवाद्य संपत्स्यते वीरतमस्य कार्यम् ।
भवद्विधाः क्रोधवशं न यान्ति दीप्तं भवान्पश्यतु साधुदृष्टम् ॥ ३४ ॥
अन्तर्हितैश्चापि तथान्तरिक्षे ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च ।
शब्दः कृतः [3]षट्कमिति ध्रुवश्रिर्मोक्षेति चोक्त्वा वरता स्वरेण ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ।

रामेण क्रोधाद्धनुषि संहितं ब्रह्मास्त्रं दृष्ट्वा सागरो भीत आत्मानं दर्शयित्वा प्रार्थनां कृत्वा तस्य पार्थिव्यर्थमनुरूपमन्तरद्वीपं । ततो नीलः सागरे सेतुं बबन्ध ।

अथोवाच रघुश्रेष्ठः सागरं दारुणं वचः । अद्यैनं शोषयिष्यामि सपातालं महार्णवम् ॥ १ ॥

रा० टी०—व्यथिता इति । दीप्तास्याः पन्नगाः तत्रत्याः व्यथिता आसन् ॥ ३२ ॥

गो० टी०—व्यथिता इति । आपातालं शराः प्रविष्टा इति भावः ॥ ३२ ॥

रा० टी०—ऊर्मय इति । सिन्धुराजस्य सहस्रशः ऊर्मयः समुत्पेतुः ॥ ३२ ॥

गो०टी०—तात्कालिकतरङ्गौवत्यं वर्णयति—ऊर्मय इति ३२

रा० टी०—आघूर्णिता इति । आघूर्णिता तरङ्गौघाः यस्मिन् अत एव उद्वर्तिताः ऊर्ध्वं प्रक्षिप्ताः महाग्राहाः यस्य अत एव स घोषः महाघोषसहितः वरुणालयो जज्ञे इति शेषः ॥ ३३ ॥

गो० टी०—उक्तानुवादेन विशेषान्तरमाह—आघूर्णितेति । आघूर्णितसंभ्रान्तोद्वर्तितपदान्येकार्थानि ॥ ३४ ॥

३३] ति० टी०—सौमित्रिरुत्पत्योपगम्य विनिःश्वसन्तं रामं मामेत्युक्त्वा समुद्रमस्वनाशनं न कार्यमित्युक्त्वा धनुरालललम्बे । धृतवानित्यर्थः ॥ ३३ ॥

रा० टी०—तत इति । ततः सागरातिक्रेशदर्शनानन्तरं सौमित्रिरुत्पत्य रामसमीपं प्राप्य मा मा एवं न कार्यमित्यर्थः इति राममुक्त्वा धनुरालललम्बे पुनः प्रहारनिवारणाय जग्राह ३३

गो० टी०—ततस्त्विति । तुशब्देन पूर्वसंधानाद्वैषम्यमुक्तम् । अप्रमेयम् अपरिच्छेद्यवैभवम् प्रकर्षमाणम् अभीषुशरसन्धानायेति भावः । समुच्छ्वसन्तं कोपेनेति शेषः । तं राघवम् उत्पत्य झटित्यागत्य मा मेत्युक्त्वा एतादृशं धनुराकर्षणं मा कुर्वित्युक्त्वा । भयातिशयाद्वीप्सा । अनिवर्तमाने तस्मिन् धनुरालललम्बे ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंश सर्गः ॥ २१ ॥

३४] ति० टी०—एवद्धिनापि क्रोधेन विनापि । साधुदृष्टं समीक्षितबलमेव वीर्यं तथा भवति तथा पश्यतु ॥ ३४ ॥

रा० टी०—एतदिति । अद्य एतत् विनाशनं विनापि वीरतमस्य तव कार्यं संपत्स्यते सेत्स्यति । ननु प्राप्तप्रोक्ष्य कथं निष्फलत्वमित्यत आह—भवद्विधाः भवत्सदृशाः क्रोधवशं न यान्ति अतः दीप्तं साधुदृष्टं क्रोधाविष्टतया दीप्तमिति भवान् पश्यतु स्मरतु ॥ ३४ ॥

३५] ति० टी०—अन्तर्हितैरित्यादिभिर्महता स्वरेण मामेत्युक्त्वा वरता प्रार्थयतः । वरे इत्यर्थः ॥ ३५ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितायां सुमध्वविजयाभिधानायां श्रीरामायणतात्पर्यनिर्णयाख्यायां वाल्मीकीयादिकाव्ये युद्धकाण्डे एकविंशः सर्गः ॥ २१ ॥

रा० टी०—निवारणे इति । अन्तरिक्षे अन्तर्हितैः [illegible] निवारयेत्यर्थः इत्युक्त्वा [illegible] ॥ ३५ ॥

इति श्रीमद्विद्याधीशकृतायां रामायणविशेषटीकायां युद्धकाण्डे एकविंशः सर्गः ॥ २१ ॥

१] ति० टी०—एवं प्राणिपीडावहं क्रोधं निवारितं शोषणप्रतिज्ञा सेतुबन्धविलुप्तिपर्यन्तं—अथेति ॥ १ ॥

रा० टी०—लक्ष्मणप्रार्थनानन्तरकालिकं रामदृष्टान्तमाह—अथेत्यादिभिः । अथ लक्ष्मणवचनश्रवणानन्तरमपि रघुश्रेष्ठो रामः सागरं दारुणं भयंकरं वच उवाच । तदाकारमाह—सपातालं पातालसहितं महार्णवं शोषयिष्यामि ॥ १ ॥

गो० टी०—प्रथमं वानरसेनातरणाय सागरं प्रति मार्ग

---

१ स्वमिति गो. पाठः । २ एतदपि श्लोकद्वयं गो. पाठे नास्ति । ३ स्वमिति गो. पाठः । ४ महार्णवमिति गो. पाठः ।

तं तथा प्रयतिक्रान्तं नातिचक्राम राघवः । तमुद्धतमभिप्रेक्ष्य रामो नदनदीपतिम् ॥ १६ ॥
ततो ऽभ्यन्तरसमुद्रस्य सागरः स्वयमुत्थितः । उदयाद्रिमहाशैलान्मेरोरिव दिवाकरः ॥ १७ ॥
पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत । स्निग्धवैदूर्यसंकाशो जाम्बूनदविभूषणः ॥ १८ ॥
रत्नमाल्याम्बरधरः पद्मपत्रनिभेक्षणः । सर्वपुष्पमयीं दिव्यां शिरसा धारयन्स्रजम् ॥ १९ ॥
जातरूपमयैश्चैव तपनीयविभूषणैः । आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः ॥ २० ॥
धातुभिर्मण्डितः शैलो विविधैर्हिमवानिव । एकावलीमध्यगतं तरलं पाण्डुरप्रभम् ॥ २१ ॥
विपुलेनोरसा बिभ्रत्कौस्तुभस्य सहोदरम् । आघूर्णिततरङ्गौघः कालिकानिलसंकुलः ॥
गङ्गासिन्धुप्रधानाभिरापगाभिः समावृतः । उद्वर्तितमहाग्राहः संभ्रान्तोरगराक्षसः ॥
देवतानां सुरूपाणां नानारूपाभिरीश्वरः । सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान् ॥
अब्रवीत्प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् ॥ ॥ २२ ॥

शरसन्धानसमय एव भीमवेगोभूत् भीमप्रवाहवेगोभूत् । स्वबलपरमोत्कर्षात् क्षोभान् ब्रह्मास्त्रमोक्षारम्भे महान् क्षोभोदृत्यर्थः ॥ १५ ॥

गो० टी०-वेगफलं दर्शयति-योजनमित्यादिना । सार्धश्लोक एकान्वयः । संप्लवात् वारिपूरेण वेलामन्यत्र वेलां त्रेत्यर्थः । अथवा संप्लवादन्यत्र प्रलयं विना । वेलां योजनं योजनपर्यन्तं व्यतिचक्राम अतिक्रान्तवान् । योजनमन्तर्जीर्णोदृत्यिप्याहुः तं समतिक्रान्तं पलायमानं नातिचक्राम पलायमानं प्रति शस्त्रप्रयोगरूपातिक्रमं न चकार ॥ १६ ॥

१६-२२] ति० टी०-तं प्रसिद्धमुच्यमानविशेषणं तं क्षिणेशमर्थं नदनदीपतिं दृष्ट्वा राघवो रामो नातिचक्राम न व्यचाल । अर्थं न परावर्तितवानित्यर्थः अर्थं न त्यक्तवानेति वा ॥ १६ ॥ १९ ॥

रा० टी०-तमिति । तथा उक्तप्रकारेण समतिक्रान्तम् लङ्घितं तं घोरप्रायं तं प्रसिद्धं नदनदीपतिं रामो नातिचक्राम नैव तस्थावित्यर्थः ॥ १६ ॥

रा० टी०-तत इति । समुद्रस्य तज्जलस्य मध्यात् सागरः मेरोर्दिवाकर इव स्वयमुत्थितः ॥ १७ ॥

गो० टी०-तत इति । समुद्रस्य मध्यात् उन्नतात् स्वयं सागरः समुद्राभिमानिदेवस्स दिवाकर इव बभाविति शेषः १७

रा० टी०-पन्नगैरिति । स्निग्धवैदूर्यसंकाशः समुद्रः पन्नगैः सह प्रत्यदृश्यत ॥ १८ ॥

रा० टी०-रत्नेति । सर्वपुष्पमयीं निखिलपुष्पविशिष्टां स्रजं धारयन् ॥ १९ ॥

गो० टी०-पन्नगैरित्यादि । जाम्बूनदं जम्बूनदीप्रभवं स्वर्णम् । रत्नमाल्य रत्नैकवस्तुमाला । जात्यरूपमयैः आकरजसुवर्णप्रचुरैः तपनीयविभूषितैः रत्नकीलनार्हदुत्तमकनकविभूषितैः रत्नानां संबन्धिभिर्भूषणोत्तमैः । एकावली मुक्तावली । तरलं नायकरत्नम् । आघूर्णितः चलितः । कालिका मेघपङ्क्तिः । मेघजालेपि कालिकेत्यमरः । तत्कालनिलश्च संकुलः क्षुभितः । मेघानिलौ समुद्रस्य रत्नयोनीति प्रसिद्धिः ॥ १८-२२ ॥

२०] ति० टी०-जातरूपं सुवर्णम्, तपनीयं ज्वलज्जाम्बूनदमधिकवर्णम्, स्थूलरजातरत्नखचितभूषणोत्तमैर्भूषितः ।

रा० टी०-जातरूपतपनीययोः अवान्तरभेदात् पौनरुक्त्यम् आत्मजानां रत्नानां भूषणोत्तमैर्भूषितः ॥ २० ॥

२१] ति० टी०-अतएव विविधधातुभिर्मण्डितः इव । कालिकानिलैर्मेघवातैः संकुलः । 'मेघजाले च कालिका' ॥ २१ ॥

रा० टी०-आघूर्णिताः तरङ्गौघाः यस्य कालिकानिलैर्मेघवातैः संकुलः मेघजाले च कालिकेति कोशः ॥ २१ ॥

२२] ति० टी०-समुपक्रम्येत्यागम्य । पूर्वमामन्त्र्य रामेति प्रथमं संबोध्य । शरपाणिनं शरव्याणिम् ॥ २२ ॥

रा० टी०-आपगाभिर्नदीभिः समावृतः सागरः समुपक्रम्य रामसमीपं प्राप्य आमन्त्र्य संबोध्य राघवमब्रवीत सार्धश्लोकचतुष्टयमेकान्वयि ॥ २२ ॥

गो० टी०-उद्वर्तितेत्यादि सार्धश्लोक एकान्वयः उद्वर्तितः उद्भामितः । समुपक्रम्य समुपागम्य । स्वसौजन्यं पुरस्कर्तुं पूर्वम् आमन्त्र्य आहूय प्रकृष्टो मूर्ध्नि कृतोऽञ्जलिः यस्यासौ प्राञ्जलिः । शरपाणिनमिति नैकारान्तत्वमार्षम् । स्वविरोधिनो मरुत्वतिनो रामेण यातयितुं स्वयं रावणभीतत्वेन तत्संहारक्षमस्य पराक्रमं परीक्षितुं च समुद्र एतावत्पर्यन्तं विलम्बितवानिति बोध्यम् ॥ २२ ॥

१ व्यतीति गो० पाठः । २ समुद्रस्येति गो० पाठः । ३ सागरस्य समुत्थित इति गो० पाठः । ४ प्रत्यदृश्यत इति गो० पाठः । ५ विभूषितैरिति गो० पाठः । ६ रत्नेति रा० पाठः । ७ विभूषितैरिति गो० पाठः । ८ [illegible]

पृथिवी वायुराकाशमापो ज्योतिश्च राघव । स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः ॥ २३ ॥
तत्स्वभावो ममाप्येष यदगाधोऽप्रतिष्ठितः । विकारस्तु भवेद्राम एतत्ते प्रवदाम्यहम् ॥ २४ ॥
न कामान्न च लोभाद्वा न भयात्पार्थिवात्मज । रोगानाकाकुलजलं स्तम्भयेयं कथञ्चन ॥ २५ ॥
विधास्ये येन गन्तासि विषहिष्येऽप्यहं तथा । न ग्राहा विषमिष्यन्ति यावत्सेना तरिष्यति ॥
हरीणां तरणे राम करिष्यामि यथा स्वलम् ॥ २६ ॥
तमब्रवीत्तदा रामः शृणु मे वरुणालय । अमोघोऽयं [illegible] निपातयतु ॥ २७ ॥
रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाशरम् । [illegible] ॥ २८ ॥

२३] ति० टी०—एतावत्कालमनागमने स्वीयमगाधत्वमेव कारणमिति मत्वयितुं सामान्यतो भूतस्थितिमाह—पृथिवीति । पृथ्वीस्वभावः काठिन्याद्धारणम्, वायोः सदा संचारात् संयोजनविशेषजने, आकाशस्यावकाशदानम्, अपां स्यन्दनं संश्लेषणं च, ज्योतिषः प्रकाशभस्मीकरणे । शाश्वतं मार्गमनादिं ब्रह्मसृष्टं स्वरूपस्थितिप्रकारमाश्रिताः सन्तः स्वे स्वे भावे तिष्ठन्ति ॥ २३ ॥

रा० टी०—तदाकारमाह—पृथिवीति । शाश्वतं नित्यं मार्गं ब्रह्मसृष्टिमाश्रिताः पृथिव्यादयः स्वभावे धारणादौ तिष्ठन्ति काठिन्याद्धारणं पृथिव्याः सदा संचारात् संयोजनविशेषजने वायोः अवकाशदानमाकाश्य स्पन्दनश्लेषणे अपां प्रकाशभस्मीकरणे ज्योतिषः स्वभाव इति विवेकः ॥ २३ ॥

गो० टी०—किं विभोस्तव मया कर्तव्यं किं गाधत्वज्ञ उत अलब्धस्थानम् आहोस्वित्सेतुबन्धनानुकूल्यमित्याशङ्क्य न तावदाद्यः पक्ष इत्याह श्लोकद्वयेन—पृथिवीति । सौम्य प्रभव । अनेनाश्लिष्टकरणानन्तरमेव रामः प्रसन्न इति गम्यते । पृथिव्यादयः पञ्चपदार्थाः शाश्वतं नित्यं मार्गं मर्यादाम् आश्रिताः सन्तः स्वभावे काठिन्यतिर्यग्गमनावकाशप्रदानागाधत्वोर्ध्वज्वलनादिस्वस्वभावे तिष्ठन्ति । स्वस्वभावं नातिक्रामन्तीत्यर्थः ॥ २३ ॥

२४] ति० टी०—तत्तस्मादहमप्यगाधत्वाशक्यतरणत्वरूपाशक्यप्रवत्यादिस्वभावः । गाधः गाधत्वं मम विकारो भवेत्, एतदेतस्माद्धेतोस्तेऽहं प्रवदामि । उपायमिति शेषः ॥ २४ ॥

रा० टी०—तदिति । तत् ब्रह्मसृष्टयवलम्बित्वाद्धेतोः अगाधः तलस्पर्शाभाववान् अत एव अप्रतिष्ठितः अप्रवस्तरणरहितोऽहमस्मीति एषः गाधाभावादिः मम स्वभाव एव अतः कामादिना मकाकुलजलं कथञ्चन न स्तम्भयेयम् अतः यत् यस्मात् उपायात् विकारः रूपान्तरं प्राप्तः सन् गाधस्तलस्पर्शित्वं भवेत् एतदुपायम् अहं ते प्रवदामि । श्लोकद्वयमेकान्वयि ॥ २४ ॥ २६ ॥

गो० टी०—एषु कस्ते स्वभाव इत्यत आह—तदिति । तत् तस्मात् सर्वेषां पृथिव्यादीनां स्वस्वभावानतिलङ्घित्वात् । अहम् अगाधः अप्रवः अलब्धप्रवेति यत् एषः ममापि स्वभावः । तस्मादेवमेव मया स्थातव्यम् । गाधः प्लवविषयोऽहमिति एषः एषः मम विकारः अन्यथाभावः । तथा मया न स्थातव्यं यथा [illegible] ॥ २४ ॥

२५] ति० टी०—[illegible] नेत्यादि । [illegible] समुद्रेण [illegible] प्रसङ्गात् । [illegible] ष्यता, [illegible] ॥

गो० टी०—[illegible] दिति । [illegible] ष्यतया [illegible] राम्यामहमेवमिति [illegible] भाव ॥ २५ ॥

२६] ति० टी०—[illegible] इति । [illegible] हरीणां तरणे [illegible] स्यामि यथा वायुसेना [illegible] रिष्यन्ति । [illegible] ष्यन्ति इति यत्नः ॥ २६ ॥

रा० टी०—[illegible] तदेव भङ्ग्यन्तरेणाह । [illegible] सेना तरिष्यति [illegible] हरीणां तरणे [illegible] ॥ २६ ॥

गो० टी०—[illegible] विधास्य इत्यादिभाषयोक्तम् । [illegible] ष्यति [illegible] —[illegible] यावत्सेना तरिष्यति [illegible] । [illegible] हि केचिन्नमिष्यन्ति [illegible] हरीणां तरणे विषये । यथा स्थैर्यं भवति तथा सेतुमार्गो भवति तथा करिष्यामि । सेतुकरणं इत्याशयकथनादिदानीं न करिष्यामीत्यर्थः ॥ २७ ॥ २८ ॥

२७-२८] ति० टी०—इत्युक्ते स्वप्रतीक्षाम् इति [illegible] एवं [illegible] कथमपि प्रतिज्ञातं सतीत्यर्थः । बाणो ब्रह्मास्त्रम् ॥ २७ ॥ २८ ॥

रा० टी०—उपायमेवाह—हरीणामिति । हे राम ! हरी[illegible]

[illegible] ति गो० [illegible] । [illegible] न प्रदर्शयन्तीति गो० [illegible] । ५ उत्तरोऽयं [illegible] ति गो० [illegible] ।

क्षिणावकाशोऽस्ति कश्चित्पुण्यतरो मम । द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान् ॥२९॥
उग्रदर्शनकर्माणो बहवस्तत्र दस्यवः । आभीरप्रमुखाः पापाः पिबन्ति सलिलं मम ॥ ३० ॥
तैर्[2] तत्स्पर्शनं पापं सहेयं पापकर्मभिः । अमोघः क्रियतां राम अयं तत्र शरोत्तमः ॥ ३१ ॥
तस्य तद्वचनं श्रुत्वा सागरस्य महात्मनः । मुमोच तं शरं दीप्तं परं[8] सागरदर्शनात् ॥ ३२ ॥
येन तन्मरुकान्तारं पृथिव्यां किल[9] विश्रुतम् । निपातितः शरो यत्र वज्राशनिसमप्रभः ॥ ३३ ॥
ननाद च तदा तत्र वसुधा शल्यपीडिता । तस्माद्व्रणमुखात्तोयमुत्पपात रसातलात् ॥ ३४ ॥
स बभूव तदा कूपो व्रण इत्येवं विश्रुतः । सततं चोत्थितं तोयं समुद्रस्येव दृश्यते ॥ ३५ ॥
अवदारणशब्दश्च दारुणः समपद्यत । तस्मात्तद्व्राणपातेन अपः कुक्षिष्वशोषयत् ॥ ३६ ॥

णे तरणार्थं स्थलं जलरहितं तरणयोग्यमित्यर्थः यथा यथा करिष्यामि । अयं पृथक् । तमिति । हे वरुणालय ! मोघः वैफल्यरहितः अयं महाबाणः कस्मिन्देशे निपात्यतामिति मे वचः श्रृणु इति रामस्तमब्रवीत् ॥ २७ ॥

गो० टी०-तमिति । उद्यतः कृतसंधानः ॥ २९ ॥

रा० टी०-रामस्येति । महोदधिः राघवमब्रवीत् ॥ २८ ॥

गो० टी०-रामस्येति । महातेजाः स्वाभिमतलाभेन विगतकान्तिः ॥ ३० ॥

२९] ति० टी०-उत्तरेणेत्येनवन्तमव्ययम् । ममोत्तरेणासन्नोत्तरदेशे । अग्निमदेश इति यावत् । उत्तरशब्दोऽग्निवाची । यथा भवांल्लोके ख्यातः पुण्यतमश्च, एवं द्रुमकुल्य इति ख्यातः पुण्यतमः कश्चिदवकाशोऽस्ति ॥ २९ ॥

रा० टी०-तदाकारमाह—उत्तरेणेति । ममोत्तरेण अग्निदेशे पुण्यतरो भवान् अतिप्रकाशविशिष्टः लोके द्रुमकुल्य इति ख्यातः कश्चियथा यथावदवकाशो देशोऽस्ति ॥ २९ ॥

गो० टी०-उत्तरेणेति । उत्तरेण समीपवर्तिन्युत्तरभागे । "तनवल्यत्तरस्यामदूरेऽपश्चात्स्याः" इत्येनप् । ममावकाशः स्थानप्रदेश इत्यर्थः । पुण्यतमः चारुतमः । पुण्यं तु चार्वपीत्यमरः । द्रुमेषु कुल्या यस्यासौ द्रुमकुल्यः । कुल्याल्पा कृत्रिमा सरिदित्यमरः ॥ ३१ ॥

३०] ति० टी०-तत्रोग्रे दर्शनकर्मणि येषां तादृशा बहवो दस्यवः पापाः सन्ति ॥ ३० ॥

रा० टी०-उग्रेति । तत्र विद्यमानाः उग्रे भयंकरे दर्शनकर्मणि येषां ते आभीरप्रमुखाः बहवो दस्यवः पापाः मम सलिलं पिबन्ति ॥ ३० ॥

गो० टी०-उग्रेति । उग्रे दर्शनकर्मणि येषां ते उग्रदर्शनकर्माणः । दस्यवः शत्रवः । दस्युशात्रवशत्रव इत्यमरः । दस्यवः चोरा वा । आभीराः महाशूद्राः ॥ ३२ ॥

३१] ति० टी०-तैः पापकर्मभिः स्पर्शनं ममास्ति तत्पापं न सहेयम्, अतस्तत्रायममोघः शरो मुच्यताम् ॥३१॥

रा० टी०-तैरिति । पापकर्मभिस्तैः कृतं पापं पापजनकं संस्पर्शनमहं न सहेयम् अतः तत्र आभीरप्रमुखेषु अयं शरोत्तमः अमोघः सफलः क्रियतां शरपातेन ते विहन्यन्तामित्यर्थः ॥ ३१ ॥

गो० टी०-तैरिति । तत्र द्रुमकुल्ये । तेषु आभीरप्रमुखेषु ॥ ३३ ॥

३२] ति० टी०-सागरदर्शनात् । अनन्तरमिति शेषः । सागरोपदेशादिति वार्थः ॥ ३२ ॥

रा० टी०-तस्येति । सागरस्य तद्वचनं श्रुत्वा सागरदर्शनात् परं दृश्यमानसागरोत्तरभागे दीप्तं शरं मुमोच ॥३२॥

गो० टी०-तस्येति । सागरदर्शनात्सागरमतेन । यद्वा अङ्गुल्या निर्दिश्य सागरेण प्रदर्शनात् ॥ ३४ ॥

३३] ति० टी०-यत्र शरः पातितस्तत्स्थलं तेन हेतुना मरुकान्तारमिति विश्रुतम् ॥ ३३ ॥

रा० टी०-तेनेति । यत्र तेन रामेण शरो निपातितः तत् मरुकान्तारं पृथिव्यां विश्रुतम् ॥ ३३ ॥

गो० टी०-तेनेति । तेन शरमोक्षणेन ॥ ३५ ॥

३४] ति० टी०-व्रणमुखाद्व्रणाख्यकृतद्वारात् ॥ ३४ ॥

रा० टी०-ननादेति । तत्र तस्मिन्समये शल्यपीडिता वसुधा ननाद तस्मात् शरपातजनितात् व्रणमुखात् तन्मार्गेणेत्यर्थः रसातलात् तोयमुत्पपात ॥ ३४ ॥

गो० टी०-ननादेति । ननाद जलनिर्गमेनेति भावः । व्रणमुखात् व्रणमुखद्वारेण ॥ ३६ ॥

३५] ति० टी०-उत्थितम् । व्रणकूपादिति शेषः । समुद्रस्य जलमिव । प्रभूतमिति शेषः ॥ ३५ ॥

रा० टी०-स इति । सः शरविदीर्णदेशः व्रण इत्येवं विश्रुतः ख्यातः कूपो बभूव उत्थितं तस्मात् कूपान्निसृतं तोयं समुद्रस्येव दृश्यते ॥ ३५ ॥

गो० टी०-स इति । सः व्रणकूपं व्रणकूप इत्यभिविश्रुतो बभूव । सततमिति । तस्येति शेषः ॥ ३७ ॥

३६] ति० टी०-तस्मादवदारणशब्दाद्व्राणपातेन हेतुना

---

१ तम इति गो. पाठः । २ तु समिति गो. रा. पाठः । ३ प्राप्तैर्न सहे इति गो. पाठः । ४ पर इत्यपि वा पाठः । ५ [illegible] इति गो. पाठः । ७ स्खलिति गो. पाठः । ८ दीप्तमिति गो. पाठः । ९ भर्त्ति गो. पाठः । [illegible]

विख्यातं त्रिषु लोकेषु मरुकान्तारमेव च । शोषयित्वा तु तं कुक्षिं रामो दशरथात्मजः ॥
वरं तस्मै ददौ विद्वान्मरवेऽमरविक्रमः ॥ ॥ ३७ ॥
पशव्यश्चाल्परोगश्च फलमूलरसायुतः । बहुस्नेहो बहुक्षीरः सुगन्धिर्विविधौषधिः ॥ ३८ ॥
एवमेतैश्च संयुक्तो बहुभिः संयुतो वरः । तस्य वरदानाच्च शिवः पन्था बभूव ह ॥ ३९ ॥
तस्मिन्दग्धे तदा कुक्षौ समुद्रः सरितां पतिः । राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत् ॥ ४० ॥
अयं सौम्य नलो नाम तनयो विश्वकर्मणः । एषोऽस्मत्तो वरः श्रीमान्प्रीतिमांस्त्वयि विश्वकर्मणः ॥ ४१ ॥
एष सेतुं महोत्साहः करोतु मयि वानरः । ततो यास्यसि पारं मे यथा ह्येष पिता तथा ॥ ४२ ॥

तदेशस्य कुक्षिषु सरस्तटाकादिषु वर्तमानाः पुरातनीभूते तस्मिन् जीवनसाधनीभूता अशोषयत । राम इति शेषः ॥ ३६ ॥

रा० टी०—अवदारणेति । अवदारणशब्दः प्राणस्येति शेषः ॥ ३८ ॥

गो० टी०—तस्मादित्यर्धम् । तद्बाणपातेन तस्य बाणस्य पातेन । कुक्षिषु अवेक्षु स्थिता अपः पूर्वं पापस्पृष्टानि जलानि तस्मात् द्रुमकुल्यात् अशोषयत् न्यवारयदित्यर्थः ॥ ३९ ॥

रा० टी०—शोषयित्वेति । अमरविक्रमो रामः कुक्षिं तटाकादिजलं शोषयित्वा मरवे मरुकान्ताराय वरं ददौ तमेकदेशग्रहणम् ॥ ३७ ॥ ३८ ॥

३७] ति० टी०—बाणशोषितजलस्थानतः परं मरुकान्तारमिति ख्यातम् । मरवे मरुदेशाय ॥ ३७ ॥

गो० टी०—पूर्वं रामबाणपातेन पृथिव्यां विश्रुतत्वमुक्तम् संप्रति विरोधिनिरसनात् त्रिषु लोकेषु विख्यातत्वमाह—विख्यातमिति । मरुकान्तारमेव मरुकान्तारनामैव । विख्यातं प्रसिद्धमभूदित्यर्थः ॥ ४० ॥

गो० टी०—शोषयित्वेति । कुक्षिं समुद्रमध्यप्रदेशम् । मरुकान्तारं शोषयित्वा दग्ध्वा । कथं मनुष्यत्वं भावयतो वरदानमित्याह—अमरविक्रम इति । सत्येन लोकान् जयतीति न्यायेन वशीकृतसर्वलोक इत्यर्थः ॥ ४१ ॥

३८] ति० टी०—पशव्यः पशुहितः, अल्परोगः क्षीणरोगः, विविधौषधिः, अतएव सुगन्धिः ॥ ३८ ॥

रा० टी०—वराकारमाह—पशव्य इति । पशव्यः पशूनां हितः अल्पो रोगो यस्मिन् फलादिभिरायुतो व्याप्तः बहूनि स्नेहानि स्नेहविशिष्टवस्तूनि यस्मिन्बहूनि क्षीराणि यस्मिन् विविधा औषधयो यस्मिन् अत एव सुगन्धिः मरुभवैर्विविधैः ॥ ३९ ॥

गो० टी०—तं निर्दिशन्तेन दर्शयति श्लोकद्वयेन—पशव्य इत्यादि । पशव्यः पशुभ्यो हितः पशव्यो गवालतृणादिसम्भव इत्यर्थः । अल्परोगः अल्पम् एव विनष्टरोगः । रसः मधु आयुतः समन्तादुक्तः । स्नेहः घृतम् । औषधमौषधिसमूहः । अनेकैः सर्वप्रकारैः गुणैः भोग्यैः युक्तः संयुतः शिवः पन्थाः शोभनश्चेत्यर्थः ॥ ४२ ॥ ४५ ॥

३९, -४०] ति० टी०—शिवः पन्थाः शोभनो देशः ३९॥४०

रा० टी०—एष इति । एषमनेन प्रकारेण रामस्य वरदानात् अनेकगुणैः संयुतो मरुः शिवः कल्याणप्रदः पन्था बभूव ॥ ४० ॥

रा० टी०—तस्मिन्निति । कुक्षौ दग्धे सति समुद्रः राघवं ब्रवीत् ॥ ४१ ॥

गो० टी०—तस्मिन्निति । स्पष्टम् ॥ ४४ ॥

४१] ति० टी०—पित्रा दत्तवरः सर्वस्तुनिर्माणसामर्थ्यं दत्तवरः । विश्वकर्मणस्तव प्रीतिमांस्त्वद्विषयप्रीतिमान् । तेन त्वत्सामस्मरणं पूर्वं करोत्वित्यर्थः । संसारसागरं गाधतासंपादकस्य त्वत्साध्यो महाधनसंपादकस्तीत्कर्मेति भावः ॥ ४१ ॥

रा० टी०—तत्स्वरूपमाह—अयमिति । विश्वकर्मणस्तनयः पित्रा दत्तः वरः निखिल[illegible] नामायं विश्वकर्मणः [illegible] तव मान त्वद्विषयप्रीतिविशिष्टोऽस्तीति शेषः ॥ ४२ ॥

गो० टी०—कथं सेतुनिर्माणादकूलं प्राप्स्यामीत्युक्तं संप्रति तदशक्यत्वं आकस्मिकमाचरति—अयमिति । दत्तवरः मनुना दत्ते भविष्यतीति मान्ये दत्तवरः ॥ ४५ ॥

४२] ति० टी०—कथं त्वत्पारं करिष्यतीत्यत्राह—तमिति । तं तत्क्रियमाणसेतुं तावदेव गाधो भूत्वा पारनि व्यामि, तावन्मात्रमाद्रार्थं मया कृते सेतुनिर्माणे तत्रैवस्थि मित्याह—यथेति । सेत्वादिनिर्माणे यथास्य पिता विश्वक तथैतस्मिन्कर्मणि समर्थः इत्यर्थः ॥ ४२ ॥

रा० टी०—एष इति । यथा पिता विश्वकर्मा सर्वस्तु

उक्त्वोदधिर्नष्टः समुत्थाय नलस्ततः । अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलम् ॥ ४३ ॥
सेतुं करिष्यामि विस्तीर्णं मैकराल्ये । पितुः सामर्थ्यमाश्रित्य तत्त्वमाह महोदधिः ॥ ४४ ॥
एष परो लोके पुरुषस्येति मे मतिः । धिक्क्षमामकृतज्ञेषु सान्त्वं दानमथापि वा ॥ ४५ ॥
हि सागरो भीमः सेतुकर्मदिदृक्षया । ददौ दण्डभयाद्वार्यं राघवाय महोदधिः ॥ ४६ ॥
मातुर्वरो दत्तो मन्दरे विश्वकर्मणा । मया तु सदृशः पुत्रस्तव देवि भविष्यति ॥ ४७ ॥
सम्बन्ध्य पुत्रोहं सदृशो विश्वकर्मणा । स्मारितोऽस्म्यहमेतेन तत्त्वमाह महोदधिः ॥
यप्यहमनुक्तो वैः प्रब्रूयामात्मनो गुणान् ॥ ॥ ४८ ॥

मर्थः तथा एष नलोऽस्तीति शेषः अतः एषं नलः मयि करोतु तं सेतुमहं धारयिष्यामि ॥ ४३ ॥

त० टी०-एष इति । तं सेतुं तथा शेष यथा स्थितेति । यथा यादृशशक्तिमान् तादृशोयमित्यर्थः ॥ ४५ ॥

३] ति० टी०-नष्टोऽदर्शनं गतः । अन्तर्हित इत्यर्थः । नलः साधुत्थायाब्रवीत् ॥ ४३ ॥

त० टी०-एवमिति । उदधिः सागरः एवमुक्त्वा नष्टः तर्हितः ततोऽनन्तरं नलः समुत्थाय राममब्रवीत् ॥ ४४ ॥

गो० टी०-एवमिति । उदधिः नष्टः अन्तर्हितः ॥ ४७ ॥

४४] ति० टी०-तदाह्यमाह—अहमिति । पितुर्वरसामर्थ्यमाश्रित्य सेतुं करिष्यामि नात्र संशयः । महोदधिश्च मेवाह—त्वत्पितामहो मम सामर्थ्यमस्तीति ॥ ४४ ॥

रा० टी०-तत्स्वरूपमाह-अहमिति । महोदधिः तथ्यमर्थमाह-अतः पितुर्दत्तं सामर्थ्यं आश्रित्य प्राप्य मकराल्ये महं करिष्यामि ॥ ४४ ॥

गो० टी०-अहमिति । पितुः सामर्थ्यम् पित्रा दत्तं ॥ ४४ ॥

ति० टी०-अथ किंचिद्वक्तुं नलो लोकस्थितिमाह—एष इति । पुरुषस्याकृतज्ञेषु दण्ड एव परोऽर्थसाधक इति मतिः, अतएवाकृतज्ञेषु क्षमां धिक् ॥ ४५ ॥

टी०-दण्ड इति । अकृतज्ञेषु जनेषु पुरुषस्य धिक्कारको दण्ड एव अतः कृतज्ञेषु कृतं क्षमा-

४५ ॥

टी०-अथ वानरान् प्रत्याह—दण्ड इत्यादिश्लोकत्रयेण । अतो राघवायेति परोक्षनिर्देशः । हिमवान् मन्दरो मकरिस्थावित् । मध्ये कविवाक्यं वा । दण्ड एव परः समीचीनोपायः । क्षमा सान्त्वं साम दानं वा धिक् । क्षमादयो नोपाया इत्यर्थः ॥ ४६ ॥

४६] ति० टी०-कुत एवं तत्राह—अयं हीति । यतोऽयं सागरो रामपूर्वैः सगरपुत्रैर्धर्षितोऽप्यकृतज्ञतया दण्डभयादेव संजातया दिदृक्षया तज्जन्यदर्शनेन राघवाय सेतुं कर्तुं गार्ध ददौ । तथापि सगरसंबन्धादेव इत्यनेन मैनाकद्वारा कृतोपचारः

सागरः, तथापि रामे एवावद्धिस्वकरणं रामेण कोपाद्वतुं संधानं कारयित्वा स्वरूपेणागमनेति बोध्यम् ॥ ४६ ॥

रा० टी०-तत्र ज्ञापकमाह-अयमिति । सागरः सगरसुतैर्निर्मितः अयं महोदधिः दण्डभयादेव सेतुकर्मदिदृक्षया सेतुरचनादर्शनविषयैकेच्छया विशिष्टः सन् राघवाय गार्धं मार्गमित्यर्थः ददौ ॥ ४७ ॥

गो० टी०-उक्तेर्थे हेतुमाह—अयं हीति । हि यस्मात्सागरः सगरस्यानितः । प्रत्युपकारागतभिज्ञ इत्यर्थः । दण्डभयात् सेतुकर्मदिदृक्षया गार्धं ददावित्यन्वयः । सेतुकर्मदिदृक्षा च दण्डभयादेवान्य जातेत्यर्थः ॥ ५० ॥

४७] ति० टी०-स्वस्य पितृसदृशत्वं सागरोक्तं सत्यमिति बोधयितुं वरागमनप्रकारमाह—ममेति । उत्तरार्धं वररूपम् ॥ ४७ ॥

रा० टी०-पितुः सामर्थ्यप्राप्तौ हेतुमाह-ममेति । मया सदृशस्तव पुत्रो भविष्यति इति वरः मन्दरे मन्दराचले विश्वकर्मणा मम मातुर्दत्तः ॥ ४८ ॥

गो० टी०-पूर्वोक्तस्वपितृतुल्यसामर्थ्यप्राप्तौ हेतुं दर्शयति-ममेति । मया सदृशः पुत्रस्तव भवित्रीत्यभिधो वरः । अयं चार्थः, भौरमस्तस्य पुत्रोहं सदृशो विश्वकर्मण इत्युद्वादात्सिद्धः ॥ ५१ ॥

४८] ति० टी०-औरसः पुत्रः । मातुरग्रिमुखपूर्वं स्वतेजोनिषेकद्वारा निर्मितः पुत्र इत्यर्थः । अतोऽहं विचित्रनिर्माणे विश्वकर्मणा सदृशः । नन्वेतत्सामर्थ्यं प्रागेव त्वं किं नावदस्तत्राह—न चेति । आत्मप्रशंसात्रजायेति शेषः ॥ ४८ ॥

रा० टी०-औरस इति । विश्वकर्मणा सदृशः तस्य औरसः पुत्रोऽहमस्मि । नन्वेवं स्वगुणं पूर्वं कुतो नोक्त इत्यत आह वः युष्माभिरनुक्तोऽपृष्टोऽहमात्मनो गुणान् न प्रब्रूयाम् ॥४९॥

गो०टी०-तर्ह्येतावत्पर्यन्तं किमर्थं नोक्तवानसीत्याह—स्मारित इति । एतेन सम्बन्धेन । अनुक्तो निमित्तान्तरमप्याह—नचेति । अनुक्तः अन्येनानुक्तः । स्वेनेत्युक्तौ महान् मोरम्भे विश्वासो न भवेदिति भावः ॥ ५२ ॥

१ तर्वेति गो. पाठः । २ महाबल इति गो. पाठः । ३ तरुणेति गो. पाठः । ४ अथोऽरीति रा. पाठः । ५ अथमेतदर्थक गो. पाठः । ६ क्तमिति गो. पाठः । ७ वै इति गो. पाठः ।

समर्थश्चाप्यहं सेतुं कर्तुं वै वरुणालये । तस्मादत्रैव बध्नन्तु सेतुं वानरपुङ्गवाः ॥ ४९ ॥
ततो [1]विसृष्टा रामेण सर्वतो हरिपुङ्गवाः । उत्पेतुरुद्महारण्यं हृष्टाः शतसहस्रशः ॥ ५० ॥
ते नगान्नगसंकाशाः शाखामृगगणर्षभाः । वसुधाः पादपांस्तत्र प्रचकर्षुश्च सागरम् ॥ ५१ ॥
ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः । कुटजैरर्जुनैस्तालैस्तिलकैस्तिनिशैरपि ॥ ५२ ॥
बिल्वकैः सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः । चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ॥ ५३ ॥
समूलांश्च विमूलांश्च पादपान्हरिसत्तमाः । इन्द्रकेतनसंकाशान्प्रजहुर्वानरास्तरून् ॥ ५४ ॥
तालान्दाडिमगुल्मांश्च नारिकेलविभीतकान् । कर्णिकारान्कुलाम्बांश्च समाजह्रुरितस्ततः ॥ ५५ ॥
हस्तिभात्रान्महाकायाः पाषाणांश्च महाबलाः । पर्वताग्रं समालम्ब्य यन्त्रैः परिवहन्ति च ॥ ५६ ॥
प्रक्षिप्यमाणैरचलैः सहसा जलमुद्धतम् । [2]सेतुर्लवणमम्भोऽन्तः [3]प्लावयामास सर्वतः पुनः ॥ ५७ ॥
[4]सघुष्टं क्षोभयामासुर्निपेतन्तः समन्ततः । सुप्राण्यन्ये मथूक्षान्त [5]योजनं शतयोजनम् ॥ ५८ ॥
नलश्चक्रे महासेतुं मध्ये नदनदीपतेः । स तदा [6]बिभिदे सेतुर्वानरैर्गिरिकर्मभिः ॥ ५९ ॥

४९] ति० टी०—यस्मात्समर्थोऽस्मि तस्मादत्रैव मया सह वानराः सेतुं कुर्वन्तु । वरुणालयः पश्चिमसमुद्रः ॥ ४९ ॥

५० टी०—समर्थ इति । सेतुं कर्तुमहं समर्थः तस्मात् वानरपुङ्गवाः सेतुं बध्नन्तु मदनुज्ञारूपेण स्वामर्थ्यसंपादनं कुरुतेत्यर्थः ॥ ५० ॥

गो० टी०—न केवलमनुज्ञाकरणे समर्थत्वात्—समर्थोऽस्मीति । वयमपि यत्नेन कैश्चित्किमालभ्यमित्यर्थः ॥ ५० ॥

५०] ति० टी०—विसृष्टा इत्यनुज्ञा । उत्पेतुरुत्पेदुः ॥ ५० ॥

रा० टी०—तत इति । रामेण विसृष्टाः आज्ञप्ताः शतसहस्रशो हृष्टपुष्टाः महारण्यमुत्पेतुः उत्पेतुः प्रविविशुः ॥ ५० ॥

गो० टी०—तत इति । अविसृष्टा निषिद्धाः ॥ ५४ ॥

५१ ति० टी०—नगसंकाशाः पर्वतसदृशाः । सागरं सागरस्थमीपं प्रचकर्षुराकृष्टवन्तः ॥ ५१ ॥

५० टी०—ते इति । नगसंकाशाः पर्वतसदृशाः शाखामृगगणर्षभाः वानरान् नगात् पर्वतात् सागरं प्रचकर्षुः प्रजह्रुः प्रापयामासुश्च ॥ ५० ॥

गो० टी०—त इति । नगात् वृक्षात् । नगसंकाशाः गिरिसंकाशाः । वानराधिपतिरेवेति मत्वर्थत्वं संभवति विपुद्स्थत्वधिकरणपूर्वपक्षन्यायादत आह—वानरा इति । तत्र तदर्थान् । प्रचकर्षुः आनयन्ति स्म ॥ ५० ॥

५२-५३] ति० टी०—सालाश्वकर्णयोरवान्तरजातिभेदो भेदः ॥ ५२ ॥ ५३ ॥

रा० टी०—ते इति । ते वानराः सालादिभिः सागरं समपूरयन् । श्लोकद्वयमेकान्वयि ॥ ५३ ॥ ५४ ॥

गो० टी०—सेतुबन्धनसाधकृतां दृष्टार्थां कृतार्थतां व्यक्तयितुं तान् परिगणयति श्लोकद्वयेन—ते सालैरित्यादिना ॥ ५३ ॥ ५४ ॥

५४-५५] ति० टी०—इन्द्रकेतनकल्पवृक्षादिना शोभायमानान्वृक्षान् समूलान्विमूलान्पादपान्हरिसत्तमाः । तरुणित्यस्योक्तेन संबन्धः ॥ ५४ ॥ ५५ ॥

५० टी०—समूलानिति । सदा हस्तिसमाः हस्तिसदृशाः सन्तः समूलान्विमूलान्पादपान् उपरि उत्पाट्य तान् इन्द्रकेतनेति पदद्वयं विशिनष्टि ॥ ५० ॥

गो० टी०—अविसृष्टत्वात्—समूलानिति । हस्तिमात्रा इत्यत्र मत्वर्थलोपः ॥ ५४ ॥

५० टी०—त इति । सोऽपि वानरः ततस्ततः ततश्च [illegible] ॥

गो० टी०—[illegible]मूलादीनाहरन्तीत्याह—तालानिति । [illegible] सहितान् अरिष्टेयकान् ॥ ५० ॥

५६] ति० टी०—यन्त्रैः यन्त्रारूढसमर्थैः ॥ ५६ ॥

रा० टी०—हस्तिमात्रा इति । महाकायाः वानराः पर्वताग्रं समालम्ब्य [illegible] यन्त्रैः परिवहन्ति । यद्वा हस्तिमात्रा इत्यत्र यन्त्रैः शकटादिभिः ॥ ५० ॥

५७] ति० टी०—अचलैः पर्वतैरित्यर्थः ॥ ५७ ॥

रा० टी०—प्रक्षिप्यमाणैरिति । प्रक्षेपणक्रियाकर्मीभूतैरचलैः पाषाणैश्च [illegible] समुत्सर्गं जगाम । ततः आकाशात् पुनर्जलमपतत् अभोदश्च प्रापात् ॥ ५० ॥

गो० टी०—प्रक्षिप्यमाणैरिति । उद्धतम् उत्पतितम् आसीत् । समुत्पतितं सत् आकाशं ततस्ततः तत्र तत्र उपरि सर्वतः प्रसस्रे ॥ ५९ ॥

५८-५९] ति० टी०—सुप्राणीति । आकर्षणाभिमानि

---

१ आज्ञप्ता गो. पाठः । २ ऊर्मीत्ति गो. पाठः । ३ प्लुवया इति गो. पाठः । ४ अभीति गो. पाठः । ५ वानरा इति गो. पाठः । ६ विश्वकैरिति गो. पाठः । ७ [illegible] गो. [illegible]वस्तकेति गो. पाठः । ८ केचानिति गो. पाठः । ९ बहुकालम्बरादानिति गो. पाठः । १० समन्तत इति गो. [illegible] ११ [illegible] १२ बालसकेति गो. पाठः । १३ व्याकुलानिति गो. पाठः

दण्डान्यन्ये प्रगृह्णन्ति विचिन्वन्ति तथापरे । वानरैः शतशस्तत्र रामस्याज्ञापुरःसरैः ॥ ६० ॥
यानैः पर्वतजैश्चैव तृणैः काष्ठैश्च बन्धिरे । पुष्पिताग्रैश्च तरुभिः सेतुं बध्नन्ति वानराः ॥ ६१ ॥
पाषाणाश्च गिरिप्रख्या गिरीणां शिखराणि च । दृश्यन्ते परिधावन्तो गृह्य दानवसंनिभाः ॥ ६२ ॥
शैलानां क्षिप्यमाणानां शैलानां तत्र पात्यताम् । बभूव तुमुलः शब्दस्तदा तस्मिन्महोदधौ ॥ ६३ ॥
कृतानि प्रथमेनाह्ना योजनानि चतुर्दश । प्रहृष्टैर्नलसंकाशैस्त्वरमाणैः प्लवङ्गमैः ॥ ६४ ॥
द्वितीयेन तथैवाह्ना योजनानि तु विंशतिः । कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः ॥ ६५ ॥
अह्ना तृतीयेन तथा योजनानि तु सागरे । त्वरमाणैर्महाकायैरेकविंशतिरेव च ॥ ६६ ॥
चतुर्थेन तथा चाह्ना द्वाविंशतिरथापि वै । योजनानि महावेगैः कृतानि त्वरितैस्ततः ॥ ६७ ॥
पञ्चमेन तथा चाह्ना प्लवगैः क्षिप्रकारिभिः । योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै ॥ ६८ ॥
स वानरवरः श्रीमान्विश्वकर्मात्मजो बली । बबन्ध सागरे सेतुं यथा चास्य पिता तथा ॥ ६९ ॥

पः । सेतोरेवकल्पायेति वा शेषः । शतयोजनमायतं दीर्घं यस्मिंस्तं तथोक्तं इत्युत्तरेणान्वयः ॥ ६८ ॥ ६९ ॥

रा० भू०—समुद्रमिति । समन्ततः चतुर्दिक्षु निपततः पर्वताभिपातात्ततः वानराः समुद्रं क्षोभयामासुः अन्ये वानराः शतयोजनमायतं यथा भवति तथा सेतुत्वाय प्रगृह्णन्ति सेतोरेवकल्पाय प्रजगृहुः ॥ ६९ ॥

गो० टी०—समुद्रमिति । सेत्वाणि शतयोजनम् व्यायतम् अत्यर्थं यथा भवति तथा प्रगृह्णन्ति प्रागृह्णन् । आर्जवार्थं वचनव्यत्ययेन कृतः ॥ ६९ ॥

रा० टी०—नल इति । नदनदीपतेर्मध्ये नलो महासेतुं चक्रे स सेतुः तदा वानरेतिरकपिभिरपि क्रियते ततेन पाषाणादितरुपर्वतं व्यायतं सामग्रीसंपादनं तु तदितरायत्तमिति सूचितम् ॥ ६० ॥

गो० टी०—नल इति । वोलकर्मभिः युगपदर्णकपर्वतानयनकर्मभिः । तथा नलक्रियानुसारेण ॥ ६३ ॥

६०-६७]ति०टी०-विचिन्वन्त्याहरणीयद्रुमादिकम् ६०-६७

रा० टी०—दण्डानिति । अन्ये केचन वानराः दण्डान् परिमाणकारकवृक्षविशेषान् प्रगृह्णन्ति तेन सेतुं परिमान्तीति सत्पर्यं अपरे विचिन्वन्ति सामग्रीसंघट्टनं कुर्वन्ति । अर्थं पृथक् । वानरैरिति । रामस्याज्ञापुरस्सरैः शतशो वानरैः दृषदादिभिर्बध्नन्ति सेतुप्रदेशा इति शेषः ॥ ६१ ॥

गो० टी०—दण्डानिति । दण्डान् सूत्रवद्दण्डान् । वानरा वारणकरणदण्डान्वा । विचिन्वन्ति विशेषेण चयनं कुर्वन्ति । नलनिर्देशेनापि शिलाश्रितत्व इत्यर्थः ॥ ६४ ॥

रा० टी०—वानरा इति । ते बबन्धिरे सेतुप्रदेशानिति शेषः ॥ ६९ ॥

रा० टी०—पुष्पिताग्रैरिति । वानराः पुष्पिताग्रैस्तरुभिः सेतुं बध्नन्ति तेषां सेतौ सन्निवेशवत्तात्पर्यः । अर्थं पृथक् । पाषाणानिति । पाषाणादीन् गृह्य गृहीत्वा परिधावन्तो वानराः वारणसन्निभाः दृश्यन्ते ॥ ६३ ॥

गो० टी०—पुष्पिताग्रैरिति । मार्दवार्थमुक्तिः अबन्धुरित्यर्थः ॥ ६६ ॥

गो० टी०—अथ वानराणां पर्वतानयनं वर्णयति—पाषाणांश्चेति । दृश्य गृहीत्वा ॥ ६७ ॥

रा० टी०—शैलानामिति । पात्यतां पात्यमानानां शैलानां क्षिप्यमाणानां शिलानां च तुमुलः अतो महोदधौ बभूव ॥ ६४ ॥

गो० टी०—शिलानामिति । निपात्यमानां आर्षं परस्मैपदम् । तुमुलः संकुलः ॥ ६८ ॥

रा० टी०—कृतानीति । प्लवङ्गमैः प्रथमेन अह्ना दिनेन चतुर्दशयोजनानि सेतुतुल्यानि कृतानि सेतुतुल्यत्वमित्यर्थतो लब्धम् एवमुत्तरत्रापि बोध्यम् ॥ ६५ ॥

गो० टी०—कृतानीति । चतुर्दशयोजनपरिमितः सेतुर्बद्ध इत्यर्थः । एवमुत्तरेष्वपि योज्यम् ॥ ६ ॥

रा० टी०—द्वितीयेनेति । द्वितीयेन अह्ना विंशतियोजनानि कृतानि ॥ ६६ ॥

रा० टी०—अह्नेति । तृतीयेन अह्ना एकविंशतियोजनानि कृतानि ॥ ६७ ॥

रा० टी०—चतुर्थेनेति । चतुर्थेन द्वाविंशतियोजनानि कृतानि ॥ ६८ ॥

गो० टी०—द्वितीयेनेति । प्रतिदिनं योजनाधिक्यमुक्त्वा ह्रस्वतिरेकात् ॥ ७०-७२ ॥

६८-६९.] ति० टी०पञ्चमेनादिनैः शतयोजनं बबन्ध सुवेलम् । सामीप्ये सप्तम्यस्याव्ययीभावः । वेलासमीपम् । परपारसमीपमधिकृत्येत्यर्थः ॥ ६८ ॥ ६९ ॥

रा० टी०—पञ्चमेनेति । सुवेलं वेलासमीपं परपारमि-

१ वानरा इति गो. पाठः । २ सरा इति गो. पाठः । ३ अर्थेनेति गो. पाठः । ४ वारणसंनिभा इति गो. रा. पाठः । ५ शैलानामिति रा. पाठः । ६ शिलानामिति रा. पाठः । ७ च नीति गो. पाठः । ८ तथा चोक्तेति गो. पाठः । ९ कृतानि इति गो. पाठः । १० अत्र गो. पाठः । १३ लिखिति गो. पाठः ।

स नलेन कृतः सेतुः सागरे मकरालये । शुशुभे सुभगः श्रीमान्स्वातीपथ इवाम्बरे ॥ ७० ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । आगम्य गगने तत्सेतुदर्शनकामास्तदद्भुतम् ॥ ७१ ॥
दशयोजनविस्तीर्णं शतयोजनमायतम् । ददृशुर्देवगन्धर्वा नलसेतुं सुदुष्करम् ॥ ७२ ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवंगमाः । अचिन्त्यमचिन्त्यार्थं तं बभूवुर्लोमहर्षणम् ॥ ७३ ॥
ददृशुः सर्वभूतानि सागरे सेतुबन्धनम् । तानि कोटिसहस्राणि वानराणां महौजसाम् ॥ ७४ ॥
बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः । विधानतः कृतः श्रीमान्सुभूमिः सुसमाहितैः ॥ ७५ ॥
अशोभत महान्सेतुः सीमन्त इव सागरे । ततः पारं समुद्रस्य गत्वा वानरवाहिनी ॥ ७६ ॥
परेषामभियानार्थमतिष्ठत्सुसंवृतैः । स दुर्गविषमं घोरं भीमं रक्षोगणैर्वृतम् ॥ ७७ ॥
हनूमन्तं त्वमारोह अङ्गदं त्वथ लक्ष्मणः । अयं हि विपुलो घोरः सागरो मकरालयः ॥ ७८ ॥

स्यर्थः अधिकृत्य पञ्चमेन अहा त्रयोविंशत् त्रयोविंशतिर्जातानि कृतानि ॥ ६९ ॥

गो० टी०-पञ्चमेनेति । त्रयोविंशत् त्रयोविंशतिः । आर्षो व्यत्ययः । अधिकृत्य अर्थं कृत्वा ॥ ७३ ॥

रा० टी०-स इति । स नलः सौमित्रेः सेतुं दृष्ट्वा । तत्र हेतुः—यथा अन्तरिक्षे विधुरुत्पन्नो तथा अयमस्मिन्नति शेषः ॥ ७० ॥

गो० टी०-स इति । अस्य पित्रा यथा वाजपेयेनेष्टिः, तथा तादृशमग्निष्टोमादिकमिष्टवानित्यर्थः ॥ ७४ ॥

७०-७२] ति० टी०-स्वातीपथच्छायापथः ॥ ७० ॥ ७२ ॥

रा० टी०-स इति । नलेन कृतः सेतुः अम्बरे स्वातीपथ इव शुशुभे ॥ ७१ ॥

गो० टी०-स नलेनेति । सुभगः शोभनमाहात्म्यवान् स्वातीपथः लाक्षापथः स्वातीवीथिर्वा सा चाकाशे पर्यायेणा उत्तरस्यां मघात्मा वीथिः । तदुक्तं वायुपुराणे—सप्तर्षीणां ययो मार्गो दक्षिणोत्तरमध्यगा इति प्रस्तुत्य । तथा हे चापि कल्पयेत्सप्त मघा चैवार्षभी मता । स्वातिश्चित्रा तथा स्वाती मध्यगोत्तरविश्रुता । ज्येष्ठा विशाखानुराधा वीथी राजन्वती मता । एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते । इति ॥ ७१ ॥

रा० टी०-तत इति । तदद्भुतं द्रष्टुकामा देवादयो गगने तस्थुः ॥ ७२ ॥

गो० टी०-तत इति । स्पष्टः ॥ ७६ ॥

रा० टी०-दशेति । सुदुष्करम् अन्यैः कर्तुमशक्यम् ॥ ७३ ॥

गो० टी०-दशेति । नलसंबन्धी सेतुर्नलसेतुः तम् ॥ ७७ ॥

७३-७४] ति० टी०-गर्जन्तः प्लवंगमाश्च ददृशुः । अचिन्त्यमचिन्त्यरूपत्वम् । असत्यं भगवत्संबन्धं विना केनाप्यशक्यकरणम् ॥ ७३ ॥ ७४ ॥

रा० टी०-आप्लवन्त इति । आप्लवन्तः अधिकप्लुतिं कुर्वन्तः प्लवन्तः कैश्चित् साधारणप्लुतिं कुर्वन्तः गर्जन्तः प्लवंगमाः सर्वभूतानि च अचिन्त्यम् अचिन्तनीयोपायमत एव अचिन्त्यं सेतुबन्धं ददृशुः । [illegible] विशेषणानि [illegible] वाक्यार्थस्य कर्तृत्वेन [illegible] ॥ ७४ ॥

गो० [illegible] दर्शयति—प्लवन्त इति । आप्लवन्तः आधिक्येन [illegible] ॥ ७८ ॥

गो० [illegible] वासावि [illegible] कल्पं सेतुबन्धं ददृशुः ॥ ७५ ॥

रा० टी०-[illegible] कोटिसहस्राणि वानराः [illegible] ॥ ७५ ॥

गो० टी०-बध्नन्त इति । सेतुं बध्नन्तः सेतुबन्धनक्रियाः ॥ ७५ ॥

७६-७७] ति० टी०-[illegible] आप्तः ॥ ७६ ॥ ७७ ॥

रा० टी०-अशोभत इति । सीमन्त इव हृद्यविन्यस्त शोभ [illegible] ॥ ७६ ॥

गो० टी०-[illegible] ॥ ७६ ॥

रा० टी०-[illegible] ॥ ७७ ॥

गो० टी०-[illegible] ॥ ७७ ॥

७७-७८] ति० टी०-परेषां राक्षसानाम् ॥ ७७ ॥

रा० टी०-तत्प्रकारं दर्शयन्नाह-सुग्रीव इति । घोरं अयं सागरो विपुलः अतिविस्तीर्णः अतः त्वं इमं हनूमारोह लक्ष्मणस्तु अङ्गदमारोहतु एतौ हनूमदङ्गदौ वेह

---

१ दक्षिणोत्तरमध्यगा गो. पाठः । २ घातार्थमिति गो रा. पाठः । ३ वापीति गो. पाठः ।

बहायसौ युवामेतौ वानरौ धारयिष्यतः । अग्रतस्तस्य सैन्यस्य श्रीमान्रामः सलक्ष्मणः ॥ ७९ ॥
जगाम धन्वी सुग्रीवेण समन्वितः । अन्ये मध्येन गच्छन्ति पार्श्वतोऽन्ये सुवंगमाः ॥ ८० ॥
सैलिलं प्रपलव्यन्येऽन्ये मार्गयन्ये प्रपेदिरे । केचिद्दायसगताः सुपर्णा इव पुप्लुवुः ॥ ८१ ॥
घोषेण महता घोषं सागरस्य समुच्छ्रितम् । भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी ॥ ८२ ॥
वानराणां हि सा तीर्णा वाहिनी नलसेतुना । तीरे निविविशे राज्ञा बहुमूलफलोदके ॥ ८३ ॥

तदद्भुतं राघवकर्म दुष्करं समीक्ष्य देवाः सह सिद्धचारणैः ।
उपेत्य रामं सहसा महर्षिभिस्समभ्यषिञ्चन्सुशुभैर्जलैः पृथक् ॥ ८४ ॥
जयस्व शत्रूनरदेव मेदिनीं ससागरां पालय शाश्वतीः समाः ।
इतीव रामं नरदेवसत्कृतं शुभैर्वचोभिर्विविधैरपूजयन् ॥ ८५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गोविन्दराजः—वानरौ वां दृढं धारयिष्यतः इति वचः सुग्रीवो रामं प्राह । अनेनदृढत्वमेवान्वयि ॥ ७८ ॥ ७९ ॥

गो० टी०—सुग्रीवेत्यादि । लक्ष्मण इत्यत्र आरोढव्यमिति शेषः । कपिवीरवरः कपीन्द्रः ॥ ८० ॥

गो० टी०—अथ सेतोरुपयोगमाह—अथमिति । विपुलः शतयोजनव्यापकः सेतुः बहुकालदृढिलम्भी भविष्यतीति भावः । क्षितयो भूमयः । इति सुग्रीवः प्राहेति पूर्वेणान्वयः ॥ ८१ ॥

७९] ति० टी०—दायसावाकाशगामिनौ ॥ ७९ ॥

रा० टी०—सैन्यस्य अग्रतः अग्रे सुग्रीवेण समन्वितो रामो जगाम । अतः अनेन सेतुना सुग्रीवस्याप्याकाशगामित्वं सूचितम् ॥ ७९ ॥

गो० टी०—अग्रत इति । स्पष्टः ॥ ८० ॥

८०-८१ [सुग्रीवेण समन्वितो रामो धन्वायतो जगाम । अन्ये मध्येन गच्छन्ति अन्ये पार्श्वतो गच्छन्ति अन्ये सर्वे प्रपतन्ति सलाप्यन्ये मार्गं सेतुं शोधयन्ति केचिद्दायसगताः सलतः पक्षिणो गरुडा इव पुप्लुवुः आकाशेनैव गतवन्तः ॥ ८१ ॥ ८० ॥

गो० टी०—अथेति । न केवलं वानरसैन्यमेव सेतुमतिक्रान्तं किन्तु राक्षसाश्चेत्यर्थः ॥ ८३ ॥

गो० टी०—[अथैवंविधसेतुकर्मणो वानरसैन्यस्य च तत्क्रियां कर्तुं देवादय आगता इत्याह—तदद्भुतमिति । सेतुकर्म राघवस्य रामस्य अद्भुतं आश्चर्यकरं । अतः सिद्धचारणैः सह देवा रामं उपेत्य सहसा महर्षिभिः समभ्यषिञ्चन्सुशुभैर्जलैः पृथक् । अतः नरदेवसत्कृतं रामं शुभैर्वचोभिर्विविधैरपूजयन् ॥ ८४ ॥ ८५ ॥

इति श्रीगोविन्दराजविरचितायां वाल्मीकीयरामायणभूषणटीकायां युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

८३] ति० टी०—तीरे परतीरे निविविशे निवेशितः ॥ ८३ ॥

रा० टी०—वानराणामिति । नलसेतुना तीर्णा वानराणां वाहिनी सेना सुग्रीवेण बहुमूलफलोदके तीरे निविविशे ॥ ८४ ॥

गो० टी०—वानराणामिति । वानराणां राज्ञा सुग्रीवेण निविशीनीत्यन्वयः । राजेति पाठे राजा सुग्रीवेण सहेत्यर्थः । तीरे दक्षिणतीरे ॥ ८९ ॥

८४] ति० टी०—अथ समुद्रे सेतुबन्धनादेवंभूतादनीतेन रामस्य राज्याभिषेकः कृतो रावणे निर्वाणप्राप्तेरित्याह—तदद्भुतमिति । राघवस्य राघवाणामन्वयात्तत्समग्रहणमन्वयात्वाय । सुग्रीवेजलैः [illegible] ॥ ८४ ॥

रा० टी०—तदिति । अद्भुतं आश्चर्यं सेतुकर्म राघवकर्म समीक्ष्य रामसुपेत्य सुग्रीवे [illegible] इत्यर्थोभयत्रैः सागरतीरैः पृथक् पृथक् अभ्यषिञ्चन् ॥ ८४ ॥

गो० टी०—इत्थमेकपदेनैकवाक्यतयोद्घुटनविदर्शनभूतं सेतुनिर्माणलक्षणमाश्चर्यं समुपजातयानन्दसन्दोहमा रावणनिबर्हणादुद्गतवर्षाणामप्यनन्तानीनामुभयसम्बन्धसम्बन्धत्वादहर्षप्रकर्षबलात्कारेण देवा यथोचितं रामसृपजयन्तित्याह—तदित्यादिना श्लोकद्वयेन । दुष्करं रामादन्यैर्मनसापि कर्तुमशक्यम् । पृथक्प्रत्येकं सलन्यषिञ्चन् ॥ ८४ ॥

८५] ति० टी०—अभिषिच्यानीयादि च कुर्वन्ति—जयस्वेत्यादि । इतीयेस्यतीत्यन्वयक्रमः । नरदेवा ब्राह्मणाः ॥ ८५ ॥

इति श्रीरामानुजाचार्यश्रीमद्गोविन्दराजविरचितायां श्रीरामायणतिलकाभिधानवाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०—जयस्वेति । शाश्वतीः समाः बहुकालं मेदिनीं पालय इतीव विविधैर्वचोभिर्नरदेवसत्कृतं राममपूजयन् ॥ ८६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणाधिरामणौ युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०—जयेति । जयेति च्छेदः । स्वशत्रून् आश्रित

---

१ अयमिति शत गो. पाठः । २ सहिते इति गो. पाठः । ३ तस्य सिन्धोर्वामेति गो. पाठः । ४ राज्ञ इति गो. पाठः । ५ समिति गो. पाठः

अयोविंशः सर्गः ।

रामः लक्ष्मणाय, लक्ष्मणः रामाय कथयति ।

निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपूर्वजः । सौमित्रिं संपरिष्वज्य इदं वचनमब्रवीत् ॥ १ ॥
परिगृह्योदकं शीतं वनानि फलवन्ति च । बलौघं संविभज्यैतं व्यूह निहंत लक्ष्मण ॥ २ ॥
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् । वैदेह्यां प्रवरं संख्ये राक्षसानां च रक्षसाम् ॥ ३ ॥
वाताश्च कटुका वान्ति कम्पते च वसुंधरा । पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः ॥ ४ ॥
मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः । क्रूराः क्रूरं प्रवर्षन्ति मिश्रं स्त्रीपतिवन्धुभिः ॥ ५ ॥
रक्तचन्दनसंकाशा संध्या परमदारुणा । ज्वलंतः सधूमाः केतवः परिवेषणम् ॥ ६ ॥

शत्रूणामेवास्य शत्रुत्वादिति भावः । नरदेवस्वरूपं मनसि कृत्वेव सत्कृतम् । अभूजयन् अरक्षन् । स्तुतिभिः मन्त्रिणो पूजां ॥ १ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे वाल्मीकीये आदिकाव्याख्याने दुष्टशकुनव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१] ति० टी०—अथ रामस्य घोरनिमित्तदर्शनम् निमित्तानीति । लक्ष्यमाणानीत्यर्थः ॥ १ ॥

रा० टी०—सागरतरणानन्तरकालिकं लक्ष्मणं प्रति रामवचनमाह—निमित्तानीत्यादिभिः । निमित्तज्ञः निमित्तविनिर्णयज्ञातः लक्ष्मणपूर्वजः सौमित्रिमिदमब्रवीत् ॥ १ ॥

गो० टी०—एवं रामो नलनेतुना तीर्णमहार्णवेन सुग्रीवकान्ते महोत्पातान् दृष्ट्वा चिरार्थितार्थावाप्तिनिर्वृतिं [1] तौर्णि सन्तुष्टो रामो निमित्तानि निमित्तज्ञस्य लक्ष्म [illegible] याते—निमित्तानीति । निमित्तज्ञत्वे लक्ष्मणस्य [illegible] मित्रं लक्ष्मणपूर्वजं उक्तवान् । संपरिष्वङ्गश्चिरप्रार्थितस्यार्थस्य सम्प्राप्तत्वात् । निमित्तापेक्षणस्यादृष्टफलत्वमुक्तम् कामदेवः निमित्तानीव शुभाशुभफलोदयम् । तस्मादेतानि दृष्ट्वा राजा समुपलक्षयेदिति ॥ १ ॥

२] ति० टी०—सौमित्रेरग्रे ऋक्षगोलाङ्गूलानीकभागं कृत्वा । तस्य व्यूहं च कुर्वेत्यर्थः ॥ २ ॥

रा० टी०—तदाज्ञामाह—परिगृह्येत्यादिभिः । उदकं फलवन्ति वनानि च परिगृह्य आदित्य बलौघं संविभज्य ऋक्षादिरूपेण विभागं कृत्वा व्यूहं व्यूहरचनया संस्थाप्य वयं तिष्ठेम ॥ २ ॥

गो० टी०—परिगृह्येति । शीतमुदकं शीतोदकप्रदेशम् वनानि जलसमीपस्थानि । परिगृह्य वासार्थं परिक्रम्य । व्यूह गरुडरूपेण संविवेश्य । तथा व्यूहीभविष्यति ॥ २ ॥

३] ति० टी०—भयं भयनिमित्तम् ॥ ३ ॥

रा० टी०—लोकेति । लोकस्य देवादिजनस्य क्षयकरम् आश्रयप्रदातारं भीमम् भयं राक्षसभीतिप्रदम् उपस्थितम् [illegible] क्षवानरराक्षसां प्रवरं संग्रामे पश्यामि । किंच लोकानां राक्षसानां क्षयकरं [illegible] दमित्यर्थः ॥ ३ ॥

गो० टी०—लोकक्षयकरं इति । लोकक्षयकरं भयं लक्षयति । लिङ्गस्य लोकानां विनाशकम् । भयमिति पुंस्त्वमार्षं ॥ ३ ॥

४] ति० टी०—वाता रूक्षा वान्ति ॥ ४ ॥

रा० टी०—तमेव निमित्तमाह वाताश्चेत्यादिभिः । कटुकाः रूक्षाः वान्ति ॥ ४ ॥

गो० टी०—भयदर्शने हेतुमन्याह—वाता इत्यादि । महद्भयं भवतीत्यर्थः । अत्यन्तानिष्टकं [illegible] तत्रोत्पातनिमित्तैः रक्षोवधे—यामः [illegible] निमित्तभाविनः । अनिष्टः क्षितीशः [illegible] ॥ ४ ॥

५] ति० टी०—क्रव्यादसंकाशाः मृगमांसाशुद्धयेनाः [illegible] ॥ ५ ॥

रा० टी०—मेघा इति । क्रव्यादसंकाशाः मृगमांसाशुद्धयेनसदृशाः [illegible] परुषस्वनाः [illegible] क्रूराः क्रूरं क्रौर्यवन्तः मिश्रं यथा भवति तथा वर्षन्ति ॥ ५ ॥

गो० टी०—मेघाः इति । [illegible] क्रव्यादसंकाशाः । क्रव्यादाः [illegible] इति या परुषाः [illegible] आकृतिः यावत् । परुषस्वनाः [illegible] अत एव क्रूराः [illegible] मिश्रं [illegible] । अनर्थिभिः [illegible] । भवद्भिः [illegible] । तथा [illegible] ॥ ५ ॥

६] ति० टी०—रक्तेति । रक्तचन्दनसंकाशा अत्यरुणा अत एव परमदारुणा संध्या सायंतनी [illegible] ज्वलंतः अग्निपिण्डाः परिवेषः ॥ ६ ॥

गो० टी०—रक्तचन्दनेति । रक्तचन्दनं कुङ्कुमम् । चन्दनतुल्यमेघवतीत्यर्थः । परमदारुणा भवतीति शेषः । मण्डलम् अग्निपिण्डः ॥ ६ ॥

---

[1] तौर्णि गो. पाठः । २ नीति गो. पाठः ।

ना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः । प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम् ॥ ७ ॥
न्यामप्रकाशस्तु संतापयति चन्द्रमाः । कृष्णरक्ताशुपर्यन्तो लोकक्षय इवोदितः ॥ ८ ॥
वो रूक्षोऽप्रशस्तश्च परिवेषस्तु लोहितः । आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ ९ ॥
जसा महता चापि नक्षत्राणि हतानि च । युगान्तमिव लोकानां पश्य शंसन्ति लक्ष्मण ॥ १० ॥
काकाः श्येनास्तथा नीचा गृध्राः परिपतन्ति च । शिवाश्चाप्यशुभान्नादान्नदन्ति सुमहाभयान् ॥ ११ ॥
ैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः । भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ १२ ॥
प्रमथ्यैव दुर्धर्षां पुरीं रावणपालिताम् । अभियाम जवेनैव सैन्यैर्हरिभिरावृताः ॥ १३ ॥
त्येवमुक्त्वा धन्वी स रामः सङ्ग्रामधर्षणः । प्रतस्थे पुरतो रामो लङ्कामभिमुखो विभुः ॥ १४ ॥

७] ति० टी०–प्रत्यादित्यं सूर्यसंमुखम् ॥ ७ ॥

रा० टी०–दीना इति । दीना महद्भयं जनयन्तो मृगपक्षिणः प्रत्यादित्यम् आदित्यसंमुखं विनर्दन्ति ॥ ७ ॥

गो० टी०–दीना इति । दीनाः दीनाकृतयः । जनयन्तः जनयन्तः ॥ ७ ॥

८] ति० टी०–चन्द्रमाः संतापयति । सांध्यकिरण इत्यर्थः । कृष्णरक्तेत्यादिना परिवेषविशेष उक्तः ॥ ८ ॥

रा० टी०–रजन्यामिति । कृष्णरक्तैरंशुभिः पर्यन्तो यस्याः अत एव लोकक्षय इवोदितश्चन्द्रमाः रजन्यामपि अधिकायाः प्रकाशरहितः सन् संतापयति ॥ ८ ॥

गो० टी०–रजन्यामिति । अर्धमेकं वाक्यम् । अप्रकाशः निष्प्रभः । सन्तापयति । शीतस्य सन्तापकरणं क्षुब्धत्वात् इति भावः ॥ ८ ॥

गो० टी०–कृष्णेति । कृष्णा रक्ताश्चांशवः पर्यन्ते यस्य स तथोक्तः । सन्ति कृष्णमण्डलः तदनन्तरं रक्तमण्डल इत्यर्थः । उदितः सत्ये अत्यन्तरक्तवर्णः लोकक्षये प्रलये उदितः परिपूर्ण इव स्थितः । रूक्षः क्रूरः । अप्रशस्तः अप्रसिद्धः । इतः पूर्वमदृष्ट इत्यर्थः । परिवेषः दृश्यत इति शेषः । अत्र वर्णत्रयकथनेन मण्डलत्रयकथनात्सार्यकालिकत्वाच्च परिवेषस्य नृपक्षयकरत्वं सूच्यते । तदाह काश्यपः—'त्रिमण्डलश्चमूपघ्नो नृपघ्नो यस्त्रिवर्णकः' इति । 'दिनकरपरिवेषः पूर्वयामे नृपीडा दिनकरपरिवेषो मध्यमे द्वितीये । दिनकरपरिवेषं चण्डमारुतीये दिनकरपरिवेषः सर्वलोकक्षयार्थं' इति ॥ ९ ॥

९] ति० टी०–रूक्षत्वादिगुणकः परिवेष आदित्ये दृश्यते ॥ ९ ॥

रा० टी०–रूक्ष इति । विमले आदित्ये रूक्षत्वादिविशिष्टः परिवेषः ये नीलं लक्ष्म च दृश्यते ॥ ९ ॥

गो० टी०–आदित्य इति । नीलं लक्ष्म चिह्नरूपम् । तदाह —' [illegible] तथा राहुग्रस्तौ चन्द्रसूर्यौ । चन्द्रार्कमण्डले दृष्ट्वा जनयत्यये ' इति । यद्वा नीलं लक्ष्म चन्द्र इव कलङ्को दृश्यते । एतदेवौत्पातिकं नैल्यमधिकृत्य पुनरादित्यस्य रोहितं रूपमित्याश्चर्य यत् कृष्णं तदत्यन्तेत्युच्यते ॥ १० ॥

१०] ति० टी०–नक्षत्राणि हतानीति । रात्रिकाल इति शेषः ॥ १० ॥

रा० टी०–रजसेति । रजसाहतानि नक्षत्राणि लोकानां युगान्तं विनाशमित्यर्थः । किं च लोकानां जनानां युगः संयोगस्य आसमन्तादन्तं विनाशमिव शंसन्ति ॥ १० ॥

गो० टी०–रजसेति । रजसा भास्विन्मण्डलेन । युगान्तं प्रलयम् ॥ ११ ॥

११] ति० टी०–महाभयान्महाभयजनकालान् ॥ ११ ॥

रा० टी०–काका इति । काकादयः परिपतन्ति भक्षयितुं निपतन्ति शिवाः अपि सुमहाभयान् अशुभान् नादान् नदन्ति ॥ ११ ॥

गो० टी०–काका इति । नीचैः । भूमौ । अधिकबलवन्तं दुर्बलैः परिभवोऽयमुत्पात इति । शिवाः शोभनाः । शिवाः शिवा भूमिर्भागुर्मायुस्तिस्रयमरः । नादान् नदन्ति नादान्कुर्वन्तीत्यर्थः ॥ १२ ॥

१२–१३] ति० टी०–अधुना दृश्यमानलिखितानां फलमाह—शैलैरित्यादि ॥ १२ ॥ १३ ॥

रा० टी०–उक्तदुत्पातानां फलमाह–शैलैरिति । कपिराक्षसैर्विमुक्तैः शैलादिभिराहता अत एव मांसशोणितकर्दमा भूमिर्भविष्यति ॥ १२ ॥

गो० टी०–उक्तोत्पातफलमाह—शैलैरिति । मांसशोणितकर्दमा मांसशोणितरूपकर्दमवती ॥ १३ ॥

रा० टी०–क्षिप्रमिति । हरिभिराहृता वयं पुरीं लङ्कां क्षिप्रमभियाम एतेन स्वविजयसूचकलक्षकाकुनोऽपि रामेणावलोकित इति व्यञ्जितम् ॥ १३ ॥

गो० टी०–क्षिप्रमिति । क्षिप्रं सत्वरम् । जवेन वेगेन॥१४

१४] ति० टी०–रामो जनरमणो राम इत्यन्वयः ॥१४

रा० टी०–इतीति । रामः सर्वाभिरमदाता रामः लङ्कामभिमुखः सन् पुरतः प्रथमं प्रतस्थे पुरतः प्रतस्थे इत्येन पुनरुत्साहः सूचितः ॥ १४ ॥

१ स्थित गो. पाठः । २ भूता नीचैरिति गो. पाठः । ३ अशिवानिति गो. पाठः । ४ [illegible] इति गो. पाठः । ५ सर्वतो [illegible] इति गो. पाठः । ६ [illegible] इति गो. पाठः । ७ हर्षण इति गो. पाठः ।

सविभीषणसुग्रीवाः सर्वे ते वानरर्षभाः । प्रतस्थिरे विनर्दन्तो भेतानां दिपतां वधे ॥ १५ ॥
राघवस्य प्रियार्थं तु सुतरां वीर्यशालिनाम् । हरीणां कर्मचेष्टाभिस्तुतोष रघुनन्दनः ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ।

रामो लङ्कां वीक्ष्य प्रसन्नश्च स्वसेनां युद्धं पूर्वं कृत युक्त [illegible] सकलं कथयामास तेन कृतः पौलस्त्यः स्वपराक्रमं गर्वं कथयति ।

सा वीरसमिती राज्ञा विरराज व्यवस्थिता । शशिना शुभनक्षत्रा पौर्णमासीव शारदी ॥ १ ॥
प्रचचाल च वेगेन त्रस्ता चैव वनेचरा । पीड्यमाना चमूरेण तेन सागरवर्चसा ॥ २ ॥
ततः शुश्रुवुराक्रुष्टं लङ्कायां काननौकसः । भेरीमृदङ्गसंपृक्तं तुमुलं लोमहर्षणम् ॥ ३ ॥
ऊचुस्तेन घोषेण संहृष्टा हरियूथपाः । अमृष्यमाणास्तद्वीर्यं निर्दहन्तमिवाहवे ॥ ४ ॥
राक्षसास्तेऽप्युदीर्यन्तां शुश्रुवुस्तेऽपि गर्जितम् । नदतामिव सत्त्वानां मेघानामम्बरे स्वनम् ॥ ५ ॥

गो० टी०—इत्येवमिति । पुरतः प्रतस्थे इति [illegible] त्रयोविंशे । शिष्टः समयः ॥ १५ ॥

१५] ति० टी०—प्रतानां निश्चितकुर्वतानाम् ॥ १५ ॥

रा० टी०—सेति । सर्वे वानरर्षभाः प्रतानां युद्धोद्योगं निश्चयतां द्विषतां राक्षसानां वधे वधार्थं प्रतस्थिरे ॥ १ ॥

गो० टी०—स चितिरिति । तिथिनक्षत्रयोगादिना [illegible] अत्र प्रस्थाने शोभनकालत्वद्योतनपरिग्रहार्थं पर्वमुहूर्तादय विस्तरेण ग्रन्थे कर्तव्यतया अभिहितत्वात् ॥ १६ ॥

१६] ति० टी०—कर्मणा चेष्टेन परे प्रति [illegible] चेष्टाभिः कालव्यवहारैश्च तुतोषेत्यन्वयः ॥ १६ ॥

इति श्रीमत्परमहंस श्रीरामभक्ते रामायणशिरोम [illegible] आदिकाव्ये युद्धकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०—राघवस्येति । राघवस्य स्वस्य प्रियार्थं हरीणां कर्मचेष्टाभिः कृतकार्यव्यापारैः रघुनन्दनस्तुतोष ॥ १६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

गो० टी०—राघवस्येति । प्रतानां धैर्यातिशय [illegible] चेष्टाभिः युद्धकर्मादिविषयचेष्टाभिः । लाङ्गूलोत्थापनादिभिः प्रकाशे स्थानेन इदं दुर्गप्रदेशं दृष्ट्वा वानरा निरुत्साहा भवन्तीति पूर्वं राममनसि स्थितमित्यवगम्यते ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषण [illegible] टाख्याने युद्धकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ [illegible] ॥

१] ति० टी०—सेति । सा वीराणां समितिः सामग्री राज्ञा व्यवस्थिता रामेण कृतव्यूहा विरराज । शुभनक्षत्रा शारदी पौर्णमासी शशिनेव ॥ १ ॥

रा० टी०—मध्यमानन्तरकालिकं वृत्तान्तमाह—सेत्या- दिभिः । राज्ञा [illegible] व्यवस्थिता सेत्यभिधीयते विरराज । [illegible] पौर्णमासी विरराज ॥ १ ॥

गो० टी०—स [illegible] प्रस्थानसमयभवणम्—सेत्यादि । राज्ञा [illegible] व्यवस्थिता [illegible] परियुक्त [illegible] सीत्यभिधीयते । [illegible] समाप्ता समितिरित्यर्थः । शशिना [illegible] शशिना कृत्तिकादि ॥ १ ॥

२] ति० टी०—[illegible] प्रचचाल च वेगेन [illegible] सेनया तेन प्रस्थाने [illegible] ॥ २ ॥

रा० टी०—प्रचचालेति । सागरवर्चसा सागरस्य सदृशी [illegible] तेन [illegible] सागरात् सागरवत् [illegible] वनेचरा वानरा वेगेन [illegible] पीड्यमानेन [illegible] प्रचचालेत्यन्वयः ॥ २ ॥

गो० टी०—[illegible] सागरस्येव सागरवत्परि [illegible] ॥ २ ॥

३] ति० टी०—[illegible] ॥ ३ ॥

रा० टी०—तत इति । [illegible] राक्षसानां परस्परमाह्वा भेरीमृदङ्गसंयुक्तं च वाद्यशब्दं शुश्रुवुः ॥ ३ ॥

गो० टी०—[illegible] तुमुलं [illegible] । निष्कं दाढे वर्तमानाः । [illegible] भेरीमृदङ्ग संयुक्तमिति [illegible] ॥ ३ ॥

४] ति० टी०—घोषं [illegible] तेन घोषेण [illegible] वर्तमान वानरा [illegible] अमृष्यमाणाः सन्तः [illegible] ॥ ४ ॥

गो० टी०—ऊचुरिति । घोषवन्तं राक्षसघोषार्हं घोषवत् । क्रियाविशेषणम् ॥ ४ ॥

५] ति० टी०—अम्बरे मेघानां स्वनमिव तेऽपि रक्षसां वृन्दानि तद्गर्जितं शुश्रुवुः ॥ ५ ॥

---

१ शुभनक्षत्रा इति गो. पाठः । २ चलनामिति गो. पाठः । ४ तन्मित्र गो. पाठः । ५ स्थिति गो. पाठः । ६ चेति गो.

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम् । जगाम मनसा सीतां दूयमानेन चेतसा ॥ ६ ॥
अत्र सा मृगशावाक्षी रावणेनोपरुध्यते । अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी ॥ ७ ॥
दीर्घमुष्णं च निःश्वस्य समुद्वीक्ष्य च लक्ष्मणम् । उवाच वचनं वीरस्तत्कालहितमात्मनः ॥ ८ ॥
आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण । मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा ॥ ९ ॥
विमानैर्बहुभिर्लङ्का संकीर्णा रचिता पुरा । विष्णोः पदमिवाकाशं छादितं पाण्डुभिर्घनैः॥ १० ॥
पुष्पितैः शोभिता लङ्का वनैश्चित्ररथोपमैः । नानापतंगसंघुष्टफलपुष्पोपगैः शुभैः ॥ ११ ॥
पश्य मत्तविहङ्गानि प्रलीनभ्रमराणि च । कोकिलाकुलखण्डानि दोधवीति शिवोऽनिलः ॥१२॥

रा० टी०–राक्षसा इति । मेघानां सजलत्वे प्रवङ्गानां जेतुं राक्षसा अपि शक्नुयुः ॥ ५ ॥

गो० टी०–राक्षसा इति । ह्लादानां पूर्णानाम् । आकाशैव शब्दाश्रयत्वादस्य इत्युक्तम् । यद्वा ह्लादसंज्ञेन्यभुल्कनाशितमित्यादावरशब्दस्तत्पर्यायं नभश्शब्दं लक्षयित्वा पूर्णमासमाह ॥ ५ ॥

६] ति० टी०–मनसा जगाम मस्मारेत्यर्थः ॥ ६ ॥

रा० टी०–दृष्ट्वेति । दाशरथिः लङ्कां दृष्ट्वा दूयमानेन तसोपलक्षितां सीतां मनसा जगाम संस्मरेत्यर्थः ॥ ६ ॥

गो० टी०–दृष्ट्वेति । चित्रध्वजो ध्वजः केवलचेला पताकाः चित्रा । चेतसा उपलक्षितः मनसा जगाम । स्मारेत्यर्थः ॥ ६ ॥

७] ति० टी०–स्मरणप्रकारः—अत्र सेति । उपरुध्यते उपरुद्धा क्रियते । लोहितोऽङ्गारकः ॥ ७ ॥

रा० टी०–स्मरणप्रकारमाह–अत्रेति । लोहिताङ्गेन ग्रहेण अभिभूता गृहीतेव सा सीता रावणेनोपरुध्यते ॥ ७ ॥

गो० टी०–स्मरणप्रकारमाह—अत्रेति । एतच्छ्लोकान्तकाव्यलक्षणमिति करणे क्तम् । सा साकेते सकलभोगार्हा । मृगशावाक्षी । मृगशावस्तत्समाने यद्वच्छिदर्शनकुतूहलेन मृगशावस्तत्सदृक्षं विलोचनयुगलम् तदेवाक्षणि यस्याः सा तथा । दाह । यद्वा मृगशावे मार्गीशब्दे अक्षिणी यस्या इति । विग्रहः ॥ ७ ॥

८] ति० टी०–आत्मनस्तत्कालहितं लङ्कादर्शनकाले आत्मनः प्रौढिकरम् । दिव्यपुरीदर्शनजसतोषपोलकमिति भावः ॥ ८ ॥

रा० टी०–दीर्घमिति । दीर्घं बहुकालमुष्णं निःश्वस्य लक्ष्मणमुद्वीक्ष्य च वीरो रामः आत्मनः तत्कालहितं वचनमुवाच ॥ ८ ॥

गो० टी०–दीर्घमिति । अथ पुष्पयात्रासमये कान्तात्मरणकाले आत्मनो निर्वाणमिति तत्रियमित्यादिति सूचयति दीर्घमुष्णं च निःश्वस्येत्यनेन । तत्कालहितम् पुष्पयात्रासमये हितम् । गोकविरभारकनगरगोमतीवर्णनरूपं वचनम् । यद्वा अङ्गदः सह नीलेनेत्यादि वाक्यं तत्कालहितम् । तस्माद्दीर्घमिदं नगाग्रमित्यिवत् । आलिखन्तीमित्यादिकं सर्वं वाक्यजातं तत्कालहितमित्युक्तम् ॥ ८ ॥

९] ति० टी०–तदेवाह—आलिखन्तीमित्यादि ॥ ९ ॥

रा० टी०–तदाकारमाह–आलिखन्तीमित्यादिभिः । नगाग्रे शैलशृङ्गे विश्वकर्मणा मनसेव कृताम् आकाशम् आलिखन्तीमिवोत्थितां लङ्कां पश्य ॥ ९ ॥

गो० टी०–आलिखन्तीमिति । आलिखन्तीं स्पृशन्तीम् उत्थिताम् उन्नताम् । नगाग्रे त्रिकूटशिखरे ॥ ९ ॥

१०–११] ति० टी०–विमानैः सामयिकप्रासादैः संकीर्णा निविडा । तत्रोपमा–पाण्डुभिर्घनैः संकीर्णं विष्णोर्व्यापनशीलस्य वायुमयस्य ब्रह्मणः पदं प्रकारस्थानमाकाशमिव ॥ १० ॥ ११ ॥

रा० टी०–विमानैरिति । पाण्डुभिर्घनैरालम्बादिभिः विष्णोः पदमाकाशमिव लङ्का विमानैः संकीर्णा आच्छादिता ॥ १० ॥

गो० टी०–विमानैरिति । विष्णोः आदित्यस्य यत् स्थानम् । आकाशमध्यमिति यावत् । रामान्यं अनेक तलप्रासादः ॥ १० ॥

रा० टी०–पुष्पितैरिति । नानापतंगसंघुष्टानां फलपुष्पाणामुपगैः राजगृहादिषु गमनं यैस्तैः पुष्पितैश्चित्ररथोपमैः काननैर्लङ्का शोभिता ॥ ११ ॥

गो० टी०–पुष्पितैरिति । फलभूतानि पुष्पाणि यासांताः फलपुष्पाः मल्लिकादयः ताभिरुपगम्यन्त इति तथा । अतो न पुष्पितैरित्यनेन पौनरुक्त्यम् । सङ्घुष्टं सङ्घोषः भावे क्तः । नानाविधानि पतङ्गसङ्घुष्टानि येषां ते ॥ ११ ॥

१२] ति० टी०–कोकिलाकुलखण्डानि तदाकुलवृक्षखण्डानि । दोधवीति कम्पयति ॥ १२ ॥

रा० टी०–पश्येति । मत्तविहङ्गानि विहङ्गशब्दोत्र कोकिलपरः । अनेन सदा फलवत्त्वमुक्तम् । प्रलीनभ्रमराणि मधुपानपरवशतया निष्पन्दभ्रमराणि । अनेन सदा पुष्पवत्त्वमुक्तम् । कोकिलाकुलं पण्डं पुष्पसमूहो येषां तानि कोकिलाकु-

१ मुनि रक्षत इति गो. पाठः । २ पाण्डुरैरिति गो. पाठः । ३ पतङ्गेति गो. पाठः । ४ यस्येति रा. पाठः ।

इति दाशरथी रामो लक्ष्मणं समभाषत । वलं च तौर्य विभजच्छास्त्रदृष्टेन कर्मणा ॥ १३ ॥
शशास कपिसेनां तां बलादादाय वीर्यवान् । अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः ॥ १४ ॥
तिष्ठेद्वानरवाहिन्या वानरौघसमावृतः । ऋषभो दक्षिणं पार्श्वमृषभो नाम वानरः ॥ १५ ॥
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः । तिष्ठेद्वानरवाहिन्याः सव्यं पक्षमधिष्ठितः ॥ १६ ॥
मूर्ध्नि स्थास्याम्यहं तेषां लक्ष्मणेन समन्वितः । सुषेणश्च सुषेणश्च वेगदर्शी च वानरः ॥ १७ ॥
ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः । मैन्दो द्विविदसेनाग्रः कपिराजोऽभिरक्षतु ॥
पश्चार्धमिव लोकस्य गत्वेनास्तेजसा वृतः ॥ १८ ॥
सुविक्रान्तमहाव्यूहा महावानररक्षितः । [illegible] ॥ १९ ॥
प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान् । अभ्यद्रवन्त लङ्कां ते मिथ्रेणेषवो रवे ॥ २० ॥
शिखरैर्विकिरामेनां लङ्कां मुष्टिभिरेव वा । इति ते तत्र ते वीरा मनांसि हरयोऽकरन् ॥ २१ ॥

लपण्डानि । अनेन लङ्का पक्षवितलमुक्तम् । कोकिलाभं । कपिसेनावत् । पक्षावित्यनुषङ्गनीयम् । दोर्भ्यामिति पक्षः पुनः कल्पयति । " पुनः कल्पे " इत्यस्मात्पुनरुक्तं ॥ १२ ॥

१३] ति० टी०—विभजदनुभवन् ॥ १३ ॥

रा० टी०—इलाति । रामः इति समभाषत शास्त्रदृष्टेन नीतिशास्त्रविहितेन कर्मणा बलं विभजन् व्यभजत् ॥ १३ ॥

गो० टी०—इत्यर्थौक्यमेकं तात्पर्यम् ॥ १३ ॥

१४] ति० टी०—बलाद्वानरबलात् आदाय स्वयं गृहीत्वा तां नीलेन सहाङ्गद उरसि पुरुषव्यूहस्योरसि तिष्ठेदिति पक्षिसेनां शशास ॥ १४ ॥

रा० टी०—शशासेति । कपिसेनां शशास नाम इति क्रियातत्पकारकसम्बन्धात् बलात् सेनायाः आदाय स्वयं गृहीत्वा उरसि पुरुषव्यूहमध्ये नीलेन सह अङ्गदः तिष्ठेत् ॥ १४ ॥

गो० टी०—बलमिति । शास्त्रदृष्टेन नीतिशास्त्रज्ञातेन कर्मणा प्रयोगेण बलं सेनाम् विभजन् व्यूहयन् व्यूहद्वारा शशास कपिसेनाया इत्यापूर्वस्योपः ॥ १४ ॥

गो० टी०—शासनप्रकारमाह—कपिसेनाया इत्यादि । अङ्गदो नीलेन सह स्वबलमादाय कपिसेनायाः उरसि उरस्थाने तिष्ठेदित्यन्वयः ॥ १५ ॥

१५-१६] ति० टी०—वानरौघसमावृत ऋषभो वानरवाहिन्या दक्षिणं पार्श्वमाश्रितस्तिष्ठेदित्यन्वयः ॥ १५ ॥ १६ ॥

रा० टी०—तिष्ठेदिति । वानरौघसमावृतः ऋषभो नाम वानरो वानरवाहिन्याः दक्षिणं पार्श्वमाश्रितः सन् तिष्ठेत् ॥ १५ ॥

गो० टी०—तिष्ठेदिति । वानरौघसमावृतः कपिसमूहसहितः ॥ १६ ॥

रा० टी०—गन्धेति । गन्धमादनः सव्यं पक्षमधिष्ठितः सन् तिष्ठेत् ॥ १६ ॥

गो० टी०—गन्धहस्तीति । गन्धहस्ती मत्तगजः ॥ १७ ॥

[illegible] ॥ १७ ॥

रा० टी०—मूर्ध्नीति । [illegible] मूर्धन्यहमेवाधि तिष्ठामि साम्प्रतमेव [illegible] कुक्षिं रक्षन्तु [illegible] इत्यनेन पक्षावित्यनुषङ्गः कर्तव्यः इति कपिराजोऽभिरक्षत्विति [illegible] ॥ १८ ॥ १९ ॥

गो० टी०—तृतीयार्धमेकं वाक्यम् । [illegible] ॥ १८ ॥

गो० टी०—[illegible] । अनेन इति वेगदर्शिनो [illegible] । [illegible] । [illegible] । [illegible] ॥ १९ ॥

२०-२१] ति० टी०—[illegible] ॥ २० ॥ २१ ॥

गो० टी०—प्रगृह्येति । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ॥ २० ॥

गो० टी०—प्रगृह्येति । आसेदुः आसादितवन्तः । मर्दयितुमिच्छवः । सनि हिन्वाभाव आर्षः ॥

२१] ति० टी०—शिखरैरिति शिखरैर्विकिरामि [illegible] पाठः । नाशयामीति यावत् ॥ २१ ॥

---

१ तद्वै इति गो० पाठः । २ सेनाया इति गो० पाठः । ३ अभिरक्षेत गो० पाठः । ४ वानरैश्च इति गो० पाठः । ५ सव्यपक्षमिति गो० पाठः । ६ समन्वित इति गो० पाठः । ७ सुषेण इति गो० पाठः । ८ विभजेति गो० रा० पाठः । ९ सङ्गमा इति गो० पाठः ।

ततो रामो महातेजाः सुग्रीवमिदमब्रवीत् । सुविभक्तानि सैन्यानि शुक एष विमुच्यताम्॥ २२ ॥
रामस्य तु वचः श्रुत्वा वानरेन्द्रो महाबलः । मोचयामास तं दूतं शुकं रामस्य शासनात् ॥ २३ ॥
मोचितो रामवाक्येन वानरैश्च [1]निपीडितः । शुकः परमसंत्रस्तो रक्षोधिपमुपागमत् ॥ २४ ॥
रावणः प्रहसन्नेव शुकं वाक्यमुवाच ह । किमियौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे ॥ २५ ॥
काञ्चिन्नालेकनिलानां तेषां त्वं वशमागतः । ततः स भयसंविग्नस्तेनैव राज्ञाभिचोदितः ॥
वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् ॥ २६ ॥
सागरस्योत्तरे तीरेऽब्रुवं ते वचनं तथा । यथा संदेशमाक्षिप्तं सान्त्वपूर्वमश्लक्ष्णया गिरा ॥ २७ ॥
क्रुद्धैस्तैरप्रतिक्रुष्टं दृष्टमात्रैः प्लवंगमैः । गृहीतोऽस्म्यविचारज्ञो हन्तुं लोष्टुं च मुष्टिभिः ॥२८॥
न ते संभावयितुं शक्याः सप्रश्नोऽत्र न [2]विद्यते । प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप॥ २९ ॥

रा० टी०—शिखरैरिति । घनां लङ्काम् । शिखरैश्चेष्टिभिर्वा तिकिरामः विनाशयाम इति मनसि हरिसङ्घाः दधिरे ॥२१॥

गो० टी०—शिखरैरिति । शिलाभिः साधनैः । विकिरामः चूर्णयामः । मनांसि दधिरे निश्चये चक्रुरित्यर्थः ॥ २३ ॥

२२-२३] ति० टी०—शुक एष विमुच्यतामिति । पूर्वं मुच्यतां इति श्रुत्वा तत्रस्थं तत्सादृश्यात्तमुच्यतामित्येवार्थः । तेन चक्षा स्वयमेव दर्शयिष्यते ॥ २२ ॥ २३ ॥

रा० टी०—तत इति । सैन्यानि सुविभक्तानि अतः एषः शुकः तदभिप्रायज्ञापनाय विमुच्यतां इदं वचः रामः सुग्रीवमब्रवीत् ॥ २२ ॥

गो० टी०—तत इति । स्पष्टः ॥ २२ ॥

रा० टी०—रामस्येति । रामस्य वचः श्रुत्वा वानरेन्द्रः सुग्रीवः रामस्य शासनात् अतं दूतं मोचयामास ॥ २३ ॥

गो० टी०—रामस्येति । स्पष्टः ॥ २३ ॥

रा० टी०—मोचित इति । रामवाक्येन मोचितः शुकः रक्षोधिपमुपागमत् ॥ २४ ॥

गो० टी०—मोचित इति । स्पष्टः ॥ २४ ॥

२५] ति० टी०—किमियौ इति । शुकस्य सारणादिविकृताकारं दृष्ट्वा प्राह । इमौ ते पक्षौ सितौ यदा स्थिरं, अतो लूनपक्षश्च दृश्यसे ? ॥ २५ ॥

रा० टी०—काञ्चिदिति । अनेकविधानां चञ्चलचित्तानां तेषां वानराणां वशं त्वं कथमागतः अर्थं पृच्छन् ॥ २५ ॥

गो० टी०—काञ्चिदिति । ततः कथं ? " शिव, कल्याणे " इत्यस्माद्धातोरीषा । तत्र हेतुमाह—अनपत्रश्च दृश्यस इति । यस्मादनपत्रो दृश्यसे तस्मात् सितावित्यन्वयः । अनेकविधानां चञ्चलचित्तानामित्यर्थः । अनेन पुनः शुकः प्रेषयितुं नेष्यते । तेषां वानराणां वशमागतो न कथमित्यन्वयः ॥ २५ ॥

२६] ति० टी०—अनेकविधानां चञ्चलचित्तानां वानराणाम् ॥ २६ ॥

रा० टी०—तत इति । भयेन संविग्नः चञ्चलमनाः राज्ञाऽभिचोदितः पृष्टः स शुकः इदं प्रत्युवाच ॥ २६ ॥

गो० टी०—तत इति । संविग्नः संभ्रान्तः । तथापि चोदितः मत्संदेशस्य किमुत्तरं सुग्रीवेण दत्तं अतेति चोदित इत्यर्थः ॥ २६ ॥

२७] ति० टी०—सागरस्योत्तरे तीरे स्थित्वा । श्लक्ष्णया गिरा वानरान्सान्त्वयन् । अक्षिप्तं ते वचनं यथोक्तं तथाब्रुवम् ॥ २७ ॥

रा० टी०—तदाकारमाह—सागरस्योत्तरे इति । सागरस्योत्तरे तीरे तदाकारं स्थित्वा श्लक्ष्णया गिरा अहं ब्रुवन् सन् अक्षिप्तं स्पष्टं यथा ते संदेशं वचनं तथाब्रुवम् । किन्तु ते संदेशं वचनमक्षिप्तमस्पष्टं यथा स्यात्तथा शुकः ॥ २८ ॥

गो० टी०—सागरस्येति । सान्त्वपूर्वं अनुनयवाक्यम् । सुग्रीवमिति शेषः ॥ २७ ॥

२८] ति० टी०—भद्रं तथाब्रुवम् । लोष्टुं पक्षभागे लेतुं मुष्टिभिर्हन्तुं चारब्धः ॥ २८ ॥

रा० टी०—क्रुद्धैरिति । क्रुद्धैः क्रुद्धमैः दृष्टमात्रोऽहं गृहीतः मुष्टिभिर्हन्तुं लोष्टुं च प्रवृत्तैरहमिति शेषः आरब्धोऽस्मि ॥ २८ ॥

गो० टी०—क्रुद्धैरिति । लोष्टुं विनाशयितुम् ॥ २८ ॥

२९] ति० टी०—ते कृतपरिभवाः संभावितुं न शक्याः । अत्र परिभवे सम्प्रश्नो विचारो नास्ति । इदमेतावत्कार्यमिति मर्यादा नास्तीत्यर्थः । तदेव स्मारयति—प्रकृत्येति ॥ २९ ॥

रा० टी०—नेति । ते वानराः प्रकृत्या कोपनाः अतः संभावितुं न शक्याः अत एव अत्र मत्कर्मकताडनसमये संप्रश्नो न विद्यते किमर्थं मां ताडयथेति प्रश्नवकाशो न लब्ध इत्यर्थः ॥ २९ ॥

गो० टी०—नेति । अत्र वानरेषु । विषये सप्तमी । तीक्ष्णा

१ निपीडितः गो. पाठः । २ विद्यते गो. पाठः । ३ अभाषतेति गो. पाठः । ४ दृश्यसे इति गो. पाठः । ५ वर्धति गो. पाठः । ६ सान्त्वपूर्वमिति गो. पाठः । ७ भाषितेति गो. पाठः । ८ [illegible] गो. पाठः । ९ लब्धव इति गो. पाठः ।

स च हन्ता विराधस्य कबन्धस्य खरस्य च । तृतीयसहितो रामः सीतायाः पदमागतः ॥ ३० ॥
स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम् । एष लङ्कां निरुध्य धन्वी तिष्ठति राघवः ॥ ३१ ॥
ऋक्षवानरसङ्घानामनीकानि सहस्रशः । निर्भिद्य धनिकाशानां आदयन्ति वसुंधराम् ॥ ३२ ॥
राक्षसानां बलौघस्य वानरेन्द्रबलस्य च । नैवंविधस्य संधिर्देवदानवयोरपि ॥ ३३ ॥
पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु । सीतां वाप्यर्पयच्छाद्य युद्धं वापि प्रदीयताम् ॥ ३४ ॥
शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत् । निर्दहन्निव चक्षुषा ॥ ३५ ॥
यदि मां प्रति युद्धयेरन्देवगन्धर्वदानवाः । सीतां प्रदास्यामि सर्वलोकभयादपि ॥ ३६ ॥
कदा समभिधावन्ति मामका राघवं शरैः । प्रलयेऽर्णवसंक्षुब्धा जला इव पादपम् ॥ ३७ ॥
कदा शोणितदिग्धाङ्गं दीप्तैः कार्मुकविच्युतैः । [illegible] ॥ ३८ ॥
तच्चास्य बलमादास्ये बलेन महता [illegible] । [illegible] प्रभामुदयन्दिवाकरः ॥ ३९ ॥
सागरस्येव मे वेगो मारुतस्येव मे [illegible] । स वै नक्षति [illegible] मां योद्धुमिच्छति ॥ ४० ॥

क्षणाः क्रूराः । उत्कोचावकाशो नास्ति प्रत्युत [illegible] भावः । रावणप्रसादार्थं मध्ये राक्षसाधिपेति [illegible] । स्वतोप्येतदतिक्रमिता इति ज्ञापनार्थं वा ॥ ३१ ॥

३०] ति० टी०—अधुना विज्ञाप्यमाह—स इति । विराधादिहन्तेत्यनेन तत्रापि हन्तेति सूचितम् । पदं स्थानम् । निष्क्रान्तः प्राप्तः ॥ ३० ॥

रा० टी०—स इति । विराधादिहन्ता रामः सीतायाः पदं स्थितिं ज्ञात्वेति शेषः आगतः ॥ ३० ॥

गो० टी०—उक्तयोर्द्वयोः सीताप्रदानयुद्धयोर्मध्ये [illegible] प्रदानस्य साधिष्ठत्वं दर्शयितुं रामपराक्रमं वर्णयति—स चेति । तदभ्याहतपराक्रमस्य भूयः संदर्शनादस्माकमर्थं इति ध्वन्येवेति भावः ॥ ३० ॥

३१-३२] ति० टी०—रक्षांसि निर्धूय तृणीकृत्य [illegible] ॥

रा० टी०—स इति । रक्षांसि निर्धूय विध्वस्तानि कृत्वा [illegible] स सेतुं कृत्वा तीर्त्वा च तिष्ठति ॥ ३२ ॥

गो० टी०—स इत्यनेति । निर्धूय तृणीकृत्य । एष इत्यनेन तिसविहितत्वमुच्यते ॥ ३३ ॥

रा० टी०—ऋक्षेति । ऋक्षवानरसंघातानामनीकानि सैन्यानि वसुन्धरां छादयन्ति ॥ ३३ ॥

गो० टी०—ऋक्षेति । सङ्घानामनीकानीत्यनेन संख्याव्याकृत्या महानीकत्वं सूचितम् ॥ ३२ ॥

३३] ति० टी०—संधिः संधानं साम्येव ॥ ३३ ॥

रा० टी०—राक्षसानामिति । [illegible] संधिरियत्ता न विद्यते ॥ ३४ ॥

गो० टी०—इदानीं तव वचनावकाशाभावेपि पुनः प्रकारान्तरेण गच्छेत्याशङ्क्याह—राक्षसानामिति । संधिः योगमात्रम् ॥ ३३ ॥

३४-३५] ति० टी०—पुरा आयान्त्यागम्यन्ति । पुरागमे भविष्यति तद् एकतरं वक्ष्यमाणयोरन्यतरत् ॥ ३४ ॥ ३५ ॥

रा० टी०—[illegible] । प्राकारमायान्ति अत्र पुरा आगमनाद्भविष्यदर्थे एकतरं क्षिप्रं कुरु एकतरव्यवहार सीतां प्रयच्छ युद्धं प्रदीयतां वा ॥ ३५ ॥

गो० टी०—[illegible] । पुरा आयान्ति आगमिष्यन्ति । "भविष्यन्तीवार्थेऽतीतेऽपि" इति भविष्यदर्थे लट् । एकतरं [illegible] ॥ ३४ ॥

३६] ति० टी०—[illegible] राक्षसक्षयाय [illegible] ॥ ३६ ॥

रा० टी०—[illegible] । [illegible] ॥ ३६ ॥

गो० टी०—[illegible] । [illegible] ॥ ३६ ॥

३६] ति० टी०—[illegible] । [illegible] ॥ ३६ ॥

रा० टी०—[illegible] । [illegible] ॥ ३६ ॥

गो० टी०—[illegible] । [illegible] ॥ ३६ ॥

३७] ति० टी०—[illegible] । [illegible] ॥ ३७ ॥

रा० टी०—[illegible] । [illegible] ॥ ३७ ॥

गो० टी०—[illegible] । [illegible] ॥ ३७ ॥

३८] ति० टी०—[illegible] । [illegible] ॥ ३८ ॥

रा० टी०—[illegible] । [illegible] ॥ ३८ ॥

गो० टी०—[illegible] । [illegible] ॥ ३८ ॥

३९] ति० टी०—[illegible] । [illegible] ॥ ३९ ॥

रा० टी०—[illegible] । [illegible] ॥ ३९ ॥

गो० टी०—[illegible] । [illegible] ॥ ३९ ॥

४०] ति० टी०—[illegible] । [illegible] ॥ ४० ॥

रा० टी०—[illegible] । [illegible] ॥ ४० ॥

गो० टी०—[illegible] । [illegible] ॥ ४० ॥

---

१ ति० गो० । २ रुरुत्सुर्वेति गो० पाठः । ३ बध्नामीति गो० पाठः । ४ तृतीयेन रामेणसह कार्मुकच्युतैरिति गो० पाठः । ५ [illegible] गो० पाठः । ६ [illegible] गो० पाठः ।

[illegible] पन्नगान् । पुरा [illegible] तेन मां योद्धुमिच्छति ॥ ४२ ॥
जानाति पुरा वीर्यं मम युद्धे स राघवः । मम चापमयीं वीणां शरकोणैः प्रवादिताम् ॥ ४२ ॥
शब्दतुमुलां घोरामार्तगीतमहास्वनाम् । नाराचतलसंनादां नदीमहितवाहिनीम् ॥
॥ ४३ ॥
महारङ्गं वादयिष्यामहं रणे ॥
न वासवेनापि सहस्रचक्षुषा युद्धेऽस्मि शक्यो वरुणेन वा स्वयम् ।
यमेन वा धर्षयितुं शराग्निना महाहवे वैश्रवणेन वा स्वयम् ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ।

[illegible]षसेने सागरं तीर्णे प्रवृत्तौ रामभटे प्रविश्य सर्वं वृत्तं कथयतमिति रावणेन संदिष्टौ शुकसारणौ तथा कुर्वन्तौ विभीषणेनापि दत्तसाध्वसेनमुक्तौ तौ रावणं प्रत्ययतां दाशरथाय मैथिलीत्यायुपदिशतः ।

गते सागरं तीर्णे रामे दशरथात्मजे । अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ ॥ १ ॥

रा० टी०-सागरस्येति ॥ ४१ ॥
गो० टी०-सागरस्येति । स्पष्टः ॥ ४२ ॥
४१] ति० टी०-पश्यति दृष्टवान् ॥ ४१ ॥
रा० टी०-नेति । पन्नगानिव शयानान् मे बाणान् न पश्यति अपश्यन् तेन हेतुना मां योद्धुमिच्छति ॥ ४२ ॥
गो० टी०-न म इति स्पष्टः ॥ ४३ ॥
४२] ति० टी०-पुरा पूर्वं मम वीर्यं न जानाति नाज्ञासीत् । शरकोणैः शररूपवादनदण्डैः प्रवादिताम् ॥ ४२ ॥
रा० टी०-नेति । युद्धे मम वीर्यं राघवो न जानाति शरकोणैः बाणरूपवीणावादनदण्डैः प्रवादितां चापमयीं वीणां न जानाति ॥ ४३ ॥
गो० टी०-न जानातीत्यर्थम् । पुरा न जानाति इतः प्राक्त्यर्थः ॥ ४४ ॥
४३] ति० टी०-ज्याशब्द एव तुमुलः शब्दो यस्यां ताम् आर्त आर्तशब्दरूपो हा हतोऽस्मीत्यादिको गीतरूपो महान्स्वनो यस्यास्ताम् नाराचतलत्र एव संनादो यस्यां ताम् अत्र तुमुलमहास्वनसंनादशब्दैर्वीणाया मन्द्रमध्यतारा उक्ताः । नदीरूपा वाहिनी सेना तद्रूपं महारङ्गम् रणाग्रं रणे वादयिष्यामि ॥ ४३ ॥
रा० टी०-ज्याशब्देति । ज्याशब्द एव तुमुलशब्दो यस्यां आर्तानां गीता हा हतोस्मीत्यादिरूपाणि महास्वनाः नाराचतलानां संनादो यस्यां तां अहितवाहिनीं [illegible] नदीमवतार्य प्राप्येत्यर्थः रणे महारङ्गं वादयिष्यामि [illegible] ॥ ४४ ॥ ४५ ॥
गो० टी०-अथ रूपकव्याजेन युद्धस्वास्त्रनो विनोदनम्—[illegible]—[illegible]—[illegible]

समग्रं सागरे तीर्णं दुस्तरं वानरं बलम् । अभूतपूर्वं रामेण सागरे सेतुबन्धनम् ॥ २ ॥
सागरे सेतुबन्धं तं न श्रद्धध्यां कथंचन । अवश्यं चापि संख्येयं तन्मया वानरं बलम् ॥ ३ ॥
भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ । परिमाणं च वीर्यं च ये च मुख्याः प्लवंगमाः ॥ ४ ॥
मन्त्रिणो ये च रामस्य सुग्रीवस्य च संमताः । ये पूर्वमभिवर्तन्ते ये च शूराः प्लवंगमाः ॥ ५ ॥
स च सेतुर्यथा बद्धः सागरे सलिलार्णवे । निवेशं च यथा तेषां वानराणां महात्मनाम् ॥ ६ ॥
रामस्य व्यवसायं च वीर्यं प्रहरणानि च । लक्ष्मणस्य च वीरस्य तत्त्वतो ज्ञातुमर्हथः ॥ ७ ॥
कश्च सेनापतिस्तेषां वानराणां महात्मनाम् । तं च ज्ञात्वा यथातत्त्वं शीघ्रमागन्तुमर्हथः ॥ ८ ॥
इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ । हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम् ॥ ९ ॥
ततस्तद्वानरं सैन्यमचिन्त्यं लोमहर्षणम् । संख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ ॥ १० ॥
तौ स्थितं पर्वताग्रेषु निर्झरेषु गुहासु च । [समुद्रस्य च तीरेषु वनेषूपवनेषु च ।]
तरुणं च तीर्णं च तर्तुकामं च सर्वशः ॥ ११ ॥

इत्यादि । इदमात्मन इति मनुष्यत्वोक्तिः । श्रीमानिति मदादिवर्णनीयः । शुक्र पूर्वमात्यः सारणसाहित्यात् ॥ १ ॥

२] ति० टी०–सम्यं वानरबलं तीर्णं सागरे सेतुबन्धनं च कृतमेतदयमस्माभिरपूर्वम् ॥ २ ॥

रा० टी०–तदाकारमाह–समग्रमित्यादिभिः । दुस्तरं सागरं रामेण वानरबलं तीर्णं तारितं सागरे सेतुबन्धनं च कृतमिति शेषः अभूतपूर्वमतद्दृश्यमपि पूर्वं न जातमित्यर्थः ॥ २ ॥

गो० टी०–समग्रमिति । समग्रं विशालम् । दुस्तरं तरितुमशक्यम् सागरं कर्मं वानरं वानरसंबन्धि बलं कर्तृ । तीर्णम् अवश्यं कर्तरि क्तः । सेतुबन्धनं रामेण कृतमिति शेषः ॥ २ ॥

३] ति० टी०–सागरे सेतुबन्धनं न श्रद्धध्याम्, क्षुद्रस्य विराट्वदरत्वेन जीवजातैरशक्यबन्धनत्वाज्जीवविशेषत्वाच्च रामस्येत्याशयः । रामोऽपि विराडेव नान्य इति बुद्धिस्तु रजस्तमःप्रधानत्वात् तस्येति दिक् ॥ ३ ॥

रा० टी०–सागरेति । तं रामेण कृतं सेतुबन्धनम् अहं त्वम् न श्रद्धध्याम् मत्तं न रोचते इत्यर्थः नन्वज्ञाते सेतुबन्धने निरर्थकमत इदानीं कर्तव्यं वदेत्यत आह–तत् तीर्णं वानरं बलम् अवश्यं मया संख्येयम् ॥ ३ ॥

गो० टी०–सागर इति । सेतुबन्धं रामेण कृतम् । कर्थं मनुष्योदितत्वेपि । अपि च तथापि । संख्येयं ज्ञातव्यम् ॥

४] ति० टी०–परिमाणं चेष्टादीनां तत्त्वतो ज्ञातुमर्हथः स्थः । ये च मुख्यास्तानिति शेषः ॥ ४ ॥

रा० टी०–ये पूर्वमभिवर्तन्ते अग्रेसरा इत्यर्थः ॥ ५ ॥

गो० टी०–सागरे संबद्धं सलिलार्णवे लवणजले [illegible]निवेशम् ॥ ६ ॥

रा० टी०–प्रहरणान्यस्त्राणि ॥ ७ ॥ ८ ॥

९] ति० टी०–भवन्ताविति । अनवलक्षितौ भवन्तौ वानरसैन्यं प्रविश्य परिमाणं वानराणामियत्तां ये मुख्याः प्लवङ्गमास्तान् सङ्ख्यां ये मन्त्रिणस्तौ च ये पूर्वमभिवर्तन्ते गच्छन्ति तांश्च ये प्लवङ्गमाः शूराः सङ्ग्रामेष्वनिवर्तिनः तांश्च यथा सेतुर्बद्धस्तत्र वानराणां निवेशं संस्थितिं च रामसैन्यसमागमादि च तत्त्वतो यथा यथावत् ज्ञातुं प्रवर्तमर्हथः । श्लोकचतुष्टयमेकान्वयि ॥ ४—९ ॥

१०] ति० टी०–क इति । वानराणां सेनापतिः कः तत् यथार्थं तत्त्वं ज्ञात्वा शीघ्रमागन्तुमर्हथः ॥ ८ ॥

रा० टी०–इतीति । इति प्रतिसमादिष्टौ शुकसारणौ हरिरूपधरौ सन्तौ वानरं बलं प्रविष्टौ ॥ ९ ॥

गो० टी०–भवन्तावित्यादि चतुःश्लोकान्वया । [illegible] स्मात्सकाशौ अनवलक्षितौ परैरविज्ञातौ सन्तौ वानरं सैन्यं प्रविश्य परिमाणं वानराणामियत्तां तेषां वीर्यं बलमपि च छेदम् ये प्लवङ्गमाः मुख्या प्रधानभूता तान् ये रामस्य सुग्रीवस्य च संमता मन्त्रिणः ये पूर्वमभिवर्तन्ते ये च प्लवङ्गमाः वस्तुतः शूराः तान् सर्वान् सागरबन्धिते सलिलार्णवे लवणजलसमुद्रे स सेतुः वानरतरणार्थसेतुश्च यथा येन प्रकारेण बद्धः तं प्रकारम् तेषां निवेशं निवासम् उत्पत्तिस्थानं वा त्रीवरमार्गम् यथार्थं यादृशप्रकारं । रामस्य व्यवसायं कर्तव्यविषयनिश्चयं वीर्यं बलम् प्रहरणानि आयुधानि लक्ष्मणस्य व्यवसायं बलं च तत्त्वतः पारमार्थेन ज्ञातुमर्हथ इत्यन्वयः ॥ ४—९ ॥

१०] ति० टी०–नाध्यगच्छेतां नाप्नुतामाम् ॥ १० ॥

रा० टी०–तत्र इति । शुकसारणौ सैन्यं संख्यातुं [illegible] गच्छेताम् अध्यगच्छताम् ॥ १० ॥

गो० टी०–तत्र इति । नाध्यगच्छेतां नाप्नुतामाम् ॥ १० ॥

११] ति० टी०–तत्र हेतुमाह–तरिष्यन्तमिति दिना ॥ ११ ॥

प्रहृष्टयोधा ध्वजिनी महात्मनां वनौकसां स्फीतिं योद्धुमिच्छताम्।
अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ।

सारणवचो निशम्य रावणः प्रासादमारुह्य कपिबलमवलोक्य च सारणं पप्रच्छ तु तत्संपरायकालव्यापनाय सचिवोपचिन्तं प्रदादीन् दर्शयति ।

तद्वचः सत्यमक्लीबं सारणेनाभिभाषितम्। निशम्य रावणो राजा पर्यभाषत सारणम् ॥ १ ॥
यदि मामभियुञ्जीरन्देवगन्धर्वदानवाः। नैव सीतामहं दद्यां सर्वलोकभयादपि ॥ २ ॥
त्वं तु सौम्य परिश्रस्तो हरिभिः पीडितो भृशम्। प्रतिप्रदानमस्यैव सीतायाः साधु मन्यसे ॥ ३ ॥
को हि नाम सपत्नो मां समरे जेतुमर्हति। इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ॥ ४ ॥
आरुरोह ततः श्रीमान्प्रासादं हिमपाण्डुरम्। बहुतालसमुत्सेधं रावणोऽथ दिदृक्षया ॥ ५ ॥

रा० टी०—यादृशमिति। रामस्य यादृशं रूपं प्रहरणान्यायुधानि च तादृशं यस्यास्ति चेदिति शेषः स एक एव लङ्कां वधिष्यति अतः वयं लक्ष्मणप्रभृतयस्तिष्ठन्तु तेषामपि न प्रयोजनमित्यर्थः ॥ ३१ ॥

गो० टी०—यादृशमिति। प्रहरणादिकं यादृशं तद्बलोपेतं रामं एको वधिष्यतीति मन्यावहे इत्यर्थः ॥ ३१ ॥

रा० टी०—रामेति। रामलक्ष्मणगुप्ता सुग्रीवेणोपलक्षिता वानरसेना पुरासुरैरपि दुर्धर्षतरा बभूव ॥ ३२ ॥

गो० टी०—नन्वमहायशसोरपि रामः सेनाहननादुत्साहः स्यात् तत् क्रियतामित्यत्राह—रामलक्ष्मणेति। सुग्रीवेण च भल्लूपादिना च सहिता गुप्ता अपरिच्छिन्ना हरिवाहिनी वर्षाकालिमेघेन रामलक्ष्मणगुप्ता रामेण रामस्य दक्षिणो बाहुरिति रामदक्षिणबाहुभूतेन लक्ष्मणेन च गुप्ता सती सुग्रीवस्य रक्षकोटावेवान्तर्यं न तु रक्षककोटौ तन्मन्त्रिणा हनुमतैव—'जयत्येतिबलो रामो लक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणाभिपालितः' इत्युक्तेः ॥ दुर्धर्षतरा बभूव। तस्मा मनसापि धर्षयितुमशक्येत्यवगम्यते। न केवलं मनुष्यादिभिः किंतु सुरैरपि न केवलं सुरैरेव किन्तु चराचरैः सिरोधं विहाय कृतसोहार्दैरपि न केवलमनायकैरेतैः किंतु सेन्द्रैरपि। स्वस्यातन्त्र्यं विहाय नायकाज्ञावर्तितिरित्यर्थः ॥ ३२ ॥

३३] ति० टी०—योद्धुमिच्छतां ध्वजिनीं दुर्धर्षत्वमन्वयः मैथिलीमतः—अलमिति ॥ ३३ ॥

इति श्रीरामायणे श्रीमद्वाल्मीकीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०—प्रहृष्टेति। प्रतियोद्धुमिच्छतां वनौकसां प्रहृष्टयोधा ध्वजिनी सेना पराभवयितुमशक्येति शेषः अतो विरोधेनालं शमो विधीयताम्। तदुपायमाह—मैथिली प्रदीयताम् ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतिलकाभिधाने युद्धकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

गो० टी०—प्रहृष्टेति। महात्मनां हृदयमनस्कानां संप्रतीतस्य एव योद्धुमिच्छतां प्रहृष्टरूपा हर्षोत्फुल्लाकारयुक्ता भवतीति शेषः। अतस्तद्विरोधेनालं कृतः क्रोधनिवृत्तिः विधीयतां क्रियतां मैथिली प्रदीयतां च ॥ ३३ ॥

इति भागवतेन्द्रराजविरचिते श्रीरामायणभाष्ये रत्नाकरव्याख्याने युद्धकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

१-४] ति० टी०—तदिति ॥ १ ॥ ४ ॥

५] ति० टी०—बहुतालसमुत्सेधमनेकतालप्रमाणोन्नतम दिदृक्षया वानरबलदर्शनेच्छया ॥ ५ ॥

रा० टी०—दूतवचनश्रवणानन्तरकालिकं रावणकृत्यमाह—तदित्यादिभिः। सारणेनाभिभाषितं निशम्य पर्यभाषत शुकसारणयोरेकमत्यात् एकतरस्यैव नाम्ना तत्र स्मृतता ॥ १ ॥

गो० टी०—अथ रावणाय सारणेन वानरबलकथनपूर्वकं तत्प्रदर्शनं पर्यदेशं—तदित्यादिना तरम्। प्रत्यभाषत अनिन्द्यदित्यर्थः ॥ १ ॥

रा० टी०—तद्वचनाकारमाह—

पूर्वं व्याख्यातः ॥ २ ॥

गो० टी०—यदीति ॥ २ ॥

रा० टी०—नैवेति ॥ ३ ॥

१ एवमिति गो० पाठः। २ पर्यभाषतेति गो० पाठः। ३ [illegible]

ल्या चराभ्यां सहितो रावणः क्रोधमूर्च्छितः । पश्यमानः समुद्रं तं पर्वतांश्च वनानि च ॥ ६ ॥
र्वं पृथिवीदेशं सुसंपूर्णं प्लवंगमैः । तदपारमसह्यं च वानराणां महाबलम् ॥ ७ ॥
लोक्य रावणो राजा परिपप्रच्छ सारणम् । एषां के वानरा मुख्याः के शूराः के महाबलाः ॥ ८ ॥
पूर्वमभिवर्तन्ते महोत्साहाः सगन्तवः । केषां शृणोतीति सुग्रीवः के वा यूथपयूथपाः ॥ ९ ॥
रणाचक्ष्व मे सर्वं किंप्रभावाः प्लवंगमाः । सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः ॥ १० ॥
वभाषेऽथ मुख्यज्ञो मुख्यांस्तत्र वनौकसः । एष गोऽभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः ॥ ११ ॥
पानां सहस्रेण शतेन परिवारितः । यस्य घोषेण महता सप्राकारा सतोरणा ॥ १२ ॥
ङ्का प्रतिहता सर्वा सशैलवनकानना । सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः ॥ १३ ॥
लाग्रे तिष्ठते वीरो नीलो नामैष यूथपः । बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान् ॥ १४ ॥
ङ्कामभिमुखः कोपादभीक्ष्णं च विजृम्भते । गिरिशृङ्गप्रतीकाशः पद्मकिंजल्कसंनिभः ॥ १५ ॥
क्षोट्यत्येतिसंरब्धो लाङ्गूलं च पुनः पुनः । यस्य लाङ्गूलशब्देन स्वनन्ति प्रदिशो दश ॥ १६ ॥

स्तस्त्वं सीतायाः प्रतिप्रदानं साधु मन्यसे ततेन राम-
णेन भीतिहेतुकमिति सूचितम् ॥ ३ ॥

गो० टी०—त्वमित्यादि सार्धश्लोकः । सपत्नः शत्रुः ॥ ४ ॥

रा० टी०—त्वमिति । सपत्नो रिपुः मां जेतुमर्हति
ते परुषं वाक्यमुक्त्वा रावणः प्रभूतशब्दकं
या रामसैन्यदर्शनविषयकेच्छया बहुतालसमुत्सेधम्
तालपरिमितोन्नतं हिमपाण्डुरं प्रासादमारुरोह । श्लोकद्व-
न्वयि ॥ ४ ॥ ५ ॥

गो० टी०—इत्युक्त्वेत्यादि सार्धश्लोकः । ततः तस्मा-
वेश्मनात् बहुतालसमुत्सेधम् अनेकतालवृक्षतुल्योन्नतम्
तं वितताङ्गणमध्यमामिसंस्थितः । तदाह सज्जनः—'परिश-
ङ्गोकर्णावितस्त्यश्च यथाक्रमम् । भवन्ति वितताङ्गणादेशिन्या
भेः सहे'ति । अत्र द्वितीयो रावणशब्दो रावयतीति व्युत्पत्या
यानिमित्तकः । दिव्यया वानरबलदिदृक्षया ॥ ४ ॥ ५ ॥

६] ति० टी०—चराभ्यां चाराभ्याम् । पश्यमानः पश्यन् ६॥

रा० टी०—ताभ्यामिति । चराभ्यां चाराभ्यां सहितः
इमं पर्वतांश्च पश्यमानः पश्यन् रावणः प्लवंगमैः संपूर्णं पृथि-
दृशं ददर्श । सार्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०—ताभ्यामित्यादि । चराभ्यां चाराभ्याम् ।
मूर्छितः क्रोधेन व्याप्तः । पृथिवीदेशं त्रिकूटाद्रि-
शम् ॥ ६ ॥

७–८] ति० टी०—वानराणां महाबलं च ददर्शेत्य-
यः ॥ ७ ॥ ८ ॥

९] ति० टी०—केषां शृणोति । वध्र इति शेषः । यूथ-
पया महाप्रभावाः ॥ ९ ॥

रा० टी०—तदिति । असह्यं वानराणां बलमालोक्य
णः सारणं परिपप्रच्छ ॥ ७ ॥

गो० टी०—तदिति । अपारम् इयत्ताविरहितम् ॥ ७ ॥

रा० टी०—तदाकारमाह—एषामिति । एषां वानराणां
मध्ये ये पूर्वमभिवर्तन्ते युद्धाय प्रचलन्तीत्यर्थः समन्ततः सर्वे
वलं महोत्साहाः के केषां वचनमिति शेषः सुग्रीवः शृणोति
आदरपूर्वकं श्रुत्वा प्रामाणिकत्वेन मन्यते प्रशस्यमाश्च वि
एतत्सर्वं हे सारण ! मे आचक्ष्व
कथय । अर्धचतुष्टयमेकान्वयि ॥ ८ ॥

गो० टी०—एषामिति । इयं निर्धारणे षष्ठी । कः
मिति । वचनमिति शेषः । प्रधानाः सेनापतयः ॥ ८ ॥ ९

१०–११] ति० टी०—वचनमुत्तरमाचष्टे इत्यन
यः ॥ १० ॥ ११ ॥

१२] ति० टी०—सहस्रेण शतेन लक्षसंख्याकेनेत्यर्थः ॥ १२

१३] ति० टी०—यूथपसंख्यायाः एष गणनम् । सु
यस्य बलाग्रे च यस्तिष्ठति एष नील इत्यन्वयः ॥ १३ ॥

रा० टी०—सारण इति परिपृच्छतः राक्षसेन्द्रस्य व
श्रुत्वा मुख्यज्ञः मुख्यानां ज्ञाता सारणः मुख्यान् वनौक
आचष्टे ॥ १० ॥

गो० टी०—सारण इति । वचनं निगद्येति शेषः ॥ १

रा० टी०—तदाकारमाह—एष इत्यादिभिः । ए
यूथपानां सहस्रेण शतेन लक्षसंख्याकेनेत्यर्थः परिवारि
लङ्कामभिमुखः नर्दंस्तिष्ठति यस्य महता घोषेण ल
प्रतिहता य एषः सुग्रीवस्य बलाग्रे तिष्ठते स वीरः नीलो
यूथपः । अर्धं सप्तकमेकान्वयि ॥ १२–१३ ॥

गो० टी०—त्रिभिर्नीलं वर्णयति—एष इत्यादि ।
इत्यन्वयः तिष्ठते तिष्ठति ॥ १३ ॥ १४ ॥

१४–१५] ति० टी०—अथाङ्गदवर्णनम्—बाहू इ
प्रगृह्यापगम्य पद्भ्यां महीं गच्छति । नरवीरेति शेषः ।

एष वानरराजेन सुग्रीवेणाभिषेचितः । युवराजोऽङ्गदो नाम त्वामाह्वयति संयुग ॥ १७ ॥
वालिनः सदृशः पुत्रः सुग्रीवस्य सदा प्रियः । राघवार्थे पराक्रान्तः शक्रार्थे वरुणो यथा ॥ १८ ॥
एतस्य सा मतिः सर्वा यद्दृष्टा जनकात्मजा । हनूमता वेगवता राघवस्य हितैषिणा ॥ १९ ॥
बहूनि वानरेन्द्राणामेष यूथानि वीर्यवान् । परिगृह्याभियाति त्वां स्वेनानीकेन मर्दितुम् ॥ २० ॥
अनुवालिसुतस्यापि बलेन महता वृतः । वीरस्तिष्ठति सङ्ग्रामे सेतुहेतुरयं नलः ॥ २१ ॥
ये तु विष्टभ्य गात्राणि श्वेडयन्ति नदन्ति च । [उत्थाय च विजृम्भन्ते क्रोधेन हरिपुंगवाः ॥ २२ ॥
एते दुष्पराहा घोराश्चण्डाश्चण्डपराक्रमाः । अष्टौ शतसहस्राणि दशकोटिशतानि च ॥]
य एनमनुगच्छन्ति वीराश्चन्दनवासिनः ॥
एषोऽभ्यासंसते लङ्कां स्वेनानीकेन मर्दितुम् । श्वेतो रजतसंकाशश्चपलो भीमविक्रमः ॥ २३ ॥
बुद्धिमान्वानरः शूरस्त्रिषु लोकेषु विश्रुतः । तूर्णं सुग्रीवमागम्य पुनर्गच्छति वानरः ॥ २४ ॥

१७] ति० टी०-अभिषेचितोऽभिषिक्तः ॥ १७ ॥

१८] ति० टी०-पराक्रान्तः पराक्रमितुमुद्यतः ॥ १८ ॥

रा० टी०-बाहू इति । यः पद्भ्यां बाहू प्रगृह्य महीं गच्छति लङ्घमभिमुखः सन् अभीक्ष्णं विजृम्भतेच लाङ्गूलं पुनः पुनः स्फोटयति च यस्य लाङ्गूलशब्देन दश प्रदिशः स्वनन्ति यश्च संयुगे त्वामाह्वयति स एषः सुग्रीवेणाभिषेचितः वालिनः पुत्रः अङ्गदो राघवार्थे पराक्रान्तः पराक्रमितुमुद्यतः. अत्रश्लोकचतुष्टय-

. १४-१८ ॥

गो० टी०-अथाङ्गदं वर्णयति—बाहू इत्यादिना स्वेनानीकेन दूरेण इत्यन्तेन । बाहू प्रगृह्य उत्क्षिप्य अभिउद्दिश्य मुखं व्यात्तमभिमुखः विजृम्भते जृम्भणं करोति पर्वतिक्लेदकमिश्रः पर्वतैरपीतवर्णः इत्यर्थः । स्फोटयति भूमौ ताडयति अभिसंरब्धः कुपितः । प्रस्वनन्तीत्यन्वयः । अभिषेचितः अभिषिक्तः आह्वयति आह्वयते । स्पर्धायांविषयत्वेऽप्यात्मनेपदाभाव आर्षः । पराक्रान्तः पराक्रमितुमुद्यतः॥१४॥१८

१९] ति० टी०-यदस्मता जनकात्मजा दृष्टा सा सर्वा मतिरेतस्याङ्गदस्य । मन्त्रमूलेति शेषः ॥ १९ ॥

रा० टी०-एतस्येति । यत् यया मत्या राघवस्य हितैषिणा हनूमता जनकात्मजा दृष्टा सा मतिरेतस्याङ्गदस्यैव एतत्सेनापत्येन सर्वं चकोल्यर्थः एतेनाङ्गदस्य अगाधबोधत्वं सूचितम् ॥ १९ ॥

गो० टी०-एतस्येति । हनुमता सीता दृष्टेति यत्सा मतिः एतस्याङ्गदस्य एतद्बुद्धिपूर्वं हनुमतः सीतादर्शनमिति भावः । अङ्गदपुरस्कारेण हनुमत् समागमात् ॥ १९ ॥

२०] ति० टी०-बहूनि यथानि परिगृह्य स्वेनानीकेन त्वां मर्दितुमेष अङ्गदोभियाति ॥ २० ॥

रा० टी०-बहूनीति । वानरेन्द्राणां बहूनि यूथानि परिगृह्य स्वेनानीकेन त्वां मर्दितुं एष अङ्गदोभियाति ॥ २० ॥

गो० टी०-बहूनीति । स्वेनानीकेनेति दुर्जयत्वकारणोक्तिः । अतो न पुनरुक्तिः ॥ २० ॥

२१] ति० टी०-वालिसुतस्यानु पश्चात् । सेतुहेतुः सेतुकर्ता ॥ २१ ॥

रा० टी०-अनुवालीति । वालिसुतस्य अनु पश्चात् सेतुहेतुः सेतुबन्धनकरणमय नलस्तिष्ठति ॥ २१ ॥

गो० टी०-अनु वालीति । एतस्यांसत्यां वीरस्तिष्ठति सङ्ग्राम इति । वालिसुतस्य अनु पश्चात् सेतुहेतुः सेतुकर्ता सङ्ग्रामे सङ्ग्रामनिमित्तम् ॥ २१ ॥

२२] ति० टी०-अथ श्वेतवर्णनम्—ये त्विति । गात्राणि विष्टभ्य श्वेलां कुर्वन्ति । एवं श्वेतम्, चन्दनवासिनः ॥ २२ ॥

रा० टी०-य इति । गात्राणि विष्टभ्य स्तब्धं यं श्वेडयन्ति नदन्ति ते एव चन्दनवासिनश्चन्दनलिप्ताङ्गाः वीराः एत नलमनुगच्छन्ति एष नलोऽपि लङ्कां मर्दितुं माभ्यसते कथयति एषेत्यत्र संन्धिरत एव ज्ञापकात् एवोऽयं । माभ्यसते एकान्वयी ॥ २२ ॥

गो० टी०-नलपरियानाह—ये त्विस्यादिना मर्दितुमित्यन्तेन । श्लोकत्रयमेकान्वयम् । विष्टभ्य उत्तभ्य । श्वेलयन्ति सिंहनादं कुर्वन्ति । नदन्ति गर्जन्ति । उत्थाय आसनादि शेषः विजृम्भन्ते कोपेन गात्रक्षेपनामं कुर्वन्ति । य एवंभूता वानराः ये च चन्दनवासिनः चन्दनवनवासिनः । एते नलमनुगच्छन्तीति संबन्धः । चन्दनवानरा इति पाठे मध्यपदलोपिसमासः । चन्दनवासिनो वानरा इति । एषोऽयमिति सम्बन्धः । आशंसते प्रार्थयते ॥ २२ ॥ २४ ॥

२३] ति० टी०-एषोऽयं एष नलः । स्थिरसत्त्वः ॥ २३ ॥

२४] ति० टी०-सुग्रीवमागम्य पुनर्गच्छति वानरः दर्शनसमये कार्यार्थं सुग्रीवसमीपमागतः गतवानिति ज्ञाप[illegible]

रा० टी०-वर्णयति—श्वेत इति । वानरो [illegible]

[illegible]

१ यौवराज्ये इति गो० पाठः । २ दुर्जयेति गो० पाठः । ३ सर्व[illegible]

विभजन्वानरीं सेनामनीकानि महर्षभः । यः पुरा गोमतीतीरे रम्यं पर्येति पर्वतम् ॥ २५ ॥
नाम्ना मैरोचनो नाम नानानगयुतो गिरिः । तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ॥ २६ ॥
योऽसौ शतसहस्राणि सहर्षभ परिकर्षति । यस्य बाला बहुव्यामा दीर्घलाङ्गूलमाश्रिताः ॥ २७ ॥
ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरदर्शनाः । अदीनो वानरश्रेष्ठः सङ्ग्रामममिकाङ्क्षति ॥
एषैवांशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ ॥ २८ ॥
यस्त्वेष सिंहसंकाशः कपिलो दीर्घकेसरः । विभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा ॥ २९ ॥
विन्ध्यं कृष्णागिरिं महां पर्वतं च सुदर्शनम् । राजन्यतमभ्यायाते सै रम्यो नाम यूथपः ॥
शतं शतसहस्राणां त्रिंशच्च हरियूथपाः ॥ ॥ ३० ॥
यं यान्तं वानरा घोराश्चण्डाश्चण्डपराक्रमाः । परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा ॥ ३१ ॥
यस्तु कर्णौ विधूनुते जृम्भते च पुनः पुनः । न तु संविजते मृत्योर्न च सेनां प्रभावति ॥ ३२ ॥
प्रकम्पते च रोषेण तिर्यक्च पुनरीक्षते । पौरुषे अकृतविश्रमं दर्शयत्येष महाबलः ॥ ३३ ॥

स वानरः विषु लोकेषु विश्रुतः श्वेतः तद्भिधः यस्यश्च प्रभा हारस्य अन्यतरवानरश्रेष्ठसार्थाय मर्दितुं सर्वं एवं ते भेषं याति योधवतीयर्थः इतिहास्य-पातेतदादानाद्यालति. अर्हं चतुष्टयमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०-अथ तानेव वानरान् वर्णयति-पुरेत्यादि । अध्वल इत्यादि । अध्वर्यनाकाशाद् गच्छतीति । अध्वलः । अनीकानि पुनर्विभजन्नित्यनुषङ्गः । विभजन् विशिष्य सेना भित्त्वा गच्छतीत्यर्थः । अथ चपल इत्यनेन अर्थेन लङ्कां प्रति यामीति विशेषणार्थं । तेन सम्पन्नित्य पुनर्गोमतीतीरं गम्यते ॥ २३ ॥ २४ ॥

२५] ति० टी०-पु० पूर्वत्वादिना कुमुदवर्णनम्-रम्यं रम्याख्यम् ॥ २५ ॥

रा० टी०-पुनर्वानरान्तरं वर्णयति—य इति । पुरा पूर्वं गोमतीतीरे नाम्ना मैरोचनो नाम गिरिस्तत्र रम्यं पर्वतं परिक्रामति पर्येति तत्र राज्यञ्च प्रशास्ति स एष कुमुदो नाम यूथपः ॥ २५ ॥

गो० टी०-पुनर्वानरान्तरं वर्णयति—यः पुरेत्यादि । पुरेत्यनेनाद्य सुग्रीवस्यैव सर्वे वानरीति गम्यते । कीर्तिं परितः स्वञ्चति । नाम्ना प्रसिद्धयो नाम यः प्रसिद्धः । पर्वतमित्यन्वयः तत्र गोमतीतीरे । परिक्रामति आवर्तते । घोरकर्मणो यस्य लाङ्गूलाभिताः लग्नाः रोमाणि । दैर्घ्यं यावधिमाह—बहुव्यामा इति । व्यामो बाहोः प्रसारितयोरितिपर्यन्तरमित्यमरः । अदीन इत्यस्य व इत्युपरक्तस्यम् ॥ २७-३० ॥

२६] ति० टी०-अन्वेव संबोधन इति नानान्तरम् ॥ २६ ॥

२७-२८] ति० टी०-चण्डवर्णनम्-योऽसाविति ॥ २७।२८ ॥

रा० टी०-चण्डं वर्णयति-यो सावितिं । शतसहस्राणि सैन्यानि यः परिकर्षति बहुव्यामाः अतिदीर्घाः प्रकीर्णाः इतस्ततः प्रक्षिप्ताः नाना वर्णविशिष्टाः दीर्घैः लाङ्गूलैराश्रिताः यस्य वालाः केशाः यश्च अदीनसत्त्वसमभिकाङ्क्षति ॥ चण्डः तद्विशिष्टो वानरः एष मां मर्दितुमाकाङ्क्षते अतोऽपि रक्षितव्यो दर्शितः । अर्धश्लोकमेकान्वयि ॥ २३-२८ ॥

२९] ति० टी०-[illegible]-विभृत इति ॥ २९ ॥

३०] ति० टी०-[illegible]-यस्त्वेष इति ॥ ३० ॥

३१] ति० टी०-[illegible]-यं यान्तमिति ॥ ३१ ॥

३२] ति० टी०-[illegible]-यस्त्विति ॥ ३२ ॥

३३] ति० टी०-[illegible]-प्रकम्पते चेति ॥ ३३ ॥

रा० टी०-सप्तभिः वर्णयति-यस्त्वेष इति । दीर्घकेसरः दीर्घा विन्ध्यः कृष्णागिरिः महांश्चासौ पर्वतश्च सुदर्शनः तं राजन्यतमभ्यायाते प्राप्ते सति यः शतसहस्राणां त्रिंशच्च हरियूथपाः घोराः चण्डाः परिवार्य लङ्कां मर्दितुं गच्छन्ति स एष रम्यो नाम यूथपः । सार्धश्लोकमेकान्वयि ॥ २९—३२ ॥

गो० टी०-अथ साङ्गोपाङ्गं रम्यं व्याचष्टे—यस्त्वेष इत्यादि ॥ ३१-३३ ॥

३२-३३] ति० टी०-शरभवर्णनम्—यस्तु कर्णाविति । मृत्योर्न संविजते नोद्विजते । तथा बलदानादिति भावः । न च सेनामिति । किं लोके अन्यो योद्धुमिच्छतीत्यर्थः ॥ ३२ ॥ ३३ ॥

रा० टी०-शरभं वर्णयति—यस्तु कर्णाविति । यः कपिः विधूनुते पुनः पुनर्जृम्भते च मृत्योर्न संविजते विभेति च तिर्यगीक्षते च क्रोधेन च यश्च साल्वेयपर्वतमध्यास्ते स एष शरभो नाम यूथपः महौजसोपलक्षितस्य शरभस्य लाङ्गूलविशेषं पश्य । अर्धं षट्कमेकान्वयि ॥ ३३-३६ ॥

गो० टी०-अथ शरभं वर्णयति—यस्तु कर्णाविति-त्यादि । संविजते विभेति ॥ ३४-३७ ॥

१ संविजते इति गो० पाठः । २ सहस्राणामिति गो. पाठः । ३ दीर्घा इति गो. पाठः । ४ कर्णौ इति गो. पाठः । ५ रोषेण इति गो. पाठः । ६ [illegible] ७ [illegible] इति गो. पाठः । ८ रम्यो नामेत्यादि गो. पाठः । ९ यूथे इति गो. पाठः । १० यूथा इति गो. पाठः । ११ [illegible]

तेजसा नीतभयो रम्यं साल्वेयपर्वतम् । राजन्सततमध्यास्ते शरभो नाम यूथपः ॥ ३४ ॥
एते बलिनः सर्वे विहारा नाम यूथपाः । राज्यञ्छतसहस्राणि चत्वारिंशत्तथैव च ॥ ३५ ॥
एष मेघ इवाकाशं महानादृत्य तिष्ठति । मध्ये वानरवीराणां सुराणामिव वासवः ॥ ३६ ॥
सेनानामिव सेनाङ्गो यस्यैष श्रूयते महान् । घोषः शाखामृगेन्द्राणां सङ्ग्राममभिकाङ्क्षताम् ॥ ३७ ॥
एष पर्वतमध्यास्ते पारियात्रमनुत्तमम् । युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः ॥ ३८ ॥
एनं शतसहस्राणां शतार्धं पर्युपासते । यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः ॥ ३९ ॥
एष भीमां पवलगन्तीं चमूं तिष्ठति शोभयन् । स्थितां तीरे समुद्रस्य द्वितीय इव सागरः ॥ ४० ॥
एष दुन्दुभिसंकाशो विनतो नाम यूथपः । पिबंश्चरति यो वेणां नदीनामुत्तमां नदीम् ॥ ४१ ॥
एष्टः शतसहस्राणि बलमस्य प्लवंगमाः । त्वामाह्वयति युद्धाय क्रथनो नाम वानरः ॥ ४२ ॥
क्रान्ता बलवन्तश्च यथा यूथानि भागशः । यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः ॥ ४३ ॥
बलस्थ राजा सर्वान्वानरान्बलदर्पितः । गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते ॥ ४४ ॥
एनं शतसहस्राणि सप्ततिः पर्युपासते । एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ ४५ ॥

३४–३८] ति० टी०–महौजसा महता तेजसा ३४॥३५ । ३६ ॥३७॥ शतसहस्रेति । शतसहस्राणि चत्वारिंशच्च विहारा विहारनामानः सर्वे एतस्य शरभस्य यूथपाः ॥ ३६ ॥

३६] ति० टी०–पनसवर्णनम्—यस्तु मेघ इत्या- ॥ ३६ ॥

३७–३८] ति० टी०–भेरीणां नाद इव यस्य संनादः । ति शेषः ॥ ३७ ॥ ३८ ॥

३७ टी०–पनसं वर्णयति–यस्त्विति । सुराणां मध्ये इव वानराणां मध्ये आकाशमादृत्य मेघ इव यस्ति- वानराणां सम्बन्धे इव स्थितो महान् घोषः शाखामृगे- ा सम्बन्धे यस्य पारियात्रं पर्वतमध्यास्ते अध्यास्त यः पनसो नाम यूथपः । अर्धचतुष्कमेकान्वयि ॥३७–३९॥

३८ टी०–अथ पनसं वर्णयति—यस्तु मेघ इत्या- ॥ ३८–४० ॥

३९] ति० टी०–एनं पनसम् । शतार्धं शतसहस्रसं- ानां पञ्चाशत्सहस्रसंख्यं यूथपाः पर्युपासते । येषां यूथानि ः प्रत्येकं सन्तीति शेषः ॥ ३९ ॥

३९ टी०–एनमिति । येषां यूथानि विभागशः सन्तीति । तेषां शतसहस्राणां शतार्धं शतेन गुणमर्धं शताधिक- शतसहस्रसंख्याका इत्यर्थः यूथपाः यूथपश्रेष्ठमेनं पनसं गजः पर्युपासते ॥ ४० ॥

४० टी०–एनमिति । एनं पनसम् । येषां यूथानाम् ानि च भागशः स्वस्वांशसङ्ख्येन एवं पर्युपासत इति बन्धः ॥ ३९ ॥

४०–४१] ति० टी०–विनतवर्णनम्—यस्तु भीमा- मेति ॥ ४० ॥ ४१ ॥

४० टी०–विनतं वर्णयति–यस्तु भीमामिति । पव लगन्तीं भीमां चमूं शोभयन् द्वितीयः सागर इव यः तिष्ठति यश्च वेणां नदीं पिबन्सन् चरति एषः दुन्दुभिसंकाशः मेघसदृश विनतो नाम यूथपः । अर्धचतुष्टयमेकान्वयि ॥ ४१ ॥ ४० ॥

४१ टी०–विनतं वर्णयति—यस्त्विति । प्रवल्ग न्तीम् उत्साहेन प्लवमानाम् समुद्रस्य तीरे स्थितम् । अतए द्वितीयः सागर इव स्थितामिति शेषः । विनतमित्येकपदं वा दर्दरो नाम गङ्गासमीपस्थः पर्वतः । पर्णासां पर्णासाख्य नदीम् । विनतसेनासङ्ख्यामाह—षष्टिरिति । षष्टिः शतस ाणि प्लवङ्गमाः अस्य विनतस्य बलमस्तीति शेषः । अर्धं पृथक् ॥ ४० ॥ ४१ ॥

४२] ति० टी०–क्रथनवर्णनम्—त्वामाह्वयतीत्यादि ४२

४२ टी०–षष्टिरिति । षष्टिशतसहस्राणि प्लवङ्गमाः अस विनतस्य बलमस्तीति शेषः । अर्धं पृथक् ॥ ४० ॥

४२ टी०–क्रथनं वर्णयति–त्वामिति । यः पुरुषाय त्वाम ह्वयति यस्य च विक्रान्ता महागमनवन्तो यथा यूथपा इ शेषः तथा यूथानि सन्ति स क्रथनो नाम वानरः ॥ ४३ ॥

४३ टी०–एकेन क्रोधनमाह—त्वामिति । उत्तर अस्येत्यध्याहार्यम् । यथायूथानि यथायूथम् अनभावच्छ न्दसः । भागशः भागत्वेन स्थिताः वानराः विक्रान्ता बल न्तश्चेति योजना ॥ ४५ ॥

४३–४५] ति० टी०–विक्रान्ता बलवन्तश्च । य यूथपा इति शेषः । यथास्य यूथपास्तथैव तेषां भागशः प्रत यूथानि च सन्तीति शेषः । गवयवर्णनम्—यस्तु गै केत्यादि ॥ ४३ ॥ ४५ ॥

४३ टी०–गवयं वर्णयति–यस्त्विति । गैरिकव गैरिकवर्णसदृशवर्णविशिष्टं वपुः पुष्यति क्रोधादेतेषां

१ महाजस इति गो. पाठः । २ वर्दरेति गो. पाठः । ३ पर्णासरेति गो. पाठः । ४ क्रोधन इति गो. पाठः । ५ गवय इति गो. पाठः । ६ प्लवंगमेति गो. पाठः ।

ते दुष्प्रसहा वीरा येषां संख्या न विद्यते । यूथपा यूथपश्रेष्ठास्तेषां यूथानि भागशः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ।

सारणो वानराणां प्रत्येकं नामनिर्देशपूर्वकं तत्पराक्रमं वर्णयति ।

अस्तु ते सैन्यवक्ष्यामि प्रेक्षमाणस्य गूथपान् । रावणार्थे पराक्रान्ता ये न रक्षन्ति जीवितम् ॥ १ ॥
स्निग्धा यस्य बहुव्यामा दीर्घलांगूलमाश्रिताः । तास्ताः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥ २ ॥
प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः । पृथिव्यां चानुकृष्यन्ते हरो नामैष वानरः ॥ ३ ॥
यं पृष्ठतोऽनुगच्छन्ति शतशोऽथ सहस्रशः । दंष्ट्रानुद्यम्य महसा लङ्गारोहणतत्पराः ॥ ४ ॥

रा० टी०—तस्य निष्कृत्य यत्र स्थानमिवर्तते त्वत्संमुखे तिष्ठति स वर्गो नाम । सार्धश्लोक एकान्वयी ॥ ४४ ॥

रा० टी०—शतमिति । शततिः शतसङ्ख्याकानि सैन्यानि यं गणं पर्युपासते एषैव एष एव मर्दितुमारभते इति शेषः, शुनेत्यत्र योगविभागेन कुत्सितसिंहत्वाभावज्ञापनाद्वा ॥ ४७ ॥

गो० टी०—शनैरिति गणं वर्णयति—यस्मित्यादिना । किं रक्तवर्णवा [1]शिखिः । "शानुर्मनश्शिलाभेदेशिखिनि तु शेखिपतः" इत्यमरः । तद्वर्णं श्यामा यस्येति विग्रहः । पैङ्गिकवर्णं श्यामातीति पैङ्गिकवर्णाभमिति वा । पृच्यन्ति गृह्यन्ते [2]भिरर्थैरिति पृथैः ॥ ४६ ॥ ४७ ॥

४६] ति० टी०—येषां यूथपानां संख्या न विद्यते । भागशः सन्तीति शेषः ॥ ४६ ॥

४७–४८] ति० टी०—अत्र सर्गश्लोकोपाङ्गे कुलमर्दनादेकप्रकरणत्वादेति कलकः ॥ ४७ ॥ ४८ ॥

इति श्रीराजनिरामे श्रीरामायणतिलके बालकाण्ड आदिकाव्ये युद्धकाण्डे षड्विंशः सर्गः ॥ २६ ॥

रा० टी०—एतेति । एते दुष्प्रसहाः वीराः वर्तिनः एते शेषः येषां संख्या न विद्यते ते यूथपश्रेष्ठा यूथपास्तेषां यूथानि च भागशस्तिष्ठन्तीति शेषः ॥ ४६ ॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

गो० टी०—उपसंहरति—एत इति । यूथपाः भद्रदादयः । यूथपश्रेष्ठाः सुहोत्रादयः । एषां यूथपानां यूथानि भागशः पृथक् । विद्यन्त इति शेषः ॥ ४८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

१] ति० टी०—तानिति । ये जीवितं न रक्षन्ति ॥ १ ॥

रा० टी०—व्याकुलजातिप्रभृतीनाह—तानित्यादिभिः । रावणार्थे नीतिं स्वजीवनमपि न रक्षन्ति तान् यूथपान् [3]पेक्षमाणस्य तेषां लोकमस्य ते तव समीपे संप्रवक्ष्यामि ॥ १ ॥

गो० टी०—पुनरेकस्योत्पुलकत्वं प्रधानयूथपतीन् प्रतिजानीते—तानित्यादि । ये रावणार्थे पराक्रान्ताः सन्तः जीवितं न रक्षन्ति तान् यूथपान् ते तुभ्यं प्रवक्ष्यामि व्याख्यास्यामि ॥ १ ॥

२] ति० टी०—स्निग्धा इत्यादि हरवर्णनमिति कलकः । लाङ्गूलेत्यत्र । बहुव्यामा यस्य लाङ्गूलमाश्रिता ताश्च बहुव्यामा [4]दीर्घलांगूलमाश्रिताः ॥ २ ॥

३–४] ति० टी०—प्रगृहीता उच्छ्रिताः । एष हरो नामेत्यन्वयः । हरो गोलाङ्गूलजातिः ॥ ३ ॥ ४ ॥

रा० टी०—स्निग्धा इति । बहुव्यामाः अतिदीर्घाः ताम्रादिविविधाः घोरकर्मणो यस्य दीर्घलाङ्गूलमाश्रिताः प्रकीर्णाः इतस्ततः प्रक्षिप्ताः स्निग्धा प्रगृहीताः उच्छ्रिताः केशाः, सूर्यस्य मरीचय इव प्रकाशन्ते पृथिव्यामनुकृष्यन्ते च यं च प्रति सहस्रशः लङ्गारोहणतत्पराः समुपस्थिताः हरिराजस्य किंकराः यूथपाश्च दृष्ट्वानुद्यम्य पृष्ठतोऽनुगच्छन्ति स एष हरो नाम वानरः । सार्धश्लोकत्रयमेकान्वयि ॥ ३–४ ॥

गो० टी०—द्वाभ्यां हरं वर्णयति—बाला इति । बालरोमाणि बहुव्यामाः बहुव्यामप्रमाणाः व्यामो नाम [5]चतुर्हस्तबाहुद्वयप्रमाणम् । प्रगृहीताः उच्छ्रिताः । प्रकीर्णाः विप्रकीर्णाः सूर्यस्य मरीचय इव मेरौ शक्रचापादिरूपेण प्रसृता [6]इव प्रकाशन्ते कदाचित् पृथिव्यामनुकृष्यन्ते एष [7]हरो नाम ॥ २ ॥ ३ ॥

गो० टी०—यमित्यादि सार्धं श्लोक एकान्वयं [8]इदम् । हरस्य हरिराजकिङ्करत्वेन तत्सैन्या अपि [9]हरिराजकिङ्करा एवेति न विरोधः ॥ ४ ॥

---

[1] शिखिः—शुभ्रकपिल इति गो० पाठः । [2] एभिरिति गो० पाठः । [3] इक्षमाणस्य गो० पाठः । [4] दीर्घलांगूलमाश्रिताः—इति गो० पाठः । [5] चतुर्हस्तबाहुद्वयप्रमाणम्—इति गो० पाठः । [6] इव—इति गो० पाठः । [7] हरो नाम—इति गो० पाठः । [8] इदम्—इति गो० पाठः । [9] हरिराजकिङ्करा—इति गो० पाठः ।

यूथपा हरिराजस्य किंकराः समुपस्थिताः । नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि ॥ ५ ॥
असिताञ्जनसंकाशान्युद्धे सत्यपराक्रमान् । असंख्येयाननिर्देश्यान्परं पारमिवोदधेः ॥ ६ ॥
पर्वतेषु च ये केचिद्विषमेषु नदीषु च । एते त्वामभिवर्तन्ते राजऋक्षाः सुदारुणाः ॥ ७ ॥
एषां मध्ये स्थितो राजा भीमाक्षो भीमदर्शनः । पर्जन्य इव जीमूतैः समन्तात्परिवारितः ॥ ८ ॥
ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन् । सर्वर्क्षाणामधिपतिर्भ्रो नामैष यूथपः ॥ ९ ॥
यवीयानस्य तु भ्राता पश्यैनं पर्वतोपमम् । भ्रात्रा समानो रूपेण विशिष्टश्चैव पराक्रमे ॥ १० ॥
स एष जाम्बवाञ्नाम महायूथपयूथपः । मैनान्तो गुरुवर्ती च संप्रहारेष्वमर्षणः ॥ ११ ॥
एतेन साग्रं तु महत्कृतं शक्रस्य भीमता । देवासुरे जाम्बवता लब्धाश्च बहवो वराः ॥ १२ ॥
आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः । मुञ्चन्ति विपुलाकारा न मृत्योरुद्विजन्ति च ॥ १३ ॥
राक्षसानां च सदृशाः पिशाचानां च रोमशाः । एतस्य सैन्या बहवो विचरन्त्यमितौजसः ॥ १४ ॥
यैः एनमाभिः संरब्धं प्लवमानमवस्थितम् । प्रेक्षन्ते वानराः सर्वे स्थितं यूथपयूथपम् ॥ १५ ॥
एष राजन्महाकक्षं पर्युपास्ते हरीश्वरः । बलेन बलसंयुक्तो रम्भो नामैष यूथपः ॥ १६ ॥

५] ति० टी०—यूथवर्णनम्—नीलानित्यादि ॥ ५ ॥

६–९] ति० टी०—अनिर्देश्यानशक्यनामगणनान् । परं पारमिव परपारस्थमिव ॥ ६–९ ॥

रा० टी०—पुनर्वर्णयति—नीलानिति । नीलान् महामेघानिव अत एव असिताञ्जनसंकाशान् अतिकृष्णाञ्जनसदृशान् हरींश्च परं पारं लक्षणया तत्स्थमिव असंख्येयान् पारं त्वं पश्यसि ये केचित् पर्वतेषु विषमेषु देशेषु नदीषु च अवस्थानेति शेषः ते एते सुदारुणा ऋक्षाः त्वामभिवर्तन्ते च । सर्वर्क्षोपरक्षमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—पुनरेतां वर्णयति—नीलानित्यादि । अनिर्देश्यान् प्रत्येकं निरूपयितुमशक्यान् । परं पारमिवोदधेः समुद्रस्यापरं तीरमिव स्थितमित्यर्थः । विषमेषु निम्नोन्नतप्रदेशेषु ॥ ५–७ ॥

रा० टी०—एषामिति । एषां पूर्वोक्तानां राजा अत एव भीमाक्षः भीमदर्शनः भीमैः कृष्णवर्णैः समन्तात्परिवारितः पर्जन्य इव स्थितः अत एव बहवो नदीं पिबन् शोषयन् अत ऋक्षवन्तं तन्नामकं गिरिश्रेष्ठमध्यास्ते अध्यास्ते सः सर्वर्क्षाणामधिपतिः एष वृक्षो नाम । अर्धचतुष्टयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०—एषामिति । पर्जन्यः वर्षदेवता ॥ ८ ॥ ९ ॥

१०] ति० टी०—अथ जाम्बवद्वर्णनम्—यवीयानिति । अस्य ऋक्षस्य कनिष्ठ इत्यर्थः । यो भ्राता समान इत्यन्वयः ॥ १० ॥

रा० टी०—जाम्बवन्तं वर्णयति—यवीयानिति । रूपेण भ्रात्रा समानः पराक्रमे विशिष्टः अधिकः महायूथपयूथपः संग्रामेषु ऋक्षसमूहेषु अमर्षणः असहनशीलेषु तत्र प्रवर्तते इत्यर्थः, तादृश अस्य यवीयान् कनिष्ठो भ्राता सुजाम्बवान् नामैष अवलोकयेति शेषः । अर्धचतुष्टयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०—यवीयानिति । यवीयान् कनिष्ठः । अयमिति शेषः । विशिष्टः अधिकः ॥ १० ॥

११] ति० टी०—गुरुवर्ती सद्गुरूपासकः । अत्र सर्वत्रेदमित्थमस्तु ॥ ११ ॥

गो० टी०—स एष इति । गुरुवर्ती गुरुशुश्रूषकः ॥ ११ ॥

१२] ति० टी०—साग्रं साहाय्यम् । देवासुरे । युद्धे इति शेषः इति वा शेषः ॥ १२ ॥

रा० टी०—एतेनेति । एतेन दृश्यमानेन जाम्बवता देवासुरे युद्धे शक्रस्य महत्साग्रं साहाय्यं कृतमत. बहवो वराः लब्धाः ॥ ११ ॥

गो० टी०—एतेनेति । देवासुरे देवासुरयुद्धे ॥ १२ ॥

१३] ति० टी०—अथ तत्सैन्यवर्णनम्—आरुह्येति १३

१४] ति० टी०—रोमशा अधिकरोमवन्तः । रक्षःपिशाचसादृश्यं वर्णेन ॥ १४ ॥

रा० टी०—तत्सैन्यं वर्णयति—आरुह्येति । अमितौजसः अत एव राक्षसानां पिशाचानां च सदृशाः रोमशाः बहुलोमवन्तः एतस्य जाम्बवतो ये बहवः सैन्याः वानराः विचरन्ति ते सर्वे आरुह्य महाभ्रवत् विपुलाः विशालाः शिलाः पर्वतायेभ्यो मुञ्चन्ति मृत्योरपि नोद्विजन्ति न बिभ्यति । राक्षसानां पिशाचानां च सदृशा इत्यन्वयः ॥ १३ ॥ १४ ॥

गो० टी०—जाम्बवतः सैनिकान् वर्णयति द्वाभ्याम्—आरुह्येत्यादि । पर्वताग्रेभ्यो मुञ्चन्ति मोद्विजन्ति न बिभ्यति । राक्षसानां पिशाचानां च सदृशा इत्यन्वयः ॥ १३ ॥ १४ ॥

१५–१६] ति० टी०—दम्भवर्णनम्—एनमिति ।

---

२ विषमेषीति गो. पाठः । २ राजानमिति गो. पाठः । ३ च उपमिति रा. पाठः । ४ तु सर्वमेमिति गो. पाठः । ५ अत्र [illegible] गो. पाठः । ६ पर्वतेषु इति गो. पाठः । ७ यतिति गो. पाठः । ८ स्थिते गो. पाठः । ९ स्थिं इति गो. पाठः । १० स्थितं [illegible]

यः स्थितं योजने शैलं गच्छन्पार्श्वेन सेवते । ऊर्ध्वं नयेत कायेन गतः प्राप्नोति योजनम् ॥ १७ ॥
यस्मात्तु परमं रूपं चतुष्पात्सु न विद्यते । यूथः संनादनो नाम वानराणां पितामहः ॥ १८ ॥
येन युद्धं तदा दत्तं रणे शक्रस्य धीमता । पराजयं न प्राप्तः सोऽयं यूथपयूथपः ॥ १९ ॥
यस्य विक्रममाणस्य शक्रस्येव पराक्रमः । एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मना ॥ २० ॥
तदा देवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम् । एष वैश्रवणो राजा जम्बूमुपनिषेवते ॥ २१ ॥
यो राजा पर्वतेन्द्राणां बहुकिन्नरसेवितान् । [illegible] ॥
तत्रैष रमते श्रीमान्वलवान्नित्यदारुणः । [illegible] ॥
हृतः कोटिसहस्रेण हरीणां [illegible] ॥

क्रममानम् । योजनार्थमिति शेषः । स्थितं योजनार्धस्थं [illegible] स्थितम् ॥ १६ ॥ १७ ॥

रा० टी०—अथैनं वर्णयति—एष इति । कपिसैन्यविशिष्टः य एष [illegible] मात्रं बलेन स्वकीयेन पर्याप्तानेक इन्द्रमाहात्म्यार्थं [illegible] प्रेषयामासेत्यर्थः ॥ १८ ॥

गो० टी०—द्वाभ्यां तमेव वर्णयति—यं त्विति । [illegible] प्रेक्षन्ते । आत्मनेति शेषः । [illegible] पर्याप्तानेकेन [illegible] त्यर्थः ॥ १६ ॥ १७ ॥

१७-१९] ति० टी०—[illegible] ति । यो योजने स्थित [illegible] यामदेश इत्युक्तम् । ऊर्ध्वमिति शेषः । कायेन [illegible] गतो व्याप्य सकलसैन्यैरदृश्यं प्राप्नोति स्फुटति ॥ १७ ॥

रा० टी०—तमेवार्थं वर्णयति—यः स्थितमिति । [illegible] स्थितं शैलं गच्छन् पार्श्वेन सेवते संस्पृशति [illegible] शैलस्थितः सन्नेव शरीरेण ऊर्ध्वं नयेत् यः कायेन ऊर्ध्वं [illegible] सेवते योजनपरिमितेत्यर्थः चतुष्पात्सु मृगजातिषु [illegible] यस्मात् परं न विद्यते यः संनादनो नाम वानराणां पितामहः [illegible] अर्थात्पुत्रयमेनाऽऽह ॥ १७ ॥ १८ ॥

रा० टी०—येनेति । येन रणे शक्रस्य युद्धे दत्तं तेन [illegible] गोपितवानित्यर्थः, तदा तस्मिन्समये पराजयं न प्राप्तः सोऽयं सञ्जातः इति भुशुण्डी मन्यते ॥ १८ ॥ १९ ॥

गो० टी०—त्रिभिः सप्तानं वर्णयति—यः स्थितमिति । यो गन्धवत् योजने योजनदूरे स्थितं शैलम् पार्श्वेन गच्छति । अस्य गुप्तमतस्य एकदशप्रजेदशतायाम् एकयोजनपरिमितः पर्वतः पार्श्वस्थो भवति । योजनायतशरीर इत्यर्थः । कायेनोर्ध्वं गतः सन् योजनं प्राप्नोति । योजनोन्नतकाय इत्यर्थः । अत एव चतुष्पादेषु यस्मात् परमं परं रूपं शरीरं न विद्यते । शक्रस्य रणे शक्रस्यासुरैः सह युद्धे । येनाङ्गदेभ्यो युद्धे दत्तं [illegible] पराजयमप्राप्तेभ्यो न प्राप्तः सोऽयं सञ्जात इति भुशुण्डी मन्यते ॥ १७-१९ ॥

२०] ति० टी०—अथ कपिसैन्यमेव [illegible] इत्येतत् । कृष्णवर्त्मनेति ॥ २० ॥

रा० टी०—क्रोधेन वर्णयति—एष इति । विक्रममाणस्य [illegible] । प्रसक्तः अस्य शक्रस्येव पराक्रमो [illegible] इत्यर्थः । देवासुरे युद्धे साह्यार्थं साह्यार्थं कृष्णवर्त्मना पतिना [illegible] किन्नरीणां गन्धर्वकन्यायामुत्पन्नः [illegible] किन्नरसेविनां पर्वतेन्द्राणां राजा एष ते शत्रुः [illegible] हितं विद्वान्सुग्रीवः अत एव तस्मिन् गिरौ [illegible] तत्रैव तस्मिन् गिरौ रमते सः [illegible] [illegible] तस्मिन्नेव गिरौ [illegible] कोपनो नाम यूथपः । अर्थात्क्रमेऽन्वयः ॥ २१ ॥ २२ ॥

गो० टी०—कस्यार्थं पुत्र इत्याह—यस्येति । विक्रमः [illegible] पराक्रमः [illegible] । [illegible] पराक्रम इत्यर्थः ॥ २० ॥

२१-२२] ति० टी०—त्रिभिरेकान्वयेन [illegible] इत्येतत् । [illegible] राजा यत्र गिरौ गन्धर्वकन्यायाम् [illegible] पर्वतेन्द्राणां राजा, यत्र ते [illegible] सन्तुष्टिहारकः ॥ २१ ॥ २२ ॥

गो० टी०—किमर्थमुच्यत इत्याह—तदुपयुक्तम् । [illegible] ॥

२३-२४] ति० टी०—यः गिरौ कैलासे वसति । अक्षत [illegible] आत्मश्लाघारहितः कायेन पराक्रमप्रदर्शकः ॥ २३ ॥ २४ ॥

रा० टी०—क्रुद्ध इति । पनसस्थितः एकपर्वतः [illegible] कोटिसहस्रेण हृतः एष क्रोधन एव [illegible] ॥ २३ ॥

गो० टी०—कपिनं वर्णयति सार्द्धत्रिभिः—[illegible] दिना । यस्य गिरेः [illegible] कैलासो राजा । [illegible] जम्बूद्वयम् उपनिषेवते । जम्बूद्वयक इत्यर्थः । [illegible]

यो गङ्गामनुपर्येति त्रासयन्गजयूथपान् । हस्तिनां वानराणां च पूर्ववैरमनुस्मरन् ॥ २५ ॥
एष यूथपतिर्नेता गैजान्गिरिगुहाशयः । गजान्रोधयते वन्यानारुजंश्च महीरुहान् ॥ २६ ॥
हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु । उशीरबीजमाश्रित्य मन्दरं पर्वतोत्तमम् ॥ २७ ॥
रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम् । एनं शतसहस्राणां सहस्रमभिवर्तते ॥ २८ ॥
वीर्यविक्रमदृप्तानां नर्दतां बाहुशालिनाम् । स एष नेता चैतेषां वानराणां महात्मनाम् ॥ २९ ॥
स एष दुर्धरो राजन्प्रमाथी नाम यूथपः । वातेनेवोद्धतं मेघं यमेनमनुपश्यसि ॥ ३० ॥
अनीकमपि संरब्धं वानराणां तरस्विनाम् । उद्धूतमरुणाभासं पवनेन समन्ततः ॥ ३१ ॥
विवर्तमानं बहुशो यत्रैतद्धरितं रजः । एते सितमुखा घोरा गोलाङ्गूला महाबलाः ॥ ३२ ॥
शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम् । गोलाङ्गूलं महाराज गवाक्षं नाम यूथपम् ॥ ३३ ॥

कुबेरस्य विहारस्थलदः तत्र पर्वते पुष्पोत्कटत्वनः कथनो नामैष यूथपो वसतीति संबन्धः ॥ २४–२४ ॥

२५] ति० टी०–अथ प्रमाथिवर्णनम्–यो गङ्गामिति । गङ्गामनु गङ्गासमीपे । हस्तिवानरयोर्वैरं गजाकारशम्बसादनासुरस्य हनुमत्पित्रा केसरिणा वधात्पूर्वमुत्पन्नमिति पौराणिकी गाथा ॥ २५ ॥

२६] ति० टी०–नेता प्रभुः ॥ २६ ॥

२७] ति० टी०–हैमवतीं नदीं गङ्गासमवर्तमानमुशीरबीजाख्यं पर्वतमाश्रित्य यो रमते इत्यन्वयः ॥ २७ ॥

२८–२९] ति० टी०–शतसहस्राणां सहस्रम् । सहस्रलक्षमिति यावत् ॥ २८ ॥ २९ ॥

रा० टी०–प्रमाथिनं वर्णयति–य इति । हस्तिनां वानराणां च पूर्वं पौराणिकं वैरमनुस्मरन् सन् गजयूथपान् त्रासयन् सन् गङ्गामनु गङ्गासमीपे यः पर्येति परिभ्रमति । रे निमित्तं तु गजाकृतिसंस्मादवतारितासुरस्य हनुमन्नितृकेसरिकृतवध इति पौराणिकी प्रसिद्धिः । य एषः नेता प्रभुः सन् महीरुहान् तरून् रुजन् भञ्जन् गजान् रोधयते शत्रु हैमवतीं गङ्गामनु अनुवर्तमानम् उशीरबीजं तन्नामिधं मन्दरं च पर्वतोत्तममाश्रित्य दिवि शक्र इव रमते यमेनं बाहुशालिनाम् अतिबाहुबलयुक्तानां शतसहस्राणां वानराणां सहस्रमभिवर्तते य चैते वातेनोद्धतं प्रलयं मेघमिव अरुणच्छवि यस्य च वानराणां संरब्धं कोपाविष्टमनीकमपि एषसि यत्र यस्यानीकं पवनेनोद्धतमरुणाभासम् अरुणकान्तिबहुलमेतद्रजः बहुशो विवर्तमानं बहुलं [1] बहुशोनेकवारमनुपश्यसि च स एषः प्रमाथी नाम वानरः स एष महात्मनां वानराणां नेता प्रवर्तकः । सार्धश्लोकान्वयमेकमन्यत् ॥ २५ ॥ ३१ ॥

गो० टी०–यो गङ्गामित्यादि सार्धश्लोकसप्तकम् प्रमाथिविषयम् ॥ हस्तिनां वानराणां च अन्योन्यं पूर्ववैरमनुस्मरन् य गङ्गामनु गङ्गासमीपे । "कर्मप्रवचनीययुक्ते द्वितीया" इति द्वितीया । हस्तियूथपान् वानरान् पर्येति परितश्चरति । अत्रेयं पौराणिकी कथा–पुरा किल शम्बसादनो नामासुरो गजरूपेण मुनीन् बाधमानस्तैर्मुनिभिश्चोदितेन केसरिणा हनुमत्पित्रा हतः । ततस्तेनैर्मुनिभिर्महापराक्रमो हनुमान् पुत्रस्ते भविष्यतीति केसरिणे वरो दत्तः । ततःप्रभृति हस्तिनां वानराणां च परस्परं वैरमभूदिति ॥ गच्छत्येव यमनकाल एव रिपूणां नाशयिता गिरिगुहाशयः शेते वर्तत इति गिरिगुहाशयः । गजानिति । गर्वोद्धतान् प्रवैरंगजांश्च इत्यर्थः । हैमवतीमनु गङ्गासमीपे स्थितम् उशीरबीजाख्यं पर्वतमाश्रित्य रमत इति योजना । हरिवाहिनीमुख्यत्वेपि सिद्धजातीयत्व भमत्युदासार्थं वानरश्रेष्ठ इत्युक्तम् । वीरस्य भावो वीर्यम् । उत्साह इत्यर्थः । विक्रमः परान् प्रत्यभिभवः । बलशालिनां वानराणामित्यर्थसिद्धम् । शतसहस्राणां सहस्रं सहस्रलक्षमित्यर्थः । नेता नायकः ॥ २५–२९ ॥

३०] ति० टी०–दुर्धरः अजेयैर्वैरिभिरजेयः । प्रमाथिनं विशिष्य बोधयति–वातेनेति ॥ ३० ॥

गो० टी०–प्रमाथिनं वर्णयति–स एष इति । दुर्धरः दुर्धर्षः । प्रमाथी नाम प्रमाथिनामकः । वातेनोद्धतं मेघमिव यमेनमनुपश्यसि एष प्रमाथीति संबन्धः ॥ ३० ॥

३१] ति० टी०–तरस्विवानरसंबन्धि यस्यानीकं संरब्धं पश्यसि, यस्यानीकेनोद्धतं बहुलं रजोऽरुणाभं पवनेन समन्ततो बहुशो विवर्तमानं भ्रियमाणं यत्र यत्समीपे पश्यसि स एष प्रमाथी बन्धुः ॥ ३१ ॥

गो० टी०–अनीकमिति । यत्र अनीके । समन्ततः पवनेनोद्धतम् अरुणाभासम् अरुणकान्तिबहुलमेतद्रजः बहुधा विवर्तमानं भवति संरब्धं तत् तरस्विनां वानराणामनीकमपि पश्यसि । तदन्यस्य प्रमाथिन इत्यर्थः ॥ ३१ ॥

३२–३३] ति० टी०–गवाक्षवर्णनम्–एते सितोत्थादि । शतं शतसहस्राणि । शतलक्षमित्यर्थः । सेतुबन्धने नलसमीपे तत्सहायतया स्थित्वा सेतुबन्धनकर्तारम् ॥ ३२ ॥ ३३ ॥

रा० टी०–गवाक्षं वर्णयति–एते इति । शेते शतसहस्राणि

---

१ बहुशोनेकवारमिति गो. पाठः । २ यो गङ्गामिति गो. पाठः । ३ तरस्विनामिति गो. पाठः । ४ अनीकमिति गो. पाठः । ५ वैरमिति गो. पाठः । ६ अनीकमिति गो. पाठः । ७ बहुशेति गो. पाठः । ८ वैरमित्रि गो. पाठः

परिवार्याभिनर्दन्ते लङ्कां मर्दितुमोजसा । वानराचरिता यत्र सर्वकालफलद्रुमाः ॥ ३४ ॥
यं सूर्यस्तुल्यवर्णाभमनुपर्येति पर्वतम् । यस्य भासा वरा भान्ति लङ्का मृगपक्षिणः ॥ ३५ ॥
यस्य प्रभ्रष्टं महात्मानो न त्यजन्ति महर्षयः । सर्वकामफला वृक्षाः सैवं फलसमन्विताः ॥ ३६ ॥
मधूनि च महार्हाणि यस्मिन्पर्वतसत्तमे । तत्रैव रमते राजन्सख्ये काञ्चनपर्वते ॥ ३७ ॥
मुख्यो वानरमुख्यानां केसरी नाम यूथपः । पृथुगिरिसहस्राणि रम्याः काञ्चनपर्वताः ॥ ३८ ॥
तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम् । तत्रैकं कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः ॥ ३९ ॥
निवसन्त्यन्तिमगिरौ क्षीक्ष्णदंष्ट्रा नखायुधाः । सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः ॥ ४० ॥
सर्वे वैश्वानरसमा ऊर्ध्वलाङ्गूलशीर्षिणः । सुदीप्तोच्छ्रितलाङ्गूला मत्तमातंगसंनिभाः ॥ ४१ ॥
महापर्वतसंकाशा महाभीमभृतनिःस्वनाः । दशपिङ्गलसर्वा हि महाभीमगतिस्वनाः ॥ ४२ ॥

तानि सहस्राणि लक्षाणीत्यर्थः अस्तिमुखाः श्यामवर्णमुखवन्तः एते गोलाङ्गूलाः तज्जातीयाः सेतुबन्धने महाकपिसैन्यस्थानमहायोधभूतं गवाक्षं नाम यूथपं परिवार्य आकाशं व्याप्य दन्ते । श्लोकद्वयमेकान्वयि ॥ ३२ ॥ ३३ ॥

गो० टी०—सप्तभिराह श्लोकद्वयेन—एत इति । अस्तिमुखाः गोलाङ्गूला नेत्रवर्णं दृष्ट्वा तत्साहश्येन अस्तिमुखाः इत्युक्ताः सहस्राणि च अन्ये गवाक्षं नाम यूथपतिं परिवार्य ओजसा सर्वतो व्याप्य अभिनर्दन्ते । अत्र पृथुपरिवारा यूथानां सर्वेषामधिपतयः इति ज्ञेयम् ॥ ३२ ॥ ३३ ॥

३४] तिल० टी०—तानित्यादिना ।—भ्रमरेत्यादि । यत्र पर्वते सर्वकाले फलिनो बहवो द्रुमाः सन्ति ॥ ३४ ॥

३५] तिल० टी०—यं सूर्यस्तुल्यवर्णाभं स्वतुल्यवर्णकान्तियुक्तं पर्वतमनुपर्येति प्रदक्षिणं करोति । मृगपक्षिणस्तस्मिन्नादयः ॥ ३५ ॥

३६] तिल० टी०—सर्वकामेति । कामयन्त इति कामाः तिपयाः सर्वेषां भोगादिसकलचन्दनाभरणास्त्रादिप्रकल्पकाः ॥ ३६ ॥

३७] तिल० टी०—काञ्चनपर्वतो महामेरुः ॥ ३७ ॥

रा० टी०—केसरिणं वर्णयति—भ्रमरेत्यादिभिः । यत्र पर्वते भ्रमराचरिताः भ्रमरैः सेविताः सर्वेषु कालेषु फलन्ति ते एव द्रुमाः सन्तीति शेषः यं च तुल्यवर्णेन आभाति ते पक्षिणः पर्येति प्रदक्षिणं परिक्रामति यस्य पर्वतस्य भासा दीप्त्या [1]अरुणा इत्यर्थः, मृगपक्षिणो भान्ति यस्य प्रभ्रष्टं [2]प्रभ्रष्टं महर्षयो न त्यजन्ति यत्र च फलसमन्विताः सर्वे वृक्षाः सर्वकामफला सन्तीति शेषः, यस्मिन् मधुनि वर्तते तत्र काञ्चनपर्वते महामेरौ केसरी नाम एष यूथपो रमते लोकचतुष्टयमेकान्वयि ॥ ३४ ॥ ३६ ॥

गो० टी०—अथ चतुर्भिः केसरिणं वर्णयति—भ्रमरेति । यत्र पर्वते । सर्वेकामफलाः । सर्वे काम्यन्त इति सर्वकामाः सर्वार्थीद्धार्थाः तान् फलन्तीति सर्वकामफलाः ते च ते द्रुमाश्च सर्वकालफलद्रुमाः भ्रमरैः आचरिताः व्याप्ताः भवन्ति । [3]अनेन [4]प्राणी सर्वोपजीवनपदत्वं सदा पुष्पितत्वं चोक्तम् । पक्षिणः यं तुल्यवर्णाभं तुल्यप्रकारकान्तिकं यथा तथा पर्येति परिक्रामति संचरन्ति । दृश्यते हि सर्वेस्तत्सन्निधाने काकादयः । यस्मिन्पर्वतसत्तमे सर्वकामफलाः सर्वैः काम्यमानफलाः । अतश्च सर्वकालफलद्रुमाः सदा फलसमन्विताः सर्वकालफलाः इत्यर्थः । काञ्चनपर्वते मेरौ ॥ ३४-३७ ॥

३८] तिल० टी०—[5]पृथुगिरिसहस्राणीत्यादि ॥ ३८ ॥

रा० टी०—तत्रवर्तिनं वर्णयति—पृथुगिरिसहस्राणीत्यादिभिः पृथुगिरिसहस्राणां विस्तीर्णानां वर्षणीया इत्यर्थः, पृथिः सहस्राणां लक्षाणीत्यर्थः ये सन्तीति शेषः तेषां पर्वतानां मध्ये श्रेष्ठः सर्वपर्वतेभ्यो गिरिवरः सर्वगिरिभ्यो गरीयानित्यर्थः, 'गिरिसहस्राणाम्' इति पाठे तु गिरिसहस्राणां मध्ये ये वर्षीयांसः काञ्चनपर्वता इत्यर्थः ॥ ३७ ॥

गो० टी०—अथ शतवर्षिणामस्मत्सहस्रपूर्वके वर्षीयपृथुगिरिसहस्रस्य हीरकरत्नत्वेन । गिरिसहस्राणां षष्टिसङ्ख्यके त्यर्थः काञ्चनपर्वता सन्ति । गिरिवरः मेरुः । अस्तगिरिः पूर्वतोपरो मेरुः । वैश्वानरसमाः वैश्वानरः अग्निः तद्वद्दीप्ता इत्यर्थः । उद्धतिताशीविषाः कुपितसर्पाः आशीविषा दिव्या सर्पा ते आशीविषाः आशीलक्षणदंष्ट्रायां शिरसि वाक्यादिलक्षणयोनिस्थमरः । पृषोदरादित्वात् साधुः । ऊर्ध्वलाङ्गूलाः ऊर्ध्वपुच्छा इत्यर्थः । आश्रितलाङ्गूलाः ऊर्ध्वस्थिता लाङ्गूलाः पुच्छा यैस्ते त्यादिना महाकायत्वमुक्तम् । पर्वतसंकाशा इत्यनेन दार्ढ्यमुक्तम् । भीमभीमाः भीमप्रकाराः प्रकारः सादृश्यं भीमसदृशा इत्यर्थः । "प्रकारे गुणवचनस्य" इति द्विर्वचनम् । तादृशगमनस्वराः । ते वानराः ते तव [6]लङ्कां समीक्ष्य तिष्ठन्तीव तस्थुः भर्त्सयन्तीव तिष्ठन्ति । भाषौ क्रियेत्यर्थः ॥ ३९-४२] तिल० टी०—तेषां मध्ये गिरिवरः सर्वरत्नाभास्ति । तत्र सावर्णिमेरौ ॥ ३९-४२ ॥

रा० टी०—तत्रेति । तत्रास्तगिरौ गिरिवरस्तत्रस्थे क्षणदेष्टा नखायुधाः सिंहा इव चतुर्दंष्टा दंष्ट्रानखायुधाः दंष्ट्राश्च इव दुरासदाः वैश्वानरसमाः वह्निसदृशाः दुरासदाः

---

१ अरुणा गो. पाठः । २ प्रभ्रष्टं गो. पाठः । ३ सहस्राणमिति गो. पाठः । ४ स्वे इति गो० भा० । ५ पृथुगिरीति गो० पाठः । ६

वर्धन्तीव ते सर्वे तस्युर्लङ्कां समीक्ष्य ते । एष वेगवतामग्र्यो तिष्ठति वीर्यवान् ॥ ४३ ॥
यार्थी नित्यमादित्यमुपतिष्ठति वीर्यवान् । नाम्ना पृथिव्यां विख्यातो राजञ्शतबलीति यः ॥ ४४ ॥
एषाशंसते लङ्कां स्वेनानीकेन मर्दितुम् । विक्रान्तो बलवाञ्छूरः पौरुषे स्वे व्यवस्थितः ॥ ४५ ॥
रामार्थे प्राणानां दयां न कुरुते हरिः । गजो गवाक्षो गवयो नलो नीलश्च वानरः ॥ ४६ ॥
कैकेयेव यौधानां कोटिभिर्दशभिर्वृतः । तथान्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः ॥
शक्यन्ते बहुत्वात्तु संख्यातुं लघुविक्रमाः ॥ ४७ ॥
सर्वे प्रहाराज महाप्रभावाः सर्वे महाशैलनिकाशकायाः ।
सर्वे समर्थाः पृथिवीं क्षणेन कर्तुं प्रविध्वस्तविकीर्णशैलाम् ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।

सारणोक्तावशिष्टं शुकः कथयति ।

सारणस्य वचः श्रुत्वा रावणं राक्षसाधिपम् । बलमादिश्य तत्सर्वं शुको वाक्यमथाब्रवीत् ॥ १ ॥
स्थितान्पश्यसि यानेतान्मत्तानिव महाद्विपान् । न्यग्रोधानिव गाङ्गेयान्सालान्हैमवतानिव ॥ २ ॥
एते दुष्प्रसहा राजन्बलिनः कामरूपिणः । दैत्यदानवसंकाशा युद्धे देवपराक्रमाः ॥ ३ ॥

णि विशङ्कानि वेश्मानि येषां ते भीमाः गतयः स्वनाश्च येषां एके प्रधानाः सर्वे ये निवसन्ति ते सर्वे लङ्कां भद्रयन्तीव त एव समीक्ष्य तस्थुः एतेन विशङ्क्यत्वयं आपद्यस्युक्तिश्चिह्या । श्लोकचतुष्टयमेकान्वयि ॥ ३८–४१ ॥

४३–४८] ति० टी०–ते वानरास्ते तव लङ्कां समीक्ष्य दर्पयन्तीव वर्धयन्त इव तिष्ठन्ति ॥ ४३–४८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०–एष इति । यो गिर्यग्र्यमध्ये तिष्ठति राज्यार्थी सन् नित्यमुपतिष्ठति च सः शतबलीति नाम्ना विख्यातः यौधेयाः एष एषां यूथीकानामधिपतिः सार्धश्लोक एकान्वयी ॥ ४२ ॥

रा० टी०–एष इति । एष शतबलीति विख्यातः मर्दितुमाशंसते अत एव निर्देशार्हो न ॥ ४३ ॥

गो० टी०–एष चेत्यादि । उपतिष्ठति उपतिष्ठते एवैवेति संधिरार्षः । यौधेय एकाकी । प्राणानां प्राणान् ॥ ४३ ॥ ४५॥

रा० टी०–रामेति । गजादिः रामप्रियार्थं प्राणानां प्राणिनां दयां तदविषयकृपां न कुरुते एतेन भेदानवकाशः सूचितः ॥ ४६ ॥

गो० टी०–गज इति । स्पष्टः ॥ ४६ ॥

रा० टी०–कैकेयेति । योधानां मध्ये दशभिः कोटिभिर्वृतः नित्यं परिवारितो योधा बहुत्वात् हेतोः तथा पूर्ववदेकैकं संख्यातुं नेत्यर्थः शक्यन्ते ॥ ४७ ॥

गो० टी०–तथेति । स्पष्टः ॥ ४७ ॥

रा० टी०–उपसंहरन्नाह–सर्वे इति । हे महाराज पृथिवीं प्रविध्वस्तविकीर्णशैलां कर्तुं सर्वे समर्थाः सन्तीति शेषः ॥ ४८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतात्पर्यसंग्रहे युद्धकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो० टी०–सर्वे इति । प्रविध्वस्तविकीर्णशैलां प्रविध्वस्ताः चूर्णिताः विकीर्णा विक्षिप्ताः शैलाः यस्याः सा तां तथा ॥ ४८

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

१] ति० टी०–सारणानुक्तं किंचिच्छुको वक्तीत्याह–सारणस्येति । तत्सर्वं बलमादिश्य तूष्णीं स्थितवतः सारणस्य वचः श्रुत्वा स्थितं रावणं शुकोऽब्रवीत् ॥ १ ॥

रा० टी०–सारणोक्तिं संवर्ण्य शुकोक्तिं वर्णयितुमाह सारणस्येत्यादिभिः । सारणस्य वचः श्रुत्वा बलमादिश्य शुको राक्षसाधिपमब्रवीत् ॥ १ ॥

गो० टी०–एवं सारणेनोक्तं श्रुत्वा शुकस्तेन कार्त्स्न्येन दृष्टैः स्वयं तत् सर्वं दर्शयत्यष्टाविंशे सर्गे–सारणस्येति । शुकः सारणस्य वचः श्रुत्वा तेन कार्त्स्न्येनादृष्टैः स्वयं तत् बलम् आदिश्य आज्ञप्त्या निर्दिश्य । रावणम् । अथ कार्त्स्न्यअब्रवीत् । अनुक्तानन्तरारम्भात् तत्रैवार्थो अपेक्ष्यतः सचिवयोरिवोत्तमाय राक्षसाधिपमित्युक्तम् ॥ १ ॥

२–३] ति० टी०–गाङ्गेयान्यज्ञियवृक्षोत्पन्नान् । अन्येऽपि उत्तमाः ॥ २ ॥ ३ ॥

१ सान्त्वार्थं ग० पाठः । २ दृष्टैरिति गो० पाठः । ३ यूथानामिति गो० पाठः ।

एषा कोटिसहस्राणि नवैकं च शतं च । तथा बभ्रुसहस्राणि तथा हरिहयानां ॥ ५ ॥
एते सुग्रीवसचिवाः किष्किन्धानिलयाः सदा । हरयो देवगन्धर्वकन्यकाः कामरूपिणः ॥ ६ ॥
यौ तौ पश्यसि तिष्ठन्तौ सैमानौ देवरूपिणौ । मैन्दश्च द्विविदश्चैव ताभ्यां नास्ति समो युधि ॥ ७ ॥
ब्रह्मणा समनुज्ञाता अमृतप्राशिनावुभौ । आशंसेते यथौ लङ्कामेतौ वंदितुमोजसा ॥ ८ ॥
यं तु पश्यसि तिष्ठन्तं प्रभिन्नमिव कुञ्जरम् । यो वलात्क्षोभयेल्लुब्धः समुद्रमपि वानरः ॥ ९ ॥
एषोऽभिगन्ता लङ्कायां वैदेह्यास्तव च प्रभो । एनं पश्य पुरा दृष्टं वानरं पुनरागतम् ॥ १० ॥
ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः । हनूमानिति विख्यातो लङ्घितो येन सागरः ॥ ११ ॥
कामरूपो हरिश्रेष्ठो बलरूपसमन्वितः । अतिवार्यगतिश्चैव यथा सततगः प्रभुः ॥ १२ ॥
उद्यन्तं भास्करं दृष्ट्वा बालः किल बुभुक्षितः । विषोजवसहस्रं तु अध्यानमवतीर्य हि ॥ १३ ॥
आदित्यमाहरिष्यामि न मे क्षुत्प्रतियास्यति । इति निश्चित्य मनसा पुप्लुवे बलदर्पितः ॥ १४ ॥

रा० टी०–तदाकारमाह—स्थितानित्यादिभिः । मत्तवद्गिरिणानिव गाङ्गेयान् गङ्गाकूलोद्भवान् न्यग्रोधानिव हैमवतान् हिमवत्प्रभवान् शालानिव स्थितान् यान् त्वं पश्यसि एते कामरूपिणः अत एव दुष्टं दुष्प्रसहाः जेतुमशक्याः इत्यर्थः । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–स्थितानिति । न्यग्रोधान् वटान् । गाङ्गेयान् गङ्गातटजान् । हैमवतान् हिमवत्प्रदेशोद्भवान् । वैदग्धानवरान् शाखाः वैदग्धानवतुल्यबलाः ॥ २ ॥ ३ ॥

४–५] ति० टी०–एषां कोटीति सुग्रीवस्यक्षिसंख्या वंशसंख्यां तु स्वयमेव वक्ष्यति ॥ ४ ॥ ५ ॥

रा० टी०–एषामिति । एषां वानराणां नवाष्टिशतकोटिसहस्रादीनि तत्संख्याका इत्यर्थः, देवगन्धर्वकन्यका सुग्रीवसचिवाः हरयः सन्तीति शेषः । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–एषामिति । शङ्कुकर्णादिस्वरूपमुत्तरत्र स्वयं वक्ष्यति । हनूमतादिभङ्गयाः सन्तीति शेषः ॥ ४ ॥

गो० टी०–एत इति । सुग्रीवसचिवाः सुग्रीवस्यायाः सन्तो महायः सचिव इत्यर्थः । देवगन्धर्वैः देवेषु गन्धर्वैश्चेत्यर्थः । उत्पन्नाः कामरूपिण इति कामरूपित्वेन उत्पन्ना इत्यर्थः । पूर्वं कामरूपित्वमुक्तम् । अत्रोत्पत्तिकथनात्पूर्वमेव व्यक्तमित्यत एव न पुनरुक्तिः ॥ ५ ॥

६] ति० टी०–यौ तावितीति मैन्दद्विविदविषयम् ॥ ६ ॥

रा० टी०–यावितीति । मैन्दो द्विविदश्च यौ प्रसिद्धौ यौ पश्यसि ताभ्यां समः कश्चिन्नास्ति ॥ ६ ॥

गो० टी०–यौ तावितीति । कुमारौ पुत्रौ । देवेति रावणं प्रति संबुद्धिः । रूपिणौ प्रशस्तरूपौ प्रशंसायां मत्वर्थीय इनिप्रत्ययः । यौ पश्यसि तौ मैन्दश्च द्विविदश्चेत्युभौ येन हेतुना युधि ताभ्यां समो नास्तीत्यत्र हेतुं दर्शयति–ब्रह्मणेति । ब्रह्मणा समनुज्ञातौ सन्तौ अमृतप्राशिनावित्यर्थः ॥ ६ ॥ ७ ॥

७] ति० टी०–समनुज्ञाता इत्यत्र लोपः शाकल्यस्य [illegible] समनुज्ञातावित्यर्थः ॥ ७ ॥

रा० टी०–तत्र हेतुं दर्शयन्—आशंसेति । प्रभवणा सम्यक् प्रकाशा सन्तौ अमृतप्राशिनौ अमृतवन्तिति शेषः । आशंसेते प्रभावाभ्यामुत्साहयतः ॥ ७ ॥

८] ति० टी०–यमित्यनेन वर्णयति—यं तिष्ठति । प्रभिन्नं मदम् ॥ ८ ॥

रा० टी०–यमित्यनेन वर्णयति—यो वलादिति । प्रभिन्नं मत्तं तिष्ठन्तं । लुब्धः तिष्ठन्तं यं पश्यसि एष समुद्रमपि क्षोभयेत् स एष ते ० ० तिष्ठन्तं लुब्धाय वैदेह्यास्तव च प्रभोरभिगन्ता अभिगन्तेति शेषः । साध्यश्लोक एकान्वयी ॥ ८ ॥

गो० टी०–एनमित्यनेन वर्णयति—यो नि[illegible]दनेन । प्रभिन्नं मत्तं प्रतिनो गजेनो मत्त इत्यर्थः । अभिगन्तेति । वैदेहीदर्शनं अभिलाषमात्रं अभिगन्तेत्युक्तम् । [illegible] दर्शनम् । अत एव हनूमतादर्शनम् । केनचिन्मुख्य, तस्य [illegible] पुरः यत्र पुनरागतः [illegible] प्रलोभनार्थं क्या प्रत्यगृह्णः । यं तं सततगः [illegible] दृष्ट्वा सततगः प्रभुः ॥ ८ ॥ ९ ॥

९–१०] ति० टी०–एनं लङ्कायां वैदेह्यास्तव चाभिगन्तारं । समीपभागतयेत्यर्थः ॥ ९ ॥ १० ॥

रा० टी०–एनमिति । येन सागरो लङ्घितः यश्च [illegible] रिणः पुत्रो वातात्मज इति श्रुतो हनूमानिति विख्यातः [illegible] पश्य ते पुरा दृष्टमेनं वानरं पुनरागतं पश्य । साध्यश्लोक एकान्वयी ॥ ९ ॥ १० ॥

११–१२] ति० टी०–वलवानो वायुः ॥ ११ ॥ १२ ॥

१३] ति० टी०–प्रतियास्यति । श्लोकवर्णितं [illegible] शेषः ॥ १३ ॥

रा० टी०–कामेति । यथा सततगो वायुः [illegible] विशिष्टः तथाऽयमपीति शेषः ॥ १२ ॥

रा० टी०–अमृत [illegible] [illegible] । [illegible] [illegible] [illegible]

अनाधृष्यतमं [illegible] भास्करादवनं गतः ॥ १४ ॥
पतितस्य कपेरस्य हनुरेका शिलातले । किंचिन्निम्ना ह्यहनुर्हनूमानेव तेन वै ॥ १५ ॥
प्रत्यमागमयोगेन ममैष विदितो हरिः । नास्य शक्यं बलं रूपं प्रभावो वानुभाषितुम् ॥ १६ ॥
एष आशंसते लङ्कामेको मथितुमोजसा । येन जाज्वल्यतेऽसौ वै धूमकेतुस्तनाग्नि वै ॥
[illegible] ॥ १७ ॥
[illegible] कायां निहितश्चापि कथं विस्मरते कपिम् ॥ १७ ॥
वैस्यैषोऽनन्तरः शूरः श्यामः पद्मनिभेक्षणः । इक्ष्वाकूणामतिरथो लोके विश्रुतपौरुषः ॥ १८ ॥
यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते । यो ब्राह्ममस्त्रं वेदौच्च वेद वेदविदां वरः ॥ १९ ॥
यो भिन्द्याद्गगनं बाणैर्मेदिनीं वापि दारयेत् । यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः ॥ २० ॥
यस्य भार्या जनस्थानात्सीता चापि हृता त्वया । स एष रामस्त्वां राजन्योद्धुं समभिवर्तते ॥ २१ ॥
यस्यैष दक्षिणे पार्श्वे शुद्धजाम्बूनदप्रभः । विशालवक्षास्ताम्राक्षो नीलकुञ्चितमूर्धजः ॥ २२ ॥
एषो हि लक्ष्मणो नाम भ्रातुः प्रियहिते रतः । नये युद्धे च कुशलः सर्वशस्त्रभृतां वरः ॥ २३ ॥
अमर्षी दुर्जयो जेता विक्रान्तश्च जयी बली । रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ २४ ॥
नष्टेष राघवस्यार्थे जीवितं परिरक्षति । एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान् ॥ २५ ॥

माहरिष्यामि भोजनार्थं ग्रहीष्यामीति मनसानिश्चित्य बलवर्धितः सन् त्रियोजनसहस्रमध्वानमवतीर्य उत्प्लुत्य पुप्लुवे प्लवनेनोर्ध्वदेशं जगाम । श्लोकद्वयमेकान्वयि ॥ १२ ॥१३॥

गो० टी०—उद्यन्तमित्यादि । बालः बाल्यावस्थः । क्षुधित इतिच । पिपासितः स्तन्यापेक्षः । क्षुधित इति पाठः । त्रियोजनसहस्रं त्रियोजनसहस्रपरिमाणम् । "द्विगोरित्यम्" इति प्रमाणप्रत्ययः लुक् । हनुमत्पितुः केसरिणः कनकाचलमासित्वात्तस्य च पुत्रत्वात्तदित्यस्य तच्छिखरस्य च मध्याद्वा त्रियोजनसहस्रमित्युक्तम् । अत एव अवतीर्येत्युक्तम् अन्यथेति । यद्वा आदित्यस्य भूमेरुपरि लक्षयोजनान्तरत्वात् त्रियोजनसहस्रमित्येतदनेकसहस्रोपलक्षणम् । आहरिष्यामि अवश्यमिष्यामि इति संचिन्त्य मनसा पूर्वेण बलवर्धित इत्यनन्तरं त्रियोजनसहस्रमित्यर्थं योज्यम् । देवं सूर्यम् । भास्करं उदयाद्रिमिति भास्करोदयनः तस्मिन् गिरौ । हनुः शृङ्गप्रदेशः । पवनसंज्ञत्वं तत्तेजसोत्पत्स्यमानम् । तेजसा तस्य निर्भृत इति किष्किन्धाकाण्डोक्तेः । यद्यप्युत्तरकाण्डे इन्द्रवज्रेण पतनमुक्तम् तथापि तदपि हेत्वन्तरमिति ज्ञेयम् । कथमिमं कपिं त्वया विदितमत्याह—सत्यमिति । आगमः आप्तवाक्यम् तदेव योग उपायः तेन । यद्वा आप्तवाक्यश्रवणेन मम सत्यं यथा भवति तथा भाषितुं न शक्यम् । कामरूपदर्शनादिति भावः ॥ १२ ॥ १७ ॥

१४-१५] ति० टी०—अनायासेन । भास्करमिति वेपः । भास्करोदयने इति तदुपरि ॥ १४ ॥ १५ ॥

१६] ति० टी०—अनाधृष्यमिति । देवैरपि निरालम्बत्वात्तस्य [illegible] सूर्यम् अनायासेन अप्राप्य भास्करस्य उदयनम् उदयो यस्मिन् तस्मिन् गिरौ पतितः इन्द्रप्रहतवज्रेण प्राप्तः ॥ १४ ॥

रा०टी०—पतितस्येति । शिलातले पतितस्य अस्यहनुतः एका हनुः किंचिन्निम्ना क्षयप्रहारेण जातव्रणा अभवदिति शेषः तेन हेतुना एष हनूरहनूरवत् अत एव हनुमान् तदभिधोऽभवद् अत एव पूर्वेण च निरोधः प्रशस्त्यार्थकोऽत्र मतुप्॥१६॥

१६] ति० टी०—आगमयोगेन सह हनुमत्तामनिमित्तभूतपूर्ववृत्तान्तेन संहेत्यर्थः ॥ १६ ॥

रा० टी०—सत्यमिति । आगमयोगेन आगमिनां मत्स्यमीपे प्रमाणां वानरादीनां योगेन योजनेन कथनेनेत्यर्थः, एष हरिरहनूमान् मम सत्यं विदितो ज्ञातः । ज्ञातमेवाह—अस्य हनुमतो बलादि भाषितुं न शक्यम् ॥ १६ ॥

१७] ति० टी०—धूमकेतुरग्निर्येन जाज्वल्यते प्रज्वलितः क्रियते स्वतेजोऽहोऽपि यत्पुच्छं प्राप्य प्रज्वलितः, । लङ्कायां निहितो निक्षिप्तश्च ॥ १७ ॥

रा० टी०—एष इति । एष हनुमान् एक एव मथितुमाशंसते । अन्यै पृथक् । नन्वेतावताऽमननेनेत्यत आह—येनेति । लङ्कायां निहितः स्वतेजसातिलेजसापि धूमकेतुर्वह्निर्येन जाज्वल्यते अन्यैर्जाज्वल्यत तं कथं विस्मरते एतेन तदाशंसनं सत्यमेव भविष्यतीति ध्वनितम् अर्धद्वयमेकान्वयि ॥ १७ ॥

१८-१९] ति० टी०—रामं वर्णयति—एषस्येष इति । अस्य दक्षिणस्य इक्ष्वाकूणामतिरथः समीपवर्ती ॥ १८ ॥ १९ ॥

२०-२५] ति० टी०—गगनं बाणैर्भिन्द्यात् । सर्वदुःखरूपमि [illegible] इत्यर्थः ॥ २० ॥ २५ ॥

---

१ हनुमत्पितुः गो. पाठः । २ हनोरिति गो. पाठः । ३ भाषितुमिति गो. पाठः । ४ [illegible] ५ [illegible] ६ भाषितुमिति गो. पाठः । ७ [illegible] ८ इत्यनेन गो. पाठः । ९ [illegible]

यस्य सव्यमसौ पक्षं रामस्याश्रित्य तिष्ठति । रक्षोगणपरिक्षिप्तो राजा क्षत्र विभीषणः ॥ २५ ॥
श्रीमता राजराजेन लङ्कायामभिषेचितः । न्यायमेनं प्रतिसंरब्धो युद्धायैषोऽभिवर्तते ॥ २६ ॥
यं तु पश्यसि तिष्ठन्तं वृक्षे गिरिमिवाचलम् । सर्वशस्त्रास्त्रविद्वांसं भर्तारमपितेजसम् ॥ २८ ॥
तेजसा यशसा बुद्ध्या वृत्तेनाभिजनेन च । यः कक्षीवानिव व्यक्तं द्विषद्भानिव वैनतः ॥ २९ ॥
किष्किन्धां यः रामस्यान्ते दुर्गां रक्षत्यरक्षकाम् । दुर्गां पूर्वं दुराक्रम्यां प्लवगैः सह यूथपैः ॥ ३० ॥
यस्यैषा काञ्चनी माला शोभते शतपुष्करा । ज्ञात्वा देवासुरप्राणां वसां लक्ष्मीः प्रतिष्ठिता ॥ ३१ ॥
एतां मालां च तारां च प्रतिपत्स्ये न संशयम् । सुग्रीवे वालिनं हत्वा रामेण प्रतिपादितः ॥ ३२ ॥

रा० टी०—रामं बोधयति—यस्येति । यस्य रामस्य अनन्तरः सन्निकृष्टो हनूमान्नामेतिः यस्मिन् धर्मो बलते नित्यं तिष्ठतीत्यर्थः । यो धर्मं नातिवर्तते उल्लङ्घयति धर्ममेव शिक्षयतीत्यर्थः, यस्य च दक्षोऽपि कायः सकलाम् । रिपुविध्वंसनं सूचयतीति शेषेण दृश्यते । यस्य सोदरा त्वया हता स एष रामः स्वौर्यं रामस्येति । सर्वत्रिष्वं कान्वयि ॥ १८—२१ ॥

गो० टी०—२७ रामं वर्णयति—यस्यैष इत्यादिना । अनन्तरः [illegible] पूर्वोक्तहनुमन्नेत्यादि [illegible] प्रकटितजोर्ध्व [illegible] यस्मिन्नेतिः [illegible] मल्लोभनोपविष्टेन [illegible] खिलशाखाकूणं मध्ये [illegible] इत्यर्थः । अत्र च वर्णने प्रमाणम् । लोके विक्रान्तपौरुष खरबाहिना [illegible] पौरुषं यस्य तथा [illegible] स्याह—यस्मिन्धर्मो न वर्तते इति [illegible] तिभिरकुलिनो [illegible] दिभिः कुलेषु [illegible] तैते । स्वरूपेऽवस्थाने [illegible] हृदयत्वेन च । न केवलं पौरुषवानेव अस्त्रवलं चास्यैत्याह—सर्वशस्त्रेति । ब्राह्मस्त्रं ब्रह्मास्त्रमन्त्रे वेदेषु वेद जानाति । आत्मवन्तस्य वेदान्तगतस्येति प्राग्वत् । [illegible] दिविदां वरः उपेन्द्रस्योपेन्द्रादिभ्योऽण् । उपेन्द्रं [illegible] अपश्यति—यो मित्रमित्यादि । गगनं गगनस्थमित्यादि । आदिशब्देन पातालादिसंग्रहः । संप्रति [illegible] यस्येति ॥ १८—२१ ॥

रा० टी०—लक्ष्मणं बोधयति—यस्येति । यस्य रामस्य [illegible] पार्श्वे स्थितः भ्रमशी रामापराधिषु भ्रमरहितः दुर्धर्षः [illegible] जेता सर्वान् जेतुं शीलः रामस्य दक्षिणो बाहुः [illegible] बलिनो रामस्य प्राणः स एष लक्ष्मणः । [illegible] ॥ २२—२५ ॥

रा० टी०—२६ तीति । जीवितं जीवनं न परित्यजति जीवनार्थं [illegible] दुर्धिनश्चलतीत्यर्थः ॥ २६ ॥

गो० टी०—२७ लक्ष्मणं वर्णयति—यस्येष इत्यादिना । [illegible] रामस्येति शेषः । शुद्धजाम्बूनदप्रभः स्वर्णवर्णः । [illegible] स्वस्थितेन शेषेणेति भावः । संपति [illegible] शाखशब्दो भीतिवाचकः [illegible] प्राणो बलिन इत्यनेन प्राणशब्दस्य [illegible] ॥ २२—२५ ॥

रा० टी०—२६ यस्य प्रत्यक्षीकृतस्य रामस्य सख्यं पश्य [illegible] स्वौरसेन परिक्षिप्तो व्याप्तः । राक्षसेन्द्रस्य रावणस्य एव ॥ २६ ॥

रा० टी०—विभीषणं बोधयति—यस्येति । यस्य रामस्य [illegible] पार्श्वे स्थितमित्यनिष्टितेन रामेण लङ्कायां लङ्कारक्षणार्थं [illegible] परिक्षिप्तः स्वौरसेन परिक्षिप्तः व्याप्तः एष विभीषणः ॥ २६ ॥

गो० टी०—२७ [illegible] । यस्य पार्श्वे । स्वौरसेनेति [illegible] रामस्य सख्यमनुवादेनाह राक्षसेन्द्रस्य । राजा लङ्कायामेति शेषः । अत्र हेतुं सत्यवाचः पौरुषवत्त्वम् ॥ २६ ॥

२७] ति० टी०—राजराजेन रामेणाभिषिक्त इत्यन्वयः । न्यायोऽयं स्वां प्रतिपक्षायाभिवर्तते ॥ २७ ॥

रा० टी०—अतः एव एषः लङ्कायामविरकेऽवसरे धर्मं विभीषणः स्वां प्रति यद्वार संरब्धोऽभिवर्तत ॥ २७ ॥

गो० टी०—राजराजेन रामेणेत्यादि—श्रीमतेति । श्रीमता अयाप्तसमस्तकल्याणेन लङ्कायामभिषेचितः । राजराजेन विभीषणायेत्यन्वयः । राजराजत्वं च निर्वाहितमिति मन्वानेन लङ्कायां निर्वाहे । लङ्कायां रामेति वाक्यशेषः ॥

२८] ति० टी०—सर्वशस्त्रास्त्रम्—यं तिष्ठति ॥ २८ ॥

२९-३०] ति० टी०—अतिवर्धात । अतिक्रम्यातिष्ठतीत्यर्थः ॥ २९ ॥ ३० ॥

३१-३२] ति० टी०—पुष्करं पद्मम् ॥ ३१ ॥ ३२ ॥

रा० टी०—रामेव लक्ष्मणं बोधयति—एतिमिति । अनेन [illegible] यं मध्ये तिष्ठन्तं यं पश्यसि यस्य तेजआदित्य [illegible]

शतं शतसहस्राणां कोटिमाहुर्मनीषिणः । शतं कोटिसहस्राणां शङ्कुरित्यभिधीयते ॥ ३३ ॥
शतं शङ्कुसहस्राणां महाशङ्कुरिति स्मृतः । महाशङ्कुसहस्राणां शतं वृन्दमिहोच्यते ॥ ३४ ॥
शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् । महावृन्दसहस्राणां शतं पद्ममिहोच्यते ॥ ३५ ॥
शतं पद्मसहस्राणां महापद्ममिति स्मृतम् । महापद्मसहस्राणां शतं खर्वमिहोच्यते ॥ ३६ ॥
शतं खर्वसहस्राणां [महाखर्वमिति स्मृतम् । महाखर्वसहस्राणां] समुद्रमभिधीयते ।
शतं समुद्रसाहस्रं महौघमिति विश्रुतम् ॥ ३७ ॥
[शतमोघसहस्राणां महौघ इति विश्रुतः ।]
एवं कोटिसहस्रेण शङ्कूनां च शतेन च । महाशङ्कुसहस्रेण तथा वृन्दशतेन च ॥ ३८ ॥
महावृन्दसहस्रेण तथा पद्मशतेन च । महापद्मसहस्रेण तथा खर्वशतेन च ॥ ३९ ॥
समुद्रेण च तेनैव महौघेन तथैव च । एष कोटिमहौघेन समुद्रसदृशेन च ॥ ४० ॥
विभीषणेन वीरेण सचिवैः परिवारितः । सुग्रीवो वानरेन्द्रस्त्वां युद्धार्थमनुवर्तते ॥
महाबलवृतो नित्यं महाबलपराक्रमः ॥ ४१ ॥
इमां महाराज समीक्ष्य वाहिनीमुपस्थितां प्रज्वलितप्रदीपमाम् ।
ततः प्रयत्नः परमो विधीयतां यथा जयः स्याच्च परैः पराभवः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

भाव यत्र पर्वतदुर्गस्थां दुर्गपर्वते स्थिताम् अत एव दुर्गां निर्भिर्दुर्गमां गहनद्रुमां निबिडद्रुमसंहतां किष्किन्धां गुहां सालवृक्षं यस्य च देवमनुष्याणां लक्ष्मीः यस्यां प्रतिष्ठिता सा कान्ता । माला शोभते स सुग्रीवः रामेण वालिनं हत्वा ज्ञातयित्वा वालहतीं प्रतिपादितः प्राप्तः । अर्धदशकमेकादशे ॥ २२–२३ ॥

गो० टी०–अथ सुग्रीवं वर्णयति—यस्त्वित्यादि । मध्ये रामविभीषणयोरित्यर्थः । अक्षरं निश्चलम् । बृहत्या महापोहरूपशास्त्रेण ज्ञानेन ज्ञाताज्ञातज्ञानेन अभिज्ञानेन कुलेन अतिवभ्राज अतिशयेन शोभते । गहनं वनम् । दुर्गां प्राकारादिना दुर्गमाम् पर्वतदुर्गस्थां पर्वतरूपदुर्गे स्थिताम् । शतपुष्करा शतपद्मा ज्ञात्वा काम्यमाना लक्ष्मीः वीरलक्ष्मीः यस्मिन्नरणे कदाचिदपि पराजयो न भवतीति सदा धारी तां वहति स्मेति प्रसिद्धिः । तद्वाक्यादेव हि रामस्तदनभिमुख एव वालिनं हतवान् । पल्लिपादितः प्रापितः ॥ २२–२३ ॥

३३–३७] ति० टी०–अथ सर्वत्रसंख्यां दुर्ज्ञेयां संख्यास्वरूपं निदर्शयति–शतमिति ॥ ३७ ॥

रा० टी०–एकैव वानरान् संख्यातुं संख्यास्वरूपमाह–शतमित्यादिभिः । शतसहस्राणां शतं कोटिमाहुः कोटिसहस्राणां शतं शङ्कुरित्यभिधीयते ॥ ३३ ॥

रा० टी०–शतं शङ्कुरिति ॥ ३४ ॥

रा० टी०–शतं वृन्देति ॥ ३५ ॥

रा० टी०–शतपद्मेति ॥ ३६ ॥

रा० टी०–शतं खर्वेति ॥ ३७ ॥

गो० टी०–उक्तानुक्तसकलवानरसङ्ख्यां शतं पद्मसङ्ख्यामेव दर्शयति—शतमित्यादिना । शतपर्यन्तसङ्ख्यायाः स्फुटत्वात्तदूर्ध्वसङ्ख्या अत्र संकीर्त्यन्ते। शतसहस्रमयुतम् लक्षाणि शतं कोटिरित्याहुः ॥ ३३–३९ ॥

३८–४१] ति० टी०–अथ बलसंख्यामाह—एवं कोटीति ॥ ३८ ॥ ४१ ॥

रा० टी०–सेनासङ्ख्यामाह—महेत्यादिभिः । महापद्मसहस्रादिना वक्ष्यमाणेन विभीषणादिभिश्च परिवारितः महाबलेन रामेण बलं न्यायतस्त्वीकृतः अत एव महाबलपराक्रमः सुग्रीवो युद्धार्थं त्वामनुवर्तते । सार्धश्लोकपञ्चकमेकान्वयि ॥ ३८–४२

गो० टी०–एवं कोटिसहस्रेणेत्याद्यानरसङ्ख्याभेदकीर्तनमवान्तरसेनाप्रतिभेदात् । समुद्रसदृशेन सागरसदृशेन । विभीषणेनेति । सचिवैः राक्षसरूपलक्षितेन विभीषणेन परिवारितः सुग्रीवः त्वामभि त्वां प्रति युद्धार्थं वर्तते ॥ ४०–४२

४२] ति० टी०–प्रज्वलितप्रदीपमां प्रज्वलितमहज्ज्योतिषमाम् ॥ ४२ ॥

इति श्रीपद्मभूषणे श्रीरामायणे रामानुजपदसेवके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

---

१ शत इति गो. पाठः । २ इति स्मृतमिति गो. पाठः । ३ अर्धमेतदधिकं गो. पाठे [illegible] ४ [illegible] ५ नास्ति । ६ शतमेवैतदिति गो. पाठः । ७ अयोधी गो. पाठः । ८ [illegible]

रावणेन शुकसारणौ धिक्कृत्य शार्दूलपुरोगाश्चाः प्रेषिताः । हरिभिस्ताडिताः शार्दूलाः कारुण्येन मोचितो रामेण च ते गत्वा शार्दूलोऽपि निन्द्य रामकर्म रावणायन्यवेदयत् ।

शुकेन तु समादिष्टान्दृष्ट्वा स हरियूथपान् । लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणम् ॥ १ ॥
सभीपस्थं च रामस्य भ्रातरं च विभीषणम् । सर्वानरराजं च सुग्रीवं भीमविक्रमम् ॥ २ ॥
अङ्गदं चापि बलिनं वज्रहस्तात्मजात्मजम् । हनूमन्तं च विक्रान्तं जाम्बवन्तं च दुर्जयम् ॥ ३ ॥
सुषेणं कुमुदं नीलं नलं च प्लवगर्षभम् । गजं गवाक्षं शरभं मैन्दं च द्विविदं तथा ॥ ४ ॥
किंचिदाविग्रहृदयो जातक्रोधश्च रावणः । भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ ॥ ५ ॥
अधोमुखौ तौ प्रणतावब्रवीच्छुकसारणौ । रोषगद्गदया वाचा संरब्धं परुषं तथा ॥ ६ ॥
न तावत्सदृशं नाम सचिवैरुपजीविभिः । विप्रियं नृपतेर्वक्तुं निग्रहे ऽनुग्रहे प्रभोः ॥ ७ ॥
रिपूणां प्रतिकूलानां युद्धार्थमभिवर्तताम् । उभाभ्यां सदृशं नाम वक्तुमप्रस्तवे स्तवम् ॥ ८ ॥
आचार्यो गुरवो वृद्धा वृथा वां पर्युपासिताः । मारं यद्राजशास्त्राणामनुभीत्यं न गृह्यते ॥ ९ ॥

रा० टी०—इमामिति । प्रज्वलितग्रहोपमां वाहिनीं समीक्ष्य अवलोक्य परमः पयत्नो विधीयताम् ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०—इमामिति । ज्वलितग्रहोपमां क्रूरग्रहोपमाम् । यथेति । यथा ते जयो न स्यात् प्रत्युत परैः पराजय एव स्यात् तथा यत्नः क्रियतामिति ध्वन्यते ॥ ५४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणे रत्नकीरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

१-४] ति० टी०—शुकेनेति ॥ १ ॥ ४ ॥

५] ति० टी०—कथान्ते वृत्तान्तश्रवणसमाप्तिसमये । भर्त्सयामास । स्वकीयभीताकारगोपनार्थोऽयं व्यापारः ॥ ५ ॥

रा० टी०—शुकवर्णितरामसेनावृत्तश्रवणानन्तरकालिकं रावणवृत्तान्तमाह—शुकेनेत्यादिभिः । शुकेन समादिष्टान् रिपूयपान् लक्ष्मणादींश्च दृष्ट्वा किंचिदाविग्रहृदयो रावणः कथान्ते वर्णनावसाने तौ वर्णनकर्तारौ शुकसारणौ भर्त्सयामास । श्लोकपञ्चकमेकान्वयि ॥ १—५ ॥

गो० टी०—अथ रावणेन चारप्रेषणादि प्रतिपाद्य एकोनत्रिंशे—शुकेनेत्यादिश्लोकत्रयम् । सर्वानरराजे चेत्यत्र चकारो हनूमदादिसङ्ग्रहार्थः आविग्रहृदयः भीतहृदयः तथापि जातक्रोधः अस्तवाकर्णनेन कुपित इत्यर्थः । कथान्ते वचनान्ते ॥ १—३ ॥

६] ति० टी०—अधोमुखौ । भर्त्सनेनेति शेषः ॥ ६ ॥

रा० टी०—अथ इति । अधोमुखौ भर्त्सनेन भयानकौ शुकसारणौ संरब्धं सकोपम् अत एव परुषं वचनमब्रवीत् ॥ ६ ॥

गो० टी०—अधोमुखाविति । रोषगद्गदया कोपस्खलितया वाचा संरब्धं कुपितः ॥ ६ ॥

७] ति० टी०—उक्तमानविनेषणस्य नृपतेः पुरस्तादुपजीविभिः सचिवैः वक्तुं तावन्न सदृशम् । प्रभोस्तवदृष्टे ॥ ७ ॥

रा० टी०—तदाकारमाह—नेत्यादिभिः । निग्रहे अननुग्रहे च प्रभोः समर्थस्य नृपतेर्यावद्विप्रियं तावत्सकलमपि भिन्नार्थः, सचिवैर्वक्तुं न सदृशं योग्यम् नामप्रसिद्धमेतत् ॥ ७ ॥

गो० टी०—न तावदिति । तावत् प्रथमतः । निग्रहानुग्रहयो । प्रभोः शक्तस्य । नृपतेः विप्रियं वक्तुं सदृशं नाम । नामेति नीतिशास्त्रप्रसिद्धिः ॥ ७ ॥

८] ति० टी०—तदेव विप्रियं दर्शयति—रिपूणामिति । युद्धायाभिवर्ततामभिमुख्यतया वर्तमानानाम् । स्वयं बलोत्कर्षकथनम् । अप्रस्तवे तत्प्रभावाभावे वक्तुं सदृशं युक्तं नाद्यत्व अपि त्वयुक्तमेव । के यूथपाः कियद्बलमिति विचारकतामिति प्रेषिते तावन्मात्रं वाच्यम्, अदृष्टं तु तैः प्राबल्यादिकं नाज्ञापयितुं शक्तं इत्यादि वक्तुं न युक्तमित्यर्थः ॥ ८ ॥

रा० टी०—विप्रियमेव दर्शयन्नाह—रिपूणामिति । प्रतिकूलानां विरुद्धाचरणशीलानाम् अत एव युद्धार्थमभिवर्तमानानां रिपूणां स्वयम् अप्रस्तवे प्रस्तुतरहितसमये उभाभ्यां युवाभ्यां वक्तुं सदृशं नाम किं नेत्यर्थः ॥ ८ ॥

गो० टी०—विप्रियमेव विशदयति—रिपूणामिति । अभिवर्ततां अभिवर्तमानानाम् । अप्रस्तवे अनवसरे । स्तवं वक्तुं सदृशं नाम सदृशं किमु । युद्धारब्धममर्षो हि परस्परं हन्तीति भावः ॥ ८ ॥

९] ति० टी०—आचार्य उपनीय वेदाध्यापकः गुरुः पित्रादयः वृद्धा ज्ञानवयोवृद्धाः । वां युवाभ्यामनुजीव्यं सेव्यं न गृह्यते न गृहीतः ॥ ९ ॥

रा० टी०—आचार्या इति । युवयोर्यतो राजशास्त्राणाम् । अनुभीत्यं सेव्यं शास्त्रं वां युवाभ्यां न गृह्यते, अगृहीतं अतः प्रमादाद् अशास्त्रज्ञत्वेन वृथा पर्युपासिताः ॥ ९ ॥

१ ग० घ० ङ० छ० झ० ञ० ट० । २ ग० घ० ङ० छ० झ० ञ० ट० । ३ ग० घ० ङ० छ० झ० ञ० ट० । ४ ग० घ० ङ० छ० झ० ञ० ट० । ५ ग० घ० ङ० छ० झ० ञ० ट० ।

गृहीतो वा न विज्ञातो भारोऽज्ञानस्य वाहते । हतैः सौवर्चलयुक्तो मूर्खैर्द्विड्भ्यो ब्रवीम्यहम् ॥ १० ॥
किं नु मृत्योर्भयं नास्ति मां वक्तुं परुषं वचः । यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम् ॥ ११ ॥
अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः । राजदण्डपरामृष्टास्तिष्ठन्ते नापराधिनः ॥ १२ ॥
हन्यामहं त्विमौ पापौ शत्रुपक्षप्रशंसिनौ । यदि पूर्वोपकारैर्मे क्रोधो न मृदुतां व्रजेत् ॥ १३ ॥
अपध्वंसत नैरृत्यं संनिकर्षादितो मम । नहि वां हन्तुमिच्छामि स्मराम्युपकृतानि वाम् ॥
हतावेव कृतघ्नौ द्वौ मयि स्नेहपराङ्मुखौ ॥ १४ ॥

गो० टी०—आचार्या इति । यतस्माद् राजशास्त्राणां सारं प्रतिपाद्य सारतमं अनुज्ञाप्यम् अनुज्ञाविधेयम् न गृह्यते न ज्ञायते अतः वां युवाभ्याम् गुरवः महान्तः वृद्धाः ज्ञानवयः शीलसंपन्नाः आचार्याः नीतिशास्त्रोपदेष्टारः तथा पर्युपासिताः । तदुपासनफलादर्शनान्निरर्थकमाराधिता इत्यर्थः । ननु चिरोपासितगुरोरज्ञानं न साम्प्रतं तत्राह—गृहीतो वेति । गृहीतो वाग्यैः न विज्ञातः न विशेषेण ज्ञातः । विस्मृत इत्यर्थः । तर्हि कथं ज्ञानत्वप्रवादः इत्याह—भार इति । ज्ञानस्य भारः उच्यते वा । ज्ञानमपि ज्ञानं वाक्यज्ञानपर्यवसायीत्यर्थः । यद्वा ज्ञानस्य भार उच्यते । ज्ञानभारभरणामिमान एव क्रियते न तु तत्कार्यमित्यर्थः ॥ ७ ॥

१०] ति० टी०—गृहीतो वा न विज्ञातः विस्मृत इत्यर्थः । ज्ञानविस्मरणमपि युवयोर्न संभावितमित्याह—भार इति । अज्ञानस्य भारो वाह्यते अज्ञानवाहुल्यमेव वर्तते, न ज्ञानलेशोऽपीति भावः । ब्रवीमि । राज्यमिति शेषः । राज्यवेलाया परमकार्यं भवादृक्कुमित्रसङ्गः, तत्र सत्यपि तत्त्वज्ञानवैफल्यं गतावस्तत्काले युवाभ्यामेव शिक्षणीय इत्यर्थः ॥ १० ॥

रा० टी०—ननु नीतिशास्त्रसारसंग्राह्यां गृहीतसंकेतयत आह—गृहीत इति । गृहीतो ज्ञातो वा नीतितात्पर्यार्थ इति शेषः न विज्ञातः इदमी ज्ञानविशेषाणां नास्ति अत्यन्तं विस्मृत इत्यर्थः । अत एव अज्ञानस्य भारः बाहुल्यं वाह्यते युवाभ्यां गृह्यते इदंभेदैः सचिवेर्लोकार्थं विद्वद्भिः अतिभाग्योदयेन भवद्भिः राज्यमिति शेषः ॥ १० ॥

गो० टी०—आवयोरन्ते कथमेतावत्पर्यन्तमस्मन्मत्यनुसरणं तत्राह—ईदृशैरिति । ईदृशैः एवं नीतिशास्त्रसंग्राह्यविशेषविद्भिः । ब्रवीमि राज्यमिति शेषः । "भृञ् भरणे" इति धौवादिको धातुः । ब्रवीमि जीवामीति यावत् ॥ ८ ॥

११] ति० टी०—युवाभ्यां स्वनाथमप्यविज्ञाय दुर्लभं वक्तमित्याह—किं त्विति । शासतो राज्ञो यस्य मे जिह्वा तद्धि किं शुभाशुभं निग्रहानुग्रहं प्रयच्छति तं मां परुषं वचो वक्तुं उत्सहेत । अतस्तयुवयोर्मृत्योर्भयं किं नु नास्ति । यदि स्याद्य युवाभ्यां इत्यर्थः ॥ ११ ॥

रा० टी०—किञ्चिति । शासतो यस्य मे जिह्वा वचनमात्रमित्यर्थः, शुभाशुभं निग्रहानुग्रहं प्रयच्छति तन्मां परुषं वक्तुं उत्सहेत युवयोरिति शेषः मृत्योर्भयं किं नास्ति एतं युवां हनिष्यामीति सूचितम् ॥ ९ ॥

गो० टी०—किञ्चिति । मां परुषं वचो वक्तुं युवयोर्मृत्योः सकाशात् भयं नास्ति किंतु । वक्तुम् उत्सहेयुर्युवयोरिति शेषः इत्यध्याहृतः । परुषोक्तिमात्रे कुतो मृत्युरित्याह—यस्येति । शासतो मे जिह्वैव शुभाशुभं प्रयच्छति । शासने प्रवृत्तस्य मे जिह्वाचलनमेव मृत्योः श्रेयो वा प्रयच्छतीत्यर्थः ॥ ९ ॥

१२] ति० टी०—अप्रतिक्रियानर्थौ राजद्रोह इत्याह—अप्येवेत्यादि । राजदोषपरामृष्टा राजक्रोधविषयाः ॥ १२ ॥

रा० टी०—अपीति । दहनं वह्निं स्पृष्ट्वापि पादपास्तिष्ठन्ति कथंचित्र दह्यन्त इत्यर्थः राजदण्डपरामृष्टाः राजदण्डार्हा इत्यर्थः, अपराधिनस्तु न तिष्ठन्ते नश्यन्तीत्यर्थः ॥ १२ ॥

गो० टी०—अपीति । राजदोषः राजक्रोधः । दहनस्पृष्टवनपादपस्थितिसंभवादप्यसंभावितः राजापराधजनस्थितिरिति भावः । तिष्ठन्ते तिष्ठन्ति ॥ १० ॥

१३] ति० टी०—पूर्वोपकारैर्मे क्रोधो न मृदुतां व्रजेत् ॥ १३ ॥

रा० टी०—हन्यामिति । पूर्वोपकारैः एतत्कृतोपकृतिभिः मे क्रोधः यदि मदुतां न व्रजेत् तर्हि इमौ अहं हन्याम् ॥१३॥

गो० टी०—स्यामः प्रत्यवा—हन्यामिति ॥ ११ ॥

१४] ति० टी०—अपध्वंसत मत्सकाशादपसृता भवत मे संनिकर्षात्तिरस्कृतमदर्शनं गच्छत । क्रोधवशाद्वचनव्यत्यासो न दोषाय । हतावेव । किमपि शिरउत्कं शिक्षारात्रेति शेषः१४

रा० टी०—अपध्वंसतेति । मम सन्निकर्षात् सान्निध्यात् कृत्यमपध्वंसत निर्गच्छत अत एव नैरृत्यं दुष्टत्वाभावं प्रापुत । ननु हतनं प्रतिज्ञाय त्याग एव कृत आज्ञाप्यते इत्यत आह—वां युवयोरुपकृतानि अहं स्मरामि अतो वां हन्तुं नेच्छामि ॥ १४ ॥

रा० टी०—हतनभावेऽपि ते जीवनं न भविष्यतीति शोषयन्नाह—हतावितीति । स्नेहपराङ्मुखौ द्वौ कृतघ्नौ युवां हतौ स्वत एव हतप्रायौ अर्थं पृथक् ॥ १५ ॥

गो० टी०—अपध्वंसतेति । अपध्वंसत स्थानात् प्रच्यवध्वम् । पूर्वस्मैर्दृ बहुवचनं चार्षम् । गच्छध्वं मन्निकर्षात् इतिशेषात् ॥ १२ ॥

वेक्षत इति गो.पाठः । २ दोषेति गो.पाठः । ३ प्रशंसकाविति गो.पाठः । ४ हतेति गो.पाठः । ५ गच्छन्त्विति गो.पाठः । ६ तदेति गो.पाठः

प्रतिसन्धाय तु सत्कारं तौ दूतौ शुकसारणौ । रावणं जयशब्देन अभिनन्द्याभिनन्द्य च ॥ १२ ॥
अब्रवीच्च दशग्रीवः समीपस्थं महोदरम् । उपस्थापय मे क्षिप्रं चारानिति निशाचरः ॥ १३ ॥
महोदरस्तथोक्तस्तु क्षिप्रमाज्ञापयच्चरान् ॥ १४ ॥
ततश्चाराः संत्वरिताः प्राप्ताः पार्थिवशासनात् । उपस्थिताः प्राञ्जलयो वर्धयित्वा जयाशिषः ॥ १५ ॥
तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः । चैराग्र्यत्यायिकान्शूरान्धीरान्विगतसाध्वसान् ॥ १६ ॥
इतो गच्छत रामस्य व्यवसायं परीक्षितुम् । मन्त्रिपक्षप्रयत्नायेऽस्य प्रीत्या तेन समागताः ॥ १७ ॥
कथं स्वपिति जागर्ति किमद्य च करिष्यति । विज्ञाय निपुणं सर्वमागन्तव्यमशेषतः ॥ २० ॥
चारेण विदितः शत्रुः पण्डितैर्नयबाह्यकैः । युद्धे स्वल्पेन यत्नेन सपदास्थ निरस्यते ॥ २१ ॥
चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम् । शार्दूलवदतः कृत्वा ततश्चक्रुः प्रदक्षिणम् ॥ २२ ॥
ततस्तं तु महात्मानं चारा राक्षससत्तमम् । कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्मणः ॥ २३ ॥
ते सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ । प्रच्छन्ना ददृशुर्वीरौ सप्रग्रीवविभीषणौ ॥ २४ ॥
प्रेक्षमाणाश्रमं तौ च बभूवुर्भयविह्वलाः । ते तु वर्णप्रभा दृष्ट्वा राक्षसेन्द्रेण राक्षसाः ॥ २५ ॥

गो० टी०—हतावित्यर्थम् । कृतप्रत्यभिज्ञेत्यर्थः । अनेन तयोर्वध इति भावः ॥ १३ ॥

१५-१७] ति० टी०—प्रतिसन्धायेति सूत्रौ । आर्षोऽयं यो राक्षसत्वप्राकट्यापरयान्त इत्यन्वय स्वयम् ॥१५-१७॥

रा० टी०—एवमिति । इत्युक्तौ शुकसारणौ जयशब्देन रावणं प्रतिनन्द्य प्रशस्य अभिनिःसृतौ ॥ १६ ॥

गो० टी०—एवमिति । प्रतिनन्द्य प्रशस्य अभिनिःसृतौ वेगतौ ॥ १४ ॥

रा० टी०—अब्रवीदिति । मे चारान् उपस्थापय इति यत्नः महोदरमब्रवीत् ॥ १७ ॥

गो० टी०—अब्रवीदिति । चारानुपस्थापयेत्यब्रवीदित्यन्वयः ॥ १६ ॥

रा० टी०—तत इति । पार्थिवशासनात् सत्त्वरिता अतएव प्राप्ताः चाराः जयाशिषः वर्धयित्वा प्राञ्जलयः सन्तः उपस्थिताः समीपे तस्थुरित्यर्थः ॥ १८ ॥

गो० टी०—तत इति । स्पष्टः ॥ १६ ॥

१८] ति० टी०—चरांश्चारान् । प्रत्यायिकान्प्रत्यय एव प्रायस्तद्वत इत्यर्थः । 'अत इनिठनौ' । विश्वासोपेतानित्यर्थः ॥ १८ ॥

रा० टी०—तानिति । प्रत्यायिकान् विश्वासान् विगतसाध्वसान् निर्भयान् अतएव शूरान् वृत्तान् रावणोऽब्रवीत् १६

गो० टी०—तानिति । प्रत्यय एव प्रत्ययः ते प्राप्ताः यायिनः तान् विश्वासोपेतान् विगतसाध्वसान् विगतभयान् ॥ १७ ॥

२०-२५] ति० टी०—मन्त्रेषु विचारेषु अप्रकृतसा परस्तत्प्रयोजनेषु ॥ १६-२५ ॥

रा० टी०—पक्षप्रयत्नायेति—इत इति । रामस्य व्यवसायं अस्य रामस्य मन्त्रेषु ये अभ्यन्तराः ये च तेन रामेण स सहायाः तयोः च व्यवसायं परीक्षितुं इतो गच्छत ॥ २०

रा० टी०—व्यवसायस्वरूपमाह—कथमिति । कथं स्वपिति करोतीति सर्वं निपुणं यथा स्यात्तथा विज्ञाय अव गन्तव्यम् ॥ २१ ॥

गो० टी०—इत इति । व्यवसायं कर्तव्यनिश्चयम् परी क्षया परीक्ष्य । शिथिलव्यवसायेषु हृतं भीषयेम इति भावः अत्र रामस्य मन्त्रिषु ये अभ्यन्तराः अन्तरङ्गभूता इत्यर्थः ते रामेण श्लाघिता सङ्गताः सिलभूता इत्यर्थः तानपि परी क्ष्यैव । तत्रैतेषित्रे ताज् भेत्स्याम इत्याशयः । कथं स्वपिति किमेकः स्वपिति उत जाग्रद्भिरनेकैरावृतः स्वपिति । अत एव सर्वं प्रवर्तयिष्याम इति दृश्यम । कथं जागर्ति कि जिताकृतः उपायाकुल इत्यर्थः । आर्षं व्यत्ययेन प्रहरिष्यतीत्याकूतम् । किमन्यच्च करिष्यति किं कंचित्कालं विश्रम्य तत्प्रयत्नं करिष्यति इत्र सर्वं इति । आर्षं क्रमेण तत्प्रवर्तयिष्यतीति तात्पर्यम् । निपुणं प्रत्यक्षमिति यावत् विज्ञायेति पञ्चमिदम् । सर्वम् उक्तं स्वापादिकम् अशेषतः सर्वप्रकारेण विज्ञायागन्तव्यम् । अशेषतः अशेषप्रकारेणेति वार्थः । अशेष इत्युत्तरत्रापि वा ॥ १८ ॥ १९ ॥

रा० टी०—चारेणेति । चारेण विदितः कालाक्षमः वहुपार्षिणः युद्धे क्षमासाः स्वल्पेन यत्नेन निरस्यते ॥ २१

गो० टी०—उक्तमाशयं विशदयति—चारेणेति । विदितो निपुणैः वहुपार्षिणैः चारेण चारद्वारेण अवगतो विदितः शत्रुः युद्धे स्वल्पेन यत्नेन सपदास्थ निरस्यते ॥ २० ॥

रा० टी०—चारा इति । तथेत्युक्त्वा ते चाराः शत्रु प्रयाणचारेङ्गितज्ञः कृत्वा राक्षसेश्वरं प्रदक्षिणं चक्रुः ॥ २२ ॥

विभीषणेन तत्रस्था निगृहीता यदृच्छया । शार्दूलो ग्राहितस्त्वेकः पापोऽयमिति राक्षसः ॥ २६
मोक्षितैः सोऽपि रामेण वध्यमानः प्लवंगमैः । अनुशंसेन रामेण मोक्षिता राक्षसाः परे ॥ २७
वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः । पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः ॥ २८
ततो दशग्रीवमुपस्थितास्ते चारा बहिर्नित्यचरा निशाचराः ।
गिरेः सुवेलस्य समीपवासिनं न्यवेदयन्राघवलं महाबलाः ॥ २९

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ।

रावणेन वानरसेनां चारयितुं प्रेषितः शार्दूलो नाम राक्षसः रावणाय सेनासु प्रमुखान् वानरान्वर्णयति ।

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः । सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १

गो० टी०–चारा इति । चाराः शार्दूलमग्रतः कृत्वा प्रदक्षिणीकृत्य राक्षसेश्वरं रावणम् प्रदक्षिणं चक्रुः ॥ २५ ॥

रा० टी०–तत इति । चाराः यत्र रामस्तत्र जग्मुः ॥ २३ ॥

गो० टी०–तत इति । कृत्वा प्रदक्षिणमित्यनुवादो मध्ये विलम्बाभावयोजनार्थम् ॥ २४ ॥

रा० टी०–ते इति । ते चाराः प्रच्छन्नाः सन्तः सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ ददृशुः ॥ २४ ॥

गो० टी०–ते सुवेलस्येति । प्रच्छन्नाः वेषान्तरधारिणः ॥ २३ ॥

रा० टी०–प्रेक्षमाणा इति । अथ प्रेक्षमाणा ते चाराः भयविह्वलाः बभूवुः अथ पृथक् ॥ २५ ॥

रा० टी०–ते इति । ते चाराः धर्मात्मना विभीषणेन दृष्टाः निगृहीताश्च ॥ २६ ॥

गो० टी०–प्रेक्षमाणा इति । भयविह्वलाः भयेन दीनाः ॥ ४

गो० टी०–ते त्विति । धर्मात्मना राक्षसेन्द्रेण । विभीषणेनेत्यर्थः ॥ २६ ॥

२६] ति० टी०–शार्दूलः परानचारो ग्राहितः । विभीषणेनेति शेषः । एको ग्राहित इत्यत्र हेतुः -पापोऽयमिति । अनिर्दिष्ट इत्यर्थः ॥ २६ ॥

रा० टी०–शार्दूल इति । अयमेव एको राक्षसः पापोऽयमिति वचनेन ग्राहितो विभीषणेन बोधितः शार्दूलोऽभवदिति शेषः अत एव प्लवङ्गमैर्वध्यमानः स शार्दूलो रामेण मोक्षितः ॥ २७ ॥

गो० टी०–विभीषणेनेति । निगृहीताः तर्जिता इत्यर्थः । ग्राहितः ग्राणं प्रापितः ॥ २६ ॥

२७–२८] ति० टी०–सोऽपि शार्दूलोऽपि परे शार्दूलसहायभूतास्ते च मोचिताः ॥ २७ ॥ २८ ॥

रा० टी०–अनुशंसेनेति । वानरैरर्दिताः परे अन्येऽपि ते चाराः अनुशंसेन क्रूरत्वलेशरहितेन रामेण मो अत एव लङ्कामनुप्राप्ताः । सार्धश्लोक एकान्वयी ॥ २

गो० टी०–मोक्षित इति । मोचिताः प्रहारादिभि

गो० टी०–वानरैरिति । अर्दिताः पीडिताः । वि रित्यत्र विक्रममात्रयोर्लघुविक्रमैरित्यत्र जवमात्रं वि निर्दिश्यते ॥ २८ ॥

२९] ति० टी०–बहिर्नित्यचराः स्वदेशाद्बहिः शान्तपरिज्ञानाय नित्यप्रवृत्ताः । सुवेलसमीपवासि रा रावणं न्यवेदयन् ॥ २९ ॥

इति श्रीरामभिरामे श्रीरामायणतिलके वाल्म आदिकाव्ये युद्धकाण्डे एकोनत्रिंशः सर्गः ॥ २९

रा० टी०–तत इति । दशग्रीवम् उपस्थिताः बहिर्नित्यचराः चाराः सुवेलस्य गिरेः समीपवासिनम् ते रावणं न्यवेदयन् ॥ २९ ॥

इति श्रीमद्गलभीकविरचितायां रामायणव्याख्याने रामायणतिलके युद्धकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

गो० टी०–तत इति । बहिर्नित्यचराः परराष्ट्रेषु ज्ञानाय सदा संचारशीलाः । समीपवासिनमिति शेषम् ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे सप्त व्याख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–संदर्शनक्रमे निवेदनमत्र प्रदक्षिणकरण इति । चराः चारणः सुवेले शैले निविष्टं राघवलं प्रत्यवेदयन् ॥ १ ॥

गो० टी०–अथ शार्दूलादिचारवचने त्रिंश तत सुवेले इत्यनेन समीपवे समसौ सुवेलस्य स पूर्वोक्तलक्षणः ॥ १ ॥

१ मोचित इति ॥ चारा । २ अनुशंसेन । अत्र मोचित

णा रावणः श्रुत्वा प्राप्तं रामं महाबलम् । जातोद्वेगोऽभवत्किंचिच्छार्दूलं वाक्यमब्रवीत् ॥ २ ॥
।वच्च ते वर्णो दीनश्चासि निशाचर । नासि कश्चिदमित्राणां क्रुद्धानां वशमागतः ॥ ३ ॥
ते नानुशिष्टस्तु वाचं मन्दमुदीरयन् । तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ॥ ४ ॥
ते चारयितुं शक्या राजन्वानरपुंगवाः । विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः ॥ ५ ॥
पि संभावितुं शक्याः संप्रश्नोऽत्र न लभ्यते । सर्वतो दृश्यते पन्था वानरैः पर्वतोपमैः ॥ ६ ॥
प्तमात्रे ज्ञातोऽहं बले तस्मिन्विचारिते । बलाद्गृहीतो रक्षोभिर्बहुधास्मि विचारितः ॥ ७ ॥
भिर्मुष्टिभिर्दन्तैस्तलैश्चाभिहतो भृशम् । परिणीतोऽस्मि हरिभिर्बलमध्ये अमर्षणैः ॥ ८ ॥
णीय च सर्वत्र नीतोऽहं रामसंसदि । रुधिरस्रावदीनाङ्गो विह्वलश्चलितेन्द्रियः ॥ ९ ॥
भिर्वध्यमानश्च याचमानः कृताञ्जलिः । राघवेण परित्रातो मामेति च यदृच्छया ॥ १० ॥
। शैलशिलाभिस्तु पूरयित्वा महार्णवम् । द्वारमाश्रित्य लङ्कायां रामस्तिष्ठति सायुधः ॥ ११ ॥

२] ति० टी०—चाराणाम् । वचनादिति शेषः । वर्णः । दीनं प्रति प्राप्तं लङ्कासमीपमागतं श्रुत्वेत्यन्वयः ॥ २ ॥

चाराणामिति । चाराणां चारेभ्यः रामं प्राप्तं श्रुत्वा रा-ः जातोद्वेगोऽभवत् शार्दूलं किंचिदश्रीव किञ्चिदिति जातो-ा इत्यन्वयः ॥ २ ॥

गो० टी०—चाराणामिति । चाराणां चारेभ्यः ॥ २ ॥

३] ति० टी०—अमित्राणां वशमागतोऽसि कश्चिदिति॥३॥

रा० टी०—तत्स्वरूपमाह—अयथावदिति । ते वर्णः यथावत् पूर्ववदाकृतीत्यर्थः, अत एव दीनोऽसि अमित्राणां रूपं वर्णं नागतोऽसि कश्चित् कश्चित् प्रश्नार्थकमव्ययम् ॥३॥

गो० टी०—अयथेति । शत्रुगृहीतत्वेन तेषां स्वरूपं किं जातमिति भावः ॥ ३ ॥

४] ति० टी०—तेनानुशिष्टः पृष्ट इत्यर्थः ॥ ४ ॥

रा० टी०—इतीति । तेन रावणेन अनुशिष्टः पृष्टः शार्दूलः शार्दूलं राक्षसश्रेष्ठं रावणं वाचमुदीरयत् उदैरयत् ॥ ४ ॥

गो० टी०—इतीति । अनुशिष्टः पृष्टः । उदीरयत् अडभाव-र्षः ॥ ४ ॥

५] ति० टी०—चारयितुं चारैर्विचारयितुम् ॥ ५ ॥

रा० टी०—तदाकारमाह—नेत्यादिभिः । वानरपुङ्गवाः चारयितुं चारैर्ज्ञातुं न शक्याः । तत्र हेतुः—संभावितुमपि न याः अत एव संप्रश्नः को भवानित्यादिवचनमत्र वानरमु-ौ न लभ्यते उच्चारयितुं च शक्यते तत्र हेतुः—सर्वतः सर्व-ेण वानरैः पन्थाः दृश्यते तत्र प्रवेश एव दुर्घट इति पर्यव-श्लोकद्वयं संमिलितान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—न त इति । चारयितुं चारविषयीकर्तुम् । न याः चारसंचारविषया न भवन्तीत्यर्थः ॥ ५ ॥

६] ति० टी०—यतः संभावितुमशक्या, अतोऽत्र संप्रश्नो विना वैपरीत्यशङ्कां न लभ्यते ॥ ६ ॥

गो० टी०—सर्वत इति । प्रविष्टमात्रे प्रविष्ट एव । अचा-रिते अन्वयिपर्यवसाने ॥ ७ ॥

७] ति० टी०—विचारिते विचारयितुं प्रकान्ते । रक्षो-भिर्विभीषणसचिवैर्विचारितो बहुप्रकारगत्या चालितः ॥ ७ ॥

रा० टी०—प्रविष्टेति । विचारिते अतिविचारशीले तस्मिन् बले मया प्रविष्टमात्रे सति रक्षोभिरहं ज्ञातः अत एव गृहीतः विचारितः इतस्ततः परिभ्रमितोऽस्मि ॥ ७ ॥

गो० टी०—बलादिति । रक्षोभिः विभीषणसचिवैः विचारितः मुहुः परिवर्तितः परिणीतः परितो नीतः सर्वतः परिणीय सर्वेषां निकटं चारोपमिति घोषणपूर्वकम् परिणीतेत्यर्थः । रामसंसदं रामसभाम् । विह्वलः मूर्च्छितः । मूर्च्छालिङ्गितत्वादपि अलितेन्द्रियः ग्रस्यमानः त्राणमिति शेषः । परित्रात इत्यङ्गवादात् ॥ ८ ॥ १० ॥

८] ति० टी०—परिणीतोऽस्मि हरिभिर्वध्यमानैर्वध्यतामिति घोषणार्थमित-स्ततो नीतोऽस्मि ॥ ८ ॥

रा० टी०—जानुभिरिति । जानुप्रभृतिभिः करणैर्वानरैर्हे-रामभिहतः परिणीतः सर्वमहावानरसन्निधौ प्रापितोऽस्मि॥८॥

९] ति० टी०—पदेषु—परिणीत्य च सर्वत्रेति । रुधिरस्रावी अतो दीनाङ्गोऽहमिति कर्मधारयः ॥ ९ ॥

रा० टी०—परिणीयेति । रुधिरस्रावमनसीत्य-अत एव दीनाङ्गः स एव स इति कर्मधारयः अत एव विह्व-लोऽहं सर्वत्र परिणीय पापस्य रामसंसदि नीतः ॥ ९ ॥

१०-११] ति० टी०—यदृच्छया पृष्टेन रामेण वा वध्यतामिति परित्रातः ॥ १० ॥ ११ ॥

रा० टी०—हरिभिरिति । हरिभिर्वध्यमानोऽत एव वध्य-मानोऽहं यदृच्छयामामेत्युक्त्वा राघवेण परित्रातोऽस्मि ॥ १०

१ चारयितुं इति गो० पाठः । २ ज्ञातमिति गो० पाठः । ३ अभिहतो इति गो० पाठः । ४ वध्यमानैरिति गो० पाठः । ५ परित्रातोऽस्मि गो०

गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः । मां विक्रम्य महातेजा लङ्कामेवाभिवर्तते ॥ ११
पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु । सीतां वापि प्रयच्छाशु युद्धं वापि प्रदीयताम् ॥ १२
मनसा तत्तदा प्रेक्ष्य तच्छ्रुत्वा राक्षसाधिपः । शार्दूलं सुमहद्वाक्यमथोवाच स रावणः ॥ १३
यदि मां प्रतियुद्ध्यन्ते देवगन्धर्वदानवाः । नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ १४
एवमुक्त्वा महातेजा रावणः पुनरब्रवीत् । चरिता भवता सेना केऽत्र शूराः प्लवंगमाः ॥ १५
किंप्रभाः कीदृशाः सौम्य वानरा ये दुरासदाः । कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि शोभन ॥ १६
तथात्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम् । अवश्यं खलु संधानं कर्तव्यं युद्धमिच्छता ॥ १७
अथैवमुक्तः शार्दूलो रावणेनोत्तमश्वरः । इदं वचनमारेभे वक्तुं रावणसंनिधौ ॥ १८
अथर्क्षरजसः पुत्रो युधि राजन्सुदुर्जयः । गदद्स्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः ॥ २०

गो० टी०-राघवेणेत्यर्थम् । जीवामीति यदृच्छया । इदानीं जीवनं वाहच्छिकमित्यर्थः । यद्वा इतीति स्वशरीरप्रदर्शनम् । अनयावस्थं ते वर्णो दीनश्चासि निशाचरेति पुनम् ॥ ११ ॥

रा० टी०-पुर इति । शैलशिलादिभिर्महार्णवं पूरयित्वा सेतुं कृत्वेत्यर्थः । लङ्कायाः द्वारमाश्रित्य एष रामस्तिष्ठति ॥ १२

गो० टी०-पुर इति । द्वारमाश्रित्य तिष्ठतीति वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ १२ ॥

१३] ति० टी०-गरुडव्यूहमास्थायेति प्रस्थानार्थम्। पूर्वं तु स्थितिकालत्वाद्गरुडव्यूह आसीत् ॥ १२ ॥

रा० टी०-गरुडेति । गरुडव्यूहमास्थाय रचयित्वेत्यर्थः, मां विक्रम्य योधयित्वा च हरिभिर्वृतो रामः लङ्कामेवाभिवर्तते ॥ १२ ॥

गो० टी०-गरुडेति । स्पष्टः ॥ १३ ॥

१३-१५] ति० टी०-पुरेत्यादयस्त्रयोदश ॥ १३-१५ ॥

रा० टी०-पुरेति । लङ्कायाः पुरः प्राकारम् आयाति आयास्यति अतः एकतरं त्रिषु वृक्षेषु एकतरत्वाद्-सीतां प्रयच्छ वा युद्धं प्रयच्छ ॥ १३ ॥

गो० टी०-पुरेति । पुरः लङ्कायाः प्राकारम् आयाति । आयास्यतीत्यर्थः । "वा शब्दयोर्विकल्पार्थयोः" एकतरं द्वयोरेकम् । "एकाद्याः पूरणाः" इति संज्ञा । एकतरमित्युक्ते विज्ञायेति-सीतामिति ॥ १४ ॥

रा० टी०-मनसेति । तत् इतीतं श्रुत्वा प्रेक्ष्य विचार्य च राक्षसाधिपः रावणः ॥ १३ ॥

गो० टी०-मनसेति । मनसा प्रेक्ष्य आत्मीयं तं शार्दूलमुवाचेत्यन्वयः ॥ १३ ॥

रा० टी०-तदुक्तमाह—यदीति । अत्र पूर्वं व्याकरणा० ॥ १४ ॥

गो० टी०-संहारमपि कर्तुमसमर्थं वदतीत्यभिप्रेत्याह—यदीति ।

युद्धयेरन् तथापि सीतां न प्रदास्यामि । सर्वलोकेभ्यो भयं न प्रदास्यामीति योजना ॥ १६ ॥

१६-१७] ति० टी०-चरिता भवता । दैवगत्वा पार्थं पणयनेनेति भावः ॥ १६ ॥ १७ ॥

रा० टी०-एवमिति । एवमुक्त्वा रावणः पुनरब्रवीत् तदाकाङ्क्षामाह-सेना भवता चरिता अत्र सेनायां शूराः प्लवंगमाः के ॥ १६ ॥

रा० टी०-कीदृशा इति । ये वानराः दुरासदाः कीदृशाः किं प्रभावाः किंप्रमाणाश्च कस्य पुत्राः कस्य पौत्राः तत्सर्वं त्वमाख्याहि ॥ १७ ॥

गो० टी०-एवं प्रथमपक्षस्यालाभतया द्वितीयपक्षे व्यमाणः तत्र ज्ञानव्यतिरेकं प्रश्नयति—एवमित्यादि-त्रयम् । भवता सेना चारिता चारविषयीकृता । सम्यक् इत्यर्थः । अत्र सेनायाम् के शूराः ये दुरासदाः ते की दृशाश्चेत्यन्वयः । किंप्रभाः किंप्रभावाः कस्य पुत्राः कस्य पौत्राः तत्सर्वं तेषां वानराणां भावमाख्याहि ॥ १७-१९ ॥

१८-१९] ति० टी०-तथा तदनुसारेण ॥ १८ ॥

रा० टी०-अत्रप्रयोजनमाह—तथेति । तेषां वानराणां बलाबलं ज्ञात्वा तथा तदनुसारेण प्रतिपत्स्यामि विधास्यामि यतो युद्धमिच्छता पुरुषेण संख्यानं सेनाविचारः इयं कर्तव्यम् ॥ १८ ॥

रा० टी०-अथेति । एवमुक्तः शार्दूलः इदं वचनं आरेभे ॥ १९ ॥

गो० टी०-कथं किं प्रयोजनमित्यत्राह-तथेति । एवमाख्याते सति तेषां बलाबलं ज्ञात्वा, अत्र वानरेषु प्रतिपत्स्यामि प्रतिपत्स्ये कर्तव्यं ज्ञास्यामीत्यर्थः ॥ २० ॥

२०] ति० टी०-गदद्स्य जाम्बवतः क्षेत्रजात्[1] यद्यपि 'जाम्बवाञ्जूम्भमाणस्य मम वक्त्रजायेत' इ

१ अजीक्षे गो० पाठः । २ वाक्यैः इति गो० पाठः । ३ वधुवं वेति गो० पाठः । ४ तमिति गो० पाठः । ५ पुरोवर्ति गो० पाठः । ६ गो० पाठः । ७ कीदृशः किंप्रभावा इति स० पाठः । ८ राक्षसेति गो० पाठः । ९ वर्तेति गो० पाठः । १० वर्तेति गो० पाठः । ११ [illegible]

स्यैव पुत्रोऽन्यो गुरुपुत्रः शतक्रतोः । कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम् ॥ २१ ॥
श्चात्र धर्मात्मा पुत्रो धर्मस्य वीर्यवान् । सुषेणः सोमपुत्रश्चात्र राजन्दधिमुखः कपिः ॥ २२ ॥
वो दुर्मुखश्चात्र वेगदर्शी च वानरः । मृत्युर्नरस्वरूपेण नूनं सृष्टः स्वयंभुवा ॥ २३ ॥
। हुतवहस्यौत्र नीलः सेनापतिः स्वयम् । अनिलस्य तु पुत्रोऽत्र हनूमानिति विश्रुतः ॥ २४ ॥
ष्मा शक्रस्य दुर्धर्षो बलवानप्रदो युवा । मैन्दश्च द्विविदश्चोभौ बलिनावश्विसंभवौ ॥ २५ ॥
पुत्रा वैवस्वतस्यैते पञ्च कालान्तकोपमाः । गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ २६ ॥
दश वानरकोट्यश्च शूराणां युद्धकाङ्क्षिणाम् । शेषाः केसरिपुत्राणां शेषं नाख्यातुमुत्सहे ॥ २७ ॥
पुत्रो दशरथस्यैष सिंहसंहननो युवा । दूषणो निहतो येन खरश्च त्रिशिरास्तथा ॥ २८ ॥
नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन । निहतो विटपी येन कबन्धश्चान्तकोपमः ॥ २९ ॥

स्युत्पत्तिः श्रुता, तथापि जृम्भणसमय उत्तरस्यां दिशि गन्धमादनक्षेत्रमाविश्य तेन रूपेण परिणतत्वादोषः ॥ २० ॥

रा० टी०—तदाकारमाह—अर्क्षेत्यादिभिः । ऋक्षरजसः क्षेत्रजस्यापि पुत्रः जाम्बवानिति विश्रुतः अत्रास्तीति शेषः । न्यतरस्य क्षेत्रजत्वात् न द्विपुत्रत्वविरोधः न च जाम्बवतः क्षमाणस्य समत्वकादजायतेति भगवद्वचनेनेदं विरुध्यत इति वाच्यं जृम्भणरूपभगवच्छक्तेः गद्गदक्षेत्रद्वारैव निष्पादितेनादोषात् ॥ २० ॥

गो० टी०—अर्क्षेति । अर्क्षपुत्रत्ववचनारम्भे द्वितीयोऽर्थशब्दः पूरणे । राजा सुग्रीवः । पाञ्चाली न्यायेन गद्गदेन पोषितत्वात्पुत्रो जाम्बवान् तस्य ब्रह्मणो जृम्भारम्भसंभूतत्वात् २१-२२] ति० टी०—अन्यः पुत्रो पुत्रः । शतक्रतोरुरुः । बृहस्पतिपुत्र इत्यर्थः । अयं केसरीति शेषः । यस्य केसरिणः पुत्रेण हनूमतैकेन रक्षसां कदनं कृतं पूर्वमित्यर्थः २१॥२२

रा० टी०—गद्गदस्येति । शतक्रतोः गुरोः बृहस्पतेः पुत्रो गद्गदस्य अन्यो द्वितीयः पुत्रः केसरीत्यर्थः, अत्र वसते इत्यत्र महाप्रकरणेन यस्य केसरिणः पुत्रेण हनुमता रक्षसां कदनं विध्वंसनं कृतम् ॥ २१ ॥

गो० टी०—गद्गदस्येति । अन्यः पुत्रः भूम्नः । जाम्बवानिति गद्गदस्य द्वौ पुत्रावित्यर्थः । यस्य पुत्रेणैकेन महता रक्षसां कदनं हननं कृतम् स केसरी शतक्रतोर्गुरुः बृहस्पतिः तस्य पुत्रः सापेक्षत्वेपि गमकत्वात् समासः ॥ २२ ॥

रा० टी०—सुषेण इति । धर्मस्य पुत्रः सुषेणोऽत्र इति । सोमात्मजोऽत्र ॥ २२ ॥

गो० टी०—सुषेणश्चेति । धर्मस्य देवतायाः । नन्वत्र वरुणो यमास सुषेणं नाम वानरमिति बालकाण्डोक्तम् । सत्यमुक्तं अत्र धर्मशब्देनोच्यते । शार्दूलो वा भयाकूलोन्यथा श्रुतः । अन्योयं सुषेण इत्यप्याहुः । एवमन्यत्रापि ज्ञेयम॥ २३॥

२३-२५] ति० टी०—मृत्युः सृष्टः । सुमुखादयो मृत्युरा इत्यर्थः ॥ २३-२५ ॥

रा० टी०—सुमुख इति । वेगदर्शी स्वस्ववेगदर्शनशीलः नो दुर्मुखः वानरत्वेन मृत्युश्च स्वयंभुवा सृष्टः ॥ २३ ॥

गो० टी०—सुमुख इति । मृत्युरेव स्वयंभुवा सुमुखादिरूपेण सृष्टः । सुमुखादयो मृत्युमुख्या इत्यर्थः । यद्वा सुमुखादयो मृत्युपुत्रा इत्यर्थः ॥ २४ ॥

रा० टी०—पुत्र इति । नीलः हुतवहस्य वह्नेः पुत्रोऽत्र इति । इति विश्रुतोऽकिल्बिषस्य वायोः पुत्रोऽत्र केसरिणः क्षेत्रजः [illegible] नेव विरुद्धम् ॥ २४ ॥

गो०टी०—पुत्रो हुतवहस्येति । अनिलस्य पुत्रः औरसः । [illegible] तत्र विष्णुरूपनिर्देशो गोत्रित्वक्षत्रियाभ्यामिति पक्षान्तरम् ॥ २४ ॥

रा० टी०—मैन्द इति । अश्विनः अश्वस्य नासा पुत्रयुक्तः मैन्दो द्विविदश्च अश्विनौ अश्विनोः पुत्रौ ॥ २५ ॥

गो० टी०—मैन्द इति । अत्र बलशब्दोपेक्षामात्र्यात् पौत्र [illegible] ॥ २५ ॥

२६] ति० टी०—पञ्च यमपुत्रपरिगणनम्—गज इत्यादि ॥ २६ ॥

रा० टी०—पुत्रा इति । गजादयः पञ्च वैवस्वतस्य पुत्राः [illegible] ॥ २६ ॥

गो० टी० पुत्रा इति । स्पष्टः ॥ २६ ॥

२७-२९] ति० टी०—दश वानरकोट्य इति । वानरेति कुलपतीत्यनुवचनान्तम् । तच्छेषपरिणामम्—शूराणामित्यादि । नाख्यातुमुत्सहे । अशक्त्यगणकत्वात् ॥ २७-२९ ॥

रा० टी०—दशेति । शूराणां केसरिपुत्राणां वानराणां दश कोट्यः सन्तीति शेषः, शेषान् अन्यान् आख्यातुं नोत्सहे सामर्थ्यं नास्तीत्यर्थः, वानरेति । समासषष्ठीयं वचनान्तम् ॥ २७ ॥

गो० टी०—दशेति । वानरकोट्य इत्यत्र वानरेत्यविभक्तिकनिर्देशः । "सुपां सुलुक्०" इत्यादिना षष्ठ्या लुक् । वानराणामित्यर्थः । शेषं जन्मैरथादि । नोत्सहे न शक्नोमि ॥ २७ ॥

रा० टी०—पुत्र इति । येन दूषणादिनिहतः स एष दशरथस्य पुत्रः ॥ २८ ॥

गो० टी०—पुत्र इति । सिंहसंहननः रमणीयावयवसन्निवेशात् । वराकृत्योपेतो यः सिंहसंहननो हि स इत्यमरः ॥ २९ ॥

१ ब्रह्मणो जृम्भा० । २ ब्रह्मणो जृम्भा० । ३ ब्रह्मणो जृम्भा० । ४ ब्रह्मणो जृम्भा० । ५ ब्रह्मणो जृम्भा० । ६ ब्रह्मणो जृम्भा० । ७ ब्रह्मणो जृम्भा० । ८ ब्रह्मणो जृम्भा० । ९ ब्रह्मणो जृम्भा० । १० ब्रह्मणो जृम्भा० । ११ ब्रह्मणो जृम्भा० ।

[कु] न शक्तो रामस्य गुणान्कश्चिन्नरः क्षितौ । जनस्थानगता येन तावन्तो राक्षसा हताः ॥ ३०
लक्ष्मणश्चात्र धर्मात्मा मातङ्गानामिवर्षभः । यस्य बाणपथं प्राप्य न जीवेदपि वासवः ॥ ३१
श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसंभवौ । वरुणस्यार्थे पुत्रोऽभूं हेमकूटः खगंगमः ॥ ३२
वैश्वकर्मसुतो वीरो नलः प्लवगसत्तमः । विक्रान्तो वेगवानत्र वसुपुत्रः स दुर्धरः ॥ ३३
राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः । श्रीतमूढ पुरीं लङ्कां राघवस्य हिते रतः ॥ ३४ ॥
इति सर्वं समाख्यातं तथा वै वानरं बलम् । सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान्गतिः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ।

रामं वानरसैन्यस्थं श्रुत्वा भयोद्विग्नः पौलस्त्योऽमात्यैः सह मन्त्रयामास तान्विसृज्य विद्युज्जिह्वेन मायाविना राक्षसेनाकल्पस्य राज्ञः सत्वं भर्ता मया हत इति कौशलेन विद्युज्जिह्वेनानीतं रामस्य शिरस्तामदर्शयत् ततो मूर्छितापि मैथिली त्रिजटामायेनेति बोधिता शुचं जहौ ।

ततस्तमक्षोभ्यबलं रैक्षुकायां नृपतेश्चराः । सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥

रा० टी०-नास्तीति । रामसहशः कथं न नास्ति ॥ २९ ॥
गो० टी०-नास्तीति । स्पष्टः ॥ ३० ॥
३०-३२] ति० टी०-यतो दूषणादयस्तेन विहताः, अतस्तस्य गुणानकं न कोऽपि शक्त इत्यन्वयः ॥ ३०-३२ ॥
रा० टी०-यत्नुमिति । रामगुणान् नकुं कश्चिच्छक्तः ३० ।
गो० टी०-यत्नुमिति । ये जनस्थानगताः ते यावन्तः सर्वेति हता इत्यर्थः । यावत्तावत् सार्वत्रम इत्यमरः ॥ ३१ ॥
रा० टी०-लक्ष्मण इति । यस्य बाणपथं प्राप्य वासवो जीवेत् स मातङ्गानामृषभः श्रेष्ठगज इव लक्ष्मणः अत्र रामार्थे वर्तत इति शेषः ॥ ३१ ॥
गो० टी०-लक्ष्मण इति । लक्ष्मणेन इक्ष्वाकुवंश्य पुत्र इत्याक्षिप्यते । मातङ्गानामिवर्षभः गजश्रेष्ठ इव स्थितः ॥ ३२ ॥
रा० टी०-श्वेत इति । भास्करस्यात्मसंभवौ पुत्रौ श्वेतो ज्योतिर्मुखश्च हेमकूटो वरुणस्य पुत्रोऽभूत् ॥ ३२ ॥
गो० टी०-श्वेत इति । स्पष्टः ॥ ३३ ॥
३३-३४] ति० टी०-दुर्धरस्तारुण्यः ॥ ३३ ॥ ३४ ॥
रा० टी०-विश्वकर्मेति । नलो विश्वकर्मसुतः सुदुर्धरो वसुपुत्रोऽभूत् ॥ ३३ ॥
गो० टी०-विश्वकर्मेति । सुदुर्धरः सुदुर्धरनाम्ना ॥ ३४ ॥
रा० टी०-राक्षसानामिति । विभीषणः लङ्कां प्रतिभूय रावणात्संयाप्य रावणस्य हिते स्थितोऽतीति शेषः ॥ ३४ ॥
गो० टी०-राक्षसानामिति । लङ्कां रामात् वरिभूय तस्य हिते रतो विभीषणस्तव भ्रातेत्यन्वयः ॥ ३४ ॥
३५] ति० टी०-अतस्त्वं गतिः प्रमाणम् निर्णायक इति शेषः । यावत् तावत् सार्वत्रम इत्यमरः । वैश्वकर्मसुतौ शरभगन्धमादनावुभौ । बालकाण्डे वरुणात्सुषेणः पर्जन्यान्शरभः कुबेरात्पनसो गन्धमादन उक्त इति चेत्र, तत्तत्संज्ञकानामनेकेषामपि सम्भवे विरोध इति तीर्थः ॥ ३५ ॥

इति श्रीरामाश्रिताभे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०-इतीति । इत्यनेन प्रकारेण सुवेलेऽधिष्ठितं वानरबलं समाख्यातं शेषकार्ये भवान् गतिर्निर्णायक इत्यर्थः, न च बालकाण्डे वरुणात्सुषेणः पर्जन्यात्शरभः कुबेरादुनसादनः इत्युक्त्या अत्रोक्तं सुषेणस्य वर्षभुवत्वं शरभगन्धमादनयोः वैश्वकर्मसुतत्वं च विरुध्यते इति वाच्यं अन्येषामपि तत्तत्नामकत्वेन विरोधाभावात् ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रिंशः सर्गः ॥ ३० ॥

गो० टी०-इतीति । गतिः प्रमाणम् । अत्र वानरबलं प्रायशो बालकाण्डोक्तविरोधादेतत्सर्गं विनापि पूर्वोत्तरकथासंघट्टनाच्च सर्गोऽयं कल्पित इत्याहुः ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

१] ति० टी०-तत इति ॥ १ ॥
रा० टी०-शार्दूलवचनश्रवणानन्तरकालिकं रावणं प्रति भारान्तराणां वचनमाह—तत इति । ततः रावणस्य च चाराः सुवेले शैले निविष्टमक्षोभ्यबलं रामं च प्रत्यवेदयन् ॥
गो० टी०-अथ सीताभोहनमुक्तविधे । कथासंग्रहन. पूर्वसर्गोक्तमनुवदति—तत इति । स्पष्टः ॥ १ ॥

१ चारा इति गो. पाठः । २ ऋक्षेति गो. पाठः । ३ अन्य इति गो. पाठः । ४ वलमिति गो. पाठः । ५ विरोध इति गो. रा. पाठः । ६ पर्जन्यात्शरभ इति गो. पाठः । ७ विरुद्धमिति गो. रा. पाठः । ८ लक्ष्मणपुत्रये इति गो. पाठः ।

चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् । जातोद्वेगोऽभवत्किंचित्सचिवानिदमब्रवीत् ॥ २ ॥
रावणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः । अयं नो मन्त्रकालो हि संप्राप्त इति राक्षसाः ॥ ३ ॥
इति तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन्द्रुतम् । ततः स मन्त्रयामास राक्षसैः सचिवैः सह ॥ ४ ॥
मन्त्रयित्वा तु दुर्धर्षः क्षमं यत्तदनन्तरम् । विसर्जयित्वा सचिवान्विवेश स्वमालयम् ॥ ५ ॥
ततो राक्षसमादाय विद्युज्जिह्वं महाबलम् । मायाविनं महामायं प्राविशद्यत्र मैथिली ॥ ६ ॥
विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः । मोहयिष्यावहे सीतां मायया जनकात्मजाम् ॥ ७ ॥
शिरो मायामयं गृह्य राघवस्य निशाचर । मां वं समुपतिष्ठस्व महच्च सशरं धनुः ॥ ८ ॥
एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः । दर्शयामास तां मायां सुप्रयुक्तां स रावणे ॥ ९ ॥
तस्य तुष्टोऽभवद्राजा ददौ च विभूषणम् । अशोकवनिकायां वै सीतादर्शनलालसः ॥ १० ॥
कैलासाभमधिपतिः संविवेश महाबलः । ततो दीनामदीनाही ददर्श धनदानुजः ॥ ११ ॥
अधोमुखीं शोकपरामुपविष्टां महीतले । भर्तारं चेतसुत्पान्तीमशोकवनिकां गताम् ॥ १२ ॥

२] ति० टी०—सचिवानुपमन्त्रिणः ॥ २ ॥

रा० टी०—चाराणामिति । रावणः चाराणां चारेभ्यः मं प्राप्तं श्रुत्वा जातोद्वेगोऽभवत् सचिवान् किंचिदब्रवीत् त्रिभिति जातोद्वेगान्वयि वा ॥ २ ॥

गो० टी०—चाराणामिति । चाराणां चारेभ्यः । जातो॰ ॥ः जातसंभ्रमः । सचिवान् मन्त्रिणः समीपस्थान ॥ २ ॥

३-४] ति० टी०—आयान्तु । पूर्वमुच्चनादिति शेषः ३-४

रा० टी०—तदाकारमाह—मन्त्रिण इति । अयं नोऽस्माकं स्वकालः संप्राप्तः अतः मन्त्रिणः शीघ्रमायान्तु ॥ ३ ॥

गो० टी०—मन्त्रिण इति । हे राक्षसाः ! अयं नो मन्त्र॰ ः संप्राप्तः इति हेतोः मन्त्रिणः समायान्त्विति इदं वाक्य॰ वदीदिति पूर्वेण सम्बन्धः । यद्वा इदमब्रवीदित्यस्य वाक्यान्तर्येनेतिरूपेण संबन्धः । राक्षसा इत्युत्तरशेषः । अथवा हे न्त्रिणः श्रूयन्तः आयान्तु स्वमीपमिति सचिवानब्रवीत् । रा॰ वा इति मन्त्रिविशेषणम् । सचिवै राक्षसैरित्यनुवादात् । समाहिताः रीतिकुशला इत्यर्थः ॥ ३ ॥

रा० टी०—तस्येति । तस्य रावणस्य तच्छासनं श्रुत्वा ऽणो द्रुतमभ्यागमन ततोऽनन्तरं रावणो मन्त्रयामास ॥ ४ ॥

गो० टी०—तस्येति । स्पष्टः ॥ ४ ॥

५] ति० टी०—यदनन्तरं श्रमम् । सीताप्राप्तावितिः ॥ ५ ॥

रा० टी०—मन्त्रयित्वेति । अनन्तरं शीघ्रं यत्क्षमं राज्ञः तत् मन्त्रयित्वा सचिवान् विसर्जयित्वा विभर्त्य ाख्यं प्रविवेश ॥ ५ ॥

गो० टी०—मन्त्रयित्वेति । समनन्तरं रामस्य समीपागन्तरम् । यत् क्षमं कर्तुमुचितं तन्मन्त्रयित्वेति योजना ॥ ५ ॥

६] ति० टी०—ततः स्वान्तःपुरप्रवेशानन्तरम् । मायाविनं मायावन्तम् । महामायं तादृशमायाप्रयोगकर्तारम् ॥ ६ ॥

रा० टी०—तत इति । ततो वेश्मप्रवेशानन्तरं मायाविनं विद्युज्जिह्वं समादाय यत्र मैथिली तत्र प्राविशत् ॥ ६ ॥

गो० टी०—तत इति । स्पष्टः ॥ ६ ॥

७] ति० टी०—मायाविनं विद्युज्जिह्वमब्रवीत् । वचनमाह॰ मोहयिष्यावहे इति ॥ ७ ॥

रा० टी०—विद्युज्जिह्वमिति । राक्षसाधिपः विद्युज्जिह्वमब्रवीत् । तदाकारमाह—मायया सीतां मोहयिष्यावहे ॥ ७ ॥

गो० टी०—विद्युज्जिह्वमित्यादि । शिर इति । पूर्व॰ दुर्धर्षा ॥ ७ ॥ ८ ॥

८] ति० टी०—मां त्वं समुपतिष्ठस्व । मत्समीपमाग॰ ष्ठेत्यर्थः ॥ ८ ॥

रा० टी०—मायाकारमाह—शिर इति । मायामयं राघवस्य शिः सशरं महच्च धनुः गृहीत्वा त्वं मां मत्समीपं समुपतिष्ठस्व ॥ ८ ॥

९] ति० टी०—रावणे रावणाधीनम् ॥ ९ ॥

रा० टी०—एवमिति । एवमुक्तः स विद्युज्जिह्वः तमेवाह एवमुक्तां रावणेनाज्ञापितां मायां कृत्वा रावणसन्निधौ दर्शयामास ॥ ९ ॥

गो० टी०—एवमिति । स्पष्टः ॥ ९ ॥

१०] ति० टी०—कृतायै विद्युज्जिह्वस्य मायायै आहूयेत्यादुः सम्भवणं पदं ॥ १० ॥

रा० टी०—तस्येति । तस्य विद्युज्जिह्वस्योपरि तुष्टोऽभवत् अत एव विभूषणं प्रददौ । अथ पूर्वार्ध॰—अशोकेति । सीता॰ दर्शनलालसो रावणः अशोकवनिकायां संविवेश ॥ १० ॥

गो० टी०—अशोकेति । स्पष्टः ॥ १० ॥

११-१२] ति० टी०—संविवेश प्रविवेश ॥ ११ ॥ १२ ॥

रा० टी०—तत इति । अदीनार्हो दीनतायाः अयोग्यो

१ ख. घ. ङ. पाठः । २ ग. घ. ङ. पाठः । ३ क. ङ. पाठः । ४ विदर्शयति गो. पाठः । ५ सत्व इति गो. पाठः । ६ [illegible]

उपास्यमानां घोराभी राक्षसीभिरदूरतः । उपसृत्य ततः सीतां प्रहर्षं नाम कीर्तयन् ॥ १३
इदं च वचनं धृष्टमुवाच जनकात्मजाम् । सान्त्व्यमाना मया भद्रे यैमाश्रित्य विमन्यसे ॥ १४
खरहन्ता स ते भर्ता राघवः समरे हतः । छिन्नं ते सर्वथा मूलं दर्पस्य निहतो मया ॥ १५
व्यसनेनात्मनः सीते मम भार्या भविष्यसि । विसृजैतां मतिं मूढे किं मृतेन करिष्यसि ॥ १६
भवस्व भद्रे भार्याणां सर्वासामीश्वरी मम । अल्पपुण्ये निष्टतार्थे मूढे पण्डितमानिनि ॥
शृणु भर्तृवधं सीते घोरं वृत्रवधं यथा ॥ ॥ १७ ॥
समायातः समुद्रान्तं हन्तुं मां किल राघवः । वानरेन्द्रप्रणीतेन बलेन महता वृतः ॥ १८ ॥
संनिविष्टः समुद्रस्य पीड्य तीरमथोत्तरम् । बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ १९ ॥
अथाध्वनि परिश्रान्तमर्धरात्रे स्थितं बलम् । सुखसुप्तं समासाद्य चैरितं प्रथमं चरैः ॥ २० ॥

दीनां तत्त्वेन प्रतीयमानां भर्तारं राममेव ध्यायन्तीम् अदूरतः समीपे घोराभी राक्षसीभिरुपास्यमानां सीतां वनदासजो ददर्श । अर्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०—तत इति । उपास्यमानाम् अनुव्रताम्॥११॥१२॥

१३-१४] ति० टी०—प्रहर्षं नाम कीर्तयन् । नामेत्यपरमार्थे अपरमार्थभूतं रामजयजं प्रहर्षं कीर्तयन् ॥१३॥१४॥

रा० टी०—उपसृत्येति । प्रहर्षं यथा स्यात्तथा नाम स्वाभिधा कीर्तयन्सन् सीतामुपसृत्य सीतासमीपं प्राप्य इदमब्रवीत् ॥ १३ ॥

गो० टी०—उपसृत्येति । प्रहर्षं नाम कीर्तयन् प्रहर्षवार्त्तां कीर्तयित्वेत्र । नामेत्यपरमार्थे ॥ १३ ॥

रा० टी०—तदाकारमाह—सान्त्व्यमानेति । यं राममाश्रित्य मया सान्त्व्यमाना प्रार्थ्यमाना त्वं विमन्यसे मत्प्रार्थनाङ्गीकारं नाकरोः स राघवः समरे हतः अतस्ते मूलं सर्वकारणं सर्वथा छिन्नम् अत एव दर्पो निहतः । सार्धश्लोक एकान्वयी ॥ १४ ॥ १५ ॥

गो० टी०—सान्त्व्यमानेति । मन्यसे जल्पसि । मां निष्ठुरमवद इत्यर्थः ॥ १४ ॥

१५] ति० टी०—ते मूलमस्मत्परिग्रहनिदानं सर्वथा सर्वप्रकारेण छिन्नम्, ते दर्पश्च मया निहतः ॥ १५ ॥

गो० टी०—छिन्नमिति । मूलम् आधारभूतम् । सर्वतः कात्स्न्येन । व्यसनेन निमित्तेन । प्रार्थना जिनेत्यर्थः ॥ १५ ॥

१६] ति० टी०—एवं कृत्वेन किं ते जातं तत्राह—व्यसनेनेति । आत्मनस्तव व्यसनेन मम भार्या भविष्यसि । तत्यन्तरामावात्त्वयसेति शेषः । एतां मतिं रामविषयां मतिम् ॥ १६ ॥

रा० टी०—नन्वेवंकृत्य सत्यत्वेऽपि अहं तल्लोकमेव गमिष्यामीत्यत आह—व्यसनेनेति । मूढे हे प्राप्तनिरोधे आत्मनो व्यसनेन पतिविरोधजदुःखेनोपलक्षिता त्वम् एनां तल्लोकगमनविषयां मतिं विसृज त्यज मृतेन लोकान्तरं गतेन तत्र्यो त्वं किं करिष्यसि तत्प्राप्तिर्न भविष्यतीत्यर्थः अतो मम भार्याः स्त्रियो भविष्यसि प्राप्स्यसि तासां सेव्या सती तत्रैव निवर्त्तस्वेत्यर्थः ॥ १६ ॥

गो० टी०—विसृजेति । मृतेन रामेण । भवस्वेत्यात्मपदमार्षम् ॥ १६ ॥

१७] ति० टी०—भवस्व । भवेत्यर्थः । निष्टतार्थे निष्टतं रामरूपोऽर्थो यस्यास्तादृशि । कथमिदं त्वया साधितमिति चेदुपायेनेत्याह—शृणुष्वेति ॥ १७ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—भवस्वेति । हे भद्रे अल्पपुण्ये अल्पानां क्षुद्राणामपि पुण्यं पवित्रत्वं यया सा मत्स्मरणादिना क्षुद्रा अपि पूता भवन्तीत्यर्थः, तत्संबोधनम् निष्टतोऽर्थो यस्याः सर्वार्थसंपत्त्येत्यर्थः, तत्संबोधनं मूढे प्राप्तनिरोधे पण्डितान्मन्यते सत्करोति तच्छीला तत्संबोधनम् मम भार्याणाम् ईश्वरी पूज्या त्वं भवस्व ॥ १७ ॥

रा० टी०—शृण्विति । हे सीते ! भर्तृवधं शृणु । तदाकारमाह—राघवो मां हन्तुं वानरेन्द्रप्रणीतेन युथपश्रेष्ठितेन बलेन वृतः सन् समुद्रान्तं समायातः । सार्धश्लोक एकान्वयी ॥ १८ ॥

गो० टी०—अल्पेति । निष्टतार्थे एतावत्पर्यन्तं निष्टतपुरुषार्थे । पण्डितमानिनि । "क्यङ्मानिनोश्च" इति ह्रस्वत्वम् ॥

१८] ति० टी०—प्रणीतेनानीतेन ॥ १८ ॥

गो० टी०—समायात इत्यादि । समुद्रान्तं समुद्रतीरम् प्रणीतेन आनीतेन । संनिविष्ट इति । स रामः समुद्रस्योत्तरं तीरं महता बलेन पीड्य पीडयित्वा । दिवा अस्तं प्रयाति सति निविष्टः ॥ १८ ॥ १९ ॥

१९] ति० टी०—अस्तं दिवाकरे व्रजति महाबलेन समुद्रस्योत्तरं तीरं संपीड्य रामः संनिविष्ट इत्यन्वयः ॥ १९ ॥

रा० टी०—संनिविष्ट इति । दिवाकरे अस्तं व्रजति सति महता बलेनोपलक्षितो रामः समुद्रस्योत्तरं तीरं पीड्य पीडयित्वा संनिविष्टः ॥ १९ ॥

२०] ति० टी०—बलं रामसेना । चरितं व्याप्तं तदलमिति शेषः ॥ २० ॥

---

१ इतस्ततः इति गो. पाठः । २ उपाश्रित्य त्वमस इति गो. पाठः । ३ सर्वत इति गो. पाठः । ४ ते निहत इति गो. पाठः । ५ इमां गो. पाठः । ६ संसुप्तमिति गो. पाठः । ७ चारितमिति गो. पाठः ।

प्रहस्तप्रणीतेन बलेन महता वृतम् । बलमस्य हतं रात्रौ यत्र रामः सलक्ष्मणः ॥ २१ ॥
प्रान्परिघांश्चक्रान्दृष्टीन्दण्डान्महायुधान् । बाणजालानि शूलानि भास्वरान्कूटमुद्गरान् ॥ २२ ॥
च तोमरान्पाशांश्चक्राणि मुसलानि च । उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ २३ ॥
सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना । असक्तं कृतहस्तेन शिराश्छिन्नं महासिना ॥ २४ ॥
षणः समुत्पत्य निगृहीतो यदृच्छया । दिशं प्रव्राजितः सैन्यैर्लक्ष्मणः प्लवगैः सह ॥ २५ ॥
ो ग्रीवया सीते भग्नया प्लवगाधिपः । निरस्तदनुकः सेते हनुमान्राक्षसैर्हतः ॥ २६ ॥
वानथ जानुभ्यामुत्पतन्निहतो युधि । पट्टिशैरवभिश्छिन्नो निकृत्तः पादपो यथा ॥ २७ ॥
ष द्विविदश्चोभौ तौ वानरवरर्षभौ । निःश्वसन्तौ रुदन्तौ च रुधिरेण परीवृतौ ॥ २८ ॥
ना व्यायतौ छिन्नौ मध्ये द्वारिनिषूदनौ । अनुष्वपन्ति मेदिन्यां पनसः पनसो यथा ॥ २९ ॥
चैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः । कुमुदस्तु महातेजा निष्कूजन्सायकैर्हतैः ॥ ३० ॥

रा० टी०—अथेति । अथानन्तरम् अर्धरात्रे स्थितम् अध्वनि परिश्रान्तम् अत एव सुखसुप्तं बलं चरैः चारैः समासाद्य प्राप्य चरितं चारकर्मणा ज्ञातम् ॥ २० ॥

गो० टी०—अथेति । कात्स्न्र्येथशब्दः । अध्वनि परिश्रान्तत एव स्थितम् । अर्धरात्रे सुखसंसुप्तं बलं प्रथममासाद्य विश्वासितमभूत् ॥ २० ॥

२१] ति० टी०—यत्र रामः सलक्ष्मणस्तत्रैवास्य बलं हतम् ॥ २१ ॥

रा० टी०—तदिति । यत्र रामः स्थितः तत्रैव अस्य बलं प्रहस्तप्रणीतेन बलेन रात्रौ हतम् ॥ २१ ॥

गो० टी०—तदिति । यत्र बले रामः सलक्ष्मणोऽवस्थितः तदस्य बलं प्रहस्तप्रणीतेन महता बलेन हतम् ॥ २१ ॥

२२-२३] ति० टी०—चक्रान्त्सबलान् । चक्राणीति पुनरेतान्युद्यम्योद्यम्य ते पट्टिशादयो वानरेषु पातिताः । सुप्तमबुद्धाः ॥ २२ ॥ २३ ॥

रा० टी०—बलहननप्रकारमाह—पट्टिशानिति । पट्टिशादीन् उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातितास्तेन वानरा इति सङ्गतिम् । अर्धचतुष्टयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०—पट्टिशानित्यादिश्लोकद्वयम् । पट्टिशान् खड्गविशेषान् परिघान् अर्गलानि चक्रान् क्षुद्रचक्राणि महायसनिर्मितान् दण्डविशेषणमेतत् कूटमुद्गरान् अयःकीलितगदाः यष्टीः केवलदण्डान् तोमरान् शूलाग्रगदान् शूलान् क्षेपणीः चक्राणि महाचक्राणि पट्टिशादीनुद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः । त इति शेषः ॥ २२-२३ ॥

२४] ति० टी०—कृतहस्तेन शिक्षितहस्तेनासक्तं यथा तथा छिन्नम् ॥ २४ ॥

रा० टी०—अथेति । प्रमथ्नातीति प्रमाथी तेन अतिशिक्षितेन प्रहस्तेन हस्ते कृतेन महासिना खड्गस्य रामस्य शिरः असक्तं यथा भवति तथा छिन्नम् ॥ २४ ॥

गो० टी०—अथेति । प्रमथ्नातीति प्रमाथी तेन कृतहस्तेन शिक्षितहस्तेन कर्त्रा महासिना करणेन असक्तं अविलम्बितं यथा भवति तथा छिन्नमित्यन्वयः ॥ २४ ॥

२५-२९] ति० टी०—समुत्पत्य यदृच्छया गतोऽपि निगृहीतः ॥ २५-२९ ॥

रा० टी०—विभीषण इति । समुत्पत्य उडीय विभीषणेन गृहीतः प्रहस्तेनेति शेषः अत एव सैन्यैः सह लक्ष्मणः दिशं प्रव्राजितः पलायितः ॥ २५ ॥

गो० टी०—विभीषण इति । विभीषणः समुत्पत्य गतोऽपि निगृहीत इत्यर्थः । प्रव्राजितः पलायितः ॥ २५ ॥

रा० टी०—सुग्रीव इति । भग्नया ग्रीवया सुग्रीवः शेते निरस्तो हतोऽस्य अत एव हतो हनुमान् शेते ॥ २६ ॥

गो० टी०—सुग्रीव इति । ग्रीवया उपलक्षित इति शेषः ॥ २६ ॥

रा० टी०—जाम्बवानिति । जानुभ्यामुत्पतन् जाम्बवान् युधि पट्टिशैर्निहतः अत एव निकृत्तः छिन्नः पादपो यथा तथा छिन्नः ॥ २७ ॥

गो० टी०—जाम्बवानिति । जानुभ्यां जानुनोः निहतः अत एव पट्टिशैश्छिन्नः जाम्बवान् निकृत्तः पादप इवाभूत् ॥ २७ ॥

रा० टी०—मैन्द इति । मैन्दो द्विविदश्चोभौ मध्ये अतिव्यायतौ प्रहस्तौ अत एव छिन्नौ अत एव निहतौ स्वकप्राणौ अभवतामिति शेषः । सार्धश्लोक एकान्वयी ॥ २८ ॥

गो० टी०—मैन्दश्चेति । व्यायतौ दीर्घशरीरौ । [illegible] कटिस्थाने ॥ २८ ॥

रा० टी०—अनिति । पनसः विदीर्णपक्वपनसफलानि पनसोदुम्बरसिति हरीक्षोदर्या शेते ॥ २९ ॥

गो० टी०—अनुतिष्ठतीति । अनुतिष्ठति शेते । पनसः [illegible] सफलम् । तथा खण्डितं इत्यर्थः ॥ २९ ॥

३०] ति० टी०—कुमुदस्तु महातेजा निष्कूजन्सायकैर्हतैः इति प्राङ्निपाठः ॥ ३० ॥

---

१ [illegible] गो० पाठः । २ दिश इति गो० पाठः । ३ अर्धरात्रे इति गो० पाठः । ४ [illegible] पाठः ।

कुदो बहुधिश्छिन्नः शरैराशाय राक्षसैः । पपात सहसा तस्मिन्नुदीच्यां दिशि निपतितोऽङ्गदः ॥ ३२
ये मथिता नागै रथजालैस्तथापरे । क्षेपणा मृदितास्तत्र वायुवेगैरिवाम्बुदाः ॥ ३३
प्रद्रुताश्च परे त्रस्ता हन्यमाना जवन्यतः । अन्वेतुरस्तु रक्षोभिः सिंहैरिव महाद्विपाः ॥ ३४
सागरे पतिताः केचित्केचिद्गगनमाश्रिताः । ऋक्षा वृक्षानुपारूढा वानरैर्व्यतिमिश्रिताः ॥ ३५
सागरस्य च तीरेषु शैलेषु च वनेषु च । विद्रुतास्ते विरूपाश्च राक्षसैर्वानरा हताः ॥ ३६
एवं तव हतो भर्ता सबलो मम सेनया । क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः ॥ ३७
ततः परमदुर्धर्षो रावणो राक्षसेश्वरः । सीतामासुपगृह्यार्यां राक्षसीमिदमब्रवीत् ॥ ३८
राक्षसं क्रूरकर्माणं विद्युज्जिह्वं समानय । येन तद्राघवशिरः सङ्ग्रामात्स्वयमाहृतम् ॥ ३९
विद्युज्जिह्वस्तदादाय शिरस्तत्सशरासनम् । प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ४०
अब्रवीत्ततो राजा रावणो राक्षसं स्थितम् । विद्युज्जिह्वं महाजिह्वं समीपपरिवर्तिनम् ॥ ४१
अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः । अवस्थां पश्चिमां भर्तुः कृपणां साधु पश्यतु ॥ ४२ ॥
एवमुक्तं तु तद्रक्षः शिरस्तत्प्रियदर्शनम् । उपनिक्षिप्य सीतायाः क्षिप्रमन्तरधीयत ॥ ४३ ॥

रा० टी०-कुसुद इति । सायकैः कृत्तदो हतः ॥ ३० ॥
गो० टी०-नाराचैरिति । निष्कूजः निःशब्दः ॥ ३० ॥
३१-३२] ति० टी०-राक्षसैरासाद्य प्राप्य छिन्नः ३१॥३२
रा० टी०-राक्षसै रासाद्य प्राप्य अङ्गदोऽङ्गदविशिष्टोऽङ्गदः छिन्नः अत एव रुधिरोद्गारी सन् क्षितौ निपतितः। सार्धकं एकान्वयी ॥ ३१ ॥
गो० टी०-अङ्गद इति । राक्षसैरासाद्य शरैश्छिन्नः निपतन्नङ्गदोऽङ्गदः क्षितौ पतितः ॥ ३१ ॥
रा० टी०-हरय इति । शयानाः अपरे हरयः वायुवेगैर्दलिताः मर्दिताः अम्बुदा इव नागैर्गजैः रथजालैश्च मथिताः ३२
गो० टी०-हरय इति । मथिताः शयानाः । अपरे हरयः वायुवेगैरम्बुदा इव नागै रथजालैश्च मृदिताः ॥ ३२ ॥
३३-३६] ति० टी०-जवन्यतोऽतिवेगेन इत्यन्वयः ३३।३६
रा० टी०-प्रद्रुता इति । जवन्यतः पृष्ठतः हन्यमानाः हताः अपरे वानराः सिंहैः प्रद्रुताः क्षुद्रद्विपा इव अद्रुताः भवन्तीति शेषः ॥ ३३ ॥
गो० टी०-प्रद्रुता इति । त्रस्ताः अत एवाभिद्रुताः । जवन्यतः पृष्ठतः । हन्यमानाः अपरे हरयः सिंहैः द्विपा इव द्रुताः ॥ ३३ ॥
रा० टी०-सागर इति । केचित्सागरे पतिताः वानरैर्व्यतिमिश्राः विभक्ताः ऋक्षा वृक्षानुपारूढाः ॥ ३४ ॥
गो० टी०-सागर इति । स्पष्टः ॥ ३४ ॥
रा० टी०-एवमित्यादि-सागरस्येति द्वाभ्याम् । विरूपाः राक्षसैः बहवः विद्रुताः वानरा हताः ॥ ३५ ॥
गो० टी०-सागरस्येति । विद्रुताः वानराः । विरूपाश्च वानराः ॥ ३५ ॥
रा० टी०-एवमिति । तव भर्ता सर्वं हतः क्षतजार्द्रं रुधिरव्याप्तम् अस्य रामस्य शिरस्तु आहृतम् ॥ ३६ ॥
गो० टी०-एवमिति । स्पष्टः ॥ ३६ ॥
३७-४१] ति० टी०-राक्षसीं सीतासमीपवर्तिनीम् ३७।४
रा० टी०-तत इति । रावणो राक्षसीमब्रवीत् ॥ ३७
गो० टी०-तत इति । राक्षसीं समीपवर्तिनीं काञ्चित्
रा० टी०-तदाकारमाह-राक्षसमिति । येन रा शिरः स्वयमाहृतं तं विद्युज्जिह्वं समानय ॥ ३८ ॥
गो० टी०-राक्षसमिति । स्पष्टः ॥ ३८ ॥
रा० टी०-विद्युज्जिह्व इति । तदाकारमाह—राव रावणानन्तरकाले तद् मायाकल्पितं सशरासनं शिरः गृहीत्वा रावणस्याग्रतः स्थितः ॥ ३९ ॥
रा० टी०-नमिति । विद्युज्जिह्वं रावणोऽब्रवीत् ॥
गो० टी०-विद्युज्जिह्व इति । ततः राक्षसीं प्रत्याज्ञाप्य वचनश्रवणानन्तरमेव ॥ ३९ ॥ ४० ॥
रा० टी०-तदाकारमाह-अग्रत इति । भर्तुः पश्चिमामवस्थां कृपणां सीता पश्यतु इति हेतोः दाशरथेः शिरः सीतायाः अग्रतः कुरु ॥ ४१ ॥
गो० टी०-अग्रत इति । पश्चिमामवस्थाम् । मरणमित्यर्थः ॥ ४१ ॥
४२] ति० टी०-शिरस्तत्प्रियदर्शनम् । रामशिरोवत् प्रियदर्शनमित्यर्थः । अन्तरधीयतापागच्छत् । अदृश्यीभूतमित्यर्थः । मयुक्तत्वधियेति भावः ॥ ४२ ॥
रा० टी०-एवमिति । एवमुक्तं राक्षसं विद्युज्जिह्वं प्रियदर्शनं शिरः सीतायाः समीपे स्थित्वा अन्तरधीयत । अन्तरधीयतेत्यनेन सीतायाः अग्रतः स्थितं शिरः रावणेनेति सूचितम् ॥ ४३ ॥

१ पतत इति गो. पाठः । २ निपतितोऽङ्गद इति गो. पाठः । ३ नागैरिति गो. पाठः । ४ [illegible] ५ नागैरिति गो. पाठः । ६ रथजालाग्रैरिति गो. रा. पाठः । ७ अभीति गो. पाठः । ८ वानरीं ऋक्षमालिनीं इति गो. [illegible] पाठः । १० राक्षसानि [illegible]

[illegible] भास्वरं कार्मुकं महत् । विधु [illegible]
[illegible] तच्च रामस्य कार्मुकं ज्यासमावृतम् । इह महस्तेनानीतं ते हृत्वा निशि [illegible]
स विद्युज्जिह्वेन सहैव तच्छिरो धनुश्च भूमौ विनिकीर्यमाणः ।
विदेहराजस्य सुतां यशस्विनीं ततोऽब्रवीत्तां भव मे वशानुगा ॥ [illegible]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ।

विद्युज्जिह्वेन दर्शितं धीर्यं धनुश्च रामस्य विलोक्य जानकी बहु विललाप तदैव केन चिद्भूतेनाहूतो रावणः संमन्त्र्यामात्यै सेनाहयामास ।

सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् । सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता ॥ १
नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम् । केशान्तदेशं च तं च चूडामणिं शुभम् ॥ २
एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता । विजगर्हेऽथ कैकेयीं क्रोशन्ती कुररी यथा ॥ ३
सकामा भव कैकेयि हतोऽयं कुलनन्दनः । कुलमुत्सादितं सर्वं त्वया कलहशीलया ॥ ४

गो० टी०-एवमिति । इप समीपे अन्तरधीयत अपागच्छत् ॥ ४२ ॥

४३-४४] ति० टी०-विक्षेपाचकर्ष ॥ ४३ ॥ ४४ ॥

रा० टी०-रावण इति । एतत्कार्मुकं धनुः रामस्येति ब्रुवन्नसन् रावणःकार्मुकं विक्षेप ॥ ४३ ॥

गो० टी०-रावणश्चेति । विक्षेप आचकर्ष । विद्युज्जिह्व इत्यादित्यर्थः । विधु लोकेषु विख्यातम् । वैष्णवत्वादिति भावः ४३

रा० टी०-इदमिति । तत्र रामस्येदं कार्मुकं मानुषं रामं हत्वा प्रहस्तेन विद्युज्जिह्वेनानीतम् ॥ ४४ ॥

गो० टी०-इदमिति । स्पष्टः ॥ ४४ ॥

४५] ति० टी०-स विद्युज्जिह्वेनेति च्छन्दोवशात्कारलोपः । विनिकीर्यमाणः विकिरन्नित्यर्थः ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

रा० टी०-स इति । विद्युज्जिह्वेन आनीतं शिरो धनुश्च सहैव रावणो विनिकीर्यनेवशानां स्त्रीणाम् अग्रतो अनुमाना निरन्तरं स्तूयमाना भव इति सां सीतामब्रवीत् । एत ज्ञापकादीदृशमपि छन्दः ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामशिरोधनुर्दर्शनो युद्धकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०-स इति । विद्युज्जिह्वस्य तलोप आर्षः । सहैव इत्र । विनिकीर्य शिरो धनुश्च पुरतः सीतायाः पुरतः क्षिप्त्वेत्यर्थः । विद्युज्जिह्वः शिरः प्रक्षिप्तवान् स्वयं धनुरिति । वशानुगास्त्वमन्तरमिति करणे द्रष्टव्यम् ॥ ४५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्ये युद्धकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

१] ति० टी०-सेति । हनूमताख्यातं सुग्रीवप्रतिसंसर्गं सुग्रीवरामसंबन्धं रावणकल्पितवानरवपुरुपपादकत्वेन इत्यर्थः ॥ १ ॥

२] ति० टी०-भर्तृसदृशमिति विभक्तिविपरिणामेन सर्वत्रान्वेति । केशान्तदेशं ललाटम् । तं केशान्तवर्तिनम्

३-४] ति० टी०-अभिज्ञानैरित्यादिः ॥ ३ ॥ ४ ॥

रा० टी०-रावण कर्तृकमायाप्रदर्शनानन्तरकालिकं [illegible] दृष्टान्तमाह-सेत्यादिभिः । शिरः कार्मुकं च दृष्ट्वा [illegible] आख्यातं सुग्रीवप्रतिसंसर्गं रामसुग्रीवयोः संबन्धं [illegible] संस्कृत्य भर्तुः सदृशं नयनादि च दृष्ट्वा एतैरुक्तैरभिज्ञानैः अभिज्ञाय रामस्यैवान्तरमनं ज्ञात्वा सुदुःखिता [illegible] रीव क्रोशन्ती विलपन्ती सती कैकेयीं ककयीशब्दवाचिनीं [illegible] विजगर्ह इ इति विस्मयेन च सकलस्वामिन्या अमात्यायाः कथमेवमभिज्ञानमिति वाच्यम् युद्धारम्भोपयोगि जनितदुःखाभावेन विचारस्यानुदयात् सदृश्यवस्तुदर्शनकाले सदृश्यस्यैवानिर्वार्यत्वाच्च मयोदापुरुषोत्तमरामाभिप्रायेण दापालनस्यावश्यकृतया मायाया अपि मयोदापालनस्यैवेति दिक् श्लोकत्रयमेकान्वयि ॥ १-३ ॥

गो० टी०-अथ सीताप्रलापो द्वात्रिंशे-स सीतेति श्लोकत्रयमेकं वाक्यम् ॥ हनुमता पूर्वं कथितम् । सुग्रीव संसर्गं रामस्य सुग्रीवप्रतिसंबन्धम् । रावणमुखाच्चुतेति गद्धा दृष्ट्वा ज्ञात्वेत्यर्थः । ज्ञानं च सुग्रीवप्रतिसंबन्धस्य णम् । अन्यत्र साक्षात्कारः । नयने इति द्वितीया । ज्ञम् भर्तुर्मुखसदृशमित्यर्थः । इदं वचनादावप्यन्वेति स्सदृशं ललाटम् । अभिज्ञानैः चिह्नैः । प्रमाणैः साक्षात्कि स्यमरः । अभिज्ञाय तदेव शिर इति प्रत्यभिज्ञायेत्यर्थः रामविषये ॥ १-३ ॥

किं नु कैकेय्या कृतं रामेण विप्रियम् । यत्तया राजपुत्रः त्वं प्रव्राजितो वनमुग्रम् ॥ ४ ॥
विमुक्त्वा तु वैदेही वेपमाना तपस्विनी । जगाम जगती बाला छिन्ना तु कदली यथा ॥ ५ ॥
सा मुहूर्तात्समाश्वस्य परिलभ्यात्थ चेतनाम् । तच्छिरः समुपादाय विललापायतेक्षणा ॥ ७ ॥
हा हतास्मि महाबाहो वीरव्रतमनुव्रत । इमां ते पश्चिमावस्थां गतास्मि विधवा कृता ॥ ८ ॥
प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते । सुवृत्तः साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ ९ ॥
महद्दुःखं प्रपन्नाया मग्नायाः शोकसागरे । यो हि मामुद्धरत्रातुं सोऽपि त्वं विनिपातितः ॥ १० ॥

रा० टी०–विहरणप्रकारमाह—सकामेत्यादिभिः । कैकेयी हे मन्थरे ! कुलनन्दनो हतः अतस्त्वं सकामा भव एतेन किं तवापि मनोरथो भद्र इति रुचितम् तत्र हेतुमाह त्वया वै कुलम् उत्सादितं विहिंसितम् ॥ ४ ॥

गो० टी०–सकामेति ॥ हे कैकेयि सकामा भव । सम्पूर्णकामा भवेत्यर्थः । कः काम इत्यत्राह–हत इति । कलहश्रीया कलहस्वभावया । कलहप्रयोजनयेति यावत् । त्वया सर्वं रघुवंशः उत्सादितं भवति । तथा कुलनन्दनोयं रामो हतः । राजनराजेन रामहननमेव त्वया संकल्पितं तदिदानीं विपरीतफलं ते जातम् । कुलतन्तुभूतरामहननेन तदेकपराः सर्वे नरतादयो हता एव कलह एव ते प्रयोजनं फलितमिति भावः ॥ ५–६] ति० टी०–आर्येण रामेणेत्यन्वयः । चीरवसनं कृत्वा मया सह प्रव्राजित इत्यन्वयः ॥ ५ ॥ ६ ॥

रा० टी०–आर्येणेति । आर्येण रामेण कैकेय्याः किं विप्रियं कृतं यस्माद्धेतोः मया सह रामो वनं प्रव्राजितः ॥५॥

गो० टी०–हेत्वन्तराभावादिमेव रामवनप्रव्राजने हेतुरित्याह–आर्येणेति । आर्येण सर्वप्रियकारिणेत्यर्थः । यत् येन कारणेन मया सह चीरवसनो रामः प्रस्थापितः तादृशं विप्रियं किं कृतम् ॥ ५ ॥

रा० टी०–एवमिति । वैदेही एवमुक्त्वा छिन्नकदलीव जगती भूमिं जगाम ॥ ६ ॥

गो० टी०–एवमिति । तपस्विनी शोचनीया जगतीं भूमिं जगाम । मूर्छितेत्यर्थः । बाला मृदुबुद्धिरित्यर्थः ॥ ६ ॥

७] ति० टी०–समुपास्थाय स्वसमीपे स्थापयित्वा । 'समुपाधाय' इति पाठान्तरम् ॥ ७ ॥

रा० टी०–सेति । सा सीता समाश्वस्य अतिश्वासं प्राप्य अथ चेतनां परिलभ्य च तत् मायामयं शिरः समुपास्थाय विललाप ॥ ७ ॥

गो० टी०–सेति । समाश्वस्य उच्छ्वासं प्राप्य । चेतनां ज्ञानम् । आयतेक्षणा अश्रुमिश्रत्वेन शिरोवलोकनार्थं विस्तृतलोचनेत्यर्थः ॥ ७ ॥

८] ति० टी०–वीरव्रतं सुहृदं पितृवाक्यपालनव्रतम् । हे तव नाथादिमां पश्चिमावस्थां गतास्मि । तामवस्थामाह–विधवा कृतेति ॥ ८ ॥

रा० टी०–विलापाकारमाह–हेत्यादिभिः । हे महाबाहो वीरव्रतमनुव्रत वीररीतिपालनशील ते पश्चिमामन्तिमामवस्थां गता दृष्टवत्यस्मि अत एव विधवा कृता विधिनेति शेषः ॥८

गो० टी०–हा हतेति । वीरव्रतं शत्रुमहत्वा न निवर्तिष्य इति संकल्पम् । अनुव्रत अनुप्राप्त । गतास्मि दृष्टवत्यस्मि गत्यर्था ज्ञानार्था इति न्यायात् । अतो विधवा कृता ॥ ८ ।

९] ति० टी०–नार्या भर्तुर्मरणं प्रथमं वैगुण्यं मुख्योऽनर्थः । यत्तु–भर्तुः प्रथमं मरणं नार्या वैगुण्यं दुश्चरित्रमूलमित्यर्थस्तत्र, एवं हि सर्वविधवानामसतीत्वापत्तेः । संवृत्तोऽतीतः ॥ ९ ॥

रा० टी०–प्रथममिति । प्रथमं नारीमरणात् पूर्वं भर्तुर्मरणं नार्याः वैगुण्यं महान् अनर्थः उच्यते अतः साधुवृत्तायाः ममाग्रतः यतस्त्वं संवृत्तस्तिरोहितः अतः सुवृत्तः महान् अनर्थः संपन्नः ॥ ९ ॥

गो० टी०–प्रथमं भर्तुर्मरणं भार्यादोषनिमित्तकं भवति तावत्र पश्यामीत्याह–प्रथममिति । प्रथमं भर्तुर्मरणं नार्या वैगुण्यं वैगुण्यहेतुकम् । सुवृत्तस्त्वं साधुवृत्तायाः ममाग्रतः संवृत्तः मृतः कथमिदं संगच्छत इति भावः । अस्मिन् पक्षे न सुवृत्तपदस्वारस्यम् । यद्वा भवन्मरणस्य मयोप एव हेतुरित्याह–प्रथममिति । विगुण एव वैगुण्यम् स्वार्थे ष्यञ् । प्रथमं भर्तुर्मरणं भार्यादोषनिमित्तकमिति सुप्रसिद्धम् अतो हे सुवृत्त साधुवृत्त । साधुवृत्तायाः सम्यग्जीवनवत्यायाः ममाग्रतस्त्वं मृतोसि मद्दैगुण्यहेतुकं त्वन्मरणमिति भावः । सुवृत्तेत्यनेन न दैगुण्यहेतुकं न भवतीति ज्ञापितम् ॥ ९ ॥

१०] ति० टी०–महद्दुःखं प्रपन्नाया मम मरणमेव मिति शेषः । हि यतो यस्त्वं मां त्रातुमुद्यतः सोऽपि त्वं विनिपातितः । राक्षसैरिति शेषः ॥ १० ॥

रा० टी०–महदिति । महत् दुःखं प्रपन्नायाः प्राप्तायाः अत एव शोकसागरे मग्नायाः ममदुःखमवलोक्येति शेषः त्रातुं यस्त्वमुद्यतः सोऽपि विनिपातितः ॥ १० ॥

गो० टी०–स्वस्य वैगुण्यसद्भावे निदर्शनमाह–दुःखादिति । दुःखाद्दुःखं अत्यन्तदुःखम् । प्रपन्नायाः वनप्रस्थानं प्रथमं तस्मादपि दुःखं रावणेनापहरणं तत्र प्राप्तायाः इत्यर्थः । स भर्तृमरणेन शोकसागरे निमग्नायाः इदं च पत्युः यस्य च

१ तं कैकेयीति गो. पाठः । २ वनस्थस्त्वया प्रस्थापित इति गो. पाठः । ३ सेति गो. पाठः । ४ मामवोपे ति. पाठः । ५ दुःखादुःखमिति गो.

सा चक्षुर्मम कौसल्या त्वया पुत्रेण राघव । वत्सला ते यथा धेनुर्विवत्सा वत्सला कृता ॥ ११
उदिष्टं दीर्घमायुस्ते दैवज्ञैरपि राघव । अनृतं वचनं तेषामल्पायुरसि राघव ॥ १२
अथवा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव । पश्चात्त्वेनं तथा कालो भूतानां प्रभवो ह्ययम् ॥ १३
अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् । व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने ॥ १४
तथा त्वं संपरिष्वज्य रौद्रयातिनृशंसया । कालरात्र्या मयाच्छिद्य हृतः कमललोचनः ॥ १५

[1] भावलक्षणम् " इत्यस्मिन्नर्थे । शोकसागरे मग्नायाः मोहसागरे मग्नायां मयि दुःखादुःखं प्रपन्नायाः प्रपन्नायां सत्यामपि मां त्रातुमुद्यतः सत्त्वमपि विनिपातित इति सम्बन्धः ॥ ११] ति० टी०—सा वत्सला मम चक्षुस्त्वया पुत्रेण लक्ष्मणसहितेन वत्सला धेनुरिव विवत्सा कृता ॥ ११ ॥

रा० टी०—सेति । त्वया पुत्रेण वत्सला या मम चक्षुः सा विवत्सा नष्टवत्सा वत्सला धेनुरिव कृता ॥ ११ ॥

गो० टी०—न केवलं ममैव दुःखं मातुश्चेत्याह—सेति । सा मम चक्षुः कौसल्या वत्सला धेनुर्यथा धेनुरिव त्वया पुत्रेण वत्सलेनैव विवत्सा कृता ॥ ११ ॥

१२] ति० टी०—दैवज्ञैः वसिष्ठादिभिरिति शेषः । तेऽल्पायुरसि, अतस्तेषां वचनं मिथ्या ॥ १२ ॥

रा० टी०—उदिष्टमिति । हे राघव ! दैवज्ञैर्ज्योतिर्विद्भिस्ते पुरुषस्य दीर्घमायुरिति कथितमतो हे राघव ! यदि त्वमल्पायुरसि तदा तेषां दैवज्ञानां वचनमनृतम् अपि पक्षे सत्यमेव ॥ १२ ॥

गो० टी०—उदिष्टमिति । यैः ब्राह्मणैः दीर्घमायुरित्यादिष्टं तेषां वचनमनृतमासीत् अनृतत्वे हेतुमाह—अल्पायुरसीति । अस्मिन्पक्षे राक्षोत्पत्तेन ते पराक्रमं दृष्ट्वा तैरेतत् शास्त्रं दृष्टमिति गम्यते ॥ १२ ॥

१३] ति० टी०—अथवेति । अथेति प्रश्ने । प्राज्ञस्य त्वयापि प्रज्ञा नश्यत्यथ नाशं प्राप्ता किम् । येन प्रज्ञादौ सत्यपि अरिवशं प्राप्त इति शेषः । वा अथवा हि यतः । भूतानां प्रभवः प्रभवाय हेतुस्तस्मादयमेनं प्राणिनं तथा तत्तत्कर्मफलं प्रापयति । कालः ईश्वरः, अतः प्राज्ञोऽपि प्राज्ञो जात इति भावः ॥ १३ ॥

रा० टी०—दैवज्ञवचनानृतत्वस्यासंभवं मनसि निधायैवमाह—अथेति । सतो जीवतोऽपि प्राज्ञस्य तव प्रज्ञा नश्यति अनश्यन् तिरोऽभवत् अथ किं हि यतः भूतानां प्रभवहेतुः अयं कालः एनं प्राणिनं तथा अदृष्टानुसारेण प्रवर्तयत्येव । वा एवार्थे ॥ १३ ॥

गो० टी०—अथवा तेषामनृतवादित्वं नास्त्येव किन्तु तवैव पर्यायात्तेषामपि प्रज्ञा नष्टेति पक्षान्तरमवलम्बते—अथवेति । प्रभवत्यस्मादिति प्रभवः भूतानां कारणभूतोऽयं कालात्मा यथा येन प्रकारेण एनं पवनविषयभूतम् । प्राज्ञमपि करोति तथा प्राज्ञस्य भविष्यदर्थेऽतीतोऽपि ।

मतः सत्पुरुषस्य प्रज्ञा तव त्वयि विषये नश्यति नष्टत्वेन [2] पूर्वमिन्द्रियपराक्रमेति तव कथं विपरिसिरित्यभिप्रायेण [3] विशेषणम् । तत्र पक्षान्तरमाह—अथवेति । एनं रामम् येन [4] रूपेण कालः पचति तथास्य प्राज्ञस्यापि प्रज्ञा नश्यति अतो [5] निरीयमिति भावः ॥ १३ ॥

१४] ति० टी०—हि यतस्त्वं व्यसनानां वर्जने उपायज्ञः स्वयमुक्तेन कुशलोऽसि । तस्मात्कस्मादकारणादेव दृष्टं पूर्वमदृष्टं मृत्युमापन्नः । अथ हेतुं न पश्यामीति भावः ॥ १४ ॥

१४ टी०—अदृष्टमिति । नयशास्त्रवित् अत एव व्यसनानां वर्जने निवर्तने उपायज्ञः अत एव कुशलस्त्वं अदृष्टमज्ञातं मृत्युं कस्मादापन्नः प्राप्तोऽसि ॥ १४ ॥

गो० टी०—अदृष्टमिति । हि यस्मात्त्वं व्यसनानां वर्जने [6] कुशलोऽसि अतः अदृष्टम् अचिन्तितं सौमित्रिकर्तृकं [7] एवं वा मरणम् कस्मादापन्नः कथमापन्नोऽसीत्यर्थः ॥ १४ ॥

१५] ति० टी०—मया कालरात्र्येत्यन्वयः । रौद्रया [8] तिनिर्दयया मया कालरात्र्या संपरिष्वज्यालिङ्गय बलात्कृत्य तथा त्वं हतो यथा नष्ट इति भावः ॥ १५ ॥

रा० टी०—तथेति । रौद्रया त्वद्वियोगिनीत्वेन भयावहया कृतया प्रतीयमानया अत एव क्रूरया क्रूरत्वेन प्रतिभासमानया अत एव कालरात्र्या तथा कालरात्रीतुल्यया मया सह परिष्वज्य मत्सौख्यं प्राप्यैवेत्यर्थः आलिङ्ग्य बलात् पित्राद्य त्वं लोकान्तरं गतः ॥ १५ ॥

गो० टी०—तथेति । रौद्रया क्रूरया कालरात्र्या [9] गर्भो समुद्भूतोऽनिर्विण्णेति तथा राक्षसी संपरिष्वज्य [10] मत्तः आच्छिद्य अपहृत्य तथा हतोसीति संबन्धः । [11] मयेति पाठः । रौद्रया अतिक्रूरतया अत्यन्तनिर्दयया [12] कालरात्र्या कर्त्र्या मया करणभूतया संपरिष्वज्य आलिङ्ग्य बलात्कृत्य तथा हत इति । कालरात्रिर्नाम सर्वभूतापहारिणी काचन शक्तिः । यद्वा मया कालरात्र्येति व्यस्तरूपकम् । [13] परिष्वज्य त्वमालिङ्ग्य बलाद्धृतोसीति द्योत्यते पूर्वमुक्तप्रकारेण त्वेन कृतया मे परिष्वङ्ग एव तेन्तेहेतुरासीदित्यर्थः । विशेषणं रौद्रेरत्यन्तत्वेन तथोक्तम् । कमललोचनेति [14] कमललोचनत्वात् त्वं कालरात्र्या हृतोसि । परिष्वङ्गस्तरूपकालङ्कारः ॥ १५ ॥

---

[1] भावलक्षणम् गो० पाठः । [2] पूर्वमिन्द्रियपराक्रमेति गो० पाठः । [3] विशेषणमिति गो० पाठः । [4] रूपेण गो० पाठः । [5] निरीयमिति गो० पाठः । [6] कुशलोऽसि गो० पाठः । [7] [illegible] [8] तिनिर्दयया [illegible] [9] गर्भो [illegible] [10] मत्तः [illegible] [11] मयेति [illegible] [12] कालरात्र्या [illegible] [13] परिष्वज्य [illegible] [14] कमललोचनत्वात् [illegible]

[illegible] महाबाहो मां विहाय तपस्विनीम् । [illegible] पृथिवीं [illegible] ॥ १६ ॥
[illegible]तं सततं यैस्त्वयाऽर्चितमार्यमया तव । इदं ते धनुः काञ्चनभूषितम् ॥ १७ ॥
[illegible] दशरथेन त्वं श्वशुरेण समानघ । सर्वैः पितृभिः सार्धं नूनं स्वर्गं समागतः ॥ १८ ॥
[illegible] नक्षत्रभूतं च महत्कर्म कृतं तथा । पुण्यं राजर्षिवंशस्य त्वमात्मनः समुपेक्षसे ॥ १९ ॥
[illegible] मां न प्रेक्षसे राजन्कि वा न प्रतिभाषसे । बालां बालेन संग्रामां भार्यां मां सहचारिणीम् ॥ २० ॥
संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया । स्मर तत्साधु कौरव्य नय मामपि दुःखिताम् ॥ २१ ॥
कस्मान्मामपहाय त्वं गतो गतिमतां वर । अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखिताम् ॥ २२ ॥
कल्याणैः रुचिरं गात्रं परिष्वक्तं मयैव तु । क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते ॥ २३ ॥

१६] ति० टी०—मां विहाय प्रियां नारीमिव पृथिवीं [illegible] ॥ १६ ॥

रा० टी०—इहेति । पृथिवीं तद्राज्यमिव प्रियां मां विहाय इह अस्मिन् समये क्षेपे ॥ १६ ॥

गो० टी०—उपक्षेप इति । तपस्विनीं क्षोभणीयाम् । प्रियां मत्तः प्रियाम् पुरुषपर्यन्तेनेन दक्षिणस्य शठत्वमुक्तम् । इति क्षेप उच्यते ॥ १६ ॥

१७] ति० टी०—मया सह तव त्वयार्चितं मत्प्रियं [illegible] । जानमिति शेषः ॥ १७ ॥

रा० टी०—अर्चितमिति । इदं ते धनुः यत्नात् सम्यक् मयाऽर्चितम् ॥ १७ ॥

गो० टी०—अर्चितमिति । मया सह तव त्वया यदर्चितं तत्ते धनुः इदम एतादृशं जानमित्यर्थः ॥ १७ ॥

१८] ति० टी०—सर्वैः पितृभिः सार्धं स्थितेन दशरथेन स्वर्गे त्वं समागत इत्यन्वयः ॥ १८ ॥

रा० टी०—पितृभिरिति । मम श्वशुरेण तव पित्रा सर्वैः पितृभिः पितामहादिभिश्च सार्धं स्वर्गे त्वं समागतोऽसि ॥ १८ ॥

गो० टी०—पितृभिरिति । सर्वैः पितृभिः सार्धं स्थितेन दशरथेन समागत इति संबन्धः ॥ १८ ॥

१९–२०] ति० टी०—दिवीति नक्षत्रभूतम् । त्रिशङ्कोरात्माच्छन्नित्यायेन वंशस्य तथात्वम् । महता पितृवधरूपेण कर्मणा कृतम् । तथा पुण्यमासाद्यात्मनः प्रियं पुण्यं राजर्षिवंशं समुपेक्षसे त्यक्त्वा गच्छसि । एतदन्याय्यमित्यर्थः ॥ १९ ॥ २० ॥

रा० टी०—दिवीति । येन त्वया दिवि नक्षत्रभूतं सर्वत्र प्रकाशमानमित्यर्थः महत्कर्म कृतं स त्वम् आत्मनो राजर्षिवंशं समुपेक्षसे किमर्थमिति शेषः ॥ १९ ॥

गो० टी०—दिवीति । महत्कर्मकृतां महापुण्यमेकतामात्मभाव आपेः । प्रियं कर्मफलत्वेन काङ्क्षणीयं पुण्यम् । आत्मनो राजर्षिवंशश्चाक्षुषप्रसूत्रम् दिवि नक्षत्रभूतः विभक्तस्त्वं समुपेक्षसे पश्यसि ॥ १९ ॥

रा० टी०—किमिति । बालां संग्रामां मां बालेन भर्त्रा त्वयेव हेतुभूतेन किं न प्रेक्षसे ॥ २० ॥

गो० टी०—किमिति । बालां बाल्येन संग्रामाम् बाल्यं त्वयोढामित्यर्थः । भार्यां सदा भर्तुं योग्याम् मां मृतदशावस्थामापन्नां सहचारिणीं मां किं न प्रेक्षसे किं न प्रतिभाषस इति सम्बन्धः ॥ २० ॥

२१–२२] ति० टी०—पाणिं गृह्णता त्वया 'त्वया सह चरिष्यामि प्रमादिकम्' इति यत्संश्रुतं प्रतिज्ञातं तत्स्मर । अतो दुःखितां मामपि नय ॥ २१ ॥ २२ ॥

रा० टी०—संश्रुतमिति । पाणिं गृह्णता त्वया चरिष्यामि प्रमादि सौख्यं करिष्यामीति यत् संश्रुतं प्रतिज्ञातं तत् स्मर । अत एव मामपि नय ॥ २१ ॥

गो० टी०—संश्रुतमिति । मम पाणिं गृह्णता चरिष्यामि सह चरिष्यामीति यत् संश्रुतं प्रतिज्ञातं तत्स्मर । स्मृत्वा मामपि त्वत्समीपं नय ॥ २१ ॥

रा० टी०—कस्मादिति । मामपहाय वने आनीतां दुःखितां मां त्यक्त्वा अस्माल्लोकात् अमुं परं लोकं कृतोऽसि । अपहायेति अपपूर्वकगत्यर्थकहाधातुप्रकृतिकल्यप् ॥ २२ ॥

गो० टी०—कस्मादिति । त्यक्त्वा त्वां विहाय दुःखितां मामपि प्रेयसीमपि माम् अपहाय अस्माल्लोकात् लोकं परलोकम् कस्माद्धेतोः गतोसि ॥ २२ ॥

२३] ति० टी०—कल्याणैर्मङ्गलै रुचिरं यत्तव तदेतावत्कालपर्यन्तं मयैव परिष्वक्तं तत्तव शरीरमद्य दैवैर्विपरिकृष्यते ॥ २३ ॥

रा० टी०—कल्याणैरिति । कल्याणैरनेकमाङ्गलिकैः रुचिरं यत्तव गात्रं मया परिष्वक्तं तत्ते शरीरं क्रव्यादैः कृष्यते ॥ २३ ॥

गो० टी०—कल्याणैरिति । मदिरेक्षणेत्यादि [illegible] कृष्यते [illegible] चिरम् [illegible] परिष्वक्तं तत्तव परिष्वक्तं ज्ञात्वा

१ उपेति गो. पाठः । २ रुमामिति गो. पाठः । ३ यत्तदिति गो. पाठः । ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ बालेनेति गो. पाठः । ९ [illegible] १० [illegible] ११ [illegible] १२ [illegible] १३ [illegible] १४ [illegible] १५ [illegible] १६ [illegible] १७ [illegible] १८ [illegible] १९ [illegible] २० [illegible] २१ [illegible] २२ [illegible] २३ [illegible] २४ [illegible] २५ [illegible] २६ [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ [illegible] ३२ [illegible] ३३ [illegible] ३४ [illegible] ३५ [illegible] ३६ [illegible] ३७ [illegible] ३८ [illegible] ३९ [illegible] ४० [illegible] ४१ [illegible] ४२ [illegible] ४३ [illegible] ४४ [illegible] ४५ [illegible] ४६ [illegible] ४७ [illegible] ४८ [illegible] ४९ [illegible] ५० [illegible] ५१ [illegible] ५२ [illegible] ५३ [illegible] ५४ [illegible] ५५ [illegible] ५६ [illegible] ५७ [illegible] ५८ [illegible] ५९ [illegible] ६० [illegible] ६१ [illegible] ६२ [illegible] ६३ [illegible] ६४ [illegible] ६५ [illegible] ६६ [illegible] ६७ [illegible] ६८ [illegible] ६९ [illegible] ७० [illegible] ७१ [illegible] ७२ [illegible] ७३ [illegible] ७४ [illegible] ७५ [illegible] ७६ [illegible] ७७ [illegible] ७८ [illegible] ७९ [illegible] ८० [illegible] ८१ [illegible] ८२ [illegible] ८३ [illegible] ८४ [illegible] ८५ [illegible] ८६ [illegible] ८७ [illegible] ८८ [illegible] ८९ [illegible] ९० [illegible] ९१ [illegible] ९२ [illegible] ९३ [illegible] ९४ [illegible] ९५ [illegible] ९६ [illegible] ९७ [illegible] ९८ [illegible] ९९ [illegible] १०० [illegible] १०१ [illegible] १०२ [illegible] १०३ [illegible] १०४ [illegible] १०५ [illegible] १०६ [illegible] १०७ [illegible] १०८ [illegible] १०९ [illegible] ११० [illegible] १११ [illegible] ११२ [illegible] ११३ [illegible] ११४ [illegible] ११५ [illegible] ११६ [illegible] ११७ [illegible] ११८ [illegible] ११९ [illegible] १२० [illegible] १२१ [illegible] १२२ [illegible] १२३ [illegible] १२४ [illegible] १२५ [illegible] १२६ [illegible] १२७ [illegible] १२८ [illegible] १२९ [illegible] १३० [illegible] १३१ [illegible] १३२ [illegible] १३३ [illegible] १३४ [illegible] १३५ [illegible] १३६ [illegible] १३७ [illegible] १३८ [illegible] १३९ [illegible] १४० [illegible] १४१ [illegible] १४२ [illegible] १४३ [illegible] १४४ [illegible] १४५ [illegible] १४६ [illegible] १४७ [illegible] १४८ [illegible] १४९ [illegible] १५० [illegible] १५१ [illegible] १५२ [illegible] १५३ [illegible] १५४ [illegible] १५५ [illegible] १५६ [illegible] १५७ [illegible] १५८ [illegible] १५९ [illegible] १६० [illegible] १६१ [illegible] १६२ [illegible] १६३ [illegible] १६४ [illegible] १६५ [illegible] १६६ [illegible] १६७ [illegible] १६८ [illegible] १६९ [illegible] १७० [illegible] १७१ [illegible] १७२ [illegible] १७३ [illegible] १७४ [illegible] १७५ [illegible] १७६ [illegible] १७७ [illegible] १७८ [illegible] १७९ [illegible] १८० [illegible] १८१ [illegible] १८२ [illegible] १८३ [illegible] १८४ [illegible] १८५ [illegible] १८६ [illegible] १८७ [illegible] १८८ [illegible] १८९ [illegible] १९० [illegible] १९१ [illegible] १९२ [illegible] १९३ [illegible] १९४ [illegible] १९५ [illegible] १९६ [illegible] १९७ [illegible] १९८ [illegible] १९९ [illegible] २०० [illegible] २०१ [illegible] २०२ [illegible] २०३ [illegible] २०४ [illegible] २०५ [illegible] २०६ [illegible] २०७ [illegible] २०८ [illegible] २०९ [illegible] २१० [illegible] २११ [illegible] २१२ [illegible] २१३ [illegible] २१४ [illegible] २१५ [illegible] २१६ [illegible] २१७ [illegible] २१८ [illegible] २१९ [illegible] २२० [illegible] २२१ [illegible] २२२ [illegible] २२३ [illegible] २२४ [illegible] २२५ [illegible] २२६ [illegible] २२७ [illegible] २२८ [illegible] २२९ [illegible] २३० [illegible] २३१ [illegible] २३२ [illegible] २३३ [illegible] २३४ [illegible] २३५ [illegible] २३६ [illegible] २३७ [illegible] २३८ [illegible] २३९ [illegible] २४० [illegible] २४१ [illegible] २४२ [illegible] २४३ [illegible] २४४ [illegible] २४५ [illegible] २४६ [illegible] २४७ [illegible] २४८ [illegible] २४९ [illegible] २५० [illegible] २५१ [illegible] २५२ [illegible] २५३ [illegible] २५४ [illegible] २५५ [illegible] २५६ [illegible] २५७ [illegible] २५८ [illegible] २५९ [illegible] २६० [illegible] २६१ [illegible] २६२ [illegible] २६३ [illegible] २६४ [illegible] २६५ [illegible] २६६ [illegible] २६७ [illegible] २६८ [illegible] २६९ [illegible] २७० [illegible] २७१ [illegible] २७२ [illegible] २७३ [illegible] २७४ [illegible] २७५ [illegible] २७६ [illegible] २७७ [illegible] २७८ [illegible] २७९ [illegible] २८० [illegible] २८१ [illegible] २८२ [illegible] २८३ [illegible] २८४ [illegible] २८५ [illegible] २८६ [illegible] २८७ [illegible] २८८ [illegible] २८९ [illegible] २९० [illegible] २९१ [illegible] २९२ [illegible] २९३ [illegible] २९४ [illegible] २९५ [illegible] २९६ [illegible] २९७ [illegible] २९८ [illegible] २९९ [illegible] ३०० [illegible] ३०१ [illegible] ३०२ [illegible] ३०३ [illegible] ३०४ [illegible] ३०५ [illegible] ३०६ [illegible] ३०७ [illegible] ३०८ [illegible] ३०९ [illegible] ३१० [illegible] ३११ [illegible] ३१२ [illegible] ३१३ [illegible] ३१४ [illegible] ३१५ [illegible] ३१६ [illegible] ३१७ [illegible] ३१८ [illegible] ३१९ [illegible] ३२० [illegible] ३२१ [illegible] ३२२ [illegible] ३२३ [illegible] ३२४ [illegible] ३२५ [illegible] ३२६ [illegible] ३२७ [illegible] ३२८ [illegible] ३२९ [illegible] ३३० [illegible] ३३१ [illegible] ३३२ [illegible] ३३३ [illegible] ३३४ [illegible] ३३५ [illegible] ३३६ [illegible] ३३७ [illegible] ३३८ [illegible] ३३९ [illegible] ३४० [illegible] ३४१ [illegible] ३४२ [illegible] ३४३ [illegible] ३४४ [illegible] ३४५ [illegible] ३४६ [illegible] ३४७ [illegible] ३४८ [illegible] ३४९ [illegible] ३५० [illegible] ३५१ [illegible] ३५२ [illegible] ३५३ [illegible] ३५४ [illegible] ३५५ [illegible] ३५६ [illegible] ३५७ [illegible] ३५८ [illegible] ३५९ [illegible] ३६० [illegible] ३६१ [illegible] ३६२ [illegible] ३६३ [illegible] ३६४ [illegible] ३६५ [illegible] ३६६ [illegible] ३६७ [illegible] ३६८ [illegible] ३६९ [illegible] ३७० [illegible] ३७१ [illegible] ३७२ [illegible] ३७३ [illegible] ३७४ [illegible] ३७५ [illegible] ३७६ [illegible] ३७७ [illegible] ३७८ [illegible] ३७९ [illegible] ३८० [illegible] ३८१ [illegible] ३८२ [illegible] ३८३ [illegible] ३८४ [illegible] ३८५ [illegible] ३८६ [illegible] ३८७ [illegible] ३८८ [illegible] ३८९ [illegible] ३९० [illegible] ३९१ [illegible] ३९२ [illegible] ३९३ [illegible] ३९४ [illegible] ३९५ [illegible] ३९६ [illegible] ३९७ [illegible] ३९८ [illegible] ३९९ [illegible] ४०० [illegible] ४०१ [illegible] ४०२ [illegible] ४०३ [illegible] ४०४ [illegible] ४०५ [illegible] ४०६ [illegible] ४०७ [illegible] ४०८ [illegible] ४०९ [illegible] ४१० [illegible] ४११ [illegible] ४१२ [illegible] ४१३ [illegible] ४१४ [illegible] ४१५ [illegible] ४१६ [illegible] ४१७ [illegible] ४१८ [illegible] ४१९ [illegible] ४२० [illegible] ४२१ [illegible] ४२२ [illegible] ४२३ [illegible] ४२४ [illegible] ४२५ [illegible] ४२६ [illegible] ४२७ [illegible] ४२८ [illegible] ४२९ [illegible] ४३० [illegible] ४३१ [illegible] ४३२ [illegible] ४३३ [illegible] ४३४ [illegible] ४३५ [illegible] ४३६ [illegible] ४३७ [illegible] ४३८ [illegible] ४३९ [illegible] ४४० [illegible] ४४१ [illegible] ४४२ [illegible] ४४३ [illegible] ४४४ [illegible] ४४५ [illegible] ४४६ [illegible] ४४७ [illegible] ४४८ [illegible] ४४९ [illegible] ४५० [illegible] ४५१ [illegible] ४५२ [illegible] ४५३ [illegible] ४५४ [illegible] ४५५ [illegible] ४५६ [illegible] ४५७ [illegible] ४५८ [illegible] ४५९ [illegible] ४६० [illegible] ४६१ [illegible] ४६२ [illegible] ४६३ [illegible] ४६४ [illegible] ४६५ [illegible] ४६६ [illegible] ४६७ [illegible] ४६८ [illegible] ४६९ [illegible] ४७० [illegible] ४७१ [illegible] ४७२ [illegible] ४७३ [illegible] ४७४ [illegible] ४७५ [illegible] ४७६ [illegible] ४७७ [illegible] ४७८ [illegible] ४७९ [illegible] ४८० [illegible] ४८१ [illegible] ४८२ [illegible] ४८३ [illegible] ४८४ [illegible] ४८५ [illegible] ४८६ [illegible] ४८७ [illegible] ४८८ [illegible] ४८९ [illegible] ४९० [illegible] ४९१ [illegible] ४९२ [illegible] ४९३ [illegible] ४९४ [illegible] ४९५ [illegible] ४९६ [illegible] ४९७ [illegible] ४९८ [illegible] ४९९ [illegible] ५०० [illegible] ५०१ [illegible] ५०२ [illegible] ५०३ [illegible] ५०४ [illegible] ५०५ [illegible] ५०६ [illegible] ५०७ [illegible] ५०८ [illegible] ५०९ [illegible] ५१० [illegible] ५११ [illegible] ५१२ [illegible] ५१३ [illegible] ५१४ [illegible] ५१५ [illegible] ५१६ [illegible] ५१७ [illegible] ५१८ [illegible] ५१९ [illegible] ५२० [illegible] ५२१ [illegible] ५२२ [illegible] ५२३ [illegible] ५२४ [illegible] ५२५ [illegible] ५२६ [illegible] ५२७ [illegible] ५२८ [illegible] ५२९ [illegible] ५३० [illegible] ५३१ [illegible] ५३२ [illegible] ५३३ [illegible] ५३४ [illegible] ५३५ [illegible] ५३६ [illegible] ५३७ [illegible] ५३८ [illegible] ५३९ [illegible] ५४० [illegible] ५४१ [illegible] ५४२ [illegible] ५४३ [illegible] ५४४ [illegible] ५४५ [illegible] ५४६ [illegible] ५४७ [illegible] ५४८ [illegible] ५४९ [illegible] ५५० [illegible] ५५१ [illegible] ५५२ [illegible] ५५३ [illegible] ५५४ [illegible] ५५५ [illegible] ५५६ [illegible] ५५७ [illegible] ५५८ [illegible] ५५९ [illegible] ५६० [illegible] ५६१ [illegible] ५६२ [illegible] ५६३ [illegible] ५६४ [illegible] ५६५ [illegible] ५६६ [illegible] ५६७ [illegible] ५६८ [illegible] ५६९ [illegible] ५७० [illegible] ५७१ [illegible] ५७२ [illegible] ५७३ [illegible] ५७४ [illegible] ५७५ [illegible] ५७६ [illegible] ५७७ [illegible] ५७८ [illegible] ५७९ [illegible] ५८० [illegible] ५८१ [illegible] ५८२ [illegible] ५८३ [illegible] ५८४ [illegible] ५८५ [illegible] ५८६ [illegible] ५८७ [illegible] ५८८ [illegible] ५८९ [illegible] ५९० [illegible] ५९१ [illegible] ५९२ [illegible] ५९३ [illegible] ५९४ [illegible] ५९५ [illegible] ५९६ [illegible] ५९७ [illegible] ५९८ [illegible] ५९९ [illegible] ६०० [illegible] ६०१ [illegible] ६०२ [illegible] ६०३ [illegible] ६०४ [illegible] ६०५ [illegible] ६०६ [illegible] ६०७ [illegible] ६०८ [illegible] ६०९ [illegible] ६१० [illegible] ६११ [illegible] ६१२ [illegible] ६१३ [illegible] ६१४ [illegible] ६१५ [illegible] ६१६ [illegible] ६१७ [illegible] ६१८ [illegible] ६१९ [illegible] ६२० [illegible] ६२१ [illegible] ६२२ [illegible] ६२३ [illegible] ६२४ [illegible] ६२५ [illegible] ६२६ [illegible] ६२७ [illegible] ६२८ [illegible] ६२९ [illegible] ६३० [illegible] ६३१ [illegible] ६३२ [illegible] ६३३ [illegible] ६३४ [illegible] ६३५ [illegible] ६३६ [illegible] ६३७ [illegible] ६३८ [illegible] ६३९ [illegible] ६४० [illegible] ६४१ [illegible] ६४२ [illegible] ६४३ [illegible] ६४४ [illegible] ६४५ [illegible] ६४६ [illegible] ६४७ [illegible] ६४८ [illegible] ६४९ [illegible] ६५० [illegible] ६५१ [illegible] ६५२ [illegible] ६५३ [illegible] ६५४ [illegible] ६५५ [illegible] ६५६ [illegible] ६५७ [illegible] ६५८ [illegible] ६५९ [illegible] ६६० [illegible] ६६१ [illegible] ६६२ [illegible] ६६३ [illegible] ६६४ [illegible] ६६५ [illegible] ६६६ [illegible] ६६७ [illegible] ६६८ [illegible] ६६९ [illegible] ६७० [illegible] ६७१ [illegible] ६७२ [illegible] ६७३ [illegible] ६७४ [illegible] ६७५ [illegible] ६७६ [illegible] ६७७ [illegible] ६७८ [illegible] ६७९ [illegible] ६८० [illegible] ६८१ [illegible] ६८२ [illegible] ६८३ [illegible] ६८४ [illegible] ६८५ [illegible] ६८६ [illegible] ६८७ [illegible] ६८८ [illegible] ६८९ [illegible] ६९० [illegible] ६९१ [illegible] ६९२ [illegible] ६९३ [illegible] ६९४ [illegible] ६९५ [illegible] ६९६ [illegible] ६९७ [illegible] ६९८ [illegible] ६९९ [illegible] ७०० [illegible] ७०१ [illegible] ७०२ [illegible] ७०३ [illegible] ७०४ [illegible] ७०५ [illegible] ७०६ [illegible] ७०७ [illegible] ७०८ [illegible] ७०९ [illegible] ७१० [illegible] ७११ [illegible] ७१२ [illegible] ७१३ [illegible] ७१४ [illegible] ७१५ [illegible] ७१६ [illegible] ७१७ [illegible] ७१८ [illegible] ७१९ [illegible] ७२० [illegible] ७२१ [illegible] ७२२ [illegible] ७२३ [illegible] ७२४ [illegible] ७२५ [illegible] ७२६ [illegible] ७२७ [illegible] ७२८ [illegible] ७२९ [illegible] ७३० [illegible] ७३१ [illegible] ७३२ [illegible] ७३३ [illegible] ७३४ [illegible] ७३५ [illegible] ७३६ [illegible] ७३७ [illegible] ७३८ [illegible] ७३९ [illegible] ७४० [illegible] ७४१ [illegible] ७४२ [illegible] ७४३ [illegible] ७४४ [illegible] ७४५ [illegible] ७४६ [illegible] ७४७ [illegible] ७४८ [illegible] ७४९ [illegible] ७५० [illegible] ७५१ [illegible] ७५२ [illegible] ७५३ [illegible] ७५४ [illegible] ७५५ [illegible] ७५६ [illegible] ७५७ [illegible] ७५८ [illegible] ७५९ [illegible] ७६० [illegible] ७६१ [illegible] ७६२ [illegible] ७६३ [illegible] ७६४ [illegible] ७६५ [illegible] ७६६ [illegible] ७६७ [illegible] ७६८ [illegible] ७६९ [illegible] ७७० [illegible] ७७१ [illegible] ७७२ [illegible] ७७३ [illegible] ७७४ [illegible] ७७५ [illegible] ७७६ [illegible] ७७७ [illegible] ७७८ [illegible] ७७९ [illegible] ७८० [illegible] ७८१ [illegible] ७८२ [illegible] ७८३ [illegible] ७८४ [illegible] ७८५ [illegible] ७८६ [illegible] ७८७ [illegible] ७८८ [illegible] ७८९ [illegible] ७९० [illegible] ७९१ [illegible] ७९२ [illegible] ७९३ [illegible] ७९४ [illegible] ७९५ [illegible] ७९६ [illegible] ७९७ [illegible] ७९८ [illegible] ७९९ [illegible] ८०० [illegible] ८०१ [illegible] ८०२ [illegible] ८०३ [illegible] ८०४ [illegible] ८०५ [illegible] ८०६ [illegible] ८०७ [illegible] ८०८ [illegible] ८०९ [illegible] ८१० [illegible] ८११ [illegible] ८१२ [illegible] ८१३ [illegible] ८१४ [illegible] ८१५ [illegible] ८१६ [illegible] ८१७ [illegible] ८१८ [illegible] ८१९ [illegible] ८२० [illegible] ८२१ [illegible] ८२२ [illegible] ८२३ [illegible] ८२४ [illegible] ८२५ [illegible] ८२६ [illegible] ८२७ [illegible] ८२८ [illegible] ८२९ [illegible] ८३० [illegible] ८३१ [illegible] ८३२ [illegible] ८३३ [illegible] ८३४ [illegible] ८३५ [illegible] ८३६ [illegible] ८३७ [illegible] ८३८ [illegible] ८३९ [illegible] ८४० [illegible] ८४१ [illegible] ८४२ [illegible] ८४३ [illegible] ८४४ [illegible] ८४५ [illegible] ८४६ [illegible] ८४७ [illegible] ८४८ [illegible] ८४९ [illegible] ८५० [illegible] ८५१ [illegible] ८५२ [illegible] ८५३ [illegible] ८५४ [illegible] ८५५ [illegible] ८५६ [illegible] ८५७ [illegible] ८५८ [illegible] ८५९ [illegible] ८६० [illegible] ८६१ [illegible] ८६२ [illegible] ८६३ [illegible] ८६४ [illegible] ८६५ [illegible] ८६६ [illegible] ८६७ [illegible] ८६८ [illegible] ८६९ [illegible] ८७० [illegible] ८७१ [illegible] ८७२ [illegible] ८७३ [illegible] ८७४ [illegible] ८७५ [illegible] ८७६ [illegible] ८७७ [illegible] ८७८ [illegible] ८७९ [illegible] ८८० [illegible] ८८१ [illegible] ८८२ [illegible] ८८३ [illegible] ८८४ [illegible] ८८५ [illegible] ८८६ [illegible] ८८७ [illegible] ८८८ [illegible] ८८९ [illegible] ८९० [illegible] ८९१ [illegible] ८९२ [illegible] ८९३ [illegible] ८९४ [illegible] ८९५ [illegible] ८९६ [illegible] ८९७ [illegible] ८९८ [illegible] ८९९ [illegible] ९०० [illegible] ९०१ [illegible] ९०२ [illegible] ९०३ [illegible] ९०४ [illegible] ९०५ [illegible] ९०६ [illegible] ९०७ [illegible] ९०८ [illegible] ९०९ [illegible] ९१० [illegible] ९११ [illegible] ९१२ [illegible] ९१३ [illegible] ९१४ [illegible] ९१५ [illegible] ९१६ [illegible] ९१७ [illegible] ९१८ [illegible] ९१९ [illegible] ९२० [illegible] ९२१ [illegible] ९२२ [illegible] ९२३ [illegible] ९२४ [illegible] ९२५ [illegible] ९२६ [illegible] ९२७ [illegible] ९२८ [illegible] ९२९ [illegible] ९३० [illegible] ९३१ [illegible] ९३२ [illegible] ९३३ [illegible] ९३४ [illegible] ९३५ [illegible] ९३६ [illegible] ९३७ [illegible] ९३८ [illegible] ९३९ [illegible] ९४० [illegible] ९४१ [illegible] ९४२ [illegible] ९४३ [illegible] ९४४ [illegible] ९४५ [illegible] ९४६ [illegible] ९४७ [illegible] ९४८ [illegible] ९४९ [illegible] ९५० [illegible] ९५१ [illegible] ९५२ [illegible] ९५३ [illegible] ९५४ [illegible] ९५५ [illegible] ९५६ [illegible] ९५७ [illegible] ९५८ [illegible] ९५९ [illegible] ९६० [illegible] ९६१ [illegible] ९६२ [illegible] ९६३ [illegible] ९६४ [illegible] ९६५ [illegible] ९६६ [illegible] ९६७ [illegible] ९६८ [illegible] ९६९ [illegible] ९७० [illegible] ९७१ [illegible] ९७२ [illegible] ९७३ [illegible] ९७४ [illegible] ९७५ [illegible] ९७६ [illegible] ९७७ [illegible] ९७८ [illegible] ९७९ [illegible] ९८० [illegible] ९८१ [illegible] ९८२ [illegible] ९८३ [illegible] ९८४ [illegible] ९८५ [illegible] ९८६ [illegible] ९८७ [illegible] ९८८ [illegible] ९८९ [illegible] ९९० [illegible] ९९१ [illegible] ९९२ [illegible] ९९३ [illegible] ९९४ [illegible] ९९५ [illegible] ९९६ [illegible] ९९७ [illegible] ९९८ [illegible] ९९९ [illegible] १००० [illegible]

१ उपेति गो. पाठः । २ रुमामिति गो. पाठः । ३ यत्तदिति गो. पाठः । ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ बालेनेति गो. पाठः । ९ [illegible] १० [illegible] ११ [illegible] १२ [illegible] १३ [illegible] १४ [illegible] १५ [illegible] १६ [illegible] १७ [illegible] १८ [illegible] १९ [illegible] २० [illegible] २१ [illegible] २२ [illegible] २३ [illegible] २४ [illegible] २५ [illegible] २६ [illegible] २७ [illegible] २८ [illegible] २९ [illegible] ३० [illegible] ३१ [illegible] ३२ [illegible] ३३ [illegible] ३४ [illegible] ३५ [illegible] ३६ [illegible] ३७ [illegible] ३८ [illegible] ३९ [illegible] ४० [illegible] ४१ [illegible] ४२ [illegible] ४३ [illegible] ४४ [illegible] ४५ [illegible] ४६ [illegible] ४७ [illegible] ४८ [illegible] ४९ [illegible] ५० [illegible] ५१ [illegible] ५२ [illegible] ५३ [illegible] ५४ [illegible] ५५ [illegible] ५६ [illegible] ५७ [illegible] ५८ [illegible] ५९ [illegible] ६० [illegible] ६१ [illegible] ६२ [illegible] ६३ [illegible] ६४ [illegible] ६५ [illegible] ६६ [illegible] ६७ [illegible] ६८ [illegible] ६९ [illegible] ७० [illegible] ७१ [illegible] ७२ [illegible] ७३ [illegible] ७४ [illegible] ७५ [illegible] ७६ [illegible] ७७ [illegible] ७८ [illegible] ७९ [illegible] ८० [illegible] ८१ [illegible] ८२ [illegible] ८३ [illegible] ८४ [illegible] ८५ [illegible] ८६ [illegible] ८७ [illegible] ८८ [illegible] ८९ [illegible] ९० [illegible] ९१ [illegible] ९२ [illegible] ९३ [illegible] ९४ [illegible] ९५ [illegible] ९६ [illegible] ९७ [illegible] ९८ [illegible] ९९ [illegible] १०० [illegible] १०१ [illegible] १०२ [illegible] १०३ [illegible] १०४ [illegible] १०५ [illegible] १०६ [illegible] १०७ [illegible] १०८ [illegible] १०९ [illegible] ११० [illegible] १११ [illegible] ११२ [illegible] ११३ [illegible] ११४ [illegible] ११५ [illegible] ११६ [illegible] ११७ [illegible] ११८ [illegible] ११९ [illegible] १२० [illegible] १२१ [illegible] १२२ [illegible] १२३ [illegible] १२४ [illegible] १२५ [illegible] १२६ [illegible] १२७ [illegible] १२८ [illegible] १२९ [illegible] १३० [illegible] १३१ [illegible] १३२ [illegible] १३३ [illegible] १३४ [illegible] १३५ [illegible] १३६ [illegible] १३७ [illegible] १३८ [illegible] १३९ [illegible] १४० [illegible] १४१ [illegible] १४२ [illegible] १४३ [illegible] १४४ [illegible] १४५ [illegible] १४६ [illegible] १४७ [illegible] १४८ [illegible] १४९ [illegible] १५० [illegible] १५१ [illegible] १५२ [illegible] १५३ [illegible] १५४ [illegible] १५५ [illegible] १५६ [illegible] १५७ [illegible] १५८ [illegible] १५९ [illegible] १६० [illegible] १६१ [illegible] १६२ [illegible] १६३ [illegible] १६४ [illegible] १६५ [illegible] १६६ [illegible] १६७ [illegible] १६८ [illegible] १६९ [illegible] १७० [illegible] १७१ [illegible] १७२ [illegible] १७३ [illegible] १७४ [illegible] १७५ [illegible] १७६ [illegible] १७७ [illegible] १७८ [illegible] १७९ [illegible] १८० [illegible] १८१ [illegible] १८२ [illegible] १८३ [illegible] १८४ [illegible] १८५ [illegible] १८६ [illegible] १८७ [illegible] १८८ [illegible] १८९ [illegible] १९० [illegible] १९१ [illegible] १९२ [illegible] १९३ [illegible] १९४ [illegible] १९५ [illegible] १९६ [illegible] १९७ [illegible] १९८ [illegible] १९९ [illegible] २०० [illegible] २०१ [illegible] २०२ [illegible] २०३ [illegible] २०४ [illegible] २०५ [illegible] २०६ [illegible] २०७ [illegible] २०८ [illegible] २०९ [illegible] २१० [illegible] २११ [illegible] २१२ [illegible] २१३ [illegible] २१४ [illegible] २१५ [illegible] २१६ [illegible] २१७ [illegible] २१८ [illegible] २१९ [illegible] २२० [illegible] २२१ [illegible] २२२ [illegible] २२३ [illegible] २२४ [illegible] २२५ [illegible] २२६ [illegible] २२७ [illegible] २२८ [illegible] २२९ [illegible] २३० [illegible] २३१ [illegible] २३२ [illegible] २३३ [illegible] २३४ [illegible] २३५ [illegible] २३६ [illegible] २३७ [illegible] २३८ [illegible] २३९ [illegible] २४० [illegible] २४१ [illegible] २४२ [illegible] २४३ [illegible] २४४ [illegible] २४५ [illegible] २४६ [illegible] २४७ [illegible] २४८ [illegible] २४९ [illegible] २५० [illegible] २५१ [illegible] २५२ [illegible] २५३ [illegible] २५४ [illegible] २५५ [illegible] २५६ [illegible] २५७ [illegible] २५८ [illegible] २५९ [illegible] २६० [illegible] २६१ [illegible] २६२ [illegible] २६३ [illegible] २६४ [illegible] २६५ [illegible] २६६ [illegible] २६७ [illegible] २६८ [illegible] २६९ [illegible] २७० [illegible] २७१ [illegible] २७२ [illegible] २७३ [illegible] २७४ [illegible] २७५ [illegible] २७६ [illegible] २७७ [illegible] २७८ [illegible] २७९ [illegible] २८० [illegible] २८१ [illegible] २८२ [illegible] २८३ [illegible] २८४ [illegible] २८५ [illegible] २८६ [illegible] २८७ [illegible] २८८ [illegible] २८९ [illegible] २९० [illegible] २९१ [illegible] २९२ [illegible] २९३ [illegible] २९४ [illegible] २९५ [illegible] २९६ [illegible] २९७ [illegible] २९८ [illegible] २९९ [illegible] ३०० [illegible] ३०१ [illegible] ३०२ [illegible] ३०३ [illegible] ३०४ [illegible] ३०५ [illegible] ३०६ [illegible] ३०७ [illegible] ३०८ [illegible] ३०९ [illegible] ३१० [illegible] ३११ [illegible] ३१२ [illegible] ३१३ [illegible] ३१४ [illegible] ३१५ [illegible] ३१६ [illegible] ३१७ [illegible] ३१८ [illegible] ३१९ [illegible] ३२० [illegible] ३२१ [illegible] ३२२ [illegible] ३२३ [illegible] ३२४ [illegible] ३२५ [illegible] ३२६ [illegible] ३२७ [illegible] ३२८ [illegible] ३२९ [illegible] ३३० [illegible] ३३१ [illegible] ३३२ [illegible] ३३३ [illegible] ३३४ [illegible] ३३५ [illegible] ३३६ [illegible] ३३७ [illegible] ३३८ [illegible] ३३९ [illegible] ३४० [illegible] ३४१ [illegible] ३४२ [illegible] ३४३ [illegible] ३४४ [illegible] ३४५ [illegible] ३४६ [illegible] ३४७ [illegible] ३४८ [illegible] ३४९ [illegible] ३५० [illegible] ३५१ [illegible] ३५२ [illegible] ३५३ [illegible] ३५४ [illegible] ३५५ [illegible] ३५६ [illegible] ३५७ [illegible] ३५८ [illegible] ३५९ [illegible] ३६० [illegible] ३६१ [illegible] ३६२ [illegible] ३६३ [illegible] ३६४ [illegible] ३६५ [illegible] ३६६ [illegible] ३६७ [illegible] ३६८ [illegible] ३६९ [illegible] ३७० [illegible] ३७१ [illegible] ३७२ [illegible] ३७३ [illegible] ३७४ [illegible] ३७५ [illegible] ३७६ [illegible] ३७७ [illegible] ३७८ [illegible] ३७९ [illegible] ३८० [illegible] ३८१ [illegible] ३८२ [illegible] ३८३ [illegible] ३८४ [illegible] ३८५ [illegible] ३८६ [illegible] ३८७ [illegible] ३८८ [illegible] ३८९ [illegible] ३९० [illegible] ३९१ [illegible] ३९२ [illeg

अग्निहोत्रादिभिर्मया सार्द्धमाप्तदक्षिणैः । अग्निहोत्रेण संस्कारं केन त्वं न तु लप्स्यसे ॥ २४ ॥
प्रव्रज्यामुपपन्नानां त्रयाणामेकमागतम् । परिप्रेक्ष्यति कौसल्या लक्ष्मणं शोकलालसा ॥ २५ ॥
सा तस्याः परिपृच्छन्त्या वधं मित्रबलस्य ते । तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम् ॥ २६ ॥
सा त्वां सुतं हतं ज्ञात्वा मां च रक्षोगृहं गताम् । हृदयेनावदीर्णेन न भविष्यति राघव ॥ २७ ॥
मम हेतोरनार्यायाः अनयः पार्थिवात्मजः । रामः सागरमुत्तीर्य वीर्यवान्गोष्पदे हतः ॥ २८ ॥
अहं दाशरथेनोढा मोहात्स्वकुलपांसनी । अनुपश्यामि रामस्य भार्यां मृत्युरजायत ॥ २९ ॥
अन्यामन्यां मया जातिं वारितं दानमुत्तमम् । याचमानैर्व शोचामि भार्यां सर्वातिथेरिह ॥ ३० ॥

कल्पादेः इत्येनादिभिः विपरिकृष्यते । अत्र मयेत्यनेन अस्य दारान्तरं नास्तीति गम्यते ॥ २३ ॥

२४] ति० टी०—अग्निहोत्रेण वैतानाग्निना संस्कारं केन तूना न लप्स्यसे न लभसे ॥ २४ ॥

रा० टी०—अग्नीति । आप्तदक्षिणैः परिपूर्णदक्षिणाविशिष्टैः स्वैः यस्त्वमिष्टवान् स त्वम् अग्निहोत्रेण हेतुभूतेन संस्कारं न हेतुना न लप्स्यसे प्राप्नोषि ॥ २४ ॥

गो० टी०—अग्निरिति । वनवासनिवर्त्तनानन्तरं त्वया आप्तदक्षिणैः पर्याप्तदक्षिणैः अग्निष्टोमादिभिर्यज्ञैः इष्टवान् तदेवपूजनो भूत्वा अग्निहोत्रेण यज्ञीयाग्निना संस्कारं न हेतुना न लप्स्यसे । अत्र वनवासात्पूर्वमन्याधानाधानभावनिवर्त्तनानन्तरमाधानाग्निष्टोमादिकमनुष्ठाय पश्चात्क्रमप्राप्तास्वसाने यज्ञीयाग्निभिः संस्कारं प्राप्तुं योग्यस्त्वं कथमेव ध्ये मरणं प्राप्नोसीति भावः । अनेन वनवासात्पूर्वं रामेण तादिकं नानुष्ठितमिति सूच्यते । अयमर्थोऽयोध्याकाण्डे व्यक्तमेवोपपादितः ॥ २४ ॥

२५] ति० टी०—प्रव्रज्यां प्रवासमुपपन्नानां त्रयाणां साकं मध्ये एकं लक्ष्मणमित्यन्वयः । परिप्रेक्ष्यति । द्रक्ष्यत्यर्थः ॥ २५ ॥

रा० टी०—प्रव्रज्यामिति । प्रव्रज्यां प्रवासम् उपपन्नानां प्राप्तानां त्रयाणामस्माकं मध्ये आगतमेकं लक्ष्मणमेव कौसल्या प्रेक्षति कथमिति शेषः ॥ २५ ॥

गो० टी०—प्रव्रज्यामिति । प्रव्रज्यां प्रवासम् । "व्रजयोर्वे क्यप्" । इतिकयप् उपपन्नानां प्राप्तानाम् त्रयाणां दीनां मध्ये एकं लक्ष्मणमागतम् शोकलालसा शोकमन्दा ल्या परिप्रक्ष्यति ॥ २५ ॥

२६] ति० टी०—मित्रबलस्य वानरबलस्य ॥ २६ ॥

टी०—स इति । स लक्ष्मणः परिपृच्छन्त्याः तस्याः समीपे ते मित्रबलस्य तव च वधमाख्यास्यते ॥ २६ ॥

टी०—स इति । सः लक्ष्मणः परिपृच्छन्त्यास्तस्याः स्वसुश्च वधं तव च आख्यास्यते ॥ २६ ॥

२७] ति० टी०—अवदीर्णेन विदीर्णेनोपलक्षिता सती त्वं न भविष्यति । म्रियेतेत्यर्थः ॥ २७ ॥

रा० टी०—सेति । सा कौसल्या सुतं त्वां हतं मां च रक्षोगृहं गतां ज्ञात्वा श्रुत्वा अवदीर्णेन विदीर्णेन हृदयेन उपलक्षिता सती न भविष्यति लोकान्तरं गमिष्यतीत्यर्थः ॥२७॥

गो० टी०—सेति । सुतं हतं लक्ष्मणाख्यायां दुःखमित्यर्थः अवदीर्णेन विशिर्ण हृदयेनोपलक्षिता सा न भविष्यति न जीविष्यति ॥ २७ ॥

२८] ति० टी०—सागरमुत्तीर्य गोष्पदे हत इत्यन्वयः । रामो लोकानां तत्तुल्यमिदं जातमित्यर्थः ॥ २८ ॥

रा० टी०—ममेति । रामः मदर्थेनो सागरमुत्तीर्य महाकर्माणि कृत्वेत्यर्थः गोष्पदे तृणरावणकृत्ये हतः ॥ २८ ॥

गो० टी०—ममेति । अनार्यायाः दुःशीलायाः मम हेतो प्रतिपादितम् अनर्हः एतादृशसौमित्रिवधानर्हः सागरमुत्तीर्य गोष्पदे हतः खरतरखरादीन् हत्वा क्षुद्रेण प्रहस्तेन हत इत्यर्थः ॥२८॥

२९] ति० टी०—दाशरथेन दशरथापुत्रेण अहं मृत्युरजायत मृत्युरूपा जाता ॥ २९ ॥

रा० टी०—अहमिति । दाशरथेन रामेणोढाऽस्मीव मोहात् कपटमृगादिविषयकमोहं प्राप्य स्थिताऽस्मीति शेषः अतः रामस्य भार्येव मृत्युरजायत ॥ २९ ॥

गो० टी०—अहमिति । स्वकुलपांसनी स्वकुलदूषणी अहं मोहात् अज्ञानात् दाशरथेनोढाऽस्मि अतो रामस्य भार्यैव मृत्युरजायत ॥ २९ ॥

३०] ति० टी०—अन्यां जातिमन्यामिति अन्यन्मम दानं कन्यादानं गोभूहिरण्यादिदानं च वारितं न कृतम् सर्वातिथेः सर्वातिथिप्रियस्येह काले देशे च ॥ ३० ॥

रा० टी०—ननमिति । सर्वातिथेः सर्वैः अतिथिभिर्याचकैर्यस्य तस्य रामस्य भार्यां याचे शोचामि तया मया अन्यस्यां जातिं जातौ जन्मनि दानं वारितं न कृतमित्यर्थः ॥ ३० ॥

गो० टी०—ननमिति । मया अन्यां जातिं प्राप्य अन्यां जातिम् अन्यस्मिन् जन्मनि दानं वारितं

साधु वातय मां क्षिप्रं रामस्योपरि रावण । समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ॥ ३१ ॥
शिरसा मे शिरश्चास्य कार्यं कायेन योजय । राजभावात्क्षमिष्यामि गतिं भर्तुर्महात्मनः ॥ ३२ ॥
इतीव दुःखसंतप्ता विललापायतेक्षणा । भर्तुः शिरो धनुश्चैव ददर्श जनकात्मजा ॥ ३३ ॥
एवं लालप्यमानायां सीतायां तत्र राक्षसः । अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः ॥ ३४ ॥
विजयस्वार्यपुत्रेति सोऽभिवाद्य प्रसाद्य च । न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ॥ ३५ ॥
अमात्यैः सहितः सर्वैः प्रहस्तस्त्वामुपस्थितः । तेन दर्शनकामेन अहं प्रस्थापितः प्रभो ॥ ३६ ॥
नूनमस्ति महाराज राजभावात्क्षमान्वित । किंचिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु ॥ ३७ ॥
एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् । अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ॥ ३८ ॥
स तु सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः । सभां प्रविश्य विदधे विदित्वा रामविक्रमम् ॥ ३९ ॥

कन्यादानं वारितमित्यर्थः । तत्र हेतुमाह–येति । सर्वे अतिक्रम्या यस्य तस्य सर्वातिगैः सर्वश्रेष्ठैरित्यर्थः । सर्वातिशयितपूजाकरणेति वार्थः । भार्यापि याहम् इह जन्मनि अस्य भोगकाले तव योक्ष्यामि ॥ ३० ॥

३१-३३] ति० टी०–समानय योजय ॥ ३१ ॥ ३३ ॥

रा० टी०–साध्विति । रामस्योपरि संस्थाप्येत्यर्थः, मां तत्र तत्प्रयोजनमाह पत्न्याः पतिं समानय संयोजय इदमेव तत्कल्याणं कुरु ॥ ३१ ॥

गो० टी०–साध्विति । समानय योजय । उत्तमं कल्याणं सौभाग्यातिशयम् ॥ ३१ ॥

रा० टी०–योजनप्रकारमाह–शिरसेति । मे शिरः अस्य रामस्य शिरसा कार्यं शेषशरीरं कायेन च योजय तत्प्रयोजनमाह–भर्तुर्गतिम् अनुगमिष्यामि ॥ ३२ ॥

गो० टी०–शिरसेति । स्पष्टः ॥ ३२ ॥

रा० टी०–इतीवेति । दुःखसंतप्ता सीता विललाप शिरो धनुश्च ददर्श च ॥ ३३ ॥

गो० टी०–इतीति । शिरः धनुश्च : तत्र पुरोदेशे ॥ ३३ ॥

३४-३६] ति० टी०–तत्राशोकवनिकायां राक्षसः प्रहस्तप्रेषितोऽनीकस्थो द्वाररक्षी राक्षसो भर्तारं स्वामिनमभिप्रेत्यागत्य 'आर्यपुत्र, विजयस्व ' इति प्रसादाभिवाद्य स कृताञ्जलिः सन्नुपस्थितः । आर्यपुत्रशब्दो यद्यपि श्रीभिर्भर्तरि प्रयुज्यते प्रायेण, तथापि पूजामात्रे सामान्यतः प्रयोगोऽपि योज्यः ॥ ३४ ॥ ३६ ॥

रा० टी०–एवमिति । सीतायामेवं लाल्यमानायां सत्यां अनीकस्थः कथन चारनिवेशः भर्तारं रावणमभिचक्राम प्राप्तो ॥ ३४ ॥

गो० टी०–एवमिति । लाल्यमानायां प्रलपन्त्याम् भर्तारं रावणम् अनीकस्थः द्वाररक्षी । नन्वशोकिकीषु कान्चिद्वि सीता भर्तुश्चिरसाक्षात्कारेण चिरं रुदित्वा विलप्य कथं जीवितं धारयति स्म । उच्यते । अत्र ययोर्दिव्यदम्पत्योः परस्परस्तैव जीवितधारणे निमित्तम् नतु ज्ञानाज्ञाने अतो भर्तुर्जीवितैवैकल्याभावात्सा जीवति स्म ॥ ३४ ॥

रा० टी०–विजयस्वेति । स राक्षसः अभिवाद्य प्रणम्य विजयस्वेत्युक्त्वा प्रसाद्य च अनुप्राप्तं प्रहस्तं न्यवेदयत् ॥ ३५॥

गो० टी०–विजयस्वेति । अनुप्राप्तं द्वारीति शेषः ॥३५॥

रा० टी०–तत्प्रकारमाह–अमात्यैरिति । प्रहस्तः अमात्यैः सहितस्त्वामुपस्थितः दर्शनकामेन तेन अहं प्रस्थापितः ॥ ३६ ॥

गो० टी०–अमात्यैरिति । वयमिति भर्तृबहुमानं बहूनामन्तःपुरे समागमासंभवात् ॥ ३६ ॥

३७] ति० टी०–नन्वनवसरे कथं प्रस्थापितवांस्तत्राह–नूनमिति । राजभावाद्राजकार्याभिप्रायज्ञानाद्देतोस्त्वमस्मत्प्राप्तावपि क्षमान्वित महाराज, नूनं निश्चितमात्ययिकमत्यावश्यकं किंचित्कार्यमस्ति, तस्मादागत्य तेषां त्वं दर्शनं कुरु । 'क्षमान्वित' इति पाठुः पाठः ॥ ३७ ॥

रा० टी०–नूनमिति । हे क्षमान्वित ! राजभावात् राजधर्मात् हेतोः किंचिदात्ययिकमावश्यकं कार्यमस्ति अतस्तेषां दर्शनं त्वं कुरु ॥ ३७ ॥

गो० टी०–प्रहस्तेन प्रेषितोपि कथमनवसरे समागतोसीत्याशङ्क्याह–नूनमिति । राजभावात् राजत्वाद्धेतोः । क्षमान्वितम् तदानीमेव कर्तव्यत्वेपि तव राजभावात् क्षमया प्राप्तीक्षणेनान्वितम् । आत्ययिकम् आतिपातिकं किंचित्कार्यमस्ति नूनम् । तत्तस्मात्तेषां प्रहस्तादीनां दर्शनं कुर्वित्यन्वयः ॥ ३७ ॥

३८] ति० टी०–मन्त्रिणां दर्शनम् उद्दिश्येति शेषः ॥ ३८

रा० टी०–एतदिति । राक्षसेन प्रतिवेदितं कथितं मंत्रिणां दर्शनम् अवलोकनार्थं ययौ ॥ ३८ ॥

गो० टी०–एतदिति । स्पष्टः ॥ ३८ ॥

३९] ति० टी०–सर्वं समर्थ्यैव गत्वा । दृष्टैकान्ते सर्वं कृत्यं विचार्येत्यर्थः । सभां प्रविश्य विदधे कृतमन्त्रोचितव्यापारमिति शेषः ॥ ३९ ॥

---

१ तत्र समीक्ष्य च पुनः पुनरिति गो.पाठः। २ सहितैरिति गो.पाठः। ३ [illegible] ४ [illegible]

अन्तर्धानं तु तच्छीर्षं तत्र कार्मुकमुत्तमम् । जगाम रावणस्यैव निर्याणसमनन्तरम् ॥ ४० ॥
राक्षसेन्द्रस्तु तैः सार्धं मन्त्रिभिर्भीमविक्रमैः । समर्थयामास तदा रामकार्यविनिश्चयम् ॥ ४१ ॥
अविदूरस्थितान्सर्वान्बलाध्यक्षान्हितैषिणः । अब्रवीत्कालसदृशो रावणो राक्षसाधिपः ॥ ४२ ॥
शीघ्रं भेरीनिनादेन स्फुटं कोणाहतेन मे । समानयध्वं सैन्यानि वक्तव्यं च न कारणम् ॥ ४३ ॥
ततस्तथेति प्रतिगृह्य तद्वचस्तेऽदव हृताः सहसा महद्बलम् ।
समानयंश्चैव समागतं च न्यवेदयन्भर्तरि युद्धकाङ्क्षिणि ॥ ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ।

नैवं रामस्य शिरः स तु सुखं जीवति शीघ्रमेव त्वां पश्यति मा शोषीरिति सरमा सीतां समाश्वासयत् ।

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी । आससादाथ वैदेहीं प्रियां मैथिलिनीं सखीं ॥ १ ॥
मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम् । आश्वासयामास तदा सरमा मृदुभाषिणी ॥ २ ॥

रा० टी०—स इति । स रावणः आत्मनः सर्वं कृत्यं समर्थ्य निष्पाद्य तत्तद्योग्यानियोज्य रामविक्रमं विदित्वा चारमुखाद्गत्वा सभां प्रविश्य विदधे विचारयामास ॥ ३१ ॥

गो० टी०—स इति । स रावणः रामविक्रमं विदित्वा सभां प्रविश्य आत्मनः सर्वं कृत्यं मन्त्रिभिः सह समर्थ्य स्थिरीकृत्य विदधे प्रकृतकार्यमिति शेषः ॥ ३१ ॥

४०] ति० टी०—निर्याणसमनन्तरमेवेति योजना । मायास्त्वादिति भावः ॥ ४० ॥

रा० टी०—अन्तर्धानमिति । रावणस्य निर्याणसमनन्तरं निर्गमानन्तरं काले एव शिरः प्रभृति अन्तर्धानं जगाम॥४०॥

गो० टी०—अन्तर्धानमिति । निर्याणं निर्गमनम् ॥४०॥

४१-४२] ति० टी०—रामकार्यविनिश्चयं रामविषयं कर्तव्यनिश्चयम् ॥ ४१ ॥ ४२ ॥

रा० टी०—राक्षसेन्द्र इति । राक्षसेन्द्रस्तु रामकार्यविषयं रामोद्देश्यककृतिविषयकनिश्चयं समर्थयामास चकार॥४१॥

रा० टी०—अविदूरेति । बलाध्यक्षान् रावणोऽब्रवीत्॥४२॥

गो० टी०—समर्थ्येत्युक्तं विवृणोति—राक्षसेन्द्र इति । कार्यविनिश्चयं रामविषये स्वकृत्यनिश्चयम् ॥ ४१ ॥ ४२ ॥

४३] ति० टी०—स्फुटं कोणाहतेनोल्बणवादनदण्डाहतेन । न वक्तव्यमिति भावः । राजा आह्वयते इत्येतावदेव मम, न त्वेतदर्थमसीति भावः ॥ ४३ ॥

रा० टी०—तदाकारमाह—शीघ्रमिति । कोणाहतेन वाद्यविशेषाहतजनितेन भेरीनिनादेन सैन्यानि समानयध्वं कारणं त्वानप्रयोजनं तु न वक्तव्यम् ॥ ४३ ॥

गो० टी०—शीघ्रमिति । स्फुटकोणाहतेन उल्बणवादनतेजनितेन । कार्यं कारणोपचारः । वक्तव्यं च न कारणमिति । एतदर्थं नियोजिता इति पूर्वं प्रवर्तन्ति चेदलाध्यक्षाः तदार्थं उक्त्वा सचिवौ कथितं स्वकीयं रामसैन्यक्षयवृत्तान्तवाक्यमस्मिन्नि तस्याः विदितं स्यादिति भावः ॥ ४३ ॥

४४] ति० टी०—अथ सीताप्रलापः स्वस्य मानुषधर्मप्रदर्शनार्थोऽपि बोध्यम् ॥ ४४ ॥

श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

रा० टी०—तत इति । तद्वचः तथेति प्रतिगृह्य महद्बलं समानयन् समागतं बलं भर्तरि न्यवेदयंश्च ॥ ४४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दराजविरचितायां रामायणशिरोमणौ युद्धकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

गो० टी०—तत इति । आत्मनः आत्मनाम् । भर्तरि विषये ॥ ४४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीर्टाख्याने युद्धकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

१-२] ति० टी०—सीतां स्मिति । विभीषणपत्नीत्वेन सरमा तु सीतायां भक्तिमती । सा हि रावणेन ज्ञातसात्त्विकभावतिभर्त्सनेन नाशमाशङ्क्य सीताश्वासनार्थं संदिदेशेति बोध्यम् । प्रणयिनी स्नेहवती सखी सरमेत्यन्वयः ॥ १ ॥ २ ॥

रा० टी०—सीतां प्रति सरमोक्तिमाह—सीतामित्यादिभिः । सीतां मोहितां रावणमायया वञ्चितां प्राप्य सरमा नाम प्रणयिनी स्नेहवती सखी वैदेहीमससाद प्राप्तवती ॥ १ ॥

रा० टी०—मोहितामिति । इदानीमपि [illegible] माश्वासयामास ॥ २ ॥

गो० टी०—एवं [illegible] सीतां समाश्वासयितुं [illegible]

[illegible] हि तत्र कृता मित्रं सीतया रक्ष्यमाणया । रक्षन्ती रावणादिष्टा साधुशोभना ॥ ३ ॥
[illegible] ददर्श सखी सीतां सरमा नष्टचेतनाम् । उपाहृत्योत्थितां ध्वस्तां वडवामिव पांसुषु ॥ ४ ॥
[illegible] समाश्वासयामास सखी स्नेहेन रुदतीम् । [सर्वान्संशिहि वैदेहि मा भूते मनसो व्यथा ।]
उक्ता यद्रावणेन त्वं मैथ्युक्तश्च स्वयं त्वया ॥ ५ ॥
[illegible] सखीस्नेहेन तैर्द्वीरु मया सर्वं प्रतिश्रुतम् ।]
लीनया गहने शून्ये भयमुत्सृज्य रावणात् । तव हेतोर्विशालाक्षि नहि मे रावणाद्भयम् ॥ ६ ॥
स संभ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसेश्वरः । तत्तें मे विदितं सर्वमभिनिष्क्रम्य मैथिलि ॥ ७ ॥

तामिति । मोहितां रामविषयविपरीतज्ञानवतीम् । सरमा भीषणभार्या । प्रणयिनीं स्नेहवतीम् ॥ १ ॥ २ ॥

३] ति० टी०—नन्वु राक्षसी कथं सखी, कथं चाश्वासयत आह—सा हीति । तत्राशोकवनिकायाम् । रावणादिष्टा अत्र बीजमुक्तम् । अतएव राक्षसीभ्यो नित्यं रक्षन्ती सरमा रक्ष्यमाणया सीतयात्मनः स्वस्याः मित्रं कृत्वा सखी पादिता । तत्र योग्यतामाह—साधुशोभनेत्यादि । दुःखितेषु दयया द्रवता प्राणैरपि ममेयं रक्षणीयेति दृढप्रतिज्ञा ॥ १ ॥

रा० टी०—नन्वु राक्षस्याः कथं सीताप्रियात्वमित्यत आह—सेति । रावणादिष्टा क्रूरराक्षसीभ्यो रक्षणाय रावणेनाज्ञापिता अत एव रक्षन्ती अत एव साधुशोभना सीताविषयकदयाविशिष्टा सा सरमा रक्ष्यमाणया सीतया मित्रं कृता ॥ ३ ॥

गो० टी०—नन्वु राक्षस्यास्तस्याः कथं सरूपमाश्वासनं वक्ष्यत आह—सा हीति । हि यस्मात्रावणादिष्टा रक्षन्ती सा आत्मना रक्ष्यमाणया मित्रं सखी कृता अत इत्यर्थः । रक्षन्ती । तत्र तत्रावसरे सीताया योगक्षेमविधानं कुर्वतीत्यर्थः । रावणादिष्टा योगक्षेमे रावणेनादिष्टा साधुशोभना सदया अनेन सख्यस्याप्रच्युतिर्दर्शिता ॥ २ ॥

४] ति० टी०—उपाहृत्य श्रमनाशार्थं क्षुत्वा, ध्वस्तां पीडितामध्वश्रमेण शोकेन च ॥ ४ ॥

रा० टी०—सेति । पांसुषु उपाहृत्य क्षुत्वित्वा उत्थिताम् अत एव ध्वस्तां रजोध्वस्तां वडवामिव नष्टचेतनां कर्तव्यविषयविरहितां सीतां सरमा ददर्श सखीस्नेहेनोपलक्षिता सती समाश्वासयामास च साधुशोभना एकान्वयी ॥ ४ ॥

गो० टी०—आसादनानन्तरं तदवस्थादर्शनमाह—सेति । साधुशोभनेत्यनेन विपरीतज्ञानवतीम् उपाहृत्य क्षुत्वित्वा ध्वस्तां धूम्रपटलाम् वडवाम् अश्वस्त्रियम् [illegible] पांसुपतीम् ॥ ४ ॥

५] ति० टी०—रावणेन यद्यदुक्तं तत्तत् सर्वं रावणं प्रति त्वया स्वयोक्तम् 'साधु पाल्यं त्वां त्रिजगत्' इत्यादि, तत्सर्वं वा परिश्रुतम् ॥ ५ ॥

रा० टी०—समाश्वासनप्रकारमाह—उक्तेत्यादिभिः । रावणेन यद्यदुक्तं त्वया रावणश्च यत्प्रत्युक्तस्तत्सर्वं सखीस्नेहेनेत्यनेन हेतुना रावणादुपहृत्योत्थाप्य शून्ये गहने निर्विजनदेशे लीनया मया प्रतिश्रुतम् । सार्धश्लोक एकान्वयी ॥ ५ ॥

गो० टी०—तामिति । पूर्वं क्रूरराक्षसीभिर्वा समाश्वासनं कृतम् इदानीं रावणवृत्तान्तप्रदर्शनेनेति ज्ञेयम् ॥ ५ ॥

गो० टी०—समाश्वासनमित्यादि । स्वयं रावणात् प्रत्युक्तं प्रत्युपरूपम् सखीस्नेहेन सखीविषयस्नेहेन प्रतिश्रुतम् । प्रतिकूलसर्गमात्रम् ॥ ५ ॥

६] ति० टी०—नन्वु विभीषणस्य विरुद्धकोटौ गतत्वात् त्वया रावणसंनिधौ स्थित्वा कथं श्रुतं तत्राह—लीनयेति । गहनेऽशोकवनमध्ये पूर्वमस्य मायाकृतवृत्तान्तश्रवणाय स्वप्रच्छन्नरूपकार्यार्थमागत्य लीनया गुप्तं स्थित्वा रावणाद्भयमुत्सृज्य स्थितया सर्वं श्रुतम् । नहि मे रावणाद्भयं तेनैव तव रक्षणे नियुक्तत्वात्तदाज्ञातित्वाच्च तत्तोऽन्येनैव हरणीयत्वात् ॥ ६ ॥

रा० टी०—नन्वु लीनश्रवणेऽपि रावणात् कुतो न भीतिरित्यत्र आह—तवेति । तव हेतोः स्वत्प्रयोजनसिद्ध्यर्थं रावणात् मे भयं नास्ति अत एव यत्कृते यदर्थं संभ्रान्तो रावणो निष्क्रान्तस्तत्सर्वमभिनिष्क्रम्य बहिर्गत्वा मे मम विदितम् । सार्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०—तदानीमसन्निहितया त्वया कथं श्रुतमित्यत्राह—लीनयेति । लीनया छन्नया गहने कुत्रचित्तरन्ध्रे गहन इति पाठे आवृत इत्यर्थः । शून्ये निर्जने कथं घोराद्रावणाद्भयं त्यक्तवत्याह—तवेति । तव हेतोः त्वन्निमित्तम् मे जीवितमार्यपुत्रं प्रियम् तत्र हेतुर्विशालाक्षीति तव नयनसौन्दर्यम् पश्यन्त्या कथं त्वत्पीडा सोढव्येति भावः । नन्वु विभीषणभार्या सीताहरणे रावणेन नियोगाद्वा नियोगे वा कथं तस्याः रावणभयाद्गृहस्थानम् । उच्यते । विभीषणावरोधनकाले [illegible] योगक्षेमवरामशर्यान्तरभूता सरमा नियुक्ता । तन्मनादिदानीमन्तरङ्गवाक्यालापेन सीतासखीति च [illegible] नियोगश्च छद्मनैवेन अदर्शने च सदाहरणमिति च योऽन्यैर्यत्करणीयं [illegible] ॥ ५ ॥

७] ति० टी०—हे रावणे यत्कृते यन्निमित्तं [illegible] निष्क्रान्तस्तत्सर्वमभिनिष्क्रम्य बहिर्गत्वा मया विदितं ज्ञा

---

१ रक्ष्यमाणयेति रा.पाठः । २ तत्र इति गो.पाठः । ३ पांसुष्वित्यत्र गो. [illegible] ठः । ४ ते मीलिति रा.पाठः । ५ गच्छतं इति गो.पाठः । ६ लीनयेति [illegible] ठे । ७ [illegible]

हत्वा सौप्तिकं कर्तुं रामस्य विदितात्मनः । वधश्च पुरुषव्याघ्रे तस्मिन्नैवोपपद्यते ॥ ८
न त्वेवं वानरा हन्तुं शक्याः पादपयोधिनः । सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ ९
दीर्घवृत्तभुजः श्रीमान्महोरस्कः प्रतापवान् । धन्वी संनहनोपेतो धर्मात्मा भुवि विश्रुतः ॥ १०
विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च । लक्ष्मणेन सह भ्रात्रा कुलीनो नयशास्त्रवित् ॥ ११
हन्ता परबलौघानामचिन्त्यबलपौरुषः । न हतो राघवः श्रीमान्सीते शत्रुनिबर्हणः ॥ १२
अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना । इव प्रयुक्ता रौद्रेण माया मायाविना त्वयि ॥ १३
शोकस्ते विगतः सैर्वकल्याणं त्वामुपस्थितम् । ध्रुवं त्वां भजते लक्ष्मीः प्रियं ते भवति शृणु ॥ १४
उत्तीर्य सागरं रामः सह वानरसेनया । संनिविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ १५
दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः । सहितैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः ॥ १६

गो० टी०–स इति । मे मया । यत्कृते यन्निमित्तम् । अभिनिष्क्रम्य बहिर्निर्गम्य ॥ ८ ॥

८] ति० टी०–तस्य पश्चादपि कथने बाधकाभावेनादौ तन्मोहं निवर्तयति—न शक्यमिति । सौप्तिकं सुप्तिकालकृत्यम् । तत्र हेतुः–विदितात्मनः । जितनिद्रालस्यादिदोषचित्तत्वेत्यर्थः पुरुषव्याघ्रे सर्वातिशायिशौर्यवति, अतएव तस्मिन्वधो नोपपद्यते ॥ ८ ॥

रा० टी०–नन्वं रामस्य तथात्वे किं वृत्तान्तज्ञानेनेत्यत आह—नेत्यादिभिः । विदितात्मनः ज्ञातराक्षसस्वभावस्य रामस्य सौप्तिकं सुप्तिकालकं पुरुषं कर्तुं न शक्यम् अत एव तस्मिन् रामे क्षत्रियेऽपि वधोपपद्यते ॥ ८ ॥

गो० टी०–मा भूदस्मदवगमः उपपत्तिश्च तत्र नास्तीत्याह—न शक्यमिति । सौप्तिकं सुप्तौ मरणम् न केवलं मशक्यत्वं रामस्य पुरुषधौरेयतया वधयोग्यतापि नास्तीत्याह—वधश्चेति ॥ ९ ॥

९–१२] ति० टी०–सर्ववानरहननमप्यशक्यमित्याह—न त्वेवमिति ॥ ९ ॥ १२ ॥

रा० टी०–नत्विति । देवर्षभेण विष्णुना सुरक्षिताः सुरा रामेण सुरक्षिताः वानराः हन्तुं नैव शक्याः ॥ ९ ॥

गो० टी०–एवं वानरवधोप्यनुपपन्न इत्याह—न त्विति । लाङ्गलबलाश्च न वानरा हन्तुं शक्या इत्यर्थः ॥ १० ॥

रा० टी०–दीर्घेति । दीर्घवृत्तभुजत्वादिविशिष्टः आत्मनः च रक्षिता अत एव परबलौघानां हन्ता लक्ष्मणेन सह भ्रात्रा न हतः । अर्धषट्कमेकान्वयि ॥ १०–१२ ॥

गो० टी०–न केवलं बलादिना सौभाग्यलक्षणादिभिरप्यराम इत्याह श्लोकत्रयेण–दीर्घेत्यादिना । श्रीमान् श्रीमान् प्रतापवान् तेजिष्ठः संहननोपेतः शोभनावयवः । लक्ष्मणेन सह रक्षितेत्यन्वयः । श्रीमान् विजय- ॥ ११ ॥ १३ ॥

] ति० टी०–नन्वं प्रत्यक्षतो हते कथं न हतस्तत्राह—अयुक्तेति । अयुक्तानुचिता बुद्धिः कृत्यं च यस्य तेन रौ रावणेन ॥ १३ ॥

रा० टी०–नन्वं हतिमन्तरा कथमेवं शिरःप्रभृतिदर्श मित्यत आह—अयुक्तेति । न युक्ते योग्ये बुद्धिकृत्ये यं अत एव सर्वभूतविरोधिना रावणेन त्वयि माया प्रयुक्ता ॥१

गो० टी०–कथं तर्हि शिरःप्रभृतिप्रापणं तत्राह—अ क्तेति । अयुक्तबुद्धिकृत्येन अनर्हबुद्धिव्यापारेण मायाशि दर्शनबुद्धेस्तत्कृत्यस्य चान्यथाभवहेतुत्वादिति भावः ॥ १३ ॥

१४–१५] ति० टी०–शोको विगतः कल्याणं चोपस्थि तम् । कुतस्त्याह—हे भवति ! ते प्रियं प्रियवचनम्॥१४॥१

रा० टी०–प्रत्युत्तररावणस्यैव मरणादि भविष्यतीति बो यन्ती आह—शोक इत्यादिभिः । हे भवति ! ते शोको विग तत्र हेतुः त्वां कल्याणं मङ्गलमुपस्थितम् अत एव त्वां लक्ष्म संनिधेर्वै भजते । नन्वं कथं सर्वमिदमित्यत आह—ते प्रि प्रीतिविषयीभूतं वृत्तान्तं शृणु ॥ १४ ॥

गो० टी०–शोक इति । भजते भविष्यत्सामीप्ये लट् योगः । प्रियं प्रियवचनम् ॥ १४ ॥

रा० टी०–वृत्तान्तमेवाह—उत्तीर्येत्यादिभिः । सागर भृतीयं संनिविष्टः सह लक्ष्मणो रामो मे मया दृष्टः । सार्ध श्लोक एकान्वयी ॥ १५ ॥

गो० टी०–उत्तीर्येति । संनिविष्टः स्थितः ॥ १५ ॥

१६] ति० टी०–दृष्टो मे इत्यर्थः । स्वदृष्टत्वेऽर्थेऽनुभवारूढोऽयं प्रयोगः । खेचरीत्वाज्जटिर्निर्गत्येति शेष ता । सागरान्तस्थैः सागरतीरस्थैः । सहितैः संगतैर्बलैः स्वमहिम्ना रक्षितस्तिष्ठति ॥ १६ ॥

रा० टी०–स इति । सागरान्तस्थैर्बलैः सैन्यैः रक्षितः रामः तिष्ठति अत एव अनेन रावणेन ये प्रेषिताः राक्षस तैः राघवस्तीर्णः इत्येवं प्रवृत्तिः वृत्तमिहाहृता । सार्धश्लो एकान्वयी ॥ १५ ॥ १७ ॥

गो० टी०–दृष्ट इति । सागरान्तस्थैः सागरतीरस्थैः॥१

१ सौप्तिकमिति गो. पाठः । २ सर्व इति गो. पाठः । ४ सौप्तिकमिति गो. पाठः ।

भेन प्रेषिता ये च राक्षसा लघुविक्रमाः । राघवस्तीर्ण इत्येवं प्रवृत्तिस्तैरिहाहृता ॥ १७ ॥
तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः । एष मन्त्रयते सर्वैः सचिवैः सह रावणः ॥ १८ ॥
ति ब्रुवाणा सरमा राक्षसी सीतया सह । सर्वौद्योगेन सैन्यानां शब्दं शुश्राव भैरवम् ॥ १९ ॥
ण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम् । उवाच सरमा सीतामिदं मधुरभाषिणी ॥ २० ॥
नाहजननी क्ष्मा भैरवा भीरु भेरिका । भेरीनादं च गम्भीरं शृणु तोयदनिःस्वनम् ॥ २१ ॥
ह्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः । दृश्यन्ते तुरगारूढाः प्रासहस्ताः सहस्रशः ॥ २२ ॥
त्र तत्र च संनद्धाः संपतन्ति सहस्रशः । आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः ॥ २३ ॥
गवद्भिर्नदद्भिश्च तोयौघैरिव सागरः । शस्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा ॥ २४ ॥
एषां विभूषणानां च राक्षसेन्द्रानुयायिनाम् । संभ्रमो राक्षसामेष हृषितानां तरस्विनाम् ॥
प्रभां विसृजतां पश्य नानावर्णसमुत्थिताम् ॥ ॥ २५ ॥

१७] ति० टी०–अथ रावणस्य निष्क्रमणहेतुमाह—अनेन इति । प्रेषितास्ते राक्षसास्तीर्ण इति प्रवृत्तिर्वार्तेहाहृता ॥ १७ ॥

गो० टी०–अनेनेति । तीर्णः तीर्णवान् । प्रवृत्तिर्वार्ता १८

१८] ति० टी०–तां प्रवृत्तिं राघवस्य रावणोत्तरणप्रवृत्तिम् तो निमित्तेन शेषः मन्त्रयते विचारयति ॥ १८ ॥

रा० टी०–एष इति । तां राघवागमननिमित्तिनीं प्रवृत्तिं श्रुत्वा रावणो मन्त्रयते ॥ १८ ॥

गो० टी०–एष इति । एष मन्त्रयत इति साक्षिध्यशो स्वाप ॥ १८ ॥

१९–२०] ति० टी०–शब्दं सिंहनादम् ॥ १९ ॥ २० ॥

रा० टी०–इतीति । सीतया सह इति ब्रुवाणा सरमा सर्वौद्योगेनात्यलक्षितानां सैन्यानां शब्दं शुश्राव ॥ १९ ॥

गो० टी०–इतीति । सीतया सह शुश्रावेत्यन्वयः सर्वौद्योगेन सर्वप्रयत्नेन जनितमिति शेषः शब्दं सिंहनादम् ॥ २० ॥

रा० टी०–दण्डेति । दण्डनिर्घातवादिन्याः शब्दवत्याः भेर्याः महास्वनं शुश्रावेत्यन्वयः सीतामुवाच ॥ २० ॥

गो० टी०–दण्डेति । दण्डनिर्घातवादिन्याः दण्डाहत्या शब्दायमानायाः ॥ २१ ॥

२१] ति० टी०–तोयदो मुख्य संबन्धम् भेरीनादं शृणु रावणेन कृतायं संनाहशब्दमिति शेषः ॥ २१ ॥

रा० टी०–नाहजननी इति । [illegible] ॥

गो० टी०–नाहजननी इति । संनाहशब्दं शृणु इति शेषः तोयदनिर्घोषं तोयदतुल्यं स्वनम् ॥ २१ ॥

२२–२३] ति० टी०–युज्यन्ते रथेषु इति शेषः ॥ २२–२३ ॥

रा० टी०–हृश्यन्ते इति । मत्तमातङ्गाः हृश्यन्ते गमनार्थं रथवाजिनो युज्यन्ते योजयन्ते इत्यर्थः रथवाजिनो युज्यन्ते योजयन्ते इत्यर्थः [illegible] ॥

गो० टी०–हृश्यन्ते इति । मत्तमातङ्गाः मत्तमातङ्गारूढाः हृश्यन्ते अत एव सन्नद्धाः सन्तः तत्र तत्र नियोजितप्रतिस्थाने संपतन्ति । सार्धश्लोक संमिलितान्वयः ॥ २२ ॥

गो० टी०–हृश्यन्ते इति । हृश्यन्ते आरूढ्यन्ते अलङ्क्रियन्त इत्यर्थः । युज्यन्ते रथवाजिनः रथेषु वाजिनः युज्यन्त इत्यर्थः । रथेत्यधिकरणनिर्देशो वा हृश्यन्ते इव व्यापारं कुर्वन्ति ॥ २३ ॥

रा० टी०–आपूर्यन्त इति । तोयौघैः सागर इव सैन्यैः राजमार्गाः आपूर्यन्ते ॥ २३ ॥

गो० टी०–तत्र तत्रेति । सार्धश्लोकः । संपतन्ति सङ्घीभवन्ति । कैः सैन्यैः सेनासमवेतरथगजतुरगपदातिभिः अद्भुतदर्शनैः अलंकारविशेषैरिति शेषः वेगवद्भिर्नदद्भिरिति पाठः ॥ २३ ॥

२४] ति० टी०–प्रसन्नानां शाणोल्लिखनेन निर्मलानाम् चर्मणां फलकम् वर्म कवचम् ॥ २४ ॥

२५] ति० टी०–नानावर्णनीलपीतादिभिः समुत्थितां प्रभां विसृजतां उत्पादयतां नानावर्णसमुत्थितां प्रभां पश्येत्यादरान्वयः ॥ २५ ॥

रा० टी०–शस्त्राणामिति । प्रसन्नानां संस्कृतत्वेन निर्मलानाम् अत एव नानावर्णसमुत्थितां धर्मे वर्मं विदहतः विभवसोः कृपस्य प्रभां विसृजतां शस्त्रादीनां राक्षसेन्द्रानुयायिराक्षसां च एष प्रदृश्यमानः सम्भ्रम उद्वेगोऽस्तीति शेषः सार्धश्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–शस्त्राणामित्यादिश्लोकद्वयम् ॥ प्रसन्नानां लानाम् । चर्मणां फलकानाम् । भूषितानाम् अत एव विसृजताम् उत्पादयताम् उत्थिताम् ऊर्ध्वं प्रसृताम् तेजः नानौपधीवनदाहेन नानावर्णत्वं सिद्धम् । पश्यैत्व प्रभैव कर्म यद्वा विसृज तामिति च्छेदः । तां प्रसि प्रभां पश्य । विसृज शोकमिति शेषः ॥ २५ ॥ २६ ॥

रा० टी०–घण्टानामिति । घण्टानां हयानां च [illegible] ॥ २६ ॥

गो० टी०–घण्टानामिति । घण्टानां अत्यर्थ

१ [illegible] २ [illegible] ३ पश्यत इति गो. पाठः । ४ भूषितानां ५ राक्षसानामिति गो. पाठः । ५ अर्थोत्तर

[वर्म निहतो धर्मं यथा रूपं विभावसोः । यज्ञानां शृणु निर्घोषं रथानां शृणुनिःस्वनम् ॥
हयानां हेषमाणानां शृणु तूर्यध्वनिं यथा । उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम्] ॥
संभ्रमो रक्षसामेष तुमुलं लोमहर्षणम् । श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम् ॥ २६
रामः कमलपत्राक्षो दैत्यानामिव वासवः । अवजित्य [जितक्रोधस्तैमचिन्त्यपराक्रमः ॥
रावणं समरे हत्वा भर्तां त्वाधिगमिष्यति ॥ ॥ २७
विक्रमिष्यति रक्षःसु भर्ता ते सहलक्ष्मणः । यथा यत्रु शत्रुघ्नो विष्णुना सह वासवः ॥ २८ ।
आगतस्य हि रामस्य क्षिप्रमङ्कागतां सतीम् । अहं दृष्टापि विक्रान्तौ त्वां शत्रौ विनिपातिते ॥ २९ ।
असाध्यानन्दजानि त्वं वर्तयिष्यसि जानकि । सभाग्य [परिष्वक्ता तस्योरसि महोरसः ॥ ३० ।
अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम् । धुवमेवं वदन्यासान्वेणीं रामो महाबलः ॥ ३१ ।
तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम् । मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी ॥ ३२ ।

स्थानां निस्वनं नेमिसंघट्टनजम् हेषम् आणानामिति शेषः आङ्पूर्वात् "अण शब्दे" इत्यस्माद्धातोः पचाद्यच् आणानां शब्दायमानानाम् हेषं शब्दम् श्रीलिङ्गभावः आर्षः । निस्वनमिति वा अनुवर्तते । तूर्यध्वनिं यथा तूर्यध्वनिमिव ॥ २७ ॥

२६] ति० टी०—एतदुत्तरम् ' वर्म निर्हतो धर्मं यथारूपं विभावसोः । यज्ञानां शृणु निर्घोषं रथानां नेमिनिःस्वनम् ॥ हयानां हेषमाणानां शृणु तूर्यध्वनिं तथा । उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम् ॥' इति श्लोकद्वयं प्रक्षिप्तमिति मतम्० । संभ्रम इति । एष संभ्रमो रक्षसामेव, अतो रक्षसां तुमुलं लोमहर्षणं भयमागतं विद्धि अर्थाच्छोकघ्नी श्रीस्त्वां भजतीति विद्धि॥२६॥

रा० टी०—उद्यतेति । उद्यतायुधैर्युक्ता हस्ता येषां तेषां राक्षसेन्द्रानुयायिनां रक्षसामेष संभ्रमः उद्वेगः अत एव लोमहर्षणं तुमुलं शब्दः भवतीति शेषः, अत एव रक्षसां भयमागतम् अत एव शोकघ्नी श्रीः त्वां भजति । सार्धश्लोकान्वयी ॥ २८ ॥ २९ ॥

गो० टी०—उद्यतेति । संभ्रमः सन्त्राहः तुमुलः सान्द्रः यत इति शेषः ॥ २८ ॥

गो० टी०—ध्रुवं त्वां भजते लक्ष्मीरित्युपक्रान्तमुपसंहरते—श्रीरिति । शोकघ्नी श्रीः विजयलक्ष्मीः भजति । भविष्यत्सामीप्ये लट्प्रयोगः ॥ २९ ॥

२७] ति० टी०—अथ दैत्यानां निकटस्थां लक्ष्मीं यथा वासवो हतवान्, एवं रामो रावणं समरे हत्वा तवं भर्तां त्वामजित्य शत्रुगृहादवमुच्याधिगमिष्यति ॥ २७ ॥

रा० टी०—राम इति । दैत्यानां दैत्यान् वासव इव रामः रणं समरे अवजित्य पराभूय हत्वा च त्वां त्वाम् अधिगमिष्यति प्राप्स्यति । सार्धश्लोक एकान्वयी ॥ ३० ॥

गो० टी०—राम इत्यादिसार्धश्लोक एकान्वयः । कमलपत्राक्षः । श्रीर्न त्यजति रक्षांसीति सामुद्रिकशास्त्रीयत्वादत्रार्थे श्रीर्नेक्षति तत्रापि श्रेष्ठे तत्रापि चक्षुषी इति नयनसौभाग्यलक्षणवित्तमित्यर्थः । न केवलं सौभाग्यलक्षणेन श्रीप्रभावेणेत्यर्थः—जेतव्यानामिति । अरेर्व्यानां देवानामध्ये वासव इव मरुतां मध्ये इत्यर्थः । अचिन्त्यपराक्रमः एकेन शरेण मरुत्सहस्रविनाशकदशमुखादपराक्रमः तर्हि ताक्ष्णः किं इतीति चिन्ता । [जितक्रोध इति । रावणस्यापि मुख्यबान्धवत्वेन तत्कलत्रभक्षणजनितक्रोधोऽपि भावः दैत्यानामिव दितेः पुत्राणां दैत्यानां वासवः इन्द्रः यथा तान् हत्वा स्वर्गं श्रीं लेभे तथा भर्तृहननजनितक्रोधं त्यक्त्वा भर्तारमधिगमिष्यतीति योजना ॥ ३० ॥

२८-२९] ति० टी०—अथ विक्रमिष्यति च यथा यत्रुघ्नो वा को विष्णुनोपेन्द्रेण सह शत्रुषु विक्रान्तवांस्तथा भर्ता विक्रमिष्यतीत्यन्वयः ॥ २८ ॥ २९ ॥

रा० टी०—विक्रमिष्यतीति । विष्णुना उपेन्द्रेण ॥२८॥

रा० टी०—आगतस्येति । शत्रौ रावणे विनिपातिते सति आगतस्य त्वामभ्युपगतां त्वाम् अहं क्षिप्रं द्रक्ष्यामि ॥२९॥

गो० टी०—एवं संस्तुत्यानो हि कश्चे तत्राह—आगतस्येति । चिरप्रवासादागतस्य दर्शितत्वर्थेन कोपि विकारो नास्ति मया द्रष्टव्य इति भावः ॥ २९ ॥

३०] ति० टी०—असाध्यानीति । असाध्यानि वर्तयिष्यसीत्यन्वयः ॥

रा० टी०—असाध्यानीति । मनोरमः रामस्य उरसि समागम्य परिष्वक्ता त्वम् आनन्दजानि जनितानि असाध्यानि अश्रूणि वर्तयिष्यसि ॥ ३२ ॥

गो० टी०—असाध्यानीति । महोरस इत्यत्र समासान्तविधेरनित्यत्वात् कथभावः । समागम्य परिष्वज्य स्थितस्य तस्य रसि अश्रूणि वर्तयिष्यसीति योजना ॥ ३२ ॥

३१-३२] ति० टी०—अचिरं गतां जघनदेशं प्राप्तां वेणीमित्यन्वयः ॥ ३१ ॥ ३२ ॥

---

१ गो० पु० पाठे । २ तुमुलो लोमहर्षण इति गो० पाठः । ३ विनिर्जितेति गो० पाठः । ४ अवजेति गो० पाठः । ५ परिष्वक्तेति गो० पाठः ।

रणे समरे हत्वा न चिरादेव मैथिलि । त्वया समग्रः सुखार्हो लप्स्यते[1] राघवः ॥ ३३ ॥
सान्त्वितो त्वं रामेण मोदिष्यसि महात्मना । सुवर्णेन समायुक्ता यथा सस्येन[2] मेदिनी ॥ ३४ ॥
गिरिवरमभितो विवर्तमानो हय इव मण्डलमाशु यः करोति[3] ।
तमिह शरणमभ्युपैहि[4] देवि दिवसकरं प्रभवो ह्ययं प्रजानाम् ॥ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ।

सरमा सीता संवादः ।

अथ तां जातसंतापां तेन वाक्येन मोदिताम् । सरमा हृदयाभास मैहीं दग्धामिवाम्भसा ॥ १ ॥

रा० टी०-अचिरादिति । जघनं गतां जघनपर्यन्तावलम्बिनीं बहून् मासान् धृतां एकां वेणीं रामो चिरान्मोक्ष्यते ३४

गो० टी०-अचिरादिति । जघनं गतां नितम्बावलम्बिनीम् बहून् मासान् धृतां बहुमासैर्धृताम् अत्यन्तसंयोगे द्वितीया । रामवियोगात्प्रभृति बद्धामेतां वेणीम् मोक्ष्यते क्षिप्स्यति । आर्षमात्मनेपदम् ॥ ३४ ॥

रा० टी०-तस्येति । तस्य रामस्य मुखं दृष्ट्वा पद्मानि नेमौकं स्वकमिव शोकजं वारि मोक्ष्यसे त्यक्ष्यसे ॥ ३५ ॥

गो० टी०-तस्येति । निमोकं त्यक्तम् निर्मोकदृष्टान्तेन शोकाश्रुणो निःशेषनिवृत्तिरुच्यते । अश्रुमूलं शोकं त्यक्ष्यसीति भावः ॥ ३५ ॥

३३-३४] ति० टी०-समग्रः सहितः ॥ ३३ ॥ ३४ ॥

रा० टी०-रावणमिति । त्वया सह समग्रः सरामः सुखं लप्स्यते ॥ ३६ ॥

गो० टी०-रावणमिति । समग्रः संपूर्णमनोरथः ॥ ३६ ॥

रा० टी०-सभाजितेति । सस्येन मेदिनी भूरिव रामेण सभाजिता सत्कृता त्वं मोदिष्यसि मोदिष्यसे ॥ ३७ ॥

गो० टी०-सभाजितेति । सस्येन समायुक्ता मेदिनी सुवर्णेन यथा तथा महात्मना रामेण समायुक्ता त्वं वीर्येण तच्छौर्येण मोदिष्यसि । ३७ ॥

३५] ति० टी०-गिरिवरं मेरुमभितो विवर्तमानः परिवर्तमानो हय इव यो मण्डलं मण्डलाकारगतिमाशुकरोति[5] तं दिवसकरं ते कुलदैवतं शरणमभ्युपैहि । हि यतोऽयं प्रजानाम् सुखदुःखदानयोरिति शेषः प्रभवः ॥ ३५ ॥

इति श्रीमाधवीये श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०-गिरिवरेति । गिरिवरं सुमेरुमभिवर्तमानो यो हय इव मण्डलं मण्डलाकारगमनं करोति तं शरणं रक्षकं दिवसकरमभ्युपैहि तत्र हेतुः अयं रविः प्रजानां सुखदुःखयोरिति शेषः प्रभवः कारणम् ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

गो० टी०-अथानिष्टनिवारणाय इष्टप्राप्तये च सूर्यनमस्कारं विदधाति—गिरिवरमिति । यः देवः गिरिवरं मेरुम् अभितः परितः "अभितः परितः०" इत्यादिना द्वितीया । अनुवर्तमानः आनुकूल्येन चरन् प्रदक्षिण्येन वा रविरित्यर्थः । हयोऽश्व इव मण्डलं मण्डलगतिम् आशु क्षिप्रम् सुखेनैव करोति । देवं द्योतमानम् दिवसकरं शरणं रक्षणम् अभ्युपैहि गच्छ । शरणीयत्वे हेतुमाह—प्रभव इति । अयं दिवसकरः प्रजानां देवतिर्यङ्मनुष्यस्थावराणाम् प्रभवः कारणम् । हिः प्रसिद्धौ वर्षादिद्वारा जगदाप्यायक इत्यर्थः । अयं प्रास्ताद्रुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्युक्तेः ॥ न पुनरत्र जगत्कारणत्वोक्तिः । अनुपमानेन त्वातिरिक्तपुरुषप्रेर्यत्वाभिधानात् । भीषास्माद्वातः पवत इति भीषोदेति सूर्य इति श्रुतेः ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

१] ति० टी०-तेन वाक्येन रावणवाक्येन अम्भसा वर्षाद्भिरिवेति शेषः ॥ १ ॥

रा० टी०-सीतां प्रति पुनः सरमोक्तिमाह-अथेत्यादिभिः । तेन रावणोक्तेन वाक्येन मोहिताम् अत एव जातसंतापां सीतां सरमा अम्भसा दग्धां महीमिव आह्लादयामास ।

गो० टी०-अथ सरमया रावणाश्रयपरिज्ञानं च तुल्ये अथ ताभिरित्यादिभिः । अथेति प्रथमश्लोकेन पूर्वसर्गोक्तवादः तेन वाक्येन हृदयाभासेत्यन्वयः । यद्वा तेन वा रावणवाक्येन ॥ १ ॥

---

१ समाप्स्यते गो. पाठः । २ सस्येति गो. पाठः । ३ मेरुमिति गो. पाठः । ४ ऽभ्विति गो. पाठः । ५ वर्तेति गो. पाठः । ६ [गो. पाठः । ७ पृथिवी चौरिति गो. पाठः ।

ततस्तस्या हितं सरमाश्चिकीर्षन्ती सखी वचः । उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी ॥ २ ॥
उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे । निवेद्य कुशलं रामे प्रतिच्छन्ना निवर्तितुम् ॥ ३ ॥
नहि मे क्रममाणाया निरालम्बे विहायसि । समर्थौ गतिमन्वेतुं पवनो गरुडोऽपि वा ॥ ४ ॥
एवं ब्रुवाणां तां सीता सरमामिदमब्रवीत् । मधुरं श्लक्ष्णया वाचा पूर्वशोकाभिपन्नया ॥ ५ ॥
समर्थौ गगनं गन्तुमपि चैव त्वं रसातलम् । अवगच्छाम्य कर्तव्यं कर्तव्यं ते मदन्तरे ॥ ६ ॥
मत्प्रियं यदि कर्तव्यं यदि बुद्धिः स्थिरा तव । ज्ञातुमिच्छामि तं गत्वा किं करोतीति रावणः ॥ ७ ॥
स हि मायाबलः क्रूरो रावणः शत्रुरावणः । मां मोहयति दुष्टात्मा पीतमात्रेव वारुणी ॥ ८ ॥
तर्जापयति मां नित्यं भर्त्सापयति चा[illegible] सुघोराभिर्यो मां रक्षति नित्यशः ॥ ९ ॥

२] ति० टी०--चिकीर्षन्ती कर्तुमिच्छन्ती च उवाचेत्यन्वयः ॥ २ ॥

रा० टी०--आह्लादनप्रकारमाह--तत इति चेकिर्षन्ती स्मितपूर्वाभिभाषिणी सरमा उवा

गो० टी०--तत इति । सरमया सीतायाः

३] ति० टी०--अहं प्रतिच्छन्ना गत्वा त्वद्वाक्यं रामे निवेद्य पुनः प्रतिच्छन्ना [illegible] युक्ता ॥ ३ ॥

रा० टी०--तत्प्रकारमाह--उत्सहेयमिति । प्रति[illegible] न् रावणोक्तं वाक्यं त्वां प्रति वचनं कुशलं तव मङ्गल[illegible] मे निवेद्य निवर्तितुमुत्सहेयम् ॥ ३ ॥

गो० टी०--उत्सहेयमिति । कुशलं कुशलप्रति पादकम् त्वद्वाक्यमित्यन्वयः निवर्तितुमुत्सहेयम् समर्थेत्यर्थः ॥ ३ ॥

४] ति० टी०--स्वस्यास्तथा सामर्थ्यं दर्शयति--नहीति ॥ ४ ॥

रा० टी०--नहीति । निरालम्बे विहायसि आकाशे क्रमणायाः मे गतिमन्वेतुं पवनो गरुडो वा न समर्थः ॥ ४

गो० टी०--बहुदूरं कथं गन्तुमर्हसीत्यत्राह--नहीति । क्रमणायाः गच्छन्त्याः ॥ ४ ॥

५] ति० टी०--तां सरमामित्यन्वयः । एवं ब्रुवाणां दूतत्वेच्छुम् । पूर्वशोकाभिपन्नयाश्वासनात्पूर्वं जातेन शोकेन युक्तया ॥ ५ ॥

रा० टी०--एवमिति । एवं ब्रुवाणां सरमां पूर्वशोकाभिपन्नया सरमावचनहेतुकपूर्वप्रादुर्भूतशोकनिष्ठसेयोतिकया च सीताऽब्रवीत् ॥ ५ ॥

गो० टी०--एवमिति । मधुरं मधुरार्थकम् । श्लक्ष्णयेति श्लक्ष्णपूर्वेति । पूर्वं शोकाभिपन्नया संप्रति हृष्टयेत्यर्थः ॥५॥

६] ति० टी०--अथ सीता अपर्णशक्त्या इदानीं अपि प्रसादोपगमनमनुचितमिति विचार्य तत्सामर्थ्यज्ञापनपूर्वं स्वोचितकृत्ये नियोजयति--समर्थौति । 'अवगच्छाम्य कर्तव्यं पाठः पाठ इति कतकः । अन्तरमन्तस्तादृशं मदन्तरे मदर्थे मत्कर्तव्यं त्वया कर्तुं योग्यं तादृशं कर्तव्यं कृत्वा गर्वोन्मानमवगच्छ ॥ ६ ॥

रा० टी०--तदाकारमाह--समर्थौति । गगनं रसातलं च मदर्थं त्वं समर्थेत्यवगच्छामि जानामि मदन्तरे मद्विषये अन्यैरकर्तव्यमपि ते कर्तव्यमित्यपि अवगच्छामि ॥ ६ ॥

गो० टी०--संदेशमाहरिष्यामीति वदन्तीं सरमां प्रति न गन्तव्यमित्युक्ते सरण्यहानिः, रामं प्रति प्रेषणं तत्रस्य सदृशं भवेदिति स्थितायाः सीतायाः न युक्तम् अतो व्याजेन नियुनक्ति--समर्थौति । मदन्तरे मद्विषये अन्यैरकर्तव्यं कर्तुमशक्यं त्वया कर्तव्यं कर्तुं शक्यमित्यवगच्छामि । यद्वा मद्विषये ते कर्तव्यम् अवश्यकरणीयं जानामीत्यर्थः ॥ ६ ॥

७] ति० टी०--मत्प्रियं कर्तव्यमिति यदि तव बुद्धिः स्थिरा[illegible] तदोच्यत इति शेषः । स्थिरैव निःशङ्कं बृहीत्युक्ता चाह--ज्ञातुमिति । इतो गत्वा रावणः किं करोतीति रावणं ज्ञातुमिच्छामि ॥ ७ ॥

रा० टी०--ननु स्वाभिप्रेतं यदेरपत आह--मदिति । रावणः किंकरोतीति ज्ञातुमहमिच्छामि अतः यदि मत्प्रियमन्यैरकर्तव्यं यदि च तव बुद्धिः स्थिरा तदा तं रावणं गत्वा रावणः किं करोतीति ज्ञापयेति ॥ ७ ॥

गो० टी०--मत्प्रियमिति । रावणं गत्वा स किं करोतीति ज्ञातुमिच्छामि स्वत्कर्तृकं रावणज्ञानमिच्छामीत्यर्थः ॥ ७ ॥

८] ति० टी०--पीतमात्रा सद्यः पीता ॥ ८ ॥

रा० टी०--तज्ज्ञाने प्रयोजनमाह--स इति । दुष्टात्मा रावणः पीतमात्रा वारुणीव मां मोहयति ॥ ८ ॥

गो० टी०--तस्य ज्ञानस्य किं प्रयोजनमित्यत्राह--स हीति । पीतमात्रा सद्यः पीता । वारुणी मद्यम् ॥ ८ ॥

९] ति० टी०--तर्जापयतीति । तर्जभर्त्सार्थाभ्याम् 'तत्करोति—' इति णिचि पुगार्थः । भवाचिकी भीषिका तर्जना वाचिकी तु सा भर्त्सनम् राक्षसीभिरिति तृतीयाकथनम् रक्षत्वकरणत्वे ॥ ९ ॥

रा० टी०--तर्जापयतीति यो रावणः राक्षसीभिः तर्जना[illegible]

[illegible]कर्तव्यमिति पा. ग्रं. । ५ स्म इति पा. ग्रं. । ६ स्वामीति पा. ग्रं.

राक्षसानां च सर्वेषामात्मनश्च वधेन वै । निहत्य रावणं संख्ये सर्वयत्नैर्निशाचरम् ॥
प्रतिनेष्यति रामस्त्वामयोध्यामसितेक्षणे ॥ ॥ २६ ॥
एतस्मिन्नन्तरे शब्दो भेरीशङ्खसमाकुलः । श्रुतो वै सर्वसैन्यानां कम्पयन्धरणीतलम् ॥ २७ ॥
श्रुत्वा तु तं वानरसैन्यनादं लङ्कागताः राक्षसराजभृत्याः ।
हतौजसो दैन्यपरीतचेष्टाः श्रेयो न पश्यन्ति नृपस्य दोषात् ॥ ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ।

लङ्कायां राक्षसविनाशसूचकानि दुष्टनिमित्तान्युत्पाताश्च भवन्तीति रावणेन सह त्वया संधिरेव कार्यो न विग्रह इति माल्यव[illegible]णं प्रत्युक्तिः ॥ १ ॥

तेन शङ्खविमिश्रेण भेरीशब्देन नादिना । उपयाति महाबाहू रामः परपुरंजयः ॥ १ ॥
तं निनादं निशम्याथ रावणो राक्षसेश्वरः । मुहूर्तं ध्यानमास्थाय सचिवानभ्युदैक्षत ॥ २ ॥
अथ तान्सचिवांस्तत्र सर्वानाभाष्य रावणः । सभां संनादयन्सर्वानित्युवाच महाबलः ॥ ३ ॥

अनिरस्तः सन् भयात् भयं प्राप्यापि त्वां भोक्तुं न शक्तः रामपक्षलोक एकान्वयी वज्रआहतिः तुमाकारकवस्थितशब्देन तुमुलमाख्यो वा ॥ २५ ॥

गो० टी०-एतादृशाध्यवसायस्य किं निमित्तमित्यपेक्षायां रावणलोभ एवेत्याह-तदेवेत्यादिसार्द्धश्लोकः। तत् तस्येत्यर्थः। राक्षसानामात्मनश्च वधेन अनिरस्तः अनिराकृतः केवलभयात्त्वां भोक्तुं न शक्तः नोत्सहत इत्यर्थः ॥ २५ ॥

२६] ति० टी०-तर्हि मम निर्गमोऽसंभवीत्यत आह—निहत्येति ॥ २६ ॥

रा० टी०-नन्वेवं मम का गतिर्भविष्यतीत्यत आह-निहत्येति । रामो रावणं निहत्य त्वामयोध्यां प्रति नेष्यति ॥२६॥

गो० टी०-कथं तर्हि मे निर्गमनमित्यत आह-निहत्येति। एतत्सर्वं तव मैत्रसौभाग्यलक्षणादित्यभिप्रायेणाह-असितेक्षण इति ॥ २६ ॥

२७] ति० टी०-भेरीशङ्खसमाकुलस्तच्छब्दसमाकुलः सर्वसैन्यानां शब्दः श्रुतः ॥ २७ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नन्तरे समये भेर्यादिशब्दसमाकुलः सर्वसैन्यानां शब्द श्रुतः ॥ २७ ॥

गो० टी०-तस्मात्तस्योपप्लुतिनिमित्तं दर्शयन्नेव कथाशेषं दर्शयति-एतस्मिन्निति। अत्र भेर्यादिशब्दो भेर्यादिशब्दपरः वानरसैन्यानामपि भेर्यादिकमस्तीति किष्किन्धाकाण्डे दर्शितम् ॥२७॥

२८] ति० टी०-नृपस्य रावणस्य दोषादन्यायाच्छ्रेयो न पश्यन्ति नष्टजीविताशा अभूवन्नित्यर्थः ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०-श्रुत्वेति । लङ्कागताः लङ्कानिवासिनः राक्षसराजभृत्याः वानरसैन्यनादं श्रुत्वा हतौजसः अत एव दैन्यपरीतचेष्टाः दैन्ययुक्तव्यापारयुक्ताः सन्तः नृपस्य रावणस्य दोषात् हेतोः श्रेयः कल्याणं न पश्यन्ति ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०-श्रुत्वेति । श्रेयो न पश्यन्ति नृपस्य दोष इति । रावणस्य दोषे निमित्तभूते जीवनभूतमात्मनः श्रेयो न पश्यन्ति ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

१-२] ति० टी०-उपया[illegible]ति शेषः ॥१-२॥

रा० टी०-रावणवृत्तान्तं वर्णयितु[illegible]आह-तेनेति । तेन अतिप्रभूतेन शब्देनोपलक्षितो रामः उपयाति लङ्कामिति शेषः ॥ १ ॥

गो० टी०-अथ माल्यवदुपदेशः पञ्चत्रिंशे-तेनेति । शङ्खविमिश्रेण शङ्खशब्दविमिश्रेण । उपयाति उपागच्छति ॥ १ ॥

रा० टी०-तमिति । रावणः निनादं निशम्य श्रुत्वा मुहूर्तं ध्यानं विचारमास्थाय सचिवानभ्युदैक्षत ॥ २ ॥

गो० टी०-तमिति । ध्यानमास्थाय किं जयेदसौ कर्तव्यमिति ध्यानं कृत्वेत्यर्थः ॥ २ ॥

३] ति० टी०-आभाष्यामन्त्र्य ॥ ३ ॥

रा० टी०-अथेति । आगतसंतापो रावणः सचिवा[illegible]य संबोध्य सभां संनादयन् सन् सचिवानुवाच इत्[illegible]र्थः ॥ ३ ॥

---

१ वानरेति गो. पाठः । २ तदिति गो. पाठः । ३ शब्दमिति गो. पाठः । ४ तदैनश इति गो. पाठः । ५ इति गो. पाठः ।

तिरस्तापनः ... दुरावग्राहपन्नाक्षसेश्वरः । तरणं सागरस्यास्य विक्रमं बलपौरुषम् ॥
दुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम् । भवतश्चाप्यहं वेमि बुद्धे सत्यपराक्रमम् ॥
तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम् । ॥
ततस्तु शुमहामाज्ञो माल्यवान्नाम राक्षसः । रावणस्य वचः श्रुत्वा इति मातामहोऽब्रवीत् ॥
विद्यास्वभिविनीतो यो राजा राजन्नयानुगः । स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे ॥
संदधानो हि कालेन विगृह्यारिभिः सह । स्वपक्षे वर्धनं कुर्वन्महदैश्वर्यमश्नुते ॥
हीयमानेन कर्तव्यो राज्ञा संधिः समेन च । न शत्रुमवमन्येत ज्यायान्कुर्वीत विग्रहम् ॥

गो० टी०—अथेत्यादि । आभाष्य संबोध्य । सभाम आस्थानमण्डपम् । उदीक्षणाशयसङ्काटयति—गर्हयन्निति । गर्हयन्नुवाच महान्तिभां वाचमुवाचेत्यर्थः ॥ ३ ॥

४] ति० टी०—रामबलमहं जानामीति सचिवान्प्रत्याह—जगदिति । जगत्संतापयतीति जगत्संतापनः अनर्थयतीति च्छेदः । अस्य रामस्य ॥ ४ ॥

रा० टी०—तदाकारमाह—तरणमिति । अस्य रामस्य सागरस्य तरणं विक्रमम् अव्याहतगतिं बलपौरुषं च यद्यवन्त उक्तवन्तः तन्मया श्रुतम् एतेन रिपुबलवर्णनं न कर्तव्यमिति सचिवम् ॥ ४ ॥

गो० टी०—गर्हाप्रकारमाह श्लोकद्वयेन—तरणमिति । तूष्णीकान् तूष्णींशीलान् । "शीले को मलोपश्च" इति कप्रत्ययो मलोपश्च । तूष्णींशीलस्तु तूष्णीक इत्यमरः । निरुत्साहानित्यर्थः ॥ ५ ॥ ६ ॥

५] ति० टी०—तूष्णीकानिति । अथ रामविक्रमं विदित्वान्योन्यमीक्षतस्तूष्णीकान्निरुत्साहान्पश्यामीदं किमिति शेषः॥५॥

रा० टी०—अनत इति । रामविक्रमं विदित्वा सत्यपराक्रमानपि भवतः अन्योऽन्यमीक्षतः तूष्णीकान् निरुत्साहानित्यर्थः, अहं वेमि एतेन तेषां कातर्यं सूचितम् ॥ ५ ॥

६] ति० टी०—' मातुः पितामहः ' इति पाठे रावणमातुः पितामहपुत्रस्तस्याः पितेत्यर्थ इति तीर्थः ॥ ६ ॥

रा० टी०—तत इति । ततः अभिषेपवचनश्रवणानन्तरं रावणस्य वचः श्रुत्वा माल्यवान्नाम रावणस्य मातामह इत्यब्रवीत् ॥ ६ ॥

गो० टी०—तत इति । पितामहस्य पुत्रः पैतामहः । पितृव्य इत्यर्थः । कैकसी प्रजापतिपुत्र्यन्तरसामान्येनाभिधानात्माल्यवतस्तद्भ्रातृत्वात् पितामहश्चासौ तस्य निरुत्साहपक्षस्वाभाव्यदीपः । पितेत्यर्थः इत्येके । केचो मातामहोऽयीविति कचित्पाठः ॥ ६ ॥

७] ति० टी०—तत्राद्यमाह—विद्यास्विति । विद्यासु आन्वीक्षिक्यादिषु अभिविनीतः शिक्षितः । नयानुगः नीतिशास्त्रानुसारी यो राजा सः चिरम् ईश्वरत्वं शास्ति अधितिष्ठति । तमिममर्थं विशदयन्काममन्दकः—आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च या विद्यास्तत्क्रियोपदेशैरभिनन्दितियान्वितः । आन्वीक्षिकी ज्ञानं धर्माधर्मौ त्रयीशिक्षितौ । अर्थानर्थौ तु वार्तायां दण्डे नयानयौ ॥ विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम् । शिक्षितो नृपतिर्न कृच्छ्रेष्ववसीदतीति ॥ ७ ॥

८] ति० टी०—तां नीतिमेवाह—संदधान इति । तेन संदधानविधेयोचितकालानुसारेण ॥ ८ ॥

रा० टी०—नीतिमेवाह—संदधान इति । कालेन विहितसमयेन अरिभिः सह संदधानः संधिं कुर्वन् स्वपक्षे वर्धनमुपायं कुर्वंश्च सन् महदैश्वर्यमश्नुते ॥ ८ ॥

गो० टी०—नयानुग इत्युक्तं तत्र नयस्वरूपमाह—संदधान इति । कालेन स्वबलक्षयकालेन संदधानः संधानं कुर्वन् स्वबलवृद्धिकालेन विगृह्णन् विग्रहं कुर्वन् ऐश्वर्यस्यानुरूपम् वैरूपम् संधिविग्रहौ कार्यावित्यर्थः । एवं कुर्वतः फलं स्वपक्षेति ॥ ८ ॥

९] ति० टी०—कश्च तयोः कालस्तत्राह—हीयमानेनेति । हीयमाणेन समेन च पक्षा संधिः कार्यः, ज्यायान्प्रभुश्चेत् कुर्वीत । सर्वथा शत्रुं नावमन्येत । नोपेक्षेतेत्यर्थः ॥ ९ ॥

रा० टी०—उचितकालमेवाह—हीयमानेनेति । हीयमानेन समेन च राज्ञा संधिः रिपुणा सह विधातव्यः कर्तव्यः ज्यायांश्चेत्राजा विग्रहं कुर्वीत यदा नावमन्येत इत्यर्थः न लङ्घेत् ॥ ९ ॥

गो० टी०—संधिविग्रहस्य च कार्यं निरूपयति हीयमानेनेति । हीयमानेन ... राजा ...

विक्रबलस्तु शत्रुं नावमन्येत नोपेक्षेत किंतु तेन सह विग्रहं नीत हीयमानः समः संधिं कुर्यात् अधिको विग्रहं कुर्यादित्यर्थः ॥ ९ ॥

१०] ति० टी०—एवं हि स्वपक्षवृद्धिर्भवतीत्युक्तम् । स्वयं तूर्वनं कुर्वन्निति । तत्तस्मादीयमानस्य तव बलवता रामेण संधिमेव रोचते । संधानोपायमाह—यदर्थमिति । सीतार्थमित्यर्थः । अभियुक्त. परैः स्वयं वाभिनिविष्टोऽसि ॥ १० ॥

रा० टी०—तदिति । तदुक्तहेतोः रामेण सह संधिमेव रोचते एतेन रामस्य समप्रबलान्यतरत्वं सूचितम् । संधेरुपायमाह—यदर्थस्याः सीतायाः अर्थमभियुक्तः अभिनिवेशवानसि सा सीता तस्मै रामाय प्रदीयताम् ॥ १० ॥

गो० टी०—अस्त्वेवं प्रस्तुते किंतूपन्यस्तं तत्राह—तदिति । मात् एवं नीतिशास्त्रस्थितेः हीयमानस्य तव बलवता संधिर्मेव रोचत इत्यर्थः । बलवता संधिदानेन विना न फलति तव सीताप्रत्यर्पणादेव सेत्स्यतीत्याह—यदर्थमिति । यदर्थम् अभियुक्ताः स्म विरुद्धाः स्म सा सीता तस्मै रामाय प्रदीयताम् ॥ १० ॥

११] ति० टी०—शत्रोर्वृद्धिः स्वक्षयश्च संधानकालः, तत्राद्यः स्पष्ट एवेत्याह—तस्येति ॥ ११ ॥

रा० टी०—रामस्य प्रबलत्वं बोधयन्नाह—तस्येति । तस्य रामस्य जयैषिणो विजयाभिकाङ्क्षिणो देवर्षयो गन्धर्वाश्च सन्तीति शेषः तेन हेतुना तव रामेण ते विरोधं मा गमः न कुरु तेन सह सन्धिः रोचताम् ॥ ११ ॥

गो० टी०—कथं रामस्य बलवत्त्वं तत्राह—यस्येति । देवाश्च ऋषयश्च देवर्षयः । ते तुभ्यम् । रामस्य देवबलवत्त्वात् बलवत्त्वमित्यर्थः ॥ ११ ॥

१२] ति० टी०—अथ स्वपक्षक्षयं दर्शयितुं सामान्यतो जगतः क्षयवृद्धिहेतुमाह—असृजदिति । भगवान्पितामहः सुराणामसुराणां च हिताहितप्राप्तिपरिहारार्थौ विधिनिषेधरूपौ द्वावेव पक्षावसृजत् । किं विषयौ तौ तत्राह—धर्माधर्मौ तदाश्रयौ सर्वविधिनिषेधयोः क्रमादाश्रयौ विषयौ । विधिविषयो धर्मो निषेधविषयश्चाधर्मः ॥ १२ ॥

रा० टी०—स्वकीयानां प्रायविनाशकालं बोधयन् जगद्वृत्तान्तमाह—असृजदित्यादिभिः । सुराणामसुराणां सुरनिलयानां दैत्यादीनां च धर्माधर्मौ द्वौ पक्षौ आश्रयणीयत्वेन पक्षसदृशौ पिता महोऽसृजत् अत एव तावेवौ क्रमेण तावेवाश्रयेते ॥ १२ ॥

गो० टी०—देवादीनां रामजयकाङ्क्षित्वे को हेतुरित्याशङ्क्य देवादीनां धर्मपक्षपातित्वाद्धर्मस्य रामाश्रयत्वादित्यभिप्रेत्याह—असृजदित्यादिना । भगवान् सर्वज्ञः पितामहः हि यस्मात् सुराणाम् असुराणाम् च पक्षौ अवलम्बभूतौ द्वावेव धर्माधर्मौ असृजत् अतः धर्माधर्मौ तदाश्रयौ सुरासुराश्रयौ असुरशब्देनाऽसुरप्रकृतयो राक्षसादयश्च विवक्षिताः ॥ १२ ॥

१३] ति० टी०—तत्रामराणां धर्मस्तद्विषयो विधिः पक्षः । राक्षसा राजसा असुरास्तामसा इति भेदः ॥ १३ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—धर्म इति । अमरः धर्मः पक्षः ह्यते राक्षसां असुराणां दानवानाम् अधर्मः पक्षः ह्यते । न तु दानवादीनामपि अग्निहोत्रादेः प्रसिद्धत्वात् कथं तत्रा-धर्म इति वाच्यं भगवद्विद्युक्तकर्तृकस्य धर्मस्याप्यधर्मप्रायत्वेनादोषात् ॥ १३ ॥

गो० टी०—अनयोः कतरः कस्यां पक्ष इत्यत्राह—धर्मो हीति । महात्मनामिति हेतुगर्भविशेषणम् महात्मभावानामित्यर्थः समीचीनप्रकृतीनामिति यावत् अमहात्मनामित्यधिकारादविशेषणं वाक्यशेषम् तथा च धर्मस्य देवपक्षत्वाद्रामस्य तदाश्रयत्वाद्देवादयो रामपक्षपातिन इति भावः ॥ १३ ॥

१४] ति० टी०—अथ तयोः कालविशेषेणाभिभवानभिभवौ दर्शयति—धर्मो वै इत्यादि । यदा कृतं युगमभूत्तदा तत्प्रारब्धकालहेतोः प्रवृद्धो धर्मोऽधर्मं ग्रसतेऽभिभवति वै प्रसिद्धम् । यदा तिष्यः कलिः प्रवर्तते तदा तत एव हेतोरधर्मो धर्मं ग्रसते कलौ पादेन धर्मस्थितेः । तथाहि—सर्वदा सुखसाधनं धर्म एकरूप एव । अधर्मस्त्रिधा । धर्मान्यस्तद्विरोधी तदभावश्चेति । तत्राद्यः शास्त्रादिधर्मभागे दृष्टो धर्माभासः । द्वितीयो हत्यादिलक्षणः । अन्त्यः स्वस्त्रिहितनित्यधर्मलोपात्मा । कृते त्रिविधाधर्माभाव एव । त्रेतादौ क्रमादेकद्वित्रिभागैः धर्मैः संवलनं धर्मस्य । एवं च कलावधर्मांशेनैव तुरीयपादेन धर्मस्य दुर्बलता एवं च धर्मतो [illegible] राक्षसत्वादीति सूचितम् । कलधर्मस्य रक्षोऽसुरपक्षत्वे रक्षोऽसुरार्थं धर्मपूर्वपर्यवसायीति कथमिति चेच्छृणु । देवा. केवलधर्मपरा रक्षोऽसुराः कामरागमत्सरादिधर्मांशपराः तादृशधर्ममयी प्रकृतिर्यदा [illegible] रजस्तमःप्रकृतिरेवेति तावुभौ [illegible]

[illegible] १ पक्षौ इति गो. पाठः । २ [illegible] गो. पाठः । ३ [illegible]

तत्त्वया चरता लोकान्धर्मोऽपि निहतो महान् । अधर्मः प्रगृहीतश्च तेनास्मद्बलिनः परे ॥ १५
स प्रमादात्पुनर्वृद्धस्तेऽधर्मोऽहिंसते हि नः । विवर्धयति पक्षं च सुराणां सुरभावनः ॥ १६
विषयेषु प्रसक्तेन यत्किंचित्कारिणा त्वया । ऋषीणामप्रिकल्पानामुद्वेगो जनितो महान् ॥ १७
तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः । तपसा भावितात्मानो धर्मस्यानुग्रहे रताः ॥ १८

त्त्वात् । अतो धर्मकरणेन सुखिनोऽपि ते काम्यत्वेन सान्ततया धर्मफलान्तेऽधर्मफलभोगभाज इति न दोषः ॥ १४ ॥

रा० टी०—तयोः फलमाह धर्मं इति । यदा धर्मोऽधर्मं ग्रसते तदा कृतमभूत् भवति यदा च अधर्मो धर्मं ग्रसते तदा तिष्यः कलिः प्रवर्तते यद्वा यदा कृतं सत्यं युगमभूत्तदा धर्मोऽधर्मं ग्रसते न्यूनयति यदा तिष्यः कलिः प्रवर्तते तदा अधर्मो धर्मं ग्रसते 'तिष्यः कलौ च पुष्ये च' इत्यमरः ॥ १४ ॥

गो० टी०—एवं देवादिपक्षपातादासस्य बलीयस्त्वमुपपाद्य धर्मस्य प्राबल्यादपि तदाह—धर्मं इति । अत्र यदेति शेषः । धर्मः अधर्मं यदा ग्रसते अभिभवति तदा कृतं युगम् अभूत् भवति पुरुषेषु प्रवर्तते आर्षः कालव्यत्ययः । अधर्मो यदा धर्मं ग्रसते तदा तिष्यः कलिः प्रवर्तते । 'तिष्यः कलौ च पुष्ये च' इत्यमरः ॥ १४ ॥

१५] ति० टी०—अस्तु तावत्, प्रकृते किमायातं तत्राह—तत्त्वयेति । तदित्यव्ययम् । तत्तादृशो निखिलैश्वर्यादिसाधनो धर्मो लोकान्दिग्विजयाय चरता निहतो यज्ञदानतपसां निषेधं चरता त्वया नाशः कृतः अधर्मश्च प्रगृहीतः अनेकद्विजदेवर्ष्यादिपीडनेनेति शेषः । तेन कारणेनास्मदस्मत्तः परे शत्रवो बलिनः धर्महान्यधर्मपरिग्रहयोरभावात् ॥ १५ ॥

रा० टी०—ननु तयोर्युगयोरिदानीमभावात् प्रकृते किमायातमित्यत आह—तदिति । तत् विजयकारी महान् धर्मः लोकान् चरता त्वया निहतः अधर्मः प्रगृहीतश्च एतेनेदानीमेव त्वया कलिः प्रवर्तित इति सूचितम् तेन तव ब्रह्मविरोधित्वमायातमिति व्यञ्जितम् तेन हेतुना परे रिपवो बलिनः सन्तीति शेषः, एतेनात्यधर्मवत्तः सदैव पराभव एव भवतीति व्यञ्जितम् ॥ १५ ॥

गो० टी०—ततः किमित्यपेक्षायां स्वस्यधर्मेण कलेः प्रबलत्वात्कृतापेक्षया कलेर्दुर्बलत्वादस्मदपेक्षया रामो बलवानित्याह—तदिति । लोकान् चरता दिग्विजयार्थमिति शेषः । विनिहतः । परदारपरिग्रहार्थमिति शेषः । अस्मदिति पञ्चमीबहुवचनम् । परे शत्रवो राक्षसा वानराश्च । यद्वा कृतं युगमिति शब्दसमुदायेन शुभं व्यवहर्तृ तिष्य इत्यनेनाशुभम् यदा धर्मः अधर्मं ग्रसते तदा शुभं प्रवर्तते यदा अधर्मो धर्मं ग्रसते तदा अशुभं भवतीत्यर्थः । एवं भवतु नाम किं कृतमित्यत्राह—तदिति । तत् धर्माधर्मयोरेकत्वात् त्वया शुभहेतुर्धर्मो विनिहतः अशुभहेतुरधर्मश्च परिगृहीतः तेन पराजयरूपाशुभोत्पत्तिरूपाशुभहेतुधर्मं एव परे बलिन इत्यर्थः ॥ १५ ॥

१६] ति० टी०—अधर्मजानर्थं दर्शयति—स इति । ते तव प्रमादादपि तदोषात्प्राक्संपादित इदानीं प्रवृद्धोऽधर्मो पीडहिंसोऽस्मान्ससते । सुरैर्भावनं नित्यानुष्ठानं यस्य धर्मो सौऽसौ धर्मः सुराणां तदंशभूतानां परेषां पक्षं विवर्धयति ॥ १६ ॥

रा० टी०—स इति । ते प्रमादात् अविचारादित्यर्थः प्रवृद्धोऽधर्मः नोऽस्मान् ग्रसते अत एव सुरभावनः सुरैः भावनं पोषणं यस्य सोऽसौ धर्म इत्यर्थः, सुराणां पक्षं विवर्धयति ॥ १६ ॥

गो० टी०—अधर्मं स्वीकृत्य धर्मे निहते तेषां सुराणां कथमित्याशङ्क्याधर्मस्याश्रयनाशकत्वादित्यभिप्रायेणाह—स इति । सः अधर्मः ते प्रमादात् अविमृश्यकारणात् विष्टः अस्मान् । ग्रसते नाशयति । सुरभावनः सुरानुकूलः सुराणां पक्षं विवर्धयति ॥ १६ ॥

१७] ति० टी०—रावणस्याधर्मपरिग्रहं प्रपञ्चयति—विषयेष्विति । विषयेषु स्त्रीवारुण्यादिषु प्रसक्तेन तत एव यत्किंचित्कारिणा निर्मर्यादं यथेष्टं कुर्वता त्वया ऋषीणामुद्वेगः क्रोधो जनितः ॥ १७ ॥

रा० टी०—तत्कृताधर्ममेव दोषयन्नाह—विषयेष्विति । विषयेषु परवनितादिषु प्रसक्तेन अत एव यत्किंचित्कारिणा अविचारितकृत्यं यथा तथा ऋषीणां महान् उद्वेगो जनितः ॥ १७ ॥

गो० टी०—स्वकृतस्याधर्मस्य सुरपक्षवृद्धिहेतुत्वं कथयित्वा ऋषीणामुद्वेगजननद्वारा धर्मप्रवर्तकत्वादित्याह—विषयेष्विति । विषयेषु प्रसक्तेन अत एव यत्किंचित्कारिणा देवर्षिमुख्यानां कन्यापत्नीहरणादिकं कुर्वता ऋषीणामुद्वेगमन्युरूपः जनितः कृतः ॥ १७ ॥

१८] ति० टी०—ननु किं तेषां क्रोधेन तत्राह—तेषामिति । तेषां प्रभावः क्रोधस्तापः प्रदीप्तपावक इव दुर्धर्षः दुस्सहः । कुतो दुःसहता तत्प्रभावस्य तत्राह—तपसेति । धर्मस्यानुग्रहेऽनुग्रहः संवर्धनरूपसंपादने रताः ॥ १८ ॥

रा० टी०—तेषामिति । ये धर्मस्य अनुग्रहे संपादने रताः तेषां प्रभावः प्रदीप्तः पावक इव दुर्धर्षः पराभवितुमशक्यः ॥ १८ ॥

गो० टी०—अग्निकल्पत्वमुपपादयति—तेषामिति ॥ १८ ॥

गो० टी०—उद्वेगादिकं कृतवन्ततस्तत्राह—तपसेति । भावितात्मानः पूतात्मानः धर्मस्यानुग्रहे संवर्धने रताः सुरूपैः तैस्तैः अग्निहोममारभ्य विश्वसृजामयनपर्यन्तैः अग्निहोत्रादिभिः क्रतुभिः होमं कुर्वन्ति । देवतोद्देशेन द्रव्यत्यागो यागः । तत्साधनो प्रक्षेपो होम इत्यनयोर्भेदः । अग्निमुद्दिश्य [illegible] ब्रह्मणोपात्तैरेवान् व्यवहरन्ति एव वेदोक्तैरेव [illegible] विवरणमिदम् ॥ १९ ॥ २० ॥

रूपैर्यज्ञैर्यजन्त्येते तैस्तैर्यैस्ते द्विजातयः । तुदन्त्यश्वमेधे विधिनद्वेदोक्तांश्चोपसर्पत ॥ १९ ॥
भिभूय च रक्षांसि ब्रह्मघोषानुदीरयन् ।
दृशो विप्रद्रुताः सर्वे स्तनयित्नुरिवोष्णगे । ऋतीषामग्निहोत्रसमुत्थितः ॥ २० ॥
मादित्य रक्षसां तेजो भूमो व्याप्य दिशो दश । तेषु तेषु च देशेषु पुण्येष्वृत्यवृतव्रतैः ॥ २१ ॥
र्यमाणं तपस्तीव्रं संतापयति राक्षसान् । देवदानवपक्षेभ्यो गृहीतश्च वरस्त्वया ॥ २२ ॥
तुष्या वानरा ऋक्षा गोलाङ्गूला महाबलाः । बलवन्त इहास्माभ्य गर्जन्ति दृढविक्रमाः ॥ २३ ॥
त्पातान्विविधान्दृष्ट्वा घोरान्बहुविधान्बहून् । विनाशमनुपश्यामि सर्वेषां रक्षसामहम् ॥ २४ ॥
खराभिस्तनिता घोरा मेघाः प्रतिभयंकराः । शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वतः ॥ २५ ॥
रुदतां वाहनानां च प्रपतन्त्यश्रुबिन्दवः । रजोध्वस्ता विवर्णाश्च न प्रभान्ति यथापुरम् ॥ २६ ॥

१९] ति० टी०—सुरूपैर्यज्ञैरन्यान्रूपैर्ब्रह्मघोषान्वेदघोषान्तुदन्तो व्यथयन्तो वेदैरुक्तवन्तः ॥ १९ ॥

रा० टी०—तत्रमंत्रमेवाह—सुरूपैरिति । तैस्तैः तत्तद्वेदविहितैरुपेयैः यज्ञे द्विजातयः यजन्ति वेदान् अधीयते च ॥ १९ ॥

रा० टी०—अभीति । रक्षांसि अभिभूय ब्रह्मघोषान् उदीरयन् उच्चारयन् अत एव सर्वे राक्षसाः उष्णगे ग्रीष्मे स्तनयित्नुरिव इव दिशो विप्रद्रुताः ॥ २० ॥

२०] ति० टी०—दिशो विप्रद्रुतास्तदुदीरितब्रह्मघोषेण । राक्षसा इति शेषः । 'स्तनयित्नुर्वलाहकः' । उष्णे ग्रीष्मस्तस्मिन्निति शेषः ॥ २० ॥

रा० टी०—ऋषीणामिति । अग्निकल्पानाम् ऋषीणाम् अग्निहोत्रसमुत्थितो धूमः इतादिशो व्याप्य रक्षसां तेजः आदित्य इव अतिष्ठदिति शेषः ॥ २१ ॥

गो० टी०—तपःप्रवृत्तिकरणैः कस्याह—दिश इत्यादिना । सर्वा दिशः प्रतिविदुताः । राक्षसा इति शेषः । उष्णगे ग्रीष्मे । स्तनयित्नुरिव शेषः इव । जातावेकवचनम् ॥ २१ ॥ २२ ॥

२१] ति० टी०—धूमः अतिष्ठतीति शेषः ॥ २१ ॥

रा० टी०—तैरियति । पुण्येषु देशेषु चर्यमाणं तपः राक्षसान् संतापयति ॥ २२ ॥

२२] ति० टी०—नन्वयमस्माभिरुपेक्षितस्तपः संतापयतु मया तु ब्रह्मणः सकाशादस्त्रलाभः कृत इति चेत्तत्राह—देवेति ॥ २२ ॥

रा० टी०—नन्वयमस्माभिरुपेक्षितस्तपः संतापयतु मया तु ब्रह्मणः सकाशादस्त्रलाभः कृत इति चेत्तत्राह—देवेति । देवादिभ्यः एव त्वया वरो गृहीतः न तु दिव्य मनुष्यादिभ्य इत्यर्थः, तेन मनुष्यादिभ्यो भयमस्तीति सूचितम् । अत्र पृथक् मनुष्या इति । सूचिताः मनुष्यादयः इहागस्य गर्जन्ति ॥ २३ ॥ २४ ॥

गो० टी०—बलिनोति देवाः ब्रह्मदत्तवरमविज्ञा न प्रहर्तुमवकल्पन्तीति चेत्तत्राह—देवदानवपक्षेभ्यो देवदानवयोरेव पक्षपातिभ्यो गृहीतः । न तु मानुषादिभ्य इति भावः ॥ २३ ॥

२३] ति० टी०—वानरादयः । न देवादय इति भावः ॥ २३ ॥

गो० टी०—तर्हि किमायातमित्यत्राह—मानुषा इति । द्वयोरपि बलवचनं पूजायाम् । महाबलाः महासैन्याः । इह लङ्कायाम् ॥ २४ ॥

२४] ति० टी०—किं च दुर्निमित्तैरप्यस्माकमनर्थं प्रतिपद्यमीयत इत्याह—उत्पातानिति । बहुविधान्दिव्यान्तरिक्षभौमभेदभिन्नान्बहूननेकान् ॥ २४ ॥

रा० टी०—उत्पातानिति । विविधान् अनेकनिमित्तकविधायकान् बहुविधान् अनेकप्रकारान् बहून् उत्पातान् दृष्ट्वा राक्षसां विनाशमनुपश्यामि ॥ २४ ॥

गो० टी०—न केवलं परागमनेन किं त्वन्यनिमित्तैरपि भयमुत्प्रेक्ष्यमित्याह—उत्पातानिति । उत्पातान् विविधान् दिव्यान्तरिक्षभौमभेदभिन्नान् । बहुविधान् भौमेषु प्रत्येकं विविधान् । अनुपश्यामि तर्कयामि ॥ २४ ॥

२५] ति० टी०—खराभिस्तनिता दुःखरवशब्दवन्तः । लङ्कामित्यनेन स्वपक्षानर्थः सूचितः ॥ २५ ॥

रा० टी०—उत्पातान्येवाह—खरेत्यादिभिः । खरैः अतिकठोरैः शब्दैः अभिस्तनिताः शब्दवन्तः घोराः अतिक्रूराः मेघाः उष्णेन शोणितेन लङ्कामभिवर्षन्ति ॥ २५ ॥

गो० टी०—खरेति । खराभिस्तनिताः परुषगर्जिताः । घोराः विरूपाः प्रतिभयंकराः प्रतीत्युपसर्गमात्रम् । भयंकरा इत्यर्थः ॥ २५ ॥

२६] ति० टी०—यथापुरं यथापूर्वम् । अनतिक्रमेऽव्ययीभावः । न प्रभान्ति । विभा इति शेषः । वाहनलीद्यर्थे ॥ २६ ॥

रा० टी०—रुदतामिति । रुदतां वाहनानाम् अश्रुबिन्दवः प्रपतन्ति तथोच्छ्वस्ता [illegible] विभा इति शेषः । यथापुरं न प्रभान्ति ॥ २६ ॥

गो० टी०—रुदतामिति । उच्छ्वस्ताः धूसराः । अत एव विवर्णाः विगतवर्णाः ॥ २६ ॥

---

१ निर्गच्छति रा. विनिर्यान्ति गो. पाठः । २ ऐरावतेति गो. पाठः । ३ इति विद्रुता इत्यर्थ इति गो. पाठः । ४ आदेश इति गो. पाठः । ५ [illegible] इति गो. पाठः । ६ प्रतिविद्रुता [illegible] ७ तपेति गो. पाठः । ८ [illegible]

व्याला गोसादवो गृध्रा वाश्यन्ति च मुदेरवम् । प्रविश्य कङ्कगोरामे समवायान् कुर्वते ॥
कालिकाः पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः । स्त्रियः स्वप्नेषु गृह्णन्त्यो गृहाणि प्रतिभाष्य च ॥
गृहाणां बलिकर्माणि श्वानः पर्युपसेवते । खरा गोषु प्रजायन्ते मूषका नकुलेषु च ॥
मार्जारा द्वीपिभिः सार्धं सूकराः शुनकैः सह । किंनरा राक्षसैश्चापि समेयुर्मानुषैः सह ॥
पाण्डुरा रक्तपादाश्च विहंगाः कालचोदिताः । राक्षसानां विनाशाय कपोता विचरन्ति च ॥
चीचीकूचीति वाशन्तः शारिका वेश्मसु स्थिताः । पतन्ति ग्रथिताश्चापि निर्जिताः कलहैर्षिभिः ॥
प्रक्षिणश्च मृगाः सर्वे प्रत्यादित्यं रुदन्ति ते । करालो विकलो मुण्डः पुरुषः कृष्णपिङ्गलः ॥

२७] ति० टी०—व्याला मांसादाः पक्षिणः । 'सर्पो मांसाशनेऽप्युक्तः' इति कोशः । समवायान्व्यधुः ॥ २७ ॥

रा० टी०—व्याला इति । व्यालादयः लङ्कां प्रविश्य वाश्यन्ति भयं कुर्वन्ति आरामे उपवने समवायान् स्वसजातीयसंघान् कुर्वते ॥ २८ ॥

गो० टी०—व्याला इति । व्यालाः दुष्टाः वाश्यन्ति वाञ्छितं कुर्वन्ति कुत्सितरुतं कुर्वन्तीत्यर्थः समवायान् सङ्घान् ॥ २८ ॥

२८] ति० टी०—कालिका महाकाल्यः । स्त्रियः स्वप्नेषु गृहाणि तद्गतिद्रव्यजातं गृह्णन्त्योऽग्रतः स्थिताः प्रतिभाष्य प्रतिकूलभाषणं कृत्वा पाण्डुरैर्दन्तैरुपलक्षिताः प्रहसन्ति ॥२८॥

रा० टी०—कालिका इति । स्वप्नेषु गृहाणि तत्स्थद्रव्याणि प्रतिभाष्य संबोध्य कालिका कराला: स्त्रियः पाण्डुरैर्दन्तैरुपलक्षिताः अग्रतः स्थिताश्च सत्यः प्रहसन्ति ॥ २९ ॥

गो० टी०—कालिका इति । कालिकाः बालवर्णाः स्त्रियः पूतनाप्रमुख्य इति यावत् । शकुन्य इत्येके । पाण्डुरैर्दन्तैरुपलक्षिताः सत्यः प्रतिभाष्य प्रतिकूलमभाष्य गृहाणि गृहस्थितानि गृह्णन्त्यः हसन्ति । एवं रुदन्त इत्यर्थः ॥ २९ ॥

२९] ति० टी०—बलिकर्माणि देवपूजासाधनघृतदध्यन्नपानादीनि श्वानः रुदन्ति । बलिहरणानि श्वान एव भुञ्जते, न तु शस्यमा इत्यर्थ इत्यन्ये ॥ २९ ॥

रा० टी०—गृहाणामिति । गृहाणां गृहस्थानां बलिकर्माणि कृतकाकोदेश्यकबलीन् श्वानः पर्युपसेवते पर्युपसेवन्ते भक्षयन्ति गोषु खराः प्रजायन्ते उत्पद्यन्ते नकुलेषु मूषकाः प्रजायन्ते ॥ ३० ॥

गो० टी०—गृहाणामिति । बलिकर्माणि बलिकर्मसाधनानि हवींषि । नकुलैः सह वर्तन्त इति शेषः ॥ ३० ॥

३०] ति० टी०—द्वीपिभिः शार्दूलैः । समेयुर्मिथुनीभावं गच्छुः ॥ ३० ॥

रा० टी०—मार्जारा इति । द्वीपिभिः सार्धं मार्जाराः राक्षसैः मानुषैश्च किंनरा समेयुः मिथुनीभावं ययुः ॥ ३१ ॥

गो० टी०—मार्जारा इति । समीयुः संयन्ति । द्वीपिभिः शार्दूलैः मानुषैः । राक्षसा इति शेषः । मानुषाश्चोत्पतज्जातीया एव लङ्कायां मानुषामात्रात् ॥ ३१ ॥

३१] ति० टी०—पाण्डुरत्वादिगुणविशिष्टाः कपोता विचरन्ति । गृहेषु मध्ये इति शेषः ॥ ३१ ॥

रा० टी०—पाण्डुरा इति । पाण्डुरत्वादिविशिष्टा विहगाः विचरन्ति ॥ ३२ ॥

गो० टी०—पाण्डुरा इति । कालचोदिताः दैवप्रेरिताः विनाशसमवायेत्यर्थः । वातायं कपिला विहगाः । कपोताः कपोताख्या विहंगा इत्यन्वयः ।

३२] ति० टी०—चीचीकूचीति शब्दानुकारः । कलपक्षान्तरैर्विजिता ग्रथिताः पतन्ति परस्परमाबध्य पतन्ति ।

रा० टी०—चीचीति । चीचीति कूचीति च तत्तच्छब्दानुकरणं वाशन्तः सन्तो वेश्मसु स्थिताः कलहैर्षिभिः स्वैः विजिताः ग्रथिताश्च सन्तः पतन्ति ॥ ३३ ॥

गो० टी०—चीचीति । वेश्मसु मधुरसाळापार्थं पंजरस्थाः । मधुरभाषणानि विहाय चीचीकूचीति वाश्यन्तीत्यर्थः ॥ ३३ ॥

३३] ति० टी०—पतन्तीति । पक्षिणः काकादयः मृगाः निर्जिता अपि पुनः कलहैर्षिणः सन्तः ग्रथिताः पुञ्जीभूताः पतन्ति वाशन्ति प्रत्यादित्यं रुदन्ति चेत्यन्वयः ॥ ३४ ॥

३३] ति० टी०—प्रत्यादित्यं सूर्याभिमुखीभूय रुदन्ति इव रुदन्तीत्यर्थः ॥ ३३ ॥

रा० टी०—पक्षिण इति । पक्षिणो मृगाश्च प्रत्यूषेऽभिमुखं रुदन्ति अथ पुरुष—कराल इति । अतिभयंकरकृतिः अत एव कराल: भयंकरो मुण्डः छिन्नशिरस्कः कृष्णपिङ्गलः इषत्पिङ्गलः पुरुषः कालेकाले प्रतिसंध्यासमयेषां गृहाणि अन्यदेहानि एतान्युक्तानि अन्यानि च मितानि उत्पतन्ति । श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५

रा० टी०—विष्णुमिति । मानुषं रूपमास्थितं विष्णुं स्वप्रतापद्वारा सर्वत्र पूर्णं मन्यामहे अतः अयं मानुषभावः अस्मदज्ञानविपत्तीभूतमनुष्यकृतीरवाप्य मानुषलक्षणः परपुरुष इत्यर्थः ॥ ३५ ॥

रा० टी०—येनेति । येन हेतुभूतेन तेन कारणेन । कृष्णेन ॥ ३७ ॥

गो० टी०—कराल इति । कराल: भीकरः ।

१ ग्रथितेति ख. पाठः । २ सूकरा इति गो. पाठः । ३ विहगा इति गो. पाठः । ४ कृष्णे इति क. पाठः । ५ [illegible]

कालो गृह्णाति सर्वेषां काले कालेऽन्ववेक्षते । एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च ॥
[विष्णुं मन्यामहेरामं मानुषं रूपमास्थितम् । न हि मानुषमात्रोऽसौ रावणो दृढ विक्रमः ॥
येनबद्धः समुद्रे च सेतुः स परमाद्भुतः । कुरूष्व नरराजेन सन्धिं रामेण रावण ॥]
ज्ञात्वाऽवधार्य कर्माणि क्रियतामायतिक्षमम् । ॥ ३४ ॥

इदं वचस्तस्य निगद्य माल्यवान्परीक्ष्य रक्षोधिपतेर्मनः पुनः ।
अनुत्तमेघूत्तमपौरुषो बली बभूव तूष्णीं समवेक्ष्य रावणम् ॥ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिय आदिकाव्ये युद्धकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ।

रावणः माल्यवतो वाक्यं हितमप्रविक्षिप्यामात्यैर्मन्त्रयित्वा नगर्याः प्रागादिप्रतीहारचतुष्टये हस्तादीन् प्रत्यर्थिनिरोधाय नियुज्य कृतकृत्यमन्योऽवरोधं विवेश ।

तत्तु माल्यवतो वाक्यं हितमुक्तं दशाननः । न मर्षयति दुष्टात्मा कालस्य वशमागतः ॥ १ ॥
स बद्ध्वाभ्रुकुटिं वक्त्रे क्रोधस्य वशमागतः । अमर्षात्परिवृत्ताक्षो माल्यवन्तमथाब्रवीत् ॥ २ ॥
हितबुद्ध्या यदहितं वचः परुषमुच्यते । परपक्षं प्रविश्यैव नैतच्छ्रोत्रागतं मम ॥ ३ ॥

विकलाङ्गः विकल इति पाठे हीनाङ्ग इत्यर्थः परुषः परुषवर्णः कालः मृत्युः काले काले सायं प्रातश्च गृह्णाण्यन्ववेक्षते अन्वीक्षमाण इव दृश्यत इत्यर्थः ॥ ३६ ॥

३४] ति० टी०—कालः कालरूपः स पुरुषः सर्वेषां गृहाणि काले काले कालरूपेण सर्वेषां नो गृहाण्यवेक्षते । एतदर्थं परमं मन्यामहे विष्णुं मानुषं रूपमास्थितम् । नहि मानुषमात्रोऽसौ रावणो दृढविक्रमः ॥ येन बद्धः समुद्रे च सेतुः स परमाद्भुतः । कुरुष्व नरराजेन सन्धिं रामेण रावण ॥' इत्यादि श्लोकद्वयं प्रक्षिप्तमिति प्राचीनैर्न व्याख्यातमिति कतकः । ज्ञात्वेति । अस्य रामस्य कर्माण्येतानि निमित्तानि च ज्ञात्वा, आयतिक्षमम् उत्तरकालसुखदं यत्कर्म तदवधार्य यदुचितं तत्क्रियताम् ॥ ३४ ॥

रा० टी०—उपसंहरन्नाह—ज्ञात्वेति । कर्माणि रामकृत्यानि ज्ञात्वा आयतिक्षमम् उत्तरकाले सुखयोग्यं कर्म अवधार्य निश्चित्य क्रियताम् अयं पथ्यः—इदमिति । अनुत्तमेषु निकृष्टेषु राक्षसमन्त्रिषु स्थितः उत्तमपौरुषो माल्यवान् इदं वचो निगद्य रावणं समवेक्ष्य रक्षोधिपतेर्मनः परीक्ष्य ज्ञात्वेत्यर्थः, तूष्णीं बभूव ॥ ३५ ॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

गो० टी०—ज्ञात्वेति । एतानि ज्ञात्वा कर्माणि कर्तव्यानि । यत् आयतिक्षमम् उत्तरकालार्हम् तत्क्रियताम् । [illegible] सीतादानमार्दवानि ॥ ३६ ॥

गो० टी०—इदमिति । अनुत्तमेषु मन्त्रिष्वेषु उत्तमपौरुषो माल्यवान् इदं वचः तत्र सभायाम् निगद्य उक्त्वा चित्वा अन्तर्भावितण्यर्थोयम् रावणं रावणाकारम् समवेक्ष्य इङ्गितादिदर्शनपुरःसरं दृष्ट्वा रक्षोधिपतेर्मनः परीक्ष्य अनिवर्त्यं ज्ञात्वा तूष्णीं बभूव उपदेशाद्विरराम इत्यर्थः ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

१–२] ति० टी०—तस्विति ॥ १ ॥ २ ॥

रा० टी०—माल्यवद्वचनश्रवणानन्तरकालिकं रावणवृत्तान्तमाह—तदित्यादिभिः । माल्यवत उक्तं हितं वाक्यं कालस्य वशमागतो दशाननो न मर्षयति नाङ्गीचकार ॥ १ ॥

गो० टी०—अथ लङ्कायुत्थिकरणं षट्त्रिंशे—तस्विति । हितमुक्तं हितं यथा भवति तथा उक्तम् न मर्षयति नामर्षयत् ॥ १ ॥

रा० टी०—स इति । अमर्षात् परिवृत्ते अक्षिणी यस्य स रावणः माल्यवन्तमब्रवीत् ॥ २ ॥

गो० टी०—स इति । परिवृत्ताक्षः घूर्णिताक्षः ॥ २ ॥

३] ति० टी०—परपक्षं तत्प्रावल्यं प्रविश्यैव परिगृह्यैव वस्तुतोऽहितं वचः परुषं हितबुद्ध्या यदुच्यते नैतन्मम श्रोत्रागतं श्रोत्रेण नैव गृहीतम् ॥ ३ ॥

---

१ शोकश्चायमेतदधिकं क० पाठे । २ इति गो० पाठः । ३ कार्याणीति गो० पाठः । ४ तत्र विशदेति गो० पाठः । ५ श्रोत्रे गतमिति गो० पाठः ।

मानुषं कृपणं राममेकं शाखामृगाश्रयम् । समर्थं मन्यसे केन त्यक्तं पित्रा वनाश्रयम् ॥ १
रक्षसामीश्वरं मां च देवानां च भयंकरम् । हीनं मां मन्यसे केन ह्रीहीनं सर्वविक्रमैः ॥ २
वीरद्वेषेण वा शङ्के पक्षपातेन वा रिपोः । त्वयाहं परुषाण्युक्तो मम प्रोत्साहनेन वा ॥ ३
प्रभवन्तं पदस्थं हि परुषं कोऽभिभाषते । पण्डितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनेन वा ॥ ४
आनीय च वनात्सीतां पद्महीनामिव श्रियम् । किमर्थं प्रतिदास्यामि राघवस्य भयादहम् ॥ ५
हतं वानरकोटीभिः सप्रधानं सलक्ष्मणम् । पश्य कौश्रेदहोभिश्च राघवं निहतं मया ॥ ६
द्वन्द्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे । स रक्षसामाहवणो युद्धे भयमाहारयिष्यति ॥ ७
ह्रिया भज्येयमप्येवं न नमेयं तु कस्यचित् । एष मे सहजो दोषः स्वभावो दुरतिक्रमः ॥ ८

रा० टी०—तदाकारमाह—हितेत्यादिभिः । हितबुद्ध्या अयं मां हितं जानात्विति विचारेण त्वया परपक्षं प्रविश्य आश्रित्य यस्मात् हेतोः अहितं परुषमुच्यते तस्मात् हेतोः एतदुक्तं मम श्रोत्रगतं न न गृहीतमित्यर्थः ॥ ३ ॥

गो० टी०—हितबुद्ध्येति । परपक्षं प्रविश्येव शत्रुं स्नेहमनुसृत्यैव हितबुद्ध्या हितमित्ययं ज्ञास्यतीति बुद्ध्या अहितं परुषं च यद्वच उक्तम् एतत् मम श्रोत्रं न गतमित्यन्वयः ॥ ३ ॥

४] ति० टी०—पुनस्तमाह—मानुषमिति ॥ ४ ॥

रा० टी०—तद्वचनस्य परुषत्वं प्रकटयन्नाह—मानुषमित्यादिभिः । मानुषं रामं समर्थं केन हेतुना मन्यसे सहेतुर्नास्तीत्यर्थः ॥ ४ ॥

गो० टी०—भवत परपक्षानुसारेण न युक्त इत्याह—मानुषमिति । मानुषं जात्या हीनत्वेन कृपणं प्रकृत्या हीनम् एकम् असहायम् शाखामृगाश्रयं क्षुद्रसहायम् पित्रा त्यक्तं निर्धनम् वनालयं राज्यहीनम् रामम् केन कथंप्रकारेण समर्थं प्रबलं मन्यसे ॥ ४ ॥

५] ति० टी०—हीनम् । विक्रमैरित्यनुषज्यते ॥ ५ ॥

रा० टी०—रक्षसामिति । सर्वविक्रमैः अहीनं संयुक्तमित्यर्थः, मां हीनं केन हेतुना मन्यसे ॥ ५ ॥

गो० टी०—स्वस्मिन् तद्विपरीतमाह—रक्षसामिति । हीनं दुर्बलम् ॥ ५ ॥

६] ति० टी०—यस्त्वयाहं परुषाण्युक्तस्तत्तु वीरद्वेषेण वा वीरे मयि द्वेषेण वा, आहोस्विद्रिपौ पक्षपातेन वा, मम प्रोत्साहनेन शत्रुप्रशंसायां क्रोधायुद्याय प्रवर्तिष्यत इति प्रवर्तनेन वा हेतुनेति शङ्के न तु वाक्यस्य यथाश्रुतार्थे तात्पर्यमित्यर्थः ॥ ६ ॥

रा० टी०—वीरेति । त्वया यत्परुषवाक्यमुक्तः तद्वेषेण वा रिपोः पक्षपातेन वा ममप्रोत्साहनेन रिपूत्कर्षश्रवणमात्रेण तत्परिहारे प्रवृत्तो भवतीति बुद्ध्या वा इत्यहं शङ्के अन्यतममिमोमीत्यर्थः ॥ ६ ॥

गो० टी०—एवं परपक्षानुसारेण त्वयोक्तस्यापि दौर्बल्यस्वारस्यदोषभावेपि तौ हेतूनाशङ्कते—वीरद्वेषेणेति । वीरद्वेषेण मयि वीरे द्वेषेण वा रिपोः पक्षपातेन शत्रौ पक्षपातेन वा ॥ ६ ॥

७] ति० टी०—तदेवं समर्थयन्नाह—प्रभवन्तं प्रबलं युद्धादिसमर्थं पदस्थमध्याहृतस्वराज्यस्थं रामं प्रोत्साहनं रिपुकृत्यप्रवृत्तिप्रेरणाप्रयोजनं विना पण्डितस्तत्त्वविशिष्टः कः परुषमभिभाषते न कोऽपीति निश्चयः ॥ ७ ॥

गो० टी०—अन्तिमं निश्चिनोति—प्रभवन्तमिति । प्रभवन्तं प्रतिपक्षातिशिष्टं पदस्थं राज्ये स्थितं प्रोत्साहनं विना परुषं कः पण्डितोऽभिभाषते न कोऽपीत्यर्थः ॥ ७ ॥

गो० टी०—परप्रोत्साहनेनेत्येतदुपपादयति—प्रभवन्तमिति । पदस्थं प्रभावयुक्तम् पदस्थं परिपक्वबुद्धिम् । स्वप्रोत्साहनाभावे पण्डितस्य पदस्थविषयकपरुषवचनम् नोपपद्यत इत्यर्थः ॥ ७ ॥

८-१०] ति० टी०—पद्महीनामित्यनेन लक्ष्मीत्वाभावमभ्युपगम्योक्तं च ॥ ८ ॥ १० ॥

रा० टी०—आनीयेति । किमर्थं राघवस्य भयात् प्राप्य सीतांप्रति दास्यामि ॥ ८ ॥

गो० टी०—अस्तु त्वदुक्तं परमार्थः तथापि दुर्बलभयस्तेषः कथं स्यात्य इत्याह—आनीयेति । किमर्थं केनेत्यर्थः । राघवस्य राघवात् ॥ ८ ॥

रा० टी०—हतमिति । वानरकोटीभिरेतमपि निहतं पश्य ॥ ९ ॥

गो० टी०—हतमिति । स्पष्टोर्थः ॥ ९ ॥

रा० टी०—द्वन्द्वे इति । यस्य द्वन्द्वे संयुगे दैवतान्यपि तिष्ठन्ति स रक्षसः भयं कस्मादाहारयिष्यति प्राप्स्यतीत्यर्थः ॥

गो० टी०—द्वन्द्व इति । द्वन्द्वे द्वन्द्वयुद्धे । एवं रामपक्षे ॥

११] ति० टी०—[illegible] यमितरवेषुवत् न नमेयं तत्स्वभावत् सहज [illegible]

---

१ कृतमिति गो० पाठः । २ दैवतानामिति गो० पाठः । ३ हारयिष्यं गो० पाठः । ४ रीति गो० पाठः । ५ भाषयतीति गो० पाठः ।

यदि तावत्समुद्रे तु सेतुर्बद्धो यदृच्छया । रामेण विस्मयः कोऽत्र येन ते भयमागतम् ॥ ११ ॥
स तु तीर्त्वार्णवं रामः सह वानरसेनया । प्रतिजानाति ते सत्यं न जीवन्प्रतियास्यति ॥ १३ ॥
एवं ब्रुवाणं संरब्धं रुष्टं विज्ञायरावणम् । व्रीडितो माल्यवान्वाक्यं नोत्तरं प्रत्यपद्यत ॥ १४ ॥
जयाशिषा तु राजानं वर्धयित्वायथोचितम् । माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनम् ॥ १५ ॥
रावणस्तु सहामात्यो मन्त्रयित्वाविनिश्चय च । ऊढ्वायास्तु तदा गुप्तिं कारयामास राक्षसः ॥ १६ ॥
व्यादिदेश च पूर्वस्यां प्रहस्तं द्वारि राक्षसम् । दक्षिणस्यां महावीर्यौ महापार्श्वमहोदरौ ॥ १७ ॥
पश्चिमायामथ द्वारि पुत्रमिन्द्रजितं तदा । व्यादिदेश महामात्रं राक्षसैर्बहुभिर्वृतम् ॥ १८ ॥
उत्तरस्यां पुरद्वारि व्यादिश्य शुकसारणौ । स्वयं तत्र गमिष्यामि मन्त्रिणस्तानुवाच ह ॥ १९ ॥

पश्चित्यज्यतां तत्राह–स्वभाव इति । नक्तञ्चरैः कदापि क्षीतलो क्षेतीति भावः ॥ ११ ॥

रा० टी०–द्विधेति । अहं द्विधा भज्येयमपि यदि तदापि इत्यचित्र नमेयम् एष मे दोषः सहजः जन्मनैव जातः अयं स्वभाव इत्यर्थः । नन्व तस्यान्याय्यत्वे त्याज्यतामित्यत आह–स्वभावो दुरतिक्रमः न त्यक्तुं शक्य इत्यर्थः ॥ ११ ॥

गो० टी०–अत्यन्तहितपरं वृद्धं मातामहं कथमेवं पश्यन्नुक्तवानस्मीत्युत्तरेणाह–द्विधेति । राम आगत्य भयं जनयिष्यतीति त्वयोक्तम् न केवलं भयमात्रम् द्विधा भज्येयं शिरश्चेदं प्राप्नुयाम् एवमपि न नमेयम् कस्यचित् न केवलं रामस्य तस्योपि शतगुणबलवतोपि द्विधा भङ्गादपि कस्यचिन्नमनमत्यन्तदुःसहमित्यर्थः । तर्हि हीयमानेन सन्धिः कार्य नीतिशास्त्रविरोधः स्यादाह–एष मे सहजो दोष इति । इति यदि दोषत्वमनुमतं तर्हि स त्याज्य एवेत्याशङ्क्याह–स्वभाव इति । न हि तिक्तो निम्बो मधुरायत इति भावः ॥ ११ ॥

१२–१३] ति० टी०–नन्व रामः कथं मानुष इत्युच्यते, समुद्रे सेतोर्मनुष्यासाध्यत्वादत आह–यदीति । तावत्प्रथमतो रामेण समुद्रे सेतुर्बद्ध इति विस्मयो यदि कौतुक विस्मयः, शुतः सः यदृच्छया दैवात्या घुणाक्षरन्यायेन, न तु स्वसामर्थ्यनिमित्तः, येन सेतुबन्धनेन मे इदं भयमागतम् ॥ १२ ॥ १३ ॥

रा० टी०–यदीति । येन यदृच्छनेन ते भयमागतं स सेतुः यदि रामेण मानुषपूर्वं बद्धः तर्हि को विस्मयः आश्चर्यं यत्पमेवमेवकश्चित् कर्तुं समर्थो इत्यर्थः ॥ १२ ॥

गो० टी०–अथ सेतुबन्धेन विस्मयसे चेत् तदपि काकतालीयम् अतो नास्माकं भयमित्याह–यदीति । तावत् समुद्रे स्वल्पसमुद्र इत्यर्थः ॥ १२ ॥

रा० टी०–स इति । अर्णवं तीर्त्वा आगतः स रामः जीवन् प्रतियास्यति इत्यर्थः सत्यं प्रतिजानाति ॥ १३ ॥

गो० टी०–स इति । अर्णवं तीर्त्वा स्थितो राम इत्यर्थः ॥ १३ ॥

१४] ति० टी०–संरब्धं युद्धे सम्भवन्तम् । रुष्टं कृपितम् । उत्तरं वाक्यं न प्रत्यपद्यत ॥ १४ ॥

रा० टी०–एवमिति । एवं ब्रुवाणं रावणं संरब्धं युद्धे योगवन्तं रुष्टं क्रुद्धं च विज्ञाय माल्यवान् उत्तरं वाक्यं न प्रत्यपद्यत अकथयदित्यर्थः ॥ १४ ॥

गो० टी०–एवमिति । संरब्धम् अहंकारयुक्तम् । व्रीडित इति । स्वोपदेशवैफल्यादिति भावः ॥ १४ ॥

१५–१६] ति० टी०–अभ्यनुज्ञातो रावणेन ॥१५॥१६॥

रा० टी०–जयेति जयाशिषा विजयहेतुकाशीर्वचनेन वर्धयित्वा अभ्यनुज्ञातो माल्यवान् स्वनिवेशनं गृहं जगाम ॥१५॥

गो० टी०–जयेति । यथोचितमिति । प्रत्युत्थानादिरिति भावः ॥ १५ ॥

रा० टी०–रावण इति । रावणो मन्त्रयित्वा निश्चित्य विचार्य च ऊढ्वायाः गुप्तिं रक्षां कारयामास ॥ १६ ॥

गो० टी०–रावण इति । मन्त्रयित्वा कर्तव्यं विचार्य । विनिश्चय निश्चित्य ॥ १६ ॥

१७] ति० टी०–गुप्तिप्रकारः व्यादिदेशेति ॥ १७ ॥

रा० टी०–तत्प्रकारमाह–व्यादिदेशेत्यादिभिः । पूर्वस्यां द्वारि तद्रक्षणार्थमित्यर्थः प्रहस्तं व्यादिदेश दक्षिणस्यां तु महापार्श्वमहोदरौ व्यादिदेश ॥ १७ ॥

गो० टी०–स इति । व्यादिदेश रक्षणायेति शेषः ॥१७॥

१८] ति० टी०–महामात्रमित्यादीन्द्रजिद्विशेषणम्॥१८॥

रा० टी०–पश्चिमायामिति । महामात्रमिन्द्रजितं व्यादिदेश ॥ १८ ॥

गो० टी०–पश्चिमायामिति । स्पष्टः ॥ १८ ॥

१९] ति० टी०–व्यादिश्य तन्मुखतो वृत्तान्तश्रवणोत्तरं तौ तिरस्कुर्यात्तर्यः । अन्योत्तरद्वारे । स्वयं च स्वयमेव गमिष्यामीति तान्मन्त्रिण उवाच ॥ १९ ॥

रा० टी०–उत्तरस्यामिति । उत्तरस्यां द्वारि शुकसारणौ व्यादिश्य अहं आदिष्टरक्षास्थितद्वि अत्र गमिष्यामि यथाकालं सर्वं ज्ञास्यामीत्यर्थः, इति दक्षिण उवाच ॥ १९ ॥

गो० टी०–उत्तरस्यामिति । भविष्यामीत्यनन्तरमिति करणं द्रष्टव्यम् ॥ १९ ॥

१ क्षेत्र गो० पाठः । २ स्याम्यायामथ इति गो० पाठः । ३ स व्यादिश्येति गो० पाठः । ४ अत्र इति गो० पाठः । ५ तत्रेति गो० पाठः । ६ त

राक्षसपुङ्गवः महाबाहुपराक्रमम् । मध्यमेऽस्थापयद्गुल्मे पदातिबहुलं बलं ॥ २० ॥
एवं विधानं लङ्कायां कृत्वा राक्षसपुंगवः । कृतकृत्यमिवात्मानं मन्यते कालचोदितः ॥ २१ ॥
विसर्जयामास ततः स मन्त्रिणो विधानमाज्ञाप्य पुरस्य पुष्कलम् ।
जयाशिषा मन्त्रिगणेन पूजितो विवेश सोऽन्तःपुरमृद्धिमन्महत् ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

षट्त्रिंशः सर्गः ।

राक्षसभीवधयोरन्येषु हनुमदादिषु हरिषु च लङ्कायां कर्तव्यं कार्यसिद्धौ मन्त्रयमाणेषु विभीषणः षट्सचिवतुष्टयेन सह प्रविश्य सर्वं वीक्ष्य प्रतिनिवृत्तेन कथितं पौलस्त्य कृतद्वारसंविधानं व्यवेदयत् रामोऽपि प्रतिद्वारं कपीनियुज्य स सैन्यः

नरवानरराजानौ स हि वायुसुतः कपिः । जाम्बवान्ऋक्षराजश्च राक्षसश्च विभीषणः
अङ्गदो वालिपुत्रश्च सौमित्रिः शरभः कविः । सुषेणः सहदायादो मैन्दो द्विविद एव च
गजो गवाक्षः कुमुदो नलोऽथ पनसस्तथा । अभित्रविषयं प्राप्ताः समवेताः समर्थयन्
इयं सा लक्ष्यते लङ्का पुरी रावणपालिता । सासुरोरगगन्धर्वैः सैन्यैरपि सुदुर्जया
कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये । नित्यं संनिहितो यत्र रावणो राक्षसाधिपः

२०-२१] ति० टी०—तीर्थं क्रमणक्षमम् । मध्यमे पुरमध्यवर्तिनि सेनासंनिवेशेऽस्थापयत् ॥ २० ॥ २१ ॥

रा० टी०—राक्षस इति । विरूपाक्षं मध्यमे गुल्मे अस्थापयत् ॥ २० ॥

गो० टी०—राक्षसमिति । मध्यमे गुल्म इति । गुल्मो नाम नगरमध्यचैत्यस्थानम् ॥ २० ॥

रा० टी०—एवमिति । राक्षसपुङ्गवः लङ्कायामेवं विधानं कृत्वा आत्मानं कृतकृत्यमिव मन्यते मेने ॥ २१ ॥

गो० टी०—एवं मिति । विधानं रक्षणसंविधानम् ॥ २१ ॥

२२] ति० टी०—जयाशिषा जयाशीर्वादरूपाभिः ॥ २२ ॥

इति श्रीरामभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०—विसर्जयामासेति । स रावणः पुरस्य पुष्कलं बहुविधानमाज्ञाप्य मन्त्रिणो विसर्जयामास मन्त्रिगणेन जयाशिषा पूजितः स रावणः महत् ऋद्धिमत् अन्तःपुरमाविवेश ॥ २२ ॥

इति श्रीमद्राघवीयरामायणव्याख्याने रामायणभारतीरमणे युद्धकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

गो० टी०—विसर्जयामासेति । पुष्कलं सर्वतः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीर्ति[illegible] ॥ ३६ ॥

१] ति० टी०—नरवानरौ रामसुग्रीवौ इत्यादि भवेत् ॥ १ ॥

२] ति० टी०—सहदायादः सबन्धुः ॥

३] ति० टी०—अभित्रविषयं शत्रुदेशम् मन्त्रयेत् ॥ ३ ॥

रा० टी०—रावणवृत्तान्तमुक्त्वा रामसुग्रीवौ इत्यादिभिः । अभित्रविषयं रिपुदेशं प्राप्ताः । ते च राजानौ रामसुग्रीवौ समालान्तविजेतव्यं गुणादयश्च समर्थयन् समर्थयन्त अतर्कयन् काव्ये ॥ १-३ ॥

गो० टी०—अथ रामस्य सेनागृहविधानं नरवानरेत्यादिश्लोकत्रयमेकान्वयम् । सहदायादो सुतबान्धवाविति समः । इदं विशेषणं तस्य । अभित्रविषयं शत्रुदेशम् । समर्थयन् समन्वयन्

४] ति० टी०—मन्त्रप्रकारः—इयमिति । हितैः सर्वैर्वैरपि यातु दुर्जया भूयो लेयम् ॥

रा० टी०—तत्प्रकारमाह—इयमिति । सुदुर्जया इयं लङ्का उच्यते ॥ ४ ॥

गो० टी०—अथ विचारप्रकारमेवाह—इयं सा इत्यमता पूर्वमुक्ता । कार्यसिद्धिं विजयसिद्धिं प्रधानीकृत्य विनिर्णये निमित्ते मन्त्रयध्वम् विनिर्णयाय मन्त्रः प्रवर्तयतामित्यर्थः ॥ ४ ॥ ५ ॥

५] ति० टी०—कार्यसिद्धिं पुरस्कृत्य [illegible] कृत्य तदुपायनिश्चयाय मन्त्रः क्रियताम् । [illegible] संनिहितः सेव्य लङ्केति शेषः ॥ ५ ॥

---

१ कङ्कणा इति पि० पाठः । २ चेति पि० पाठः । ३ सर्वा वानिति पि० पाठ । ४ दाक्ष इति पी० पाठः । ५ [illegible]

तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत् । कार्यमप्राप्यपूर्वं तु कुर्वाणं विभीषणः ॥ ५ ॥
वैनतेयश्च संपातिः प्रमतिश्चैव तथा । मत्वा लङ्कां ममामात्या पुरीं पुनरिहागताः ॥ ७ ॥
शकुनयः सर्वे प्रविष्टाश्च रिपोर्बलम् । विधानं विहितं यच्च तद्बुद्धा समुपस्थिताः ॥ ८ ॥
ज्ञानं यथाबुद्धते रावणस्य दुरात्मनः । राम तद्बुधतः सर्वं यथातथ्येन मे शृणु ॥ ९ ॥
गृहीत्वा सबलो द्वारमाग्नेयं तिष्ठति । दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ ॥ १० ॥
जिघृक्षुश्चिमं द्वारं राक्षसैर्बहुभिर्वृतः । पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः ॥ ११ ॥
नानाप्रहरणैः शूरैरावृतो रावणात्मजः । राक्षसानां सहस्रैस्तु बहुभिः शस्त्रपाणिभिः ॥ १२ ॥
परमसंविग्नो राक्षसैः सह मन्त्रवित् । उत्तरं नगरद्वारं रावणः स्वयमास्थितः ॥ १३ ॥
विरूपाक्षस्तु महता शूलमुद्गरधनुष्मता । बलेन राक्षसैः सार्धं मध्यमं गुल्ममाश्रितः ॥ १४ ॥
एतानेवंविधान्गुल्मांल्लङ्कायां समुदीक्ष्य ते । मामका मन्त्रिणः सर्वे शीघ्रं पुनरिहागताः ॥ १५ ॥
नानां देवसहस्रं रथानामयुतं तथा । हयानामयुते द्वे च सौम्यां कोटिं च रक्षसाम् ॥ १६ ॥

रा० टी०—कार्येति । यत्र रावणो नित्यं संनिहितः तत्र पूर्वमिति शेषः, कार्यसिद्धिं पुरस्कृत्य उद्दिश्य विनिर्णये निर्णयार्थं मन्त्रयध्वम् ॥ ५ ॥

६–७] ति० टी०—अप्राप्यपूर्ववदप्राप्तार्थपदवदपशब्दहीनं पुरुषार्थं बहुर्थविशिष्टम् ॥ ६ ॥ ७ ॥

रा० टी०—अर्थेति । तेषु रामादिषु ब्रुवाणेषु सत्सु रावणावरजो विभीषणः पुरुषार्थं बहुर्थविशिष्टम् अप्राप्यपूर्ववत् पशब्दहीनं वाक्यमब्रवीत् ॥ ६ ॥

गो० टी०—तथेति । अप्राप्यपूर्ववत्संस्कृतपदवत् । दीर्घा लुप्तप्रतिपाद्ये स्वदेशभाषादिरहितत्वकृतानित्यर्थः ॥६॥

रा० टी०—तदाकारमाह—अनल इत्यादिभिः । अनलदयो ममामात्याः लङ्कां गत्वा पुनरिहागताः ॥ ७ ॥

गो० टी०—अनल इत्यादि—लोकवत्पदम् । विधानं नगररक्षणसंविधानम् । ते दुरात्मनो रावणस्य यत्संविधानमाद्रः तद्यथातथ्येन याथार्थ्येन बुबुधतः मे मत्तः शृणु ॥ ७ ॥ ९ ॥

८–९] ति० टी०—यच्च विधानं विहितम् । पुरस्कृत्यार्थमिति शेषः । समुपस्थिता मम समीपं प्राप्ताः ॥ ८ ॥ ९ ॥

रा० टी०—गमनप्रयोजनं शकुनयोगाह—पूर्वेति । शकुनयः पक्षिणो भूत्वा रिपोर्बले प्रविष्टाः सर्वेऽमात्याः यद्विधानं पुररक्षोपायो विहितं कृतं तद्बुद्धा समुपस्थिताः पुनरागताः ॥८॥

रा० टी०—संविधानमिति । रावणस्य संविधानमुपायं ममामात्याः यथाबुद्धं तथा याथातथ्येन बुबुधतो मे शृणु ॥ ९ ॥

१०–११] ति० टी०—पूर्वं द्वारमित्यन्वयः ॥ १० ॥ ११ ॥

रा० टी०—तदुक्तमेवाह—पूर्वमित्यादिभिः । पूर्वं द्वारमाग्नेयं प्रहस्तस्तिष्ठति ॥ १० ॥

गो० टी०—पूर्वमिति । स्पष्टः ॥ १० ॥

रा० टी०—इन्द्रजिदिति । पश्चिमं द्वारं रावणात्मजः इन्द्रजित्तिष्ठति उत्तरं तु युक्तो विधानकर्ता स्वयं रावण आस्थितः श्लोकत्रयमेकान्वयि ॥ ११–१३ ॥

गो० टी०—इन्द्रजिदिति । पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः बहुभी राक्षसैः प्रधानराक्षसैश्चेतः नानाप्रहरणैः शूरैरावृतः रावणात्मजः इन्द्रजित्पश्चिमद्वारम् आसाद्य तिष्ठतीत्यन्वयकृप्यते ॥ ११ ॥

१२] ति० टी०—राक्षसानां सहस्रैरित्यादि रावणविशेषणम् ॥ १२ ॥

१३–१५] ति० टी०—परमसंविग्नः शुकसारणावेदितमहाबलस्मरणादन्तःकरणेऽतिभीतः ॥ १३–१५ ॥

गो० टी०—राक्षसानामित्यादि । अतिसंविग्नः अकम्पितहृदयः । राक्षसैः प्रधानैश्चेतैः ॥ १२ ॥ १३ ॥

रा० टी०—विरूपाक्ष इति । विरूपाक्षो मध्यमं गुल्ममाश्रितः ॥ १४ ॥

गो० टी०—विरूपाक्षस्त्वित्यादि । बलेन सेनया । राक्षसैः मुख्यैः ॥ १४ ॥

रा० टी०—एतानिति । एते मन्त्रिणः एतादृशान् गुल्मान् समुदीक्ष्य पुनरिहागताः ॥ १५ ॥

गो० टी०—एतानिति । गुल्मान् सेनाः । गुल्मो रुकुस्तम्बसेनाश्चित्यमरः ॥ १५ ॥

१६] ति० टी०—तदनाधिक्षातुंस्तदुचितैःस्वबलैः प्रतिरोधकानुपलक्ष्य तत्रत्यबलस्य समाधिकन्यूनतापरिज्ञानाय तत्परिच्छेदमाह—गजानामिति । गजयोधिनामित्यर्थः । रथानां रथिनामयुतं दशसहस्रम् । [illegible] कोटिः त्रिंशदधिकसंख्याधिका कोटिरित्यर्थः ॥ १६ ॥

---

१ स्थिते गो. पाठः । २ क्रमम इति गो. पाठः । ३ प्रथम इति गो. पाठः । ४ यथातत्त्वेनेति गो. पाठः । ५ नीयेविति गो. पाठः । ७ पूर्वमित्यादि गो. पाठः । ८ बुधिमुद्र इति गो. पाठः । ९ ब्रुवाणेति गो. पाठः । १० जाग्रिमं इति गो. पाठः । ११ लङ्कामिति गो. [illegible] । १३ च मध्यं चेति गो. पाठः । १४ पुरे इति गो. पाठः । १५ [illegible]

विशतस्त्रयस्त्रिंशत्कोटयस्ततस्तायिनः । इष्टा राक्षसराजस्य [illegible] विभीषणः ॥
एकैकस्यात्र युद्धार्थं राक्षसस्य विशांपते । परीवारः[1] सहस्राणां सहस्रमुपतिष्ठति[2] ॥ १८ ॥
एतां प्रवृत्तिं लङ्कायां मन्त्रिभ्योक्तां विभीषणः । एवमुक्त्वा मन्त्रिवाहू राक्षसांस्तानदर्शयत् ॥ १९ ॥
लङ्कायां सचिवैः सर्वैः रामाय प्रत्यवेदयत्[3] । रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् ॥ २० ॥
रावणावरजः श्रीमान्रामप्रियचिकीर्षया । कुबेरं तु यदा राम रावणः प्रतियुद्ध्यति[4] ॥ २१ ॥
षष्टिः शतसहस्राणि[5]दा निर्यान्ति राक्षसाः । पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात् ॥
[illegible]पण रावणस्य दुरात्मनः । ॥ २२ ॥
[illegible] मन्युर्न कर्तव्यः कोपये त्वां न भीषये । समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे ॥ २३ ॥

१० टी०—गजानामिति । सामा किंचिदूनाधिका एव स्तीति शेषः ॥ १६ ॥

१० टी०—गजानामित्यादि । गजानां गजयोधिनाम । स्थानां रथानामित्यत्राप्येवं द्रष्टव्यम् । हयानां सप्त कोटिः द्वे अयुते चेत्यन्वयः । एते एतावन्तः । यद्वा गजानामित्यादिशब्दा गणनापराः एव[illegible] टी०—धिकसङ्ख्योच्यते । रथानां द्वे अयुते । [illegible]यक० [illegible]यां कोटिः । एते रावणस्येष्टा अन्तरङ्गाः । [illegible]र्वे । आततायिनः क्रूरा इत्यर्थः ॥ १६ ॥ १७ ॥

१७] ति[illegible] आततायिनः मन्त्रिणाएते पृथपा गणिताः ॥ १७ ॥

१० टी०-विख्याता इति । एते उक्तसंख्याकाः राक्षसाः राक्षसराजस्य नित्यमिष्टाः ॥ १७ ॥

१८] ति० टी०—सहस्राणां सहस्रादः अयुतलक्षमित्यर्थः । एकैकस्य राक्षसस्य परिवारः पौरुहार्थे । उक्तसंख्या उपतिष्ठन्ति ते ॥ १८ ॥

रा० टी०—एकैकस्येति । एकैकस्य राक्षसस्य सहस्राणां पदमं बहुसहस्रमित्यर्थः, परीवारः युद्धार्थं उपतिष्ठति ॥ १८ ॥

गो० टी०—एकैकस्येति । अत्र राक्षसेषु एकैकस्य राक्षसस्य सहस्राणां सहस्रं दशलक्षसङ्ख्याविशिष्टः परिवारः इदानीं युद्धार्थं युद्धनिमित्तम् । उपतिष्ठत इत्यन्वयः ॥ १८ ॥

१९] ति० टी०—एतां मन्त्रिप्रोक्तां प्रवृत्तिम् । एवं प्रकारणोक्तान्तरान्राक्षसानलादीश्चतुरो मन्त्रिणोऽदर्शयत् ॥ १९ ॥

रा० टी०—एतामिति । विभीषणः मन्त्रिप्रोक्तां लङ्कायामेतां प्रवृत्तिमेवमुक्त्वा राक्षसान् अनलादीन् स्वमन्त्रिणः अदर्शयत् एतैरेव दृष्टमित्यबोधयत् ॥ १९ ॥

गो० टी०—एतामिति सार्धश्लोकः । तान् मन्त्रिभूतान् । निजान्तरं सचिवैः प्रयोज्यकर्तृभिः । लङ्कायां सर्वां प्रवृत्तिमित्यत्रलक्ष्यते । रामाय प्रत्यवेदयत् सचिवैरपि तं दृष्टान्तवेदयदित्यर्थः ॥ १९ ॥

२०-२१] ति० टी०—तैः सचिवैः करणभूतैः सर्वंलङ्कायां तत्प्रवृत्तिवेदयत् तदुत्तरं राममिदमब्रवीच्च ॥ २० ॥ २१ ॥

२२] ति० टी०-षष्टिः शतसहस्राणि षष्टिलक्षमित्यर्थः इदानीं बहुविधमित्यर्थः । पराक्रमादिना रावणस्य [illegible] सत्त्वगौरवाद्धैर्यातिशयात् तत्सङ्ख्याः ॥ २२ ॥

रा० टी०-लङ्कायामिति । सचिवैः करणभूतैः लङ्कायां तत्प्रवृत्तिं तस्यै रावणावरजो विभीषणः प्रत्यवेदयत् अकथयत् इदमुत्तरं वक्ष्यमाणं अब्रवीत् । सार्धे श्लोक एकान्वयी ॥ २० ॥

२१० टी०—तद्वचनाकारमाह-कुबेरमित्यादिभिः । हे राम ! यदा रावणः कुबेरं प्रत्ययुध्यत तदा अत्र युद्धे पराक्रमादिना ये रावणस्य सत्त्वाः तेषां रक्षसां षष्टिशतसहस्राणि वा लक्षमित्यर्थः, निर्यान्ति । अर्द्धचतुर्थमेकान्वयि ॥ २१ ॥ २२

गो० टी०-रामेत्यादि श्लोकत्रयम् । उत्तरम् अग्रतो वक्ष्यमाणं । दिग्विजयकालिकं यदाधुनिकबलमपि कर्मणि [illegible] यितुं पूर्वबलं परिगणयति-कुबेरमिति । निर्यान्ति निर्यास्यन्ति । पराक्रमेण पराभिभवासामर्थ्येन । वीर्येण पूर्वे स्वयमनुभूतेन तेजसा प्रतापेन सत्त्वगौरवात् धैर्यातिशयेनेत्यर्थः । दर्पेण च रावणस्य अत्र ये सहस्रादिसङ्ख्या राक्षसा हतास्ते पूर्वमित्यन्वयः ॥ २०-२२ ॥

२३] ति० टी०—अत्र रावणवधवर्णनविषये मन्युः स्वात्मनो दैन्यमपि शोकश्च न कार्यो राजन्यत् । यतस्त्वं रामं प्रति रोषवान् इत्यर्थः । तत्रहेतुमाह—समर्थ इति ॥ २३ ॥

रा० टी०—अत इति । यतः सुराणामपि निग्रहे त्वं समर्थो ह्यसि अतः अत्र युद्धे मन्युरिति शोको न कर्तव्यः अतिशोकमन्तरेण ते विजयो भविष्यतीति तात्पर्यम् अत एव त्वां न कोपये नापि भीषये ॥ २३ ॥

गो० टी०—स्वामिन्विभो शत्रुबलवर्णनमूलकमित्यादि [illegible] परिहरति-अथेति । अत्र वधवर्णने सति मन्युः कोपः कर्तव्यः । कोपये शत्रुनिरसनाय रोषमुत्पादये न भीषये शत्रुवधवर्णनेन भीतिमुत्पादये । रोषोत्पादनस्य फलमाह-समर्थो ह्यसीति ॥ २३ ॥

---

१ परिवार इति गो. पाठः । २ तिष्ठते इति गो. पाठः । ३ सर्वानिति गो. पाठः । ४ अब्रवीत्तेति गो. रा. पाठः । ५ रक्षसामिति रा. पाठः । ६ [illegible] गो. पाठः । ७ रोषे इति गो. पाठः ।

लक्ष्मणाग्रजो वाक्यमेवं ब्रुवति राघवः । शत्रूणां प्रतियातार्थमिदं वचनमब्रवीत् ॥ २५ ॥
पूर्वद्वारं तु लङ्काया नीलो वानरपुंगवः । प्रहस्तं प्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः ॥ २६ ॥
अङ्गदो वालिपुत्रस्तु बलेन महता वृतः । दक्षिणे वाधतां द्वारे यमोऽप्यत्र महोदरौ ॥ २७ ॥
पश्चिमद्वारं निर्ऋत्या पवनात्मजः । प्रविशत्वमेयात्मा बहुभिः कपिभिर्वृतः ॥ २८ ॥
देवदानवदुर्धर्षान्नागयक्षगणांश्च महाबलान् । विमर्दकारिणः क्षुद्रो वरदानबलान्वितः ॥ २९ ॥
परिक्षिपति यः सर्वाल्लोकान्संतापयन्प्रजाः । तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः ॥ ३० ॥
उत्तरं नगरद्वारमहं सौमित्रिणा सह । निपीडयाभिभवेद्यामि सबलो यत्र रावणः ॥ ३१ ॥
वानरेन्द्रश्च वृद्धवाक्षराजश्च वीर्यवान् । राक्षसेन्द्रानुजश्चैव गुल्मे भवतु मध्यमे ॥ ३२ ॥
न चैव मानुषं रूपं कार्यं हरिभिराहवे । एष नः संज्ञा युद्धेऽस्मिन्वानरे बले ॥ ३३ ॥

२४-२५] ति० टी०-तस्मात्तेन तत्तद्वारेषु सर्वा सेना विभज्य स्थापिता, अस्मात्कारणादिदं वानरानीकं तद्वेत्ता विभागेन सर्वा व्यवस्थिता तत्तद्वलेन बलेन हतं क्षयं निर्मिष्यति ॥ २४ ॥ २५ ॥

२६] गो० टी०-पूर्वेति । इदं वानरानीकं व्यूह्य व्यूहरचनया संस्थाप्य रक्षणं कृत्वा निर्मिष्यति निर्गमिष्यति व्यवस्थेत्यर्थः । मध्यमः ॥ २६ ॥

२७] गो० टी०-अङ्गदेति । यम राक्षसस्तस्य व्यूहत्वात् कल्पाद्वर्षेण क्षयं करोति यमयुद्धेन राक्षसेनाक्षयकरत्वमेवेत्यर्थः । अभिभवेत् । अङ्गदयमकक्षयकरत्वात्तुरङ्गे ॥ २७ ॥

२८] वा० टी०-रावणावरणे एवं ब्रुवति सति शत्रूणां प्रतियातार्थं प्रतिक्रियार्थम् ॥ २८ ॥

२९] गो० टी०-राक्षसेति । प्रतियातार्थं प्रतिक्रियार्थम् ॥ २९ ॥

२६-२७] ति० टी०-प्रहस्तं प्रतियोद्धा प्रहस्तस्य सेनापतेः प्रतियोद्धा ॥ २६ ॥ २७ ॥

२७] वा० टी०-तदाज्ञयाह—पूर्वेत्यादिभिः । लङ्कायाः पूर्वद्वारे विघ्नमाने सति इति क्रमेणोत्तरत्रापि योज्यं । नीलः प्रतियोद्धा स्यात् वैपक्षेत्र एव व्यवस्थितत्वात् ॥ २६ ॥

गो० टी०-पूर्वेति । द्वारे स्थित्वेति शेषः ॥ २६ ॥

वा० टी०-अङ्गद इति । वालिपुत्रोऽङ्गदः दक्षिणे विघ्नमाने सति वधायाभिमुखं गच्छतु ॥ २७ ॥

गो० टी०-अङ्गद इति । तत्र ॥ २७ ॥

२८] ति० टी०-पवनात्मजमाह्वानयति । तदनीमिति । तदनीमिति । तदनीमिति । तदनीमिति ॥ २८ ॥

वा० टी०-पश्चिमद्वारं [illegible] ॥ २८ ॥

गो० टी०-हनुमानिति । अप्रमेयात्मेति [illegible] ॥ २८ ॥

२९] ति० टी०-विप्रकारी वरः ॥ २९ ॥

३०-३२] ति० टी०-सर्वलोकान्संतापयन्प्रजाः [illegible] । अहं तस्य वधे धृतः कृतप्रतिज्ञो यतः [illegible] ॥ ३० ॥

वा० टी०-दैवादीन [illegible] ॥ ३० ॥

गो० टी०-अस्य चो [illegible] ॥ ३० ॥

३१] ति० टी०-सौमित्रिणा सह । [illegible] ॥ ३१ ॥

३२] ति० टी०-वानरेन्द्रश्च [illegible] ॥ ३२ ॥

गो० टी०-वानरेन्द्र इति । [illegible] ॥ ३२ ॥

३३] ति० टी०-अथ वानराणामिव [illegible] ॥ ३३ ॥

वा० टी०-राक्षसानां वानराणां च [illegible]

सर्वं वक्ष्यति स्वजनेऽस्मिन्भविष्यति । वयं तु मानुषेणैव सह योत्स्यामहे परान् ॥ ३३ ॥
सह भ्राता लक्ष्मणेन महौजसा । आत्मना पञ्चमश्चायं सखा मम विभीषणः ॥ ३४ ॥
ः कृत्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम् । सुवेलारोहणे बुद्धिं चकार मतिमान्नृपः ॥
तरं दृष्ट्वा सुवेलस्य गिरेस्तदा ॥ ॥ ३५ ॥
ततस्तु रामो महता बलेन प्रध्वंस्य सर्वां पृथिवीं महात्मा ।
प्राङ्मुखोऽभिजगाम लङ्कां कृत्वा मतिं सोऽरिवधे महात्मा ॥ ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय [illegible] युद्धकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

...ये स्वपक्षपरपक्षयोर्विज्ञानं न स्यात् इत्यत आह—...
...। हरिभिर्वानरैः मानुषं रूपम् आहवे नैव कार्यं नोऽस्मा...
...वानरबले अस्मिन् युद्धे एषा संज्ञा चिह्नं भवतु ॥ ३३ ॥

गो० टी०—स चैवेति । संज्ञा संकेतः । अस्य पर्यायमाह—वानरा इति । नः अस्माकम् । वानरा एवास्मिन् स्वजने चिह्नं भविष्यतीति । अस्मदीयं वानरत्वमेवास्मीयत्वज्ञापकं भविष्यतीत्यर्थः । यदि वानरा अपि कामरूपधारणेन युद्ध्येयुः राक्षसानामपि तादृक्शक्त्यादिविवेको न स्यात् वानरत्वन्तु अदृश्यतया न ते भक्षिष्यन्तीति भावः । एवमपि मानुषरूपपरिग्रहप्रतिषेधसामर्थ्यादिदानीं मानुषरूपं परिगृह्य स्थिता इति गम्यते ॥ ३३ ॥ ३४ ॥

गो० टी०—वयं त्विति । मानुषेण मनुष्यसंबन्धिना रूपेणेति शेषः । विभीषणादीनामपि मानुषरूपसंस्थानादेवमादेशः युक्तः ॥ ३३ ॥

३४] ति० टी०—संकेतप्रकारमाह—वानरा एवेति । यो युष्माकं स्वजने स्वजनत्वपरिज्ञाने वानरा एव वानरत्व विशिष्टा एव चिह्नम् । तद्वैशिष्ट्यमेव चिह्नमित्यर्थः । मानुषेण रूपेणेति शेषः ॥ ३४ ॥

रा० टी०—वानरा इति । यो युष्माकं स्वजने तत्परि इति वानराः तदूपमेव चिह्नं भविष्यति वयं सह तु मानुषेण रूपेणैव परान् रिपून् योत्स्यामहे एतन्नाऽस्माकं मानुषरूपमेव चिह्नमिति सुष्ठितम् ॥ ३४ ॥

३५] ति० टी०—के सह तत्राह—अहमिति । आत्मना स्वयम् । मन्त्रिचतुष्टयरहितो विभीषण इत्यर्थः ॥ ३५ ॥

रा० टी०—गोविन्द—अहमिति । आत्मना स्वमतीर्णा पञ्चमोऽयं विभीषणः सखा एतस्मिन् पञ्चमत्वं तु चतुरुपायोपेक्षया ॥ ३५ ॥

३६–३७] ति० टी०—[illegible] संस्थाने मन्त्र्यन्तरदेवेक्षणं [illegible] कटकटेत्यादिना तेषां मानुष...
...मण्डलं स्वार्थानुरोधेन परेषामपरिज्ञानार्थं च । एवं [illegible] विभीषणमेवमुक्तवेति । मानुषरूपेण एव...
...[illegible] इत्यर्थः । स सेवारोहणे [illegible] । तस्य दुर्गसंस्थाने तत्रावस्थानस्य सुष्ठुत्वाच्च । ...मन्त्रिभ्य इति पाठे मतिमद्भिर्निर्धारणात्मिकां बुद्धिमित्यर्थः । अथेतिशब्दः मतिरिति तार्यः ॥ ३६ ॥ ३७ ॥

एतदर्थं ' ततस्तु रामः ' इति पद्यं पठन्ति तत्र । वक्ष्य...
...माणार्थद्वयानुकानुवादो नाम्नः प्रकरणादि-
...क्षेद इतीमं श्लोकं कृपा प्रक्षिप्तवान् सर्ग-
...दयं [illegible]न्ति भाला इति कतकदृक् ॥

...[illegible]मानिते श्रीरामायणतिलके वाल्मीकीय...
...आदिकाव्ये युद्धकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०—स इति । रामः विभीषणमेवमुक्त्वा सर्वे...
...[illegible] विभीषणं रक्षणीयतया दृष्ट्वा सुवेलारोहणे बुद्धिं चकार...
...[illegible] एकाग्र्यं ॥ ३३ ॥ ३६ ॥

रा० टी०—ततस्तु इति । ततोऽनन्तरं पृथिव्यां राक्षसत्वयो...
...[illegible] कृत्वा केवलं सर्वां प्रथिवीमाक्रम्य प्राङ्मुखः प्रतिप्रयत्नमकरोत् लङ्कामभिजगाम ॥ ३७ ॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणशिरोमणौ युद्धकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

गो० टी०—स राम इत्यादिसार्धश्लोकं संकलय्याह। कृत्यसिद्ध्यर्थं कार्यसिद्ध्यर्थम् । सुवेलारोहणे विषये । बुद्धिं बुद्धिमान् मनूपोप आर्षः । मतिमत्स्थानम् । सुवेलारोहणे बुद्धिमेव मतिं चकार मान्याभिधेयः [illegible] सुवेलारोहणबुद्धिमेव मतिं चकार मान्याभिधेयः [illegible] यत्तरमिति सौवर्णवोलोकमेव [illegible] लङ्कां लङ्कुप्राप्तिः अत एव लङ्कोपरोधप्रयोजनं [illegible] तत्रस्थिति—ततस्त्विति । पृथिवीं सुवेलकटकमूर्धिम मत्वा महाद्रिः पञ्चरूपधरि...
...धरेण प्रध्वंस्य । 'प्रध्वंसायां रुजायां' । लङ्कां लङ्कुदेशम् । महान्तमिति द्वितीयमहात्मशब्दार्थः । अभिजगाम इत्यनेनेति भावः ॥ ३६ ॥ ३७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभ...
...व्याख्याने युद्धकाण्व्याख्याने सप्तत्रिंश...

रामः सलक्ष्मणविभीषणः सुग्रीवादिभिश्च वृतो मन्त्रयित्वा सुवेलोपरिमभिरुह्य लङ्कां न्यशामयत् । हरिभिरा अपि
ह्यं नेतुस्तस्मिन्गिरौ महीध्रे रामेण समं तां निशामयुश्च ।

स तु कृत्वा सुवेलस्य मतिमारोहणं प्रति । लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत् ॥
विभीषणं च धर्मज्ञमनुरक्तं निशाचरम् । मन्त्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा ॥
सुवेलं साधुशैलेन्द्रप्रिमं धातुशतैश्चितम् । अध्यारोहामहे सर्वे वत्स्यामोऽत्र निशामिमाम् ॥
लङ्कां चालोकयिष्यामो निलयं तस्य रक्षसः । येन मे मरणान्ताय हृता भार्या दुरात्मना ॥
येन धर्मो न विज्ञातो न वृत्तं न कुलं तथा । राक्षस्या नीचया बुद्ध्या येन तद्गर्हितं कृतम् ॥
[तस्मिन्मे वर्तते रोषः कीर्तिते राक्षसाधमे । यस्यापराधान्नीचस्य वधं द्रक्ष्यामि रक्षसाम् ॥
एको हि कुरुते पापं कालपाशवशं गतः । नीचेनात्मापचारेण कुलं तेन विनश्यति ॥]
एवं संमन्त्रयन्नेव सक्रोधो रावणं प्रति । रामः सुवेलमासाद्य चित्रसानुमुपारुहत् ॥ ६ ॥
पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत्समाहितः । सशरं चापमुद्यम्य सुमहद्विक्रमे रतः ॥ ७ ॥
तमन्वारोहत्सुग्रीवः सामात्यः सविभीषणः । [हनुमानङ्गदो नीलो मैन्दो द्विविद एव च ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥
पनसः कुमुदश्चैव हरो रम्भश्च यूथपः । जाम्बवांश्च सुषेणश्च ऋषभश्च महामतिः ॥

१] ति० टी०–स त्विति ॥ १ ॥

२] ति० टी०–विधिज्ञं कार्यविदम् ॥ २ ॥

रा० टी०–सुग्रीवादिकं प्रति रामोक्तिमाह—स इत्यादिभिः । लक्ष्मणेनानुगतो रामः सुवेलस्यारोहणं प्रति मतिं कृत्वा सुग्रीवं विभीषणं चाब्रवीत् । श्लोकद्वयमेकान्वयि ॥ १ ॥२॥

गो० टी०–अथ लङ्कादर्शनार्थं सुवेलारोहणमष्टाभिरेकैः—स त्वित्यादिश्लोकद्वयमेकान्वयम् । धर्मज्ञेत्यादि सुग्रीवस्यापि विशेषणम् । सुवेलो नाम लङ्कासमनुन्नतको गिरिविशेषः । विधिज्ञं कार्यज्ञम् ॥ २ ॥ ३ ॥

३] ति० टी०–अध्यारोहामहे आरोहयामहे ॥ ३ ॥

रा० टी०–तदाकारमाह—सुवेलमित्यादिभिः । धातुशतैः अनेकधातुभिः चितं सुवेलं वयं सर्वे अध्यारोहामहे इमां निशां वत्स्यामश्च ॥ ३ ॥

गो० टी०–सुवेलमिति । चितं व्याप्तम् । अध्यारोहामहे आरोहयामः । अथ च समुद्तरणदिवसस्यान्तः पूर्वं संग्रहेणोक्तः अथ सविशेषमुच्यते ॥ ३ ॥

ति० टी०–मरणान्ताय मरणपर्यन्तदुःखमनुभवितुम् ४
रा० टी०–राक्षस्या रक्षः संबन्धिन्या नीचया क्रूरया। ५ ॥
गो० टी०–अवलोकनप्रयोजनमाह–लङ्कामिति । मरणान्ताय येन राक्षस्या बुद्ध्या धर्मादिर्न भार्या हृता अत एव येन गर्हितं निन्दितं कर्म ऋषीपीडनादि कृतं तस्य रक्षसः निलयं लङ्कामालोकयिष्यामः । श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–लङ्कामित्यादिश्लोकद्वयमेकान्वयम् । लङ्कालोकने निमित्तमाह—निलयमिति । मे भार्येति संबन्धः । मरणान्ताय मरणरूपफलाय तत् प्रसिद्धम् वृत्तं धर्मशास्त्रविहितस्वकुलाचारः कुलं स्वकुलानिशयः एतत्सर्वं भार्यापहरणनिष्कृतिहेतुः तत्रासीदित्यर्थः । तर्हि केन हेतुना कृतमित्यत्राह—राक्षस्येति । तद्भार्यापहरणम् ॥ ४ ॥ ५ ॥

६–७] ति० टी०–संमन्त्रयन्संचिन्तयन् । चित्रसानुं सुवेलमित्यन्वयः ॥ ६ ॥ ७ ॥

रा० टी०–एवमिति । एवं संमन्त्रयन् एव रामः चित्रसानुमुपारुहत् ॥ ६ ॥

गो० टी०–एतादृशस्य निलयदर्शने किं फलं तत्राह—तस्मिन्निति । वर्तते उत्पद्यते । तर्हि तन्मात्रवधे यत्नः किमर्थं क्रियत इत्यत्राह—यस्येति ॥ ६ ॥

गो० टी०–अन्यस्य दोषेणान्यवधः किमर्थं क्रियत इत्यत्राह–एक इति । एकः पापं कुरुते नीचेन तेन कर्त्रा आत्मापचारेण तदोषेण कारणेन कुलं तत्संबन्धिनः सर्वे विनश्यन्ति ॥ ७ ॥

गो० टी०–एवमिति । संमन्त्रयन् ब्रुवन् । उपारुहत् उपारुहत् ॥ ८ ॥

रा० टी०–पृष्ठत इति । चापमुद्यम्य लक्ष्मणश्च पृष्ठतः समन्वगच्छत् ॥ ७ ॥

२ श्लोकद्वयमेकान्वयिके गो. पाठे । ३ वासावित्ति गो. पाठे । ४ इत्यभि रा. पाठः । ५ श्लोकद्वयमधिके गो. पाठे ।
ति रा. पाठः ।

सुषेणश्च महातेजास्तथा शतबलिः कपिः । एते चान्ये च बहवो वानराः शीघ्रगामिनः ॥ ७ ॥
ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः ॥ ॥ ८ ॥
अध्यारोहन्त शतशः सुवेलं यत्र राघवः । ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः ॥ ९ ॥
ददृशुः शिखरे तस्य विपक्तामिव खे पुरीम् । तां शुभां प्रवरद्वारां प्राकारेणाभिसंवृताम् ॥ १० ॥
लङ्कां राक्षससंपूर्णां ददृशुर्हरियूथपाः । प्राकारवरसंस्थैश्च तथा नीलैश्च राक्षसैः ॥
ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम् ॥ ॥ ११ ॥
तैं दृष्ट्वा वानराः सर्वे राक्षसान्युद्धकाङ्क्षिणः । मुमुचुर्विविधान्नादांस्तस्यै रामस्य पश्यतः ॥ १२ ॥
ततोऽस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः । पूर्णचन्द्रप्रदीपा च क्षपा समतिवर्तत ॥ १३ ॥
ततः स रामो हरिवाहिनीपतिर्विभीषणेन प्रतिनन्द्य सत्कृतः ।
सलक्ष्मणो यूथपयूथसंवृतः सुवेलपृष्ठे न्यवसद्यथासुखम् ॥ ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०–पृथुत इत्यादि । सार्धश्लोकः हनुमान्हितः सावधानः ॥ ७ ॥

८] ति० टी०–वायुवेगप्रवणा वायुवेगगतयः ॥ ८ ॥

९] ति० टी०–यत्र राघवः । येन राघव आरूढ इत्यर्थः ॥ ९ ॥

रा० टी०–तमिति । तं सुवेलं गिरिं सुग्रीवप्रभृतिः अन्वारोहत् । श्लोकत्रयमेकान्वयि ॥ ८–१० ॥

रा० टी०–एते इति । एते अन्ये च शतशो वानराः यत्र राघवः तत्र सुवेलमध्यारोहन्त । सार्धं श्लोक एकान्वयी ॥११॥

गो० टी०–सामान्य इत्युक्तं विवृणोति—हनुमानित्यादिश्लोकौ । हनुमानिति पृथगुक्त्या रामलक्ष्मणौ पदयात्रामेवारूढाविति गम्यते ते प्रसिद्धाः एते अन्ये च वायुवेगप्रवणाः वायुवेगेन गच्छन्तः । "प्रुङ्, गतौ" इति धातोर्नेदुग्रहणात्कर्तरि ल्युट् अत एव शीघ्रगामिनः सन्तः अध्यारोहन्त ॥ १०–१३ ॥

१०] ति० टी०–शिखरे तस्येति स्थिरेति शेषः । खे आकाशे विपक्तां रचितामिव ॥ १० ॥

रा० टी०–ते इति । ते वानराः अदीर्घेणैव कालेन गिरिमारुह्य शिखरे स्थिरेति शेषः खे विपक्तामिव पुरीं ददृशुः ॥ १२ ॥

गो० टी०–ते त्विति । ते रामादयः तस्य प्रसिद्धस्य कूटस्य खे विपक्तां आकाशे लम्बमानामिव स्थिताम् तां लङ्कां सर्वतो ददृशुः ॥ १४ ॥

११–१२] ति० टी०–रक्षार्थं प्राकारवरसंस्थैर्निशाचरैः प्राकारं कृतमिव ददृशुः ॥ ११ ॥ १२ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—तामिति । प्रवराणि वस्त्राणि यस्याः तां लङ्कां हरियूथपाः ददृशुः ॥ १३ ॥

गो० टी०–वानराश्च ददृशुरित्याह–तामिति । स्पष्टः ॥ १२ ॥

रा० टी०–प्राकारैरिति । प्राकारवरसंस्थैः रक्षणार्थं प्रकल्पितैः प्राकारेषु स्थितैर्नीलैः राक्षसैः कृतं रचितमपरं प्राकारं प्राकारवत् प्रतीयमानं राक्षससमूहमित्यर्थः, हरिश्रेष्ठाः ददृशुः ॥ ११ ॥

गो० टी०–प्राकारैरिति । प्राकारस्य चयः वप्रम् तत्स्थितैः । स्थाचयो वप्रमञ्चियामित्यमरः ॥ ११ ॥

रा० टी०–तमिति । ते राक्षससैन्यं वानराः दृष्ट्वा युद्धकाङ्क्षिणः सन्तः रामस्य पश्यतः नादान् मुमुचुः ॥ १२ ॥

गो० टी०–त इति । स्पष्टः ॥ १२ ॥

१३–१४] ति० टी०–प्रतिरञ्जितः प्रतिभासितरागः । पूर्णचन्द्रप्रदीपा क्षपेत्यनेन पौर्णमासीचतुर्दश्यां पूर्णिमायां सुवेलारोहणमिति बोध्यम् । 'सुवेलाग्रे रामः सैन्यं न्यवेशयत्' इत्यग्निवेश्योक्तेः । अत्र पूर्णचन्द्रोक्तिः पूर्णकल्पत्वादिति ॥ १३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०–तत इति । ततोऽनन्तरं संध्यया प्रतिरञ्जिता प्रातारुण्यः सूर्यः अस्तमगमत् पूर्णचन्द्रेण प्रदीप्ता क्षपा रात्रिः समभिवर्तत समजायत ॥ १३ ॥

गो० टी०–तत इति । प्रतिरञ्जितः रक्तवर्णीकृतः । पूर्णचन्द्रप्रदीपेति । अनेन पौर्णमास्यां सुवेलारोहणमिति प्रथमाया युद्धारम्भ इत्याहुः । यद्वा पूर्णचन्द्रस्तत्प्रदीपः सार्थः संभवति हि वानरसेनायामपि [illegible] दीपाः ॥ १४ ॥

रा० टी०–तत इति । विभीषणेन प्रतिनन्द्य सत्कृतः लक्ष्मणः च प्रसिद्धो रामः [illegible]

---

१ पूर्णि तो पाठः । २ त्वेति गो० पाठः । ३ तेति गो० पाठः । ४ विवक्षामिति गो० पाठः । ५ ते इति गो० पाठः । ६ तेति गो० पाठः ।

एकोनचत्वारिंशः सर्गः ।

तां रात्रिमुषितास्तत्र हरिपूथपयूथपाः । लङ्कायां ददृशुर्वीरा वनान्युपवनानि च ॥ १ ॥
समसौम्यानि रम्याणि विशालान्यायतानि च । दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः ॥ २ ॥
चम्पकाशोकवैकुलशालतालसमाकुला । तमालैपनसच्छन्ना नागमालासमावृता ॥ ३ ॥
हिन्तालैरर्जुनैर्नीपैः सप्तपर्णैः सुपुष्पितैः । तिलकैः कर्णिकारैश्च पाटलैश्च समन्ततः ॥ ४ ॥
शुशुभे पुष्पिताग्रैश्च लतापरिगतद्रुमैः । लङ्कां बहुविधैर्दिव्यैर्यथेन्द्रस्यामरावती ॥ ५ ॥
विचित्रकुसुमोपेतै रक्तकोमलपल्लवैः । शाद्वलैश्च तथा नीलैश्चित्राभिर्वनराजिभिः ॥ ६ ॥
गन्धाढ्यान्यैश्च रम्याणि पुष्पाणि च फलानि च । धारयन्त्युगमास्तत्र भूषणानीव मानवाः ॥ ७ ॥
तच्चैत्ररथसंकाशं मनोज्ञं नन्दनोपमम् । वनं सर्वर्तुकं रम्यं शुशुभे परपदायुतम् ॥ ८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये रामायणशतकोटीसंहितायां वाल्मीकीयभरद्वाजसंवादे उत्तरकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०—तत इति । वाहिनीपतिः वानरसेनानायकः ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्यानेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

१] ति० टी०—तामिति ॥ १ ॥

रा० टी०—सुवेलनिवासकारके वानरवृत्तान्तमाह—तामित्यादिभिः । सुवेले तां रात्रिमुषिताः हरिपूथपाः वीराः लङ्कायाः समसौम्यानि समानि उन्नतनिम्नरहितानि सौम्यानि व्याघ्रादिपशुरहितानि अत एव रम्याणि मनोहराणि अत एव दृष्टिरम्याणि दृष्टेर्विषयाणि वनान्युपवनानि च ददृशुः दृष्ट्वा जातविस्मया बभूवुः । श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—अथ लङ्कादर्शनमेकोनचत्वारिंशे—तामिति । तां रात्रिमित्यत्रत्वसंयोगे द्वितीया । ददृशुः प्राप्तरिति शिक्षम् । वनानि अकृत्रिमाणि उपवनानि कृत्रिमाणि ॥ १ ॥

२] ति० टी०—समसौम्यान्यनामिरतराणां समानि समसमतलानि च दुष्टमृगादिपशुरहितेन सौम्यानि, अत एव क्रीडार्हा रम्याणीत्यर्थः इति तीर्थः । 'समसमानि' इति पाठः । समप्रदेशे साम्यसंस्थानानि, रम्याणि मृगादिपशुरहितत्वादिति कतकः । विशालानि विपुलानि आयतानि दीर्घाणि दृष्टिरम्याणि चक्षुर्हराणि ॥ २ ॥

रा० टी०—समानीति । समानि च तानि सौम्यानि च समसौम्यानि निम्नोन्नतत्वरहितानि स्निग्धानि चेत्यर्थः अत एव रम्याणि रमणीयानि विशालानि विपुलानि आयतानि दीर्घाणि दृष्टिरम्याणि नयनाकर्षकाणि वनान्युपवनानि चेत्याकृष्यान्वयः ॥ २ ॥

३-४] ति० टी०—चम्पकेत्यादिश्लोकद्वयविशेषणम् । नागमाला नागकेसरमाला ॥ ३ ॥ ४ ॥

५] ति० टी०—द्रुमैरुपलक्षिता दृश्यैर्दृष्टिप्रियवस्तुभिरुपलक्षिता ॥ ५ ॥

६] ति० टी०—दृश्यान्येवाह—विचित्रेति ॥ ६ ॥

रा० टी०—चम्पकेति । चम्पकादिभिः समाकुला तमालपनसैः छन्ना नागानां तदभिन्नतरुणां मालाभिः समावृता सुपुष्पितैर्हितालादिभिरुपलक्षिता पुष्पिताग्राणि अग्राणि येषां ते अत एव विचित्रकुसुमोपेतैः रक्तकोमलपल्लवविशिष्टैः लतानि. अनेकविधवल्लीभिः परिगतैर्व्याप्तैः द्रुमैः यत एव दृश्यैर्दर्शनयोग्यैर्बहुविधैर्नानारूपैरन्यतरस्मिन् शाद्वलैश्च वनराजिभिश्चोपलक्षिता लङ्का इन्द्रस्यामरावतीव शुशुभे । श्लोकचतुष्टयमेकान्वयि ॥ ३-६ ॥

गो० टी०—चम्पकेत्यादि । श्लोकचतुष्टयमेकान्वयम् नागमाला नागकेसरमाला । हिन्तालैरित्यादि । उपर्यो नेति शेषः । दिव्यैः पारिजातादिभिः । अनाढ्यपदलक्षिते शेषैः । विचित्रेत्यादि । पदद्वयमपि दिव्यद्रुमविशेषणम् शाद्वलैरित्यादावप्युपलक्षणे तृतीया । लङ्कायामित्यत्र सुवेलपदं तत्र वानरवृत्तान्तोक्तेः । शुशुभे शोभमाना दृश्यत इत्यन्वयः ॥ ७] ति० टी०—अगमा वृक्षाः ॥ ७ ॥

रा० टी०—गन्धेति । तत्र लङ्कायामगमाः वृक्षाः मानवा भूषणानीव पुष्पाणि फलानि च धारयन्ति ॥ ७ ॥

गो० टी०—गन्धेति । तत्र वनेषु धारयन्ति अपरान्तः अगमाः वृक्षाः ॥ ७ ॥

८] ति० टी०—चैत्यं चैत्ररथं वर्तिस्तत्सदृशं सर्वर्तुकम् ॥

रा० टी०—तदेति । पदपैरावृतं व्याप्तं तल्लङ्कासंबन्धि [illegible]

---

१ पुष्पिता इति गो. २ पुष्पितेति गो. पाठः । ३ समसमेति गो. [illegible] ४ [illegible]रितेति गो. रा. पाठः । ५ [illegible] ६ [illegible] पाठः । ७ [illegible]रितेति गो. पाठः । ८ [illegible]नीति गो. पाठः ।

सर्वर्तुकैर्पुष्पफलोपपन्नैः वनैर्हिमैः । रुतं परभृतानां च शुश्रुवे वननिर्झरे ॥ ८ ॥
नित्यमत्तविहंगानि भ्रमराचरितानि च । कोकिलाकुलखण्डानि विहंगाभिरुतानि च ॥ ९ ॥
भृङ्गराजोपगीतानि कुररस्वनितानि च । [कौणालकविघुष्टानि सारसाभिरुतानि च] ॥
विविशुस्ते ततस्तानि वनान्युपवनानि च ॥ ॥ १० ॥
हृष्टाः प्रमुदिता वीरा हरयः कामरूपिणः । तेषां प्रविशतां तत्र वानराणां महौजसाम् ॥ ११ ॥
पुष्पसंसर्गसुरभिर्ववौ प्राणसमोऽनिलः । अन्ये तु हरिवीराणां यूथाद्विष्क्रम्य यूथपाः ॥
सुग्रीवेणाभ्यनुज्ञाता लङ्कां जग्मुः पताकिनीम् ॥ ॥ १३ ॥
त्रित्रासयन्तो विहगान्मृगेन्द्रान्प्रमथन्तो द्रुमहस्तिनश्च । कम्पयन्तश्च तां लङ्कां नादैः स्वैर्नदतां वराः ॥ १४ ॥
कुर्वन्तस्ते महावेगा मही चरणपीडिताम् । रजश्च सहसैवोर्ध्वं जगाम चरणोत्थितम् ॥ १५ ॥
ऋक्षाः सिंहाश्च महिषा वारणाश्च मृगाः खगाः । तेन शब्देन वित्रस्ता जग्मुर्भीता दिशो दश ॥ १६ ॥
शिखरं तु त्रिकूटस्य प्रांशु चैकं दिविस्पृशम् । समन्तात्पुष्पसंछन्नं महारजतसंनिभम् ॥ १७ ॥

गो० टी०—तत्रैवेति । सर्वे ऋतवो यस्मिन् तत्सर्वर्तुकम् । "ऋतोऽण्छन्दसि भाषा" इति ऋतुप्रत्ययः पदपद्धत्यैव पदपदेत्यस्य सिद्धम् ॥ ८ ॥

९] ति० टी०—बर्हिणैर्मयूरैः । परभृताः कोकिलाः । वननिर्झरे निर्झरयुते वने राजद्न्तादिः ॥ ९ ॥

रा० टी०—द्वात्यूहेति । द्वात्यूहादिभिरुपलक्षितानां परभृतानां कोकिलानां रुतं शब्दः वननिर्झरे वनसंबन्धिनिर्झरसमीपे शुश्रुवे कोयष्टिकाः जलकुक्कुटविशेषाः ॥ ९ ॥

गो० टी०—नित्यहेति । वननिर्झरे वनसंबन्धिनि कोयष्टिकैः रक्तकुक्कुटविशेषैः नित्यमत्तैः नित्यदृप्तैः बर्हिणैश्च सहितानां परभृतानां रुतं शुश्रुवुरिति योजना ॥ ९ ॥

९] ति० टी०—कोकिलैराकुलाः खण्डा वृक्षसमूहा यत्र तानि वनोपवनानि । अन्येऽपि बहुव्रीहिरेव ॥ १० ॥ १२ ॥

रा० टी०—नित्येति । नित्यमत्ता विहङ्गा येषु अत एव भ्रमराभिरुतानि कुररैः स्वनितानि वनान्युपवनानि च हृष्टाः हृष्टाः अत एव प्रमुदिताः ते हरयो विविशुः । श्लोकत्रयमन्वयि ॥ १० ॥ ११ ॥

गो० टी०—वनरामणीयकाकृष्टास्तत्र विविशुरित्याह—हृष्टेत्यादिना कामरूपिण इत्यन्तेन श्लोकत्रयेण । विहगाः प्राणकोकिलादिव्यतिरिक्ताः । षण्डाः वृक्षसमूहाः । विहङ्गसत्तमस्य तत्रादस्य च वनशोभाहेतुत्वात्तत्संचारमुक्त्वा तदमाह—विहगेत्यादिना । विहगानामभिरुतं येषु तानि तथाभिरुतानि एवमुत्तरत्रापि विग्रहः । कोणालकः खञ्जनः । सारसाभिरुतानीत्यनेन वनादीनां सरःसमीपवर्तित्वमुक्तम् । घुष्टानि । प्रहृष्टाः सन्तुष्टाः । वीराः बहुवनप्रवेशेन निर्भयाः कामरूपिणः स्वेच्छमविरुद्धप्रवेशात्तत्तद्गुणस्थूलसूक्ष्ममात्रीरूपधरन्तः ॥ १०–१२ ॥

गो० टी०—तेषामिति । पुष्पसंसर्गसुरभिर्वानराणां प्राणसमोऽनिलो ववौ ॥ १२ ॥

गो० टी०—तेषामिति । स्पष्टः ॥ १३ ॥

१३–१५] ति० टी०—प्राणसमत्वेन मन्दता । अन्ये तु वनोपवनप्रवेशव्यतिरिक्ता यूथानिष्क्रम्य लङ्कां जग्मुः॥१३–१५॥

रा० टी०—अन्ये इति । सुग्रीवेणाभ्यनुज्ञाताः अन्ये वृषभाः हरिवीराणां यूथानिष्क्रम्य निर्गत्य लङ्कां कम्पयन्तः पद्भ्यां चरणाभ्यां पीडितां दुर्वन्तश्च सन्तः लङ्कां जग्मुः अत एव चरणोत्थितं रजः ऊर्ध्वं जगाम श्लोकत्रयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—अन्ये स्थित्यादिसार्धश्लोकत्रयमेकान्वयम् स्पष्टम् ॥ १४ ॥ १५ ॥

गो० टी०—रजश्चेत्यर्धमेकं वाक्यम् । चरणोत्थितं चरणाघातजनितम् रजः ऊर्ध्वं जगाम उत्थितमित्यर्थः ॥ १५ ॥

१६] ति० टी०—वारणा वनगजाः ॥ १६ ॥

रा० टी०—ऋक्षा इति । तेन शब्देन वित्रस्ताः ऋक्षादयः दश दिशो जग्मुः ॥ १६ ॥

गो० टी०—ऋक्षा इति । अत्र ऋक्षादयो लङ्कायनवासिनो भीताः दर्शनादेव भीताः तेन शब्देन वित्रस्ताः विशेषेण त्रस्ताः दश दिशो जग्मुः यथायथं जग्मुरित्यर्थः ॥ १७ ॥

१७] ति० टी०—शिखरमित्यन्वयः । दिविस्पृशं दिविस्पृक्पूर्वपदे क्यञ्वा च । इति वेरुपः । स्पृशः कप्रत्ययान्तः समन्तात्पुष्पैरिति शेषः । महारजतसंनिभम् ॥ १७ ॥

---

१ सर्वर्तुकमिति गो० पाठः । २ बर्हिणैरिति गो० पाठः । ३ शुश्रुवुरिति गो० पाठः । ४ कोकिलेति गो० पाठः । ५ [ ] एतदन्तर्गतः पाठो गो० पुस्तके नास्ति । ६ तेषामिति गो० पाठः ।

शतयोजनविस्तीर्णं विमलं चारुदर्शनम् । शुभ्रं श्रीमन्महत्त्वेन दुष्प्रापं शकुनेरपि ॥ १८ ॥
मनसापि दुरारोहं किं पुनः कर्मणा जनैः । निविष्टा तस्य शिखरे लङ्का रावणपालिता ॥ १९ ॥
द्वात्रिंशद्योजनविस्तीर्णा त्रिंशद्योजनमायता । सा पुरी गोपुरैस्तुङ्गैः पाण्डुराम्बुदसंनिभैः ॥
काञ्चनेन च शालेन राजतेन च शोभते ॥ ॥ २० ॥
प्रासादैश्च विमानैश्च लङ्का परमभूषिता । घनैरिवातपापाये मध्यमं वैष्णवं पदम् ॥ २१ ॥
यस्यां स्तम्भसहस्रेण प्रासादः समलंकृतः । कैलासशिखराकारो दृश्यते खमिवोल्लिखन् ॥ २२ ॥
चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम् । शतेन रक्षसां नित्यं यः समग्रेण रक्ष्यते ॥ २३ ॥
मनोज्ञां काञ्चनवतीं पर्वतैरुपशोभिताम् । नानाधातुविचित्रैश्च उद्यानैरुपशोभिताम् ॥ २४ ॥
नानाविहगसंघुष्टां नानामृगनिषेविताम् । नानाकुसुमसंपन्नां नानाराक्षससेवितां ॥ २५ ॥

१८-१९] ति० टी०- शतयोजनेति । अनेकयोजनेत्यर्थः श्लक्ष्णं कुट्टिमभूमिवत् ॥ १८ ॥ १९ ॥

रा० टी०-शिखरमिति । प्रांशु स्वसमीपवर्ति शिखरमपेक्ष्योन्नतं पुनः संलग्नं महारजतस्य धवर्णस्य सन्निभः शोभो यस्मिन् अत एव श्रीमत् अतिशोभाविशिष्टत अत एव दुष्प्रधर्षणीयं शकुनेरपि दुष्प्रापं प्राप्तुमशक्यम् अत एव मनसापि निरन्तरमन्तुभिर्मनसाऽपि दुरारोहं किं पुनः कर्मणा यत्र यस्मिन्नस्य त्रिकूटस्य शिखरं तस्मिन् शिखरे रावणपालिता लङ्का निविष्टा अधिष्ठानेकान्वयि ॥ १७ ॥ १९ ॥

गो० टी०-एवं त्रिकूटस्य प्रथमशिखरं सुवेलाख्यमुक्त्वा द्वितीयशिखरं वर्णयति--शिखरं तदित्यादिना । सार्धश्लोकमेकान्वयम् । तत् प्रसिद्धम् प्रांशु पार्श्ववर्तिशिखरद्वयापेक्षया उन्नतम् एकम् अद्वितीयम् मध्यमभित्यर्थः । स्पृशतीति स्पृशम् उपलक्षणम् कप्प्रत्ययः । समन्तात्सुष्ठसंलग्नम् अत एव महारजतसन्निभं पुञ्जीभूतसन्निभम् । यद्वा सुवर्णसन्निभमिति स्वरोपेक्षिः । चारुदर्शनं सुन्दरदर्शनम् एवंभूतं शिखरम् अदृश्यतेऽध्याहारः ॥ १८ ॥ १९ ॥

गो० टी०-निविष्टेत्यादिश्लोकपञ्चकमेकान्वयम् । सा च प्राकारेण । प्रासादैरिति । प्रासादादिलक्षणं प्रागेव लिखितम् आतपापाये वर्षारम्भसमये । मध्यमं वैष्णवं पदमिति । त्रिविक्रमावतारे त्रिभिः पदैः सर्वलोकक्रमणे मध्यमपदेनान्तरिक्षं क्रान्तमिति आकाशं मध्यमं वैष्णवं पदमिति उच्यते । स्तम्भानिति । उल्लिखन् व्याप्नुवन् । चैत्य इति । नगरमध्यानुरूपं चैत्यम् अत्र भवत्यैत्यः राक्षसेन्द्रस्य पुरभूषणमित्वर्थः । यः समग्रेण रक्षसां शतेन नित्यं रक्ष्यते । यश्च राक्षसेन्द्रस्य पुरभूषणं बभूव । स्तम्भसहस्रेण समलंकृतः कैलासशिखराकारः स्फुल्लिङ्गवन्नि स्थितः चैत्यः स प्रासादः यस्यां दृश्यते साध्वी रावणपालितत्वादिविशेषणविशिष्टा तत्र शिखरे निविष्टा लङ्का अदृश्यतेत्यध्याहारेणान्वयः ॥ २०-२४ ॥

२०] ति० टी०-दृशगोजनेति । इदं च लङ्कारूपमहादुर्गान्तर्वर्तिरावणावासस्थानभूतान्तर्दुर्गपरम् । ' शतयोजनविस्तीर्णा त्रिंशद्योजनमायता ' इत्यत्रैवान्यत्र स्थले उक्तेः । काञ्चनेन राजतेन शालेन प्राकारेण ॥ २० ॥

रा० टी०-दृशेति । पाण्डुराम्बुदसन्निभैः उच्चैर्गोपुरैः पुरद्वारैः शालेन प्राकारेण चोपलक्षिता सा लङ्का शोभते सार्धश्लोक एकान्वयी ॥ २० ॥

२१] ति० टी०-प्रासादभूषितत्वे उपमानम्—घनैरित्यादि । मध्यमं वैष्णवं पदम् आकाशमित्यर्थः ॥ २१ ॥

२२] ति० टी०-तत्र रावणगृहं प्रासादविशेषेण लक्ष्यत इत्याह—यस्यामिति । स्तम्भसहस्रेण निर्मित इति शेषः ॥ २२

रा० टी०-प्रासादैरिति । यस्यां स्तम्भसहस्रेण समलंकृतः खमुल्लिखन्निव प्रासादो दृश्यते सा आतपापाये ग्रीष्मापगमसमये घनैर्मध्यमं वैष्णवं पदमाकाशमिव प्रासादैर्विमानैश्च परमभूषिता लङ्का दृश्यते । श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२

२३-२५] ति० टी०-स इति पुरभूषणं प्रासादो राक्षसेन्द्रस्य । चैत्य आलयः । ' चैत्यमायतनं तुल्ये ' । पुंस्त्वमार्षम् समग्रेण रक्षसां शतेन समग्रसेनाहवता । अनेकनेत्यर्थः २३-२

रा० टी०-चैत्य इति । यः रक्षसां समग्रेण मिलितेः शतेन रक्ष्यते स चैत्यः पुरभूषणं बभूव मनोज्ञामिति समृद्धाः परिपूर्णाः अर्थाः यस्यां अत एव समृद्धाम् अतिप्रसिद्धां विविधप्रकारां नगरीं लङ्कां दृष्ट्वेति शेषः, लक्ष्मणाग्रजः विस्मयं प्राप श्लोकत्रयमेकान्वयि ॥ २३ ॥ २५ ॥

गो० टी०-एवं वानराभ्रमणतानां लङ्कादर्शनहर्षकरं रामस्यापि तद्दर्शनमाह—मनोज्ञामित्यादिश्लोकत्रयमेकान्वयम् । पर्वतैः क्रीडाचलैः । नानाधातुविचित्रैः इति पर्वतविशेषणम् । उद्यानैः कृत्रिमवनैः । नानाकाननेति । पूर्वं काननं स्वल्पतम् अत्र तदानात्त्वमिति भिन्ना । समृद्धाम् उक्तामेव समृद्धार्थं पुनरुक्त्यम् । लक्ष्मणाग्रजः नगरदर्शनजप्रीतिविकसितकान्तिः ॥ २५-२७ ॥

१ त्रयति गो. पाठः । २ शतेति गो. पाठः । ३ त्रिंशदिति गो. पाठः । ४ वनेनेति गो. पाठः । ५ काननेति गो. पाठः । ६ काननसंज्ञम् गो. पाठः ।

स्वर्द्धां समृद्धार्थो लक्ष्मीवाँल्लक्ष्मणाग्रजः । [रावणस्य पुरीं रामो ददर्श सह वानरैः ॥
महागृहसंबाधां दृष्ट्वा लक्ष्मणपूर्वजः ।] नगरीं त्रिदिवप्रख्यां विस्मयं प्राप वीर्यवान् ॥ २६ ॥
तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलङ्कृतां च ।
पुरीं महायन्त्रकवाटमुख्यां ददर्श रामो महता बलेन ॥ ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।

ततो राघवे राक्षसविबले सुवेलमारुह्य लङ्कायां गोपुरस्थं [ण पश्यति सहसा सुग्रीवः समुत्प्लुत्य पौलस्त्यस्य मुकुटं भूमौ] त्वा तेन सार्धं चिरं युद्ध्वा वञ्चयित्वा च ते विजयी पुना रामसमीपमाजगाम ।

ततो रामः सुवेलाग्रं योजनद्वयमण्डलम् । उपारोहत्ससुग्रीवो हरियूथैः समन्वितः ॥ १ ॥
स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन् । त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा ॥ २ ॥
ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम् । तस्य गोपुरवृक्षस्थं राक्षसेन्द्रं दुरासदम् ॥ ३ ॥
श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम् । रक्तचन्दनसंलिप्तं रौक्माभरणभूषितम् ॥ ४ ॥
नीलजीमूतसंकाशं हेमसंछादिताम्बरम् । ऐरावतविषाणाग्ररुक्कृष्टकिणवक्षसम् ॥ ५ ॥
शशलोहितरागेण संवीतं रक्तवाससा । संध्यारक्तघनसंलीनं मेघराशिमिवाम्बरे ॥ ६ ॥

२६-२७] ति० टी०-नगरीम् । दृष्ट्वेति शेषः॥२६॥२७॥
इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥
गो० टी०-तामिति । अमरप्रख्य. देवसदृशः ॥ २७ ॥
रा० टी०-तामिति । बहूनि संविधानानि रचनाविशेषा यां महायन्त्रयुक्ताः कपाटमुख्या यस्यां तां महता बलेनोपेताम् पुरीं लङ्कां रामो ददर्श ॥ २७ ॥
इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥
गो० टी०-पुनः संक्षेपेणाह—तामिति । रत्नानि श्रेष्ठानि । संविधानं रचणम् ॥ २९ ॥
श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

३]ति० टी०-योजनद्वयमण्डलं योजनद्वयविस्तरम् ।१-३] ति० टी०-श्वेतचामरे पर्यन्ते वीज्यमाने यस्य । लक्षणं श्वेतच्छत्रेण राजचिह्नेन शोभितम् ॥ ४ ॥
ति० टी०-हेमसंछादिताम्बरं हेममालोपरिचितहेमादिछादितम्बरमन्तरीयवासो यस्य । ऐरावतविषाणाग्रकृष्टैर्विलेखनैर्जातः किणो व्रणो यस्मिन् तम् ॥ ५ ॥
ति० टी०-शशलोहिते शशकधिरे तत्सदृशरागवता सदीयवस्त्रेण संवीतम् ॥ ६ ॥
गो०-रामभूयान्तमेवाह-तत इत्यादिभिः । योजनद्वयं न परिमितं मण्डलं विस्तारो यस्य तत् सुवेलार्थं रामः उपारोहत् ॥ १ ॥
गो० टी०-अथ सुग्रीवरावणयोर्द्वन्द्वयुद्धकथनं चत्वारिंशे [प्रथमश्लोकः पूर्वोक्तानुवादः—ततः इति । योजनद्वयमण्डलं योजनद्वयविस्तारमण्डलम् ॥ २ ॥
रा० टी०-स्थित्वेति । तत्र सुवेलाग्रे मुहूर्तं स्थित्वा त्रिकूटशिखरे विश्वकर्मणा निर्मितां लङ्कां ददर्श । सार्धश्लोकेनैकान्वयी ॥ २ ॥
गो० टी०-स्थित्वेत्यादि । सुन्यस्तां सम्यक् निवेशिताम् ॥ ३ ॥
रा० टी०-तस्यामिति । तस्यां लङ्कायां गोपुरवृक्षस्थं श्वेतचामरे पर्यन्ते समीपे वीज्यमाने यस्य तं विजयच्छत्रेण शोभितं हेम्ना संछादितं सौवर्णतिलिपरचनया रचितमम्बरं यस्य तम् ऐरावतस्य विषाणाग्रैः दन्तकोटिभिः उत्कृष्टेन पुनः पुनर्भेदनेन किणं व्रणं वक्षसि यस्य तं शशलोहितरागेण शशकधिरसदृशारुण्यविशिष्टेन वाससा संवीतम् अत एव संध्याकालिकरविनेजसा संलग्नमम्बरे मेघराशिमिव राक्षसेन्द्रं पश्यतां वानरेन्द्राणां पश्यतो राघवस्य च तावनाद्दूरस्थं सूर्यः राक्षसेन्द्रस्य दर्शनाद् सुग्रीव प्रत्यितो बभूवेति शेषः । सार्धश्लोकचतुष्टयमेकान्वयि ॥ ३ ॥ ४ ॥
गो० टी०-तस्यामित्यादि । सार्धश्लोकत्रयमेकान्वयम् । अत्र ददर्शेत्यनुषज्यते । श्वेते चामरे पर्यन्ते यावद्भागे यस्य तं श्वेतचामरपर्यन्तः । बभूवतो वीज्यमानचामरे इत्यर्थः । विजयच्छत्रं विजयसूचकच्छत्रम् । रत्नाभरणं यद्रागाभरणम्

१ कपाटेति ग. पुस्त० । २ अमरप्रख्य इति गो० पाठः । ३ कपोतेति ग. पुस्त० । ४ आरुरोहेति गो. पाठः । ५ पुनर्भवेत इति

वानरेन्द्राणां राक्षसस्यापि पश्यताम् । दर्शनाद्राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः
सौहार्देन संयुक्तः सत्त्वेन च बलेन च । अचलाग्राद्व्यहोत्थाय पुप्लुवे गोपुरस्थले ॥ ८
स्थित्वा मुहूर्तं संप्रेक्ष्य निर्भयेनान्तरात्मना । तृणीकृत्य च तद्वक्षः सोऽब्रवीत्परुषं वचः ॥ ९
लोकनाथस्य रामस्य सखा दासोऽस्मि राक्षस । न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा ॥ १०
इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि । आकृष्य मुकुटं चित्रं पातयामास तद्भुवि ॥ ११ ॥
समीक्ष्य तूर्णमायान्तं बभाषे तं निशाचरः । सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि ॥ १२ ॥
इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत्तले । कन्दुवत्स समुत्थाय बाहुभ्यामाक्षिपद्धरिः ॥ १३ ॥
परस्परं स्वेदविदिग्धगात्रौ परस्परं शोणितरक्तदेहौ ।
परस्परं क्षिप्तनिरुद्धचेष्टौ परस्परं शाल्मलिकिंशुकाविव ॥ ॥ १४ ॥

सप्तच्छदादिनाम्बरं तत्र तत्र सुवर्णचित्राम्बरम् । सुवर्णमण्डितानेकमिति वार्थः । पद्मकृष्णकिणदण्डम् उपपादितकिणवक्षसम् । कृष्णस्य उल्लिखितस्य किणः वक्षसि यस्य स तथेति वार्थः । प्रातर्लोहितरागेण शशरुधिरसमानरागेण । रक्ताम्बरद्युविवरणविदम् रक्तवाससा उत्तरीयेण । संवीतं परिवीतम् ॥ ३–६ ॥

७] ति० टी०–पश्यताम् । पश्यतोऽनादरेत्यर्थः ॥७॥

गो० टी०–वृत्तं च रावणं सङ्गरे दर्शनादवधार्येति रामं सुग्रीवौ पूर्वं प्रतिज्ञातमर्थं साधयितुमुत्थितः सुग्रीव इत्याह–पश्यतामित्यादिना । पश्यतामित्यनादरे षष्ठी । अज्ञानादवज्ञानमुक्त्वा गमनम् । सप्तम्यर्थे षष्ठी वा । दर्शनात् दर्शनमात्रात् । कोपवेगेन कथं मत्सामिनोऽग्रे स्वयं राजोपचारेण तिष्ठति दुरात्मेति कोपातिशयेनेत्यर्थः । सत्त्वेन मनोबलेन । बलेन कायबलेन । पुप्लुवे गोपुरस्थिरेयेति शेषः ॥ ७ ॥ ८ ॥

८–९] ति० टी०–सत्त्वेन सत्त्वगुणोत्साहेन । अचलाग्रात्पुप्लुवेत्यादिगोपुरस्थले रावणावस्थितिस्थाने ॥ ८ ॥ ९ ॥

रा० टी०–क्रोधेति । कोपवेगेन सत्त्वेन सात्कार्यबलपुरुषोत्साहेन च संयुक्तः सुग्रीवः अचलाग्रात् सुवेलशृङ्गात् उत्थाय गोपुरस्थले लङ्कापुरद्वारभूमौ पुप्लुवे उल्लङ्घ्य प्राप ॥ ८ ॥

रा० टी०–स्थित्वेति । निर्भयेनान्तरात्मनोपलक्षितः स सुग्रीवो मुहूर्तं स्थित्वा संप्रेक्ष्य च तद्रक्षस्तृणीकृत्य परुषमब्रवीत् ॥ ९ ॥

गो० टी०–स्थित्वेति । गोपुरस्थले स्थित्वेत्यन्वयः । अन्तरात्मना मनसा ॥ ९ ॥

१०] ति० टी०–पार्थिवेन्द्रस्य तेजसानुगृहीतेन मया न मोक्ष्यसे । रामाभिप्रायेण सखा, स्वाभिप्रायेण दास इति भावः ॥ १० ॥

रा० टी०–तदाकारमाह–लोकेति । रामस्याहं सखा दासश्चास्मि अतः पार्थिवेन्द्रस्य रामस्य तेजोपलक्षितेन मया त्वं न मोक्ष्यसे ॥ १० ॥

गो० टी०–लोकनाथस्येति । रामाभिप्रायेण सखा वस्तुतो दासोऽस्मीति भावः । मया मत्तः । औद्धत्यं परिहरति—पार्थिवेन्द्रस्य तेजसेति ॥ १० ॥

११] ति० टी०–उत्पत्य । गोपुरादिति शेषः । तयोपरि पुप्लुवे । प्लुत्यागत इत्यर्थः । चित्रमद्भुतं तत्प्रसिद्धं मुकुटं माकृष्य शिरसो गृहीत्वा भुवि पातयामास । तत्पातयित्वा स्वयं भूमौ पपात ॥ ११ ॥

रा० टी०–इतीति । इत्युक्त्वा तस्य रावणस्योर्ध्वं पुप्लुवे मुकुटमाकृष्य पातयामास च ॥ ११ ॥

गो० टी०–इत्युक्त्वेति । स्पष्टम् ॥ ११ ॥

१२] ति० टी०–तूर्णमायान्तम् । पुनर्भूतलादिति शेषः मे परोक्षमेव त्वं सुग्रीवः । इदानीं मद्दृष्टयैव हीनग्रीवो भविष्यसि ॥ १२ ॥

रा० टी०–समीक्ष्येति । तूर्णमायान्तं सुग्रीवं समीक्ष्य निशाचरो बभाषे । तदाकारमाह–मे परोक्षमसन्निधाने सुग्रीवः शोभनग्रीवावान् त्वं हीनग्रीवो भविष्यसि ॥ १२ ॥

गो० टी०–समीक्ष्येति । आयान्तं सुग्रीवमिति शेषः परोक्षं ममासन्निधाने त्वं सुग्रीवः शोभनग्रीवः । प्रत्यक्षं तु नग्रीवो भविष्यसीत्यर्थः ॥ १२ ॥

१३] ति० टी०–तले भूतले क्रीडार्थं तलाहतकं यथा द्रागुत्क्षिपति तद्वत्समुत्थाय बाहुभ्यामाक्षिपत् । भस्म शेषः ॥ १३ ॥

रा० टी०–इतीति इत्युक्त्वोत्थाय तं सुग्रीवं च तले भूतले आक्षिपत् हरिः स सुग्रीवोऽपि कन्दुवत् सद्यः बाहुभ्यां तं रावणं भूतले आक्षिपत् ॥ १३ ॥

गो० टी०–इत्युक्त्वेति । तले गोपुरतले । आक्षिप पातयत् । कन्दुवत्सद्यस्थाय कन्दुकयज्जनदित्युत्पत्त्येत्यर्थः ।

१४] ति० टी०–शोणितेन रुधिरेण रक्तवर्णौ देहौ परस्परं क्षिप्तौ क्षिप्तवन्तौ तौ च तौ निरुद्धचेष्टौ लिङ्गव्यत्ययः । पुष्पितावित्यर्थः शेषः ॥ १४ ॥

रा० टी०–परस्परमिति । स्वेदेन विदिग्धे

१ पातयित्वाऽपतदिति पा० । २ कन्दुवत्प्रति-गो. रा. पाठः । ३ क्षिपति गो. पाठः । ४ [illegible] पाठः ।

मुष्टिप्रहारैश्च तलप्रहारैररत्निघातैश्च कराग्रघातैः ।
तौ चक्रतुर्युद्धमसह्यरूपं महाबलौ राक्षसवानरेन्द्रौ ॥ ॥ १५ ॥
कृत्वा नियुद्धं भृशमुग्रवेगौ कालं चिरं गोपुरवेदिमध्ये ।
उत्क्षिप्य चोत्क्षिप्य विनम्य देहौ परस्परादोपुरवेदिलग्नौ ॥ ॥ १६ ॥
अन्योन्यमाक्षिप्य विलग्नदेहौ कृत्वेतुः प्राकारनिखातमध्ये ।
उत्पेततुर्भूमितलं स्पृशन्तौ मुहूर्तं स्थित्वाभिनिःश्वसन्तौ ॥ ॥ १७ ॥
आलिङ्ग्य चालिङ्ग्य च बाहुयोगैः संयोजयामासतुराहवे तौ ।
संरम्भशिक्षाबलसंप्रयुक्तौ युयुद्धतुः संयति युद्धमार्गे ॥ ॥ १८ ॥
शार्दूलसिंहाविव जातदंष्ट्रौ गजेन्द्रपोताविव संप्रयुक्तौ ।
संहत्य संवेद्य च तौ कराभ्यां तौ पेततुर्वै युगपद्धरायाम् ॥ ॥ १९ ॥

रयोः शोणितेन कर्दमसम्पर्केण रक्तारुणौ देहौ ययोः क्लेशेन युद्धचातुर्यसंपादितबन्धनविशेषेण निरुद्धे चेष्टे ययोः कालक्लिन्नकेशबद्धौ वक्त्रौ वक्त्रमुरिति शेषः ॥ १४ ॥

गो० टी०–परस्परनिग्रहादि । [illegible] परस्परेण रुधिरसम्पर्केण रक्तारुणौ देहौ ययोः क्लेशेन युद्धचातुर्यसंपादितबन्धनविशेषेण निरुद्धे चेष्टे ययोः कालक्लिन्नकेशबद्धौ वक्त्रौ वक्त्रमुरिति शेषः ॥ १४ ॥

१५] ति० टी०–[illegible] । अपरस्तु निष्कनिष्ठेन मुष्टिना । इत्यर्थः । अत्यन्तरूपमत्यन्तम् ॥ १५ ॥

रा० टी०–मुष्टीति । मुष्टिप्रहारादिभिः राक्षसवानरेन्द्रौ परस्परम् अन्यै. सोढुमशक्यमित्यर्थः युद्धं चक्रतुः ॥ १५ ॥

] ति० टी०–नियुद्धं बाहुयुद्धम् । विनम्य पातक्रमापेक्षयाहेतौ । गोपुरवेदिस्थौ । भूपतितावित्यर्थः ॥ १६ ॥

० टी०–कृत्वेति । उग्रवेगौ राक्षसवानरेन्द्रौ चिरं कालं युयोधनं कृत्वा उत्क्षिप्योत्क्षिप्य पातक्रमादेहौ विनम्य देहौ दिदृक्षुरिति शेषः ॥ १६ ॥

टी०–कृत्वेत्यादिश्लोकार्द्धश्लोक एकान्वयः । नियुद्धं बाहुयुद्धं वा नियुद्धं बाहुयुद्धं स्यादित्यमरः । गोपुरवेदिस्थे चिरं कालं नियुद्धं कृत्वा । अत उत्क्षिप्य परस्परत्वा आक्षिप्य आकृष्य । परस्परं देहौ विनम्य पातक्रमात् पादविन्यासविशेषात् । गोपुरवेदिलग्नौ आक्षिप्य पुनर्युद्धार्थमवसरप्रतीक्षतया गोपुरवेदिलं स्थितावित्यर्थः । आक्षिप्य बाहुभ्यां संवेद्य [illegible] वेदनं प्रेरणम् ॥ १९ ॥

वेदनप्रेरणमिति गो.पाठः । २ बाहुभ्यामिति गो.पाठः । ३ अभिनिःश्वसन्तौ इति गो.पाठः । ४ भूतलमत्यन्तमुत्क्षिप्येति गो.पाठः ।

उद्यम्य चान्योन्यमभिक्षिपन्तौ संचक्रमाते बहु युद्धमार्गे ।
व्यायामशिक्षाबलसंप्रयुक्तौ क्रमं न तौ जग्मतुराशु वीरौ ॥ ॥
बाहूत्तमैर्वारणवारणाभैर्निवारयन्तौ परवारणाभौ ।
चिरेण कालेन मृगं मृगेन्द्रौ संचेरतुर्मण्डलमार्गमाशु ॥ ॥ २१ ॥
श्रौ परस्परमासाद्य पातावन्योन्यसूदने । मार्जारावित्र भक्षार्थेऽवतस्थाते मुहुर्मुहुः ॥ २२ ॥
मण्डलानि विचित्राणि स्थानानि विविधानि च । गोमूत्रकाणि चित्राणि गतप्रत्यागतानि च ॥ २३ ॥

गो० टी०-संहृत्येति । संहत्य संयोज्य । उरोभ्यमन्योन्यमार्पाट्य धरण्यां युगपन्निपेततुः । अथ उद्यम्य उद्धृत्य विक्षिपन्तौ पातयन्तौ । एवं बहुयुद्धमार्गैः बहुयुद्धप्रकारैः । चक्रमाते संचेरतुः ॥ १९ ॥

२०] ति० टी०-व्यायामो निर्युद्धोत्साहः ॥ २० ॥

रा०टी०-उद्यम्येतिउद्यम्य युद्धविहितेनयोगं कृत्वा अन्योन्यमभिक्षिपन्तौ व्यायामेन युद्धोत्साहेन संप्रयुक्तौ तौ युद्धमार्गे बहुप्रकारं संचक्रमाते क्रमं ग्लानिं तु न जग्मतुः ॥ २० ॥

गो० टी०-व्यायामेति । स्वरूपां श्रमजयाय कृतोऽन्योन्यो व्यायामः तदुपा या शिक्षा तद्बलेन तदतिशयेन संप्रयुक्तौ संयुक्तौ । बाहूनत्तमैरिति वारणाः आलानस्तम्भाः । वारणवारणाभैः बाहूत्तमैः अन्योन्यमाशु निवारयन्तावपि क्रमं श्रमम् न जग्मतुः ॥ २० ॥

२१] ति० टी०-वारयन्त्येभिः प्रतिगजानिति वारणो महागजः । द्वितीयवारणशब्दः करिहस्तवाची । करिकरैर्भैरित्यर्थः । परवारणो मत्तगजः । मण्डलमार्गम् । मण्डलाकारत्वसाधको मार्गो गतिभेदः ॥ २१ ॥

रा० टी०-बाहुभिरिति । वारणवारणाभैः गजशुण्डादण्डसदृशैर्बाहुत्तमैर्भैरं प्रयुक्तौ निवारयन्तौ अन्योन्यप्रहारं वञ्चयन्तौ परवारणाभौ मत्तगजसदृशौ तौ मण्डलमार्गं संचेरतुः ॥ २१ ॥

गो० टी०-चिरेत्यर्धम् । चिरेण कालेन बहुकालेन । संप्रयुक्तौ युद्धमार्गे भौ । मण्डलमार्गं चक्राकारमार्गम् । चेरतुः चक्रतुरित्यर्थः । अयं च वक्ष्यमाणमार्गान्तराणामप्युपलक्षणम् ॥ २१ ॥

२२] ति० टी०-भक्षार्थं भक्षरूपप्रयोजनमिमित्तं यथा कुद्धावतस्थाते तथेत्यर्थः ॥ २२ ॥

रा० टी० तावितिः । अन्योन्यसूदने परस्परनिपातने भक्षार्थं मार्जारावित्र यतौ कृतोद्योगौ तौ परस्परमासाद्य अवतस्थाते ॥ २२ ॥

गो० टी०-तेन पातयतीति--तावित्यादिना । परस्परमासाद्य अन्योन्यहिंसने यत्नौ कुर्वन्तौ । भक्ष्यत इति भक्षः भक्ष्यरूपम् । तदर्थं तन्निमित्तम् । मार्जारावित्र तिष्ठतः तिष्ठेतां तत्तुल्यः । "समप्रविभक्तस्थः" इत्यभिनयदर्पणः । अत्रापि लक्षणाश्रयेणैव मार्जारावित्र तिष्ठतः तत्तुल्यतुरित्यर्थः । मुहुर्मुहुरित्यनेन मध्ये मध्ये मण्डलादिसंचारो व्यज्यते ॥ २२ ॥

२३] ति० टी०-विचित्राणि मण्डलानि चारिकरणखण्डमहामण्डलाख्यभेदात् । तानि तु—' एकपादप्रचारेण चारिसंज्ञं तु मण्डलम् । द्विपादक्रमणं यत्र करणास्यं तु मण्डलम् । करणानां समायोगात्खण्डमण्डलमीरितम् । खण्डैस्त्रिभिश्चतुर्भिर्वा महामण्डलमीरितम् ॥ ' इति भरतोक्तानि । विविधानि स्थानानि । ' वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षण्णाम् ॥ ' इति भरतोक्तानि । पादयोः पूर्वापरविन्यासविशेषादिविन्यासविशेषरूपाणीति तीर्थः । गोमूत्रकाणि गोमूत्रेखाकारकुटिलगमनानि चित्राणि गतप्रत्यागतानि नानाप्राकारापसर्पणोपसर्पणानि ॥ २३ ॥

रा० टी०-मण्डलानीति । विचित्राणि अनेकविधानि मण्डलानि चारिकरणखण्डमहामण्डलाभिधानि विविधानि स्थानानि वैष्णवाभिधादीनि च गोमूत्रकाणि तत्राकाराणि चित्राणि अनेकविधानि गतप्रत्यागतानि च—एकपादप्रचारेण चारिसंज्ञं तु मण्डलम् । द्विपादक्रमणं यत्र करणाख्यं तु मण्डलम् । करणानां समायोगात्खण्डमण्डलमीरितम् । खण्डैस्त्रिभिश्चतुर्भिर्वा महामण्डलमीरितम् । इति भरतः ॥ २३ ॥

गो० टी०-मण्डलानीत्यादि । बहुश्लोकैकान्वयम् । मण्डलानि परिभ्रमणविशेषान् । यथाह भरतः—' एकपादो यः स चारीत्यभिधीयते । द्विपादक्रमणं यत्तु नाम तद्भवेत् । करणानां समायोगात्खण्डमित्यभिधीयते । खण्डैस्त्रिभिश्चतुर्भिर्वा संयुक्तं मण्डलं भवेत् ॥ ' इति । विविधसव्यमपसव्यं सव्यापसव्यमर्धभ्रमणमित्यादिभेदाद्विविधानि स्थानानि व्याघ्रसिंहादितुल्यावस्थानानि वैष्णवादिस्थानपादयोः पूर्वापरविन्यासविशेषा इति तदाह भरतः—' वैष्णवं समपादं च वैशाखं मण्डलं प्रत्यालीढमथालीढं स्थानान्येतानि षण्णाम् ॥ ' इति । एषां लक्षणादिकथने ग्रन्थगौरवं स्यादिति न प्रपञ्च्यते । गोमूत्रिकाणि गोमूत्रसरणिसदृशानि गमनानि । वशब्दात्तदाकारगमनवाच्यकान्यत्वर्थं उनप्रत्ययः । ते पुनः चित्रत्वं गमनागमनादिभेदात् । गतप्रत्यागतानि

१ चेरतेति गो० पाठः । २ तु उपप्रयुक्ताविति गो० पाठः । ३ बहुलमिति रा० पाठः । ४ इति गो० पाठः ।

नानगतान्येव तथा वक्रगतानि च । परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ २५ ॥
द्रवणमाप्लावमेवस्थानं सविग्रहम् । पराङ्मुखमपाङ्मुखमपद्रुतमवप्लुतम् ॥ २६ ॥
स्तमपन्यस्तं युद्धमार्गविशारदौ । तौ विचेरतुरन्योन्यं वानरेन्द्रश्च रावणः ॥ २७ ॥
मन्तरे रक्षो मायाबलमथात्मनः । आरब्धुमुपसंपेदे ज्ञात्वा तं वानराधिपः ॥ २८ ॥
पपात तदाकाशे जितकाशी जितक्रमः । रावणः स्थित एवात्र हरिराजेन वञ्चितः ॥ २९ ॥
अथ हरिवरनाथः प्राप्तसङ्ग्रामकीर्तिर्निशिचरपतिमाजौ योजयित्वा श्रमेण ।
गगनमतिविशालं लङ्घयित्वार्कसूनुर्हरिगणबलमध्ये रामपार्श्वे जगाम ॥ ॥ २९ ॥

पसर्पणानि । एते उभयगतिप्रचारभेदाः ॥ तिरश्चीनगतानि र्यग्गमनानि । वक्रगतानि सव्यापसव्यसंचरणानि । परि- क्षं स्थानचालनेन प्रहाराणां मोघकरणम् । वर्जनं प्रतिप्रयो- न परिहरणम् । परिधावनम् एकस्य तिष्ठतः समन्तादन्यस्य नागमनम् । अभिद्रवणम् आभिमुख्येन शीघ्रं गमनम् । प्लावम् अल्पाङ्गुत्थानल्पाङ्गुत्थाविधिर्विनम्र गमनम् । इप- वा । मण्डूकवद्गमनमित्यर्थः । आस्थानं च सविग्रहं वि- हितमास्थानम् । विमुख केवलासनं प्रयुक्त निर्भयावस्था- ति वार्थः । पराङ्मुखं पराङ्मुखगमनम् । अपाङ्मुखं स्थि- पश्चाच्चलनम् । अवप्लुतं निपृक्षया शरीरं संकुच्यावनम्य म् । अवप्लुतं प्रतियोधिनं पादेन प्रहर्तुमभीमुखेन प्लव- । उपन्यस्तं प्रतियोधिबाहुग्रहणार्थं स्वबाहुप्रसारणम् । न्यस्तं प्रतियोधिग्रहणवञ्चनार्थं स्वबाह्वोरपक्षेपणम् । एवं ेषामङ्गशास्त्रादिषूदीर्यते । सत्तद्विदर्शने वितान्तं ग्रन्थ- स्यात् । अतस्तदुपेक्ष्यते ॥ २३–२६ ॥

३] ति० टी०–तिरश्चीनगतानि तिर्यग्गतानि वक्रग- सव्यापसव्यसंचारणानि । प्रहाराणां परदत्तप्रहारा- । परिमोक्षं स्थानचलनादिना व्यर्थीकरणम् । वर्जनं वैकल्यापादकस्थाने तद्वर्जनम् । परिधावनमेकस्य ति- तो धावनम् । भ्रमणमित्यर्थः ॥ २४ ॥

टी०–तिरश्चीनगतानि तिर्यग्गमनानि वक्रगतानि वेपरीतगमनानि च प्रहाराणां मुष्ट्यादीनां परिमोक्षं नं यत्तत्तस्त्रीकरणं च परिधावनं परिभ्रमणं च २४

ति० टी०–अभिद्रवणमभिमुखेन शीघ्रगमनम् । दीपदूरगम । अवस्थानं कृत्वाकृत्वा गमनमिति विग्रहमवस्थानं विमुखाभिमुखत्वेनावस्थानम् । परा- मुखगमनम् । अपाङ्मुखं पार्श्वतोऽपसरणम् अप- आन्तरादिषु धावनकरणतया धावनम् । अवप्लुतं न प्रहर्तुमभिगमनम् ॥ २५ ॥

–अभिद्रवणं शीघ्रं संमुखगमनम् आप्लवस्तूत्प्लवनं स्थानं स्थितं प्रदर्श्य प्लवन ऐक्येस्थितिमित्यर्थः, पार्श्वतो गमनं अपद्रुतं पृष्ठतोपुरुषविशेषप्रदर्शनाय अपसर्पणं धावनं अवप्लुतं प्रहर्तुं पादकुत्थाय गमनम् ॥ २६ ॥

२६] ति० टी०–उपन्यस्तं परेण स्वबाहोरग्रहणाय स्वबा सर्वावस्थानम् । अपन्यस्तं प्रतिभटबाहुग्रहणार्थं स्वबाहुप्रस रणम् कुर्वन्तौ तौ विचेरतुरित्यन्वयः ॥ २६ ॥

रा० टी०–उपन्यस्तं रिपुणा स्वबाह्वोर्ग्रहणाभावाय स्वबाहु- णा स्थितं अपन्यस्तं रिपूणां ग्रहणाय स्वबाहुप्रसारणञ्च कुर्व- न्तावित्यनेन विशेषः युद्धमार्गविशारदौ वानरेंद्रो रावणश्च विचेरतुः । श्लोकचतुष्टयमेकान्वयि ॥ २६ ॥

२७] ति० टी०–एतस्मिन्नन्तरे सुग्रीवास्थानं अवतीर्णो मोक्षयितुभक्षयत्वावसरे मायाबलमारब्धुमुपसंपेदे अथ तन्मे तमुपक्रान्तमायं ज्ञात्वा ॥ २७ ॥

२८] ति० टी०–जितकाशी जितत्रासः वञ्चितः के सति इत्यज्ञातहरिराजगमनः ॥ २८ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे मायोपक्र- मकरणस्य शक्यत्वाभावज्ञानसमये रक्षः आत्मनो मायाबल- मारब्धुमुपसंपेदे इत्येष वानराधिपः तं मायाबलमारब्धं रावणं ज्ञात्वा जितकाशी जितत्रासः सन् आकाशमुत्पत्य हरिराजेन वञ्चितो रावणस्तु स्थित एव अभूवेति शेषः, श्लो- कार्धं संमिलितान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–एतस्मिन्नित्यादिश्लोकद्वयमेकान्वयम् । अ न्तरे अवकाशे । मायाबलं परिज्ञानेकरावणप्रदर्शनम् । स्वर- ब्धुमुपसंपेदे कर्तुमुपचक्रमे । तं मायोपक्रमम् । जितेन ज्ञायते प्रकाशत इति जितकाशी । रावणस्य मायाबलोपक्रम एव जितार्थं युद्धमानस्य सुग्रीवस्य जय इति शेषः । जित- काशी जितत्रासः । वञ्चितः किं मयुद्धकरणादिति ज्ञातः । [illegible] स्थित एव रावणो वञ्चितः पुनरागमने [illegible] ॥ २८ ॥

[illegible] टी०–मायां [illegible] । तदेव स्वर- [illegible] । जितकाशी [illegible] । [illegible] । जितत्रासः [illegible] । [illegible] गगनमतिविशालं [illegible] ॥ २९ ॥

स इति सविद्युन्मुसलं तत्कर्म कृत्वा पवनगतिरनीकं प्राविशत्सप्तमहद्वः ।
रघुवरनृपसूनोर्वेषयन्युद्धहर्षं तरुगणगणमुख्यैः पूज्यमानो हरीन्द्रः ॥ ॥ ३०

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ।

रामस्तु सुग्रीवस्य साहसेन प्रीतिं हृष्टो वचो दुष्करमित्यतानपश्यत् राक्षसैर्न कार्यमित्युपदिश्य लङ्कायाः चतुर्णां द्वाराणां रोधनाय ऋक्षादिसैन्यं च रावणीपदेशार्थमङ्गदं प्राहिणोत् अङ्गदोऽपि रावणं यथाव्यापदुपदिश्य रामकृत्यं कृत्वा राक्षसांस्तर्जयित्वा च रामपार्श्वमाजगाम ।

अथ तस्मिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः । सुग्रीवं संपरिष्वज्य रामो वचनमब्रवीत् ॥ १ ॥
असंमन्त्र्य मया सार्धं तदिदं साहसं कृतम् । एवं साहसयुक्तानि न कुर्वन्ति जनेश्वराः ॥ २ ॥
संशये स्थाप्य मां चेदं बलं चेमं विभीषणम् । कष्टं कृतमिदं वीर साहसं साहसप्रिय ॥ ३ ॥
इदानीं मा कृथा वीर एवंविधमरिंदम । त्वयि किंचित्समापन्ने किं कार्यं सीतया मम ॥ ४ ॥
भरतेन महाबाहो लक्ष्मणेन यवीयसा । शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः ॥ ५ ॥

निशिचरं रावणं श्रमेण योजयित्वा श्रमं प्रापयित्वेत्यर्थः गगनं लङ्घयित्वा गगनेन गत्वेत्यर्थः रामपार्श्वं जगाम ॥ ३९ ॥

गो० टी०-अथेति । हरिवरनाथः श्रमेण रावणहरणाय परिकरनियन्ता । रामभक्तिरेव स्वयंगमनहेतुरिति भावः । प्राप्य संग्रामकीर्तिम् । रामस्य युद्धादागतां कीर्तिं स्वयमाजहारेति भावः । निशिचरपतिम् । तत्सदृशेष्वनेकेषु विद्यमानेष्वपि तान् तृणीकृत्य तेनैव युद्धं कृतवानिति भावः । आजौ । रावणवत् स्वयमा युद्धकृत् किन्तु मयादयेति भावः । योजयित्वा श्रमेण इतः पूर्वं तदज्ञातेन श्रमेण योजयित्वा । योजनं हि पूर्वमज्ञातितस्यैव रावणस्य श्रमफलम् । आत्मवस्तु कीर्तिरिति भावः । गगनमतिविशालं लङ्घयित्वार्कसदृक् स्वरयारित्यपुत्रत्वज्ञापनायाकाशमार्गेणालङ्घयत् । अर्कसदृक् अज्ञातगमनवेगः । हरिवरगणमध्ये निजेन स्वातिशयमप्रकाशयन् वानरेष्वन्यतम इति स्थितः । रामपार्श्वं जगाम रावणशिरोऽपादानयोग्यं कथमस्याधं निश्चयमिति पार्श्वे स्थितः । निशिचरपतिं श्रमेण योजयित्वा जगामेत्यनेन रामस्य प्रतिज्ञानिर्वाहं प्रशंसतीति रावणमहत्त्वेनागत इति सूचितम् । मायाप्रयोगारम्भे समागमनं स्वेनापि मायाप्रयोगं रामस्य क्षोभ्यादित्याशयात् ॥ ३९ ॥

३०] ति० टी०-उक्तमर्थमुपसंहरति स इति । तरुगणा वानरास्तृणमुख्या इनमदादयः ॥ ३० ॥

इति श्रीमद्रामायणे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०-एवमेव भद्रधन्वरणाह-स इति । पवनगतिः सविद्युत्सप्तमहद्वः तत् रावणपराभवरूपं कर्म कृत्वा रघुवरनृपसूनोः रामस्य युद्धरूपं वर्धयन् सन् अनीकं सैन्यं प्राविशत् ॥ ३० ॥

इति श्रीमद्भूमीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

गो० टी०-तृतीये । रघुवरनृपसूनोः रामस्य । तरुगणगणमुख्यैः वानरगणमुख्यैः ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते श्रीपुरुषायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

१] ति० टी०-तस्मिन्सुग्रीवे । निमित्तानि श्रुतजातिपाणि युद्धचिह्नानि ॥ १ ॥

रा० टी०-सुग्रीवागमनानन्तरकालिकं रामदृष्टान्तमाह-अथेत्यादिभिः । रामः तस्मिन्समये निमित्तानि दृष्ट्वा सुग्रीवं संपरिष्वज्य अब्रवीत् ॥ १ ॥

गो० टी०-अथ लङ्कावरोध एकचत्वारिंशे—अथेति । तस्मिन्सुग्रीवे । निमित्तानि युद्धचिह्नानि । निमित्तं हे रामणारित्यमरः ॥ १ ॥

२] ति० टी०-जनेश्वराः भूपाः ॥ २ ॥

रा० टी०-तदाकारमाह-असंमन्त्र्येति । असंमतिमलब्ध्वा तदिदं गमनं साहसं कृतम् अविचारेण तत् । ननु तत्र का क्षतिरित्यत आह-जनेश्वराः राजान साहसयुक्तानि कर्माणि न कुर्वन्ति ॥ २ ॥

गो० टी०-असंमन्त्र्येति । जनेश्वराः राजानः । इति आत्मादृशपरिजने विद्यमाने न कुर्वन्तीत्यादरोक्तिः

३] ति० टी०-संशये । आपदि । अतिघोरं गतः कथमागमिष्यति राजेति बहुचिन्तामग्नं कृत्वा ॥

रा० टी०-तत्र दोषमाह-संशय इति । मत्प्रभृत्यप्रबलमनुष्यमात्रेऽपि गतोऽयं कथमागमिष्यति राजेति संशये स्थापयित्वा त्वं कृतवानसि साहसमिति शेषः । अतः क्षमस्वेति भावः ॥ ३ ॥

४-५] ति० टी०-एतावत् तोऽपि दुष्करमाशंक्य

त्वय्यनागते पूर्वमिति मे निश्चिता मतिः । जानतश्चापि ते वीर्यं मैत्रद्विरण॥
त्वात्तु रावणं युद्धे सपुत्रबलवाहनम् । अभिषिच्य च लङ्कायां विभीषणमथापि च ॥ ७
भरते राज्यमारोप्य त्यक्ष्ये देहं महाबल । तमेवं वादिनं रामं सुग्रीवः प्रत्यभाषत ॥ ८
तव भार्यापहर्तारं दृष्ट्वा राघव रावणम् । मर्षयामि कथं वीर जानन्विक्रममात्मनः ॥ ९
इत्येवं वादिनं वीरमभिनन्द्य च राघवः । लक्ष्मणं लक्ष्मिसंपन्नमिदं वचनमब्रवीत् ॥ १०
परिपूर्णोदकं शीतं वनानि फलवन्ति च । बलीयं संविभज्येमं व्यूह तिष्ठाम लक्ष्मण ॥ ११

सहासमन्यत् कार्यमितः परं मा कृथाः । त्वयि किंचित्समापन्ने दैवात्तवापमानादिप्राप्तावित्यर्थः । 'नाश्नीलं कीर्तयेत्' इत्युक्तेरेवं वादः ॥ ४ ॥ ६ ॥

रा० टी०—नन्वत्र स्वत्प्रयोजनमिदमर्थमेवेदं कृतमित्यत आह—त्वयीति । त्वयि किंचित् अपमानादि समापन्ने प्राप्ते सति सीतादिना मम किं कार्यं त्वदपमानार्थमेव मदुद्यमित्यर्थः । सार्धश्लोक एकान्वयी ॥ ४ ॥ ६ ॥

गो० टी०—इदानीमित्यादि श्लोकद्वयम् । इदानीम् अप्रवृत्ते अचिन्तितम् अविचारितम् एतेनैवं साहसं मा । कृत इत्यत आह—त्वयीति । त्वयि किंचित्समापन्ने । हे संबोधनम् । प्राप्ते मम सीतया किं कार्यं किं प्रयोअभिनववत्सवात्सल्येन पूर्ववत्सममनभिलषन्ती वत्सव नित्यानपायिनीमपि सीतामनादृत्य तदानीमाश्रित त्यभिनिवेशं कुर्वतो रामस्य वात्सल्यातिशय उच्यआ अर्थो वा एष आत्मनो यत्पत्नीत्यर्थशरीरभूतया त्कार्यम् । भरतेन यवीयसेति कनिष्ठत्वमुच्यते । स्वा मूर्तिरात्मन इयत्तत्भरतादिनापि न मे किंचित्प्र । स्वशरीरेण वा, आत्मानं सर्वथा रक्षणीयैरपि धनैत्युक्तशरीरेण वा किं क्रियते ॥ ४ ॥ ६ ॥

] ति० टी०—त्वयि चानागते पूर्वं त्वदागमनात्पूर्वम् । त्र विपत्तिः स्यात् तर्हीति शेषः । इति वक्ष्यमाणप्रकारा निश्चिताभूत् । भगवन्कथमेवं मयि तव प्राकृत इव त्राह—जानतश्चापीति । 'अतिस्नेहः पापशङ्की' इति दित्याशयः ॥ ६ ॥

] ति० टी०—तां मतिं दर्शयति—हत्वेति । अभिषि प्रतिज्ञायाः साधनीयत्वादित्याशयः ॥ ७ ॥

टी०—त्वयीति । पूर्वं त्वयि अनागते सति ते वीर्यं पि मे मतिः रावणं हत्वा विभीषणमभिषिच्य भरते ोप्य त्वत्य देहं देवभूतमिदं राज्यादि त्वदर्थं हत्वेति रहृत्य तेन सहितम् काले त्वदागमनपर्यन्तमेवेति मतिः इत्यं सार्धश्लोकद्वयमेकान्वयि ॥ ४ ॥ ६ ॥

टी०—तत्रेत्यं तत्प्रयोजनाभिलाषेणैवं वादिना । हे त्वत्यनागते सति । इति वक्ष्यमाणप्रकारेण मे मतिः निश्चितामीत् । जानतश्चापीति विशेषणेन अस्थाने भक्तवात्सल्यातिशय उक्तः । इतिशब्दार्थमाह—इत्येवमिति । प्रतिज्ञानिर्वाहार्थमिति भावः । अभिषिच्येति । अन्यथा रागतिवैफल्यादिति भावः । भरत इति । अन्यथा कुलक्रम लेदादिति भावः । महाबलेत्यनन्तरमितिकरणस्याध्याहृत्य ॥ ४ ॥

८] ति० टी०—महाबलेत्यन्तं मतिकथनम् ॥ ८ ॥

रा० टी०—तमिति । एवंवादिनं रामं सुग्रीवः प्रत्यभाषत अर्थपृथक् ॥ ८ ॥

गो० टी०—तमेवमित्यादि सार्धश्लोकः । पौरुषं स्वा स्वरूपं पुरुषधर्ममित्यर्थः । अत एव हि पूर्वं रावणादिके वा शोत्सीत्युक्तधान् । जानन्नित्यनेन रामस्य कर्मेदं न तु स्वा समित्युच्यते ॥ ८ ॥ ९ ॥

९] ति० टी०—आत्मनो विक्रमं स्वस्य परपराक्रमं रसामर्थ्यं जानन्स्वातन्त्र्येणावगच्छन्कथं मर्षयामि न क्षमे पीत्यर्थः ॥ ९ ॥

रा० टी०—सदाकारमाह—तवेति । आत्मनो विक्रमं नन्नहं तव भार्यापहर्तारं कथं मर्षयामि ॥ ९ ॥

१०] ति० टी०—अभिषिच्य लौहित्यातिबलसंपत्तेर्भरत पूर्वकमिति शेषः । लक्ष्मिसंपन्नमिति ह्रस्व आर्षः ॥

रा० टी०—इतीति । एवंवादिनं सुग्रीवमभिनन्द्य रा लक्ष्मिसंपन्नं लक्ष्मीयुक्तं लक्ष्मणमब्रवीत् ॥ १० ॥

गो० टी०—अथ रामस्योत्साहविशेषं वर्णयति—इ मिति । लक्ष्मिसम्पन्नमित्यत्र "इको ह्रस्वोऽयो गालवस्य इति ह्रस्वः लक्ष्मीरत्र निमित्तलक्षणः सन्तोषः ॥ १० ॥

११] ति० टी०—शीतमुदकं तत्तो जलप्रवाहात्पूर्व वनानि च परिपूर्णम् । यत्तेन त्वया त्वत्प्रतिपक्षपूर्व विभीषणं स्थापयिष्यः ॥ ११ ॥

रा० टी०—सदाकारमाह—परीति । पीतमुदकं आहृत्य ते बलीयं सचिवम् अभिषिच्य विभज्य ॥ ११ ॥

गो० टी०—परिपूर्णेति । अनेनैव वनोपपादि कथा किल गुणवत्तरविशेषः प्रकाशितः ॥ ११ ॥

पश्यं वाप्तिं कम्पते च वसुंधरा । पर्वताग्राणि वेपन्ते नदन्ति धरणीधराः ॥ १३ ॥
क्रव्यादसंकाशाः परुषाः परुषस्वराः । क्रूराः क्रूरं प्रवर्षन्ते मिश्रं शोणितबिन्दुभिः ॥ १४ ॥
संध्या परमदारुणा । ज्वलच्च निपतत्येतदादित्यादग्निमण्डलम् ॥ १५ ॥
आदित्यमभिवाश्यन्ति जनयन्तो महद्भयम् । दीना दीनस्वराः क्रूरा अप्रशस्ता मृगद्विजाः ॥ १६ ॥
रजन्यामप्रशस्तश्च संतापयति चन्द्रमाः । कृष्णरक्तानुपर्यन्तो यथा लोकस्य संक्षये ॥ १७ ॥
ह्रस्वो रूक्षो प्रशस्तश्च परिवेषः सुलोहितः । आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ १८ ॥
दृश्यते न यथावच्च नक्षत्राण्यभिवर्तते । युगान्तमिव लोकस्य पश्य लक्ष्मण शंसति ॥ १९ ॥
काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च । शिवाश्चार्प्यशुभा वाचः प्रवदन्ति महास्वनाः ॥ २० ॥
शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः । भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ २१ ॥
क्षिप्रमद्य दुराधर्षा पुरीं रावणपालिताम् । अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ २२ ॥
इत्येवं तु ब्रुवन्नीरो लक्ष्मणं लक्ष्मणाग्रजः । तस्माद्वातायनच्छीघ्रं पर्वताग्रान्महाबलः ॥ २३ ॥
अवतीर्य तु धर्मात्मा तस्माच्छैलात्स राघवः । परैः परमदुर्धर्षं ददर्श बलमात्मनः ॥ २४ ॥

१२-१८] ति० टी०-व्याख्यातप्राया इमे श्लोकाः १२-१८

रा० टी०-लोकेति । क्षयावहरक्षसां निवर्हणं पीतं भीमं भयं प्रयामि । १२ ॥

गो० टी०-लोकेति । लोकक्षयकरं लोकक्षयसूचकम् भीमं भयंकरम् भयं भयनिमित्तम् । न केवलं लोकस्य प्रतीक्षणं किन्त्वहं-निवर्हणामिति । विनाशमूलकमित्यर्थः ॥ १२ ॥

रा० टी०-भयमेवाह-वाता इत्यादिभिः । धरणीधराः राजा नदन्ति ॥ १३ ॥

गो० टी०-तदेव भयनिमित्तं प्रपञ्चयति-वाता इति । रवन्ति अनिमित्तमिति शेषः ॥ १३ ॥

रा० टी०-मेघा इति । क्रव्यादसंकाशाः हिंसकसदृशाः मेघाः शोणितबिन्दुभिर्मिश्रं जलमिति शेषः, क्रूरं यथा भवति तथा प्रवर्षन्ते ॥ १४ ॥

गो० टी०-मेघा इति । क्रव्यादसंकाशाः श्येनादिसदृशसंस्थानाः परुषाः क्रूरवेषाः क्रूराः लोकक्षयसूचकाः मिश्रं जलमिति शेषः ॥ १४ ॥

रा० टी०-रक्तेति । सन्ध्यारक्तचन्दनसंकाशा अतः सर्वेषां राक्षसां भयावहा दृश्यते इति शेषः आदित्यात् ज्वलदग्निमण्डलं निपतति ॥ १५ ॥

गो० टी०-रक्तेति । स्पष्टः ॥ १५ ॥

रा० टी०-आदित्यमिति । अप्रशस्ताः निषिद्धाः मृगद्विजाः मृगाश्च द्विजाश्च मृगद्विजाः अयं जनयन्तः सन्तः आदित्यमभिवाश्यन्ति नदन्ति ॥ १६ ॥

गो० टी०-आदित्यमिति । आदित्यमभि आदित्यमिश्रितम् दीनाः दीनशब्दः दीनस्वराः दैन्यसूचकस्वरवन्तः अत एव क्रूराः भयंकराः अप्रशस्ताः हीनाः शिवादयः ॥ १६ ॥

रा० टी०-रजन्यामिति । कृष्णरक्तौ अन्तपर्यन्तौ यस्य कृष्णान्तभागकः रक्तान्तभागकश्चेत्यर्थः रजन्यामप्रशस्तः काश्चः चन्द्रमाः लोकस्य संक्षये इव सन्तापयति ॥ १७ ॥

गो० टी०-रजन्यामिति । कृष्णरक्तान्तपर्यन्तः रक्तो रक्तपर्यन्तश्चेत्यर्थः ॥ १७ ॥

रा० टी०-ह्रस्व इति । अप्रशस्तः अशुभकरः परिवेषः नीलं लक्ष्म च आदित्यमण्डले दृश्यते ॥ १८ ॥

गो० टी०-ह्रस्व इति । ह्रस्वः श्यामवर्णः रूक्षः क्रूरः अप्रशस्तः अशुभकरः सुलोहितः रक्तवर्णः लोकस्य संक्षये यथा तथा दृश्यत इति शेषः ॥ १८ ॥

गो० टी०-आदित्येत्यादिसार्धश्लोकः । लक्ष्म चिह्नं दृश्यत इत्यर्थः । तथैव छान्दोग्ये-यदादित्यस्य कृष्णं रूपं तत्प्रलयकाले तथा दृश्यत इति व्याख्यातम् । नक्षत्राणि यथावत् यथाप्रकारेण न दृश्यन्ते । मलिनानि दृश्यन्ते इत्यर्थः । उक्तं निमित्तजातं लोकस्य युगान्तं शंसतीवाभि इति योजना ॥ १९ ॥

१९] ति० टी०-पश्य नक्षत्राण्यभिवर्तते प्रकाशगणं यथावत् दृश्यते इत्यन्वयः । हे लक्ष्मण ! इदमुत्पातनिमित्तं लोकस्य युगान्तं शंसतीव पश्य ॥ १९ ॥

रा० टी०-दृश्यन्त इति । नक्षत्राणि यथावत् न दृश्यन्ते अतः पश्य लोकस्य लोके अभिवर्तते अभिवर्तते जनाय युगान्तमिव शंसति शंसयति दर्शयतीति शेषः ॥

२०-२१] ति० टी०-शिवादयो नीचैर्निपतन्ति

रा० टी०-काका इति । काकादयः नीचैरधः प[illegible] शिवाः शृगालकङ्कादयश्च अशुभाः वाचः प्रवदन्ति ॥

---

१ अ पश्यं इत्र गो. पाठः । २ पतन्ति धरणीधरा इति गो. पाठः । ३ स्रुवा इति गो. पाठः । ४ वर्तते इति गो. पाठः । ५ वीरा इति रा० टी० पाठः । ६ दृश्यते इति गो. पाठः । ७ भाशिवा इति गो. पाठः । ८ दीप्तदृ गो. पाठः । ९ पक्षाकीर्ति गो. पाठः

तु सप्तधीवः कपिराजबलं महत् । कालज्ञो राघवः काले संयुगायाभ्यचोदयत् ॥
तः काले महाबाहुर्वेलेव महता वृतः । मैथिलः पुरतो धन्वी लङ्कामभिमुखः पुरीम् ॥
तौ बिभीषणसुग्रीवौ हनूमाञ्जाम्बवान्बलः । ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा ॥
ततः पश्चात्सुमहती पृतनर्क्षवनौकसाम् । पश्चाद्य महतीं भूमिमनुयाति स्म राघवम् ॥
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् । जगृहुः कुञ्जरप्रख्या वानराः परवारणाः ॥
तौ त्वदीर्घेण कालेन भ्रातरौ रामलक्ष्मणौ । रावणस्य पुरीं लङ्कामासेदतुररिंदमौ ॥
पताकामालिनीं रम्यामुद्यानवनशोभिताम् । चित्रवप्रां सुदुष्पापामुच्चैः प्राकारतोरणाम् ॥
तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदितः । यथा निदेशं संपीड्य न्यविशन्त वनौकसः ॥
लङ्कायास्तूत्तरद्वारं शैलशृङ्गाभशोभनम् । रामः सलक्ष्मणो धन्वी जुगोप च रुरोध च ॥

गो० टी०—काका इति । नीचैः हस्वं वैदिकत्वात् परिपतन्ति प्रापुवन्ति । शिवा इति । अशस्तमृगजातयोऽपि पुनरुक्तिरशुभार्थैकत्वात् ॥ २० ॥

रा० टी०—तत्कालमाह—शैलेरिति । कपिराक्षसैरेकैकेन परिमिताहता अत एव पर्वतादिभिरिता भूमिर्भविष्यति॥२१॥

चित्रवप्रामिति । राक्षसपालितां पुरीं चित्रप्र

मैथि । अभियामेति वर्तमानकाले

इतीति । इति वदन् लक्ष्मणाग्रजः पर्वतात्

२३ ॥

टी०—इत्येवमिति । स्पष्टः ॥ २२ ॥

०—उद्यतीर्येति । राघवः परैः रिपुभिः परमदुर्ग दुर्गं ॥ २४ ॥

०—अद्यतीर्येति । तस्मात्संबुद्धम् । कृतिरित्यनेन संबोधनमाकारादेशः गम्यते ॥ २३ ॥

५] ति० टी०—सप्तधीवः धीवलसहितः । कपिराजबलं कृतसन्नाहं कृत्वा काले ज्योतिःशास्त्रोक्तकाले संयुगाय न्यचोदयत् ॥ २५ ॥

मये संयुगायेति । सप्तधीवो राघवः सन्नद्ध काले

टी०—गाय अभ्यचोदयत् ॥ २५ ॥

ना—सन्नद्धेति । राघवः सप्तधीवः सन् कपिराजबलं बलम् सन्नद्ध प्रोत्साह्य काले युद्धकाले संयुगाय न्यचोदयत् ॥ २४ ॥

७] ति० टी०—काले स्वरशास्त्रोक्ते युद्धयोग्ये काले युं प्रस्थितः ॥ २६ ॥ २७ ॥

०—तत इति । काले युद्धे योग्यमुहूर्ते धन्वी रामः वः सन् पुरतः पूर्वं प्रविष्टः प्रवेतुं प्रस्थितः ॥ २६ ॥

०—तत इति । काले प्रातःकाले ॥ २७ ॥

०—तावितिं । तदा रामः प्रस्थानसमये विभीषणसुग्रीवौ ॥ २७ ॥

गो० टी०—तमिति । स्पष्टः ॥ २६ ॥

२८] ति० टी०—ऋक्षवनौकसां पृतनेति छेदः ॥ २८ ॥

रा० टी०—तत इति । ततः पश्चात् ऋक्षवनौकसां पृतनेना रामबलमनुयाति स्म ॥ २८ ॥

गो० टी०—तत इति । पृतना सेना ॥ २७ ॥

२९-३१] ति० टी०—परवारणाः शत्रुनिवारकाः २९—३

३२] ति० टी०—यथानिदेशं रामनिदेशमनतिक्रम्य संपीड्य सह्य ॥ ३२ ॥

रा० टी०—शैलेति । परवारणाः रिपुनिवारणक्षमाः शतशो वानराः शैलशृङ्गाणि महीरुहांश्च जगृहुः ॥ २९ ॥

गो० टी०—शैलेति । कुञ्जरप्रख्याः गजतुल्याः परवारणाः शत्रुवारकाः ॥ २८ ॥

रा० टी०—ताविति । रामलक्ष्मणौ लङ्कामासेदतुः ॥ ३

गो० टी०—ताविति । स्पष्टः ॥ २९ ॥

रा० टी०—पताकेति । पताकाभालिनीं पताकासम्पन्नां चित्रप्राम् चित्रैः प्राकारे तोरणं यस्याः सुरैरपि दुर्धर्षां तां लङ्कां रामवाक्यप्रचोदिता वनौकसः यथानिदेशं संपीड्य न्यविशन्त श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

गो० टी०—पताकेत्यादिश्लोकद्वयम् । पताकामालिनीं त्यत्र "ऋयार्यीः संज्ञाछन्दसोर्बहुलम्" इति ह्रस्वः । रम्यामुद्यानवनम् चित्रवप्रां चित्रवप्राम् यथानिदेशं यथास्थानम् रामवचोऽनूद्य स्वं स्वं स्थानमनतिक्रम्येत्यर्थः । संपीड्य उपरुध्य ॥ ३० ॥ ३१ ॥

३३] ति० टी०—तत्रैव प्रपञ्चः—लङ्कायां इति । द्वारं रुरोध तद्वारनिरोधकमासक्तं चकार ॥ ३३ ॥

रा० टी०—तत्प्रकारमाह—लङ्कायां इत्यर्धेन । द्वारं रामो जगौ रुरोध च ॥ ३३ ॥

गो० टी०—लङ्कायामिति । उत्तरद्वारं शैलशृङ्गाभशोभनं वत् रक्षणार्थं । रुरोधस्यानेन क्रियार्थं शैलशृङ्गस्य प्राप्त विशिष्टमिति कविकौशलात्पाठक्रमोऽपि ॥ ३२ ॥

[illegible] तरद्वारमासाद्य यत्र तिष्ठति रावणः । तिष्ठन्त्या दक्षमाद्यं तद्वारं समर्थः परिरक्षितुम् ॥ ३३ ॥
रावणाधिष्ठितं भीमं वरुणेनेव सागरम् । सान्वयं राक्षसैर्भीमैरभिगुप्तं समन्ततः ॥ ३४ ॥
लघूनां त्रासजननं पातालमिव दानवैः । विन्यस्तानि च योधानां बहूनि विविधानि च ॥ ३५ ॥
दर्शयुधजालानि तैर्यैव कवचानि च । पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः ॥ ३८ ॥
अतिष्ठत्सह मैन्देन द्विविदेन च वीर्यवान् । अङ्गदो दक्षिणद्वारं जग्राह सुमहाबलः ॥ ३९ ॥
ऋषभेण गवाक्षेण गजेन गवयेन च । हनूमान्पश्चिमद्वारं रक्षति बलवान्कपिः ॥ ४० ॥
प्रजङ्घतरसाभ्यां च वीरैरन्यैश्च संगतः । मध्यमे च स्वयं गुल्मे सुग्रीवः समतिष्ठत ॥ ४१ ॥
सह सर्वैर्हरिश्रेष्ठैः सुवर्णपवनोपमैः । वानराणां तु षट्त्रिंशत्कोट्यः प्रख्यातयूथपाः ॥ ४२ ॥
निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः । शासनेन तु रामस्य लक्ष्मणः सविभीषणः ॥ ४३ ॥
द्वारे द्वारे हरीणां तु कोटिं कोटीर्न्यवेशयत् । पश्चिमेन तु रामस्य सुषेणः सहजाम्बवान् ॥ ४४ ॥

३४] ति० टी०-उक्तमेवार्थं स्पष्टयितुमाह—लङ्कामिति ३४
३५-३६] ति० टी०-तद्वारं तद्वाररोधिकां सेनाम् ३५।३६
रा० टी०-लङ्कामिति । यत्र रावणस्तिष्ठति तदुत्तरद्वारमासाद्य अवरुह्य रामो लङ्कायामुपनिविष्टः तत्र तस्यैवोपनिवेशहेतुः तद्वारं रामादन्यः परिरक्षितुं न समर्थः श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥
गो० टी०-लङ्कामित्यादिसार्धश्लोक एकान्वयः । लक्ष्मणानुचरो वीर इति पाठः । रावणो यत्र तिष्ठति तदुत्तरद्वारमासाद्य लङ्कायामुपनिविष्ट इत्यन्वयः । ॥ ३३ ॥
रा० टी०-रावणेति । वरुणेन सागरमिव दानवैः पातालमिव रावणेनाधिष्ठितमत एव राक्षसैः समन्ततोऽभिगुप्तम् अत एव लघूनामल्पवीर्याणां त्रासजननं पूर्वद्वारं द्वारं रक्षितुं विन्यस्तानि योधानामायुधजालानि कवचानि च दर्शयामासेति श्लोकद्वयमेकान्वयि ॥ ३५ ॥ ३७ ॥
गो० टी०-रामेणैव निरोद्धव्यत्वे हेतुमाह—नान्य इत्यार्धश्लोकद्वयेन । लघूनाम् अल्पसाराणाम् ॥ ३४ ॥ ३५ ॥
३७-४०] ति० टी०-लघूनामल्पवीर्याणाम् । दानवैः पातालमिव गुप्तं राक्षसैर्गुप्तं द्वारमित्यन्वयः । विन्यस्तानि । पूर्वकाले एषोऽभिनिवेशोऽर्थमिति शेषः ॥ ३७-४० ॥
गो० टी०-विन्यस्तानीति । विन्यस्तानि द्वारोपान्तवेदिकादिनिति शेषः ॥ ३६ ॥
रा० टी०-पूर्वमिति । पूर्वं द्वारमासाद्य नीलोऽतिष्ठत् ३८
गो० टी०-पूर्वमिति । मैन्देन द्विविदेन चेत्यादिना प्रतिद्वारमधिकरूपपतिसम्बन्धात्पौनरुक्त्यात्पूर्वं रामेण ते नियुक्ता इति ज्ञेयम् ॥ ३७ ॥
रा० टी०-अङ्गद इति । ऋषभादिना पूर्वोक्तेन दक्षिणं द्वारं जग्राह ॥ ३९ ॥
गो० टी०-अङ्गद इति । स्पष्टः ॥ ३८ ॥
रा० टी०-हनुमानिति । प्रजङ्घतरसाभ्यां वानराभ्यामन्यैर्वीरैश्च संगतो हनुमान् पश्चिमं द्वारं रक्षति ॥ ४० ॥
गो० टी०-हनुमानिति । स्पष्टः ॥ ३९ ॥
४१] ति० टी०-मध्यमे गुल्मेऽनि
वितयोरुत्तरपश्चिमद्वारयोर्मध्ये वर्तमा
कार्यं मध्यमणिन्यायेन साहाय्यं कर्तुं सु
रा० टी०-मध्यम इति । सर्वैः हरि
मध्यमे गुल्मे समतिष्ठत् ॥ ४१ ॥
गो० टी०-मध्यम इति । दूरेणरावणेनन्द्रजि
त्तरपश्चिमद्वारयोर्मध्ये तदुभयद्वारनिरोधकानां
तेन साहाय्यं कर्तुं सुग्रीवः स्वयमतिष्ठदिति ज्ञेयम
तु ... सुग्रीवः सहजाम्बवान् । अदूरान्
सखी बहुबलानुगः ॥ इति ... रक्ष्यमाणत्वात्
गरुडः ॥ ४० ॥
४२-४३] ति० टी०-सर्वैर्हरिश्रेष्ठैर्वानरनिरोधनिपु
ज्ञातिः प्रख्यातयूथपाः षट्त्रिंशत्कोट्यः । अप्रख्यात
तत्सेवानां च गणनाभाव इति भावः ॥ ४२ स्कान्द ॥
रा० टी०-वानराणामिति । षट्त्रिंशन्निर्याड
मध्ये प्रख्यातयूथपाः वानराः यत्र सुग्रीवः तत्र शेषः
राक्षसान् पीडयित्वा उपनिविष्टाः अभवन्निति ॥
गो० टी०-वानराणामिति । स्पष्टः ॥ ४१ ।
रा० टी०-शासनेनेति । रामस्य शासनेन
लक्ष्मणो द्वारे द्वारे हरीणां कोटिकोटीः न्यवेशय
स्थापयत् ॥ ४३ ॥
गो० टी०-शासनेनेति । स्पष्टः ॥ ४२ ॥
४४] ति० टी०-हनूनिरोधविशुद्धजनप्रमाण
इति ॥ ४४ ॥
रा० टी०-पश्चिमेनेति । सुषेणः सहजाम्बवान् ॥

[illegible] गुल्म इस्ता [illegible] ॥ ४३ ॥
द्रुमशैलाग्रहस्तांश्च ददृशुस्ते प्लवंगमान् । ते तु वानरसिंहास्तान् दृष्ट्वा [illegible] ॥ ४४ ॥
सर्वे विकृतलाङ्गूलाः सर्वे दंष्ट्रानखायुधाः । सर्वे विकृतचित्राङ्गाः सर्वे च विकृताननाः ॥ ४५ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः । केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ ४६ ॥
सन्ति चौघबलाः केचित्केचिच्छतगुणोत्तराः । अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥ ४७ ॥
अद्भुतश्च विचित्रश्च तेषामासीत्समागमः । तत्र वानरसैन्यानां शलभानामिवोद्यमः ॥ ४८ ॥
प्रतिपूर्णमिवाकाशं संपूर्णैव च मेदिनी । लङ्कामुपनिविष्टैश्च संपतद्भिश्च वानरैः ॥ ५० ॥
शतं शतसहस्राणां पूतनाऋक्षवनौकसाम् । लङ्काद्वाराण्युपाजग्मुरन्ये योद्धुं समन्ततः ॥ ५१ ॥
आवृतः स गिरिः सर्वैस्तैः समन्तात्प्लवङ्गमैः । अयुतानां सहस्रं च पुरीं तामभ्यवर्तत ॥ ५२ ॥
वानरैर्वलवद्भिश्च बभूव द्रुमपाणिभिः । सर्वतः संवृता लङ्का दुष्प्रवेशापि वायुना ॥ ५३ ॥
राक्षसा विस्मयं जग्मुः सहसाभिनिपीडिताः । वानरैर्मेघसंकाशैः शक्रतुल्यपराक्रमैः ॥ ५४ ॥

[illegible]ले एव रामस्य पश्चिमेन पृष्ठभागावष्टम्भेन अदूरात् समीपे एव तस्थौ ॥ ४४ ॥

४५] ति० टी०–अदूरात्पश्चिमेनासन्नपृष्ठभागावष्टम्भेन ४५

रा० टी०–ते इति । ईषाणः शार्दूला इव वानरशार्दूलाः शैलाग्रान् गृहीत्वा युद्धाय तस्थिरे ॥ ४५ ॥

गो० टी०–ते इति । वानरशार्दूलाः वानरश्रेष्ठाः । लाघानिति पुंस्त्वमार्षम् ॥ ४४ ॥

४६] ति० टी०–विकृतलाङ्गूलाः । क्रोधामर्षवशादिति ष: ॥ ४६ ॥

रा० टी०–सर्वे इति । विकृतलाङ्गूला अतिक्रोधावेशव- विकृतलाङ्गूलस्तादिनिर्दिष्टाः सन्तीति शेषः ॥ ४६ ॥

गो० टी०–सर्वे इति । विकृतलाङ्गूलाः ऊर्ध्वं प्रसारित- । विकृतचित्राङ्गा इत्यत्र विकृतत्वं कोपरक्तमुखनेत्रत्वम् । त्र चित्रं चित्रवर्णम् अङ्गं येषां ते तथोक्ता इति विग्रहः । तनाः राक्षसविडम्बनाय कुटिलितमुखाः ॥ ४५ ॥

] ति० टी०–दशगुणोत्तराः शतनागबलाः । नागस- ागसहस्रेण ॥ ४७ ॥

टी०–दशेति ॥ ४७ ॥

टी०–दशेति । दशगुणोत्तराः शतनागबला ४६ ॥

ति० टी०–ओघबला ओघसंख्यनागबलाः ॥ ४८ ॥

०–सन्तीति । केचिद् ओघबलाः ओघसंख्या- विष्टाः सन्ति अन्ये अप्रमेयबलाः आसन् ॥४८॥

०–सन्तीति । ओघबलाः ओघसङ्ख्याकनाग- गुणोत्तराः ओघसङ्ख्याकनागबलेभ्यः शतगुणेन त्यर्थः । अप्रमेयबलाः अपरिच्छेद्यबलाः ॥ ४७ ॥

० टी०–शलभानामिति । उत्पातकाले इति

रा० टी०–अद्भुत इति । शलभानामुद्यम इव तेषां वान- रसैन्यानां समागमः विचित्रोऽनेकविधः अद्भुत आश्चर्य आसीत् ॥ ४९ ॥

गो० टी०–अद्भुत इति । अद्भुतः आश्चर्यभूतः । विचित्र वानरोच्छलल्लङ्गूलतया नानावर्णः । तत्र लङ्कायाम् । तेषां वानरसैन्यानाम् समागमः आगमनं शलभानां शरभा- णाम् अष्टपादभृगाणाम् उद्यमः समागम इव आसीत् । तथा भयङ्करोभूदित्यर्थः । यद्वा यथा शलभानां समागमो युगान्त भवति तथेति युगपत्पतने दृष्टान्तः ॥ ४८ ॥

५०] ति० टी०–संपतद्भिराकाशं पूर्णं निविष्टैर्मेदिनी पूर्णा ॥ ५० ॥

रा० टी०–प्रतीति । लङ्कामुपनिविष्टैः संस्थितैः संपतद्भि आगच्छद्भिश्च वानरैः प्रतिपूर्णमाकाशमिव मेदिन्यपि प्रतिपूर्णा ऽभवदिति शेषः एक इवशब्दोऽप्यर्थे ॥ ५० ॥

गो० टी०–परिपूर्णमिति । अत्र इवशब्दद्वयमपि वाक्या- लङ्कारे । उपनिविष्टैः पृथिवी पूर्णा । संपतद्भिः आगच्छद्भिस्तु आकाशं पूर्णम् । भूमावधकाशाभावादिति भावः ॥ ५० ॥

५१] ति० टी०–ऋक्षवनौकसां शतसहस्राणाम् । शतको- टिरित्यर्थः । एवं च कोटिसंख्याः पूतना लङ्काद्वाराण्युप जग्मुः । पूतनाः ऋक्षेश्वर संचिरार्याः । एते पूर्वमिक्ष्वाकवो इति बोध्यम् । अन्येऽभिष्टाः समन्ततो युद्धं परितो योद्धुं जग्मुः ॥ ५१ ॥

रा० टी०–शतमिति । शतसहस्राणामृक्षवनौकसां शत पूतनाः लङ्काद्वाराणि उपाजग्मुः अन्येऽभिष्टाः समन्ता उपाजग्मुः ॥ ५१ ॥

गो० टी०–शतमिति । शतसहस्राणाम् ऋक्षवनौक शतं पूर्वमिक्ष्वाकोरिति कम् लङ्काद्वाराणुपागमाय । वानराः [illegible] ॥ ५० ॥

५२–[illegible]] ति० टी०–स गिरिर्निवृत्तः । अयुतानां

[illegible] ॥ ४३ ॥ [illegible] ॥ ४४ ॥ [illegible] ॥ ४५ ॥ [illegible] ॥ ४६ ॥ [illegible] ॥ ४७ ॥ [illegible] ॥ ४८ ॥ [illegible] ॥ ४९ ॥ [illegible] ॥ ५० ॥ [illegible] ॥ ५१ ॥ [illegible] ॥ ५२ ॥ [illegible] ॥ ५३ ॥ [illegible] ॥ ५४ ॥

महाञ्छब्दोऽभवत्तत्र वेलोत्पस्यार्भवर्तनैः । सागरस्येव भिन्नस्य यथा स्यात्तालिलस्वनः ॥ ५५
तेन शब्देन महता समाकारा सतोरणा । लङ्का प्रचलिता सर्वा सशैलवनकानना ॥ ५६ ।
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी । बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ५७
प्लवगः संनिवर्त्यैवं स्वसैन्यं रक्षसां वधे । संमन्त्र्य मन्त्रिभिः सार्धं निश्चित्य च पुनः पुनः॥ ५८
आनन्तर्यमभिप्रेप्सुः क्रमयोगार्थतत्त्ववित् । विभीषणस्यानुमते राजधर्ममनुस्मरन् ॥ ५९ ॥
अङ्गदं वालितनयं समाहूयेदमब्रवीत् । गत्वा सौम्य दशग्रीवं ब्रूहि मद्वचनात्कपे ॥ ६० ॥
लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गतव्यथः । अवष्टभ्यैकं गतैर्वर्यं भुमूर्षोर्नगृहेतनम् ॥ ६१ ॥
ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा । नागानामथ यक्षाणां राज्ञां च रजनीचर ॥ ६२ ॥

हर्षं च पुरीं तामभ्यवर्तत[1] । सर्वद्वारस्थितैस्तस्य सेनासर्वस्वगुप्तान्तर्हणार्थं संचरतामिति शेषः ॥ ५३ ॥ ५४ ॥

रा० टी०-आवृत इति । तैः प्लवङ्गमैर्गिरिः सह्यवेलाप्रतिः आवृतः आप्लावितः शेषः अयुतानां सहस्रं कोटिपरिवेतं तु पुरीमभ्यवर्तत्सर्वद्वारमधिष्ठत्सर्वसैनाग्रहणान्तर्घोषनाय पुरीमनुदिश्य अगच्छत्तित्यर्थः ॥ ५२ ॥

गो० टी०-आवृत इत्यर्धमेकं वाक्यमस गिरिः त्रिकूटः ५२

गो० टी०-अयुतानामित्यर्धम् । अयुतानां सहस्रं च तां पुरीमभ्यवर्ततेत्यनेन पूर्वोक्तस्य द्वारावरणस्यानन्तरम् । अयुतानां सहस्रं च पुरीं तां पर्यवारयदित्युच्यते ॥ ५२ ॥

रा० टी०-वानरैरिति । वानरैः संहता लङ्का वापरापि दुष्प्रवेशा बभूवेत्यन्वयः ॥ ५३ ॥

गो० टी०-वानरैरिति । दुष्प्रवेशा बभूवेत्यन्वयः ॥ ५३ ॥

रा० टी०-राक्षसा इति । वानरैर्निपीडिताः राक्षसाः विस्मयं जग्मुः ॥ ५४ ॥

गो० टी०-राक्षसा इति । अभिनिपीडिताः उपरुद्धाः राक्षसाः । विस्मयमाश्चर्यं जग्मुः ॥ ५४ ॥

५५-५८] ति० टी०-वेलोत्पस्य वानरीयस्याभिवर्ततोऽभिवर्तमानस्य, भिन्नस्य सागरस्य कूलमेतुविदारणस्य । अभूतोपमेयम् ॥ ५५ ॥ ५८ ॥

५९.] ति० टी०-आनन्तर्यमनन्तरकर्तव्यमभिप्रेप्सुः प्राप्तुमिच्छुः । क्रमयोगार्थतत्त्ववित्सामादुपायानां क्रमयोगं क्रमप्रयोगं तत्साध्यमर्थं तत्त्वं तत्प्रयोजनं च वेत्तीति सः । विभीषणस्यानुमते स्थित इति शेषः । यदि रावणो भवन्तं शरणमुपेयात्तदा लङ्कैश्वर्यं तस्मैव देयमिति विभीषणस्थिते स्थित इत्यर्थः । राजधर्ममनुस्मरन्साधादिरूपोपायसाध्यं दण्डो न सोत्रयः प्रजानामेतदुपरि स्थैर्यरूपं राजधर्मं संचिन्वन् ॥ ५९ ॥

रा० टी०-महानिति । अभिवर्ततः अभिवर्धमानस्य सैन्यस्य महान् शब्दोऽभवत् तत्र दृष्टान्तः भिन्नस्य विदीर्णस्यतोः सागरस्य सलिलस्वनो यथा अभूतोपमेयमिति भद्रः ॥ ५५ ॥

गो० टी०-महानिति । तत्र त्रिकूटशिखरे । भिन्नस्य भिन्नमर्यादस्य । सागरस्येव अभिवर्ततः अभिवर्धमानस्य वेलोत्पस्य । सलिलस्वनो यथा स्यात् तथा महाञ्छब्दो बभूवेत्यर्थः योजना । अतो न अभूतोपमेयमित्यर्थम् ॥ ५५ ॥

रा० टी०-तेनेति । लङ्का तेन शब्देन प्रचलिता च वेति शेषः ॥ ५६ ॥

गो० टी०-तेनेति । सशैलवनकाननेत्यत्र वनम् उद्यानम्

रा० टी०-रामेति । रामलक्ष्मणगुप्ता सुग्रीवेण सर्वा सा वाहिनी दुर्धर्षतरा बभूव ॥ ५७ ॥

गो० टी०-रामेति । सुग्रीवेणेति रक्ष्यसाहित्यमत्र ज्ञेयम्

रा० टी०-राघव इति । क्रमयोगार्थतत्त्ववित् क्रमयोगः संबन्धो येषां तेषां सामादीनाम् अर्थानां तत्त्वं नानां च तत्त्वं याथार्थ्यं वेत्ति सः आनन्तर्यम् उत्तरकालं तत्त्वं अभिप्रेप्सुः कर्तुमिच्छुः राजधर्ममनुस्मरन् सन् विभीषणस्यानुमते स्थित इति शेषः । रावणः स्वसैन्यं सर्वं मन्त्रिभिः सार्धं संमन्त्र्य च अङ्गदमाहूय अब्रवीत साधिष्ठं मेकाग्र्यमि ॥ ५८ ॥ ५९ ॥

गो० टी० राघव इत्यादिसार्धश्लोकद्वयमेकान्वयि । आनन्तर्यम् अनन्तरकर्तव्यम् अभिप्रेप्सुरिच्छुः [illegible] दूतः प्रेषणीय इति विचार्य अङ्गद एव [illegible] इति निश्चित्य । क्रमयोगार्थतत्त्ववित् युक्तायोगः सामादुपायाः तेषामर्थः फलं तस्य तत्त्वं याथार्थ्यं वेत्तीति तथोक्तः । राजधर्ममनुस्मरन् युद्धात्तस्य प्रत्यागता राजानः युद्धार्थं इतस्ततश्च प्रथममाहूयन् पश्चम् राज्यभोगमनुस्मरन् । विभीषणस्यानुमते अनुमतौ अङ्गदमाहूयेदमब्रवीदिति संबन्धः ॥ ५८ ॥ ५९

६०] ति० टी०-दूतं वक्ष्यमाणमङ्गदमाहूयाब्र

रा० टी०-सहाकारमाह-गत्वेति । लङ्कां [illegible] लङ्घयित्वा अनादृत्य भयं त्यक्त्वा च [illegible] गतव्यथः सन् मद्वचनाद्ब्रूहि ॥ ६० ॥

गो० टी०-गत्वेति । हे सौम्य ! गतव्यथः सन् । लङ्कां पुरीं तत्प्राकारं लङ्घयित्वा भयं त्यक्त्वा मद्वचनात् ब्रूहि मयोक्तमिति मृदित्यर्थः । कपे साहस्रर्थं द्योतयति ॥ ६० ॥

६१-६२] ति० टी०-लङ्घयित्वा सङ्घ

---

[1] स्वामिति ए० पाठः । २ मैन्यं स्वामिति गो० पाठः । ३ ओक गतैर्वर्यं भुमूर्षो नगृहेतनम् गो० पाठः ।

[illegible] राक्षसेश्वरकालेन राक्षसैः । [illegible] निधनं दर्पः स्वयंभुवरदानजः ॥ ६१
तैरयपापस्य संप्राप्तः व्युष्टिरद्य दुरासदा ।
स्य दण्डधरस्तेऽहं दाराहरणकर्शितः । दण्डं धारयमाणस्तु लङ्कायां व्यवस्थितः ॥ ६२
दवीं देवतानां च महर्षीणां च राक्षस । राजर्षीणां च सर्वेषां गमिष्यसि युधि स्थिरः ॥ ६३
लेन येन वै सीतां मायया राक्षसाधम । मामतिक्रमयित्वा त्वं हृतवांस्तन्निदर्शय ॥ ६४
राक्षसमिमं लोकं कर्तास्मि निशितैः शरैः । न चेच्छरणमभ्येषि तामादाय तु मैथिलीम् ॥ ६५
मात्मा राक्षसश्रेष्ठः संप्राप्तोऽयं विभीषणः । लङ्कैश्वर्यमिदं श्रीमान्ध्रुवं प्राप्नोत्यकण्टकम् ॥ ६६

पदवः । अयं त्यक्त्वा त्वद्भक्तं तृणीकृत्य लङ्कामुपारुणध ते शेषः । अतो अष्टेत्यादि तादृशं ब्रूहीत्यन्वयः ॥६१॥६२॥

६३] ति० टी०—यच्च पापं कृतं प्राणान्तनानाप्रकारं तत्करणीभूतः स्वयंभूवरदानजो दर्पस्ते त्वत्संबन्धय तः ॥ ६३ ॥

० टी०—तदाकारमाह—भ्रष्टेत्यादिभिः । हे भ्रष्टश्रीकत्वा शिष्ट! अवलिप्तेन गर्वितेन त्वया मोहात् अविवेकितः प्रभृतीनां यत् पापमपराधः कृतं तस्य पापस्य व्युष्टिः तिगावसरः संप्राप्ता अतः स्वयंभूवरदानजः ते गर्वो विध्वस्तः सार्धश्लोकद्वयमेकान्वयि ॥ ६१ ॥ ६२ ॥

ो० टी०—भ्रष्टश्रीकेत्यादि । भ्रष्टश्रीक भ्रष्टप्रायश्रविण र्यं गतप्रायनिवन्तृत्व संपदि भ्रष्टायामपि लोके नित्य संभवति [illegible] संभवति सापि नास्तीत्याह—मुमूर्षो इति । तदानीमपि भवति तदपि नास्तीत्याह—नष्टचेतनेति । नागानं म् । अवलिप्तेन गर्वितेन त्वया ऋषिप्रसुखानां वरदा द्रोहः कृतः तस्य कारणभूतः स्वयंभुवरदानजो दर्पः प्राप्य इत्यन्वयः । तत्र हेतुमाह—यस्येति । दण्डधर यस्य ते दण्डं धारयमाणः करिष्यमाण ॥ ६३ ॥

० टी०—दण्डं धारयमाणो निरुच्छ्वासं पुरोपरो णिः ॥ ६४ ॥

स्येति । दण्डधरः अपराधिनां निग्रहकर्ता ऽहं तस्यापकारिणः ते दण्डं धारयमाण यवस्थितः ॥ ६५ ॥

टी०—अप्यद्यैनां पदवीं गमिष्यसि । तद्वत्य्यतीति शेषः । किं च यदि स्थिरत्वे स्वयं राक्षसमहान्मनो मरणे पुण्यलोकप्राप्तिस्तवति तदण्डात्तु कृत्वा पापानि मायया । निर्मर्यादः शकुनिर्यथा ॥ शकुनेः ॥ ६५ ॥

वीमिति । यदि स्थिरस्त्वं देवप्रभृतीनां रणेतिरणं गमिष्यसि प्राप्नुयि ॥६५॥

गो० टी०—एवंविधस्य नियमने तव किं भविष्यतीत्य पदवीमिति । पदवीं तेन कृतं परिमवं तमपि गमिष्य त्यर्थः । यद्वा पदवीं लोकम् । युद्धे स्थितः सन् तांश्च गमिष्यसि । युद्धे स्थित्वा सर्वपापविशुद्धः सन् गति [illegible] र्यसि । ततस्तृणमागच्छेति भावः ॥ ६४ ॥

६६] ति० टी०—युद्धस्थ, मा पलायितोऽभूरित्याह— बलेनेत्यादि ॥ ६६ ॥

रा० टी०—बलेनेति । येन बलेन मामतिक्रमयित्वा अतिक्रान्त्य सीतां हृतवान् तद्बलं निदर्शय ॥ ६६ ॥

गो० टी०—बलेनेति । मायया मारीचमायया । मां अतिक्रमयित्वा अपवाद्य । व्यत्ययश्च आर्षः । येन बलेन यद्ब लक्ष्मणस्य सीतां हृतवानसि तद्बलं निदर्शयेत्यन्वयः ॥ ६६ ॥

६७] ति० टी०—यदि शरणभीरुता तवास्ति तथापि ते हितं वचीमीत्याह—अराक्षसमिति ॥ ६७ ॥

रा० टी०—अराक्षसमिति । मैथिलीं यदि शरणं नायासि यद्यपि तथैवं लोकमराक्षसं कर्तास्मि ॥ ६७ ॥

गो० टी०—अराक्षसमिति । मैथिलीमुपादाय लक्ष्मणं शरणं नायासि चेदिमं लोकमराक्षसं कर्तास्मि । शरणागतौ तु स्वयं ग्रहीष्य इति भावः । मैथिलीमुपादायेत्यनेन स्वयं स्वयंप्रकाशेन प्रायश्चित्तानधिकारवतीमाकाशं पंगायाश्चे शरणागतौ तु नाधिकार इत्युक्तम् । लक्ष्मणे शरणागतौ कृतायां विभीषणाय कोसलाधिपत्ये वास्यतीत्य भिप्रायः ॥ ६६ ॥

६८] ति० टी०—शरणागतिं विना जीवनं राज्यं च उत्तरां दुर्धर्षमित्याह—धर्मात्मेत्यादि । इहागत्य मां शरणं प्राप्तो विभीषण इदं लङ्कैश्वर्यमकण्टकं स्वदुष्टकण्टकरहितं [illegible] प्राप्नोति । तत्प्राप्तियोग्यतां धर्मात्मत्वादिविशेषणैर्दर्शयति— धर्मिष्ठा धर्मप्रधाना चित्तं धर्मशिलत्व । इदमैश्वर्यस्य [illegible] निदानम् । राक्षसश्रेष्ठत्वेनेत्यनेन स्वदत्त-तरं न्याय्यप्राप्तं तस्य [illegible] मिति दर्शितम् । श्रीमानित्यनेन तत्रैश्वर्यप्राप्तकारणपक्षपा [illegible] एवम् । मां प्राप्त्येत्यनेन मत्प्रापकस्यमधस्य मयीसंपर्कमिति॥६८॥

रा० टी०—धर्मात्मेति । संप्राप्तोऽयं विभीषणः [illegible] र्यं प्राप्नोति ॥ ६६ ॥

[illegible] ६ अकण्टकमिदं स. पाठः । ३ तमेति रा. पाठः [illegible] ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible]

राज्यमर्पणं भोक्तुं तस्मात्वं त्यज [illegible] ॥ ६९ ॥
दुष्टस्य मा धृतिं कृत्वा शरण्यमाव्रज्य राक्षस । अक्लिष्टकर्मणो रामाच्छान्तस्ततः शान्तो भविष्यसि ॥ ७० ॥
यावद्विशसि लोकांस्त्रीन्पक्षीभूतो निशाचर । मम चक्षुःपथं प्राप्य न जीवन्मोक्ष्यसे ध्रुवम् ॥ ७१ ॥
अवीमि त्वां हितं वाक्यं क्रियतामौर्ध्वदेहिकम् । सुहृदा क्रियतां लङ्घा जीवितं ते मयि स्थितम् ॥ ७२ ॥
इत्युक्तः स तु तारेयो रामेणाक्लिष्टकर्मणा । जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट् ॥ ७३ ॥
सोऽतिपत्य मुहूर्तेन श्रीमन्रावणमन्दिरम् । ददर्शासीनमव्यग्रं रावणं सचिवैः सह ॥ ७४ ॥
ततस्तस्याविदूरेण निपत्य हरिपुंगवः । दीप्तासिसहस्तस्तस्थावुद्यदः कनकाङ्गदः ॥ ७५ ॥

गो० टी०—शरणागत्यकरणे स्वकर्तव्यमाह—धर्मात्मेति । अहं शरणागतो प्राणत्राणं करिष्यामि न तु राज्यं दास्यामीत्यभिप्रायेणाह—धर्मात्मेति । धर्मात्मा धर्मबुद्धिः राक्षसां वरः राक्षसनायक इत्यर्थः । अयं विभीषणः संप्राप्तः मां प्रपन्नः । तस्मात्कृच्छ्रमयं प्राप्नोति उत्तरक्षणे प्राप्स्यतीत्यर्थः । क्षमावान् तत्क्षणगुणात्कृच्छ्रवान् । एवं क्रियाभेदादयं शब्दद्वयोक्तिः ॥ ६७ ॥

६९] ति० टी०—नन्वहं मयि जीवति कथं लङ्कैश्वर्यप्राप्तिस्तत्रेत्यत आह—[illegible] इति । अधर्मेणान्यायेन । न शक्यमित्यत्र हेतुः—मूर्खसहायेनेति । विभीषणेन मया राज्यस्य दत्तत्वात्तव तद्भोगो न न्याय्य इति भावः ॥ ६९ ॥

रा० टी०—नेति । मूर्खसहायेन अविवेकिसहायेनविवेकिना त्वया राज्यं भोक्तुं न शक्यं युध्यस्वेति वा मत्समीपगमनाभावे प्रति कृत्वा युध्यस्व तत्फलमाह—मक्षयैः शान्तः मृत इत्यर्थः, शान्तः अपराधपापरहितो भविष्यसि एतेन पलायनं न कर्तव्यमिति सूचितम् ॥ ७१ ॥

गो० टी०—एवं विभीषणस्य राज्यभोग्यतामुक्त्वा रावणस्य तदभावमाह—अधर्मेण हीति । अधर्मेण धर्मरहितेन अत एव पापेन पापिष्ठेन अत एवाविदितात्मना अस्वाधीनमनस्केन मूर्खसहायेन त्वया न शक्यमित्यन्वयः ॥ ६८ ॥

७०] ति० टी०—शरण्यतां तु जीवितमेकांशेन राज्यं च त्वयापि दास्यामि तदभावे तु दण्डाधिकारिणा मया सर्वथा वध्यस्त्वम् युद्धवश्च परमं हितं त्वत्प्रत्यागतुर्भगवान्तदुपदेक्ष्यति—युद्धस्वेति । मा मात्र धृतिं कृत्वा युद्धस्व । 'युध्यस्व मा धृतिं कृत्वा' इति पाठः । मक्षयैः पापशेषनाधिकृतस्य मम शरे रणे शान्तः समाप्तपाप एव हेतोः शान्त आजन्मकृतात्पापात्पूतो भविष्यसि रामनामस्मरणैः पापशेषनाशकत्वं यथायमवतारस्तत्त्वेन ज्ञायते, तथा ज्ञानाभावेऽपि मनो मरणे किंचित्कालोत्तरभुक्तमधर्मियकुले जन्मप्राप्तिरिति भावः ॥ ७० ॥

गो० टी०—शरण्यतामाश्रय शरणागतोऽसि चेद्विभीषणम् आश्रयं दत्त्वा स्वप्राणान् रक्षामि अन्यथा मृदुत्वात्[2] युद्धवश्चेति । शान्तः मृतः । पूत इति । युद्धे अपराङ्मुखतः सर्वपापप्रायश्चित्तत्वादिति भावः ॥ ६९ ॥

७१] ति० टी०—पुनरपि धैर्याय वधनिश्चयमवबन्ध्यैव चिरकर्त्य कृत्वेत्युपदिशति—यदीति । न स देशोऽस्ति न मे पक्षः प्रतिरिति भावः ॥ ७१ ॥

रा० टी०—तत्र हेतुमत्—यदीति । मम चक्षुःपथं प्रपथिभूतः सन् यदि त्रीन् लोकान् आविशसि तदापि जीवितं प्रतियास्यति ॥ ७१ ॥

गो० टी०—यद्येति ॥ ७० ॥

७२] ति० टी०—देहादूर्ध्वं प्राप्तं और्ध्वदेहिकम् परलोकहितं दानादिकमौर्ध्वदेहिकम् । सुहृदा क्रियताम् । इतः प्रभृतिनाशात् ॥ ७२ ॥

रा० टी०—अवीमीति । यतस्त्वं जीवित[illegible] मदधीनजीवितः अतः और्ध्वदेहिकं परलोकसुखकारकं दानं क्रियताम् अत एव लङ्घा सुहृदा क्रियताम् लङ्घादर्शनं भविष्यतीत्यर्थः इति हितं वाक्यं त्वां अवीमि ॥ ७३ ॥

गो० टी०—अवीमीति । क्रियतामौर्ध्वदेहिकमिति उपकरणेन आढकर्त्रभावात्स्वयमेव जीवच्छ्राद्धं कुर्विति सूचितम् । म्रियमाणा हि चापदेन पुत्रकलत्रादयः कुर्वन्ति तद्वदिति भावः । मयि स्थितं वशायत्तम् । आश्रयामीत्यर्थः ॥ ७१ ॥

७३] ति० टी०—मूर्तिमान्हव्यवाडिति । अग्निरित्यर्थः ॥ ७३ ॥

रा० टी०—इतीति । हव्यवाट् अग्निरिव आकाशमाविश्य जगाम ॥ ७३ ॥

गो० टी०—इत्युक्त इति । मूर्तिमान् करणवान् । हव्यवाट् अग्निः ॥ ७३ ॥

७४–७५] ति० टी०—अतिपत्येति[illegible] ॥ ७४ ॥ ७५ ॥

रा० टी०—[illegible] इति । अतिपत्य प्राप्य [illegible] रावणं ददर्श ॥ ७४ ॥

गो० टी०—अतिपत्य इति । अतिपत्य प्राप्य [illegible] दृष्टमात्रेण [illegible] ॥

[2] मृदुत्वात् इति गो० पाठः ।

दूतोऽहं कौशलेन्द्रस्य रामस्याक्लिष्टकर्मणः । वालिपुत्रोऽङ्गदो नाम यदि ते श्रोत्रमागतः ॥ ७५
आह त्वां राघवो रामः कौसल्यानन्दवर्धनः । निष्पत्य प्रतियुध्यस्व नृशंस पुरुषो भव ॥ ७६
हतासि त्वं सहामात्यं सपुत्रज्ञातिबान्धवम् । निरुद्विग्नास्त्रयो लोका भविष्यन्ति हते त्वयि ॥ ७७
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् । शत्रुपक्षोद्धरिष्यामि त्वापृपीणां च कण्टकम् ॥ ७८
विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि । न चेत्सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि ॥ ७९
इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुंगवे । अमर्षवशमापन्नो निशाचरगणेश्वरः ॥ ८०
ततः स रोषसंपन्नः शस्त्रास्त्रविदांवरः । गृह्यतामिति दुर्मेधा वध्यतामिति चासकृत् ॥ ८१
रावणस्य वचः श्रुत्वा दीप्तैरग्निमिव तेजसा । जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः ॥ ८२
ग्राहयामास तान्रेयः स्वयमात्मानमात्मवान् । बलं दर्शयितुं वीरो यातुधानगणे तदा ॥ ८३

रा० टी०—तत इति । तस्य रावणस्य अविदूरेण निकटे निपत्यं प्राप्य अङ्गदस्तस्थौ ॥ ७५ ॥

गो० टी०—तत इति । स्पष्टः ॥ ७४ ॥

७६] ति० टी०—तदाभवचनमिति । संक्षेपकथनं वक्ष्यमाणस्य ॥ ७६ ॥

रा० टी०—त्वामिति । आत्मानं निवेद्य बोधयित्वा रामवचनम् अन्यनायिकं यथा भवति तथा सामात्यं रावणं आलपामास ॥ ७७ ॥

गो० टी०—त्वामिति । इदमर्धम् । सामात्यं रावणमिति शेषः । आत्मानं स्वयम् आत्मानं निवेद्य आत्मनो वृत्तिप्रवृत्तिनिवेदनपूर्वकं रामवचनं रामसामीप्येत्यर्थः ॥ ७७ ॥

७७] ति० टी०—तस्या एवदः—दूतोऽहमिति । यावत्संनिधौ यौवराज्यं [ ] प्रभुत्वं चेत्यर्थः । श्रोत्रमागतं श्रुतं [ ] स्वामिनो वा बलादि दूतेन न ज्ञायमेव त्वया ज्ञातव्यमिति भावः ॥ ७८ ॥

रा० टी०—तदाकारमाह—दूत इत्यादिभिः । यदि कथंचित्ते श्रोत्रमागतः श्रुत इत्यर्थः, अङ्गदो नाम रामस्य दूतोऽहमस्मीति शेषः ॥ ७८ ॥

गो० टी०—दूत इति । यदि ते श्रोत्रमागतः त्वां श्रुतज्ञानमिति किमित्यर्थः ॥ ७६ ॥

७८–८०] ति० टी०—निष्पत्य पुरान्निष्क्रम्य । पुरुषो भव शूरो भव ॥ ७८ ॥ ८० ॥

रा० टी०—आहेति । त्वा त्वां राघव आह । तदाकारमाह—हे नृशंस निष्पत्य नगरान्निष्क्रम्य प्रतियुध्यस्व अतः परं दुष्टो भव अन्यथा त्वयि हतेऽतो प्राप्स्यतीत्यर्थः ॥ ७९ ॥

गो० टी०—आहेति । राघव इत्यादिना उक्तेन । निष्पत्य इत्यादिना [ ] दुष्टप्रायसामर्थ्यसंपत्तिरूपेण इत्यनेन [ ] निष्पत्य पुरान्निर्गत्य । पुरुषो भव शूरो भव [ ] इत्यादिभिः । इत्यादिभिरिति शेषे इत्यादिभिः पदैः [ ] ॥ ७७ ॥

रा० टी०—हन्तेति । त्वयि हते सति त्रयो लोकाः [ ] द्विषः प्रतिपक्षिन्ति अतः त्वां हन्मीति ॥ ८० ॥

गो० टी०—हन्तेति । अहमिति शेषः । निरुद्विग्नाः निर्भयाः ॥ ७८ ॥

रा० टी०—देवेति । देवप्रभृतीनां शत्रुभूत एव [ ] कण्टकं नाम उद्धरिष्यामि ॥ ८१ ॥

गो० टी०—देवेति । उद्धरिष्यामि उन्मूलयिष्यामि । [ ] एवं बाधकमित्यर्थः ॥ ७९ ॥

८१–८४] ति० टी०—वैदेहीं सत्कृत्य अभ्यर्च्य [ ] प्रणिपत्य न चेत्प्रदास्यसि तदा त्वयि हते विभीषणस्यै [ ] भविष्यति ॥ ८१ ॥ ८४ ॥

रा० टी०—विभीषणस्येति । सत्कृत्य प्रणिपत्य [ ] यदि वैदेहीं न प्रदास्यसि तर्हि त्वयि हते सति विभीषणस्यै [ ] ऐश्वर्यं भविष्यति ॥ ८२ ॥

गो० टी०—विभीषणस्येति ॥ ८० ॥

रा० टी०—इतीति । हरिपुङ्गवे एवं परुषं दुर्वाक्ये [ ] निशाचरगणेश्वरः अमर्षवशम् अक्षमायत्तत्वमापन्नः प्राप्तः ॥ ८० ॥

गो० टी०—इत्येवमिति । आपन्नः प्राप्तः बभूव ॥ ८० ॥

रा० टी०—तत इति । रोषमापन्नः स रावणः [ ] वध्यतामिति सचिवान् असकृत् अवास ॥ ८१ ॥

गो० टी०—तत इति । दुर्मेधाः दुर्बुद्धिः । न दुर्मेधा इति आलापविधिः इत्यर्थः । अतएव [ ] दुर्मेधा इत्युक्तमस्य ॥ ८१ ॥

रा० टी०—रावणस्येति । [ ] ॥ ८२ ॥

गो० टी०—रावणस्येति । स्पष्टः ॥ ८२ ॥

८३] ति० टी०—आहयामास [ ] ॥ ८३ ॥

रा० टी०—[ ] ॥ ८३ ॥

तान्बाहुद्वयासक्तानादाय चतुरो[1] राक्षसान् ।
तस्योत्पतनवेगेन निर्धूतास्तत्र राक्षसाः । भूमौ निपतिताः सर्वे राक्षसेन्द्रस्य पश्यतः ॥ ८७ ॥
ततः प्रासादशिखरं शैलशृङ्गमिवोन्नतम् । जगाम राक्षसेन्द्रस्य वालिपुत्रः प्रतापवान् ॥ ८८ ॥
पफाल च तदाक्रान्तं दशग्रीवस्य पश्यतः । पुरा हिमवतः शृङ्गं वज्रेणेव विदारितम् ॥ ८९ ॥
भङ्क्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः[2] । विनद्य सुमहानादमुत्पपात विहायसा ॥ ९० ॥
व्यथयन्राक्षसान्सर्वान्हर्षयंश्चापि वानरान् । स वानराणां मध्ये तु रामपार्श्वमुपागतः ॥ ९१ ॥
रावणस्तु परं चक्रे कोपं प्रासादधर्षणात् । विनाशं चात्मनः पश्यन्निःश्वासपरमोऽभवत् ॥ ९२ ॥
रामस्तु बहुभिर्हृष्टैर्वानरैर्द्रुमयोधिभिः[3] । वृतो रिपुवधाकाङ्क्षी युद्धायैवाभिवर्तते[4] ॥ ९३ ॥
सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः । बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः[5] ॥ ९४ ॥
स तु द्वाराणि संयम्य सुग्रीववचनात्कपिः । पर्यक्रामत दुर्धर्षो नक्षत्राणीव चन्द्रमाः ॥ ९५ ॥
तेषामक्षौहिणिशतं सायवेक्ष्य वनौकसाम्[6] । लङ्कामुपनिविष्टानां सागरं चाभिवर्तताम् ॥ ९६ ॥
राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथापरे[7] । अपरे समरे हर्षाद्ववोपपेदिरे[8] ॥ ९७ ॥

गो० टी०–बाहुद्वयासक्तानिति । यातुधानगणे विषयं स्वकं दर्शयितुं आत्मवान् धृतिमान् स्वयम् आत्मानं प्रकाशमाल पहीतुमङ्गदमैक्षत ॥ ८४ ॥

८६–८७] ति० टी०–स्वयमेव दर्शयति—स तानित्यादि ॥ ८६ ॥ ८७ ॥

रा० टी०–स इति । साऽङ्गदः बाहुद्वयासक्तान् तान् चतुरो राक्षसान् तानीव आदाय प्रासादमुत्पपात ॥ ८७ ॥

गो० टी०–स तानिति । स्पष्टः ॥ ८६ ॥

रा० टी०–तस्येति । तस्याङ्गदस्य उत्पतनवेगेन निर्धूताः प्रकम्पिताः राक्षसाः भूमौ निपतिताः ॥ ८८ ॥

गो० टी०–तत्रारिष्टादिति । स्पष्टः ॥ ८६ ॥

८८] ति० टी०–वालिपुत्रः प्रासादशिखरम् ददर्शेति शेषः । दृष्ट्वा च तदाक्रान्तं पदाक्रान्तवान् ॥ ८८ ॥

रा० टी०–तत इति । वालिपुत्रः राक्षसेन्द्रस्य प्रासादशिखरं चक्राम ॥ ८८ ॥

गो० टी०–तत इति । स्पष्टः ॥ ८७ ॥

८९–९१] ति० टी०–तदाक्रान्तं च प्रासादशिखरं पश्यतो दशग्रीवस्य पफाल शतधा विशीर्णमभूत् ॥ ८९–९१ ॥

रा० टी०–पफालेति । वज्रेण विदारितं हिमवतः शृङ्गमिव तदा आक्रान्तं प्रासादशृङ्गं पफाल विभेद ॥ ९० ॥

गो० टी०–तत्पफालेति । पफाल व्यशीर्यत ॥ ८८ ॥

रा० टी०–आत्मन इति । आत्मनो नाम विश्राव्य ज्ञैः आज्ञापित्वा वि[9] ॥ ९१ ॥

गो० टी०–आत्मन इति । विश्राव्य विशेषेण ज्ञापयित्वा ८९

रा० टी०–व्यथयन्निति । साऽङ्गदः वानराणां मध्ये विनयमानं रामपार्श्वमुपागत[10] आप्तः ॥ ९० ॥

गो० टी०–व्यथयन्निति ॥ ९० ॥

९२] ति० टी०–पश्यन्निति । एकेऽपि समरे मम बलं पराभूय निर्भयं गच्छति, एवंविधेष्वनेकेषु मन्त्रागोचरेषु कथं जीवनमिति पर्यालोचयन्नित्यर्थः ॥ ९२ ॥

रा० टी०–रावण इति । प्रासादधर्षणाद्धेतोः रावणः परं कोपं चक्रे आत्मनो विनाशं पश्यन् सन् निःश्वासपरमोऽभवत् ॥ ९२ ॥

गो० टी०–रावण इति । प्रासादधर्षणात् प्रासादभङ्गात् पश्यन् तर्कयन् निःश्वासपरमः अधिकनिःश्वासः ॥ ९२ ॥

९३–९४] ति० टी०–युद्धायैवाभिवर्तताभ्यवर्तत ९३

रा० टी०–राम इति । ऋक्षरजसैवेतो रामस्तु अभिप्रायाकाङ्क्षी सन् युद्धाय एव अभिवर्तत अभ्यवर्तत ॥ ९४ ॥

गो० टी०–राम इति । अङ्गदागमनं दृष्ट्वेति शेषः ॥९३॥

रा० टी०–सुषेण इति । सुषेणस्तु बहुभिर्वानरैः संवृतोऽभवदिति शेषः ॥ ९५ ॥

गो० टी०–सुषेण इति । संवृतः बभूवेति शेषः । उत्तरश्लोकेनैकवाक्यत्वे हरिकोटिकयोः गौनकत्वं स्यात् ॥ ९३ ॥

९५] ति० टी०–पर्यक्रामत सर्वबलरक्षार्थं सर्वद्वारदृष्टान्तग्रहणार्थं च । नक्षत्राण्यभिन्यूहीति ॥ ९५ ॥

रा० टी०–स इति । सुषेणः सुग्रीववचनात् हेतोः नक्षत्राणि चन्द्रमा इव पर्यक्रामत ॥ ९५ ॥

गो० टी०–चतुरिति । न्यूनतान्यादरार्थं सर्वाणीत्यकथ कपिः सुषेणः पर्यक्रामत परितश्चचार नक्षत्राणि नक्षत्रनिरुपितराशीनित्यर्थः ॥ ९५ ॥

९६–९७] ति० टी०–अक्षौहिणिशतम् सायौ इत्य[11]

---

१ इदं सप्तमात गो.पाठः । २ तदाक्रोशादर्निनदात्तस्य वेगेनेत गो.पाठः । ३ वृक्षयोधिभिरिति गो.पाठः । ४ वर्तते इति गो. पाठः । ५ कपिकाल पर्वत गो.पाठः । ६ सायवेक्ष्येति गो.पाठः । ७ निनदन्तिति गो.पाठः । ८ अभवदतेऽपि गो.पाठः । ९ चतुरिति गो.पाठः । १० [illegible]

कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखान्तरम् । ददृशुः राक्षसा दीनाः प्राकारं वानरीकृतम् ॥
हाहाकारमकुर्वन्त राक्षसाः भयमागताः ॥ ९८ ॥
तस्मिन्महाभीषणके प्रवृत्ते कोलाहले राक्षसराजयोधाः ।
प्रगृह्य रक्षांसि महायुधानि युगान्तवाता इव संविचेरुः ॥ १०० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ।

राक्षसा रावणमेत्य लङ्का रामेण कपिभी रुद्धेति कथयामासुः ततः स प्रासादमारुह्य कथं कपीनां वाली भवेदिति स्वाघवं हरींश्च धैर्येण ददर्श । रामस्तु लङ्कां दृष्ट्वा सीता मद्धेतुं पीड्यते इति कपीन्राक्षसवधाय चतुर्णां द्वाराणां निरोधायादिशत् सुग्रीवद्वारं सलक्ष्मणो रुरुधे । एतद्वाणः श्रुत्वा स्वबलं युद्धायादिशतो राक्षसाः सभेरीशब्दं स्वनादमकुर्वन् ।

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम् । न्यवेदयन्पुरीं रुद्धां रामेण सह वानरैः ॥ १ ॥
रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः । विधानं द्विगुणं श्रुत्वा प्रासादं चाप्यरोहत ॥ २ ॥
स ददर्श वृतां लङ्कां सशैलवनकाननाम् । असंख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः ॥ ३ ॥

'अक्षादहिन्याम्' इति सूत्रेः । यावन्तोऽक्षौहिण्यां राजान्तरिपदातयस्तत्संख्या वानरा इत्यर्थः शतशब्दोऽनन्तवाची सागरं चाभिवर्तताम् सागरपर्यन्तमभिव्याप्य वर्तमानानामित्यर्थः ॥ ९६ ॥ ९७ ॥

रा० टी०—तेषामिति । वनौकसाम् अक्षौहिणिशतम् अक्षौहिणीशतं समवेक्ष्य राक्षसाः विस्मयं जग्मुः अपरे राक्षसा त्रासं जग्मुः अपरे अन्ये समरे हर्षात् अन्यन्मरणसंस्मरणात् हर्षमेव उपपेदिरे श्लोकद्वयमेकान्वयि ॥ ९७ ॥ ९८ ॥

गो० टी०—तेषामित्यादि । अक्षौहिणिशतमित्यत्र "दशानां च सहस्राणां शतं लक्षमुदाहृतम्" इति ह्रस्वः अनेकाक्षौहिणीमित्यर्थः । सागरं चाभिवर्तताम् सागरसमीपे वर्तमानानामित्यर्थः । राक्षसा इति । राक्षसाः धीरा इति शेषः । अपरे अधीरा इत्यर्थः । उद्धर्षात् गर्वात् ॥ ९६ ॥ ९६ ॥

९८] ति० टी०—वानरीकृतं वानररूपनिर्मितरूपमिव कृतम् ॥ ९८ ॥

रा० टी०—कृत्स्नमिति । कृत्स्नं प्राकारपरिखान्तरं कपिभिर्व्याप्तम् अत एव राक्षसाः वानरीकृतं वानरचितमिव प्राकारं ददृशुः अत एव भयमागता राक्षसाः हाहाकारमकुर्वन्त । सार्धश्लोक एकान्वयी ॥ ९९ ॥

गो० टी०—कृत्स्नमिति । हरिभिर्व्याप्तं प्राकारपरिखान्तरं प्राकारपरिखयोरन्तरालम् वानरीकृतं वानरप्रचुरतया कृतम् अपरमिव प्राकारं ददृशुरित्यर्थः ॥ ९९ ॥

गो० टी०—हाहेत्यधर्मम् ॥ ९८ ॥

९९] ति० टी०—राक्षसराजयोधरूपाणि रक्षांसीत्यर्थः ९९

इति श्रीरामायणे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०—तस्मिन्निति । महाभीषणके अतिकोलाहले तस्मिन् शब्दे प्रवृत्ते सति राक्षसराजयोधाः रक्षांसि महायुधानि प्रगृह्य महावाता इव संविचेरुः ॥ १०० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

गो० टी०—तस्मिन्निति । स्पष्टः ॥ ९९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

१] ति० टी०—तत इति ॥ १ ॥

रा० टी०—रावणदूतान्तं वर्णयितुं तं प्रति राक्षसेति । ततः इति । राक्षसाः रामेण रुद्धां पुरीं लङ्कांन्यवेदयन् ॥ १ ॥

गो० टी०—अथ युद्धारम्भो द्विचत्वारिंशे—तत इति । तत्र तस्मिन् काले ॥ १ ॥

२–३] ति० टी०—विधानम् । द्वाराणां रक्षाविधानमित्यर्थः ॥ २ ॥ ३ ॥

रा० टी०—रुद्धामिति । निशाचरो रावणः नगरीं रुद्धां श्रुत्वा द्विगुणं विधानं पुररक्षार्थं राक्षसनियोगं कृत्वा प्रासादमारुरोह ॥ २ ॥

गो० टी०—रुद्धामिति । विधानं रक्षणविधिम् द्विगुणं पूर्वस्मादधिकम् ॥ २ ॥

रा० टी०—स इति । [illegible] लङ्कां ददर्श ॥

गो० टी०—स इति । [illegible]

वानरैः कपिलीकृतां कपिलवर्णवत्कृतां दृष्ट्वा कथं वयं विनाशनीया इति चिन्तापरोऽभवत् ॥ ४ ॥

गो० टी०—स दृष्ट्वेति । कपिलीकृतां आच्छादितां । कपिलीकृतामिति पाठे वानरवर्णेन कपिलीकृतां । वयं विनाश्याः नाशयितव्याः एत इति शेषः ॥ ४ ॥

रा० टी०—स इति । स राघवः पैतृकमालम्ब्य स्वीकृत्य राघवं हरियूथांश्च ददर्श ॥ ५ ॥

गो० टी०—स इति । आयतलोचन इत्यनेन विस्मयानिष्टं लक्ष्यते ॥ ५ ॥

६] ति० टी०—सुदितः पुप्लुवे । वाशब्दो वाक्यालंकारे आकारसमीपमिति शेषः । रामाविरुद्धवानरप्लवनं रामे दर्शयति ॥ ६ ॥

रा० टी०—राघव इति । मुदितो राघवः सैन्यैन सह राक्षसैः सर्वतो वृतमात एव गुप्तां लङ्कां दृष्ट्वा च राघवस्य प्लवनं तु योग्यतया आरोहमाणयानरूढाद्रेः समम् ॥ ६ ॥

गो० टी०—राघव इति । पुप्लुवे नाम पूर्वस्थानात् प्रकोष्ठसन्निकृष्टं प्रदेशं प्राप इत्यर्थः ॥ ६ ॥

७] ति० टी०—मनसा जगाम सस्मार ॥ ७ ॥

रा० टी०—दृष्ट्वेति । दाशरथिः दूयमानेन चेतसोपलक्षितां सीतां मनसा जगाम ॥ ७ ॥

गो० टी०—दृष्ट्वेति । दूयमानेनेति । सीतां स्मृत्वा दुःखितोऽभूदित्यर्थः ॥ ७ ॥

८] ति० टी०—पीड्यते सन्निमित्तं शोकसंतप्तमानसैः पीड्यते । अतश्च राक्षसैर्वा महाशोकोऽजायत इति विना मनीत्यर्थः ॥ ८ ॥

रा० टी०—चिन्ताकारणमाह—अयेति । महते शोकसंतापाय अयं एव कृशा जनकात्मजा पीड्यते अतिदुःखेनेति शेषः ॥ ८ ॥

गो० टी०—अयेति । मृगशावाक्षीत्यनेन शोकानर्हत्वमुच्यते स्थण्डिलशायिनी भूतलशायिनी ॥ ८ ॥

९] ति० टी०—निपीड्यमानाम् । उत्करीत्येति शेषः । आज्ञापयदाज्ञप्तवान् ॥ ९ ॥

रा० टी०—निपीड्यमानामिति । वैदेहीमनुचिन्तयन् रामः द्विषां वधे वानरानाज्ञापयत् ॥ ९ ॥

गो० टी०—पीड्यमानामिति । पीड्यमानां राक्षसीभिरिति शेषः । धनार्जनत्वेन दयार्हत्वमुच्यते ॥ ९ ॥

१०] ति० टी०—संरब्धमाना अयं भवितुं परस्परं स्पर्धमानाः ॥ १० ॥

रा० टी०—एवमिति । वचसि रिपुविघाताथकवचने रामे गौरवयुक्ते सति संरब्धमानाः अहमेव पूर्वं हनिष्यामीतीच्छन्ताः प्लवगाः सिंहनादैः तत्सदृशस्वनैरपूरयन् ॥ १० ॥

गो० टी०—एवमुक्त इति । वचने आज्ञापनरूपे । संरब्धमानाः स्पर्धमानाः अनादरेण लङ्कामिति शेषः ॥ १० ॥

११] ति० टी०—विकिराम विदारयाम ॥ ११ ॥

रा० टी०—शिखरैरिति । अनां लङ्कां शिखरैः मुष्टिभिरेव विकिराम भिन्द्याम इति मनांसि इच्छा हरियूथपाः दधिरे ॥ ११ ॥

गो० टी०—शिखरैरिति । विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ ११ ॥

१२] ति० टी०—निरिणूनामि संक्षयामि । भृशं स्थापयन्तोऽपि शिखरे लङ्कापर्वते इति निघण्टुः ॥ १२ ॥

रा० टी०—उद्यम्येति । गिरिशृङ्गाणि विशेषतश्च शैलशृङ्गाणि च तत्र तत्र उद्यम्य उत्पाट्य तैस्तैः प्रकारैः लङ्कां हरियूथपास्तिरश्चि [illegible] ॥ १२ ॥

गो० टी०—उद्यम्येति । विशेषतश्च पर्वतशृङ्गाणि । तिरश्चि [illegible]

---

१ सर्वामिति गो. पाठः । २ कपिलीकृतामिति गो. पाठः । ३ वयमिति गो. पाठः ।

तेषां शैलसङ्घस्य प्रेक्षतां भागशः । राघवप्रियकामार्थं [illegible]
ते प्लवङ्गमवरा रामार्थं त्यक्तजीविताः । लङ्कामेवाभ्यवर्तन्त [illegible]
ते द्रुमैः पर्वतैश्चैव मुष्टिभिश्च प्लवंगमाः । प्राकाराट्टालसंस्थानि ममन्थुस्तोरणानि च ॥ १६
पौरिवान्पूरयन्तश्च प्रसभंसलिलाशयान् । पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः ॥ १७
ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः । कोटियूथशताश्चान्ये लङ्कामारुरुहुस्तदा ॥ १८
काञ्चनानि प्रमृद्नन्तस्तोरणानि प्लवंगमाः । कैलासशिखराग्राणि गोपुराणि प्रमथ्य च ॥ १९
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवंगमाः । लङ्कां तामभिधावन्ति महावारणसंनिभाः ॥ २०
जयत्युरुबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २१
इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवंगमाः । अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः ॥ २२
वीरबाहुः सुबाहुश्च नलश्च पनसस्तथा । निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः ॥
एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥ २३

१३-१५] ति० टी०—प्रेक्षतः । प्रकृतमनादृत्येत्यर्थः । राघवस्य प्रेयो यः कामो मनोरथस्तस्मिन्नर्थमासस्तुर्लङ्काम् । लङ्काप्राकारमित्यर्थः ॥ १३ ॥ १५ ॥

रा० टी०—प्रेक्षत इति । राक्षसेन्द्रस्य प्रेक्षतः सतः तानि रामसंबन्धीनि अनीकानि लङ्कां तत्प्राकारमारुरुहुः ॥ १३ ॥

गो० टी०—प्रेक्षत इति । प्रेक्षतः प्रेक्षमाणमनादृत्य तानीकानि वानरानीकानि । भागशः स्वस्वनियुक्तप्रदेशं लङ्कां लङ्काप्राकारम् । राघवप्रियकामार्थं रामप्रीतिसिद्ध्यर्थमित्यर्थः ॥ १३ ॥

रा० टी०—ते इति । सालभूधरयोधिनः ते वानराः लङ्कां तत्प्राकारमभ्यवर्तन्त ॥ १४ ॥

गो० टी०—त इति । त्यक्तजीविताः "आशंसायां भूतवच्च" इति क्तः ॥ १४ ॥

रा० टी०—ते इति । ते प्लवङ्गमाः प्राकाराट्टानि तोरणानि च ममन्थुः ॥ १६ ॥

गो० टी०—ते द्रुमैरिति । अरण्यानि उद्यानानि तोरणानि बहिर्द्वाराणि ममन्थुः, नभञ्जुरित्यर्थः ॥ १६ ॥

१६-१७] ति० टी०—परिखामिति पुंस्त्वमार्षम् ॥ १६ ॥ १७

रा० टी०—परिखा इति । पांसुप्रभृतिभिः परिखाः प्रसन्नसलिलाशयांश्च पूरयन्तः वृक्षे यूथानि येषां तत्प्रभृतयो यूथपाः लङ्कामारुरुहुः लङ्कारुरुक्षयैवेत्यपि ॥ १६ ॥ १७ ॥

गो० टी०—परिखा इति । स्पष्टः ॥ १६ ॥

गो० टी०—तत इति । कोटीशतयूथाः कोटीशतयूथपाः ॥ १७ ॥

१८] ति० टी०—काञ्चनानि [illegible] गोपुराणि [illegible]

[illegible] गोपुराणि प्रमथ्य तोरणानि प्रमर्दन्तो [illegible] श्रेषः ॥ १८ ॥

गो० टी०—काञ्चनानीत्यादिश्लोकद्वयम् । काञ्चनकृतानि प्रभूतानि वर्णयन्तः आप्लवन्त प्लवन्तश्च नागमनं कुर्वन्तः ॥ १८ ॥ १९ ॥

१९-२१] ति० टी०—आप्लवन्तः सम्यगाप्लवन्त प्लवन्तः प्राकाराभिमुखं प्लवन्तः ॥ १९ ॥ २१ ॥

रा० टी०—आप्लवन्त इति । महावारणसंनिभाः वृक्षाः आप्लवन्तः सर्वतः परिधावन्तः प्लवन्तः प्राकाराभिमुखं गच्छन्तश्च सन्तः लङ्कामभिधावन्ति ॥ १९ ॥

रा० टी०—जयतीति । उरुबलो रामप्रभृतिर्जयति इत्येवं घोषयन्तः प्लवङ्गमाः लङ्कायाः प्राकारमभ्यधावन्त । [illegible] द्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०—जयतीति । स्पष्टः ॥ २० ॥

गो० टी०—इत्येवमिति । घोषयन्तः घृण्वन्तः । गर्जन्तः सिंहनादं कुर्वन्तः ॥ २१ ॥

२२] ति० टी०—प्राकारं निपीड्योपनिविष्टा इति । प्रवेशार्थं बहिः प्राकारं भङ्क्त्वा स्थिताः । एतस्मिन्नन्तरे प्राकारं भङ्क्त्वा सेनाप्रवेशसमये । स्कन्धावारस्य सेनायाः अस्य निवेशनं स्थानं स्कन्धावेशं स्थापनम् ॥ २२ ॥

रा० टी०—वीरेति । वीरबाहुप्रभृतयो हरियूथपाः प्राकारं निपीड्योपनिविष्टाः सन्तः स्कन्धावारस्य सैन्यस्य निवेशनं वेश्म लङ्कायेव स्थापनं चक्रुः । सार्धश्लोक एकान्वयी ॥

गो० टी०—वीरबाहुरित्यादि सार्धश्लोक एकान्वयी । एतस्मिन्नन्तरे प्रविश्य वीरबाहुप्रभृतयः प्राकारं निपीड्य स्थिताः सन्तः स्कन्धावारस्य सैन्यस्य निवेशनं वेश्म लङ्कायेव स्थापनं चक्रुः । [illegible]

सहायार्थं तु तस्यैव निविष्टः प्रेषितो हरिः । सुषेणः [illegible] महाबाहुर्वानरैरभिसंवृतः ॥ २४ ॥
दक्षिणद्वारमासाद्य वीरः शतबलिः कपिः [illegible] तस्थौ विशत्या कोटिभिर्वृतः ॥ २५ ॥
सुषेणः पश्चिमद्वारं गत्वा तारापितो बली । आवृत्य बलवांस्तस्थौ कोटिकोटिभिरावृतः ॥ २६ ॥
उत्तरद्वारमागम्य रामः सौमित्रिणा सह । आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः ॥ २७ ॥
गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः । वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २८ ॥
ऋक्षाणां भीमकोपानां वृद्धः शत्रुनिबर्हणः । वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २९ ॥
संनद्धस्तु महावीर्यो गजाणामिव भीषणः । वृतो यत्तैस्तु सचिवैस्तस्थौ यत्र महाबलः ॥ ३० ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः । समन्तात्परिधावन्तो ररक्षुर्हरिवाहिनीम् ॥ ३१ ॥
ततः कोपपरीतात्मा रावणो राक्षसेश्वरः । निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयद्बली ॥ ३२ ॥
एतच्छ्रुत्वा तदा वाक्यं रावणस्य मुखेरितम् । सहसा भीमनिर्घोषमुत्पपात रजनीचरैः ॥ ३३ ॥

२६] ति० टी०—तत्प्रकारः—पूर्वद्वारमित्यादि । पूर्वदिशा ईशानदिशि निर्गतिवायुदिक्परः नीलादीनां साधारणपूर्वदिद्वारनिर्गमनार्थः प्रागुक्तत्वात् एवं च तदपौरस्त्यकोणे स्थितिः । पूर्वद्वारं पूर्वद्वारोपदिशमित्यर्थः ॥ २३ ॥

रा० टी०—तत्प्रकारमाह—पूर्वेत्यादिभिः । पूर्वद्वारमाश्रित्य कुमुदस्तस्थौ, अत्र पूर्वादिशब्दाः आग्नेयादिकोणपराः पूर्वादिदिग्नीलादीनां स्वस्वस्य प्रागुक्तत्वात् ॥ २३ ॥

गो० टी०—निवेशनप्रकारमेवाह—पूर्वद्वारमित्यादिना । कुमुदः पूर्वद्वारमाश्रित्य तस्थौ ईशानकोणे स्थित्वा पूर्वद्वारमाश्रित्य स्थितवानित्यर्थः ॥ २३ ॥

२४-२६] ति० टी०—तस्यैवेत्यादि वर्तिकुमुदस्यैव २४-२६

रा० टी०—सहायेति । तस्य कुमुदस्य सहायार्थं एव प्रभो पनसश्च निविष्टः ॥ २४ ॥

गो० टी०—साहाय्यार्थमित्यादि । स्पष्टः ॥ २४ ॥

रा० टी०—दक्षिणेति । दक्षिणद्वारभागाय शतबलिस्तस्थौ ॥ २५ ॥

गो० टी०—दक्षिणामिति । शतबलिः दक्षिणद्वारमाश्रित्य तस्थौ । आग्नेयकोणे स्थित्वा दक्षिणद्वारमाश्रित्य स्थितवान् इत्यर्थः ॥ २५ ॥

रा० टी०—सुषेण इति । पश्चिमद्वारं गत्वा तस्थौ ॥२६॥

गो० टी०—सुषेण इति । सुषेणः पश्चिमद्वारं गतः आवृत्य तस्थौ नैर्ऋतकोणे स्थित्वा पश्चिमद्वारमाश्रित्य स्थितवानित्यर्थः ॥ २६ ॥

२७-२९] ति० टी०—सुग्रीवश्चेति । अयं च वायुकोणस्थ इति प्रागुक्तम् ॥ २७-२९ ॥

रा० टी०—उत्तरेति । उत्तरद्वारमाश्रित्य रामस्तस्थौ॥२७॥

गो० टी०—उत्तरामिति । सुग्रीवश्चोत्तरं द्वारमाश्रित्य तस्थौ । पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान । अदूरात्पश्चिमे गुल्मे तस्थौ शतबलिगजः । इत्युक्तप्रकारेण वायव्यकोणे स्थितस्य सुग्रीवस्य उत्तरद्वारनिरोधकत्वमिति व्याख्येयम् ॥ २७ ॥

रा० टी०—गोलाङ्गूल इति । गोलाङ्गूलो गवाक्षः रामपार्श्वतस्तस्थौ ॥ २८ ॥

गो० टी०—गोलाङ्गूल इति । स्पष्टः ॥ २८ ॥

रा० टी०—ऋक्षाणामिति । ऋक्षाणां कोट्या वृतः वृद्धश्च रामस्य पार्श्वतस्तस्थौ ॥ २९ ॥

गो० टी०—ऋक्षाणामिति । स्पष्टः ॥ २९ ॥

३०] ति० टी०—यत्र महाबलो रामस्तत्र तत्स्थाविन्यन्वयः ॥ ३० ॥

रा० टी०—सन्नद्ध इति । यत्तैः सचिवैर्वेष्टितो विभीषणः यत्र महाबलो रामस्तत्र तस्थौ ॥ ३० ॥

गो० टी०—सन्नद्ध इति । स्पष्टः ॥ ३० ॥

३१-३२] ति० टी०—गवाक्ष इति । अयं गवाक्षो रामपार्श्वस्थगवाक्षादन्यो ज्ञेयः ॥ ३१ ॥ ३२ ॥

रा० टी०—गज इति । गजप्रभृतयः समन्तात्परिधावन्तः सन्तः हरिवाहिनीं ररक्षुः ॥ ३१ ॥

गो० टी०—गजो गवाक्ष इति । रामपार्श्वस्थाद् गवाक्षादन्यो ज्ञेयः ॥ ३१ ॥

रा० टी०—तत इति । ततः रामोसंमुखसैनानन्तरं रात्रंचरः सर्वसैन्यानां निर्याणं निर्गमनमाज्ञापयत् ॥ ३२ ॥

गो० टी०—तत इति । ततः वानरसैनासन्निवेशश्रवणतोः । तदा तस्मिन् सैन्यनिर्गमकाले ॥ ३२ ॥

३३] ति० टी०—एतद्वाक्यं निर्याणवाक्यम् । भीमनिर्घोषं यथा तथा रजनीचरैरुत्पपात ॥ ३३ ॥

---

१ प्रथम इति गो० पाठः । २ वृद्धश्चेति इति गो० पाठः । ३ आगम्येति गो० पाठः । ४ तत्र इति गो० पाठः । ५ आसीदिति गो० पाठः । ६ वेगवानिति गो० पाठः । ७ भीमेति गो० पाठः । ८ [illegible]

ततः प्रतापिता भेर्यश्चन्द्रपाण्डुरपुष्कराः । हेमकोणैरभिहता राक्षसानां समन्ततः ॥ ३३ ॥
विनेदुश्च महाघोषाः शङ्खाः शतसहस्रशः । राक्षसानां सुघोराणां मुखमारुतपूरिताः ॥ ३४ ॥
ते दधुः शुकनीलाङ्गाः सशङ्खा रजनीचराः । विद्युन्मण्डलसंनद्धाः सबलाका इवाम्बुदाः ॥ ३५ ॥
निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः । समये पूर्यमाणस्य वेगा इव महोदधेः ॥ ३७ ॥
ततो वानरसैन्येन मुक्तो नादः समन्ततः । मलयः पूरितो येन ससानुप्रस्थकंदरः ॥ ३८ ॥
शङ्खदुन्दुभिनिर्घोषः सिंहनादस्तरस्विनाम् । पूरयामास चान्तरिक्षं च सागरं चाभ्यनादयत् ॥ ३९ ॥
गजानां बृंहितैः सार्धं हयानां हेषितैरपि । रथानां नेमिनिर्घोषैः पैदलिःस्वनैः ॥ ४० ॥
एतस्मिन्नन्तरे घोरः सङ्ग्रामः समपद्यत । रक्षसां वानराणां च यथा देवासुरे पुरा ॥ ४१ ॥
ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः । निजघ्नुर्वीरान्सर्वोत्कथयन्तः स्वविक्रमान् ॥ ४२ ॥

रा० टी०—एतदिति । रावणस्य सूतस्तिस्रः शङ्खाध्वनिं श्रुत्वा रजनीचरैः भीमनिर्घोषं यथा भवति तथा उद्दधुरित्यन्वयः ॥ ३३ ॥

गो० टी०—एतदिति । भीमनिर्घोषं यथा भवति तथा उद्दधुरित्यन्वयः । त्रयैः सिंहनादः कृत इत्यर्थः ॥ ३३ ॥

३४—३५] ति० टी० शङ्खवत्पाण्डुराणि पुष्कराणि मुखानि येषां ते । 'पुष्करं व्योमिलक्षे स्याद्गजगण्डमुखे जले' इत्यमरः । हेमकोणैरभिहताः स्वर्णमयदण्डाभिहताः ॥ ३४ ॥ ३५ ॥

रा० टी०—तत इति । चन्द्रवत् पाण्डुराणि पुष्कराणि मुखानि येषां ते । हेमकोणैः हेममयदण्डैः अभिहताः स्वर्णमयदण्डैः ताडिताः भेर्यो विनेदुः राक्षसानां मुखमारुतपूरिताः शतसहस्रशः शङ्खाश्च विनेदुः शब्दं कृतवन्तः । बाह्यभाण्डे पूर्णे जाते इत्यमरः । अतश्चतुर्थमेकान्वयि ॥ ३३ ॥ ३४ ॥

गो० टी०—तत इति । प्रचोदिताः सेनायै प्रेरिताः चन्द्रवत्पाण्डुराः शुक्लाः पुष्कराः मुखानि येषां ते संगतजनसंस्कारविशेषेण तासां पुष्करत्वम् पुष्करं करिहस्ताग्रे बाह्यभाण्डमुखे जले इत्यमरः । कोणो वाद्यताडनदण्डः विनेदुरित्यनुकर्षः । अतः पूर्वमिति शेषः । अन्यदुत्तरम् ॥ ३३ ॥ ३४ ॥

३६] ति० टी०—विद्युन्मण्डलसंनद्धत्वस्थाने राक्षसेषु सबलाकत्वं ज्ञेयम् ॥ ३६ ॥

रा० टी०—ते इति । शुकनीलान्यङ्गानि येषां ते सशङ्खा रजनीचराः विद्युन्मण्डलसंनद्धाः सबलाका अम्बुदा इव बभुः विद्युन्मण्डलसंनद्धानीवेति निशाचराणां भूषणानि बोध्यानि ॥ ३६ ॥

गो० टी०—त इति । शुकनीलाङ्गाः आभरणप्रभाभिः शोभमानानि नीलानि अङ्गानि येषां ते अत एव विद्युन्मण्डलसंनद्धा इति नाधिकोपमा । विद्युन्मण्डलसंनद्धा इत्युपमानिर्देशेनोपमेयेषु राक्षसेषु सबलाकत्वं गम्यत इत्याहुः ॥ ३६ ॥

३७] ति० टी०—सेन्याः सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते इत्यमरः । समये प्रलयकाले । पूर्यमाणस्य महोदधेरिति शेषः । वेगास्तरङ्गाः ॥ ३७ ॥

रा० टी०—निष्पतन्तीति । रावणचोदिताः सैन्याः तेषु समवेता राक्षसाः समये प्रलयकाले महोदधेः वेगा इव निष्पतन्ति सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते इत्यमरः ॥ ३७ ॥

गो० टी०—निष्पतन्तीति । सैन्याः सेनायां समवेताः जनाः । सेनायां समवेता ये सैन्यास्ते सैनिकाश्च त इत्यमरः । समये प्रलये चन्द्रोदये वा वेगाः पूराः ॥ ३७ ॥

३८] ति० टी० वेगातिदूरवर्ती मलयोऽपि पूरित इत्यनेनाऽहो शूरः । साहुर्महाप्रस्थः प्रस्थः शूरः ॥ ३८ ॥

रा० टी०—तत इति । ससानुप्रस्थकन्दरः सानुप्रस्थाभ्यां दृढतरोच्छ्रायाभ्यां कन्दरेण दर्या च सहितो मलयः येन पूरितः सनादः वानरसैन्येन मुक्तः ॥ ३८ ॥

गो० टी०—तत इति । मलयः गिरिः । सः प्रसिद्धः साहुप्रस्थकन्दरः अहुप्रस्थं प्रस्थे प्रस्थे स्थिताः याः कन्दराः ताभिः सह वर्तत इति विग्रहः । यद्वा साहुः बहुः प्रस्थः तद्रूपः कन्दरः गुहेत्यर्थः । साहुः महाप्रस्थः प्रस्थः अतटः कन्दरी तैः सह वर्तत इति ससानुप्रस्थकन्दर इत्यप्याहुः ॥ ३८ ॥

३९] ति० टी०—अभ्यनादयत्प्रतिध्वनिपूरितानकरोत् ॥ ३९ ॥

४०] ति० टी०—गजानां बृंहितैर्हिन्यादिभिः सार्धं हयानामभ्यनादयत्नि-त्यनेनान्वयः ॥ ४० ॥

रा० टी०—शङ्खेति । गजबृंहितादिभिः सार्धं शङ्खदुन्दुभि-निर्घोषः तरस्विनां सिंहसदृशो नादश्च पृथिव्यादि अभ्यनादयत् । श्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

गो० टी०—शङ्खदुन्दुभीत्यादिश्लोकद्वयम् शङ्खदुन्दुभिनिर्घोषः शङ्खदुन्दुभिसदृशो घोषश्च तरस्विनां बलवतां सिंहनादः गजबृंहितादिभिः सह प्रतिध्वनिरूपं नादमकरोत् अभ्यनादयत् ॥ ३९ ॥ ४० ॥

४१–४२] ति० टी०—देवासुरे समरे ॥ ४१ ॥ ४२ ॥

रा० टी०—एतस्मिन्निति । देवासुरे देवासुरयुद्धे । राक्षसानां वानराणां संग्रामः समपद्यत ॥ ४१ ॥

गो० टी०—एतस्मिन्निति । देवासुरे यथा देवासुरयुद्धं

तैस्तु वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः । निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च संगताः ॥ ४४ ॥
राजा जयति सुग्रीव इति शब्दो महानभूत् । राजञ्जय जयेत्युक्त्वा स्वस्वनामकथां ततः ॥ ४५ ॥
राक्षसास्त्वपरे भीमाः प्राकारस्था महीं गतान् । वानरान्भिन्दिपालैश्च शूलैश्चैव व्यदारयन् ॥ ४६ ॥
वानराश्चापि संक्रुद्धाः प्राकारस्थान्महीं गताः । राक्षसान्पातयामासुः समाप्लुत्य स्वबाहुभिः ॥ ४६ ॥
स संप्रहारस्तुमुलो मांसशोणितकर्दमः । रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ।

रक्षसां हरीणां च द्वन्द्वयुद्धेऽङ्गदेन्द्रजितोश्च महति सङ्ग्रामे प्रकृतेऽन्यत्र रामेण दुर्धर्षमित्रबाभ्रिकेतुयज्ञकोपनानां नीलेन निकुम्भस्य च शिरांसि छिन्नानि तथा सुषेणेन हतौ विद्युन्माली च गतासुभूमौ निपपातेत्यादि ।

युध्यतां तु ततस्तेषां वानराणां महात्मनाम् । रक्षसां संबभूवाथ बलरोषः सुदारुणः ॥ १ ॥

देवानामसुराणामिवेत्यर्थः । यूथा वहीवद्वचनस्य "सुपां सुलुक्०" इत्यादिना जेआदेशः ॥ ४१ ॥

रा० टी०-ते इति । स्वविक्रमान् कथयन्तो राक्षसाः गदादिभिर्निजघ्नुः ॥ ४२ ॥

गो० टी०-त इति । स्पष्टः ॥ ४२ ॥

४३] ति० टी०-इका मही युद्धसाधनानि । पर्वतायातीनि क्रूरतराणामिति विवेकः ॥ ४३ ॥

रा० टी०-तथेति । महाकायाः वानराः वृक्षादिभिः रक्षांसि तथैव निजघ्नुः ॥ ४३ ॥

गो० टी०-राजेत्यर्धम् । स्पष्टम् ॥ ४३ ॥

४४] ति० टी०-राजञ्जयरावण, जयजयेति रक्षसामुक्तिः । स्वस्वनामकथां कथां शब्दं चोक्त्वा वानरान्व्यदारयन्निति संबन्धः ॥ ४४ ॥

रा० टी०-राजेति । राजा सुग्रीवः जयतीति महान् शब्दोऽभूत् वानरसेनायामिति शेषः । अर्धं पृथक् ॥ ४४ ॥

गो० टी०-राजञ्जिन्यादिसार्धश्लोकः । स्वस्वनामकथां ततः इति । नामकथां चोक्त्वा ततो भिन्नद्वरित्युत्तरत्रान्वयः । नामकथानाम् अन्यतः अन्ये इति या योजना । वेगितः सञ्जातवेगः । वेपिता इति पाठे कोपेन कम्पमाना इत्यर्थः ॥ ४४ ॥

४५-४७] ति० टी०-अत्र 'राक्षसास्त्वपरे' इत्यर्धं पश्चिमसिद्धे कृतक. ततश्चोत्तरं प्रत्यवहारः सेनाया इति भारद्वाजन्यासे—

'ततः प्रत्यवहारो भूत्सैन्यानां राघवाज्ञया ॥
कपेर्निशितपाशास्त्रसैनिकान्रावणानुगाः ।
अभिजग्मुर्गणा रक्षे पिशाचद्रुमलक्षणम् ॥
ततोऽभिपत्तनां तेषां महत्यानां दुरात्मनाम् ।
अन्तर्धानवधं तत्रशकार स विभीषणः ॥'
॥ ४५-४७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रा० टी०-राजञ्जिति । प्राकारस्थाः अपरे राक्षसाः राजन् हे रावण ! त्वं जय जयेति स्वस्वनामकथां चोक्त्वा महीगतान् वानरान् भिन्दिपालादिभिर्व्यदारयन् । सार्धश्लोक एकान्वयी ॥ ४५ ॥

गो० टी०-राक्षसा इति । भिन्दिपालैः गदाभिः ॥ ४५ ॥

रा० टी०-वानरा इति । महीं गताः वानरा अपि समाप्लुत्य बाहुभिः राक्षसान् पातयामासुः ॥ ४६ ॥

गो० टी०-वानरा इति । समाप्लुत्य प्राकारमपर्यन्तमुत्प्लुत्य । प्लवनं प्लुतगतिं गच्छन्तीति प्लवङ्गमाः । भावप्रधानमपि वचनम् । अनेन प्लुतगतिमत्त्वमुक्तम् । अतो न वानरशब्देन पुनरुक्तिः ॥ ४६ ॥

रा० टी०-मांसशोणितान्येव कर्दमाः यस्मिन् सः रक्षसां वानराणां च संप्रहारः अद्भुतोपमः संबभूव ॥ ४७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

गो० टी०-स इति । संप्रहारः युद्धम् । तुमुलः परस्परसंकुलः । मांसशोणितान्येव कर्दमो यस्मिन् स मांसशोणितकर्दमः । अद्भुतोपमः दुर्लभोपम इति यावत् ॥ ४७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१] ति० टी०-वानरैः परस्परबलदर्पजो रोषः । अ. नावरिनयुद्धेऽपि पूर्वं च भिन्नीत्यैव रोष इति भावः ॥ १ ॥

१ पलक्षण्यो ब्राह्मणो. पाठान्तरात्तः गो. पाठे । २ वेगितः इति गो.पाठान्तरं । ३ [illegible] । ४ महीगता इति गो. पाठः । ५ अभिति गो. पाठः । ६ युद्धकाण्डे इति गो. पाठः ।

काञ्चनापीडैः काञ्चनभूषणवद्भिः । रथैश्चादित्यसंकाशैः कवचैश्च मनोरमैः ॥ १
निर्ययुः राक्षसा वीरा नादयन्तो दिशो दश । राक्षसा भीमकर्माणो रावणस्य जयैषिणः ॥ २
वानराणामपि चमूर्बृहती जयमिच्छताम् । अभ्यधावत तां सेनां राक्षसीं घोरकर्मणाम् ॥ ३
एतस्मिन्नन्तरे तेषामन्योन्यमभिधावताम् । राक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत ॥ ४
अङ्गदेनेन्द्रजिस्सार्धं वालिपुत्रेण राक्षसः । अयुध्यत महातेजाश्चण्डकेतुः यथान्तकः ॥ ५
प्रजङ्घेन च संपातिर्नित्यं दुर्धर्षणो रणे । जम्बुमालिनमारब्धो हनुमानपि वानरः ॥ ६
संगतस्तु महाक्रोधो राक्षसो रावणानुजः । समरे तीक्ष्णवेगेन शरभेण विभीषणः ॥ ७
तपनेन गजः सार्धं राक्षसेन महाबलः । निकुम्भेन महातेजा नीलोऽपि समयुध्यत ॥ ८
वानरेन्द्रस्तु सुग्रीवः प्रघसेन सुसंगतः । संगतः समरे श्रीमान्विरूपाक्षेण लक्ष्मणः ॥ ९
अग्निकेतुः सुदुर्धर्षो रश्मिकेतुश्च राक्षसः । मित्रघ्नो यज्ञकोपश्च रामेण सह संगताः ॥ १०
वज्रमुष्टिश्च मैन्देन द्विविदेनानिलप्रभः । राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ ॥ ११
वीरः प्रतपनो घोरो राक्षसो रणदुर्धरः । समरे तीक्ष्णवेगेन नलेन समयुध्यत ॥ १२
धर्मस्य पुत्रो बलवान्सुषेण इति विश्रुतः । स विद्युन्मालिना सार्धमयुध्यत महाकपिः ॥ १३
वानराश्चापरे घोरा राक्षसैरपरैः सह । द्वन्द्वं समीयुः सहसा, युद्धा च बहुभिः सह ॥ १४
तत्रासीत्सुमहद्युद्धं तुमुलं रोमहर्षणम् । रक्षसां वानराणां च वीराणां जयगिच्छताम् ॥ १५

रा० टी०–पूर्वसर्गान्तमेवाह–युध्यतामित्यादिभिः । वानराणां युध्यतां सतां रक्षसां सुदारुणः बलरोषः वानरसेनाकोपो बभूव ॥ १ ॥

अथ द्वन्द्वयुद्धं वर्णयति त्रिचत्वारिंशे—युद्धयतां चित्यादि । वानराणां युद्धयतां वानरैश्च युध्यमानैश्च । बलकोपः सेनायाः कोपः । बलेत्यविभक्तिकनिर्देशः ॥ १ ॥

२] ति० टी०–काञ्चनापीडैः काञ्चनभूषणवद्भिः अतिनिर्लोपमैस्तद्दुर्धर्षैः ॥ २ ॥

३–४] ति० टी०–निर्ययुरिति । अनेन वाल्मीकिनापि प्रत्यवहारो ध्वनितः ॥ ३ ॥ ४ ॥

रा० टी०–ते इति । काञ्चनापीडैः स्वर्णभूषणवद्भिर्वर्णजादिभिश्चोपलक्षिताः राक्षसाः बहुराक्षसविधिध्वा— निर्ययुः । श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

रा० टी०–वानराणामिति । वानरजयमिच्छतां रक्षसां सेनामभ्यधावत ॥ ४ ॥

गो० टी०–ते इत्यैरित्यादिश्लोकद्वयमेकान्वयम् । काञ्चनापीडैः स्वर्णमयशेखरैः । हयैरित्यनुपलक्षणे तृतीया । राक्षसव्याघ्राः राक्षसश्रेष्ठाः राक्षसभल्लेति आदरान्तरं संभवतीति राक्षसा इत्युक्तम् ॥ २–३ ॥

५] ति० टी०–अन्योन्यमभिधावतामिति । द्वन्द्वयुद्धार्थमिति भावः ॥ ५ ॥

रा० टी०–एतस्मिन्नित्यादि । एतस्मिन्नन्तरे सङ्कुले द्वन्द्व[illegible]

गो० टी०–तान्येव द्वन्द्वयुद्धान्याह—अङ्गदेनेति ।

६] ति[illegible]
रा० टी[illegible]
[illegible]
शेष [illegible]
[illegible]
श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

७] ति० टी०–प्रजङ्घेन तदाख्यरक्षसा । 'संपातिर्गृध्रभेदेषु प्रजङ्घेन समाहतः' इति लिङ्गात् । दुर्धर्षणो दुःसहः आरब्धो युद्धमारब्धवान् ॥ ७ ॥

गो० टी०–प्रजङ्घेनेति । दुर्धर्षणः दुःसहः । प्रजङ्घो राक्षसः संपातिः विभीषणसचिवः आरब्धः हनुमन्तमिति शेषः ॥ ७-१०

८–११] ति० टी०–शरभेण तदाख्यरक्षसा । 'मित्रघ्ने शरभे इति क्वचित्पाठः ॥ ८ ॥ ११ ॥

गो० टी०–संगत इति । शरभेण तदभिधानराक्षसेन विभीषणः संगतः अयुध्यत इत्यर्थः ॥ ८ ॥

रा० टी०–तपनेनेति । तपनेन राक्षसेन गजः निकुम्भो नीलश्च समयुध्यत ॥ ९ ॥

रा० टी०–वानरेन्द्र इति । वानरेन्द्रः प्रघसेन सङ्गतः लक्ष्मणस्तु विरूपाक्षेण सङ्गतः ॥ १० ॥

रा० टी०–अग्निकेतुरिति । अग्निकेतुप्रभृतयः राक्षसेन [illegible] सङ्गताः ॥ ११ ॥

गो० टी०–अग्निकेतुरिति । अग्निकेतुश्च रश्मिकेतुश्चेति द्वाभ्यामेव [illegible]

१२–१६] ति० टी०–राक्षसाभ्यां सुघोराभ्यां [illegible]
[illegible]

हरिराक्षसदेहेभ्यः प्रसस्रुः कृष्णशाद्वलाः । शरीरावयवाः [illegible] प्रसुस्रुः शोणितापगाः ॥ १७ ॥
आजघानेन्द्रजित्क्रुद्धो वज्रेणेव शतक्रतुः । अक्षतं हृदयं वीरं शत्रुसैन्यविदारणम् ॥ १८ ॥
तस्य आञ्जनचित्राङ्गं रथं साश्वं ससारथिम् । जघान हृदयं श्रीमानङ्गदो वेगवान्हरिः ॥ १९ ॥
संपातिस्तु प्रजङ्घेन त्रिभिर्बाणैः समाहतः । निजघान शरेणाशु प्रजङ्घं रणमूर्धनि ॥ २० ॥
जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः । विभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे ॥ २१ ॥
तस्य तं रथमास्थाय हनूमान्मारुतात्मजः । प्रममाथ तलेनाशु सह तेनैव रक्षसा ॥ २२ ॥
नदन्प्रतपनो घोरो नलं सोऽभ्येत्य पातयत् । नलः प्रतपनस्याशु पातयामास चक्षुषी ॥ २३ ॥
भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा । ग्रसन्तमिव सैन्यानि प्रससर्द वानराधिपः ॥ २४ ॥

रा० टी०—प्रजङ्घेति । मैन्दन द्विविदेन राक्षसाभ्यां वज्रमुष्टिः वज्रतुल्यमुष्टियुक्तौ अपिसुग्रीवौ समागतौ ॥ १२ ॥

गो० टी०—वज्रमुष्टिरिति । राक्षसाभ्यां वज्रमुष्टयभिप्रायेण बहुवचनम् । वज्रमुष्टी मैन्दद्विविदौ । अनेन परस्परसाहित्यमुक्तम् ॥ १२ ॥

रा० टी०—वीर इति । प्रतपनो राक्षसः नलेन समयुध्यत ॥ १३ ॥

रा० टी०—धर्मस्येति । सचेण विघुन्माली धर्मपुत्रेण ॥ १४ ॥

गो० टी०—वीर इति । हनूमदुपरि रणे दृष्टि

रा० टी०—वानरा इति । अपरेऽपि वानरा [illegible] ॥ १३–१५ ॥

गो० टी०—वानरा इति । [illegible] बुधा [illegible] विशेषणाद्वानरैरन्यैरपि वहव इति विशेषणं विशेषयम् ॥ १५ ॥

रा० टी०—तत्रेति । तत्र तस्मिन्समये समरमूर्धनि [illegible]

गो० टी०—तत्रेति । तुमुले व्याकुलम् ॥ १६ ॥

१७] ति० टी०—हरीति । आद्रवत्यः कृष्णशाद्वला [illegible] प्रसुस्रुः [illegible] ॥ १७ ॥

रा० टी०—हरीति । हरिराक्षसदेहेभ्यः प्रसृताः [illegible] शरीराण्येव संघाः [illegible] ॥ १७ ॥

गो० टी०—हरीति । कृष्णशाद्वलाः [illegible] ॥ १७ ॥

१८] ति० टी०—अक्षतमित्यादि [illegible] आजघानेति । शत्रुसैन्यविदारणमित्यनेन विशेषणम् ॥ १८ ॥

रा० टी०—आजघानेति । वज्रेण शतक्रतुरिवेन्द्रजित् गदया शत्रुसैन्यविदारणमक्षतं जघान ॥ १८ ॥

गो० टी०—आजघानेति । आजघान नाद्यापास [illegible]

१९] ति० टी०—तस्येन्द्रजितः । तस्य रथं तस्यैव गदया स्वापहरणं जघान ॥ १९ ॥

रा० टी०—तस्येति । तस्येन्द्रजितः साश्वं ससारथिं काञ्चनचित्राङ्गं रथमङ्गदो जघान ॥ १९ ॥

२०] ति० टी०—अक्षकर्णो वृक्षविशेषः तेन प्रजङ्घमाजघान । संपातिरित्यृक्षकर्णः ॥ २० ॥

रा० टी०—संपातिरिति । त्रिभिर्बाणैः प्रजङ्घेन समाहत संपातिः अक्षकर्णेन तरुविशेषेण प्रजङ्घं निजघान ॥ २० ॥

२१] ति० टी०—रथस्था शक्ती रथशक्तिः ॥ २१ ॥

रा० टी०—जम्बुमालीति । जम्बुमाली तु [illegible] स्तनान्तरे हनूमन्तं विभेद ॥ २१ ॥

२२–२३] ति० टी०—तेन रक्षसा सह तस्य रथं प्रममाथ तेन जम्बुमाली मृत इति गम्यते ॥ २२ ॥ २३ ॥

रा० टी०—तस्येति । हनूमान् तस्य जम्बुमालिनः [illegible] मास्थाय तेन रक्षसा जम्बुमालिना सह तं रथं तलेनैव जघान ददाह ॥ २२ ॥

गो० टी०—जम्बुमालीति । रथशक्त्या रथ एव [illegible] वर्तमानया शक्त्या ॥ २१ ॥

गो० टी०—तस्येति । आस्थाय आरुह्य ॥ २२ ॥

[illegible] टी०—नदन्निति । नदन् प्रतपनः नलमभ्यनुधावत [illegible] शिप्रहस्तेन रक्षसा शरैर्भिन्नगात्रः स नलः प्रतपनस्य [illegible] तावपि चिक्षेप साईश्लोक एकान्वयी॥२४॥

टी०—नदन्निति श्लोकं वाक्यम् ॥ २३ ॥

गो० टी०—नल इति । रक्षसा प्रतपनेन । भिन्नगात्र इत्यस्य पूर्वेणान्वयः ॥ २३ ॥

२४] ति० टी०—भिन्नेति । शरैर्भिन्नगात्रो नलः प्रतपनस्य चक्षुषी पातयामास । नल [illegible] । ग्रसन्तमित्यादिना प्रकरणसमाप्तिः ॥

रा० टी०—[illegible] सैन्यानि [illegible] निजघान ॥ २४ ॥

गो० टी०—[illegible]

१ प्रसृता इति गो० पाठः । २ रूपेण इति गो० पाठः । ३ उक्तेति गो० पाठः ।

[illegible] लक्ष्मणेन निजघ्नतुः । जघ्नतुश्च । प्रेषयित्वा शरगणं राक्षसं भीमदर्शनम् ॥ २५
विरूपाक्षं विरूपाक्षः शरौघेण लक्ष्मणः । अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ॥
मित्रघ्नो यज्ञकोपश्च रामपादोपयच्छरैः ॥ २६
तेषां चतुर्णां रामस्तु शिरांसि समरे शरैः । कृत्तवतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः ॥ २७
वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे । पपात सरथः सूतः पुराद्रुद्र इव भूतले ॥ २८
निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम् । निर्बिभेद शरैस्तीक्ष्णैः क्रोधमित्रांशुमान् ॥ २९
पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः । विद्ध्वा समरे नीलं निकुम्भः प्रजहास च ॥ ३०
तस्यैव रथचक्रेण नीलो विष्णुनिवाहवे । शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः ॥ ३१
वज्राशनिसमस्पर्शौ द्विविदैश्च समप्रभम् । अपातयत गिरिशृङ्गेण क्षिप्तां सर्वरसामयीम् ॥ ३२
द्विविदं वानरेन्द्रं तं दुमयोधिनमाहवे । वज्रजानिसंकाशः स विव्याधाशनिप्रभः ॥ ३३
स शरैरभिविद्धाङ्गो द्विविदः कोपमूर्छितः । सालेन जघ्ने सार्थं निशाचरानाशनिप्रभम् ॥ ३४
विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः । सुषेण वानरश्रेष्ठं ननाद च महाबलः ॥ ३५
तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः । गिरिशृङ्गेण महता रथमाशु न्यपातयत् ॥ ३६
लाघवेन तु संयुक्तो विद्युन्माली निशाचरः । उत्पत्य व्योम्नि तूर्णं गदापाणिः स्थितो बलिः ॥ ३७
ततः क्रोधसमाविष्टः सुषेणः हरिपुङ्गवः । [illegible] मुखे निशाचरमभिद्रवत् ॥ ३८
तमापतन्तं गदया [illegible]माली निशाचरः । [illegible] सुषेणं हरिपुङ्गवम् ॥ ३९

२५-२६] ति० टी०—[illegible] ॥ २५ ॥ २६ ॥
गो० टी०—वधोद्योगेति । लक्ष्मणः विरूपाक्षं राक्षसं अ[illegible] प्रयोज्य एकेन शरेण निजघान ॥ २५ ॥
रा० टी०—अग्नीति । अग्निकेतुप्रभृतयः चत्वारः [illegible] विद्विदः वानरश्रेष्ठः व्यापादयत् चक्रुः ॥ २६ ॥
गो० टी०—अग्निकेतुरिति । स्पष्टः ॥ २६ ॥
२७] ति० टी०—चतुर्भिश्चिच्छेद । रामस्तु चतुर्णां शिरांसि चतुर्भिः [illegible] ॥ २७ ॥
रा० टी०—तेषामिति । रामस्तु चतुर्णां शिरांसि चतुर्भिः [illegible] ॥ २७ ॥
गो० टी०—तेषामिति । अग्निज्वालोपमैः अग्निज्वालोपमैः २७
२८-३०] ति० टी०—अङ्गः शैलमिति कृतकः । [illegible]मित्यन्ये ॥ २८ ॥ ३० ॥
रा० टी०—वज्रेति । मैन्देन दुविदेन निहतो वज्रमुष्टिः [illegible] । देवविमानमिव भूतलं पुरात् ॥ २८ ॥
गो० टी०—वज्रमुष्टिरिति । पुराद्रुद्र इव [illegible] ॥ २८ ॥
रा० टी०—निकुम्भस्त्विति । निकुम्भस्तु नीलं [illegible]नचयप्रभम् [illegible] अभ्रमाल इव [illegible] ॥ २९ ॥
गो० टी०—निकुम्भ इति । स्पष्टः ॥ २९ ॥
रा० टी०—पुनरिति । क्षिप्रहस्तः निकुम्भः शरशतेन पुनः [illegible] ॥ ३० ॥
गो० टी०—पुनरिति । क्षिप्रहस्तः क्षिप्रकारिहस्तः [illegible] इति रा० सम्मतः ॥ ३० ॥

३१] ति० टी०—[illegible] ॥ ३१ ॥
रा० टी०—तस्येति । नीलस्तु [illegible] निकुम्भस्य रथस्य [illegible] निकुम्भस्य सारथेश्च शिरः चिच्छेद ॥ ३१ ॥
३२] ति० टी०—वज्रेति । वज्राशनिसमस्पर्शैः [illegible] द्विविदः गिरिशृङ्गेण [illegible] ॥ ३२ ॥
रा० टी०—वज्रेति । वज्राशनिसमस्पर्शैः [illegible] द्विविदः गिरिशृङ्गेण [illegible] ॥ ३२ ॥
गो० टी०—वज्रेति । वज्राशनिसमस्पर्शैः वज्रवत् अ[illegible]मयीं दृढां शिलामित्यर्थः ॥ ३२ ॥
३३-३४] ति० टी०—द्विविदमिति । [illegible] ॥ ३३ ॥
रा० टी०—द्विविदमिति । अशनिसमः शरैर्वानरेन्द्रं द्विविदं विव्याध जघान ॥ ३३ ॥
गो० टी०—स इति । [illegible] द्विविदः शालवृक्षेण [illegible] ॥ ३४ ॥
रा० टी०—स इति । [illegible] द्विविदः शालवृक्षेण अशनिप्रभं निजघान ॥ ३४ ॥
गो० टी०—स इति । स्पष्टः ॥ ३४ ॥
३५-३६] ति० टी०—विद्युन्मालीति । [illegible] विद्युन्माली [illegible] सुषेणं वानरयूथपं ननाद च ॥ ३५ ॥
गो० टी०—विद्युदिति । स्पष्टः ॥ ३५ ॥
रा० टी०—तमिति । सुषेणस्तु रथस्थं तं विद्युन्मालिनं दृष्ट्वा महता गिरिशृङ्गेण रथं न्यपातयत् ॥ ३६ ॥
गो० टी०—तमिति । स्पष्टः ॥ ३६ ॥
३७-३९] ति० टी०—अपक्रम्याचरत ॥ ३७ ॥ ३९ ॥

१ [illegible] गो० भाः । २ [illegible] ओके गो० नास्ति । ३ [illegible] भाः । ४ रामं निविद्ध्येति गो० रा० पाठः । ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] गोपि भाः । ९ [illegible]

गदामहारं तं घोरमचिन्त्य पुरुषोत्तमः । तौ तूर्णौ पातयामास तस्योरसि महाद्रुमौ ॥ ४० ॥
शिलाप्रहाराभिहतो विद्युन्माली निशाचरः । निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ॥ ४१ ॥
एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः । द्वन्द्वे विमथितास्तत्र दैत्या इव दिवौकसैः ॥ ४२ ॥
प्रासैश्चान्यैर्गदाभिश्च शक्तितोमरसायकैः । अपविद्धैश्च रथैस्तथा साङ्ग्रामिकैर्हयैः ॥ ४३ ॥
निहतैः कुञ्जरैश्चैस्तथा वानरराक्षसैः । चक्राक्षयुगदण्डैश्च भग्नैरुर्वीसंश्रितैः ॥ ४४ ॥
बभूवायोधनं घोरं गोमायुगणसेवितम् । कबन्धानि समुत्पेतुर्दिक्षु वानरराक्षसाम् ॥
विमर्दे तुमुले तस्मिन्देवासुररणोपमे ॥ ४५ ॥

निहन्यमाना हरिपुंगवैस्तदा निशाचराः शोणितगन्धमूर्च्छिताः ।
पुनः समुद्यं तरसा समाश्रिता दिवाकरस्यास्तमयाभिकाङ्क्षिणः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०–लाघवेनेति । लाघवेन संयुक्तो विद्युन्माली स्यादवक्रम्य शिलां स्थितो बभूवेति शेषः ॥ ३७ ॥

गो० टी०–लाघवेनेति । अवक्रम्य अवष्टभ्य ॥ ३७ ॥

रा० टी०–तत इति । सुवेगः महतीं शिलां गृह्य गृहीत्वा निशाचरमिन्द्रवत् अभ्यद्रवत् ॥ ३८ ॥

गो० टी०–तत इति । अभिद्रवत् अभ्यद्रवत् ॥ ३८ ॥

रा० टी०–तामिति । विद्युन्माली आपतन्तं सुवेगं गदया वक्षस्यभिजघान ॥ ३९ ॥

गो० टी०–तामिति । स्पष्टः ॥ ३९ ॥

४०–४१] ति० टी०–अचिन्त्यचिन्तयित्वा तां पूर्ववृत्तीं शिलाम् । इव ॥ ४१ ॥

रा० टी०–गदेति । पुरुषोत्तमः गदाप्रहारमचिन्त्य अचिन्तयित्वा ॥ तत्रोरसि तौ द्रुमहतौ शिलां पातयामास ॥ ४० ॥

गो० टी०–गदाप्रहारमिति । अचिन्त्य अचिन्तयित्वा ॥ ४० ॥

रा० टी०–शिलेति । शिलाप्रहाराभिहतः अत एव विपिष्टहृदयः अत एव गतासुः विद्युन्माली भूमौ निपपात॥४१॥

गो० टी०–शिलेति । स्पष्टः ॥ ४१ ॥

४२–४३ । ति० टी०–त्रिभिरेकान्वयेन । आर्षः प्रयोगः ॥ ४२ ॥ ४३ ॥

रा० टी०–एवमिति । त्रिभिरेकान्वयेन एवं वानरैः रजनीचराः विमथिताः क्षिप्ताः अभूवितिति शेषः ॥ ४२ ॥

गो० टी०–एवमिति । त्रिभिरेकान्वयेनैव समाप्तिरित्यभिप्रायम् ४२

रा० टी०–प्रासैरिति । अन्यैश्चिन्द्रपालादिभिः अपविद्धैः क्षिप्तैः रथैश्च निहतैः साङ्ग्रामिकैर्हयैः कुञ्जरैश्च वानरराक्षसैश्च भग्नैः अत एव धरणिसंश्रितैः भूमौ पतितैः चक्रादिभिश्चायुधैः क्षितम् अत एव घोरं भयंकरमायोधनं संग्रामभूमिः गोमायुगणैः शृगालैः सेवितं बभूव । सार्धश्लोकद्वयमेकान्वयि ४३ ४४

गो० टी०–भग्नैरित्यादिसार्धश्लोकद्वयमेकान्वयम् । अपविद्धैरिति रथविशेषणम् भिन्नैरिति हयविशेषणम् । साङ्ग्रामिकैः संग्रामे साधुभिः । अक्षं चक्ररन्ध्रम् । युगदण्डः अक्षबन्धनदण्डः ॥ ४३ ॥ ४४ ॥

रा० टी०–कबन्धानीति । देवासुररणोपमे तस्मिन् विमर्दे संग्रामे कबन्धानि दिक्षु समुत्पेतुः ॥ ४५ ॥

गो० टी०–कबन्धानीति । कबन्धानि शिरोहीनशरीराणि । विमर्दे युद्धे ॥ ४५ ॥

४६] ति० टी०–अस्तमयाभिकाङ्क्षिणः रात्रौ स्वसां बलाधिक्यात् ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०–निहन्यमाना इति । हरिपुङ्गवैर्निहन्यमानाः अत एव शोणितगन्धमूर्च्छिताः निशाचराः दिवाकरस्यास्तमयाभिकाङ्क्षिणः सन्तः युद्धं पुनः समाश्रिता बभूवुरिति शेषः तेषाम् अस्ताकाङ्क्षित्वं तु स्वबलवृद्ध्ये निशितवृद्धिस्तु सर्वत्र प्रसिद्धेति बोध्यम् ॥ ४६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०–विमृद्यमाना इति । दिवाकरस्येति । रात्रौ राक्षसानां बलाधिक्यादिति भावः ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

---

१ पट्टिशैरिति गो. पाठः । २ च भिन्नैश्च खड्गैरिति गो. पाठः । ३ संकुलमिति गो. पाठः । ४ विद्रावयेति गो. पाठः । ५ विपन्नान्
६ आस्थिता इति गो. पाठः । ७ अवेति रा. पाठः ।

चतुश्चत्वारिंशः सर्गः ।

वानराणां राक्षसानां च रात्रियुद्धे निशायां रात्रिंचराणां बलाधिक्यायोद्युमुद्युक्तैरपि वानरैः कपयोऽभीतास्तुमुलं युद्धमपि रावणिमन्तरेण जिते पश्यन्तोऽस्यर्थं जहृषुश्च राघवावपि शरधाराभिरपरिमेयाभिर्वान्परलायनायासतुरन्ते मन्महावरणेन तामसशरपाशौबद्धौ तौ ।

युध्यतामेव तेषां तु तदा वानररक्षसाम् । रविरस्तं गतो रात्रिः प्रहृष्टा प्राणहारिणी ॥ १
अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् । संप्रवृत्तं निशायुद्धं तदा वानररक्षसाम् ॥ २
राक्षसोऽसीति हरयो वानरोऽसीति राक्षसाः । अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ ३
हैत दारय चैहीति कथं विद्रवसीति च । एवं सुतुमुलः शब्दस्तस्मिन्सैन्ये तु शुश्रुवे ॥ ४
कालाः काञ्चनसंनाहास्तस्मिंस्तमसि राक्षसाः । संप्रहृष्यन्त शैलेन्द्रा दीप्तौषधिवना इव ॥ ५
तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्च्छिताः । परिपेतुर्महावेगा भक्षयन्तः प्लवंगमान् ॥ ६
ते हयान्काञ्चनापीडान्ध्वजांश्चाशीविषोपमान् । आसाद्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ॥ ७
वानरा बलिनो युद्धेऽक्षोभयन्राक्षसीं चमूम् । कुञ्जरान्कुञ्जरारोहान्पताकाध्वजिनो रथान् ॥ ८
चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्च्छिताः । लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः ॥ ९

१] ति० टी०–युध्यतामिति ॥ १ ॥

रा० टी०–रात्रियुद्धवर्णनमुपक्रमते—युध्यतामिति । वानररक्षसां युध्यतां सतां रविरस्तं गतः अत एव प्राणहारिणी निशाचरातिरिक्तानां भयावहेत्यर्थः रात्रिः प्रहृष्टा ॥१॥

गो० टी०–अथ रात्रियुद्धप्रवृत्तिश्चतुश्चत्वारिंशे–युध्यतामेवेत्यादि । युध्यतां युद्ध्यमानेषु । प्राणहारिणी प्राणनाशिनीति शेषः ॥ १ ॥

२–३] ति० टी०–निशायुद्धं प्रवृत्तम् । परस्परं बद्धवैरादर्शनजदोषादिति भावः । पौषपौर्णमास्यां शुक्लचतुर्दश्यां पक्षप्रवृत्तौ, तेनाविभागादिना पौषकृष्णेऽसिते माघशुक्लप्रतिपदि युद्धारम्भे बहुदिनपर्यन्तं संकुलं युद्धं सामान्येनोक्तम्, तृतीयदिने चेदं निशायुद्धं प्रवृत्तम् । 'ततो जज्ञे महायुद्धं कुलं कपिरक्षसाम् । मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यहम् ॥' इति पाद्मोक्तेः । अत्र तत्त्वं वक्ष्यामः ॥ २ ॥ ३ ॥

रा० टी०–अन्योन्यमिति । जयमिच्छतां वानररक्षसां वैरायुद्धं संप्रवृत्तम् ॥ २ ॥

गो० टी०–अन्योन्यमिति । स्पष्टः ॥ २ ॥

रा० टी०–तत्प्रकारमाह—राक्षस इत्यादिभिः । राक्षसोऽसीति वानरोऽसीति च क्रमेणोक्तत्वेति शेषः हरयो राक्षसाश्च कर्णौ तमसि अन्धकारसमये अन्योन्यं जघ्नुः ॥ ३ ॥

गो० टी०–राक्षस इति । हरिरासीति राक्षस इति । तमोऽन्धकारत्वेन रक्षसामपि मोहोदृष्टिति भावः ॥ ३ ॥

४] ति० टी०–हत । इदं हन्तेर्लोटि मध्यमपुरुषबहुवचनम् । हतेत्यर्थः । दारय विदारणं कुरु एवमागच्छ । [illegible] एवं सुतुमुलः शब्दस्तस्मिन्सैन्ये

रा० टी०–हतेति । पूर्वं हत एवं दारय एहीति च विद्रवसीति च एवं सुतुमुलः शब्दः सैन्ये शुश्रुवे ॥ ४ ॥

गो० टी०–जहीति । स्पष्टः ॥ ४ ॥

५–७] ति० टी०–कालाः कृष्णवर्णाः । काञ्चनसंनाहाः सुवर्णकवचाः ॥ ५ ॥ ७ ॥

रा० टी०–काला इति । काञ्चनसंनाहाः सुवर्णमयवर्मविशिष्टाः कालाः श्यामवर्णाः राक्षसाः दीप्तानि ओषधिवनेषु ते शैलेन्द्रा इव संप्रहृष्यन्त संप्राहृष्यन्त ॥ ५ ॥

गो० टी०–काला इति । कालाः नीलाः । काञ्चनसंनाहाः काञ्चनकवचाः । दीप्तौषधिवनाः दीप्ततृणज्योतिर्वनाः ।

रा० टी०–तस्मिन्निति । तस्मिन् तमसि अन्धकारे प्लवंगमान् भक्षयन्तो राक्षसाः परिपेतुः वानरसैन्येषु प्रविविशुरित्यर्थः ॥ ६ ॥

गो० टी०–तस्मिन्निति । परिपेतुः संचेरुः ॥ ६ ॥

रा० टी०–ते इति । ते वानराः काञ्चनापीडान् हयान् मयभूषणविशिष्टान् हयान् शिक्षणेपमान् ध्वजांश्च आशीविषोपमान् दशनैर्व्यदारयन् ॥ ७ ॥

गो० टी०–त इति । ते वानराः । काञ्चनापीडान् हयान् शीघ्रगामिनः ॥ ७ ॥

८–९] ति० टी०–अक्षोभयन्निति पदम् । पताकाध्वजिनः पताकोपेतध्वजवन्तः ॥ ८ ॥ ९ ॥

रा० टी०–वानरा इति । वानराः कुञ्जरादीन् [illegible] चकृषुः अत एव राक्षसीं चमूम् अक्षोभयन् । [illegible] एकान्वयी ॥ ८ ॥

गो० टी०–वानरा इत्यादिश्लोकौ । पूर्ववत् स्पष्टौ अक्षोभयन्निति पदच्छेदः ॥ ८ ॥

लक्ष्मणस्त्वनि दृष्टानि प्रवराणि निजघ्नतुः ॥ तुरङ्गाणां खुरैर्विध्वस्तं रथनेमिना
क्षितं धरणीरजः पुष्पवर्षं कर्णनेत्राणि रुरोध ॥ ११ ॥ रथनेमिसङ्घट्टं रजो युध्यतां
कर्णनेत्राणि रुरोध ॥ ११ ॥ १२ ॥ वर्तमाने घोरे संग्रामे रुधिरौघाः रुधिरमुद्गरत्वो महामघो विचुक्षुभुः ॥ ११ ॥
रुधिरौघा महाघोरा नद्यस्तत्र विचुक्षुभुः ॥ ११ ॥ १२ ॥
ततो भेरीमृदङ्गानां पणवानां च निःस्वनः । प्रभुतमिश्रितोन्मिश्रः संबभूवाद्भुतोपमः ॥ १२ ॥
हयानां स्तनमानानां राक्षसानां च निःस्वनः । शस्त्राणां वानराणां च संबभूवाति दारुणः ॥ १३ ॥
हतैर्वानरमुख्यैश्च शक्तिशूलपरश्वधैः । निहतैः पर्वताकारैः राक्षसैः कामरूपिभिः ॥ १४ ॥
शस्त्रपुष्पोपहारा च तत्रासीद्भूमेदिनी । दुर्गमा दुर्निवेशा च शोणितास्रावकर्दमा ॥ १५ ॥
सा बभूव निशा घोरा हरिराक्षसहारिणी । कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा ॥ १६ ॥
तस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे । राममेवाभ्यवर्तन्त संहृष्टाः शरवृष्टिभिः ॥ १७ ॥
तेषामापततां शब्दः क्रुद्धानामपि गर्जताम् । उद्वर्ते इव सत्त्वानां समुद्राणामभूत्स्वनः ॥ १८ ॥
तेषां रामः शरैः षड्भिः षड् जघान निशाचरान् । निमेषान्तरमात्रेण शरैरग्निशिखोपमैः ॥ १९ ॥

रा० टी०—लक्ष्मण इति । लक्ष्मणो रामश्च दृश्यादृश्यानि दृश्यानि अदृश्यानि च प्रवराणि श्रेष्ठानि रक्षांसि निजघ्नतुः ॥ ९ ॥

गो० टी०—लक्ष्मण इति । दृश्यादृश्यानि इंद्रियदृश्यार्थः ॥ ९ ॥

१०] त्रि० टी०—प्रवराणि श्रेष्ठानि ॥ १० ॥

रा० टी०—तुरङ्गेति । तुरङ्गाणां खुरैर्विध्वस्तं रथनेमिना क्षुण्णितं धरणीरजः पुष्पवर्षं कर्णनेत्राणि रुरोध ॥ १० ॥

गो० टी०—तुरङ्गेति । विध्वस्तं चूर्णितम् ॥ १० ॥

११-१२] त्रि० टी०—रथनेमिसङ्घट्टं रजो युध्यतां कर्णनेत्राणि रुरोध ॥ ११ ॥ १२ ॥

रा० टी०—वर्तमान इति । वर्तमाने घोरे संग्रामे रुधिरौघाः रुधिरमुद्गरत्वो महामघो विचुक्षुभुः ॥ ११ ॥

गो० टी०—वर्तमान इति । रुधिरौघाः । असृग्धारामुद्गरशब्दस्योदादेश आर्षः ॥ ११ ॥

रा० टी०—तत इति । शङ्खानां भेरीणां च स्वनैर्मिश्राः प्रभृतीनां निस्वनः अद्भुतोपमः संबभूव ह ॥ १२ ॥

गो० टी०—तत इति । स्पष्टः ॥ १२ ॥

१३] त्रि० टी०—स्तनमानानां स्तनताम् । शस्त्राणां हिंसितानाम् ॥ १३ ॥

रा० टी०—हयानामिति । तत्र तस्मिन्समये हयादीनां निस्वनः शब्दादीनां च निस्वनो बभौ ॥ १३ ॥

गो० टी०—हतानामिति । स्तनमानानां स्तनताम् । शस्त्राणां हिंसितानाम् ॥ १३ ॥

१४] त्रि० टी०—कामरूपिभिरुपलक्षिता भूमिर्यस्यां तादृशीवासीत् ॥ १४ ॥

१५] त्रि० टी०—शोणितानामास्रावैः कर्दमो यस्यां सा ॥ १५

रा० टी०—हतैरिति । शक्त्यादिभिर्हतैर्वानरश्रेष्ठैर्निहतैः राक्षसैश्चोपलक्षिता अत एव शोणितास्रावैः कर्दमो यस्यां अत एव दुर्गमा अत एव दुर्गमा युद्धभूमिः शस्त्रपुष्पोपहारा शस्त्रमेव पुष्पोपहारस्तद्युक्ता आसीत् । अर्धचतुष्टयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०—हतैरित्यादिश्लोकद्वयमेकान्वयम् । निहतैरिति राक्षसविशेषणम् । पर्वताकारैः वानरप्रेरितैः । उपलक्षणं चैतत् । भूमेरपि पुष्पोपहाराः पुष्पवत्त्वो यस्यां सा । तत्र तदा दुर्गमा कुत्रचिदा । प्रतिषेधिनः दुर्निवेशा दुष्प्रवेशा ॥ १४ ॥ १५ ॥

१६-१७] त्रि० टी०—कालरात्री संहारराात्रिः ॥ १६ ॥ १७ ॥

रा० टी०—सेति । हरिराक्षसहारिणी सा निशा कालरात्रीव भूतानां दुरतिक्रमा बभूव ॥ १६ ॥

गो० टी०—सेति । कालरात्रिः भीमरात्रिः । रात्रि भीमरात्रिरिति सर्वप्राणिभयावहेत्युक्तेः । कल्पिता । सती । कालरात्रिश्च वैरजी गणनायिकेत्युक्तेः ॥ १६ ॥

रा० टी०—तत इति । तमसि संघट्टाः ते राक्षसाः शस्त्रवृष्टिभिः राममेव अभ्यवर्तन्त ॥ १७ ॥

गो० टी०—तत इति । संघट्टाः संमिलिताः ॥ १७ ॥

१८] त्रि० टी०—उद्वर्ते प्रलयकाले ॥ १८ ॥

रा० टी०—तेषामिति । आपततां तेषां रक्षसां शब्दः उद्वर्ते प्रलयकाले सत्त्वानां सङ्घातानां स्वन इव अभवत् ॥ १८ ॥

गो० टी०—तेषामिति । उद्वर्ते अभिवर्तः प्रलय इति ॥ १८ ॥

१९] त्रि० टी०—षड्भिः षड्भिः । एकैकमित्यर्थः ॥ १९ ॥

रा० टी०—तेषामिति । तेषां रक्षसां मध्ये यो यो निशाचरस्तं तं रामः [illegible] ॥ १९ ॥

---

१ मवेति गो. पाठः । २ नद्योघा इति गो. पाठः । ३ प्रेति गो. पाठः । ४ वेणिति गो. पाठः । ५ ॥ ११ ॥ १२ ॥ इति गो. पाठः । ६ स बभौ अत्र निरस्त इति रा. पाठः । ८ अतीति गो. पाठः । ९ वीरो [illegible] । १० [illegible] । ११ प्रभुतमिश्रे इति गो. पाठः । १३ [illegible] इति रा. पाठः ।

[illegible] वरः । वज्रदंष्ट्रः शुकश्चोभौ सारणश्च ॥
ते तु रामेण बाणैः तीक्ष्णाग्रैः ताडिताः । युद्धादपसृतास्तत्र सावशेषायुषोऽभवन् ॥
[illegible] । दिशश्चकार विमलाः प्रदिशश्च महाद्युतिः ॥
ये त्वत्र राक्षसा वीरा रावणस्याभिमुखे स्थिताः । तेऽपि नष्टाः समालोक्य पतङ्गा इव पावकम् ॥
सुवर्णपुङ्खैर्विशिखैः संपतद्भिः समन्ततः । बभूव रजनी चित्रा खद्योतैरिव शारदी ॥
राक्षसानां च निनदैर्वीराणां चैव निःस्वनैः । सा बभूव निशा घोरा भूयो घोरतरा भवत् ॥
तेन शब्देन महता महद्धेन समन्ततः । त्रिकूटः कन्दरः कीर्णः प्रव्याहरदिवाचलः ॥
गोलाङ्गूलाः महाकायास्तमसा तुल्यवर्चसः । संपरिष्वज्य बाहुभ्यां भक्षयन्रजनीचरान् ॥
अङ्गदस्तु रथे शत्रूनिहन्तुं समुपस्थितः । रावणिं निजघानाशु सारथिं च हयानपि ।
वर्तमाने तदा घोरे संग्रामे भृशदारुणे ॥]
इन्द्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः । अङ्गदेन महाबाहुस्ततस्त्रैवान्तरधीयत ॥
तत्कर्म बालिपुत्रस्य सर्वे देवाः सहर्षिभिः । तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ॥

गो० टी०–तेषामिति । तेषां राक्षसानां मध्ये षट् निशाचरान् अग्निशिखोपमैः शितैः शरैः जघान ॥ १९ ॥

२०] ति० टी०–ये पतन्त्यत्र––यज्ञशत्रुरिति । दुर्धर्ष इति यज्ञशत्रोर्विशेषणम् । महाकाय इति वज्रदंष्ट्रस्य । इमौ शुकसारणौ चारत्वेन प्रेषितावित्यामन्त्र्यावेवेति भवत । तावित्यि परस्परस्याकारत्वेन प्रेषितत्ववेमौ राजा विकृतावपि गतसंधिं परित्यज्य युद्धं मतावित्यर्थे ॥ २० ॥

गो० टी०–के ते पतित्यपक्षायामाह–यमेति । दुर्धर्षः अपितुमशक्यः । यज्ञशत्रुः । महोदरमहापार्श्वौ । महाकायः वज्रदंष्ट्रः । तौ उक्तरद्वारस्वकत्वेन पूर्वोक्तौ उभौ शुकसारणौ चेति पदं । अत्र महाकाय इति वज्रदंष्ट्रविशेषणम् । अपधृताः पलायिताः । सावशेषायुषः आयुःशेषयुक्ता इति जीवने हेतुः ॥ २० ॥ २१ ॥

२१–२४] ति० टी०–यतः सावशेषायुषः, अतो यतोपसृता अभवन् ॥ २१ ॥ २४ ॥

रा० टी०–तं इति । रामेण सर्वमर्मसु ताडिताः अत एव सावशेषायुषः विशिखाभावविशीर्णकवचाः आसन्नमरणा इत्यर्थः ते षड्राक्षसाः युद्धादपसृताः निवृत्ता अभवन् ॥ २१ ॥

रा० टी०–निशेयेति । महाश्वो रामः अग्निशिखोपमैः शरैः दिशः प्रदिशश्च विमलाश्चकार ॥ २२ ॥

गो० टी०–तमेति । महाद्युः रामः ॥ २३ ॥

रा० टी०–ये इति । रामस्य अभिमुखे स्थिताः सन्तः ये राक्षसाः तेऽपि पावकं संग्रामाग्निं पतङ्गा इव शलभा इव नष्टाः ॥ २२ ॥

गो० टी०–ये त्विति । सर्वत्र समानमेतत्पदम् ॥ २३ ॥

रा० टी०–सुवर्णेति । सुवर्णपुङ्खाः शोभनपुङ्खाः तैः तैः संपतद्भिः अभिमुखं निपतद्भिः विशिखैः रजनी बभूव ॥ २३ ॥

गो० टी०–सुवर्णपुङ्खैरिति । स्पष्टः ॥ २३ ॥

२५–२६] ति० टी०–घोरा सा निशा भूयो घोरतरा बभूव ॥ २५ ॥ २६ ॥

रा० टी०–राक्षसानामिति । घोरा निशा यद्यपि सा राक्षसनिनदादिभिर्भूयो घोरतराऽभवत् ॥ २५ ॥

गो० टी०–राक्षसानामिति । पूर्वमेव घोरा सा विशिष्य घोरतरा बभूव ॥ २५ ॥

रा० टी०–तेनेति । महता तेन शब्देन त्रिकूटाचलः प्रव्याहरन् शब्दमकरोदिव ॥ २६ ॥

गो० टी०–तेनेति । प्रव्याहरदिव प्रतिध्वनादिवेत्यर्थः ॥ २७] ति० टी०–यज्ञशत्रुमभक्षयन् ॥ २७ ॥

रा० टी०–गोलाङ्गूला इति । तमसा तुल्यवर्चसः कृष्णाः रजनीचरान् संपरिष्वज्य परिष्वङ्गेन हित्वा भक्षयन् भक्षयन्तः ॥ २७ ॥

गो० टी०–गोलाङ्गूला इति । भक्षयन् भक्षयन्त ॥ २८–२९] ति० टी० अङ्गदेन हताश्वः, अत एव हतसारथिः यस्मात् महाबलः प्राप्त इन्द्रजित् तत्रैवान्तरधीयत अन्तर्धानं गतवान् ॥ २८ ॥

रा० टी०–अङ्गद इति । बालिसूनुः इन्द्रजितं हन्तुं समुपस्थितः लोष्टहस्तः रावणिप्रभृति निजघान ॥ २८ ॥

रा० टी०–इन्द्रजिदिति । अङ्गदेन हताश्वादिः महाबलः इन्द्रजित् तत्रैवान्तरधीयत ॥ २९ ॥

गो० टी०–पूर्वप्रस्तुतप्रकृतेर्दशमुखस्य [illegible] कर्मणः–अङ्गदस्त्विति त्यादिना ॥ २८ ॥

गो० टी०–वर्तमान इति । वर्तमाने तस्मिन् इन्द्र [illegible]

रा० टी०–तदिति । बालिपुत्रस्याङ्गदस्य तत्कर्म देवाः तुष्टुवुः ॥ ३० ॥

[illegible] । ४ सहस्रव इति गो. पाठः । ५ रावणेति गो. पाठः । ६ रावणेति गो. पाठः ।

[illegible] सर्वभूतानि विदुस्त्रिभुवनं तथा पुरे । [illegible]

तदा महर्षयः कपयः समुपेत्यविभीषणाः । साधुसाध्विति संहृष्टा वचनं प्रत्यपूजयन् ॥ ३१ ॥

इन्द्रजिन्तु तदानेनै निर्जितो भीमकर्मणा । संयुगे दारुणेनाथ क्रोधं चक्रे सुदारुणम् ॥ ३२ ॥

[एतस्मिन्नन्तरे रामो वानरान्वाक्यमब्रवीत् । सर्वे भवन्तस्तिष्ठन्तु कपिराजेन संगताः ॥

स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् । भवतामपि सर्वेषां कालेन सुसमागतः ॥

अद्यैव क्षमितव्यं मे भवन्तो विगतज्वराः ।]

सोऽन्तर्धानगतः पापो रावणी रणकर्शितः । ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्च्छितः ॥ ३३ ॥

अदृश्यो निशितान्बाणान्मुमोचाशनिसंनिभान् । रामं च लक्ष्मणं चैव घोरैर्नागमयैः शरैः ॥ ३४ ॥

विभेद समरे क्रुद्धः सर्वगात्रेषु राघवौ । मायया संवृतस्तत्र मोहयन्राघवौ युधि ॥ ३५ ॥

अदृश्यः सर्वभूतानां कूटयोधी निशाचरः । बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ ॥ ३६ ॥

तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः । सहसाभिहतौ वीरौ तदा मेदन्त वानराः ॥ ३७ ॥

प्रकाशरूपस्तु यदा न शक्तस्तौ बाधितुं राक्षसराजपुत्रः ।

मायां प्रयोक्तुं समुपाजगाम बबन्ध तौ राजसुतौ दुरात्मा ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिय आदिकाव्ये युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

गो० टी०–तदिति । पूजनार्हस्य स्तुत्यर्हस्य ॥ ३० ॥

३०–३५] ति० टी०–अत इन्द्रजितो युधि प्रभावं विदुः, तस्तेनाक्षदेन तमिन्द्रजितं प्रपूर्वितं दृष्ट्वा महात्मानं तमक्षदं दृष्ट्वा तुष्टाः ॥ ३०–३५ ॥

३६] ति० टी०–शरबन्धेन शरपरिणतनागपाशबन्धेन । यं शरबन्धो भ्रातृकृष्णान्त्यदिनेषु इत्यये निरूपयिष्यामः ६३

रा० टी०–प्रभावमिति । यस्येन्द्रजितः प्रभावं सर्वभूतानि विदुः ततः तं महात्मानमतिप्रयत्नवन्तमिन्द्रजितं तेनाक्षेन प्रपूर्वितं दृष्ट्वा तुष्टाः वानरादयो बभूवुरिति शेषः ॥३१॥

गो० टी०–प्रभावमिति । ते तानि त्रिकूटयस्थ आर्षः । महात्मानं महावीर्यम् तेन अक्षेन प्रपूर्वितं पराजितम् दृष्ट्वा तुष्टाः ॥ ३१ ॥

रा० टी०–तत इति । शत्रुं पराजितं दृष्ट्वा कपयः साधुसाध्विति नेदुः ॥ ३२ ॥

गो० टी०–तत इति । स्पष्टः ॥ ३२ ॥

रा० टी०–इन्द्रजितेति । अनेनाक्षेन निर्जित इन्द्रजिन्नाम्नः क्रोधं चक्रे ॥ ३३ ॥

गो० टी०–इन्द्रजितेति । स्पष्टः ॥ ३३ ॥

रा० टी०–स इति । रणकर्शितो यो रावणिः अन्तर्धानगतः स रावणिः अदृश्यः सन् निशितान् बाणान् मुमोच । शरबन्धश्लोक एकान्वयी ॥ ३४ ॥

गो० टी०–एतस्मिन्नित्यर्धम् ॥ ३४ ॥

गो० टी०–सर्व इत्यर्धम् ॥ ३५ ॥ ३६ ॥

गो० टी०–स इति । अन्तर्धानगतः अन्तर्धानविद्यां प्राप्तः ३७

रा० टी०–राममिति । रामं लक्ष्मणं च राघवौ नागमयैः शरैः तूर्णं रावणिः सर्वगात्रेषु विभेद भेदाद्वकूल्यापारं चकार ॥ ३५ ॥

गो० टी०–स इति । सर्वगात्रेषु सर्वावयवेषु ॥ ३८ ॥

रा० टी०–माययेति । मायया संवृतः अत एव सर्वभूतानामदृश्यः कूटयोधी कपटयोद्धा निशाचर इन्द्रजित् शरबन्धेन बबन्ध । सार्धश्लोक एकान्वयी ॥ ३६ ॥ ३७ ॥

गो० टी०–माययेति । मायया संवृतः मायया युक्तः । अत एव अदृश्यः कूटयोधी कपटयोधी राघवौ रघुकुलौद्भवौ रामलक्ष्मणौ शरबन्धेन शररूपबन्धकेन बबन्ध । वैष्णवनागविना नागमयत्वम् वैष्णवास्त्रेण ब्रह्मणत्वम् ॥ ३६ ॥

३७] ति० टी०–अभिहतौ दृष्टौ ॥ ३७ ॥

रा० टी०–तावितीति । तौ रामलक्ष्मणौ अभिहतौ तानिन्द्रजित्प्रयत्नं प्राप्तवन्तौ तौ रामलक्ष्मणौ वानराः भेदन्त ॥ ३८ ॥

गो० टी०–तौ तेनेति । स्पष्टं ॥ ३७ ॥

३८] ति० टी०–प्रकाशरूपादि । यदा प्राजगामोपचक्रमे । [illegible] नागपाशबन्धनसमर्थं [illegible] विरोधेनानि [illegible] राक्षसराजपुत्रः [illegible] ॥ ३८ ॥

[illegible] ॥ ४४ ॥

---

१ प्रपूर्वितमिति गो. पाठः । २ तेनेति गो.पाठः । ३ एतदादि सार्धं श्लोकद्वयमेको. [illegible] ४ [illegible] ५ रामलक्ष्मणौ इति गो. पाठः । ६ रामेति गो. पाठः । ७ राक्षस इति गो. पाठः । ८ निहतावितिगो. पाठः । ९ भेदन्त

पञ्चचत्वारिंशः सर्गः ।

शरपाशबद्धौ सवीरनादमन्योः क्रूरपाशेन्द्रजिता विद्धौ राघवौ वीक्ष्यातौ हरयो विषादं परमं जग्मुः ।

स तस्य गतिमन्विच्छन्राजपुत्रः प्रतापवान् । दिदेशातिबलो रामो दश वानरयूथपान् ॥ १
द्वौ सुषेणस्य दायादौ नीलं च पनवगाधिपम् । अङ्गदं वालिपुत्रं च शरभं च तरस्विनम् ॥ २
द्विविदं च हनूमन्तं सानुप्रस्थं महाबलम् । ऋषभं चर्षभस्कन्धमादिदेश परंतपः ॥ ३
ते संप्रहृष्टा हरयो भीमानुद्यम्य पादपान् । आकाशं विविशुः सर्वे मार्गमाणा दिशो दश ॥ ४
तेषां वेगवतां वेगमिषुभिर्वेगवत्तरैः । अन्वेत्परमर्षेण वारयामास रावणिः ॥ ५
तं भीमवेगा हरयो नाराचैः क्षतविक्षताः । अन्धकारे न ददृशुर्मेघैः सूर्यमिवावृतम् ॥ ६
रामलक्ष्मणयोरेव सर्वदेहभिदः शरान् । भूशमावेशयामास रावणिः समितिंजयः ॥ ७
निरन्तरशरीरौ तु तावुभौ रामलक्ष्मणौ । क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः ॥ ८
तयोः क्षतजमार्गेण सुस्राव रुधिरं बहु । तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ ॥ ९
ततः पर्यन्तरक्ताक्षो भिन्नाञ्जनचयोपमः । रावणिर्भ्रातरौ वाक्यमन्तर्धानगतोऽब्रवीत् ॥ १०

रा० टी०–मायोत्पादने हेतुं वदन् तदेवाह—प्रकाशेति । राक्षसराजपुत्रः प्रकाशरूपः प्रकटशरीरः सन् नौ रामलक्ष्मणौ बाधितुमभिभवितुं यदा न शक्तः तदा मायां प्रयोक्तुं कर्तुं समुपाजगाम आरेभे अत एव वचनं बन्धनानुकूलव्यापारं चकार ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

गो० टी०–मायाप्रयोगः किमर्थस्तत्राह—प्रकाशेति । समुपाजगाम उपचक्रमे । वचनं च । महात्मा महाशरीरः ॥३९॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे सप्तकाण्डात्मके रामायणशिरोमणिव्याख्याने युद्धकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

१–४] ति० टी०–उक्तस्यैव राघवयोरिन्द्रजित्कृतबन्धनस्य प्रपञ्चः—स इति । तस्येन्द्रजितो गतिमवस्थानप्रदेशमन्विच्छन्ज्ञातुमिच्छन्दिदेशादिदेश ॥ १–४ ॥

रा० टी०–इन्द्रजित्कर्तृकमायारब्धानन्तरकालिकं रामलक्ष्मणसान्त्वमाह–स इत्यादिभिः । तस्येन्द्रजितो गतिं स्थितिदेशं अन्विच्छन् ज्ञातुमिच्छन् रामः दशवानरयूथपान् दिदेश अन्वेषयितुमाज्ञापयामास ॥ १ ॥

गो० टी०–अथ नागपाशबन्धः पञ्चचत्वारिंशे–स तस्येत्यादि । गम्यत इति गतिः स्थानम् ॥ १ ॥

रा० टी०–दशानां नामनिर्देशमाह–द्वाविति । सुषेणदायादप्रभृतीन् आदिदेश दायादौ पुत्रौ 'दायादो पुत्रबान्धवौ' इत्यमरः । शेषमुत्तरकाण्डे ॥ २ ॥ ३ ॥

गो० टी०–तमेव दशं दर्शयति–द्वाविति । दायादौ पुत्रौ दायादो ज्ञातावन्धवाविति ॥ २ ॥ ३ ॥

[illegible] इति [illegible] आजग्मुः हरयः भीमान् पादपा[illegible] ॥ ४ ॥

गो० टी०–त इति । मार्गमाणाः मार्गितुमिच्छन्तः ॥ ४ ॥

५–६] ति० टी०–परमास्त्रेण ब्रह्मास्त्रेण मन्त्रितेन वारयामास ॥ ५ ॥ ६ ॥

रा० टी०–तेषामिति । अन्वेत् रावणिः तेषां वानरेषां शीघ्रगतिं परमास्त्रेण ब्रह्मास्त्रमन्त्रेण अभिमन्त्रितैरिषुभिः वेगवत्तरैरिषुभिर्वारयामास ॥ ५ ॥

गो० टी०–तेषामिति । परमास्त्रैरिषुभिः परमास्त्रमन्त्रितैरिषुभिः ॥ ५ ॥

रा० टी०–तमिति । नाराचैः बाणविशेषैः क्षतविक्षतैः अन्याधिकरणयुक्ताः हरयः मेघैराहतं सूर्यमिव अन्धकारे तं रावणिं तं न ददृशुः ॥ ६ ॥

गो० टी०–तमिति । स्पष्टः ॥ ६ ॥

७] ति० टी०–भावेशयामास प्रवेशयामास ॥ ७ ॥

रा० टी०–रामेति । सर्वेषां देवादीनां देहं भिन्दन्ति तान् शरान् रामलक्ष्मणयोरुपरि रावणिरावेशयामास प्रवेशयामास कूटव्यापारं चकार ॥ ७ ॥

गो० टी०–रामेति । भृशं सर्वदेहभिदः शरान् रामलक्ष्मणयोरधिकरणयोरावेशयामास ॥ ७ ॥

८] ति० टी०–निरन्तरशरीरौ तु कृतावित्यपि शेषः ॥ ८ ॥

रा० टी०–निरन्तरेति । इन्द्रजिता शरतां गतैः प्राप्तैः पन्नगैः रामलक्ष्मणौ निरन्तरशरीरौ उपरिभागे अन्तररहितदेहौ कृतौ ॥ ८ ॥

गो० टी०–निरन्तरेति । निरन्तरशरीरौ कृतावित्यपि शेषः । शरतां शरत्वं नैपथ्यादिना कृत्रिमत्वम् ॥ ८ ॥

९–१०] ति० टी०–क्षतजमार्गेण क्षतेन कर्मणा जातो मार्गस्तेन ॥ ९ ॥ १० ॥

रा० टी०–तयोरिति । क्षतजमार्गेण रुधिरविषयकविक्षरण [illegible]

युध्यमानमनालक्ष्यं शक्रोऽपि त्रिदशेश्वरः । द्रष्टुमास्तादितुं वापि न शक्तः किं पुनर्नरः ॥ ११ ॥
प्राप्तोपतिष्ठजालेन राघवौ कङ्कपत्रिणा । एष दोषपरीतात्मा नयामि यमसादनम् ॥ १२ ॥
एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ । निर्विभेद शितैर्बाणैः प्रजहर्ष ननाद च ॥ १३ ॥
भिन्नाञ्जनचयश्यामो विस्फार्य विपुलं धनुः । भूय एव शरान्घोरान्विससर्ज महामृधे ॥ १४ ॥
ततो मर्मसु मर्मज्ञो मज्जयन्निशिताञ्शरान् । रामलक्ष्मणयोर्वीरो ननाद च मुहुर्मुहुः ॥ १५ ॥
बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि । निमेषान्तरमात्रेण न शेकतुरवेक्षितुम् ॥ १६ ॥
ततो विभिन्नसर्वाङ्गौ शरशल्याचितौ कृतौ । ध्वजाविव महेन्द्रस्य रज्जुमुक्तौ प्रकम्पितौ ॥ १७ ॥
तौ संप्रचलितौ वीरौ मर्मभेदेन कर्शितौ । निपेततुर्महेष्वासौ जगत्यां जगतीपतौ ॥ १८ ॥

रामलक्ष्मणयोरपि बहु रुधिरं स्रस्राव मायया सावयामास अन्तर्भावितणिजर्थः स्रवति. अत एव तौ रामलक्ष्मणौ पुष्पितौ किंशुकौ पलाशाविव प्रकाशेते ॥ ९ ॥

गो० टी०—लक्षयेति । धनेन जातो मार्गः क्षतजमार्गः । भवं, न भूतमहाभूतसंघातो देहोऽस्य परमात्मनः । न तस्य प्राकृतो मूर्तिमांसमेदोऽस्थिमज्जेत्यादिभिः रामलक्ष्मणयोर्दिव्यविग्रहस्यापि प्राकृतत्वप्रतिपादनं रुधिरोद्गम इति चेदवादुः । वस्तुतोऽमी रुधिरादयोऽपि मनुष्यजातावनुरोधेन नट इव रुधिराणि दर्शयतः स्म । तत्त्वं निर्बन्धेन मनुष्यभावं भावयतः किं प्रयोजनं अत्र । अवतीर्य मनुष्यजातावनुरोधेन जात एवं मन्येन नायं मर्तुः किं तु देवः तेन तद्वधस्माकं न शक्यमनुष्ठातुं धर्मानिति सर्वथा मनुष्यभावकथां तु महाजनानुज्ञानदर्शनेन स्वयमनुष्ठास्यते लोक इति रहस्यम् । रावणस्य मनुष्येत्वबध्यत्वेन तद्वधसंकल्पादुः । नारायणकवचकृतत्राणस्थानं तु धर्मनिष्ठानामपि दर्शयितव्यमिति विवक्षितं च अवतीर्णेति लौकानां प्रदर्शनायेति एवं सीतादिष्वपि द्रष्टव्यम् ॥ ९ ॥

रा० टी०—तत इति । पर्यन्तरक्ताक्षः अरुणप्रान्तविशिष्टनलिनिभिः नलिनीपत्रसदृशैः विशालैरक्षिभिः अन्तर्भावितणिजर्थः ॥ १० ॥

गो० टी० तत इति । पर्यन्तरक्ताक्ष इत्यनेन ईषत्कोपोक्तेः ॥ १० ॥

११] रा० टी०—अनालक्ष्यमशक्यदर्शनम् ॥ ११ ॥

रा० टी० तदुपकारमाह—युध्यमानमिति । अनालक्ष्यं मम चक्षुरादिनेन्द्रियेण लक्ष्यते अन्तर्भावितणिजर्थः, मां शक्रोऽपि द्रष्टुमास्तादितुं ॥ न शक्तः तर्हि पुनर्नरः किम् ॥ ११ ॥

गो० टी० युद्धयमानमिति । अनालक्ष्यं यथा भवति तथा युद्धयमानं मां शक्रस्त्रिदशेश्वरोऽपि द्रष्टुं मायया बलान्तरेण आस्तादितुं वापि न शक्तः । किं पुनर्नरो मानुषावित्यर्थः ॥ ११ ॥

१२-१५] रा० टी०—प्राप्तोपतिष्ठजालेनेति श्लोकः १२-१५

रा० टी०—प्राप्तोपतिष्ठजालेन । कोपपरीतात्मा एषोऽहम् इन्द्रजालेन प्राप्तौ पुनां यमसादनं नयामि ॥ १२ ॥

गो० टी०—प्राप्तोपतिष्ठजालेन । राघवाविति संबोधनम् । अत्रापि युवामिति द्विवचनान्ततया विपरिणम्यानुषञ्जनीयम् । कङ्कपत्रिणा कङ्कपक्षवता एष इत्यस्यवधानद्योतनाय ॥ १२ ॥

रा० टी०—एवमिति । रामलक्ष्मणौ एवमुक्त्वा बाणैः निर्विभेद निर्भेदानुकूल्यापारं चकार ॥ १३ ॥

गो० टी०—एवमिति । धर्मज्ञाविति । शब्दवेधयोग्यासहिष्णू इत्यर्थः ॥ १३ ॥

रा० टी०—भिन्नेति । विपुलं महद्धनुः विस्फार्य शरान् भूयो विससर्ज ॥ १४ ॥

गो० टी०—भिन्नेति । अञ्जनोपरिप्रदेशस्य दूरत्वसंभवात् भिन्नेत्युक्तम् ॥ १४ ॥

रा० टी०—तत इति । रामलक्ष्मणयोर्मर्मसु शरान् मज्जयन् तदनुकूल्यापारं कुर्वन् मुहुर्मुहुर्ननाद ॥ १५ ॥

गो० टी०—तत इति । स्पष्टः ॥ १५ ॥

१६-१८] ति० टी०—न शेकतुरवेक्षितुं नाहशावित्थं स्थितौ मनुष्यत्वनाटनायेति बोध्यम् ॥ १६-१८ ॥

रा० टी०—बद्धाविति । शरबन्धेन बद्धौ तौ रामलक्ष्मणौ अवेक्षितुम् आत्मानं दर्शयितुं न शेकतुः सामर्थ्यं ददतुः अन्तर्भावितणिजर्थः, एतेन रामस्य मर्यादापालकत्वं ध्वनितम् । तुशब्द एवार्थे ॥ १६ ॥

गो० टी०—बद्धौ त्विति । निमेषान्तरमात्रेण निमेषावकाशमात्रेण । क्षणमात्रेणत्यर्थः ॥ १६ ॥

रा० टी०—तत इति । शरशल्याभ्यां बाणविशेषाभ्याम् आचितौ व्याप्ताविव अत एव विभिन्नसर्वाङ्गाविव अत एव प्रकम्पितौ स्वसेनाप्रकम्पनकर्तारौ रामलक्ष्मणौ रज्जुमुक्तौ रज्जुभिः रहितौ भूमौ स्थापितावित्यर्थः, महेन्द्रस्य ध्वजाविव कृतौ इवाविस्यर्थः । इवशब्दितयान्वयौ ॥ १७ ॥

रा० टी०—तावितीति । संप्रचलितौ सर्वेषां बुद्धिचालकौ तौ रामलक्ष्मणौ मर्मभेदनकर्शिताविव अस्तौ जगत्यां निपेततुः नाटकृत्वात्प्यादर्शनेन वानराभिप्रायमासतुः ॥ १८ ॥

गो० टी०—तत इति । शरशल्याचितौ शराग्रप्रोतौ कृतौ रज्जुमुक्तौ शुष्करज्जू अत एव प्रकम्पितौ महेन्द्रस्य ध्वजाविव कृतौ, जगत्यां भूमौ जगतीपतौ भूपतौ ॥ १७ ॥ १८ ॥

---

१ प्राप्तोपतिष्ठेति गो. सू. पाठः । २ भूय इति गो. पाठः । ३ बद्धौशितुमिति गो. पाठः । ४ [illegible]

तौ वीरशयने वीरौ शयानौ रुधिरोक्षितौ । शरवेष्टितसर्वाङ्गावार्तौ परमपीडितौ ॥ १९
तावविद्धं तयोर्मध्ये नाभूदङ्गुलमन्तरम् । नानिर्विण्णेन चाध्वस्तमाकराग्रादभिद्यतः ॥ २०
तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा । असृक्समुक्षमतुस्तीव्रं जलं प्रस्रवणाविव ॥ २१
पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः । क्रोधादिन्द्रजिता येन पुरा शक्रो विनिर्जितः ॥ २२
रुक्मपुङ्खैः प्रसन्नाग्रैर्जोगतिभिराशुगैः । नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि ॥
विव्याध वत्सदन्तैश्च सिंहदंष्ट्रैः क्षुरैस्तथा ॥ २३
स वीरशयने शिश्ये ऽविज्यमाविध्य कार्मुकम् । भिन्नमुष्टिपरीणाहं त्रिनतं रुक्मभूषितम् ॥ २४

१९] ति० टी०—वीरशयने युद्धभूमौ शरवेष्टितसर्वाङ्गौ शरभूतसर्पवेष्टितसर्वगात्रौ ॥ १९ ॥

रा० टी०—ताविति । वीरशयने शयानौ रुधिरेण मायापातितरक्तेन उक्षितौ सिक्तौ तौ भ्रातरौ वि परमपीडितावित्यत्र भूवचनरिति शेषः । आर्तपरमपीडितशब्दौ आचारक्विबन्तप्रकृतिककर्तृक्विबन्तौ ॥ १९ ॥

गो० टी०—ताविति । वीराः शेरतेऽस्मिन्निति वीरशयनं रणभूमिः शरतल्पं वा शरवेष्टितसर्वाङ्गौ शरभूतसर्पवेष्टितसर्वाङ्गौ आर्तौ मनःपीडावन्तौ परमपीडितौ शारीरकपीडावन्तौ । अभूतामिति शेषः ॥ १९ ॥

२०] ति० टी०—अविद्धं वेधरहितम् । अङ्गुलमङ्गुलप्रमाणमन्तरमवकाशो नाभूत् । आकराग्रात्करायमभिव्याप्याध्वस्तमश्लोभितम् । 'अस्तब्धम्' इति पाठे वेधावत् । अनिर्विण्णैर्बाणैरनिर्विण्णमविदारितं चाङ्गं नाभूत् ॥ २० ॥

रा० टी०—नेति । अन्तरं प्राकृतविलक्षणमित्यर्थः, भल एव अविद्धं नित्यं भेदनसंसर्गरहितमानिर्विण्णं नित्यं स्वजातुरागि तयोर्गात्रम् आकराग्रात् करायमभिव्याप्य अभिव्याप्तः अङ्गैः आस्तब्धं वस्तुतः ईषदपि स्तुटितम् अङ्गुलम् अङ्गुलपरिमितमपि न बभूव न स्फुटं न बभूव ॥ २० ॥

गो० टी०—न ह्रीति । अङ्गुलम् अङ्गुलिप्रमाणम् । अथवा अङ्गुलिरङ्गुल मिति त्रिकाण्डीस्मरणात् अङ्गुलिप्रमाणवाच्यङ्गुलशब्दोकारान्तोप्यस्ति । तयोर्गात्रमङ्गुलमात्रेप्यवकाशे अविद्धं नाभूदिति भावः । यद्वा तयोर्गात्रम् अङ्गुलम् अङ्गुलसंबन्ध्यन्तरमवकाशः । आकराग्रात्करायपर्यन्तम् । अभिव्याप्तैः सर्पैरुपलक्षितैः । आविद्धं न बभूव । अस्तब्धम् अनिर्भिन्नं च न बभूव । अनिर्भिन्नं च न बभूव ॥ २० ॥

२१] ति० टी०—प्रस्रवणौ प्रस्रवणाख्यपर्वतौ इवेति॥ २१ ॥

रा० टी०—तावितिः । क्रूरेण रक्षसा निहतौ ताडितौ तौ रक्तकृताक्षतप्रमवक्षतैः प्रस्रवणौ जलमिव स्रवन्तौ पपात ॥ २१ ॥

गो० टी०—ताविति । तीव्रम् अत्यन्तम् । प्रस्रवणौ

२२] ति० टी०—इन्द्रजिदेव कृतस्तमाह—येनेति

रा० टी०—पपातेति । येन पुरा शक्रो विनिर्जितस्तेन जिता मार्गणैर्बाणैर्मर्मस्वप्यनिद्धो रामः प्रथमं पपात । रामस्य मर्यादापालकत्वं सचित्तं प्रथममित्यनेन मत्कर्तृकदर्शनमन्तरा लक्ष्मणो न पतिष्यतीति हेतुर्व्यञ्जितः ॥

गो० टी०—पपातेति । इन्द्रजिदेव निर्वक्ति—येनेति ।

२३] ति० टी०—रजोगतिभिर्वायुना विस्मार्यमाणवीर्यैः संपत्तिः । अर्धनाराचैरर्धभागे नाराचवद्भिः लिकैरञ्जल्याकारवद्भिः वत्सदन्तादयस्तत्तदाकाराः ॥ २३

रा० टी०—बाणस्वरूपं निर्विशनाह—रुक्मेति । प्रसन्नाग्राणि अग्राणि येषां रजसामिव गतिः रन्ध्ररहितेऽपि येषां नैर्नाराचैः बाणविशेषैः अर्धनाराचैः अर्धभागे नाराचरूपैश्च अञ्जलिकैः अञ्जलिसदृशसुखेधत्सदन्तैर्वत्सदन्ताकारैः भल्लैर्विध्याध सार्धश्लोक एकान्वयी ॥ २३ ॥

गो० टी०—नाराचप्रयोगानन्तरं केवलशरैरपि विध्यत्याह—रुक्मपुंखैरित्यादिना । प्रसन्नाग्रैः उन्मुद्रागैरित्यर्थः प्रदर्शकाशस्थत्वेनाधोगतिभिः आशुगैः वक्ष्यमाणविशेषैः नाराचैः ऋजुवृत्ताग्रैः अर्धनाराचैः मध्ये भिन्ननाराचाकृतिभिः परश्वग्रैः अञ्जलिकैः अञ्जलिसदृशाग्रैः वत्सदन्तैः वत्सदन्तसदृशाग्रैः सिंहदंष्ट्रैः सिंहदंष्ट्रासदृशाग्रैः क्षुरैः क्षुराग्रैः अर्धचन्द्रैश्च ध्याहार्यम् ॥ २३ ॥

२४] ति० टी०—आविध्य इषुकल्पा। भिन्नं सुष्टिपरीणाहं सुष्टिप्रदेशो सुष्टिग्रहणं वा यस्य । त्रिषु स्थानेषु त्रिनतम् [illegible]

रा० टी०—स इति । अविज्यं ज्यारहितमित्यर्थः । प्राकृतविलक्षणः सुष्टिपरीणाहः सुष्टिग्रहणदेशो यस्य [illegible] देशेषु नतं कार्मुकम् आविध्य दृष्ट्वा वीरशयने [illegible] चिन्तयेत्ते विषये तस्थौ ॥ २४ ॥

गो० टी०—स इति । भिन्नसुष्टिपरीणाहं विभिन्नसुष्टि[illegible] भिन्नतन्त्रिषु स्थानेषु परीणाहेऽपि न नतम् । [illegible] पङ्खवन्तम् । त्रिषु अग्रमूलमध्यभागेषु नतम् । [illegible] पङ्खः आदाय व्यवस्थाप्य । वीरशयने रणभूमौ शिश्ये [illegible]

बाणपातान्तरे रामं पतितं पुरुषर्षभम् । स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत् ॥ २५ ॥
रामं कमलपत्राक्षं सैरण्यं रणतोषिणम् । शुशोच भ्रातरं दृष्ट्वा पतितं धरणीतले ॥ २६ ॥
हरयश्चापि तं दृष्ट्वा संतापं परमं गताः । शोकार्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचनाः ॥ २७ ॥
बद्धौ तु तौ वीरशये शयानौ ते वानराः संपरिवार्य तस्थुः ।
समागता वायुसुतप्रमुख्या विषादमाताः परमं च जग्मुः ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।

नागपाशबद्धौ राघवौ वीक्ष्य शत्रुं जिघांसवोऽपि हत्वो नागस्थान् विभीषणस्तथापि मायाच्छन्नमिन्द्रजितं दृष्ट्वा भयग्रस्तं सुग्रीवं मायमुद्वेगकालो न भेतव्यमित्याश्वासयदिदेश इन्द्रजिति राघवौ मृतौ ज्ञात्वा सहर्षं पुरं प्रविश्य पित्राभिनन्दितव्य ।

ततो यां पृथिवीं चैव वीक्षमाणा वनौकसः । ददृशुः संततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १ ॥
दृष्ट्वैवोपरते देवे कृतकर्मणि राक्षसे । आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥ २ ॥
नीलश्च द्विविदो मैन्दः सुषेणः कुमुदोऽङ्गदः । तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ ॥ ३ ॥
अचेष्टौ मन्दनिःश्वासौ शोणितेन परिप्लुतौ । शरजालाचितौ स्तब्धौ शयानौ भरतर्षभौ ॥ ४ ॥

२५-२८] ति० टी०—बाणपातान्तरे शरतल्पमध्ये २५-२८ इति श्रीराजारिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०—बाणेति । बाणपातान्तरे शरतल्पे ॥ २५ ॥

गो० टी०—बाणेति । बाणपातान्तरे शरतल्पे ॥ २५ ॥

रा० टी०—रामेति । रामं पतितं निश्चलतया स्थितमित्यर्थः । रामं दृष्ट्वा अशोच ॥ २६ ॥

गो० टी०—रामेति । शरजालपरिक्षतम् । बन्धः क्षतजैरिति द्वयमत्र शरकायमुच्यते ॥ २६ ॥

रा० टी०—हरय इति । ते रामं दृष्ट्वा परमं संतापं गताः अत एव शोकार्ताः हर्यः चुक्रुशुः ॥ २७ ॥

गो० टी०—हरय इत्यर्धम ॥ २७ ॥

रा० टी०—बद्धाविति । बद्धौ स्वाज्ञायां निश्चिन्वद्भिरबद्धौ तौ रामलक्ष्मणौ भ्रातरौ राक्षसस्वरूपाद्विनिर्गतासीनाः वायुपुत्रप्रमुख्याः परिवार्य तस्थुः परमं विषादं जग्मुश्च ॥ २८ ॥

इति श्रीमद्राजारिरामायणव्याख्याने रामायणतिलकेऽयं युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०—बद्धाविति । आद्यौ नागपाशबद्धौ । अथ बद्धौ तु तौ वीरौ संपरिवार्य वायुसुतादयो वानरास्तस्थुः । विषादं दुःखं जग्मुश्चेत्यन्वयः ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीरीटाख्याने युद्धकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

१] ति० टी०—यां पृथिवीं च वीक्षमाणाः अतिभयादिति शेषः । संततौ व्याप्तौ ॥ १ ॥

रा० टी०—वानराणां वृत्तान्तमेवाह—तत इत्यादिभिः । वीक्षमाणाः राक्षसादेशेनावलोकयन्तो वनौकसो वानराः बाणैः सन्ततौ व्याप्तौ रामलक्ष्मणौ ददृशुः ॥ १ ॥

गो० टी०—अथ पूर्वसर्गोक्तमनुवदति—तत इत्यादि । याम् आकाशम् । सन्ततौ व्याप्तौ ॥ १ ॥

२-४] ति० टी०—देवे इन्द्रे दृष्ट्वेव कृतकर्मणि तस्मिन् राक्षस उपरते सति ॥ २-४ ॥

रा० टी०—दृष्ट्वेति । अदेवे देवविरोधिनि कृतकर्मणि राक्षसे उपरते बाणप्रक्षेपात् किंचिद्विरते सति दृष्ट्वा रामामिति शेषः स देशं ससुग्रीवो विभीषणः आजगाम ॥ २ ॥

गो० टी०—दृष्ट्वेति । दृष्ट्वा उपरते देव इव स्थिते राक्षसे । कृतकर्मणि कृतशरवर्षरूपकर्मणि सति तं देशं रामस्थानम् ॥२॥

रा० टी०—नील इति । हनुमता सार्धं नीलप्रभृतयः अचेष्टौ व्यापाररहितौ मन्दनिःश्वासौ तत्त्वेन प्रतीयमानौ शरजालाचितौ मायिकबाणसमूहावृतौ शरतल्पगाविव स्तब्धौ निश्चलतया स्थितौ अत एव शयानाविव शरतल्पगशयनश्रद्धावाचारक्रियन्तौ राघवौ अन्वशोचन्त । श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०—नीलेति । नीलाद्यैः सुग्रीवान्तैर्वानरैर्मेवागताः ॥३॥

गो० टी०—अचेष्टावित्यादिचतुःश्लोक्येकान्वया । अचेष्टावत एव स्तब्धौ निश्चलौ । मध्ये मध्ये मन्दनिःश्वासौ मध्ये मध्ये निश्चेष्टौ । कदाचिदुत्पतितुं निःश्वसन्तौ कदाचिन्मूर्च्छ-

१ पतितमिति गो. पाठः । २ शरतल्पपरिच्छुतमिति गो.पाठः । ३ अचेतनत गो. पाठित । ४ बद्धौ पतितावित्ति गो.पाठः । ५ शोणितौघेति गो. पाठः । ६ [illegible] ७ शोणितौघेति गो. पाठः । ८ [illegible]

निःश्वसन्तौ यथा सर्पौ निर्विषौ दीनचेष्टितौ । रुधिरस्रावदिग्धाङ्गौ तपनीयाविव ध्वजौ ॥ ५
तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ । यूथपैः स्वैः परिवृतौ बाष्पव्याकुललोचनैः ॥ ६
सप्तर्क्षौ पतितौ दृष्ट्वा शरजालसमन्वितौ । बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥ ७
अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः । न चैनं मायया छन्नं ददृशू रावणिं रणे ॥ ८
तं तु मायाप्रतिच्छन्नं माययैव विभीषणः । वीक्षमाणो ददर्शाग्रे भ्रातुः पुत्रमवस्थितम् ॥
तमप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ ९
ददर्शान्तर्हितं वीरं वरदानाद्विभीषणः । तेजसा यशसा चैव विक्रमेण च संयुतः ॥ १०
इन्द्रजिच्चात्मनः कर्म तौ शयानौ समीक्ष्य च । उवाच परमप्रीतो हर्षयन्सर्वराक्षसान् ॥ ११
दूषणस्य च हन्तारौ खरस्य च महाबलौ । सादितौ सायकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १२
नैनौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात् । सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः ॥ १३
यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम । अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी ॥ १४
कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला । सोऽयं मूलहरो नष्टः सर्वेषां शमितो मया ॥ १५
रामस्य लक्ष्मणस्यैव सर्वेषां च वनौकसाम् । विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः ॥ १६

ष्टितौ च । अत्र पुनरुक्तयो दुःखातिरेकात् । यद्वा अवेक्षाविति श्लोकः पूर्वश्लोकेनान्वितः ॥ ४—७ ॥

५–७] ति०टी०—रुधिरस्य स्रावः प्रवाहस्तेन दिग्धाङ्गौ ५–७

रा० टी०—तदेव भङ्ग्यन्तरेणाह—निःश्वसन्ताविति । तपनीयौ स्वर्णमयौ ध्वजाविव मन्दं चेष्टितं वानराणां चेष्टा यास्यां तौ बाष्पव्याकुललोचनैः यूथपैः परिवृतौ शरजालसमन्वितौ राघवौ दृष्ट्वा सर्वे वानरा व्यथिताः बभूवुः मायया तत्रं संभवतीति मन्दनिःश्वासौ निःश्वसन्तौ यथा सर्पौ इत्यनयोर्न विरोधः । श्लोकत्रयमेकान्वयि ॥ ५–७ ॥

८] ति०टी०—मायया छन्नमेनं रावणिं वानरा न ददृशुः ॥ ८ ॥

रा० टी०—अन्तरिक्षमिति । अन्तरिक्षं सर्वा दिशश्च निरीक्षन्तो वानराः मायया छन्नं रावणिं नैव ददृशुः ॥ ८ ॥

गो० टी०—अन्तरिक्षमिति । स्पष्टः ॥ ८ ॥

९] ति० टी०—किं तु मायाप्रतिच्छन्नं तं भ्रातुः पुत्रं तत्रैव रावणिं विभीषण एव मायया ददर्श ॥ ९ ॥

रा० टी०—तमिति । विभीषणः मायाप्रतिच्छन्नं भ्रातुः पुत्रं मायया तत्कारणीभूतविद्ययैव ददर्श ॥ ९ ॥

गो० टी०—तं त्विति । माययेति । अन्तर्हितवस्तुदर्शनहेतुभूतया विद्ययेत्यर्थः ॥ ९ ॥

१०] ति० टी०—वरदानाद्ब्रह्मवरदानात्तथान्तर्धानविद्यया तिरोहितम् ॥ १० ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—तमिति । वरदानात् तिरोहितं अतएव अप्रतिमकर्माणं तमिन्द्रजितं तेजआदिभिः विभीषणो ददर्श सार्धश्लोकेनान्वयी ॥ १० ॥

गो० टी०—तमिति । अप्रतिद्वन्द्वं निःसमम् । वरदानान्तर्हितमित्यन्वयः । तेजसेत्यर्थं पूर्वेणान्वेति ॥ १० ॥ ११

११–१३] ति० टी०—आत्मनः कर्म समीक्ष्य शयानौ च समीक्ष्य ॥ ११–१३ ॥

रा० टी०—इन्द्रजिदिति । इन्द्रजित् शयानौ तौ स्वमात्मनः कर्मोवाच ॥ ११ ॥

गो० टी०—इन्द्रजिदिति । आत्मनः कर्म नागास्त्रस्वरूपम् । शयानौ तौ च वीक्षमेत्यन्वयः ॥ ११ ॥

रा० टी०—तदाकारमाह—दूषणस्येति । दूषणादिहन्तारौ रामलक्ष्मणौ सायकैर्बाणैः सादितौ हिंसितप्रायौ ॥ १२ ॥

गो० टी०—दूषणस्येति । सादितौ पश्येतेति शेषः ॥ १२ ॥

रा० टी०—तत्र हेतुमाह—नेति । इषुबन्धनात् शरास्त्रबन्धनात् इमौ न शक्यौ ॥ १३ ॥

गो० टी०—नेमाविति । समागम्य सङ्घीभूय ॥ १३ ॥

१४–१६] ति० टी०—यत्कृते यदर्थं रावणेर्निमित्तम् तदर्थेनेति यावत् । गात्रैः शयनमस्पृष्ट्वैव त्रियामा रात्रिर्याति अनिद्र एव निशाः क्षपयतीत्यर्थः ॥ १४–१६ ॥

रा० टी०—यदिति । यत्कृते यदर्थं चिन्तयानस्य मम पितुर्गात्रैः शयनं शय्यामस्पृष्ट्वैव शर्वरी रात्रिर्याति यत्कृते वर्षासु नदीव इयं लङ्का आकुला व्याकुला सः सर्वेषामस्माकं मूलहरः सैन्यादिविघातकः अत एव अनर्थः सर्वार्थनिवर्तकः अहं रामो मया शमितः । अर्धचतुष्टयमेकान्वयि ॥ १४ ॥ १५

गो० टी०—यदिति । यत्कृते यन्निमित्तम् । गात्रैः शयनमस्पृष्ट्वा चिन्तयानस्यैव मम पितुः त्रियामा याति । यत्कृते मयान्मम पिता शत्रुर्यामेऽस्तंगिरौ शमे न निवर्तीत्यर्थः ॥ १५

१ तपनीयाविति गो. पाठः । २ ददृशुरिति गो. पाठः । ३ दृष्ट्वेति गो. पाठः । ४ समाहृतानीति गो. पाठः । ५ अनेति गो. पाठः । ६ [illegible]

ऊचुस्तु तान्समान्राक्षसान्परिपक्षयतः । यूथपानपि तान्सर्वान्ताडयत्व च [illegible]
नीलं नवभिराहत्य मैन्दं द्वाविंदं तथा । त्रिभिस्त्रिभिरमित्रघ्नस्तताप [illegible] ॥ १८ ॥
जाम्बवन्तं महेष्वासो विद्ध्वा बाणेन वक्षसि । हनूमतो वेगवतो विससर्ज शरान्दश ॥ १९ ॥
गवाक्षं शरभं चैव तीव्रवेगपराक्रमौ । द्वाभ्यां द्वाभ्यां शरवेगो विव्याध युधि रावणिः ॥ २० ॥
गोलाङ्गूलेश्वरं चैव वालिपुत्रमथाङ्गदम् । विव्याध बहुभिर्बाणैस्त्वरमाणोऽथ रावणिः ॥ २१ ॥
तान्वानरवरान्भित्त्वा शरैरग्निशिखोपमैः । ननाद बलवान्तत्र महासत्त्वः स रावणिः ॥ २२ ॥
तानर्दयित्वा बाणौघैस्त्रासयित्वा च वानरान् । प्रजहास महाबाहुर्वचनं चेदमब्रवीत् ॥ २३ ॥
शरबन्धेन घोरेण मया बद्धौ रणमूर्धनि । सहितौ भ्रातरावेतौ निशामयत राक्षसाः ॥ २४ ॥
एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः । परं विस्मयमापन्नाः कर्मणा तेन हर्षिताः ॥ २५ ॥
विनेदुश्च महानादान्सर्वे ते जलदोपमाः । हतौ रामौ इति ज्ञात्वा रावणिं समपूजयन् ॥ २६ ॥
निष्पन्दौ तु तदा दृष्ट्वा भ्रातरौ रामलक्ष्मणौ । वसुधायां निरुच्छ्वासौ हतावित्यन्वमन्यत ॥ २७ ॥
हर्षेण तु समाविष्ट इन्द्रजित्समितिंजयः । प्रविवेश पुरीं लङ्कां हर्षयन्सर्वनैर्ऋतान् ॥ २८ ॥
रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते । सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत् ॥ २९ ॥

गो० टी०—कृत्स्नेति । लङ्का लङ्कास्थजनः । आकुला व्याप्ता आविलेत्यर्थः । लङ्कापक्षे रणेत्यर्थः । सर्वेषामस्माकं मूलहरः अनर्थः अनर्थकरो रामः ॥ १६ ॥

रा० टी०—रामस्येति । शरदि तोयदा मेघा इव रामादीनां विक्रमाः निष्फलाः ॥ १५ ॥

गो० टी०—रामस्येति । विक्रमाः सेतुबन्धनादयः ॥१७॥

१७–१८] ति० टी०—पृथपान् । वानराणामिति शेषः । ताडयदताडयत् ॥ १७ ॥ १८ ॥

रा० टी०—एवमिति । राक्षसान् एवमुक्त्वा परिपक्षयतो यूथपानपि रावणिस्ताडयत् भताडयत् ॥ १७ ॥

गो० टी०—एवमिति । परिपार्श्वतः समीपतः ॥ १८ ॥

रा० टी०—तत्प्रकरणमाह—नीलमित्यादिभिः । सप्तभिः शरमेघैर्नीलमाहत्य सांद्रविदं मैन्दं त्रिभिस्त्रिभिराहत्य ततापेति १८

गो० टी०—नीलमित्यादि । हनूमतः हनूमदर्थमित्यर्थः । सम्बन्धसामान्ये षष्ठी । गोलाङ्गूलेश्वरं गवाक्षम् ॥ १९–२० ॥

१९–२०] ति० टी०—हनूमतः । उपरीति शेषः॥१९॥२०॥

रा० टी०—जाम्बवन्तमिति । महेष्वास इन्द्रजित् जाम्बवन्तं वक्षसि बाणेन विद्ध्वा हनूमतो वक्षसि दश शरान् विससर्ज१९

रा० टी०—गवाक्षमिति । रावणिः अमितविक्रमौ गवाक्षं शरभं च द्वाभ्यां द्वाभ्यां शराभ्यां विव्याध ॥ २० ॥

२१–२३] ति० टी०—त्वरमाणस्त्वरां वेगं कुर्वन्२१–२३

रा० टी०—गोलाङ्गूलेति । गोलाङ्गूलेश्वरं वालिपुत्रमङ्गदं रावणिर्विव्याध ॥ २१ ॥

रा० टी०—तानिति । रावणिर्वानरवरान् भित्त्वा ननाद२२

गो० टी०—तानिति । स्पष्टः ॥ २३ ॥

रा० टी०—तानिति । वानरान् बाणौघैरर्दयित्वा त्रासयित्वा च प्रजहास अब्रवीत ॥ २३ ॥

गो० टी०—तानर्दयित्वेति । स्पष्टः ॥ २४ ॥

२४–२८] ति० टी०—निशामयत पश्यत ॥ २४–२८ ॥

रा० टी०—तदाकारमाह—शरैरित्यादिभिः । घोरेण शरबन्धेन बद्धौ संग्रामशीर्षे बद्धौ भ्रातरौ निशामयत पश्यत ॥ २४ ॥

गो० टी०—शरबन्धेनेति । निशामयत पश्यत ॥ २५ ॥

रा० टी०—एवमिति । एवमुक्ताः तेन कर्मणा परमविस्मयमापन्नाश्च राक्षसा हर्षिताः बभूवुरिति शेषः ॥ २५ ॥

गो० टी०—एवमिति । कूटयोधिनः कपटयोधिनः ॥ २६॥

रा० टी०—विनेदुरिति । रामौ हत इति ज्ञात्वा ते राक्षसाः महानादान् विनेदुः रावणिं समपूजयंश्च ॥ २६ ॥

गो० टी०—विनेदुश्चेति । स्पष्टः ॥ २७ ॥

रा० टी०—निष्पन्दाविति । निष्पन्दौ क्रियारहितौ वसुधायां पतिताविति शेषः, रामलक्ष्मणौ दृष्ट्वा हतौ इति अन्वमन्यत इन्द्रजिरित्यन्वयः ॥ २७ ॥

गो० टी०—निष्पन्दाविति । स्पष्टः ॥ २८ ॥

रा० टी०—हर्षेणेति । इन्द्रजित् नैर्ऋतान् हर्षयन् सन् लङ्कां प्रविवेश ॥ २८ ॥

गो० टी०—हर्षेण समिति । स्पष्टः ॥ २९ ॥

२९] ति० टी०—सर्वाणि शरीरे सायकैश्चिते सर्वाण्यङ्गान्यु-पाङ्गानि च सायकैश्चितानि व्याप्तानि इति ॥ २९ ॥

रा० टी०—[illegible] ॥ [illegible] रामलक्ष्मणयोः शरीरे [illegible] दृष्ट्वा [illegible] सर्वाणि [illegible] ॥ २९ ॥

गो० टी०—[illegible] ॥ [illegible]

१ पार्श्वत इति गो. पाठः । २ ताडयामासेति गो. पाठः । ३ चेति गो. पाठः । ४ [illegible] पाठः । ७ आकुलेति गो. पाठः । ८ सर्वत इति गो. पाठः । ९ वसुधायामिति गो. पाठः । [illegible]

[illegible] विभीषणः । सर्वानरक्षसां [illegible]
अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम् ॥ ३०
एवं प्रायाणि युद्धानि विजयो नास्ति नैश्चिकः । सभाग्यशेषतास्माकं यदि वीर भविष्यति ॥ ३१
मोहयेतां महात्मानौ महाबलौ । पर्यवस्थापयात्मानमलार्थं मा च वानर ॥
सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥ ३३
एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना । सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः ॥ ३४
ततः सलिलमादाय विधया परिजप्य च । सुग्रीवनेत्रे धर्मात्मा प्रममार्ज विभीषणः ॥ ३५
विमृज्य वदनं तस्य कपिराजस्य धीमतः । अब्रवीत्कालसंप्राप्तमसंभ्रान्तमिदं वचः ॥ ३६
न कालः कपिराजेन्द्र वैक्लव्यमवलम्बितुम् । अतिस्नेहोऽपि कालेऽस्मिन्मरणायोपकल्पते ॥ ३७

पेक्षया द्विवचनम् अङ्गानि करादीनि उपाङ्गानि अङ्गुल्यादीनि । अत्रापि शरैरिवानीति योज्यम । दृष्ट्वा स्थित इति शेषो विशेषणीयः ॥ ३० ॥

३०] ति० टी०–सबाष्पवदनं बाष्पसहितमुखम् ॥ ३० ॥

रा० टी०–तामिति । परित्रस्तं ताडनरामदर्शनेन भीतम् अत एव सबाष्पवदनं क्रोधेन राक्षसविषयकक्रोधेन, व्याकुले लोचने यस्य तं वानरेन्द्रं विभीषण उवाच ॥ ३० ॥

रा० टी०–तदाकारमाह—अलमित्यादिभिः । एवं प्रायाणि एतादृशानि मायामयानीत्यर्थः, यानि युद्धानि तत्र विजयः मायिककर्तृकपराभवो नैश्चिकः निश्चितो न मायया पीदृशदर्शनसंभवादिति तात्पर्यम् अतः त्रासेनालं न कर्तव्य इत्यर्थः अत एव बाष्पवेगो निगृह्यताम् ॥ ३१ ॥

गो० टी०–तामिति । स्पष्टः ॥ ३१ ॥

गो० टी०–अलमिति । एवंप्रायाणि एवं विधानि । प्रायशब्देन मृत्यौ मुख्यबाहुल्ययोरपीति विश्वः । नैश्चिकः नियतः ३२

गो० टी०–सदोषभाग्यशेषेति । अस्माकं भाग्यशेषं यथस्तीत्यर्थः ॥ ३२ ॥

३१] ति० टी०–एवंप्रायाणि एवंविधः प्रायो बाहुल्यं येषां तानि प्रायेणैवंविधानीत्यर्थः नैश्चिको नित्यैकान्त भाग्यशेषेण सहिताः सभाग्यशेषास्तेषां भावस्तत्ता भाग्यशेषसहितत्वम । तद्विशिष्य यदस्माकमित्यर्थः ॥ ३१ ॥

रा० टी०–सेति । अस्माकं सभाग्यशेषता भाग्यशेषेण सहिता सभाग्यशेषाः तेषां भावः यदि भविष्यति तदा वयं महाबली तौ अलक्ष्मणौ स्यस्यतः ॥ ३२ ॥

गो० टी०–पर्यवस्थापयेति । पर्यवस्थापयात्मानं वनौ निर्व० कृत्व । स्वात्मपर्यवस्थापनक मां च पर्यवस्थापय । पैर्व [illegible] ॥ ३२ ॥

रा० टी०–परीति । सत्यधर्माभिरक्तानां नित्यसत्यधर्मरतानां जनानां मृत्युकृतं भयं नास्ति अतः आत्मानं मां पर्यवस्थापय स्वास्थ्यं प्रापय तव स्वास्थ्येनैव समापि स्वस्थं भविष्यतीति तात्पर्यम् ॥ ३३ ॥

रा० टी०–एवमिति । विभीषणः स्निग्धेन आर्द्रेण पाणिना सुग्रीवस्य नेत्रे प्रममार्ज शश्वुणि निर्जलयामासेत्यर्थः ॥ ३

गो० टी०–एवमिति । जलक्लिन्नेन जलसिक्तेन ॥ ३४

३४] ति० टी०–ततः सामान्यतः प्रमार्जनानन्तरं विद्यया तिरस्करणीविद्या तिरस्कारकविद्यया परिजप्य 'ओं वीभीष्य' इति पाठेऽप्ययमेवार्थः । राक्षसमायापरिज्ञानेन चैतत्पादनं चेतत्प्रमार्जनस्य फलम् वस्तुतः 'ततः सलिलम्' श्लोको बहुपुस्तकेषु नास्तीति प्रायेण प्रक्षिप्तोऽयम् तेनेन्द्र इत्यादि तत्कार्यप्रकाशकोत्तरवाक्यासंगतेश्च ॥ ३४ ॥

रा० टी०–तत इति । ततोऽनन्तरं सलिलमादाय विधया शोकनिवारकमन्त्रविशेषेण परिजप्य अभिमन्त्र्य च सुग्रीवस्य प्रममार्ज ॥ ३५ ॥

गो० टी०–पत्रमयस्यूतनिवृत्त्यर्थं भ्रान्तिनिवृत्त्यर्थं नेत्रे प्रमृज्य राक्षसमायापरिज्ञानेनाप्यस्य [illegible] वेन विद्याभिमन्त्रितजलेनापि ममार्जेत्याह–ततः इति । [illegible] राक्षसमायादर्शनहतुमन्त्रेण परिजप्य अभिमन्त्र्य ॥ ३५

३६] ति० टी०–कालसंप्राप्तं कार्यौचित्येन प्राप्तवन्तं [illegible]

रा० टी०–विमृज्येति । कपिराजस्य वदनं विमृज्य कालसंप्राप्तं कृत्यौचित्येन प्राप्तवन्तं असंभ्रान्तं संभ्रान्तिनिवृत्तौ [illegible] ॥ ३६ ॥

गो० टी०–समृज्येति । कालसंप्राप्तं तत्कार्यौचित्येन [illegible] ॥ ३६ ॥

३७] ति० टी०–नेति । [illegible] ॥ ३७ ॥

रा० टी०–नेति । [illegible]

अथ वा रक्ष्यतां रामो यावत्संज्ञाविपर्ययः । रामपुरोगमाणां सन्यानामनुशासनम् ॥ ३८ ॥
नैतल्लिङ्गेन रामस्य न च रामो मुमूर्षति । लब्धसंज्ञौ हि काकुत्स्थौ भयं नौ व्यपनेष्यतः ॥ ३९ ॥
तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम् । नहीनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम् ॥ ४० ॥
यावत्सैन्यानि सर्वाणि पुनः संस्थापयाम्यहम् ॥ ४० ॥
एते हि फुल्लनयनास्त्रासादागतसाध्वसाः । कर्णे कर्णे प्रकथिता हरयो हरिसत्तम ॥ ४१ ॥
मां तु दृष्ट्वा प्रभावन्तमनीकं संप्रहर्षितम् । त्यजन्तु हरयस्त्रासं भुक्तपूर्वामिव स्रजम् ॥ ४२ ॥

रोदनाच्यपि अस्मित्रकाले अनुचितसमये मरणाय उपकल्पते प्रभवति ॥ ३७ ॥

गो० टी०—न काल इति । वैक्लव्यम् अधैर्यम् । किं करोमि अतिस्नेह एवं बाधते इत्यत्राह—अतिस्नेहोऽपीति ॥ ३८ ॥

३७] ति० टी०—यदेवमतः—तस्मादित्यादि । हितं तत्समाश्वासनम् ॥ ३७ ॥

रा० टी०—तस्मादिति । तस्मादुक्तहेतोः वैक्लव्यम् अस्थैर्यं त्यक्त्वा सैन्यानां हितमनुचिन्तय ॥ ३८ ॥

गो० टी०—एवं त्यक्तव्यमुक्त्वा कर्तव्यमुपदिशति—तस्मादिति । वैक्लव्यमिति स्नेहस्याप्युपलक्षणम् । रामपुरोगाणां रामप्रभृतीनाम् । रामशरण्यानामित्यर्थः ॥ ३९ ॥

३८] ति० टी०—यदि तव सेनासमाश्वासने धैर्यं नास्ति तदा तदहं करिष्यामि, त्वया तु रामो रक्षणीय इत्याह—अथवेति । संज्ञाविपर्ययो मोहो यावत्तावत्पर्यन्तम्, मोहमात्रमेवानयोर्नः स्वल्पसंभावनेत्याह—लब्धसंज्ञाविति । नावयोः ॥ ३८ ॥

रा० टी०—अत्यन्तविकलं सुग्रीवं निरीक्ष्य पक्षान्तरमाह—अथवेति । यावत्कालं संज्ञायाः विपर्ययो यस्मात् मोह इत्यर्थः तावत्कालं रामो रक्ष्यतां हि यतः लब्धसंज्ञौ काकुत्स्थौ नौ भावयोर्भयं व्यपनेष्यतः ॥ ३९ ॥

गो० टी०—अथवेति । संज्ञाविपर्ययः मूर्च्छा यावदनुवर्तते तावद्रक्ष्यतामित्यर्थः ॥ ३९ ॥

३९] ति० टी०—व्यपनेष्यत इतीममेवार्थं स्पष्टयति—नैतदिति । रामस्य नेतल्लिङ्गेन । अपायकरणमित्यर्थः । कुतस्तत्राह—न चेति । मुमूर्षाभावे लिङ्गमाह—नहीति । या गतायुषां दुर्लभा सा लक्ष्मीरेनं न हास्यति इदानीं न जहात्यस्मानपि न हास्यतीत्यर्थः ॥ ३९ ॥

रा० टी०—संज्ञालाभे हेतुमाह—नेति । एतदल्पकालं प्रति भासमानं मोहादि रामस्य समीपे किंचन न तुच्छमित्यर्थः, अत एव रामो न मुमूर्षति अस्मान् मारयितुं नेच्छति अत एव गतायुषां दुर्लभा लक्ष्मीः शरीरशोभा सा एनं रामं न हास्यते त्यजति ॥ ४० ॥

गो० टी०—एवंभूतयोः कथं संज्ञाप्राप्तिस्तत्राह—नेतदिति । एतत् अस्वल्पत्वम् रामस्य न किंचन इदमल्पत्वायम् बाधकं न भवतीत्यर्थः भतो न मुमूर्षति । मरिष्यतीति शङ्का न कर्तव्येत्यर्थः । "लाजङ्घायाङ्घपल्वाभम्" इति नियमात् । एतच्च लक्ष्मीलिङ्गशरीरशोभामात्रेण निश्चीयत इत्याह—नहीति । गतायुषां मृतानाम् या लक्ष्मीः मुखकान्तिः दुर्लभा सा च एनं न हास्यते । न जहातीत्यर्थः । जीवनानुकूला सा लक्ष्मीर्दृश्यत इत्यर्थः ॥ ४१ ॥

४०] ति० टी०—स्वकं बलं स्वकं प्राणम् । अहं यावत्सैन्यानि सर्वाणि पुनः स्थापयामि स्थिराणि करोमि तावदात्मानमात्मप्राणं चाश्वासय ॥ ४० ॥

रा० टी०—तस्मादिति । तस्मादुक्तहेतोः सैन्यानि यावत्कालं संस्थापयामि तावत्कालम् आत्मानं बलं च आश्वासय ॥ ४१ ॥

गो० टी०—तस्मादिति । यावत् यावत्पर्यन्तम् । सर्वाणि कार्याणि कर्तव्यानि पुनः संस्थापयामि । तावत्पर्यन्तमाश्वासयेत्यन्वयः । केचित्तु यावत्कार्याणि यावन्ति कर्तव्यानि तानि सर्वाणीत्याहुः ॥ ४२ ॥

४१] ति० टी०—एते फुल्लनयनत्वादिगुणका हरयः कर्णे कर्णे प्रकथिता रामविषद्विषयप्रकथनवन्तो भवन्ति । हरिसत्तम सुग्रीव ॥ ४१ ॥

रा० टी०—एत इति । त्रासात् उद्वेगाद्धेतोः आगतसाध्वसाः प्राप्तभयाः अत एव फुल्लनयनाः घूर्णितलोचनाः इमे हरयः कर्णे कर्णे प्रकथिताः रामदुस्तान्तकथनवन्तः सन्तीति शेषः ॥ ४२ ॥

गो० टी०—पर्यवस्यापनं किमर्थमित्याह—एते इति । आगतसाध्वसाः प्राप्तभयविकाराः । ते च विकाराः पुलकादयः । प्रकथिताः पलायनार्थं प्रवृत्तकथा इत्यर्थः । संप्रहर्षितुमित्यनन्तरम् अर्हसीत्यध्याहार्यम् । प्रभावन्तम् इन्द्रजिद्भयेनेति भावः । इदमनीकविशेषणम् । गच्छामीति वाक्यादाहार्यम् संप्रहर्षितुं भयाविवर्तयितुमिति यावत् । तदेवाह—त्यजन्त्विति ॥ ४३ ॥ ४४ ॥

४२] ति० टी०—अनीकप्रत्याश्वासनार्थं मां यावन्तं दृष्ट्वा तु संप्रहर्षितं प्रातिभयमनीकं तावन्तं हरयो भुक्तपूर्वां स्रजमिव त्रासं त्यजन्तु ॥ ४२ ॥

रा० टी०—मामिति । प्रभावन्तं मां दृष्ट्वा अत एव संप्रहर्षितमनीकं दृष्ट्वा हरयः भुक्तपूर्वां स्रजमिव त्रासं त्यजन्तु

१ विपर्यय इति गो. पाठः । २ कार्याणीति गो. पाठः । ३ दर्शनमिति गो. पाठः ।

सह भ्रात्रा तु सुग्रीवेण रक्षसन्त्रा विभीषणः । विद्रुतं वानरानीकं तत्समाश्वासयत्पुनः ॥ ४३ ॥
इन्द्रजित्तु महामायः सर्वसैन्यसमावृतः । विवेश नगरीं लङ्कां पितरं चाभ्युपागमत् ॥ ४४ ॥
तत्र रावणमासाद्य अभिवाद्य कृताञ्जलिः । आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥ ४५ ॥
उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे । रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ ॥ ४६ ॥
उपाघ्राय च तं मूर्ध्नि पप्रच्छ प्रीतमानसः । पृच्छते च यथावृत्तं पित्रे तस्मै न्यवेदयत् ॥
यथा तौ शरबन्धेन निश्चेष्टौ निष्प्रभौ कृतौ ॥ ॥ ४७ ॥
स हर्षवेगानुगतान्तरात्मा श्रुत्वा गिरं तस्य महारथस्य ।
जहौ ज्वरं दाशरथेः समुत्थं प्रहृष्टवाचाभिननन्द पुत्रम् ॥ ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।

इन्द्रजिति लङ्कां प्रविष्टे तत्रत्यजनतते [illegible] राघवं परिवार्य ररक्षुः । अथ स्तो रावणो विजयेन्द्रजितं सीतासक्षणं राक्षस तादृशौ राघवौ सीतां दर्शयतीत्यादिना । निगदव्याख्यातः । ततः पुष्पेण सीतां नीत्वा रामलक्ष्मणावदर्शयन् । सीता तु तत्रापि देवरं चावलोक्य मूर्छां त्यक्तवती ।

तस्मिन्प्रविष्टे लङ्कायां कृतार्थे रावणात्मजे । राघवं परिवार्याथ ररक्षुर्वानरर्षभाः ॥ १ ॥
हनुमानङ्गदो नीलः सुषेणः कुमुदो नलः । गजो गवाक्षः पनसः सानुप्रस्थो महाहरिः ॥ २ ॥

४३-४८] ति० टी०-समाश्वास्य । उक्तमित्यर्थः शेषः ॥ ४३-४८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रा० टी०-समाश्वास्येति । विभीषणः सुग्रीवं समाश्वास्य वानरानीकं समाश्वासयत् ॥ ४४ ॥

गो० टी०-समाश्वास्येति । समाश्वासयन् नाशयिन्नजित्किंतु विभीषण इति समाश्वासयदित्यर्थः ॥ ४५ ॥

रा० टी०-इन्द्रजिदिति । इन्द्रजित् लङ्कां विवेश पितरमेवोपागमत् ॥ ४५ ॥

गो० टी०-कथासंबन्धनाय पूर्वोक्तमनुवदति—इन्द्रजिदिति ॥ ४६ ॥

रा० टी०-तत्रेति । तत्र तस्मिन् समये रावणमासाद्य अभिवाद्य च रामलक्ष्मणौ निहतौ इति प्रियं वचः पित्रे आचचक्षे कथयामास ॥ ४६ ॥

गो० टी०-तत्रेति । रामलक्ष्मणावित्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ४७ ॥

रा० टी०-उत्पपातेति । शत्रू निपातितौ श्रुत्वा हृष्टो रावणः उत्पपात उत्तस्थौ पुत्रं परिषस्वजे च ॥ ४७ ॥

गो० टी०-उत्पपातेति । उत्पपात आसनादिति शेषः ॥ ४७ ॥

रा० टी०-उपाघ्रायेति । तं पुत्रं मूर्ध्नि उपाघ्राय प्रीतमानसो रावणः पप्रच्छ पृच्छते पित्रे यथा तौ रामलक्ष्मणौ शरबन्धेन निश्चेष्टौ कृतौ तद्वृत्तं यथा यथावत् न्यवेदयत् सार्धश्लोक एकान्वयी ॥ ४८ ॥ ४६ ॥

गो० टी०-पृच्छते चेति । यथावृत्तं उत्पन्नातिकायहतमेव निवृणोति—यथा ताविति ॥ ४६ ॥

रा० टी०-स इति । महारथस्य पुत्रस्य गिरं श्रुत्वा हर्षवेगेन अनुगतः प्राप्तोऽन्तरात्मा यस्य स रावणः दाशरथेः समुत्थं ज्वरं संत्यज्य जहौ पुत्रमभिननन्द च ॥ ५० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०-स इति । हर्षवेगेन हर्षातिशयेन अनुगतः व्याप्तः अन्तरात्मा मनो यस्य स तथोक्तः । दाशरथेः निमित्तात् । ज्वरं चिन्तासंतापम् । अनया राज्ञा प्रविषण्णत्वे ॥ ५० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटव्याख्याने युद्धकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

१-२] ति० टी०-तस्मिन्निति ॥ १ ॥ २ ॥

रा० टी०-वानरबलान्तमाह-तस्मिन्नित्यादिभिः । कृतार्थे रावणात्मजे लङ्कायां प्रविष्टे सति वानरर्षभाः राघवं परिवार्य ररक्षुः ॥ १ ॥

गो० टी०-अथ सीतायै वीरबन्धनस्थरामलक्ष्मणप्रदर्शनं सप्तचत्वारिंशे—प्रतिप्रविष्ट इत्यादि ॥ १ ॥

---

१ भ्रात्रेति गो. पाठः । २ स मूर्ध्नेति गो. पाठः । ३ सर्वमिति गो. पाठः । ४ वच इति गो. पाठः । ५ सप्तमिति गो. पाठः । ६ [illegible] गो. पाठः । ७ लङ्कां त्विति गो. पाठः । ८ आर्ये इति गो. पाठः । ९ गवयः शरभो गन्धमादन इति गो. पाठः ।

वीक्षमाणा दिशः सर्वास्तिर्यगूर्ध्वं च वानराः । तृणेष्वपि च चेष्टत्सु राक्षसा इति मेनिरे ॥ ४ ॥
रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम् । आलुलाव ततः सीतारक्षणीं राक्षसीस्तदा ॥ ५ ॥
राक्षस्यश्चिरजाता याश्चामनात्तमुपस्थिताः । ता उवाच ततो हृष्टो राक्षसीं राक्षसाधिपः ॥ ६ ॥
हतावित्रजितारब्धात् वैदेह्या रामलक्ष्मणौ । पुष्पकं तत्समारोप्य दर्शयध्वं रणे हतौ ॥ ७ ॥
यदाश्रयाद्वयद्वत्था नेयं मामुपतिष्ठते । सोऽस्या भर्ता सह भ्रात्रा निर्हतो रणमूर्धनि ॥ ८ ॥
निर्विशङ्का निरुद्विग्ना निरपेक्षा च मैथिली । मामुपस्थास्यते सीता सर्वाभरणभूषिता ॥ ९ ॥
अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम् । अवेक्ष्य विनिवृत्ता सा चान्यां गतिमपश्यती ॥
अनपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम् ॥ ॥ १० ॥
तस्य लक्ष्मणं श्रुत्वा रावणस्य दुरात्मनः । राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्यत्र पुष्पकम् ॥ ११ ॥
ततः पुष्पकमादाय राक्षस्यो रावणाज्ञया । अशोकवनिकास्थां तां मैथिलीं समुपानयन् ॥ १२ ॥
तामादाय तु राक्षस्यो भर्तृशोकपराजिताम् । सीतामारोपयामासुर्विमानं पुष्पकं तदा ॥ १३ ॥

गो० टी०-रक्षणप्रकारमाह—हनूमानित्यादिभिः । यदवस्थि अवस्थरचेष्टया व्याप्तिमति अनीकानि यैः ते अत एव हता वशमापादिताः सर्वा दिशः सर्वत्र सर्वं तिर्यगूर्ध्वं च वीक्षमाणाः सन्तः तृणेषु अपि चेष्टत्सु सत्सु राक्षसा इति मेनिरे । श्लोकत्रयमेकान्वयि ॥ ३-४ ॥

गो० टी०-ये रक्षणप्रकारमाह—हनूमानित्यादिना ॥ ३ ॥

३] ति० टी०-यदाश्रि ॥ रुद्धाधिकारव्यूहवत्त्वमनीकानीति शेषः ते ॥ ३ ॥

गो० टी०-अन्यान् वानरानाह—व्यूढानीकाश्चेति । व्यूढानीकानि हतप्रभेदसैन्यानि । चेष्टत्सु चेष्टमानेषु ॥ ३ ॥

४] ति० टी०-राक्षसा इत्यस्यागता इति शेषः ॥ ४ ॥

५-६] ति० टी०-सीतारक्षणीः सीतारक्षिका राक्षसीः राक्षस्यः ताः राक्षसाधिपेन च रावणेन ॥ ५ ॥ ६ ॥

रा० टी०-राक्षस इति । अनेन रावणः इन्द्रजितं विसृज्य एकला सीतारक्षणीः राक्षसीः आलुलाव ॥ ५ ॥

गो० टी०-रावणश्चेति । स्पष्टः ॥ ४ ॥

रा० टी०-राक्षसेन्द्र इति । आत्मनात् राजाज्ञावशात् राक्षस्यः विसृज्य च त्वं रावणमुपस्थिता वक्ष्यसीति शेषः राक्षसाधिपतिः तं उवाच ॥ ६ ॥

गो० टी०-राक्षसस्य इत्यर्थः ॥ ६ ॥

गो० टी०-ता उवाचेत्यर्थम् ॥ ६ ॥

७] ति० टी०-आख्यात कथयत । रणे हतौ रावणौ तस्मै तदैवेत्यर्थः ॥ ७ ॥

गो० टी०-तदाकारमाह—हतावित्यादि । हतावित्या रामलक्ष्मणौ हतौ इति वैदेह्याः क्षणिकं वचनमाख्यात पुष्पकमारोप्य रणे हतौ कथयत च सीतामिति शेषः ॥ ७ ॥

गो० टी०-हतावित्यादि । आख्यात कथयत ॥ ७ ॥

८] ति० टी०-यदाश्रयाद्वयद्वत्था गर्विता ॥ ८ ॥

९] ति० टी०-निर्विशङ्का रामशङ्कारहिता, निरुद्विग्ना निःशोका, निरपेक्षा रामो मिलिष्यतीत्याशारहिता ॥ ९ ॥

रा० टी०-यदिति । यदाश्रयात् अवष्टब्धा गर्विता इयं सीता मां लङ्कासंपत्तिं नोपतिष्ठते गणयति सोऽस्याः भर्ता रणमूर्धनि निहतः अतः निर्विशङ्का रामशङ्कारहिता अत एव निरुद्विग्ना अत एव निरपेक्षा-अयोध्याप्राप्त्यपेक्षारहिता मैथिली सर्वाभरणभूषिता सती मां लङ्कासंपत्तिम् उपस्थास्यते अवैव निवत्स्यतीत्यर्थः । श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०-यदाश्रयादिति । अवष्टब्धा गर्विता निर्विशङ्का निर्विचारा निरुद्विग्ना निःशोका अतो निरपेक्षा रामः समेष्यतीत्याशारहिता ॥ ८ ॥ ९ ॥

१०-१३] ति० टी०-अवेक्ष्य विनिवृत्ता प्रत्यागता सा च सा त्वन्यां भर्तोऽन्यां रामरूपां गतिं प्राप्यं वस्त्वपश्यती अनपेक्षा रामापेक्षारहिता ॥ १०-१३ ॥

रा० टी०-तदेव भङ्ग्यन्तरेण-अद्येति । कालवशं प्राप्तं रामलक्ष्मणं विनिवृत्ता आशा यस्याः अत एव अन्यां गतिमपश्यन्ती अनपेक्षा लङ्कासंपत्त्यपेक्षारहिताऽपि सीता मां लङ्कासंपत्तिं स्वयमुपस्थास्यते । सार्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०-अद्येत्यादिसार्धश्लोक एकान्वयः । अन्यां गतिम् चापश्यती आगमशास्त्रनस्यानित्यत्वात्सुभगाः । अन्याम् मत्तोऽन्याम् । गम्यत इति गतिः प्राप्यम् । विनिवृत्ताशा रामाद्विनिवृत्ताशा ॥ १० ॥

रा० टी०-तस्येति । रावणस्य वचनं श्रुत्वा तथेत्युक्त्वा राक्षस्यः यत्र पुष्पकं तत्र जग्मुः ॥ ११ ॥

गो० टी०-तस्येति । स्पष्टः ॥ ११ ॥

१ तस्य वचनं गो० पाठः । २ मैथिलीं गो० पाठः । ३ यदि तां गो० पाठः ।

ततः पुष्पकमारोप्य सीतां त्रिजटया सह । [जग्मुर्देशमयोध्यायां तत्रैनौ रामलक्ष्मणौ ॥
रावणश्चारयामास पताकाध्वजमालिनीम् । ॥ १३ ॥
राघवोपयत हृष्टश्च लङ्कायां राक्षसेश्वरः । राघवो लक्ष्मणश्चैव हतावित्यब्रवीज्जिता रणे ॥ १५ ॥
विमानेनापि गत्वा तु सीता त्रिजटया सह । ददर्श वानराणां तु सर्वं सैन्यं निपातितम् ॥ १६ ॥
सुहृष्टमनसश्चापि ददर्श पिशिताशनान् । वानरांश्चातिदुःखार्तान्रामलक्ष्मणपार्श्वतः ॥ १७ ॥
ततः सीता ददर्शाथो शयानौ शरतल्पगौ । लक्ष्मणं चैव रामं च विसंज्ञौ शरपीडितौ ॥ १८ ॥
विध्वस्तकवचौ वीरौ विप्रविद्धशरासनौ । सायकैश्छिन्नसर्वाङ्गौ शरस्तम्बमयौ क्षितौ ॥ १९ ॥
तौ दृष्ट्वा भ्रातरौ तत्र प्रवीरौ पुरुषर्षभौ । शयानौ पुण्डरीकाक्षौ कुमाराविव पावकी ॥ २० ॥
शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ । दृष्ट्वार्ता करुणं सीता सुभृशं विललाप ह ॥ २१ ॥
भर्तारमनवद्याङ्गी लक्ष्मणं चारितेक्षणा । प्रेक्ष्य पाण्डु चेष्टन्तौ रुरोद जनकात्मजा ॥ २२ ॥
सबाष्पशोकाभिहता समीक्ष्य तौ भ्रातरौ देवसुतप्रभावौ ।
वितर्कयन्ती निधनं तयोः सा दुःखान्विता वाक्यमिदं जगाद ॥ ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०–तत इति । पुष्पकमारोप्य मैथिली सकलामयत् प्रापयत् ॥ १२ ॥

गो० टी०–तत इति । स्पष्टः ॥ १२ ॥

रा० टी०–तामिति । अत्रशोकेन राजसीवकल्पनया त्रि-जटाभर्तृविषयकज्ञानापेक्षं पराजिता सीताबादय ज्ञापयन्त्या पुष्पकमारोपणमासः ॥ १३ ॥

गो० टी०–तामिति । स्पष्टः ॥ १३ ॥

१४] ति० टी०–पताकाध्वजमालिनीं लङ्कां चारयामास रक्षस्यौ तौ इहुमिति शेषः ॥ १४ ॥

रा० टी०–तत इति । त्रिजटया सह सीतां पुष्पकमारोप्य पताकाध्वजमालिनीं लङ्कां रावणश्चारयामास ॥ १४ ॥

गो० टी०–तत इति । त्रिजटया सह सीतामारोप्य । उभयोरेव विमानारोहणमनुज्ञायेत्यर्थः । पुत्रीत्वाभिषुणतया च त्रिजटाया विमानारोहणानुज्ञा ॥ १४ ॥

१५] ति० टी०–घोषणप्रकारः–राघवो लक्ष्मणश्चेति १५

रा० टी०–प्राघोषयतेति । इन्द्रजिता राघवो लक्ष्मणश्च हतौ इति लङ्कायां प्राघोषयत ॥ १५ ॥

गो० टी०–रावण इत्यादि । इन्द्रजिता रण इत्यनन्तर-मितिकरणं बोध्यम् ॥ १५ ॥

१६–१८] ति० टी०–सर्वम् वक्ष्यमाणमित्यर्थः ॥ १६–१८ ॥

रा० टी०–विमानेनेति । त्रिजटया सह सीता विमानेनैव गत्वा निपातितं वानराणां सैन्यं ददर्श ॥ १६ ॥

गो० टी०–विमानेनेति । स्पष्टः ॥ १६ ॥

रा० टी०–सुहृष्टेति । पिशिताशनान् राक्षसान् प्रहृष्टमनसः शोकार्तान् वानरांश्च ददर्श ॥ १७ ॥

गो० टी०–सुहृष्टेति । स्पष्टः ॥ १७ ॥

रा० टी०–तत इति । शरतल्पगौ सन्तौ शयानौ लक्ष्मणं रामं चोभौ ददर्श ॥ १८ ॥

गो० टी०–ततः सीतेत्यादिश्लोकद्वयम् । विप्रविद्ध-शरासनौ भग्नचापौ । सायकैश्छिन्नसर्वाङ्गौ अत एव शरस्तम्बमयौ शरगुल्ममयौ । स्तम्बः समूह इत्यमरः । क्षितौ शरतल्पगौ शयानाविति संबन्धः ॥ १८ ॥ १९ ॥

१९–२२] ति० टी०–विप्रविद्धशरासनौ भग्नचापौ शरस्तम्बः शरसमूहस्तन्मयौ ॥ १९–२२ ॥

रा० टी०–विध्वस्तेति । विध्वस्ताः जनस्थाने विनाशिताः कवचाः राक्षसमयानि यस्यां विप्रविद्धानि शरासनानि यस्यां सायकैः छिन्नानि सर्वाङ्गानि यस्यां तौ शरस्तम्बमयौ शरगुल्ममयौ पावकात्मजौ कुमारौ इव क्षितौ शयानौ दृष्ट्वा दुःखार्ता सीता करुणं यथा स्यात्तथा नरर्षभौ रामलक्ष्मणौ भृशदुःखैर्विललाप स्वारयामास । अर्धपदक्रमैकान्वयि ॥ १९–२१ ॥

गो० टी०–साधित्यादिश्लोकद्वयम् । पावकी पावकस्य स्कन्दविशाखौ । अग्रजोत्तरो वीरशब्दः कुमारादिष्वपि योज्यः ॥ २० ॥ २१ ॥

रा० टी०–भर्तारमिति । पाण्डु चेष्टन्तौ भर्तारं लक्ष्मणं च प्रेक्ष्य रुरोद ॥ २२ ॥

गो० टी०–भर्तारमिति । स्पष्टः ॥ २२ ॥

२३] ति० टी०–वितर्कयन्ती चिन्तयन्तीत्येव ॥ २३ ॥

इति श्रीगोविन्दराजे श्रीरामायणतिलके युद्धकाण्डे आदिकाव्ये युद्धकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१ पुष्पकमारोप्य मैथिली सकलामयत् प्रापयत् ॥ १२ ॥ २ तत इति स्पष्टः ॥ १२ ॥ ३ तामिति स्पष्टः ॥ १३ ॥ ४ प्रहृष्टेति स्पष्टः ॥ १७ ॥ ५ तत इति स्पष्टः ॥ १८ ॥ ६ ततः सीतेत्यादि श्लोकद्वयम् । विप्रविद्धशरासनौ भग्नचापौ । सायकैश्छिन्नसर्वाङ्गौ अत एव शरस्तम्बमयौ शरगुल्ममयौ । स्तम्बः समूह इत्यमरः । क्षितौ शरतल्पगौ शयानाविति संबन्धः ॥ १८ ॥ १९ ॥ ७ विध्वस्तेति । विध्वस्ताः जनस्थाने विनाशिताः कवचाः राक्षसमयानि यस्यां विप्रविद्धानि शरासनानि यस्यां सायकैः छिन्नानि सर्वाङ्गानि यस्यां तौ शरस्तम्बमयौ शरगुल्ममयौ पावकात्मजौ कुमारौ इव क्षितौ शयानौ दृष्ट्वा दुःखार्ता सीता करुणं यथा स्यात्तथा नरर्षभौ रामलक्ष्मणौ भृशदुःखैर्विललाप स्वारयामास । अर्धपदक्रमैकान्वयि ॥ १९–२१ ॥ ८ साधित्यादिश्लोकद्वयम् । पावकी पावकस्य स्कन्दविशाखौ । अग्रजोत्तरो वीरशब्दः कुमारादिष्वपि योज्यः ॥ २० ॥ २१ ॥ ९ भर्तारमिति । पाण्डु चेष्टन्तौ भर्तारं लक्ष्मणं च प्रेक्ष्य रुरोद ॥ २२ ॥ १० वितर्कयन्ती चिन्तयन्तीत्येव ॥ २३ ॥

सामुद्रिकलक्षणज्ञा मामविधवां पुत्रिणीं चाहुः कथमिवमेकपदे दुर्विधिना कृतेत्यु। ज्ञानिभिरुक्तं मनु वृथा भवेत्यादि शोच सी यहाँ तत्सामुद्रिकलक्षणदर्शनादिना विधुरा सान्त्वयित्वा तच्चित्तं प्रसाद्यावोचन्निका अवेशयामासुः पुनः ।

भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम् । विललाप भृशं सीता करुणं शोकलालसा ॥ १ ॥
ऊचुर्लक्षणिका ये मां पुत्रिण्यविधनेति च । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ २ ॥
यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिणः । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ३ ॥
वीरपार्थिवपत्नीनां ये विदुर्भर्तृपूजिताम् । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ४ ॥
ऊचुः संश्रवणे ये मां द्विजाः कार्तान्तिकाः शुभाम् । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ५ ॥

रा० टी०–सेति । देवहूतप्रभावौ ज्ञातरौ तौ तथाभूतौ दृष्ट्वा तथा दुःखदर्शनजनितात्यन्तदुःखेन सहिता या विधुरा सती अन्विता युक्ता शोकाभिहता सा सीता तथा-निधनं निर्वर्ण्यस्त्री सती इदं वाक्यं जगाद ॥ २३ ॥

इति श्रीमद्रात्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

गो० टी०–सेति । अत्र वीक्षणगदनकपक्रियाभेदात्तल्ल-क्षेदुक्तम् ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटा-ख्याने युद्धकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१] ति० टी०–विललापेति । सर्वेऽपि देवी राक्षसानां मायोपबृंहितैर्वधाय नरवद्विललापेत्यर्थः । निहतं निहतमिव स्थितम् ॥ १ ॥

रा० टी०–सीतायेत्यादिमाह—भर्तारमित्यादिभिः । शोकलालसा सीता करुणं यथा भवति तथा विललाप ॥ १ ॥

गो० टी०–अथ सीतायाः पोडशभिरुक्तस्त्रिंशे–भर्तारमिति । करुणं यथा तथा विललाप ॥ १ ॥

२] ति० टी०–लक्षणिका सामुद्रिकलक्षणज्ञाः ॥ २ ॥

रा० टी०–लक्षणिका इत्यादि—ऊचुरित्यादिभिः । ये लक्ष-णिकाः मुखाद्यवयवलक्षणज्ञाः पुत्रिणी प्रशस्तपुत्रविशिष्टेति अविधवेति च मामूचुः ते सर्वे रामे हते सति अनृतवादिनो भविष्यन्तीति शेषः ॥ २ ॥

गो० टी०–ऊचुरिति । लक्षणिन इति । लक्षणशब्देनात्र लक्षणज्ञाने लक्ष्यते संदेहामर्शीति लक्षणिनः । प्रशस्तपुत्रविशि-ष्टामविधवां च मामूचुरित्यर्थः । पतिपितृकुलयोर्दिव्यकुललक्षणमी-रितमित्रेत्र । अत्र पत्यादिभिः विशेषणैर्लक्षणरहितः । निर्लोम-हस्तं गुह्यं अप्रलम्बत्वादितम् । सौभाग्यं चाप्यवैधव्यं प्रियप्रेम च सा उमा ॥ इत्युक्तलक्षणवत्यः । पुत्रिणी पुत्रलाभलक्षणवती दीर्घायुष्कैश्च या जातो दीर्घायुष्कौ च या भवेत् । दीर्घमायुरवा-प्नोति पुत्रेभ्य स्व वर्तते ॥ इत्युक्तलक्षणवत्यः । ज्ञानिनो लक्षणज्ञानवन्तः । अनृतवादिनः अन्यथावादिन इति शेषः ॥ २ ॥

३] ति० टी०–अयमेव पाठः पाठ इति कतकः । य ज्वनोऽश्वमेधादियागकर्तुः सत्रिणोः बहुदिनसाध्यबहुकर्तृकया गकर्तुः ॥ ३ ॥

रा० टी०–यज्वन इति । यज्वनः अश्वमेधप्रभृतियाग कर्तुः सत्रिणः चिरकालसाध्यबहुकर्तृकयज्ञकर्तुः रामस्य महिषं मुख्यां पत्नीं ये मामूचुः ॥ ४ ॥

गो० टी०–यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिण इति ॥ यज्वनः कृताश्वमेधादिकस्य यज्वा तु विधिनेष्वा नित्यमरः । बहुयजमानकामि गवामयनप्रभृतीनि सत्राणि तत्कर्ता सत्री तस्य महिषीं कृताभिषेकाम् । कृताभिषेका महि षीत्यमरः । पत्नीं यज्ञसंयोगवतीम् । "पत्युर्नो यज्ञसंयोगे' इति पतिशब्दस्य नकारान्तादेशः । ततो "ऋन्नेभ्यो ङीप्' इति ङीप् ॥ ३ ॥

४] ति० टी०–वीरपार्थिवपत्नीनाम् । पूजनीयामिति शेषः । भर्तृपूजितां समकूर्मीं ये प्राहुः ॥ ४ ॥

रा० टी०–वीरेति । वीरपार्थिवपत्नीनां वीरा ये पार्थिव राजानः तेषां पत्नीनां मध्ये ये मां भर्तृपूजितां समकूर्मीं विदुः प्राहुरित्यर्थः ते ज्ञानिनोऽनृतवादिनो भविष्यन्ति ॥ ३ ॥

गो० टी०–वीरेति । त्वं वीरपार्थिवपत्नी अन्या चेति ये विदुः । विदित्वा ऊचुरित्यर्थः । तेष्वनृतवादिन इति पूर्व णान्वयः ॥ ५ ॥

५] ति० टी०–सम्यक्श्रवणं यस्मिन्निति संश्रवणं संनि धिस्तस्मिन् । सत्समक्षमिति यावत् । कार्तान्तिकाः ज्योतिःशा स्त्रान्तविदः । शुभामविधवाम् । ज्ञानिन इति छेदः ॥ ५ ॥

रा० टी०–ऊचुरिति । कार्तान्तिकाः ज्योतिषशास्त्रे कृतान्ताभिज्ञाः ये द्विजाः संश्रवणे मत्सन्निधौ मां शुभां वैधव्य रहितामूचुस्ते ॥ ५ ॥

गो० टी०–ऊचुरिति । संश्रवणे मम सम्यक् श्रवणे । मयि सुप्रसन्नायामित्यर्थः । ग्रहा सम्यक् श्रवणमस्मिन्निति संश्रवणः अग्निधिः । मत्सन्निधावित्यर्थः । मात्रादिसमीप इति शेषः । कृतान्तः कालः तद्विदः कार्तान्तिकाः । स्पर्शोहोरात्रमौहूर्तेक

१ लक्षणिन् इति गो० पाठः । २ यदादि श्लोकार्धं व्याचष्टे गो० रा० पाठेन । ३ पत्नीं ये [illegible]

तानि खलु पद्मानि पादयोर्वै कुलस्त्रियः । आधिराज्येऽभिषिच्यन्ते नरेन्द्रैः पतिभिः सह ॥ ५ ॥
सत्यैर्यै यान्ति यैर्नार्यो लक्षणैर्भाग्यदुर्लभाः । नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ ७ ॥
सत्यनामानि पद्मानि स्त्रीणामुक्तानि लक्षणैः । तान्यद्य निहते रामे वितथानि भवन्ति मे ॥ ८ ॥
केशाः सूक्ष्माः समा नीला भ्रुवौ चासंहते मम । वृत्ते चारोमके जङ्घे दन्ताश्चाविरला मम ॥ ९ ॥
जङ्घे नेत्रे करौ पादौ गुल्फावूरू समौ चितौ । अनुवृत्तनखाः स्निग्धाः समाश्चाङ्गुलयो मम ॥ १० ॥

कातन्तिका अपीत्यमरः । शुभां नित्यनङ्गलाभ । स्निग्धं रक्तं बहलमनिमीलितलोचनम् । समलम्बपुटा नासा लघूष्मा शुभावह ॥ इत्यायुक्तलक्षणैरिति शेषः ॥ ३ ॥

६] ति० टी०—यैर्लक्षणैः स्त्रियो नरेन्द्रैः पतिभिः सहाधिराज्येऽभिषिच्यन्ते तानीमानि पद्मानि पादिनाद्रतिरेखारूपपद्मानि मयि वर्तन्त इति शेषः ॥ ६ ॥

रा० टी०—इमानीति । यैः चिह्नैः नरेन्द्रैः पतिभिः सह अधिराज्ये कुलस्त्रियोऽभिषिच्यन्ते तानीमानि पद्मानि तलाकारेखारूपलक्षणानि मम पादयोर्वर्तन्त इति शेषः ॥ ६ ॥

गो० टी०—इमानीति । यैः पद्मैरुपलक्षिताः स्त्रियः आधिराज्येभिषिच्यन्ते किलेत्येतिछे । तानीमानि पद्मानि रेखारूपाणि दृश्यन्त इति शेषः । सन्तिति प्रसिद्धौ । स्पष्टं दृश्यन्त इत्यर्थः । कथमेषां निष्फलत्वमिति भावः ॥ ६ ॥

७] ति० टी०—वैधव्यं भाग्यदुर्लभा दुर्लभभाग्या वैधव्यं यान्ति तान्यात्मनो न पश्यामि । सुलक्षणानि पश्यन्त्यपि हतलक्षणा निष्फललक्षणा जातास्मीति शेषः । इदं पद्यं प्रक्षिप्तमिति बहवः ॥ ७ ॥

रा० टी०—वैधव्यमिति । भाग्यं दुर्भं याभिः दुर्भगा इत्यर्थः, नार्यः यैर्लक्षणैर्वैधव्यं यान्ति तानि लक्षणानि पश्यन्ती अन्वेषयन्ती तलक्षणा तलयोः पाणिपादतलयोः क्षणम् उत्सवप्रदचिह्नं यस्याः साऽहमात्मनो नैव पश्यामि एतेन रामनिधनं न संभवतीति सूचितम् । ह एवार्थे ॥ ७ ॥

गो० टी०—वैधव्यमिति । भाग्यदुर्लभाः दुर्लभभाग्याः नार्यः यैर्लक्षणैर्वैधव्यं यान्ति तानि लक्षणानि पश्यन्ती विभ्रमन्ती न पश्यामि । कुत्रापि वैधव्ययोग्यदुर्लक्षणं न पश्यामीत्यर्थः । किंतु केवलं हतलक्षणा निष्फललक्षणाऽस्मीत्यर्थः । तादृग्लक्षणानि च सामुद्रिकोक्तानि । परस्परं समारूढाः पादाङ्गुल्यो भवन्ति चेत् । इत्या बहवपि पतीन् परप्रेष्या तथा भवेत् ॥ यस्याः कनिष्ठिका भूमिं न गच्छन्त्याः परिस्पृशेत् । पतिद्वयं निहन्त्याशु द्वितीया च पतित्रयम् ॥ एकरोमा राजपत्नी द्विरोमाप्तिसुखान्विता । त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभागित्यादिना ॥ ७ ॥

८] ति० टी०—लक्षणैर्लक्षणाभिज्ञैः सत्यनामान्यमोघफलानि । तानि लक्षणानि सत्प्रतिपादकशास्त्रैश्च सत्यनामान्यमोघफलानि ।

रा० टी०—सत्यैरिति । लक्षणैः लक्षणाभिज्ञैः सत्यनामा अमोघफलानि स्त्रीणां यानि पद्मानि उक्तानि तानि अद्य वितथा भवन्ति ॥ ८ ॥

गो० टी०—सत्यैरिति । यदि पदे मा श्रीर्यैर्यां तानि पद्मानीत्येवं सत्यनामानि । पदश्रीकराणीत्यर्थः । यद्वा पद्मावत्पद्मशब्दवाच्यानि रेखारूपाणि यानि पद्मानि सत्यनामा अन्वर्थनामानि पद्मशब्दादर्शनाश्रयेण कृते रूपम् । केचित्तु सत्यनामानि अमोघफलानीत्याहुः । लक्षणैः लक्षणाभिज्ञैः यानि सत्यनामानि पद्मान्युक्तानि तानि मे वितथानि निष्फलानि भवन्तीति योजना ॥ ८ ॥

९] ति० टी०—अर्हते अपरस्परास्थिते ॥ ९ ॥

रा० टी०—लक्षणान्यनुवाद्य—केशा इत्यादिभिः । सूक्ष्मत्वादिविशिष्टाः मम केशाः असंहते परस्परमसंश्लिष्टे वृत्ते वर्तुले अरोमके मम जङ्घे च विरले परस्परमसंश्लिष्टा इत्यर्थः ॥ ९ ॥

गो० टी०—केशा इत्यादिचतुःश्लोक्येकान्वया ॥ ९ ॥ सूक्ष्मकेशत्वादिलक्षणलक्षितेऽस्मि । अतो मां शुभलक्षणामूचुर्ज्ञ्यन्त्यः । समाः न्यूनाधिक्यरहिताः । भ्रमंगते परस्परमयुक्ते । अरोमशे रोमरहिते । वृत्ते वर्तुले । अत्र स्कान्दम्—रोमहीने शुभे स्निग्धे यज्जङ्घे क्रमवर्तुले । सा राजपत्नी भवति विप्रेऽपि सुमनोहरेति ॥ जङ्घे नेत्रेत्यादन्यभूतलाटपार्श्वे स्त्रियौ उपचितौ । एतल्लक्षणं नेत्रे इत्यत्र लिङ्गव्यत्ययेन योजनीयम् । अनुवृत्तनखाः वृत्तनखाः । अङ्गुलयः पादहस्ताङ्गुल्यः तदुक्तं स्कान्दे—स्निग्धाः समुन्नतास्तत्र वृत्ताः पादनखाः शुभा इति । समाः हस्तपरिमाणलक्षिताः । नातिदीर्घा नातिह्रस्वा इत्यर्थः । यद्वा एकहस्तवद्वस्तान्तरेऽपि तुल्यपरिमाणा वृत्त्यर्थः अन्यूनाधिकसंख्याका इति वार्थः । अविरलौ निरन्तरौ मग्नचूचुकौ ईषन्मग्नाग्रौ । मग्ना गम्भीरा । उत्सङ्गिनी वृत्तपर्यन्तप्रदेशः । पार्श्वोरुकाः पार्श्वे च उरुकं च । आर्वो स्त्रियौ व्यत्ययः । चितः उचिताः । मणिनिभैः मणिवत्स्निग्धवर्णैः प्रतिष्ठितां द्वादशभिः दशभिः पादाङ्गुलिभिः दृश्यां पादतलाभ्यां च भूमौ सुप्रतिष्ठिताम् ॥ ९–१२ ॥

१०] ति० टी०—जङ्घे मणिनाभ्यभागौ कलाट्पूर्वे इति कनकः । चितावुपचितौ अनुद्धतौ आनुपूर्व्येण वृत्तौ उपयुक्तौ समाः समसंख्याः ॥ १० ॥

रा० टी०—चितौ मांसलौ मे जङ्घे प्रभूतेवृन्तौ तत्र ज

[illegible] मया चारुतरौ नासा: पार्श्वोरस्कं च मे चितम्॥ ११
वर्णो मणिनिभो मृदून्यङ्गरुहाणि च। प्रतिष्ठिता द्वादशभिर्मामूचुः शुभलक्षणाम्॥ १२॥
समग्रयवमच्छिद्रं पाणिपादं च वर्णवत्। मन्दस्मितेत्येव च मां कन्यालाक्षणिका विदुः॥ १३॥
आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह। कृतान्तकुशलैरुक्तं तत्सर्वं वितथीकृतम्॥ १४॥
शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च। तीर्त्वा सागरमक्षोभ्यं त्वरितौ गोष्पदे हतौ॥ १५॥
ननु वारुणमास्त्रेयमैन्द्रं वायव्यमेव च। अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रत्यपद्यत॥ १६॥
अदृश्यमानेन रक्षसा मायया वासवोपमौ। मम नाथावनाथाया निहतौ रामलक्ष्मणौ॥ १७॥
नहि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः। जीवन्प्रतिनिवर्तेत यद्यपि स्यान्मनोजवः॥ १८॥

नेत्रोपान्तदेशौ अनुवृत्ताः अनुपूर्वेण क्रमेण वृत्तं वर्तनं येषां तानि तथोक्तानि यासां स्त्रियः समाकुलयथ॥ १० ॥

११] ति० टी०–अक्षिल्यौ परस्परसंसक्तौ, मम चक्षुषी निर्विशेषभासौ, उन्नतेनानुपनतपर्यन्तप्रदेशा पार्श्वे चोरस्कं च स्वार्थे [illegible] मयोरस्कम् प्राण्यङ्गत्वादेकवचनम् । चितमुपचितम् ॥ ११ ॥

रा० टी०–अक्षिल्यौ परस्परं मिलितौ मम चक्षुषी ययोः नौ मामकौ [illegible] नौ मम निम्नाऽन्तरेणिनी उन्नतप्रदेशा मे नासिः चितं मांसलं मे पार्श्वोरस्कं पार्श्वौ उरश्च प्राण्यङ्गत्वात्समाहारैकत्वम्॥ ११ ॥

१२] ति० टी०–वर्णः कान्तिः । मणिनिभः प्राणभृदमणिवदुज्ज्वलः । अङ्गरुहाणि रोमाणि । द्वादशभिः प्रतिष्ठितां पादद्वयवर्त्यङ्गुलिदशकं हे पाणिपादे च, एवं द्वादशभिः सुप्रतिष्ठितां दृश्यदृष्टभूमिकाम् । एवं केशादिपादान्तलक्षणैर्मां शुभलक्षणामूचुः॥ १२ ॥

रा० टी०–वर्णः कान्तिः प्राणभृत्कृतमणिसदृशः मम वर्णः कान्तिः मूर्तिः [illegible] लोमानि च द्वादशभिः दशभिरिन्द्रियैर्मनोबुद्धिश्च प्रतिष्ठितां मां शुभलक्षणामूचुः । लोमदृष्टान्तश्चापि॥ १२ ॥

१३] ति० टी०–समग्रयवमङ्गुलिपर्वबन्धसमग्रयवप्रमाणछिद्रिद्रिंगवत्, अच्छिद्रं निरन्तराङ्गुल्यन्तरालम् वर्णवत्प्रशस्तकान्ति मन्दस्मिता मन्दस्मितवदकृपणलक्षणवती कन्यालाक्षणिकाः कन्यालक्षणज्ञाः मां तादृशलक्षणजाः॥ १३ ॥

रा० टी०–समग्रेति । समग्रयवं संपूर्णयवाकारेखम् । अच्छिद्रं निरन्तराङ्गुल्यन्तरालम् । वर्णवत् अरुणवर्णम् । मामूचुरित्यनुषङ्गनीयम् । मन्दस्मितेत्येवेत्यवधारणं अयोगव्यवच्छेदार्थम् । निरूपकन्यालक्षणज्ञाः॥ १३ ॥

१४] ति० टी०–कृतान्तकुशलैरुक्तं इति आधिराज्यं [illegible] आधिराज्येऽभिषेको मातीत्यकर्मित्यनुषङ्गः॥ १४ ॥

रा० टी०–अथोक्तिः । कृतान्तकुशलैः ज्योतिःशास्त्रसिद्धान्तविद्भिर्ब्राह्मणैः आधिराज्ये पतिना सह मे अभिषेक उक्तं तत्सर्वं वितथीकृतं विधिनेति शेषः, सामान्ये नपुंसकम्॥ १४॥

गो० टी०–आधिराज्य इति । कृतान्तकुशलैः ज्यौतिषिकसिद्धान्तनिपुणैः । अत्र इतिकरणं उक्तम् । अभिषेक इत्यनुकर्मिण्यन्वयः । चक्रवर्तिक्रियाः पाणौ नख्यावर्तः प्रदक्षिण इत्यादयुक्तलक्षणावर्तादिलक्षणैरिति भावः । सर्वं वितथीकृतमित्यतः परं यज्वनो महिषी ये मासित्यधस्तनश्लोकः कचित्केषु दृश्यते स तु लेखकप्रमादकृतः॥ १४ ॥

१५] ति० टी०–शोधयित्वा शुद्धं राक्षससेनाभासं आक्षोभ्यं तीर्त्वा गोष्पदेऽल्पावशिष्टसैन्ये हतावित्यर्थः । अनेन बहुदिनैः क्षोभरूपावशिष्टे सैन्ये कतिपयमुहूर्तपरिपाट्यं अवस्थान इति लभ्यते॥ १५ ॥

रा० टी०–शोधयित्वेति । जनस्थानं शोधयित्वा दुष्टवर्गेण संशोध्य प्रवृत्तिं हतमन्त्रेषणादिना महदुत्तान्तमुपलभ्य च सागरं तीर्त्वा पुनः त्वरितौ गोष्पदे हतौ॥ १५ ॥

गो० टी०–शोधयित्वेति । शोधयित्वा अन्विष्य । प्रवृत्तिं वृत्तान्तम् । गोष्पदे स्वल्पजलमात्रावशेषे इति भावः॥ १५ ॥

१६–१८] ति० टी०–प्रत्यपद्यत प्रत्यपद्येताम् । एकवचनमार्षम् । नन्वितः पूर्वं तत्किमिदानीं व स्मृतमिति शेषः॥ १६–१८

रा० टी०–नन्विति । वारुणास्त्रं राघवौ प्रत्यपद्यत प्रत्यपद्येताम् एतेन तत्त्रितयमोक्षयमिति तात्पर्यम्॥ १६ ॥

गो० टी०–नन्विति । ब्रह्मशिरः अस्त्रविशेषः । प्रत्यपद्यतां नन्वित्यस्यः परस्मैपदमार्षम् । नन्विति प्रसिद्धौ आमन्त्रणे वा प्रभावधारणाह्लादनयामन्त्रणे नन्वित्यमरः । प्रत्यपद्यतेति निमित्तमामन्त्रणं संभवति॥ १६ ॥

रा० टी०–अदृश्यमानेनेति । अदृश्यमानेनैव रक्षसा मम नाथौ निहतौ हि यतः राघवस्य दृष्टिपथं प्राप्य मनोजवोऽपि रिपुः जीवन्न प्रतिनिवर्तेत । श्लोकद्वयमेकान्वयि॥ १७॥१८॥

गो० टी०–अदृश्यमानेनेति । स्पष्टः॥ १७ ॥

१ समेमाक्षिणी गो०पाठः । २ उरस्कार्थे गो०पाठः । ३ वरस्कार्थे गो०पाठः । ४ [illegible] गो०पाठः । ५ [illegible]

कालस्यातिभारोऽस्ति कृतान्तश्च सुदुर्जयः । यत्र रामः सह भ्रात्रा शेते युधि निपातितः ॥ १९ ॥
शोचामि तथा रामं लक्ष्मणं च महारथम् । नात्मानं जननीं चापि यथा भ्रातृं तपस्विनीम् ॥ २० ॥
तु चिन्तयते नित्यं समाप्तव्रतमागतम् । कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम् ॥ २१ ॥
परिदेवयमानां तां राक्षसी त्रिजटाब्रवीत् । मा विषादं कृथा देवि भर्तायं तव जीवति ॥ २२ ॥
कारणानि च वक्ष्यामि महान्ति सदृशानि च । यथेमौ जीवतो देवि भ्रातरौ रामलक्ष्मणौ ॥ २३ ॥
हि कोपपरीतानि हर्षपर्युत्सुकानि च । भवन्ति युधि योधानां मुखानि निहते पतौ ॥ २४ ॥
दं विमानं वैदेहि पुष्पकं नाम नामतः । दिव्यं त्वां धारयेदेतं यद्येतौ गतजीवितौ ॥ २५ ॥
हतवीरप्रधाना हि गतोत्साहा निरुद्यमा । सेना भ्रमति संख्येषु हतकर्णेव नौर्जले ॥ २६ ॥

गो० टी०—हन्यमानस्ते नैनं हन्तुं शक्नुयादित्यादि—तं ॥ १८ ॥

२९–२२] ति० टी०—कालस्य शुभाशुभफलप्राप्तकाल पेक्षणेऽतिभारो नास्ति, अतस्तदुपस्थापितफलनिर्वर्तको यः तान्तो दैवं स न सुदुर्जयः सामान्यरूपस्यार्थस्य विशेषेण मर्थेनरूपोऽर्थान्तरन्यासः। प्रकृतकथनरूपो यत्रेत्यादि । तत्र स्मादित्यर्थः ॥ १९–२२ ॥

रा० टी०—नेति । यत्र यदा निपातितो रामः शेते तदा कृतान्तः कालः सुदुर्जयः केनिदपि जेतुं शक्यः अत एव कालस्य अतिभारोऽतिभीतिनास्ति रावणमेवाश्रित्य सर्वे नि-र्याः भविष्यन्तीति सचितम् ॥ १९ ॥

गो० टी०—नेति । शुभाशुभप्रापकस्य कालस्यातिभारो स्ति । अशक्यार्थो नास्तीत्यर्थः । कृतान्तः दैवम् । यत्र यतः। मिः अतिबलपराक्रमकार्य्यपीति भावः ॥ १९ ॥

रा० टी०—नेति । यथा भ्रातृं कौसल्यां शोचामि तथा रामप्रभृतीन् शोचामि ॥ २० ॥

गो० टी०—न शोचामीति । जननीं सम्मातरम् ॥ २० ॥

रा० टी०—तत्र हेतुमाह—समाप्तेति । समाप्तो व्रतो नियमो न अत एव आगतं राघवं लक्ष्मणं च सीतां च कदा द्रक्ष्यामि ति सा कौसल्या नित्यं चिन्तयते ॥ २१ ॥

गो० टी०—उक्तार्थं हेतुमाह—समाप्तव्रतम् अत आगतं सराघवं लक्ष्मणं सीतां च कदा द्रक्ष्यामीति अनुचि-न्तयत इत्यन्वयः ॥ २१ ॥

रा० टी०—परीति । परिदेवयमानां सीतां त्रिजटा मब्रवीत् । तमाकाक्षया—हे देवि ! अयं तव भर्ता जीवति यतो विषादं मा कृथाः ॥ २२ ॥

गो० टी०—परीति । परिदेवयमानां सीताम् ॥ २२ ॥

गो० टी०—मा विषादमित्यर्थम् ॥ २३ ॥

२३] ति० टी०—एवं दर्शा प्रामाण्यं कथं जीवनं तत्राह—कारणानीति । महान्तीदानीमपि सजीवत्वोपपादकानि । सदृशानि हतुल्यानि हतसंवादानि । यथेमौ जीवत इति तत्र कारणानि वक्ष्यामीत्यन्वयः ॥ २३ ॥

रा० टी०—ननु कथमिदं विज्ञायते इत्यत आह—का-णानीति । यथा यैः कारणैः इमौ जीवतः तानि सदृशानि योग्यानि महान्ति कारणानि वक्ष्यामि ॥ २३ ॥

गो० टी०—कारणानीति । इमौ रामलक्ष्मणौ जीव इति यथा ज्ञातुं शक्यते तथा महान्ति स्फुटानि सदृशानि हतुल्यानि हतसंवादानीति यावत् । कारणानि हेतून् वक्ष्यामीत्यन्वयः ॥ २३ ॥

२४] ति० टी०—तान्येव व्यतिरेकमुखेनाह—नहीति । पतौ पत्यौ निहते सति योधानां मुखानि क्षणेन शत्रुं हनि ष्याम क्व गच्छतीत्येवं कोपेन व्याप्तानि न भवन्ति । हर्षेण पर्युत्सुकानि हर्षजनकमोहशान्तिहेतुकहर्षपुक्तानि न भवन्ति, अपि तु स्वन्ति केवलम् । नैनं प्रहते, अतो जीवतीति निश्चित्य॥२४

रा० टी०—कारणान्याह—नेत्यादिभिः । पतौ पत्यौ निहते सति योधानां मुखानि कोपेन पर्याप्तानि युक्तानि हर्ष पर्युत्सुकानि मोहशान्तिहेतुकहर्षपुक्तानि नैव भवन्ति एतौ विषयभेदेनैतौ स्त इति सचितम् तेन तयोरेव कारणत्वं सू-चितम् ॥ २४ ॥

गो० टी०—तान्येव कारणानि व्यतिरेकमुखेनाह—न हीति । हर्षेण पर्युत्सुकानि । प्रसन्नानीति यावत् ॥ २५ ॥

२५] ति० टी०—इतोऽप्येवमेवेत्याह—इदं विमानमिति२५

रा० टी०—इदमिति । नामतः पुष्पकमिदं दिव्यं विमानं यदि एतौ गतजीवितौ नहि त्वां न धारयेत् किन्तौ न धारय तीत्यर्थः यतेन धारणकर्त्रं हेत्यन्तरं सचितम् ॥ २५ ॥

गो० टी०—इदमिति । स्पष्टः ॥ २५ ॥

२६] ति० टी०—पुनर्दृष्टान्तमाह—हतेति । हतौ वीर प्रधानौ यस्याः सा सेना गतोत्साहा सती अतो हतकर्णा निहतकर्णधारा नौरिव संख्येषु भ्रमति आन्ति प्राप्नोति इत्यर्थः । तु अन्यत् निरुद्विग्ना वह्नेनरहिता सती भग्ना भीता क्षोभिता

दृष्ट्वा पुनरसंभ्रान्ता निरुद्विग्ना तपस्विनि । सन्न सन्नति काकुत्स्थो मया चीर्त्या निवेदितः ॥ २६ ॥
सा त्वं भव सुविस्रब्धा अनुमानैः सुखोदयैः । अहतौ पश्य काकुत्स्थौ स्नेहादेतद्ब्रवीमि ते ॥ २८ ॥
अनृतं नोक्तपूर्वं मे न च वक्ष्यामि मैथिलि । चारित्रसुखशीलत्वात्प्रविशासि मनो मम ॥ २९ ॥
नैनौ शक्यौ रणे जेतुं सेन्द्रैरपि सुरासुरैः । तादृशं दर्शनं दृष्ट्वा मया चैवोदीरितं तव ॥ ३० ॥
इदं तु सुमहच्चित्रं शरैः पश्यस्व मैथिलि । विसंज्ञौ पतितावेतौ नैव लक्ष्मीर्विमुञ्चति ॥ ३१ ॥
प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् । दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥ ३२ ॥
त्यज शोकं च दुःखं च मोहं च जनकात्मजे । रामलक्ष्मणयोरर्थे नाथ शक्यमजीवितुम् ॥ ३३ ॥
श्रुत्वा तु वचनं तस्याः सीता सुरसुतोपमा । कृताञ्जलिरुवाचेमामेवमस्त्विति मैथिली ॥ ३४ ॥
विषण्णं पुष्पकं तत्तु संनिवर्त्य मनोजवम् । दीना त्रिजटया सीता लङ्कामेव प्रवेशिता ॥ ३५ ॥
ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा । अशोकवनिकामेव राक्षसीभिः प्रवेशिता ॥ ३६ ॥

प्रविश्य सीता बहुवृक्षखण्डां तां राक्षसेन्द्रस्य विहारभूमिम् ।
संमेक्ष्य संचिन्त्य च राजपुत्रौ परं विषादं समुपाजगाम ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

जनकजीवनसन्तानौ काकुत्स्थौ दृश्यते यतेनेदमपि गमकमिति मुनिभिः । नैनौ हतधैर्यौ कार्यौ ॥ २६ ॥ २७ ॥

रा० टी०-हतधैर्यौरिति । हतकर्णा हतकर्णधारा ॥ २७ ॥

२७-२८] ति० टी०-तस्य विषयेषु पर्यवसानं दर्शयति-दृश्य पुनरिति । निवेदितौ निवेदितजीवनौ तुभ्यं कृतौ २७॥२८

२९] ति० टी०-चारित्रेण पतिव्रत्येन सुखशीलत्वात्सुखस्वाभाव्यात्सुखप्रकृतित्वात्सुखावस्थान्मनः प्रविशसि । हृदयं गमिष्यसीत्यर्थः । अत एतत्सत्यं स्वस्यामिनो रावणस्य विरुद्धमपि मया तवोक्तमिति भावः ॥ २९ ॥

गो० टी०-इत्यभिति । निवेदितौ निवेदितजीवितौ॥२८॥

रा० टी०-सेति । सुखोदयैः सुखेन प्रतिभासमानैः अनुमानैरनुविद्धया सविस्रब्धया व्यवसितिभाषा त्वं काकुत्स्थौ अहतौ पश्य मत्वा यदहं ब्रवीमि तत्सत्यं नोक्तपूर्वं मादृशं न च वक्ष्यामि मादृशं ते अनृतं ब्रवीमि । अत्र हेतुमाह---चारित्रेण निर्मलाचरणेन युक्तं सर्वं सकलेतरार्थं शीलं यस्याः तत्त्वादेतोः त्वं मम मनः प्रविशसीत्यर्थे । लोकद्वयमेकान्वये ॥ २८ ॥ २९ ॥

गो० टी०-सा त्वमित्यादि । अनुमानैः चिह्नैः । सुखोदयैः सुखजनकैरित्यर्थः । चारित्रसुखशीलत्वात् । चरित्रमेव पतिव्रतत्वम् तदेव सर्वं प्रियं शीलं स्वभावः यस्या सा तस्याः भावस्तत्त्वं तस्मात् । यद्वा चारित्रेणाह्लादकत्वभावात्तादित्यर्थः । प्रविशसि मनो मम । स्वस्थं मम मनो [ ] ति० टी०-तादृशं दर्शनं जीवनमरणकमनयोः संनिधानं चानुद्दृष्टं मया ततानयोर्जीवनसन्देशरितं निवेदितम् । दृश्यत इति दर्शनः कर्मणि ल्युट् । राजभोजनः शालयः इतिवत् ॥ ३० ॥

रा० टी०-कारणान्तरमाह-नेति । इमौ जेतुं न शक्यौ । नन्वेतदेवं विज्ञातमित्यत आह-तादृशं पराभवाभावात्मकं दर्शनं लक्षणं दृष्ट्वा तव सन्निधौ मया उदीरितम् ॥ ३० ॥

गो० टी०-नेमाविति । तादृशं तालत्रिधम् । जीवनस्य अत्रकमिति यावत् । दृश्यते ज्ञायतेनेनेति दर्शनं सैन्यसुलप्रसादिकम् । पूर्वदृष्टं स्वप्नमिति वार्थः । शनैः पश्यस्व सावधानेन पश्येत्यर्थः ॥ ३१ ॥

३१-३२] ति० टी०- 'लक्ष्मीर्नैव विमुञ्चति' इति पाठेऽपि न मुञ्चतीत्येवार्थः ॥ ३१ ॥ ३२ ॥

रा० टी०-लक्षणान्तरमाह-इदमिति । शरैः सह पतितौ विसंज्ञौ एतौ लक्ष्मीः परमशोभा नैव विमुञ्चति इदं सुमहच्चित्रं पश्यस्व पश्य ॥ ३१ ॥

गो० टी०-निःसंज्ञाविति । न विमुञ्चते न जहाति । गतायुषाम् अत एव गतसत्त्वानां गतप्राणानाम् । द्रव्याख्यव्यवसायेषु सत्त्वमक्षी तु जन्तुष्वित्यमरः । वैकृतं विकृतिः ॥३२॥

रा० टी०-प्रायेणेति । गतायुषाम् । अत एव गतसत्त्वानां निर्गतप्राणानां पुरुषाणां दृश्यमानेषु वक्त्रेषु परमवैकृतं विकारो भवति अत्र नास्तीति तात्पर्यम् ॥ ३२ ॥

३३-३७] ति० टी०-रामलक्ष्मणयोरर्थे शोकं त्यज एवं प्रसन्नमुखाभ्यामजीवितुं जीवनराहित्येनावस्थातुमशक्यम् । अतो जीवतीति निश्चिन्वितिं शेषः ॥ ३३ ॥ ३७ ॥

इति श्रीरामभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१-२ सुखोदयैरिति ग० पाठः । ३ वक्ष्ये कदाचनेति गो. पाठः । ३ चावेदितमिति गो. पाठः । ४ चेति गो. पाठः । ५ विज्ञप्तिमिति गो. पाठः । ६ त्यजेति गो. पाठः ।

एकोनपञ्चाशः सर्गः ।

तत्र प्रतिबुद्धो रामः प्रभूतप्रहारविषण्णं लक्ष्मणं वीक्ष्य बहु विललाप कस्योऽपि विलोक्यैतत् विषादस्य परं[illegible] रामानुपायच्छन्तं विभीषणं निरीक्ष्य रावणबुद्धया पलायामासुः ।

घोरेण शरबन्धेन बद्धौ दशरथात्मजौ । निःश्वसन्तौ यथा नागौ शयानौ रुधिरोक्षितौ ॥ १ ॥
सर्वे ते वानरश्रेष्ठाः सुग्रीवप्रमुखा बलाः । परिवार्य महात्मानौ तस्थुः शोकपरिप्लुताः ॥ २ ॥
एतस्मिन्नन्तरे रामः प्रत्यबुध्यत वीर्यवान् । स्थिरत्वात्सत्त्वयोगाच्च शरैः संदानितोऽपि सन् ॥ ३ ॥
ततो दृष्ट्वा सरुधिरं निषण्णं गात्रमर्पितम् । भ्रातरं दीनवदनं पर्यदेवयदातुरः ॥ ४ ॥
किं नु मे सीतया कार्यं लैङ्घ्यया जीवितेन वा । शयानं योऽद्य पश्यामि भ्रातरं युधि निर्जितम् ॥ ५ ॥

रा० टी०—त्यजेति । अजीवितुं रामलक्ष्मणयोर्जीवनं वर्णयितुं न शक्यम् अतः रामलक्ष्मणयोरन्यं शोकं मोहं च त्यज ॥ ३३ ॥

गो० टी०—त्यजेति । रामलक्ष्मणयोरन्यं शोकं शोककर्तृ प्रविकारम् मोहं विपरीतबुद्धिम् दुःखं सर्वकार्यार्थं च त्यज । जीवितुं न शक्यं जीवितुं शक्यमेवेत्यर्थः ॥ ३३ ॥

रा० टी०—श्रुत्वेति । तस्याः विजटायाः वचनं श्रुत्वा त्रस्तमस्तीति इमां विजटामुवाच ॥ ३४ ॥

गो० टी०—श्रुत्वेति । कलत्रलिङ्गिन्यत्वेन भगवद्विग्रहेषा योषिदपि कोप्यारणेय इत्युक्तम् । इति श्रुत्वा विभीषणोऽपि त्रस्तमस्तीति ॥ ३४ ॥

रा० टी०—विमानमिति । दीना सीता विजटया विमानं निवर्त्य लङ्कामेव प्रवेशिता ॥ ३५ ॥

गो० टी०—विमानमिति । सचिवेनेत्यनेन प्रवेशे च हितैव कर्त्री ॥ ३५ ॥

रा० टी०—तत इति । पृथक्कादधस्तात् उद्यानं राक्षसीभिः सा सीता अशोकवनिकामेव प्रवेशिता ॥ ३६ ॥

गो० टी०—तत इति । राक्षसीभिरित्यनेन विजटादर्शनायानीतेति गम्यते ॥ ३६ ॥

रा० टी०—प्रविश्येति । बहुयोधानां षण्डः समूहो यस्यां तां राक्षसेनस्य विहारभूमिम् अशोकवनिकां प्रविश्य संप्रेक्ष्य सर्वतश्चावलोक्य च राघवपूर्वां संचिन्त्य च सीता परमं विषादं वशमापजगाम ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणेऽध्यात्मे रामायणशिरोमणौ युद्धकाण्डे अनूचत्वारिंशः सर्गः ॥ ४८ ॥

गो० टी०—प्रविश्येति । विहारभूमिं प्रमदावनम् । संप्रेक्ष्य संचिन्त्य । प्रेक्षितप्रकारेण संचिन्त्येत्यर्थः । यद्वा भावनाप्रकारेण स्थितौ संप्रेक्ष्येत्यर्थः ॥ ३७ ॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्ये युद्धकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४८ ॥

१–२] ति० टी०—घोरेणेति ॥ १ ॥ २ ॥

रा० टी०—रामवृत्तान्तमेवाह—घोरेणेत्यादिभिः । घोरेण बन्धेन बद्धाविव दशरथात्मजौ परिवार्य वानरश्रेष्ठाः तस्थुः बलप्रधानाः भावाविष्कृतप्रकृतिकप्रथमान्तः । श्लोकद्वयेनान्वयः ॥ १ ॥ २ ॥

गो० टी०—अथ रामप्रबोधनमेकोनपञ्चाशे—घोरेणेत्यादि श्लोकद्वयमेकान्वयम् । नागौ यथा नागाविव निःश्वसन्तौ तथेत्यन्वयः । शोकपरिप्लुताः शोकपूर्णाः ॥ १ ॥ २ ॥

३] ति० टी०—स्थिरत्वादतिदृढगात्रत्वात्, सत्त्वयोगात्तदारब्धकत्वात्, संदानितोऽपि बद्धोऽपि ॥ ३ ॥

रा० गो०—एतस्मिन्निति । शरैः संदानितो बद्धोऽपि रामः सत्त्वयोगात् नित्यं प्राकृतविलक्षणसत्त्वसंबन्धात् अतः स्थिरत्वात् उद्रेकसंसर्गरहितत्वाद्वेतोः वीर्यवान् रामः एतस्मिन्नन्तरे समये प्रत्यबुध्यत 'बद्धः संदानितो मितः' इत्यमरः । एतेन पूर्वं तादृशप्रबोधनिरोधात्[illegible] लक्ष्मणेवेति मन्तव्यम् ॥ ३ ॥

गो० टी०—एतस्मिन्निति । स्थिरत्वात् धीरत्वात्, सत्त्वयोगाद्बलयोगात् । संदानितोऽपि बद्धोऽपि । बद्धे संदानितमित्यमरः ॥ ३ ॥

४–५] ति० टी०—गात्रमर्पितं शरैर्गाढमाहतम् ॥ ४ ॥ ५ ॥

रा० टी०—तत इति । स रामः गात्रमर्पितं प्रक्षिप्तं दृष्ट्वा विषण्णं भ्रातरं च दृष्ट्वा आतुरः सन् पर्यदेवयत् व्यलपत् ॥ ४ ॥

गो० टी०—तत इति । अर्पितं शरैरिति शेषः ॥ ४ ॥

रा० टी०—तदाकारमाह—किमित्यादिभिः । योधे युधिनिर्जितमेव भ्रातरं पश्यामि तस्य मे सीतया जीवितेन वा किम् । निर्जितशब्दः आचारक्विबन्तप्रकृतिकक्तप्रत्ययान्तः ॥ ४ ॥ ५ ॥

गो० टी०—किं नु मे इत्यादिश्लोकद्वयम् । विचित्रमदेति शेषः । लक्ष्मणः [illegible] आचारक्विप्रत्ययः [illegible] भ्रातरमित्यर्थः । कस्यचिदाचारस्य कस्यचिदाचार इत्यमरः ॥ ४ ॥ ५ ॥

सीतासमा नारी मर्त्यलोके विचिन्वता । न लक्ष्मणसमो भ्राता सचिवः सांपरायिकः ॥ ६ ॥
परित्यक्ष्याम्यहं प्राणान्वानराणां तु पश्यताम् । यदि पञ्चत्वमापन्नः सुमित्रानन्दवर्धनः ॥ ७ ॥
किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम् । कथमम्बां सुमित्रां च पुत्रदर्शनलालसाम् ॥ ८ ॥
विवत्सां वेपमानां च वेपन्तीं कुररीमिव । कथयाश्वासयिष्यामि यदि यास्यामि तं विना ॥ ९ ॥
कथं वक्ष्यामि शत्रुघ्नं भरतं च यशस्विनम् । मया सह वनं यातो विना तेनाहमागतः ॥ १० ॥
उपालम्भं न शक्ष्यामि सोढुमम्बासुमित्रया । इहैव देहं त्यक्ष्यामि नहि जीवितुमुत्सहे ॥ ११ ॥
धिङ्मां दुष्कृतकर्माणमनार्यं मैत्कृते त्वसौ । लक्ष्मणः पांसुतल्पे शेते शरततल्पे गतासुवत् ॥ १२ ॥
त्वं नित्यं सुविषण्णं मामाश्वासयसि लक्ष्मण । गतासुर्नाद्य शक्तोऽसि मामार्तमभिभाषितुम् ॥ १३ ॥
येनाद्य हैहयो युद्धे निहता राक्षसाः क्षितौ । तस्यामेवाद्य शूरस्त्वं शेषे विनिहतः शरैः ॥ १४ ॥
शयानः शरतल्पेऽस्मिन्सशोणितपरिप्लुतः । शरभूतैस्ततो भासि भास्करोऽस्तमिव व्रजन् ॥ १५ ॥

६-९] ति० टी०-सचिवः सहायः । सांपरायिको युद्धे साधुः युद्धार्हः इति यावत् ॥ ६ ॥ ९ ॥

रा० टी०-शक्ष्येति । सीतासमा नारी विचिन्वता सेनासंचयं कुर्वता मया मर्त्यलोके न लभ्या लब्धुमिति शेषः, सांपरायिकः युद्धकर्मणि साधुः सचिवः साचिव्यकर्ता लक्ष्मणसमो भ्राता च न लभ्यः अतेन तत्सदृशयोरभावः सूचितः 'युद्धागम्योः संपरायः' इत्यमरः विनिगमनाविरहात्र उभयान्वयी मर्त्यलोक इति लोकान्तराणामप्युपलक्षकम् ॥ ६ ॥

रा० टी०-पुरीति । सुमित्रानन्दवर्धनः यदि पञ्चत्वं लोकान्तरमापन्नः तदा प्राणान् लोकरक्षाः अहं परित्यक्ष्यामि तत्समीप एव गमिष्यामीति तात्पर्यम् ॥ ७ ॥

गो० टी०-परित्यक्ष्यामीति । पञ्चत्वं मृतिम् ॥ ७ ॥

रा० टी०-किमिति । तं लक्ष्मणं विना यदि यास्यामि तर्हि विवत्सां वेपन्तीं कुररीमिव वेपमानां कौसल्याप्रभृतिं कथं केन प्रकारेण किं वक्ष्यामि तत्र वचनयोग्यता नास्तीत्यर्थः अत एव कथमाश्वासयिष्यामि । श्लोकद्वयमेकान्वयि ॥८॥९॥

गो० टी०-किं नित्यादिश्लोकद्वयमेकान्वयम । अहं तं लक्ष्मणं विना अयोध्यां यदा यास्यामि तदा कौसल्यां कैकयीं च किं वक्ष्यामि । सुमित्रां कथमाश्वासयिष्यामि ॥ ८ ॥ ९ ॥

१०] ति० टी०-यो मया सह वनं गतस्तेन लक्ष्मणेन विना गतोऽहं किं वक्ष्यामि ॥ १० ॥

रा० टी०-कथमिति । यो मया सह वनं यातः तेन विनाऽहमागतः इति वचनं अर्थं वक्ष्यामि ॥ १० ॥

गो० टी०-कथमित्यर्धम् । यशस्विनमित्यनेन तथशो मया न लब्धमिति खिद्यति ॥ १० ॥

११-१२] ति० टी०-अम्बासुमित्रयेति । क्रियमाणमिति शेषः ॥ ११ ॥ १२ ॥

रा० टी०-उपालम्भमिति । अम्बाभ्यां सहितया सुमित्रया क्रियमाणमिति शेषः, उपालम्भम् उपस्तोभादिः सोढुं शक्ष्यामि यतो जीवितुं पालयितुं नोत्सहे अतो देहं तत्रत्यं नीयसेनाम इह अस्मिन् समये एव त्यक्ष्यामि ॥ ११ ॥

गो० टी०-इहैवेत्यर्धम् ॥ १२ ॥

रा० टी०-धिगिति । यतो मत्कृते मदर्थं लक्ष्मणो गतासुवत् शेते अतो मां धिक ॥ १२ ॥

गो० टी०-धिगिति । दुष्कृतकर्माणं लक्ष्मणवनालयनमेदुष्कृतं कर्म ॥ १२ ॥

१३-१४] ति० टी०-गतासुर्गतासुरिव ॥ १३ ॥ १४ ॥

रा० टी०-लक्ष्मणमुद्दिश्य आह-त्वमिति । हे लक्ष्मण यस्त्वं मां नित्यमाश्वासयसि स त्वं गतासुरिव मामभिभाषितुं न शक्तोऽसि पुरोहितोऽयं राजेत्यादाविव गतासुशब्द लाक्षणिकः ॥ १३ ॥

गो० टी०-त्वमिति । स त्वमित्यन्वयः ॥ १४ ॥

रा० टी०-येनेति । येन त्वया अद्य क्षितौ युद्धे बहवो राक्षसाः निहताः स त्वं तस्यामेव क्षितौ शरैर्विनिहितस्ताडितः सन् शेषे ॥ १४ ॥

गो० टी०-येनेति । स्पष्टम् ॥ १५ ॥

१५] ति० टी०-शरभूतैः शरैर्व्याप्तशरीरत्वाच्छरभूतैः प्राप्तैः । अस्तं व्रजन्भास्कर इव तत्तदन्यानिःसरद्भिरन्यैः शरैः किरणस्थानीयैः ॥ १५ ॥

रा० टी०-शयान इति । शोणितपरिप्लुतः शरभूतैः शरैराहतोऽत एव शरतल्पे शयानस्त्वम् अस्तं व्रजन् भास्कर इव भासि शराणां किरणस्थानीयत्वम् ॥ १५ ॥

गो० टी०-शयान इति । अयमिति शेषः । अत्र शर-

१ प्राणानिति गो. पाठः । २ क्रोशन्तीमिति गो. पाठः । ३ गतः पुनरिति गो. पाठः । ४ व्रतेति गो. पाठः । ५ वधिति गो. पाठः । ६ इति गो. रा. पाठः । ७ सेति गो. पाठः । ८ शक्नोषीति गो. पाठः । ९ निहतं युद्धे राक्षसा विनिपातिता इति गो. पाठः । १० क्षिति निहतः पौरिति गो. पाठः । ११ प्लुत इति गो. पाठः । १२ जानकीमितो नीतेति गो. पाठः ।

बाणानामस्त्रमन्त्राणां शक्नोमीह भाषितुम् । रुजा चाक्षुवतो यस्य दृष्टिरागेण सूच्यते ॥ १६ ॥
यथैव मां वनं यान्तमनुयातो महाद्युतिः । अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥ १७ ॥
इष्वन्वृजनो नित्यं मां च नित्यमनुव्रतः । इमामद्य गतोऽवस्थां मयानार्यस्य दुर्नयैः ॥ १८ ॥
गुरुणापि धीरेण लक्ष्मणेन न संस्मरे । परुषं विप्रियं चापि श्रावितं तु कदाचन ॥ १९ ॥
विससर्जैकवेगेन पञ्च बाणशतानि यः । इष्वस्त्रेष्वधिकस्तस्मात्कार्तवीर्याच्च लक्ष्मणः ॥ २० ॥
अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः । सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः ॥ २१ ॥
तु मिथ्या प्रलप्तं मां प्रधक्ष्यति न संशयः । यन्मया न कृतो राजा राक्षसानां विभीषणः ॥ २२ ॥
स्मिन्मुहूर्ते सुग्रीव प्रतियातुमिहार्हसि । सैन्यहीनं मया राजन्रावणोऽभिभविष्यति ॥ २३ ॥
उदधिं तु पुरस्कृत्य ससैन्यं सेपरिच्छदम् । सागरं तर सुग्रीव नीलेन च नलेन च ॥ २४ ॥

स्थानायोत्सृगिरि. शरस्थाने किरणाः शोणितस्थाने वर्णत्वम् ॥ १६ ॥

१६] ति० टी०—अक्षुवतोऽपि यस्य रुजा व्यथा दृष्ट्या बाणान्यथा सूच्यते शोभया च सूच्यते । इत्यनेन दर्शनशक्तिः सूच्यते ॥ १६ ॥

रा० टी०—बाणेति । बाणैः अभिहतानि व्याप्तानि मर्माणि यस्य तस्याक्षेतोः अक्षुवतो यस्य तव दृष्टिरागेण नयनाकर्षणेन पीडा सूच्यते स त्वम् इह इदानीं भाषितुं न शक्नोषि॥१६॥

गो० टी०—बाणेति । रुजा व्यथा । दृष्टिरागेण दीक्षप्रेम्णा ॥ १७ ॥

१७] ति० टी०—यमक्षयं यमगृहं यास्यामीत्यन्वयः । भ्रायं मात्रादिषु स्नेहमपर्याप्तोऽपि यथानुगतस्तथाहमपि स्नेहं त्यक्त्वानुयास्यामीति भावः ॥ १७ ॥

रा० टी०—यथेति । वनं यान्तं मां यथा त्वमनुयातः तेन प्रकारेण कृतागस्यं लोकं यान्तमेनं त्वामहमप्यनुयास्यामि ॥ १७ ॥

गो० टी०—यथैवेति । तैव तेन प्रकारेण । मात्रादिष्वेवमवेचार्येत्यर्थः । यमक्षयमित्यत्रापि यान्तमित्यनुषज्यते ॥ १७ ॥

१८] ति० टी०—इष्टे बन्धुजनो यस्य सः ॥ १८ ॥

रा० टी०—इष्टेति । इष्टो बन्धुजनो यस्य सः मां नित्यमनुव्रतश्च त्वम् । अनार्यस्य राक्षसस्य दुर्नयैः मायाभिरित्यर्थः । इमामवस्थां गतोऽसि ॥ १८ ॥

गो० टी०—इष्टेति । स्पष्टः ॥ १८ ॥

१९] ति० टी०—विप्रियमहितं कदाचन श्रावितं स्मिति न तस्मरे न स्मरामीत्यर्थः ॥ १९ ॥

रा० टी०—गुरुणेति । गुरुणापि लक्ष्मणेन परुषं विप्रियं च कदाचन न श्रावितम् इत्यहं संस्मरे जानामि ॥१९॥

गो० टी०—गुरुणेति । विप्रियम् अहितम् । गुरुणापि लक्ष्मणेन श्रावितं विप्रियं परुषं वाक्यम् अक्षरामीत्यर्थः॥१९॥

२०-२१] ति० टी०—यः एकवेगेन पञ्चबाणशतानि विससर्ज कार्तवीर्यस्तस्मात्कार्तवीर्यात्सहस्रबाहोरयं द्विबाहुरेकेन वेगेन तावतो बाणान्विसृजन्नधिक इत्यर्थः ॥ २० ॥२१॥

रा० टी०—विससर्जेति । यः एकवेगेन पञ्च बाणशतानि विससर्ज स लक्ष्मणः इष्वस्त्रेषु इषुप्रयोगेषु कार्तवीर्यात् सहस्रबाहोरप्यधिकः ॥ २० ॥

गो० टी०—विससर्जेति । यः कार्तवीर्यः । एकेन वेगेन एकप्रयत्नेन । यत्सहस्रबाहुः कार्तवीर्यः । यावता कालेन पञ्चबाणशतानि विससर्ज प्रायुङ्क्त । द्विभुजोऽयं लक्ष्मणः तावतैव कालेन तावतो बाणान् विसृजन् । इष्वस्त्रेषु विषये तस्मात्कार्तवीर्यादधिक इत्यर्थः ॥ २१ ॥

रा० टी०—अस्त्रैरिति । शक्रस्यापि अस्त्राणि अस्त्रैर्यो हन्यात् सोऽयं हतस्ताहिनः सन् उर्व्यां शेते ॥ २१ ॥

गो० टी०—अस्त्रैरिति । हन्यात् हन्तुं शक्तः । शकि लिङ्॥२१॥

२२] ति० टी०—विभीषणो राजा न कृत इति यत्, तस्माद्विभीषणमभिषेक्ष्यामीति मिथ्या प्रलपं प्रलपितं मां प्रधक्ष्यति ॥ २२ ॥

रा० टी०—तादिति । राक्षसानां राजा विभीषणः मत्स्मान्मया कृतः तत्तस्माद्धेतोः प्राप्तं विभीषणमभिषेक्ष्यामीति मम वचनं मिथ्या सत् मां प्रधक्ष्यति अत्र संशयो न ॥ २२ ॥

गो० टी०—यदिति । यत् यस्मात् । विभीषणो राक्षसानां राजा न कृतः । तस्मात् मिथ्याप्रलपनं राजानं त्वां करिष्यामीति मिथ्या प्रलपितं मां प्रधक्ष्यति । दहतीत्यर्थः । आशुतं कार्यनिर्वाहाभावेन मिथ्येत्युच्यते । आशुतं प्रतिज्ञातम् ॥२२॥

२३] ति० टी०—सैन्यहीनं शोकवता मया बलहीनम॥२३॥

रा० टी०—सुग्रीवं प्रत्याह—अस्मिन्निति । हे सुग्रीव मया सह सैन्यहीनं शोकेन बलरहितं त्वां रावणोऽभिभविष्यति अतः अस्मिन्मुहूर्ते एव त्वं प्रतियातुमर्हसि ॥ २३ ॥

गो० टी०—अस्मिन्निति । प्रतियातुं किञ्चित्कालं शेषः । हीनं त्यक्तमिति शेषः ॥ २३ ॥

२४] ति० टी०—नलेनेत्यादौ लहेति शेषः ॥ २४ ॥

कृतं हि सुमहत्कर्म यदन्यैर्दुष्करं रणे । ऋक्षराजेन तुष्यामि गोलाङ्गूलाधिपेन च ॥ २५ ॥
अङ्गदेन कृतं कर्म मैन्देन द्विविदेन च । युद्धं केसरिणा संख्ये घोरं संपातिना कृतम् ॥ २६ ॥
गवयेन गवाक्षेण शरभेण गजेन च । अन्यैश्च हरिभिर्युद्धं दुर्धरैः त्यक्तजीवितैः ॥ २७ ॥
न चातिक्रमितुं शक्यं दैवं सुग्रीव मानुषैः । यत्तु शक्यं वयस्येन सुहृदा वै परं मम ॥ २८ ॥
कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा । मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः ॥ २९ ॥
अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ । शुश्रुवुस्तस्य ये सर्वे वानराः परिदेवितम् ॥
वर्तयांचक्रिरेऽश्रूणि नेत्रैः कृष्णेतरेक्षणाः ॥ ३० ॥
ततः भर्याण्यनीकानि स्थापयित्वा विभीषणः । आजगाम गदापाणिस्त्वरितं यत्र राघवः ॥ ३१ ॥
तं दृष्ट्वा त्वरितं यान्तं नीलाञ्जनचयोपमम् । वानरा दुद्रुवुः सर्वे मन्यमानास्तु रावणिम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०—अङ्गदमिति । अङ्गदं परस्कृत्य नीलादिना सह सागरं तर ॥ २४ ॥

गो० टी०—अङ्गदमिति । स्पष्टः ॥ २५ ॥

२५-२६] ति० टी०—ऋक्षमदादिभिर्मदर्थं यत्कृतं तेन तुष्यामि ॥ २५ ॥ २६ ॥

रा० टी०—कृतमिति । ऋक्षमता ऋक्षराजेन च अन्यैर्दुष्कृतं कर्म कृतं भवतोऽहं तुष्यामि ॥ २७ ॥

रा० टी०—अङ्गदेनेति । अङ्गदादिना घोरं युद्धं कर्म कृतम् ॥ २६ ॥

गो० टी०—कृतमित्यादिसार्धश्लोकत्रयम् । संपातिना वानरेण ॥ २६-२८ ॥

२७] ति० टी०—हरिभिर्युद्धं कृतमिति पूर्वेण संबन्धः॥२७॥

रा० टी०—गवयेनेति । गवयादिना अन्यैश्च हरिभिर्दुर्धर्षं युद्धं कृतम् ॥ २७ ॥

२८] ति० टी०—अतिप्रबलसहायेनापि दैवं दर्शयमित्याह—न चातिक्रमितुमिति । वयस्यः केवलसखा सहृदुपकारापेक्षया ॥ २८ ॥

रा० टी०—नन्वेवं परानुग्रहस्त्वया सर्वं निरर्थकमित्यत आह—यत्त्विति । हे सुग्रीव ! दैवं परमात्माविहितम् । अतिक्रमितुं मानुषैर्जनैर्न शक्यं तथापि यच्छक्यं तत्सर्वं मम कार्यं वयस्येन सहृदा भवता कृतम् । सार्धश्लोक एकान्वयी ॥ २८ ॥

गो० टी०—यत्त्विति । वयस्येन मित्रेण । सहृदा च शोभनहृदयेन वा । वयस्यो वाग्भवार्थकः । धर्मभीरुणा धर्मो न हनिष्यतीति भीरुणेत्यर्थः । अधर्मभीरुणेति वा पदच्छेदः ॥ २९ ॥

२९] ति० टी०—अधर्मभीरुणेति छेद इति तीर्थस्तद्विफलम् । नञ्भीरुणेति छेदेऽपि धर्मेत्यामाद्भीरुणेति व्याख्यातुं शक्यत्वात् ॥ २९ ॥

रा० टी०—मित्रेति । हे वानरर्षभाः ! मित्रकार्यं भवद्भिः कृतम् अतो मयाऽनुज्ञाता यूयं गन्तुमर्हथ ॥ २९ ॥

गो० टी०—मित्रेति ॥ ३० ॥

३०-३१] ति० टी०—परिदेवितं परिदेवनप्रकारं तच्च कृष्णेतरेक्षणाः पिङ्गलाक्षाः ॥ ३० ॥ ३१ ॥

रा० टी०—शुश्रुवुरिति । ये कृष्णेतरेक्षणाः पिङ्गलनेत्रा वानराः तस्य परिदेवितं शुश्रुवुः ते सर्वे नेत्रैः अश्रूणि वर्तयांचक्रिरे ॥ ३० ॥

गो० टी०—शुश्रुवुरिति । वर्तयांचक्रुः प्रवर्तयांचक्रुः । कृष्णेतरेक्षणाः रक्तेक्षणा इत्यर्थः ॥ ३१ ॥

रा० टी०—तत इति । ततस्तस्मिन् समये भयोत्पादकानि स्थापयित्वा यत्र राघवः तत्र विभीषणः आजगाम ॥ ३१ ॥

गो० टी०—तत इत्यादिश्लोकद्वयम् ॥ ३२ ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

३२] ति० टी०—तं दूरपलायितसेनाः परावर्त्य स्थापयित्वा गतम् । वानरा दुद्रुवुः । सुग्रीवसमीपस्था इति शेषः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीमद्भीमे रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०—तमिति । त्वरितं यान्तं तं विभीषणं दृष्ट्वा रावणिं मन्यमाना वानराः दुद्रुवुः ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्यायां रामायणशिरोमणौ युद्धकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

---

१ ऋक्षमता ऋक्षपतिना गो. रा. पाठः । २ अदर्थं इति गो. पाठः । ३ च परंतपेति गो. पाठः । ४ ते इति गो. पाठः । ५ देवमानुषैः [illegible]
६ लक्षि इति गो. पाठः ।

पञ्चाशः सर्गः ।

सुग्रीवेणाहृतः पृष्टः शोकहेतुमावेद्य ततः प्राप्तं विभीषणं दृष्ट्वा सुग्रीवो जाम्बवन्तं वानरान्समाश्वासयितुमादिश्य स्वयं विभीषणं सान्त्वयित्वा सुषेणं यदाबोधनार्थमागते गरुत्मति झटिति रावणी नागपाशविमुक्तौ लक्ष्मणं च लब्धसंज्ञमालोक्याखिलैः कपिभिः सह

अथोवाच महातेजा हरिराजो महाबलः । किमियं व्यथिता सेना मृदुवातेव नौर्जले ॥ १ ॥
सुग्रीवस्य वचः श्रुत्वा वालिपुत्रोऽङ्गदोऽब्रवीत् । न त्वं पश्यसि रामं च लक्ष्मणं च महारथम् ॥ २ ॥
शरजालाचितौ वीरावुभौ दशरथात्मजौ । शरतल्पे महात्मानौ शयानौ रुधिरोक्षितौ ॥ ३ ॥
अथात्रवीद्विनरेन्द्रः सुग्रीवः पुत्रमङ्गदम् । नानिमित्तमिदं मन्ये भवितव्यं भयेन तु ॥ ४ ॥
विषण्णवदना ह्येते त्यक्तप्रहरणा दिशः । पलायन्तेऽत्र हरयस्त्रासादुत्फुल्ललोचनाः ॥ ५ ॥
अन्योन्यस्य न लज्जन्ते न निरीक्षन्ति पृष्ठतः । विप्रकर्षन्ति चान्योन्यं पतितं लङ्घयन्ति च ॥ ६ ॥
एतस्मिन्नन्तरे वीरो गदापाणिर्विभीषणः । सुग्रीवं वर्धयामास राघवं च जयाशिषा ॥ ७ ॥

१] ति० टी०—मृदुवाता दिग्भ्रमोद्भवकरवातवर्जिता । मृदेति भावे निष्ठा ॥ १ ॥

रा० टी०—सुग्रीवोक्तिमाह—अथेति । मृदुः मोहकारिवातो यस्यां सा किंत्र वातेन मृदुः मृदुवाता नौरिव इयं सेना किं किमर्थं व्यथिता इति हरिराजः सुग्रीव उवाच ॥ १ ॥

गो० टी०—अथ रामस्य नागपाशविमोचनं पर्यालोच्य—अथोवाचेत्यादि । नाक्षत्रिकसेनापलायननिमित्तमजानानः पृच्छति—किमिति । किं किमर्थम् । व्यथा वानरानिति शेषः । मृदुः मूर्च्छितः । विरुद्धदिग्व्यन्तरवातात् इत्यर्थः । ह्यात्याहतति यावत् ॥ १ ॥

२–३] ति० टी०—सुग्रीवस्य वचः सेनापलायनप्रहेतुरूपम् । अङ्गदस्तु प्रस्तुतमेव निमित्तमाह—न त्वमिति । एवं विशेषणकौ दशरथात्मजौ न पश्यसि किम् एतदेव निमित्तमिति तथा प्रश्न इति भावः ॥ २ ॥ ३ ॥

रा० टी०—सुग्रीवस्येति । सुग्रीवस्य वचः श्रुत्वा अङ्गदः प्रत्यब्रवीत् । अर्थं पृथक् । तदाकारमाह—नेति । शरजालेन चाचितौ शरतल्पे शयानौ रामं लक्ष्मणं च इक्ष्वाकुवंशजौ त्वं न पश्यसि एतेन एतदर्थमेव संचलनमिति सन्निधम् । सार्धश्लोक एकान्वयी ॥ २ ॥ ३ ॥

गो० टी०—सुग्रीवस्येत्यर्धम् ॥ २ ॥

गो० टी०—रामलक्ष्मणौ विना किमन्यन्निमित्तमित्युत्तरयति—त्वमिति । अत्र काकुः । त्वं न पश्यसि किमित्यर्थः । रामं लक्ष्मणं चेत्युभावित्यन्वयः ॥ ३ ॥

४] ति० टी०—सुग्रीवो नेदमिदानीं पलायननिमित्तमित्याह—अथेति । इदं पलायननिमित्तं त्वदुक्तनिमित्तान्यनिमित्तमिति न मन्ये, किं तु केनचित्सांयात्रिकेण पलायनहेतुना भवितव्यमित्यर्थः ॥ ४ ॥

रा० टी०—अथेति । सुग्रीवोऽब्रवीत् तदाकारमाह—भयेन भवितव्यम् अस्मदादिभिरिति शेषः भविष्यत्त्व हेतुरूपं तत्र वक्तुमनिमित्तं विशेषणेनिमित्तं हितं न मन्ये किंत्र [illegible] इदमनिमित्तं चानौ भयेन भवितव्यम् ॥ ४ ॥

गो० टी०—नानिमित्तमिति—अथेत्यादिना । इदं रघुवीरहयोः शस्त्रप्रपतनं अनिमित्तं न भवतीति मन्ये । किंत्वेतत् भयनिमित्तेन भवितव्यमित्यर्थः । तत्र हेतुमाह—विषण्णेत्यादिना । त्यक्तप्रहरणाः त्यक्तशिलावृक्षपाणयः । अन्योन्यस्य अन्योन्यम् विप्रकर्षन्ति इतस्ततः आकर्षन्ति ॥ ४–६ ॥

५] ति० टी०—तदेव स्पष्टयति—विषण्णेति । विषण्णवदनास्त्यक्तप्रहरणाश्च सन्त एतानन्यायेनैतमेव स्थिताः पलायन्ते तु इतो दिशः प्रतिपलायन्ते, तत् त्रासात्सांप्रतिकादेव नान्यथेत्यर्थः ॥ ५ ॥

रा० टी०—विषण्णेति । [illegible] अतः एतान्यनिमित्तानि प्रहरणान्यपि नेयं दिशः पलायन्ते ॥ ५ ॥

६] ति० टी०—न लज्जन्ते । शत्रुभीति फलेन क्रियमाणेन न लज्जां प्राप्नुवन्तीत्यर्थः । पृष्ठतः । वर्तमानपदार्थोनिति शेषः । विप्रकर्षन्ति । पलायनप्रतिरोधकानिति शेषः ॥ ६ ॥

रा० टी०—अन्योन्यस्येति । अन्योन्यस्य न लज्जन्ते पृष्ठतो न निरीक्षन्ति च अन्योन्यं विप्रकर्षन्ति च पतितं लङ्घयन्ति भीत्या नोत्थापयन्तीत्यर्थः ॥ ६ ॥

७] ति० टी०—वर्धयामास । विजयी भवेति वचनेनेति भावः ॥ ७ ॥

रा० टी०—एतस्मिन्निति । एतस्मिन्नन्तरे समये [illegible] वणः सुग्रीवं राघवं च जयाशिषा वर्धयामास ॥ ७ ॥

गो० टी०—एतस्मिन्निति । स्पष्टः ॥ ७ ॥

---

१ क. ङ. छ. झ. ञ. °वातवर्जनी । २ झटित्यागतेऽपि गो. पाठः । ३ निरीक्षतेति गो. पाठः ।

विभीषणं च सुग्रीवो दृष्ट्वा वानरभीषणम् । ऋक्षराजं महात्मानं समीपस्थमुवाच ह ॥ ८ ॥
विभीषणोऽयं संप्राप्तो यं दृष्ट्वा वानरर्षभाः । द्रवन्त्ययाततसंत्रासा रावणात्मजशङ्कया ॥ ९ ॥
शीघ्रमेतान्समुत्संत्रस्तान्बहुधा विप्रधावितान् । पर्यवस्थापयास्माकं हि विभीषणमुपस्थितम् ॥ १० ॥
सुग्रीवेणैवमुक्तस्तु जाम्बवानृक्षपार्थिवः । वानरान्सान्त्वयामास संनिवर्त्य प्रधावतः ॥ ११ ॥
ते निवृत्ताः पुनः सर्वे वानरास्त्यक्तसाध्वसाः । ऋक्षराजवचः श्रुत्वा तं च दृष्ट्वा विभीषणम् ॥ १२ ॥
विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम् । लक्ष्मणस्य तु धर्मात्मा बभूव व्यथितस्तदा ॥ १३ ॥
जलक्लिन्नेन हस्तेन तयोर्नेत्रे विमृज्य च । शोकसंपीडितमना रुरोद विललाप च ॥ १४ ॥
इमौ तौ सत्त्वसंपन्नौ विक्रान्तौ प्रियसंयुगौ । इमामवस्थां गमितौ राक्षसैः कूटयोधिभिः ॥ १५ ॥
भ्रातृपुत्रेण चैतेन दुष्पुत्रेण दुरात्मना । राक्षस्या जिह्मया बुद्ध्या वञ्चितावृजुविक्रमौ ॥ १६ ॥
शरैरिमावलं विद्धौ रुधिरेण समुक्षितौ । वसुधायामिमौ सुप्तौ दृश्येते शल्यकाविव ॥ १७ ॥
ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया । ताविमौ देहनाशाय प्रसुप्तौ पुरुषर्षभौ ॥ १८ ॥
जीवन्नप्य विपन्नोऽस्मि नष्टराज्यममनोरथः । प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः ॥ १९ ॥
एवं विलपमानं तं परिष्वज्य विभीषणम् । सुग्रीवः सत्त्वसंपन्नो हरिराजोऽब्रवीदिदम् ॥ २० ॥

८-९] ति० टी०-वानरभीषणं वानराणां भयनिमित्तम् ॥ ८ ॥ ९ ॥

रा० टी०-विभीषणमिति । वानरभीषणं वानरभयनिमित्तं विभीषणं सुग्रीवो दृष्ट्वा ऋक्षराजं जाम्बवन्तमुवाच ॥ ८ ॥

गो० टी०-विभीषणमिति । स्पष्टः ॥ ८ ॥

रा० टी०-सप्तकारमाह—विभीषण इति । यं दृष्ट्वा रावणात्मजशङ्कया आगतसंत्रासाः वानरर्षभाः द्रवन्ति सोऽयं प्राप्तो विभीषणः ॥ ९ ॥

गो० टी०-विभीषणोऽयमिति । विप्रधावितान् पलायमानान् ॥ ९-१३ ॥

१०-१२] ति० टी०-पर्यवस्थापय प्रतिष्ठापय॥१०॥१२॥

रा० टी०-शीघ्रमिति । बहुधानेकप्रकारेण विप्रधावितान् पलायितान् एतान् पर्यवस्थापय उपस्थितं विभीषणमाह च ॥ १० ॥

रा० टी०-सुग्रीवेणेति । जाम्बवान् प्रधावतो वानरान् निवर्त्य सान्त्वयामास ॥ ११ ॥

रा० टी०-ते इति । ऋक्षराजवचः श्रुत्वा त्यक्तसाध्वसाः निस्त्यक्तभयाः सर्वे वानराः निवृत्ताः ॥ १२ ॥

१३-१६] ति०टी०-लक्ष्मणस्य तु लक्ष्मणस्य च॥१३॥१६॥

रा० टी०-विभीषण इति । शरैश्चितं व्याप्तं गात्रं दृष्ट्वा विभीषणो व्यथितो बभूव ॥ १३ ॥

रा० टी०-जलेति । तयोः रामलक्ष्मणयोः नेत्रे हस्तेन विमृज्य शोकसंपीडितमनाः विभीषणः रुरोद विललाप च॥१४॥

रा० टी०-विलापाकारमाह—इमावित्यादिभिः । सत्त्वसंपन्नौ नित्यसत्त्वान्वितौ इमौ कूटयोधिभिः कपटयुद्धकर्तृभिः राक्षसैः इमामवस्थां गमितौ प्रापितौ ॥ १५ ॥

रा०टी०-भ्रातृ इति। एतेन भ्रातृपुत्रेण जिह्मया कुटिलया राक्षस्या बुद्ध्या ऋजुविक्रमौ कापट्यसंसर्गरहितविक्रमविशिष्टौ रामलक्ष्मणौ वञ्चितौ ॥ १६ ॥

गो० टी०-भ्रातुरिति। दुष्पुत्रेण कपटयुद्धेन पितुरक्षणावहेन वञ्चितौ वञ्चितौ ऋजुविक्रमौ अकपटविक्रमौ ॥ १६ ॥

१७] ति० टी०-शल्यकः शावित् ॥ १७ ॥

रा० टी०-शरैरिति। शरैः अलं निद्धौ अत्यन्तं व्याप्तौ रुधिरेण समुक्षितौ संसिक्तौ इमौ शल्यकाविव वसुधायां सुप्तौ दृश्येते ॥ १७ ॥

गो० टी०-शरैरिति । सुप्तौ शल्यसदृशौ । शल्यकौ कण्टकिवराहौ ॥ १७ ॥

१८] ति० टी०-प्रतिष्ठा राज्ये स्थितिः॥ १८ ॥

रा० टी०-ययोरिति । ययोर्वीर्यं पराक्रममुपाश्रित्य प्रतिष्ठा मया काङ्क्षिता तावेमौ देहनाशायात्मबुद्धिप्रध्वंसनाय प्रसुप्तौ ॥ १८ ॥

गो० टी०-ययोरित्यादिचतुःश्लोकी । अत्र वक्तव्यं सर्वमभयप्रदाने दर्शितम् ॥ १८—२१ ॥

१९-२०] ति० टी०-अथ जीवन्नपि विपन्नोऽस्मि मृतोऽस्मि प्राप्तप्रतिज्ञो निर्दग्धसीतापरित्यागाभावप्रतिज्ञः सकामः पूर्णमनोरथश्च पुत्रेण कृतः ॥ १९ ॥ २० ॥

रा० टी०-जीवन्निति । नष्टः राज्यममनोरथो यस्य सोऽहं जीवन्नपि विपन्नो मृतः रिपुः रावणः प्राप्तप्रतिज्ञः सन् सकामः प्राप्तमनोरथो कृतः पुत्रेणेति शेषः ॥ १९ ॥

रा० टी०-एवमिति । एवं विलपमानं तं विभीषणं सुग्रीवः परिष्वज्य [illegible] ॥ २० ॥

१ सुग्रीवस्य जाम्बवानिति गो. पाठः । २ विद्रवन्ति परित्रस्ता इति गो. पाठः । ३ स्थिति गो. पाठः । ४ [illegible] इति गो. पाठः । ५ प्रेति गो. पाठः । ६ भ्रातृपुत्रेण मे नेत्रेति गो. पाठः । ७ [illegible]

[illegible] संशयः । रावणः सह पुत्रेण स्वकामं नेह लप्स्यते ॥ २१ ॥
गरुडाधिष्ठितावेतावुभौ राघवलक्ष्मणौ । त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे ॥ २२ ॥
तमेवं सान्त्वयित्वा तु समाश्वास्य तु राक्षसम् । सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह ॥ २३ ॥
सह शूरैर्हरिगणैर्लब्धसंज्ञावरिंदमौ । गच्छ त्वं भ्रातरौ गृह्य किष्किन्धां रामलक्ष्मणौ ॥ २४ ॥
अहं तु रावणं हत्वा सपुत्रं सहवान्धवम् । मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियम् ॥ २५ ॥
श्रुत्वैतद्वानरेन्द्रस्य सुषेणो वाक्यमब्रवीत् । देवासुरं महायुद्धमनुभूतं पुरातनम् ॥ २६ ॥
तदा स्म दानवा देवाञ्शरसंस्पर्शकोविदान् । निर्जिग्युः शस्त्रविदुषश्छादयन्तो मुहुर्मुहुः ॥ २७ ॥
तानार्तान्नष्टसंज्ञांश्च गतासूंश्च बृहस्पतिः । विद्याभिर्मन्त्रयुक्ताभिरोषधीभिश्चिकित्सति ॥ २८ ॥
तान्यौषधान्यानयितुं क्षीरोदं यान्तु सागरम् । जवेन वानराः शीघ्रं संपातिपनसादयः ॥ २९ ॥
हरयस्तु विजानन्ति पार्वती ते महौषधी । संजीवकरणीं दिव्यां विशल्यां देवनिर्मिताम् ॥ ३० ॥

२१] ति० टी०—रावणः पुत्रेण सह स्वकामं स्वमनोरथमिह लङ्कायां न लप्स्यते ॥ २१ ॥

रा० टी०—तदाकारमाह—राज्यमिति । इह लङ्कायां त्वं राज्यं प्राप्स्यसि रावणस्तु इह लङ्कायां स्वकामं न लप्स्यते २१

२२] ति० टी०—कुतस्तत्राह—गरुडाधिष्ठितावितिं । गरुडोपासकतया विज्ञातावित्यर्थः तीर्थस्तु—'न रुजा पीडितावेतौ' इति पठित्वा न मरणपर्यवसायिरुजापीडितावित्यर्थः, किं तु मोहमात्रं प्राप्तौ, अतस्त्यक्त्वेत्येवं व्याचष्टे ॥ २२ ॥

रा० टी०—तत्र हेतुमाह—गरुडेति । एतौ रामलक्ष्मणौ गरुडाधिष्ठितौ सन्तौ मोहं त्यक्त्वा रावणं वधिष्येते एतेन सुग्रीवस्य विक्रान्तत्वं व्यक्तम् ॥ २२ ॥

गो० टी०—न रुजेति । न रुजापीडितौ इत्यं रुजा अनयोरात्यन्तिकहानिकरी न भवति । किंतु मोहमात्रकारिणीत्यर्थः ॥ २२–२५ ॥

२३] ति० टी०—तमेवं सान्त्वयित्वा । गरुडानुग्रहमंभावनयेत्यर्थः । सान्त्वयित्वेत्यस्यैवार्थकथनम्—समाश्वास्येति । अनेन सुग्रीवस्यैतद्वाक्येन रामविषये स्वस्य भगवदवतारत्वज्ञानं सूचितम् ॥ २३ ॥

रा० टी०—तमिति । राक्षसं तं विभीषणमेवमाश्वास्य सान्त्वयित्वा तापं निरस्य सुषेणं श्वशुरमब्रवीत्॥२३॥

२४–२५] ति० टी०—यावल्लब्धसंज्ञौ भविष्यतस्तावदेनयो रक्षार्थमेतौ गृहीत्वा हरिभिर्गणैः सह किष्किन्धां गच्छ २४॥२५

तदाकारमाह—एतद्वीति । लब्धसंज्ञौ रामलक्ष्मणौ गृह्य गृहीत्वा हरिभिर्गणैः सह गच्छ ॥ २४ ॥

रा० टी०—अहमिति । अहं तु रावणं हत्वा शक्रो नष्टां [illegible] मैथिलीमानयिष्यामि आनेष्यामि ॥ २५ ॥

२६] ति० टी०—एतद्वाक्यं रक्षणोपायबोधकं वाक्यम् । तदेवाह—देवासुरमिति ॥ २६ ॥

२७] ति० टी०—स्पृश्यत इति स्पर्शो विषयः । शरस्पर्शे शरविषये लक्ष्यबाधनरूपे कोविदानपि शस्त्रविदुषोऽपि मुहुर्मुहुः इत्यादयन्तो मायया जिह्वदात्मानं प्रच्छादयन्तो जघ्नुः ॥ २७

रा० टी०—श्रुत्वेति । वानरेन्द्रस्य गतद्वयः श्रुत्वा सुषेणो ब्रवीत् । अर्थं पथक् । तदाकारमाह—देवेत्यादिभिः । पुरा तनं देवासुरं युद्धमनुभूतमस्माभिरिति शेषः । तदा तस्मिन् युद्धे शराणां संस्पर्शे येषु ते लक्ष्या इत्यर्थः तेषां कोविदा तज्ज्ञाने निपुणान् शस्त्रविदुषः शस्त्रप्रयोगाभिज्ञान् देवा छादयन्तो दानवा निर्जिग्युः । सार्धश्लोक एकान्वयी ॥२५॥२७॥

गो० टी०—दैवासुरमिति । अनुभूतं मया ज्ञातम् । शरसंस्पर्शकोविदाः शरप्रयोगसमर्थाः । स्पर्शो दानमिति पर्यायः ॥ २६ ॥ २७ ॥

२८] ति० टी०—आर्तत्वादिधर्मवतोपि तान्बृहस्पतिर्विद्याभिर्मन्त्ररूपाभिरुत्पन्नजीवदौषधिभिस्तद्रूपाभिरोषधीभिश्च चिकित्सत्यविकिरन् ॥ २८ ॥

रा० टी०—तानिति । नष्टसंज्ञान् तान् देवान् मन्त्रयुक्ताभिर्विद्याभिः ओषधीभिश्च बृहस्पतिश्चिकित्सति अचिकित्सत्॥२८

गो० टी०—तानिति । मन्त्रयुक्ताभिः मन्त्रपुरस्काराभिः विद्याभिर्मृतसंजीविनीप्रभृतिभिः चिकित्सति अचिकित्सत्॥२८

२९] ति० टी०—अस्तु, किं प्रकृते तत्राह—तानीति॥२९

रा० टी०—तानीति । संपातिपनसादयो वानराः औषधानि आनयितुमानेतुं क्षीरोदं सागरं यान्तु ॥ २९ ॥

गो० टी०—तान्यौषधानीत्यादिसार्धश्लोकः । स्पष्टः ।

३०] ति० टी०—नन्वत्र ज्ञाने किंचनयत्नं तत्राह—हरय इति । संपात्यादयो हरयः पार्वती पर्वतप्रतिष्ठिते ओषधी विजानन्ति । पार्वती इति द्विवचनमार्षम् । तयोर्नामाह—संजीवकरणीमिति । विशल्यां विशल्यकरणीम् । देवेन ब्रह्मणा निर्मिताम् ॥ ३० ॥

---

१ न रुजा पीडितावितिं गो. पाठः । २ शस्त्रमिति गो. पाठः । ३ दैवासुरमिति गो. पाठः । ४ [illegible] ५ महौषधी इति गो. पाठः । ६ [illegible] ७ [illegible] ८ तिष्ठति इ. पाठः । ९ पार्वतीपुत्र महौषधीति गो. पाठः ।

चन्द्रश्च नाम द्रोणश्च क्षीरोदे सागरोत्तमे । अमृतं यत्र मथितं तत्र ते परमौषधी ॥ ३१ ॥
तौ तत्र विहितौ देवैः पर्वतौ तौ महोदधौ । अयं वायुसुतो राजन्हनूमांस्तत्र गच्छतु ॥ ३२ ॥
एतस्मिन्नन्तरे वायुर्मेघाश्चापि सविद्युतः । पर्यस्य सागरे तोयं कम्पयन्निव पर्वतान् ॥ ३३ ॥
महता पक्षवातेन सर्वद्वीपमहाद्रुमाः । निर्भग्नविटपाः सलिले लवणाम्भसि ॥ ३४ ॥
अभवन्पन्नगास्तस्ता भोगिनस्तत्रवासिनः । शीघ्रं सर्वाणि यादांसि जग्मुश्च लवणार्णवम् ॥ ३५ ॥
ततो मुहूर्तादुत्थितं वैनतेयं महाबलम् । वानरा ददृशुः सर्वे ज्वलन्तमिव पावकम् ॥ ३६ ॥
तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः । यैस्तु तौ पुरुषौ बद्धौ शरभूतैर्महाबलैः ॥ ३७ ॥
ततः सुपर्णः काकुत्स्थौ स्पृष्ट्वा प्रत्यभिनन्द्य च । विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे ॥ ३८ ॥
वैनतेयेन संस्पृष्टास्तयोः संरुरुहुव्रणाः । सुवर्णं च तनू स्निग्धे तयोराशु बभूवतुः ॥ ३९ ॥

रा० टी०-हरय इति । देवेन परमात्मना निर्मितां संजीवकरणीं तदभिधां विशल्यां तदभिधां च पार्वतीं पर्वतोद्भवे महौषधी हरयो विजानन्ति ॥ ३० ॥

गो० टी०-संजीवकरणीमित्यर्थमेवं वाक्यम् । अत्राधियितुं यास्यित्यनुषज्यते । पूर्वोत्तरक्षीरोदमध्ये संजीवकरणीं विशल्यां चानयितुं यास्यित्यर्थः । स्थानान्तरोपयोगादिति भावः ॥ ३० ॥

३१] ति० टी०-क्व पर्वते ते अत्राह—चन्द्रश्चेति । द्रोणाद् तौ पर्वतौ स्तः, तयोश्चौषधी । को नाम सागरोत्तमेस्तत्राह—अमृतमिति ॥ ३१ ॥

रा० टी०-औषधस्थलं निर्दिशन्नाह—चन्द्र इति । अमृतं यत्र मथितं तत्र सागरोत्तमे चन्द्रो द्रोणश्च नाम पर्वतौ तत्र तयोः पर्वतयोः परमौषधी स्त इति शेषः ॥ ३१ ॥

गो० टी०-ते कुत्र विद्येते इत्याह—चन्द्रश्चेत्यादिना । सागरोत्तमे क्षीरोदे यत्र प्रदेशे अमृतं मथितं तत्र चन्द्रद्रोणाख्यौ पर्वतौ स्तः, तयोस्ते महौषधी स्त इत्यर्थः । तत्रावस्थाने हनुमान्ते तत्रेति । पर्वते पर्वतयोरित्येकवचनम् ॥ ३१ ॥

३२] ति० टी०-यद्यपि पवनसादयो जानन्ति तथापि शीघ्रमागमनार्थं वायुश्चनो यातु ॥ ३२ ॥

रा० टी०-एककार्यकरणमनेनैव कार्यं सेत्स्यतीत्यभिप्रेत्याह—ते इति । देवैर्महोदधौ विहितौ संस्थापितौ यौ पर्वतौ तत्र ते औषधी आनेतुमिति शेषः । तत्र संजीव्यादीनां मध्ये हनुमान् गच्छतु एतेन हनुमतो वेगातिशयः सूचितः ॥ ३२ ॥

गो० टी०-अयमित्यर्थम् । औषध्यन्तरानयने पवनादयो गच्छन्तु । संजीवविशल्यानयने तु हनुमान् गच्छत्विति विशेषम् ॥ ३२ ॥

३३] ति० टी०-एतस्मिन्नन्तरे औषध्यानयनवार्ताकाले सागरे तोयं पर्वतस्थातिबलत्वियोगेन कृत्वा पर्वताम्कम्पयन्पक्षवायुरुद्भवन्, सविद्युतो मेघाश्चागमन् ॥ ३३ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नन्तरे क्षीरे सागरे तोयं पर्यस्य परितः संचाल्य पर्वतान् कम्पयन्निव वायुः सविद्युतो मेघाश्चाभवन्निति शेषः ॥ ३३ ॥

गो० टी०-एतस्मिन्निति । मेघान् सागरतोयं च पर्यस्य पर्वतान् कम्पयन्निव गरुडपक्षवायूद्भूतेति शेषः । सर्वद्वीपमहाद्रुमाः सर्वपदं द्रुमविशेषणम् । द्वीपं च लङ्का-लवणाम्भसि लवणसमुद्रे ॥ ३३ ॥ ३४ ॥

३४] ति० टी०-सर्वे द्वीपा लवणसमुद्रान्तर्वर्तिनः ॥ ३४ ॥

रा० टी०-महतेति । पक्षवातेन भग्नविटपाः सर्वद्वीपमहाद्रुमाः लवणाम्भसि सलिले निपेतुः ॥ ३४ ॥

३५-३७] ति० टी०-तत्रवासिनो मलयवासिनो भोगिनो महाकाया यादांसि सर्वाणि लवणार्णवं जग्मुः भयादन्तर्मग्नानीत्यर्थः ॥ ३५ ॥ ३७ ॥

रा० टी०-अभवन्निति । तत्र वासिनः तत्समीपालयनिवासिनो भोगिनो महाकायाः पन्नगाः यादांसि च लवणार्णवं जग्मुः एतेन गरुडस्य नागभिन्नप्राणाभिजयः सूचितः ॥ ३५ ॥

रा० टी०-तत इति । ततो मुहूर्तादनन्तरं वानराः गरुडं ददृशुः ॥ ३६ ॥

रा० टी०-तमिति । तं गरुडमागतमभिप्रेक्ष्य अवलोक्य यैस्तौ रामलक्ष्मणौ बद्धौ नागैः प्रवीरौ ते नागाः विप्रदुद्रुवुः पलायिता बभूवुः ॥ ३७ ॥

गो० टी०-अभवन्निति । भोगिनः प्रवरफणाकायाः । तत्र वासिनः लङ्काद्वीपवासिनः । यादांसि जलजन्तवश्च । लवणार्णवं लवणार्णवमध्यम । भयादन्तर्मग्ना इत्यर्थः ॥ ३५-३८ ॥

३८] ति० टी०-प्रत्यभिनन्द्य विजयाभिषा प्रतिपूज्य । मुखे रामलक्ष्मणयोः ॥ ३८ ॥

रा० टी०-तत इति । सुपर्णो गरुडः काकुत्स्थौ स्पृष्ट्वा प्रत्यभिनन्द्य च जयाशिषा प्रतिपूज्य मुखे तयोरानने पाणिना विममर्श ॥ ३८ ॥

३९] ति० टी०-पक्षवृद्ध्यर्थापूर्वं लब्धमांसा अभूवन्नित्यर्थः । सुवर्णं शोभनवर्णयुक्तं वर्म शरीरे ॥ ३९ ॥

१ ते तत्र विहिते देवैः पर्वते परमौषधी इति गो. ते उभेति रा. पाठः । २ मेघाश्चाभवन्निति गो. पाठः । ३ पर्यस्येति गो. पाठः । ४ पन्नगा इति गो. पाठः । ५ भिन्नेति गो. पाठः । ६ समृद्धा इति गो. पाठः । ७ तौ नैदिति गो. पाठः । ८ [illegible] । ९ [illegible]

तेजो बलं वीर्यं ओजः उत्साहश्च महागुणः । मद्दर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणा तयोः ॥ ४०
तावुत्थाप्य महातेजा गरुडो नागसत्तमौ । उभौ तौ सस्वजे हृष्टो रामश्चैनमुवाच ह ॥ ४१
भवत्प्रसादाद्व्यसनं रावणिप्रभवं महत् । उपायेन व्यतिक्रान्तो वीर्यं च बलिनो कृतौ ॥ ४२
यथा तातं दशरथं यथाजं च पितामहम् । तथा भवन्तमासाद्य हृदयं मे प्रसीदति ॥ ४३ ॥
को भवान्रूपसंपन्नो दिव्यस्रगनुलेपनः । वसानो विरजे वस्त्रे दिव्याभरणभूषितः ॥ ४४ ॥
तमुवाच महातेजा वैनतेयो महाबलः । पतत्तिराजः प्रीतात्मा हर्षपर्याकुलेक्षणम् ॥ ४५ ॥
अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः । गरुत्मानिह संप्राप्तो युवयोः साह्यकारणात् ॥ ४६ ॥
असुरा वा महावीर्या वानरा वा महाबलाः । सुराश्चापि सगन्धर्वाः पुरस्कृत्य शतक्रतुम् ॥ ४७ ॥
नैनं मोक्षयितुं शक्ताः शरवर्ष्यं सुदारुणम् । मायाबलादिन्द्रजिता निर्मितं क्रूरकर्मणा ॥ ४८ ॥

४०-४१] रा० टी०—वैनतेयेनेति । वैनतेयेन संस्पृष्टाः सर्पबन्धाः नागराजौ स्थित्वा प्रणवबलभासमानावनतप्रदेशाः संवरद्भुः यथा पूर्वं बभ्रुः शुक्लवर्णं शोभनवर्णविशिष्टं तयोस्तन्निर्मुक्तं बलवत्तद्बन्धनेन प्रत्यभासेताम् ॥ ३९ ॥

गो० टी०—वैनतेयेनेति । प्रणाः भवति । संरुरुहुः पुनरूढाः, अज्ञातस्वरूपा बभूवुरित्यर्थः ॥ ३९ ॥

४०-४१] ति० टी०—तेजः परामिभवसामर्थ्यं, वीर्यं शरीरम्, बलं शारीरम्, ओजः कान्तिः, उत्साहः प्रसिद्धः, मद्दर्शनं भवात्मनाभ्यां पुरोधूमनिभृतः, बुद्धिरपरोक्षनिश्चयः, द्विगुणा वैनतेयसम्पर्कात्पूर्वतो ऽभ्यधिका । अत्रश्लोकद्वयेनैतयोः ४ नो रामस्य मूलभूतैराशयोपकारः संपादितः गरुडेन कृपन नदेति बोध्यम् ॥ ४० ॥ ४१ ॥

४० टी०—तेज इति । तयोस्तेजःप्रभृतिर्द्विगुणा तद्दर्शनेन वीर्यमाना अभवदिति शेषः ॥ ४० ॥

गो० टी०—तेज इति । तेजः परामिभवसामर्थ्यं रावणिप्रयोगदर्शनं वा वीर्यं परशस्त्रभेद्यं बलं शारीरम् ओजः कान्तिः उत्साहः लोकोत्तरकार्येषु स्थिरतरव्यवसायः इत्यर्थः मद्दर्शनम् बुद्धिः निश्चयः स्मृतिः अनुभवाभिप्रायपरामर्शः भवत् सर्वं द्विगुणम् वैनतेयसंस्पर्शवशात् पूर्वतोऽप्येकं जातमित्यर्थः । अत्र वीरिणी गायत्र्याः सप्तदशाक्षरम् । छन्दसहस्रमध्यका गताः ॥ ४० ॥

४१ टी०—तावित्यादि । महातेजा गरुडः उभौ तौ रामलक्ष्मणौ उत्थाप्य सस्वजे आलिङ्गनं चकार रामश्चैनं [1]वाच ॥ ४१ ॥

४२ टी०—तावित्यादि । क्रियाफलान्वेष्टव्यम् ॥ ४१ ॥

४२] ति० टी०—व्यतिक्रान्तौ लङ्घितवन्तौ ॥ ४२ ॥

गो० टी०—तदाकारमाह—भवदित्यादिभिः । रावणिप्रभवं व्यसनं दुःखं भवत्प्रसादात् भवां व्यतिक्रान्तौ अतः एवोपायेन यत्नेन त्वया बलिनौ कृतौ ॥ ४२ ॥

गो० टी०—भवदिति । व्यतिक्रान्तौ लङ्घितवन्तौ । गरुत्मान्साह्यात् करोति इति ॥ ४२ ॥ ४३ ॥

४३] ति० टी०—यथा तातं दशरथं स्वात्मसारोपिकं यथाजं च पितामहं ऋतुवृक्षप्रशंसाभिः हिरण्यगर्भात्मानमुद्दिश्य ॥ ४३ ॥

४३ टी०—यथेति । यथा दशरथं यथाजं चात्मानं प्रति मे हृदयं प्रसीदति तथा भवन्तमासाद्य प्रसीदति तोषं भजतु हृदयं मदीयम् ॥ ४३ ॥

४४] ति० टी०—को भवानिति । अयं प्रश्नोऽपि मधुरवाक्यालापव्यवहार एव तत्सम्बन्धप्रश्नपरः अत्र रामस्यैवं रावणिप्रयोगदर्शनेन पक्षिराजकारुण्येनैव मोक्षणिसम्भवेन मायाबन्धने पुरुषकारेण व्यवसातव्यमिति बोधनार्थः । तदाह—को भवानिति । दिव्य रूपसम्पन्न इत्यर्थः ॥ ४४ ॥

४४ टी०—को इति । विरजे निर्मले वस्त्रे वसानो भवान् को ४४ ॥

गो० टी०—को भवानिति । विरजे निर्मले ॥ ४४ ॥ ४५ ॥

४५] ति० टी०—तमुवाचेत्यादिना रामस्यार्तस्यैव ४५ ॥

४५ टी०—तमित्यादि । वैनतेयो वर्णयाकुलेक्षणं ते रामं मुखाच्च गोत्रं गरुडस्याभीक्ष्णमिति जानन्तम् तेन गरुडस्य रामवत्सलतायामभिप्रायान्तरेण सूचितम् ॥ ४५ ॥

४६] ति० टी०—अहं सखेति । सखित्वादुपकारादिवशात् । साह्यकरणस्वभावात् इति भावः ॥ ४६ ॥

४६ टी०—तदाकारमाह—अहमित्यादिभिः । बहिश्चरः प्राण इव । सखा इत्यनेनात्मनात्मनोः गरुत्मानहं संप्राप्तो युवयोः साह्यकारणादिह संग्रामे ॥ ४६ ॥

गो० टी०—अहमिति । सखा कृत्रिमेण स्नेहेन इति शेषः । बहिश्चरः प्राणः इव । युवाभ्यां युवयोः पक्षयोर्यत्नेन । साह्यकारणात् साहाय्यार्थम् ॥ ४५-४८ ॥

४७-४८] ति० टी०—इदं च साहाय्यं मदकस्माद्यस्मिन्नाह—असुरा इति ॥ ४७ ॥ ४८ ॥

४७ टी०—साहायकप्रयोजनमाह—असुरा इति । इन्द्रजिता मायाबलात् निर्मितमिमं शरवर्षं मोक्षयितुं असुरादयः शक्तास्तु पुरस्कृत्य सुरा वा न शक्ताः यतेन मायेनार्थसंपादनसमर्थेन हमागत इति शेषः । लोकत्रयमेकार्थं ॥ ४७ ॥ ४८ ॥

---

१ वाच इति गो. पाठः । २ द्विगुणमिति गो. पाठः । ३ वीर्यमिति गो. पाठः । ४ तावित्यादि गो. पाठः । ५ तदाकारमाह इति गो. पाठः । ६ तावित्यादि गो. पाठः । ७ [illegible] इति गो. पाठः । ८ [illegible] इति गो. पाठः । ९ बलवत्तमिति गो. पाठः । १० [illegible] इति गो. पाठः ।

नागाः काद्रवेयास्तीक्ष्णदंष्ट्रा विषोल्बणाः । रक्षोमायाप्रभावेण भरभूतास्त्वदाश्रयाः ॥ ४९ ॥
तमभाष्यक्षमस्व धर्मज्ञ राम सत्यपराक्रम । लक्ष्मणेन सह भ्रात्रा समरे रिपुघातिना ॥ ५० ॥
इमं श्रुत्वा तु विक्रान्तस्त्वरमाणोऽभ्यागतः । सहसैवाभयोः स्नेहात्सस्नित्वमनुपालयन् ॥ ५१ ॥
मामेतौ च महाघोरादस्मात्सांपरायबन्धनात् । अप्रमादश्च कर्तव्यो युवाभ्यां नित्यमेव हि ॥ ५२ ॥
वक्तव्या राक्षसाः सर्वे सङ्ग्रामे कृतशोभिनः । शूराणां शुद्धभावानां भवतामार्जवं बलम् ॥ ५३ ॥
तत्र विश्वसनीयं वो राक्षसानां रणाजिरे । एतेनैवोपमानेन नित्यं जिह्मा हि राक्षसाः ॥ ५४ ॥
एवमुक्त्वा तदा रामं सुपर्णः खे महाबलः । परिष्वज्य च सस्नेहमाप्रष्टुमुपचक्रमे ॥ ५५ ॥
सख्यं राघव धर्मज्ञ रिपूणामपि वत्सल । अभ्यनुज्ञातुमिच्छामि गमिष्यामि यथासुखम् ॥ ५६ ॥
न ते कृतघ्ने कार्यं सख्यित्वं प्रति काङ्क्षिणः । कृतकर्मारणे वीर सख्यित्वं प्रतिवेत्स्यसि ॥ ५७ ॥
मायाबलावलेपा तु लङ्कां कृत्वा शरोर्मिभिः । रावणं तु रिपुं हत्वा सीतां त्वमुपलप्स्यसे ॥ ५८ ॥
इत्येवमुक्त्वा वचनं सुपर्णः शीघ्रविक्रमः । रामं च नीरुजं कृत्वा मध्ये तेषां वनौकसाम् ॥ ५९ ॥
प्रदक्षिणं ततः कृत्वा परिष्वज्य च वीर्यवान् । जगामाकाशमाविश्य सुपर्णः पवनो यथा ॥ ६० ॥
नीरुजं राघवं दृष्ट्वा ततो वानरयूथपाः । सिंहनादं तदा चेदुर्लाङ्गूलं दुधुवुश्च ते ॥ ६१ ॥

४९] ति० टी०—रक्षोमायया भरभूता एते नागास्त्वदाश्रया इति योजितम् । त्वां प्राप्ता इत्यर्थः ॥ ४९ ॥

रा० टी०—तत्र हेतुमाह—एते इति । काद्रवेयाः कद्रपुत्राः रक्षोमायाप्रभावेण भरभूताः सन्तः त्वदाश्रयाः त्वामाश्रिताः ॥ ४९ ॥

गो० टी०—एत इति । काद्रवेयाः कद्रपुत्राः । मायाबलाद्धि आश्रयणमित्यबलाः ॥ ४९ ॥ ५० ॥

५०] ति० टी०—मर्म दुर्वचैरित्यादिना यदात्मनिन्दनं कृतं तत्परिहरति—तमभाष्य इति । अनवलक्षितश्चासौ देववानसि । तमेवं मन्यस्वेत्यर्थः ॥ ५० ॥

रा० टी०—तमभाष्य इति । रिपुघातिना समरे कृतमिमं अपराधं क्षमस्व । भ्रात्रेति सख्यित्वमनुपालयन् संपादयितुमित्यर्थः । त्वत्प्राणोऽहमागतः सायकबन्धनात् मया युवां मोचितौ च अतः अभार्यादि अनार्यतयैव ते कार्यलिङ्गिभवतीति भावार्थः । सार्धश्लोकत्रयेणान्वयि ॥ ५० ॥ ५१ ॥

५१] ति० टी०—इमं वृत्तान्तं नागबन्धवृत्तान्तं श्रुत्वा । दयालुतया सुपर्ण इति शेषः स्नेहादवागतः ॥ ५१ ॥

गो० टी०—इममिति । सख्या जवेन ॥ ५१ ॥

५२-५३] ति० टी०—अप्रमादश्च युवां मोचितौ मोचितैः अप्रमादः सोऽभवतां ॥ ५२ ॥ ५३ ॥

रा० टी०—अप्रमाद इति । प्रकृत्या स्वभावेनैव राक्षसाः कूटयोधिनो भवन्ति अतो युवाभ्यामप्रमादः प्रमादराहित्यं कर्तव्यः ॥ ५२ ॥

गो० टी०—मोचितावित्यादि । अप्रमादः कर्तव्य इति । तदत्रस्थानां गुणप्रत्यक्षप्रयोगेषु सावधानार्या प्रकीर्तयमित्यर्थः ॥ ५२ ॥

रा० टी०—शूराणामिति । शुद्धभावानां भवतां बलमार्जवं कापट्यहीनमस्ति तस्मादेतोः राक्षसानां रणाजिरे वो युष्माकं न विश्वसनीयम् सावधानतया स्थातव्यमित्यर्थः ॥ ५३ ॥

गो० टी०—प्रकृत्येत्यादि श्लोकद्वयम् । एतेनैवोपमानेनेति । अनेन दृष्टान्तेन राक्षसा जिह्मा ज्ञेया इत्यर्थः ॥ ५३-५५ ॥

५४] ति० टी०—तत्र विश्वसनीयम् । यथा वयं धर्मपरास्तथा पुरुषत्वाविशेषादन्येऽपीत्यर्थः । तत्रैवेति च रक्षोगतमार्जवं न विश्वसितव्यमित्यर्थः । उक्तमेवार्थमनु स्पष्टीकरोति—एतेनैवेति । इन्द्रजित्कापट्यनैवत्यर्थः ॥ ५४ ॥

रा० टी०—एतेनेति । एतेन इन्द्रजिता उपमानेन दृष्टान्तभूतेन राक्षसाः निःस्वं जिह्माः सकपटाः बोध्या इति शेषः । अर्धं पृथक् ॥ ५४ ॥

५५-५६] ति० टी०—आप्रष्टुं गमनानुज्ञां कारयितुम् ॥ ५५ ॥ ५६ ॥

रा० टी०—एवमिति । सुपर्णः एवमित्थं रामभवद्भुक्त्वा परिष्वज्य च आप्रष्टुं स्वगमनाय प्रार्थयितुमुपचक्रमे ॥ ५५ ॥

रा० टी०—तदाकारमाह—सख्य इति । हे राघव ! अभ्यनुज्ञातुं स्वगमनाय अनुज्ञां गृहीतुमिच्छामि अत एव यथा सुखं गमिष्यामि ॥ ५६ ॥

गो० टी०—सख्य इति । रिपूणामपि तत्सख्येनैव जिह्मोपायो न ज्ञात इति योजयते ॥ ५६ ॥

५७-५९] ति० टी०—मदकृतसख्यित्वं प्रति लोकप्रसिद्धेरन्यापि विस्मृतौ न कार्यं इत्याह—न चेति । अद्य वेत्स्यसि । एते सर्वे लोका इति शेषः ॥ ५७ ॥ ५९ ॥

५९-६१] ति० टी०—प्रदक्षिणं कृत्वेत्यनेन दिव्यदेवताव[illegible]

---

१ ज्ञात भूत्वा स्वधातिनां इति गो. पाठः । २ इत्यन्तमिति गो. रा. पाठः । ३ [illegible] गो. पाठः । ४ विश्वसितव्यं [illegible] पाठः । ५ एत इति गो. पाठः । ६ सहदिति गो. पाठः । ७ एतमिति गो. पाठः । ८ दीप्त [illegible] ति गो. पाठः । ९ [illegible] १० विश्वसितमिति गो. पाठः । ११ विश्वसितमिति गो. पाठः । १२ [illegible]

[illegible] समाप्लुत्य [illegible] दध्नुः [illegible]
[illegible] विक्रान्ता वानरा नगयोधिनः । द्रुमानुत्पाट्य विविधांस्तरसा [illegible]
विष्टनन्तो महानादांस्त्रासयन्तो निशाचरान् । लङ्कामुद्दाराण्युपाजग्मुर्युद्धकामाः [illegible]
तेषां सुभीमस्तुमुलो निनादो बभूव शाखामृगयूथपानाम् ।
क्षये निदाघस्य यथा घनानां नादः सुभीमो नदतां निशीथे ॥ ॥ ६५
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ।

वानरारवं तुमुलमाकर्ण्यायुक्ते रघुचरैर्निवेदितं राघवयोरुत्पाशमोचनम् । ततः खिन्नेन दशाननेन रामवधार्थं धूम्राक्षसेनानुत्साताभिरीक्ष्य व्यथितोऽपि कथमपि निवर्तनमनिच्छन्रामचमूमपश्यत् ।

तेषां तु तुमुलं शब्दं वानराणां महौजसाम् । नर्दतां राक्षसैः सार्धं तदा शुश्राव रावणः ॥ १

रा० टी०—अह कथं मया तव सख्यमिच्छत आह—नेति । रणे कृतकर्मा त्वं सखिस्वं प्रति वेत्स्यसि ज्ञास्यसि अतः सखित्वं प्रति कौतूहलन्न इदानीं प्रश्न इत्यर्थः न कार्यन्न ॥ ५६ ॥

गो० टी०—अहं सखा ते काङ्क्षत्स्येत्यादिनोक्तं सखित्वं कथमिति रामोक्तमाशङ्क्य दत्तस्यादिदानीं तद्विषयप्रश्नो न कर्तव्यः रावणवधानन्तरं स्वयमेव ज्ञास्यसीत्याह—न चेति । सखित्वं प्रति सखित्वप्रश्नं प्रतीत्यर्थः ॥ ५७ ॥

रा० टी०—रणदृढं शोभयन्नाह बालेति । शरोर्मिभिः लङ्कां बालवृद्धानामवशोषः यस्यां तां कृत्वा रावणं च हत्वा सीतामुपलप्स्यत ॥ ५८ ॥

गो० टी०—रामस्योत्साहवर्धनाय भाविनमर्थं कथयति—बालेत्यादिना । शरोर्मिभिः शरपरम्पराभिः ॥ ५८ ॥

रा० टी०—इतीति । सुपर्णः शोभनपक्षविशिष्टः सुपर्णो वनौकसां मध्य एवमूरुकृत्वा रामं निरूजं कृत्वा प्रकटमित्यर्थः प्रदक्षिणं कृत्वा च पवन इव आकाशमाविश्य जगाम । श्लोकद्वयेऽप्येवम् ॥ ६१ ॥ ६० ॥

गो० टी०—इत्येवमिति । शीघ्रविक्रमः शीघ्रगतिः । क्रियाशब्दकृदर्थपदद्वयान्वयः ॥ ५९ ॥ ६० ॥

रा० टी०—निरूजाविति । वानरयूथपाः राघवौ निरूजौ दृष्ट्वा सिंहनादं नेदुः लङ्कां दुदुवुश्च ॥ ६१ ॥

गो० टी०—निरूजाविति । सिंहनादं नेदुः सिंहनादं चक्रुरित्यर्थः । दुदुवुः अकम्पयन् ॥ ६१ ॥

६२-६४] ति० टी०—यथापुरं यथापूर्वम् ॥ ६२ ॥६५॥

रा० टी०—तत इति । भीमः समाप्लवः यथापुरं क्षेत्रेषु [illegible] ॥ ६२ ॥

टी०—अपर इति । [illegible] नगयोधिनः [illegible] वानराः लङ्कां दुदुवुरित्यन्वयः ॥ ६३ ॥

रा० टी०—विक्रान्ता इति । [illegible] लङ्कादारानि [illegible] ॥ ६४ ॥

गो० टी०—तत इति । यथापुरं यथापूर्वम् । बह [illegible] दानवान् यक्षान् पृथिव्यां चैव राक्षसान् । [illegible] हन्मीत्युक्तनिरवधिकशक्तिसंपन्नः सर्वज्ञो रामः [illegible] इन्द्रजिता हतो लोहिताक्षो भूमौ स्थित इत्याशङ्क्य उच्यते । लोके समाचारप्रवर्तनार्थमेव स्थितः । इन्द्रजित्पु [illegible] येन लक्ष्मणोऽवगम्यते । शुचीनां शुद्धभावानामङ्गानां प्रा [illegible] स्नेहदार्ढ्यविशेषेऽपि न विनाशः । विपरीतानां पापिष्ठा [illegible] करतलगतापि कार्यसिद्धिर्विगलति अतः शुचित्वादि [illegible] गुणकृत्यैः पुरुषैर्भवितव्यमिति सतां धर्मनिश्चयप्रतिपत्ति [illegible] यत्नः । ननु रावणवधार्थं दैवतैरर्थितो हि विष्णु रा [illegible] नादतोषः सत्यं, दुष्कृद्विनाशवद्धर्मसंस्थापनमपि [illegible] प्रयोजनम् रावणवधमात्रस्य प्रयोजनत्वे शीतावाप्ति [illegible] व्यर्थः स्यात् । अत एवोक्तम्—धातुवैषम्ये च लोकस्थि [illegible] स्थे धर्मे नियोक्ष्यतीति । न च धर्मोपदेशमात्रेण तस्मि [illegible] तादृशोपदेशस्य श्रुतिस्मृतिभिरेव कृतत्वात् । स्वावतार [illegible] धर्मप्रवचनाय हि मानुषभावना च कृता । अतः रक्षोवध [illegible] धर्मप्रवर्तनमित्यादिप्रबन्धावावेद्योक्तम् ॥ ६२-६५ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्वाल्मीकिरामायण [illegible] टीकायां युद्धकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

६५] ति० टी०—निर्वाये यथा घनानां नादस्तथा वानरा [illegible] नाद इत्यर्थः अत्र स्थाने वैषम्यं सङ्गमात्रं इत्यभिप्रेत्य [illegible]

इति श्रीरामानुजमुनि-श्रीपादभक्त [illegible] वाल्मीकीय [illegible] आदिकाव्ये युद्धकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०—तेजोभिरिति । निर्वाणस्य क्षये निशीथे नदतां [illegible] भीमो भवत् एवं वानराधिपयूथपानां भीमो निनादो बभूव [illegible]

इति श्रीगोविन्दराजकृतायां वाल्मीकीयरामायणभूषणाभिधानायां [illegible] टीकायां युद्धकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

६१] ति० टी०—अथ [illegible] रावणं [illegible] वधार्थमित्यादि । रक्षोविनाशार्थमित्यर्थः ॥ ६१ ॥

[illegible]गम्भीरनिर्घोषं श्रुत्वा तं निनदं भृशम् । सचिवान् राक्षसेन्द्रोऽथ पप्रच्छेदं वचनमब्रवीत् ॥ १ ॥
किमयं संप्रहृष्टानां वानराणामुपस्थितः । बहूनां तुमुलो नादो मेघानामिव गर्जताम् ॥ २ ॥
तुल्यवंशसहनौ प्रीतिरेतेषां नात्र संशयः । तथा हि विपुलैर्नादैर्हृष्टवद्भिर्विमुच्यते ॥ ३ ॥
तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ । अयं च सुमहान्नादः शङ्कां जनयतीव मे ॥ ४ ॥
इत्येवं च वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः । उवाच चैकतांस्तत्र समीपपरिवर्तिनः ॥ ५ ॥
ज्ञायतां तूर्णमेतेषां सर्वेषां च वनौकसाम् । शोककाले समुत्पन्ने हर्षकारणमुत्थितम् ॥ ६ ॥
तथोक्तास्ते सुसंभ्रान्ताः प्राकारमभिरुह्य च । ददृशुः पालितां सेनां सुग्रीवेण महात्मना ॥ ७ ॥
तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ । समुत्थितौ महात्मानौ विषेदुः सैन्यराक्षसाः ॥ ८ ॥
संभ्रमाकुलहृदयाः सर्वे प्राकारमास्थिताः । विवर्णा राक्षसा घोरा राक्षसेन्द्रमुपस्थिताः ॥ १० ॥
तद्दृष्ट्वा दीनमुद्विग्नं रावणस्य च राक्षसाः । कृत्स्नं निवेदयामासुर्यथावद्वाक्यकोविदाः ॥ ११ ॥
सुग्रीवेणाभिरक्षितौ युद्धे भ्रातरौ रामलक्ष्मणौ । निबद्धौ शरबन्धेन निष्पन्दभुजौ कृतौ ॥ १२ ॥
विमुक्तौ शरबन्धेन हर्षयुक्तौ तौ रणाजिरे । पाशानिव गजौ छित्त्वा गजेन्द्रसमविक्रमौ ॥ १३ ॥
तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः । चिन्तारोषसमाक्रान्तो विवर्णवदनोऽभवत् ॥ १४ ॥

रा० टी०—अथानन्तरं कृतप्रायश्चित्तप्रवेशानन्तरकालिकं रावणप्रश्नवाक्यमाह—तेषामित्यादिभिः । नदतां वानराणां तुमुलं नादो राक्षसेन्द्र श्रूयते सार्धं शुश्राव ॥ १ ॥

गो० टी०—अथ श्रीरामेण एकबाणेन—तेषामित्यादि । राक्षसेन्द्रः रावणः शुश्रावेत्यन्वयः ॥ २ ॥

२] ति० टी०—किमयमित्यादिना दुःखमूलरोदनादिशब्दशङ्कानिः ॥ २ ॥

रा० टी०—किमयमिति । किमयमादिर्विशिष्टं निनदं श्रुत्वा सचिवानां मध्ये इदमब्रवीत् रावणः इत्यनुकृष्यते किमयमादिभिः पृच्छन् तेषां भीरुतामाः सचिवः ॥ २ ॥

गो० टी०—किमयमिति । निनदः ध्वनिः ॥ २ ॥

३] ति० टी०—कथं । यस्मादित्यर्थः । एवमेषां नादः समुत्थितः ॥ ३ ॥

रा० टी०—तत्रैवाकस्मादुत्थितं हर्षोत्थानादिभिः । मेघानामिव गर्जतां वानराणां कथं यतः सुमहान्नादः सेना तस्मात् एषां महती प्रीतिः सुव्यक्तमे अत्र संशयो न तत्सामान्य तदुत्सवकस्म अतएव एषां शोकाभावेन तद्धेतुं शोकप्रध्वंसकान्वयि ॥३॥४॥

गो० टी०—तथा स्वाभिप्रायादिसाधनार्थं शब्दान्वयः । तथा तेन प्रकारेण । सुमहान्नादः समुत्थितः तत एषां समहती प्रीतिः । अन्वयोक्तिः ॥ ३ ॥

४] ति० टी०—तस्मादेषां महती प्रीतिर्जातेति मन्ये । तत्रैव युक्त्यन्तरम्—तथा हीति ॥ ४ ॥

गो० टी०—तथाहीत्यर्धम् । तथा प्रसिद्धप्रकारः ॥ ३ ॥

५-६] ति० टी०—शङ्कां बन्धमोक्षणशङ्कां जनयतीव जनयत्येव ॥ ५ ॥ ६ ॥

रा० टी०—तावित्ति यतोरामलक्ष्मणौ बद्धौ अतः अयं सुमहान् नादो मे शङ्कां जनयतीव इव व्यर्थे ॥ ५ ॥

रा० टी०—एवमिति । राक्षसेश्वरः मन्त्रिणः एवमुक्त्वा चैकैतान् राक्षसानुवाच ॥ ६ ॥

गो० टी०—तौ त्वित्यादि । तुशब्दोऽवधारणे । तौ च बद्धौ नादश्च श्रूयते । स च प्रकृतविरुद्धो नादः । शङ्कां राजपुत्रयोः शरबन्धापगमशङ्कां जनयतीव । इव शब्दः संभावनायाम् ॥ ५ ॥ ६ ॥

७] ति० टी०—किं हर्षकारणमुत्थितं तज्ज्ञायतामिति ॥ ७ ॥

रा० टी०—तदाकस्मादुत्थितं हर्षकारणं ज्ञायतां कुतश्चायं हर्षो जात इति निर्धार्यतामित्यर्थः ॥ ७ ॥

गो० टी०—ज्ञायतामिति । उत्थितं हर्षकारणं ज्ञायतामित्यन्वयः ॥ ७-९ ॥

८] ति० टी०—प्राकारमभिरुह्येति । अनेनाशयावहारः सूचितः ॥ ८ ॥

९-१४] ति० टी०—तच्छ्रुत्वेति । इति शेषः ॥ ९ ॥ १४ ॥

१ ङ. ३ ख. घ. ङ. छ. झ. ञ. °नादो गो. पाठः । २ महानुद इति गो. पाठः । ४ व्यक्तं सुमहतीति गो. पाठः । ५ वदनाख्य इति गो. पाठः । ६ [illegible] इति गो. पाठः । ७ वनौकसामिति गो. पाठः । ८ ते इति गो. पाठः । ९ वृत्तमिति गो. पाठः । १० प्रेक्ष्येति गो. पाठः । ११ निवेदयन्त इति गो. पाठः । १२ निबन्धन इति गो. पाठः । १३ तौ दृष्ट्वेति गो. पाठः । १४ शोकेति गो. पाठः । १५ [illegible] गो. पाठः । १६ अन्वयोक्तिरिति गो. [illegible] ।

[illegible] अभवन् दूषणसंकाशाः बभञ्जुद्यानपादपान् ॥ ७ ॥
[illegible] रिपू मम । संशयस्थानि सर्वाणि नुनवाभ्यहं वनम् ॥ ८ ॥
निष्फलाः खलु संहृष्टाः शराः पावकतेजसः । आदत्तं यैस्तु सङ्ग्रामे रिपूणां जीवितं मम ॥ ९ ॥
एवमुक्त्वा तु संक्रुद्धो निःश्वसन्नुरगो यथा । अब्रवीद्रक्षसां मध्ये धूम्राक्षं नाम राक्षसम् ॥ १० ॥
बलेन महता युक्तो राक्षसैर्भीमविक्रमः । त्वं वधायाशु निर्याहि रामस्य सह वानरैः ॥ ११ ॥
एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता । परिक्रम्य ततः शीघ्रं निर्जगाम नृपालयात् ॥ १२ ॥
अभिनिष्क्रम्य तद्द्वारं बलाध्यक्षमुवाच ह । त्वरयस्व बलं शीघ्रं किं चिरेण ब्रुवन्नतः ॥ १३ ॥
धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो बलानुगः । बलमुद्योजयामास रावणस्यानुया भृशम् ॥ १४ ॥
ते बद्धघण्टा बलिनो घोररूपा निशाचराः । विनद्यमानाः संहृष्टा धूम्राक्षं पर्यवारयन् ॥ १५ ॥

रा० टी०—तथेति । तथोक्ताः भूत एव ह्रस्वजङ्घाः सर्वराक्षसाः प्राकारवरिष्ठ चुपीवेणामिपाणिनां सेना शरबन्धेन सुष्ठौ रावणौ च ददृशुः अत एव विषेदुः शोकदुरमकान्तारे ॥ ८ ॥ ९ ॥

रा० टी०—सम्त्रस्तेति । संत्रस्तहृदयाः राक्षसाः प्राकाराद्वरुण राक्षसेन्द्रमुपस्थिता बभूवुरिति शेषः ॥ १० ॥

गो० टी०—संत्रस्तेति । उपस्थिताः प्राप्ताः ॥ १० ॥

रा० टी०—तदिति । वाक्यकोविदा राक्षसाः रावणस्यापियं तदूनं यथावन्निवेदयामासुः ॥ ११ ॥

रा० टी०—निवेदनप्रकारमाह—यानिति । इन्द्रजिता यौ शरबन्धेन निबद्धौ अत एव निष्पक्रम्यकुलौ कुलौ नौ रामलक्ष्मणौ पाशान् क्षिप्त्वा गजाविव शरबन्धेन विसुष्ठौ कृतौ शोकदुरमकान्तारे ॥ १२ ॥ १३ ॥

रा० टी०—तदिति । तेषां वचनं श्रुत्वा राक्षसेन्द्रः चिन्तारोषाभ्यां समाक्रान्तः अत एव विवर्णवदनोऽभवत् ॥ १४ ॥

गो० टी०—तद्वियमित्यादि । यौ नौ । यानित्यर्थः । पाशानिति । पाशान् क्षिप्त्वा स्थितौ गजाविव भासमानावित्यर्थः ॥ ११–१४ ॥

१५] ति० टी०—दत्तवरैरेव इत्या दत्तवरादेः । किंभूतैः । अरत्नप्रसादैः वरप्राप्तैरित्यर्थः । दृष्टिप्रभ्रष्ट बद्धानिरुत्थयः ॥ १५ ॥

१६] ति० टी०—संत्रयस्थम । इन्द्रजिद्बलमवष्टभ्य स्थितस्य मे पक्षमुत्पन्न ईक्षण्यात्प्रायोऽस्माकमपजय इति वाच्य इत्यर्थः ॥ १६ ॥

रा० टी०—चिन्ताकारमाह—घोरैरित्यादिभिः । इत्तवरैः प्राप्ताभयवरादेः अत एव अमोघैः शरैः प्रमथ्य इन्द्रजिता बद्धौ तौ रिपू यदि तत्पक्षसमीपात् प्राप्य मुक्तौ तदा हतं राक्षसकुलं [illegible] ॥ १४ ॥ १५ ॥

गो० टी०—घोरैरित्यादि । दत्तवरैः । प्रमथ्य [illegible] बलात्कृत्य । बद्धौ अभूतामिति शेषः । संशयस्थं प्राणसंशय आपन्नम् आत्तम् ॥ १३–१८ ॥

१७–१९] ति० टी०—तदेवाह—निष्फलाः इति । शरेरिन्द्रजिन्मुक्तैः सङ्ग्रामे मम रिपूणां जीवितमादत्तं निष्फलाः संहृष्टाः खलु तस्मात्संशयस्थमिदम् ॥ १७ ॥ १८ ॥ १९ ॥

रा० टी०—निष्फला इति । यैः रिपूणां जीवितमादत्तं शराः निष्फलाः संहृष्टाः भूताः ॥ १७ ॥

रा० टी०—एवमिति । एवमुक्त्वा धूम्राक्षं नाम राक्षसं मन्त्रवीत् ॥ १८ ॥

रा० टी०—तदाकारमाह—बलेनेति । महता बलेन युक्तः त्वं वानरैः सह रामस्य वधाय निर्याहि ॥ १९ ॥

गो० टी०—बलेनेति । त्वं यथायमिनिर्याहीत्यर्थः । तत्सूचकं वचः ॥ १९ ॥ २० ॥

२०] ति० टी०—परिक्रम्य रावणं प्रदक्षिणीकृत्य ॥ २० ॥

रा० टी०—एवमिति । एवमुक्तो धूम्राक्षः नृपालयात् निर्जगाम ॥ २० ॥

२१–२२] ति० टी०—तद्द्वारं रावणगृहद्वारमभिनिष्क्रम्य ततो निर्गत्य ब्रुवन्नतः पुंसः किं चिरेण किं विलम्बेन व्यर्थं इत्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०—अभीति । तद्द्वारमभिनिष्क्रम्य ब्रुवन्नतो भूत्वा चिरेण किम् नु प्रयोजनमित्यर्थः अतो बलं शीघ्रं त्वरयस्व इति बलाध्यक्षमुवाच ॥ २१ ॥

गो० टी०—अभीति । द्वारमभिनिष्क्रम्य द्वाराभिनिष्क्रम्य । ब्रुवन्नतः ब्रूमेति शेषः । किं चिरेण किं विलम्बेन ॥ २१ ॥

रा० टी०—धूम्राक्षेति । बलाध्यक्षो धूम्राक्षवचनं श्रुत्वा रावणस्यानुया बलमुद्योजयामास ॥ २२ ॥

गो० टी०—धूम्राक्षेति । रावणस्यानुया [illegible] ॥ २२ ॥

२३] ति० टी०—बद्धघण्टा [illegible]

विविधायुधहस्ताश्च — शूलमुद्गरपाणयः । भल्लाट्टि[1] — [illegible]
भिन्दिपालैश्च भल्लैः पाशैः परश्वधैः । निर्ययुः सप्तसप्तौघाः सवल्गा[illegible] पथा ॥ २५ ॥
रथैः कवचिनस्त्वन्ये ध्वजैश्च समलंकृतैः । सुवर्णजालसंवीतैः खरैश्च विविधाननैः ॥ २६ ॥
हयैः परमसंयुक्तैर्गजैश्चैव मदोत्कटैः । निर्ययुस्तत्क्षणव्याघ्रा व्याघ्रा इव दुरासदाः ॥ २७ ॥
व्याघ्रसिंहमुखैर्युक्तं खरैः कनकभूषितैः । आरुरोह रथं दिव्यं धूम्राक्षः खरनिःस्वनः ॥ २८ ॥
स निर्यातो महावीर्यो धूम्राक्षो राक्षसैर्वृतः । हनुमान्वै पश्चिमद्वारादूनुपाम्यत्र तिष्ठति ॥ २९ ॥
रथप्रवरमास्थाय खरयुक्तं खरस्वनम् । प्रयान्तं तु महावीर्यं राक्षसं भीमदर्शनम् ॥ ३० ॥
अन्तरिक्षगताः क्रूराः शकुनाः प्रत्यवेक्षयन् । स्थशीर्षे घोरभीमे — गृध्रश्च निपपात ह ॥ ३१ ॥
ध्वजाग्रे ग्रथिताश्चैव निपेतुः कृष्णपक्षिणः । रुधिरार्द्रा महाश्वेताः कबन्धः पतितो भुवि ॥ ३२ ॥
विस्वरं चोत्सृजन्नादान्धूम्राक्षस्य निपातितः । ववर्ष रुधिरं देवः संचचाल च मेदिनी ॥ ३३ ॥

रा० टी०—त इति । भल्लघण्टाः पाशशक्त्यादिषु यैः ते भल्लाट्टिकरपाणयः स्वाभाविकशूलादियुक्तपाणिविशिष्टास्ते निर्याताः विविधायुधहस्तास्सन्तो विनिर्यमानाः धूम्राक्षं पर्यवारयन् सार्द्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०—त इति । भल्लघण्टाः शस्त्रविशेषाय कटिबद्धघण्टा इत्यर्थः । ते पूर्वोक्तसेनास्थाः । विविधेति । आयुधानि शूलादिविशेषाणि । अस्यार्धस्य पूर्वेणान्वयः ॥ २३ ॥

२४-२५] ति० टी०—गदादिभिरिति ॥२४॥२५॥

रा० टी०—आयुधानि निर्दिशन्नाह—गदाभिरिति । गदाभिरुल्बणिताः जलदा इव गर्जन्तो राक्षसा निर्ययुः सार्द्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०—गदाभिरित्यादि । गदा प्रसिद्धा पट्टिशः दण्डविशेषः परिघः भिन्दिपालः भल्लः अयोमयः शरः प्राप्तैः परश्वधैः द्विस्रो जलदा इवेत्यन्वयः ॥ २४ ॥ २५ ॥

२६-२८] ति० टी०—समलंकृतैरिति रथध्वजयोर्विशेषणम् । सुवर्णजालविहितेनेत्र विहितालंकारैः ॥ २६ ॥ २७ ॥

रा० टी०—रथैरिति । अन्ये एके कवचिनो व्याघ्र इव दुरासदाः मत्तैर्व्याघ्राः ध्वजैश्चसमलंकृतैस्सुवर्णजालेन विहितैः रथिभिर्विनिर्यातैः खरैस्सप्तभिः रथैश्च हयादिभिश्च निर्ययुः श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

रा० टी०—शुकेति । शुकाना सिंहानां च मुखानीव मुखानि येषां तैः कनकभूषितैः खरैर्युक्तं रथं धूम्राक्ष आरुरोह ॥ २८ ॥

गो० टी०—रथैरिति । अन्ये कवचिनः । अन्ये विनिर्यातैः अन्ये समलंकृतैः रथैर्निर्ययुः । अन्ये हयैः अन्ये गजैश्च निर्ययुरित्यन्वयः ॥ २६-२९ ॥

२९-३०] ति० टी०—पश्चिमद्वारात् यत्र द्वारे हनुमान्स्थितस्तस्मात्पश्चिमद्वारादूनुपाम्यत्र गोरे निर्यातः ॥ २९ ॥३० ॥

रा० टी०—स इति । राक्षसैर्वृतो धूम्राक्षः यत्र हनुमान् तिष्ठति तस्मात् पश्चिमद्वारादेव हनुमन्तं नियातः ॥ २९ ।

रा० टी०—रथेति । खरयुक्तं रथप्रवरमास्थाय प्रयान्तं खरस्वनं राक्षसं धूम्राक्षं क्रूराः शकुनाः प्रत्यवेक्षयन् सार्द्धश्लोक एकान्वयी ॥ ३० ॥

गो० टी०—प्रयान्तमिति । शकुनाः निमित्तसूचका पक्षिणः ॥ ३० ॥

३१] ति० टी०—शकुना दुःशकुनाः प्रत्यवेक्षयन् मृत्युसूचनेनेति शेषः ॥ ३१ ॥

रा० टी०—क्रूरशकुनानेवाह—रथेत्यादिभिः । रथशीर्षे रथस्योपरि मध्यभागे गृध्रो निपपात सार्द्धं पृथक् ॥ ३१ ॥

गो० टी०—रथशीर्ष इति । कृष्णपक्षिणः गृध्राः ग्रथिता निर्मिताः ॥ ३१ ॥

३२] ति० टी०—ग्रथिता मालावत्परस्परसंयुक्ताः कृष्णपक्षिणा गृध्राः ॥ ३२ ॥

रा० टी०—ध्वजेति । ग्रथिताः मालेव परस्परं संयुक्ताः कृष्णपक्षाभाः गृध्राः निपेतुः रुधिरार्द्रः श्वेतो महान् कबन्धो भुवि तत्समभागे पतितः ॥ ३२ ॥

गो० टी०—रुधिरेति । विस्वरमिति क्रियाविशेषणम् ३२

३३] ति० टी०—धूम्राक्षस्य समीपे निपातितो विवर्तितः कबन्ध इति शेषः ॥ ३३ ॥

रा० टी०—विस्वरमिति । निपातितः कबन्धः विस्वरं नादमुत्सृजन् सवल्गनेनेति शेषः देवो रुधिरं ववर्ष मेदिनी संचचाल धूम्राक्षस्य समीपत इति पाठे तु विस्वरनादोत्सर्जनकर्तापि देव एव बोध्यः ॥ ३३ ॥

गो० टी०—ववर्षेत्यादि । देवः पर्जन्यः । प्रतिलोमं [illegible] ॥ ३३-३५ ॥

---

१ भल्लाट्टि गो० पाठः । २ [illegible] गो० पाठः । ३ पाशैः शक्ति गो० पाठः । ४ [illegible] गो० पाठः । ५ [illegible] गो० पाठः । ६ [illegible] गो० पाठः । ७ प्रवरमिति गो० पाठः । ८ [illegible] गो० पाठः । ९ [illegible] इति गो० पाठः । १० [illegible] गो० पाठः । ११ [illegible] गो० पाठः । १२ [illegible] गो० पाठः । १३ [illegible] गो० पाठः । १४ [illegible] गो० पाठः । १५ [illegible] गो० पाठः । १६ [illegible] गो० पाठः ।

[illegible] [illegible] [illegible] [

रक्षोभिर्वानरास्ते भृशमलाः । अमर्षजनितोत्साहाः ॥ ५ ॥
शल्यनिर्भिन्नदेहिनः । जगृहुस्ते द्रुमांस्तत्र गिरयश्च हरीश्वराः ॥ ६ ॥
भीमवेगा हरयो नदेयानास्ततस्ततः । ममन्थुरक्षसां वीरान्यामानि च चमूषिरे ॥ ८ ॥
तत्रभूवाद्भुतं घोरं युद्धं वानरराक्षसाम् । शिलाभिर्भिन्नविभिन्नैश्च बहुशाखैश्च पादपैः ॥ ९ ॥
राक्षसा मथिताः केचिद्वानरैर्जितकाशिभिः । भक्षेमु रुधिरं केचिन्मुखे रुधिरभोजनाः ॥ १० ॥
पार्श्वेषु दारिताः केचित्केचिद्वाशकृता द्रुमैः । शिलाभिश्चूर्णिताः केचित्केचिद्दन्तैर्विदारिताः ॥ ११ ॥
ध्वजैर्विमथितैर्भग्नैः खड्गैश्च विनिपातितैः । रथे विध्वंसितास्तत्र केचिद्ध्वजिन्य इवाभवन् ॥ १२ ॥
गजेन्द्रैः पर्वताकारैः पर्वताग्रैर्वनौकसाम् । मथितैर्वाजिभिः कीर्णं सारोहैर्वसुधातलम् ॥ १३ ॥
वानरैर्भीमविक्रान्तैराप्लुत्योत्प्लुत्य वेगितैः । राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिदारिताः ॥ १४ ॥
विषण्णवदना भूयो विप्रकीर्णशिरोरुहाः । मूढाः शोणितगन्धेन निपेतुर्धरणीतले ॥ १५ ॥
अन्ये तु परमक्रुद्धा राक्षसा भीमविक्रमाः । तलैरेवाभिधावन्ति वज्रस्पर्शसमैर्हरीन् ॥ १६ ॥

५] ति० टी०—जनितोद्भवाः संजातोत्साहाः अमीतव-मयाः सन्त. ॥ ५ ॥

रा० टी०—ते इति । रक्षोभिः गदादिभिः करणैर्विदा-रिताः गदाबलास्ते ते वानराः अमर्षेण तदसहनेन जनितः हर्षो बुद्धौ-यस्ते यथा तथाभूतास्सन्तः अभीतवत् भीतिरहिता यथा भवंति तथा कर्माणि युद्धोत्साहयोगान् चक्रुः श्लोकद्वयमे-कान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—त इति । जनितोद्भवा जनितोत्साहाः ॥५॥६॥

७-९] ति० टी०—शल्यनिर्भिन्नदेहिनः । इत्यन्तत्व-मर्थम् ॥ ७ ॥ ९ ॥

रा० टी०—शरेति । शरनिर्भिन्नगात्राः ते ते हरिश्वपाः (मान् जगृहुः ॥ ७ ॥

गो० टी०—शरेति । शल्यनिर्भिन्नदेहिनः । कर्मधारया-द्वैतिराद्यः ॥ ७ ॥

रा० टी०—ते इति । नर्दमानाः हरयः राक्षसान् ममन्थुः मारितवंतः सान्वाभिनाश्च वभाषिरे ॥ ८ ॥

रा० टी०—तदिति । वानरराक्षसां शिलाभिर्युद्धमद्भुतं बभूव ॥ ९ ॥

गो० टी०—त इति । नामानि स्वनामानि ॥ ८—११ ॥

१०] ति० टी०—जिताशिवः जितभयैर्जित्वरैः ॥ १० ॥

रा० टी०—राक्षसा इति । वानरैर्मथिताः रुधिरभोजनाः केचिदाख्याः रुधिरं प्रबभुः ॥ १० ॥

११-१२] ति० टी०—द्रुमै राशीकृताः द्रुमप्रहारैर्हत्वा राशीकृता इत्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०—पार्श्वेष्विति । राशीकृता एकत्र स्थापिता केचित्केचित् द्रुमादिभिः पार्श्वेषु दारिताः केचित् चूर्णिताः केचिच्चान्ये सह विदारिताः ॥ ११ ॥

रा० टी०—ध्वजैरिति । विमथितैर्विध्वंसितैर्ध्वजैर्भग्नैः खड्गैश्च विनिपातितैस्तथोपलक्षिताः केचिद्ध्वजवीचयः विध्वंसिताः अत एव व्यथिताः ॥ १२ ॥

गो० टी०—ध्वजैरिति । वनौकसां पर्वताग्रैः वानरैरि-त्यर्थः । मथितैः गजेन्द्रैः सारोहैः साधिष्ठानैः वसुधातलं कीर्णमभूत् ॥ १२ ॥ १३ ॥

१३] ति० टी०—गजेन्द्रैर्मथितगजेन्द्रशरीरैः ॥ १३ ॥

रा० टी०—गजेन्द्रैरिति । वनौकसां वनौकोभिर्मथितैर्गजे-न्द्रैः सारोहसहितैर्गजैर्वाजिभिश्च वसुधातलं कीर्णम् ॥ १३ ॥

१४] ति० टी०—करजैर्नखैः ॥ १४ ॥

१५-१६] ति० टी०—मूढा मूर्च्छिताः ॥ १५ ॥ १६ ॥

रा० टी०—वानरैरिति । वेगितैर्वानरैस्तीक्ष्णैः करजैः करणैः राक्षसाः मुखेषु विनिदारिताः अत एव विषण्णवदनाः अत एव विप्रकीर्णशिरोरुहाः शोणितगन्धेन मूढाः संज्ञारहिताः राक्षसाः धरणीतले निपेतुः श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

रा० टी०—अन्य इति । तलैरभिहताः अन्ये राक्षसाः हरीन् अभिधावन्ति ॥ १६ ॥

गो० टी०—वानरैरित्यादि । भीमविक्रान्तैः भीमविक्रमैः । वेगितैः संजातवेगैः वानरैः कर्तृभिः । करजैः नखैः कर्तृभूतैः आक्रम्याक्रम्य मुखेषु विनिकर्तितैः क्षतिकृद्भिः । मूढाः मूर्च्छिताः ॥ १४ ॥ १५ ॥

गो० टी०—अन्य इति । तलैरेवाभिधावन्ति । इत्यनेन श्येनायुधवत्वाद्धरीणां अन्यथावधिरुक्तः ॥ १६ ॥

१ अमर्षादिति गो० पाठः । २ भीमानीति गो० पाठः । ३ बहुशब्देति गो० पाठः । ४ वनौकस इति गो० पाठः । ५ वीरानिति गो० पाठः । ६ शाखाभिरिति गो० पाठः । ७ परिवीरिति गो० पाठः । ८ वीरानिति गो० पाठः । ९ वाशकृत्वेति गो० पाठः । १० [illegible] इति गो० पाठः । ११ [illegible] इति गो० पाठः । १२ परमक्रुद्धा इति गो० पाठः । १३ निघ्नन्ता इति गो० पाठः ।

वानरैः पातयन्तस्ते वेगिता वेगवत्तरैः । मुष्टिभिश्चरणैर्दन्तैः पादपैश्चावपोथिताः ॥ १७ ॥
सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः । रोषेण क्रदनं चक्रे वानराणां युयुत्सताम् ॥ १८ ॥
प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः । मुद्गरैराहताः केचित्पतिता धरणीतले ॥ १९ ॥
परिघैर्मथिताः केचिद्भिन्दिपालैश्च दारिताः । पट्टिशैर्मथिताः केचिद्विह्वलन्तो गतासवः ॥ २० ॥
केचिद्विनिहता भूमौ रुधिरार्द्रा वनौकसः । केचिद्विद्राविता नष्टाः शैलेन्द्रं गहनं युधि ॥ २१ ॥
विभिन्नहृदयाः केचिदेकपार्श्वेन शायिताः । विदारिताभिशूलैश्च केचिदान्त्रैर्विनिःसृताः ॥ २२ ॥
तत्सुभीमं महद्युद्धं हरिराक्षससंकुलम् । प्रवभौ शैलबहुलं शिलापादपसंकुलम् ॥ २३ ॥
धनुर्ज्यातन्त्रिमधुरं हि तालसमन्वितम् । मन्दस्तनितगीतं तद्युद्धगान्धर्वमाबभौ ॥ २४ ॥
धूम्राक्षस्तु धनुष्पाणिर्वानरान्रणमूर्धनि । हरन्निद्रावयामास दिशस्ताक्ष्यैरवृष्टिभिः ॥ २५ ॥
धूम्राक्षेणार्दितं सैन्यं व्यथितं मरुतेर्यथा । अभ्यवर्तत संक्रुद्धः मरुतः विपुलां शिलाम् ॥ २६ ॥
क्रोधाद्विगुणताम्राक्षः पिङ्गतुल्यपराक्रमः । शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥ २७ ॥
आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात् । रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ॥ २८ ॥

१७-१९] ति० टी०-अवपोथिता हिंसिताः ॥१७॥१९॥

रा० टी०-वानरैरिति । पातयन्तो वेगितास्ते राक्षसाः वेगवत्तरैर्वानरैर्मुष्ट्यादिभिरवपोथिताः ॥ १७ ॥

गो० टी०-वानरैरिति । अवपोथिताः हिंसिताः । 'पुथ, हिंसायाम्' इति धातुः ॥ १७ ॥

रा० टी०-सैन्यमिति । धूम्राक्षः सैन्यं विद्रावितं दृष्ट्वा युयुत्सतां वानराणां क्रदनं हिंसनं चक्रे ॥ १८ ॥

गो० टी-सैन्यं त्विति । क्रदनं हिंसनम् ॥ १८ ॥

रा० टी०-तत्प्रकारमाह—प्रासैरित्यादिभिः । केचिद्वानराः प्रासैः प्रमथिताः अत एव शोणितस्रवास्सन्तो धरणीतले पतिताः केचित् मुद्गरैराहतास्सन्तः पतिताः ॥ १९ ॥

गो० टी०-प्रासैरित्यादि चतुःश्लोकी ॥ विह्वलन्तः विवशाः । गतासवः अभवन्निति शेषः । अन्त्रैर्विनिःसृताः विनिःसृतान्त्रा इत्यर्थः ॥ १९—२१ ॥

२०-२१] ति० टी०-विह्वलन्तो विवशाः ॥२०॥२१॥

रा० टी०-परिघैरिति । मथिताः अत एव विह्वलन्तः अतः गतासवो बभूवुरिति शेषः ॥ २० ॥

रा० टी०-केचिदिति । विद्राविता बभूवुरिति शेषः ॥२१॥

२२-२३] ति० टी०-आन्त्रैर्विनिःसृताः निःसृतान्त्राः इत्यर्थः । आन्त्राणि पुरीतत इति कृतकः ॥ २२ ॥ २३ ॥

रा० टी०-विभिन्नेति । केचिद्विभिन्नहृदयाः एकपार्श्वेन शायिताः निपातिताः केचित् आन्त्रैर्विनिःसृताः निर्गतान्त्रा अतएव विह्वलाः ॥ २२ ॥

रा० टी०-तदेति । हरिभिः राक्षसैश्च तद्भूतं संग्रामं दृष्ट्वा मरुतः प्रवृद्ध अभ्यवर्तत इति गो० पाठः । ३ शूलैश्चैवान्त्रसंकुलैः राक्षसा विनिर्भिन्नपुरीषकाः गो० पाठः २ विद्रावितमिति रा० पाठः । ४ कोपेनेति गो० पाठः । ५ [illegible] ६ पातया इति गो० पाठः । ७ भवेदिति गो० पाठः । ८ सर्वत्रेति गो० पाठः । ९ दारिता इति गो० पाठः । १० मरुतुल्यः इति [illegible] ११ शिलां गो० पाठः । १२ शूलेति गो० पाठः । १३ विह्वलन्ति गो० पाठः ।

वानरैः पातयन्तस्ते वेगिता वेगवत्तरैः । मुष्टिभिश्चरणैर्दन्तैः पादपैश्चावपोथिताः ॥ १७ ॥
सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः । रोषेण क्रदनं चक्रे वानराणां युयुत्सताम् ॥ १८ ॥
प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः । मुद्गरैराहताः केचित्पतिता धरणीतले ॥ १९ ॥
परिघैर्मथिताः केचिद्भिन्दिपालैश्च दारिताः । पट्टिशैर्मथिताः केचिद्विह्वलन्तो गतासवः ॥ २० ॥
केचिद्विनिहता भूमौ रुधिरार्द्रा वनौकसः । केचिद्विद्राविता नष्टाः शैलेन्द्रं गहनं युधि ॥ २१ ॥
विभिन्नहृदयाः केचिदेकपार्श्वेन शायिताः । विदारिताभिशूलैश्च केचिदान्त्रैर्विनिःसृताः ॥ २२ ॥
तत्सुभीमं महद्युद्धं हरिराक्षससंकुलम् । प्रवभौ शैलबहुलं शिलापादपसंकुलम् ॥ २३ ॥
धनुर्ज्यातन्त्रिमधुरं हि तालसमन्वितम् । मन्दस्तनितगीतं तद्युद्धगान्धर्वमाबभौ ॥ २४ ॥
धूम्राक्षस्तु धनुष्पाणिर्वानरान्रणमूर्धनि । हरन्निद्रावयामास दिशस्ताक्ष्यैरवृष्टिभिः ॥ २५ ॥
धूम्राक्षेणार्दितं सैन्यं व्यथितं मरुतैर्यथा । अभ्यवर्तत संक्रुद्धः मरुतः विपुलां शिलाम् ॥ २६ ॥
क्रोधाद्विगुणताम्राक्षः पिङ्गतुल्यपराक्रमः । शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥ २७ ॥
आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात् । रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ॥ २८ ॥

१७-१९] ति० टी०-अवपोथिता हिंसिताः ॥१७॥१९॥

रा० टी०-वानरैरिति । पातयन्तो वेगितास्ते राक्षसाः वेगवत्तरैर्वानरैर्मुष्ट्यादिभिरवपोथिताः ॥ १७ ॥

गो० टी०-वानरैरिति । अवपोथिताः हिंसिताः । 'पुथ, हिंसायाम्' इति धातुः ॥ १७ ॥

रा० टी०-सैन्यमिति । धूम्राक्षः सैन्यं विद्रावितं दृष्ट्वा युयुत्सतां वानराणां क्रदनं हिंसनं चक्रे ॥ १८ ॥

गो० टी-सैन्यं त्विति । क्रदनं हिंसनम् ॥ १८ ॥

रा० टी०-तत्प्रकारमाह—प्रासैरित्यादिभिः । केचिद्वानराः प्रासैः प्रमथिताः अत एव शोणितस्रवास्सन्तो धरणीतले पतिताः केचित् मुद्गरैराहतास्सन्तः पतिताः ॥ १९ ॥

गो० टी०-प्रासैरित्यादि चतुःश्लोकी ॥ विह्वलन्तः विवशाः । गतासवः अभवन्निति शेषः । अन्त्रैर्विनिःसृताः विनिःसृतान्त्रा इत्यर्थः ॥ १९—२१ ॥

२०-२१] ति० टी०-विह्वलन्तो विवशाः ॥२०॥२१॥

रा० टी०-परिघैरिति । मथिताः अत एव विह्वलन्तः अतः गतासवो बभूवुरिति शेषः ॥ २० ॥

रा० टी०-केचिदिति । विद्रावितो बभूवुरिति शेषः ॥२१॥

२२-२३] ति० टी०-आन्त्रैर्विनिःसृताः निःसृतान्त्राः इत्यर्थः । आन्त्राणि पुरीतत इति कृतकः ॥ २२ ॥ २३ ॥

रा० टी०-विभिन्नेति । केचिद्विभिन्नहृदयाः एकपार्श्वेन शायिताः निपातिताः केचित् आन्त्रैर्विनिःसृताः निर्गतान्त्रा अतएव विह्वलाः ॥ २२ ॥

रा० टी०-तदेति । हरिभिः राक्षसैश्च तद्भूतं संग्रामं दृष्ट्वा मरुतः प्रवृद्ध अभ्यवर्तत इति गो० पाठः । ३ शूलैश्चैवान्त्रसंकुलैः राक्षसा विनिर्भिन्नपुरीषकाः गो० पाठः २ विद्रावितमिति रा० पाठः । ४ कोपेनेति गो० पाठः । ५ [illegible] ६ पातया इति गो० पाठः । ७ भवेदिति गो० पाठः । ८ सर्वत्रेति गो० पाठः । ९ दारिता इति गो० पाठः । १० मरुतुल्यः इति [illegible] ११ शिलां गो० पाठः । १२ शूलेति गो० पाठः । १३ विह्वलन्ति गो० पाठः ।

स मम्रथ्य रथं तस्य निपपात शिला भुवि । सचक्रकूबरयुगं ध्वजं सशरतूणम् ॥ २९ ॥
स त्यक्त्वा तु रथं तस्य हनूमान्मारुतात्मजः । रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः ॥ ३० ॥
विभिन्नशिरसो भूत्वा राक्षसा रुधिरोक्षिताः । द्रुमैः प्रमथिताश्चान्ये निपेतुर्धरणीतले ॥ ३१ ॥
विद्रोव्य राक्षसं सैन्यं हनूमान्मारुतात्मजः । गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३२ ॥
तमापतन्तं धूम्राक्षो गदामुद्यम्य वीर्यवान् । विनर्दमानः सहसा हनूमन्तमभिद्रवत् ॥ ३३ ॥
तस्य क्रुद्धस्य रोषेण गदां तां बहुकण्टकाम् । पातयामास धूम्राक्षो मस्तकेऽथ हनूमतः ॥ ३४ ॥
ताडितः स तया तत्र गदया भीमवेगया । स कपिर्मारुतबलस्तं प्रहारमचिन्तयन् ॥ ३५ ॥
धूम्राक्षस्य शिरोमध्ये गिरिशृङ्गमपातयत् । स विस्फारितसर्वाङ्गो गिरिशृङ्गेण ताडितः ॥ ३६ ॥
एवान्य राक्षसा भूमौ विकीर्ण इव पर्वतः । धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः ॥
अलङ्कां शोणितोत्कीर्णां नष्टमानाः प्लवंगमैः ॥ ॥ ३७ ॥

स तु पानसुतो नित्यं शैलूक्षतजयहाः सरितश्च संविकीर्य ।
विपुलयजनितश्रमो महात्मा सुहृदभिपत्कपिभिः सुपूज्यमानः ॥ ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०—अथेति । प्रोद्धतस्तैः द्विगुणं ताडे अश्वत्थे निर्गतो यस्तस्य स्कन्धस्तेन सहितैः शाखाढ्यैः स्कन्धविटपैर्वृक्षैः ॥ २७ ॥

रा० टी०—शरतूणमिति । शिलया सरतूणं युद्धा गदामस्य मस्तके पातयामास । अथात् स्थाद्रूपेण तस्य तत्रैवावयवे व्यतिषक्तम् ॥ २८ ॥

गो० टी०—सेनेति । विना ॥ २७ ॥ २८ ॥

२९] ति० टी०—स इति शिलां तस्य रथादिसहितं रथं प्रमथ्य पि शिलया [illegible] कृत्वान्यो पर्वतः । अवष्टब्धतिकाले रथे स्थितो [illegible] ॥ २९ ॥

रा० टी०—मथेति । स हनूमता निपातिता शिला तस्य रथस्य [illegible] रथिनं सारथिं च पिपेष इति निपपात ॥ २९ ॥

गो० टी०—मथेति । कूबरः पुरोधरः । कूबरस्तु पुरोधरः इत्यमरः ॥ २९ ॥ २९ ॥

३०] ति० टी०—अथेति । अथ रथम् रक्षसां कदनं चक्रे [illegible] तस्कन्धयोर्मिलने जेयः स्कन्धः स्कन्धशाखा विटपः सहशा सा [illegible]

रा० टी०—स इति । हनूमान् तस्य रथं त्यक्त्वा स्कन्ध वेटपसहितैर्द्रुमैः स्कन्धा महाशाखा विटपोऽल्पशाखेति भेदः ॥ ३० ॥

३२–३३ इति ति० टी०—धूम्राक्षस्य पतिता इति शेषः ३२ ॥ ३३

रा० टी०—विभिन्नेति । अन्ये राक्षसाः द्रुमैः प्रमथिता अत एव भिन्नशिरसो भूत्वा धरणीतले निपेतुः ॥ ३१ ॥

३२ रा० टी०—विद्रोव्येति । हनूमान् राक्षसं सैन्यं विद्राव्य [illegible] शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३२ ॥

३३–३८] ति० टी०—अभिद्रवदभ्यद्रवत् ॥ ३३ ॥ ३४ ॥

धूम्राक्षवधो भात्रशुक्लद्वितीयायामित्याहुः ॥

इति श्रीरामभिरामे श्रीरामायणे रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०—तमिति । धूम्राक्षो गदामुद्यम्य विनर्दमानः सन् हनूमन्तमभिद्रवत् अभ्यद्रवत् ॥ ३३ ॥

गो० टी०—तमिति । अभिद्रवत् अभ्यद्रवत् आगमशास्त्रस्यानित्यत्वादडभावः ॥ ३३ ॥

रा० टी०—तस्येति । धूम्राक्षो बहुकण्टकां गदां तस्य हनूमतो मस्तके पातयामास ॥ ३४ ॥

गो० टी०—तस्य इति । बहुकण्टकां बहुकीलाम् ॥ ३४ ॥

रा० टी०—ताडित इति । गदया ताडितः स कपिः कपिस्वसहितैः स हनूमान् तं प्रहारमचिन्तयन् सन् धूम्राक्षस्य शिरोमध्ये गिरिशृङ्गमपातयत् ताडयोक एकान्वयी ॥ ३५ ॥

रा० टी०—स इति । गिरिशृङ्गेण ताडितः अत एव विस्फारितानि विदीर्णानि सर्वाङ्गानि यस्य सः धूम्राक्षो विकीर्णः पर्वत इव भूमौ पपात ॥ ३६ ॥

गो० टी०—ताडित इति । ताडितः आर्षत्वादिति शेषः ॥ ३२ ॥ ३६ ॥

रा० टी०—धूम्राक्षमिति । [illegible] नष्टमानाः अत एव तस्ताः हतशेषा निशाचराः लङ्कां प्रविविशुः ॥ ३७ ॥

गो० टी०—स इति । निहतानि विनाशीकृतानि ३७ ॥ ३८ ॥

रा० टी०—स इति । पवनसुतः भवन् निहत्य अत एव

---

१ [illegible] २ अक्षयेति गो० पाठः । ३ शोणितेति गो० पाठः । ४ ततः कूबरयुगेत्येके गो० पाठः । ५ विद्रुत्य गो० पाठः । ६ [illegible] ७ निहतेति गो० पाठः । ८ हनुमति गो० पाठः । ९ नीत्वेति गो० पाठः । १० इति गो० पाठः ।

धूम्राक्षे निहतेऽतिरुष्टेन रावणेन प्रहितेन पञ्चसेनापतिना निशाचरेण कपीनां दारुणो रणः ।

धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः । क्रोधेन महताविष्टो निःश्वसन्नुरगो यथा ॥ १ ॥
दीर्घमुष्णं विनिःश्वस्य क्रोधेन कलुषीकृतः । अब्रवीद्राक्षसं क्रूरं वज्रदंष्ट्रं महाबलम् ॥ २ ॥
गच्छ त्वं वीर निर्याहि राक्षसैः परिवारितः । जहि दाशरथिं रामं सुग्रीवं वानरैः सह ॥ ३ ॥
तथेत्युक्त्वा द्रुततरं मायावी राक्षसेश्वरः । निर्जगाम बलैः सार्द्धं महद्भिः परिवारितः ॥ ४ ॥
नागैरश्वैः खरैरुष्ट्रैः संयुक्तः सुसमाहितः । नानाशस्त्रधरैश्चैव बलैर्महद्भिः समलंकृतः ॥ ५ ॥
ततो विचित्रकेयूरमुकुटेन विभूषितः । रथेन च समादत्त राघवनिर्ययौ द्रुतम् ॥ ६ ॥
पताकालंकृतं दीप्तं तप्तकाञ्चनभूषितम् । स्वं प्रहरणं कृत्वा समारोहन्महारथः ॥ ७ ॥
ऋष्टिभिस्तोमरैश्चित्रैः शूलैश्च सुसंशितैः । विविधायुधैश्च घोरैश्च शक्तिभिः पट्टिशैरपि ॥ ८ ॥
खड्गैश्चक्रैर्गदाभिश्च निशितैश्च परश्वधैः । परिवृतो निर्ययौ वीरो विविधाः शस्त्रपाणयः ॥ ९ ॥
विचित्रवाससः सर्वे दीप्ता राक्षसपुंगवाः । नानाप्रहरणाः शूराश्चलन्त इव पर्वताः ॥ १० ॥

तत्रवहाः सरितः संनिकीर्य परिवाह्य स्थितेन सचिवेन तस्य स कपिभिः क्षुण्णमाचष्ट मन्त्र मुदाहरन् ॥ १ ॥

इति श्रीमद्रामायणीयवाल्मीकीयादिकाव्ये रामचरितान्तर्गते युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

गो० टी०—स्व स्विते । वहन्तीति वाहाः तत्रत्यस्य हाः क्षत्रजवहाः सचिवीयं वाक्यमित्यर्थः ॥ त्रिपञ्चाशत्तमे ब्रह्मक्षयः ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे [illegible] युद्धकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ३९ ॥

१–२] ति० टी०—धूम्राक्षमिति ॥ १ ॥ २ ॥

रा० टी०—धूम्राक्षवधानन्तरकालिकं [illegible] धूम्राक्षमित्यादिभिः । धूम्राक्षं निहतं श्रुत्वा राक्षसेश्वरो रावणः क्रोधेन हेतुना निःश्वसन्निवेति शेषः ॥ १ ॥

रा० टी०—दीर्घमिति । कोपेन कलुषीकृतो रावणस्तं राक्षसमब्रवीत् ॥ २ ॥

गो० टी०—अथ वज्रदंष्ट्रवृत्तं त्रिपञ्चाशे धूम्राक्षनिधनादि । तत्रिद्ध अब्रवीदिति शेषः ॥ १ ॥ २ ॥

३–४] ति० टी०—गच्छ त्वमिति त्वान्तो वर्णयन् तत्त्वमिति बोध्यते ॥ ३ ॥ ४ ॥

रा० टी०—तदाकारमाह—गच्छेति । त्वं गच्छ राक्षसैरिति प्राप्यते तैः राक्षसैः परिवारितः सन् निर्याहि दाशरथिं रामं जहि ॥ ३ ॥

गो० टी०—गच्छ त्वं वीर निर्याहीति । इतो गच्छ रावणार्थोऽस्यर्थः ॥ ३ ॥

रा० टी०—तथेत्युक्त्वेति । तत्र परिवारितो बलादिभिः संवृतः ॥ ४ ॥

गो० टी०—तथेत्युक्त्वेति । बहुभिः बलाध्यक्षैरिति शेषः ॥ ४ ॥

५] ति० टी०—बहुभिः । बलाध्यक्षैरिति शेषः ॥ ५ ॥

गो० टी०—नागैरित्यादि । रथैरित्यत्र संयुक्त इत्यनेन [illegible] कृतः बहुभिर्बलैरिति [illegible] पूरयितव्यः ॥ ५ ॥

६–७] ति० टी०—रथं [illegible] समारोहन्महारथः ॥ ६ ॥ ७ ॥

रा० टी०—[illegible] । विचित्रकेयूरेति [illegible] रथेन च समादत्त संयमे ततो रावणमभ्यायियो ॥ ६ ॥

गो० टी०—पताकेति । अत्र पताकाभिः संयुक्तं पताकालंकृतं रथं प्रहरणं [illegible] ॥ ६ ॥ ७ ॥

८–१०] ति० टी०—[illegible] । चतुरङ्गबलयुक्तः क्षितः पताकयो [illegible] ॥ ८ ॥ ९ ॥

गो० टी०—ऋष्टिभिरित्यादि पञ्चश्लोकैकवाक्यम् ॥ ८ ॥ ९ ॥

रा० टी०—पताकेति । [illegible] । विविधाः पताकीर्ण राक्षसमुख्याः [illegible] गुरुकुलाग्रसोपरागुरुपाणयः हस्तिपैः [illegible] राजानः निर्ययुः सार्वलोकहृदयमेकान्वयि ॥ ९–१२ ॥

गो० टी०—राजान इति । अत्र निर्ययुरित्यनुषज्यते ।

---

१ वारणेति गो. पाठः । २ रथेनेति गो. पाठः । ३ केयूर इति रा. पाठः । ४ मुकुटेनेति गो. पाठः । ५ तनुत्राणीति गो. पाठः । ६ रक्षिभिरिति गो. पाठः । ७ वाहयेति गो. पाठः ।

तोमराङ्कुशपाणिभिः । अन्ये रक्षणसंयुक्ताः द्रुमारूढा महाबलाः ॥ ११ ॥
सङ्घाससबलं सैन्यं विप्रस्थितमशोभत । प्रावृट्काले यथा मेघा नर्दमानाः सविद्युतः ॥ १२ ॥
निःसृता दक्षिणद्वारादङ्गदो यत्र यूथपः । तेषां निष्क्रममाणानामशुभं समजायत ॥ १३ ॥
आकाशाद्विपनात्तीव्रा दुर्लक्ष्यकान्यपतंस्तदा । वमन्तः पावकज्वालाः शिवा घोरा ववाशिरे ॥ १४ ॥
व्याहरन्त मृगा घोरं रक्षसां निधनं तदा । समापतन्तो योधास्तु प्रास्खलंस्तत्र दारुणम् ॥ १५ ॥
एतानौत्पातिकान्दृष्ट्वा वानरेन्द्रो महाबलः । धैर्यमालम्ब्य तेजस्वी निर्जगाम रणोत्सुकः ॥ १६ ॥
तांस्तु विदितवान् रामः वानरान् जितकाशिनः । प्रणेदुः क्रमशनादान्दिशः शब्देन पूरयन् ॥ १७ ॥
ततः प्रहृष्टं तुमुलं हरीणां राक्षसैः सह । घोराणां भीमरूपाणामन्योन्यवधकाङ्क्षिणाम् ॥ १८ ॥
निष्पतन्तो महोत्साहा भिन्नदेहशिरोधराः । रुधिरोक्षितसर्वाङ्गा न्यपतन्धरणीतले ॥ १९ ॥
केचिदन्योन्यमासाद्य शूराः परिघबाहवः । निजिघ्नुर्विविधाञ्शस्त्रान्समरेष्वनिवर्तिनः ॥ २० ॥
द्रुमाणां च शिलानां च शस्त्राणां चापि निस्वनः । श्रूयते तुमुलांस्तत्र घोरो हृदयभेदनः ॥ २१ ॥
रथनेमिस्वनस्तत्र धनुषश्चापि घोरवत् । शङ्खभेरीमृदङ्गानां बभूव तुमुलः स्वनः ॥ २२ ॥

तोमरेति विनिर्दिष्टैः । तोमराङ्कुशपाणिभिः रक्षोभिः । द्रुमा आरूढा इत्यर्थः ॥ ११ ॥

११] ति० टी०–तोमराङ्कुशपाणिभी रूढा आरूढा द्रुमेषु ये राक्षसास्ते च निर्यांता इत्यन्वयः । रक्षणसंयुक्ता इत्यत्र । आरूढा निर्यांताः ॥ ११ ॥

गो० टी०–अन्ये रक्षणसंयुक्ता इति । पक्षान्तरे द्रुमा नेयाः ॥ ११ ॥

१२] ति० टी०–विप्रस्थितं विशेषेण कृतप्रस्थानम् । सविद्युतः सौदामन्या रक्षोबलस्य स्वनकृपणन्हुलत्वात्सविद्युत्वमेघोपनेयत्वम् ॥ १२ ॥

रा० टी०–तांस्त्विति । विप्रस्थितं कृतप्रस्थानं तद्बलमशोभत, अतः हृतक आवृत्तिरिति रभसेन वर्तमानाः प्रावृट्काले मेघा इव राक्षसाः सविद्युतः सौदामनीसहिताः सन्तः विप्रहारवंतिः सृताः ॥ १२ ॥

१३] ति० टी०–निःसृताः । राक्षसा इति शेषः ॥ १३ ॥

रा० टी०–तेषामिति । तेषां निष्क्रममाणानां मध्यमशुभं दक्षकुलनाशसूचकं अङ्गदस्य ॥ १३ ॥

१४] ति० टी०–दुर्निमित्तान्तरमप्युत्पेदाह—आकाशादिति । विघनात् घनरहितात् आकाशात् रक्षकान्यपतन् शुषकज्वालाः वमन्तः शिवाः शृगाल्यः वयांसि ववाशिरे ववाशिरे ॥ १४ ॥

गो० टी०–आकाशादित्यादि । विघनात् घनरहितात् ॥ १४ ॥

१५] ति० टी०–घोरा मृगा रक्षसां निधनं व्याहरन्त व्याहरन् ॥ १५ ॥

रा० टी०–व्याहरन्तेति । घोराः मृगाः रक्षसां निधनं एवं भवति तथा व्याहरन्त समापतन्त आगच्छन्तो योधाः प्रास्खलन् भूमौ निपेतुः ॥ १५ ॥

१६] ति० टी०–औत्पातिकान्अशुभसूचकान् ॥ १६ ॥

रा० टी०–एतानिति । औत्पातिकान् दृष्ट्वापि रणोत्सुको वानरेन्द्रः धैर्यमालम्ब्य निर्जगाम ॥ १६ ॥

गो० टी०–एतानिति । औत्पातिकान् अशुभसूचकान् १६

१७] ति० टी०–विदितवतो विशेषेण स्वसंमुखमागच्छतः पूरयन्पूरयन्तः आर्षमेकवचनम् ॥ १७ ॥

रा० टी०–तानिति । विदितवतस्तान् राक्षसान् दृष्ट्वा वानराः क्रमशनादान् प्रणेदुः अत एव शब्देन दिशः पूरयन् अपूरयन् १७

गो० टी०–तांस्त्विति । पूरयन् अपूरयंश्चेत्यर्थः । केचित्तु पूरयन् पूरयन्त इत्यर्थः, वचनव्यत्यय आर्ष इत्याहुः ॥ १७ ॥

१८–२०] ति० टी०–तुमुलं रणसंकुलम् ॥ १८ ॥ २० ॥

रा० टी०–तत इति । अन्योन्यवधकाङ्क्षिणां राक्षसैः सह हरीणां तुमुलं युद्धं प्रवृत्तम् ॥ १८ ॥

रा० टी०–निष्पतन्त इति । निष्पतन्तो युद्धार्थमागच्छन्तः महोत्साहाः वानरराक्षसाः भिन्नदेहशिरोधरास्सन्तः धरणीतले न्यपतन् ॥ १९ ॥

रा० टी०–केचिदिति । परिघबाहवः केचित् शूराः विविधान् शस्त्रान् निजिघ्नुः ॥ २० ॥

गो० टी०–तत इति । तुमुलं रणसङ्कुलम् । तुमुलं रणसङ्कुले इत्यमरः ॥ १८–२२ ॥

२१–२२] ति० टी०–हृदयभेदनः भयंकर इत्यर्थः २१।२२

रा० टी०–द्रुमाणामिति । हृदयभेदनः द्रुमादीनां क्रमशः निस्वनः शब्दः श्रूयते ॥ २१ ॥

रा० टी०–रथेति । सागरस्य घोषवत् रथनेमिस्वनः शंखादीनाञ्च तुमुलस्वनो बभूव ॥ २२ ॥

---

१ रक्षोबलेति गो. पाठः । २ घोरमिति गो. पाठः । ३ तीव्रा इति गो. पाठः । ४ उल्काश्चेति गो. पाठः । ५ निष्क्रमत इति गो. पाठः । ६ दूरीकृत्य विनिर्देशेति गो. पाठः । ७ अपतं इति गो. पाठः । ८ पावक इति गो. पाठः । ९ सागरस्येति रा. पाठः । १० घोषवदिति रा. पाठः ।

कोपरक्षाणि संत्यज्य बाहुयुद्धमकुर्वत । तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि ॥ २३ ॥
जानुभिश्च हताः केचिद्भग्नदेहाश्च राक्षसाः । शिलाभिश्चूर्णिताः केचिद्वानरैर्युद्धदुर्मदैः ॥ २४ ॥
वज्रदंष्ट्रोऽथ तं दृष्ट्वा रणे वित्रासयन्हरीन् । चचार लोकसंहारे पाशहस्त इवान्तकः ॥ २५ ॥
बलवन्तोऽस्त्रविदुषो नानाप्रहरणा रणे । जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्छिताः ॥ २६ ॥
जैत्रे तान्राक्षसान्सर्वान्धृष्टो वायुसुतो रणे । क्रोधेन द्विगुणाविष्टः संवर्तक इवानलः ॥ २७ ॥
तान्राक्षसगणान्सर्वान्हृष्टरूपमुद्यम्य वीर्यवान् । अङ्गदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव ॥ २८ ॥
चकार कदनं घोरं शक्रतुल्यपराक्रमः । अङ्गदाभिहतास्तत्र राक्षसा भीमविक्रमाः ॥ २९ ॥
विभिन्नशिरसः पेतुर्निकृत्ता इव पादपाः । रथैश्चित्रैर्ध्वजैरश्वैः शरीरैर्हरिरक्षसाम् ॥ ३० ॥
रुधिरौघेण संछन्ना भूमिर्भयकरी तदा । हारकेयूरवस्त्रैश्च च्छत्रैश्च समलंकृता ॥ ३१ ॥
भूमिर्भाति रणे तत्र शारदीव यथा निशा । अङ्गदस्य च वेगेन तद्राक्षसबलं महत् ॥
प्राकम्पत तदा तत्र पवनेनाम्बुदो यथा ॥ ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

२३-२४] ति० टी०-अस्त्राणि संत्यज्य सर्वाण्यस्त्राणि प्रयुज्य तदनन्तरमस्त्राभावाद्बाहुयुद्धमकुर्वत ॥ २३ ॥ २४ ॥

रा० टी०-केचिदिति । केचित् बाहुयुद्धमकुर्वत अङ्गदमुख्यैः तलैरिति केचिद्राक्षसाः तलादिभिर्वानरैर्भग्नदेहाश्चान्त. हता केचित् शिलाभिश्चूर्णीकृताः । सार्द्धश्लोक एकान्वयी॥ २३॥ २४॥

गो० टी०-केचिदिति । अस्त्राणि संसृज्य सर्वाण्यस्त्राणि प्रयुज्य तदनन्तरमस्त्राभावात् बाहुयुद्धमकुर्वतेत्यर्थः ॥२३-२५॥

२५] ति० टी०-वज्रदंष्ट्रोऽथ तं दृष्ट्वा । स्वसेनाविनाशमित्यर्थः । लोकसंहारे तन्निमित्तम् ॥ २५ ॥

रा० टी०-वज्रदंष्ट्र इति । वज्रदंष्ट्रः तं स्वसेनाविनाशं दृष्ट्वा लोकसंहारे अन्तक इव हरीन् वित्रासयन्चचार ॥२५॥

२६] ति० टी०-अस्त्रविदुषः अस्त्रविद्वांस इत्यर्थः॥२६॥

रा० टी०-बलवन्त इति । बलवन्तोऽस्त्रविदुषोऽस्त्रविद्वांसो राक्षसाः वानरसैन्यानि जघ्नुः ॥ २६ ॥

गो० टी०-बलवन्त इति । अस्त्रविदुषः अस्त्रविद्वांसः । प्रथमार्थे द्वितीया ॥ २६ ॥

२७] ति० टी०-संवर्तके प्रलयकाले ॥ २७ ॥

२८-३०] ति० टी०-तान्राक्षसगणान् । निजघानेति शेषः॥ २८ ॥ ३० ॥

रा० टी०-क्रुद्धइति । क्रोधेन द्विगुणाविष्टः द्विगुणक्रोधेन युक्तः अत एव क्रोधताम्राक्षो वालिक्षोऽङ्गदः संवर्तके प्रलयकाले अनिल इव राक्षसान् जघ्ने अत एव घोरं कदनं चकार सार्द्धश्लोकमेकान्वयि ॥ २७ ॥ २८ ॥

रा० टी०-अङ्गदेति । अङ्गदाभिहताः भीमविक्रमाः राक्षसाः विभिन्नशिरसस्सन्तः निकृत्ताः छिन्नाः पादपा इव पेतुः ॥ २९ ॥

रा० टी०-रथैरिति । हरिरक्षसां शरीरैः रुधिरौघेण रथादिभिश्च संछन्ना अत एव भयंकरी भूमिरभवदिति शेषः ॥ ३० ॥

गो० टी०-निघ्नत इत्यादिश्लोकद्वयमेकान्वयम् ॥ संवर्तके प्रलयकाले । तान् राक्षसगणानित्यत्र निजघानेति क्रियापदं शेषम् ॥ २७-३० ॥

३१] ति० टी०-भयंकरी भयंकरी अभूदिति शेषः । क्रमभाव आर्षः ॥ ३१ ॥

रा० टी०-हारेति । कृत्स्नैः छिन्नैः हारादिभिः समलंकृता भूमिः शारदी निशेव भाति ॥ ३१ ॥

गो० टी०-हारेति । शारदीव यथा निशेत्यत्र इव शब्दः यथाशब्दार्थकः कर्मधारयः । अभिनिर्वृत्त इवशब्दः पादपूरणः इत्येके ॥ ३१ ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नाकरीटाख्याने युद्धकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

३२] ति० टी०-पवनेनाम्बुदो यथेत्युत्तरं सर्गशेषः । कश्चित्श्लोकोऽयको वृत्तभेदप्रकरणभेदाभावादिति कतकः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामायणे रामायणशिरोमणौ वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रा० टी०-अङ्गदस्येति । अङ्गदस्य वेगेन राक्षसं बलं पवनेनाम्बुद इव प्राकम्पत ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

---

१ संसृज्येति गो. पाठः । २ निघ्नेति गो. पाठः । ३ भूयो जघ्नेरिति गो. पाठः । ४ निघ्नो राक्षसान्वृक्षा सर्वेनिति गो. पाठः । ५ वालीति गो. पाठः । ६ वालीति गो. पाठः । ७ क्रुद्धेनेत्यनेनेति गो. पाठः । ८ क्रुद्धेनेत्यनेनेति गो. पाठः । ९ कृत्स्नैरिति रा. पाठान्तरेति गो. पाठः ।

अङ्गदवज्रदंष्ट्रयोर्महति वज्रदंष्ट्रप्रहतेषु भीगविरुमेष्वपि हरिषु भग्नगात्रेषु प्रायस्तद्वधनिरपेक्षेष्वङ्गदं प्रधावत्सु वज्रदंष्ट्रस्य रोषोऽभूदी भूमाज्ञातयम् ।

स्वबलस्य च घातेन अङ्गदस्य बलेन च । राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः ॥ १ ॥
विस्फार्य च धनुर्घोरं शक्राशनिसमप्रभम् । वानराणामनीकानि प्राकिरच्छरवृष्टिभिः ॥ २ ॥
राक्षसाश्चापि मुख्यास्ते रथैश्च समवस्थिताः । नानाप्रहरणाः शूराः प्रायुध्यन्त तदा रणे ॥ ३ ॥
वानराणां च शूरास्तु ते सर्वे प्लवगर्षभाः । अयुध्यन्त शिलाहस्ताः समवेताः समन्ततः ॥ ४ ॥
तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम् । राक्षसाः कपिमुख्येषु पातयांचक्रिरे तदा ॥ ५ ॥
वानराश्चैव रक्षःसु गिरिवृक्षान्महाशिलाः । प्रवीराः पातयामासुर्मत्तवारणसंनिभाः ॥ ६ ॥
शूराणां युध्यमानानां समरेष्वनिवर्तिनाम् । तद्राक्षसगणानां च सुयुद्धं समवर्तत ॥ ७ ॥
अन्यशिरसः केचिच्छिन्नैः पादैश्च बाहुभिः । शस्त्रैरर्दितैर्देहास्तु रुधिरेण समुक्षिताः ॥ ८ ॥
हरयो राक्षसाश्चैव शेरते गां समाश्रिताः । कङ्कगृध्रबलोलूकाश्च गोमायुकुलसंकुलाः ॥ ९ ॥
कबन्धानि समुत्पेतुर्भीरूणां भीषणानि वै । भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले ॥ १० ॥

१-३] ति० टी०-स्वबलस्य चेति ॥ १ ॥ ३ ॥

रा० टी०-प्रभग्नेत्यादिना दृष्टान्तमाह—स्वबलस्येत्यादिभिः। बलस्य बलेन अतिपराक्रमदर्शनेन स्वबलस्य घातेन च हेतुनाऽधमाविष्टो वज्रदंष्ट्रः धनुर्विस्फार्य वानराणामनीकानि शरवृष्टिभिः प्राकिरत् श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

रा० टी०-राक्षसा इति । रथैः समवस्थिताः मुख्या राक्षसा अपि प्रायुध्यन्त ॥ ३ ॥

गो० टी०-अथ वज्रदंष्ट्रवधश्चतुःपञ्चाशे—बलस्य चेत्याद्येश्लोकद्वयमेकान्वयम् ॥ १-३ ॥

४] ति० टी०-वानराणामिति निर्धारणे षष्ठी ॥ ४ ॥

रा० टी०-वानराणामिति । वानराणां मध्ये ये शूराः प्रतिज्ञौर्यविशिष्टास्तेऽपि प्लवगर्षभाः अयुध्यन्त ॥ ४ ॥

गो० टी०-वानराणामिति । निर्धारणे षष्ठी ॥ ४ ॥

५-६] ति० टी०-तत्र वीरक्षयकारणे तस्मिन्प्रसिद्धे आयोधने युद्धे ॥ ५ ॥ ६ ॥

रा० टी०-तत्रेति । तत्र तस्मिन् समये राक्षसाः कपिमुख्येषु आयुधसहस्राणि पातयांचक्रिरे ॥ ५ ॥

रा० टी०-वानरा इति । प्रवीरा वानरा रक्षस्सु महावृक्षान् महाशिलाश्च पातयामासुः ॥ ६ ॥

गो० टी०-तत्रेति । तत्र कपिमुख्येष्वित्यन्वयः । आयोधने युद्धे ॥ ५ ॥ ६ ॥

७] ति० टी०-तद्राक्षसगणानाम् तच्छब्देन वानराः वानरराक्षसगणानामित्यर्थः ॥ ७ ॥

रा० टी०-शूराणामिति । राक्षसगणानां चकारेण वानराणां च सुयुद्धं समवर्तत ॥ ७ ॥

गो० टी०-शूराणामिति । तद्राक्षसगणानां चेति । ते च राक्षसगणाश्च तद्राक्षसगणाः तेषाम् तच्छब्देन वानरा उच्यन्ते । युद्ध्यमानानां सुयुद्धं समवर्ततेत्यनेन उत्तरोत्तरयुद्धाधिक्यमुच्यते ॥ ७ ॥

८] ति० टी०-छिन्नैः पादैर्बाहुभिरुपलक्षिताः ॥ ८ ॥

रा० टी०-प्रभग्नेति । छिन्नैः पादैर्बाहुभिश्चोपलक्षिताः केचित्प्रभग्नशिरसः शस्त्रैरर्दिता देहाः कबन्धा येषां ते सन्तः रुधिरेण समुक्षिताः बभूवुरिति शेषः ॥ ८ ॥

गो० टी०-प्रभिन्नेति । पादैश्च बाहुभिरित्युपलक्षणे तृतीया । अर्पितदेहाः आरोपितदेहाः । गां भूमिम् । कङ्कः अवटः स च श्येनविशेषः गृध्रः दूरदर्शी बलः श्येनविशेषः काकश्च तैराख्याः व्याप्ताः ॥ ८ ॥ ९ ॥

९-१०] ति० टी०-बला वायसाः कङ्कादिभिराख्याः । व्याप्ता इत्यर्थः ॥ ९ ॥ १० ॥

रा० टी०-हरय इति । शरवेगं समाश्रिताः हरयो राक्षसाश्च कंकादिभिराख्याः पूर्णाः गोमायुकुलसंकुलाश्च बभूवुरिति शेषः तत्र बलाः काकाः ॥ ९ ॥

रा० टी०-कबन्धानीति । भीरूणां भीषणानि भयंकराणि कबन्धानि शिरोरहितदेहाः समुत्पेतुः अर्द्धं पृथक् तदेव भङ्ग्यन्तरेणाह—भुजेति । भुजादिभिः छिन्नाः भेदितशरीरावयवा इत्यर्थः छिन्नानि विदीर्णानि गात्राणि कबन्धानि तथा ते वानरा राक्षसाश्च भूतले निपेतुः ॥ १० ॥

गो० टी०-कबन्धानीत्यत्र ॥ १० ॥

गो० टी०-पुनः कबन्धोत्पत्तिमाह—भुजेति । भुजपाणिशिरस्त्वं छिन्नाः शिरपाणाः छिन्नकायाश्च ॥ १० ॥

१ बलस्य च तीति गो. पाठः । २ जवेनेति गो. पाठः । ३ धनुर्विस्फार्येति गो. पाठः । ४ रक्षोभिरिति गो. पाठः । ५ शु द्धा के पुरे ते इति गो. पाठः । ६ आ इति गो. पाठः । ७ गिरीन्वृक्षानिति गो. महावृक्षानिति रा. पाठः । ८ प्रभिन्नेति पू. गो. पाठः । ९ निर्भरेति गो. पाठः । १० [illegible] इति गो. पाठः । ११ बलेनेत्या इति गो. पाठः । १२ गणेति गो. पाठः ।

वानरा राक्षसाश्चापि निपेतुस्तत्र भूतले । ततो वानरसैन्येन हन्यमानं निशाचरम् ॥ ११ ॥
प्राभज्यत बलं सर्वं वज्रदंष्ट्रस्य पश्यतः । राक्षसान्भयविस्तान्हन्यमानान्प्लवंगमैः ॥ १२ ॥
दृष्ट्वा स रोषताम्राक्षो वज्रदंष्ट्रः प्रतापवान् । प्रविवेश धनुष्पाणिस्त्रासयन्हरिवाहिनीम् ॥ १३ ॥
शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः । विभेद वानरांस्तत्र समाप्तौ नव पञ्च च ॥ १४ ॥
विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान् ॥

त्रस्ताः सर्वे हरिगणाः शरैः संकृत्तदेहिनः । अङ्गदं संपधावन्ति प्रजापतिमिव प्रजाः ॥ १५ ॥
ततो हरिगणान्भग्नान्दृष्ट्वा वालिसुतस्तदा । क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत ॥ १६ ॥
वज्रदंष्ट्रोऽङ्गदश्चोभौ योद्धुकामौ परस्परम् । चक्रतुः परमक्रुद्धौ हरिमत्तगजाविव ॥ १७ ॥
ततः शतसहस्रेण हरिपुत्रं महाबलम् । जघान मर्मदेशेषु शरैरग्निशिखोपमैः ॥ १८ ॥
रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः । चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः ॥ १९ ॥
दृष्ट्वा पतन्तं तं वृक्षमसंभ्रान्तश्च राक्षसः । चिच्छेद बहुधा सोऽपि सचिवैः प्रेषितः शरैः ॥ २० ॥
तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं सुमहात्मनः । पुनः विपुलं शैलं क्षिप्तवान च ननाद च ॥ २१ ॥
तमापतन्तं दृष्ट्वा स रथादाप्लुत्य वीर्यवान् । महाजिरसंक्रान्तः पृथिव्यां समतिष्ठत ॥ २२ ॥
अङ्गदेन शिला क्षिप्ता गत्वा तु रणभूमिम् । सचक्रध्वजं सार्धं प्रमथ्य रथं तदा ॥ २३ ॥
ततोऽन्यच्छिखरं गृह्य विपुलं द्रुमभूषितम् । वज्रदंष्ट्रस्य शिरसि पातयामास वीर्यवान् ॥ २४ ॥
अभवच्छोणितोद्गारी वज्रदंष्ट्रः सुमूर्छितः । मुहूर्तमथसञ्ज्ञो गदामादित्य निःश्वसन् ॥ २५ ॥
स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम् । जघान वामकक्षो दक्षोदेशे निशाचरः ॥ २६ ॥
गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमकुर्वताम् । अन्योन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ ॥ २७ ॥
रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ । बभूवतुः सुविक्रान्तावङ्गारकलधाविव ॥ २८ ॥

११] ति० टी०–निशाचरम् निशाचरसेनायाः ॥ ११ ॥
रा० टी०–तत इति । वानरसैन्येन हन्यमानं निशाचरं निशाचरसंबन्धिबलं प्राभज्यत व्यदीर्यत ॥ ११ ॥
गो० टी०–तत इति । निशाचरं निशाचरसंबन्धि । ‘ज्ञ-’ ध्येभाव आर्षः । यद्वा निशायां चरतीति योगमात्रविवक्षः ॥ १२–१३ ति० टी०–प्राभज्यत भग्नमभूत ॥ १२ ॥ १३ ॥
रा० टी०–राक्षसानिति । वज्रदंष्ट्रः प्रतङ्कैर्हन्यमानान् अत एव भयविस्तान् राक्षसान् दृष्ट्वा हरिवाहिनीं वानरसैन्यं प्रविवेश शरैर्विदारयामास च श्लोकद्वयमेकान्वयि ॥ १२–१३ ॥
गो० टी०–राक्षसानित्यादि । भगविस्तान् भयेन त्रस्तान् ॥ १३ ॥ १४ ॥

१४] ति० टी०–सप्ताष्टौ नव पञ्च च । वानरानेकैकेन शरेण विभेदेत्यर्थः ॥ १४ ॥
रा० टी०–तत्प्रकारमाह–विभेदेति । तत्र एकैकबाणप्रहारेण सप्तानां यूथपतीनां एकोनविंशतिसंख्याकान्वानरान् विभेद अर्धं अर्धम् ॥ १४ ॥
गो० टी०–विभेदेति । सप्ताष्टौ नव पञ्च चेति एकैकप्रयोगेणेति शेषः ॥ १४ ॥ १५ ॥ १६ ॥
रा० टी०–संपधावन्ति । परमक्रुद्धो वज्रदंष्ट्रः विव्याधेत्यादिना शेषेण सप्त पञ्च शरसंधानेन विद्धवतां हरिगणानां प्रजानां प्रजापतिमिव अङ्गदं अभ्यधावन्ति स्मेत्येकश्लोकेन एकान्वयी ॥ १५ ॥
१५] ति० टी०–संपधावन्ति स्म ॥ १५ ॥
१६] ति० टी०–क्रोधेनोदीक्षन्तं क्रोधेनोदैक्षत ॥ १६ ॥
रा० टी०–तत इति । वालिसुतः हरिगणान् भग्नान् दृष्ट्वा क्रोधेन उदीक्षन्तं वज्रदंष्ट्रं क्रोधेन जैक्षत ॥ १६ ॥
गो० टी०–तत इति । उदीक्षन्तम् उदीक्षमाणम् ॥ १६ ॥
१७] ति० टी०–योद्धुकामौ । पुनः पुनर्युद्धमकुर्वतामित्यर्थः हरिमत्तगजाविव हरिरिति शार्दूलः सिंहेन मत्तगजस्य युद्धात् संभवात् स्वतोऽपि सिंहसंज्ञेन राज्ञां मरणादिति कनकः ॥ १७ ॥
रा० टी०–वज्रदंष्ट्र इति । वज्रदंष्ट्रोऽङ्गदश्च परस्परं योद्धुकामौ अतिशयेन युद्धमकुर्वतामत एव हरिमत्तगजाविव चक्रतुः अत्र हरिपदेन शार्दूलः सिंहेन सह गजयुद्धाभ्यासम्भवात् स्वतोऽपि सिंहसंज्ञनमात्रेण गजमरणप्रसिद्धेः अभूतोपमा वा ॥ १७ ॥
गो०–टी० वज्रदंष्ट्र इति । हरिमत्तगजौ सिंहमत्तगजौ ॥ १८–२८]
१८–२८] ति० टी०–हरिपुत्रं वालिपुत्रम् ॥ १८ ॥ २८ ॥

१ मुख्यानिति रा., पाठः । २ वचनं हरिराक्षसाविति गो. पाठः । ३ सैन्यमिति गो. पाठः । ४ मातङ्गमिव गोमर्तमिति गो. पाठः । ५ सिंहसंज्ञेति गो. पाठः । ६ भवेत इति गो. पाठः । ७ सचिवैरिति गो. पाठः । ८ तं दृष्ट्वेति गो. पाठः । ९ शार्दूलेन गर्जेति गो. पाठः । १० अत्र गिरिमल्लिकेति [illegible] पाठः । ११ वीक्षन्त इति गो. पाठः । १२ इ इति गो. पाठः ।

ततः परमतेजस्वी अङ्गदः प्लवगर्षभः । इत्याज्ञाय वृक्षं स्थितवानासीत्पुष्पफलैर्युतः ॥ २९ ॥
अग्राह चार्षभं चर्म खड्गं च विपुलं शुभम् । किङ्किणीजालसंछन्नं चर्मणा च परिष्कृतम् ॥ ३० ॥
विचित्रांश्च सुविचरान्मार्गांश्चेरतुः कपिराक्षसौ । जग्मतुश्च तदान्योन्यं नर्दन्तौ जयकाङ्क्षिणौ ॥ ३१ ॥
व्रणैः सुसुप्तैः शोभेतां पुष्पिताविव किंशुकौ । युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ॥ ३२ ॥
निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः । उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः ॥ ३३ ॥

रा० टी०—तत इति । हरियूथसहस्रं शतसहस्रेण शरैः समर्दयत् जघान । अत इति शेषः ॥ १८ ॥

गो० टी०—हरियूथेति । हरिणोक्षितानि सटाङ्गानि यस्य तं वालिसुतः अङ्गदोऽपि दृष्ट्वा विषेदे ॥ १९ ॥

रा० टी०—दृष्ट्वेति । राक्षसः आपतन्तं वृक्षं दृष्ट्वा बहुधा विकृष्टेऽस्त्र एव स्व [illegible] मतिर्मतो भिन्नः सन् भुवि प्रापतत् ॥ २० ॥

रा० टी०—तमिति । प्लवगर्षभोऽङ्गदः वज्रदंष्ट्रस्य विक्रमं दृष्ट्वा दैवं [illegible] निश्चेष्ट एवास्त ॥ २१ ॥

गो० टी०—तमिति । आपतन्तं तं वृक्षं स राक्षसो दृष्ट्वा स्वादात्मनः पुनर्जन्म समतिष्ठत ॥ २२ ॥

गो० टी०—तमिति । सः वज्रदंष्ट्रसंज्ञो गदां आदिश्य जग्राह ॥ २३ ॥

रा० टी०—अङ्गदेनेति । अङ्गदेन शिला शिलां रणमूर्धनि गत्वा रणं प्रमथ्य ॥ २३ ॥

रा० टी०—तत इति । ततः अन्यच्छिखरं गृहीत्वा वज्रदंष्ट्रस्य शिरसि पातयामास ॥ २४ ॥

गो० टी०—स इति । सः अङ्गदशिलाशैलः ॥ २३ ॥ २५ ॥

रा० टी०—अभवदिति । शोणितोद्गारी सन् वज्रदंष्ट्रः सुमुहूर्तोऽभवत् अत एव गदामादिदृक्षुः निश्वसन् सन् मुहूर्तं मुहो विकलरहितोऽभवत् ॥ २५ ॥

गो० टी०—शोणितेति । शोणितोद्गारी रक्तोद्गारी । गदाम् अन्याम् । वज्रः अधात पश्चात्कृतो वज्रोवेशे निशाचर इत्यन्वयात् । पाठान्तरे गदां शिलां गत्वा तु रणमूर्धनीत्यर्थः गोत्रजः ॥ २६ ॥

रा० टी०—स इति । तच्छब्दलक्ष्यः निशाचरः गदया वालिसुतं वज्रदंष्ट्रोऽङ्गदं जघान ॥ २६ ॥

रा० टी०—गदामिति । ततोऽनन्तरं गदां त्यक्त्वा मुष्टियुद्धमकुर्वतां अकुरुताम् अत एव अन्योन्यं जघ्नतुः ॥ २७ ॥

रा० टी०—रुधिरेति । पहारैरिति । जनितश्रमौ रुधिरोद्गारिणौ तौ अङ्गारकबुधाविव सुविक्रान्तौ शोभनपादविक्षेपकौ बभूवतुः ॥ २८ ॥

गो० टी०—स इत्यादि । अवर्तत अभवत्तयोः ॥ २८ ॥ २९ ॥

२९] ति० टी०—पुष्पफलैर्हस्तगतदृष्टीयैर्लतैर्युतः आसीत् २९ ।

रा० टी०—तत इति । परमतेजस्वी अङ्गदः वृक्षमुत्पाट्य स्थितवान् अत एव पुष्पफलैर्युतः आसीत् ॥ २९ ॥

गो० टी०—ततः परमतेजस्वीत्यादिश्लोकद्वयमेकान्वयम् ॥ वृक्षोत्पाटनार्षचर्मखड्गग्रहणादिकमङ्गदस्योच्यमानमितरस्याप्युपलक्षणम् । विचित्रांश्चेरतुर्मार्गानिति वक्ष्यमाणयुद्धस्य उभयोरविशेषेण वर्णनात् । अङ्गदेन वृक्षे गृहीते राक्षसोपि वृक्षं जग्राह । अङ्गदे खड्गादौ गृहीते राक्षसोपि खड्गादिकं जग्राहेति भावः । आर्षभं चर्म ऋषभचर्मनिर्मितं फलकम् । चर्मणा खड्गकोशेन ॥ ३० ॥ ३१ ॥

३०–३१] ति० टी०—आर्षभं चर्म ऋषभचर्मनिर्मितं फलकम् चर्मणा च परिष्कृतम् कोशरूपेणेत्यर्थः जग्राह वज्रदंष्ट्राङ्गदश्चेति शेषः ॥ ३० ॥ ३१ ॥

रा० टी०—जग्राहेति । आर्षभं ऋषभचर्मनिर्मितं किङ्किणीजालसंवृतं चर्मणा कोशेन परिष्कृतं त्यक्तं खड्गं च जग्राह राक्षस इति शेषः ॥ ३० ॥

रा० टी०—विचित्रानिति । जयकाङ्क्षिणौ अत एव नर्दन्तौ कपिराक्षसौ विचित्रान् मार्गान् चेरतुः अत एव अन्योन्यं जघ्नतुः ॥ ३१ ॥

गो० टी०—विचित्रानिति । मार्गान् पूर्वोक्तमण्डलादिमार्गान् । विदेयं जघ्नतुरित्यन्वयः ॥ ३२ ॥

३२–३३] ति० टी०—व्रणैः सुसुप्तैः सुस्थितैरुत्थितैरित्यर्थः ॥ ३२ ॥ ३३ ॥

रा० टी०—व्रणैरिति । युध्यमानौ परिश्रान्तौ अत एव जानुभ्यामवनीं गतौ कपिराक्षसौ सुप्तैः परस्परायातेन जनितैः व्रणैः पुष्पितौ किंशुकाविव शोभेताम् ॥ ३२ ॥

गो० टी०—व्रणैरिति । सुप्तैः सरुधिरैः । अस्रमसृगिति शोणितं इत्यमरः । अवनीं गतौ अक्षतामिति शेषः ॥ ३३ ॥

रा० टी०—निमेषेति । अङ्गदो निमेषान्तरमात्रेण दण्डाहत इव उरग इव उदतिष्ठत ॥ ३३ ॥

गो० टी०—निमेषेति । निमेषान्तरमात्रेण निमेषावकाशमात्रेण ॥ ३३ ॥

---

१ कपिकुञ्जरः इति गो. पाठः । २ बहुपुष्पफलान्वितमिति गो. पाठः । ३ विचित्रांश्चेरतुर्मार्गान् शोभेते इति गो. [illegible] पाठः । ४ नित्यमिति गो. पाठः । ५ साधारण इति गो. पाठः ।

निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः । जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः ॥ ३४ ॥
रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा । तच्च तस्य परीताक्षं शुभं खड्गहतं शिरः ॥ ३५ ॥
वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः । त्रस्ता द्वीप्यद्रवल्लंङ्कां वध्यमानाः प्लवंगमैः ॥
विषण्णवदना दीना क्रिया किंचिदवाङ्मुखाः ॥ ॥ ३६ ॥
निहत्य तं वैश्रवरः प्रतापवान्स वालिसूनुः कपिसैन्यमध्ये ।
जगाम हर्षं सहितो महाबलः सहस्रनेत्रस्त्रिदशैरिवावृतः ॥ ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ।

वज्रदंष्ट्रे हते व्याकुलकोशो रावणस्याज्ञया सत्वरमागतस्य महता राक्षससैन्यानुगतस्यापि [illegible] स्वरक्षसः क्रौर्यं च विस्तरेणाह तृतीयः ।

वज्रदंष्ट्रं हतं श्रुत्वा वालिपुत्रेण रावणः । बलाध्यक्षमुवाचेदं कृताञ्जलिमुपस्थितम् ॥ १ ॥
शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः । अकम्पनं पुरस्कृत्य सर्वशस्त्रास्त्रकोविदम् ॥ २ ॥
एष शास्ता च गोप्ता च नेता चयुधि सत्तमः । भूतिकामश्च मे नित्यं नित्यं च समरप्रियः ॥ ३ ॥
एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम् । वानरांश्चापरान्वीरान्हनिष्यति न संशयः ॥ ४ ॥
परिगृह्य स तामाज्ञां रावणस्य महाबलः । बलं संप्रेरयामास तदा लघुपराक्रमः ॥ ५ ॥
ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः । निष्पेतू राक्षसा गुरुया बलाध्यक्षप्रचोदिताः ॥ ६ ॥

३४-३६] ति० टी०-खड्गेनाच्छिन्न गृहीतेन चन्द्रदंष्ट्रायेण ॥ ३४ ॥ ३६ ॥

रा० टी०-निर्मलेनेति । सुधौतेन क्षाणोल्लिखितेन अत एव निर्मलेन खड्गेन वज्रदंष्ट्रस्य महच्छिरो वालिसूनुर्जघान॥३४॥

रा० टी०-रुधिरेति । रुधिरोक्षितगात्रस्य तस्य राक्षसस्य खड्गहतमत एव परीते पराङ्मुखे अक्षिणी यस्मिन् तत् शिरः पतितं सत् द्विधा बभूव ॥ ३५ ॥

गो० टी०-निर्मलेनेति । सुधौतेन क्षाणोल्लिखितेन अत एव निर्मलेन। अस्य वज्रदंष्ट्रस्येत्यन्वयः। केचित्तु त जघानार्धमर्धमिति पठित्वा सः वज्रदंष्ट्रः खड्गं जघाह अङ्गदो वज्रं जघाहेति व्याख्याय, खड्गेनास्य महच्छिर इत्यत्र वज्रे प्रतिहतेऽङ्गदोपि चर्मासी जघाहेति अनेनावगम्यत इत्यपि वर्णयन्ति॥३५॥३६॥

३७] ति० टी०-महितः पूजितः ॥ ३७ ॥

तृतीयार्था वज्रदंष्ट्रवधः ॥

इति श्रीमोतिन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

रा० टी०-निहत्येति । [illegible] प्रतापवान् अतिबलः तं वज्रदंष्ट्रं निहत्य त्रिदशराट्सहस्रनेत्रः इव कपिसैन्यमध्ये महितः प्रशंसितस्सन् हर्षं जगाम ॥ ३७ ॥

इति श्रीमद्गोविन्दराजविरचिते रामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

गो० टी०-वज्रदंष्ट्रमित्यादि । विषण्णवदनाः म्लानमुखाः ॥ ३६ ॥ ३८ ॥

तृतीयार्था वज्रदंष्ट्रवधः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

१-२] ति० टी०-बलाध्यक्षं प्रहस्तम् ॥ १ ॥ २ ॥

रा० टी०-वज्रदंष्ट्रवधानंतरकालिकं रावणस्य चिन्तामाह-वज्रेत्यादिभिः । रावणः वालिपुत्रेण वज्रदंष्ट्रे हते श्रुत्वा [illegible] बलाध्यक्षमुवाच ह ॥ १ ॥

रा० टी०-तदाकारमाह-शीघ्रमिति । सर्वशस्त्रास्त्रकोविदं बलकर्म्मनं तन्नामधेयराक्षसं पुरस्कृत्य राक्षसाः शीघ्रं निर्यान्तु॥२॥

गो० टी०-अथाकम्पनवृत्तं प्रस्तुतमाह-वज्रदंष्ट्रमित्यादि । बलाध्यक्षं प्रहस्तम ॥ १ ॥ २ ॥

३-६] ति० टी०-शास्ता शत्रूणाम्, गोप्ता स्वबलस्य, नेता नायको युद्धस्य ॥ ३ ॥ ६ ॥

---

१ [illegible] २ अत्यन्तमिति गो. पाठः । ३ वज्रदंष्ट्रप्रभाव इति गो. पाठः । ४ अनेति गो. पाठः । ५ अनि गो. पाठः । ६ [illegible] ७ [illegible] ८ [illegible]

रथमास्थाय विपुलं तप्तकाञ्चनभूषणम् । प्रयातो मेघवर्णश्च मेघस्वननदास्वनः ॥ ७ ॥
राक्षसैः संवृतो घोरैस्तदा निर्यात्यकम्पनः । नहि कम्पयितुं शक्यः सुरैरपि महामृधे ॥ ८ ॥
अकम्पनस्ततस्तेषामादित्य इव तेजसा । तस्य निर्यायमानस्य संरब्धस्य युयुत्सया ॥ ९ ॥
अकस्मादैन्यमागच्छद्धयानां रथवाहिनाम् । शिरोरुहाश्च गात्रेषु सद्यः शुद्धाभिनन्दिनः ॥ १० ॥
विवर्णो मुखवर्णश्च गद्गदश्चाभवत्स्वनः । तमस्यत्युदिते काले दुर्दिनं रूक्षमारुतम् ॥ ११ ॥
ऊचुः खगमृगाः सर्वे वाचः क्रूरा भयावहाः । सिंहोपचितस्कन्धः शार्दूलसमविक्रमः ॥ १२ ॥
तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम् । तथा निर्गच्छतस्तस्य राक्षसः सह राक्षसैः ॥ १३ ॥
बभूव सुमहान्नादः क्षोभयन्निव सागरम् । तेन शब्देन वित्रस्ता वानराणां महाचमूः ॥ १४ ॥
द्रुमशैलप्रहाराणां योद्धुं सैन्यपतिर्युताम् । तेषां युद्धं महारौद्रं संजज्ञे कैपिरक्षसाम् ॥ १५ ॥

रा० टी०–प्रोत्साहनार्थमकम्पनस्य गुणानाह–एष इति । एषः अकम्पनः शास्ता रिपूणां निग्रहकर्ता गोप्ता स्वबलरक्षकश्च अत एव शत्रोः नेता अग्रणीर्भवितुं शीलमस्यास्तीति शेषः ॥ ३ ॥

रा० टी०–एष इति । एषः वानरान् हनिष्यति अत एव काकुत्स्थौ छत्रीवं च जेष्यति ॥ ४ ॥

गो० टी०–एष इति । शास्ता परसैन्यनिग्राहकः गोप्ता स्वबलरक्षकः नेता नायकः सेनापतिरित्यर्थः । संमतः प्रसिद्धः ॥ ३ ॥ ४ ॥

रा० टी०–परीति । बलाध्यक्षः प्रहस्त इत्यर्थः रावणाज्ञां परिगृह्य बलं संप्रेरयामास ॥ ५ ॥

गो० टी०–परिगृह्येति । बलचोदनेन स्वचोदनमर्थसिद्धं मत्वेत्यर्थः ॥ ५ ॥

रा० टी०–तत इति । बलाध्यक्षप्रचोदिताः मुख्याः राक्षसाः अकम्पनप्रभृतयो निर्ययुः ॥ ६ ॥

गो० टी०–तत इति । निर्ययुः पुराद्बिर्ययुः ॥ ६ ॥

७] ति० टी०–मेघाभो मेघसमानदेहप्रमाणः मेघवर्णस्तद्वत्नीलवर्णः मेघस्य स्वन इव महान्स्वनो यस्य स तथा ॥ ७ ॥

रा० टी०–तत्प्रकारमाह–रथमिति । मेघाभो मेघाकारशरीरो मेघवर्णस्तद्वन्नीलो मेघस्य स्वन इव महास्वनो यस्य सोऽकम्पनः रथमास्थाय निर्याति सार्द्धश्लोकैकान्वयी ॥ ७ ॥

गो० टी०–रथमित्यादि । मेघाभः मेघवत् स्थूलः मेघस्वनमहास्वनः समभ्युपमानपूर्वपदस्येत्यादिना उत्तरपदलोपस्य वैकल्पिकत्वे प्रथमस्वनपदश्रवणम् ॥ ७ ॥

८] ति० टी०–निर्याति याति स्म ॥ ८ ॥

रा० टी०–नहीति । संरब्धोऽपि कम्पयितुं न शक्यः ततः तस्मात्हेतोः अकम्पनः तेजसा आदित्य इव तेषां वानराणां दुष्प्रेक्षो बभूवेति शेषः ॥ ८ ॥

गो० टी०–प्रसङ्गादाह––न हीति । हि यस्मात् महामृधे महायुद्धेऽपि कम्पयितुं न शक्यते अतो हेतोरकम्पनः अकम्पन शब्दवाच्यः । तेषां रक्षसाम् मध्ये तेजसा आदित्य इव स्थित इत्यर्थः ॥ ८ ॥ ९ ॥

९] ति० टी०–तेषां वानराणां तेजसादित्य इव दुष्प्रेक्षोऽभूदिति शेषः ॥ ९ ॥

रा० टी०–पराभवलक्षणान्याह––तस्येत्यादिभिः । युयुत्सया संरब्धस्य कोपाविष्टस्य अत एव युयुत्सया निर्यायमानस्य तस्याकम्पनस्य हयानामकस्मात् दृष्टकारणाभावात् दैन्यं ग्लानिरगच्छत् ॥ ९ ॥

१०] ति० टी०–रथवाहनकर्तृणां हयानामकस्मान्निर्हेतुकमेव दैन्यमागच्छत् मम इति शेषः ॥ १० ॥

रा० टी०–व्यस्फुरन्निति । शुद्धाभिनन्दिनोऽस्याकम्पनस्य सव्यं नयनं व्यस्फुरत् कृष्णवर्णो विवर्णो विपरीतवर्णः स्वनो गद्गदश्चाभवत् ॥ १० ॥

गो० टी०–व्यस्फुरदित्यादि । विवर्णः विपरीतवर्णः दुर्दिनं मेघच्छन्नदिनम् । मेघच्छन्नेऽह्नि दुर्दिनमित्यमरः ॥ १० ॥ ११ ॥

११–१२] ति० टी०–दुर्दिने वर्षादिकृतदुर्दिनप्रसक्तिरहिते ॥ ११ ॥ १२ ॥

रा० टी०–अभवदिति । दुर्दिने शोभनदिनहेतौ दुर्दिनायोग्ये इत्यर्थः काले रूक्षः मारुतो यस्मिन् तदुर्दिनं मेघनिर्घातादि अभवत् क्रूराः खगमृगाः भयावहा वाच ऊचुः ॥ ११ ॥

रा० टी०–स इति । सिंहवत् उपचितौ वृत्तौ स्कन्धौ यस्य सोऽकम्पनः तानुत्पातान् अचिन्त्यैव रणाजिरं निर्जगाम ॥ १२ ॥

गो० टी०–स इति । सिंहोपचितस्कन्धः सिंहस्येवोन्नतस्कन्धवान् ॥ १२–१५ ॥

१३–१५] ति० टी०–अचिन्त्येत्यार्षम् ॥ १३ ॥ १५ ॥

रा० टी०–तथेति । राक्षसैस्तत् निर्गच्छतो रक्षसः यस्याकम्पनस्य सुमहानादः सागरं क्षोभयन्निव बभूव ॥ १३ ॥

रा० टी०–तेनेति । तेन शब्देन द्रुमशैलप्रहाराणां वानराणां महाचमूः वित्रस्ता ॥ १४ ॥

रा० टी०–तेषामिति । रक्षोवानरयोः समरिष्यमाणाः समर्पिताः ये देहाः तद्वतां [illegible] तेषां ते ॥ १५ ॥

गो० टी०–तेषामिति । समरिष्यमाणानां मृतिमतां शरीराणामित्यर्थः ॥ १५ ॥

---

१ कुण्डक इति गो. पाठः । २ भीमैरिति गो. पाठः । ३ °व्यस्फुरदिति गो. रा. पाठः । ४ अत्र ९ तमः [illegible] इति गो. पाठः । ५ °शब्दश्रवणेति गो. पाठः । ७ इतीति गो. पाठः ।

रामरावणयोरर्थे समभित्यक्तदेहिनः । सर्वे द्युतिबलाः शूराः सर्वे पर्वतसंनिभाः ॥ १६ ॥
हरयो राक्षसाश्चैव परस्परजिघांसया । तेषां विनर्दतां शब्दः संयुगेऽतितरस्विनाम् ॥ १७ ॥
शुश्रावे सुमहान्कोपादन्योन्यमभिगर्जताम् । रजश्चारुणवर्णाभं सुभीममभवद्भृशम् ॥ १८ ॥
उद्धूतं हरिरक्षोभिः संरुरोध दिशो दश । अन्योन्यं रजसा तेन कौशेयोद्धूतपाण्डुना ॥ १९ ॥
संवृतानि च भूतानि ददृशुर्न रणाजिरे । न ध्वजो न पताका वा चर्म वा तुरगोऽपि वा ॥ २० ॥
आयुधं स्यन्दनो वापि दृश्यते तेन रेणुना । शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम् ॥ २१ ॥
श्रूयते तुमुलो युद्धे न रूपाणि चकाशिरे । रजसेव समंसृष्टा हरयो जघ्नुराहवे ॥ २२ ॥
राक्षसा राक्षसांश्चापि निजघ्नुस्तिमिरे तदा । ते परांश्च विनिघ्नन्तः स्वांश्च वानरराक्षसाः ॥ २३ ॥
रुधिरार्द्रा तदा चक्रुर्महीं पङ्कानुलेपनाम् । तत्र रुधिरौघेण सिक्तं क्षिप्तं रजः ॥ २४ ॥
शरीरशवसंकीर्णा बभूव च वसुंधरा । प्रासशक्तिगदोपासैः शिलापरिघतोमरैः ॥ २५ ॥
राक्षसा हरयस्तूर्णं जघ्नुरन्योन्यमोजसा । बाहुभिः परिघाकारैरुद्यन्तः पर्वतोपमान् ॥ २६ ॥
हरयो भीमकर्माणो राक्षसाञ्छ्रुराहवे । राक्षसास्तैर्विसंक्रुद्धाः प्रासतोमरपाणयः ॥ २७ ॥
कपीन्निजघ्निरे तत्र शस्त्रैः परमदारुणैः । अकम्पनः सुसंक्रुद्धो राक्षसानां चमूपतिः ॥ २८ ॥

१६-१७] ति० टी०—समभित्यक्ता देहिनः प्राणान्तो यैस्ते आत्मरक्षानिरपेक्षा इति यावत् ॥ १६ ॥ १७ ॥

रा० टी०—सर्वे इति । हरयो राक्षसाश्च परस्परं निजघ्नुः सर्वे बभूवुरिति शेषः ॥ १६ ॥

गो० टी०—सर्वे इति । परस्परजिघांसया अन्योन्यवधेच्छया ॥ १६

रा० टी०—तेषामिति । कोपात् अन्योन्यमभिगर्जतां सुग्रीवार्थमाह्वयतामत एव विनर्दतां तेषां युद्धादन्यः शब्दः श्रुतपूर्वः ॥ १७

गो० टी०—तेषामिति । विनर्दतां सिंहनादं कुर्वताम् अभिगर्जताम् अभिमुखमेव गर्जनं कुर्वताम् ॥ १७ ॥

१८] ति० टी०—अरुणवर्णाभं अरुणवर्णः प्रभूतः आभा यस्मिंस्तत् । अरुणाभं, मूलपर्यायोऽपि ॥ १८ ॥

रा० टी०—रज इति । हरिरक्षोभिः उद्धूतत्वात् अरुणवर्णा आभा दीप्तिर्यस्य तत् सभीषणमतिशयभूतं भृशं रजोऽभवत् अत एव दिशः संरुरोध ॥ १८ ॥

गो० टी०—रजश्चेति । अरुणवर्णेन रक्तिमा आभातीव्यरुणवर्णाभम ॥ १८ ॥

१९] ति० टी०—कौशेयोद्धतपाण्डुनोद्धतकौशेयवत्पीतपाण्डुरवर्णेन ॥ १९ ॥

रा० टी०—अन्योन्यमिति । कौशेयोद्धतवत् बद्धकौशेयवत्पाण्डुना ईषद्धरणवर्णेनेत्यर्थः अन्योन्यजया संवृतानि भूतानि वानरादयः रणाजिरे न ददृशुः ॥ १९ ॥

गो० टी०—अन्योन्यमिति । कौशेयोद्धतपाण्डुना उद्धृतकौशेयपाण्डुना आहितान्यादित्वात् पत्वनिषातः । रजसो रक्तत्वपाण्डुत्वे भूभेदादिति ज्ञेयम् । संवृतानि व्याप्तानि भूतानि वस्तूनि न ददृशुः वानरा राक्षसाश्चेति शेषः ॥ १९ ॥

२०] ति० टी०—भूतानि कपिरक्षोरूपाणीत्यर्थः ॥ २० ॥

रा० टी०—नेति । रेणुना धूलिरूपभूतिर्न दृश्यते ॥ २० ॥

गो० टी०—उक्तं विवृणोति—न ध्वजा इति । वर्मादिरपि वस्त्वन्तरमेवेति शेषः ॥ २० ॥

२१] ति० टी०—आयुधादि न दृश्यते इत्यन्वयः ॥ २१ ॥

रा० टी०—शब्द इति । तदा तेषां तुमुलश्शब्दः श्रूयते स्म परं तु न चकाशिरे ॥ २१ ॥

गो० टी०—परन्तु परादेरादिजन्यं अजातान्तरमाह—शब्दश्चेति । रूपाणि पदार्थजातानि ॥ २१ ॥

२२-२४] ति० टी०—शब्द एव श्रूयते न च रूपाणि चकाशिरे इत्यनेनाः सुतरां सम्यक्त्वमुक्तं ॥ २२ ॥ २४ ॥

रा० टी०—हरीनिति । तदा तस्मिन् तिमिरे हरयो हरीन्सर्वे जघ्नुः राक्षसा राक्षसानपि जघ्नुः ॥ २२ ॥

गो० टी०—अदर्शनकालमाह—हरीनिति ॥ २२ ॥

रा० टी०—ते इति । परान् स्वांश्च विनिघ्नन्तो वानरराक्षसाः महीं रुधिरार्द्रामत एव पङ्कानुलेपनां चक्रुः ॥ २३ ॥

गो० टी०—एवमिति । एवं रक्षोवानरांश्च जघ्नुश्चेत्यनेन पङ्किलार्थमिदमर्थः । पङ्कानुलेपनां पङ्कलिप्ताम् । कर्णि त्वट् २३

रा० टी०—तत्र इति । रुधिरौघेण सिक्तं तत् रजोपमर्दं वसुन्धरा तु शरीरशवेन शवरूपकबंधेन संकीर्णा बभूव ॥ २४ ॥

गो० टी०—तत्र इति । शरीरशवसंकीर्णां शवभूतशरीरसंकीर्णा ॥ २४ ॥

२५-२८] ति० टी०—शरीरशवसंकीर्णां शवरूपैः शरीरैः संकीर्णां ॥ २५ ॥ २८ ॥

---

१ जीवितानीति गो० देहिनमिति रा० पाठः । २ जिघांसय इति गो० रा० पाठः । ३ शुश्रुव इति गो० रा० पाठः । ४ कोपादिति गो० पाठः । ५ उद्धतमिति गो० पाठः । ६ उद्धतेति गो० पाठः । ७ ध्वजा इति गो० पाठः । ८ स्वर्नामिति गो० पाठः । ९ तुमुल इति गो० पाठः । १० कृत्वा इति गो० पाठः । ११ परांश्चैव विनिघ्नन्त इति गो० पाठ । १२ व्याप्तमिति गो० पाठः । १३ क्षिप्तेति गो० पाठः । १४ गर्दति गो० पाठः । १५ हरयो राक्षसा इति गो० पाठः । १६ व्याप्तमिति गो० पाठः । १७ व्याप्तेति गो० पाठः ।

संहर्षयति तान्सर्वान्राक्षसान्भीमविक्रमान् । हरयस्त्वपि संक्रुद्धा महाद्रुममहाश्मभिः ॥ २९ ॥
विदारयन्त्यभिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः । एतस्मिन्नन्तरे वीरा हरयः कुमुदो बलः ॥ ३० ॥
चक्रुश्च परमक्रुद्धश्चक्रवेगमनुत्तमम् । ते तु दृष्ट्वैमहावीरा राक्षसानां चमूमुखे ॥ ३१ ॥
कर्तारं सुमहत्कर्म हरिपुंगवाः । मन्यन्ते राक्षसान्सर्वे नानाप्रहरणैर्भृशम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकिय आदिकाव्ये युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ।

हनुमत्कृतोऽक्षसैन्यस्य वधः ।

तद्दृष्ट्वा सुमहत्कर्म कृतं वानरसत्तमैः । क्रोधमाहारयामास युधि तीव्रमकम्पनः ॥ १ ॥
क्रोधमूर्च्छितरूपस्तु वृत्तवत्परमकार्मुकम् । दृष्ट्वा तु कर्म शत्रूणां सारथिं वाक्यमब्रवीत् ॥ २ ॥
तत्रैव गच्छ संक्षिप्तो रथं प्रापय सारथे । एते च बलिनो घ्नन्ति सुबहून्राक्षसान्रणे ॥ ३ ॥
एते वै वानरन्तो यौ भीमक्रोधौ च वानराः । द्रुमशैलप्रहरणास्तिष्ठन्ति प्रमुखे मम ॥ ४ ॥

रा० टी०-द्रुमेति । राक्षसाः हरयश्च द्रुमादिभिरन्योन्यं जघ्नुः ॥ २८ ॥

गो० टी०-द्रुमेति । द्रुमशैला वानरीयाः । शकलयादयो राक्षसीयाः ॥ २८ ॥

रा० टी०-बाहुभिरिति । परिघाकारैः बाहुभिर्युध्यन्तो वानराः पर्वताग्रहस्तान् राक्षसान् जघ्नुः ॥ २६ ॥

गो० टी०-बाहुभिरिति । बाहुभिः परिघाकारैरित्यर्थो-ऽर्थात्. हरयो भीमक्रमणो राक्षसान् जघ्नुराहव इति ॥२६॥

रा० टी०-राक्षसा इति । प्रासतोमरपाणयो राक्षसाः वीरा निजघ्निरे ॥ २७ ॥

गो०टी०-राक्षसास्त्वगीति। शब्दैः उक्तप्रासादिभिः॥२७॥

रा० टी०-अकम्पन इति । अकम्पनो राक्षसान् संहर्षयति प्रकर्षणोत्साहयति ॥ २८ ॥

गो० टी०-अकम्पन इति । संहर्षयति उत्साहयति॥२८॥

२९] ति० टी०-संहर्षयति समहर्षयत् ॥ २९ ॥

रा० टी०-हरय इति । हरयः वीर्यतः पराक्रमातिशयाद् शस्त्राणि राक्षसायुधानि आच्छिद्य महाद्रुममहाश्मभिः रक्षांसि अभिक्रम्य विदारयन्ति ॥ २९ ॥

गो० टी०-हरयश्चेति । अभिक्रम्य अभिमुखीभूय । आच्छिद्य अपहृत्य ॥ २९ ॥

३०-३१] ति० टी०-शस्त्राण्याच्छिद्य वानराः परहस्तादिति शेषः ॥ ३० ॥ ३१ ॥

३२] ति० टी०-नानाप्रहरणैर्भृशमित्यत्र सर्गावच्छेदः प्रयोजकेति बलम् ॥ ३२ ॥

इति श्रीमत्परिमले श्रीमत्पाये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नन्तरे समये कुमुदो बलो हरयः बलं वेगं चक्रुः ॥ ३० ॥

रा० टी०-ते इति । ते महावीराः हरिपुङ्गवाः राक्षसानां चमूमुखे सेनाग्रभागे दृष्ट्वैनानाप्रहरणैश्च राक्षसान् समन्युः अत एव महत् कर्तारं हिंसां चक्रुः सार्द्धश्लोक एकान्वयी ॥३१॥३२॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

गो० टी०-एतस्मिन्निति । स्पष्टः ॥ ३० ॥

गो० टी०-ते त्वित्यादिसार्धश्लोकः ॥ लीलया अनायासेन ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

१-३] ति० टी०-तदिति ॥ १ ॥ ३ ॥

रा० टी०-सैन्यपराभवानंतरकालिकमकम्पनहृत्तान्तमाह-तदित्यादिभिः । अकम्पनः वानरसत्तमैः कृतं द्रुमदलकर्म दृष्ट्वा तीव्रं कोपमाहारयामास दधार ॥ १ ॥

रा० टी०-क्रोधेति । शत्रूणां कर्म दृष्ट्वा क्रोधमूर्छितरूपो ऽकम्पनः सारथिमब्रवीत् ॥ २ ॥

रा० टी०-तदाकारमाह---तत्रेति । एते वानराः यान् राक्षसान् घ्नन्ति तत्रैव रथं प्रापय ॥ ३ ॥

गो०टी०-अथाकम्पनवधः षट्पञ्चाशे-तदृष्ट्वेत्यादि १-३

४] ति० टी०-एते चेत्यत्र वर्तेत्यादिः बलवन्तौ वानरौ वैशब्दस्यार्थे ॥ ४ ॥

१ [ ] नास्ति गो. पाठः । २ वेगं इति गो. पाठः । ३ यूथपा इति गो. पाठः । ४ वानरा राक्षस इति गो. पाठः । ५ वर्तेत इति गो. पाठः । ६ अनेन गो. सं. पाठः । ७ इति गो. वी इति रा. पाठः । ८ काम्यत्रेति गो. पाठः ।

एतानिहन्तुमिच्छामि समरश्लाघिनो वयम् । एतैः प्रमथितं सर्वं रक्षसां दृश्यते बलम् ॥ ५
ततः प्रचलितोवेगेन रथेन रथिनां वरः । हरीनभ्यपतद्बाणजालैरकम्पनः ॥ ६
न स्थातुं वानराः शेकुः किं पुनर्योद्धुमाहवे । अकम्पनशरैर्भग्ना सर्व एवाभिदुद्रुवुः ॥ ७
तान्मृत्युवशमापन्नानकम्पनशरानुगान् । समीक्ष्य हनुमान्भ्रातीनुपतस्थे महाबलः ॥ ८
तं महाप्लवगं दृष्ट्वा सर्वे ते प्लवगर्षभाः । समेत्य समरे वीराः संहिताः पर्यवारयन् ॥ ९
ऊर्ध्वस्थितं हनूमन्तं ते दृष्ट्वा प्लवगर्षभाः । बभूवुर्बलवन्तो हि बलवन्तमुपाश्रिताः ॥ १०
अकम्पनस्तु शैलाग्रं हनूमन्तमवस्थितम् । महेन्द्र इव धाराभिः शरैरभिववर्ष ह ॥ ११
अचिन्तयित्वा बाणौघाञ्शरीरे पातितान्कपिः । अकम्पनवधार्थाय मनो दध्रे महाबलः ॥ १२
स प्रहस्य महातेजा हनूमान्मारुतात्मजः । अभिदुद्राव तद्रक्षः कम्पयन्निव मेदिनीम् ॥ १३
तस्यैव नर्दमानस्य दीप्यमानस्य तेजसा । बभूव रूपं दुर्धर्षं दीप्तस्येव विभावसोः ॥ १४
आत्मानं नैर्व्यपहरणं ज्ञात्वा क्रोधसमन्वितः । शैलमुत्पाटयामास वेगेन हरिपुंगवः ॥ १५
गृहीत्वा सुमहाशैलं पाणिनैकेन मारुतिः । स विनद्य महानादं भ्रामयामास वीर्यवान् ॥ १६
ततोनमभिदुद्राव राक्षसेन्द्रमवस्थितम् । पुरा हि नमुचिं संख्ये वज्रेणेव पुरंदरः ॥ १७

५–७] ति० टी०–एतानिहन्तुमिच्छामि प्रथमतः स्वसैन्यानाश्वासार्थमेव ततः परञ्चैते हनिष्यामीति शेषः तदेव दर्शयति–एतैरिति ॥ ५ ॥ ७ ॥

रा० टी०–एते इति । दूरमेवप्रहरणाः ये एते वानराः मम सम्मुखं तिष्ठन्ति तैरेतैः रक्षसां बलं प्रमथितं तान् एतान् निहन्तुमिच्छामि श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–एत इति । प्रमुखे अग्रे ॥ ४ ॥ ५ ॥

रा० टी०–तत इति । अकम्पनः शरजालैरुपलक्षितस्तान् हरीनभ्यपतत् ॥ ६ ॥

रा० टी०–नेति । अकम्पनशरैर्भग्नाः वानराः स्थातुं न शेकुः किं पुनर्योद्धुमत एव अभिदुद्रुवुः ॥ ७ ॥

गो० टी०–तत इति । प्रजवनत्वेन वेगवदत्वेन ॥६॥ ७ ॥

८] ति० टी०–भ्रातीन्कुमुदनलादीनुपतस्थे । स्वस्थानादिति शेषः ॥ ८ ॥

रा० टी०–तानिति । अकम्पनशराः भटगाः शेषामत एव मरणवशमापन्नान् भ्रातीन् समीक्ष्य हनुमानुपतस्थे ॥ ८ ॥

गो० टी०–तानिति । उपतस्थे अकम्पनसमीपमागम ॥ ८–११ ॥

९] ति० टी०–ते प्लवगर्षभाः कुमुदादयः ॥ ९ ॥

रा० टी०–तमिति । ते हनूमन्तं दृष्ट्वा सहिताः सैकमत्यं प्राप्ताः सर्वे प्लवगर्षभाः समेत्य प्राप्य पर्यवारयन् ॥ ९ ॥

१०–१४] ति० टी०–ते बलवन्तो बभूवुः, यतो बलवन्तमुपाश्रिताः ॥ १० ॥ १४ ॥

रा० टी०–ऊर्ध्वस्थितमिति । बलवन्तं हनूमन्तमुपाश्रिताः प्लवगर्षभाः बलवन्तो बभूवुः ॥ १० ॥

रा० टी०–अकम्पन इति । अकम्पनः अवस्थितं शैलहस्तं हनूमन्तं भ्रातृभिर्महेन्द्र इव शरैरभिववर्ष ॥ ११ ॥

रा० टी०–अचिन्तयित्वेति । कपिः शरीरे पतितान् बाणौघान् अचिन्तयित्वा अपरिगणय्य अकम्पनवधार्थाय । दध्रे ॥ १२ ॥

रा० टी०–स इति । हनुमान् प्रहस्य तद्रक्षोऽभिदुद्राव॥१

गो० टी०–अचिन्तयित्वेति । अकम्पनवधार्थाय अकम्पनवधरूपप्रयोजनाय ॥ १२ ॥ १३ ॥

रा० टी०–तस्येति । तेजसा दीप्यमानस्य तस्य हनूमतः रूपं दीप्तस्य विभावसोरिव दुर्धर्षं बभूव ॥ १४ ॥

गो० टी०–तस्येति । तस्य हनुमतः ॥ १४ ॥

१५–१६] ति० टी०–अपहरणमायुधमहीनम् ॥१५॥१

रा० टी०–आत्मानमिति । क्रोधसमन्वितो हरिपुंगवः आत्मानमप्रहरणमायुधरहितं ज्ञात्वा शैलमुत्पाटयामास ॥१

गो० टी०–आत्मानमिति । अप्रहरणम् अनायुधम् ॥१

रा० टी०–गृहीत्वेति । स हनुमान् एकेन पाणिना म शैलं गृहीत्वा महानादं विनद्य भ्रामयामास ॥ १६ ॥

गो० टी०–तमिति । महानादं विनद्य महाकृतेत्यर्थः ॥ १६ ॥

१७] ति० टी०–पुरा हीति प्रसिद्धौ ॥ १७ ॥

रा० टी०–तत इति । प्लवङ्गमो वज्रेण नमुचिमिव अकम्पनमभिदुद्राव हनुमानिति शेषः ॥ १७ ॥

---

१ दूरमेव राक्षसमिति गो. पाठः । २ अभिनेति गो. पाठः । ३ अन्यद्धनुमत्कोपादिति गो. पाठः । ४ दीप्तेति गो. पाठः । ५ वज्रगतामिति गो. पाठः । ६ प्लवगवृषभा इति गो. पाठः । ७ संहृष्टा इति गो. पाठः । ८ नर्दमेति गो. पाठः । ९ हरीपुंगवप इति गो. पाठः । १० समिति गो. पाठः । ११ [illegible] ११ अस्मेति गो. पाठः । १३ भ्रामेति गो. पाठः । १४ तु रक्षितो गो. पाठः । १५ तं गृहीत्वा महाशैलमिति गो. पा

अकम्पनस्तु तद्दृष्ट्वा गिरिशृङ्गं समुद्यतम् । दूरादेव महाबाणैरर्धचन्द्रैरदारयत् ॥ १८ ॥
तै पर्वताग्रमाकाशे रक्षोबाणविदारितम् । विकीर्णं पतितं दृष्ट्वा हनूमान्क्रोधमूर्च्छितः ॥ १९ ॥
सोऽश्वकर्णं समासाद्य रोषदर्पान्वितो हरिः । तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितम् ॥ २० ॥
तं गृहीत्वा महाकर्णं सोऽश्वकर्णं महाद्युतिः । प्रगृह्य परया प्रीत्या भ्रामयामास भूतले ॥ २१ ॥
प्रयाजस्तुरुदेवेन पर्वस्य तरसा द्रुमान् । हनूमान्प्रबलक्रुद्धश्चरणैर्दारयन्महीम् ॥ २२ ॥
गजांश्च रथसंघाढ्यान्सरथान्रथिनस्तथा । जघान हनुमान्भीमान्राक्षसांश्च पदातिगान् ॥ २३ ॥
तमन्तकमिवं क्रुद्धं सैन्यं प्राणहारिणम् । हनूमन्तमभिप्रेक्ष्य राक्षसाः विप्रदुद्रुवुः ॥ २४ ॥
तमापतन्तं संप्रेक्ष्य राक्षसानां भयावहम् । ददर्शाकम्पनो वीरश्चुक्षोभ च ननाद च ॥ २५ ॥
स भल्लैरभिवर्षद्भिर्निशितैर्देहदारणैः । निर्विभेद महावीर्यं हनूमन्तमकम्पनः ॥ २६ ॥
स तेषां विषयीकृत्य नाराचैः शितशक्तिभिः । हनूमान्दृढमे वीरः प्ररूढ इव सानुमान् ॥ २७ ॥
विरराज महावीर्यो महाकायो महाबलः । पुष्पिताशोकसंकाशो विधूम इव पावकः ॥ २८ ॥
ततोऽन्यं तुङ्गमुत्पाट्य कृत्वा वेगमनुत्तमम् । शिरस्यभिजघानाशु राक्षसेन्द्रमकम्पनम् ॥ २९ ॥
स तेनाशु हतस्तेन सक्रोधेन महात्मना । राक्षसो वानरेन्द्रेण पपात च ममार च ॥ ३० ॥
तं दृष्ट्वा निहतं भूमौ राक्षसेन्द्रमकम्पनम् । व्यथिता राक्षसाः सर्वे क्षितिकम्प इव द्रुमाः ॥ ३१ ॥
त्यक्तप्रहरणाः सर्वे राक्षसास्ते पराजिताः । लङ्कामभिययुस्त्रस्ता वानरैस्तैरभिद्रुताः ॥ ३२ ॥

गो० टी०—तत इति । तत्र सः शैलेनेत्यध्याहार्यम् । स हनूमान् भक्षकर्णो दूरादेव समुद्यतं यथा तथा शैलेन तत्रैगे-दिदारयत् ॥ १८ ॥ १९ ॥

१८] नि० टी०—तदृष्ट्वा हनूमन्तमुक्तं शैलशृङ्गम् ॥ १८ ॥

१९० टी०—तदर्शन इति । अकम्पनस्तत हनूमता प्रक्षिप्तं शिलाशृङ्गं दूरादेव दृष्ट्वा बाणैरदारयत् ॥ १८ ॥

१९—२२] नि० टी०—तम् तदित्यर्थः क्रोधमूर्च्छितः सन्निति शेषः ॥ १९ ॥ २० ॥

रा० टी०—तदेति । आकाशे तत्र रक्षोबाणविदारितमत एव विकीर्णं तत्र पतितं पर्वताग्रं दृष्ट्वा क्रोधमूर्च्छि-तोऽतिशयेन ॥ १९ ॥

रा० टी०—स इति । स हनूमान् महागिरिमिवोच्छ्रितम्-मुत्पाटयन् अश्वकर्णं समासाद्य उत्पाटयामास ॥ २० ॥

रा० टी०—तमिति । स हनूमान् भक्षकर्णं गृहीत्वा प्रक्ष्य भ्रामयामास ॥ २१ ॥

गो० टी०—तमिति । तोयधिरिति शेषः १९-२१ ।

२२—२६] नि० टी०—प्रयाजेत्यरण्याभ्याम् ॥ २२ ॥ २६ ॥

रा० टी०—प्रयाजेति । उत्तरेण पथागत् अत एव तं प्रयाजस्तुरुदेवेन हनूमान् दूरत्व अवत ॥ २२ ॥

गो० टी०—प्रयाजेति । चरणैः चरणन्यासैः दारयत् दारयन् ॥ २२ ॥

रा० टी०—गजानिति । हनूमान् गजादीन् पदातिगान्

पदातित्वेन गच्छन्ति तांश्च जघान किंच अतिमान् भीमान्-भक्षकर्तृन् गजादीन पदा एकचरणेन जघान ॥ २३ ॥

रा० टी०—तमिति । अन्तकमिव प्राणहारिणं सदृशं हनुमन्तमभिप्रेक्ष्य राक्षसाः विप्रदुद्रुवुः ॥ २४ ॥

रा० टी०—तमिति । राक्षसानां भयावहमापतन्तं हनुमन्त-मकम्पनो ददर्श चुक्षोभ च ननाद च ॥ २५ ॥

रा० टी०—स इति । सोऽकम्पनो देहदारणैर्देहदारणशीलैः तुरंगभिर्बाणैर्हनुमन्तं निर्विभेद ॥ २६ ॥

गो० टी०—गजानिति । पदातित्वेन गच्छन्तीति पदा-तिगाः तान् ॥ २३—२६ ॥

२७—३०] नि० टी०—प्रहरः शस्त्रमात्रेण बहुप्रहरणोद्यत-शरीरस्त्यक्तबहुधो गिरिरिव जरैरुक्त इत्यर्थः॥२७॥३०॥

रा० टी०—स इति । नाराचैः शितशक्तिभिश्च विप्रकीर्णो हनू-मान् प्रहरः अनेकतरुभिर्विशिष्टः सानुमान् पर्वत इव ददृशे ॥ २७

रा० टी०—विरराजेति । पुष्पिताशोकसंकाशो हनुमान् विधूमः पावक इव विरराज ॥ २८ ॥

रा० टी०—तत इति । ततोऽनन्तरमन्यं दृढमुत्पाट्य भक्षकर्णं शिरसि अभिजघान ॥ २९ ॥

गो० टी०—स इति । प्ररूढः प्रकृष्टवृक्षः ॥ २७—२९ ॥

गो० टी०—स इति । वानरेन्द्रेण कर्त्रा । तेन हनुमता हत इत्यन्वयः ॥ ३० ॥

३१—३२] नि० टी०—क्षितिकम्पे भूकम्पकाले॥३१॥३२॥

१ त्यक्तप्रहरणा इति गो. पाठः । २ क्षोभेति गो. पाठः । ३ विकीर्णमिति गो. पाठः । ४ प्रहरमिति गो. रा. पाठः । ५ संयुग इति गो. पाठः । ६ तमिति गो. पाठः । ७ तिमिमिति गो. पाठः । ८ क्षोभानिति गो. पाठः । ९ समर इति गो. पाठः । १० तुक्रोधेति गो. पाठः । ११ शितैर्देह-विदारणैरिति गो. पाठः । १२ हनुमन्तं महाबलमिति गो. पाठः । १३ स तदा प्रति विद्धस्तु बलवद्भिः शरवृष्टिभिरिति गो. पाठः । १४ महाकायो महा-बलो महामना इति गो. पाठः । १५ प्रस्था इति गो. पाठः ।

ते मुक्तकेशाः संभ्रान्ता भग्नमानाः पराजिताः । भयाच्छ्रमजलैरङ्गैः प्रस्रवद्भिर्विदुद्रुवुः ॥ ३३ ॥
अन्योन्यं ते प्रमथ्नन्तो विविशुर्नगरं भयात् । पृष्ठतस्ते तु संमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ ३४ ॥
तेषु लङ्कां प्रविष्टेषु राक्षसेषु महाबलाः । समेत्य हरयः सर्वे हनूमन्तमपूजयन् ॥ ३५ ॥
सोऽपि मेघद्रुस्तान्सर्वान्हरीन्संप्रत्यपूजयत् । हनूमान्सत्त्वसंपन्नो यथार्हमनुकूलतः ॥ ३६ ॥
निनेदुश्च यथाप्राणं हरयो जितकाशिनः । चक्रुश्च पुनरत्यर्थं प्राणानेव राक्षसान् ॥ ३७ ॥
स वीरशोभामभजन्महाकपिः समेत्य रक्षांसि निहत्य मारुतिः ।
महासुरं भीममभिघ्नतां शनं विष्णुर्यथैवोरुबलं चमूमुखे ॥ ॥ ३८ ॥
अपूजयन्देवगणास्तदा कपिं स्वयं च रामोतिबलश्च लक्ष्मणः ।
तथैव सुग्रीवमुखाः प्लवंगमा विभीषणश्चैव महाबलस्तदा ॥ ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ।

अकम्पनवधश्रवणकुपितः पौलस्त्यो मन्त्रिणः संमन्त्र्य सेनापतिं प्रहस्तं बहुसैन्येन संयुज्य संग्रामाय गन्तुं समादिशति ।

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः । किंचिदीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ १ ॥

रा० टी०—व्यथिता इति । क्षितिकम्पे सर्वे द्रुमा इव सर्वे राक्षसाः व्यथिताः अत एव राक्षसैः पराजिता बभूवुरिति शेषः ॥ ३० ॥

रा० टी०—लङ्कामिति । वानरैः पराजिताः अत एव श्रमितुताः अत एव मुक्तकेशाः अत एव भग्नमानाः राक्षसाः लङ्कामभिययुः ॥ ३१ ॥

गो० टी०—तमिति । क्षितिकम्पे भूकम्पे ॥ ३१–३२ ॥

३३] ति० टी०—श्रमजलैः स्वेदजलैः ॥ ३३ ॥

रा० टी०—स्रवदिति । स्रवन्ति श्रमजलानि येषु तैरङ्गैरुपलक्षिताः सन्तो राक्षसाः विप्रदुद्रुवुः भयात् पदुद्रुवुरुत्रस्ताः प्रेक्षमाणाः अन्योन्यं प्रमथ्नन्तश्च ते नगरं विविशुश्च सार्धश्लोकः स्वकाव्यः ॥ ३३ ॥

३४–३५] ति० टी०—भयादन्योन्यं प्रमथ्नन्तो द्रुन्दशूकमिदं कुर्वाणाः ॥ ३४ ॥ ३५ ॥

रा० टी०—तेष्विति । राक्षसेषु लङ्कां प्रविष्टेषु सत्सु हरय समेत्य हनूमन्तमपूजयन् सत्यसन्धः स हनूमानपि प्रहृष्टान् हरीन् यथार्हं संप्रत्यपूजयत् अर्थैकतृण्यमेकान्वयि ॥ ३३ ॥ ३४ ॥

३६] ति० टी०—सोऽपि यथार्हमनुकूलतोऽनुकूलवचनालिङ्गनैः संप्रत्यपूजयत् ॥ ३६ ॥

गो० टी०—सोपीति । प्रत्यपूजयत् भवत्साहाय्येनैव या जितमित्येवमिति भावः ॥ ३६–३९ ॥

चतुर्पञ्चाशत्सर्गः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

३७] ति० टी०—यथाप्राणं यावद्बलं सप्राणानेव चक्रुः प्राणनाशार्थमिति शेषः ३७ ॥

रा० टी०—निनेदुरिति । जितकाशिनः विजितरिपुपक्षाशाः हरयः यथा प्राणं यावद्बलं निनेदुः स प्राणान् जिवतो राक्षसान् चक्रुश्च ॥ ३८ ॥

३८] ति० टी०—यथा विष्णुरुबलं बलवन्तं महान्तं मधुकैटभादिसैन्यं हत्वा वीरशोभामभजत्तथेत्यर्थः ॥ ३८ ॥

रा० टी०—स इति । मारुतिः रक्षांसि समेत्य हत्वा च वीरशोभामभजत् तत्र दृष्टान्तः उरुबलं महाहरं मधुकैटभप्रमुखं निहत्य अभिघ्नतां विष्णुर्यथा ॥ ३८ ॥

३९] ति० टी०—रामादयोऽपि यथार्हमपूजयन्नित्यर्थः ॥ ३९ ॥

सप्तपञ्चाशत्तम्यां सप्तपञ्चाशः ॥

इति श्रीमन्महामहोपाध्यायगोविन्दराजविरचितायां रामायणभूषणाख्यायां वाल्मीकीयआदिकाव्ये युद्धकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०—हनूमानिति । तदा देवगणादयः कपिमपूजयन् तदैव रामप्रभृतयश्चापूजयन् ॥ ३९ ॥

इति श्रीमद्वाल्मीकिरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

१] ति० टी०—अथ प्रहस्तनिगम:—अकम्पनवधमिति ॥ १ ॥

रा० टी०—अकम्पनवधानन्तरकालिकं रावणदुःखान्तमाह—अकम्पनेत्यादिभिः । अकम्पनवधं श्रुत्वा किंचिदीनमुखः युद्धे च राक्षसेश्वरः सचिवानुदैक्षत ॥ १ ॥

---

१ लक्ष्मीति गो. पाठः । २ प्रमथन्तश्च इति गो. पाठः । ३ प्रमथन्तश्च इति गो. पाठः । ४ स्थिति गो. पाठः । ५ प्रहृष्ट इति [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ लक्ष्मीति गो. पाठः । १० [illegible]

स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिः संविचार्य च । ततस्तु रावणः पूर्वदिवसे राक्षसाधिपः ॥
पुरीं परियथौ लङ्कां सर्वान्गुल्मानवेक्षितुम् । ॥ १ ॥
तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम् । ददर्श नगरीं राजा पताकाध्वजमालिनीम् ॥ २ ॥
रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः । उत्पातैस्सहितं काले प्रहस्तं युद्धकोविदम् ॥ ४ ॥
पुरस्योपनिविष्टस्य सहसा पीडितस्य ह । नान्यं युद्धात्यपश्यामि मोक्षं युद्धविशारदाः ॥ ५ ॥
अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम । इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ ६ ॥
सर्वं बलमतः शीघ्रमादाय परिगृह्य च । विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ ७ ॥
निर्याणादेव तूर्णं च चलिता हरिवाहिनी । नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति ॥ ८ ॥
चपला ह्यविनाताश्च चलचित्ताश्च वानराः । न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः ॥ ९ ॥
विद्रुते च बले तस्मिन्रामः सौमित्रिणा सह । अवशस्तु निरालम्बः प्रहस्तवशमेष्यति ॥ १० ॥
आपत्सञ्जनिता श्रेयो नात्र निःसंशयीकृता । प्रतिलोमानुलोमैर्वा यत्तु नो मन्यसे हितम् ॥ ११ ॥
रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः । राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना ॥ १२ ॥

गो० टी०—अथ पुरीं प्रहस्तनिर्याणं समर्थयते—स कल्पनवचनमित्यादि ॥ १ ॥

२—३] ति० टी०—पूर्वदिवसे पूर्वाह्णे सर्वान्गुल्मान्सेनाव्यूहान्ददर्शेत्यन्वयः ॥ २ ॥ ३ ॥

रा० टी०—स इति । पूर्वदिवसे एव मुहूर्तं ध्यात्वा मनसा चिन्तयित्वा मन्त्रिभिस्संविचार्य च राक्षसस्तवान् गुल्मान् अवेक्षितुं द्रष्टुं पुरीं परियथौ परिक्रमां जगाम सार्द्धश्लोक एकान्वयी ॥ २ ॥

रा० टी०—तामिति । बहुभिर्गुल्मैरावृतां तां रुद्धां राजा ददर्श ॥ ३ ॥

गो० टी०—स चित्यादिसार्धश्लोक एकान्वयः । ततः स राक्षसः पुरीं परियथौ । पूर्वेद्युरिते द्वितीयस्य पूर्वभागे पूर्वाह्ण इत्यर्थः । गुल्मान् सेनाव्यूहान् ॥ २ ॥ ३ ॥

रा० टी०—रुद्धामिति । रावणो नगरीं रुद्धां दृष्ट्वा काले प्रापत्कालेपि ह्यात्महिते प्रहस्तमुवाच ॥ ४ ॥

गो० टी०—रुद्धामिति । काले विदेहाहरणसमये ॥ ४ ॥

५-६] ति० टी०—पुरस्योपनिविष्टस्य अतिसमीपनिविष्टस्य शत्रुबलस्येत्यर्थः अतएव सहसा बलात्कारेण पीडितस्य अन्यत्पुरः अन्यत्कर्तृ कमुद्धारकं तोमोक्षमुपायमोक्षं न पश्यामि ॥ ५ ॥ ६ ॥

रा० टी०—तदेवाह—पुरस्येत्यादिभिः । उपनिविष्टस्य सैन्यैः परिवृतस्य अत एव पीडितस्य पुरस्थं लङ्कायां मोक्षं मोक्षोपायं युद्धमन्यं न पश्यामि ॥ ५ ॥

गो० टी०—पुरस्येति । उप समीपे निविष्टं परसैन्यानिवेशो यस्य तस्य शत्रुबलस्येत्यर्थः । अत एव सहसेत्यर्थे । पीडितस्य च मोक्षं मोक्षोपायम् ॥ ५ ॥

रा० टी०—अहमिति । दृष्टं मां वानरसेनाकृतपीडाकरभरं भरादय एव वहेयुः ॥ ६ ॥

गो० टी०—अहमिति । वहेयुरिति शकि लिङ् ॥ ६ ॥

७] ति० टी०—अतोऽसमाप्तमाह ॥ ७ ॥

रा० टी०—स इति । बलमादाय स्वयमास्थितस्त्वं यत्र वनौकसः तत्र विजयाय अभिनिर्याहि ॥ ७ ॥

गो० टी०—स इति । शीघ्रमादाय परिगृह्य स्वाधीनं कृत्वा यत्र वनौकसो वर्तन्ते तत्र हतो निर्याहीत्यन्वयः ॥ ७ ॥

८—९] ति० टी०—द्रविष्यति पलायिष्यते ॥ ८ ॥ ९ ॥

रा० टी०—निर्याणादिति । निर्याणाद्भवतां निर्गमादेव चलिता चञ्चलचित्ता हरिवाहिनी राक्षसेन्द्राणां नादं श्रुत्वा द्रविष्यति पलायिष्यते ॥ ८ ॥

रा० टी०—पलायने हेतुमाह—चपला इति । चपलत्वादिविशिष्टा वानराः ते नादं द्विपाः सिंहनादमिव न सहिष्यन्ति ॥ ९ ॥

गो० टी०—निर्याणादिति । चपला धैर्यरहिता ॥ ८ ॥ ९ ॥

१०] ति० टी०—अवशो नष्टं प्रभुत्वरहितः तद्रहितः 'वशमिन्द्रियप्रभुत्वयोः' इति विश्वः अत एव निरालम्बः ॥ १० ॥

रा० टी०—विद्रुत इति । तस्मिन् बले विद्रुते सति अत्रान्तरेपि रामः प्रहस्तवशमेष्यति ॥ १० ॥

गो० टी०—विद्रुत इति । अवशः प्रभुत्वरहितः वशमिन्द्रियप्रभुत्वयोरिति विश्वः । हे प्रहस्त ते तव वशमेष्यतीत्यन्वयः ॥ १० ॥

११-१२] ति० टी०—नन्वयं मद्बीजनेपि संदेहात्कर्मं निरालम्बो वशमेष्यतीत्युच्यते तत्राह—आपदिति । पूर्वं आपत्स्यतिः संदिग्धा संदेहविषया श्रेयो विजयस्तु तव ह संदिग्धो न संदेहविषयः तत्रातिबलत्वान्नरेन्द्रो दक्षिणक्ष त्वाच्च इत्यतिद्वयेन पीडितोऽकर्मण्यो [illegible]

१ लङ्कामिति गो. पाठः । २ अप्रपते इति गो. पाठः । ३ चेति गो. पाठः । ४ [illegible] ५ ते तुल्यमिति गो. पाठः । ७ वपश्येति गो. पाठः । ८ ते इति गो. पाठः । ९ [illegible]

राजन्मन्त्रिपुरोधोभिः कुशलैः सह मन्त्रिभिः । विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम् ॥ १३ ॥
मदानेन तु सीतायाः श्रेयो व्यवसितं मया । अप्रदाने पुनर्युद्धं दृष्टमेव तथैव नः ॥ १४ ॥
सोऽहं दानैश्च मानैश्च सततं पूजितस्त्वया । सान्त्वैश्च विविधैः काले किं न कुर्यां हितं तव ॥ १५ ॥
नहि मे जीवितं रक्ष्यं पुत्रदारधनानि च । त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि ॥ १६ ॥

मृतावुत्तमलोकः अतोऽत्र युद्धे प्रवृत्तिरेव निःसंशयीकृता 'यशायुद्धे ध्रुवो मृत्युर्युद्धे जीवितसंशयः । तमेव काले युद्धस्य प्रशंसन्ति मनीषिणः ॥' इत्यादि ज्ञात्वादिति भावः मम त्वया युद्धमेव हितं प्रतिभाति प्रकारान्तरमस्ति चेद्ब्रूहीत्याह—प्रतिलोमेत्यादि । मनोऽनुकूलं वा भवतु प्रतिकूलं वा यत्तु नो हितं मन्यसे तद्ब्रूहीति शेषः ॥ ११ ॥ १२ ॥

रा० टी०—ननु जयपराजययोः परमात्मायत्तत्वात् कथं यशमेष्यतीत्युच्यते इत्यत आह—आपदिति । यद्यपि आपत् युद्धे मृतिः संशयिता संशयविषयीभूता तथापि श्रेयः स्व विजयो न संशयितं भविष्यत्येवेत्यर्थः । शिष्टविशिष्टयोर्ये साम्राज्यन्त्रयः एतेन प्रहस्तस्यातिबलत्वदृष्टविजयत्वादयो हेत्व सूचिताः अत एव निःसंशयीकृता युद्धप्रवृत्तिरिति शेषः किंत्व आपत् न निःसंशयीकृता कैश्चिदपीति शेषः अतः संशयिता तथापि श्रेयः कल्याणं न संशयितं नित्यं नैमित्तिकत्वादपि तस्य आमुष्मिकफलप्राप्तिरिति कल्याणं निश्चितमेवेत्यर्थः व्यवस्यति निश्चयं तदभिप्रायं विज्ञापयति प्रतिलोमेत्यादिना अनुकूलत्वप्रतिकूल्ये लोमानुकूलं वा यत्तु हितं मन्यसे तद्ब्रूहीति शेषः ॥ १२ ॥

रा० टी०—रावणेनेति । रावणेनैवमुक्तः प्रहस्तः राक्षसेन्द्रं वृषभं भर्तारमित्येवाह ॥ १२ ॥

गो० टी०—ननु युद्धे सत्यात्महानेरपि संभवात्कथमत्रैव श्रेय इत्याशङ्क्य तथात्वे शत्रुकृतया हानेर्निश्चितत्वात् युद्धस्मरणे तस्याः संदेहात् । बलाद्युद्धे ध्रुवो मृत्युरित्यादि जीवितसंशयः । तमेव काले युद्धस्य प्रवदन्ति मनीषिणः, इत्युक्तरीत्या वर्तमाने युद्धमेव श्रेय इत्याह—आपदिति । संशयिता नित्यैकता । आपत् मृतिः श्रेयः । युद्धे मृतिः श्रेयस्करीत्यर्थः । तयापजययोर्व्यवस्थितत्वेन पाक्षिकजयस्यापि संभवादिति भावः । पक्षान्तरं प्रतिक्षिपति—नश्चिति । निःसंशयीकृता नेश्चिता मृतिस्तु युद्धं विना शत्रुभिर्यत्र तु न शेषः यत्तन्मम मतम् । त्वन्मतं तु किमित्याह—प्रतिलोमेति । प्रतिलोमं विपरीतप्रकारम् । अनुलोमं वा नोस्माकं यद्धितं मन्यसे तद्ब्रूहीति शेषः । वेति पक्षान्तरे । अहं तदेव श्रेयो मन्ये त्वमन्यच्च यदि मन्यसे तद्ब्रूहि तदेवास्माकं हितमेवेत्यर्थः ॥ ११ ॥ १२ ॥

१३] ति० टी०—कुशलैर्मन्त्रिभिर्विभीषणमाल्यवदादिभिः सह मन्त्रितं यद्वः परस्परं परस्परस्मात् समवेक्ष्य विवादोऽनेनेत्यं वृत्तम् ॥ १३ ॥

रा० टी०—तत्रप्रकारमाह—राजन्निति । समवेक्ष्य विचार्य मन्त्रिभिर्माल्यवदादिभिस्सह नोऽस्माकं मन्त्रिपूर्वं पुरोमंत्रितं नोऽस्माकं परस्परं विवादश्च वृत्तः प्रवृत्तः एतेन कर्तव्यं सर्वमस्मन्मतिमत्तदानीं न जानेति सूचितम् ॥ १३ ॥

गो० टी०—मन्त्रणमये मया यथा निश्चारिते ततथा प्रवृत्तमित्याह—राजन्निति । कुशलैर्मन्त्रिभिः विभीषणादिभिः सह नः अस्माभिः इदं वक्ष्यमाणं मन्त्रितपूर्वम् । तत्र मन्त्रितमेव कथं विवादो वा तत्राह—विवाद इति । परस्परं समवेक्ष्य बहुमतितया आलोच्य । नः अस्माकं विवादश्चापि वृत्तः । तेन विभीषणो निरुत्तरश्चेति भावः ॥ १३ ॥

१४] ति० टी०—सीतायाप्रदानेनैव श्रेय इति च तदा व्यवसितं निश्चितम् अप्रदाने च युद्धे दृष्टं तत्तथैव न इदानीं प्राप्तम् ॥ १४ ॥

गो० टी०—स्वमतमाह—प्रदानेनेति । सीतायाः प्रदानेनैव श्रेयः सर्वं कल्याणं इति मया व्यवसितं निश्चितम् । प्रदानेन तु युद्धमेव दृष्टं ज्ञातम् ॥ १४ ॥

गो० टी०—मन्त्रितमर्थमाह—प्रदानेनेति । सीतायाः प्रदानेन तु श्रेयः । अप्रदाने तु युद्धमिति च मम व्यवसितमित्यर्थः । सर्वत्रार्षे पुरुषभेदेनोपन्यासे । तथैव व्यवसितं तथैव नः अस्माभिः दृष्टं च ॥ १४ ॥

१५] ति० टी०—अतःपरं तु यत्प्रार्थमस्माभिः युद्धं तत्रैव मयानुद्येयमित्याह—सोऽहमिति । तव प्रियं न कुर्यां किम् अपि तु कुर्यामेव ॥ १५ ॥

रा० टी०—एव इति । त्वया दानादिभिः सततं पूजितोऽहं तव हितं किं न कुर्यां कुर्यामेवेत्यर्थः ॥ १५ ॥

गो० टी०—एवं स्वमतमुक्त्वा संप्रति स्वन्मतानुसारेण युद्धमेव करिष्यामीत्याह—सोऽहमित्यादिना । दानैः भूषणादिप्रदानैः मानैः स्वतन्त्रैर्न जीवितमित्यादिप्रियभाषणैः पूजितः उपलालनादितः । काले आपत्काले । किं न कुर्यां जीवितत्यागादिकमित्यर्थः ॥ १५ ॥

१६] ति० टी०—नहीति । मे जीवितं न रक्ष्यं पुत्रादीनि च रक्ष्याणि अतो युधि जीवितं स्वजीवनं जुहूषन्तं होतुमिच्छन्तं त्वदर्थमित्यर्थः मां पश्य ॥ १६ ॥

गो० टी०—उक्तमेव विशदयति—न हीति । जुहूषन्तं होतुमिच्छन्तम् जुहोतेः सन् प्रत्ययः अनेन जीवितस्य हविष्ट्वं युद्धस्याग्निरूपत्वं च गम्यते । तेन चात्महविः प्रदानस्य महाफलत्वं युद्धप्रवृत्तिमात्रेण स्वजिघांसश्च द्योत्यते । गतायुषां

एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः । उवाचेदं बलाध्यक्षान्प्रहस्तः पुरतः स्थितान् ॥ १७ ॥
अमन्त्रयत मे शीघ्रं राक्षसानां महाबलम् । मद्वाणानां तु वेगेन हतानां तु रणाजिरे ॥ १८ ॥
अद्य तृप्यन्तु मांसादाः पक्षिणः काननौकसः । तस्य तद्वचनं श्रुत्वा बलाध्यक्षा महाबलाः ॥ १९ ॥
बलमुद्योजयामासुस्तस्मिन्राक्षसमन्दिरे । सा बभूव मुहूर्तेन भीमैर्नानाविधायुधैः ॥ २० ॥
लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला । हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम् ॥ २१ ॥
आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ । स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः ॥ २२ ॥
सङ्ग्रामसज्जाः संहृष्टा धारयन्राक्षसास्तदा । सधनुष्काः कवचिनो वेगादुत्सृज्य राक्षसाः ॥ २३ ॥
रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन् । अथामन्त्र्य तु राजानं भेरीमाहत्य भैरवाम् ॥ २४ ॥
आरुरोह रथं युक्तं प्रहस्तः सज्जकल्पितम् । हयैर्महाजवैर्युक्तं सम्यक्सूतं सुसंयतम् ॥ २५ ॥
महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम् । उरगध्वजदुर्धर्षं सुवरूथं स्वेपस्करम् ॥ २६ ॥
सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया । ततस्तं रथमास्थाय रावणार्पितशासनः ॥ २७ ॥

पस्तु प्रहस्तं वक्तुमिच्छन्तमित्यर्थः । जुहोतेर्दानार्थत्वाद्देत्याहुः ॥ १६ ॥ १८ ॥

१७-२२] ति० टी०-बलाध्यक्षान्सर्वबलाध्यक्षेण स्वेन सनियोजनाधिकृतपुरुषानित्यर्थः ॥ १७ ॥ २२ ॥

रा० टी०-एवमिति । प्रहस्तः रावणमेव मुक्त्वा पुरतः स्थितान् बलाध्यक्षान् उवाच ॥ १७ ॥

रा० टी०-तदाकारमाह—समिति । मे राक्षसानां महान्तं समानयत अहं पृथक् ॥ १८ ॥

रा० टी०-मांदिति । मद्बाणानां वेगेन हतानां हतैः तन्मांसित्यर्थः मांसादा गृध्रादयः अद्य तृप्यन्तु ॥ १९ ॥

रा० टी०-तस्येति । तस्य प्रहस्तस्य वचनं श्रुत्वा बलाध्यक्षाः राक्षसमन्दिरे बलमुद्योजयामासुः ॥ २० ॥

रा० टी०-सेति । गजैरिव राक्षसवीरैः लङ्का समाकुला भूत ॥ २१ ॥

गो० टी०-मद्बाणेति । हतानां काननौकसां तृप्यन्त्वित्यन्वयः । " पृषोदरादि० " इत्यादिना समासप्रतिषेधेन सहितयोगे क्रापिता षष्ठी ॥ १९ ॥ २१ ॥

रा० टी०-हुताशनमिति । हुताशनं तर्पयतां ब्राह्मणान् नमस्यतां च सतां आज्यगन्धप्रतिवहः अत एव सुरभिर्मारुतो ववौ ॥ २२ ॥

गो० टी०-हुताशनमिति । हुताशनं तर्पयताम् अग्नौ हुत्वा शान्तिहोमानाचरताम् ब्राह्मणांश्च नमस्यतां गन्धपुष्पादिभिरर्चयताम् सम्बन्धी आज्यगन्धप्रतिवहः ब्राह्मणार्चनसमाप्तिना सुरभिर्मारुतो ववौ ॥ २२ ॥

रा० टी०-स्रज इति । संग्रामाय सज्जाः सन्नद्धाः राक्षसाः अभिमन्त्रिताः स्रजः जगृहुः धारयन् अधारयंश्च ॥ २३ ॥

गो० टी०-स्रज इति । संग्रामसज्जाः संग्रामायोद्युक्ता राक्षसाः अभिमन्त्रिताः विजयमन्त्रेणाभिमन्त्रिताः स्रजः जगृहुः धारयन् अधारयंश्च ॥ २३ ॥

२३-२४] ति० टी०-सङ्ग्रामसज्जाः सङ्ग्रामाय संनद्धाः धारयन्तधारयन् अभिमन्त्रितस्रज इत्यनुकर्षः उत्सृज्य वाहनानीति शेषः ॥ २३ ॥ २४ ॥

रा० टी०-सेति । राक्षसाः रावणं प्रेक्ष्य उत्सृज्य वाहनानि स्थित्वा प्रहस्तं पर्यवारयन् ॥ २४ ॥

गो० टी०-सधनुष्का इति । रावणं प्रेक्ष्य स्वामितया प्रधानं रावणमभिवन्ध्येत्यर्थः ॥ २४ ॥

रा० टी०-अथेति । प्रहस्तः राजानमामन्त्र्य तदाज्ञां गृहीत्वा सज्जकल्पितं सर्वायुधयुक्तं रथमारुरोह ॥ २५ ॥

गो० टी०-अथेत्यादिश्लोकत्रयम् । सज्जकल्पितं सज्जमुद्युक्तम् सर्वायुधादिसमवेतत्वेन कल्पितमित्यर्थः सुसंयतं नियमितम् साक्षाच्चन्द्रार्कभास्वरं चन्द्रार्कतुल्यं भास्वरं च साक्षात् प्रत्यक्षतुल्ययोरित्यमरः आह्लादकत्वेन चन्द्रसाम्यम् तेजसार्कसाम्यम् सुवरूथं शोभनरथगुप्तिकम् रथगुप्तिर्वरूथो नेत्यमरः । स्वपस्करं शोभनरथाङ्गम् । " अवस्करो रथाङ्गम् " इति निपातनात् षत्वागमः । आलं गवाक्षम् प्रहसन्तमिव श्रिया स्वकान्त्या सर्वकान्तिमद्वस्तु परिहसन्तमिव स्थितम्॥२५-२७॥

२५] ति० टी०-सज्जकल्पितं सर्वायुधसमेततया कल्पितम् । सम्यक्सूतो यस्य तम् ॥ २५ ॥

२६-२७] ति० टी०-सुवरूथम् । वरूथो रथगुप्तिः । स्वपस्करं शोभनरथाङ्गम् ॥ २६ ॥ २७ ॥

रा० टी०-रथं वर्णयन्नाह—सुवरूथमिति । हयैर्युक्तं सम्यक् निपुणः सूतो यस्मिन् सुसंयतं शोभनमवस्करं यस्य

---

१ महाजलदेति गो. पाठः । २ महाजलदेति गो. पाठः । ३ काननौकसामिति गो. पाठः । ४ [illegible] गो. पाठः । ५ [illegible] गो. पाठः । ६ स्त्रिमेति गो. पाठः । ७ आज्यरेति गो. पाठः । ८ भेरि गो. पाठः । ९ [illegible] १० स्वपस्करमिति गो. रा. पाठः ।

लङ्कायां निर्ययौ तूर्णं बलेन महता वृतः । ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः ॥
वादित्राणां च निनदः पूरयन्निव मेदिनीम् ॥ ॥ २८ ॥
शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ । निनदन्तः स्वराम्घोरान्राक्षसा जग्मुरग्रतः ॥ २९ ॥
भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः । नरान्तकः कुम्भहनुर्महानादः समुन्नतः ॥
प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तम् ॥ ॥ ३० ॥
व्यूढेनैव सुघोरेण पूर्वद्वारात्स निर्ययौ । गजयूथनिकाशेन बलेन महता वृतः ॥ ३१ ॥
सागरप्रतिमौघेन वृतस्तेन बलेन सः । प्रहस्तो निर्ययौ क्रुद्धः कालान्तकयमोपमः ॥ ३२ ॥
तस्य निर्याणघोषेण राक्षसानां च नर्दताम् । लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः ॥ ३३ ॥
व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः । मण्डलान्यपसव्यानि खगाश्चक्रुः रथं प्रति ॥ ३४ ॥
वमन्ति पावकज्वालाः शिवा घोरा ववाशिरे । अन्तरिक्षान्निपतिता उल्काश्च पपुरुः बभौ ॥ ३५ ॥
अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे । वाश्च खरनिर्घोषा रथस्योपरि रक्षसः ॥ ३६ ॥

इवत् निर्घोषो यस्य चन्द्रार्कविव भास्वरं प्रकाशमानमुरगाराध्वजेन दुर्धर्षं शोभनाः वरूथाः गृहयो यस्मिन् स्वलङ्कारं आभरणसामग्रीविशिष्टं श्रिया ग्रहसन्तमिव रथमास्थाय रावणार्पितशासनः प्रहस्तः लङ्कायाः निर्ययौ श्लोकद्वयैकान्वयः २७-२८

गो० टी०—ततस्तामिति । ततः आरूढ्यानन्तरम् ॥२७॥

२८-३३] ति० टी०—दुन्दुभिनिर्घोष इत्यादेः शुश्रुवे इत्यन्तेनान्वयः ॥ २८ ॥ ३३ ॥

रा० टी०—तत इति । वाहिनीपतौ ततो लङ्कायाः प्रयाते सति मेदिनीं पूरयन्निव पटुः पर्जन्यनिनदोपमः दुन्दुभिनिर्घोषः वादित्राणां तूर्यादीनां निनदश्च शङ्खशब्दश्च शुश्रुवे तादृग्घोषः एकान्वयी ॥ २९ ॥

गो० टी०—तत इत्यादिसार्धश्लोक एकान्वयः पर्जन्यः मेघविशेषः ॥ २९ ॥

रा० टी०—निनदन्त इति । प्रहस्तस्य पुरस्सराः पौरस्त्याः स्वरान् निनदन्तस्सन्तो जग्मुः ॥ ३० ॥

रा० टी०—नरान्तक इति । नरान्तकप्रभृतयः प्रहस्तसचिवाः तं प्रहस्तं परिवार्य निर्ययुः ॥ ३१ ॥

गो० टी०—निनदन्त इति । पुरःसराः अग्रगाः॥३०॥३१॥

रा० टी०—व्यूढेनेति । व्यूढेन व्यूहरचनया रचितेन गजयूथनिकाशः प्रकाशो यस्य तेन बलेन वृतस्स प्रहस्तः पूर्वद्वारान्निर्ययौ ॥ ३२ ॥

गो० टी०—व्यूढेनेति । व्यूढेन सङ्गतकक्षेण । व्यूढः सङ्गतकक्ष इत्यमरशेषे ॥ ३२ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—सागरेति । सागरप्रतिमानां दुरवगाह्यत्वेन सागरसदृशानां राक्षसानां ओघः समूहो यस्मिन् तेन बलेन वृतः अत एव कालान्तकयमोपमः प्रहस्तो नैर्ययौ तत्र कालः महाप्रलयः अन्तको मरणसमयो यमस्संयमीपतिरिति विवेकः ॥ ३३ ॥

गो० टी०—सागरेति । कालान्तकयमोपमः काले प्रलयकाले अन्तको विनाशको यो यमस्तदुपमः ॥ ३३ ॥

रा० टी०—तस्येति । तस्य प्रहस्तस्य निर्याणघोषेण निर्याणकालिकशब्देनेत्यर्थः । राक्षसानां नर्दतां सतां लङ्कायां स्थियमानानि सर्वभूतानि विकृतैः स्वरैर्विनेदुः ॥ ३४ ॥

गो० टी०—तस्येति । तस्य प्रहस्तस्य निर्याणघोषेण निर्गमकालिकसिंहनादेन । राक्षसानां निर्याणघोषेण च हेतुना सर्वभूतानि विकृतैः सर्वोत्पातसूचितानि सन्ति विनेदुरिति सम्बन्धः ॥३३॥

३४-३६] ति० टी०—तस्य दुर्निमित्तान्याह—व्यभ्रमित्यादि । मांसशोणितभोजनाः खगा अपसव्यानि मण्डलान्यपसव्यमार्गे विभ्रान्तियेषु मण्डलेषु वामभागेषु तान्यपसव्यानि प्रदक्षिणानि । गृध्रादीनां प्रदक्षिणमपि दुर्निमित्तमिति कतकः ॥ ३४ ॥ ३६ ॥

रा० टी०—व्यभ्रमिति । मांसशोणितभोजनाः खगा व्यभ्रमभ्ररहितमाकाशमाविश्य रथं प्रति अपसव्यानि मण्डलानि चक्रुः ॥ ३५ ॥

गो० टी०—व्यभ्रमिति । अपसव्यानि अपदक्षिणानि व्यभ्रमित्येव मण्डलकरणस्याकाशिकत्वसूचनम् । सावकाशं हि पक्षिणो मण्डलान्याचरन्ति यद्वत्ता खगाः गृध्राः अपसव्यं प्रदक्षिणम् अपसव्यन्त दक्षिणमित्यमरः गृध्राणां प्रदक्षिणं शोभनम् ॥ ३५ ॥

रा० टी०—वमन्तीति । शिवाः शृगालविशेषाः पावकज्वालाः वमन्ति ववाशिरे स्वजातीयशब्दं चक्रिरे च अन्तरिक्षा दुल्काः पपात च बभूवुः परुषं बभौ च ॥ ३६ ॥

रा० टी०—अन्योन्यमिति अन्योन्यसंरब्धाः कृतयुद्धा ग्रहाः न चकाशिरे खरनिर्घोषाः मेघाः रक्षसः रथस्योपरि

१ तत्र इति गो० पाठः । २ पूर्णमिति गो० पाठः । ३ वमन्ति इति गो० पाठः । ४ शोभनमिति गो० पाठः । ५ पपत इति गो० पाठः ।

वर्वर्षे रुधिरं चास्य सिषिचुश्च पुरःसरान् । केतुमूर्धनि गृध्रस्तु विलीनो दृश्यतेऽद्भुतः ॥ ३७ ॥
नदन्नुभयतः पार्श्वे समग्रां श्रियमाहरत् । सारथेर्बहुशश्चात्र सङ्ग्रामप्रतिवर्तिनः ॥ ३८ ॥
प्रतोदं हयपतदाहरतात्मुतस्य हयसादिनः । निर्याणश्रीश्च या च स्याद्वाहस्वरा च षड्दुलेभा ॥ ३९ ॥
सा ननाश मुहूर्तेन सम्मे च स्खलिता हयाः । महस्तं तं हि निर्यान्तं प्रस्थातृगुणपौरुषम् ॥
युद्धि नानाप्रहरणः कपिसेनाभ्यवर्तत ॥ ॥ ४० ॥
अथ शैलाः शुकुलाभे हरीणां समजायत । दृक्षान्नाहरतां चैव गुर्वीर्वै गृह्णतां शिलाः ॥ ४१ ॥
नर्दतां राक्षसानां च वानराणां च गर्जताम् । उभे प्रमुदिते सैन्ये रक्षोगणवनौकसाम् ॥ ४२ ॥
वेगितानां समन्तान्योन्यवधकाङ्क्षिणाम् । परस्परं चाह्वयतां निनादः श्रूयते महान् ॥ ४३ ॥
ततः प्रहस्तः कपिराजवाहिनीमभिप्रतस्थे विजयाय दुर्मतिः ।
विघुष्टवेगैश्च विवेशितां चमूं यथा मुमूर्षुः शलभो विभावसुम् ॥ ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

हरिसैन्यं । तस्य सैन्यस्य मध्यगान् निर्विशेषान् सर्वलोक एकान्तयी ॥ ३७ ॥ ३८ ॥

गो० टी०–प्रहस्तस्य इत्यादि । यतः सन्नद्धसादिभ्यः । तस्मात् षड्दुलभा अष्टवडवतुल्याः ॥ ३९ ॥ ४० ॥

३७] ति० टी०–केतुरिति । लोलत्वादिधुक्तो गृध्रो नदन्नुभयतः पार्श्वे कपिसैन्यमानं इति शेषः । तथा कुर्वन्नस्य सम्बन्धी सेनायाः सम्बन्धी प्रभां शुक्लतिशोभां जयश्रियं चाहरत् ॥ ३७

रा० टी०–केतुरिति । केतुमूर्धनि केतुपरिभागे विलीनः स्थितः दृश्यतेऽद्भुतः उभयतः पार्श्वे कपिसैन्यमानं इति शेषः गृध्रो नदन् सन् अस्य प्रहस्तस्य समग्रां प्रभामाहरत् ॥ ३९ ॥

रा० टी०–केतुरिति । नदन्नुभयतः पार्श्वम् । उभौ पक्षौ शूलेन च प्रहरतः समन्तादाहरत् प्रभां प्रहरतस्येति शेषः । अनेनास्य गृध्रस्य प्रहस्तमुख विशीर्णमासीदित्यर्थः ॥ ३९ ॥

३८–४१] ति० टी०–सतस्य सूतजातस्य सारथेः । हयसादिनोऽश्वारोहकस्य । प्रतोदमित्येवम् ॥ ३८ ॥ ४१ ॥

रा० टी०–सारथेरिति । हयसादिनः हयानां नियन्तुः सारथेस्य सूतकुलप्रसूतस्य बहूनां नैकवारं सङ्ग्राममभिवर्तिनः सारथेः प्रतोदः तोत्रं यद्वा सूतस्य सूतजातीयस्य । अश्वसञ्चालनकुशलस्यात्मीयस्यार्थेः । हयसादिनः अश्वारोहिणोऽस्य ॥ ४० ॥

रा० टी०–निर्याणेति । समे निर्व्रणोन्नतव्यतिरिक्तदेशे हयाः प्रस्खलिताः अत एव षड्दुलभा या निर्याणश्रीरासीत् सा अहस्तेन ननाश ॥ ४१ ॥

गो० टी०–निर्याणेति । षड्दुलभाः अष्टवडवतुल्याः । भास्वरा बहुदुलभेति पाठः । निर्याणश्रीः निर्गमकालिकश्रीः । निर्व्याहः प्रहस्तोऽभरित्यर्थः । स्खलिताः चस्खलुः । कर्तरि क्तः ॥ ४१ ॥

रा० टी०–प्रहस्तमिति । अभिनियान्तं प्रस्थातं नानाप्रहरणा कपिसेना अभ्यवर्तत सम्मुखमगच्छत् ॥ ४२ ॥

गो० टी०–प्रहस्तमिति । नानाप्रहरणा शिलावृक्षादि नानाप्रहरणा ॥ ४२ ॥

रा० टी०–अथेति । दृक्षान् आरुजतामुत्पाटयतां शिला गृह्णतां च हरीणां सतुमुलो घोषः समजायत ॥ ४३ ॥

गो० टी०–अथेति । आरुजताम् उन्मूलयताम् । आगृह्णताम् आसमन्तात् गृह्णताम् ॥ ४३ ॥

४२–४४] ति० टी०–रक्षोगणवनौकसामित्यस्य निनादः श्रूयत इत्युत्तरेण संबन्धः ॥ ४२ ॥ ४३ ॥

इति श्रीरामाभिरामे श्रीरामायणेतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०–नर्दतामिति । राक्षसानां नर्दतां वानराणां गर्जतां च तेषां रक्षोगणवनौकसां सैन्ये प्रमुदिते सतीति शेषः ॥ ४२

रा० टी०–वेगितानामिति । वेगितानामतिवेगवतां योन्यवधकाङ्क्षिणामत एव परस्परमाह्वयतां रक्षोगणवनौकसां महाननादः श्रूयते ॥ ४३ ॥

गो० टी०–नर्दतामिति । त्रिपादश्लोकः रक्षोगणवनौकसामित्युत्तरशेषः ॥ ४२ ॥ ४३ ॥

रा० टी०–तत इति । प्रहस्तः विजयाय कपिराजवाहिनीमभिप्रतस्थे अत एव शलभो विभावसुमिव सा चमूं हरिसेनं विवेश ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामाधर्षणशिरोमणौ युद्धकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

---

१ षड्दुलेति गो. पाठः । २ अरुजेति गो. पाठः । ३ प्रहस्तमाप्तेति गो. पाठः । ४ अरुजेति गो. पाठः । ५ [illegible] ६ [illegible] ७ [illegible] ८ षड्दुलेति गो. पाठः । ९ [illegible] १० [illegible]

नीलेन नरान्तककुम्भहन्वादिसेनानिपरिवृतराक्षसबलानुयातोऽपि प्रहस्तमिं युद्धा वैवस्वतालयातिथिः कृतः ।

ततः प्रहस्तं निर्यान्तं दृष्ट्वा रणकृतोद्यमम् । उवाच सस्मितं रामो विभीषणमरिंदमः ॥ १ ॥
क एष सुमहाकायो बलेन महता वृतः । आगच्छति महावेगः किंरूपबलपौरुषः ॥ २ ॥
आचक्ष्व मे महाबाहो वीर्यवन्तं निशाचरम् । राघवस्य वचः श्रुत्वा प्रत्युवाच विभीषणः ॥ ३ ॥
एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः । लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृतः ॥
वीर्यवानस्त्रविच्छूरः सुभृत्यातपराक्रमः ॥ ४ ॥
ततः प्रहस्तं निर्यान्तं भीमं भीमपराक्रमम् । गर्जन्तं सुमहाकायं राक्षसैरभिसंवृतम् ॥ ५ ॥
ददर्श महती सेना वानराणां बलीयसाम् । अभिसंजातसंत्राणां प्रहस्तमभिगर्जताम् ॥ ६ ॥
खड्गशक्तयृष्टिशूलांश्च बाणांस्तीक्ष्णानि मुसलानि च । गदाश्च परिघाः प्रासा विविधाश्च परश्वधाः ॥ ७ ॥
धनूंषि च विचित्राणि राक्षसानां जयैषिणाम् । प्रगृहीतान्यराजन्त वानरानभियावताम् ॥ ८ ॥

गो० टी०—तत इति । कपिराजबलेनेत्यपि पाठः । तं चमूं निवेश्य च ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे श्लोकसिद्धिप्रधाने युद्धकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१-३] ति० टी०—तत इति । सस्मितम् । एवं सेनया किलास्मान्भीषयतीति स्मितम् ॥ १ ॥ २ ॥

रा० टी०—प्रहस्तागमनानन्तरकालिकं रामप्रश्नान्तमाह—ततइत्यादिभिः । रामः निर्यान्तं प्रहस्तं दृष्ट्वा विभीषणमुवाच ॥ १ ॥

गो० टी०—अथ प्रहस्तवधोऽष्टपञ्चाशे—ततः प्रहस्तमित्यादि । सस्मितमिति । बलवच्छत्रुदर्शनहर्षेणेति भावः । तदेवं व्याकुर्वन्ति—अरिन्दम इति ॥ २ ॥

रा० टी०—तदाकारमाह—क इति । महता बलेन वृतः एषः क आगच्छति नन्वु लङ्कायां राक्षससामेव सत्त्वाढ्यत्वेत्यत आह किंरूपादिविशेषोऽस्ति ॥ २ ॥

रा० टी०—आचक्ष्वेति । हे महाबाहो वीर्यवन्तं निशाचरमाचक्ष्व राघवस्य वचः श्रुत्वा विभीषणः प्रत्युवाच ॥ ३ ॥

गो० टी०—क एष इति । ननु प्रहस्तः पूर्वद्वारनिर्गतः, रामस्तु उत्तरद्वारि तिष्ठति स्म, कथमस्थानेकयोजनस्थसाक्षात्कारः । उच्यते आत्मवचनेन प्रत्यक्षतुल्येन महाकायः कश्चन गच्छतीति विदित्वा एष इत्याह । आचक्ष्व तमिति शेषः ॥ २ ॥ ३ ॥

४-६] ति० टी०—लङ्कायामित्यादि । राक्षसेन्द्रसंबन्धिलङ्कास्थबलस्य तृतीयभागेन संवृत इत्यर्थः ॥ ४ ॥ ५ ॥

४-८] ति० टी०—प्रहस्तमभि तदभिमुखेन गर्जन् वानराणां महती सेना निर्यान्तं प्रहस्तं ददर्शेति संबन्धः ॥ ६ ॥ ८ ॥

रा० टी०—तदाकारमाह—एष इत्यादिभिः । राक्षसेन्द्रस्य विभागबलैः संवृतः वीर्यवान् एषः प्रहस्तो नाम राक्षसेन्द्रस्य सेनापतिः साईश्लोक एकान्वयी ॥ ४ ॥

गो० टी०—एष इत्यादिसार्धश्लोक एकान्वयः । तस्य राघवस्य असमतया नामाग्रहणम् । संवृतशब्दोऽन्तर्वर्तित्वपरः रावणेन लङ्कायां स्वबलस्य तृतीयभागेन संवृत इत्यर्थः लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृत इति पाठः । राक्षसस्य मित्येषु भागत्रयम्—राक्षसीमिति भागः वीर्यवान् बलवान् वीर्यं बले प्रभावे चेत्यमरः । सुभृत्यातपराक्रमः सुष्ठु भृत्यः पराक्रमे परपरिभवने । अत्रेति करणं वीप्सयम् ॥ ४ ॥

रा० टी०—तत इति । ततः रामविभीषणसंवादसमये निर्यान्तं प्रहस्तं संग्रामरोषाणां प्रहस्तमुद्दिश्य अभिगर्जतां वानराणां सेना ददर्श विशेषतोऽकुलीकृतं ददर्शेत्यर्थः काव्यलिङ्गम् ॥ ५ ॥ ६ ॥

गो० टी०—तत इत्यादि श्लोकद्वयम् । भीमं भयंकरं भेषम् ॥ ५ ॥ ६ ॥

रा० टी०—खड्गेति । वानरान् अभियावतां राक्षसानां राक्षसैः प्रगृहीतानि खड्गादीनि अराजन्त अदृश्यतेत्यर्थः काव्यलिङ्गम् ॥ ७ ॥ ८ ॥

गो० टी०—खड्गेत्यादिश्लोकद्वयम् राक्षसानामिति शेषः । यायं षष्ठी । राक्षसैरित्यर्थः ॥ ७ ॥ ८ ॥

१ भीमपराक्रमेति गो. पाठः । २ रक्षसां गो. मुद्रि. नास्ति । ३ प्रत्यक्षतत्परोक्षे इति गो. पाठः । ४ बाणाश्चेति गो. पाठः । ५ मुद्रि.

जगृहुः पादपांश्चापि पुष्पितांस्तु गिरिंस्तथा । निरुच्छ्वासा विधुन्वन्तो वानरा भीमविक्रमाः ॥ ९ ॥
तेषामन्योन्यमासाद्य संग्रामः सुमहानभूत् । बहूनामक्षमर्दिनां च शरवर्षं च वर्षताम् ॥ १० ॥
बहवो राक्षसा युद्धे बहून्वानरपुंगवान् । वानरा राक्षसांश्चापि निजघ्नुर्बहवो बहून् ॥ ११ ॥
शूलैः प्रपथिनाः केचित्केचिंत्तु परमायुधैः । परिघैराहताः केचित्केचिच्छिन्नाः परश्वधैः ॥ १२ ॥
निरुच्छ्वासाः पुनः केचित्पतिता जगतीतले । विभिन्नहृदयाः केचिद्विसंधानसौषिताः ॥ १३ ॥
केचिद्द्विधा कृताः खड्गैः स्फुरन्तः पतिता भुवि । वानरा राक्षसैः शैलैः पार्श्वतश्च विदारिताः ॥ १४ ॥
वानरैश्चापि संक्रुद्धैः राक्षसौघाः समन्ततः । पादपैर्गिरिशृङ्गैश्च संपिष्टा वसुधातले ॥ १५ ॥
वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्च हता भृशम् । वेमुश्शोणितमास्येभ्यो विशीर्णैर्वदनेक्षणाः ॥ १६ ॥
आर्तस्वनं च स्वनतां सिंहनादं च नर्दताम् । बभूव तुमुलः शब्दो हरीणां रक्षसामपि ॥ १७ ॥
वानरा राक्षसाः क्रुद्धा वीरमार्गमनुव्रताः । विवृत्तवदनैर्घोरैः क्रूराश्चक्रुः कर्माण्यभीतवत् ॥ १८ ॥
नरान्तकः कुम्भहनुर्महानादः समुन्नतः । एते महस्तसचिवाः सर्वे जघ्नुर्वनौकसः ॥ १९ ॥

९-११] ति० टी०-गिरींस्तथा जगृहुरित्यनुकर्षः । निरुच्छ्वासानीति यावत् ॥ ९ ॥ ११ ॥

रा० टी०-जगृहुरिति । स्कन्धमाः पादपादीन् जगृहुः॥९॥

रा० टी०-एषामिति । अन्योन्यमासाद्य विषमानानाम् अक्षमर्दिनां शरवर्षं च वर्षतां तेषां हरिरक्षसां सुमहान् संग्रामोऽभूत् ॥ १० ॥

रा० टी०-बहव इति । राक्षसाः बहून् वानरपुङ्गवान् वानरा बहून् राक्षसांश्च निजघ्नुः ॥ ११ ॥

गो० टी०-जगृहुरिति । वानरश्रेष्ठस्वेष्वायासरत्ववारणाय प्लवङ्गमा इत्युक्तम् । यद्वा प्लवङ्गमाः युद्धोत्साहेन प्लवमत्या आरब्धवन्तः आसंजायां सप्तम्यर्थः ॥ ९ ॥ ११ ॥

१२] ति० टी०-परमायुधैश्चक्रैः । 'चक्रं तु परमायुधम्' इति कोशः ॥ १२ ॥

रा० टी०-तत्प्रकारमाह-शूलैरित्यादिभिः । केचित् वानरा राक्षसैः शूलैः प्रपथिनाः केचित्तु परमायुधैश्चक्रैः प्रपथिनाः केचित् परिघैराहताः बभूवुः ॥ १२ ॥

गो० टी०-शूलैरित्यादि । परमायुधैः चक्रैः । चक्रं तु परमायुधमिति निघण्टुः ॥ १२ ॥

१३] ति० टी०-द्रव्याणां संधानं सम्यग्विसर्जनं तेन सौषिताः खण्डिताः । 'संधानसौषिताः' इति पाठे इषव एव संधानानि बन्धनरज्जवस्तैः संहिता संयुता इत्यर्थः ॥ १३ ॥

रा० टी०-निरिति । निरुच्छ्वासाः तद्दर्शनजनितमूर्च्छा हेतुकपूर्वत्रासरहिताः केचित् सौषिताः विहिंसिताः केचित् विभिन्नहृदयाः बभूवुरिति शेषः ॥ १३ ॥

गो० टी०-शल्यपातादिकार्यं दर्शयति—निरुच्छ्वासा इत्यादि । निरुच्छ्वासाः कृताः । इषवस्तानसंहिताः इषव एव संधानानि बन्धनरज्जवः तैः संहिताः संस्कृताः । स्फुरन्त स्फुरन्तः । अवदारिताः भिन्नाः ॥ १३ ॥ १४ ॥

१४-१५] ति० टी०-स्फुरन्त उच्छलन्तः ॥१४॥ १५

रा० टी०-केचिदिति । स्फुरन्तः केचित् खड्गैर्द्विधा कृताः पार्श्वतो विदारिताश्च सन्तो भुवि पतिताः ॥ १४ ॥

रा० टी०-वानरैरिति । वानरैः पादपादिभिः संपिष्टा राक्षसौघाः वसुधातले निपेतुरिति शेषः ॥ १५ ॥

गो० टी०-वानरैरित्यादि । संपिष्टाः चूर्णिताः । वेमुः वमनं चक्रुः ॥ १५ ॥ १६ ॥

१६-१७] ति० टी०-वमनवमन् । 'वेमुः' इति पाठान्तरम् ॥ १६ ॥ १७ ॥

रा० टी०-वज्रेति । वज्रस्पर्शवत् तलानि तलस्पर्शा येषां तैर्हस्तैर्मुष्टिभिश्च भृशं हताः अत एव विशीर्णानि वदनेक्षणानि येषां ते राक्षसाः आस्येभ्यः मुखेभ्यः शोणितं वमन् अवमन्[1] ॥

रा० टी०-आर्तेति । आर्तस्वनं स्वनतां सिंहनादं च नर्दतां हरीणां रक्षसामपि तुमुलः शब्दो बभूव ॥ १७ ॥

गो० टी०-आर्तेति । स्वनतां नर्दतामित्यत्र कर्तरीति[2] स्वर्थः । तुमुलः निर्विवेकः । रक्षसां वानराणां च ॥ १७ ॥

१८-१९] ति० टी०-वीरमार्गमनुव्रता वीरमार्गोपरा युद्धस्वरूपस्तमनुव्रता अनुगताः । अभीतवदभीतार्हाणि ॥ १८ ॥ १९ ॥

रा० टी०-वानरा इति । विवृत्तवदनैः व्यादत्तवक्त्रैः राक्षसाः अभीतवत् नीतिरहितं यथा भवति तथा क्रूराणि दुष्टक्रियाः चक्रुः ॥ १८ ॥

रा० टी०-नरान्तक इति । नरान्तकादयः प्रहस्तसचिवा वनौकसो जघ्नुः ॥ १९ ॥

गो० टी०-वानरा इति । वीरमार्गं युद्धकौशलम् । वि

---

१ वेमुरिति गो. पाठः । २ वेति गो. पाठः । ३ करणीति गो. पाठः । ४ वानरा इति गो. पु. पाठः । [illegible] ति गो. पाठः । ७ वेमुरिति गो. पाठः । ८ वदनेति गो. पाठः । ९ वृणीति गो. पाठः । १० [illegible]

तेषां निपतितां शीघ्रं निघ्नतां चापि वानरान् । द्विविदो गिरिशृङ्गेण जघानैकं नरान्तकम् ॥ २० ॥
दुर्मुखः पुनरुत्थाय कपिः सविपुलद्रुमम् । राक्षसं क्षिप्रहस्तं तु समुन्नतमपोथयत् ॥ २१ ॥
जाम्बवांस्तु सुसंक्रुद्धः प्रगृह्य महतीं शिलाम् । पातयामास तेजस्वी महानादस्य वक्षसि ॥ २२ ॥
अथ कुम्भहनुस्तत्र तारणेनासाद्य वीर्यवान् । दृढेन मुहता सद्यः प्राणान्संत्याजयद्रणे ॥ २३ ॥
अमृष्यमाणस्तत्कर्म प्रहस्तो रथमाश्रितः । चकार कदनं घोरं धनुष्पाणिर्वनौकसाम् ॥ २४ ॥
आवर्त इव संजज्ञे सेनयोरुभयोस्तदा । क्षुभितस्यार्णवस्येव सागरस्येव निःस्वनः ॥ २५ ॥
महता हि शरौघेण राक्षसो रणदुर्मदः । अर्दयामास संक्रुद्धो वानरान्परमाहवे ॥ २६ ॥
वानराणां शरीरैस्तु राक्षसानां च मेदिनी । बभूवातिचिता घोरैः पर्वतैरिव संहता ॥ २७ ॥
सा मही रुधिरौघेण प्रच्छन्ना संप्रकाशते । संछन्ना माधवे मासि पलाशैरिव पुष्पितैः ॥ २८ ॥
हतवीरौघवपां तु भग्नायुधमहाद्रुमाम् । शोणितौघमहातोयां यमसागरगामिनीम् ॥ २९ ॥

लनयनाः भ्रान्तनेत्राः । कर्माणि युद्धकर्माणि । अपोथयत् भङ्गरहितं यथा भवति तथा ॥ १८ ॥ १९ ॥

२०] ति० टी०–तेषामिति निर्घातेन पक्षौ ॥ २० ॥

रा० टी०–तेषामिति । तेषां सचिवानां निघ्नतां च सतां द्विविदो नरान्तकं जघान ॥ २० ॥

गो० टी०–तेषामिति । इयं निर्घातेन पक्षौ । तर्क गुरुम् ॥ २० ॥

२१] ति०टी०–समुन्नतं तदाढ्यम् अपोथयद्भङ्गवन्तम्॥२१॥

रा० टी०–दुर्मुख इति । दुर्मुखः कपिः विपुलद्रुमत्वेन समुन्नतं तदभिधं राक्षसमपोथयत् ॥ २१ ॥

गो० टी०–दुर्मुख इति । उत्थाय उद्गत्य । समुन्नतत्वाद्यं राक्षसम् अपोथयत् अमारयत् । " पुथ, हिंसायाम् " ति धातुः ॥ २१ ॥ २२ ॥

२२] ति० टी०–महानादस्य तदाढ्यस्य ॥ २२ ॥

रा० टी०–जाम्बवानिति । जाम्बवान् महतीं शिलां गृहीत्वा महानादस्य वक्षसि पातयामास ॥ २२ ॥

२३] ति० टी०–तारणेनासाद्य संबध्य । गृहीत्वेति शेषः । ततः स तारस्तस्य कुम्भहनोर्महता दृढेन प्राणान्संत्याजयत्समर्थाजयत् ॥ २३ ॥

रा० टी०–अथेति । कुम्भहनुः तारणेनासाद्य अभ्युद्यतेति शेषः महता दृढेन प्राणान् कुम्भहनोर्जीववायून् संत्याजयत् निस्त्याजयत् तार इति शेषः किंच कुम्भहनुस्तारेण सह संग्रामाय युद्धं प्राप्य दृढेन तारप्रहततरुणाप्राणान् सन्त्याजयत् परित्याजयत् ॥ २३ ॥

गो० टी०–अथेति । तत्र प्रहस्तसन्निधौ । सन्त्याजयत् निस्त्याजयत् । स्वार्थिको णिच् प्रत्ययः ॥ २३ ॥ २४ ॥

२४] ति० टी०–तत्कर्म क्षणादेव रुचिरचतुरुद्यमारब्धम् ॥ २४ ॥

रा० टी०–अमृष्यमाण इति । तत् वानरकृतं कर्म अमृष्यमाणः प्रहस्तः रथमाश्रितस्सन् वनौकसां घोरं कदनं चकार२४

२५–२८] ति० टी०–उभयोः सेनयोरितस्ततो भ्रमणे सत्यावर्त इव संजज्ञे । क्षुभितस्य सागरस्य निःस्वन इव निःस्वनः संजज्ञे ॥ २५–२८ ॥

रा० टी०–आवर्त इति । उभयोस्सेनयोः आवर्तः इतस्ततो भ्रमणे सति सागरस्य निःस्वन इव निःस्वनो जज्ञे॥२५॥

गो० टी०–आवर्त इति । आवर्तः संवर्तः प्रलय इव स्थिते सत्यस्मिन् युद्धे क्षुभितस्य सागरस्य निःस्वन इव सेनाया निःस्वनः संजज्ञे ॥ २५ ॥

रा० टी०–महतेति । राक्षसः प्रहस्तः शरौघेण वानरान् अर्दयामास ॥ २६ ॥

गो० टी०–तेषु प्रहस्तप्रकर्षं प्रतिपादयितुं पुनराह–महतेत्यादि ॥ २६ ॥

रा० टी०–वानराणामिति । वानराणां राक्षसानाञ्च शरीरैश्चिता व्याप्ता मेदिनी पर्वतैस्संहतेव बभूव ॥ २७ ॥

रा० टी०–सेति । रुधिरौघेण प्रच्छन्ना सा मही पुष्पितैः पलाशैस्सञ्छन्नेव प्रकाशते ॥ २८ ॥

गो० टी०–वानराणामिति । निहता व्याप्ता० ॥ २७॥२८॥

२९] ति० टी०–युद्धभूमिं नदीत्वेन वर्णयति—हतेत्यादि । यमं तदम् । यम एव सागरस्तद्गामिनीम् ॥ २९ ॥

रा० टी०–संग्रामभूमिं नदीत्वेन वर्णयति—हतेत्यादिभिः । हतवीरौघावेव प्रभा यस्याः भग्नायुधान्येव महाद्रुमा यस्याम् शोणितौघा महातोयापि यस्याम् यमः सभासदोऽत्र सागरः तद्गामिनीम् ॥ २९ ॥

गो० टी०–अपरिच्छिन्नवानरबलो वृत्र इति योनयिद्धं युद्धभूमिं नदीत्वेन वर्णयति—हतेत्यादिना । उभयसेनयोर्यो हतवीराणामौघः समूह एव प्रभा तत्र यस्यास्ताम् । भग्नायुध

१ ब्रा. प्रतौ नास्तीयं पंक्तिः । २ अनिहतो सूर्यादि गो. पाठः । ३ उभयोः सेनयोरिति गो. पाठः । ४ प्रहस्त इति गो. पाठः ।

यकृत्प्लीहमहापङ्कां विनिकीर्णान्त्रशैवलाम् । भिन्नकायान्तरामान्त्रपङ्क्तिवेष्टनवेष्टिताम् ॥ ३१ ॥
गृध्रहंसबकाकीर्णां कङ्कसारससेवितां । मेदःफेनसमाकीर्णामावर्तस्थननिःस्वनाम् ॥ ३२ ॥
तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीम् । नदीमिव घनापाये हंससारससेवितां ॥ ३३ ॥
राक्षसाः कपिमुख्यास्ते तरुस्तां दुस्तरां नदीम् । यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः ॥ ३४ ॥
ततः सृजन्तं बाणौघान्प्रहस्तं स्यन्दने स्थितम् । ददर्श तरसा नीलो विधमन्तं प्लवंगमान् ॥ ३५ ॥
उद्धूत इव वायुः खे महदभ्रबलं बलात् । समीक्ष्याभिद्रुतं युद्धे प्रहस्तो वाहिनीपतिः ॥ ३६ ॥
रथेनादित्यवर्णेन नीलमेवाभिदुद्रुवे । स धनुर्धन्विनां श्रेष्ठो विकृष्य परमाहवे ॥ ३७ ॥
नीलाय त्र्यग्रजद्वाणान्प्रहस्तो वाहिनीपतिः । ते देहे विविशुः नीलं विनिर्भिद्य समाहिताः ॥ ३८ ॥
यद्वद् अभ्रमुपद्यावेगा रश्मिर्ता इव पन्नगाः । नीलः शरैरभिततो निशितैर्ज्वलनोपमैः ॥ ३९ ॥
स तं परमदुर्धर्षमापतन्तं महाकपिः । प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान् ॥ ४० ॥
स तेनाभिहतः क्रुद्धो नर्दन्राक्षसपुंगवः । ववर्ष शरवर्षाणि प्लवंगानां चमूपतौ ॥ ४० ॥

तेन महाद्रुमाः भग्नाः तीरमहाद्रुमा यस्यास्ताम् । शोणितौघा एव महान्तोऽपि कङ्कपक्षाणि यस्यास्ताम् यमसागरगामिनीं दक्षिणो यमो जीवभक्षणाय सन्निधत्त इति प्रसिद्धिः । तदपि सागरगामित्वेन । यकृत्प्लीहशब्दौ हृदयस्य दक्षिणभागभागावयवविशेषपरौ । अन्त्राणां शैवलत्वनिरूपणं स्तब्धत्वप्रयुक्तं । भिन्नकायशिरसोन्त्रत्वनिरूपणं स्फुरितत्वात् । अङ्गावयवैः करचरणाद्यङ्गानामवयवैः अङ्गुल्य इत्यर्थः । तथा कङ्कपक्षाणि अङ्गलग्नत्वेनाणानि यस्यास्ताम् । कङ्कः पक्षतिः कङ्कः । भल्लो हंसविशेषः मेदः रुधिरमण्डलम् । आवर्तो ललितः ऊर्ध्व इति यावत् तदेव निर्भीतपतत्रजनिवन्धो नाम्नाम् । यद्यपि रुधिरप्रवाहस्यापि स्वत एव घोरत्वेन तत्रापि पक्षकल्पायेश्वमुक्तम् । कापुरुषाः भीरवः तैः दुस्तारां वहिरायां युद्धभूमिमयीमिति स्वार्थे मयट् । व्याख्यातमन्यत् । यद्वा तेरुरिति वक्ष्यमाणमाख्यातपदमाश्रित्य अत्र सत्यवरूपकालंकारः ॥ ३१॥३२॥

३३] ति० टी०—यकृत्प्लीहानौ हृदयदक्षिणभागस्थमांसविशेषौ ॥ ३३ ॥ ३१ ॥

रा० टी०—यकृत्प्लीहानौ हृदयदक्षिणभागस्थमांसविशेषौ महान्तौ पङ्कौ यस्याम् विनिकीर्णानि अन्त्राणि शैवाला यस्याम् भिन्नानि कायशिरांसि मीना यस्याम् अङ्गावयवाः शाद्वला यस्याम् ॥ ३१ ॥

रा० टी०—गृध्ररूपपरमणीयकाकीर्णाम् कङ्करूपैर्मनोरमैः सेवितां मेदोरूपेण फेनेन समाकीर्णाम् आवर्तनिरूपणस्तनिस्वनविशिष्टाम् ॥ ३२ ॥

३३] ति० टी०—युद्धभूमिमयीं तदुपां नदीं प्रस्तुत्य वि॰ घनापाये हंसादिसेवितां नदीमिव त्वां तेरुः ॥ ३३ ॥

रा० टी०—कापुरुषैर्दुस्तराम् घनापाये हंसादिसेवितां नदीं शत्रुभूतां नदीमिव युद्धभूमिमयीं नदीम् ॥ ३३ ॥

गो० टी०—उपमानमुखेनापि तत्तरणं दर्शयति—नदीमिति । घनापाये वर्षान्ते । तां पूर्वम् रूपकेण वर्णिताम् । केचित्तु अनोत्तरश्लोकस्थनदीपदवैयर्थ्यभयेन युद्धभूमिमयीं नदीं प्रवर्तयितेत्यन्वाहरन्ति ॥ ३३ ॥

३४] ति० टी०—पद्मरजोधूतां यथा गजयूथपास्तेरुस्तथेत्यर्थः ॥ ३४ ॥

रा० टी०—राक्षसाः कपिमुख्याश्च तेरुस्तत्र दृष्टान्तः गजयूथपाः पद्मरजोध्वस्तां नलिनीमिव अदृष्टकमेकान्वयि ॥ ३४ ॥

गो० टी०—उक्तानां रक्षोवानराणामुपमामाह—यथेति । पद्मरजोभिः ध्वस्तां वर्णान्तरं प्राप्तां नलिनीं सरसीं यथा गजयूथपास्तरन्ति लीलया रक्ततनवो भवन्तीति यावत् । तथा अरुणशरीरा इत्तेरुरित्यर्थः ॥ ३४ ॥

३५] ति० टी०—तत उद्यममानगुणं प्रहस्तं नीलो ददर्श ॥ ३५ ॥

रा० टी०—तत इति । बाणौघान् सृजन्तं स्यन्दने स्थितं प्लवङ्गमान् विधमन्तं नीलो ददर्श ॥ ३५ ॥

गो० टी०—तत इति । स्यन्दने रथे स्थितम् । बाणौघान् सृजन्तं मुञ्चन्तम् । तरसा वेगेन । प्लवङ्गमान् विनिघ्नन्तं प्रहस्तं ददर्श ॥ ३५ ॥

३६-४०] ति० टी०—वाहिनीपतिः प्रहस्तो यथा उद्धूतो वायुर्महदभ्रबलमिव बलवदभिद्रुतं युद्धेऽभिद्रुतं स्वं प्रत्याभिद्रुत्य रथेनागच्छन्तं नीलं समीक्ष्य तं नीलमेवाभिदुद्रुवे ॥३६-४०॥

रा० टी०—उद्धूत इति । खे उद्धूतो यो वायुः तत्र वा पुनः अभ्रबलम् बलमधिक अभिद्रुतं स्वसैन्यं समीक्ष्य प्रहस्तो रथेन नीलमपि द्रुद्रुवे किंच उद्धूतो वायुरिव प्रहस्तः महाप्रलयवद्वानरसैन्यमभिद्रुतं समीक्ष्य रथेन नीलमेवाभिद्रुद्रुवे ॥

रा० टी०—स इति । धनिनां [illegible] बाणान् व्यसृजत् ॥ ३६ ॥

तस्य बाणगणानेव राक्षसस्य दुरात्मनः । अपारयन्वारयितुं प्रत्यगृह्णान्निमीलितः ॥
यथैव गोवृषो वर्षं शारदं शीघ्रमागतम् ॥ ४१ ॥
एवमेव महस्तस्य शरवर्षान्दुरासदान् । निमीलिताक्षः सहसा नीलः सेहे दुरासदान् ॥ ४२ ॥
रोषितः शरवर्षेण सालेन महता महान् । प्रजघान हयान्नीलः प्रहस्तस्य महाबलः ॥ ४३ ॥
ततो रोषपरीतात्मा धनुस्तस्य दुरात्मनः । बभञ्ज तरसा नीलो ननाद च पुनः पुनः ॥ ४४ ॥
विधनुः सँ कृतस्तेन महस्तो वाहिनीपतिः । प्रगृह्य मुसलं घोरं स्यन्दनादवपुप्लुवे ॥ ४५ ॥
तावुभौ वाहिनीमुख्यौ जातवैरौ तरस्विनौ । स्थितौ क्षतजसिक्ताङ्गौ प्रभिन्नाविव कुञ्जरौ ॥ ४६ ॥
उल्लिखन्तौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरम् । सिंहशार्दूलसदृशौ सिंहशार्दूलचेष्टितौ ॥ ४७ ॥
विक्रान्तविजयौ वीरौ समरेष्वनिवर्तिनौ । काङ्क्षमाणौ यशः प्राप्तुं त्रैलोक्यस्यापि वै ॥ ४८ ॥
आजघान तदा नीलं ललाटे मुसलेन सः । प्रहस्तः परमायत्तस्ततः सुस्राव शोणितम् ॥ ४९ ॥
ततः शोणितदिग्धाङ्गः प्रगृह्य च महातरुम् । प्रहस्तस्योरसि क्रुद्धो विससर्ज महाकपिः ॥ ५० ॥

गो० टी०—उद्धूत इत्यादिसार्धश्लोकमेकं वाक्यम् । स्वदेशभूतं । उद्धूतः उल्बणः वायुः अश्वबलं अश्वशक्तिम् । हे बलादभिद्रुतम् आभिमुख्येनायान्तं नीलं मायया दर्शनेनैवाभिद्रुवे इति योजना ॥ ३९ ॥ ३६ ॥

रा० टी०—ते इति । समाहिताः प्रहस्तेन प्रेरिताः नीलं प्राप्य निर्भिद्य च रोषिताः पन्नगा इव महीं जग्मुः ॥३७॥

गो० टी०—त इति । रुषिताः पन्नगा इव क्रुद्धाः समाप्ताः ऋजवः नीलं विनिर्भिद्य मही जग्मुः विनिर्गुरित्यर्थः॥३७॥

रा० टी०—नीलइति । शरैरभिहतो नीलः आपतन्तं प्रहस्तं प्रेक्ष्यैव ताडयामास सार्द्धश्लोक एकान्वयी ॥ ३८ ॥३९॥

रा० टी० स इति । तेन नीलपातितेनाभिहतो वसुधाकृतः क्षतजाक्तां वसुधां नीले शरवर्षाणि ववर्ष ॥४०॥

गो० टी०—नील इत्यादि सार्धश्लोकः ॥ ३८ ॥ ४० ॥

४१–४६] ति० टी०—अपारयन्वारयितुमशक्तः सन् । शारदं वर्षम् । गोवृषस्य शरत्काले प्राबल्यं कालस्वभावात् । तस्य स्वन्यथा तत एव । तेन नक्षत्रेशकरस्तस्य शरवर्षं ते सचित्तम् ॥ ४१–४६ ॥

रा० टी०—तस्येति । तस्य प्रहस्तस्य बाणगणान् शरसमूहान् अपारयन् अशक्नुवन् निमीलिताक्षस्तत्रैव प्रत्यगृह्णात्॥४१

गो० टी०—तस्येति । अपारयन् अशक्नुवन् ॥ ४१ ॥

रा० टी०—तदेव दृष्टान्तमाह—यथेति । गोवृषो शीघ्रमागतं शारदं वर्षं यथा सेहे एवं तथा प्रहस्तस्य शरवर्षान् नीलः । सार्धश्लोक एकान्वयी ॥ ४२ ॥

रा० टी०—रोषित इति । शरवर्षेण रोषितो नीलः सालेन महता प्रहस्तस्य हयान् प्रजघान ॥ ४३ ॥

रा० टी०—तत इति । नीलः तस्य प्रहस्तस्य धनुर्बभञ्ज ॥४४॥

रा० टी०—विधनुरिति । तेन नीलेन विधनुः कृतः प्रहस्तः मुसलं प्रगृह्य स्यन्दनाद्व वपुप्लुवे ॥ ४५ ॥

गो० टी०—यथैवेत्यादिसार्द्धश्लोकः यथैवेत्यत्र एवकारोऽन्यत्रायोगव्यवच्छेदार्थकः । शारदमित्यनेन अल्पातस्य व्यनक्ति ॥ ४२ ॥ ४५ ॥

रा० टी०—तावितिं । जातवैरौ जातेन सिते अक्षिणी यस्योः तौ उभौ हरिराक्षसौ प्रभिन्नौ मत्तौ कुञ्जरावि स्थितौ ॥४६॥

गो० टी०—तावुभाविति सार्द्धश्लोकत्रयमेकं वाक्यम् । प्रभिन्नौ मत्तौ । सिंहशार्दूलसदृशाविति छेदः । विक्रान्तविजयौ सर्वत्र प्राप्तविजयौ । काङ्क्षमाणौ अभिलषमाणाविति शेषः ॥ ४६ ॥ ४८ ॥

४७] ति० टी०—सुतीक्ष्णाभिरिति । दंष्ट्राभिरुल्लिखन्तौ ॥ ४७ ॥

४८] ति० टी०—विक्रान्तविजयौ प्राप्तजयशब्दितौ ॥४८॥

रा० टी०—काङ्क्षमाणाविति । त्रैलोक्यस्यापि विजयौ काङ्क्षमाणौ अत एव समरेष्वनिवर्तिनौ अत एव क्षत्रियवीर्यौ । अतः काङ्क्षमाणौ बभूवतुरिति शेषः अन्यत्रापि ॥ ४७ ॥ ४८ ॥

४९–५०] ति० टी०—परमायत्तः परमोद्युक्तः ॥४९ ५०॥

रा० टी०—आजघानेति । परमायत्तः स प्रहस्तः सालेन नीलं ललाटे आजघान ततोऽनन्तरं शोणितं सुस्राव ॥ ४९ ॥

रा० टी०—तत इति । शोणितदिग्धाङ्गो नीलः महातरुं प्रगृह्य प्रहस्तस्योरसि विससर्ज ॥ ५० ॥

गो० टी०—आजघानेति । परमायत्तः परमोद्युक्तः ॥४९५०॥

---

१ सँ कृतस्तेन इति गो. पाठः । २ सालेन इति गो. पाठः । ३ शारदं वर्षमिति गो. पाठः । ४ सुसल्लेणेति गो. पाठः । ५ मत्तौ इवेति गो. पाठः । ६ [illegible] ७ रोषित इति गो. पाठः । ८ विनेति गो. पाठः । ९ इतरेतरमिति रा. पाठः । १० [illegible] ११ [illegible] १२ रुषित इति गो. पाठः ।

स एवमुक्त्वा ज्वलनप्रकाशं रथं तुरंगोत्तमराजियुक्तम् ।
प्रकाशमानं वपुषा ज्वलन्तं समारुरोहामरराजशत्रुः ॥ ७ ॥
स शङ्खभेरीपणवप्रणादैरास्फोटितश्वेडितसिंहनादैः ।
पुण्यैः स्तवैश्चापि सुपूज्यमानस्तदा ययौ राक्षसराजमुख्यः ॥ ८ ॥
स शैलजीमूतनिकाशरूपैर्मांसाशनैः पावकदीप्तनेत्रैः ।
बभौ वृतो राक्षसराजमुख्यो भूतैर्वृतो रुद्र इवामरेशः ॥ ९ ॥
ततो नगर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् ।
महार्णवाभ्रस्तनितं ददर्श समुद्यतं पादपशैलहस्तम् ॥ १० ॥
सराक्षसानीकमतिप्रचण्डमालोक्य रामो भुजगेन्द्रबाहुः ।
विभीषणं शस्त्रभृतां वरिष्ठमुवाच सेनानुगतः पृथुश्रीः ॥ ११ ॥
नानापताकाध्वजचक्रयुक्तं प्रासासिशूलायुधशस्त्रजुष्टम् ।
कैस्त्वेदृशोऽभ्यमभीरुजुष्टं सैन्यं महेन्द्रोपमनागजुष्टम् ॥ १२ ॥

रा० टी०—स इति । सः श्रुतसेनापतिर्विनतोऽहं रिपुनिजघ्नाय च भवतः इति शेषः अविचारयन् रिपूंस्तृणवत्तया गणयन्नहं रणभूमिं प्रत्यर्थं प्रस्थास्यामि ॥ ५ ॥

रा० टी०—अद्येति । दीप्तैरग्निभिर्वनमिव बाणैर्वानरानीकानि निर्दहिष्यामि निर्भक्ष्यामि ॥ ६ ॥

गो० टी०—सोऽहमिति । अद्भुतं दुर्बलैः प्रबलविमाश्रनाश्रयेण ॥ ५ ॥ ६ ॥

७] ति० टी०—तुरंगोत्तमराजियुक्तम् । अनेन बहुत्वं तस्योक्तम् । वपुषा ज्वलन्तम्, अत एव स्वभासा प्रकाशमानम् ॥ ७ ॥

रा० टी०—स इति । अमरराजशत्रुः स रावणः ज्वलनप्रकाशमाणिक्यप्रकाशविशिष्टं राक्षसराजमुख्यमेवं वचनमुक्त्वा प्रकाशमानं स्वगमनत्वेन स्वतः प्रकाशितं वपुषा रावणशरीरकान्त्या ज्वलन्तं प्रकाशमानं च रथं समारुरोह ॥ ७ ॥

गो० टी०—स एवमिति । तुरङ्गोत्तमराजैः तुरङ्गश्रेष्ठतमैः युक्तम् । प्रकाशमानम् अन्यैरप्रकाशमानम् वपुषा ज्वलन्तं स्वरूपेण एव प्रकाशमानम् ॥ ७ ॥

८-९] ति० टी०—आस्फोटितानि भुजास्फालनानि श्वेडितानि स्वजोगेप्रकाशकशब्दाः । आस्फोटितादीन्यत्र सैनिकानाम् ॥ ८ ॥ ९ ॥

रा० टी०—सेति । शङ्खादिप्रणादसहितैः आस्फोटितादिभिः पुण्यैः स्तवैश्च सुपूज्यमानः राक्षसराजमुख्यो रावणो यत्र तत्र आस्फोटितानि भुजास्फालनानि श्वेडिताः स्वस्वजोगेप्रकाशकशब्दाः सिंहनादाः अट्टाट्टहासाः ॥ ८ ॥

गो० टी०—स शङ्खेति । आस्फोटितश्वेडितसिंहनादैः आस्फोटितं भुजास्फालनम् । श्वेडितशब्दः शब्दमात्रपरः । आस्फोटितजनितशब्दैः सिंहनादैरित्यर्थः । पुण्यैः स्वकीयैः ॥ ८ ॥

रा० टी०—स इति । शैलजीमूतनिकाशानि गिरिमेघयोः सदृशानि रूपाणि यैर्यैस्तैर्मांसाशनैः राक्षसैर्वृतो राक्षसराजमुख्यो रावणो भूतैर्वृतो रुद्र इव बभौ ॥ ९ ॥

गो० टी०—स इति । कालिन्यसिदृशे शैलोपम्ये : संकाशैर्विकासाहेन्वसिदृशैर्मेघौपम्यम् । रूपं शरीरम् । रक्षस्यादरेश्वरत्वं तामसप्रकृतित्वात् । तदुक्तं मैत्रायणीयानामुपनिषदि—यो ह वा अस्य तामसोंशः सोसौ रुद्र इति ॥ ९ ॥

१०] ति० टी०—महार्णवस्यास्य महामेघस्येव च स्तनितं यस्य तत् ॥ १० ॥

रा० टी०—तत इति । महौजा रावणः नगर्याः निष्क्रम्य महार्णवाभ्रयोरिव स्तनितं शब्दो यस्मिन् तत् समुद्यतं वानरसैन्यं ददर्श ॥ १० ॥

गो० टी०—तत इति । महार्णवाभ्रस्तनितं महार्णवाभ्रयोरिव स्तनितं घोषो यस्येति तथा ॥ १० ॥

११] ति० टी०—सेनयानुगतः सेनानुगतः ॥ ११ ॥

रा० टी०—तदिति । सेनामनुगतो रामः अतिप्रचण्डं राक्षसानीकमालोक्य विभीषणमुवाच ॥ ११ ॥

गो० टी०—तदिति । अतिप्रचण्डम् अत्यन्तकोपनम् । भुजगेन्द्रबाहुः प्रदीप्तकोपेन प्रवर्धमानबाहुरित्यर्थः पृथुश्रीः सुदृढत्वेन सञ्जातलक्ष्मीकः सेनानुगतः स्वामिसंरक्षणाय सर्वतः समवेतसेनापरिवृतः शस्त्रभृतां वरिष्ठो नीतिपटुतरत्वात्प्रथमं विभीषणमुवाच इति भावः ॥ ११ ॥

१२] ति० टी०—[illegible] गजैश्च महेन्द्रपर्वतसमानैर्युक्तम् । [illegible]

रा० टी०—नानेति । [illegible] प्रासादिभिश्च अनीकैः राक्षसैर्जुष्टं [illegible] अतोऽन्यादृशं कैस्त्वं दृष्टम् ॥ १२ ॥

१ राक्षसेति गो० पाठः । २ अनीति गो० पाठः । ३ अत्रेति गो० पाठः । ४ अत्रेति गो० पाठः ।

ततस्तु रामस्य निशम्य वाक्यं विभीषणः शक्रसमानवीर्यः ।
शशंस रामस्य बलप्रवेकं महात्मनां राक्षसपुंगवानाम् ॥ ॥ १३ ॥

योऽसौ गजस्कन्धगतो महात्मा नरोहितार्कोपमताम्रवक्त्रः ।
सैन्यस्य मध्यात्तमशिरोऽपनीति कृत्वापदानं स्वेनमर्दाह राजन् ॥ ॥ १४ ॥

योऽसौ रथस्थो मृगराजकेतुः शक्रधनुःप्रतिमं विकृष्य ।
करीव मातङ्गयूथिपतीन्द्रः स इन्द्रजिन्नाम नरास्त्रदः ॥ ॥ १५ ॥

यश्चैष विन्ध्यास्तमहेन्द्रकल्पौ स्थलीडनिर्योगति तीव्र ।
विरूपाक्षयक्षाक्षमलक्ष्यमाणो नातिक्षतोऽनिविद्धगात्रः ॥ ॥ १६ ॥

योऽसौ गजाकोपितमत्तनागं तप्तानिलप्रख्यमहाप्रभावम् ।
गजे स्थरे गजमेवं ॥ ॥ १७ ॥

योऽसौ हयं काञ्चनचित्रभाण्डं सुनीथमित्येव ।
यमं समुद्यान्तमिवान्तकाय एषोऽतिनिर्वाणमुखः ॥ ॥ १८ ॥

गो० टी०-तत्रेति । [illegible] प्रसादादिति [illegible] पितामहो ब्रह्मा तथा पशोपतिः [illegible] रुद्रमुपतिष्ठेति [illegible]

१३] ति० टी०-[illegible]

रा० टी०-तत्र इति । [illegible] तस्य राक्षसमुख्यस्य [illegible] तत्र दृष्टवान् ॥ १३ ॥

गो० टी०-तत्र इति । [illegible] न मौलिकल्पिति भेदः । [illegible] तत्रोपमानमाह [illegible] ॥ १४ ॥

१४] ति० टी०-[illegible] शिरः संछिनत्तीति ॥ १४ ॥

रा० टी०-तत्रादावाह-[illegible] इत्यादिभिः । [illegible] तस्य ताम्रवर्णं मुखं च वर्णयति । [illegible] तमेवमवस्थमवेहि [illegible] इति योजना ॥ १४ ॥

गो० टी०-योऽसावित्यादि । [illegible] ताम्रवर्णं मुखं च । [illegible] सुखराग इत्यर्थः । योऽसौ गजस्कन्धगतो दृष्टस्त्वया गजस्कन्धगतः स्वशरीरभारासहिष्णुः करेणुरिति एवमाकारं रावणपुत्रमवेहि ॥ १४ ॥

१५] ति० टी०-अथ विद्वला दृष्टा यस्य सः, तथा वरेण ब्रह्मदत्तवरेण प्रधानो राक्षसश्रेष्ठः ॥ १५ ॥

रा० टी०-य इति । मृगराजः मृगराजेत्यादिचिह्नः केतु-[illegible] ॥ १५ ॥

गो० टी०-यश्चेत्यादि । [illegible] विन्ध्यस्य [illegible] इवेति शेषः सोऽतिनिर्वाणः ॥ १६ ॥

रा० टी०-यश्चेति । [illegible] अनिर्वाणः [illegible] आकर्षणमित्यर्थः । अतिनिर्वाणमित्यादार्षम् ॥ १६ ॥

१७] ति० टी०-[illegible] गजमालम्ब्य तिष्ठति ॥ १७ ॥

रा० टी०-योऽसावित्यादि । [illegible] यो गजेति स एष महोदरो नाम ॥ १७ ॥

गो० टी०-योऽसावित्यादि । [illegible] स्वनो विनाशकालाकृष्टः [illegible] स्वनो यस्य तम् । यमभिति क्रियाविशेषणम् ॥ १७ ॥

१८] ति० टी०-[illegible] भाण्डानि यस्य तमथम् । विभीषणस्य ॥ १८ ॥

---

१ ऽपि तो. पाठः । २ ऽकाशमिति तो. पाठः ।

यश्चाप शूल निशितं प्रगृह्य विद्युत्प्रभं किंकरवज्रवेगम् ।
दृप्तेन्द्रमास्थाय शशिप्रकाशमायाति योऽसौ त्रिशिरा यशस्वी ॥ ॥ १९ ॥

अक्षी च जीमूतनिकाशरूपः कुम्भः पृथुव्यूढसुजातवक्षाः ।
समाहितः पन्नगराजकेतुर्विस्फारयन्यौति धनुर्विधुन्वन् ॥ ॥ २० ॥

यश्चेष जाम्बूनदवज्रजुष्टं दीप्तं सधूमं परिघं प्रगृह्य ।
आयाति रक्षोबलकेतुभूतो योऽसौ निकुम्भोऽद्भुतवीरकर्मा ॥ ॥ २१ ॥

यश्चैव चापासिशरौघजुष्टं पताकिनं पावकदीप्तरूपम् ।
रथं समास्थाय विभात्युदग्रो नरान्तकोऽसौ नगशृङ्गयोधी ॥ ॥ २२ ॥

यश्चैष नानाविधघोररूपैर्व्याघ्रोष्ट्रनागेन्द्रमृगाश्ववक्त्रैः ।
भूतैष्टितो भाति विवृत्तनेत्रैर्योऽसौ सुराणामपि दर्पहन्ता ॥ ॥ २३ ॥

यश्चैतदिन्दुपतिमं विभाति च्छत्रं सितं सूक्ष्मशलाकमग्र्यम् ।
वीर्यैर्न रक्षोधिपतिर्महात्मा भूतैष्टितो रुद्र इवावभाति ॥ ॥ २४ ॥

रा० टी०—य इति । काञ्चनमयं चित्रं भाण्डमाभरणं यस्य स एवम्भूतः योऽसौ मरीचिनद्धं दीप्तिसहितं प्राप्तं सधूमं सन्ध्याभ्रमिव शोभमानं सन्ध्याभ्रगिरिप्रकाशमिव प्रकाशते स त्रिशिराः परिघः ॥ १८ ॥

गो० टी०—योऽसौ हयमिति । काञ्चनचित्रभाण्डं काञ्चनमयचित्रभाण्डम् । स्यादुच्चलक्षभाजन इत्यमरः । अत्र च सन्ध्याभ्रगिरिप्रकाशं सन्ध्याभ्रपुञ्जगिरिप्रकाशम् इवार्थः । मरीचिनद्धं किरणैर्बद्धं प्राप्तमुत्पन्नं गर्जतीति पूर्वश्लोकादनुषक्तम् । स च त्रिशिराः त्रिशिरोनामकः ॥ १८ ॥

१९] ति० टी०—किंकरभूता वज्रवेगो यस्मिंस्तम् । त्रिशिरा, यशसि कपिविशिरः ॥ १९ ॥

२० टी० य इति । किंकर इवातिशयित्वात् किंकरः वज्रवत् वेगो यस्मिन् तत् विद्युत्प्रभं शूलं प्रगृह्य शशिप्रकाशं शुभ्रमाश्रित्य यो वानुषंग इव यः एष आयाति सोऽसौ त्रिशिरा ॥ १९ ॥

गो० टी०—य इति । किंकरो वज्रवेगो यस्य तत् किंकरवज्रवेगम् । उपमानाच्चेत्यर्थः । तृषेन्द्रं तृषभेन्द्रम् । शोभो पोषः शोभाविस्पर्शः आयाति सोऽसौ त्रिशिरा इत्यपि पठन्ति । १९ ॥

२०] ति० टी०—कुम्भस्तथा ॥ २० ॥

रा० टी०—असाविति । जीमूतनिकाशो मेघसदृशं रूपं यस्य स पृथु पीनं व्यूढं विशालं सुजातं सुन्दरं वक्षो यस्य स तथोक्तः । समाहितः सावधानः । ज्याविस्फारयन् धनुष्टङ्कारयन् कर्षन् । पुनर्लीलया विधुन्वन् असौ कुम्भो भाति । अत्र वर्तमानप्रयोगः सन्निहितत्वादिति भावः ॥ २० ॥

२१] ति० टी०—जाम्बूनदवज्रजुष्टं जाम्बूनदेन वज्रैरादित्यैश्च युक्तम्, अत एव दीप्तम् सधूमं नीलमणिकान्त्या सधूममिव ॥ २१ ॥

रा० टी०—य इति । जाम्बूनदवज्राभ्यां सुवर्णहीरकाभ्यां जुष्टं संयुक्तं सधूमं संयुक्तनीलमणिना धूमविशिष्टत्वेन प्रतीयमानं परिघं प्रगृह्य य एवं आयाति यश्च अद्भुतवीरकर्मा सोऽसौ निकुम्भः ॥ २१ ॥

गो० टी०—यश्चेति । जाम्बूनदवज्राभ्यामन्योन्यमिलिताभ्यां जुष्टम् अत एव दीप्तं ज्वालायुक्तम् सधूमं सधूममिव स्थितम् अभेदनिर्देशः सर्वथा साहश्यप्रतिपत्त्यै । रक्षोबलकेतुभूतः रक्षोबलप्रधानभूत इत्यर्थः ॥ २१ ॥

२२] ति० टी०—पावकवदीप्तं रूपं यस्य [illegible] रावणः क्रूरयोधी । प्रतियोद्धृभावाद्भुजकण्डूनिदृश्यर्थमिति भावः ॥ २२ ॥

रा० टी०—य इति । चापादिभिः शैलितं रथं समास्थाय उदग्रो अत्युन्नतः योऽसौ विभाति सः नगशृङ्गयोधी नरान्तकः तदभिधः । नगशृङ्गयोद्धृत्वेन स्वसदृशं संहारं स न लभते इति सन्निहितम् ॥ २२ ॥

गो० टी०—यश्चेष इति । उदग्रः उच्चः । नगशृङ्गैः साधनैः युध्यत इति नगशृङ्गयोधी । प्रतियोद्धृभावात् भुजकण्डूनिदृश्यर्थं नगैः सह युध्यत इति भावः ॥ २२ ॥

२३] ति० टी०—योऽसौ कोऽसौ त्वर्थः—यः सुराणामपि दर्पहा । रावण इति शेषः । भूतैष्टितगणैः ॥ २३ ॥

२४] ति० टी०—काले तथा—यश्चेति । यश्च इत्यनुषङ्गः । सप्तादिगुणकं छत्रं भात्यनेन [illegible] ॥ २४ ॥

[illegible] किरीटी चलकुण्डलास्यो नगेन्द्रविन्ध्योपमधीरकायः ।
[illegible]न्द्रवैवस्वतदर्पहन्ता रक्षोधिपः सूर्य इवावभाति ॥ ॥ २५ ॥

मत्युवाच ततो रामो विभीषणमरिंदमैः । अहो दीप्तिमहातेजा रावणो राक्षसेश्वरः ॥ २६ ॥
आदित्य इव दुष्प्रेक्ष्यो रश्मिभिर्भाति रावणः । न त्वर्कं लक्षये लक्ष्य रूपं तेजःसमावृतम् ॥ २७ ॥
देवदानववीराणां वपुर्नैवंविधं भवेत् । यादृशं राक्षसेन्द्रस्य वपुरेतद्विराजते ॥ २८ ॥
सर्वे पर्वतसंकाशाः सर्वे परिघबाहवः । सर्वे दीप्तास्यनयना योधास्तस्य महात्मनः ॥ २९ ॥
विभाति रक्षोगणोऽयं भीमैर्भीमैर्दशैनैः । [illegible] ॥ ३० ॥
दिष्ट्याऽप्यद्य पापात्मा एष दृष्टिपथं गतः । [illegible] ॥ ३१ ॥
एवमुक्त्वा ततो रामो [illegible] ॥ ३२ ॥

ततः स रक्षोधिपतिर्महात्मा रक्षोगणान्वारणयन्महात्मा ।
द्वारेषु चर्यागृहगोपुरेषु सुनिष्ठितात्मा [illegible] ॥ ३३ ॥

रा० टी०—य इति । मध्ये [illegible] मेघैरिव [illegible] गायतीति वक्ष्यति । [illegible] पीतो [illegible] पूर्णेन्दो रूप इव भवति ॥ २४ ॥

गो० टी०—अथ [illegible] ॥ २४ ॥

[illegible]] ति० टी०—[illegible] ॥ २५ ॥ २६ ॥

रा० टी०—रावणनेवाह—अस्तमिति । [illegible] इव आभाति ॥ २५ ॥

गो० टी०—अस्तमिति । [illegible] ॥ २५ ॥

—इतीति । रामो विभीषणं पप्रच्छ [illegible] महातेजा रावणः, अहो आश्चर्यं दीप्तः ॥ २६ ॥

गो० टी०—अहो इति । दीप्तः कान्तिमान् [illegible] महाप्रतापः ॥ २६ ॥

२७-२९] ति० टी०—न त्वर्कं [illegible] तेजःसमावृतमिति । [illegible] ॥ २७ ॥

रा० टी०—आश्चर्यमेवाह—आदित्य इति । [illegible] मिति: आदित्य इव दुष्प्रेक्षोऽस्तीति शेषः अहं न त्वर्कं [illegible] तेजसमावृतस्य रूपं त्वर्कं न लक्षये ॥ २७ ॥

गो० टी०—आदित्य इति । आदित्य इव रविमिर्भाति [illegible] ॥ २७ ॥

रा० टी०—[illegible] ॥ २८ ॥

गो० टी०—[illegible] ॥ २८ ॥

रा० टी०—[illegible] ॥ २९ ॥

गो० टी०—[illegible] ॥ २९ ॥

३०] ति० टी०—[illegible] ॥ ३० ॥

रा० टी०—[illegible] ॥ ३० ॥

गो० टी०—[illegible] ॥ ३० ॥

३१] ति० टी०—[illegible] ॥ ३१ ॥

रा० टी०—[illegible] ॥ ३१ ॥

गो० टी०—[illegible] ॥ ३१ ॥

३२] ति० टी०—[illegible] ॥ ३२ ॥

रा० टी०—[illegible] ॥ ३२ ॥

गो० टी०—[illegible] ॥ ३२ ॥

रा० टी०—[illegible] ॥ ३३ ॥

गो० टी०—[illegible] ॥ ३३ ॥

---

१ [illegible] पो० पाठः । २ दीप्त इति गो. रा. पाठः । ३ [illegible] इति गो. पाठः । ४ [illegible] इति गो. पाठः । ५ [illegible] इति रा. पाठः । ६ [illegible] इति गो. पाठः । ७ [illegible] ८ [illegible] इति रा. पाठः । ९ [illegible] इति गो. पाठः । १० [illegible] ११ [illegible] इति गो. पाठः । १२ [illegible] इति गो. पाठः ।

इहागतं मां सहितं भवद्भिर्वनौकसश्छिद्रमिदं विदित्वा ।
शून्यां पुरीं दुष्प्रसहां प्रमथ्य प्रधर्षयेयुः सहसा समेताः ॥ ३४ ॥
विसर्जयित्वा सचिवांस्ततस्तान्गतेषु रक्षःसु यथानियोगम् ।
व्यदारयद्वानरसागरौघं महाह्रदः पूर्णमिवार्णवौघम् ॥ ३५ ॥
तमापतन्तं सहसा समीक्ष्य दीप्तेषुचापं युधि राक्षसेन्द्रम् ।
महत्समुत्पाट्य महीधराग्रं दुद्राव रक्षोधिपतिं हरीशः ॥ ३६ ॥
तच्छैलशृङ्गं बहुवृक्षमानुं प्रगृह्य चिक्षेप निशाचराय ।
तमापतन्तं सहसा समीक्ष्य चिच्छेद बाणैस्तपनीयपुङ्खैः ॥ ३७ ॥
तस्मिन्महद्दोलमसानुवृक्षे शृङ्गे विदीर्णे पतिते पृथिव्याम् ।
महाहिकल्पं शरमन्तकाभं समादधे राक्षसलोकनाथः ॥ ३८ ॥
स तं गृहीत्वानिलतुल्यवेगं सविस्फुलिङ्गज्वलनप्रकाशम् ।
बाणं महेन्द्राशनितुल्यवेगं चिक्षेप सुग्रीववधाय हृष्टः ॥ ३९ ॥
स सायको रावणबाहुमुक्तः शक्राशनिस्पर्शवपुः प्रकाशम् ।
सुग्रीवमासाद्य विभेद वेगाद्धरेस्तनुं क्रौञ्चमिवोग्रशक्तिः ॥ ४० ॥

३४] ति० टी०-इदं छिद्रं रणभूमौ सपरिवारस्यागमनम् ॥ ३४ ॥

रा० टी०-सत्प्रयोजनमाह-इहेति । भवद्भिः सहितमिहागतं मामिदं छिद्रमवकाशं विदित्वा समेताः वनौकसः पुरीं लङ्कां शून्यां रक्षोभ्य प्रधर्षयेयुः पराभवं प्रापयेयुः ॥ ३४ ॥

गो० टी०-इहेति । इहागतं मां विदित्वा इदमिदं छिद्रं [illegible] प्रमथ्य ध्वंसित्वा । प्रधर्षयेयुः अभिभवेयुः॥३४॥

३५] ति० टी०-अर्णवौघं समुद्रजलसमूहम् ॥ ३५ ॥

गो० टी०-विसर्जयित्वेति । सचिवान् विसर्जयित्वा [illegible] स्वकार्यं निष्पन्नं ज्ञात्वा यथानियोगं गतेषु सत्सु महाह्रदः पूर्णमर्णवौघमिव वानरसागरौघं व्यदारयत् रावण इति शेषः ॥ ३५ ॥

गो० टी०-विसर्जयित्वेति । सहितान् संमिलितान् । [illegible] महाह्रदः ॥ ३५ ॥

३६] ति० टी०-दीप्ता धनुर्ज्याघोषो यस्य तम् ॥ ३६ ॥

रा० टी०-तमिति । हरीशः सुग्रीवः आपतन्तं राक्षसेन्द्रं समीक्ष्य महत् महीधराग्रं गिरिश्रेष्ठं समुत्पाट्य रक्षोधिपतिं दुद्राव जघान ॥ ३६ ॥

गो० टी०-तमिति । दीप्तः इषुचापे यस्य स तथोक्तः । युधि संयुगसंसक्तं सहसा आपतन्तं राक्षसेन्द्रं समीक्ष्य महीधराग्रं पर्वतश्रेष्ठं समुत्पाट्य हरीशः प्रगृह्य रक्षोधिपतिं दुद्राव ॥ ३६ ॥

३७-३९] ति० टी०-शृङ्गशब्दोऽपेक्षादिः पुंस्यपि ३७-३९

रा० टी०-तदिति । बहुवृक्षसानुमनेकविधतरुप्रस्तरविशिष्टं तत् शैलशृङ्गं प्रगृह्य विशाचराय चिक्षेप शृंगशब्दः अर्धर्चादित्वात्पुमानपि आपतन्तं शृङ्गं समीक्ष्य बाणैः चिच्छेद रावण इति शेषः ॥ ३७ ॥

रा० टी०-तस्मिन्निति । महद्दोलाः उन्नतसानुवृक्षाः यस्मिन् तस्मिन् शृंगे विदीर्णे पतिते च सति महाहिकल्पम् अन्तकाभं [illegible] शरं राक्षसलोकनाथः समादधे ॥ ३८ ॥

गो० टी०-बहुवृक्षसानुं । बहुतरुयुततटम् । तपनीयं स्वर्णम् ॥ ३७ ॥ ३८ ॥

रा० टी०-स इति । अनिलतुल्यवेगं सविस्फुलिङ्गो [illegible] यो ज्वलनो वह्निः तद्वत्प्रकाशो यस्य तं बाणं [illegible] चिक्षेप ॥ ३९ ॥

गो० टी०-स तमिति । महेन्द्राशनिः वज्रम् । औत्पातिकाशनिव्याहतये महेन्द्रपदम् । अथवा महेन्द्रसंबन्धीति अभ्यासवता शुक्लत्वेनातिवेगद्योतनाय ॥ ३९ ॥

४०] ति० टी०-शक्राशनिस्पर्शवपुः [illegible] प्राप्य, अर्थात्तमेव विभेद । गृहीतोपकरणः क्रौञ्चमिव ॥४०॥

रा० टी०-स इति । रावणबाहुमुक्तः [illegible] यः सायकः शक्राशनिस्पर्शवपुः वज्रतुल्यशरीरः [illegible] प्राप्य, गृहीतोपकरणः क्रौञ्चमिव विभेद ॥ ४० ॥

गो० टी०-स इति । [illegible] यस्य [illegible] ॥ ४० ॥

१ विक्षेपेति गो. पाठः । २ निर्याण इति गो. पाठः । ३ प्रस्थानं गो. पाठः ।

स सायकार्तो विपरीतचेताः कृच्छ्रात्पृथिव्यां निपपात वीरः ।
स वीक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥ ॥ ४१ ॥
ततो गवाक्षो गवयः सुषेणस्त्वथर्षभो ज्योतिरथो नलश्च ।
शैलान्समुत्पाट्य विवृद्धकायाः पदुद्रुवुस्तं प्रति राक्षसेन्द्रम् ॥ ॥ ४२ ॥
तेषां प्रहारान्स चकार मोघान्क्षोभिणो वार्णसनैः शिताग्रैः ।
तान्वानरेन्द्रानपि बाणजालैर्विभेद जाम्बूनदचित्रपुङ्खैः ॥
ते वानरेन्द्रास्त्रिदशारिबाणैर्भिन्ना निपेतुर्भुवि भीमकायाः ॥ ॥ ४३ ॥
ततस्तु तद्वानरसैन्यमुग्रं प्रच्छादयामास स बाणजालैः ।
ते वध्यमानाः पतिताश्च तेन वानयमाना भयशल्यविद्धाः ॥
शाखामृगा रावणसायकार्ता जग्मुः शरण्यं शरणं स्म रामम् ॥ ॥ ४४ ॥
ततो महात्मा स धनुर्धनुष्मानादाय रामः सहसा जगाम ।
तं लक्ष्मणः प्राञ्जलिरभ्युपेत्य उवाच रामं परमार्थयुक्तम् ॥ ॥ ४५ ॥
काममार्य सुपर्याप्तो वधायास्य दुरात्मनः । विधमिष्याम्यहं चैतन्मनुजानीहि मां विभो ॥ ४६ ॥
तमब्रवीन्महातेजा रामः सत्यपराक्रमः । गच्छ यत्नपरश्चापि भव लक्ष्मण संयुगे ॥ ४७ ॥

४१-४३] ति० टी०-विपरीतचेताः । अर्जुना इति यावत् ॥ ४१-४३ ॥

रा० टी०-स इति । सायकैर्नार्तः पीडितः अत एव विपरीतचेताः स वीरः पृथिव्यां निपपात भूमौ पतितं तं वीक्ष्य यातुधानाः प्रहृष्टाः बभूवुरिति शेषः ॥ ४१ ॥

गो० टी०-स सायकेति। विपरीतचेताः भ्रान्तचित्तः ४१

रा० टी०-तत इति । गवाक्षप्रभृतयश्चैते समुत्पत्य उत्थाप्य राक्षसेन्द्रं प्रदुद्रुवुः ॥ ४२ ॥

रा० टी०-तेषामिति । स्रोधिपः तेषां गवाक्षादीनां प्रहारान् बाणकृतैः मोघान् विफलांश्चकार तत्प्रक्षिप्तशैलान् विदारयामासेत्यर्थः वानरेन्द्रान् गवाक्षादीनपि बाणजालैर्विभेद ४३

रा० टी०-ते इति । त्रिदशारेः रावणस्य बाणैर्भिन्नाः वानरेन्द्राः भुवि निपेतुः ततोऽनन्तरमुग्रवानरसैन्यं बाणजालैः स रावणः छादयामास ॥ ४४ ॥

गो० टी०-तत इति। ज्योतिर्मुखः ज्योतिर्मुखनलौ ४२-४४।५

४५] ति० टी०-भयमेव शल्यं तेन विद्धाः शरण्यं रामं शरणं जग्मुः ॥ ४४ ॥

रा० टी०-ते इति । वध्यमानाः अत एव रावणसायकार्ताः अत एव भयशल्येन भयङ्करशरेण विद्धाः अत एव पतिताः कचित् कचित् स्खलिताः ते वानराः शरणं दुर्जनविनाशकं वरण्यं रामं जग्मुः ॥ ४५ ॥

गो० टी०-ते वध्यमाना इति । ते प्रसिद्धाः वानरेन्द्राः [illegible] वध्यमानाः सन्तः [illegible] ततः पूर्तिमुखः [illegible] रक्षकान्तरादर्धनाशनः [illegible] ४५

शल्यविद्धाः बाणहेतुना भयङ्करप्रत्यक्षा विद्धाः [illegible] वनजान्तिर्वैनतुः [illegible] सायकैरिति सन्तः शरण्यं सर्वलोकशरणार्थं राघं शरणं जग्मुः। एतेनात्रैव शरणागतिप्रयोजिका [illegible] ईशकालावेकादिकलक्षिणमा इत्युक्तम् ॥ ४५ ॥

४५] ति० टी०-[illegible] स भरतादेर्ग्यन्वयः ॥ ४५ ॥

रा० टी०-तत इति। ततोऽनन्तरं धनुष्मान् प्रशस्तधनुष्मानपि स प्रसिद्धो रामः आदाय लक्ष्मणः तं गच्छन्तं रामं प्राप्तवत्। सन् अभ्युपेत्य परमार्थयुक्तं स्वनयुक्तं च ॥ ४६ ॥

गो० टी०-शरणागतरक्षकत्वेन शरण्यत्वमुक्तम्—तत इति । अत्र पूर्वरात्रेऽपस्थितत्वेन तत्याः यथाकालत्वं तत्राय तत इत्युक्तम्। प्रशस्तधनुरक्षण इत्यर्थः। महात्मा शरणागतिरक्षणेऽतत्परः धनुष्मान् प्रशस्तधनुष्कः धनुर्दण्डसमेत इत्यर्थः। सहसेत्यनेन लक्ष्मणः स्वयं गमिष्यामीति तत्पूर्वमेव प्राप्तित्राणत्वरया सत्वरः सन् जगामेत्युक्तम्। तत्रैव वक्तुमुचितं प्रभातमित्याह—तमिति । तम् आर्तत्राणत्वरया आगतम् लक्ष्मणः रामैकपुरुषार्थसंपन्नः । अनतिक्रमणाय साधु तिष्ठतीति—प्राञ्जलिरिति । अभ्युपेत्य अभितः इत्येत्य । [illegible] लक्ष्मणागमनमजानन्निव नानापार्श्वेषु रामैतत्कथा आसीत् वर्तमत्ते । परमार्थयुक्तं न तूपचारयुक्तम् । यद्वा परमार्थ [illegible] परमप्रयोजनयुक्तम् । मेघविविदे केकुर्वत्व जेयभूमं [illegible] परमप्रयोजनयुक्तम् ॥ ४६ ॥

४६-४७] ति० टी०-यत्नवान् । अहमिति शेषः ॥ ४६-४७ ॥

रावणो हि महावीर्यो रणेऽद्भुतपराक्रमः । त्रैलोक्येनापि संक्रुद्धो दुष्प्रसह्यो न संशयः ॥ ४८ ॥
तस्यच्छिद्राणि मार्गस्व स्वच्छिद्राणि च लक्षय । चक्षुषा धनुषात्मानं गोपायस्व समाहितः ॥ ४९ ॥
राघवस्य वचः श्रुत्वा [1]संपरिष्वज्य पूज्य च । अभिवाद्य च रामाय ययौ सौमित्रिराहवे ॥ ५० ॥
स रावणं वारणहस्तबाहुं ददर्श भीमोद्यतदीप्तचापम् ।
प्रच्छादयन्तं शरवृष्टिजालैस्तान्वानरान्भिन्नविकीर्णदेहान् ॥ ५१ ॥
समालोक्य महातेजा हनूमान्मारुतात्मजः । निवार्य शरजालानि विद्रुद्राव स रावणम् ॥ ५२ ॥
रथं तस्य समासाद्य बाहुमुद्यम्य दक्षिणम् । त्रासयन्रावणं धीमान्हनूमान्वाक्यमब्रवीत् ॥ ५३ ॥
देवदानवगन्धर्वैर्यक्षैश्च सह राक्षसैः । अवध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयम् ॥ ५४ ॥

रा० टी०—तदाकारणा०—काममिति । हे आर्य अस्य दुरात्मनः परदारापहरणविक्रमदुर्वृत्तेः कार्यं प्रकर्षं करोमि अतो गामेव आज्ञापय ॥ ४७ ॥

गो० टी०—कार्यमिति । हे आर्य, अस्य दुरात्मनः परदारापहरणविक्रमदुर्वृत्तेः कार्यं प्रकर्षं करोमि । उपपत्तिं दर्शयति । तथापि नीचं भवता योद्धुमनर्हम् अहं वधिष्यामि । तदाज्ञैव प्रमाणं नीचैरहं न योद्धुमर्हे इति भावः । यद्वा अस्य दुरात्मनः परदारापहरणविक्रमदुर्वृत्तेः कार्यं प्रकर्षं करोमि । यदि रावणेन सन्धातामित्याह—अथवा नेति । यथा रावणं स्वं मां च श्रेयस्तमबुध्यसे तथा कुरु । अतस्तदाज्ञामेव मे प्रमाणमित्यर्थः । स्वस्यैव पक्षनिकरमिति भावः ॥ ४७ ॥

रा० टी०—तदाकारयेति । रामश्च तदाकारयत्पदं [2]तदाकारयत्पदं [3]तदाकारयत्पदं [4]तदाकारयत्पदं अत्र ॥ ४८ ॥

गो० टी०—त्रैलोक्येति । त्रैलोक्यवन्तम् । महातेजाः तात्त्विकतेजोयुक्तः [5]तेजोयुक्तो [6]तेजोयुक्तो [7]तेजोयुक्तो । सति कस्मिन्नित्याह सति । [8]तस्मिन्नित्यर्थः । [9]तस्मिन्नित्यर्थः अब्रवीत् ॥ ४८ ॥

रा० टी०—गच्छेति । भीमधनुर्दर्शनेनादरः [10]प्रदर्शितः [11]प्रदर्शितः [12]प्रदर्शितः [13]प्रदर्शितः । पुनः प्रत्यागमनं मा भूत् यथा युद्धसंभ्रमे [14]तथा [15]तथा [16]तथा [17]तथा । प्रत्यागमनाशङ्कयैव हेतुमाह—राघवस्य इति । अद्भुतपराक्रमः [18]अद्भुतपराक्रमः [19]अद्भुतपराक्रमः [20]अद्भुतपराक्रमः इत्यादिः [21]अद्भुतपराक्रमः [22]अद्भुतपराक्रमः [23]अद्भुतपराक्रमः [24]अद्भुतपराक्रमः [25]अद्भुतपराक्रमः [26]अद्भुतपराक्रमः [27]अद्भुतपराक्रमः [28]अद्भुतपराक्रमः [29]अद्भुतपराक्रमः [30]अद्भुतपराक्रमः [31]अद्भुतपराक्रमः [32]अद्भुतपराक्रमः [33]अद्भुतपराक्रमः [34]अद्भुतपराक्रमः [35]अद्भुतपराक्रमः [36]अद्भुतपराक्रमः [37]अद्भुतपराक्रमः [38]अद्भुतपराक्रमः [39]अद्भुतपराक्रमः [40]अद्भुतपराक्रमः [41]अद्भुतपराक्रमः [42]अद्भुतपराक्रमः [43]अद्भुतपराक्रमः [44]अद्भुतपराक्रमः [45]अद्भुतपराक्रमः [46]अद्भुतपराक्रमः [47]अद्भुतपराक्रमः [48]अद्भुतपराक्रमः [49]अद्भुतपराक्रमः [50]अद्भुतपराक्रमः [51]अद्भुतपराक्रमः [52]अद्भुतपराक्रमः [53]अद्भुतपराक्रमः [54]अद्भुतपराक्रमः [55]अद्भुतपराक्रमः [56]अद्भुतपराक्रमः [57]अद्भुतपराक्रमः [58]अद्भुतपराक्रमः [59]अद्भुतपराक्रमः [60]अद्भुतपराक्रमः

एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः । विषमिष्यति ते देहे भूतात्मानं चिरोषितम् ॥ ५५ ॥
श्रुत्वा हनूमतो वाक्यं रावणो भीमविक्रमः । संरक्तनयनः क्रोधादिदं वचनमब्रवीत् ॥ ५६ ॥
क्षिप्रं प्रहर निःशङ्कं स्थिरां कीर्तिमवाप्नुहि । ततस्त्वां ज्ञातविक्रान्तं नाशयिष्यामि वानर ॥ ५७ ॥
रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत् । प्रहृतं हि मया पूर्वमक्षं तव सुतं स्मर ॥ ५८ ॥
एवमुक्तो महातेजा रावणो राक्षसेश्वरः । आजघानानिलसुतं तलेनोरसि वीर्यवान् ॥
स तलाभिहतस्तेन चचाल च मुहुर्मुहुः ॥ ५९ ॥
स्थितो मुहूर्तं तेजस्वी स्थैर्यं कृत्वा महामतिः । आजघान च संक्रुद्धस्तलेनेवासदद्विषम् ॥ ६० ॥
ततः स तेनाभिहतो वानरेण महात्मना । दशग्रीवः समाधूतो यथा भूमेर्नलेऽचलः ॥ ६१ ॥
सङ्ग्रामे तं तथा दृष्ट्वा रावणं तलताडितम् । ववृधे वानरः सिद्धा नेदुर्देवाः सुरासुरैः ॥ ६२ ॥
अर्थाश्चास्य महातेजा रावणो वाक्यमब्रवीत् । भाषसे वानर वीर्येण श्लाघनीयोऽसि मे रिपुः ॥ ६३ ॥
सत्यमेवमुक्तस्तु मारुतिर्वाक्यमब्रवीत् । धिगस्तु मम वीर्यस्य यत्त्वं जीवसि रावण ॥ ६४ ॥
सकृत्तु प्रहरेदानीं दुर्बुद्धे किं विकत्थसे । त्वामद्य मामको मुष्टिर्नेष्यति क्षयसदनम् ॥ ६५ ॥
ततो मारुतिवाक्येन कोपस्तस्य प्रवर्धते । संरक्तनयनो गृह्य मुष्टिमाहत्य दक्षिणम् ॥
पातयामास वेगेन वानरोरसि वीर्यवान् ॥ ६६ ॥

५५–५६] ति० टी०–पञ्चशाखः पञ्चाङ्गुलिकः । एष मे दक्षिणो बाहुः ते देहे चिरोषितं भूतात्मानं तव देहाश्रितमिन्द्रियमिष्यति विषयीकरिष्यति ॥ ५५ ॥

रा० टी०–तत्र किं तेनेत्यत आह–एष इति । पञ्चशाखः पञ्चाङ्गुलिसमुद्यत एष मे दक्षिणो बाहुः ते देहे चिरोषितं दीर्घकालं स्थानं प्राणानित्यर्थः विषमिष्यति विनाशयिष्यति ॥ ५५ ॥

रा०टी०–श्रुत्वेति । हनुमतो वाक्यं श्रुत्वा रावणोऽब्रवीत् ॥ ५६ ॥

गो० टी०–एष इति । पञ्चशाखः पञ्चाङ्गुलिकः । उषितं स्थानं विषमिष्यति विनाशयिष्यति । बाहुनाप्यनेकार्थलाभात् ॥ ५५ ॥

५७] ति० टी०–कीर्तिं हनुमानपि रावणं प्रहरत्वानिरूपां कीर्तिम् । ज्ञातविक्रान्तं ज्ञातपराक्रमम् ॥ ५७ ॥

रा० टी०–तदाक्रम्याह–क्षिप्रमिति । क्षिप्रं प्रहर त्वमस्मान् प्रतीत्य त्व स्थिरां कीर्तिं हनुमानपि रावणं प्रति पक्षिप्तवान् इति यशोऽवाप्नुहि ततोऽनन्तरं ज्ञातविक्रान्तं त्वां नाशयिष्यामि ॥ ५८ ॥

गो० टी०–क्षिप्रमिति । स्थिरां कीर्तिमवाप्नुहीति सोपालम्भोक्तिः । हनुमान् रावणापसृत्य प्रहृतवानित्येतादृशीं कीर्तिमवाप्स्यसीत्यर्थः । ज्ञातविक्रान्तं ज्ञातविक्रमम् भावेक्त ॥ ५७ ॥

५८–६०] ति० टी०–रावणस्य वच इति । ज्ञातविक्रमं नाशयिष्यामीत्येवंरूपम् । पूर्वं मया प्रहृतमक्षं तलाभानं सुतं स्मर । मत्पराक्रमज्ञानायेति शेषः । पूर्वमेव ज्ञातत्वादिदानीं किमपि मद्विक्रमविषये ज्ञातव्यं नास्तीति भावः ॥ ५८–६० ॥

रा०टी०–रावणस्येति । पूर्वं मया प्रहृतं तव सुतमक्षं स्मर एतेनापि हतोऽसीत्यामर्षितमुक्तिरत्र वचो वायुसूनुरब्रवीत् ॥ ५९

गो० टी०–रावणस्येति । हनूमद्वचनं ज्ञात्वा तदुचितप्रतिवचनमाह–प्रहृतं हीति ॥ ५९ ॥

रा० टी०–एवमिति । एवमुक्तो रावणः अनिलसुतं तलेनोरसि आजघान ॥ ६० ॥

रा० टी०–स इति । तेन रावणेन तलेनाभिहतः स हनूमान् दशग्रीवः रावणो यथा भूमेर्नलेऽचलः स्थित इति तेनैव तत्र महत्त्वं विवक्षितम् स्थैर्यं स्थविराणामर्थकृत्वा संकुरुस्तत्र नलेन अमरद्विषं रावणमाजघान ॥ ६१ ॥

गो० टी०–एवमुक्त इति । मर्मोद्घाटनेन संघातरोषं इत्यर्थः ॥ ६० ॥

गो० टी०–स इत्यादि । तलेनेति । रावणेन तलेन प्रहरणेन स्वयमपि तलेनैव प्राहरदिति भावः ॥ ६१ ॥

गो० टी०–तत इति । समाधूतः कम्पितः अभूत् । भूकम्पे सति अचलः निश्चेष्टो यथा ॥ ६२–६३ ॥

६१] ति० टी०–समाधूतः कम्पितः यथिचले भूमिकम्पे ६२

रा० टी०–तत इति । तलेन हतेन अभिहतो रावणः यथा भूमिचले भूकम्पे अचलदयौल इव समाधूतः प्रकम्पितोऽभवदिति शेषः ॥ ६२ ॥

६२–६३] ति० टी०–तथा ताडित यिंजक्षापयंस्तादृक्कलकलन्तम् । नेदुः । शंसोपादिति शेषः ॥ ६२ ॥ ६३ ॥

रा० टी०–संग्राम इति । तलताडितं रावणं दृष्ट्वा सुरैरसह ऋषिप्रभृतयः देवाः ब्रह्मादित्रयो वेदाः साधु साध्विति प्रचुः ॥ ६३ ॥

रा० टी०–अर्थेति । महातेजा रावणः आत्मन्य स्वचित्ते स्थिरीकृत्य हे वानर रिपुरपि त्वं वीर्येण मे श्लाघनीयोसीति इति वाक्यमब्रवीत् ॥ ६४ ॥

६४–६५] ति० टी०–वीर्यस्य धिक् । वीर्यं विगर्हितार्थं यत्त्वं जीवसि । मत्तलताडितोऽपीत्यर्थः ॥ ६४–६५ ॥

१ तलेनेति गो. पाठः । २ प्रहृतमिति गो. पाठः । ३ स्थिरमिति गो. पाठः । ४ तलेनेति गो. पाठः । ५ वर्धते गो. पाठः । ६ आजघानेति गो. पाठः । ७ [illegible] । ८ [illegible] । ९ साधिति गो. पाठः । १० तदाक्रम्येति गो. पाठः । ११ वर्धयते गो. पाठः ।

हनूमान्वक्षसि व्यूढे सैंचचाल पुनः पुनः । विह्वलं तं तदा दृष्ट्वा हनूमन्तं महाबलम् ॥ ६७ ॥
रथेनातिरथः शीघ्रं नीलं प्रतिसमभ्यगात् । राक्षसानामधिपतिर्दशग्रीवः प्रतापवान् ॥ ६८ ॥
पन्नगप्रतिमैर्भीमैः परममार्गाभिभेदनैः । शरैरादीपयामास नीलं हरिचमूपतिम् ॥ ६९ ॥
स शरौघसमायस्तो नीलो हरिचमूपतिः । कलेनैकेन शैलाग्रं रक्षोधिपतयेऽसृजत् ॥ ७० ॥
हनूमानपि तेजस्वी समाश्वस्तो महामनाः । विप्रेक्षमाणो युद्धेप्सुः सरोषमिदमब्रवीत् ॥ ७१ ॥
नीलेन सह संयुक्तं रावणं राक्षसेश्वरम् । अन्येन युध्यमानस्य न युक्तमभिधावनम् ॥ ७२ ॥
रावणोऽथ महातेजास्तैं शृंगं सप्तभिः शरैः । आजघान सुतीक्ष्णाग्रैस्तद्विशीर्णं पपात ह ॥ ७३ ॥
तद्विशीर्णं गिरेः शृंगं दृष्ट्वा हरिचमूपतिः । कालाग्निरिव जज्वाल कोपेनैं वरवीरहा ॥ ७४ ॥
सोऽन्धकर्णद्रुमाश्वाल्लांश्चूतांश्चापि सुपुष्पितान् । अन्यांश्च विविधान्वृक्षान्नीलश्चिक्षेप संयुगे ॥ ७५ ॥
स तान्वृक्षान्समासाद्य प्रतिचिच्छेद रावणः । अभ्यवर्षच्च वेगेन शरवर्षेण पावकिम् ॥ ७६ ॥
अभिवृष्टः शरौघेण मेघेनेव महाबलः । हस्वं कृत्वा ततो रूपं ध्वजाग्रे निपपात ह ॥ ७७ ॥
पावकात्मजमालोक्य ध्वजाग्रे समवस्थितम् । जज्वाल रावणः क्रोधात्ततो नीलो ननाद च ॥ ७८ ॥

रा० टी०–राक्षसेनेति । रावणेनैवमुक्तो मारुतिरवधीदाकारमाह—यस्मात् त्वं जीवसि मन्मुष्टिप्रहारं प्राप्यापि प्राणान् न त्यजसि तस्मात् मम वीर्यस्य वीर्यं धिगस्तु ॥६६॥

गो० टी०–धिगस्त्विति । वीर्यमिति द्वितीयाभाव आर्षः स्वं जीवसि । मया प्रहतोऽपीति शेषः । सकृत्तु प्रहर शत्रुणा हते पुनरात्मनः प्रहारो विक्रमपरिपाटीमाटीकत इति हनुमतो हृदयम् । द्वितीयमिति । पुनर्मदनवधानाजीवसीति भावः । दृढे प्रहारान्तरस्यानभिज्ञ किं निरर्थं विकत्थसे श्लाघसे । कत्थ, श्लाघायाम् " इति धातुः । यमक्षयं यमनिलयम् । वैवस्वतपुरीं क्षयातिथिपुरं [1] ॥ ६५ ॥

रा० टी०–सकृदिति । [2] । [3]यदि बलवान् हनूमान् सकृत्प्रहारं दत्त्वा [4]अन्तर्धत्ते, [5]यदि वा यमक्षयं नयिष्यति वेत्स्यति ॥ ६६ ॥

गो० टी०–तत इति । ततः तेनेत्यर्थः । अन्यथा तदाघोतिरित्यनेन । अजलत् यद्वद्ध इत्यर्थः ॥ ६७ ॥

रा० टी०–तत इति । तस्य रावणस्य मारुतिवाक्येन रोषः प्रज्वलेऽत एव संरब्धनयनो रावणः [6]क्षिप्तं मुष्टिमादाय वानरोरसि वेगेन पातयामास सार्द्धश्लोक एकान्वयी॥६७॥

गो० टी०–संरब्धेति । वीर्यवान् बल्यान् । वीर्यं बले वेश्यमरः ॥ ६८ ॥

६७–६९] ति० टी० व्यूढेऽतिविशाले वक्षसि हतो हनुमान्सचचाल ॥ ६७–६९ ॥

रा० टी०–हनूमानिति । व्यूढे विशाले वक्षसि पुनर्हतो हनुमान् चचाल अहं पृथक्—विह्वलमिति । अतिरथो रथीतो रावणः विह्वलं हनूमन्तं दृष्ट्वा रथेन नीलं प्रति समभ्यगात् साकश्लोक एकान्वयी ॥ ६८ ॥ ६९ ॥

गो० टी०–हनूमानित्यर्धम् । व्यूढे विशाले ॥ ६९ ॥

गो० टी०–विह्वलमिति । विह्वलं मूर्छितम् । महाबलं तदानीमपि परैरनभिभवनीयम् ॥ ७० ॥

गो० टी०–राक्षसानामिति । आदीपयामास आ समन्ताज्ज्वालयामास ॥ ७१ ॥

गो० टी०–स इति । समाश्वस्तः आयासवान् । एकेनेत्यनेन इतरेण शस्त्रवारणं गम्यते ॥ ७२ ॥

रा० टी०–पन्नगेति । पन्नगप्रतिमैः शरैः नीलमादीपयामास ॥ ७० ॥

७०] ति० टी०–रक्षोधिपतयेऽसृजत् । अस्यहारं दत्तवानित्यर्थः । समायस्तः खेदितः ॥ ७० ॥

रा० टी०–स इति । शरौघेण समायस्तः पीडितो नीलः एकेन करेण शैलाग्रमुत्पाट्येति शेषः रक्षोधिपतये असृजत् अक्षिपत् ॥ ७१ ॥

७१–७८] ति० टी०–समाश्वस्तो नीलेन सह युद्धकाले प्राप्तसमाश्वासः । पुनर्युद्धेप्सुर्नीलेन सह युद्धाय संसक्तं रावणं विप्रेक्षमाणो रावणं प्रत्यन्येन युध्यमानस्यास्याभिधावनमयुक्तमितीदं वचोऽब्रवीत् ॥ ७२–७८ ॥

रा० टी०–हनूमानिति । समाश्वस्तो युद्धेप्सुरपि हनूमान् अन्येन युध्यमानस्य समीपे अभिधावनं न युक्तमिदं वक्ष्यो नीलेन सह संयुक्तं राक्षसेश्वरं रावणं क्रोधात्ययेऽब्रवीत् ॥ ७२ ॥ ७३ ॥

रा० टी०–रावण इति । सप्तभिः शरैः तं नीलेन प्रक्षिप्तं शृङ्गं रावण आजघान अत एव तच्छृङ्गं विशीर्णं सत् पपात शृङ्गस्यास्य अर्द्धपातित्वात् शक्तिमि, विशेषणं न विरुद्धम् ॥ ७३ ॥

रा० टी०–तदिति । [7]हरिचमूपतिर्नीलो गिरेः शृङ्गं विशीर्णं दृष्ट्वा कोपेन कालाग्निरिव बभूव ॥ ७४ ॥

१ क्षयीति गो. पाठः । २ अपीति गो. पाठ । ३ तत्कृतमिति गो. पाठ । ४ विकीर्णमिति गो. पाठः । ५ नीलमिति गो. पाठः । ६ क्षिप्तं इति गो. पाठः । ७ समुद्यमेति गो. पाठः ।

ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे च तं हरिम् । लक्ष्मणोऽथ हनूमांश्च रामश्चापि सविस्मिताः ॥ ७९ ॥
रावणोऽपि महातेजाः कपिलाघवविस्मितः । अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम् ॥ ८० ॥
ततस्ते चुक्रुशुर्हृष्टा लक्ष्मणप्रमुखाः प्लवंगमाः । नीललाघवसंभ्रान्तं दृष्ट्वा रावणमाहवे ॥ ८१ ॥
वानराणां च नादेन संरब्धो राक्षसेश्वरः । ऐन्द्रमाविध्यहृदयो न किंचित्समचोदयत् ॥ ८२ ॥
आग्नेयेनापि संयुक्तं गृहीत्वा रावणः शरम् । व्यसृजत्तिग्मधारं तं नीलमुद्दिश्य वेगवान् ॥ ८३ ॥
ततोऽब्रवीन्महातेजा रावणो राक्षसेश्वरः । नरे व्यायच्छसे कस्मात्पश्य मे पौरुषं मृधे ॥ ८४ ॥
जीवितं खलु रक्षस्व यदि शक्नोषि वानर । यानि वानरमात्राणि कर्माणि त्वमनेकशः ॥ ८५ ॥
तथापि त्वां मया मुक्तः सायकोऽद्य पातयिष्यति । जीवितं परिरक्षन्तं जीवितार्हं सुदुर्मतिम् ॥ ८६ ॥
एवमुक्त्वा महाबाहू रावणो राक्षसेश्वरः । संधाय बाणमुग्रेण चमूपतिमताडयत् ॥ ८७ ॥
सोऽस्त्रमुक्तेन बाणेन नीलो वक्षसि ताडितः । व्यदेदीप्यतः शुशुभे वै पावकात्मजः ॥ ८८ ॥

रा० टी०—स्व इति । स नीलः स रावणोदीर्णं अस्त्रं विक्षम ॥ ७९ ॥

गो० टी०—हनुमानपीत्यादि । रावणस्य अस्त्रविद्धिति संबन्धः । अभिधानमस्त्रेण युद्धस्यामं पश्यविद्याकर्मविदर्थः । अभिविशेषणं दृश्यम् ॥ ७९–७० ॥

रा० टी०—स्व इति । रावणः तत्र अस्त्रं सर्वास्त्रं अग्नेयेन प्रतिचिच्छेद पर्वतं नीलमवत्सलः ॥ ८० ॥

रा० टी०—अभीति । आग्नेयेन अस्त्रेण अभिहतो नीलः स्वं रूपं कृत्वा व्यवायं निपपात ॥ ७८ ॥

गो० टी०—स्व त्यादिति । स्वमात्मानं रूपं प्राप्य । पावकिं पावकसुतम् ॥ ७८ ॥ ७९ ॥

रा० टी०—पावकेति । ध्वजाग्रे सप्तशिखं [illegible] रामलोकय रावणः क्रोधाज्ज्वलन् नीलस्य तनुं जग्राह ॥

गो० टी०—पावकात्मजमिति । जग्राह गृहीतवान् ॥ ८० ॥ ८१ ॥

७९] ति० टी०—ध्वजाग्रादिति । तं हरिमिति शेषः । रावणशिरसि स्थितेर्दृष्टे केनापि दुष्करत्वाल्लक्ष्मणादयश्चोपि विस्मिताः ॥ ७९ ॥

रा० टी०—ध्वजेति । ध्वजाग्रादौ हरिं नीलं दृष्ट्वा लक्ष्मणादयः विस्मिताः अभवन्निति शेषः ॥ ८० ॥

८०] ति० टी०—न केवलं स्वपक्ष्या एव, अपि तु अन्यरावणोऽपीत्याह—रावणोपीति ॥ ८० ॥

रा० टी०—रावण इति । कपिलाघवेन विस्मितो रावणः आग्नेयमग्निदैवतमस्त्रमाहारयामास ॥ ८१ ॥

गो० टी०—रावणोपीति । आहारयामास आददे ॥ ८२ ॥

८२] ति० टी०—नीललाघवसंभ्रान्तं रावणं दृष्ट्वा लक्ष्मणो लक्ष्मणप्रमुखाः, अत एव हृष्टाः प्लवंगमाश्चुक्रुशुः ॥ ८१ ॥

रा० टी०—[illegible] इति । नीललाघवेन संभ्रान्तं रावणं दृष्ट्वा [illegible] लक्ष्मणप्रमुखाः अत एव हृष्टाः प्लवंगमाः चुक्रुशुः ८२

गो० टी०—तत इति । ततः अस्त्रमाहारयामासेत्यनन्तरं लक्ष्मणप्रमुखाः हृष्टाः प्लवंगमाश्चुक्रुशुरित्यर्थः ॥ ८१ ॥ ८२ ॥

८२–८३] ति० टी०—[illegible] ॥ ८२ ॥

रा० टी०—वानराणामिति । वानराणां नादेन संरब्धः [illegible] ऐन्द्रमस्त्रं [illegible] ॥ ८३ ॥

रा० टी०—संधायेति । बाणेन अग्निदेवतामन्त्रसंस्कृतमग्निपत्रिणं धनुषि संधाय निक्षिप्तो रावणो वीरं [illegible] ॥ ८४ ॥

गो० टी०—वानराणां नेति । वानरेण नीलेनापि [illegible] नीयते संयम्य [illegible] ॥ ८३ ॥ ८४ ॥

८५] ति० टी० [illegible] ॥ ८४ ॥

रा० टी०—स्व इति । रावणोऽब्रवीत् त्वमकाण्डे [illegible] कपे यस्मात् एवमेव छलविशेषेण वानरेषु [illegible] यदसि न त्वं यदि शक्नोसि यदि जीवितं रक्षितुं [illegible] ॥ ८५ ॥

गो० टी०—रूप इत्यादि । कपे वानरप्रकृते हरयः अतो न वानरत्वेन पौनरुक्त्यम् । यानि वानरमात्राणि सूचयति स्वमनेकश इति ॥ तथापीत्यनेन सूचयीव इत्यस्य इत्यर्थः । नन्वेतानि वानरमात्राणि रावणो भीरु वानरातिरिक्तपरिपन्थिकर्मेति मन्यत इत्यवगम्यत इति चेन्न । कपे इत्यादिना भीरुत्वं पूर्वोक्तविरोधात् । पक्षः प्रयुक्तः । अस्त्रमयोजितः अस्त्रमन्त्रेणामिमन्त्रितः । जीवितं परिरक्षन्तं स्वां जीवितार्हं धनविभूतीत्यर्थः ॥ ८६–९० ॥

८५] ति० टी०—आत्मकर्माणीत्यादि स्वपराक्रमोचितानि तानि कर्माणि यूथपि सूचयति ॥ ८५ ॥

८६–८८] ति० टी०—तथापि मया मुक्तोऽस्त्रयोजितो [illegible] सायकस्त्वां पातयिष्यति ॥ ८६–८८ ॥

पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा । जानुभ्यामपतद्भूमौ न तु बाणैर्विभुज्यते ॥ ८९ ॥
विसंज्ञं वानरं दृष्ट्वा दशग्रीवो रणोत्सुकः । रथेनाभ्युदनादेन सौमित्रिमभिदुद्रुवे ॥ ९० ॥
आसाद्य रणमध्येतं वारयित्वा स्थितो ज्वलन् । धनुर्विस्फारयामास राक्षसेन्द्रः प्रतापवान् ॥ ९१ ॥

तमाह सौमित्रिरदीनसत्त्वो विस्फारयन्तं धनुरप्रमेयम् ।
अजेति मामद्य निशाचरेन्द्र न वानरांस्त्वं प्रतियोद्धुमर्हसि ॥ ॥ ९२ ॥
स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च निशम्य राजा ।
आसाद्य सौमित्रिमुपस्थितं तं रोषान्वितं वाचमुवाच रक्षः ॥ ॥ ९३ ॥
विधूपितोऽसि त्वं राघव दृष्ट्या प्राप्तोऽन्तगामी विपरीतबुद्धिः ।
अरिंदमेन यास्यसि मृत्युलोकं संत्रायमानो मम बाणजालैः ॥ ॥ ९४ ॥
तमाह सौमित्रिरविस्मयानो गर्जन्तमुद्वृत्तशिताग्रदंष्ट्रम् ।
गर्जन्ति गर्जन्ति महाप्रभावा विकत्थसे पापकृतां वरिष्ठ ॥ ॥ ९५ ॥

रा० टी०—पार्थिवेति । आत्मसदृशानि स्वयोग्यानि तानि मायाबलेनापि सृजसि तथापि अल्पप्रयोजितः अस्य [illegible] मया शक्तस्त्वयकः जीवितं परित्यक्तं [illegible] योजयिष्यति नियोजयिष्यति सार्द्धश्लोकमन्यत्र ॥ ८७ ॥ ८८ ॥

रा० टी०—एवमिति । राक्षस एवमुक्त्वा भल्लेन अतिमर्मोपघातिना बाणं संधाय चमूपतिमताडयत् ॥ ८८ ॥

रा० टी०—स इति । अमोघेन बाणेन वक्षसि ताडितो [illegible] निश्चेष्टमात्मा महीतले निपपात ॥ ८९ ॥

८९-९०] [illegible] टी०—पितृमाहात्म्यसंयोगादात्मन्यन्यकारितो बाणैर्न विभुज्यते अभुज्यत व्यभुज्यत ॥ ८९ ॥ ९० ॥

गो० टी०—पितृमिति । पितृव्रैः माहात्म्यभंयोगात् हेतोः आत्मनः [illegible] हेतुना जानुभ्यां भूमावपतदेव प्राणैस्तु न विभुज्यत व्यभुज्यत ॥ ८९ ॥

रा० टी०—विसंज्ञमिति । वानरं विसंज्ञं दृष्ट्वा रथेन सौमित्रिमभिदुद्रुवे ॥ ९० ॥

गो० टी०—पितृमाहात्म्येति । पितृमाहात्म्यम् अतेः [illegible] तदनुरूपविषयम् ॥ ८९ ॥ ९० ॥

९१] ति० टी०—ते सौमित्रे इत्यन्विति । सर्वं कपिबलमिति शेषः ॥ ९१ ॥

रा० टी०—आसाद्येति । आसाद्य तत्रस्थं वानरं वारयित्वा तदुपरक्षणमनं निवार्य रणमध्ये ज्वलन् सन् स्थितो राक्षसेन्द्रो धनुर्विस्फारयामास ॥ ९२ ॥

गो० टी०—आसाद्येति । सौमित्रिमासाद्य । वारयित्वा श्रीरामादीन् वारयित्वा । रणमध्ये ज्वलन् स्थितः धनुर्विस्फारयामासेत्यन्वयः ॥ ९३ ॥ ९४ ॥

९२-९३] ति० टी०—अजेति पञ्च ॥ ९२ ॥ ९३ ॥

रा० टी०—तमिति । हे निशाचरेन्द्र मामजेति प्राप्तं जानीहि अतः वानरान् प्रति योद्धुं नार्हसि इति वधः अदीनसत्त्वः सौमित्रिः तं रावणमाह ॥ ९३ ॥

रा० टी०—स इति । रावणो राजा तस्य लक्ष्मणस्य वाक्यं प्रतिपूर्णः घोषो यस्मिन् तं ज्याशब्दं च निशम्य उपस्थितं सौमित्रिमासाद्य रोषान्वितां वाचमुवाच ॥ ९४ ॥

गो० टी०—स तस्येति । रक्षः रक्षोरूपः राजेत्यन्वयः ९

९४] ति० टी०—अन्तगामी[1]यन्तं नाशं प्राप्स्यतीत्यन्तगामी भविष्यति यिनिः । सह युद्धाय प्राणनाशार्थमागमनादि परीप्सद्भिर्देवैरिति । संत्रायमानः पीड्यमानः ॥ ९४ ॥

रा० टी०—तदाकारमाह—विधूपित इति । अन्तगामी विनाशेच्छः अत एव विपरीतबुद्धिः[2] अयोद्धव्ये योद्धव्यविपरीतबुद्धिर्यस्य सः अत एव दिष्ट्या भाग्यवशेन मे दृष्टिमार्गं प्राप्तो यस्त्वमसि स त्वं मम बाणजालैस्संत्रायमानः प्राप्तमात्मानम् मृत्युलोकं यास्यसि ॥ ९४ ॥

गो० टी०—विधूपितेति । अन्तगामी विनाशेच्छः अत एव विपरीतबुद्धिः त्वं दिष्ट्या बहुत्वया दृष्टिमार्गं प्राप्तोसि । संत्रायमानः पीड्यमानः ॥ ९४ ॥

९५] ति० टी०—अविस्मयानस्तद्विक्रमादिदर्शनेऽपि स्मयरहितः । उद्वृत्तातितैक्ष्ण्यादतिसौष्ठवाद्दृढकटा शिता तीक्ष्णा अग्रदंष्ट्रा यस्य ॥ ९५ ॥

रा० टी०—तमिति । अविस्मयानस्सौमित्रिः उद्वृत्तः दृढतरविधिः शितो यमदंष्ट्रा यस्य स एवं स इति वर्णयारूपं तं रावणमाह तदाकारमाह—पापकृतां वरिष्ठ हे पापिनां मध्ये त्वं विकत्थसे यथा बलवानहं जना न गर्जन्ति ॥ ९५ ॥

गो० टी०—तमिति । अविस्मयानः [illegible] उद्वृत्तशिताग्रदंष्ट्रम् [illegible] न गर्जन्ति

१ व्यभुज्यतेति गो. पाठः । २ अन्यथेति मोरिस्थिति गो. पाठः । ३ अन्येहीति गो. [illegible] देवमिति गो. पाठः ।

जानामि वीर्यं तव राक्षसेन्द्र बलं प्रतापं च पराक्रमं च ।
अवस्थितोऽहं शरचापपाणिरागच्छ किं मोघविकत्थनेन ॥ ॥ ९६ ॥
स एवमुक्तः कुपितः सस्मर्ज रक्षोधिपः सप्त शरान्सुपुङ्खान् ।
ताँल्लक्ष्मणः काञ्चनचित्रपुङ्खैश्चिच्छेद बाणैर्निशिताग्रधारैः ॥ ॥ ९७ ॥
तान्प्रेक्षमाणः सहसा निकृत्तान्निकृत्तभोगानिव पन्नगेन्द्रान् ।
लङ्केश्वरः क्रोधवशं जगाम रामस्य चान्यानिशितान्पृषत्कान् ॥ ॥ ९८ ॥
स बाणवर्षं तु ववर्ष तीव्रं रामानुजः कार्मुकसंप्रयुक्तम् ।
क्षुरार्धचन्द्रोत्तमकर्णभल्लैः शरांश्च चिच्छेद न चुक्षुभे च ॥ ॥ ९९ ॥
स बाणजालान्यपि तानि बाणैर्घोराणि पञ्चोरगविग्रहाणि ।
विभिद्य तस्मै लक्ष्मणश्चापवेगेन पुनश्च बाणानभिसंदधेऽस्मै ॥ ॥ १०० ॥
स लक्ष्मणश्चापि शितांश्चिकर्ष तूणीमुखेभ्यः पृतनामुखेषु ।
संधाय चापे ज्वलनप्रकाशानस्मै रक्षोधिपतेर्वधाय ॥ ॥ १०१ ॥
स तान्चिच्छेद हि राक्षसेन्द्रः शितान्शरांल्लक्ष्मणमाजघान ।
शरेण कालाग्निसमप्रभेण स्वयंभुदत्तेन ललाटदेशे ॥ ॥ १०२ ॥
स लक्ष्मणो रावणसायकार्तश्चचाल चापं शिथिलं प्रगृह्य ।
पुनश्च संज्ञां प्रतिलभ्य कृच्छ्राच्चिच्छेद चापं विदशेन्द्रशत्रोः ॥ ॥ १०३ ॥
निकृत्तचापं विमिराजघान बाणैस्तदा दाशरथिः शिताग्रैः ।
स सायकार्तो विचचाल राजा कृच्छ्राच्च संज्ञां पुनरासमाद्य ॥ ॥ १०४ ॥

वां कुर्वन्तीत्यर्थः । पापकृतां दक्षिणेति द्वेषगर्भितविशेषणम् । पापकृद्दक्षिणत्वाद्विकत्थस इत्यर्थः ॥ ९७ ॥

९६–९८] ति० टी०–जानामीति । चौदर्मलाघवार्थमेवेति भावः । मोघविकत्थनेन व्यर्थात्मश्लाघनेन ॥ ९६–९८ ॥

रा० टी०–जानामीति । तव वीर्यादिकं जानामि अतः अवस्थितोऽहं शरचापपाणिरहमवस्थितः अतः आगच्छ मोघविकत्थनेन निष्फलस्वश्लाघया किम् ॥ ९७ ॥

गो० टी०–जानामीति । सोपहासोक्तिः । तव जिनेन यतिवेषेण सीतामपहृतवतः । प्रतापं शत्रुभीषणत्वं पराक्रमं शौर्यम् । शौर्यादीतौ पराक्रमादित्यमरः । मोघविकत्थनेन निष्फलश्लाघनेन ॥ ९८ ॥

रा० टी०–स इति । एवमुक्तो रक्षोधिपः सप्त शरान् ससर्ज क्षिप्तवान् तान् बाणान् लक्ष्मणो बाणैश्चिच्छेद ॥ ९८ ॥

गो० टी०–स इति । निशिते अग्रधारे अग्रपर्वणी वेधसा तैः ९९

रा० टी०–तानिति । निकृत्तभोगान् छिन्नशरीरान् पन्नगेन्द्रानिव तान् बाणान् प्रेक्षमाणो लंकेश्वरः क्रोधवशं जगाम अतः स्व [illegible] इत्यस्त्रज्ञ बाणान् ससर्ज ॥ ९९ ॥

गो० टी०–तानिति । पूर्वोक्तान् बाणान् ॥ १०० ॥

[illegible] रामानुजो रावणोपरि बाणवर्षं-

वर्षं, तदीयं-अतो लक्ष्मणश्चिच्छेदेत्यन्वयः । न चुक्षुभे च । न व्यथामवापेत्यर्थः ॥ ९९–१०२ ॥

रा० टी०–स इति । रामानुजः कार्मुकेण धनुषा संप्रयुक्तं तत्तो बाणवर्षं ववर्ष चकार अथादिभिः शरान् चिच्छेद न चुक्षुभे च । क्रियातिशयद्योतनमेतद्विक्रियया संप्रयुक्तमित्यस्य विशेषेणेत्यनुवादलाभाभ्यः ॥ १०० ॥

गो० टी०–स इति । कार्मुकसंप्रयुक्तं चापमर्पितम् । क्षुरैरिति । क्षुरैः नापितशस्त्रकारैः अर्धचन्द्रैः अर्धचन्द्राकारैः उत्तमैः कर्णिभिः कर्णिकैः भल्लैः उभयधारोपेतैः शरान् रावणशरान् चिच्छेद तथापि न चुक्षुभे न क्षोभितहृद्योभूत् ॥ १०१ ॥

रा० टी०–स इति । बाणजालानि लक्ष्मणश्चापवेगेन [illegible] तानि निष्फलानि पश्यन् विदशारिराजः विभिद्यमिये [illegible] पुनर्मुमोच ॥ १०२ ॥

गो० टी०–स इति । विदशारिराजः राक्षसराजः ॥ १०३

रा० टी०–स इति । लक्ष्मणोपि छिन्नचापान् शरान् [illegible] धिपतेर्वधाय ससर्ज ॥ १०३ ॥

रा० टी०–स इति । स रावणः तान् लक्ष्मणप्रयुक्त

स कृतचापः शरताडितश्च भेदाद्रिगात्रो रुधिरावसिक्तः ।
जग्राह शक्तिं स्वगमुग्रशक्तिः स्वयंमृदन्तीं युधि देवशत्रुः ॥ ॥ १०५ ॥
स तां ज्वलन्मानलसंनिकाशां वित्रासनां संयति वानराणाम् ।
निक्षेप शक्तिं तरसा ज्वलन्तीं सौमित्रये राक्षसराष्ट्रनाथः ॥ ॥ १०६ ॥
तामापतन्तीं भरतानुजोऽस्त्रैर्जघ्यान बाणैश्च हुताशिकल्पैः ।
तथापि सा तस्य विवेश शक्तिर्भुजान्तरं दाशरथेर्विशालम् ॥ ॥ १०७ ॥
स शक्तिमाशक्तिसमाहतः सञ्ज्वाल भूमौ स रघुप्रवीरः ।
तं विह्वलन्तं सहसाभ्युपेत्य जग्राह राजा तरसा भुजाभ्याम् ॥ ॥ १०८ ॥
हिमवान्सन्तरां यक्षलोक्यं वा सहामरैः । शक्यं भुजाभ्यामुद्धर्तुं न शक्यो भरतानुजः ॥ १०९ ॥

तरसा प्रविष्टेऽर्धनिमग्नेन शरेण ललाटदेशे लक्ष्मणमाजघ्ने ॥ १०४ ॥

गो० टी०—स तस्येति । मेरोरुच्चशृङ्गविशेषसंनिकाशान् ॥ १०३ ॥ १०४ ॥

रा० टी०—स इति । रावणसायकार्तो लक्ष्मणः शिथिलं यथा भवति तथा चापं त्यक्त्वा पुनरुत्थानाय प्रचलं पुनरुत्थानं प्रतिलभ्य विह्वलतामगात् ॥ १०४ ॥

रा० टी०—विह्वलन्तमिति । निष्कृष्टं क्षिप्तं चापं यस्य तं रावणं दाशरथिः लक्ष्मणः, विह्वलतामगतवन्तं सायकार्तः राजा रावणो विधृतवान् वैह्वल्यं चास्य पुनरुत्थानाय प्रत्यागमनाय च आसादयामास ॥ १०५ ॥

रा० टी०—स इति । निष्क्रमणापरनामादिविशिष्टः स्वयंमृदन्तीं शक्तिं रावणः स्वयंमृदन्तीं शक्तिं जग्राह ॥ १०६ ॥

गो० टी०—स लक्ष्मण इति । शिथिलं यथा भवति तथा प्रमुच्य ॥ १०५ ॥ १०६ ॥

१०५] ति० टी०—मेरोरुच्चैर्नाम इति संनिकाशः । अथ रावणः प्राणान्तकारः प्रायः प्रकाशान्तरेण जीवनिर्वाहमसंभाव्य ब्रह्मदत्तामोघां शक्तिं जघानेत्याह—जग्राहेति ॥ १०५ ॥

गो० टी०—स कृत्तेति । मेदोऽवयवान्तरत्वमार्षम् । स्वयंमृदन्तीं शक्तिं समधिकसामर्थ्यः ॥ १०७ ॥

१०६] ति० टी०—सधूमानलसंनिकाशां सधूमानलसदृशीम् । राक्षसराष्ट्रनाथो रावणः ॥ १०६ ॥

रा० टी०—स इति । सधूमानलवत् सन्निकाशः प्रकाशो यस्याः तां वानराणां विनाशनीं ज्वलन्तीं शक्तिं राक्षसराष्ट्रनाथः रावणः सौमित्रये निक्षिप्तवान् ॥ १०७ ॥

गो० टी०—स तामिति । राक्षसराष्ट्रनाथः राक्षसराष्ट्रस्वामी ॥ १०४ ॥

१०७] ति० टी०—तथापि सेति । प्राप्तत्वेनामोघत्वादित्यर्थः ॥ १०७ ॥

रा० टी०—तामिति । भरतानुजो लक्ष्मणः तां रावणमुक्तां शक्तिं यद्यपि बाणैरबध्नात् तथापि सा हुताशि शक्तिः भुजान्तरं भुजयोरन्तरालं विवेश वक्षसि सक्षाभवेदित्यर्थः ॥ १०८ ॥

गो० टी०—तामिति । वाहुन्तरं वक्षः ॥ १०९ ॥

१०८] ति० टी०—शक्तिमानपि महाबलवानपि शक्तिसमाहतः सञ्ज्वाल । 'प्रभातं' इति पाठान्तरम् । विह्वलन्तं विकलं भवन्तं राजा रावणस्तरसा बलेन लक्ष्मणं भुजाभ्यां जग्राह । इन्द्रजिद्बद्धयोरपि पुनरुत्थानदर्शनादिदानीमपि पुनर्जीवनभयेन गुरीत्वा समुद्रे प्रक्षेपणीयः । तत्र गते रामोऽहं हायो नष्टभ्रातेत्याकन्दनेनाप्यारम्भः ॥ १०८ ॥

रा० टी०—स इति । शक्तिभान् तदानीन्तननिवारणसमर्थो रघुप्रवीरो लक्ष्मणः शक्तिसमाहतस्तस्य भूमौ जज्वाल सका राजा रावणः विह्वलन्तं तन्मूर्छापरं भुजाभ्यां जग्राह शक्तिमपि समाहृत इत्यनेन तस्य मर्यादापालकत्वं ध्वनितम् ॥ १०९

गो० टी०—स इति । विह्वलन्तं मुह्यन्तम् ॥ ११० ॥

१०९] ति० टी०—न चोद्धर्तुमशक्यतामाह—हिमवदिति । येन रावणेन सुरासुरैः सहिता हिमवदादयोऽपि भुजाभ्यामुद्धर्तुं शक्यमभूतेन भरतानुजः लक्ष्मण उद्धर्तुं शक्यो नास्ति ॥ १०९ ॥

रा० टी०—हिमवानिति । भुजाभ्यामुद्धर्तुमुत्थापयितुं यमरैः सह हिमवदादिशक्यं रावणेनेति शेषः भरतानुजः उद्धर्तुं न शक्यः ॥ ११० ॥

गो० टी०—लक्ष्मणं भुजाभ्यामुद्धर्तुमुक्तं रावणमपि परिहसति—हिमवानिति । शक्यमित्यव्ययम् । हिमवान् पैव हिमवानिति । समस्तसुरासमायुतो हिमवानपि रावणेन भुजाभ्यामुद्धर्तुं शक्यम् । तदेकदेशस्य कैलासस्य पुरा वालितत्वात् । मन्दरः सकलसुरासुरप्रयत्नगभीरतरक्षीरोदक्षोभणभीतोऽपि मन्दरो वा भुजाभ्यामुद्धर्तुं शक्यम् । स्वनिर्जितैरेव सुरैरमृतमथने जलोरितत्वात् । मेरुः सकलकुलाचलसमवेतमथनोऽपि मेरुरपि भुजाभ्यामुद्धर्तुं शक्यम् । [illegible] दुरापः भुजाभ्यामुद्धर्तुं न शक्यः लक्ष्मणः ।

१ समुद्धरेति गो० पाठः । २ विनाशनीमिति गो० पाठः । ३ भवेति गो० पाठः ।

अथ [illegible] सौमित्रिस्ताडितोऽपि स्तनान्तरा विष्णोरमीमांस्यैभागमात्मानं प्रत्यनुस्मरत् ११० ॥
ततो दाशरथेर्पुत्रं सौमित्रिं देवकण्टकः । तं पीडयित्वा बाहुभ्यां नैव प्रभुरुदञ्चनेऽभवत् ॥ १११ ॥
ततः क्रुद्धो वायुसुतो रावणं समभिद्रवत् । आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ॥ ११२ ॥
तेन मुष्टिप्रहारेण रावणो राक्षसेश्वरः । जानुभ्यामगमद्भूमौ चचाल च पपात च ॥ ११३ ॥

णभुत्तीर्णपरिमाणान्तरं त्रैलोक्यमपि तथा कर्तुं शक्यम् । कदेशधरण्या हिरण्याक्षेण कलीकृतत्वात् । सहार्णवैः शैलोपनिबन्धकगोवीर्णैः सहितमपि तथा कर्तुं शक्यम् । तदपि नैर्जितत्वेनैव निगृहीतत्वात् । भरतानुजः रामानन्यभक्तः रामचतुर्थभाग इत्यर्थः । रामचतुर्थभागोद्धरणेऽप्यशक्तः कथं रामेण योद्धुं शक्नोतीति भावः । अयोध्यायां गते पश्चात्ताप्ते—सीतामादाय गच्छ त्वमग्रतो भरतमग्रजेति वचनं चकारोक्तम् । भुजाभ्यामित्यनेन हिमवदादयो द्रव्यात्मकोद्धरणे शक्यम् अयं तु विंशतिभुजैरपि न शक्यत इति सकलद्रव्यजातप्रकल्प्योपादानत्ववादात् । सपरिकरेणापि रावणेन न शक्यमित्यपि सिद्धम् । कथं तर्हि हनुमतोद्धरणं शक्यम् । तत्रोच्यते इति । दुर्वहयैर्नोद्धर्तुं शक्य इत्यर्थः । अत्रैव व्याचष्टे—वायुसुतोः सहत्वेनेति । अनेन हिमवदादिभ्यो बलवत्त्वमितिस्य लक्ष्मणशरीरस्य गरीयस्त्वोक्तेः ॥ १११ ॥

११०] ति० टी०—कुतस्तत्राह—शक्त्येति । अमोघया ब्रह्मदत्तया स्वस्तान्तर आहतः सौमित्रिर्विष्णोरमीमांस्यं निःसंशयविष्णुभावात्वत्तमियत्तया चिन्तयितुमशक्यं तं विष्णोरंशभागमात्मानं प्रत्यनुस्मरत्स्मरत । नहि स्वीयं स्वं हितकरं स्वाशयेन ब्रह्मशक्तिमूलापत्राणार्थं भगवत्तेजोंश एवाहमस्मीति ध्यातवान् । नटवदङ्गीकृतमनुष्यत्वस्यैतस्येदं दृढमोत्पत्तिकमिति, परं न सर्वदा तथा ध्यानम् । एवं च ब्रह्मभावनया लक्ष्मणस्वशरीरस्य गरीयस्त्वमापादितमिति भवति ॥ ११० ॥

रा० टी०—ननु ताडनदशायां कथं तत्तच्छरीरस्य गुरुत्वमित्यत आह—शक्त्येति । अमोघया शक्त्या स्वस्तान्तरं वक्षसि सौमित्रिस्ताडितोऽपि सन् विष्णोर्भागम् अंशभूतम् अचिन्त्यम् ईदृक्तया यत्तया च चिन्तयितुमशक्यम् स्वमात्मानं स्वस्वरूपं, स्वाप्राप्येण निर्वाहेन इति तया प्रयोगात् स्वात्मांश इति गुरुत्वस्मरणाय प्रत्यनुस्मरत् स्मृतवान् । स्वस्वरूपस्मरणातिरिक्तव्यापारकरणोक्त्या स्वाभाविकमेवास्येदं गुरुत्वमित्युक्तम् । यद्यु [illegible] स्मरणेन हनुमता लक्ष्मणस्य स्वशरीरस्य गरीयस्त्वं तुल्यमित्युक्तं तत्रोच्यते इति तत्र [illegible] स्वस्मरणस्य गरीयस्त्वं प्रति कारणतयाहत्वप्रमाणाभावाच्च । यद्यपि विघ्नशान्तिद्वारार्थं भगवत्तत्त्वप्रकाशकं विष्णुभक्तस्य हितमित्यर्थ इति तदपि न । रामस्यैव विष्णुरूपत्वेन विघ्नपरिहारस्वरूपत्वात् । का लक्ष्मणभावना क्रियमाणा विघ्नयेत यदि स्वतो गौरवं भवेत्, अतो विष्णुभक्तमभिति चेन्न । मानवभावनयाऽपि लौकिकेरज्ञातत्वेन एवमपि मनुष्यभावनाया अनुपपत्तेः अतः अभयेक्षणोक्तस्वस्यभावेनैव भक्तमभयदानं एवोक्तागरीयस्त्वं अत एवाचिन्त्यमित्युक्तम् ॥ ११० ॥

१११] ति० टी०—तत इति । तथानुसंधानमहिमवत्त्वेन । अथानन्तरदृष्टमानविभवार्थं सौमित्रिं बाहुभ्यां पीडयित्वा लङ्कायां चालयेत्यपि न प्रभुरभवत् समर्थोऽभवत् । किं पुनरुद्धरणे इति भावः ॥ १११ ॥

रा० टी०—तत इति । देवकण्टको राक्षसः सौमित्रिं बाहुभ्यां पीडयित्वा यदि लंकायां चालयेत्यपि प्रभुः समर्थो नाभवत् ॥ १११ ॥

गो० टी०—वस्तुतस्तु रामैकभक्तत्वात्तेषां त्रिभुवनकोभयविनाशसमर्थत्वेऽपि—तत इत्यादिश्लोकं एकान्वयः । यतः स्वाभाविकेन गरीयस्त्वे सतीत्यर्थः । लङ्कायां उद्धरणे अपटुः असमर्थः । अत एवं पतनावसरे देवकण्टकः रावणः मानुषदेहास्थितं रामचतुर्थं वैष्णवं भागं सौमित्रिं भुजाभ्यां पीडयित्वा ततः वैष्णवभागरूपत्वाद्धेतोः लङ्कायां अप्रसरत्वादित्यर्थः स्वयं अत्रापि निजवपुःसामर्थ्याद्भुजयुग्मरूपत्वात् [illegible] वित्युक्तम् । तत्र च कथमसमर्थः विष्णुरूपस्य निरवयवत्वात् । सत्यम् । स्वरूपेण नांशस्तथोच्यते । किन्तु गुणाविर्भावकालत्वात् । गुणैः परिवृत्तैः प्रथमतरगुणितत्व एवं भवति लिप्तस्तेषां त्रिगुणगुणैर्ये त्रिभिरनुगः व्यवस्थायां वैष्णं नवरूपं सोमिष्कृतिवशात् भवान् सर्वेषु त्वगणितमहामहिमगुणोऽसीत्यधिकृतत्वात् । मानुषकरूपत्वं चास्य मानुषलीलाकरणार्थम् ॥ ११३ ॥ ११४ ॥

११२] ति० टी०—ततः । सौमित्रिमनालक्ष्य वायुसुतः इत्यर्थः ॥ ११२ ॥

रा० टी०—तत इति । क्रुद्धो वायुसुतः रावणं समभिद्रवत् समन्यद्रवत् अत एव उरसि मुष्टिना आजघान ॥ ११३ ॥

११३] ति० टी०—जानुभ्यां स्थभूमावगमत् । एवं भूमौ पपात चचाल । चलितलंकोऽभवदित्यर्थः ॥ ११३ ॥

रा० टी०—तेनेति । राक्षसेश्वरः जानुभ्यां भूमौ अगमत् चचाल च पपात च ॥ ११३ ॥

गो० टी०—तेनेत्यादि । जानुभ्यां रथभूमावपतत् (नय

आस्येभ्यो नेत्रैः श्रवणैः पपात रुधिरं बहु । विधूयमानो निश्चेष्टो रथोपस्थ उपाविशत् ॥ ११४ ॥
विसंज्ञो मूर्च्छितश्चासीन्न च स्थानं समालभत् । विसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमम् ॥ ११५ ॥
ऋषयो वानराश्चैव नेदुर्देवाश्च सासुराः । हनूमानथ तेजस्वी लक्ष्मणं रावणार्दितम् ॥ ११६ ॥
आनन्दाश्रुपरिप्लुताभ्यां बाहुभ्यां परिगृह्य तम् । वायुसूनोः सहृत्वेन भक्त्या परमया च सः ॥
शत्रूणामप्रकम्प्योऽपि लघुत्वमगमत्क्षणे: ॥ ॥ ११७ ॥
तं निर्जित्य स शक्तिः सौमित्रिं सुधि निर्मितम् । रावणस्य रथे तस्मिन्स्थानं पुनरुपागमत् ॥ ११८ ॥
रावणोऽपि महातेजाः प्राप्य संज्ञां महाहवे । आददे निशितान्बाणाञ्जग्राह च महद्धनुः ॥ ११९ ॥

अथान्तरे पपात अतिदीप्त दशमिरास्ये रुधिरं बहु सर्व-श्रवणेभ्यो नेत्रेभ्यः श्रवणेभ्यश्च रुधिरं बहुमेतदुत्पन्नमित्यर्थः ॥ ११४ ॥ ११५ ॥

११४] ति० टी०—आर्ष्यरिति बहुत्व दशाननत्वात् । आस्येभ्य इत्यत्र । यतो रुधिरं पपात, ततो विधूयमान इत्यादि ॥ ११४ ॥

रा० टी०—आस्येरिति । आस्यादिभि. बहु रुधिरं पपात अत एव सो ऽतिधूयमानः निश्चेष्टश्च सन् रथोपस्थे उपाविशत् ११४

गो० टी०—विधूयमान इति । तिरश्चिकाले विधूयमानः भ्रमन् पतनिनेष्टः सन् रथोपस्थे रथमध्ये उपाविशत् स्थितः ततो मूर्च्छितः सन् एव विसंज्ञः संज्ञाशून्यश्चासीत् पुनः संज्ञां लब्ध्वापि स्वस्थं स्थितिं न लेभमभ् नालभत इत्यर्थः ॥ ११७ ॥

११५] ति० टी०—विसंज्ञो मतचेतनः । मूर्च्छितः स्थिति-व्यतिक्रमः । स्थानाधिकरणाधारः । न । स्थानमनस्थितिस्थानं समाहारबहुव्रीहिः ॥ ११५ ॥

रा० टी०—विसंज्ञ इति । स. विसंज्ञो मूर्च्छितश्चासीत् न स्थानं स्थितिमित्यर्थः न समालभत् । पादादिविपर्ययं चकारकृत्यर्थः कर्तृ प्रयुक्तं । विसंज्ञमिति । रावणं विसंज्ञं दृष्ट्वा सर्वे ऋषिसुरासुरा नेदुः साधु भावितमिति शब्दं चक्रुः ॥ ११५ ॥

गो० टी०—विसंज्ञमिति । नेदुः हर्षेणेति शेषः ॥ ११८ ॥

११६] ति० टी०—नेदुः । संतोषादिति शेषः । साधवः । रावणस्य कृतप्रतिक्रियेऽपि किंकरत्वेन तेषामपि वैरित्वात्११६

रा० टी०—हनूमानिति । हनुमान् बाहुभ्यां लक्ष्मणं परिगृह्य रावणस्यार्दितं रावणमारमानयत् ॥ ११७ ॥

गो० टी०—हनूमानिति । अभ्यार्शं सन्निधिम् ॥ ११९ ॥

११७] ति० टी०—रावणाद्राजमत्वयदित्युक्तम्, कथमेवं शत्रुहृद्यं लक्ष्मणमेत्यत आह—वायुसूनोरिति । सहृत्वेन सचिवत्वेन परमभक्त्या च लक्ष्मणः शत्रूणामप्रकम्प्योऽपि रावणमनोर्दृत्यमगमत् । शत्रूणामित्यनेन लक्ष्मणोद्धरणसमये रावणस्यातिबलैः साहाय्यं कृतमिति गम्यते । इदं च भक्तमात्रशरणत्वं भगवतो भगवदवतारायां च स्वभावसिद्धमेवेति बोध्यम् । एवं च रामलक्ष्मणयोरज्ञानशक्तिमत्त्वतात्पर्यतया भासमानानि वचनानि मानुषवेषनिर्वहणमात्रपराणीति बोध्यम् तदुक्तं भागवते—'सत्यावतारस्त्विह सत्यशिक्षणं रक्षोवधायैव न केवलं विभोः । कुतोऽन्यथा स्यू रमतः स्व आत्मनीताकृतानि त्यसतानीश्वरस्य ॥' इति । सत्यशिक्षणं तत्त्वज्ञानशिक्षणं । आत्मनीश्वरस्येत्यनेन ज्ञानवत्त्वगौरवप्राप्तयोर्विरोध उक्तः ॥ ११७ ॥

रा० टी०—नन्वं रावणोत्थापनाशक्यं इदमान् कथमुत्थापयामासेत्यत आह—वायुसूनोरिति । शत्रूणामर्कन्यायेन लक्ष्मणः शत्रूणां सुहृदादिना लघुत्वमगमत् ॥ ११८ ॥

गो० टी०—नन्वं पूर्वं हिमवानित्यादिना लक्ष्मणस्याकम्प्यत्वमुक्तम्, तादृशस्य कथिमा रामसमीपप्रापणं कथमित्याशङ्क्य विरोधं परिहरति—वायुसूनोरिति । सहृत्वेन शोभनहृदयत्वेन अनुकूलहृदयत्वेनेत्यर्थः । हृदयानुकूल्यमेवात्र भक्तित्वव्यधिकरण्येनाह—भक्त्या परमया चेति । चशब्दोऽवधारणे । सः लक्ष्मणः शत्रूणां रावणस्य तत्पक्षिकरणां चेत्यर्थः । अप्रकम्प्योऽपि कम्पितुमशक्योऽपि । कर्मणः कर्मेरपि हनुमत एकस्य लघुत्वमगमत् लघूत्वमकरोत् अनेन लघुत्वस्य बुद्धिपूर्वकत्वमुक्तम् । शत्रुमित्रयोर्दृष्टप्रापत्वस्वभावे स्वरूपयुक्ते अस्येति भावः मूर्छितस्यापि लक्ष्मणस्य ज्ञानशक्तिप्रतिपादनेन तत्र तत्र रावणयोरज्ञानशक्तिप्रत्यायकानि वचनानि मानुषवेषनिर्वहणपराणीति मन्तव्यानि ॥ ११७ ॥

११८-११९] ति० टी०—तं सशक्त्युज्झ्य । ब्रह्मत्वेन ध्यायमानत्वात्ससुरसर्गः । स्थानं स्थितिम् ॥ ११८ ॥ ११९ ॥

रा० टी०—तमिति । निर्जितं निर्जितप्रायं सौमित्रिं शक्तिसशक्त्युज्झ्य रावणस्य रथे स्थानं स्थितिं पुनरुपागमत् ॥११९॥

गो० टी०—तमिति । दुर्जयमिति हेतुगर्भम् तस्य दुर्जयस्वकर्तृत्वाच्छक्तिस्तं त्यक्त्वा गतेति भावः । यतश्लोकानन्तरमाहस्त इति श्लोकः । ततो रावणोपीति श्लोकः पञ्चभिः ११९

रा० टी०—रावण इति । रावणस्तस्मात् ब्रह्मगर्भत्वविषयकातिबोधत्वात् शत्रुं बाणानादत्त अत एव पदवयमुपात्त ॥११९॥

१ सर्वेऽप्यर्कन्यायेन गो. पाठः । २ ब्रह्मत्वेनेति गो. पाठः । ३ सर्व इति गो. पाठः । ४ शत्रूणामर्क इति गो. पाठः । ५ कर्मणेति गो. पाठः । ६ हनूमदाख्यवेष प्रभवोभेदेनेत्यनेन पाठो गो. पुस्तके ।

आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः । विष्णोर्भागमसीमांस्यमात्मानं प्रत्यमन्यत ॥ १२० ॥
निपातितमहावीरां वानराणां महाचमूम् । राघवस्तु रणे दृष्ट्वा रावणं समभिद्रवत् ॥ १२१ ॥
अथैनमनुसंक्रम्य हनूमान्वाक्यमब्रवीत् । मम पृष्ठं समारुह्य राक्षसं शास्तुमर्हसि ॥ १२२ ॥
विष्णुर्यथा गरुत्मन्तमारुह्यामरवैरिणम् । तच्छ्रुत्वा राघवो वाक्यं वायुपुत्रेण भाषितम् ॥ १२३ ॥
अथारुरोह सहसा हनूमन्तं महाकपिम् । स्थस्थं रावणं संख्ये ददर्श मनुजाधिपः ॥ १२४ ॥
तमालोक्य महातेजाः पदुद्राव स रावणम् । वैरोचनमिव क्रुद्धो विष्णुरभ्युद्यतायुधः ॥ १२५ ॥
ज्याशब्दमकरोत्तीव्रं यन्त्रनिष्पेषनिर्हृदम् । गिरा गम्भीरया रामो राक्षसेन्द्रमुवाच ह ॥ १२६ ॥
तिष्ठ तिष्ठ मम त्वं हि कृत्वा विप्रियमीदृशम् । क्व नु राक्षसशार्दूल गत्वा मोक्षमवाप्स्यसि ॥ १२७ ॥

यदीन्द्रवैवस्वतभास्करान्वा स्वयंभुवैश्वानरशंकरान्वा ।
गमिष्यसि त्वं दृशवा दिशो वै तथापि मे नाद्य गतो विमोक्ष्यसे ॥ ॥ १२८ ॥

१२०] ति० टी०-पुनर्विष्णोर्भागमसीमांस्यमात्मानं प्रत्यमन्यत प्रसादात्सेन्द्रियग्रामः विशल्यो नीरुक्क्षतवर्णश्च भवन्निति शेषः ॥ १२० ॥

रा० टी०-आश्वस्त इति । विष्णोरप्यसीमांस्यं भाविमैश्वर्यप्राप्त्यात्मानं स्वदासरूपत्वं च प्रत्यमन्यत लक्ष्मणः विशल्यः व्रणरहितोऽभवदिति शेषः ॥ १२१ ॥

गो० टी०-आश्वस्त इति । आश्वस्तः स्वस्थः विशल्यः प्रस्तरप्रहारव्रणशून्यः अभवदिति शेषः अकाण्डे शक्तिविशल्यौ सहनविशल्यत्वेषु को हेतुरत आह-विष्णोरिति । विशल्यत्वस्यौषधस्वभावत्वादिति भावः । असीमांस्यम् अचिन्त्यम् अवश्यमनिष्टनेन साधनानुष्ठानं किमपि न कृतवानित्युक्तत्वात् ॥ १२० ॥

१२१-१२४] ति० टी०-समभिद्रवत्-अभिमुखं ययौ ॥ १२१-१२४ ॥

रा० टी०-निपातितेति । निपातिताः महावीरा वरा यां तां महाचमूं राघवो रामो दृष्ट्वा रावणं समभिद्रवत् समभ्यद्रवत् ॥ १२२ ॥

गो० टी०-निपातितेति । हन्तीमिति । रावणस्य बाणसंधानदर्शनादिति भावः ॥ १२४ ॥

रा० टी०-अथेति । हनुमान् एनं रामं अनुसंक्रम्य प्राप्य विष्णुर्गरुत्मन्तमारुह्य अमरवैरिणं मनुष्यत्वेनापि मम पृष्ठमारुह्य राक्षसं शास्तुमर्हसि साईश्लोक एकान्वयी ॥ १२३ ॥ १२४ ॥

गो० टी०-अथेति । अहमीत्यनन्तरमसीत्यध्याहारः दृश्यम् ॥ १२३ ॥

रा० टी०-तदिति । वायुपुत्रेण भाषितं वाक्यं राघवः श्रुत्वा हनुमन्तमारुरोह ॥ १२५ ॥

गो० टी०-विष्णुर्यथेति । सार्धश्लोक एकान्वयः । वायुपुत्रेण भाषितं तद्वाक्यं श्रुत्वा समाहितः सन् विष्णुर्गरुत्मन्तं यथा तथा महाकपिं हनुमन्तमारुरोहेति योजना ॥ १२५ ॥

रा० टी०-एनेति । मनुजाधिपो रामः रावणं संख्ये युद्धे स्थस्थं स्थितं ददर्श ॥ १२६ ॥

गो० टी०-स्थस्थमिति । स्थं स्थायम् ॥ १२७ ॥

१२५-१२६] ति० टी०-दृष्ट्वा शीघ्रमगमत् ॥ १२५-१२६ ॥

गो० टी०-तमिति । तमालोक्येत्यनुवादः अव्यवहितपूर्वकालयोगार्थः । अन्यथाव्यवहितपूर्वो रामः विष्णुरिवाभवदिति विरुद्धं स्यात् । साधर्म्यमात्रमत्र दृष्टान्तः ॥ १२८ ॥

रा० टी०-ज्याशब्दमिति । यन्त्रनिष्पेषवत् निष्पेषो यस्य ज्याशब्दं रामोऽकरोत् अकारयत् सम्भीरया गिरा राक्षसेन्द्रमुवाच ह ॥ १२८ ॥

गो० टी०-ज्याशब्दमिति । यन्त्रनिष्पेषः स्फूर्जथुः स्फूर्जनुर्ध्वनिविशेष इत्यमरः ॥ १२९ ॥

गो० टी०-नित्यधर्मम् ॥ १३० ॥

१२७] ति० टी०-क्व नु राक्षसशार्दूल गत्वा मोक्षमवाप्स्यसि नित्यधर्मः ॥ १२७ ॥

रा० टी०-तदाक्रमणमाह-तिष्ठेति । मम विप्रियं कृत्वा क्व गत्वा मोक्षं मुक्तिमवाप्स्यसि । इत्यर्थः अतस्तिष्ठ तिष्ठ ॥ १२६ ॥

गो० टी०-तिष्ठ तिष्ठेति । दिष्ट्या लक्ष्मणप्रहारकरणं सीताहरणकरणं वा । मैवं वोचन्निति शेषः ॥ १३१ ॥

१२८] ति० टी०-यदीन्द्रवैवस्वत-इति । यद्यपीन्द्रादीन् शरणं गमिष्यसि, इन्द्रादि दिशो वा तदन्तरालं वा गमिष्यसि, तथापि मे सकाशात् न विमोक्ष्यसे । दिशः वा दिशो वा इति वीप्सायां द्विरुक्तिः पर्यायवाचकशब्दद्वयेऽपि ॥ १२८ ॥

रा० टी०-यदीति । यदि स्वर्गादीन् गमिष्यसि दशदिशो वा इन्द्रादिलोकान्तरालं गमिष्यसि तथापि मे सकाशात् मद्विषयं प्रावल्यं मे भयमित्यर्थः विमोक्ष्यसे किंच दशधा दिशो रोधेन दशप्रकाराम्नाय आदित्य ऊर्ध्वदेशकर्तॄन् इन्द्रादीन् गमि-

---

१ दृश्यतां वाल्मीकीयमिति गो. पाठः । २ क्षयसंज्ञेयेति गो. पाठः । ३ वृत्रवन्तं समादित इति गो. पाठः । ४ आरुरोह महादीप्तो बलवन्तमिति गो. पाठः । ५ [illegible]रिति गो. पाठः । ६ अवोचदिति गो. पाठः ।

यश्चैष शक्त्या निहतस्त्वयाद्य गच्छन्विषादं सहसाभ्युपेत्य ।
स एष रक्षेन्द्रगणाजमृत्युः सपुत्रपौत्रस्य तवाद्य युद्धे ॥ ॥ १२९ ॥
एतेन चात्यद्भुतदर्शनानि शरैर्जनस्थानकृतालयानि ।
चतुर्दशान्यायतवरायुधानि रक्षःसहस्राणि निषूदितानि ॥ ॥ १३० ॥
राघवस्य वचः श्रुत्वा राक्षसेन्द्रो महाबलः । वायुपुत्रं महौवेगं वहन्तं राघवं रणे ॥ १३१ ॥
रोषेण महताविष्टः पूर्ववैरमनुस्मरन् । आजघान शरैर्दीप्तैः कालानलशिखोपमैः ॥ १३२ ॥
राक्षसेनाहते तस्य ताडितस्यापि रायकैः । स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत ॥ १३३ ॥
ततो रामः [illegible]तेजा रावणेन कृतव्रणम् । दृष्ट्वा प्लवगशार्दूलं क्रोधस्य वशमेयिवान् ॥ १३४ ॥
[illegible]भिसंक्रम्य रथं सचक्रं साश्वध्वजच्छत्रमहापताकम् ।
अथास्यर्षि साशनिशूलखड्गं रामः प्रचिच्छेद शितैः शराग्रैः ॥ ॥ १३५ ॥

वक्षसि महति न विभोदयते इति किं भत्र वैक्षानरशब्देनविष्णुः पूर्वोत्तरस्याद्ध्यायेन इत्यादि स्वयम् वैक्षानरस्साधारणशब्दविशेषात् ॥ १२८ ॥

गो० टी०–यद्वृत्ते । इन्द्रादीन् वा स्वयम्भवादीन् वा यदि मन्यिष्यसि यद्यपि मन्यिष्यति तथापि अद्य मत्सभीरं गच्छन्त्वं के [illegible] दश वा दिशो वेत्स्यत एको राक्षस [illegible] ॥ १२९ ॥

१३०–१३२] ति० टी०–सर्वं परस्परकोपे हेतुमाह––य इति । अथ [illegible] लक्ष्मणस्त्वया शक्त्या निहतस्ताडितः [illegible] अतीवाभ्युपेत्य प्रतिज्ञाय स एषोऽहं [illegible] पुत्रपौत्रस्य ते संख्ये मृत्युर्भविष्यामीति शेषः ॥ [illegible] ॥

रा० टी०–य इति । हे रक्षोगणराज त्वया शक्त्या निहतः अत एव विषादमुपेत्य सहसा इह प्राप्तः य एष लक्ष्मणः स एष तव पुत्रपौत्रस्य च मृत्युः मृत्युरिति ॥ १३१ ॥

गो० टी०–यदेवेति । अथ य एष त्वया शक्त्याभिहतः स एषः अत्र विषादमित्यादि सन् सपुत्रदारस्य तव मृत्युः सन् सहसा अत्यर्थम् अत्यन्तमनायासेन अचिरादागमिष्यतीत्यर्थः । यद्वा सर्वदर्शनेन [illegible] स एवाहमागतस्त्वामिति । लक्ष्मणं प्राप्तवन्तमिति वा पाठः इति ॥ १३१ ॥

१३०–१३२] ति० टी०–एतेन मया तावकानि रक्षांसि निषूदितानि ॥ [illegible] ॥

रा० टी०–एतेनेति । मया शरैर्जनस्थानं हतमत आह––एतेनेति । एतेन मया जनस्थानकृतालयानि चतुर्दशसहस्रसंख्यानि रक्षांसि निषूदितानि एतेन वाङ्मात्रेण त्वत्सभामध्ये स्थितम् ॥ १३२ ॥

गो० टी०–लक्ष्मणप्रहृतः कथं त्वया प्रहृतः स्यामित्याशङ्क्य स्वपराक्रममनिशं [illegible]यति––एतेनेति । एतच्छब्दः संनिहितपरः एषोऽस्मीत्यादिप्रयोगात् अयं जन इति प्रयोगाच्च । अयेत्यर्थः । मृत्युशब्दापेक्षया वा एतेनेत्युक्तिः । चतुर्दशानि चतुर्दशशब्दादर्शआद्यचि टिलोपे कृते जसि रूपम् । यद्वा एतेनेति स्वाभेदेन लक्ष्मणो निर्दिश्यते ॥ १३४ ॥

रा० टी०–राघवस्येति । राक्षसेन्द्रः राघवस्य वचः श्रुत्वा पूर्ववैरमनुस्मरन् सन् राघवं वहन्तं वायुपुत्रं दीप्तैः शरैरजघ्न अर्द्धचतुष्टयमेकान्वयि ॥ १३३ ॥ १३४ ॥

गो० टी०–राघवस्येत्यर्धत्रयमेकं वाक्यम् । वहन्तमिति । आत्मानं प्रहृत्य पुनरपि रामं वहनीति कोपादिति भावः ॥ १३५ ॥

१३३–१३४] ति० टी०–भूयस्तेजः शौर्यं विशेषम् भूत् ॥ १३३ ॥ १३४ ॥

रा० टी०–राक्षसेनेति । राक्षसेन ताडितस्यापि स्वभावतेजोयुक्तस्य स्वाभाविकरामतेजसाभिरक्षितत्वेत्यर्थः हनुमत्तेजो भूयोऽधिकमभ्यवर्धत ॥ १३५ ॥

गो० टी०–राक्षसेनेति । स्वभावतेजः स्वाभाविकं तेजः ॥ १३६ ॥

रा० टी०–तत इति । रामः रावणेन कृतव्रणं व्रणाः कृतः प्रयत्नो यस्मिन् तं प्लवगशार्दूलं दृष्ट्वा क्रोधस्य प्रातीतिकक्रोधस्य वशमिव एयिवान् वशशब्दः आचारक्विबन्तप्रकृतिकक्रकृविबन्तः किंच क्रोधस्य क्रोधवतो वशं कान्तिमेयिवान् क्रोधसदृशकान्तिमानभवदित्यर्थः ॥ १३६ ॥

गो० टी०–तत इति । एयिवान् प्राप्तः ॥ १३७ ॥

१३५] ति० टी०–अभिसंक्रम्य संयुक्तो भूत्वा ॥१३५॥

रा० टी०–तस्येति । तस्य रावणस्य संयुक्तमभिसंक्रम्य सचक्रम अश्वादिसहितम् अशनिप्रभृतिसहितम् रथम् रामः शराग्रैः प्रचिच्छेद ॥ १३७ ॥

गो० टी०–तस्येति । अभिसंक्रम्य पौनःपुन्येन समीपं गत्वा ॥ १३८ ॥

---

१ इच्छतीति गो. पाठः । २ आस्येति गो. पाठः । ३ कपिमिति गो. पाठः । ४ वीर्यमिति गो. पाठः । ५ हनुमत्ते गो. पुस्तके पाठः । ६ क्रोधेनेति गो. पाठः । ७ क्रोधस्येति गो. पाठः । ८ चक्रमेति गो. पाठः । ९ क्रोधस्येति गो. पाठः ।

अथेन्द्रशत्रुं तरसा जघान बाणेन वज्राशनिसंनिभेन ।
भुजान्तरे व्यूढभुजातरूपे वज्रेण मेरुं भगवानिवेन्द्रः ॥ ॥ १३६ ॥

यो वज्रपाताशनिसंनिपाताश्च चुक्षुभे नापि चचाल राजा ।
स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः ॥ ॥ १३७ ॥

तं विह्वलन्तं प्रसमीक्ष्य रामः समादधे दीप्तमथार्धचन्द्रम् ।
तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा ॥ ॥ १३८ ॥

तं निर्विषाशीविषसंनिकाशं शान्तार्चिषं सूर्यमिवाप्रकाशम् ।
गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेन्द्रम् ॥ ॥ १३९ ॥

कृतं त्वया कर्म महत्सुभीमं हतप्रवीरश्च कृतस्त्वहम् ।
तस्मात्परिश्रान्त इति व्यवस्य न त्वां शरैर्मृत्युवशं नयामि ॥ ॥ १४० ॥

१३६] ति० टी०–व्यूढं विशालम् । सुजातरूपं राजाहाभरणचन्दनादिभिः प्रशस्ताकारं तस्मिन् ॥ १३६ ॥

रा० टी०–अथेति । रामः व्यूढं पुष्टं सुजातं सुन्दरं रूपाकृतियस्य तस्मिन् भुजान्तरे इन्द्रशत्रुम् इन्द्रो मेरुमिव आजघान ॥ १३८ ॥

गो० टी०–अथेति । वज्राशनिसंनिभेनेति । बाणस्य असाम्यमुच्यतेवज्रेण मेरुं भगवानिवेन्द्र इति प्रहस्तं रामस्येद्रसाम्यमित्यपुनरुक्तिः । भगवान् वीर्यवान् । भगः श्रीरमाहात्म्यवीर्यलक्ष्मीकीर्तिष्वित्यमरः ॥ १३६ ॥

१३७–१३८] ति० टी०–वज्रपातवाशनिसंनिपातेति तहारैकत्वम् ॥ १३७ ॥ १३८ ॥

रा० टी०–य इति । वज्रपाताद् अशनिसंनिपाताश्च समाहारद्वन्द्वः यो न चुक्षुभे न चचाल च स राजा रावणः मत्बाणाभिहतस्सन् आर्तोऽभयदिति शेषः चचाल च चापं च मुमोच च ॥ १३७ ॥

गो० टी०–य इति । यः पुरा । वज्रपातयुक्ताशनिसंनिपातेति मध्यमपदलोपिसमासः । वज्रम् इन्द्रायुधम् अशनिः पातिकः न चुक्षुभे नार्ति प्राप्तः नापि चचाल नार्तिनिमित्तं प्राप्तः । राजा अन्यूनराजभावश्च स्थितः । सः रामबाणाभिहतः भृशार्तः भृशमार्तः क्षुब्धः चचाल वीरोऽपि चापं च स्वस्य स्वरक्षणत्वात्स्वयं त्यक्तवान् रामैकरक्षत्वथोरिय ॥ १४० ॥

रा० टी०–तमिति । विह्वलन्तं तं रावणं रामः प्रसमीक्ष्य अर्धचन्द्रं शरविशेषं समादधे तेनार्धचन्द्रेण रक्षोधिपतेः किरीटं चिच्छेद ॥ १३९ ॥

तत्सादृश्यकरणात्समलोकपालं अर्कवर्णं अर्कचन्द्राकारं बाणम् आदत्ते तेन सदृशं निर्भेदं मानभङ्गकरोत्तिरर्थः । महात्मा महामनाः दयालुरित्यर्थः । अस्त्रयं श्लोकाभ्यां भगवद्रक्षणे निमित्तं स्वयत्ननिष्ठत्तिरेवेत्युक्तम् ॥ १४१ ॥

१३९] ति० टी०–किरीटकूटं किरीटसमूहम् ॥ १३९ ॥

रा० टी०–तमिति । निर्विषा ये आशीविषाः महासर्पाः तत्सन्निकाशं तत्सदृशं कृत्तः किरीटस्य किरीटसमूहो यस्य अत एव गतश्रियं राक्षसेन्द्रं राम उवाच ॥ १४१ ॥

गो० टी०–तमिति । तं स्वयमेव निर्विषाशीविषसन्निकाशं निर्विषसर्पतुल्यम् अप्रकाशं निस्तेजस्कम् अत एव शान्तार्चिषं शान्तकिरणं सूर्यमिव स्थितम् कृतकिरीटकूटं छिन्नकिरीटसमूहम् मायानिश्चलयन्त्रेषु केतवाकुतरङ्गेषु । अथोघने शैलश्रृङ्गे सीराङ्गे कूटमस्त्रियामित्यमरः । अत एव गतश्रियं निष्प्रभम् उवाच ॥ १४२ ॥

१४०] ति० टी०–हताः प्रवीरा यस्य तथा । तस्मात्पूर्वं धर्मज्ञानात् । व्यवस्य ज्ञात्वा ॥ १४० ॥

रा० टी०–तदाकारमाह–कृतमिति । त्वया महत् सुभीमं कर्म कृतम् अहं च त्वया हतप्रवीरोऽस्मि तस्मादपि परिश्रान्तः एवः श्रमभ्रम इति व्यवस्य निश्चित्य त्वां शरैर्मृत्युवशं न नयामि ॥ १४२ ॥

गो० टी०–कृतमिति । महत् अतिशयकरम् सुभीमं कर्म युद्धं कृतम् किं चाहं हतलक्ष्मणादिप्रवीरश्च कृतोस्मि तस्मात् अनेकवीरपतनावधिकरणकरणात् त्वं परिश्रान्तः आयुधधारणेपि श्रान्त इति व्यवस्य निश्चित्य त्वां मृत्युवशं मृत्योरधीनं न नयामि । चिररणपरिश्रान्तकृतनकृतापवादापनोदाय [illegible]

त्वेनाहि जानामि रणार्दितस्त्वं प्रविश्य रात्रिंचररा[1]ज लङ्काम् ।
आश्वस्य निर्याहि रथी सधन्वी तदा बलं प्रेक्ष्यसि मे रथस्थः ॥ ॥ १४१ ॥
स एवमुक्तो हतदर्पहर्षो निकृत्तचापः स हताश्वसूतः ।
शरार्दितो भग्नमहाकिरीटो विवेश लङ्कां सहसा स्म राजा ॥ ॥ १४२ ॥
तस्मिन्प्रविष्टे रजनीचरेन्द्रे महाबले दानवदेवशत्रौ ।
हरीन्विशल्यान्सह लक्ष्मणेन चकार रामः परमाहवाग्रे ॥ ॥ १४३ ॥
तस्मिन्प्रभग्ने त्रिदशेन्द्रशत्रौ सुरासुरा भूतगणा दिशश्च ।
ससागराः सर्वमहोरगाश्च तथैव भूम्यम्बुचराः प्रहृष्टाः ॥ ॥ १४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ।

रामेण लङ्कां प्रविश्यासत्कानननयमध्याप्य रक्षांसि प्रेक्षमाण इदमब्रवीत् । अखलु पश्य तपस्तप्तं मया तन्नोपमन्य यदिदं[2]क्षोभ्यं मयेन रामेण जितः अतोऽयम्भावेदवतीनन्दीश्वरानरण्यशापा एव हेतव इति स्मरामीति । अथ तेन लङ्कां गोपायितुं क्रमनर्दं च पर्यवस्थितुं कृतावहेलैरिन्द्रारिवरलब्धवरेनानिलरक्षस्त्वेन कथमपि प्रबोधितः कुम्भकर्णोऽभ्रजसदीपं गतः । ततस्तं दिव्य सर्वे प्रथा गीता दुद्रुवुः ।

स प्रविश्य पुरीं लङ्कां रामबाणभयार्दितः । भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः ॥ १ ॥
मातंग इव सिंहेन गरुडेनेव पन्नगः । अभिभूतोऽभवद्राजा राघवेण महात्मना ॥ २ ॥

१४१–१४४] ति० टी०–इतो रणात्प्रयाहीति योजना । जानाम्यहं जानामि । प्रेक्ष्यसि प्रेक्षिष्यसि ॥ १४१–१४४ ॥

अथ रामशरावस्तम्भसीतायत्नपरश्शतं सायंकाले ॥
इति श्रीरामायणे श्रीराजीय रामायणतिलके वाल्मीकीय
आदिकाव्ये युद्धकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

रा० टी०–प्रयाहीति । त्वं रणार्दित इत्यहं जानामि अतः प्रयाहि लङ्कां प्रविश्य आत्मान्यं स्वास्थ्यं प्राप्य रणादिमान् सन् निर्याहि इत्याक्षेपव्यंग्यः तदा मे बलं प्रेक्ष्यसि प्रेक्षिष्यसे ॥ १४३ ॥

गो० टी०–गच्छेत्येवं । त्रिपो पुनः विलसति कथं गच्छेयमित्यत्राह—अनुजानामीति । रणार्दित इति अन्तः रात्रिंचरराज कृतयोगिनिति सापहासोक्तिः आश्वास्य विश्रम्य, रथी धन्वी च सन्निर्याहि ! स त्वं तदा तादृशे मे बलं रथस्थ इत्यवलक्ष्यसि, धातूनामनेकार्थत्वात् ॥ १४४ ॥

रा० टी०–स इति । एवमुक्तो राजा रावणः लङ्कां सहसा विवेश ॥ १४२ ॥

गो० टी०–स इति । अत्र क्रियाभेदात्पञ्चत्रयमिति न तद्वैयर्थ्यम् । सहसा झटिति भङ्गकृतत्वमेवेति भावः ॥ १४२ ॥

रा० टी०–तस्मिन्निति । रजनीचरेन्द्रे प्रविष्टे सति लङ्कामिति शेषः परमाहवाग्रे स्थितानां लक्ष्मणेन सह रामः हरीन् विशल्यान् शररहितान् चकार ॥ १४३ ॥

गो० टी०–तस्मिन्निति । प्रविष्टे लङ्कामिति शेषः दानवदेवशत्रावित्यनेन रावणनिर्गमो देवदानवहरणहेतुरिति कथ्यते । सह लक्ष्मणेनेति सह लक्ष्मणस्य पूर्वमेव विशल्यत्वेन दशन् पुनः करणम् । परमाहवाग्र इत्यनेन विशल्यकरणं विशल्यौषधीनां हरीणामन्यत्रानयनासंभवः सूच्यते ॥ १४३ ॥

रा० टी०–तस्मिन्निति । त्रिदशेन्द्रशत्रौ तस्मिन् राक्षसेन्द्रे प्रभग्ने सति सुरासुराः प्रहृष्टा बभूवुरिति शेषः ॥ १४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

गो० टी०–पूर्वमचिंतं देवादिहर्षं प्रपञ्चयति–तस्मिन्निति प्रभग्ने पराजिते दिशः दिक्पालाः सागराः सागरवासिनः अम्बुचराः सागरनिवासजलचराः हृष्टाः बभूवुरिति शेषः पश्यां रावणदुष्कृतभङ्गः ॥ १४४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकोशे
व्याख्ये युद्धकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

१–२] ति० टी०–स इति ॥ १ ॥ २ ॥

१ लङ्कामुपानयेति गो. पाठः । २ च धन्वीति गो. पाठः । ३ कुर्वतेति गो. पाठः । ४ [illegible] गो. पाठः ।

ब्रह्मदण्डप्रतीकानां विद्युद्वलितवर्चसाम् । स्मरन्राघववाणानां विव्यथे राक्षसेश्वरः ॥ ३ ॥
स काञ्चनमयं दिव्यमाश्रित्य परमासनम् । निरीक्षमाणो रक्षांसि रावणो वाक्यमब्रवीत् ॥ ४ ॥
सर्वं तत्खलु मे मोघं यत्तप्तं परमं तपः । यत्समानो महेन्द्रेण मानुषेणै विनिर्जितः ॥ ५ ॥
इदं तद्ब्रह्मणो घोरं वाक्यं मामभ्युपस्थितम् । मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा ॥ ६ ॥
देवदानगन्धर्वैर्यक्षरासपन्नगैः । अवध्यत्वं मया प्रोक्तं मानुषेभ्यो न याचितम् ॥ ७ ॥
तन्मिमं मानुषं मन्ये रामं दशरथात्मजम् । इक्ष्वाकुकुलजातेन अनरण्येन यत्पुरा ॥ ८ ॥
उत्पत्स्यति हि मद्वंशपुरुषो राक्षसान्तकः । यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिम् ॥ ९ ॥
निहनिष्यति संग्रामे त्वां कुलाधम दुर्मते । अयोऽहं वेदवत्या च यथा सा धर्षिता पुरा ॥ १० ॥

रा० टी०—रावणकर्तृकलंकाप्रवेशानन्तरकालिकं रावणवृत्तान्तमाह स इत्यादिभिः रामबाणभयादिनीत एव मग्नो दर्पो यस्य स राजा रावणः व्यथितेन्द्रियो बभूव ॥ २ ॥

गो० टी०—अथ कुम्भकर्णप्रबोधनं पर्यन्तं स इत्यादि । रामबाणभयादितः किमिदानीमपि रावणस्य पतेयुरिति भयपीडितः । व्यथितेन्द्रियः दूनितमनस्कः ॥ २ ॥

रा० टी०—तदेव भेयन्तरेणाह मातङ्ग इति । ततश्च राजा रावणः राघवेणाभिभूतोऽभवत् ॥ ३ ॥

गो० टी०—मनोव्यथामुपपादयितुं तद्धेतुं सङ्क्षिप्तमनुवदति—ब्रह्मदण्ड इत्यादि । महान्भवान् महाप्रभावान् । ब्रह्मतेजस्तत्रार्थः ॥ ३ ॥

३–४] ति० टी०—ब्रह्मदण्डो युगान्तसूर्यस्तत्प्रतीकानां सदृशानां विद्युदिव चलितं वर्चो येषां तेषां राघववाणानां स्मरन् राक्षसेश्वरो विव्यथे ॥ ३ ॥

रा० टी०—ब्रह्मेति । ब्रह्मदण्डेन युगान्तसूर्यसदृशेन प्रतीकानां सदृशानां विद्युदिव चलितं वर्चो येषां तेषां राघववाणानां स्मरन् राक्षसेश्वरो विव्यथे ॥ ३ ॥

रा० टी०—स इति । स रावणः काञ्चनमयं परमासनमाश्रित्य स्थितः निरीक्षमाणस्सन् अब्रवीत् ॥ ४ ॥

गो० टी०—ब्रह्मदण्डेति । ब्रह्मदण्डः ब्रह्मशापः । सर्वोच्चनिरूपणक्षमो वसिष्ठदण्डो वा ब्रह्मास्त्रं वा । युगान्तकालसमुत्थितप्रियो भूमकेतुरित्येके । तत्प्रकाशानां बाणानामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी ॥ ३ ॥ ४ ॥

५] ति० टी०—महेन्द्रेण समान इति यत्तपः मोघं निरर्थकम् । तत्र हेतुः—मानुषेणेति ॥ ५ ॥

रा० टी०—तदाकारमाह—सर्वमित्यादिभिः । यस्मात् महेन्द्रेण समानोऽहं मानुषेण विनिर्जितः तस्मात् यत् परमं तपः तत् तत्सर्वं मोघं विफलमभवदिति शेषः ॥ ५ ॥

गो० टी०—सर्वमिति । मे मया यत्तप्तमुक्तं तद् सर्वं मोघं गतमिति शेषः ॥ ५ ॥

६] ति० टी०—मानुषेभ्यस्तव भयमिति यदुक्तं ब्रह्मणो वाक्यम्, तदर्थो वाक्यस्थित इति शेषः ६

रा० टी०—इदमिति । तं मानुषेभ्यो भयं विजानीहि इदं ब्रह्मणो घोरं वाक्यं मामभ्युपस्थितं मया श्रुतमित्यर्थः ॥ ६ ॥

गो० टी०—वक्ष्यमाणं तु स्फुटयितुमित्याह—इदमिति । तं मानुषेभ्यो भयं विजानीहीति यत् ब्रह्मणो घोरं वाक्यं तदिदं मामभि मा प्रति उपस्थितं मयि तत्तथा तत्त्वतः तथ्यं तथा । तत्तु तेन सम्पत्स्यतीत्यर्थः ॥ ६ ॥

७] ति० टी०—तत्र भगवता तथा भयोपदेशः कृतस्तमाह—देवेत्यादि । यस्मान्मानुषेभ्यो न याचितं तस्मात्तेभ्यो भयं जानीहीत्युक्तिः-दन्तयः ॥ ७ ॥

रा० टी०—देवेति । देवादिभिरिव अवध्यत्वं मया प्रोक्तं याचितं मानुषेभ्यस्तु न याचितम् ॥ ७ ॥

गो० टी०—देवेति । प्राक् प्रार्थितः प्राक्तन . मानुषेभ्योऽवध्यत्वं नेत्र प्रार्थितमित्यर्थः ॥ ७ ॥

८] ति० टी०—यो मानुषो भवेदुक्तस्तमिमं दुष्टरक्षोमजेता मन्ये । वधहेतुनिश्चये हेतुमाह—इक्ष्वाकुकुलेत्यादि ॥ ८ ॥

रा० टी०—तन्मिति । तं तस्मरणकारणं रामं मानुषं मन्ये निर्विनोमि तत्र हेतुमाह इक्ष्वाकुकुलजातेन अनरण्येन पुरा पूर्वं यस्मात् रामस्त्वमित्यन्वयः ॥ ८ ॥

गो० टी०—चिरन्तनमित्यादिनार्थक्रमेणाह-वक्ष्यमाणम् । यस्त्वामित्यत्र तु आमिति छेदः । आमिति पूरणे । यस्तु पुरुषस्त्वां मेघमिव निहनिष्यति सः मद्वंशे वध्यत्वेन आमिति मित्रिवम् इत्येवं प्रकारेण इक्ष्वाकुकुलजातेन अनरण्येन यत् यस्मात् पुरा चिरन्तनं प्रतिज्ञातं तस्मात् मत्वं रामं दशरथपुत्रकेन जातं मन्ये । राक्षसान्तकः कुलाधमेति आदिना कुलजस्य नीचत्वमुच्यते । कुलादीनां कारणव्यापकत्वानुपपत्तेः । अन्ये तु त्वामिति द्विरुक्तिरनुप्रासार्थेत्याहुः अपरे त्वयाहतादिशब्देन द्विरुक्तिरिति । त्वां प्रत्युत्पत्स्यत इति द्वितीयस्त्वंशब्दान्वय इत्येके ॥ ८ ॥ ९ ॥

९–१०] ति० टी०—कुलाधम स्वकुलाधम । राक्षसकुलान्त-

१ मानुषेभ्यस्तवेति गो० पाठः । २ सदृशेति गो० पाठः । ३ अस्मीति गो० पाठः । ४ अवमिति गो० पाठः । ५ विनिर्जित इति गो० पाठः । ६ नादेव-
७ [illegible] । ८ वधेति गो० पाठः ।

सेयं सीता महाभागा जाता जनकनन्दिनी । उमा नन्दीश्वरश्चापि रम्भा वरुणकन्यका ॥ ११ ॥
यथोक्तास्तेन्मया प्राप्तं न मिथ्या ऋषिभाषितम् । एतदेवं समागम्य यत्नं कर्तुमिहार्हथ ॥ १२ ॥
राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्धसु । स चाप्रतिमगौरभीर्यो देवदानवदर्पहा ॥ १३ ॥
ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम् । समरे जितमात्मानं प्रहस्तं च निषूदितम् ॥ १४ ॥
ज्ञात्वा रक्षो भीमबलमादिदेश महाबलः । द्वारेषु यत्नः क्रियतां प्राकारश्चाधिरुह्यताम् ॥ १५ ॥
निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम् । सुखं स्वपिति निश्चिन्तः कामोपहतचेतनः ॥ १६ ॥

धर्मेण यावत् । इतीति शेषः । शप्तोऽहमित्युभयान्वयि । वेदवत्या च सह इत्यन्वयः । शापहेतुमाह—यथा यतः सा धर्षिता ॥ ९ ॥ १० ॥

रा० टी०—तत्प्रकारमाह उत्पत्स्यतीति । हे राक्षसाधम यः पुत्रादिसहितं त्वां निहनिष्यति स पुरुषः त्वां त्वत्कृतोपद्रवमालक्ष्येति शेषः मद्वेगं सहत्पत्स्यति सार्धश्लोक एकान्वयी ॥ ९ ॥

रा० टी०—शप्ता इति यतः सा वेदवती पुरा धर्षिता मयेति शेषः तस्मात्तपस्विन्या मदं शप्तः, अहमेव स्वकृतं कार्मपिष्यामीत्युक्तं भवति अत एव सा हिंसाकाङ्क्षिणा तथाप्रतिज्ञाकर्त्रैर्यर्थः वेदवत्यैव हेतुना तत्प्रार्थनयैवेत्यर्थः इयं सीता जाता यथा चायमर्थस्तथा बालकाण्डप्रथमसर्गे विस्तरोद्धारप्रकरणे निरूपितम् निरूपयिष्यमाणोत्तरकाण्डे ॥ १० ॥

गो० टी०—शप्तोऽहमिति । किं चाहं पुरा वेदवत्या शप्तोस्मि । मत्कृते तव विनाशो भविष्यतीति । वेदवत्याह—यदेति । सा वेदवती यदा धर्षिता बलात्कृता तदा । अथ तया किं क्रियते सीता जनकसुतेत्यत्राह—सेयमिति । सा वेदवती स्वप्रार्थनानिर्देशार्थं सीता जाता ॥ १० ॥

११] ति० टी०—सेयं वेदवत्येव जनकनन्दिनीत्यर्थः । भयकारणं शापान्तरमाह—उमेति ॥ ११ ॥

रा० टी०—शापान्तरान्यपि स्मरति उमेति । उमादयः यथा येन प्रकारेण उक्ताः उक्तवन्तः तत्तथा मया प्राप्तं तत्र हेतुः ऋषिभाषितं पत्नद्वयभिन्नैः मिथ्या न ॥ ११ ॥

गो० टी०—उमेति । उमादयश्चत्वारः तपसा तपःप्रभावेन यथोक्ताः यथोक्तवन्तः तथा प्राप्तं सिद्धम् । ऋषिभाषितं न मिथ्या भवति हि । नन्दीश्वरस्य शापोत्तररामायणे प्रोक्तः । उमावरुणकन्यकाशापौ चादेवैव सिद्धौ ॥ ११ ॥

१२] ति० टी०—यथोक्ता मच्छापनिमित्तं शापं यथोक्तवन्तस्तदेव गता प्राप्तम् । 'यदुक्तस्तन्मया' इति पाठान्तरम् । तत्रोमाशापः कैलासशिखरचालनवेलायां रावणस्य मरणनिमित्तं मरणमित्येवंरूप इत्याहुः । नन्दीश्वरशापस्तु—'उमाङ्गनादर्शनं मां दृष्ट्वा राक्षस दुर्मते । मौखर्यान्मामवज्ञानीषे परिहासं च यत्कपे ॥ तस्मात्तदुपसंयुक्ता मद्वीर्यसमतेजसः । उत्पत्स्यन्ति वधार्थं हि कुलस्य तव वानराः ॥' इति । रम्भोद्वहनेन रम्भानिमित्तवलकूबरशाप उच्यते । 'यदा त्वकामां कामार्तो धर्षयिष्यसि योषितम् । मूर्धा ते सप्तधा रक्षः शकलीभविता तदा ॥' इति । वरुणकन्यका पुञ्जिकस्थला तन्निमित्तश्च ब्रह्मशापः स्त्रीधर्षणे मरणरूपः । तदुक्तस्यावश्यप्राप्तौ हेतुः—न मिथ्येति । ऋषिपदेन तपोयुक्ता उच्यन्ते । एतदुक्तं भवति—यतिमित्तं समागम्य ज्ञात्वा यत्नमित्यादि । भयस्य निश्चितत्वात्तिष्ठन्तियत्नं कुरुतेत्यर्थः ॥ १२ ॥

रा० टी०—एतदिति । एतत् मदुक्तं सर्वं समागम्य ज्ञात्वैव यत्नं कर्तुमर्हथ अर्थं प्रयत्नं ॥ १२ ॥

गो० टी०—एतदिति । एतत् शापस्वरूपम् । अभ्युपागम्य ज्ञात्वा । इह प्रकृते शत्रुविजये कार्ये यत्नम् अवधानं कर्तुमर्हथ । चर्याः गोपुरपार्श्वस्थभटसंचारप्रदेशाः ॥ १२ ॥

१३] ति० टी०—कोऽसौ यत्नो योऽस्माभिः कार्यस्तत्राह—राक्षसा इति । चर्यागोपुर इत्यत्रैव अप्रतिमगाम्भीर्यो-पमगाम्भीर्यः ॥ १३ ॥

रा० टी०—यत्नाकारमाह—राक्षसा इति । चर्यासु राजमार्गेषु गोपुरमूर्धसु च राक्षसास्तिष्ठन्तु अप्रतिमगाम्भीर्यः असदृशगाम्भीर्यविशिष्टः ब्रह्मशापेनाभिभूतः उप इत्यर्थः कुम्भकर्णः विबोध्यतां ॥ १३ ॥

गो० टी०—स चेति । ब्रह्मशापाभिभूतः ब्रह्मशापकृतनिद्रापरवश इत्यर्थः ॥ १३ ॥

१४] ति० टी०—कुम्भकर्णविबोधनाशयं कविराह—समरे इति । आत्मानं पराजितं प्रहस्तं च निषूदितम् ॥ १४ ॥

रा० टी०—ननु महाभिमानोऽतिबली रावणस्साहाय्यं भ्रातरं कथं प्रबोधयतीत्याशंक्य कविराह—स इति । स रावणः आत्मानं पराजितं ज्ञात्वा प्रहस्तं निषूदितं ज्ञात्वा रक्षः कुम्भकर्णं भीमबलं ज्ञात्वा आदिदेश कुम्भकर्णं विबोधयतामित्याज्ञापयामास ॥ १४ ॥

गो० टी०—किमर्थं कुम्भकर्णो विबोध्यत इत्याशङ्क्य कविराह—स पराजितमिति । आदिदेश कुम्भकर्णविबोधनार्थमिति शेषः ॥ १४ ॥

१५-१६] ति० टी०—ज्ञात्वा एवं स्वस्य बलक्षये सहायाहं भीमबलं रक्षः कुम्भकर्णं ज्ञात्वा भीमं बलमादिदेशेत्यन्वयः । कुम्भकर्णविबोधनार्थमिति शेषः ॥ १५ ॥ १६ ॥

रा० टी०—रावणोक्तिमाह—द्वारेष्विति । द्वारेषु यत्न

१ तपसेति गो. पाठः । २ अभ्युपागम्येति गो. पाठः । ३ तन्भीमेति गो. पाठः । ४ तपोयुक्तमिति गो. पाठः । ५ रक्षोपरि-तिष्ठन्तु इति पाठः । ६ कालेति गो. पाठः ।

नव सप्त दशाष्टौ च मासान्स्वपिति राक्षसः । मत्रं कृत्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि ॥ १७ ॥

प्रबलराक्षसस्थापनादि क्रियतां प्राकारश्चाधिरुह्यतां प्रबलराक्षसैरिति शेषः अहं पृथक् निद्रेति । निद्राया वशेन कांत्या समाविष्टः अत एव कामं यथा भवति तथा इदानीं चेतनः यस्य अत एव निश्चिन्तः यः कुम्भकर्णः सुखं स्वपिति स विबोध्यताम् ॥ १५ ॥

गो० टी०–द्वारेषु इत्यन्तरश्लोके । यत्नः क्रियतां, प्राकारश्चाधिरुह्यताम् । वानरानरोधार्थमिति भावः । निद्रावशसमाविष्टः निद्रावशेन क्वचनः । सत्र यतेऽत्यर्थं पुनरुक्तिः ॥ १५ ॥

गो० टी०–सुखमिति । दुःखिते चिन्ताक्रान्ते अवधारकामे मयि जायति सतीति शेषः । न केवलमितीमेव सर्वावाप्येमेवेत्याह—नवेति । कदाचित्त्रयमासान कदाचित् षण्मासान् कदाचित्सप्तमासान् कदाचिदष्टमासांश्चानिद्रयमेव स्थापितीत्यर्थः । अत एवोत्तरकाण्डे अविशेषेण सप्तमार्थेना इत्याकर्णेन क्रियते—स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितमिति । उत्तरत्र रामं प्रति विभीषणवचने—शयिता शेष षण्मासानेकाहं जागरिष्यतीति वचनं तु पश्चान्तराणामपपुपलक्षकम् । अन्यनाभिप्रायं वा सप्तमासादिस्थापसंभवेपि षण्मासस्यात्रः संभवृत्येव । यद्वा, नवसप्तदशाष्टौ च मासान् स्वपिति राक्षस इति पाठः । दशाष्टौ दशमासहानौ सत्यां नवसप्तमासान् षण्मासानित्यर्थः । अष्टिरशनम् नाश इति यावत् । नवसप्तमासाः षोडशमासाः तेषु दशमासलोपे हि षण्मासा भवन्तीति । अथवा षड्भिर्मासान्संपाद्याहरुत्सृजन्ति षड्भिर्मासान्संपश्यन्त्यर्धमासैर्मासान्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान् संपश्यन्ति षड्भिर्मासान्संपश्यन्त्यमावास्यया हि मासान् संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान् संपश्यन्ति पौर्णमास्या मासान्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्संपश्यन्तीत्युक्तमासविकल्पेषु षड्भागमपि मासस्य श्रवणात्तत्प्रकारेण नवषड्डित्युक्तविंशन्मासा अपि भवीत्युत्तरश्रुतदिनतया अमावास्यया पौर्णमास्या वा परिगणनेन षण्मासा एव संपश्यन्त इति न कश्चिद्विरोधः । तथा हि नास्ति किंचिदु उत्सर्गिणामयनं नाम सत्रं गवामयनस्य विकृतेः । तत्र प्रकृतौ द्वादशमासेष्वनुष्ठेयानां सोमयागविशेषाणां त्रैशतोत्पत्तेयस्यान्न किंचिदहरुत्सृष्टं शक्यते । तद्विकृतावत्र प्रतिमासमेकस्मिन्नहनि सोमयागपरित्यागो विधीयते । तत्र कतमहस्त्यज्यतामित्यपेक्षायामुच्यते अमावास्यया मासान्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्संपश्यन्ति पौर्णमास्या मासान्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्संपश्यन्तीति । अस्यार्थः अमावास्यायामहरेनेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति । पौर्णमास्यामनुष्ठेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति । अस्मिन् विषये अर्थवादे प्रसिद्धिवाक्येन हि शब्देन अमावास्याया मासान्तत्वम् । उत्तरवाक्ये पौर्णमास्या मासान्तत्वं च श्रुतम् । एवम्, अर्धमासैर्मासान्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान् संपश्यन्ति षड्भिर्मासान् संपाद्याहरुत्सृजन्ति षड्भिर्हि मासान्संपश्यन्तीत्यत्रापि पक्षात्मकः षड्भागोपि मासोस्तीति हिशब्देन दर्शितम् । नव च षड्भिरिति बहुवचननिर्देशात् षड्भिः षड्भिरिति व्याख्यानेन विंशतिर्मासा भवन्त्यत्र व्याख्यानेन विंशतिर्मासा भवन्त्यत्र व्याख्यानेन विंशतिर्मासा भवन्त्यत्र

तेः। स्थितः कङ्कणवनिव तीक्ष्णशृङ्ग इति श्लोके प्रतिपूर्णशृङ्ग इति पदेन प्रतिपूर्णशृङ्गवच्चन्द्रवर्णवत्व तस्यामेव संभवात्। यस्मिन्दिने रात्रौ लङ्कायां सीतान्वेषणं तदनन्तरदिन एव प्रातर्लङ्कादाहः। अवश्यमेव द्रष्टव्या मया लङ्का निश्चित्य इत्युक्तत्वात्। अनन्तरं तस्मिन्नेव दिने अविलम्बेन प्रत्यागमनस्य। यदि वा वन्यफलैर वर्त्तयिष्येऽहमरिन्दमेति सीतया प्रेष्ट, एवमाश्वास्य वैदेह्या हनुमान्मारुतात्मजः। गमनाय मतिं चक्रे इत्युक्तेः। उपरि लङ्कादाहानन्तरं तस्मिन्नेव दिने मध्याह्नात् पूर्वमेव सुहृदादिभिर्मधुवनविध्वंसनपूर्वकं रामप्राप्तिः। अरिष्टवर्तारोहणे लङ्घनेनव्याजेन बोध्यमानमिव श्रीघ्रं क्रियाकरैः सुवेलरिति सूर्योदयसमयमुक्त्वा अनन्तरमस्तमयमुक्तेः। तस्मिन्नेव दिवसे चतुर्दशीशेषयुक्तपौर्णमासीयुते मध्याह्ने पुङ्खयोगे। अस्मिन्मुहूर्ते सुग्रीवप्रयाणमभिरोचये। इति मुहूर्तो दिवा प्राप्तो मध्ये दिवाकर इत्युक्तेः। वसिष्ठादिभिर्मिलित्वा प्रस्थानं तत्परपुरुषैः सहृदर्तीर सेनानिवेशः। सा च सर्वत्र दिवाकरा महती हरिवाहिनीत्याद्यम्, मुहूर्ते क्वापि तात्पर्यात्। यस्मिन्दिने लङ्कादाहात्तत्रैव दिवसे सभायां मन्त्रिभिः सह किंचिदिह चारमुक्त्वा, विसर्जयित्वा तांस्तु सर्वान् विवेश स्वकं पुरं नित्यन्तेन लङ्कादाहदिनदृष्टान्ते परिसमाप्य, ततः प्रातरेव श्रीघ्रं इत्यादिना अनन्तरदिने उक्तकाले विभीषणेनेति। इति सञ्चिन्त्य ततो मन्त्रविचारार्थं रामे कृतप्रणामविभीषणादिसभां प्रविष्टे विभीषणस्य तृतीयमुहूर्तेऽभ्यागमः, इत्युक्तम् एवं चाद्भुतं दृष्ट्वा [illegible] रामः सलक्ष्मणः॥ इत्यविलम्बेन लङ्कादाहदिनान्तरमेव समुद्रतीरे रामसकाशागमनवर्णनेन च द्वितीयदिने सायं समुद्रतीरं प्राप्तमित्यवगम्यते। समुद्रतीरप्राप्तिदिनं च द्वितीयं कात्स्न्येनपौर्णमासी अत एव उत्तरफल्गुनी, तथोक्तं चतुर्थश्लोके प्रस्थानदिनस्य पौर्णमासीयुक्तत्वमभ्युपगम्य समुद्रतीरप्राप्तिदिनस्य पौर्णमासीयुक्तत्व च, चण्डनक्राहं घं अमावास्यां दिनमस्य। कृष्णपक्षमुहूर्तं प्रतिपन्नमसाधुत्वमिति संख्यासमय एव अवतारप्रतिपन्नत्वात् सिद्धम्। सेनानिवेशानन्तरं विभीषणागमनवृत्तान्तस्य एकदिनसाध्यापि वा क्रमवर्तित्वात् क्रमेणोक्तः। प्रथमायां रामस्य वसिष्ठप्रयुक्तमकर्मव्यापारकश्च। अनुपौषशुक्लपौर्णमास्यन्वयमीष्ट संबन्धः। अष्टम्यां रात्रौ सुवेलारोहणम्। अस्तु सुवेल, पूर्णचन्द्र प्रदीपा च निशा समभिवर्तत्तेति वचनम्, तत्पूर्णचन्द्र। प्रदीपा यस्यां निशायामित्येवमर्थकं व्याख्येयम्। सुग्रीवनाथा वेयादीनामिव प्रदीपादीनामपि संभवात्। सुवेलात् हणानन्तरदिने दिवा लङ्कानिरीक्षः। तां रात्रिमुषितस्तत्र सुवेले हरियूथपः। लङ्कायां वह्नयुत्थैर्धूमैरनभ्रपटलानि चेत् पक्वस्य युद्धवर्णनात्। तत्रैव प्रथमदिनेऽपि रात्रौ जुगोपवत् तादृग्मोहादि। युद्धवृत्तमेव तेषां तु तथा [illegible] रात्रिरत्नं गतो रात्रि [illegible]

तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम् ।
स हि संख्ये महाबाहुः कर्कशं सर्ववर्षसाम् । वानरान्राक्षसपतौ च क्षिप्रमेव हनिष्यति ॥ १८ ॥
एष केतुः परं संख्ये मुख्यो वै सर्ववर्षसाम् । कुम्भकर्णः सदा शेते मृतो ज्ञात्यसुखे रतः ॥ १९ ॥
रामेणाभिनिरस्तस्य सङ्ग्रामेऽस्मिन्दुरुत्तरे । भविष्यति न मे शोकः कुम्भकर्णे विबोधिते ॥ २० ॥

निशा घोरा हरिराक्षसहारिणी । तत्रते राक्षसान्तकरं तरिं
स्तमसि दारुणे ॥ राममेवाभ्यवर्तन्त । ते भिन्नैरुः हतो
नाराचैः क्षतविग्रहाः । अन्धकारां च दृष्ट्वारिवाहिनि तामेव
रात्रिं प्रत्यभिज्ञाय, निरन्तरशरौघौ तौ भ्रातरौ राम इत्यौ ।
क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः, शरीरविनिर्भेदकरैः ।
तत्रैव निजीये वानरहर्षनादकृतिना रावणेन रोषितं
राक्षसं दूयोर्युद्धं तद्भूयश्च । तयोर्युद्धे दिवा आकाशस्थानां वानर-
हर्षनिनदश्रवणाच्च । रात्रियुद्धेन तयोरतिक्रूरं द्वितीये
दिने अकम्पनयुद्धम् । अस्मिन्नेवाहनि ... दिने
चापि दुर्दिनं कक्षभास्तमिति दिवा ज्ञात्वा ...
नवधानन्तरमेव रावणस्य पुत्रौ ... पुनर्युद्धं
नवरात्रान्तरं प्रस्तुतयुद्धायाभिलक्ष्य ... ।
तत्र, अन्योन्यमभिसंरब्धा ... प्रकाशप्रतिषेधेन प्रहस्तयुद्धं राक्षसीति ... ।
... दुर्दिनं दिवादर्शनायोग्यानामप्यर्थानां ... ।
... प्राजापत्यं च नक्षत्रं रोहिणी ... ।
... कस्य वृष्टस्यो प्रजानामभूमार इत्यादि ... ।
... वर्तेतेति पाठानुरोधादत्रैव ... ।
... तदपरोक्ष्यान्यान्ते वक्ष्यमाणत्वात् । तत्रिकटे ... ।
रावणराजयकुम्भकर्णप्रहस्तकुम्भकर्णसुताः ... ।
मर्सकीर्त्यानन्दमयविद्वेषेण तदीयपूर्वकर्मसंस्मरणम् ... ।
वल्पनत्रद्विर्मोक्षरूपे कालविशेषकीर्तनात् । दृश्यते हि ...
पश्चिहनाः कोट्यो वानराणां नरर्षभाः । अक्ष ... ।
पूरुषेण स्वर्गेऽपि इति ॥ अत्र अक्ष. पञ्चमकोटो नव सार्धकोट्य ।
ततःसंख्यमध्याद्वारात्राः सामस्त्यार्थौ । ...
पञ्च भागा दिनस्य कालचिन्तकैरिति वचनात् ॥ तत्र ...
द्वितीयायां रात्रौ वानरविमोक्षानन्तरं पुनर्द्वितीयवासरात्-
कुम्भनिकुम्भशुम्भशोणिताक्षप्रजङ्घयज्ञशत्रुसमकरालयाः सप्तते-
स्तत्रैव आदित्ये रात्रौ तदभिलाषिणश्च । तद्भ्रातृमित्रयोर्का
लम्भवते प्रवगर्षभा इत्युक्तेः ॥ एवं परिपूर्णदिनद्वयेन युद्धवेला-
न्द्रजिद्रावणव्यतिरिक्तेषु व्यपस्थितराक्षसेषु हतेषु दुर्दर्शदिनमा-
रभ्य दिनत्रयेणेन्द्रजिद्युद्धम् । अहो रावणिभिर्वीरैः कथञ्चिदपि
निपातित इत्युक्तत्वात् । अथ पञ्चदिने कृष्णचतुर्दश्याम् । तस्मिन्
दिने सायंकालमारभ्य द्विरात्रं रावणयुद्धम् । सप्तमदिने
रावणवधः । अथवा सप्तमदिने रावणयुद्धम् । अष्टमदिने
प्रातःकाले रावणवधः । अभ्युत्थानं त्वमावै कृष्णपक्षचतुर्द-
शीम । अहो निर्योगमालाग्रं विजयाय भवेन्नृप इत्यादि
संवत्सरयोगमपि योजयितुं शक्यत्वात् । पूर्वाभावस्यापि
पालनीय इति कृत्वा अमावास्यायां रावणवध इति प्रवादः ।
... यत्र यत्रि रामरावणयोर्युद्धं सप्तमदिनं ... ।
... स्तेषां ... ।
... ।
... ।

किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि । ईदृशे व्यसने घोरे[1] यो न साह्याय कल्पते ॥ २१ ॥
तेषां तद्वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः । जग्मुः परमसंभ्रान्ताः कुम्भकर्णनिवेशनम् ॥ २२ ॥
ते शक्रसमादिष्टा मांसशोणितभोजनाः । गन्धं माल्यं महद्भक्ष्यमादाय सहसा ययुः ॥ २३ ॥
तां प्रविश्य महाद्वारां सर्वतो योजनायताम् । कुम्भकर्णगुहां रम्यां पुष्पगन्धप्रवाहिनीम्[2] ॥ २४ ॥
कुम्भकर्णस्य निःश्वासादवधूता महाबलाः । प्रतिष्ठमानाः कृच्छ्रेण यत्नात्पविविशुर्गुहाम्[3] ॥ २५ ॥
तां प्रविश्य गुहां रम्यां रत्नकाञ्चनकुट्टिमाम्[4] । ददृशुर्नैर्ऋतव्याघ्राः शयानं भीमविक्रमम्[5] ॥ २६ ॥
ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम्[6] । कुम्भकर्णं महानिद्रं समेतास्तं[7] प्रत्यबोधयन्[8] ॥ २७ ॥
ऊर्ध्वलोमाञ्चिततनुं श्वसन्तमिव पन्नगम्[9] । भ्रामयन्तं विनिःश्वासैः शयानं भीमविक्रमम्[10] ॥ २८ ॥
भीमनासापुटं तं तु पातालविपुलाननम्[11] । शैलाभे न्यस्तसर्वाङ्गं मेदोरुधिरगन्धिनम्[12] ॥ २९ ॥
काञ्चनाङ्गदसंनद्धां किरीटेनार्कवर्चसम्[13] । ददृशुर्नैर्ऋतव्याघ्रं कुम्भकर्णमरिंदमम्[14] ॥ ३० ॥
ततश्चकुम्भकर्णस्य[15] चाग्रतः । भूतानां मेरुसंकाशं राशिं परमतर्पणम् ॥ ३१ ॥
मृगाणां महिषाणां च वराहाणां च संचयान् । चक्रुर्नैर्ऋतशार्दूला राशिमन्नस्य चाद्भुतम् ॥ ३२ ॥
ततः शोणितकुम्भांश्च मांसानि विविधानि च । पुरस्तात्कुम्भकर्णस्य चक्रुस्ते दशशत्रवः ॥ ३३ ॥

२१-२३] ति० टी०—नन्वेवंविधदुःखनाशसमर्थस्यापि कथमेतोत्थानमुचितं भवेत्तत्राह—किं करिष्यामीति । व्यसने दुःखे ॥ २१–२३ ॥

रा० टी०—किमिति । ईदृशे व्यसने दुःखे प्राप्ते सति यः कुम्भकर्णः साह्याय न कल्पते सहायो न भवति तेन शक्रतुल्यबलेन अहं किं करिष्यामि ॥ २० ॥

गो० टी०—अकाले तस्योत्थानमनुचितमित्याह—किं करिष्यामीति ॥ साह्याय साहाय्याय ॥ २१ ॥

रा० टी०—ते इति । राक्षसाः राक्षसेंद्रस्य वचनं श्रुत्वा परमसम्भ्रान्ताः कुंभकर्णनिवेशनं जग्मुः ॥ २२ ॥

गो० टी०—ते त्विति । परमसंभ्रान्ताः कथमेनमकाले बोधयिष्याम इति व्याकुलाः ॥ २२ ॥

रा० टी०—तदेव भंगयंतरेणाह—ते इति । मांसशोणितभोजनाः राक्षसाः गंधादीन्यादाय सहसा ययुः ॥ २३ ॥

गो० टी०—त इति । प्रबोधशक्तिविद्वद्भ्यर्थं मांसादिकं भुक्त्वा कुम्भकर्णस्य प्रबोधकालिकश्वासापादिशान्तये गन्धमाल्यादिकं गृहीत्वा ययुरित्यर्थः ॥ २३ ॥

२४] ति० टी०—सर्वतः प्राक्प्रत्यग्दक्षिणोत्तरतश्चेत्यर्थः । कुम्भकर्णगुहाम् । पातालवदेवानिर्मितं भूविलमित्यर्थः ॥ २४ ॥

२५] ति० टी०—प्रतिष्ठमानाः परिहृत्य गच्छन्तः ॥ २५ ॥

रा० टी०—तामिति । महद्वारं यस्याः सर्वतश्चतुर्दिक्षु योजनमायतं यस्याः पुष्पगंधानां प्रवाहस्तद्वतीम् कुम्भकर्णगुहां प्रविश्य किंचिद्दूरं गत्वा कुम्भकर्णस्य निश्वासादवधूताः महाबलाः प्रतिष्ठमानाः बभूवुरिति शेषः यत्नात् अतिप्रयत्नेन गुहां प्रविविशुः पुनः प्रवेशं चक्रुः अर्द्धचतुष्टयमेकान्वयि ॥ २२ ॥ २४ ॥

गो० टी०—तामित्यादिश्लोकद्वयमेकान्वयम् । सर्वतः चतसृषु दिक्षु । सर्वगन्धप्रवाहिनीं कुम्भकर्णोत्थितश्वासादिगन्धप्रवाहवतीम् । कुम्भकर्णगुहां प्रविश्य निश्वासादवधूताः सन्तः कृच्छ्रेण प्रतिष्ठमानाः अभिमुखं गच्छन्तः यत्नात्तां गुहां विविशुरिति योजना ॥ २४ ॥ २५ ॥

२६–२७] ति० टी०—रत्नकाञ्चनकुट्टिमां रत्नकाञ्चननिबद्धभूतलयुक्ताम् ॥ २६ ॥ २७ ॥

रा० टी०—तामिति । नैर्ऋतव्याघ्राः शयानं कुंभकर्णं ददृशुः ॥ २५ ॥

गो० टी०—तामिति । काञ्चनकुट्टिमां स्वर्णमयनिबद्धभूमिम् ॥ २६ ॥

रा० टी०—ते इति । समेताः ते राक्षसाः विकीर्णं पर्वतमिव विकृतं महती निद्रा यस्य तं सुप्तं कुम्भकर्णं प्रत्यबोधयन् ॥ २६ ॥

गो० टी०—ते तु तमिति । विकृतं निद्राकालिकविकारयुक्तम् । विकीर्णं शिथिलम् ॥ २७ ॥

२८–३३] ति० टी०—ऊर्ध्वलोमाञ्चिततनुमूर्ध्वलोमयुक्तशरीरं भ्रामयन्तं परिवर्तयन्तम् । जनानिति शेषः ॥ २८–३३ ॥

रा० टी०—कुम्भकर्णं वर्णयन्नाह—ऊर्ध्वैरित्यादिभिः । ऊर्ध्वैर्लोमभिः अञ्चिता युक्ता तनुर्यस्य पन्नगं महासर्पमिव श्वसन्तं अत एव विनिःश्वासैर्भ्रामयंतं राक्षसानितस्ततश्चालयंतं भीमे नासापुटे यस्य पातालवद्विपुलाननं यस्य शयने शय्यायां

---

१ क्रोधे इति गो. पाठः । २ गन्धवाल्यवतीवरा महद्वारेति गो. पाठः । ३ सर्वतो गो. पाठः । ४ शुभ्रामिति गो. पाठः । ५ ददृशुरिति गो. पाठः । ६ सहिता इति गो. पाठः । ७ रोमेति गो. पाठः । ८ श्वासयन्तमिति गो. पाठः । ९ दर्शनमिति गो. पाठः । १० शय्यायामिति गो. पाठः । ११ किरीटमकुटमिति गो. पाठः । १२ महाबलमिति गो. पाठः । १३ कुम्भकर्णप्रतिरूपेति गो. पाठः । १४ [illegible]

लिलिपुश्च पराध्येन चन्दनेन परंतपम् । दिव्यैराश्वसयामासुर्माल्यैर्गन्धैश्च गन्धिभिः ॥ ३४ ॥
धूपैर्गन्धांश्च ससृजुस्तुष्टुवुश्च परंतपम् । जलदा इव चानेदुर्यातुधानास्ततस्ततः ॥ ३५ ॥
शङ्खांश्चैव पूरयामासुः शशाङ्कसदृशप्रभान् । तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः ॥ ३६ ॥
नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः । कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वरम् ॥ ३७ ॥

स शङ्खभेरीपणवप्रणादं सास्फोटितक्ष्वेलितसिंहनादम् ।
दिशो द्रवन्तस्त्रिदिवं किरन्तः श्रुत्वा विहंगाः सहसा निपेतुः ॥ ॥ ३८ ॥
यदा भृशार्तैर्निनदैर्महात्मा न कुम्भकर्णो बुबुधे प्रसुप्तः ।
ततो भुशुण्डीर्मुसलानि सर्वे रक्षोगणास्तं जगृहुर्गदाश्च ॥ ॥ ३९ ॥
तं शैलशृङ्गैर्मुसलैर्गदाभिर्वक्षस्यथैले मुहुरभ्यघ्निभिश्च ।
सुखप्रसुप्तं भुवि कुम्भकर्णं रक्षांस्युदग्राणि तदा निजघ्नुः ॥ ॥ ४० ॥
तस्य निःश्वासवातेन कुम्भकर्णस्य रक्षसः । राक्षसाः कुम्भकर्णस्य स्थातुं शेकुर्न चाग्रतः ॥ ४१ ॥

न्यस्तानि सर्वांगानि येन मेदोरुधिरयोरिव नद्यौ यस्य अवतरतां ललितमुखमित्यर्थः कांचनाङ्गदेन नद्धमूर्ध्वं यस्य किरीटेन भासद्बाहौ यस्य तं शयानं नैर्ऋतव्याघ्रं कुम्भकर्णं ददृशुः प्रहस्तपञ्चसेनालोकिरे अर्धपद्मकमेकान्वयि ॥ २७–२९ ॥

गो० टी०–ऊर्ध्वेत्यादिश्लोकत्रयमेकान्वयम् । ऊर्ध्वमाश्रिततनुम् ऊर्ध्वभूतरोमव्यायततनुम् । भीमनासापुटं भयंकरनासारन्ध्रम् । मेदोरुधिरेति । पीतावशिष्टेति शेषः ॥ २८–३० ॥

रा० टी०–तत इति । महात्मानोऽतिप्रयत्नवन्तो राक्षसाः मेरुसंकाशं मेरुतुल्यमत एव परमतर्पणम् कुम्भकर्णतृप्तिकरं घृतानां राशिं कुम्भकर्णस्याग्रतोऽग्रे चक्रुः ॥ ३० ॥

गो० टी०–तत इति । अग्रतश्चक्रुः पुरतश्चिक्षिपुरित्यर्थः । परमतर्पणम् अत्यन्ततृप्तिकरम् ॥ ३१ ॥

रा० टी०–भूतानां नामनिर्देशमाह—मृगाणामिति नैर्ऋतव्याघ्रान् मृगादीनां संचयान् अवस्थ राशिं च चक्रुः ॥ ३१ ॥

गो० टी०–मृगाणामिति । राशिं चक्रुः अग्रतो राशिमकुरित्यर्थः ॥ ३२ ॥

रा० टी०–तत इति । त्रिदशवरैः शोणितकुंभान् मांसानि च कुंभकर्णस्य पुरस्ताच्चक्रुः संस्थापयामासुः ॥ ३२ ॥

गो० टी०–तत इत्यादि । मद्यानि मद्यकुम्भानीत्यर्थः । लिलिपुः लेपनं चक्रुः । पराध्येन श्लाघ्यमूल्येन माल्यगन्धैः माल्यचन्दनैः । ततस्ततः पुनः पुनरित्यर्थः । तुमुलं निरन्तरं यथा तथा । युगपद्विनेदुः अमर्षिताः महता प्रयत्नेनाप्यनुत्थाप्यातिक्रोधाः सन्तः नेदुः आस्फोटयामासुः ताडयामासुः । चिक्षिपुः शरीरं कम्पयामासुः । कुम्भेति । इत्थं कुम्भकर्णबोधार्थं विपुलं स्वनं चक्रुरिति संग्रहः ॥ ३३–३७ ॥

३८–३९] ति० टी०–अथ क्रमेण मन्दमध्यतीव्रानुपादानाह—लिलिपुरिति । लेपनं चक्रुः । आश्वासयामासुरित्यनायासः ॥ ३४–३६ ॥

रा० टी०–लिलिपुरिति । चंदनेन लिलिपुः गंधैर्गन्धिभिर्माल्यगंधैः पुष्पचन्दनैश्च आश्वासयामासुः ॥ ३३ ॥

रा० टी०–धूपैरिति । धूपगन्धान् सर्वतः आहृत्य निष्पाद्यामासुः परन्तपं कुम्भकर्णं दृष्ट्वा जलदा इवेत्यनुषज्यते ॥३४॥

रा० टी०–शंख्यानीति । अमर्षिताः विशेषामर्षवन्तः राक्षसाः यत्नवन्तः शंखान् पूरयामासुः तुमुलं निनदुश्च ॥ ३६ ॥

३७] ति० टी०–नेदुरिति । चिक्षिपुर्हस्तैस्तच्छरीरस्य प्रणोदनं चक्रुः ॥ ३७ ॥

रा० टी०–नेदुरिति । केचिदास्फोटयामासुः बाह्वादीनां ताडनं चक्रुः केचित् चिक्षिपुः तत्पादावुत्क्षाप्य नुमुचिरे चिक्षिपुः । केचित् विपुलं स्वरं चक्रुः ॥ ३६ ॥

३८] ति० टी०–त्रिदिवं व्योम । किरन्त इत्यन्तः ॥३८॥

रा० टी०–सेति । संघातप्रणादसहितमास्फोटितादि श्रुत्वा विहंगाः दिशो द्रवंतः त्रिदिवमाकाशं किरन्तः उत्पतन्तश्च सन्तः सहसा निपेतुः ॥ ३७ ॥

गो० टी०–स शङ्खेति । आस्फोटितं बाहुताडनजन्यशब्दः । क्ष्वेलितशब्देन गर्जितमात्रमुच्यते । सिंहनादमित्येकयद्भावः । तद्विहंगाः श्रुत्वा भयेन सर्वा दिशो द्रवन्तः गच्छन्तः तत्रापि भयनिष्टरयदर्शनात् त्रिदिवम् आकाशम् किरन्तः विशन्तः । तत्रापि भयशान्तिमलभमानाः सहसा निपेतुः भूमौ निपतन्ति स्म ॥ ३८ ॥

३९–४१] ति० टी०–भुशुण्डीर्मुसलरक्षिशैलान्॥३९–४१॥

रा० टी०–यदेति । यदा प्रहस्तः कुम्भकर्णं भृशं तैर्निनदैर्न

१ अवतरतां गो.पाठसंमतः पाठः २ लिलिपुरिति गो.पाठः ३ धूपैर्गन्धमिति गो.पाठः ४ चोक्षेपुरिति गो.पाठः । ५ आ इति

ततः परिहिता गाढं राक्षसा भीमविक्रमाः । मृदङ्गपणवान् भेरीः शङ्खकुम्भगणास्तथा ॥ ४२ ॥
दश राक्षससाहस्रं युगपत्पर्यवारयत् । नीलाञ्जनचयाकारं ते तु तं प्रत्यबोधयन् ॥ ४३ ॥
अभिघ्नन्तो नदन्तश्च न च संबुबुधे तदा । यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ॥ ४४ ॥
ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् । अश्वानुष्ट्रान्खराञ्नागाञ्जघ्नुर्दण्डकशाङ्कुशैः ॥ ४५ ॥
भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन् । निजघ्नुश्चास्य गात्राणि महाकाष्ठकटंकरैः ॥ ४६ ॥
मुद्गरैर्मुसलैश्चापि सर्वप्राणसमुद्यतैः । तेन नादेन महता लङ्का सर्वा प्रपूरिता ॥
रावणवना सर्वा सोऽपि नैव प्रबुध्यते ॥ ॥ ४७ ॥
ततो भेरीसहस्रं तु युगपत्समहन्यत । मृष्टकाञ्चनकोणानामसक्तानां समन्ततः ॥ ४८ ॥

बुबुधे ततस्तदा सर्वे रक्षोगणाः भुशुण्डीप्रभृतीः जगृहुः भुशुण्डी मुद्गरविशेषः ॥ ३८ ॥

गो० टी०–यदेति । भृशार्तैः अत्यन्तार्तिपूर्वकैः उच्चावचैः भिन्नैः । भूयं वेरिति पाठान्तरम् । महात्मा महाशरीरः । तत्र तदा । भुशुण्डी मुद्गरविशेषः ॥ ३९ ॥

रा० टी०–तमिति । उद्यतानि महान्ति रक्षांसि भुवि सुप्तस्य कुम्भकर्णं उत्थापयितुं शैलटंकादिभिर्निजघ्नुः ॥ ३९ ॥

गो० टी०–मुद्गरैरिति प्रजघ्नुश्चेत्यादि–तमिति ॥ ४० ॥

रा० टी०–तस्येति । बलवन्तोऽपि राक्षसाः कुम्भकर्णस्य विश्वासातिशयेन पुरः स्थातुं न अशकुवन् ॥ ४० ॥

गो० टी०–तस्येति । रक्षस इति विशेषणं विश्वासातिशयोत्पादाय ॥ ४१ ॥

४२] ति० टी०–गाढं परिहिताः परिहितवाससः । कुम्भकर्णजागरणायेति । वादयामासुरिति शेषः । 'ततः प्रपूरिता सर्वा रक्षसां भीमविक्रमैः' इति पाठः । तत्र सुगमम् । उत्तरार्धे शङ्खाश्च इत्यादि ॥ ४२ ॥

रा० टी०–तत इति । गाढं परिहिताः धृतवस्त्राः राक्षसाः भेरीशङ्खादीन् वादयामासुरिति शेषः ॥ ४१ ॥

गो० टी०–तत इत्यर्धमेकं वाक्यम् । परिहिताः कृतपरिधानाः सन्तः । वक्ष्यमाणकार्ये सावधाना आसन्नित्यर्थः ॥ ४२ ॥

गो० टी०–मृदङ्गेति । शङ्खकुम्भवाणगणान् । दशसाहस्रा एवाः [1] ते राक्षसमहत्तमाणि परिवारभूता येषां ते तथोक्ताः ॥ ४२ ॥

४३-४४] ति० टी०–दशराक्षससाहस्रं दश राक्षससहस्राणि ॥ ४३ ॥ ४४ ॥

रा० टी०–नीलेति । नीलाञ्जनचयाकारं ते कुम्भकर्णम् राक्षससाहस्रं दश एकैकालातास्त्रेण पर्यवारयन् ते परिवारितवन्तो राक्षसाः अभिघ्नन्तो नदन्तश्च सन्तः प्रत्यबोधयन् [2] न च संबुबुधे [3] सार्धश्लोक एकान्वयी ॥ ४२ ॥४३॥

रा० टी०–यदेति । यदा राक्षसाः एनं कुम्भकर्णं प्रतिबोधयितुं न शेकुः तदा तत्तस्मात् बोधनयत्नात् गुरुतरं दारुणं यत्नं बोधनोपायं समुपाक्रमन् कर्तुमारभन्त ॥ ४४ ॥

गो० टी०–नीलेति । ते राक्षसाः अभिघ्नन्तो नदन्तश्च सन्तः तं प्रत्यबोधयन्नित्यनुवादः । प्रतिबोधनेपि स न संविवेद न बुबुधे । 'नीलाञ्जनचयाकारा इति परितः संचारिस्वयोतनायोक्तम् ॥ ४४ ॥

गो० टी०–यदेति । गुरुतरं यत्नमुपाक्रमन् प्रबलं बोधनोपायमारेभिर इत्यर्थः ॥ ४५ ॥

४५] ति० टी०–जघ्नुः । तदुपरि संचारेण तद्बोधनार्थमिति शेषः ॥ ४५ ॥

रा० टी०–यत्नमेवाह—अश्वानिति । अश्वादीन् दण्डैः कशाभिस्तोत्रैः अंकुशैश्च जघ्नुः तदुपरिसंचरणाय ताडयामासुः सर्वप्राणैर्निखिलबलैः अवादयंश्च ॥ ४५ ॥

गो० टी०–तमेव यत्नं दर्शयति—अश्वानिति । तस्योपरिपरिधावनायेति भावः । सर्वप्राणैः सर्वबलैः ॥ ४६ ॥

४६-४७] ति० टी०–सर्वप्राणैः सर्वबलेन । महाकाष्ठानां स्थूणादीनां कटंकरैः समूहैः । 'कटंकटैः' इति पाठः । कटंकटः स्तम्भभेद इति तीर्थैः ॥ ४६ ॥ ४७ ॥

रा० टी०–निजघ्नुरिति । सर्वप्राणैर्निखिलबलेन । समुद्यतैः महाकाष्ठानां स्थूणादीनां कटंकरैः समूहैः मुद्गरैर्मुसलैश्च अस्य कुम्भकर्णस्य गात्राणि निजघ्नुः ॥ ४६ ॥

गो० टी०–निजघ्नुरिति । महाकाष्ठकटंकरैः महाकाष्ठाग्रस्तम्भैः । काष्ठाग्रस्थकशाभिरित्यर्थः कटंकरः स्तम्भभेद इति केचित् । सर्वप्राणसमुद्यतैः ॥ ४७ ॥

रा० टी०–तेनेति । महता तेन नादेन लंका प्रपूरिता सर्वासः सर्वेषां राक्षसानामासा विजयवाञ्छा येन किंच सर्वेषामासौ दीप्तिर्यस्मात् स कुम्भकर्णस्तु नैव प्रबुध्यते ॥ ४७ ॥

गो० टी०–तेनेति । प्रबुद्धयते प्राबुध्यत ॥ ४८ ॥

४८] ति० टी०–मृष्टकाञ्चनकोणानां मृष्टकाञ्चननिर्मितकोणा वादकदण्डा यासां ताडनीनां भेरीणां सहस्रमित्यर्थः । आर्षः समासः ॥ ४८ ॥

---

१ साहस्रा इति गो. पाठः । २ अवाद्यन्निति गो. पाठः । ३ आकाय इति गो. पाठः । ४ [illegible] पाठः । ५ शब्देनेति गो. पाठः । ६ सबलेनेति गो. पाठः । ७ सहस्रभेरीणामिति गो. पाठः ।

एवमप्यनिद्रस्तु यदा नैव प्रबुध्यत । शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः ॥ ४९ ॥
तैतः कोपसमाविष्टाः सर्वे भीमपराक्रमाः । तद्रक्षो बोधयिष्यन्तश्चक्रुरन्ये पराक्रमम् ॥ ५० ॥
अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् । केशानन्ये प्रलुलुचुः कर्णानन्ये दशन्ति च ॥ ५१ ॥
उदकुम्भशतानन्ये समसिञ्चन्त कर्णयोः । न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः ॥ ५२ ॥
अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः । मुष्टौ वक्षसि गात्रेषु पातयन्कूटमुद्गरान् ॥ ५३ ॥
रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वशः । वध्यमानो महाकायो न प्राबुध्यत राक्षसः ॥ ५४ ॥
वारणानां सहस्रं च शरीरेऽस्य प्रधावितम् । कुम्भकर्णस्तदा बुद्धा स्पर्शं पप्रच्छ वै तदा ॥ ५५ ॥

स पात्यमानैर्गिरिभृक्षसंचिन्तयंस्तान्निपुणान्प्रहारान् ।
निद्राक्षयात्क्षुद्रपपीडितश्च विजृम्भमाणः सहसोत्पपात ॥ ५६ ॥
स नागमीगाचलभूरुहाणि विक्षिप्य बाहू जितदेवसङ्घौ ।
विधूय वक्त्रं वदनान्तकाभं निशाचरोऽसौ विरुरुवं जजृम्भे ॥ ५७ ॥

रा० टी०–तत इति । समन्ततः आस्तरणार्थं तत्रास्तीर्णानां सृष्टाः ये कांचनकोशाः सुवर्णमयकोशाः तेषां यानीसहस्रं युगपत् समहन्यत सम्यग्न्यपतन्मारुतिस्तत्र ॥४८

गो० टी०–तत इति । सृष्टकाञ्चनकोशानां सृष्टसुवर्णमयकोशानां तन्निर्मिताः कोशाः वादनदण्डाः यासां ताः तथोक्ताः । आस्तृतानां संहतानाम् ॥ ४८ ॥

४९–५२] ति० टी०–शापस्य वशमापन्न ॥ ५० ॥ ५१

रा० टी०–एवमिति । यदा कुंभकर्णः एवमुक्तप्रकारेण तस्य एष अत्यन्तं निद्रा यस्य स कुम्भकर्णः तदा तस्मिन् यदा निशाचराः क्रुद्धाः क्रोधेन विष्टब्धचित्ताः ॥ ४९ ॥

गो० टी०–एवमपीत्यादि । शापस्य वशमापन्नः । क्रुद्धाः पूर्वमेव कुपिताः । पुनर्यदा महाकोपसमाविष्टाः जज्ञिरे ॥ ५० ॥

रा० टी०–तत इति । तद्रक्षो बोधयिष्यन्तः अन्ये सर्वे राक्षसाः पराक्रमं प्रहारं चक्रुः ॥ ५० ॥

रा० टी०–तत्पराक्रममाह—अन्ये इति । अन्ये कर्णौ घ्नन्ति ॥ ५१ ॥

रा० टी०–उदेति । अन्ये उदकुम्भशतानां शतसंख्याकानि उदकानि कर्णयोः समसिञ्चन्त अन्यत्र पूरयन्ति स्म । कर्णौ च पस्पन्दे ॥ ५२ ॥

गो० टी०–तद्रक्ष इत्यादि । पराक्रमं सृष्टिप्रहारात्मकम् । महास्वनं महागर्जितम् । प्रलुलुचुः लुलुचन्तः । दशन्ति भक्षयन्ति । उदकुम्भशतानि आदायेति शेषः ॥ ५०–५३ ॥

५३–५४] ति० टी०–पातयन्नपातयन् ॥ ५३ ॥ ५४ ॥

रा० टी०–अन्य इति । अन्ये महाबलिनः कूटमुद्गरान् पातयन् अपातयन् ॥ ५३ ॥

गो० टी०–अन्य इति । कूटमुद्गरपाणय इत्येतेन तत्प्रहारेष्वयं लक्ष्यते । पातयन् अपातयन् ॥ ५४ ॥

रा० टी०–वध्यमान इति । रज्जुबन्धनबद्धाभिः शतघ्नीभिः वध्यमानो विनाश्यमानो विशेषतः ॥ ५४ ॥

गो० टी०–रज्जुबन्धनबद्धाभिरिति । रज्जुबन्धनानि प्रसिद्धानि रज्जवश्च वस्त्रवल्कादिनिर्मिताः । रज्जुबन्धनबद्धाभिः स्त्रीलिङ्गनिर्देशः पुंवद्भावार्षः । शतघ्नीभिश्चेति । शतघ्नयश्च पीडयमानः ॥ ५४ ॥

५५] ति० टी०–स्पर्शं स्पर्शनेन्द्रियं प्रश्नवाचकम् ॥ ५५ ॥

रा० टी०–वारणानामिति । तदा अस्य कुंभकर्णस्य वारणानां गजानां सहस्रं सहस्रसंख्याकं प्रधावितम् सदा इतस्ततो धृतं केचित् स्पर्शेतरुपपत्तेः मेदानां नाधावत इत्यर्थः ॥ ५५ ॥

गो० टी०–वारणानामिति । स्पर्शं पप्रच्छ । वारणप्रधावनं केचित् स्पर्शेतरुपपत्तेः मेदानामधावनमिति अन्ये । तदः विस्तृतिः ॥ ५५ ॥

५६–५७] ति० टी०–स पात्यमानैरिति ॥ ५६ ॥ ५७ ॥

रा० टी०–स इति । पात्यमानैः विविधमुत्क्षिप्य भूमौ पातयद्भिः वानरैः अभिनिघ्नद्भिः आघातयद्भिः निद्राक्षयात् अल्पनिद्रात्वात् क्षुद्रपपीडितः स कुम्भकर्णः उत्पपात उत्पतितः ॥ ५६ ॥

गो० टी०–स पात्यमानैरिति । पात्यमानैः प्रक्षिप्यमाणैः स्वातन्त्र्याय पुनः क्षिप्यमाणैः क्षुद्रपपीडितः क्षुद्रबाधापीडितः मथमथकालवत्तत्वम् । क्षुद्र इत्यपपीडित इति वा । विजृम्भमाणः गात्राणि कुर्वाणः उत्पपात उत्पतितः ॥ ५६ ॥

रा० टी०–स इति । सोऽसौ निशाचरः जितः वज्रसारः वज्राङ्गः बहुयोद्धारौ यान्यां तौ बाहू विक्षिप्य वक्त्रं मुखं विधूय तत्य जजृम्भे ॥ ५७ ॥

गो० टी०–विजृम्भमाण इत्युक्तं विवृणोति–स इति ।

१ तदेत्यन्त इति गो० रा० पाठः । २ महाबलीति गो० पाठः । ३ कर्णाविति गो० रा० पाठः । ४ सर्वत्र इति गो० पाठः । ५ विधि गो० पाठः ।

तस्य जृम्भमाणस्य वक्त्रं पातालसंनिभम् । ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ ५८ ॥
स जृम्भमाणोऽतिबलः प्रबुद्धस्तु निशाचरः । निःश्वासवात्स्य संजज्ञे पर्वतादिव मारुतः ॥ ५९ ॥
रूपमुत्पिपृक्षतस्तस्य कुम्भकर्णस्य तद्बभौ । युगान्ते सर्वभूतानि कालस्येव दिधक्षतः ॥ ६० ॥
तस्याग्निदीप्तसदृशे विद्युत्सदृशवर्चसी । ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ ६१ ॥
ततस्त्वदर्शयन्खादन्वराहांश्च विविधान्बहून् । वराहान्महिषांश्चैव बभक्ष स महाबलः ॥ ६२ ॥
आदद्रुधिरिणो मांसं शोणितं तृषितोऽपिबत् । मेदःकुम्भांश्च मद्यांश्च पपौ शर्करिपुस्तदा ॥ ६३ ॥
ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः । शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ ६४ ॥
निद्राविशदृनेत्रस्तु कलुषीकृतलोचनः । चारयन्सर्वतो दृष्टिं तानुवाच निशाचरान् ॥ ६५ ॥
स सर्वान्मान्त्रयामास नैकृतान्नैर्ऋतर्षभः । बोधनाद्विस्मितश्चापि राक्षसानिदमब्रवीत् ॥ ६६ ॥

५८-६०] ति० टी०-जृम्भमाणस्य पुनः पुनर्जृम्भां कुर्वतः । वक्त्रमतः पातालसंनिभं ददृशे । उपरि तु मेरुशृङ्गाग्रे दिवो दिवाकर इव ददृशे महाशरीरत्वात् ॥ ५८ ॥ ६० ॥

रा० टी०-तस्येति । जृम्भमाणस्य तस्य कुंभकर्णस्य पातालसन्निभं वक्त्रं ऊर्ध्वशृङ्गाग्रे उदितो दिवाकर इव ददृशे॥५८॥

गो० टी०-तस्येति । जृम्भमाणस्य । यद्वदुदयास्तपदस्थानमाभाव्यार्थौ । मेरुशृङ्गाग्रे । मेरोस्तस्य सावर्णिमरुदृष्टस्यैव सूर्यसंबन्धात् । अत्र दिवाकरस्योदितत्वं महाशरीरभागस्थपुर्यपेक्षया । यद्वा उदितः दृष्ट इत्यर्थः । सत्यानां बहुत्वात् ॥ ५९ ॥

रा० टी०-स इति । निशाचरः प्रबुद्धः अस्य निशाचरस्य निःश्वासस्तु पर्वतान् मारुत इव संजज्ञे ॥ ५९ ॥

गो० टी०-स जृम्भमाण इति । प्रतिबुद्धः अबुद्धिपूर्वः । सन्यङ् प्रबोधोऽत्र विवक्षितः ॥ ६० ॥

रा० टी०-रूपमिति । कुम्भकर्णस्य रूपं युगान्ते सर्वभूतानि दिधक्षतः दग्धुमिच्छतः कालस्य रूपमिव बभौ ॥६०॥

गो० टी०-रूपमिति । तस्य साभरणस्येत्यर्थः । अतः प्रकाशत्वमिति भाविकोपमा । विवर्धत इति नीलत्वाभिप्रायेण ॥ ६१ ॥

६१] ति० टी०-अग्निदीप्तसदृशे दीप्ताग्निसदृशे ॥ ६१ ॥

रा० टी०-तस्येति । अग्निदीप्तसदृशे दीप्ताग्नितुल्ये विद्युत्सदृशे तथेमे ययोः ते तस्य महानेत्रे ग्रहाविव ददृशाते ॥ ६१ ॥

गो० टी०-तस्येति । विद्युत्सदृशवर्चसीति निद्राविरामकालिकत्वाभ्युक्तिः । महाग्रहौ अन्यङ्गारकाविति परपीडकत्वोक्तिः दीप्ताग्निसदृशे इति क्रौर्यातिशयोक्तिः ॥ ६२ ॥

६२] ति० टी०-अदर्शयन् । राक्षसा इति शेषः दर्शितांश्च तान् स बभक्ष ॥ ६२ ॥

रा० टी०-तत इति । ततोऽनन्तरं वराहादीन् भक्ष्यान् अदर्शयन् राक्षसा इति शेषः । अत एव महाबलः कुम्भकर्णो बभक्ष ॥ ६२ ॥

गो० टी०-ततस्त्वित्यादि । अदर्शयन् राक्षसा इति शेषः । सर्वान् सर्वविधान् तदवान्तरभेदतो विविधान् बहून्विपुलान् वराहान् वराहविकारान् बभक्ष भक्षयामास । बुभुक्षितो मांसमदन् बुभुक्षाशान्त्यर्थं मांसमदनित्यर्थः । तृषितः शोणितं पिबन् तृष्णाशान्त्यर्थं शोणितं पिबन्नित्यर्थः । पुनरप्यायनार्थं मेदःकुम्भान् मद्यं च पपौ । कुम्भपरिमितमेदोलीत्यर्थः ॥ ६३ ॥ ६४ ॥

६३] ति० टी०-आदत् । अदेलुक् ॥ ६३ ॥

रा० टी०-आदिति । बभुक्षितः शर्करिपुः मांसमादत अभक्षयत् *गणकार्यन्यायनित्यत्वात् अनलुगुपरिहः ॥ ६३ ॥

६४] ति० टी०-समुत्पेतुः संमुखमाजग्मुः ॥ ६४ ॥

रा० टी०-तत इति । निशाचराः तृप्त इति ज्ञात्वा समुत्पेतुः प्रणम्य पर्यवारयंश्च ॥ ६४ ॥

गो० टी०-ततस्तृप्त इति । समुत्पेतुरिति पूर्वं कुम्भकर्णभयादन्तर्यातास्ते । इदानीं तृप्तत्वेन शान्तक्रोधत्वात् प्रकाशमाजग्मुरित्यर्थः ॥ ६४ ॥

६५] ति० टी०-निद्रया विशदे ईषदुन्मीलिते नेत्रे यस्य सः ॥ ६५ ॥

रा० टी०-निद्रेति । निद्रया विशदे ईषदुन्मीलिते नेत्रे यस्य अत एव कलुषीकृतलोचनः कुंभकर्णः सर्वतो दृष्टिं चारयन् सन् निशाचरानुवाच ॥ ६५ ॥

गो० टी०-निद्रेति । निद्रया अविशदे अप्रसन्ने ईषदुन्मीलिते नेत्रे यस्य स तथोक्तः ॥ ६६ ॥

६६] ति० टी०-विस्मित इति । स्वभावतो निद्रापगमाभावेनाकालबोधादिति भावः ॥ ६६ ॥

१ पाठान्तरे सकलकस्य मेरुशेषे विवर्तत इति गो. पाठः । २ दीप्ताग्निसदृशे इति गो. पाठः । ३ स बभक्षेति गो. पाठः । ४ अवधीदिति गो. पाठः । ५ तृप्तः पिबन्निति गो. पाठः । ६ ददर्शेति गो. पाठः । * तदुक्तत्वात् 'अदः सर्वेषाम्' इत्यत्र ।

किमर्थमहमादृत्य भवद्भिः प्रतिबोधितः । कच्चित्सुकुशलं राज्ञो भयं वा नेह किंचन ॥ ६७ ॥
अथ वा ध्रुवमन्येभ्यो भयं परमुपस्थितम् । यदर्थमेवं त्वरितैर्भवद्भिः प्रतिबोधितः ॥ ६८ ॥
अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् । दारयिष्ये महेन्द्रं वा शातयिष्ये तथानलम् ॥ ६९ ॥
नह्यल्पकारणे सुप्तं बोधयिष्यति भादृशम् । तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ॥ ७० ॥
एवं ब्रुवाणं संरब्धं कुम्भकर्णमरिंदमम् । यूपाक्षः सचिवो राज्ञः कृताञ्जलिरभाषत ॥ ७१ ॥
न नो देवकृतं किंचिद्भयमस्ति कदाचन । मानुषाद्नो भयं राजंस्तुमुलं संप्रबाधते ॥ ७२ ॥
न दैत्यदानवेभ्यो वा भयमस्ति ननः क्वचित् । यादृशं मानुषं राजन्भयमस्मानुपस्थितम् ॥ ७३ ॥
वानरैः पर्वताकारैर्लङ्केयं परिवारिता । सीताहरणसंतप्तादामान्नस्तुमुलं भयम् ॥ ७४ ॥
एकेन वानरेणेयं पूर्वं दग्धा महापुरी । कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ॥ ७५ ॥
स्वयं रक्षोधिपश्चापि पौलस्त्यो देवकण्टकः । त्रैजेति संयुगे मुक्तो रामेणादित्यवर्चसा ॥ ७६ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—स इति । बोधनाद् अप्रबोध्यबोधनात्॥ ६७॥

६७] ति०टी०-आदृत्यादरपूर्वम् । यत्नपूर्वमिति यावत्॥ ६७

रा० टी०-तदाकारमाह—किमित्यादिभिः । भवद्भिः आदृत्य यत्नं कृत्वेत्यर्थः अहं किमर्थं प्रतिबोधितः राज्ञो रावणस्य कच्चित्सुकुशलमस्तीति शेषः ॥ ६७ ॥

गो० टी०-किमर्थमिति । राज्ञः रावणस्य सुकुशलं कच्चिन्न राजा च भयवान् किमु भयशून्यो न भवति हि ॥ ६७ ॥

६८-६९] ति० टी०-अन्येभ्यः शत्रुभ्यः । परमत्यन्तम् उत्थिते ॥ ६८ ॥ ६९ ॥

रा० टी०-तानिश्चिनोति—अथवेति । यदर्थं भवद्भिः प्रतिबोधितस्तदन्येभ्यो भयं ध्रुवमुपस्थितम् ॥ ६८ ॥

गो० टी०-एवं संशय्य पुनर्निश्चिनोति—अथवेति । तत्र हेत्वाह—यदर्थमिति यदर्थं यद्भयनिवृत्त्यर्थम् ॥ ६९ ॥

रा० टी०-अथेति । राक्षसराजस्य भयमहमुत्पाटयामि प्रकारमाह—महेन्द्रमपि दारयिष्ये अनलमपि शीतयिष्ये ६९

गो० टी०-अथेति । शातयिष्ये शातयिष्यामि लेट्यागीर्थः । " शदॢ शातने " इति धातोर्णिचि " अदेरगतौ " इति तादेशः ॥ ७० ॥

७०-७४] ति० टी०-अर्थतत्त्वेन यथार्थत्वेन॥ ७०---७४॥

रा० टी०-स्वनिश्चये हेतुमाह—नहीति । अल्पकारणे ते मादृशं सुप्तं न बोधयिष्यति तस्मादेतोः मत्प्रबोधनकारणमर्थतत्त्वेन यथार्थ्येनाख्यात यूयं कथयत ॥ ७० ॥

रा० टी०-एवमिति । एवं ब्रुवाणं कुंभकर्णं यूपाक्षस्तथो राजस्तच्चिवोऽभाषत ॥ ७१ ॥

गो० टी०-नहीति । अल्पकारणे अल्पकार्यनिमित्तम् । अथजः । आख्यात कथयत । अर्थतत्त्वेन तत्त्वार्थेन यथार्थेति यावत् ॥ ७१ ॥ ७२ ॥

रा० टी०-तदाकारमाह—नेत्यादिभिः । देवकृतं नो अस्मार्कं भयं कदाचन किंचिन्नास्ति मानुषात्भयं तुमुलं भयं बोध्यमाणं नश्चाबधते ॥ ७२ ॥

गो० टी०-न न इति । देवकृतम् इन्द्रादिकृतम् । मानुषादिति । नः अस्मान् मानुषाद्भयं तुमुलं भयं संप्रबाधते इत्यन्वयः ॥ ७२ ॥

गो० टी०-नेति । मानुषं यादृशं भयमस्मानुपस्थितं तादृशं दैत्यादिभ्यः क्वचिन् ॥ ७३ ॥

रा० टी०-नन्वेतावत्सैन्यं मनुष्य इत्यत आह—वानरैरिति । रामाद्भयमस्ति नस्ते कस्मादस्मानत्यर्थं युष्माकं भयमित्यत आह वानरैर्लङ्का परिवारिता एतेन रामस्य वानरसहायकत्वं सूचितम् ॥ ७४ ॥

गो० टी०-न दैत्येति । यादृशमनो-ऽतुलमुभयार्थं । दैत्येभ्यर्थेत्यर्थः । मानुषं मनुष्यादतुलम् ॥ ७४ ॥ ७५ ॥

७५] ति० टी०-नन्विन्द्रादिभिरपि दुष्करपीडनमस्मत्पुरं कथं वानरैः पीडितं तत्राह—एकेनेति ॥ ७५ ॥

रा० टी०-वानरप्रभावमाह—एकेनेति । एकेन वानरेण सानुयात्रः अक्षयायिसहितः अक्षः कुमारो निहतः महापुरी लंका दग्धा च ॥ ७५ ॥

गो० टी०-इन्द्रादिभिरपि दुष्पीडमिदं नगरं कथं वानरैः पीड्यत इत्यत्राह—एकेनेत्यादि । सानुयात्रः सानुगः । एकेनैव महती पीडा कृता किं पुनरनेकैर्भामनेकैरिति भावः ॥७५॥

७६] ति० टी०-संयुगे युद्धे । मोक्षमुक्त इत्युक्तमिति शेषः ॥ ७६ ॥

रा० टी०-स्वयमिति । स्वयं रक्षोधिपो रावणो यत्र पराभूतस्तत्र गत्वा इति रामेणोक्त्वा मुक्तः ॥ ७६ ॥

गो० टी०-स्वयमिति । मुक्तेति । हे मुक्तमुक्त्वा यत्तु तस्तु मुक्तेत्यविभक्तिकनिर्देशः मुक्त इति कृत्वेत्यर्थः मुक्तवाप इति मत्वेत्यर्थ इत्यन्याहुः ॥ ७७ ॥

---

१ भवद्भिरिति नो. पाठः । २ एवमिति गो. पाठः । ३ यातयिष्य इति गो. पाठः । ४ शातयिष्य इति गो. पाठः । ५ मां गुप्तेति गो. पाठः । ६ दत्वानद्धेति गो. पाठः । ७ मुक्तेति गो. पाठः ।

यश्च देवैः कृतो राजा नापि दैत्यैर्न दानवैः । कृतः स इह रामेण विमुक्तः प्राणसंशयात् ॥ ७७ ॥
स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराभवम् । कुम्भकर्णो विघूर्णाक्षो यूपाक्षमिदमब्रवीत् ॥ ७८ ॥
सर्वमेवेह यूपाक्ष दृष्टवीर्ये मलक्ष्मणम् । राघवं च रणे जित्वा ततो द्रक्ष्यामि रावणम् ॥ ७९ ॥
राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः । रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम् ॥ ८० ॥

तस्य वाक्यं ब्रुवतो निशम्य सगर्वितं रोषविघूर्णदोषम् ।
महोदरो नैर्ऋतयोधमुख्यः कृताञ्जलिर्वाक्यमिदं बभाषे ॥ ८१ ॥

रावणस्य च वीर्यज्ञ गुणदोषौ विमृश्य च । पश्चादपि महाबाहो शत्रून्युधि विजेष्यसि ॥ ८२ ॥
महोदरवचः श्रुत्वा राक्षसैः परिवारितः । कुम्भकर्णो महातेजाः संप्रतस्थे महाबलः ॥ ८३ ॥
सुप्तमुत्थाप्य भीमरूपपराक्रमम् । राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम् ॥ ८४ ॥
तत्रभिगम्य दशग्रीवमासीनं परमासने । ऊचुर्बद्धाञ्जलिपुटाः सर्व एव निशाचराः ॥ ८५ ॥
कुम्भकर्णः प्रबुद्धो वो भ्राता ते राक्षसेश्वर । कथं तत्रैव निर्यातु द्रक्ष्यसे तमिहागतम् ॥ ८६ ॥
रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान् । द्रष्टुमेनमिहेच्छामि यथान्यायं च पूज्यताम् ॥ ८७ ॥
तथेत्युक्त्वा च ते सर्वे पुनरागम्य राक्षसाः । कुम्भकर्णमिदं वाक्यमूचू रावणचोदिताः ॥ ८८ ॥
द्रष्टुं त्वां काङ्क्षते राजा सर्वराक्षसपुंगवः । गमने क्रियतां बुद्धिर्भ्रातरं संप्रहर्षय ॥ ८९ ॥
कुम्भकर्णस्तु दुर्धर्षो भ्रातुरुत्थाय शासनम् । तथेत्युक्त्वा महावीर्यः शयनादुत्पपात ह ॥ ९० ॥

७७-८०] ति० टी०—एतत् कृतो यावत्तां न प्रापितः, स रामेण कृतस्तावत्तां प्रापितः प्राणसंशयात्तावदवस्थया प्रापितो विमुक्त इत्यर्थः ॥ ७७ ॥ ८० ॥

रा० टी०—यदिति । राजा रावणः यथावदवस्थां देवादिभिर्न कृतः प्रापितः तावदवस्थां रामेण कृतः प्रापितः अवस्थामेवाह स रावणः प्राणसंशयाद्रामेण विमुक्तः ॥ ७७ ॥

गो० टी०—यदित्यादि । यत्र च इत्यर्थे । प्राणसंशयादिति पञ्चम्यर्थे उपपदविभक्तिः । यो राजा देवादिभिरपि प्राणसंशयं नीत्वा मुक्तो न कृतः स रावणो रामेण प्राणसंशयं नीत्वा अथ विमुक्तः कृत इत्यर्थः । यद्वा राजा देवादिभिरपि यत् न कृतः न प्रापितः तत् रामेण कृतः प्राणसंशयाद्विमुक्तत्वेत्यर्थः ॥७८॥

रा० टी०—स इति । स कुम्भकर्णः युधि भ्रातुः पराभवं पराजयरूपं यूपाक्षवचः श्रुत्वा विघूर्णाक्षस्सन् यूपाक्षमब्रवीत् ॥ ७८ ॥

रा० टी०—तदाकारमाह—सर्वमिति । हे यूपाक्ष अहमेव दृष्टवीर्ये विजितशत्रौ इह लङ्कायां मलक्ष्मणं रामं च रणे जित्वा ततो द्रक्ष्यामि ॥ ७९ ॥

रा० टी०—राक्षसानिति । हरिवीरसंबन्धीनां मांसशोणितैः राक्षसान् तर्पयिष्यामि शोणितं पास्यामि च ॥ ८० ॥

रा० टी०—स इति । पराजयं पराजयवचनमित्यर्थः ॥ ७९–८१ ॥

८१-८२] ति० टी०—सगर्वितं सगर्वम् । रोषेण विघूर्णदोषा दुर्नयस्थो यस्य तम् ॥ ८१ ॥ ८२ ॥

रा० टी०—तदिति । श्रुतस्तस्य कुम्भकर्णस्य रोषेण विघूर्णदोषः नीतिविरोधो यस्मिन् तत्सगर्वितं वाक्यं श्रुत्वा महोदरः इदं वाक्यं बभाषे ॥ ८१ ॥

रा० टी०—तदाकारमाह—रावणस्येति । गुणदोषौ रावणवचनेन गुणं दोषं च विमृश्य विचार्य शत्रून् युधि विजेष्यसि ८२

गो० टी०—तदिति । सगर्वितं सगर्वम् । रोषविघूर्णदोषं रोषविघूर्णदुर्नयं कुम्भकर्णमिति शेषः ॥ ८२ ॥ ८३ ॥

८३-८५] ति० टी०—संप्रतस्थे प्रस्थातुमुपचक्रमे ८३।८४

रा० टी०—महोदरेति । महोदरवचः श्रुत्वा कुंभकर्णः संप्रतस्थे ॥ ८३ ॥

रा० टी०—सुप्त इति । सुप्तं कुम्भकर्णमुत्थाप्य राक्षसा जग्मुः ॥ ८४ ॥

गो० टी०—महोदरेति । संप्रतस्थे प्रस्थातुमुपचक्रमे । शयनादुत्पपात हेत्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८४ ॥ ८५ ॥

रा० टी०—त इति । निशाचराः दशग्रीवमभिगम्य ऊचुः ८५

गो० टी०—तत इति । गत्वा रावणनिवेशनं गत्वा । तत ऊचुरित्यन्वयः ॥ ८५ ॥

८६] ति० टी०—तत्रैव स्थितो युद्धाय निर्यात्वाहोस्विदिहागतं द्रक्ष्यसे ॥ ८६ ॥

रा० टी०—तदाकारमाह—कुम्भकर्ण इति । हे राक्षसेश्वर प्रबुद्धोसौ कुम्भकर्णः तत्र संग्रामभूम्या एव निर्यातु इहागतं द्रक्ष्यसे वा कथं वार्थे ॥ ८६ ॥

गो० टी०—प्रबुद्ध इति । तत्रैव निर्यातु वा इहागतमेनं द्रक्ष्यति वा कथं, कथं करोतीति सम्बन्धः ॥ ८७ ॥

८७-९०] ति० टी०—पूज्यताम् । स इति शेषः ८७।९०

१ परानयमिति गो. पाठः । २ इक्षेति गो. पाठः । ३ त इत्युत्थाप्येति गो. पाठः । ४ ततो गत्वा दशग्रीवमिति गो. पाठः । ५ [illegible] ६ राक्षसपतेर्भो गो. पाठः । ७ द्रक्ष्यस्येनमिति गो. पाठः । ८ महाबाहुरिति गो. पाठः ।

प्रक्षाल्य वदनं हृष्टः स्नातः परमहर्षितः । पिपासुस्त्वरयामास पानं बलसमीरणम् ॥ ९१ ॥
ततस्ते त्वरितास्तत्र राक्षसा रावणाज्ञया । मद्यं भक्ष्यांश्च विविधान्क्षिप्रमेवोपहारयन् ॥ ९२ ॥
पीत्वा घटसहस्रे द्वे गमनायोपचक्रमे । ईषत्समुत्कटो मत्तस्तेजोबलसमन्वितः ॥ ९३ ॥
कुम्भकर्णो बभौ रुष्टः कालान्तकयमोपमः । भ्रातुः स भवनं गच्छन्रक्षोबलसमन्वितः ॥
कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ॥ ९४ ॥

स राजमार्गं वपुषा प्रकाशयन्सहस्मरश्मिर्धरणीमिवांशुभिः ।
जगाम तत्राञ्जलिमालया वृतः शतक्रतुर्गेहमिव स्वयंभुवः ॥ ॥ ९५ ॥
तं राजमार्गस्थमिवाद्रिशृङ्गं विनेशुरुग्रे सहसा बहिःस्थिताः ।
दृष्ट्वाग्रमेयं गिरिशृङ्गकल्पं वितत्रसुस्ते सह यूथपालैः ॥ ॥ ९६ ॥
केचिच्छरण्यं शरणं स्म रामं व्रजन्ति केचिद्व्यथिताः पतन्ति ।
केचिद्दिशश्चैव व्यथिताः पतन्ति केचिद्भयार्ता भुवि शेरते स्म ॥ ॥ ९७ ॥
तमद्रिशृङ्गप्रतिमं किरीटिनं स्पृशन्तमादित्यमिवात्मतेजसा ।
वनौकसः प्रेक्ष्य विसंज्ञमञ्जसा भयार्दिता दुद्रुविरे यतस्ततः ॥ ॥ ९८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०—रावण इति । एनं कुंभकर्णमित्येव द्रष्टुमिच्छामि अतो यथान्यायं भवद्भिः पूज्यतां सत्कारेणानीयताम् इति रावणोऽब्रवीत् ॥ ८७ ॥

गो० टी०—रावणस्त्विति । पूज्यतामग्र इति शेषः ॥

रा० टी०—तथेति । राक्षसाः तथेत्युक्त्वा पुनरागत्य उचुः ॥ ८८ ॥

रा० टी०—तदाज्ञामाह—द्रष्टुमिति । राजा राक्षसान् यं द्रष्टुं काङ्क्षते अतो गमने वहिः क्रियताम् अत एव भवद्भिः संप्रहर्षय ॥ ८९ ॥

रा० टी०—कुंभकर्ण इति । कुंभकर्णः तत्रैवस्थित्वा अथ शय्यायां उत्पपात उत्तस्थौ ॥ ९० ॥

९१] ति० टी०—बलसमीरणं बलवृद्धिकरम् ॥ ९१ ॥

रा० टी०—प्रक्षाल्येति । वदनं प्रक्षाल्य स्नातः कुंभकर्णः बलसमीरणं बलप्रवृद्धिकरं पानं पिपासुस्सन् त्वरयामास यानमानेतुं भ्रातृसमीपे दूतान् प्रेषयामासेत्यर्थः ॥ ९१ ॥

गो० टी०—प्रक्षाल्येति । बलसमीरणं बल्यमित्यमरः ॥ ९१ ॥

९२] ति० टी०—उपहारयन्नुपाहारयन् ॥ ९२ ॥

रा० टी०—तत इति । ते रावणसमीपं प्रेषिता इताः रावणाज्ञया त्वरितास्सन्तः मद्यादीन् क्षिप्रमेव उपाहारयन् उपाहारयन् ॥ ९२ ॥

गो० टी०—ततस्त इति । रावणाज्ञया त्वरितास्ते क्षिप्रमुपाहारयन् उपाहारयन्निति संबन्धः ॥ ९३ ॥

९३–९४] ति० टी०—ईषत्समुत्कटो मत्तः । तावन्मधुपानेनापीदृश एव समुत्कटो मत्तश्चेत्यर्थः ॥ ९३ ॥ ९४ ॥

रा० टी०—पीत्वेति । द्वे घटसहस्रे तत्परिमितमद्यम् पीत्वा ईषत्समुत्कटः किंचिदुत्कटरूपः । ईषन्मत्तश्च कालान्तकयमोपमः कालान्तकयमसदृशः क्रुद्धः केवलं बभौ साधिक्येन प्रकाशते स्म ॥ ९३ ॥

गो० टी०—पीत्वेति । ईषत्समुत्कटः पानेन ईषन्मदोत्कटः मत्तः स्वभावेनोन्मत्तश्चेत्यर्थः । भ्रातुः कुबेरस्यापि कालेन प्रेरितः सोऽन्तकः संहारको यमस्तत्सदृश इत्यर्थः ॥ ९४ ॥

रा० टी०—भ्रातुरिति । भ्रातुर्भवनं गच्छन्कुंभकर्णः पदन्यासैर्मेदिनीमकम्पयत ॥ ९४ ॥

गो० टी०—भ्रातुरिति । रक्षोबलं राक्षससेना ॥ ९४ ॥

९५] ति० टी०—वपुषा देहकान्त्या ॥ ९५ ॥

रा० टी०—स इति । स्वप्रभाभिः स्वांशुभिर्धरणीमिव वपुषा राजमार्गं प्रकाशयन् अञ्जलिमालया कृताञ्जलिजनैरित्यर्थः वृतः स कुंभकर्णः स्वयंभुवो ब्रह्मणः शतक्रतुरिव जगाम ॥ ९५ ॥

गो० टी०—स इति । तत्र राजमार्गे । अञ्जलिमालया पौष्पजनकृतयेति शेषः ॥ ९५ ॥

९६–९७] ति० टी०—अप्रमेयमत्यद्भुतं शैलशृङ्गकल्पम् ॥ ९६ ॥ ९७ ॥

रा० टी०—तमिति । अप्रमेयमत्यद्भुतत्वात्तथा चात एव गिरिशृङ्गसदृशं राजमार्गस्थमभिव्याप्तिं कुम्भकर्णं यूथपालैस्सह बहिःस्थिता वनौकसो दृष्ट्वा वितत्रसुः ॥ ९६ ॥

रा० टी०—केचिदिति । शरण्यं शरणे हितं रामं शरणं रक्षार्थं व्रजन्ति केचिद्व्यथितास्सन्तः पतन्ति केचित् व्यथितास्सन्तो दिशः प्रयान्ति केचित् भुवि शेरते ॥ ९७ ॥

गो० टी०—तमिति । यूथपाला इत्यत्र चकारो द्रष्टव्यः अन्यथा तच्छब्दोऽतिरिच्येत ॥ ९७ ॥ ९८ ॥

९८] ति० टी०—आत्मतेजसादित्यं स्पृशन्तमिव

१ ईषत्समुत्कट इति गो. पाठः । २ मत्तश्चेति गो. पाठः । ३ मत्तेति गो. पाठः । ४ यूथपाला इति गो. पाठः । ५ रमेति गो. पाठः ।

एकषष्टितम सर्गः ।

रामादपि पलायितां स्वसृं दृष्ट्वा तं चाद्भुतदर्शनं पश्यन्कोऽसावित्यादि विभीषणं पप्रच्छ । सौऽस्यस्यां जाल्यात्प्रभृति प्रबोधनान्तं सर्वं वृत्तं निवेद्य शीघ्रमेनं जहीति प्रार्थयत ततो रामो नीलं सेनान्यमाहूय कपीन्समाश्वासयितुमप्रमादेन योद्धुं च समादिशत् । तु तथादेशमनुष्ठितवान् ।

ततो रामो महातेजा धनुरादाय वीर्यवान् । किरीटिनं महाकायं कुम्भकर्णं ददर्श ह ॥ १ ॥
तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम् । क्रममाणमिवाकाशं पुरा नारायणं यथा ॥ २ ॥
सतोयाम्बुदसंकाशं काञ्चनाङ्गदभूषणम् । दृष्ट्वा पुनः प्रदुद्राव वानराणां महाचमूः ॥ ३ ॥
विद्युतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसम् । सविस्मितमिदं रामो विभीषणमुवाच ह ॥ ४ ॥
कोऽसौ पर्वतसंकाशः किरीटी हरिलोचनः । लङ्कायां दृश्यते वीरैः सविद्युदिव तोयदः ॥ ५ ॥
पृथिव्यां केतुभूतोऽसौ महानेकोऽत्र दृश्यते । यं दृष्ट्वा वानराः सर्वे विद्रवन्ति यतस्ततः ॥ ६ ॥
आचक्ष्व मे महान्कोऽसौ रक्षो वा यदि वासुरः । न मयैवंविधं भूतं दृष्टपूर्वं कदाचन ॥ ७ ॥
संपृष्टो राजपुत्रेण रामेणाक्लिष्टकर्मणा । विभीषणो महाप्रज्ञः काकुत्स्थमिदमब्रवीत् ॥ ८ ॥
येन वैवस्वतो युद्धे वासवश्च पराजितः । सैष विश्रवसः पुत्रः कुम्भकर्णः प्रतापवान् ॥
अस्य प्रमाणसदृशो राक्षसोऽन्यो न विद्यते ॥ ॥ ९ ॥

एतेन देवा युधि दानवाश्च यक्षा भुजंगाः पिशिताशनाश्च ।
गन्धर्वविद्याधरपन्नगाश्च सहस्रशो राघव संप्रभग्नाः ॥ ॥ १० ॥

शूलपाणिं विरूपाक्षं कुम्भकर्णं महाबलम् । हन्तुं नशेकुस्त्रिदशाः कालोऽयमिति मोहिताः ॥ ११ ॥

स्मदमिति यावत् । प्रायो दिनद्वये नास्य जारः ॥ ६८ ॥

इति श्रीरामायणतिलके श्रीरामाश्रिते रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०—तमिति । अद्रिसङ्घप्रतिमम् आत्मतेजसा ॥दित्यं व्यवस्थिते तं कुंभकर्णे वनौकसः प्रेक्ष्य भयार्दिता-स्ततो यतस्ततो द्रुतिरे ॥ ६८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्यायां रामायणशिरोमणौ युद्धकाण्डे षष्टितमः सर्गः ॥ ६० ॥

गो० टी०—तमिति । आत्मतेजसा शरीरकान्त्या ॥६९॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१] ति० टी०—ततो राम इति ॥ १ ॥

रा० टी०—कुंभकर्णदर्शनहेतुकवानरभीत्यनन्तरकालिकं रामवृत्तान्तमाह—तत इत्यादिभिः । ततः वृत्तान्तज्ञानानन्तरं पराक्रमाशंसितो रामः कुम्भकर्णं ददर्श ॥ १ ॥

गो० टी०—अथ रामेण कुम्भकर्णस्वरूपप्रश्नः विभीषणेन तदुत्तरं च क्रियत एकषष्टितमे—तत इत्यादि । सार्धश्लोकत्रयमेकान्वयम् । तं दृष्ट्वा धनुरादाय पुनर्विशेषेण ददर्शेति योजना । महाकायमुन्नतकायम् । पर्वताकारदर्शनम् दृश्यत इति दर्शनं शरीरं पर्वतवत् स्थूलशरीरमित्यर्थः । काञ्चनाङ्गदभूषणं काञ्चनमयाङ्गदभूषणम् अत एव सतोयाम्बुदः वर्षकमेघः तत्सदृशम् ॥ १ ॥ २ ॥

२] ति० टी०—पर्वताकारं दर्शनं यस्य तं दृष्ट्वा । यतो बभूवेति शेषः ॥ २ ॥

रा० टी०—तमिति । पर्वताकारदर्शनं पुरा पूर्वमाकाशं क्रममाणं नारायणं वामनमिव तं कुंभकर्णं दृष्ट्वा रामः यतो बभूवेति शेषः ॥ २ ॥

३-४] ति० टी०—सतोयेति । सजलमेघसंकाशमित्यर्थः ॥ ३ ॥ ४ ॥

रा० टी०—सेति । तोयसहितो योऽम्बुदः तद्वत् संकाशते तं कुंभकर्णं दृष्ट्वा वानराणां महाचमूः पुनः प्रदुद्राव ॥ ३ ॥

गो० टी०—दृष्ट्वेत्यर्धम् । कुम्भकर्णमिति शेषः ॥ ३ ॥

रा० टी०—विद्युतामिति । वाहिनीं सेनां विद्युतां राक्षसं वर्धमानं च दृष्ट्वा रामो विभीषणं सविस्मितं श्रोतृविस्मयकारकमुवाच सर्वज्ञरामप्रश्नेन ज्ञातॄणां विस्मयो भवतीति तात्पर्यम् ॥ ४ ॥

गो० टी०—विद्युतामिति । सविस्मयमिति क्रियाविशेषणम् । वर्धमानमिति । कामरूपत्वादिति भावः ॥ ४ ॥

५-११] ति० टी०—हरिलोचन इति ॥ ५ ॥

---

१ भूमिति गो० पाठः । २ वीरेति गो० पाठः । ३ तत इति गो० पाठः । ४ ये [illegible]

प्रकृत्या चैष तेजस्वी कुम्भकर्णो महाबलः । अन्येषां राक्षसेन्द्राणां वरदानकृतं बलम् ॥ १२ ॥
बालेन जातमात्रेण क्षुधार्तेन महात्मना । भक्षितानि सहस्राणि प्रजानां सुबहून्यपि ॥ १३ ॥
तेषु संभक्ष्यमाणेषु प्रजा भयनिपीडिताः । यान्ति स्म शरणं शक्रं तमप्यर्थं न्यवेदयन् ॥ १४ ॥
स कुम्भकर्णं कुपितो महेन्द्रो जघान वज्रेण शितेन वज्री ।
स शक्रवज्राभिहतो महात्मा चचाल कोपाच्च भृशं ननाद ॥ ॥ १५ ॥
तस्य नानद्यमानस्य कुम्भकर्णस्य वेश्मनः । श्रुत्वा निनादं विस्रस्ताः प्रजा भूयो वितत्रसुः ॥ १६ ॥
ततः क्रुद्धो महेन्द्रस्य कुम्भकर्णो महाबलः । निष्कृष्यैरावताद्दन्तं जघानोरसि वासवम् ॥ १७ ॥
कुम्भकर्णप्रहारार्तो विजज्वाल स वासवः । ततो विषेदुः सहसा देवा ब्रह्मर्षिदानवाः ॥
प्रजाभिः सह शक्रश्च ययौ स्थानं स्वयंभुवः ॥ ॥ १८ ॥
कुम्भकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः । भक्षणं चापि शशंसुस्ते दिवौकसाम् ॥
आश्रमध्वंसनं चापि परस्त्रीहरणं तथा ॥ ॥ १९ ॥

रा० टी०—तदाकारमाह—क इत्यादिभिः । सौमित्रोर्यद इव हरिलोचनः कपिलनेत्रः किंच त्रिपुरस्याम्बापतेरर्कनेत्रविशिष्टः यो लंकायां वीरो दृश्यते सोऽसौ कः ॥ ७ ॥

रा० टी०—पृथिव्या इति । यं दृष्ट्वा वानराः विद्रवन्ति सोऽसौ पृथिव्याः महान् केतुभूतः एक एव दृश्यते ॥ ८ ॥

रा० टी०—आचक्ष्वेति । रक्षो वाक्यं तत् सुग्रीवः कोपी आचक्ष्व कथय मया तु एतावित्यं भूतं कदाचन न दृष्टपूर्वं प्राग् भविकालादारभ्य एतावत्कालपर्यन्तं नावलोकितमित्यर्थः ॥ ९ ॥

रा० टी०—रामेण संपृष्टो विभीषणः इदमब्रवीत् ॥ ८ ॥

गो० टी०—कोसाविति । हरिलोचनः कपिलेक्षणः हरिनी कपिले त्रिषु इत्यमरः ॥ ५–८ ॥

रा० टी०—तदाकारमाह—येनेत्यादिभिः । येन वैवस्वतादिः पराजितः स विश्रवसः पुत्र एष कुंभकर्णः अस्य कुंभकर्णस्य प्रमाणसदृशः प्रमाणेन तुल्योऽन्यो राक्षसो न विद्यते सार्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०—येनेत्यादि । सैष इत्यत्र "सोऽपि लोपे चेत् पादपूरणम्" इति सूत्रोपः । प्रमाणं स्थौल्योच्चत्वे ॥ ९ ॥

रा० टी०—एतेनेति । सहस्रशो देवादयः अपि साध्वसभग्नाः ॥ १० ॥

गो० टी०—एतेनेति । संध्रमभग्नाः अभज्यन्त ॥ १० ॥

रा० टी०—शूलपाणिमिति । विरूपे असदृशे अक्षिणी यस्य तं कुंभकर्णं हन्तुं कालोऽयमिति मोहिताः विस्रवसः न शेकुः ॥ ११ ॥

गो० टी०—शूलपाणिमिति । विरूपाक्षं विकटाश्रम । मोहिताः भ्रान्ताः ॥ ११ ॥

१२–१७] ति० टी०—प्रकृत्येति । स्वभावतः परमशिवसमर्थत्वात् ॥ १२–१७ ॥

रा० टी०—प्रकृत्येति । अन्येषां राक्षसेन्द्राणां वरदानकृतं बलमस्ति एष कुंभकर्णस्तु प्रकृत्यैव तेजस्वी महाबलश्च ॥ १२ ॥

गो० टी०—प्रकृत्या तेजस्वी स्वभावेन बलवान् । न तु वरप्रदानेनेत्यर्थः । अन्येषां राक्षसादीनां भयमिति शेषः ॥ १२ ॥

रा० टी०—बलत्वे हेतुमाह—बालेनेति । जातमात्रेण क्षुधार्तेन बालेन कुंभकर्णेन प्रजानां सुबहूनि सहस्राणि भक्षितानि ॥ १३ ॥

रा० टी०—तेष्विति । तेषु प्रजासहस्रेषु संभक्ष्यमाणेषु सत्सु भयनिपीडिताः प्रजाः शरणं रक्षकं शक्रं यांति स्म तमपि इत्थमर्थं न्यवेदयंश्च ॥ १४ ॥

रा० टी०—स इति । कुपितो महेंद्रः वज्रेण कुंभकर्णं जघान शक्रवज्राभिहतः कुंभकर्णः चचाल कोपात् ननाद च ॥ १५ ॥

गो० टी०—प्रकृत्या तेजस्वित्वमुपपादयति—एतेनेत्यादिना ॥ १३–१५ ॥

रा० टी०—तस्येति । नानद्यमानस्य तस्य कुंभकर्णस्य निनादं श्रुत्वा विस्रस्ताः प्रजाः भूयस्तत्रसुः ॥ १६ ॥

गो० टी०—तस्येति । नानद्यमानस्य अनिशमेव नदतः विस्रस्ता भूमिः भूयो वितत्रसे उत्तरोत्तरं भीतासीत् ॥ १६ ॥

रा० टी०—तत इति । क्रुद्धः कुंभकर्णः ऐरावतात् दन्तं निष्कृष्य उत्पाट्य वासवमिन्द्रमुरसि जघान ॥ १७ ॥

गो० टी०—तत्रेति । तत्र तदानीम् । निष्कृष्य उत्पाट्य ॥ १७ ॥

१८–१९] ति० टी०—विजज्वाल इत्यग्निप्रवाहैर्ज्वाल व्याप्त इव बभूव ॥ १८ १९ ॥

रा० टी०—कुंभकर्णेति । कुंभकर्णप्रहारेण आर्तो वासवः विजज्वाल अतिसंतापं प्राप ततस्माद्देवो देवादयो विषेदुः ॥

रा० टी०—प्रजाभिरिति । शक्रः प्रजाभिस्सह स्वयंभुवः स्थानं ययौ अगं पृथक् ॥ १९ ॥

१ एतेनेति गो. पाठः । २ बलवानिति गो. पाठः । ३ भीमत इति गो. पाठः । ४ भूयो भूमिर्वितत्रसे इति गो. पाठः । ५ तत्र कोपादिति गो. पाठ
[illegible] ६ [illegible] ७ [illegible] ८ देवादय इति गो. पाठः । ९ भृशमिति गो. पाठः ।

एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः । अचिरेणैव कालेन शून्यो लोको भविष्यति ॥ २० ॥
तासवस्य वचः श्रुत्वा सर्वलोकपितामहः । रक्षांस्यावाहयामास कुम्भकर्णं ददर्श ह ॥ २१ ॥
कुम्भकर्णं समीक्ष्यैव चित्रास प्रजापतिः । कुम्भकर्णमथाश्वस्तः स्वयंभूरिदमब्रवीत् ॥ २२ ॥
ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः । तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे ॥ २३ ॥
अक्षमालापरिभृतोऽथ निपपात ह्यग्रतः प्रभोः । ततः परमसंभ्रान्तो रावणो वाक्यमब्रवीत् ॥ २४ ॥
प्रवृद्धः काञ्चनो वृक्षः फलकाले निकृन्त्यते । न नक्षारं स्वकं न्याय्यं शप्तुमेवं प्रजापते ॥ २५ ॥
न मिथ्यैतद्वचस्तव स्वप्स्यत्येवं न संशयः । कालस्तु क्रियतामस्य शयने जाग्रणे तथा ॥ २६ ॥

गो० टी०—प्रजाभिरित्यादि । ये अन्यायेन । प्रजापतेः प्रजापतेः ॥ १९ ॥

गो० टी०—कुम्भकर्णेति । विनाशाय भक्षयितुमित्यर्थः ॥ २० ॥

रा० टी०—तदाकारमाह—कुम्भकर्णेति । ये अन्यायेन कुंभकर्णस्य तीव्रस्वभावत्वात् तथा पुत्रत्वे विश्रवसः पौलस्त्यस्य पुत्रत्वे च सति एवं प्रजा भक्षयिष्यति तदा पितामहः प्रजापतिस्तमीक्षणे प्रेक्षणे सति स प्रजापतस्तमीक्षे प्रेक्षणे प्रशंसः सार्वज्ञ्येन ॥ २० ॥ २१ ॥ २२ ॥

गो० टी०—तिरस्कृत्य इत्यादि—प्रजानामित्यादि॥ २० ॥

रा० टी०—तमेवाह—प्रजानामित्यादि ॥ २० ॥

गो० टी०—ध्रुवमिति । ध्रुवं स्वार्थे क्रियमाणप्रकारेण यदि भवसि एवमाह्य ॥ २३ ॥

२४] ति० टी०—अक्षमालापरिभृतोऽक्षमाला गायत्रीलक्षणेन मन्त्रेण जपपरिभृतः ॥ २४ ॥

रा० टी०—ध्रुवमित्येवेत्यादि । अक्षमालापरिभृतः रक्षांसि आवाहयामास स्वकार्ये व्यापारं प्रापयामास अतः एव कुम्भकर्णं ददर्श ॥ २० ॥ २१ ॥

गो० टी०—अक्षमालापरिभृत इति । अत्यन्तात्मास्वग्रहणम् । कुम्भकर्णम् तेजोमिति भेदः ॥ २२ ॥

२४] ति० टी०—अक्षमालापरिभृतोऽक्षमालाधिष्ठितः परमसंभ्रान्त इति शेषः ॥ २४ ॥

२२० टी०—कुम्भकर्णमिति । प्रजानाशं कुंभकर्णं समीक्ष्यैव चित्रास भयाकुलत्वात्तमुत्सृष्टवान् । स्वयंभूः प्राप्तः स्वयंभूः कुंभकर्णमब्रवीत् ॥ २२ ॥

गो० टी०—कुम्भकर्णमिति । इदं रक्षः इदं वक्ष्यमाणमिति इदंशब्दद्वयनिर्देशः । विश्रवस इत्युक्त्वा मातृव्यपूर्वकं सर्वभक्षत्वमुक्तम् ॥ २३ ॥

२३—२७] ति० टी०—पौलस्त्येन विश्रवसा । मृतकल्पः शयिष्यसे इति । आह च शापः ' स्वप्तुं वर्षाण्येकानि देवदेव ममेप्सितम् । एवमस्त्विति तमुक्त्वा प्रह्वाश्चास्ते दिवौकसः ॥' इति तपश्चर्यानन्तरं प्राप्तेनाल्पवद्वर्षाधिकनिद्रासमनन्तरकालभावी इति बोध्यम् । मृतकल्पः शयिष्यस इति शप्तस्य तपश्चर्यायां संभवात् । पूर्वं जातमात्रेणेत्युक्तिस्तु तपोविशिष्टतया जातमात्रेऽप्यौपचारिकी ॥ २३ ॥ २४ ॥

रा० टी०—तदाकारमाह—ध्रुवमिति । पौलस्त्येन लोकविनाशाय त्वं निर्मितोसि ध्रुवं निश्चितमेतत्प्रभाति तस्मादेतोः अद्यप्रभृति मृतकल्पं यथा भवति तथा शयिष्यसे ॥ २४ ॥

गो० टी०—ध्रुवमिति । पौलस्त्येन विश्रवसः । तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यस इत्ययं शापः । स्वप्तुं वर्षाण्येकानि देवदेव ममेप्सितम । एवमस्त्विति तमुक्त्वा प्रह्वास्ते दिवौकसः ॥ इति तपश्चर्यानन्तरप्राप्तेनाल्पवद्बहुवार्षिकनिद्रासमनन्तरकालभावीत्यवगन्तव्यम् । अन्यथा मृतकल्पः शयिष्यस इति शप्तस्य तपश्चर्यासंभवात् ॥ २४ ॥

रा० टी०—अक्षेति । अक्षमालापरिभृतः कुंभकर्णः प्रभोः अग्रतः अग्रे निपपात ततोऽनन्तरं परमसंभ्रान्तः अत्युद्विग्नो रावणः इदं वाक्यमब्रवीत् ॥ २५ ॥

गो० टी०—अक्षेति । प्रभोः रावणस्य ॥ २५ ॥

२५] ति० टी०—प्रवृद्धः । प्रवर्धित इत्यर्थः । काञ्चनः काञ्चनफलकः । फलकाले काञ्चनरूपफलप्राप्तिकाले । निकृन्त्यते छिद्यते । नक्षारं नक्षारमेव शप्तुं न न्याय्यम॥२५॥

रा० टी०—तदाकारमाह—प्रवृद्ध इति । काञ्चनः कांचनफलवान् प्रवृद्धो वृक्षः फलकाले सुवर्णरूपफलनिष्पत्तिसमये न निकृन्यते केनचित् छिद्यते अतः स्वकं नक्षारमेव शप्तुं न न्याय्यम् ॥ २५ ॥

गो० टी०—विवृद्ध इति । काञ्चनः काञ्चनवत् स्पृहणीयः । चम्पकवृक्षो वा । विवृद्धः वर्धितः । फलकाले पुष्पकाले । निकृत्यते छिद्यते । नक्षारं पौत्रम् ॥ २५ ॥

२६] ति० टी०—पुनरपि रावण आह—न मिथ्येति । अतोऽयं स्वप्स्यत्येव न संशयः । जाग्रणे । गुणाभाव अर्थः । कालः कालनियमः ॥ २६ ॥

रा० टी०—नेति । यत्तस्त्वं न मिथ्यावचनः अतः एष स्वप्स्यत्येव अतः शयने जागरणे च कालः समयनियमः क्रियताम् ॥ २७ ॥

गो० टी०—नेति । कालः कालनियमः ॥ २० ॥ २६ ॥

३ २ इदं विभास्य वैव [illegible] गो.पा.। २ मृतकल्पमिति रा.पा.। ३ नीति गो.पा.। ४ प्रभ इति गो.पा.। ५ जागरे इति गो.पा.

रावणस्य वचः श्रुत्वा स्वयंभूरिदमब्रवीत् । शयिता ह्येष षण्मासमेकाहं जागरिष्यति ॥ २७ ॥
एकेनाह्ना त्वसौ वीर्यान्नरभूमिं बुभुक्षितः । व्यात्तास्यो भक्षयेल्लोकान्संवृद्धे इव पावकः ॥ २८ ॥
सोऽसौ व्यसनसंपन्नः कुम्भकर्णप्रबोधयत् । त्वत्पराक्रमभीतश्च राजा संप्रति रावणः ॥ २९ ॥
स एष निर्गतो वीरः शिबिराद्वीर्यविक्रमः । वानरान्भक्षयन्क्रुद्धो भक्षयन्परिधावति ॥ ३० ॥
कुम्भकर्णं प्रतीक्ष्यैव हरयोऽद्य प्रहेदुवुः । कथमेनं रणे क्रुद्धं वारयिष्यन्ति वानराः ॥ ३१ ॥
उच्यन्तां वानराः सर्वे यन्नमेतत्समुच्छ्रितम् । इति विज्ञाय हरयो भविष्यन्तीह निर्भयाः ॥ ३२ ॥
विभीषणवचः श्रुत्वा हेतुमत्समुदीरितम् । उवाच राघवो वाक्यं नीलं सेनापतिं तदा ॥ ३३ ॥
गच्छ सैन्यानि सर्वाणि व्यूह त्रिगुणया पदा । द्वाराण्यादाय लङ्कायाश्चर्याश्चास्यैव संक्रमान् ॥
शैलशृङ्गाणि वृक्षांश्च शिलाश्चापुपसंहरन् । भवन्तः सायुधाः सर्वे वानराः शैलपाणयः ॥ ३५ ॥
राघवेण समादिष्टो नीलो हरिचमूपतिः । ययौ स वानरानीकं यथावत्कपिकुञ्जरः ॥ ३६ ॥
ततो गवाक्षः शरभो हनूमानङ्गदस्तथा । शैलशृङ्गाणि शैलाभा गृहीत्वा द्रुमवर्ष्मणः ॥ ३७ ॥

२७-२८] ति० टी०-षण्मासं च यदर्थं शयिता न तु रात्रौ न्यूनम् आधिक्यं तु न निवार्यते तद्वीजमुक्तम् जागरणं स्वेकाहमेव । सत्यत्याहिते कार्ये इति शेषः । अनेनैवं लोकक्षयाय राक्षसस्य कुम्भकर्णेन यद् यत्न प्रथमतस्ते मधुपुरे नाम उक्तः द्वितीयतस्ते कैलासे यत्न रम्भायां कथाद्वारेण प्रवृत्तिः, तदनन्तरम् ' कुम्भकर्णस्तु दुरात्मा जागरेणोपपीडितः ' इत्यादिना तृतीयतश्चित्रसादिः सूचितम् । तेन 'कुम्भकर्णेनैकदिनमपि जागरणं प्रतीक्षस्व ॥ २७ ॥ २८ ॥

रा० टी०-राक्षसस्येति । एवं षण्मासं शयित्वा एकाहं जागरिष्यति इदं स्वयम्भूरब्रवीत् ॥ २८ ॥

गो० टी०-शयितेति । षण्मासादित्यनेनैकाहमित्यस्य विरोधः स्यात् । अन्यथा नव षट् सप्त चाष्टौ च मासानिति पूर्वोक्तविरोधः स्यात् ॥

रा० टी०-एकाहजागरणस्य प्रयोजनमाह—एकाह्नेति । बुभुक्षितः चिरशयनेन जातबुभुक्षः असौ वीरः एकेनाह्ना पूर्वं चरन् व्यात्तास्यस्सन् लोकान् भक्षयन् पावक इव संवृद्धः इति शेषः ॥ २८ ॥

२९] ति० टी०-इदानीं तत्याजकाले बोधनहितैषिणमाह—सोऽसाविति ॥ २९ ॥

रा० टी०-कुंभकर्णवृत्तान्तं संक्षेपं प्रकृतमाह—स इति । व्यसनं पराभवदुःखमापन्नः अत एव त्वत्पराक्रमभीतः सोऽसौ राजा रावणः कुंभकर्णं प्रत्यबोधयत् ॥ २९ ॥

गो० टी०-सोऽसाविति । सोऽसौ रावणः ॥ २९ ॥

३०] ति० टी०-शिबिरात्स्वगृहात् भक्षयन् हेतौ शता भक्षार्थमित्यर्थः ॥ ३० ॥

रा० टी०-स इति । शिबिरात् राजभवनात् निर्गतः एष कुंभकर्णः वानरान् भक्षयन् भक्षयितुं परिधावति हेतौ शता ॥ ३१ ॥

गो० टी०-स इति । शिबिरात् स्वनिलयात् । भक्षयन् परिधावति । भक्षणहेतोः परिधावियति । "लक्षणहेत्वो-

क्रियायाः" इति शतृप्रत्ययः । अतेर्मालासमीप्यादिना भक्षिधात्वर्थे यङ् ॥ ३१ ॥ ३० ॥

३१] ति० टी०-तत्रा रामः पृच्छति—कथमेनमिति ३१

रा० टी०-कुंभकर्णमिति । कुंभकर्णं प्रतीक्ष्यैव हरयः प्रहरेयुः अतः एनं वानराः एवं कथं वारयिष्यन्ति ॥ ३२ ॥

३२] ति० टी०-विभीषण उत्तरमाह—उच्यतामिति । समुच्छ्रितं राक्षसैः मायया विभीषिकार्थं निर्मितं विशिष्यन्ते मायत्व, अतो न किंचिदेतदित्येवं वानरा उच्यन्तां भया स्वामिभिः, न तु रावणाद्युज्जत्वादिकमित्यर्थः । एवं च कार्यसिद्धिरित्याह—इतीति । इह एतस्मिन्विषये ॥ ३२ ॥

रा० टी०-सन्तु वानरस्वाम्यर्थं किं कर्तव्यमित्यत आह—उच्यन्तामिति । समुच्छ्रितमिति पदद्वयमेतदुच्यमानं रक्षः यंत्रं मायामयं सेकृत्रिमतया जो भविष्यतीति शेषः इति सर्वे वानराः उच्यन्तामिति भवद्भिः हरयो विज्ञाय निर्भयाः भविष्यन्ति॥३२॥

गो० टी०-उच्यन्तामिति । यन्त्रं विभीषिका । समुच्छ्रितमुक्तम् ॥ ३२ ॥

३३] ति० टी०-हेतुमत्युक्तिमत् । समुद्योगं वानरणां कार्य सौमुख्यसंपादनायोद्यतमुपदिष्टं वचः प्रयुक्तं श्रुत्वा नीलं प्रति वाक्यमुवाच ॥ ३३ ॥

रा० टी०-विभीषणेति । हेतुमत् समुक्तिकं समुद्योगं वानराणां युद्धसम्मुखाय उद्यतं कथितं विभीषणवच. श्रुत्वा राघवो नीलमुवाच ॥ ३४ ॥

गो० टी०-विभीषणेति । समुच्छ्रितं समुद्यतं यथा भवति तथा इरितम् उक्तम् ॥ ३४ ॥

३४] ति० टी०-यथापूर्वं द्वारनिरोधे नियुङ्क्ते—गच्छेति । अनेन रावणबलायनानन्तरं मध्येऽद्रयः सूचिताः ॥ ३४ ॥

३५-३७] ति० टी०-शैलशृङ्गादीन्पुपसंहरन् । उपसंहरन्तः संचिन्वन्तः । भवन्तस्तिष्ठन्तीति शेषः ॥ ३५-३७ ॥

रा० टी०-तदाकारमाह—गच्छेति । पावके हे पावकाभ

---

१ संवृद्ध इति गो. पाठः । २ शयिष्यत इति गो. पाठः । ३ मुक्तेरितमिति गो. पाठः । ४ आप्येति गो. पाठः ।

रामवाक्यमुपश्रुत्य हरयो जितकाशिनः । पादपैरुद्यतैर्वीरा वानराः परवाहिनीम् ॥ १८ ॥
ततो हरीणां तदनीकमुग्रं रराज शैलोद्यतवृक्षहस्तम् ।
गिरेः समीपानुगतं यथैव महन्महाम्भोधरजालमुग्रम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ।

स कुम्भकर्णः महते राक्षसानां परिवृतः पुष्पवर्षेणावकीर्यमाणश्चाग्रजभवनं प्रविश्य तेन सत्कृतश्च पर्यङ्के निषण्णस्य तस्य चरणावभिवाद्य स्वयमासनमलङ्कृत्य किं भयमद्यापतितं यतोहं प्रबुद्धोऽभ्युत्थापित आर्येणेति क्रोधसंरक्तनयनोऽब्रवीत् रावणोऽपि तं राघवकृतावमर्दं शंसन् पूर्वमुत्तिष्ठ राक्षसवाहिनीं व्यथय मां चानन्दयेति प्रतिबभाषे ।

स तु राक्षसशार्दूलो निद्रामदसमाकुलः । राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः ॥ १ ॥
राक्षसानां सहस्रैश्च वृतः परमदुर्जयः । गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ ॥ २ ॥
स हेमजालविततं भानुभास्वरदर्शनम् । ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम् ॥ ३ ॥
स तत्तदा सूर्य इवाभ्रजालं प्रविश्य रक्षोधिपतेर्निवेशनम् ।
ददर्श दूरेऽग्रजमासनस्थं स्वयंभुवं शक्र इवासनस्थम् ॥ ४ ॥
भ्रातुः स भवनं गत्वा रक्षोगणसमन्वितः । कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ५ ॥

नील गच्छ सैन्यानि व्यूह व्यूहरचनया संस्थाप्य अत एव लंकायाः द्वाराणि चर्याः राजमार्गांश्च संक्रमांश्चादाय स्ववर्गं प्रापय्य शैलशृंगादीनि उपसंहरन् सन् त्वं तिष्ठस्व शैलपाणयस्तस्तः सायुधाः वानराः तिष्ठन्तु अहं चतुर्थयमेकान्वयि॥३५॥३६॥

रा० टी०—राघवेणेति । राघवेण समादिष्टो नीलः वानरानीकं यथावत् ययौ ॥ ३७ ॥

रा० टी०—तत इति । शैलाभाः गवाक्षादयश्शैलशृङ्गाणि गृहीत्वा द्वारमभ्ययुः रुरुधुरित्यर्थः ॥ ३८ ॥

गो० टी०—गच्छेत्यादिश्लोकद्वयम् । आदाय स्वीकृत्य । आरुहेति यावत् । उपसंहर संगीकुरु । युद्धसाधनशिलादिकमिदानीमेव संपादयेत्यर्थः । तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणयः इति पाठः। सायुधाः सन्नद्धायुधवन्तः॥३५-३८॥

३८] ति० टी०—रामवाक्यं पूर्वमाज्ञप्तमिदमित्येवंरूपम् । जितकाशिनो निर्भयाः परवाहिनीं पुरःसरैः पुरीपरिसररक्षिणीं राक्षससेनामित्यर्थः ॥ ३८ ॥

रा० टी०—रामेति । रामवाक्यमुपश्रुत्य हरयः विप्रप्राणहरणवीरा वानराः परवाहिनीं पादपैरुद्यतान् आदयन् ॥ ३९ ॥

गो० टी०—रामेति । परवाहिनीं नगररक्षार्थं बहिश्चरन्तीम् । यद्वा कुम्भकर्णं दृष्ट्वा पलायमानान् वानरान् प्रत्युद्गतां परवाहिनीमित्यर्थः ॥ ३९ ॥

३९] ति० टी०—शैलोद्यतेति । उद्यतशैलं वृक्षहस्तं च । गिरेः समीपानुगतम्, पर्वताग्रवर्तिलङ्कायाः परितो वर्तमानत्वात्तत्रम्, महन्महादशकायमिसंस्थानवत् ॥ ३९ ॥

इति श्रीरामभिरामे श्रीरामीये रामायणतिलके बालवीकीय आदिकाव्ये युद्धकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

रा० टी०—तत इति । शैलाः उद्यतवृक्षाश्च हस्तेषु यस्य तत् हरीणामनीकम् गिरेस्समीपानुगतमुग्रं महाम्भोधरजालमिव रराज ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

गो० टी०—तत इति । शैलोद्यतदीप्तहस्तं शैलोद्यताः उद्यतशैलाः । महन्महाम्भोधरजालम् । महद् गुरु महाम्भोधरजालं मेघजालमित्यर्थः ॥ ४० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

१] ति० टी०—अथ रावणेन कुम्भकर्णनियोजनम्—स त्विति ॥ १ ॥

रा० टी०—कुम्भकर्णदृष्टान्तमाह—स इत्यादिभिः । निद्रामदेन समाकुलः कुंभकर्णः राजमार्गं ययौ ॥ १ ॥

गो० टी०—अथ कुम्भकर्णं प्रति रावणस्य सान्त्ववचनं द्विषष्टितमे—स त्वित्यादि । निद्रामदसमाकुलः निद्रया अकालोत्थितत्वेनानुवर्तमानया मदेन मद्यपानकृतेन च समाकुलः । गृहेभ्यः निर्गतनेति शेषः ॥ १ ॥ २ ॥

२] ति० टी०—गृहेभ्यस्तत्तद्गृहवर्तिस्त्रीहस्तेभ्यः । निर्गतेनेति शेषः ॥ २ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह-राक्षसानामिति । राक्षसानां सहस्रैर्वृतः कुंभकर्णः गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ२

गो० टी०—स हेमेति । हेमजालविततं स्वर्णमयगवाक्षवितनम् । भानुभास्वरदर्शनम् उद्यत इति दर्शनं रूपम् । भानुवत् प्रकाशमानमित्यर्थः ॥ ३ ॥

३-५] ति० टी०—भानुवत्स्वयंद्योतत्वं दर्शनं यस्य तत्

---

१ दीप्तेति गो. पाठः । २ आभिति रा. पाठः । ३ गच्छेत्यिति गो. रा. पाठः ।

सोऽभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च । ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम् ॥ ६ ॥
अथ दृष्ट्वा दशग्रीवः कुम्भकर्णमुपस्थितम् । तूर्णमुत्थाय संहृष्टः संनिकर्षमुपानयत् ॥ ७ ॥
अथासीनस्य पर्यङ्के कुम्भकर्णो महाबलः । भ्रातुर्ववन्दे चरणौ किं कृत्यमिति चाब्रवीत् ॥ ८ ॥
पुनः स मुदितोत्पत्य रावणः परिषस्वजे । स भ्रात्रा संपरिष्वक्तो यथावच्चाभिनन्दितः ॥ ९ ॥
कुम्भकर्णः शुभं दिव्यं प्रतिपेदे वरासनम् । स तदासनमाश्रित्य कुम्भकर्णो महाबलः ॥ १० ॥
संरक्तनयनः क्रोधाद्रावणं वाक्यमब्रवीत् । किमर्थमहमाहृत्य त्वया राजन्प्रबोधितः ॥ ११ ॥
शंस कस्माद्भयं तेऽद्य को वा प्रेतो भविष्यति । भ्रातरं रावणः क्रुद्धं कुम्भकर्णमवस्थितम् ॥
रोषेण परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत् ॥ १२ ॥
अयं ते सुमहान्कालः शयानस्य महाबल । सुषुप्तस्त्वं न जानीषे मम रामकृतं भयम् ॥ १३ ॥
एष दाशरथिः श्रीमान्वृतो वीरसहस्रिभिः बली । समुद्रं लङ्घयित्वा तु कुलेनः परिकुन्तति ॥ १४ ॥

भानुभिः सूर्यकिरणैर्भास्वरं दर्शनं यस्येति च । रत्नेषु सूर्यकिरणसंबन्धादधिकतेजोवत्त्वं गृहस्येति भावः । द्वाभ्येव युग्मम् ॥ ३–५ ॥

रा० टी०–स इति । भानुवत् भास्वरं दर्शनं यस्य तत् राक्षसेंद्रनिवेशनं स कुंभकर्णो ददर्श ॥ ३ ॥

रा० टी०–स इति । स कुंभकर्णः पर्यंकाल्लंबिपादं स्थोपविष्टेनिवेशनं प्रविश्य शयनस्थयन्मुखेति । शयनस्थमेनं इदं ददर्श ॥ ४ ॥

रा टी०–भ्रातुरिति । कुंभकर्णः भ्रातृभवनं गच्छन् सन् पदन्यासैर्मेदिनीमकम्पयत ॥ ५ ॥

गो० टी०–स इति । इदं कक्ष्यान्तरपदेशं ददर्श । उक्त तपुष्पकवत्त्वादिति भावः ॥ ४–६ ॥

६] ति० टी०–कक्ष्यामभिविगाह्य द्वाराणि तीर्त्वा ॥६॥

रा० टी०–स इति । स कुम्भकर्णः कक्ष्यामभिविगाह्य दृष्ट्वा पुष्पके विमाने आसीनमुद्विग्नं गुरुं ददर्शेत्यन्वयः ॥ ६ ॥

७–८] ति० टी०–उपस्थितं प्राप्तम् ॥ ७ ॥ ८ ॥

रा० टी०–अथेति । दशग्रीवः उपस्थितमात्रमेव कुंभकर्णं दृष्ट्वा संहृष्टस्सन् सन्निकर्षं स्वसमीपमुपानयत् ॥ ७ ॥

गो० टी०–अथेति । सन्निकर्षं समीपम् ॥ ७ ॥

रा० टी०–अथेति । कुंभकर्णः पर्यंके आसीनस्य भ्रातुः चरणौ ववन्दे मया किं कृत्यमित्यब्रवीच्च ॥ ८ ॥

गो० टी०–अथेति । कृत्यं मया कर्तव्यम् ॥ ८–१० ॥

९–१०] ति० टी०–स मुदितोत्पत्य । स रावणो मुदितः सन्नुत्पत्य आसनादुत्थायेत्यर्थः संधिरार्षः ॥ ९ ॥ १० ॥

रा० टी०–पुनरिति । मुदितो रावणः पुनरुत्पत्य उत्थाय परिषस्वजे ॥ ९ ॥

रा० टी०–स इति । भ्रात्रा संपरिष्वक्तः अत एव अभिनन्दितः कुंभकर्णः वरासनं भ्रातुरुत्तममासनं प्रतिपेदे प्राप१०

रा० टी०–स इति । क्रोधात् संरक्तनयनः कुंभकर्णः तदासनमाश्रित्य रावणमब्रवीत् ॥ ११ ॥

११] ति० टी०–क्रोधादकाल उद्बोधनकोपात् । 'कोपा' इति पाठान्तरम् । तदेव दर्शयति—किमर्थमिति । आहृत्य यत्नं कृत्वा ॥ ११ ॥

रा० टी०–तदाकारमाह—किमर्थमिति । त्वयाहं किमर्थं प्रबोधितः कस्माते भयमत्र अस्मिन् समये कारणमिति हेतुः प्रेतो मृतो भविष्यति ॥ १० ॥

गो० टी०–किमर्थमिति । आहृत्य स्थितेनेति शेषः । शंसेति । तमिति शेषः । प्रेतो भविष्यति मृतो भविष्यति॥११॥

१२] ति० टी०–प्रेतो भविष्यति । मया निहत इति शेषः । रोषेणोत्परिवृत्ताभ्यां नेत्राभ्यामुपलक्षितं कुम्भकर्णमिदं वाक्यमब्रवीत् ॥ १२ ॥

रा० टी०–भ्रातरमिति । रोषेण परिवृत्ताभ्यां नेत्राभ्यामुपलक्षितो रावणः अयस्थितं कुंभकर्णमब्रवीत्॥१२॥

गो० टी०–भ्रातरमिति । 'रोषेण परिवृत्ताभ्यामित्यनेन [illegible] कोपो उच्यते ॥ १२ ॥

१३–१४] ति० टी०–सुमहान्कालः । गत इति शेषः । मया सेमत्य । गमनान्तरमिति भावः । समुद्रानित्यनेन ब्रह्मकुलाविभूतषण्मासादप्यधिकः कालो गत इति सूच्यते । 'शयिष्यसे षण्मासानेकाहं जागरिष्यते' इति तु षण्मासादर्वाग्जागरणाभावपरम् । 'मन्वं कृत्वा प्रसुप्तोऽयमितस्तवमेऽहनि' इति पद्यं तु प्रक्षिप्तम् । नैवाहःपदं मासपरं केत्युक्तम् । अन्यथा षण्मासादर्वाक्कदापि जागरणाभावेन तावत्कालस्य तत्त्वापे नियतत्वात्ततोऽर्वाक्कासदृयादिमध्ये एक त्प्रश्नत्तौ सुमहानित्युक्तेरसंगत्यापत्तेः । अनेन मन्वं कृत्वा सुप्तस्याष्टनवमासरूपः कालो गत इति गम्यते । अनेनाहि युद्धस्य षण्मासाधिककालव्यापिता सूचिता भवतीति ज्ञायत ॥ १३ ॥ १४ ॥

१ उत्पत्य चैव मुदित इति गो. पाठः । २ बीति गो. पाठः । ३ तेऽस्ति कोऽयेति गो. पाठः । ४ ईषदिति गो. पाठः । ५ अस्य ते इति गो. पाठः । ६ [illegible] इति गो. पाठः । ७ राम इति गो. पाठः । ८ सुषुप्तस्त्वमिति गो. पाठः । ९ मूर्छतीति गो. पाठः ।

हन्त पश्यस्व लङ्कायां वनान्युपवनानि च । सेतुना सुखमागत्य वानरैकार्णवं कृतम् ॥ १५ ॥
ये राक्षसा मुख्यतमा हतास्ते वानरर्युधि । वानराणां क्षयं युद्धे न पश्यामि कथंचन ॥
न चापि वानरा युद्धे जितपूर्वाः कदाचन । ॥ १६ ॥
तदेतद्भयमुत्पन्नं त्रायस्वेह महाबल । नाशय त्वमिमानद्य तदर्थं बोधितो भवान् ॥ १७ ॥
सर्वक्षपितकोशं च स त्वमभ्युपपद्य माम् । त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम् ॥ १८ ॥
भ्रातुरर्थे महाबाहो कुरु कर्म सुदुष्करम् । मयैवं नोक्तपूर्वो हि भ्राता कश्चित्परंतप ॥ १९ ॥
त्वय्यस्ति मम चस्नेहः परा संभावना च मे । देवासुरेषु युद्धेषु बहुशो राक्षसर्षभ ॥
त्वया देवाः प्रतिव्यूह्य निर्जिताश्चामरा युधि । ॥ २० ॥
तदेतत्सर्वमातिष्ठ वीर्यं भीमपराक्रम । नहि ते सर्वभूतेषु दृश्यते सदृशो बली ॥ २१ ॥

रा० टी०—तदाकारमाह—अयमित्यादिभिः । हे महाबल यथानन्य ते समर्थः कालो व्यतीत इति शेषः अतः युयुत्सुस्त्वं रामकृतं भयं न जानीषे ॥ १४ ॥

गो० टी०—इत्थमेव विवृणोति—अद्येत्यादिना । क्षमस्व कालः वर्षत्रयपरिमितः । गत इति शेषः ॥ १३ ॥

रा० टी०—एषदृति । एष रामः सुग्रीवसहितस्सन् नः कुलं परिक्लान्तति ॥ १४ ॥

गो० टी०—एष इति । मूलं मूलबलम् । परिक्लन्तति आपत इत्यर्थः ॥ १४ ॥

१५] ति० टी०—स्वलङ्कायां स्वीयद्वीपे । वानरैकार्णवं कृतं वानरसमैकार्णवत्वकृतम् ॥ १५ ॥

रा० टी०—हन्तस्मिन् । सेतुना सुखमागम्य रामादिभिरिति शेषः स्वलंकायां वनादीनि हन्त हतानि पश्य वानराः एव एकार्णवो यस्मिन् तत् कृतं सिद्धं पुरे च पश्य ॥ १६ ॥

गो० टी०—मूलकृन्तनमुपपादयति—हन्तेति । लङ्कायां वनान्युपवनानि च सर्वम् । सेतुना सुखमागम्य स्वनिर्मितसेतुमात्रेण सुखमागम्य । रामेण । वानरैकार्णवीकृतं वानरकार्णवीकृतम् । पश्यस्व । आत्मनेपदमार्षम् । यद्वा स्वलङ्कायामिति शेषः । आत्मीयलङ्कादीप इत्यर्थः ॥ १५–१७ ॥

१६–१७] ति० टी०—वानराणां क्षयं न पश्यामि । तिसृषु क्षणो युद्ध, मर्दीयें रक्षोभिर्जितपूर्वा अपि न दृश्यन्ते ॥ १६ ॥ १७ ॥

रा० टी०—नेदृति । वानराणां क्षयं युद्धे न पश्यामि न वा वानराः युद्धे कदाचन जितपूर्वा दृष्टा इति शेषः ॥ १७ ॥

रा० टी०—तदेतदिति । तस्मात् एतत् भयमुत्पन्नम् इह अस्मिन् कर्मणि त्रायस्व तदुपायमाह इमान् त्वं नाशय तदर्थमेव भवान् बोधितः ॥ १८ ॥

गो० टी०—तदेतदृति । तस्मात् एतादृशम् । भयमुत्पन्नम् अस्माद्भयादिमां पुरीं त्रायस्व । इमान् वानरान् नाशय । तदर्थं नाशनार्थम् ॥ १८ ॥

१८–१९] ति० टी०—सर्वं क्षपिता नाशिताः कोशा ऐश्वर्याणि यस्य तं मामभ्युपपद्याङ्गीकृत्य त्रायस्व ॥१८ ॥ १९ ॥

रा० टी०—सर्वेति । सर्वक्षपिताः निश्शेषं नष्टाः कोशाः धनागाराणि यस्य तं मामुपपद्याङ्गीकृत्य बालवृद्धावशेषितां लंकां त्रायस्व ॥ १९ ॥

गो० टी०—सर्वक्षपितेति । सर्वक्षपितकोशं क्षपितसर्वैश्वर्यम् कोशोऽस्त्री कुड्मले खड्गपिधानेऽौषधिव्ययोः इत्यमरः । अभ्युपपद्य जानीहि इत्यर्थः । बालवृद्धावशेषितामित्यतिशयोक्तिः । मूलबलाद्युत्सादनस्य वक्ष्यमाणत्वात् ॥ १९ ॥

रा० टी०—भ्रातुरिति । भ्रातुरर्थे सुदुष्करं कर्म कुरु कश्चिद्भ्राता मया एवं नोक्तपूर्वः ॥ २० ॥

गो० टी०—भ्रातुरिति । कश्चिदिति प्रश्ने । कदाचिदपि नोक्तपूर्वोसीत्यर्थः । कश्चिदिति पाठे त्वदन्यः कश्चिदपि नैवमुक्तपूर्व इत्यर्थः ॥ २० ॥

२०] ति० टी०—परा संभावना कार्यसिद्धिप्रत्याशा मे । त्वय्यस्तीति शेषः । प्रतिव्यूह्य प्रातिभटयं कृत्वा ॥ २० ॥

रा० टी०—त्वय्यीति । त्वयि मे स्नेहः परा संभावना अयं कार्यं साधयिष्यतीत्याशा चास्ति ॥ २१ ॥

रा० टी०—आशार्थां हेतुमाह—देवेति । अमराः मरणधर्मरहिताः अपि बहुशो देवाः प्रतिव्यूह्य भयमुत्पाय त्वया निर्जिताः ॥ २२ ॥

गो० टी०—त्वय्यीति । सम्भावना आदरः । दैवासुरेषु देवासुरसंबन्धिषु । प्रतिव्यूह्य विभज्य । अमराः अमरा अपीत्यर्थः ॥ २१ ॥

२१] ति० टी०—वीर्यमातिष्ठ वीर्यमवलम्बस्व ॥ २१ ॥

रा० टी०—तदिति । तत् लङ्कात्राणहेतोः एतत्सर्वं वीर्यमातिष्ठ स्मरेत्यर्थः हि यतः ते सदृशो बली न दृश्यते ॥ २३ ॥

१ क्षमस्वेति गो. पाठः । २ स्वलंकीयमिति गो. पाठः । ३ कदाचनेति गो. पाठः । ४ इमामिति गो. पाठः । ५ कश्चिद्भ्रातरिति गो. पाठः । ६ तु मयेति गो. पाठः । ७ असुरा इति गो. पाठः ।

कुरुष्व मे प्रियहितमेतदुत्तमं यथाप्रियं प्रियरण बान्धवप्रिय ।
स्वतेजसा व्यथय सपत्नवाहिनीं शरद्घनं पवन इवोद्यतो महान् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।

रावणस्य परिदेवितं निशम्य पापकर्मणो योग्यं फलमाप्तवन्तं यद् सीतास्वाम्यादिके प्रियवक्ता मन्त्रोदर्को अनुजस्य विभीषणस्य च हितं वचनमनादृतं भवता राजनीतिविधिना दण्डयितव्यो नवेति कुम्भकर्णं प्रति भर्त्सयमानं रावणः । ततो रक्षोयमिति ज्ञात्वा तत्कालानुगुणवीर्योत्साहजनितां स्थिरमनाश्चिन्तयन्नेकः ।

तस्य राक्षसराजस्य निशम्य परिदेवितम् । कुम्भकर्णो बभाषेदं वचनं प्रजहास च ॥ १ ॥
दृष्टो दोषो हि योऽस्माभिः पुरा मन्त्रविनिर्णये । हितेष्वनभियुक्तेन सोऽयमासादितस्त्वया ॥ २ ॥
शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः । निरयेष्वेव पतनं यथा दुष्कृतकर्मणः ॥ ३ ॥
प्रथमं वै महाराज कृत्यमेतदचिन्तितम् । केवलं वीर्यदर्पेण नानुबन्धो विचारितः ॥ ४ ॥

गो० टी०—तदेतदिति । आर्षत्वादवकारलोपः ॥ २२ ॥

२२] ति० टी०—हे प्रियरण हे बान्धवप्रिय, यथाप्रियं स्वप्रीत्युत्सारेण प्रियहितमुत्तमं हितं कुरुष्व ॥ २२ ॥

इति श्रीरामानन्दे श्रीरामीये रामायणतिलके बाल्मीकीय आदिकाव्ये युद्धकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

रा० टी०—कुरुष्वेति । शरद्घनमुद्यतो महान् पवन इव सपत्नवाहिनीं स्वतेजसा व्यथय एतस्मै प्रियहितं यथाप्रियं प्रीतिमनतिक्रम्य कुरुष्व ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतिलकमणौ युद्धकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

गो० टी०—कुरुष्वेति । यथाप्रियं यथालेख्यं भावसोः प्रीत्यनुरूपमित्यर्थः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

१] ति० टी०—प्रजहास च । विभीषणवचोऽनादरकारं फलं प्राप्तं दुरात्मनेति हासः ॥ १ ॥

रा० टी०—रावणवचनश्रवणानंतरकालिकीं कुंभकर्णोक्तिमाह—तस्येत्यादिभिः । तस्य रावणस्य परिदेवितं विलापं निशम्य कुंभकर्णो बभाषे प्रजहास च ॥ १ ॥

गो० टी०—अथ कुम्भकर्णद्विषष्टितमे—तस्येत्यादि । परिदेवितम् पूर्वोक्तवचनानां परिदेवनतुल्यत्वात् परिदेवितस्वम् । कुम्भकर्णो वचनं बभाषे जहास चेत्यत्र व्यत्ययः कार्यः उक्त्वा जहासेति वार्थः ॥ १ ॥

२] ति० टी०—तदेव प्रकाशयति—दृष्ट इति । मन्त्रविनिर्णये विभीषणेन सह मन्त्रविचारकाले हितेषु हितवादिषु, अनभियुक्तेनाश्रद्धातेन, सोऽयमासादितः । मया विभीषणेन च दृष्टः । सर्वनाशप्राप्तिरूपदोष इत्यर्थः ॥ २ ॥

रा० टी०—तद्वचनाकारमाह—दृष्ट इत्यादिभिः । पुरा पूर्वस्मिन् मंत्रविनिर्णये विभीषणादिभिस्सह मन्त्रकरणकाले यो दोषो भवत्कृतदुर्नयफलमस्माभिर्दृष्टो दर्शितः सोऽयं दोषः हितेषु अनभियुक्तेन हिताकाङ्क्षारहितेन त्वया आसादितः त्वत्कृतः प्राप्तो वा ॥ २ ॥

गो० टी०—दृष्ट इति । पुरा मन्त्रनिर्णये क्रियमाणे । अस्माभिः यो दोषो दृष्टः अद्यैवास्मत्पक्षे अविचारितेति निश्चितः हितेषु हितवत्सु । अनभियुक्तेन अभक्तेन हितपरवचनमप्रमाणीकृतवत्या, त्वया सोऽयं दोष आसादितः । पूर्वमेव चिन्तितो विपत् प्राप्तेत्यर्थः ॥ २ ॥

३] ति० टी०—लोके कर्मणः दोषं पुरुषाः प्रयच्छन्ति । त्वां तु 'अभ्युत्थैः पुण्यपापैरिह एव फलमश्नुते' इति न्यायेन शीघ्रमेव परदारग्रहणरूपदुष्कर्मणः फलं प्राप्नोतीत्याह—शीघ्रमिति । अभ्युपेतं प्राप्तं ज्ञातम्, यथा पापस्य प्रथमं निरयेष्वेव पतनं तद्वत् ॥ ३ ॥

रा० टी०—शीघ्रमिति । दुष्कृतकर्मणो निरयेषु पतनमिव पापस्य कर्मणः फलं त्वां शीघ्रमभ्युपेतम् ॥ ३ ॥

गो० टी०—शीघ्रमिति । पापस्य सीताहरणरूपस्य कर्मणः फलम् त्वाम् शीघ्रम् अभ्युपेतं प्राप्तम् । अभ्युत्थैः पुण्यपापैरिह एव फलमश्नुते इति न्यायात् । अत्रोदाहरणमाह—निरयेष्विति । दुष्कृतकर्मणः महापातकिनः पुरुषान् । निरयेष्वेव पतनं यथा प्राप्नोति तद्वत् । एवकारोणापरिहार्यत्वमुच्यते ॥ ३ ॥

४] ति० टी०—प्रथममेतत्कृत्यं सर्वनाशप्राप्तिरूपं केवलं वीर्यदर्पेण न चिन्तितम्, अनुबन्धो दोषोत्पादोऽपि न विचा-

यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः । पूर्वं चोत्तरकार्याणि न स वेद नयानयौ ॥ ५ ॥
देशकालविहीनानि कर्माणि विपरीतवत् । क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ६ ॥
त्रयाणां पञ्चधा योगं कर्मणां यः प्रपद्यते । सचिवैः समयं कृत्वा स सम्यग्वर्तते पथि ॥ ७ ॥
यथागमं च यो राजा समयं वै चिकीर्षति । बुध्यते सचिवैर्बुद्ध्या सुहृदश्चानुपश्यति ॥ ८ ॥

रितः । इदं दृष्टं कर्म तस्य वैवं फलं भावीति ह्ययमपि न विस्मापयितव्यः । लोकानुग्रहबन्धः स्यात् इत्यमरः ॥४॥

रा० टी०—प्रथममिति । वीर्यदर्पेणैव एतदुपहरणरूपं कृत्यमविचिन्त्य भक्ष्यभक्षणवदिति न विचारितम् अत एव अनु बन्धः सीताहरणयोः परस्परं प्रीतिर्न विचारितः तत्कालमेवोपस्थितमिति तात्पर्यम् ॥ ४ ॥

गो० टी०—प्रथममिति । हे महाराज, केवलं वीर्यदर्पेण एतत्कृत्यं सीताहरणरूपं कार्यं यत् प्रथमं सीताहरणात् पूर्वम् न विचिन्तितवान् परामर्शं नाकरोत् तदा न विचारितम् । अनुबन्धतीतिबन्धः दोषोत्पादकबन्धः स्यात् इत्यमरः ॥४॥

५] ति० टी०—पूर्वकार्याणि पूर्वकर्तव्यकार्याणि यः पश्चात्कर्तव्योत्तरकार्याणि च पूर्वं स नयानयौ न वेद । अत्र पूर्वकार्यं विचार्य उत्तरकार्यं सीताहरणम् ॥ ५ ॥

रा० टी०—य इति । ऐश्वर्यम् आधिपत्यमाश्रितो यः पूर्वकार्याणि त्वात्मरक्षोपयोगीनि उत्तरकार्याणि पूर्वं करोति स नयानयौ न वेद ॥ ५ ॥

गो० टी०—प्रथमं विचार्य पश्चात् कर्म कर्तव्यमिति प्रेक्षावतां क्रमः, तथा तु तद्विपरीतं कृतमित्याह—य इति । ऐश्वर्यम् आश्रितः प्राप्तः नः पुमान् पूर्वकार्याणि कार्यारम्भात् पूर्वं कर्तव्यानि अन्तरङ्गाणि कृत्वा । परकार्याणि उत्तरकाले विचार्याणि च पूर्वं कृत्वा स नयानयौ नीत्यनीती न वेद ॥ ५ ॥

६] ति० टी०—तदेव प्रपञ्चयति—देशेति । उचितदेशकालरहितानि विपरीतकालदेशयुक्तानि स्वकृतैतत्कर्मबन्धुव्यसनानि दुःखाय भवन्ति । अप्रयतेष्वसावधानेष्वसंस्कृतेष्वग्निषु च हवींषीव ॥ ६ ॥

रा० टी०—देशेति । देशकालविहीनानि अनुचितदेशकालयुक्तानि क्रियमाणानि कर्माणि विपरीतवत् अयोग्यकर्तृकृतानीव दुष्यति तत्र दृष्टान्तः अप्रयतेषु संस्कारायोग्येषु अतिनीचेषु हवींषीव ॥ ६ ॥

गो० टी०—एवं देशकालानुरोधेन कर्म कर्तव्यमित्युक्तम्, तदनन्तरोक्ते योगमाह—देशेति । देशकालविहीनानि क्रियमाणानि अदेशे अकाले च कृतानि कर्माणि । विपरीतवत् देशकालवैकल्याद्विपरीतकर्माणीव । अप्रयतेषु मन्त्रानध्ययनादिना अपूतेषु अयज्ञेषु हवींषीव दुष्यन्ति विफलानि भवन्तीत्यर्थः ॥ ६ ॥

७] ति० टी०—अथ यथाकालदेशप्रयुक्तत्वसिद्धिमाह—त्रयाणामिति । अवहित्थानलक्षणानां निश्चयपूर्वं कर्तव्यानां कर्मणां सामादीनां योगं प्रयोगं सचिवैः सह पञ्चधा पञ्चप्रकारं समयं प्रयोगसाधनविचारं कृत्वा यः प्रपद्यते स सम्यक्पथि वर्तते समीचीने नीतिमार्गे वर्तते । तानि पञ्चप्रकारसाधनानि—कर्मणामारम्भोपायः, पुरुषद्रव्यसंपत्, देशकालविभागः, विपत्तिप्रतीकारः, कार्यसिद्धिश्चेति । सम्यगित्यव्ययम् ॥ ७ ॥

रा० टी०—त्रयाणामिति । सचिवैस्सह पञ्चधा पञ्चविधं समयं प्रयोगसाधनविचारं कृत्वा त्रयाणां विचारपूर्वककर्तव्यश्चयवहित्थानलक्षणानां सामादीनां कर्मणां योगमुयोगं यः प्रपद्यते स पथि राजमार्गे सम्यग्वर्तते पञ्चविधत्वं तु कर्मारम्भोपाय १ पुरुषद्रव्यसम्पत् २ देशकालविभागः ३ विपत्तिप्रतीकार ४ कार्यसिद्धिभेदेन ॥ ५—७ ॥

गो० टी०—देशकालानुरोधस्य फलमाह—त्रयाणामिति । सचिवैः मन्त्रिभिः सह । समयं निश्चयरूपम् सिद्धान्तं कृत्वा । समयाः शपथाचारकालसिद्धान्तसंविद इत्यमरः । त्रयाणाम् उत्तममध्यमाधमकर्मणाम् । तत्र आत्मोदयपरोदयानिसंभवसमये क्रियमाणं दण्डोपयोगि यानमुत्तमं कर्म । आत्मपरयोः बलसाम्ये क्रियमाणं संधानं मध्यमं कर्म । परोदयात्मक्षयानिसमये क्रियमाणं दानपूर्वसमाश्रयणमधमं कर्म तेषां पञ्चधा योगम् । कर्मणामारम्भोपायः । पुरुषद्रव्यसंपत् । देशकालविभागः विनिपातप्रतीकारः । कार्यसिद्धिश्चेत्युक्तैः पञ्चभिर्योगम् यद्वा त्रयाणाम् उत्तममध्यमाधमभावेन त्रिविधानां कर्मणाम् पञ्चधा योगं देशकालात्मद्रव्यप्रयोजनसंबन्धवशात् पञ्चविधं संबन्धम् । यः पश्यति सः सभ्ये साधौ सभ्यः सामाजिके साधौ इति रत्नमाला पथि नीतिमार्गे वर्तते सम्यङ्नीतिफलं प्राप्नोतीत्यर्थः ॥ ७ ॥

८] ति० टी०—एवं वर्तमानस्य प्रथमं बुद्धिसिद्धिः फलमित्याह—यथागमिति । यथागमं नीतिशास्त्रमनतिक्रम्य यो राजा सचिवैः सह समयं चिकीर्षति क्षयादिकालोचितसामादिकर्मविचारमुक्तपञ्चप्रकारतत्प्रयोगसाधनसंपत्तिविचारं च कर्तुमिच्छति । तथा—आत्मोपचयपरहानिसमये दण्डोपयोगियानम्, आत्मपरयोर्बलसाम्ये संधानम्, परोपचयात्महानिसमये दानपूर्वं समाश्रयणमिति । बुद्ध्या स्वबुद्ध्या सचिवैः सह सुहृदश्चानुपश्यति । अयं सुहृदित्यवक्ता, अयं प्रभोः क्षयमाक्रमणेच्छया वदति न सुहृदित्यनुपश्यति कार्यवशेन विचारयति । स सभ्यते कर्तव्याकर्तव्यविवेकबुद्धिं प्राप्नोति ॥ ८ ॥

रा० टी०—यथेति । यो राजा यथागमं नीतिशास्त्रमनति-

१ अपरेऽपि गो. पाठः । २ सभ्ये इति गो. पाठः । ३ तीति गो. पाठः । ४ सचिवानिति गो. पाठः ।

धर्मार्थौ हि कामो वा सर्वान्वा रक्षसां पते । भजते पुरुषः काले त्रीणि द्वन्द्वानि वा पुनः ॥ ९ ॥
त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तत्रावबुध्यते । राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम् ॥ १० ॥
उपप्रदानं सान्त्वं च भेदं कालेन विक्रमम् । योगं च रक्षसां श्रेष्ठ तावुभौ च नयानयौ ॥ ११ ॥
काले धर्मार्थकामान्यः संमन्त्र्य सचिवैः सह । निषेवेतात्मवाँल्लोके न स व्यसनमाप्नुयात् ॥ १२ ॥
हितानुबन्धमालोक्य कुर्यात्कार्यमिहात्मनः । राजा बहुगुणोपेतैः सचिवैर्बुद्धिजीविभिः ॥ १३ ॥

क्रम्य समर्थं क्षयादिकालयोग्यमासादिविशेषं प्रकरणेन लक्षयन्नुपप्रदानप्रयोगसाधनादिविचारं च निरीक्षते तत्रोपप्रदानमिति पद्यद्वयेन पुलस्त्यस्तत्रैवस्थ सहदोऽनुवदति इमे मे सहदः इत्यनेन विश्वस्तकृतपरीक्षया जानाति स बुध्यते राजधर्मं वेति शास्त्रो पञ्चप्रतिपुहादिसमये दण्डदानमात्मापरयोर्बलसाम्ये सन्धानं परोपघातात्महानिसमये दानपूर्वं समाश्रयणमित्यादि निरूपितम् ॥ ८ ॥

गो० टी०—यथाशास्त्रमिति । एवंगुणं मन्त्रिसहायस्यैवं कार्यं यो राजा समर्थं कार्यनिर्णयक्षमं विशेषेण मन्त्रिभिः बुध्यते सचिवैः सहालोचयतीति शेषः । बुध्यतानुवर्तते इति हि सिद्धान्तयतीति शेषः । स व्यसनं नाप्नुयात् इति पूर्वेणान्वयः ॥ ८ ॥

९] ति० टी०—अथ यदिकाले पुरुषार्थानिति त्रिवर्गधर्ममित्यादि । द्विष्ठार्थे । काले वय प्रस्तावसमये, यत्रोपप्रदानादिसेवा, राजा कामसेवेति स्वयंकाले श्रीणि वर्गतीति भजते एवराजादिस्तु द्वन्द्वानि वा द्वन्द्वान्येव धर्मकामादिकान् वा भजते अवान्तरभेदाद्बहुत्व सेवत इत्यर्थः ॥ ९ ॥

१०] गो० टी०—धर्ममिति । काले यथोचितावसरे पुरुष सर्वनिरूपणजनः धर्मादीन् भजते पूर्वोक्तप्रकारेण सेवते इत्यर्थः । वा कर्मण समुच्चये धर्मार्थकामान् सेवत इत्यर्थः । त्रीणि वा काले विहितेषु कालेषु भजते यथावसरं सेवते इन्द्राणि वा भजते तत्रापि प्रातर्मध्याह्नविहितौ धर्मार्थौ प्रातःकाले मध्याह्ने च सेवेत सायंकाले विहितकामं मध्याह्नविहितमर्थं च सायंकाले [९ ॥

गो० टी०—धर्ममिति । धर्ममर्थं कामं च [ ] त्रीणि द्वन्द्वानि वा धर्मार्थौ अर्थकामौ कामार्थौ वा [ ] काले विहितेषु प्रातर्मध्याह्नसायाह्नेषु भजेत । अकाले । सेवेतेति भावः । तदुक्तं भवति । प्रातःकाले धर्मं विहितं तं तदा सेवेत । मध्याह्ने अर्थं विहितं, तं तदा सेवेत । सायंकाले कामो विहितः, तं तदा सेवेतेति । यद्वा प्रातःकाले स्वकालविहितं धर्मं मध्याह्ने विहितमर्थं च सेवेत । मध्याह्ने स्वकालविहितमर्थं प्रातर्विहितं धर्मं च सेवेत । सायंकाले स्वकालविहितं कामं मध्याह्नविहितमर्थं च सेवेत । अथवा सायंकाले स्वविहितं कामं प्रातर्मध्याह्नयोर्विहितौ धर्मार्थौ च सेवेतेति । केवलकामं सर्वकालेष्वपि सेवमानः पुरुषाधमं एवेत्यभिसंधिः ॥ ९ ॥

१०] ति० टी०—अथ धर्मविरुद्धे कामे प्राप्ते धर्म एव श्रेष्ठं इत्याह—त्रिष्विति । एतेषु त्रिषु धर्मादिषु सर्वमुत्तरवा-

यच्छ्रेष्ठं धर्मरूपं तस्य तात्पर्येण्यः श्रुत्वापि नावबुध्यते विरोधे धर्मेणानुपेक्षणं न बुध्यते यो राजा महाराजो राजमात्रो युवराजस्तस्य बहुश्रुतं व्यर्थम् ॥ १० ॥

गो० टी०—तत्रधर्मं विरुद्धेषु धर्मादिषु प्राप्तेषु धर्म एव सेवेत इत्याह—त्रिष्विति । एतेषु धर्मादिषु श्रेष्ठं धर्मं श्रुत्वापि यदि [ ] राजा राजमात्रो वा नावबुध्यते नेच्छति न प्रतिपद्यते [ ] तस्य बहुश्रुतमनेकशास्त्रश्रवणं व्यर्थम् १०

गो० श्री०—धर्मं धर्मविरुद्धेषु तदवान्तरं मित्यादि—त्रिष्विति । एतेषु पूर्वोक्तेषु त्रिषु भजनेषु धर्मार्थकामेषु वा [ ] प्रत्येकं प्रत्येकत्वेन धर्मो वा तत्त्वेन यो राजा वा राजमात्रो वा [ ] राजसत्रुषो वा न बुध्यते ज्ञातुं न जानाति तस्य बहुश्रुतं शास्त्रश्रवणं व्यर्थम् । बहुज्ञानवैयर्थ्यमात्रमादिशति [ ] यो राजाद्यः [ ] अप्रमत्तपक्षेत्या त्रिवर्गेषु श्रेष्ठं धर्मं [ ] ज्ञात्वा तत्र [ ] आहारादिकाल [ ] से आप्तश्रवणं सम्यग्बोधमाप्तधर्मादिति [ ] [ ] ॥ १० ॥

११-१२] ति० टी०—सान्त्वं साम । एते दानादिचतुष्कम्, योगमुपकरणविषयसंपादनम् । तावुभौ नयानयौ धर्मिष्ठौ । एतौ साध्ययोगकालौ धर्मादीन् काले सचिवैः सह संमन्त्र्यालोचितौ यो विषेवेतेऽनुतिष्ठति स व्यसनं नाप्नुयात् ॥ ११ ॥ १२ ॥

गो० टी०—उपप्रदानमिति । सचिवैस्सह उभौ नयानयौ [ ] सम्यक् मन्त्रेण निश्चित्य काले यथोचितसमये उपप्रदानादीनि काले सम्यगेवेत्य यो निषेवेत स लोके । व्यसनं नाप्नुयात् । लोकद्वयमेकमन्वेति ॥ ११ ॥ १२ ॥

गो० टी०—अकाले काम इवाकाले विक्रमोपि स्याज्य इत्याह—उपप्रदानमित्यादिश्लोकद्वयेन । काले तत्तदुचितकाले उपप्रदानं प्रतिपक्षिणः समीपं गत्वा द्रविणादिप्रदानम् सान्त्वं समीचीनभाषणम् भेदं मित्रादिभ्यस्तस्य वैरीपक्षस्य विक्रमं दण्डं च प्रत्येकं तेषां योगं समवायं च सौ पूर्वोक्तौ नयानयौ तेषां निषिद्धप्रकारान् धर्मार्थकामांश्च सचिवैः संमन्त्र्य काले पूर्वोक्तकाले आत्मवान् वशीकृतमनस्कः यो निषेवेत स लोके व्यसनं नाप्नुयात् ॥ ११ ॥ १२ ॥

१३] ति० टी०—किं च स एव राजापि भवतीत्याह—हितानुबन्धमिति । य उच्यमानगुणैः सचिवैः सह हितानुबन्धं शुभसुदर्कफलमालोक्य विचार्यात्मनः कार्यं कुर्यात्स राजा भवतीत्यन्वयः ॥ १३ ॥

---

१ धर्मेति गो. पाठः । २ धर्मेति गो. पाठः । ३ देति गो. पाठः । ४ कार्यकार्यमिति गो. पाठः । ५ स हि जीवति इति गो. पाठः ।

अनभिज्ञाय शास्त्रार्थान्पुरुषाः पशुबुद्धयः । प्रागल्भ्याद्वक्तुमिच्छन्ति मन्त्रिणस्तान्विपश्चितः ॥ १५ ॥
अशास्त्रविदुषां तेषां कार्यं नाभिहितं वचः । अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम् ॥ १६ ॥
अहितं च हिताकारं धाष्ट्यांज्जल्पन्ति ये नराः । अवश्यं मन्त्रबाह्यास्ते कर्तव्याः कृत्यदूषकाः ॥ १७ ॥
विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः । विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः ॥ १७ ॥
तान्भर्ता मित्रसंकाशानमित्रान्मन्त्रनिर्णये । व्यवहारेण जानीयात्सचिवानुपसंहितान् ॥ १८ ॥

रा० टी०–हितेति । बुद्धिरेव जीवो जीवनं तद्वद्भिः अत एव अर्थतत्त्वज्ञैस्सचिवैः आत्मनो हितानुबन्धं हितप्रवृद्धिमालोक्य विचार्य राजा कार्यं कुर्यात् ॥ १३ ॥

गो० टी०–हितेति । अत्र कार्यमित्यध्याहारः निषेवेतेत्यनुषङ्गः यो राजा अर्थतत्त्वज्ञैः सचिवैः सह हितानुबन्धं हितोदर्कम् आत्मनः कार्याकार्यं कर्तव्याकर्तव्यम् आलोच्य निश्चित्य कार्यमेव निषेवेत सः इह लोके जीवतीत्यर्थः हीत्यनेनायमर्थो लोकप्रसिद्ध इत्यवगम्यते । हितानुबन्धकार्याकार्यानालोचनात्तवेदं व्यसनमापन्नमिति भावः ॥ १३ ॥

१४] ति० टी०–अथोत्तममन्त्रिविभीषणादिमतमपहाय दुर्मन्त्रिभिः क्षणमूलः सर्वानर्थ इत्याह—अनभिज्ञायेति । प्रागल्भ्यात्[1] वक्तुमिच्छन्ति वचनामात्रसामर्थ्यात् ॥ १४ ॥

रा० टी०–अनभिज्ञायेति । मन्त्रिषु अभ्यंतरीकृताः कथंचित् [illegible] प्रार्थिताः पशुबुद्धयः पुरुषाः शास्त्रार्थान् अनभिज्ञाय प्रागल्भ्यात् [illegible] वक्तुमिच्छन्ति तेषामर्थशास्त्रानभिज्ञानामत एव अशास्त्रविदां शास्त्रोक्तमित्रज्ञातृणामभिहितं वचो न कार्यम् श्लोकद्वयमन्वयि ॥ १४ ॥ १५ ॥

गो० टी०–सर्वं सामान्येन राजानमधिक्षिप्य मन्त्रिणोऽप्यधिक्षिपति–अनभिज्ञायेति । शास्त्रार्थान् नीतिशास्त्रार्थान् अभिज्ञाय गुरुमुखादधीत्य वेषेण पुरुषाः पशुबुद्धयः आहारनिद्राभिभूताभिज्ञः भ्रान्तेन राज्ञा मन्त्रेषु राजकार्यविचारेषु अभ्यन्तरीकृता मन्त्रित्वेन कृताः सन्तः प्रागल्भ्यात् अहापोहौ विना वक्तृत्वाद्यात् । वक्तुमिच्छन्ति । नतु सम्यक् संगते निश्चित्य वक्तीत्यर्थः ॥ १४ ॥

१५] ति० टी०–अशास्त्रविदामित्यस्यैव व्याख्या—अर्थशास्त्रानभिज्ञानामिति । अथापि विपुलां श्रियं केवलं हृदादेवेच्छतां [illegible] र्थमित्यन्वयः ॥ १५ ॥

रा० टी०–अशास्त्रेति । शास्त्रानभिज्ञानां तेषां मन्त्रिणाम् अहितं यतः अर्थशास्त्रानभिज्ञानाम् अथापि विपुलां श्रियमिच्छतां राज्ञां न कार्यम् । राजभिस्तदुक्तप्रकारो नाश्रयेण इत्यर्थः ॥ १५ ॥

१६] ति० टी०–राजभिर्मन्त्रकाले दुर्मन्त्रिनिरासः सर्वथा कार्य इत्याह—अहितं चेति । धाष्ट्यांत्साहसाभ्यां जल्पन्ति ते मन्त्रबाह्या अवश्यं कर्तव्याः ॥ १६ ॥

रा० टी०–अहितमिति । धाष्ट्यांद्वेतोः अहितं वचो हिताकारं ये जल्पन्ति ते कृत्यदूषकाः नराः अवश्यं मंत्रबाह्याः कर्तव्याः ॥ १६ ॥

गो० टी०–न केवलं तद्वचनाश्रवणं, मन्त्रेषु बहिष्कार्याश्च त इत्याह–अहितमिति । वस्तुतः अहितं हिताकारं हितमिवापाततः प्रतीयमानमर्थम् धाष्ट्यात् शास्त्रज्ञानं विना केवलप्रागल्भ्यात् ये जल्पन्ति अक्रमेण वदन्ति कृत्यदूषणाः कार्यदूषकास्ते अवेक्ष्य पूर्वमेव परीक्ष्य मन्त्रबाह्याः मन्त्रबहिर्भूताः कर्तव्याः ॥ १६ ॥

१७] ति० टी०–विनाशयन्त इति । केचन दुर्मन्त्रिणो भर्तारं त्वां नाशयन्तः हतौ शता तव नाशनिमित्तं विपरीतानि कृत्यानि कारयन्ति । केचित्सदमन्त्रिणो दुर्मन्त्रफलं तव नाशं पश्यन्तो बुधैः सर्वज्ञैस्तव शत्रुभिः सहिता । स्वरक्षणं कुर्वन्तीति शेषः ॥ १७ ॥

रा० टी०–विनाशयन्त इति । इह लङ्कायाम् बुधैश्शत्रुभिः सहिताः सदुर्मं प्राप्ता इत्यर्थः मंत्रिणो भर्तारं विनाशयन्तो विनाशहेतुं विपरीतानि कृत्यानि कारयन्ति किंच शत्रुभिः शत्रुत्वैः सहिता मन्त्रिणः बुधैरपि भर्तृहितैर्विपरीतानि कारयन्ति ॥ १७ ॥

गो० टी०–न केवलमहितवचनं, विपरीतं च कुर्वन्तीत्याह–विनाशयन्त इत्यादि । मन्त्रिणः दुर्मन्त्रिणः । बुधैः उपायज्ञैः शत्रुभिः सहिताः श्लेषितः विनाशयन्तः विनाशार्थम् इह प्रयोजनविषये विपरीतानि विपरीतफलकानि कृत्यानि भर्तारं कारयन्ति ॥ १७ ॥

१८] ति० टी०–ऊनमन्त्रित्वदुर्मन्त्रिनिर्णयः कथं तत्राह–तानिति । मन्त्रनिर्णये चिकीर्षिते तान्मित्रसंकाशानमित्रानुपसंहितानुत्कोचादिना शत्रुवशीकृतान्सचिवसंकाशान्व्यवहारेण तत्तन्मन्त्रनार्थक्रियालक्षणव्यवहारेण जानीयात् ॥ १८ ॥

रा० टी०–तानिति । अनुपसंहितान् उत्कोचादिना रिपुवशं प्राप्तान् अत एव मित्रसंकाशान् मित्रसदृशान् अमित्रान् सचिवान् मंत्रनिर्णये व्यवहारेण तत्तच्चरणेन भर्ता राजा जानीयात् स्वेन तान्विस्मारयेति ध्वनितम् ॥ १८ ॥

गो० टी०–दुर्मन्त्रित्वनिर्णयोपायमाह–तानिति । उपसंहितानुपजापितान् उत्कोचप्रदानादिना शत्रुभिर्भेदं प्रापितान् मित्रसंकाशान् मित्रद्रावयतः कार्यतोऽमित्रान् सचिवान् व्यवहारेण व्याभिश्रभाषणेन जानीयात् ॥ १८ ॥

१ मनोभिति गो० पाठः । २ न कार्यमहितमिति गो० पाठः । ३ अवश्येति गो० पाठः । ४ दूषणा इति गो० पाठः ।

चपलस्यैष कृत्यानि सहसानुप्रधावतः । क्षिप्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ १९ ॥
यो हि शत्रुमवज्ञाय आत्मानं नाभिरक्षति । अनर्थानवाप्नोति स्थानाच्च व्यवरोप्यते ॥२०॥
यदुक्तोऽसि हि ते पूर्वं प्रियया मेऽनुजेन च । तदेव नो हितं वाक्यं यथेच्छसि तथा कुरु ॥२१॥
तच्तु श्रुत्वा दशग्रीवः कुम्भकर्णस्य भाषितम् । भ्रुकुटिं चैव संचक्रे क्रुद्धश्चैनमभाषत ॥ २२ ॥
मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससे । किमेवं वाक्यमर्थं कृत्वा यदुक्तं तद्विधीयताम् ॥ २३ ॥
विभ्रमाच्चित्तमोहाद्वा बलवीर्याश्रयेण वा । नाभिपन्नमिदानीं यदुक्तं तस्य पुनः कथा ॥२४॥

१९] ति० टी०–चपलस्यापातसुखलुब्धकवचरसंतुष्टस्य हसाविचारेण कृत्यान्यनुप्रधावतः कुर्वतोऽन्ये शत्रवः क्षिप्रं स्वं रन्ध्रं प्रपद्यन्ते । द्विजाः पक्षिणः स्कन्दशक्तिविदारितक्रौञ्चस्य कैलासाख्यपर्वतस्य खं रन्ध्रमिव ॥ १९ ॥

रा० टी०–तत्र हेतुमाह—चपलस्येति । चपलस्य चंचलस्वभावस्य अत एव सहसा अविचारेण कृत्यानि अनुप्रधावतः कुर्वतः राज्ञः स्वं रन्ध्रं अन्ये रिपवः क्षिप्रं प्रपद्यन्ते तत्र दृष्टान्तः क्रौञ्चस्य तदभिघातेच्छिद्रपर्वतस्य स्वं स्कन्दशक्तिकृतछिद्रं द्विजा इव ॥ १९ ॥

गो० टी०–स्वयमसमर्थो विपरीतबुद्धयो मन्त्रिणः वैरिण्यन्तीत्याह—चपलस्येति । इह प्रस्तुते कार्ये क्रियमाणानि कृत्यानि उपसंहितमन्त्रिप्रेरितानि कार्याणि सहसा अविचार्य अनुप्रधावतः दुर्मन्त्रिषु मन्त्रित्वमनुसरतः चपलस्य अविवेकिनो यें प्रवर्तमानस्य राज्ञः क्षिप्रं रन्ध्रम् अन्ये शत्रवः विपक्षाः प्रपद्यन्ते स्वीकुर्वन्ति । कथमिव । द्विजाः पक्षिणः इन्तविप्रा इजा द्विजा इत्यमरः । क्रौञ्चस्य स्कन्दशक्तिविदारितस्य कैलासाख्यपर्वतस्य खमिव । पण्डिताः शत्रवः उत्कोचप्रदानादिना वशीकृतैर्मन्त्रिभिः कृतविश्वासपटकार्यं राजानं प्रापय्य एव रन्ध्रमासाद्य अन्तः प्रविशन्तीति भावः ॥ १९ ॥

२०] ति० टी०–अवज्ञायावमत्य । स्थानाद्राजपदव्याः । व्यवरोप्यते निवर्त्यते ॥ २० ॥

रा० टी०–य इति । शत्रुमवज्ञाय अपरिणतस्य आत्मानं । नाभिरक्षति सः अनर्थानवाप्नोति अत एव स्थानात् रा०यात् व्यवरोप्यते भ्रश्यते ॥ २० ॥

गो० टी०–एवं कपटवृत्तेः शत्रोः स्वरूपापरिज्ञाने राजा पपत इत्याह—यो हीति । यो हि राजा शत्रुं बलवत्त्वं अविज्ञाय मन्त्रव्यवहारादिना अविज्ञाय आत्मानं च नाभिरक्षति दुर्मन्त्रिनिरासादिना नात्मानं प्रकृतौ स्थापयति । अनर्थानवाप्नोति स्थानात् राजासनात् व्यवरोप्यते प्रच्याव्यते । इयता ग्रन्थेन तव कामव्यसनात् कुमन्त्रिवचनार्थेयमापदिति दर्शितम् ॥ २० ॥ २१ ॥

२१–२२] ति० टी०–प्रियया मन्दोदर्या । मेऽनुजो विभीषणः । समानार्थं च तयोर्वाक्ये इति मन्दोदरीवाक्यं न शत्रुकृतम् । स्वमतिसदृशमतित्वान्मेऽनुज इत्युक्तम् ॥२१॥२२॥

रा० टी०–यदिति । प्रियया मन्दोदर्या मेऽनुजेन विभीषणेन च ते तुभ्यं यत् दुष्कृतं तदेव वाक्यं मेऽत्राके हितं नतु तव मह्यं रोचते इत्यत आह यथा येन प्रकारेण इच्छसि तथा कुरु ॥ २१ ॥

रा० टी०–तदिति । दशग्रीवः कुम्भकर्णस्य भाषितं श्रुत्वा भ्रुकुटीं भ्रुवोः कौटिल्यं संचक्रे एवं कुम्भकर्णमभाषत च ॥२२॥

गो० टी०–तदिति । दशग्रीवः भ्रुकुटिं भ्रूवोर्वक्रीकरणपूर्वं चक्रे । एवमभाषत चेत्यन्वयः ॥ २२ ॥

२३] ति० टी० अहं तव दुर्मतेः निर्विवेकस्यैवाचार्य इव द्वितीयपक्षत्वाद इव च मान्यः । एवं वाक्यमर्थं कृत्वा किं फलम्, न किमपि । अतोऽत्र कार्ये यदुक्तं तद्विधीयताम् ॥ २३ ॥

रा० टी०–तदुत्तरमाह—मान्य इत्यादिभिः । मान्यो गुरुवत्पूजकः आचार्यः शिक्षाप्रद इव च त्वं किं क्रियार्थमनुशाससि अनुशासनयोग्यो नासि मान्योऽसि । त्वदुक्तं न करिष्यामीति साध्वसम् अतः एव च साध्वसं कृत्वा किं फलं न किमपीत्यर्थः अतो यत् युक्तमस्मिन् कार्ये का योग्यं तद्विधीयताम् ॥ २३ ॥

गो० टी०–मान्य इति । हे कुम्भकर्ण त्वं मान्यः बहुमानार्हः आचार्यः आचारप्रदर्शकः दुर्मतेः मां मान्यमाचार्यं गुरुम् अनुशाससि शिक्षसे किमर्थः यद् वैपरीत्यबोधकमीत्यर्थः । एवं वचनं त्वदुक्तमिति भावः । अथवा वेदं वचनमित्याह—किमेवमिति । एवम् उक्तप्रकारेण वाक्यमर्थं कृत्वा प्रयासैकफलां वाच्यमुक्त्वेत्यर्थः किं फलम् किमपि प्रयोजनं नास्तीत्यर्थः । नीतिकालातीतत्वादिति भावः । अतो नयमार्गातीतकाले यदुक्तं पराक्रमरूपम् तद् विधीयतां क्रियताम् ॥ २३ ॥

२४] ति० टी०–किं च त्वदुक्तं साध्वसेन । तथापि गते जले सेतुबन्धवदेषा कथा व्यर्थेत्यनुशयमनुतिष्ठन्नाह विभ्रमादिति । विभ्रमो विपरीतज्ञानम्, चित्तमोहोऽज्ञानम्, तदादिदोषेण शुभदुक्तं हितं तत्काले नाभिपन्नं मादृशिकम् । इदानीमतीतकालस्य पुनः कथा व्यर्थेत्यर्थः ॥ २४ ॥

रा० टी०–विभ्रमादिति । विभ्रमात् विपर्ययज्ञानात् चित्तमोहादविवेकाद्वा बलवीर्याश्रयेण वा यत् नाभिपन्नं स्वीकृतं तस्येदानीं पुनः कथा व्यर्था ॥ २४ ॥

१ किमिति गो. पाठः । २ अभीति गो. पाठ । ३ नात्मानमभीति गो. पाठः । ४ क्रियतामनुजनेति गो. पाठः । ५ यादेश्छाति च तदिति गो. पाठः । ६ कार्ये युक्तमिति गो. पाठः । ७ व्यर्था इति गो. पाठः । ८ कथाः इति गो. पाठः ।

अस्मिन्काले तु यद्युक्तं तदिदानीं विचिन्त्यताम् । [गतं तु नानुशोचन्ति गतं तु गतमेव हि]
ममापनयजं दुःखं विक्रमेण समीकुरु ॥ ॥ २५ ॥
यदि खल्वस्ति मे स्नेहो विक्रमं वाधिगच्छसि । यदि कार्यं ममैतत्ते हृदि कार्यतमं मतम् ॥ २६ ॥
स सुहृद्यो विपन्नार्थं दीनमभ्युपपद्यते । स बन्धुर्योऽपनीतेषु साहाय्यायोपकल्पते ॥ २७ ॥
तमर्थवं ध्रुवाणं सँ वचनं धीरदारुणम् । रुष्टोऽयमिति विज्ञाय शनैः श्लक्ष्णमुवाच ह ॥२८॥
अतीव हि समालक्ष्य भ्रातरं क्षुभितेन्द्रियम् । कुम्भकर्णः शनैर्वाक्यं बभाषे परिसान्त्वयन् ॥२९॥
शृणु राजन्यथादिष्टो मम वाक्यमरिंदम । अलं राक्षसराजेन्द्र संतापमुपपद्य ते ॥
रोषं च संपरित्यज्य स्वस्थो भवितुमर्हसि ॥ ॥ ३० ॥

गो० टी०—पूर्वसर्गोक्त इत्यत्र निमित्तमाह—विभ्रमादिति । विभ्रमात् भ्रंशात् धीरत्वात् । चित्तमोहात् ज्ञानाद्यवाद । कल्याणमित्रस्य । बलवीर्ययोरत्यर्थेन । गर्वेणेति शेषः । न कृतं तस्य पुनः कथाः पुनः पुनः श्रुतम्सि । इदानीमतीतकाले वर्तथाः ॥ २४ ॥

२५] ति० टी०—तदेवमत—अस्मिन्निति । अपनयजमपनीतिजम् । विक्रमेण स्वीयेन ॥ २५ ॥

रा० टी०—अस्मिन्निति । अस्मिन् काले यद्युक्तं तद्विशेषेण विचिन्त्यताम् अत एव यदि मे स्नेहो मद्विषयकप्रीतिर्भवति स्वयंप्रीतेः सकाशात् यदि च विक्रममधिगच्छसि विक्रमवानसीत्यर्थः यदि च एतत् प्रसिद्धं मम कार्यं ते हृदिकार्यतमं मन्तव्यं तदा मम अपनयजं दुर्नीतिजन्यं दुःखं समीकुरु मोचय । परिहरेत्यर्थः ॥ २५ ॥ २६ ॥

गो० टी०—स्नेहमित्यादि । इदानीं मयः । गतं तु गतमेव । न तदनुशोचन्त्यतीति भावः ॥ २५ ॥

२६] ति० टी०—विक्रमं वैक्लव्य स्वस्मिन्नित्यादिः । एतत्कार्यं सुहृदुपकारकत्वे यदि कार्यतममतिशयेनानुष्ठार्यं योग्यं कार्यमिति तव मंमतं तदा एवं कुर्विति संबन्धः ॥ २६ ॥

गो० टी०—ममेत्यादि । सार्वलौकिक एकान्वयः दोषं वैषम्यम् । नयविक्रमशालिति यावत् । समीकुरु समतया कुरु । वैषम्यापत्तौ सत्यां विषम्यमाणः सन् । खलु वाक्यालङ्कारे । मे मयि यदि स्नेहोऽस्ति स्यादिति विक्रमे यदि वा अवगच्छसि । स्वपराक्रमज्ञस्त्वेव नीतिपुरस्सरत्वया कृत इति भावः । एतत् दुष्करं कार्यं ते तदि कार्यतमम् अवश्यकर्तव्यम् मतम् इष्टम् । मन्यतेऽर्थेऽयं लट् । तदा समीकुरुष्वेत्यन्वयः ॥ २६ ॥

२७] ति० टी०—स इत्यत्र यदि मम साहाय्यमेवेदं कार्यमित्याह—स इति । विपन्नार्थं विनष्टकार्यकम् अतएव दीनम् । अभ्युपपद्यतेऽभ्युद्धरति । एव सुहृत् । बन्धुस्त्वेऽप्येवंस्त्वेव साहाय्यमित्याह—स इति । अपनीतेष्वपनीतिमार्गस्थेषु ॥ २७ ॥

रा० टी०—स इति । विपन्नो विनष्टो अर्थो यस्य अत एव दीनं योभ्युपपद्यते तत्साहाय्यकर्तृत्वेन प्राप्नोति स सुहृत् योपनीतेषु अपनीतिजनितप्रायदुःखेषु साहाय्यायोपकल्पते स बन्धुः ॥ २७ ॥

गो० टी०—इदानीं साहाय्याकरणे तव बन्धुत्वमेव भज्येतेति सदृष्टान्तमाह—स इति । विपन्नार्थं विपदः शङ्कितापायः अर्थः प्रयोजनं यस्य तम दीनं मलिनमनस्कम् पुरुषम् यः सुहृत् अभ्युपपद्यते अभितः प्राप्नोति सदा सन्निधत्त इत्यर्थः स एव सुहृत् । यो बन्धुः अपनीतेषु विपन्निनीतिषु पुरुषेषु सहाय्यायोपकल्पते साहाय्याय प्रभवति स एव बन्धुः । सर्वं वाक्यं सावधारणमिति न्यायात् ॥ २७ ॥

२८–२९.] ति० टी०—धीरदारुणम् । इच्छा चेत्कर्वित्युक्तेर्धीरत्वम् । स सुहृद्य इत्युक्तेर्दारुणत्वम् ॥ २८ ॥ २९ ॥

रा० टी०—तमिति । धीरदारुणं यद्युक्तं तद्विशेषतोभिरुक्तेन धीरत्वेन मान्यो गुरुरिवाचार्य इत्यायुक्तेर्दारुणत्वेन च प्रतीयमानं वचनमेवं ब्रुवाणं रावणं रुष्टोयमिति विज्ञाय कुम्भकर्णः श्लक्ष्णं मृदु वचनमुवाच ॥ २८ ॥

गो० टी०—तमिति । धीरदारुणम् । यदि वा कार्यमित्युक्त्या धीरम् सुहृदित्यायुक्त्या दारुणं निष्ठुरम् । रुष्टोयमिति विज्ञाय । भ्रुकुटिवैकृत्येनानुमायेत्यर्थः ॥ २८ ॥

रा० टी०—तदेव भङ्गयन्तरेणाह—अतीवेति । अतीव समतीत क्षुभितेन्द्रियं समालक्ष्य परिसान्त्वयन् मन बभाषे २९

गो० टी०—उक्तमेवार्थं प्रपञ्चयन्नाह—अतीवेति । अतीव क्षुभितेन्द्रियमित्यनेन रुष्टपदं व्याख्यातम् । परिसान्त्वयन्नित्यनेन श्लक्ष्णपदम ॥ २९ ॥

३०] ति० टी०—संतापमुपपद्य प्राप्यालम् । तापो न कार्य इत्यर्थः ॥ ३० ॥

रा० टी०—तदाकारमाह—शृण्विति । हे राजन् अवहितः एकाग्रचित्तः सन् मम वाक्यं शृणु अहं पृथक् तत्स्वरूपमाह अलमिति । संतापं रोषमुपपद्य प्राप्य ते अलं न कार्यं इत्यर्थः अतः संतापं रोषं च संपरित्यज्य स्वस्थो भवितुमर्हसि ॥ ३० ॥

गो० टी०—अलमिति । ते त्वया संतापम् उपपद्य प्राप्य

१ विनष्टतामिति गो. पाठः । २ एतदर्थमेवं गो. पुस्तक । ३ दोषमिति गो. पाठः । ४ अमेवेति गो. पाठः । ५ वा कार्यमेतदिति गो. पाठः । ६ अमेवेति गो. पाठः । ७ विति गो. पाठः । ८ इदमर्धं गो. पुस्तके नास्ति ।

नैतन्ममनसि कर्तव्यं मयि जीवति पार्थिव । तमहं नाशयिष्यामि यत्कृते परितप्यते ॥ ३१ ॥
अवश्यं च हितं वाच्यं सर्वावस्थां गतं मया । बन्धुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव ॥ ३२ ॥
सदृशं यच्च कालेऽस्मिन्कर्तुं स्नेहेन बन्धुना । शत्रूणां कदनं पश्य क्रियमाणं मया रणे ॥ ३३ ॥
अद्य पश्य महाबाहो मया समरमूर्धनि । हते रामे सह भ्रात्रा द्रवन्तीं हरिवाहिनीम् ॥ ३४ ॥
अद्य रामस्य तद्भद्रा मया नीतं रणाच्छिरः । सुखी भव महाबाहो सीता भवतु दुःखिता ॥ ३५ ॥
अद्य रामस्य पश्यन्तु निधनं सुमहत्प्रियम् । लङ्कायां राक्षसाः सर्वे ये ते निहतबान्धवाः ॥ ३६ ॥
अद्य शोकपरीतानां स्वबन्धुवधजोचिताम् । शत्रोर्युधि विनाशेन करोम्यश्रुप्रमार्जनम् ॥ ३७ ॥
अद्य पर्वतसंकाशं समूर्धनीव तोयदम् । विकीर्णं पश्य समरे सुग्रीवं प्लवगेश्वरम् ॥ ३८ ॥
कथं च राक्षसैरेभिर्मया च परिसान्त्वितः । जिघांसुभिर्दाशरथिं व्यथसे त्वं सदानव ॥ ३९ ॥

लम् । संतापो न कर्तव्य इत्यर्थः । "अर्तेस्वन्योः प्रतिषेधः प्राचां कल्या" इति कल्या प्रत्ययः । स्त्रियां भवतेर्यो भवेत्यर्थान्तरम् ॥ ३० ॥

३१] ति० टी०–एतदैन्यं यत्कृते यमभिमित्य ॥ ३१ ॥

रा० टी०–नैति । यत्कृते त्वं परितप्यसे तमहं नाशयिष्यामि ततो मयि जीवति सति एतद् दुःखं मनसि न कर्तव्यम्॥३१॥

गो० टी०–नैतदिति । नैतन्मनसि कर्तव्यम् विषमोहाद्वेरयुक्तं मनसि न कर्तव्यमित्यर्थः । यत्कृते यस्य रामस्य ते अर्थान्तरं तु मयि जीवति सति एतन्मनसि न कर्तव्यम् । यहं जीविष्यामि तदा एवं न कर्तव्या । अहमेव न जीविष्यामीत्यर्थः । यत्कृते यस्य मम कृते परितप्यसे अत एवेन मत्कार्यं न करोतीति परितप्यसि । तं मम स्नेहेन नाशयिष्यामीति ॥ ३१ ॥

३२] ति० टी०–सर्वावस्थां सुखदुःखादिसर्वावस्थां गतं प्राप्तम् । त्वां प्रतीति शेषः । 'विष्णोरानिष्कृतायां' इत्यादि स्थिति सीयते' इत्यन्ये ॥ ३२ ॥

रा० टी०–अवश्यमिति । बन्धुभावाद्बन्धुत्वात् स्नेहादिति सर्वावस्थाश्च ते हितं मयाऽवश्यं वाच्यम् अत एव मया अभिहितं कथितम् ॥ ३२ ॥

गो० टी०–तर्हि किमर्थमेवमुक्तमित्यत आह -अवश्यमित्यादि । बन्धुभावात् सामान्यस्नेहात् विशेषतो भ्रातृस्नेहाच्च । सर्वावस्थम् रोषहर्षादिसर्वावस्थावस्थितमित्यर्थः अवश्यं वाच्यं हितं मयाभिहितम् ॥ ३२ ॥

३३–३८] ति० टी०–यन्मम पराक्रमस्य सदृशमस्मिन्काले च स्निग्धेन बन्धुना कर्तुं योग्यं तन्मया क्रियमाणं शत्रूणां कदनं पश्य ॥ ३३–३८ ॥

रा० टी०–सदृशमिति । स्निग्धेन बन्धुना अस्मिन्काले कर्तुं सदृशं योग्यम् तत् मया क्रियमाणं शत्रूणां कदनं पश्य॥३३॥

गो० टी०–सदृशमिति । अस्मिन् काले आपत्काले स्निग्धेन बन्धुना यत्कर्तुं सदृशं युक्तम् तादृशं कदनं मया क्रियमाणं पश्य । अत्र बन्धुकर्तृके कदनमित्यर्थान्तरम् ॥३३॥

रा० टी०–अद्येति । मया रामे हते सति द्रवन्तीं पलायमानां हरिवाहिनीं पश्य ॥ ३४ ॥

गो० टी०–अद्येति । अर्थान्तरम् । हे सर्वसैन्य, मया सह समरमूर्धनि हते मम सति रामे रामनिमित्तम् द्रवन्तीम् भागच्छन्तीम् वाहिनीं पश्येति ॥ ३४ ॥

रा० टी०–अद्येति । मयि नीते रामस्य शिरो हृत्वा त्वं सुखी भव सीता तु दुःखिता भवतु ॥ ३५ ॥

गो० टी० अद्य रामस्येति । अर्थान्तरम् । मया सह रामस्य रणादेतोः आनीते इते शिरसम् । शिरः गल्लिरः । हृत्वा सुखी भव । सदासी सति रोदिष्यसीति भावः । सीता दुःखिता भवतु । सर्वलोकप्रसिद्धत्वादिति भावः ॥ ३५ ॥

रा० टी०–अद्येति । निहतबान्धवाः ये राक्षसास्ते मयाद्य नेत्रजं नाशयन्तु ॥ ३६ ॥

गो० टी०–अद्य रामस्य पश्यन्त्विति । अर्थान्तरम् । रामस्येति कर्मणि षष्ठी । रामकर्तृके मयिनिमम् ये निहतबान्धवाः ते राक्षसाः पश्यन्तु । न दृष्टे पश्यन्ति इति न्यायादिति भावः इत्यस्मिन्पक्षेऽपि मेव योजना ॥ ३६ ॥ ३७ ॥

रा० टी०–अद्येति । स्वबन्धुवधोचितानां स्वजनवधयोग्यानां राक्षसानां शत्रोर्युधि विनाशेन अश्रुप्रमार्जनं करोमि ॥ ३७ ॥

रा० टी०–अद्येति । समूर्धनि तोयदमिव रुधिरकणमित्यर्थः सुग्रीवं विकीर्णं पश्य ॥ ३८ ॥

गो० टी०–अद्येति । समूर्धनि तोयदमिति । रुधिरकणतया सामर्थ्यप्रकाशं मेघमिव स्थितमित्यर्थः ॥ ३८ ॥

३९] ति० टी०–दाशरथिं जिघांसुभिरस्माभिः परिसान्त्वितोऽपि कथं व्यथसे ॥ ३९ ॥

रा० टी०–कथमिति । दाशरथिं जिघांसुभिः मया राक्षसैश्च परिसान्त्वितत्वं कथं व्यथसे ॥ ३९ ॥

गो० टी०–कथमिति । सर्वैस्य दाशरथिं जिघांसुभिरेभिः राक्षसैः मया च परिसान्त्वितस्त्वं कथं रामेण व्यथसे इति योजना । अर्थान्तरम् । जिघांसुभिः हननेच्छामात्रादिः

---

१ निहतो गो. पाठः । २ सर्वावस्थं मया तवेति गो. सर्वावस्थासु ते मयेति रा. पाठः । ३ परितप्यते गो. पाठः । ४ परितप्ये गो. पाठः । ५ कारणादिति । ६ इत्यनेति गो. पाठः । ७ सर्वेति गो. पाठः । ८ रक्षित इति गो. पाठः । ९ वध्यत इति गो. पाठः । १० इत्येति गो. पाठः ।

राक्षसमस्मदीयैः । कर्णे परिरक्षितः । प्रत्युत वध्यस्व इति । अत्र विभीषणः क्व गत इति कुम्भकर्णस्य प्रश्नः मया विभीषणो गत इति रावणस्योत्तरं च कस्मिन् कोशे दृश्यते तन्मूलपरिशीलनम् ॥ ३९ ॥

४०–४५] ति० टी०–अथाहेत्यर्धेनास्तीत्याह—मामिति। मां निहत्य तदनन्तरं किल त्वां निहनिष्यति । तत्र ममैव हननं तेनाशक्यम्, अतस्त्वाह—नात्मनि स्वविषये संतापं रामनिधनं अयं गच्छेयम् ॥ ४०–४२ ॥

रा० टी०–ननु स्वजघन्यानिष्टयत्नेन कथमेवं ब्रूषे इत्यत आह—मामिति । राघवो मां निहत्य त्वां निहनिष्यति अहं तु आत्मनि स्वमरणनिमित्तं सन्तापं न गच्छेयम् ॥ ४० ॥

गो० टी०–अथेति । अत्र अथशब्दः प्रकमान्तरे । मयि हते मयि हि पश्चात्त्वां रामो हन्ति हनिष्यति । अहं च आत्मनि स्वस्मिन् संतापं शत्रुपरिभवजं न कदाचिदपि गच्छेयम् । न केनचिद्धन्तुं शक्य इत्यर्थः । अतः कुतस्ते भयमिति भावः । अथोत्तरम् । अहमात्मनि विषये संतापम् न गच्छेयं न गच्छामि । "व्यत्ययो बहुलम्" इति लकारव्यत्ययः । मयि-धनं नानुशोचामीत्यर्थः । किं तु मयि हते सति । अथ राघवस्त्वां हन्ति हनिष्यतीति संतापं गच्छामीति ॥ ४० ॥

रा० टी०–काममिति । हे परंतप युद्धाय मां कामं यथेच्छं व्यादिश आज्ञापय परोऽन्यो न प्रेक्षणीयः मत्साहाय्यार्थं नान्वेषणीयः ॥ ४१ ॥

गो० टी०–काममिति । इदानीमपि इदानीमेव युद्धाय व्यादिश । ते त्वया परः अन्यः न प्रेक्षणीयः ॥ ४१ ॥

रा० टी०–अहमिति । यदि शक्राद्यत्तमः स्यात्तर्हि तान् अहं योधयिष्यामि अतस्त्वय शत्रुक्षयादयिष्यामि । सार्द्धश्लोक एकान्वयी ॥ ४२ ॥ ४३ ॥

रा० टी०–गिरीति । शितं तीक्ष्णं शूलं धरति तस्य नर्दतो मे पुरंदरो विभीयात् ॥ ४४ ॥

गो० टी०–अहमित्यर्धमेकं वाक्यम् ॥ ४२ ॥

गो० टी०–उक्तं विशृणोति–यदीति ॥ ४३ ॥ ४४ ॥

रा० टी०–ननु रामादिभिरशस्त्राणि छिन्नदन्त इति नैस्सह कथं तव युद्धं भविष्यतीत्यत आह–अथवेति । रिपून् मृदतो विनाश्नतस्त्यक्तशस्त्रस्यापि मे जिजीविषुः कश्चित् प्रतिमुखस्तस्मुखः सन् स्थातुं न शक्तः ॥ ४५ ॥

गो० टी०–अथवेति । मृद्नतः प्रहरतः । प्रतिमुखे अग्रे ॥ ४५ ॥ ४६ ॥

रा० टी०–नेति । सोहं शक्त्यादिना न हनिष्यामि किन्तु सवज्रिणमपि रिपुं हस्ताभ्यामेव संरभ्य प्रहृत्य हनिष्यामि॥४६॥

४६–५०] ति० टी०–मे मुष्टिवेगं राघवो यदि सहिष्यति तदा राघवस्य बाणौघा मे रुधिरं पास्यन्ति । तत्सहनमेव तस्याशक्यमिति भावः ॥ ४६–५० ॥

रा० टी०–यदीति। स राघवः यदि मे मुष्टिवेगं सहिष्यति मुष्टिवेगेन न मरिष्यतीत्यर्थः तर्हि मे बाणौघाः राघवस्य रुधिरं पास्यन्ति एतेन स्वबाणानामभेद्यत्वं सूचितम् ॥ ४७ ॥

गो० टी०–यदीति । रामः प्रथमं मे मुष्टिप्रहारमेव न सहिष्यते कुतो मां प्रहरिष्यतीति भावः ॥ ४७ ॥

रा०टी०–चिन्तयेति। सोहं तव शत्रुविनाशाय निर्यातमुद्योतोस्मि अतो मयि तिष्ठति सति चिन्तया त्वं किमर्थं तप्यसे४८

गो० टी०–चिन्तयेति । उद्यतः अस्मीति शेषः ॥४८॥

रा० टी०–मुञ्चेति । यतोऽसाधारणं यशः तव तुभ्यं दातुमिच्छामि अतो राघवादीन् हनिष्यामि येन लङ्का प्रदीपिता तं हनुमन्तं हरींश्च भक्षयिष्यामि अतो रामाद्भयं मुञ्च। सार्द्धश्लोकद्वयमेकान्वयि ॥ ४९ ॥ ५० ॥

१ अथ पूर्वं हते तेन मयि त्वां हन्तीति गो. पाठः । २ प्रेषणीय इति गो. पाठः । ३ वज्रिणो गो. पाठः । ४ त्वेतिगो. पाठः । ५ पास्यन्ति रुधिरं [illegible] दिति गो. पाठः । ६ संरब्ध इति गो. पाठः । ७ अपीति गो. पाठः । ८ ते इति गो. पाठः । ९ स्थिति गो. पाठः । १० शेषमिति [illegible] ११ राक्षसनिष्यामीत्येति गो. पाठः । १२ लङ्का येनेति गो. पाठः । १३ चापि हनिष्यामीति गो. पाठः । १४ [illegible]

यदि चेन्द्राग्न्यं राजन्यदि चापि स्वयंभुवः । [ततोऽहं नाशयिष्यामि नैशं तम इवांशुमान्]
अपि देवाः शयिष्यन्ते मयि क्रुद्धे महीतले ॥ ॥ ५१ ॥
यमं च शमयिष्यामि भक्षयिष्यामि पावकम् । आदित्यं पातयिष्यामि सनक्षत्रं महीतले ॥ ५२ ॥
शतक्रतुं वधिष्यामि पास्यामि वरुणालयम् । पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम् ॥ ५३ ॥
दीर्घकालं प्रसुप्तस्य कुम्भकर्णस्य विक्रमम् । अद्य पश्यन्तु भूतानि भक्ष्यमाणानि सर्वशः ॥
नैं त्विदं त्रिदिवं सर्वमाहारो मम पूर्यते ॥ ॥ ५४ ॥
वधेन ते दाशरथेः क्षुधार्तः सुखं समाहर्तुमहं व्रजामि ।
निहत्य रामं सह लक्ष्मणेन खादामि सर्वान्हरियूथमुख्यान् ॥ ॥ ५५ ॥
रमस्व रौद्रान्विदह क्षयं वाहिनीं कुरुष्व क्रूराणि विनीय दुःखम् ।
मयाद्य रामे सगिते भक्षयन्त्यां निराश सीता वशगा भविष्यति ॥ ॥ ५६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ।

एवमुक्त्वन्तं कुम्भकर्णं महोदर आह स्म । [अकालज्ञोऽसि न तु बहुतरवेत्ति इति रावणेन प्रत्याह स्म प्रभो आदिशेः संहादी कुम्भकर्णो विनीतेन इति सम्बन्धः ततश्च चेद्राजन्यदि अपि अस्मासु सत्सु रामो भक्षित इति सदा श्रुतधीषय तच्छ्रुत्वानाथा सीता वशगेन भवेदिति] इत्यादिना ।

तदुक्तमतिकायस्य वदितो बहुभाषिणा । कुम्भकर्णस्य वचनं श्रुत्वोवाच महोदरः ॥ १ ॥

गो० टी०—सुरेन्द्रेत्यादिभार्गवो०[illegible] । रामाद् भयम् अस्तीति शेषः दुर्विदग्धत्वमुक्तम् । दातुं खण्डितुमित्यर्थान्तरम् ॥ ५१ ॥ ५२ ॥

५१–५२] ति० टी०—इन्द्राद्यित्यादि । यदि यदि वा यदि तवास्त्राधारणं यशो जयञ्च दातुमिच्छसि । तदुपायतोऽपि देवाः शयिष्यन्ति किं पुनर्मम इत्यर्थः ॥ ५१ ॥ ५२ ॥

रा० टी०—यदीति । यदीन्द्रात् स्वयंभुवो वा भयं तवापि नैशं तमोऽंशुमानिवाहं नाशयिष्यामि अतः एव मयि क्रुद्धे सति इवा अपि महीतले शयिष्यन्ति सार्द्धश्लोक एकान्वयः ॥ ५१ ॥ ५२ ॥

रा० टी०—यममिति । सनक्षत्रमादित्यं पातयिष्यामि ॥ ५२ ॥

गो० टी०—यदि चेत्यर्धम् । इन्द्रात् स्वयंभुवश्च भयं पश्यसि तदपि मोचयिष्यामीत्युपरकर्तव्यम् ॥ ५१ ॥ ५२ ॥

५३–५४] ति० टी०—वरुणालयं समुद्रम् ॥ ५३ ॥ ५४ ॥

रा० टी०—शतक्रतुमिति । वरुणालयं समुद्रं पास्यामि ॥ ५४ ॥

रा० टी०—दीर्घेति । भक्ष्यमाणानि भूतानि कुम्भकर्णस्य विक्रमं पश्यन्तु ॥ ५३ ॥

रा० टी०—विक्रममेवाह नेति । मम न पूर्यते उदरमिति शेषः अतः सर्वं त्रिदिवं ममाहार उदरपूरकं नैत्यर्थः अहं पृथक् वधेनेति । सुखावहं नित्यं सुखवन्तं त्वां ते रिपोर्दाशरथेर्वधेन

रक्षसामधिपानन्दमाहर्तुं प्रत्यपत्तिषुर्वे व्रजामि अत एव रामा दीन् विनीय यास्यामि ॥ ५६ ॥

गो० टी०—नन्विति । त्रिदिवं त्रिलोकी । आहारस्य पूर्यते आहाराय न पूर्यते न पर्याप्नोतीत्यर्थः ॥ ५५ ॥

५५–५६] ति० टी०—सुखावहम्[illegible]त्वम् ॥ ५५ ॥ ५६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे तत्त्वदीपिकाख्ये आदिकाव्ये युद्धकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०—रमस्वेति । मया तिमिरेण रक्षसेभ्यो काङ्क्षः । इमं क्षयमिति च्छेदः । रामे विषये गमिता इयं सीता विनय वशगा भविष्यतीत्यर्थान्तरम् ॥ ५७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषण[illegible]व्याख्याने युद्धकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

१] ति० टी०—अथाविचारकारी रावण इति यदुक्तम्

१ वेद्मि गो. पाठः । २ इदमर्धमधिकं रा. पाठे । ३ क्रुद्धे मयीति गो. पाठः । ४ नन्विति गो. पाठः । ५ आहारस्य नेति गो. पाठः [illegible]त्वमिति गो. पाठः । ७ कामयेति गो. पाठः । ८ चाप्येति । गो. पाठः । ९ विनीयतां उर इति गो. पाठः ।

कुम्भकर्ण कुले जातो धृष्टः प्राकृतदर्शनः । अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम् ॥ २ ॥
नहि राजा न जानीते कुम्भकर्ण नयानयौ । त्वं तु कैशोरकाद्धृष्टः केवलं वक्तुमिच्छसि ॥ ३ ॥
स्थानं वृद्धिं च हानिं च देशकालविधानवित् । आत्मनश्च परेषां च बुध्यते राक्षसर्षभः ॥ ४ ॥
यत्त्वशक्यं बलवता कर्तुं प्राकृतबुद्धिना । अनुपासितवृद्धेन कः कुर्यात्तादृशं नरः ॥ ५ ॥
यांस्तु धर्मार्थकामांस्त्वं त्रयीमपि पृथगाश्रयान् । अवबोद्धुं स्वभावेन नहि लक्षणमस्ति तान् ॥ ६ ॥

इत्य एव योत्स्यामीति च तदुभयं दूषयति महोदर इत्याह—तदिति । अतिकायस्य कुम्भकर्णस्य तेन प्रकारेणोक्तं वचनं श्रुत्वा महोदर उवाच ॥ १ ॥

रा०टी०- कुम्भकर्णवचनश्रवणानन्तरकालिकीं तं प्रति महोदरोक्तिमाह—तदित्यादिभिः । बाहुशालिः चलायमानबाहोः अतिकायस्य कुंभकर्णस्य वचनं श्रुत्वा महोदर उवाच ॥ १ ॥

गो० टी०- अथ मन्त्रिकृतलयमसहमानो महोदरः कुम्भकर्णं तिरस्करिष्यति—तदुक्तमित्यादिना । उक्तं वचनं विना कृत्यत्वेन दूषितम् । अतिकायस्य महाशरीरस्य । प्रतिषेधनानर्हत्वद्योतनाय विशेषणानि ॥ १ ॥

२] ति० टी०-कुले महाकुले जातोऽपि धृष्टोऽवलिप्तस्त्वं प्राकृतदर्शनः सन्सर्वकृत्यं कर्तव्यं वेदितुं न शक्नोषि ॥ २ ॥

रा० टी० तमाक्षेपमाह—कुंभकर्णेति । हे कुंभकर्ण कुले प्रख्यातवंशे जातः अत एव अवलिप्तः अतिगर्वः अत एव धृष्टः अत एव प्राकृतदर्शनः प्राकृतजन इव दृश्यमानस्त्वं सर्वत्र सर्वस्मिन् विषये वेदितुं ज्ञातुं न शक्नोषि ॥ २ ॥

गो० टी०-मन्त्रिभिः सहाविचार्यैव रावणेनाकार्यं कृतम् । अहमराजा एव रामादिभिर्योत्स्यामीति यदुक्तं कुम्भकर्णेन तदुभयं दूषयित्वाह—कुम्भकर्णेत्यादिना । कुले जातोऽपि प्राकृतदर्शनः क्षुद्रबुद्धिः । केवलं धृष्टः न तु शास्त्रज्ञ इत्यर्थः । अवलिप्तः गर्वितः । त्वं सर्वत्र कार्यं कृत्यं मन्त्ररूपम् तद्वेदितुं न शक्नोषि ॥ २ ॥

३] ति० टी०-न त्वेव नयानयाविति कुम्भकर्णोक्तं दूषयति—नहीति । राजा नयानयावुचितकृत्याकृत्ये न जानातीति न, किं तु जानात्येवेत्यर्थः । त्वं तु कैशोरकाद्बाल्याद्धृष्टः सन्नेवं वक्तुमिच्छसि । 'केवलं वक्तुमिच्छसि' इति पाठे ज्ञानवतया रामेण युद्धमिति शेषः ॥ ३ ॥

रा० टी०-तस्याज्ञानं प्रकटयितुमाह नहीत्यादिभिः । राजा रावणः नयानयौ न जानीत इति न हि जानात्येवेत्यर्थः । त्वं तु कैशोरकात् बाल्याद्धेतोः केवलं वक्तुमिच्छसि तत्त्वं न जानासीत्यर्थः । एतेन रावणो नयानयौ न जानातीति त्वदज्ञानं मूलमूलकल्पेति सूचितम् ॥ ३ ॥

गो० टी०-केवलं वीर्यदर्पेण नाहवन्यो विचारितः, न स तु नयानयावित्यादिना रावणोद्देशेन कुम्भकर्णोक्तं दूषयति—न हीत्यादिना । राजा नयानयौ न जानीत इति न जानीत एवेत्यर्थः । किशोरः बालः तस्य भावः कैशोरकं तस्माद् वा लयात् । केवलं धृष्टः न तु शास्त्रज्ञानेनेति भावः ॥ ३ ॥

४] ति० टी०-राजा तु सर्वं वेत्तीत्याह—स्थानमिति स्थाने वृद्धिक्षयरहितेन यथाप्राप्ते स्वरूपेऽवस्थानम् । आत्मनं वृद्धिं परेषां हानिं च राजा बुध्यते । किं च देशकालविधानविदेशकालयोरुचितकर्तव्यवित् ॥ ४ ॥

रा० टी०-रावणज्ञानमेवाह—स्थानमिति । देशकालविधानवित् यथोचितदेशकालकृत्यविज्ञाता राक्षसर्षभः आत्मन परेषां रिपूणां च स्थानमिह लोके स्थितिनियमं वृद्धिं च हानिं च बुध्यते ॥ ४ ॥

गो० टी०-स्थानमिति । देशकालविभागवित् विधिकादिमन्त्रोचिततद्विज्ञयोः देश्ययोः तथा मन्त्रोचितात्तद्विज्ञयोश्च कालयोर्विभागं वेत्तीति तथोक्तः । राक्षसर्षभः रावणः । आत्मनः शत्रूणां च वृद्धिं हानिं स्थानं समतां च बुध्यते । रावणो देशकालविभागायनभिज्ञ इति त्वयोक्तं न युक्तमिति भावः ॥४॥

५] ति० टी०-सर्वथा राजोऽविवेको नास्तीत्याह—यत्त्वशक्यमिति । अनुपासितवृद्धेन, अत एव प्राकृतबुद्धिना केवलं बलवता यत्तु कर्तुमशक्यं तादृशं को बुधो राजा कुर्यात्, न कोऽपि ॥ ५ ॥

रा० टी०—यदिति । न उपासितो वृद्धो महाजनो येन अत एव प्राकृतबुद्धिना बलवता केवलबलविशिष्टेनापि जनेन यत्कर्तुं न शक्यमनुचितमित्यर्थः तादृशं कर्म बुधो विज्ञाता कुर्यात् न कोपीत्यर्थः एतेन रावणकृतं समीचीनमेवेति सूचितं तेन प्रथमं वै महाराज कृतमेतदचिन्तितं केवलं वीर्यदर्पेण नाहवन्यो विचारितः इति च त्वदुक्तिरज्ञानमूलिकेवेति सूचितम् ॥ ५ ॥

गो० टी०-लोके कापुरुषेणापि यत् कर्तुमनर्हं तादृशं कर्म विवेकी रावणः कथं कुर्यादित्यभिप्रेत्याह—यत्त्विति । बलवता केवलवीर्यावलम्बिना प्राकृतबुद्धिना यत् कर्तुं शक्यं तादृशं कर्म बुधः कः कुर्यात् न कोपि कुर्यात् । किमुत रावण इति भावः ॥५॥

६] ति० टी०—एतावता 'प्रथमं वै महाराज कृतमेतदचिन्तितम् । केवलं वीर्यदर्पेण नाहवन्यो विचारितः' । इति कुम्भकर्णोक्तं दूषणं परिहृतम् । अथ त्रिषु चैतेषु युद्धेऽहमित्यादिना धर्मं एव सेव्यः, न तु काम इति यदुक्तं तत्राह—यांस्त्विति । यांश्च धर्मादीन्पृथगाश्रया धर्मादयः, तेषां

१ विनापि गो. पाठः । २ दूष इति गो. पाठः । ३ अनिति गो. पाठः । ४ तत्रात्त [illegible]

कर्म चैव हि सर्वेषां कारणानां प्रयोजनम् । श्रेयः पापीयसां चात्र फलं भवति कर्मणाम् ॥ ७ ॥
निःश्रेयसफलावेव धर्मार्थावितरावपि । अधर्मानर्थयोः प्राप्तं फलं च प्रात्ययायिकम् ॥ ८ ॥
ऐहलौकिकपारत्र्यं कर्म पुंभिर्निषेव्यते । कर्माण्यपि तु कर्तव्यानि लभते कामसास्थितः ॥ ९ ॥

हा नैकानुष्ठेया इति ब्रवीति, तान्धर्मादीन्स्वभावेन तत्त्वतोऽ- ते लक्षणं सामर्थ्यं नास्ति ॥ ६ ॥

ा० टी०—यानिति । यान् धर्मार्थकामान् पुरुषाश्रयान् परं विरुद्धत्वेनैकेनानुष्ठातुमयोग्यान् त्वं ब्रवीषि तान् दीन् स्वभावेन तत्त्वतोऽवबोद्धुं लक्षणं स्वसामर्थ्यं नास्ति त्विह चैतेषु यच्छ्रेष्ठमित्यादि तथा न कल्प्यमिति नेतम् ॥ ६ ॥

ो० टी०—धर्मार्थमयोर्हितार्हितसाधनत्वं निश्चित्य, शेष -पुपेतं त्वां फलं पापस्य कर्मण इत्यादिना मोक्षाख्यस्य ापान्तवायमनर्थः प्राप्त इति यदुक्तं कृष्णकर्णन तदपि र्मयोर्हितार्हितफलनियमाभावात्र संगच्छत इति प्रतिब- आह—यांस्त्वित्यादिना । पुरुषाश्रयान् पुरुषकाम्यान् फलान् धर्मार्थकामान् ब्रवीषि । तान् स्वभावे अनुष्ठे पतो ज्ञातुम लक्षणं लक्ष्यतेऽनेनेति लक्षणं प्रमाणम् नास्तीत्यर्थः । सुखफलदयागादिधर्मानुष्ठानस्यापि तत्क- -कशरीरायासजनितदुःखदर्शनात् दुःखजनकपरद्रव्यहरणा- धर्माचरणसमये तात्कालिकदुःखदर्शनाच्च । अर्थकामयोरप्येवं र्शनाच्च । कर्मणामनियतफलकत्वान्नियतफलकत्वे न विधि- माणस्योपलभ्यत इत्यर्थः ॥ ६ ॥

७] ति० टी०—कुत इत्थं सर्वस्याप्येककर्तृकत्वादेवमेवं -र्म चैवेति । सर्वेषां कारणानां सुखसाधनानां विचित्रलक्षणानां मैव प्रयोजनं प्रयोजकमुत्पादकम् , नह्यक्रियस्य कस्यचित्पुरुषार्थो र्मादिः । एवमेकपुरुषप्रयत्नसाध्यानां श्रेयःपापीयसां फलानां भाक्षुष्यव्यापाराणां फलमेकमिमेव कर्तरि भवति । एवं च रूढयोरपि धर्मकामयोरेकानुष्ठेयत्वदर्शनाद्धर्मं सर्वानुष्ठेयः, न तद्विरुद्धः काम इति त्वदुक्तमयुक्तमिति भावः ॥ ७ ॥

ा० टी०—कर्मेति । कारणानां सुखदुःखभोगसाधकानां ःपापीयसां कल्याणाकल्याणानां सर्वेषां कर्मणां प्रयोजनं ोजकमुत्पादकमित्यर्थः फलं च कर्मैव पूर्वोपार्जितकर्मजनि- स्कारवशादुत्तरकर्मनिष्पत्तिः तज्जनितसंस्कारवशात् फल- ष्पत्तिरित्यर्थः एतेन पूर्वजनितसंस्कारायत्तकर्मप्रवृत्तेर्दुर्निवा- न त्वत्कर्तृकनिवारणं निष्फलमिति सूचितम् ॥ ७ ॥

ो० टी०—तदेव प्रदर्शयति—कर्म चेत्यादिना । सर्वेषां णानां स्वर्गनरकरूपाणां फलानां कर्मैव प्रयोजकं साध- । आप्येकवचनम् । किं तु अत्र कर्मजाते पापीयसामपि ां श्रेयः फलं भवति ॥ ७ ॥

८] ति० टी०—तत्र पुरुषयत्नसाध्येष्वपि धर्मार्थयोः ानिश्रेयसफलत्वेऽप्यस्तीत्याह—निःश्रेयसेति । धर्मार्थौ निः- श्रेयसफलत्वेन सन्तौ कामनाविशेषेणेतरावपि स्वर्गाभ्युदयफ- लावपि भवतः । अत्र धर्मशब्देनार्थनिरपेक्षो जपध्यानादिः । अर्थशब्देन चार्थसाध्यो यागदानादिः । ' यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ' इति भगवद्वचनात् । तेषां चित्तशुद्धि- द्वारा मोक्षसाधनत्वमस्ति । कामस्तु न कदापि निःश्रेयसफलं इति भावः । तयोरप्यपि कामाद्विशेषमाह—अधर्मानर्थ- योरिति । जपादिरूपे क्रियामये वा निषेधमये लुप्ते सत्यध- र्मार्थौ प्राप्तौ भवतः, तयोश्च सतोः प्रात्ययायिकं विहिताक- रणप्रयुक्तप्रत्यवायजन्यं फलं पुंसः प्राप्तं भवति । न तु काम्या- करणे प्रत्यवाय इति भावः ॥ ८ ॥

रा० टी०—निःश्रेयसेति । निःश्रेयसं मोक्षः फलं ययोः तावपि धर्मार्थौ इतरौ स्वर्गैहिकाद्यादिफलावपि भवतः इति शेषः तयोः फलान्तरमाह अधर्मानर्थयोः प्राप्तं प्राप्तिर्भवेत् च प्रात्ययिकं प्रात्ययायिनामपराधिनां के पुंसां यस्मात्फल- मपि भवति प्रत्यवायस्यापि अधर्मजन्यो विहितेरिति ज्ञेयम् ॥ ८ ॥

शो० टी०—क्रमेणार्थं विशदयति—निःश्रेयसेति । ध- र्मार्थौ धर्मार्थसाध्यत्वे कर्मणी इतरौ अधर्मानर्थसाधनभूते कर्मणी च निःश्रेयसफलौ एतानि चतुर्विधानि निःश्रेयसक- रणान्येव किं तु कदाचित्यधर्मानर्थयोः प्रात्ययायिकं अर्थेन इति ज्ञेयम् । प्रत्ययायोऽस्मिन् कामणत्ययस्तीति प्रत्ययायिक- म् । " अत इनिठनौ " इति ठन् । प्राप्यत इति प्राप्तिः क- रणे कर्मणि क्तिन्प्रत्ययः । एतेनाधर्मानर्थयोः श्रेयस्तदितर- योर्न फलं भवतीत्युक्तम् ॥ ८ ॥

९] ति० टी०—कीदृशं तत्फलं तत्राह—ऐहलौकिकेति । इह लोके परत्र च भवं कर्म कर्मफलम् । इह क्षुदादरिद्र्यादि- रूपम् , परत्र नरकयातनादिरूपं निषेव्यतेऽनुभूयते । एवं धर्म- फलमपि । अथ कामस्य धर्मार्थाभ्यां वैलक्षण्यमाह—कर्मा- णीति । कामं तत्पुरुषार्थसिद्धिरुद्दिश्य कर्म । ' यत्नेनास्थितो- ऽपि तिष्ठत्यपि कल्पानि शतानि तु विशिष्यात्रापि साक्षाद्भवति न तु धर्मार्थयत्नकालान्तरे लोकान्तरे वा । एवं च धर्मार्थकामा- श्चैकैनैव सेव्याः । धर्मविरुद्धो यदि कामस्तदा स स्वतएवोत्सृ- ष्टादिना समर्थ्यः । नहि ' भिक्षुकाः सन्तीति स्थाल्यो नाधि- श्रियन्ते ' इति न्यायादिति भावः ॥ ९ ॥

रा० टी०—नन्वत्र कर्मकर्तुः कर्मणो चैतैव विनष्टत्वात् पूर्व- कर्मजनितसंस्कारायत्तकर्मप्रवृत्तिर्दुर्निवारेति त्वदुक्तिर्व्याहता- अत एव स्वर्गः कर्तृक्रियाकर्मविनाशेऽपि च यज्ञनाम्न तडागाग्निहोत्राणां फलं स्याद्बुरिभुरुहाम् शतानामपि जन्तूनां

तत्र क्रूरमिदं राज्ञा हृदि कार्यं मतं च नः। शत्रौ हि साहसं येत्तत्किमिवात्रापनीयते ॥ १० ॥
एकस्यैवाभियाने तु हेतुर्यः प्राहृतस्त्वया। तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च ॥ ११ ॥

ण्डश्चेदृमिकारकः निर्वाणस्य च दीपस्य स्नेहः संवर्द्धयेच्छश्वामित्यायुक्तमित्याशङ्क्य निवर्त्तयितुमाह नेहेति। कामं कल्पमास्थितश्शिष्टजनः कल्पानि फलोत्पादकदृष्टसंस्कारोदयने समर्थानि कर्माणि लभते करोतीत्यर्थः अत एव हलौकिकपारलयमुभयलोकजन्यं कर्म क्रियाफलं पुंभिरात्मनैर्निषेव्यते भुज्यते एतेनाप्राचरणप्रामाण्येनात्मनां ध्वंसातियोगित्वं कर्मणां चावश्यं फलदातृत्वं सूचितम् अत एव दानां नाप्रामाण्यम् उक्तश्लोकौ तु वेदविरुद्धत्वेन भ्रांतिमूलत्वेति न दोषः ॥ ९ ॥

गो० टी०—एवं धर्मार्थयोरुभयावस्थितफलत्वमुक्त्वा कामस्यापि तदाह—ऐहलौकिकेति। ऐहलौकिकं इहलोकोपयोगि पारलौकं परलोकोपयोगि च कर्म पुंभिर्निषेव्यते तत्फलं चानुभूयते तथैव काममास्थितः यथेच्छाचारोऽपि कल्पानि शुभानि कर्माणि कल्याणानि कर्मफलानि लभते अतो विहितमेव शुभप्रदम्, निषिद्धं तु तथा न भवतीति नियमो नास्तीत्यर्थः ॥ ९ ॥

१०] ति० टी०—इदानीमनभिज्ञाय शास्त्रार्थमित्यादिना दुर्मन्त्रिसंबन्धस्त्याज्य इत्युक्तं तत्परिहरति—तत्रेति। तत्र त्रयाणामेकानुष्ठेयत्वे सिद्धे सति राज्ञामिदं कामपुरुषार्थसाधनं कार्यं कर्तुं योग्यम। तथा हृदि क्रूरं निश्चितं च नोऽस्माकं मन्त्रिणां मतमनुमतं च। बलवद्विषये न्याय्यत्वस्योक्तत्वात्, अतो राज्ञि नास्माकं च किंचिदचातुर्यम। अथ साहसप्रवृत्तिरूपं प्रागुक्तदोषमुद्धरति—शत्रौ हीति। शत्रौ हि प्रसिद्धं साहसं बलवतो बलात्प्रवृत्तिरूपम्। अत्रैतदनुष्ठाने किमिवापनीयते कोऽपनयः, न कोऽपि। उचितमेव कृतमित्यर्थः। यत्तु तीर्थोक्तम, धर्मार्थयोर्हिताहितसाधनत्वं निश्चित्य परदाराहरणरूपाधर्माद्राजो दुःखमित्युक्तं तदधर्मार्थयोर्हिताहितफलनियमाभावादसंगतमित्याह—यांस्तु धर्मार्थेति। पृथगाश्रयान्पृथक्फलाश्रयकान्त्वमसि तान्स्वभावेनावबोद्धुं स्वरूपतो ज्ञातुं लक्ष्यतेऽनेनेति लक्षणं कारणं च नास्ति। सुखफलकयागादिधर्मानुष्ठानेऽपि तात्कालिकारीरियासदर्शनात्, दुःखजनकपरदारगमनादावपि तात्कालिकसुखदर्शनाच्चेति भावः। तदेव प्रदर्शयति—धर्मे चेति। सर्वेषां कारणानाम्। सुखानामित्यर्थः। कर्म कर्ममात्रं प्रयोजनं प्रयोजकम्। साधकमित्यर्थः। अत्रास्मिन्पुण्यकर्मणि फलं भवति। अश्रेयोऽपीति शेषः। पापीयसां कर्मणां श्रेयः सुखं च फलं भवति। एतदेव विशदयति—निःश्रेयसेति। धर्मार्थौ तत्साधनीभूते कर्मणी, इतरावधर्मार्थौ तत्साधनभूते कर्मणीति यावत् निःश्रेयसफलावेव चतुर्विधकर्माण्यपि श्रेयस्करायैवेत्यर्थः। किं तु कदाचिदधर्मानर्थयोः प्राप्त्यधिकं प्रत्यवायाकारणकं दुःखं फलं सुखं च। प्राप्यत इति प्राप्तिः कर्मणि क्तिन् प्राप्यं भवतीत्यर्थः। एतेनाधर्मानर्थयोः सुखदुःखोभयफलत्वमुक्तम् धर्मार्थयोरुभयावस्थितफलमुक्त्वा कामस्याप्याह—ऐहलौकिकेति। इहलोकपरलोकयोगि कर्म धर्मार्थरूपं निषेव्यते तत्फलं चानुभूयते। काममास्थितोऽपि यथेच्छाचारोऽपि कल्पानि शुभानि कर्माणि कर्मफलानि लभते एवं च विहितमेव शुभदं निषिद्धमशुभमिति नियमो नेति भावः। एतत्पक्षानुसारेणैव सीताहरणेन कृतमस्माभिश्चानुमतमित्याह—तत्रेति। तथा च इदं कार्यं सीताहरणरूपं राज्ञा हृदि निश्चितमस्माभिरनुमतं किं च शत्रुविषये रावणेन यत्साहसं कृतं तत्किमिव नापनीयत इत्यर्थः। अत्र साहसविषयेऽपनीयतां पृथक्कृत्य प्रदर्श्य अत्र पक्षे रावणेनाविचार्य कृतं किमपि दर्शयितुं न शक्त्यर्थ इति पञ्चश्लोकीव्याख्यानम्, तत्र। धर्मादुःखस्याधमात्सुखस्य सर्वासंमतत्वात्। यदुक्तं यागादौ नान्तरीयकं दुःखमिति, तत्र तस्य धर्मस्य फलम्, किं तु प्राकृतकर्मान्तरमेवमधर्मविषयेऽपि अनया रीत्या सर्वं पलालप्रायतया दूषयति—मतिमद्भिरित्यलम् ॥ १० ॥

रा० टी०—तत्रेति। राज्ञा हृदि क्रूरं निश्चितम् तत्र तस्मिन् समये एव नोऽस्माकं मतं सम्मतिविषयीभूतमत एव कार्यं कर्तव्यम् यदिदं शत्रौ साहसं तत् अत्र अस्मिन्समये किमपनीयते अपनीतमिदं त्वया कथमुच्यते इत्यर्थः एतेन नानभिज्ञाय शास्त्रार्थमित्यादि त्वयोक्तमज्ञानमूलकमिति सूचितम इव एवार्थे ॥ १० ॥

गो० टी०—धर्मादीनां फलनियमो नास्ति, सर्वं सर्वस्य फलमित्यस्मिन् पक्षे स्थित्वा रावणेन सीताहरणं कृतमस्माभिश्चानुमतमित्याह—तत्र क्रूरमिति। तत्र राज्ञा काममेव्यपि सुखानि लभत इति मते स्थितेन राज्ञा इदं कार्यं सीताहरणरूपं कार्यम् हृदि क्रूरं हृदि चिन्तितम्। नः अस्माकमपि मतं संमतम्। शत्रौ शत्रुविषये यत् साहसं स्यात् तत् अस्मिन् साहसकर्मणि किमिवापनीयते न किंचित् किमित्यर्थः ॥ १० ॥

११] ति० टी०—अथेदानीमेव मां राजन्यादिश, अहमुत्साहयिष्यामीत्यादिनाऽसहायतया यो रिपुसंहारत्वाद उक्तं दूषयति—एकस्यैवेति। एकस्यासहायस्यैवाभियाने यो हेतुः स्वबलबलप्रत्ययः प्राहृत उक्तस्त्वयापि यदनुपपन्नमनुपपत्तिरहितं अतएवासाधु वचोऽस्ति तत्ते वक्ष्यामि ॥ ११ ॥

रा० टी०—एकस्येति। एकस्य स्वस्यैव अभियाने गमने यो हेतुः स्वबलबलप्रत्ययः त्वया प्राहृतः उक्तः, तत्रोक्तौ च

१ तस्यादिति यो. पाठः। २ तमिति गो. पाठः। ३ प्रकृत इति गो. पाठः।

यत्र पूर्वं जनस्थाने वसतोऽतिबलास्तदा । राक्षसा राघवं ध्वस्ताः कथमेको जयिष्यसि ॥ ९ ॥
ये पूर्वं निर्जितास्तेन जनस्थाने महौजसः । राक्षसांस्तान्पुरे सर्वान्भीतानद्य न पश्यसि ॥ १० ॥
तं सिंहमिव संक्रुद्धं रामं दशरथात्मजम् । सर्पं सुप्तमिवो बुद्धा प्रबोधयितुमिच्छसि ॥ १४ ॥
ज्वलन्तं तेजसा नित्यं क्रोधेन च दुरासदम् । कस्तं मृत्युमिवासह्यमासादयितुमर्हति ॥ १५ ॥
संशयस्थमिदं सर्वं शत्रोः प्रतिसमासने । एकस्य गमनं तत्र नहि मे रोचते भृशम् ॥ १६ ॥
हीनार्थस्तु समृद्धार्थं को रिपुं मानुषं यथा । निश्चितं जीवितत्यागे वशमानेतुमिच्छति ॥ १७ ॥
यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम । कथमाशंससे योद्धुं तुरयेनेन्द्रविवस्वतोः ॥ १८ ॥
एवमुक्त्वा तु संरब्धं कुम्भकर्णं महोदरः । उवाच रक्षसां मध्ये रावणं लोकरावणम् ॥ १९ ॥

पश्यमद्यैव निर्मित एष युद्धे असून् सर्वान्तारयिष्यं अथ ते वक्ष्यामि ॥ ११ ॥

गो०टी०-एवं रावणवाक्यविभूषणार्थं कुम्भकर्णं प्रतिक्षिप्य कुम्भकर्णस्यैवाभिप्रायप्रकाशनार्थं निरूपयति-न हि रक्षसामहिते । एकस्यासहायस्य । अभियाते युद्धाय निर्गते सति तव पराक्रमक्रमः त्वया प्रकृतः प्रस्तावितः तवापीत्यर्थः । तत्पूर्वं निराकृतः पश्चात् समुचीयते । सदृशप्रतिपक्षस्य । असह्यं अहितं च तद्वक्ष्यामि ॥ ११ ॥

१२] ति० टी०-अनुपपत्तिमेवाह-येनेति । तत्तिष्ठतात्तावत् रावणमित्यन्वयः ॥ १२ ॥

रा० टी०-तत्राकाममाह-येनेत्यादिभिः । एव एवेत्यः । ह्यवो रक्षसाः जनस्थाने पूर्वं इतः त्वं राघवमेकसहायं हि-स्त्वं कथं जयिष्यसि जेष्यसि ॥ १२ ॥

गो० टी०-अनुपपत्तिमुपपादयति-येनेति ॥ १२ ॥

१३] ति० टी०-जनस्थाने तेन ये निर्जिता विद्रावितास्तानपि भीतानद्य पुरे वियमाणान्राक्षसान् न पश्यसि किं ॥ १३ ॥

रा० टी०-ये इदानीं । ये राक्षसाः तेन रामेण पूर्वं निर्जिताः सान् पुरे लंकायां वियमानान् राक्षसान् अद्य न पश्यसि ॥ १३ ॥

गो० टी०-असाधुत्वं दर्शयति-ये पुरेति । तान् रक्षोयोनित्यर्थः ॥ १३ ॥

१४-१५] ति० टी०-सिंहमिव सुप्तं सर्पमिव च दुरासदं बोधयितुमिच्छसि अहो ते मौर्ख्यमिति भावः ॥ १४-१५ ॥

रा० टी०-तमिति । संक्रुद्धं सिंहमिव संक्रुद्धसिंहसदृशम् न-मुष्यु अडङ्गा सुप्तं सर्पमिव प्रबोधयितुमिच्छसीत्यन्वयः ॥ १४ ॥

गो० टी०-तमिति । संक्रुद्धं सिंहमिव संक्रुद्धसिंहसदृशम् न-मुष्यु अडङ्गा सुप्तं सर्पमिव प्रबोधयितुमिच्छसीत्यन्वयः ॥ १४ ॥

रा० टी०-ज्वलन्तमिति । असह्यं मृत्युमिवैकं क्रोधेन दुरा-सदं ते रक्षसमासादयितुं कोहति अर्थोपीत्यर्थः ॥ १५ ॥

गो० टी०-ज्वलन्तमिति । असह्यं सोढुमशक्यम् । अ-दुरासदं पराक्रमेणेत्यर्थः । आसादयितुमासादितुम् ॥ १५ ॥

१६] ति० टी०-इदं सर्वं कर्म शत्रोः प्रतिसमासने प्रति मुख्यावस्थाने संशयस्थं भयनिमित्तकसंशयविषयम् अतः एकस्य गम तत्र मे रोचत इत्यन्वयः ॥ १६ ॥

रा० टी०-संशयस्थमिति । अत्रोः प्रतिसमासने स मुख्यैकसंस्थाने अति सर्वमिदं तेन्यं संशयस्थं विजयविषये संशयविशिष्टमत एव एकस्य गमनं युक्तमस्यर्थः तत्र न रोचते ॥

गो० टी०-संशयस्थमिति । यत्र शत्रोः प्रतिसमासने प्रतिसमासन्नितौ इदं सर्वं सैन्यं संशयस्थं भवति तत्र एकस्य तत्र गमनं न रोचते ॥ १६ ॥

१७-१९] ति० टी०-हीनार्थो दीनबलोपहायः सन् स पुमान्समृद्धार्थं समृद्धगां जीवितत्यागे निश्चितं स्वप्राणं तृणी-कृत्य कथमुत्संहारादिद्योगेन रिपुं प्राकृतं यथा प्राकृतमित्योक्ति लेपव्यतिरेकेण वशमानेतुमिच्छति ॥ १७-१९ ॥

रा० टी०-हीनार्थ इति । दीनार्थः सैन्यबलोपहायः सन् स पुमान् पूर्णार्थं पूर्णसैन्यं जीवितत्यागे निश्चितं निश्चयवन्तं प्राकृतं प्राकृतमिवेत्युक्तिः जीवितत्यागे निश्चयोऽस्ति चेत्तं प्रति युद्धाय वाहीत्यर्थः ॥ १७ ॥

गो० टी०-यस्येति । मनुष्येषु यस्य सदृशो नास्ति न इन्द्रविवस्वतोस्तुल्येन तेजसा योद्धुं कथमाशंससे ॥ १८ ॥

रा० टी०-एवमिति । महोदरः संरब्धं कुम्भकर्णमेवमुक्त्वा रावणमुवाच ॥ १९ ॥

गो० टी०-यस्येति । यस्य मनुष्येषु सदृशो नास्ति किं तु देवयोः इन्द्रविवस्वतोः इत्यनुषंगेण तेन रामेण शेषः । योद्धुं कथमाशंससे । युद्धमेव न शक्यं किमुत जेतुमिति शेषः ॥ १८ ॥ १९ ॥

---

१ मिति गो. पाठः । २ क्षमिति गो. पाठः । ३ पुरेति गो. पाठः । ४ भरीति गो. पाठः । ५ मिवाबुध्येति गो. पाठः ।

कल्पया पुरुषादैर्हीं किमर्थं त्वं विलम्बसे । यदीच्छसि तदा सीता मरणं ते भविष्यति ॥२०॥
दुष्टः कथिदुपायो ते सीतोत्पत्त्यानकारकः । रुचितश्चेत्त्वया वृद्धया राक्षसेन्द्र ततः शृणु ॥२१॥
आर्द्रं हिरण्मयं कृत्वा कृष्णवर्णं विसर्जनम् । पश्च रामवधायेति निर्यान्तीत्यवबोधय ॥ २२ ॥
ततो गत्वा वनं युद्धं कृत्वास्माकमस्य वेगतः । जेष्यामो यदि ते शत्रूंस्तापसैः कोपमस्ति नः २३
अथ जीवति नः शत्रुर्हते च क्षतजेक्षणाः । ततः संप्रेषयन्त्यामो मनसा यत्समीक्षितम् ॥२४॥
त्वं तु युद्धाभिकाङ्क्षी सन्विश्रब्धं स्थापितः । विदार्य स्वतनुं बाणैः रामनामाङ्कितैः शरैः ॥२५॥
मतिर्वो राघवोऽस्माभिर्मोक्षितेति वादिनः । तैतः पादौ ग्रहीष्यामस्त्वं नः कामं प्रपूरय ॥२६॥
इत्युक्त्वोपस्थ पुरः रावणस्यैव पापिनः । हतो रामः सह भ्राता ससैन्य इति सर्वतः ॥२७॥

२०] ति० टी०-पुरुषादैः...किमर्थं त्वं विलम्बसे यदीच्छसि तदा सीता मरणं ते भविष्यति इति योजना ॥ २० ॥

२१] ति० टी०-दुष्टः...दुष्ट इति । सीतोत्पत्त्यानकारकः सीतोत्पत्तिनिवारकः । रुचितश्चेत्त्वया रुचितः रोचमानश्चेत्त्वया ॥ २१ ॥

२२] ति० टी०-आर्द्रं...इति । यद्यपि निर्यान्तीत्यत्र न ॥ २२ ॥

२३] ति० टी०-ततो...यदि ते शत्रूंस्तापसैः कोपमस्ति नः यदि ते शत्रून् तापसैः नः कोपमस्ति तदा वयं रामवधाय निर्यान्तीत्यवबोधय वर्त्मनि परिपूरय ॥ २३ ॥

२४] ति० टी०-अथ...ततः संप्रेषयन्त्यामो मनसा यत्समीक्षितम् अथ जीवति नः शत्रुर्हते च क्षतजेक्षणाः ततः पश्चात् वयं च यदि जीवतः नः मनसा यत्समीक्षितं तत्समभिप्रेषयन्त्यामः प्राप्स्यामः ॥ २४ ॥

२५] ति० टी०-त्वं...विदार्य स्वतनुं बाणैः रामनामाङ्कितैः शरैः त्वं तु युद्धाभिकाङ्क्षी सन्विश्रब्धं स्थापितः युद्धाभिकाङ्क्षी युद्धाभिलाषी सन् विश्रब्धं स्थापितः स्वतनुं बाणैः रामनामाङ्कितैः शरैः विदार्य ॥ २५ ॥

२६] ति० टी०-मतिर्वो...इति । मतिर्वो राघवोऽस्माभिर्मोक्षितेति वादिनः वो युष्माकं मतिः राघवोऽस्माभिर्मोक्षितेति वादिनः ॥ २६ ॥

२७] ति० टी०-इत्युक्त्वा...इति । इत्युक्त्वोपस्थ पुरः रावणस्यैव पापिनः इत्युक्त्वा पापिनः रावणस्य पुरः उपस्थ उपस्थाय ॥ २७ ॥

गो० टी०-पुरुषादैः...किमर्थं त्वं विलम्बसे । संप्रेषयन्त्यामो मनसा यत्समीक्षितम् इत्यत्र न्यायं वक्ष्यति । तत्र...स्वतनुं बाणैः विदार्य स्वतनुं बाणैः विदार्य ॥ २० ॥

२१] गो० टी०-दुष्टः...इति । सीतोत्पत्त्यानकारकः सीतोत्पत्तिनिवारकः ॥ २१ ॥

२२] गो० टी०-आर्द्रं...इति । यद्यपि निर्यान्तीत्यत्र न ॥ २२ ॥

२३] गो० टी०-ततो...यदि ते शत्रूंस्तापसैः कोपमस्ति नः यदि ते शत्रून् तापसैः नः कोपमस्ति तदा वयं रामवधाय निर्यान्तीत्यवबोधय वर्त्मनि परिपूरय ॥ २३ ॥

२४] गो० टी०-अथ...ततः संप्रेषयन्त्यामो मनसा यत्समीक्षितम् अथ जीवति नः शत्रुर्हते च क्षतजेक्षणाः ततः पश्चात् वयं च यदि जीवतः नः मनसा यत्समीक्षितं तत्समभिप्रेषयन्त्यामः प्राप्स्यामः ॥ २४ ॥

२५] गो० टी०-त्वं...विदार्य स्वतनुं बाणैः रामनामाङ्कितैः शरैः त्वं तु युद्धाभिकाङ्क्षी सन्विश्रब्धं स्थापितः युद्धाभिकाङ्क्षी युद्धाभिलाषी सन् विश्रब्धं स्थापितः स्वतनुं बाणैः रामनामाङ्कितैः शरैः विदार्य ॥ २५ ॥

२६] गो० टी०-मतिर्वो...इति । मतिर्वो राघवोऽस्माभिर्मोक्षितेति वादिनः वो युष्माकं मतिः राघवोऽस्माभिर्मोक्षितेति वादिनः ॥ २६ ॥

२७] गो० टी०-इत्युक्त्वा...इति । इत्युक्त्वोपस्थ पुरः रावणस्यैव पापिनः इत्युक्त्वा पापिनः रावणस्य पुरः उपस्थ उपस्थाय ॥ २७ ॥

...भोगांश्च परिवारांश्च कामान्वेषु च राघव ॥ २८ ॥
...वासांसि वीराणामनुलेपनम् ।
...देयं च बहु गोभ्यश्च स्वयं च मुदितः पिब ॥ २९ ॥
...कौलीने चर्चितो गते । भक्षितः सहसा रामो राक्षसैरिति विश्रुते ॥ ३० ॥
...प्रविश्याग्न्यागारे च वसारेति ... ॥ ३१ ॥
...राजन्भूयः शोकाभिवर्धया ।
...हि प्रतीहि विनष्टमिति तत्त्वतः ॥ ३२ ॥
...सुखसंवृद्धा सुखार्हा दुःखकर्षिता ।
...॥ ३३ ॥
...॥ ३४ ॥

एतत्तु नीतिं मम दर्शनेन यथा हि दृष्ट्वा प्रवदन्ति सन्तः ।
इष्टेन ते ऐक्ष्यति मोक्षको मुखेन सम्पूर्णशशाङ्कशुभ्रेण ॥ ३५ ॥

...वीक्षितः । [...] वीरं पार्थिवविक्रमं देहीत्यर्थः ॥ २८ ॥

रा० टी०—तत इति । राजकर्मणा ... इति सर्वतस्त्वेव अवबोधय ॥ २७ ॥

गो० टी०—तत इति । ... पुत्रेण ॥ २७ ॥

२९] ति० टी०—प्रीतो नाम । ... इत्यर्थः । परिणामदालीत्वात् ॥ २९ ॥

रा० टी०—प्रीत इति । ... एव ॥ २९ ॥

गो० टी०—प्रीत इति । ... ॥ २९ ॥

३०] ति० टी०—कौलीने ... विश्रुते लोकमुखः सीतयेति सर्वः ॥ ३० ॥

३१] ति० टी०—आगते ... इति । सर्वतः को बहुभूमौ ... ते । एव बहुलीभूते राक्षसैर्विभूते वि ... रामो भक्षित ... ते सीतया ज्ञाते सति सीतां सान्त्वयन्सीत ... प्रविश्याग्न्यागारे च वसारेति भगवन्त लोकपरि ... ॥ ३० ॥ ३१ ॥

रा० टी०—तत इत्यादिश्लोकद्वयम् । कौलीने लोकवाद । कौलीने लोकवाद इत्यमरः । कौलीनमेव निन्दति—तत इति । प्रविश्य । समीपं गत्वेत्यर्थः आश्वास्य रा ... सीतेति शेषः । सान्त्वना मयि प्रीतिं करित्येव सा ... ॥ ३० ॥ ३१ ॥

३२] ति० टी०—तत्त्वतो ... भगवतो ... यतो ... ॥ ३२ ॥

रा० टी०—अनयेति । ... ॥ ३२ ॥

३३] ति० टी०—अनयेति । ... ॥ ३३ ॥

३४] ति० टी०—[illegible] ॥ ३४ ॥

रा० टी०—[illegible] ॥ ३४ ॥

३५] ति० टी०—[illegible] ॥ ३५ ॥

रा० टी०—[illegible] ॥ ३५ ॥

गो० टी०—[illegible] ॥ ३५ ॥

३६] ति० टी०—[illegible] ॥ ३६ ॥

रा० टी०—एतदिति । रामं दृष्ट्वा ... ॥ ३६ ॥

---

१ मोक्षितो गो. पाठः । २ मेवमिति गो. पाठः । ३ भाषन्ते गो. पाठः । ४ सर्वे गो. पाठः । ५ रक्षोगणैरिति गो. पाठः । ६ दृष्टेन गो.

अनष्टसैन्यो ह्यनुरक्तसंवृतो रिपुं त्वयुद्धेन वशे करिष्यति ।
यशश्च पुण्यं च महान्महीपतिः श्रियं च कीर्तिं च चिरं समश्नुते ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

चतुःषष्टितमः सर्गः ।

इति भाषमाणं महोदरं निर्भर्त्स्य सार्धं तु न प्रस्थास्यामि कर्म दर्शयामि रणे भवादृशैः प्रियवादिभिः राजशेषा इत्या महाकाय इति वदन् कुम्भकर्णः महोदरं स्थापितो भ्रात्रा यूथीतसर्वाङ्गाभरणश्च बहुनिशाचरानुगतः शिलमुद्गरपाणिरेव पञ्चानेव विनिर्ययौ । ततस्तदा तेष्वहितेषु प्रनिमित्तशतान्यघोरुत्पन्नानि चित्यैवमादयो नैकविधा दुरुत्पाताः समभवन् ॥ १ ॥

स तथोक्तस्तु निर्भर्त्स्य कुम्भकर्णो महोदरम् । अब्रवीद्राक्षसश्रेष्ठं भ्रातरं रावणं तदा ॥ १ ॥
सोऽहं तव भयं घोरं वधाच्चास्य दुरात्मनः । रामस्याद्य प्रमार्जामि निर्वैरो हि सुखी भव ॥ २ ॥
गर्जन्ति न वृथा शूरा निर्जला इव तोयदाः । पश्य संपद्यमानं तु गर्जितं युधि कर्मणा ॥ ३ ॥
न मर्षयन्ति चात्मानं संभावयितुमात्मना । अदर्शयित्वा शूरास्तु कर्म कुर्वन्ति दुष्करम् ॥ ४ ॥

अतः उरसुकः युद्धे रामदर्शनविषयकोत्कण्ठोच्छ्वासवान् एवं मा मृः अयुद्धेन इदानीमेव महान् ते धनस्य लाभः इहैव सेत्स्यति एष दुर्बलेन युद्धा एतद्धनलाभं निमित्तम् ॥ ३६ ॥

गो० टी०—उक्तमर्थं निगमयति—एतदिति । एतत् मम दुर्बलेन युद्धा यशोजितं निर्वीर्यत्वेन रामं दृष्ट्वा स्थितस्य तव अनयो भवेत् मोत्सुको भूः मादृशस्तवको भूः । अयुद्धेन युद्धव्यतिरिक्तसमरेण पाठ्य प्रतिपक्षमपि ममालम्बेवेत्यात् भावः ॥३६॥

[३६] ति० टी०—स्वोत्कोपायानुष्ठानमेव ते धनलाभहेतुरुपलक्षयति—अनष्टेति ॥ ३६ ॥

इति श्रीराजाधिराज श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

रा० टी०—उपसंहरन्नाह—अनष्टेति । अयुद्धेन रिपूणां जयम् अत एव न नष्टं सैन्यं यस्य अतः एव अनुरक्तसंवृतो महीपतिः यः प्रयुङ्क्ते चिरं समश्नुते प्राप्नोति ॥ ३६ ॥

इति श्रीमद्राजाधिराजरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

गो० टी०—स्वेवायुद्धं स्तौति—अनष्टेति । अनष्टसैन्यः अनष्टपक्षसैन्यः अत एवानुरक्तसंवृतः अप्राप्तप्रायसंदेहः स्वयुद्धेन जयन् प्रकृष्यतिरिक्तोपायेन जयन्नित्यर्थः । बहूनि पुण्यफलानि यशश्च श्रियं श्रीमत्प्रियालाभेन जनितां सैन्यम् कीर्तिं प्रसादम् विस्तारं वा कीर्तिः प्रसादे यशसि कीर्तने विस्तारेऽपि इति रत्नमाला । महीपतेः इति संबोधनम् श्रीमानुरागाभावेन नैराश्यादाशाः स्वयं विनश्यन्तीति महोदरहृदयम् ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीर्तिव्याख्याने युद्धकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥ ६४ ॥

१] ति० टी०—स तथोक्त इति । युद्धं न प्रार्थ्यमित्युक्तः ॥ १ ॥

रा० टी०—महोदरवचनश्रवणानन्तरकालिकं कुम्भकर्णं प्राह—स इत्यादिभिः । ततस्तस्मिन्समये महोदरेण तथोक्तः कुम्भकर्णः महोदरं निर्भर्त्स्य रावणमब्रवीत् ॥ १ ॥

गो० टी०—अथ युद्धाय कुम्भकर्णनिर्यातं पञ्चपञ्चाशतो—स तथोक्तस्त्वित्यादि । निर्भर्त्स्य गर्जन्तीत्यादिवक्ष्यमाणप्रकारेणेति शेषः ॥ १ ॥

२] ति० टी०—निर्वैरोऽवधुः ॥ २ ॥

रा० टी०—तदाकारमाह—स इत्यादिभिः । सर्व रामस्य वधात् प्रमार्जामि अतः त्वं निर्वैरः रिपुरहितस्सन् सुखी भव ॥ २ ॥

गो० टी०—सोऽहमिति । प्रमार्जामि । निर्वर्तयिष्यामीत्यर्थः वर्तमानसामीप्ये वर्तमानवत् प्रयोगः ॥ २ ॥

३] ति० टी०—वृथा न गर्जन्ति शत्रोरसमक्षं स्वशौर्यं वृथा न कत्थन्ते युधि कर्मणा संपद्यमानं तु मे गर्जितं पश्य ॥ ३ ॥

रा० टी०—मदुक्तं न सूचयेति बोधयन्नाह—गर्जन्तीति । निर्जलाः तोयहीना इव वृथा न गर्जन्ति सार्थमेव गर्जन्तीत्यर्थः अतः कर्मणा संपद्यमानं संगतं मे गर्जितं पश्य जानीहि ॥३॥

गो० टी०—गर्जन्तीति । वृथा कर्मणा विना । कर्मणा संपद्यमानं गर्जितं पश्य गर्जितानुसारेण कर्म करोमीत्यर्थः ॥ ३ ॥

४] ति० टी०—आत्मानमात्मानं सम्भावयितुं श्लाघितुं । न मर्षयन्ति न सहन्ते नेच्छन्तीति यावत् । अपि तु शूरास्तु वाचा स्वसामर्थ्यमप्रकाश्य दुष्करं कर्म कुर्वन्ति ॥ ४ ॥

रा० टी०—नेति । आत्मना आत्मानं सम्भावयितुं

---

१ अदृष्टसैन्यो गो. पाठः । २ पुनिति गो. पा० । ३ नवाधिक शतानां अवशिष्टेषु पं. पाठ ४ नवाधिक शतेषु पं. पाठः । ५ वर्धयति गो. पाठः । ६ अथ युद्धाय गो. पाठः ।

विक्लवानां बुद्धीनां रौक्षं पण्डितमानिनाम् । रोचते त्वद्वधो मिथ्या कथ्यमानं महोदर ॥ ५
युद्धे कापुरुषैर्नित्यं भवद्भिः प्रियवादिभिः । राजानमनुगच्छद्भिः सर्वं कृत्यं विनाशितम् ॥ ६
राजशेषा कृता लङ्का क्षीणः कोशो बलं हतम् । राजानमिममासाद्य सुहृच्चिकमभिक्रमम् ॥ ७
एष नियोक्ष्यहं युद्धमुद्यतः शत्रुनिर्जये । दुनेयं भवतामद्य समीकर्तुं महाहवे ॥ ८
एवमुक्तवतो वाक्यं कुम्भकर्णस्य धीमतः । प्रत्युवाच ततो वाक्यं महासन्राक्षसाधिपः ॥ ९
महोदरोऽयं रामाच्तु परित्रस्तो न संशयः । नहि रोचयते तात युद्धं युद्धविशारद ॥ १०
कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च । गच्छ शत्रुवधाय त्वं कुम्भकर्णजयाय च ॥ ११
शेषानः शत्रुनाशार्थं भवान्संबोधितो मया । अयं हि कालः सुमहान्राक्षसानामरिंदम ॥ १२
सैन्यैश्च शूलमादाय वाशरस्त इवान्तकः । वानरान्राजपुत्रौ च भस्मादित्यतेजसौ ॥ १३

स्तिं अस्य न मर्षयन्ति इत्यन्ति अतः अदर्शयित्वा परोक्षमेवाकथित्वा दुष्करं कर्म कुर्वन्ति ॥ ३ ॥

गो० टी०—न मर्षयन्तीति । अयः परकृतमवज्ञातोत्तिम् न मर्षयन्ति न सहन्ते आत्मना स्वयम् आत्मानं न संभावयन्ति न बहु मन्यन्ते उपचारोऽपि व्यत्ययेनैकवचनम् । किं तु अदर्शयित्वा अप्रकाशन आत्मपौरुषमवज्ञातत्वेत्यर्थः । दुष्करमपि कर्म कुर्वन्ति ॥ ४ ॥

५] ति० टी०—अकृत्यकर्मनैकृत्यादिगुणानां लघूनां युद्धविद्यादक्षत्वं नास्ति न तु वीराणामित्यर्थः । 'परेषां स्वाधिपत्ये स्थितानाम्' इति पाठे नैकृत्यादिगुणानां स्वाधिपत्ये स्थितानाम् ॥ ५ ॥

रा० टी०—स्वयं अस्माद्—विक्लवानामिति हे महोदर ! कथ्यमानं स्वदुक्तं अबुद्धीनां राज्ञो रोचते रावणाय न रोचते इत्यर्थः ॥ ५ ॥

गो० टी०—विक्लवानामिति । अत्र षष्ठ्यर्थे षष्ठी । नास्तिमिति भावे निष्ठा विक्लवेभ्यः कातरेभ्यः अबुद्धिभ्यः पण्डितमानिभ्यः स्वद्विद्भ्यः सत्यता राज्ञा इदमीदृशम् वर्तितं यद्यं भवति ॥ ५ ॥

६] ति० टी०—अस्मादिपापिष्ठमन्त्रैर्यं राजा नाशितं स्यात्—युद्धे इति । युद्धे प्राप्तकाले सति कापुरुषैः कुत्सितैर्भीरुभिः पुरुषैः प्राङ्मात्रकाले प्रियवादिभिः, अत एव तदा राजानमनुगच्छद्भिरेतत्राज्ञः सर्वं कृत्यं नाशितमित्यर्थः॥६॥

रा० टी०—युद्धे इति । प्रियवादिभिः अहितमपि प्रियलोकवद्भिः अत एव कापुरुषैः भवद्भिः सर्वं कृत्यं रावणस्य तैर्व्यं विनाशितम् ॥ ६ ॥

गो० टी०—उदाहरणनिर्देशं दर्शयति—युद्धे इति । युद्धे कापुरुषैः युद्धभीरुभिरित्यर्थः । राजानमनुगच्छद्भिः राजेत्यनुरूपिमित्यर्थः । एतत् प्रकृतयुद्धपर्यवसायि सीताहरणकृत्यं इति संपादितम् ॥ ६ ॥

७] ति० टी०—किं नाशितं तदाह—राजशेषेति । क्षी-

वमतो राजानमिममासाद्य सुहृच्चिकं सौहार्दप्रकाशकं मित्रकर्म अभिक्रमाय कृतमिति शेषः ॥ ७ ॥

रा० टी०—राजेति । इमं राजानमासाद्य मंत्रिदोषेण प्रा लङ्का राज्ञा विनाशितद्रुमदलेत्यर्थः कृता कोशः क्षीणः अत एव बलं सामर्थ्यं हतं विनाशितम् अत एव रिपुं सुहृत्त्वेन प्रतीयमानमभिक्रमं शत्रुस्वभावमिति शेषः ॥

गो० टी०—राजशेषेति । अवशब्दस्यनुगच्छद्भिः भवद्भि एतदुत्तरार्धम् सुहृच्चिकं सुहृत्कर्मेत्यस्य अभिप्रेतं भवति मित्र-कृतम् इमं राजानमासाद्य अनुगच्छद्भिः भवद्भिः राजशेषा कृता । अवशब्दस्तो राजा यैर्न निवार्यते स मन्त्रिभिः इत्यर्थप्राप्तेन अभिक्रमेत्युक्तम् ॥ ७ ॥

८] ति० टी०—किं कथाप्रसंगेन, इदानीं एकस्यैव स्वात्मदोषं करोमीत्याह—एष इति । युद्धे प्रत्युपस्थितेऽहं शत्रु नियोक्ष्यामि नियोजयिष्यामि भवतां दुर्मन्त्रिणां दुर्नयं दुर्मन्त्रपूर्वं नयमार्गेण समीकर्तुं यत्नं करिष्यामीत्यर्थः ॥ ८ ॥

रा० टी०—एष इति । अहमेव दुर्नयं समीकर्तुं योद्धुमुद्यतः एवोहं शत्रुनिर्जये शत्रूणां विजयार्थम् नियोक्ष्ये ॥ ८ ॥

गो० टी०—एष इति । दुर्नयं समीकर्तुं शत्रुनिर्जये सङ्गिमाय इत्यर्थः । उद्यत, उद्यतः सन्, युद्धे युद्धसमि एष नियोक्ष्ये अर्थेन नियोक्ष्यामीत्यर्थः ॥ ८-११ ॥

९] ति० टी०—प्रीयन्त इति । भुज्यन्ते शेषः ॥ ९ ॥

रा० टी०—एवमिति । वाक्यमत्र, कुम्भकर्णस्य वाक्यमुक्तवतीति शेषः राक्षसाधिपः प्रत्युवाच ॥ ९ ॥

१०-११] ति० टी०—प्रहस्तादयं स्वयमेवाह—महोदरोऽयमिति । तातेत्युपलालने ॥ १० ॥ ११ ॥

रा० टी०—तदाकारमाह—महोदर इत्यादिभिः । अयं महोदरः रामात्परित्रस्तः अत एव युद्धं न रोचयते इत्यर्थः॥१०॥

रा० टी०—कश्चिदिति । सौहृदादिना त्वत्समः को नास्ति अत एव त्वं गच्छ ॥ ११ ॥

१२-१३] ति० टी०—अयं कालः युद्धगमनार्थो शेषः ॥ १२ ॥ १३ ॥

तवालोक्य तु ते रूपं विद्रविष्यन्ति वानराः । रामलक्ष्मणयोश्चापि हृदयं स्फुटिष्यति ॥ १४ ॥
एवमुक्त्वा महातेजाः कुम्भकर्णं महाबलम् । पुनर्जातमिवात्मानं मेने राक्षसपुंगवः ॥ १५ ॥
कुम्भकर्णवलाभिज्ञो रावणस्तस्य दुर्बलम् । बभूव मुदितो राजा शशाङ्क इव निर्मलः ॥ १६ ॥
इत्येवमुक्तः संहृष्टो निर्जगाम महाबलः । राक्षसस्य वचनं श्रुत्वा योद्धुमुद्युक्तवांस्तदा ॥ १७ ॥
आददे निशितं शूलं वज्राच्छ्रेष्ठमुनिर्वणः । सर्वं कालायसं दीप्तं तप्तकाञ्चनभूषणम् ॥ १८ ॥
इन्द्राशनिसमस्पर्शं वज्रप्रतिममौरवम् । देवदानवगन्धर्वयक्षराक्षसभूषणम् ॥ १९ ॥
रक्तमाल्यमहादाम्नं स्वतश्चोद्गतपावकम् । आदाय विपुलं शूलं शत्रुशोणितरञ्जितम् ॥ २० ॥
कुम्भकर्णो महातेजा रावणं वाक्यमब्रवीत् । गमिष्याम्यहमेकाकी निष्प्रतिह्वि बलं महत् ॥ २१ ॥
अद्य तान्वानरान् क्रुद्धो भक्षयिष्यामि वानरान् । कुम्भकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ २२ ॥
सैन्यैः परिवृतो गच्छ शूलमुद्यम्य पाणिभिः । वानरा हि महात्मानः शूराः सुव्यवसायिनः ॥ २३ ॥
एकाकिनं प्रमत्तं वा नयेयुर्दक्षिणैः क्षयम् । तस्मात्परमदुर्धर्षैः सैन्यैः परिवृतो व्रज ॥
एतामहितं सर्वे शत्रुपक्षं निषूदय ॥ २४ ॥
यथासनात्समुत्पत्य सज्जं मणिकृतान्तराम् । आरुरोह महातेजाः कुम्भकर्णस्य रावणः ॥ २५ ॥

रा० टी०-शयान इति । राक्षसानामयं सुमहान् कालः सुप्त इति शेषः अत एव शयानो यतः शत्रुनाशार्थं मया चोदितः ॥ १३ ॥

रा० टी०-त्यमिति । पाशहस्तोऽन्तक इव शत्रुनाशाय गच्छ तत्रयो तत्राह भक्ष्य च ॥ १३ ॥

गो० टी०-तस्मादिति । तस्माद् भवतो निःसमत्वात् । शोणितः प्रोक्षितः अयं हि कालः युद्धायेति शेषः ॥१२-१४॥

१४-१७] ति० टी०-प्रस्फुटिष्यतो विदीर्णं भवितः ॥ १४-१७ ॥

रा० टी०-स्वमालोक्येति । ते रूपं स्वमालोक्य वानराः द्रविष्यन्ति पलायिष्यन्ते अतः एव रामलक्ष्मणयोरपि हृदयं स्फुटिष्यतः ॥ १४ ॥

रा० टी०-एवमिति । राक्षसश्रेष्ठः कुम्भकर्णमेव कृत्वा आत्मानं पुनर्जातमिव मेने ॥ १५ ॥

रा० टी०-कुम्भकर्णेति । कुम्भकर्णबलाभिज्ञो रावणः स्व कुम्भकर्णस्य परबलं दलनं सैन्यमन्तक निर्मलः शशांक इव मुदितो बभूव ॥ १६ ॥

गो० टी०-एवमिति । एवजातमिव मेने जेष्यन्त्यमीति निःसमादिति भावः ॥ १५ ॥ १६ ॥

रा० टी०-इतीति । इत्येवमुक्तः कुम्भकर्णो निर्जगाम अथ पुनः राज्ञो वचनं श्रुत्वा निशितं योद्धुमुद्युक्तवान् कुम्भकर्णो निशितं शूलमादद ॥ १७ ॥

गो० टी०-इत्येवमित्यर्धम् । निर्जगाम निर्गन्तुमुद्यतः ॥ १७ ॥

गो० टी०-राक्षसेत्यादि । सर्वकालायसम बहुकालायसमयमित्यर्थः । महाप्रभ महातेजाः । स्वतश्चोद्गतपावकं यतोऽतः स्वतः एवोद्गतपावकम् ॥ १८-२२ ॥

१८] ति० टी०-सर्वं कालायसं, सर्वेष्ववयवेषु दण्डादिष्वपि कालायसनिर्मितम् ॥ १८ ॥

१९] ति० टी०-इन्द्राशनिसमा प्रभा यस्य तत्तथा कान्तिर्यस्य तम् १९

२०-२४] ति० टी०-रक्तमाल्यान्येव महादामानि यस्य तत्, स्वतश्चोद्गतपावकम्बुद्गतार्चिषम् ॥ २०-२४ ॥

रा० टी०-सर्वमिति । सर्वं प्रत्ययवत् कालायसं तन्निर्मितं तप्तकांचनमयानि भूषणानि यस्मिन् तत् वज्रप्रतिमं वज्रसदृशं गौरवं गुरुत्वं यस्य देवादीनां मर्दनं रक्तमाल्यमयानि महादामानि यस्मिन् स्वत उद्गतः पावको यस्मात् शत्रुशोणितेन रञ्जितं शूलमादाय कुम्भकर्णोऽब्रवीत् अर्धषट्कमेकान्वयि ॥ १८-२० ॥

रा० टी०-तदाकारमाह—गमिष्यामीति । अहमेकाकीव गमिष्यामि बलं तु इहैव निष्प्रतिह्वि अयं पृथक् ॥ २१ ॥

रा० टी०-अद्येति । अद्य क्षुधितोऽहं वानरान् भक्षयिष्यामि कुम्भकर्णवचः श्रुत्वा रावणोऽब्रवीत् ॥ २२ ॥

रा० टी०-तदाकारमाह-सैन्यैरिति । सैन्यैः परिवृतः सन् गच्छ हि यतः महात्मानो वानराः एकाकिनं प्रमत्तं च त्वां दक्षिणैः अयं नयेयुः साङ्क्ष्येक एकान्वयी ॥ २३ ॥

रा० टी०-तस्मादिति । तस्मादुक्तहेतोः सैन्यैः परिवृतस्त्वं व्रज रक्षसां पृथं रक्षस्व शत्रुपक्षं निषूदय च ॥ २४ ॥

गो० टी०-सैन्यैरित्यादि । महात्मानः महाबलवन्तः शूराः नेतारः सुव्यवसायिनः दृढनिश्चयाः ॥ २३ ॥ २४ ॥

२५] ति० टी०-हेम काञ्चनी मणिकृतान्तरा मणिरत्नैः तमध्यदेशासु ॥ २५ ॥

रा० टी०-अथेति । रावणः आसनात्समुत्पत्य [illegible]

१ कुम्भकर्णः सुप्त इति गो. पाठः । २ सर्वं कालायसमिति गो. पाठः । ३ दृष्ट्वा श्रीमिति गो. [illegible]

[illegible] च । हारं च प्रतिसक्तोपासङ्गस्य महात्मनः ॥ २५ ॥
दिव्यानि च सुगन्धीनि माल्यदामानि रावणः । गात्रेषु सज्जयामास श्रोत्रयोश्चास्य कुण्डले ॥ २६ ॥
काञ्चनाङ्गदकेयूरनिष्काभरणभूषितः । कुम्भकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ ॥ २७ ॥
श्रोणीसूत्रेण महता मेचकेन विराजता । अमृतोत्पादने नद्धो भुजगेनेव मन्दरः ॥ २८ ॥
स काञ्चनं भारसहं निवातं विद्युत्प्रभं दी[illegible]प्य ।
आबध्यमानः कवचं रराज संध्याभ्रसंवीत इवा[illegible] ॥ ३० ॥
सर्वाभरणसर्वाङ्गः शूलपाणिः स राक्षसः । त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ॥ ३१ ॥
भ्रातरं संपरिष्वज्य कृत्वा चापि प्रदक्षिणम् । प्रणम्य शिरसा तस्मै प्रतस्थे स महाबलः ॥ ३२ ॥
[निष्पतन्तं महाकायं महानादं] महाबलम् ।
तमात्मभिः प्रशस्ताभिः प्रेषयामास रावणः । शङ्खदुन्दुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः ॥ ३३ ॥
तं गजैश्च तुरंगैश्च स्यन्दनैश्चादित्यवर्चसैः । अनुजग्मुर्महात्मानो रथिनो रथिनां वरम् ॥ ३४ ॥

निभिः कृतो रचितः अन्तरो मध्यपदेशो यस्याः सा तां रत्नं वर्णमालां कुम्भकर्णस्य आवबन्ध गले मन्थारमाणे ॥ २५ ॥

गो० टी०-अथेति । रत्नं काञ्चनमालाम् । कुम्भकर्णस्य आवबन्ध कुम्भकर्णं आवबन्धेत्यर्थः ॥ २५ ॥

२६-२७] ति० टी०-अङ्गुलीवेष्टान् अङ्गुलीयकानि ॥ २६ ॥ २७ ॥

टी०-अङ्गदानीति । महात्मनः कुम्भकर्णस्य अङ्ग आबबन्ध तत्राङ्गुलीवेष्टाः अङ्गुलीयकानि ॥ २६ ॥

रा० टी०-दिव्यानीति । रावणः अस्य कुम्भकर्णस्य सुगन्धीनि शोभनगन्धविशिष्टानि दिव्यानि माल्यदामानि सज्जयामास श्रोत्रयोश्च कुण्डले सज्जयामास ॥ २७ ॥

गो० टी०-अङ्गदानीति । अङ्गुलीवेष्टान् अङ्गुलीयकानि ॥ २६ ॥

गो० टी०-दिव्यानीति । आसज्जयामास बबन्धेत्यर्थः । अत्र केयूरादीनामप्युपलक्षणम् । काञ्चनाङ्गदकेयूरनिष्कादीन् ॥ २७ ॥ २८ ॥

२८] ति० टी०-निष्कश्चरोभूषणम् ॥ २८ ॥

रा० टी०-काञ्चनेति । बृहत्कर्णः कुम्भकर्णः सुहुतोऽग्निरिवाबभौ ॥ २८ ॥

२९] ति० टी०-श्रोणीसूत्रं कटिसूत्रम् ॥ २९ ॥

रा० टी०-श्रोणीति । मेचकेन कृष्णवर्णेन विराजता शोभमानेन श्रोणीसूत्रेणोपलक्षितः कुम्भकर्णः अमृतोत्पादने तत्समये भुजगेन नद्धो मन्दर इव आबभावित्युत्प्रेक्ष्यते २९

गो० टी०-श्रोणीसूत्रेणेति । अमृतोत्पादने नद्ध इति मेचकसमी । भुजगेन वासुकिना ॥ २९ ॥

३०] ति० टी०-भारसहं यद्धेऽभिघातसहम् । निवातं 'वातप्रवेशेन तन्निवातप्रदाहनम्' । आबध्यमानम् आर्षो विकरणव्यत्ययः ॥ ३० ॥

रा० टी०-स इति । भारसहत्वमाघातसहत्वमित्यभि-

स्वर्थः । आबध्यमानो दीप्तं प्रज्वलितमिव अत एव विद्युत्प्रभं तत्काञ्चनं निवातं शत्रुभिरभेद्यं कवचमाबध्यमानः कुम्भकर्णः स्वयमेव संनद्धस्संनद्धोऽविराजत इव दरात् 'भक्षाभोक्षंतु यो तन्निवातत्वदाहत' मिति कोशः ॥ ३० ॥

गो० टी०-स इति । भारसहं आयुधादिभिः प्रहारासहिष्णुमित्यर्थः । रत्नमिति शेषः । यद्वा उपरीतापो तुरीयो व्याप्यमानान् वहन् भारान् सहत इति भारसहः अत आत्मपरित्राणे दृढयत्नः । निवातं वातप्रवेशनिवारकम् निरन्तरमिति यावत् । आबध्यमानः कवचकाल्या यद्वा निवातशत्रुभेदकम् । निवातात्मपरित्राणात्मकं शत्रुभिर्भेद्यं च वर्म यद् इत्यर्थः । आबध्यमानः आत्मन् । आबधिकरणकर्तृवाच्ये शानच् ॥ ३० ॥

३१-३३] ति० टी०-सर्वाभरणसर्वाङ्गः सर्वाभरणभूषितसर्वाङ्गः । 'तद्राजः' इति पाठान्तरम् । त्रिषु विक्रमेषु यो न्यासेषु क्रमोत्साहः ॥ ३१-३३ ॥

३४] ति० टी०-अम्बुवर्षनैः स्यन्दनैश्च सह प्रेषयामासेति योजना ॥ ३४ ॥

रा० टी०-सर्वेति । सर्वैराभरणैर्युक्तानि सर्वाङ्गानि यस्य स राक्षसः त्रिषु लोकेषु विक्रमाय पादन्यासाय कृतः उत्साहो येन स नारायण इवाबभौ ॥ ३१ ॥

रा० टी०-भ्रातरमिति । भ्रातरं रावणं संपरिष्वज्य तस्मै तमनुकूलयितुं प्रतस्थे ॥ ३२ ॥

रा० टी०-तमिति । प्रशस्ताभिरात्मीयाभिर्योजिवं ते कुम्भकर्णे राक्षसः प्रेषयामास अर्थं प्रयत् ॥ ३३ ॥

रा० टी०-शङ्खेति । महात्मानो राक्षसाः बलपरिगृहीतैः विशिष्टैः वरायुधैः सैन्यैः अम्बुवर्षनैर्गजादिभिश्च तं कुम्भकर्णं पर्वतमिव सानुदेशेन प्रकाशयंती ॥ ३४ ॥

[illegible] खरश्चैव सिंहदूषणमाद्रिभिः । अनुजग्मुश्च तं वीरं कुम्भकर्णं महाबलम् ॥ ३५
स पुष्पवर्षैरवकीर्यमाणो धृतातपत्रः सितशुभ्यपाणिः ।
महोत्कटः शोणितगन्धमत्तो विनिर्ययौ दानवदेहसत्त्वः ॥ ३६
पदातयश्च बहवो महासारा महाबलाः । अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्रपाणयः ॥ ३७
रक्ताक्षाः सुबहुश्यामा नीलाञ्जन[illegible] । शूलानुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ॥ ३८
भिन्दिपालांश्च परिघान्दण्डांश्च [illegible]नं च । तालस्कन्धांश्च विपुलान्प्रेषणीयान्पुरासदान् ॥ ३९
अथान्यद्बृहदाकाशं दारुणं रौद्रदर्शनम् । निष्पपात महातेजा कुम्भकर्णो महाबलः ॥ ४०
धनुःशतपरीणाहः स षट्शतसमुच्छ्रितः । रौद्रः शकटचक्राक्षो महापन्नगसंनिभः ॥ ४१
संनिपत्य च रक्षांसि दग्धशैलोपमो महान् । कुम्भकर्णो महावक्त्रः प्रहसन्निदमब्रवीत् ॥ ४२
अद्य वानरमुख्यानां तानि यूथानि भागशः । निर्दहिष्यामि संक्रुद्धः पतङ्गानिव पावकः ॥ ४३
नापराध्यन्ति मे कामं वानरा वनचारिणः । जातिरस्मद्विधानां सा पुरोद्यानविभूषणम् ॥ ४४
पुरोधस्य मूलं तु राघवः सहलक्ष्मणः । हते तस्मिन्हतं सर्वं तं हनिष्यामि संयुगे ॥ ४५

गो० टी०-सर्वेति । सर्वाभरणसर्वाङ्गः सर्वाभरणयुक्तसर्वाङ्गः । विविक्रमशतोत्साहः त्रिषु विक्रमेषु पदन्यासेषु कृतोत्साहः ॥ ३१-३२ ॥

३५-३७] ति० टी०-अनुजग्मुरिति । रावणप्रेषिता इति शेषः सर्पादिभिर्वाहनैर्जग्मुः ॥ ३५-३७ ॥

३८-३९] ति टी०-सकरयोर्बाह्वोस्तनयोस्तियंगन्तरालं यामः सुबहुश्यामाः छत्रां बहुव्यामप्रमाणाः ॥ ३८ ॥ ३९ ॥

रा० टी०-सर्वेरिति । सर्पादिभिर्वाहनैः कुम्भकर्णमनुजग्मुः ॥ ३५ ॥

गो० टी०-सर्पैरिति । सर्पादीनां महाशरीराणां वाहनत्वं भवतीति शेषम् । द्विपाः गजाः । द्विजाः हंसादयः ॥ ३६ ॥

रा० टी०-स इति । शिति कृष्णं दृढं पाणौ यस्य महोत्कटोऽतिभयङ्करः शोणितगन्धेन मत्तः स कुम्भकर्णः पुष्पवर्षैरवकीर्यमाणस्सन् विनिर्ययौ ॥ ३६ ॥

गो० टी०-स इति । महोत्कटः स्वाभाविकमदेन मत्तः । मत्ते शौण्डोत्कटक्षीबा इत्यमरः ॥ ३७ ॥

रा० टी०-पदातय इति । पदातयो बहवो राक्षसाः प्रहस्तादीनामस्य अन्वयुः अर्द्धपद्येकान्वयि तत्र सुबहुश्यामाः सुबहुश्यामपरिमिताः तथाचामराः व्यामोबाह्वोस्तत्करयोस्तयोस्तिर्यगन्तरम् ॥ ३७-३९ ॥

गो० टी०-पदातयश्चेत्यादि । बहुश्यामान् अनेकव्यामप्रमाणान् । व्यामो बाह्वो सकरयोस्तनयोस्तिर्यगन्तरालं त्र्यमरः । तालस्कन्धान् तालवृक्षान् ॥ ३८-४१ ॥

४०] ति० टी०-अथान्यदालंकारसौभाग्यात् ॥ ४० ॥

रा० टी०-अथेति । अन्यत् कृत्रिमशैलव्याहिलक्षणं बृहदाकाशं कुम्भकर्णो निष्पपात ॥ ४० ॥

४१] ति० टी०-तस्यैव प्रदर्शनम्-धनुःशतेति । परिणाहो विशालता । तिर्यग्देहप्रमाणमिदम् षट्शतधनुःप्रमऊर्ध्वोच्छ्रायः ॥ ४१ ॥

४२-४३] ति० टी०-संनिपत्य स्थित्वा ॥ ४२ ॥ ४३

रा० टी०-धनुरिति । शतधनुःपरीणाहः शतसंख्या धनुष्परिमितः विस्तृतः षट्शतसमुच्छ्रितः षट्शतसंख्याकधनुष्परिमितोच्छ्रायविशिष्टः शकटचक्रे इव यस्य दग्धशैलोपम स्स कुम्भकर्णः इदमब्रवीत् अर्द्धचतुष्कान्वयि ॥ ४१ ॥ ४२ ॥

गो० टी०-धनुःशतेत्यादि । धनुःशतपरीणाहः धनुर्विशालः षट्शतसमुच्छ्रितः षट्शतधनुरुच्छ्रायः सन्निपत्य स्वगमनायोद्युक्तानां राक्षसानां समीपं गत्वेत्यर्थः ॥ ४२ ॥ ४३

रा० टी०-तदाकारमाह—अद्येत्यादिभिः । वानरयूथानां यूथानि निर्दहिष्यामि निर्धक्ष्यामि ॥ ४३ ॥

गो० टी०-अद्येत्यादि । सा जातिः वानरजातिः स्मद्विधानां क्रीडापराणाम् ॥ ४४-४५ ॥

४४] ति० टी०-वानरयूथानां यूथानि हनिष्यत्युक्त्वा निरपराधत्वात्तेषां हन्तव्यत्वं, किं तु राम एव स राक्षसमूलं हन्तव्य इत्याह-नापराध्यन्तीति । ते नापराध्यन्त्यत इति शेषः । किं तु सा जातिर्वानरजातिरस्मद्विपुरोद्यानानां विभूषणमलंकारः ॥ ४४ ॥

रा० टी०-वस्तुतस्तु वानरवधो न न्याय्य इत्याह—नेयं वानराणां सा अस्मद्विधा जातिः अस्मद्विधानां हरीणां विभूषणं भवति ते वानराः कपयः [illegible]पतेन हेतुना हन्तव्या इति सूचितम् ॥ ४४ ॥

४५] ति० टी०-अतस्तैः सह पुरोधस्य मूलं एव हन्तव्यः तस्मिन्हते सर्वं हतं भवति अतस्तमेव [illegible]हनिष्यामि ॥ ४५ ॥

कुम्भकर्णस्य राक्षसः । नादं चक्रुर्महाघोरं कम्पयन्त इवार्णवम् ॥ ४६ ॥
तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः । बभूवुर्घोररूपाणि निमित्तानि समन्ततः ॥ ४७ ॥
उल्काशनियुता मेघा बभूवुर्गर्दभारुणाः । ससागरवना चैव वसुधा समकम्पत ॥ ४८ ॥
घोररूपाः शिवा नेदुः सज्वालकवलैर्मुखैः । मण्डलान्यपसव्यानि ववन्वुश्च विहंगमाः ॥ ४९ ॥
निष्पपात च गृध्रोऽस्य शूले वै पथि गच्छतः । प्रास्फुरच्चयनं चास्य सव्यो बाहुरकम्पत ॥ ५० ॥
निष्पपात तदा चोल्का ज्वलन्ती भीमनिःस्वना । आदित्यो निष्प्रभश्चासीन्न वाति च सुखोऽनिलः ॥ ५१ ॥
अचिन्तयन्महोत्पातानुदितान्रोमहर्षणान् । निर्ययौ कुम्भकर्णस्तु कृतान्तबलचोदितः ॥ ५२ ॥
स छादयित्वा प्राकारं पद्भ्यां पर्वतसंनिभः । सं ददर्श धनप्रख्यं वानरानीकमद्भुतम् ॥ ५३ ॥
ते दृष्ट्वा राक्षसश्रेष्ठं वानराः पर्वतोपमम् । वायुनुन्ना इव घना यूथशः सर्वा दिशस्तदा ॥ ५४ ॥

तद्वानरानीकमतिप्रचण्डं दिशो द्रवद्भिन्नमिवाभ्रजालम् ।
स कुम्भकर्णः समवेक्ष्य हर्षान्ननाद भूयो घनवद्घनाभः ॥ ॥ ५५ ॥
ते तस्य घोरं निनदं निशम्य यथा निनादं दिवि वारिदस्य ।
पेतुर्धरण्यां बहवः प्लवंगा निकृत्तमूला इव शालवृक्षाः ॥ ॥ ५६ ॥

रा० टी०—नन्वेतैरेव लंका अवरुध्यते इति कथमिदमुच्यते इत्यत्र आह—तुरेति। तुरशब्दस्य मूलं तु राघवः अतएव वधिष्यामि नन्वेतस्वामिनोपरागित्वे तत्सेवका अप्यपरागा एवेति वानरा अपि हन्तव्याः इत्यत आह तस्मिन् मूलनाशे इते सति सर्वं हतं निहतमिव भविष्यतीति शेषः ४३-४७] ति० टी०—राक्षसः वाक्यं श्रुत्वेति शेषः। नादं राक्षसा इति शेषः ॥ ४६ ॥ ४७ ॥

रा० टी०—एवमिति। कुम्भकर्णस्य एवं ब्रुवाणस्य सतः कम्पयन्त इव राक्षसाः नादं चक्रुः ॥ ४६ ॥

रा० टी०—तस्येति। कुम्भकर्णस्य निष्पततस्ततः घोराणि निमित्तानि बभूवुः ॥ ४७ ॥

रा० टी०—तस्यति। घोररूपाणि अत्यन्तघोराणि ॥ ४८ ॥ ४९] ति० टी०—गर्दभारुणा गर्दभभूम्राः ॥ ४८ ॥

रा० टी०—निमित्ताकारमाह—उल्केत्यादिभिः। गर्दभारुणाः धूम्रवर्णाः उल्काशनिभ्यां युताः मेघाः बभूवुः बहुधा वर्षन्तः ॥ ४८ ॥

रा० टी०—उल्केत्यादि। गर्दभारुणाः गर्दभवदव्यक्तशब्दकरास्तत्करुण इत्यमरः। निष्पपातेति। गच्छन्नुदिते सूर्ये शालेव निष्पपातेत्यन्वयः। सूर्य इति शेषः। सज्वालशब्दो लिङ्गव्यत्ययेन नयनशब्देनापि संबध्यते अकम्पत उल्का मेघनिर्घातजन्याकृतिविशेषः ॥ ४९-५१ ॥

ति० टी०—तद्वानरानीकं, साङ्गारविष्टैः ॥ ५५ ॥

रा० टी०—तेरेति। वानरानीकस्य अंगारवत्त्ववत्तः

हिंस्रैर्मुखैः शिवाः नेदुः विहंगमाः अपसव्यानि दक्षिणक्रमेणेति मण्डलानि ववन्वुः ॥ ४९ ॥

५०-५१] ति० टी०—नयनं वामम् ॥ ५० ॥ ५१ ॥

रा० टी०—निष्पपातेति। अस्य शूलाग्रे गृध्रो निष्पपात सव्यं वामं नयनं प्रास्फुरच्च सव्यो बाहुरकम्पत च सव्य इति लिङ्गविपरिणामेन पूर्ववाक्यमेवेति ॥ ५० ॥

रा० टी०—निष्पपातेति। अपतः उल्का निष्पपात आदित्यो निष्प्रभ आसीत् अनिलश्चसुखो न वाति ॥ ५१ ॥

५२] ति० टी०—अचिन्तयन्महाणवत् ॥ ५२ ॥

रा० टी०—अचिन्तयन्निति। कृतान्तस्य कालस्य बलेन चोदितः कुम्भकर्णस्तु महोत्पातान् अचिन्तयन्महाणवत् सन् निर्ययौ ॥ ५२ ॥

५३-५६] ति० टी०—तद्वहनक्षमबाहनाभावात्पद्भ्यामिति ॥ ५३-५६ ॥

रा० टी०—स इति। स कुम्भकर्णः पद्भ्यां प्राकारं लंघयित्वा अधनप्रख्यं निबिडाभ्रसदृशं वानरानीकं ददर्श ॥ ५३ ॥

रा० टी०—ते इति। वानराः राक्षसश्रेष्ठं दृष्ट्वा वायुना इव प्रेरिताः घना इव सर्वा दिशो ययुः ॥ ५४ ॥

रा० टी०—तदिति। अतिप्रचण्डमपि वानरानीकं निबिडमेघजालमिव दिशोऽद्रवत् कुम्भकर्णस्तु समवेक्ष्य भूयो ननाद ॥ ५५ ॥

रा० टी०—ते इति। ते वानराः घोरं निनादं निशम्य निकृत्तमूलाः शालवृक्षा इव धरण्यां पेतुः ॥ ५६ ॥

रा० टी०—स इति। अधनप्रख्यं अघनसदृशं ॥ ५३-५६ ॥

विपुलपरिघबाहुः कुम्भकर्णो रिपुभ्यस्तनय विनिःसृतो महात्मा ।
कपिगणभयमादधत्सुभीमं मधुरिव किंकरदण्डवान्युगान्ते ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

रामरावणान्तं सूर्यं नक्तं च कुम्भकर्णं निलोक्य प्रवृत्तान्कपीन्बलादीनभिजनवीर्यादीनि विस्मृत्य भयाद्रणं किं पलायध्वं ए भीषयमाणेऽङ्गदो निवर्तयामास कथमपि भीतं प्रहस्तादिना भयितान्तएव पर्वताग्रिताग्रकाङ्क्षिवृक्षसमाकुलानन्यान्पलायितान्हरीन् प्लव्यङ्गदो वीरधर्मानुपदिश्य स्थिरीचकार ।

स लङ्घयित्वा प्राकारं गिरिकूटोपमो महान् । निर्ययौ नगरात्तूर्णं कुम्भकर्णो महाबलः ॥ १ ॥
ननाद च महानादं समुद्रमभिनादयन् । विजयन्निव निर्घातान्विधमन्निव पर्वतान् ॥ २ ॥
तमवध्यं मघवता यमेन वरुणेन वा । प्रेक्ष्य भीमाक्षमायान्तं वानरा विप्रदुद्रुवुः ॥ ३ ॥
तांस्तु विप्रद्रुतान्दृष्ट्वा रोजपुत्रोऽङ्गदोऽब्रवीत् । नलं नीलं गवाक्षं च कुमुदं च महाबलम् ॥ ४ ॥
आत्मनस्तानि विस्मृत्य वीर्याण्यभिजनानि च । क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा ॥ ५ ॥
साधु सौम्या निवर्तध्वं किं प्राणान्परिरक्षथ । नालं युद्धाय वै रक्षो महतीयं विभीषिका ॥ ६ ॥
महतीमुत्थितामेनां राक्षसानां विभीषिकाम् । विक्रमाद्विधमिष्यामो निवर्तध्वं प्लवंगमाः ॥ ७ ॥
कुम्भकर्णं तु समाश्वस्य संगम्य च ततस्ततः । वृक्षान्गृहीत्वा हरयः संप्रतस्थू रणाजिरे ॥ ८ ॥

५७] ति० टी०—विपुलपरिघबाहुरिति । अष्टवर्षदिमव्यस्थायम् । किंकरदण्डवान्किंकराः संहारपरिकराः कालदण्डा अस्य सन्ति तथा युगान्ते प्रभुः कालाग्निरुद्र इव रिपुनिःसृतः ॥ ५७ ॥

इति श्रीरामायणतिलके श्रीरामीये रामार्थप्रदीपके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रा० टी०—विपुलेति । विपुलपरिघबान् अनेकविधपरिघविशिष्टः कुम्भकर्णः कपिगणभयमादधत्सन् युगान्ते किंकरदण्डवान् किंकरैरितप्रजादण्डदायकः प्रभुः काल इव रिपुनिःसृतोभवदिति शेषः ॥ ५७ ॥

इति श्रीमद्भारतीकीर्थरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

गो० टी०—विपुलेति । प्रभुः अन्तकः किंकरदण्डवान् किंकरोमृत्यव्यापी सर्वतनो दण्डः तद्वान् ॥ ५८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

१] ति० टी०—स इति ॥ १ ॥

रा० टी०—वक्ष्यमाणानन्तरकालिकं उत्तरमाह—स इत्यादिभिः । कुम्भकर्णो नगरान्निर्ययौ निर्घातान् अशनिरवान् विजयन्निव महानादं ननाद च श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—अथ कुम्भकर्णप्रवृत्तिः—स इत्यादि ॥ १ ॥

२] ति० टी०—निर्घातानशनिघोषान् ॥ २–४ ॥

रा० टी०—तमिति । मघवदादिभिरवध्यमायान्तं कर्णं प्रेक्ष्य वानराः विप्रदुद्रुवुः ॥ ३ ॥

रा० टी०—तानिति । विप्रद्रुतान् नलादीन् तान् अङ्गदोऽब्रवीत् ॥ ४ ॥

गो० टी०—स ननादेति । विधमन् दहन् ॥ २–४

५] ति० टी०—आत्मन आत्मसम्बन्धीनि वीर्याणि कर्माणि ॥ ५ ॥

रा० टी०—तदाकारमाह—आत्मन इत्यादिभिः । ३ स्वस्य वीर्याणि अभिजनानि स्वजन्मांश्च विस्मृत्य प्राकृता इव भयत्रस्ता यूयं क्व गच्छत ॥ ५ ॥

गो० टी०—आत्मानमिति । अभिजनानि प्रकृतानि ॥ ५ ॥

६–८] ति० टी०—साध्वित्यादि । हे सौम्या यूयं निवर्तध्वं यतः किमर्थं परिरक्षथ नहु अतिबलवतां रक्षोभिर्वैरमुत्थितं महती विभीषिका भयमापादकमस्तीत्यर्थः ततः [illegible] ॥ ६ ॥

रा० टी०—महतीमिति । [illegible] ॥ ६ ॥

रा० टी०—[illegible]

[illegible] कुम्भकर्णो वनौकसः । निर्जेतुः परमक्रुद्धाः समदा इव कुञ्जराः ॥ ९ ॥
शृङ्गैर्गिरिशृङ्गैश्च शिलाभिश्च महाबलाः । पादपैः पुष्पिताग्रैश्च घ्नन्यमानो न कम्पते ॥ १० ॥
स्य गात्रेषु पतिता भिद्यन्ते बहवः शिलाः । पादपाः पुष्पिताग्राश्च भग्नाः पेतुर्महीतले ॥ ११ ॥
ऽपि सैन्यानि संक्रुद्धो वानराणां महौजसाम् । ममन्थ परमायत्तो वनान्यग्निरिवोत्थितः ॥ १२ ॥
क्षितास्तैस्तु बहवः शेरते वानरर्षभाः । निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः ॥ १३ ॥
द्रुव्यन्तः प्रधावन्तो वानरा नावलोकयन् । केचित्समुद्रे पतिताः केचिद्गगनमास्थिताः ॥ १४ ॥
द्यमानास्तु ते वीरा राक्षसेन बलीयसा । सागरं येन ते तीर्णाः पथा तेनैव दुद्रुवुः ॥ १५ ॥
स्थलानि तदा निम्नं विवर्णवदना भयात् । ऋक्षा वृक्षान्समारूढाः केचित्पर्वतमाश्रिताः ॥ १६ ॥
मैमज्जुर्वर्णवे केचिद्वृहाः केचित्समाश्रिताः ।]
निपेतुः केचिदपरे केचित्तत्रावतारिरे । केचिद्भूमौ निपतिताः केचित्सुप्ता मृता इव ॥ १७ ॥
ान्समीक्ष्याङ्गदो भग्नान्वानरानिदमब्रवीत् । अवतिष्ठत युष्माभो निवर्तध्वं प्लवंगमाः ॥ १८ ॥
ानां वो न पश्यामि परिक्रम्य महीमिमाम् । स्थानं सर्वे निवर्तध्वं किं प्राणान्परिरक्षथ ॥ १९ ॥

भासनं संगृह्य अत एव ततस्तत्तरसंगम्य संप्राप्य तत्रास्त्वा हर्यस्संप्रतस्थुः ॥ ८ ॥

गो० टी०–साधिवति । विभीषिका भयानकः इति-एवेषः ॥ ६–८ ॥

९] ति० टी०–निवर्त्य निवृत्ता भूत्वा ॥ ९ ॥

रा० टी०–ते इति । समदाः कुञ्जरा इव परमक्रुद्धाः अत संरब्धाः कृतयुद्धोद्योगाः ते वनौकसः निवर्त्य कुम्भकर्णः त्यूचुः ॥ ९ ॥

गो० टी०–त इति । परमक्रुद्धा इति कुञ्जरविशेषणम् ॥

१०–१३] ति० टी०–प्रांशुभिरुत्तैः ॥ १०–१३ ॥

रा० टी०–प्रांशुभिरिति । महाबलैर्वानरैः प्रांशुभिरुत्तैः रेरुद्गताग्रैश्च तिभिः हन्यमानोऽपि कुम्भकर्णो न कम्पते ॥ १०

रा० टी०–तस्येति । तस्य कुम्भकर्णस्य गात्रेषु पतिताः गाः पादपाश्च भिद्यन्ते भग्नास्सन्तः महीतले पेतुश्च ॥ ११ ॥

गो० टी०–प्रांशुभिरिति । प्रांशुभिः उन्नतैः महाबलैः मकर्णैः ॥ १० ॥ ११ ॥

रा० टी०–स इति । संक्रुद्धः स कुम्भकर्णोऽपि अग्निरिवा- वानराणां सैन्यानि ममन्थ ॥ १२ ॥

गो० टी०–सोऽपीति । ममन्थ । ददाहेत्यर्थः ॥ १२ ॥

रा० टी०–लोहितेति । लोहितेन रुधिरेणाक्तानि बहवो वर्षभाः ताम्रपुष्पा द्रुमा इव भूमौ पतितास्सन्तः शेरते तो बभूवुः ॥ १३ ॥

गो० टी०–लोहितार्द्रा इति । निरस्ताः उत्क्षिप्ताः ॥ १३ ॥

१४–१५] ति० टी०–नावलोकयन्नग्रगृध्रदेशं नालोकित- ॥ १४ ॥ १५ ॥

रा० टी०–संद्रवन्त इति । द्रवयन्तः प्रधावन्तो वानराः न अवलोकयन् अग्रालोकयन् स्वजनानीति शेषः अत्र । केचित्समुद्रे पतिताः ॥ १४ ॥

गो० टी०–द्रवयन्त इत्यर्थः । नावलोकयन् नाव लोकयन् पुरोदृष्टमित्यर्थः ॥ १४ ॥

गो० टी०–केचिदिति । केचिदे वानरा इति योजना ।

रा० टी०–वध्यमाना इति । राक्षसेन वध्यमाना वानरा येन पथा सागरं तीर्णास्तेनैव पथा दुद्रुवुः ॥ १५ ॥

गो० टी०–सागरमित्यर्धम् । ते वानराः ॥ १५ ॥

१६] ति० टी०–स्थलानि यद्दुर्गविषमम् ॥ १६ ॥

रा० टी०–ते इति । भयाद्विवर्णवदनाः ते वानराः स्थल तिर्यं यथा भवति तथा दुद्रुवारिति शेषः केचित् ऋक्षाः वृक्षं समारूढाः ॥ १६ ॥

गो० टी०–ते स्थलानीति । स्थलानि अतिधावनयो स्थाद् देशान् अवप्रदेशान् वा आश्रिता इत्यन्वयः ॥ १६

१७–१८] ति० टी०–मिलितः दृढसंश्लेषः ॥ १७ ॥

रा० टी०–निपेतुरिति ॥ १७ ॥

गो० टी०–ममज्जुरित्यादि । निपेतुः भूमौ पतिता इव तन्यः ॥ १८ ॥

रा० टी०–सानिति । भग्नान् वानरान् समीक्ष्याङ्गदो वीत् तस्मात्कारणात् वयमत्रस्थिता निवर्तध्वं यं युध्याम ॥

गो० टी०–अवतिष्ठतेत्यादि । परिगम्य प्रदक्षिणीकृ त्यर्थः । स्थानं न पश्यामीत्यन्वयः ॥ १९ ॥

१९] ति० टी०–एवं भग्नानां वो युष्माकं सर्वा महीं रिक्रम्यापि गत्वापि स्थानं प्रतिष्ठां न पश्यामि समीक्ष विना गतानां वैव एव सर्वेषेति भावः अतः सर्वे नि इत्यम् ॥ १९ ॥

[illegible] ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

निरायुधानां क्रमतामसङ्गगतिपौरुषाः । दारा वोपहसिष्यन्ति स वै घातो मृतोऽपि वः ॥ २० ॥
कुलेषु जाताः सर्वेऽस्मिन्विस्तीर्णेषु महत्सु च । क गच्छत भयत्रस्ताः प्राकृता इतरो यथा ॥
अनार्याः खलु यद्भीता रणकर्मण्यकत्थनाः । वीर्यं प्रत्यक्ष्यते ॥ २१ ॥
विकत्थनानि वो यानि भैरवैर्जनसंसदि । तानि वः क नु यातानि सोदग्राणि हतानि च ॥ २२ ॥
भीरोः प्रवादाः श्रूयन्ते यस्तु जीवति विक्कृतः । मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम् ॥ २३ ॥
शयामहे वा निहताः पृथिव्यामल्पजीविताः । प्राप्नुयामो ब्रह्मलोकं दुष्प्रापं च कुयोधिभिः ॥ २४ ॥
अथवाप्नुयामः कीर्तिं वा निहत्वा शत्रुमाहवे । निहता वीरलोकस्य भोक्ष्यामो वसु वानराः ॥ २५ ॥

रा० टी०–भक्षानाभिति । भक्षानामत एव महीं परित्यक्ष्यामि गतानां वो युष्माकं स्वामी निर्भयस्थानं न पश्यामि विद्युताङ्ग स्वान् सुहृदो हनिष्यतीति तात्पर्यम् अतः सर्वं वृथा निवर्तेथम् ॥ १९ ॥

२०] ति० टी०–हेतुगर्भगतिपौरुषाः, निरायुधानां पाषाणदण्डशस्त्रादिरहितानां द्रवतां दारा उपहसिष्यन्ति स्वदारोपहासो जीवतां युष्माकं घातो मृत्योरप्यधिकदुःखदो भविष्यति ॥ २० ॥

रा० टी०–निरायुधानामिति । न सङ्गौ रिपुभिः प्राप्यौ गतिपौरुषौ येषां तत्सम्बोधनं निरायुधानां क्रमतां दाराः उपहसिष्यन्ति स दारोपहासः जीवतामपि भवतां घातो मरणमेव तेन विद्रवणमत्यन्तमनुचितमिति सूचितम् असङ्गगतिपौरुषा इति दारविशेषणं वा तत्पक्षे अर्थस्तु न सङ्गौ ज्ञातौ गतिपौरुषौ यैरिति ॥ २० ॥

गो० टी०–निरायुधानामिति । असङ्गगतिपौरुषाः अनेकप्रकाराः इति धातूनामनेकार्थत्वम् । निरायुधानां द्रवतां पलायमानानां यूयं दारास्तान् अपहसिष्यन्तीति सः अपहासः घातः मृतिः ॥ २० ॥

२१] ति० टी०–यस्मादीदृशं पराक्रमं त्यक्त्वा भीताः अतः प्राकृतवत्, ततोऽनार्याः स्वाभिद्रोहिणः खलु ॥ २१ ॥

रा० टी०–कुलेष्विति । महत्सु कुलेषु जातास्तवं भयात् प्राकृता इतर इव भयत्रस्तास्सन्तः क गच्छत ॥ २१ ॥

रा० टी०–अनार्या इति । यस्मादेतेनो वीर्यं त्यक्त्वा प्रणष्टा यस्मात् अनार्याः अतस्तदयः अहं पृथक् विकत्थनानीति । तत्र पूर्वस्मिन् काले जनसंसदि सोदग्राणि स्वस्वोत्साहोन्नतसहितानि हितानि स्वामिहितकारकत्वमूचकानि नि वो युष्माकं विकत्थनानि तानि क यातानि गतानि २२

गो० टी०–कुलेष्विति । सर्वे अयमिति शेषः विस्तीर्णेषु महत्सु प्रसरत्सु ॥ २१ ॥

गो० टी०–अनार्या इत्यर्थम् । यस्मात् भीताः प्रपलायकाः तस्मादनार्याः खलु ॥ २२ ॥

२२] ति० टी०–वो युष्माकं जनसंसदि यानि विकत्थनानि सोदग्राणि स्वस्योदग्रताप्रतिपादनसहितानि च स्वामिहितकरणि च कृतानि तानि सर्वाण्यधुनायुध्यतां क यातानि २२

गो० टी०–विकत्थनानीति । सोदग्राणि उद्गतायुक्तानि महान्ति भूयांसीत्यर्थः ॥ २२ ॥

२३] ति० टी०–यः सत्पुरुषैर्धिक्कृतो जीवति तस्य जीवनं धिगित्येवं भीरूणां वीरैः क्रियमाणाः प्रवादा धिक्काररूपाः श्रूयन्ते मरणादप्यधिकदुःखदाः, अतो भयं त्यज्यताम् । सत्पुरुषैर्जुष्टो मार्गो युद्धं सेव्यताम् ॥ २३ ॥

रा० टी०–भीरोरिति । यः सत्पुरुषैर्धिक्कृतस्तस्य जीवति तस्य भीरोः प्रवादाः नरकगतादिप्रतिपादकवचनानि श्रूयन्ते अतः सत्पुरुषैर्जुष्टो मार्गस्सेव्यताम् ॥ २३ ॥

गो० टी०–भीरुप्रवादा इति । यस्तु धिक्कृतो जीवति तद्विषये भीरुप्रवादाः भीरुत्वापवादाः श्रूयन्ते सत्पुरुषैः शूरैः जुष्टः सेवितः ॥ २४ ॥

२४] ति० टी०–हतो वा प्राप्स्यसि स्वर्गं जित्वा भोक्ष्यसे महीम् ' इत्याशयवानाह—शयामहे इति श्लोकद्वयेन । यदि दैवगत्या निहताः शयामहे तदा कुयोधिभिर्दुष्प्रापं ब्रह्मलोकं प्राप्नुयामः । वा शब्दो व्यवस्थितविकल्पे ॥ २४ ॥

रा० टी०–नन्वत्र स्थितावपि मरणमेव भविष्यतीति स्थित्येत्यत आह—शयामहे इति । वा यदि अल्पजीवितं अत एव निहताः वयं पृथिव्यां शयामहे तदा कुयोधिभिर्युद्धभीरुभिः दुष्प्रापं ब्रह्मलोकं प्राप्नुयामः ॥ २४ ॥

गो० टी०–सत्पुरुषजुष्टो मार्गः क इत्यपेक्षायामाह—शयामह इत्यादि । युद्धमरणं हि सत्पुरुषजुष्टो मार्ग इत्यर्थः समरानिवृत्तस्य पलायिनामपि मरणस्यावश्यंभावित्वप्रदर्शनार्थमल्पजीविता इत्युक्तम् समरानिवर्तिनां वीराणां तु मरणजीवनयोरुभयोरपि श्रेयस्करत्वं प्रतिपादयिष्यति दुष्प्रापमिति निहत्य निहत्य । जीवितमिति । वीरलोकस्य वीराणां योग्यं ब्रह्मलोकं तस्य वसु धनभूतं जीवितं भोक्ष्यामः ॥ २४ ॥

२५] ति० टी०–युद्धमरणे निहत्य निहत्य कीर्तिं प्राप्नुयामः । तत्रैवं द्वाभ्यामाह—निहता इति । निहतानामेवास्माकं वीरैः वीराणां प्राप्यस्य ब्रह्मलोकस्य भो

---

१ द्रवतामिति गो. पाठः । २ ह्यपेति गो. रा. पाठः । ३ क्षिप्ते गो. पाठः । ४ जीवन्तमिति गो. पाठः । ५ [illegible] गो. पाठः । ६ तदावे इति गो. पाठः । ७ महान्तिपदि गो. पाठः । ९ अपेक्षे गो. पाठः । [illegible] ११ सामिति गो. पाठः । १२ जीवितमिति गो. पाठः ।

अद्यैव तं गमिष्यामि देशं यत्रानुजो मम । नहि भ्रातॄन्समुत्सृज्य क्षणं जीवितुमुत्सहे ॥ १९ ॥
देवा हि मां हसिष्यन्ति दृष्ट्वा पूर्वोपकारिणम् । कथमिन्द्रं जयिष्यामि कुम्भकर्णे हते त्वयि ॥ २० ॥
तदिदं मामनुप्राप्तं विभीषणवचः शुभम् । यदज्ञानान्मया तस्य न गृहीतं महात्मनः ॥ २१ ॥
विभीषणवचस्तावत्कुम्भकर्णप्रहस्तयोः । विनाशोऽयं समुत्पन्नो मां व्रीडयति दारुणः ॥ २२ ॥
तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः । यन्मया धार्मिकः श्रीमान्स निरस्तो विभीषणः ॥ २३ ॥
इति बहुविधमाकुलान्तरात्मा कृपणमतीव विलप्य कुम्भकर्णम् ।
न्यपतदपि दशाननो भृशार्तस्तमनुजमिन्द्ररिपुं हतं विदित्वा ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ।

ततोऽतिकायन्तं रावणं त्रिशिरा नाम तनयो गो स्वोत्तरीयते त्रिभुवनस्याप्येकाकी व्याप्तो भवान् किमन्यैः, प्राकृतवद्दीनवत्सामान्यं साम्प्रतमेतत्तिष्ठ त्वमहमेवशत्रुमुद्वरिष्यामीत्युवाच ततस्त्रिशिरायाधिकायत्र देवान्तकनरान्तकौ महोदरमहापार्श्वौ तद्रक्षणाय रावणप्रेषितौ मत्तयुद्धोन्मत्तौचेति योद्धुं निर्गतास्तत्रनरान्तकः मुतुमुले युद्धान्तेऽङ्गदेन यमपुरातिथीकृतः ।

एवं विलपमानस्य रावणस्य दुरात्मनः । श्रुत्वा शोकाभिभूतस्य त्रिशिरा वाक्यमब्रवीत् १ ॥
एवमेव महावीर्यो हतो नस्तातमध्यमः । न तु सत्पुरुषा राजन्विलपन्ति यथा भवान् ॥ २ ॥

गो० टी०—यद्यहमिति । भ्रातृहन्तारं न हन्मि यदि तदा इदं व्यर्थजीवितम् श्रेयः न च नैवेत्यर्थः । किंतु मरणमेव श्रेयो नास्तीति संबन्धः ॥ १८ ॥

१९—२१] ति० टी०—भ्रातृनित्यनेन स्वस्यार्थोऽप्युक्तस्तथा इति ज्ञायते ॥ १९—२१ ॥

रा० टी०—अद्येति । यत्र मम अनुजः तं देशमद्यैव गमिष्यामि हि यतः भ्रातॄन् समुत्सृज्य जीवितुं नोत्सहे ॥ १९ ॥

रा० टी०—देवा इति । पूर्वोपकारिणं मां दृष्ट्वा देवा हसिष्यंति । नन्वहं ते पूर्वजेतव्या इत्यत आह इंद्रं कथं जयिष्यामि जेष्यामि ॥ २० ॥

रा० टी०—तदिति । यत् यस्मात् शुभं विभीषणवचोऽतानात् अनिश्चयात् मया न गृहीतं स्वीकृतं तत्तस्मात् महात्मनस्तस्योक्तमिति शेषः इदं दुःखं मामनुप्राप्तम् ॥ २१ ॥

गो० टी०—अद्यैवेति । भ्रातृनिति बहुवचनं पूजार्थम् ॥ २१ ॥

२२] ति० टी०—यावद्यदारभ्य कुम्भकर्णप्रहस्तयोर्दारुणोऽयं विनाश उत्पन्नस्तावत्तदारभ्य विभीषणवचो मां व्रीडयतीत्यर्थः । इष्टं भ्रातृवचो न गृहीतमिति लज्जितोऽस्मीत्यर्थः ॥ २२ ॥

रा० टी०—विभीषणेति । यावत् यस्मिन् काले कुम्भकर्णप्रहस्तयोः अयं विनाशस्समुत्पन्नः तावत्कालादारभ्य विभीषणवचः मां व्रीडयति ॥ २२ ॥

गो० टी०—विभीषणेति । कुम्भकर्णप्रहस्तयोर्योदारुणो विनाशः यावत् यदा समुत्पन्नः तत आरभ्य विभीषणवचो मां पीडयति पीडयतीत्यर्थः ॥ २२—२४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

२३—२४] ति० टी०—अपि च धार्मिकस्य निष्कामस्य फलमिदमित्याह—तस्यायमित्यादि ॥ २३ ॥ २४ ॥

इति श्रीरामायणे श्रीमत्यां रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डव्याख्यानेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

रा० टी०—तस्येति । यस्माद्धेतोः मया विभीषणो निरस्तः तस्मात् मम शोकदः तस्य निरासकरणरूपस्य कर्मणः विपाकः फलं मया प्राप्तः ॥ २३ ॥

रा० टी०—इतीति । इन्द्ररिपुमनुजं हतं विलप्य मृशार्तो दशाननः इति अनेन प्रकारेण बहुविधमतीव विलप्य न्यपतत् २४

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतिलकाख्ये युद्धकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

१] ति० टी०—एवमिति । विलपमानस्य विलप्य विलापमिति शेषः ॥ १ ॥

रा० टी०—रावणविलापानन्तरकालिकं प्रस्तौति—एवमित्यादिभिः । एवं विलपमानस्य रावणस्य वाक्यं श्रुत्वा त्रिशिरा अब्रवीत् ॥ १ ॥

गो० टी०—अथातिकायनिर्गमः—एवमित्यादि ॥ १ ॥

२] ति० टी०—एवमेव देवदानवबधेन कालाद्विप्रसिद्ध इत्यादुक्तप्रकारेण महावीर्यो हतः । देवादिति शेषः । सत्पुरुषाः श्रेष्ठाः ॥ २ ॥

रा० टी०—तदाकारमाह—एवमित्यादिभिः । महावीर्यः नोऽस्माकं तातमध्यमः हतः इत्येवमेव अत्र संशयो नास्तीत्यर्थः । तथापि भवानित्र सत्पुरुषा न विलपन्ति ॥ २ ॥

१ यावदिति गो. रा. पा. ।

नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो । स कस्मात्प्राकृत इव शोचस्यात्मानमीदृशम् ॥ ३ ॥
ब्रह्मदत्तास्ति ते शक्तिः कवचं सायको धनुः । सहस्रखरसंयुक्तो रथो मेघसमस्वनः ॥ ४ ॥
त्वयासकृद्धि शस्त्रेण विशस्ता देवदानवाः । स सर्वायुधसंपन्नो राघवं शास्तुमर्हसि ॥ ५ ॥
कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणे । उद्धरिष्यामि ते शत्रून्गरुडः पन्नगानिव ॥ ६ ॥
शम्बरो देवराजेन नरको विष्णुना यथा । तथाद्य शयिता रामो मया युधि निपातितः ॥ ७ ॥
श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः । पुनर्जातमिवात्मानं मन्यते कालचोदितः ॥ ८ ॥
श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ । अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः ॥ ९ ॥
ततोऽहमहमित्येवं गर्जन्तो नैर्ऋतर्षभाः । रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः ॥ १० ॥
अन्तरिक्षगताः सर्वे सर्वे मायाविशारदाः । सर्वे त्रिदशदर्पघ्नाः सर्वे समरदुर्मदाः ॥ ११ ॥
सर्वे सुबलसंपन्नाः सर्वे विस्तीर्णकीर्तयः । सर्वे समरमासाद्य न श्रूयन्ते स्म निर्जिताः ॥ १२ ॥
देवैरपि सगन्धर्वैः सकिंनरमहोरगैः । सर्वेऽस्त्रविदुषो वीराः सर्वे युद्धविशारदाः ॥
सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा । ॥ १३ ॥

गो० टी०—एवमिति । तातमध्यमः तातेषु मध्यमः मध्यमपितृव्यः । एवमेव महावीर्यः त्वदुक्तप्रकारेणैव महावीर्यः इत. देवादिति शेषः ॥ २ ॥

३–४] ति० टी०—ईदृशं त्रैलोक्यविजयसमर्थम् । शोचसि शोकस्थानं करोषि ॥ ३ ॥ ४ ॥

रा० टी०—शोकस्यानुचितत्वमाह—नूनमिति । यस्त्वं त्रिभुवनस्यापि विजय इति शेषः । पर्याप्तः स त्वं प्राकृत इव आत्मानं कस्मात् शोचसि ॥ ३ ॥

गो० टी०—नूनमिति । ईदृशमिति शोककियाविशेषणम् आत्मानम् उद्दिश्येति शेषः ॥ ३ ॥

रा० टी०—ब्रह्मेति । ब्रह्मदत्ता शक्तिप्रभृतिस्तेऽस्ति अतेन तव पराजयो न भविष्यतीति सन्दितम् ॥ ४ ॥

गो० टी०—ब्रह्मदत्तेत्यादिश्लोकद्वयमेकान्वयम् । विशस्तेण विशस्तेन ॥ ४–६ ॥

५–६] ति० टी०—असकृत्त्वया विशस्ता इत्यन्वयः । 'विषस्ताः' इति पाठे विषण्णिता इत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०—त्वयेति । विशस्तेण शस्त्ररहितेनापि येन त्वया असकृद्धि हतारं देवदानवाः विशस्ताः विहिंसिताः स त्वं राघवं शास्तुमर्हसि ॥ ५ ॥

रा० टी०—कामिति । हे महाराज त्वं कामं यथेष्टं तिष्ठ अहं रणे गमिष्यामि ते शत्रून् उद्धरिष्यामि हनिष्यामि ॥ ६ ॥

७] ति० टी०—नरको विष्णुनेति । अयं सिंहिकायां विप्रक्षत्रियो नरको भौमाज्जरकात्कृष्णहतादन्य इति नीर्थः ॥७॥

रा० टी०—शम्बर इति । देवराजेन शम्बरो यथा निपातितः तथाहं मया निपातितो रामः शयिता ॥ ७ ॥

गो० टी०—शम्बर इति । नरकोऽत्र सिंहिकायां विप्रक्षत्रियेषु जातेषु वातापिप्रमुखेष्वन्यतमः । वातापिर्नमुचिश्चैव इत्वलः सुमरस्तथा । अन्धको नरकश्चैव कालनाभस्तथैव चेत्युक्तेः । न तु कृष्णहतो भसतो नरकासुरः । तस्य वाल्मीकिप्रबन्धनिर्माणकाले असंजातत्वात् ॥ ७ ॥ ८ ॥

८–१०] ति० टी०—पुनर्जातमिवात्मानं मन्यते । त्रिशिरसो वचनमात्रेण संतुष्टो बभूव । ननु कुम्भकर्णसाध्येऽर्थे कथं रावणस्य तस्मात्तत्रयप्रत्याशया संतोषस्तत्राह—कालचोदित इति । तत्राशप्रद्वनकालात्मकभगवत्प्रेरणया पुनस्तस्य युद्धवुद्ध्यनुपरम इत्यर्थः ॥ ८—१० ॥

रा० टी०—श्रुत्वेति । रावणो रोदनकर्ता रावणः त्रिशिरसो वाक्यं श्रुत्वा आत्मानं पुनर्जातमिव मन्यते ॥ ८ ॥

रा० टी०—श्रुत्वेति । देवान्तकादयः युद्धहर्षिता बभूवुः॥९॥

रा० टी०—तत इति । ततः युद्धहर्षादेतोः शक्रतुल्यपराक्रमत्वादिविशिष्टाः रावणस्य सुताः नैर्ऋतर्षभाः अहमेव गमिष्यामीत्यहमेवगमिष्यामीति गर्जन्तो बभूवुरिति शेषः । सार्द्धश्लोकचतुष्टयमेकान्वयि ॥ १०–१३ ॥

गो० टी०—श्रुत्वा त्रिशिरस इत्यादि । त्रिशिरसो वचनं स्वेषामपि तुल्यत्वादेवान्तकादयोपि युद्धोद्युक्ता बभूवुरित्यर्थः ॥ ९ ॥ १० ॥

११] ति० टी०—अन्तरिक्षे गतं गमनं येषां ते ॥ ११ ॥

गो० टी०—अन्तरिक्षेति । अन्तरिक्षे गतं गमनं येषां तेऽन्तरिक्षगताः ॥ ११ ॥

१२] ति० टी०—विस्तीर्णकीर्तयो विशालकीर्तयः ॥१२॥

गो० टी०—सर्वे इत्यादि । देवादिभिः सह समरमासाद्य पराजिता न श्रूयन्त इत्यन्वयः ॥ १२ ॥

१३] ति० टी०—प्रवरविज्ञानाः श्रेष्ठज्ञानवन्तः ॥ १३ ॥

---

१ स्वनो महानिति गो. पा. । २ रणामेति गो. पाठः । ३ चरेणेति गो. पाठः । ४ पराजित्ता इति गो. पाठः ।

समुत्पाट्य चिक्षेप कुम्भकर्णाय वानरः । तमप्राप्य महाकायं तस्य सैन्येऽपतत्तदा ॥ १० ॥
दीप्तान्गजांश्चापि रथांश्चापि गजोत्तमान् । तानि चान्यानि रक्षांसि एवं चान्यद्विरः शिरः ॥ ११ ॥
शैलवेगेनाभिहतं हताश्वं हतसारथिम् । रक्षसां रुधिरक्लिन्नं बभूवायोधनं महत् ॥ १२ ॥
नो वानरेन्द्राणां शरैः कालान्तकोपमैः । शिरांसि नर्दतां[11] जह्रुः सहसा भीमनिःस्वनाः ॥ १३ ॥
राश्च महात्मानः समुत्पाट्य महाद्रुमान् । रथानश्वान्गजानुष्ट्रान्राक्षसानभ्यसूदयन् ॥ १४ ॥
पान्शैलशृङ्गाणि शिलाश्च विविधान्द्रुमान् । वर्षं कुम्भकर्णस्य शिरस्यम्बरमार्दितः ॥ १५ ॥
ने पर्वतशृङ्गाणि शूलेन स विभेद ह । बभञ्ज वृक्षवर्षं च कुम्भकर्णो महाबलः ॥ १६ ॥

ततो हरीणां तदनीकमुग्रं दुद्राव शूलं निशितं प्रगृह्य ।
तस्थौ स तस्यापततः पुरस्तान्महीधराग्रं हनुमान्प्रगृह्य ॥ ॥ १७ ॥
स कुम्भकर्णं कुपितो जघान वेगेन शैलोत्तमभीमकायम् ।
[12]संचुक्षुभे तेन तदाभिभूतो मेदार्द्रगात्रो रुधिरावसिक्तः ॥ ॥ १८ ॥
स शूलमाविध्य तडित्पिकाशं गिरेर्यथा प्रज्वलितोग्रशृङ्गम् ।
बाह्वन्तरे मारुतिमाजघान गुहोज्वलं क्रौञ्चमिवोग्रशक्त्या ॥ ॥ १९ ॥

---

० टी०—तत इति । विशेषेण लक्ष्यत इति विलक्ष्यः । गिरिशृङ्गाभं गिरिशृङ्गवद्दृश्यतम् ॥ ९ ॥

] ति० टी०—तमप्राप्य तं कुम्भकर्णम् । तस्य कुम्भसैन्ये ॥ १० ॥

० टी०—तमिति । वानरो द्विविदः तं पर्वतं समुत्पाप्य कुम्भकर्णाय चिक्षेप शैलस्तु तं कुम्भकर्णमप्राप्तस्तत्सैन्ये न्यपतत् ॥ १० ॥

० टी०—तमिति । तं कुम्भकर्णं समुत्पाट्य मर्मापमाकुम्भकर्णस्य कुम्भकर्णाय ॥ १० ॥

—१२] ति० टी०—तानि प्रसिद्धानि च रक्षांस्यादिकं गिरेः शिरः शृङ्गं चिक्षेप ॥ ११ ॥ १२ ॥

० टी०—ममर्देति । नगोत्तमः अश्वादीन् तानि ममर्दी । रक्षांसि च ममर्द अन्यानि रक्षांस्युद्दिश्य गिरेरन्यपुनराहवे ॥ ११ ॥

० टी०—ममर्देत्यादि त्रिपादश्लोकः । तानि प्रसिद्धानि ममर्देति पूर्वेणान्वयः । पुनश्चेति पादश्लोकः । अन्यतो चिक्षेपेति योज्यम् ॥ ११ ॥

०—तदिति । शैलवेगेन अभिहतमभिहननं यस्मिन् क्षसां रुधिरक्लिन्नमायोधनं महद्बभूव ॥ १२ ॥

०—तदिति । तच्छैलशृङ्गाभिहतम् अनन्तरप्रभिहतसैन्यम् । आयोधनं युद्धम् ॥ १२ ॥

९] ति० टी०—रक्षिणो राक्षसाः हरीणांवानरेन्द्राणां ९ ॥ १३—१६ ॥

रा० टी०—रक्षिण इति । वानरेंद्राणां रक्षिणः शरैर्नर्दतां राक्षसानां शिरांसि जह्रुः ॥ १३ ॥

गो० टी०—रक्षिण इति । कालान्तकः प्रलयकालस्थः १

रा० टी०—वानरा इति । वानराः स्थादीन् अश्वस दयन् ॥ १४ ॥

रा० टी०—हनूमानिति । अम्बरमार्गिणो हनुमा कुम्भकर्णस्य शिरसि शैलशृङ्गादीनि वर्षं ॥ १५ ॥

रा० टी०—तामीति । स कुम्भकर्णः पर्वतशृङ्गाणि विभे वृक्षवर्षं च बभञ्ज ॥ १६ ॥

गो० टी०—वानराश्चेति । अभ्यसूदयन् अघ्नन् ॥ १४ ॥

१७] ति० टी०—हरीणामनीकं सैन्यं । तस्य कुम्भकर्णस्य पुरस्तात् ॥ १७ ॥

रा० टी०—तत इति । कुम्भकर्णः शूलं प्रगृह्य हरीणाम् नीकं दुद्राव आपततः तस्य कुम्भकर्णस्य पुरस्तात् अग्रे महीधराग्रं प्रगृह्य हनुमान् तस्थौ ॥ १७ ॥

गो० टी०—तत इति । दुद्राव द्रावयामास ॥ १७ ॥

१८—१९] ति० टी०—तेन हनुमन्मुक्तशिलाशृङ्गेण संचुक्षुभे ॥ १८ ॥ १९ ॥

रा० टी०—स इति । कुपितस्तन् हनुमान् कुम्भकर्ण जघान तेन हननेन अभिभूतः पराभूतः अत एव मेदार्द्रगात्रः कुम्भकर्णः संचुक्षुभे ॥ १८ ॥

गो० टी०—स इति । मेदार्द्रत्वेन संक्षिप्तगात्रः ॥ १८ ॥

रा० टी०—स इति । स कुम्भकर्णः गिरेः प्रज्वलितग्रो

---

१ शैलेति गो. रा. पाठः । २ कर्णेति गो. पाठः । ३ अभात इति गो. पाठः । ४ व्याप इति रा. पाठः । ५ प्रसंक्षेपेणेति [illegible] । ६ पाठः । ७ जेभेत गो. पाठः । ८ नगोत्तम इति गो. रा. पाठः । ९ पुनश्चेति गो. पाठः । १० कृतेति गो. पाठः । ११ [illegible] । १२ संक्षिप्तेति गो. पाठः । १३ [illegible] । १४ जघ्नेऽस्त्रेति गो. पाठः । १५ [illegible] । १६ क्रमेति गो. [illegible]

स शूलनिर्भिन्नमहाभुजान्तरः प्रविह्वलः शोणितमुद्वमन्मुहुः ।
ननाद भीमं हनुमान्महाहवे युगान्तमेघस्तनितस्वनोपमम् ॥ ॥ २० ॥
ततो विनेदुः सहसा प्रहृष्टा रक्षोगणास्तं व्यथितं समीक्ष्य ।
प्लवंगमास्तु व्यथिता भयार्ताः प्रदुद्रुवुः संयति कुम्भकर्णात् ॥ ॥ २१ ॥
ततस्तु नीलो बलवान्पर्यवस्थापयन्बलम् । प्रविचिक्षेप शैलाग्रं कुम्भकर्णाय धीमते ॥ २२ ॥
तदापतन्तं संप्रेक्ष्य मुष्टिनाभिजघान ह । मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत ॥
प्रविस्फुलिङ्गं सज्वालं निपपात महीतले ॥ ॥ २३ ॥
ऋषभः शरभो नीलो गवाक्षो गन्धमादनः । पञ्च वानरशार्दूलाः कुम्भकर्णमुपाद्रवन् ॥ २४ ॥
शैलैर्द्रुमैस्तलैः पादैर्मुष्टिभिश्च महाबलाः । कुम्भकर्णं महाकायं निजघ्नुः सर्वतो युधि ॥ २५ ॥
स्पर्शानिव महाकायस्तान्वेदयानो न विव्यथे । ऋषभं तु महावेगं बाहुभ्यां परिषस्वजे ॥ २६ ॥
कुम्भकर्णभुजाभ्यां तु पीडितो वानरर्षभः । निपपातर्षभो भीमः प्रमुर्च्छागतशोणितः ॥ २७ ॥
मुष्टिना शरभं हत्वा जानुना नीलमाहवे । आजघान गवाक्षं तु तलेनेन्द्रारिपुस्तदा ॥ २८ ॥
पादेनाभ्याहनत्क्रुद्धस्त्वरसा गन्धमादनम् ।
दत्तप्रहारव्यथिता मुमुहुः शोणितोक्षिताः । निपेतुस्ते तु मेदिन्यां निकृत्ता इव किंशुकाः ॥ २९ ॥
तेषु वानरमुख्येषु पतितेषु महात्मसु । वानराणां सहस्राणि कुम्भकर्णं प्रदुद्रुवुः ॥ ३० ॥
तं शैलमिव शैलाभाः सर्वे तु प्लवगर्षभाः । समारुह्य समुत्पत्य ददंशुः प्लवगर्षभाः ॥ ३१ ॥
ते नखैर्दशनैश्चापि मुष्टिभिर्बाहुभिस्तथा । कुम्भकर्णं महाबाहुं निजघ्नुः प्लवगर्षभाः ॥ ३२ ॥

इमिव शलमाविध्य करतलेनापीड्य उरश्चकस्या मुहुः कौक्षलमिव मारुतिं बाल्यन्तरे आजघान ॥ १९ ॥

रा० टी०—स इति । आविध्य भ्रामयित्वा मुहुः स्कन्दः १९ २०–२५] ति० टी०—ननाद भीमम् । शूलाभिघातजरु- शेषः । युगान्ते मेघस्तनितस्य यः स्वनस्तद्रूपमम् ॥ २० ॥ २५ ॥

रा० टी०—स इति । शूलेन निर्भिन्नं महाभुजयोरन्तरं य अत एव प्रविह्वलो हनुमान् शोणितमुद्वमन् सन् युगान्- मेघस्तनितस्वनोपमं यथा ननाद तथा ननाद ॥ २० ॥

गो० टी०—स इति । प्रविह्वलः प्रमुह्यन् । युगान्तेति । स्तनितरूपो यः स्वनः तत्तुल्यमिति क्रिया- क्षेपणम् ॥ २० ॥

रा० टी०—तत इति । तं हनुमन्तं व्यथितं समीक्ष्य प्रा: रक्षोगणाः विनेदुः कुम्भकर्णात् भयार्ताः प्लवङ्गमास्तु द्रुवुः ॥ २१ ॥

गो० टी०—तत इति । कुम्भकर्णात् भयार्ता इत्यन्वयः । पति युद्धे ॥ २१ ॥

रा० टी०—तत इति । नीलः बलं पर्यवस्थापयन् सन् म्भकर्णाय शैलाग्रं प्रविचिक्षेप ॥ २२ ॥

गो० टी०—तत इति । पर्यवस्थापयन् बलमिति पर्या- नान् सन्निवेशयन्नित्यर्थः ॥ २२ ॥

रा० टी०—तदेति । आपतन्तं शैलाग्रं संप्रेक्ष्य मुष्टि भिजघान कुम्भकर्ण इति शेषः अत एव शैलाग्रं व्यशीर्यत अत ए महीतले निपपात सार्द्धश्लोक एकान्वयी ॥ २३

रा० टी०—ऋषभ इति । ऋषभादयः पञ्च कुम्भ द्रुपाद्रवन् ॥ २५ ॥

गो० टी०—तमापतन्तमिति । व्यशीर्यत शी मभूत् ॥ २३–२५ ॥

रा० टी०—शैलैरिति । शैलादिभिः कुम्भकर्णं निजघ्नुः

गो० टी०—शैलैरिति । पादैः प्रहारोपयतैः । सर्वतो क्षणे तृतीया ॥ २५ ॥

२६] ति० टी०—स्पर्शानिव मक्षादिस्पर्शानिव वेद जानन् ॥ २६ ॥

रा० टी०—स्पर्शानिति । तान् ऋषभादिकृतान् स्पर्शान् पुष्पमाक्षादिसंयोगानिव वेदयानो जानन् कुम विव्यथे ऋषभं तु बाहुभ्यां परिषस्वजे दृढं जघाहेत्य

गो० टी०—स्पर्शानिति । स्पर्शानिव खर मुखमर्दनानिव जानन्निव ॥ २६ ॥

२७–३२] ति० टी०—तमिति । प्रकर्षेण नु शोणितं वमन् [illegible]

१ मुखादिति गो० पाठः । २ नखैरिति गो० पाठः । ३ [illegible]

स तैर्वानरसैन्यस्तु विचितः पर्वतोपमैः । रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव ॥ ३३ ॥
बाहुभ्यां वानरान्सर्वान्मृदित्वा सो महाबलः । भक्षयामास संक्रुद्धो गरुडः पन्नगानिव ॥ ३४ ॥
प्रक्षिप्ताः कुम्भकर्णेन वक्त्रे पातालसंनिभे । नासापुटाभ्यां कर्णाभ्यां चैव वानराः ॥ ३५ ॥
भक्षयन्भृशसंक्रुद्धो हरीन्पर्वतसंनिभः । चचाल वानरानीकं सर्वतो राक्षसोत्तमः ॥ ३६ ॥
मांसशोणितसंक्लेदां कुर्वन्भूमिं स राक्षसः । चचार हरिसैन्येषु कालाग्निरिव मूर्च्छितः ॥ ३७ ॥
वज्रहस्तो यथा शक्रः पाशहस्त इवान्तकः । शूलहस्तो बभौ युद्धे कुम्भकर्णो महाबलः ॥ ३८ ॥
यथा शुष्काण्यरण्यानि ग्रीष्मे दहति पावकः । तथा वानरसैन्यानि कुम्भकर्णो ददाह सः ॥ ३९ ॥
ततस्ते वध्यमानास्तु हतयूथाः प्लवंगमाः । वानरा भयसंविग्ना विनेदुर्विक्लवैः स्वरैः ॥ ४० ॥
अनेकशो वध्यमानाः कुम्भकर्णेन वानराः । राघवं शरणं जग्मुर्व्यथिता भिन्नचेतसः ॥ ४१ ॥
प्रभग्नान्वानरान्दृष्ट्वा वज्रहस्तात्मजात्मजः । अभ्यधावत वेगेन कुम्भकर्णं महाहवे ॥ ४२ ॥
शैलशृङ्गं महद्गृह्य विनदन्सं मुहुर्मुहुः । वानरान्राक्षसान्सर्वान्कुम्भकर्णोऽदानुयान् ॥ ४३ ॥
चिक्षेप शैलशिखरं कुम्भकर्णस्य मूर्धनि । स तेनाभिहतो मूर्ध्नि शैलेनेन्द्रद्विषुन्मदा ॥ ४४ ॥
कुम्भकर्णः प्रजज्वाल क्रोधेन महता तदा । सोऽभ्यधावत वेगेन वालिपुत्रवधैषिणम् ॥ ४५ ॥
कुम्भकर्णो महानादस्त्रासयन्सर्ववानरान् । क्रुद्धं सशृङ्गे वै रोषादङ्गदे तु महाबलः ॥ ४६ ॥

रा० टी०-कुम्भकर्णेति । पतितोऽतएव प्रकर्षेण मुखादागतं शोणितं यस्य सः वानरर्षभः कपिश्रेष्ठः निपपात ॥ ३२ ॥

रा० टी०-मुष्टिनेति । इन्द्रद्विषः कुम्भकर्णस्य तलेन हतायाः क्षमाज्जातवान ॥ ३३ ॥

रा० टी०-दृष्टेति । इतेन प्रकर्षेण व्याप्तैः अत एव शोणितोक्षिताः ते शरभाद्यः विक्षताः किंशुका इव विभेदुः ३४

रा० टी०-तेष्विति । वानरमुख्येषु पतितेषु मत्ता वानराणां सहस्राणि प्रदुद्रुवुः ॥ ३५ ॥

गो० टी०-कुम्भकर्णेति । प्रेम्णि लेढः । श्लथात् वान्तशोणितः पपातेत्यन्वयः । "व्यवहिताश्च" इत्यपरसंज्ञया व्यवहितप्रयोगः । वान्तशोणितः उद्गीर्णरक्तः ॥ ३८-३१ ॥

रा० टी०-तमिति । शैलाभाः ये प्रकृष्टगर्भाः ते प्रकृष्टगर्भाः शैलमिव तं कुम्भकर्णं समारुह्य ददंशुः ॥ ३२ ॥

रा० टी०-तमिति । तं कुम्भकर्णं नखादिभिर्विचिक्षेपुः ३३

गो० टी०-तमिति । समारुह्य समुत्पत्य समुत्पत्येति क्रमः ॥ ३२ ॥ ३३ ॥

३३-३१] ति० टी०-विचितो व्याप्तः 'मूर्च्छितः' इति पाठान्तरम् । आत्मरुहैर्वृक्षैः ॥ ३३-४१ ॥

रा० टी०-स इति । वानरसहस्रैर्विचितो व्याप्तः पर्वतोपमः कुम्भकर्णः आत्मरुहैः तरुप्रभृतिभिः गिरिरिव रराज ॥ ३४ ॥

रा० टी०-बाहुभ्यामिति । स कुम्भकर्णः बाहुभ्यां वानरान् पृथक् भक्षयामास ॥ ३५ ॥

रा० टी०-प्रक्षिप्ता इति । कुम्भकर्णेन वक्त्रे प्रक्षिप्ताः वानराः नासापुटाभ्यां कर्णाभ्यां च निर्जग्मुः ३६ ॥

गो० टी०-स इति । भाषितव्याप्त आत्मरुहैः वृक्षैः ३३-३१

रा० टी०-भक्षयन्निति । भक्षयन् चचार । गजाणां चर्मवत्तैर्यथा ॥ ३७ ॥

रा० टी०-आसेति । भूमिं मांसशोणितसंक्लेदां कुर्वन् कुम्भकर्णः मूर्च्छितः प्रदृष्ट कालाग्निरिव हरिसैन्येषु चचार॥३७॥

रा० टी०-वज्रहस्त इति । वज्रहस्तः इव पूर्वं बभौ॥३८॥

गो० टी०-आसेति । वानरशोणितसंक्लेदां मांसशोणितसंक्लिन्नामित्यर्थः ॥ ३८ ॥ ३८ ॥

रा० टी०-यथेति । पावकः ग्रीष्मे यथा अरण्यानी व वानरसैन्यानि अनिर्दहत् निरदहत् ॥ ४० ॥

गो० टी०-यथेति । निर्निरदहत् गिरिरदहत् ॥ ४० ॥

रा० टी०-तत इति । वध्यमानाः वानराः विनेदुः [illegible] रैर्विनेदुः ॥ ४१ ॥

रा० टी०-अनेकश इति । कुम्भकर्णेन वध्यमानाः अनेकशो वानराः राघवं शरणं जग्मुः ॥ ४२ ॥

रा० टी०-प्रभग्नानिति । वज्रहस्तात्मजस्य अङ्गदस्य आत्मजोऽङ्गदः वानरान् प्रभग्नान् दृष्ट्वा कुम्भकर्णमभ्यधावत ४३

गो० टी०-तत इति । विनायकाः विगतनायकाः ४२-४६

४२-४६] ति० टी०-वज्रहस्तात्मजस्य वालिनः पुत्रोऽङ्गदः ॥ ४२-४६ ॥

१ निर्दहत् इति गो. पाठः । २ गिरिरिति गो. पाठः । ३ भक्षयन्निति गो. पाठः । ४ विनिर्दहत् इति गो. निर्दहतीति च. रा. पाठः । ५ विनायका [illegible] ६ विनदन्निति गो. पाठः । ७ विनेदुरिति गो. पाठः । ८ इतीति गो. पाठः । ९ चेति गो. पाठः । १० मत्तवं गिरिभूतेन कुम्भकर्ण

[illegible] वलेवान्युद्धमार्गविशारदः । [illegible] वलवान्वीरपरिवृढः ॥ ४७ ॥
उत्पत्य चैनं तरसा तलेनोरस्यताडयत् । स तेनाभिहतः कोपप्रसमुद्रोद्वेलोपमः ॥ ४८ ॥
स लब्धसंज्ञोऽतिबलो मुष्टिं संगृह्य राक्षसः । अपहासेन चिक्षेप विसंज्ञः स पपात ह ॥ ४९ ॥
तस्मिन्नुपरतशार्दूले विसंज्ञे पतिते भुवि । तच्छूलं समुपादाय सुग्रीवस्त्वभिदुद्रुवे ॥ ५० ॥
तमापतन्तं संप्रेक्ष्य कुम्भकर्णं महाबलम् । उत्पपात तदा वीरः सुग्रीवो वानराधिपः ॥ ५१ ॥
स पर्वताग्रमुत्क्षिप्य समाविध्य महाबलः । अभिदुद्राव वेगेन कुम्भकर्णं महाबलम् ॥ ५२ ॥
तमापतन्तं संप्रेक्ष्य कुम्भकर्णः प्लवंगमम् । तस्थौ विदृत्तसर्वाङ्गो वानरेन्द्रस्य संमुखः ॥ ५३ ॥
कपिशोणितादिग्धाङ्गं भक्षयन्तं महाकपीन् । कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत् ॥ ५४ ॥
पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम् । भक्षितानि च सैन्यानि प्राप्तं तेपरमं यशः ॥ ५५ ॥
त्यज तद्वानरानीकं प्राकृतैः किं करिष्यसि । सहस्वैकं निपातं मे पर्वतस्यास्य राक्षस ॥ ५६ ॥
तद्वाक्यं हरिराजस्य सत्यधैर्यसमन्वितम् । श्रुत्वा राक्षसशार्दूलः कुम्भकर्णोऽब्रवीद्वचः ॥ ५७ ॥
प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः । धृतिपौरुषसंपन्नस्तस्मात्त्वं जहि वानर ॥ ५८ ॥

रा० टी०—शैलेति । महच्छैलशृङ्गं गृह्य गृहीत्वा सोऽङ्गदश्चैत्यशिखरं कुम्भकर्णस्य मूर्द्धनि चिक्षेप साईश्लोक एकान्वयी ४४

रा० टी०—स इति । तेनाङ्गदेन कपी तेन शैलेन अभिहतः कुम्भकर्णः क्रोधेन प्रजज्वाल ॥ ४५ ॥

रा० टी०—स इति । महानादः कुम्भकर्णो वालिपुत्रमभ्यधावत् ॥ ४६ ॥

रा० टी०—शूलमिति । महाबलः कुम्भकर्णः अङ्गदं शूलं प्रजे अहं पृथक् ॥ ४७ ॥

४७—५७] ति०टी०—तदा पतन्तम् । पुंस्त्वमार्षम् ४७—५७

रा० टी०—तदेति । बलवान् [illegible] आपतन्तं शूलं लाघवात् मोघयामास वञ्चयामास ॥ ४८ ॥

रा० टी०—उत्पत्येति । सोऽङ्गदः उत्पत्य एनं कुम्भकर्णं तलेन उरसि अताडयत् तेन तलेनाभिहतोऽचलोपमः कुम्भकर्णः पपात ॥ ४९ ॥

रा० टी०—स इति । लब्धसंज्ञस्य कुम्भकर्णः मुष्टिं संगृह्य चिक्षेप अत एव विसंज्ञसंज्ञारहितः सोऽङ्गदः पपात ॥ ५० ॥

रा० टी०—तस्मिन्निति । तस्मिन्नृक्षे भुवि पतिते सति शूलं समुपादाय सुग्रीवोऽभिदुद्रुवे कुम्भकर्णं इति शेषः ॥ ५१ ॥

रा० टी०—तमिति । आपतन्तं कुम्भकर्णं संप्रेक्ष्य सुग्रीवः उत्पपात ॥ ५२ ॥

रा० टी०—स इति । स सुग्रीवः पर्वताग्रमुत्क्षिप्य समाविध्य शूलं गृहीत्वा कुम्भकर्णमभिदुद्राव ॥ ५३ ॥

रा० टी०—तमिति । कुम्भकर्णः आपतन्तं प्लवङ्गमं संप्रेक्ष्य विदृत्तसर्वाङ्गस्तस्थौ ॥ ५४ ॥

रा० टी०—कपीति । कपीनां शोणितेन दिग्धं व्याप्तमङ्गं यस्य तं महाकपीन् भक्षयन्तं कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो ऽब्रवीत् ॥ ५५ ॥

रा० टी०—तदाकारमाह—पातिता इति । त्वया वीराः पातिताः सैन्यानि च भक्षितानि अत एव सुदुष्करं कर्म कृतमत एव परमं यशः ते त्वया प्राप्तं तस्मात्हेतोः वानरानीकं त्यज प्राकृतैः तत्करनैः किंकरिष्यसि मे मदृहीतस्य एकं केवलं निपातं सहस्व श्लोकद्वयमेकान्वयि ॥ ५६ ॥५७ ॥

रा० टी०—तदिति । हरिराजस्य वाक्यं श्रुत्वा कुम्भकर्णोऽब्रवीत् ॥ ५८ ॥

गो० टी०—तमिति । समुन्मुखः अभिमुखः ॥ ५४—५८ ॥

५८] ति० टी०—प्रजापतेः पौत्रश्चतुर्मुखजम्भणजनितः ऋक्षरजःपुत्रत्वात्सुग्रीवस्य ब्रह्मपौत्रत्वम् ॥ ५८ ॥

रा० टी०—तदाकारमाह—प्रजापतेरिति । यस्मात् ऋक्षरजःसुतः विजृम्भितचतुर्मुखजनितऋक्षरजसः पुत्रः अत एव प्रजापतेः पौत्रः अत एव धृतिपौरुषसम्पन्नस्त्वमसीति शेषः तस्मात्त्वं जहि ॥ ५९ ॥

गो० टी०—प्रजापतेरिति । इदमत्रैतिह्यमनुसंधेयम् । पुरा किल ब्रह्मणो जृम्भमाणस्य वदनाद्ऋक्षरजा नाम वानरी स कदाचित् पर्यटन् ब्रह्मलोकेऽप्सरोरूपकारिणि क्वचिच्छिवसरसि निमज्याप्सरोरूपमभजत् । तां दृष्ट्वा कामोद्रिक्तादित्यौ हस्तेन युगपद्गृहीताम् । तत्रान्तरे तयोः शुक्रमिश्रं रेतोऽपतत् । तत्र द्वौ कुमारावभवताम् । वाले पतत्र ऋक्षीवायां पतनात् सुग्रीवः । तं दृष्ट्वा प्रहस्य ब्रह्मा अप्सरः रूपधारिणम् ऋक्षरजसं यथापूर्वरूपप्राप्तावे कुमारौ गृहीत्वा तस्मिन् वानररूपकारिणि सरसि निमज्यात्मरूपौ । [illegible] तथा कृत्वा कुमाराभ्यां सह वानररूपमजत्सरसः [illegible]

१ तमिति गो. पाठः । २ सुग्रीवेति गो. पाठः । ३ मोघचक्षासेति गो. पाठः । ४ वलवान्वीरपरिवृढ इति गो. पाठः । ५ महाकपीरिति गो. पाठः । ६ समुन्मुख इति गो. पाठः । ७ ऋक्षरजसमिति गो. पाठः । [illegible]

स कुम्भकर्णस्य वचो निशम्य व्याविध्य शैलं सहसा मुमोच ।
तेनाजघानोरसि कुम्भकर्णं शैलेन वज्राशनिसंनिभेन ॥ ॥ ६९ ॥
तच्छैलशृङ्गं सहसा विभिन्नं भुजान्तरे तस्य तदा विशाले ।
ततो विषेदुः सहसा प्लवंगा रक्षोगणाश्चापि मुदा विनेदुः ॥ ॥ ६० ॥
स शैलशृङ्गाभिहतश्चुकोप ननाद रोषाच्च विधूय वक्त्रम् ।
व्याविध्य शूलं च तडित्प्रकाशं चिक्षेप हैयङ्गवपतेर्वधाय ॥ ॥ ६१ ॥
तत्कुम्भकर्णस्य भुजप्रमुक्तं शूलं क्षितिं काञ्चनदामभूषितम् ।
क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां बभञ्ज वेगेन सुतोऽनिलस्य ॥ ॥ ६२ ॥
कृतं भारसहस्रस्य शूलं कालायसं महत् । बभञ्ज जानुभागेन सहसा हनुमान् प्लवंगमः ॥ ६३ ॥
शूलं भग्नं हनुमता दृष्ट्वा वानरयूथपैः । दृष्ट्वा ननाद बलवान् कर्मण्यापि दृढव्रते ॥ ६४ ॥
बभूवाथ परित्रस्तो राक्षसो विमुखोऽभवत् । सिद्धनादं च ते चक्रुः प्रहृष्टा वनगोचराः ॥
मारुतिं पूजयांचक्रुर्दृष्ट्वा शूलं तथागतम् ॥ ॥ ६५ ॥
स तत्तथा भग्नमवेक्ष्य शूलं चुकोप रक्षोधिपनिर्दहात्मा ।
उत्पाट्य लङ्कामलयाग्रशृङ्गं जघान मूर्ध्नीभमुपेत्य तेन ॥ ॥ ६६ ॥
स शैलशृङ्गाभिहतो विसंज्ञः पपात भूमौ युधि वानरेन्द्रः ।
तं वीक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥ ॥ ६७ ॥

तालिमुखीवाविति । तदनेन पक्षरेण सुग्रीवः पलायनेन पौरुषक्षयजनः पुरुषः । कादयपात् प्रलापनेत्यिवान् विलापनः छदीन इत्यर्थः ॥ ६१ ॥

५२-६५] ति० टी०-व्याविध्य संतोल्य ॥ ५९-६२ ॥

रा० टी०-स इति । स क्रुद्धः कुम्भकर्णस्य वधो निशम्य व्याविद्धशैलं मुहुर्मुहुर्निरीक्ष्य समोच्च तेन शैलेन कुम्भकर्णमुरसि आजघान ॥ ६० ॥

रा० टी०-तदिति । तस्य कुम्भकर्णस्य भुजान्तरे वक्षसि शैलशृङ्गं विभिन्नं तत्प्रहारेणेत्यर्थः प्लवङ्गाः वानराः विषेदुः खेदं गताः रक्षोगणाः मुदा विनेदुश्च ॥ ६१ ॥

रा० टी०-स इति । शैलशृङ्गाभिहतः स कुम्भकर्णः चुकोप अतएव ननाद च व्याविद्धं विशेषेण आविद्धं हिंसा परायत्तत्वं शूलं चिक्षेप च ॥ ६२ ॥

रा० टी०-तदिति । कुम्भकर्णस्य भुजात् प्रमुक्तं प्रक्षिप्तं शूलमनिलस्य सुतो हनुमान् वेगेन समुत्पत्य दोर्भ्यां निगृह्य बभञ्ज ॥ ६३ ॥

गो० टी०-स इति । व्याविध्य तोलयित्वा ॥ ६०-६३ ॥

गो० टी०-तदेव भङ्गान्तरेणाह-कृतमिति । भारसहस्रस्य भारसहस्रेण निर्मितं शूलं जानुभागेन्य प्रहृष्टः प्लवङ्गमो हनुमान् बभञ्ज ॥ ६३ ॥

गो० टी०-कृतमिति । भारसहस्रेण भारसहस्रपरिमाणेन लोहेन घटितमित्यर्थः ॥ ६३ ॥

रा० टी०-शूलमिति । तमसा भग्नं शूलं दृष्ट्वा वानरयूथपैः सहितो ननाद हनुमांश्च ॥ ६४ ॥

रा० टी०-बभूवेति । राक्षसः तत्र स्थितः विभुः उदासीनमुखोऽभवत् वनगोचराः वानराः सिद्धनादं चक्रुः मारुतिं पूजयांचक्रुश्च । साहंकोऽहं एकाकी यो

गो० टी०-शूलमिति । सर्वतः सर्वस्मात् प्रदेशात् आजगाम ॥ ६१ ॥ ६५ ॥

६६-६७] ति० टी०-लङ्कामलयाद्रुत्यमाणपर्वतित्वात् ॥ ६६ ॥ ६७ ॥

रा० टी०-स इति । स कुम्भकर्णः शूलं तथा भग्नमवेक्ष्य चुकोप अत एव लङ्कामलयात् लङ्कासुत्पाट्य तेन अधान ॥ ६

रा० टी०-स इति । शैलशृङ्गाभिहतः अत एव विसं वानरेन्द्रः पपात । भूमौ पतितं तं दृष्ट्वा वीक्ष्य प्रहृष्टा या यातानाः नेदुः ॥ ६८ ॥

गो० टी०-स इति । छद्मीनमुपेत्य तेन स्वकृत्य अथवा त्रिकूटशिखरस्थलङ्कागोपुरं क्षिप्त्वा गृध्नतः कुम्भकर्णस्य प्र मान्तरस्थमलङ्कामलयपर्वतोत्पाटनं कथमुपपद्यत इति चेत्

१ विषेदुरिति गो. पाठः । २ ननादेति गो. पाठः । ३ त्रासविह्वलेति गो. पाठः । ४ शूलमिति गो. पाठः । ५ जानुमीति गो. पाठः । ६ विक्षेपेति रा. पाठः । ७ विसंज्ञमिति गो. पाठः । ८ विसंज्ञमिति रा. पाठः । ९ मेघोति गो. पाठः । १० सहसा ज

सैन्यमुपेत्याद्भुतघोरवीर्यं स कुम्भकर्णं युधि वानरेन्द्रम् ।
जहार सुग्रीवमभिप्रमृद्य यथानिलो मेघमिवं प्रचण्डः ॥ ॥ ६८ ॥
स तं महामेघनिकाशरूपमुत्पाट्य गच्छन्युधि कुम्भकर्णः ।
रराज मेरुप्रतिमानरूपो मेरुर्यथा द्वयुच्छ्रितवद्भृङ्गः ॥ ॥ ६९ ॥
ततस्तमादाय जगाम वीरः संस्तूयमानो युधि राक्षसेन्द्रैः ।
शृण्वन्निनादं त्रिदिवालयानां प्लवंगराजग्रहविस्मितानाम् ॥ ॥ ७० ॥
ततस्तमादाय तदा स मेने हरीन्द्रमिन्द्रोपममिन्द्रवीर्यः ।
अस्मिन्हते सर्वमिदं हतं स्यात्सराघवं सैन्यमितीन्द्रशत्रुः ॥ ॥ ७१ ॥

विद्रुतां वाहिनीं दृष्ट्वा वानराणामितस्ततः । कुम्भकर्णेन सुग्रीवं गृहीतं चापि वानरम् ॥ ७२ ॥
हनूमांश्चिन्तयामास पतिमान्मारुतात्मजः । एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत् ॥ ७३ ॥
यद्धि न्याय्यं मया कर्तुं तत्करिष्याम्यसंशयम् । भूत्वा पर्वतसंकाशो नाशयिष्यामि राक्षसम् ॥ ७४ ॥
मया हते संयति कुम्भकर्णे महाबले मुष्टिविशीर्णदेहे ।
विमोचिते वानरपार्थिवे च भवन्तु हृष्टाः प्लवगाः समग्राः ॥ ॥ ७५ ॥
अथवा स्वयमप्येष मोक्षं प्राप्स्यति वानरः । गृहीतोऽयं यदि भवद्भिरुग्रैः सासुरोरगैः ॥ ७६ ॥

पुनरुत्थानशरीरत्वात् गोप. । उद्धामलयकल्पेन त्रिकूटं वोपयेते ॥ ६७-७० ॥

६८] ति० टी०-अभिमृद्य कक्षादेर्दृढं कृत्वा जहार सैन्यव्यापादनाय निनाय ॥ ६८ ॥

रा० टी०-सामिति । अद्भुतं घोरं वीर्यं यस्य तं सुग्रीवमिलो मेघमिव अभिमृद्य कुम्भकर्णो जहार ॥ ६८ ॥

६९] ति० टी०-विशेषणान्युच्छ्रितान्यत्यर्थानि घोराणि शृङ्गाणि यस्य सः ॥ ६९ ॥

रा० टी०-स इति । महामेघनिकाशरूपं तं सुग्रीवमुत्पाट्य मुत्थाय गच्छन् मेरुप्रतिमानरूपः कुम्भकर्णः द्वयुच्छ्रितानि वस्तुमानि घोरश्रृंगाणि यस्य स मेरुरिव रराज ॥ ७० ॥

गो० टी०-स इति । अन्युच्छ्रितम् उन्नतम् । स्वाराक्षसादध्याय प्रथमं मेरूपादानम् । द्वितीये तु सुग्रीवधारणोत्तरकालादध्याय ॥ ७० ॥

७०-७२] ति० टी०-तत्सत्वोपाय जगामेति लङ्कामिति शेषः । त्रिदिवालयानां निनादं दुःखजं शृण्वन्नु ॥७०-७५॥

रा० टी०-तत इति । संस्तूयमानो राक्षसेन्द्रैः प्लवङ्गराजग्रहेण विस्मितानां त्रिदिवालयानां निनादं शृण्वन् सन् जगाम ॥ ७२ ॥

गो० टी०-तत इति । उत्पाट्य अद्भुत्य त्रिदशालयानां स्वर्गिणाम् ॥ ७१ ॥

रा० टी०-तत इति । इन्द्रशत्रुः कुम्भकर्णः हरीन्द्रं सुग्रीवं समादाय अस्मिन् हते सति सराघवमिदं सैन्यं हतं स्यादिति मेने ॥ ७० ॥

रा० टी०-विद्रुतामिति । कुम्भकर्णेन गृहीतं सुग्रीवं विद्रुतां वानराणां वाहिनीं च दृष्ट्वा हनुमान् चिन्तयामास । सार्द्धश्लोक एकान्वयी ॥ ७३ ॥

रा० टी०-तदाकारमाह—एवमिति । सुग्रीवे एवं गृहीते सति मया किं कर्तव्यं भवेत् । अहं पुनः ॥ ७२ ॥

रा० टी०-निश्चित्याह—यदिति । मया कर्तुं यन्न्याय्यं तत्करिष्यामि । न्याय्यमेवाह । पर्वतसंकाशो भूत्वा राक्षसं नाशयिष्यामि ॥ ७३ ॥

रा० टी०-मयेति । कुम्भकर्णे मया हते सति अत एव वानरपार्थिवे सति सुग्रीवे विमोचिते सति प्लवङ्गाः हृष्टास्तुष्टा भवन्तु ॥ ७५ ॥

गो० टी०-बलवान् कुम्भकर्णो युद्धे पतिनं सुग्रीवं किमर्थं हतवानित्यत्राह—ततस्तमादायेति ॥ ७२-७५ ॥

७६] ति० टी०-अथवेत्यादि वानरो वानरराजो महाबलत्वात्स्वयमेव कुम्भकर्णान्मोक्षं प्राप्स्यति । यदि न मोचयिष्यत्यात्मानं तदा मोचयितव्यो मयेति क्षणमात्रं प्रतीक्ष्य स्थितः । सासुरोरगैरपि गृहीतोऽपि यद्यं भवेत्तथापि महाबलत्वात्स्वयमेव मोक्षं प्राप्स्यति किं पुनरेनं राक्षसाय देयेति भावः ॥ ७६ ॥

रा० टी०-चिन्तयान्तरमाह—अथवेति । अयमेष [illegible]

---

१ सामिति गो. पाठः । २ मेघमतीति गो. पाठः । ३ अभीति गो. पाठः । ४ उच्छ्रितेति गो. पाठः । ५ [illegible] ६ [illegible] ७ तत्रेति गो. पाठः । ८ यदे इति गो. रा. पाठः । ९ सर्वमेति गो. पाठः । १० [illegible]

[illegible] वानराधिपः । शैलप्रहाराभिहतः कुम्भकर्णेन संयुगे ॥ ७५
भयं मुहूर्तात्सुग्रीवो लब्धसंज्ञो महाहवे । आत्मनो वानराणां च यत्पथ्यं तत्करिष्यति ॥ ७६
मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः । अप्रीतिश्च भवेत्कष्टा कीर्तिनाशश्च शाश्वतः ॥ ७७
तस्मान्मुहूर्तं काङ्क्षिष्ये विक्रमं मोक्षितस्य तु । भिन्नं च वानरानीकं तावदाश्वासयाम्यहम् ॥ ७८
इत्येवं चिन्तयित्वाथ हनूमान्मारुतात्मजः । भूयः संस्तम्भयामास वानराणां महाचमूम् ॥ ७९
स कुम्भकर्णोऽथ विवेश लङ्कां स्फुरन्तमादाय महाद्रिशृङ्गम् ।
विमानचर्यागृहगोपुरस्थैः पुष्पाद्यवर्षैरभिपूज्यमानः ॥ ॥ ८२ ॥
लाजगन्धोदवर्षैस्तु सेव्यमानः शनैः शनैः । राजवीथ्यास्तु शीतत्वात्संज्ञां प्राप महाबलः ॥ ८३ ॥
ततः स संज्ञामुपलभ्य कृच्छ्राद्बलीयसस्तस्य भुजान्तरस्थः ।
अवेक्षमाणः पुरराजमार्गं विचिन्तयामास मुहुर्महात्मा ॥ ॥ ८४ ॥
एवं गृहीतेन कथं नु नाम शक्यं मया संप्रति कर्तुमद्य ।
तथा करिष्यामि यथा हरीणां भविष्यतीहं च हितं च कार्यम् ॥ ॥ ८५ ॥

सागरौघैः विशैरपि यदि गृहीतो भवेत् तत् किं स्यमेव मोक्षं प्राप्स्यति एतेनैतद्ग्रहणमकिञ्चित्करमिति एवं नाम ॥ ७७ ॥

गो० टी०—अथवेति । सागरौघैः क्षीरैः गृहीतोऽपि मोक्षं प्राप्तुं शक्नोति किं पुनरनेन राक्षसाधमेनेति भावः ॥ ७७ ॥

७७-७८] ति० टी०—कथं तर्हि नेदानीं मोचयतीत्यत्राह—मन्ये इति । मोचयात्मानं परेण गृहीतं न बुध्यत इति मन्ये इत्यर्थः ॥ ७७ ॥ ७८ ॥

रा० टी०—मन्य इति । कुम्भकर्णेन शैलप्रहाराभिहतो यो वानराधिपः सावद्दिनमात्मानं न बुध्यते सोऽयं सुग्रीवः मुहूर्तालब्धसंज्ञस्सन् यत्पथ्यं हितं तत्करिष्यति इत्यहं मन्ये । अर्द्धचतुर्थमेकान्वयि ॥ ७८ ॥ ७९ ॥

गो० टी०—तर्हि मोचयित्वात्मानं किमिति न निवर्तत इत्यत्राह—मन्य इत्यादिना । तावदित्यवधारणे आत्मानमेव न बुध्यत इत्यर्थः । पथ्यं हितम् ॥ ७८ ॥ ७९ ॥

७९] ति० टी०—कृच्छ्रगतत्वेऽपि मया नायं मोचयितुमुचित इत्याह—मया त्विति ॥ ७९ ॥

रा० टी०—मयेति । मया मोचितस्य सुग्रीवस्य कीर्तिनाशः अत एव कष्टा अनिवारणीया अप्रीतिः अहं मत्पुरुषार्थविघातक इति चित्तविकारजनितद्वेषश्च भवेत् ॥ ८० ॥

गो० टी०—कृच्छ्रगतः स्वामी भृत्येनावश्यं मोचनीय एवेत्याशङ्क्याह—मया त्विति ॥ ८० ॥

८०-८१] ति० टी०—काङ्क्षिष्ये प्रतीक्षिष्ये । 'तस्मात्क्षणं प्रतीक्षिष्ये' इति पाठान्तरम् । मोक्षितस्य कृतमोक्षस्य विक्रमं तु द्रक्ष्यामीति शेषः ॥ ८० ॥ ८१ ॥

रा० टी०—तस्मादिति । तस्मात्कष्टेतोः नः प्राप्तिमस्तु गृहीतस्तु विक्रमं क्षणं प्रतीक्षिष्ये तावत्कालं भिन्नं वानरानीकं तावदाश्वासयामि ॥ ८१ ॥

८२] ति० टी०—तस्यादिति । तावत् सुग्रीवागमनपर्यन्तम् ॥

रा० टी०—इतीति । हनुमान् इत्येवं चिन्तयित्वा वानराणां महाचमूं भूयस्संस्तम्भयामास ॥ ८२ ॥

गो० टी०—इतीति । संस्तम्भयामास गमनान्निवारयामास ॥ ८२ ॥

८२] ति० टी०—पुष्पाद्यवर्षैर्लाजपुष्पवर्षैः ॥ ८२ ॥

रा० टी०—स इति । महाद्रिं क्षीरसमादाय कुम्भकर्णः लंकां विवेश अत एव विमानादिस्थैः पुष्पाद्यवर्षैः अभिपूज्यमानो बभूवेति शेषः ॥ ८३ ॥

गो० टी०—स इति । पुष्पाद्यवर्षैः लाजपुष्पवृष्टिभिः ८३-८४] ति० टी०—लाजगन्धोदवर्षैः सिच्यमानः वानरा मोहविनाशार्थं सर्वाय इति शेषः ॥ ८३ ॥ ८४ ॥

रा० टी०—लाजेति । महाबलकुम्भकर्णः राजवीथ्याः क्षीरत्वात् हेतोः लाजादिवर्षैः शीतैर्जलैः सिच्यमानस्सन् संज्ञां प्राप ॥ ८४ ॥

गो० टी०—तत इति । तस्य कुम्भकर्णस्य भुजांतरस्थः स सुग्रीवः सञ्ज्ञामुपलभ्य राजमार्गमवेक्षमाणस्तत्र विचारयामास ॥ ८४ ॥

८५] ति० टी०—संप्रतिकर्तुं सम्यक्प्रतिकर्तुम् ॥ ८५ ॥

रा० टी०—एवमिति । एवं गृहीतेन कथं संप्रतिकर्तुं सम्यक् प्रतिकर्तुं कथं शक्यमतः यथा येन प्रकारेण हरीणामिहं हितं च भविष्यति तथा कार्यं करिष्यामि ॥ ८५ ॥

गो० टी०—एवमिति । संप्रतिकर्तुं सम्यक् प्रतिकर्तुम् अन्यथा अर्थेति पुमर्थेति स्यात् ॥ ८५ ॥

---

१ टी०—तस्यादिति । २ टी०—इतीति । ३ टी०—इतीति । ४ सिच्यमान इति गो० पाठः । ५ अर्थेति गो० पाठः ।

ततः करायैः सहसा समेत्य राजा हरीणाममरेन्द्रशत्रोः ।
स्वरैश्च कर्णौ दशनैश्च नासां ददंश पार्श्वैर्विददार पार्श्वौ ॥ ॥ ८६ ॥
स कुम्भकर्णो हृतकर्णनासो विदारितस्तेन रदैर्नखैश्च ।
रोषाभिभूतः क्षतजार्द्रगात्रः सुग्रीवमाविध्य निपेष भूमौ ॥ ॥ ८७ ॥
स भूतले भीमबलाभिपिष्टः सुरारिभिस्तैरभिहन्यमानः ।
जगाम खं कैन्दुकवज्जवेन पुनश्च रामेण समाजगाम ॥ ॥ ८८ ॥

कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः । रराज शोणितोत्सिक्तो गिरिः प्रस्रवणैरिव ॥ ८९ ॥
शोणिताद्रों महाकायो राक्षसो भीमदर्शनः । अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः ॥ ९० ॥
नीलाञ्जनचयप्रख्यः सस्यंध्य इव तोयदः । युद्धायाभिमुखो भीमो मनश्चक्रे निशाचरः ॥ ९१ ॥
गते च तस्मिन्सुरराजशत्रुः क्रोधात्प्रदुद्राव रणाय भूयः ।
अनायुधोऽस्मीति विचिन्त्य रौद्रो वीरं तदा मुद्गरमाससाद ॥ ॥ ९२ ॥
ततः सपुर्याः सहसा महात्मा निष्क्रम्य तद्वानरसैन्यमुग्रम् ।
बभक्ष रक्षो युधि कुम्भकर्णः प्रजा युगान्ताग्निरिव प्रवृद्धः ॥ ॥ ९३ ॥
बुभुक्षितः शोणितमांसगृध्नुः प्रविश्य तद्वानरसैन्यमुग्रम् ।
चखाद रक्षांसि हरीन्पिशाचान्भृक्षांश्च मोहाद्युधि कुम्भकर्णः ॥
यथैव मृत्युर्हरते युगान्ते स भक्षयामास हरींश्च मुख्यान् ॥ ॥ ९४ ॥
एकं द्वौ त्रीन्बहून्क्रुद्धो वानरान्सह राक्षसैः । समादायैकहस्तेन प्रचिक्षेप त्वरन्मुखे ॥ ९५ ॥

८६-८७] ति० टी०-खरैस्तीक्ष्णैः कराग्रैर्नखैः कर्णौ नासिकेति शेषः । पार्श्वैः पाणिभ्याम् ॥ ८६ ॥ ८७ ॥

रा० टी०-तत इति । हरीणां राजा सुग्रीवः समेत्य एवं वेधार्य खरैस्तीक्ष्णैः कराग्रैः अमरेन्द्रशत्रोः कुम्भकर्णस्य कर्णौ दशनैर्नासां च ददंश विदारयामास पार्श्वैः पार्श्वौ विददार च ८७ ॥

गो० टी०-तत इति । खरैः तीक्ष्णैः कराग्रैः कर्णौ समेत्य संहत्य दशनैः नासां च ददंश पार्श्वेषु कपोलयोरंसयोरन्तरयोश्च पार्श्वाभ्यां विददारेति शेषः ॥ ८७ ॥

रा० टी०-स इति । तेन सुग्रीवेण रदैर्दंष्ट्रैर्नखैश्च विदारितः अत एव हृतकर्णनासः अत एव क्षतजेन रुधिरेण आर्द्रं गात्रं यस्य अत एव रोषाभिभूतः कुम्भकर्णः सुग्रीवं भूमावाविध्य निपात्य पिपेष संचूर्णालुकुट्यापारं चकार ॥ ८८ ॥

गो० टी०-स इति । विमर्दितः संपीडितः ॥ ८८ ॥ ८९ ॥

८८-९०] ति० टी०-सुरारिभी राक्षसैः ॥ ८८-९० ॥

रा० टी०-स इति । भीमबलेन कुम्भकर्णेन अभिपिष्ट इव अत एव सुरारिभिः राक्षसान्तरैः अभिहन्यमानः सुग्रीवः जवेन खमाकाशं जगाम अत एव रामेण समाजगाम ॥ ८९ ॥

रा० टी०-कर्णेति । शोणितोत्सिक्तः कुम्भकर्णः प्रस्रवणैर्निर्झरैर्गिरिरिव रराज ॥ ९० ॥

गो० टी०-कर्णेति । प्रस्रवणैः निर्झरैः ॥ ९० ॥

रा० टी०-शोणितेति । शोणितोद्गारी रुधिरवमनशीलः रावणानुजः अमर्षात् शुशुभे ॥ ९१ ॥

गो० टी०-शोणिताद्रे इति । अभिमुखः सन् युद्धाय मनश्चक्रे इति संबन्धः ॥ ९१-९४ ॥

९१-९३] ति० टी०-नीलाञ्जनेत्यनेन निध्यञ्जनादिव्याहृतिः ॥ ९१-९३ ॥

रा० टी०-नीलेति । नीलाञ्जनचयवत् प्रख्या आकृतिर्यस्य सस्यंध्यः सन्ध्याकालिकतोयद इव निशाचरः अभिमुखस्सन् युद्धाय मनश्चक्रे ॥ ९२ ॥

रा० टी०-गते इति । सुरराजशत्रुः कुम्भकर्णः तस्मिन् सुग्रीवे गते सति रणाय भूयः प्रदुद्राव अत एव अनायुधोऽहमस्मीति विचिन्त्य मुद्गरमाससाद जग्राह च ॥ ९३ ॥

रा० टी०-तत इति । कुम्भकर्णः पुर्याः लंकायाः निष्क्रम्य प्रवृद्धो युगान्ताग्निः प्रजा इव वानरसैन्यं बभक्ष ॥ ९४ ॥

९४-९५] ति० टी०-एकआदेरपि खादने हेतुः-मोहादिति । महाविक्रम रक्षोधानजमरवैवध्यादिति भावः यथा मृत्युर्हरते तथा स भक्षयामासेत्यर्थः ॥ ९३ ॥ ९५ ॥

रा० टी०-बुभुक्षित इति । बुभुक्षितः अत एव शोणितमांसगृध्नुः कुम्भकर्णः [illegible] एकप्रभृतीन् चखादेत्यर्थः

रा० टी०-तदेव [illegible]-यथेति । युगान्ते [illegible] यथा हरते तथा [illegible] हरीन् तद्वानरसैन्यं [illegible] भक्षयामास अर्थः स्पष्टः ॥ ९४ ॥

१ शत्रुमिति गो. पाठः । २ पार्श्वेषु च कुम्भकर्णोऽपि गो. पाठः । ३ विमर्दितेति [illegible] ४ इति गो. पाठः । ५ पतद्ग्रहो दशनयोरार्द्र मुखवेष्टनमिति गो. पाठः । ६ हरीन [illegible]

समक्षयत्तद्वानरान् मेदः शोणितं च महाबलः । वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान् ॥ ९५ ॥
ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा गतिम् । कुम्भकर्णो भृशं क्रुद्धः कपीन्खादन्प्रधावति ॥ ९७ ॥
शतानि सप्त चाष्टौ च विंशत्रिंशतथैव च । संपरिष्वज्य बाहुभ्यां खादन्विपरिधावति ॥ ९८ ॥
मेदोवैसाशोणितदिग्धगात्रः कर्णावसक्तग्रथितान्त्रमालः ।
ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः कलौ युगान्तस्य इव प्रवृद्धः ॥ ॥ ९९ ॥
तस्मिन्काले सुमित्रायाः पुत्रः परबलार्दनः । चकार लक्ष्मणः क्रुद्धो युद्धं परपुरंजयः ॥१००॥
स कुम्भकर्णस्य शरान्शरीरे सप्त वीर्यवान् । निचखानाददे चान्यान्विससर्ज च लक्ष्मणः ॥१०१॥
पीड्यमानस्तदस्त्रं तु विशेषं तस्य राक्षसः । ततश्चुकोप बलवान् सुमित्रानन्दवर्धनः ॥१०२॥
अथास्य कवचं शुभ्रं जाम्बूनदमयं शुभम् । प्रच्छादयामास शरैः संध्याभ्रमिव मारुतः ॥१०३॥
नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः । अपीड्यमानः शुशुभे मेघैः सूर्य इवांशुमान् ॥१०४॥
ततः स राक्षसो भीमः सुमित्रानन्दवर्धनम् । सावज्ञमेव प्रोवाच वाक्यं मेघौघनिःस्वनः ॥१०५॥
अन्तकस्याप्यकष्टेन युधि जेतारमाहवे । युध्यता मामभीतेन ख्यापिता वीरता त्वया ॥१०६॥
प्रगृहीतायुधस्येह मृत्योरिव महामृधे । तिष्ठन्प्रत्यग्रतः पूज्यः किमु युद्धप्रदायकः ॥१०७॥
ऐरावतं समारूढो हतः सर्वामरैः प्रभुः । नैव शक्रोऽपि समरे स्थितपूर्वः कदाचन ॥१०८॥
अद्य त्वयाहं सौमित्रे बालेनापि पराक्रमैः । तोषितो गन्तुमिच्छामि त्वामनुज्ञाप्य राघवम् ॥१०९॥
यत्तु वीर्यबलोत्साहैस्तोषितोऽहं रणे त्वया । रामणैवैकमिच्छामि हन्तुं यस्मिन्हते हतम् ॥११०॥
रामे मयात्र निहते येऽन्ये स्थास्यन्ति संयुगे । तानहं योधयिष्यामि स्वबलेन प्रमाथिना ॥१११॥
इत्युक्त्वा वाक्यं तद्रक्षः प्रोवाच स्तुतिसंहितम् । मृधे घोरतरं वाक्यं सौमित्रिः प्रहसन्निव ॥११२॥
यस्त्वं शक्रादिभिर्देवैरसह्यः प्राप्य पौरुषम् । तत्सत्यं नान्यथा वीर दृष्टस्तेऽद्य पराक्रमः ॥११३॥
एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः । इति श्रुत्वा वचनादृत्य लक्ष्मणं स निशाचरः ॥११४॥
अतिक्रम्य च सौमित्रिं कुम्भकर्णो महाबलः । राममेवाभिदुद्राव कर्मैवयन्निव मेदिनीम् ॥११५॥
अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन् । कुम्भकर्णस्य हृदये ससर्ज निशिताञ्शरान् ॥११६॥
तस्य रामेण विद्धस्य सहसाभिप्रधावतः । अङ्गारमिश्राः क्रुद्धस्य मुखाग्निश्चेरुरुल्बणाः ॥११७॥

रा० टी०—भक्षणप्रकारमाह—एकमिति । एकमनीकं राक्षसैः सह वानरान् एकहस्तेन समाहाय मुखे प्रचिक्षेप ॥ ९७ ॥

गो० टी०—बुभुक्षित इति । शोणितमांसगृध्नुः शोणितमांसलोलुपः ॥ ९६–९७ ॥

९६] ति० टी०—संप्रस्रवत् अडभाव आर्षः । मक्षितवानरसंवन्धिशोणितादि ॥ ९६ ॥

रा०टी०—समिति । नगेंद्राग्रैर्वध्यमानोपि कुम्भकर्णः वानरान् भक्षयामास अत एव मेदः शोणितं च संप्रस्रवत् संप्रास्रवत् ॥ ९८ ॥

गो० टी०—संप्रस्रवन्निति । संप्रस्रवन् तालुभ्यामुद्गमन् शोणितं मेदश्च भक्षितवानरसंबन्धि ॥ ९८ ॥

९७–९८] ति० टी०—गतिं शरणम् ॥ ९७ ॥ ९८ ॥

रा० टी०—ते इति । भक्ष्यमाणाः हरयो रामं जग्मुः । कुम्भकर्णस्तु कपीन् खादन् सन् प्रधावति ॥ ९९ ॥

गो० टी०—त इत्यर्धम् । गतिं शरणम् ॥ ९९ ॥

गो० टी०—कुम्भकर्ण इत्यर्धम् । प्रधावति प्राधावत् । [illegible] ॥ १०१ ॥

रा० टी०—तत्प्रकारमाह—शतानीति । शतानीत्यं संपरिष्वज्य विपरिधावति ॥ १०० ॥

९९–१०१] ति० टी०—कर्णावसक्तेत्यनेनाधोभागे एव कर्णलुम्बनं सूचितमिति गम्यते । कर्णावसक्ता ग्रथिता परस्परसंलग्ना अन्त्रमाला यस्य सः ॥ ९९–१०१ ॥

रा० टी०—मेद इति । मेदःप्रभृतिभिः दिग्धं गात्रं यस्य कर्णयोः तन्मूलप्रदेशयोरवसक्ता संलग्ना ग्रथिता ग्रन्थियुक्ता अन्त्रमाला यस्य स कुम्भकर्णः युगान्तस्य काले इव शूलानि ववर्ष ॥ १०१ ॥

रा० टी०—तस्मिन्निति । तस्मिन्काले क्रुद्धो लक्ष्मणः युद्धं चकार ॥ १०२ ॥

गो० टी०—तस्मिन् काल इति । स्पष्टः ॥ १०२ ॥

रा० टी०—स इति । स लक्ष्मणः कुम्भकर्णस्य शरीरे सप्तशरान् निचखान अन्यांश्च शरानादद विससर्ज च ॥ १०३ ॥

गो० टी०—स कुम्भकर्णस्येति । स्पष्टः ॥ १०३ ॥

१०२–११७] ति० टी०—पीड्यमानः स राक्षसस्तस्य [illegible] विशेषमक्लान्तरूपं विशेषयितुमेव चकारेत्यर्थः ॥ १०२–११७ ॥

रामास्त्रविद्धो घोरं वै नर्दन्राक्षसपुङ्गवः ।
तस्योरसि निमग्नास्ते शरा बर्हिणवाससः ।
आयुधानि च सर्वाणि विप्रकीर्यन्त भूतले ।
मुष्टिभ्यां च कराभ्यां च चकार कदनं महत् ।
रुधिरं परिसुस्राव गिरिः प्रस्रवणं यथा ॥
स तीव्रेण च कोपेन रुधिरेण च मूर्च्छितः ।
अथ भृङ्गं समाविध्य भीमं भीमपराक्रमः ।
अभ्यधावत्ततो रामः सप्तभिस्तमजिह्मगैः ।

[illegible] कुद्धो [illegible] ॥ १२० ॥
हस्तात्परिभ्रष्टा गदा वज्र्या पपात ह ॥ १२१ ॥
स निरायुधमात्मानं यदा मेने महाबलः ॥ १२० ॥
[illegible] ॥ १२१ ॥
वानरान्राक्षसान्वृक्षान्खादन्त परिधावति ॥ १२२ ॥
चिच्छेद गिरिशृङ्गं तं पुनः संधाय कार्मुकम् ॥ १२१ ॥

रा० टी०—पीड्यमान इति । पीड्यमानः लक्ष्मणशरैरित्यध्याहार्यम् । अथ विशेषे विगतशेषं चकारेति शेषः विध्वंसयामासेत्यर्थः । ततस्तत्प्रहर्तृन्संस्थमिवानन्दयन्कर्मणः कोप ॥ १०४ ॥

रा० टी०—अथेति । अथ कुम्भकर्णस्य कवचं संध्यार्थं मारुत इव शरैः प्रच्छादयामास । लक्ष्मण इति शेषः ॥ १०५ ॥

रा० टी०—नीलेति । कांचनभूषणैः शरैरापीड्यमान आच्छाद्यमानः नीलाञ्जनचयप्रख्यः कुम्भकर्णः मेघैराच्छाद्यमानस्तार्क्ष्य इव शुशुभे ॥ १०६ ॥

रा० टी०—तत इति । स कुम्भकर्णः सायकं कृतस्वानामुर्वी रुधिरानन्दवर्धनं प्रोवाच ॥ १०७ ॥

रा० टी०—तदाकारमाह—अन्तकस्येत्यादिभिः । अन्तकस्यापि अकर्तृत्वं अल्पप्रयत्नेनेत्यर्थः जेतारं मां युध्यता अत एव अभीतेन त्वया वीरता त्वयापिता ॥ १०८ ॥

रा० टी०—वीरताख्यापने हेतुमाह—प्रगृहीतेति । शूलयोरिव प्रगृहीतायुधस्य मे भयतः अग्रेतिष्ठन्नपि जनः पूज्यो भवति युद्धप्रदायकः पूज्यश्चेत्किमु वक्तव्यम् ॥ १०९ ॥

रा० टी०—नन्वेवं तव मृत्युसादृश्यमित्यत आह—ऐरावतेति । सर्वामरैरप्रतिरथोपि समरे भस्मसाद्गमे स्थितपूर्वः कदाचन न ॥ ११० ॥

रा० टी०—अथेति । बलेन पराक्रमैः प्रभावैश्च त्वया तोषितोऽहं त्वामनुज्ञाप्य त्वदाज्ञां गृहीत्वा गन्तुमिच्छामि ॥ १११ ॥

रा० टी०—यदिति । यस्मात्त्वत्तोः वीर्यबलोत्साहैः त्वयाहं तोषितस्तस्माद्धेतोः यस्मिन् हते हतं मित्रिणं सैन्यमिति शेषः । तमेकं राममेव हंतुमिच्छामि त्वां इमं मेच्छामीत्यर्थः ॥ ११२ ॥

रा० टी०—राम इति । मया रामे निहते सति येऽन्ये स्थास्यन्ति तानहं स्वबलेन स्वसैन्येन योधयिष्यामि ॥ ११३ ॥

रा० टी०—इतीति । इत्यनेन प्रकारेण उक्तं वाक्यं येन तत् घोरतरं रक्षः स्मृत्या संहितं मिथितं वाक्यं सौमित्रिरुवाच ॥ ११४ ॥

रा० टी०—तदाकारमाह—य इति । शक्रादिभिर्देवैः अलं पौरुषं प्राप्य वृषे इति शेषः । तत्तस्यमन्यथा न यतस्ते परा क्रमो दृष्टः ॥ ११५ ॥

रा० टी०—नन्वेष रामः क्षतीत्यत आह अद्रिरिवाचलं राम एव तिष्ठति । अहं पृथक्—इतीति । इति श्रुत्वा लक्ष्मणमनादृत्य अत एवातिक्रम्य संत्यज्य कुम्भकर्णः राममेवाभिदुदाव सार्धश्लोक एकान्वयी ॥ ११६ ॥ ११७ ॥

गो० टी०—अतिक्रम्येति । स्पष्टः ॥ १०४ ॥

रा० टी०—अथेति । रामः अस्त्रं प्रयोजयन् अनुसंदधत्सन् कुम्भकर्णस्य हृदये शरान् ससर्ज ॥ ११८ ॥

गो० टी०—अथेति । स्पष्टः ॥ १०५ ॥

रा० टी०—तस्येति । रामेण विद्धस्य अत एव क्रुद्धस्य अत एव प्रधावतः कुम्भकर्णस्य क्षणात् अर्चिषोऽग्निकणाः निश्चेरुः ॥ ११९ ॥

गो० टी०—तस्येति । अर्चिषः ज्वालाः ॥ १०६ ॥

११८]ति०टी०—अभ्यधावत तं रामं विसृज्येतिशेषः॥११८॥

रा० टी०—रामेति । रामास्त्रविद्धः अत एव घोरं नर्दन् राक्षसपुङ्गवो हरीन् विद्रावयन् सन् अभ्यधावत ॥ १२० ॥

गो० टी०—रामास्त्रेति । स्पष्टः ॥ १०७ ॥

११९] ति० टी०—ते रौद्रास्त्रप्रयोजिताः शराः११९॥१२०

रा० टी०—तस्येति । बर्हिणवाससः शराः तस्य कुम्भकर्णस्य उरसि निमग्नाः अत एव अस्य हस्तात्परिभ्रष्टा गदा वज्र्या पपात सर्वाणि आयुधानि विप्रकीर्यन्त विप्राकीर्यन्त च । सार्धश्लोक एकान्वयी ॥ १२१ ॥

गो० टी०—तस्येति सार्धः । बर्हिणवाससः बर्हिणं बर्हिपत्रं वासो वास स्थानं येषां ते तथोक्ताः । आयुधानि खड्गादीनि ॥ १०८ ॥

रा० टी०—स इति । स कुम्भकर्णः आत्मानं यदा निरायुधं मेने तदा दृढिन्यां बद्धहस्ताभ्यां कराभ्यां प्रसह्यात्मनो वा कदनं हिंसनं चकार ॥ १२२ ॥

गो० टी०—स इति । कदनं बाणपाणमिति शेषः॥१०९॥

१२१-१२३] ति० टी०—प्रस्रवणं गिरेः [illegible]

---

१ नदन्निति गो. पाठः । २ समिति गो. पाठः । ३ [illegible] पाठः । ४ [illegible] पुस्तके ।

ततस्तु [illegible] धर्मात्मा तस्य शृङ्गं महच्छिदा । शरैः काञ्चनचित्राङ्गश्चिच्छेद भरतानुजः ॥ ११० ॥
तन्मेरुशिखराकारैर्द्योतमानमिव श्रिया । द्वे शते वानराणां च पतमानमपातयत् ॥ १११ ॥
तस्मिन्काले स धर्मात्मा लक्ष्मणो रामपत्रवीत् । कुम्भकर्णवधे युक्तो योगान्परिमृशन्बहून् ॥ ११२ ॥
नैवायं वानरान्राजन्न विजानाति राक्षसान् । मत्तः शोणितगन्धेन स्वान्परांश्चैव खादते ॥ ११३ ॥
साध्वेनमभिरोहन्तु सर्वतो वानरर्षभाः । यूथपाश्च यथा मुख्यास्तिष्ठन्त्वस्मिन्समन्ततः ॥ ११४ ॥
अयं दुर्मतिः काले गुरुभारप्रपीडितः । प्रचरन्राक्षसो भूमौ नान्यान्हन्यात्प्लवंगमान् ॥ ११५ ॥
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः । ते समारुरुहुर्हृष्टाः कुम्भकर्णं महाबलाः ॥ ११६ ॥
कुम्भकर्णस्तु संक्रुद्धः सप्राप्तः प्लवंगमैः । व्यधूनयत्तान्वेगेन वृष्टिवन्तमिवाम्बुदः ॥ ११७ ॥
तान्दृष्ट्वा निर्धुतान्रामो रुष्टोऽयमिति राक्षसम् । समुत्पपात वेगेन धनुरुत्तममाददे ॥ ११८ ॥
क्रोधरक्तेक्षणो धीरो निर्दहन्निव चक्षुषा । राघवो राक्षसं वेगादभिदुद्राव वेगितः ॥
यूथपान्हर्षयन्सर्वान्कुम्भकर्णबलैर्दितान् । ॥ ११९ ॥

स चापमादाय सुजातवल्यं दृढज्यमुग्रं तपनीयचित्रम् ।
हरीन्समाश्वास्य समुत्पपात रामो निबद्धोत्तमतूणबाणः ॥ ॥ १२० ॥

रा० टी०—स इति । क्षतजेन समुक्षितः सिक्तः स कुम्भकर्णः प्रस्रवणान् गिरिरिव रुधिरं परिस्रवन् ॥ ११८ ॥

गो० टी०—स बाणैरिति । स्पष्टः ॥ ११० ॥

रा० टी०—सुतीव्रेणेति । सुतीव्रेण क्रोधेन रुधिरेण च लिप्तो व्याप्तः स कुम्भकर्णः वानरादीन् खादन् सन् परिधावति ॥ ११४ ॥

गो० टी०—स तीव्रेणेति । घूर्णितः व्याप्तः ॥ १११ ॥

रा० टी०—अथेति । भीमं शूलं समादिश्य हस्तं गृहीत्वा क्षेप ॥ ११५ ॥

गो० टी०—अथेति । स्पष्टः ॥ ११२ ॥

रा० टी०—अप्राप्तमिति । रामः कार्मुकं पुनः सन्धाय सप्तभिश्शरैः अप्राप्तमेव गिरिशृङ्गमन्तरा मध्ये चिच्छेद ॥ ११६ ॥

गो० टी०—अप्राप्तमिति । स्पष्टः ॥ ११३ ॥

११४–११५] ति० टी०—ततो धर्मात्मा रामः तस्य कुम्भकर्णस्य शृङ्गमन्तरा मध्येमार्गं सप्तभिः शिलागतस्यादित्यप्रतिमैः शरैश्चिच्छेद ॥ ११४ ॥ ११५ ॥

रा० टी०—तत इति । रामः तस्य कुम्भकर्णस्य वर्म चिच्छेद ॥ ११७ ॥

रा० टी०—तदिति । श्रिया द्योतमानमत एव मेरुशिखराकारं रक्षःशरीरं तद् भिन्नं शिखरं वानराणां द्वेशते अपातयत् ॥ ११८ ॥

गो० टी०—तन्मेरुशिखरेति । द्वे शते वानरीयं पतमानं शृङ्गम् अपातयत् । मेरोरिति शेषः ॥ ११४ ॥

११६–११९] ति० टी०—योगान्परिमृशन् । अनेन अवकाशं लक्ष्मणाद्दित्सं रामस्य ज्ञप्यते ॥ ११६–११९ ॥

रा० टी०—तस्मिन्निति । कुम्भकर्णवधे युक्तः पूर्वं रामेण नियुक्तः अत एव योगान् सदुपोपायान् परिमृशन् लक्ष्मणः रामम्अब्रवीत् ॥ ११९ ॥

गो० टी०—तस्मिन् काल इति । योगान् परिमृशन् उपायान् विधान्यन ॥ ११६ ॥

रा० टी०—तदाकारमाह—नेति । अयं कुम्भकर्णः वानरादीन् नैव विजानाति राक्षसांश्च नैव विजानाति अतः एव स्वान् परांश्च खादति ॥ ११७ ॥

गो० टी०—नैवायमिति । स्पष्टः ॥ ११६ ॥

रा० टी०—साध्विति । वानरर्षभाः एनं कुम्भकर्णं साध्वधिरोहन्तु गुरुभाराः यूथपास्तु अस्य समन्ततः यथायोग्यम् ॥ ११८ ॥

गो० टी०—साध्विति । यथा यथायोग्यम् ॥ ११७ ॥

रा० टी०—तत्प्रशंसनमाह—अयमिति । गुरुभारप्रपीडितः अयं कुम्भकर्णः प्रचरन् सन् अन्यान् वानरान् न हन्यात् ॥ ११९ ॥

गो० टी०—अन्ययमिति । भारः वानरारोहणरूपः ॥ ११८ ॥

रा० टी०—तस्येति । तस्य तथ्यमाप्त्य वचनं श्रुत्वा ते वानराः कुम्भकर्णं सप्ताद्रुरुहुः ॥ ११९ ॥

गो० टी०—तस्येति । स्पष्टः ॥ ११९ ॥

रा० टी०—कुम्भकर्ण इति । प्रचण्डमरुत्तमाक्रुद्धः अत एव संक्रुद्धः कुम्भकर्णः व्यधूनयत् ॥ ११४ ॥

गो० टी०—कुम्भकर्णस्त्विति । स्पष्टः ॥ ११० ॥

१२२–१२४] ति० टी०—रामश्च रुष्टोऽयमिति मत्वा वेगेन समुत्पपात ॥ १२२–१२३ ॥

रा० टी०—तानिति । रामः तान् वानरान् निर्धुतान् दृष्ट्वा अयं राक्षसो रुष्ट इति दृष्ट्वा ज्ञात्वा च राक्षसमभिसमुत्पपात तस्थौ धनुरादाय च ॥ १२५ ॥

---

1 [illegible] 2 [illegible] । पूर्व । 3 [illegible] इति गो. पुस्त । 4 आजानाति गो. पोट । 5 [illegible] गो. पा. । 6 [illegible]

स वानरगणैस्तैस्तु वृतः परमदुर्जयैः । लक्ष्मणानुचरो वीरः समासाद्य महाबलः ॥१३५॥
स ददर्श महात्मानं किरीटिनमरिंदमम् । शोणिताक्षतसर्वाङ्गं कुम्भकर्णं महाबलः ॥१३६॥
सर्वान्समभिधावन्तं यथारुष्टं दिशागजम् । मार्गमाणं हरीन्क्रुद्धं राक्षसैः परिवारितम् ॥१३७॥
विन्ध्यमन्दरसंकाशं काञ्चनाङ्गदभूषणम् । भक्षयन्तं रुधिरं वक्त्राद्वर्षमेघमिवोत्थितम् ॥१३८॥
जिह्वया परिलिह्यन्तं सृक्किणी शोणितोक्षिते । भक्षयन्तं वानरानीकं कालान्तकयमोपमम् ॥१३९॥
तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसम् । विस्कारयामास तदा कार्मुकं पुरुषर्षभः ॥१४०॥
स तस्य चापनिर्घोषात्क्रुपितो राक्षसर्षभः । अभ्युध्यमानस्तं घोषमभिदुद्राव राघवम् ॥१४१॥
ततस्तु घोरोद्धतमेघकल्पं भुजंगराजोत्तमभोगबाहुः ।
तमापतन्तं धरणीधराभमुवाच रामो युधि कुम्भकर्णम् ॥ ॥१४२॥
आगच्छ रक्षोधिप मा विषादमवस्थितोऽहं मयृहीतचापः ।
अवेहि मां राक्षसवंशनाशनं यस्त्वं मुहूर्ताद्विविता विचेताः ॥ ॥१४३॥
रामोऽयमिति विज्ञाय जहास विकृतस्वनम् । अभ्यधावत संक्रुद्धो हरीन्विद्रावयन्रणे ॥१४४॥
दारयन्निव सर्वेषां हृदयानि वनौकसाम् । प्रहस्य विकृतं भीमं स मेघस्तनितोपमम् ॥१४५॥
कुम्भकर्णो महातेजा राघवं वाक्यमब्रवीत् । नाहं विराधो विज्ञेयो न कबन्धः खरो न च ॥
न वाली न च मारीचः कुम्भकर्णः समागतः ॥ ॥१४६॥
पश्य मे मुद्गरं भीमं सर्वं कालायसं महत् । अनेन निर्जिता देवा दानवाश्च पुरा मया ॥१४७॥

गो० टी०—तानिति । विशसनानिति ह्रस्व आर्षः ॥१३५॥

रा० टी०—क्रोधेति । राघवः यूथपान् हर्षयन् सन् राक्षसमभिदुद्राव सार्द्धश्लोक एकान्वयी ॥ १३६ ॥

गो० टी०—क्रोधताम्रेत्यादिसार्द्धश्लोकमेकं वाक्यम् १३३

रा० टी०—स इति । निर्दलीन्मत्तगणवाणो रामः दृढां ज्यां यस्मिन् तत्कार्मुकमादाय सन्नद्धपार्श्वं कुम्भकर्णसमीपं जगाम १३७

गो० टी०—स चापमिति । निर्दलीन्मत्तगणवाणः निर्दलीन्मत्तगणवृन्द इत्यर्थः ॥ १३३ ॥ १३४ ॥

१३५-१३८] ति० टी०—लक्ष्मणानुचरः बहुभिः लक्ष्मणसहितः ॥ १३५-१३८ ॥

१३९-१४१] ति० टी०—कालान्तकयमानामवस्थाकृतो भेद इति तीर्थः ॥ १३९-१४१ ॥

रा० टी०—स इति । वानरगणैरेतैः लक्ष्मणोऽनुचरो यस्य स रामः संप्रतस्थे कुम्भकर्णसमीपे तस्थौ ॥ १३८ ॥

रा० टी०—स इति । स रामः कुम्भकर्णं ददर्श ॥ १३९॥

रा० टी०—सर्वानिति । रुष्टं दिशां गजमिव हरीन् मार्गमाणमत एव सर्वान् समभिधावन्तल्लक्षितं वर्षमेघमिव रुधिरं सक्तं शोणितोक्षिते सृक्किणी परिलिह्यन्तं वानरानीकं भक्षयन्तं कुम्भकर्णं दृष्ट्वा पुरुषर्षभो रामः कार्मुकं विस्कारयामास । अर्द्धश्लोकमेकान्वयि ॥ १४०-१४१ ॥

रा० टी०—स इति । तस्य रामस्य चापनिर्घोषात् क्रुपितः अत एव घोषमभ्युद्यमाणः स कुम्भकर्णः राघवमभिदुद्राव १४१

गो० टी०—ततदद्रेत्यादिचतुःश्लोक्येकान्वया । कालान्तकयमोपमम् एतन्निनेत्रत्रिपुरान्तको वेतिवत् । एकस्यैवावस्थाभेदात् कालादिनामभेदः । यद्वा । काले युगान्तकाले अन्तको नाशको यमः उपमा यस्य स तथोक्तः ॥१२९-१३१॥

१४२] ति० टी०—भुजंगराजस्य शेषस्योत्तमो भोगस्तद्वद्बाहुर्यस्य सः ॥ १४२ ॥

रा० टी०—तत इति । भुजंगराजस्य उत्तमभोगवत् बाहू यस्य स रामः आपतन्तं कुम्भकर्णमुवाच ॥ १४२ ॥

१४३] ति० टी०—हे रक्षोधिप, विषादं मा आगच्छ यतोऽहं मयृहीतचापः स्थितस्तं मां राममवेहि तस्मान्मामेवागच्छ । मुहूर्तात्त्वं विचेता निर्जीवो मृतो भवितेति ध्रुवं रामः कुम्भकर्णमुवाचेत्यन्वयः ॥ १४३ ॥

रा० टी०—तदाकारमाह—आगच्छेति । हे रक्षोधिप ! यस्त्वं मुहूर्तात् विचेताः भविता स त्वं विषादं स्वकुलविध्वंसजनितखेदं मा गच्छ प्रापुहि यतः मयृहीतचापोऽहमवस्थितः ननु किं तेनेत्यत आह मां राक्षसवंशनाशनमवेहि ॥ १४३ ॥

गो० टी०—आगच्छेति । मा मागच्छ अविनाशय आगच्छशब्दवत् । यद्वा विषादं मा गच्छ सरणेन धारयात्मानं हे रक्षोधिप । आत्मानमवधारयात्मानम् ॥ १३२ ॥

१४४-१४७] ति० टी०—रामोऽयमिति विज्ञाय [illegible]

---

१ दुर्जय इति गो० पा. । २ लक्ष्मणानुचर इति गो० पा. । ३ कार्मुकमिति गो० पा. । ४ राक्षसेति गो० पा. । ५ राक्षसवंशनाशनमिति गो० पा. । ६ मयृहीत इति गो० पा. । ७ राक्षसवंशे राजा त्वमिति गो० पा. ।

विकर्णनास इति मां नावज्ञातुं त्वमर्हसि । स्वल्पापि हि न मे पीडा कर्णनासाविनाशनात् ॥१४८॥
दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मेऽनघ । ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमम् ॥१४९॥

स कुम्भकर्णस्य वचो निशम्य रामः सैपुङ्खान्विससर्ज बाणान् ।
तैराहतो वज्रसमप्रवेगैर्न चुक्षुभे न व्यथते मुरारिः ॥ ॥१५०॥
यैः सायकैः सालवरा निकृत्ता वाली हतो वानरपुंगवश्च ।
ते कुम्भकर्णस्य तदा शरीरं वज्रोपमानं व्यथयांप्रचक्रुः ॥ ॥१५१॥
स वारिधारा इव सायकांस्तान्पिबञ्शरीरेण महेन्द्रशत्रुः ।
जघान रामस्य शरप्रवेगं व्यविध्य तं मुद्गरमुग्रवेगम् ॥ ॥१५२॥
ततस्तु रक्षः क्षतजावलिप्तं वित्रासनं देवमहाचमूनाम् ।
व्यॉविध्य तं मुद्गरमुग्रवेगं विद्रावयामास चमूं हरीणाम् ॥ ॥१५३॥

रा० टी०–राम इति । क्रुद्धः कुम्भकर्णः रामोऽयमिति विज्ञाय जहास हरीन् विद्रावयन् सन् अभ्यधावत च ॥१४७॥

गो० टी०–रामोयमित्यादि । स्पष्टः ॥ १३३॥१३४ ॥

रा० टी०–दारयन्निति । कुम्भकर्णः विकृतं यथा भवति तथा मेघस्तनितोपमं प्रहस्य राघवमब्रवीत् । सार्द्धश्लोक एकान्वयी ॥ १४८ ॥ १४९ ॥

रा० टी०–तदाकारमाह—नेत्यादिभिः । विराधाद्यन्यनमोऽहं न विज्ञेयः किन्तु कुम्भकर्णोहम् । एतेनविराधादीनामल्पपराक्रमत्वं सूचितम् ॥ १५० ॥

गो० टी०–प्रहस्येति । विकृतमित्यादिविशेषणत्रयं क्रियाविशेषणम् ॥ १३५ ॥

गो० टी०–नाहमिति । स्पष्टः ॥ १३६ ॥

रा० टी०–पश्येति । मे मुद्गरं त्वं पश्य अनेन मुद्गरेण मया देवा दानवाश्च निर्जिताः ॥ १५१ ॥

गो० टी०–पश्य मे मुद्गरमिति । यद्यपि निरायुधत्वं पूर्वमुक्तं तथाप्यय मुद्गरं गृहीतवानिति ज्ञेयम् । सर्वत्रालायसं बहुलायसमयमित्यर्थः ॥ १३७ ॥

१४८–१४९] ति० टी०–निकर्णनास इत्येतावन्मात्रेण, मामवज्ञातुं दुर्बल इत्यवगन्तुं नार्हसि । नहि विराधादिवदहं लीलया त्वया क्षयोयः, अतो मयि यत्नवान्भवेत्यर्थः । नन्व कथं न दुर्बलस्तत्राह—स्वल्पापीति ॥ १४८ ॥ १४९ ॥

रा० टी०–विकर्णेति । विगते कर्णनासे यस्य स इति हेतोः मामवज्ञातुमल्पपराक्रमोऽयमिति तिरस्कर्तुं त्वं नार्हसि तत्र हेतुः कर्णनासाविनाशनात् स्वल्पापि मे पीडा न ॥ १५२ ॥

गो० टी०–विकर्णनास इति ॥ १३८ ॥

रा० टी०–दर्शयेति । वीर्यं स्वपराक्रमं मे गात्रेषु दर्शय यावच्छक्ति शरान् प्रक्षिपेत्यर्थः । ततोऽनन्तरं दृष्टपौरुषविक्रमं त्वां भक्षयिष्यामि ॥ १५३ ॥

गो० टी०–दर्शयेति । लघु क्षिप्रम । दृष्टपौरुषविक्रमं दृष्टबलपराक्रमम् ॥ १३९ ॥

१५०] ति० टी०–न व्यथते न विव्यथे ॥ १५० ॥

रा० टी०–स इति । रामः कुम्भकर्णस्य वचो निशम्य बाणान् विससर्ज । तैर्बाणैराहतः मुरारिः कुम्भकर्णः न चुक्षुभे न व्यथते विव्यथे च ॥ १५४ ॥

गो० टी०–स इति । चक्षुभ इति । क्षोभोत्र मानसः १४०

१५१] ति० टी०–व्यथयांप्रचक्रुरित्यार्षे आमन्तस्य व्यवहितप्रयोगः ॥ १५१ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—यैरिति । वज्रोपमास्ते सायकाः कुम्भकर्णस्य शरीरं न व्यथयांप्रचक्रुः ॥ १५ . ॥

गो० टी०–यैः सायकैरिति । सालभेदकस्य वालिविनाशकस्य च बाणस्यैकत्वेपि बहुवचनं तद्भृत्यांगामनेकत्वादुपपद्यते ॥ १४१ ॥

१५२] ति० टी०–वारिधाराः पर्वत इव सायकान्शरीरेण पिबन्निति योजना । एतेन सर्वे सायकाः शरीरं मग्ना अपि न व्यथयन्तीति दर्शितम् । उग्रवेगं तं मुद्गरं व्याविध्य भ्रामयित्वा रामस्य शरप्रवेगं जघान ॥ १५२ ॥

रा० टी०–स इति । महेन्द्रशत्रुः कुम्भकर्णः वारिधारा इव सायकान् शरीरेणापिबन् सन् रामस्य शरप्रवेगं जघान॥१५६॥

गो० टी०–स इति । शरीरेण पिबन् । शरीरनिमग्नबाण इत्यर्थः । जघान मोघीचकार ॥ १४२ ॥

१५३] ति० टी०–ततो रामं मुक्त्वा हरीणां चमूं विद्रावयामास ॥ १५३ ॥

रा० टी०–तत इति । कुम्भकर्णः देवमहाचमूनां वित्रासनं मुद्गरं व्याविध्य हरीणां चमूं विद्रावयामास ॥ १५७ ॥

गो० टी०–ततस्त्विति । विव्याध अचालयत् ॥१४३॥

१ अस्थि गो.पा.। २ स्थिति गो.रा.पा.। ३ शरीरं वज्रोपमा नेति च गो. शरीरं वज्रोपमा नेतिच रा.पा.। ४ अस्थिति गो.पा.। ५ विव्याधेति गो.पा.।

वायव्यमादाय ततोऽपरास्त्रं रामः प्रचिक्षेप निशाचराय ।
समुद्धरं तेन जहार बाहुं सकुक्षिबाहुस्तुमुलं ननाद ॥ ॥१५४॥
स तस्य बाहुर्गिरिशृङ्गकल्पः समुद्धरो राघवबाणकृत्तः ।
पपात तस्मिन्हरिराजसैन्ये जघान तां वानरवाहिनीं च ॥ ॥१५५॥
ते वानरा भग्नहतावशेषाः पर्यन्तमाश्रित्य तदा विषण्णाः ।
प्रपीडितोद्वृत्तदृशः सुघोरं नरेन्द्ररक्षोधिपसंनिपातम् ॥ ॥१५६॥
स कुम्भकर्णोऽस्त्रनिकृत्तबाहुर्महासिकृत्ताग्र इवाचलेन्द्रः ।
उत्पाटयामास करेण वृक्षं ततोऽभिदुद्राव रणे नरेन्द्रम् ॥ ॥१५७॥
तं तस्य बाहुं सहतालवृक्षं समुद्यतं पन्नगभोगकल्पम् ।
ऐन्द्रास्त्रयुक्तेन जघान रामो बाणेन जाम्बूनदचित्रितेन ॥ ॥१५८॥
स कुम्भकर्णस्य भुजो निकृत्तः पपात भूमौ गिरिसंनिकाशः ।
विचेष्टमानो निजघान वृक्षान्शैलाञ्शिलावानरराक्षसांश्च ॥ ॥१५९॥
तं छिन्नबाहुं समवेक्ष्य रामः समापतन्तं सहसा नदन्तम् ।
द्वावर्धचन्द्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य ॥ ॥१६०॥
तौ तस्य पादौ प्रदिशो दिशश्च गिरेरिवाग्रेषु महार्णवं च ।
लङ्कां च सेनां कपिराक्षसानां विनादयन्तौ विनिपेततुश्च ॥ ॥१६१॥
निकृत्तबाहुर्विनिकृत्तपादो विदार्य वक्त्रं वडवामुखाभम् ।
दुद्राव रामं सहसाभिगर्जन्राहुर्यथा चन्द्रमिवान्तरिक्षे ॥ ॥१६२॥

१५४–१५५] ति० टी०–समुद्धरं सुदृढसहितम् । तेन वायव्यास्त्रेण ॥ १५४ ॥ १५५ ॥

रा० टी०–वायव्यमिति । रामः वायव्यं माहास्त्रमादाय प्रचिक्षेप तेन प्रक्षिप्तमहास्त्रेण समुद्धरं बाहुं कुम्भकर्णभुजं चकर्त चिच्छेद कृत्तबाहुः स कुम्भकर्णः तुमुलं ननाद ॥१५४॥

गो० टी०–वायव्यमिति । स्पष्टः ॥ १५४ ॥

रा० टी०–स इति । राघवबाणेन कृत्त छिन्नः तस्य कुम्भकर्णस्य बाहुः हरिराजसैन्ये पपात अत एव वानरवाहिनीं कांचिन्जघान ॥ १५५ ॥

गो० टी०–स तस्येति । स्पष्टः ॥ १५५ ॥

१५६] ति० टी०–भग्नहतावशेषाः भग्नसमुद्धरपतितबाहुहतावशिष्टाः । पर्यन्तमाश्रित्य समुद्रवेलाप्रदेशसमीपमाश्रित्य । विषण्णाः स्थिताः ॥ १५६ ॥

रा० टी०–ते इति । भग्नेन समुद्धरकुम्भकर्णबाहुपातेन हतात् तदनन्तरं अवशेषाः पर्यंतं देशान्तरमाश्रित्य विषण्णाः स्थिताः ते वानराः नरेन्द्ररक्षोधिपयोः सन्निपातं युद्धं ददृशुः ॥ १६० ॥

गो० टी० ते वानरा इति । सन्निपातं द्वन्द्वयुद्धम् ॥ १४६ ॥ १४७ ॥

१५७ १५८] ति० टी०–करेण दक्षिणेन ॥ १५७ ॥ १५८ ॥

रा० टी०–स इति । अस्त्रेण निकृत्तो बाहुर्यस्य अत एव महासिना कृत्तमग्रं यस्य स अचलेंद्र इव कुम्भकर्णः करेण उर्वरितहस्तेन शालमुत्पाटयामास । ततोऽनन्तरं नरेन्द्रं राममभिदुद्राव ॥ १६१ ॥

रा० टी०–तमिति । समुद्यतं सहसालवृक्षं तस्य कुम्भकर्णस्य बाहुमैन्द्रास्त्रयुक्तेन इन्द्रास्त्रमन्त्राभिमन्त्रितेन बाणेन रामो जघान ॥ १६२ ॥

गो० टी०–स तस्येति । ऐन्द्रास्त्रयुक्तेन ऐन्द्रास्त्रमन्त्राभिमन्त्रितेन ॥ १४८ ॥

१५९–१६०] ति० टी०–विचेष्टमानः । भूमाविति शेषः ॥ १५९ ॥ १६० ॥

रा० टी०–स इति । निकृत्तः कुम्भकर्णस्य भुजः भूमौ पपात अत एव विचेष्टमानः विविधं पतन् वृक्षादीन् जघान ॥ १६३ ॥

गो० टी०–स कुम्भकर्णस्येति । विचेष्टमानः विवर्तमानः ॥ १४९ ॥

रा० टी०–तमिति । रामः समापतन्तं कुम्भकर्णं समीक्ष्य द्वौ अर्द्धचन्द्रौ बाणविशेषौ प्रगृह्य राक्षसस्य पादौ चिच्छेद १६४

गो० टी०–तमिति । प्रगृह्य युगपत् संधाय ॥ १५० ॥

१६१–१६२] ति० टी०–विनादयन्तौ दिगादीन्प्रतिध्वनयन्तौ ॥ १६१ ॥ १६२ ॥

१ वेपितामिति गो. पा. । २ अभीति गो. पा. । ३ गिरीनिति गो. पा. ।

अपूरयत्तस्य मुखं शिनाग्रै रामः शरैर्हेमपिनद्धपुङ्खैः ।
संपूर्णवक्त्रो न शशाक वक्तुं चुक्रोज कृच्छ्रेण मुमूर्च्छ चापि ॥ ॥१६३॥
अथाददे सूर्यमरीचिकल्पं सब्रह्मदण्डान्तककालकल्पम् ।
अरिष्टमैन्द्रं निशितं नृपुङ्खं रामः शरं मारुततुल्यवेगम् ॥ ॥१६४॥
तं वज्रजाम्बूनदचारुपुङ्खं प्रदीप्तसूर्यज्वलनप्रकाशम्
महेन्द्रवज्राशनितुल्यवेगं रामः प्रचिक्षेप निशाचराय ॥ ॥१६५॥
स सायको राघवबाहुचोदितो दिशः स्वभासा दश संप्रकाशयन् ।
[1]विधूमवैश्वानरभीमदर्शनो जगाम शक्राशनिभीमविक्रमम् ॥ १६६ ॥
स तन्महापर्वतकूटसंनिभं सुवृत्तदंष्ट्रं चलचारुकुण्डलम् ।
चकर्त रक्षोधिपतेः शिरस्तदा यथैव वृत्रस्य पुरा पुरंदरः ॥ १६७ ॥
कुम्भकर्णशिरो भाति कुण्डलालंकृतं महत् ।
आदित्येऽभ्युदिते रात्रौ मध्यस्थ इव चन्द्रमाः ॥ १६८ ॥

रा० टी०–ताविति । तौ छिन्नौ तस्य कुम्भकर्णस्य पादौ प्रदिगादीन् विनाशयन्तौ सन्तौ विनिपेततुः ॥ १६१ ॥

गो० टी०–ताविति । विनाशयन्तौ दिगादीन प्रतिध्वनयन्तौ ॥ १६१ ॥

रा० टी०–निकृत्तेति । निकृत्तबाहुः कुम्भकर्णः वहन्मुखाभं वक्त्रं विदार्य राहुश्चन्द्रमिव रामं दुद्राव ॥ १६२ ॥

गो० टी०–निकृत्तेति । दुद्राव राममिति ऊर्ध्वमाभ्यामिदम । अन्यथेदं गमनं वक्ष्यमाणं पतनं च न संभवतः । राहुर्यथेति । चन्द्रमिव स्थितं राममं राहुर्यथा तथा कुम्भकर्ण इत्यर्थः ॥ १६२ ॥

१६३] ति० टी०–चुक्रुज । अवर्णेन शब्देनेति शेषः ॥ १६३ ॥

रा० टी०–अपूरयदिति । तस्य कुम्भकर्णस्य मुखं रामशरैरपूरयत् अत एव सम्पूर्णवक्त्रत्वात् वक्तुं न शशाक कृच्छ्रेण चुक्रुज मुमूर्च्छ च ॥ १६३ ॥

गो० टी०–अपूरयदिति । स्पष्टः ॥ १६३ ॥

१६४-१६५]ति०टी०–अरिष्टं रिपूणामशुभप्रदम् १६४।१६५ ।

रा० टी०–अथेति । रामः सूर्यमरीचिकल्पं ब्रह्मदण्डादिकल्पमरिष्टं शत्रूणामतिविदारकं शरमाददे ॥ १६४ ॥

गो० टी०–अथेति । अरिष्टं रिपूणामशुभप्रदम । अरिष्टं तु शुभाशुभे इत्यमरः ॥ १६४ ॥

रा० टी०–तमिति । वज्रादिभिश्चारुः पुङ्खो यस्य प्रदीप्तयोः सूर्यज्वलनयोरिव प्रकाशो यस्य तं शरं रामः प्रचिक्षेप ॥ १६५ ॥

गो० टी०–तमिति । स्पष्टः ॥ १६५ ॥

१६६] ति० टी०–शक्राशन्योरिव शक्राशनिरिव वा भीम विक्रमो यस्य तं कुम्भकर्णं जगाम ॥ १६६ ॥

रा० टी०–स इति । राघवबाहुना चोदितः स सायक स्वभासा दश दिशः प्रकाशयन् सन् जगाम ॥ १६० ॥

गो० टी०–स इति । वैश्वानरः अग्निः ॥ १६६ ॥

१६७] ति० टी०–स्खले गते चारुणी रमणीये कुण्डले यस्मात्तत्कुचारुकुण्डलम् ॥ १६७ ॥

रा० टी०–स इति । स रामः महापर्वतकूटसन्निभं रक्षोधिपतेर्शिरः वृत्रस्य शिरः पुरन्दर इव चकर्त ॥ १६७ ॥

गो० टी०–स तदिति । स्पष्टः ॥ १६७ ॥

१६८] ति० टी०–कुम्भकर्णशिर इति । कुण्डलश्यामलंकृतं विनाकृतम् । 'अरे भूषणपर्यायाभिशब्दिताभरणवाचकम् ' इत्यमरः । कुम्भकर्णस्य शिरः । अभ्रादौ प्रातःकाले आदित्ये उदिते गगनमध्यस्थचन्द्रमा इव निष्प्रभे भातीत्यर्थः अत्र श्लोकः प्रक्षिप्त इति बहवः ॥ १६८ ॥

रा० टी०–कुम्भकर्णेति । कुण्डलाभ्यामलंकृतं कुम्भकर्णशिरः आदित्ये सूर्यरूपे अभ्युदिते सति मध्यस्थचन्द्रमा इव भाति ॥ १६८ ॥

गो० टी०–कुम्भकर्णेति । कर्तनवेगादूर्ध्वं गगने स्थितं रात्रौ आदित्ये अदितिदेवताके पुनर्वसुनक्षत्रे तारकद्वयात्मके अभ्युदिते तन्मध्यगतचन्द्रमा इव बभावित्यर्थः १५

१ स इति गो. पा. । २ सेति गो. पा. । ३ कम इति गो. पा. ।

तद्रामबाणाभिहतं पपात रक्षःशिरः पर्वतसन्निकाशम् ।
बभञ्ज चर्यागृहगोपुराणि प्राकारमुच्चं तमपातयच्च ॥ १६९ ॥
तच्चातिकायं हि महत्प्रकाशं रक्षस्तदा तोयनिधौ पपात ।
ग्राहान्पुरान्मीनवरान्भुजंगाँमान्ममर्द भूमिं च तथौ विवेश ॥ १७० ॥
तस्मिन्हते ब्राह्मणदेवशत्रौ महाबले संयति कुम्भकर्णे ।
चचाल भूर्भूमिधराश्च सर्वे हर्षाच्च देवास्तुमुलं प्रणेदुः ॥ १७१ ॥
ततस्तु देवर्षिमहर्षिपन्नगाः सुराश्च भूतानि सुपर्णगुह्यकाः ।
सयक्षगन्धर्वगणा नभोगताः प्रहर्षिता रामपराक्रमेण ॥ १७२ ॥
ततस्तु ते तस्य वधेन भूरिणा मनस्विनो नैर्ऋतराजबान्धवाः ।
विनेदुरुच्चैर्व्यथिता रघूत्तमं हरिं समीक्ष्यैव यथा मैतंगजाः ॥ १७३ ॥
स देवलोकस्य तमो निहत्य सूर्यो यथा राहुमुखाद्विमुक्तः ।
तथा व्यभासीद्धरिसैन्यमध्ये निहत्य रामो युधि कुम्भकर्णम् ॥ १७४ ॥
प्रहर्षमीयुर्बहवश्च वानराः प्रबुद्धपद्मप्रतिमैरिवाननैः ।
अपूजयन्राघवमिष्टभागिनं हते रिपौ भीमबले नृपार्त्मजम् ॥ १७५ ॥

१६९-१७२] ति० टी०-इदं प्राकारं लङ्कायाः इति शेषः । शिरः कर्तनवेगोत्थितं लङ्कायां पपात । देहस्तु कर्तनवशाविलुठन्समुद्रे पपात पतितः । यद्यपि 'तं ब्रह्मदण्डेन सौमित्रिर्ददाहाद्रिवरोपमम् । स पपात महावीरो दिव्यास्त्राभिहतो रणे ॥ तं दृष्ट्वा त्रस्तसंकाशं कुम्भकर्णं तरस्विनम् । गतार्द्धं पतितं भूमौ राक्षसाः प्राद्रवन्भयात् ॥' इति महाभारतोक्त्या लक्ष्मणगतः कुम्भकर्णवधः प्रतीयते तथापि न विरोधः । रामलक्ष्मणाभ्यां मिलित्वा तद्वधकरणात्, अत एव पूर्वं लक्ष्मणानुचर इत्यत्र लक्ष्मणसहित इति व्याख्यातम् । प्राधान्यात्त्वत्र रामस्यैव तद्धन्तृत्वोक्तिः । लक्ष्मणसाहित्येन हननात्तु व्यासो लक्ष्मणस्य हन्तृत्वमुक्तवान् ॥ १६२—१७२ ॥

रा० टी०-तदिति । रामबाणाभिहतं रक्षश्शिरः पपात अत एव चर्यादीनि बभञ्ज उच्चं प्राकारमपातयत् च ॥ १७१ ॥

गो० टी०-तदिति । चर्या प्राकारोपान्तकृतभटसंचारार्हप्रदेशाः ॥ १६९ ॥

गो० टी०-व्यपतदिति । कोटयः कोटीः ॥ १६० ॥

रा० टी०-तदिति । हिमवत्प्रकाशं तद्वत्प्रकाशमपि तोयनिधौ पपात बाणवेगवशेन प्राप अत एव ग्राहादीन् ममर्द अत एव भूमिं समाविवेश ॥ १७४ ॥

गो० टी०-तच्चातिकायमिति । रक्षः कबन्धरूपं भूमिं तदा विवेश भूमिमस्त्रादित्यर्थः ॥ १६१ ॥

रा० टी०-तस्मिन्निति । कुम्भकर्णे हते सति हर्षाद्भूमिश्चचाल महीधराश्चेत्यः देवाः तुमुलं प्रणेदुश्च ॥ १७१ ॥

गो० टी०-तस्मिन् हृत इति । स्पष्टः ॥ १६२ ॥

रा० टी०-तत इति । रामपराक्रमेण देवादयः प्रहर्षिताः बभूवुरिति शेषः ॥ १७२ ॥

गो० टी०-ततस्त्विति । ॥ १६३ ॥ १६४ ॥

१७३] ति० टी०-भूरिणा महता ॥ १७३ ॥

रा० टी०-तत इति । भूरिणा महता तस्य कुंभकर्णस्य वधेन व्यथिताः नैर्ऋतराजबान्धवाः हरिं सिंहं समीक्ष्य मतङ्गजाइव रघूत्तमं समीक्ष्य उच्चैर्विनेदुः ॥ १७३ ॥

१७४] ति० टी०-देवलोकस्याकाशस्य मध्ये इति शेषः । व्यभासीद्विशेषेण भाति स्म ॥ १७४ ॥

रा० टी०-स इति । देवलोकस्य आकाशस्य तमोन्धकारं निहत्य राहुमुखाद्विमुक्तः सूर्यो यथा व्यभासीत् तथा कुम्भकर्णं निहत्य रामोऽभासीत् ॥ १७४ ॥

गो० टी०-स इति । वानरौघे वानरौघमध्ये ॥ १६५ ॥

१७५] ति० टी०-प्रबुद्धपद्मप्रतिमैरिव प्रबुद्धपद्मरूपैरिव, अतो नेवशब्दवैयर्थ्यम् । इष्टभागिनमिष्टप्राप्तिमन्तम् ॥ १७५ ॥

रा० टी०-प्रहर्षमिति । प्रबुद्धपद्मप्रतिमैः विकसितकमलसदृशैराननैरुपलक्षिताः बहवोनेकविधाः वानराः प्रहर्षमीयुः अत एव इष्टभागिनमभीष्टप्राप्तिमन्तं राममपूजयन् ॥ १७५ ॥

गो० टी०-प्रहर्षमिति । प्रबुद्धपद्मप्रतिमैरिति । प्रतिमाशब्दोत्र रूपवचनः नतु सदृशवचनः इवशब्दप्रयोगात् इष्टभागिनं जयरूपेष्टभाजम् ॥ १६६ ॥

१ तत इति गो. पा. । २ नदीनति गो. रा. पा. । ३ भुजङ्गानि गो. पा. । ४ तदेति गो समा इति रा.पा. । ५ सुरादित्या इति गो. सुरादित्य इति रा. पा. । ६ भुवि वानरौघ इति गो. पा. । ७ त्रिति गो. पा. । ८ दुरासद इति गो. रा. पा. ।

स कुम्भकर्णं सुरसैन्यमर्दनं महत्सु युद्धेषु कदाचनाजितम् ।
ननन्द हत्वा भरताग्रजो रणे महासुरं वृत्रमिवामराधिपः ॥ १७६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ।

कुम्भकर्णं हतं निशम्य रावणो मुमोह पपात च देवान्तकनरान्तकौ त्रिशिराश्चातिकायश्च महोदरमहापार्श्वौ च शोकपीडिता रुरुदुः कुम्भकर्णमुद्दिश्य रावणस्य विलापः विभीषणोपदेशानादरणजनितोऽनुतापश्च ।

कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना । राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ १ ॥
राजन्सैन्यं कालसंकाशः संयुक्तः कालकर्मणा । विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान् ॥ २ ॥
प्रतपित्वा मुहूर्तं तु प्रशान्तो रामतेजसा । कायेनार्धप्रविष्टेन समुद्रं भीमदर्शनम् ॥ ३ ॥
निकृत्तनासाकर्णेन विक्षरद्रुधिरेण च । रुद्धा द्वारं शरीरेण लङ्कायाः पर्वतोपमः ॥ ४ ॥
कुम्भकर्णस्तव भ्राता काकुत्स्थशरपीडितः । अगण्डभूतो विहतो दावदग्ध इव द्रुमः ॥ ५ ॥
श्रुत्वा विनिहतं संख्ये कुम्भकर्णं महाबलम् । रावणः शोकसंतप्तो मुमोह च पपात च ॥ ६ ॥

१७६] ति० टी०—कदाचन न कदाप्यजयवन्तम् ॥ १७६ ॥
अत्र दिनद्वयेन कुम्भकर्णोत्थानम्, ततः सप्तम-
वासरे वध इति भाद्रपदपूर्णिमायामेन-
द्वध इति पाद्मसंमतिपूर्वकमग्रे
स्फुटीभविष्यति ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय
आदिकाव्ये युद्धकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०—**स इति** । महत्सु युद्धेषु कदाचन सर्वदापि अजितं कुंभकर्णं हत्वा वृत्रं हत्वा अमराधिप इव भरताग्रजो रामो ननन्द ॥ १८० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

गो० टी०—**स कुम्भकर्णमिति** । पराजितश्रमं त्यक्तश्रमं । अत्र सर्गे अधिकाः केचन श्लोकाः क्वापि क्वापि दृश्यन्ते ते न व्याख्याताः अस्मिन्सर्गे सार्धषट्पष्टयुत्तरशतश्लोकाः ॥ १६७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीरीटा-
ख्याने युद्धकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

१] ति० टी०—**कुम्भकर्णमिति** ॥ १ ॥

रा० टी०—कुम्भकर्णवधानन्तरकालिकं राक्षसवृत्तान्तमाह—**कुम्भकर्णमित्यादिभिः** । राघवेण कुंभकर्णं हतं दृष्ट्वा राक्षसाः राक्षसेन्द्राय न्यवेदयन् ॥ १ ॥

गो० टी०—कुम्भकर्णवधश्रवणेन रावणस्य प्रलापः—**कुम्भकर्णमित्यादि** । अत्र रावणायेत्यत्र यकारो गायत्र्या अष्टादशाक्षरम् । सप्तदशसहस्रश्लोका गताः ॥ १ ॥

२] ति० टी०—कालसंकाशः कुम्भकर्णः । कालकर्म मृत्युः समुद्रमर्धप्रविष्टेन कबन्धरूपेण कायेनोपलक्षितः ॥ २ ॥

रा० टी०—तदाकारमाह—**राजन्नित्यादिभिः** । कालसंकाशः स कुम्भकर्णः वानरीं सेनां वानरांश्च विद्राव्य भक्षयित्वा च कालकर्मणा मृत्युना संयुक्तोऽभवदिति शेषः ॥ २ ॥

गो० टी०—कालकर्मणा कालस्य मृत्योः कर्मणा मरणरूपक्रियेति यावत् । यद्वा काले कर्मणा कालकर्मणा परिपक्वकर्मणेत्यर्थः ॥ २ ॥

३] ति० टी०—मुहूर्तं प्रतपित्वा विक्रम्य ॥ ३ ॥

४] ति० टी०—निकृत्तनासाकर्णत्वादिगुणेन शरीरेण शिरःलक्षणेन लङ्काद्वारं रुद्धा पर्वतोपमः कुम्भकर्णो रामतेजसा प्रशान्त इति पूर्वश्लोकेनान्वयः ॥ ४ ॥

५–६] ति० टी०—अगण्डभूतः । ‘ अशिरःपाणिपादस्तु कबन्धोऽगण्ड उच्यते ’ । विहतो विकृतकायः । भवत्वात् । दावदग्धो द्रुम इव प्रशान्त इत्यन्वयः ॥ ५ ॥ ६ ॥

रा० टी०—तत्प्रकारमाह—**प्रतपित्वेति** । समुद्रमर्धप्रविष्टेन कायेन कबन्धरूपेण मुहूर्तं प्रतपित्वा प्रतप्य कृत्वा नासाकर्णे यस्मात्तेन अत एव विक्षरत् रुधिरं यस्मात्तेन शरीरेण शिरसेत्यर्थः लंकाया द्वारं रुद्धा काकुत्स्थशरपीडितः अत एव दावदग्धद्रुम इव विकृतः अत एव अगण्डभूतः कुम्भकर्णोयमिति बोधकचिह्नाभावं प्राप्तः पर्वतोपमः कुम्भकर्णः रामतेजसा प्रशान्तोऽभवदिति शेषः । श्लोकत्रयमेकान्वयि ॥ ३–६ ॥

१ संघेति गो. पा. । २ पराजितश्रममिति गो. अजितं कदाचनेति रा. पा. । ३ रिति गो. पा. । ४ चेति गो. पा. । ५ कष्टोरुभुज इति गो. पा. । विक्षरन् रुधिरं वक्षीति गो. पा. । ७ अगण्ड इति गो. पा. । ८ तं श्रुत्वा निहतमिति गो. पा. ।

पितृव्यं निहतं श्रुत्वा देवान्तकनरान्तकौ । त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः ॥ ७ ॥
भ्रातरं निहतं श्रुत्वा रामेणाक्लिष्टकर्मणा । महोदरमहापार्श्वौ शोकाक्रान्तौ बभूवतुः ॥ ८ ॥
ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुंगवः । कुम्भकर्णवधादीनो विललापाकुलेन्द्रियः ॥ ९ ॥
हा वीर रिपुदर्पघ्न कुम्भकर्ण महाबल । त्वं मां विहाय वै दैवाद्यातोऽसि यमसादनम् ॥ १० ॥
मम शल्यमनुद्धृत्य बान्धवानां महाबल । शत्रुसैन्यं प्रताप्यैकः क्व मां संत्यज्य गच्छसि ॥ ११ ॥
इदानीं खल्वहं नास्मि यस्य मे पतितो भुजः । दक्षिणोऽयं समाश्रित्य न बिभेमि सुरासुरात् ॥ १२ ॥
कथमेवंविधो वीरो देवदानवदर्पहा । कालाग्निप्रतिमो युद्धे रामेण रणे हतः ॥ १३ ॥
यस्य ते वज्रनिष्पेषो न कुर्याद्व्यसनं सदा । स कथं रामबाणार्तः प्रसुप्तोऽसि महीतले ॥ १४ ॥
एते देवगणाः सार्षिभिर्गगने स्थिताः । निहतं त्वा रणे दृष्ट्वा निनदन्ति प्रहर्षिताः ॥ १५ ॥
ध्रुवमद्यैव संहृष्टा लब्धलक्षाः प्लवंगमाः । आरोक्ष्यन्तीह दुर्गाणि लङ्कोद्वाराणि सर्वशः ॥ १६ ॥
राज्येन नास्ति मे कार्यं किं करिष्यामि सीतया । कुम्भकर्णविहीनस्य जीविते नास्ति मे मतिः ॥ १७ ॥
यद्यहं भ्रातृहन्तारं न हन्मि युधि राघवम् । ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितम् ॥ १८ ॥

रा० टी०—श्रुत्वेति । कुम्भकर्णं विनिहतं श्रुत्वा शोकसंतप्तो रावणः मुमोह पपात च ॥ ६ ॥

गो० टी०—प्रतिपित्वा । पराक्रम्य, एतदारभ्य श्लोकत्रयमेकान्वयम् । अर्धप्रविष्टेन अर्धेन कबन्धमात्रेण प्रविष्टेन कायेन समुद्रं रुद्धा शरीरेण उत्तमाङ्गेन द्वारं रुद्धा लगण्डभूतः पिण्डीभूतः । लगण्डोऽजगर इत्येके । विकृतः विकृतशरीरः रामतेजसा प्रशान्त इत्यन्वयः ॥ ३–१० ॥

७] ति० टी०—देवान्तकादयो रावणपुत्राः ॥ ७ ॥

रा० टी०—पितृव्यमिति । पितृव्यं कुम्भकर्णं निहतं श्रुत्वा देवान्तकप्रभृतयः शोकपीडिता रुरुदुः । देवान्तकप्रभृतयो रावणात्मजा बोध्याः ॥ ७ ॥

८–९०] ति० टी०—महोदरमहापार्श्वौ विमातृजौ भ्रातरौ तस्य ॥ ८–१० ॥

रा० टी०—भ्रातरमिति । भ्रातरं निहतं दृष्ट्वा श्रुत्वा महोदरमहापार्श्वौ शोकेनाक्रान्तौ बभूवतुः ॥ ८ ॥

रा० टी०—तत इति । ततस्मपुत्रो रावणः कृच्छ्रात्संज्ञां समासाद्य विललाप ॥ ९ ॥

रा० टी०—तदाहास्माद—हेति । हे कुम्भकर्ण मां विहाय यमसादनं संयमिनां स्थानं जानासि ॥ १० ॥

११] ति० टी०—बान्धवानां च शल्यमनुद्धृत्येत्यन्वयः॥११॥

रा० टी०—ममेति । शत्रुसैन्यं प्रताप्यापि मम बान्धवानां च शल्यं रिपुरूपशरमनुद्धृत्य मां संत्यज्य क्व गच्छसि ॥ ११ ॥

गो० टी०—ममेति । मम बान्धवानां च शल्यं शोकमित्यर्थः ॥ ११ ॥

१२–१३] ति० टी०—अहं नास्मि । अहमपि मृतप्राय इत्यर्थः । सुरासुरान्तरासुरेभ्यः ॥ १२ ॥ १३ ॥

रा० टी०—इदानीमिति । अयं बान्धवस्य मम मे दक्षिणो भुजस्समाश्रित्य प्राप्य इदानीं पतितो मृत इत्यर्थः सोऽहं नास्मि मृतप्राय इत्यर्थः अत एव सुरासुरान् न बिभेमि कृतसमरनिश्चयस्य न कुतश्चिद्भीतिरित्यर्थः ॥ १२ ॥

रा० टी०—कथमिति । एवंविधो वीरः रामेण कथं हतः ॥ १३ ॥

गो० टी०—इदानीमिति । सुरासुरान् सुरासुरेभ्यः १२–१३

१४–१५] ति० टी०—वज्रनिष्पेषस्तदाघातोऽपि यस्य व्यसनं दुःखं न कुर्यात् ॥ १४ ॥ १५ ॥

रा० टी०—बुद्धिस्थं कुम्भकर्णमुद्दिश्याह—यस्येति । यस्य ते तव वज्रनिष्पेषः तदाघातः व्यसनं दुःखं सदा न कुर्यात् स त्वं रामबाणार्तस्सन् कथं प्रसुप्तोऽसि ॥ १४ ॥

रा० टी०—एते इति । निहतं त्वां दृष्ट्वा प्रहर्षिताः देवगणाः निनदन्ति ॥ १५ ॥

१६] ति० टी०—लब्धलक्षा लब्धावसराः ॥ १६ ॥

रा० टी०—ध्रुवमिति । प्लवङ्गमा इह अस्मिन् समये लंकाद्वाराणि आरोक्ष्यन्ति ॥ १६ ॥

गो० टी०—ध्रुवमिति । लब्धलक्षाः लब्धावसराः १६–१७

१७–१८] ति० टी०—जीविते नास्ति मे मतिः । सजीवितयावस्थाने बुद्धिर्नास्तीत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०—राज्येनेति । यस्य मे जीविते मतिर्नास्ति तस्य मे राज्येन कार्यं नास्ति अतः सीतया किं करिष्यामि एतेन राज्यकल्याणार्थमेव रावणकर्तृकसीताप्रमादकरणेत्यलाऽभवदिति सूचितम् ॥ १७ ॥

रा० टी०—यद्दीति । यद्यहं राघवं न हन्मि तर्हि मे मरणं श्रेयः इदं भ्रातृविघातकवपरहितं व्यर्थजीवितं न श्रेयः ॥ १८ ॥

१ उद्धृति गो. पा. । २ स रावण इति गो. रा. पा. । ३ त्वमिति गो. पा. । ४ दक्षिण इति गो. रा. पा. । ५ पतित इति गो. रा.पा. । ६ स्वप्रातिम इति गो. पा. । ७ रणे रामेण वै इति गो. पा. । ८ जीवितमिति गो. रा. पा. ।

रक्षोऽधिपतेः काकुत्स्थं रामं दृष्ट्वा दीप्यमानं ज्वलनमिव जीवन्नागमिष्यति । दीप्यमानमिवात्याय पतङ्गः ज्वलनं यथा ॥ २५
पलायनेन बोधिताः प्राणान्रक्षामहे वयम् । एकेन बहवो भग्नाः यशोनाशं गमिष्यति ॥ २७
एवं ब्रुवाणं तं शूरमब्रुवं कनकाङ्गदम् । द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितम् ॥ २८
कृतं नः कदनं घोरं कुम्भकर्णेन रक्षसा । न स्थानकालो गच्छाम्यो दयितं जीवितं हि नः ॥ २९
एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः । भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः ॥ ३०
द्रवमाणास्तु ते वीरा अङ्गदेन बलीमुखाः । सौम्यैर्नयैश्चानुमानैश्च ततः सर्वे निवर्तिताः ॥ ३१
प्रहर्षमुपनीताश्च वालिपुत्रेण धीमता । आज्ञाप्रतीक्षास्तस्थुश्च सर्वे वानरयूथपाः ॥ ३२

ऋषभशरभमैन्दनीलाः कुमुदसुषेणगवाक्षरम्भतारादयः ।
द्विविदपनसवायुपुत्रमुख्यास्त्वरितनराभिमुखं गणं प्रेयाताः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

हिरण्यगर्भभूमानत्वं भोक्ष्यामोऽनुभविष्यामः । 'जीवितं वीरलोकस्य मोक्ष्यामः' इति पाठोऽशुद्धः, नापि तत्रार्थसामञ्जस्यम् तत्र हि ब्रह्मलोकस्य वस्तु मूल्यभूतं जीवितं भोक्ष्याम इत्यर्थं तीर्थं आह ॥ २५ ॥

रा० टी०—अत्र स्थितौ कल्याणमेवेति बोधयन्नाह—अथाब्रुवामिति । हे वानराः शत्रुं निहत्य निहत्य कीर्तिमयामः वा यदि निहताः तदा वीरलोकस्य वीरप्राप्यब्रह्मभुवनस्य वस्तु धनं भोक्ष्यामः ॥ २५ ॥

६] ति० टी०—नन्वेवं कथमपि जयप्रत्याशाभावेन स्थित्या ाजनमत आह—न कुम्भकर्ण इति ॥ २६ ॥

ा० टी०—वस्तुतस्तु विजय एव भविष्यतीति बोाह—नेति । कुम्भकर्णः काकुत्स्थं रामं दृष्ट्वा दीप्यमानं ं वह्निमासाय पतङ्ग इव जीवन्नागमिष्यति ॥ २६ ॥

ा० टी०—न कुम्भकर्ण इति । दीप्यमानं ज्वलनमिव त्साय कुम्भकर्णः पतङ्गो यथेति यथेवशब्दयोर्निर्देहः २७
७–३०] ति० टी०—उदिष्टा महावीरेषु गणिता बहवो ंकन भग्नाः पलायनेन यदि प्राणान्रक्षामहे तदा यशो ं गमिष्यति । यद्वोदिष्टा एते पलायिता इति जनैर्निर्दिष्टा र्थः ॥ २७–३० ॥

रा० टी०—पलायनेनेति । उदिष्टाः वीरेषु ख्याताः बहवो यथेकेन भग्नास्सन्तः पलायनेन प्राणान् रक्षामहे तदा यशोाकं कीर्तिनाशं गमिष्यति ॥ २७ ॥

गो० टी०—पलायनेनेति । उदिष्टाः व्यपदिष्टाः बहवो नेन कुम्भकर्णेन भग्नाः पलायनेन प्राणान् रक्षामहे यदि । यशो नाशं गमिष्यतीति योजना ॥ २८ ॥

रा० टी०—एवमिति । एवं ब्रुवाणमङ्गदं द्रवमाणाः रराः वीरविगर्हितं वाक्यमब्रुवन् ॥ २८ ॥

गो० टी०—एवमिति । सर्वं पराक्रमयन्तम् । कनकाङ्ग ाभरणोपेतम् ॥ २९ ॥

रा० टी०—तदाकस्मात्—कृतमिति । कुम्भकर्णेन कदनं कृतमतः स्थानकालः स्थितिसमयो न अत्र हेतुः हि जीविते नोऽस्माकं दयितं प्रियम् ॥ २९ ॥

रा० टी०—एतावदिति । वानरयूथपाः भीमाक्षं कुम्भ र्णमायान्तं दृष्ट्वा एतावद्वचनमुक्त्वा दिशो भेजिरे ॥ ३०

गो० टी०—कृतमिति । कदनं मर्दनम् दयितमिष्टम् ॥ २९ ॥

३१] ति० टी०—अङ्गदेनागतानामनुत्साहसमनालम्भेन जयानुमानैः ॥ ३१ ॥

रा० टी०—द्रवमाणा इति । बलीमुखाः मुख्याः ते द्रवमाणाः वीराः अङ्गदेन सान्त्वनैः सान्त्वनकारकैरङ्गम वालिवधादिसमये अनुभूतरामलक्ष्मणपराक्रमस्मारकैः कुम्भकर्णविष प्रत्ययकहेतुभिर्निवर्तिताः ॥ ३१ ॥

गो० टी०—द्रवमाणा इति । अनुमानैः सान्त्वनैरिभेव दिदृष्टान्तपुरस्कृतैर्युक्तिविशेषैः ॥ ३१ ॥

३२] ति० टी०—आज्ञाप्रतीक्षा एतदाज्ञाप्रतीक्षाः ॥ ३

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

रा० टी०—प्रहर्षमिति । वालिपुत्रेण प्रहर्षमुपनीताः एव आज्ञाप्रतीक्षाः वानरयूथपाः तस्थुः ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

गो० टी०—प्रहर्षमिति । आज्ञाप्रतीक्षाः लब्धाज्ञाप्रतीक्षाः ॥ ३२ ॥

गो० टी०—ऋषभशरभेति । त्वरितनराभिमुखं स तरम् अभिमुखं चेति क्रियाविशेषणम् । अत्र वायुपु न पलाय्य निहतः । किं तु कथमपि मिलित्वा कुम्भक सह युद्धार्थं निहत इति ज्ञेयम् ॥ ३३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीट स्थाने युद्धकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।

अत्र सुधीरं युध्यमानस्य कुम्भकर्णस्य कपिभिः सङ्ग्रामः तत्रापि हनुमताद्रिणा सुग्रीवेण च कण्ठे सुग्रीवकृतकुम्भकर्ण नासेन्द्रियच्छेदनं हनुमत्कृततच्छूलभक्षणमन्ते रामेण संगमे बाहुकर्तनपूर्वकः कुम्भकर्णवधः ।

ते निवृत्ता महाकायाः श्रुत्वाङ्गदवचस्तदा । नैष्ठिकीं बुद्धिमास्थाय सर्वे सङ्ग्रामकाङ्क्षिणः ॥ १ ॥
समुदीरितवीर्यास्ते[1] समारोपितविक्रमाः । पर्यवस्थापिता वीरैरङ्गदेन वधैषिणा ॥ २ ॥
प्रभाताश्च गता हर्षं मरणे कृतनिश्चयाः । चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः ॥ ३ ॥
अथ वृक्षान्महाकायाः सानूनि सुमहान्ति च । वानरास्तूर्णमुद्यम्य कुम्भकर्णमभिद्रवन् ॥ ४ ॥
कुम्भकर्णः सुसंक्रुद्धो गदामुद्यम्य वीर्यवान् । धर्षयन्स महाकायः समन्वाद्रवैक्षिपद्गिरीन् ॥ ५ ॥
शतानि सप्त चाष्टौ च सहस्राणि च वानराः । प्रकीर्णाः शेरते भूमौ कुम्भकर्णेनताडिताः ॥ ६ ॥
षोडशाग्रौ च दश च विंशतिंशतथैव च । परिक्षिप्य च बाहुभ्यां खादन्सैन्यं परिधावति ॥
भक्षयन्भृशसंक्रुद्धो गरुडः पन्नगानिव ॥ ॥ ७ ॥
कृच्छ्रेण च समाश्वस्ताः संगम्य च ततस्ततः । वृक्षाद्रिहस्ता हरयस्तस्थुः सङ्ग्राममूर्धनि ॥ ८ ॥
ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः । दुद्राव गिरिगुङ्गाभं विलम्ब इव तोयदः ॥ ९ ॥

१] ति० टी०–अथ सर्गावतरणोद्देशः सांग्रहायिकः । प्रकरणत्वाद्भूमभेदाभावेति कृतकः ॥ वक्ष्यमाणवादः–ते वृत्ता इति । नैष्ठिकीं निश्चिताम् निशानाशरतसंबन्धिनीं मरणपर्यवसायिनीमित्यर्थः इति तीर्थः ॥ १ ॥

रा० टी०–पलायनान्निवृत्तानां वानराणां कुम्भकर्णसह–इत्यादिभिः । अङ्गदवचः श्रुत्वा नैष्ठिकीमचलां बुद्धिं स्थिति–क्षयकमतिमास्थाय संग्रामकांक्षिणोऽभवन्निति शेषः ॥ १ ॥

गो० टी०–ते निवृत्ता इत्यादि । चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविता इत्यन्तमेकं वाक्यम् । नैष्ठिकीं निशा–तः तत्संबन्धिनीम् मरणव्यवसायिनीमित्यर्थः । समुदी–रितवीर्याः कपित्वात्परावक्रमाः समारोपितविक्रमाः समुत्क–टपराक्रमाः । मरणनिश्चयहेतुमाह–त्यक्तजीविता इति । त्यक्तप्राणरहिता इत्यर्थः ॥ १–४ ॥

२–८] ति० टी०–समुदीरितवीर्याः समुदीरितविक्रमाः पितार्थीयपूर्वपराक्रमाः समारोपितविक्रमा इति गृहीत–क्रमाः ॥ २–८ ॥

रा० टी०–समिति । अङ्गदेन वाक्यैः पर्यवस्थापिताः बोधिताः अत एव समुदीरितानि संस्मृतानि वीर्याणि यैः । वानराः समारोपितविक्रमाः प्रकटीकृतपराक्रमाः अभव–न्निति शेषः ॥ २ ॥

रा० टी०–प्रयाता इति । प्रयाताः अकृतसमीपं प्राप्ताः [2]हर्षोत्साहं गताः प्राप्ताः अत एव मरणे कृतनिश्चयाः अत एव त्यक्तजीविताः परित्यक्तभोजनादिव्यापाराः वानराः सुतुमुलं युद्धं चक्रुः ॥ ३ ॥

रा० टी०–अथेति । वानराः महान्ति सानूनि शृङ्गाणि कुम्भकर्णमभिद्रवन् अभ्यद्रवन् ॥ ४ ॥

रा० टी०–कुम्भकर्ण इति । सुसंक्रुद्धः कुम्भकर्णः [3]सैन्यं धर्षयन् स्वप्रागल्भ्यं प्रकटयन् रिपून् व्यक्षिपत् ॥

गो० टी०–स इति । व्यक्षिपत् अपातयत् ॥ ५ ॥

रा० टी०–शतानीति । कुम्भकर्णेन ताडिताः अत प्रकीर्णाः शतप्रभृतयो वानराः भूमौ शेरते ॥ ६ ॥

गो० टी०–शतानीति । प्रकीर्णाः शिथिलावयवाः [4]पिताः हिंसिताः कुम्भकर्णस्यैकेन व्यापारेण शतादि–[5]पेण पतिता इत्यर्थः ॥ ६ ॥

रा० टी०–षोडशेति । षोडशप्रभृतीन् वानरान् बा परिक्षिप्य पन्नगान् भक्षयन् गरुड इव खादन्सन् परिध–[6]तीत्यर्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–षोडशेत्यादि । परिक्षिप्य परिगृह्य खा भक्षयन् । पन्नगान् भक्षयन्निवेति गरुडविशेषणम् ॥ ७ ॥

रा० टी०–कृच्छ्रेणेति । कृच्छ्रेण अनेकविधयत्नेनेत समाश्वस्ताः स्वास्थ्यं प्राप्ताः अत एव वृक्षाद्रिहस्ता हर संग्राममूर्धनि [7]तस्थुः ॥ ८ ॥

गो० टी०–कृच्छ्रेणेति । हरयः वलन्त इति शेष संगम्य संघृत्य ॥ ८ ॥

९] ति० टी०–विशेषेण लम्बत इति विलम्बः ॥ १ ॥

रा० टी०–तत इति । तोयद इव विलम्बः प्रलम्बशरीर द्विविदः गिरिगुङ्गाभं कुम्भकर्णं दुद्राव ॥ ९ ॥

---

१ आसलीति गो० पाठः । २ चेति गो० पाठः । ३ वक्षीमुखा इति गो० पाठः । ४ हृष्ट इति गो० पाठः । ५ [illegible] ६ अर्धमिति गो० पाठः । ७ स्थाःपदेति गो० पाठः । ८ पोथिता इति गो० पाठः । ९ [illegible]

स तैस्तथा भास्करतुल्यदर्शनैः सुतैर्वृतः शत्रुबलश्रियार्दनैः ।
रराज राजा मघवान्यथामरैर्वृतो महादानवदर्पनाशनैः ॥ १४ ॥

स पुत्रान्संपरिष्वज्य भूषयित्वा च भूषणैः । आशीर्भिश्च प्रशस्ताभिः प्रेषयामास वै रणे ॥ १५ ॥
युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः । रक्षणार्थं कुमाराणां प्रेषयामास संयुगे ॥ १६ ॥
तेऽभिवाद्य महात्मानं रावणं लोकरावणम् । कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे ॥ १७ ॥
सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः । निर्जग्मुर्नैर्ऋतश्रेष्ठाः षण्ढेते युद्धकाङ्क्षिणः ॥ १८ ॥
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ । महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः ॥ १९ ॥
ततः सुदर्शनं नाम नीलजीमूतसंनिभम् । ऐरावतकुले जातमारुरोह महोदरः ॥ २० ॥
सर्वायुधसमायुक्तस्तूणीभिश्चाप्यलंकृतः । रराज गजमास्थाय सवितेवास्तमूर्धनि ॥ २१ ॥
हयोत्तमसमायुक्तं सर्वायुधसमाकुलम् । आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः ॥ २२ ॥
त्रिशिरा रथमास्थाय विरराज धनुर्धरः । सविद्युदुल्कः सज्वालः सेन्द्रचाप इवाम्बुदः ॥ २३ ॥
त्रिभिः किरीटैस्त्रिभिः शिराः शुशुभे सैन्यं रथोत्तमे । हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः ॥ २४ ॥
अतिकायोऽतितेजस्वी राक्षसेन्द्रसुतस्तदा । आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम् ॥ २५ ॥

गो० टी०—सर्व इति । विद्युतः विद्यावन्तः । प्रख्यविज्ञानाः उत्कृष्टशास्त्रज्ञानाः ॥ १३ ॥

१४] ति० टी०—शत्रूणां बलस्य श्रीणां चार्दनैरित्यर्थे श्रेयार्दनैरित्यार्षम् ॥ १४ ॥

रा० टी०—स इति । शत्रुबलश्रियोरर्दनैस्सतैर्वृतो राजा स रावणः महादानवदर्पनाशनैरमरैर्वृतो मघवानिव रराज । श्रियार्नैरित्यार्षमिति भट्टारः । शत्रुबलप्रमर्दनैरिति क्वचित्पाठः । व्याख्या तु नैतस्य ॥ १४ ॥

गो० टी०—स तैरिति । तुल्यवर्चसैरित्यत्र समासान्त आर्षः ॥ १४ ॥

१५] ति० टी०—आशीर्भिरित्यस्य संयुज्येति शेषः ॥ १५ ॥

रा० टी०—स इति । स रावणः पुत्रान संपरिष्वज्य आशीर्भिस्संयोज्येति शेषः रणे प्रेषयामास ॥ १५ ॥

गो० टी०—स इति । आशीर्भिः सहेति शेषः ॥ १५ ॥

१६—१७] ति० टी०—युद्धोन्मत्तमत्तशब्दौ महोदरमहापार्श्वयोः पर्यायनामनी ॥ १६ ॥ १७ ॥

रा० टी०—युद्धेति । युद्धोन्मत्तं महोदरं मत्तं महापार्श्वं । भ्रातरौ कुमाराणां रक्षणार्थं प्रेषयामास ॥ १६ ॥

गो० टी०—युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावण इति । अत्र युद्धोन्मत्तौ महोदरमहापार्श्वपर्यायनामानौ रावणभ्रातरौ एतौ परत्र प्रकाशयिष्येते ॥ १६ ॥

रा० टी०—ते इति । महाकायास्ते पुत्रादयः प्रतस्थिरे ॥ १७ ॥

गो० टी०—त इति । रिपून् रावयतीति रिपुरावणः ॥ १७ ॥

१८-२०] ति० टी०—सर्वौषधीभिरायुधप्रहारनिवारणौषधिविशेषैः ॥ १८—२० ॥

रा० टी०—सर्वेति । षण्ढेते महाबलाः सर्वौषधीभिरायुधाघातनिवारकौषधिज्ञानेनगन्धैश्च समालभ्य संस्पृश्य निर्जग्मुः १८

रा० टी०—तेषां नामानि निर्दिशन्नाह—त्रिशिरा इति । त्रिशिरःप्रभृतयो निर्जग्मुः ॥ १९ ॥

रा० टी०—तत इति । महोदरः सुदर्शनं नागमारुरोह ॥ २० ॥

गो० टी०—सर्वौषधीभिरिति । सर्वौषधीभिः कोशीमांसी हरिद्रे द्वे मुरा शैलेयचन्दनं । वचाचम्पकमुस्ताश्च सर्वौषधयो दश स्मृताः । इत्युक्ताभिः आयुधप्रहारनिवर्तकाभिः औषधीभिरित्याहुः । समालभ्य समालिप्य ॥ १८—२० ॥

२१-२२] ति० टी०—सवितेवास्तमूर्धनीत्यनेन शीघ्रं नाशः सूचितः ॥ २१ ॥ २२ ॥

रा० टी०—सर्वेति । सर्वायुधसमायुक्तो महोदरः गजमास्थाय अस्तमूर्धनि अस्ताचलस्थे सवितेव रराज ॥ २१ ॥

रा० टी०—हयेति । हयोत्तमे. समायुक्तं रथश्रेष्ठं त्रिशिरा आरुरोह ॥ २२ ॥

गो० टी०—सर्वायुधेति । अस्तमूर्धनीत्येतदुत्तरक्षणे विनाशसूचनाय ॥ २१-२३ ॥

२३] ति० टी०—विद्युद्भिरुल्काभिः सहितः ॥ २३ ॥

रा० टी०—त्रिशिरा इति । त्रिशिरा विरराज । अर्कं पृथक् । तदेव विशदयन्नाह—सेति । स विद्युदुल्कः विद्युदुल्काभ्यां सहितः सज्वालः ज्वालसहितः सेन्द्रचापोऽम्बुद इत त्रिभिः काञ्चनपर्वतैरुपलक्षितो हिमवानिव च त्रिभिः किरीटैरुपलक्षितः त्रिशिराः शुशुभे । सार्धश्लोक एकान्वयी ॥ २३ ॥ २४ ॥

२४-२५] ति० टी०—काञ्चनपर्वतैः शिखरभूतैरुक्तो हिमवानिव ॥ २४ ॥ २५ ॥

---

१ वर्चसैरिति गो.पा.। २ बलमर्दनैरिति गो.पा.। ३ संयुग इति गो. पा.। ४ रिक्षिति गो.पा.। ५ नामेति गो.पा.। ६ यूक्ष्मिति गो.रा.पा.। ७ अर्कं तमिति रा. स्वरूपमिति गो.पा.। ८ शैलाग्र इति गो.पा.। ९ शुशुभे त्रिशिरा रा. इति गो.पा.। १० स्यन्दनोत्तम इति रा.पा.। ११ अपीति गो. पाठः

सुचक्राक्षं सुसंयुक्तं सानुकर्षं सकूबरम् । तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम् ॥ २६ ॥
स काञ्चनविचित्रेण किरीटेन विराजता । भूषणैश्च बभौ मेरुः प्रभाभिरिव भासयन् ॥ २७ ॥
स राज रथे तस्मिन्राजलुनुर्महाबलः । वृतो नैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः ॥ २८ ॥
हयमुख्यैश्चतुर्युक्तं खेचरं कनकभूषणम् । मनोजवं महाकायमारुरोह नरान्तकः ॥ २९ ॥
गृहीत्वा परमुत्कृष्टं विरराज नरान्तकः । शक्तिमादाय तेजस्वी गुहः शिखिगतो यथा ॥ ३० ॥
देवान्तकः समादाय परिघं हेमभूषणम् । परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन् ॥ ३१ ॥
महापार्श्वो महातेजा गदामादाय वीर्यवान् । विरराज गदापाणिः कुबेर इव संयुगे ॥ ३२ ॥
ते प्रतस्थुरिवाभोगैर्भोगवन्तः सुरा इव । तान्गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिःस्वनैः ॥ ३३ ॥
अनुपेतैर्महात्मानो राक्षसाः पत्तरायुधाः । ते विरेजुर्महात्मानः कुमाराः सूर्यवर्चसः ॥ ३४ ॥
किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे । प्रगृहीता बभौ तेषां वस्त्राणामावलिः शिता ॥ ३५ ॥
शरदभ्रप्रतीकाशा हंसावलिरिवाम्बरे । मरणं वापि निश्चित्य शत्रूणां वा पराजयम् ॥ ३६ ॥
इति कृत्वा मतिं वीराः संजग्मुः संयुगार्थिनः । जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान् ॥ ३७ ॥

२६ ३०] ति० टी० सुचक्रमिति । सुचक्रं परिपूर्णचक्रम् । सानुकर्षं रथाधोभागे [1] कीलस्थानीयं स्थापितं दारुविशेषोऽनुकर्षः । [2] कूबरो रथावयवः । तूणीरः । सकूबरम् । [3] कूबरस्तु युगंधरः ॥ २६–३० ॥

गो० टी०-किरीटिनः श्रीभिः साङ्गदपर्वते शिखरभ्रान्तिमादधतीत्येवं ॥ २५ ॥

रा० टी०-स्वनिकाय इति । राक्षसेन्द्रसुतोऽतिकायः शोभनैः खेचरैः अश्वैः युक्तम् । शोभनास्संयुक्ताः अश्वा इत्यर्थः । तस्मिन् अनुकर्षेण रथाधोभागस्थेन दारुविशेषेण स्थापितदारुविशेषेण सहितं तूणीरबाणासनैश्चापेक्षं दीप्तं प्रासादिभिराकुलं व्याप्तमाकरोत् । [4] अनुकर्षोऽश्वबन्धस्थमित्यमरः । श्लोकत्रयमेकान्वयि । २६ ॥ २७ ॥

गो० टी०-अतिकाय इत्यादिश्लोकद्वयमेकान्वयम् । सुसंयुक्तं शोभनैरश्वैः । अनुकर्षो दारुबन्धस्थमित्यमरः । सकूबरं शोभनयुगंधरम् । कूबरस्तु युगंधर इत्यमरः ॥ २६ ॥ २७ ॥

रा० टी०-स इति । प्रभाभिरिव विराजता शोभनेन किरीटेन भूषणैश्च भासयन् एतादृशो बभौ ॥ २७ ॥

रा० टी०-स इति । नैर्ऋतशार्दूलैस्तत्सोदरातिकायो रथे राजत ॥ २८ ॥

रा० टी०-हयमिति । खेचरं नरान्तकः हयमारोह ॥ २९ ॥

रा० टी०-गृहीत्वेति । शक्तिमादाय शिखिगतो मयूरारूढो गुह इव प्रासं गृहीत्वा नरान्तकः विरराज ॥ ३० ॥

रा० टी०-स इति । विष्णोः भासयन् भासमानः । मेरुरिव बभावित्यन्वयः ॥ २७–३० ॥

३१–३२] ति० टी०-परिघं समादाय स्थितो देवान्तकः दोर्भ्यां गिरिं समुद्रमथने मन्दरगिरिं परिगृह्य स्थितस्य विष्णोर्वपुर्विडम्बयन्निव राजेत्यनुकर्षः ॥ ३१ ॥ ३२ ॥

रा० टी०-देवान्तक इति । देवान्तकः परिघं समादाय दोर्भ्यां गिरिं समुद्रमथनाय मन्दराचलं परिगृह्य स्थितस्य विष्णोः वपुर्विडम्बयन्वनुकुर्वन् यद् राजेत्यनुकृष्यते ॥ ३१ ॥

रा० टी०-महापार्श्व इति । महापार्श्वः गदामादाय गदापाणिः कुबेर इव विरराज ॥ ३२ ॥

गो० टी०-देवान्तक इति । अत्रापि विरराजेति संबध्यते । देवान्तकः परिघमादाय समुद्रमथने गिरिं मन्दरगिरिमिव परिगृह्य तिष्ठतो विष्णोर्वपुर्विडम्बयन् विरराज ॥ ३१–३६ ॥

३३–३५] ति० टी०-अमरावत्याः सुरा इव अद्भुताः प्रतस्थुरित्यन्वयः ॥ ३३—३५ ॥

रा० टी०-ते इति । ते विशारःप्रभृतयः अमरावत्या सुरा इव प्रतस्थुः अत एव महात्मानो राक्षसाः गजादिभिः तानवतस्थेतुः । सार्धश्लोक एकान्वयी ॥ ३३ ॥

रा० टी०-ते इति । श्रिया जुष्टास्ते कुमाराः अम्बरे दीप्ता ग्रहा इव विरेजुः ॥ ३४ ॥

गो० टी०-प्रगृहीतेति । प्रगृहीता शरदभ्रप्रतीकाशा तेषां शस्त्राणामावलिः अम्बरे हंसावलिरिव बभौ ॥ ३५ ॥

३६] ति० टी०-निश्चित्य निश्चयेन मरणं शत्रुपराजयं वा । करिष्याम इति शेषः ॥ ३६ ॥

रा० टी०-मरणमिति । मरणं पराजयं रिपुकर्मकजयं वा करिष्यामीति शेषः । इति मतिं कृत्वा संयुगार्थिनो वीरास्संजग्मुः ॥ ३६ ॥

गो० टी०-मरणं वेत्यर्धं निर्जग्मुरित्युपस्कार्यम् ॥ ३७ ॥

३७] ति० टी०-चिक्षिपुः शत्रुविषयाक्षेपवचनान्यूचुः । सायकानित्यस्य जगर्जुरित्यनेनान्वयः ॥ ३७ ॥

रा० टी०-जगर्जुरिति । युद्धदुर्मदा राक्षसाः गर्जनादि चक्रुः ॥ ३७ ॥

---

१ स्वनुकर्ष सुचक्रमिति गो. पाठः । २ किलीरिति गो. पाठः । ३ वन्त्रेति गो. रा. पाठः । ४ भूषिताभिति रा. पाठः । ५ प्रतस्थिर इति गो.पाठः । ६ बलेप्रतिभेदेना इति गो. रा. पाठः । ७ जगुरिति गो. पाठः । ८ सितेति गो. पाठः । ९ शारदेति गो. पाठः । १० निरिति गो. रा. पाठे ।

जगृहुश्च महात्मानो निर्यांता युद्धदुर्मदाः । क्ष्वेडितास्फोटितैर्नादैः संचचालेव मेदिनी ॥ ३८ ॥
रक्षसां सिंहनादैश्च संस्फोटितमिवाम्बरम् । तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रं महाबलाः ॥ ३९ ॥
ददृशुर्वानरानीकं समुद्यतशिलाद्रुमम् । हरयोऽपि महात्मानो ददृशू रक्षसां बलम् ॥ ४० ॥
हस्त्यश्वरथसंबाधं किङ्किणीशतनादितम् । नीलजीमूतसंकाशं समुद्यतमहायुधम् ॥ ४१ ॥
दीप्तानलरविप्रख्यैर्नैर्ऋतैः सर्वतो वृतम् । तद्दृष्ट्वा बलमायातं लब्धलक्षाः प्लवंगमाः ॥ ४२ ॥
समुद्यतमहाशैलाः संप्रणेदुर्मुहुर्मुहुः । अमृष्यमाणा रक्षांसि प्रतिनेदन्त वानराः ॥ ४३ ॥
ततः समुत्क्रुष्टरवं निशम्य रक्षोगणा वानरयूथपानाम् ।
अमृष्यमाणाः परहर्षमुग्रमहाबला भीमतरं प्रणेदुः ॥ ॥ ४४ ॥
ते राक्षसबलं घोरं प्रविश्य हरियूथपाः । विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥ ४५ ॥
केचिदाकाशमाविश्य केचिदुर्व्यां प्लवंगमाः । रक्षःसैन्येषु संक्रुद्धाः केचिद्दुर्मशिलायुधाः ॥ ४६ ॥
द्रुमांश्च विपुलस्कन्धान्गृह्य वानरपुंगवाः । तद्युद्धमभवद्घोरं रक्षोवानरसंकुलम् ॥ ४७ ॥
ते पादपशिलाशैलैश्चकुर्वृष्टिमनुपमाम् । बाणैर्विदार्यमाणाश्च हरयो भीमविक्रमाः ॥ ४८ ॥
सिंहनादान्विनेदुश्च रणे राक्षसवानराः । शिलामिश्चूर्णयामासुर्गृहीतुधानान्प्लवंगमाः ॥ ४९ ॥
निर्जघ्नुः संयुगे क्रुद्धाः कवचाभरणाद्रुतान् । केचिद्रथस्तान्वीरान्गजवाजिगतानपि ॥ ५० ॥

गो० टी०-इति कृत्वेत्यर्थम् । इत्थं लब्धमित्येवं रूपं वि त्यर्थः ॥ ३८ ॥

३८-३९] ति० टी०-क्ष्वेडितास्फोटितानां च । स्पष्टम् ॥ ३८ ॥ ३९ ॥

रा० टी०-क्ष्वेडितैरिति । क्ष्वेडिता अट्टहासाः तेषां स्फोटनिनदैः प्रस्फुटनिनदैर्मेदिनी चचाल । अम्बरं तु रक्षसां सिंहनादैः संस्फोटितमिव ॥ ३८ ॥

रा० टी०-ते इति । राक्षसेन्द्राः अभिनिष्क्रम्य समुद्यताः शिलाः नगाः तरवश्च यस्मिन् तद्वानरानीकं ददृशुः ॥३९॥

गो० टी०-जगृहुरित्यादि । जगृहुः मेघध्वनिं चक्रुः । प्रणेदुः सिंहनादं चक्रुः चिक्षेपुः क्षेपयन्तश्चक्रुः सायकान् गृहुरित्यन्वयः ॥ ३९-४२ ॥

४०-४२] ति० टी०-समुद्यतशिलानग समुद्यताः शिला गा द्रुमाश्च येन तत् ॥ ४०—४२ ॥

रा० टी०-हरय इति । हरयोऽपि हस्त्यादिभिस्तम्बार्थं नैर्ऋतैः सर्वतोवृतं राक्षसं बलं ददृशुः । अतश्चतुष्टयमेकान्वयि ॥ ४० ॥ ४१ ॥

रा० टी०-तमिति । आयातं बलं दृष्ट्वा लब्धलक्षाः लब्धप्रहारविषयाः अत एव समुद्यतमहाशैलाः प्लवङ्गमाः संप्रणेदुः ॥ ४२ ॥

गो० टी०-तदित्यादि । लब्धलक्षाः लब्धपराक्रमविषयाः ॥ ४४-४६ ॥

४३] ति० टी०-प्रतिनेदन्त प्रत्यनदन्त ॥ ४३ ॥

रा० टी०-अमृष्यमाणा इति । रक्षांसि अक्षमयमाणा वानराः प्रतिनेदन्त प्रत्यनदन्त समुद्यतस्य कर्मतात्र द्वितीया । अर्हं पृथक् ॥ ४२ ॥

४४-४५] ति० टी०-परहर्षं प्रकृष्टमृष्यमाणाः ॥ ४४-४५

रा० टी०-तत इति । वानरयूथपानां समुत्क्रुष्टरवं निशम्य श्रुत्वा परहर्षमसहमानाः रक्षोगणाः भीमतरं निनेदुः ॥ ४४

रा० टी०-ते इति । हरियूथपाः उद्यतैर्शैलैर्नगैः शिखरिणो नगाः मेघा इव हरियूथपाः राक्षसबलं प्रविश्य विचेरुः ॥ ४५ ॥

४६-५०] ति० टी०-केचिदाकाशमिति स्वभावोक्तिः । तादृशाः प्लवंगमा रक्षःसैन्येषु सक्रुद्धा आकाशमाविश्य चेरुः । केचिद्विपुलस्कन्धान्द्रुमान्गृहीत्वोर्व्यां चेरुः ॥ ४६-५० ॥

रा० टी०-केचिदिति । संक्रुद्धाः द्रुमशि लाभियोधनशीलाः अत एव द्रुमान् वृ गृहीत्वा नियमानाः वानरपुङ्गवाः के मात्रिश्य केचिदुर्व्यामाविश्य स्थि विश्य विचेरुरिति शेषः । अत एव तद्युद्धं द्वयमेकान्वयि ॥ ४६ ॥ ४७ ॥

गो० टी०-संचारप्रकारमेवाह—केचिदित्यादि श्लोक एकान्वयः । द्रुमशिलायुधाः इति स्वभावोक्तिः ॥ ४७-५८

रा० टी०-ते इति । बाणैर्विदार्यमाणाः ते हरयः पादपादिभिरनुपमां वृष्टिं चक्रुः ॥ ४८ ॥

रा० टी०-सिंहेति । अराक्षसाः राक्षसविरोधिनो व

---

१ अपि ते वीरा इति गो.रा.पाठः । २ निर्यान्त इति गो. निर्जग्मुरिति रा.पाठः । ३ आस्फोटनिनदैश्चाल च वसुधेरिति गो.रा.पाठः । ४ पुस्फोटे त्याम्बरमिति गो.पाठः । ५ आयुधमिति रा.पाठः । ६ नैर्ऋतमिति गो.रा.पाठः । ७ सर्वतो नैर्ऋतौरिति गो.पाठः । ८ महाबला इति गो.पा.। ९ नर्दन्तीति गो.। १० मुत्क्रुष्टेति गो.पा.। ११ विनेदुरिति गो.रा.पा.। १२ चेरुरिति गो.पा.। १३ वानरराक्षसा इति गो.पा.। १४ नीति गो.रा.पाठः । १५ समर इति रा.पा

निर्जघ्नुः सहसा वीरैन्यातुधानान्प्लवंगमाः । शैलशृङ्गान्विताङ्गास्ते मुष्टिभिर्वान्तलोचनाः ॥ ५१ ॥
चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुंगवाः । राक्षसाश्च शरैस्तीक्ष्णैर्विभिदुः कपिकुञ्जरान् ॥ ५२ ॥
शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः । अन्योन्यं पातयामासुः परस्परजयैषिणः ॥ ५३ ॥
रिपुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः । ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः ॥ ५४ ॥
मुहूर्तेनावृता भूमिरभवच्छोणितोक्षिता । विकीर्णैः पर्वताकारै रक्षोभिरभिमर्दितैः ॥
आसीद्वसुमती पूर्णा तदा युद्धमदान्वितैः ॥ ॥ ५५ ॥
आक्षिप्ताः क्षिप्यमाणाश्च भग्नशैलैश्च वानरैः । पुनरङ्गैस्तदा चक्रुर्वानरा युद्धमद्भुतम् ॥ ५६ ॥
वानरान्वानरैरेव जघ्नुस्ते नैर्ऋतर्षभाः । राक्षसान्राक्षसैरेव जघ्नुस्ते वानरा अपि ॥ ५७ ॥
आक्षिप्य च शिलाः शैलाञ्जघ्नुस्ते राक्षसास्तदा । तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः॥ ५८ ॥
निर्जघ्नुः शैलशृङ्गैश्च विभिदुश्च परस्परम् । सिंहनादान्विनेदुश्च रणे राक्षसवानराः ॥ ५९ ॥
छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः । रुधिरं प्रसृतास्तत्र रससारमिव द्रुमाः ॥ ६० ॥
रथेन च रथं चापि वारणेनापि वारणम् । हयेन च हयं केचिन्निर्जघ्नुर्वानरा रणे ॥ ६१ ॥
क्षुरैश्चन्द्रार्धनन्दैश्च भल्लैश्च निशितैः शरैः । राक्षसा वानरेन्द्राणां बिभिदुः पादपाञ्शिलाः ॥ ६२ ॥

नराः वानरशराः प्लवङ्गमाश्च सहसादान्विनेदुः शिलाभिश्चूर्णयामासुश्च किं च यद्यपि वानरा राक्षसाश्च सिंहनादं विनेदुस्तथापि प्लवङ्गमाश्चूर्णयामासुः । सो यथार्थमेवं ॥ ४९ ॥

रा० टी०–निजघ्नुरिति । केचिद्वानराः कवचाभरणाढ्यान् राक्षसान् निजघ्नुः ॥ ५० ॥

गो० टी०–तत्र इति । अनुपमाम् अनुपमाम् ॥४९–५६॥

५१-५५] ति० टी०–शैलशृङ्गान्विताङ्गाः गिरिशिखरैर्व्याप्तदेहाः । मुष्टिभिर्मुद्गरैर्वान्तलोचनाः बहिर्निर्गतलोचनाः ५१-५५

रा० टी०–निजघ्नुरिति । वान्तलोचनाः बहिर्निर्गतनयनाः किंच अन्यानि आयुधान्यभावेन रिपुविनाशकानि लोचनानि येषां ते शैलशृङ्गान्विताः अपि प्लवङ्गमाः उत्प्लुत्य पातयामासिरन्नु ॥ ५१ ॥

रा० टी०–चेलुरिति । राक्षसपुंगवाः राक्षसाः चलनादि [illegible] जघ्नुश्च । सार्द्ध- [illegible] ॥ ५२ ॥

[illegible]न्यमिति । रिपुशोणितैर्दिग्धानि पलिप्तानि अङ्गानि येषां ते वानरराक्षसाः अन्योन्यं ॥ ५३ ॥

इति । भूमिः हरिराक्षसैर्विसृष्टैः व्यक्तैर्जै- [illegible]वृता अत एव शोणितोक्षिता अभवत् ॥ ५४ ॥

रा० टी०–विकीर्णैरिति । युद्धमदान्वितैरतिमदैर्विकीर्णैः दूरान्तरसंस्थितैरङ्गैः बहुमती पूर्णा आसीत् ॥ ५५ ॥

५६-६०] ति० टी०–आक्षिप्ताः क्षिप्यमाणा इति निर्युद्धप्रकारकथनम् । भग्नशैलैश्च वानरैः राक्षसभग्नस्वयुद्धसाधनशैलादिभिः अतएव पुनरङ्गैर्हस्तपादादिभिरासक्ता भूत्वा युद्धं चक्रुः ॥ ५६ ॥ ५७ ॥

रा० टी०–आक्षिप्ता इति । भग्नाः शैलाः वानरगृहीतगिरयो यैस्ते राक्षसैराक्षिप्ता इतस्ततश्चालिताः क्षिप्यमाणाः चाल्यमानाश्च वानराः आसन्ना राक्षसमसमीपं प्राप्तास्संतः अङ्गैः करचरणादिभिः युद्धं चक्रुः ॥ ५६ ॥

रा० टी०–युद्धाकारमाह—वानरानिति । नैर्ऋतर्षभाः वानरान् वानरैरेव जघ्नुः हरियूथपास्तु राक्षसान् राक्षसैरेव जघ्नुः ॥ ५७ ॥

गो० टी०–आक्षिप्ता इति । आक्षिप्ता क्षिप्यमाणाश्चेति निर्युद्धप्रकारकथनम् । अङ्गैः हस्तपादादिभिः ॥ ५७—६० ॥

५८-५९] ति० टी०–आक्षिप्य बलाद्गृहीत्वा ॥५८॥५९॥

रा० टी०–आक्षिप्येति । राक्षसाः तेषां वानराणां शिलाः आक्षिप्य आक्षिप्य हरीन् निजघ्नुः वानरा अपि तेषां रक्षसां शस्त्राणि आछिद्य रक्षांसि जघ्नुः ॥ ५८ ॥

रा० टी०–निजघ्नुरिति । राक्षसवानराः शैलशस्त्रास्त्रैः परस्परं निजघ्नुः विच्छिदुश्च ॥ ५९ ॥

६०-६२] ति० टी०–प्रसृताः स्रुतवन्तः । रससारो निर्यासः ॥ ६०—६२ ॥

रा० टी०–छिन्नेति । वानरैः छिन्नानि चर्मतनुत्राणानि येषामत एव हताः राक्षसाः द्रुमा रससारं निर्यासमिव रुधिरं प्रसृताः प्रस्रवणकर्त्तारो बभुवुरिति शेषः ॥ ६० ॥

गो० टी०–छिन्नेति । छिन्नवर्मतनुत्राणाःछिन्नवर्मरूप

१ आकुलेति गो० पाठः । २ आक्षिप्ताश्चेति गो.पाठः । ३ आप्लुतेति गो.पाठः । ४ विकीर्णपर्वतेति गो.पाठः । ५ मर्दनैरिति गो.रा.पाठः । ६ शूला इति गो.पाठः । ७ वानरा इति रा.पाठः । ८ आपन्ना इति गो.रा.पाठः । ९ रक्षनीचरा इति गो.पाठः । १० हरियूथपा इति रा.पाठः । ११ तेषां निजघ्नूरक्षसा हरी [illegible] गो.रा.पाठः । १२ शूलाद्यैरिति गो. शस्त्रास्त्रैरिति च रा.पाठः । १३ वानरराक्षसा इति गो.पाठः । १४ द्रुवेति गो. पाठः । १५ चिच्छिदुरिति गो.पा.।

विकीर्णा पर्वतास्तैश्च द्रुमच्छिन्नैश्च संयुगे । हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाभवत् ॥ ६३ ॥
ते वानरा गर्वितहृष्टचेष्टाः सङ्ग्राममासाद्य भयं विमुच्य ।
युद्धं स्म सर्वे सह राक्षसैस्ते नानायुधाश्चक्रुरदीनसत्त्वाः ॥ ॥ ६४ ॥
तस्मिन्प्रवृत्ते तुमुले विमर्दे प्रहृष्यमाणेषु वलीमुखेषु ।
निपात्यमानेषु च राक्षसेषु महर्षयो देवगणाश्च नेदुः ॥ ॥ ६५ ॥
ततो हयं मारुततुल्यवेगमारुह्य शक्तिं निशितां प्रगृह्य ।
नरान्तको वानरसैन्यमुग्रं महार्णवं मीन इवाविवेश ॥ ॥ ६६ ॥
स वानरान्सप्त शतानि वीरः प्रासेन दीप्तेन विनिर्विभेद ।
एकः क्षणेनेन्द्ररिपुर्महात्मा जघान सैन्यं हरिपुंगवानाम् ॥ ॥ ६७ ॥
ददृशुश्च महात्मानं हयपृष्ठप्रतिष्ठितम् । चरन्तं हरिसैन्येषु विद्याधरमहर्षयः ॥ ६८ ॥
स तस्य ददृशे मार्गो मांसशोणितकर्दमः । पतितैः पर्वताकारैर्वानरैरभिसंवृतः ॥ ६९ ॥
यावद्विक्रमितुं बुद्धिं चक्रुः प्लवगपुंगवाः । तावदेतानतिक्रम्य निर्विभेद नरान्तकः ॥ ७० ॥
ददाह हरिसैन्यानि वनानीव विभावसुः । यावदुत्पाटयामासुर्वृक्षाञ्शैलान्दनौकसः ॥ ७१ ॥
तावत्प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः । ज्वलन्तं प्रासमुद्यम्य सङ्ग्रामान्ते नरान्तकः ॥ ७२ ॥
दिक्षु सर्वासु बलवान्विचचार नरान्तकः । प्रमृद्नन्सर्वतो युद्धे गात्रवृत्काले यथानिलः ॥ ७३ ॥
न शेकुर्भापितुं वीरा न स्थातुं स्पन्दितुं कुतः । उत्पतन्तं स्थितं यान्तं सर्वान्विध्यध वीर्यवान् ॥ ७४ ॥
एकेनान्तककल्पेन प्रासेनादित्यतेजसा । भग्नानि हरिसैन्यानि निपेतुर्धरणीतले ॥ ७५ ॥
वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम् । न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम् ॥ ७६ ॥
पतितां हरिवीराणां रूपाणि प्रचकाशिरे । वज्राभिन्नाग्रकूटानां शैलानां पततामिव ॥ ७७ ॥

तनुत्राणाः रुधिरं प्रभुताः स्रवन्तः क्षुस्रवुरिति यावत् । रभसात् निर्यासम् ॥ ६१—६४ ॥

रा० टी०—रथैरिति । केचिद्वानराः रथादिभिः रथादीन् निजघ्नुः ॥ ६१ ॥

रा० टी०—क्षुरप्रैरिति । राक्षसा वानरेंद्राणां पादपान् शिलाश्च क्षुरप्रादिभिश्शरैरशरविशेषैः विभिदुः ॥ ६२ ॥

गो० टी०—क्षुरैरिति । शिलाः शिलाश्चैत्यर्थः ॥६२—६३॥

६३] ति टी०—पर्वतास्तैरित्यत्र पर्वतैः द्रुमच्छिन्नैश्छिन्नद्रुमैः विकीर्णा व्याप्ता ॥ ६३ ॥

रा० टी०—विकीर्णैरिति । विकीर्णैर्भग्नैः पर्वताग्रैः छिन्नैर्द्रुमैश्च हतैः कपिरक्षोभिश्च वसुधा दुर्गमाभवत् ॥ ६२ ॥

६४] ति० टी०—गर्वितहृष्टचेष्टाः संजातगर्वा हृष्टाश्चेष्टा येषां ते नानायुधा द्रुमशैलदन्तनखादिनानाप्रहरणयुताः ॥६४॥

रा० टी०—ते इति। गर्विता गर्वविशिष्टा एव हृष्टा चेष्टा येषां ते वानराः संग्राममासाद्य भयं विमुच्य अगृहीत्वेत्यर्थः राक्षसैस्सह युद्धं चक्रुः ॥ ६४ ॥

गो० टी०—ते वानरा इति । गर्वितं हृष्टं च यथा भवति तथा चेष्टन्त इति गर्वितहृष्टचेष्टाः नानायुधाः गृहीतराक्षसायुधा इत्यर्थः ॥ ६७ ॥

६५—६८] ति० टी०—प्रहृष्यमाणेषु प्रहृष्यत्सु वलीमुखेषु वानरेषु ॥ ६५—६८ ॥

रा० टी०—तस्मिन्निति । तुमुले युद्धे प्रवृत्ते सति वलीमुखेषु वानरेषु प्रहृष्यमाणेषु सत्सु राक्षसेषु निपात्यमानेषु सत्सु च महर्षिप्रभृतयो नेदुः ॥ ६५ ॥

रा० टी०—तत इति । नरान्तको हयमारुह्य महार्णवं मीन इव वानरराजसैन्यमाविवेश ॥ ६६ ॥

गो० टी०—तस्मिन्निति । विमर्दे युद्धे ॥ ६८ ॥ ६९ ॥

रा० टी०—स इति । एक एव स नरान्तकः समशतानि वानरान् प्रासेन निर्विभेद अत एव वानरपुङ्गवानां सैन्यं क्षणेन जघान ॥ ६७ ॥

रा० टी०—दृदृशुरिति । हयपृष्ठे प्रतिष्ठितं हरिसैन्येषु चरन्तं नरान्तकं विद्याधरमहर्षयो ददृशुः ॥ ६८ ॥

गो० टी०—स वानरानिति । जघानेति । इत्थमिति शेषः ॥ ७०—७३ ॥

६९-७७] ति० टी०—मार्गो युद्धार्थं गमनमार्गः पतितैर्वानरैरभिसंवृतो मांसशोणितकर्दमः सन्ददृशे दृष्टः ॥६९—७७॥

रा० टी०—स इति । पतितैः वानरैरभिसंवृतः अत एव

१ स्विति गो. पाठः । २ तैरिति गो. रा. पाठः । ३ आयुधैरिति रा. पाठः । ४ राजसैन्यमिति गो. रा. पाठः । ५ एकोतिसमस्तो गो. पाठः ६ पृष्ठे इति गो. रा. पाठः । ७ उत्तरपद्योत्तरार्धमेतत्पदौ गो. पुस्तके । ८ पातितुमिति गो. पाठः । ९ मयादिति गो. रा. पाठः ।

ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः । ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे ॥ ७८ ॥
प्रेक्षमाणः स सुग्रीवो ददर्श हरिवाहिनीम् । नरान्तकभयत्रस्तां विद्रवन्तीं यतस्ततः ॥ ७९ ॥
विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम् । गृहीतप्रासमायान्तं हयपृष्ठप्रतिष्ठितम् ॥ ८० ॥
दृष्ट्वोवाच महातेजाः सुग्रीवो वानराधिपः । कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम् ॥ ८१ ॥
गच्छैनं राक्षसं वीरं योऽसौ तुरगमास्थितैः । भक्षयन्तं पत्रबलं क्षिप्रं प्राणैर्वियोजय ॥ ८२ ॥
स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्तदा । अनीकान्मेघसंकाशादंशुमानिव वीर्यवान् ॥ ८३ ॥
शैलसंघातसंकाशो हरीणामुत्तमोऽङ्गदः । रराजाङ्गदसंनद्धः स धातुरिव पर्वतः ॥ ८४ ॥
निरायुधो महातेजाः केवलं नखदंष्ट्रवान् । नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद्वचः ॥ ८५ ॥
तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि । अस्मिन्वज्रसमस्पर्शे प्रासं क्षिप ममोरसि ॥ ८६ ॥
अङ्गदस्य वचः श्रुत्वा श्रुत्वोक्थं नरान्तकः । संदश्य दशनैरोष्ठं निःश्वस्य च भुजंगवत् ॥
अभिगम्याङ्गदं क्रुद्धो वालिपुत्रं नरान्तकः । ॥ ८७ ॥

मौनमवोचत् । स स्वस्थो गत्विति सः तस्य नरान्तकस्य मार्गो ददर्श ॥ ७८ ॥

रा० टी०-यावदिति । एवमुक्त्वाः विक्रमितुं विक्रमं कर्तुं यावद्भिः सद्भिः तावदेव एतान् वानरानतिक्रम्य नरान्तको निर्विवेश ॥ ७० ॥

रा० टी०-दृष्ट्वेति । अनीकस्थः सैन्यादीन् यावदस्पाद्यामास. तावदेव विधानसूचनार्थमेव हरिसैन्यानि इदाह नरान्तक इति शेषः अत एव वक्ष्यमाणा अनेला इव प्रासहताः वानराः पेतुः । मार्दूलोक एकान्वयी ॥ ७१ ॥ ७२ ॥

रा० टी०-उद्यतमिति । नरान्तकः जनानां विघातको नरान्तकः प्रमुद्यन् विहिंसन सन् अनिल इव सर्वान् दिशः विचचार । मार्दूलोक एकान्वयी ॥ ७३ ॥

गो० टी०-उद्यतमिति । उद्यन्तं उद्यतमिव स्थितम् । विभ्राजः प्रभाः ॥ ७४ ॥ ७५ ॥

गो० टी०-दिक्षिवेति । प्रयत्नं कुर्वेन् ॥ ७६ ॥

रा० टी०-नेति । उत्पातादि कुर्वन्तं नरान्तकः भावितुं स्थातुं च स्थापितुं किंचिदपि च वीरा न शेकुः अत एव वीरयन् नरान्तकः सर्वान् वानरान् विद्राव्य ॥ ७४ ॥

रा० टी०-एकेनेति । एकेन नरान्तकेन भग्नानि हरिसैन्यानि विषेदुः ॥ ७५ ॥

रा० टी०-रुद्धेति । शस्त्राभिनिपातनं सोढुं वानराः न शेकुः अत एव महास्त्रनं विसृजे ॥ ७६ ॥

रा० टी०-पतताभिति । वीराणां रूपाणि पतनं शैलानां रूपाणीव प्रचकाशिरे ॥ ७७ ॥

गो० टी०-न शेकुरिति । एषां हेतोरुत्पतन्तं स्थितं वान्तं च विव्याध अतः स्तब्धादौ न शेकुरित्यर्थः ॥७७-८०॥

७८-८१] ति० टी०-स्वस्थाः स्वस्थचित्तेन्द्रियाः । वानरश्रेष्ठा अङ्गदाद्यः ॥ ७८—८१ ॥

रा० टी०-ये इति । महात्मानः ये पूर्वं कुम्भकर्णेन निपातिताः ते वानरश्रेष्ठाः स्वस्थाश्चन्तस्सुग्रीवमुपतस्थिरे ॥ ७८ ॥

रा० टी०-प्रेक्षमाण इति । प्रेक्षमाणः इतस्ततोऽवलोकयन् सुग्रीवः नरांतकभयत्रस्तां हरिवाहिनीं ददर्श ॥ ७९ ॥

रा० टी०-विद्रुतामिति । स सुग्रीव आपतन्तं नरान्तकं ददर्श ॥ ८० ॥

रा० टी०-दृष्ट्वेति । सुग्रीवोऽङ्गदमुवाच ॥ ८१ ॥

गो० टी०-कुम्भकर्णेन पातितानां नीलादीनामुत्तरत्र पौरुषकथनसांगत्यार्थेषां लब्धसंज्ञत्वमाह—येत्विति ॥८१-८५॥

८२]ति०टी०-गच्छैनं राक्षसमिति। हन्तुमिति शेषः ८२

रा० टी०-तदाकारमाह—गच्छेति । यस्तुरगमास्थितः तं हरिबलं क्षोभयन्तमेनं राक्षसं गच्छ प्राणैर्वियोजय च ॥ ८२ ॥

८३] ति० टी०-मेघसंकाशादिति-अनीकान्मध्यात् ॥८३॥

रा० टी०-स इति । सोऽङ्गदो मेघसंकाशात् अनीकान्मध्यात् अंशुमानिव निष्पपात ॥ ८३ ॥

गो० टी०-स इति । मेघसंकाशादिति निविडत्वलक्षणसमानधर्मप्रयुक्तोपमा । मेघानीकादित्यत्र तु निष्क्रमणापादानत्वधर्मप्रयुक्तोपमाद्वयमस्य मतिः ॥ ८६ ॥

८४-८५] ति० टी०-अङ्गदेन दिव्यभुजाभरणेन संनद्धो युक्तः ॥ ८४ ॥ ८५ ॥

रा० टी०-शैलेति । अङ्गदेन भुजाभरणेन सन्नद्धो युक्तो हरीणां मध्ये उत्तमः श्रेष्ठोऽङ्गदस्सधातुः पर्वत इव रराज ॥८४॥

रा० टी०-निरायुध इति । निरायुधोऽङ्गदः नरान्तकमभिक्रम्य प्राप्याब्रवीत् ॥ ८५ ॥

गो० टी०-शैलेति । संघातः निविडसंश्लेषः । अङ्गदसन्नद्धः सन्नद्धाङ्गदः ॥ ८७—९० ॥

गो० टी०-अभिगम्येति । अयमुत्तरश्लोपः ॥ ९१-९७ ॥

८६-८७] ति० टी०-अस्मिन्ममोरसि क्षिपेत्यन्वयः ८६-८७

---

१ विक्रमाण इति रा० पाठः । २ इत इतो गो. रा. पाठः । ३ एते इति गो. रा. पाठः । ४ स्वस्थेति गो. पाठः । ५ क्षोभयन्तं हरिबलमिति गो. रा. पाठः । ६ तमेवेत्यत्र इति रा. पाठः । ७ अत्र इति गो० पाठः । ८ मेघानीकादिवां शुभानिति गो. पाठः ।

स प्रासमाविध्य तदाङ्गदाय समुज्ज्वलन्तं सहसोत्ससर्ज ।
स वालिपुत्रोरसि वज्रकल्पे बभूव भग्नो न्यपतच्च भूमौ ॥ ८८ ॥

तं प्रासमालोक्य तदा विभग्नं सुपर्णकृत्तोरगवद्विकल्पम् ।
तलं समुद्यम्य स वालिपुत्रस्तुरङ्गमस्याभिजघान मूर्ध्नि ॥ ८९ ॥

निर्भग्नपादैः स्फुटिताक्षितारः, विच्छिन्नजिह्वोच्चलदल्पनिष्कः ।
स तस्य वाजी निपपात भूमौ तलप्रहारेण विकीर्णमूर्धा ॥ ९० ॥

नरान्तकः क्रोधवशं जगाम हतं तुरंगं पतितं समीक्ष्य ।
स मुष्टिमुद्यम्य महाप्रभावो जघान वीर्ये युधि वालिपुत्रम् ॥ ९१ ॥

अथाङ्गदो मुष्टिविशीर्णमूर्धा सुस्राव तीव्रं रुधिरं भृशार्तः ।
मुहुर्विजज्वाल भृशोष्मा च मंत्रां सभासाद्य विभेदिवांश्च ॥ ९२ ॥

अथाङ्गदो मृत्युसमानवेगं संवर्त्य मुष्टिं गिरिशृङ्गकल्पम् ।
निपातयामास तदा महात्मा नरान्तकस्योरसि वालिपुत्रः ॥ ९३ ॥

स मुष्टिनिर्भिन्ननिमग्नवक्षाः ज्वालाकुलास्यः सहसोच्छ्वसंश्च ।
नरान्तको भूमितले पपात यथाचलो वज्रनिपातभग्नः ॥ ९४ ॥

तदान्तरिक्षे त्रिदशोत्तमानां वनौकसां चैव महाप्रणादः ।
बभूव तस्मिन्निहतेऽतिवीर्ये नरान्तके वालिसुतेन संख्ये ॥ ९५ ॥

रा० टी०—तदाकारमाह—तिष्ठेति । प्र क्षीतेभिः [ ] [ ] कै कर्त्तिष्यसि तैर्यूढ न कुर्वित्यर्थः । अनर्थित स्वस्यो भव [ ]मोक्षमि प्राप्तं [ ]व च ॥ ८७ ॥

रा० टी०—अङ्गदस्येति । अङ्गदस्य [ ]च श्रुत्वा नरान्तकः प्रकृष्टकोप अत एव दशनैर्दन्तैः ओष्ठ संदश्य विनिष्क्रम्य च अङ्गदमभिगम्य तत्सम्मुखं प्राप्य च भ्रातरमिति शेषः । सार्धश्लोक एकान्वयी ॥ ८७ ॥

८८-८९] ति० टी०—वालिपुत्रमभिगम्य प्राससुत्ससर्ज स प्रासो भग्नोऽभवद्भूमौ पपात च ॥ ८८ ॥ ८९ ॥

रा० टी०—स इति । स नरान्तकः प्राससाविध्य इदं गृहीत्वा अङ्गदाय उत्ससर्ज स प्रासः वज्रकल्पे वालिपुत्रोरसि भग्नो बभूव न्यपतच्च ॥ ८८ ॥

रा० टी०—तमिति । सुपर्णः कृत्तो विदारितो येन स एव उरगवत् वीर्यं स्वपराक्रमं कल्पयति तं प्रासं विभग्नमालोक्य वालिपुत्रः तलं समुद्यम्य अस्य नरान्तकस्य तुरङ्गं मूर्ध्नि अभिजघान ॥ ८९ ॥

९०-९३] ति० टी०—स्फुटिताक्षितारः स्फुटिता विशीर्णाक्षितारा कनीनिका यस्य सः ॥ ९०—९३ ॥

रा० टी०—निर्भग्नेति । निर्भग्नाः पादा यस्य स्फुटिता अक्षितारा यस्य निष्क्रांता जिह्वा यस्य तलप्रहारेण विभिन्नमूर्द्धा तस्य नरान्तकस्य वाजी भूमौ निपपात ॥ ९० ॥

रा० टी०—नरान्तक इति । नरान्तकः तुरंगं पतितं समीक्ष्य क्रोधवशं जगाम अत एव मुष्टिमुद्यम्य वालिपुत्रं वीर्ये जघान ९१

रा० टी०—अथेति । मुष्टिविशीर्णो मूर्द्धा यस्य सोऽङ्गदः भृशोष्मा रुधिरं स्रुस्राव तिव्रं [ ]ल च सभेषु च मन्त्रां विभेदिवांश्च सभासाद्य विभिदे च ॥ ९२ ॥

गो० टी०—स्व मुष्टीति । ज्वालाकुलेन वदनेन श्वसन्नसृग्धारया शोणितेन विग्रमन्नङ्गः ॥ ९४ ॥ ९५ ॥

रा० टी०—सर्वेति । अङ्गदः मुष्टिं संवर्त्य उद्यम्य नरान्तकस्योरसि निपातयामास ॥ ९३ ॥

गो० टी०—अथेति । यत् कृतवानित्यर्थः तदित्यर्थः पश्चम तदाख्यर्थः । अङ्गदः हि पूर्वमात एवंकरम अत एव रामप्रभावप्रदर्शनं विक्रमं कृतवान तस्मादित्यर्थः । विभिन्दिवांश्च । सोऽपि तत्प्रहारेण रामप्रभावप्रदर्शनमित्यर्थः मूर्छितो रामशत्रुः पतन्नभवत् । हर्षितः विभिन्नेन रामेण स्वार्थया शोणितं । स च अङ्गदश्च पुनः युद्धे बभूव । युद्धविषये संनद्धो बभूवेत्यर्थः ॥ १०० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्ड०व्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

९४-९५] ति० टी०—मुष्टिना निर्भिन्नम्, अत एव निमग्नं वक्षो यस्य स, ज्वाला अभिव्याप्तास्या यस्य स, उच्छ्वसन् वज्रनिपातभग्नोऽचल इव भूमितले पपात ॥ ९४ ॥ ९५ ॥

रा० टी०—तदेति । अत्यद्भुतमं वीर्यं यस्य तस्मिन् नरान्तके वालिसुतेन निहते सति अन्तरिक्षे त्रिदशोत्तमानां वनौकसां च महाप्रणादो हर्षमुचकशब्दो बभूव ॥ ९५ ॥

---

१ भोगेति गो.रा.पा.। २ तुरङ्गमं तस्येति गो.पा.। ३ तालुरिति गो.पा.। ४ विशीर्णेति गो. विभिन्नेति रा.पा.। ५ सिरिति गो.पा.। ६ वीर इति गो.पा.

अथाङ्गदो राममनःप्रहर्षणं सुदुष्करं तं कृतवान्हि विक्रमम् ।
विसिष्मिये सोऽप्यथ भीमकर्मा पुनश्च युद्धे स बभूव हर्षितः ॥ ॥ ९६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

सप्ततितमः सर्गः ।

नरान्तके हतेऽत्रिशिरः पीडितमङ्गदं मोचयितुमागतेन हनुमता देवान्तको हतः नीलेनापि महोदरो गतासुः पातितः त्रिशिरा अपि वायुसुतेन पलायं प्राप्तः कृतघ्नेन च मत्तो हतः ।

नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतप्रभाः । देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः ॥ १ ॥
आरुहो मेघसंकाशं वारणेन्द्रं महोदरः । वालिपुत्रं महावीर्यमभिदुद्राव वेगवान ॥ २ ॥
भ्रातृव्यसनसंतप्तस्तदा देवान्तको बली । आदाय परिघं घोरमङ्गदं समभिद्रवत् ॥ ३ ॥
रथमादित्यसंकाशं युक्तं परमवाजिभिः । आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्यगात्॥ ४ ॥
स त्रिभिर्देवदर्पघ्नै राक्षसेन्द्रैरभिद्रुतः । वृक्षमुत्पाटयामास महाविटपमङ्गदः ॥ ५ ॥
देवान्तकाय तं वीरश्चिक्षेप सहसाङ्गदः । महावृक्षं महाशाखं शक्रो दीप्तामिवाशनिम् ॥ ६ ॥
त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः । स वृक्षं कृत्तमालोक्य उत्पपात तदाङ्गदः ॥ ७ ॥
स ववर्ष ततो वृक्षाञ्शैलाश्च कपिकुञ्जरः । तान्प्रचिच्छेद संक्रुद्धस्त्रिशिरा निशितैः शरैः ॥ ८ ॥
परिघाग्रेण तान्वृक्षान्बभञ्ज स महोदरः । त्रिशिराश्चाङ्गदं वीरमभिदुद्राव सायकैः ॥ ९ ॥
भग्नेन समभिदुत्य वालिपुत्रं महोदरः । जघानोरसि संक्रुद्धस्तोमरैर्वज्रसंनिभैः ॥ १० ॥
देवान्तकश्च संक्रुद्धः परिघेण तदाङ्गदम् । उपगम्याभिहत्याशु व्यपचक्राम वेगवान ॥ ११ ॥
स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः । न विव्यथे महातेजा वालिपुत्रः प्रतापवान् ॥ १२ ॥

९६] ति० टी०-राममनःप्रहर्षणं राममनसः प्रहर्षणम् । सोऽपि रामोऽपि । अथात्रिशिरसमङ्गदः पुनश्च युद्धे युद्धनिमित्तं हर्षितो बभूव तृप्तः सन्संतुष्टो बभूवेत्यर्थः ॥ ९६ ॥

इति श्रीमद्रामायणे श्रीवाल्मीकीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

रा० टी०-अथेति । अङ्गदः राममनःप्रहर्षणं सुदुष्करं विक्रमं कृतवान् अतः अथ स रामोऽपि विसिष्मिये अथानन्तरं भीमकर्मादिः पश्चाद्धे युद्धार्थं प्रहर्षितो बभूव ॥ ९६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

१-५] ति० टी०-अत्र त्रिशिरश्चेदो बहुषु पुस्तकेषु न दृश्यत इत्यस्माभिरपि न कृतः । पूर्वोत्तरवाक्ययोरेककर्तृकयुद्धवर्णनादिति क्वापि ॥ १—५ ॥

रा० टी०-नरान्तकवधानन्तरकार्यैर्देवान्तकमाह-नरान्तकमित्यादिभिः । नरान्तके हते दृष्ट्वा देवान्तकाद्यो नैर्ऋतप्रभाः युद्धार्थं रुरुधुः ॥ १ ॥

रा० टी०-आरुहेति । गजेन्द्रं महागजमारुढो महोदरः वालिपुत्रमभिदुद्राव ॥ २ ॥

गो० टी०-नरान्तकमित्यादि । पौलस्त्य इति त्रिमूर्धविशेषणम् । न तु महोदरस्य । देवान्तकादयस्त्रयश्चुक्रुशुरिति संबन्धः ॥ १ ॥ २ ॥

रा० टी०-भ्रातृव्यसनेति । भ्रातृव्यसनेन मरणेन सन्तप्तो देवान्तकः अङ्गदं समभिद्रवत् ॥ ३ ॥

रा० टी०-रथमिति । त्रिशिराः रथमास्थाय वालिपुत्रमथाभ्यगात् ॥ ४ ॥

रा० टी०-स इति । देवदर्पघ्नैः त्रिभिर्देवान्तकनरांतकत्रिशिरोभिरभिद्रुतोऽङ्गदो महाविटपं बृहच्छाखावन्तं वृक्षमुत्पाटयामास ॥ ५ ॥

गो० टी०-भ्रातृव्यसनेति । समभिद्रवत् समभ्यद्रवत् ॥ ३--१० ॥

६] ति० टी०-दीप्तामशनिमिव दृक्षं चिक्षेप ॥ ६ ॥

रा० टी०-देवान्तकायेति । शक्रः दीप्तामशनिमिव अङ्गदो महावृक्षं देवांतकाय चिक्षेप ॥ ६ ॥

७-१२] ति० टी० त्रिशिरास्तमिति । देवान्तकाय प्रक्षिप्तं वृक्षम् तत्सहायायेति शेषः ॥ ७—१२ ॥

१ प्रतिवीर्येति गो. पाठः । २ ऋतिवीर्येत्यिमम इति गो. पाठः । ३ वीर्यवानिति गो. पाठः । ४ दीप्तमिति गो. पाठः । ५ अथादिति गो. रा. पाठः । ६ नैर्ऋतेति गो. पाठः । ७ नैर्ऋतानिति गो. पाठः । ८ च प्रान्तक इति गो. पाठः ।

स वेगवान्महावेगं कृत्वा परमदुर्जयः । तलेन समभिद्रुत्य जघानास्य महागजम् ॥
तस्यै तेन प्रहारेण नागराजस्य संयुगे । ॥ १३ ॥
पेततुर्नयने तस्य विनैनाश स कुञ्जरः । विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः॥ १४ ॥
देवान्तकमभिद्रुत्य ताडयामास संयुगे । स विह्वलस्तु तेजस्वी वातोद्धूत इव द्रुमः ॥ १५ ॥
लाक्षारससवर्णं च सुस्राव रुधिरं महत् । अथास्य महातेजाः कृच्छ्रादेवान्तको बली॥ १६ ॥
आविध्य परिघं वेगादाजघान तदाङ्गदम् । परिघाभिहतश्चापि वानरेन्द्रात्मजस्तदा ॥ १७ ॥
जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह । तमुत्पतन्तं त्रिशिरास्त्रिभिर्बाणैरजिह्मगैः ॥ १८ ॥
घोरैर्हरिपतेः पुत्र ललाटेऽभिजघान ह । ततोऽङ्गदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुंगवैः ॥ १९ ॥
हनूमानथ विज्ञाय नीलश्चापि प्रतस्थतुः । ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा ॥ २० ॥
तद्रावणसुतो धीमान्बिभेद निशितैः शरैः । तद्बाणशतनिर्भिन्नं विदारितशिलातलम् ॥ २१ ॥
सविस्फुलिङ्गं सज्वालं निपपात गिरेः शिरः । सं विजृम्भितमालोक्य हर्षादेवान्तको बली ॥ २२ ॥

रा० टी०—त्रिशिरा इति । ते बाणा त्रिशिरोनामभिः चिच्छेद अङ्गदस्तु कृत्तं छिन्नं वृक्षमालोक्य उत्पपात ॥ ७ ॥

रा० टी०-स इति । सोऽङ्गदो वृक्षान् शिलाश्च ववर्ष । त्रिशिरास्तु तान् प्रचिच्छेद ॥ ८ ॥

रा० टी०—परिघेति । महोदरः परिघेण तान् त्रिशिरश्छेदनोद्यतान् वृक्षान् बभञ्ज त्रिशिरास्तु अङ्गदमभिदुद्राव ॥ ९ ॥

रा० टी०—गाढेनेति । महोदरः वालिपुत्रं समभिद्रुत्य उरसि जघान ॥ १० ॥

रा० टी०—देवेति । संक्रुद्धो देवान्तकः अङ्गदमुपगम्य परिघेणाभिहत्य व्यपचक्राम अपसस्मार ॥ ११ ॥

रा० टी०—स इति । त्रिभिः महोदरप्रभृतिभिः नैर्ऋतश्रेष्ठैः सुरक्षितं समभिद्रुतोऽपि वालिपुत्रः न विव्यथे ॥ १२ ॥

गो० टी०—देवान्तकश्चेति । व्यपचक्राम व्यवाजगाम ॥ ११ ॥ १२ ॥

१३-१९] ति० टी०—अस्य महागजं महोदरस्य तलम् ॥ १३—१५ ॥

रा० टी०—स इति । स वालिपुत्रः समभिद्रुत्य तलेन अस्य देवान्तकस्य महागजं जघान ॥ १३ ॥

गो० टी०—स इति । अस्य महोदरस्य ॥ १३ ॥

रा० टी०—तस्येति । तस्याङ्गदस्य प्रहारेण तस्य नागराजस्य नयने पेततुः अत एव कुञ्जरो विननाश ॥ १४ ॥

गो० टी०—तस्येति । तस्य अङ्गदस्य तस्य नागराजस्येति द्वितीयतच्छब्दान्वयः ॥ १४ ॥

रा० टी०—विषाणमिति । अस्य कुञ्जरस्य विषाणं दंतं निष्कृष्य अभिद्रुत्य देवांतकं ताडयामास ॥ १५ ॥

रा० टी०—स इति । वातोद्धतो द्रुम इव विह्वलस्स देवांतक. लाक्षारसेन समानं वर्णं यस्य तद्रुधिरं सुस्राव सुस्राव इत्यर्थः ॥ १६ ॥

गो० टी०—विषाणमिति । महाबलः वालिपुत्रः अस्य महोदरवाहनस्य गजस्य विषाणं निष्कृष्य अभिद्रुत्य वेगेन सन्निपत्य देवान्तकं ताडयामासेति संबन्धः ॥ १५—१६ ॥

१६-१७] ति० टी०—लाक्षारसेन समानो वर्णो यस्य तद्रुधिरम् ॥ १६ ॥ १७ ॥

रा० टी०—अथेति । देवांतकः कृच्छ्रादस्य परिघमाविध्य इदं गृहीत्वा अङ्गदमाजघान ॥ १७ ॥

रा० टी०—परिघेति । परिघेणाभिहतः अत एव जानुभ्यां भूमौ पतितो वानरेन्द्रात्मजः पुनरुत्पपात ॥ १८ ॥

१८-२१] ति० टी०—अजिह्मगैरकुटिलगामिभिः ॥१८-२१॥

रा० टी०—तमिति । त्रिशिराः उत्पतन्तं हरिपतेः पुत्रं त्रिभिर्बाणैर्ललाटे अभिजघान ॥ १९ ॥

रा० टी०—तत इति । हनुमांश्चाल्य त्रिभिर्नैर्ऋतपुङ्गवैः परिक्षिप्तं प्राकृतमङ्गदं विज्ञाय प्रतस्थतुः ॥ २० ॥

रा० टी०—तत इति । नीलः त्रिशिरसे शैलाग्रं चिक्षेप तत् शैलाग्रं रावणसुतः त्रिशिराः बिभेद ॥ २१ ॥

रा० टी०—तदिति । बाणशतेन निर्भिन्नमत एव विदारितं शिलातलं यस्य तद्गिरेः शिरः अविस्फुलिङ्गं निपपात ॥ २२ ॥

गो० टी०—तत इति । जृम्भितं भग्नमिति यावत् जृम्भितं तद्धनुर्दृष्ट्वेत्यादिवत् ॥ २३—२५ ॥

२२] ति० टी०—गिरेः शिरः पर्वतस्य शृङ्गम् । विजृम्भितं त्रिशिरसः पर्वतनिश्चरभेदनरूपं जृम्भणमालोक्य ॥ २२ ॥

रा० टी०—स इति । देवान्तकः विजृम्भितं क्रोधावेशेन परिणतरूपं मारुतात्मजमालोक्य परिघेणोपक्षिप्तस्मन् अभिदुद्राव ॥ २३ ॥

१ इदं मर्धमधिकं गो. रा. पुस्तके । २ लोचने इति गो.पाठः । ३ विननाद सबाण इति गो. पाठः । ४ विह्वलितसर्वाङ्ग इति गो. पाठः । ५ मुखादेति गो. रा. पाठः । ६ घोरमिति गो. पाठः । ७ तत इति गो. पाठः । ८ तदेति गो. पाठः ।

हतं त्रिशिरसं दृष्ट्वा युद्धोन्मत्तं तथैव च । हतौ प्रेक्ष्य दुराधर्षौ देवान्तकनरान्तकौ ॥ ४९ ॥
चुकोप परमामर्षी मत्तो राक्षसपुंगवः । जग्राहार्चिष्मतीं चापि गदां सर्वायसीं तदा ॥ ५० ॥
हेमपट्टपरिक्षिप्तां सांसशोणितफेनिलाम् । विराजमानां विपुलां शत्रुशोणिततर्पिताम् ॥ ५१ ॥
राजसा संप्रदीप्ताग्रां रक्तमाल्यविभूषिताम् । ऐरावतमहापद्मसार्वभौमभयावहाम् ॥ ५२ ॥
तदादाय संक्रुद्धो मत्तो राक्षसपुंगवः । हरीन्समभिदुद्राव युगान्ताग्निरिव ज्वलन् ॥ ५३ ॥
प्रथमैः समुत्पत्य वानरो रावणानुजम् । मत्तानीकमुपागम्य तस्थौ तस्याग्रतो बली ॥ ५४ ॥
तं पुरस्तात्स्थितं दृष्ट्वा वानरं पर्वतोपमम् । आजघानोरसि क्रुद्धो गदया वज्रकल्पया ॥ ५५ ॥
स तयाभिहतस्तेन गदया वानरर्षभः । भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ॥ ५६ ॥
स संप्राप्य चिरान्संज्ञामृषभो वानरैश्चरैः । क्रुद्धो विस्फुरमाणौष्ठो महापार्श्वमुदैक्षत ॥ ५७ ॥

स वेगवान्वेगवदभ्युपेत्य तं राक्षसं वानरवीरमुख्यः ।
संवर्त्य मुष्टिं महसा जघान वाह्यान्तरे शैलनिकाशरूपः ॥ ॥ ५८ ॥
स कृत्तमूलः सहसेव वृक्षः क्षितौ पपात क्षतजोक्षिताङ्गः ।
तां चास्य घोरां यमदण्डकल्पां गदां प्रगृह्याशु तदा ननाद ॥ ॥ ५९ ॥
मुहूर्तमासीत्स गतासुकल्पः प्रत्यागतात्मा सहसा सुरारिः ।
उत्पत्य संध्याभ्रसमानवर्णस्तं वारिराजात्मजमाजघान ॥ ॥ ६० ॥
स मूर्च्छितो भूमितले पपात मुहूर्तमुत्पत्य पुनः ससंज्ञः ।
तामेव तस्याद्रिवराद्रिकल्पां गदां समाविध्य जघान संख्ये ॥ ॥ ६१ ॥
सा तस्य रौद्रा समुपेत्य देहं रौद्रस्य देवाम्बरविप्रशस्त्रोः ।
विभेद वक्षः क्षतजं च भूरि सुस्राव धात्वम्भ इवाद्रिराजः ॥ ॥ ६२ ॥

अथ मत्तो महावेगो वेगेन गदां तस्य महात्मनः । तां गृहीत्वा गदां भीमामाविध्य च पुनः पुनः ॥ ६३ ॥
तदानीकं महौत्सुक्यः स जघान रणमूर्धनि । स स्वया गदया भग्नो विशीर्णदशनेक्षणः ॥ ६४ ॥
निपपात तदा मत्तो वज्राहत इवाचलः । विशीर्णनयनो भूमौ गतसर्वस्वो गतायुषः ॥
निहते राक्षसे तस्मिन्विद्रुते राक्षसं बलम् ॥ ॥ ६५ ॥

रा० टी०-तानीति । आयतानि अक्षाणीन्द्रियाणि येषु तानि तथोक्तानि येषु तानि इन्द्रजितोः त्रिशिरसः सर्वाणि चक्षूंषि येषु ॥ ४७ ॥

रा० टी०-तस्मिन्निति । हेममया त्रिशिरसं हतं सति क्रुद्धः सन् अभिदुद्राव क्रोधेन चक्षूंषि समन्ताद्घूर्णयन् । ४८ ॥

गो० टी०-तानीति । सुतानि अनुकूलपुण्यफलानि । कर्मणोऽनुरूपाणि ॥ ४८ ॥ ४९ ॥

४९] ति० टी०-युद्धोन्मत्तं महोदरम् । तथैव च हतमिति शेषः । सत्कृत्यो हतमिति पूर्वत्रान्वयः ॥ ४९ ॥

५०-५६] ति० टी०-मत्तस्तदाख्यो महापार्श्वः ॥ ५० ॥ ५१ ॥

५२-६५] ति० टी०-ऐरावतादयो दिग्गजाः ॥ ५२-६५ ॥

रा० टी०-हतामिति । त्रिशिरसं महोदरं च हतं दृष्ट्वा देवान्तकनरान्तकौ च हतौ प्रेक्ष्य महापार्श्वः चुकोप अत एव गदां जग्राह । अर्द्धचतुष्टयमेकान्वयि ॥ ४९ ॥ ५० ॥

रा० टी०-हेमेति । हेमपट्टपरिक्षिप्तां सर्वतोयुक्तामैरावतादिगजजातीनां भयावहां गदामादाय संक्रुद्धो मत्तो महापार्श्वः युगान्ताग्निरिव ज्वलन् सन् हरीन् समभिदुद्राव । अर्द्धषट्कमेकान्वयि ॥ ५१–५३ ॥

गो० टी०-हतं त्रिशिरसमित्यादिचतुःश्लोक्येकान्वया।

---

१ नक्षोदरमाणि शेषे रा. तीव न महोदरमिति गो. पाठः । २ घोरमिति । गो. पाठः । ३ शुभामिति गो. रा. पाठः । ४ लेपनामिति । पाठः । ५ सदृशेति गो. रा. पाठः । ६ रक्तिमामिति गो. पाठः । ७ ऋषभ इति गो. रा. पाठः । ८ इत आरभ्य धात्वम्भ इवाद्रिराज इत्यन्तः सार्धश्लोक पदानि गो. पुस्तके न सन्ति । ९ पपात भूमाविति रा. पाठः १० भूत्वेति रा. पाठः ११ गृहीत्वा तामिति गो. पाठः । १२ महात्मानमिति गो. पाठः । १३ सदने इति गो. रा. पाठः १४ सर्व इति गो. रा. पाठः । १५ आयुषीति गो. रा. पाठः १६ रक्षसामिति गो. पाठः ।

[उन्मत्तस्तु तदा दृष्ट्वा गतासुं भ्रातरं रणे । चुक्रोप परमक्रुद्धः प्रलयाग्निसमद्युतिः ॥
ततः समादाय गदां स वीरो वित्रासयन् वानरसैन्यमुग्रम् ।
दुद्राव वेगेन तु सैन्यमध्ये दहन् यथा वह्निरतिप्रचण्डः ॥
आपतन्तं तदा दृष्ट्वा राक्षसं भीमविक्रमम् । शैलमादाय दुद्राव गवाक्षः पर्वतोपमः ॥
जिघांसू राक्षसं भीमं तं शैलेन महाबलः । आपतन्तं तदा दृष्ट्वा उन्मत्तोऽपि महागिरिम् ॥
चिच्छेद गदया वीरः शतधा तत्र संयुगे । चूर्णीकृतं गिरिं दृष्ट्वा रक्षसा कपिकुञ्जरः ॥
विस्मितोभून्महाबाहुर्जगर्ज च मुहुर्मुहुः । उन्मत्तस्तु सुसंक्रुद्धो ज्वलन्तं राक्षसोत्तमः ॥
गदामादाय वेगेन कपेर्वक्षस्यताडयत् । स तया गदया वीरस्ताडितः कपिकुञ्जरः ॥
पपात भूमौ निःसंज्ञः सुस्राव रुधिरं बहु । पुनः संज्ञामथास्थाय वानरः स समुत्थितः ॥
तलेन ताडयामास ततस्तस्य शिरः कपिः । तेन प्रताडितो वीरो राक्षसः पर्वतोपमः ॥
विस्रस्तदन्तनयनो निपपात महीतले । सुस्राव रुधिरं सोष्णं गतासुश्च ततोऽभवत् ॥]

तस्मिन्हते भ्रातरि रावणस्य तन्नैर्ऋतानां बलमर्णवाभम् ।
त्यक्तायुधं केवलजीवितार्थं दुद्राव भिन्नार्णवसंनिकाशम् ॥ ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

मत्तः महापार्श्वः मत्त इति महापार्श्वस्य नामान्तरम् अस्मद्योणितकनिलामिनि युद्धकालिकरूपम् शत्रुशोणितरक्षितामिति पूर्वकालिकरूपम् महापद्मः पुण्डरीकाह्वदिग्गजः ॥ ६०–६४ ॥

रा० टी०–अथेति । अथानन्तरं ऋषभो वानरः मत्तानीकं महापार्श्वमुपागम्य तत्याधतस्थौ ॥ ६४ ॥

रा० टी०–तमिति । पुरस्तात्स्थितं तमृषभं वानरं दृष्ट्वा क्रुद्धो महापार्श्वः गदया उरसि आजघान ॥ ६५ ॥

गो० टी०–अथेति । मत्तानीकम् मत्तानीक इति च महापार्श्वस्य नामान्तरम् ॥ ६३ ॥ ६५ ॥

रा० टी०–स इति । तेन महापार्श्वेन गदया अभिहतः अत एव भिन्नवक्षाः अत एव समाधूतः वानरर्षभो रुधिरं सुस्राव ६६

गो० टी०–स तयेति । समाधूतः कम्पितः ॥ ६७ ॥

रा० टी०–स इति । ऋषभः चिरात्संज्ञां संप्राप्य महापार्श्वमुदैक्षत ॥ ६७ ॥

रा० टी०–स इति । वेगवान् स ऋषभः तं महापार्श्वं वेगवदभ्युपेत्य मुष्टिं संवर्त्य वाह्वन्तरे आजघान ॥ ६८ ॥

रा० टी०–स इति । क्षतेन उच्छ्रितभङ्ग यस्य स महापार्श्वः कृत्तमूलो वृक्ष इव भूमौ पपात । अस्य महापार्श्वस्य गदां प्रगृह्य ननाद ऋषभ इति शेषः । एव इत्यर्थे ॥ ६९ ॥

रा० टी०–मुहूर्त्तमिति । स महापार्श्वः मुहूर्त्तं गतासुकल्पः गतप्राणसदृश आसीत् । सहसा पुनः प्रत्यागतात्मा प्राप्तप्राणश्चासीत् अत एव सन्ध्याभ्रसमानवर्णो महापार्श्वः तमृषभमाजघान ॥ ६० ॥

रा० टी०–स इति । मूर्छितस्स ऋषभः पपात । ससंज्ञस्सन् पुनरुत्पत्य तां पूर्वं गृहीतां तस्य महापार्श्वस्य गदां ऋषभः समाविध्य दृढं गृहीत्वा जघान ॥ ६१ ॥

रा० टी०–सेति । गौद्रो भयावहा सा गदा रौद्रस्य महापार्श्वस्य देहं समुपेत्य तथा विभेद यत एव अद्रिराजः भास्वभः गैरिकेण युक्तं जलमिव क्षतजं रुधिरं सुस्राव ॥ ६२ ॥

रा० टी०–अभीति । महात्मनो ऋषभस्य गदां प्रति अभिदुद्राव । महापार्श्व इति शेषः । अङ्गं पृथक् ॥ ६३ ॥

रा० टी०–तामिति । तां पूर्वगृहीतामेव गदां गृहीत्वा दृढं परिष्वज्य पुनः पुनरादिश्य मत्तानीकं महापार्श्वं स ऋषभो जघान ॥ ६४ ॥

रा० टी०–स इति । स्वगदया भग्नः मत्तो महापार्श्वः वज्राहतोऽचल इव निपपात ॥ ६५ ॥

रा० टी०–विशीर्णेति । विशीर्णं नयने यस्य अत एव गतसत्वे महापार्श्वे भूमौ पतिते सति रक्षसां बलं विद्रुतम् ६६

गो० टी०–स इति । गदामभिदुद्राव गदां ग्रहीतुं दुद्रावेत्यर्थः ॥ ६८–६९ ॥

६६] ति० टी०–भिन्नार्णवसंनिकाशमिति क्रियाविशेषणम् ॥ ६६ ॥

इति श्रीरामभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

रा० टी०–तत्रेत्यङ्गसन्तोषात्–तस्मिन्निति । रावणस्य भ्रातरि तस्मिन् महापार्श्वे हते सति अर्णवाभं नैर्ऋतानां बलं त्यक्तायुधं सत् केवलजीवितार्थं भिन्नार्णवसन्निकाशं यथा भवति तथा दुद्राव ॥ ६७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ।

ततोऽतिकायः क्रुद्धो धातुरितीणंवरः कपीन्यदाऽऽससत्तदा ते भयार्ता राघवं शरणं जग्मुः । तदुपशौर्यादिविलोकनचकितेन रामेण पूर्वं विभीषणस्तस्येतिहासं कथयित्वा तूर्णं तं जहि इति रामं प्रार्थयत । ततो राममेवाभिगच्छन्तं तमसहमानः सौमित्रिः सूतेरं युद्धाभि नाशकत्तोत्तदा वायुना ब्रह्मास्त्रेणैव हन्तव्य इत्युपदिष्टश्च स ब्रह्मास्त्रेणैव तं जघान ।

स्वबलं व्यथितं दृष्ट्वा तुमुलं लोमहर्षणम् । भ्रातुश्च निहतान्दृष्ट्वा शक्रतुल्यपराक्रमान् ॥ १ ॥
पितृव्यौ चापि संदृश्य समरे संनिपातितौ । युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसोत्तमौ ॥ २ ॥
चुकोप च महातेजा ब्रह्मदत्तवरो युधि । अतिकायोऽद्रिसंकाशो देवदानवदर्पहा ॥ ३ ॥
स भास्करसहस्रस्य संघातमिव भास्वरम् । रथमारुह्य शक्रारिरभिदुद्राव वानरान् ॥ ४ ॥
स विस्फार्य तदा चापं किरीटी मृष्टकुण्डलः । नाम संश्रावयामास ननाद च महास्वनम् ॥ ५ ॥
तेन सिंहप्रणादेन नामविश्रावणेन च । ज्याशब्देन च भीमेन त्रासयामास वानरान् ॥ ६ ॥
ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः । भयार्ता वानराः सर्वे संश्रयन्ते परस्परम् ॥ ७ ॥
ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे । भयाद्वानरयोधास्ते विद्रवन्ति ततस्ततः ॥ ८ ॥
तेऽतिकायं समासाद्य वानरा मूढचेतसः । शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे ॥ ९ ॥
ततोऽतिकायं काकुत्स्थो रथस्थं पर्वतोपमम् । ददर्श धन्विनं दूराद्गर्जन्तं कालमेघवत् ॥ १० ॥
स तं दृष्ट्वा महाकायं राघवस्तु सुविस्मितः । वानरान्सान्त्वयित्वा च विभीषणमुवाच ह ॥ ११ ॥

गो० टी०—तस्मिन्निति । केवलजीवितार्थं यशोरहितजीवनार्थम् । जिघांसवस्त्रिकामभिति क्रियाविशेषणम् ॥ ६२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

१] ति० टी०—स्वबलमिति ॥ १ ॥

२-३] ति० टी०—पितृव्यौ कावित्यत्राह—युद्धोन्मत्तं चेत्यादि । भ्रातरावन्योन्यं भ्रातरौ एतदुक्तिः परस्परसौहार्दातिशयप्रतिपादनाय ॥ २ ॥ ३ ॥

रा० टी०—महापार्श्वधानन्तरकालिकं वृत्तान्तमाह—स्वबलमित्यादिभिः । तुमुलशब्देहेतुभूतम् अत एव लोमहर्षणं स्वबलं निहतं श्रुत्वा भ्रातुश्च निहतान्दृष्ट्वा युद्धोन्मत्तं महोदरं मत्तं महापार्श्वं भ्रातरौ परस्परमतिस्नेहयुक्तौ पितृव्यौ स्वसॄं स्त्रियापातितौ संदृश्य बलादत्तवरोऽतिकायः चुकोप । लोकत्रयमेकतश्चेति ॥ २-३ ॥

गो० टी०—स्वबलमित्यादि । भ्रातरौ अन्योन्यं भ्रातरौ ॥ १-४ ॥

४-६] ति० टी०—सूर्यसहस्रसमुदायसदृश्यम् ॥ ४-६ ॥

रा० टी०—स इति । सोऽतिकायः भास्करसहस्रस्य संघातं समूहमिव भास्वरं प्रकाशमानं रथमारुह्य वानरान् अभिदुद्राव ॥ ४ ॥

रा० टी०—स इति । सोऽतिकायः चापं विस्फार्य नाम स्वाभिधां संश्रावयामास महास्वनं ननाद च ॥ ५ ॥

रा० टी०—तेनेति । सिंहप्रणादेन सिंहवद्गर्जनेन नामविश्रावणेन च भीमेन ज्याशब्देन च वानरान् त्रासयामास॥६॥

गो० टी०—स इति । मृष्टकुण्डलः शुद्धकुण्डलः ॥५॥६ ॥

७] ति० टी०—कुम्भकर्णोऽयमुत्थित इति मन्यमानाः परस्परं संश्रयन्ते रक्षणार्थमिति शेषः ॥ ७ ॥

रा० टी०—ते इति । ते वानराः देहमाहात्म्यम् अतिकायशरीरस्य महत्त्वं दृष्ट्वा अयं कुम्भकर्ण एवोत्थित इति मन्वेति शेषः भयार्ताः वानराः परस्परं संश्रयन्ते ॥ ७ ॥

गो० टी०—त इति । माहात्म्यं महत्त्वम् । उत्थित इत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ७—११ ॥

८-१०] ति० टी०—ते रूपमालोक्य ते इव वानरा इव विद्रवन्तीति तच्छब्दद्वयनिर्वाहः । इवेति शेषः ॥ ८—१० ॥

रा० टी०—ते इति । ते वानराः त्रयाणां लोकानां विक्रमे इयत्ताकरणसमये विष्णोरिव तस्यातिकायस्य रूपमालोक्य ते प्रसिद्धाः ते पूर्वोक्ताः वानरयूथाः वानरयूथपन्तः भयात्ततस्ततो विद्रवन्ति ॥ ८ ॥

रा० टी०—ते इति । अतिकायं समासाद्य अतिकायसमीपे प्राप्य मूढचेतसो वानराः लक्ष्मणाग्रजं शरणं जग्मुः॥९॥

रा० टी०—तत इति । काकुत्स्थः दूरात् गर्जन्तमतिकायं ददर्श ॥ १० ॥

११] ति० टी०—सान्त्वयित्वा मा भैष्टेत्युक्त्वा ॥ ११ ॥

रा० टी०—स इति । महात्मानं बृहच्छरीरमतिकायं दृष्ट्वा सुविस्मितो राघवः वानरान् सांत्वयित्वा विभीषणमुवाच॥११॥

---

१ निर्भृत्सयन्तीति गो. ग. पाठः । २ रूपमालोक्येति गो. पाठः । ३ महदिति गो. पाठः । ४ दीप्ति गो. पाठः । ५ यूथा इति गो. पाठः ६ विस्मिय इति गो. पाठः । ७ अथेति गो. पाठः ।

कोऽसौ पर्वतसंकाशो धनुष्मान्हरिलोचनः । युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः ॥ १२ ॥
य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः । अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः ॥ १३ ॥
कालजिह्वाप्रकाशाभिर्य एषोऽभिविराजते । आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः ॥ १४ ॥
धनूंषि चास्य सज्जानि[1] हेमपृष्ठानि सर्वशः । शोभयन्ति रथश्रेष्ठं शक्रचापमिवाम्बरम्[2] ॥ १५ ॥
य एष रक्षःशार्दूलो रणभूमिं विराजयन् । अभ्येति रथिनां श्रेष्ठो रथेनादित्यवर्चसा ॥ १६ ॥
ध्वजशृङ्गप्रतिष्ठेन राहुणाभिविराजते[3] । सूर्यरश्मिप्रभैर्बाणैर्दिशो दश विराजयन् ॥ १७ ॥
त्रिनतं मेघनिर्ह्रादं हेमपृष्ठपरिष्कृतम्[4] । शतक्रतुधनुःप्रख्यं धनुरस्य विराजते ॥ १८ ॥
सध्वजः सपताकश्च सानुकर्षो महारथः[5] । चतुःसादिसमायुक्तो मेघस्तनितनिःस्वनः ॥ १९ ॥
विंशतिर्दश चाष्टौ च तूणीरास्य रथास्थिताः[6] । कार्मुकाणि च भीमानि ज्याश्च काञ्चनपिङ्गलाः ॥ २० ॥
द्वौ च खड्गौ चरौ पार्श्वस्थौ प्रदीप्तौ पार्श्वशोभिनौ । चतुर्हस्तप्रमाणाभ्यां मुष्टिभ्यां चोत्तमौ[7] ॥ २१ ॥
रक्तकण्ठगुणो धीरो महापर्वतसंनिभः । कालः कालमहावक्त्रो मेघस्थ इव भास्करः ॥ २२ ॥
काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते । शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान्पर्वतोत्तमः ॥ २३ ॥

१२-१३] ति० टी०—हरिलोचनः सिंहदृष्टिः ॥ १२ ॥ १३ ॥

रा० टी०—तदाकारमाह—क इति । भूतैरिति भूतेश्वरः शूलादिभिर्वृतो हरिसहस्रेण युक्ते स्यन्दने स्थित हरिलोचनः सिंहदृष्टिर्यः कश्चिदेष भाति सोऽसौ कः । श्लोकद्वयेनान्वयः ॥ १२ ॥ १३ ॥

गो० टी०—कोऽसावित्यादि । हरिलोचनः सिंहदृष्टिः । रथशक्तीभिः रथस्थिताभिः शक्तिभिः ॥ १२—१६ ॥

१४-१६] ति० टी०—रथशक्तीभिरिति द्वौ श्लोकौ । रथस्थाभिः शक्तिभिरित्यर्थः ॥ १४-१६ ॥

रा० टी०—कालेति । कालजिह्वावत् प्रकाशो यासां ताभिः रथशक्तीभिः रथस्य शक्तिभिराहृतः अत एव विद्युद्भिस्तोयद इव य एषोऽतिविराजते ॥ १४ ॥

रा० टी०—यस्य चास्य सज्जानि इत्यादि शक्रचापमंबरमिव रथश्रेष्ठं शोभयन्ति ॥ १५ ॥

रा० टी०—य एषः रणभूमिं विराजयन् सन् आदित्यवर्चसा रथेन अभ्येति ॥ १६ ॥

१७] ति० टी०—ध्वजशृङ्गेत्यादिना राहुध्वजत्वमुक्तम् १७

रा० टी०—य एषः सूर्यरश्मिप्रभैर्बाणैर्दश दिशो विराजयन् सन् ध्वजशृंगप्रतिष्ठेन ध्वजोपरि लिखितेन राहुणा अभिविराजते १७

गो० टी०—ध्वजशृङ्गप्रतिष्ठेनेति । अनेन राहुध्वजोऽयमेवोक्तम् ॥ १७ ॥

१८] ति० टी०—हेमपृष्ठं हेमसदृशपृष्ठभागम् । त्रिनतमिति प्राच्यास्ख्यातम् ॥ १८ ॥

रा० टी०—त्रिषु स्थानेषु नतं शक्रधनुःप्रख्यं यस्यास्य धनुर्विराजते ॥ १८ ॥

गो० टी०—त्रिणतमिति । त्रिषु आयन्तयोर्मध्ये च नतम् । मेघनिर्ह्रादं मेघतुल्यध्वनियुक्तम् । हेमपृष्ठं हेमखचितपार्श्वमित्यर्थः । अस्य रथस्य । अन्यत् कण्ठ्यमिदम् ॥ १८ ॥

१९] ति० टी०—सादिभिः सार्थयुक्तः ॥ १९ ॥

रा० टी०—सध्वजो ध्वजविशिष्टः चतुर्भिः सादिभिः अश्वारोहैः समायुक्तः ॥ १९ ॥

गो० टी०—सध्वज इति । ध्वजः असाधारणकेतनम् । पताका साधारणी । अनुकर्षो रथकटस्थाह । चतुःसादिसमायुक्तः चतुःसादिपुरुषैः ॥ १९ ॥

२०] ति० टी०—अष्टा अश्वेति ॥ २० ॥

रा० टी०—विंशतिरित्यनुवर्तमाने दशेत्यस्य रथसंख्यार्थत्वात् ॥ २० ॥

गो० टी०—विंशतिरित्यादि । कार्मुकाणि चतुर्दश इति न पौनरुक्त्यम् ॥ २० ॥

२१] ति० टी०—पार्श्वशोभिनौ स्वपार्श्वशोभिनौ । चतुर्हस्तप्रमाणाभ्यां स्वकरयोः चतुर्मुष्टिभ्यां चितौ । ध्वजदण्डपरिमाणेनायतौ ॥ २१ ॥

रा० टी०—ध्वजौ अतिकान्तिविशिष्टौ दण्डदशभिरायतौ चतुर्हस्तौ. चतुर्हस्तप्रमाणदण्डपरिवृतैः स्वकरैः मुष्टिभिश्चितौ संयुतौ पार्श्वयोः अत एव पार्श्वयोः शोभितौ शोभा याभ्यां तौ प्रदीप्तौ यस्य द्वौ खड्गौ ॥ २१ ॥

गो० टी०—द्वौ चेति । पार्श्वशोभिनौ पार्श्वाभ्यां शोभितौ । चतुर्हस्तसमरत्नौ चतुर्हस्तप्रमाणसमरत्नौ । स्वकरः खड्गादिमुष्टौ स्यादित्यमरः । चतुर्हस्तदशायतौ ध्वजौ च तौ हस्तदशायतौ चेति तथा ॥ २१ ॥

२२-२३] ति० टी०—रक्तकण्ठगुणो रक्तकण्ठसमान्यः । कालः कृष्णवर्णः । कालस्य मृत्योरिव महद्वक्त्रं यस्य सः २२ ॥ २३

---

१ सज्यानीति गो. रा. पाठः । २ तेजसेति गो. पाठः । ३ संनद्धमिति रा. पाठः । ४ तूण्य इति गो. रा. पाठः । ५ रथगतौ पार्श्वरक्षाविति गो. ऋ । ६ तुंताविति गो. पाठः ।

कुण्डलाभ्यामुभाभ्यां च भाति वक्त्रं सुभीषणम् । पुनर्वस्वन्तरगतैः परिपूर्णो निशाकरः ॥ २४ ॥
आचचक्षे स महाबाहो त्वमेनं राक्षसोत्तमम् । यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः ॥ २५ ॥
स पुत्रो राजपुत्रेण रामेणामिततेजसा । आचचक्षे महातेजा राघवाय विभीषणः ॥ २६ ॥
दशग्रीवो महातेजा राजा वैश्रवणानुजः । भीमकर्मा महात्मा हि रावणो राक्षसेश्वरः ॥ २७ ॥
तस्यायमीदृशबाहुर्यः रावणप्रतिमो बले । वृद्धसेवी श्रुतिधरः सर्वास्त्रविदुषां वरः ॥ २८ ॥
अश्वपृष्ठे गजस्कन्धे रथे धनुषि कर्षणे । भेदे सान्त्वे च दाने च नये मन्त्रे च संमतः ॥ २९ ॥
यस्य बाहू समाश्रित्य लङ्का भवति निर्भया । तनयं धान्यमालिन्या अतिकायमिमं विदुः ॥ ३० ॥
एतेनाराधितो ब्रह्मा तपसा भावितात्मना । अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ॥ ३१ ॥
सुराऽसुरैरवध्यत्वं दत्तमस्मै स्वयंभुवा । एतच्च कवचं दिव्यं रथश्च रविभास्वरः ॥ ३२ ॥
एतेन शतशो दैत्या दानवाश्च पराजिताः । रक्षितानि च रक्षांसि यक्षाश्चापि निषूदिताः ॥ ३३ ॥
वज्रं विष्टम्भितं येन बाणेनेन्द्रस्य धीमता । पाशः सलिलराजस्य युद्धे प्रतिहतस्तथा ॥ ३४ ॥
एषोऽतिकायो बलवान्राक्षसानामथर्षभः । स रावणसुतो धीमान्देवदानवदर्पहा ॥ ३५ ॥
तदभिक्रम्यतां यत्नः क्षिप्रं पुरुषपुंगव । पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ ३६ ॥
ततोऽतिकायो बलवान्प्रविश्य हरिवाहिनीम् । विस्फारयामास धनुर्ननाद च पुनः पुनः ॥ ३७ ॥
तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम् । अभिपेतुर्महात्मानः प्रधानाः ये वनौकसः ॥ ३८ ॥

२४ टी०—पूर्वं रक्तकण्ठगुणः रक्तः कण्ठगुणः कण्ठमाला यस्य सः कालः कृष्णः शनैश्चरोऽपि यस्य सः २२

२३ टी०—यस्य एषः तुल्यबाहुबलाभ्यां श्रुताभ्यां हिमवन्निकाशेनानुहृदेन महाभ्यां भुजाभ्यां शोभते ॥ २३ ॥

गो० टी०—रक्तेति । रक्तकण्ठगुणः रक्तकण्ठमालाधरः । कालश्चायं कालपर्वत इवातिदीर्घत्वात् । कालः शनैश्चरोऽपि यस्य स तथोक्तः । कालः शनैश्चरः इति वा ॥ २२—२३ ॥

२६ २८] ति० टी०—पूर्वोक्तं वीरलक्षणं मनसि कृत्वा राम एतत्पृच्छति २४-२८

२९—३१] ति० टी०—भेदे सान्त्वे च दाने च नये मन्त्रे च संमतः इति पाठे कृत्यलुटोर्बहुलमिति वचनात् कर्मणि षष्ठी । यस्यायमीदृशबाहुरिति वा ॥ २९—३१ ॥

रा० टी०—यस्य कुण्डलाभ्यां वक्त्रं भाति । तत्र दृष्टान्तः पुनर्वस्वन्तरगतो निशाकर इव ॥ २४ ॥

गो० टी०—ये च दृष्ट्वा वानराः दिशो विद्रुताः तमेनमाचचक्षे निर्दिश्य कथयेत्यर्थः । दृष्टवानतिकायत्वात् ॥ २५ ॥

रा० टी०—स इति । रामेण पृष्टो विभीषणः आचचक्षे २६

२७—२८ टी०—तदाकर्ण्य—दृशेत्यादिभिः । महातेजा यौवराज्यस्य रावणपुत्रेषु अप्रधानो तदारोहणादौ कर्मणि संमत पुत्र आसीत् । श्लोकत्रयमेकान्वयि ॥ २७-२९ ॥

रा० टी०—यस्येति । यस्य रावणपुत्रस्य बाहू समाश्रित्य लङ्का सेनया भवति तमिमं धान्यमालिन्याः तदभिधरावणभार्यायाः तनयमतिकायं विदुः ॥ ३० ॥

रा० टी०—एतेनेति । भावितः परिशीलितः आत्मा यत्नो येन तेनैतेन ब्रह्मा आराधितः अत एव अस्त्राणि अवाप्तानि अत एव रिपवः पराजिताः ॥ ३१ ॥

गो० टी०—तस्येत्यादि श्लोकद्वयम् । नये युक्तौ । मन्त्रे विचारे ॥ २८—३३ ॥

३२-३५] ति० टी०—रविभास्वरो रथो दत्त इत्यन्वयः ॥ ३२—३६ ॥

रा० टी०—सुरेति । अस्मै अतिकायाय स्वयम्भुवा सुरासुरैरवध्यत्वं दत्तमित्यनेन कवचं च दत्तं रविभास्वरो रथश्च दत्तः ३२

रा० टी०—एतेनेति । एतेनातिकायेन शतशो दैत्यादयः पराजिताः ॥ ३३ ॥

रा० टी०—वज्रमिति । येन इन्द्रस्य वज्रं विष्टम्भितं सलिलराजस्य पाशः प्रतिहतः स एषः रावणसुतोऽतिकायः श्लोकद्वयमेकान्वयि ॥ ३४-३५ ॥

गो० टी०—यज्रमित्यादिश्लोकद्वयम् । विष्टम्भितं निश्चलीकृतम् । राक्षसानामथर्षभ इत्यत्राथशब्दः कात्स्न्र्ये॥३४॥३५॥

३६-३८] ति० टी०—अस्मिन्नतिकाये । क्षिप्रमित्यत्र हेतुः—पुरेति । पुरा नयति । नेष्यतीत्यर्थः ॥ ३६—३८ ॥

रा० टी०—तदिति । वानरसैन्यानि क्षयं नयति नेष्यति अतः पुरा पूर्वमेव अस्मिन् यत्नः वधोपायः क्रियताम् ॥३६॥

रा० टी०—तत इति । अतिकायो हरिवाहिनीं प्रविश्य धनुर्विस्फारयामास ननाद च ॥ ३७ ॥

१ ( ) एतच्चिह्नान्तर्गतः वक्त्र शोभते इति गो. पाठः । २ पूर्णे बिम्बमिवेन्दवमिति गो. पाठः । ३ महोत्साह इति गो. पाठः । ४ अपि इति गो. पाठः । ५ रण इति गो. पाठः । ६ रणे नाथे इति गो. पाठः । ७ बाहू इति गो. पाठः । ८ यपोऽकैभास्वर इति गो. पाठः । ९ भीमत इति गो. पाठः । १० रणे इति गो. पाठः । ११ ये प्रधानाः इति गो. पाठः ।

कुमुदो द्विविदो मैन्दो नीलः शरभ एव च । पादपैर्गिरिशृङ्गैश्च युगपत्समभिद्रवन् ॥ ३९ ॥
तेषां दक्षांश्च शैलांश्च शरैः कनकभूषणैः । अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ ४० ॥
तांश्चैव सर्वान्स हरीञ्शरैः सर्वायसैर्बली । विव्याधाभिमुखान्संख्ये भीमकायो विशारदः ४१ ॥
तेऽर्दिता बाणवर्षेण भिन्नगात्राः पराजिताः । न शेकुरतिकायस्य प्रतिकर्तुं महाहवे ॥ ४२ ॥
तत्सैन्यं हरिवीराणां त्रासयामास राक्षसः । मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः ॥ ४३ ॥

स राक्षसेन्द्रो हरियूथमध्ये नायुध्यमानं निजघान कंचित् ।
उत्पत्य रामं स धनुःकलापी सगर्वितं वाक्यमिदं बभाषे ॥ ॥ ४४ ॥
रथे स्थितोऽहं शरचापपाणिर्न प्राकृतं कंचन योधयामि ।
वर्षास्ति शक्तिर्विक्रमसमायुक्तो ददातु मे शीघ्रमिहाद्य युद्धम् ॥ ॥ ४५ ॥
तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहन्ता ।
अमृष्यमाणश्च मुमोचपात जग्राह चापं च ततः सयित्वा ॥ ॥ ४६ ॥

क्रुद्धः सौमित्रिरुत्पत्य तृणाद्दाक्षिण्य सायकम् । पुरस्तादतिकायस्य विचकर्ष महद्धनुः ॥ ४७ ॥
पूरयन्स महीं सर्वामाकाशं सागरं दिशः । ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन्रजनीचरान् ॥ ४८ ॥

रा० टी०—तमिति । स्वयं भीमरूपं दृष्ट्वा ये महात्मानो वानराः ते अभिपेतुः ॥ ३८ ॥

गो० टी०—तदस्मिन्निति । पूर्वं अतिकायेन नेष्यत्यर्थः ॥ ३९-४२ ॥

३९-४२] ति० टी०—समभिद्रवन्समन्ताद्ययुः ॥ ३९-४२ ॥

रा० टी०—कुमुद इति । कुमुदादयः पादपैः समभिद्रवन्, समाश्रयन् ॥ ३९ ॥

गो० टी०—कुमुद इति । समभिद्रवन् । आश्रमाश्रयानित्यन्वादेशभावः ॥ ३९ ॥ ४० ॥

रा० टी०—तेषामिति । तेषां कुमुदादीनां द्रुमादीन् च तिकायः चिच्छेद ॥ ४० ॥

रा० टी०—तानिति । भीमकायोऽतिकायः सर्वान् हरीन् शरैर्विव्याध ॥ ४१ ॥

रा० टी०—ते इति । बाणवर्षणार्दिताः अत एव पराजिताः ते वानराः प्रतिकर्तुं न शेकुः ॥ ४२ ॥

गो० टी०—ताञ्छ्रेति । अभिमुखः स्थित इति शेषः ४१-४२ ॥

४३] ति० टी०—यौवनदर्पितो हरिरिव तरुणश्चित्र ४३

रा० टी०—तदिति । राक्षसः हरिवीराणां सैन्यं हरियूथमिव त्रासयामास ॥ ४३ ॥

गो० टी०—तदिति । हरिः सिंहः ॥ ४३ ॥

४४] ति० टी०—वीरत्वादयुध्यमानं कंचिदपि न निजघान । कलापी तूणीरवान् । सगर्वितं सगर्वम् ॥ ४४ ॥

रा० टी०—स इति । धनुःकलापी चापसमूहवान् स राक्षसेन्द्रो हरियूथमध्ये आयुध्यमानं कंचित् न निजघान ननु किं चकारेत्यत आह उत्पत्य सगर्वितमिदं वाक्यं रामं बभाषे ॥ ४४ ॥

गो० टी०—स इति । कलापी तूणीरवान् । कलापो भूषणे बर्हे तूणीरे संहतावयवेऽपीत्यमरः । सगर्वितं सगर्वम् ॥ ४४ ॥

४५] ति० टी०—यस्य शक्तिरित्यत्र व्यत्ययपक्षेऽथ यः स एवं ददात् ॥ ४५ ॥

रा० टी०—तमाक्षेपमाह—रथे इति । शरचापपाणिरहं प्राकृतमन्यं वानरमित्यर्थः । न योधयामि अतो यस्य शक्तिरस्ति स. युद्धमायैव पुरोऽस्मात्स एक एव मह्यं युद्धं ददातु ॥ ४५ ॥

गो० टी०—रथ इति । उपलक्षणं चैतत् ॥ ४५ ॥

४६] ति० टी०—तत्तस्येत्यत्र वाक्यं रामं प्रत्युक्तमसहिष्णुतया तस्य । शिरः जग्राह ॥ ४६ ॥

रा० टी०—तदिति । तस्यातिकायस्य तद्वाक्यं निशम्य सौमित्रिः अमृष्यमाणः असहमानः अतएव मुमोचपात सयित्वा ज्यां च जग्राह ॥ ४६ ॥

गो० टी०—तत्तस्येति । रामेति । अमृष्यमाणः असहमानः इति यावत् ॥ ४६ ॥ ४७ ॥

४७] ति० टी०—दाक्षिण्यादाय ॥ ४७ ॥

रा० टी०—क्रुद्ध इति । क्रुद्धः सौमित्रिः, तृणात् सायकं दाक्षिण्य तूणं पूरयित्वेत्यर्थः अतिकायस्य पुरस्ताद् अग्रे महद्धनुर्विचकर्ष ॥ ४७ ॥

४८] ति० टी०—ननादातिपूरयन्राक्षसांस्त्रासयन्नाशब्द उच्चरतीति शेषः ॥ ४८ ॥

रा० टी०—पूरयन्निति । स धनिको लक्ष्मणस्य ज्याशब्दः महीप्रभृतीन् पूरयन् सन् रजनीचरान् त्रासयन् त्रासयितुम् उद्यो बभूवेति शेषः ॥ ४८ ॥

गो० टी०—पूरयन्निति । त्रासयन् अभूदिति शेषः ॥ ४८ ॥

१ काञ्चनेति गो. पाठः । २ निशाचर इति गो. पाठः । ३ भग्नेति गो. पाठः । ४ ध्रुवंगमा इति गो. पा. । ५ रणे इति गो. पाठः । ६ यश्चास्ति कश्चिदिति गो. पाठः ।

सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा । विसिष्मिये महातेजा राक्षसेन्द्रात्मजो बली ॥ ४९ ॥
तदैतिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम् । आदाय निशितं बाणमिदं वचनमब्रवीत् ॥ ५० ॥
बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः । गच्छ किं कालसंकाशं मां योधयितुमिच्छसि ॥ ५१ ॥
नहि मद्बाहुसृष्टानां बाणानां हिमवानपि । सोढुमुत्सहते वेगमन्तरिक्षमथो मही ॥ ५२ ॥
सुखप्रसुप्तं कालाग्निं [1]विबोधयितुमिच्छसि । न्यस्य चापं निवर्तस्व प्राणान्न जहि मद्गतः ॥ ५३ ॥
अथवा त्वं प्रतिस्तब्धो न निवर्तितुमिच्छसि । तिष्ठ प्राणान्परित्यज्य गमिष्यसि यमक्षयम् ॥ ५४ ॥
पश्य मे निशिताञ्बाणान्रिपुदर्पनिषूदनान् । ईश्वरायुधसंकाशांस्तप्तकाञ्चनभूषणान् ॥ ५५ ॥
एष ते सर्पसंकाशो बाणः पास्यति शोणितम् । मृगराज इव क्रुद्धो नागराजस्य शोणितम् ॥
इत्येवमुक्त्वा संक्रुद्धः शरं धनुषि संदधे ॥ ५६ ॥

श्रुत्वातिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः ।
स संचुकोपातिबलो मनस्वी उवाच वाक्यं च ततो बृहच्छ्रीः ॥ ॥ ५७ ॥
न वाक्यमात्रेण भवान्प्रधानो न कत्थनात्सत्पुरुषा भवन्ति ।
मयि स्थिते धन्विनि बाणपाणौ निदर्शयस्वात्मबलं दुरात्मन् ॥ ॥ ५८ ॥
कर्मणा सूचयात्मानं न विकत्थितुमर्हसि । पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः ॥ ५९ ॥
सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः । शरैर्वा यदि वाप्यस्त्रैर्दर्शयस्व पराक्रमम् ॥ ६० ॥
ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः । मारुतः कालसंयुक्तं वृन्तात्तालफलं यथा ॥ ६१ ॥

४९-५२] ति० टी०-प्रतिभयं भयंकरम् ॥ ४९-५२ ॥

रा० टी०-सौमित्रेरिति । प्रतिभयं रिपुभयंकरं सौमित्रेश्चापनिर्घोषं श्रुत्वा राक्षसेन्द्रात्मजो विसिष्मिये ॥ ४९ ॥

रा० टी०-तदेति । लक्ष्मणमुत्थितं दृष्ट्वा कुपितोऽतिकायो बाणमादाय इदं वचनमब्रवीत् ॥ ५० ॥

रा० टी०-तदाहात्मा—बाल इति । हे सौमित्रे त्वं बालोऽसि अतः एव विक्रमेषु अविचक्षणः अनिपुणोऽसि अतः कालसंकाशं मां योधयितुं किं निमित्तमिच्छसि नेच्छेत्यर्थः अतो गच्छ ॥ ५१ ॥

रा० टी०-नहीति । मद्बाहुना सृष्टानां त्यक्तानां बाणानां वेगं सोढुं हिमवत्प्रभृतिर्नोत्सहते ॥ ५२ ॥

गो० टी०-सौमित्रेरिति । प्रतिभयम् । भयंकरं प्रतिभयमित्यमरः ॥ ४९-५२ ॥

५३] ति० टी०-मद्गतो मां प्राप्तः ॥ ५३ ॥

रा० टी०-सुखेति । कालाग्निं विबोधयितुमिच्छसि किमर्थमिति शेषः । नोत्थितोऽस्मीत्यर्थः अतः चापं न्यस्य प्रक्षिप्य निवर्तस्व मद्गतो मां प्राप्तः सन् प्राणान् न जहि ॥ ५३ ॥

गो० टी०-सुप्तेति । विबोधयितुं प्रबोधयितुम् । मा जहि मा हिंसीः । "हन्तेर्जः" इति जादेशः । मद्गतः मां प्राप्तः ॥ ५३ ॥

५४] ति० टी०-प्रतिस्तब्धोऽहंकारवान्निवर्तितुं नेच्छसि तदा तिष्ठ । स त्वं प्राणान्परित्यज्य यमक्षयं गमिष्यसि ॥ ५४ ॥

रा० टी०-अथवेति । अथवा मद्बाक्यानङ्गीकारे प्रतिस्तब्धोऽहंकारवान् त्वं यदि निवर्तितुं नेच्छसि तर्हि तिष्ठ प्राणान् परित्यज्य यमक्षयं गमिष्यसि ॥ ५४ ॥

गो० टी०-अथ वेति । प्रतिस्तब्धः प्रतिमुखं स्थितः ॥ ५४ ॥

५५-५७] ति० टी०-ईश्वरायुधं त्रिशूलम् ॥ ५५-५७ ॥

रा० टी०-पश्येति । ईश्वरायुधसंकाशान् अत एव रिपुनिषूदनान् मे बाणान् त्वं पश्य ॥ ५५ ॥

रा० टी०-एष इति । एष बाणस्ते शोणितं पास्यति ॥ ५६ ॥

रा० टी०-इतीति । इत्येवमुक्त्वा संक्रुद्धोऽतिकायः धनुषि शरं संदधे अहं पृथक्—श्रुत्वेति । राजपुत्रो लक्ष्मणः अतिकायस्य वचः श्रुत्वा संचुकोप ततोऽनन्तरं महार्थं वाक्यमुवाच ॥ ५७ ॥

गो० टी०-पश्येति । ईश्वरायुधं त्रिशूलम् ॥ ५५-५७ ॥

५८-६१] ति० टी०-प्रधानः श्रेष्ठः । कत्थनादात्मनः श्लाघामात्रात् । सत्पुरुषाः श्लाघ्यगुणयुक्ता न भवन्ति । आत्मनो बलं सामर्थ्यम् ॥ ५८—६१ ॥

रा० टी०-तदाकाङ्क्षाह—नेत्यादिभिः । यतः कत्थनात् स्वश्लाघातः सत्पुरुषा न भवन्ति अतो वाक्यमात्रेण स्वश्लाघाबोधकस्ववचनेनैव प्रधानः सत्पुरुषो भवान् अतः मयि स्थिते सति आत्मबलं निदर्शयस्व ॥ ५८ ॥

रा० टी०-कर्मणेति । कर्मणा युद्धक्रियया आत्मानं

१ अबोधयितुं गो. पाठः । २ अस्त्राणामिति गो. पाठः । ३ नीति गो. पाठः । ४ मा प्राणाञ्जहीति गो. पाठः । ५ प्रतिष्टब्ध इति गो. पाठः । ६ बृहच्छ्रीरिति गो. रा. पाठः । ७ बहुश्रीमिति गो. रा. पाठः । ८ यत्नमिति गो. पाठः ।

अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः । पास्यन्ति रुधिरं गात्राद्बाणशल्यान्तरोत्थितम् ॥६२॥
बालोऽयमिति विज्ञाय न चावज्ञातुमर्हसि । बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे॥ ६३ ॥
बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिविक्रमैः । लक्ष्मणस्य वचः श्रुत्वा हेतुमत्परमार्थवत् ॥
अतिकायः प्रचुक्रोध बाणं चोत्तममाददे ॥ ६४ ॥
ततो विद्याधरा भूता देवैर्दैत्या महर्षयः । गुह्यकाश्च महात्मानस्तद्युद्धं ददृशुस्तदा ॥ ६५ ॥
ततोऽतिकायः कुपितश्चापमारोप्य सायकम् । लक्ष्मणाय प्रचिक्षेप संक्षिपन्निव चाम्बरम् ॥ ६६ ॥
तमापतन्तं निशितं शरमाशीविषोपमम् । अर्धचन्द्रेण चिच्छेद लक्ष्मणः परवीरहा ॥ ६७ ॥
तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम् । अतिकायो भृशं क्रुद्धः पञ्च बाणान्समादधे ॥ ६८ ॥
ताञ्शरान्संप्रचिक्षेप लक्ष्मणाय निशाचरः । तानमात्राभिश्चैतैर्बाणैश्चिच्छेद भरतानुजः ॥ ६९ ॥
स ताञ्छित्त्वा शितैर्बाणैर्लक्ष्मणः परवीरहा । आददे निशितं बाणं ज्वलन्तमिव तेजसा ॥ ७० ॥
तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः । विचकर्ष च वेगेन विससर्ज च सायकम् ॥ ७१ ॥

मृत्यवे । तत्र हेतुः यः पौरुषेण पुरुषप्रयत्नेन युद्धेनैवार्थः पुरुषः स एव शर इति स्मृतः अतो विक्रमितुं स्वश्लाघामात्रं कर्तुं नार्हसि ॥ ६१ ॥

रा० टी०—सर्वेति । सर्वोपकरणसमायुक्तत्वं शरैरस्त्रैश्च स्वपराक्रमं दर्शयन् ॥ ६० ॥

गो० टी०—न वाक्यमात्रेणेति । कत्थनात् आत्मश्लाघनात् । सत्पुरुषाः शरपुरुषाः ॥ ५८–६० ॥

रा० टी०—तत इति । ते शिरः अहं शरैः पातयिष्यामि । तत्र दृष्टान्तः वृन्ताच्च्यवनबन्धनात् कालपक्वं तालफलं यथेव ॥ ६१ ॥

गो० टी०—तत इति । वृन्तात् प्रसवबन्धनात् । वृन्त प्रसवबन्धनमित्यमरः ॥ ६१ ॥

६२] ति० टी०—बाणशल्यान्तरोत्थितं बाणशल्यकृतच्छिद्रादुत्थितम् ॥ ६२ ॥

रा० टी०—अद्येति । बाणशल्यान्तरोत्थितं बाणशल्यकृतछेदान्निस्सृतं रुधिरं मामका बाणा गात्राद्भावं प्राप्य पास्यन्ति ॥ ६२ ॥

गो० टी०—अद्य त इति । बाणशल्यान्तरोत्थितमिति । बाणशल्यान्तराणि बाणशल्यकृतान्यन्तराणि ॥ ६२ ॥

६३] ति० टी०—मृत्युं जानीहि । पुरःस्थितस्य शत्रोरिति शेषः ॥ ६३ ॥

रा० टी०—बाल इति । बालो वृद्धो वा योऽहं तं मां मृत्युं जानीहि अतो बालोऽयमिति विज्ञाय अवज्ञातुं मां नार्हसि॥६३॥

गो० टी०—बाल इति । मृत्युं जानीहि । मामिति शेषः ॥ ६३–६६ ॥

६४-६५] ति० टी०—बाल्यं न प्रतिबन्धकम् पराक्रमे इत्यत्र दृष्टान्तमाह—बालेनेति । वामनेनेत्यर्थः ॥६४॥६५॥

रा० टी०—नन्वयं बालो कथमेवं शक्तिशालिनम् आह—बालेनेति । बालेन विष्णुना त्रिभिर्विक्रमैः यतः त्रयो लोका क्रान्ताः अहं पञ्चक ॥ ६४ ॥

गो० टी०—लक्ष्मणस्येति । हेतुमत् कारणसहितं परमार्थवत् परमार्थविशिष्टं लक्ष्मणस्य वचः श्रुत्वा अतिकायः प्रचुक्रोध ॥ ६४ ॥

६६–७१] ति० टी०—सायकं चापमारोप्य बाणं धनुषि संधाय संक्षिपन्निव । चाम्बरं बाणवेगेनान्तरालस्थितमाकाशं ग्रसन्निवेत्यर्थः ॥ ६६—७१ ॥

रा० टी०—तत इति । शीघ्रकरत्वं दर्शयन् ॥६६॥

गो० टी०—तत इति । कुपितोऽतिकायः चापमारोप्य बाणं धनुषि संधाय संक्षिपन् निःशेषं पिबन्निव लक्ष्मणाय सायकं प्रचिक्षेप ॥ ६७ ॥

रा० टी०—तमिति । आपतन्तं तं शरमर्धचन्द्रेण शरविशेषेण लक्ष्मणः चिच्छेद ॥ ६८ ॥

रा० टी०—तदिति । कृत्तभोगमुरगमिव निकृत्तं तं शरं दृष्ट्वा भृशं महोरगिकायः पञ्च बाणान् समादधे ॥ ६९ ॥

रा० टी०—तानिति । निशाचरः तान् समाहितान् शरान् लक्ष्मणाय संप्रचिक्षेप भरतानुजः आयान्तान् तान् शरान् बाणैश्चिच्छेद ॥ ७० ॥

रा० टी० स इति । लक्ष्मणः तान् निशाचरबाणान् शरान् छित्त्वा बाणं शरान्तरमादत्ते ॥ ७१ ॥

रा० टी०—तमिति । लक्ष्मणः तं सायकमादाय धनुःश्रेष्ठे योजयामास वेगेन विचकर्ष विससर्ज च ॥ ७२ ॥

गो० टी०—तत इति । सायकं चापमारोप्य बाणं धनुषि संधायेत्यर्थः । संक्षिपन्निव बाणवेगेनान्तरालस्थितमाकाशं ग्रसन्निवेत्यर्थः ॥ ६७–७२ ॥

---

१ मा इति गो. पाठः । २ देवा इति गो. पाठः । ३ द्रष्टुमागमन्निति गो. पाठः । ४ शरैस्तीक्ष्णैरिति गो. पाठः । ५ शरैस्तीक्ष्णैरिति गो. पाठः । ६ बाणैर्वानिति गो. पाठः ।

पूर्णायतविसृष्टेन शरेण नतपर्वणा । ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान् ॥ ७२ ॥
स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः । ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले ॥ ७३ ॥
राक्षसः प्रचकम्पेऽथ लक्ष्मणेषुप्रपीडितः । रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरम् ॥
चिन्तयामास चाश्वस्य विमृश्य च महाबलः ॥ ७४ ॥
साधु बाणनिपातेन श्लाघनीयोऽसि मे रिपुः । विधायैवं विदार्यास्यं विनम्य च महाभुजौ ॥
स रथोपस्थमास्थाय रथेन प्रचचार ह ॥ ७५ ॥
एकं त्रीन्पञ्च सप्तेति सायकान्राक्षसर्षभः । आददे संदधे चापि विचकर्षोत्ससर्ज च ॥ ७६ ॥
ते बाणाः कालसंकाशा राक्षसेन्द्रधनुश्च्युताः । हेमपुङ्खा रविप्रख्याश्चक्रुर्दीप्तमिवाम्बरम् ॥ ७७ ॥
ततस्तान्राक्षसोत्सृष्टाञ्शरान्राघवानुजः । असंभ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः ॥ ७८ ॥
ताञ्शरान्युधि संप्रेक्ष्य निकृत्तान्रावणात्मजः । चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम् ॥ ७९ ॥
स संधाय महातेजास्तं बाणं सहसोत्सृजत् । तेनैव सौमित्रिमायान्तमाजघान स्तनान्तरे ॥ ८० ॥
अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि । सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः ॥ ८१ ॥
स चकार तदात्मानं विशल्यं सहसा विभुः । जग्राह च शरं तीक्ष्णमस्त्रेणापि समादधे ॥ ८२ ॥

७२–७३] ति० टी०–पूर्णायतविसृष्टेन पूर्णाकर्षणपूर्वकं विसृष्टेन त्यर्थः । ललाटे आजघानेत्यन्वयः ॥ ७२ ॥ ७३ ॥

रा० टी०–पूर्णेति । पूर्णायतविसृष्टेन यथोचितकर्षणपूर्वकत्यक्तेन शरेण राक्षसश्रेष्ठमतिकायं ललाटे आजघान॥७२॥

गो० टी०–पूर्णायतेति । पूर्णायतेन पूर्णाकृष्टेन विसृष्टेन क्षिप्तेन नतपर्वणा निर्दीनपर्वणा । ऋजुनेति यावत् ॥७२॥

रा० टी०–स इति । राक्षसोऽतिकायस्य ललाटे मग्नः सन् एव शोणितेनाक्तः स लक्ष्मणेन पत्रिकः शरः अचले पन्नगेन्द्र इव ददृशे ॥ ७३ ॥

गो० टी०–स इति । स्पष्टं लिङ्गः ॥ ७४ ॥

७४] ति० टी०–त्रिपुरगोपुरं त्रिपुरासुरस्य गोपुरम् । त्रासस्य संज्ञां प्राप्य, विमृश्य विचार्य कर्तव्यमर्थं चिन्तयामास ॥ ७४ ॥

७५–८१] ति० टी०–तमेवार्थमाह—साध्विति । साधु प्रशस्तबाणप्रयोगेण त्वं मे श्लाघ्यो रिपुरसीत्येवमास्यं विदार्य प्रकट्य यथा भवति तथा शिरसाभिधानं भुजौ विनम्य नम्रौ कृत्वा रथोपस्थमास्थाय रथेन प्रचचार हेत्यन्वयः ॥ ७५–८१ ॥

रा० टी०–राक्षस इति । लक्ष्मणेषुणा प्रपीडितो राक्षसः रुद्रबाणेन हतं त्रिपुरगोपुरं यथा ॥७४॥

गो० टी०–राक्षस इति । त्रिपुरगोपुरं त्रिपुरद्वारम्॥७४॥

रा० टी०–चिन्तयामासेति । आत्मस्थ महाबलोऽतिकायः स हि शास्त्रमस्मदर्तव्यं विचारयामास; विमृश्य संचिन्त्य बाणनिपातेन रिपुस्त्वं मे श्लाघनीयोऽस्येवं विधाय उक्त्वा आस्यं विदार्य रथोपस्थमास्थाय रथेन प्रचचार । श्लोकद्वयमेकान्वयि ॥ ७६ ॥ ७७ ॥

गो० टी०–चिन्तयामासेत्यादिश्लोकद्वयमेकान्वयम । विमृश्य कर्तव्यं निर्धार्य । बाणनिपातेन मे साधु श्लाघनीयो रिपुरसीति । एवं लक्ष्मणम् विधाय अभिधाय । आस्यं विनम्य भुजौ नियम्य वक्षे स्थापयित्वा । रथोपस्थमास्थाय रथेन प्रचचार हेति संबन्धः ॥ ७६ ॥ ७७ ॥

रा० टी०–एकमिति । एकत्रिसप्तकानादद इ ॥ ७८ ॥

रा० टी०–ते इति । राक्षसेन्द्रधनुश्च्युतास्ते बाणाः अम्बरं दीप्तमिव चक्रुः ॥ ७९ ॥

रा० टी०–तत इति । राघवानुजः राक्षसोत्सृष्टान् शरोत्तमान् शरैः प्रचिच्छेद ॥ ८० ॥

रा० टी०–तानिति । रावणात्मजः शरान् निकृत्तान् संप्रेक्ष्य चुकोप शरं जग्राह च ॥ ८१ ॥

रा० टी०–स इति । रावणात्मजः तं बाणं सन्धाय उत्सृजत् उदसृजत् तेन बाणेन । सौमित्रिं स्तनान्तरे आजघान च ॥ ८२ ॥

रा० टी०–अतिकायेनेति । अतिकायेन वक्षसि ताडितः सौमित्रिः रुधिरमरुणवर्णं मदं युद्धोत्साहविशिष्टं यथा भवति तथा मत्तो द्विप इव सुस्राव इतस्ततोऽगच्छत् ॥ ८३ ॥

गो० टी०–एकमिति । इति उक्तप्रकारेण ॥ ७८–८३ ॥

८२] ति० टी०–आत्मानं विशल्यं चकारेत्यत्र हेतुः—विभुरिति । विष्वंशत्वानुसंधानवानित्यर्थः ॥ ८२ ॥

रा० टी०–स इति । विभुर्लक्ष्मणः आत्मानं विशल्यं विनष्टः शल्यो यस्मात् तं चकार । शरीरसम्बन्धमात्रेण शरो ध्वस्त इत्यर्थः । अत एव शरं बाणान्तरं जग्राह अत एव अस्त्रेण तन्मंत्रेण समादधे अभिमंत्रयामास ॥ ८४ ॥

१ चेति गो. पाठः । २ आजघ्नेति गो. पाठः । ३ विनम्येति गो. पाठः । ४ भुजावुभाविति गो. पाठः । ५ चेति गो. पाठः । ६ तत इति गो. पाठः । ७ च संदधे इति गो. समादधे इति च रा. पाठः ।

आग्नेयेन तदास्त्रेण योजयामास सायकम् । स जज्वाल तदा बाणो धनुश्चास्य तदात्मनः॥ ८३ ॥
अतिकायो ऽतितेजस्वी रौद्रमस्त्रं समाददे । तेन बाणं भुजंगाभं हेमपुङ्खमयोजयत् ॥ ८४ ॥
तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम् । अतिकायाय चिक्षेप कालदण्डमिवान्तकः ॥ ८५ ॥
आग्नेयास्त्राभिसंयुक्तं दृष्ट्वा बाणं निशाचरः । उत्ससर्ज तदा बाणं रौद्रं सूर्यास्त्रयोजितम् ॥ ८६ ॥
तावुभावप्यरे बाणावन्योन्यमभिजघ्नतुः । तेजसा संप्रदीप्ताग्रौ क्रुद्धाविव भुजंगमौ ॥
तावन्योन्यं विनिर्दह्य पेततुः पृथिवीतले ॥ ८७ ॥
निरर्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ । तावुभौ दीप्यमानौ स्म न भ्राजेते महीतले ॥ ८८ ॥
ततोऽतिकायः संक्रुद्धस्त्वाष्ट्रमैषीकमुत्सृजत् । ततश्चिच्छेद सौमित्रिरस्त्रमैन्द्रेण वीर्यवान् ॥ ८९ ॥
ऐषीकं निहतं दृष्ट्वा कुमारो रावणात्मजः । याम्येनास्त्रेण संक्रुद्धो योजयामास सायकम्॥ ९० ॥
ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः । वायव्येन तदस्त्रेण निजघान स लक्ष्मणः ॥ ९१ ॥
अर्थैनं शरधाराभिर्धाराभिरिव तोयदः । अभ्यवर्षत संक्रुद्धो लक्ष्मणो रावणात्मजम्॥ ९२ ॥
तेऽतिकायं समासाद्य कवचे वज्रभूषिते । भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥ ९३ ॥
तान्मोघानभिसंप्रेक्ष्य लक्ष्मणः परवीरहा । अभ्यवर्षत बाणानां सहस्रेण महायशाः ॥ ९४ ॥

गो० टी०—स त्वक्कायेति । अस्त्रेण अस्त्रमन्त्रेण । सदर्भे योजयामास ॥ ८४ ॥

८३-८४] ति० टी०—अस्त्रेणास्त्रमन्त्रेण । तदेवाह—आग्नेयेनेति ॥ ८३ ॥ ८४ ॥

रा० टी०—आग्नेयेनेति । आग्नेयेन अग्निदेवताकेन अस्त्रेण तन्मन्त्रेण सायकं योजयामास सः योजितो बाणः जज्वाल ॥८४॥

गो० टी०—आग्नेयेनेत्यादि । पूर्वोक्तमेव विवरणम् ॥८४॥

रा० टी०—अतीति । अतिकायः रौद्रमस्त्रं समाददे तेनास्त्रेण भुजङ्गाभं बाणमयोजयत् ॥ ८६ ॥

गो० टी०—अतिकायोऽपीति । समादधे अनुसंदधे॥८६॥

८५-८७] ति० टी०—आहितमाहितदिव्यशक्तिम्, अस्त्ररूपं शरम् ॥ ८५—८७ ॥

रा० टी०—तदिति । अस्त्रं तन्मन्त्रप्रयोजितमाहितं सन्धितं शरं लक्ष्मणोऽतिकायाय चिक्षेप ॥ ८७ ॥

रा० टी०—आग्नेयेति । निशाचरः आग्नेयास्त्रेणाभिसंयुक्तं बाणं दृष्ट्वा सूर्यास्त्रयोजितं बाणमुत्ससर्ज ॥ ८८ ॥

रा० टी०—तावितिं । तेजसा सम्प्रदीप्ते अग्रे ययोस्तौ उभौ बाणौ अम्बरे आकाशे अन्योन्यमभिजघ्नतुः ॥ ८९ ॥

गो० टी०—तदिति । आहितं संहितम ॥ ८७-८९ ॥

८८] ति० टी०—दीप्यमानौ तादृशावपि परस्पराभिघाताच्च भ्राजेते ॥ ८८ ॥

रा० टी०—तावितिं । तौ बाणौ अन्योन्यं विनिर्दह्य पृथिवीतले पेततुः । भस्मकृतौ अत एव निरर्चिषौ शरोत्तमौ न भ्राजेते ॥ ९० ॥

गो० टी०—तावितिं । भस्मतया कृतौ॥९०-९१॥

८९-९२] ति० टी०—त्वाष्ट्रं त्वष्टृदेवताकमैषीकास्त्रम् ॥ ८९ ॥ ९२ ॥

रा० टी०—तावितिं । दीप्यमानौ तौ लक्ष्मणरावणावपि महीतले न भ्राजेते । अतेन बाणध्वंसहेतुकपश्चात्तापस्तयोर्जात इति ध्वनितम् अतं पृथक् । तत इति । ततोऽतिक्रुद्धो अतिकायः त्वाष्ट्रं तदेवताकमैषीकं शरविशेषमुत्सृजत् तदसृजत् ततोऽनन्तरं सौमित्रिः तन्द्रेण इन्द्रदेवताकेन शरविशेषेणास्त्रं चिच्छेद ॥ ९१ ॥

रा० टी०—ऐषीकमिति । रावणात्मजः ऐषीकं निहतं दृष्ट्वा याम्येन यमदेवताकेनास्त्रेण सायकं योजयामास ॥ ९० ॥

रा० टी०—तत इति । निशाचरः तदस्त्रं लक्ष्मणाय चिक्षेप लक्ष्मणो वायव्येनास्त्रेण निजघान तदस्त्रमिति शेषः ॥ ९१ ॥

रा० टी०—अर्थेति । वर्षाभिस्तोयद इव लक्ष्मणः शरधाराभिः रावणात्मजमभ्यवर्षत ॥ ९४ ॥

९३] ति० टी०—भग्नाग्रशल्यवर्तिशल्यं येषां ते ॥ ९३ ॥

९४] ति० टी०—मोघान्व्यर्थान् ॥ ९४ ॥

१ धनुरिति गो. पाठः । २ महेति गो. पाठः । ३ अपीति गो. पाठः । ४ सौरमिति गो. पाठः । ५ आदधे इति गो. पाठः । ६ आग्नेयेनेति गो. पाठः । ७ दीप्तमिति गो. पाठः । ८ रक्तमिति गो. पाठः । ९ तत्प्रचिच्छेदेति गो. पाठः । १० अस्त्रेणेति गो. पाठः । ११ अपित इति गो. पाठः । १२ रक्तसंकुद्ध इति गो. पाठः । १३ न्मोघूणामिति गो. पाठः ।

स ब्रुवन्माणौघैरतिकायो महाबलः । अवध्यकवचः संख्ये राक्षसो नैव विध्यते ॥ ९९ ॥
[शरं चाशीविषाकारं लक्ष्मणाय व्यपासृजत् । स तेन विद्धः सौमित्रिर्मर्मदेशे शरेण ह ॥
मुहूर्तमात्रं निःसंज्ञो बभूवच्छत्रुतापनः । ततः संज्ञामुपालभ्य चतुर्भिः सायकोत्तमैः ॥
निजघान हयान् संख्ये सारथिं च महाबलः । ध्वजस्योन्मथनं कृत्वा शरवर्षैररिंदमः ॥
अमर्षान्वितः स सौमित्रिस्तान् शरानभिलक्षितान् । मुमोच लक्ष्मणो बाणान्वधार्थं तस्य रक्षसः ॥]
न शशाक रुजं कर्तुं युधि तस्य नरोत्तमैः । अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह ॥ ९६ ॥
ब्रह्मदत्तवरः शेष अवध्यकवचावृतः । ब्राह्मेणास्त्रेण भिन्ध्येनमेष वध्यो हि नान्यथा ॥
अवध्य एष दुर्धर्षस्त्वया कवची बली ॥ ९७ ॥

इत्युक्त्वा वायुवेगेन निशम्य सौमित्रिरिन्द्रप्रतिमानवीर्यः ।
जग्राह बाणं ज्वलनार्कवेगं तद्ब्राह्ममस्त्रं सहसा नियुज्य ॥ ९८ ॥
तस्मिन्वरास्त्रे तु नियुज्यमाने सौमित्रिणा बाणवरे शिताग्रे ।
दिशश्च चन्द्रार्कमहाग्रहाश्च नभश्च तत्रास रसा चोर्वी ॥ ९९ ॥
तं ब्राह्मणोऽस्त्रेण नियुज्य चापे शरं सपुङ्खं यमदूतकल्पम् ।
सौमित्रिरन्विष्यतुलस्य तस्य ससर्ज बाणं युधि वज्रकल्पम् ॥ १०० ॥
तं तस्य कण्ठोरसिवृद्धवेगं समापतन्तं श्वसनोग्रवेगम् ।
ददर्श बाणं सहसातिकायः समरे ददर्श ॥ १०१ ॥
तं प्रेक्ष्य बाणं सहसातिकायो जघान बाणैर्निशितैरनेकैः ।
स बाणवर्षस्य भृशं विवेगस्तथातिवेगेन जगाम पार्श्वम् ॥ १०२ ॥
तमागतं प्रेक्ष्य तदातिकायो बाणं प्रदीप्तान्तककालकल्पम् ॥
जग्राह जग्राह्यविसादकुण्ठैः शूलैः शरैश्चाप्यविपन्नचेष्टः ॥ १०३ ॥
बाल्यादुपात्तव्रतविग्रहाणि मोघानि कृत्वा स शरोऽभिदीप्तः ॥
प्रगृह्य तूर्णं किरीटजुष्टं तदौतिकायस्य शिरो जहार ॥ १०४ ॥
सकुण्डलं सक्षितिरत्नभूषणं लक्ष्मणेषुप्रमर्दितम् । पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ १०५ ॥
तं भूमौ पतितं दृष्ट्वा रक्षिप्तास्त्रवरभूषणम् । बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ १०६ ॥
ते विषण्णमुखा दीनाः प्रहारजनितश्रमाः । विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥ १०७ ॥
तत्सैन्यमथितो नादो निरीक्षा निशाचराः । पुरीमभिमुखा भीता द्रवन्तो नायके हते ॥ १०८ ॥

९५-१०८] तिलक टीका-ब्रुवन्माण इत्यादि श्लोकाष्टकम् ९५-१०८

रा० टी०-ते इति । ते लक्ष्मणशरा: बाणा: वज्रभृषिते कवचे अतिकर्षे सन्नाहाद्य बाण्य कवचेऽवध्यो शल्यात्रभागो येषां ते च ते बाणा महाबलाश्च ॥ ९५ ॥

रा० टी०-तानिति । तान् बाणान् ओघान् निष्फलानभिसंधेक्ष्य लक्ष्मणो बाणानां महत्त्वमाश्चर्यते ॥ ९६ ॥

रा० टी०-स इति । बाणैरेवंभूतमाणिऽवध्यकवचोतिकाय: केन विध्यते ॥ ९७ ॥

रा० टी०-नेति । नरोत्तमो लक्ष्मण: तस्यातिकायस्य रुजमङ्गभेदं कर्तुं न शशाक अथात: एनं लक्ष्मणमभ्युपागम्य वायुर्वाक्यमुवाच ॥ ९८ ॥

रा० टी०-तदाकारमाह ब्रह्मेति । एष राक्षस: ब्रह्मदत्तवर: अत एव अवध्येन कवचेनावृत: अत एव ब्राह्मेणास्त्रेण एनं राक्षसं भिन्धि अत एव एष वध्य: अन्यथा न ॥ ९९ ॥

रा० टी०-अवध्य इति । कवची कवचवान् बली एष राक्षस: शस्त्राणामवध्य: अतं पृथक् ॥ १०० ॥

१ रणोग्र इति गो. पाठः । २ अतं इति गो. पाठः । ३ अमोघेति गो. पाठः । ४ नियोज्येति गो. पाठः । ५ तत्सदृशमोघेति गो. पाठः । ६ तत्कवचमिति गो. पाठः । ७ अतिकर्षस्येति गो. पाठः । ८ वज्रैश्चाप्यविपन्नचेता इति गो. पाठः । ९ तत इति गो. पाठः । १० पीडितमिति गो. पाठः । ११ ते भूमौ निपतितं दृष्ट्वा रक्षिप्तास्त्रभूषणमिति गो. पाठः । १२ ते स्वरितमिति गो. पाठः ।

प्रहर्षयुक्ता बहवस्तु वानराः प्रफुल्लपद्मप्रतिमाननास्तदा ।
अपूजयँल्लक्ष्मणमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ १०९ ॥
[अतिबलमतिकायमभ्रकल्पं युधि विनिपात्य स लक्ष्मणः प्रहृष्टः ।
त्वरितमथ तदा स रामपार्श्वं कपिनिवहैश्च सुपूजितो जगाम ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ।

अतिकाये निधनं गते रावण उद्वेगमुपगम्य विस्मितश्चास्त्रशस्त्रबलमोघत्वाच्च राक्षसानादिश्य स्वयमिन्द्रजितं सीतां च रक्षणीये इति ते च स्वनियोगमन्वतिष्ठन् रावणः पुनर्दुःखेन क्षणं विनिःश्वसन्नाह । प्रतिभः ।

अतिकायं हतं श्रुत्वा लक्ष्मणेन महौजसा[1] । उद्वेगमगमद्राजा वचनं चेदमब्रवीत् ॥ १ ॥
धूम्राक्षः परमामर्षी सर्वशस्त्रभृतां वरः[2] । अकम्पनः प्रहस्तश्च कुम्भकर्णसुतौ च ॥ २ ॥
एते महाबला वीरा राक्षसा युद्धदुर्जयाः । जेतारः परसैन्यानां पर्वतैरप्यसंवृताः ॥ ३ ॥
सैसैन्यैस्ते हता वीरा रामेणाक्लिष्टकर्मणा । राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः ॥ ४ ॥
अन्ये च बहवः शूरा महात्मानो निपातिताः । प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम ॥ ५ ॥

रा० टी०—तत इति । इन्द्रप्रतिमानवीर्यः सौमित्रिः बाणोत्सर्जनं निशम्य ब्राह्ममस्त्रं नियुज्य बाणं समादधे ॥ १०१ ॥

गो० टी०—ततस्त्विति । ब्राह्ममस्त्रं ब्रह्मास्त्रमन्त्रम् नियोज्य जपित्वेति यावत् ॥ १०० ॥

रा० टी०—तस्मिन्निति । सौमित्रिणा बाणत्वे तस्मिन् बाणे अस्त्रे निधूयमाने सति नभ आस दिशि पूर्वा रराज चकम्पे दिक्प्रभृतयो रराजुः । रराजेत्यस्य वचनविपरिणामेनान्यत्राप्यन्वयः दिक्पदेन तदधिष्ठातारो ग्रहणात्तदाश्रयाः ॥१०२॥

गो० टी०—तस्मिन्निति । दिशश्चेत्यादौ तत्सन्निधि विपरिणम्यानुषज्यते ॥ १०१ ॥

रा० टी०—तमिति । ब्रह्मणोऽस्त्रेण युक्तमत एव ब्रह्मकल्पमत एव यमदूतकल्पं शरं रिपुहिंसकं बाणं चापे नियुज्य इन्द्राग्निदत्तयोपरि ससर्ज ॥ १०३ ॥

रा० टी०—तमिति । लक्ष्मणोत्सृष्टेन विशिष्टो वेगो यस्य तं सुपर्णवातोत्तमवत् चित्रं पुंखं यस्य तं बाणमतिकायो ददर्श ॥ १०४ ॥

गो० टी०—तमिति । नियोज्य जपित्वा । तस्य यमदूतकल्पमित्यन्वयः ॥ १०२–१०४ ॥

रा० टी०—तमिति । तं लक्ष्मणशरं प्रेक्षमाणोऽतिकायोऽनेकैर्बाणैर्जघान सायको लक्ष्मणबाणस्तु अतिवेगेन तस्यातिकायस्य पार्श्वं जगाम ॥ १०५ ॥

रा० टी०—तमिति । अविषक्तश्चेत्यतिकायः आगतं बाणं प्रेक्ष्य शक्त्यादिभिर्जघान ॥ १०६ ॥

गो० टी०—तमागतमिति । हुलैः द्विफलपत्रायमुधविशेषैः । हुलं द्विफलपत्रायमिति वैजयन्ती ॥ १०५–१०८ ॥

रा० टी०—तानीति । अग्निदीप्तः स शरः तानि अतिकायप्रक्षिप्तानि आयुधानि मोघानि निष्फलानि कृत्वा किरीटजुष्टमतिकायस्य शिरः प्रगृह्य जहार ॥ १०७ ॥

रा० टी०—तदिति । लक्ष्मणेषुणा प्रमथित तत्शिरः क्षितलः पद्मभिव गजो पपात ॥ १०८ ॥

रा० टी०—तमिति । विनिहतमित्यादिपदानि यावत् तमतिकायं भूमौ पतितं दृष्ट्वा विषादवान् जातः ॥ १०९ ॥

रा० टी०—त इति । प्रहीणा अप्रत्याशातेन अनिष्टमभूवन् येषां येषु भ्रष्ट एव विषण्णमुखा इत्यौचित्यात् ते राक्षसा विस्मैः विकृतवर्णैः सर्वैर्विदुः ॥ ११० ॥

गो० टी०—त इति । विस्मैः विस्मयैः ॥ १०९ ॥

रा० टी०—तत इति । तस्मिन् हते सति निरुत्साहा पुरे लङ्कायां निशाचराः पुरोधसमुपाययुरित्यन्वयः ॥ १११ ॥

गो० टी०—तत इति । निरुत्साहा गतोत्साहाः ॥ ११० ॥

१०९] ति० टी०—इष्टभागित्वमिष्टस्य भागः प्राप्तिस्तद्वत्त्वम् । इष्टमतिकायवधं प्राप्तत्वमित्यर्थः ॥ १०९ ॥

त्रिभिरेतानिकायदेवान्तकनरान्तकसंज्ञकैः समहोदरमहापार्श्वनिकुम्भाग्निकेतुप्रहस्तैश्च सप्तभिः सप्तभिः सप्तभिः

तौ भ्रातरौ तदा बद्धौ घोरैर्दत्तवरैः शरैः । यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः ॥ ६ ॥
मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वपन्नगैः । तन्न जाने प्रभावैर्वा मायया मोहनेन वा ॥ ७ ॥
शरबन्धाद्विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ । ये योधा निर्गताः शूरा राक्षसा मम शासनात्॥ ८ ॥
ते सर्वे निहता युद्धे वानरैः सुमहाबलैः । तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम्॥
नाशयेत्सबलं वीरं ससुग्रीवं विभीषणम् ॥ ९ ॥
अहो दुर्बलवान्रामो महदस्त्रबलं च वै । यस्य विक्रममासाद्य राक्षसा निधनं गताः ॥ १० ॥
अप्रमत्तैश्च सर्वत्र गुल्मैः रक्ष्या पुरी त्वियम् । अशोकवनिका चैव यत्र सीताभिरक्ष्यते ॥ ११ ॥
निष्क्रमो वा प्रवेशो वा ज्ञातव्यः सर्वदैव नः । यत्र यत्र भवेद्गुल्मस्तत्र पुनः पुनः ॥ १२ ॥
सर्वतश्चापि निर्गुप्तं सैन्यैः परिवृता बलैः । दृष्टव्यं च पदं तेषां वानराणां निशाचराः ॥ १३ ॥
प्रदोषे वार्धरात्रे वा प्रत्यूषे वापि सर्वशः । नावज्ञा तत्र कर्तव्या वानरेषु कदाचन ॥ १४ ॥

रा० टी०—श्रीरामः अतिक्रम्य व्यवधानान्तरमतिक्रम्य हृतां सीतां—अतिक्रान्तमिति । लङ्कायामशोकवनिकायां हृतां श्रुत्वा राजा रावणः वहेंगमकथयत् दूतं वक्ष्यमाणवत् ॥ १ ॥

रा० टी०—तदाकर्ण्यमाह—वृत्रक्षेत्यादिभिः । यत् सैन्यानां जेतारः, परैरजितमपराजितमेवं यस्य ते पूर्वाभाद्रपदे राक्षसाः, रामेण हताः । अतः न अराः निर्वीर्याः । साहसोक्तयमेव ते अपि ॥ ३—८ ॥

गो० टी०—अथ रावणश्चिन्ता—अतिक्रायमित्यादि १-४

रा० टी०—रावणश्चिन्तयन्नाह—प्रहस्येति—प्रहस्यातिबलगर्वेण अस्य पुरोगन्तॄन्हता दत्तवरैरजितैर्वा वानरौ तौ बद्धौ ॥ ५ ॥

गो० टी०—प्रहस्येत्यादिश्लोकत्रयमेकं वाक्यम । घोरैर्दत्तवरैः तौ भ्रातरौ स्वकृपणादिदत्तवरैरमोघैः शरैरपि बद्धौ । तदेव बन्धनं वर्णयति—यन्नेति । यद्बन्धनं सुरादिभिः मोक्तुं मोचयितुम अशक्यं तद्बन्धनं छित्त्वा । भ्रातरौ तौ शरबन्धाद्विमुक्तौ इति यत् तन्न जाने । किन्तु तौ जातौ न जान इत्यन्वयः । प्रभावैः स्वाभाविकैः । मायया व्याजकारिणी विद्याविशेषेण औषधादिकम् ॥ ६—९ ॥

९-१०] ति० टी०—इत्यरैरेतैः शरैर्यौ शरादिहन्तारौ भ्रातरौ तौ बद्धौ । यद्बन्धबन्धनं सुरादिभिरपि मोक्तुं न शक्यं तस्मादपि शरबन्धनाद्विमुक्तौ तत्प्रभावैः, सहजस्ववलादिवैभवेरथवा मायया प्रतिमायाबलेन वा मोहनेन वा बन्धकरणज्ञानं मोहनेन वेति न जान इत्युत्तरेण संबन्धः । ९-१० ॥

रा० गो०—यद् येन बन्धनेन बद्धौ तद्बन्धनं मोक्तुं सुरादिभिर्न शक्यमतः प्रभावैः रामतेजोभिर्मायया छलविशेषेण वा मोहनेन अस्मान्वञ्चयितुमासक्तचित्तान्तःपुरोत्पादनेन वा किं च मंत्रादिभिः स्वभावान्यथाकरणेन वा विनष्टमिति शेषः तन्निश्चयं न जाने अतः एव भ्रातरौ विमुक्तौ । अर्द्धषट्कमेकान्वयि ॥६-७॥

गो० टी०—ये इति । मम शासनान्निर्गताः ये योधास्ते सर्वे वानरैर्निहताः ॥ ८ ॥

रा० टी०—तमिति । विशेषणविशिष्टं रामं यो नाशयेत्-महं न पश्यामि ॥ ९ ॥

रा० टी०—अहो इति । यस्य विक्रममासाद्य प्राप्य ना अस्त्रा निधनं विनाशनं गताः स रामः अहो आश्चर्यं कथमनेन तदस्त्रबलं च मतम् ॥ १० ॥

गो० टी०—अहो निर्वन्ध्यादिश्लोकत्रयमेकान्वयम् । गिहि तद्वाक्यतोरणा द्वारम् अन्तर्द्वारम् तोरणं बहिर्द्वारम् ॥ १०-१३॥

११] ति० टी०—अप्रमत्तैरिति । रक्ष्या । यत्राभिरक्षिद्वाराग्रमेरिति शेषः, अशोकवनिका चेति । विशिष्य रक्षेति शेषः ॥ ११ ॥

रा० टी०—अप्रमत्तैरिति । सर्वत्र सर्वस्मिन् काले अप्रमत्तैरवहित्थैर्गुल्मैरिहिता इयं पुरी यत्र सीताभिरक्ष्यते या अशोकवनिका च रक्ष्या ॥ ११ ॥

गो० टी०—एवं रामप्रभावे सशङ्कमुक्त्वा सैन्यं प्रति पुनरात्मनः निगमयति—अप्रमत्तैरित्यादिना । गुप्तैः स्वयं कृतरक्षणैः । गुल्मैरिति वा पाठः ॥ ११ ॥

गो० टी०—अशोकेति । यत्र सीता अभिरक्ष्यते तत्र अशोकवनिकायाम् । निष्क्रामः निर्गमः प्रवेशो वा । नः अस्माभिः ज्ञातव्यः । मदनुज्ञां विना न कोपि जनो निर्गमयितव्यो नापि प्रवेष्टव्य इत्यर्थः ॥ १२ ॥

१२] ति० टी०—निष्क्रामो वेति । पुरेऽशोकवनिकायां चेति शेषः । नो युष्माकम् । युष्माभिरिति यावत् । यत्र यत्र गुल्म इति । पृथक्स्थापित इति शेषः ॥ १२ ॥

रा० टी०—निष्क्राम इति । यत्र यत्र गुल्मो भवेत् तत्र तत्र निष्क्रामो वा प्रवेशो वा नोऽस्माकं पुनः पुनर्ज्ञातव्यः ॥ १२ ।

गो० टी०—यत्र यत्रेति । गुल्मः सेनासन्निवेशः ॥ १४ ।

१३-१४] ति० टी०—पदं गतागतम् ॥ १३ ॥ १४ ॥

---

१ यौ हितौ भ्रातरौ तौरौ बद्धाविति गो. पाठः । २ किन्नैरिति गो. पाठः । ३ ससुग्रीवविभीषणमिति गो.पाठः । ४ त्विति गो.पाठः । ५ [illegible] गो. पाठः । ६ वनिकायां रेति गो. पाठः । ७ सर्वत्रेति गो. पाठः । ८ स्वैः स्वैरिति गो. पाठः ।

द्विषतां बलमुद्युक्तमापतत्किं स्थितं यथा । ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत् ॥
वचनं सर्वमातिष्ठन्यथावत्तु महाबलाः ॥ १५ ॥
तान्सर्वान्हि समादिश्य रावणो राक्षसाधिपः । मन्युशल्यं वहन्दीनः प्राविशत्स्वमालयम् ॥ १६ ॥
ततः स संदीपितकोपवह्निर्निशाचराणामधिपो महाबलः ।
तदैव पुत्रव्यसनं विचिन्तयन्मुहुर्मुहुश्चैव तदा विनिःश्वसन् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

त्रिसप्ततितमः सर्गः ।

ततो ... [illegible] ... स्वशरपथगान्कपीन्, विद्रावयामासापि च ... शत्रुः ... इत्यादि विस्तरतो रक्षसामेव विजयं मुदा पुरं विवेश

ततो हतान्राक्षसपुंगवांस्तान्दृष्ट्वान्तकादित्रिशिरो नरान्तकान् ।
रक्षोगणास्तत्र हतावशिष्टास्ते रावणाय त्वरितैः शशंसुः ॥ १ ॥
ततो हतांस्तान्सहसा निशम्य राजा महाबाणपरिप्लुताक्षः ।
पुत्रक्षयं भ्रातृवधं च घोरं विचिन्त्य राजा विपुलं प्रदध्यौ ॥ २ ॥

रा० टी०—सर्वत इति । सैन्यैर्बलैः परिवृता पृथ्वी सर्वतः तिष्ठत्यं तिष्ठत । तत्प्रयोजकमाह वानराणां पतनागतं द्रष्टव्यम् ॥ १३ ॥

गो० टी०—द्रष्टव्यमित्यादिश्लोकद्वयमेकान्वयम् । पूर्वं व्याख्यातम् । दर्शनप्रकारमाह—द्विषतामिति । द्विषतां बलं स्थितं किम् । उद्युक्तम् उद्यतं किम् । आपतन्तम् । विभक्तिव्यत्यय आर्षः । आपतत् किमिति सदा द्रष्टव्यमित्यर्थः । आपतत् किमिति पाठः सुशोभनः ॥ १४–१५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नवृत्तिव्याख्याने युद्धकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

रा० टी०—प्रदोष इति । प्रदोषादौ वानरैः आज्ञा न कर्तव्या अस्मिन्काले नागमिष्यन्तीति न विश्वसितव्यमित्यर्थः । तेन सर्वदैव सावधानतया स्थातव्यमिति ध्वनितम् ॥ १४ ॥

१५] ति० टी०—द्रष्टव्यं च पतन्तिपुरुषं तत्र, दर्शनप्रकारमाह—द्विषतामिति । उद्युक्तमुद्यमवत्किमापतद्गमनशीलं किम् । लङ्कायामिति शेषः । यथा यथा पू। स्थितं स्थितमस्तिक्रियेयंप्रकारेण सदा द्रष्टव्यमित्यर्थः ॥ १५ ॥

रा० टी०—तत्र हेतुमाह—द्विषतामिति । आपतन्तं मन्त्रभूतमुद्दिश्य द्विषतां वानराणां बलं यथा यथावदुद्युक्तं सत् स्थितम् । अद्य पृथक् ॥ १६ ॥

रा० टी०—तत इति । लंकाधिपस्य वचनं श्रुत्वा सर्वे राक्षसाः यथावदातिष्ठन् ॥ १६ ॥

१६–१७] ति० टी०—मन्युशल्यं मन्युरूपं शल्यम् १६ ॥ ७३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दराजविरचितायां श्रीरामायणभूषणाभिधानायां वाल्मीकीयआदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

रा० टी०—तानिति । राक्षसाधिपः तान् राक्षसान्सर्वानादिश्य मन्युशल्यं क्रोधरूपं शल्यम् प्रतुन्नत्वात् दीप्तं प्रकाशमानं निर्वाणं स्वालयं प्राविशत् ॥ १६ ॥

रा० टी०—तत इति । त्रीणि शिरांसि कालान्तकादित्रयस्य स निशाचराणामधिपः पुत्रव्यसनं पुत्रमरणदुःखं विचिन्तयन्सन् घर्मं मुष्णं निःश्वसितीति स्म ॥ १७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दराजविरचितायां श्रीरामायणभूषणाभिधानायां युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

१–२] ति० टी०—तत इति । देवान्तकादयः त्रिशिरोन्तिकान्तो च त्रयः ॥ १ ॥ २ ॥

रा० टी०—राक्षसानां हतानामाह—तत इत्यादिभिः । हता विशिष्टा रक्षोगणाः देवान्तकादिना हतान् शशंसुः ॥ १ ॥

गो० टी०—अथ त्रयाणामन्वन्वयसप्ततितमे—ततो हतानित्यादि ॥ १ ॥

रा० टी०—तत इति । राक्षसान् हतान् निशम्य बाणपरिप्लुताक्षो राजा ऐश्वर्यादाप्तो संपूर्णो राजा रावणः पुत्रक्षयं भ्रातृवधं च विचिन्त्य विपुलमत्यन्तं प्रदध्यौ विचारयामास ॥ २ ॥

गो० टी०—पूर्वं कुम्भकर्णादिवधः सामान्येन श्रुतः सम्प्र-

---

१ सदेति गो. पाठः । २ स तान्सर्वानिति गो. तान्सर्वान्स इति रा. पाठः । ३ निश्वासतिरम धर्मामिति रा. पाठः । ४ त्वनिःश्वसतिरम गो. पाठः ५ त्वरितमिति गो. पाठः । ६ मुमोहादिवति गो. रा. पाठः ।

ततस्तु राजानमुदीक्ष्य दीनं शोकार्णवे संपरिप्लुवानम् ।
रथर्षभो राक्षसराजसूनुस्तमिन्द्रजिद्वाक्यमिदं बभाषे ॥ ३ ॥
न तात मोहं परिगन्तुमर्हसे यत्रेन्द्रजिज्जीवति नैर्ऋतेशे ।
नेन्द्रारिबाणाभिहतो हि कश्चित्प्राणान्समर्थः समरेऽभिपातुम् ॥ ४ ॥
पश्याद्य रामं सह लक्ष्मणेन मद्बाणनिर्भिन्नविकीर्णदेहम् ।
गतायुषं भूमितले शयानं शितैः शरैराचितसर्वगात्रम् ॥ ५ ॥
इमां प्रतिज्ञां शृणु शक्रशत्रोः सुनिश्चितां पौरुषदैवयुक्ताम् ।
अद्यैव रामं सह लक्ष्मणेन संतर्पयिष्यामि शरैरमोघैः ॥ ६ ॥
अद्येन्द्रवैवस्वतविष्णुरुद्रसाध्यार्श्व वैश्वानरचन्द्रसूर्याः ।
द्रक्ष्यन्तु मे विक्रममप्रमेयं विष्णोरिवोग्रं बलियज्ञवाटे ॥ ७ ॥
स एवमुक्त्वा त्रिदशेन्द्रशत्रुरापृच्छ्य राजानमदीनसत्त्वः ।
समारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसमाधियुक्तम् ॥ ८ ॥
समास्थाय महातेजा रथं हरिरथोपमम् । जगाम सहसा तत्र यत्र युद्धमरिंदमः ॥ ९ ॥

त्याग्नेः सकाशेषं श्रुत इत्याह—तत इति । पूर्वोक्तसर्वास्त्रवादो वा ॥ २ ॥

३] ति० टी०—संपरिप्लुवानम् । लिटः कानच् । शोकार्णवमग्नमित्यर्थः । रथर्षभो रथस्थानां श्रेष्ठः । महारथ इत्यर्थः । तं रावणम् ॥ ३ ॥

रा० टी०—तत इति । राक्षसराजसूनुरिन्द्रजित् शोकार्णवे सम्परिप्लुवानमत एव दीनं राजानमुदीक्ष्य इदं वाक्यं बभाषे३

गो० टी०—तत इति । संपरिप्लुवानम् । लटः शानजादेशः ॥ ३ ॥

४] ति० टी०—हे तात, तस्मान्मोहं गन्तुं नार्हसि । यत्र यस्मादिन्द्रजिज्जीवति । इन्द्रारिरिन्द्रजित् समरे इन्द्रजिद्बाणाभिहतः प्राणानभिपातुं कश्चिदपि समर्थो नास्ति ॥ ४ ॥

रा० टी०—तदाकारमाह—नेति । हे तात यत्र यदा इन्द्रजित् जीवति तदा त्वं मोहं गन्तुं नार्हसि । तत्र हेतुः इन्द्रारेर्मम बाणाभिहतः कश्चिदपि जनः प्राणान् अभिपातुं रक्षितुं न समर्थः ॥ ४ ॥

गो० टी०—न तातेति । यत्र यदा । इन्द्रारिः इन्द्रजित्४-५

५] ति० टी०—मद्बाणनिर्भिन्नः, अत एव विकीर्णो देहो यस्य तम् ॥ ५ ॥

रा० टी०—पश्येति । शरैराचितानि व्याप्तानि सर्वगात्राणि यस्य अत एव मद्बाणनिर्भेदेन । बाणकरणकविदारणेन विकीर्णो देहो यस्य अत एव भूमितले शयानं रामं पश्य ॥ ५ ॥

६-७] ति० टी०—पौरुषदैवयुक्तां पौरुषेण सहजशौर्यबलेन दैवबलेन भगवद्ब्रह्मबलेन च युक्तां क्रियमाणाम् । आदिकर्मणि क्तः ॥ ६ ॥ ७ ॥

रा० टी०—इमामिति । पौरुषेण सहजशौर्यबलेन दैवेन ब्रह्मास्त्रप्रयोगेण च युक्तामत एव सुनिश्चितां सत्याम् शक्रशत्रोर्ममेमां प्रतिज्ञां शृणु । तदाकारमाह अमोघैः शरैः रामसंयत्र सन्तर्पयिष्यामि ॥ ६ ॥

रा० टी०—अद्येति । बलेर्यज्ञवाटे यागशालायां विष्णोरुग्रमप्रमेयं विक्रममिव मे विक्रममिन्द्रादयो द्रक्ष्यन्ति ॥ ७ ॥

गो० टी०—इमामिति । पौरुषदैवयुतां पुरुषबलदैवबलयुक्ताम् । सन्तर्पयिष्यामि पूरयिष्यामि ॥ ६ ॥ ७ ॥

८] ति० टी०—खरश्रेष्ठैः, समाधीयते युद्धमेभिरिति समाधयो धनुःखड्गादयस्तैश्च युक्तम् ॥ ८ ॥

रा० टी०—स इति । त्रिदशेन्द्रशत्रुस्स इन्द्रजित् एवमुक्त्वा राजानं रावणमापृच्छ्य तदाज्ञां गृहीत्वा खरश्रेष्ठैः श्रेष्ठखरैः, समाधीयते सङ्ग्राम एभिरिति समाधयो युद्धोपकरणधनुःखड्गादयस्तैश्च युक्तं रथं समारुरोह ॥ ८ ॥

गो० टी०—स इति । खरश्रेष्ठसमाधियुक्तं खरश्रेष्ठसंबन्धयुक्तम् । खरश्रेष्ठैः समाधिना समाधानेन च युक्तमिति वा॥८॥

९] ति० टी०—हरिरथ इन्द्रस्थः ॥ ९ ॥

रा० टी०—समिति । महातेजा इन्द्रजित् हरिरथोपमं रथं समास्थाय यत्र युद्धं तत्र सहसा जगाम ॥ ९ ॥

गो० टी०—तमिति । हरिरथः सूर्यरथः । यमानिलेन्द्रचन्द्रार्केविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिनां कपिले त्रिषु, इत्यमरः । युद्धमिति । कर्तव्यमिति शेषः ॥ ९ ॥

१ राक्षसेन्द्रेति गो. रा. पाठः । २ मित्रेति गो. पाठः । ३ क्थीति गो. पाठः ।

तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः । संहृष्यमाणा बहवो धनुःप्रवरपाणयः ॥ १० ॥
गजस्कन्धगताः केचित्केचित्परमवाजिभिः । व्याघ्रर्क्षशिक्रमार्जारखरोष्ट्रैश्च भुजंगमैः ॥ ११ ॥
वराहैः श्वापदैः सिंहैर्नम्युकैः पर्वतोपमैः । काकैर्हंसमयूरैश्च राक्षसा भीमविक्रमाः ॥
प्रासमुद्गरनिस्त्रिंशपरश्वधगदाधराः । भुशुंडिमुद्गरायष्टिशतघ्नीपरिघायुधाः ॥ १२ ॥
स शङ्खनिनदैः पूर्णैर्भेरीणां चापि निःस्वनैः । जगाम त्रिदशेन्द्रारिर्राजं वेगेन वीर्यवान् ॥ १३ ॥
स शङ्खशशिवर्णेन छत्रेण रिपुसूदनः । रराज प्रीतिपूर्णेन नभश्चन्द्रमसा यथा ॥ १४ ॥
वीज्यमानस्ततो वीरो हैमैर्हेमविभूषणैः । चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम् ॥ १५ ॥
[सैन्यं दृष्ट्वा विनिर्यान्तं बलेन महता वृतम् । राक्षसाधिपतिः श्रीमान्रावणः पुत्रमब्रवीत् ॥
त्वमप्रतिरथः पुत्र त्वया वै वासवो जितः । किं पुनर्मानुषं धृष्यं निहनिष्यसि राघवम् ॥
तथोक्तो राक्षसेन्द्रेण प्रत्यगृह्णान्महाशिषः ।]
ततस्त्विन्द्रजिता लङ्का सूर्यपतिमतेजसा । रराजाप्रतिवीर्येण सौरिवार्केण भास्वता ॥ १६ ॥
स संप्राप्य महातेजा युद्धभूमिमरिंदमः । स्थापयामास रक्षांसि रथं प्रति समन्ततः ॥ १७ ॥
ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः । जुहुवे राक्षसश्रेष्ठो विधिवन्मन्त्रसत्तमैः ॥ १८ ॥
स हाविर्लाजसंस्कारैर्माल्यगन्धपुरस्कृतैः । जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान् ॥ १९ ॥

१०–१२] ति० टी०–संहृष्यमाणा इत्यर्थम् । ऋष्यमाणा इत्यर्थः ॥ १०—१२ ॥

१३] ति० टी०–आजि युद्धम् ॥ १३ ॥

रा० टी०–तमिति । प्रस्थितं तमिन्द्रजितं संहृष्यमाणाः संहृष्यमाणाः बहवो महाबला अनुजग्मुः ॥ १० ॥

रा० टी०–तद्गमनप्रकारमाह—गजेति । केचिद्गजस्कन्धगताः केचित्परमवाज्यादिभिरुपलक्षिताः पादातिवराः सप्तद्व्याद्यापुधाश्च सन्तः अनुजग्मुरित्यनुषज्यते । श्लोकत्रयमेकान्वयि ॥ ११–१३ ॥

रा० टी०–स इति । शंखनिनदैः भेरीणां निस्वनैश्चोपलक्षितः स इन्द्रजित् आजिं सङ्ग्रामं वेगेन जगाम ॥ १३ ॥

गो० टी०–तं प्रस्थितमित्यादिश्लोकत्रयमेकान्वयम् ॥ १०-१३ ॥

१४] ति०टी०–शङ्खस्य शशिनश्च वर्ण इव वर्णो यस्य तत् १४

रा० टी०–स इति । शङ्खस्य शशिनश्च वर्ण इव वर्णो यस्य तेन छत्रेण स इन्द्रजित् पतिपूर्णेन चन्द्रमसा नभ इव रराज ॥ १५ ॥

१५–१६] ति० टी०–हैमैर्हिरण्मयदण्डैः ॥ १५ ॥ १६॥

रा० टी०–वीज्यमान इति । सर्वधनुष्मतां मुख्य इन्द्रजित् हैमैः हेममयदण्डयुक्तैश्चारुचामरमुख्यैर्वीज्यमानोऽभवदिति शेषः ॥ १६ ॥

रा० टी०–तत इति । लङ्का अप्रतिवीर्येणेन्द्रजिता अर्केण सौरिव रराज ॥ १७ ॥

गो० टी०–अवीज्यतेति । हैमैः हेममयदण्डैः । हेमविभूषितैः हेममयाकरणैः ॥ १५ ॥ १६ ॥

१७] ति० टी०–युद्धभूमिं युद्धजयसंपादकहोमसामग्रीभूमिम । निकुम्भिलास्थानमित्यर्थः ॥ १७ ॥

रा० टी०–स इति । स इन्द्रजित् युद्धस्य युद्धजयसंपादकहोमसामग्र्याः भूमिं निकुम्भिलास्थानमित्यर्थः संप्राप्य रथं प्रति रथस्य समीपं समंततश्चतुर्दिक्षु रक्षांसि स्थापयामास ॥ १७ ॥

गो० टी०–सम्प्राप्येति । रथं प्रति रथसन्निधिमुद्दिश्य १७

१८] ति० टी०–हुतभोक्तारमग्निम् । विधिवत्क्रमेणोक्तप्रकारैः ॥ १८ ॥

रा० टी०–तत इति । हुतभुजा वह्निना सदृशी प्रभा यस्य स इन्द्रजित् हुतभोक्तारं वह्निं मन्त्रसत्तमैर्विधिवत् जुहुवे ॥ १९ ॥

गो० टी०–ततस्त्विति । विधिवत् क्रमेण ॥ १८ ॥

१९] ति० टी०–गन्धमाल्यपुरस्कृतैर्लाजसत्कारसंस्कृतैर्हविर्द्रव्यैः पावकं सत्कृत्य तत्र पावके क्रियमाणसंस्काराभ्यर्थनार्थं लिंक्षयमाणल्लाजरूपं जुहाव ॥ १९ ॥

रा० टी०–हवनप्रकारं दोषयन्नाह—स इति । माल्यगन्धौ पुरस्कृतौ पूर्वं समर्पितौ यैस्तैः लाजसत्कारैः सत्कृतिकारकलाजैः पावकं सत्कृत्येति शेषः राक्षसेन्द्रः हविरेष्यमाणल्लाजरूपं जुहुवे । यदि तु लाजसत्कारैरित्यत्र हविर्जुहुवे इत्यन्वयस्तदा न शेषकल्पनेति दिक् ॥ १९ ॥ ९ ॥

गो० टी०–स इति । हविर्लाजसंस्कारैः संस्कृतहविर्लाजैः ॥ १९ ॥ ९ ॥

---

१ प्रवरेति गो. पाठः । २ मार्जारैरिति गो. पाठः । ३ वराहश्वापदैरिति गो. पाठः । ४ शशेति गो. पाठः । ५ पट्टिशेति रा. पाठः । ६ इदमर्धमधिकं रा. पाठे । ७ रत्नमालो निशाचरैरिति गो. पाठः । ८ निशीति रा. पाठः । ९ अवीज्यतेति गो. पाठः । १० विनुषितैरिति गो. रा. पाठः ११ इदं सार्धपद्यद्वयमधिकं गो. पाठे । १२ जुहवेति गो. पाठः । १३ मन्त्रवद्विधिवत्तदेति गो. पाठः । १४ संस्कारैरिति गो. पाठः ।

शस्त्राणि शरपत्राणि समिधोऽथ बिभीतकाः । लोहितानि च वासांसि स्रुवं काष्णायसं तथा॥२० ॥
स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः । छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः ॥ २१ ॥
सकृदेव समिद्धस्य विधूमस्य महार्चिषः । बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन् ॥२२ ॥
प्रदक्षिणावर्तशिखस्तप्तकांञ्चनसंनिभः । हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ २३ ॥
सोऽस्त्रमाहारयामास ब्राह्ममस्त्रविशारदः । धनुश्चात्मरथं चैव सर्वं तत्राभ्यमन्त्रयत् ॥ २४ ॥
तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके । सार्कग्रहेन्दुनक्षत्रं वितत्रास नभःस्थलम् ॥ २५ ॥
स पावकं पावकदीप्ततेजा हुत्वा महेन्द्रप्रतिमप्रभावः ।
सचापबाणासिरथाश्वशूलः खेऽन्तर्दधेऽत्मानमचिन्त्यवीर्यः ॥ २६ ॥

२०] ति० टी०–शस्त्राण्येव शरपत्राणि, काशविशेषाः परिस्तरणभूताः। बिभीतका बिभीतकवृक्षसंबन्धिन्यः समिधः। रक्तवस्त्राणि च अभिचारकर्मणि तेषामेव विनियोगात्। आस्तरितेति शेषः। स्रुवमित्यत्रार्षादिति ॥ २० ॥

रा० टी०–शस्त्राणीति। शस्त्राण्येव शरपत्राणि परिस्तीर्यमाणकाशविशेषस्थानीयान्यभवन्निति शेषः। अभिचारकर्मणि शस्त्राणामेव तथात्वेन विनियोगोऽस्तीति तात्पर्यम् अत एव बिभीतकाः बिभीतकतरुसंबन्धिन्योऽभवन् वासांसि लोहितानि रक्तान्यभवन् स्रुवं काष्णायसं कृष्णलोहमयमभवत् ॥ २० ॥

गो० टी०–शस्त्राणीति। शस्त्राणि आयुधानि शरपत्राणि काशपत्रस्थानीयानि। तानि परिस्तरणान्यासन्नित्यर्थः। शरमयं बर्हिस्तृणातीत्यभिचारे काशश्रोदितः। अत्र त्वाथर्वणविधिमे तत्स्थाने शस्त्राणि कृतानीति बोध्यम्। बिभीतकाः कलिद्रुमविकाराः। बेभीतक द्रुम इति श्रुतेः। वासांसि स्वधार्याणि। यद्वा शस्त्राणि तोमरादीनि शरपत्राणि च ; तर्हीप्यासन्निति शेषः। शरपत्रैः सतोमरैरित्यनुवादात्। काष्णायसं स्रुवम्। कृतमिति शेषः ॥ १९॥ २०

२१] ति० टी०–शरपत्रैः प्राग्वत्कृतैः। जीवतो गलं जग्राह। सजीवस्य होमार्थमिति शेषः ॥ २१ ॥

रा० टी०–स इति। स इन्द्रजित् सतोमरैः तोमरसहितैः शरपत्रैस्तत्प्रतिनिधिभूतैरग्निं समास्तीर्य जीवतश्छागस्य गलं जग्राह। होमार्थमिति शेषः ॥ २१ ॥

गो० टी०–स तत्रेति। तत्र गृहभूमौ। आस्तीर्य परिस्तीर्य ॥ २१ ॥

२२] ति० टी०–सकृदेवेति। सजीवस्य समग्रावयवस्य छागस्य सकृदेव महाहुत्या समिद्धस्य महार्चिषोऽग्नेः सकाशात्तानि लिङ्गानि बभूवुः। यानि पुरा स्वस्य विजयमदर्शयन् ॥ २२

रा० टी०–सकृदिति। सकृदेकवारमेव समिद्धस्य प्रदीप्तस्य विधूमस्य धूमरहितस्य महार्चिषो वह्नेर्यानि लिङ्गानि विजयं देवादियुद्धे इन्द्रजित्कर्तृकरिपुपराभवमित्यर्थः अदर्शयन् तानि लिङ्गानि बभूवुः ॥ २२ ॥

गो० टी०–सकृदेवेति। सकृत् समिद्धस्य एकदा समिद्भिर्ज्वलितस्य लिङ्गानि उक्तसकृत्समिद्धविधूमत्वमहार्चिष्ट्वानि विजयं यान्यदर्शयन्। पूर्वमिति शेषः ॥ २२ ॥

२३] ति० टी०–तान्येवाह—प्रदक्षिणेति ॥ २३ ॥

रा० टी०–लिङ्गान्येव बोधयन्नाह—प्रदक्षिणेति। प्रदक्षिणावर्ता प्रदक्षिणातो गमनवती शिखा यस्य स पावकः स्वयमुत्थितस्तत्क्षणं तदीपमानं हविः प्रतिजग्राह ॥ २३ ॥

गो० टी०–प्रदक्षिणेति। प्रदक्षिण आवर्तो भ्रमिर्यासां ताः शिखा यस्येति विग्रहः। स्वयमास्थितः स्वयमाख्यावान् स्वयमुत्थित इति पाठे पुरुषरूपेणोत्थितः इत्यर्थः ॥ २२ ॥

२४] ति० टी०–अस्त्रविशारदः स ब्राह्ममस्त्रमाहारयामास ब्रह्मणा पुनर्ब्रह्मोपदेशमकारयत्। अथ धनुरादिसिद्धब्रह्मास्त्रमन्त्रेणाभ्यमन्त्रयत् ॥ २४ ॥

रा० टी०–स इति। अस्त्रविशारदस्य इन्द्रजित् ब्राह्ममस्त्रमाहारयामास यथाविधि स्वसमीपं प्रापयामास धनुरादि चाभ्यमन्त्रयच्च मंत्रेणेति शेषः ॥ २४ ॥

गो० टी०–स इति। आहारयामास आजुहाव अभ्यमन्त्रयत् अभिमन्त्रितवान् ॥ २३ ॥

२५] ति० टी०–तस्मिन्नस्त्र आहूयमाने तदभ्यमन्त्रदैवते विमूर्तिरहस्यलक्षणे क्रियमाणवाहने ; तदुद्देशेन तन्मन्त्रेण पावके हूयमाने च सति सार्कादिकं नभःस्थलं वितत्रासेति। नायमर्थवादः ॥ २५ ॥

रा० टी०–तस्मिन्निति। अस्त्रे आहूयमाने सति पावके हूयमाने च सति अर्कादिसहितं नभःस्थलं वितत्रास ॥ २५ ।

गो० टी०–तस्मिन्निति। वितत्रास चचाल ॥ २४ ॥

२६] ति० टी०–अन्तर्दधेऽत्मानमित्यत्राकारलोपश्छान्दसः ॥ २६ ॥

रा० टी०–स इति। महेन्द्रप्रतिमप्रभावः चापादिसहितस्तस्य इन्द्रजित् आत्मानं चापादिसहितस्वशरीरं खे अन्तर्दधे अन्तर्धापयामास आत्मशब्दाकारलोप आर्षः ॥ २७ ॥

गो० टी०–स इति। आत्मानम् अन्तर्दधे अन्तर्धापयामास। अन्तर्भावितण्यर्थोऽयम्। खेऽन्तर्दधेत्मानमित्यत्र आर्षं पूर्वरूपत्वम्। अचिन्त्यरूपः अचिन्त्यमन्त्रशक्तिः ॥२५–२७॥

१ भूषण इति गो. पाठः। २ आस्थित इति गो. पाठः। ३ मिन्द्रारिपुस्तदेति गो. पाठः। ४ कवचं चेति रा. पाठः। ५ नक्षत्रैरिति गो. पाठः ६ सूत इति गो. पाठः। ७ रूप इति गो. पाठः।

ततो हयरथाकीर्णं पताकाध्वजशोभितम् । निर्ययौ राक्षसबलं नर्दमानं युयुत्सया ॥ २७ ॥
ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः । तोमरैरङ्कुशैश्चापि वानराञ्जघ्नुराहवे ॥ २८ ॥
रावणिस्तु सुसंक्रुद्धस्तान्निरीक्ष्य निशाचरान् । हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया॥ २९ ॥
ततस्ते राक्षसाः सर्वे गर्जन्तो जयकाङ्क्षिणः । अभ्यवर्षंस्ततो घोरंवानराञ्शरवृष्टिभिः ॥ ३० ॥
स तु नालीकनाराचैर्गदाभिर्मुसलैरपि । रक्षोभिः संवृतः संख्ये वानरान्विचकर्ष ह ॥ ३१ ॥
ते वध्यमानाः समरे वानराः पादपायुधाः । अभ्यवर्षन्त सहसा रावणिं शैलपादपैः ॥ ३२ ॥
इन्द्रजित्तु तदा क्रुद्धो महातेजा महाबलः । वानराणां शरीराणि व्यधमद्रावणात्मजः ॥ ३३ ॥
शरेणैकेन च हरीन्नव पञ्च च सप्त च । विभेदैं समरे क्रुद्धो राक्षसान्सप्तहर्षयन् ॥ ३४ ।
स शरैः सूर्यसंकाशैः शातकुम्भविभूषणैः । वानरान्समरे वीरः प्रममाथ सुदुर्जयः ॥ ३५ ॥
ते भिन्नगात्राः समरे वानराः शरपीडिताः । पेतुर्भग्नितसंकल्पाः सुरैरिव महासुराः ॥ ३६ ॥
ते तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः । अभ्यधावन्त संक्रुद्धाः संयुगे वानरर्षभाः ॥ ३७ ॥
ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः । व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः ॥ ३८ ॥
रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः । नर्दन्तस्तेऽनिवृत्तास्तु समरे सशिलायुधाः ॥ ३९ ॥
ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवंगमाः । अभ्यवर्षन्त समरे रावणिं समवस्थिताः ॥ ४० ॥

२७–२८] ति० टी०–तत इति । यागसमाप्त्यनन्तरम् । तयागभूमिमित्यर्थः ॥ २७ ॥ २८ ॥

रा० टी०–तत इति । राक्षसबलं युयुत्सया निर्ययौ॥२८॥

रा० टी०–ते इति । ते राक्षसाश्चरादिभिर्वानरान् जघ्नुः२९

२९–३०] ति० टी०–निशाचरान्समीक्ष्य । आहेति शेषः । किमाह तदाह–हृष्टा इति ॥ २९ ॥ ३० ॥

रा०टी०–रावणिरिति । संसंक्रुद्धो रावणिस्तान् युध्यमानान् निशाचरान्निरीक्ष्य हृष्टास्सन्तो भवन्तो युध्यन्त्वित्याहेतिशेषः३०

गो० टी०–रावणिस्त्विति । उग्रावेति शेषः ॥ २८ ॥

रा० टी०–तत इति । ते इन्द्रजिता प्रोत्साहिता राक्षसाः वानरान् शरवृष्टिभिः अभ्यवर्षन् आच्छादयन् ॥ ३१ ॥

गो० टी०–तत इति । ततः तस्मात् रावणिवचनात् । द्वितीयस्ततः शब्दः पश्चाच्छब्दार्थः ॥ २९ ॥

३१] ति० टी०–रक्षोभिः संवृतो राक्षससैन्योपरि प्रत्यासन्नाकाशदेशे स्थितः ॥ ३१ ॥

रा० टी०–स इति । रक्षोभिस्संवृतः स इन्द्रजित् नालीकादिभिर्वानरान् विचकर्त ॥ ३२ ॥

गो० टी०–स त्विति । नालीकः विशालाग्रशरः। रक्षोभिः संवृतः रक्षोगणमध्यत उपरिस्थित इत्यर्थः । अन्यथा खेऽन्तर्दध इति पूर्वोक्तं विरुध्येत । विचकर्त हिंसितवान् ॥ ३० ॥

३२–३५] ति० टी०–अभ्यवर्षन्त । तत्सैन्यस्थित्यनुमितस्थितिकद्विगुरेशेनेति शेषः । अन्यथान्तर्धानगतत्वेनेतदसंभवात् ॥ ३२–३५ ॥

रा० टी०–ते इति । वध्यमाना राक्षसैर्निहन्यमानास्ते वानराः शैलपादपैः रावणिमभ्यवर्षन्त ॥ ३३ ॥

३३ टी०–इन्द्रजिदिति । इन्द्रजित् वानराणां शरीराणि व्यधमत् ॥ ३३ ॥

गो० टी०–शरेणेति । एकेन शरेण नवप्रभृतीन् हरीन् विभेद ॥ ३४ ॥

रा०टी०–स इति । स इन्द्रजित् शरैर्वानरान् प्रममाथ

गो० टी०–त इति । रावणिं रावणिमुखाभिमुखागमनं देशम ॥ ३१–३४ ॥

३६] ति० टी०–भग्नितसंकल्पाः संहृतयुद्धसंकल्पाः ॥ ३

रा० टी०–ते इति । सर्वेऽहताश्च ३५ शरेण पीडिताः अपविद्धा अत एव भिन्नगात्राः अत एव भग्नितसंकल्पाः हृत्तयुद्धेच्छाः वानराः पेतुः ॥ ३७ ॥

गो० टी०–त इति। भग्नितसं[illegible]भग्नसंकल्पाः३६-

३७–३८] ति० टी०–[illegible] तद्विगमिमु नेति शेषः ॥ ३७ ॥ ३८ ॥

रा० टी०–प्रतपन्तमिति । बाणगभस्तिभिः बाणरूपाः रणे प्रतपन्तमादित्यमिवेन्द्रजितं वानरर्षभाः अभ्यधावन्त ३

रा०टी०–तदेव भङ्गान्तरमाह–तत इति । भिन्नविद्धा देहा येषामत एव रुधिरेण समुक्षिताः अत एव व्यथिताः एव विचेतसो वानराः विद्रवन्ति इतस्ततश्चलन्ति स्म ॥ ३९

३९–४०] ति० टी०–त्यक्तजीविताः त्यक्तजीवितेच्छाः सशिलायुधाः शिलाख्यायुधैः सहिताः ॥ ३९ ॥ ४० ॥

रा० टी०–रामस्येति । रामस्यार्थे रामप्रयोजनसिद्ध पराक्रम्य पराक्रमं कृत्वा त्यक्तजीविताः जीवनाशारहिताः एव निवृत्ताः इह लोकसुखेच्छारहिताः नर्दन्तो वानराः स शिलायुधाः शिलायुधविशिष्टाः बभूवुरिति शेषः ॥ ४० ॥

१ नर्दन्त इति गो. पाठः । २ चकर्त इति गो. रा. पाठः । ३ अभ्यद्रवन्त सहसा रावणिं रणकर्कशमिति गो. पाठः । ४ विच्छेदेति गो. पा. ५ भूषितैरिति गो. पाठः । ६ अभीति गो. पाठः ।

तं द्रुमाणां शिलानां च वर्षं प्राणहरं महत् । व्यपोहत महातेजा रावणिः समितिंजय ॥ ४१ ॥
ततः पावकसंकाशैः शरैराशीविषोपमैः । वानराणामनीकानि बिभेद समरे प्रभुः ॥ ४२ ॥
अष्टादशशरैस्तीक्ष्णैः स विद्ध्वा गन्धमादनम् । विव्याध नवभिश्चैव नलं दूरादवस्थितम् ॥ ४३ ॥
सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः । पञ्चभिर्विशिखैश्चैव गजं विव्याध संयुगे ॥ ४४ ॥
जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च । सुग्रीवमृषभं चैव सोऽङ्गदं द्विविदं तथा ॥ ४५ ॥
घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा । वन्यानपि तदा मुख्यान्वानरान्बहुभिः शरैः॥४६ ॥
अर्दयामास संक्रुद्धः कालाग्निरिव मूर्च्छितः । स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः॥ ४७ ॥
वानराणामनीकानि निर्ममन्थ महारणे । आकुलां वानरीं सेनां शरजालेन पीडिताम्॥ ४८ ॥
हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम् । पुनरेव महातेजा राक्षसेन्द्रात्मजो बली ॥ ४९ ॥
संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम् । ममर्द वानरानीकं पैरितस्त्विन्द्रजिद्बली ॥ ५० ॥

स्वसैन्यमुत्सृज्य समेत्य तूर्णं महाहवे वानरवाहिनीषु ।
अदृश्यमानः शरजालमुग्रं ववर्ष नीलाम्बुधरो यथाम्बु ॥ ५१ ॥
ते शक्रजिद्बाणविशीर्णदेहा मायाहता विस्वरमुन्नदन्तः ।
रणे निपेतुर्हरयोऽद्रिकल्पा यथेन्द्रवज्राभिहता नगेन्द्राः ॥ ५२ ॥
ते केवलं संददृशुः शिताग्रान्बाणान्रणे वानरवाहिनीषु ।
मायाविगूढं च सुरेन्द्रशत्रुं न चात्र तं राक्षसमप्यपश्यन् ॥ ५३ ॥
ततः स रक्षोधिपतिर्महात्मा सर्वा दिशो बाणगतैः शिताग्रैः ।
प्रच्छादयामास रविप्रकाशैर्विदारयामास च वानरेन्द्रान् ॥ ५४ ॥
स शूलनिस्त्रिंशपरश्वधानि व्याविद्धदीप्तानलसप्रभाणि ।
सविस्फुलिङ्गोज्ज्वलपावकानि ववर्ष तीव्रं प्लवगेन्द्रसैन्ये ॥ ५५ ॥

रा० टी०–ते इति । समन्वितास्तत्परिवारभूताः द्रुमादिभिः रावणिमभ्यवर्षन्त ॥ ४१ ॥

गो० टी०–रामस्येति । त्यक्तजीविताः त्यक्तजीवितेच्छाः । अभिमुखाः अभिमुखं प्रवृत्ताः । तुरक्षयारणे ॥ ३८ ॥ ३९ ॥

४१–४५] ति० टी०–व्यपोहतापसारयति स्म॥४१–४५॥

रा० टी०–तदिति । प्राणहरं प्राणां शिलानां च महद्वर्षम् रावणिर्व्यपोहत न्यवर्त्तयत ॥ ४२ ॥

रा० टी०–तत्प्रकारमाह–तत इत्यादिभिः । प्रभुः समर्थो रावणिः पावकसंकाशैः शरैः वानराणामनीकानि बिभेद ॥४३॥

गो० टी०–तदिति । व्यपोहत वारयामास ॥४२॥४३॥

रा० टी०–भेदनप्रकारमाह–अष्टेत्यादिभिः । स रावणिः दूरात् अष्टादशशरैः गन्धमादनं विद्ध्वा नवभिः शरैः नलं विव्याध॥४३

रा० टी०–सप्तभिरिति । महावीर्यो रावणिः मर्मविदारणैस्सप्तभिः विशिखैः मैन्दं पञ्चभिर्गजं च दशभिर्जाम्बवन्तं च त्रिंशद्भिर्नीलं च विव्याध । सार्द्धश्लोक एकान्वयी ॥ ४५ ॥

रा० टी०–सुग्रीवमिति । दत्तवरैः शरैः सुग्रीवप्रभृतीन् निष्प्राणान् प्राणरहितानिवाकरोत् ॥ ४६ ॥

गो० टी०–अष्टादशेत्यादिसार्धश्लोकत्रयमेकान्वयम् । दत्तवरैः वरदत्तैः ॥ ४३–४४ ॥

४६–५०] ति० टी०–दत्तवरैरित्यर्धः ॥ ४६—५० ॥

रा० टी०–अन्यानिति । मूर्छितः प्रवृद्धः कालाग्निरिव संक्रुद्धो रावणिः अन्यानपि वानरान् बहुभिः शरैरदर्शयामास॥४७

रा० टी०–स इति । स रावणिः सुमुक्तैः शरैः वानराणामनीकानि निर्ममन्थ ॥ ४८ ॥

गो० टी०–अन्यानिति । मूर्छितः प्रवृद्धः ॥ ४५ ॥ ४६ ॥

रा० टी०–आकुलामिति । हृष्टः निर्मथनेन प्राप्तसंतोषः स रावणिः शरजालेन पीडितामत एव आकुलां वानरीं सेनां परया प्रीत्या ददर्श ॥ ४९ ॥

गो० टी०–आकुलामिति । परया प्रीत्या हृष्टः उद्गतः४७

रा० टी०–पुनरिति । महातेजा इन्द्रजित् बाणवर्षं शस्त्रवर्षं च संसृज्य कृत्वा वानरानीकं पुनर्ममर्द । सार्धश्लोक एकान्वयी ॥ ५० ॥ ५१ ॥

गो० टी०–पुनरेवेत्यादिसार्धश्लोकमेकं वाक्यम् । खड्गादीनि शस्त्राणि । अत्र द्वितीयबलिशब्दो वरदानबलवत्तावाचकः । प्रथमो वीर्यवत्तावाचकः ॥ ४८ ॥

५१–५५] ति० टी०–स्वसैन्यं स्वसैन्योपरिभागमुत्सृज्य ॥ ५१—५५ ॥

---

१ मोहितामिति गो. पाठः । २ इन्द्रजित्त्वरित इति गो.पाठः । ३ त्विति गो.पाठः । ४ विषादयामासेति गो.पाठः । ५ संनिभानीति गो.रा.पाठः ।

ततो ज्वलनसंकाशैर्बाणैर्वानरयूथपाः । ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः॥५६॥
ते न्योऽन्यमभि सर्पन्तो निनदन्तश्च विस्वरम् । राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः
उदीक्षमाणा गगनं केचिच्चेत्रेषु ताडिताः । शैनैर्विविशुरन्योन्यं पेतुश्च जगतीतले ॥ ५७ ॥
हनूमन्तं च सुग्रीवमङ्गदं गन्धमादनम् । जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च ॥ ५८ ॥
मैन्दं च द्विविदं नीलं गवाक्षं गवयं तथा । केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम् ॥ ५९ ॥
सूर्याननं ज्योतिमुखं तथा दधिमुखं हरिम् । पावकाक्षं नलं चैव कुमुदं चैव वानरम् ॥ ६० ॥
प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः । विव्याध हरिशार्दूलान्सर्वास्तान्राक्षसोत्तमः॥ ६१ ॥

स वै गदाभिर्हरियूथमुख्यान्निर्भिद्य बाणैस्तपनीयवर्णैः ।
ववर्ष रामं शरवृष्टिजालैः सलक्ष्मणं मारुतवृष्टिमेकलैः ॥ ६२ ॥
स बाणवर्षैरभिवृष्यमाणो घोरानिपातानिव वानरेन्द्रान् ।
समीक्षमाणः परमाद्भुतश्री रामस्ततो लक्ष्मणमित्युवाच ॥ ६३ ॥

रा० टी०—स्वसैन्यमिति । स्वसैन्यमुत्सृज्य त्यक्त्वा वानरवाहिनीषु समेत्य प्राप्य अदृश्यमानो रावणिः नीलाम्बुधरोऽम्बु जलमिव शरजालं ववर्ष ॥ ५२ ॥

रा० टी०—ते इति । मायया इन्द्रजित्कृतबन्धनेन हता मोहिता अत एव शक्रजिद्बाणेन विशीर्णा देहा येषामत एव विस्वरमुच्चैरनन्तो हरयः इन्द्रेण बाभिहताः नगेन्द्रा इव निपेतुः ॥ ५४ ॥

गो० टी०—स्वसैन्यमिति । स्वसैन्यं सामान्योपरि नागम् ॥ ४९ ॥ ५० ॥

रा० टी०—ते इति । ते हरयः वानरवाहिनीषु बाणान् इव संदृश्य मायया निर्मितं गुप्तं खन्दशनं तु नेत्रापथत्वेन एकथम्त्वर्थं ॥ ५४ ॥

रा० टी०—तत इति । रक्षोपितिः रावणिः बाणवर्षैः सर्वा दिशः प्रच्छादयामास वानरेन्द्रान् विदारयामास च ॥ ५५॥

रा० टी०—स इति । व्याविद्ध प्रहरः यो दीप्तानलः तस्य सन्निभानि सदृशानि तत्र हेतुः सविस्फुलिङ्गा विस्फुलिङ्गसहिताः उज्ज्वलपावका येषु तानि शलाकादीनि प्रयोगेन्द्रसंज्ञानि तीव्रं यथा भवति तथा ववर्ष ॥ ५६ ॥

गो० टी०—त इति । मायानिगूढम् अत एव भाद्रतम् अप्रकाशम् ॥ ५१–५३ ॥

५६] ति० टी०—प्रफुल्लाः किंशुका इव । आग्नविति षः ॥ ५६ ॥

रा० टी०—तत इति । ज्वलनसंकाशैः शक्रजिद्बाणैः ताडिताः वानरयूथपाः प्रफुल्लाः किंशुका इव बभूवुरिति शेषः ॥ ५७॥

रा० टी०—ते इति । वानरर्षभा निपेतुः ॥ ५८ ॥

गो० टी०—ततो ज्वलनेत्यादिश्लोकद्वयमेकान्वयम् । तैः तीक्ष्णैरित्यर्थः ॥ ५४ ॥ ५५ ॥

५७- ६३] ति० टी०—ततैर्बाणैः ताडिता इत्यन्वयः अन्योन्यं विशिष्यरन्योन्यमार्तं समरिच्य तस्य ॥ ५७–६३ ॥

रा० टी०—उदीक्षमाणा इति । गगनमुदीक्षमाणा केचिद्वानरा नेत्रेषु ताडिताः बभूवुरिति शेषः अत एव अन्योन्यं । विशेषः हनूमन्तमेवेत्यत्र ॥ ५७ ॥

गो० टी०—उदीक्षमाणा इति । विविशुरन्योन्यम् अन्यो वैमुख्यायान्धत्वार्थं पेतुर्नियर्थः ॥ ५८ ॥

रा० टी०—हनुमन्तमिति । इन्द्रजित् भयसंहितैः अभिसंहितैः पाशादिभिः हनूमदादीन् हरिशार्दूलान् विव्याध । स्त्रीलिङ्गप्रयोगश्चार्षः ॥ ५९–६१ ॥

गो० टी०—हनुमन्तमित्यादिश्लोकत्रयैकान्वया । केसरिमित्यार्षम् ॥ ५९–६० ॥

रा० टी०—स इति । स रावणिः गदाभिरित्यत्र । हरियूथमुख्यानिति भरद्वृष्टिजालैः रामं ववर्ष ॥ ६२ ॥

गो० टी०—स वा इति । गदाभिरित्येतत् पूर्वोक्तप्रासादीनामुपलक्षणम् ॥ ६१ ॥

रा० टी०—स इति । बाणवर्षैः अभिवृष्यमाणो रामः घोरानिपातानिव तान् बाणनिपातान् अचिन्त्य तृणत्वेन परिगणय्य समीक्षमाणः सन् लक्ष्मणमित्युवाच ॥ ६३ ॥

गो० टी०—स बाणैरिति । बाणवर्षैः बाणनिरन्तरपातैः अभिवृष्यमाणः अभितः पात्यमानः स रामः तान् बाणवर्षान् घोरानिपातानिव लघूनचिन्त्य । बाणवर्षं तृणीकृत्येत्यर्थः । अत्र हेतुमाह—परमेति । अत्यन्ताश्चर्यकरधैर्यसृष्टिः सन् लक्ष्मणं समीक्षमाणः स्वस्वभावावलम्बनेन ब्रह्मास्त्रप्रतिक्रियां कर्तुमुचितमिङ्गितैरभिप्रेक्षमाणः सन्नित्युवाच ६२

---

१ शरैरिति गो. पाठः । २ इदं पद्यमधिकं गो. रा. पुस्तके । ३ शरैरिति गो. पाठः । ४ गजगोमुखाविति गो. पाठः । ५ पुङ्खैरिति गो. रा. पाठः । सहेति गो. पाठः । ७ वर्ष्यमाण इति गो. पाठः ।

असौ पुनर्लक्ष्मण राक्षसेन्द्रो महास्त्रमाश्रित्य सुरेन्द्रशत्रुः ।
निपातयित्वा हरिसैन्यमस्मान्[1]शितैः शरैरर्दयति प्रसक्तम्[2] ॥ ६४ ॥
स्वयंभुवा दत्तवरो महात्मा समाहितोऽन्तर्हितभीमकायः ।
कथं नु शक्यो युधि नष्टदेहो निहन्तुमद्येन्द्रजिदुग्रतेजाः[3] ॥ ६५ ॥
मन्ये स्वयंभूर्भगवानचिन्त्यस्तस्यैतदस्त्रं प्रभवश्च योऽस्य ।
बाणावपातं[4] त्वमिहाद्य धीमन्मया महाव्यग्रमनाः सहस्व ॥ ६६ ॥
पच्छादयत्येष हि राक्षसेन्द्रः[5] सर्वाधिकः सायकवृष्टिजालैः ।
एतच्च सर्वं पतिताग्र्यशूरं[6] न भ्राजते वानरराजसैन्यम्[7] ॥ ६७ ॥
आवां तु दृष्ट्वा पतितौ विसंज्ञौ निवृत्तयुद्धौ हृतहर्षरोषौ[8] ।
ध्रुवं प्रवेक्ष्यत्यमरारिवासमसौ समासाद्य रणाग्र्यलक्ष्मीम् ॥ ६८ ॥

६४] ति० टी०—प्रसक्तं प्रकृतं प्राप्तं ब्रह्मास्त्रमाश्रित्यास्मानाजामेवार्दयति ॥ ६४ ॥

रा० टी०—तदाकारमाह—असावित्यादिभिः । असौ रावणिः प्रसक्तं प्राप्तं महास्त्रं ब्रह्मास्त्रमाश्रित्य संयोज्य हरिसैन्यं निपातयित्वा निपात्य अस्मान् अर्दयति ॥ ६५ ॥

गो० टी०—असाविति । असौ ब्रह्मास्त्रं ब्रह्मास्त्रमन्त्रम् आश्रित्य । प्रहरतीति शेषः ॥ ६३ ॥

६५] ति० टी०—नष्टदेहोऽदृष्टदेहः ॥ ६५ ॥

रा० टी०—नन्वहं निहन्यतामित्यत आह—स्वयमिति । स्वयम्भुवा दत्तो वरो यस्मै अत एव महात्मा अतिप्रयत्नवान् अत एव नष्टोऽदृश्यो देहो यस्य स इन्द्रजित् युधि निहन्तुं कथं शक्यः एतेन कपटयोद्धृणां हननं पलायनपरहननवत् दोषावहमिति रामाभिप्रायः सूचितः तेन वक्ष्यमाणविशसनसादृश्यप्राप्तिः स्वयमजिज्ञपत्तनायेवेति ध्वनितम ॥ ६५ ॥

गो० टी०—स्वयम्भुवेति । नष्टदेहः अदृष्टदेहः । तत्र हेतुः—अन्तर्हितभीमकाय इति ॥ ६४ ॥

६६] ति० टी०—नन्वदृष्टदेहस्यापि संहारमार्गनैः शब्दवेध्यादिदिव्यास्त्रैर्हननं कार्यमिति चेत्र. भगवतो ब्रह्मण आज्ञाया याहशीनेवास्माभिरपि पालनौचित्येनैतत्सहनन्वैौचित्यादित्याशयेनाह—मन्य इति । अचिन्त्योऽचिन्त्यवैभवः । योऽस्य सकलसंसारस्य प्रभवः स्रष्टा । चकारात्संहर्ता च । स्वयंभूर्हिरण्यगर्भोऽस्ति तस्य भगवत एतदस्त्रमेतदस्त्रवैभवमित्येव मन्ये जानामि. अतस्तत्प्रयुक्तमिमं बाणावपातं मया सहाव्यग्रमना भगवद्ध्यानैकचित्तो भूत्वा भगवद्ध्यानबलेन सहस्व । धीमन्निति हेतुगर्भविशेषणम् । यतस्त्वमपि ब्रह्मध्यानसंपन्नस्तस्मात्सहस्व । एवं हि भगवदनुग्रहादस्माकमपि जयो भविष्यति, नान्यथेत्यर्थः ॥ ६६ ॥

रा० टी०—मन्य इति । योऽस्य मनुवंशस्य प्रभवः उत्पत्तिकारणं स स्वयंभूः अचिन्त्यः पराभवितुं चिन्तयितुमशक्यः तस्य स्वयंभुव एव एतदस्त्रमतः बाणावपातं मया सह त्वं सहस्व इत्यहं मन्ये ॥ ६७ ॥

गो० टी०—तर्हि तत्र प्रतिक्रिया कर्तव्येत्यत्राह—मन्य इति । स्वयम्भूः अचिन्त्यः अचिन्त्यप्रभाव इति मन्ये । तत्र हेतुमाह—यस्येति । एतदस्त्रं यस्य यदवतारे यः अस्यास्यस्य प्रभवः उत्पत्तिकारणम् । सोऽचिन्त्यः । तस्मात्किम् किं कर्तव्यमित्यत्राह—बाणेति । धीमन् आपत्सु न चलितव्यमिति ज्ञानिन् ॥ ६५ ॥ ६६ ॥

६७] ति० टी०—पतिताग्र्यशूरं पतिता भुवि पतिता अग्र्यशूराः प्रशस्तवीरा यस्मिंस्तत् ॥ ६७ ॥

श्रीरामचंद्रायनमः

रा० टी०—पच्छादयतीति । एष रावणिः प्रच्छादयति अत एव पतिता अग्र्यशूराः यस्मिन् तदेतत् वानरराजसैन्यं न भ्राजते ॥ ६८ ॥

६८] ति० टी०—एतत्सहनस्यैवेतदुपरमोपायत्वमपीत्याह—आवामिति । हृतहर्षरोषापायप्रकाशितहर्षरोषविकारौ, अतएव विसंज्ञाविवावां पतितौ दृष्ट्वा रणाग्र्यलक्ष्मीं समासाद्य ध्रुवमसावमरारिवासं लङ्कां प्रवेक्ष्यति । पश्चादस्माभिरनुद्योग्य तत्करिष्याव इति शेषः । रणाग्र्येत्यादिना समूलनाशशक्तिः सूचिता ॥ ६८ ॥

रा० टी०—सहने फलमाह—आवामिति । असौ रावणिः आवां विसंज्ञौ दृष्ट्वा ज्ञात्वा रणाग्र्यलक्ष्मीं विजयसंपत्तिमासाद्य मनसा प्राप्य अमरारिवासं लंकां प्रवेक्ष्यति ॥ ६९ ॥

गो० टी०—आवामिति । गतरोषहर्षौ. मूर्छितावित्रि यावत् । अमरारिवासं लङ्काम् । रणाग्र्यलक्ष्मीं विजयलक्ष्मीम् । अग्र्यपदेन रणमूललक्ष्मीर्न ग्रहीतुं शक्येत्युच्यते । एतेन मूलघातः कर्तुं न शक्यत इत्युच्यते ॥ ६७ ॥

---

१ ब्रह्मास्त्रमिति गो. रा. पाठः । २ उग्रमिति गो. रा. पाठः । ३ अस्मानिति गो. रा. पाठः । ४ प्रसक्त इति गो. पाठः । ५ यस्येति गो. पाठः । ६ पातानिति गो. पाठः । ७ छादयतीति गो. रा. पाठः । ८ गतरोषहर्षाविति गो. पाठः ।

ततस्तु ताविन्द्रजितोऽस्त्रजालैर्बभूवतुस्तत्र तदा विशस्तौ ।
स चापि तौ तत्र विषादयित्वा ननाद हर्षाद्युधि राक्षसेन्द्रः ॥ ६९ ॥
ततस्तदा वानरसैन्यमेवं रामं च संख्ये सह लक्ष्मणेन ।
विषादयित्वा सहसा विवेश पुरीं दशग्रीवभुजाभिगुप्ताम् ॥
संस्तूयमानः स तु यातुधानैः पित्रे च सर्वं हृषितोऽभ्युवाच ॥ ७० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

चतुःसप्ततितमः सर्गः ।

इन्द्रजित्प्रयुक्तब्रह्मास्त्रबलेन मूर्छितौ कपिपतौ दृष्ट्वा मारुतिविभीषणावानयितुं गते सति अङ्गदादयः हिमालयसौषधिगिरेर्मृतसञ्जीवीविशल्यकरण्यादौषधीरानेतुं मारुतिं प्रार्थयत तदोऽसौ वानरर्षिं ऋक्षपतिं तत्रानयति स्मेत्यादिना वक्ष्यमाणं विषादाहेत्थं विधायाग्नेयः स्थाने पुनर्गिरिं निधाय रामपार्श्वमागतस्तेन यावद्रामचरितमवशिष्टं तत्सर्वम् ।

तयोस्तदासादितयो रणाग्रे मुमोह सैन्यं हरियूथपानाम् ।
सुग्रीवनीलाङ्गदजाम्बवन्तो न चापि किंचित्प्रतिपेदिरे ते ॥ १ ॥
ततो विषण्णं समवेक्ष्य सर्वं विभीषणो बुद्धिमतां वरिष्ठः ।
उवाच शाखामृगराजवीरानाश्वासयन्नप्रतिमैर्वचोभिः ॥ २ ॥
मा भैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ ।
स्वयंभुवो वाक्यमथोद्वहन्तौ यत्सादितावित्यजितास्त्रजालैः ॥ ३ ॥

६९–७०] ति० टी०–विशस्तौ पीडितौ ॥ ६९–७० ॥
इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

रा० टी०–तत इति । ततः रामोक्त्यनन्तरं तौ रामलक्ष्मणौ इन्द्रजितोऽस्त्रजालैः अविशस्तौ हिंसितसदृशौ बभूवतुः रावणिस्तु तौ रामलक्ष्मणौ विषादयित्वा विषाद्य हर्षात् ननाद ॥ ७० ॥

रा० टी०–तत इति । स रावणिः वानरसैन्यं रामं च तथैवादयित्वा निपत्य पुरीं लंकां सहसा विवेश अत एव यातुधानैः संस्तूयमानः अत एव हृषितश्च सन् पित्रे रावणाय सर्वमभ्युवाच ॥ ७१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

गो० टी०–ततस्त्विति । विशस्तौ पीडितौ तौ पतितौ वेदर्शयित्वा दृष्ट्वा ननाद ॥ ६८ ॥ ६९ ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

१] ति० टी०–तयो राघवयोः रणाग्रे रणमुखे सादितौ निश्चेष्टीकृतवन्तौ ॥ १ ॥

रा० टी०–इन्द्रजिद्रमनानंतरकालिकं वानरसैन्यदृक्तान्तमाह–तयोरित्यादिभिः । रणाग्रे तयो रामलक्ष्मणयोरमादितयोः दुःखितयोश्च सतोर्हरियूथपानां सैन्यं मुमोह अत एव सुग्रीवादयः किञ्चित्र प्रतिपेदिरे कर्तुं समर्थाः बभूवुः आसादितशब्दः आचारक्विबन्तप्रकृतिकक्तवृक्विबन्तः ॥ १ ॥

गो० टी०–अथ ब्रह्मास्त्रव्यतिरिक्तास्त्रसप्तकौ—तयोरित्यादि । सादितयोः अवसादितयोः । किंचित्र प्रतिपेदिरे पटा बभूवुरित्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०–अप्रतिमैरत्यन्तं कालोचितैः ॥ २ ॥

रा० टी०–तत इति । बुद्धिमतां वरिष्ठो विभीषणः सैन्यं विषण्णं समवेक्ष्य अप्रतिमैः उपमारहितैः वचोभिः शाखामृगराजवीरान् आश्वासयन्सन् उवाच ॥ २ ॥

३] ति० टी०–तदेवाह—मा भैष्टेति । अत्रास्यामवस्थायां विषादकालो विषादावसरो नास्ति । कुतस्तत्राह—यदिति । यत्यात्स्वयंभुवो वाक्यमुद्वहन्तौ तदाज्ञां परिपालयन्तौ, अत एव विवशावस्त्रप्रयोगप्रवृत्तिरहितौ । अथानन्तरं तस्मादेवेन्द्रजिता सादिताविति यत्तस्मादविषण्णावेव, न तु प्राणपीडावन्तौ, अतो माभैष्ट । यद्वा एतावदवशौ विषण्णाविति यत्तत्र विषये माभैष्ट । एतयोर्विषण्णयोरस्मान्को वा रक्षिष्यतीति शत्रुभ्यो भयं मा भूत् । अथैतद्विषये [illegible] कालो ना-

१ इन्द्रजिदस्त्रेति गो. रा. पाठः । २ विदर्शयित्वेति गो. पाठः । ३ विषादयित्वेति गो. पाठः । ४ इदमर्धं गो. [illegible]ति गो. पाठः । ६ इन्द्रजिदस्त्रेति गो. रा. पाठः ।

तस्मै तु दत्तं परमास्त्रमेतत्स्वयंभुवा ब्राह्ममघोघवीर्यम् ।
तन्मानयन्तौ युधि राजपुत्रौ निपातितौ कोऽत्र विषादकालः ॥ ४ ॥
ब्राह्ममस्त्रं ततो धीमान्मानयित्वा तु मारुतिः । विभीषणवचः श्रुत्वा हनूमानिदमब्रवीत् ॥ ५ ॥
अस्मिन्नस्त्रहते सैन्ये वानराणां तरस्विनाम् । यो यो धारयते प्राणांस्तं तमाश्वासयावहे ॥ ६ ॥
तावुभौ युगपद्वीरौ हनूमद्राक्षसोत्तमौ । उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ॥ ७ ॥
भिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः । स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिः समन्ततः ॥ ८ ॥
पतितैः पर्वताकारैर्वानरैरभिसंवृताम् । शस्त्रैश्च पतितैर्दीप्तैर्दृश्यते वसुधराम् ॥ ९ ॥
सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम् । जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च ॥ १० ॥
मैन्दं नलं ज्योतिमुखं द्विविदं चापि वानरम् । विभीषणो हनूमांश्च दृश्यते हतान्रणे ॥ ११ ॥

स्ति । यस्मात्स्वयंभुवो वाक्यं मन्त्ररूपमुद्वहन्तौ मानयन्तावन्द्रजिदस्त्रजालैः सादितौ सादितावित्र, यतो ब्रह्ममानमनार्थं स्वयमेव पतितावितिमाभैष्टेत्यर्थः ॥ ३ ॥

रा० टी०—तदाकारमाह—मैत्यादिभिः। यत् यस्मादेतौ स्वयंभुवो वाक्यमुद्वहन्तौ प्रतिपालयन्तौ यदार्यपुत्रौ प्रयत्नाभावविशिष्टदशरथसुतौ रामलक्ष्मणौ इन्द्रजिता अस्त्रजालैः सादितौ आच्छादितौ अत एव विषण्णौ उदासीनत्वेन प्रतीयमानौ अत एव अवशौ अस्ववशसदृशौ मृत इति शेषः अतः विषादकालः खेदसमयो न एतेन युष्मदौदासीन्यज्ञापनरामलक्ष्मणौदासीन्यज्ञापने रिपुणां हर्षातिशयो भविष्यतीति सूचितम् तेन रिपवन्तरापण्यागमिष्यन्तीति ध्वनितम् ॥ ३ ॥

गो० टी०—मा भैष्टेति । आर्यपुत्रौ अवशौ विषण्णाविति यत् अत्र विषादकालो नास्ति विषादहेतुकालो नास्ति । कुतः। स्वयम्भुवो वाक्यम् उद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैः सादितौ सादिताविव वर्तमानाविति यत् तत् ततः मा भैष्टेत्यर्थः ॥ ३ ॥

४] ति० टी०—राघवान्यां श्रुत्वा योग्यमस्त्रं रावणेरस्तीत्याह—तस्मै इति । कोऽत्र विषादकालः न कोऽपि । क्षणानन्तरमुत्थास्यत इति शेषः ॥ ४ ॥

रा० टी०—तदेव भंग्यन्तरेणाह—तस्मादिति । यत यस्मादेतोः तस्मै इन्द्रजिते स्वयंभुवा ब्राह्मं परमास्त्रं दत्तं ततस्मादस्त्रं मानयन्तौ स्वकीयत्वेन सत्कुर्वन्तौ राजपुत्रौ यदि निपातितौ निपातितसदृशौ व्यापाररहितावित्यर्थः तर्हि अत्रास्मिन्समये विषादकालः कः नास्तीत्यर्थः मानयन्तावित्यनेन रामस्य स्वकीयपरिपालकत्वं स्वाभाविको गुणो व्यक्तः यद्यपि रावणादिष्वपि स्वकीयत्वं तुल्यं तथापि तन्निहननादि तेषां दोषनिवृत्तये एवेति न विरोधः ॥ ४ ॥

गो० टी०—उक्तमेवार्थं विशदयति—तस्मा इति ॥ ४ ॥

५] ति० टी०—मारुतिस्तदा विभीषणवचः श्रुत्वा तद्ब्राह्ममस्त्रं मानयित्वा सर्वेणाप्यनुसरणीयमेवेति पूजयित्वा विभीषणं प्रतीदमब्रवीत् ॥ ५ ॥

रा० टी०—ब्राह्ममिति । मारुतिः ब्राह्ममस्त्रं मानयित्वा मुहूर्तमात्रं तदधीनतया स्थित्वा विभीषणवचः श्रुत्वा च इदमब्रवीत् ॥ ५ ॥

गो० टी०—ब्राह्ममिति । मानयित्वा मुहूर्तमात्रं ब्रह्मास्त्रपरवशः स्थित्वा ॥ ५—७ ॥

६] ति० टी०—अस्त्रहते ब्रह्मास्त्रहते । आश्वासयावहे । विचार्येति शेषः ॥ ६ ॥

रा० टी०—तदाकारमाह—एतस्मिन्निति । निहते एतस्मिन्सैन्ये वानराणां मध्ये यो यो वानरः प्राणान्धारयते तंतमाश्वासयावहे ॥ ६ ॥

७] ति० टी०—तदा रात्रावित्यनेन सप्तम्यां रात्रावयमस्त्रप्रयोग इति सूचितम् ॥ ७ ॥

रा० टी०—तावितिं । तौ हनुमद्राक्षसोत्तमौ युगपदेककालावच्छेदेन उल्काहस्तौ सन्तौ रणशीर्षे विचेरतुः ॥ ७ ॥

८—१०] ति० टी०—प्रस्रवद्भिः । सूत्रमिति शेषः॥८-१०॥

११] ति० टी०—दृश्यते हतान्रणे । हतप्रायानित्यर्थः॥११॥

रा० टी०—भिन्नेति । भिन्नाः लाङ्गूलादयो येषां तैः अत एव प्रस्रवद्भिरचलैर्गिरिभिरिव क्षतजं रुधिरं स्रवद्भिः अत एव पतितैः पर्वताकारैः वानरैः पतितैः शस्त्रैश्च अभिसंवृतां व्याप्तां वसुधरां दृश्यते हनुमद्विभीषणाविति शेषः श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—भिन्नलाङ्गूलेत्यादिश्लोकद्वयमेकान्वयम् । स्रवद्भिः स्रवद्भिः ॥ ८ ॥ ९ ॥

रा० टी०—सुग्रीवमिति । विभीषणो हनूमांश्च सुग्रीवादीन् हतान् दृश्यते श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०—सुग्रीवमित्यादिश्लोकद्वयमेकान्वयम् । आहुक इति कश्चियूथपः । गवाक्षं च सुषेणं च वेगदर्शिनमाहुकमिति पाठः । हतान् हतप्रायान् । प्रहृतानिति वा॥१०॥११॥

२ तमथेति गो. पाठः । ३ नहि इति गो. पाठः । ४ ततस्ततः गो. इवाचलैरिति रा. पाठः । ५ संकुलामिति गो. पाठः । आहुकमिति गो. पाठः । ८ पनसं तथेति गो. रा. पाठः । ९ एतांश्चान्यांस्ततो वीरानिति गो. पाठः ।

सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् । अहः पञ्चमशेषेण बल्लभेन स्वयम्भुवः ॥ १२ ॥
सागरौघनिभं भीमं दृष्ट्वा वानाहितं बलम् । मार्गते जाम्बवन्तं नै हनूमान्सविभीषणः ॥ १३ ॥
स्वभावजरया युक्तं वृद्धं शरशतैश्चितम् । प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम् ॥ १४ ॥
दृष्ट्वा समभिसंक्रम्य पौलस्त्यो वाक्यमब्रवीत् । कच्चिदार्यशरैस्तीक्ष्णैर्न मोणा ध्वंसितास्तव ॥ १५ ॥
विभीषणवचः श्रुत्वा जाम्बवान्वृत्तयूथपः । कृच्छ्राद्व्युद्गिरन्वाक्यमिदं वचनमब्रवीत् ॥ १६ ॥
नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाभिलक्षये । किंतु गात्रैः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा ॥ १७ ॥
अङ्गना सुप्रजा येन मातरिश्वा च सूयते । इत्यमान्मानवश्रेष्ठः प्राणान्धारयते क्वचित् ॥ १८ ॥
श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः । आर्यपूर्वाग्रजं कस्मान्नाभिभाषसि मारुतिम् ॥ १९ ॥
नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे । आर्य संदर्शितः स्नेहो यथा वायुसुते परः ॥ २० ॥
विभीषणवचः श्रुत्वा जाम्बवान्वाक्यमब्रवीत् । शृणु नैर्ऋतशार्दूल यस्मान्नोत्सहसि मारुतिम् ॥ २१ ॥
अस्मिन्क्षीणेति वीरे तु हनूमत्यहतं बलम् । हनूमान्पुनरुत्थाप्य जीवन्तो ऽपि मृता बलम् ॥ २२ ॥

१२] ति० टी०—पञ्चमभागो शेषो भागश्च येन प्रातः सूर्योदयमध्याह्नापराह्णसायाह्नेषु पञ्चधिकाल्पेषु पञ्चमेन सायाह्नेनेत्यर्थः । चतुर्भिर्भागैश्च ब्रह्मास्त्रसाधनमिति बोध्यम् । सप्तषष्टिकोट्यधानवहत्वे सामर्थ्यमाह—बल्लभेन स्वयंभुव इति । स्वयंभुवल्लभेन ब्रह्मास्त्रेणाप्यविनेतप्राणितत्वात्तथोक्तं तमिति अनेनैवंभूतमेवेतदिति भावः ॥ १२ ॥

रा० टी०—सप्तेति । अहः पञ्चमशेषेण अतिक्रान्तेषु चतुर्षु प्रहरेषु पञ्चमकालिकमोदनमात्रेणेत्यर्थः स्वयंभुवो ब्रह्मणो वरेण वानराणां सप्तषष्टिः कोट्यः हताः किमुतान्यत्वमार्षं किं च समकोट्यः, यस्मिन् हताः इति शेषः । इत्यर्थेनान्वयः ॥ १२ ॥

गो० टी०—सप्तषष्टिरिति । वानराणां वयूथपानरराजानामित्यर्थः । सप्तषष्टिकोट्यः इति पाठस्तु । अहः पञ्चमशेषेण पञ्चमभागेन प्रातःसङ्गवमध्याह्नापराह्णसायाह्नेषु पञ्चाधिकाल्पेषु पञ्चसु भागेषु सत्सु पञ्चमेन सायाह्नेनेत्यर्थः । स्वयम्भुवो बल्लभेन इन्द्रजिता शक्तिना वा ॥ १२–१५ ॥

१३] ति० टी०—मार्गते । विशिनष्टीत्यर्थः । तस्य बहुजाम्बवदुपायप्रधानमिति भावः ॥ १३ ॥

रा० टी०—सागरौघेति । सविभीषणो हनुमान् बलं वानाहितं दृष्ट्वा जाम्बवन्तं मार्गते एतेन जाम्बवतः सर्वगुणसम्पन्नं मत्वा तेन तदर्शनेन कल्याणं भविष्यत्येवेति तयोर्निश्चयस्सूचितः ॥ १३ ॥

१४–१५] ति० टी०—स्वभावजरया युक्तं वयःस्वभावजरया वलीपलितादिना युक्तम् ॥ १४ ॥ १५ ॥

रा० टी०—स्वभावेति । स्वभावजरया स्वभावेन स्वाभाविकधैर्यादिना जरया च युक्तं वृद्धं ज्ञानेनाधिकं शरैः चितं यावन्मत एव शाम्यन्तं पावकमिव प्रजापतिसुतं जाम्बवन्तं दृष्ट्वा समभिसंक्रम्य पौलस्त्यो वाक्यमब्रवीत् । कच्चिदार्यशरैस्तीक्ष्णैर्न मोणा ध्वंसितास्तव इति वाक्यमब्रवीत् ब्रूयेत्यपि ॥ १५ ॥ १६ ॥

१६–१७] ति० टी०—कृच्छ्राद्व्युद्गिरन्वाक्यमिति व्याख्यातम् ॥ १६ ॥ १७ ॥

रा० टी०—नैर्ऋतेति । नैर्ऋतेन्द्र विभीषणेत्यर्थः । स्वरेण शब्देन त्वामभिलक्षये । त्वां पश्यामि किंतु गात्रैः शितैर्बाणैर्न चक्षुषा इत्यन्वयः ॥ १७ ॥

रा० टी०—तत्र हनूमतो गुणोत्कर्षं । [नैर्ऋतेन्द्र वानरेन्द्रसमो ह्यसि त्वमिति पाठान्तरं त्वं च परमर्षिः] ॥ १७ ॥

गो० टी०—विभीषणेति । [ ] ॥ १६ ॥ १७ ॥

१८] ति० टी०—अङ्गनेति । येन अङ्गना सुप्रजाः शोभनपुत्रवती मातरिश्वा वायुरपि सूयते स एवमान्मा प्राणान् धारयते क्वचिदिति वक्ष्यमाणम् ॥ १८ ॥

गो० टी०—अङ्गनेति । अस्यार्थः इत्थं [ ] किं पामरवत इत्यर्थः ॥ १८ ॥

१९] ति० टी०—आर्यपूर्वं [ ] ॥ १९ ॥

रा० टी०—श्रुत्वेति । विभीषणमिदमुक्त्वा जाम्बवान् आह आर्यस्य दशरथस्य पूर्वो अतिक्रम्य अपत्या मारुतिमेव कस्मान्नाभिभाषसि ॥ १९ ॥

गो० टी०—अन्वयाद्यर्धश्लोकद्वयमेकं वाक्यम् ॥ १९–२२ ॥

२०–२२] ति० टी०—आर्य जाम्बवन् ॥ २०–२२ ॥

रा० टी०—तत्र भगवत्तेरणाह—आर्येति । हे आर्य यथा परः स्नेहः वायुसुते संदर्शितः तथा राजादौ नैव संदर्शितः ॥ २० ॥

१ स इति गो. स्मेति रा. पाठः । २ उपसंगम्येति गो. पाठः । ३ प्राणा नेति गो. पाठः । ४ पार्थिव इति रा. पाठः । ५ पौलस्त्यमाह इति गो. पाठः । ६ नैर्ऋतेति गो. रा. पाठः । ७ तस्मिन्निति गो. पाठः । ८ वयं हता इति गो. पाठः ।

धरते मारुतिस्तात मारुतप्रतिमो यदि । वैश्वानरसमो वीर्ये जीविताशा ततो भवेत् ॥ २३ ॥
ततो वृद्धमुपागम्य विनयेनाभ्यवादयत् । गृह्य जाम्बवतः पादौ हनूमान्मारुतात्मजः ॥ २४ ॥
श्रुत्वा हनूमतो वाक्यं तदा विध्यथितेन्द्रियः । पुनर्जातमिवात्मानं मन्यते पुरुषोत्तमः ॥ २५ ॥
ततोऽब्रवीन्महातेजा हनूमन्तं स जाम्बवान् । आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि ॥ २६ ॥
नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा । त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कंचन ॥ २७ ॥
ऋक्षवानरवीराणामनीकानि प्रहर्षय । विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ २८ ॥
गत्वा परमधिष्ठानमुपर्युपरि सागरम् । हिमवन्तं नगश्रेष्ठं हनूमन्गन्तुमर्हसि ॥ २९ ॥
ततः काञ्चनमत्युग्रमुपधर्म पर्वतोत्तमम् । कैलासशिखरं चात्र द्रक्ष्यस्यरिनिषूदन ॥ ३० ॥
तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् । सर्वौषधियुतं वीर द्रक्ष्स्योषधिपर्वतम् ॥ ३१ ॥
तस्य वानरशार्दूल चतस्रो मूर्ध्नि संभवाः । द्रक्ष्यस्योषधयो दीप्ता दीपयन्तीर्दिशो दश ॥ ३२ ॥
मृतसंजीवनीं चैव विशल्यकरणीमपि । सुवर्णकरणीं चैव संधानीं च महौषधीम् ॥ ३३ ॥

रा० टी०—विभीषणेति । जाम्बवानब्रवीत् तदाकारमाह ऋक्षवानरेति पुनरपि तत्करणं श्लोत्सुक्यार्थम् ॥ २१ ॥

रा० टी०—तावन्मात्रेत्यादि—अस्मिन्निति । अस्मिन् हनुमति जीवति सति रामेऽपि जीवत्यहमेव गत्वा इति शेषः हनुमति इतस्ततः प्राणे सति जीवन्तीति वयं मृताः ॥ २२ ॥

२३-२४] ति० टी०—जीविताशा ततो भवेत् । जीवनहेतोस्तत एव लाभसंभवादिति भावः ॥ २३ ॥ २४ ॥

रा० टी०—धरत इति । मारुतिर्यदि धरते प्राणानिति शेषः ततस्तदा जीविताशा भवेत् ॥ २३ ॥

रा० टी०—तत इति । ततः जाम्बवद्वचनश्रवणानन्तरं हनुमान् वृद्धं जाम्बवन्तमुपागम्य जाम्बवतः पादौ गृह्य गृहीत्वा अभ्यवादयत् ॥ २४ ॥

गो० टी०—तत इति । मारुतात्मजः हनुमान् । वृद्धं जाम्बवन्तम् उपागम्य । नियमेन श्रीवशस्तस्यपर्वतस्यस्तद स्तत्वादिरूपेण सह । जाम्बवत पादौ गृह्य गृहीत्वा अभ्यवादयत् । स्वनामोच्चारणपूर्वके सुखम्त् पादावगृह्यादित्यर्थः ॥ २४ ॥

२५-२६] ति० टी०—विध्यथितेन्द्रियो विशेषेण व्यथितानीन्द्रियाणि यस्य सः ॥ २५ ॥ २६ ॥

रा० टी०—श्रुत्वेति । हनुमतः सकाशं श्रुत्वा विध्यथितेन्द्रियो जाम्बवान् आत्मानं पुनर्जातमिव मन्यते अमन्यत ॥ २५ ॥

गो० टी०—श्रुत्वेति । तदर्थं हनुमानहमस्मीत्यभिवादनवाक्यम् । तथा व्यथितेन्द्रियोऽपि हनुमतो वाक्यं श्रुत्वा हृष्टपुष्टः सञ्जात आत्मानं पुनर्जातं मन्यते स्मेति संबन्धः ॥ २४ ॥ २५ ॥

रा० टी०—तत इति । जाम्बवानब्रवीत् तदाकारमाह वानरांस्त्रातुमर्हसि ॥ २६ ॥

गो० टी०—आगच्छेति । विक्रमपर्याप्त पर्याप्तविक्रमः । विक्रमपूर्ण इति यावत् ॥ २६ ॥

२७] ति० टी०—विक्रमपर्याप्तः पर्याप्तविक्रमः ॥ २७ ॥

रा० टी०—नेति । विक्रमेण पर्याप्तः त्वादृशपरिपूर्णः अन्यो न परः परमः सखा च लभ्यमीति शेषः अतः अयं त्वत्पराक्रमकालः ॥ २६ ॥

गो० टी०—त्वदिति । अत्र पराक्रमितारम् ॥ २८ ॥

२८] ति० टी०—सादितौ पीडितौ ॥ २८ ॥

रा० टी०—ऋक्षेति । सादितौ बाणैराच्छादितौ रामलक्ष्मणौ विशल्यौ कुरु अत एव अनीकानि प्रहर्षय ॥ २८ ॥

२९] ति० टी०—सागरमित्युपरिशेषे पञ्चम्यै द्वितीया ॥ २९

रा० टी०—विशल्यकरणीप्राप्तयेत्याह—गत्वेति । सागरमुपर्युपरि वियमानं परमं पारमैरेगम्यत्वेन श्रेष्ठमध्वानं गत्वा हिमवन्तं गन्तुमर्हसि गच्छेत्यर्थः ॥ २९ ॥

गो० टी०—गत्वेति । परमं दीर्घम् । उपर्युपरि सागरं सागरस्य समीपोत्तरदेशे । " उपर्यध्यधसः सामीप्ये " इति सामीप्ये द्वित्वेनत्वम् । " विभुपर्यादिषु द्वितीया " इति द्वितीयेति द्वितीया ॥ २९ ॥

३०] ति० टी०—काञ्चनं स्वर्णमयम् । अत्युग्रमिति विशेषणेशम् । ऋषभं तदाख्यम् ॥ ३० ॥

रा० टी०—तत इति । ततो हिमवद्गमनानन्तरं काञ्चनं स्वर्णमयमुग्रं तदभिधं पर्वतोत्तम पर्वतस्य हिमवतः ऋषभसञ्जकपर्वतान्तरस्य वा उत्तमं शिखरमित्यर्थः द्रक्ष्यसि अत्र ऋषभशिखरे स्थितस्त्वं कैलासशिखरं द्रक्ष्यसि ॥ ३० ॥

गो० टी०—तत इति । ऋषभम् ऋषभाख्यम् । पर्वतोत्तमं शिखरमित्यर्थः ॥ ३० ॥ ३१ ॥

३१] ति० टी०—तयोः शिखरयोः । ऋषभकैलासशिखरयोरित्यर्थः ॥ ३१ ॥

रा० टी०—तयोरिति । तयोः प्रसिद्धयोः शिखरयोः ऋषभकैलासाख्ययोः मध्ये औषधिपर्वतं द्रक्ष्यसि ॥ ३१ ॥

३२] ति० टी०—ओषधयो दीप्ताः । दीप्ता ओषधीरित्यर्थः ३२

३३] ति० टी०—सुवर्णकरणीं स्वर्णसमानवर्णस्य देहादेः

१ सुतीति ग. पाठः । २ तथापीति गो. पाठः । ३ स्मर्क्षवृद्धव इति गो. रा. पाठः । ४ तच्चमिति गो. रा. पाठः । ५ दीपयन्त्य इति गो. पाठः । ६ सावर्ण्यकरणीं चैव सन्धानकरणीं तथेति गो. पाठः ।

ताः सर्वा हनुमन्गृह्य क्षिप्रमागन्तुमर्हसि । आश्वासय हरीन्प्राणैर्योजय गन्धवहात्मज ॥ ३४ ॥
श्रुत्वा जाम्बवतो वाक्यं हनूमान्मारुतात्मजः । आपूर्यत बलोद्धर्षैर्वायुवेगैरिवार्णवः ॥ ३५ ॥
स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तमम् । हनुमान्दृश्यते वीरो द्वितीय इव पर्वतः ॥ ३६ ॥
हरिपाद्विनिर्भग्नो निषसाद स पर्वतः । न शशाक तदात्मानं वोढुं भूतनिपीडितः ॥ ३७ ॥
तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः । शृङ्गाणि च व्यकीर्यन्त पीडितस्य हनूमता ॥ ३८ ॥
तस्मिन्संपीड्यमाने तु भग्नद्रुमशिलातले । न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ ३९ ॥
सा घूर्णितमहाद्वारा प्रभग्नप्रवरापुरा । लङ्का वातावृता रात्रौ मनुष्येवाभवत्तदा ॥ ४० ॥
पृथिवीधरसंकाशो निपीड्य पृथिवीधरम् । पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४१ ॥

करणीय । 'सवर्णे—' इति पाठे पूर्ववर्णसमानवर्णकरणीमित्यर्थः । संधानीं छिन्नशिरःकबन्धयोरपि यथापूर्वं नाडीसंधातकरणीम् ॥ ३३ ॥

रा० टी०—तस्येति । तस्यौषधिपर्वतस्य मूर्ध्नि तस्थुषः दश दिशो दीपयन्तीः मृतसञ्जीवनीप्रभृतीः चतस्रः औषधयः ओषधीः ददर्श । औषधिनामार्थस्तु मृतानां संजीवनीं स्पर्शमात्रेण संजीवनकरीं विशल्यकरणीं स्पर्शमात्रेण बाणादिशल्यसंघादिनाम छिन्नकरणीं शोभनवर्णसंपादिकां संधानकरणीं छिन्नशिरःप्रभृतीनां यथापूर्वं संयोजिकामिति श्लोकद्वयेनाह त्वरयेति ॥ ३२ ॥ ३३ ॥

गो० टी०—तस्येत्यादिश्लोकत्रयमेकान्वयम् । चतस्रः ओषधीः दीपयन्त्यः दीपयन्तीः व्यत्ययेन द्वितीयार्थे प्रथमा । मृतं सञ्जीवयतीति मृतसञ्जीवनी । जीवितानन्तरं संचारक्षमतायै विशल्यं करोतीति विशल्यकरणी । विशल्ये कृते व्रणान् सन्धानं करोतीति सन्धानकरणी । ततो व्रणकृतवैवर्ण्यं विहाय पूर्वं सावर्ण्यकरणी सावर्ण्यकरणी ॥ ३२–३४ ॥

३४] ति० टी०—प्राणैर्योजयित्वाश्वासयेत्यन्वयः ॥ ३४ ॥

रा० टी०—ता इति । ता ओषधीः गृहीत्वा प्रतिगन्तुमागन्तुमर्हसि तत्प्रयोजनमाह हरीन् प्राणैर्योज्य योजयित्वा आश्वासय ॥ ३४ ॥

३५] ति० टी०—बलोद्धर्षैर्बलोत्कर्षैः ॥ ३५ ॥

रा० टी०—श्रुत्वेति । हनुमान् जाम्बवतो वाक्यं श्रुत्वा बलोद्धर्षैः अतिबलैः आपूर्यत ॥ ३५ ॥

गो० टी०—श्रुत्वेति । बलोद्धर्षैः बलोत्कर्षैः । आपूर्यत पूर्णोऽभूत ॥ ३५ ॥

३६] ति० टी०—पर्वततटाग्रस्थ इत्यस्य त्रिकूटशिखरस्थः ॥ ३६ ॥

रा० टी०—स इति । पर्वततटाग्रस्थः त्रिकूटशिखरे स्थितः हनुमान् पर्वतोत्तमं त्रिकूटं पीडयन् सन् द्वितीयः पर्वत इव दृश्यते ॥ ३६ ॥

गो० टी०—स इति । पर्वततटाग्रस्थः त्रिकूटशिखरस्थः पर्वतोत्तमं त्रिकूटम् ॥ ३६ ॥

३७] ति० टी०—हरिपादविनिर्भग्नस्तद्भाराक्रान्तः निषसाद विनिर्योजन ॥ ३७ ॥

रा० टी०—हरिपादेति । हरेर्हनुमतः पादाभ्यां विनिर्भग्नः प्रभग्नः अत एव भूतनिपीडितः पतितः आत्मानं स्वशरीरं सोढुं संधारयितुं न शशाक ॥ ३७ ॥

गो० टी०—हरीति । हरिः हनुमान् ॥ ३७ ॥

३८] ति० टी०—हरिवेगादित्यस्य उपपत्तयेत्यर्थः । नगा वृक्षाः पेतुः परस्परसंघर्षं जनयित्वा जज्वलुः ॥ ३८ ॥

रा० टी०—तस्येति । हनुमता पीडितस्य तस्य पर्वतस्य नगाः वृक्षाः स्वीयेनात्यन्तवेगेन जनितप्रकम्पनाद्धेतोः भूमौ पेतुः शृङ्गाणि च व्यकीर्यन्त अत एव जज्वलुः परस्परसंघर्षजनितज्वलिता दिदीपिरे ॥ ३८ ॥

गो० टी०—तस्येति । तस्य त्रिकूटस्य । नगाः वृक्षाः हरिवेगात् हनुमतो हरिवेगात्यर्थौषधिपर्वतपर्यन्तगमनो त्थितप्रकम्पात्तत्रत्यवृक्षाः । जज्वलुः । वेगाद्धर्षजनितेत्यर्थः पीडितस्य वर्तमानार्थे क्तः ॥ ३८ ॥

३९] ति० टी०—तस्मिन्त्रिकूटपर्वते घूर्णमाने नगोत्तमे वानराः स्थातुं न शकुः । त्रिकूटस्यैव पङ्कभूमित्वात्तच्छिखरस्थैर्वीरैः न शक्यते ॥ ३९ ॥

रा० टी०—तस्मिन्संपीड्यमाने । भग्नाः छिन्नाः द्रुमाः शिलातलानि यस्य तस्मिन् अत एव संपीड्यमाने अत एव घूर्णमाने नगोत्तमे सति वानराः स्थातुं न शेकुः ॥ ३९ ॥

गो० टी०—तस्मिन्संपीड्यमाने । न शेकुरिति । त्रिकूटतटस्य पङ्कबहुत्वात् घूर्णमाने कम्पमाने ॥ ३९ ॥

४०–४१] ति० टी०—अत एव सा घूर्णितद्वारेण लङ्का क्षोभ्य इत्यर्थः । मनुष्येव जनसमूहेव ॥ ४० ॥ ४१ ॥

रा० टी०—सेति । आपूर्णिताभि: महोद्वाराणि यस्याः अत एव प्रभग्नप्रवरापुरा अत एव त्रासेन वातावृता लोकैः परित्यक्तत्वात् प्रकर्षशून्यापणेव इवाभवत् ॥ ४० ॥

रा० टी०—पृथिवीति । पृथिवीधरसंकाशः पर्वतसदृशः मारुतात्मजः पृथिवीं क्षोभयामास ॥ ४१ ॥

गो० टी०—सेति । प्रभग्नेवाभवत् त्रिकूटापनिर्मितत्वात् तस्याः ॥ ४० ॥ ४१ ॥

१ हरिपुङ्गव इति गो. रा. पाठः । २ व्यशीर्यन्तेति गो. पाठः । ३ वृत्ता इति गो. पाठः ।

[आरुरोह तदा तस्माद्धरिर्मलयपर्वतम् । मेरुमन्दरसंकाशं नानाप्रस्रवणाकुलम् ॥
नानाद्रुमलताकीर्णं विकासिकमलोत्पलम् । सेवितं देवगन्धर्वैः पञ्चियोजनमुच्छ्रितम् ॥
विराजपर्वतनिर्गतैरप्सरोभिर्निषेवितम् । नानामृगगणाकीर्णं बहुकन्दरशोभितम् ॥
एवंनानाकुलपर्वंस्तत्र यक्षगन्धर्वकिन्नरान् । हनूमान् मेघसंकाशो ववृधे मारुतात्मजः ॥]
पद्भ्यां तु शैलमाविश्य बहवामुरुवन्मुखम् । विहृत्योग्रं ननादोच्चैस्त्रासयन्रजनीचरान् ॥ ४२ ॥
तस्य नानद्यमानस्य सत्त्वा निनदमुत्तमम् । लङ्कास्था राक्षसव्याघ्रा न शेकुः स्पन्दितुं क्वचित्॥४३॥
नमस्कृत्वा समुद्राय मारुतिर्भीमविक्रमः । राघवार्थे परं कर्म समीहत परंतपः ॥ ४४ ॥

स पुच्छमुत्क्षिप्य भुजंगकल्पं विनम्य पृष्ठं श्रवणे निकुञ्च्य ।
विहृत्य पक्षे बहवामुखाभपापुप्लवे व्योम्नि स चण्डवेगः ॥ ४५ ॥
स वृक्षखण्डैस्तरसा जहार शैलाञ्शिलाः प्राकृतवानरांश्च ।
बाहूरुवेगोद्धतसंप्रणुन्नास्ते क्षोभवेगाः सलिले निषेतुः ॥ ४६ ॥
स तौ प्रसार्यौरगभोगकल्पौ भुजौ भुजंगारिनिकाशवीर्यः ।
जघान शैलौ नगराजमध्ये दिशः प्रकर्षन्निव वायुसूनुः ॥ ४७ ॥
स सागरं पूर्णतरंगमालं तदूर्मिभिः भ्रामितसर्वसत्त्वम् ।
समीक्षमाणः सहसा जगाम चक्रं यथा विष्णुकराग्रमुक्तम् ॥ ४८ ॥

गो० टी०-आरुरोहेति सप्तभिः श्लोकैः सप्तमकाण्डस्य । मलयपर्वतमित्यत्र ल ॥ ४१ ॥ ४२ ॥ ४३ ॥

४३-४३ । ति० टी०-एवंनानाकुलपर्वंस्तत्रेत्यत्र सुखं स्थितं स्यादतः राक्षसांस्तावत्क्षुब्धयितुमेवमुक्तवान् । पादोपघातात्पर्वं तावदधोविशेषमाह पद्भ्यामिति नेयं भाषार्थं सर्वत्रेति भाव ॥ ४२ ॥ ४३ ॥

रा० टी०-पद्भ्यामिति । पद्भ्यां शैलमाविश्य सर्वं वनमुत्पाट्य विहृत्य ततश्च पर्वतेनाद ॥ ४२ ॥

रा० टी०-तस्येति । तस्यानद्यमानस्य राक्षसैस्त्रासयन्तं स्वयमेव निर्भिन्नहृदयमपि न शेकुः ॥ ४३ ॥

गो० टी०-पद्भ्यामिति । राक्षसत्रासनाय नदन् । "लङ्कास्थाः०" इति श्लोकस्थम् । स्वयमनद्यमानस्तं राक्षसनिर्घातं मा भवतिति नेयं त्रासनार्थं त्रासयति भावः । एवं सर्वत्र प्रकरणेऽपि ॥ ४३ ॥ ४४ ॥

४४ । ति० टी०-समीहत चिन्तितवान् ॥ ४४ ॥

रा० टी०-नम इति । मारुतिः परं कर्म समीहत सर्वं एवं चकार्षीद ॥ ४४ ॥

गो० टी०-नमस्कृत्वेति । अथ पारंपर्येण तत्कर्मसमाप्तौ तत्सर्वाधिष्ठातृदेवतानमस्कारः ॥ ४४ ॥

४५] ति० टी०-स पुच्छमित्यनेन जातिवर्णनम् ॥ ४५ ॥

रा० टी०-स्वयमिति । स हनूमान् स्वपुच्छमुत्क्षिप्य उत्थाप्य पृष्ठं विनम्य श्रवणे निकुञ्च्य कुक्षिमाकुञ्च्य विहृत्य व्यादाय आपुप्लवे ॥ ४५ ॥

गो० टी०-स पुच्छमिति । पुच्छोत्थमनोवेगाद्वायोरधिकवेगः । पृष्ठविनमनेनाकाशगमनकालवाणवायुनिरोधः स्यात् । श्रवणनिकुञ्चनेन चलोर्ध्वपवनः । मुखव्यादानेनापि निरोधः ॥ ४५ ॥

४६] ति० टी०-प्राकृतवानरान्विशेषणेन विनयन्नाह प्राकृतवानरान् । ते क्षोभवेगा अवगतदुःखत्वात्सदयः ॥ ४६ ॥

रा० टी०-स इति । स हनूमान् तरसा वेगेन वृक्षखण्डान् जहार तत्र प्राकृतवानरान् तत्र स्त्रियश्चमिनः बाहूरुवेगोद्धतेन बाहूरुवेगेन संप्रणुन्नाः दूरं प्रक्षिप्ता अत एव क्षोभवेगाः ते वृक्षखण्डप्रणुन्नत्वात् क्षोभवेगाः सन्तः सलिले निषेतुः ॥ ४६ ॥

गो० टी०-स इति । प्राकृतवानरान् विकृतवानरान्वयिनः । आजहार इत्यत्र । अन्यैवानुसंधा बाहूरुवेगेन बाहूरुवेगान उद्धताः उन्मूलिताः संप्रणुन्नाः दूरं प्रेरिताः । क्षोभवेगाः क्षोभेण क्षीणवेगाः सन्तः ॥ ४६ ॥

४७ ४८] ति० टी०-भुजंगारिनिकाश गरुडवीर्यसदृशं वीर्यं यस्य स वायुसूनुः भुजौ प्रसार्य नगराजमत एव श्रेष्ठं मुख्यं मेरुं तत्सदृशं हिमवन्तमित्यर्थः दिशः प्रकर्षन् प्रक्षिपन्निव जगाम ॥ ४७ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह स इति । स हनूमान् तरसेन सह पूर्णिता वीचिमाला यस्मिन् अत एव भ्रामितानि सर्वसत्त्वानि जलजन्तवो यस्मिन् तं सागरं समीक्षमाणः सन् विष्णुकराग्रात् मुक्तं चक्रमिव जगाम ॥ ४८ ॥ ४९ ॥

गो० टी०-स तावति । मेरुं कैलासपार्श्वेनेमम् ।

१ एवं चतुःश्लोक्यन्ता के पुस्तके २ ०धोमनीति गो.रा.पा.। ३ षण्डानिति गो.रा.पा.। ४ मेरुमिति गो.रा.पा.। ५ तथाश्मसेति रा.तञ्च भूशमिति गो.पा.।

स पर्वतान्पक्षिगणान्सरांसि नदीस्तटाकानि पुरोत्तमानि ।
स्फीताञ्जनांस्तानपि संप्रवीक्ष्य जगाम वेगात्पितृतुल्यवेगः ॥ ४९ ।
आदित्यपथमाश्रित्य जगाम स गतश्रमः । हनूमांस्त्वरितो वीरः पितुस्तुल्यपराक्रमः ॥ ५० ॥
जवेन महता युक्तो मारुतिर्वातरंहसा । जगाम हरिशार्दूलो दिशः शब्देन नादयन् ॥ ५१ ॥
स्मरञ्जाम्बवतो वाक्यं मारुतिर्भीमविक्रमः । ददर्श सहसा चापि हिमवन्तं महाकपिः ॥ ५२ ॥
नानाप्रस्रवणोपेतं बहुकंदरनिर्झरम् । श्वेताभ्रचयसंकाशैः शिखरैश्चारुदर्शनैः ॥
शोभितं विविधैर्वृक्षैरगमत्पर्वतोत्तमम् ॥ ५३ ।
स तं समासाद्य महानगेन्द्रमतिप्रवृद्धोत्तमहेमशृङ्गम् ।
ददर्श पुण्यानि महाश्रमाणि सुरर्षिसङ्घोत्तमसेवितानि ॥ ५४ ।
स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशरप्रमोक्षम् ।
हयाननं ब्रह्मशिरश्च दीप्तं ददर्श वैवस्वतकिंकरांश्च ॥ ५५ ॥
वज्रस्य चालयं वैश्रवणालयं च सूर्यप्रभं सूर्यनिबन्धनं च ।
ब्रह्मासनं शंकरकार्मुकं च ददर्श नाभिं च वसुंधरायाः ॥ ५६ ॥

अस्ति अन्यो हिमवदन्तर्यती मेरुः । यद्वा मेरुं मेरूपलक्षित-दिशि स्थितं जनराजं हिमवन्तम् । यद्वा मेरुमुद्दिश्य जगाम । उत्तरां दिशमुद्दिश्य जगामेत्यर्थः । यद्वा मेरुं मेरुसदृशम् । प्रकर्षेण कम्पयन् ॥ ५१ ॥ ५२ ॥

४९–५१] ति० टी०—जनाञ्जनपदान् ॥ ४९—५१ ॥

गो० टी०—स पर्वतानिति । जनान्तान् जनपदान् ५३

रा० टी०—स हनुमान् पर्वतादीनपि संप्रवीक्ष्य जगाम इति—आदित्येति । पितुस्तुल्यपराक्रमो हनुमान आदित्य पथमाश्रित्य जगाम ॥ ५० ॥

रा० टी०—जवेनेति । मारुतिः शब्देन दिशो नादयन्न जगाम ॥ ५१ ॥

गो० टी०—आदित्यपथमिति । पूर्वसुपर्यपरिमागरमि-त्युक्त्वा आदित्यपथमाकाशम् ॥ ५४ ॥ ५५ ॥

५२,५३] ति० टी०—स्मरञ्जाम्बवतो वाक्यम् । तद्वाक्य-स्मर्णं वेगवशादोषध्यादिपर्वतमतीत्य गमननिवृत्त्यर्थम् ५२।५३

रा० टी०—स्मरन्निति । महाकपिः हिमवन्तं ददर्श॥५२॥

रा० टी०—नानेति । शिखरैर्दिग्भिः शोभितमत एव चारु-दर्शनं यस्य तं पर्वतोत्तमम् अगमत् साद्धश्लोक एकान्वयी॥५३॥

गो० टी०—स्मरन् जाम्बवत इति । जाम्बवद्वाक्यस्म-रणम् औषधिपर्वतमतीत्य वेगातिशयेनान्यत्र गमननिवृत्त्य-र्थम् । वातरंहसा । उपलक्षित इति शेषः ॥ ५६–५८ ॥

५४] ति० टी०—सुरर्षिसङ्घोत्तमेति । उत्तमसुरर्षि-सङ्घैरित्यर्थः ॥ ५४ ॥

रा० टी०—स इति । अतिप्रवृद्धानि उत्तमहेमशृङ्गाणि यस्य तं हिमवन्तं समासाद्य महाश्रमाणि ददर्श ॥ ५४ ॥

५५] ति० टी०—तदृष्टदेवतादिस्थानानां नामान्याह—स ब्रह्मेति । ब्रह्मकोशं भगवतो हिरण्यगर्भस्य स्थानम् ' ब्र प्रपचे ब्रह्मकोशं प्रपद्ये ' इत्यादि श्रुतिसिद्धम् । रजतालयं हिरण्यगर्भापरमूर्तेः रजतनाभेः स्थानम् । रुद्रशरप्रमोक्षं यत्र त्र्य म्बित्वा रुद्रविप्रसंहाराय शरं मुमोच तत्स्थानम् । हयाननं भगवतो हयग्रीवस्य स्थानम् । ब्रह्मशिरो ब्रह्मादेवता तत्स्थानम् । तत्र तत्र नित्यसंनिहितान्वैवस्वतकिंकरांश्च ददर्श ॥ ५५

रा० टी०—स इति । स हनुमान् ब्रह्मणो हिरण्यगर्भस्य कोशं ब्रह्मकोशं पद्मं इत्यादिश्रुतिप्रसिद्धं स्थानविशेषं रजतं हिरण्यगर्भापरमूर्तेः रजतनाभेः आलयं स्थानं च रुद्रशर प्रमोक्षः त्रिपुरवधाय प्रमोक्षणं यस्मिन् तं हयाननं हयग्री स्थानं च ब्रह्मशिरः ब्रह्मादेवतालयं च ददर्श ॥ ५५ ॥

गो० टी०—इदानामाश्रमाणां नामान्यदुक्रामति—स ब्रह्मकोशमित्यादिना । ब्रह्मणश्चतुर्मुखस्य कोशः गृहम् । कोऽम्बौ कुड्मलेऽर्थेऽपि गृहदेशेऽण्डकोशयोः । गृहे क्लीबे पुल्लिङ्गो पेट्वाम्मिपिधानके, इति रत्नमाला । रजतालयं कैलासं शक्रस्य इन्द्रस्य स्थानम् आश्रमस्थानम् । रुद्रशर प्रमोक्षस्य लीलार्थं यस्मिन् तद्रुद्रशरप्रमोक्षं स्थानम् । हयाननं हयशीर्ष राक्षसस्थानम् । ब्रह्मशिरः रुद्रविप्रब्रह्मशिरःप्रक्षालनस्थानम् वैवस्वतकिंकरान् विवस्वत्संबन्धिकिङ्करान् । श्रमाभ्यादी मासान्तपरिचारकान् विश्रमार्थमत्र स्थितान् ॥ ५५ ॥

५६] ति० टी०—वज्रस्येति । सर्वेषां निधनं सर्व णां यत्र स्थाने निधनं समावेशस्तत्स्थानम् अत एव तत्सम् प्रभम् । ब्रह्मालयं चतुर्मुखस्थानम्, शंकरकार्मुकं पिन काख्यराजस्थानम्, वसुंधरायाः नाभिं भूनाभिसंज्ञं प्राजाप स्थानम् ॥ ५६ ॥

१ क्रम इति गो. पाठः । २ पितृतुल्येति गो. पाठः । ३ मारुतो यथेति गो. रा. पाठः । ४ वातरंहसेति गो. पाठः । ५ सर्वेति रा. पाठः । ६ वो ति गो. पाठः । ७ वज्रालयमिति गो. पाठः । ८ ब्रह्मासनमिति गो. रा. पाठः ।

कैलासमुग्रं हिमवच्छिलां च तं [1]वै वृषं काञ्चनशैलमय्यम् ।
पैदीप्तसर्वौषधिसंप्रदीप्तं ददर्श सर्वौषधिपर्वतेन्द्रम् ॥ ५७ ॥
स तं समीक्ष्यानलरौशिदीप्तं विसिष्मिये वासवदूतसूनुः ।
आप्लुत्य तं चौषधिपर्वतेन्द्रं तत्रौषधीनां विचयं चकार ॥ ५८ ॥
स योजनसहस्राणि समतीत्य महाकपिः । दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ ५९ ॥
महौषध्यस्ततः सर्वास्तस्मिन्पर्वतसत्तमे । विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ ६० ॥
स ता महात्मा हनुमानपश्यंश्चुकोप रोषाच्च भृशं ननाद ।
अमृष्यमाणोऽग्निसमानचक्षुर्महीधरेन्द्रं तमुवाच वाक्यम् ॥ ६१ ॥
किमेतदेवं सुविनिश्चितं ते यदाघवेनास्ति कृतानुकम्पः ।
पश्याद्य मद्बाहुबलाभिभूतो विकीर्णमात्मानमथो नगेन्द्र ॥ ६२ ॥

रा० टी०-चञ्चल्लोति । चञ्चलाग्रभृतेरुद्रं तत्र सूर्यनिर्देशेन सकलसूर्यसमावेशस्थानम् ॥ ५६ ॥

गो० टी०-चञ्चलाग्रमिति । इन्द्राय त्रैलोक्यराज्यप्रदानस्थानम् । सूर्यप्रभमिति वैचित्र्यात्स्वभावविपर्ययम् । सूर्यनिवन्धनं लोकोपकारार्थतया विश्वकर्मणा सूर्यनिवन्धनत्वस्थानम् । ब्रह्मासनं देवतासमदर्शनाय कृतं ब्रह्मणः सिंहासनम् । ब्रह्मणासूर्यांशासनं स्थानं वा । अङ्कुरकामुकं तत्स्थानमित्यर्थः । नाभिं पातालप्रतिष्ठत्वम् ॥ ५७ ॥

५७] ति० टी०-हिमवच्छिलां भगवतो रुद्रस्य तपःसमाधिस्थितिम् । तं वै वृषं जाम्बवदुपदिष्टम् ॥ ५७ ॥

रा० टी०-कैलासेति । अथवा शैलं काञ्चनं शैलः शिलासमूहो यस्मिन् तं कैलासम् उग्रम् शिवं च हिमवच्छिलाम् गौरीसम्भोगसमयतल्पपीठं च वृषं धर्मरूपिणं च प्रदीप्तसर्वौषधिभिः संप्रदीप्तं प्रकाशित सर्वौषधिपर्वतेन्द्रं च ददर्श ॥ ५७ ॥

गो० टी०-ब्रह्मादिस्थानेषु स्वस्थानत्वमिति परिगणितमपि आम्बवदुपदिष्टप्रकारेण दर्शनाय पुनराह—कैलासमिति । हिमवच्छिला नाम कैलासगते कालसंकल्पादिशेषः । रूपकम् रूपभारूढमौषधिपर्वतम् । काञ्चनशैलं पर्व मेरुरित्युक्तम् । संदीप्तसर्वौषधिसंप्रदीप्तम् संदीप्तानि सर्वाणि ज्वलन्तीतिः सर्वाणि. औषधीभिः तृणाद्योषधिभिः संप्रदीप्तं सञ्जीवकरणसमर्थम् । सर्वौषधिपर्वतेन्द्रं मृतसञ्जीवन्यादिसर्वौषधिरूपकल्पवृक्षं ददर्श ॥ ५७ ॥

५८] ति० टी०-वासवस्य मेघस्वरूपिणो देवराजस्य दूतः प्रेरकः । वायुरित्यर्थः । विचयं मार्गणम् ॥ ५८ ॥

रा० टी०-स इति । वासव इन्द्रोऽपि दूतः इतस्ततोदेशयक्षनिपातानन्तरकाले परितापितो येन विघ्न वासवस्य दूतो परितापं तनोति स वायुरित्यर्थः तस्य सूनुर्हनुमान् अनलराशिवत् दीप्तम् तं जाम्बवदुपदिष्टमौषधिपर्वतेन्द्रं सभीक्ष्य तमाप्लुत्य च तत्र पर्वते ओषधीनां मृतसञ्जीवन्यादीनां विचयमन्वेषणं चकार ॥ ५८ ॥

गो० टी०-स इति । वासवदूतः वायुः वासवादेशेन मेघप्रेरकत्वात् । अत एवाभिषेकसमये इन्द्रेण प्रेषितो हरेः रामो योगात्तत् । विचयम् अन्वेषणम् ॥ ५८ ॥

५९-६१] ति० टी०-योजनसहस्राणि । सहस्रशब्दोऽत्र कोपलक्षणम् ॥ ५९—६१ ॥

रा० टी०-स इति । महाकपिः स हनुमान योजनसहस्राणि अनेकसहस्रयोजनानि समतीत्य गत्वा शैलं व्यचरत् ५९

गो० टी०-स इति । अतीत्य अतीत्यार्षत्वेन । अनेन श्रमरहितत्वमुक्तम् ॥ ६३ ॥

रा० टी०-महौषध्य इति । आयान्तं तत्रत्ये इत्यर्थः विज्ञाय ता पूर्वोक्ता महौषध्यः पर्वतसत्तमे अदर्शनं जग्मुः ६०॥

गो० टी०-महौषध्य इति । ततः तस्य हनुमतः सकाशेनम् ॥ ६४ ॥

रा० टी०-स इति । ता ओषधीरपश्यन् अत एव चक्षुषामाणः तदवलम्बमसहमानो महात्मा हनुमान् चुकोप रोषात् रोषात् एव ननाद च महीधरेन्द्रमुवाच च ॥ ६१ ॥

गो० टी०-स ता इति । ताः ओषधीः ॥ ६१ ॥

६२] ति० टी०-किमेतदिति । यदाघवे कृतानुकम्पो नास्ति । एवं प्रकारमेतदौदासीन्यं किंवलादित्यर्थः । व्यत्ययादिति चेत्तत्राह—पश्येति ॥ ६२ ॥

रा० टी०-तदाकारमाह—किमिति । यत् यस्माद्धेतोः ते राघवे कृतानुकम्पो नास्ति तस्माद्धेतोः ते सुविनिश्चितं किम् कृत्सितम् अथो अत एव मद्बाहुबलाभिभूतस्त्वमात्मानं विकीर्णं विहिंसितं पश्य ॥ ६२ ॥

गो० टी०-किमिति । राघवे कृतानुकम्पो नास्तीति यत एतत् एवं सुविनिश्चितं यदि तर्हि आत्मानमथो विकीर्णं पश्येति संबन्धः ॥ ६२ ॥

१ वर्षमिति गो. पाठः । २ समिति गो. पाठः । ३ रश्मीति गो. पाठः । ४ कोपादिति गो. पाठः । ५ निकाशेति गो. पाठः

स तस्य शृङ्गं सनगं सनागं सकाञ्चनं धातुसहस्रजुष्टम् ।
विकीर्णकूटं ज्वलिताग्रसानुं प्रगृह्य वेगात्सहसोन्ममाथ ॥ ६३ ॥
स तं समुत्पाट्य खमुत्पपात चित्रास्य लोकान्समुरान्सुरेन्द्रान् ।
संस्तूयमानः खचरैरनेकैर्जगाम वेगाद्गरुडोग्रवेगः ॥ ६४ ॥
स भास्कराध्वानमनुप्रपन्नस्तं भास्कराभं शिखरं प्रगृह्य ।
बभौ तदा भास्करसंनिकाशो रवेः समीपे प्रतिभास्कराभः ॥ ६५ ॥
स तेन शैलेन भृशं रराज शैलोपमो गन्धवहात्मजस्तु ।
सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवार्पितेन ॥ ६६ ॥
तं वानराः प्रेक्ष्य तदा विनेदुः स तानपि प्रेक्ष्य मुदा ननाद ।
तेषां समुत्कृष्टरवं निशम्य लङ्कालया भीमतरं विनेदुः ॥ ६७ ॥
ततो महात्मा निपपात तस्मिञ्शैलोत्तमे वानरसैन्यमध्ये ।
हर्युत्तमेभ्यः शिरसाभिवाद्य विभीषणं तत्र च सम्ववज्ञे सः ॥ ६८ ॥
तावप्युभौ मानुषराजपुत्रौ तं गन्धमाघ्राय महौषधीनाम् ।
बभूवतुस्तत्र तदा विशल्यावुत्तस्थुरन्ये च हरिप्रवीराः ॥ ६९ ॥
सर्वे विशल्या विरुजाः क्षणेन हरिप्रवीराश्च हताश्च ये स्युः ।
गन्धेन तासां प्रवरोषधीनां सुप्ता निशान्तेष्विव संप्रबुद्धाः ॥ ७० ॥

६३] ति० टी०—सनागं सगजम् । उन्ममाथोत्पाट्यामास ॥ ६३ ॥

रा० टी०—स इति । स हनुमान् सनगं गिरिसहितं सनागम् गजैः सहितं सकाञ्चनं काञ्चनलतासहितं धातुसहस्रैर्जुष्टं व्याप्तं प्रकाशविशिष्टः ज्वलमानः सानोरग्रभागो यस्य तत् तथोक्तं शृङ्गं विकीर्णकूटं यथा भवति तथा वेगादुन्ममाथ उत्पाटयामास ॥ ६३ ॥

गो० टी०—एतच्छ्लोकानन्तरमित्युत्तरत्रैवाध्याहार्यम् । स इति । सनागं सगजम् । उन्ममाथ उत्पाटयामास ॥६३॥६४॥

६४] ति० टी०—अतः—स तमिति ॥ ६४ ॥

रा० टी०—स इति । स हनुमान् शैलं समुत्पाट्य खरासुरेन्द्रसहितान् लोकान् चित्रास्य समुत्पपात अनेकैः खचरैर्गणैः संस्तूयमानः सन् जगाम च ॥ ६४ ॥

६५] ति० टी०—तम् । तदित्यर्थः । प्रतिभास्कराभः प्रतिसूर्यसदृशः । रवेः समीपे इत्यनेन सूर्यादर्वागुत्तरमेतदानयनमिति लभ्यते ॥ ६५ ॥

रा० टी०—स इति । भास्कराभं शिखरं प्रगृह्य भास्कराध्वानमनुप्रपन्नः प्राप्तः भास्करसन्निकाशः सूर्यसदृशो हनुमान् प्रतिभास्करा सूर्यप्रकाशिका आभा यस्य सः सूर्य इव रवेः समीपे बभौ ॥ ६५ ॥

गो० टी०—स इति । भास्कराध्वानम् अन्तरिक्षम् । भास्कराभशिखरग्रहणात् स्वयं भास्करसन्निकाशत्वाच्च सूर्यसमीपस्थः प्रतिसूर्य इव बभावित्यर्थः ॥ ६५ ॥

६६–७०] ति० टी०—सपावकेन सग्निज्वालेन । अर्पितेन स्वकरार्पितेन ॥ ६६—७० ॥

रा० टी०—स इति । तेन पूर्वोक्तेन शैलोपलक्षितो गन्धवहात्मजो हनुमान् अर्पितेन गृहीतेन सहस्रधारेण चक्रेण विष्णुरिव रराज ॥ ६६ ॥

गो० टी०—स तेनेति । सहस्रधारेण । अर्पितेन हस्तेर्पितेन । सपावकेन अग्निज्वालायुक्तेन चक्रेण विष्णुरिव रराज ॥ ७० ॥

रा० टी०—तमिति । तं गृहीतोपलक्षितं हनुमन्तं वानराः प्रेक्ष्य विनेदुः स हनुमानपि तान् मुदान्वितान् वानरान् प्रेक्ष्य ननाद तेषां हनुमदादीनां समुत्कृष्टरवम् उच्चारितशब्दं निशम्य श्रुत्वा लङ्कालया राक्षसा भीमतरं विनेदुः ॥ ६७ ॥

गो० टी०—ते वानरा इत्यनेन दृष्ट्वेव गन्धाघ्राणेन सर्वे जीविता इति गम्यते ॥ ७० ॥

रा० टी०—तत इति । ततः स्वकरणानन्तरं स हनुमान शैलोत्तमे विद्यमाने वानरसैन्यमध्ये निपपात तत्र तस्मिन्समये हर्युत्तमेभ्यः श्रेष्ठवानरेभ्यः शिरसा अभिवाद्य विभीषणं सम्ववज्ञे ॥ ६८ ॥

रा० टी०—तावित्ति । मानुषराजपुत्रौ तौ रामलक्ष्मणौ महौषधीनां गन्धमाघ्राय विशल्यौ बाणसमुद्गमशरहितौ बभूवतुः तदा तस्मिन्काले ऽन्ये मूर्छादिग्रासाः हरिप्रवीरा उत्तस्थुः ॥६९॥

१ कूटज्वलिति गो. पाठः । २ विनेदुरुच्चैरिति गो. पाठः । ३ समुद्भूष्टेति गो. पाठः । ४ स इति गो. पाठः । ५ चेति गो. पाठः । ६ विरुज इति गो. रा. पाठः । ७ निहता इति गो. रा. पाठः ।

यदा प्रभृति लङ्कायां युध्यन्ते हरिराक्षसाः । तदाप्रभृति मानार्थमाज्ञया रावणस्य च ॥ ७१ ॥
ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः । हता हतास्तु क्षिप्यन्ते सर्व एव तु सागरे ॥ ७२ ॥
ततो हरिर्गन्धवहात्मजस्तु तमोषधीशैलमुदग्रवेगः ।
निनाय वेगाद्धिमवन्तमेव पुनश्च रामेण समाजगाम ॥ ७३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ।

सुग्रीवेण वीरैर्हनूमदादिभिस्तत्र कृतो रावणः कुम्भनिकुम्भयूपाक्षादीन्योद्धुं प्रेषयतां हरिराक्षसानां घोरः संग्रामः प्रकृतः ।

ततोऽब्रवीन्महातेजाः सुग्रीवो वानरेश्वरः । अर्थ्यं विज्ञापयंश्चापि हनूमन्तमिदं वचः ॥ १ ॥
यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः । नेदानीमुपनिर्हारं रावणो दातुमर्हति ॥ २ ॥

गो० टी०–तत इति । औषधीशैलं विकृष्टक्षिप्तं ॥ ७२॥७३॥

रा० टी०–सर्व इति । हतः चकारेण मूलौषधिप्राप्तस्य ये स्युः ते सर्वे हरिप्रवीराः प्रवरौषधीनां अन्वेषेण विज्ञाय विरुजाश्च बभूवुरिति शेषः अत एव हृष्यन्तः सुप्ताः जनाः निशान्तेषु संप्रबुद्धा इव ॥ ७० ॥

गो० टी०–सर्व इति । विशल्यकरणी विशल्याः सल्यकरणी विरुजः ये पूर्वं निःशल्यतेति सुप्ता निशान्तेषिव संप्रबुद्धाः । अनेन अन्वर्थमिदं नाम्नः ॥ ७४ ॥

७३] ति० टी०–यदि महौषधीनां गन्धमाघ्राय अर्थयौ हरिप्रवीरौ पवनपुत्रौ स्वयमन्तर्दोषनिर्हारसमर्थ तत्साधारणत्वादौषधान्तरं हेत्वाह—यदेति । मानार्थं अर्थशब्दो निष्प्रयोजनो मानणे प्रयोजनाभावार्थमित्यर्थः । तत्परिजनोऽयमिति कृत्वा मानस लङ्कां प्रविशेयुः, के मा प्रवेशयिष्यन्तीत्यतश्चौषधं रावणस्यैवेति रूपेण विचारः ॥ ७० ॥

७२] ति० टी०–हता हता इति वीप्सा । सर्व एव हता इत्यर्थः ॥ ७० ॥

रा० टी०–ननु औषधिसञ्चयाहरणं मानस इव राक्षसा अपि जीवतं पातालं क्षुरित्वा प्राहः—यदेति । यदा यस्मिन् यत्कालादारभ्य कपिराक्षसाः युध्यन्ते तदा हताः हता इति तदाप्रभृति मानार्थं राक्षसा न मृता इति पक्षसाम्यं रावणस्याज्ञया ये राक्षसाः कपिकुञ्जरैः हन्यन्ते ते सर्वे सागरे क्षिप्यन्त एव औषधमेवान्वयि ॥ ७१ ॥ ७२ ॥

गो० टी०–तर्हि मिहता राक्षसाः किं न प्रयुक्ता इत्यत्राह—यदाप्रभृतीति । मानार्थं हतानां राक्षसानां इयत्तायां अपरिज्ञानार्थम् मृतशरीरसंख्यापरिपरिपत्त्यर्थं वा पूर्वयोजनायामर्थशब्दो निष्प्रयोजनेऽक्लुप्तप्रयोजनविरोधित्वेन्यस्यः । परैः परिक्षिप्त आत्मा मा भूदित्येवमर्थमिति भावः । हताहताः क्षुण्णप्रायस्याः किं पुनर्मृता इति भावः । "कर्तुः ईप्सिततमं कर्म" इति कर्मसंज्ञायाः । यदा यदा यदा ये हताः तदा तदा ते ते क्षिप्ता इत्यर्थः ॥ ७०–७७ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे भूषणाख्यव्याख्याने युद्धकाण्डव्याख्याने चतुःसप्ततितमः सर्गः ॥ ७४ ॥

७३] ति० टी०–ओषधीशैलमिति दीर्घ आर्षः । अग्निनक्तञ्चराष्टस्यादिदम् ॥ ७३ ॥

इति श्रीरामायणे श्रीरामीये समाश्रयणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

रा० टी०–तत इति । उद्भूतगन्धः सन्नुग्रवेगान् गन्धवहात्मजो हनुमान् औषधीशैलं हिमवन्तमेव विनाय यथापूर्वं संख्यायामासेत्यर्थः पुनश्च रामेण समाजगाम रामसमीपं प्राप ॥ ७३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

१] ति० टी०–तत इति । अर्थ्यमर्थादनपेतमर्थं कर्तव्यं विज्ञापयन् ॥ १ ॥

रा० टी०–सर्वोत्तरसमाश्वासानन्तरकालिकं हनूमन्तमाह—तत इत्यादिभिः । सुग्रीवः अर्थ्यमर्थादनपेतमौत्तरकालिककर्तव्यमित्यर्थः विज्ञापयन् बोधयन् सन् हनुमन्तमब्रवीत् ॥ १ ॥

गो० टी०–एवं हनुमदानीतोषधिसंगन्धमाघ्राय समागतप्राणेषु सर्वेषु विशल्येषु समुत्थितेषु सुग्रीवः स्वातिसन्धानजनितकोपातिरेकेण सद्यो निःशेषं लङ्कानिर्दहनं हनुमते नियमयति—तत इत्यादि । अर्थ्यम् अर्थादनपेतम् प्रयोजननियतं वाक्यं विज्ञापयन् रामायेति शेषः । ततो हनुमन्तमब्रवीदिति योजना यद्वा अर्थ्यं विज्ञापयन् विशेषेण ज्ञापयन् ॥ १ ॥

२] ति० टी०–निषूदिताः । राघवाभ्यामिति शेषः ।

१ नरिराक्षसा इति गो. रा. पाठः । २ वीर्यं इति गो. रा. पाठः । ३ अपि इति गो. रा. पाठः ।

ये ये महाबलाः सन्ति लघवश्च प्लवंगमाः । लङ्कामभिपतन्त्वद्य प्रचोदिताः प्लवंगमाः ॥ ३ ॥
[हरयो हरिसंकाशाः प्रदग्धुं रावणालयम्]
ततोऽस्तं गत आदित्ये रौद्रे तस्मिन्निशामुखे । लङ्कामभिमुखाः सर्वे जग्मुस्ते प्लवंगमाः ॥ ४ ॥
ऽल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः । आपतन्त्यः पिशाचाश्च सहसा विप्रदुद्रुवुः ॥ ५ ॥
गोपुराट्टप्रतोलीषु चर्यासु विविधासु च । आसादेषु च वेश्मसु ववृधुर्हुतभोजनम् ॥ ६ ॥
तेषां गृहसहस्राणि ददाह हुतभुक्तदा । प्रासादाः पर्वताकाराः पतन्ति स्म चकाशिरे ॥ ७ ॥
अगुरुर्दह्यते तत्र परं चैव सुचन्दनम् । मौक्तिकानि च मुख्यानि विविधानि च राघव ॥ ८ ॥

...दिदानीमुपनिहितं पुरस्कारं दातुं संपादयितुं नार्हसीति ...। उपनिहितं निष्कृष्य पुरस्कारदानमिति यावत्। उपनिहितं ...स्माभिर्दातुं नार्हसीत्यर्थः। अनन्तान्यदा पुरस्कारदानं ... इति ज्ञापयत इत्यन्ये ॥ २ ॥

गो० टी०-तदाकारमाह—यत इति । ह्यःश्वश्च यतः ... रणो हतः कुमारः रावणसुतश्च निहतः। अतो राघव ... निहितं त्वयापुरस्कृतं दातुं संपादयितुं नार्हसि किंवा उपनिहितं ... त्वयापुरस्कृतकजलं दातुं नार्हसि अयमर्थो न ज्ञातव्य इति ... पनिहितं निष्कृष्य पुरस्कारदानमिति तीर्थः ॥ २ ॥

ति० टी०-इदानीं लङ्कादाहोपदेशं निमित्तमाह-यत इति। ... पनिहितं उपनिष्कृष्य पुरस्कारं निर्गमनमिति यावत्। ... त्वयोपनिक्षेपान्तरं हठाद्रावणो न निर्गमिष्यतीति भावः। अत ... लेन प्रतिनिधानरूपं उपनिक्षेपदृष्टयोगः दातुं कर्तुमिति यावत्। ... पनामनेनोपन्यस्तः। उपनिहितशब्दः उपनिष्कृष्य पुरस्कारे ...

६] ति० टी०-अतो ये ये महाबलाः सन्ति लघवः ... विशब्दादिष्यन्ते सर्वे इत्यर्थः। पूर्वस्मिन् लङ्कामभ्युपपन्नत्वात्। ... इति भावः ॥ ३ ॥

गो० टी०-नन्वेवं सति किं तत्रैवमित्यत आह—ये इति। ... त्वयोक्तं ये ये महाबलाः लघवो लघुकाश्च प्लवंगमाः सन्ति ... न उक्ताः तत्र सुग्रीवेण लङ्कामभिगन्तव्यं ॥ ३ ॥

गो० टी०-य इति । लघवः वेगवन्तः उत्पतन्तः प्राकाम्यगुणयुक्ता ... यच्छतु ॥ ३ ॥

४] ति० टी०-ततोऽस्तमिति । पूर्वस्मिन्सर्गे रामेण ... लङ्काहननार्थं हनूमदादिभिरुक्तार्थं जाम्बवदन्तेषणम्, ततश्च ... नियोगात् उपरि पर्वताहरणाय गमनम्, अथाहरणं पुनरा ... त्यापणं पुनरागमनमिति विशब्दुटिकामध्ये सर्वम्, ततः पुन ... पदेशं हनूमदादीनां लङ्कादाहगमनमिति कलकादयः ॥ ४ ॥

गो० टी०-तत इति । ततः सुग्रीवाज्ञाश्रवणानन्तरम् आदित्ये अस्तं गते अत एव रौद्रे भयंकरे निशामुखे सेनोकाः ... ल्कासहिताः प्लवंगर्षभाः लङ्काममिमुखाः सन्तो जग्मुः ॥ ४ ॥

गो० टी०-तत इति । ननु पूर्वमुल्काहस्तौ तदा सायं ... विरुद्धमिति चेन्न विरोधः। आदित्येऽस्तं गत इति प्रकाश ... ...

५] ति० टी० ... ...

गो० टी०-हरयः ... ...

६] ति० टी० ... ...

गो० टी०-ऽल्काहस्तैरिति । ... ...

७] ति० टी० ... ...

गो० टी०-तेषामिति । ... ...

८] ति० टी० ... ...

गो० टी०-तत्रैवकारमाह—अनर्घेत्यादिभिः । ... ...

---

१ इदमर्धमधिकं गो० पाठे । २ हरिचन्दनमिति गो० पाठः ।

क्षौमं च दह्यते तत्र कौशेयं चापि शोभनम् । आविकं विविधं चौर्णं काञ्चनं भाण्डमायुधम्॥ ९ ॥
नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदम् । गजग्रैवेयकक्ष्याश्च रथभाण्डांश्च संस्कृतान् ॥ १० ॥
तनुत्राणि च योधानां हस्त्यश्वानां च चर्म च । खड्गा धनूंषि ज्याबाणास्तोमराङ्कुशशक्तयः॥ ११ ॥
रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु । मुक्तामणिविचित्रांश्च प्रासादांश्च समन्ततः ॥ १२ ॥
विविधानस्त्रसंघातानग्निर्दहति तत्र वै । नानाविधान्गृहांश्चित्रान्ददाह हुतभुक्तदा ॥ १३ ॥
आवासान्राक्षसानां च सर्वेषां गृहगृध्नुनाम् । हेमचित्रतनुत्राणां स्रग्भाण्डाम्बरधारिणाम् ॥ १४ ॥
सीधुपानचलाक्षाणां मदविह्वलगामिनाम् । कान्तालम्बितवस्त्राणां शत्रुसंजातमन्युनाम् ॥ १५ ॥
गदाशूलासिहस्तानां खादतां पिबतामपि । शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह ॥ १६ ॥
त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः । तेषां शतसहस्राणि तदा लङ्कानिवासिनाम् ॥ १७ ॥

गो० टी०—मौक्तिका इत्यादिश्लोकत्रयेकान्वयी । सर्वत्र अदह्यतेत्यस्य यथायथं विपरिणामेनान्वयः । मणयः उपात्तमौक्तिकादिव्यतिरिक्ताः । क्षौमकौशेययोरुपादानभेदात् भेदः । वालजं क्षौमादि कौशेयं कृमिकोशोत्थमित्यमरव्याख्यानमरः शोभनं शोभमानम् । आविकम् अविरोमनिर्मितं कम्बलम् । और्णं मेषादिरोमनिर्मितं कम्बलम् । कर्णा मेषादिलोम्नि स्यादित्यमरः भाण्डम् उपकरणम् । आभरणादि वा । भाण्डं तु भूषायां नादे पात्रोपभृत्ययोः । भाजने कलशादौ च वणिक्कुलयनेपि च इति रत्नमाला । नानाविकृतसंस्थानं नानाविधविकारवद्विचित्रसन्निवेशमिति त्रयाणामविशेषणम् । वाजिभाण्डपरिच्छदौ अश्वालंकारकल्पनादिपरिच्छदौ । भाण्डशब्देनैवाश्वाभरणसिद्धावपि कर्णावर्तनमादित्यत्साहित्यबोधनार्थं वाजिपदम् । गजानां ग्रैवेयकादि कण्ठभूषणानि । कक्ष्याः इभबन्धिन्यः । ग्रैवेयकं कण्ठभूषा । कक्ष्या प्रकोष्ठे हर्म्यादेः काक्ष्यां मध्येभबन्धने इत्युभयत्राप्यमरः । संस्कृताः उनेजिताः । योधानां तनुत्राणि वर्माणि । हस्त्यश्वानां वर्म अयःकांस्यादिनिर्मितम् । रोमजम् अविरोमादिरोमश्लक्ष्णनिर्मितं कम्बलादि । वालजं चामरादि । चर्मसंस्तरणं खेटकं वा । व्याघ्रजं वैयाघ्रं नखव्यालादि । अण्डजं कस्तूरिकादि इत्यम् ॥ ८—११ ॥

९] ति० टी०—और्णमूर्णामित्रनिर्मितम् । आविकमविरोमनिर्मितम् । ऊर्णा स्त्रियामपीति न पौनरुक्त्यम् । काञ्चनं भाण्डं सौवर्णमुपकरणम् ॥ ९ ॥

रा० टी०—क्षौममिति । क्षौमप्रभृति दह्यते तत्र क्षौमकौशेययोरुपादानभेदात्र पौनरुक्त्यम् । आविकमविरोमनिर्मितमौर्णं तज्जात्यन्तरलोमनिर्मितम् ॥ ९ ॥

१०—११] ति० टी०—वाजिभाण्डपरिच्छदं वाजिनां भाण्डमलंकारः । परिच्छदः पल्ययनादिश्च । तत्रानेकं विकृतसंस्थानं विचित्रविन्यासम् । रथभाण्डान्रथालंकारान् । संस्कृतान्सम्यक्सज्जितान् । भाण्डशब्दोऽलंकारमात्रवाची । रथभाण्डान्युक्तः । अत एव वाजिभाण्डेत्यत्र वाजिग्रहणं चरितार्थम् । अश्वालंकारवाचित्वे तु तद्ग्रहणं स्पष्टमेव । तत्रैवंपि कर्णावर्तनमादित्यत्साहित्यबोधनार्थं तत्र सः । रथभाण्डेत्यत्र तु लाक्षणिक इत्यन्ये ॥ १० ॥ ११ ॥

रा० टी०—नानेति । नानाविकृतनानासंस्थानं संस्थानं स्थलं वाजिनो भाण्डानि च परिच्छदानि अलंकारादीनि गजान् ग्रीवालङ्कारान् कक्ष्याः इभबन्धनानि संस्कृतान् रथभाण्डान् रथालङ्कारान् तनुत्राणि हस्त्यश्वानां वर्म लोहादिनिर्मिततनुत्राणं च खड्गादीनि शक्तयः शक्तीश्च रोमजं कम्बलादि वालजं चामरादि व्याघ्रजं तत्सम्बन्धि चर्म आसनायुपयोगि आण्डजं कस्तूर्यादि मुक्तामणिभिर्विचित्रान् प्रासादांश्च अग्निर्दहति माहिश्लोकत्रयमेकान्वयि ॥ १०—१२ ॥

१२] ति० टी०—रोमजं कम्बलादि । वालजं चामरादि । व्याघ्रजं चर्मासनोपयोगि । अण्डजं कस्तूरादि ॥ १२ ॥

गो० टी०—मुक्तेति । प्रासादाः पर्वताकारा इत्यत्र केवलप्रासादाः अत्र मुक्तादिखचिताः । अस्त्रसंघातान् संयुज्यन्त इति संघाताः सङ्घातास्तान् । तत्र लङ्कायाम् ॥ १३ ॥

१३] ति० टी०—अस्त्रं शस्त्रम् । चित्रान्गृहान्स्वस्तिकादिगृहान् ॥ १३ ॥

रा० टी०—नानेति । चित्रान् अनेकविधविचित्रितान् नानाविधान् गृध्नूनाम् गृध्नाम् गृहादिविषयकविशेषेच्छावतां राक्षसानां गृहान् आवासान् चित्रगृहभित्रान्यपि देहमानि च हुतभुग्दहाद ॥ १३ ॥

गो० टी०—नानाविधानिति । गृहच्छन्दात् स्वस्तिकादिगृहविन्यासान् गृहगर्विनां गृहस्थानाम् ॥ १३ ॥

१४ ति० टी०—गृहगृध्नुनां गृहस्थानाम् । दीर्घाभाव आर्षः । हेमचित्रं तनुत्रं येषां तेषाम् । भाण्डानि भूषणानि ॥१४॥

१५] ति० टी०—सीधुपानेन चञ्चलाक्षीणि येषाम् । शत्रुषु संजातो मन्युर्येषाम् । अदीर्घत्वमार्षम् ॥ १५ ॥

१६] ति० टी०—प्रियैः । प्रियवस्तुभिः कान्ताभिरित्यर्थः ॥ १६ ॥

१७] ति० टी०—त्रस्तानां गच्छताम् । अग्निर्भयादिति शेषः । एवंभूतानां लङ्कानिवासिनां शतसहस्राणि गृहाण्यदहत् ॥ १७ ॥

१ परिच्छदाविति गो. पाठः । २ गृहच्छन्दशनिति गो. पाठः । ३ गार्धनामिति गो. पाठः । ४ दामेति गो. पाठः ।

अदहत्पावकस्तत्र जज्वाल च पुनः पुनः । सारवन्ति महार्हाणि गम्भीरगुणवन्ति च ॥ १८ ॥
हेमचन्द्रार्धचन्द्राणि चन्द्रशालोत्तमानि च । तत्र चित्रगवाक्षाणि साधिष्ठानानि सर्वशः ॥ १९ ॥
मणिविद्रुमचित्राणि स्पृशन्तीव दिवाकरम् । क्रौञ्चबर्हिणवर्णानां भूषणानां च निःस्वनैः ॥ २० ॥
नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः । ज्वलनेन परीतानि तोरणानि चकाशिरे ॥ २१ ॥
विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे । ज्वलनेन परीतानि गृहाणि प्रचकाशिरे ॥ २२ ॥
दीप्ताग्निदीप्तानि यथा शिखराणि महागिरेः । विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः ॥ २३ ॥

रा० टी०—हेमेति । हेम्ना चित्राणि तनूकृतानि वेषां तानि हेमचित्राणि अर्धचन्द्रवदाकारणशीलानां भाण्डानि भूषणानि श्रीमतां मध्यानां पर्वतश्चलानि अक्षीणि येषामत एव मदच्छिद्यमानानां मदहेतुकस्खलद्गमनशीलानां कान्ताभिः आलम्बितानि गृहीतानि वस्त्राणि येषां तेषु सक्तालो घन्यः कोषो येषां संज्ञापूर्वकविधेरनित्यत्वादीषोभावः गदादिविशिष्टहस्तानां स्वादतां तेषां रक्षसां शिवतामकोऽयतामपि रक्षसां प्रसक्तानां च रक्षसां पुत्रानादाय गच्छतामपि रक्षसां शतसहस्राणि पावकोऽदहत पुनः पुनर्जज्वाल च अर्द्धचतुष्टयमेकान्वयि ॥ १८—१९ ॥

गो० टी०—हठोपनतत्वेन नेदानिशयं व्यञ्जयितुं तेषां व्यापारं दर्शयति—हेमेत्यादिना । हेमचित्रतत्वाणां हेममयाद्भुतवर्णानाम् आलम्ब्याश्रयं योचित्रमित्यमरः । वर्मधरणव्यासक्तानामित्यर्थः । सज्जमानि पुष्पमालाः अमरश्चो हारपरः । स्रग्दामशब्देनानेकसरनिर्मितपुष्पमालोच्यत इत्याचार्याः अत एवोपरि व्याख्यातम् एव तात्पर्यम् । सौवृत्तवस्त्राणां मद्यपानलीलाहृष्टानाम् अत एव मदच्छिद्यमानानां मदेन भ्रश्यमानानाम् कान्तालम्बितवस्त्राणाम् आलम्बितवस्त्रकान्तानाम् । रतिरक्षणमिति यावत् । भक्षयतु सञ्जातमन्यां सञ्जातकोषाणाम् दीर्घसूत्रादार्षत्वात् । स्यातां भोग्यादिकं भक्षयतां पिबतां मद्यपानं कुर्वताम् स्त्रीपुत्रादेरेव मद्यपानकारणकुलाङ्गनादिकं पिबतामिति वा । महार्हाणीति विशेषणेन सूत्रयतिप्रयोजनमुक्तम् । प्रियैः दारैरिति विशेष्यम् । तेषामेव व्यासक्तानां शतसहस्राणीति संख्यासंख्येययोर्भेदेन निर्देशः । अनेकशतसहस्रसङ्ख्यानामानित्यर्थः। पुनः पुनरित्यनेन तद्वह्नित्यसाहेतुकाधिक्यज्वालोच्यते ॥ १८—१९ ॥

१८] ति० टी०—दह्यमानगृहवर्णनम्—सारवन्तीत्यादि । सारवत्त्वं स्थिरसंस्थानत्वम् । गम्भीरगुणवन्त्यनेककक्ष्याप्राकारान्तर्गहद्वारोपद्वारस्तो दुर्गमत्वलक्षणगाम्भीर्यवन्ति ॥ १८ ॥

१९] ति० टी०—हेमेत्यादि । हेमनिर्मितानि पूर्णचन्द्रार्धचन्द्राकारवन्ति । चन्द्रशालोत्तमानि प्रशस्तशिखरगृहाणि । साधिष्ठानानि मञ्चादिसहितानि ॥ १९ ॥

२०-२१] ति०टी०—दिवाकरं स्पृशन्तीव स्थितानि २०-२१

रा० टी०—सारवन्तीति । सारो बलं तद्वन्ति दृढानीत्यर्थः गम्भीरगुणवन्ति अनेककक्ष्याप्राकारादिमत्त्वेन दुर्ज्ञेयानीत्यर्थः। हेमचन्द्रार्धचन्द्राणि हेमनिर्मितपूर्णचन्द्रार्धचन्द्रान्यतराकाराणि चन्द्रशालोत्तमानि शिरोगृहैरुत्तमानि सर्वेषिता[1] मवरुद्धा येषु ते शिखितानि सुवर्णमयमणिप्राकारविशिष्टानि मणिभिर्विद्रुमैश्चित्राणि दिवाकरं स्पृशन्तीव संस्थितानि क्रौञ्चादीनां भूषणानां च निःस्वनैर्नादितानि शब्दायमानानि गिरिसदृशानि वेश्मानि अग्निर्ददाह अर्द्धचतुष्टयमेकान्वयि ॥ १८—२० ॥

गो० टी०—राक्षस्य पुनर्वधसमये व्यतथयितुमग्निदाहं दर्शयति—सारवन्तीत्यादिना । सारवन्ति श्लेष्मवन्ति सारो बले स्थिरांशे पुमान् यागे वर विष्ठिति रत्नमाला गम्भीराणि महात्मवन्ति गुणान्ति सौन्दर्यवन्ति हेमरत्नार्धचन्द्राणि हेमकृतानि चन्द्राकाराण्यर्धचन्द्राकाराणि वा स्वर्णि । चन्द्रशालोत्तमानि शिरोगृहैः उत्तमानि । चन्द्रशाला शिरोगृहमित्यमरः । साधिष्ठानानि अध्यासनादिसहितानि । स्पृशन्तीव दिवाकरम् सूर्यपर्यन्तोन्नतानीत्यर्थः । क्रौञ्चादयो लीलार्थं गृहेषु संरोपिताः ॥ १८—२० ॥

रा० टी०—ज्वलनेति । ज्वलनेन परीतानि आवृतानि तोरणानि शिखराणि घर्मगे ग्रीष्मर्तौ सविद्युद्भिर्नद्धानि प्रावृतानि मेघजालानीव चकाशिरे ॥ २१ ॥

गो० टी०—ज्वलनेनेति । घर्मोऽस्मादस्तीति घर्मगः ग्रीष्मकाल इत्यर्थः । घर्मगे दिवाग्नि गच्छतीति वेद इत्यण्प्रत्ययः पृषोदरादित्वेन वर्णव्यत्ययो ज्ञेयः । ने गच्छति प्राप्नोतीति घर्मगः वर्षाऋतुरित्यपरः । वस्तुतो घर्मगे घर्म इत्येवार्थः । लङ्कायां दह्यमानायां मन्दोदरी च सपरिवारा प्रसक्तानि दह्यमानतोरणादीनि विदारयन्ती विलपन्तीत्यर्थः ॥ २० ॥

२२] ति० टी०—घर्मगे ग्रीष्मर्तौ दिवाकरं यते प्रवृत्तानि विद्युद्भिर्नद्धानि मेघजालानीव स्थितानि गृहाणि ॥ २२ ॥

रा० टी० ज्वलनेनेति । ज्वलनेन परीतानि गृहाणि महागिरेः शिखराणीव प्रचकाशिरे ॥ २२ ॥

गो० टी०—ज्वलनेन परीतानि निपेतुरित्यस्य वक्ष्यमाणस्यानीवेत्युत्तरार्धम् ॥ २२ ॥

२३] ति० टी०—विमानेष्विति । विमानेषु सप्तभूमिप्रासादेषु ॥ २३ ॥

रा० टी०—विमानेष्विति । विमानेषु सप्तभूमिप्रासादेषु प्रसुप्ताः अत एव दह्यमानाः अत एव त्यक्ताः आभरणसंयोगा याभिः ताः वराङ्गनाः हाहेत्युच्चैर्विचुक्रुशुः ॥ २३ ॥

गो० टी०—विमानेष्विति । त्यक्ताभरणसंवीताः सर्वाभरणान्यपि त्यक्तवत्य इत्यर्थः ॥ २३ ॥

---

१ उन्नतानीति गो. पाठः । २ वीणानामिति गो. रा. पाठः । ३ निपेतुर्भवनाग्र्येति गो. पाठः । ४ दवेति रा. वह्निवज्रहतानीवेति. गो. पाठः

त्यक्ताभरणसंयोगा हाहेत्युच्चैर्विचुक्रुशुः । तत्र चाग्निपरीतानि निपेतुर्भवनान्यपि ॥ २४ ॥
वज्रिवज्रहतानीव शिखराणि महागिरेः । तानि निर्दह्यमानानि दूरतः प्रचकाशिरे ॥ २५ ॥
हिमच्छिखराणीव दह्यमानानि सर्वशः । हर्म्याग्रैर्दह्यमानैश्च ज्वालाभज्वलितैरपि ॥ २६ ॥
रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः । हस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश्च तुरगैरपि ॥
बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः ॥ २७ ॥
अश्वं मुक्तं गजो दृष्ट्वा क्वचिद्भीतोऽपसर्पति । भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते ॥ २८ ॥
लङ्कायां दह्यमानायां शुशुभे च मैथिलीदधिः । छायासंसक्तसलिलो लोहितोद इवार्णवे ॥ २९ ॥
सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी । लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुंधरा ॥ ३० ॥
नारीजनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः । स्वनो ज्वलनतप्तस्य शुश्रुवे शतयोजनम् ॥ ३१ ॥
प्रदग्धकायानपरान्राक्षसान्निर्गतान्बहिः । सहसा हर्यः पतन्ति स्म हरयोऽथ युयुत्सवः ॥ ३२ ॥
उद्घुष्टं वानराणां च राक्षसानां च निःस्वनम् । दिशो दश समुद्रं च पृथिवीं च व्यनादयत् ॥ ३३ ॥
विशल्यौ तौ महात्मानौ तावुभौ रामलक्ष्मणौ । असंभ्रान्तौ जगृहतुस्ते उभे धनुषी वरे ॥ ३४ ॥
ततो विस्फारयामास रामश्च धनुरुत्तमम् । बभूव तुमुलः शब्दो राक्षसानां भयावहः ॥ ३५ ॥

२४-२६] ति० टी०-तत्र चेति । सप्तभूमिप्रासादे वर्तमानानि गृहाणीत्यर्थः ॥ २४-२६ ॥

रा० टी०-तत्रेति । तस्मिन् इन्द्रस्य इवहतानि महागिरेः शिखराणीव अग्निपरीतानि भवनानि निपेतुः ॥ २४ ॥

रा० टी०-तानीति । दह्यमानानि हिमवच्छिखराणीव निर्दह्यमानानि सर्वशः तानि भवनानि दूरतः प्रचकाशिरे॥२५॥

गो० टी०-तानीति । तानि त्रिलोकैक प्रख्यातधिकरणतयोपात्तानि विमानानि । दीप्तौषधितानि प्रकाशिततृणज्योतिर्वनानि ॥ २४ ॥

रा० टी०-हर्म्येति । ज्वालाभिः एतच्छिखैः अत एव दह्यमानैर्हर्म्याग्रैरुपलक्षिता लङ्का पुष्पितैः किंशुकैरिव दृश्यते २६

गो० टी०-हर्म्याग्रैरिति । ज्वालाप्रज्वलितैः ज्वालाविशिष्टैरित्यर्थः ॥ २६ ॥

२७-२८] ति० टी०-हस्त्यध्यक्षा गजस्वामिनस्तैर्दांडपरित्राणाय मुक्तैर्गजैः । लोकान्ते प्रलये । भ्रान्ता घूर्णमाना ग्राहा यस्य सः ॥ २७ ॥ २८ ॥

रा० टी०-हस्तीति । हस्त्यध्यक्षैः हस्तिपकैर्मुक्तैर्गजैः मुक्तैश्चतुरगैरप्युपलक्षिता लंका लोकान्ते लोकनाशसमये भ्रान्ताः ग्राहाः यस्मिन् सोर्णव इव बभूव ॥ २७ ॥

रा० टी०-अश्वमिति । अश्वं मुक्तं दृष्ट्वा भीतो गजोऽपसर्पति पलायते भीतमपि गजं दृष्ट्वा क्वचित् कदाचिदश्वो निवर्तते पलायते ॥ २८ ॥

गो० टी०-हस्त्यध्यक्षैरिति । हस्त्यध्यक्षैः हस्तिपकैः । मुक्तैः निगलान्मोचितैः । मुक्तैश्च तुरगैरपीत्यत्राप्यध्याहार्यम् । लोकान्ते प्रलये ॥ २६ ॥ २७ ॥

२९, ३०] ति० टी०-छाया वह्निज्वालाप्रतिबिम्बम्२९-३०

रा० टी०-लंकायामिति । लंकायां दह्यमानायां सत्यां छायया ज्वालाप्रतिबिम्बेन संसक्तानि सलिलानि यस्य स महोदधिः लोहितोदीर्ण इव शुशुभे ॥ २९ ॥

रा० टी०-सेति । दीपिता सा लंका लोकस्य क्षये प्रदीप्ता वसुन्धरेव बभूव ॥ ३० ॥

गो०टी०-लङ्कायामिति । छायासंसक्तसलिलः प्रतिबिम्बसंक्रान्तजलः लोहितोदः लोहितोदकः । उदादेश आर्षः॥२९॥३०॥

३१-३५] ति० टी०-धूमेनेत्यादेस्य, अतएवोच्चैर्विनेदुषः । कुर्वतः । नारीजनस्य स्वन इत्यन्वयः ॥ ३१—३५ ॥

रा० टी०-नारीति । धूमेन व्याप्तस्य ज्वलनेन तप्तस्य अत एव उच्चैर्विनेदुषः विक्रोशतः नारीजनस्य स्वनः शतयोजनं शुश्रुवे ॥ ३१ ॥

रा० टी०-प्रदग्धेति । बहिर्निर्गतान् अपरान् राक्षसान् युयुत्सवो हरयः उत्पतन्ति स्म ॥ ३२ ॥

गो० टी०-नारीति । नारीजनस्यातिसाहसिकत्वाद्दशयोजनस्वनश्रवणम् ॥ ३० ॥ ३१ ॥

रा० टी०-उद्घुष्टमिति । वानराणामुद्घुष्टमुद्घोषः राक्षसानां निःस्वनं दीनशब्दश्च दिगादि व्यनादयत् ॥ ३३ ॥

गो० टी०-उद्घुष्टमिति । उद्घुष्टम् उद्घोषः । भावे क्तः ॥ ३२ ॥

---

१ सर्वत्रेति गो. पाठः । २ दीप्तौषधितनानि चेति गो. पाठः । ३ महार्णव इति गो. पाठः । ४ अर्णवः इति गो. रा. पाठः । ५ दशेति गो. पाठः । ६ अभीति गो. रा. पाठः । ७ स्वन इति गो. पाठः । ८ अन्विति गो. पाठः । ९ लिति गो. पाठः । १० तदोभे इति गो. तदोभाविति रा.पाठः। ११ बाणस्य रामस्येति गो. रा. पाठः ।

अशोभत तदा रामो धनुर्विस्फारयन्महत् । भगवानिव संक्रुद्धो भवो वेदमयं धनुः ॥ ३६ ॥
उद्घुष्टं वानराणां च राक्षसानां च निःस्वनम् । ज्याशब्दस्तावुभौ शब्दावतिरामस्य शुश्रुवे॥ ३७ ॥
वानरोद्घुष्टघोषश्च राक्षसानां च निःस्वनः । ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश॥३८ ॥
तस्य कार्मुकनिर्मुक्तैः शरैस्तत्पुरगोपुरम् । कैलासशृङ्गप्रतिमं विकीर्णमभवद्भुवि ॥ ३९ ॥
ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च । संनाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥ ४० ॥
तेषां संनह्यमानानां सिंहनादं च कुर्वताम् । शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत ॥ ४१ ॥
आदिष्टा वानरेन्द्रास्ते सुग्रीवेण महात्मना । आसन्नं द्वारमासाद्य युध्यध्वं च प्लवंगमाः ॥ ४२ ॥
यश्च वो वितथं कुर्यात्तत्र तत्राप्युपस्थितः । स हन्तव्योऽभिसंप्लुत्य राजशासनदूषकः ॥ ४३ ॥
तेषु वानरमुख्येषु दीप्तोल्काज्वलपाणिषु । स्थितेषु द्वारमाश्रित्य रावणं क्रोधमाविशत् ॥ ४४ ॥

रा० टी०–विशल्यावितिं । असम्भ्रान्तौ नित्यं सम्भ्रान्तिरहितौ रामलक्ष्मणौ धनुषी जगृहतुः ॥ ३४ ॥

गो० टी०–विशल्यावितिं । विशल्यौ निर्गलितशरीरनिमग्नशरफलकौ । तदोभे धनुषी वरे इति पाठः ॥ ३३ ॥

रा० टी०–तत इति । रामस्य धनुर्विस्फारयाणस्य स ततः तुमुलः शब्दो बभूव ॥ ३६ ॥

गो० टी०–तत इति । विस्फारयाणस्य ध्वनयतः । विस्फारो धनुषः स्यान इत्यमरः । " स्फुरतिस्फुलत्योर्निर्निविभ्यः " इति णत्वम् । मुगभाव आर्षः ॥ ३४ ॥

३६] ति० टी०–संहारकाले संक्रुद्धो भगवान्भवः शब्दब्रह्मात्मकं वेदमयं धनुर्विस्फारयन्निव ॥ ३६ ॥

रा० टी०–अशोभतेति । धनुर्विस्फारयन् रामः संक्रुद्धः संहारकालकक्रोधविशिष्टः अत एव वेदमयं शब्दब्रह्मात्मकं धनुर्विस्फारयन् भव इवाशोभत किंच वेदिति रामविशेषणं निखिलज्ञातेति तदर्थः—अमयमिति । तद्धनुषो विशेषणम् नित्यं रामसमीपवर्तीति तदर्थः ॥ ३६ ॥

गो० टी०–अशोभतेति । वेदमयं धनुः वेदोक्तलक्षणं धनुः । कृत्तिवासाः पिनाकीति श्रुत्या प्रतिपादितमहिमेति वार्थः॥३५॥

३७] ति० टी०–रामस्य ज्याशब्दश्चतावुभौ वानरराक्षसशब्दावतिक्रम्याधरीकृत्य शुश्रुवे ॥ ३७ ॥

रा० टी०–उद्घुष्टमिति । रामस्य ज्याशब्दः उद्घुष्टं निःस्वनं चोभौ शब्दौ अतिशुश्रुवे अतिक्रम्य अधरीकृत्येत्यर्थः श्रवणविषयो बभूव ॥ ३७ ॥

गो० टी०–उद्घुष्टमिति । रामस्य ज्याशब्दः वानराणामुद्घुष्टं राक्षसानां निःस्वनं च तावुभावतीत्य शुश्रुवे ॥ ३६ ॥

३८–३९] ति० टी०–एतत्त्रयं व्याप व्याप्तमभूत् ३८।३९

रा० टी०–वानरेति । वानरोद्घुष्टघोषादित्रयं दश दिशो व्याप ॥ ३८ ॥

रा० टी०–तस्येति । तस्य रामस्य शरैर्विकीर्णं तत् तस्य रावणस्य पुरगोपुरमपतत् ॥ ३९ ॥

गो० टी०–वानरेति । वानरोद्घुष्टघोषः वानरोत्पादितघोषः ॥ ३७ ॥ ३८ ॥

४०] ति० टी०–संनाह उद्योगः ॥ ४० ॥

रा० टी०–तत इति । तुमुलः परस्परमज्ञायमानः राक्षसेन्द्राणां सन्नाह उद्योगः समपद्यत अभवत् ॥ ४० ॥

गो० टी०–तत इति । तुमुलः अधिकः ॥ ३९ ॥

४१] ति० टी०–रौद्रीव कालरात्रिरिव ॥ ४१ ॥

रा० टी०–तेषामिति । संनह्यमानानां राक्षसेन्द्राणां शर्वरी रात्रिः रौद्री कालरात्रिरिव समपद्यत प्राप्नोत् ॥ ४१ ॥

गो० टी०–तेषामिति । संनह्यमानानां कक्ष्यावबन्धनादियुद्धसन्नाहं कुर्वताम् । रौद्री प्रलयरात्रिः ॥ ४० ॥

४२] ति० टी०–यस्यासन्नं द्वारं तत्तदासाद्य युध्यध्वमित्यादिष्टाः ॥ ४२ ॥

४३] ति० टी०–अपि च वो युष्माकं मध्ये तत्र युद्धे स्थितो वितथं पलायनं कुर्यात्स राजशासनदूषको महाज्ञातिवर्तीति स सर्वैः प्लवंगैरन्तव्य इत्यादिष्टाः ॥ ४३ ॥

रा० टी०–आदिष्टा इति । आसन्नं स्वस्यसमीपवर्ति द्वारमासाद्य पूर्वं युद्धाध्वमिति वो युष्माकं मध्ये तत्र तत्र युद्धे उपस्थितः यो वितथं तवाज्ञाविघातं पलायनादीत्यर्थः कुर्यात् स राजशासनदूषकः अभिसंप्लुत्य पाप्य हंतव्यः इति च सुग्रीवेण वानरेन्द्रा आदिष्टा बभूवुरिति शेषः अर्द्धचतुष्टयमेकान्वयि ॥ ४२ ॥ ४३ ॥

गो० टी०–आदिष्टा इत्यादिश्लोकद्वयमेकान्वयम् । अन्ते इतिकरणं बोध्यम् । व इति निर्धारणे षष्ठी । वितथं कुर्यात् मच्छासनमिति शेषः । आसन्नद्वारं रावणान्तःपुरासन्नमध्यक्ष्याद्वारम् । तत्र तत्र युद्धभूमौ उपस्थितः ॥ ४२–४३ ॥

४४] ति० टी०–स्थितेषु । सत्स्विति शेषः ॥ ४४ ॥

रा० टी०–तेष्विति । दीप्तोल्काभिः उज्ज्वलाः प्रकाशिताः पाणयो येषां तेषु वानरमुख्येषु द्वारमाश्रित्य स्थितेषु सत्सु रावणं क्रोधमाविशत् ॥ ४४ ॥

---

१ असन्नद्वारमिति गो. रा. पाठः । २ हीति गो. पाठः । ३ मन्युरिति गो. रा. पाठः ।

तस्य जृम्भितविक्षेपाद्व्यामिश्रा वै दिशो दश । रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत ॥ ४५ ॥
स कुम्भं च निकुम्भं च कुम्भकर्णात्मजावुभौ[1] । प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह ॥ ४६ ॥
यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा[2] । निर्ययुः कौम्भकर्णाभ्यां[3] सह रावणशासनात्॥४७ ॥
शशास चैव तान्सर्वान्राक्षसान्[4]स महाबलान् । राक्षसा गच्छताद्यैव सिंहनादं च नादयन् ॥ ४८ ॥
ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः । लङ्कायाः[5] निर्ययुर्वीराः प्रणदन्तः पुनः पुनः ॥ ४९ ॥
रक्षसां भूषणस्थाभिर्भाभिः[6] स्वाभिश्च सर्वशः । चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह ॥ ५० ॥
तत्र ताराधिपस्याभा ताराणां भा तथैव च[7] । तयोरभरणाभा च ज्वलिता[8] व्यामभासयत् ॥ ५१ ॥
चन्द्राभा भूषणाभा च ग्रहाणां ज्वलिता च भा[9] । हरिराक्षससैन्यानि भ्राजयामास सर्वतः ॥ ५२ ॥
तत्र चार्धप्रदीप्तानां गृहाणां सागरः पुनः[10] । भाभिः संसक्तसलिलश्चलोर्मिः शुशुभे[11] ध्रुवम् ॥५३ ॥
पताकाध्वजसंयुक्तमुत्तमासिपरश्वधम् । भीमाश्वरथमातंगं नानापत्तिसमाकुलम् ॥ ५४ ॥
दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम् । ददृशे राक्षसबलं[12] भीमं घोरविक्रमपौरुषम् ॥ ५५ ॥

४५-४७] ति० टी०-तस्य रावणस्य मन्युरोधजं यज्जृम्भितं विजृम्भणं तदुत्थविक्षेपात्सप्तदशदशाव्यापृतत्वया दश दिशो व्यामिश्रा व्याप्ताः । रूपवान्रुद्रस्य गात्रेषु भ्रुकुटिचक्षुर्मुखादिष्वदृश्यत ॥ ४५-४७ ॥

रा० टी०-तस्येति । तस्य रावणस्य जृम्भितेन विक्षेपात् गात्रविक्षेपात् दश दिशो व्यामिश्राः अत एव तस्य गात्रेषु रूपवान् रुद्रस्य मन्युरिव मन्युरदृश्यत ॥ ४५ ॥

रा० टी०-स इति । स रावणः कुम्भकर्णतनयौ कुम्भं निकुम्भं च प्रेषयामास ॥ ४६ ॥

गो० टी०-यूपाक्ष इति । यूपाक्षादयः कौम्भकर्णिभ्यां सह निर्ययुः ॥ ४७ ॥

गो० टी०-तस्येति । जृम्भितविक्षेपाद् गात्रविनामविस्तारात् । व्यामिश्राः व्याकुलाः । अभवन्निति शेषः । दिशः दिक्स्थिताः । रुद्रस्य कालाग्निरुद्रस्य गात्रे यो रूपवान् मन्युः स इव रावणोऽलक्ष्यत ॥ ४४—४६ ॥

४८-४९] ति० टी०-अशासात् राज्यामेव गच्छतेति वानरानीकभयाय स्वयं सिंहनादं नादयन्कुर्वञ्शशास॥४८॥४९॥

रा० टी०-शासनप्रकारमाह-शशासेति । हे राक्षसाः यूयमद्यैव गच्छत इति सिंहनादं नादयन् सन् स रावणः शशास४८

गो० टी०-शशासेति । अत्रैव अस्मिन् गृह एवास्य । सिंहनादं नादयन्तः नादयन्तः कुर्वन्तः गच्छत । नादयन्नित्यत्र "व्यत्ययो बहुलम्" इति बहुवचनविषये एकवचनम् ॥४७॥

रा० टी०-तत इति । ज्वलितायुधाः राक्षसाः लंकायाः निर्ययुः ॥ ४९ ॥

गो०टी०-ततस्त्वित्यादि । ज्वलितेति आयुधानां ज्वलितत्वं युद्धयात्रासु शिक्षाविशेषप्रदर्शनात् लङ्कायाः इति पञ्चमी ॥४८॥

५०] ति० टी०-सप्रभं निस्तिमिरम् ॥ ५० ॥

रा० टी०-रक्षसामिति । रक्षसां भूषणस्थाभिः स्वाभिः भाभिः प्रकाशैः ते राक्षसाः अग्निभिर्हरयश्च व्योमाकाशं सप्रभं चक्रुः ॥ ५० ॥

गो० टी०-रक्षसामिति । स्वाभिः स्वाभावरणाभिः । रक्षसां भूषणस्थाभिः भाभिश्च । व्योम सेनासमध्याकाशम्॥५०॥

५१] ति० टी०-ताराधिपस्य चन्द्रस्य । ताराणां नक्षत्राणाम् । तयोर्वानरराक्षसबलयोराभरणाभा आभरणकान्तिश्चज्वलिता प्रकाशमाना व्यां सेनाद्वयमध्यगताकाशप्रदेशमभासयत् ॥ ५१ ॥

रा० टी०-तत्रेति तत्र तस्मिन् समये ताराधिपस्य चन्द्रस्य आभा ताराणां च भा तयोः वलयोः रामरावणसैन्ययोराभरणाभा च व्यां दिशमभासयत् ॥ ५१ ॥

गो० टी०-तदानीं चन्द्रोदयात् पुनः प्रकाशातिशयमाह—तत्रेति । तत्र तदानीम् । ताराधिपस्याभा ताराणां चाभा तयोर्वलयोराभरणस्याभा च व्याम् आकाशम् अभासयत्॥५०॥

५२] ति० टी०-उक्तश्लोकमेव व्याख्यानम्—चन्द्राभेत्यादि । ग्रहाणां नक्षत्राणाम् ॥ ५२ ॥

रा० टी०-चन्द्रेति । चन्द्रादित्रयाभा हरिराक्षससैन्यानि भ्राजयामास ॥ ५२ ॥

गो० टी०-वक्ष्यमाणलङ्कागृहप्रकाशैः पुनरपि स प्रकाशोत्कर्षतेत्याह—चन्द्रेति ॥ ५१ ॥

५३] ति० टी०-संसक्तं संबद्धं सलिलं यस्य सः ॥ ५३॥

रा० टी०-तत्रेति । अर्धप्रदीप्तानां गृहाणां भाभिः प्रभाभिः संसक्तानि सलिलानि यस्य स चलोर्मिः सागरः पुनरधिकं शुशुभे ॥ ५३ ॥

गो० टी०-तत्र चेति । संसक्तपातालः पातालपर्यन्तं संसक्तः ॥ ५२ ॥

५४-५५] ति० टी०-उत्तमासिपरश्वधम् । परश्वधो

१ निकुम्भं च कुम्भं चेति गो. पाठः । २ कर्णिभ्यामिति गो. रा. पाठः । ३ स्थिति गो. पाठः । ४ नादयन् गच्छतात्रैव जयध्वं शीघ्रमेव चेति गो. पाठः । ५ चेति गो. रा. पाठः । ६ आभरणस्थाभिः गो. पाठः । ७ बलयोरिति गो. रा. पाठः । ८ ज्वलतामिति गो. पाठः । ९ ऊर्ध्वमिति गो. पाठः । १० अधिकमिति गो. रा. पाठः । ११ घोरं भीमेति गो. पाठः ।

दृश्ये ज्वलितप्रासं किङ्किणीशतनादितम् । हेमजालाचितभुजं व्यावेष्टितपरश्वधम् ॥ ५६ ॥
व्याधूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम् । गन्धमाल्यमधूत्सेकसंमोदितमहानिलम् ॥ ५७ ॥
घोरं शूरजनाकीर्णं महाम्बुधरनिःस्वनम् । तद्दृष्ट्वा बलमायातं राक्षसानां दुरासदम् ॥ ५८ ॥
संचचाल प्लवंगानां बलमुच्चैर्ननाद च । जवेनाप्लुत्य च पुनस्तद्बलं रक्षसां महत् ॥ ५९ ॥
अभ्ययात्प्रत्यरिबलं पतंगा इव पावकम् । तेषां भुजपरामर्शव्यामृष्टपरिघाशनि ॥ ६० ॥
राक्षसानां बलं श्रेष्ठं भूयः पैरमशोभत । तत्रोन्मत्ता इवोत्पेतुर्हरयोऽथ युयुत्सवः ॥ ६१ ॥
तरुशैलैरभिघ्नन्तो मुष्टिभिश्च निशाचरान् । तथैवापततां तेषां हरीणां निशितैः शरैः ॥ ६२ ॥
शिरांसि सहसा जह्रू राक्षसा भीमविक्रमाः । दशनैर्हतकर्णाश्च मुष्टिभिर्भिन्नमस्तकाः ॥
शिलाप्रहारभग्नाङ्गा विचेरुस्तत्र राक्षसाः ॥ ६३ ॥
तथैवाप्यपरे तेषां कपीनामसिभिः शितैः । प्रवरानभितो जघ्नुर्घोररूपा निशाचराः ॥ ६४ ॥
[तथैवाप्यपरे तेषा कपीनामसिभिः सितैः । हरिवीरा निजघ्नुश्च घोररूपा निशाचराः] ॥
घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत् । गर्हमाणं जगर्हान्यो दशन्तमपरोऽदशत् ॥ ६५ ॥

द्विविधः—असिरूपः, कुठाररूपश्च । तत्रासिरूपपरश्वधमित्यर्थः । तेनासिखड्गयोर्न पौनरुक्त्यम् ॥ ५४ ॥ ५५ ॥

रा० टी०—पताकेति । पताकाभिर्ध्वजैश्च संयुक्तमुत्तमा असयः परश्वधाश्च यस्मिन् भीमैः अक्षादिभिस्समाकुलं दीप्तानि शूलादीनि यस्मिन् ज्वलितः प्रासः प्रासविशेषो यस्मिन् किंकिणीशतैर्नादितं राक्षसबलं दृश्ये असिखड्गयोरवान्तरभेदान्न पौनरुक्त्यम् सार्द्धश्लोकद्वयमेकान्वयि ॥ ५४—५६ ॥

गो० टी०—पताकेत्यादिसार्धचतुःश्लोक्येकान्वया । चलत्पटा पताका मत्स्यादिचिह्नितं ध्वजम् उत्तमासिपरश्वधम् । परश्वोऽसिरूपः कुठाररूपश्चेति तत्रासिरूपपरश्वोऽसिपरश्वधः । तेन वक्ष्यमाणयोः खड्गपरश्वधयोर्न पौनरुक्त्यम् । ज्वलितप्रासमित्यत्र प्रासशब्दः क्षेप्यो ह्रस्वकुन्ते वर्तते । तेन तस्यापि न पौनरुक्त्यम् । पत्तयः पदातयः । तेषां नानात्वं वेषायुधादिभेदात् । प्रासस्य ज्वलितत्वं युद्धागमनसमये शिक्षाविशेषप्रदर्शक्रियासंबन्धात् । किङ्किणीशतनादितं ध्वजाद्यावत्किङ्किणीशतनादितम् । हेमजालाचितभुजं हेमाभरणजालावद्धभुजम् । व्यावेष्टितपरश्वधं मदेन चालितपरश्वधम् । शस्त्रम् उक्तव्यतिरिक्तायुधम् । बाणसंसक्तकार्मुकमिति दीप्तशूलगदाखड्गप्रासतोमरकार्मुकमित्यत्र यत् पूर्वोक्तं कार्मुकं तद्भङ्गे पुनरादातुं पृष्ठे बद्धमपरमिदं कार्मुकमिति ज्ञेयम् । गन्धेति । गन्धः चन्दनादिः गन्धमाल्याभ्यां मधूत्सेकेन वीरपाणरूपमधुसेवनेन च संमोदितमहानिलं वासितमहावातम् ॥ ५३—५७ ॥

५६] ति० टी०—ज्वलितप्रासं बाणवर्षणादुज्ज्वलितप्रासमित्यर्थ इति कतकः । हेमजालेति । हेमजालव्याप्तभुजमित्यर्थः । व्यावेष्टिताश्चालिताः परश्वधा यस्मिंस्तत् ॥ ५६ ॥

रा० टी०—हेमेति । हेमजालेन आचिता व्याप्ता भुजा यत्र व्यावेष्टिता. प्रचलिताः परश्वधाः यत्र व्याधूर्णितानि भ्रामितानि महाशस्त्राणि यस्मिन् बाणैस्संसक्तानि कार्मुकानि यस्मिन् गंधादीनामुत्सेकेनाधिक्येन संमोदितो महानिलो यस्मिन् शूरजनैराकीर्णं महाम्बुधरवाणां निस्वन इव निस्वनो यस्मिन् तत् आयातं राक्षसानां बलं दृष्ट्वा प्लवङ्गानां बलं संचचाल ननाद च श्लोकत्रयमेकान्वयि ॥५७—५९ ॥

५७–५८] ति० टी०—गन्धादीनामुत्सेकेन आधिक्यतः संमोदितो महानिलो येन तत् ॥ ५७ ॥ ५८ ॥

गो० टी०—तद्दृष्ट्वेत्यादि । आयान्तमिति पुलिङ्गमार्षम् । संचचाल अभिमुखं जगाम ॥ ५८ ॥ ५९ ॥

५९] ति० टी०—संचचाल । लङ्कायामिति शेषः ॥५९॥

रा० टी०—जवेनेति । रक्षसां महद्बलं पतङ्गाः पावकमिव प्रत्यग्निबलं वानरसैन्यमभ्ययात् प्राप्नोत् ॥ ६० ॥

६०–६३] ति० टी०—तेषां रक्षसां भुजपरामर्शेन भुजव्यापारेण व्यामृष्टा व्याधूर्णिताः परिघाशनयो यत्र तत्॥६०-६३

रा० टी०—तेषामिति । तेषां राक्षसानां भुजपरामर्शेन भुजव्यापारेण व्यामृष्टाः व्याधूर्णिताः परिघाशनयो यस्मिन् तत् श्रेष्ठं बलं परमशोभत ॥ ६१ ॥

रा० टी०—तत्रेति । तत्र तस्मिन् समये युयुत्सवो हरयः तरुप्रभृतिभिः निशाचरान् अभिघ्नन्तस्सन्तः उन्मत्ता इव उत्पेतुः ६२

रा० टी०—तथेति । तथा आपततां हरीणां शिरांसि राक्षसा आजह्रुः ॥ ६३ ॥

रा० टी०—दशनैरिति । दशनैः हतानि कर्णानि येषां शिलाप्रहारेण भग्नान्यङ्गानि येषां ते राक्षसा. तत्र सैन्ये विचेरुः६४

गो० टी०—तेषामिति । भुजपरामर्शव्याप्तपरिघाशनिसन्ततभुजस्पर्शेन उत्क्षिप्तपरिघवज्रम् ॥ ६०—६३ ॥

६४–६५] ति० टी०—अपरे निशाचरास्तेषां कपीनां प्रवरानहुः ॥ ६४ ॥ ६५ ॥

---

१ व्याप्तेत्यर्थ इति गो. पाठः । २ भूयस्तरामिति गो. पाठः । ३ कपीनामसिभिः शितैरिति गो. पाठः । ४ दर्शना इति गो. पाठः । ५ अभिकक्षिता इति गो. पाठः । ६ प्रवीरानिति गो. पाठः । ७ राक्षसानां तरक्षिनामिति गो. पाठः । ८ इदं पद्यमार्षं गो. पाठे । ९ जघ्नुरिति गो. पाठः ।

देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः । किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे ॥ ६६ ॥
विप्रलम्भितशस्त्रं च विमुक्तकवचायुधम् । समुद्यतमहाप्रासं मुष्टिशूलासिकुन्तलम् ॥ ६७ ॥
प्रावर्तत महारौद्रं युद्धं वानररक्षसाम् । वानरान्दश सप्तेति राक्षसा जघ्नुराहवे ॥ ६८ ॥
[राक्षसान्दश सप्तेति वानराश्चाभ्यपातयन्]
विप्रलम्भितवर्म्मं च विमुक्तकवचध्वजम् । बलं राक्षसमालम्ब्य वानराः पर्यवारयन् ॥ ६९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ।

कम्पनयूथाक्षशोणिताक्षप्रजङ्घानां मैन्दद्विविदांगदानां च परस्परेषां रोमहर्षणो रणः प्राजनि तत्र वालिपुत्रः प्रजङ्घस्य शिरोमुष्टिना पातयामास यूथाक्षशोणिताक्षावपि क्रमेण मैन्दद्विविदाभ्यां हतौ एवं हतप्रवीरां चमूं कुम्भः पालयामास अथ कुम्भेन प्रायः सर्वे हरयो व्यथिताः तत्समीक्ष्य सुग्रीवधिक्षं दारुणं युद्धान्तेऽनल्पेन विक्रमेण कुम्भं क्षितौ पातयामास ।

प्रवृत्ते संकुले तस्मिन्वीरे घोरजनक्षये । अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः ॥ १ ॥
आहूय सोऽङ्गदं कोपात्ताडयामास वेगितः । गदया कम्पनः पूर्वं स चचाल मुहूर्तः ॥ २ ॥
स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः । अर्दितश्च प्रहारेण कम्पनः पतितो भुवि ॥ ३ ॥

रा० टी०–तथेति । निशाचराः कपीनां प्रवरान् शरैरभितो जघ्नुः ॥ ६४ ॥

गो० टी०–तथेवेति । कपीनाम् अभिलक्षिताः प्रसिद्धाः । कपिप्रवराः इत्यर्थः ॥ ६४ ॥

रा० टी०–हन्तमिति । हन्तमन्यो जघान गर्हमाणं निन्दयन्तमन्यो जगर्ह ॥ ६६ ॥

गो० टी०–तथेवेति । कपीनां मध्ये हस्तिवीरान् वीरहरीन् निजघ्नुः ॥ ६५ ॥ ६६ ॥

६६–६९] ति० टी०–देहीति । युद्धमिति शेषः६६-६९॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

रा० टी०–देहीति । अन्यो देहि युद्धमिति शेषः इत्युक्ते सति ददामीत्युक्तेति शेषः ददामीति किं क्लेशयसीति तिष्ठेति अन्योन्यं बभाषिरे च ॥ ६७ ॥

गो० टी०–देहीति । अन्यो वीरः प्रहरणमत्र देहीति बभाषे । अन्यो ददातीति बभाषे । अपरः पुनः ददामीति बभाषे । आत्मानम् आयासेन किं क्लेशयसि तिष्ठत्यन्यो बभाषे । तत्रैवमन्योन्यं बभाषिरे ॥ ६७ ॥

रा० टी०–विप्रलम्भितेति । विप्रलम्भितानि शस्त्राणि यस्मिन् विमुक्तानि कवचेषु आयुधानि यस्मिन् समुद्यताः महाप्रासादयो यस्मिन् तत् वानरराक्षसां युद्धं प्रावर्तत सार्द्धश्लोक एकान्वयी ॥ ६८ ॥

गो० टी०–विप्रलम्भितवस्त्रमित्यादि । सर्वं क्रियाविशेषणम् ॥ ६८ ॥

रा० टी०–वानरानिति । राक्षसाः दश सप्त वानरान् जघ्नुः वानरास्तु राक्षसानभ्यपातयन् ॥ ६९ ॥

गो० टी०–वानरान् दश सप्तेति । राक्षसाः दश सप्तेत्यनेन प्रकारेण वानरान् जघ्नुः । वानराश्च दशसप्तेत्यनेन प्रकारेण राक्षसानभ्यपातयन्निति संबन्धः ॥ ६९ ॥

रा० टी०–विप्रलम्भितेति । विमुक्ताः कवचध्वजाः यस्मिन् तद्राक्षसबलं वानराः पर्यवारयन् ॥ ७० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पंचसप्ततितमः सर्गः ॥ ७५ ॥

गो० टी०–विस्रस्तेति । आलम्ब्य वेगेन आगमानं प्रतिदृश्य ततः परितो वारयन् ॥ ७० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

१] ति० टी०–अथ कम्पनादीनामङ्गदादिभिर्युद्धम्—प्रवृत्त इति ॥ १ ॥

रा० टी०–युद्धवृत्तान्तमाह—प्रवृत्तइत्यादिभिः । वीरजनानां क्षयः पर्यटनं यस्मिन् संकुले निबिडे तस्मिन् संग्रामे प्रवृत्ते सति अंगदः कम्पनं वीरमाससाद ॥ १ ॥

गो० टी०–अथ कुम्भवधः षट्सप्ततितमे—प्रवृत्त इत्यादि । संकुले निरन्तरे ॥ १ ॥

२–३] ति० टी०–आहूयेति पूर्वान्वयि । सोऽङ्गदम् । अङ्गदेन युद्धायाहूतः कम्पन इत्यर्थः । स चचाल । अङ्गद इत्यर्थः ॥ २ ॥ ३ ॥

१ यष्टिशूलासिसंकुलमिति गो.पा.। २ इदमर्धमधिकं गो.रा.पा.। ३ विस्रस्तकेशवसनमिति गो.पा.च ४ शस्त्रमिति रा.पा.। ५ घोरे वीरेति गो.रा.पा.।

ततस्तु कम्पनं दृष्ट्वा शोणिताक्षो हतं रणे । रथेनाभ्यपतत्क्षिप्रं तत्राङ्गदमभीतवत् ॥ ४ ॥
सोऽङ्गदं निशितैर्बाणैस्तदा विव्याध वेगितः । शरीरदारणैस्तीक्ष्णैः[1] कालाग्निसमविग्रहैः॥ ५ ॥
क्षुरक्षुरप्रैर्नाराचैर्वत्सदन्तैः[2] शिलीमुखैः[3] । कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः॥ ६ ॥
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रः प्रतापवान् । धनुरुग्रं रथं बाणान्ममर्द तरसा बली ॥ ७ ॥
शोणिताक्षस्ततः क्षिप्रमसिचर्म[4] समाददे । उत्पपात तदा क्रुद्धो वेगवानविचारयन् ॥ ८ ॥
तं क्षिप्रतरमासाद्य परामृश्याङ्गदो बली । करेण तस्य तं खड्गं समाच्छिद्य ननाद च॥ ९ ॥
तस्यां स[5]फलके खड्गं निजघान ततोऽङ्गदः । यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः ॥ १० ॥
तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः । वालिपुत्रोऽभिदुद्राव रणशीर्षे परानरीन्॥ ११ ॥
प्रजङ्घसहितो वीरो यूपाक्षस्तु ततो बली । रथेनाभिययौ क्रुद्धो वालिपुत्रं महाबलम्॥ १२ ॥
आयसीं तु गदां गृह्य स वीरः कनकाङ्गदः । शोणिताक्षः समाश्वस्य तमेवानुपपात ह॥ १३ ॥
प्रजङ्घस्तु महावीरो यूपाक्षसहितो बली । गदयाभिययौ क्रुद्धो वालिपुत्रं महाबलम्॥ १४ ॥
तयोर्मध्ये कपिश्रेष्ठः क्षोणिताक्षप्रजङ्घयोः । विशाखयोर्मध्यगतः पूर्णचन्द्र इवाबभौ ॥ १५ ॥

रा० टी०—आहूयेति । सः कम्पनः अंगदमाहूय पूर्वं गदया ताडयामास भृशाहतः अत्यन्तं ताडितः सोऽङ्गदश्चचाल ॥ २ ॥

गो० टी०—आहूयेति । आहूय स्पर्धयित्वा । "ह्वेञ्, स्पर्धायां शब्दे च" इति धातोर्ल्यप् । वेगितः सञ्जातवेगः । तारकादित्वादितच् । स अङ्गदः ॥ २ ॥

रा० टी०—स इति । सोऽङ्गदस्समञ्जां प्राप्य गिरेश्शिखरं चिक्षेप प्रहारेण शिखरताडनेन अर्दितः हतः कम्पनः भूमि पतितः ।

गो० टी०—स इति । चिक्षेप कम्पनोरसीति शेषः॥ ३ ॥

४–५] ति० टी०—अभीतवदभीतमहम् ॥ ४ ॥ ५ ॥

रा० टी०—तत इति । शोणिताक्षोऽङ्गदमभ्यपतत् ॥ ४ ॥

गो० टी०—ततस्त्वित्यादि । कम्पनं हतमित्यन्वयः । तत्र कम्पनयुद्धस्थाने । अभीतवत् अभीतमिति क्रियाविशेषणम्॥४॥

रा० टी०—स इति । स शोणिताक्षः अदारणैः अतिविशारकैरेव शरैर्विद्धिमकैर्विव्याध ॥ ५ ॥

गो० टी०—स इत्यादि । कालाग्निसमविग्रहैः कालाग्नितुल्याकारैरित्यर्थः ॥ ५ ॥

६–८] ति० टी०—क्षुरः क्षुरप्रः शरः । क्षुरप्रोऽर्धचन्द्राकृतिः नाराचः सर्वायसः वत्सदन्तस्तदाकारः शिलीमुखः कङ्कपक्षसदृशः कर्णी पार्श्वद्वयस्थितकर्णाकारावयवः । शल्यश्शल्यस्वाहीर्घफलको बाणः शल्यः । विपाठः करवीरात्रसदृश इति तीर्थादयः॥६–८॥

रा० टी०—क्षुरेति । क्षुरादिभिश्शरैर्बाणभेदैः प्रतिविद्धाङ्गोऽङ्गदः कम्पनस्य धनुरादीनि ममर्द तत्र क्षुरः क्षुरसदृशाग्रभागः नाराचो निखिलायसः वत्सदन्तः तदाकृतिः शिलीमुखः कङ्कपत्रतुल्यः कर्णिः पार्श्वद्वयस्थितकर्णाकारावयवः शल्यः दीर्घफलकः विपाठः करवीरपत्रसदृशाग्रभागः लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०—क्षुरेत्यादि । क्षुरः नापितशस्त्राकारमुखः । क्षुरप्रः अर्धचन्द्राकृतिः । नाराचः शल्यकः । वत्सदन्तैः वत्सदन्ताकारमुखैः । शिलीमुखैः कङ्कपक्षाकारमुखैः । उभयपार्श्वकृतकर्णः कर्णी । अर्धनाराचः शल्यः । विपाठः करवीरपत्राग्रसदृशः ॥ ६ ॥ ७ ॥

रा० टी०—शोणितेति । ततः धनुरादिविनाशानन्तरं शोणिताक्षः असिचर्मं समादद उत्पपात च ॥ ८ ॥

गो० टी०—शोणिताक्ष इति । असिचर्मं खेट्यसिचर्म । एकवद्भावः । उत्पपात । रथादिति शेषः ॥ ८ ॥

९] ति० टी०—परामृश्य बलात् ॥ ९ ॥

रा० टी०—तमिति । अङ्गदः क्षिप्रतरमासाद्य तं शोणिताक्षं करेण परामृश्य गृहीत्वा तस्य खड्गं समाच्छिद्य बलादादाय ननाद ॥ ९ ॥

गो० टी०—तमिति । परामृश्य गृहीत्वा ॥ ९ ॥

१०] ति० टी०—अंसस्थे फलके यज्ञोपवीतवदेनं शोणिताक्षं चिच्छेद । तावतापि न परावृत्तो नापि मृतः ॥ १० ॥

गो० टी०—तस्येति । तस्य शोणिताक्षस्य अंसस्थे फलके खड्गमङ्गदो निचखान एनं शोणिताक्षं यज्ञोपवीतवत् यथा भवति तथा चिच्छेद च ॥ १० ॥

गो० टी०—तस्येति । चिच्छेद । छिन्नस्तु न मृतः ॥१०॥

११–१२] ति० टी०—तं महाखड्गं शोणिताक्षोयम् ॥ ११–१२ ॥

रा० टी०—तमिति । तं शोणिताक्षादृहीतं महाखड्गं वालिपुत्रः प्रगृह्य अपरान् भटान् अभिदुद्राव ॥ ११ ॥

गो० टी०—तमिति । अपरान् प्रजङ्घादीन् ॥ ११ ॥

१३–१५] ति० टी०—कनकाङ्गद इति शोणिताक्षविशेषणम् ॥ १३–१५ ॥

१ शरैरदारणैरिति रा० पाठः । २ क्षुरप्रैरिति गो० पाठः । ३ अस्त्रमिति गो० पाठः । ४ दिवेमिति गो० रा० पाठः । ५ अनयोः पूर्वोत्तरपदयोर्व्यत्यासेन पाठः गो० रा० पुस्तकयोः । ६ रथेनेति गो० पाठः । ७ अभवदिति गो० पाठः ।

अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च । तस्य तस्थतुरभ्याशे परस्परदिदृक्षया ॥ १६ ॥
अभिपेतुर्महाकायाः प्रतियत्ता महाबलाः । राक्षसा वानरान्रोषादसिबाणगदाधराः ॥ १७ ॥
त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुंगवैः । संसक्तानां महद्युद्धमभवद्रोमहर्षणम् ॥ १८ ॥
ते तु वृक्षान्समादाय संपचिक्षिपुराहवे । खड्गेन प्रतिचिक्षेप तान्प्रजङ्घो महाबलः ॥ १९ ॥
रथान्सर्वान्द्रुमाञ्छैलान्प्रतिचिक्षिपुराहवे । शरौघैः प्रतिचिच्छेद तान्यूपाक्षो महाबलः ॥ २० ॥
सृष्टान्द्विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान् । बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान् ॥ २१ ॥
उद्यम्य विपुलं खड्गं परमर्मविदारणम् । प्रजङ्घो वालिपुत्राय अभिदुद्राव वेगितः ॥ २२ ॥
तमभ्याशगतं दृष्ट्वा वानरेन्द्रो महाबलः । आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा ॥ २३ ॥
बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना । वालिपुत्रस्य घातेन स पपात क्षितावसिः ॥ २४ ॥
तं दृष्ट्वा पतितं भूमौ खड्गं मुसलसंनिभम् । मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ २५ ॥
स ललाटे महावीर्यमङ्गदं वानरर्षभम् । आजघान महातेजाः स मुहूर्तं चचाल ह ॥ २६ ॥
स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान् । प्रजङ्घस्य शिरः कायात्पातयामास मुष्टिना ॥ २७ ॥
स यूपाक्षोऽश्रुपूर्णाक्षः पितृव्ये निहते रणे । अवरुह्य रथात्क्षिप्रं क्षीणेषुः खड्गमाददे ॥ २८ ॥

रा० टी०–आयसीमिति । कनकमयोऽङ्गदो यस्य स शोणिताक्षः समाश्वस्य गदां गृह्य गृहीत्वा तमङ्गदमेवाभ्युपपात ॥ १२ ॥

गो० टी०–आयसीमिति । तमेव अङ्गदमेव ॥ १२ ॥

रा० टी०–प्रजङ्घ इति । यूपाक्षसहितः प्रजङ्घोपि वालिपुत्रमभिययौ ॥ १३ ॥

गो० टी०–प्रजङ्घेति । स्पष्टः ॥ १३ ॥

रा० टी०–तयोरिति । शोणिताक्षप्रजंघयोर्मध्ये गतः कपिश्रेष्ठः विशाखयोः तारयोर्मध्यगतः चन्द्र इवाबभौ ॥ १४ ॥

गो० टी०–तयोरिति । यूपाक्षस्य दूरस्थत्वादुक्तिः॥१४॥

१५] ति० टी०–परस्परदिदृक्षया युद्धावसरदिदृक्षया, स्वातुरूपप्रतिभटराक्षसजिज्ञासया वा ॥ १५ ॥

रा० टी०–अङ्गदमिति । अङ्गदं परिरक्षन्तौ मैन्दो द्विविदश्च परस्परदिदृक्षया स्वस्वयुद्धचातुरीबोधनेच्छया तस्याङ्गदस्य अभ्याशे समीपे तस्थतुः ॥ १५ ॥

गो० टी०–अङ्गदमिति । परिरक्षन्तौ । मातुलत्वादिति भावः । परस्परदिदृक्षया । स्वानुरूपप्रतिभटराक्षससंजिज्ञासयेत्यर्थः ॥ १५ ॥

१७] ति० टी०–प्रतियत्ताः सावधानाः ॥ १७ ॥

रा० टी०–अभीति । प्रतियत्ताः सावधानाः राक्षसाः रोषात् वानरान् अभिपेतुः ॥ १६ ॥

गो० टी०–अभिपेतुरिति । प्रतियत्ताः प्रतियत्नवन्तः । युद्धाधानं प्रतियत्नः । आरोपितवीर्या इत्यर्थः ॥ १६–१८ ॥

१८–२०] ति० टी०–त्रयाणामङ्गदमैन्दद्विविदानाम् । त्रिभिः शोणिताक्षप्रजङ्घयूपाक्षैः ॥ १८–२० ॥

रा० टी०–त्रयाणामिति । संसक्तानां युद्धोत्साहयुक्तानां त्रयाणामङ्गदमैन्दद्विविदानां वानरेन्द्राणां त्रिभिः शोणिताक्ष प्रजङ्घयूपाक्षैः सह महद्युद्धमभवत् ॥ १७ ॥

रा० टी०–ते इति । तेऽङ्गदादयः वृक्षान् समादाय संपचिक्षिपुः प्रजङ्घास्तु तान् वृक्षान् खड्गेन प्रचिच्छेद ॥ १८ ॥

रा० टी०–रथानिति । तेऽङ्गदादयः द्रुमैश्शैलैश्च रथादीन् प्रचिक्षिपुः आच्छादयामासुः यूपाक्षस्तु तान् द्रुमादीन् शरौघै प्रतिचिच्छेद ॥ १९ ॥

गो० टी०–रथानिति । रथानश्वान् । प्रतीति शेषः॥१९

२१] ति० टी०–सृष्टान्प्रक्षिप्तान् ॥ २१ ॥

रा० टी०–तदेव विशिष्याह—सृष्टानिति । द्विविदमैन्दाभ्यामुत्पाट्य सृष्टान् द्रुमान शोणिताक्षो बभञ्ज ॥ २० ॥

गो० टी०–सृष्टानिति । उत्पाट्य सृष्टानित्यन्वयः॥२०॥

२२–२८] ति० टी०–वालिपुत्रायोद्यम्य वालिपुत्रं हन्तुमुद्यम्य ॥ २२—२८ ॥

रा० टी०–उद्यम्येति । प्रजंघः विपुलं महान्तं खड्गमुद्यम्य वालिपुत्राय अभिदुद्राव ॥ २१ ॥

गो० टी०–उद्यम्येति । वालिपुत्राय वालिपुत्रं हन्तुम् । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी ॥२१॥

रा० टी०–तमिति । वानरेन्द्रोऽङ्गदः अभ्याशगतं समीपे प्राप्तं तं प्रजङ्घं दृष्ट्वा अश्वकर्णेन तदभिधेन द्रुमेण आजघान२२

गो० टी०–तमिति । वानरेन्द्रः अङ्गदः ॥ २२ ॥

रा० टी०–बाहुमिति । सोऽङ्गदः सनिस्त्रिंशं खड्गसहितमस्य प्रजंघस्य बाहुं मुष्टिना जघान सोसिः वालिपुत्रस्य घातेन क्षितौ पपात ॥ २३ ॥

---

१ चर्मेति गो.पाठः । २ निशाचर इति गो.पाठः । ३ निकृन्तनामिति गो.पाठः । ४ खड्गेनापातयल्लिप्तावीति गो. पाठः । ५ वीर्यैर्वानिति रा.पाठः ।

तमापतन्तं संप्रेक्ष्य यूपाक्षं द्विविदस्त्वरन् । आजघानोरसि क्रुद्धो जग्राह च बलाद्बली ॥ २९ ॥
गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलम् । आजघान महातेजा वक्षसि द्विविदं ततः ॥ ३० ॥
स तैतोऽभिहतस्तेन चचाल च महाबलः । उद्यतां च पुनस्तस्य जहार द्विविदो गदाम् ॥ ३१ ॥
एतस्मिन्नन्तरे मैन्दो द्विविदाभ्याशमागमत् । [यूपाक्षं ताडयामास तलेनोरसि वीर्यवान्]
तौ शोणिताक्षयूपाक्षौ प्लवगाभ्यां तरस्विनौ । चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम् ॥ ३२ ॥
द्विविदः शोणिताक्षं तु विददार नखैर्मुखे । निष्पिपेष स वीर्येण क्षितावाविध्य वीर्यवान् ॥ ३३ ॥
यूपाक्षमभिसंक्रुद्धो मैन्दो वानरपुंगवः । पीडयामास बाहुभ्यां पपात स हतः क्षितौ ॥ ३४ ॥
हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तथा । जगामाभिमुखी सा तु कुम्भकर्णात्मजो यतः ॥ ३५ ॥
आपतन्तीं च वेगेन कुम्भस्तां सान्त्वयच्चमूम् । अथोत्कृष्टं महावीर्यैर्लब्धलक्षैः प्लवंगमैः ॥ ३६ ॥
निपातितमहावीरां दृष्ट्वा रक्षश्चमूं तदा । कुम्भः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करम् ॥ ३७ ॥
स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः । मुमोचाशीविषप्रख्यान्छरान्देहविदारणान् ॥ ३८ ॥
तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम् । विद्युद्दैरावताविष्मद्वितीयेन्द्रधनुर्यथा ॥ ३९ ॥
आकर्णकृष्टमुक्तेन जघान द्विविदं तदा । तेन हाटकपुङ्खेन पत्रिणा पत्रवाससा ॥ ४० ॥

गो० टी०—बाहुभिति । सनिर्लिशं सखड्गम् ॥ २३ ॥

रा० टी०—तमिति । महाबलः प्रजङ्घः भूमौ पतितं यूपाक्षं दृष्ट्वा मृष्टिं संवर्तयामास भ्रामयामास ॥ २४ ॥

रा० टी०—स इति । स प्रजङ्घः अङ्गदं ललाटे आजघान अत एव महातेजा अङ्गदः मुहूर्तं चचाल बभ्राम ॥ २५ ॥

रा० टी०—स इति । वालिपुत्रः सञ्ज्ञां प्राप्य प्रजङ्घस्य शिरः मुष्टिना कायात् पातयामास ॥ २७ ॥

रा० टी०—स इति । विकृष्य निहते सति भग्नपृष्ठोऽयं यूपाक्षः स्थादवरुह्य लङ्घमादद ॥ २७ ॥

गो० टी०—तमिति । उत्पलसन्निभम् । नीलोत्पलसमानकान्तिमित्यर्थः । महाबलः प्रजङ्घः ॥ २४–२१ ॥

२९–३१] ति० टी०—जग्राह दधार ॥ २९–३१ ॥

रा० टी०—तमिति । द्विविदः यूपाक्षं संप्रेक्ष्य उरसि आजघान बलात् हठात् जग्राह च ॥ २८ ॥

रा० टी०—गृहीतमिति । शोणिताक्षः भ्रातरं गृहीतं दृष्ट्वा द्विविदं वक्षसि आजघान ॥ २९ ॥

रा० टी०—स इति । तेन शोणिताक्षेण अभिहतः स द्विविदः चचाल पुनरनन्तरं तस्य शोणिताक्षस्य गदां जहार च ॥ ३० ॥

३२–३४] ति० टी०—एतस्मिन्नन्तरे शोणिताक्षताडिते द्विविदे । शोणिताक्षगदां गृह्याने सतीत्यर्थः । भ्रातृसहायार्थं तत्समीपमागमत् । प्लवंगाभ्यां मैन्दद्विविदाभ्याम् । आकर्ष-आकर्षणम् । उत्पाटनमुत्थानम् ॥ ३२–३४ ॥

रा० टी०—एतस्मिन्निति । एतस्मिन्नन्तरे समये मैन्दः द्विविदाभ्याशमागमत् अर्द्धं पृथक्—ताविति । शोणिताक्षयूपाक्षौ प्लवगाभ्यां मैन्दद्विविदाभ्यामाकर्षमाकर्षणमुत्पाटनमुत्थायाथः पातनं च चक्रतुः ॥ ३१ ॥

रा० टी०—द्विविद इति । स द्विविदः शोणिताक्षं भ्रातरं विददार क्षितावाविध्य निष्पिपेष च ॥ ३२ ॥

रा० टी०—यूपाक्षमिति । मैन्दः यूपाक्षं बाहुभ्यां पाडयामास अत एव हतस्सयूपाक्षः क्षितौ पपात ॥ ३३ ॥

गो० टी०—ताविति । प्लवङ्गाभ्यां मैन्दद्विविदाभ्याम् आकर्षोत्पाटनम् आकर्षणताडने । अन्योन्यमिति शेषः ३२–३४ ॥

३५] ति० टी०—कुम्भकर्णात्मजो यतः । यथ तत्रेत्यर्थः ३५ ॥

रा० टी०—हतेति । हताः प्रवीराः यस्याः अत एव व्यथिता राक्षसेन्द्रचमूः यतः यत्र कुम्भकर्णात्मजः तदभिमुखी सती जगाम ॥ ३५ ॥

३६–३८] ति० टी० सान्त्वयत्समान्वयत् । उत्कृष्टं रभसं कुम्भो लब्धलक्षैर्महावीर्यैस्तत्रस्थविभीषणेनैर्निपातितमहावीरां चमूं दृष्ट्वा रणे सुदुष्करं कर्म चक्रे इति संबन्धः ॥ ३६–३८ ॥

रा० टी०—आपतन्तीमिति । कुम्भः आपतन्तीं स्वसमीपमागच्छन्तीम् चमूं सान्त्वयत् आसान्त्वयत् अर्द्धं पृथक् ॥ ३६ ॥

गो० टी०—आपतन्तीमित्यर्धम् । सान्त्वयत् असान्त्वयत् ॥ ३६ ॥

रा० टी०—अथेति । उत्कृष्टं महत् रक्षः कुम्भः लब्धलक्षैः प्राप्तावसरैः प्लवङ्गमैः निपातितमहावीरां चमूं दृष्ट्वा सुदुष्करमन्यैः कर्तुमशक्यं कर्म चक्रे सार्द्धश्लोक एकान्वयी ॥ ३६ ॥

रा० टी०—तत्कर्मार्ह—स इति । सुसमाहितः स कुम्भ धनुः प्रगृह्य शरान् मुमोच ॥ ३७ ॥

गो० टी०—अथेत्यादिसार्धश्लोक एकान्वयः । लब्ध लक्षैः अप्रतिद्वन्द्विभिः ॥ ॥ ३७–३८ ॥

३९–४०] ति० टी०—तस्य कुम्भस्य तत्सशरं धनुर्वि

१ महावक्त्र इति गो.रा.पाठः। २ गदामप्रेप्सुरिति गो.पाठः। ३ तदेति रा. गदेति गो.पाठः। ४ वीरो मैन्दो वानरयूथप इति गो.पाठः। ५ इदमर्धमधिकं गो. पुस्तके। ६ च वेगेनेति गो. पाठः। ७ भूमाविति रा. पाठः। ८ यूथप इति गो. पाठः। ९ क्षुत इति गो. पाठः। १० तत इति गो. पाठः।

सहसाभिहतस्तेन विप्रमुक्तपदः स्फुरन् । निपपात त्रिकूटाभो विह्वलन्प्लवगोत्तमः ॥ ४१ ॥
मैन्दस्तु भ्रातरं तत्र भग्नं दृष्ट्वा महाहवे । अभिदुद्राव वेगेन गृहीत्वा विपुलां शिलाम् ॥ ४२ ॥
तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः । बिभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः ॥ ४३ ॥
संधाय चान्यं सुमुखं शरमाशीविषोपमम् । आजघान महातेजा वक्षसि द्विविदाग्रजम् ॥ ४४ ॥
स तु तेन प्रहारेण मैन्दो वानरयूथपः । मर्मण्यभिहतस्तेन पपात भुवि मूर्च्छितः ॥ ४५ ॥
अङ्गदो मातुलौ दृष्ट्वा मथितौ तु महाबलौ । अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम् ॥ ४६ ॥
तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः । त्रिभिश्चान्यैस्त्रिभिर्बाणैर्मातंगमिव तोमरैः ॥
सोऽङ्गदं बहुभिर्बाणैः कुम्भो विव्याध वीर्यवान् ॥ ४७ ॥
अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः । अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते ॥ ४८ ॥
शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह । स प्रचिच्छेद तान्सर्वान् बिभेद च पुनः शिलाः ॥ ४९ ॥
कुम्भकर्णात्मजः श्रीमान्वालिपुत्रसमीरितान् । आपतन्तं च संप्रेक्ष्य कुम्भो वानरयूथपम् ॥ ५० ॥
भ्रुवौ विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम् । तस्य सुस्राव रुधिरं पिहिते चास्य लोचने ॥ ५१ ॥
अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते । सालमासन्नमेकेन परिजग्राह पाणिना ॥ ५२ ॥

पुदैरावतसंबन्धतोऽर्चिष्मद्वाममानं द्वितीयेन्द्रधनुर्यथापरमिन्द्रधनुरिव भूयः शुशुभे । विद्युल्लक्षस्थानीया । ऐरावतोऽभ्रमातङ्गस्तस्येन्द्रधनुषा संबन्धात् । 'इन्द्रायुधं त्विन्द्रधनुस्तदेव ऋजु रोहितम्' । ऐरावतं ऋजुरोहिन्द्रधनुस्तयुक्तं च । स्वाभाविकमिन्द्रधनुरित्यर्थः । एतच्चोत्पातकाले भवतीत्यर्थ इति तीर्थः ॥३९॥

रा० टी०-तस्येति । सशरं तस्य कुम्भस्य धनुः भूयोऽधिकं शुशुभे तत्र दृष्टान्तः विद्युदैरावतयोरर्चिष्मत् प्रभावि-शिष्टं द्वितीयेन्द्रधनुर्यथा विद्युल्लक्षस्थानीयशरः ऐरावतस्थानीयः राक्षसदेहः उपमानसम्बन्धः उत्पाते प्रसिद्धः अभूतोपमा वा ३८

गो० टी०-तस्येति । विद्युदैरावताभ्याम् अर्चिष्मत् । विद्युल्लक्षस्थानीया विद्युत् बाणस्थानीयमैरावतम् ऐरावतं नाम दीर्घेन्द्रधनुः इन्द्रायुधं शक्रधनुस्तदीयमृजुरोहितम् । ऐरावतं चेति वैजयन्ती । एवंभूतं द्वितीयमिन्द्रधनुरिव स्थितम् । ऐरावतादिसंयोग उत्पातकाले भवति अभूतोपमा वा ॥ ३९ ॥

रा० टी०-आकर्णेति । आकर्णं कृष्टेन पश्चान्मुक्तेन पत्रं पुङ्खावेव वाम्रो यस्य तेन हाटकपुंखेन पत्रिणा शरेण द्विविदं जघान कुम्भ इति शेषः ॥ ३९ ॥

गो० टी०-आकर्णेति । हाटकं स्वर्णम् । पत्रिणा बाणेन । पत्रवाससा वासःस्थानीयपङ्क्तपत्रेण ॥ ४० ॥

४१-४२] ति० टी०-विप्रमुक्तपदे विप्रमुक्तं प्रसारितं पदं येन सः ॥ ४१ ॥ ४२ ॥

रा० टी०-सहसेति । तेन शरेण अभिहतः अत एव विप्रमुक्ते प्रस्खलिते पदे पादौ यस्य स प्लवगोत्तमो द्विविदः स्फुरन् प्रकाशमानः विह्वलन् च सन् निपपात ॥ ४० ॥

रा० टी०-मैन्द इति । मैन्दः भ्रातरं भग्नं दृष्ट्वा अभिदुद्राव ॥ ४१ ॥

गो० टी०-सहसेति । विप्रमुक्तपदः शिथिलपदविन्यासः । स्फुरन् चलन् । विह्वलः विवशः सन् ॥ ४१-४६ ॥

४३-५२] ति० टी०-प्रसन्नैरुनेजितैः ॥ ४३-५२ ॥

रा० टी०-तामिति । महाबलो मैन्दः तां गृहीतां शिलां राक्षसाय कुम्भाय प्रचिक्षेप कुम्भः प्रसन्नैः भासमानैः शरैः तां शिलां बिभेद ॥ ४२ ॥

रा० टी०-संधायेति । महातेजा कुम्भः अन्यं शरं संधाय द्विविदाग्रजं मैन्दं वक्षसि आजघान ॥ ४३ ॥

रा० टी०-स इति । तेन कुम्भेन कर्त्रा तेन कुम्भकृतेन प्रहारेण मर्मण्यभिहतो मैन्दो भुवि पपात ॥ ४४ ॥

रा० टी०-अङ्गद इति । अङ्गदः मातुलौ मैन्दद्विविदौ मथितौ हिंसितप्रायौ दृष्ट्वा कुंभमभिदुद्राव ॥ ४५ ॥

रा० टी०-तमिति । कुम्भः आपतन्तं तमङ्गदं त्रिभिरन्यैर्बाणैः तोमरैर्मातङ्गमिव विव्याध ॥ ४६ ॥

गो० टी०-तमिति । तोमरैः अङ्कुशैः ॥ ४७ ॥

रा० टी०-स इति । स कुम्भः अकुण्ठधारैर्वर्तुभिर्विशिखैः शिखारहितैर्बाणैरङ्गदं विव्याध ॥ ४७ ॥

गो० टी०-स इति । अकुण्ठधारैः अभग्नाग्रैः । निशितैः उत्कृष्टैः । तीक्ष्णैः अयोमयैः । तीक्ष्णं गरे मृधे लोह इति रत्नमाला ॥ ४८ ॥

रा० टी०-अङ्गद इति । प्रतिविद्धांगोप्यङ्गदो न कम्पते अकम्पत तस्य कुम्भस्य मूर्ध्नि शिलापादपवर्षाणि ववर्ष च॥४८॥

---

१ अद्रिकूटेति गो. पाठः । २ विह्वल इति गो. पाठः । ३ दृष्ट्वा भग्नं तत्रेति गो. रा. पाठः । ४ महतीमिति गो. पाठः । ५ पतितामिति गो. पाठः । ६ क्षिप्तेरिति गो. रा. पाठः । ७ विविधैरिति गो. पाठः । ८ विद्धति गो. रा. पाठः । ९ भ्रुवोरिति गो. रा. पाठः ।

संपीड्योरसि सस्कन्धं करेणाभिनिवेश्य च । किंचिदभ्यवनम्यैनमुन्ममाथ महारणे ॥ ५३ ॥
तमिन्द्रकेतुप्रतिमं वृक्षं मन्दरसंनिभम् । समुत्सृजत वेगेन मिषतां सर्वरक्षसाम् ॥ ५४ ॥
स चिच्छेद शितैर्बाणैः सप्तभिः कायभेदनैः । अङ्गदो विव्यधेऽभीक्ष्णं स पपात मुमोह च ॥ ५५ ॥
अङ्गदं पतितं दृष्ट्वा सीदन्तमिव सागरम् । दुरासदं हरिश्रेष्ठा राघवाय न्यवेदयन् ॥ ५६ ॥
रामस्तु व्यथितं श्रुत्वा वालिपुत्रं महाहवे । व्यादिदेश हरिश्रेष्ठाञ्जाम्बवत्प्रमुखांस्ततः ॥ ५७ ॥
ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम् । अभिपेतुः सुसंक्रुद्धाः कुम्भमुद्यतकार्मुकम् ॥ ५८ ॥
ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः । रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः ॥ ५९ ॥
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः । कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः ॥ ६० ॥
समीक्ष्यापततस्तांस्तु वानरेन्द्रान्महाबलान् । आववार शरौघेण नगेनेव जलाशयम् ॥ ६१ ॥
तस्य बाणपथं प्राप्य न शेकुरपि वीक्षितुम् । वानरेन्द्रा महात्मानो वेलामिव महोदधिः ॥ ६२ ॥
तांस्तु दृष्ट्वा हरिगणाञ्शरवृष्टिभिरर्दितान् । अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः ॥ ६३ ॥

गो० टी०—अङ्गद इति । न क्रम्पते नाकम्पत ॥ ४९ ॥

रा० टी०—स इति । कुम्भकर्णात्मजः स कुम्भः वालिपुत्रसमीरितान् प्रक्षिप्तान् सर्वान् तान् तरून् प्रचिच्छेद शिलाश्च विभेद ॥ ४९ ॥

रा० टी०—आपतन्तमिति । कुम्भः आपतन्तं वानरयूथपमङ्गदं संप्रेक्ष्य बाणाभ्यां भ्रुवोर्विव्याध ॥ ५० ॥

रा० टी०—तस्येति । तस्यांगदस्य रुधिरं स्रुस्राव अत एव अस्याङ्गदस्य लोचने पिहिते रुधिरेणाच्छादिते अभवतामिति शेषः अर्द्धं पृथक् ॥ ५१ ॥

रा० टी०—अङ्गद इति । अङ्गदः रुधिरेण उक्षिते सिक्ते नेत्रे पिधाय आसन्नं समीपवर्तिनं शालमेकेन पाणिना जघाह॥५२॥

गो० टी०—स इति । तान् द्रुमान् प्रचिच्छेद शिलाः विभेदेत्यन्वयः ॥ ५० ॥ ५२ ॥

५३] ति० टी०—सस्कन्धमेतं सालशुरसि निवेश्यैकेन करेण संपीड्य सूक्ष्मशाखां किंचिदवनम्योन्ममाथ निष्पत्रं कृतवान्५३

रा० टी०—ग्रहणप्रकारमाह—सम्पीड्येति । सस्कन्धं शाखासहितं तरुं करेण एकपाणिना उरसि अभिनिवेश्य किंचित् अभ्यवनम्य सम्पीड्य पत्रादिरहितं कृत्वा गज इव उन्ममाथ सूक्ष्मशाखारहितं चकार ॥ ५३ ॥

गो० टी०—संपीड्येति । एकहस्तस्य नेत्रपिधानव्याकृतत्वादेकहस्तेनोत्पाटनासम्भवादुरसि संपीड्येत्युक्तम् । अभिनिवेश्य । अभिगृह्येत्यर्थः ॥ ५३—५८ ॥

५४] ति० टी०—समुत्सृजत समुदसृजत् ॥ ५४ ॥

रा० टी०—तमिति । इन्द्रकेतुप्रतिमं तं वृक्षं सर्वरक्षसां पश्यतां सतां समुत्सृजत समुदसृजत ॥ ५४ ॥

५५—६०] ति० टी०—अभीक्ष्णं विव्यधे । पुनः पुनः क्रियमाणेन युद्धेनेति भावः ॥ ५५—६० ॥

रा० टी०—स इति । स कुंभः सप्तभिर्बाणैः विच्चिछेद द्रुमानिति शेषः अत एव सः छेदितद्रुमः पाण्योरङ्गदः विव्यधे अत एव पपात मुमोह च ॥ ५१ ॥

रा० टी०—अङ्गदमिति । सागरं इव सीदन्तं पतितमङ्गदं दृष्ट्वा हरिश्रेष्ठाः राघवाय रामाय न्यवेदयन् ॥ ५६ ॥

रा० टी०—राम इति । रामः वालिपुत्रे व्यथितं श्रुत्वा हरिश्रेष्ठान् व्यादिदेश ॥ ५७ ॥

रा० टी०—ते इति । वानरशार्दूलाः रामस्य शासनं श्रुत्वा कुम्भमभिपेतुः ॥ ५८ ॥

रा० टी०—तदेवभंगयन्तरेणाह—तत इति । द्राभ्यां अङ्गदं रिरक्षिषन्तो वानरर्षभाः अभ्यपतन् ॥ ५९ ॥

रा० टी०—जाम्बवानिति । जाम्बवत्प्रमुखाः कुम्भकर्णात्मजं समभिदुद्रुवुः ॥ ६० ॥

गो०टी०—तत इति । रिरक्षिषन्तः रक्षितुमिच्छन्तः५९-६१

६१-६२] ति० टी०—आववारावरोधं । नगेन पर्वतेन जलाशयं जलप्रवाहमिव ॥ ६१ ॥ ६२ ॥

रा० टी०—समीक्ष्येति । आपतनो वानरेन्द्रान् समीक्ष्य नगेन वृक्षेण जलाशयमिव शरौघेणावार ॥ ६१ ॥

गो० टी०—समीक्ष्येति । जलाशयं जलप्रवाहम् । नगेनेव वृक्षेणेव । वृक्षौघपरोयं शब्दः ॥ ६२ ॥

रा० टी०—तस्येति । तस्य कुम्भस्य बाणपथं प्राप्य महात्मानोपि वानरेन्द्राः महोदधिर्वेलामिव अतिवर्तितुं न शेकुः ॥ ६२ ॥

गो० टी०—तस्येति । अतिवर्तितुम् अतिक्रम्याभिमुख्येन गन्तुम् ॥ ६३ ॥

६३] ति० टी०—भ्रातृजं भ्रातृपुत्रम् । प्लवगेश्वरः सुग्रीवः । एतदन्तमष्टमीरात्रौ युद्धम । अतः परं नवमीदिनयुद्धम् ६३

१ चोरसि स्कन्धमिति गा. पाठः । २ यथागज इति गो. रा. पाठः । ३ पश्यतामिति गो. रा. पाठः । ४ वभेदेति गो.पाठः । ५ ससादेति गो. पाठः । ६ व्यधेतमिति गो. पाठः । ७ सागरे इति गो. रा. पाठः । ८ अर्द्धं रामायान्ये इति गो. पाठः । ९ अतिवर्तितुमिति गो. रा. पाठः ।

अभिदुद्राव सुग्रीवः कुम्भकर्णात्मजं रणे । शैलसानुचरं नागं वेगवानिव केसरी ॥ ६४ ॥
उत्पाट्य च महावृक्षानश्वकर्णादिकान्बहून् । अन्यांश्च विविधान्वृक्षांश्चिक्षेप स महाकपिः ॥ ६५ ॥
तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम् । कुम्भकर्णात्मजः श्रीमांश्चिच्छेद स्वैश[1]रैः शितैः ६६ ॥
[अभिलक्षेण तीव्रेण कुम्भेन निशितैः शरैः ।]
अर्दितास्ते द्रुमा रेजुर्यथा घोराः शतह्रदाः । द्रुमवर्षं तु तद्भिन्नं दृष्ट्वा कुम्भेन वीर्यवान् ॥ ६७ ॥
वानराधिपतिः श्रीमान्महासत्त्वो न विव्यथे । स विध्यमानः सहसा सहमानस्तु[2] ताञ्छरान् ६८ ॥
कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुष्प्रभम् । अवप्लुत्य धनुः[3] शीघ्रं कृत्वा कर्म सुदुष्करम् ॥ ६९ ॥
अब्रवीत्कुपितः कुम्भं भग्नशृङ्गमिव द्विपम् । निकुम्भाग्रज वीर्यं ते बाणवेगं तदद्भुतम् ॥ ७० ॥
संनतिश्च प्रभावश्च तव वा रावणस्य वा । प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम ॥ ७१ ॥
एकस्त्वमनुजातोऽसि पितरं बलवत्तरम्[4] । त्वामेवैकं महाबाहुं शूलहस्तमरिंदमम् ॥ ७२ ॥
त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः । विक्रमस्व महाबुद्धे कर्माणि मम पश्य[5] च ॥ ७३ ॥

रा० टी०–तानिति । सुग्रीवः शरवृष्टिभिरर्दितान् हरिगणान् दृष्ट्वा अङ्गदं पृष्ठतः कृत्वा कुम्भकर्णात्मजमभिदुद्राव तत्र दृष्टान्तः शैलसानुचरं तं नागं गजं केसरीव श्लोकद्वयमेकान्वयि ॥ ६३ ॥ ६४ ॥

गो० टी०–तांस्त्विति[6]श्लोकद्वयमेकान्वयम् । अङ्गदं पृष्ठतः कृत्वा । अन्यथा हन्यादिति भावः । शैलसानुचरं शैलसानुचरत्वेनातिबलम् । गिरिचर इव नागः प्राणसारं बिभर्तीति कालिदासोक्तेः ॥ ६४ ॥ ६७ ॥

६४-६९] ति० टी०–शैलसानुषु चरति तं नागं गजम् ॥ ६४–६९ ॥

रा० टी०–उत्पाट्येति । महाकपिस्सुग्रीवः अश्वकर्णादिकान् वृक्षान् चिक्षेप ॥ ६५ ॥

रा० टी०–तामिति । आकाशं छादयन्तीं नगवृष्टिं कुम्भकर्णात्मजः चिच्छेद ॥ ६६ ॥

रा० टी०–अर्दिता इति । अर्दिताः शतह्रदा इव अर्दिताः द्रुमाः रेजुः अर्द्धं पृथक् द्रुमेति । वानराधिपतिस्सुग्रीवः कुम्भेन भिन्नं द्रुमवर्षं दृष्ट्वापि न विव्यथे ॥ ६७ ॥

रा० टी०–स इति । भिद्यमानः स सुग्रीवः शरान् सहमानस्सन् कुम्भस्य धनुराक्षिप्य बभञ्ज ॥ ६८ ॥

रा० टी०–अवप्लुत्येति । कृपितस्सुग्रीवः दुष्करं कर्म धनुर्भग्नक्रियां कृत्वा अवप्लुत्य भग्नशृङ्गं विध्वस्तदन्तं द्विपमिव कुम्भमब्रवीत् ॥ ६९ ॥

गो० टी०–अभिलक्षेणेति । अभिलक्षेण अभिगतलक्ष्येण । आचिताः सर्वतो नीरन्ध्रतया व्याप्ताः । शतह्रदाः । शङ्कुचिता आयुधविशेषाः ॥ ६८ ॥ ७१ ॥

७०] ति० टी०–अथ कुम्भस्य शौर्यं स्तौति—निकुम्भाग्रजेति । वेगशब्दोऽर्थचादिः ॥ ७० ॥

रा० टी०–तदाकारमाह—निकुम्भेत्यादिभिः । हे निकुम्भाग्रज बाणस्य वेगो येन तत्ते वीर्यमद्भुतमिति शेषः अत एव संनतिः स्वजनप्रवणता प्रभावः तेजः च तव रावणस्य च एव एवं नान्यराक्षसेषु दृष्टाविति[7]यर्थः एको वा शब्दश्चार्थे ॥ ७० ॥

गो० टी०–निकुम्भाग्रजेति । वीर्यस्य बाणवेगवत्त्वं तद्धेतुत्वात् । संनतिः राक्षसेषु विनयः राक्षसप्रावण्यं वा । कम्पनप्रजाघ्न्यपाक्षशोणिताक्षमारकाणामक्षदमेन्द्रद्विविदानां निराकरणाद्राक्षसप्रावण्योक्तिः । तव वा रावणस्य वा । रावणतुल्या तव संनतिरित्यर्थः ॥ ७० ॥

७१] ति० टी०–संनतिः स्वजनप्रावण्यम् । प्रभावः प्रतापः । तव वा रावणस्य वा । नान्यस्य । युष्मास्वित्यर्थः । प्रह्लादबल्योर्वृत्रघ्नादीनां चोपमा यस्य तम् ॥ ७१ ॥

रा० टी०–प्रह्लादेति । प्रह्लादाद्युपम एक एव त्वं पितरमनुजातः पित्रा सदृशोसि ॥ ७१ ॥

गो० टी०–प्रह्लादेति । पितरमनुजातोसि पित्रा सदृशोसीत्यर्थः । बलवृत्तसदृशः बलव्यापारेण ॥ ७२ ॥

७२–७३] ति० टी०–पितरमनुजातोऽसि पित्रा सदृशोऽसि ॥ ७२ ॥ ७३ ॥

रा० टी०–त्वामिति । त्वामेवैकं त्रिदशा देवाः जितेन्द्रियमाधय इव नातिवर्तन्ते अतो विक्रमस्व मम कर्माणि पश्य च सार्द्धश्लोक एकान्वयी ॥ ७२ ॥ ७३ ॥

गो० टी०–त्वामिति । नातिवर्तन्ते न धर्षयन्तीत्यर्थः ७४

गो० टी०–विक्रमस्वेत्यर्धम् । कर्माणि युद्धकर्माणि प्रति । विक्रमस्व पराक्रमं कुरु । युद्धकर्मसिद्ध्यर्थं पराक्रमं कुर्वित्यर्थः ॥ ७५ ॥

---

१ वेगेनेति रा. वेगेन सुग्रीवः कुम्भमाहवेइति गो. पाठः । २ शैलानिति गो. अश्वकर्णान् । श्वानिति गो. रा. पाठः । ३ च महावक्ष इति गो. पाठः । ४ शीघ्रमिति गो. रा. पाठः । ५ निशितैः । ६ शरैरिति गो. रा. पाठः । ७ इदमर्धमधिकं गो. पुस्तके । ८ आचिता इति गो. पाठः । ९ समिध्यमान इति रा. निर्भिद्यमान इति गो. पाठः । १० वेति गो. पाठः । ११ तत इति गो. पाठः । १२ वेगवदिति गो. पाठः । १३ वृत्तत इति गो. पाठः । १४ चापेति गो. पाठः । १५ पदयत इति गो. पाठः ।

वरदानात्पितृव्यस्ते सहते देवदानवान । कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान ॥ ७४ ॥
धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च । त्वमद्य रक्षसां लोके श्रेष्ठोऽसि बलवीर्यतः ॥ ७५ ॥
महाविमर्दं समरे मया सह तवाद्भुतम् । अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव ॥ ७६ ॥
कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम् । पतिता हरिवीराश्च त्वयैते भीमविक्रमाः ॥ ७७ ॥
उपालम्भभयाच्चैव नासि वीर मया हतः । कृतकर्मपरिश्रान्तो विश्रान्तः पश्य मे बलम्॥ ७८ ॥
तेन सुग्रीववाक्येन सावमानेन मानिनः । अग्नेराज्यहुतस्येव तेजस्तस्याभ्यवर्धत ॥ ७९ ॥
ततः कुम्भस्तु सुग्रीवं बाहुभ्यां जगृहे तदा । गजाविवावतैमदौ निःश्वसन्तौ मुहुर्मुहुः ॥ ८० ॥
अन्योन्यगात्रग्रथितौ परिपन्नावितस्ततः । मधूमां मुखतो ज्यायां विसृजन्तौ परिश्रमात्॥ ८१ ॥
तयोः पादाभिघाताच्च निमग्ना चाभवन्महीं । व्याधूर्णिततरुश्चैव चुक्षुभे वरुणालयः ॥ ८२ ॥
ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि । पातयामास वेगेन दर्शयन्बलमुत्थैः स्थलम् ॥ ८३ ॥

७४–७५] ति० टी०–पितृव्यो रावणः । कुम्भकर्णस्तु वीर्येण शरीरबलेन सुरासुरान्सहते त्वं तथाभ्यामित्यर्थः ॥७४॥

रा० टी०–वरदानादिति । ते पितृव्यो रावणः वरदानात् देवदानवान् सहते अतिक्रमते कुम्भकर्णस्तु वीर्येण शरीरबलेन सुरासुरान् सहते ॥ ७४ ॥

रा० टी०–धनुषीति । त्वं यद्यपि धनुर्विद्यायां इन्द्रजित्तुल्यः प्रतापे रावणस्य च तुल्योऽसि अतः बलवीर्यतः रक्षसां श्रेष्ठोऽसि ॥ ७५ ॥

गो० टी०–वरदानादिति । पितृव्यः रावणः वरदानात् देवदानवान् सहते । कुम्भकर्णस्तु वीर्येण शारीरबलेन सुरासुरान् सहते । रौद्रं शक्रोचितमित्यर्थः । त्वं तु ताभ्यामप्यभ्यधिकान् सहस इति भावः ॥ ७५ ॥ ७७ ॥

७६–७७] ति० टी०–मे तव मया सह महाविमर्दं महाप्रहारम् ॥ ७६ ॥ ७७ ॥

रा० टी०–महेति । अद्यैतं मया सह तव विमर्दं युद्धं समरं संग्रामभूमौ भूतानि पश्यन्तु ॥ ७६ ॥

रा० टी०–कृतमिति । त्वया भीमविक्रमा हरिवीराः पातिताः अतः अप्रतिमं अन्यस्यासदृशं कर्म त्वया कृतम् ॥ ७७॥

गो० टी०–महाविमर्दमिति । महाविमर्दं महाप्रहारम् ॥ ७८ ॥ ७९ ॥

७८] ति० टी०–उपालम्भभयाद्बहुभिः सह युद्धेन श्रान्तः कुम्भः सुग्रीवेण हत इति निन्दाभीरुत्वेत्यर्थः ॥ ७८ ॥

रा० टी०–उपालम्भेति । उपालम्भभयात् युद्धे श्रान्तः कुम्भः बहुभिस्सह सुग्रीवेण हतः इति निन्दाभीतेः परिश्रांतस्त्वं मया न हतोऽसि अतो विश्रान्तस्त्वं मे बलं पश्य ॥७८॥

गो० टी०–उपालम्भेति । उपालम्भभयात् बहुभिः सह युद्धेन श्रान्तो हत इत्यपवादभयात् ॥ ८० ॥

७९] ति० टी०–सावमानेन कृतकर्मेत्यादिना ॥ ७९ ॥

रा० टी०–तेनेति । सावमानेन उपालम्भावहतोऽसीत्यावमानसहितेन सुग्रीववाक्येन कृतमप्रतिमित्यादिसावमानितेन सता कृतो मे दीप्तिरित्यर्थः । अत्र पक्षे आज्यहुतस्य तेज इव तस्य कुम्भस्य तेजोऽभ्यवर्धत ॥ ७९ ॥

गो० टी०–तेनेत्यादि । सावमानेन मानिनः । बहुमानेन आत्मानमभिमानिनं इत्यर्थः । तस्य तथा मानितस्य कुम्भस्य ॥ ७९॥

८०–८२] ति० टी०–ततो गजावित्यादिना तेजो व्याख्यातमित्यर्थः ॥ ८० ॥ ८१ ॥

रा० टी०–तत इति । ततोऽनन्तरं कुम्भसुग्रीवौ तयोर्युद्धे कृतके गजाविति । यथौ तौ गजौ विव निःश्वसन्तौ अन्योन्यगात्रग्रथितौ ग्रथितौ इतस्ततः इतश्चेतश्च परिश्रमात् मुखतो ज्यायां विसृजन्तौ वहन्तौ इति शेषः सा ईर्ष्योक्ता ॥ ८० ॥ ८१ ॥

रा० टी०–तयोरिति । तयोः कुम्भसुग्रीवयोः पादाभिघातात् महीं निमग्नां अधः प्रविष्टां वरुणालयश्चाभवत् क्षुभितश्चाभवत् ॥ ८२ ॥

गो० टी० सद्यश्चित्यादिनाऽर्धमर्थोक्तं स्वयं व्य । व्याधूर्णितस्तरुर्यत्र । अन्योन्यगात्रग्रथितौ अन्योन्यगात्रेषु ग्रथितौ । परिश्रमात् बहुक्षणश्रमात् मुखतः स्वमुखं प्रति विसृजन्तौ । वमन्तावित्यर्थः शेषः ॥ ८० ॥ ८१ ॥

८३] ति० टी०–दर्शयन्बलमित्यत्र । स्थलम् । स्थलं दर्शयन् दर्शयन्नित्यर्थः । लवणाम्भसि कुम्भं पातयामास । 'उरः पेरन्तलम्' इति पाठे तत्रोरसोऽवयवोऽम्भसि पातयामासेत्यर्थः ॥ ८३ ॥

रा० टी०–तत इति । सुग्रीवः कुम्भं समुत्क्षिप्य उदधेः तदे दर्शयन्स्वं बलमम्भसि पातयामास ॥ ८३ ॥

गो० टी०–तत इति । दर्शयन्बहुवेलस्थलम् । निकुम्भे यथा उदधितले पश्येत्तथा वेगेन पातयामासेत्यर्थः । तत इति अनयोजनविस्तीर्णविकटशिखरमध्ये गृह्यन् सुग्रीवः कुम्भं लङ्काद्वीपतले लवणाम्भसि पातयामासेत्यभिधानात् सुग्रीवस्यापरिमेयबलत्वं गीयते ॥ ८४ ॥

१ त्वया वै इति गो. पाठः । २ अपीति गो. रा. पाठः । ३ आहवेति गो. पाठः । ४ कर्मस्वीति गो. रा. पा. । ५ तलमिति गो. पाठः ।

ततः कुम्भनिपातेन जलराशिः समुत्थितः । विन्ध्यमन्दरसंकाशो विससर्प समन्ततः ॥ ८४ ॥
ततः कुम्भः समुत्पत्य सुग्रीवमभिपात्य च । आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ॥ ८५ ॥
तस्य वर्म च पुस्फोट संजज्ञे चापि शोणितम् । तस्य मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले ॥ ८६ ॥
तस्य वेगेन तत्रासीत्तेजः प्रज्वलितं महत् । वज्रनिष्पेषसंजाता ज्वाला मेरोर्यथा गिरेः ॥ ८७ ॥
स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः । मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ ८८ ॥
अर्चिःसहस्राविकैंचरविमण्डलवर्चसम् । स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान्॥८९ ॥
स तु तेन प्रहारेण विह्वलो भृशपीडितः । निपपात तदा कुम्भो गतार्चिरिव पावकः ॥ ९० ॥
मुष्टिनाभिहतस्तेन निपपाताशु राक्षसः । लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ॥ ९१ ॥
कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना । बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः ॥ ९२ ॥

तस्मिन्हते भीमपराक्रमेण प्लवंगमानामृषभेण युद्धे ।
मही सशैला सवना चचाल भयं च रक्षांस्यधिकं विवेश ॥ ९३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

८४-८५] ति० टी०-विन्ध्यमन्दरसंकाशः कुम्भस्ततो जलात्समुत्पत्येत्यन्वयः ॥ ८४ ॥ ८५ ॥

रा० टी०-तत इति । कुम्भनिपातेन समुत्थितो जलराशिः समंततो विससर्प ॥ ८४ ॥

गो० टी०-तत इति । विससर्प अभ्यवर्धत ॥ ८५ ॥

रा० टी०-तत इति । कुम्भस्सुग्रीवमभिपत्य समीपं प्राप्य उरसि आजघान ॥ ८५ ॥

गो० टी०-ततः कुम्भ इति । स्पष्टः ॥ ८६ ॥

८६-८७] ति० टी०-पुस्फोट भिन्नम । स तस्य मुष्टिः सुग्रीवास्थिमण्डले प्रतिजघ्ने प्रतिहतः ॥ ८६ ॥ ८७ ॥

रा० टी०-तस्येति । तस्य सुग्रीवस्य वर्म कवचं पुस्फोट शोणितं च संजज्ञे तस्य कुम्भस्य मुष्टिस्तु अस्थिमण्डले सुग्रीवास्थिसमूहे प्रतिजघ्ने वेगवत्तां प्राप ॥ ८६ ॥

गो० टी०-तस्येति । पुस्फोट विभिन्नम । स चेति । सः मुष्टिः सुग्रीवस्यास्थिमण्डले प्रतिजघ्ने प्रतिहतः । मोघो बभूवेत्यर्थः । स च मुष्टिर्महावेग इति पाठः ॥ ८७ ॥

रा० टी०-तस्येति । तस्य मुष्टेर्वेगेन तत्रास्थिमण्डले प्रज्वलितं तेज आसीत् तत्र दृष्टान्तः मेरोर्ज्वालेव ॥ ८७ ॥

गो० टी०-तदेति । वेगेन कुम्भवेगेन । तत्र सुग्रीववक्षसि तेजः संघट्टजम् प्रज्वलितमासीत् । वज्रनिष्पेषसंजाता इन्द्रेण पक्षच्छेदकाले वज्रसंघट्टजन्येत्यर्थः ॥ ८८ ॥

८८] ति० टी०-तत्रोरसि ॥ ८८ ॥

रा० टी०-स इति । तेन कुम्भेन अभिहतस्ताडितस्सुग्रीवो मुष्टिं संवर्तयामास भ्रामयामास ॥ ८८ ॥

गो० टी०-स तत्रेति । संवर्तयामास चकारेत्यर्थः ॥८९॥

८९-९०] ति० टी०-अर्चिःसहस्रेण विकचं यद्रविमण्डलं तत्समानवर्चस्कम् ॥ ८९ ॥ ९० ॥

रा० टी०-अर्चिरिति । स सुग्रीवः अर्चिःसहस्रेण विकचं प्रकाशितं यत् रविमण्डलं तद्वद्वर्चस्तेजो यस्य तं मुष्टिं कुंभस्योरसि पातयामास ॥ ८९ ॥

रा० टी०-स इति । तेन प्रहारेण भृशं पीडितः अत एव विह्वलः अपगतस्मृतिः कुम्भो निपपात ॥ ९० ॥

गो० टी०-अर्चिरिति । अर्चिःसहस्रविकचस्य अर्चिःसहस्राततमित्यर्थः । अत एव रविमण्डलसप्रभम् ॥ ८९-९२ ॥

९१] ति० टी०- यदृच्छया दैवाधीनतः । कदाचिद्भूम्यां पतितो लोहिताङ्गो भौम इव पपात ॥ ९१ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—मुष्टिनेति । मुष्टिनाभिहतो राक्षसः आकाशात् लोहिताङ्गो भौम इव निपपात ॥९१॥

९२-९३] ति० टी०-मुष्टिनोरसि भग्नस्य पततः कुम्भस्य रूपं रुद्रेणाभिपन्नस्याभिहतस्य गवां पतेः सूर्यस्येव ९२॥९३

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

रा० टी०-कुम्भस्येति । उरसि भग्नस्य अत एव पततः कुम्भस्य रूपं रुद्रेणाभिपन्नस्याभिहतस्य गवां पतेः सूर्यस्य रूपमिव बभौ ॥ ९२ ॥

गो० टी०-कुम्भस्येति । गवां पतेः सूर्यस्य ॥ ९३ ॥

रा० टी०-तस्मिन्निति । प्लवंगमानामृषभेण तस्मिन् कुम्भे हते सति मही चचाल रक्षांसि भयं विवेश च ॥ ९३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

१ वेगेनेति गो. पाठः । २ बहु सुस्रावेति गो. पाठः । ३ स चेति गो. रा. पाठः । ४ तदेति गो. पाठः । ५ मुद्गरिति गो.पाठः । ६ मेरौ गिराविवेति रा. मेरौ यथा गिराविति गो. पाठः । ७ विकचमिति गो. पाठः । ८ सप्रभमिति गो. पाठः । ९ ताडित इति गो. रा. पाठः ।

सप्तसप्ततितमः सर्गः ।

पातितकुम्भं सुग्रीवं तद्भाता निकुम्भोऽभ्येत्य परिघादिभिरायुधैरभ्यगमदीडक्ष्व. तद्दृष्ट्वा हनुमांस्तेन युयुधे तयोस्तु घनघोरं रणोऽभूते हनुमता निकुम्भः पातितो गतासुः ।

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम् । प्रदहन्निव कोपेन वानरेन्द्रमुदैक्षत ॥ १ ॥
ततः सम्दामसंनद्धं दत्तपञ्चाङ्गुलं शुभम् । आददे परिघं वीरो मैहेन्द्रशिखरोपमम् ॥ २ ॥
हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम् । यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥ ३ ॥
तमाविध्य महातेजाः शक्रध्वजसमौजसम् । ननाद विवृतास्यो निकुम्भो भीमविक्रमः॥ ४ ॥
जरोगतेन निष्केण भुजगैरुद्गतैरपि । कुण्डलाभ्यां च चित्राभ्यां मालया च सै चित्रया॥५॥
निकुम्भो भूषणैर्भाति तेन स्म परिघेण च । यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान् ॥ ६ ॥
परिघाग्रेण चुम्फोट वातग्रन्थिर्महाघनः । प्रजज्वाल सघोषश्च विधूम इव पावकः ॥ ७ ॥
नगर्यां विटपावत्यां गन्धर्वभवनोत्तमैः । सतोरणजनक्षत्रं सचन्द्रसमहाग्रहम् ॥
निकुम्भपरिघाघूर्णं भ्रमतीव नभस्थलम् ॥ ८ ॥

गो० टी०—तांस्मिन्निति । स्पष्टः ॥ १४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीर्ति-व्याख्याने युद्धकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

१] ति० टी० निकुम्भ इति ॥ १ ॥

रा० टी०—कुम्भविघातानन्तरकालिकं वृत्तमाह—निकुम्भ इत्यादिभिः । भ्रातरं निपातितं दृष्ट्वा कोपेन प्रदहन्निव निकुम्भः वानरेन्द्रमुदैक्षत ॥ १ ॥

गो० टी०—अथ निकुम्भवधः सप्तसप्ततितमे—संनद्धकुम्भ इत्यादि ॥ १ ॥

२] ति० टी०—सन्दामेति. सन्दामसंनद्धम् । दत्ताः पञ्चाङ्गुलप्रमाणा दन्ताः कालायसपट्टकन्या एस्मिन्तम् ॥ २ ॥

रा० टी०—तत इति । वीरो निकुम्भः स्वयं दत्तमिः सन्दामसंनद्धं दत्ताः पञ्चाङ्गुलाः पञ्चाङ्गुलप्रमाणककालायसपट्टन्याः यस्मिन् तं परिघमाददे ॥ २ ॥

गो० टी०—तत इत्यादिश्लोकद्वयमेकान्वयम् । सन्दामसंनद्धं सकलमूहनिबद्धम् । दत्तपञ्चाङ्गुलं चन्दनकुङ्कुमादिविचर्चित-पञ्चाङ्गुलसद्भावुदितम् । अथवा क्रियाविशेषणमेतत् । दत्तपञ्चाङ्गुलं यथा तथा आददे । परिक्षिप्तं परिणद्धम् ॥ २—४ ॥

३] ति० टी०—हेमपट्टादयोऽर्थवादाः ॥ ३ ॥

४] ति० टी०—शक्रध्वजसमौजसम् । अनेकारादिदृढ-सौन्दर्यात् ॥ ४ ॥

रा० टी०—हेमेति । हेमपट्टेन परिक्षिप्तं सबद्धं वज्रविद्रु-माभ्यां भूषितं तं परिघमाविध्य दृढं गृहीत्वा निकुम्भो वि-ननाद श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

५—६] ति० टी०—निष्कमुरोभूषणम् ॥ ५ ॥ ६ ॥

रा० टी०—उर इति । उरो गतेन निष्केण भुजगाकृतिभिश्च भुजगैरिव भूषणे आभरणाभ्यां च परिघेण च निकुम्भो भाति स्म तत्र दृष्टान्तः मेघो यथा स्वेन्द्रधनुषाऽपि ॥५॥

गो० टी०—उरोगतेत्यादिश्लोकद्वयमेकान्वयम् । निष्क-मुरस्यम् । भूषणैः हारादिभिः भाति स्म । "तत्र तस्य" इति वृत्तं वा । स्तनयित्नुमान् गर्जितवान् । स्तनयित्नुस्तु गर्जिते मेघे इति रत्नमाला । दृष्टान्तमुत्थाने दर्शयति । विद्युत्स्थाने भूषणानि । चित्रतादेति यथायोगिकौ विशेषः स्तनयित्नुमान् इति नीलमेघन्यूनता ॥ ४ ॥ ५ ॥

७] ति० टी०—महात्मनो महाप्रभस्य । परिघाग्रेण वात-ग्रन्थिरायतादित्यमण्डलसमानो भीमः स्फोटः । तेनैव परिघेण देदीप्यमानम् । प्रजज्वाल । निकुम्भ इति शेषः । परिघाग्र भाग इति वा ॥ ७ ॥

रा० टी०—परिघाग्रेणेति । महात्मनो वृहद्वपुषो निकु-म्भस्य परिघाग्रेण वातग्रन्थिः आयतसदृशप्रमाणवातसमूह-स्फोटः तेन परिघेणादित्यं सदृशं पावक इव प्रजज्वाल निकुम्भ इति परिघाग्रभाग इति वा शेषः ॥ ७ ॥

गो० टी०—परिघाग्रेणेति । वातग्रन्थिः आयतादित्यम-वातस्कन्धः । सघोषः सस्निहनाद इति निकुम्भविशेषणम् । परिघविशेषणं वा ॥ ७ ॥

८] ति० टी०—विटपावतीं गन्धर्वनगरीं । अलकेति शेषः ॥ ८ ॥

रा० टी०—नगर्यामिति । विटपावत्यां अलकायां गन्धर्वभ-वनोत्तमादिभिश्च सहितं नभस्तलं निकुम्भपरिघाघूर्णमिव भ्रमति स्म चचाल श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—नगर्यामित्यादिश्लोकद्वयमेकान्वयम् । विटपाव-

१ अवेक्ष्येति गो. पाठः । नगेन्द्रेति गो. रा. पाठः । २ सम तदेति गो. पाठः । ४ वीति गो. रा. पाठः । ५ सतारायहनक्षत्रं सचन्द्रं समहाग्रहमिति गो. सचन्द्रं समहाग्रहमिति रा. पाठः ।

दुरासदश्च संजज्ञे परिघाभरणप्रभः । क्रोधेन्धनो निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः ॥ ९ ॥
राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात् । हनुमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ॥ १० ॥
परिघोपमबाहुस्तु परिघं भास्करप्रभम् । बली बलवतस्तस्य पातयामास वक्षसि ॥ ११ ॥
स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः । विकीर्यमाणः सहसा उल्काशतमिवाम्बरे ॥ १२ ॥
स तु तेन प्रहारेण नैव चचाल महाकपिः । परिघेण समाधूतो यथा भूमिचलेऽचलः ॥ १३ ॥
स तथाभिहतस्तेन हनूमान्प्लवगोत्तमः । मुष्टिं संवर्तयामास बलेनातिमहाबलः ॥ १४ ॥
तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान् । अभिचिक्षेप वेगेन वेगवान्वायुविक्रमः ॥ १५ ॥
तत्र पुस्फोट वर्मास्य प्रमुस्राव च शोणितम् । मुष्टिना तेन संजज्ञे मेघे विद्युदिवोत्थिता ॥ १६ ॥
स तु तेन प्रहारेण निकुम्भो विचचाल च । स्वस्थश्चापि निजग्राह हनूमन्तं महाबलम् ॥ १७ ॥
चुक्रुशुश्च तदा संख्ये भीमं लङ्कानिवासिनः । निकुम्भेनोद्यतं दृष्ट्वा हनूमन्तं महाबलम् ॥ १८ ॥
स तथा ह्रियमाणोऽपि हनूमांस्तेन रक्षसा । आजघानानिलसुतो वज्रकल्पेन मुष्टिना ॥ १९ ॥

ख्या अलकया । अद्यापि सहेति शेषः । भवनैः अमरभवनैः । तारा अश्विन्यादयः महाग्रहाः बृहादयः नक्षत्राणि अश्विन्यादिभिन्नानि महाग्रहाः शुक्रादयः अत्र रात्रित्वात् सूर्यो नोक्तः । निकुम्भपरिघाभरणम् । अत्र परिघशब्देन तद्वात उपलक्ष्यते । इवशब्दो वाक्यालंकारे ॥ ८ ॥ ९ ॥

९] ति० टी०–परिघाभरणाभ्यां प्रभा कान्तिर्यस्य सः९॥

रा० टी०–दुरासद इति । परिघाभरणाभ्यां प्रभा कान्तिर्यस्य क्रोध एव इन्धनं यस्य स निकुम्भाग्निः उत्थितो युगान्ताग्निरिव दुरासदः संजज्ञे ॥ ९ ॥

गो० टी०–दुरासदश्चेति । परिघेणाभरणेन च प्रभातीति परिघाभरणप्रभ । यद्वा परिघाभरणान्येव प्रभा यस्य स तथा । कपीनां दुरासदो जज्ञ इति संबन्धः ॥ ९ ॥

१०] ति० टी०–स्पन्दितुमपि न शेकुः । उरो विवृत्योः प्रकाश्य ॥ १० ॥

रा० टी०–राक्षसा इति । भयात् परस्परभीतेः राक्षसाः वानराश्च स्पन्दितुमपि किञ्चिच्चलितुं न शेकुः हनुमांस्तु उरो विवृत्य संप्रकाश्य प्रमुखतोऽग्रसरे तस्थौ ॥ १० ॥

गो० टी०–राक्षसा इति । प्रबलेषु प्रजङ्घादिषु हतेषु दुर्बलेभवद्भिः किमर्थं युद्धाय प्रयत्नः कृत इति निकुम्भः कुप्येदिति राक्षसानां भयं वेदितव्यम् । विवृत्य विस्तार्य । प्रमुखतः अग्रे ॥ ११ ॥

११] ति० टी०–तस्य हनुमतः ॥ ११ ॥

रा० टी०–परिघेति । परिघोपमबाहुर्निकुम्भः तस्य हनुमतो वक्षसि परिघं पातयामास ॥ १२ ॥

गो० टी०–परिघेति । परिघोपमबाहुः निकुम्भः ॥१२॥

१२] ति० टी०–परिघः शतधा कृतः । महाशिलाहतजीर्णकाष्ठवद्विकीर्यमाणश्च स आकाशे उल्काशतमिवाभीदिति शेषः ॥ १२ ॥

रा० टी०–स्थिर इति । स्थिरे दृढे तस्योरसि शतधा कृतः परिघः अम्बरे उल्काशतमिव विकीर्यमाणोऽभवदिति शेषः ॥ १३ ॥

गो० टी०–स्थिर इति । व्यूढे विशाले । उल्काशतमिव बभाविति ॥ १३ ॥

१३–१७] ति० टी०–भूमिचले भूकम्पे ॥ १३–१७ ॥

रा० टी०–स इति । परिघेण समाधूतोऽपि हनुमान् भूमिचलेऽचलश्चैल इव प्रहारेण न चचाल ॥ १४ ॥

गो० टी०–स त्विति । भूमिचले भूकम्पे ॥ १४ ॥

रा० टी०–स इति । तेनाभिहतो हनुमान् मुष्टिं संवर्तयामास भ्रामयामास ॥ १५ ॥

गो० टी०–तमिति । महातेजा हनुमान् तं मुष्टिमुद्यम्य निकुम्भोरसि अभिचिक्षेप ॥ १६ ॥

रा० टी०–तत्रेति । तत्र मुष्टिप्रक्षेपसमये मुष्टिना मुष्टिप्रहारेण अस्य वर्म पुस्फोट शोणितं प्रमुस्राव च अत एव मेघे उत्थिता विद्युदिव शोणितं संजज्ञे बभूव ॥१६॥

रा० टी०–स इति । निकुम्भः प्रहारेण विचचाल स्वस्थो भूत्वा हनुमन्तं निजग्राह च ॥ १७ ॥

गो० टी०–स इति । संवर्तयामास । चकारेत्यर्थः १५-१८

१८] ति० टी०–भीमं चिक्रुशुः । कपीनां भयंकरं यथा भवति तथेत्यर्थः । उद्यतं गृहीतम् ॥ १८ ॥

रा० टी०–चिक्रुशुरिति । लङ्कानिवासिनो निकुम्भेनोद्यतं ह्रियमाणं हनुमन्तं दृष्ट्वा भीमं चिक्रुशुः स्वविजयशब्दं चक्रुः ॥ १९ ॥

गो० टी०–चिक्रुशुरिति । भीमं चिक्रुशुः । हनुमद्ग्रहणदर्पादिति भावः । उद्यतं गृहीतम् ॥ १९ ॥ २० ॥

१९] ति० टी०–तथा ह्रियमाणोऽपि कुम्भकर्णेन इवाभिह्रियमाणोऽपि ॥ १९ ॥

---

१ कपीनांस्त इति गो. पाठः । २ तस्याग्रत इति गो. पाठः । ३ विशीर्यमाण इति गो. पाठः । ४ वीति गो. पाठः । ५ ज्वालेति गो. पाठः । ६ हेति गो. रा. पाठः । ७ चिक्रुशुरिति गो. रा. पाठः । ८ तदेति गो. पाठः । ९ कुम्भकर्णात्समेन हेति गो. रा. पाठः ।

आत्मानं मोक्षयित्वाथ क्षितावभ्यवपद्यत । हनूमानुन्ममाथाशु निकुम्भं मारुतात्मजः ॥ २० ॥
निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष च । उत्पत्य चाम्य वेगेन पपातोरसि वेगवान् ॥ २१ ॥
परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम् । उत्पाटयामास शिरो भैरवं नदतो महत् ॥ २२ ॥
अथ निनदति सादिते निकुम्भे पवनसुतेन रणे बभूव युद्धम् ।
दशरथसुतराक्षसेन्द्रसूनुर्बोर्भृशतरमागतरोषयोः सुभीमम् ॥ २३ ॥
व्यपेते तु जीने निकुम्भस्य हृष्टा विनेदुः प्लवंगा दिशः सस्वनुश्च ।
चचौलेव चोर्वी पपौतेव सा द्यौर्बिलं राक्षसानां भयं चाविवेश ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

अष्टसप्ततितमः सर्गः ।

ततो रावणो मकराक्षं स्वपुत्रं प्राहिणोद्वधायनिसूदनाय तस्मिंस्तु निष्क्रान्ते बभूवाकाल्यदर्शनानि निमित्तानि पादुर्भूतानि भूयोऽपि तानि स वैदेहीवरणमभिवाय प्रदक्षिणीकृत्य च निश्चक्राम ।

निकुम्भं निहतं दृष्ट्वा कुम्भं च विनिपातितम् । रावणः परमामर्षी प्रजज्वालानलो यथा ॥ १ ॥

रा० टी०–स इति । हियमाणोऽपि स हनुमान् मुष्टिना आजघान ॥ २० ॥

२०] ति० टी०–क्षितावभ्यवपद्यत भूमावाप्लुतो बभूव २० ॥

रा० टी०–आत्मानमिति । हे ! हनुमान् आत्मानं मोक्षयित्वा क्षितावभ्यवपद्यत प्राप्नोत् निकुम्भमुन्ममाथ च ॥ २१ ॥

गो० टी०–आत्मानमिति । क्षितावभ्यवपद्यत स्थितः २१ ॥

२१] ति० टी०–निक्षिप्येति । भूमाविति शेषः । अस्योरसि भूमिपतितस्योरसि ॥ २१ ॥

रा० टी०–निक्षिप्येति । परमायत्तो हनुमान् निकुम्भं निक्षिप्य पातयित्वा निष्पिपेष उत्पत्य च उद्गीर्य तस्य निकुम्भस्योरसि पपात च ॥ २२ ॥

गो० टी०–निक्षिप्येति । निक्षिप्य भूमौ पातयित्वा । परमायत्तः अतिप्रयासयुक्तः । उत्पत्य ऊर्ध्वमुद्गत्य । उरसि वेगेन पपात ॥ २२ ॥

२२] ति० टी०–शिरोधरां परिवृत्य पशोश्चिच्छेदेत्यर्थः २२ ॥

रा० टी०–परीति । बाहुभ्यां परिवृत्य शिरोधरां ग्रीवां परिवृत्य आवृत्य नदतो निकुम्भस्य शिरः उत्पाटयामास ॥ २३ ॥

गो० टी०–परिगृह्येति । बाहुभ्यां शिरोधरां परिगृह्य परिवर्त्य शिर उत्पाटयामास ॥ २३ ॥

२३] ति० टी०–निनदति निकुम्भे सादिते सति राक्षसेन्द्रसूनुः खरसुतो मकराक्षः । अनेन वक्ष्यमाणेनोपक्षेपः ॥ २३ ॥

रा० टी०–अथेति । निनदति निकुम्भे पवनसुतेन सादिते विनाशिते सति आगतरोषयोः दशरथसुतरामराक्षसेन्द्रसूनुर्बोर्भृशतरमागतरोषयोः सुभीमं युद्धं बभूव युद्धप्रकारस्तु वक्ष्यते अत्र राक्षसेन्द्रः खरतत्सूनुर्मकराक्षः ॥ २४ ॥

गो० टी०–उत्तरसर्गद्वयार्थं संग्रहेण दर्शयति—अथेति विनदति निकुम्भे पवनसुतेन सादिते सति । दशरथसुतराक्षसेन्द्रसूनुर्बोः राममकराक्षयोः युद्धं बभूव । पुष्पितायां वृत्तम् उत्तरत्र भुजङ्गप्रयातम् ॥ २४ ॥

२४] ति० टी०–उक्तार्थमेव विवरणम् । व्यपेते व्यपगते । पपौतेव पपौदित्यर्थः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे वैयाकरणसिंहासनाधीश्वर-श्रीमन्महामहोपाध्याय-रामानुजविरचिते वाल्मीकीय-आदिकाव्ये युद्धकाण्डे रामायणतिलके वा वाल्मीकीय-रामायणव्याख्याने युद्धकाण्डव्याख्यानं सप्तसप्ततितमः सर्गः ॥ ७७ ॥

रा० टी०–व्यपेत इति । निकुम्भस्य जीवे व्यपेते गते सति हृष्टा प्लवङ्गाः विनेदुः अत एव दिशः सस्वनुः अत एव राक्षसानां चित्ते भयमविवेश ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणभूषणे युद्धकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

गो० टी०–व्यपेत इत्यादि । दिशः सस्वनुः प्रतिध्वनिं चक्रुः । पपौतेव पपौदित्यर्थः । चचौलेव चेति गो. पाठः । ४ पपौतेव चेति गो. पाठः ।

१] ति० टी०–निकुम्भमिति ॥ १ ॥

रा० टी०–निकुम्भमिति । निकुम्भविघातानन्तरकालिकं कृतान्तमाह—निकुम्भमित्यादिभिः । रावणोऽनल इव प्रजज्वाल ॥ १ ॥

गो० टी०–अथ मकराक्षनिर्गमोद्यमसप्ततितमे, प्रथमपक्षे अर्धं दशम्यां प्रातः, द्वितीयपक्षे तु दशम्यां प्रातरारभ्य कम्पनवधप्रहस्तवधरावणमुकुटभङ्गकुम्भकर्णप्रबोधतद्वधाः, अथापराह्णे ब्रह्मास्त्रबन्धः, रात्रौ तन्मोक्षलङ्कादहनकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजङ्घकम्पनमकराक्षवधाः—निकुम्भं चेत्यादि ॥ १ ।

१ हेति गो. पाठः । २ वीर्यवानिति गो. रा. पाठः । ३ प

नैर्ऋतः क्रोधशोकाभ्यां द्राभ्यां तु परिमूर्च्छितः । खरपुत्रं विशालाक्षं मकराक्षमचोदयत् ॥ २ ॥
गच्छ पुत्र मयाज्ञप्तो बलेनाभिसमन्वितः । राघवं लक्ष्मणं चैव जहि तौ सवनौकसौ ॥ ३ ॥
रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः । बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरम् ॥ ४ ॥
सोऽभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम् । निर्जगाम गृहाच्छुभ्राद्रावणस्याज्ञया बली ॥ ५ ॥
समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीद्वचः । रथमानीयतां तूर्णं सैन्यं त्वानीयतां त्वरात् ॥ ६ ॥
तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः । स्यन्दनं च बलं चैव समीपं प्रत्यपादयत् ॥ ७ ॥
प्रदक्षिणं रथं कृत्वा समाहृत्य निशाचरः । सूतं संचोदयामास शीघ्रं वै रथमावह ॥ ८ ॥
अथ तान्राक्षसान्सर्वान्मकराक्षोऽब्रवीदिदम् । यूयं सर्वे प्रयुध्यध्वं पुरस्तान्मम राक्षसाः ॥ ९ ॥
अहं राक्षसराजेन रावणेन महात्मना । आज्ञप्तः समरे हन्तुं तावुभौ रामलक्ष्मणौ ॥ १० ॥
अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः । शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः ॥ ११ ॥
अद्य शूलनिपातैश्च वानराणां महाचमूम् । प्रदहिष्यामि संप्राप्तां शुष्कैन्धनमिवानलः ॥ १२ ॥
मकराक्षस्य तच्छ्रुत्वा वचनं ते निशाचराः । सर्वे नानायुधोपेता बलवन्तः समाहिताः ॥ १३ ॥
ते कामरूपिणः क्रूरा दंष्ट्रिणः पिङ्गलेक्षणः । मातंगा इव नर्दन्तो ध्वस्तकेशा भयावहाः ॥ १४ ॥
परिवार्य महाकायं महाकायं खरात्मजम् । अभिजघ्नुस्ततो हृष्टाश्चालयन्तो नभस्तलम् ॥ १५ ॥
शङ्खभेरीसहस्राणामाहतानां समन्ततः । क्ष्वेलितास्फोटितानां च तत्र शब्दो महानभूत् १६ ॥

२-५] ति० टी०-नैर्ऋतो रावणः । परिमूर्च्छितो व्याप्तः ॥ २—५ ॥

रा० टी०-नैर्ऋत इति । क्रोधशोकाभ्यां परिमूर्छितो नैर्ऋतो रावणः मकराक्षं तदभिधं खरपुत्रमचोदयत् ॥ २ ॥

रा० टी०-तत्प्रकारमाह—गच्छेति । बलेनाभिसमन्वितस्त्वं गच्छ ॥ ३ ॥

रा० टी०-रावणस्येति । हृष्टो मकराक्षः बाढमित्यब्रवीत् एष इति शेषो वा ॥ ४ ॥

रा० टी०-स इति । स मकराक्षः दशग्रीवमभिवाद्य गृहान्निर्जगाम ॥ ५ ॥

गो० टी०-नैर्ऋत इति । परिमूर्छितः व्याप्तः ॥ २ ॥ ५ ॥

६-७] ति० टी०-बलाध्यक्षं रावणबलाध्यक्षम् । त्वरात्वरया ॥ ६ ॥ ७ ॥

रा० टी०-समीपस्थमिति । खरपुत्रः रथमानीयतामिदं वचो बलाध्यक्षमब्रवीत् ॥ ६ ॥

गो० टी०-समीपस्थमिति । त्वरात्वरया ॥ ६ ॥

रा० टी०-तस्येति । बलाध्यक्षः स्यन्दनं बलं च समीपं प्रत्यपादयत् प्रापयत् ॥ ७ ॥

गो० टी०-तस्येति । प्रत्यपादयत् प्रापयत् ॥ ७ ॥

८] ति० टी०-रथमावह । गृहभूमिं प्रापयेत्यर्थः ॥ ८ ॥

रा० टी०-प्रदक्षिणमिति । निशाचरः शीघ्रं रथमावहेति मनसा संचोदयामास ॥ ८ ॥

गो० टी०-प्रदक्षिणमिति । आवह चोदय । अत्रेतिकरणं द्रष्टव्यम् ॥ ८ ॥

९-१३] ति० टी०-मम पुरस्तान्ममाग्रतो यूयं सर्वे प्रयुध्यध्वम् । वानरैः सहेति शेषः ॥ ९—१३ ॥

रा० टी०-अथेति । मकराक्ष इदमब्रवीत् तदाकारमाह हे राक्षसाः मम पुरस्तात् सर्वे यूयं प्रयुद्ध्यध्वम् ॥ ९ ॥

रा० टी०-अहमिति । रावणेनाहं हन्तुमाज्ञप्तः ॥ १० ॥

रा० टी०-अद्येति । रामादीन् वधिष्यामि ॥ ११ ॥

रा० टी०-अद्येति । शुष्केन्धनमनल इव सम्प्राप्तोऽहं महाचमूं प्रदहिष्यामि प्रधक्ष्यामि ॥ १२ ॥

गो० टी०-अथ तानित्यादिचतुःश्लोक्येकान्वया॥९-१२॥

रा० टी०-मकराक्षस्येति । मकराक्षस्य वचनं श्रुत्वा ध्वस्तकेशाः प्रकीर्णकेशाः निशाचराः खरात्मजं परिवार्य वसुधरां चालयन्तस्समन्तात् अभिजघ्नुः श्लोकत्रयमेकान्वयि॥१३-१५॥

गो० टी०-मकराक्षस्येति । समागताः समाजग्मुः॥१३॥

१४-१६] ति० टी०-ध्वस्तकेशा विप्रकीर्णकेशाः, अतएव भयावहाः ॥ १४-१६ ॥

गो० टी०-कामरूपिण इत्यादिश्लोकद्वयमेकान्वयम् । स्पष्टः ॥ १४—१६ ॥

रा० टी०-शङ्खेति । आहतानां वादितानां शंखभेरीसहस्राणां क्ष्वेलितास्फोटितानां च महान् शब्दोऽभूत् ॥ १६ ॥

---

१ तांश्च वर्णीक्ष इति गो.पाठः । २ चर इति गो.रा.पाठः । ३ इदमिति गो.रा.पाठः । ४ आहूयतामिति गो. पाठः । ५ आरोहेति गो. समारुहेति रा.पाठः । ६ सैन्यमिति गो.रा.पाठः । ७ आगता इति गो.पाठः । ८ सर्वे इति गो.शूरा इति रा.पाठः । ९ वसुधरामिति गो.रा.पाठः । १० तत इति गो.पाठः ।

प्रभ्रष्टोऽथ करात्तस्य प्रतोदः सारथेस्तदा । पपात सहसा दैवाद्ध्वजस्तस्य तु रक्षसः ॥ १७ ॥
तस्य ते रथसंयुक्ता हयाः विक्रमवर्जिताः । चरणैराकुलैर्गत्वा दीनाः सास्रमुखा ययुः ॥ १८ ॥
पवाति पवनस्तस्मिन्सपांसुः खरदारुणः । निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः ॥ १९ ॥
तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः । अचिन्त्य निर्गताः सर्वे यत्र तौ रामलक्ष्मणौ ॥ २० ॥
घनगजमहिषाङ्गतुल्यवर्णाः समरमुखेष्वसकृद्दृढासिभिन्नाः ।
अहमहमिति युद्धकौशलास्ते रजनिचराः परिवभ्रमुर्मुदं स्म ते ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

नवभ्यशीतितमः सर्गः ।

मकराक्षेण तदनुनरेश्च कीशानां च महति रणे तद्दर्शितं तत्रत्य दुष्करं रामेण यद्धः खरसुत चोद्य मकराक्षः रामस्तु बाणैश्चतुर्भिः शूल चूर्णयित्वा मुष्टिमुद्यम्य नियुद्धायागतं तं चापि पावकास्त्रेण संदिह्य हत्वा भूमावपातयत्तदनु वानराः विजयं लब्ध्वा देवाधिदेवाः

निर्गतं मकराक्षं ते दृष्ट्वा वानरपुंगवाः । आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः ॥ १ ॥
ततः प्रवृत्तं सुमहत्तद्युद्धं लोमहर्षणम् । निशाचरैः प्लवंगानां देवानां दानवैरिव ॥ २ ॥
वृक्षशूलनिपातैश्च गदापरिघपातनैः । अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः ॥ ३ ॥
शक्तिखड्गगदाकुन्तैस्तोमरैश्च निशाचराः । पट्टिशैर्भिन्दिपालैश्च बाणपातैः समन्ततः ॥ ४ ॥
पाशमुद्गरदण्डैश्च निर्यातैश्चापरैस्तथा । कदनं कपिसिंहानां चक्रुस्ते रजनीचराः ॥ ५ ॥
बाणैर्वरार्दिताश्चापि खरपुत्रेण वानराः । संभ्रान्तमनसः सर्वे दृष्ट्वा वृत्रभयपीडिताः ॥ ६ ॥

१७] ति०टी०—तस्य ध्वजः पपात । स च ब्रह्मेतीति शेषः १७
रा० टी०—कृशकुनानाह—प्रभ्रष्टेति । तस्य खरात्मजस्य सारथेः करात् प्रतोदः प्रभ्रष्टः भूमौ पतितः ध्वज पपात च ॥१७॥
गो० टी०—प्रभ्रष्ट इति । करात्तस्य आर्तकरस्य वशीकृतकरस्य । लघुहस्तस्येति यावत् ॥ १७ ॥

१८] ति० टी०—विक्रमरहिता यथापूर्वं विचित्रपादन्यास रहिताः । प्रथममाकुलैश्चरणैर्गत्वा पश्चात्सास्रमुखा ययुः ॥१८॥
रा० टी०—तस्येति । तस्य खरात्मजस्य रथसंयुक्ता हयाः विक्रमवर्जिताः बभूवुरिति शेषः अत एव आकुलैः पीडितैः चरणैर्गत्वा सास्रमुखास्सन्तो ययुः रणभूमिं प्रापुः॥१८॥
गो० टी०—तस्येति । विक्रमवर्जिताः विविधपदन्यासविरहिताः । प्रथममाकुलैश्चरणैर्गत्वा पश्चाद्गत्विर्त्यर्थः ॥ १८ ॥

१९–२०] ति० टी०—प्रवाति सपांसुः, अत एव खरः । अभिमुख इति शेषः ॥ १९ ॥ २० ॥
रा० टी०—प्रवातीति । मकराक्षस्य निर्याणे सति सपांसुः अत एव खरदारुणः पवनः प्रवाति सम्मुखे ववौ॥१९॥
गो० टी०—प्रवातीति । सपांसुः अत एव खरदारुणः खरः परुषः दारुणो भयंकरश्च ॥ १९ ॥
रा० टी०—तानीति । राक्षसाः निमित्तानि कृशकुनान् दृष्ट्वापि तानि अचिन्त्य अगणयित्वा एव रामलक्ष्मणौ तत्र निर्गताः प्राप्ताः ॥ २० ॥
गो० टी०—तानीत्यादिर्श्लोकद्वयमेकान्वयम् । अमहद्भिः सिभिर्भिन्ना इत्यनेन शौर्यातिशयः सूचितः । पट्टयोऽस्त्राः पट्टश शब्दः । स्वार्थेऽण् । अहमहमिति वदन्तः । अचिन्त्य निमित्त इति पूर्वेण संबन्धः ॥ २० ॥ २१ ॥

इति श्रीगोविन्दराजविरचितायां श्रीमद्रामायणभूषणाभिधानायां व्याख्यायां युद्धकाण्डव्याख्यायां अशीतितमः सर्गः ॥ ८० ॥

२१] ति० टी०—अमकरकृष्णा गजसिभिर्भिन्ने भटे सेवां ते । अहमहमिति वदन्तः ॥ २१ ॥

इति श्रीमद्गोविन्दराजविरचितायां रामायणभूषणाभिधानायां व्याख्यायां आदिकाव्य युद्धकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

रा० टी०—घनेति । घनगजकृष्णवर्णास्समरमुखेषु गदासिभिर्भिन्नाः छिन्नावयवाः रजनिचरा अहमहमितिवदन्त स्सन्तः परिबभ्रमुः ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्यायां रामायणतिलकाभिधानायां युद्धकाण्डे अशीतितमः सर्गः ॥ ८० ॥

१–४] ति० टी०—निर्गतमिति ॥ १–४ ॥
५–६] ति० टी०—निर्यातास्तद्वन्महाध्वनयो यन्त्रायुध विशेषाः ॥ ५ ॥ ६ ॥

१ चैवेति गो. भूमाविति रा.पाठः । २ चेति गो.पाठः । ३ युक्ता चेति गो. पाठः । ४ पतितः समुन्नदन्त इति गो.पाठः । ५ नदन्त इति रा.पाठः ६ यूथपा इति गो. पाठः । ७ रोमेति गो. रा. पाठः । ८ शिलेति गो. रा. पाठः । ९ निर्यातैश्चेति गो. पाठः । १० निर्यातैश्चापरै तंदति गो. पाठः ११ वरायुधैरिति रा. पाठः ।

तान्दृष्ट्वा राक्षसाः सर्वे द्रवमाणान्वनौकसः । नेदुस्ते सिंहवद्दृप्ता राक्षसा जितकाशिनः ॥ ७ ॥
विद्रवत्सु तदा तेषु वानरेषु समन्ततः । रामस्तान्वारयामास शरवर्षेण राक्षसान् ॥ ८ ॥
वारितान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः । कोपानलसमाविष्टो वचनं चेदमब्रवीत् ॥ ९ ॥
तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं भविष्यति । त्याजयिष्यामि ते प्राणान्घनुर्मुक्तैः शितैः शरैः१० ॥
यत्तदा दण्डकारण्ये पितरं हतवान्मम । तदैग्रतः स्वकर्मस्थं स्मृत्वा रोषोऽभिवर्धते ॥ ११ ॥
दह्यन्ते भृशमङ्गानि दुरात्मन्मम रावण । यन्मयासि न दृष्टस्त्वं तस्मिन्काले महावने ॥ १२ ॥
दिष्ट्यासि दर्शनं राम मम त्वं प्राप्तवानिह । काङ्क्षितोऽसि क्षुधार्तस्य सिंहस्येवेतरो मृगः॥ १३ ॥
अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः । ये त्वया निहताः शूरास्तैः सह त्वमसि॑ष्यसि॥ १४ ॥
बहूनात्र किमुक्तेन शृणु राम वचो मम । पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे॥ १५ ॥

रा० टी०–मकराक्षागमनानन्तरकालिकं वृत्तान्तमाह—निर्गतेत्यादिभिः । वानरपुङ्गवाः निर्गतं मकराक्षं दृष्ट्वा योद्धुकामास्तस्य आवृत्य व्यवस्थिता मकराक्षसन्निधौ संस्थिता बभूवुरिति शेषः ॥ १ ॥

रा० टी०–तत इति । निशाचरैस्सह वृक्षाणां समरयुद्धं प्रवृत्तम् ॥ २ ॥

रा० टी०–वृक्षेति । कपिनिशाचराः वृक्षशस्त्रनिपातैः अन्योन्यं मर्दयन्तिस्म ॥ ३ ॥

गो० टी०–अथ मकराक्षवध एकोनाशीतौ—निर्गतमिति ॥ १–३ ॥

रा० टी०–शक्तीति । निशाचराः निशायामेव भोजनशीलाः रजनीचराः राक्षसाः शक्तिप्रभृतिभिः कपिसिंहानां कदनं चक्रुः तत्र निर्यातास्ताडशब्दनिमन्तो यद्यायुधविशेषाः श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

रा० टी०–बाणेति । खरपुत्रेणादिताः वानराः दुद्रुवुः ॥६॥

गो० टी०–शक्तीत्यादिश्लोकद्वयमेकान्वयम । निर्यातैः आगतैरित्यर्थः । निर्यातैरिति पाठे अशनिभिरित्यर्थः । केचित्तु निशाचराः शक्तिप्रहारादिभिः अपरे रजनीचराः पाशमुद्गरादिभिश्च कदनं चक्रुरिति योजना ॥ ४–६ ॥

७ | ति० टी०–द्रवमाणान्द्रवतः । जितेन जयेन काशन्ते ते जितकाशिनोऽप्रच्युतविति शेष इति तीर्थः ॥ ७ ॥

रा० टी०–तानिति । जितकाशिनः पराभाविनिरुपप्रकाशाः राक्षसाः बहुराक्षसवन्तो राक्षसा वनौकसो द्रवमाणान् दृष्ट्वा सिंहवत्तेदुः ॥ ७ ॥

गो० टी०–तान् दृष्ट्वेति । राक्षसा जितकाशिन इति भिन्नं वाक्यम् । जिते जयः येन काशन्त इति तथोक्ता जितकाशिनः । बभूवुरिति शेषः । अन्यथा द्वितीयराक्षसपदवैयर्थ्यं स्यात ॥ ७–१० ॥

८–१०] ति० टी०–तान्वानरविद्रावकान्राक्षसान्रामः शरवर्षेण वारयामास ॥ ८–१० ॥

रा० टी०–विद्रवदिति । वानरेषु विद्रवत्सु सत्सु रामइशरवर्षेण राक्षसान् वारयामास आच्छादयामास ॥ ८ ॥

रा० टी०–वारितानिति । मकराक्षः निशाचरान् वारितान् दृष्ट्वा इदमब्रवीत् ॥ ९ ॥

रा०टी०–तदाकारमाह–तिष्ठेत्यादिभिः । हे राम मयासार्द्धं द्वन्द्वयुद्धं भविष्यति ॥ १० ॥

११] ति०टी०–यत्तस्मात्पितरं हतवानसि तस्मात्तदयं तत्तद्दिनादितः स्वकर्मस्थं पितृवधरूपकर्मकर्तारं त्वां स्मृत्वा रोषोऽभिवर्धते । 'मदग्रतः स्वकर्मस्थं दृष्ट्वा' इति पाठे मदग्रतस्तिष्ठन्तमिति शेषः । तीर्थस्तु—स्वकर्मस्थं खरारामकृत्य निरतमित्यर्थ इत्याह ॥ ११ ॥

रा० टी०–यदिति । यस्मात् दण्डकारण्ये मम पितरं त्वं हतवान् तत्तस्माद्धेतोः अग्रतः पूर्वं स्वकर्मस्थं स्वकर्मनिरतं राक्षसवधपरायणमित्यर्थः त्वां स्मृत्वा रोषो मम कोपोऽभिवर्द्धते ॥ ११ ॥

गो० टी०–यत्तदेति । स्वकर्मस्थं वधकर्मस्थम । यथा पिता हतस्तथा वध्यमित्यर्थः । यद्वा क्षात्रधर्मकर्मानुतिष्ठन्तमित्यर्थः । स्वकर्मस्थमिति खरारामकृत्यनिरतमिति वार्थः॥११॥

१२] ति० टी०–यस्मात्तस्मिन्काले पितृवधकाले तस्मिन्महावने मया न दृष्टोऽसि तस्मान्ममाङ्गानि दह्यन्ते । तदैव दर्शने तु प्रतीकारेण तापः शाम्येदित्यर्थः ॥ १२ ॥

रा० टी०–दह्यन्त इति । तस्मिन्काले युद्धसमये महावने दण्डकारण्ये यस्मात् त्वं मया न दृष्टोऽसि तस्मान्ममाङ्गानि दह्यन्ते ॥ १२ ॥

गो० टी०–दह्यन्त इति । तस्मिन् काले महावने यस्मात्र दृष्टोसि तस्मान्ममाङ्गानि दह्यन्ते । तदानीमेव दृष्टश्चेत्प्रतिकारेण तापः शाम्येदित्यर्थः ॥ १२–१५ ॥

१३–१५] ति० टी०–इतरो मृगः सिंहेतरमृगमात्रम् ॥ १३–१५ ॥

रा० टी०–दिष्ट्येति । क्षुधार्तस्य सिंहस्य इतरः सिंहभि-

१ बलीमुख्यानिति गो. पाठः । २ कोपेति गो. पाठः । ३ दर्शामि ते इति गो. पाठः । ४ मदिति गो. रा.पाठः । ५ दृष्ट्वेति गो.पाठः । ६ वीरा इति गो. पाठः । ७ समेष्यसीति गो. पाठः ।

अस्त्रैर्वा गदया वापि बाहुभ्यां वा रणाजिरे । अभ्यस्तं येन वा राम वर्ततां तेन वा मृधम् ॥ १६ ॥
मकराक्षवचः श्रुत्वा रामो दशरथात्मजः । अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनम् ॥ १७ ॥
कत्थसे किं वृथा रक्षो बहून्यसदृशानि ते[3] । न रणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥ १८ ॥
चतुर्दश सहस्राणि रक्षसां त्वत्पिता च यः । त्रिशिरा दूषणश्चापि दण्डके निहतो मया ॥ १९ ॥
स्वाशिताश्चापि मांसेन गृध्रगोमायुवायसाः । भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुशाः॥ २० ॥
राघवेणैवमुक्तस्तु मकराक्षो महाबलः । बाणौघानमुचत्तस्मै राघवाय रणाजिरे ॥ २१ ॥
ताञ्छराञ्छरवर्षेण रामश्चिच्छेद नैकधा । निपेतुर्भुवि विच्छिन्ना रुक्मपुङ्खाः सुवाससः ॥२२॥
तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा । खरराक्षसपुत्रस्य सूनोर्दशरथस्य च ॥ २३ ॥
जीमूतयोरिवाकाशे शब्दो ज्यातलयोरिव[6] । धनुर्मुक्तः स्वनोऽन्योन्यं श्रूयते च रणाजिरे॥ २४ ॥
देवदानवगन्धर्वाः किंनराश्च महोरगाः । अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम् ॥ २५ ॥

मो मृग इव मया त्वं कांक्षितोऽसि अतः शिष्टया भाग्यवशेन मम दर्शनं दृष्टिपथं त्वं प्राप्तवानसि ॥ १३ ॥

रा० टी०—अद्येति । महाहवेऽहं प्रेतराजो यमस्य विषयं दृष्टिपथं प्राप्तस्त्वं ये शराः त्वया निहताः तैरसद् असिष्यति वत्स्यसि ॥ १४ ॥

रा० टी०—बहुनेति । रणाजिरे रणभूमौ त्वां मां च लोकाः पश्यन्तु ॥ १५ ॥

१६] ति० टी०—येन कर्मणाधनेनास्त्रादिनाभ्यस्तमनेन तेऽभ्यस्तं तमाभ्यासोऽस्ति तेन वा तेनैव शस्त्रं युद्धं वर्ततां संपाद्यताम् ॥ १६ ॥

रा० टी०—अस्त्रैरिति । हे राम अस्त्राण्यस्तमैः वा अथवा येन शस्त्रविशेषेण त्वया अभ्यस्तं यस्मिन् शस्त्रे अभ्यासः कृत इत्यर्थः तेन शस्त्रेण मृधे संग्रामे वर्तताम् ॥ १६ ॥

गो० टी०—अस्त्रैरिति । महाहवे निमित्ते । येन वा अन्येनायुधेनाभ्यस्तं तेनैव युधि वर्तताम् । भवानिति शेषः ॥ १६ ॥

१७] ति० टी०—उत्तरोत्तरवादिनं बहुप्रलापिनम् ॥ १७॥

रा० टी०—मकराक्षेति । रामः उत्तरोत्तरवादिनं अधिकजल्पकमित्यर्थः खरात्मजमब्रवीत् ॥ १७ ॥

गो० टी०—मकराक्षेति । उत्तरोत्तरवादिनम् । बहुप्रलापिनमित्यर्थः ॥ १७ ॥

१८-१९] ति० टी०—ते त्वया जेतुमित्यन्वयः १८॥१९॥

रा० टी०—तदाकारमाह—कत्थस इत्यादिभिः । असदृशानि शराणामयोग्यानि बहूनि स्वश्लाघावचनानि किं किमर्थं वृथा कत्थसे वृथात्वमेवाह युद्धेन विना वाग्बलात् जेतुं न शक्यते ॥ १८ ॥

रा० टी०—इदानीं युद्धनिवृत्तिपूर्वकतत्प्राणरक्षणार्थं स्वाचरितमाह—चतुर्दशेति । रक्षसां चतुर्दश सहस्राणि त्वत्पिता दूषणश्च मया निहताः ॥ १९ ॥

गो० टी०—कत्थस इति । युद्धेन विना प्रहारेण विना ॥ १८ ॥ १९ ॥

२०-२३] ति० टी०—स्वाशिताः सुभुक्तवन्तोऽद्य भविष्यन्ति । त्वद्धनेनेति शेषः ॥ २०-२३ ॥

रा० टी०—स्वाशिता इति । हे पाप तीक्ष्णतुण्डादिविशिष्टा गृध्रादयः मांसेन त्वदीयमांसेन स्वाशिताः सुभोजिताः भविष्यन्ति ॥ २० ॥

रा० टी०—राघवेणेति । मकराक्षः राघवाय बाणौघान् अमुचत् ॥ २१ ॥

रा० टी०—तानिति । तान् मकराक्षप्रयुक्तान् शरान् रामो नैकधा अनेकप्रकारं चिच्छेद अत एव विच्छिन्नाः शराः भुवि निपेतुः ॥ २२ ॥

रा० टी०—तदिति । अन्योन्यमोजसा समेत्य तद्युद्धमभवत् ॥ २३ ॥

गो० टी०—स्वाशिता इति । स्वाशिताः सुभु आशितवन्तः ॥ २०-२३ ॥

२४-२५] ति० टी०—आकाशे जीमूतयोः शब्द इव ज्यातलयोर्ज्याकरतलयोः संघर्षाद्देवोपधनुर्मुक्तोऽन्योन्यधनुर्मुक्तः स्वनोऽन्योन्यमिश्रो रणाजिरे श्रूयते स्म ॥ २४ २५ ॥

रा० टी०—जीमूतयोरिति । आकाशे जीमूतयोर्मेघयोः शब्द इव ज्यातलयोः संघर्षादिति शेषः धनुर्मुक्तः स्वनः अन्योन्यं श्रूयते ॥ २४ ॥

रा० टी०—देवेति । अद्भुतं युद्धं द्रष्टुकामाः देवादयः अन्तरिक्षगताः बभूवुरिति शेषः ॥ १५ ॥

गो० टी०—जीमूतयोरिति । ज्यातलयोः शब्दः ज्यातलयोः संघर्षजः । शब्दः । स्वनोत्कृष्टः स्वनेनोत्कृष्टः ॥ २४॥२५॥

---

१ तेनैव युधि वर्तताम् इति गो. पाठः । २ मृधे इति रा. पाठः । ३ त्विति गो. पाठः । ४ निहता इति गो. रा. पाठः । ५ अंकुरा इति गो. पाठः ६ स्वरपुत्रो निशाचर इति गो. पाठः । ७ ते इति गो. पाठः । ८ सहस्रश इति गो. रा. पाठः । ९ रक्षसः स्वरपुत्रस्येति गो. पाठः । १० तदेति गो पाठः । ११ उत्कृष्ट इति गो. पाठः ।

विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते बलम् । कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे ॥ २६ ॥
राममुक्तांस्तु बाणौघान्राक्षसस्त्वच्छिनद्रणे । रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः॥ २७ ॥
बाणौघैर्वितताः सर्वा दिशश्च प्रदिशस्तथा । संछन्ना वसुधा चैव[2] समन्तान्न प्रकाशते ॥ २८ ॥
ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद संयुगे[3] । अष्टाभिरथ नाराचैः सूतं विव्याध राघवः ॥ २९ ॥
भित्त्वा रथं शरै रामो हत्वा अश्वानपातयत् । विरथो वसुधांस्थः स मकाराक्षो निशाचरः॥ ३० ॥
तत्तिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना । त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम् ॥ ३१ ॥
दुरवापं महच्छूलं रुद्रदत्तं भयंकरम् । जाज्वल्यमानमाकाशे संहारास्त्रमिवापरम् ॥ ३२ ॥
यं दृष्ट्वा देवताः सर्वा भयार्ता विद्रुता दिशः । विभ्राम्य चैव महच्छूलं प्रज्वलन्तं निशाचरः॥ ३३ ॥
स क्रोधात्प्राहिणोत्तस्मै राघवाय महात्मने । तमापतन्तं ज्वलितं खरपुत्रकराच्युतम् ॥ ३४ ॥
बाणैश्चतुर्भिराकाशे शूलं चिच्छेद राघवः । स भिन्नो नैकधा शूलो दिव्यहाटकमण्डितः ॥
व्यशीर्यत महोल्केव रामबाणार्दितो भुवि ॥ ३५ ॥
तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा । साधु साध्विति भूतानि व्याहरन्ति नभोगताः ॥ ३६॥
तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः । मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत्॥ ३७ ॥
स तं दृष्ट्वा पतन्तं तु[5] प्रहस्य रघुनन्दनः । पावकास्त्रं ततो रामः संदधे तु शरासने ॥ ३८ ॥
तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे । सच्छिन्नहृदयं तत्र पपात च ममार च ॥ ३९ ॥

२६-२९] ति० टी०-अन्योन्यं गात्रेषु विद्धम् । वैरनमभूदिति शेषः । अद्यापि द्विगुणं बलं वर्धते स्म । कृतप्रतिकृता कृतप्रतिकृतानि आर्षोऽडादेशो विभक्तेः । कुरुतामकुरुताम् अडभाव आर्षः ॥ २६—२९ ॥

रा० टी०-विद्धमिति । तौ रामप्रकराक्षौ अन्योन्यगात्रेषु विद्धं ताडनं यथा भवति तथा कृतप्रतिकृता कृतप्रतिकृते हननप्रतिहनने अन्योन्यं कुरुतामकुरुतां सुपां सुलुगिति विभक्तेर्डादेशः ॥ २६ ॥

रा० टी०-रामेति । नैकधा अनेकप्रकारम् प्राच्छिनत्॥ २७॥

रा० टी०-बाणेति । दिशः प्रदिशश्च बाणौघैर्वितताः व्याप्ताः अत एव संछन्ना वसुधा न प्रकाशते ॥ २८ ॥

रा० टी०-तत इति । राघवः अष्टाभिर्नाराचैर्बाणविशेषैः रक्षसो धनुश्चिच्छेद सूतं विव्याध च ॥ २९ ॥

गो० टी०-विद्धमिति । विद्धं वेधनम् । वर्धते अवर्धत । कृतप्रतिकृतान्योन्यं कृतस्य प्रतिकृतं ययोस्तौ तादृशावन्योन्यं यस्मिन् युद्धकर्मणि तत्तथोक्तम् । कुरुताम् अकुरुताम् । युद्धमिति शेषः ॥ २६ ॥ २९ ॥

३०] ति० टी०-भित्त्वा रथम् अदूरुक्त्येत्यर्थः । हत्वा अश्वानित्यसंधिपाठः । 'रथादश्वान्' इति पाठान्तरम् । वसुधास्थोऽभूदिति शेषः ॥ ३० ॥

रा० टी०-भित्त्वेति । रामः रथं भित्त्वा रथात् अश्वान् अपातयत् अचालयत् अत एव मकराक्षो वसुधास्थो बभूवेति शेषः ॥ ३० ॥

गो० टी०-भित्त्वेति । वसुधां तिष्ठत् वसुधायामतिष्ठत् ३०

३१-३२] ति० टी०-' तत्तिष्ठद्वसुधाम् ' इति पाठः वसुधां वसुधायां तिष्ठत्तदृशः शूलं जग्राहेति संबन्धः ॥३१॥३२

३३-३९] ति० टी०-श्लोकार्धादिः ॥ ३३—३९ ॥

रा० टी०-तदिति । वसुधां वसुधायां तिष्ठत्तदृशः युगान्ताग्निसमप्रभं शूलं जग्राह ॥ ३१ ॥

रा० टी०-दुरवापमिति । यत् महच्छूलं दृष्ट्वा भयार्ता देवता दिशो विद्रुताः तत् अपरं संहारास्त्रमिव जाज्वल्यमानं दुरवापमन्यैरशक्यं प्रज्वलत् परान्प्रज्वालयत् तन्महच्छूलं स मकराक्षः विभाम्य राघवाय प्राहिणोत् प्राक्षिपत् सार्द्धश्लोकद्वयमेकान्वयि ॥ ३२ ॥ ३३ ॥

रा० टी०-तमिति । राघवः आपतन्तं शूलं चतुर्भिर्बाणैश्चिच्छेद ॥ ३४ ॥

गो० टी०-तदिति । वसुधां वसुधायाम् ॥ ३१-३४ ॥

रा० टी०-स इति । रामबाणार्दितः अत एव नैकधा अनेकप्रकारं भिन्नः छिन्नः शूलः महोल्केव भुवि व्यशीर्यत ॥ ३५ ॥

रा० टी०-तदिति । रामेण निहतं शूलं दृष्ट्वा भूतानि पृथिव्यादिदेवाः नभोगता देवादयश्च साधु साध्विति व्याहरन्ति ॥ ३६ ॥

---

१ बाणौघैर्वितता इति गो. पाठः । २ चौघैरिति रा. पाठः । ३ रक्षस इति गो. रा.पाठः । ४ रथादश्वानिति रा. रथाश्वान्समपातयदिति गो. पाठः । ५ वसुधां तिष्ठन्निति गो. पाठः । ६ साधेमिदं पदं गो. पुस्तके नास्ति । ७ रिति गो. पाठः । ८ आद्रवे इति गो. पाठः । ९ तु त्रिभिरिति गो. पाठः । १० छिन्न इति गो. रा. पाठः । ११ वे इति गो. पाठः ।

दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम् । लङ्कामेव प्रधावन्त रामबाणभयार्दिताः ॥ ४० ॥
दशरथनृपसूनुबाणवेगै रजनिचरं निहतं खरात्मजं तम् ।
प्रेदृदृशुरथ देवताः प्रहृष्टा गिरिमिव वज्रहतं यथा विकीर्णम् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवसप्ततितमः सर्गः ॥ ७९ ॥

अशीतितमः सर्गः ।

मकराक्षेऽपि हते मुखे मुखो दशग्रीवः पुत्रमिन्द्रजितं प्रकृति पठितवान् तोषि प्रकाशमिति दुःखमिव । मारुत्याच्छन्नो युयुधे तेन वानरध्वजं व्यक्तिमकरोत् । सौमित्रिरस्त्र प्रयोगे पुनरुद्यतं तमपि निरस्य एव एवोऽ तस्मिन्नि-त्यतोऽहमेव हनिष्यामीति च पश्चात्तेन तत्काय ममनयत ।

मकराक्षं हतं श्रुत्वा रावणः समितिंजयः । रोषेण महताविष्टो दन्तान्कटकटार्य च ॥ १ ॥
कुपितश्च तदा तत्र किं कार्यमिति चिन्तयन् । आदिदेशाथ संक्रुद्धो रणायेन्द्रजितं सुतम् ॥ २ ॥
जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ । अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ॥ ३ ॥
त्वमप्रतिमकर्माणमिन्द्रं जयसि संयुगे । किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे ॥ ४ ॥
तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य पितुर्वचः । यत्तमर्मो स विधिवत्पावकं जुहवेन्द्रजित् ॥ ५ ॥

रा० टी०—तदिति । मकराक्षः सुग्रिवस्य सालस्य रामं तिष्ठ तिष्ठेत्यब्रवीत् ॥ ३७ ॥

रा० टी०—स इति । पतन्तं तं मकराक्षं रामो दृष्ट्वा देवास्त्रे धनुषि पावकास्त्रं संदधे ॥ ३८ ॥

रा० टी०—तेनेति । तेन रामप्रयुक्तेन अग्नेयेन करणेन काङ्क्षत्स्येन कर्त्रा संछिन्नहृदयमत एव हतं सन्तं मकराक्षं पपात ममार च ॥ ३९ ॥

गो० टी०—तच्छूलमिति । नभोगतः नभोजातानि । "सुपांसुलुक्०" इत्यादिना आकारादेशः ॥ ३७—३९ ॥

४०—४१] ति० टी०—प्रधावन्त प्राधावन्त ॥ ४०॥४१॥

नवम्यां पूर्वगदेऽस्य वधः ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवसप्ततितमः सर्गः ॥ ७९ ॥

रा० टी०—दृष्ट्वेति । राक्षसाः मकराक्षस्य पातनं दृष्ट्वा लङ्कामेव प्रधावन्त प्राधावन्त ॥ ४० ॥

रा० टी०—दशरथेति । दशरथनृपसूनुबाणवेगैः निहतं तं मकराक्षं प्रहृष्टाः सत्यो देवताः यथावत् ददृशुः तत्र दृष्टान्तः वज्रहतमत एव विकीर्णं गिरिमिव ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

गो० टी०—दशरथेति । गिरिमिव वज्रहतं यथेति । द्वे अक्षयकुमारे संयुगे एकस्मिन्वधे मारुतिरेव मकराक्षवधे-नेह दशमुखः समाप्तम ॥ ४१ ॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणभाष्ये युद्धकाण्डे ऊनाशीतितमः सर्गः ॥ ७९ ॥

१—४] ति० टी०—अदृश्यो दृश्यमानो वा ॥ १—४ ॥

रा० टी०—अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः—मकराक्षमित्यादिभिः । रावणः मकराक्षे एव सत्यं कथयन् अतिशयेन बलवान् अतिशयेन प्रीतः अतः सत्यं शीघ्रं अस्मात् राक्षसान्तरात्मानं वीरवरं कर्तव्यं किमपि मिति चिन्तयन् एतत्पर्यन्तं रामलक्ष्मणदिग्धं श्लोकद्वयमेकमाह ॥ १ ॥ ४ ॥

रा० टी०—अदृश्यो दृश्यमानो वा—जहीति । हे वीर त्वं यतो बलाधिकोऽसि अतः अदृश्यो दृश्यमानो वा हे रामलक्ष्मणौ जहि ॥ ३ ॥

गो० टी०—अथेन्द्रजितिसंमोहनादितो—मकराक्षमित्यादि । आसेद अनुदिति शेषः ॥ १—३ ॥

रा० टी०—त्वमिति । त्वमिन्द्रं जयसि तर्हि मानुषौ दृष्ट्वा किं वधिष्यसि वधिष्यस्येवेत्यर्थः ॥ ४ ॥

गो० टी०—त्वमिति । जयसि अजैषीः । पुनःशब्दस्तर्थे । मानुषौ पुनः मानुषौ तु । संयुगे दृष्ट्वापि न वधिष्यसि किं दर्शनमात्रेण वधिष्यस्येवेत्यर्थः ॥ ४ ॥

५] ति० टी०—जहव जुहाव । हुदृधभाव आर्षः ॥ ५ ॥

रा० टी०—तथेति । राक्षसेन्द्रेण तथोक्त इन्द्रजित् पितृ-

१ अभ्यधत्तेति गो. पाठः । २ अर्दितास्तदेति गो रा. पाटः । ३ पुत्रेति गो. पाठः । ४ ददृशुर्विजेति रा. पाठः । ५ मूल मुद्रणमिति गो. पाठः । ६ पयाग्निति गो. पाठ ।

जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः । आजग्मुस्तत्र संभ्रान्ता राक्षस्यो यत्र रावणिः ॥ ६ ॥
शस्त्राणि शरपत्राणि समिधोऽथ विभीतकाः । लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ॥ ७ ॥
सर्वतोऽग्निं समास्तीर्य शरपत्रैः सतोमरैः । छागस्य सैवकृष्णस्य गलं जग्राह जीवतः ॥ ८ ॥
शरैर्होमसमिद्धस्य विधूमस्य महार्चिषः । बभूवुस्तानि लिङ्गानि विजयं दर्शयन्ति च ॥ ९ ॥
प्रदक्षिणावर्तशिखस्तप्तहाटकसंनिभः । हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः ॥ १० ॥
हुत्वाग्निं तर्पयित्वाथ देवदानवराक्षसान् । आरुरोह रथश्रेष्ठमन्तर्धानगतं शुभम् ॥ ११ ॥
स वाजिभिश्चतुर्भिस्तु बाणैस्तु निशितैर्युतः । आरोपितमहाचापः शुशुभे स्यन्दनोत्तमे ॥ १२ ॥
जाज्वल्यमानो वपुषा तपनीयपरिच्छदः । मृगैश्चन्द्रार्धचन्द्रैश्च स रथः समलंकृतः ॥ १३ ॥
जाम्बूनदमहाकम्बुदीप्तपावकसंनिभः । बभूवेन्द्रजितः केतुर्वैदूर्यसमलंकृतः ॥ १४ ॥
तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः । स बभूव दुराधर्षो रावणिः सुमहाबलः ॥ १५ ॥

वेत्तः प्रतिगृह्य यज्ञभूमौ पावक विविधजुहुव सन्नाहपूर्वकविधेनित्यत्वाद्वह्वभावः ॥ ५ ॥

गो० टी०-तथोक्त इति । अत्र जहाव । बहुत्वभाव आर्षः ॥ ५ ॥

६] ति० टी०-स्त्रिय आजग्मुः । होमपरिचारिका इति शेषः ॥ ६ ॥

रा० टी०-जुह्वत इति । अग्निं जुह्वतः सतः रक्तोष्णीषधराः ऋत्विजां धारणार्थं गृहीतारुणोष्णीषाः राक्षस्यः स्त्रियः यत्र रावणिः तत्राजग्मुः ॥ ६ ॥

गो० टी०-जुह्वत इति । भावलक्षणे षष्ठी । रक्तोष्णीषधराः । ऋत्विग्धारणार्थं रक्तोष्णीषाण्यानयन्त्य इत्यर्थः । लोहितोष्णीषा ऋत्विजः प्रचरन्ति इति श्रुतेः । संभ्रान्ताः त्वरावत्यः । समयातिक्रमो मा भूदिति त्वरया उष्णीषाण्यानिन्युरित्यर्थः ॥ ६ ॥

७-८] ति० टी०-शस्त्राणीत्यादि व्याख्यातम् ॥ ७ ॥ ८ ॥

रा० टी०-शस्त्राणीति । सर्वतोऽग्निं शस्त्रादीनि समास्तीर्य सतोमरैश्शरपत्रैर्जीवतः छागस्य गलं जग्राह श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०-शस्त्राणीति । शस्त्राणि । अभवन्निति शेषः । शरपत्राणि गुन्द्रपत्राणि गुन्द्रश्च काशजातीयः गुन्द्रस्तेजनकः शर इत्यमरः । शस्त्राणि तोमराणि सतोमरैरित्यनुवादात् । शस्त्राणि शरपत्राणि च परिस्तरणान्यभवन् । विभीतकाः समिधः इध्मानि अभवन् । वासांसि ऋत्विग्वुष्णीषवासांसि लोहितान्यभवन् । कार्ष्णायसं स्रुवमासीत् ॥ ७ ॥ ८ ॥

९-१०] ति० टी०-विजयं दर्शयन्ति चेत्यत्र जीवतः पुनर्लङ्काप्रवेश एवात्र जयः ॥ ९ ॥ १० ॥

रा० टी०-शरैरिति । शरहोमेन समिद्धस्य महार्चिषो वह्नेः यानि विजयं दर्शयन्ति तानि लिङ्गानि चिह्नानि बभूवुः ॥ ९ ॥

रा० टी०-लिङ्गान्येवाह प्रदक्षिणेति । प्रदक्षिणावर्ता शिखा यस्य स स्वयमुत्थितः पावकः तद्वह्निः प्रतिजग्राह ॥ १० ॥

गो० टी०-सकृदेवेति । विजयं दर्शयन्ति विजयसूचकानि ॥ ९ ॥ १० ॥

११-१२] ति० टी०-राक्षसांस्तर्पयित्वा । अभिचारयागीयानिति शेषः ॥ ११ ॥ १२ ॥

रा० टी०-हुत्वेति । अन्तर्द्धानगतम् अन्तर्द्धानगतिविषयकशक्तिमन्तं रथश्रेष्ठमारुरोह इन्द्रजिदिति शेषः ॥ ११ ॥

रा० टी०-स इति । वाजिप्रभृतिभिर्युतः स्यन्दनोत्तमः शुशुभे ॥ १२ ॥

गो० टी०-हुत्वेति । अन्तर्धानगतम् अन्तर्धानशक्तियुक्तम् ॥ ११ ॥ १२ ॥

१३] ति० टी०-वपुषा स्वरूपेण जाज्वल्यमानो रथ इति शेषः । मृगैश्चित्रमयैः ॥ १३ ॥

रा० टी०-जाज्वल्यमान इति । वपुषा स्वस्वरूपकान्त्या जाज्वल्यमानः प्रकाशमानः चित्रीभूतमृगादिभिः समलंकृतः स रथः शुशुभे इत्यनुकृष्यते ॥ १३ ॥

गो० टी०-जाज्वल्यमान इति । मृगैः मृगाकारप्रतिमाभिः चन्द्रैः चन्द्राकारैः अर्धचन्द्रैः रचनाविशेषैः ॥ १३ ॥

१४-१५] ति० टी०-जाम्बूनदमया महान्तः कम्बवो वलया यस्य । 'कम्बुर्ना वलये शङ्खे' इत्यमरः ॥ १४ ॥ १५ ॥

रा० टी०-जाम्बूनदेति । जाम्बूनदः सुवर्णमयः महान् कम्बुर्वलयो यस्य स इन्द्रजितः केतुः वैदूर्यसमलंकृतो बभूव कम्बुर्नावलये शंखे इत्यमरः ॥ १४ ॥

रा० टी०-तेनेति । आदित्यकल्पेन ब्रह्मास्त्रेण पालितो रावणिः दुराधर्षो बभूव ॥ १५ ॥

गो० टी०-जाम्बूनदेति । जाम्बूनदमहाकम्बुः सौवर्णमहावलययुक्तः । कम्बुर्ना वलये शङ्ख इत्यमरः ॥ १४ ॥ १५ ॥

---

१ कृष्णवर्णस्येति गो. पाठः । २ सकृदेवेति गो. पाठः । ३ चेति गो. पाठः । ४ विविधैरिति रम्मा । उत्तमः इति गो. रा. पाठः ।

सोऽभिनिर्याय नगरादिन्द्रजित्समितिंजयः । हुत्वाग्निं राक्षसैर्मन्त्रैरन्तर्धानगतोऽब्रवीत् ॥ १६ ॥
अद्य हत्वा रणे यौ तौ मिथ्या प्रव्रजितौ वने । जयं पित्रे प्रदास्यामि रावणाय रणेऽधिकम्॥१७ ॥
अद्य निर्वानरामुर्वीं हत्वा रामं च लक्ष्मणम् । करिष्ये परमां प्रीतिमित्युक्त्वान्तरधीयत ॥ १८ ॥
आपपाताथ संक्रुद्धो दशग्रीवेण चोदितः । तीक्ष्णकार्मुकनाराचैस्तीक्ष्णैस्त्विन्द्ररिपू रणे॥१९ ॥
स ददर्श महावीर्यौ नागौ त्रिशिरसाविव । सृजन्तावि षुजालानि वीरौ वानरमध्यगौ ॥ २० ॥
इमौ ताविति संचिन्त्य सज्यं कृत्वा च कार्मुकम् । संततानिषुधाराभिः पर्जन्य इव वृष्टिमान् ॥ २१ ॥
स तु वैहायसस्थो युधि तौ रामलक्ष्मणौ । अचक्षुर्विषये तिष्ठन्विव्याध निशितैः शरैः ॥ २२ ॥
तौ तस्य शरवेगेन परीतौ रामलक्ष्मणौ । धनुषी सशरे कृत्वा दिव्यमस्त्रं प्रचक्रतुः ॥ २३ ॥
प्रच्छादयन्तौ गगनं शरजालैर्महाबलौ । तमस्त्रैः सूर्यसंकाशैर्नैव पस्पर्शतुः शरैः ॥ २४ ॥
स हि धूमान्धकारं च चक्रे प्रच्छादयन्नभः । दिशश्चान्तर्दधे श्रीमान्हीहारतमसा वृतः ॥ २५ ॥
नैव ज्यातलनिर्घोषो न च नेमिखुरस्वनः । शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते ॥ २६ ॥
घनान्धकारे तिमिरे शिलावर्षमिवाद्भुतम् । स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः ॥ २७ ॥

१६–१७] ति० टी०–राक्षसैर्मन्त्रैर्निर्ऋतिदेवत्यमन्त्रैः । अन्तर्धानगतोऽन्तर्धानशक्तिं प्राप्तः ॥ १६ ॥ १७ ॥

रा० टी०–स इति । इन्द्रजित् नगरात् निर्याय निर्गत्य राक्षसैः राक्षसकुलमात्रप्रसिद्धैः मंत्रैः अग्निं हुत्वा अन्तर्धानगतस्तस्थौ अब्रवीत् ॥ १६ ॥

गो० टी०–स इति । राक्षसैः निर्ऋतिदेवताकैः । अन्तर्धानगतः अन्तर्धानशक्तिं प्राप्तः । अतः इत्युक्त्वान्तरधीयतेत्यनेन न विरोधः ॥ १६ ॥

रा० टी०–अद्येति । मिथ्या निरर्थं यौ वने प्रव्रजितौ आगतौ तौ रामलक्ष्मणौ हत्वा अधिकं जयं पित्रे प्रदास्यामि१०

गो० टी०–अद्य हत्वेत्यादिश्लोकद्वयमेकान्वयम् । अद्य निर्वानरामिति । पितुरित्यध्याहारः । पितुः परमप्रीतिं प्रति । पितुः प्रीतिमुद्दिश्येत्यर्थः । अद्य सलक्ष्मणं रामं हत्वा उर्वीं निर्वानरां करिष्य इति संबन्धः ॥ १७–१९ ॥

१८–१९] ति० टी०–रामं हत्वा निर्वानरामुर्वीं कृत्वा पितुः प्रीतिं करिष्ये इत्यर्थः । यत्त्वेवमादिवचसां रामस्तुतिपरतया क्रमेण व्याख्यानं तद्दुर्घट । कवेः कविनिबद्धवक्तुश्च तथा तात्पर्याभावादिति । एतत्सजातीयवालिवाक्यावसरे निरूपितम् ॥ १८ ॥ १९ ॥

रा० टी०–अद्येति । उर्वीं निर्वानरां कृत्वेति शेषः इत्युक्त्वा अन्तरधीयत वचनादुपरामेत्यर्थः ॥ १८ ॥

रा० टी०–आपपातेति । तीक्ष्णकार्मुकनाराचैः तीक्ष्णैरहंकारादिभिश्चोपलक्षित इन्द्ररिपुः रणे आपपात ॥ १९ ॥

२०] ति० टी०–तूणीधनुःसंबन्धात्त्रिशिरोनागस्तोत्रेण । सृजन्तौ लक्ष्यन्तौ ॥ २० ॥

रा० टी०–स इति । स इन्द्ररिपुः इषुजालानि सृजन्तौ त्रिशिरसौ नागाविव महावीर्यौ रामलक्ष्मणौ ददर्श तूणीधनुषोसंबन्धात् त्रिशिरोनागस्तोत्रेणेत्यपेक्षा ॥ २० ॥

गो० टी०–स ददर्शेति । नागौ त्रिशिरसाविति दृष्टान्तेन रामलक्ष्मणयोर्महापुरुषलक्षणप्रपुलोकितबृहच्छिरस्कत्वं द्योत्यते । सृजन्तौ लक्ष्यन्तौ । सकलराक्षसक्षयकारिणावित्यर्थः ॥ २० ॥

२१] ति० टी०–इमौ ताविति संचिन्य सकलराक्षसहन्तारौ इति स्मृत्वेषुधाराभिरिषुवर्षैः संततान्धकारमासं। मयो दिश इति शेषः ॥ २१ ॥

रा० टी०–इमाविति । इमावेव रामलक्ष्मणाविति सञ्चिन्त्य निश्चित्य कार्मुके सज्यं ज्यासहितं कृत्वा वृष्टिमान् पर्जन्य इव इषुजालानि ससर्जतान ॥ २१ ॥

गो० टी०–इमौ ताविति । ससर्जतान ववर्ष ॥ २१ ॥

२२] ति० टी०–वैहायसस्थ आकाशगामी रथो यस्य सः। अचक्षुर्विषये तिष्ठन् । इदं गूढं तद्रात्रावेव मध्यरात्रे ॥ २२ ॥

रा० टी०–स इति । स इन्द्ररिपुः अचक्षुर्विषये तिष्ठन् सन् शरैर्विव्याध ॥ २२ ॥

गो० टी०–वैहायसं विहायसा गमनम् ॥ २२–२४ ॥

२३] ति० टी०–परीतौ व्याप्तौ। प्रचक्रतुः प्रादुश्चक्रतुः ॥ २३

रा० टी०–शरवेगेन परीतौ रामलक्ष्मणौ धनुषी सशरे कृत्वा दिव्यमस्त्रं तन्मंत्राभिमंत्रणं प्रचक्रतुः ॥ २३॥

२४] ति० टी०–अस्त्रैरस्त्रमन्त्राभिमन्त्रितैः शरैस्तमिन्द्रजितं नैव पस्पर्शतुः पस्पृशतुः अन्तर्हितत्वादिति भावः॥ २४॥

रा० टी०–प्रच्छादयन्तावेति । महाबलौ अस्त्रैः तन्मंत्राभिमन्त्रितैश्शरैः तमिन्द्रजितं नैव पस्पर्शतुः पस्पृशतुः अन्तर्हितत्वादित्यर्थः ॥ २४ ॥

२५–२७] ति० टी०–धूमान्धकारं चक्रे । माययेति

१ त्राजितावि गो. पाठः । २ रणार्जितमिति गो. रा. पाठः । ३ सलक्ष्मणमिति गो. रा. पाठः । ४ परमप्रीतिमिति गो. पाठः । ५ संततानीति गो. पाठः । ६ ज्वालाभिरिति रा. पाठः । ७ वैहायसं प्राप्य स्थरो रामलक्ष्मणाति गो. पाठः । ८ वृत्ता इति गो. रा. पाठः । ९ शरेति गो. पाठः ।

स रामं सूर्यसंकाशैः शरैर्दत्तवरैर्भृशम् । विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः ॥ २८ ॥
तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ । हेमपुङ्खान्नरव्याघ्रौ तिग्मान्मुमुचतुः शरान् ॥ २९ ॥
अन्तरिक्षे समासाद्य रावणिं कङ्कपत्रिणः । निकृत्य पतगा भूमौ पेतुस्ते शोणितोक्षिताः ॥ ३० ॥
अतिमात्रं शरौघेण दीप्यमानौ नरोत्तमौ । तानिघ्नन्पततो भल्लैरनेकैर्विचकर्ततुः ॥ ३१ ॥
यतो हि दृश्यते तौ शरान्निपतितांश्छितान् । ततस्तु तौ दाशरथी ससृजातेऽस्त्रमुत्तमम् ॥ ३२ ॥
रावणिस्तु दिशः सर्वा रथेनातिरथोऽपतत् । विव्याध तौ दाशरथी लघ्वस्त्रौ निशितैः शरैः ॥ ३३ ॥
तेनातिविद्धौ तौ वीरौ रुक्मपुङ्खैः सुसंहतैः । बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ ॥ ३४ ॥
नास्य वेगगतिं कश्चिन्न च रूपं धनुः शरान् । न नास्य विदितं किंचित्सूर्यस्येवाभ्रसंप्लवे ॥ ३५ ॥
तेन विद्धाश्च हरयो निहताश्च गतासवः । बभूवुः शतशस्तत्र पतिता धरणीतले ॥ ३६ ॥
लक्ष्मणस्तु ततः क्रुद्धो भ्रातरं वाक्यमब्रवीत् । ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम् ॥ ३७ ॥
तमुवाच ततो रामो लक्ष्मणं शुभलक्षणम् । नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि ॥ ३८ ॥

शेषः । दिशश्चान्तर्धिरन्तर्धापयामास । नीहारध्वजान्तर्दधिरे मायया संपादयामासेत्यर्थः ॥ २५—२७ ॥

२८-२९] ति० टी०—दत्तवरैरस्त्रैः ॥ २८ ॥ २९ ॥

रा० टी०—स इति । स इन्द्रजित् नभः प्रच्छादयन् प्रच्छादयितुं धूमान्धकारं चक्रे । स्वमायेयेति शेषः अत एव दिशः अन्तर्दधे अन्तर्द्धापयामास ॥ २५ ॥

गो० टी०—नेति । चरतो गच्छतोऽपि तस्येन्द्रजितो ज्यातलनिर्घोषः नेमिस्वरश्चापश्च न शुश्रुवे ॥ २६ ॥

गो० टी०—स इति । नभः प्रच्छादयन् । हेतौ शतृप्रत्ययः । अन्तर्धापयामासेत्यर्थः । धूमान्धकारमिति नीहारतमसावृता इति च पूर्वमेवोत्पातकलुषत्वमुच्यते ॥ २५ ॥ २६ ॥

रा० टी०—घनेति । महावाहुः रामः घने निविडे अन्धकारे दृष्टयुपघातके तिमिरे तमसि नाराचश्रवणदृष्टिभिः शिलावर्षमिव वर्षे ॥ २७ ॥

रा० टी०—स इति । रावणिः दत्तवरैरस्त्रैः रामं सर्वगात्रेषु विव्याध ॥ २८ ॥

रा० टी०—तावेति । नाराचैः हन्यमानौ पर्वताविव नाराचैर्हन्यमानौ तौ रामलक्ष्मणौ तिग्मान् शरान् मुमुचतुः ॥ २९ ॥

गो० टी०—घनान्धकार इति । घनान्धकारं घनकालिमवति ॥ २७-२९ ॥

३०] ति० टी०—कङ्कपत्रिणस्ते पतगा बाणा अन्तरिक्षे रावणिं समासाद्य तं निकृत्य विद्ध्वा भूमौ शोणितोक्षिताः पेतुः ॥ ३० ॥

रा० टी०—अन्तरिक्ष इति । पतगाः रामबाणाः अन्तरिक्षे रावणिं समासाद्य प्राप्य निकृत्य विध्वा शोणिताप्लुतास्सन्तः भूमौ पेतुः ॥ ३० ॥

गो० टी०—अन्तरिक्ष इति । पतगाः पक्षिणो भूत्वा । तथा वेगवन्त इत्यर्थः ॥ ३०-३३ ॥

३१] ति० टी०—तानिघ्नन्निन्द्रजित्यतबाणान्विचकर्ततुरित्यर्थो गुणः ॥ ३१ ॥

रा० टी०—अतिमात्रमिति । शरौघेण अतिमात्रमत्यन्तं दीप्यमानौ नरोत्तमौ तान् इन्द्रजित्प्रयुक्तान् पतत इघ्नन् भल्लैर्बाणविशेषैः विचकर्ततुः विचकृततुः ॥ ३१ ॥

३२-३४] ति० टी०—यतो यस्यां दिशि ततस्तस्यां दिशि ॥ ३२-३४ ॥

रा० टी०—यत इति । तौ दाशरथी यतो यस्याः दिशः निपतितान् निर्गतान् शरान् दृश्यते ततः तस्यां दिशि उत्तममस्त्रं ससृजाते क्षिप्तवन्तौ ॥ ३२ ॥

रा० टी०—रावणिरिति । रावणिस्तु सर्वाः दिशः पतन् दिशः पतन् सन् शरैर्बहुभिः अल्पकालेन बहुतरं प्रभूतशीघ्राणि अस्त्राणि ययोस्तौ दाशरथी विव्याध ॥ ३३ ॥

रा० टी०—तेनेति । रुक्मपुङ्खैः शरैरतिविद्धौ अतिताडितौ रामलक्ष्मणौ पुष्पितौ सपुष्पौ किंशुकाविव बभूवतुः सुवर्णमयत्वेन निहतबहुजन्तुरुधिराक्तत्वेन च शराणां किंशुकपुष्पोपमा ॥ ३४ ॥

गो० टी०—तेनेति । सुसंहितैः सुदृढनिर्मितैः ॥ ३४ ॥

३५-३८] ति० टी०—अस्यसंप्लवे सूर्यस्य गत्यादिकमिव नास्य वेगयुक्तगत्यादिकं किंचिद्विदितम् ॥ ३५-३८ ॥

रा० टी०—नेति । अभ्राणां संप्लवे अतिप्रवाहे सूर्यस्येव अस्येन्द्रजितः गत्यादि कश्चिन्न वेद अत एव अस्य विदितं स्थितिं च न वेद विदितशब्दःणिजन्तप्रकृतिकनिष्ठान्तः संज्ञापूर्वकविधेरनित्यत्वादुणाभावः ॥ ३५ ॥

रा० टी०—तेनेति । तेनेन्द्रजिता अतिविद्धाः अत एव निहताः पीडिताः अत एव गतासवः शतशो हरयः धरणीतले पतिता बभूवुः ॥ ३६ ॥

रा० टी०—लक्ष्मण इति । सर्वरक्षसां वधार्थं ब्राह्ममस्त्रं प्रयोक्ष्यामीति वाक्यं लक्ष्मणो भ्रातरमब्रवीत् ॥ ३७ ॥

---

१ क्षितो इति गो. पाठः । २ निचकृन्ततुरिति गो. पाठः । ३ निपातत इति गो. पाठः । ४ रथः पतन्निति गो. रा. पाठः । ५ लघ्वस्त्र इति गो. पाठः । ६ सैर्हितैरिति गो. रा. पाठः । ७ अन्यदिति गो. पाठः । ८ सुसमिति गो. पाठः । *ताडयांचक्रुरिति युक्तम् ।

अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् । पलायमानं मत्तं वा न हन्तुं त्वमिहार्हसि ॥ ३९ ॥
तस्यैव तु वधे यत्नं करिष्यामि महाभुज । आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान्॥ ४० ॥
तमेनं मायिनं क्षुद्रमन्तर्हितरथं बलात् । राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः ॥ ४१ ॥
यद्येष भूमिं विशते दिवं वा रसातलं वापि नभस्तलं वा ।
एवं विगूढोऽपि ममास्त्रदग्धः पतिष्यते भूमितले गतासुः ॥ ४२ ॥
इत्येवमुक्त्वा वचनं महार्थं रघुप्रवीरः प्लवगर्षभैर्वृतः ।
वधाय रौद्रस्य नृशंसकर्मणस्तदा महात्मा त्वरितं निरीक्षते ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

एकाशीतितमः सर्गः ।

इन्द्रजित्सर्वेषां मोहनार्थं मायामयीं सीतां रचयित्वा स्वरथे स्थापयित्वा वानरसमक्षं वधायोद्यतस्तदा गच्छामश्चामो मारयिष्यामीति वानरैर्दीनां सीतां दृष्ट्वा वानरबलेन परिवृतोऽन्यमार्गेण रावणिस्तु रामसमीपं कोशन्तो वानरान् दूरतश्चैव खड्गनाताञ्छत्रून् हनुमांस्तं भर्त्सयितवान् वानरा अपि तत्रिशाम्य विषण्णा बभूवुः

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः । स निवृत्त्याहयात्तस्मात्पुरं विवेश पुरे ततः ॥ १ ॥

रा० टी०—तमिति । रामो लक्ष्मणमुवाच तदाकारमाह एकः इन्द्रजितो हेतोः रक्षांसि निखिलराक्षसान हन्तुं त्वं नार्हसि ३९

गो० टी०—नास्येति । अस्त्रमंत्रेण मेघायरणे ॥३९-४८॥

३९] ति० टी०—अयुध्यमानं त्यक्तयुद्धं प्रच्छन्नं गृहीत्वा गृहीतस्मदृष्टश्रुतया स्थितम् अयुध्यमानत्वादिषुप्रक्षेपाणामपि सर्वास्त्रप्रदर्शनेन ब्रह्मास्त्रसंधाने वधो भवति, न तु तदुच्यत इत्यर्थः। अन्ततो विभीषणस्यापि नाशप्रसङ्ग इत्याशयः ॥ ३९ ॥

रा० टी०—ननु इन्द्रजिन्मायावधार्थमेव ब्रह्मास्त्रं प्रयोक्ष्यामीत्युक्त आह—अयुध्यमानमिति । अयुध्यमानप्रभृतीन् हन्तुं त्वं नार्हसि एतेन पूर्वं शस्त्रप्रक्षेपो रावणिमार्यार्थमेवेति ध्वनितम्॥३९॥

गो० टी०—नैकस्येत्यादि । प्रच्छन्नं युद्धभीत्या प्रच्छन्नम् । पलायन्तं पलायमानम् ॥ ३९ ॥

४०-४१] ति० टी०—मायया अन्तर्हितमनेनैव हन्तुं घोरनाशीविषोपमानस्त्राण्यादेक्ष्यावः । अदृष्टवधोऽस्मदेकसाध्यः । दृष्टस्य तु वध ईषत्करो वानराणामपीत्याह—राक्षसमिति । यदि दर्शनं स्यात्तदा दृष्ट्वा दर्शनमात्रेण हनमदादय एनं राक्षसं निहनिष्यन्ति । 'दृष्ट्वा वानरयूथपाः' इत्यत्र तदर्शनोपायो भारते उक्तः—'इदमम्भो गृहीत्वा तु राजराजस्य शासनात । गृह्यकोऽभ्यागतः कश्चित्त्वत्सकाशमरिंदम ॥ इदमम्भः कुबेरस्ते महाराज प्रयच्छति । अन्तर्हितानां भूतानां दर्शनार्थं परंतप ॥ अनेन मृष्टनयनो भूतान्यन्तर्हितान्युत । भवान्द्रक्ष्यति यस्मै च प्रदास्यति नरः स च ॥' इति विभीषणवाक्येन ॥४० ॥ ४१॥

रा० टी०—तस्येन्द्रजितः वधे यत्नं करिष्याम्येव अत एव अस्त्रान् अस्त्राणि आदेक्ष्यावः ॥ ४० ॥

रा० टी०—ननु शस्त्राणामादेशेपि अन्तर्हितस्य वधः कथं भविष्यतीत्यत आह—तमिति । अन्तर्हितमेनं दृष्ट्वा वानरयूथपा निहनिष्यन्ति एतेन स्वस्यायत्तिवधनापेक्षणस्त्रं सूचितम्॥४१।

गो० टी०—अस्येव त्विति । आदेक्ष्यावः प्रयोक्ष्यावः अस्त्रान् अस्त्राणि । लिङ्व्यत्ययेन आर्षः ॥ ४० ॥ ४१ ॥

४२] ति० टी०—भूमिं भूमिविवरम् । दिवं स्वर्गम् एतदुपलक्षणं तलातलादिपरिग्रहार्थम् । रसातलमित्येतदप्यस्त्रदग्धस्यैकदेशपतनोपलक्षणम् ।

रा० टी०—ननु दर्शनानन्तरं शस्त्रविसर्जनेपि यद्यन्तर्हितो भविष्यति तार्हि कथं वधो भविष्यतीत्यत आह—यद्यीति एवं विमूढ इन्द्रजित् यदि एष्यत्यन्तरिक्षं विशते तदापि ममास्त्रदग्धस्यास्य भूमितले पतिष्यति एतेन स्वस्य सर्वदर्शिनो बाणानां चेतनत्वमभ्युपगन्तव्यं च सूचितम् ॥ ४२ ॥

गो० टी०—यद्यप इति । भूमिं भूविवरम् विशते । आत्मनेपदमार्षम् । दिवं स्वर्गम् ॥ ४२ ॥

४३] ति० टी०—त्वरितं त्वरोपेतं निरीक्षते स्म ॥ ४३॥

इति श्रीमाधविरचिते श्रीरामायणतात्पर्यनिर्णये वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

रा० टी०—इतीति । रघुप्रवीरः इति वचनमेवमुक्त्वा रौद्रस्य रक्षसः त्वरितं यथा भवति तथा निरीक्षते विचारयामास॥४३॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे अशीतितमः सर्गः ॥ ८० ॥

गो० टी०—इत्येवमिति । प्लवगर्षभैः वृतः निरीक्षते । उपायं चिन्तयति स्मेत्यर्थः ॥ ४३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीर्टाख्याने युद्धकाण्डव्याख्याने अशीतितमः सर्गः ॥ ८० ॥

१] ति० टी०—मनो विज्ञाय दिव्याज्ञबलेन सर्वथा मां जिघांसतीति ज्ञात्वा ॥ १ ॥

१ पलायन्तं प्रमत्तं वेति गो. रा. पाठः । २ त्वं हन्तुमिहेति गो. पाठः । ३ अस्त्रेति गो. पाठः । ४ करिष्यावो महाबलेति गो. पाठः । ५ नीति गो. पाठः। ६ समिति गो. पाठः ।

सोऽनुस्मृत्य वधं तेषां राक्षसानां तरस्विनाम् । क्रोधताम्रेक्षणः शूरो निर्जगामार्थं रावणिः ॥ २ ॥
स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः । इन्द्रजित्सुमहावीर्यः पौलस्त्यो देवकण्टकः॥ ३ ॥
इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ । रणायात्युद्धतौ वीरौ मायां प्रादुष्करोत्तदा॥ ४ ॥
इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं तदा । बलेन महतावृत्य तस्या वधमरोचयत् ॥ ५ ॥
मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः । हन्तुं सीतां व्यवसितो वानराभिमुखो ययौ॥ ६ ॥
तं दृष्ट्वा त्वभिनिर्यान्तं सर्वे ते काननौकसः । उत्पेतुरभिसंक्रुद्धाः शिलाहस्ता युयुत्सवः ॥ ७ ॥
हनूमान्पुरतस्तेषां जगाम कपिकुञ्जरः । प्रगृह्य सुमहच्छृङ्गं पर्वतस्य दुरासदम् ॥ ८ ॥
स ददर्श हतानन्दां सीतामिन्द्रजितो रथे । एकवेणिधरां दीनामुपवासकृशाननाम् ॥ ९ ॥
परिक्लिष्टैकवसनाममृजां राघवप्रियाम् । रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम् ॥ १० ॥
तां निरीक्ष्य मुहूर्तं तु मैथिलीमध्यवस्य चै । बभूवाचिरदृष्टा हि तेन सा जनकात्मजा ॥ ११ ॥

रा० टी०–इन्द्रजिद्वधविषयकरामविचारानन्तरकालिकं वृत्तान्तमाह—विज्ञायेत्यादिभिः। स इन्द्रजित् राघवस्य मनः स्ववधविषयकेच्छां विज्ञाय आहवार्थित्वेन पुरं लंकां प्रविवेश अनेन इन्द्रजितो भीतत्वं सूचितम् तेन रामस्य 'भीषास्माद्वातः पवते' इत्यादिश्रुतिगम्यत्वं सूचितम् ॥ १ ॥

गो० टी०–अथ मायासीतावधः एकाशीतितमे—विज्ञाय त्विन्यादि । अत्र तृतीयाक्षरभूतो यकारो गायत्र्या एकोनविंशतिमाक्षरम् । अष्टादशसहस्रश्लोकाः गताः ॥ १ ॥

२–३] ति० टी०–तेषां कुम्भकर्णादीनाम् ॥ २ ॥ ३ ॥

रा० टी०–स इति । स पुरभागतो रावणिः रक्षसां वधं स्वगमनमन्तरा हिंसनमनुस्मृत्य निर्जगाम ॥ २ ॥

गो० टी०–सोऽनुस्मृत्येति । तेषां कुम्भकर्णादीनाम् ॥२॥

रा० टी०–तत्प्रकारमाह—सेति । इन्द्रजित् पश्चिमेन द्वारेण निर्ययौ ॥ ३ ॥

गो० टी०–निकुम्भिलायां दुर्जयाश्वबललाभाय होतुकामस्तावत्पर्यन्तं रामलक्ष्मणयोर्युद्धोद्योगं मन्दीकर्तुं मायामारिप्यमाणो रामलक्ष्मणयोः कृपितत्वेन दुरासदत्वात् सीतास्वरूपाभिज्ञस्यान्यस्याभावाद्दनुमते मायां दर्शयितुं पश्चिमद्वारेण निर्गत इत्याह—स पश्चिमेनेत्यादिना ॥ ३ ॥

४] ति० टी०–मायां परव्यामोहकरीं शक्तिं प्रादुष्करोत्–प्रादुर्भावयामास । निकुम्भिलां गन्तुकामः पश्चिमेन द्वारेण निर्गच्छन्स्वगमनविघातकं रामलक्ष्मणयोर्युद्धोद्योगं दृष्ट्वा तन्निवारणार्थं मायां प्रकटितवानित्याशयः ॥ ४ ॥

रा० टी०–इन्द्रजिदिति । इन्द्रजित् रामलक्ष्मणौ रणाय अभ्युद्यतौ दृष्ट्वा मायां प्रादुष्करोत् स्वप्राणरक्षणाय विविधकार्पण्यं प्रकटयामास आगमशास्त्रस्यानित्यत्वाद्दविरहः ॥ ४ ॥

गो० टी०–इन्द्रजिरित्यति । दृष्ट्वा विचिन्त्य । पश्चिमद्वारनिष्क्रान्तस्य रामलक्ष्मणदर्शनासंभवात् । मायां परव्यामोहकरीं शक्तिम् प्रादुष्करोत् प्रादुर्भावयामास ॥ ४ ॥

५–९] ति० टी०–तां मायामाह—इन्द्रजित्त्विति । तस्या वधं मायासीतावधम् । बुद्धिं कृत्वा मन्त्रं कृत्वा सीतां हन्तुं व्यवसितः सन् ययौ । इदं रात्रिशेषे परदिने दशम्यां वा इति बोध्यम् ॥ ५—९ ॥

१०] ति० टी०–परिक्लिष्टं मलिनम् । अमृजामुद्वर्तनादिसंस्काररहिताम् । सर्वगात्रैरुपलक्षिताम् ॥ १० ॥

रा० टी०–मायामेवाह—इन्द्रजिदिति । इन्द्रजित् मायामयीं सीतां रथे स्थाप्य स्थापयित्वा बलेन सैन्येनावृत्य तस्याः मायासीतायाः वधमरोचयत् ऐच्छत् ॥ ५ ॥

रा० टी०–मोहनार्थमिति । सर्वेषां हनुमदादीनां मोहनार्थं बुद्धिं निश्चयं कृत्वा सीतां हंतुं व्यवसितो निश्चयवान् इन्द्रजित् वानराभिमुखस्सन् ययौ ॥ ६ ॥

रा० टी०–तमिति । अभिनिर्यांतं तमिन्द्रजितं दृष्ट्वा अभिसंक्रुद्धाः काननौकस उत्पेतुः ॥ ७ ॥

रा० टी०–हनूमानिति । हनुमान् सुमहत्पर्वतस्य शृङ्गं प्रगृह्य तेषां वानराणां पुरतो जगाम ॥ ८ ॥

गो० टी०–इन्द्रजित्त्विति । आवृत्य स्थितेन बलेन । युक्त इति शेषः । युक्ते रथे सीतां स्थाप्य ततस्तस्या वधमरोचयदिति संबन्धः ॥ ५–८ ॥

रा० टी०–स इति । हतः आनन्दो यस्याः उपवासेन कृशमाननं यस्याः परिक्लिष्टं मलिनमेकवसनं यस्याः अमृजामुद्वर्तनप्रभृतिसंस्काररहितां रजोमलाभ्यामालिप्तैः सर्वगात्रैरुपलक्षितां वरस्त्रियं सीतां स हनुमान् ददर्श श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०–स ददर्शेत्यादिश्लोकद्वयमेकान्वयम् । अमृजाम् अनुद्वर्तनाम् । अनलंकारामिति वा । " मृजू, शौचालंकारयोः " इति धातोर्भिदादित्वादङ् । सर्वगात्रैः उपलक्षिताम् ॥ ९ ॥ १० ॥

११] ति० टी०–अध्यवस्य निश्चित्य । विषण्णो बभूवेति शेषः । निश्चयहेतुमाह—अचिरेत्यादि ॥ ११ ॥

१ महाद्युतिरिति गो. पाठः । २ त्विति गो. पाठः । ३ अभीति गो. रा. पाठः । ४तत इति गो. पाठः । ५ नगर्यां इति गो. पाठः । ६ मैथिलीतीति गो. पाठः । ७ त्विति गो. रा. पाठः ।

अब्रवीत्तां तु शोकार्तां निरानन्दां तपस्विनीम् । दृष्ट्वा रथस्थितां दीनां राक्षसेन्द्रसुतश्रिताम् ॥ १२ ॥
किं समर्थितमस्येति चिन्तयन्स महाकपिः । सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिम् ॥ १३ ॥
तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्च्छितः । कृत्वा विकोशं निस्त्रिंशं मूर्ध्नि सीतामकर्षयत् ॥ १४ ॥
तां स्त्रियं पश्यतां तेषां ताडयामास राक्षसः । क्रोशन्तीं रामरामेति मायया योजितां रथे ॥ १५ ॥
गृहीतमूर्धजां दृष्ट्वा हनूमान्दैन्यमागतः । दुःखजं वारि नेत्राभ्यामुत्सृजन्मारुतात्मजः ॥ १६ ॥
तां दृष्ट्वा चारुसर्वाङ्गीं रामस्य महिषीं प्रियाम् । अब्रवीत्परुषं वाक्यं क्रोधाद्राक्षोधिपात्मजम् ॥ १७ ॥
दुरात्मन्नात्मनाशाय केशपक्षे परामृशः । ब्रह्मघ्नीणां कुले जातो राक्षसीं योनिमाश्रितः ॥ १८ ॥
धिक्त्वां पापसमाचारं यस्य ते मतिरीदृशी । नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम ॥
अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण ॥ १९ ॥
च्युता गृहाच्च राज्याच्च रामहस्ताच्च मैथिली । किं तयापराद्धा हि यदेनां हंसि निर्दय ॥ २० ॥

रा० टी०—तामिति । तां भायामयीं मैथिलीं मुहूर्तं निरीक्ष्य अध्यवस्यन निरूपयन् मनसेन तेन हनुमता अचिरदृष्टा बहुकालमवलोकिता सा सीता बभूव ॥ ११ ॥

गो० टी०—तामिति । अध्यवस्य निश्चित्य । विषण्ण इति शेषः । निश्चये हनुमाह—बभूवेति ॥ ११ ॥

गो० टी०—तामिति । दृश्य दृष्ट्वा ॥ १२ ॥

१२] ति० टी०—शोकार्तत्वादिगुणविशिष्टां राक्षसेन्द्रसुतमिन्द्रजितं श्रितां सीतां दृष्ट्वा किमस्य समर्थितमभिप्रेतमिति स्वयं चिन्तयन् सन् वानरान्प्रत्यपि किं समर्थितमस्येत्यब्रवीत् ॥१२॥

रा० टी०—अब्रवीदिति । राक्षसेन्द्रसुतश्रितामत एव शोकार्तां तां सीतां दृष्ट्वा चिंतयन चिन्तां प्राप्तस्सन् अस्येन्द्रजितः किं समर्थितमभिप्रेतमित्यब्रवीत् वानरान् प्रतीति शेषः वानरश्रेष्ठैस्सह रावणिमभ्यधावत च श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०—अब्रवीदित्याद्यर्धत्रयमेकान्वयम् । सीतां रथे स्थापितवतोऽस्य किं समर्थितं को वाभिप्राय इति चिन्तयन्नब्रवीत् । इतिवचनचिन्तनयोः साधारणः ॥ १३ ॥

१३] ति० टी०—अस्तु यत्किंचिदस्य समर्थितम्, अपि तु दृष्टमेनं हन्म इत्युद्योगं कृतवानित्याह—सह तैरिति ॥ १३॥

गो० टी०—सहतैरित्यर्धम् । हनुमानिति शेषः ॥ १४ ॥

१४] ति० टी०—विकोशं विगतपिधानं निस्त्रिंशं खड्गं मूर्ध्नि तत्स्थे केशपाशे । स्प्रष्टुमिति शेषः ॥ १४ ॥

रा० टी०—तदिति । तत् यावत् वानरबलं दृष्ट्वा क्रोधमूर्छितो रावणिः निस्त्रिंशं खड्गं विकोशं पिधानरहितं कृत्वा मूर्ध्नि सीताकेशपाशे स्पर्शयित्वेति शेषः सीतामकर्षयत् ॥१४॥

गो० टी०—तदिति । मूर्छितः व्याप्तः ॥ १४ ॥

१५-१७] ति० टी०—पश्यतां तेषाम् । पश्यतस्तानाहत्येत्यर्थः ॥ १५—१७ ॥

रा० टी०—तामिति । मायया रक्षोमायया योजितां सीतां तेषां वानराणां पश्यतां सतां राक्षसः सीतां ताडयामास ॥ १५ ॥

रा० टी०—गृहीतेति । गृहीताः मूर्द्धजाः यस्याः तां सीतां दृष्ट्वा दुःखजं वारि नेत्राभ्यामुत्सृजन् हनुमान् दैन्यमागतोऽभवदिति शेषः ॥ १६ ॥

रा० टी०—तामिति । तां गृहीतमूर्द्धजां रामस्य महिषीं दृष्ट्वा हनुमान् स्त्रीविघातजं परुषं वाक्यमब्रवीत् ॥ १७ ॥

गो० टी०—तामिति । पश्यतां तेषाम् । अनादरे षष्ठी । मायया परमोहनशक्त्या ॥ १६-१८ ॥

१८] ति० टी०—हे दुरात्मन्, यदेनां केशपक्षे केशकलापे परामृशस्तदात्मनाशाय । 'पाशः पक्षश्च हस्तश्च कलापार्थाः कलात्परे' । यतो ब्रह्मघ्नीकुले जातोऽपि राक्षसीं योनिमाश्रितोऽसि, अतस्त्वां धिगित्यादिश्लोकेनान्वयः ॥ १८ ॥

रा० टी०—तदात्मनाशमाह—दुरात्मन्नित्यादिभिः । हे दुरात्मन् राक्षसीं योनिमाश्रितस्त्वं आत्मविनाशाय केशपक्षे केशपक्षमिश्रणे परामृशः व्यचारयः, अतः यस्य ते मतिरीदृशी तं त्वां धिक् श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०—दुरात्मन्निति । केशपक्षे केशसमूहे । पाशः पक्षश्च हस्तश्च कलापार्थाः कलात्परः इत्यमरः । परामृशः अस्पृशः ॥ १९ ॥

१९-२०] ति० टी०—पापपराक्रम कुटयोधिन । हे निर्घृण ! ते स्त्रीविषयेऽपि घृणा नास्ति । अतोऽनार्यस्येदृशं कर्म धिगित्यनुकर्षः ॥ १९ ॥ २० ॥

रा० टी०—अनार्यस्येति । यतोऽनार्यस्य नीचस्य ईदृशमेव कर्म भवति अतस्ते घृणा दया नास्ति अतः पृथक् । सीतायाः दयाविषयत्वमुपपादयन्नाह—च्युतेति । गृहादिभ्यश्च्युता एषा मैथिली तव किमपराद्धा अपराधं कृतवती कर्तरि निष्ठा ययेनापराधेन एनां हंसि ॥ २० ॥

गो० टी०—धिगित्यादिसार्धश्लोक एकान्वयः । ईदृशी ।

१ सीतामिति गो. पाठः । २ दृष्ट्वेति गो. पाठः । ३ परामृशदिति गो. पाठः । ४ रावणिरिति गो. पाठः । ५ शोकार्जमिति गो. पाठः । ६ हन्तुमेच्छतीति गो. पाठः ।

सीतां हत्वा तु न चिरं जीविष्यसि कथंचन । वधार्हकर्मणा तेन मम हस्तगतो ह्यसि ॥ २१ ॥
ये च स्त्रीघातिनां लोका लोकवध्यैश्च कुत्सिताः । इह जीवितमुत्सृज्य प्रेत्य तान्प्रति लप्स्यसे॥ २२ ॥
इति ब्रुवाणो हनुमान्सायुधैरिरिभिर्वृतः । अभ्यधावत्सुसंक्रुद्धो राक्षसेन्द्रसुतं प्रति ॥ २३ ॥
आपतन्तं महावीर्यं तदनीकं वनौकसाम् । रक्षसां भीमकोपानामनीकेन न्यवारयत् ॥ २४ ॥
स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीम् । हनूमन्तं हरिश्रेष्ठमिन्द्रजित्प्रत्युवाच ह ॥ २५ ॥
सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः । तां वधिष्यामि वैदेहीमद्यैव तव पश्यतः ॥ २६ ॥
इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर । सुग्रीवं च वधिष्यामि तं चानार्यं विभीषणम्॥ २७ ॥
न हन्तव्याः स्त्रियश्चेति यद्ब्रवीषि प्लवङ्गम । पीडाकरमिमित्राणां यच्च कर्तव्यमेव तत् ॥ २८ ॥
तमेवमुक्त्वा रुदतीं सीतां मायामयीं च ताम् । शितधारेण खड्गेन निजघानेन्द्रजित्स्वयम् ॥ २९ ॥
यज्ञोपवीतमार्गेण छिन्ना तेन तपस्विनी । सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना ॥ ३० ॥

जुगुप्सितेत्यर्थः । नृशंस निर्दय अनार्य अभज्जन दुर्वृत्त दुराचार क्षुद्र अल्पबुद्धे पापः अधर्म्यः पराक्रमो यस्य स पापपराक्रमः । उक्तमनार्यत्वं कार्यतो दर्शयति—अनार्यस्येति । ईदृशं जुगुप्सितं कर्म अनार्यस्यैव भवति । हे निर्घृण निर्दय, ने घृणा जुगुप्सा नास्ति । जुगुप्सा करुणा घृणा इत्यमरः ॥ २० ॥ २१ ॥

गो० टी०—अपराधिषु घृणा न कर्तव्या अत एव एनां हन्मीत्याशङ्क्यापराधलेशोऽप्यस्यां नास्तीत्याह—द्युतेति । गृहात् स्वसदनात् चकारात् परिचारकेभ्यश्च अनेन बन्धुसुखादपराधकरणं नास्तीत्युक्तम् । राज्यात् राज्योपकरणाच्च अनेन सेनामुखेन नापराध इत्युक्तम् । रामहस्तात् रक्षकहस्ताच्च । तन्मुखादप्यपराधप्रसक्तिर्नास्तीत्युक्तम् । मैथिली आचारप्रधानकुले जाता । अनेनापराधस्वरूपमेव न जानातीत्युक्तम् । यत् येनापराधकार्येण एनां हन्तुमिच्छसि तादृशं किं प्रयोजनमुद्दिश्य अपराद्धा अपराधं कृतवती । कर्तरि क्तः ॥ २२ ॥ २३ ॥

२१] ति० टी०—हे वधार्ह ! तेन कर्मणा न चिरं जीविष्यसि । हि यतो मम हस्तगतोऽसि ॥ २१ ॥

रा० टी०—हनूमत्स्य नाशहेतुकत्वमुपपादयन्नाह—सीतामिति । हेवधार्ह सीतां हत्वा तेन कर्मणा हेतुभूतेन त्वं चिरं कथंचित्र जीविष्यसि हि यतः मम हस्तगतः दृष्टिपथं प्राप्तोसि २१

२२-२३] ति० टी०—ये लोकवध्यैश्चोरादिभिरपि कुत्सिता अतिदुःखिताः परिहृताः स्त्रीघातिनां लोकास्तानिदानीं जीवितमुत्सृज्य प्रेत्य प्रतिलप्स्यसे ॥ २२ ॥ २३ ॥

रा० टी०—ये इति । लोकानां सर्वजनानां वध्यैः महापापिभिरपीत्यर्थः ये कुत्सिताः तैरपि ये गन्तुं नेष्यन्ते इत्यर्थः तान् स्त्रीघातिनां लोकान् इह जीवितमुत्सृज्य प्रेत्य गत्वा प्रतिलप्स्यसे नियतवासाश्रयत्वेन प्राप्स्यसि ॥ २२ ॥

गो० टी०—ये चेति । हे लोकवध्य ! एषु चतुर्दशलोकेषु स्त्रीघातिनां ये कुत्सिताः लोकाः तान् इह जीवितमुत्सृज्य प्रेत्य यातनाशरीरं प्राप्य प्रतिपत्स्यसे प्राप्स्यसीत्यर्थः ॥२४॥

रा० टी०—इतीति । हनुमान् राक्षसेन्द्रसुतं प्रति अभ्यधावत ॥ २३ ॥

गो० टी०—इतीति । सायुधैः सहननसायुधैः॥ २३ ॥

२४-२७] ति० टी०—आपतन्तमिति लिङ्व्यत्ययेन आर्षः ॥ २४—२७ ॥

रा० टी०—आपतन्तमिति । आपतन्तमापतत् वनौकसामनीकं रक्षसामनीकेन सैन्येनन्यवारयत् इन्द्रजिदिति शेषः ॥ २४ ॥

रा० टी०—स इति । स इन्द्रजित् हरिवाहिनीम् विक्षोभ्य निवार्य हनुमन्तं प्रत्युवाच ॥ २५ ॥

रा० टी०—तदाकारमाह—सुग्रीव इति । यन्निमित्तं सुग्रीवादय इहागताः तां वैदेहीं तव पश्यतो वधिष्यामि॥२६॥

रा० टी०—इमामिति । रामप्रभृतीन् वधिष्यामि ॥२७॥

गो० टी०—आपतन्तमिति । अनीकम् अनीकं च २६-२९

२८-३०] ति० टी०—अमित्राणां शत्रूणां यत्पीडाकरं तत्पापमपि कर्तव्यमेव ॥ २८ —३० ॥

रा० टी०—नेति । स्त्रियो न हन्तव्याः इति यत्त्वं ब्रवीषि तदेवमुत्तरमिति शेषः उत्तरमेवाह अमित्राणां यत्पीडाकरं तत्कर्तव्यमेवेति एतेन स्त्रीवधदोषस्य नायं विषय इति सूचितम् ॥ २८ ॥

रा० टी०—तमिति । इन्द्रजित् मायामयीं सीतां खड्गेन निजघान ॥ २९ ॥

गो० टी०—न हन्तव्या इति । यत् ब्रवीषि तन्नोत्तरं श्रूयतामिति वाक्यशेषः ॥ ३० ॥ ३१ ॥

रा० टी०—यज्ञेति । यज्ञोपवीतमार्गेण तदुपलक्षितशरीरार्द्धदेशेन छिन्ना सा मायामयी सीता पृथिव्यां पपात ॥३०॥

गो० टी०—यज्ञोपवीतेति । यज्ञोपवीतमार्गेण भिन्ना ।

---

१ च इत्येते गो. पाठः । २ अनेनेति गो. पाठः । ३ प्रस्थसे इति गो. पाठः । ४ वेगानामिति गो.पाठः । ५ अनीकं त्विति गो.पाठः । ६ हरिश्रेष्ठं हनूमन्तमिति गो. पाठः । ७ यस्यादिति गो. पाठः ।

तामिन्द्रजित्स्त्रियं हत्वा हनूमन्तमुवाच ह । मया रामस्य पश्येमां प्रियां शस्त्रनिषूदिताम् ॥
एषा विशस्ता वैदेही निष्फलो वः परिश्रमः ॥ ३१ ॥
ततः खड्गेन महता हत्वा तामिन्द्रजित्स्वयम् । हृष्टः स रथमास्थाय ननाद च महास्वनम् ॥ ३२ ॥
वानराः शुश्रुवुः शब्दमदूरे मृत्यवस्थिताः । व्यादितास्यस्य नदतस्तदुर्गं संश्रितस्य तु ॥ ३३ ॥
तथा तु सीतां विनिहत्य दुर्मतिः प्रहृष्टचेताः स बभूव रावणिः ।
तं हृष्टरूपं समुदीक्ष्य वानरा विषण्णरूपाः समभिप्रदुद्रुवुः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

द्व्यशीतितमः सर्गः ।

मारुतिर्विषण्णान्विद्रुतान्कपीन्धैर्यवचनैः संनिवर्त्य तैः सहेन्द्रजिता चिरं कलहं कृत्वा जानकीं तु मया वधं प्रहराम इति मन्त्रिभिर्धैर्यः कपिभिः सह रणाभिमुखं कृत्वा विविदिषुरेव तदभिमुखो ययौ । इन्द्रजितु निवृत्तं मारुतिं प्रेक्ष्य पुनर्यागे संप्रेप्सुं निकुम्भिलामगात् ।

श्रुत्वा तं भीमनिर्हादं शक्राशनिसमस्वनम् । वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरा भृशम् ॥ १ ॥
तानुवाच ततः सर्वान्हनूमान्मारुतात्मजः । विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतः पृथक् ॥ २ ॥
कस्माद्विषण्णवदना विद्रवध्वं प्लवंगमाः । त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतम् ॥ ३ ॥
पृष्ठतो न व्रजध्वं मामग्रतो यान्तमाहवे । शूरैरभिजनोपेतैर्युक्तं हि निवर्तितुम् ॥ ४ ॥
एवमुक्ताः सुसंक्रुद्धा वायुपुत्रेण धीमता । शैलशृङ्गैर्द्रुमांश्चैव जगृहुर्हृष्टमानसाः ॥ ५ ॥
अभिपेतुश्च गर्जन्तो राक्षसान्वानरर्षभाः । परिवार्य हनूमन्तमन्वयुश्च महाहवे ॥ ६ ॥
स तैर्वानरमुख्यैस्तु हनूमान्सर्वतो वृतः । हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम् ॥ ७ ॥
स राक्षसानां कदनं चकार सुमहाकपिः । हतो वानरसैन्येन कालान्तकयमोपमः ॥ ८ ॥
स तु शोकेन चाविष्टः कोपेन महता कपिः । हनूमान्रावणिरथे महतीं पातयच्छिलाम् ॥ ९ ॥

मार्गशब्दः प्रकारवचनः । यज्ञोपवीतप्रकारेण भित्त्वेत्यर्थः । यज्ञोपवीतमादाय भित्त्वेति पाठान्तरम् । पूर्वं सव्येऽपि गृहीतमादाय । यज्ञोपवीतभित्त्वा यज्ञोपवीतं यथा भवति तथा भित्त्वा यज्ञोपवीतप्रकारेण भित्त्वेत्यर्थः ॥ ३२ ॥

३१–३२] ति० टी०–एषा वैदेही विशस्ता, अतो वः परिश्रमो निष्फलः ॥ ३१ ॥ ३२ ॥

रा० टी०–तामिति । इन्द्रजित् स्त्रियं हत्वा हत्वा तमुवाच अहं पृथक् ॥ ३१ ॥

रा० टी०–तदाकारमाह—मयेति । मया शस्त्रनिषूदितां दृश्यत तत्फलमाह यदि एषा वैदेही विशस्ता हिंसिता तर्हि वः परिश्रमो निष्फलः एतेन युद्धान्निवर्तध्वमिति सूचितम् ॥ ३२ ॥

रा० टी०–तत इति । इन्द्रजित् तां हत्वा रथमास्थाय महास्वनं यथा भवति तथा ननाद ॥ ३३ ॥

गो० टी०–मयेति ॥ ३३ ॥ ३४ ॥

३३] ति० टी०–व्यादितास्यस्य विवृतास्यस्य । तद्दुर्गं विचररथरूपं दुर्गम् ॥ ३३ ॥

रा० श्री०–वानरा इति । अदूरे निकटे मृत्यवस्थिताः वानराः व्यादितास्यस्य प्रस्फारितमुखस्य नदत इन्द्रजितः शब्दं शुश्रुवुः ३४

गो० टी०–वानरा इति । व्यादितास्यस्य व्यात्तास्यस्य । तद्दुर्गं व्यूहीकृतराक्षसपरिवृतरूपम् ॥ ३३ ॥

३४] ति० टी०–हृष्टरूपमतिशयेन हृष्टम् । प्रशंसायां रूपप् ३४

इति श्रीरामानुगस्य श्रीरामार्यस्य रामायणशिरोमणेर्वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

रा० टी०–तथेति । रावणिः तथा सायामयीं सीतां विनिहत्य प्रहृष्टचेताः बभूव हृष्टरूपमतिशयेन हर्षं न रावणिं समुदीक्ष्य विषण्णरूपाः अतिविषण्णाः वानराः समभिप्रदुद्रुवुः ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणे वाल्मीकीये रामायणशिरोमणौ युद्धकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

गो० टी०–तथा न्यिति । हृष्टरूपम् अत्यन्तहृष्टम् । विषण्णरूपाः अत्यन्तं विषण्णाः ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीरीटाख्याने युद्धकाण्डव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

१–८] ति० टी०–श्रुत्वेति । भीमो यो निर्हादः शब्द-

१ स्वयमिति गो. रा. पाठः । २ कोपेन चेति गो. पाठः । ३ वीति गो. पाठः । ४ चेति गो. रा. पाठः । ५ सङ्गमेति गो. पाठः । ६ त्रिति गो. पाठः । ७ वानरर्षभा इति गो. पाठः । ८ ध्वे इति गो. पाठः । ९ इदमर्धमधिकं गो. पाठे । १० स्था इति गो. पाठः । ११ शक्राण्यशनिरिति गो पाठः । १२ चेति गो. पाठः । १३ कोपेनेति गो. पाठः । १४ शोकेनेति गो. पाठः । १५ च महाकपिरिति गो. पाठः । १६ पातयन्महतीमिति. गो. पाठः ।

तामापतन्तीं दृष्ट्वैव रथं सारथिना तदा । विधेयाश्वसमायुक्तो विदूरमपवाहितः ॥[1] १० ॥
तमिन्द्रजितमप्राप्यरथस्थं सहसारथिम् । विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता ॥ ११ ॥
पतितायां शिलायां तु व्यथिता रक्षसां चमूः । निपतन्त्या च शिलया राक्षसा मथिता भृशम् ॥ १२ ॥
तमभ्यधावन्क्रुद्धास्ते नदन्तः काननौकसः । ते द्रुमांश्च महाकायाँ गिरिशृङ्गाणि चोद्यताः ॥ १३ ॥
क्षिपन्तीन्द्रजितं संख्ये वानरा भीमविक्रमाः । वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः ॥ १४ ॥
शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वनैः । वानरैस्तैर्महाभीमैर्घोररूपा निशाचराः ॥ १५ ॥
वीर्यादभिहता वृक्षैर्व्यचेष्टन्त रणक्षितौ । सँ सैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित् ॥ १६ ॥
प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ । स शरौघानवसृजन्स्वसैन्येनाभिसंवृतः ॥ १७ ॥
जघान कपिशार्दूलान्सुबहून्दृढविक्रमः । शूलैरशनिभिः खड्गैः पट्टिशैः शूलमुद्गरैः
॥ १८ ॥
ते चाप्यनुचरांस्तस्य वानरा जघ्नुराहवे
सुस्कन्धविटपैः शैलैः[12] शिलाभिश्च महाबलः । हनूमान्कदनं चक्रे रक्षसां भीमकर्मणाम् ॥ १९ ॥

स्वं श्रुत्वा । इन्द्रजित इति शेषः । शक्राशनिसमस्वनं तमिन्द्रजितं वीक्षमाणा दिशो ददृशुः ॥ १—८ ॥

रा० टी०—वानराणां कृतान्तमाह—श्रुत्वेत्यादिभिः । वानराः भीमनिर्ह्रादं श्रुत्वा वीक्षमाणास्तन्तः दिशो ददृशुः ॥१॥

रा० टी०—तानिति । हनूमान् तस्मात् अत एव हेतोः विदूरतः तान् वानरान् उवाच ॥ २ ॥

गो० टी०—अथेन्द्रजितो निकुम्भिलायां होमारम्भः—श्रुत्वेत्यादि । शक्राशनिसमस्वनम् शक्राशनिस्वनसमम् इत्यर्थः ॥ १ ॥ २ ॥

रा० टी०—तदाकारमाह—कस्मादिति । हे प्लवङ्गमाः यूयं कस्मात् विद्रवध्वं नन्वभयात् विद्रवामः इत्यत आह वो युष्माकं भयत्वं कुतगतम् ॥ ३ ॥

गो० टी०—कस्मादिति । विद्रवध्वे विद्रवथ । आत्मनेपदमार्षम् ॥ ३ ॥

रा० टी०—पृष्ठत इति । आहवे अग्रतो यान्तं मां यूयं पृष्ठतोऽनुव्रजध्वमेवं वायुपुत्रेणोक्ताः वानराः उत्संहृष्टाः बभूवुरिति शेषः ॥ ४ ॥

रा० टी०—शैलेति । हृष्टमानसाः वानरर्षभाः शैलशृङ्गान् द्रुमांश्च जगृहुः राक्षसानभिपेतुश्च ॥ ५ ॥

रा० टी०—परिवार्येति । ये हनुमन्तं परिवार्यान्वयुः तैर्वानरमुख्यैर्वेष्टितस्य हनुमान् अग्निष्मान् हुताशन इव शत्रूणां वाहिनीं सेनां सर्वतोऽदहत् साहंस्तोक एकान्वयी ॥ ६ ॥

रा० टी०—स इति । स हनूमान् राक्षसानां कदनं हिंसनं चकार ॥ ७ ॥

रा० टी०—स इति । शोकेन क्षीताविघातजनितेन कोपेन चानिष्टो हनूमान् रावणिस्थे महतीं शिलां पातयत् अपातयत् ८

गो० टी०—पृष्ठत इति । अनुव्रजध्वम् अनुव्रजत । पदव्यत्यय आर्षः ॥ ४—१० ॥

९] ति० टी०—विधेयाश्वैः सारथ्यधीनाश्वैः समायुक्तः॥९।

रा० टी०—तामिति । आपतन्तीं तां शिलां दृष्ट्वैव विधेयैस्सारथ्यधीनीभूतैरश्वैस्समायुक्तो रथसारथिना विदूरमपवाहितः ॥ ९ ॥

१०–११] ति० टी०—सा शिला व्यर्थमुद्यता । अभवदिति शेषः ॥ १० ॥ ११ ॥

रा० टी०—तमिति । सहसारथिं सारथिसहितं रथस्थमिन्द्रजितमप्राप्य सा शिला धरणीं भित्त्वा विवेश अतः व्यर्थमुद्यताभवदिति शेषः ॥ १० ॥

रा० टी०—पतितायामिति । रक्षसां चमूर्व्यथिता राक्षसमथिताश्च ॥ ११ ॥

गो० टी०—तमिति । व्यर्थमुद्यता व्यर्थं प्रयुक्ता॥११-१३।

१२] ति० टी०—गिरिशृङ्गाणि चोद्यताः । गृहीत्वेति शेषः । गृहीत्वा युद्धार्थमुद्यता बभूवुरित्यर्थः ॥ १२ ॥

रा० टी०—तमिति । काननौकसः तमिन्द्रजितमभ्यधावन् अहं पृथक् ते इति उद्यताः वानराः द्रुमान् गिरिशृङ्गाणि इन्द्रजित्सैन्ये क्षिपन्ति ॥ १२ ॥

गो० टी०—ते द्रुमानिति । इन्द्रजितः इन्द्रजितं प्रति१४-१९

१३–१८] ति० टी०—ततस्तद्वर्षं विसृजन्तस्ते वानर इन्द्रजितं क्षिपन्त्याक्षिपन्ति स्म । निरस्कृतं चक्रुरिति यावत्॥ १३ ॥ १८ ॥

रा० टी०—वृक्षेति । वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः शत्रूणां कदनं चक्रुर्नेदुश्च ॥ १३ ॥

---

१ स्थ इति गो. रा. पाठः । २ रिति गो पाठः । ३ रक्षसां व्यथितेति गो.पाठः । ४ वीर्या इति गो.पाठः । ५ स्वरैरिति गो. पाठः । ६ वीर्यैरि गो. पाठः । ७ स्वेति गो. रा. पाठः । ८ कुद्धेति गो. पाठः । ९ कूटेति गो. रा. पाठः । १० अनुचरा इति गो पाठः । ११ वानरान् जघ्नुरोजसेति गो जघ्नुरोजसेति रा. पाठः । १२ सालैरिति गो. शालैरिति रा. पाठः ।

[1]संनिवार्य परानीकमब्रवीत्तान्वनौकसः । हनूमान्संनिवर्तध्वं न नः साध्यमिदं बलम् ॥ २० ॥
त्यक्त्वा प्राणान्विचेष्टन्तो रामप्रियचिकीर्षवः[2] । यन्निमित्तं हि युध्यामो हता सा जनकात्मजा॥२१॥
इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च । तौ यत्प्रतिविधास्येते तत्करिष्यामहे वयम् ॥२२ ॥
इत्युक्त्वा वानरश्रेष्ठो वारयन्सर्ववानरान्[3] । शनैः शनैरसंत्रस्तः सबलः संन्यवर्तत[4] ॥ २३ ॥
ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः । स होतुकामो दुष्टात्मा गतश्चैत्यं निकुम्भिलाम्[5]॥२४॥
निकुम्भिलामधिष्ठाय पावकं जुहवेन्द्रजित्[6] । यज्ञभूम्यां ततो गत्वा पावकस्तेन रक्षसा[7]॥ २५ ॥
हूयमानः प्रजज्वाल होमशोणितभुक्तदा । सार्चिः[8] पिनद्धो ददृशे होमशोणिततर्पितः॥
संध्यागत इवादित्यः सुतीव्रोऽग्निः समुत्थितः ॥ २६ ॥

अथेन्द्रजिद्राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित्[9] ।
दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते महासमूहेषु नयानयज्ञाः[10] ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

रा० टी०—वानरैरिति । वानरैः वृक्षैः करणैः अभिहता निशाचराः रणक्षितौ व्यचेष्टन्त ॥ १४ ॥

रा० टी०—स्वेति । इन्द्रजित् स्वसैन्यं वानरादिनमभिवीक्ष्य प्रगृहीतायुधस्सन् परान् रिपूनभिमुखो ययौ ॥ १५ ॥

रा० टी०—स इति । स्वसैन्येनाभिसंवृतः इन्द्रजित् शरीवान् अवसृजन् प्रक्षिपन् सन् सुवहून् कपिशरदृशान् अस्मारिभिर्जेयान् सार्द्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०—ते इति । वानरा अपि तस्येन्द्रजितः अनुचरान् जघ्नुः अर्द्धं पृथक् ॥ १७ ॥

रा० टी०—स इति । सस्कन्धविटपैः स्कन्धशिखासहितैः शालैश्शिलाभिश्च रक्षसां कदनं हनुमान् चक्रे ॥ १८ ॥

गो० टी०—शूलैरशनिभिरिति । अशनेरायुधत्वं शक्तिविशेषात् ॥ १९ ॥ २० ॥

१९] ति० टी०—संनिवार्य परानीकं राक्षससेनाम् ॥१९॥

रा० टी०—स इति । हनुमान् परानीकं रिपुसेनां निवार्यावदीत् तदाकारमाह हे वनौकसः इदं राक्षसीयं बलं नस्साध्यं विहिंसनीयमित्यर्थः न अतः सन्निवर्तध्वम ॥ १९ ॥

गो० टी०—स निवार्येत्यादि । न साध्यं साधयितुमयोग्यमप्रयोजनाभावादिति भावः । तदेवाह—त्यक्त्वेति॥२१–२४॥

२०] ति० टी०—प्राणांस्त्यक्त्वा प्राणस्नेहमपि त्यक्त्वा विचेष्टन्तः सन्तो रामप्रियचिकीर्षया यन्निमित्तं युध्यामः सा हतेति व्यर्थोऽयं श्रम इति भावः ॥ २० ॥

रा० टी०—तत्र कारणमाह—त्यक्त्वेति । यन्निमित्तं यस्याः हेतोः प्राणान् त्यक्त्वा त्यक्तप्रायान् कृत्वा विचेष्टामः विविधचेष्टां कुर्मः अत एव युध्यामः सा जनकात्मजा हता ॥ २० ॥

२१–२२] ति० टी०—प्रतिविधास्येते प्रतिक्रियानुष्ठाने नियोक्ष्येते तत्करिष्यामहे ॥ २१ ॥ २२ ॥

रा० टी०—इदमिति । इदमर्थं सीताहरणान्तं रामं विज्ञाप्य संश्राव्य तौ रामसुग्रीवौ यत्प्रतिविधास्येते कर्तुमाज्ञापयिष्येते तदयं करिष्यामहे ॥ २१ ॥

रा० टी०—इतीति । असंत्रस्तस्स हनुमान् इत्युक्त्वा न्यवर्तत ॥ २२ ॥

२३] ति० टी०—दशम्यां पूर्वाह्णे निकुम्भिलागमनम् । निकुम्भिलां चैत्यं तदाख्यदेवालयं यत्रस्थं वा ॥ २३ ॥

रा० टी०—तत इति । दुष्टात्मा रावणिः हनुमन्तं व्रजन्तं प्रेक्ष्य होतुकामस्सन् निकुम्भिलां तदाख्यं चैत्यं देवालयं गतः२३

गो० टी०—तत इति । चैत्यनिकुम्भिलां चैत्ये क्रियमाणे निकुम्भिलाख्यदेवतायतनमित्यर्थः ॥ २५ ॥

२४] ति० टी०—जुहव जुहाव ॥ २४ ॥

रा० टी०—निकुम्भिलामिति । इन्द्रजित् निकुम्भिलामधिष्ठाय पावकं जुहव जुहाव अर्द्धं पृथक् इतीति । रक्षसा विधिवत् हूयमानः होमशोणितभुक् पावकः प्रजज्वाल ॥ २४ ॥

गो० टी०—निकुम्भिलामित्यर्धम् । जुहव जुहाव२६॥२७

२५] ति० टी०—होमशोणितभुगग्नेरार्धमाह—निर्यत इति । शोणितभुक् । अर्चिर्भिः पिनद्धः संमूढः सुतीव्रोऽग्निः ज्वालोत्पत्तिकः ॥ २५ ॥

रा० टी०—स इति । होमशोणिततर्पितः अत एव अर्चिर्भिः पिनद्धः संप्रदृढः अर्चिर्मंडलस्थर्थः समुत्थितोऽग्निस्सन्ध्यागत आदित्य इव सुतीव्रो ददृशे ॥ २५ ॥

गो० टी०—स इति । होमशोणितं शोणितहोमः ॥ २४ ॥

२६] ति० टी०—महासमूहेषु युद्धेषु । नयानयज्ञाः कृत्याकृत्यतत्त्वज्ञाः ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

---

१ स इति गो. पाठः । २ वेष्टन्त इति गो. चेष्टाम इति रा. पाठः । ३ चिकीर्षवेति रा. पाठः । ४ चैत्यनिकुम्भिलामिति गो. पाठः । ५ तु विधिवदिति गो. रा. पाठः । ६ सांसेति गो. पाठः । ७ स इति गो. रा. पाठः ।

त्र्यशीतितमः सर्गः ।

हनुमांस्तु राघवमुपगम्य समरेऽनुभूतमिन्द्रजित्कृतसीतावधमकथयत् रामोऽपि तत्परमार्थतया गृहीतशोकमूर्छितो भूमौ न्यपतत् तं चानुजो लक्ष्मणो बाहुभ्यां संपरिष्वज्य दुःखेन प्राकृत इव धर्ममाक्षिप्यार्थमेव हेत्वनुवादपुरःसरं प्रशस्य भो शीघ्रमुत्तिष्ठाहं रुष्टो सरथं जहयां सराक्षसेन्द्रां दृशमिषुभिर्विनिपातयामि लङ्कामित्यब्रवीत् ।

राघवश्चापि विपुलं तं राक्षसवनौकसाम् । श्रुत्वा सङ्ग्रामनिर्घोषं जाम्बवन्तमुवाच ह ॥ १ ॥
सौम्य नूनं हनुमता कृतं कर्म सुदुष्करम् । श्रूयते च यथा भीमः सुमहानायुधस्वनः ॥ २ ॥
तद्गच्छ कुरु साहाय्यं स्ववलेनाभिसंवृतः । क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः ॥ ३ ॥
ऋक्षराजस्तथेत्युक्त्वा स्वेनानीकेन संवृतः । आगच्छत्पश्चिमं द्वारं हनूमान्यत्र वानरः ॥ ४ ॥
अथायान्तं हनूमन्तं ददर्शर्क्षपतिस्तदा । वानरैः कृतसङ्ग्रामैः श्वसद्भिरभिसंवृतम् ॥ ५ ॥
दृष्ट्वा पथि हनूमांश्च तदक्षबलमुद्यतम् । नीलमेघनिभं भीमं संनिवार्य न्यवर्तत ॥ ६ ॥
स तेन सह सैन्येन संनिकर्षं महायशाः । शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत् ॥ ७ ॥
समरे युध्यमानानामस्माकं प्रेक्षतां च सः । जघान रुदतीं सीतामिन्द्रजिद्रावणात्मजः ॥ ८ ॥
उद्भ्रान्तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिंदम । तदहं भवतो वृत्तं विज्ञापयितुमागतः ॥ ९ ॥
तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्च्छितः । निपपात तदा भूमौ छिन्नमूल इव द्रुमः ॥ १० ॥
तं भूमौ देवसंकाशं पतितं दृश्य राघवम् । अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः ॥ ११ ॥

रा० टी०—अथेति । विधानवित् इन्द्रजित् राक्षसानां भृत्यै प्रहर्षाय हव्यं मुखाय दृष्ट्वा तद्वचनमवलोक्य महासमूहेषु युद्धेषु नयानयज्ञाः कर्तव्याकर्तव्ययोर्विचारे राक्षसाः व्यतिष्ठन्त संस्थिता अभवन् ॥ १ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

गो० टी०—अथेति । नयानयज्ञाः शास्त्रीयाशास्त्रीयविदः २९

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्व्यशीतितमः सर्गः ॥ ८२ ॥

१–४] ति० टी०—राघवश्चापीति ॥ १–४ ॥

रा० टी०—पूर्वसिरामायणान्तरकालिकमिन्द्रजिद्वृत्तान्तमुक्त्वा हनुमद्वृत्तान्तं वर्णयितुमाह—राघव इत्यादिभिः । राघवो राक्षसानीकस्य संग्रामनिर्घोषं श्रुत्वा जाम्बवन्तमुवाच ॥ १ ॥

गो० टी०—अथ मायासीतावधमूर्छितरामसान्त्वनं त्र्यशीतितमे—राघवश्चापीत्यादि । जाम्बवन्तं यदृच्छया सन्निहितम् १

रा० टी०—तदाकारमाह—सौम्येति । सौम्य हे जाम्बवन् हनुमता सुदुष्करं कर्म युद्धक्रिया कृतं तव ज्ञापकमाह सुमहान् आयुधस्वनः यथा यथावत् श्रूयते ॥ २ ॥

रा० टी०—तदिति । युध्यतः कपिश्रेष्ठस्य साहाय्यं त्वं कुरु तत्साहेतोः गच्छ ॥ ३ ॥

रा० टी०—ऋक्षेति । ऋक्षराजो जाम्बवान् तथेत्युक्त्वा पश्चिमद्वारमगच्छत् ॥ ४ ॥

गो० टी०—सौम्येति । यथा यतः ॥ २–६ ॥

५] ति० टी०—श्वसद्भिः सीतावियोगस्मृतिजदुःखादिभिः श्वसद्भिरित्यर्थः ॥ ५ ॥

रा० टी०—अथेति । ऋक्षपतिः श्वसद्भिः सीताहृत्तान्तश्रवणजनितशोकहेतुकनिश्वासवद्भिर्वानरैरभिसंवृतमायान्तं हनुमन्तं ददर्श ॥ ५ ॥

६] ति० टी०—नीलमेघनिभं भीममृक्षबलमुद्यतं युद्धायोद्यतं संनिवार्य । युद्धप्रहर्षेरिति शेषः ॥ ६ ॥

रा० टी०—दृष्ट्वेति । हनुमान् उद्यतं युद्धाय सन्नद्धमृक्षबलं दृष्ट्वा संनिवार्य गमनात्संनिवर्त्य न्यवर्तत ॥ ६ ॥

७–१०] ति० टी०—तेन सैन्येन सह राक्षससैन्येनापि सह रामस्य संनिकर्षमागम्य प्राप्य रामायाब्रवीदित्यर्थः ७-१

रा० टी०—स इति । हनुमान् सैन्येन सह सन्निकर्षं रामसमीपं शीघ्रमागम्य रामायाब्रवीत् ॥ ७ ॥

रा० टी०—तदाकारमाह—समर इति द्वाभ्याम् अस्मार्क प्रेक्षतां सतामिन्द्रजित् सीतां जघान ॥ ८ ॥

रा० टी०—उद्भ्रान्तेति । तां विहिंसितां सीतां दृष्ट्वा उद्भ्रान्तचित्तोभवमिति शेषः तद्वृत्तं विज्ञापयितुं भवतस्समीपमहमागतः

रा० टी०—तस्येति । राघवः तस्य हनुमतो वचनं श्रुत्वा शोकमूर्छितस्सन् छिन्नमूलद्रुम इव भूमौ निपपात ॥ १० ॥

गो० टी०—स तेनेति । हरिसैन्येन सह । सन्निकर्षम् रामस्येति शेषः ॥ ७–११ ॥

११] ति० टी०—अभिपेतुस्तत्समीपमाजग्मुः ॥ ११ ॥

१ क्रियते कर्म दुष्करमिति गो. पाठः । २ उक्तस्त्विति गो. पाठः । ३ पश्चीति गो. रा. पाठः । ४ पुर इति गो. रा. पाठः ।

आसिञ्चन्सलिलैश्चैनं पद्मोत्पलसुगन्धिभिः । प्रदहन्तमसंहार्यं सहसाग्निमिवोत्थितम् ॥ १२ ॥
तं लक्ष्मणोऽथ बाहुभ्यां परिष्वज्य सुदुःखितः । उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम् ॥ १३ ॥
शुभे वर्त्मनि तिष्ठन्तं त्वामार्य विजितेन्द्रियम् । अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः ॥ १४ ॥
भूतानां स्थावराणां च जङ्गमानां च दर्शनम् । यथास्ति न तथा धर्मस्तेन नास्तीति मे मतिः॥ १५ ॥
यथैव स्थावरं व्यक्तं जङ्गमं च तथाविधम् । नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते ॥ १६ ॥

रा० टी०—तमिति । देवसंकाशं देवानामपि प्रकाशकं राघवं भूमौ पतितं दृष्ट्वा दृष्ट्वा कपिसत्तमाः समुत्पत्य अभिपेतुः रामसमीपं प्रापुः ॥ ११ ॥

१२] ति० टी०—प्रदहन्तं सीताहरणश्रवणशोकेन सहायेन दहन्तम्, अतएवासंहार्यमनिवार्यमग्निमिव दृष्ट्वा सलिलादिभिस्तमसिञ्चन् ॥ १२ ॥

रा० टी०—असिञ्चन्निति । असंहार्यमशमनीयमपि प्रदहन्तं स्वदशादर्शनेन अन्यान् प्रतपन्तमेनं रामं पद्मादिसुगन्धिविशिष्टैः सलिलैः असिञ्चन् ॥ १२ ॥

गो० टी०—असिञ्चन्निति । उत्क्लिष्टम् उद्गतज्वालम् । अर्चिर्हेतिः शिखा स्त्रियामित्यमरः ॥ १२ ॥

१३] ति० टी०—तं लक्ष्मणो बाहुभ्यां परिष्वज्य दुःखितो भूत्वा स्वस्थमस्वस्थचित्तं रामं हेत्वर्थसंयुतमुपपत्त्या विशिष्टं प्रयोजनेन च सहितं वाक्यमुवाच ॥ १३ ॥

रा० टी०—तमिति । सुदुःखितः सुदुःखितरामदर्शनजनितसुदुःखं प्राप्तो लक्ष्मणः अस्वस्थं रामं बाहुभ्यां परिष्वज्य हेत्वर्थाभ्यामुपपत्तिप्रयोजनाभ्यां संयुतं वाक्यमुवाच ॥ १३ ॥

गो० टी०—तमिति । हेत्वर्थसंयुतं हेतुरुपपत्तिः अर्थप्रयोजनम् । हेतुरूपोऽर्थोऽभिधेयो हेत्वर्थ इति वा ॥ १३ ॥

१४] ति० टी०—तदेवाह—शुभे इति । 'तदस्य विपुलं वीर दुःखमिन्द्रजिता कृतम् । कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव ॥' इति युद्धाय पौरुषावलम्बेन प्रोत्साहयिष्यन्नैकवल्यमावलम्बनमप्रयोजकमिति प्रतिपादयत्येनेवाक्यमनुहेन—हे आर्य, शुभे वर्त्मनि धर्ममार्गे राज्यत्यागपूर्वकं पितृवचनपालनरूपे तिष्ठन्तं विजितेन्द्रियं हस्तप्राप्तराज्यपरित्याजकयोः कैकेयीदशरथयोरुपरि कालुष्याभावेन विजितेन्द्रियं त्वां त्वदाश्रितो धर्मोऽनर्थेभ्यस्त्रातुं न शक्नोति यतस्तस्मादसौ निरर्थकः । प्राधान्येन पुरुषार्थो न भवति ॥ १४ ॥

रा० टी०—तदाकारमाह—शुभ इति । हे आर्य शुभे शुभहेतुभूते वर्त्मनि धर्ममार्गे तिष्ठन्तं नित्यं प्रवर्तमानम् अत एव विजितेन्द्रियं त्वां धर्मः अनर्थेभ्यः दुःखहेतुभ्यस्त्रातुं यदि न शक्नोति तर्हि धर्मो निरर्थकः निष्फलः प्रतिभातीति शेषः एतेन कार्याभावात् तल्लिङ्गकानुमानासिद्ध्या तदन्यधर्मस्याभावस्सूचितः ॥ १४ ॥

गो० टी०—एवं सीताहननश्रवणजनितमनवधिकमधैर्यमाश्रयन्तं राममाश्वासयितुं लक्ष्मणोन्वारुह्यवादेन धर्माधर्मयोः स्वरूपं स्वप्रत्ययप्रतिशास्त्रानुसारेण बलमेव प्रधानतयालम्ब्य तामित्याह—शुभ इत्यादिना सप्तशेषेण । पितृवाक्यपरिपालनादिरूपे शुभे वर्त्मनि तिष्ठन्तम् । स्थिरतया तदनुतिष्ठन्तमित्यर्थः । विजितेन्द्रियं हस्तप्राप्तराज्यपरित्याजकयोः कैकेयीदशरथयोरुपर्यपि मनःकालुष्याभावेन विजितेन्द्रियं त्वाम् निरर्थकः अप्रयोजकः । अप्रमाणमिति यावत् । शशविषाणवत् केवलव्यवहारमात्रावलम्बनो धर्मः अनर्थेभ्यः व्यसनेभ्यः त्रातुं रक्षितुं किमिति विशेषयितुं न शक्नोति । सति धर्मिणि धर्मा विशेष्यन्त इति न्यायादिति भावः । निरर्थकमेव स्वयं पितृवचनपरिपालनमारब्धम् । आरब्धो मयोक्तमिति भावः धर्म इत्युपलक्षणम् । अधर्मोऽपि निष्फलः सन् रावणमर्थेभ्यो न निवारयितुं शक्नोतीत्यर्थः ॥ १४ ॥

१५] ति० टी०—सर्वं धर्मपदार्थमङ्गीकृत्य तस्यार्थस्य नास्तीत्यनुभवात्प्रदर्शयेदानीं धर्मपदार्थ एव नास्ति, फलानुभवतापि तस्योक्ता, फलं च सुखम् । प्रकृते च सुखान्वयव्यतिरेकयोर्धर्मेऽभावेन न तेन तदनुभावमित्याह—भूतानामिति । स्थावराणां जङ्गमानां च पश्वादिरूपाणां भूतानां दर्शनं सुखापरोक्षदर्शनं यथास्ति तथा धर्मो नास्ति । आगमस्यादनधिकाराच्च । तस्माद्धर्मः सुखसाधनत्वव्याप्तो नेति मे मतिः । जन्मान्तरादिकं नास्त्येवेति बौद्धमतेनेयमुक्तिः । नहि ते विना जायमानस्यापि अस्करणकत्वमिति भावः । वस्तु—यथा स्थावरादीनां दर्शनात्सत्ता तथा धर्मस्य दर्शनाभावाद्धर्मो नास्तीति व्याचक्षते तच्च, योग्यानुपलम्भलक्षणाभावमाकल्प्य, धर्मस्य च पिशाचादिवदयोग्यत्वात् ॥ १५ ॥

रा० टी०—धर्मसाधकानुमाननिरसनपूर्वकधर्मसत्तां निरस्य तत्साधकप्रत्यक्षप्रमाणनिरसनपूर्वकतदभावं साधयति-भूतानामिति । भूतादीनां यथादर्शनं तथा दर्शनं नास्ति धर्मस्येति शेषः अतो धर्मो नास्तीति मे मतिर्निश्चयः ॥ १५ ॥

गो० टी०—नन्वनयोरप्रामाणिकत्वमित्यपेक्षायां तत्र किं प्रत्यक्षं प्रमाणम् उतानुमानम् अथ शब्दो वा, नाद्य इत्याह—भूतानामिति । स्थावराणां जङ्गमानां च भूतानां पदार्थानाम् यथा दर्शनं प्रत्यक्षत उपलम्भनम् अस्ति । तथा धर्माधर्मयोः दर्शनं न अस्तीत्यनुषङ्गः । तेन अदर्शनेन धर्मोऽधर्मश्च नास्तीति मे मतिः निर्णयः ॥ १५ ॥

१६] ति० टी०—उक्तमेवार्थं विशदयति—यथैवेति यथा यस्मात्स्थावरं व्यक्तं धर्मप्रसक्तिरहितमपि सुखीति व्य

१ अनासाद्यमिति गो. पाठः ।

यद्यधर्मो भवेद्भूतो रावणो नरकं व्रजेत् । भवांश्च धर्मसंयुक्तो नैव व्यसनमाप्नुयात् ॥ १७ ॥
तस्य च व्यसनाभावाद्व्यसनं चागते त्वयि । धर्मो भवत्यधर्मश्च परस्परविरोधिनौ ॥ १८ ॥
धर्मेणोपलभेद्धर्ममधर्मं चाप्यधर्मतः । यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः ॥ १९ ॥
न धर्मेण वियुज्येरन्नाधर्मरुचयो जनाः । धर्मेणाचरतां तेषां तथा धर्मफलं भवेत् ॥ २० ॥

कम्, तथाविधं स्थावरवद्धर्मानधिकृतं जङ्गमं पश्वादिष्वपि सुखीति व्यक्तम् । एतेन व्यतिरेकः खण्डितः । अन्वयमपि खण्डयति—न तथा युक्तः । अयमर्थः सुखरूपो न । सर्वात्मना धर्मयुक्तस्त्वद्विधो धर्मस्य सुखान्वये न विपद्यते न विपन्नः स्यात् । दृश्यते च विपत्तिरित्यन्वयोऽपि नास्ति । अनेन तदंशे जन्मान्तरीणधर्मकल्पनापि परास्ता । साधनत्वसिद्धावेव तत्कल्पनावसरात्, अतोऽयमर्थो धर्मरूपो न नास्त्येव ॥ १६ ॥

रा० टी०—नन्वन्वयव्यतिरेकाभ्यां धर्माधर्मवतामेव सुखादिमत्तया लोके स्थितिरित्यत आह—यथेति । यथा स्थावरं तरुप्रभृति व्यक्तं धर्माधर्मकरणविषयकाधिकाराभावेन तत्संसर्गाभावोऽपि सुखादिमत्तया स्थितं तथाविधं धर्मादिसंसर्गरहितं जङ्गमं मनुष्यादिष्वस्तीति शेषः तथा तस्मात् अयं शंकितः अर्थः धर्मादिमतामेव सुखादिमत्तया लोके स्थितिरित्येतद्रूपो न युक्तः एतेन व्यतिरेकाभावनिश्चयात् अन्वयाभावोऽपि निश्चेतव्य इति सूचितम् । ननु स्थावराणां जन्मान्तरीयधर्माधर्मवशात् सुखादिमत्त्वमस्तीति न व्यतिरेक इत्यन्वयाभावो वक्तुमशक्य इत्याशङ्क्य तयोस्सत्त्वे विरोधमाह त्वद्विधः अधर्मसंसर्गरहितधर्मवान् न विपद्यते विपत्तिं प्राप्नुयात् ॥१६॥

गो० टी०—उक्तमेवार्थं प्रत्यक्षानुग्राहकेण तर्केण दृढयति—यथेति । यथैव स्थावरं व्यक्तं प्रत्यक्षत उपलब्धम् । जङ्गमं च तथाविधं व्यक्तं भवति । अयं धर्माधर्मरूपोऽर्थः तथा युक्तो न भवति, तथा प्रत्यक्षो न भवतीत्यर्थः । यदि कथिद्धर्मोऽधर्मो वार्थः प्रत्यक्षसिद्धः स्यात् तर्हि स जङ्गमतया वा स्थावरतया दृश्येत न च दृश्यते तस्मान्नासौ प्रत्यक्ष इति भावः । किं च त्वद्विधो न विपद्यते धर्मस्य प्रत्यक्षसिद्धतया सद्भावे त्वद्विधः पार्मिकः विपत्तिं नाप्नुयात् रावणश्चार्थं न प्राप्नुयादित्यपि द्रष्टव्यम् ॥ १६ ॥

१७] ति० टी०—उक्तमर्थं प्रकृते योजयति—यदीति । अधर्मो भूतो दुःखसाधनत्वेन यदि सिद्धो भवेत्तदा रावणो नरकं दुःखं व्रजेत् । धर्मयुक्तो भवांश्च नैव व्यसनं दुःखं प्राप्नुयात् ॥ १७ ॥

रा० टी०—तदेव भंग्यन्तरेणाह—यदीति । अधर्मो यदि भूतः स्वफलप्रापको भवेत् तर्हि रावणः नरकं नरकप्रापकदुःखं व्रजेत् धर्मसंयुक्तो भवांस्तु व्यसनं नैवाप्नुयात् ॥ १७ ॥

गो० टी०—नाप्यनुमानं धर्माधर्मयोः प्रमाणमित्याह—यदीति । यद्यधर्मो भूतो भवेत् तदा अधर्मयुक्तो रावणः नरकं व्रजेत् व्यसनं गच्छेत् । यदि धर्मो भूतो भवेत् तदा धर्मयुक्तो भवांश्च एवं व्यसनं नाप्नुयात् । व्यसनाव्यसनरूपकार्याभ्यां धर्माधर्मावनुमेयौ न तथा संभवति पार्मिकतयाभिमते त्वयि व्यसनदर्शनात् अपार्मिकतयाभिमते रावणे व्यसनादर्शनाच्च । साध्यवति पक्षे हेत्वभावात् स्वरूपासिद्धो हेतुरित्यर्थः ॥ १७ ॥

१८] ति० टी०—अस्य तर्कस्य विपर्यये पर्यवसानमाह—तस्य चेति । तस्य रावणस्य सत्यधर्मे व्यसनाभावात्सुखसत्त्वाच्च पितृवाक्यपरिपालके त्वयि व्यसनं दुःखमागतं प्राप्ते सति सिद्धो धर्माधर्माभ्यां सुखदुःखयोरन्वयव्यतिरेकाभावः । किं चोक्तानुभवादेव विपरीतफलता च तयोरित्याह—धर्म इति । धर्मो यथाश्रुतफलविरुद्धदुःखफलो भवति, एवमधर्मश्च श्रुतफलविरुद्धसुखफलो भवति । तस्मादेतौ परस्परविरोधिनावन्योन्यं यथाश्रुतफलविरुद्धफलकौ ॥ १८ ॥

रा० टी०—एतावता धर्माधर्मयोरभावं संसाध्यापि तयोस्सत्त्वमभ्युपेत्याह—तस्येति । तस्य रावणस्य व्यसनाभावात् त्वयि च व्यसनं गते सति स्यातामिति शेषः ॥ १८ ॥

गो० टी०—विरुद्धत्वाच्च सुखदुःखयोः कार्ययोर्न धर्माधर्मावनुमापकत्वमित्याह—तस्य चेति । तस्य चाधर्मिष्ठस्य रावणस्य व्यसनाभावात् । व्यसनाभावशब्देन सुखं लक्ष्यते । सुखसद्भावादित्यर्थः । त्वयि च परमधार्मिके व्यसनं दुःखम् गते सति धर्मः अधर्मो भवति अधर्मफलप्रदो भवति । चकारादधर्मोऽपि धर्मफलाभ्युदयप्रदो भवतीति लभ्यते । अत एव परस्परविरोधिनौ स्वाभावव्याप्तहेतुकावित्यर्थः ॥ १८ ॥

१९–२०] ति० टी०—उक्त एवं निश्चयस्तत्रानुभवादेवेत्याह—धर्मेणेति । धर्मेण धर्मं धर्मसाध्यं सुखं यद्युपलभेत्, तथा धर्मतोऽधर्मेणाधर्मं तत्फलं दुःखं यद्युपलभेन्नियमेन । उत्तरार्धस्थं यदीति पूर्वोत्तरान्वयि । यद्येवं नियमः स्यात्तदा येषु रावणादिष्वधर्मः प्रतिष्ठितस्तेऽधर्मेण तत्फलेन दुःखेनैव वियुज्येयुः । तथा ये जना नाधर्मरुचय अधर्मरुचिरहितास्ते धर्मेण तत्फलेन सुखेन न वियुज्येरन् वियुक्ताः स्युः । तमेवार्थं प्रकारान्तरेणाह—धर्मेणेति । धर्मेण धर्ममार्गेणाचरतामनुतिष्ठतां तेषां तथा धर्मफलं सुखं भवेत् । तदेतयोर्विरुद्धफलराहित्यं स्यादित्यर्थः ॥ १९ ॥ २० ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—धर्मेणेति । यदि धर्मेण शुभकर्मणा धर्मं तत्फलभूतं सुखमधर्मतो अधर्मेणाधर्मं तत्फ-

१ युक्तो वै नैवमिति गो. पाठः । २ च गते इति गो. रा. पाठः ।३ यदि धर्मेणेति गो. न विधर्मेणेति रा. पाठः । ४ चरतामिति गो. रा. पाठः । ५ धर्मं इति गो. चैषामिति रा. पाठः । ६ चैषामिति गो. पाठः ।

यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः । क्रियन्ते धर्मशीलाश्च तस्मादेतौ निरर्थकौ॥ २१ ॥
वध्यन्ते पापकर्माणो यद्यधर्मेण राघव । वधकर्महतोऽधर्मः स हतः कं वधिष्यति॥ २२ ॥
अथवा विहितेनायं हन्यते हन्ति चापरम् । विधिः स लिप्यते तेन न स पापेन कर्मणा॥ २३ ॥

लभूतदुःखमुपलभेत नियमेन प्राप्नुयात् तदा येषु रावणादिषु अधर्मः प्रतिष्ठितः नित्यं संस्थितः ते अधर्मेण नित्यदुःखेन युज्येयुः तथा दर्शनात् विपरीतकल्पनेति तात्पर्यम् ॥ १९ ॥

रा० टी०—तुल्यन्यायादन्यत्रापि तथैव युक्तमित्याह—नेति । ये जनाः अधर्मरुचयो न ते जनाः विधर्मेण पापफलभूतदुःखेन न युज्येरन् तथा धर्मेण चरतां वर्तमानानामेषां जनानां धर्मफलं सुखमेव भवेत् ॥ २० ॥

गो० टी०—व्यभिचाराद्याप्त्यासिद्धत्वाद्वा न ताभ्यां तदनुमानमित्याह—धर्मेणेत्यादिना निरर्थकावित्यन्तेन । उपलभेदित्यत्र काकुः । धर्मेण धर्मानुष्ठानेन धर्मं धर्मफलं सुखम् उपलभेत् । अधर्मतः अधर्मानुष्ठानेन अधर्मफलं दुःखम् उपलभेत् उपलभेतेति मन्यसे किमित्यर्थः । एवमत्र तत्र दूषणमाह—यदीति । येष्वधर्मः प्रतिष्ठितः । ये अधार्मिका इति यावत् । ते अधर्मेण अधर्मफलेन यदि युज्येयुः युज्येरन् । नाधर्मरुचयो जनाः धर्मरुच्य इति यावत् द्वौ नञौ प्रकृतमर्थं गमयत इति न्यायात् । ते धर्मेण धर्मफलेन यदि युज्येरन्, तदा धर्मेण चरतामेषां जनानाम् धर्मः धर्मफलं सुखम् भवेत् चकारात् अधर्मेण चरतां दुःखं भवेदिति सिद्धम् । न चैवमित्याह—यस्मादिति । अनेन च हिताहितप्राप्तिलक्षणकार्ययोरनियतत्वेन व्याप्यभावात् ताभ्यां धर्माधर्मावनुमातुं शक्याविति व्याप्त्यासिद्धिर्व्यभिचारो वा दर्शितः॥१९—२१॥

२१] ति० टी०—न चैवमस्तीत्याह—यस्मादिति । येष्वधर्मः प्रतिष्ठितस्तेष्वर्था विवर्धन्ते, धर्मशीलाश्च क्रियन्ते तस्मादेतौ निरर्थकौ । श्रुतस्वस्वफलरहितौ विपरीतफलौ चेत्यर्थः । एवं च सुखदुःखयोर्धर्माधर्माभ्यां व्याप्यभावान्न ताभ्यां तदनुमानमिति भावः ॥ २१ ॥

रा० टी०—यस्मादिति । यस्मात् येष्वधर्मः प्रतिष्ठितः ते विवर्धन्ते धर्मशीलास्तु क्रियन्ते तस्मात् एतौ धर्माधर्मौ निरर्थकौ फलरहितौ विपरीतफलकौ वा ॥ २१ ॥

२२] ति० टी०—इदानीं धर्मादिस्वरूपमेव दुर्निरूपमिति वक्तुं किं व्यापाररूपौ वा तज्जन्यातिशयरूपौ वेति विकल्प्य नाद्य इत्याह—वध्यन्त इति । पापकर्माणः पुरुषा यद्यधर्मेण क्रियाशरीरेण वध्यन्ते तदा क्रियायाश्चिक्षणावस्थायित्वाच्चतुर्थक्षणे स्वत एव वधकर्मणा नाशक्रियया हतो नष्टोऽधर्मः स्वयं हतोऽसन्भूत्वा कं हन्तव्यं वधिष्यति । यद्वा वधकर्मरूपो धर्मश्चतुर्थक्षणे हतो नष्टः स्वयमसन्सन्कं वधिष्यति । वधकर्मेत्युपलक्षणम् ॥ २२ ॥

रा० टी०—इदानीं धर्माधर्मयोः स्वरूपमेव दुर्वचमिति वक्तुं किं तौ क्रियारूपौ तज्जन्यातिशयरूपविशिष्टौ वेति विकल्प्याद्यं दूषयन्नाह—वध्यन्त इति । हे राघव अधर्मेण पापकर्माणो यदि वध्यन्ते इति पक्षस्तर्हि वधकर्म वधादिक्रियारूपोऽधर्मः हतः क्रियायाश्चिक्षणावस्थायित्वनियमात् विनष्टः सन् हतः सोऽधर्मः कं वधिष्यति पापफलं दास्यति दातुरभावात् फलाभावः स्यादित्यर्थः किञ्च अधर्मः यदि वधकर्मविनाशहेतुभूतक्रिया तर्हि हतः अतः हतः स वधकर्मरूपोऽधर्मः कं वधिष्यति अतः पापकर्माणो धर्मेण वध्यन्ते काकुः कथमित्याक्षेपार्थो वा तेशब्दार्थे निषेधार्थाकाङ्क्षेदो वा ॥ २२ ॥

गो० टी०—शङ्कोदेति न धर्माधर्मयोः प्रमाणमित्याह वध्यन्त इति । हे राघव ! पापकर्माणः पापिनः अधर्मेण कर्मरूपेण वध्यन्ते यदि बाध्यन्ते चेत् वधकर्म वधकर्मरूपोऽधर्मः धर्मस्याप्युपलक्षणम् हतः क्षिप्रावस्थायित्वेन ध्वस्तो भवति शत्रुबुद्धिकर्मणां क्षिप्रावस्थायित्वात् । हतः सः कं वधिष्यति । कं श्रेयसि नियोक्ष्यतीत्यपि द्रष्टव्यम् । धर्माधर्मयोः क्रियारूपयोः क्षणिकत्वेन कालान्तरभाविफलजनकत्वासंभवात् बाधितविषयो वेदो यागादिनाधिकबलदृष्टार्थक इति भावः ॥ २२ ॥

२३] ति० टी०—द्वितीयं दूषयति—अथवेति । विहितेन विहितश्येनाद्यनुष्ठानजातिशयेनात्मीयेनायं पुरुषो हन्यते स्वीयेन वान्यं हन्ति, एवं सति विधिर्विहितानुष्ठानजातिशय एव, तेन पापेन कर्मणा हत्यारूपेण लिप्यते न स कर्मानुष्ठाता पुरुषः हत्यायास्तदकर्तृकत्वात् । नहि स्योत्पादितपुत्रकृतां हत्यां पितरं स्पृशति । एवं तस्य कर्मजातिशयस्यात्मन्यभ्युपेत्यात्मालेप उक्तः । अनेन कर्मकरणसंतुष्टस्येश्वरस्य फलदत्वमित्यपास्तम् । तस्यैव लेपप्रसङ्गात् । अत्र पक्षे विहितेनेत्यस्य विहितकर्मसंतुष्टेनेश्वरेणेत्यर्थः ॥ २३ ॥

रा० टी०—द्वितीयं दूषयन्नाह—अथवेति । विहितेन क्रियानिर्मितेन केनचिदतिशयरूपादिविशिष्टेन अधर्मेणायं जनो हन्यते अपरं हन्ति च तदा विधिः विहितकर्मजनितस्वरूपविशेषविशिष्ट एव पापेन कर्मणा लिप्यते आलिप्यते स पुरुषस्तु न लिप्यते ॥ २३ ॥

गो० टी०—कर्मणः क्षणध्वंसित्वेपि तदाराधिता देवतैव फलप्रदेत्याह—अथवेति । विहितेन विधिना देवतायेत्यर्थः । अयं जनः हन्यते बाध्यते । परम् अन्यम् हन्ति वा बाधते वा । एवं यदि तेन पापेन कर्मणा पापफलभूतदुःखेन विधिरेव आलिप्यते संबध्यते सः प्रयोज्यकर्ता नालिप्यते । अस्य न्यायस्य पुण्यकर्मण्यपि तुल्यत्वात् सुखेनापि प्रयोज्यो न

१ वेति गो. पाठः । २ आ इति गो. रा. पाठः ।

अदृष्टप्रतिकारेण अव्यक्तेनासता सता । कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्षण ॥ २४ ॥
यदि सत्स्यात्सतां मुख्य नासत्स्यात्तव किंचन । त्वया यदीदृशं प्राप्तं तस्मात्तन्नोपपद्यते ॥ २५ ॥
अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते । दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः ॥ २६ ॥

संबध्यते । यदि हि सत्कर्माराधितः असत्कर्माप्रीतो वा ईश्वरः धर्माधर्मशब्दवाच्यः स्यात्, तर्हि स एव सुखदुःखभागी कारयिता स्यात् न तु प्रयोज्य इति भावः ॥ २३ ॥

२४] ति० टी०—एवमतिशयस्य घातकत्वमङ्गीकृत्यात्मालेप उक्तः । इदानीं घातकत्वमेव नास्तीत्याह—अदृष्टेति । अदृष्टप्रतिकारेणाचेतनतयाज्ञातस्वकर्तव्यशत्रुप्रतीकारेण । अथ स्वाश्रयचेतनद्वारा तज्ज्ञानमिति चेदत्राह—अव्यक्तेन स्वाश्रयभूतात्मनोऽप्रत्यक्षतयाप्रत्यक्षरूपाव्यक्तेन. अतएवासतासत्कल्पेन सता वर्तमानेनापि धर्मेण कर्मजन्यातिशयेन कथं परं वध्यस्वरूपं प्राप्तुं शक्यम्, अप्राप्य परं हन्तीति चेदसंबन्धाविशेषात्सर्वहननप्रसङ्गः अयं हन्तृकृतकर्मजातिशयो वधयनिष्ठ एवेति चेदन्यधर्मेणान्यस्य धार्मिकत्वप्रसङ्गः, कर्तृनिष्ठत्वे तूक्तदोष इति भावः ॥ २४ ॥

रा० टी०—नन्वं तथैवास्त्वित्याह—अदृष्टेति । न दृष्टः अचेतनत्वात् ज्ञातः प्रतिकारः विधातनं येन अत एवाव्यक्तेन अप्रकाशमानेन अत एव असता असत्सदृशेन सता विद्यमानेनापि धर्मेण कर्मजन्यातिशयरूपविशिष्टेन परं वध्यादिस्वरूपं प्राप्तुं ज्ञातुमित्यर्थः कथं शक्यं न शक्यमित्यर्थः ॥ २४ ॥

गो० टी०—नन्वं यथा स्वतन्त्रो राजा लीलार्थं कामपि मर्यादां प्रवर्त्य तदनुवर्तिनमनुगृह्णाति तदतिलंघिनं निगृह्णाति च तथेश्वरोऽपि स्वाज्ञारूपकर्मानुष्ठायिनमनुगृह्णाति तदननुष्ठायिनं विपरीतानुष्ठायिनं च निगृह्णातीति चेत्र । स हि किं स्वार्थमनुगृह्णाति उत परार्थम् । नाद्यः अवाप्तसमस्तकामस्यावाप्तव्याभावात् । न द्वितीयः । कंचन विनिंचनं कंचनाकिंचनं च वितन्वतस्तस्य पक्षपातनैर्घृण्यापत्तेः । तत्तत्कर्मानुगुणतया सृष्टेर्न पक्षपातादिप्रसक्तिरिति चेत्र । समीचीने कर्मण्यप्रवर्त्तेतस्तस्य सर्वज्ञस्य निर्दयत्वापत्तेः । अनादिकर्मप्रवाहकृतपूर्वपूर्वकर्मानुगुण्येन पुनः पुनः सदसतोः कर्मणोः पुरुषं प्रवर्तयतीति चेत्, तर्हि कस्यचिन्नियमेन दुःखं कस्यचिन्नियमेन सुखं च स्यात् न च तथा दृश्यते, अनियमदर्शनात् । तर्हि कर्मजन्योपूर्वरूपोऽतिशयः फलप्रदो धर्म इत्याशङ्क्याह—अदृष्टेति । हे अरिविकर्षण ! प्रतिक्रियते परप्रतिपत्तिजन्यत इति प्रतिकारो लिङ्गम् । अदृष्टप्रतिकारेण अदृष्टलिङ्गेन अनुमानागम्येनेत्यर्थः अव्यक्तेन अप्रत्यक्षेण असता सता असद्रूपेण अग्नीन्द्रादिवदर्थवादवाक्येनागम्येन धर्मेण अपूर्वारूपेण परं श्रेयः कथं प्राप्तुं शक्यम् । न शक्यमित्यर्थः ॥ २४ ॥

२५] ति० टी०—तुल्यन्यायाच्छुभकर्मजातिशयोऽप्यसत्रेवेति ध्वनितमर्थं तर्केण दृढीकरोति—यदीति । हे सतां मुख्य सत्पुरुषश्रेष्ठ, यदि सत्कर्मजन्यमदृष्टं सत्स्यात्तदा तव किंचन किंचिदप्यसदृशं दुःखं न स्यात् । उक्तस्य तर्कस्य विपर्ययपर्यवसानमाह—त्वया चेदृशं दुःखं प्राप्तं तस्मात्तत्सदिति नोपपद्यते ॥ २५ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह-यदीति । हे सतां मुख्य सत्पुरुषश्रेष्ठ यदि सत्सत्कर्म स्यात् फलदायकत्वेन विद्येत तदा असत् सत्कर्मविरोधिदुःखं तव किञ्चन न स्यात् ॥ यस्माद्धेतोः त्वया ईदृशं दुःखं प्राप्तं तस्माद्धेतोः तत्कर्म नोपपद्यते फलदायकत्वेन न प्रतीयत इत्यर्थः ॥ २५ ॥

गो० टी०—उक्तमेवार्थं पुनस्तर्केण दृढीकरोति—यदीति । हे सतां मुख्य यदि सत् स्यात् धर्माख्यं वस्त्विति शेषः । धार्मिकस्य तव असत् अनिष्टम् किंचन न स्यात् । तर्कस्य विपर्यये पर्यवसानमाह—त्वयेति । यत् यस्मात्कारणात्, त्वया ईदृशं दुःसहं व्यसनं प्राप्तम् तस्मात्सत्रोपपद्यते असदेव भवतीत्यर्थः । कार्यानुपलम्भात्पूर्वारूपधर्मो न फलप्रदित्यर्थः ॥ २५ ॥

२६] ति० टी०—ननूक्तदोषसमूहः कर्मणः प्राधान्येनार्थसाधनपक्षे युक्तः, न तु पौरुषोपकृतस्यार्थसाधकत्वे तर्हि मुख्यमर्थसाधनं पौरुषमेवावलम्ब्यतामित्याह—अथवेति । दुर्बलः स्वतोऽप्यसाधनासमर्थः, अत एव क्लीबोऽप्यसाधनेऽकिंचित्करो बलं पौरुषमनुवर्तने सहकारित्वापेक्षते तदा दुर्बलो हृतमर्यादस्त्यक्तसुखसाधनत्वमर्यादोऽधर्मो न सेव्य इति मे मतिः । उक्तन्यायेनेति भावः ॥ २६ ॥

रा० टी०—नन्वं कर्मणः पौरुषाधीनत्वेन स्वातन्त्र्याभावात् नोक्तदोषावसर इत्यत आह—अथवेति । दुर्बलः अत एव क्लीबः धर्मो वा यदि बलं पौरुषमनुवर्तते तर्हि दुर्बलः अत एव हृता मर्यादा स्वफलदानशक्तिर्यस्य स धर्मो न सेव्यः इति मे मतिर्निश्चयः ॥ २६ ॥

गो० टी०—ननु न कार्यानुपलम्भमात्रादर्थस्याभावो निश्चेतुं शक्यः अतीन्द्रियोच्छेदापत्तेः । किं तु सहकारिसम्पत्तौ सत्यां कार्यानुपलम्भः कारणत्वाभावं साधयति सहकारि च पौरुषम् अतस्तदभावात्फलानुदय इत्यत आह—अथवेति । दुर्बलः बलरहितः निरपेक्षतया कार्याक्षमः अत एव क्लीबः कातरः स्वतः कार्यकरणासमर्थः धर्मः बलमनुवर्तते कार्योत्पादने पौरुषमपेक्षत इत्यर्थः । एवं चेद्दुर्बलो हृतमर्यादः स्वातन्त्र्येण फलप्रदत्वमर्यादाहीनो धर्मः प्राधान्येन न सेव्य इति मे मतिः ॥ २६ ॥

---

१ अव्यक्तेनेति गो. पाठः । सदिति गो. रा. पाठः ।

बलस्य यदि चेद्धर्मो गुणभूतः पराक्रमैः । धर्ममुत्सृज्य वर्तस्व यथा धर्मे तथा बले ॥ २७ ॥
अथ चेत्सत्यवचनं धर्मः किल परंतप । अनृतं त्वय्यकरणे किं न बद्धस्त्वया विना ॥ २८ ॥
यदि धर्मो भवेद्भूत अधर्मो वा परंतप । न स्म हत्वा मुनिं वज्री कुर्यादिज्यां शतक्रतुः ॥ २९ ॥

२७] ति० टी०—नन्वयं पौरुषं सहकारीकृत्य धर्मः साध्यतीति नोच्यते, किं तु पौरुषमेव प्रधानं कर्म तु तत्पोषकारकमिति तर्हि तथैवानुष्ठानं कुर्वित्याह—**बलस्येति** । बलस्य पौरुषस्य धर्मो गुणभूत इत्यङ्गीक्रियते तदा पराक्रमैः प्रधानैरित्युत्सृज्य धर्मप्राधान्यं व्यक्त्वा यथेदानीं धर्मे वर्तसे प्राधान्येन तथा बले पौरुष एव वर्तस्व ॥ २७ ॥

रा० टी०—ननु धर्मत्यागे लोकसांकार्यप्रसङ्ग इत्यत्र आह—**बलस्येति** । पराक्रमैरुपलक्षितस्य बलस्य यदि धर्मो गुणभूतः तदा धर्मं तत्प्राधान्यमुत्सृज्य त्यक्त्वा यथा धर्मे वर्तसे इति शेषः तथा बले पौरुषे वर्तस्व एतेन गुणत्वेनापि सेव्यमानो धर्मः साङ्कर्यं निवारयिष्यतीति सूचितम् ॥ २७ ॥

गो० टी०—प्रधानभूतं बलमाश्रयणीयमित्याह—**बलस्येति** । पराक्रमे कार्यसाधने विषये, बलस्य धर्मः गुणभूतो यदि चेन्न उपसर्जनभूतो यदि स्यात्, तदा यथेदानीं धर्मे वर्तसे तथा धर्ममुत्सृज्य धर्मप्राधान्यमुत्सृज्य, धर्मे इव बलेऽपि वर्तस्व ॥ २७ ॥

२८] ति० टी०—किं च सत्यस्यापि धर्मत्वाद्धर्मपक्षपातिना भवता सत्यधर्म एवादौ किमिति सम्यगनुष्ठितो नेत्येवमर्थो न कृतः स्यादित्याह—**अथ चेदिति** । अथ पक्षान्तरे । हे परंतप, त्वया सत्यवचनं पितृवचनाङ्गीकारक्रमसत्यपरिपालनं धर्मोऽनुष्ठीयत इति चेत्तदा त्वयि श्रेष्ठे अकरण्यपि पैकवचनस्याकरणे यदनृतं राज्ञः प्राप्तं तेनानृतेन राज्ञा त्वया विना भृतः । मृत इति शेषः । अनृतेन राज्ञोऽभिषेककरणरूपसत्येन त्वं बद्धः किं न । भवेदिति शेषः । प्रथमोक्तं राज्ञोऽभिषेकवचनरूपं सत्यं न परिपालितम् । तत्परिपालने त्वया विनाभूतत्वासंभवेन पितृमरणं न स्यात् । एवमाचरणेन च दृष्टः स्यादिति भावः । 'अनृतं त्वय्यकरणे किं न बद्धस्त्वया विना' इति सर्वत्र पाठ्यः पाठ इति कतकः । तार्किकास्तु—'अनृतं त्वय्यकरणः किं न बद्धस्त्वया पिता' इति पठित्वा सत्यस्य धर्मत्वे त्वय्यभिषेकविषयमनृतं यदस्याध्यक्षिप्तासनाकरणः पित्रा त्वया किं न बद्ध इति व्याचक्षते, तदयुक्तम् । पितृबन्धनस्य सत्यवचनपरिपालनरूपत्वाभावात् ॥ २८ ॥

रा० टी०—इदानीमनुमानेन सत्यरूपधर्मस्यैव दुःखप्रदत्वदर्शनात् तत्त्यागाकरणात् स्वपश्चात्तापमाह—**अथेति** । अकरणे प्राकृतेन्द्रियरहिते त्वयि सत्यवचनं धर्मः चेद्यदि अनृतं सुखसम्बन्धनिवर्त्तकं तदा अविना सर्वरक्षकेन त्वया किं किमर्थं न बद्धः त्यक्त इत्यर्थः अनृतस्वय्यकरणः किं न बद्धस्त्वया पितेतितीर्थमम्मतपाठे अपिना परिपालितत्वेन पितृसत्यः अकरणः न करणाफलदानहेतुभूतदया यस्मिन् अत एव अनृतमिति वक्तुमपि धर्मविशेषणम् ॥ २८ ॥

गो० टी०—एवं सामान्येन धर्मे दूषितेऽपि सत्यवचनरूपधर्मविशेषस्य रामेण प्राधान्येनानुरोधात्तत्पृथक् दूषयति—**अथेति** । हे परंतप । सत्यवचनं धर्मः किल अथ चेदेवं चेत्, अनृतः त्वामभिषेक्ष्यामीत्युक्त्वा तदकरणेन सत्यत्वरहितः । अनृतमिति पाठे वदन्निति शेषः । त्वयि सकलकल्याणगुणाश्रये श्रेष्ठपुत्रे अकरणः, राज्याद्वनं प्रति निष्कासनक्रियेयः अतो वध्योयः पिता त्वया पितृवचनं करिष्यामीति कृतप्रतिज्ञेन त्वया किञ्च बद्धः किं न नियमितः । सर्वप्रजासमक्षमेव रामममिषेक्ष्यामीत्युक्त्वा प्राथमिकं पितृवचनं परित्यज्य पाश्चात्यवनवासनक्रियं पितृवचनं करिष्यामीति कृतप्रतिज्ञेन त्वया पालयता सत्यवचनमपि सम्यक् पालितमिति भावः ॥ २८ ॥

२९] ति० टी०—अतिशयेनैवं राज्ञः सत्यौरुषधर्मयोरनुष्ठाने सिद्धान्तं विधातुमाक्षेपपूर्वकमाह—**यदीति** । हे परंतप, धर्म एव यदि भूतः प्राप्यमाणत्वेनानुष्ठेयः स्यात् । भूत अयम इत्यर्थसिद्धम् । अधर्मो वा साङ्कर्यः पौरुषं तद्वा । यदि प्राग्वद्भूतं प्राप्तवान् वज्री मुनिं विश्वरूपं पौरुषेण हत्वा पश्चादिज्यां यज्ञं न कुर्यात्, किं तिरश्चोऽपि प्राणिनः एकमेव हन्यादिति भावः ॥ २९ ॥

रा० टी०—इदानीं इदानीन्तनं तदानीन्तनं च सेव्यत्वेनेति बोधयन्नाह—**यदीति** । यदि धर्म एव भूत प्रत्यक्षत्वेनानुष्ठेयः अधर्मः धर्मभिन्नः पौरुषं वा भूतो भवेत् । तदा शतक्रतुरिन्द्रः मुनिं विश्वरूपं हत्वा पौरुषेण विहत्य इज्यां तद्रूपधर्मं न कुर्यात् ॥ २९ ॥

गो० टी०—धर्माधर्मयोः सङ्कीर्णेऽपि राज्ञा धर्मोऽयमधर्मो वा नियमेन नानुष्ठातव्यः । किन्तु कर्तव्याकर्तव्योभयानुगुणेनोभावपि कर्तव्यावित्येवं सिद्धान्तं प्रमाणयति—**यदीति** । भूतो अयमधर्मो वेत्यत्र इत्यनुरोधात् सत्यमित्यः । यदि धर्मो भवेद्भूतः । यदि केवलः प्राप्तानुरोधेन प्राप्तो भवेत्, तदा वज्री शतक्रतुः मुनिं विश्वरूपं हत्वा इज्यां न कुर्यात्, किन्त्विज्यामेव कुर्यात् । अधर्मो वा । केवलमधर्मो वा यद्यनुष्ठेयः स्यात्, तदा शतक्रतुः मुनिं मुख्यं हत्वा इज्यां न कुर्यात्, किन्तु हननमेव कुर्यात् । अतोभयधर्मनिर्णयेन धर्माधर्मयोरनुष्ठितत्वाद्राजा यथाकालमुभयमपि कर्तव्यमिति भावः । यान्येतानि देवक्षत्राणीन्द्रो वरुणः पर्जन्यो यम ईशान इतीन्द्रस्य क्षत्रियत्वं श्रूयते ॥ २९ ॥

---

१ पराक्रमे इति गो. पाठः । २ अनृतस्त्वय्यकरण इति रा. गो. पाठः । ३ पितेति गो. पाठः ।

अधर्मसंश्रितो धर्मो विनाशयति राघव । सर्वमेतद्यथाकामं काकुत्स्थ कुरुते नरः ॥ ३० ॥
मम चेदं मतं तात धर्मोऽयमिति राघव । धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता तदा ॥ ३१ ॥
अर्थेभ्योऽर्थ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः । क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ॥ ३२ ॥
अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः । विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ३३ ॥
सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः । पापमाचरते कर्तुं तदा दोषः प्रवर्तते ॥ ३४ ॥

३०] ति० टी०–तस्मादधर्मसंश्रितः पौरुषपुक्तो धर्मो रिपुं विनाशयति, तस्मात्सर्वमेतत्पौरुषधर्मोभयं यथाकामं स्वकार्यानुरोधेन नरः कुरुते अन्निप्रभृतिर्नरः ॥ ३० ॥

रा० टी०–अधर्मेति । अधर्मेण पौरुषेण संश्रितस्सहितो धर्मः विनाशयति रिपून् विध्वंसयति किञ्च संश्रितो नित्यं सहैवाश्रितोधर्मः विनाशयति आश्रयणकर्तारं विध्वंसते तस्मात् एतत् पौरुषधर्माभयं यथाकामं यथेच्छं नरः कुरुते कालभेदेन आश्रयत इत्यर्थः ॥ ३० ॥

गो० टी०–इदानीमभ्युपगमवादेनैकान्ततो धर्माधर्मयोरकरणाश्रयणमनर्थपर्यवसायीत्याह—अधर्मेति । अधर्मसंश्रितो धर्मः अधर्मसहितो धर्मः धर्मशब्दोऽधर्मेऽप्यर्थः । विनाशयति कर्तारमिति शेषः । नियमेन पृथक् पृथगनुष्ठीयमानौ धर्माधर्मौ कर्तारं विनाशयतः । अत एवैतत्सर्वं धर्माधर्मात्मकं सर्वं कर्मजातम् यथाकामं तत्तत्कालोचितम् अनियमेन नरः कुरुते । कुर्यादित्यर्थः ॥ ३० ॥

३१] ति० टी०–यदिदमुक्तं यथोचितकालदेशशुभयमनुष्ठेयमिति मम मतम्। नन्वेतं धर्मस्य तवापि संमतत्वे किमिति मे दुःखमत आह–धर्ममूलमिति । अर्थमूलं राज्यमुत्सृजता त्वया धर्मस्य मूलमर्थरूपं छिन्नम्, अतस्त्वं क्लेशवानिति भावः । यत्तु तीर्थेन 'अधर्मः संश्रितो धर्मः कर्तारं विनाशयति। तस्मायथाकामं तत्कालौचित्येनोभयमप्यनुष्ठेयमिदमेव यथाकाम्येनोभयाचरणमेव धर्म इति मम मतम्' इतिव्याख्यातम्, तत्तूपहस्तनीयमेव व्युत्पन्नैरित्युक्तम् ॥ ३१ ॥

रा० टी०–ममेति । इदं कालविशेषे पौरुषधर्मान्यतरस्वीकरणमयमुक्तो धर्मः इति मम मतं अहं पृथक् इदानीं बुद्धिपूर्वकमवत्कर्तृकयमत्यागाभावेऽपि धर्मत्यागोऽर्थासंपन्न इति बोधयन्नाह धर्मेति । राज्यमुत्सृजता त्वया धर्ममूलमर्थ इत्यर्थः छिन्नं विनाशितमहं पृथक् ॥ ३१ ॥

गो० टी०–अस्मिन्नर्थे न मे संदेह इत्याह—ममेति । हे तात अनुकम्प्य । तातोनुकम्प्ये पितरि इति रत्नमाला । इदं यथाकाम्येनाचरणं यदस्ति अयं धर्म इति मम मतं सिद्धान्त इत्यर्थः । एवं प्रथमं धर्म एवाप्रामाणिक इत्युक्तम् । पश्चात्कथंचित् प्रामाणिकत्वसंभवेऽपि न तस्य प्राधान्यमित्युक्तम् । इदानीमप्राधान्येनापि धर्मस्तव न संभवति, मूलाभावादित्याह–धर्ममूलमित्यादिना । धर्मस्य मूलं कारणम् अर्थरूपम्, तदा प्राप्तकाले, राज्यमुत्सृजता त्वया छिन्नम् मूलच्छेदात्तव कथं धर्म इत्यर्थः ॥ ३१ ॥

३२] ति० टी०–अथार्थस्य धर्ममूलत्वमेव प्रतिपादयति—अर्थेभ्य इति । ततस्ततः संवृत्तेभ्यो नानादेशादाहृतेभ्यः अत एव प्रवृत्तेभ्योऽर्थेभ्यः सर्वाः क्रिया योगप्रधाना भोगप्रधानाश्च प्रवर्तन्ते । निष्कामतया कृता योगप्रधाना भवन्ति । सकामतया कृता भोगप्रधाना इत्यर्थः ॥ ३२ ॥

रा० टी०–अर्थस्य धर्ममूलत्वमुपपादयितुमाह—अर्थेभ्य इति । संवृत्तेभ्यः अनेकदेशादाहृतेभ्यः अत एव प्रवृद्धेभ्योऽर्थेभ्यः पर्वतेभ्य आपगा नद्य इव क्रिया प्रवर्तन्ते ॥ ३२ ॥

गो० टी०–तदेव धर्ममूलत्वमर्थस्य प्रतिपादयति—अर्थेभ्य इति। ततस्ततः प्रजापालनाय प्रदेयषड्भागकरप्रदानादिकारणात् संवृत्तेभ्यः प्राप्तेभ्यः क्रमाद्विवृद्धेभ्यो अर्थेभ्यः सर्वाः क्रियाः यज्ञदानादिक्रियाः प्रवर्तन्ते । पर्वतेभ्य इत्युपमानेन मूलधनव्ययमकृत्वैवार्थमूलतया दानादिक्रियाः कार्या इत्युक्तम् ॥ ३२ ॥

३३] ति० टी०–अर्थाभावे क्रियाव्यतिरेकमप्याह—अर्थेन हीति ॥ ३३ ॥

रा० टी०–अर्थेनेति । अर्थेन विमुक्तस्य अत एव अल्पचेतसो जनस्य सर्वाः क्रियाः ग्रीष्मे कुसरितोऽल्पनद्य इव विच्छिद्यन्ते ॥ ३३ ॥

गो० टी०–व्यतिरेकसुखनापि तदेव प्रतिपादयति—अर्थेनेत्यादिना । कुसरितः अल्पसरितः ॥ ३३ ॥

३४] ति० टी०–न केवलमर्थपरित्यागे धर्मासंभवः, किं तु दोषप्राप्तिरपीत्याह—सोऽयमिति । यः पुमान्प्राप्तमर्थं परित्यज्य सुखकामो भवति सोऽयं अष्टार्थः सुखैधितोऽभिवृद्धसुखाभिलाषो भूत्वा पापमन्यायेनार्थार्जनं कर्तुमाचरत आरभते, ततो दोषस्ताडनबन्धनादिरूपः प्रवर्तते ॥ ३४ ॥

रा० टी०–स इति । सुखैधितः पूर्वं सुखेन प्रवृद्धः सोऽर्थविशिष्टः पुरुषः अर्थं परित्यज्य केनचित् हेतुना धनं त्यक्त्वा वित्यमानस्सन् पापमन्यायेन धनार्जनं कर्तुमाचरते अत एव दोषो राजदण्डादिः प्रवर्तते ॥ ३४ ॥

गो० टी०–न केवलमर्थपरित्यागेन धर्मासंभवः किं तु दोषप्राप्तिरपीत्याह—सोयमिति । सुखैधितः पूर्वं सुखेन संवर्धितः, सोयम् अर्थपरित्यागी अर्थं प्राप्तं परित्यज्य सुखकामः सन्, पापम् अन्यायेनार्थार्जनम् सुखसाधनभूतधन-

१ द्विवीति गो. पाठः । २ तेजस इति गो. पाठः । ३ रमत इति गो. पाठः ।

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः । यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ३५॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान् । यस्यार्थाः स महाबाहुर्यस्यार्थाः स गुणाधिकः ३६॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया । राज्यमुत्सृजता धीर येन बुद्धिस्त्वया कृता॥३७॥
यस्यार्था धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम् । अधनेनार्थकामेन नार्थः शक्यं विचिन्वता॥ ३८ ॥
हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः । अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप ॥ ३९ ॥
येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम् । तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः४० ॥
त्वयि प्रव्रजिते वीर गुरोश्च वचने स्थिते । रक्षसापहृता भार्या प्राणैः प्रियतरा तव ॥ ४१ ॥

संपादनार्थं स्तेयादिपापम् आरभते । ततः तेन कर्मणा दोषः प्रवर्तत इत्यर्थः ॥ ३४ ॥

३५-३६] ति० टी०-अथार्थः सर्वमूलमिति स्तौति—यस्येति ॥ ३५ ॥ ३६ ॥

रा० टी०-यस्येति । यस्यार्थाः तस्यैव मित्रादयो भवन्ति ॥ ३५ ॥

रा० टी०-यस्येति । यस्यार्थाः स एव विक्रान्तो बलवान् ॥ ३६ ॥

गो० टी०-यस्यास्तस्य मित्राणीत्यादिश्लोकद्वयं कुचित्पठ्यते । पुमान् पुंस्त्ववान् । अन्यः स्त्रीप्राय इत्यर्थः । महाभागः महाभाग्यः । महागुणः शीलादिगुणवान् ॥ ३५ ॥ ३६ ॥

३७] ति० टी०-एते दोषा मित्राद्यभावरूपा । प्रव्याहृताः स्पष्टमुक्ताः । तत्र राज्यमुत्सृजता त्वया येन गुणेन बुद्धिरर्थपरित्यागविषया कृता । तं न जाने इति शेषः ॥ ३७ ॥

रा० टी०-अर्थस्येति । अर्थस्य परित्यागे एते दोषाः मया प्रव्याहृताः एतेन अर्थत्यागो न कर्तव्य इति सूचितम् अर्थं पृथक् राज्यमिति राज्यमुत्सृजता त्वया येन हेतुना बुद्धिः त्यागविषया मतिः कृता तत्र विद्म इति शेषः अर्थं पृथक् ॥३७॥

गो० टी०-अर्थस्येति । अर्थस्य परित्यागे एते पूर्वोक्तगुणप्रतियोगिनो निर्मित्रत्वादयो दोषाः, प्रव्याहृताः स्पष्टमुक्ताः । राज्यमुत्सृजता त्वया येन गुणेन बुद्धिः अर्थपरित्यागविषया कृता तं गुणं जान इत्यर्थः । यद्वा राज्यमुत्सृजता त्वया । येन कारणेनार्थपरित्यागे बुद्धिः कृता तेन कारणेन एते दोषा मया प्रव्याहृता इत्यर्थः ॥ ३७ ॥

३८] ति० टी०-पुनरर्थमेव स्तौति—यस्येति । यस्यार्थाः सन्ति तस्य धर्मकामरूपा अर्थाः प्रयोजनानि भवन्ति तस्य सर्वं प्रदक्षिणमनुकूलम । अधनेन पुरुषेणार्थं विचिन्वतापर्यर्थकामेन विना पौरुषमर्थो न शक्यम प्राप्तुमिति शेषः॥३८॥

रा० टी०-यस्येति । यस्यार्थाः सन्ति तस्य धर्मप्रभृतय स्त्रयः सन्ति अत एव सर्वं प्रदक्षिणं तदधीनं भवति अधनेन अर्थकामेन अत एव विचिन्वता पौरुषं कुर्वता जनेन अर्थः प्राप्तुं न शक्यं सामान्ये नपुंसकम् ॥ ३८ ॥

गो० टी०-यस्येति । धर्मकामार्थाः धर्मकामप्रयोजनानि । प्रदक्षिणम् अनुकूलम् । प्रतिष्ठितमिति वा पाठः व्यतिरेकमुखेनाप्याह-अधनेति । अधनेन धनं विना अर्थकामेनापि । विचिन्वता अर्थार्जनव्यापारं कुर्वता पुरुषेण अर्थः श्रेयो न शक्यं न साधयितुं शक्यम । अव्ययमेतत् । शक्यमरविन्दसुरभीति प्रयोगात् ॥ ३८ ॥

३९] ति० टी०-अर्थवशादेव राज्ञि सर्वे गुणा इत्याह—हर्ष इत्यादि । यानि हर्षादीनि सन्ति, एतानि नराधिपेऽर्थादर्थसंपत्तेरेव प्रवर्तन्ते । अभीष्टानि भवन्तीति भावः । यस्य हर्षो राज्ञः स कृतार्थो भवति । यस्मिन्क्रोधः स नश्यतीत्यादि ॥ ३९ ॥

रा० टी०-हर्ष इति । एतानि हर्षादीनि अर्थादेव प्रवर्तन्ते ॥ ३९ ॥

गो० टी०-न केवलमर्थकामावेव धनमूलौ, अन्येऽपि तथेत्याह—हर्ष इति । प्रवर्तन्ते प्रकृता निवर्तन्ते । शाम्यन्त इत्यर्थः । असतो निर्धनस्य शमदमौ हि धनलाभे निवर्तेते॥३९॥

४०] ति० टी०-सर्वमूलोऽर्थस्तव न संप्रत इत्याह—येषामिति । येषां धर्मचारिणां तापसानां धर्मं चरतामप्यर्थाभावादयं लोक ऐहिकपुरुषार्थो नश्यतीति स्पष्टम् । न इह लोके सुखसाधनभूता अर्थास्त्वयि न दृश्यन्ते । दुर्दिनेषु नवग्रहा इवेत्यर्थः ॥ ४० ॥

रा० टी०-येषामिति । धर्मचारिणामत एव चरतां तपः कुर्वतां जनानां येषामर्थानां परित्यागादिति शेषः अयं लोकः ऐहिकसुखं नश्यति ते अर्थाः दुर्दिनेषु घनच्छन्नदिनेषु ग्रहाः इव त्वयि न दृश्यन्ते ॥ ४० ॥

गो० टी०-न केवलमामुष्मिकश्रेयःसाधनभूतोर्थः, किं तु ऐहिकश्रेयःसाधनं चेति व्यतिरेकमुखेन प्रतिपादयन् तादृशोऽर्थस्त्वयि नास्तीत्याह—येषामिति । येषां चरतामित्यनादरे षष्ठी । येषां चरतां सान् चरतो विद्यमानानर्थाननादृत्य धर्मचारिणां केवलं धर्ममाचरताम् अयं लोको नश्यति । ऐहिकसुखं नास्तीत्यर्थः । ते तादृशाः सुखसाधनभूताः अर्थाः दुर्दिनेषु मेघच्छन्नदिनेषु । मेघच्छन्नेह्नि दुर्दिनमित्यमरः । सूर्यादयो ग्रहाः यथा न दृश्यन्ते, । तथा त्वयि न दृश्यन्ते । सकलश्रेयःसाधनभूता अर्थास्त्वया नाहृता इत्यर्थः ॥ ४० ॥

४१] ति० टी०-सर्वमिदं दुःखं स्वानुष्ठितपूर्वाचातुरीम्-

---

१ भाग इति गो. पाठः । २ महा गुण इति गो. पाठः । ३ शक्य इति गो. पाठः । ४ आह्नि इति गो. पाठः ।

तदद्य विपुलं वीर दुःखमिन्द्रजिता कृतम् । कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव ॥ ४२ ॥
उत्तिष्ठ नरशार्दूल दीर्घबाहो धृतव्रत । किमात्मानं महात्मानमात्मानावबुध्यसे॥ ४३ ॥
अयमनघ तवोदितः प्रियार्थं जनकसुतानिधनं निरीक्ष्य रुष्टः ।
सरथगजहयां सराक्षसेन्द्रां भृशमिषुभिर्विनिपातयामि लङ्काम् ॥ ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

चतुरशीतितमः सर्गः ।

ततो विभीषणेन तत्रागत्य लक्ष्मणस्थाने सीताजानिं दृष्ट्वान्तर्विषाददूनेन किमेतदिति पृष्टो लक्ष्मणो यथावृत्तमकथयत् विभीषणस्तु हे राम नेदं यथार्थं वानरान्तरायसाद्धीन्द्रजिन्मायाजालमेव नान्यदतो न मेतव्यम् स तु राक्षसो हवनेन प्राप्तसिद्धिरन्यदुर्जयो भवेदतोऽस्य कर्मपूर्तेः प्राक् तद्विघातोऽपेक्षितः लक्ष्मणं प्रेषय विलम्बेनालमित्याद्यवदीत् ।

रामस्त्वाश्वासमाने तु लक्ष्मणे भ्रातृवत्सले । निक्षिप्य गुल्मान्स्वस्थाने तत्रागच्छद्विभीषणः ॥१॥
नानाप्रहरणैर्वीरैश्चतुर्भिरभिसंवृतः । नीलाञ्जनचयाकारैर्मातंगैरिव यूथपैः ॥ २ ॥

लमित्युपसंहरति—त्वयीति । गुरोर्वचने स्थिते त्वयि प्रव्रजिते सति धर्मश्रद्धाजालेन मोहाद्वनं प्राप्ते रक्षसा भार्यापहृता प्रहृता च । प्राणैः प्राणेभ्यः ॥ ४१ ॥

रा० टी०—त्वयीति । त्वयि प्रव्रजिते सति प्रियतरा भार्या रक्षोभापहृता एतेन इदमपि अर्थाभावेनैव जनितमिति सूचितम् ॥ ४१ ॥

गो० टी०—अर्थितभ्रातृराज्यपरित्यागेन पितृवचनपरिपालनरूपैकलक्षधर्मावलम्बनेन च प्राप्तं दोषमाह—त्वयीति । प्राणैः प्राणेभ्यः । प्राणैरपि प्रियतरेति वार्थः ॥ ४१ ॥

४२] ति० टी०—अतः परमेतावदेव कर्तव्यम्, किमतीतार्थानुशोचनेनेत्याह—तदद्येति । कर्मणा पौरुषेणाहमेव व्यपनेष्यामि तस्मान्मत्प्रीत्साहनार्थमुत्तिष्ठ ॥ ४२ ॥

रा० टी०—तर्हिदानीं किं कर्तव्यमित्यत आह—तदिति । इन्द्रजिता कृतं दुःखं कर्मणा स्वपौरुषेण व्यपनेष्यामि तस्मादुत्तिष्ठ ॥ ४२ ॥

गो० टी०—एवं गते किं कर्तव्यमित्यत्राह—तदद्येति । भवत्कर्मणा प्राप्तं दुःखं मत्कर्मणा व्यपनेष्यामीत्यर्थः । कृतप्रतिक्रियया तद्दुःखं निवारयिष्यामीति भावः ॥ ४२ ॥

४३] ति० टी०—न तु प्राकृतवदैन्यं युक्तं महात्मनस्ते इत्याह—उत्तिष्ठेत्यादि । महात्मानं परमात्मानम् ॥ ४३ ॥

रा० टी०—उत्तिष्ठेति । हे महात्मन् महात्मानं सर्वप्रवर्तकमात्मानं स्वस्वरूपं कुतो नावबुध्यसे एतेन तवैवेच्छया सर्वं जातमिति सूचितम् ॥ ४३ ॥

गो० टी०—एवं भक्तिवादानुक्त्वा क्षमापणं विदधाति—उत्तिष्ठेति । आत्मानं स्वम् महात्मानम् महावह्निम् आत्मानं परमात्मानम् किं नावबुध्यसे । तस्मात् भवतः शोककारणं नास्तीति हृदयम् ॥ ४३ ॥

४४] ति० टी०—तव प्रियार्थमुदित उक्तः । निरीक्ष्य श्रुत्वा ॥ ४४ ॥

इति श्रीरामभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

रा० टी०—ननु मत्प्रयत्नस्य विनष्टत्वात् कथं मत्कर्तृकरिपुविजयो भविष्यतीत्यत आह—अयमिति । प्रियार्थं विविधदुःखान्तश्रवणजनितशोकापनोदपूर्वकं तव प्रीत्युत्पत्त्यर्थमयमर्थाभावादिः उदितो मया कथितः एतेन भवत्स्वर्थाभावादेर्न सम्भव इति ध्वनितम् अतः जनकसुतानिधनं निरीक्ष्य हनुमत्कथनेन ज्ञात्वा रुष्टोऽहं स्थाटिमहितं लंकामिषुभिर्विनिपातयामि ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

गो० टी०—अयमिति । अयम् अहं तव विधेयत्वेन सन्निहितः, तव प्रियार्थम् उदितः उत्पन्नो वा । अनेन दुःखं व्यपनेष्यामीत्येतद्व्रतम् ॥ ४४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

१-२] ति० टी०—आश्वासमान आश्वासयमाने । गुल्मान्स्वस्थाने पूर्वादितत्तद्द्वारे निक्षिप्यावस्थाप्य ॥ १ ॥ २ ॥

रा० टी०—लक्ष्मणकर्तृकरामाश्वासनानन्तरकालिकं वृत्तान्तमाह—रामेत्यादिभिः । विभीषणः गुल्मान् स्वस्थाने पूर्वादितत्तद्द्वारे निक्षिप्य तत्र रामसमीपे अगच्छत् ॥ १ ॥

रा० टी०—नानेति । नाना प्रहरणानि येषु तैः मातङ्गैरिव चतुर्भिर्यूथपैरभिसंवृतः सः विभीषणः राघवमभिसंगम्य दृष्ट्वे श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

---

१ आश्वासयाने इति गो. पाठः । २ सचिवैर्वृतै इति गो. पाठः । ३ यूथपः इति गो. पाठः ।

सोऽभिगम्य महात्मानं राघवं शोकलालसम् । वानरांश्चापि[1] ददृशे बाष्पपर्याकुलेक्षणान् ॥ ३ ॥
राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम् । ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम्[2] ॥ ४ ॥
व्रीडितं शोकसंतप्तं दृष्ट्वा रामं विभीषणः । अन्तर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत् ॥५॥
विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान् । लक्ष्मणोवाच सन्दार्थमिदं बाष्पपरिप्लुतः[3] ॥ ६ ॥
हतां[4] इन्द्रजिता सीतां इति श्रुत्वैव राघवः । हनूमद्वचनात्सौम्य ततो मोहमुपाश्रितः[5] ॥ ७ ॥
कथयन्तं तु सौमित्रिं संनिवार्य विभीषणः । पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत्[6] ॥ ८ ॥
मनुजेन्द्रार्तरूपेण यदुक्तस्त्वं हनूमता । तदयुक्तमहं मन्ये सागरस्येव शोषणम्[7] ॥ ९ ॥
अभिप्रायं तु जानामि रावणस्य दुरात्मनः । सीतां प्रति महाबाहो न च घातं करिष्यति ॥ १० ॥
याच्यमानः सुबहुशो मया हितचिकीर्षुणा । वैदेहीमुत्सृजस्वेति न च तत्कृतवान्वचः ॥ ११ ॥
नैव साम्ना न दानेन न भेदेन कुतो युधा । सा द्रष्टुमपि शक्येत नैव चान्येन केनचित्[8] ॥ १२ ॥

गो० टी०—अथेन्द्रजिद्वधोपायदर्शनम्—राममाश्वासयान इत्यादि । आश्वासयाने आश्वासयमाने आगमशासनस्यानित्यत्वान्मुगभावः । अनेन पूर्वोक्तवादा भ्रातृवात्सल्यात्तदाश्वासनार्था न तु परमार्था इत्युक्तम् । पूर्वोक्तयुक्तिपरिहारस्तु, हैतुकान् बकट्टन्तीश्च वाङ्मात्रेणापि नार्चयेदिति मन्त्रकरीत्या प्रेक्षणीयः । गुल्मान् सेनासन्निवेशान स्वस्थाने स्वकार्यकरणार्थम् ॥ १ ॥ २ ॥

३-५] ति० टी०—ददर्श ददर्श ॥ ३-५ ॥

गो० टी०—सांभिगम्येति । अत्र राघवपदं लक्ष्मणपरम् उत्तरश्लोके रामदर्शनस्य वक्ष्यमाणत्वात् ददर्श इत्यत्र ॥३॥४॥

रा० टी०—राघवमिति । मोहमापन्नं राघवं ददर्श ॥ ४ ॥

रा० टी०—पीडितमिति । शोकसंतप्तं रामं दृष्ट्वा दीनात्मा विभीषणः किमेतदित्यब्रवीत् ॥ ५ ॥

गो० टी०—व्रीडितमिति । सः विभीषणः रामं दृष्ट्वा दीनात्मा दीनमनस्कः सन्, अन्तर्दुःखेन अबहिःप्रतिहतदुःखविकारेण उपलक्षितः सन् अब्रवीत् ॥ ५ ॥

६-७] ति टी०—विभीषणमुखं दृष्ट्वा । रामादिदैन्यदर्शनेन दीनमित्यर्थः । लक्ष्मणोवाचेति संधिरार्षः ॥ ६ ॥ ७ ॥

रा० टी०—विभीषणेति । लक्ष्मणः विभीषणमुखादि दृष्ट्वा मन्देन शनैरर्थो अर्थबोधो यस्मात् तत् उवाच सन्धिरार्षः॥६॥

रा० टी०—तदाकारमाह—तामिति । इन्द्रजिता हतां सीतां हनुमद्वचनाच्छ्रुत्वैव राघवो मोहमुपाश्रितः प्राप्तः ॥ ७ ॥

गो० टी०—विभीषणमुखमिति । लक्ष्मणोवाचेत्यत्र छान्दसः सुलोपः । मन्दार्थम् अल्पार्थम् । संगृहीतार्थमित्यर्थः ॥ ६ ॥ ७ ॥

८] ति० टी०—संनिवार्य नैवं दुःखं कार्यमित्युक्त्वा॥८॥

रा० टी०—कथयन्तमिति । विभीषणः कथयन्तं सौमित्रिं संनिवार्य पुष्कलो दृढोऽर्थो यस्मिन् तद्वाक्यमब्रवीत् ॥ ८ ॥

गो० टी०—कथयन्तमित्यर्धम् । मध्ये निवारणोक्तिः सर्वस्य वृत्तान्तस्य स्वेनावगतत्वात् । विभीषणः उवाचेति शेषः ॥ ८ ॥ ९ ॥

९] ति० टी०—आर्तरूपेण दीनरूपेण ॥ ९ ॥

रा० टी०—तदाकारमाह—मनुजेति । हे मनुजेन्द्र आर्तरूपेण हनुमता यत् सीताहरणं त्वयुक्तः तत् सागरस्य शोषणमिव अयुक्तमहं मन्ये एतेन तस्याले अगस्त्यकर्तृकसागरशोषणं न प्रसिद्धमिति ध्वनितम् ॥ ९ ॥

१०] ति० टी०—कथमयुक्तं तत्राह—अभिप्रायं त्विति । सीतां प्रति सीतामुद्दिश्य वर्तमानं तदभिप्रायं मनोवृत्तिं सीता न त्याज्येत्येवंरूपं जानामि च अतो घातं न करिष्यति । सीतायाः इति शेषः ॥ १० ॥

रा० टी०—अभीति । सीतां प्रति दुरात्मनो रावणस्याभिप्रायमहं जानामि अन्यदुर्जनावलोकिन मनिषु मनोयात्वेन नित्यं तदर्शनाकाङ्क्षया च सीता संरक्षणीये अतः घातं सीताविहननं न करिष्यति ॥ १० ॥

गो० टी०—अभिप्रायं त्विति । करिष्यति । रावण इति शेषः ॥ १० ॥

११] ति० टी०—तमेवाह—याच्यमान इति ॥ ११ ॥

रा० टी०—तदेव दृढयति—याच्यमान इति । वैदेहीमुत्सृजस्वेति मया बहुशो याच्यमानो रावणः क्षमं वचो न कृतवान् ॥ ११ ॥

गो० टी०—तत्र हेतुमाह—याच्यमान इत्यादिना ॥११॥

१२] ति० टी०—यैः च सीतात्वेन केनापि केनाप्युपायेन द्रष्टुमेवाशक्या, कुतस्तस्याहरणपूर्वं वध इत्याह—नैव साम्नेति । कुतो वृथा निमित्तभूतयात्वन्य दर्शनादिप्रसङ्गः, कुतोऽपि ॥ १२ ॥

रा० टी०—नेति । अन्येन केनचिज्जनेन सामाद्यन्यतमेन उपायेन सा सीता द्रष्टुमपि नैव शक्येत तर्हि वृथा युद्धेन कुतः शक्येतेत्यर्थः ॥ १२ ॥

---

१ वेति गो. पाठः । २ आश्रित इति गो. पाठः । ३ हतामिति गो. रा. पाठः । ४ सीतामिति गो. रा. पाठः । ५ उपागत इति गो. पाठः । ६ इदमर्धं गो. पु. नास्ति । ७ उक्तं चेति गो. पाठः ।

वानरान्मोहयित्वा तु प्रतियातः स राक्षसः । मायामयीं महाबाहो तां विद्धि जनकात्मजाम्॥ १३ ॥
चैत्यं निकुम्भिलामद्य प्राप्य होमं करिष्यति । हुतवानुपयातो हि देवैरपि सवासवैः ॥ १४ ॥
दुराधर्षो भवत्येष सङ्ग्रामे रावणात्मजः । तेन मोहयता नूनमेषा माया प्रयोजिता ॥
विघ्नमन्विच्छता तत्र वानराणां पराक्रमे ॥ १५ ॥
ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते । त्यजैनं नरशार्दूल मिथ्या संतापमागतम् ॥ १६ ॥
सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम् । इह त्वं स्वस्थहृदयस्तिष्ठ सत्वसमुच्छ्रितः ॥
लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः ॥ १७ ॥
एष तं नरशार्दूलो रावणिं निशितैः शरैः । त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति॥ १८ ॥
तस्यैते निशितास्तीक्ष्णाः पत्रिपत्राङ्गवाजिनः । पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम्॥१९॥

गो० टी०–नैवेति । सा सात्रा द्रष्टुमपि नैव शक्येत दानेनापि द्रष्टुं न शक्येत भेदेनापि द्रष्टुं न शक्येत युधा दण्डेन कुतो द्रष्टुमपि शक्येत । अन्येन मायोपायेन केनचिद्रष्टुमपि नैव शक्येत ॥ १२ ॥

१३] ति० टी०–का तर्हि वधविपरीतस्यानुभवस्य गतिरित्याह—वानरानिति । मोहयित्वा । मायामयसीताच्छेदनेनेति शेषः ॥ १३ ॥

रा० टी०–ननु हनुमता दृष्टस्य सीतावधस्य अपलापः कथं क्रियेत इत्यत आह—वानरानिति । स इन्द्रजित् वानरान्मोहयित्वा प्रतियातः अत एव तां हननकर्मत्वेन प्रतीयमानां जनकात्मजां मायामयीं विद्धि ॥ १३ ॥

गो० टी०–कथं तर्हीन्द्रजिता हतेत्याशङ्क्य मायेयमित्याह—वानरानित्यादिना । मोहयित्वा । लङ्कायां स्वव्यतिरिक्तस्य गोदुरभावात् स्वस्मिन् कर्मव्याकुले वानराः प्रहरेयुः यज्ञश्च विच्छिद्येत विच्छिद्ये च तस्मिन् ब्रह्मवरानुसारेण स्वस्य विनाशो भविष्यतीति मत्वा वज्रनमिति भावः ॥ १३ ॥ १४॥

१४] ति० टी०–मोहने प्रयोजनमाह—चैत्यमिति॥१४॥

रा० टी०–चैत्यमिति । निकुम्भिलां तदभिधं चैत्यं देवालयं प्राप्य होमं करिष्यति, ननु किं तेनेत्यत आह हुतवान् कृतहवनः उपयात इन्द्रजित् देवैरपि दुराधर्षो भवति सार्धश्लोक एकान्वयी ॥ १४ ॥

१५] ति० टी०–ननु करोतु होमम्, किं मोहनप्रयासेनेत्यत्राह—विघ्नमिति । वानराणां पराक्रमे सति यागस्य विघ्नमन्विच्छतानुस्मरता संभावयता नूनं निश्चयेन तत्तद्विघ्ननिष्टत्तये प्रयोजिता ॥ १५ ॥

रा० टी०–मायासीताहनने प्रयोजनमाह—तेनेति । वानराणां पराक्रमे विघ्नमन्विच्छता अत एव मोहयता वानरमोहं संपादयता तेनेन्द्रजिता एषा माया प्रयोजिता ॥ १५ ॥

गो० टी०–तेनेति । अन्विच्छता चिन्तयता ॥ १५ ॥

१६] ति० टी०–तेनाथ तद्यागस्य विघ्न एव कर्तव्य इति रहस्यमित्याह—ससैन्या इति । तद्धोमकर्म ॥ १६ ॥

रा० टी०–तर्ह्विदानीं किंकर्तव्यमित्यत आह—सेति । तद्धवनं यावत् न समाप्यते तावत् ससैन्या वयं गच्छामः अतः मिथ्यागतं सन्तापं त्यज ॥ १६ ॥

गो० टी०–ससैन्या इत्यादि । तत् होमरूपं कर्म ॥१६॥

१७] ति० टी०–हि यतस्त्वां शोककर्शितं दृष्ट्वा सर्वं वानरबलं सीदते सीदति, तस्मात्त्वं स्वस्थहृदयो भूत्वा इहैव तिष्ठ । सैन्यानुकर्षिभिः सर्वसेनां गृहीत्वा गच्छद्भिरस्माभिः प्रधानैः सह लक्ष्मणं प्रेषय ॥ १७ ॥

रा० टी०–सीदत इति । त्वां शोककर्षितं दृष्ट्वा सर्वं बलं सीदते अतः सत्त्वेन धैर्यबलेन समुच्छ्रितः प्रवृद्धस्त्वं स्वस्थहृदयस्सन् इह तिष्ठ सैन्यानुकर्षिभिः सेनां चालयद्भिस्सह लक्ष्मणं प्रेषय सार्द्धश्लोक एकान्वयी ॥ १७ ॥ १८ ॥

गो० टी०–इहेति । सैन्यानुकर्षिभिः सैन्यपालैः ॥ १७ ॥

१८] ति० टी०–एष रावणिं निशितैः शरैर्व्याकुलीकृत्य तत्कर्म त्याजयिष्यति । ततो हेतोर्मायासिद्धयभावाद्वध्यो भविष्यति ॥ १८ ॥

रा० टी०–एष इति । एष लक्ष्मणः रावणिं तत् मायाजनकहवनरूपं कर्म त्याजयिष्यति ततः तस्माद्धेतोः वध्यो भविष्यति इन्द्रजिदिति शेषः रावणेः कर्मत्वं तु कृतपूर्वीकटमित्यत्रेव पूर्वकर्मरूपकर्मांविवक्षयाकर्मकत्वेन अविवक्षितकर्माणोऽपि यथाकर्मकत्वेन गृह्यन्ते तथाकर्मकत्वेन शब्देन्दुशेखरादौ निरूपितम् ॥ १९ ॥

गो० टी०–एष इति । तत् कर्म होमकर्म । णिजन्तत्वाद्विकर्मकत्वम् ॥ १८ ॥

१९] ति० टी०–पत्रिणां पत्ररूपैरङ्गैर्वाजिनो वेगवन्तस्तस्य लक्ष्मणस्य शरा असौम्याः पत्रिणः कङ्कादय एव शोणितं पास्यन्ति । इन्द्रजित इति शेषः ॥ १९ ॥

रा० टी०–तस्येति । पत्रिणः शराः एव पत्राणि वाहनानि अङ्गानि सेनाङ्गभूतगदादयः वाजिनो अश्वाश्च यस्य शरग्रहणे वाहनाद्यपेक्षारहितस्येत्यर्थः तस्य लक्ष्मणस्य शराः असौम्याः

---

१ रदप्रभृत्यर्थं गो. प. नास्ति । २ नाम अत्रेति गो. रा. पाठः । ३ अहैरिति रा. पाठः ।

तत्संदिश महाबाहो लक्ष्मणं शुभलक्षणम् । राक्षसस्य विनाशाय वज्रं वज्रधरो यथा ॥ २० ॥
मनुजवर न कालविप्रकर्षो रिपुनिधनं प्रति यत्क्षमोऽद्य कर्तुम् ।
त्वमतिसृज रिपोर्वधाय वज्रं दिविजरिपुमथने यथा महेन्द्रः ॥ २१ ॥
समाप्तकर्मा हि स राक्षसर्षभो भवत्यदृश्यः समरे सुरासुरैः ।
युयुत्सता तेन समाप्तकर्मणा भवेत्सुराणामपि संशयो महान् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

पञ्चाशीतितमः सर्गः ।

शोकाकुलतया विभीषणाशयं सुव्यक्तमजानानेन रामेण पुनः पर्यनुयुक्तो विभीषणः भो राघव तुष्टेन भात्रेन्द्रजिद्वितीयेनरो यत्कर्मपूर्वी सर्वेषां त्वमजय्यः ततः प्राक् यो हन्तु यत्नेन तदा तव वध अन्यतस्तत्कर्माधुनैव विहन्तव्यं कर्मणि विहते रावणिर्हतस्तस्मिंश्च मृते सशुद्धद्गणं रावणं हतं विद्धीत्याद्यवोचत् । अथ रामेण रिपुहननमात्मरक्षणं च विविदुपदिश्य हरिबलसमेतोऽविलम्बेन प्रेषितो लक्ष्मणः परबलं विवेश ।

तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्छितः । नोपधार्यते व्यक्तं यदुक्तं तेन रक्षसा ॥ १ ॥
ततो धैर्यमवष्टभ्य रामः परपुरंजयः । विभीषणमुपासीनमुवाच कपिसंनिधौ ॥ २ ॥
नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण । भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितम् ॥ ३ ॥

क्रराः पतत्रिणः कंकादय इव शोणितं रिपुशरीररुधिरं पास्यन्ति ॥ २० ॥

गो० टी०–तस्येति । एते लक्षणीयाः । पक्षिपत्राणि पक्षिपक्षाः, तेषामङ्गानि बर्हाणि, तैः वाजिनः वेगवन्तः १९॥२०

२०] ति० टी०–तत्तस्माल्लक्ष्मणं संदिश प्रेषय ॥ २० ॥

रा० टी०–तदिति । वज्रधरो वज्रमिव राक्षसस्य विनाशाय लक्ष्मणं सन्दिश प्रेषय ॥ २१ ॥

२१] ति० टी०–रिपुनिधनं प्रति कालविप्रकर्षः कालक्षेपोऽद्य कर्तुं यथतो न क्षमो न योग्यः, तस्मात्त्वं रिपोर्वधाय लक्ष्मणमतिसृज प्रेषय । यथा दिविजरिपुमथने देवरिपुमथनेऽमरेन्द्रो वज्रमतिसृजति तथेत्यर्थः ॥ २१ ॥

रा० टी०–मनुजेति । हे मनुजवर यस्मादेतोः रिपोर्निधनं नाशं प्रति कालविप्रकर्षः कालात्ययः कर्तुं न क्षमः तस्मात् रिपोर्वधाय त्वमतिसृज लक्ष्मणमिति शेषः तत्र दृष्टान्तः दिविजरिपूणां दैत्यानां मथने महेन्द्रो वज्रमिव ॥ २२ ॥

गो० टी०–मनुजेति । यस्मात्कारणात् रिपुनिधनं प्रति कालविप्रकर्षः कालविलम्बः अद्य कर्तुं न क्षमः । तत्तस्मात् त्वं रिपुवधाय वाणीमतिसृज । आज्ञापयेत्यर्थः । यथा महेन्द्र इत्यापन्मात्रे दृष्टान्तः ॥ २१ ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

२२] ति० टी०–कालक्षेपो न कार्य इत्यत्र हेतुमाह—समाप्तेति । समाप्तयागकर्मेत्यर्थः । सुराणामपि संशयः प्राणसंशय इत्यर्थः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

रा० टी०–विलम्बे दोषमाह—समाप्तेति । राक्षसर्षभः हि यदि समाप्तकर्मा भवति तदा सुरासुरैरपि अदृश्यो भवति भविष्यति अत एव समाप्तकर्मणा युयुत्सुना तेनेन्द्रजिता सुराणामपि संशयो भवेत् भविष्यति ॥ २३ ॥

इति श्रीमद्वाल्मीकीय रामायणव्याख्याने रामायण शिरोमणौ युद्धकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

१] ति० टी०–नोपधार्यते व्यक्तम् । शोकमूर्छित आजानाति स्मेत्यर्थः ॥ १ ॥

रा० टी०–विभीषणवचनश्रवणानन्तरकालिकं वृत्तान्तमाह—तस्येत्यादिभिः । शोकमूर्छितो राघवः रक्षसा विभीषणेन यदुक्तं तन्नोपधार्यते उपाधार्यत् आदरतोऽश्रौषीत् ॥ १ ॥

गो० टी०–अथेन्द्रजिद्वधाय लक्ष्मणनिर्गमनम्—तस्य तद्वचनमित्यादि । व्यक्तं नोपधार्यते हृदि सम्यङ्निधातुं नाशकदित्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०–उपासीनं समीपस्थितम् ॥ २ ॥

रा० टी०–तत इति । रामः कपेर्हनुमतस्सन्निधौ उपासीनं विभीषणमुवाच ॥ २ ॥

३] ति० टी०–ते त्वया यत्प्रागुक्तं तद्भूयः श्रोतुमिच्छामि ॥ ३ ॥

१ वमिति गो. पाठः । २ वाणीममरारिपोरिति गो. पाठः । ३ रिपोरिति रा. पाठः । ४ अपि इति गो. पाठः ।

राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः । यत्तत्पुनरिदं वाक्यं बभाषेऽर्थं विभीषणः ॥ ४ ॥
यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् । तत्तथानुष्ठितं वीर त्वद्वाक्यसमनन्तरम् ॥ ५ ॥
तान्यनीकानि सर्वाणि विभक्तानि समन्ततः । विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः ॥ ६ ॥
भूयस्तु मम विज्ञाप्यं तच्छृणुष्व महाप्रभो । त्वय्यकारणसंतप्ते संतप्तहृदया वयम् ॥ ७ ॥
त्यज राजन्निमं शोकं मिथ्या संतापमागतम् । यदियं त्यज्यतां चिन्ता शत्रुपक्षविवर्धिनी ॥ ८ ॥
उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम् । प्राप्तव्या यदि ते सीता हन्तव्याश्च निशाचराः ॥ ९ ॥
रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः । साध्वयं यातु सौमित्रिर्बलेन महता वृतः ॥ १० ॥
निकुम्भिलायां संप्राप्तं हन्तुं रावणिमाहवे । धनुर्मण्डलनिर्मुक्तैराशीविषविषोपमैः ॥ ११ ॥
शरैर्हन्तुं महेष्वासो रावणिं समितिंजयः ।
तेन वीरेण तपसा वरदानात्स्वयंभुवः । अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरंगमाः ॥ १२ ॥
स एष किल सैन्येन प्राप्तः किल निकुम्भिलाम् । यद्युत्तिष्ठेत्कृतं कर्म हतान्सर्वांश्च विद्धि नः ॥ १३ ॥
निकुम्भिलामसंप्राप्तमकृताग्निं च यो रिपुः । त्वामाततायिनं हन्यादिन्द्रशत्रो स ते वधः ॥ १४ ॥

रा० टी०—तदाकारमाह—नैर्ऋतेति । हे विभीषण यत्ते त्वया उक्तं तदहं श्रोतुमिच्छामि अतो यत्ते विवक्षितं वक्तुमिष्टं तत्त्वं ब्रूहि ॥ ३ ॥

गो० टी०—नैर्ऋतेति । ते त्वया ॥ ३ ॥

४–७] ति० टी०—यदुक्तं तदेवेदं वाक्यं पुनरुक्तमपि ४–७

रा० टी०—राघवस्येति । राघवस्य वाक्यं वक्तुं योग्यं यच्चो त्तरं श्रुत्वा यदुक्तं तदिदं वाक्यं पुनरुक्तमपि ॥ ४ ॥

गो० टी०—राघवस्येति । यत्तत् पुनरिति । यद्वाक्यं पूर्वमुक्तवान् तदिदं पुनरुक्तमप इत्यन्वयः ॥ ४ ॥

रा० टी०—तदाकारमाह—वर्ष्मेत्यादिभिः । हे महाबाहो यथा येन प्रकारेण गुल्मनिवेशनं सेनासंस्थापनं त्वयाज्ञप्तं तत्त्वद्वाक्यसमनन्तरं त्वदुक्त्यनन्तरकाले तथैवानुष्ठितं संपादितम् ॥ ५ ॥

रा० टी०—अनुष्ठितमेवाह—तानीति । यथान्यायमनीकानि विभक्तानि यथायथं विभागशो विन्यस्ताः ॥ ६ ॥

रा० टी०—भूय इति । भूयः पुनर्यन्मम विज्ञाप्यं तच्छृणुष्व तदाकारमाह त्वयि अकारणसन्तप्ते सति वयं सन्तप्तहृदयाः भवाम इति शेषः ॥ ७ ॥

गो० टी०—यथाज्ञप्तमित्यादुक्तिः रामस्य व्याकुलत्वनिवारणाय ॥ ५–७ ॥

८–११] ति० टी०—मिथ्यासंतापं तन्मूलं शोकम् ८–११

रा० टी०—त्यजेति । मिथ्यागतं शोकं संतापं च त्यज इयं चिन्ता च त्यज्यताम् ॥ ८ ॥

गो० टी०—त्वयीति । सन्तापं सन्तापं च । मिथ्येति शोकसन्तापयोर्विशेषणम् । सन्तापः शोककार्यमिति तयोर्भिदा ॥ ८ ॥

रा० टी०—उद्यम इति । सीता प्राप्तव्या अतः उद्यमः रिपुविनाशोपायोगः क्रियतां यदि यतो निशाचराः हन्तव्याः ॥९॥

रा० टी०—रघुनन्दनेति । हे रघुनन्दन मे वचः श्रूयतां ननु किं त्वद्वच इत्यत आह बलेनावृतः सौमित्रिः निकुम्भिलायां प्राप्तं रावणिं हन्तुं यातु श्लोकद्वयमेकान्वयि ॥१०॥११॥

गो० टी०—तदिति । उद्यमः उत्साहः ॥ ९–१२ ॥

१२] ति० टी०—तेन वीरेणेन्द्रजिता तपसा प्रीतस्य स्वयंभुवो वरदानान्निकुम्भिलायां देवीहोमे समाप्ते कामतुरङ्गयुक्तो रथो ब्रह्मशिरोऽस्त्रं चाग्नेः सकाशाल्लब्धवतेन च तवावध्यत्वं सकल्पयोगपर्यन्तमिति वरदानाद्ब्रह्मशिरोऽस्त्रं प्राप्तम् ॥ १२ ॥

रा० टी०—निकुम्भिलायां हतने प्रयोजनमाह—तेनेति । तेनेन्द्रजिता स्वयंभुवो वरदानात् ब्रह्मशिरोऽस्त्रं प्राप्तं तुरङ्गमाश्च प्राप्ताः ॥ १२ ॥

गो० टी०—तेनेति । ब्रह्मशिरः ब्रह्मशिरःसंज्ञकमस्त्रम् तुरङ्गमशब्दो रथस्याप्युपलक्षणम् प्राप्तम् । होमद्वारेति शेषः ॥ १२ ॥

१३] ति० टी०—स एष एवं प्रकारेण लब्धवर इन्द्रजित्सैन्येन सह होमं कर्तुं निकुम्भिलायां प्राप्तः । यदि कृतं कर्महोमकर्म कृत्वोत्तिष्ठेत्तर्हि सर्वानेव नोऽस्मान्हतान्विद्धि ॥ १३ ॥

रा० टी०—स इति । निकुम्भिलां प्राप्त एष रावणिः कृतमारब्धं कर्म समाप्येति शेषः यत्र यदोत्तिष्ठेत्तदा सर्वान् नोऽस्मान् हतान् विद्धि ॥ १३ ॥

गो० टी०—स एष इति । यदीति । यदि च निकुम्भिलाया उत्तिष्ठेत्, यदि कर्म कृतं स्यात्, तदा हतान् विद्धीत्यन्वयः ॥ १४ ॥

१४] ति० टी०—किं च भगवता तद्बोध्येवंप्रकारेणोक्त

१ स इति गो. रा. पाठः । २ यश इति गो. पाठः । ३ तदिति गो. रा. पाठः । ४ संप्राप्येति गो. पाठः । ५ इदमर्धमधिकं गो. पाठे । ६ वीर्येणेति गो. पाठः । ७ सहेति गो. पाठः । ८ अहुतेति गो. रा. पाठः । ९ शत्रोरिति गो. पाठः ।

वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै । इत्येवं विहितो राजन्वधस्तस्यैष धीमतः ॥ १५ ॥
वधायेन्द्रजितो राम संदिशस्व महाबलम् । हते तस्मिन्हतं विद्धि रावणं ससुहृद्गणम् ॥ १६ ॥
विभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत् । जानामि तस्य रौद्रस्य मायां सत्यपराक्रमम् ॥ १७ ॥
स हि ब्रह्मास्त्रवित्प्राज्ञो महामायो महाबलः । करोत्यसंज्ञान्सङ्ग्रामे देवान्सवरुणानपि ॥ १८ ॥
तस्यान्तरिक्षे चरतः सरथस्य महायशः । न गतिर्ज्ञायते वीर सृष्टिमेवास्त्रसृष्टये ॥ १९ ॥
राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः । लक्ष्मणं कीर्तिसंपन्नमिदं वचनमब्रवीत् ॥ २० ॥
यद्वानरेन्द्रस्य बलं तेन सर्वेण संवृतः । हनूमत्प्रमुखैर्वीर यूथपैः सह लक्ष्मण ॥ २१ ॥
जाम्बवेनर्क्षपतिना सह सैन्येन संवृतः । जहि तं राक्षससुतं मायाबलसमन्वितम् ॥ २२ ॥
अयं त्वां सचिवैः सार्धं महात्मा रजनीचरः । अभिज्ञातस्य मायानां पृष्ठतोऽनुगमिष्यति ॥ २३ ॥
राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः । जग्राह कार्मुकश्रेष्ठमन्यद्वीरमपराजितम् ॥ २४ ॥

इत्याह—**निकुम्भिलामिति** । निकुम्भिलां तथासंज्ञिं महाकालीक्षेत्रं तदाख्यन्यग्रोधमूलरूपमप्राप्तम् । अकृताग्निहोत्राभिचाराहोमम् । 'अहुताग्निम्' इति पाठान्तरम् । आततायिनं गृहीतशस्त्रं यो रिपुर्हन्यादमुष्येत हे इन्द्रशत्रो, स रिपुस्ते वधो वधकर्ता भविष्यति ॥ १४ ॥

रा० टी०—ननु तत्र गमनेन कथं तस्य वध इत्यत आह—**निकुम्भिलामिति** । निकुम्भिलासंज्ञं प्राप्तं न्यग्रोधमनादिसिद्धत्वेन तत्र गतेऽपि कृत्तादिरहितं वा आत्मानमिदं दत्तो वरो रिपुर्हन्यात् तेनैव सः प्राणवियोगरूपः ते वधः सम्भविष्यतीति शेषः इति वरः सर्वलोकेश्वरेण ब्रह्मणा दत्तः अतः स्व निकुम्भिलासमनादिसिद्धत्वेनैव एषः प्राणवियोगरूपः तस्य वधो विहित अन्यथा तस्य वधो नास्तीत्यर्थः श्लोकद्वयैकान्वयि॥ १४॥ १५

गो० टी०—तर्हि कथं स वध्य इत्यत्राह—**निकुम्भिलामित्यादिसार्धश्लोक एकान्वयः** । यो रिपुः अहुताग्निं च समाप्तहोमम्, निकुम्भिलोमसंज्ञं प्राप्तं निकुम्भिलाख्यन्यग्रोधवृक्षस्थानमसंप्राप्तं च । तमप्रविष्टन्यग्रोधमित्युत्तरत्रार्थे वक्ष्यति । आततायिनं शस्त्रपाणिम् रिपुर्योऽपि त्वां यो हन्यात् हिंस्यात्, सः इन्द्रशत्रोस्ते वधो मारक इति सर्वलोकेश्वरेण ब्रह्मणा वरो दत्त इति योजना । "वध, हनौ" इति धातोः पचाद्यचि वध इति रूपम् । यद्यप्येतल्लाघवगमिव प्रतिभाति तथापि निकुम्भिलाप्राप्तिहोमयोर्विलाभावे अवध्य इति पर्यवसानाद्वररूपत्वं द्रष्टव्यम् ॥ १५ ॥

१५–१८] ति० टी०—सर्वलोकेश्वरेण ब्रह्मणा एष वरो दत्तो वै प्रसिद्धः । राजन्, भीमतस्तस्यैवमेष वधो विहितो ब्रह्मणा ॥ १५–१८ ॥

गो० टी०—इत्येवमित्यादिसार्धश्लोक एकान्वयः । इत्येवंप्रकारेण एषः होमविघ्नकारी तस्य इन्द्रजितः वधः मारकः विहितः ब्रह्मणा कृतः तस्मात् तस्य इन्द्रजितो वधाय सन्दिशस्व । अस्मासु रुचिरिति शेषः ॥ १६–१८ ॥

रा० टी०—वधायेति । हे राम इन्द्रजितो वधाय महाबलं वानरसैन्यं सन्दिशस्व तस्मिन् इन्द्रजिति हते सति रावणं हतं विद्धि ॥ १६ ॥

गो० टी०—विभीषणेति । रामोऽप्रतीत्या तदाख्यानात् तस्येन्द्रजितो मायामहं जानामि ॥ १७ ॥

रा० टी०—जानामेत्याह—स हीति । ब्रह्मास्त्रविद्भिः इन्द्रजित् संग्रामे देवानप्यसंज्ञान् करोतीति ॥ १८ ॥

१९–२२] ति० टी०—हे महाबाहो सर्वलोकेश्वरेण ब्रह्मणा वरतः सत्यस्य तस्य गतिर्न ज्ञायते । अस्मभ्यं हे इत्यादि॥ १९–२२ ॥

रा० टी०—तस्येति । हे महाबाहो सर्वलोकेश्वरेण ब्रह्मणा वरतः सत्यस्य तस्य गतिर्न ज्ञायते । अस्मभ्यं हे इत्यादि॥ १९–२२ ॥

रा० टी०—राघव इति । राघवः विभीषणमुखात् श्रुत्वा लक्ष्मणमब्रवीत् ॥ २० ॥

गो० टी०—तस्येति । तस्य प्रसिद्धस्येति । सर्वलोकेश्वरेण हिरण्यगर्भेण तस्येति पदम् । अस्मत्संज्ञे मेघनादे ॥ १९ ॥ २० ॥

रा० टी०—तदाकारमाह—यदीति । वानरेन्द्रस्य सुग्रीवस्य यद्बलं तेन संवृतः हनूमत्प्रमुखैः सह सहितश्च जाम्बवेन जाम्बवता संवृतश्च त्वं तत्सैन्यं जहि श्लोकद्वयमेकान्वयि॥ २१॥२२॥

गो० टी०—यद्वानरेन्द्रस्येत्यादिश्लोकद्वयमेकान्वयम् । जाम्बवेन जाम्बवता सहसैन्येन सैन्यसहितेन "तोषसज्ञेभ्यस्तस्य" इति विकल्पेन सभावः । संवृतः । त्वमिति शेषः ॥ २१–२३ ॥

२३] ति० टी०—मायानामभिज्ञातस्य बहिपयज्ञानवतः । 'अभिज्ञस्य' इति पाठेऽप्ययमेवार्थः ॥ २३ ॥

गो० टी०—अयमिति । रजनीचरः तस्येन्द्रजितो मायानामभिज्ञः अयं विभीषणः ते पृष्ठतोऽनुगमिष्यति अभिज्ञेति पाठे तृतीयान्तत्वात्सहित इत्यध्याहार्यम् ॥ २३ ॥

२४] ति० टी०—अन्यत्कार्मुकश्रेष्ठम् : देवानुग्रहप्राप्तं परमित्यर्थः ॥ २४ ॥

रा० टी०—राघवस्येति । भीमपराक्रमो लक्ष्मणः अन्यत् पूर्वगृहीतापेक्षया भिन्नं कार्मुकश्रेष्ठं जग्राह ॥ २४ ॥

---

१ रुचिरं गो.पाठः । २ रथस्थस्येति गो.पाठः । ३ विशारदमिति गो.पाठः । ४ अभिज्ञस्तस्य देशस्येति गो. रा. पाठः । ५ अन्यकुलेति गो.पाठः ।

संनद्धः कवची खड्गी सशरी[1] वामचापभृत् । रामपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत्[2]॥ २५ ॥
अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिम् । लङ्कामभिपतिष्यन्ति हंसाः पुष्करिणीमिव ॥ २६ ॥
अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः । विधमिष्यन्ति भित्त्वा तं महाचापगुणच्युताः ॥ २७ ॥
एवमुक्त्वा तु वचनं द्युतिमान्भ्रातुरग्रतः । स रावणिवधाकाङ्क्षी लक्ष्मणस्त्वरितं[3] ययौ ॥ २८ ॥
सोऽभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम् । निकुम्भिलामभिययौ चैत्यं रावणिपालितम्[4]॥ २९ ॥
बिभीषणेन सहितो राजपुत्रः प्रतापवान् । कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो[5] ययौ॥ ३० ॥
वानराणां सहस्रैस्तु हनूमान्बहुभिर्वृतः । विभीषणश्च सामात्यो लक्ष्मणं त्वरितं[6] ययौ॥ ३१ ॥
महता हरिसैन्येन सवेगमभिसंवृतः । ऋक्षराजबलं चैव ददर्श पथि विष्ठितम् ॥ ३२ ॥
स गत्वा दूरमध्वानं सौमित्रिर्मित्रनन्दनः । राक्षसेन्द्रबलं दूरादपश्यद्व्यूहमाश्रितम् ॥ ३३ ॥
स संप्राप्य धनुष्पाणिर्मायायोगमरिंदमः । तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः ॥ ३४ ॥
बिभीषणेन सहितो राजपुत्रः प्रतापवान् । अङ्गदेन च वीरेण तथानिलसुतेन च ॥ ३५ ॥
विविधममलशस्त्रभास्वरं तद्बलमगहनं गहनं महारथैश्च ।
प्रतिभयतममप्रमेयवेगं तिमिरमिव द्विषतां बलं विवेश ॥ ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

२५] ति० टी०-सशरी प्रशस्तशरवान् वामचापभृद्रामहस्तेन चापभृत् ॥ २५ ॥

रा० टी०-सन्नद्ध इति । सन्नद्धः गृहीतयुद्धसामग्रीकः अत एव कवचादिविभिष्टः सौमित्रिः रामपादावुपस्पृश्य अब्रवीत्॥२५॥

२६-२७] ति० टी०-रावणिं निर्भिद्यासत्काः सन्तो लङ्कामभिपतिष्यन्ति ॥ २६ ॥ २७ ॥

रा० टी०-तदाकारमाह—अद्येति । द्वाभ्याम् पुष्करिणीं सरसीं हंसा इव मत्कार्मुकान्मुक्ताः शराः रावणिं निर्भिद्य लंकामभिपतिष्यन्ति ॥ २६ ॥

रा० टी०-तदेव भंग्यन्तरेणाह—अद्येति । महाचापगुणच्युताः मामकाः शराः तस्येन्द्रजितश्शरीरं भित्त्वा तं विधमिष्यन्ति प्राणवियुक्तं करिष्यन्ति ॥ २७ ॥

२८-३०] ति० टी०-एवमुक्त्वा त्विति । ' स एवमुक्त्वा' इति पाठे स लक्ष्मणः, स एव लक्ष्मणस्त्वरितं ययाविति तृच्छब्दत्रयनिर्वाह इति तीर्थः ॥ २८-३० ॥

रा० टी०-एवमिति । लक्ष्मण एवमुक्त्वा त्वरितं ययौ२८

रा० टी०-गमनप्रकारमाह—त इति । स लक्ष्मणः गुरोः रामस्य पादौ अभिवाद्य प्रदक्षिणं कृत्वा च निकुंभिलां चैत्यमभियया ॥ २९ ॥

रा० टी०-विभीषणेनेति । भ्रात्रा रामेण कृतस्वस्त्ययनः अत एव त्वरितो लक्ष्मणो ययौ ॥ ३० ॥

गो० टी०-स एवमिति । असत्यपि कर्तृभेदे क्रियाभेदमाश्रित्य स इति द्विरुक्तिः । स एवमुक्त्वा स ययाविति निर्वाहः । वस्तुतस्तु स लक्ष्मणः । सः तादृशवीरवेषविशिष्ट एवेत्यर्थः । यद्वा सरावणिवधाकाङ्क्षीत्येकं पदम् । रावणिना सहवर्तन्त इति सरावणगः निकुम्भिलास्था राक्षसाः, तेषां वधाकाङ्क्षीत्यर्थः ॥ २८-३३ ॥

३१] ति० टी०-त्वरितं ययौ । लक्ष्मणमनुययावित्यर्थः३१

रा० टी०-वानराणामिति । हनुमान् विभीषणश्च त्वरितं ययौ ॥ ३१ ॥

३२-३३] ति० टी०-पथि विष्ठितं हनुमता सीतावधवृत्तान्तनिवेदनार्थमागमनसमये द्वाररक्षार्थं पथि स्थापितमित्यर्थः ॥ ३२ ॥ ३३ ॥

रा० टी०-महतेति । हरिसैन्येन सवेगमभिसंवृतो लक्ष्मणः पथि विष्ठितं संस्थितं ऋक्षराजस्य जाम्बवतो बलं ददर्श ॥३२॥

रा० टी०-स इति । सौमित्रिः व्यूहमाश्रितं राक्षसेन्द्रबलं दूरादपश्यत् ॥ ३३ ॥

३४] ति० टी०-मायायोगं मायायैव योगो युद्धजयोपायो यस्य तमिन्द्रजितं प्राप्य ब्रह्मविधानेन निर्भिलामसंप्राप्त इत्यायुक्तब्रह्मवरदानप्रकारेण तं विजेतुं तस्थौ । रघुनन्दनो लक्ष्मणः । ' ब्रह्मविधानेन ' इति पाठे ब्रह्मणो भगवतस्तेजोंशोऽहमस्मीति विशिष्य जायमानेन ध्यानेन शत्रुं जेतुं तस्थौ । संकटकाले तादृशध्यानस्य तस्य निसर्गसिद्धत्वादिति कतकः॥३४॥

३५-३६] ति० टी०-च लक्ष्मणो विभीषणादिभिः सहोच्यमानगुणं द्विषतां बलं विवेश । प्रतिभयतममतिशयेनभयंकरम् ॥ ३५ ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामोल्लणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

---

१ सशरो हेमेति गो. पाठः । २ स एवमुक्त्वा द्युतिमान्वचनमिति गो. पाठः । ३ त्वरित इति गो. पाठः । ४ तथा लक्ष्मणमन्ववगाहेति गो. पाठः । ५ त इति गो. पाठः । ६ विपुकमिति गो. पाठः ।

षडशीतितमः सर्गः ।

सौमित्रे मेघश्यामं रजनीचरबलमविदूर एव दृश्यते नच्छिलायायधैः कपिभिर्भेदनीयं येन तत्कर्मकर्तेन्द्रजिदपि युध्यतो भवेत्तेन युद्धयस्व येन कर्मावसानात्पूर्वं रुष्टो बहिरागच्छेत्स इत्युक्तो विभीषणेन लक्ष्मणः शरवर्षेण तं विव्याध ऋक्षशाखामृगा अपि तद्बलेन युयुधिरे स्वबलमर्दितं विलोक्यासमाप्य च कर्म युध्यमानं मारुतिं जिघांसुमिन्द्रजितं विभीषणदर्शितं लक्ष्मणः प्रेक्षत ।

अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः । परेषामहितं वाक्यमर्थसाधकमब्रवीत् ॥ १ ॥
यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते । एतदायोध्यतां शीघ्रं कपिभिश्च शिलायुधैः॥ २ ॥
तैस्यानीकस्य महतो भेदने यत लक्ष्मण । राक्षसेन्द्रसुतोऽप्यत्र भिन्ने दृश्यो भविष्यति॥ ३ ॥
स त्वमिन्द्राशनिप्रख्यैः शरैरवकिरन्परान् । अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते ॥ ४ ॥
जहि वीर दुरात्मानं मायापरमधार्मिकम् । रावणिं क्रूरकर्माणं सर्वलोकभयावहम् ॥ ५ ॥
विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः । ववर्ष शरवर्षेण राक्षसेन्द्रसुतं प्रति ॥ ६ ॥
ऋक्षाः शाखामृगाश्चैव द्रुमप्रवरयोधिनः । अभ्यधावन्त सहितास्तदनीकमवस्थितम् ॥ ७ ॥
राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः । अभ्यवर्तन्त समरे कपिसैन्यजिघांसवः ॥ ८ ॥
स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् । शब्देन महता लङ्कां नादयन्वै समन्ततः ॥ ९ ॥
शस्त्रैश्च विविधाकारैः शितैर्बाणैश्च पादपैः । उद्यतैर्गिरिशृङ्गैश्च घोरैराकाशमावृतम् ॥ १० ॥

रा० टी०-स इति । विभीषणादिना सहितो रघुनन्दनः स लक्ष्मणः मायैव योगः युद्धोपायो यस्य तमिन्द्रजितं संप्राप्य ब्रह्मविधानेन ब्रह्मोक्तवधप्रकारेण विजेतुं तस्थौ श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०-स तं प्राप्येत्यादिश्लोकद्वयमेकान्वयम् । ब्रह्मविधानेन निकुम्भिलासंप्राप्तमित्यादिनोक्तब्रह्मवरदानप्रकारेण, मायायोगं मायारूपोपायम्, तम् इन्द्रजितम्, विजेतुं प्राप्य तस्थौ । मायायागमिति पाठे मायायागं जेतुं नाशयितुम् तं देशम् प्राप्य तस्थावित्यन्वयः ॥ ३४ ॥ ३५ ॥

रा० टी०-विविधमिति । अमलशस्त्रैर्भास्वरं प्रतिभयैर्महं निविडं महारौद्रैश्च गहनं प्रतिभयतममतिभयंकरमप्रमेयवेगं विविधं तिमिरमिव द्विषतां बलं विवेश ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

गो० टी०-विविधमिति । प्रतिभयतमम् अतिशयेन भयंकरम् ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

१] ति० टी०-अथ तस्यामवस्थायां रक्षार्थं सेनां निवेश्येन्द्रजितो यागकाले परेषां शत्रूणामहितं नाशकरम् स्वेषामर्थसाधकम् ॥ १ ॥

रा० टी०-लक्ष्मणकर्तृकेन्द्रजित्सैन्यप्रवेशानन्तरकालिकं वृत्तान्तमाह—अथेत्यादिभिः । रावणानुजो विभीषणः अर्थसाधकं रामार्थनिष्पादकं परेषां रिपूणामहितं वाक्यमब्रवीत् १

गो० टी०-अथेन्द्रजिद्युद्धारम्भः—अथ तस्यामित्यादि तस्यामवस्थायाम् निकुम्भिलासमीपगमनावसरे । अर्थसाधकम् । स्वानामिति शेषः ॥ १ ॥

२] ति० टी०-एतत्कपिभिरायोध्यताम् ॥ २ ॥

रा० टी०-तदाकारमाह—यदित्यादिभिः । यत् एतत् राक्षसानीकमवलोक्यते तदेतत् कपिभिश्शीघ्रमायोध्यताम् ॥२॥

गो० टी०-यदेतदिति । आयोध्यतां हन्यताम् । शीघ्रमिति । विलम्बे यागः समाप्येतेति भावः ॥ २ ॥

३] ति० टी०-हे लक्ष्मण, तस्य तत्परस्थितस्य महतोऽनीकस्य भेदने त्वं यत यत्नं कुरु ॥ ३ ॥

रा० टी०-नन्विन्द्रजितोऽदृश्यमानत्वात्किं तत्सैन्ययोधनेनेत्यत आह—तस्येति । अनीकस्य भेदने विनाशने यत नन्वशक्यं तदवस्थेवेत्यत आह अत्र अस्मिन् अनीके भिन्ने विनष्टे सति राक्षसेन्द्रसुतोऽपि दृश्यो भविष्यति ॥ ३ ॥

गो० टी०-अस्येति । यत यतस्व । अत्र राक्षसानीके ३-५

४] ति० टी०-एतत्कर्म होमकर्म यावत्न समाप्यते तावदाभिद्रव रावणिमित्यन्वयः ॥ ४ ॥

रा० टी०-स इति । एतत् मायाप्राकट्यादिहेतुभूतं कर्म हवनादि यावत्न समाप्यते तावदेव शरैः रिपून अवकिरन् सन् अभिद्रव ॥ ४ ॥

५] ति० टी०-मायापरम् अधार्मिकमिति छेदः ॥ ५ ॥

रा० टी०-जहीति । मायापरं रावणं जहि ॥ ५ ॥

६-१०] ति० टी०-राक्षसेन्द्रसुतं प्रति । तत्प्राप्तिमुद्दिश्य तत्सेनायां ववर्षेत्यर्थः ॥ ६-१० ॥

---

१ पादपायुधैरिति गो. पाठः । २ अस्येति गो. पाठः । ३ वर्षाणीति गो. रा. पाठः । ४ चाशीति गो. पाठः । ५ अद्रिनखेति गो. पाठः । ६ हतमे समवर्तन्तेति गो. पाठः । ७ सैन्यमिति रा. पाठः । ८ वधुवेति गो. पाठः ।

राक्षसा वानरेन्द्रेषु विकृताननबाहवः । निवेशयन्तः शस्त्राणि चक्रुस्ते सुमहद्भयम्॥ ११ ।
तथैव सकलैर्वृक्षैर्गिरिशृङ्गैश्च वानराः । अभिजघ्नुर्निजघ्नुश्च समरे सर्वराक्षसान् ॥ १२ ।
ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः । रक्षसां युध्यमानानां महद्भयमजायत ॥ १३ ।
स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम् । उदतिष्ठत दुर्धर्षः स कर्मण्यननुष्ठिते ॥ १४ ॥
वृक्षान्धकारान्निर्गम्य जातक्रोधः स रावणिः । आरुरोह रथं सज्जं पूर्वयुक्तं सुसंयतम् ॥ १५ ॥
स भीमकार्मुकेशरः कृष्णाञ्जनचयोपमः । रक्तास्यनयनो भीमो बभौ मृत्युरिवान्तकः॥ १६ ॥
दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद्बलम् । रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम् ॥ १७ ॥
तस्मिंस्तु काले हनुमानकुलत्स दुरासदम् । वरणीधरसंकाशो महावृक्षमरिंदमः ॥ १८ ॥
स राक्षसानां तत्सैन्यं कालाग्निरिव निर्दहन् । चकार बहुभिर्वृक्षैर्निःसंज्ञं युधि वानरः ॥ १९ ॥
विध्वंसयन्तं तरसा दृष्ट्वैव पवनात्मजम् । राक्षसानां सहस्राणि हनूमन्तमवाकिरन् ॥ २० ॥

रा० टी०–विभीषणेति । लक्ष्मणः शरवर्षेण राक्षसेन्द्रसुतं प्रतिववर्ष ॥ ६ ॥

रा० टी०–ऋक्षा इति । द्रुमप्रवरैः योधितुं शीलं येषां ते ऋक्षादयः अवस्थितं तदनीकमभ्यधावन्त ॥ ७ ॥

गो० टी०–विभीषणेति । शुभलक्षणः सुहृद्वचनमाश्रयाहित्यलक्षणयुक्तः ॥ ६ ॥ ७ ॥

रा० टी०–राक्षसा इति । कपिसैन्यं जिघांसवो राक्षसा वाणादिभिरभ्यवर्तन्त ॥ ८ ॥

गो० टी०–राक्षसा इति । कपिसैन्यं जिघांसवः कपिसैन्यं हन्तुमिच्छवः ॥ ८ ॥

रा० टी०–स इति । अक्षेण लंकां नादयन् सन् कपिरक्षसां तुमुलसंप्रहारस्संजज्ञे ॥ ९ ॥

रा० टी०–शस्त्रैरिति । शस्त्रादिभिराकाशमावृतम्॥१०॥

गो० टी०–स इति । संप्रहारः युद्धम् ॥ ९ ॥ १० ॥

११–१३] ति० टी०–ते शस्त्राणि निवेशयन्तो विकृताननबाहवः सन्तः सुमहद्भयं चक्रुः । ' राक्षसा वानरेन्द्रेषु ' इति पाठः ॥ ११–१३ ॥

रा० टी०–राक्षसा इति । विकृताननबाहवो राक्षसाः वानरेन्द्रेषु शस्त्राणि निवेशयन्तस्सन्तः सुमहद्भयं चक्रुः ॥ ११ ॥

रा० टी०–तथेति । वानराः वृक्षादिभिः अभिजघ्नुः संप्रहारं प्रापुः जघ्नुश्च ॥ १२ ॥

रा० टी०–ऋक्षेति । ऋक्षवानरमुख्यैस्सह युध्यमानानां रक्षसां महद्भयमजायत ॥ १३ ॥

गो० टी०–ते राक्षसा इति । शस्त्रनिवेशनविकृताननबाहुत्वरूपक्रियाभेदात् पञ्चभद्रद्वयनिर्वाहः ॥ ११–१३ ॥

१४] ति० टी०–विषण्णं श्रुत्वा । यागभूमिस्थ इति शेषः । अननुष्ठिते यागस्थानाप्राप्तयामाग्नि । ' स स्वकर्मणि ' इति पाठेऽप्यधिकृयमर्थम् ॥ १४ ॥

रा० टी०–स्वमिति । शत्रुभिरर्दितं स्वमनीकं श्रुत्वा कर्मणि अननुष्ठिते अननुष्ठानरहिते सत्येव उदतिष्ठत ॥ १४ ॥

गो० टी०–स्वमनीकमिति । तत्कर्मणि तस्मिन् होम कर्मणि ॥ १४ ॥

१५–१६] ति० टी०–वृक्षान्धकारान्निर्गम्य निःसन्नं दक्षस्यां सायाह्ने ॥ १५ ॥ १६ ॥

रा० टी०–वृक्षेति । वृक्षान्धकारात् निर्गम्य रावणिः सज्जं सामग्रीसहितम् पूर्वयुक्तं सुसंयतं दृढं स्थमारुरोह ॥१५॥

गो० टी०–वृक्षान्धकारादिति । वृक्षान्धकारात् नीरन्ध्रवृक्षषण्डादित्यर्थः । सज्जम् आयुधादिभिः, पूर्वयुक्तम् पूर्वमेव युक्तापन्न । सराक्षसः राक्षससहितः ॥ १५ ॥

गो० टी०–स इति । भीमौ कार्मुकशरौ यस्य स रावणिः अन्तको विनाशकारको मृत्युरिव बभौ ॥ १६ ॥

गो० टी०–स इति । अन्तकः अन्तकरः ॥ १६ ॥

१७–१८] ति० टी०–पर्यवर्तत तद्बलम । राक्षसबलमित्यर्थः ॥ १७ ॥ १८ ॥

१९–२०] ति० टी०–राक्षसानां तत्सैन्यं हनुमान्निःसंज्ञं चकार ॥ १९ ॥ २० ॥

रा० टी०–दृष्ट्वेति । रथस्थं तं रावणिं दृष्ट्वैव रक्षसां बलं पर्यवर्तत युद्धोन्मुखमभवत् ॥ १७ ॥

गो० टी०–दृष्ट्वैवेति । पर्यवर्तत परितोऽतिष्ठत् ॥ १७ ॥

रा० टी०–तस्मिन्निति । हनुमान् तस्मिन् काले महावृक्षमुद्यम्य राक्षसानां सैन्यं कालाग्निरिव निर्दहन् सन् बहुभिर्वृक्षैः निस्संज्ञं चकार श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

रा० टी०–विध्वंसयन्तमिति । विध्वंसयन्तं राक्षससैन्यं विनाशयन्तं हनुमन्तं राक्षसानां सहस्राणि अवाकिरन् शस्त्राणि प्राक्षिपन् ॥ २० ॥

गो० टी०–तस्मिन्नित्यादि । आदावेकं वृक्षद्वयस्य नि-

---

१ ते राक्षसा वानरेन्द्रेति गो. पाठः । २ जघ्निरे रा. पाठः । ३ राक्षसपर्वभानेति गो. पाठः । ४ स राक्षस इति गो.पाठः । ५ वर इति गो.पाठः । ६ क्रुद्ध इति गो. क्रूर इति च रा. पाठः । ७ काले । हनुमानुद्यम्य सुदुरासदमिति गो. रा. पाठः । * योद्धुमिति धुर्कं भाति ।

शितशूलधराः शूलैरसिभिश्चासिपाणयः । शक्तिहस्ताश्च शक्तीभिः पट्टिशैः पट्टिशायुधाः ॥ २१ ॥
परिघैश्च गदाभिश्च कुन्तैश्च सुमहद्बलैः । शतघ्नीभिश्च शतशः शतघ्नीभिरायसैरपि मुद्गरैः ॥ २२ ॥
घोरैः परशुभिश्चैव भिन्दिपालैश्च राक्षसाः । मुष्टिभिर्विविधैश्चैव तलैरशनिसंनिभैः ॥ २३ ॥
अभिजघ्नुः समासाद्य सर्वान्सर्वेषमक्षुभत् । तेषामपि च संक्रुद्धश्चकार कदनं महत् ॥ २४ ॥
स ददर्श कपिश्रेष्ठमदग्धंषमभिद्रुतम् । मृद्नानमेकं सैन्यस्य मध्यमध्वनमजम् ॥ २५ ॥
स सारथिमुवाचेदं याहि यत्र स वानरः । अयमेको हि नः कृत्स्नं प्रधानानमुपेक्षितः ॥ २६ ॥
इत्युक्तः सारथिस्तेन यत्रासौ मारुतिः । ततस्तमभ्युपागच्छत्स्थितमिन्द्रजितं रणे ॥ २७ ॥
सोऽभ्युपेत्य शरान्वृक्षान्पाषाणांश्चाभिवर्षतः । अभ्यवर्षत दुर्धर्षः कपिर्मेघ इव श्रावणः ॥ २८ ॥
तानि शस्त्राणि घोराणि तस्मिन्मुक्तानि राक्षसैः । गृहीत्वा महतावीरो वानरः प्रत्यवारयत् ॥ २९ ॥
युध्यस्व यदि शूरोऽसि सत्यमाहुः कपीश्वराः । दृष्टमस्य समासाद्य न जीवन्प्रतियास्यसि ॥ ३० ॥
बाहुभ्यां संप्रयुध्यस्व यदि मे दृष्टवानसि । इत्युक्त्वा सुमहत्कर्म तत्तस्मै राक्षसो वरः ॥ ३१ ॥
हनूमन्तं जिघांसन्तं सर्वप्राणेन वानरम् । राक्षसान्तःपुरचरो लक्ष्मणाय विभीषणः ॥ ३२ ॥

दर्शन सन् पथात् वक्ष्यमिष्टेभ्यस्तेभ्यः विभज्य ददौ व्यन्वयः ॥ १८–२० ॥

२१-२५] ति० टी०–शक्तिभिरस्त्रविशेषैर्हस्तेषु येषां ते शक्तिहस्ताः शक्तीभिरित्यत्र प्रकारार्थेषष्ठ्या शक्तीभिरित्यर्थः ॥ २१–२५ ॥

गो० टी०–तत्रैकमाह—शितेति । शितशूलधराः शूलैरसिभिः शितखड्गैः असिपाणयः शक्तिहस्ताः शक्तीभिः शक्तिभिः पट्टिशायुधाः पट्टिशैः ॥ २१ ॥

रा० टी०–परिघैरिति । राक्षसाः परिघादिभिः शस्त्रैः सर्वान् वानरान् समासाद्य अभिजघ्नुः अतः एव महद्बलैः राक्षसानां सैन्यं कदनं चकार । क्षोभयामास । तेषामपि च संक्रुद्धश्चकार कदनं महत् ॥ २२–२४ ॥

रा० टी०–स इति । इन्द्रजित् तस्मिन्नवसरे सैन्यस्य मध्यमध्वनं सर्वं अभिव्याप्य वर्तमानं तं ददर्श ॥ २५ ॥

गो० टी०–तमाक्रन्दमित्युक्त आह त्रयोदशभिः—शितेत्यादिभिः । शितशूलधरा इत्यादिविशेषणेन येषां विशेषरूपः प्रकारोऽस्ति तानेव तावत् अवाकिरन्निति सम्बन्धः । परिघैरित्यादौ परिघप्रभृतीनां इत्यादिपदम् । समवर्तनैरित्यत्र देवपथवत्पदयोः पथिन्शब्दस्य लोपमं हनुमन्तमिति शेषः ॥ २१–२५ ॥

गो० टी०–तेषामित्यर्धेन । सकर्मकः । हनूमानिति शेषः ॥ २४ ॥ २५ ॥

२६] ति० टी०–नो राक्षसानां सर्वसैन्यानां राक्षसानाम् ॥ २६ ॥

रा० टी०–स इति । उपेक्षितो यः वानरः राक्षसानां क्षयं कुर्यादेव अतः यत्रैष वानरः तत्र याहि गत्वा प्रापयेत्यर्थः इति स इन्द्रजित् सारथिमुवाच ॥ २६ ॥

गो० टी०–स सारथिमिति । हि यस्मात् कारणात् उपेक्षितः एषः नः अस्माकं संबन्धिनां राक्षसानां क्षयं कुर्यात् । अतः एष वानरो यत्र । ततस्त इति शेषः । तत्र याहीतीदं वचः सारथिमुवाचेत्यन्वयः ॥ २६ ॥

२७-३०] ति० टी०–स्थितमिन्द्रजितं तत्र स्थं यत्र मारुतिः तत्र यतो प्रापयामास ॥ २७ ॥

गो० टी०–इत्युक्त इति । तत्र प्रापयत् ॥ २७ ॥

रा० टी०–स इति । स इन्द्रजित् धनुषेण प्राप्य शरिभिः शस्त्रादीन् अभ्यवर्षत ॥ २८ ॥

रा० टी०–तानीति । यानि इन्द्रजित्प्रयुक्तानि शस्त्राणि राक्षसैः तेषु तेषु दिक्षु मुक्तानि इत्यर्थः ॥ २९ ॥

रा० टी०–युध्यस्वेति । प्रायुध्यं मां समासाद्य जीवन् सन् न प्रतियास्यसीति ॥ ३० ॥

गो० टी०–साध्युध्यस्वेति । अवाकिरन् क्रियाविशेषात् कर्मणि द्वितीया वा ॥ २८–३० ॥

३१] ति० टी०–यदि दृष्टमस्य इत्यसीति शेषः तर्हि वा बाहुभ्यां युध्यस्व ॥ ३१ ॥

रा० टी०–बाहुभ्यामिति । यदि त्वं वस्तुतः मां दृष्टवानसि यदि अस्माभिः सह युद्धं कृतवानसि तर्हि बाहुभ्यां संप्रयुध्यस्व अतः तव तस्मै प्रेम महत्त्वम् ॥ ३१ ॥

गो० टी०–बाहुभ्यामिति । हनूमन्तं इत्यत्र । इत्यसीति शेषः । यदि दृष्टमसि यदि अस्माभिः सह युद्धं कृतवानसि बाहुभ्यां प्रतियुध्यस्वेत्यन्वयः । अतः कारणात् इत्यनुषङ्गः ॥ ३१॥३२॥

३२] ति० टी०–हनूमन्तं जिघांसन्तं सहज सर्वात्मना सेनाक्षम् ॥ ३२ ॥

रा० टी०–हनूमन्तमिति । हनूमन्तं जिघांसन्तं हन्तुमिच्छन्तं रावणात्मजं विभीषणो लक्ष्मणाय आचष्ट बोधयामास ॥ ३२ ॥

१ शक्तिभिः शक्तिहस्ताश्चेति गो. पाठः । २ चक्रैश्चेति गो. पाठः । ३ परश्वधैरिति गो. पाठः । ४ सूदयन्तमिति गो. सूदयानमिति च रा. पाठः । ५ आभिमुख्यमिति गो. रा. पाठः । ६ एष इति गो. पाठः । ७ पट्टिशाश्चेति गो. पाठः । ८ मुष्टि स इति गो. पाठः । ९ जीवन्निति गो. पाठः ।

यः स वासवनिर्जेता रावणस्यात्मसंभवः । स एष रथमास्थाय हनूमन्तं जिघांसति ॥ ३३ ॥
तमप्रतिमसंस्थानैः शरैः शत्रुनिवारणैः । जीवितान्तकरैर्घोरैः सौमित्रे रावणिं जहि ॥ ३४ ॥
इत्येवमुक्तस्तु तदा महात्मा विभीषणेनारिविभीषणेन ।
ददर्श तं पर्वतसंनिकाशं रथस्थितं भीमबलं दुरासदम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

सप्ताशीतितमः सर्गः ।

विभीषणो धनुष्पाणि लक्ष्मण तत्सामर्थ्यवत्त्वमेवस्थान रक्षणिका यावत्र व्यक्तीभूते कर्म गमाप्य भूतोपहारं निर्वर्त्येन्द्रजिद्विजि-ष्यतेऽतः प्राप्तसाम्राज्यमविदूरमेवाग्नीनाधत्तुमो लक्ष्मण इन्द्रजि । रणायाद्य स तु विभीषण वीक्ष्यास्मैवैतदाचरणमिति मन्यमानस्तं वचनैरुत्तुदः प्रत्याच विभीषणोऽपि मा दुरात्मन् वीरवन्नाथ सौमित्रिरुत्तरमाः कथ समरशरवि तरिष्यतीत्यादि यथाह प्रत्युवाच ।

एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः । धनुष्पाणिं तमादाय त्वरमाणो जगाम सः ॥ १ ॥
अविदूरं ततो गत्वा प्रविश्य तु महद्वनम् । अदर्शयत तत्कर्म लक्ष्मणाय विभीषणः ॥ २ ॥
नीलजीमूतसंकाशं न्यग्रोधं भीमदर्शनम् । तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत् ॥ ३ ॥
इहोपहारं भूतानां बलवान्रावणात्मजः । उपहृत्य ततः पश्चात्सङ्ग्राममभिवर्तते ॥ ४ ॥
अदृश्यः सर्वभूतानां ततो भवति राक्षसः । निहन्ति समरे शत्रून्वध्नाति च शरोत्तमैः ॥ ५ ॥

३३] ति० टी०—यो वासवजेता यस्य दर्शने नवापेक्षितं स एव रथमास्थाय हनुमन्तं जिघांसति ॥ ३३ ॥

रा० टी०—तत्प्रकारमाह—य इति । यो वासवनिर्जेता स एष रावणात्मसंभवः हनुमन्तं जिघांसति ॥ ३३ ॥

गो० टी०—यः स इति । यः स्मरो यो ब्रह्मणो ३३ ॥

३४–३५] ति० टी०—तमिति नवापि लक्ष्म प्रतिमसंस्थानैरनुपमसंस्थानैः शरैर्जहि ॥ ३४ ॥ ३५ ॥

इति श्रीरामायणेऽयोध्याकाण्डटीकायां श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितायां आदिकाव्ये युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

रा० टी०—तमिति । अप्रतिमसंस्थानैः उपमारहितावयव-विशिष्टैरशत्रूणां निवारणैः निवारकैः शरैः रावणिं जहि ॥३४॥

गो० टी०—तमिति । अप्रतिमसंस्थानैः अनुपमसन्निवेशैः करणीयप्रयोजकारिभिरित्यर्थः ॥ ३४ ॥

रा० टी०—इतीति । अरीणां विभीषणेन भयङ्करेण वि-भीषणेन इत्येवमुक्तो महात्मा लक्ष्मणः स्थापितमिन्द्रजित दर्शं ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरो-मणौ युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

गो० टी०—इत्येवमिति । अरिविभीषणेन शत्रुभयं-करेण ॥ ३५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटा-ख्याने युद्धकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

१] ति० टी०—एवमिति । जातहर्षो रामास्मात्या ब्र-ह्मवचनाद्वध्य मरिष्यतीति संतुष्टो धनुष्पाणिं तं लक्ष्मणमा-दाय जगाम । इन्द्रजिन्संमुखे इति शेषः ॥ १ ॥

रा० टी०—विभीषणकर्तृकेन्द्रजिद्वधोपायानन्तरकार्यिके प्र-श्नात्तमाह—एवमित्यादिभिः । जातहर्षः लक्ष्मणविजयसम-यप्राप्त्या प्राप्तानन्दो विभीषणः धनुष्पाणिं सौमित्रिमेवमुक्त्वा स्वरमाणस्तम् जगाम ॥ १ ॥

गो० टी०—अथेन्द्रजिद्विभीषणसंवाद—एवमुक्त्वेत्या-दि । धनुष्पाणिमिति नकारान्तत्वमार्षम् ॥ १ ॥

२–३] ति० टी० अविदूरमल्पमार्गं गत्वा महद्वनं नि-कुम्भिलावनं प्रविश्य तत्रत्यं तत्कर्म होमकर्मस्थानम् ॥२॥ ३॥

रा० टी०—अविदूरमिति । विभीषणः ततस्तस्मात् स्थानात् अविदूरं किंचिद्दूरमार्गं गत्वा तत् निकुंभिलासंज्ञिपवनं प्रविश्य तत् राक्षसप्रसिद्धं कर्महवनस्थानं लक्ष्मणायादर्शयत॥२॥

रा० टी०—नीलेति । नालजीमूतसंकाशं नीलमेघसदृशं भीमदर्शनं न्यग्रोधं निकुंभिलाद्वारं रावणभ्राता विभीषणः लक्ष्म-णाय न्यवेदयत् अबोधयत् ॥ ३ ॥

गो० टी०—अविदूरमिति । तत्कर्म होमकर्मस्थानम् २॥३

४–५] ति० टी०—भूतानां रजस्तमःप्रधानभूतगणानां-मुपहारमुपहृत्य दत्त्वा ॥ ४ ॥ ५ ॥

रा० टी०—तत्प्रकारमाह—इहेति । रावणात्मजः इहा-स्मिन् वटे भूतानामुपहारं बलिमुपहृत्य दत्त्वा पश्चात् संग्रा-ममभिवर्तते गच्छति ॥ ४ ॥

१ विहारणैरिति गो. पाठः । २ तत्रस्थमिति गो. पाठः । ३ पाणिमिति गो. पाठः । ४ चेति गो. पाठः ।

तमप्रविष्टं न्यग्रोधं बलिनं रावणात्मजम् । विध्वंसय शरैर्दीप्तैः सरथं साश्वसारथिम् ॥ ६ ॥
तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रनन्दनः । बभूवावस्थितस्तत्र चित्रं विस्फारयन्धनुः ॥ ७ ॥
स रथेनाग्निवर्णेन बलवान्रावणात्मजः । इन्द्रजित्कवची खड्गी सध्वजः प्रत्यदृश्यत ॥ ८ ॥
तमुवाच महातेजाः पौलस्त्यमपराजितम् । समाह्वये त्वां समरे सम्यग्युद्धं प्रयच्छ मे ॥ ९ ॥
एवमुक्तो महातेजा मनस्वी रावणात्मजः । अब्रवीत्परुषं वाक्यं तत्र दृष्ट्वा विभीषणम् ॥ १० ॥
इह त्वं जातसंवृद्धः साक्षाद्भ्राता पितुर्मम । कथं दुर्वसि पुत्रस्य पितृव्यो मम राक्षस ॥ ११ ॥
न ज्ञातित्वं न सौहार्दं न जातिस्तद्ध दृश्यते । प्रमाणं न च सौदर्यं न धर्मो धर्मभूषण ॥ १२ ॥
शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः । यस्त्वं स्वजनमुत्सृज्य परमभ्येत्यमागतः ॥ १३ ॥
नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरम् । क्व च स्वजनवासः क्व च नीचपराश्रयः ॥ १४ ॥

रा० टी०—अदृश्य इति । ततोऽनन्तरं स्वेनैवागमदृश्यो भवति अत एव शत्रुं निर्व्याजेन वधति च ॥ ५ ॥

गो० टी०—इहेति । उपायं वक्ष्यमि । उपायं कृत्वा । ओदनपाकं पचतीतिवत् । ततः तस्मादहम् ॥ ४ ॥ ५ ॥

६] ति० टी०—न्यग्रोधमप्रविष्टं बहिर्गच्छाय विरोधं पुनस्तत्राप्रविष्टमेव जहि । तथेव तस्य वस्तुगतादिति भावः ॥ ६ ॥

रा० टी०—तमिति । न्यग्रोधमप्रविष्टं रावणात्मजं त्वं विध्वंसय ॥ ६ ॥

गो० टी०—तमिति । अप्रविष्टन्यग्रोधं रावणात्मजं विध्वंसय । पुनः प्रवेशात्पूर्वमेव विध्वंसयेत्यर्थः ॥ ६—८ ॥

७] ति० टी०—तत्र न्यग्रोधद्वारे ॥ ७ ॥

रा० टी०—अथेति । सौमित्रिः तथेत्युक्त्वा सौमित्रिकार यत् तत् तत्रावस्थितो बभूव ॥ ७ ॥

८] ति० टी०—प्रत्यदृश्यत । लक्ष्मणशब्दं श्रुत्वा तत्र प्रविनिष्टत इति भावः ॥ ८ ॥

रा० टी०—स इति । अग्निवर्णेन स्वर्णखचितत्वेन इन्द्रजित् प्रत्यदृश्यत ॥ ८ ॥

९, १०] ति० टी०—महातेजा लक्ष्मणः ॥ ९ ॥ १० ॥

रा० टी०—तमिति । महातेजा लक्ष्मणः समरे समरार्थं त्वां समाह्वये अतो मे युद्धं सम्यक् प्रयच्छ इति पौलस्त्यमिन्द्रजितमुवाच ॥ ९ ॥

गो० टी०—तमिति । महातेजा इति लक्ष्मणो विशेषणम् । सम्यग्युद्धं अमायायुद्धम् ॥ ९ ॥

रा० टी०—एवमिति । एवमुक्तो रावणात्मजः तत्र लक्ष्मणसमीपे विभीषणं दृष्ट्वा परुषं वाक्यमब्रवीत् ॥ १० ॥

गो० टी०—एवमिति । मनस्वी दृढमनस्कः ॥ १० ॥

११] ति० टी०—इह राक्षसीयास्मत्कुले जातः संवृद्धश्चेति भ्रातानुलिप्सवत्समात्तः पुत्रस्य पुत्राय ॥ ११ ॥

रा० टी०—तदाकारमाह—इहेत्यादिभिः । इहास्मदीयराक्षसकुले जातसंवृद्धश्च पितुस्साक्षाद् भ्राता अत एव पितृव्यस्त्वं मह्यं कथं दूषयसि ॥ ११ ॥

गो० टी०—इहेति । इह लङ्कायां जातसंवृद्धः । "भूतकालेऽपि" इत्यादिना भूतकालार्थवाचिनः जातशब्दस्य वर्तमानकालार्थवाचिना संवृद्धशब्देन सह समासः । पुत्रस्य पुत्राय "कृपदृ०" इत्यादिना चतुर्थीविधानात् । राक्षसेन्द्रेणेन सह राक्षसीति स्त्रीप्रत्ययः ॥ ११ ॥

१२-१३] ति० टी०—ते सहजिनं ज्ञातित्वमात्रं प्रमाणं कर्तव्यात्कर्तव्यमतोऽसत्यात् । सौदर्यं सोदरत्वम् ॥ १२-१३ ॥

रा० टी०—नेति । हे धर्मभूषण ते ज्ञातित्वं ज्ञातित्वमेव न अत एव सौदर्यं सोदरत्वं [न] अत एव जातिरपि न जातिरित्युच्यते अत एवं न च धर्मोऽपि धर्मः अत एव सौदर्यं सोदरत्वमपि न अत एव प्रमाणं न ॥ १२ ॥

गो० टी०—न ज्ञातित्वमिति । प्रमाणं मदपेक्षानिवारकम् ॥ १२ ॥

रा० टी०—शोच्यस्त्वमिति । हे दुर्बुद्धे यस्मात्त्वमसि अतो धिक्कारार्हः असि ॥ १३ ॥

गो० टी०—शोच्य इति । शोचनकालो हेतुगर्भः—यस्त्वमिति ॥ १३ ॥

१४] ति० टी०—शिथिलया अनवस्थितया बुद्ध्या । एवमहं तव स्वजनत्वमात्रेण ममतास्पदं तवोपकारकत्वेन न वेद्मि । अहं तु ब्रवीमि पुनराह—क्व चेति । स्वजनसंवासः स्वजनसंवासोऽभिलषितः । अन्यत्र संवासो वः परस्तदाश्रयं पुनः नीचो नीचत्वमाश्रयः । मयूरव्यंसकादित्वात्समासः ॥ १४ ॥

रा० टी०—नेति । हे नीच क्व स्वजनसंवासः तत्सुखं क्व पराश्रयः तज्जन्यसुखमेतत् महदन्तरं शिथिलया मन्दया बुद्ध्योपलक्षितत्वं न वेत्सि ॥ १४ ॥

गो० टी०—नैतदिति । शिथिलया कोमलया, शुष्कया वा । अन्तरं तारतम्यम् ॥ १४ ॥

१ अप्रविष्टन्यग्रोधमिति गो. पाठः ।

गुणवान्वा परजनः स्वजनो निर्गुणोऽपि वा । निर्गुणः स्वजनः श्रेयान्यः परः पर एव सः ॥ १५ ॥
यः स्वपक्षं परित्यज्य परपक्षं निषेवते । स स्वपक्षे क्षयं याते पश्चात्तैरेव हन्यते ॥ १६ ॥
निरनुक्रोशता चेयं यादृशी ते निशाचर । स्वजनेन त्वया शक्यं पौरुषं रावणानुज ॥ १७ ॥
इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः । अजानन्निव मच्छीलं किं राक्षस विकत्थसे ॥ १८ ॥
राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात् । कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणाम् ॥
गुणो यैः प्रथमो नृणां तन्मे शीलमराक्षसम् । ॥ १९ ॥
न रमे दारुणेनाहं न चाधर्मेण वै रमे । भ्राता विषमशीलोऽपि कथं भ्राता निरस्यत ॥ २० ॥

१५] ति० टी०—सत्यमेवं यदि परो बोधः स्यात्तदाह—गुणवान्वेति । यः परः परपक्ष स इति । स्वकुलप्रयुक्तव्यवहारे प्राप्ते परोऽन्यस्तस्मिन्न न भवितव्यमित्यर्थः ॥ १५ ॥

रा० टी०—नन्वेवं परस्य गुणवत्त्वे तदाश्रयणं युक्तमित्यत आह—गुणवानिति । वा यदि परजनो गुणवान् स्वजनश्च निर्गुणः तदा निर्गुणोऽपि स्वजनः श्रेयान् भवति परो यः सगुणोऽपि स परः पर एव स्वपक्षेण सह विरोधे भिन्न एव भवितव्यः१५

गो० टी०—नन्वेवं परस्य नीचस्याश्रयात् भवदुत्कर्ष इत्याह—गुणवानिति ॥ १५ ॥

१६] ति० टी०—किं च परपक्षाश्रितस्यान्ते वाच्य एवेत्याह—य इति ॥ १६ ॥

रा० टी०—य इति । यः परपक्षं निषेवते सः स्वपक्षे क्षये याते सति तैः परपक्षैरेव हन्यते ॥ १६ ॥

गो० टी०—तदेव वैषम्यं स्वस्यापरो दर्शयति—य इति॥१६॥

१७] ति० टी०—इयं निरनुक्रोशता होमविघातपूर्वं लक्ष्मणस्य न्यग्रोधपर्यवेक्षकरणेन सहधर्मिणश्च निर्दयता यादृश्यतियोग ते तवास्ति तद्विषयं पौरुषं पुरुषत्वं स्वजनेनैवैकेन त्वयैव कर्तुं शक्यम्, बाह्येन केनापि ॥ १७ ॥

रा० टी०—इत्युक्तेति । हे राक्षसानुज यादृशी इयं मद्विघातकारणीभूतलक्ष्मणाभिक्रमणपूर्विकौमविघातकारणत्वेन प्रतीता निरनुक्रोशता निर्दयता यादृशञ्च पौरुषं स्वकीयविघातकोद्यमश्च तादृशं स्वजनेन त्वयैवैकेन शक्यं कर्तुमिति शेषः बाह्येनेत्यर्थः ॥ १७ ॥

गो० टी०—निरनुक्रोशतेति । इयं होमविघातपूर्वं लक्ष्मणस्य न्यग्रोधपर्यवेक्षकरणरूपा निरनुक्रोशता निर्दयता, यादृशी यथा योग्या, तादृशं पुरुषं निर्दयत्वं स्वजनेन बन्धुभूतेन त्वयैव कर्तुं शक्यं, नान्येनेत्यर्थः । यद्वा स्वजने विषये त्वया न शक्यं न कर्तव्यम्। अनुचितं कृतमिति भावः॥१७।१८॥

१८] ति० टी०—मच्छीले मत्स्वभावे जानन्नप्यजानन्निव किं विकत्थसे ॥ १८ ॥

रा० टी०—इत्युक्तो इति । इत्युक्तो विभीषणः प्रत्युवाच तदाक्यमाह हे राक्षस मच्छीलमजानन्निव त्वं किं किमर्थं विकत्थसे विरुद्धं भाषसे ॥ १८ ॥

१९] ति० टी०—अतोऽमार्गे, गौरवात्पितृव्यत्वगौरवमाश्रित्य मद्विषयं पारुष्यं त्यज । यद्वा अतोऽहमिति गौरवाद्रोषाद्वाक्यं त्यज । अथ त्वं जातसंरम्भ इत्यनयोत्तरमाह—कुले इति । प्रथमो गुणः सत्त्वम् । अराक्षसं रजस्तमःप्रकृतिरक्षःकुलदूषणम् ॥ १९ ॥

रा० टी०—राक्षसेति । हे असाधो गौरवात् महदाश्रयणेन मन्महत्त्वहेतोः पारुष्यं रूक्षभाषणं त्यज अहं पृथक् तनु भवा यथाश्रुतमेवोच्यते न परपक्षमित्यत आह—कुले इति । यद्यपि रक्षसां कुले अहं जातः तथापि नृणां यः प्रथमो गुणः सत्त्वमित्यर्थः तद् तन्मयमराक्षसं राक्षसैरालब्धं मे शीलमस्ति अत एव अधर्मेण धर्मविरुद्धेन न रमे दारुणेन परपीडाकर्मणा न अहं न रम इति लोकप्रकाश्यवृत्त्या ॥ १९ ॥ २० ॥

गो० टी०—अजानन्निति । गौरवात् गुरोर्भावो गौरवम । पितृव्यत्वादित्यर्थः ॥ १९ ॥

गो० टी०—कुल इति । रक्षसां कुले यद्यप्यहं जातः, तत् तथापि मे शीलम् अराक्षसम् अकरम् । अयं मे शीलार्थो गुणः नृणां सत्त्वगुणाश्रय प्रथमः मुख्यः ॥ २० ॥

२०] ति० टी०—किं च स्वजनत्यागहेतुस्तव पितुरेवेत्याह—भ्रातेति । विषमशीलोऽपि भ्राता कथं निरस्यते, एवमेव वा लोके वदंति शेषः । 'भ्राता विषमशीलेव' इति पाठे दारुणकर्मा धर्मारिरिरंसुः । अन्यथा विषमशीलेन रावणाद्विलक्षणशीलेन भ्रात्रा कथं भ्राता रावणो निरस्यत इत्यर्थे च सौख्यं आह ॥ २० ॥

रा० टी०—बन्धुत्यागदोषः तव पितुरेवेति शेषयन्नाह—भ्रातेति । विषमशीलोऽपि भ्राता कथं निरस्यते न निरस्यते इत्यर्थः एतेन तत्यागादेवाहमिहागत इति सूचितम् तेन तवोत्कर्षापः त्वत्पितैवेति ध्वनितम् अहं पृथक् ननु ज्येष्ठत्वात्त्वं त्वया न त्यक्तव्य इत्यत आह—धर्मादिति । धर्मात्प्रच्युतं निवृत्तं शीलं यस्य अत एव पापनिश्चयं पुरुषं हस्तादाशीविषमिव त्यक्त्वा सुखमवाप्नोति एतेन स्वविनाशभिया राममपीह समागतोऽहमिति सूचितम् ॥ २१ ॥

गो० टी०—तन्मे शीलमराक्षसमित्युक्तमेव दर्शयति—न रम इति । दारुणेन कर्मणा न रमे । अधर्मेण परपीडाक-

१ प्राप्त इति गो. पाठः । २ अर्थमिति गो. पाठः । ३ शीलेनेति गो. पाठः ।

धर्मात्मच्युतशीलं हि पुरुषं पापनिश्चयम् । त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा ॥ २१ ॥
परस्वहरणे युक्तं परदाराभिमर्शकं । त्याज्यमाहुर्दुरात्मानं वेश्म प्रज्वलितं यथा ॥ २२ ॥
परस्वानां च हरणं परदाराभिमर्शनम् । सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः ॥ २३ ॥
महर्षीणां वधो घोरः सर्वदेवैश्च विग्रहः । अभिमानश्च रोषश्च वैरत्वं प्रतिकूलता ॥ २४ ॥
एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः । गुणान्प्रच्छादयामासुः पर्वतानिव तोयदाः ॥ २५ ॥
दोषैरेतैः परित्यक्तो मया भ्राता पिता तव । नेयमस्ति पुरी लङ्का न च त्वं न च ते पिता ॥ २६ ॥
अतिमानश्च बालश्च दुर्विनीतश्च राक्षस । बद्धस्त्वं कालपाशेन ब्रूहि मां यद्यदिच्छसि ॥ २७ ॥
अद्येहं व्यसनं प्राप्तं यन्मां परुषमुक्तवान् । प्रवेष्टुं न त्वया शक्यं न्यग्रोधं राक्षसाधम ॥ २८ ॥

रेण च कर्मणा न रमे । न केवलं मय्येव दोषः रावणेऽपीत्याह—भ्रात्रेति । निरस्यते । त्वां तु शिक्षाकल्पांस्त्यजामीति वचनेनेत्यर्थः ॥ २१ ॥

२१] ति०टी०—नन्वेवं दुःशीलस्त्यज्यत एवेति चेद्भवतु दुःशीलस्य मम त्यागोऽनुचित एवेत्याशयेनाह-धर्मादिति ॥ २१ ॥

गो० टी०—इन्द्रजिदुक्तस्वदोषपरिहाराय परित्यागहेतून् रावणदोषानाह—धर्मादित्यादिना ॥ २२ ॥

२२] ति० टी०—मया तु तस्य त्यागो न्याय्य एवेत्याह परस्वेति ॥ २२ ॥

रा० टी०—यथाशास्त्रमेव मयाचरितमिति बोधयन्नाह—परस्वादिभिः । प्रज्वलितं वेश्मेव दुरात्मानं त्याज्यमाहुः शास्त्राणीति शेषः ॥ २२ ॥

गो० टी०—हिंसेति । हिंसा च परस्वहरणं च ते हिंसापरस्वहरणे । हिंसादिरूपं दुराचाररूपं कर्म त्याज्यमाहुः । तथुक्तस्त्याज्य इत्यर्थः ॥ २३ ॥

२३] ति० टी०—स्वकुलनाशनं कृतं त्वयेत्यस्योत्तरमाह—परस्वानामिति । सुहृदामतिशङ्कानिष्टत्वशङ्का । एवं च भवदीयधर्म एव भवन्नाशकः, न त्वहमिति भावः ॥ २३ ॥

रा० टी०—तव पिता स्वकर्मणैवावश्यं विनङ्क्ष्यतीति बोधयन्नाह—परेति । हरणादयः त्रयो दोषाः क्षयावहाः विनाशकारकाः तेन तत्र स्थितौ तत्पापाकर्तृणामपि विध्वंसो भवतीति सूचितम् तेन पापिनां संसर्गो न कार्य इति ध्वनितम् ॥ २३ ॥

गो० टी०—परस्वानामिति । सुहृदामतिशङ्का सुहृत्त्वविनाशः ॥ २४ ॥

२४] ति० टी०—पुनः स्पष्टमेव रावणीयादोषाद्भवतां सर्वेषां नाश इत्याह—महर्षीणामिति । अभिमानो गर्वः वैरत्वं दीर्घवैरम् प्रतिकूलता हितवक्तृषु प्रतिकूलबुद्धिता ॥ २४ ॥

२५] ति० टी०—गुणानभिजनविद्याबलवत्त्वादिगुणान् २५

रा० टी०—नन्वेवं वेदाध्ययनादिगुणा अपि रावणे सन्तीति कथं भवता विनाश इत्यत आह—महर्षीणामिति । जीवितैश्वर्यनाशना एते पूर्वादयो मम भ्रातुर्दोषाः पर्वतान् तोयदा इव गुणान्प्रच्छादयामासुः अत एव लङ्कात्रभृतिनास्ति भ्रातृविनाशेऽतीत्यर्थः एतैर्दोषैरेव हेतुभिर्मया भ्राता परित्यक्तः तव पितरं कालः वैरत्वमाजन्मातिक्रमनस्कत्वं प्रतिकूलता विरुद्धाचरणं श्लोकत्रयमेकान्वयि ॥ २४-२६ ॥

गो० टी०—दोषवत्तया यदि त्याज्यत्वं, तर्ह्यभिजनविद्यादिगुणवत्तया किमिति न ग्राह्यत्वमित्यत आह- महर्षीणामिति सार्धश्लोकत्रयमेकान्वयम् । अभिमानः गर्वः वैरित्वं बहुवैरत्वम् प्रतिकूलता परश्रेयोद्वेषित्वम् तथा चाभिजनविद्यादिगुणवत्त्वेऽपि परस्वापहरणादिदोषदूषितया निष्फलत्वमभ्युच्चय द्योतयितुमाहुरित्युक्तं भावः ॥ २५ ॥ २६ ॥

२६] ति० टी०—नेयमस्तीति । इदं मया पुरेवोक्तमिति शेषः ॥ २६ ॥

गो० टी०—नेयमस्तीत्यादि । उत्तरक्षणे अवश्यं न भिष्यतीत्यर्थः ॥ २७-२९ ॥

२७] ति० टी०—यद्यत् । परुषमित्यर्थः ॥ २७ ॥

रा० टी०—अतीति । अतिमानत्वादिदोषयुक्तः अत एव कालपाशेन बद्धत्वं यद्यत् परुषमिच्छसि तत्तत् ब्रूहि ॥ २७ ॥

२८] ति० टी०—यन्मां परुषमुक्तवान्त्वं पुरा तस्मात्तेऽद्य व्यसनं प्राप्तम् । सांप्रतभ्युच्यमानपराभवकाले तु कालान्तरे भविष्यतीति शेषः । व्यसनं प्राप्तमित्येतदेव द्रढयति—प्रवेष्टुमिति । पुनरभिचारायेति शेषः ॥ २८ ॥

रा० टी०—स्वस्यामरत्व लब्धिनाशहेतुत्वमाह—अद्येति । यत् परुषमुक्तवान् मय्यागतसमये कथितवान् तस्मादेव अद्य व्यसनं त्वया प्राप्तमेतेन इदानींतनपरुषभाषणकालसमये भविष्यतीति सूचितम् अहं पृथक् ॥ २८ ॥

रा० टी०—व्यसनस्वरूपमाह—प्रवेष्टुमिति । न्यग्रोधः प्रवेष्टुं त्वया न शक्यः नन्वहं मास्तु योत्स्याम्येवेत्यत आह कालकुरुस्थं लक्ष्मणं धर्षयित्वा त्वया जीवितुं न शक्यम् ॥ २९ ॥

१ हिंसापरस्वहरणे इति गो.पाठः। २ वैरित्वमिति गो.पाठः। ३ मानीति गो.रा.पाठः। ४ अद्यते इति गो पाठः। ५ शक्यो न्यग्रोध इति गो.रा.पाठः।

धर्षयित्वा च काकुत्स्थं न शक्यं जीवितुं त्वया । युध्यस्व नरदेवेन लक्ष्मणेन रणे सह ॥
हतस्त्वं देवताकार्यं करिष्यसि यमक्षयम् ॥ २९ ॥
निदर्शयित्वात्मबलं समुद्यतं कुरुष्व सर्वायुधमायकव्ययम् ।
न लक्ष्मणस्यैत्य हि बाणगोचरं त्वमद्य जीवन्सबलो गमिष्यसि ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

अष्टाशीतितमः सर्गः ।

लक्ष्मणेन्द्रजितोः परस्परजयैषिणोर्मेघान्तर्भूतयोर्युद्धमारभमाणयोर्मेघाच्छन्नो रणभूमिप्रदेशो रणोऽत्र वर्ण्यते ।

विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्च्छितः । अब्रवीत्परुषं वाक्यं क्रोधेनाभ्युत्पपात च ॥ १ ॥
उद्यतायुधनिस्त्रिंशो रथे सुसमलंकृते । कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥ २ ॥
महाप्रमाणमुद्यम्य विपुलं वेगवद्धनुः । धनुर्भीमबलो भीमं शरांश्चामित्रनाशनान् ॥ ३ ॥
तं ददर्श महेष्वासो रथस्थः समलंकृतः । अलंकृतमभित्रघ्नो रावणस्यात्मजो बली ॥ ४ ॥
हनूमत्पृष्ठमारूढमुदयस्थमिवाप्रभम् । उवाचैनं सुसंरब्धः सौमित्रिं सविभीषणम् ॥ ५ ॥
तांश्च वानरशार्दूलान्पश्यध्वं मे पराक्रमम् । अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् ॥ ६ ॥

२९-३०] ति० टी०—अद्य हतो यमक्षयं यमगृहं गतः सन्देवताकार्यं मद्देवानां संतोषरूपं करिष्यसि ॥ २९ ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

रा० टी०—युध्यस्वेति । लक्ष्मणेन युध्यस्व अत एव हतस्त्वं यमक्षयं देवतानां कार्यं सन्तोषं करिष्यसि ॥ ३० ॥

रा० टी०—निदर्शयित्वेति । समुद्यतं प्रदृढमात्मबलं निदर्शयित्वा निदर्श्य सर्वायुधमायकव्ययं कुरुष्व त्वन्तु लक्ष्मणस्य बाणगोचरं शरविषयत्वमेत्य प्राप्य जीवन्न गमिष्यसि ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

गो० टी०—धर्षयित्वेत्यादि । देवताकार्यं यमदूतरूपदेवताकार्यम् नरकयातनानुभवं वा ॥ ३० ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकीर्त्याख्ये युद्धकाण्डव्याख्याने सप्ताशीतितमः सर्गः ॥ ८७ ॥

१] ति० टी०—अब्रवीत्परुषमिति । विभीषणमिति शेषः । तच्च वक्ष्यमाणम् ॥ १ ॥

रा० टी०—इन्द्रजितं प्रति विभीषणवचनानन्तरकालिकं वृत्तान्तमाह—विभीषणेति । रावणिः परुषमब्रवीत् अभ्युत्पपात च ॥ १ ॥

गो० टी०—अलंकृतजिष्णुरथगृहम—विभीषणवच्च इत्यादि । अभ्युत्पपात अभिमुखमुज्जगाम ॥ १ ॥

२-३] ति० टी०—उद्यतायुधनिस्त्रिंशः । उद्यतायुधो निस्त्रिंशो निस्तृंशश्चेत्यर्थः इति कतकः । उद्यतान्यायुधानि निस्त्रिंशश्च येन सः । गोवलीवर्दवत्प्रयोग इत्यन्ये ॥ २ ॥ ३ ॥

रा० टी०—उद्यतेति । उद्यतान्यायुधानि निस्त्रिंशः खड्गश्च यस्य गोवलीवर्दन्यायेन त्रिशिखोपादानं स इन्द्रजित् महत्प्रमाणं यस्य तद्धनुः शरांश्च उद्यम्य कालाश्वैर्युक्ते रथे स्थितोऽभवदिति शेषः श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०—कीदृग्भूतोऽभ्युज्जगामेत्यत्राह—उद्यतेत्यादिश्लोकद्वयेन । सुसमलंकृते शुभ्रे सुसमन्तात् अलंकृते । महाप्रमाणं महादीर्घम्, धनुरुपलक्षणं परान्, इषूंश्च गृहीत्वा अभ्युज्जगाम अभ्यगच्छदित्यन्वयः । अमित्रान् शत्रून् शातयन्ति खण्डयन्तीत्यमित्रशातनान् ॥ २ ॥ ३ ॥

४] ति० टी०—तं सविभीषणं लक्ष्मणम् । अलंकृतं स्वतेजोभूषितम् ॥ ४ ॥

रा० टी०—तमिति । समलंकृतो रावणस्यात्मजः अलङ्कृतं स्वाभाविकालंकारविशिष्टं तमागतं लक्ष्मणं ददर्श ॥ ४ ॥

गो० टी०—तमित्यादि । रथे स्थित इति शेषः । अलंकृतं स्वतेजसा भूषितम । हनुमत्पृष्ठमारूढमित्यनुवादेन हनुमान् पूर्वं राक्षसैर्युद्धा इन्द्रजित्यागते लक्ष्मणं स्वपृष्ठभागमारोप्य स्थितवानिति गम्यते । उदयस्थरविप्रभमित्यनेन हनुमतः काञ्चनाकृतित्वं लक्ष्मणस्य रविवर्णत्वं चोक्तम् ॥ ४ ॥

५] ति० टी०—उवाचेत्यादिनाब्रवीत्परुषं वाक्यमिति प्रागुक्तस्यैव विवरणम् ॥ ५ ॥

६] ति० टी०—तांश्च वानरशार्दूलान्वाचेत्यनुकर्षः ॥ ६ ॥

१ काकुत्स्थमिति गो० पाठः । २ क्षय इति गो. रा. पाठः । ३ वेगेनेति गो. पाठः । ४ भीमं परामृदवेति गो. पाठः । ५ शातनानिति गो. रा. पाठः । ६ रथेस्थिति गो. पाठः । ७ अमित्रघ्न रावणस्यानुजमिति गो. पाठः । ८ समारब्ध इति गो. सुसंरब्धमिति रा. पाठः ।

मुक्तवर्षमिवाकाशे धारयिष्यथ संयुगे । अद्य वो मामका बाणा महाकार्मुकनिःसृताः ॥
विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ ७ ॥
तीक्ष्णसायकनिर्भिन्नाञ्शूलशक्त्यृष्टिसायकैः । अद्य वो गमयिष्यामि सर्वानेव यमक्षयम् ॥ ८ ॥
सृजतः शरवर्षाणि क्षिप्रहस्तस्य संयुगे । जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः ॥ ९ ॥
रात्रियुद्धे तदा पूर्वं वज्राशनिसमैः शरैः । शायितौ तौ मया भूयो विसंज्ञौ सपुरःसरौ ॥ १० ॥
स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं यातो यमक्षयम् । आशीविषसमं क्रुद्धं यन्मां योद्धुमुपस्थितः ॥ ११ ॥
तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं रौंधवस्तदा । अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत् ॥ १२ ॥
उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया । कार्याणां कर्मणां पारं यो गच्छति स बुद्धिमान् ॥ १३ ॥

रा० टी०—हनुमदिति । सुसंरब्धः कृतयुद्धोद्योगो रावणिः एनं लक्ष्मणं वानरशार्दूलांश्च उवाच तदाकारमाह पराक्रमं रिपुविघातकं मुक्तवर्षं मेघच्युतवृष्टिमिव मे शरवर्षं पञ्चमं धारयिष्यथ च सार्द्धश्लोकद्वयमेकान्वयि ॥ ६ ॥ ६ ॥

गो० टी०—उवाचैनमिति । त्रिपादश्लोक एकान्वयः । एतद्ब्रवीत् परुषमिति पूर्वोक्तस्य विवरणं न भवति । तद्विभीषणमात्रं प्रति । इदं तु सर्वान् प्रति । तत्र परुषम् । इदं तु पराक्रमविषयम् । समारब्धः संरब्धः । पश्यध्वमिति । मुक्तं मेघमुक्तम् । धारयिष्यथेत्येतत् सापह्नवोक्तिः ॥ ५ ॥ ६ ॥

७-९] ति० टी०—मुक्तवर्षं मेघोत्सृष्टवर्षम् ॥ ७-९ ॥

रा० टी०—अद्येति । मामका बाणाः वो गात्राणि विधमिष्यन्ति ॥ ७ ॥

गो० टी०—अद्येति । वः युष्माकम् । विधमिष्यन्ति वक्ष्यन्ति ॥ ७ ॥

रा० टी०—तीक्ष्णेति । शूलादिभिरुपलक्षितोऽहं तीक्ष्णसायकनिर्भिन्नान् वो युष्मान् यमक्षयं गमयिष्यामि ॥ ८ ॥

गो० टी०—तीक्ष्णेति । तीक्ष्णसायकैरिति तृतीयाविभक्तिकं पदम् । तीक्ष्णसायकैरित्यर्थः । शूलशक्त्यृष्टितोमरैरित्यर्थः । इत्यत्र अनियतेष्टितोमरैरित्यर्थः । सन्धिरार्षः । तीक्ष्णसायकैः शूलशक्त्यृष्टितोमरैश्च निर्भिन्नान् वः युष्मान्, यमक्षयं यमनिलयम्, गमयिष्यामीत्यन्वयः ॥ ८ ॥

रा० टी०—सृजत इति । क्षिप्रहस्तस्य शरवर्षाणि सृजतो ममाग्रतः कः स्थास्यति न कोपीत्यर्थः ॥ ९ ॥

गो० टी०—क्षिपत इति । जीमूतस्येति नादमात्रे दृष्टान्तः ॥ ९ ॥

१०] ति० टी०—सपुरःसरौ सुग्रीवादिप्रधानसहितौ । युवां भ्रातराविति शेषः ॥ १० ॥

रा० टी०—स्वोक्तेऽर्थे विश्वासं संपादयितुमाह—रात्रीति द्वाभ्यां पूर्वरात्रियुद्धे सपुरस्सरौ युवां मया शरैः शायितौ अत एव विसंज्ञौ स्थः ॥ १० ॥

गो० टी०—रात्रीति । आग्रहातिशयेन मयेति द्विरुक्तिः ॥ १० ॥

११] ति० टी०—एवमपि यन्मां योद्धुमुपस्थितोऽसि तत्प्रायः पूर्वस्य ते स्मृतिर्नास्ति । तस्मात् व्यक्तं यातो यमक्षयम् । आदिकर्मणि क्तः । यमक्षयं यमगृहं प्रयातुमुपकान्तोऽसि ॥ ११ ॥

रा० टी०—स्मृतिरिति । यस्मादहेतोः मां योद्धुमुपस्थितः पुनः प्राप्तः अतः ते स्मृतिः पूर्वशायनस्मरणं नास्ति यत् यस्मात् यमक्षयं यातो भविष्यसीति शेषः अत एव मां योद्धुमुपस्थितोसि इदं मन्ये ॥ ११ ॥

गो० टी०—स्मृतिरिति । यस्मां योद्धुं व्यवस्थितः, अतः स्मृतिर्नास्तीति वा मन्ये । अथ वा यमसादनं यमप्रापणम् । व्यक्तं परोक्षं प्रत्यासन्नमिति यावत् । यद्वा सादनम् सदनम् । स्वार्थेणप्रत्ययः ॥ ११ ॥

१२] ति० टी०—अभीतवदनो निर्भयप्रहृष्टाभिवदनव्यवहारः ॥ १२ ॥

रा० टी०—तदिति । रौंधवो रावणिमब्रवीत् ॥ १२ ॥

गो० टी०—तच्छ्रुत्वेति । अभीतवदनः भयविकृतिशून्यवदनः ॥ १२ ॥

१३] ति० टी०—च यस्मात्त्वया कार्याणां शत्रुवधादिकार्याणां पारोऽन्तः समाप्तिरुक्तो वाचा जल्पितः, स पारस्त्वया कर्मणा दुर्गम एव दुष्प्राप एव । कुतस्तत्राह—कार्याणामिति । यः कार्याणां पारं कर्मणा गच्छति स बुद्धिमान् ॥ १३ ॥

रा० टी०—तदाकारमाह—उक्त इत्यादिभिः । कार्याणां त्वदुक्तास्मत्कर्मकविजयादीनां पारः पूर्तिः त्वया दुर्गमः कर्तुमशक्यः नन्वेवं किं तेनेत्यत आह कार्याणां कर्त्तव्यानां यः पारं गच्छति स एव बुद्धिमानुक्तः अतस्त्वं निर्बुद्धिरसीति सूचितम् ॥ १३ ॥

गो० टी०—उक्तश्चेति । दुर्गमः दुर्लभः । कार्याणां यमप्रापणादीनाम् । पारः निर्वाहः । उक्तश्च उक्त एव, न कृतः । अतो दुर्बुद्धिरसीत्यर्थः । कस्तर्हि बुद्धिमानित्यत आह—कार्याणामिति । कार्याणां कर्मणाम्, आचरणेनेत्यर्थः ॥ १३ ॥

१ मुक्तं वर्षमिति गो. पाठः । २ तोमरैरिति गो. पट्टिशैरिति रा. पाठः । ३ क्षिपत इति गो.पाठः । ४ मे युधीति गो.पाठः । ५ मयेति गो.पाठः । ६ त्वो मया भूमाविति गो. रा. पाठः । ७ वा यमसादनमिति गो. पाठः । ८ इवेति गो. समाबुद्धमिति रा. पाठः । ९ व्यवस्थित इति गो. पाठः । १० रुक्ष्मण इति गो. पाठः । ११ कर्मणामिति रा. पाठः ।

स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित् । वाचा व्याहृत्य जानीषे कृतार्थोऽस्मीति दुर्मते ॥ १४ ॥
अन्तर्धानगतेनाजौ यैस्त्वया चरितस्तदा । तस्करा चरितो मार्गो नैष वीरनिषेवितः ॥ १५ ॥
यथा बाणपथं प्राप्य स्थितोऽस्मि तव राक्षस । दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे ॥ १६ ॥
एवमुक्तो धनुर्भीमं परामृश्य महाबलः । ससर्ज निशितान्बाणानिन्द्रजित्समितिंजयः ॥ १७ ॥
तेनैं सृष्टा महावेगाः शराः सर्पविषोपमाः । संप्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः ॥ १८ ॥
शरैरतिमहावेगैर्वेगवान्रावणात्मजः । सौमित्रिमिन्द्रजिद्युद्धे विव्याध शुभलक्षणम् ॥ १९ ॥
स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः । शुशुभे लक्ष्मणः श्रीमान्विधूम इव पावकः ॥ २० ॥
इन्द्रजित्त्वात्मनः कर्म प्रसमीक्ष्याभिगम्य च । विनद्य सुमहानादमिदं वचनमब्रवीत् ॥ २१ ॥
पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः । आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तकाः ॥ २२ ॥
अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण । गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया ॥ २३ ॥
क्षत्रबन्धुं सदानार्यं रामः परमदुर्मतिः । भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति हतं मया ॥ २४ ॥
विसृष्टकवचं भूमौ व्यपविद्धशरासनम् । हतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया ॥ २५ ॥
इति ब्रुवाणं संक्रुद्धः परुषं रावणात्मजम् । हेतुमद्वाक्यमर्थज्ञो लक्ष्मणः प्रत्युवाच ह ॥ २६ ॥

१४] ति० टी०—स त्वं हीनार्थः क्रियाकार्यनिष्पादनासमर्थः केनचिदपि दुरवापस्य मद्विजयरूपस्यार्थस्य सिद्धिं वाचा व्याहृत्य दुर्मते कृतार्थोऽस्मीति जानीषे ॥ १४ ॥

रा० टी०—स इति । हीनार्थः निषिद्धवक्ता स निर्बुद्धिस्त्वं केनचित् दुरवापस्यार्थस्य मत्कर्मकविजयस्य वाचा व्याहृत्य कृतार्थोस्मीति जानीषे कर्मणः शेषत्वेन विवक्षया षष्ठी ॥ १४ ॥

गो० टी०—स त्वमिति । अर्थस्येति तादर्थ्यसंबन्धे षष्ठी । अर्थस्य वचः प्रयोजनार्थम् वचः ॥ १४ ॥

१५–१७] ति० टी०—अथ शापितावित्ति यत्त्वयोक्तं सा तेऽपकीर्तिरेवेत्याह—अन्तरिति । आजौ रणेऽन्तर्धानगतेन त्वया यत् यत् आचरित एष तस्करादिचरितो मार्गो न वीरनिषेवितः ॥ १५–१७ ॥

रा० टी०—नन्वहं पूर्ववदिदानीमपि त्वां जेष्यामीत्येवंस्यात आह—अन्तर्धानेति । अन्तर्धानगतेन त्वया पुरा पूर्वं य आचरितः कृतः स मार्गः तस्करा चरितः अत एव न वीरनिषेवितः एतेन चुरया कर्मकर्तृत्वादेव मया पूर्वं त्वं न हत इति सूचितम् ॥ १५ ॥

गो० टी०—दृष्टेष्वस्मत्पराक्रमे कथमित्थं कथ्यत इत्याशङ्क्य मायामयत्वात्र स वीरसंमत इत्याह—अन्तर्धानेति । आजौ युद्धे ॥ १५ ॥

रा० टी०—यथेति । तव बाणपथं प्राप्य यथा यथावत् स्थितोस्मि अतः तत् पूर्वकृतं तेजः पराक्रमं दर्शयस्व ॥ १६ ॥

रा० टी०—एवमिति । एवमुक्त इन्द्रजित् धनुः परामृश्य दृढं गृहीत्वा बाणान् ससर्ज ॥ १७ ॥

गो० टी०—प्रत्यक्षेणापि योद्धुं शक्तोस्मीत्यत आह—यथेति । यथा स्थितोस्मि तथैव. तत्तेजः पूर्वकृतं तेजः दर्शयस्वेत्यन्वयः ॥ १६ ॥ १७ ॥

१८–२४] ति० टी०—लक्ष्मणं संप्राप्य पेतुः । कवचेनाहता इति शेषः ॥ १८–२४ ॥

रा० टी०—तेनेति । तेनेन्द्रजिता सृष्टाश्शराः लक्ष्मणं संप्राप्य पेतुः ॥ १८ ॥

गो० टी०—न इति । सर्पविषोपमाः सर्पविषवत् घोराः पेतुः । भूमाविति शेषः ॥ १८ ॥

रा० टी०—शरैरिति । इन्द्रजित् सौमित्रिं शरैर्विव्याध ताडयायामास ॥ १९ ॥

रा० टी०—स इति । शरैरतिविद्धाङ्गस्सन्ताडितशरीरः अत एव रुधिरेण क्रोधेहेतुकारुण्यवर्णेन समुत्थितो श्यामः लक्ष्मणः पावक इव शुशुभे ॥ २० ॥

गो० टी०—शरैरिति । अतिविव्याधेत्यन्वयः । " व्यवहिताश्च " इति व्यवहितप्रयोगः ॥ १९ ॥ २० ॥

रा० टी०—इन्द्रजिदिति । इन्द्रजित् आत्मनः कर्म ताडनं प्रसमीक्ष्य अभिगम्य सम्मुखे च इदमब्रवीत् ॥ २१ ॥

रा० टी०—तदाकारमाह—पत्रिण इत्यादिभिः । मत्कार्मुकच्युताः शराः ते जीवितमादास्यन्ते ॥ २२ ॥

रा० टी०—अद्येति । मया निहतमत एव गतासुं त्वां गोमायुसङ्घादयो निपतन्तु ॥ २३ ॥

रा० टी०—क्षत्रेति । रामः भ्रातरं त्वां मया हतं द्रक्ष्यति २१

गो० टी०—इन्द्रजिदिति । अभिगम्य फलनक्षो दृष्ट्वा ॥ २१–२४ ॥

२५–२६] ति० टी०—त्वामर्थेति । द्रक्ष्यतीत्यनुकर्षः २५-२

१ य हति गो. रा. पाठः । २ निसृष्टा इति गो. पाठः । ३ अशीति गो. पाठः । ४ अस्तगा इति गो.पाठः । ५ मया हतमिति गो.पाठः। ६ सौमित्रिमिति गो. सौमित्रिरिति रा. पाठः । ७ अत्यर्थमिति गो. पाठः ।

वाग्बलं त्यज दुर्बुद्धे क्रूरकर्मन्हि राक्षस । अथ कस्माद्वदस्येतत्संपाद्य सुकर्मणा ॥ २७ ॥
अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस । कुरु तत्कर्म येनाहं श्रद्धेयं तव कत्थनम् ॥ २८ ॥
अनुक्त्वा परुषं वाक्यं किंचिदप्यनवक्षिपन् । अविकत्थन्वधिष्यामि त्वां पश्य पुरुषादैन ॥ २९ ॥
इत्युक्त्वा पञ्च नाराचानाकर्णापूरिताञ्शरान् । विजघान महावेगाल्लक्ष्मणो राक्षसोरसि ॥ ३० ॥
सैपत्रवाजिता बाणा ज्वलिता इव पन्नगाः । नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा ॥ ३१ ॥
स शरैराहतस्तेन सरोषो रावणात्मजः । सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम् ॥ ३२ ॥
स बभूव महाँभीमो नरराक्षससिंहयोः । विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः ॥ ३३ ॥
विक्रान्तौ बलसंपन्नावुभौ विक्रमशालिनौ । उभौ परबलार्जनेयावतुल्यबलतेजसौ ॥ ३४ ॥
युयुधाते तदा वीरौ ग्रहाविव नभोगतौ । बलवृत्रावि हिं तौ युधि वैं दुष्प्रधर्षणौ ॥ ३५ ॥
युयुधाते महात्मानौ तदा केसरिणाविव । बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ ॥
नरराक्षसमुख्यौ तौ प्रहृष्टावभ्ययुध्यताम् ॥ ३६ ॥

रा० टी०-विध्वस्तेति । विध्वस्तकवचं हतमुत्तमाङ्गं शिरो यस्य अत एव मया निहतं त्वां रामो द्रक्ष्यतीत्यनुकृष्यते यदि तु हतमित्यस्य ताडनमर्थः निहतमित्यस्य प्राणैर्वियुक्तमर्थस्तदा द्वयोरेकवाक्यता ॥ २६ ॥

रा० टी०-इतीति । अर्थजः सौमित्रिः इति परुषं वृत्तमिन्द्रजिते हेतुभद्वाक्यं प्रत्यवाच ॥ २६ ॥

गो० टी०-विशस्तेति । विशस्तं भिन्नं कवचं यस्य तं त्वां रामो द्रक्ष्यतीत्यनुषङ्गेण योजना ॥ २५ ॥ २६ ॥

२७-२८] ति० टी०-क्रूरकर्मन्कूटयुद्धव्यापारकर्तः, एतद्वृथावचनं कस्माद्वदसि सर्वं सुकर्मणैव संपादय ॥२७॥२८॥

रा० टी०-तदाकारमाह—वागिति । वागबलं त्यज निरर्थकमेतदित्यर्थः अथातः एतत् कस्माद्वदसि सुकर्मणा संपाद्यमेतत्कर्मसिद्धिं कुरु ॥ २७ ॥

रा०टी०-अकृत्वेति । तव कत्थनं येन श्रद्धेयं तत्कर्म कुरु२८

गो० टी०-वाग्बलमिति । अथ इदानीम् ॥ २७-३० ॥

२९-३०] ति० टी०-अनवक्षिपन्नीषदपि निन्दामकुर्वन् । अविकत्थन्स्वश्लाघामकुर्वन्हं त्वां वधिष्यामि ॥ २९ ॥ ३० ॥

रा० टी०-अनुक्त्वेति । अविकत्थन् स्वश्लाघामकुर्वन्हं त्वां वधिष्यामि ॥ २९ ॥

रा० टी०-इतीति । लक्ष्मणः राक्षसोरसि पञ्च नाराचान् निजघान ॥ ३० ॥

३१-३२] ति० टी०-सुपत्रवाजिताः सुपत्रैः कङ्कादिपत्रैः संजातवेगाः ॥ ३१ ॥ ३२ ॥

रा० टी०-सुपत्रेति । शोभनानि पत्राणि वाजिता वेगाश्च येषां ते बाणाः नैर्ऋतोरसि अभासन्त ॥ ३१ ॥

रा० टी०-स इति । शरैराहतो रावणात्मजः त्रिभिर्बाणैः लक्ष्मणं प्रति विव्याध ॥ ३२ ॥

गो० टी०-सुपत्रेति । सुपत्रवाजिताः सुपत्रैः संजातवेगाः ॥ ३१ ॥ ३२ ॥

३३] ति० टी०-विमर्दः संघर्षः ॥ ३३ ॥

रा० टी०-स इति । नरराक्षससिंहयोः तुमुलो विमर्दः परस्परताडनं बभूव ॥ ३३ ॥

गो० टी०-स इति । विमर्दः संघर्षः ॥ ३३ ॥

३४] ति० टी०-विक्रान्तौ कृतपराक्रमौ ॥ ३४ ॥

३५] ति० टी०-बलवृत्रौ । बल इन्द्र ॥ ३५ ॥

रा० टी० विक्रान्ताविति । विक्रान्तौ कृतविक्रमावुभौ इन्द्रजिल्लक्ष्मणौ ग्रहाविव बलवृत्रावि च युयुधाते तत्र बल इन्द्रः श्लोकद्वयैकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०-उभौ हीत्यादिसार्धश्लोक एकान्वयः । कृतविक्रान्तौ कृतपराक्रमौ ॥ ३४ ॥ ३५ ॥

३६] ति० टी०-'नरराक्षसमुख्यौ तौ प्रहृष्टावभ्ययुध्यताम्' इत्युत्तरं श्लोकद्वयं भिन्नवृत्तं प्रक्षिप्तम् । तदुत्तरं सर्गावच्छेदधारासंप्रदायः । तयोर्युद्धमेवार्धं सर्गेण प्रकरणान्तराभावादिति कतकः ॥ ३६ ॥

रा० टी०-युयुधाते इति । मार्गणौघान् शरसमूहान् अवसृजन्तौ केसरिणाविव युयुधाते ॥ ३६ ॥

रा० टी०-नरेति । नरराक्षसमुख्यौ प्रहृष्टौ सन्तौ अभ्ययुध्यतामहं पृथक् ॥ ३७ ॥

गो० टी०-युयुधाते इत्याद्यर्धम् ॥ ३६ ॥

गो० टी०-बलेति । बलशब्दो बलशालिन्द्रपरः । सामैकदेशे नामग्रहणात् ॥ ३७ ॥ ३८ ॥

रा० टी०-सुसंप्रहृष्टाविति । तौ नरराक्षसमुख्यौ बलाहकौ मेघाविव शरवर्षेण प्रववर्षतुः प्रवृष्टवन्तौ ॥ ३८ ॥

रा० टी०-अथेति । युद्धकोविदौ अत एव प्रगल्भौ शूरत्व-

१ क्रूरकर्मन्निति गो. पाठः । २ अहृष्यामिति गो. पाठः । ३ इह अथमेति गो. आदर्शात स. पाठः । ४ शिलानिति गो. रा. पाठः । ५ त्रिभिरिति गो. रा. पाठः । ६ सौमित्रेति गो.पाठः । ७ उभौ हि बलवृत्रावाविति गो.पाठः । ८ अजीतावाविति गो. रा.पाठः । ९ तावितिं गो. रा.पाठः । १० सिंहाविति गो.पाठः ।

[सुसंप्रहृष्टौ नरराक्षसोत्तमौ जयैषिणौ मार्गणचापधारिणौ ।
परस्परं तौ प्रववर्षतुर्भृशं शरौघवर्षेण बलाहकाविव ॥
अभिप्रहृद्धौ युधि युद्धकोविदौ शरासिचण्डौ शितशस्त्रधारिणौ ।
अभीक्ष्णमाविध्यधनुर्महाबलौ महाहवे शम्बरवासवाविव ॥
ततः शरान्दाशरथिः संधायामित्रकर्षणः । ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ॥ ३७ ॥
तस्य ज्यातलनिर्घोषं स श्रुत्वा राक्षसाधिपः । विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ ३८ ॥
विवर्णवदनं दृष्ट्वा राक्षसं रावणात्मजम् । सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः ॥ ३९ ॥
निमित्तान्युपपश्यामि यान्यस्मिन्रावणात्मजे । त्वर तेन महाबाहो भग्न एष न संशयः ॥ ४० ॥
ततः संधाय सौमित्रिः शैरानाशीविषोपमान् । मुमोच विशिखांस्तस्मिन्सर्पानिव विषोल्बणान् ॥ ४१ ॥
शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः । मुहूर्तमभवन्मूढः सर्वसंक्षुभितेन्द्रियः ॥ ४२ ॥
[उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः ।]
ददर्शावस्थितं वीरमाजौ दशरथात्मजम् । सोऽभिचक्राम सौमित्रिं रोषात्संरक्तलोचनः ॥ ४३ ॥
अब्रवीच्चैनमासाद्य पुनः स परुषं वचः । किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमम् ॥
निबद्धस्त्वं मह भ्रात्रा यदा युधि विचेष्टसे ॥ ४४ ॥

तिलकौ शम्बरवासवोपमौ नरराक्षसमुख्यौ अभीक्ष्णमाविध्यधनुः ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे अष्टाशीतितमः सर्गः ॥ ८८ ॥

गो० टी०-सुसंप्रहृष्टाविति । शरौघः, मेघपक्षे जलौघः । शरशब्दो हि जलवाची । शरधिरिति समुद्रपर्यायात् ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाशीतितमः सर्गः ॥ ८८ ॥

३७-३८] ति० टी०-ततः शरानिति ॥ ३७ ॥ ३८ ॥

रा० टी०-युद्धमेव वर्णयन्नाह—तत इत्यादिभिः । दाशरथिः राक्षसेन्द्राय शरान् ससर्ज ॥ १ ॥

रा० टी०-तस्येति । राक्षसाधिपः तस्य लक्ष्मणस्य ज्यातलनिर्घोषं श्रुत्वा अत एव विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ २ ॥

गो० टी०-अथ लक्ष्मणेन्द्रजितोः सुमहान् संप्रहारः—ततः शरमित्यादि ॥ १ ॥ २ ॥

३९] ति० टी०-युद्धसंयुक्तं युद्धजनकहर्षयुक्तम् ॥ ३९ ॥

रा० टी०-विवर्णेति । रावणात्मजं विवर्णवदनं दृष्ट्वा सौमित्रिं प्रत्युवाच ॥ ३ ॥

गो० टी०-तमिति । सौमित्रिं प्रति उद्दिश्य ॥ ३ ॥

४०-४१] ति० टी०-निमित्तानि सुखवैवर्ण्यादिदुर्निमित्तानि । यान्यनुभूतपराजयसूचकत्वानि तेनैतद्धेतुना त्वर शीघ्रमुद्यमं कुरु ॥ ४० ॥ ४१ ॥

रा० टी०-तदाकारमाह—निमित्तानीति । रावणात्मजे यानि पराजयहेतुत्वेनानुभूतानि निमित्तानि सुखवैवर्ण्यादीनि तानि अनुपश्यामि तेन हेतुना त्वं त्वर एष भग्न एव ॥ ४ ॥

रा० टी०-तत इति । सौमित्रिः विशिखान् शरान् संधाय तस्मिन् रावणात्मजे मुमोच ॥ ५ ॥

गो० टी०-निमित्तानीति । अस्मिन् यानि सुखवैवर्ण्यस्तब्धत्वादीनि निमित्तानि अनुपश्यामि, तैरयं भग्न इति जाने । तेन कारणेन त्वं त्वरस्व ॥ ४ ॥ ५ ॥

४२-४३] ति० टी०-सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः ॥ ४२ ॥ ४३ ॥

रा० टी०-शक्रेति । लक्ष्मणेन शरैराहतः अत एव सर्वाणि संक्षुभितानि इन्द्रियाणि यस्य स रावणिर्मुहूर्तं मूढोऽभवत् ॥ ६ ॥

रा० टी०-उपलभ्येति । मुहूर्तेन सञ्ज्ञामुपलभ्य अत एव प्रत्यागतेन्द्रिय इन्द्रजित् आजौ अवस्थितं दशरथात्मजं ददर्श ॥ ७ ॥

रा० टी०-स इति । स रावणिः सौमित्रिमभिचक्राम एनं लक्ष्मणमासाद्य परुषं वचः पुनरब्रवीच ॥ ८ ॥

गो० टी०-शक्राशनीति । सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः ॥ ६-८ ॥

४४] ति० टी०-प्रथमे तद्युद्धे नागपाशबन्धनके तस्मिन्युद्धे । यत्र भ्रात्रा सह निबद्धस्त्वं तत्रैव न स्मरसि । यदयायुध्यायोधने विचेष्टसे शरपातादि करोषि ॥ ४४ ॥

---

१ भीकद्वयमधिकं गो.पाठे । २ शरमिति गो. पा. । ३ रावणस्यज इति गो. पा. । ४ तं विवर्णमुखमिति गो. पा. । ५ बाणानग्निशिखोपमानिति गो. पा. । ६ निमित्तानीति गो. रा. पाठः । ७ महाविषानिति गो. पा. । ८ इदमर्धमधिकं गो. रा. पुस्तके । ९ वीरइति गो. पा. । १० भुवि विचेष्टसे इति गो. पाठः ।

युवां खलु महायुद्धे वैत्राशनिसमैः शरैः । शायितौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ ॥ ४५ ॥
स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनम् । गन्तुमिच्छसि यन्मां त्वमाधर्षयितुमिच्छसि ॥ ४६ ॥
यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः । अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ॥ ४७ ॥
इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् । दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ॥ ४८ ॥
ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान् । क्रोधाद्विगुणसंरब्धो निर्विभेद विभीषणम् ॥ ४९ ॥
तद्दृष्ट्वेन्द्रजिता कर्म कृतं रामानुजस्तदा । अचिन्तयित्वा प्रहरणं तत्किंचिदिति ब्रुवन् ॥ ५० ॥
मुमोच च शरान्घोरान्संगृह्य नरपुंगवः । अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि ॥ ५१ ॥
नैवं रणगताः शूराः प्रहरन्ति निशाचर । लघवश्चाल्पवीर्याश्च शरा ह्येमे सुखास्तव ॥ ५२ ॥
नैवं शूरास्तु युध्यन्ते समरे बुद्धकाङ्क्षिणः । इत्येवं तं ब्रुवन्धन्वी शरैरभिववर्ष ह ॥ ५३ ॥
तस्य बाणैः सुविध्वस्तं कवचं काञ्चनं महत् । व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात् ॥ ५४ ॥
विधूतवर्मा नाराचैर्बभूव स कृतव्रणः । इन्द्रजित्समरे वीरः प्रेत्यूषे भानुमानिव ॥ ५५ ॥
ततः शरसहस्रेण संक्रुद्धो रावणात्मजः । विभेद समरे वीरो लक्ष्मणं भीमविक्रमः ॥ ५६ ॥

रा० टी०—तदाकारमाह—किमिति । प्रथमे युद्धे यदा सह भ्राता त्वं निवद्धो विशेषसे तत् तात्कालिकं मत्पराक्रमं किं न स्मरसि—युवामिति । यद्यस्माद्धेतोः मामाधर्षयितुमिच्छसि तस्मात् महायुद्धे युवां शरैरशायितौ अत एव विमूर्छौ अभवतमिति शेषः तस्य स्मृतिः ते नास्ति एतेन स्मृतिसत्त्वे मत्सम्मुखमागमनात् ते मनो न स्यादिति सूचितम् वा अथवा यमसादनं गन्तुमिच्छसि अद्यचतुष्टयमेकान्वयि ॥४५॥४०

गो० टी०—किमिति । त्वं भ्राता सह निबद्ध इति यत् प्रथमे, तद्युद्धे तस्मिन् युद्धे मत्पराक्रमं त्वन्निबन्धनरूपम् न स्मरसि किम् । यदा यत्र युद्धकाले, विशेषसे विशेषितवानसि ॥ ९ ॥

४५] ति० टी०—तदेव पुनराह—युवामिति ॥ ४५ ॥

गो० टी०—तमेव पराक्रमं विशिनष्टि—युवामिति ॥४०॥

४६–४९] ति० टी०—यमसादनं यमगृहम् ॥४६॥४९॥

गो० टी०—स्मृतिरिति । व्यक्तं ननमित्यर्थः ॥४१–४३॥

रा० टी०—यदीति । प्रथमे युद्धे यदि मत्पराक्रमो न दृष्टः तर्हि अद्य दर्शयिष्यामि अतः व्यवस्थितो दृढमतिस्सन् त्वं तिष्ठ ॥ ११ ॥

रा० टी०—इतीति । सप्तभिर्बाणैः लक्ष्मणं दशभिस्तु हनूमन्तमभिविव्याध ॥ १२ ॥

रा० टी०—तत इति । शरशतेनैव विभीषणं निर्विभेद १३

गो० टी०—तत इति । क्रोधाद्विगुणसंरब्ध इति । लक्ष्मणादिविषयरोषापेक्षया विभीषणविषये द्विगुणं कुपित इत्यर्थः१४

५०–५१] ति० टी०—नैतत्किंचिदिति ब्रुवन् । एतत्न किंचित् । अकिंचित्करमिति ब्रुवन्नित्यर्थः ॥ ५० ॥ ५१ ॥

रा० टी०—तदिति । इन्द्रजिता कृतं कर्म दृष्ट्वा अचिन्तयित्वा च एतत् प्रहरणं न किंचित् अकिंचित्करमित्यर्थः इति ब्रुवँल्लक्ष्मणः शरान् संगृह्य रावणिं मुमोच अद्यचतुष्टयमेकान्वयि ॥ १२ ॥ १५ ॥

गो० टी०—तद्दृष्ट्वेत्यादिसार्धश्लोक एकान्वयः । नैतत्किंचिदिति ब्रुवन् एतदकिंचित्करमिति ब्रुवन्नित्यर्थः ॥ १५ ॥

गो० टी०—अभीतवदन इत्यादिसार्धश्लोकद्वयमेकान्वयम् । अकिंचित्करत्वमेवाह—नैवमिति ॥ १६–१९ ॥

५२–५४] ति० टी०—अकिंचित्करत्वमेव विवृणोति—नैवमिति । एवंशब्दार्थः—लघव इति । पुष्पमालावल्लघव इमे तव शरा मे सुखाः, न तु क्लेशदा इत्यर्थः ॥ ५२–५४ ॥

रा० टी०—नेति । शराः एवं न प्रहरन्ति एवं प्रहरणे दोषमाह इमे शराः लघवः अल्पवीर्याश्च अत एव सुखाः निर्वृणां सुखप्रदाः एतेनैव प्रहारो व्यर्थ इति सूचितम् अत एव युद्धकाङ्क्षिणः शराः एवं न युध्यन्ते इत्येवं ब्रुवन् लक्ष्मणश्शरैरभिववर्ष अद्यचतुष्टयमेकान्वयि ॥ १६ ॥ १७ ॥

रा० टी०—तस्येति । तस्य लक्ष्मणस्य बाणैः सुविध्वस्तं कवचं रावणिवर्म ताराजालमिव रथोपस्थे व्यशीर्यत ॥ १८ ॥

५५–५६] ति० टी०—प्रत्यूषे भानुमानिव । क्षतजरक्तवर्णत्वादिति भावः ॥ ५५ ॥ ५६ ॥

रा० टी०—विधूतेति । कृतव्रण इन्द्रजित् प्रत्यूषे भानुमान् इव बभूव रुधिरारक्तत्वेनुकारुण्ये सप्रभा ॥ १९ ॥

रा० टी०—तत इति । रावणात्मजः शरसहस्रेण लक्ष्मणं विभेद ॥ २० ॥

गो० टी०—विधूतेति । परूढः प्रारूढश्च ॥ २०॥ २१ ॥

१ शक्रेति गो. पाठः । २ यस्मादिति गो. पाठः । ३ ते इति गो.पाठः । ४ स इति गो.पाठः । ५ प्रहरन्ते इति गो पाठः । ६ सुखा ह्येमे शरा इति गो. पाठः । ७ जवेति गो. पाठः । ८ ब्रुवाणस्तु शरवर्षैरवाकिरदिति गो. पाठः । ९ हेमकृत्तमिति गो. पाठः । १० प्ररूढ इव भानुमानिति गो. पाठः ।

व्यशीर्यत महैद्दिव्यं कवचं लक्ष्मणस्य तु । कृतप्रतिकृतान्योन्यं बभूवतुरभिद्रुतौ ॥ ५७ ॥
अभीक्ष्णं निःश्वसन्तौ वै[3] युध्येतां तुमुलौ युधि। शरसंकृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥
सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः ॥ ५८ ॥
ततक्षतुर्महात्मानौ रणकर्मविशारदौ । बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ ॥ ५९ ॥
तौ शरौघैस्तथाकीर्णौ निकृत्तकवचध्वजौ । स्रजन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव ॥ ६० ॥
शरवर्षं ततो घोरं मुञ्चतोर्भीमनिःस्वनम्[7] । सासारयोरिवाकाशे नीलयोः कालमेघयोः ॥ ६१ ॥
तयोरथ महान्कालो व्यतीयाद्युध्यमानयोः । न च तौ युद्धवैमुख्यं क्लमं चाप्युपजग्मतुः ॥ ६२ ॥
अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः । शरानुच्चावचाकारानन्तरिक्षे व्यवन्धतुः ॥ ६३ ॥
व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च । उभौ तु तुमुलं घोरं चक्रतुर्नररक्षसौ ॥ ६४ ॥
तयोः पृथक्पृथग्भीमः शुश्रुवे तुमुलः स्वनः । सैं कम्पं जनयामास निर्घात इव दारुणः ॥ ६५ ॥
तयोः स भ्राजते शब्दस्तथा समरयत्नयोः । सुघोरयोर्निःस्वैनतोर्गगने मेघयोरिव[13] ॥ ६६ ॥
सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ । प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ ॥ ६७ ॥
ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि । असृग्दिग्धा विनिष्पेतुर्विशुधरणीतलम्[16] ॥ ६८ ॥
अन्ये सुनिशितैः शस्त्रैराकाशे संजघट्टिरे । बभञ्जुश्चिच्छिदुश्चैव[17] तयोर्बाणाः सहस्रशः ॥ ६९ ॥

५७-६०] ति० टी०-अन्योन्यं कृतप्रतिकृता आर्षो दा । कृतप्रतिकृते यत्नौ बभूवतुरित्यर्थः ॥ ५७-६० ॥

रा० टी०-व्यशीर्यतेति । दिव्यं दैवैर्दत्तमित्यर्थः लक्ष्मणस्य कवचं व्यशीर्यत अद्धे पृथक् ॥ २१ ॥

रा० टी०-कृतेति । अरिन्दमौ लक्ष्मणेन्द्रजितौ कृतप्रतिकृता कृतप्रतिकृतौ बभूवतुः औडोडादेशः अत एव निःश्वसन्तौ सन्तौ तुमुलं यथा भवति तथा युध्येताम् ॥ २२ ॥

गो० टी०-व्यशीर्यतेति । कृतं प्रतिकृतम् अन्योन्यं यस्मिन् कर्मणि तत्थोक्तम् ॥ २२ ॥

रा० टी०-शरेति । शरेण संकृत्तानि संकृतसदृशानि संकृत्तानि छिन्नानि च सर्वाङ्गानि ययोः सर्वतः सर्वदेशे रुधिराभ्यामरुणवर्णरक्ताभ्यामुक्षितौ व्याप्तौ सुदीर्घकालमन्योन्यं ततक्षतुः जघ्नतुः अत एव आत्मजये यत्तौ कृतोद्योगौ बभूवतुश्च एकत्रोपपदकृतलक्ष्मणाङ्कविशेषणीभूतसंकृत्तशब्दः आधारक्रियान्तर्भूतिककर्त्रंशतः श्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

रा० टी०-तावितिं । शरौघैः आकीर्णौ अत एव निकृत्तकवचध्वजौ तौ द्वौ रुधिरमरुणस्रुक्ष्णं जलमरुणस्वेन प्रतीयमानं प्रस्रवेदमित्यर्थः प्रस्रवणौ निर्झराविव स्रजन्तौ बभूवतुरिति शेषः २५

गो० टी०-अभीक्ष्णमिति । युद्धयेताम् अयुद्धयेताम् २३

गो० टी०-सुदीर्घकालमिति । ततक्षतुः अन्योन्यं बभञ्जतुः ॥ २४ ॥

गो० टी०-बभूवतुरित्यादि । यत्नौ यत्नवन्तौ ॥ २५ ॥

६१] ति० टी०-सासारयोर्धारासंपात आसारस्तत्सहितयोः ॥ ६१ ॥

६२-६६] ति० टी०-महान्कालोऽनेकदिनरूपः॥६२-६६

रा० टी०-शरवर्षमिति। सासारयो. धारासंपातसहितयोः अत एव नीलयोः कालमेघयो. लोकविघातकयोः वर्षाकालिकयोर्वा घनयोरिव भीमनिःस्वनं यथा भवति तथा शरवर्षं मुञ्चतोः युध्यमानयोस्तयोर्महान् बहुकालो व्यतीयात् आगमशास्त्रस्यानित्यत्वादद्भिरिहः इकारप्रश्लेषादीर्घः नौ यद्धवैमुख्यं युद्धरहितयं क्लमं च नोपजग्मतुः श्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

रा० टी०-अस्त्राणीति। पुनः पुनरस्त्राणि दर्शयन्तौ अस्त्रविदां श्रेष्ठौ उच्चावचकारान् शरान् अन्तरिक्षे बबन्धतुः ॥२८॥

गो० टी०-शरवर्षमित्यादिश्लोकद्वयमेकान्वयम् । सासारयोः सधारापातयोः। धारासंपात आसार इत्यमरः २६-२८

रा० टी०-व्यपेतेति । व्यपेतदोषादि यथा भवति तथा अस्यन्तौ नररक्षसौ घोरं युद्धं चक्रतुः ॥ २९ ॥

रा० टी०-तयोरिति । तयोर्युध्यमानयोः स्वनः पृथक् पृथक् शुश्रुवे कम्पं जनयामास च ॥ ३० ॥

रा० टी०-तयोरिति । समरमत्तयो. तयोरिशब्दः स्वनतोयमेघयोरशब्द इव सम्भ्राजते ॥ ३१ ॥

गो० टी०-व्यपेतेति । व्यपेतदोषं व्यपगतमोहत्वदोषम् । अस्यन्तौ बाणान् क्षिपन्तौ ॥ २९-३१ ॥

६७-६९] ति० टी०-जये धृतौ दृढोत्साहौ ॥६७-६९॥

१ महार्हेत्यमिति गो. पाठः । २ अरिंदमाविति रा. पाठः । ३ तावितिं गो. पाठः । ४ तुमुलमिति गो. रा. पाठः । ५ तदेति गो. पाठः । ६ व्यत्ययादिति गो. पाठः । ७ अमभिति गो. पाठः । ८ तलनिःस्वन इति गो. पाठः । ९ प्रकम्पवनूवनं घोर इति गो. पाठः । १० स्व तयोरिति गो. तयोः स्व मिति रा. पाठः । ११ सत्तयोरिति गो. मत्तयोरिति च रा. पाठः । १२ इतनोरिति गो. पाठः । १३ वयेति गो. पाठः । १४ व्यक्ता इति गो. पाठः १५ । निष्पयेति गो. पाठः । १६ तले इति रा. पाठः । १७ चाप्ये इति गो. पाठः ।

स बभूव रणे घोरस्तयोर्बाणमयश्चयः । अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्च यः ॥ ७० ॥
तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः । सुपुष्पाविव निष्पत्रौ वने किंशुकशाल्मली ॥ ७१ ॥
चक्रतुस्तुमुलं घोरं संनिपातं मुहुर्मुहुः । इन्द्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ ॥ ७२ ॥
लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम् । अन्योन्यं तावविभिन्नन्तौ न श्रमं प्रतिपद्यताम् ॥ ७३ ॥
बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ । शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ ॥ ७४ ॥
ततो रुधिरसिक्तानि संवृतानि शरैर्भृशम् । बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ ७५ ॥
तयोरथ महान्कालो व्यतीयाद्युध्यमानयोः । न च तौ युद्धवैमुख्यं श्रमं चाप्यभिजग्मतुः ॥ ७६ ॥
अथ समरपरिश्रमं निहन्तुं समरमुखेष्वजितस्य लक्ष्मणस्य ।
प्रियहितमुपपादयन्महात्मा समरमुपेत्य विभीषणोऽवतस्थे ॥ ७७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

रा० टी०–सुवर्णेति । नाराचैः कृतौ व्रणौ ययोः तौ अत एव धृतिमन्तौ नरराक्षसौ रुधिरमरुणप्रस्यन्दं प्रसुस्रुवाते कृतव्रणशब्दकुक्षिप्रविष्टलक्ष्मणविशेषणीकृतव्रणशब्दः आचारक्विबन्तप्रकृतिकर्कर्जन्तः ॥ ३३ ॥

रा० टी०–ते इति । गात्रयोर्निपतिताः अस्त्रजा अन्यपक्षीयशरीरजेन इन्द्रजित्शरीरजेन च रुधिरेण लिप्ता व्याप्ताः शराः विनिपेतुः धरणीतले विविशुश्च ॥ ३३ ॥

गो० टी०–सुवर्णेति । धृतौ अवहितौ ॥ ३२ ॥ ३३ ॥

रा० टी०–अन्य इति । अन्ये सहस्रशस्तयोः प्रक्षिप्ताः शक्तेस्तह बाणाः आकाशे संजघट्टिरे अत एव बभञ्जुः विच्छिद्य चिच्छिदुश्च परस्परमिति शेषः ॥ ३४ ॥

गो० टी०–अन्य इति । तयोः अन्ये केचन बाणाः आकाशे सुनिशितैः शस्त्रैः संजघट्टिरे संघट्टिताः । अन्ये बाणाः बाणान् सहस्रशः बभञ्जुः चिच्छिदुश्चेति संबन्धः ॥ ३४ ॥

७०–७१] ति० टी०–चयः समूहः ॥ ७० ॥ ७१ ॥

रा० टी०–स इति । दीप्ताभ्यामग्निभ्यामिव तयोः नरराक्षसयोः बाणमयो यो रणः सः सत्रे कुशमयो यो देशस्स इव बभूव[1] ॥

रा० टी०–तयोरिति । सुपुष्पौ किंशुकशाल्मलीवत् तयोर्देहौ शुशुभाते ॥ ३६ ॥

गो० टी०–स बभूवेति । सः रणः घोरो बभूव । यस्मिन् तयोर्बाणमयश्चयः सत्रे दीप्ताभ्यामग्निभ्यां सहितः कुशमयश्च इवासीत् । अग्नी गार्हपत्याहवनीयौ ॥ ३५ ॥ ३६ ॥

७२–७३] ति० टी०–संनिपातं युद्धम् ॥ ७२ ॥ ७३ ॥

रा० टी०–चक्रतुरिति । परस्परजयैषिणौ इन्द्रजिल्लक्ष्मणश्च मुहुर्मुहुः सन्निपातं चक्रतुः ॥ ३७ ॥

गो० टी०–चक्रतुरिति । सन्निपातं युद्धम् ॥ ३७ ॥

रा० टी०–लक्ष्मण इति । अन्योन्यमभिघ्नन्तौ तौ श्रमं न प्रत्यपद्यताम् ॥ ३८ ॥

गो० टी०–लक्ष्मण इति । प्रत्यपद्यतां प्रत्यपद्येताम् ॥ ३८ ॥ ३९ ॥

७४–७६] ति० टी०–अवगाढैर्गाढमग्नैः । प्ररूढौ प्ररूढवृक्षौ ॥ ७४ ॥ ७५ ॥

रा० टी०–बाणेति । शरीरस्थैरवगाढैर्देहैर्बाणजालैरवस्थितौ महावीर्यौ प्ररूढौ वृक्षादिमन्तौ पर्वताविव शुशुभाते ३९

रा० टी०–तत इति । शरैः संवृतानि रुधिरसम्यामाक्ष्यक्तास्यां सिक्तानि व्याप्तानि सर्वगात्राणि ज्वलन्तः पावका इव बभ्राजुः ॥ ४० ॥

रा० टी०–तयोरिति । युध्यमानयोस्तयोः महान् कालो व्यतीयात् तौ तु युद्धवैमुख्यं श्रमं च नाभिजग्मतुः अत्यर्थोत्कः पूर्वमपि पठितः ॥ ४१ ॥

गो० टी०–तयोरिति । बभ्राजुः । आर्षे परस्मैपदम् ॥ ४०–४२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे वाल्मीकीयव्याख्याने युद्धकाण्डव्याख्याने एकोननवतितमः सर्गः ॥ ८९ ॥

७७] ति० टी०–समरपरिश्रमं युद्धजश्रमम् ॥ ७७ ॥

इतिश्रीरामानुजविरचिते श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

रा० टी०–अथेति । समरमुखे अजितस्य लक्ष्मणस्य परिश्रमं निहन्तुं प्रियहितमुपपादयन् विभीषणः समरमुपेत्यावतस्थे ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

---

१ रण इति गो.पाठः । २ वाल्मकिंशुकाविति गो.पाठः । ३ वपैषिणाविति गो.पाठः । ४ महौजा इति गो.पाठः । * इवेति विभज्य पाठो युक्तः

एकोननवतितमः सर्गः ।

तयोरभूत्पूर्वं संग्रामं प्रेक्षितुमिच्छुर्विभीषणस्त्वात्तवरचापः शरैरक्षांसि सामात्यो दारयामास हरिप्रवीराः नायमुपेक्षासमयो यन्महाशूराः सर्वे प्रायः कृतान्तसात्कृता अवशिष्टमल्पकमिदं बलम् इति बभाषे च एवं चोदिता हरयश्च महान्तं विक्रमपदर्शयन् । लक्ष्मणो रावणः सारथिं प्रमाथ्यादयश्चत्वारः कपयोऽपि तुरगानमर्दन्तदा स पदातिरेव युयुधे च ।

युध्यमानौ ततो दृष्ट्वा प्रसक्तौ नरराक्षसौ । प्रभिन्नाविव मातंगौ परस्परजयैषिणौ ॥ १ ॥
तयोर्युद्धं द्रष्टुकामो वरचापधरो बली । शूरः स रावणभ्राता तस्थौ सङ्ग्राममूर्धनि ॥ २ ॥
ततो विस्फारयामास महद्धनुरवस्थितः । उत्ससर्ज च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ॥ ३ ॥
ते शराः शिखिसंस्पर्शा निपतन्तः समाहिताः । राक्षसान्दारयामासुर्वज्रौ इव महागिरीन् ॥ ४ ॥
विभीषणस्यानुचरास्तेऽपि शूलासिपट्टिशैः । चिच्छिदुः समरे वीरान्राक्षसान्राक्षसोत्तमाः ॥ ५ ॥
राक्षसैस्तैः परिवृतः स तदा तु विभीषणः । बभौ मध्ये प्रधृष्टानां कलभानामिव द्विपः ॥ ६ ॥
ततः संचोदयानो वै हरीन्रक्षोवधप्रियान् । उवाच वचनं काले कालज्ञो रक्षसां वरः ॥ ७ ॥
एकोऽयं राक्षसेन्द्रस्य परायणमवस्थितः । एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ॥ ८ ॥
तस्मिंश्च निहते पापे राक्षसे रणमूर्धनि । रावणं वर्जयित्वा तु शेषमस्य बलं हतम् ॥ ९ ॥

१] ति० टी०—युध्यमानाविति । प्रभिन्नौ मत्तौ मातंगाविव युद्धाय प्रसक्तावत एव युध्यमानौ दृष्ट्वा ॥ १ ॥

२] ति० टी०—तत. परं युद्धार्थं गतयोरन्यतरवधान्तं युद्धं द्रष्टुकामः सत्वरो रावणभ्राता युयुत्सया सङ्ग्राममूर्धनि तस्थौ ॥ २ ॥

रा० टी०—युद्धवृत्तान्तमेवाह—युध्यमानाविति । प्रभिन्नौ मत्तौ अत एव युध्यमानौ मातङ्गाविव प्रसक्तौ युद्धे संसक्तौ नरराक्षसौ दृष्ट्वा दूरतोऽवलोक्य तयोर्युद्धं द्रष्टुकामः अत्यन्तमवलोकयितुमनाः रावणभ्राता संग्राममूर्धनि तस्थौ श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—अथेन्द्रजितो रथभङ्गः—युध्यमानौ त्विति श्लोकद्वयमेकान्वयम् । प्रभिन्नौ मत्तमातङ्गाविव परस्परगतौ परस्परं युद्धार्थं सक्तौ तौ लक्ष्मणेन्द्रजितौ प्रथमं द्रष्टुकामः स विभीषणस्तौ दृष्ट्वा संग्राममूर्धनि योद्धुं तस्थावित्यन्वयः । स्वयं प्रथमं युद्धं कर्तुमुद्युक्तोऽपि तयोर्बलाधिक्यं द्रष्टुं तत्रैव स्थितः । तयोर्बलतौल्ये दृष्टे स्वस्य रामविषयकिञ्चित्कारार्थमिदानीं युद्धाय तस्थावित्यर्थः ॥ १ ॥ २ ॥

३] ति० टी०—अत एव ततो विस्फारयामासेति । अवस्थितः । भूभाविति शेषः ॥ ३ ॥

रा० टी०—तत इति । अवस्थितो विभीषणः महद्धनुर्विस्फारयामास राक्षसेषु महाशरान् उत्ससर्ज च ॥ ३ ॥

गो० टी०—तत इति । धनुः तादात्विकं किंचित् । विभीषणस्य केवलगदापाणित्वात् ॥ ३ ॥

४–५] ति० टी०—वज्रा वज्रपाताः ॥ ४ ॥ ५ ॥

रा० टी०—ते इति । शिखिवत् वह्निवत् संस्पर्शो येषां ते शराः वज्रा महागिरीनिव राक्षसान् दारयामासुः ॥ ४ ॥

रा० टी०—विभीषणस्येति । विभीषणस्यानुचरा अपि राक्षसान् चिच्छिदुः ॥ ५ ॥

गो० टी०—ते शरा इति । वज्राणि अशनयः ॥ ४–७ ॥

६] ति० टी०—राक्षसैस्तैः सचिवरूपैः ॥ ६ ॥

रा० टी०—राक्षसैरिति । राक्षसैः परिवृतो विभीषणः कलभानां करिशावकानां मध्ये द्विप इव बभौ । ६ ॥

७] ति० टी०—संचोदयानः संचोदयमानः ॥ ७ ॥ ४ ॥

रा० टी०—तत इति । रक्षसां वरो विभीषणः रक्षोवधप्रियान् हरीनुवाच ॥ ७ ॥

८–९] ति० टी०—परायणं परा गतिः । उत्तमः । योद्धेति यावत् तस्य राक्षसस्य बलं सेना । एतच्छेषं हन्यमानबलमात्रावशेषम् । तत्किं तिष्ठत । तद्धननात्पुरुषमेनेति शेषः ॥ ८ ॥ ९ ॥

रा० टी०—तदाकारमाह—एक इत्यादिभिः । एकोयमिन्द्रजित् राक्षसेंद्रस्य रावणस्य परायणमुत्तमाश्रयः तत्र हेतुः तस्य रावणस्य बलमेतच्छेषम् एष एव शेषः अवशिष्टो यस्मिन् तत् अत एव अस्मिन् इन्द्रजिति हते सति रावणं वर्जयित्वा शेषमस्य बलं हतं भविष्यतीति शेषः अतः किं किमर्थं तिष्ठत इममपि निहतेत्यर्थः श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०—एकोयमिति । परायणं गतिः ॥ ८ ॥ ९ ॥

१ तौ दृष्टुकामः संग्रामे परस्परगतौ बली इति गो. रा. पाठः । २ संकाङ्क्ष इति गो. पाठः । ३ वज्राणीति गो. पाठः । ४ रणेति गो. पाठः । ५ द्रवेति गो. पाठः । ६ अस्मिन्निहते इति गो. पाठः । ७ हतं बलमिति गो. पाठः ।

प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः । कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः ॥ १० ॥
जम्बुमाली महामाली तीक्ष्णवेगोऽशनिप्रभः । सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः ॥ ११ ॥
संह्रादी विकटोऽरिघ्नस्तपनो मन्द एव च । प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च ॥ १२ ॥
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् । विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः ॥ १३ ॥
अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः । कम्पनः सत्त्ववन्तश्च देवान्तकनरान्तकौ ॥ १४ ॥
एतान्निहत्यातिबलान्बाहुभ्यां राक्षसर्षभान् । बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु ॥ १५ ॥
एतावदेव शेषं वो जेतव्यमिति वानराः । हताः सर्वे समागम्य राक्षसा बलदर्पिताः ॥ १६ ॥
अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम । घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम् ॥ १७ ॥
हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यते । तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति ॥ १८ ॥
वानरा हत संभूय भृत्यानस्य सभीषणान् । इति तेनातियशसा राक्षसेनाभिचोदिताः ॥ १९ ॥
वानरेन्द्रा जहर्षिरे लांगूलानि च विव्यधुः । ततस्तु कपिशार्दूलाः श्वेर्डन्तश्च पुनः पुनः ॥
मुमुचुर्विविधान्नादान्मेघान्दृष्ट्वेव बर्हिणः ॥ २० ॥
जाम्बवानपि तैः सर्वैः सैन्यमुख्यैरभिसंवृतः । तेऽभ्यभिस्ताडयामासुर्नखैर्दन्तैश्च राक्षसान् ॥ २१ ॥
निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः । परिभैर्त्स्य भयं त्यक्त्वा तमनेकविधायुधाः ॥ २२ ॥
शरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः । जाम्बवन्तं मृधे जघ्नुर्निघ्नंतं राक्षसीं चमूम् ॥ २३ ॥
स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् । देवासुराणां क्रुद्धानां यथा भीमो महास्वनः ॥ २४ ॥

१०-१४] ति० टी०-एतन्मात्रशेषत्वमाह—प्रहस्त इति ॥ १०-१४ ॥

रा० टी०-हतान् निर्दिशन्नाह—प्रहस्तइत्यादिभिः । प्रहस्तादिनिहतः श्लोकपञ्चकमेकान्वयि ॥ १०-१४ ॥

गो० टी०-उक्तानुक्तांश्च राक्षसान् युद्धे हतान् कांश्चित्पुनर्निगृह्यत्युत्साहनाय—प्रहस्त इत्यादिना श्लोकपञ्चकेन । अकम्पनः कम्पनश्च राक्षसौ सर्वत्र निहत इत्यनेनान्वयः । देवान्तकनरान्तकावित्यत्र निहताविति विपरिणामः कार्यः १०-१४

१५] ति० टी०-बाहुभ्यां सागरं तीर्त्वायस्मिन्नैष्पमाभिरिदं लघ्ववशिष्टबलरूपं गोष्पदं लङ्घ्यताम् ॥ १५ ॥

रा० टी०-एतानिति । बाहुभ्यां सागरं तीर्त्वैव एतान् प्रहस्तादीन् निहत्य गोष्पदमिव लघु अल्पमेतावत् शेषं जेतव्यं बलं लङ्घ्यताम् एव इतिशब्दोऽर्थे सार्द्धश्लोक एकान्वयी ॥ १५ ॥

गो० टी०-एतानिति । एतान् राक्षसर्षभान् निहत्य स्थितानां भवताम् इन्द्रजितो बाहुभ्यां सागरं तीर्त्वा स्थितस्य पुंसो गोष्पदतरणमिव सुकरमिति निदर्शना । बाहुभ्यां सागरं तीर्त्वैव एतानतिबलान् बहून् राक्षसर्षभान् निहत्य स्थितैः भवद्भिः गोष्पदमिव लघु इन्द्रजिद्बननरूपं स्वल्पं कार्यं लङ्घ्यतामित्यन्वयः ॥ १५ ॥

१६] ति० टी०-समागम्य युद्धे प्राप्य ॥ १६ ॥

रा० टी०-हता इति । यद्यपि सर्वे राक्षसाः हताः अतो मम जनितुः समागमे जातस्य भ्रातुरित्यर्थः पुत्रस्य निधनं नाशनमयुक्तं तथापि रामार्थे घृणां दयामपास्य त्यक्त्वा भ्रातुरात्मजं निहन्याम् वालघेयम् ॥ १६ ॥

गो० टी०-एतावदिति । एतावदेव इन्द्रजिन्मात्रमेव १६

१७] ति० टी०-जनितुर्जननिमित्तभूतः पुत्रस्य निधनं नाशः कर्तुमयुक्तम्, तथापि घृणां दयामपास्य रामार्थे भ्रातुरात्मजं निहन्याम् । हननोपायप्रवर्तनेनेति भावः ॥ १७ ॥

गो० टी०-अयुक्तमिति । जनितुः जननितुः । पितृव्यस्येत्यर्थः ॥ १७ ॥

१८] ति० टी०-हन्तुकामस्य साक्षात्पहर्तुकामस्य बाष्पं कर्तुं निरुध्यते निरुणद्धि । तं लक्ष्मण एवेत्यन्वयः १८

रा० टी०-नन्वेवं तर्हि त्वयैव निहन्यतां किं लक्ष्मणमुद्दिश्येत्यत आह—हन्तुकामस्य मे चक्षुः बाष्पमश्रु निरुध्यते अतः तं मायिनं लक्ष्मण एव शमयिष्यति अतः हे वानराः अनेनेन्द्रजितः समीपगान् भृत्यान् हत एव सार्धश्लोक एकान्वयी ॥ १८ ॥

गो० टी०-हन्तुकामस्येति । बाष्पं कर्तुं, चक्षुः निरुणद्धीति निरुणद्धि ॥ १८-२३ ॥

१९-२४] ति० टी०-प्रतीत्यार्थम् ॥ १९-२४ ॥

रा० टी०-इतीति । तेन विभीषणेन इत्यभिचोदिताः वानरेन्द्रा जहर्षिरे अत एव लांगूलानि विव्यधुः ॥ १८ ॥ १९ ॥

१ निघ्न इति गो. पाठः । २ वन्तौ तौ इति गो. वन्तौ चेति रा. पाठः । ३ इहेति गो. पाठः । ४ श्वेलन्त इति गो. पाठः । ५ स्वयूथैरिति रा. स्वयूथैरपीति गो. पाठः । ६ अभ्यभिस्ताडयामासेति गो. पाठः । ७ लङ्घ्यरिति गो. रा. पाठः ।

हनूमानपि संक्रुद्धः सानुमुत्पाट्य पर्वतात् । स लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः ॥ २५ ॥
रक्षसां कदनं चक्रे दुरासादः सहस्रशः । स दृष्ट्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद्बली ॥ २६ ॥
लक्ष्मणं परवीरघ्नः पुनरेवाभ्यधावत । तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ ॥ २७ ॥
शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् । अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ ॥ २८ ॥
चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ । नह्यादानं न संधानं धनुषो वा परिग्रहः ॥ २९ ॥
न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः । न मुष्टिप्रतिसंधानं न लक्ष्यप्रतिपादनम् ॥ ३० ॥
अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् । चापवेगप्रयुक्तैश्च बाणजालैः समन्ततः ॥ ३१ ॥
अन्तरिक्षेऽभिसंपन्ने न रूपाणि चकाशिरे । लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम् ॥ ३२ ॥

रा० टी०–तत इति । क्रोधान्तः कपिशार्दूलः मेघान् दृष्ट्वा बर्हिण इव विविधान् नादान् मुमुचुः ॥ २४ ॥

रा० टी०–जाम्बवानिति । स्वयंवरसभासंस्थो जाम्बवान् ते वानराश्च राक्षसान् ताडयामासुः ॥ २१ ॥

रा० टी०–निघ्नन्तमिति । महाबलाः राक्षसाः निघ्नन्तम् ऋक्षाधिपतिं परिवव्रुः आच्छादयामासुः ॥ २२ ॥

रा० टी०–शरैरिति । क्रमं निघ्नन्तं जाम्बवंतं शरादिभिर्जघ्नुः ॥ २३ ॥

रा० टी०–स इति । कपिरक्षसां महास्वनः अतिस्वनिर्घृष्टः संप्रहारः देवासुराणां संप्रहार इव संजज्ञे ॥ २४ ॥

गो० टी०–स इति । यथा भीम इति । महास्वनो देवानां संप्रहारो यथा तथेत्यर्थः ॥ २४ ॥

२५] ति० टी०–हनूमानपीति । पर्वतात्सानुं शिखरमुत्पाट्य लक्ष्मणं पृष्ठादवरोप्य विश्रामार्थं स्वारूढं लक्ष्मणं भूमाववस्थाप्य विभीषणसहायार्थं हनुमान्कदनं चक्रे ॥ २५ ॥

रा० टी०–हनूमानिति । दुरासादः हन्तुमशक्यः क्रुद्धो हनुमानपि लक्ष्मणं पृष्ठादवरोप्य पर्वतात् सानुमुत्पाट्य सहस्रशो रक्षसां कदनं चक्रे सार्द्धश्लोक एकान्वयी ॥ २५ ॥

गो० टी०–हनूमानिति । अत्र हनुमतो युद्धकथनात् किंचिद्विश्रमार्थं तस्य पृष्ठादवरुह्य लक्ष्मण इत्यवगम्यते । सहस्रशः कदनमित्यन्वयः ॥ २१–२८ ॥

२६] ति० टी०–दुरासादः । परैर्दुरासद इत्यर्थः ॥ २६ ॥

रा० टी०–स इति । स इन्द्रजित् पितृव्यस्य समीपे लक्ष्मणं तुमुलं युद्धं दृष्ट्वा पुनरभ्यधावत ॥ २६ ॥

२७] ति० टी०–प्रयुद्धौ योद्धुमुपक्रान्तौ ॥ २७ ॥

रा० टी०–ताविति । तौ प्रसिद्धौ तौ अमृतक्षोररूपौ प्रयुद्धौ लक्ष्मणराक्षसौ परस्परं जघ्नतुः ॥ २७ ॥

२८] ति० टी०–शरजालैः परस्परप्रयुक्तैः परस्परमन्तर्दधतुः ॥ २८ ॥

रा० टी०–अभीक्ष्णमिति । शरजालैः अभीक्ष्णमंतर्दधतुः तत्र दृष्टान्तः उष्मान्ते ग्रीष्मापाये मेघैः चंद्रादित्याविव मेघाविति पाठे अर्शआद्यजन्तः मेघवन्तावित्यर्थः ॥ २८ ॥

२९] ति० टी०–उष्मान्ते वर्षारम्भे । संधानं संयोजनम् । धनुषो वा परिग्रहः सव्यापसव्येन कार्मुकग्रहणम् ॥ २९ ॥

३०–३१] ति० टी०–विग्रहो बाणानां विभागः । 'विग्रहः समरे काये विरोधप्रविभागयोः' इति कोश. । प्रतिसंधानं दृढतया मुष्टिसंयोजनम् । लक्ष्यप्रतिपादनं लक्ष्यभेदनम् ॥ ३० ॥ ३१ ॥

रा० टी०–नहीति । युध्यतोस्तयोः पाणिलाघवाद्धेतोः आदानादिनाऽदृश्यत तत्रादानं तूणीरात् शरग्रहणं संधानं उद्धृतशरस्य चापेवस्थापनं धनुषः परिग्रहः सव्यापसव्येन ग्रहणं बाणानां विप्रमोक्षः प्रक्षेपः विकर्षो ह्यं ग्रहणं विग्रहः शराणां विभागः मुष्टिप्रतिसंधानं दृढतो मुष्टया ग्रहणं लक्ष्यस्य प्रतिपादनं भेदनमहंचतुष्टयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०–न ह्यादानमित्यादिश्लोकद्वयमेकान्वयम् । आदानं बाणस्य तूणादुद्धरणम् । संधानम् उद्धृतस्य बाणस्य धनुष्यवस्थापनम् । धनुषो वा परिग्रहः सव्यापसव्यत्वेन कार्मुकग्रहणम् । बाणानां विप्रमोक्षः विसर्जनम् । विकर्षः आकर्णग्रहणम् । विग्रहः आलीढादिवस्थानविशेषः, सावष्टम्भावस्थानं वा, धनुर्ज्यादीनां प्रविभागो वा । विग्रहः समरे काये विरोधप्रविभागयोरिति विश्वः । मुष्टिप्रतिसंधानं ज्याकार्मुकयोर्मुष्टिबन्धनम् । लक्ष्यप्रतिपादनं लक्ष्यप्रापणम् । लक्ष्यवेध इति यावत् ॥ २९ ॥ ३० ॥

रा० टी०–चापेति । चापवेगप्रयुक्तैः बाणजालैः अन्तरिक्षे अभिसम्पन्ने परिपूर्णे सति रूपाणि न चकाशिरे ॥ ३१ ॥

गो० टी०–चापवेगेति । रूप्यन्त इति रूपाणि वस्तूनि । बाणव्यतिरेकेण न किंचित्तदानीं दृश्यत इति भावः ॥ ३१ ॥

३२] ति० टी०–अभिसंपन्ने व्याप्ते । रूपाणि रूपवद्वस्तूनि न चकाशिरे । न दृग्गोचराणीति भावः । रावणिश्चापि लक्ष्मणं प्राप्यायुध्यतामिति शेषः ॥ ३२ ॥

रा० टी०–लक्ष्मण इति रावणिश्च लक्ष्मणं प्राप्य युयुधाते इति शेषः अत एव ताभ्यामन्योन्यविग्रहे परस्परसंप्रहारे उभा अव्यवस्था सर्वमनसामस्वास्थ्यं भवति ॥ ३२ ॥

गो० टी०–लक्ष्मण इति । लोकव्यवहारानुसारेणात्र क्रियाकारकसंबन्धः । लक्ष्मणो रावणिं रावणिश्चापि लक्ष्मणं प्राप्य ताभ्यामन्योन्यविग्रहे अन्योन्याभिभवे उभा अव्यवस्था भवति । अन्योन्यप्राप्तावयमेनं निगृह्णाति अयं वा एनमिति

१ वीर्यवानिति गो.पाठः । २ इदमर्धं गो.पु. नास्ति । ३ समासाविति गो.पा. । ४ युधीति गो.पाठः । ५ विनिर्मुक्तेति गो.पाठः । ६ हीति गो.पा. ।

अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे । ताभ्यामुभाभ्यां तरसा प्रैसृष्टैर्विशिखैः शितैः ॥ ३३ ॥
निरन्तरमिवाकाशं बभूव तमसा वृतम् । तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः ॥ ३४ ॥
दिशश्च प्रदिशश्चैव बभूवुः शरसंकुलाः । तमसा पिहितं सर्वमासीत्यतिभयं महत् ॥ ३५ ॥
अस्तं गते सहस्रांशौ संवृते तमसा च वै । रुधिरौघा महानद्यः प्रावर्तन्त सहस्रशः ॥ ३६ ॥
क्रव्यादा दारुणा वाग्भिश्चिक्षिपुर्भीमनिःस्वनान्[5] न तदानीं ववौ वायुर्न च जज्वाल पावकः ॥ ३७ ॥
स्वस्त्यस्तु लोकेभ्य इति जजल्पुस्ते महर्षयः । संपेतुश्चात्र संतप्ता गन्धर्वाः सह चारणैः ॥ ३८ ॥
अथ राक्षससिंहस्य कृष्णान्कनकभूषणान् । शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान् ॥ ३९ ॥
ततोऽपरेण भल्लेन पीतेन निशितेन च । संपूर्णायतमुक्तेन सुपत्रेण सुवर्चसा ॥ ४० ॥
महेन्द्राशनिकल्पेन सूतस्य विचरिष्यतः । स तेन बाणाशनिना तलशब्दानुनादिना ॥ ४१ ॥
लाघवाद्राघवः श्रीमाञ्छिरः कायादपाहरत् । स यन्तरि महातेजा हते मन्दोदरीसुतः ॥ ४२ ॥
स्वयं सारथ्यमकरोत्पुनश्च धनुरस्पृशत् । तदद्भुतमभूत्तत्र सौरथ्यं पश्यतां युधि ॥ ४३ ॥
हयेषु व्यग्रहस्तं तं विव्याध निशितैः शरैः । धनुष्यथ पुनर्व्यग्रं हयेषु सुमुचे शरान् ॥ ४४ ॥
छिन्नेषु तेषु बाणौघैर्विचरन्तमभीतवत्[13] । अर्दयामास समरे सौमित्रिः शीघ्रकृत्तमः[14] ॥ ४५ ॥

मिश्रयो नाभवदित्यर्थः । यद्वा रावणि लक्ष्मणो राजर्षिश्चापि लक्ष्मणं प्राप्य भयमध्येतामिति शेषः । ताभ्यांतथा युद्धं कुर्युरित्याम्, अन्योन्यविग्रहे परस्परप्रहारे क्रियमाणे उग्रा अव्यवस्था भवति । क्षणे क्षणे जयपराजयनियमो नास्तीत्यर्थः ॥ ३२-३३ ॥

३३-३४] ति० टी०—उग्राव्यवस्था तत्तद्वीरैरन्यथा-ज्ञानरराक्षसवधरूपा भवति । अभवदित्यर्थः । यत्तु अयमेनं निगृह्णाति स एनं वेत्यनियतरूपाव्यवस्थेति व्याख्यानं नविवक्षितम् । तस्या अव्यवस्थाया उग्रत्वस्य निरूपयितुमशक्यत्वात् । उग्रेति विशेषणवैयर्थ्यात् ॥ ३३ ॥ ३४ ॥

रा० टी०—ताभ्यामिति । ताभ्यां विसृष्टैः विशिखैराकाशं निरन्तरमिव अत एव तमसा वृतं बभूव ॥ ३३ ॥

रा० टी०—तैरिति । तयोः शरशतैः दिशः प्रदिशश्च शरसंकुला बभूवुः अत एव तमसा पिहितमत एव भीततरं सर्वमासीत् सार्द्धश्लोक एकान्वयि ॥ ३४ ॥

गो० टी०—तैः पतद्भिरित्यादिश्लोकद्वयमेकं वाक्यम् । शरशतैः निमित्तभूतैः महत् अत्यन्तम् ॥ ३४ ॥ ३५ ॥

३५-३६] ति० टी०—प्रतिभयं भयंकरम् ॥ ३५ ॥ ३६ ॥

रा० टी०—अस्तमिति । सहस्रांशौ अस्तं गते अत एव तमसैव संवृते सति रुधिरौघाः सहस्रशो महानद्यः प्रावर्तन्त ॥

गो० टी०—रुधिरौघेति । चिक्षिपुः चक्रुः ॥ ३६ ॥

३७-३९] ति० टी०—वाग्भिर्वाग्निन्द्यैः । क्रव्यादा गृध्रादयः ॥ ३७-३९ ॥

रा० टी०—क्रव्यादा इति । दारुणाः क्रव्यादाः गृध्रादयः भीमनिस्वनान् चिक्षिपुः वायुर्न ववौ ॥ ३६ ॥

रा० टी०—स्वस्तीति । महर्षयः लोकेभ्यस्त्वस्त्विति जजल्पुः गन्धर्वाः संपेतुः ॥ ३७ ॥

गो० टी०—अथेति । सौमित्रिः राक्षससिंहस्य चतुरो हयान् चतुर्भिः शरैर्विव्याध ॥ ३८ ॥

गो० टी०—न तदानीमित्यादि । अत्र युद्धस्थले पूर्वं संग्रामाः गन्धर्वाः चारणैः सह संपेतुः । अन्यत्र गता इत्यर्थः । अतिघोरयुद्धदर्शनभयादिति भावः ॥ ३७-३९ ॥

४०] ति० टी०—पीतेन स्वर्णरूपितेन । संपूर्णायतमुक्तेन संपूर्णमाकर्णपर्यन्तमायतेनाकृष्टेन ततो मुक्तेन ॥ ४० ॥

४१-४३] ति० टी०—विचरिष्यतो रथसंचारं कुर्वतः । तलशब्दानुनादिना तलं ज्याघातवारणं तस्य शब्दस्तस्यानुनादो यस्मिन्तत्र ॥ ४१-४३ ॥

रा० टी०—तत इति । पीतेन सुवर्णभूषितेन तदीयवर्णेन संपूर्णायतात् आकर्णमाकर्षणात् मुक्तेन महेन्द्राशनिकल्पेन इन्द्रवज्रतुल्येन भल्लेन भल्लाकृतिना तलशब्देन तलं ज्याघातवारणं तस्य शब्देन ज्यासंघट्टजनितस्वनेन योनुनादः तद्वता अपरेण बाणाशनिना बाणरूपवज्रेण विचरिष्यतः सूतस्य शिरः रावणः कायात्पाहरत् सार्द्धश्लोकद्वयमेकान्वयि ॥ ३९-४१ ॥

रा० टी०—स इति । मन्दोदरीसुतस्य इन्द्रजितः यंतरि हते सति सारथ्यं व्यधत्तकरात् धनुरस्पृशच्च ॥ ४२ ॥

रा० टी०—तदिति । सारथ्यं पश्यतां जनानां तत्सारथ्यकरणमद्भुतमभूत् अयं पृथक् ॥ ४३ ॥

गो० टी०—ततोऽपरेणेत्यादिसार्धश्लोकद्वयमेकान्वयम् संपूर्णायतमुक्तेन संपूर्णाकृष्टमुक्तेन ॥ ४०-४२ ॥

४४-४५] ति० टी०—हयेषु हयग्रहणविषये व्यग्रहस्तं दृष्ट्वा । तत्समय इति शेषः ॥ ४४ ॥ ४५ ॥

---

१ वीति गो. पाठः । २ संपृक्तमिति गो. पा. । ३ भीमस्वनान् गो. रा. पाठः । ४ संपृक्तमिति गो. पाठः । ५ एष इति गो. रा. पाठः । ६ सौमैः । षमहानथ इति गो. पाठः । ७ निःस्वनमिति गो. पाठः । ८ प्रासा इति गो. पाठ. । ९ शितेनेति गो. पाठः । १० सामर्थ्यमिति गो. पाठः । ११ व्यग्रे इति गो. पाठः । १२ छिन्नेष्विति गो. रा. पाठः । १३ बाणेष्विति गो. पाठः । १४ सौमित्रिः शीघ्रविक्रमः, अर्दयामास समरे विचरन्तमभीतवदिति गो. रा. पा. परं विक्रम इत्यस्य स्थाने कृत्तम इति भेदो रा. पुस्तके । समरे इत्यस्य स्थाने बाणौघैरिति गो. पु. ।

निहतं सारथिं दृष्ट्वा समरे रावणात्मजः । प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह ॥ ४६ ॥
विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः । ततः परमसंहृष्टा लक्ष्मणं चाभ्यपूजयन् ॥ ४७ ॥
ततः प्रमाथी रभसः शरभो गन्धमादनः । अमृष्यमाणाश्चत्वारश्चक्रुर्वेगं हरीश्वराः ॥ ४८ ॥
ते चास्य हयमुख्येषु तूर्णमुत्पत्य वानराः । चतुर्षु सुमहावीर्या निपेतुर्भीमविक्रमाः ॥ ४९ ॥
तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः । मुखेभ्यो रुधिरं व्यक्तं हयानां समवर्तत ॥ ५० ॥
ते हया मथिता भग्ना व्यसवो धरणीं गताः । ते निहत्य हयांस्तस्य प्रमथ्य च महारथम् ॥
पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः ॥ ५१ ॥
स हताश्वादवप्लुत्य रथान्मथितसारथिः । शरवर्षेण सौमित्रिमभ्यधावत रावणिः ॥ ५२ ॥
ततो महेन्द्रप्रतिमः सलक्ष्मणः पदातिनं तं निहतैर्हयोत्तमैः ।
भृजन्तमाजौ निशिताञ्छरोत्तमान्भृशं तदा बाणगणैर्व्यदारयत् ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

नवतितमः सर्गः ।

हताश्वसारथिरिन्द्रजित्कोपितकाल पदातिरेव युद्धा नगराद्रत्यमारुह्योपस्थितः पुनरपि परमदारुणं युद्धा परबलं प्रमथ्य चान्ते परमरोषणेन लक्ष्मणेनेन्द्रास्त्रेण वैष्णवास्त्रपुरस्कृतेन देवानामपीषां चामोघास्त्रदिदृक्षां महतीमुत्पाद्य समस्तकपुरुषप्रवीरानपि विषादोपहतसत्ववत्र लक्ष्मणमुद्दिश्य जयोद्योगश्च वर्णितः ।

स हताश्वो महातेजा भूमौ तिष्ठन्निशाचरः । इन्द्रजित्परमक्रुद्धः संप्रजज्वाल तेजसा ॥ १ ॥
तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम् । विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव ॥ २ ॥

रा० टी०—हयेष्विति । हयेषु तत्रियमनेषु व्यग्रहस्तं तमभिलक्षितं शरैरित्यादि यद्यपि चतुर्थचरणे व्यग्रं ज्ञात्वेति शेषः, हयेषु शरान् मुञ्चते ॥ ४४ ॥

रा० टी०—छिद्रेष्विति । सौमित्रिः छिद्रेषु उत्कायसंधिषु सत्सु, अभीतत्वाद्विचरन्तमिन्द्रजितमदर्शयामास ॥ ४५ ॥

गो० टी०—छिद्रेष्विति । छिद्रेषु रन्ध्रेषु, बाणेषु बाणप्रयोगेषु, शीघ्रविक्रम इत्यन्वयः ॥ ४६ ॥

४६-५०] ति० टी०—समरोद्धर्षं समरोत्साहं प्रजहौ त्यक्तवान् ॥ ४६-५० ॥

रा० टी०—निहतमिति । रावणात्मजः सारथिं निहतं दृष्ट्वा समरोद्धर्षं युद्धोत्साहं प्रजहौ अत एव विषण्णो बभूव ४६

रा० टी०—विषण्णेति । राक्षसं विषण्णवदनं दृष्ट्वा परमसंहृष्टाः हरियूथपाः लक्ष्मणमभ्यपूजयन् ॥ ४७ ॥

रा० टी०—तत इति । प्रमाथिप्रभृतयः चत्वारः अमृष्यमाणाः इन्द्रजिज्जीवितमसहमानास्तस्य वेगं चक्रुः ॥ ४८ ॥

गो० टी०—निहतमिति । समरोद्धर्षं युद्धवेगम् ॥४७-४९

रा० टी०—ते इति । ते प्रमाथिप्रभृतयः अस्येन्द्रजितो हयेषु निपेतुः ॥ ४९ ॥

गो० टी०—ते चास्येति । समहावीर्याः महावीर्यसहिताः ५०

रा० टी०—तेषामिति । वानरैरधिष्ठितानां हयानां मुखेभ्यः रुधिरं समवर्तत ॥ ५० ॥

गो० टी०—तेषामिति । रक्तं शोणितम् ॥ ५१-५२ ॥

५१-५३] ति० टी०—ते निहत्येति । क्रमभाविन इत्यर्थः ॥ ५१-५२ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोननवतितमः सर्गः । ८९ ॥

रा० टी०—त इति । मथिताः अङ्गभङ्गं प्रापिताः अत एव मथिताः अत एव व्यसवो हयाः धरणीं गताः बभूवुरिति शेषः अङ्गं पृथक् ते इति ते वानराः हयानिहत्य महारथं प्रमथ्य च पुनरुत्पत्य च लक्ष्मणपार्श्वतस्तस्थुः—स इति । रावणिः रथादवप्लुत्य सौमित्रिमभ्ययावत ॥ ५१ ॥ ५२ ॥

रा० टी०—तत इति । लक्ष्मणः हयोत्तमैर्निहतैः हेतुभिः पदातिनं शरोत्तमान् सृजन्तं तं रावणिं बाणगणैर्व्यदारयत् ५३

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

गो० टी०—तत इति । पदातिनं पदाभ्यामापतन्तं गच्छन्तम् । " अत, सातत्यगमने " इत्यस्माण्णिनिः ॥ ५४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवतितमः सर्गः ॥ ९० ॥

१-२] ति० टी०—विजयेन विजयप्राप्तिरूपेण हेतुना अभिमुखतया युद्धार्थं प्रवृत्तावभूतामिति शेषः गजवृषौ गजश्रेष्ठौ १-२

१ उत्प्लुत्येति गो.पा.। २ रक्तमिति गो.पा.। ३ सारथेरिति गो.रा.पा.। ४ निहितैरश्वरत्नमैरिति गो.पा.। ५ सुखन्तमिति गो.रा.पा.। ६ न्यवारयदिति गो.पा.।

निबर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः । भर्तारं न जहुर्युद्धे संपतन्तस्ततस्ततः ॥ ३ ॥
ततस्तान्राक्षसान्सर्वान्हर्षयन्रावणात्मजः । स्तुन्वानो हर्षमाणश्च इदं वचनमब्रवीत् ॥ ४ ॥
तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः । नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ॥ ५ ॥
धृष्टं भवन्तो युध्यन्तु हरीणां मोहनाय वै । अहं तु रथमास्थाय आगमिष्यामि संयुगे ॥ ६ ॥
तथा भवन्तः कुर्वन्तु यथेमे हि वनौकसः । न युध्येयुर्महात्मानः प्रविष्टे नगरं मयि ॥ ७ ॥
इत्युक्त्वा रावणसुतो वञ्चयित्वा वनौकसः । प्रविवेश पुरीं लङ्कां रथहेतोरमित्रहा ॥ ८ ॥
स रथं भूषयित्वार्थं रुचिरं हेमभूषितम् । पार्सासिशरगर्भयुक्तं युक्तं परमवाजिभिः ॥ ९ ॥
अधिष्ठितं हयज्ञेन सूतेनाशोपदेशिना । आरुरोह महातेजा रावणिः समितिंजयः ॥ १० ॥
स राक्षसगणैर्भुख्यैर्वृतो मन्दोदरीसुतः । निर्ययौ नगराद्वीरैः कृतान्तबलचोदितः ॥ ११ ॥
सोऽभिनिष्क्रम्य नगरादिन्द्रजित्परमौजसा । अभ्ययाज्जवनैरश्वैर्लक्ष्मणं सविभीषणम् ॥ १२ ॥
ततो रथस्थमालोक्य सौमित्रीं रावणात्मजम् । वानराश्च महावीर्या राक्षसश्च विभीषणः ॥ १३ ॥
विस्मयं परमं जग्मुर्लाघवात्तस्य धीमतः । रावणिश्चापि संक्रुद्धो रणे वानरयूथपान् ॥ १४ ॥
पातयामास बाणौघैः शतशोऽथ सहस्रशः । स मण्डलीकृतधनू रावणिः समितिंजयः ॥ १५ ॥
हरीनभ्यहनत्क्रुद्धः परं लाघवमास्थितः । ते वध्यमाना हरयो नाराचैर्भीमविक्रमैः ॥ १६ ॥

रा० टी०-इन्द्रजितो युद्धमेवाह—स इत्यादिभिः। धर्मौ तिष्ठन् अत एव परमक्रुद्ध इन्द्रजित् तेजसा संप्रजज्वाल ॥ १ ॥

गो० टी०-अथेन्द्रजिद्वधः—स हताश्व इत्यादि ॥ १ ॥

रा० टी०-तावितिं । विजयेन स्वस्वविजयप्राप्तीच्छया अभिनिष्क्रान्तौ अत एव गजवृषाविव अन्योन्यं जिघांसन्तौ बभूवतुरिति शेषः ॥ २ ॥

गो० टी०-तावितिं । विजयेनेति प्रयोजने तृतीया । विजयायेत्यर्थः । अभिनिष्क्रान्तौ बभूवतुरिति शेषः । गजवृषाविव गजश्रेष्ठाविव । यद्वा किंचिद्धीनबलत्वादिन्द्रजितो वृषभतुल्यत्वम् ॥ २ ॥

३] ति० टी०-निबर्हयन्तो मारयन्तः । भर्तारं स्वस्वभर्तारम् संपतन्तः संगच्छमानाः ॥ ३ ॥

रा० टी०-निबर्हयन्त इति । अन्योन्यं निबर्हयन्तो हिंसन्तो राक्षसवनौकसः भर्तारं संपतन्तोऽनुगच्छन्तस्तस्ततः न जहुः ॥ ३ ॥

गो० टी०-निबर्हयन्त इति । संपतन्तः परितः संचरन्त इत्यर्थः ॥ ३ ॥

४] ति० टी०-स्तुन्वान इत्यार्षम् । स्तुवन्निव्यर्थः ॥ ४ ॥

रा० टी०-तत इति । रावणात्मजः राक्षसान् हर्षयन् हर्षयितुं स्तुन्वानः स्तुवन् हर्षमाणश्च सन् इदमब्रवीत् ॥ ४ ॥

गो० टी०-तत इति । स्तुवानः स्तुवन् । आर्षः शानच् (?) ॥ ४ ॥ ५ ॥

५] ति० टी०-बहुलेन तमसा इमा दिशः संसक्ताः संवृताः । एवं चास्माकं बलकरी रात्रिरागता ॥ ५ ॥

रा० टी०-तदाकाङ्क्षाह—तमसेति । हे राक्षसोत्तमा दिशः बहुलेन तमसा संसक्ता व्याप्ताः अत एव स्वः परो वा न विज्ञायते वानरैरिति शेषः ॥ ५ ॥

६] ति० टी०-अतो भवन्तो धृष्टं निर्भयं युध्यन्तु । मोहनाय मद्गमनापरिज्ञानाय । त्वया किमर्थं गम्यते तदाह—अहं त्विति ॥ ६ ॥

रा० टी०-धृष्टमिति । हरीणां मोहनाय धृष्टं यथा भवति तथा भवन्तो युध्यन्तु अहं तु रथमास्थाय पुरस्थरथान्तरे स्थित्वा संयुगे आगमिष्यामि ॥ ६ ॥

गो० टी०-धृष्टमिति । मोहनाय मद्विगमनापरिज्ञानाय ॥ ६—८ ॥

७-९] ति० टी०-प्रविष्टे प्रवेष्टुमुपक्रान्ते न युध्येयुः । मम नगरप्रवेशविज्ञानार्थं यथा वानरा मया सह न युध्येरंस्तथा भवन्तः कुर्वन्त्वित्यर्थः ॥ ७—९ ॥

१०-१६] ति० टी०-हयज्ञेनाश्वहृदयज्ञेन । आर्षं हितसुपेतुं शीलमस्यस्य तेन ॥ १०-१६ ॥

रा० टी०-तथेति । मयि नगरं प्रविष्टे सति यथा इमे वानराः न युध्येयुः तथा भवन्तः कुर्वन्तु ॥ ७ ॥

रा० टी०-इतीति । रावणसुतः वनौकसो वञ्चयित्वा तज्ज्ञानविषयत्वमप्राप्येत्यर्थः रथहेतोः लंकां प्रविवेश ॥ ८ ॥

रा० टी०-स इति । स इन्द्रजित् प्राप्तादिसंयुक्तं हयज्ञेन सूतेन अधिष्ठितं रथं भूषयित्वा आरुरोह ॥ श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

१ स्तुवान इति गो. पाठः । २ सयुगमिति गो. पाठः । ३ काननौकस इति गो. रा. पा. । ४ दुरात्मान इति गो. रा.पाठः । ५ त्विति गो.पाठः । ६ शक्तेपूर्णमिति गो. शरक्षेपूर्णमिति रा. पाठः । ७ तूर्णमिति गो. रा. पा. । ८ परवीरहेति गो. रा. पाठः । ९ विक्रमा इति गो. रा. पाठः ।

सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः । ततः समरकोपेन ज्वलितो रघुनन्दनः ॥
चिच्छेद कार्मुकं तस्य दर्शयन्पाणिलाघवम् ॥ १७ ॥
सोऽन्यत्कार्मुकमादाय सज्यं चक्रे त्वरन्निव । तदप्यस्य त्रिभिर्बाणैर्लक्ष्मणो निरकृन्तत ॥ १८ ॥
अथैनं छिन्नधन्वानमाशीविषविषोपमैः । विव्याधोरसि सौमित्री रावणिं पञ्चभिः शरैः ॥ १९ ॥
ते तस्य कायं निर्भिद्य महाकार्मुकनिःसृताः । निपेतुर्धरणीं बाणा रक्ता इव महोरगाः ॥ २० ॥
स छिन्नधन्वा रुधिरं वमन्वक्त्रेण रावणिः । जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरम् ॥ २१ ॥
स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः । ववर्ष शरवर्षाणि वर्षाणीव पुरंदरः ॥ २२ ॥
मुक्तमिन्द्रजिता तत्तु शरवर्षमरिंदमः । आवारयदसंभ्रान्तो लक्ष्मणः सुदुरासदम् ॥ २३ ॥
संदर्शयामास तदा रावणिं रघुनन्दनः । असंभ्रान्तो महातेजास्तदद्भुतमिवाभवत् ॥ २४ ॥
ततस्तान्राक्षसान्सर्वांस्त्रिभिरेकैकमाहवे । अविध्यत्परमक्रुद्धः शीघ्रास्त्रं संप्रदर्शयन् ॥
राक्षसेन्द्रस्तु तं चापि बाणौघैः समताडयत् ॥ २५ ॥
सोऽतिविद्धो बलवता शत्रुणा शत्रुघातिना । असक्तं मेपयामास लक्ष्मणाय बहूञ्शरान् ॥ २६ ॥

रा० टी०—स इति । कृतान्तबलेन कालतेजसा चोदितः मन्दोदरीसुतः नगरान्निर्ययौ ॥ ११ ॥

रा० टी०—स इति । इन्द्रजित् नगरान्निष्क्रम्य जवेनैव रथिनं गवद्भिरश्वैः लक्ष्मणमभ्ययात् ॥ १२ ॥

गो० टी०—स रथमित्यादिश्लोकद्वयमेकान्वयम । भूपयित्वा स्वतेजसा भूषयित्वा । भासोपदेशिना दिनोपदेशिना ॥ ९—१२ ॥

रा० टी०—तत इति । रावणात्मजं रथस्थमालोक्य तस्य लाघवात् लाघवं संस्मृत्य सौमित्रिप्रभृतयः विस्मयं जग्मुः । लाघवादित्यत्र त्यब्लोप इति पञ्चमी सार्धश्लोक एकान्वयी ॥ १३ ॥

रा० टी०—रावणिरिति । रावणिः शतशः सहस्रशो वानरयूथपान् पातयामास ॥ १४ ॥

रा० टी०—स इति । मण्डलीकृतानि धनूंषि येन स रावणिः हरीन् अभ्यहनत् अभ्यहन् ॥ १५ ॥

रा० टी०—ते इति । वक्ष्यमाणा हरयः शरणं रक्षकं सौमित्रिं प्राप्ताः ॥ १६ ॥

गो० टी०—तत इत्यादि सार्धश्लोक एकान्वयः । ततः तस्मायुद्धप्रदेशात् ॥ १३—१७ ॥

१७] ति० टी०—समरकोपेन रावणिसमरजन्यकोपेन १७

रा० टी०—तत इति । सौमित्रिः तस्येन्द्रजितः कार्मुकं चिच्छेद ॥ १७ ॥

१८-१९] ति० टी०—त्वरन्निव शीघ्रमेव । तदपि द्वितीयं धनुरपि ॥ १८ ॥ १९ ॥

रा० टी०—स इति । स इन्द्रजित् अन्यत् कार्मुकमादाय सज्यं ज्यासहितं चक्रे तदपि कार्मुकं लक्ष्मणो निरकृन्तत १८

रा० टी०—अथेति । एनं रावणिं सौमित्रिः पञ्चभिश्शरैः उरसि विव्याध ॥ १९ ॥

गो० टी०—स इति । त्वरन्निवेति । इवशब्दो वाक्यालंकारे निरकृन्तत अच्छिनत् ॥ १८—२० ॥

२०-२३] ति० टी०—रक्ताः । बाणानामपि रुधिरसंबन्धाद्रक्तत्वम् ॥ २०-२३ ॥

रा० टी०—ते इति । ते लक्ष्मणप्रयुक्ताः बाणाः तस्येन्द्रजितः कायं निर्भिद्य रक्ता महोरगा इव निपेतुः ॥ २० ॥

रा० टी०—स इति । रुधिरं वमन्नपि रावणिः कार्मुकं श्रेष्ठं जग्राह ॥ २१ ॥

रा० टी०—स इति । परं लाघवमास्थितस्स रावणिः लक्ष्मणं समुद्दिश्य शरवर्षाणि ववर्ष ॥ २२ ॥

रा० टी०—मुक्तमिति । इन्द्रजिता मुक्तं दुरासदमन्यैर्निवारयितुमशक्यं शरवर्षं लक्ष्मणोऽवारयत् ॥ २३ ॥

गो० टी०—स भिन्नवर्मेति । अनेन पुनश्च कवचान्तरमपि स्वीकृतवानित्यवगम्यते ॥ २१—२३ ॥

२४] ति० टी०—संदर्शयामास । स्वपौरुषमिति शेषः॥२४

रा० टी०—समिति । रघुनन्दनः यत् वारणरूपं स्वपौरुषं संदर्शयामास तत् अद्भुतमन्येषामाश्चर्यमेवाभवत् ॥ २४ ॥

गो० टी०—दर्शयामासेति । दर्शयामास पराक्रममिति शेषः ॥ २४ ॥

२५] ति० टी०—ननु कथं सर्वराक्षसा इन्द्रजिति युध्यति त्रिभिस्त्रिभिर्बाणैर्वेद्धुं शक्यास्तत्राह—शीघ्रास्त्रमिति । प्रयोगमात्रेण सर्वविषयकमस्त्रं शीघ्रास्त्रम् । यद्वा भावप्रधानो निर्देशः । अस्त्रविषयकशीघ्रप्रयोगसामर्थ्यरूपं शीघ्रास्त्रत्वं संप्रदर्शयन्नित्यर्थः ॥ २५ ॥

२६] ति० टी०—असक्तमविरतम् ॥ २६ ॥

रा० टी०—तत इति । परमक्रुद्धो लक्ष्मणः सर्वान् राक्षसान्

---

१ सज्यमिति गो. रा. पाठः । २ भिन्नवर्मेति गो. रा. पाठः । ३ दर्शयामास चेति गो. पाठः । ४ सुतमिति गो. रा. पाठः ।

तानप्राप्तान्शितैर्बाणैश्चिच्छेद परवीरहा । सारथेरस्य च रणे रथिनो रथसत्तमः ॥ २७ ॥
शिरो जहार धर्मात्मा भल्लेनानतपर्वणा । असूतास्ते हयास्तत्र रथमूहुरविक्लवाः ॥ २८ ॥
मण्डलान्यभिधावन्ति तदद्भुतमिवाभवत् । अमर्षवशमापन्नः सौमित्रिरतिविक्रमः ॥ २९ ॥
प्रत्यविध्यद्धयांस्तस्य शरैर्वित्रासयन्रणे । अमर्षमाणस्तत्कर्म रावणस्य सुतो रणे ॥ ३० ॥
विव्याध दशभिर्बाणैः सौमित्रिं रोमहर्षणम् । ते तस्य वज्रप्रतिमाः शराः पर्वतिषोपमाः ॥
विलयं जग्मुरागत्य कवचं काञ्चनप्रभम् ॥ ३१ ॥
अभेद्यकवचं मत्वा लक्ष्मणं रावणात्मजः । ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित् ॥ ३२ ॥
अविध्यत्परमक्रुद्धः शीघ्रमस्त्रं प्रदर्शयन् । तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः ॥ ३३ ॥
रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः । स तथार्पितो बाणैः राक्षसेन तदा मृधे ॥ ३४ ॥
तमाशु प्रतिविव्याध लक्ष्मणः पञ्चभिः शरैः । विकृष्येन्द्रजितं युद्धे वदने शुभकुण्डले ॥ ३५ ॥
लक्ष्मणेन्द्रजितौ वीरौ महाबलशरार्चनौ । अन्योन्यं जघ्नतुर्वीरौ विशिखैर्भीमविक्रमौ ॥ ३६ ॥
ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ । रणे तौ रेजतुर्वीरौ पुष्पिताविव किंशुकौ ॥ ३७ ॥

त्रिभिश्शरैरेकैकमविध्यत् राक्षसेन्द्रसुतं तु बाणैर्वैरूप्यमनाडयन साईश्लोक एकान्वयी ॥ २६-२७ ॥

गो० टी०-ततस्तानित्यादिसार्धश्लोक एकान्वयः शीघ्रास्त्रं शीघ्रमन्त्रम् ॥ २६ ॥ २६ ॥

रा० टी०-स इति । शत्रुणा अतिविद्धः स इन्द्रजित् असक्तमास्थारहितं यथा भवति तथा लक्ष्मणाय बहून् शरान् प्रेषयामास ॥ २४ ॥

गो० टी०-स इति । असक्तम् अव्याहतम्, अविलम्बितं वा ॥ २४ ॥

२७] ति० टी०-रथसत्तमो लक्ष्मणः ॥ २७ ॥

रा० टी०-तानिति । तान् इन्द्रजित्प्रेषितान् अप्राप्तान् एव परवीरहा लक्ष्मणश्चिच्छेद अर्धे पृथक् ॥ २८ ॥

रा० टी०-सारथेरिति । रथसत्तमो लक्ष्मणः रथिनः अस्य इन्द्रजितः सारथेः चरणे शिरश्च भल्लेन जहार रणे इति छेदे तु शिर एव हस्तेः कर्म बोध्यम् ॥ २९ ॥

गो० टी०-तानप्राप्तानित्यादिसार्धश्लोक एकान्वयः । रथिनोऽस्य रावणेः सारथेरित्यन्वयः ॥ २८ ॥

२८-३०] ति० टी०-असूता असारथयः अविक्लवाः अनाकुलाः ॥ २८-३० ॥

रा० टी०-असूता इति । असूताः सूतरहिता हया रथमूहुः मण्डलानि अभिधावन्ति अभ्यधावन्त च तदद्भुतमिवाभवत् ॥ २९ ॥

रा० टी०-अमर्षेति । सौमित्रिस्तस्य हयान् शरैः प्रत्यविध्यत् ॥ ३१ ॥

रा० टी०-अमर्षमाण इति । तत् लक्ष्मणकर्तृकाश्वनिहननरूपं कर्म अमर्षमाणो रावणस्य सुतः दशभिर्बाणैस्सौमित्रिं विव्याध ॥ ३२ ॥

गो० टी०-असूता इति । अविक्लवाः अनाकुलाः । [illegible] शापाद्वानिष्टयादिति मन्तव्यम् ॥ २९ ३० ॥

३१ । ति० टी०-कवचभागस्य प्राप्य विलयं जग्मुः पूर्वकवचस्य विशरणेऽपि कवचान्तरं धृतमित्यागम्यते ॥ ३१

३१ टी०-ते इति । वज्रप्रतिमाः तस्येन्द्रजितश्शराः कवचं लक्ष्मणस्य [illegible] आगत्य प्राप्य विलयं जग्मुः ॥ ३१ ॥

गो० टी०-ते तस्येति । विलयं नाशम् ॥ ३१ ॥

३२-३४] ति० टी०-[illegible] दर्शनात्तमभेद्यकवचं मत्वा कवचरहिते स्थाने ललाटेऽविध्यत् ॥ ३२ ३४ ॥

३५] ति० टी०-शरासनं विकृष्येन्द्रजितो वदने शरौ व्यार्पयति संबन्धः ॥ ३५ ॥

रा० टी०-अभेद्येति । लक्ष्मणमभेद्यकवचं मत्वा त्रिभिर्बाणैर्ललाटे अविध्यत् साईश्लोक एकान्वयी ॥ ३४ ॥ ३५

गो० टी०-अभेद्येत्यादिसार्धश्लोक । अभेद्यकवचमित्यं पूर्वकवचस्य भग्नत्वात् कवचान्तरं धृतमिति ज्ञायते । शीघ्रास्त्रं च प्रदर्शयन् । आत्मनः शीघ्रास्त्रत्वं प्रदर्शयन्नित्यर्थः ॥ ३३ ।

रा० टी०-तैरिति । ललाटस्थैः सर्पाणामिव बाणत्वेन कल्पितैः पृषत्कैर्बाणैः किंशुक इव रघुनन्दनः शुशुभे ॥ ३३

गो० टी०-तैरिति । समरं श्लाघत इति समरश्लाघी समरप्रिय इत्यर्थः । पृषत्कैः बाणैः ॥ ३३ ॥

रा० टी०-स इति । राक्षसेन बाणैः तथार्पितोऽपि लक्ष्मणः शरान् निष्कृष्य शुभकुण्डले इन्द्रजितो वदने तमिन्द्रजितं पञ्चभिश्शरैः प्रतिविव्याध साईश्लोक एकान्वयी ॥ ३४ ॥

गो० टी०-स तथेत्यादिसार्धश्लोक एकान्वयः । विकृष्य धनुराकृष्य ॥ ३५ ॥

३६-३७] ति० टी०-विशिखैर्विशिष्टशिलैः । शिलैरिति यावत् ॥ ३६ ॥ ३७ ॥

---

१ रघुनन्दन इति गो. पाठः । २ धावन्त इति गो. पाठः । ३ मृष्यमाण इति गो. पाठः । ४ तममर्षणमिति गो. रा.पाठः । ५ शीघ्रास्त्रं चेति पाठः । ६ ह्यर्दित इति गो. पाठः । ७ बाणैरिति गो. रा. पाठः ।

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ । घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ॥ ३८ ॥
ततः समरकोपेन संयुतो रावणात्मजः । विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे ॥ ३९ ॥
अथोमुखैस्त्रिभिर्विद्ध्वा राक्षसेन्द्रं विभीषणम् । एकैकानभिविव्याध तान्सर्वान्हरियूथपान् ॥ ४० ॥
तस्मै दृढतरं क्रुद्धो जघान गदया हयान् । विभीषणो महातेजा रावणेः स दुरात्मनः ॥ ४१ ॥
स हताञ्चादवप्लुत्य रथान्मथितसारथिः । अथै शक्तिं महातेजाः पितृव्याय मुमोच ह ॥ ४२ ॥
तामापतन्तीं संप्रेक्ष्य सुमित्रानन्दवर्धनः । चिच्छेद निशितैर्बाणैर्दशधापाँतयद्भुवि ॥ ४३ ॥
तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः । वज्रस्पर्शसमान्पञ्च ससर्जोरसि मार्गणान् ॥ ४४ ॥
ते तस्य कायं भित्त्वा तु रुक्मपुङ्खा निमित्तगाः । बभूवुर्लोहिता दिग्धा रक्ता इव महोरगाः ॥ ४५ ॥
स पितृव्यस्य संक्रुद्ध इन्द्रजिच्छरमाददे । उत्तमं रक्षसां मध्ये यमदत्तं महाबलम् ॥ ४६ ॥
तं समीक्ष्य महातेजा महेषुं तेन संधितम् । लक्ष्मणोऽप्याददे बाणमन्यद्भीमपराक्रमः ॥ ४७ ॥
कुबेरेण स्वयं स्वप्ने यदत्तमपितात्मना । दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः ॥ ४८ ॥
तयोस्तु धनुषी श्रेष्ठे बाहुभिः परिघोपमैः । विकृष्यमाणे बलवत्कौञ्चाविव चुकूजतुः ॥ ४९ ॥

रा० टी०—लक्ष्मणेति । महती बले शरासने च ययोः तौ लक्ष्मणेन्द्रजितौ अन्योन्यं जघ्नतुः ॥ ३८ ॥

रा० टी०—तत इति । शोणिताभ्यामारुण्यरुचिराभ्यां देहावयवेभ्यो यौ तौ लक्ष्मणेन्द्रजितौ पुष्पितौ किंशुकाविव शुशुभतुः ॥ ३९ ॥

गो० टी०—लक्ष्मणेन्द्रजिताविति । विभिन्नैः विविधशिल्पैः । करवीरपत्रायाकारायैरित्यर्थः ॥ ३६ ॥ ३७ ॥

३८-४२] ति० टी०—जये कृतभावौ कृताभिप्रायौ ॥ ३८-४२ ॥

रा० टी०—ताविति । जये कृतः संस्थापित भावोऽभिप्रायो याभ्यां तौ धन्विनौ परस्परमभ्येत्य सर्वगात्रेषु विव्यधतुः॥३८॥

रा० टी०—तत इति । रावणात्मजः त्रिभिर्बाणैः विभीषणं वदने विव्याध ॥ ४१ ॥

रा० टी०—अथोमुखैरिति । विभीषणं त्रिभिरधोमुखैर्बाणैर्हत्वा एकैकेन बाणेन हरियूथपान् अभिविव्याध ॥ ४२ ॥

रा० टी०—तस्मा इति । तस्मै इन्द्रजिते दृढतरं क्रुद्धो विभीषणः रावणेर्हयान् गदया जघान ॥ ४३ ॥

गो० टी०—ताविति । जये कृतभावावित्यन्वयः ॥३८-४१

रा० टी०— स इति । मथितसारथिर्यस्य स इन्द्रजित् रथादवप्लुत्य पितृव्याय शक्तिं मुमोच ॥ ४४ ॥

गो० टी०—स इति । रथशक्ति रथेवस्थितां शक्तिम्॥४२॥४३

४३-४४] ति० टी०—दशधा चिच्छेद भुव्यपातयच्च ॥ ४३ ॥ ४४ ॥

रा० टी०—तामिति । सुमित्रानन्दवर्धनः आपतन्तीं तां शक्तिं संप्रेक्ष्य बाणैर्दशधा चिच्छेद अत एव सा भुवि अपतत् ॥ ४३ ॥

रा० टी०—तस्मा इति । तस्मै इन्द्रजिते क्रुद्धो विभीषणः पंच मार्गणान् बाणान् उरसि ससर्ज ॥ ४४ ॥

गो० टी०—तस्मा इति । दृढधनुः दृढधन्वा । समासान्तविधेरनित्यत्वात्समासः ॥ ४४ ॥

४५-४६] ति० टी०—निमित्तगा लक्ष्यगाः । वेध्यं लक्ष्यं शरव्यं च निमित्तं चेति कथ्यते । लोहितं रुधिरम् ॥४५॥४६॥

रा० टी०—ते इति । निमित्तगाः लक्ष्यं प्राप्ताः तस्य विभीषणस्य ते बाणाः रक्ता महोरगा इव लोहिता बभूवुः ॥ ४५ ॥

गो० टी०—ते तस्येति । निमित्तगाः लक्ष्यगाः । वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुरिति निघण्टुः ॥ ४५ ॥

रा० टी०—स इति । रक्षसां मध्ये विद्यमानः पितृव्यस्य पितृव्याय संक्रुद्ध इन्द्रजित् यमदत्तमुत्तमं शरमाददे ॥ ४८ ॥

गो० टी०—स पितृव्यायेति । रक्षसां मध्ये आदद इत्यन्वयः ॥ ४६ ॥

४७] ति० टी०—बाणशब्दोऽर्धर्चादिः ॥ ४७ ॥

४८-४९] ति० टी०—अमितात्मनापरिच्छिन्नमाहात्म्येन ॥ ४८ ॥ ४९ ॥

रा० टी०—तमिति । तेनेन्द्रजिता संहितं तं महेषुं समीक्ष्य लक्ष्मणोपि स्वप्ने कुबेरेण स्वयं यदत्तमत एव सुराद्यैरपि दुर्जयमत एव दुर्विषह्यं तदन्यद्बाणमाददे श्लोकद्वयमेकान्वयि ॥ ४९ ॥ ५० ॥

रा० टी०—तयोरिति । परिघोपमैः तयोर्बाहुभिः बलवद्यथा भवति तथा विकृष्यमाणे धनुषी कौञ्चाविव चुकूजतुः ५१

गो० टी०—तं समीक्ष्येत्यादिश्लोकद्वयमेकान्वयम् । महात्मना अप्रमेयबुद्धिना । भाविदृत्तान्तज्ञेनेति यावत् ॥४७-५०

---

१ निहतसारथेरिति गो. पाठः । २ रथेति गो. पाठः । ३ सापतदिति गो. रा. पाठः । ४ भिलेति रा. निर्भिवेति गो. पाठः । ५ पितृव्यायेति गो. पाठः । ६ बल इति गो. पाठः । ७ संहितमिति गो. रा. पाठः । ८ अन्यमिति गो. पा. । ९ यदस्मै दत्तं महात्मनेति गो. पाठः ।

ताभ्यां तु धनुषि श्रेष्ठे संहितौ सायकोत्तमौ । विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया ॥ ५० ॥
तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ । मुखेन मुखमाहत्य संनिपेततुरोजसा ॥ ५१ ॥
संनिपातस्तयोश्चासीच्छरयोर्घोररूपयोः । सधूमविस्फुलिङ्गश्च तज्जोऽग्निर्दारुणोऽभवत् ॥ ५२ ॥
तौ महाग्रहसंकाशावन्योन्यं संनिपत्य च । सङ्ग्रामे शतधा यातौ मेदिन्यां चैव पेततुः ॥ ५३ ॥
शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि । व्रीडितौ जातरोषौ च लक्ष्मणेन्द्रजितौ तदा ॥ ५४ ॥
स संरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे । रौद्रं महेन्द्रजिद्युद्धेऽप्यमूजद्युद्धैर्विचेष्टितः ॥ ५५ ॥
तेन तद्विहतं शस्त्रं वारुणं परमाद्भुतम् । ततः क्रुद्धो महातेजा इन्द्रजित्समितिंजयः ॥
आग्नेयं संदधे दीप्तं सलोकं संक्षिपन्निव ॥ ५६ ॥
सौमित्रेणास्त्रेण तं वीरो लक्ष्मणः पर्यवारयत् । अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः ॥ ५७ ॥
आददे निशितं बाणमासुरं शत्रुदारणम् । तस्माच्चापाद्विनिष्पेतुर्भास्वराः कूटमुद्गराः ॥ ५८ ॥
शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः । तदृष्ट्वा लक्ष्मणः संरुषे घोरमस्त्रं सुदारुणम् ॥ ५९ ॥
अवार्यं सर्वभूतानां सर्वशस्त्रविदारणम् । माहेश्वरेण धृतिमांस्तदस्त्रं प्रत्यवारयत् ॥ ६० ॥
तयोः समभवद्युद्धमद्भुतं रोमहर्षणम् । गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् ॥ ६१ ॥

५०] ति० टी०–संहितौ योजितौ ॥ ५० ॥

रा० टी०–ताभ्यामिति । ताभ्यां नरराक्षसाभ्यां श्रेष्ठे धनुषि संहितौ अत एव विकृष्यमाणौ सायकोत्तमौ श्रिया जज्वलतुः ॥ ५२ ॥

५१] ति० टी०–संनिपेततुः संघर्षं प्रापतुः ॥ ५१ ॥

रा० टी०–ताविति । धनुर्भ्यां च्युतौ आकाशं भासयन्तौ विशिखौ मुखमाहत्य सन्निपेततुः ॥ ५३ ॥

गो० टी०–ताविति । सन्निपेततुः संघर्षं प्राप्तौ ॥ ५१ ॥

५२] ति० टी०–बाणसंनिपाताज्जातस्तज्जः ॥ ५२ ॥

रा० टी०–सन्निपात इति । तयोश्छरयोः यः सन्निपात आसीत् तज्जो दारुणोऽग्निरभवत् ॥ ५४ ॥

गो० टी०–सन्निपात इति । तज्जः सन्निपातजः ५२-५६

५३] ति० टी०–महाग्रहोऽङ्गारकशन्यादिः ॥ ५३ ॥

रा० टी०–ताविति । अन्योन्यं सन्निपत्य शतधा यातौ शरौ मेदिन्यां पेततुः ॥ ५३ ॥

५४-५५] ति० टी०–व्रीडितौ स्वस्वप्रयुक्तशरस्य मोघत्वदर्शनेन संजातलज्जौ । यद्यपि रावणेरेव व्रीडा युक्ता, लक्ष्मणस्य तु तद्बाणनिवारणाय प्रयोक्तुः सार्थक्यसत्त्वेन व्रीडाभावः, तथापि तन्निराकरणपूर्वकं रिपुवधपर्यन्तव्यापारोपादानात्तदभावेन तस्यापि लज्जेति बोध्यम् । छन्दोऽनुरोधेन द्विवचनप्रयोग इति कतकः । जातरोषौ रामाविशेषे विभीषणे बाणः प्रयुक्त इति लक्ष्मणस्य रोषः । लक्ष्मणस्तं परिरक्षतवानिति रावणे रोषः ॥ ५४ ॥ ५५ ॥

रा० टी०–द्वाराविति । उभौ लक्ष्मणेन्द्रजितौ शरौ प्रतिहतौ दृष्ट्वा व्रीडितौ जातरोषौ च बभूवतुरिति शेषः ॥ ५६ ॥

गो० टी०–सुसंरब्ध इति । सौमित्रिः वारुणमस्त्रमाददे व्यसृजच्च इन्द्रजिदपि रौद्रमस्त्रमाददे व्यसृजच्च तेनेति तदस्त्रं तेनेन्द्रजिता विहतं स्वास्त्रेण विनाशितं माहेश्वरेण ॥ ५७ ॥

५६] ति० टी०–लोकं संक्षिपन्निव संहरन्निव ॥ ५६ ॥

रा० टी०–तत इति । ततः लक्ष्मणकर्तृकपूर्वशरप्रचालनात् लोकं संक्षिपन्निव क्रुद्ध इन्द्रजित् आग्नेयमस्त्रं संदधे ॥ ५८ ॥

गो० टी०–तत इति । संक्षिपन् संहरन् ॥ ५७ ॥

५७-६१] ति० टी०–'शस्त्रं निवारितम्' इति पाठे शस्त्रशब्दोऽस्त्रपर्यायः ॥ ५७-६१ ॥

रा० टी०–सौमित्रेणेति । लक्ष्मणः सौमित्रेणास्त्रेण तमस्त्रं पर्यवारयत् पृथक् अस्त्रमिति रावणिः आसुरं बाणं बाणसंयोजितचापमादत्त ॥ ५९ ॥

गो० टी०–सौमित्रेणेति । सौम्येन मयूखेनास्त्रेण । "सूर्ये विष्यागस्त्य०" इत्यादिना यलोपः ॥ ५८ ॥ ५९ ॥

रा० टी०–तस्मादिति । तस्मात् चापात् कूटमुद्गरादयः विनिष्पेतुः ॥ ६० ॥

गो० टी०–तस्मादिति । असुराज्ञप्रयोगाहेतोः, चापात् इन्द्रजिद्धनुषोपादानात्, कूटमुद्गरादयो विनिष्पेतुरित्यन्वयः भुशुण्ड्यः मुसलविशेषाः ॥ ६० ॥

रा० टी०–तदिति । लक्ष्मणः सर्वभूतानामवार्यं घो

१ ताविति गो. रा. पाठः । २ यात्ताविति गो. पाठः । ३ विनीते गो. पाठः । ४ स्विति गो. रा. पाठः । ५ युधीति गो.रा.पाठः । ६ सस्त्रमिति गो. चास्त्रमिति रा. पाठः । ७ सौरभेति गो. पाठः । ८ तदिति गो.रा.पाठः । ९ असुरं शत्रुनाशाय घोरमस्त्रं समादत्ते इति गो. पाठः । १० दारुणमिति रा. पाठः । ११ अथासुरमिति गो. पाठः । १२ नाशनमिति गो. पाठः । १३ सुतुमुलं युद्धं संबभूवाद्भुतोपममिति गो. पाठः ।

भैरवाभिरुते भीमे युद्धे वानररक्षसाम् । भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ॥ ६२ ॥
ऋषयः पितरो देवा गन्धर्वगरुडोरगाः । शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ॥ ६३ ॥
अथान्यं मार्गणश्रेष्ठं संदधे राघवानुजः । हुताशनसमस्पर्शं रावणात्मजदारणम् ॥ ६४ ॥
सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् । सुवर्णविकृतं वीरः शरीरान्तकरं शरम् ॥ ६५ ॥
दुरावारं दुर्विषहं राक्षसानां भयावहम् । आशीविषविषप्रख्यं देवसङ्घैः समर्चितम् ॥ ६६ ॥
येन शक्रो महातेजा दानवानजयत्प्रभुः । पुरा देवासुरे युद्धे वीर्यवान्हरिवाहनः ॥ ६७ ॥
ऐन्द्रमिन्द्रस्य सौमित्रिः संयुगेष्वपराजितम् । शरश्रेष्ठं धनुःश्रेष्ठे विकर्षन्निदमब्रवीत् ॥ ६८ ॥
[संधायामित्रदलनं विचकर्ष शरासनम् । सज्यमायम्य दुर्धर्षः कालो लोकक्षये यथा ॥
संधाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत् ।]
लक्ष्मीवांल्लक्ष्मणो वाक्यमर्थसाधकमात्मनः । धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि ॥
पौरुषे चाप्रतिद्वन्द्वस्तैदैनं जहि रावणिम् ॥ ६९ ॥
इत्युक्त्वा बाणमाकर्णं विकृष्य तैमजिह्मगम् । लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति ॥
ऐन्द्रास्त्रेण समायुज्य लक्ष्मणः परवीरहा ॥ ७० ॥
तच्छिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् । प्रमथ्येन्द्रजितः कायात्पातयामास भूतले ॥ ७१ ॥

तदस्त्रं दृष्ट्वा माहेश्वरेणास्त्रेण तदस्त्रं प्रत्यवारयत् स्वाहं श्लोक एकान्वयी ॥ ६१ ॥ ६२ ॥

गो० टी०—तद्दृष्ट्वेत्यादिसार्धश्लोक एकान्वयः । क्रियाद्वयार्थं तदस्त्रमिति द्विरुक्तिः ॥ ६१ ॥

रा० टी०—तयोरिति । तयोः अस्त्रयोर्युद्धं समभवत् अत एव गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् स्वस्वरक्षार्थं तत्र तस्थुः ॥ ६२ ॥

गो० टी०—तयोरिति । स्पष्टः ॥ ६२ ॥

६२-६३] ति० टी०—भैरवमभिरुतं यस्मिंस्तादृशे । भूतैः प्राणिभिः ॥ ६२ ॥ ६३ ॥

रा० टी०—भैरवेति । भैरवं भयंकरमभिरुतं शब्दो यस्मिन् तस्मिन् वानररक्षसां युद्धे विस्मितैर्बहुभिर्भूतैराकृतमाकाशं बभौ ॥ ६४ ॥

गो० टी०—भैरवेति । भैरवाभिरुते भयंकरशब्दे ॥ ६२ ॥

रा० टी०—ऋषय इति । ऋषिप्रभृतयः शतक्रतुं पुरस्कृत्य लक्ष्मणं ररक्षुः ॥ ६३ ॥

गो० टी०—ऋषय इति । ररक्षुः जय जयेत्याशीर्वादैरित्यर्थः ॥ ६४ ॥ ६५ ॥

६४] ति० टी०—संनिहितैतदस्त्रेणैवायं वध्य इति निश्चित्येन्द्रास्त्रं संदध इत्यादि—अथेति । अत्र प्रत्यस्त्रं रावणेरेवाशरपवशात्र वृद्ध्यारूढम् वस्तुतोऽस्य प्रत्यस्त्रं नास्त्येवेति कृतकः ६४

रा० टी०—अथेति । राघवानुजः अन्यं मार्गणश्रेष्ठमाददे अर्थं पृथक् श्रेष्ठत्वमुपपादयन्नाह—हुताशनेति । हुताशनसमः स्पर्शो यस्य शोभने पत्रे पुंखौ यस्य अनुवृत्तानि यथोक्तवृत्तस्वगुणविशिष्टानि अङ्गानि यस्य शोभनं संस्थितमवयवविन्यासो यस्य सुवर्णेन विकृतं भूषितं शरीरगणां रिपुदेहानामन्तकरमत एव रावणात्मजदारणम् दुर्विषहं दुस्सहं देवसङ्घैस्तपूजितम येन हरिवाहनोऽश्वारूढः शक्रः देवासुरे युद्धे दानवान् अजयत् तत् ऐन्द्रमिन्द्रदेवताकं शरश्रेष्ठं शरमस्त्रं धनुःश्रेष्ठे नरश्रेष्ठो लक्ष्मणोऽभिसंदधे सार्धश्लोकचतुष्टयमेकान्वयि ॥ ६६-६९ ॥

६५] ति० टी०—अनुवृत्ताङ्गमानुपूर्व्यानुवृत्तवद्वृत्तत्वगुणयुक्तमङ्गं यस्य । सुसंस्थितं शोभनसंस्थानम् । सुवर्णविकृतं स्वर्णभूषितम् ॥ ६५ ॥

६६-६८] ति० टी०—दुरावारमस्त्रान्तरैर्वारयितुमशक्यम् । आशीविषस्वगुणकं यद्विषं महासर्पस्तत्प्रख्यं तत्सदृशम् । देवसङ्घैः समर्चितं पूजितं देवराजीयत्वादेव ॥ ६६-६८ ॥

गो० टी०—सुपत्रमित्यादिश्लोकैकान्वया । अनुवृत्ताङ्गं वर्तुलस्वरूपम् सुसंस्थितं सुसंस्थानम् सुवर्णविचित्रितम । हरिवाहनः हरितवर्णाश्वः । ऐन्द्रमस्त्रम् ॥ ६६-६९ ॥

रा० टी०—सम्प्रधार्येति । दुर्धर्षो लक्ष्मणः शरासनं धनुराकृष्यानम्य सज्यं कृत्वा शरं संयोज्य च विचकर्ष ॥ ७० ॥

रा० टी०—संधायेति । विकर्षन् लक्ष्मणः अर्थसाधकमिदं वाक्यमब्रवीत् ॥ ७१ ॥

गो० टी०—संधायेति । अमित्रदलनं शत्रुनाशनम् । कालः यमः ॥ ७०-७२ ॥

६९-७१] ति० टी०—अर्थसाधनमात्मनः कार्यसिद्धिहेतुभूतमिदं वक्ष्यमाणवचनमब्राधिष्ठाभी देवतां प्रत्यब्रवीत् ६९-७१

---

१ गन्धर्वा इति गो. पाठः । २ दुर्वारमिति रा. पाठः । ३ विषह्यमिति गो. विषह्यमिति रा. पाठः । ४ दैवेति गो. पाठः । ५ तदेति गो. रा. पाठः । ६ नरश्रेष्ठोऽभिसंदधे इति गो. रा. पाठः । ७ इदं सार्धपद्यमधिकं गो. रा. तथापि दलनमित्यस्य स्थाने मथनमिति रा. पाठे । ८ श्रेरिति गो. रा. पाठः । ९ च महाबल इति रा. पाठः । १० स शिर इति गो. पाठः ।

तद्राक्षसतनूजस्य भिन्नस्कन्धं शिरो महत् । तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम् ॥ ७२ ॥
हतः सैः निपपाताथ धरण्यां रावणात्मजः । कवची सशिरस्त्राणो विप्रविद्धशरासनः ॥ ७३ ॥
चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः । हृष्यन्ते निहते तस्मिन्देवा वृत्रवधे यथा ॥ ७४ ॥
अथान्तरिक्षे भूतानामृषीणां च महात्मनाम् । जज्ञेऽर्थं जयसंनादो गन्धर्वाप्सरसामपि ॥ ७५ ॥
पतितं सैन्यमिज्ञाय राक्षसी सा महाचमूः । वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः ॥ ७६ ॥
वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः । लङ्कामभिमुखाः सस्रुर्भ्रष्टमंज्ञाः पथाविताः ॥ ७७ ॥
दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः । त्यक्त्वा प्रहरणान्सर्वे पट्टिशासिपरश्वधान् ॥ ७८ ॥
केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः । समुद्रे पतिताः केचित्केचित्पर्वतमाश्रिताः ॥ ७९ ॥
हतमिन्द्रजितं दृष्ट्वा शयानं च रणक्षितौ । राक्षसानां सहस्रेषु न कश्चित्पर्यदृश्यत ॥ ८० ॥
यथास्तं गत आदित्ये नावतिष्ठन्ति रश्मयः । तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः ॥ ८१ ॥
शान्तरश्मिरिवादित्यो निर्वाण इव पावकः । बभूव स महाबाहुर्व्यपास्तगतजीवितः ॥ ८२ ॥
प्रशान्तपीडाबहुलो विनेष्टारिः प्रहर्षवान् । बभूव लोकः पतिते राक्षसेन्द्रसुते तदा ॥ ८३ ॥
हर्षं च शक्रो भगवान्सह सर्वैर्महर्षिभिः । जगाम निहते तस्मिन्राक्षसे पापकर्मणि ॥ ८४ ॥
आकाशे चापि देवानां शुश्रुवे दुन्दुभिस्वनः । नृत्यद्भिरप्सरोभिश्च गन्धर्वैश्च महात्मभिः ॥ ८५ ॥

रा० टी०—सदृशकारं यद्ब्राह्म-धर्मात्मेति । दशरथी रामः इति धर्मात्मा धर्म एवात्मा मनो यस्य अधर्मसंसर्गशून्य इत्यर्थः अत एव सत्या संधा प्रतिज्ञा यस्य पौरुषे अप्रतिद्वन्द्वः समाधिरहित इत्यर्थः तदा एनं रावणिं जहि इति लक्ष्मण उक्त्वा आकर्णं बाणं विकृष्य इन्द्रजितं प्रति ससर्ज श्लोकद्वयमेकान्वयि ७२–७३

रा० टी०—ऐन्द्रेति । लक्ष्मणः ऐन्द्रास्त्रेण समायोज्य सशिरस्त्राणं शिरस्त्राणसहितं तस्यैन्द्रजितशिरः कायात्प्रमथ्य नेत्वा भूतले पातयामास साद्धश्लोक एकान्वयी ॥ ७४ ॥

गो० टी०—इत्युक्त्वेत्यादिसार्धश्लोक एकान्वयः ॥ बाणमैन्द्रास्त्रेण समायोज्य संसर्जेत्यन्वयः । एको लक्ष्मणशब्दो लक्ष्मीपरकवचनः लक्ष्मीवान् लक्ष्मणः श्रीलः श्रीमानित्यमरः ॥ ७२

गो०टी०—स शिरः सशिरस्त्राणमिति सार्धाभ्यां ७४–७६ ७२–८१] ति० टी०—तपनीयनिभमिति उपपत्तिः—हृष्यन्ति निहतमिति ॥ ७२–८१ ॥

रा० टी०—तदिति । राक्षसतनूजस्य तत् शिरः शिरो भूमौ ददृशे ॥ ७२ ॥

रा० टी०—हत इति । विप्रविद्धं शरासनं धनुर्यस्य स हतो रावणात्मजो धरण्यां निपपात ॥ ७३ ॥

रा० टी०—चुक्रुशुरिति । तस्मिन् इन्द्रजिति निहते सति वानराः हृष्यन्ते चुक्रुशुश्च ॥ ७४ ॥

रा० टी०—अथेति । अन्तरिक्षे भूतादीनां सत्वादः लक्ष्मणविजयोभूदिति शब्दः अभिजज्ञे ॥ ७५ ॥

रा० टी०—पतितमिति । पतितमिन्द्रजितं समभिज्ञाय निर्भिद्यमाना राक्षसी महाचमूः दिशो भेजे ॥ ७६ ॥

रा० टी०—वानरैरिति । वानरैर्वध्यमानाः अत एव भ्रष्टसंज्ञाः गतविवेकाः अत एव पथाविताः राक्षसाः लंकामभिमुखास्सन्तः सस्रुः जग्मुः ॥ ७७ ॥

रा० टी०—दुद्रुवुरिति । भीताः राक्षसाः पट्टिशादीन् प्रहरणान् त्यक्त्वा दुद्रुवुः ॥ ७८ ॥

रा० टी०—केचिदिति ॥ ७९ ॥

रा०टी०—हतमिति । हतमेव रणक्षितौ शयानमिन्द्रजितं दृष्ट्वा राक्षसानां सहस्रेषु कश्चिदाक्षस्यं न प्रत्यदृश्यत ॥ ८० ॥

रा०टी०—यथेति । आदित्ये अस्तं गते सति रश्मयः किरणाः यथा नावतिष्ठन्ति दृश्यन्त इत्यर्थः तथा तस्मिन् इन्द्रजिति निपतिते सति राक्षसाः दिशो गताः न दृश्यन्ते इत्यर्थः ॥ ८१ ॥

गो० टी०—हतमित्यिति । कवचीति । कवचादिभिः सह विध्वस्तः हतः धरण्यां निपपातेत्यन्वयः । ७६–८४ ॥

८२] ति० टी०—शान्तरश्मिरिति विशेषणभेदः, अत एव गतजीवितः ॥ ८२ ॥

रा०टी०—शान्तेति । महाबाहुरिन्द्रजित् व्यपास्तेन धर्मत्यागेन गतं जीवितं यस्य सः किञ्च व्यपास्तः पतितस्य एव गतजीवितो बभूव ॥ ८२ ॥

गो० टी०—शान्तरश्मिरिति । व्यपास्तगतजीवितः व्यपास्तो विशिष्टाङ्गो गतजीवितश्च, सः शान्तरश्मिरादित्य इव, निर्वाणः शान्तः, पावक इव च बभूव । निस्तेजस्को भूदित्यर्थः ॥ ८२ ॥

८३–८५] ति० टी०—प्रशान्तपीडाबहुलः प्रशान्तबहुलपीडः ॥ ८३–८५ ॥

१ क्षिति गो. रा. पाठः । २ विध्वस्तः सेति गो. पाठः । ३ हृष्यन्त इति गो. पाठः । ४ देवानामिति गो. रा. पाठः । ५ भावेतारमनामिति रा. पाठः । ६ अभिजज्ञे चेति गो. रा. पाठः । ७ तमिति गो. पाठः । ८ नष्टेति गो. पाठः । ९ समरेति गो. पाठः । १० तेजा इति गो. पठः । ११ नष्टाः प्रतापवानिति गो. पाठः । १२ सुरपैभिरिति रा. सुरपैरिति गो. पाठः । १३ क्रूरेति रा. पाठः ।

ववर्षुः पुष्पवर्षाणि तदद्भुतमिवाभवत् । प्रशशामै हते तस्मिन्राक्षसे क्रूरकर्मणि ॥ ८६ ॥
शुद्धा आपो नभश्चैव जह्रुर्देवैर्वदानवाः । आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे ॥ ८७ ॥
ऊचुश्च सहितास्तुष्टा देवगन्धर्वदानवाः । विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति ॥ ८८ ॥
ततोऽभ्यनन्दन्संहृष्टाः समरे हरियूथपाः । तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुंगवम् ॥ ८९ ॥
विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः । विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम् ॥ ९० ॥
क्ष्वेडन्तश्च प्लवन्तश्च गर्जन्तश्च प्लवंगमाः । लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥ ९१ ॥
लांगूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः । लक्ष्मणो जयतीत्येवं वाक्यं विश्रावयंस्तदा ॥ ९२ ॥
अन्योन्यं च समाश्लिष्य हरयो हृष्टमानसाः । चक्रुस्तावचगुणा राघवाश्रयसंश्रयाः ॥ ९३ ॥

तदसुकरमथाभिवीक्ष्य हृष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म ।
परममुपलभन्मनःप्रहर्षं विनिहतमिन्द्ररिपुं निशम्य देवाः ॥ ९४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

रा० टी०–प्रशान्तेति । रक्षोधिपात्मजे पतिते सति विनष्टारिः अत एव प्रशान्तपीडाबहुलो लोकः प्रहर्षवान् बभूव८६

रा० टी०–हर्षमिति । राक्षसे तस्मिन् निहते सति शक्रो हर्षं जगाम ॥ ८७ ॥

गो० टी०–प्रशान्तेति । इदमारभ्य लोकविशेषणम् । प्रशान्तपीडाबहुलः प्रशान्तबहुपीडः । प्रतापवान् सूर्यप्रकाशवान् । पूर्वं भयेन मन्दसूर्यत्वात् ॥ ८६ ॥ ८७ ॥

रा० टी०–आकाश इति । आकाशे अप्सरःप्रभृतिभिः देवानां दुन्दुभिस्वनः श्रुश्रुवे ॥ ८८ ॥

गो० टी०–आकाश इत्यर्धम् ॥ ८८ ॥

गो० टी०–नृत्यद्भिरिति । अप्सरोभिर्गन्धर्वैश्च कृतनर्तनगानजन्यस्वनः श्रुश्रुव इत्यर्थः । नृत्यद्भिरित्यत्र जीवभाव आर्षः ॥ ८९ ॥

८६] ति० टी०–प्रशशाम । रज इति शेषः ॥ ८६ ॥

रा० टी०–ववर्षुरिति । तत् इन्द्रजिद्धननमद्भुतमिव अभवत् अत एव पुष्पवर्षाणि ववर्षुः वव्रुः देवादय इति शेषः प्रशशाम महीरज इति शेषः ॥ ८९ ॥

गो० टी०–ववर्षुरिति । अत्रापि देवाः कर्तारः । वव्रुः प्रशशंसुश्च ॥ ९० ॥ ९१ ॥

८७–९०] ति० टी०–आपः शुद्धाः, प्रसन्ना देवदानवाः दानवानामपि तच्छत्रुत्वेनेषामपि हर्षः । आजग्मुरिति देवदानवा इत्यनुकर्षः ॥ ८७–९० ॥

गो० टी०–आजग्मुरित्यादिसार्धश्लोक एकान्वयः । देवगन्धर्वदानवाः आजग्मुः विचरन्त्वित्यूचुश्चेति संबन्धः ९२॥९६

रा० टी०–शुद्धा इति । आपो नभश्च शुद्धाः निर्मला अभवन्निति शेषः देवदानवा जह्रुः आजग्मुः तत्समीपं प्रापुश्च ॥ ९० ॥

रा० टी०–ऊचुरिति । सहिता हरियूथपा नैर्ऋतपुङ्गवं हतं दृष्ट्वा अभ्यनन्दन् देवादयो विज्वरास्सन्तो विचरन्त्वित्यूचुश्च श्लोकद्वयमेकान्वयि ॥ ९१ ॥ ९२ ॥

रा० टी०–विभीषण इति । विजयेनाभिनन्दन्तो विभीषणादयः लक्ष्मणं तुष्टुवुः ॥ ९३ ॥

९१] ति० टी०–लब्धलक्षाः प्राप्तहर्षावसराः । रलयोरभेदात्प्राप्तरक्षणा इत्यपि । रघुसुतं रघुवंशजम् ॥ ९१ ॥

रा० टी०–क्ष्वेडन्त इति । लब्धलक्षाः प्राप्तावसराः रलयोरैक्यात्प्राप्तरक्षणा वा अत एव क्ष्वेडादि कुर्वन्तः प्लवङ्गमाः रघुसुतं रघुवंशे जातं लक्ष्मणं परिवार्योपतस्थिरे ॥ ९४ ॥

९२-९३] ति० टी०–विश्रावयन्व्यश्रावयन् ॥९२॥९३॥

रा० टी०–लाङ्गूलानीति । वानराः लक्ष्मणो जयतीति वाक्यं विश्रावयन् व्यश्रावयन् ॥ ९२ ॥

रा० टी०–अन्योन्यमिति । उक्तावचगुणाः हरयः अन्योन्यं समाश्लिष्य राघवाश्रयसत्कथाश्चक्रुः ॥ ९३ ॥

गो० टी०–लाङ्गूलानीति । विश्रावयन् व्यश्रावयन् ॥ ९६ ॥ ९७ ॥

९४] ति० टी०–उपलभन्नुपालभन् ॥ ९४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

रा० टी०–उपसंहरन्नाह—तत इति । लक्ष्मणस्य प्रियसुहृदः असुकरमन्यैः कर्तुमशक्यं लक्ष्मणस्य कर्म अभिवीक्ष्य हृष्टाः बभूवुरिति शेषः देवाः अपि इन्द्ररिपुं निहतं निशम्य परमं मनःप्रहर्षमुपलभन् उपालभन् ॥ ९५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

गो० टी०–तदसुकरमिति । असुकरं दुष्करम, सर्वेषां

---

१ वव्रुरिति गो. पाठः । २ अभूत्तदेति गो. पाठः । ३ शशंसुरिति गो. पाठः । ४ देत्येति गो. पाठः । ५ सर्वे इति गो. पाठः । ६ क्ष्वेडेति रा. पाठः । ७ नदन्त्श्चेति गो. पाठः । ८ प्लमिति गो. रा. पाठः । ९ कपय इति गो. पाठः । १० जा इति गो. पाठः ।

एकनवतितमः सर्गः ।

इन्द्रजितं हत्वा सौमित्रिः राममुपजगाम ततो विभीषणमुखान्छुत्वा रावणिवधो रामः सौमित्रिं मुष्णिघ्राय बाहुं कृती यदविरादेव पुत्रहतिसंतप्तहृदयानने विजेष्यें इति सादरवचनैः संपूज्य सुषेणमन्यांश्च कपीन्मा विशल्यान्कुर्वित्यादिदेश च लक्ष्मणेन तथानुष्ठितेऽवजः कपयश्च विशल्या जहृषुः ।

रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः । बभूव हृष्टस्तं हत्वा शैवुतेतामाहवे ॥ १ ॥
ततः स जाम्बवन्तं च हनूमन्तं च वीर्यवान् । संनिपत्य महातेजास्तांश्च सर्वान्यचैकयः ॥ २ ॥
आजगाम ततः शीघ्रं[3] यत्र सुग्रीवराघवौ । विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः ॥ ३ ॥
ततो रामभिक्रम्य सौमित्रिरभिवाद्य च । तस्थौ भ्रातुरमीपस्थः शक्रस्येन्द्रानुजो यथा ॥ ४ ॥
निघ्नन्निव चागत्यै राघवाय महात्मने । आचचक्ष तदा वीरो घोरमिन्द्रजितो वधम् ॥ ५ ॥
रावणस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना । न्यवेदयत रामाय तदा हृष्टो विभीषणः ॥ ६ ॥
श्रुत्वैव तु महावीर्यो लक्ष्मणेनेन्द्रजिद्वधम् । प्रहर्षमतुलं लेभे धैर्यं चेदमुवाच ह ॥ ७ ॥

प्राणप्रतिष्ठापकमिति वा । प्रियसुहृद. स्वप्रियसुहृदः । उपलभित्यत्र भट्टात्मनेपदाभावार्षौ । देवाः इन्द्ररिपुं विनिहतं निशम्य परमं मनःप्रहर्षम् उपलभन्त उपालभन्त । अथ अमुकं तत् इन्द्रजिद्धननं प्रियसुहृदः लक्ष्मणस्य. कर्म कृतिविषयकृतम्, अभिवीक्ष्य हृष्टाः विस्मिताः । आसन्निति शेषः । "विस्मितप्रतिघातयोरिति वक्तव्यम्" इति ङीषः पाक्षिक डभावः । देवाश्चारणादिमुखेन प्रथमतोऽजिद्धननं श्रुत्वा संतुष्टाः सन्तः पश्चात्तस्यान्यन्ताशक्यहृदादतथ्यं मन्वानाः पुनर्भूमिभागत्य तत्प्रत्यक्षीकृत्य विस्मिता आसन्निति भावः॥९०॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

१] ति० टी०—रुधिरेति ॥ १ ॥

रा० टी०—इन्द्रजिद्धानन्तरकालिकं लक्ष्मणवृत्तान्तमाह-रुधिरेत्यादिभिः। तमिन्द्रजितं हत्वा रुधिरेण निहतेनेन्द्रजिच्छरीरोत्थितरक्तेन क्लिन्नं गात्रं यस्य स लक्ष्मणः हृष्टो बभूव ॥ १ ॥

गो० टी०—अथ लक्ष्मणश्लाघनं-रुधिरक्लिन्नगात्रेत्यादि १,

२] ति० टी०—संनिपत्य समृह्य ॥ २ ॥

३] ति० टी०—युद्धश्रमजपीडाद्यनादृत्याभीषणं हनूमन्तं चावष्टभ्य । अवलम्ब्येत्यर्थः ॥ ३ ॥

रा० टी०—तत इति । लक्ष्मणः जाम्बवत्प्रभृतीन सन्निपत्य गृहीत्वेत्यर्थः विभीषणं हनूमन्तं चावष्टभ्य यत्र राघवौ तत्र शीघ्रमाजगाम श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०—तत इत्यादिश्लोकद्वयमेकान्वयम् ॥ सन्निहत्य संघीभूय । अवष्टभ्य युद्धपारवश्यादवलम्ब्य ॥ २ ॥ ३ ॥

४] ति० टी०—अभिक्रम्य प्रदक्षिणीकृत्य । शक्रस्येन्द्रानुजो यथा यथोपेन्द्र इन्द्रसमीपे तिष्ठति तद्वत् । 'इन्द्रस्येव बृहस्पतिः' इति पाठे गुणपरिज्ञानसाधर्म्यावस्थानमात्रे दृष्टान्त इत्यर्थः ॥ ४ ॥

रा० टी०—तत इति । सौमित्रिः रामममिक्रम्य भ्रातुसमीपस्थमस्मत् शक्रस्य समीपस्थः उपेन्द्र इव तस्थौ ॥४॥

गो० टी०—तत इति । इन्द्रस्येव बृहस्पतिरिति पारतन्त्र्यमात्रे साम्यम् ॥ ४ ॥

५] ति० टी०—निघ्नन्निति । विभीषण इत्याकर्षः । हृष्टो विभीषणः संतुष्टागमनेनेन्द्रजिद्वधं निघ्नन्बोधयन्निव निकटमागत्य राघवाय सामान्यत इन्द्रजिद्वधमाचचक्षे ॥ ५ ॥

रा० टी०—निघ्नन्निति । वीरो लक्ष्मणः निघ्नन् प्रसादविशिष्टसुखदर्शनेनेन्द्रजितं कथयन्नेवागत्य इन्द्रजितो वधमाचचक्षे ॥ ५ ॥

गो० टी०—निघ्नन्निति । निघ्नन् अव्यक्ताक्षरं वदन्नित्यर्थः । इवशब्दो वाक्यालंकारे । * भायास्यायाभिनयनमात्रेणालीकत्वयोतनाय वा ॥ ५ ॥

६-७] ति० टी०—ततः किंकर्तृको वध इत्याकाङ्क्षायामाह—रावणेरिति । शिरमिति न्यवेदयत् ॥ ६ ॥ ७ ॥

रा० टी०—रावणेरिति । हृष्टो विभीषण लक्ष्मणेन छिन्नं रावणेशिरः रामाय न्यवेदयत ॥ ६ ॥

गो० टी०—राममन्त्रिणौ संकोचयता लक्ष्मणेनाविशेषेणेन्द्रजिद्वधकथनाद्विभीषणः स्पष्टतयाह—रावणेरिति । यद्वा लक्ष्मणेन सूचनयोक्तावपि हर्षप्रकर्षेण विभीषणः पुनराह—रावणेरिति ॥ ६ ॥

रा० टी०—श्रुत्वेति । महावीर्यो रामः लक्ष्मणेन कृतमिन्द्रजिद्वधं श्रुत्वैव अतुलं प्रहर्षं लेभे इदं वाक्यमुवाच ॥ ७ ।

१ शक्रेति गो. रा. पाठः । २ निहत्येति गो. पाठः । ३ तीव्रमेति गो. पाठः । ४ इन्द्रस्येव बृहस्पतिरिति गो. पाठः । ५ आगम्येति गो. पाठ । ६ रामो वाक्यमिति गो. रा. पाठः ।

साधु लक्ष्मण तुष्टोऽस्मि कर्म चासुकरं कृतम् । रावणेहि विनाशेन जितमित्युपधारय ॥ ८ ॥
स तं शिरस्युपाघ्राय लक्ष्मणं कीर्तिवर्धनम् । लज्जमानं बलात्स्नेहादङ्कमारोप्य वीर्यवान् ॥ ९ ॥
उपवेश्य तमुत्सङ्गे परिष्वज्यावपीडितम् । भ्रातरं लक्ष्मणं स्निग्धं पुनः पुनरुदैक्षत ॥ १० ॥
शल्यसंपीडितं शस्तं निःश्वसन्तं तु लक्ष्मणम् । रामस्तु दुःखसंतप्तं तं तु निःश्वासपीडितम् ॥ ११ ॥
मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च त्वरन् । उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभः ॥ १२ ॥
कृतं परमकल्याणं कर्म दुष्करकर्मणा । अद्य मन्ये हते पुत्रे रावणं निहतं युधि ॥ १३ ॥
अद्याहं विजयी शत्रौ हते तस्मिन्दुरात्मनि । रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे ॥ १४ ॥
छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः । विभीषणहनूमद्भ्यां कृतं कर्म महद्रणे ॥ १५ ॥
अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः । निरमित्रः कृतोऽस्म्यद्य निर्यास्यति हि रावणः ॥ १६ ॥
बलव्यूहेन महता निर्यास्यति हि रावणः । बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम् ॥ १७ ॥

गो० टी०–श्रुत्वेति । महावीर्यो राम इत्यन्वयः ॥ ७ ॥

८] ति० टी०–जितमित्युपधारय । इदानीमेवास्माभिरिति शेषः ॥ ८ ॥

रा० टी०–वाक्यावतारमाह—साध्विति । हि यतः रावणे विनाशेन जितं राक्षसवधजातमिति शेषः इत्युपधारय निश्चिनु अतः हे लक्ष्मण असुकरमन्यैर्दुष्करं कर्म त्वया कृतमतस्तुष्टोस्मि॥८॥

गो० टी०–साध्विति । सुकृतं कृतं सुकर्तव्यं कृतम् । कर्मणा युद्धकर्मणा ॥ ८ ॥

९] ति० टी०–लज्जमानं भ्रातुः संनिधावेवं कृतमिति वक्तुं लज्जया पुतम् । क्रियाबाहुल्याच्चैतेषु श्लोकेषु पुनःपुनः कर्मपदप्रयोगः । अङ्कमारोप्याङ्के उपवेशनायाकृत्य ॥ ९ ॥

१०] ति० टी०–अवपीडितम् । शल्यवणेनेति शेषः । यद्वावपीडितं गाढमालिङ्ग्य ॥ १० ॥

रा० टी०–स इति । लज्जमानमतिसत्कारप्राप्त्या प्राप्तकिंचिद्व्रीडं लक्ष्मणं सकलसल्लक्षणसंपन्नम् अङ्कमिन्द्रजिद्व्रणेन निश्शङ्कीकृतेन्द्रपदं प्राप्तं वा भ्रातरमत एवलब्धमृतसदृशं तं प्रसिद्धं लक्ष्मणमारोप्य गृहीत्वेत्यर्थः उत्संगे उपवेश्य च अवपीडितं यथा भवति तथा परिष्वज्य च पुनः पुनरुदैक्षत श्लोकद्वयमेकान्वयि यदि तु पूर्वश्लोके अतिहृदित्यध्याह्रियेत तदा पृथगन्वयः क्रियाकल्पना च न ॥ ९ ॥ १० ॥

गो० टी०–स तमित्यादिश्लोकद्वयमेकान्वयम् । आरोप्य आरोपणायाकृत्य । अवपीडितं शल्यपीडितं, गाढं यथा भवति तथेति वा । क्रियाबाहुल्यमिति द्विरुक्तिः ॥ ९ ॥ १० ॥

११–१२] ति० टी०–शस्तं कृतगात्रम् ॥ ११ ॥ १२ ॥

रा० टी०–शल्येनेति निश्चमन्तमत एव निश्वासेन पीडितं शल्येन संपीडा राक्षसपीडादातृत्वं जाता यस्य तमत एव दुःखेन संतप्तास्संतापिता येन तमत एव शस्तं राक्षसहिंसाकर्तारम् तं लक्ष्मणं भूर्ध्नि उपाघ्राय संस्पृश्य च त्वरन् उवाच श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–शल्यसंपीडितमित्यादिश्लोकद्वयमेकान्वयम् ॥ शस्तं प्रहृतम्, निश्वसितः स्वयं कृतनिश्वासः, त्वरन् संस्पृश्य । त्वरा च प्रहारव्यथापनयनायेति भावः ॥११॥१२॥

१३–१४] ति० टी०–दुष्करकर्मणेतरदुष्करकारिणेत्वयेति शेषः । पुत्रे हते रावणमप्य हतमेव मन्ये । तद्वधस्येपत्करत्वादिति भावः ॥ १३ ॥ १४ ॥

रा०टी०–तदाकारमाह–कृतमिति । पुत्रे हते सति रावणं निहत मन्ये अतो दुष्करकर्मणा त्वया परमकल्याणं कर्म कृतम् १३

गो० टी०–कृतमित्यादिसार्धश्लोकः । दुष्करकर्मणा त्वयेति शेषः ॥ १३ ॥

रा० टी०–अद्येति । शत्रौ इन्द्रजिति दिष्ट्या भाग्यवशेन त्वया हते सति अहं रावणस्य विजयी इति मन्ये इति शेषः१४

गो० टी०–रावणस्येति । व्यपाश्रयः आलम्बनम्॥१४॥

१५] ति० टी०–व्यपाश्रयोऽवलम्बनभूतः । एवं लक्ष्मणमाश्वास्य विभीषणादीनप्याश्वासयति–विभीषणेनेति ॥१५॥

रा० टी०–छिन्न इति । तस्य रावणस्य व्यपाश्रयः अवलम्बनभूमिर्दक्षिणो बाहुः तत्सदृश इन्द्रजित् विभिरहोरात्रै. विभीषणहनूमद्भ्यां सहितेन त्वया छिन्नो विघातितः अत एव कथंचित् निरमित्रः रिपुरहितः कृतोस्मि अतो महत्कर्म कृतं ननु रावणमत्वे कथं रिपुरहितत्वमित्यत आह बलव्यूहेन सहितं पुत्रं निपातितं श्रुत्वा रावणो हि यदि निर्यास्यति तर्हि पुत्रवधसंतप्तं सरावणं महता बलेनाहत्याहं निहनिष्यामि सार्द्धश्लोकत्रयमेकान्वयि ॥ १५–१७ ॥

गो० टी०–विभीषणेति । अहोरात्रैस्त्रिभिरिति । एकादशीद्वादशीत्रयोदशीभिरित्यर्थः ॥ १५ ॥

१६–१७] ति० टी०–अहोरात्रैस्त्रिभिरिति । दशम्यां चतुर्थप्रहरे आरभ्यात्रयोदश्यां चतुर्थप्रहरे वधादिति भावः । अथ निरमित्रः कृतोऽस्मि । कथं रावणे जीवति निरमित्रत्वं तत्राह—निर्यास्यतीति । अवश्यं निर्यास्यति ॥ १६॥१७॥

---

१ कर्मणा सुकृतमिति गो.पाठः । २ लक्ष्मि इति गो. पाठः । ३ तप्तस्तदा निःश्वसितो मुहुर्मुहुः इति गो. पाठः । ४ इदमर्धं गो.रा. पुस्तकयोर्नास्ति ।

तं पुत्रवधसंतप्तं निर्यान्तं राक्षसाधिपम् । बलेनावृत्य महता निहनिष्यामि दुर्जयम् ॥ १८ ॥
त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे । न दुष्प्रापा हते तस्मिञ्शक्रजेतरि चाहवे ॥ १९ ॥
स तं भ्रातरमाश्वास्य परिष्वज्य च राघवः । रामः सुषेणं मुदितः समाभाष्येदमब्रवीत् ॥ २० ॥
विशल्योऽयं महाप्राज्ञः सौमित्रिर्मित्रवत्सलः । यथा भवति सुस्वस्थस्तथा त्वं समुदाचर ॥ २१ ॥
विशल्यः क्रियतां क्षिप्रं सौमित्रिर्मित्रवत्सलः । ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम् ॥ २२ ॥
ये चाप्यन्येऽत्र युध्यन्ति सशल्या व्रणिनस्तथा । तेऽपि सर्वे प्रयत्नेन क्रियंतां सुविनिस्तथा ॥ २३ ॥
एवमुक्तः स रामेण महात्मा हरियूथपः । लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधम् ॥ २४ ॥
स तस्य गन्धमाघ्राय विशल्यः समपद्यत । तदा निर्वेदनश्चैव संरुढ्रव्रण एव च ॥ २५ ॥
विभीषणमुखानां च सुहृदां राघवाज्ञया । सर्ववानरमुख्यानां चिकित्सामकरोत्तदा ॥ २६ ॥
ततः प्रकृतिमापन्नो हृतशल्यो गतक्लमः । सौमित्रिर्मुमुदे तत्र क्षणेन विगतज्वरः ॥ २७ ॥
तदैव रामः प्लवगाधिपस्तथा विभीषणश्चर्क्षपतिश्च वीर्यवान् ।
अवेक्ष्य सौमित्रिमरोगमुत्थितं मुदा ससैन्याः सुचिरं जहर्षिरे ॥ २८ ॥
अपूजयत्कर्म स लक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा ।
बभूव हृष्टो युधि वानरेन्द्रो निशम्य तं शक्रजितं निपातितम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

१८] ति० टी०–निर्यान्तं च तं महता बलेन सहजेनाऽप्यक्षस्य निहनिष्यामि ॥ १८ ॥

गो० टी०–निर्यान्तमिति श्लोकद्वयमेकान्वयम् १८॥१९

१९] ति० टी०–हे लक्ष्मण, नाथेन । उपलालनार्थं नाथशब्दप्रयोगः ॥ १९ ॥

रा० टी०–त्वयेति । हे लक्ष्मण तस्मिन् इन्द्रजिति हते सति नाथेन पालकत्वेन त्वया सीता पृथिवी च न दुष्प्रापा १८

गो० टी०–त्वयेति । नाथेन याचमानेन । "नाथृ, याच्ञायाम्" इत्यस्मात्पचाद्यच् ॥ १८ ॥

२०] ति० टी०–समाभाष्य सुषेणेत्येतं संबोध्य ॥ २० ॥

रा० टी०–स इति । रामः भ्रातरमाश्वास्य सुषेणं समाभाष्य संबोध्य इदमब्रवीत् ॥ १९ ॥

गो० टी०–स तमिति । समाभाष्य आमन्त्र्य ॥ १९ ॥

२१–२२] ति० टी०–विशल्य इति । ओषधिपर्वतानयनोत्तरमोषध्यः सुषेणेन संगृह्य स्थापिता इत्येतेन ज्ञायते २२

रा० टी०–तदाकारताह—विशल्य इति । सौमित्रिः विशल्यः शल्यसंसर्गजनितश्रमरहितः अत एव सुखस्थः अत्यन्तं स्वस्थचित्तः यथा भवति तथा त्वं समुदाचर ॥ २० ॥

गो० टी०–सशल्योयमिति । समुपाचर चिकित्सां कुरु ॥ २० ॥

रा० टी०–विशल्य इति । सविभीषणस्सौमित्रिः विशल्यः शल्यसंसर्गजपीडारहितः क्रियतामत्र हनुमदनुवृत्त्या तस्मिन् श्रमाभावःसूचितः उपलक्षणत्वे तु नेयं व्याख्या तेन अद्धे पृथक् ॥२१॥

गो० टी०–विशल्य इति । श्लोकद्वयमेकान्वयम् ॥ ऋक्षवानरसैन्यानामिति निर्धारणे षष्ठी ॥ २१ ॥ २२ ॥

२३] ति० टी०–ये वानराः सशल्या व्रणिनश्च तेऽपि विशल्याः प्रकर्तव्याश्च कार्याः ॥ २३ ॥

रा० टी०–ऋक्षेति । ऋक्षवानरसैन्यानां मध्ये ये अन्यत्र रिपुसैन्ये युध्यन्ति अगृह्यन्त अत एव सशल्या व्रणिनश्च ते सर्वे प्रयत्नेन सुविनिः क्रियन्तां साङ्गलोक एकान्वयी ॥ २२ ॥

२४–२९] ति० टी०–ततः नाभिकायाम् ॥२४॥२९॥

इति श्रीगोविन्दराजे श्रीरामायणभूषणे रामायणशिरोलङ्के वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

रा० टी०–एवमिति । एवमुक्तः सुषेणः नस्तो नासामार्गेण परमौषधं लक्ष्मणाय ददौ स लक्ष्मणः तस्य गन्धमाघ्राय विशल्यस्समपद्यत एतेन ओषधपर्वतानयनसमये तेनौषधानि संगृहीतानीति सूचितम् साङ्गलोक एकान्वयी ॥ २३ ॥ २४ ॥

रा० टी०–तत इति । ततोनन्तरम विभीषणमुखानां सर्ववानरमुख्यानां च चिकित्सामकरोत् तदा चिकित्सोत्तरकाले निर्वेदनः पीडाराहित्यं संरुढव्रणत्वं च अभवदिति शेषः भावप्रधाने उभे सुषेणविशेषणत्वे तु नेयं कल्पना साङ्गलोक एकान्वयी ॥ २९ ॥

१ सशल्य इति गो. पाठः । २ उपाचरेति गो. पाठः । ३ सविभीषण इति गो. रा. पाठः । ४ क्रियन्तामिति गो. पाठः । ५ त्विति गो. पाठः । ६ औषधिमिति गो.पाठः। ७ तस्या इति गो.पाठः। ८ संरूढव्रण इति गो.रा.पाठः। ९ स तदाकरोदिति गो. तु तदाकरोदिति रा.पाठः । १० व्यथ इति गो. पाठः। ११ मुदित इति गो पाठः। १२ तत्रेति गो.पाठः। १३ आश्ववानिति गो.पाठः। १४ हृष्टा बभवर्युधि यथपेन्द्रा निपातितं शक्रजितं निशम्येति गो.पाठः

द्विनवतितमः सर्गः ।

सचिवमुखादिदितशक्रजिद्वधं सुमधश्चिराक्ष्यसंक्षोऽनलं विलप्य यन्निमित्तोऽयं विषादः सैव सीतेदानीं हन्यते मयेति तां हन्तुमुद्यतः कृपाणपाणी रावणः सुषार्श्वनामात्येन मेधाविना स्त्रीहतिर्निन्द्येत्याद्युपदेशपुरःसरमीतिवचनैः कथंचिन्निवारितो गृहं गत्वा सभां प्रविवेश ।

ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितो वधम् । आचचक्षुरवैजाय दशग्रीवाय सत्वराः ॥ १ ॥
युद्धे हतो महाराज लक्ष्मणेन तवात्मजः । विभीषणसहायेन मिषतां नो महाद्युतिः ॥ २ ॥
शूरः शूरेण संगम्य संयुगेष्वपराजितः । लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेन्द्रजित् ॥ ३ ॥
गतः स परमाँल्लोकाञ्छरैः संतर्प्य लक्ष्मणम् । स तं श्रुत्वा वधं पुत्रस्य दारुणम् ॥ ४ ॥
घोरमिन्द्रजितः संख्ये कश्मलं प्राविशन्महत् । उपलभ्य चिरात्संज्ञां राजा राक्षसपुंगवः ॥ ५ ॥
पुत्रशोकाकुलो दीनो विललापाकुलेन्द्रियः । हा राक्षसचमूमुख्य मम वत्स महाबल ॥ ६ ॥

रा० टी०–तत इति । हतः शत्रोः शस्त्रसंसर्गजनितपीडा यस्य अत एव गतः क्रमो ग्लानिर्यस्य अत एव प्रकृतिभापन्नः विगतज्वरः नित्यं ज्वरग्रस्तः किं च निर्वासितेन्द्रियसन्तापस्सौमित्रिः क्षणेन सुस्थः ॥ १ ॥

गो० टी०–एवमिति । नस्तः नासिकायाम् ॥ २ ॥

गो० टी०–स इति । विषेदः विषादसहितः ॥ २४–२६॥

रा० टी०–तमिति । रामादयः सौमित्रिमरोगमुत्थितम् वेदय जहर्षिरे जहर्षिरे ॥ २७ ॥

रा० टी०–अथेति । स रामः लक्ष्मणाय दुष्करं कर्म सुपूजयन् बानरस्त्रसंयोगैः अजिते निर्वासिते विशल्ये हृष्टो बभूव ॥ २८ ॥

इति श्रीमद्गोविन्दराजविरचितायां रामायणव्याख्यायां रामायणशिरोभूषणे युद्धकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

गो० टी०–तथेति । भद्रा युक्तमिति शेषः । सुखं युक्तं सौमित्रिमरोगं जहर्षिरे इति संबन्धः । जहर्षिरे इत्यत्र गुण आर्षः ॥ २७ ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विनवतितमः सर्गः ॥ ९२ ॥

१] ति० टी०–अथ रावणवृत्तान्तमाह—तत इत्यादि । सचिवा अवगिश्रुतपार्श्वादिमन्त्रिणः । अवजायेत्यत्र अवशिष्टा ज्ञा ज्ञाने गत्यर्थे तस्मै । पूर्वमेव यज्ञविघ्नेन निर्वासितेन्द्रियसन्तापेत्यर्थः । तीर्थे तु–अवजायाजिजायेत्यत्र दृष्ट्वा । दृष्ट्वा श्रुत्वा वधाद्युद्भूमिं गत्वा प्रेतस्त्रीकृत्यानन्तरमित्यर्थमाह ॥ १ ॥

गो० टी०–इदमिन्द्रजित्प्रयाणानन्तरकालिकं राक्षसवृत्तान्तमाह—तत इत्यादिभिः । पौलस्त्यसचिवाः इन्द्रजितो वधं श्रुत्वा अवजाय सर्वसन्मुखपानाद्यर्थं दशग्रीवायाचचक्षुः ॥ १ ॥

गो० टी०–अथ सीतावधोद्योगपर्यन्तो रावणस्य पुत्रशोकातिशय उच्यते—तत इत्यादि । पौलस्त्यसचिवाः रावणागारवर्तिनः सहायभूताः, इन्द्रजितं हतं श्रुत्वा स्वयमभिजाय साभिज्ञानं दृष्ट्वा, सत्वराः सन्तो रावणाय आचचक्षुः आचचक्षिरे । अथवा अभिज्ञायेति चतुर्थी । पूर्वमेव यज्ञविघ्नेन निर्वासितेन्द्रियायेत्यर्थः । अवजायेति पाठेपि चतुर्थीपक्षे अयमेवार्थः । पक्षान्तरे साक्षात्कारपर्यन्तदर्शनं पाठ्येत्यर्थः ॥ १ ॥

२] ति० टी०–मिषतां न इति । योद्धृराक्षसैर्देशकाल्यं विन्यायेन वीक्षणम् । मिषतो जात्यपेक्षयेत्यर्थः ॥ २ ॥

रा० टी०–तत्प्रकारमाह–युद्ध इति । विभीषणसहायो यस्य तेन लक्ष्मणेन शूरेण संगम्य संयुगेषु अपराजितोपि शूरस्तवात्मजो हतः साईलोकं प्रकाल्यर्थः ॥ ३ ॥

गो० टी०–युद्ध इति । मिषतां नः अस्मासु पश्यत्सु सत्स्वित्यर्थः । अनन्तरयोजनायामस्मान् लोकेत्यर्थः अलाद्रे षष्ठी ॥ ३ ॥

३] ति० टी०–विबुधान्दधानिन्द्रं च जयतीति विबुधेन्द्रजित् ॥ ३ ॥

रा० टी०–लक्ष्मणेनेति । विबुधेन्द्रजित् ते पुत्रः शरैः लक्ष्मणं संतर्प्य लक्ष्मणेन हतस्सन् परमान् लोकान् गतः ॥३॥

गो० टी०–शूर इत्यादिस्त्रिभिश्लोकैः एकान्वयः ॥ क्रियाभेदाच्छूरपदद्वयम् । विबुधेन्द्रजित् देवेन्द्रजित् ॥ ३ ॥

४] ति० टी०–परमाँल्लोकान् । वीरप्राप्यानिति भावः । दारुणं शोकजनकत्वात् । प्रतिभयमतिभयंकरम् ॥ ४ ॥

रा० टी०–स इति । स रावणः प्रतिभयं भयंकरं दारुणं दारकमत एव घोरमसहनीयमिन्द्रजितो वधं श्रुत्वा महत् कश्मलं मूर्छां प्राविशत प्राप ॥ ४ ॥

गो० टी०–स इति । दारुणं करुणम् घोरं तीक्ष्णम् । कश्मलं मूर्छाम् । मूर्छा तु कश्मलं मोह इत्यमरः ॥ ४–६ ॥

५–६] ति० टी०–घोरं तीक्ष्णम् । कश्मलं मूर्च्छाम् ५॥६

१ जितं इलीति गो. पाठः । २ अभीत्य गो. पाठः । ३ व्यथा इति गो. रा. पाठः । ४ क्षिति गो. पाठः । ५ संतापेति गो. पाठः । ६ चति गो. पाठः । ७ अर्दित इति गो. पाठः । ८ र्थेति गो. रा. पाठः ।

जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः । ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि॥ ७ ॥
मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं युधि । अद्य वैवस्वतो राजा भूयो बहुमतो मम ॥ ८ ॥
येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा । एष पन्थाः सुयोधानां सर्वामरगणेष्वपि ॥
यः कृते हन्यते भर्तुः स पुमान्स्वर्गमृच्छति ॥ ९ ॥
अद्य देवगणाः सर्वे लोकपाला महर्षयः । हतमिन्द्रजितं दृष्ट्वा सुखं स्वप्स्यन्ति निर्भयाः ॥ १० ॥
अद्य लोकास्त्रयः कृत्स्ना पृथिवी च सकानना । एकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे ॥ ११ ॥
अद्य नैर्ऋतकन्यानां श्रोष्यामन्तःपुरे स्वनम् । करेणुमद्रुस्य यथा निनादं गिरिगह्वरे ॥ १२ ॥
यौवराज्यं च लङ्कां च रक्षांसि च परंतप । भ्रातरं मां च भार्यां च क्व गतोऽसि विहाय नः ॥ १३ ॥
मम नाम त्वया वीर गतस्य यमसादनम् । प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे ॥ १४ ॥
स त्वं जीवति सुग्रीवे लक्ष्मणे न च राघवे । मम शल्यमनुद्धृत्य क्व गतोऽसि विहाय नः ॥ १५ ॥
एवमादिविलापार्तं रावणं राक्षसाधिपम् । आविवेश महान्कोपः पुत्रव्यसनसंभवः ॥ १६ ॥

रा० टी०—उपलभ्येति । राक्षसपुङ्गवः चिरात् संज्ञामुपलभ्य विललाप ॥ ६ ॥

रा० टी०—विलापकारणमाह—इत्यादिभिः । इन्द्रं जित्वा वियमानस्यं लक्ष्मणस्य वशं कथं गतः ॥ ६ ॥

७] ति० टी०—कालान्तकौ। कालः सर्वसंहारकः, अन्तकस्तथाधिकृतः ॥ ७ ॥

रा० टी०—मन्दिरेति । क्रुद्धो यस्त्वं मन्दरस्य शृङ्गाणि कालान्तकौ मृत्युयमावपि भिन्द्याः स त्वं लक्ष्मणं जित्वा इति शिष्टः ।

गो० टी०—ननु त्वमिति । ननु त्वमामन्त्रणे । कालान्तकौ यमश्च मृत्युमेदौ ॥ ७ ॥

८] ति० टी०—भूयो बहुमतो मयाल्पत्वं ख्यापितः ॥८॥

रा० टी०—अद्येति । येन हेतुना त्वं कालधर्मणा मृत्युना संयुक्तः तेन हेतुना अद्य वैवस्वतो मृत्युर्यो राजा बहु भूयो अत्यधिको मम मतो ज्ञातः ॥ ८ ॥

गो० टी०—अद्येति । भूयः अतिशयेन । कालधर्मणा मरणेन । आपोनित्य इमासान्तः । संयुक्तः संयोजितः ॥ ८ ॥

९] ति० टी०—येन वैवस्वतेन त्वं कालधर्मणा कालधर्मेण संयुक्तः संयोजितः । यो भर्तुः कृते हन्यते स पुमान्स्वर्गं गच्छति । एष पन्थाः सुयोधानां नरकोत्तरत्वानुयोधानां न केवलमेतत्त्वम्, किं तु देवादिगणेऽपीत्याह—सर्वामरगणेष्वपि । एवं युद्धमरणस्य सकलसुरजनाकाङ्क्षितत्वेन युद्धतस्त्वां न शोचामीति भावः ॥ ९ ॥ १० ॥

रा० टी०—एष इति । भर्तुः कृते स्वामिनार्थे यो हन्यते स पुमान् स्वर्गमृच्छति अतः सर्वामरगणेषु अपिना मनुष्यादिषु विद्यमानानां सुयोधानां एष स्वामिन्यर्थे शरीरत्याग एव पन्थाः स्वर्गमार्गः एतेन तव तु कल्याणमेवजातमिति सूचितम् ॥ ९ ॥

रा० टी०—अद्येति । देवगणादयः निर्भयास्सन्तः सुखं स्वप्स्यन्ति एतेन इदमेव मम महद्दुःखमिति सूचितम् ॥ १० ॥

गो० टी०—पुङ्गवस्य सर्वोत्कृष्टस्यापि हतं त्वां न शोचामीत्याह—एष इति । एषः पुङ्गवस्यापि पन्थाः ॥९॥

गो० टी०—यतो यतोऽयं शोकस्ततस्ततो स्वमर्यादामतिक्रान्तमाह—अद्य इति ॥ १० ॥ ११ ॥

११] ति० टी०—अयं लोकः पातालादारभ्य सप्तभिः पृथिव्याः पृथग्भूतैः सकानना निर्जीवत्वेन शून्यं । किं च मयैकेनेन्द्रजिता शून्या सर्वा दृष्टिर्मे प्रतिभाति ॥ ११ ॥

रा० टी०—अद्येति । शून्येव मे प्रतिभाति ॥ ११ ॥

१२-१३] ति० टी०—सर्वं गोचरम् ॥ १२ ॥ १३ ॥

रा० टी०—अद्येति । अन्तःपुरे नैर्ऋतकन्यानां स्वं नादं श्रोष्यामि ॥ १२ ॥

गो० टी०—अद्येति । लोकत्रय इत्यूर्ध्वाधो पृथिव्याः प्रत्येकावस्थानं पातालान्तं । पृथ्वी च इत्यत्र जलस्य वरिष्ठोऽयमत इत्यादौ ॥ १२ ॥

रा० टी०—यौवराज्यादीति । यौवराज्यादि विहाय त्वं क्व गतोऽसि ॥ १३ ॥

गो० टी०—यौवराज्यादीति । नः मामादिभि योजनीयम ॥ १३-१४ ॥

१४-१५] ति० टी०—मामेति अभिदो । मम त्वया प्रेतकार्याणि त्वं करिष्यसि । त्वं च विपरीते वर्तसे यत्तस्त्वदीयानि मया कर्तव्यानि भविष्यन्ति ॥ १४ ॥ १५ ॥

रा० टी०—ममेति । यमसादनं गतस्य मे प्रेतकार्याणि त्वया कार्याणि कर्तव्यानि अतः विपरीते पथि मार्गे त्वं हि कथं वर्तसे मां प्रवर्तयसि ॥ १४ ॥

रा० टी०—स इति । सुग्रीवादौ जीवति सति मम शल्यं दुरुद्धरमनुद्धृत्य नो विहाय क्व गतोऽसि ॥ १५ ॥

१६] ति० टी०—' रावणं च समाविगम ' इति पाठे सम्यगाधिः समाधिमनोव्यथा तां गच्छतीत्यर्थं इति तीर्थः १६

१ तथर्थं इति गो. पाठः । २ श्रुत्वेति गो. पाठः ।

प्रकृत्या कोपनं शेनं पुत्रस्य पुनराधयः । दीप्तं संदीपयामासुर्घर्मेऽर्कमिव रश्मयः ॥ १७ ॥
ललाटे भ्रुकुटीभिश्च संगताभिर्व्यरोचत । युगान्ते सह नक्रैस्तु महोर्मिभिरिवोदधिः ॥
कोपाद्विजृम्भमाणस्य वक्त्राद्व्यक्तमिवै ज्वलन् । उत्पपात सधूमाग्निर्दृत्रस्य वदनादिव ॥ १८ ॥
स पुत्रवधसंतप्तः शूरः क्रोधवशं गतः । समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद्वधम् ॥ १९ ॥
तस्य प्रकृत्या रक्ते च रक्ते क्रोधाग्निनापि च । रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः ॥ २० ॥
घोरं प्रकृत्या रूपं तत्तस्य क्रोधाग्निमूर्च्छितम् । बभूव रूपं रुद्धस्य रुद्रस्येव व्यवस्थितम् ॥ २१ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः । दीप्ताभ्यामिव दीप्ताभ्यां सार्चिषः स्नेहबिन्दवः॥ २२ ॥
दन्तान्विदशतस्तस्य श्रूयते दशनस्वनः । यन्त्रस्याकृष्यमाणस्य मथ्नतो दानवैरिव ॥ २३ ॥
कालाग्निरिव संक्रुद्धो यां यां दिशमवैक्षत । तस्यां तस्यां भयत्रस्ता राक्षसाः संविलिल्यिरे ॥
तमन्तकमिव क्रुद्धं चराचरचिखादिषुम् । वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः ॥ २४ ॥
ततः परमसंक्रुद्धो रावणो राक्षसाधिपः । अब्रवीद्रक्षसां मध्ये संस्तम्भयिषुराहवे ॥ २५ ॥
मया वर्षसहस्राणि चरित्वा परमं तपः । तेषु तेष्ववकाशेषु स्वयंभूः परितोषितः ॥ २६ ॥

रा० टी०—एवमिति । एवमादिविलापेन आर्त्तं रावणं पुत्रव्यसनसम्भवः महान् कोप आविवेश ॥ १६ ॥

१७-१८] ति० टी०—पुत्रस्याधयः पुत्रनाशजा आधयः । प्रकृत्या कोपनम्, अत एव दीप्तं नित्यं कोपदीप्तं पुनराधयो दीपयामासुः ॥ १७ ॥ १८ ॥

रा० टी०—प्रकृत्येति । प्रकृत्या कोपनमेनं रावणं पुत्रस्याधयः पुत्रमरणजनितव्यथाः घर्मे निदाघे दीप्तमर्कं रश्मय इव संदीपयामासुः ॥ १७ ॥

रा० टी०—कोपादिति । कोपात् विजृम्भमाणस्य रावणस्य वक्त्रात् अभिव्यज्वलन् स धूमाग्निः वृत्रस्य वदनादिव उत्पपात १८

गो० टी०—प्रकृत्येति । प्रकृत्या कोपनमित्यस्य विवरणम् दीप्तमिति । पुत्रस्य पुत्रसंबन्धिन्यः । पुत्रविषया इत्यर्थः । आधयः शोकाः पुनः भूयः संदीपयामासुः कोपयामासुः अकर्मपक्षे कृत्यामासुरित्यर्थः ॥ १४ ॥

गो० टी०—ललाट इति । भ्रुकुटीभिरिति बहुवचनं दशशिरस्कत्वात् ॥ १८-२३ ॥

१९-२२] ति० टी०—बुद्ध्या समीक्ष्य । वैदेह्या किल मे पुत्रवधमूलमित्यालोच्येत्यर्थः ॥ १९-२२ ॥

रा० टी०—स इति । रावणः बुद्ध्या अन्तःकरणेन समीक्ष्य सीतैव मत्पुत्रवधे निमित्तमिति निश्चित्य वैदेह्याः वधं रोचयत् अरोचयत् आगमशास्त्रस्यानित्यत्वादडभावः ॥ १९ ॥

रा० टी०—तस्येति । रावणस्य नेत्रे महाघोरे बभूवतुः २०

रा० टी०—घोरमिति । क्रोधाग्निमूर्छितं तस्य रूपं रुद्धस्य रुद्रस्य रूपमिव व्यवस्थितं बभूव ॥ २१ ॥

रा० टी०—तस्येति । दीप्ताभ्यां दीपाभ्यां स्नेहबिन्दव इव तस्य रावणस्य नेत्राभ्यामश्रुबिन्दवः प्रापतन् ॥ २२ ॥

२३] ति० टी०—यन्त्रस्य मन्दरारूपमथनयन्त्रस्य वासुकिना करणेन दानवैः कृष्यमाणस्य मथ्नतः क्षीराब्धिमथनं कुर्वतो मन्दरस्येव ॥ २३ ॥

रा० टी०—दन्तानिति । दानवैः आकृष्यमाणस्य अत एव मथ्नतः अमृतमन्थनं कुर्वतः यन्त्रस्य मन्दरारूपमन्थनस्य स्वन इव दन्तान् विदशतः तस्य रावणस्य दशनस्वनः श्रूयते ॥ २३॥

गो० टी०—दन्तानिति । आवेष्ट्यमानस्य भ्राम्यमाणस्य, यन्त्रस्य तिलपीडनयन्त्रस्य । दानवैर्बलवद्भिरित्यर्थः ॥ २४ ॥

गो० टी०—कालाग्निरिवेति । संविलिल्यिरे स्तम्भादिव्यवहिता बभूवुरित्यर्थः ॥ २५ ॥

२४] ति० टी०—नोपचक्रमुः समीपं न प्रापुः ॥ २४ ॥

रा० टी०—तमिति । क्रुद्धमन्तकमिव चराचरचिखादिषुं चराचरं खादितुमिच्छुमत एव सर्वाः दिशो वीक्षमाणं तं रावणं राक्षसा नोपचक्रमुः समीपं प्रापुः ॥ २४ ॥

गो० टी०—तमिति । चिखादिषुं संहर्तुमिच्छुमित्यर्थः । नोपचक्रमुः नोपसेदुः ॥ २६ ॥

२५] ति० टी०—आहवे युद्धे । संस्तम्भयिषुः प्रतिष्ठापयितुमिच्छुः । राक्षसानिति शेषः । द्वित्वाभाव आर्षः ॥ २५ ॥

रा० टी०—तत इति । परमसंक्रुद्धो रावणः आहवे संस्तंभयिषुः राक्षसान् प्रतिष्ठापयितुमिच्छुस्सन् रक्षसां मध्येऽब्रवीत् २५

गो० टी०—तत इति । संस्तम्भयिषुराहवे युद्धभीतान् राक्षसान् युद्धे स्थापयितुकामः । सनि द्विर्वचनाभाव आर्षः२७

२६] ति० टी०—अवकाशेषु तत्तत्तपःसमाप्तिसमयेषु स्वायंभुवस्थानविषयेषु वा ॥ २६ ॥

रा० टी०—तदाकारमाह—मयेति । वर्षसहस्राणि परमं-

१ इदं पद्यमधिकं गो. पाठे । २ अभीति गो. रा. पाठः । ३ दुरासदामिति गो. पाठः । ४ अस्रेति गो. पाठः । ५ दीप्ताभ्यामिव दीपाभ्यामिति गो. पाठ । ६ आवेष्ट्यमानस्येति गो. पाठः ७ महत इति गो. रा. पाठः । ८ इदं पद्यमधिकं गो. पाठे ।

तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयंभुवः । नासुरेभ्यो न देवेभ्यो भयं मम कदाचन ॥ २७ ॥
कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम् । देवासुरविमर्देषु न छिन्नं वज्रमुष्टिभिः ॥ २८ ॥
तेन मामद्य संयुक्तं रथस्थमिह संयुगे । प्रतीयात्कोऽद्य मामाजौ साक्षादपि पुरन्दरः ॥ २९ ॥
यत्तदाभिप्रसन्नेन सशरं कार्मुकं महत् । देवासुरविमर्देषु मम दत्तं स्वयंभुवा ॥ ३० ॥
अद्य तूणशतैर्भीमं धनुरुत्थाप्यतां मम । रामलक्ष्मणयोरेव वधाय परमाहवे ॥ ३१ ॥
स पुत्रवधसंतप्तः क्रूरः क्रोधवशं गतः । समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत ॥ ३२ ॥
प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनः । दीनो दीनस्वरान्सर्वास्तानुवाच निशाचरान् ॥ ३३ ॥
मायया मम वत्सेन वञ्चनार्थं वनौकसाम् । किंचिदेव हतं तत्र सीतेयमिति दर्शितम् ॥ ३४ ॥
तदिदं तस्यैवाहं करिष्ये प्रियमात्मनः । वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम् ॥
इत्येवमुक्त्वा सचिवान्खड्गमाशु परामृशत् ॥ ३५ ॥

पर्यरिक्ता तेषु तेषु अवकाशेषु तत्तत्पत्न्यभिसमयेषु स्वयं न परिशोषिता ॥ २६ ॥

गो० टी०—मयेति । अवकाशेषु तपःसमाप्तिषु ॥ २६ ॥

२७] ति० टी०—व्युष्ट्या फलोदयेन ॥ २७ ॥

रा० टी०—तस्येति । स्वयंभुवः प्रसादात्तस्य तपसो व्युष्ट्या फलोदयेन असुरादिभ्यो मम भयं न ॥ २७ ॥

गो० टी०—तस्येत्यादि । व्युष्ट्या समूहात् । व्युष्टिः इति पाठो वा । मयाभावे हेतुमाह—कवचमिति । यत् यस्मात् कवचमिति, तच्छब्दादिति, पूर्वेणान्वयः ॥२७-३०॥

२८] ति० टी०—मयाभावे हेतुमाह—कवचमिति ॥२८॥

रा० टी०—भयाभावे प्रमाणमाह—कवचमिति । ब्रह्मदत्तं यन्मे कवचं तत् देवासुरविमर्देषु मया सह देवासुरयोर्युद्धेषु छिन्नम् ॥ २८ ॥

२९] ति० टी०—कुतोऽत्यादरेणास्य पुनरुक्तिर्दोषाय । प्रतीयादभिमुखो भवेत् ॥ २९ ॥

रा० टी०—तेनेति । तेन भयप्राप्तिहेतुना आजौ रथस्थं निखिलेश्वराकर्तारं संयुगे संग्रामार्थं पुरन्दरः पुरदारणसमर्थोऽपि कः प्रतीयात् सम्मुखमागच्छेत् न कोऽपीत्यर्थः ॥ २९ ॥

गो० टी०—तेनेति । तेन कवचेन संयुक्तं रथस्थं मां इह संयुगे कः प्रतीयात् आभिमुख्येनागच्छेत् । अद्य मामाजौ साक्षात्पुरन्दरोऽपि न प्रतीयादिति च योज्यम । अत्र मामिद्धो वर्त्तमानः क्रियापदमस्त्येव । अनेकव्याख्याने अद्य मामाजाविति पुनरुक्तं स्यात् ॥ २९ ॥

३०] ति० टी०—तदेतस्य व्याख्यानम्—देवासुरविमर्देष्वित्यादि । तद्विषयेऽभिप्रसन्नेन प्रीतेन यद्दत्तदनम ॥ ३० ॥

३१] ति० टी०—तदथ तूणशतैरनेकमङ्गुल्यात्मकबाणैरेभिः सह परं पत्नुत्रेत्यादि यद्धनुरुत्थाप्यतामुद्धियताम् । आहवे रामलक्ष्मणयोर्वधाय ॥ ३१ ॥

रा० टी०—यदिति । देवासुरविमर्देषु अभिप्रसन्नेन स्वयंभुवा यद्मे दत्तं तदिदं मम कवचमद्य मामुद्दिश्य कार्मुकेण सायकैश्च उपलक्षितः सन्कः प्रतीयात्सोऽयमर्थः सर्वत्रैवान्वयेऽपि ॥ ३० ॥ ३१ ॥

गो० टी०—तस्यैत्यादिश्लोकद्वयमेकान्वयम् । तेषामयं विभागः तस्यैव तपसः प्रसादात् स्वयंभुवः । अद्य मामाजौ साक्षादपि पुरन्दरः कः प्रतीयात् नाभिमुख्येन इत्यर्थः ॥ ३० ॥ ३१ ॥

३२] ति० टी०—सीतां हन्तुं व्यवस्यत निश्चयमकरोत् ॥ ३२ ॥

३३] ति० टी०—प्रत्यवेक्ष्येति । तामाजौ रामलक्ष्मणसहायां दीनस्वरान् राक्षसान् पत्नीरक्षत्वेन चाह च ॥ ३३ ॥

गो० टी०—प्रत्यवेक्ष्येति । सर्वान् सचिवानिति ॥ ३३ ॥

३४] ति० टी०—किंचिदेव हतं सीतेयमिति दर्शितम् ॥ ३४ ॥ तत्र तस्मिन्काले इयं सीतेत्यवगता दर्शिता मयेति दर्शितं तदिदं मयाकृतमपि यत्कर्म तस्यैवात्मनः प्रियं स्यामिति करिष्ये ॥ ३४ ॥

रा० टी०—तदेतत्कारणमाह—माययेति । मम वत्सेन पुत्रेण वनौकसां वानराणां मायया किंचिदेव हतं तत्र रणभूम्यां इयं सीता इति दर्शितम् ॥ ३४ ॥

गो० टी०—मायेत्यादिश्लोकद्वयमेकान्वयम् ॥ सीतेयमिति दर्शितं निश्चयेन वनौकसामित्यर्थः ॥ ३४ ॥ ३५ ॥

गो० टी०—क्षत्रबन्धुमनुव्रताम् । परामृशत् मार्जत ॥ ३५ ॥

३५] ति० टी०—वैदेहीमिति । अवध्यत्वं वस्तुतोऽसम्भवम् ॥ ३५ ॥

रा० टी०—तदिति । तत्र पूर्वोक्तमिदं मायादर्शनं तस्यैव सत्यमेव करिष्यामि अत एव अवध्यत्वं रामक्षत्रबन्धुव्रतां सीतां नाशयिष्यामि इत्येवं सचिवान् उक्त्वा खड्गं परामृशत् अगृह्णात् सार्द्धश्लोक एकान्वयी ॥ ३५ ॥ ३६ ॥

१ भिन्नमिति गो. पाठः ।

उत्पत्त्य गुणमेकं विमलाम्बरवर्चसम् । निष्पपात स वेगेन सभार्यः सचिवैर्वृतः ॥ ३६ ॥
रावणः पुत्रशोकेन भृशमाकुलचेतनः । संक्रुद्धः खड्गमादाय सहसा यत्र मैथिली ॥ ३७ ॥
ततस्ते राक्षसं प्रेक्ष्य सिंहनादं विचुक्रुशुः । ऊचुश्चान्योन्यमालिङ्ग्य संक्रुद्धं प्रेक्ष्य राक्षसम् ॥ ३८ ॥
अनेन तापसौ हत्वा भ्रातरौ रणविश्रुतः । लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः ॥
बहवः अत्रतश्चान्ये संयुगेष्वभिपातिताः ॥ ३९ ॥
त्रिषु लोकेषु रत्नानि भुङ्क्ते आहृत्य रावणः । विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि ॥ ४० ॥
तेषां संजल्पमानानामशोकवनिकां गताम् । अभिदुद्राव वैदेहीं रावणः क्रोधमूर्च्छितः ॥ ४१ ॥
गायमाणः सुसंक्रुद्धः सुहृद्भिर्हितबुद्धिभिः । अभ्यधावत संक्रुद्धः खे ग्रहो रोहिणीमिव ॥ ४२ ॥
मैथिलीं रक्ष्यमाणां तु राक्षसीभिरनिन्दिताम् । ददर्श राक्षसं क्रुद्धं निशितासिपरश्वधम् ॥ ४३ ॥
तं निरीक्ष्य रुषाविष्टं व्यथिता जनकात्मजा । निवार्यमाणं बहुभिः सुहृद्भिर्नैर्ऋतेश्वरम् ॥ ४४ ॥
सीता दुःखसमाविष्टा विलपन्तीदमब्रवीत् । यथायं मामभिक्रुद्धः सर्वमिद्धमिति क्षयम् ॥
वधिष्यति रुषाविष्टो मामनार्यो यथेह दुर्मतिः ॥ ४५ ॥
तदृश्यतोदयामास भर्तारं मामनुव्रताम् । आर्यो मम भवत्वेष अस्यामापदि पूरुषः ॥ ४६ ॥

३६] ति० टी०—विमलाम्बरवर्चसं निर्मलवस्त्रकान्तिमन्तम् ॥ ३६ ॥

३७] ति० टी०—पुत्र० पुत्रशोकेन । विमलाम्बरवर्चसं कौशेयवस्त्रस्य ते गुणमेकं सहसोत्पत्य तत्र मैथिली यत्र विद्यते तत्र निष्पपात ॥ ३७ ॥ ३८ ॥

गो० टी०—उत्पत्त्येत्यादिश्लोकद्वयमेकं वाक्यम् ॥ गुणं भाण्डं गृहीत्वेत्यर्थः, विमलाम्बरवर्चसं निर्मलकौशेयवस्त्रम्, तद्गुणमेकं कौशेयवस्त्रं, तत्र मैथिली ते इति शेषः निष्पपात ॥ ३६ ॥ ४० ॥

३८] ति० टी०—सिंहनादं सिंहवद्गर्जनं कौशेयं कृतवन्तः । रुचिरा इति शेषः ॥ ३८ ॥

गो० टी०—ततस्ते इत्यत्र सिंहनादं राक्षसं दृष्ट्वा तापसं रावणं च प्रति संक्रुद्धं च प्रेक्ष्य अन्योन्यमूचुः । च विचुक्रुशुः तु ॥ ३८ ॥

गो० टी०—ऊचुश्चान्योन्यमित्यादिश्लोकद्वयमेकान्वयम् ॥ रत्नानि वस्तूनि । रत्नं स्त्रीजातिशोभनेऽपीत्यमरः ॥४१-४२॥

३९] ति० टी०—तेषां सिंहनादप्रभृतीनां ऊचुरित्यादि—अदैनामिति ॥ ३९ ॥

४०] ति० टी०—आहृत्य गृहीत्वा भुङ्क्ते ॥ ४० ॥

गो० टी०—तेषामित्यादि—अदैनामिति । उभौ रामलक्ष्मणौ च रावणं हत्वा अन्यायेन च बलेन हेतुना अनेन रावणेन लोकपालाः निर्जिताः ॥ ३९ ॥

गो० टी०—बहव इति । अन्येऽपि बहवो निपातिताः रत्नानि आहृत्य भुङ्क्ते अतः एव अस्य सदृशो न साङ्कर्येण गृहीतव्यो न ॥ ४१ ॥

४१] ति० टी०—अशोकवनिकां गतां [सीतां] दृष्ट्वा रावणो वैदेहीमभिदुद्राव ॥ ४१ ॥

४२ टी०—तदृश्यतोदयामास । तेषां तं रक्षःसमूहानां मध्ये रावणो वैदेहीमभिदुद्राव ॥ ४२ ॥

४२ ४३] ति० टी०—ग्रहः इवार्कः ॥ ४२ ॥ ४३ ॥

गो० टी०—अभ्यधावत इति । सुहृद्भिर्यथार्थवेत्तृभिः क्रूरबुद्धेः रावणस्य संक्रुद्धः यतो रोहिणीमिव अभ्यधावत ॥ ४२ ॥

गो० टी०—मैथिलीति । तृतीयं राक्षसं रावणं ददर्श ॥४३॥

गो० टी०—वार्यमाण इति । यतः अद्यापि [?] ॥४३॥४४॥

४४] ति० टी०—निशितासिपरश्वधमप्यविचेतनम् । ' अत्र चेतनम् ' इति पाठेऽविद्यमानचेतनम् ॥ ४४ ॥

गो० टी०—तामिति । दुःखेन विशेषेणाविष्टत्वात् समाविष्टा अतएव विलपन्ती व्यथिता जनकात्मजा सीता बहुभिर्वार्यमाणमपि अनिवर्तिनं रावणं ददर्श दृष्टवतीत्यर्थः । एकान्वयी ॥ ४४ ॥

४५] ति० टी०—यथा नो मां रक्षणेनानुग्रहमानोऽयं मामभिद्रवति ॥ ४५ ॥

गो० टी०—तदाकारमाह—यथेति । यथा यथायं अभिक्रुद्धोऽयं रावणः सर्वं मां समभिद्रवति अतः मत्सदृशामपि मामनार्यामिव वधिष्यति ॥ ४५ ॥ ४६ ॥

गो० टी०—यथेति ॥ यथा यस्मादित्यर्थः ॥ ४५ ॥ ४६ ॥

४६ति० टी०—वधिष्यतीत्यत्र कारणमाह—बहुश इति४६

गो० टी०—यत्र हेतुमाह—बहुश इति । भर्तारमनुव्रतां मां मम भार्यां मन्दोदरीप्रभृतीः भर्तृत्व प्राप्नुहि तत्पूज्यत्वेन तिष्ठेत्यर्थः इति बहुशश्चोदयामास प्रार्थयामास मया तु प्रत्याख्यातः तदुक्तमङ्गीकृतमित्यर्थः ॥ ४६ ॥

१ प्रति गो० पाठः । २ आर्योऽयं गो० पाठः । ३ अयंति गो० पाठः । ४ नीति गो० पाठः । ५ चाङ्क्षेयात गो० पाठः । ६ निशान्येति गो० पाठः । ७ अनुव्रतेनामिति गो० पाठः । ८ रमस्वेति गो० पाठः ।

सोऽयं मामनुपस्थाने व्यक्तं नैराश्यमागतः । क्रोधमोहसमाविष्टो व्यक्तं मां हन्तुमुद्यतः ॥ ४७ ॥
अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ । यन्निमित्तमनार्येण समरेऽहं निपातितौ ॥ ४८ ॥
भैरवो हि महान्नादो राक्षसानां श्रुतो मया । बहूनामिह हृष्टानां तथा विक्रोशतां प्रियम् ॥ ४९ ॥
अहो धिङ्मन्निमित्तोऽयं विनाशो राजपुत्रयोः । अथवा पुत्रशोकेन अहत्वा रामलक्ष्मणौ ॥ ५० ॥
विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः । हनूमतस्तु तद्वाक्यं न कृतं क्षुद्रया मया ॥ ५१ ॥
यद्यहं तस्य पृष्ठेन तदायासमनिर्जिता । सार्यैवमनुशोचेयं भर्तुरुद्गता गतेः ॥ ५२ ॥
मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति । एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि ॥ ५३ ॥
सा हि जन्म च बाल्यं च यौवनं च महात्मनः । धर्मकार्येषु रूपं च गुणैः संरक्षिष्यति ॥ ५४ ॥
निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना । अग्निप्रवेशनं नूनमथो वापि प्रवेक्ष्यति ॥ ५५ ॥
विगर्हन्तु कुजामसतीं मन्यरां पापनिश्चयाम् । पश्चिमितमिदं शोकं कौसल्या प्रतिपत्स्यते ॥ ५६ ॥
इत्यार्यं मैथिली दृष्ट्वा विलपन्तीं तदाऽनघाम् । शोकोपहतया चित्तं विह्वलेव चकार सा ॥ ५७ ॥
एतस्मिन्नन्तरे तस्य अमात्यः शीलवान्शुचिः । सुपार्श्वो नाम मेधावी गोपुरं रक्षसां वरम् ॥
निवार्यमाणः सचिवैरिदं वचनमब्रवीत् ॥ ५८ ॥

४७-४९] ति० टी०-अनुपस्थाने अनुपस्थिते सति नैराश्यमागतः अत एव क्रोधमोहसमाविष्टो मां हन्तुमुद्यतः व्यक्तं स्पष्टमेतत् ॥ ४७ ॥

गो० टी०-सोऽयमिति । अनुपस्थिते सति हन्तुमुद्यतः ॥

रा० टी०-सोऽयमित्यनन्तरम्-अथवेति ॥ ४७ ॥

रा० गो०-सोऽयमनार्यो रावणः-भैरवो हि महान्नाद इत्यनन्तरं पश्चात्-अथवा पुत्रशोकेनेत्यनन्तरं विक्रोशतां राक्षसानां महान्तो भैरवो नादः ॥ ४७ ॥

गो० टी०-तौ निहत्य तेन निमित्तेन मम प्रवासगमनं राक्षसोऽभिप्रायेणाह-अथ वेत्यादि ॥ ४७ ॥

५०] ति० टी०-रामलक्ष्मणावहत्वा तौ हन्तुमकृतप्रयत्नेन ॥ ५० ॥

रा० टी०-अहो इति । मन्निमित्तो यदि विनाशः स हि [मामिति शेषः अहं पृथक् सम्भावनानन्तरमाह-अथवेति] पुत्रशोकहेतुना रामलक्ष्मणावहत्वा यथा मया हनूमतो वाक्यं न कृतं मां विधमिष्यति साष्टश्लोक एकान्वयी ॥ ४९ ॥ ५० ॥

गो० टी०-अत्र निमित्तान्तरमाशङ्क्ते-अथवा पुत्रशोकेनेति । अहत्वा हन्तुमशक्तो मृत्यो ॥ ५० ॥

५१-५२] ति० टी०-हनूमतस्तु तद्वाक्यं मत्पुनरागमनोद्दीपनमेव स्यां रामसमर्पणं नेष्यामीत्युक्तरूपम् । रामणानिर्जितापि यदि तदायासमयासिषं तदाऽहं नानुशोचेयम् ॥५१॥५२॥

गो० टी०-हनूमत इत्यर्धम् । क्षुद्रया निःसारबुद्ध्या ॥ ५१ ॥

रा० टी०-यद्दीति । अनिर्जिता रावणेनाहितेत्यर्थः अहं तस्य हनूमतः पृष्ठेन पश्चादागमनादिना ॥ ५१ ॥ ५२ ॥ इत्यहं सर्वं मनुशोचेयम् ॥ ५२ ॥

गो० टी०-यद्दीति । तदायासमयासिषं [तं हेतुमतोऽहं] ॥ ५१ ॥ ५२ ॥

५३-५६] ति० टी०-मन्ये तु यद्यस्मात्कारणात्तस्याः कौसल्यायाः हृदयं फलिष्यति स्फुटिष्यति । यदा यस्मिन्काले एव हनूमतः पुत्रं विनष्टं श्रोष्यते तदैव-स्फुटिष्यतीति ॥ ५३-५६ ॥

रा० टी०-मन्ये इति । एकपुत्रा यदा पुत्रं मरिष्यन्तं विना जातेत्यनन्तरं पश्चात्-पश्चिमितमिदं शोकं कौसल्या प्रतिपत्स्यते [इति] ॥ ५६ ॥

गो० टी०-एकपुत्रेत्यादि । एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते [इति] ॥ ५६ ॥

रा० टी०-गर्हन्तु [इत्यनन्तरं तां च दृष्ट्वा मत्कृते मनस्तापं जनयन्तीं ज्ञास्यन्ति] ॥ ५६ ॥

गो० टी०-एवं द्वौ [ति० टी०-सा कौसल्या] ॥ ५६ ॥

रा० टी०-विगर्हन्तु [इत्यनन्तरं कौसल्या कौसल्यया सह सपत्नी पुत्रं मया सह गमिष्यन्तं ज्ञात्वा] ॥ ५६ ॥

गो० टी०-प्रतिपत्स्यते [प्राप्स्यते] ॥ ५६ ॥

५७] ति० टी०-शोकोपहतया चन्द्रेण विना कला ग्रहवशं गतेव मैथिली दृष्ट्वा ॥ ५७ ॥

५८] ति० टी०-सुपार्श्वो नामामात्यः शुचिः शुद्धव्रत-

---

१ निहन्तुं मां समुद्यतः इति गो. पाठः । २ अपि यदीति गो. रा. पाठः । ३ यास्यामि इति गो. पाठः । ४ अनुशुश्रुमिति गो. पाठः । ५ स्फुटन्ती इति गो. रा. पाठः । ६ इदं दुःखमिति गो. पाठः । ७ बुद्धिमानिति गो. पाठः । ८ राक्षसो राक्षसेश्वरमिति गो. पाठः । ९ मणमिति गो. पाठः ।

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज । हन्तुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य च ॥ ५९ ॥
वेदविद्याव्रतस्नातः स्वकर्मनिरतस्तथा । क्षत्रियः कस्माद्धर्मं वीर मन्यसे राक्षसेश्वर ॥ ६० ॥
मैथिलीं रूपसंपन्नां प्रत्यवेक्षस्व पार्थिव । तस्मिन्नेव सहास्माभिर्राघवे क्रोधमुत्सृज ॥ ६१ ॥
अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी । कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ॥ ६२ ॥
शूरो धीमान्रथी खड्गी रथप्रवरमास्थितः । हत्वा दाशरथिं भीमं भवान्प्राप्स्यति मैथिलीम् ॥ ६३ ॥
स तद्वाक्यमुपश्रुत्य मुहृदां निर्वेदितं वचः । सुधर्मं प्रतिपूज्य रावणः ।
गृहं जगामाथ ततश्च वीर्यवान्पुनः सभां च प्रययौ सुहृद्वृतः ॥ ६४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९२ ॥

स्तदितरसचिवैरेव बलमवाप्यमिति जिगीषमाणोऽपि रावणः प्रतीदमब्रवीत् । अर्थैवाविद्ध्य इति सामान्यतम्, अत एव भाष्ये—अर्थोऽत्यन्तानिष्टस्यां तां सीतामेवलालसाम् । खड्गमादाय दुष्टात्मा जवनामिपपात ह ॥ सुहृदां तस्य दुष्टस्य विज्ञायः पापनिश्चयम् । शमयामास सुहृदं श्रुतवां येन हेतुना ॥ इत्युक्तम् ॥ ५८ ॥

रा० टी०—इतीति । यद्यपि गतो चन्द्रण विना रोहिणीमिव इत्येव विलप्तां मैथिलीं दृष्ट्वा सुपार्श्वो नाम राक्षसस्तमाश्वासयन्नुत्तरिक्षिविद्यादिकालेऽपि इदमवसरमाहेत्यभिप्रायेणाह—कालवादीति ॥ ५९ ॥ ६० ॥

गो० टी०—इत्येवमित्यादि । मैथिलीं दृष्ट्वा राक्षसवचनविस्वन्वयः ॥ ५८-६४ ॥

५९] ति० टी०—वैश्रवणानुजेत्यनेन महाकुलप्रसूतत्वमुक्तम् ॥ ५९ ॥

रा० टी०—तदाकारमाह—कथमिति । हे दशग्रीव धर्ममपास्य त्यक्त्वा वैदेहीं हन्तुं कथमिच्छसि ॥ ५९ ॥

६०] ति० टी०—धर्मापाठमं च तवापुक्तं धार्मिकत्वादेवेत्याह—वेदेति । वेदविद्याग्रहणोक्षितव्रतत्वचर्यावतपूर्वं विद्यां श्रुतीस्त्या स्नातो गुरुकुलात्समाहृतः । तदनन्तरं दारग्रहणपूर्वं नित्याग्निहोत्रादिस्वकर्मनिरतः ॥ ६० ॥

रा० टी०—वेदेति । वेदविद्याव्रतस्नातस्त्वं क्षियो वत्र कस्मान्मन्यसे इत्यन्वयः ॥ ६० ॥

६१] ति० टी०—रूपसंपन्नां मैथिलीं प्रत्यवेक्षस्व । रामवधपर्यन्तमिति शेषः । त्वं तस्मिन्नेव राघवे त्व क्रोधमुत्सृज ॥ ६१ ॥

रा० टी०—नन्वं किं कर्तव्यमित्यत आह—मैथिलीमिति । मैथिलीं प्रत्यवेक्षस्व नित्यं पश्य तस्मिन्न राघवे त्व अस्माभिस्सह त्वं क्रोधमुत्सृज ॥ ६१ ॥

६२-६४] ति० टी०—अथ कृष्णपक्षचतुर्दशी तस्यामभ्युत्थानं यमरोत्सवं कृत्वामावास्यां विजयाय निर्याहि प्रस्थानं कुरु ॥ ६२-६४ ॥

इति श्रीमन्माधवयोगीन्द्रविरचिते श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९२ ॥

रा० टी०—अभ्युत्थानमिति । अत्र कृष्णपक्षचतुर्दशी अतः अभ्युत्थानं समरोत्सवं कृत्वा इत्येवमन्वयमभिप्रायेणाह—अमावास्यां निर्याहि ॥ ६२ ॥

रा० टी०—शूर इति । अस्यार्थः—त्रिपुरा भवान् मैथिलीं प्राप्स्यति अतस्त्वयापि भवद्रायोपुक्त्यात्वेन मैथिली स्वीकर्तव्येति ॥ ६३ ॥

रा० टी०—स इति । स रावणः सुहृदां निवेदितं वचः प्रतिपूज्य सुधर्मं नाम अमात्यं प्रययौ ॥ ६४ ॥

इति श्रीमद्वाल्मीकीयरामायणे वाल्मीकीयाभिप्रायप्रकाशिकायां युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९२ ॥

---

१ क्षीति गो. पाठः । २ संवेति गो. रा. पाठः । ३ क्षिया इति गो. पाठः । ४ त्वमेव त्विति गो. पाठः । ५ राघव इति गो. पाठः । ६ चतुर्दशीम्

त्रिनवतितमः सर्गः ।

पुत्रव्यसनकृशपौलस्त्यप्रेरितबलाध्यक्षाणां सबलानां युध्यमानानां च कपीनां रोमहर्षणे सख्ये रात्रिचरभटा सेना दाशरथिं रक्षवं ता ततश्च रामोऽपूर्वशरसंधानमोक्षनकौशलेन दिवसस्याष्टमभागमात्रे स्थानां दश सहस्राणि कुञ्जरणामष्टादश सहस्राणि चतुर्दश हस्राणि सारोहाणां वाजिनां लक्षद्वयं राक्षसानां हत्वा देवैः साधुवादेति पूजितः ।

स प्रविश्य सभां राजा दीनः परमदुःखितः । निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन् ॥ १ ॥
अब्रवीच्च स तान्सर्वान्बलमुख्यान्महाबलः । रावणः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्शितः ॥ २ ॥
सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः । निर्यातं रथसङ्घैश्च हस्त्यश्वैश्चोपशोभिताः ॥ ३ ॥
एकं रामं परिक्षिप्य समरे हन्तुमर्हथ । प्रहृष्टाः शरवर्षाणि प्रावृट्काल इवाम्बुदाः ॥ ४ ॥
अथवाहं शरैस्तीक्ष्णैर्भिन्नगात्रं महाहवे । भवद्भिः स्वो निहन्ताम्मि रामं लोकस्य पश्यतः ॥ ५ ॥
इत्येतद्वाक्यमादाय राक्षसेन्द्रस्य राक्षसाः । निर्ययुस्ते रथैः शीघ्रैर्नानाशस्त्रैः संयुताः ॥ ६ ॥
परिघान्पट्टिशांश्चैव शरखड्गपरश्वधान् । शरीरान्तकरान्सर्वे चिक्षिपुर्वानरान्प्रति ॥
वानराश्च द्रुमाञ्शैलान्राक्षसान्प्रति चिक्षिपुः ॥ ७ ॥
स सङ्ग्रामो महाभीमः सूर्यस्योदयनं प्रति । रक्षसां वानराणां च तुमुलः समपद्यत ॥ ८ ॥
ते गदाभिश्च चित्राभिः प्रासैः खड्गैः परश्वधैः । अन्योन्यं समरे जघ्नुर्वानरराक्षसाः ॥ ९ ॥
एवं प्रवृत्ते सङ्ग्रामे बद्धुते सुमहद्भयः । रक्षसां वानराणां च क्षान्तं शोणितविस्रवैः ॥१० ॥

१] ति० टी०—स इति ॥ १ ॥

रा० टी०—राक्षसेन्द्रस्य सकलसमाप्तेरागन्तव्यं कालिकं वृत्तान्तं श्रुत्वा—स इत्यादिभिः । सभां रावणः कुशलिह इव श्वसन् सन् मुख्ये आसने निषसाद ॥ १ ॥

गो० टी०—अथ मुख्यबलयुद्धम् स प्रविश्येत्यादि ॥ १ ॥

२] ति० टी०—रावणः प्राञ्जलिरिति । पराभवशङ्कानां वृद्धौन्मुख्यार्थं नमस्कारं कुर्वन्तीत्याचारः ॥ २ ॥

रा० टी०—अब्रवीदिति । पुत्रव्यसनकर्शितः अत एव प्राञ्जलिः रावणो बलमुख्यानब्रवीत् ॥ २ ॥

गो० टी०—अब्रवीदिति । रावणः प्राञ्जलिरिति । अनुवार्थमञ्जलिकरणम् ॥ २ ॥ ३ ॥

३] ति० टी०—सर्वेण । एकमपि हस्त्यश्वं वादातमत्यु-त्येत्यर्थः ॥ ३ ॥

रा० टी०—तदाकारमाह—सर्व इति । भवन्तस्सर्वे मिलित्वा युद्धाय निर्गच्छत ॥ ३ ॥

४] ति० टी०—एकं रामं परिक्षिप्येति । तस्यैव मुख्यबलस्यैकमेव परिक्षिप्य परितो निरुध्य हन्तुमर्हथ । शरवर्षाणि । वर्षयतेति शेषः ॥ ४ ॥

रा० टी०—एकमिति । एकं मुख्यं रामं शरवर्षेण परिक्षिप्य निरुध्य हन्तुमर्हथ ॥ ४ ॥

गो० टी०—एक मिति । परिक्षिप्य आवार्य, शरवर्षेण कृत्वा हन्तुमर्हथेत्यन्वयः ॥ ४ ॥

५] ति० टी०—अथवेति । अथ शत्रुहननासंभवे भवद्भिस्त्यक्तप्राणो वा निहन्ताम्मि ॥ ५ ॥

रा० टी०—अथवेति । अथवा भवद्भिरस्मत्कृतद्विषातापार्थं रामे लोकस्य पश्यतोऽहं निहन्ताम्मि ॥ ५ ॥

गो० टी०—स चेत्तो यदि हन्तुं न शक्नुयात्, तदापि भवतां मध्ये विनश्यामि, तत्र तस्य वधः सुकरो मे भवित्र्यमिप्रायेणाह—अथ वेति । इदानीं यद्यं तं हन्तुं न शक्नोषीदानीं तेनैव शस्त्रेणाहमात्मानं वा निहन्ताम्मि ॥ ५-८ ॥

६-७] ति० टी०—एतेत्यादिकं प्रथमपद्यैकम् ॥ ६-७ ॥

रा० टी०—इतीति । राक्षसेन्द्रस्य इत्येतद्वाक्यमादाय रथादिभिर्निर्ययुः राक्षसाः निर्ययुः ॥ ६ ॥

रा० टी०—परिघानिति । सर्वे राक्षसा वानरान् प्रति परिघानिति चिक्षिपुः ॥ ७ ॥

गो० टी०—वानरा इति । वानराः द्रुमादीन् राक्षसान् प्रतिचिक्षिपुः अत्र प्रथमश्लोकस्य इति सूर्योदयनं प्रति चतुर्दशोत्तरद्वयमात्रस्य स्थाने वानराणां च तुमुलः समपद्यत ॥८॥

८] ति० टी०—सूर्योदयनं प्रति । चतुर्दशीसूर्योदयमारभ्येत्यर्थः । सूर्योदयारभ्यविशेषे रावणस्य नीतास्मीपगमनमिति बोध्यम् ॥ ८ ॥

गो० टी०—स संग्राम इति । सूर्योदयनं प्रति सूर्योदयमारभ्य ॥ ९ ॥

९-१०] ति० टी०—गदाभिरन्योन्यं जघ्नुः । यद्यपि

१ यान्विति गो. पाठः । २ पादावितिति गो. पाठः । ३ वर्धन्त इति गो. पाठः । ४ वर्धयेति गो. रा. पाठः । ५ रथ इति गो. रा. पाठः । राक्षसेन्द्रस्य वाक्यमादाय राक्षसा इति गो. पाठः । ७ सुसंवृता इति गो. पाठः । ८ वीति गो. रा.पाठः ।

मातंगरथकूलाश्च शैरमत्स्या ध्वजद्रुमाः । शरीरसंघाटवहाः प्रसस्रुः शोणितापगाः ॥ ११ ॥
ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः । ध्वजवर्मरथानश्वान्नानाप्रहरणानि च ॥
आप्लुत्याप्लुत्य समरे वानरेन्द्रा बभञ्जिरे ॥ १२ ॥
केशान्कर्णललाटं च नासिकाश्च प्लवंगमाः । रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि व्यकर्तयन् ॥ १३ ॥
एकैकं राक्षसं संख्ये शतं वानरपुंगवाः । अभ्यधावन्त पतितं वृक्षं शकुनयो यथा ॥ १४ ॥
तदा गदाभिर्मुर्वीभिः प्रासैः खड्गैः परश्वधैः । निर्जघ्नुर्वानरान्घोरान्राक्षसाः पर्वतोपमाः ॥ १५ ॥
राक्षसैर्वध्यमानानां वानराणां महाचमूः । शरण्यं शरणं याता रामं दशरथात्मजम् ॥ १६ ॥
ततो रामो महातेजा धनुरादाय वीर्यवान् । प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष ह ॥ १७ ॥
प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे । नाविजंस्तुमुहाघोरा निर्दहन्तं शराग्निना ॥ १८ ॥
कृतान्येव सुघोराणि रामेण रजनीचराः । रणे रामस्य ददृशुः कर्माण्यमुकराणि ते ॥ १९ ॥
चालयन्तं महासैन्यं विधमन्तं महारथान् । ददृशुस्तेन वै रामं वातं वनगतं यथा ॥ २० ॥
छिन्नं भिन्नं शरैर्दीर्णं प्रभग्नं शस्त्रपीडितम् । बलं रामेण ददृशे रामं शीघ्रकारिणम् ॥ २१ ॥

वानराणां महाबाहुबलाभावस्तथापि राक्षसहस्तेभ्य आच्छिद्य मूर्तीस्तैस्तैस्तेषां युद्धसंभव इति बोध्यम् ॥ ९–१० ॥

रा० टी०–ते इति । वानरराक्षसाः गदादिभिः अन्योन्यं जघ्नुः ॥ ९ ॥

रा० टी०–एवमिति । एवं संग्रामे प्रवृत्ते सति सुमहद्रजः शोणितविसर्पेऽन्तरम् ॥ १० ॥

गो० टी०–ते गदाभिरिति । अन्योन्यं जघ्नुरित्यत्र शिलावृक्षाणामप्युपलक्षणम् । राक्षसेभ्योपलब्धानि गदाखड्गादीनि राक्षसानामिव वानराणामपि संभवन्तीति वा तथोक्तमिति ज्ञेयम् ॥ १० ॥ ११ ॥

११–१८] ति० टी०–मातङ्गरथरूपे कूले यासां ताः । शरीराण्येव संघाटाः काष्ठसमूहास्तान्वहन्ति ताः ॥ ११–१२ ॥

रा० टी०–मातङ्गेति । मातङ्गरथौ कूलौ यासां ताः शरा मत्स्या यासां शरीराण्येव संघाटाः दारुनिचयास्तान् वहन्ति ताः शोणितापगाः रुधिरनद्यः प्रसस्रुः ॥ ११ ॥

गो० टी०–मातङ्गेति । शरीराण्येव संघाटाः प्लवास्तान् वहन्तीति शरीरसंघाटवहाः ॥ ११ ॥

रा० टी०–तत इति । शोणितौघपरिप्लुता वानरेन्द्रा वानराः ध्वजादीनि आप्लुत्याप्लुत्य बभञ्जिरे सार्द्धश्लोक एकान्वयी ॥ १२ ॥ १३ ॥

गो० टी०–ततस्ते वानराः सर्वे शोणितौघपरिप्लुता इत्याद्यन्वय, राक्षसानां बभञ्जिरित्यन्तं सार्धश्लोक एकान्वयः ॥ १३ ॥

रा० टी०–केशानिति । प्लवङ्गमाः दशनादिभिः रक्षसां केशादीन् व्यदारयन् ॥ १४ ॥

रा० टी०–एकैकमिति । एकैकं राक्षसशतं वानरपुङ्गवाः शकुनयो वृक्षमिव अभ्यधावन्त ॥ १५ ॥

रा० टी०–तदेति । राक्षसाः गदादिभिः वानरान् निजघ्नुः ॥ १५ ॥

गो० टी०–केशानिति । रक्षसां केशानिति क्रमेणान्वयः व्यकर्तयन् चिच्छिदुः ॥ १४–१६ ॥

रा० टी०–राक्षसैरिति । राक्षसैर्वध्यमानानां वानराणां महाचमूः रामं शरणं याता ॥ १७ ॥

रा० टी०–तत इति । रामो धनुरादाय राक्षसं सैन्यं प्रविश्य शरवर्षं ववर्ष ॥ १८ ॥

रा० टी०–प्रविष्टमिति । शराग्निना निर्दहन्तं रामं सूर्यं मेघा इव महाघोरा राक्षसाः नाविजन्मुः ॥ १९ ॥

गो० टी०–राक्षसैरिति । वानरसेनाशरणागतिरियम् । राक्षसैर्वध्यमानानामित्यकिंचित्यासन्नगतिकत्वोक्तिः । शरण्यमिति दयायुक्तिः । राममिति परमोक्तिः । दशरथात्मजमिति सौलभ्योक्तिः ॥ १७–२१ ॥

१९] ति० टी०–रजनीचरा रामस्य रणेऽमुकराणि कर्माणि रामेण कृतान्येव ददृशुः, न तु क्रियमाणानि ॥ १९ ॥

रा० टी०–कृतानीति । अमुकराणि अन्यैः कर्तुमशक्यानि रामस्य कर्माणि रजनीचराः रामेण कृतान्येव ददृशुः न तु क्रियमाणानीत्यर्थः ॥ २० ॥

गो० टी०–कृतान्येवेति । कृतान्येव ददृशुः, न तु क्रियमाणानीत्यर्थः ॥ २० ॥

२०–२१] ति० टी०–तथा तत्कर्तारमपि न ददृशुरित्याह—चालयन्तमिति । कर्तुरदृष्टत्वेऽपि क्रियामात्रदर्शने दृष्टान्तः—वातं वनगतं यथा । स्पर्शविधमनादिकार्यैर्यथा वायुरनुमित एव भवति तथा रामोऽप्यनुमित एव न प्रत्यक्ष इति भावः ॥ २० ॥ २१ ॥

---

१ वाजीति गो. पाठः । २ राक्षसानामिति गो. पाठः । ३ ललाटानिति गो. रा. पाठः । ४ नीति गो. व्यदारयन्निति रा. पाठः । ५ फलिनमिति गो. रा. पाठः । ६ तथेति गो. पाठः । ७ नीति गो. रा. पाठः । ८ युध्यमानानामिति गो. पाठः । ९ हेति गो. रा. पाठः । १० अभीति गो. पाठः । ११ घोरामिति गो. पाठः । १२ चेति गो. पाठः । १३ अनीकमिति गो. रा. पाठ ।

प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम् । इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः ॥ २२ ॥
एष हन्ति गजानीकमेष हन्ति महारथान् । एष हन्ति शरैस्तीक्ष्णैः पदातीन्वाजिभिः सह ॥ २३ ॥
इति ते राक्षसाः सर्वे रामस्य सदृशान्रणे । अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य तु ॥ २४ ॥
न ते ददृशिरे रामं दहन्तमपि वाहिनीम् । मोहिताः परमास्त्रेण गान्धर्वेण महात्मना ॥ २५ ॥
ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः । पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे ॥ २६ ॥
भ्रमन्ता काञ्चनीं कोटिं कार्मुकस्य महात्मनः । अलातचक्रप्रतिमां ददृशुस्ते न राघवम् ॥ २७ ॥

रा० टी०—चालयन्तमिति । महासैन्यं चालयन्तं महान्तं क्रियमन्तं रामं ते राक्षसाः न ददृशुः क्रियामात्रमेव ददृशुरित्यर्थः क्रियामात्रदर्शने क्रियावतो दर्शनाभावे दृष्टान्तः घनं वातं वायुमिव ॥ २१ ॥

गो० टी०—न केवलं हस्तलाघवातिशयेन कर्मणामदर्शनं गर्सचारलाघवातिशयेन कर्तारमपि न ददृशुरित्याह—चालयन्तमिति । यथाचालनक्रियमनादिकार्यलिङ्गात् वायुरनुमितो भवति, तद्वद्रामो ऽप्यनुमितः । न तु प्रत्यक्षित इत्यर्थः ॥ २१ ॥

रा० टी०—छिन्नमिति । रामेण छेदादिविशिष्टं बलमस्य दृष्टं न रामम् ॥ २२

गो० टी०—एकमर्थं विशदयति—छिन्नमिति । छिन्नं छिन्नतम । भिन्नं विदारितम् । प्रभग्नं शकलीकृतम् । शस्त्रपीडने हृदयार्पितमन्यत् ॥ २२ ॥

२२] ति० टी०—इन्द्रियार्थे. शब्दादिविषयासक्तेषु तिष्ठन्तमभिलक्ष्येवावस्थितं भूतात्मानं जीवं प्रजा यथा न पश्यन्ति प्रत्यक्षतस्तद्वदित्यर्थः ॥ २२ ॥

रा० टी०—तदेव सदृष्टान्तमाह—प्रहरन्तमिति । इन्द्रियार्थेषु शब्दादिविषयेषु तिष्ठन्तं भूतात्मानमन्तर्यामिणमिव शरीरेषु प्रहरन्तं राघवं ते राक्षसाः न पश्यन्ति ॥ २२ ॥

गो० टी०—प्रहरन्तमिति । इन्द्रियार्थेषु तिष्ठन्तम इन्द्रियोपलक्षितम् अनुभवन्तं, तेनानुभवेनानुमीयमानमपि भूतात्मानं भूतस्य पञ्चभूतात्मकशरीरस्य आत्मानं जीवात्मानं जनः कथा न पश्यति, तथैव शरीरेषु प्रहरन्तं तेन प्रहारेणानुमीयमानमपि राघवं पुरतश्चक्षुषा नादाक्षुरित्यर्थः । यद्वा इन्द्रियार्थेषु प्रत्यक्षतोऽनुभूयमानेषु गन्धादिगुणेषु, निराश्रयगुणानामसंभवात् सौक्ष्म्येणानुक्तं भूतात्मानमिव पृथ्वाद्यवयवप्रथिव्यादिस्वरूपमिवेत्यर्थः ॥ २३ ॥

२३] ति० टी०—एष गजानीकमेव हन्तीत्यादिप्रकारेण कुपिताः ते राक्षसा रामस्य सदृशान्सदृशत्वेन प्रतीयमानान्राक्षसान्रामसादृश्यादन्योन्यं जघ्नुः । 'सदृशा रावणस्येते रणे राक्षससत्तमाः' इति पूर्वार्धपाठे रावणेन देवासुरयुद्धादौ साक्षात्साक्षार्थं भुक्तबलतया तेषां दृष्टप्रत्ययानामत्यूर्जितबलानामेव संगृहीतत्वात्तेषां रावणसादृश्यम् ॥ २४ ॥

रा० टी०—एष इति । एष रामः गजानीकादीन् हन्ति इति बुद्ध्या कुपिताः राक्षसाः राघवस्य सादृश्यनिमित्तेन भ्रमेण सादृश्यं विज्ञाय रामस्य सदृशान् सदृशत्वेन प्रतीयमानान् राक्षसान् अन्योन्यं जघ्नुः श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०—एष हन्तीत्यादिश्लोकद्वयमेकान्वयम् । सदृशान् सादृश्येन प्रतीयमानान् । अन्योन्यं सादृश्यादेव हेतोर्जघ्नुरित्यन्वयः ॥ २४ ॥ २५ ॥

२५] ति० टी०—राक्षसानां परस्परं रामसादृश्यप्रतीतौ कारणमाह—मोहिता इति ॥ २५ ॥

रा० टी०—नेति । महात्मना रामेण कर्त्रा परमास्त्रेण करणेन मोहिताः वैकल्यं प्राप्ता ते राक्षसाः वाहिनीं सेनां दहन्तमपि रामं न ददृशिरे ॥ २६ ॥

गो० टी०—राक्षसानां रामादर्शनकारणमाह—न त इति—इदमुपलक्षणम् । सादृश्यदर्शनमपि मोहनास्त्रेणेति द्रष्टव्यम् । महात्मना महाप्रभावेन ॥ २५ ॥

२६] ति० टी० अतएव ते रामसहस्राणि पश्यन्ति । पुनश्च एकमेव पश्यन्ति ॥ २६ ॥

रा० टी०—मोहकार्यमेवाह—ते इति । राक्षसाः रामसहस्राणि पश्यन्ति पुनः कदाचित् एकमेव पश्यन्ति ॥ २७ ॥

गो० टी०—अदर्शनेऽप्यदृश्यदर्शनव्यापारेऽप्यदर्शने नास्त्रकृतं किं तु भीतिकृतमित्याह—ते त्विति । तु शब्दः पूर्वस्माद्विशेषणार्थः । तारीचेनाप्युक्तम्—अपि रामसहस्राणि भीतः पश्यामि रावणेति ॥ २७ ॥

२७] ति० टी०—भ्रमन्तीमाकर्णवेगतोऽलक्ष्यितां काञ्चनीं स्वर्णमयीं कार्मुकस्य कोटिं धनुष्कोटिं वेगबाहुलातच्चक्रप्रतिमां ददृशुः, राघवं तु नेति संबन्धः ॥ २७ ॥

रा० टी०—भ्रमन्तीमिति । काञ्चनीं स्वर्णमयीं भ्रमन्तीं अलातचक्रप्रतिमां कार्मुकस्य कोटिमग्रभागमेव ददृशुः राघवं न ददृशुः ॥ २८ ॥

गो० टी०—भ्रमन्तीमिति । भ्रमन्तीं रामस्य मण्डलाकारगतिविशेषेऽस्तीति केचित् । निरन्तरज्याकर्षणादिति वयम । अलातचक्रप्रतिमां निर्व्यालं कृष्टं निरन्तरभ्रमणेनान्तरालाग्रहणाभावेन प्रतीयमानामित्येवार्थः ॥ २८ ॥

१ ते इति गो. पाठः । २ अरीति गो. पाठः ।

शरीरनाभिसत्त्वार्चिः शरीरं नेमिकार्मुकम् । ज्याघोषतलनिर्घोषं तेजोबुद्धिगुणप्रभम् ॥ २८ ॥
दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान् । ददृशू रामचक्रं तत्कालचक्रमिव प्रजाः ॥ २९ ॥
अनीकं दशसाहस्रं रथानां वातरंहसाम् । अष्टादश सहस्राणि कुञ्जराणां तरस्विनाम् ॥ ३० ॥
चतुर्दश सहस्राणि सारोहाणां च वाजिनाम् । पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनाम् ॥ ३१ ॥
दिवसस्याष्टभागेन शरैरग्निशिखोपमैः । हतान्येकेन रामेण रक्षसां कामरूपिणाम् ॥ ३२ ॥

२८] ति० टी०—लाघवातिशयान्मण्डलीकृतकार्मुकं राक्षसान् निघ्नन्तं रामं कालचक्रेणोपमिनोति—शरीरेति । शरीरं मध्यदेह एव नाभिश्चक्रस्येव मध्यं यस्य तत् सत्त्वं बलमेवार्चिर्ज्वाला यस्य तत् शरा एवारा मध्यकाष्ठानि यस्य तत् नेमिर्वलयाकारोऽवयवविशेषस्तद्रूपं कार्मुकं यस्य तत् तत्र ज्याघातवारणं तेन तज्जो घोषो लक्ष्यते । ज्याघोषतलघोषावेव निर्घोषो ध्वनिर्यस्य तत् । तेजः प्रतापो बुद्धिर्ज्ञानं तद्रूपौ गुणावेव प्रभा यस्य तत् ॥ २८ ॥

२९] ति० टी०—दिव्यास्त्रगुणो दिव्यास्त्रवेभवं तदेव पर्यन्तो धारणा यस्य तत् ॥ २९ ॥

रा० टी०—मण्डलीकृतकार्मुकादिसहितरामं कालचक्रत्वेनोपमिन्वन्नाह—शरीरेति । शरीरं रामदेह एव नाभिर्यस्य स त्वं बलमेव अर्चिर्ज्वाला यस्य शरा एव अराणि मध्यकाष्ठानि यस्य कार्मुकमेव नेमिः प्रान्तभागो यस्य स ज्याघोषतलघोषावेव निर्घोषः स्वनो यस्य तत्र तलेन तत्स्वनो लक्ष्यते किं च ज्याघोषतलनिर्घोषौ स्वनोस्मिन्निति अर्शआद्यजन्तम् तेजोबुद्धिरूपौ गुणावेव प्रभा यस्य दिव्यास्त्राणां गुणः ऐश्वर्यं पर्यन्तो धारा यस्य तत् राक्षसान् निघ्नन्तं निघ्नत् रामचक्रं कालचक्रमिव प्रजाः ददृशुः श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०—अथ तत्र समरसमये मण्डलीकृतकार्मुकं रामं सकलरिपुनिघातिसुदर्शनत्वेन रूपयति—शरीरेत्यादिना । ज्वालानेम्यरनाभ्यक्षपुरुषाङ्गं सुदर्शनमित्युक्तरीत्या चक्रे पर्यङ्कं भवति । तत्र कोदण्डचक्रमध्यस्थत्वाद्दृढत्वाच्च शरीरं नाभित्वेन दर्शयति—शरीरेति । नाभिः चक्रमध्योन्नतप्रदेशः, शरीरमेव नाभिर्यस्य तत्तथोक्तम् सत्त्वं बलमेवार्चिः ज्वाला यस्य तत् सत्त्वार्चिः । 'पङ्क्तेर्द्वयोर्ज्वालिकीलावर्चिरेतिः शिखा स्त्रिया' मित्यमरः । सत्त्वस्य परमन्तापंदत्वादर्चिष्ट्वेन निरूपणम् । शरा एवाराणि चक्रमध्यशलाकाः यस्य तत्तथोक्तम् । सुदर्शनस्य सहस्राराव्याच्छराणामपरत्वरूपेण युगपत्सहस्रधारमंशते व्यज्यते । नेमिः आधारचक्रवलयः, नेमिवत् मण्डलीकृतकार्मुकं यस्य तत्कार्मुकनेमीत्यर्थः । एतेन मण्डलीकृतदशायामपि नाभिभूतरामशरीरपरिवेषेण धनुषो महोवलत्वमुच्यते । सुदर्शनस्य ज्वालाधारया निरन्तरघोषवत्त्वाज्ज्यातलघोषं तद्घोषत्वेन रूपयति—ज्याघोषतलनिर्घोषमिति । तलं ज्याघातवारणं तेन तद्घोषो लक्ष्यते । ज्याघोषतलघोषावेव निर्घोषो यस्य तत्तथोक्तम् । तेजः पराक्रम एव बुद्धिः अक्षं यस्य तत्तेजोबुद्धि । यथा प्लवगसैन्यमूलकजिता जितमित्यत्र उदकशब्दो लक्षणया कौशिकशब्दं लक्षयित्वा इन्द्रजितमाह, तथा बुद्धिशब्दो बुद्धिजनकाक्षलक्षणया अक्षप्रदेशमाह । गुणः शरीरकान्तिः, स एव प्रभा यस्य तत्तथोक्तम् । दिव्यास्त्राणां गुणः शक्तिः माहात्म्यं तदेव पर्यन्तो धारा यस्य तद्दिव्यास्त्रगुणपर्यन्तम् । निघ्नन्तं निघ्नत् । लिङ्व्यत्यय आर्षः । किंच कालचक्रं ज्योतिश्चक्रमिव स्थितम् । विष्णुपुराणे, यत्र कालचक्रं प्रतिष्ठितमिति प्रयोगात् । रामचक्रम् उत्करीत्या चक्रमिव स्थितं रामं ददृशुः । ननु यदि रामो मोहनास्त्रेण राक्षसान् संहरेत्तदेन्द्रजितोस्य को विशेषः । उच्यते । नात्र गान्धर्वास्त्रेण मोहनं कृतम् । अपि तु गान्धर्वप्रयोगे सति वेगातिशयेनाजातस्वपरविभेदतया मोहिताः परस्परं जघ्नुः । यत्र रामो दृष्टः तत्क्षणे तत्र तस्यादर्शनादामुद्दिश्य क्षिप्ताः शराः स्वकीयानेव घ्नन्ति । वेगातिशयादेव नानादिक्षु चक्षुःप्रसरे नानात्वेन दर्शनम् । अत एव, न रामे शीघ्रकारिणमित्युक्तिः । कार्मुककोटिस्थलातचक्रप्रतिमत्वं रामस्य चक्रत्वरूपणं च प्रयोगसंख्यायामेव संगच्छते । अत एव सर्गादयो मायावत्यः शङ्कुरित्यपि परिहरिष्यति—एतदस्त्रबलमिति । न ते दद्दशिरे इत्यस्य श्लोकस्यैव योजना । गान्धर्वास्त्रेण हन्तं रामं मोहिताः सन्तो न ददृशिरे । मोहोत्र वेगादवगन्तव्यः । गान्धर्वास्त्रं दाहमात्रे हेतुरिति बोध्यम्॥ २९॥३०

३०–३२] ति० टी०—अनीकमिति । 'एकैकेकरथा व्यूहा पत्तिः पञ्चपदातिका । परस्परेभसुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः । अनीकिनी दशानीकिन्यक्षौहिणि—' इत्यमरोक्तप्रकारेण दशसंख्या पत्तिः, तत्त्रिगुणं सेनामुखम् तत्त्रिगुणो गुल्मः, तत्त्रिगुणो गणः, गणत्रिगुणा वाहिनी, तत्त्रिगुणा पृतना, तत्त्रिगुणा चमूः चमूत्रिगुणानीकिनी । एवं च दशोनत्रिशताधिकसप्तसहस्रसंख्या चमूरनीकम् । सहस्राण्येव साहस्रं दशसाहस्राण्यनीकान्यस्मिन्नस्तीति तत् । स्थानां दशसाहस्राण्यनीकिनीत्यर्थः । एकोनविंशलक्षाधिकसप्तकोटिसंख्यासंख्याना रथा इत्युक्तम् । ' अष्टादश सहस्राणि ' इत्यत्राप्यनीकमिति विभक्तिविपरिणामेन योज्यम् । तेन विंशतिसहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्या गजा इत्युक्तम् । चतुर्दशसहस्राण्यनीकानि षष्टिसहस्राधिकविंशतिलक्षोत्तरदशशतकोटिसंख्या वाजिन इत्यर्थः । शतसहस्रे द्वेनीकेऽष्टाशीतिलक्षोत्तरपञ्चचत्वारिंशत्कोट्यधिकशतकोटिसंख्याः पदातय इत्यर्थः ॥ दिवसस्याष्टभागेन चतुर्दशीसंबन्ध्यन्त्यमुहूर्तद्वयेन ॥ ३० ॥ ३२ ॥

१ अष्टमे भाग इति गो. पाठः ।

ते हताश्वा हतरथाः शान्ता विमथितध्वजाः । अभिपेतुः पुरीं लङ्कां हतशेषा निशाचराः ॥ ३३ ॥
हतैर्गजपदात्यश्वैस्तद्बभूव रणाजिरम् । आक्रीडभूमिः क्रुद्धस्य रुद्रस्येव महात्मनः ॥ ३४ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । साधुसाध्विति रामस्य तत्कर्म समपूजयन् ॥ ३५ ॥
अब्रवीच्च तदा रामः सुग्रीवं प्रत्यनन्तरम् । विभीषणं च धर्मात्मा हनूमन्तं च वानरम् ॥ ३६ ॥
जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च । एतदस्त्रबलं भीमं मम वा त्र्यम्बकस्य वा ॥ ३७ ॥
निहत्य तां राक्षसराजवाहिनीं रामस्तदा शक्रसमो महात्मा ।
अस्त्रेषु शस्त्रेषु जितक्रमश्च संस्तूयते देवगणैः प्रहृष्टैः ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

रा० टी०—अनीकमिति । रथानां दशसाहस्रमनीकं कुञ्जराणामष्टादश सहस्राणि वाजिनां चतुर्दश सहस्राणि राक्षसानां द्वे शतसहस्रे एकेन रामेण दिवसस्याष्टभागेन हतानि श्लोकत्रयमेकान्वयि ॥ ३१–३३ ॥

गो० टी०—अनीकमित्यादि । एकैकैकरथा व्यूहा पत्तिः पञ्चपदातिका । पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादारुह्य यथोत्तरम् सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः इत्युक्तरीत्या दशसंख्यासंख्याता पत्तिः । पत्तितस्त्रिगुणम् सेनामुखम् । सेनामुखतस्त्रिगुणो गुल्मः । गुल्मतस्त्रिगुणो गणः । गणतस्त्रिगुणा वाहिनी । तत्त्रिगुणा पृतना । पृतनातस्त्रिगुणा चमूः । एवं च दशोनत्रिशताधिकसप्तसहस्रसंख्यालक्षणा चमूरनीकम् । तेनोक्तं सहस्राण्येव साहस्राणि दशसाहस्राण्यस्मिन्सन्तीति दशसाहस्रम् । रथानां दशसहस्राण्यनीकानीत्यर्थः । एकोनविंशलक्षाधिकसप्तकोटिसंख्यासंख्याता रथा इत्युक्तं भवति । रथाङ्क ७ कोटि १९ लक्षम् । अष्टादश सहस्राणीत्यनेन अनीकमित्येतद्विभक्तिविपरिणामेनानुषज्यते । अष्टादश सहस्राण्यनीकानीत्यर्थः । त्रिंशतिसहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्यासंख्याता स्तस्मिन्नः कुञ्जरा इत्यर्थः । गजाङ्क १३ कोटि १२ लक्षं तु २०००० । चतुर्दश सहस्राणीत्यत्रापि अनीकमित्येतद्विपरिणाम्यानुषञ्जनीयम् । चतुर्दशसहस्राण्यनीकानीत्यर्थः । पञ्चिंशतिसहस्राधिकत्रिंशतिलक्षोत्तरदशकोटिसंख्यासंख्याता. सारोहा वाजिन इत्यर्थः । तुरङ्क १० कोटि ३० लक्षंतु ६०००० पूर्णं शतसहस्रे द्वे अनीकानीत्यर्थः । अशीतिलक्षोत्तरषट्शतसंख्या, त्रिंशत्कोट्यधिकशतकोटिसंख्यासंख्याताः पदातयो राक्षसा इत्यर्थः । पदाति १४९ कोटि ८० लक्षम् । वातंरहसाभिन्याद्विशिशेषणमहिम्ना तद्विद्या रथगजतुरगपदातयोसंख्येया इति भावः । अत एवैवमनुसंदधते—नागानामयुतं तुरङ्गनियुतं सार्धं रथानां शतं पादातं शतकोटिकर्तनविधावेकः कबन्धो रणे । एवं कोविकबन्धनर्तनविधौ किंचिद्ध्वनिः किंकिणीयांमार्घं परमात्मनो रघुपतेः कोदण्डघण्टारव इति । कामरूपिणां रक्षसां तंवन्धीनि । रथादिचतुरङ्गबलानि एकेन रामेण दिवसस्याष्टमे भागे पादोनघटिकाद्वयतुष्टये निहतानीत्यन्वयः ॥ ३१–३४ ॥

३३] ति० टी०—हतशेषाः कतिपया लङ्कामभिपेतुः ३३॥

रा० टी०—ते इति । हताश्वत्वादिविशिष्टाः निशाचराः लङ्कामभिपेतुः ॥ ३४ ॥

३४–३५] ति० टी०—आक्रीडं क्रीडा तस्या भूमिः ३४।३५

रा० टी०—हतैरिति । हतैर्गजादिभिरुपलक्षितं रणाजिरं क्रुद्धस्य रुद्रस्य आक्रीडभूमिः क्रीडास्थानं बभूव ॥ ३४ ॥

गो० टी०—हतैरिति । हतगजाद्युपलक्षितं युद्धमहात्मनो रामस्य तद्रणाजिरं रुद्रस्य आक्रीडं क्रीडास्थानं श्मशानमिव बभूव । आर्षं नपुंसकत्वम् अतिक्रूरेण पुरीं लङ्कां श्मशानसदृशीं मन्वितीति पूर्वोक्तेः ॥ ३३ ॥ ३५ ॥

रा० टी०—तत इति । रामस्य कर्म तोदृशः साधु साध्विति समपूजयन् ॥ ३५ ॥

३६] ति० टी०—अनन्तरमासन्नम् ॥ ३६ ॥

३७] ति० टी०—मम वा त्र्यम्बकस्य वा । अनेन स्वस्य विष्णुत्वं सूचितम् ॥ ३७ ॥

रा० टी०—अब्रवीदिति । रामस्तेषामेव एतदस्त्रं त्र्यम्बकस्य वा इव इति वचः श्रुत्वाऽनन्तरं रामोऽब्रवीत् तत्र प्रत्यनन्तरं समीपस्थं श्लोकद्वयमेकान्वयि ॥ ३७ ॥ ३८ ॥

गो० टी०—अब्रवीदित्यादिश्लोकद्वयमेकान्वयम् । प्रत्यनन्तरं समीपस्थम् । क्षणोनेन स्व प्रतिक्षेपजनितां मायाविस्थलङ्कां वारयति—एतदस्त्रबलमिति । अत्रान्ते इतिकरणं द्रष्टव्यम् । अस्त्रयोः अस्त्रप्रयोगशक्तिः । न स्वयमपि, गान्धर्वेण च गान्धर्वमिति रावणादेरपि तत्संभवकथनात् । त्र्यम्बकस्य वा संहारकाले अस्तीति शेषः ॥ ३७ ॥ ३८ ॥

३८] ति० टी०—संस्तूयते स्म ॥ ३८ ॥

इति श्रीरामाभिरामे श्रीरामीय रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

रा० टी०—निहत्येति । अस्त्रादिषु जितक्रमः अत एव राक्षसराजवाहिनीं निहत्य वियमानो रामः देवगणैस्संस्तूयते॥३९॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

१ मिवेति गो. पाठः । २ दिव्यमिति गो. रा. पाठः । ३ वाहिनीं त्विति गो. पाठः ।

चतुर्नवतितमः सर्गः ।

राघवनिहतपतिपुत्रभ्रातृकाणां राक्षसीनां गृहे गृहे मृतानुद्दिश्य विलापः तद्धेतुभूतशूर्पणखाधिक्षेपः शूरतमखरदूषणकुम्भकर्णादीन्द्रजिदन्तनिशाचरवधनिदर्शननिर्णीतराघवरावणजयापजयतया भयस्यान्तमपश्यन्तीनां तासां विभीषणापदेशाननुष्ठानेन रावणनिन्दा च।

तानि नागसहस्राणि सारोहाणि च वाजिनाम् । रथानां त्वग्निवर्णानां सध्वजानां सहस्रशः ॥ १ ॥
राक्षसानां सहस्राणि गदापरिघयोधिनाम् । काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम् ॥ २ ॥
निहतानि शरैर्दीप्तैस्तप्तकाञ्चनभूषणैः । रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ॥ ३ ॥
दृष्ट्वा श्रुत्वा च संभ्रान्ता हतशेषा निशाचराः । राक्षस्यश्च समागम्य दीनाश्चिन्तापरिप्लुताः ॥ ४ ॥
विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः । राक्षस्यः सह संगम्य दुःखार्ताः पर्यदेवयन् ॥ ५ ॥
कथं शूर्पणखा वृद्धा कराला निर्णतोदरी । आससाद वने रामं कंदर्पसमरूपिणम् ॥ ६ ॥
सुकुमारं महासत्त्वं सर्वभूतहिते रतम् । तं दृष्ट्वा लोकवध्या सा हीनरूपा प्रकामिता ॥ ७ ॥
कथं सर्वगुणैर्हीना गुणवन्तं महोजसम् । सुमुखं दुर्मुखी रामं कामयामास राक्षसी ॥ ८ ॥
जनस्यास्याल्पभाग्यत्वाद्वलिनी श्वेतमूर्धजा । अकार्यमप्रहास्यं च सर्वलोकविगर्हितम् ॥ ९ ॥
राक्षसानां विनाशाय दूषणस्य खरस्य च । चकारामतिरूपा सा राघवस्य प्रधर्षणम् ॥ १० ॥

गो० टी०-निहत्येति । संस्मृयत इति वर्तमाननिर्देशेन स्मृतेरथाप्यविच्छित्तत्वमुच्यते ॥ ३९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

१-३] ति० टी०-तानीति । सहस्रशः । सहस्राणीत्यर्थः ॥ १-३ ॥

४-५] ति० टी०-रावणेन प्रयुक्तानि पुङ्खार्थं प्रेषितानि रामेण हतानि दृष्ट्वा वृद्धास्तु श्रुत्वा हतशेषा बालवृद्धा निशाचरा राक्षस्यश्च समागम्य सङ्घशः संभूय दीनाश्चिन्तापरिप्लुताश्च । अभवन्निति शेषः ॥ ४ ॥ ५ ॥

रा० टी०-रावण सकलसेनाविघातानन्तरकालिकंवृत्तान्तमाह—तानीत्यार्दाभिः । रावणेन प्रयुक्तानि नागसहस्रादीनि रामेण निहतानि दृष्ट्वा श्रुत्वा च सम्भ्रान्ताः हतशेषा निशाचराः समागम्य विद्यमाना राक्षस्यश्च चिन्तापरिप्लुताः बभूवुरिति शेषः श्लोकचतुष्टयमेकान्वयि ॥ १-४ ॥

गो० टी०-अथ राक्षसीनां प्रलापः—तानि तानीत्यादिचतुःश्लोकी । वाजिनामित्येतद्वजानामप्युपलक्षणम् । सहस्रशः सहस्राणि । राक्षसीः राक्षसस्त्रियः, समागम्य चिन्तापरिप्लुताः । आसन्निति शेषः ॥ १-४ ॥

रा० टी०-विधवा इति । विधवादयो राक्षस्यः क्रोशन्त्यस्तत्यस्सह एककालावच्छेदेन संगम्य स्वकीयान् स्वकीयानालिङ्ग्य पर्यदेवयन् व्यलपन् ॥ ५ ॥

गो० टी०-विधवा इति । संगम्य संधीभूय । परस्परमालिङ्गिता इत्यर्थः ॥ ९ ॥

६] ति० टी०-परिदेवनप्रकारः—कथमिति । निर्णतोदरी निम्नोदरी ॥ ६ ॥

रा० टी०-तत्प्रकारमाह—कथमित्यादिभिः । निर्णतोदरी निम्नोदरविशिष्टा शूर्पणखा कंदर्पसमरूपिणं रामं कथमाससाद प्राप ॥ ६ ॥

गो० टी०-कथमित्यादिसार्धश्लोकमेकं वाक्यम् । कराला विकटा ॥ ६ ॥

७-८] ति० टी०-लोकवध्या लोकैर्वधार्हा । हीनरूपा रामसंनिध्यानर्हा कुत्सितरूपा । अथापि रामे प्रकामिता संजातप्रकामा ॥ ७ ॥ ८ ॥

रा० टी०-सुकुमारमिति । सुकुमारत्वादिविशिष्टं रामं दृष्ट्वा लोकवध्या सर्वजनैर्हननार्हया दुर्मुखी शूर्पणखा प्रकामिता रामे संजातकामा सती रामं कथं कामयामास इत्येष श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०-तं दृष्ट्वेत्यादि सार्धश्लोकमेकं वाक्यम् । प्रकामिता सा कथं कामयामास ॥ ७ ॥ ८ ॥

९] ति० टी०-अस्य जनस्य राक्षसजनस्य । वलिनी जरावशाज्जातवलिः । वीभत्सादित्वादिनिः ॥ ९ ॥

१०] ति० टी०-अप्रतिरूपा विकृतरूपा । 'अप्रतिरूपस्य' इति पाठे तदसदृशाकारस्येत्यर्थः ॥ १० ॥

रा० टी०-जनस्येति । वलिनी अतिदृढत्वात्सञ्जातवलिः अत एव श्वेता सूर्दजाः केशाः यस्याः सा शूर्पणखा अस्य लंकानिवासिनो जनस्य अल्पभाग्यत्वाद्धेतोः अकार्यं कार्यविध्वंसकमपहास्यमयोग्यत्वेन लोकानां हसनीयमत एव स-

---

१ तानीति गो. पाठः । २ राक्षसीरिति गो. पाठः । ३ निन्द्येति गो. पाठः ।

तन्निमित्तमिदं वैरं रावणेन कृतं महत् । वधाय सीता सा नीता दशग्रीवेण रक्षसा ॥ ११ ॥
न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम् । बद्धं बलवता वैरमक्षयं राघवेण च ॥ १२ ॥
वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम् । हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् ॥ १३ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ १४ ॥
खरश्च निहतः संख्ये दूषणः त्रिशिरास्तथा । शरैरादित्यसंकाशैः पर्याप्तं तन्निदर्शनम् ॥ १५ ॥
हतो योजनबाहुश्च कबन्धो रुधिराशनः । क्रोधान्नादं नदन्घोरं पर्याप्तं तन्निदर्शनम् ॥ १६ ॥
जघान बलिनं रामः सहस्रनयनात्मजम् । वालिनं मेरुसंकाशं पर्याप्तं तन्निदर्शनम् ॥ १७ ॥
ऋष्यमूके वसंश्चैव दीनो भग्नमनोरथः । सुग्रीवः स्थापितो राज्ये पर्याप्तं तन्निदर्शनम् ॥ १८ ॥
धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम् । युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते ॥ १९ ॥
विभीषणवचः कुर्याद्यदि स धनदानुजः । अशानभूता दुःखार्ता नेयं लङ्का भविष्यति ॥ २० ॥
कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम् । अतिकायं च दुर्धर्षं लक्ष्मणेन हतं तथा ॥
प्रियं चेन्द्रजितं पुत्रं रावणो नावबुद्ध्यते ॥ २१ ॥

लोकत्रयविनाशं राक्षसानां विनाशाय चकार लोकत्रयमकार्षीत् ॥ ८ ॥ १० ॥

शि० टी०—जनस्येत्यादिसार्धश्लोकद्वयमेकं वाक्यम् । बलिनीत्यादिः सर्वान्तः बलिनी पामादित्वात् आर्षो ङीप् । अप्रतिरूपा अननुरूपा । तन्निमित्तं पर्यायेणेतिशेषः । अर्थपर्यायशब्दयोश्चापि सत्कामनादिकमङ्गीकल्पनादिमुत्वात् सर्वज्ञोक्तमिति त्रयम् ॥ ९—१२ ॥

११] ति० टी०—तन्निमित्तं पर्यायेणनिमित्तम् । सा आनीतेति छेदः । वधाय । रक्षसामिति शेषः ॥ ११ ॥

रा० टी०—तदिति । सा अर्थपर्यायेण निमित्तं यस्मिन् तत्तस्मात् रावणेन कृतम् अत एव वधाय राक्षसानां हेतवे दशग्रीवेण सीतां आनीता च अन्यथा दशग्रीवस्सीतां न प्राप्नोति प्राप्नुयात् इतिव्यत्ययः सार्धश्लोक एकान्वयी ॥ ११ ॥

१२] ति० टी०—न प्राप्नोति न प्राप्स्यति च ॥ १२ ॥

गो० टी०—बद्धमिति । अक्षयं वैरं बलवता राघवेण बद्धं रावणेनेति शेषः एतेन रावणस्यापि विघातोऽवश्यं भविष्यतीति सूचितम् अर्धं पृथक् ॥ १२ ॥

१३—२०] ति० टी०—प्रार्थयानं प्रार्थयमानम् । एकेनासहायेन रामेण ब्रह्मदत्तवरमपि हतं विराधं सेंद्रेण स्थितस्य रावणस्य तदेकमेव पर्याप्तं निदर्शनम् । रामस्य सदेवासुरस्यकल्लोकातिशायित्वाधिगमाय पर्याप्तं निदर्शनमित्यर्थः ॥१३—२०॥

रा० टी०—रामस्य बलवत्त्वमुपादयन्त्य आहुः—वैदेहीमित्यादिभिः । वैदेहीं प्रार्थयानं विराधं प्रेक्ष्य एकेन वानरेण रामेण हतं प्रत्यासत्त्या विराध एव सामान्ये नपुंसकम् तत् निदर्शनं दृष्टान्तः पर्याप्तम् ॥ १३ ॥

गो० टी०—वैदेहीमिति । विराधं प्रेक्ष्य ज्ञात्वा, स्थितानामस्माकं तत् विराधहननं विरोधिनिरसनाय पर्याप्तं पूर्णं निदर्शनम् ॥ १३ ॥

रा० टी०—चतुर्दशेति । रक्षसां चतुर्दश सहस्राणि निहतानि ॥ १४ ॥

रा० टी० खर इति । परमप्रतिनिहतः ॥ १५ ॥

गो० टी०—चतुर्दशेति । श्लोके पर्याप्तं तन्निदर्शनमित्यनुषज्यते । इतरश्लोकेऽपि तत्पदद्वयमेवंरूपम् ॥१४—१७॥

रा० टी०—हत इति । क्रोधात् नादं नदन् योजनबाहुः कबन्धो हतः ॥ १६ ॥

रा० टी०—जघानेति । रामो वालिनं जघान ॥ १७ ॥

रा० टी०—ऋष्येति । दीनस्सुग्रीवः राज्ये प्रापितः तदपि निदर्शने गमकं पर्याप्तम् ॥ १८ ॥

रा० टी० धर्मार्थेति । विभीषणेनोक्तं वाक्यं मोहाद्धेतोः तस्य रावणस्य न रोचते अरोचत ॥ १९ ॥

रा० टी०—विभीषणेति । धनदानुजो रावणः यदि विभीषणवचः कुर्यात् तदा लेका अशानभूता न भवेत् ॥ २० ॥

गो० टी०—हत इति । अथ खरवधानन्तरम् । नादं शब्दम्, नदन् कुर्वन्, सः प्रसिद्धः कबन्धः ॥ १६—२० ॥

२१] ति० टी०—इन्द्रजितमपि हतं श्रुत्वा नावबुध्यते । पराक्रममिति शेषः ॥ २१ ॥

रा० टी०—कुंभकर्णमिति । राघवेण निहतं कुम्भकर्णप्रभृतिं श्रुत्वापि रावणो नैव बुध्यते रामं बलवत्त्वेन न जानीते सार्धश्लोक एकान्वयी ॥ २१ ॥

गो० टी०—कुम्भकर्णमित्यादि । नावबुध्यते रामप्रभावमिति शेषः ॥ २१ ॥

१ मेरुरिति गो. पाठः । २ शैल इति गो. पाठः । ३ स्थापितो राज्य इति गो. पाठः । ३ पुनरिति गो. पाठः ।

मम पुत्रो मम भ्राता मम भर्ता रणे हतः । इत्येष श्रूयते शब्दो राक्षसीनां कुले कुले ॥ २२ ॥
रथैरश्वैर्नागैश्च हतास्तत्र तत्र सहस्रशः । रणे रामेण शूरेण हताश्चापि पदातयः ॥ २३ ॥
रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः । हन्ति नो रामरूपेण यदि वा स्वयमन्तकः ॥ २४ ॥
हतप्रवीरा रामेण निराशा जीविते वयम् । अपश्यन्त्यो भयस्यान्तमनाथा विलपामहे ॥ २५ ॥
रामहस्तादशग्रीवः शूरो दत्तमहावरः । इदं भयं महाघोरं समुत्पन्नं न बुद्ध्यते ॥ २६ ॥
तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः । उपसृष्टं परित्रातुं शक्ता रामेण संयुगे ॥ २७ ॥
उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे । कथयन्ति हि रामेण रावणस्य निबर्हणम् ॥ २८ ॥
पितामहेन प्रीतेन देवदानवराक्षसैः । रावणस्याभयं दत्तं मनुष्येभ्यो न याचितम् ॥ २९ ॥
तदिदं मानुषं मन्ये प्राप्तं निःसंशयं भयम् । जीवितान्तकरं घोरं रक्षसां रावणस्य च ॥ ३० ॥
पीड्यमानास्तु बलिना वरदानेन रक्षसा । दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन् ॥ ३१ ॥
देवतानां हितार्थाय महात्मा वै पितामहः । उवाच देवतास्तुष्ट इदं सर्वा महद्वचः ॥ ३२ ॥

२२-२४] ति० टी०—कुले कुले गृहे गृहे ॥ २२-२४ ॥

रा० टी०—ममेति । मम पुत्रादिर्हतः इत्येष शब्दः राक्षसीनां कुले कुले प्रतिसमूहे श्रूयते ॥ २२ ॥

रा० टी०—रथेति । रामेण रथादयो हताः ॥ २३ ॥

रा० टी०—रुद्र इति । रुद्रादन्यतमः रामरूपेण नोऽस्मान् हन्ति ॥ २४ ॥

गो० टी०—ममेति । कुले कुले गृहे गृहे । इदमपि राक्षसीवाक्यमेव ॥ २२-२४ ॥

२५] ति० टी०—अपश्यन्तोऽपश्यन्त्यः ॥ २५ ॥

रा० टी०—हतेति । रामेण हताः प्रवीराः पत्यादयो यासाम् अत एव अनाथाः अत एव जीविते जीवने निराशा वयं स्त्रीजनाः भयस्यान्तमपश्यन्तस्सन्तः विलपामहे ॥ २५ ॥

गो० टी०—हतप्रवीरेति । वयमित्येतदपेक्षया अपश्यन्त इति पुल्लिङ्गम् । विलपामहे इत्यात्मनेपदमार्षम् ॥ २५॥२६ ॥

२६] ति० टी०—रामहस्तात्प्राप्तमिदं स्वस्य भयं शूरो ब्रह्मदत्तमहावर इति कृत्वा तदुवाच बुध्यते ॥ २६ ॥

रा० टी०—रामेति । दत्तो महावरः देवादिभ्यो मृत्युराहित्यरूपमीप्सितं यस्मै स दशग्रीवः रामहस्तात् समुत्पन्नं भयं न बुध्यते ॥ २६ ॥

२७] ति० टी०—उपसृष्टं हन्तुमारब्धम् ॥ २७ ॥

रा० टी०—ननु स्वाभयस्य प्राप्तत्वात् न तस्य भीतिरित्यत आह—तमिति । रामेण उपसृष्टं युद्धाय प्रवृत्तं तं रावणं त्रातुं देवादयो न शक्ताः ॥ २७ ॥

गो० टी०—न देवा इति । उपसृष्टम् उपद्रुतम् ॥२७॥

२८] ति० टी०—कथयन्तीति । तदुत्पातफलं माल्यवदादयो वृद्धा इति शेषः ॥ २८ ॥

रा० टी०—तत्र गमकमाह—उत्पाता इति । रावणस्य रणे रणे ये उत्पाता दृश्यन्ते ते रामेण रावणस्य निबर्हणं विनाशं कथयन्ति ॥ २८ ॥

गो० टी०—उत्पाताश्चापीति । कथयिष्यन्ति, इतः परमपि कानिचिन्निमित्तानि प्रादुर्भूय कथयिष्यन्तीत्यर्थः । वर्तमाने तात्पर्यमित्यप्याहुः ॥ २८ ॥

२९-३०] ति० टी०—रामेणास्य वधे उपपत्तिं चाहुः—पितामहेनेति । देवदानवराक्षसेभ्यः ॥ २९ ॥ ३० ॥

रा० टी०—ननु पितामहदत्तवरस्य मिथ्यात्वं कथं भविष्यतीत्यत आह—पितामहेनेति । पितामहेन देवादिभिः देवादिभ्य एव अभयं दत्तं ननु रामात् कुतो न दत्तमित्यत आह मानुषेभ्योऽभयं न याचितम् ॥ २९ ॥

गो० टी०—पितामहेनेति । देवदानवराक्षसैः देवदानवराक्षसेभ्यः ॥ २९

रा० टी०—तदिति । ननु मनुष्यादभयप्राप्त्यभावाद्धेतोः रक्षसां रावणस्य च निस्संशयं जीवितान्तकरं मानुषमिदं भयं मन्ये ॥ ३० ॥

गो० टी०—तदिदमिति । मानुषं मानुषादागतम् । मन्ये मन्यामहे ॥ ३० ॥

३१-३२] ति० टी०—रावणेन पीड्यमानदेवैः प्रसारितस्य ब्रह्मणोऽनुग्रहादपि क्षयो राक्षसानामित्याहुः—पीड्यमानास्त्विति ॥ ३१ ॥ ३२ ॥

रा० टी०—रावणविनाशे हेत्वन्तरमाह—पीड्यमाना इत्यादिभिः । वरदानेन हेतुना बलिना रक्षसा पीड्यमानाः विबुधाः देवाः दीप्तैस्तपोभिरुपलक्षितं पितामहमपूजयन् ॥३१॥

रा० टी०—देवतानामिति । तुष्टः पितामहः देवतानां हितार्थाय सर्वा देवताः इदं वच उवाच ॥ ३२ ॥

गो० टी०—पीड्यमानास्तु बलिनेति । रक्षसा रावणेन । वरदानेन करणेन ॥ ३१ ॥ ३२ ॥

---

१ एवमिति गो. पाठः । २ रथाश्चाश्वाश्च नागाश्च हताः शतसहस्रशः इति गो. रा. पाठः । ३ राक्षसाश्चेति गो. रा. पाठः । ४ उत्पन्नं नावबुध्यते इति गो. पाठः । ५ सर्वा इदं तुष्टो महद्वच इति गो. रा.पाठः ।

अद्यप्रभृति लोकांस्त्रीन्सर्वे दानवराक्षसाः । भयेन प्रभृता नित्यं विचरिष्यन्ति शाश्वतम् ॥ ३३ ॥
दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः । वृषध्वजस्त्रिपुरहा महादेवः प्रतोषितैः ॥ ३४ ॥
प्रसन्नस्तु महादेवो देवानेतद्वचोऽब्रवीत् । उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा ॥ ३५ ॥
एषा देवैः प्रयुक्ता तु क्षुद्यथा दानवान्पुरा । भक्षयिष्यति नः सैन्यान्राक्षससङ्घान् सरावणान् ॥ ३६ ॥
रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः । अयं निष्टानको घोरः शोकेन समभिप्लुतः ॥ ३७ ॥
तं न पश्यामहे लोके यो नः शरणदो भवेत् । राघवेणोपसृष्टानां कालेनेव युगक्षये ॥ ३८ ॥
नास्ति नः शरणं किंचिद्भये महति तिष्ठताम् । दावाग्निवेष्टितानां हि करेणूनां यथा वने ॥ ३९ ॥
प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना । यत एव भयं दृष्टं तमेव शरणं गतः ॥ ४० ॥
इतीव सर्वा रजनीचरस्त्रियः परस्परं संपरिरभ्य बाहुभिः ।
विपेदुरार्तातिभयाभिपीडिता विनेदुरुच्चैश्च तदा सुदारुणम् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

३३] ति० टी०–दानवा राक्षसाश्च भयेन प्रभृता देवेभ्यो भयं बिभ्राणा एव विचरिष्यन्ति । देवाः स्वतः परतो वास्मान्पीडयिष्यन्तीति भययुक्ता एव भविष्यन्तीत्यर्थः ॥ ३३ ॥

रा० टी०–तदाकारमाह—अद्येति । अद्यप्रभृति अस्मात् कालादारभ्य दानवराक्षसाः भयेन प्रभृताः पोषिताः युक्ता इत्यर्थस्सन्तो विचरिष्यन्ति ॥ ३३ ॥

गो० टी०–अद्यप्रभृतीति । दानवराक्षसा इत्युक्तेर्मन्दोदरीसंबन्धेन दानवाश्च केचिद्राक्षसैः सह विहरन्तीति ज्ञेयम् ॥ ३३–३५ ॥

३४–३५] ति० टी०–एवं ब्रह्मणः प्रसादात्सभयत्वमात्रं प्राप्तम्, संहाराधिकृतरुद्रप्रसादेन तु नाश एवास्माकमित्याहुः–दैवतैरिति ॥ ३४ ॥ ३५ ॥

रा० टी०–दैवतैरिति । तु अनन्तरं दैवतैस्समागम्य महादेवः प्रसादितः ॥ ३४ ॥

रा० टी०–प्रसन्न इति । वो हितार्थं रक्षःक्षयावहा नारी उत्पत्स्यति एतद्वचः प्रसन्नो महादेवः देवानब्रवीत् ॥ ३५ ॥

३६] ति० टी०–सैषा सीतैवेत्याहुः–एषेति । पुरा पूर्वकल्पे । देवैर्दानवनाशार्थं प्रयुक्ता क्षुधथा दानवान्हरति स्म, एवं देवैः प्रयुक्तैषा सीतापि सरावणान्रावणसहितानस्मान्भक्षयिष्यति ॥ ३६ ॥

रा० टी०–एषेति । पुरा पूर्वकल्पे देवैः प्रयुक्ता एषा क्षुत् दानवानभक्षयत तथा राक्षससङ्घा एषा सीता नो अस्मान् भक्षयिष्यति ॥ ३६ ॥

गो० टी०–एषेति । क्षुधथा दानवान् पुरेति । देवेभ्योऽमृतप्रदानानन्तरमिति बोध्यम् । अस्मच्छब्दापेक्षया सरावणानित्युक्तिः ॥ ३६ ॥

३७–३९] ति० टी०–अपनीतेनानयेन । निष्टानको नाशः शोकसहितः प्राप्तः ॥ ३७–३९ ॥

रा० टी०–रावणस्येति । दुर्विनीतस्य रावणस्य अपनीतेन दुर्नयेन शोकेन समभिप्लुतो युक्तः अयं निष्टानको नाशः आप्नोतीति शेषः ॥ ३७ ॥

गो० टी०–रावणस्येति । निष्टानकः नाश इत्याहुः ॥ ३७ ॥

रा० टी०–तमिति । कालेनेव राघवेण उपसृष्टानां प्राप्तभयानां नोऽस्माकं यः शरणदो रक्षाप्रदो भवेत् तं न पश्यामहे ॥ ३८ ॥

रा० टी०–नास्तीति । दावाग्निवेष्टितानां करेणूनामिव महति भये तिष्ठतां नोऽस्माकं शरणं किंचिन्नास्ति ॥ ३९ ॥

गो० टी०–तमिति । पश्यामह इत्यात्मनेपदमार्षम् ॥ ३८ ॥ ३९ ॥

४०–४१] ति० टी०–प्राप्तकालं कालोचितम् । पौलस्त्येन विभीषणेन । यत एव यस्माद्रामादेव भयं दृष्टम् । स्वमन्त्रशक्तिवैभवेनेति शेषः ॥ ४० ॥ ४१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणशिलोके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

रा० टी०–प्राप्तेति । यतो यस्मात् रामात् भयं दृष्टं तं राममेव शरणं गतः विभीषण इति शेषः अतः पौलस्त्येन विभीषणेन प्राप्तकालं यथोचितं कृतम् ॥ ४० ॥

रा० टी०–इतीवेति । अतिभयेनाभिपीडिताः चञ्चलचित्ताः अत एवार्ता दुःखिताः रजनीचरस्त्रियः परस्परं संपरिरभ्य इतीव अत्यन्तं सुदारुणं विलेपुः अत एव विनेदुरुच्चैश्शब्दं चक्रुः आर्तातीव्रत्र सन्धिरत एव आपकाल आर्तं प्राप्तं यदतिभयं तेन अभिपीडिता इत्यर्थो वा ॥ ४१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पंचनवतितमः सर्गः ॥ ९५ ॥

गो० टी०–प्राप्तकालमिति । प्राप्तकालम् उचितम् । पौलस्त्येन विभीषणेन । इतः परं तस्यैव पौलस्त्यकुलप्रतिष्ठापकत्वात्तच्छब्दप्रयोगः । अत्र पितामहादिवरप्रदानवृत्तान्तो

---

१ प्रभृता इति गो. पाठः । २ प्रसादित इति गो. रा. पाठः । ३ सीतेति गो. रा. पाठः । ४ कश्चिदिति गो. रा. पाठः ।

पञ्चनवतितमः सर्गः ।

रावणो राक्षसीनां प्रतिसञ्चार्तस्वमाकर्ण्य रुषा दशनैरोष्ठं संदश्य महोदरमहापार्श्वविरूपाक्षाख्यशूरनिशाचरान्स्वबलैः सह द्रुतं निर्यातेत्यादिश्य स्वविक्रमकत्थनपुरस्सरमग्र पतिपुत्रादिवियुक्तानां राघवपातनेनाश्रु प्रमार्जिष्यामीति वदन्यदा निष्क्रान्तस्तदानुपदमशकुनप्रादुर्भावमालोक्यारममपश्यत् ।

आर्तानां राक्षसीनां तु लङ्कायां वै कुले कुले । रावणः करुणं शब्दं शुश्राव परिदेवितम् ॥ १ ॥
स तु दीर्घं विनिःश्वस्य मुहूर्तं ध्यानमास्थितः । बभूव परमक्रुद्धो रावणो भीमदर्शनः ॥ २ ॥
संदश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः । राक्षसैरपि दुर्दर्शः कालाग्निरिव मूर्तिमान् ॥ ३ ॥
उवाच च समीपस्थान्राक्षसान्राक्षसेश्वरः । क्रोधाव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा ॥ ४ ॥
महोदरं महापार्श्वं विरूपाक्षं च राक्षसम् । शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः । चोदयामासुरव्यग्रान्राक्षसांस्तान्नृपाज्ञया ॥ ६ ॥
ते तु सर्वे तथेत्युक्त्वा राक्षसा भीमदर्शनाः । कृतस्वस्त्ययनाः सर्वे ते रणाभिमुखा ययुः ॥ ७ ॥
प्रतिपूज्य यथान्यायं रावणं ते महारथाः । तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः ॥ ८ ॥
ततोवाच प्रहस्यैतान्रावणः क्रोधमूर्च्छितः । महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ॥ ९ ॥
अद्य बाणैर्धनुर्मुक्तैर्युगान्तादित्यसंनिभैः । राघवं लक्ष्मणं चैव नेष्यामि यमसादनम् ॥ १० ॥
खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा । करिष्यामि प्रतीकारमद्य शत्रुवधादहम् ॥ ११ ॥

राक्षसीभिरित्यादिरामकाशाच्छत इति ज्ञेयम । सा च जानट्टङ्कनि वक्ष्यते ॥ ४० ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभाषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चनवतितमः सर्गः ॥ ९५ ॥

१-२] ति० टी०-आर्तानामिति । कुलेकुले गृहे गृहे ॥ १-३ ॥

४-५] ति० टी०-क्रोधेनाव्यक्ता कथा कथनं यस्य सः ॥ ४ ॥ ५ ॥

रा० टी०-राक्षसीविलापानन्तरकालिकं रावणवृत्तान्तमाह—आर्तानामिति । रावणः राक्षसीनां परिदेवितमुच्चारितं करुणं शब्दं कुले कुले शुश्राव ॥ १ ॥

रा० टी०-स इति । रावणः दीर्घं विनिःश्वस्य मुहूर्तं ध्यानं विचारमास्थितो बभूव ॥ २ ॥

गो० टी०-अथ रावणनियोगम्-आर्तानामित्यादि । परिदेवितं परिदेवितरूपं शब्दम् ॥ १ ॥ २ ॥

रा० टी०-संदश्येति । क्रोधेन संरक्तानि लोचनानि यस्य सः क्रोधेन अव्यक्ता कथा कथनं यस्य स रावणः दशनैरोष्ठं संदश्य चक्षुषा निर्दहन्निव समीपस्थान् राक्षसानुवाच श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

रा० टी०-तदाकारमाह—महोदरमिति । ममाज्ञया सैन्यानि यूयं निर्यापयत निस्सारयत इति महोदरादीन् शीघ्रं वदत यदि तु सैन्यशब्देन रिपुसेना गृह्येत तदा नान्तर्भावितणिचूकल्पना ॥ ५ ॥

गो० टी०-संदश्येत्यादिश्लोकद्वयमेकान्वयम् । पूर्वतः अभिमुखः कालाग्निरिव स्थितः । भयाव्यक्तकथः भयादव्यक्तवचनः । ममाज्ञया यदेतत्पूर्वोक्तेत्यर्थः । इमौ महोदरमहापार्श्वौ भवितौ । पूर्वहतौ तु मत्तप्रमत्तापरपर्यायौ रावणभ्रातरौ ॥ ३-८ ॥

६-८] ति० टी०-अव्यग्रान्रावणोत्साहेन त्यक्तभयान् ॥ ६-८ ॥

रा० टी०-तस्येति । तस्य रावणस्य वचनं श्रुत्वा भयार्दिताः राक्षसाः राक्षसान् महोदरादीन चोदयामासुः ॥ ६ ॥

रा० टी०-ते इति । ते श्रुतराजाज्ञाः अत एव कृतस्वस्त्ययनाः सर्वे रणाय सर्वेषां रिपूणामीरणाय प्रकम्पनाय अभिमुखाः प्रकाशितवदनाः सर्वे राक्षसाः ययुः रावणसमीपं प्राप्युः ॥ ७ ॥

रा० टी०-प्रतीति । महारथाः महोदरप्रभृतयः रावणं यथान्यायं प्रतिपूज्य प्राञ्जलयः सन्तः तस्थुः ॥ ८ ॥

९-११] ति० टी०-ततोवाच तत उवाच । प्रहस्य । क्रोधजोत्र प्रहासः ॥ ९-११ ॥

रा० टी०-तत इति । रावणः महोदरमहापार्श्वौ विरूपाक्षं चेतान् प्रहस्योवाच ततो वाचेत्यत्र गुण आर्षः ॥ ९ ॥

रा० टी०-तदाकारणमाह—अद्येत्यादिभिः । बाणैर्यमसादनं नेष्यामि ॥ १० ॥

---

१ मूर्च्छित इति गो. रा. पाठः । २ भयेति गो. पाठः । ३ महोदरमहापार्श्वाविति गो. पाठः । ४ घोरेति गो. रा. पाठः । ५ रणायाभिमुखा इति गो. पाठः । ६ निशाचरा इति गो. पाठः । ७ भयेति गो. पाठः

नैवान्तरिक्षं न दिशो न द्यौर्नापि सागराः । प्रकाशत्वं गमिष्यन्ति मद्बाणजलदावृताः ॥ १२ ॥
अद्य वानरमुख्यानां तानि यूथानि भागशः । धनुषा शरजालेन वैधिष्यामि पतत्रिणा ॥ १३ ॥
अद्य वानरसैन्यानि रथेन पवनौजसा । धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः ॥ १४ ॥
व्याकोशपद्मवक्त्राणि पद्मकेसरवर्चसाम् । अद्य यूथपतटाकानि गजवत्प्रमथाम्यहम् ॥ १५ ॥
सशरैरद्य वदनैः संख्ये वानरयूथपाः । मण्डयिष्यन्ति वसुधां सनालैरिव पङ्कजैः ॥ १६ ॥
अद्य यूथपचण्डानां हरीणां द्रुमयोधिनाम् । मुक्तेनैकेषुणा युद्धे भेत्स्यामि च शतं शतम् ॥ १७ ॥
हतो भ्राता च येषां वै येषां च तनयो हतः । वधेनाद्य रिपोस्तेषां करोम्यश्रुप्रमार्जनम् ॥ १८ ॥
अद्य मद्बाणनिर्भिन्नैः प्रस्तीर्णैर्गतचेतनैः । करोमि वानरैर्युद्धे यन्नावेक्ष्यतलां महीम् ॥ १९ ॥
अद्य काकाश्च गृध्राश्च ये च मांसाशिनोऽपरे । सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः सराहवैः ॥ २० ॥
कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः । अनुप्रयान्तु मां युद्धे येऽन्ये शिष्टा निशाचराः २१ ॥
तस्य तद्वचनं श्रुत्वा महापार्श्वोऽब्रवीद्वचः । बलाध्यक्षान्स्थितांस्तत्र बलं संन्वर्यतामिति ॥ २२ ॥
बलाध्यक्षास्तु संयुक्ता राक्षसांस्तान्गृहे गृहे । चोदयन्तः पांसयुर्लङ्कां लघुपराक्रमाः ॥ २३ ॥

गो०टी०—अर्थयति । पहस्येति । शत्रुं तृणीकरणात् ॥९॥१०॥

रा० टी०—खरस्येति । शत्रुवधात् खरादेः प्रत्युपकारं करिष्यामि ॥ ११ ॥

गो० टी०—खरस्येत्यादिषु । वधस्येति शेषः ॥११–१४॥

१२] ति० टी०—प्रकाशत्वं प्रकटत्वम् ॥ १२ ॥

रा० टी०—नेति । मद्बाणजलदैरावृताः अन्तरिक्षादयः प्रकाशत्वं न गमिष्यन्ति ॥ १२ ॥

१३] ति० टी०—पतत्रिणा प्रशस्तपक्षवता ॥ १३ ॥

रा० टी०—अद्येति । वानरमुख्यानां यूथानि शरजालेन वधिष्यामि ॥ १३ ॥

१४] ति० टी०—धनूरूपात्समुद्रात् ॥ १४ ॥

रा० टी०—अद्येति । धनुःसमुद्रात् उद्भूतैः शरोर्मिभिः रथनौकालक्षितोऽहं वानरसैन्यानि मथिष्यामि ॥ १४ ॥

१५] ति० टी०—व्याकोशपद्मवक्त्राणि विकसितपद्मानि । पद्मकेसरवर्चसाम् । वानराणामिति शेषः । यूथपानि तटाकानि प्रमथामि प्रमथिष्यामि ॥ १५ ॥

रा० टी०—व्याकोशेति । व्याकोशपद्मानि विकसितपद्मानीव वक्त्राणि येषु तानि पद्मकेसरवद्वर्चो येषां तेषां वानराणां यूथतटाकानि अहं गजवत्प्रमथामि ॥ १५ ॥

गो० टी०—आकोशेति । आकोशपद्मवक्त्राणि इंपद्विकसितपद्मभूतवक्त्राणि । पद्मकेसरवर्चसाम् वानराणामिति शेषः । प्रमथामि प्रमथ्नामि आभाव आर्षः ॥ १५–१८ ॥

१६–१८] ति० टी०—सशरैः शरसहितैर्वदनैः स्वीयैः । सशस्त्वात्सनालैः पङ्कजैरिव ॥ १६–१८ ॥

रा० टी०—सेति । सनालैः पङ्कजैरिव सशरैः शरसहितैर्वदनैर्वानरयूथपाः वसुधां मण्डयिष्यन्ति ॥ १६ ॥

रा० टी०—अद्येति । मुक्तेन एकेषुणा बालानां शतं शतं भेत्स्यामि ॥ १७ ॥

रा० टी०—हत इति । येषां भ्राता हतः येषां च तनयो हतः तेषामश्रुप्रमार्जनं तेषां रिपोरेव करोमि ॥ १८ ॥

१९–२३] ति० टी०—यत्नेनावेक्ष्यमाणां योग्यं तलं यस्यास्तथाभूताम् ॥ १९–२३ ॥

रा० टी०—अद्येति । मद्बाणेन निर्भिन्नैः अत एव गतचेतनैः अत एव प्रकीर्णैरित्यस्यैव प्रतिपादनाय यत्नेन अतिप्रयत्नेन अवेक्ष्यं द्रष्टुं योग्यं तलं यस्याः ताः करोमि ॥१९॥

रा० टी०—अद्येति । शरैरर्पितैश्शत्रुमांसैः काकादयो ये मांसाशिनः तान् स्वान् तर्पयिष्यामि ॥ २० ॥

गो० टी०—अद्येति । गतचेतनैः मृतप्रायैः । यत्नावेक्ष्यतलामिति । निरन्तरेण भूमौ वानरान् पातयिष्यामीत्यर्थः १९।२०

रा० टी०—कल्प्यतामिति । मे मम कल्प्यताम् अश्वाद्यभिर्योज्यताम् धनूंषि आनीयतां च शिष्टा निशाचराः मामनुप्रयान्तु च ॥ २१ ॥

रा० टी०—तस्येति । तस्य रावणस्य वचनं श्रुत्वा महापार्श्वः बलं सैन्यं संन्वर्यतामिति वचः स्थितान् बलाध्यक्षान् अब्रवीत् ॥ २२ ॥

गो० टी०—कल्प्यतामिति । कल्प्यताम् आकल्प्यताम् । आकल्प्यतामित्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०—बलेति । संयुक्ता नियोजिताः बलाध्यक्षाः गृहे गृहे राक्षसान् चोदयन्तः सन्तः लङ्कां परिषयुः तत्र विचरुः ॥ २३ ॥

गो० टी०—बलाध्यक्षास्त्विति । संन्वर्या इति । पुनः पुनराह्वानेष्वनागमनात् कुपिता इत्यर्थः । परिषयुः प्रतिरक्ष्यं ययुरित्यर्थः ॥ २३ ॥

१ नद्य इति गो. पाठः । २ विधमिष्यामि पत्रिणेति गो. पाठः । ३ आकोशेति गो. पाठः । ४ हतो भर्ता हतो भ्राता यासां च तनया हता इति गो. पाठः । ५ तासामिति गो. पाठः । ६ अक्षेति गो. पाठः । ७ प्रकीर्णैरिति गो. रा. पाठः । ८ गोमायवो गृध्रा इति गो. रा. पाठः । ९ अर्पितैरिति गो. रा. पाठः । १० सर्वे इति गो. रा. पाठः । ११ अवेति गो. चेति रा. पाठः । १२ संरब्धा इति गो. पाठः । १३ लङ्कायां तु महाबला इति गो. पाठः ।

ततो मुहूर्तान्निष्पेतू राक्षसा भीमदर्शनाः । नदन्तो भीमवदना नानाप्रहरणैर्भुजैः ॥ २४ ॥
असिभिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हलैः[1] । शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः ॥ २५ ॥
यष्टिभिर्विविधैश्चक्रैर्निशितैश्च परश्वधैः । भिन्दिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः ॥ २६ ॥
अथानयन्बलाध्यक्षाश्चत्वारो[2] रावणाज्ञया । रथानां नियुतं साग्रं नागानां नियुतत्रयम् ॥ २७ ॥
अश्वानां पंक्तिकोट्यस्तु खरोष्ट्राणां तथैव च । पदातयस्त्वसंख्याता जग्मुस्ते राजशासनात्[3]॥ २८ ॥
बलाध्यक्षाश्च संस्थाप्य राज्ञः सेनां पुरस्थिताम् । एतस्मिन्नन्तरे सूतः स्थापयामास तं रथम् ॥ २९ ॥
दिव्यास्त्रवरसंपन्नं नानालंकारभूषितम् । नानायुधसमाकीर्णं किङ्किणीजालसंयुतम् ॥ ३० ॥
नानारत्नपरिक्षिप्तं रत्नस्तम्भैर्विराजितम् । जाम्बूनदमयैश्चैव सहस्रकलशैर्वृतम् ॥ ३१ ॥
तं दृष्ट्वा राक्षसाः सर्वे विस्मयं परमं गताः । तं दृष्ट्वा सहसोत्थाय रावणो राक्षसेश्वरः ॥ ३२ ॥
कोटिसूर्यप्रतीकाशं ज्वलन्तमिव पावकम् । द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम् ॥
आरुरोह तदा भीमं दीप्यमानं स्वतेजसा । ॥ ३३ ॥
ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः । रावणः सत्त्वगाम्भीर्याद्वारयन्निव मेदिनीम् ॥ ३४ ॥
ततश्चोसीन्महानादस्तूर्याणां च ततस्ततः । मृदङ्गैः पटहैः शङ्खैः कलहैः सह रक्षसाम् ॥ ३५ ॥
आगतो रक्षसां राजा छत्रचामरसंयुतः । सीतापहारी दुर्वृत्तो ब्रह्मघ्नो देवकण्टकः ॥
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः । ॥ ३६ ॥
तेन नादेन महता पृथिवी समकम्पत । तं शब्दं सहसा श्रुत्वा वानरा दुद्रुवुर्भयात् ॥ ३७ ॥
रावणस्तु महाबाहुः सचिवैः परिवारितः । आजगाम महातेजा जयाय विजयं प्रति ॥ ३८ ॥
रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ । विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा ॥ ३९ ॥
ते तु हृष्टाभिनर्दन्तो भिन्दन्त इव मेदिनीम् । नादं घोरं विमुञ्चन्तो निर्ययुर्जयकाङ्क्षिणः ॥ ४० ॥
ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः । निर्ययावुद्यतधनुः कालान्तकयमोपमः ॥ ४१ ॥
ततः प्रजविताश्वेन रथेन स महारथः । द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ ॥ ४२ ॥

२४] ति० टी०–भुजैरुपलक्षिताः ॥ २४ ॥
२५–३२] ति० टी०–हलैरायुधविशेषैः ॥ २५–३२ ॥
रा० टी०–तत इति । अस्यादिभिः नानाप्रहरणैरुपलक्षिताः नदन्तो राक्षसाः मुहूर्तात् निष्पेतुः श्लोकत्रयमेकान्वयि ॥ २४–२६ ॥
गो० टी०–तत इत्यादिश्लोकत्रयमेकान्वयम् । हुलैः द्विफलपत्राग्रायुधविशेषैः । हुलं द्विफलपत्राग्रमिति वैजयन्ती । भुजैरित्यायुपलक्षणे तृतीया ॥ २४–२६ ॥
रा० टी०–अथेति । बलाध्यक्षाः रावणाज्ञया सूतेन समायुक्तं युक्ता अष्टौ तुरगा यस्मिन् तं रथमानयन् अत एव भीमो भयङ्करः स्वतेजसा दीप्यमानो रावणः आरुरोह सार्द्धश्लोक एकान्वयी ॥ २७ ॥
गो० टी०–अथेति । अथानयद्बलाध्यक्षः सर्वतो रावणाज्ञया । द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथमिति पाठः ॥ २७ ॥
३३] ति० टी०–अमायां सूर्योदय इदं रथारोहणम् ॥ ३३ ॥
गो० टी०–आरुरोहेत्यर्धमेकं वाक्यम् । भीमः रावणः ॥ २८ ॥
३४-४१] ति० टी०–सत्त्वगाम्भीर्याद्बलातिशयात् ३४-४१
रा० टी०–तत इति । बहुभिः राक्षसैर्वृतो रावणः सत्त्वगाम्भीर्यात् बलाधिक्याद्धेतोः मेदिनीं दारयन्निव ततो लङ्कायाः प्रयातोऽभवदिति शेषः ॥ २८ ॥
रा० टी०–रावणेनेति । महापार्श्वादयः रथानारुरुहुः २९
रा० टी०–ते इति । घोरं नादं विमुञ्चन्तः मेदिनीं भिन्दन्त इव हृष्टास्ते महापार्श्वादयो निर्ययुः ॥ ३० ॥
रा० टी०–तत इति । रक्षोगणबलैर्वृतो रावणः युद्धाय निर्ययौ ॥ ३१ ॥
गो० टी०–ततः प्रयात इति । सत्त्वगाम्भीर्यात् बलातिशयात् ॥ २९–३२ ॥
४२] ति० टी०–प्रजविताश्वेन प्रकर्षेण संजातवेगा अश्वा यस्य तेन ॥ ४२ ॥

---

१ हुलैरिति गो. पाठः । २ आनयद्बलाध्यक्षः सत्वर इति गो. पाठः । ३ इत आरभ्य पञ्चपदं गो. रा. पुस्तकयोर्नास्ति । ४ भीम इति गो. रा पाठः । ५ इतः सार्धश्लोकचतुष्टयं गो. रा. पुस्तकयोर्नास्ति । ६ वीति गो. रा. पाठः । ७ जवनेति गो. पाठः ।

ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः । द्विजाश्च नेदुर्घोराश्च संचचाल च मेदिनी ॥ ४३ ॥
ववर्ष रुधिरं देवश्चस्खलुश्च तुरंगमाः । ध्वजाग्रे न्यपतद्गृध्रो विनेदुश्चाशिवाः शिवाः॥ ४४ ॥
नयनं चास्फुरद्रामं वामो बाहुरकम्पत । विवर्णवदनश्चासीत्किंचिदभ्रश्यत स्रजः ॥ ४५ ॥
ततो निष्पततो युद्धे दशग्रीवस्य रक्षसः । रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे ॥ ४६ ॥
अन्तरिक्षात्पपातोल्का निर्घातसमनिःस्वना । विनेदुरशिवा गृध्रा वायसैरभिमिश्रिताः ॥ ४७ ॥
एतानचिन्तयन्घोरानुत्पातान्समवस्थितान् । निर्ययौ रावणो मोहाद्वधार्थं कालचोदितः ॥ ४८ ॥
तेषां तु रथघोषेण राक्षसानां महात्मनाम् । वानराणामपि चमूर्युद्धायैवाभ्यवर्तत ॥
[तेषां तु तुमुलं युद्धं बभूव कपिरक्षसाम्]
अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम् । ॥ ४९ ॥
ततः क्रुद्धो दशग्रीवः शरः काञ्चनभूषणैः । वानराणामनीकेषु चकार कदनं महत् ॥ ५० ॥
निकृत्तशिरसः केचिद्रावणेन बलीमुखाः । केचिद्विच्छिन्नहृदयाः केचिच्छ्रोत्रविवर्जिताः ॥५१॥
निरुच्छ्वासा हताः केचित्केचित्पार्श्वेषु दारिताः । केचिद्विभिन्नशिरसः केचिच्चक्षुर्विनाकृताः ॥ ५२ ॥
दशाननः क्रोधविवृत्तनेत्रो यतो यतोऽभ्येति रथेन संख्ये ।
ततस्ततस्तस्य शरप्रवेगं सोढुं न शेकुर्हरियूथपास्ते ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

रा० टी०–तत इति । प्रजविताः अनिवेगवन्तोऽश्वा अस्मिन् तेन रथोपलक्षितस्य रावणो यत्र रामलक्ष्मणौ तेन रथेन निर्ययौ ॥ ३२ ॥

गो० टी०–तत इति । द्वारेणेति । उत्तरद्वारेणेत्यर्थः ३३

४३–४५] ति० टी०–अथ रावणस्य दुर्निमित्तान्याह–षड्भिरित्यादि ॥ ४३–४५ ॥

रा० टी०–तदनन्तरं अशुभसूचकानि निमित्तान्याह—तत इत्यादिभिः । सूर्यो नष्टप्रभोऽभवत अत एव दिशः तिमिरावृता अभवन् घोराः द्विजाः पक्षिणो विनेदुः ॥ ४३ ॥

रा० टी०–ववर्षेति । देवः मेघाभिमानिदेवता रुधिरं वर्षं तुरङ्गमाः चस्खलुश्च ध्वजाग्रे गृध्रो न्यपतत् शिवा विनेदुश्च ॥ ४४ ॥

रा० टी०–नयनमिति । वामं नयनमस्फुरत् वामो बाहुरकम्पत वदनं विवर्णमासीच्च स्रजः किञ्चित् अभ्रश्यत च ४५

गो० टी०–ततो नष्टप्रभ इत्यादिश्लोकचतुष्टयमेकान्वयं । रूपाणि दुर्निमित्तरूपाणि । ततः अनन्तरं, ततः उत्तरात् । निष्पततः निष्क्रमतः । सूर्यनष्टप्रभत्वादीनि रूपाणि जज्ञिर इति संबन्धः ॥ ३४–४१ ॥

४६–४८] ति० टी०–एतानि रूपाणि । निधनसूचनीत्यर्थः ॥ ४६–४८ ॥

रा० टी०–तत इति । दशग्रीवस्य रणे निष्पततस्ततः निधनशंसीनि रावणविनाशसूचकानि एतानि वक्ष्यमाणानि रूपाणि निमित्तानि जज्ञिरे ॥ ३६ ॥

रा० टी०–निमित्तान्येवाह—अन्तरिक्षादिति । निर्घातसमो निःस्वनो यस्याः सा उल्का अन्तरिक्षात् पपात वायसैरभिमिश्रिताः अशिवाः गृध्राः विनेदुः ॥ ३७ ॥

रा० टी०–एतानिति । रावणः मोहात् एतान् उत्पातान् अचिन्तयन् सन् निर्ययौ ॥ ३८ ॥

४९–५३] ति० टी०–आह्वयानानां स्पर्धयाह्वयमानानाम् ॥ ४९–५३ ॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणभूषणाख्ये वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

रा० टी०–तेषामिति । राक्षसानां रथघोषेण रथोपश्रवणेन सह वानराणामपि चमूः युद्धाय एव अभ्यवर्तत ॥ ३९ ॥

रा० टी०–तेषामिति । अन्योन्यमाह्वयानानामाह्वयमानानाम् किंच अन्योन्यमाह्वेन आह्वानेन यानं गमनं येषां तेषां कपिरक्षसां तुमुलं युद्धं बभूव ॥ ४० ॥

गो० टी०–तेषां त्विति । आह्वयानानाम् आह्वयमानानाम्, स्पर्धया आह्वयताम् । आगमशासनस्यानित्यत्वान्नुगागमाभावः ॥ ४२ ॥ ४३ ॥

रा० टी०–तत इति । दशग्रीवः वानराणामनीकेषु महत्कदनं चकार ॥ ४१ ॥

रा० टी०–कदनान्येवाह—निकृत्तेति । बलीमुखानि

---

१ श्वेति गो. पाठः । २ तुरगाः पक्षीति गो.पाठः । ३ अश्विवमिति गो.रा. पाठः । ४ सख्य इति गो.पाठः । ५ विवर्णं वदनं चासीदिति गो. रा. । ६ अनुनादिता इति गो. पाठः । ७ उपेति गो. पाठः । ८ जयेति गो. रा. पाठः । ९ इदमर्धमधिकं गो.रा.पाठे विवर्जिता इति गो. पाठः ।

षण्णवतितमः सर्गः ।

दशग्रीवः शरसंपातं सोढुमक्षमान्कपिवीरान्विद्राव्य राघवाभिमुखो यातः ततः सूर्यपुत्रं पलायितांस्तान्निशाम्य वानरानीकं रामाश्वास्य रक्षःसङ्घं चूर्णयन्तं विरूपाक्षो रुरुधे तयोश्च भयानके मृधे सुग्रीवेण प्रसह्य विरूपाक्षः पञ्चत्वं गमितः ।

तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः । बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा ॥ १ ॥
रावणस्याप्रसह्यं तं शरसंपातमेकतः । न शेकुः सहितुं दीप्तं पतङ्गा ज्वलनं यथा ॥ २ ॥
तेऽर्दिता निशितैर्बाणैः क्रोशन्तो विप्रदुद्रुवुः । पावकार्चिःसमाविष्टा दह्यमाना यथा गजाः ॥ ३ ॥
प्लवंगानामनीकानि महाभ्राणीव मारुतः । संययौ समरे तस्मिन्विधमन्रावणः शरैः ॥ ४ ॥
कदनं तरसा कृत्वा राक्षसेन्द्रो वनौकसाम् । आससाद ततो युद्धे त्वरितं राघवं रणे ॥ ५ ॥
सुग्रीवस्तान्कपीन्दृष्ट्वा भग्नान्विद्रावितान्रणे । गुल्मे सुषेणं निक्षिप्य चक्रे युद्धे द्रुतं मनः ॥ ६ ॥
आत्मनः सदृशं वीरं स तं निक्षिप्य वानरम् । सुग्रीवोऽभिमुखं शत्रुं प्रतस्थे पादपायुधः ॥ ७ ॥
पार्श्वतः पृष्ठतश्चास्य सर्वे वानरयूथपाः । अनुजग्मुर्महाशैलान्विविधांश्च वनस्पतीन् ॥ ८ ॥
ननर्द युधि सुग्रीवः स्वरेण महता महान् । पोथयन्विविधांश्चान्यान्ममन्थोत्तमराक्षसान् ॥ ९ ॥

मुखानि येषां ते केचित् रावणेन निकृत्तशिरसोऽभवन्निति शेषः ॥ ४२ ॥

रा० टी०–निरुच्छ्वासा इति । केचित् हताः अत एव निरुच्छ्वासा अभवन्निति शेषः ॥ ४३ ॥

रा० टी०–दशानन इति । दशाननः यतो यतो यत्र यत्र रथेनाभ्येति ततस्ततस्तत्र तत्र तस्य रावणस्य शरप्रवेगं सोढुं हरियूथपाः न शेकुः ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

गो० टी०–निकृत्तशिरस इत्यादिश्लोकद्वयम् स्पष्टम् ॥ ४४–४६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

१] ति० टी०–तथेति ॥ १ ॥

रा० टी०–रावणयुद्धमेव वर्णयति—तथेत्यादिभिः । दशग्रीवेण कर्त्रा मार्गणैरुत्तमैः कृत्तानि गात्राणि येषां तैः हरिभिः प्रकीर्णा वसुधाभवत् ॥ १ ॥

गो० टी०–अथ विरूपाक्षवधः–तथा तैरित्यादि ॥ १ ॥

२–५] ति० टी०–एकत एकैकस्मिन्प्रदेशे ॥ २–५ ॥

रा० टी०–रावणस्येति । अप्रसह्यं प्रसहितुमशक्यं रावणस्य शरसंपातमेकतः एकस्मिन्नपि क्षणे न शेकुः तत्र दृष्टान्तः पतंगाः ज्वलनं वह्निं यथा ॥ २ ॥

रा० टी०–ते इति । पावकार्चिस्समाविष्टाः अत एव दह्यमाना गजा इव बाणैरर्दिताः ते वानराः क्रोशन्तस्सन्तः विप्रदुद्रुवुः ॥ ३ ॥

रा० टी०–प्लवङ्गानामिति । महाभ्राणि मारुत इव प्लवङ्गानामनीकानि विधमन् रावणस्संययौ ॥ ४ ॥

रा० टी०–कदनमिति । राक्षसेन्द्रः वनौकसां कदनं कृत्वा राघवमाससाद जगाम ॥ ५ ॥

गो० टी०–रावणस्येति । एकत एकस्य अद्वितीयस्य २–५

६] ति० टी०–गुल्मे सेनासंनिवेशे ॥ ६ ॥

रा० टी०–सुग्रीव इति । भग्नान् अत एव विद्रावितान् कपीन् सुग्रीवो दृष्ट्वा गुल्मे सुषेणं निक्षिप्य संस्थाप्य युद्धे मनश्चक्रे ॥ ६ ॥

गो० टी०–सुग्रीव इति । अद्भुतमिति क्रियाविशेषणम् ६॥७

७] ति० टी०–आत्मनः सदृशमात्मतुल्यं सुषेणं निक्षिप्य ॥ ७ ॥

रा० टी०–आत्मन इति । आत्मनः सदृशं तं सुषेणं निक्षिप्य सुग्रीवश्शत्रुमभिमुखं प्रतस्थे ॥ ७ ॥

८] ति० टी०–सर्वे वानरयूथपाः । सुषेणं विनेति शेषः । महाशैलानित्यादेर्गृहीत्वेति शेषः ॥ ८ ॥

रा० टी०–पार्श्वत इति । वानरयूथपाः शैलान् वनस्पतींश्च गृहीत्वेति शेषः पार्श्वतः पृष्ठतश्चानुजग्मुः ॥ ८ ॥

गो० टी०–पार्श्वत इति । महाद्रुमान् उत्पाट्येति शेषः । उत्पाट्य अस्य पार्श्वतः पृष्ठतश्चानुजग्मुरिति संबन्धः । यथा महाराजे युद्धाय गच्छति तदायुधानि भूत्या आहरन्ति तथा वानरराजे युद्धाय निष्क्रामति तदायुधभूतान् शैलवृक्षादीन् समये वृक्षान् दातुं वानरा आजह्रुरिति भावः ॥ ८ ॥९ ॥

९] ति० टी०–अन्यानवशिष्टानुत्तमराक्षसान् बलाध्यक्षराक्षसान् ॥ ९ ॥

रा० टी०–ननर्देति । सुग्रीवः महता स्वरेण विविधान्

१ रावणं त्वरितस्तेति गो. पाठः । २ द्रवंत इति गो. पाठः । ३ यूथाधिपाः स्वयमिति गो. पाठः । ४ महाद्रुमानिति गो. महीरुहानिति रा. पाठः । ५ स ननर्देत्रिति गो. पाठः । ६ पातयन्निति गो. पाठः । ७ जगामेति गो. पाठः ।

ममर्द च महाकायो राक्षसान्वानरेश्वरः । युगान्तसमये वायुः प्रवृद्धानगमानिव ॥ १० ॥
राक्षसानामनीकेषु शैलवर्षं ववर्ष ह । अश्मवर्षं यथा मेघः पक्षिसङ्घेषु कानने ॥ ११ ॥
कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः । विकीर्णशिरसः पेतुर्विकीर्णा इव पर्वताः ॥ १२ ॥
अथ संक्षीयमाणेषु राक्षसेषु समन्ततः । सुग्रीवेण प्रमथ्येषु नर्दत्सु च पतत्सु च ॥ १३ ॥
विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः । स्थादाप्लुत्य दुर्धर्षो गजस्कन्धमुपारुहत् ॥ १४ ॥
स तं द्विपमथारुह्य विरूपाक्षो महाबलः । ननर्द भीमनिर्ह्रादं वानरानभ्यधावत ॥ १५ ॥
सुग्रीवे स शरान्घोरान्विससर्ज चमूमुखे । स्थापयामास चोद्विग्नान्राक्षसान्संप्रहर्षयन् ॥ १६ ॥
सोऽतिविद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा । चुक्रोश च महाक्रोधो वधे चास्य मनो दधे ॥ १७ ॥
ततः पादपमुद्धृत्य शूरः संप्रयतो हरिः । अभिपत्य जघानास्य प्रमुखे तं महागजम् ॥ १८ ॥
स तु प्रहाराभिहतः सुग्रीवेण महागजः । अपासर्पद्धनुर्मात्रं निषसाद ननाद च ॥ १९ ॥
गजात्तु मथितात्तूर्णमपक्रम्य स वीर्यवान् । राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिम् २० ॥
आर्षभं चर्म खड्गं च प्रगृह्य लघुविक्रमः । भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितम् ॥ २१ ॥
स हि तस्यापि संगृह्य प्रगृह्य विपुलां शिलाम् । विरूपाक्षस्य चिक्षेप सुग्रीवो जलदोपमाम् ॥ २२ ॥

राक्षसान् पोथयन् सन् उत्तमराक्षसान् ममन्थ युद्धेनेति शेषः ॥ ९ ॥

१०-१२] ति० टी०—अगमान्वृक्षान् ॥ १०-१२ ॥

रा० टी०—ममर्देति । प्रवृद्धान् विस्तीर्णान् उत्पन्नान् वृक्षान् वायुरिव वानरेश्वरः सुग्रीवः राक्षसान् ममर्द ॥ १० ॥

रा० टी०—राक्षसानामिति । मेघः अशनिसंघेषु अश्मवर्षमिव राक्षसानामनीकेषु शैलवर्षं ववर्ष ॥ ११ ॥

रा० टी०—कपीति । कपिराजेन विमुक्तैश्शैलवर्षैः विकीर्णशिरसो राक्षसाः विकीर्णाः पर्वता इव पेतुः ॥ १२ ॥

गो० टी०—ममन्थ चेति । अगमान् वृक्षान् । पक्षाणी इत्यमरः ॥ १०-१२ ॥

१३-१५] ति० टी०—संक्षीयमाणेषु हिंस्यमानेषु १३-१५

रा० टी०—अथेति । राक्षसेषु क्षयमाणेषु भग्नेषु अत एव सक्षीयमाणेषु आत्मत्राणेषु अत एव नर्दत्सु पतत्सु च सत्सु विरूपाक्षो राक्षसः स्वकं नाम विश्राव्य स्वादाप्लुत्य गजस्कन्धमारुहत् त्रैलोक्यद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

रा० टी०—स इति । विरूपाक्षः भीमनिर्ह्रादं यथा भवति तथा ननर्द वानरानभ्यधावत च ॥ १५ ॥

गो० टी०—अथेत्यादि । संक्षीयमाणेषु हिंस्यमानेषु । "क्षि, हिंसायाम्" इति धातुः ॥ १३-१५ ॥

१६-१७] ति० टी०—उद्विग्नान्पलायनकृतोत्साहान्स्थापयामास पलायनान्निवर्तयामास ॥ १६ ॥ १७ ॥

रा० टी०—सुग्रीव इति । स विरूपाक्षः सुग्रीवे शरान् विससर्ज अत एव राक्षसान् संप्रहर्षयन् सन् स्थापयामास १६

रा० टी०—स इति । बाणैरतिविद्धस्य सुग्रीवः अस्य विरूपाक्षस्य वधे मनो दधे अत एव चुक्रोश अमर्षकं नादं चकार ॥ १७

१८-२०] ति० टी०—संप्रयतः सम्यक्प्रयत्नं युद्धं यस्य सः । प्रमुखे प्रकृष्टे मुखप्रदेशे इत्यर्थः ॥ १८-२० ॥

२१] ति० टी०—आर्षभमृषभचर्मनिष्परिवीतं चर्म फलकम् ॥ २१ ॥

रा० टी०—तत इति । हरिसुग्रीव पादपमुद्धृत्य अभिपत्य इत्यस्य अस्य विरूपाक्षस्य महागजे प्रमुखे जघान ॥ १८ ॥

गो० टी०—तत इति । संप्रयतः बहुलग्रहणात् कर्मणि क्यप् । पहर्तव्ययोः । प्रमुखे मुखे ॥ १८ ॥

रा० टी०—स इति । सुग्रीवेण प्रहाराभिहतो महागजः धनुर्मात्रमपासर्पत् निषसाद भूमौ पपात ननाद च ॥ १९ ॥

गो० टी०—स त्विति । धनुर्मात्रं धनुःप्रमाणम् । "प्रमाणे द्वयसज्दघ्र-मात्रचः" इत्यादिना मात्रचप्रत्ययः ॥ १९ ॥

रा० टी०—गजादिति । मथितात् गजात् अपक्रम्य शत्रुं सुग्रीवं भर्त्सयन्निव अभिमुखः सन् प्रत्युद्गम्य आर्षभमृषभचर्मनिष्परिवीतं चर्म खड्गं च प्रगृह्य लघुविक्रमो विरूपाक्षः आससाद लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०—गजादिति । लोकद्वयमेकं वाक्यम् । व्यवस्थितं निश्चलतया स्थितम् ॥ २० —२२ ॥

२२] ति० टी०—तस्यापि तेनापि इमं प्रहारं संगृह्य गृहीत्वा ॥ २२ ॥

रा० टी०—स इति । स सुग्रीवः जलदोपमां शिलां प्रगृह्य विरूपाक्षस्य दृढ इति शेषः चिक्षेप ॥ २२ ॥

---

१ ममन्थेति गो.पा. । २ निकृत्ता इति गो.पा. । ३ पतत्सु निनदत्सु चेति गो.पा. । ४ विनदन्निति गो. पा. । ५ क्षिपति गो.पा. । ६ अभिसंक्रुद्ध इति गो. पा. ।

स तां शिलामापतन्तीं दृष्ट्वा राक्षसपुंगवः । अपक्रम्य सुविक्रान्तः खड्गेन प्राहरत्तदा ॥ २३ ॥
तेन खड्गप्रहारेण रक्षसा बलिना हतः । मुहूर्तमभवद्भूमौ विसंज्ञ इव वानरः ॥ २४ ॥
सहसा स तदोत्पत्य राक्षसस्य महाहवे । मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि ॥ २५ ॥
मुष्टिप्रहाराभिहतो विरूपाक्षो निशाचरः । तेन खड्गेन संक्रुद्धः सुग्रीवस्य चमूमुखे ॥ २६ ॥
कवचं पातयामास पद्भ्यामभिहतोऽपतत् । स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत् ॥२७॥
तलप्रहारमशनेः समानं भीमनिःस्वनम् । तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतम् ॥ २८ ॥
नैपुण्यान्मोचयित्वैनं मुष्टिनोरसि ताडयत् । ततस्तु संक्रुद्धतरः सुग्रीवो वानरेश्वरः ॥ २९ ॥
मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा । स ददर्शान्तरं तस्य विरूपाक्षस्य वानरः ॥ ३० ॥
ततोऽन्यं पातयत्क्रोधाच्छङ्खदेशे महातलम् । महेन्द्राशनिकल्पेन तलेनाभिहतः क्षितौ ॥ ३१ ॥
पपात रुधिराक्तिन्नः शोणितं हि समुद्गिरन् । स्रोतोभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव ॥ ३२ ॥
विवृत्तनयनं क्रोधात्सफेनं रुधिरप्लुतम् । ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतम् ॥ ३३ ॥
स्फुरन्तं परिवर्तन्तं पार्श्वेन रुधिरोक्षितम् । करुणं च विनर्दन्तं ददृशुः कपयो रिपुम् ॥ ३४ ॥

२३-२६] ति० टी०-स तामिति । अपक्रम्य शिलाप्रहारमोघीकरणार्थं पार्श्वतोऽपसृत्य सुग्रीवं प्राहरदित्यर्थः ॥२३-२६॥

२७-२८] ति० टी०-अभिहतः सुग्रीवः पद्भ्यामपतत् । आकुञ्चितजानुरभवदित्यर्थः ॥ २७ ॥ २८ ॥

रा० टी०-स इति । सः विरूपाक्षः आपतन्तीं शिलां दृष्ट्वा अपक्रम्य वञ्चयित्वा खड्गेन प्राहरत् ॥ २३ ॥

रा० टी०-तेनेति । रक्षसा कर्त्रा खड्गप्रहारेण हतो वानरः विसंज्ञ इव मुहूर्तं दीनोऽभवत् ॥ २४ ॥

रा० टी०-सहसेति । स सुग्रीवः उत्पत्य वेगेन मुष्टिं संवर्त्य राक्षसस्य वक्षसि पातयामास ॥ २५ ॥

गो० टी०-स तामिति । अपक्रम्य शिलापातपरिहारार्थमन्यतोऽपसृत्य, प्राहरत् । सुग्रीवमिति शेषः ॥ २३-२६ ॥

रा० टी०-मुष्टीति । मुष्टिप्रहाराभिहतः संक्रुद्धो विरूपाक्षः सुग्रीवस्य कवचं खड्गेन पातयामास स सुग्रीवस्तु पद्भ्यां राक्षसचरणाभ्यां हतस्सन्नपतत् पतितः कपिः सुग्रीवः समुत्थाय अशनेस्समानं तलप्रहारं तस्य रक्षसः देहे व्यसर्जयत् सार्धश्लोकद्वयमेकान्वयि ॥ २६ ॥ २७ ॥

गो० टी०-मुष्टिप्रहारेत्यादिसार्धश्लोक एकान्वयः । कवचमिति । अनेन सुग्रीवस्यापि कवचधारणमस्तीति गम्यते । पद्भ्यामिति । अभिहतः सन् पद्भ्यामपतदित्यन्वयः ॥२६॥२७

गो० टी०-तलेति । तद्रक्षस्सुग्रीवेण समुद्यतं तलप्रहारं मोचयित्वा एनं विरूपाक्षं मुष्टिना उरसि अताडयत् ॥ २८ ॥

गो० टी०-तलप्रहारमिति । नैपुण्यात् शिक्षापाटवात् २८

गो० टी०-ततस्त्विति सार्धश्लोकमेकं वाक्यम् । अन्तरम् अवकाशम् ॥ २९ ॥

२९] ति० टी०-नैपुण्याद्वञ्चनासामर्थ्यान्मोचयित्वा मोघीकृत्य ॥ २९ ॥

३०] ति० टी०-अन्तरं प्रहारावसरम् ॥ ३० ॥

रा० टी०-तत इति । सुग्रीवः आत्मनः प्रहारं रक्षसा मोक्षितं वञ्चितं दृष्ट्वा विरूपाक्षस्यान्तरं हननावकाशं ददर्श ततोऽनन्तरं शंखदेशे ललाटास्थिप्रदेशे महत्तलं न्यपातयत् श्लोकद्वयसंकान्वयि ॥ २९-३१ ॥

गो० टी०-तत इत्यर्धम् । शङ्खदेशे ललाटास्थिप्रदेशे । शङ्खो निधौ ललाटास्थनीत्यमरः ॥ ३० ॥

३१] ति० टी०-शङ्खदेशे ललाटास्थिप्रदेशे । तलं प्रसृतकरतलप्रहारम् ॥ ३१ ॥

३२] ति० टी०-प्रस्रवणे निर्झरमुत्पत्स्यमानम् । प्रस्रवत्यस्मादिति व्युत्पत्तेः ॥ ३२ ॥

रा० टी०-महेन्द्रेति । तलेनाभिहतः अत एव रुधिरक्लिन्नो विरूपाक्षः स्रोतोभ्यः नासिकादिभ्यः प्रस्रवणाज्जलमिव शोणितं समुद्गिरन्सन् क्षितौ पपात सार्धश्लोक एकान्वयी ॥३२॥

गो० टी०-महेन्द्राशनीत्यादिसार्धश्लोक एकं वाक्यम् । स्रोतोभ्यः नासादिनवद्वारेभ्यः ॥ ३१ ॥ ३२ ॥

३३] ति० टी०-विरूपाक्षतरमतिविरूपाक्षम् ॥ ३३ ॥

रा० टी०-विवृत्तेति । विवृत्ते नयने यस्य स फेनरुधिरेण आप्लुतं विरूपाक्षतरमतिविरूपेन्द्रियं विरूपाक्षं ददृशुः ॥ ३३ ॥

गो० टी०-विवृत्तनयनमिति । विरूपाक्षतरं नेत्रोद्गमनेनात्यन्तविकटाक्षम् ॥ ३३ ॥

३४] ति० टी०-पार्श्वेन परिवर्तन्तमित्यन्वयः ॥ ३४ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-स्फुरन्तमिति । स्फुरत्वादिविशिष्टं विरूपाक्षं कपयो ददृशुः ॥ ३४ ॥

गो० टी०-स्फुरन्तमिति । स्फुरन्तमूर्ध्वमुत्पतन्तम् । परिवर्तन्तं परिवर्तमानम् ॥ ३४ ॥

१ स तदा सहसेति गो.पा.। २ अताडयदिति गो.रा.पाठः। ३ न्यपातयदिति गो.रा.पा.। ४ महत्तलमिति गो.रा.पा.। ५ च समुद्गच्छन्निति गो.पा.।

तथा तु तौ संयति संप्रयुक्तौ तरस्विनौ वानरराक्षसानाम् ।
बलार्णवौ सस्वनतुश्च भीमौ महार्णवौ द्याविव भिन्नसेतू ॥ ३५ ॥
विनाशितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन ।
बलं सैमेतं कपिराक्षसानामुद्गतगङ्गाप्रतिमं बभूव ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

सप्तनवतितमः सर्गः ।

विरूपाक्षे परासौ द्विगुणितरोषोऽमर्षाभ्यबल- पङ्क्तिमुखः सर्वोपस्त्र महोदर प्राणिधान २ तु सुग्रीवेणाकम्पकमुखे गाढं प्रहृत्य सशिरश्छेदं पातितः ।

हन्यमाने बले तूर्णमन्योन्यं ते महाभुजे । सरसीव महाघर्मे सूपक्षीणे बभूवतुः ॥ १ ॥
स्वबलस्य तु घातेन विरूपाक्षवधेन च । बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥ २ ॥
प्रक्षीणं स्वबलं दृष्ट्वा वध्यमानं वलीमुखैः । बभूवास्य व्यथा युद्धे दृष्ट्वा दैवविपर्ययम् ॥ ३ ॥
उवाच च समीपस्थं महोदरमनन्तरम् । अस्मिन्काले महाबाहो जयाशा त्वयि मे स्थिता ॥४॥
जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम् । भर्तृपिण्डस्य कालोऽयं निर्वेष्टुं साधु युध्यताम् ॥५ ॥
एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रो महोदरः । प्रविवेशारिसेनां सै पतङ्ग इव पावकम् ॥ ६ ॥

३५] ति० टी०—संप्रयुक्तौ युद्धाय संयुक्तत्या स्थितौ ३५

गो० टी०—तथेति । वानरराक्षसानां बलयोर्यो, संयति संग्रामे संप्रयुक्तौ नियोजितौ बलार्णवौ सैन्यसमुद्रौ द्यौ द्युलोकनिरूपाक्षौ भीमौ महार्णवाविव । सस्वनतुः ॥ ३५ ॥

गो० टी०—तथात्विति । भिन्नसेतू विदीर्णसेतू ॥ ३५ ॥

३६] ति० टी०—उद्गतगङ्गा । उद्वेलगङ्गेत्यर्थः । बलस्य-मानन्दन, राक्षसबलं शोकेनेति शेषः ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामायणनिलये श्रीरामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

गो० टी०—विनाशितमिति । हरिपार्थिवेन विनाशितं विरूपनेत्रं प्रेक्ष्य समस्तं कपिराक्षसानां बलमुद्गतगंगाप्रतिमं बभूव ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामाभरणशिरोमणौ युद्धकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

गो० टी०—विनाशितमिति । उन्मत्तगङ्गा उद्वेलगङ्गा ३६

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तनवतितमः सर्गः ॥ ९७ ॥

१-४] ति० टी०—अन्योन्यं हन्यमाने ते बले सूपक्षीणे सूतरामुपक्षयवती बभूवतुः । सरसी इव । संविरार्पः ॥ १--४ ॥

५-६] ति० टी०—भर्तृपिण्डस्य स्वामिकृतान्नादिप्रदानोपकारस्य । निर्वेष्टुं प्रत्युपकारं कर्तुम् ॥ ५ ॥ ६ ॥

गो० टी०—निर्वेष्टुं प्रत्युपकारं कर्तुमित्यर्थः । अनन्तरमाह—हन्यमान इत्यादिभिः । अन्योन्यं हन्यमाने महाबले ते सैन्ये महाघर्मे ग्रीष्मे सूपक्षीणे इदानीं प्राप्ते सरसी। बभूवतुः । न शक्त इत्यर्थः । तेन सरस्योर्यथा स्वल्पजलत्वेऽपि महाघर्मेऽतिशया ॥१॥

गो० टी०—स्वबलस्येति । रावणो द्विगुणं क्रुद्धो बभूव २

गो० टी०—प्रक्षीणमिति । वलीमुखैर्वानरैर्हन्यमानमत एव प्रक्षीणं स्वबलं दृष्ट्वा अत एव दैवविपर्ययं भाग्यविपर्ययं दुर्लभमित्यर्थः दृष्ट्वा ज्ञात्वा विपद्यमानस्यास्य रावणस्य व्यथा मनःपीडा बभूव ॥ ३ ॥

गो० टी०—अथ महोदर इत्यादि । सरसी इति वत्यर्थे सरसीवेति संविरार्पः ॥ १--२ ॥

गो० टी०—उवाचेति । अनन्तरं समीपस्थं महोदरमुवाच तदाकाङ्क्षमाह अस्मिन्काले मम जयाशा त्वयि स्थिता अतः शत्रुचमूं जहि भर्तृपिण्डस्य स्वाम्यन्नादिदानरूपोपकारस्य निर्वेष्टुं प्रत्युपकारं कर्तुमयं कालः अतस्मात् युध्यताम् अहं चतुर्थमेकत्वयि ॥ ४--५ ॥

गो० टी०—एवमिति । महोदरः अरिसेनां प्रविवेश ॥६॥

गो० टी०—अस्मिन् काले इत्यादिसार्धश्लोक एकान्वयः । भर्तृपिण्डस्येति संबन्धमात्रे षष्ठी । भर्तृपिण्डस्य निर्वेष्टुं स्वामिदत्तवेतनमपाकर्तुमित्यर्थः ॥ ४--६ ॥

१ सुभीममिति गो. पाठः । २ वेलावितिं गो. रा. पाठः । ३ समस्तमिति गो. रा. पाठः । ४ उन्मत्तेति गो. रा. पाठः । ५ सोपक्षीणे इति गो. पाठः । ६ वीति गो. पाठः । ७ त्रिति गो. पाठः । ८ प्रेक्ष्येति गो. पाठः । ९ अरिंदमामिति गो. रा. पाठः । १० तामिति गो. रा. पाठः ।

ततः स कदनं चक्रे वानराणां महाबलः । भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ॥ ७ ॥
वानराश्च महासत्त्वाः प्रगृह्य विपुलाः शिलाः । प्रविश्यारिबलं भीमं जघ्नुस्ते सर्वराक्षसान् ॥ ८ ॥
महोदरः [1]सुसंक्रुद्धः शरैः काञ्चनभूषणैः । चिच्छेद पाणिपादोरु[2] वानराणां महाहवे ॥ ९ ॥
ततस्ते वानराः सर्वे राक्षसानां महामृधे । दिशो दश द्रुताः केचित्केचित्सुग्रीवमाश्रिताः ॥ १० ॥
[3]प्रेभग्नं समरे दृष्ट्वा वानराणां महाबलम् । अभिदुद्राव सुग्रीवो महोदरमनन्तरम् ॥ ११ ॥
प्रगृह्य विपुलां घोरां महीधरसमां शिलाम् । चिक्षेप च महातेजास्तद्वधाय हरीश्वरः ॥ १२ ॥
तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः । असंभ्रान्तस्ततो बाणैर्नि[4]र्बिभेद तताः शिलाम् ॥ १३ ॥
रक्षसा तेन बाणैर्[5]निकृत्ता सा सहस्रधा । निपपात तदा भूमौ गृध्रचक्रमिवाकुलम् ॥ १४ ॥
तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्च्छितः । सालमुत्पाट्य चिक्षेप [6]तं स चिच्छेद नैकधा ॥ १५ ॥
शरैश्च विददारैनं शूरः [7]परबलार्दनः । स ददर्श ततः क्रुद्धः परिघं पतितं भुवि ॥ १६ ॥
आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन् । [8]परिघेणोग्रवेगेन जघानास्य हयोत्तमान् ॥ १७ ॥
तस्माद्धतहयाद्वीरः सोऽवप्लुत्य महारथात् । गदां जग्राह संक्रुद्धो राक्षसोऽथ महोदरः ॥ १८ ॥
गदापरिघहस्तौ तौ युधि वीरौ समीयतुः । नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ ॥ १९ ॥

७-१०] ति० टी०—भर्तृवाक्येन चोदितः सः स्वेन वीर्येण कदनं चक्रे ॥ ७-१० ॥

रा० टी०—तत इति । भर्तृवाक्येन चोदितस्स महोदरः स्वेन वीर्येण वानराणां कदनं चक्रे ॥ ७ ॥

रा० टी०—वानरा इति । वानराः अरिबलं प्रविश्य सर्वराक्षसान् जघ्नुः ॥ ८ ॥

गो० टी०—तत इति । भर्तृवाक्येन चोदितः सन् स्वेन वीर्येण कदनं चक्र इत्यन्वयः ॥ ७ ॥ ८ ॥

रा० टी०—महोदर इति । महोदरः वानराणां पाणिपादोरु चिच्छेद ॥ ९ ॥

गो० टी०—तत इति । राक्षसानां महामृधे विद्यमानास्ते केचित् वानराः दश दिशो द्रुताः केचित्सुग्रीवमाश्रिताः ॥ १० ॥

गो० टी०—महोदर इति । पाणिपादोरूनिति । एकवद्भावाभावः आर्षः ॥ ९ ॥ १० ॥

११-१३] ति० टी०—अनन्तरं संनिहितमित्यर्थ इति तीर्थः ॥ ११-१३ ॥

रा० टी०—प्रभग्नामिति । सुग्रीवः वानराणां चमूं प्रभग्नां दृष्ट्वा अनन्तरं समीपस्थं महोदरमभिदुद्राव ॥ ११ ॥

रा० टी०—प्रगृह्येति । हरीश्वरः शिलां प्रगृह्य तस्य महोदरस्य वधाय चिक्षेप ॥ १२ ॥

रा० टी०—तामिति । महोदरः आपतन्तीं शिलां दृष्ट्वा बाणैर्विभेद ॥ १३ ॥

गो० टी०—प्रभग्नामिति । अनन्तरं समीपस्थम् ११-१३

१४-१५] ति० टी०—आकुलं गृध्रचक्रमिव निपपात । शिलाया अनेकधा भग्नत्वात्तत्सादृश्यम् ॥ १४ ॥ १५ ॥

रा० टी०—रक्षसेति । बाणैर्निकृत्ता शिला सहस्रधा निपपात तत इत्यन्तः आकुलं गृध्रचक्रमिव निपातितशिलायाः बहुत्वात् गृध्रचक्रोपमा ॥ १४ ॥

रा० टी०—तामिति । सुग्रीवः शिलां भिन्नां दृष्ट्वा शालमुत्पाट्य चिक्षेप स महोदरस्तु तं शालं नैकधा चिच्छेद एनं सुग्रीवं अर्दयित्वा च साद्धलोक एकान्तर्यौ ॥ १५ ॥

गो० टी०—रक्षसेति । गृध्रचक्रं गृध्रसमूह. ॥ १४ ॥ १५ ॥

१६] ति० टी०—स सुग्रीवः ॥ १६ ॥

रा० टी०—स इति । स सुग्रीवः भूमौ पतितं परिघं ददर्श अर्द्धं पृथक् ॥ १६ ॥

गो० टी०—शरैरित्यर्धम् । शरः महोदरः एनं च सालं च शरैः विददारेत्यन्वयः ॥ १६ ॥

गो० टी०—स इति । सः सुग्रीवः ॥ १७ ॥

१७-१८] ति० टी०—दीप्तं परिघमाविध्य भ्रामयित्वा हस्तलाघवं तस्मै दर्शयंस्तद्धयानजघान ॥ १७ ॥ १८ ॥

रा० टी०—आविध्येति । स सुग्रीवः तं परिघमाविध्य गृहीत्वा तस्य तं महोदरं दर्शयन् सन् अस्य महोदरस्य हयोत्तमान् जघान ॥ १७ ॥

रा० टी०—तस्मादिति । महोदरः हतहयात् रथादवप्लुत्य गदां जग्राह ॥ १८ ॥

गो० टी०—आविध्येति । आदायेति शेषः । तस्य महोदरस्य, दर्शयन् । पाणिलाघवमिति शेषः ॥ १८-२० ॥

१९] ति० टी०—समीयतुः संगतौ बभूवतुः ॥ १९ ॥

रा० टी०—गदेति । गदापरिघहस्तौ तौ सुग्रीवमहोदरौ सविद्युतौ घनाविव समीयतुः ॥ १९ ॥

---

१ रजनीचरासिति गो. पाठः । २ त्रिति गो. रा. पाठः । ३ पादोरूनिति गो. पाठः । ४ राक्षसेनार्दिताक्षरामिति रा. राक्षसैरर्दिताभूशमिति गो. पाठः । ५ प्रभग्नामिति गो. रा. पाठः । ६ चमूमिति गो. रा. पाठः । ७ बिभेद स इति रा. पाठः । ८ दुरासदामिति गो. रा. पाठः । ९ राक्षसे रणमूर्धनीति गो. पाठः । १० परपुरंजय इति गो. परबलार्दनमिति रा. पाठः । ११ परिघाग्रेण वेगेनेति गो. पाठः ।

ततः क्रुद्धो गदां तस्य चिक्षेप रजनीचरः । ज्वलन्तीं भास्कराभासां सुग्रीवाय महोदरः ॥ २० ॥
गदां तां सुमहाघोरामापतन्तीं महाबलः । सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे ॥ २१ ॥
आजघान गदां तस्य परिघेण हरीश्वरः । पपात तरसा भिन्नः परिघस्तस्य भूतले ॥ २२ ॥
ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात् । आयसं मुसलं घोरं सर्वतो हेमभूषितम् ॥ २३ ॥
स तमुद्यम्य चिक्षेप सोऽप्यस्य प्राक्षिपद्गदाम् । भिन्नावन्योन्यमासाद्य पेततुस्तौ महीतले ॥ २४ ॥
ततो भिन्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः । तेजोबलसमाविष्टौ दीप्तावि हुताशनौ ॥ २५ ॥
जघ्नतुस्तौ तदान्योन्यं नदन्तौ च पुनः पुनः । तलैश्चान्योन्यमासाद्य पेततुश्च महीतले ॥ २६ ॥
उत्पेततुस्तदा तूर्णं जघ्नतुश्च परस्परम् । भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ ॥ २७ ॥
जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परंतपौ । जहार च तदा खड्गमदूरपरिवर्तिनम् ॥ २८ ॥
[राक्षसश्चर्मणा सार्धं महावेगो महोदरः । तथैव च महाखड्गं चर्मणा पतितं सह ॥
जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः] ॥ ॥
ततो रोषपरीताङ्गौ नदन्तावभ्यधावताम् । उद्यतासी रणे हृष्टौ युद्धे शस्त्रविशारदौ ॥ २९ ॥
दक्षिणं मण्डलं चोभौ सुतूर्णं संपरीयतुः । अन्योन्यमभिसंक्रुद्धौ जये प्रणिहितावुभौ ॥ ३० ॥
स तु शूरो महावेगो वीर्यश्लाघी महोदरः । महावर्मणि तं खड्गं पातयामास दुर्मतिः ॥ ३१ ॥

२०] ति० टी०—भास्करवदाभासते सा भास्कराभासा तां ॥ २० ॥

रा० टी०—तत इति । महोदरः सुग्रीवाय गदां चिक्षेप ॥

गो० टी०—तत इति । भास्कराभासां भास्करवद्भासमानाम् ॥ २० ॥

२१] ति० टी०—आपतन्तीं गदाम् । दृष्ट्वेति शेषः । समुद्यम्य । परिघमिति शेषः ॥ २१ ॥

रा० टी०—गदामिति । सुग्रीवः आपतन्तीं गदामवलोक्येति शेषः उद्यम्य परिघमुत्थाप्य परिघेण तस्य महोदरस्य गदामाजघान गदोद्भिन्नः सुग्रीवगदया विदीर्णः स परिघस्तु भूतले पपात श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०—गदां तामित्यादि । गदां दृष्ट्वेति शेषः । समुद्यम्य परिघमिति सिद्धम् ॥ २२ ॥

२२-२३] ति० टी०—गदा पपात । स परिघश्च भिन्न इत्यर्थः ॥ २२ ॥ २३ ॥

गो० टी०—पपात स गदोद्भिन्न इत्यर्थम् । उभावपि परस्परमभिहतौ विशीर्णौ पेततुरिति भावः ॥ २३-३१ ॥

रा० टी०—तत इति । सुग्रीवः सर्वतो हेमभूषितम् मुसलं वसुधातलाज्जग्राह ॥ २३ ॥

२४-२७] ति० टी०—स सुग्रीवः । तं मुसलम् । सोऽपि महोदरोऽपि ॥ २४-२७ ॥

रा० टी०—स इति । स सुग्रीवः तं मुसलमुद्यम्य चिक्षेप स महोदरोऽपि अन्यां गदां व्याक्षिपत् अन्योन्यमासाद्य भिन्नौ गदामुसलौ महीतले पेततुः ॥ २४ ॥

रा० टी०—तत इति । भिन्नप्रहरणौ विशीर्णायुधौ सुग्रीवमहोदरौ दीप्तौ हुताशनाविव मुष्टिभ्यां समीयतुः ॥ २५ ॥

रा० टी०—जघ्नतुरिति । अन्योन्यं जघ्नतुः पेततुश्च ॥ २६ ॥

रा० टी०—उत्पेततुरिति । परस्परम्-पेततुः भुजैश्चिक्षेपतुः चिक्षिपतुः ॥ २७ ॥

२८-२९] ति० टी०—हृष्टौ जहतुः ॥ २८ ॥ २९ ॥

रा० टी०—जग्मतुरिति । वीरौ बाहुयुद्धे परां श्रमं जग्मतुः तदा राक्षसः चर्मणा सार्धं खड्गं जहार तथा सुग्रीवोऽपि चर्मणा सह पतितं महाखड्गं जग्राह सार्धश्लोकद्वयमेकान्वयि ॥ २८ ॥ २९ ॥

रा० टी०—तावितिं । रोषपरीताङ्गौ अत एव उद्यतासी तौ सुग्रीवमहोदरौ अभ्यधावताम् ॥ २९ ॥

३०] ति० टी०—दक्षिणमण्डलं च । चकाराद्वामं च । सुतूर्णं संपरीयतुश्चक्रतुः ॥ ३० ॥

रा० टी०—दक्षिणमिति । ओं इत्येवं भा ययोः तौ उभौ सुग्रीवमहोदरौ दक्षिणं मण्डलं संपरीयतुः चक्रतुः ॥ ३१ ॥

गो० टी०—दक्षिणमिति । दक्षिणं प्रदक्षिणं, चकारात् सव्यं च । सुतूर्णं संपरीयतुः अकुर्वाताम् ॥ ३० ॥

३१] ति० टी०—वीर्येण श्लाघत इति वीर्यश्लाघी ॥ ३१ ॥

रा० टी०—स इति । महोदरः महावर्मणि सुग्रीवकवचे खड्गं पातयामास ॥ ३२ ॥

१ तस्मै इति गो. रा. पाठः । २ स गदोद्भिन्न इतिगो. रा. पाठः । ३ अन्यामिति गो. रा. पाठः । ४ चेति रा. धरणीतल इति गो. पाठः । ५ नेदतुश्चेति गो. पाठः । ६ आहत्येति गो. पाठः । ७ धरणीतल इति गो. पाठः । ८ आजहार तत इति गो. पाठः । ९ इदं सार्धपथमधिकं गो. रा.पाठे । १० नदन्तावितिं गो. रा. पाठः । ११ युधीति गो. चर्मरवश्चेति रा. पाठः । १२ चर्मणीति गो. पाठः ।

लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः । जहार स शिरस्त्राणं कुण्डलोपगतं शिरः ॥ ३२ ॥
निकृत्तशिरसस्तस्य पतितस्य महीतले । तद्बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न दृश्यते ॥ ३३ ॥
हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः । चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ ३४ ॥
विषण्णवदनाः सर्वे राक्षसा दीनचेतसः । विद्रवन्ति ततः सर्वे भयवित्रस्तचेतसः ॥ ३५ ॥
महोदरं तं विनिपात्य भूमौ महागिरेः कीर्णमिवैकदेशम् ।
सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥ ३६ ॥
अथ विजयमवाप्य वानरेन्द्रः समरमुखे सुरसिद्धयक्षसङ्घैः ।
अवनितलगतैश्च भूतसङ्घैर्हरुषसमाकुलितैर्निरीक्षमाणः ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

अष्टनवतितमः सर्गः ।

महोदरे निपातिते महाबलौघदर्शनात् क्षोभयामास ततोऽङ्गदपरिघप्रहारविभिन्नस्य तस्य हयान् जान्वाद्यालम्बयामास रथं च बभञ्जाक्षे महान्तं कालं युद्धादौ प्रवर्तमि सुग्रीवेण हते प्रहस्य तं कृतान्तगावोचत् ।

महोदरे तु निहते महापार्श्वो महाबलः । सुग्रीवेण समीक्ष्याथ कोपात्संरक्तलोचनः ॥ १ ॥

गो० टी०–स इति । तीर्येण श्लाघत इति तीर्यश्लाघी ॥ ३३ ॥

३२] ति० टी०–सुग्रीवकरस्थे लग्नं खड्गमुत्कर्षतो महोदरस्य शिरः खड्गेन जहार ॥ ३२ ॥

रा० टी०–लग्नमिति । लग्नं कवचे आसक्तं खड्गमुत्कर्षतः महोदरस्य शिरः खड्गेन कपिकुञ्जरो जहार ॥ ३३ ॥

गो० टी०–लग्नमिति । लग्नं चर्मलग्नम् । उत्कर्षतः महोदरस्येति शेषः ॥ ३४ ॥

३३–३४] ति० टी०–निकृत्तशिरसो राक्षसेन्द्रस्य बलं तद्राक्षसेन्द्रशिरो दृष्ट्वा तत्र स्थाने न दृश्यते । पलायितमिति यावत् ॥ ३३ ॥ ३४ ॥

रा० टी०–निकृत्तेति । निकृत्तशिरसो राक्षसेन्द्रस्य बलं सेना तत्पतितशिरो दृष्ट्वाऽत्रलोक्य न दृश्यते *अपलायतेत्यर्थः किं च तद्बलं राक्षससेना राक्षसेन्द्रस्य दृष्ट्वा तत्र न दृश्यते संबन्धसामान्ये षष्ठी ॥ ३४ ॥

रा० टी०–हत्वेति । तं महोदरं हत्वा मुदितो हरिस्सुग्रीवो ननाद हृष्टो राघवो बभौ च ॥ ३५ ॥

गो० टी०–निकृत्तेति । तत् शिरः । न तिष्ठते नातिष्ठत ॥ ३५ ॥ ३६ ॥

३५] ति० टी०–सर्वे विषण्णवदना दीनचेतसश्च । अभूवुरिति शेषः । भयवित्रस्तचेतसो भयकम्पितचित्ताः । सर्वे विद्रवन्ति व्यद्रवन् ॥ ३५ ॥

रा० टी०–विषण्णेति । भयवित्रस्तचेतसः अत एव दीनचेतसः अत एव विषण्णवदनाः सर्वे राक्षसाः विद्रवन्ति ॥३६॥

गो० टी०–विषण्णेति । विषण्णवदनाः अभवन्निति शेषः । अतः सर्वशब्दापौनरुक्त्यम् ॥ ३७ ॥

३६] ति० टी०–कीर्णं शीर्णम् ॥ ३६ ॥

रा० टी०–महोदरमिति । कीर्णं महागिरेरेकदेशमिव महोदरं भूमौ निपात्य लक्ष्म्या विजयसंपन्नोपलक्षितस्सूर्यात्मजस्सुग्रीवः स्वतेजोभिरुपलक्षितस्सूर्य इव रराज ॥ ३६ ॥

गो० टी०–महोदरमिति । लक्ष्म्या जयलक्ष्म्या॥३८॥३९॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टनवतितमः सर्गः ॥ ९८ ॥

३७] ति० टी०–हर्षपदस्थाने हरुषेति पाठश्छन्दोवृत्तेरार्षात् । बभूवेति शेषः ॥ ३७ ॥

इति श्रीरामभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

रा० टी०–अथेति । वानरेन्द्रः समरमुखे विजयमवाप्य हर्षसमाकुलितैः सुरादिभिः निरीक्ष्यमाणो बभूवेति शेषः॥३८॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

१] ति० टी०–महोदरे इति । सुग्रीवेण महोदरे निहते सति तद्भक्तारं सुग्रीवं महापार्श्वः समीक्ष्य ॥ १ ॥

रा० टी०–महोदरविघातानन्तरकालिकं वृत्तान्तमाह–महोदर इत्यादिभिः । सुग्रीवेण महोदरे निहते सति महापार्श्वः अङ्गदस्य भीमां चमूं समीक्ष्य मार्गणेश्वरैः क्षोभयामास सार्द्धश्लोक एकान्वयी ॥ १ ॥

---

१ हतमिति गो. पाठः । २ तिष्ठत इति गो. पाठः । ३ यक्षसिद्धेति गो. पाठः । ४ हर्षेति गो. रा. पाठः । * पलायतेति युक्तम् ।

अङ्गदस्य चमूं भीमां क्षोभयामास मार्गणैः । स वानराणां मुख्यानामुत्तमाङ्गानि राक्षसः॥ २ ॥
पातयामास कायेभ्यः फलं वृन्तादिवानिलः । केषांचिदिषुभिर्बाहूंश्चिच्छेदाथ स राक्षसः ॥ ३ ॥
वानराणां सुसंरब्धैः पार्श्वे केषांचिदाक्षिपत् । तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः ॥ ४ ॥
विषादविमुखाः सर्वे बभूवुर्गतचेतसः । निशम्य बलमुद्विग्नमङ्गदो राक्षसार्दितम् ॥ ५ ॥
वेगं चक्रे महावेगः समुद्र इव पर्वसु । आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम् ॥ ६ ॥
समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत् । स तु तेन प्रहारेण महापार्श्वो विचेतनः ॥
ससूतस्यन्दनात्तस्माद्विसंज्ञश्चापतद्भुवि ॥ ७ ॥
तस्यर्क्षराजस्तेजस्वी नीलाञ्जनचयोपमः । निष्पत्य सुमहावीर्यः स्वयूथान्मेघसंनिभात् ॥ ८ ॥
प्रगृह्य गिरिशृङ्गाभां क्रुद्धः स विपुलां शिलाम् । अश्वाञ्जघान तरसा वैभक्तं स्यन्दनं च तैः ॥ ९ ॥
मुहूर्तालब्धसंज्ञस्तु महापार्श्वो महाबलः । अङ्गदं बहुभिर्बाणैरभ्यस्यन्तं प्रत्यविध्यत ॥ १० ॥
जाम्बवन्तं त्रिभिर्बाणैराजघान स्तनान्तरे । ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः ॥ ११ ॥
गवाक्षं जाम्बवन्तं च स दृष्ट्वा शरपीडितौ । जग्राह परिघं घोरमङ्गदः क्रोधमूर्च्छितः ॥ १२ ॥
तस्याङ्गदः सैरोपाक्षो राक्षसस्य तमायसम् । दूरस्थितस्य परिघं रविरश्मिसमप्रभम् ॥ १३ ॥
द्वाभ्यां भुजाभ्यां संगृह्य भ्रामयित्वा च वेगवत् । महापार्श्वाय चिक्षेप वधार्थं वालिनः सुतः ॥ १४ ॥

गो० टी०-अथ महापार्श्ववधः—महोदरे त्वित्यादि । महोदरे क्षुरप्रेण निहत इत्यन्वयः ॥ १-७ ॥

२] ति० टी०-अङ्गदचमूं क्षोभयामास ॥ २ ॥

रा० टी०-स इति । स महापार्श्वः वानराणामुत्तमाङ्गानि शिरांसि कायेभ्यः पातयामास यत्र दृष्टान्तः अनिलः वृन्तात् प्रसवबन्धनात् फलमिव ॥ २ ॥

३-४] ति० टी०-वृन्तं प्रसवबन्धनम् ॥ ३ ॥ ४ ॥

रा० टी०-केषामिति । केषां चिद्वानराणां बाहून् विच्छेद केषां चित् पार्श्वमाक्षिपत् ॥ ३ ॥

रा० टी०-ते इति । महापार्श्वेनार्दिताः अत एव विषादेन दुःखेन विमुखाः म्लानवदनाः सर्वे राक्षसाः गतचेतसो बभूवुः ॥ ४

५-६] ति० टी०-विषादेन विमुखाः ॥ ५ ॥ ६ ॥

रा० टी०-निशम्येति । अङ्गदः राक्षसार्दितं बलं निशम्य पर्वसु समुद्र इव वेगं चक्रे ॥ ५ ॥

रा० टी०-आयसमिति । वानरश्रेष्ठः परिघं गृह्य गृहीत्वा महापार्श्वे न्यपातयत् ॥ ६ ॥

७] ति० टी०-ससूतस्यन्दनात् । हतसूतसहितरथादित्यर्थः ॥ ७ ॥

रा० टी०-स इति । तेन प्रहारेण विचेतनश्चैतन्यरहितः अत एव विसंज्ञः विवेकरहितो महापार्श्वः ससूतस्यन्दनात् सूतसहितरथात् भुवि अपतत् ॥ ७ ॥

८] ति० टी०-ऋक्षराजो जाम्बवान् ॥ ८ ॥

९-१२] ति० टी०-गिरिशृङ्गाभां शिलां गृहीत्वाश्वान्, अनन्तरं स्यन्दनं तै वभञ्ज ॥ ९—१२ ॥

रा० टी०-स इति । ऋक्षराजस्य जाम्बवान स्वयूथात् निष्पत्य शिलां प्रगृह्य अश्वान् जघान स्यन्दनं बभञ्ज च अङ्गचतुष्टयमेकान्वयि ॥ ८ ॥ ९ ॥

रा० टी०-मुहूर्तादिति । लब्धसंज्ञो महापार्श्वः अङ्गदं भूयः प्रत्यविध्यत ॥ १० ॥

गो० टी०-सक्षराजस्त्रिभिरित्यादि श्लोकद्वयमेकान्वयम् । ऋक्षराजः जाम्बवान् तेन सहितः सऋक्षराजः गवाक्षः । जाम्बवन्तं गवाक्षं चेत्युभयत्र ह्यस्वत्वात् ॥ ८-१० ॥

रा० टी०-जाम्बवन्तमिति । जाम्बवन्तं त्रिभिर्बाणैः स्तनांतरे आजघान बहुभिश्शरैः गवाक्षं जघान च ॥ ११ ॥

रा० टी०-गवाक्षमिति । गवाक्षं जाम्बवन्तं च शरपीडितौ दृष्ट्वा अङ्गदः परिघं जग्राह ॥ १२ ॥

गो० टी०-जाम्बवन्तमिति । ऋक्षराजं जाम्बवन्तं त्रिभिर्बाणैराजघान । गवाक्षं च बहुभिः शरैर्जघानेत्यन्वयः ॥ ११ ॥ १२ ॥

१३-१४] ति० टी०-दूरस्थितस्य राक्षसस्य वधार्थं परिघं द्वाभ्यां भुजाभ्यां संगृह्य गृहीत्वा भ्रामयित्वा च महापार्श्वाय चिक्षेपेत्यन्वयः ॥ १३ ॥ १४ ॥

रा० टी०-तस्येति । वालिनस्सुतोऽङ्गदः तस्य महापार्श्वस्य परिघं द्वाभ्यां भुजाभ्यां संगृह्य भ्रामयित्वा च वधार्थं महापार्श्वाय चिक्षेप अष्टचतुष्टयमेकान्वयि ॥ १३ ॥ १४ ॥

---

१ सायकैरिति गो. पाठः । २ सर्वश इति गो. पाठः । ३ रक्षांश्चिच्छेदेति गो. रा. पाठः । ४ क्रुद्ध इति गो.पाठः । ५ व्यषादयदिति गो.पाठः । ६ पर्वणीति.गो. पाठः ।७ ससूत इति गो.पाठः। ८ सर्क्षराजस्त्विति गो.सऋक्षराज इति रा.पाठः।९ स्वानिति गो.पाठः।१० स्यन्दनं च बभञ्जेति गो.पाठः। ११ यदिति रा. पाठः । १२ जाम्बवन्तं गवाक्षं चेति गो. पाठः । १३ प्रकुपित इति गो.रा.पाठः ।१४ वेगवानिति गो.रा. पाठः। १५ पार्श्वस्येति गो.पाठः।

स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः । धनुश्च सशरं हस्ताच्छिरस्त्राणं च पातयत् ॥ १५ ॥
तं समासाद्य वेगेन वालिपुत्रः प्रतापवान् । तलेनाभ्यहनत्क्रुद्धः कर्णमूले सकुण्डले ॥ १६ ॥
स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः । करेणैकेन जग्राह सुमहान्तं परश्वधम् ॥ १७ ॥
तं तैलधौतं विमलं शैलसारमयं दृढम् । राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत् ॥ १८ ॥
तेन वामांसफलके भृशं प्रत्यवपातितम् । अङ्गदो मोक्षयामास सरोषः सपरश्वधम् ॥ १९ ॥
स वीरो वज्रसंकाशमङ्गदो मुष्टिमात्मनः । संवर्तयत्समुत्क्रुद्धः पितुस्तुल्यपराक्रमः ॥ २० ॥
राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयं प्रति । इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत् ॥ २१ ॥
तेन तस्य निपातेन राक्षसस्य महामृधे । पफाल हृदयं चास्य स पपात हतो भुवि ॥ २२ ॥
तस्मिन्विनिहते भूमौ तत्सैन्यं संप्रचुक्षुभे । अभवच्च महान्क्रोधः समरे रावणस्य तु ॥ २३ ॥
वानराणां प्रहृष्टानां सिंहनादः सुपुष्कलः । स्फोटयन्निव शब्देन लङ्कां साट्टालगोपुराम् ॥
सहेन्द्रेणेव देवानां नादः समभवन्महान् ॥ २४ ॥
अथेन्द्रशत्रुस्त्रिदशालयानां वनौकसां चैव महाप्रणादम् ।
श्रुत्वा सरोषं युधि राक्षसेन्द्रः पुनश्च युद्धाभिमुखोऽवतस्थे ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

गो० टी०–तस्याङ्गद इत्यादिश्लोकद्वयमेकान्वयम् । दृढस्थितस्य तस्य वधार्थमित्यन्वयः १३–१७ ॥

१५–१७] ति० टी०–तस्य रक्षसो हस्तात्सशरं धनुः । चादेर्लुप्तं शिरस्त्राणं चापातयत् । अत एवाग्रे वक्ष्यति—एकेन करेणेति ॥ १५–१७ ॥

रा० टी०–स इति । बलवताङ्गदेन क्षिप्तः परिघः सशरं धनुः हस्तात् अपातयत् शिरस्त्राणं च अपातयत् ॥ १५ ॥

रा० टी०–तमिति । वालिपुत्रः तं महापार्श्वमासाद्य तलेन सकुण्डले कर्णमूले अभ्यहनत् अभ्यहनत् ॥ १६ ॥

रा० टी०–स इति । महापार्श्वः परश्वधं जग्राह ॥ १७ ॥

१८] ति० टी०–तैलधौतं तेनातितीक्ष्णम् । शैलसारोऽयस्तन्मयम् ॥ १८ ॥

रा० टी०–तमिति । तैलेन धौतं तैक्ष्ण्यार्थं संस्कृतं शैलसारो लोहस्तन्मयं तं परश्वधं राक्षसो महापार्श्वः वालिपुत्रे न्यपातयत् ॥ १८ ॥

गो० टी०–तमिति । तैलधौतं प्रतिदिनं तैलसेचनाविच्छेदम्, शैलसारमयं तद्वत्कठिनमित्यर्थः । दृढम् अशिथिलम् ॥ १८ ॥ १९ ॥

१९] ति० टी०–मोक्षयामास मोघीचकार ॥ १९ ॥

रा० टी०–तेनेति । तेन महापार्श्वेन वामांसफलके प्रत्यवपातितं परश्वधमङ्गदो मोक्षयामास निष्फलं चकार ॥ १९ ॥

२०–२१] ति० टी०–संवर्तयत्समवर्तयत् । बबन्धेत्यर्थः ॥ २० ॥ २१ ॥

रा० टी०–स इति । अङ्गदः वज्रसंकाशमात्मनो मुष्टिं संवर्तयत् समवर्तयत् ॥ २० ॥

रा० टी०–राक्षसस्येति । सोऽङ्गदः राक्षसस्य स्तनयोरभ्यासे समीपे हृदयं प्रतिमुष्टिं विन्यपातयत् ॥ २१ ॥

गो० टी०–स वीर इति । आत्मन इत्यस्य पितुस्तुल्यपराक्रम इत्यनेन संबन्धः । संवर्तयत् समवर्तयत् श्रामयामासेत्यर्थः ॥ २०–२३ ॥

२२–२३] ति० टी०–पफाल विशीर्णम् ॥ २२ ॥ २३ ॥

रा० टी०–तेनेति । निपातेन निपातितेन तेन मुष्टिना राक्षसस्य हृदयं पफाल अत एव महापार्श्वो भुवि पपात॥२२॥

रा० टी०–तस्मिन्निति । तस्मिन् महापार्श्वे भूमौ विनिहते सति तत्सैन्यं संप्रचुक्षुभे रावणस्य तु महान् क्रोधोऽभवत्॥२३॥

२४–२५] ति० टी०–वानराणां सिंहनादो लङ्कां स्फोटयन्निव विदारयन्निव । उदभूदिति शेषः । इन्द्रेण सह देवानामिवाङ्गदेन सह वानराणां सिंहनादः समभवत् ॥ २४ ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

रा० टी०–वानराणामिति । इन्द्रेण सह देवानां नाद इव अङ्गदेन सह वानराणां सिंहनादः लङ्कां स्फोटयन्निव पुष्कलो महानभवत् ॥ २४ ॥

रा० टी०–अथेति । राक्षसेन्द्रः त्रिदशालयानां वनौकसां च महाप्रणादं श्रुत्वा युद्धाभिमुखस्सन् अवतस्थे ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

---

१ शिरस्त्रं चाप्यपातयदिति गो. त्राणमपातयदिति रा. पाठः । २ पादितमिति गो.पाठः । ३ चेति गो. पाठः । ४ महेन्द्रेणेति गो. रा. पाठः ।

नवनवतितमः सर्गः ।

महोदरादीनां निधनं वीक्ष्याविषह्यमन्युमत एव तिरिचिनिमितदारुणतामसास्त्रयोगपरायतीकृतवानरबलं दशमुखं दाशरथिर्निरुध्य तेन चिरमदृष्टपूर्वं युद्ध्वा तत्प्रेरितमासुरास्त्रं पावकास्त्रेण निरस्य स्वबलमानन्दितवान् ।

महोदरमहापार्श्वौ हतौ दृष्ट्वा सै रावणः । तस्मिंश्च निहते वीरे विरूपाक्षे महाबले ॥ १ ॥
आविवेश महान्क्रोधो रावणं तु महामृधे । सूतं संचोदयामास वाक्यं चेदमुवाच ह ॥ २ ॥
निहतानाममात्यानां रुद्धस्य नगरस्य च । दुःखमेवापनेष्यामि हत्वा तौ रामलक्ष्मणौ ॥ ३ ॥
रामदृक्षं रणे हन्मि सीतापुष्पफलप्रदम् । प्रशाखा यस्य सुग्रीवो जाम्बवान्कुमुदो नलः ॥ ४ ॥
द्विविदश्चैव मैन्दश्च अङ्गदो गन्धमादनः । हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः ॥ ५ ॥
स दिशो दश घोषेण रथस्यातिरथो महान् । नादयन्प्रययौ तूर्णं राघवं चाभ्यधावत ॥ ६ ॥
पूरिता तेन शब्देन सनदीगिरिकानना । संचचाल मही सर्वा त्रस्तसिंहमृगद्विजा ॥ ७ ॥
तामसं सुमहाघोरं चकारास्त्रं सुदारुणम् । निर्दहाह कपीन्सर्वांस्ते प्रपेतुः समन्ततः ॥ ८ ॥
उत्पपात रजो भूमौ तैर्भग्नैः संप्रधावितैः । नहि तत्सहितुं शेकुर्ब्रह्मणा निर्मितं स्वयम् ॥ ९ ॥
तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः । दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः ॥ १० ॥
ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीम् । स ददर्श ततो रामं निघ्नन्तमपराजितम् ॥ ११ ॥
लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा । आलिखन्तमिवाकाशमवष्टभ्य महद्धनुः ॥ १२ ॥
पद्मपत्रविशालाक्षं दीर्घबाहुमरिंदमम् । ततो रामो महातेजाः सौमित्रिसहितो बली ॥ १३ ॥
वानरांश्च रणे भग्नानापतन्तं च रावणम् । समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम् ॥ १४ ॥
विस्फारयितुमारेभे ततः स धनुरुत्तमम् । महावेगं महानादं निर्भिन्दन्निव मेदिनीम् ॥ १५ ॥

गो० टी०—वानराणामित्यादि । स्फोटयन इत्यर्थः । वानराणां च सिंहनादः समभवत् । मेघेन सह देवानां नाद इव वानराणां च देवानां च नादः समभवदित्यर्थः । एतच्चानन्तरश्लोके स्फुटीभविष्यति ॥ २४–२६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे दक्षिणात्याख्याने युद्धकाण्डव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

१–२] ति० टी०—महोदरेति । हतौ हत्वा स रावणः । क्रुद्धो जात इति शेषः ॥ १ ॥ २ ॥

रा० टी०—रावणस्यैव युद्धमाह—महोदरेत्यादिभिः । विरूपाक्षे हते सति महोदरमहापार्श्वौ हतौ दृष्ट्वा वियमानो यो रावणः तं रावणं महान् क्रोध आविवेश अत एव रथं संचोदयामास उवाच च श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—अथ रामरावणयुद्धारम्भः शततमे—महोदरेत्यादि । तस्मिन् विरूपाक्षे निहते सति पश्चान्महोदरमहापार्श्वौ हतौ दृष्ट्वा स्थितमिति शेषः ॥ १–८ ॥

३] ति० टी०—रुद्धस्य नगरस्य । वानरबलैरिति शेषः । दुःखमपनेष्याम्येव ॥ ३ ॥

रा० टी०—तद्वाक्यांकारमाह—निहतानामित्यादिभिः । अमात्यानां नगरस्य च दुःखमपनेष्याम्येव ॥ ३ ॥

४–५] ति० टी०—मूलोच्छेदं करिष्यामीत्याशयेन रामं सर्वावयवमहाक्षत्वेन विरूपयति—रामवृक्षमिति । सीता पुष्पं यस्य सः, स चासौ तेनैव पुष्पेण सर्वान् वानरान् तत्फलभक्षणफलप्रदस्तम्, सुग्रीवादयः प्रशाखा यस्य तम् । प्रशाखासहितं हन्मीति शेषः ॥ ४ ॥ ५ ॥

रा० टी०—तत्प्रकारमाह—रामेति । सीतारूपपुष्पेण फलं प्रददाति सुग्रीवादयो यस्य शाखाः, तं रामवृक्षं रणे हन्मि स्वोभद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

६–७] ति० टी०—इत्यवस्था रथस्य घोषेण दश दिशो नादयन् ॥ ६ ॥ ७ ॥

रा० टी०—स इति । स रावणः रथस्य घोषेण दश दिशो नादयन् अत एवाहं राघवमभ्यधावत च ॥ ६ ॥

रा० टी०—पूरितेति । तेन रथनिनादेन शब्देन पूरिता सर्वा मही संचचाल ॥ ७ ॥

८] ति० टी०—तामसमस्त्रं तमोयहंदतामकमस्त्रम ॥ ८ ॥

रा० टी०—तामसमिति । तामसं राहुदैवतात्मकमस्त्रं चकार अत एव कपीन् निर्दहाह अत एव ते कपयः प्रपेतुः ॥ ८ ॥

९–१३] ति० टी०—ब्रह्मणा स्वयं निर्मितं तामसमस्त्रं सहितुं सोढुं न शेकुः ॥ ९–१२ ॥

१४–१५] ति० टी०—राघवो हृष्टः । एकः शिष्टः शत्रुः दृग्गोचरं प्राप्त इति हर्षः ॥ १४ ॥ १५ ॥

---

१ तु राक्षसाविति गो. पाठः । २ तनित गो. पाठः । ३ एव इति गो. एक इति रा. पाठः । ४ मैन्दश्च द्विविदश्चेति गो. रा. पाठः । ५ ह्यङ्गद इति ङ. पाठः । ६ अवतैतेति गो. पाठः । ७ सवराहमृगद्विपेति गो. रा. पाठः । ८ घोरमिति गो. रा. पाठः ।

रावणस्य च बाणौघैः रामविस्फारितेन च । शब्देन राक्षसास्तेन पेतुश्च शतशस्तदा ॥ १६ ॥
तयोः शरपथं प्राप्य रावणो राजपुत्रयोः । स बभौ च यथा राहुः समीपे शशिसूर्ययोः ॥ १७ ॥
तमिच्छन्प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः । मुमोच धनुरायम्य शरानग्निशिखोपमान् ॥ १८ ॥
तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता । बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत् ॥ १९ ॥
एकमेकेन बाणेन त्रिभिस्त्रीन्दशभिर्दश । लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवम् ॥ २० ॥
अभ्यतिक्रम्य सौमित्रिं रावणः समितिंजयः । आससाद रणे रामं स्थितं शैलमिवापरम् ॥ २१ ॥
स राघवं समासाद्य क्रोधसंरक्तलोचनः । व्यसृजच्छरवर्षाणि रावणो राक्षसेश्वरः ॥ २२ ॥
शरधारास्ततो रामो रावणस्य धनुश्च्युताः । दृष्ट्वापतिताः शीघ्रं भल्लाञ्जग्राह सत्वरम् ॥ २३ ॥
ताञ्छरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः । दीप्यमानान्महाघोराञ्छरानाशीविषोपमान् ॥ २४ ॥
राघवो रावणं तूर्णं रावणो राघवं तथा । अन्योन्यं विविधैस्तीक्ष्णैः शरैर्वर्षैर्ववर्षतुः ॥ २५ ॥

रा० टी०—उत्पपातेति । भयैः अङ्गभङ्गं प्राप्तैस्संप्रयावितैस्तैर्बाणैः महत् रजः उत्पपात हि यतः ब्रह्मणा स्वयं निर्मितं तदस्त्रं सहितुं न शेकुः ॥ ९ ॥

रा० टी०—तानीति । रावणस्य शतशः भग्नान्यनेकान्यनीकानि दृष्ट्वा राघवः पर्यवस्थित. युद्धायोद्युक्तोऽभवदिति शेषः ॥ १० ॥

गो० टी०—उत्पपातेति । सहितुं सोढुम् । *आर्ष इडागमः ॥ ९ ॥ १० ॥

रा० टी०—तत इति । स रावणो विष्णुनोपेन्द्रेण वासवमिव लक्ष्मणेन सह तिष्ठन्तं महद्धनुरवष्टभ्य आकाशमालिखन्तमिव दीर्घबाहुं रामं ददर्श सार्द्धश्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०—तत इत्यादिसार्धश्लोकद्वयेन रामस्यापराजितत्वं, निरवधिकसौन्दर्यनिधित्वेन वैरं विहाय निरन्तरानुभाव्यत्वं, रावणस्य दुर्बुद्धित्वम्, अमृतप्रवाहमावर्तनेव महता धनुर्वेरेणावर्तितं श्रीरामदेहलावण्यामृतपूरमनवगाहमानस्य तस्य दौर्भाग्यं चोच्यते ॥ ११ ॥ १२ ॥

रा० टी०—तत इति । भग्नान् वानरान् आपतन्तं रावणं च समीक्ष्य हृष्टो महायुद्धं द्रक्ष्यामीति तुष्टया प्राप्तहर्ष इत्यर्थः रामः कार्मुकं मध्ये जग्राह सार्द्धश्लोक एकान्वयी ॥ १३॥१४॥

रा० टी०—विस्फारयितुमिति । स रामः मेदिनीं निर्भिन्दन्निव महानादं धनुर्विस्फारयितुमारेभे ॥ १५ ॥

गो० टी०—ततो राम इत्यादिसार्धश्लोक एकान्वयः । हृष्टः चिरादेवी समागत इति संतुष्टः कार्मुकं जग्राह । विस्फारयितुमारेभे इत्यादि विलम्बोक्त्या किमिदानीमपि वा ततो भविष्यति रावण इति रामस्य दयालुतोच्यते ॥ १३—१५ ॥

१६] ति० टी०—राघवबाणौघै रामविस्फारितेन च यः शब्दस्तेन पेतुः ॥ १६ ॥

रा० टी०—रावणस्येति । रावणस्य बाणौघैः रामविस्फारितेन जातेन शब्देन शतशस्ते राक्षसाः पेतुः ॥ १६ ॥

गो० टी०—रावणस्येति । रावणस्य बाणौघैः रामविस्फारितेन च जातेन शब्देनेत्यर्थः ॥ १६ ॥

१७—२०] ति० टी०—स रावणो राजपुत्रयोः समीपं प्राप्य चन्द्रसूर्ययोः समीपे राहुर्यथा बभौ ॥ १७—२० ॥

रा० टी०—तयोरिति । तयोः रामलक्ष्मणयोःशरपथं प्राप्य शशिसूर्ययोस्समीपे राहुरिव स रावणो बभौ ॥ १७ ॥

रा० टी०—तमिति । शरैरुपलक्षितः प्रथमं योद्धुमिच्छन् लक्ष्मणः धनुरायम्य शरान् मुमोच ॥ १८ ॥

रा० टी०—तानिति । लक्ष्मणेन मुक्तमात्रान् बाणान् रावणो बाणैः प्रत्यवारयत ॥ १९ ॥

रा० टी०—एकमिति । लक्ष्मणस्य एकं बाणमेकेन बाणेन त्रीन् त्रिभिः दश दशभिः प्रचिच्छेद रावण इति शेषः ॥ २० ॥

गो० टी०—तयोरिति । शशिसूर्ययोरिति । अभायामिति शेषः ॥ १७—२० ॥

२१—२४] ति० टी०—अभ्यतिक्रम्य बाणैरयाकुलीकृत्य शैलमिव स्थिरमचलं राममाससाद ॥ २१—२४ ॥

रा० टी०—पुनरिति । लक्ष्मणः पुनर्दशरूपेण तस्य शरप्रक्षेपमिति शेषः वारयन् अवारयत् अथेम—अभीति । रावणः सौमित्रिमभ्यतिक्रम्य त्यक्त्वा राममाससाद ॥ २१ ॥

रा० टी०—स इति । रावणः राघवं रामं समासाद्य शरवर्षाणि व्यसृजत् ॥ २२ ॥

रा० टी०—शरेरिति । रामो धनुश्च्युताः अत एव आपतिताः शरधारा दृष्ट्वा भल्लं जग्राह ॥ २३ ॥

रा० टी०—तानिति । राघवः दीप्यमानान् शरौघान् चिच्छेद ॥ २४ ॥

गो० टी०—अभ्यातिक्रम्येति । अभ्यतिक्रम्य एकस्यापि बाणस्य स्वस्मिन्नपतनादनादरेणातिक्रम्य ॥ २१—२६ ॥

२५] ति० टी०—राघवो रावणं रावणो राघवमित्यन्योन्यं शरवर्षैर्ववर्षतुर्वर्षतुः ॥ २५ ॥

१ ते चेति गो. पा. । २ प्राप्त इति गो.पा. । ३ तत इति गो.रा. पाठः । ४ अचलमिति गो. पा. । ५ संख्ये राममिति गो. पा. । ६ राघवोपरीति गो. रा.पा. । ७ आपतत इति गो.पा.। ८ क्रुद्धानाशीविषानिवेति गो.पाठः । ९ शरैरभीति गो.पाठः । *इदं चिन्त्यं तीक्ष्णहेति विकल्पेनेडागमविधानात् ।

चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम् । बाणवेगात्समुत्क्षिप्तावन्योन्यमपराजितौ ॥ २६ ॥
तयोर्भूतानि वित्रेसुर्युगपत्संप्रयुध्यतोः । रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः ॥ २७ ॥
सततं विविधैर्बाणैर्बभूव गगनं तदा । घनैरिवातपापाये विद्युन्मालासमाकुलैः ॥ २८ ॥
गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः । महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः ॥ २९ ॥
शरान्धकारमाकाशं चक्रतुः प्रथमं तदा । गतेऽस्तं तपने चापि महामेघाविवोत्थितौ ॥ ३० ॥
तयोरभून्महायुद्धमन्योन्यवधकाङ्क्षिणोः । अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव ॥ ३१ ॥
उभौ हि परमेष्वासावुभौ युद्धविशारदौ । उभावस्त्रविदां मुख्यावुभौ युद्धे विचेरतुः ॥ ३२ ॥
उभौ हि येन व्रजतस्तेन तेन शरोर्मयः । ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव ॥ ३३ ॥
ततः संसक्तहस्तस्तु रावणो लोकरावणः । नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत ॥ ३४ ॥
रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम् । शिरसाधारयद्रामो न व्यथामभ्यपद्यत ॥ ३५ ॥
अथ मन्त्रानपि जपन्रौद्रमस्त्रमुदीरयन् । शरान्भूयः समादाय रामः क्रोधसमन्वितः ॥ ३६ ॥

रा० टी०—राघव इति । शरवर्षैरन्योन्यं बबर्षतुः । चक्रतुः ॥ २५ ॥

२६] ति० टी०—अन्योन्यं बाणवेगात्समुत्क्षिप्तावन्योन्यं क्षिप्तवन्तौ । अपराजितावप्रतिहतौ ॥ २६ ॥

रा० टी०—चेरतुरिति । वामदेशौ परिधिभौ दक्षिणतौ याभ्यामत एव अन्योन्यमपराजितौ रामरावणौ सव्यदक्षिणं मण्डलं चेरतुः ॥ २६ ॥

२७] ति० टी०—सायकमुचोर्तयोः २७

रा० टी०—तयोरिति । यमांतकनिकाशयोः तयोः रामरावणयोः संप्रयुध्यतोः सतोः भूतानि युगपत् वित्रेसुः ॥ २७ ॥

गो० टी०—तयोरिति । यमान्तकनिकाशयोः यमतदन्तकौ यमरुद्रौ तत्तुल्ययोः ॥ २७ ॥

२८] ति० टी०—सततं व्याप्तम् ॥ २८ ॥

रा० टी०—सन्ततमिति । आतपापाये विद्युन्मालासमाकुलैः घनैरिव विविधैर्बाणैस्सन्ततं व्याप्तं गगनं बभूव ॥ २८ ॥

गो० टी०—संततमिति । गगनं संततं निबिडं बभूवेत्यन्वयः ॥ २८ ॥

२९] ति० टी०—गवाक्षितमिव संजातगवाक्षमिव । गृध्रपत्रैस्तद्बन्धनैः । सुवाजितैः सम्यक्संपादितवेगैः । आर्षं पुंस्त्वम् । शरवृष्टिविशेषणत्वात् ॥ २९ ॥

रा० टी०—गवाक्षितमिति । गृध्रपत्रैः तद्बन्धनविशिष्टैः महावेगैः अत एव सुवाजितैः अतिगमनवद्भिः शरवृष्टिभिराकाशं गवाक्षितं संजातगवाक्षमिव बभूव महावेगैरित्यादौ पुंस्त्वमार्षम् ॥ २९ ॥

गो० टी०—गवाक्षितमित्यर्धम् । गवाक्षितं संजातगवाक्षम् ॥ २९ ॥

गो० टी०—महावेगैरित्यादिसार्धश्लोक एकान्वयः । गृध्रपत्रैः हेतुभिः, सुवाजितैः संजातशोभनपक्षैः । बाणैरिति शेषः ॥३०॥

३०–३२] ति० टी०—तपने सूर्येऽस्तं गते च । अपि-शब्दादस्ताचलं त्यक्त्वोदयाद्रिं गतेऽपीत्यर्थः । दिवापीति यावत् । यत्तु यथाश्रुतरीत्या रात्रावपीति व्याचक्षते तन्न कश्चिन्मत्कारः ॥ ३०—३२ ॥

रा० टी०—शरैरिति । तपने सूर्ये अस्तं गते सति महामेघाविवोत्थितौ रामरावणौ आकाशं शरान्धकारं चक्रतुः॥३०॥

रा० टी०—तयोरिति । तयोः रामरावणयोर्पुरुहूतमनमासाद्यमन्यैः कर्तुमशक्यं वृत्रवासवयोर्पुरुहूतमिव अचिन्त्यं बभूव ॥३१॥

रा० टी०—उभाविति । युद्धे विचेरतुः ॥ ३२ ॥

गो० टी०—बभूवेति । अनासाद्यम इत्र पूर्वं केनापि दुर्लभम । अचिन्त्यं रावणस्यैव भविष्यतीति चिन्तानर्हम् ३१॥३२

३३] ति० टी०—येन व्रजतः । येन येन मण्डलचारेणेत्यर्थः ॥ ३३ ॥

रा० टी०—उभाविति । येन येन पथा उभौ व्रजतः तेन तेन पथा मारुता विद्धाः सागरयोरूर्मय इव शरोर्मयो जग्मुः ३३

गो० टी०—उभाविति । येन येन मण्डलचारेण ॥३३॥

३४–३५] ति० टी०—संसक्तहस्तो बाणप्रयोगे आसक्तहस्तः ॥ ३४ ॥ ३५ ॥

रा० टी०—तत इति । संसक्तहस्तः बाणप्रयोगे आसक्तकरो रावणः रामस्य ललाटे नाराचमालां प्रत्यमुञ्चत ॥ ३४ ॥

रा० टी०—रौद्रेति । रौद्रचापप्रयुक्तां तां नाराचमालां शिरसा धारयन् रामः व्यथां न प्रत्यपद्यत ॥ ३५ ॥

गो० टी०—तत इति । संसक्तहस्तः बाणप्रयोगासक्तहस्तः ॥ ३४ ॥ ३५ ॥

३६] ति० टी०—उदीरयन्प्रवर्तयन् ॥ ३६ ॥

रा० टी०—अथेति । मंत्रान् जपन् रौद्रमस्त्रमुदीरयंश्च रामश्शरान् समादाय चापमायम्य मुमोच सार्द्धश्लोक एकान्वयी ॥ ३६ ॥

---

१ कारं तौ भीममिति गो. कारं तौ वीरावितिरा. पा. । २ समरमिति गो. परममिति रा. पाठः । ३ बभूव तुमुलमिति गो. पाठः । ४ श्लेषेति गो. पाठः । ५ अथेति गो. पाठः ।

मुमोच च महातेजाश्चापमायम्य वीर्यवान् । तौञ्शरान्राक्षसेन्द्राय चिक्षेपाच्छिन्नसायकः॥ ३७ ॥
ते महामेघसंकाशे कवचे पतिताः शराः । अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा ॥ ३८ ॥
पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम् । ललाटे परमास्त्रेण सर्वास्त्रकुशलोऽभिनत् ॥ ३९ ॥
ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः । श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलिताः ॥ ४० ॥
निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्च्छितः । आसुरं समहाघोरमन्यदस्त्रं चकार सः ॥ ४१ ॥
सिंहव्याघ्रमुखांश्चापि कङ्ककोकमुखानपि । गृध्रश्येनमुखांश्चापि शृगालवदनांस्तथा ॥ ४२ ॥
ईहामृगमुखांश्चापि व्यादितास्यान्भयावहान् । पञ्चास्यालेलिहानांश्च ससर्ज निशिताञ्शरान् ४३ ॥
शरान्खरमुखांश्चान्यान्वराहमुखसंश्रितान् । श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान् ॥ ४४ ॥
एतांश्चान्यांश्च मायाभिः ससर्ज निशिताञ्छरान् । रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन् ॥ ४५ ॥
आसुरेण समाविष्टः सोऽस्त्रेण रघुपुंगवः । ससर्जास्त्रं महोत्साहं पावकं पावकोपमः ॥ ४६ ॥
अग्निदीप्तमुखान्बाणांस्तैव सूर्यमुखानपि । चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि ॥
ग्रहनक्षत्रवर्णाश्चै महोल्कामुखसंस्थितान् । ॥ ४७ ॥

गो० टी०–अथेत्यादि । शरान् सौवास्त्रप्रयुक्तान् बाणान्, मुमोचेत्यन्वयः । मुमोच च महातेजाश्चापमायम्य वीर्यवानिति पाठः । तदनन्तरं, ते महामेघसंकाश इति श्लोकः । तदनन्तरं, पुनरेवेति श्लोकः । तदनन्तरं, ते भित्त्वेति श्लोकान्पूर्व ग्रन्थपतनमस्ति तदन्वेष्टव्यम् ॥ ३६ ॥

३७] ति० टी०–अच्छिन्नसायकोऽव्यवच्छिन्नसायकः । निरन्तरप्रवर्तितबाणवर्ष इति यावत् ॥ ३७ ॥

३८] ति० टी०–अवध्येऽभेद्ये । जनयन्नजनयन् ॥ ३८ ॥

रा० टी०–ते इति । राक्षसेन्द्रस्य कवचे पतिताश्शराः व्यथां न जनयन् अजनयन् ॥ ३७ ॥

गो० टी०–त इति । अवध्ये अभेद्ये । व्यथां न जनयन् नाजनयन् ॥ ३७ ॥

३९] ति० टी०–परमास्त्रेणाग्नेयास्त्रेण योजितेबाणेरभिनत् ३९

रा० टी०–पुनरिति । रामः परमास्त्रेण रावणं ललाटे अभिनत् ॥ ३८ ॥

गो० टी०–पुनरेवेति । ललाटे विषये ललाटमुद्दिश्येत्यर्थः । यद्वा परमास्त्राणि विद्यायेति शेषः ॥ ३८ ॥

४०] ति० टी०–बाणरूपाणि । प्रशंसायां रूपप् । प्रशस्ता बाणाः आर्षो लिङ्व्यत्ययः रावणप्रतिकूलिता रावणेन निवारिता अपि श्वसन्तः पञ्चशीर्षा उरगा एव भूमिं विविशुः ॥ ४० ॥

रा० टी०–ते इति । ते बाणरूपाणि प्रशस्तबाणाः प्रशंसायां रूपप् लिङ्व्यत्ययः आर्षः रावणप्रतिकूलिताः रावणेन निवारिताः अत एव पञ्चशीर्षा उरगा इव श्वसन्तश्वसन्तः भूमिं विविशुः ॥ ३९ ॥

गो० टी०–त इति । ते अस्त्रविकृतिरूपाः शराः, बाणरूपाणि रावणास्त्राणि भित्त्वा, रावणप्रतिकूलिताः रावणेन निवारिताः सन्तः, भूमिं विविशुः ॥ ३९ ॥ ४० ॥

४१–४२] ति० टी०–चकार प्रादुश्चकार ॥ ४१ ॥४२ ॥

रा० टी०–निहत्येति । रावणः अन्यत् महाघोरमस्त्रं चकार क्षिप्तवान् ॥ ४० ॥

४३–४४] ति० टी०–ईहामृगो वृकः । पञ्चास्यान्सिंहमुखान् ॥ ४३ ॥ ४४ ॥

४५] ति० टी०–यदास्त्रमस्त्रं प्रादुश्चकार तदा ससर्जेत्यन्वयः ॥ ४५ ॥

रा० टी०–अस्त्राकारं बोधयन्नाह—सिंहेति । सिंहव्याघ्रमुखादीन् शरान् ससर्ज अर्द्धचतुष्टयमेकान्वयि ॥ ४३ ॥ ४२॥

रा० टी०–शरानिति । एतान् खरमुखादीन् अन्यांश्च शरान् मायाभिः रामं प्रति ससर्ज अर्द्धचतुष्टयमेकान्वयि ४३।४४

गो० टी०–आसुरास्त्रं प्रपञ्चयति—सिंहेत्यादिश्लोकचतुष्टयेन । लेलिहानान् सर्पान् । तदाकारानिति यावत् । श्वानशब्दोऽप्यस्ति । मकराशीविषाननानित्यत्र आर्षोविषशब्दः पञ्चास्यसर्पेतरसर्पपरः ॥ ४१–४४ ॥

४६] ति० टी०–तमोऽस्त्रस्य प्रत्यस्त्रं पावकमिति तत्सर्जेत्याह—पावकमिति ॥ ४६ ॥

रा० टी०–आसुरेणेति । आसुरेण अस्त्रेण समाविष्टः संयोजितः स रामः पावकमस्त्रं ससर्ज ॥ ४५ ॥

गो० टी०–आसुरेणेति । पावकं पावकसंबन्धि ॥ ४६ ॥

४७] ति० टी०–ततोऽखिलज्योतिर्गणमुखबाणोत्पत्तिरित्याह—अग्निदीप्तमुखानिति ॥ ४७ ॥

---

१ इदमर्धं गो. रा. पुस्तकयोर्नास्ति । २ पतिता इति गो. पा. । ३ रणे इति गो. पा. । ४ अस्त्रं प्रादुश्चकार इति गो. रा. पा. । ५ काकेति गो. कालेति रा. पाठः । ६ क्ष्यानीति गो. पाठः । ७ भयानकानीति गो. महाभयानिति रा. पा. । ८ स्थितानिति गो. सृतानिति रा. पाठः । ९ अन्यानिति गो. रा. पाठः । १० प्रायाचीति गो. विविक्षानिति रा. पा. । ११ नन्दन इति गो. पाठः । १२ उत्साह इति गो. पाठः । १३ तपोते गो. पाठः । १४ इदमर्धमधिकं गो. रा. पुस्तकयोः । १५ नक्त्रानिति गो. पाठः ।

विद्युज्जिह्वोपमांश्चापि ससर्ज विविधाञ्छरान् । ते रावणशरा घोरा राघवास्त्रसमाहताः ॥ ४८ ॥
विलयं जग्मुराकाशे जघ्नुश्चैव सहस्रशः । तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ ४९ ॥
हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः । सुग्रीवाभिमुखा वीराः संपरिक्षिप्य राघवम् ॥ ५० ॥
ततस्तदस्त्रं विनिहत्य राघवः प्रसह्य तद्रावणबाहुनिःसृतम् ।
मुदान्वितो दाशरथिर्महात्मा विनेदुरुच्चैर्मुदिताः कपीश्वराः ॥ ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

शततमः सर्गः ।

स्वास्त्रे मोघे मयविहितं रौद्रमस्त्रं रावणेन प्रयुक्तं रामो मेनलक्ष्मणेन मित्रस्था एवमस्त्रत्यत्नेन सूत्र्यमानयोस्तयोः सौमित्रिः सारथिं जघान ध्वजं धनुश्च चिच्छेद रावणस्य विभीषणस्तु हयानहनत्तान् रावणस्तु विभीषणे रुषोऽपि तदाज्ञाकारिणि लक्ष्मणे दारुणां शक्तिं मुमोच तया हतो लक्ष्मणो विसंज्ञो भुवि पपात तेन रामो दशाम्बेन रुषो युयुधे च ।

तस्मिन्प्रतिहतेऽस्त्रे तु रावणो राक्षसाधिपः । क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम् ॥ १ ॥
मयेन विहितं रौद्रमन्यदस्त्रं महाद्युतिः । उत्स्रष्टुं रावणो भीमं राघवाय प्रचक्रमे ॥ २ ॥
ततः शूलानि निश्चेरुर्गदाश्च मुसलानि च । कार्मुकाद्दीप्तमालानि वज्रसाराणि सर्वशः ॥ ३ ॥
मुद्गराः कूटपाशाश्च दीप्ताश्चाशनयस्तथा । निष्पेतुर्विविधास्तीक्ष्णा वाता इव युगक्षये ॥ ४ ॥
तदस्त्रं राघवः श्रीमानुत्तमास्त्रविदां वरः । जघान परमास्त्रेण गान्धर्वेण महाद्युतिः ॥ ५ ॥
तस्मिन्प्रतिहतेऽस्त्रे तु राघवेण महात्मना । रावणः क्रोधताम्राक्षः सौरमस्त्रमुदीरयत् ॥ ६ ॥
ततश्चक्राणि निष्पेतुर्भास्वराणि महान्ति च । कार्मुकाद्वीप्तवेगस्य दशग्रीवस्य धीमतः ॥ ७ ॥
तैरासीद्गगनं दीप्तं संपतद्भिः समन्ततः । पतद्भिश्च दिशो दीप्तैश्चन्द्रसूर्यग्रहैरिव ॥ ८ ॥

रा० टी०–अग्नीति । अग्निदीप्तमुखादीन् शरान् ससर्ज रावण इति शेषः अर्द्धचतुष्टयमेकान्वयि ॥ ४८ ॥ ४७ ॥

गो० टी०–पावकास्त्रं प्रपञ्चयति—अग्नीत्यादिश्लोकद्वयेन । महोल्कामुखसंस्थितान् महोल्कामुखेन वर्तमानान् । विद्युज्जिह्वोपमान् विद्युदर्चिःसदृशान् । कर्णा जिह्वास्तथार्चिष इति हलायुधः ॥ ४६–५० ॥

४८] ति० टी०–विद्युज्जिह्वोपमान्विद्युदर्चिःसदृशान् । ' कर्णा जिह्वास्तथार्चिषः ' इति हलायुधः ॥ ४८ ॥

रा० टी०–ते इति । ये सहस्रशो जानरान् जघ्नुः ते राघवास्त्रेण समाहताः रावणशराः आकाशे विलयं जग्मुः ॥४८

४९] ति० टी०–विलयं जग्मुस्तथापि सहस्रशो वानराञ्जघ्नुः ॥ ४९ ॥

रा० टी०–तदिति । रामेण निहतमस्त्रं दृष्ट्वा हृष्टाः कपयो राघवं संपरिक्षिप्य परिवृत्य नेदुः सार्द्धश्लोक एकान्वयी ॥ ४९।५० ॥

५०–५१] ति० टी०–संपरिक्षिप्य परिवार्य ॥ ५० ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

रा० टी०–तत इति । राघवः तद्रावणबाहुनिःसृतं तदस्त्रं विनिहत्य मुदान्वितो बभूवेति शेषः अत एव मुदिताः कपीश्वराः विनेदुः ॥ ५१ ॥

इति श्रीमद्रामायणकाव्यव्याख्याने रामायणशिरोमणौ युद्धकाण्डे शततमः सर्गः ॥ १०० ॥

गो० टी०–तत इति । सुग्रं प्रसिद्धम् । मुदान्वितः बभूवेति शेषः ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे सत्क्रियाटीकाख्ये युद्धकाण्डव्याख्याने शततमः सर्गः ॥ १०० ॥

१] ति० टी०–तस्मिन्प्रतिहते इति । क्रोधाच्चास्त्रमनन्तरम् चक्रे इति शेषः ॥ १ ॥

रा० टी०–रामरावणयोर्युद्धमेव वर्णयति–तस्मिन्निति-त्यादिभिः । तस्मिन्पूर्वोक्ते अस्त्रे प्रतिहते सति रावणः द्विगुणं क्रोधं चक्रे क्रोधादनन्तरमस्त्रं द्विगुणं चक्रे ॥ १ ॥

गो० टी०–अथ लक्ष्मणस्य शक्त्या पतनम्—तस्मिन्निति-त्यादि । क्रोधाच्चास्त्रमनन्तरमित्यत्रापि चक्र इत्यनुषज्यते ॥ १ ॥

२–८] ति० टी०–तस्किमस्त्रं तत्राह—मयेनेति ॥ २–८ ॥

रा० टी०–मयेनेति । रावणः मयेन विहितमन्यदस्त्रं राघवाय उत्स्रष्टुं प्रचक्रमे ॥ २ ॥

---

१ अन्यानिति गो. पाठः । २ जग्मुरिति गो. पाठः ३ प्रेति गो. पाठः । ४ आहवे इति गो. पाठः । ५ घोरमिति गो. पाठः । ६ उदैरयदिति . पाठः । ७ इतस्तत इति गो. पाठः । ८ दीप्ता इति गो. पाठः ।

तानि चिच्छेद बाणौघैश्चक्राणि तु स राघवः । आयुधानि च चित्राणि रावणस्य चमूमुखे ॥ ९ ॥
तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः । विव्याध दशभिर्बाणै रामं सर्वेषु मर्मसु ॥ १० ॥
स विद्धो दशभिर्बाणैर्महाकार्मुकनिःसृतैः । रावणेन महातेजा न प्राकम्पत राघवः ॥ ११ ॥
ततो विव्याध गात्रेषु सर्वेषु समितिंजयः । राघवस्तु सुसंक्रुद्धो रावणं बहुभिः शरैः ॥ १२ ॥
एतस्मिन्नन्तरे क्रुद्धो राघवस्यानुजो बली । लक्ष्मणः सायकान्सप्त जग्राह परवीरहा ॥ १३ ॥
तैः सायकैर्महावेगै रावणस्य महाद्युतिः । ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद नैकधा ॥ १४ ॥
सारथेश्चापि बाणेन शिरो ज्वलितकुण्डलम् । जहार लक्ष्मणः श्रीमान्नैर्ऋतस्य महाबलः ॥ १५ ॥
तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम् । लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिर्निशितैस्तदा ॥ १६ ॥
नीलमेघनिभांश्चास्य सदश्वान्पर्वतोपमान् । जघानाप्लुत्य गदया रावणस्य विभीषणः ॥ १७ ॥
हताश्वात्तु तदा वेगादवप्लुत्य महारथात् । कोपमाहारयत्तीव्रं भ्रातरं प्रति रावणः ॥ १८ ॥

गो० टी०-किं तदस्त्रमित्यपेक्षायामाह—मयेनेति । रौद्रं रुद्रदेवताकम् ॥ २ ॥

रा० टी०-तत इति । कार्मुकात् रावणचापात् शूलादीनि निश्चेरुः ॥ ३ ॥

रा० टी०-मुद्गरा इति । मुखरक्षये वाता इव मुद्गरादयो निष्पेतुः ॥ ४ ॥

रा० टी०-तदिति । उत्तमास्त्रविदां वरो राघवः गान्धर्वेण परमास्त्रेण तदस्त्रं जघान ॥ ५ ॥

रा० टी०-तस्मिन्निति । राघवेण तस्मिन्नस्त्रे प्रतिहते सति रावणोन्यदस्त्रमुदीरयत् उदैरयत् ॥ ६ ॥

रा० टी०-तत इति । ततोऽनन्तरं दशग्रीवस्य कार्मुकात् महान्ति चक्राणि निष्पेतुः ॥ ७ ॥

गो० टी०-ततः शूलानित्यादिश्लोकद्वयमेकान्वयम् । कूटपाशाः कपटपाशाः ॥ ३—७ ॥

रा० टी०-तैरिति । दिशः पतद्भिः चन्द्रसूर्यग्रहैरिव संपतद्भिस्तैश्चक्रैर्गगनं दीप्तमासीत् ॥ ८ ॥

गो० टी०-तैरिति । चन्द्रसूर्यग्रहैरिवेति । तत्समानाकारैरित्यर्थः ॥ ८—१२ ॥

९-१३] ति० टी०-तानि सौरास्त्रनिःसृतचक्राणि । बाणबलादेव केवलं चिच्छेद न ब्रह्मास्त्रमपेक्षते स्म ॥ ९-१३ ॥

रा० टी०-तानीति । चमूमुखे आगतानि रावणस्य यानि चक्राण्यायुधानि च तानि राघवश्चिच्छेद ॥ ९ ॥

रा० टी०-तदिति । रावणः तदस्त्रं निहतं दृष्ट्वा दशभिर्बाणैः सर्वेषु मर्मसु रामं विव्याध ॥ १० ॥

रा० टी०-स इति । रावणेन दशभिर्बाणैर्विद्धस्ताडितोपि स राघवः न प्राकम्पत ॥ ११ ॥

रा० टी०-तत इति । राघवः रावणं सर्वेषु गात्रेषु बहुभिश्शरैर्विव्याध ॥ १२ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नन्तरे अवकाशे लक्ष्मणः सप्त सायकान् जग्राह ॥ १३ ॥

गो० टी०-एतस्मिन्नन्तर इति । एवं रावणं प्रहृत्य क्षणं रामे विश्राम्यति सतीत्यर्थः । लक्ष्मणः पूर्वं युद्धे प्रवृत्तो मध्ये रामेण युद्धकरणादवसरप्रतीक्ष इत्यर्थः । एवमन्याप्यानेकथमन्येन युध्यमानमन्यो युध्येतेति महान् दोषः स्यात् ॥ १३ ॥

१४-१५] ति० टी०-मनुष्यः शीर्षे यस्य तम् । मनुष्यशीर्षयुक्तमित्यर्थ इत्यन्ये ॥ १४ ॥ १५ ॥

रा० टी०-तैरिति । महाद्युतिर्लक्ष्मणो मनुष्यशीर्षं मनुष्यशिरोविशिष्टं रावणस्य ध्वजं नैकधा चिच्छेद ॥ १४ ॥

रा० टी०-सारथेरिति । लक्ष्मणः नैर्ऋतस्य रावणस्य सारथेः ज्वलितकुण्डलं शिरो जहार ॥ १५ ॥

गो० टी०-गृहीतानां सप्तबाणानां विनियोगप्रकारमाह—तैः सायकैरित्यादिश्लोकत्रयेण । तैः सायकैरिति षष्ठ्यर्थे तृतीया । तेषां सायकानां मध्ये एकेन बाणेन ध्वजम्, एकेन बाणेन सारथिशिरः, पञ्चभिर्धनुश्च चिच्छेदेत्यर्थः निशितैः शरैरित्यत्र शरशब्दः काशदण्डविशेषमयत्वपरो बाणविशेषणम् ॥ १४-१६ ॥

१६-१८] ति० टी०-गजकरोपमं धनुश्चिच्छेद १६-१८

रा० टी०-तस्येति । लक्ष्मणः गजकरोपमं शुण्डादण्डसदृशं तस्य रावणस्य धनुः पञ्चभिश्शरैश्चिच्छेद ॥ १६ ॥

रा० टी०-नीलेति । विभीषणः आप्लुत्य अस्य रावणस्य सदश्वान् गदया जघान ॥ १७ ॥

रा० टी०-हतेति । रावणः हताः अश्वाः यस्य स तस्मात् महारथात् अवप्लुत्य भ्रातरं प्रति कोपमाहारयत् अकरोत् १८

१ स त्विति गो. पाठः । २ शरैरिति गो. रा. पा. । ३ वेगवानिति गो. पाठः ।

ततः शक्तिं महाशक्तिः प्रदीप्तामशनीमिव । विभीषणाय चिक्षेप राक्षसेन्द्रः प्रतापवान् ॥ १९ ॥
अप्राप्तामेव तां बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः । अथोदतिष्ठत्संनादो वानराणां महाहवे ॥ २० ॥
संपपात त्रिधा छिन्ना शक्तिः काञ्चनमालिनी । सविस्फुलिङ्गा ज्वलिता महोल्केव दिवश्च्युता ॥२१॥
ततः संभाविततरां कालेनापि दुरासदाम् । जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा॥ २२ ॥
सा वेगिता बलवता रावणेन दुरात्मना । जज्वाल सुमहातेजा दीप्ताशनिसमप्रभा ॥ २३ ॥
एतस्मिन्नन्तरे वीरो लक्ष्मणस्तं विभीषणम् । प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत ॥ २४ ॥
तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः । रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत् ॥ २५ ॥
कीर्यमाणः शरौघेण विसृष्टेन महात्मना । स प्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः ॥ २६ ॥
मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः । लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत् ॥ २७ ॥
मोक्षितस्ते बलश्लाघिन्यस्मादेनं विभीषणः । विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते ॥ २८ ॥
एषा ते हृदयं भित्त्वा शक्तिर्लोहितलक्षणा । मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति ॥ २९ ॥
इत्येवमुक्त्वा तां शक्तिमष्टघण्टां महास्वनाम् । मयेन मायाविहिताममोघां शत्रुघातिनीम् ॥ ३० ॥
लक्ष्मणाय समुद्दिश्य ज्वलन्तीमिव तेजसा । रावणः परमक्रुद्धश्चिक्षेप च ननाद च ॥ ३१ ॥
सा क्षिप्ता भीमवेगेन वज्राशनिसमस्वना । शक्तिरभ्यपतद्वेगाल्लक्ष्मणं रणमूर्धनि ॥ ३२ ॥

गो० टी०—एवं धनुषि लिप्ते क्षणं तूष्णीं तिष्ठति रावणे विभीषणेन किंचित्कारमाह—नीलेति ॥ १७–२१ ॥

१९–२१] ति० टी०—महाशक्तिर्महाबलः ॥ १९–२१ ॥

रा० टी०—तत इति । राक्षसेंद्रः प्रदीप्तामशनीमिव शक्तिं विभीषणाय चिक्षेप ॥ १९ ॥

रा० टी०—आप्राप्तामिति । लक्ष्मणः अप्राप्तामेव तां शक्तिं विभीषणेश्चिच्छेद अथानन्तरं वानराणां सन्नादः हर्षसूचकस्वनः उदतिष्ठत् ॥ २० ॥

रा० टी०—संपपातेति । सविस्फुलिङ्गा ज्वलिता दिवश्च्युता महोल्केव काञ्चनमालिनी शक्तिस्संपपात ॥ २१ ॥

२२] ति० टी०—संभाविततरामसोघेति सर्वविख्याताम् । दुरासदां दुःसहाम् ॥ २२ ॥

रा० टी—तत इति । संभाविततरामसोघत्वेन प्रसिद्धामत एव कालेनापि दुरासदाम् शक्तिं जग्राह रावण इति शेषः ॥ २२ ॥

गो० टी०—तत इति । संभाविततरां चन्दनादिभिरर्चिताम् ॥ २२ ॥ २३ ॥

२३] ति० टी०—वेगिता कृतवेगा ॥ २३ ॥

रा० टी०—सेति । रावणेन वेगिता वेगेन प्रक्षिप्ता सुमहातेजाः सा शक्तिर्जज्वाल ॥ २३ ॥

२४–२५] ति० टी०—तूर्णमभ्यवपद्यत । शक्तिसंमुखं स्वयमागत्य विभीषणं रक्षितवानित्यर्थः ॥ २४ ॥ २५ ॥

रा० टी०—एतस्मिन्निति । एतस्मिन्नन्तरे समये प्राणसंशयमापन्नं विभीषणं लक्ष्मणस्तूर्णमभ्यवपद्यत अरक्षदित्यर्थः२४

रा० टी०—रक्षणप्रकारमाह—तमिति । ह्राभ्याम् लक्ष्मणः तं विमोक्षयितुं चापमायम्य शक्तिहस्तं रावणं शरवर्षैरवाकिरत् ॥ २५ ॥

गो० टी०—एतस्मिन्निति । अभ्यवपद्यत तमाश्लाघ्य स्वयमतिष्ठदित्यर्थः ॥ २४ ॥ २५ ॥

२६–२८] ति० टी०—महात्मना लक्ष्मणेन विसृष्टेन शरौघेण कीर्यमाणः, अत एव विमुखीकृतविक्रमः कुण्ठितशत्रुवधविषयोत्साहः, अत एव भ्रातरं प्रहर्तुं मनश्चक्रे ॥ २६–२८ ॥

रा० टी०—कीर्यमाण इति । महात्मना लक्ष्मणेन कर्त्रा शरौघेण कीर्यमाणः अत एव विमुखीकृतविक्रमो रावणः प्रहर्तुं मनो न चक्रे ॥ २६ ॥

रा० टी०—मोक्षितमिति । रावणः लक्ष्मणेन मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणाभिमुखस्तिष्ठन्तच्चिदमब्रवीत् ॥ २७ ॥

गो० टी०—कीर्यमाण इति । विमुखीकृतविक्रमः विमुखीकृतविभीषणविषयपराक्रमः ॥ २६ ॥ २७ ॥

रा० टी०—तदाकारमाह—मोक्षितमिति । हे बलश्लाघिन् यस्मात् विभीषणस्त्वया मोक्षितस्तस्मात् राक्षसं विभीषणं विमुच्य इयं शक्तिः त्वयि विनिपात्यते ॥ २८ ॥

गो० टी० मोक्षित इति । ते त्वया ॥ २८ ॥

२९–३२] ति० टी०—एषेति । लोहितेन रिपुशरीररुधिराकरसंहेतुकारुण्येन लक्ष्यते दृश्यते सा इयं शक्तिः मद्बाहुपरिघात्सृष्टा सती ते हृदयं भित्त्वा प्राणान् आदाय यास्यति ॥ २९ ॥

१ दीप्तां दीप्ताशनिमिवेति गो. पाठः । २ तदेति गो. तत्रेति रा. पाठः । ३ सा पपातेति गो. पाठः । ४ शक्रेति गो. रा. पाठः । ५ नेति गो. रा. पाठः ।

तामनुव्याहरच्छक्तिमापतन्तीं स राघवः । स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा ॥३३॥
रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा । मुक्ता शूरस्य भीतस्य लक्ष्मणस्य ममज्ज सा॥ ३४ ॥
न्यपतत्सा महावेगा लक्ष्मणस्य महोरसि । जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः ॥ ३५ ॥
ततो रावणवेगेन सुदूरमवगाढया । शक्त्या [1]विभिन्नहृदयः पपात भुवि लक्ष्मणः॥ ३६ ॥
तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः । भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत् ॥ ३७ ॥
स मुहूर्तमिवै ध्यात्वा बाष्पपर्या[3]कुलेक्षणः । बभूव संरब्धतरो युगान्त इव पावकः ॥ ३८ ॥
न विषादस्य कालोऽयमिति संचिन्त्य राघवः । चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः ॥
सर्वयत्नेन महता लक्ष्मणं [4]परिवीक्ष्य च । ॥ ३९ ॥
स ददर्श ततो रामः शक्त्या भिन्नं महाहवे । लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ॥ ४० ॥

रा० टी०—इतीति । रावणः इत्येवमुक्त्वा अष्टौ घण्टा यस्यामत एव महास्वनां मयेन मायाविहितां शक्तिं लक्ष्मणाय समुद्दिश्य चिक्षेप ननाद च श्लोकद्वयमेकान्वयि ॥ ३०॥३१॥

रा० टी०—सेति । क्षिप्ता शक्तिः लक्ष्मणमभ्यपतत् ॥३२॥

गो० टी०—एषेति । लोहितलक्षणा रुधिरचिह्ना । अनेन पूर्वमपि बहुधा रिपवो मया हता इति व्यज्यते । लोहितलक्षणा सती यास्यतीति वा ॥ २९–३२ ॥

३३] ति० टी०—आपतन्तीं तां शक्तिं शक्त्यधिष्ठातृदेवतामुद्दिश्यानुव्याहरत् । तदेवाह—लक्ष्मणाय स्वस्त्यस्तु । त्वं हतोद्यमा हतप्राणनाशोद्योगा, अत एव मोघा प्राणापहारांशे मोघा भव । तच्चक्तिस्तु पीडामात्रेण चरितार्थास्यिति भावः । स्पर्शमात्रेण प्राणापहरणसामर्थ्ययुक्तायाः शक्तेरनेन स्ववाक्येन मोघीकरणात्स्वस्य सत्यसंकल्पत्वं सूचितम् ॥ ३३ ॥

रा० टी०—तामिति । मोघा लक्ष्यास्पर्शित्वेन निष्फला अत एव हतोद्यमा विध्वंसितरावणोद्योगा त्वं भव अत एव लक्ष्मणाय स्वस्त्यस्तु लोकांतरगमनं न भवेदित्यर्थः इति वचः आपतन्तीं शक्तिं तदभिमानिदेवतां राघवो व्याहरत् अकथयत् ॥ ३३ ॥

गो० टी०—तामिति । राघवः लक्ष्मणाय स्वस्त्यस्तु त्वं हतोद्यमा नष्टहननोद्योगा मोघा भवेति तामनुव्याहरदित्यन्वयः ३३

३४] ति० टी०—सा मुक्ता शक्तिरभीतस्य भगवत्तत्त्वानुसंधानेन निर्भयस्य लक्ष्मणस्योरस्याशु ममज्ज ॥ ३४ ॥

रा० टी०—रावणेनेति । रावणेन मुक्ता शक्तिः भीतस्य भीर्भयमिता नित्यं निवृत्ता यस्मात् तस्य लक्ष्मणस्य सन्निधौ ममज्ज पपातेत्यर्थः उरसि ममज्जेत्यर्थस्तु न युक्तः शक्तिकर्मकरामकर्तृकोक्तेर्विरुद्धत्वापत्तेः अत एव ज्ञः कालकालः कर्तृत्वं करणत्वं चेत्यादिश्रुतिस्मृतयस्तानुकूलाः मूर्छावामिस्तु तदस्पर्शेऽपि सौकुमार्यातिशयात् ॥ ३४ ॥

गो० टी०—क्षणात् भस्मीकरणक्षमा शक्तिः रामेण मोघीकृता सती केवलमपतदित्याह—रावणेनेति । मुक्तेति । आशु उरसि अभीतस्येति पदानि । लक्ष्मणस्योरसि ममज्जेति संबन्धः ॥ ३४–३७ ॥

३५–३७] ति० टी०—मुक्ता आशु उरसीति छेदस्य गूढत्वात्स्पष्टमेवाह कविः—न्यपतदिति ॥ ३५–३७ ॥

रा० टी०—न्यपतदिति । उरगराजस्य जिह्वेव सा शक्तिः लक्ष्मणस्य महोरसि इव न्यपतत् अतिसान्निध्यात्तस्यैवालक्ष्यतेत्यर्थः इव उभयान्वयी ॥ ३५ ॥

रा० टी०—तत इति । रावणवेगेन सुदूरमवगाढया समागतयेत्यर्थः शक्त्या अविभिन्नहृदयो लक्ष्मणः भुवि पपात ॥ ३६ ॥

रा० टी०—तदिति । राघवः तदवस्थं लक्ष्मणं प्रेक्ष्य भ्रातुः स्नेहाद्धेतोः विषण्णहृदयोऽभवत् ॥ ३७ ॥

३८] ति० टी०—मुहूर्तमिव ध्यात्वा । किमिदानीं कर्तव्यमिति पर्यालोच्येत्यर्थः। संरब्धतरो युद्धेऽधिकोत्साहवान् ३८

रा० टी०—स इति । स रामः मुहूर्तं ध्यात्वा युगान्तः पावक इव संरब्धतरः अतिक्रुद्ध इव बभूव ॥ ३८ ॥

गो० टी०—स मुहुर्तमिति । अनुध्याय तत्कालकर्तव्यं चिन्तयित्वा ॥ ३८ ॥

३९] ति० टी०—अथ विषादस्यायं न काल इति संचिन्त्य लक्ष्मणं च संनिरीक्ष्य महतोत्कृष्टेन सर्वयत्नेन सहजबलाऽबलेन रावणस्य वधे धृतो निश्चितो भूत्वा सुतुमुलं युद्धं चक्रे । अयं च वक्ष्यमाणार्थसंक्षेपः ॥ ३९ ॥

रा० टी०—नेति । विषादस्यायं न कालः इति संचिन्त्य रावणस्य वधे धृतः कृतनिश्चयो राघवः सुतुमुलं युद्धं चक्रे ३९

गो० टी०—न विषादस्येति । सार्धश्लोकमेकं वाक्यम् । लक्ष्मणं सन्निरीक्ष्य महता सर्वयत्नेन रावणस्य वधे धृतः अवहितः सुतुमुलं युद्धं चक्रे इत्यन्वयः । केवलं सीताहरणात् किंतु लक्ष्मणदर्शनादपीति च शब्दार्थः ॥ ३९ ॥

४०] ति० टी०—तमेव प्रपञ्चयति—स ददर्शेति॥४०॥

रा० टी०—सर्वेति । महता सर्वयत्नेनोपलक्षितो रामः

१ निर्भिन्नेति गो. पाठः । २ अनुव्याहरत गो. पाठः । ३ व्याकुललोचन इति गो. रा. पाठः । ४ संनिरीक्ष्येति ङ गो. परवारहति रा. पा. ।

तामपि प्रहितां शक्तिं रावणेन बलीयसा । यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ॥ ४१ ॥
अर्दिताश्चैव बाणौघैस्ते[1] प्रवेकेन रक्षसाम् । सौमित्रेः[2] सा विनिर्भिद्य भित्त्वा धरणीतलम् ४२ ॥
तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम् । बभञ्ज समरे क्रुद्धो बलवान्विचकर्ष च ॥ ४३ ॥
तस्य निष्कर्षतः शक्तिं रावणेन बलीयसा । शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः ॥ ४४ ॥
अचिन्तयित्वा तान्बाणान्समाश्लिष्य च लक्ष्मणम्[3] । अब्रवीच्च हनूमन्तं सुग्रीवं[4] च महाकपिम् ॥ ४५ ॥
लक्ष्मणं परिवार्यैवं[5] तिष्ठध्वं वानरोत्तमाः । पराक्रमस्य कालोऽयं संप्राप्तो मे चिरेप्सितः॥ ४६ ॥
पापात्मायं दशग्रीवो वध्यतां पापनिश्चयः । काङ्क्षितं चातकस्येव घर्मान्ते मेघदर्शनम् ॥ ४७ ॥
अस्मिन्मुहूर्ते न चिरात्सत्यं प्रतिशृणोमि वः । अरावणपरामं वा जगद्द्रक्ष्यथ वानराः ॥ ४८ ॥
राज्यनाशं वने वासं दण्डके परिधावनम् । वैदेह्याश्च परामर्शं[6] रक्षोभिश्च समागमम् ॥ ४९ ॥

शक्त्या अभिन्नं शक्तिकरणकदारणरहितं लक्ष्मणं रुधिरेण आदिग्धं व्याप्तं संपन्नगमचलमिव लक्ष्मणं ददर्श लक्ष्मणस्यातिगौरत्वेन च धनुर्बाणविशिष्टत्वेन चेयमुपमा सार्द्धश्लोक एकान्वयी ॥ ४० ॥

गो० टी०–कथं लक्ष्मणदर्शनं रावणवधकारणं भवतीत्याह–स ददर्शेति । तदानीं लक्ष्मणस्य तादृशं शोच्यदर्शनं रावणवधनिश्चयकारणं भवतीत्याशयः ॥ ४० ॥

४१] ति० टी०–तां शक्तिं लक्ष्मणगात्रादवमर्दितुमुद्धर्तुं यत्नतो न शेकुः । तत्र हेतुर्बलीयसा प्रहितत्वम् ॥ ४१ ॥

रा० टी०–शक्तिमुद्धर्तुमशक्तत्वमेवाह—तामित्यादिभिः । राक्षसान यत्नतः प्रहितां शक्तिमवमर्दितुं रक्षसार्दिताः हरिश्रेष्ठा न शेकुः सार्द्धश्लोक एकान्वयी ॥ ४१ ॥ ४२ ॥

गो० टी०–तामपीति । अपिशब्दस्य यत्नतोपीत्युत्तरान्वयः । बाणार्दितत्वेन सुतरां न शेकुरित्याह—अर्दिताश्चेति ॥ ४१ ॥ ४२ ॥

४२] ति० टी०–हेत्वन्तरमप्याह—अर्दिता इति । इयं प्रवेकेन श्रेष्ठेन । किं च सा शक्तिः सौमित्रेर्देहं निर्भिद्य धरणीतलं भुवं प्रविष्टा स्पृष्टवती ॥ ४२ ॥

४३] ति० टी०–तां शक्तिं कराभ्यां परामृश्य धृत्वा बलवत्तरो रामो लक्ष्मणदेहाद्विचकर्ष विकृष्य बभञ्ज । इयं शक्तिः सर्वदा शत्रुं निर्भिद्य रावणसमीपमेव प्राप्नोति, इदानीं रामेण मोघा भवेत्युक्त्या सत्यसंकल्पेन नाशितनिष्कृष्टशक्तिस्तत्रैव लग्ना सा च भगवता विकृष्य भग्ना ॥ ४३ ॥

रा० टी०–सौमित्रेरिति । सा शक्तिः सौमित्रेरनिर्भिद्य स्पर्शित्वेन भेदः नाभासमप्यकृत्वा सौमित्रेस्समीपवर्ति णीतलं प्रविष्टा अहं पृथक् नामिति रामः तां धरणीतले विष्टां शक्तिं कराभ्यां परामृश्य धरणीतलादाकृष्य बभञ्ज चकर्ष च ॥ ४३ ॥

गो० टी०–कारणान्तरमाह—सौमित्रिमिति ४३–४४ ।

४४] ति० टी०–एतदन्तरे रन्ध्रविद्राक्षमः प्रजहार-

न्याह–तस्येति । शक्तिं निष्कर्षतस्तस्य रामस्य गात्रेष्वित्यन्वयः ॥ ४४ ॥

रा० टी०–तस्येति । शक्तिं निष्कर्षतः तस्य रामस्य सर्वगात्रेषु मर्मभेदिनः शराः पातिताः ॥ ४४ ॥

४५–४६] ति० टी०–समाश्लिष्येति । समाश्लेषोऽयं सकलपीडानिवृत्तिफलकः स्वतादात्म्यावभासनरूपः ॥४५॥४६

रा० टी०–अचिन्तयित्वेति । तान् बाणान् अचिन्तयित्वा लक्ष्मणं समाश्लिष्य च हनूमन्तं सुग्रीवं च महाकपिं जाम्बवन्तं चार्षभं रामं इति शेषः ॥ ४५ ॥

रा० टी०–तदाकारमाह—लक्ष्मणमिति । लक्ष्मणं परिवार्य प्रावृत्य यूयं तिष्ठध्वं मे मम तु चिरेप्सितः पराक्रमस्यायं कालः संप्राप्तः ॥ ४६ ॥

गो० टी०–पराक्रमस्येत्यादिसार्धश्लोक एकान्वयः । वध्यतामिति प्राप्तकाले लोट् । स्तोककस्य चातकस्य ; स्तोकः कथातकः समा इत्यमरः ॥ ४८ ॥

४७] ति० टी०–पापात्मायं वध्यतां मत्तोऽयं वधं प्राप्नोतु । यतो घर्मान्ते चातकस्य मेघदर्शनमिव वधार्थमस्य दर्शनं मम चिरं काङ्क्षितम । 'स्तोककस्य' इति पाठेऽपि चातकस्येत्यर्थः । 'स्तोककश्चातकः समौ' इत्यमरात् ॥ ४७ ॥

रा० टी०–पापात्मेति । पापात्मा अत एव पापनिश्चयः अयं दशग्रीवः वध्यताम् अस्माभिरिति शेषः तत्र हेतुः घर्मान्ते चातकस्य मेघदर्शनमिव कांक्षितं मदस्य हननमिति शेषः॥४७

४८–४९] ति० टी०–प्रतिशृणोमि प्रतिजाने । न चिरादित्यस्य शीघ्रमित्यर्थकस्य रावणमित्यादिनान्वयः ॥४८॥४९

रा० टी०–अस्मिन्निति । हे वानराः अस्मिन मुहूर्ते वो युष्माकमग्रे सत्यं प्रतिशृणोमि प्रतिज्ञां करोमि तदाकारमाह अरावणं रावणरहितमरामं वा जगत् न चिरात् शीघ्रं द्रक्ष्यथ ॥ ४८ ॥

गो० टी०–अस्मिन्निति । अस्मिन्मुहूर्ते नचापि न चिराद्दृक्ष्यथेत्यन्वयः ॥ ४९ ॥

१ क्षिप्तैस्तेन रक्षसेति गो. रा. पाठः । २ सौमित्रिमिति गो. पाठः । ३ तमिति रा. चैव राघव इति गो. पाठः । ४ धृत्वेति रा. इहेति गो. पाठः । ५ बद्धोत्तस्तोककस्येति गो. पाठः । ६ परामर्शमिति गो. रा. पाठः ।

प्राप्तं दुःखं महद्घोरं क्लेशश्च निरयोपमः । अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे ॥ ५० ॥
यदर्थं वानरं सैन्यं समानीतमिदं मया । सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे ॥
यदर्थं सागरः क्रान्तः सेतुर्बद्धश्च सागरे । ॥ ५१ ॥
सोऽयमद्य रणे पापश्चक्षुर्विषयमागतः । चक्षुर्विषयमागत्य नायं जीवितुमर्हति ॥ ५२ ॥
दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः । [1]यथौ वा वैनतेयस्य दृष्टिं प्राप्तो भुजंगमः ॥ ५३ ॥
[2]सुखं पश्यर्थं दुर्धर्षा युद्धं वानरपुंगवाः । आसीनाः पर्वताग्रेषु ममेदं रावणस्य च ॥ ५४ ॥
अद्य पश्यन्तु रामस्य रामत्वं मम संयुगे । त्रयो लोकाः सगन्धर्वाः सिद्धगन्धर्वचारणाः ॥ ५५ ॥
अद्य कर्म करिष्यामि यल्लोकाः सचराचराः । सदेवाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥ ५६ ॥
समागम्य सदा लोके यथायुद्धं प्रवर्तितम् । ॥
एवमुक्त्वा शितैर्बाणैस्तप्तकाञ्चनभूषणैः । आजघान रणे रामो दशग्रीवं समाहितः ॥ ५७ ॥
तथा प्रविद्धैर्नाराचैर्मुसलैश्चापि रावणः । अभ्यवर्षत्तदा रामं धाराभिरिव तोयदः ॥ ५८ ॥

रा० टी०–राज्येति । अहं राज्यनाशादीन् समागमं प्रापम् ॥ ४९ ॥

गो० टी०–राज्यनाशमित्यादिश्लोकद्वयमेकान्वयम् । प्राप्तं यन्मोपवनादौ । केशं लक्ष्मणप्रहरणजन्यम् ॥ ५०॥५१ ॥

५०–५२] नि० टी०–राज्यनाशादिकृतं घोरं दुःखं मासस्थं प्राप्तम् । निरयोपमो यातनोपमः क्लेशः कायक्लेशश्च प्राप्तः ॥ ५० ॥ ५१ ॥

रा० टी०–प्राप्तमिति । यतः क्लेशः निरयोपमो भवति अतः रावणं निहत्य निहत्य प्राप्तं देवादिभिरनुभूतं सर्वं दुःखमहं त्यक्ष्ये त्याजयिष्यामि किञ्च क्लेशो महत्पीडनं निरयोपमः तत्प्रापकत्वेन तत्समः अतः दुःखं रावणक्लेशं त्यक्ष्ये त्याजयिष्यामि ॥ ५० ॥

रा० टी०–यदर्थमिति । यदर्थं यद्युद्धार्थम् वानरसैन्यानयनादि कृतं स रावणः अद्य चक्षुर्विषयमागतः अर्हत्यनुष्टुभमेकान्वयि ॥ ५१ ॥ ५२ ॥

रा० टी०–नन्वक्षुर्विषयागमनेन किमित्यत्र आह—

रा० टी०–चक्षुरिति । दृष्टिदर्शनमेव विषं महाविषपानं यस्य तस्य सर्पस्य दृष्टिं प्राप्य विषमानो जन इव वैनतेयस्य दृष्टिं प्राप्तो भुजंगम इव च मम चक्षुर्विषयमागम्य अयं रावणो जीवितुं नार्हति सार्द्धश्लोक एकान्वयी ॥ ५२ ॥ ५३ ॥

गो० टी०–यदर्थमित्यादिश्लोकत्रयमेकान्वयम् । दृष्टिं दृष्टिविषम् । दृष्टौ विषं यस्यासौ दृष्टिविषः तस्य । केचित्तु सर्पाः दर्शनमात्रेण मनुष्यान् मारयन्तीति प्रसिद्धिः ॥ ५२॥५३॥

५३–५४] नि० टी०–दृष्टिविषस्य दर्शनमात्रेण संहारकरमहाविषवतः सर्पस्य दृष्टिं प्राप्तो मनुष्य इव स रावणो जीवितुमर्हति ॥ ५३ ॥ ५४ ॥

रा० टी०–सुखमिति । इदं युद्धं सुखं पश्यत ॥ ५४ ॥

५५] नि० टी०–रामस्य रामत्वं त्रीलोकान्तर्यामिदेवान्यथत्वेन सत्येन शौर्येण च रमयतीत्यन्वर्थं रामत्वम् । तदुचितं कर्माहं करिष्यामीति भावः ॥ ५५ ॥

रा० टी०–अद्येति । रामस्य मम रामत्वमभिरामदारत्वादि संयुगे त्रयो लोकाः गन्धर्वसहितास्मिन्नाहवे पश्यन्तु पृथगुपादानं गोवर्लावदन्यायेन ॥ ५५ ॥

गो० टी०–अद्येति । रामत्वं जगदेकवीरत्वम् । आचार्यास्तु रामावतारप्रयोजनमित्याहुः ॥ ५६ ॥

५६–५८] नि० टी०–यावद्भूमिर्धरिष्यति प्राणिनस्तावन्मे कर्म सचराचराः सदेवा लोका जनाः कथयिष्यन्ति तादृशं कर्म करिष्यामि ॥ ५६–५८ ॥

रा० टी०–अद्येति । भूमिः यावद्धरिष्यति चराचरानिति शेषः तावत् यत्कर्म सचराचराः सदेवाः लोकाः जनाः कथयिष्यन्ति तत्कर्म करिष्यामि ॥ ५७ ॥

रा० टी०–एवमिति । राम एवमुक्त्वा बाणैर्दशग्रीवमाजघान ॥ ५८ ॥

रा० टी०–तथेति । तदा तस्मिन् काले प्रसिद्धैर्नाराचैर्मुसलैश्च रावणो राममभ्यवर्षत ॥ ५९ ॥

गो० टी०–अद्येत्यादिसार्धश्लोक एकान्वयः । सदेवाः सचराचराः लोकाः जनाः समागम्य संगीभूय, यथेदानीं युद्धं प्रवर्तितं तथा यावद् भूमिर्धरिष्यति, तावत्कालं सदा नित्यशः लोके यत्कर्म कथयिष्यन्ति, तत् कर्माहं करिष्यामीत्यन्वयः ॥ ५७ ॥ ६३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोत्तरशततमः सर्गः ॥१०१॥

१ इदमर्धं गो. पुस्तके नास्ति । २ दृष्टिं वा वैनतेयस्य यथेति रा. पा. । ३ स्वस्था इति गो. पा. ४ पश्यतेति गो. पा. । ५ रामस्य रामत्वं पश्यन्विति गो. पा. । ६ सदेवाः सर्पाति गो. । सिद्धगंधर्वचारणा इति रा. पा. । ७ इदमर्धमधिकं गो पुस्तके । ८ अथ प्रसिद्धैरिति गो. तथा प्रसिद्धैरिति रा. पा. ।

रामरावणमुक्तानामन्योन्यमभिनिघ्नताम् । वराणां च शराणां च बभूव तुमुलः स्वनः ॥ ५९ ॥
विच्छिन्नाश्च विकीर्णाश्च रामरावणयोः शराः । अन्तरिक्षात्प्रदीप्ताग्रा निपेतुर्धरणीतले ॥ ६० ॥
तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान् । त्रासनः सर्वभूतानां बभूवाद्भुतदर्शनः ॥ ६१ ॥
विकीर्यमाणः शरजालवृष्टिर्महात्मनां दीप्तधनुष्मतादितः ।
भयात्प्रदुद्राव समेत्य रावणो यथानिलेनाभिहतो बलाहकः ॥ ६२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे शततमः सर्गः ॥ १०० ॥

एकाधिकशततमः सर्गः ।

शक्त्या निपातितं लक्ष्मणं वीक्ष्य तदुपकृतिभिरसंस्तुत्य साकुमुरो बाहुभ्यां विगाह्य रामं सुषेणः समाश्वास्य हनुमदाहृताभिरुत्थौषधीरसेन लक्ष्मणं निरुजं विशल्यं च कारयित्वा रामादिकपीन् सर्वानाश्वासयत् लक्ष्मणस्तु स्वदुःखाक्रान्तं भ्रातरं धीरचक्षुरवेक्षयामास ।

शक्त्या निर्भातितं दृष्ट्वा रावणेन बलीयसा । लक्ष्मणं समरे शूरं शोणितौघपरिप्लुतम् ॥ १ ॥
स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्मनः । विसृजन्नेव बाणौघान्सुषेणमिदमब्रवीत् ॥ २ ॥
एष रावणवीर्येण लक्ष्मणः पतितो भुवि । सर्पवच्चेष्टते वीरो ममैनं शोकमुद्वीरयन् ॥ ३ ॥
शोणितार्द्रमिमं वीरं प्राणैः प्रियतरं मम । पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥ ४ ॥
अयं स समरश्लाघी भ्राता मे शुभलक्षणः । यदि पञ्चत्वमापन्नः प्राणैर्मे किं सुखेन वै ॥ ५ ॥

५९–६१] ति० टी०–वराणां शराणां श्रेष्ठानां शराणाम् । त्रासनस्त्रासनाम् ॥ ५९–६१ ॥

रा० टी०–रामेति । रामरावणमुक्तानां वराणां श्रेष्ठानां शराणां चकारेण मुशलानां च स प्रसिद्धस्तुमुलो बभूव ६० ।

रा० टी०–विच्छिन्ना इति । विच्छिन्नाः अत एव विकीर्णाः रामरावणयोश्शराः धरणीतले निपेतुः ॥ ६१ ॥

रा० टी०–तयोरिति । रामरावणयोः महान् ज्यातलनिर्घोषः सर्वभूतानां त्रासनो बभूव ॥ ६२ ॥

६२] ति० टी०–भयाद्भातृपीडाजनितकोपेन । सर्वथा मां हनिष्यन्येवेति भयादित्यर्थः । इदं पलायनममासायंकाले ६२

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे शततमः सर्गः ॥ १०० ॥

रा० टी०–विकीर्यमाण इति । महात्मना रामेण अर्दितो रावणः भीतेर्नाभिहतो बलाहक इव प्रदुद्राव ॥ ६३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकाधिकशततमः सर्गः ॥ १०१ ॥

१] ति० टी०–शक्त्येति ॥ १ ॥

२] ति० टी०–बाणौघान्विसृजन्रावणस्य तुमुलं युद्धं दत्त्वा तस्मिन्पलायिते लक्ष्मणपीडानिष्टत्यर्थं सुषेणमिदमब्रवीत् ॥ २ ॥

रा० टी० रावणबलायनानन्तरकालिकं रामश्लाघान्तमाह—शक्त्येत्यादिभिः । स रामः बाणौघान् विसृजन् रावणस्य तुमुलं युद्धं दत्त्वा शक्त्या शक्तिनिमालिंग्यमावेण निपातिते शोणितौघपरिप्लुतं क्रौंचपेतुकारुण्येन रुधिरसमूहव्याप्तमिव किंच शोणितस्य क्रौंचपेतुकारुण्यस्योः भाविकयमित्यर्थः तेन परिप्लुतं क्रौंचवर्णं लक्ष्मणं दृष्ट्वा सुषेणमब्रवीत् श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–अथ लक्ष्मणसंजीवनं द्विशततमे—शक्त्या विनिहतमित्यादिश्लोकद्वयमेकं वाक्यम । विसृजन्नेवेत्यादिवर्णनानन्तरं रावणपलायनानन्तरं लक्ष्मणयोगक्षेमानुसंधाने अखिलस्यः सुचितः ॥ १ ॥ २ ॥

३] ति० टी०–शोकमुद्वीरयन्नयन् ॥ ३ ॥

रा० टी०–तदाकारमाह—एष इत्यादिभिः । रावणवीर्येण हतो भुवि पतितो लक्ष्मणः मम शोकमुद्वीरयन् उत्पादयन् मम सर्पवत् चेष्टते ॥ ३ ॥

गो० टी०–एष इति । उद्वीरयन् जनयन् ॥ ३ ॥

४–५] ति० टी०–प्राणैः प्राणेभ्यः ॥ ४ ॥ ५ ॥

रा० टी०–प्राणैः प्रियतमं शोणिताद्रमिमं पश्यतः अत एव पर्याकुलात्मनो मम योद्धुं का शक्तिः ॥ ४ ॥

रा० टी०–अयमिति । अयं मे भ्राता यदि पञ्चत्वमापन्नः तत्सदृशो निधन इत्यर्थः तदा प्राणैस्सुखेन वा मे किम् ॥ ५ ॥

---

१ शराणामिति गो. पा. । २ ते भिन्ना इति गो. पाठः । ३ संवभूवाद्भुतोपम इति गो. पाठः । ४ स इति गो. पाठः । ५ विनिहतमिति गो. पाठः । ६ रुधिरौघेति गो. पाठः । ७ वाक्यमिति गो. पाठः । ८ क्षिताविति गो. रा. पा. । ९ वेष्टत इति गो. पाठः । १० भूमाविति रा. पा. । ११ इष्टतरमिति रा. इष्टतममिति गो. पाठः । १२ चेति गो. पाठः ।

लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः । सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता ॥ ६ ॥
अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव । चिन्ता मे वर्तते तीव्रा मुमूर्षापि च जायते ॥ ७ ॥
भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना । विष्टनन्तं तु दुःखार्तं मर्मण्यभिहतं भृशम् ॥ ८ ॥
राघवो भ्रातरं दृष्ट्वा प्रियं प्राणं बहिश्चरम् । दुःखेन महताविष्टो ध्यानशोकपरायणः ॥
परं विषादमापन्नो विललापाकुलेन्द्रियः । भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु ॥ ९ ॥
विजेयोऽपि हि मे शूर न प्रियायोपकल्पते । अचक्षुर्विषयश्चन्द्रः कां प्रीतिं जनयिष्यति ॥ १० ॥
किं मे युद्धेन किं प्राणैर्युद्धकार्यं न विद्यते । यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः ॥ ११ ॥
यथैव मां वनं यान्तमनुयाति महाद्युतिः । अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥ १२ ॥
इष्टबन्धुजनो नित्यं मां स नित्यमनुव्रतः । इमामवस्थां गमितो राक्षसैः कूटयोधिभिः ॥ १३ ॥
देशे देशे कलत्राणि देशे देशे च बान्धवाः । तं तु देशं न पश्यामि यत्र भ्राता सहोदरः ॥ १४ ॥
इत्येवं विलपन्तं तं शोकाविह्वलितेन्द्रियम् । विनेष्टमानं करुणमुच्छ्वसन्तं पुनः पुनः ॥
किं नु राज्येन दुर्धर्ष लक्ष्मणेन विना मम । कथं वक्ष्याम्यहं त्वम्बां सुमित्रां पुत्रवत्सलाम्॥ १५ ॥
उपालम्भं न शक्ष्यामि सोढुं दत्तं सुमित्रया । किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम्॥१६॥
भरतं किं नु वक्ष्यामि शत्रुघ्नं च महाबलम् । सह तेन वनं यातो विना तेनागतः कथम् ॥ १७ ॥
इहैव मरणं श्रेयो न तु बन्धुविगर्हणम् । किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि ॥ १८ ॥
येन मे धार्मिको भ्राता निहतश्चाग्रतः स्थितः । हा भ्रातर्मनुजश्रेष्ठ शूराणां प्रवर प्रभो ॥ १९ ॥
एकाकी किं नु मां त्यक्त्वा परलोकाय गच्छसि । विलपन्तं च मां भ्रातः किमर्थं नाभिभाषसे ॥ २० ॥
उत्तिष्ठ पश्य किं शेषे दीनं मां पश्य चक्षुषा । शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च ॥ २१ ॥
विषण्णस्य महाबाहो समाश्वासयिता मम । राममेवं ब्रुवाणं तु शोकव्याकुलितेन्द्रियम् ॥ २२ ॥
आश्वासयन्नुवाचेदं सुषेणः परमं वचः । स्थैर्यमेमां नरश्रेष्ठ बुद्धिं वैक्लव्यकारिणीम् ॥ २३ ॥

गो० टी०–शोणितार्द्रमिति । प्राणैः प्राणेभ्यः ॥४ ॥ ५ ॥

६] ति० टी०–लज्जतीवेति परम्मैपदमार्षम् ॥ ६ ॥

रा० टी०–लज्जतीति । मे वीर्यं लज्जतीव अत एव धनुर्भ्रश्यतीव अत एव सायका व्यवसीदन्ति अत एव मे दृष्टिः बाष्पवशमश्रुवशीनत्वं गता ॥ ६ ॥

गो० टी०–लज्जतीत्यादिसार्धश्लोकद्वयमेकान्वयम । लज्जतीव आर्षं परम्मैपदम् । स्वप्नयाने स्वप्नगमने । स्वप्ने हि गच्छतां पुरुषाणां पादाः पश्चादाकृष्टा भवन्ति । भ्रातरं निहतं दृष्ट्वेति पूर्वशेषः ॥ ६–८ ॥

७] ति० टी०–स्वप्नयाने । स्वप्ने इत्यर्थे आर्षमस्य साधुत्वम् ॥ ७ ॥

रा० टी०–अवसीदन्तीति । स्वप्नस्य दुःस्वप्नकदर्शनस्य याने प्राप्तौ सत्यां नृणां गात्राणीव मे गात्राणि अवसीदन्ति अत एव चिन्ता वर्धते अत एव मुमूर्षा एतल्लोकत्यागेच्छा जायते ॥ ७ ॥

८] ति० टी०–भ्रातरं निहतमित्यादि सार्धश्लोकः कविवाक्यम् । विष्टनन्तं विकृतशब्दं कुर्वन्तम् ॥ ८ ॥

रा० टी०–भ्रातरमिति । रावणेन मर्मणि अभिहतं ताडितमत एव दुःखार्तमत एव विष्टनन्तं दुःखमुच्चकैस्त्यजन्तमत एव निहतमिव भ्रातरं दृष्ट्वा परमविषादमापन्नोऽहं विललाप बहु जगाद सार्धश्लोक एकान्वयी ॥ ८ ॥

गो० टी०–विनिष्टनन्तमित्यादिसार्धश्लोकमेकं वाक्यम् । निष्टनन्तं निःश्वसन्तम । ध्यानशोकपरायणः अभूदिति शेषः ॥ ९ ॥

९–१०] ति० टी०–रणपांसुषु । लुठन्तमिति शेषः । ताडशं भ्रातरं दृष्ट्वा विजयोऽपि मे न प्रियायेत्यर्थः ॥९॥१०॥

गो० टी०–परं विषादमित्यर्धम् । राघव इत्यनुषङ्गनीयम् ॥ १० ॥

रा० टी०–विजय इति । हे शूर मे विजयः प्रियाय नोपकल्पते तत्र दृष्टान्तः अचक्षुर्विषयः अन्यजनसमीपस्थः चन्द्रः कां प्रीतिं जनयिष्यति न जनयिष्यतीत्यर्थः ॥ ९ ॥

गो० टी०–न हि युद्धेनेति । दृष्ट्वा स्थितस्येति शेषः११

११–२३] ति० टी०–यत्रायमिति । यतः कारणादित्यर्थः ॥ ११–२३ ॥

१ चोपेति गो. पाठः । २ इदं पद्यमधिकं गो. पाठे । ३ इदमर्धं रा. पुस्तके नास्ति । ४ इदं पद्यं गो. पुस्तके न दृश्यते । ५ राज्येनेति गो. पाठः । ६ युद्धे इति गो. पाठः । ७ इदं पद्यद्वयं गो. पुस्तके नास्ति । ८ इदं पद्यमधिकं गो. पुस्तके । ९ इतश्चारभ्यश्लोकाष्टकं गो. पुस्तके न दृश्यते । १० राममाश्वासयन्वीरः सुषेणो वाक्यमब्रवीत् इति गो. पाठः । ११ इदं पद्यं गो. पुस्तके न दृश्यते ।

शोकसंजननीं चिन्तां तुल्यां बाणैश्चमूमुखे । नैवै पञ्चत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः ॥ २४ ॥
नह्यस्य विकृतं वक्त्रं नै च श्यामत्वमागतम् । सुप्रभं च प्रसन्नं च मुखमस्य निरीक्ष्यताम् ॥ २५ ॥
पद्मपत्रतलौ हस्तौ सुप्रसन्ने च लोचने । नेदृशं दृश्यते रूपं गतासूनां विशां पते ॥ २६ ॥
विषादं मा कृथा वीर सप्राणोऽयमरिंदम । आख्याति तु प्रसुप्तस्य स्रस्तगात्रस्य भूतले ॥ २७ ॥
मोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः । एवमुक्त्वा महाप्राज्ञः सुषेणो वानरं वचः ॥ २८ ॥
सैमीपस्थमुवाचेदं हनूमन्तं महाकपिम् । सौम्य शीघ्रमितो गत्वा पर्वतं हि महोदयम् ॥ २९ ॥

रा० टी०–किमिति । यत्र यदा अयं लक्ष्मणो निहत इव शेते तदा यूयेन प्राणेश मे किं न किमपीत्यर्थः अत एव यूयस्य कार्यं कर्तव्यता न त्रियते ॥ २३ ॥

रा० टी०–यथेति । यथा यत्प्रकारकप्रीत्या अयं भ्रातानुयाति अनुसरति तथाहमपि समक्षयं नियमानामाश्रयमेतमनुयास्यामि अनुसरामि ॥ २१ ॥

रा० टी०–इष्टेति । इष्टबन्धुजनः स लक्ष्मणः राक्षसैरिमामवस्थां गमितः ॥ २२ ॥

रा० टी०–देश इति । यत्र सहोदरो भ्राता तं देशं न पश्यामि निखिले संत्यज्य गमनतः पुरुषस्य कलत्रादिप्राप्तिसम्भवति सहोदरप्राप्तिस्तु न सम्भवतीत्यर्थः अनेन सहोदरोऽवश्यं परिरक्षणीय इति सूचितम् रामलक्ष्मणयोस्सहोदरत्वं तु पितृदयादर्शितेन किञ्च सहजः स्वभ्रातृदुःखिजातस्यापि सोदर्या अतो निखिलभयरहितो भ्राता यत्र तं न पश्यामीत्यर्थः ॥ २३ ॥

रा० टी०–किमिति । लक्ष्मणेन विना एष राजेन्द्र किमहं सुमित्रामम्बां कथं वक्ष्यामि ॥ २४ ॥

रा० टी०–उपालम्भमिति । सुमित्रया दत्तं कृतपालम्भं निंदां सोढुं न शक्ष्यामि ॥ २५ ॥

रा० टी०–भरतमिति । तेन लक्ष्मणेन सह वनं यातस्यं तेन विना कथमायात इति पृच्छन्तमिति शेषः भरतं किं वक्ष्यामि ॥ २६ ॥

रा० टी०–इहेति । बन्धुविग्रहेण न श्रेयः अहं पृथक् १७

रा० टी०–ननु राक्षसविरोधजनकं कर्म त्वया कथं कृतमित्यत आह–किमिति । येन राक्षसेन मे भ्राता निहतः तस्य राक्षसस्य अन्यत्र प्राक्तनविलक्षणे जन्मनि प्रादुर्भावे भाविनेन मया किं दुष्कृतमपराधः कर्म कृतम् प्रथममिति शेषः न किमपीत्यर्थः ॥ १८ ॥

रा० टी०–हेति । परलोकाय किं गच्छसि गत्वर्थेति चतुर्थी ॥ १९ ॥

रा० टी०–विलपन्तमिति । पश्य प्रबुध्यस्व अत एव मां पश्य अवलोकय ॥ २० ॥

रा० टी०–शोकार्तस्येति । शोकार्तस्य मे समाश्वासयिता त्वमेव ॥ २१ ॥

रा० टी०–इत्येवमिति । एवं ब्रुवाणं राममाश्वासयन् सुषेण इति वाक्यमुवाच ॥ २२ ॥

रा० टी०–तदाकारमाह—त्यजेत्यादिभिः । हे नराशार्दूल शोकसंजननीं बाणैस्तुल्यां चिन्तां त्यज ॥ २३ ॥

गो० टी०–किं मे राजेयेनेति । यत्र यतः ॥१३–१४॥

२४] नि० टी०–बाणैः शत्रुप्रेषितैस्तुल्यां न पञ्चत्वं मृतिमापन्नः । आसन्नत्वात् ॥ २४ ॥

रा० टी०–तत्र हेतुमाह—नेति । लक्ष्मणः पञ्चत्वं नापन्नः अहं ब्रूषे ॥ २४ ॥

गो० टी०–न मृतोऽयमिति । इयं कपिरूपम् । विषण्णमिति पाठान्तरम् । श्यामः श्यामवर्णोऽयं इत्यभ्रमः ॥ १५–१८ ॥

२५] नि० टी०–नापि भविष्यति लक्ष्मणो मातादित्याह–नह्यस्येति ॥ २५ ॥

रा० टी०–पञ्चत्वाभावे समर्थनमाह अस्य वक्त्रं विकृतं न श्यामत्वं च नागतमत एव सुप्रभमस्य मुखं लक्ष्यते ॥ २५ ॥

२६] नि० टी०–पद्मपत्रतलौ पद्मपत्रवदरुणकरतलवन्तौ ॥ २६ ॥

रा० टी०–पद्मेति । गतासूनां न दृश्यते ॥ २६ ॥

२७–२९] नि० टी०–भूतले प्रसुप्तस्य स्रस्तगात्रस्यैव मुहुर्मुहुः स्पन्दमानस्य हृदयस्थं सोच्छ्वासमाख्याति ॥ २७–२९ ॥

रा० टी०–विषादमिति । सुप्तस्यास्य अत एव भ्रस्तगात्रस्य लक्ष्मणस्य कम्पमानं हृदयं सोच्छ्वासं प्राणसहितमाख्याति बोधयति अतो विषादं मा कृथाः सार्धश्लोक एकान्वयी ॥ २७ ॥

रा० टी०–एवमिति । सुषेणो वानरमेवमुक्त्वा हनूमन्तमुवाच ॥ २८ ॥

गो० टी०–आख्यास्यत इति । मुहुर्मुहुः कम्पमानं हृदयमेनं सोच्छ्वासं सप्राणम् आख्यास्यते आचष्टे । लडर्थे लृट् ॥ १९ ॥ २० ॥

रा० टी०–तदाकारमाह—सौम्येत्यादिभिः । जाम्बवता योऽसौ पूर्वं कथितस्तं महोदयं पर्वतमितो गत्वा तस्य दक्षिणे शिखरे जातां महौषधिमिहानय सार्धश्लोक एकान्वयी ॥ २९ ॥

गो० टी०–सौम्य शीघ्रमित्यादि सार्धश्लोकत्रयमेका-

---

१ न मृतोऽयं महाबाहो इति गो. पाठः । २ नापि श्यामं न निष्प्रभमिति गो. श्यामवर्णमित्यत्राने श्यामवर्णमिति रा. पाठः । ३ हि लक्ष्यते इति रा. अभिलक्ष्यत इति गो. पाठः । ४ पद्मं न दृश्यते इति गो. पाठः । ५ अख्यास्यत इति गो. पाठः । ६ तु वाक्यश इति गो. पाठः । ७ हनुमन्तमुवाचेदं हनुमन्त मभिस्वरन्निति गो. पाठः । ८ शैलमौषधिपर्वतमिति गो. पा. ।

पूर्वं तु कथितो योऽसौ वीर जाम्बवता तव । दक्षिणे शिखरे जातां मौहौषधिमिहानय ॥ ३० ।
विशल्यकरणीं नाम्ना सौवर्णकरणीं तथा । संजीवकरणीं वीर संधानीं च महौषधीम् ॥ ३१ ।
संजीवनार्थं वीरस्य लक्ष्मणस्य ममानय । इत्येवमुक्तो हनुमान्गत्वा चौषधिपर्वतम् ॥
चिन्तामभ्यगमच्छ्रीमानजानंस्तां महौषधीः । ॥ ३२ ।
तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः । इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ॥ ३३ ॥
अस्मिन्तु शिखरे जातामोषधीं तां सुखावहाम् । प्रतर्कणावगच्छामि सुषेणो ह्येवमब्रवीत् ॥ ३४ ॥
अगृह्य यदि गच्छामि विशल्यकरणीमहम् । कालात्ययेन दोषः स्याद्वैक्लव्यं च महद्भवेत् ॥ ३५ ॥
इति संचिन्त्य हनुमान्गत्वा क्षिप्रं महाबलः । आसाद्य पर्वतश्रेष्ठं त्रिः प्रकम्प्य गिरेस्तटम् ॥ ३६ ॥
फुल्लनानातरुगणं समुत्पाट्य महाबलः । गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत् ॥ ३७ ॥
स नीलमिव जीमूतं तोयपूर्णं नभस्तलात् । उत्पपात गृहीत्वा तु हनूमाञ्छिखरं गिरेः ॥ ३८ ॥

न्वयम् । ओषधिपर्वतम् ओषधपर्वतनाम्नम् । द्वितीयो विशल्यकरणीशब्दो गुणवचनः । विशल्याः क्रियन्तेऽनयेति विशल्यकरणी ताम् ॥ २९ ॥ ३० ॥

३०] ति० टी०–योऽसौ जाम्बवता ते कथितस्तमोषधिपर्वतं गत्वा तत्र दक्षिणशिखरे जातामोषधीमानय ॥ ३० ॥

रा० टी०–औषधीनां नाम निर्दिशति—विशल्येति । लक्ष्मणस्य संजीवनार्थं सञ्जीवकरणीप्राप्तिपर्यं विशल्यकरणीप्रभृतिं महौषधिमानय मार्दूलोक एकान्वयी ॥ ३० ॥

३१] ति० टी०–भानवयकरणीं पूर्ववर्णसमानवर्णकरणीम् ॥ ३१ ॥

३२-३३] ति० टी०–अजानंस्ता महौषधीरिति । पूर्वश्लोकानामप्यस्मिन्पर्यं पुराणान्तरोक्तकालनेमियुद्धकृतचित्तचाञ्चल्यं हेतुरिति बोध्यम् ॥ ३२ ॥ ३३ ॥

रा० टी०–इतीति । ता. महौषधीः अजानन् हनुमान् चिन्तामभ्यगमत् ॥ ३१ ॥

रा० टी०–तस्येति । तस्य हनुमतो बुद्धिः समुत्पन्ना तदाकारमाह गिरेरिशिखरं गृहीत्वा गमिष्यामि ॥ ३२ ॥

गो० टी०–तस्य बुद्धिरित्यादिश्लोकत्रयमेकान्वयम् । प्रतर्कण अन्तःकरणप्रसादादिना लिङ्गेन । सुषेणोऽप्येवमब्रवीदिति । दक्षिणे शिखरे तस्य जाताम् ओषधिमानयेति सुषेण वचनम् अगृह्य यदि गच्छामि । पुनः सुषेण प्रदर्शनमिति भावः । दोषः लक्ष्मणहानिरूपः । वैक्लव्यं निष्पौरुषत्वम् । अन्ते इतिकरणेन पूर्वमन्वयः कार्यः ॥ २९-३७ ॥

३४] ति० टी०–अस्मिन्तु शिखरे इति । अस्मिन्नेव शिखरे जातां तामोषधीं प्रतर्कणावगच्छामि, हि यतः सुषेण एवमेवंलक्षणशिखरे तामब्रवीत् ॥ ३४ ॥

रा० टी०–अस्मिन्निति । अस्मिन् शिखरे जातामौषधीं प्रतर्कणा स्वतर्केबलेन अवगच्छामि जानामि प्रतर्के कारणमाह सुषेण एवं एतदाकारमब्रवीत् औषधिपर्वतमिति शेषः ॥ ३४ ॥

३५] ति० टी०–अगृह्येति । अत्र शिखरेऽस्तीत्येतन्मात्रमेव जानामि, इयं विशल्यकरणीति विशिष्य न जानामि अनुभवाभावात् अतस्तां विशल्यकरणीं लक्ष्मणप्राणत्वादवश्यमपेक्षितां यथागृहीत्वान्यां वा तदाभासां गृहीत्वा गच्छामि तदा महद्वैक्लव्यमचतुराजत्वादिदोषः स्यात् विचारकरणे तु कालात्ययेन लक्ष्मणस्य प्राणनाशो दोषः स्यात् ॥ ३५ ॥

रा० टी०–अगृह्येति । विशल्यकरणीमगृह्य अगृहीत्वा विशेषज्ञानाभावेन विशिष्य गृहीतुमशक्यत्वात् ग्रहणमकृत्वेत्यर्थः विरुद्धं गृहीत्वेत्यर्थो वा औषधान्तरं गृहीत्वेत्यर्थः तदा कालात्ययेन हेतुना दोषः कार्यविघातरूपो दुर्गुणस्स्यात् अत एव महत् वैक्लव्यं भवेत् ॥ ३४ ॥

३६-३७] ति० टी०–इत्येवमादिकं संचिन्त्य त्रिः प्रकम्प्य । स्वेन पुरा स्थापितस्यापि पुनरुत्पाटनार्थं त्रिः कम्पनम् । पूर्वं संगृहीतौषधीनां मूर्च्छितत्वौषधेषु व्ययाप्यनरस्य प्रेषणमिति बोध्यम् ॥ ३६ ॥ ३७ ॥

रा० टी०–इतीति । हनुमान् गिरेस्तटमासाद्य प्राप्य फुल्लनानातरुगणं पर्वतश्रेष्ठं समुत्पाट्य गृहीत्वा च हस्ताभ्यां समतोलयत् तदुत्पत्यमजानादित्यर्थः ॥ ३६ ॥ ३६ ॥

गो० टी०–इति संचिन्त्येत्यादिश्लोकद्वयमेकान्वयम् । समतोलयत् उदक्षिपत् ॥ २८-३० ॥

३८] ति० टी०–गिरेः शिखरं गृहीत्वा स्थलात्नभ उत्पपात ॥ ३८ ॥

रा० टी०–स इति । तोयपूर्णमत एव नीलं जीमूतमिव गिरेश्शिखरं गृहीत्वा उत्पपात ॥ ३७ ॥

---

१ शुभ इति गो. पाठः । २ तस्येति गो. पाठः । ३ जातामिति गो. पाठः । ४ नमिति गो. पा. । ५ विशल्यकरणीं शुभामिति गो. पा. । ६ संधानकरणीं चापि श्रेष्ठा शीघ्रमिहानयेति गो. पा. । ७ महात्मन इति गो.पा.। ८ तां महौषधिमिति गो. पा. । ९ इति गो. पा. । १० अप्येवमिति गो. पा. । ११ शिर इति गो. पा. । १२ आ इति गो. पा. ।

समागम्य महावेगः संन्यस्य शिखरं गिरेः । विश्रम्य किंचिद्धनुमान्सुषेण मिदमब्रवीत् ॥ ३९ ॥
औषधीर्नावगच्छामि ता अहं हरिपुंगव । तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ॥ ४० ॥
एवं कथयमानं तुं प्रशस्य पवनात्मजम् । सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीः ॥ ४१ ॥
विस्मितास्तु बभूवुस्ते सर्वे वानरपुंगवाः । दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करम् ॥ ४२ ॥
ततः संक्षोदयित्वा तामोषधीं वानरोत्तमः । लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः ॥ ४३ ॥
सशल्यः स समाघ्राय लक्ष्मणः परवीरहा । विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥ ४४ ॥
तमुत्थितं तुं हरयो भूतलात्प्रेक्ष्य लक्ष्मणम् । साधुसाध्विति सुप्रीता लक्ष्मणं प्रत्यपूजयन् ॥ ४५ ॥
एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा । सस्वजे गाढमालिङ्ग्य बाष्पपर्याकुलेक्षणः ॥ ४६ ॥
अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा । दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतम् ॥ ४७ ॥
न हि मे जीवितेनार्थः सीतया चैं जयेन वा । को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते ॥ ४८ ॥
इत्येवं ब्रुवैतस्तस्य राघवस्य महात्मनः । खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ ४९ ॥
तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम । लब्धुः कश्चिदिवासत्त्वो नैवं १ वक्तुमिहार्हसि ॥ ५० ॥
नहि प्रतिज्ञां कुर्वन्ति वितथां सत्यवादिनः । लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम् ॥ ५१ ॥

३९-४२] ति० टी०—संन्यस्य । सुषेणमब्रवीत इति शेषः ॥ ३९-४२ ॥

रा० टी०—समागम्येति । महावेगो हनुमान् गिरेर्दक्षिणभागं संन्यस्य किंचिद्विश्रम्य च सुषेणमिदमब्रवीत् ॥ ३९ ॥

रा० टी०—तदाकारमाह—औषधीरिति । नाऽहं भवदुपदिष्टाः औषधीरहं नावगच्छामि विशेषतो नाजानाम तस्मादेतोः सर्वं औषधनिश्चिन्त्य गिरेरिदं शिखरं मयाहृतम् ॥ ४० ॥

रा० टी०—एवमिति । सुषेणः पवनात्मजं प्रशस्य औषधीरुत्पाट्य जग्राह ॥ ४१ ॥

रा० टी०—विस्मिता इति । वानरयूथपाः हनुमत्कर्म दृष्ट्वा विस्मिता बभूवुः ॥ ४१ ॥

गो० टी०—समागम्येति । संन्यस्य सेनामध्ये निक्षिप्य ॥ ३९-४३ ॥

४३-४५] ति० टी०—संक्षोदयित्वा । संमर्दयित्वर्थः ४३-४५ ॥

रा० टी०—तत इति । सुषेणः औषधिं संक्षोदयित्वा संक्षोद्य संचूर्णीकृत्य लक्ष्मणस्य लक्ष्मणाय नस्तो नासामार्गेण दौ ॥ ४३ ॥

रा० टी०—सेति । विगता नित्यं निहता रुजा यस्य स विशल्यः समीपपतितशल्यजनिततापसहितः लक्ष्मणः समाघ्राय णमिति शेषः विशल्यः शल्यसंसर्गजव्यथारहितः सन् उदतिष्ठत् ॥ ४३ ॥

रा० टी०—तमिति । लक्ष्मणमुत्थितं प्रेक्ष्य सुप्रीताः यः साधु साध्विति लक्ष्मणं प्रत्यपूजयन् ॥ ४४ ॥

४६-४८] ति० टी०—एहीति । उत्थितं लक्ष्मणं राम एवेत्यब्रवीत् ॥ ४६-४८ ॥

रा० टी०—एहीति । बाष्पपर्याकुलेक्षणो रामः एहीति लक्ष्मणमब्रवीत् ॥ गाढमालिङ्ग्य सस्वजे च ॥ ४६ ॥

रा० टी०—अब्रवीदिति । राघवः सौमित्रिमब्रवीत् तदाकारमाह मरणात्पुनरागतमिति त्वां दिष्ट्या पश्यामि ॥ ४६ ॥

रा० टी०—नेति । त्वयि पञ्चत्वमागते सति मे जीवितेन सीतया जयेन वा अर्थः पदार्थमात्रं कः कस्मिन्नपि प्रतीयते अतः एव जीवितादिना नार्थःप्रयोजनम् ॥ ४७ ॥

गो० टी०—अब्रवीदित्यादिश्लोकद्वयमेकान्वयम् ४७-४९

४९] ति० टी०—शिथिलया । को हि मे जीवितेनार्थ इत्येवंरूपया रावणवधविभीषणराज्यदानप्रतिज्ञाशैथिल्यव्यञ्जया वाचा खिन्न इत्यर्थः ॥ ४९ ॥

रा० टी०—इतीति । राघवस्य एवं ब्रुवतस्ततः खिन्नो लक्ष्मणः इदं वाक्यमब्रवीत् ॥ ४८ ॥

५०-५१] ति० टी०—तदेवाह—तामिति । तां मदुत्करूपाम् ॥ ५० ॥ ५१ ॥

रा० टी०—तदाकारमाह—तामित्यादिभिः । तां राक्षसनाशविषयिणीं प्रतिज्ञां प्रतिज्ञाय कृत्वा भवान्नो निर्बलः कश्चिदपुरुषः वक्तुं त्वं नार्हसि ॥ ५० ॥

रा० टी०—नहीति । हि यतः प्रतिज्ञापरिपालनं महत्त्वस्य लक्षणमतः सत्यवादिनः पुरुषाः प्रतिज्ञां वितथां न कुर्वन्ति ५० ॥

गो० टी०—तामिति । तां प्रतिज्ञाम् रावणं हत्वा विभीषणमभिषेक्ष्यामीत्येवंरूपाम् ॥ ४२ ॥ ४३ ॥

१ औषधिं नावगमिष्यामीति गो. पा. । २ तामिति गो. पा. । ३ औषधीमिति गो. पा. । ४ रणे वानरराक्षसाडति गो. पा. ५ । तुषया इति रा. ६ । हनूमतः कर्मेति गो. पा. । ७ स इति रा. पाठः । ८ तामिति गो. पा. । ९ ते इति गो. पा. । १० स्नेह गाढं चेति गो. पा. ।११ अपि लक्ष्मणेति पा. । १२ विजयेनेति गो. पाठः । १३ वदन इति गो, पाठः । १४ वक्तुमिहार्हसीति गो. पाठः । १५ क्षत्रबोऽनवेति गो. पा. ।

नैराश्यमुपगन्तुं चै नालं ते मत्कृतेऽनघ । वधेन रावणस्याद्य प्रतिज्ञामनुपालय ॥ ५२ ॥
न जीवन्यास्यते शत्रुस्तव बाणवशं गतः । नर्दंतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥ ५३ ॥
अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः । यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥ ५४ ॥
यदि वधमिच्छसि रावणस्य संख्ये यदि च कृतां हि तैवेच्छसि प्रतिज्ञाम् ।
यदि तव राजसुतांभिलाँष आर्य कुरु च वचो मम शीघ्रमद्य वीर ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकाधिकशततमः सर्गः ॥ १०१ ॥

द्व्यधिकशततमः सर्गः ।

लक्ष्मणेन धैर्येमवष्टभ्योक्तो दाशरथिः शौर्येण रथस्थोऽपि रावणं भूमिस्थः शरधारा वर्षन् शक्रप्रहितमातलिनाभिवाद्य भो काकुत्स्थेन्द्ररथोऽयं रथस्त्वेनमारुरुक्षेन्द्रचापप्रमाणकवचशस्त्रतूणीरिमा गृहीत्वा जयेनमिति सादरमुक्तः स तथाकरोत् तस्मिन्महति रणे रावणः श्रुत्वा चिक्षेप रामस्तु दुर्निवारशल्य वासवदत्तशक्त्या सूर्यैरित्यान्यशरै रावण मार्गिव्य हीनशक्तिं हृतं चाकरोत् ।

लक्ष्मणेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः । संदधे परवीरघ्नो धनुरादाय वीर्यवान् ॥ १ ॥
रावणाय शरान्घोरान्विससर्ज चमूमुखे । अथान्यं रथमास्थाय रावणो राक्षसाधिपः ॥ २ ॥
अभ्ययाँवत काकुत्स्थं स्वर्भानुरिव भास्करम् । दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ॥
आजघान महाशैलं धाराभिरिव तोयदः । ॥ ३ ॥
दीप्तपावकसंकाशैः शरैः काञ्चनभूषणैः । अभ्यवर्षद्रणे रामो दशग्रीवं समाहितैः ॥ ४ ॥
भूमौ स्थितस्य रामस्य रथस्थस्य च रक्षसः । न समं युद्धमित्याहुर्देवगन्धर्वकिंनराः ॥ ५ ॥
ततो देववरः श्रीमाञ्श्रुत्वा तेषां वचोऽमृतम् । आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ॥ ६ ॥

५२-५३] ति० टी०-मत्कृते नैराश्यमुपगन्तुं नालं न युक्तम् । दैवाद्विपत्तावपीति शेषः । प्रतिज्ञामनुपालय दैवगत्या ममापि स्वस्थतया स्वस्थचित्तः सन्प्रतिज्ञां पालय ॥ ५२॥५३॥

रा० टी०-नैराश्यमिति । हे अनघ मत्कृते मदर्थमपि नैराश्यं प्रतिज्ञातयागमुपगन्तुं ते नालमतः रावणस्य वधेन प्रतिज्ञामनुपालय ॥ ५२ ॥

गो० टी०-नैराश्यमिति । नैराश्यं सीतायां विजये चोपेक्षाम् ॥ ५४ ॥

रा० टी०-ननु प्रबलस्य रावणस्य कथं वध इत्यत आह-नेति । तव बाणवशं गतशक्तुः जीवन् न यास्यते तत्र दृष्टान्तः सिंहस्य वशं गतो महागज इव ॥ ५३ ॥

गो० टी०-न जीवन्निति । यास्यते यास्यति ॥ ५३ ॥

५४-५५] ति० टी०-कृतकर्मायतनकर्तव्यांशे कृतलोकानुग्रहः । यावदस्तं न यातीत्यनेनाधिनशुक्रप्रतिपेधेषा वार्तेति गम्यते ॥ ५४ ॥ ५५ ॥

इति श्रीरामभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकाधिकशततमः सर्गः ॥ १०१ ॥

रा० टी०-अहमिति । दिवाकरः यावत् अस्तं न याति तावदेव अस्य रावणस्य वधमिच्छामि ॥ ५३ ॥

गो० टी०-अहं त्विति । कृतकर्मा कृतसंचारः ॥५४॥

रा० टी०-यदीति । यदि रावणस्य वधमिच्छसि यदि च कृतान्तो धर्मराज इव प्रतिज्ञां प्रतिज्ञापरिपालनमिच्छसि यदि च राजसुतायाः अभिलाषमिच्छाविषयमिच्छसि तदा मम वचश्शीघ्रं कुरु ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे व्यधिकशततमः सर्गः ॥१०२॥

गो० टी०-यदीति । कृतां निर्व्यूढाम् ॥ ५७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥१०२॥

१] ति० टी०-लक्ष्मणेनेति ॥ १ ॥

रा० टी०-लक्ष्मणवाक्यश्रवणानन्तरकालिकं रामवृत्तान्तमाह—लक्ष्मणेत्यादिभिः । राघवो धनुरादाय संदधे शरान् रावणाय विससर्ज च सार्द्धश्लोक एकान्वयी ॥ १ ॥

गो० टी०-अथेन्द्रस्थमारुह्य संग्रामश्लिशततमे-लक्ष्मणेनेत्यादि ॥ १-७ ॥

२-६] ति० टी०-रावणाय शरान्विससर्ज । अथान्यं रथमित्यनेन चात्र स्थाने रावणेन शुक्राज्ञया जयनिमित्तं निकुम्भिलायामारब्धहोमकर्मणो वानुरुद्धारा हिंसनं पुराणान्तरो-

१ तदर्थमिति गो. पा. । २ पथमिति गो. पा. । ३ त्वमिहेति गो. इवेति रा. पा. । ४ वरात्मजाभिलाष इति । ५ अभिलाषमिति रा. पा. । ६ आरुरुक्षेति गो. रा. । ७ अभ्ययातेति गो. पा. । ८ सौरिरिति गो. पा. । ९ निर्विभेदेति गो. पा. । १० समाहितमिति गो. पा. । ११ दानवा इति गो. पा. । १२ इत आरभ्य श्लोकचतुष्टयं गो. पुस्तके नास्ति ।

रथेन मम भूमिष्ठं शीघ्रं याहि रघूत्तमम् । आहूय भूतलं यातः कुरु देवहितं महत् ॥ ७ ॥
इत्युक्तो देवराजेन मातलिर्देवसारथिः । प्रणम्य शिरसा देवं ततो वचनमब्रवीत् ॥ ८ ॥
शीघ्रं यास्यामि देवेन्द्र सारथ्यं च करोम्यहम् । ततो हयैश्च संयोज्य हरितैः स्यन्दनोत्तमम् ॥
ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः । ॥ ९ ॥
तरुणादित्यसंकाशो वैदूर्यमयकूबरः । सदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः ॥ १० ॥
हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः । रुक्मवेणुध्वजः श्रीमान्देवराजरथो वरः ॥ ११ ॥
देवराजेन संदिष्टो रथमारुह्य मातलिः । अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात् ॥ १२ ॥
अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः । प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः ॥ १३ ॥
सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते । दत्तस्तव महासत्त्व श्रीमञ्शत्रुनिबर्हण ॥ १४ ॥
इदमैन्द्रं महच्चापं कवचं चाग्निसंनिभम् । शराश्चादित्यसंकाशाः शक्तिश्च विमला शिवा ॥ १५ ॥
आरुहेमं रथं वीर राक्षसं जहि रावणम् । मया सारथिना देव महेन्द्र इव दानवान् ॥ १६ ॥

त्मभुसंभेयमिति सूचितम् । पूर्वं रणात्पलायनोक्त्या रावणोद्देश्यकशरविसर्गस्य रणभूमावसंभवादाधिपत्यप्रतिपन्नमर्थाद्ध्व एतद्युद्धप्रवृत्तिः ॥ ७–९ ॥

रा० टी०–अथेति । रावण. अन्यं रथमास्थाय काकुत्स्थमभ्यधावत ॥ ७ ॥

रा० टी०–दशग्रीव इति । स्थस्थो दशग्रीवः रामं शरैराजघ्नात ॥ ८ ॥

रा० टी०–ईरितमिति । रामः दशग्रीवं शरैरभ्यार्पयत् ॥ ९ ॥

रा० टी०–भूमाविति । भूमौ स्थितस्य रथस्थस्य च युद्धं समं तुल्यं न इति देवादय आहुः ॥ ९ ॥

रा० टी०–तत इति । अथ: हेषां देवादीनां वचोऽमृतं श्रुत्वा मातलिं स्वसारथिमाहूय इदमब्रवीत् ॥ ७ ॥

गो० टी०–ततइत्यादिसार्धश्लोकत्रयमेकान्वयम । कूबर. युगाधारदारु कूबरस्तु युगंधर इत्यमर. । काञ्चनापीडैः काञ्चनालंकारैः श्वेतप्रकीर्णकैः श्वेतचामरैः चामरं तु प्रकीर्णकमित्यमरः । हरिभिः हरितवर्णैः । रुक्मवेणुध्वजः कनकदण्डध्वजः । देवराजरथ इति । य इति शेषः । योऽस्ति तमो रुधेत्युत्तरत्रान्वयः । संदिष्टः चोदितः । त्रिविष्टपात् स्वर्गात् ६–९

७–९] ति० टी०–मम रथेन शीघ्रं रघूत्तमं याहि । भूतलं यातः प्राप्तश्चाहूय रघूत्तमं संबोधनपूर्वकं देवराजरथोऽयमिति बोधयित्वा महद्देवहितं कुर्वित्यर्थः ॥ ७–९ ॥

रा० टी०–तदाकारमाह रथेनेति । मम रथेन भूमिष्ठं रघूत्तमं याहि प्रामुहि भूतलं यातः प्राप्तस्त्वं रघूत्तममाहूय रथे स्थापयेति शेषः अत एव महद् देवहितं त्वं कुरु ॥ ७ ॥

रा० टी०–इतीति । अहं हयैः स्यन्दनोत्तमं संयोज्य यास्यामि सारथ्यं करोमि करिष्यामि च इति मातलिरब्रवीत् अर्धचतुष्टयमेकान्वयि ॥ ८ ॥ ९ ॥

१०] ति० टी०–काञ्चनापीडैः स्वर्णभिरणैः श्वेतप्रकीर्णकैः सितच्छत्रायलंकारविशेषैः । 'चामरं तु प्रकीर्णकम्' इत्यमर. ॥ १० ॥

११] ति० टी०–देवराजरथः । योऽस्तीति शेषः । तमारुहेत्युत्तरेण संबन्धः ॥ ११ ॥

१२–१३] ति० टी०–देवराजेन संदिष्टः शीघ्रं गच्छेत्याज्ञप्तो मातलिरित्यन्वयः । पूर्वाज्ञया वस्तुसत्तां दर्शं पुनराज्ञया मनुष्यलोकं प्रति चलनमिति बोध्यम् ॥ १२–१४ ॥

१५–१६] ति० टी०–इदं दत्तमित्यनुषज्यते ॥१५॥१६॥

रा० टी०–तत इति । काञ्चनेन तन्मयत्वचनया चित्रमयं यस्य वैदूर्यमयः कूबरो यस्य काञ्चनापीडैरुत्तमया-भरणविशिष्टैः श्वेतप्रकीर्णकैः श्वेतचामरादिविशिष्टैः हरिभिर्हरितवर्णैः सूर्यसंकाशैः हेमजालेन विभूषितैः सदश्वैर्युक्तः रुक्ममयौ वेणुध्वजौ यस्य स यो राजरथः ते रथं देवराजेन संदिष्टो मातलिरारुह्य विविष्टपात् स्वर्गात् काकुत्स्थमभ्यवर्तत सार्धश्लोकत्रयमेकान्वयि ॥ १०–१३ ॥

रा० टी०–अब्रवीदिति । तदा रामसमीपागमनसमये सप्रतोदः नोदसहितः सहस्राक्षस्य सारथिः प्राञ्जलिस्सन् राममब्रवीत् ॥ १४ ॥

गो० टी०–अब्रवीच्चेति । प्रतोदः अश्वप्रेरणकाष्ठम्॥१३॥

रा० टी०–तदाकारमाह—सहस्राक्षेणेति । तव समीपवर्ती मया सारथिनोपलक्षितः अयं रथः ते विजयाय सहस्राक्षेण दत्तः इदं चापादि च दत्तमतः इमं रथमारुह्य महेन्द्रो दानवानिव रावणं जहि श्लोकत्रयमेकान्वयि ॥ १५–१७ ॥

गो० टी०–सहस्राक्षेणेत्यादिश्लोकत्रयमेकान्वयम् । इदमिति । अत्र चापादिषु यथायोग्यं दत्त इत्येनच्छिन्नवचनविपरिणामेन योजनीयम् ॥ १५–१६ ॥

१ राजन्निति गो. रामेति रा. पाठः ।

इत्युक्तः संपरिक्रम्य रथं तमभिवाद्य च । आरुरोह तदा रामो लोकाँल्लक्ष्म्या विराजयन् ॥ १७ ॥
तद्वैभौ चाद्भुतं युद्धं द्वैरथं रोमहर्षणम् । रामस्य च महाबाहो रावणस्य च रक्षसः ॥ १८ ॥
स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः । अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ १९ ॥
अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः । ससर्ज परमक्रुद्धः पुनरेव निशाचरः ॥ २० ॥
ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः । अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः ॥ २१ ॥
ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः । राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः ॥ २२ ॥
तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः । दिशश्च संततः सर्वा विदिशश्च समावृताः ॥ २३ ॥
तान्दृष्ट्वा पन्नगान्रामः समापतत आहवे । अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम् ॥ २४ ॥
ते राघवधनुर्मुक्ता रुक्मपुङ्खाः शिखिप्रभाः । सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः ॥ २५ ॥
ते तान्सर्वाञ्शराञ्जघ्नुः सर्परूपान्महाजवान् । सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥ २६ ॥
अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः । अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥ २७ ॥
ततः शरसहस्रेण राममक्लिष्टकारिणम् । अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥ २८ ॥
चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः । पातयित्वा रथोपस्थे रथात्केतुं च काञ्चनम् ॥ २९ ॥
ऐन्द्रानपि जघानाश्वाञ्शरजालेन रावणः । विषेदुर्देवगन्धर्वचारणा दानवैः सह ॥ ३० ॥
राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः । व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ॥ ३१ ॥

१७] ति० टी०–संपरिक्रम्य प्रदक्षिणीकृत्य ॥ १७ ॥

रा० टी०–इतीति । इत्युक्तः सारथिना प्रार्थितो रामः लोकान् लक्ष्म्या विजयसम्पत्त्या विराजयन् प्रकाशयन्सन् रथमारुरोह ॥ १८ ॥

गो० टी०–इत्युक्त इति । संपरिक्रम्य प्रदक्षिणीकृत्य । लोकान् लक्ष्म्या विराजयन् चन्द्रप्रभयेव स्वकान्त्या सर्वलोकान् प्रकाशयन्नित्यर्थः ॥ १४–१८ ॥

१८–२१] ति० टी०–द्वैरथम् । द्वौ रथौ ययोस्तौ द्विरथौ तयोरिदं द्वैरथम् ॥ १८–२१ ॥

रा० टी०–तदिति । द्वौ रथौ यस्मिन् तदेव द्वैरथं स्वार्थिकोऽण् रामस्य रक्षसश्च अद्भुतं युद्धं बभौ ॥ १९ ॥

रा० टी०–स इति । स रामः राक्षसराजस्य गान्धर्वमस्त्रं गान्धर्वेण दैवं दैवेन च जघान ॥ २० ॥

रा० टी०–अस्त्रमिति । राक्षसाधिपः परमं घोरमस्त्रं ससर्ज ॥ २१ ॥

रा० टी०–अस्त्राणां घोरत्वमुपपादयन्नाह ते इति । रावणधनुर्मुक्ताः शराः सर्पाः भूत्वा काकुत्स्थमभ्यवर्तन्त ॥२२॥

२२–२३] ति० टी०–व्यादितास्या व्यात्तवदनाः २२॥२३

रा० टी०–ते इति । व्यादितास्याः अत एव भयानकाः दीप्तवदनास्ते बाणसर्पाः मुखैर्दीप्तं ज्वलनं वमन्तस्सन्त एव राममभ्यवर्तन्त ॥ २२ ॥

गो० टी०–ते दीप्तवदना इति । व्यादितास्याः व्यात्राननाः भयानकाः भयंकराः ॥ १९ ॥

रा० टी०–तैरिति । वासुकिसमः स्पर्शो येषां तैर्वासुकिसमस्पर्शैः दिशस्सन्ततः व्याप्ताः विदिशश्च समावृताः अभवन्निति शेषः २४

गो० टी०–तैरिति । दीप्तभोगैः दीप्तफणैः । भोगः सुखे स्यादिभृतावहेश्च फणकाययोरित्यमरः । प्रदिशः दिक्कोणाः २०

२४] ति० टी०–प्रादुश्चक्रे प्रयुयुजे ॥ २४ ॥

रा० टी०–तानिति । रामः समापततः पन्नगान् दृष्ट्वा गारुत्मतमस्त्रं प्रादुश्चक्रे ॥ २५ ॥

गो० टी०–तान् दृष्ट्वेति । प्रादुश्चक्रे प्रयुयुजे ॥ २१ ॥

२५–२८] ति० टी०–शिखिप्रभा अग्निप्रभाः २५–२८

रा० टी०–ते इति । राघवधनुषो मुक्ताः शिखिप्रभाः रुक्मपुङ्खाः काञ्चनादशराः सुपर्णा गरुडा भूत्वा विचेरुः ॥२६॥

रा० टी०–ते इति । सुपर्णरूपा रामस्य विशिखाः सर्परूपान् शरान् जघ्नुः ॥ २७ ॥

रा० टी०–अस्त्र इति । अस्त्रे प्रतिहते सति क्रुद्धो रावणः शरवृष्टिभिः राममभ्यवर्षत् ॥ २८ ॥

रा० टी०–तत इति । शरसहस्रेण राममर्दयित्वा अदीनाक्लेशव्यापारं कृत्वा शरौघेण मातलिमिन्द्रसारथिं प्रत्यविध्यत ॥ २९ ॥

गो० टी०–त इति । शिखिप्रभाः अग्निप्रभाः । सुपर्णाः गरुडाः ॥ २२–२९ ॥

२९] ति० टी०–केतुमुद्दिश्य प्रक्षिप्तेनैकेन शरेण केतुं चिच्छेद । छिन्नं च तं रथाद्रथोपस्थेदेशाद्रथोपस्थे पातयित्वा २९

३०–३१] ति० टी०–अश्वानपि जघान ॥ ३० ॥ ३१ ॥

१ बभूवेति गो. पाठः । २ तुमुलमिति गो. पाठः । ३ शरा इति गो. पाठः । ४ गन्धर्वा इति गो. रा. पा. । ५ दानवाश्चारणैरिति गो. पाठः ।

रामचन्द्रमसं दृष्ट्वा ग्रस्तं राघणराहुणा । प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् ॥ ३२ ॥
समाक्रम्य बुधस्तस्थौ प्रजानामहितावहः । सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः ॥ ३३ ॥
उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम् । शस्त्रवर्णः सुपरुषो मन्दराशिमदिवाकरः ॥ ३४ ॥
अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना । कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् ॥ ३५ ॥
आहैत्याङ्गारकस्तस्थौ विशाखमपि चाम्बरे । दशास्यो विंशतिभुजः प्रगृहीतशरासनः ॥ ३६ ॥
अदृश्यत दशग्रीवो मैनाक इव पर्वतः । निरस्यमानो रामस्तु दशग्रीवेण रक्षसा ॥ ३७ ॥
नाशक्नोदभिसंधातुं सागरान्तरमूर्धनि । स कृत्वा भ्रुकुटिं क्रुद्धः किंचित्संरक्तलोचनः ॥ ३८ ॥
जगाम सुमहाक्रोधं निर्दहन्निव राक्षसान् । तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः ॥
सर्वभूतानि विव्येसुः प्राकम्पत च मेदिनी । ॥ ३९ ॥

रा० टी०–चिच्छेदेति । रावणः लोकानां रावयित्रा रावणः केतुमुद्दिश्य प्रक्षिप्तेनैकेन शरेण केतुं चिच्छेद स्यात् स्थोर्ह्यदेशात् स्थोपस्थे पातयित्वा छिन्नं केतुं निपात्य नेदानीं श्वानपि शरजालेनाभिजघान अत एव दानवैस्सह देवादयो विषेदुः श्लोकद्वयमेकान्वयि ॥ ३० ॥ ३१ ॥

रा० टी०–राममिति । आर्षं तत्वेन प्रतीयमानं रामं दृष्ट्वा सिद्धादयो व्यथिता बभूवुः ॥ ३२ ॥

गो० टी०–चिच्छेदेत्यादिसार्द्धश्लोकमेकं वाक्यम् । केतुं ध्वजपटम् । उद्दिश्य लक्षीकृत्य । स्यात् स्थोर्वयव्यदण्डात् ॥ २६–२८ ॥

३२–३३] ति० टी०–अथ रामभयावहानुत्पातानाह—प्राजापत्यमिति । प्रजापतिदैवत्यनक्षत्रभूतां रोहिणीमित्यर्थः ॥ ३२ ॥ ३३ ॥

रा० टी०–लोकपीडाप्रदान् दिव्यान् भौमांश्चोत्पातानाह रामेत्यादिभिः । रावणराहुणा ग्रस्तं रामचन्द्रमसं दृष्ट्वा शशिनः प्रियं प्राजापत्यं प्रजापतिदैवताकं रोहिणीं नक्षत्रं समाक्रम्य प्रजानामहितावहस्सन् बुधः तस्थौ सार्धश्लोक एकान्वयी ॥ ३३ ॥

रा० टी०–सेति । सधूमाः परिवृत्ताः कर्मणो यस्य स सागरः प्रज्वलन् सन्निव दिवाकरं स्पृशन्निव च उत्पपात ॥३४॥

गो० टी०–रामस्य तादृशदशादर्शनेन संजातादि दिव्यानि भौमानि च वैकृतान्याह—रामचन्द्रमसमित्यादिना । प्राजापत्यं नक्षत्रं प्रजापतिदैवताकनक्षत्रभूतां रोहिणीम् । ह्यदं रोहिणीं प्राप्ते जगत्पीडा भवतीति भावः ॥ २९–३१ ॥

३४] ति० टी०–दिवाकरं स्पृशन्निवोत्पपात । अन्युचोर्मिजात इत्यर्थः । शस्त्रवर्णः कृष्णान्तर्मण्डलः ॥ ३४ ॥

रा० टी०–शस्त्रेति । शस्त्रवद्वर्णं यस्य कृष्णवर्ण इत्यर्थः सपरुषोतिरुच्छः कबन्धः अङ्के यस्य धूमकेतुना संसक्तः दिवाकरोऽदृश्यत ॥ ३५ ॥

गो० टी०–शस्त्रवर्ण इति । शस्त्रवर्णः असिश्यामः ॥ ३२ ॥

३५] ति० टी०–कबन्धाङ्कः कबन्धोऽङ्के यस्य सः ३५॥

रा० टी०–कोशलानामिति । कोशलानामिक्ष्वाकूणां नक्षत्रं इन्द्राग्निदेवतं विशाखं तदभिजनक्षत्रमाहत्य तस्थौ ॥३६॥

गो० टी०–कोसलानामिति । कोसलानाम् इक्ष्वाकूणाम् । विशाखायास्तत्क्षत्रत्वमेतत्काण्डचतुर्थसर्गे दर्शितम् ॥ ३३ ॥ ३४ ॥

३६–३८] ति० टी०–विशाखं विशालारुणनक्षत्रम् । एते उत्पाता रामस्य तथा मनुष्यधर्मनटनसूचका इति बोध्यम् ॥ ३६–३८ ॥

रा० टी०–दशास्य इति । प्रगृहीतशरासनो दशास्यः मैनाक इव अदृश्यत ॥ ३७ ॥

रा० टी०–निरस्यमान इति । दशग्रीवेण निरस्यमानो रामस्सायकान् अभिसंधातुं नाशक्नोत् सामर्थ्यान्नकृत्कृति सौत्रादयत् वैयाकरणमते पि कृतेर्व्यापारकृतिप्रविष्टत्वात् नाशब्दार्थत्वमेतेन रावणात्राणां देवानुग्रहविषयत्वं सूचितं तेन रामस्य मर्यादापालकत्वगुणो व्यक्तः ॥ ३८ ॥

गो० टी०–निरस्यमान इति । अभिसंधातुं धनुष्यारोपयितुम् ॥ ३९ ॥

रा० टी०–स इति । क्रुद्धः स रामः भ्रुकुटिं भ्रुवो कुटिं कौटिल्यं कृत्वा राक्षसान्निर्दहन्निव महाक्रोधं रावणं जगाम ३९.

गो० टी०–अथैतदर्शनेन रामकोपं दर्शयति—स कृत्वेति ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकरीव्याख्याने युद्धकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०३ ॥

३९] ति० टी०–क्रुद्धः स रामः सुमहाक्रोधं जगाम । तादृशक्रोधप्राप्तौ स्वजनार्तिभूतवैपरीत्यं रावणपराक्रमश्च निमित्तम् ॥ ३९ ॥

रा० टी०–तस्येति । रामस्य वदनं दृष्ट्वा सर्वभूतानि विव्येसुः मेदिनी मही प्राकम्पत च ॥ ४० ॥

गो० टी०–अथ रावणस्य श्लोकद्वयम् चतुःशततमे–तस्येत्यादि ॥ १ ॥ २ ॥

---

१ अशुभावह इति गो. रा. पा. । २ आक्रम्येति गो. पाठः । ३ विशाखामिति गो. पाठः । ४ चक्षुरिति गो. पाठः ।

सिंहशार्दूलवाक्शैलैः संचचाल चलद्रुमः । बभूव चापि क्षुभितः समुद्रः सरितां पतिः ॥ ४० ॥
खराश्च खरनिर्घोषा गगने परुषा घनाः । औत्पातिकाश्च नर्दन्तः समन्तात्परिचक्रमुः ॥ ४१ ॥
रामं दृष्ट्वा सुसंक्रुद्धमुत्पाताश्चैव दारुणान् । विव्यथुः सर्वभूतानि रावणस्याभवद्भयम् ॥ ४२ ॥
विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः । ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः ॥ ४३ ॥
ददृशुस्ते तदा युद्धं लोकसंवर्तसंस्थितम् । नानाप्रहरणैर्भीमैः शूरयोः संप्रयुध्यतोः ॥ ४४ ॥
ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः । प्रेक्षमाणा महद्युद्धं वाक्यं भक्त्या प्रहृष्टवत् ॥ ४५ ॥
दशग्रीवं जयेत्याहुरसुराः समवस्थिताः । देवा राममथोचुस्ते त्वं जयेति पुनः पुनः ॥ ४६ ॥
एतस्मिन्नन्तरे क्रोधाद्राघवस्य च रावणः । प्रहर्तुकामो दुष्टात्मा स्पृशन्प्रहरणं महत् ॥ ४७ ॥
वज्रसारं महानादं सर्वशत्रुनिबर्हणम् । शैलशृङ्गनिभैः कूटैश्चित्तदृष्टिभयावहम् ॥ ४८ ॥
सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम् । अतिरौद्रमनासाद्यं कालेनापि दुरासदम् ॥ ४९ ॥
त्रासनं सर्वभूतानां दारणं भेदनं तथा । प्रदीप्तं इव रोषेण शूलं जग्राह रावणः ॥ ५० ॥

४०] ति० टी०–चलद्रुम इति बहुव्रीहिः । ' महद्रुमः ' इति पाठान्तरम् ॥ ४० ॥

रा० टी०–सिंहेति । शैलः चंचलाः द्रुमा यस्मिन् तादृशस्सन् चचाल समुद्रः क्षुभितश्च बभूव ॥ ४१ ॥

४१–४३] ति० टी०–औत्पातिका उत्पातप्रवृत्ताः ॥ ४१ ॥ ४३ ॥

४४] ति० टी०–लोकानां संवर्तः प्रलयस्तद्वत्संस्थितं संस्थानं यस्य तत् ॥ ४४ ॥

रा० टी०–खरा इति । औत्पातिकाः उत्पातसूचकाः खरनिर्घोषाः खराः गर्दभाकृतयः परुषाः रूक्षाः घनाश्च समन्तात्परिचक्रमुः ॥ ४१ ॥

रा० टी०–राममिति । सुसंक्रुद्धं रामं सुदारुणान् उत्पातांश्च दृष्ट्वा सर्वभूतानि विव्यथुः रावणस्य भयमभवच्च ४२

गो० टी०–खगाश्चेति । औत्पातिकानि उत्पातसूचकानि । नर्दन्तः गर्जन्तः ॥ ३ ॥ ४ ॥

रा० टी०–विमानस्था इति । लोकानां संवर्तवत् प्रलयवत् संस्थितं शरयोः रामरावणयोः युद्धं देवादयो ददृशुः श्लोकद्वयमेकान्वयि ॥ ४४ ॥ ४५ ॥

गो० टी०–विमानस्था इत्यादिश्लोकद्वयमेकान्वयम । लोकसंवर्तस्य प्रलयस्येव संस्थितं संस्थानं यस्य तत्तथोक्तम्५–६

४५–४७] ति० टी०–विग्रहमागता रामरावणपक्षपातात् द्विरोधपूर्वकमभिनिवेशं प्राप्ताः । प्रहृष्टवत्प्रहृष्टाः सन्तः ४५॥४७

४८] ति० टी०–कूटैः शूलस्य दलवयशिखरैः ॥ ४८ ॥

४९–५०] ति० टी०–अग्निचयोऽग्निसमूहः ॥ ४९॥५० ॥

रा० टी०–ऊचुरिति । विग्रहं परस्परविरोधमागताः महायुद्धं प्रेक्षमाणाः सुराऽसुराः प्रहृष्टवद्वाक्यमूचुः ॥ ४६ ॥

गो० टी०–ऊचुरिति । विग्रहमागताः विग्रहं युद्धम उद्दिश्य आगताः । युद्धं द्रष्टुमागताः इत्यर्थः । यद्वा विग्रहमागताः रामरावणपक्षपातात् परस्परं कलहायमाना इत्यर्थः । भक्त्या प्रेक्षमाणाः सन्तः प्रहृष्टवद्वाक्यमूचुरिति संबन्धः ॥ ७ ॥

रा० टी०–तदाकारमाह—दशग्रीवमिति । असुराः जयेति वचः दशग्रीवमाहुः देवास्तु राममूचुः ॥ ४७ ॥

गो० टी०–तद्वाक्यं विविच्य दर्शयति—दशग्रीवमिति । यद्यप्यसुराणामपि रावणो बाधकः, तथापि देवानामतिशयो मा भूदित्यभयया रावणं वर्धयन्तीति बोध्यम् ॥ ८ ॥

रा० टी०–एतस्मिन्निति । राघवस्य प्रहर्तुकामो रावणो लोकानां रावयिता रावणो वज्रसारं वज्रबलसदृशबलनिर्मितमत एव सर्वशत्रुनिबर्हणं शैलशृङ्गनिभैः कूटैः शूलावयवैः चित्तदृष्टेरुभयावहं सधूममिव तीक्ष्णमग्रं यस्य युगान्ताग्निचयः उपमा यस्य कालेनापि दुरासदमत एव अतिरौद्रमत एव अनासाद्यं पराभवितुमशक्यमत एव सर्वभूतानां त्रासनं भेदनं च महत्प्रहरणं शूलं जग्राह अर्द्धश्लोकमेकान्वयि ४८॥५१

गो० टी०–एतस्मिन्नन्तर इत्यादिश्लोकचतुष्टयमेकान्वयम । राघवस्य क्रोधात् राघवविषयक्रोधात्, प्रहरणम् आयुधम्, स्पृशन् परामृशन् । किं वेदानीं प्रहीतुमुचितमिति क्षणं चिन्तयन्नित्यर्थः । कूटैः शिखराकारैरयःशङ्कुभिः, चित्तं युक्तमित्यर्थः । अतिरौद्रं रौद्रं शूलमतिवर्तमानम् अनासाद्यं शत्रुभिरप्रधृष्यम् । कालेन यमेन, दारणं क्रकचवत्कृन्तनम् । भेदनम् द्विधाकरणम् । दुष्टात्मा रावणः राघवस्य क्रोधात् प्रहर्तुकामः महत्प्रहरणं स्पृशन् सन् वज्रसारत्वादिविशिष्टं शूलं रोषेण प्रदीप्तम् इव स्थितो रावणो जग्राहेति संबन्धः ॥ ९–१३ ॥

१ अतीति गो. रा. पाठः । २ औत्पातिकानीति गो. पाठः । ३ महायुद्धमिति गो. पाठः । ४ महदिति गो. पाठः । ५ स इति गो. पाठः। ६ चित्तमिति गो. पाठः । ७ प्रदीप्तमिति गो. पाठः ।

तच्छूलं परमक्रुद्धो जग्राह युधि वीर्यवान् । अनीकैः समरे शूरैः राक्षसैः परिवारितः ॥ ५१ ॥
समुद्यम्य महाकायो ननाद युधि भैरवम् । संरक्तनयनो रोषान्स्वसैन्यमभिहर्षयन् ॥ ५२ ॥
पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा । प्राकम्पयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः ॥ ५३ ॥
अतिकायस्य नादेन तेन तस्य दुरात्मनः । सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे ॥ ५४ ॥
स गृहीत्वा महावीर्यः शूलं तद्रावणो महत् । विनद्य सुमहानादं रामं परुषमब्रवीत् ॥ ५५ ॥
शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः । तव भ्रातृसहायस्य सद्यःप्राणान्हरिष्यति ॥ ५६ ॥
रक्षसामद्य शूराणां निहतानां चमूमुखे । त्वां निहत्य रणश्लाघी करोमि तरसा समम् ॥ ५७ ॥
तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव । एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः ॥ ५८ ॥
तद्रावणकरान्मुक्तं विद्युन्मालासमावृतम् । अप्राप्तं सहसादं विधुद्वत्सो भत ॥ ५९ ॥
तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनम् । ससर्ज विशिखान्रामश्चापमायम्य वीर्यवान् ॥ ६० ॥
आपतन्तं शरौघेण वारयामास राघव । उत्पतन्तं युगान्ताग्निं जलौघैरिव सायरः ॥ ६१ ॥
निर्दिदाह स तान्बाणान्रामकार्मुकनिःसृतान् । रावणस्य महाँश्शूलः पतङ्गानिव पावकः ॥ ६२ ॥
तान्दृष्ट्वा भस्मसाद्भूतान्शूलसंस्पर्शचूर्णितान् । सायकानन्तरिक्षस्थान्रावणः क्रोधमूर्च्छितः ॥ ६३ ॥
स तां मातलिना नीतां शक्तिं वासवसंमताम् । जग्राह परमक्रुद्धो राघवो रघुनन्दनः ॥ ६४ ॥
सा तोलिता बलवता शक्तिर्घण्टाकृतस्वना । नभः प्रज्वालयामास युगान्तोल्केव सप्रभा ॥ ६५ ॥
सा क्षिप्ता राक्षसेन्द्रस्य तस्मिञ्छूले पपात ह । भिन्नः शक्त्या महाञ्शूलो निपपात गतद्युतिः ॥ ६६ ॥

५१–५६] ति० टी०—अनीकैरनेकानीकसंख्यैः ५१-५६

रा० टी०—तदिति । राक्षसैः राक्षसीयैः अनीकैः परिवारितो रावणः यत् शूलं जग्राह तत् शूलं समुद्यम्य स्वसैन्यमभिहर्षयन्सन् भैरवं ननाद अर्द्धचतुष्टयमेकान्वयि ॥५२॥५३॥

रा० टी०—पृथिवीमिति । राक्षसेन्द्रस्य शब्दः पृथिव्यादि प्राकम्पयत् ॥ ५४ ॥

रा० टी०—अतीति । दुरात्मनो रावणस्य नादेन सर्वभूतानि वित्रेसुः ॥ ५५ ॥

रा० टी०—स इति । रावणः शूलं गृहीत्वा महानादं विनद्य परुषमब्रवीत् ॥ ५६ ॥

रा० टी०—तदाकारमाह शूल इत्यादिभिः । रोषान्मयोद्यतः वज्रसारोऽयं शूलः भ्रातृसहायस्य तव प्राणान् सद्यःक्षरिष्यति ॥ ५७ ॥

गो० टी०—स इति । विनद्येति । पूर्वं शूलोद्यमनजनितोत्साहकृतो नाद उक्तः । इह प्रक्षेपजनितोत्साहकृतो नाद इति विवेकः ॥ १७ ॥ १८ ॥

५७–६० ति० टी०—त्वां निहत्य रक्षसां समं करोमि । रक्षोभिः समं करिष्यामीत्यर्थः ॥ ५७–६० ॥

रा० टी०—रक्षसामिति । त्वां निहत्य निहतानां रक्षसां समं सदृशं करोमि करिष्यामि ॥ ५८ ॥

रा० टी०—तिष्ठेति । एषोहं शूलेन त्वां निहन्मि एवमुक्त्वा स रावणः तच्छूलं चिक्षेप ॥ ५९ ॥

गो० टी०—राक्षसमित्यादिसार्धश्लोकमेकान्वयम् । त्वां विनिहत्य रक्षोभिः समं करिष्यामीत्यर्थः । "तुल्यार्थैः०" इत्यादिना षष्ठी ॥ १९ ॥ २० ॥

रा० टी०—तदिति । रावणकरान्मुक्तं विद्युन्मालाभिस्समाकुलं विद्युद्वत्सो तच्छूलमशोभत ॥ ६० ॥

रा० टी०—तदिति । राघवः ज्वलन्तं तच्छूलं दृष्ट्वा चापमानम्य विशिखान् ससर्ज ॥ ६१ ॥

गो० टी०—तदिति । विद्युज्ज्वाला विद्युत्सदृशज्वाला ॥ २१–२८ ॥

६१–६६] ति० टी०—वारयामास । प्रथमं वेगभङ्गं कृतवानित्यर्थः ॥ ६१–६६ ॥

रा० टी०—आपतन्तमिति । उत्पतन्तं युगांताग्निं जलौघैर्वारिधिरिव आपतन्तं शूलं राघवो वारयामास ॥ ६१ ॥

रा० टी०—निर्दिदाहेति । महान् रावणस्य शूलः रामकार्मुकनिस्सृतान् बाणान् निर्दिदाह ॥ ६२ ॥

रा० टी०—तानिति । शूलसंस्पर्शचूर्णितान् भस्मसात्भूतान् अन्तरिक्षस्थितान् सायकान् रावणो दृष्ट्वा क्रोधमाहरत् ॥ ६४ ॥

रा० टी०—स इति । वासवस्य सम्मतामपि तामित्यर्थः मातलिना नीतां शक्तिं रघुनन्दनो जग्राह ॥ ६४ ॥

रा० टी०—सेति । बलवता रामेण तोलिता उत्थापितेत्यर्थः सप्रभा शक्तिः युगान्तोल्केव नभः प्रज्वालयामास॥६६॥

---

१ मध्ये जग्राहेति गो. पाठः । २ नादस्येति गो. पाठः । ३ सद्य इति गो. रा. पाठः । ४ समाकुलमिति गो. रा. पाठः । ५ महाशूल इति गो. पाठः । ६ क्रोधमाहरदिति गो. रा. पाठः । ७ निर्मितामिति गो. पा. । ८ हतेति गो. पाठः ।

निर्बिभेद ततो बाणैर्हयानस्य महाजवान् । रामः [1]क्षिप्रैर्महावेगैर्बाणैर्वज्रिरजिह्मगैः ॥ ६७ ॥
निर्बिभेदोरसि तदा रावणं निशितैः शरैः । राघवः परमायत्तो ललाटे त्रिभिरित्रिभिः ॥ ६८ ॥
स शरैर्भिन्नसर्वाङ्गो गात्रप्रस्रुतशोणितः । राक्षसेन्द्रसमूहस्थः फुल्लाशोक इवाबभौ ॥ ६९ ॥
स रामबाणैरतिविद्धगात्रो निशाचरेन्द्रः क्षतजार्द्रगात्रः ।
जगाम खेदं च समाजमध्ये क्रोधं च चक्रे सुभृशं तदानीम् ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्व्यधिकशततमः सर्गः ॥ १०२ ॥

त्र्यधिकशततमः सर्गः ।

परमक्रुद्धेन रावणेन बाणजालैरविद्धोऽपि काकुत्स्थोऽहं मन्द मया विरहितां जानकीमसंबाध्यात्मानं शूरं मन्यसे नहीदं वीरकृत्यमद्य सङ्ग्रामशीर्षबाणवेगं वेद्मीति निर्भर्त्स्य शरजालभिन्नगात्रमकरोत्तम् सूतस्तथाविधं प्रतिकर्तुमशक्तं तं वीक्ष्य रथमन्यत्रानयत् ।

स तु तेन तदा क्रोधात्काकुत्स्थेनार्दितो भृशम् । रावणः समरश्लाघी महाक्रोधमुपागमत् ॥ १ ॥
स दीप्तनयनोऽमर्षाच्चापमुद्यम्य वीर्यवान् । अभ्यर्दयत्सुसंक्रुद्धो राघवं परमाहवे ॥ २ ॥
बाणधारासहस्रैस्तु सतोयद इवाम्बरात् । राघवं रावणो बाणैस्तटाकमिव पूरयन् ॥ ३ ॥
पूरितः शरजालेन धनुर्मुक्तेन संयुगे । महागिरिरिवाकम्प्यः काकुत्स्थो न प्रकम्पते ॥ ४ ॥
स शरैः शरजालानि वारयन्समरे स्थितः । गभस्तीनिव सूर्यस्य प्रतिजग्राह वीर्यवान् ॥ ५ ॥
ततः शरसहस्राणि क्षिप्रहस्तो निशाचरः । निजघानोरसि क्रुद्धो राघवस्य महात्मनः ॥ ६ ॥
स शोणितसमादिग्धः समरे लक्ष्मणाग्रजः । दृष्टः फुल्ल इवारण्ये सुमहान्किंशुकद्रुमः ॥ ७ ॥
शराभिघातसंरब्धः सोऽभिनग्राह सायकान् । काकुत्स्थः सुमहातेजा युगान्तादित्यवर्चसः ॥ ८ ॥

रा० टी०–संवृति । क्षिप्रा सा शक्तिः राक्षसेन्द्रस्य शूले पपात अत एव शक्त्या भिन्नः अत एव गतयुतिः शूलो निपपात ॥६७॥

६७–६८] ति० टी०–बाणवृद्धिः शब्दायमानैः ॥६७॥६८॥

रा० टी०–निर्बिभेदेति । ततोऽनन्तरमस्य रावणस्य हयान् रामः तीक्ष्णबाणैर्निर्बिभेद ॥ ६८ ॥

गो० टी०–निर्बिभेदेति । बाणैः शब्दायमानैः । "अण, बाणशब्दे" इत्यस्मात् पचाद्यच् (३) । बाणशब्दः शरभेदसंज्ञेत्यप्याहुः ॥ ६८ ॥

रा० टी०–निर्बिभेदेति । ततो परमायत्तो राघवः रावणं त्रिभिः पञ्चभिः शरैरुरसि ललाटे च निर्बिभेद ॥ ६९ ॥

गो० टी०–निर्बिभेदोरसि तत इति । पत्त्रिभिस्त्रिभिरिति प्रयोगभेदात् पुनरुक्तिः । पत्त्रिभिः । पत्त्रवद्भिरित्यर्थः ॥३०॥

६९–७०]ति०टी०–गात्रेभ्यः प्रस्रुतं शोणितं यस्य सः । समूहस्थः समूहतया स्थितः । बहुशिरःपाणित्वात्तथात्वम् ६९॥७०

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्र्यधिकशततमः सर्गः ॥ १०२॥

रा० टी०–स इति । शरैर्भिन्नसर्वाङ्गः समूहस्थः राक्षससमुदाये स्थितः स रावणः फुल्लाशोक इवाबभौ ॥ ७० ॥

गो० टी०–स इति । समूहस्थः ॥ ३१ ॥

रा० टी०–स इति । रामबाणैरतिविद्धानि गात्राणि यस्य अत एव क्षतजेन रुधिरेण आर्द्राणि गात्राणि यस्य स तथोक्तः । आजेः संग्रामस्य मध्ये खेदं जगाम क्रोधं च चक्रे ॥७१॥

इति श्रीमद्गोविन्दराजविरचिते श्रीरामायणभूषणे रत्नाकरीटीकाख्याने युद्धकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

गो० टी०–स रामबाणैरिति । समाजे युद्धे ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नाकरीटीकाख्याने युद्धकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

१–२] ति० टी०–स तु तेनेति ॥ १ ॥ २ ॥

रा० टी०–रावणस्य रामबाणखेदानन्तरकालिकं वृत्तान्तमाह—स इत्यादिभिः । काकुत्स्थेनार्दितो रावणः महाक्रोधमुपागमत् ॥ १ ॥

रा० टी०–स इति । दीप्तनयनो रावणः चापमुद्यम्य राघवमभ्यधावत् ॥ २ ॥

गो० टी०–अथ श्रान्तस्य रावणस्य सूतेन रथापवाहनं पञ्चशततमे–स तु तेनेत्यादि ॥ १ ॥ २ ॥

३–८] ति० टी०–अम्बरात्पतिताभिर्धाराभिस्तोयदस्तटाकमिव स रावणो राघवं बाणधारासहस्रैः पूरयन् । अभ्यर्दयदिति शेषः ॥ ३–८ ॥

---

१ तीक्ष्णैरिति गो. पाठः । २ वज्रकल्पैः शितैः शरैरिति गो. पाठः । ३ उरसि तत इति गो. उरसि तदेति रा. पा. । ४ तेन क्षिति गो. पाठः । ५ रणे इति गो. पाठः । ६ आयम्येति गो. पाठः । ७ तीरैरिति गो. पाठः । ८ अपीति गो. पाठः । ९ तेजस इति गो. पा. ।

ततोऽन्योन्यं सुसंरब्धौ तावुभौ रामरावणौ । शरान्धकारे समरे नोपलक्षयतां तदा ॥ ९ ॥
ततः क्रोधसमाविष्टो रामो दशरथात्मजः । उवाच रावणं वीरः प्रहस्य परुषं वचः ॥ १० ॥
मम भार्यां जनस्थानादज्ञानाद्राक्षसाधम । हृता ते विदशा यस्मात्तस्मात्त्वं नासि वीर्यवान् ॥ ११ ॥
मया विरहितां दीनां वर्तमानां महावने । वैदेहीं प्रसभं हृत्वा शूरोऽहमिति मन्यसे ॥ १२ ॥
स्त्रीषु शूर विनाथासु परदाराभिमर्शनम् । कृत्वा कापुरुषं कर्म शूरोऽहमिति मन्यसे ॥ १३ ॥
भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित । दर्पान्मृत्युमुपादाय शूरोऽहमिति मन्यसे ॥ १४ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च । श्लाघनीयं महत्कर्म यशस्यं च कृतं त्वया ॥ १५ ॥
उत्सेकेनाभिपन्नस्य गर्हितस्याहितस्य च । कर्मणः प्राप्नुहीदानीं तस्याद्य सुमहत्फलम् ॥ १६ ॥
शूरोऽहमिति चात्मानमवगच्छसि दुर्मते । नैव लज्जासि ते सीतां चौरवद्व्यपकर्षतः ॥ १७ ॥

रा० टी०–बाणेति । बाणधारासहस्रैः बाणसदृशबहुधाराभिः तटाकं पूरयन् तोयद इव रावणो बाणैः राघवं पूरयन्नेवावर्ततेति शेषः एक इव एवार्थे ॥ ३ ॥

रा० टी०–पूरित इति । धनुर्मुक्तेन रावणचाप-मुक्तेन शरजालेन पूरितोऽपि काकुत्स्थः अकम्प्यो महागिरिरिव न प्रकम्पते ॥ ४ ॥

रा० टी०–स इति । स रावणः शरैश्शरजालानि वारयन् वारयितुं सूर्यस्य गभस्तीन् किरणानिव प्रतिजग्राह शरानिति शेषः ॥ ६ ॥

रा० टी०–तत इति । निशाचरः राघवस्योरसि शरसहस्राणि निजघान ॥ ६ ॥

रा० टी०–स इति । शोणितेन क्रोधहेतुकारुण्येन समादिग्धो व्याप्तो लक्ष्मणोयत्रः कृष्टः किंशुकद्रुम इव दृष्टः ॥ ७ ॥

रा० टी०–शरैरिति । शराभिघातेन संरब्ध उपात्तकोपस्मरामः सायकान् अभिजग्राह ॥ ८ ॥

गो० टी०–बाणधारेति । बाणधारासहस्रैः हेतुभिः, तोयद इव रावणः नैः धारारूपैः बाणैः, तटाकमिव रामं पूरयत अपूरयत् ॥ ३–८ ॥

९] ति० टी०–अन्योन्यं नोपलक्षयतामित्यन्वयः ॥ ९ ॥

रा० टी०–तत इति । सुसंरब्धौ रामरावणौ अत एव अन्धकारो यस्मिन् तस्मिन् समरे अन्योन्यं नोपलक्षयतामुपालक्ष्येताम् ॥ ९ ॥

गो० टी०–तत इति । अन्योन्यं नोपालक्षयतामित्यन्वयः ॥ ९ ॥ १० ॥

१०] ति० टी०–प्रहस्येति । कोपविकारजोऽयं प्रहासः १०

रा० टी०–तत इति । रामः रावणं परुषमुवाच ॥१०॥

११–१२] ति० टी०–अज्ञानादविवेकान्मत्स्वरूपाज्ञानाच्च तस्मात्त्वं वीर्यवान्नासि च । मत्क्रोधदीपकेन तेन पापेन शीघ्रं विनङ्क्ष्यसीत्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–तदाकारमाह–मयेत्यादिभिः । अज्ञानात् मम परोक्षमविषयकज्ञानराहित्यादेतोः विदशा अतिक्रान्तमर्यादा मम भार्या जनस्थाने त्वया हृता चोरिता तस्मात् त्वं वीर्यवान्नासि ॥ ११ ॥

रा० टी०–मयेति । वैदेहीं हृत्वा प्रसभं स्वहठात् शूरोऽहमिति मन्यसे ॥ १२ ॥

रा० टी०–मर्मेति । मम अज्ञानात् प्रमादर्शनात्, त्वदविवेकादिति वा । ते त्वया ॥ ११ ॥ १२ ॥

१३–१४] ति० टी०–विनाथासु पतिसंरक्षियानरहितासु स्त्रीषु एतत्कर्मैकपुरुषस्य तव परदाराणामभिमर्शनं केशस्पर्शादिकापुरुषकर्म कृत्वा शूरोऽहमिति मन्यसे ॥ १३ ॥

रा० टी०–भिन्नेति । मृत्युं मृत्युहेतुभूतपरस्त्रियमुपादाय शूरोऽस्मीति मन्यसे ॥ १४ ॥

गो० टी०–स्त्रीष्विति । कापुरुषं कापुरुषसंबन्धि १३–१४

१५] ति० टी०–श्लाघनीयं यशस्यं च महत्कर्म कृतं त्वया । इति व्यङ्ग्योक्तिः ॥ १५ ॥

रा० टी०–शूरेणेति । धनदभ्रात्रा त्वया शूरेण श्लाघनीयं महत् कर्म कृतम् विपरीतलक्षणया निन्दैव अद्य कृतमित्याहितयोः सिद्ध त्वया यशस्यं कर्म कृतं किम् ॥ १५ ॥

गो० टी०–शूरेणेत्यादि । सोपहासोक्तिः ॥ १५ ॥

१६–१७] ति० टी०–तदेव स्पष्टमाह–उत्सेकेनेति । गर्वेणाभिपन्नस्यानुन्नितस्य । अहितस्येहामुत्रानर्थरूपस्य १६–१७

रा० टी०–उत्सेकेनेति । उत्सेकेन गर्वेण अभिपन्नस्य कृतस्य गर्हितस्य कर्मणः सुमहत् फलं प्राप्नुहि ॥ १६ ॥

रा० टी०–शूर इति । चौरवत् सीतां व्यपकर्षतस्ते लज्जा नैवास्ति अत एव शूरोऽहमित्यवगच्छसि जानासि ॥१७॥

गो० टी०–उत्सेकेनेति । उत्सेकेन गर्वेण ॥ १६–१९ ॥

---

१ उभौ तावितिं गो. पाठः । २ अभिनशकेति गो. रा. पाठः । ३ यशस्यं च कृतं कर्म महत्त्वेवात गो. पाठः ।

यदिमत्संनिधौ सीता धर्षिता स्यात्त्वया बलात् । भ्रातरं तु स्वरं पश्येस्तदा मत्सायकैर्हतः ॥ १८ ॥
दिष्ट्यासि मम मन्दात्मंश्चक्षुर्विषयमागतः । अद्य त्वां सायकैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १९ ॥
अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम् । क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु ॥ २० ॥
निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण । पिबन्तु रुधिरं तर्षाद्बाणशल्यान्तरोत्थितम् ॥ २१ ॥
अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते । कर्षन्त्वन्त्राणि पतगा गरुत्मन्त इवोरगान् ॥ २२ ॥
इत्येवं स वदन्वीरो रामः शत्रुनिबर्हणः । राक्षसेन्द्रं समीपस्थं शरवर्षैरवाकिरत् ॥ २३ ॥
बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे । रामस्यास्त्रबलं चैव शत्रोर्निधनकांक्षिणः ॥ २४ ॥
प्रादुर्बभूवुरस्त्राणि सर्वाणि विदितात्मनः । प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोऽभवत् ॥ २५ ॥
शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः । भूय एवार्दयद्रामो रावणं राक्षसान्तकृत् ॥ २६ ॥
हरीणां चाश्मनिकरैः शरवर्षैश्च राघवात् । हन्यमानो दशग्रीवो विघूर्णहृदयोऽभवत् ॥ २७ ॥
यदा च शस्त्रं नारेभे न चकर्ष शरासनम् । नास्य प्रत्यकरोद्वीर्यं विक्लवेनान्तरात्मना ॥ २८ ॥

१८-२०] ति० टी०-तदा तदैव ॥ १८-२० ॥

रा० टी०-यदीति । त्वया मत्सन्निधौ सीता धर्षिता यदि स्यात् तदा मत्सायकैर्हतस्त्वं भ्रातरं स्वरं पश्येः ॥ १८ ॥

रा० टी०-दिष्ट्येति । यमसादनं नेमिनां स्थानं नयामि ॥ १९ ॥

रा० टी०-अद्येति । मच्छरैः छिन्नमत एव रणपांसुषु विकीर्णं ते शिरः क्रव्यादा व्यपकर्षन्तु ॥ २० ॥

गो० टी०-अद्य त इति । शिरो ज्वलितकुण्डलमित्यनेन तदानीमन्तकाले रावण एकशिरस्कः स्थित इति गम्यते ॥२०॥

२१-२३] ति० टी०-तर्षात्पिपासया । बाणशल्यान्तरोत्थितं बाणानां यानि शल्यानि तत्कृतादन्तराच्छिद्रादुत्थितम् ॥ २१-२३ ॥

रा० टी०-निपत्येति । क्षितौ क्षिप्तस्य ते उरसि गृध्रा निपत्य बाणशल्येन अयोमयबाणाग्रभागेन कृतात् अन्तरात् छिद्रादुत्थितं रुधिरं पिबन्तु ॥ २१ ॥

रा० टी०-अद्येति । मद्बाणभिन्नस्य ते अन्त्राणि गरुत्मन्त उरगानिव पतगा. गृध्रादयः कर्षन्तु ॥ २२ ॥

रा० टी०-इतीति । रामः राक्षसेन्द्रं शरवर्षैरवाकिरत् २३

गो० टी०-निपत्येति । तर्षः पिपासा । शरशल्यान्तरोत्थितं शरशल्यक्षतविवरादुत्थितमित्यर्थः ॥ २१-२६ ॥

२४] ति० टी०-रामस्य वीर्यादि द्विगुणं बभूव । अपकारस्मरणादिति शेषः ॥ २४ ॥

रा० टी०-बभूवेति । शत्रोर्निधनकांक्षिणो रामस्य वीर्यादि द्विगुणमधिकत्वेन प्रतीयमानं बभूव ॥ २४ ॥

२५] ति० टी०-अस्त्राणि प्रादुर्बभूवुरस्त्रदेवताः संनिहिता अभूवन् । प्रहर्षादस्त्रदेवतासंनिधिजात् ॥ २५ ॥

रा० टी०-प्रादुरिति । विदितात्मनो रामस्य अस्त्राणि प्रादुर्बभूवुः रामस्तु हर्षात् युद्धोत्साहजनितानन्दात् शीघ्रहस्ततरोऽभवत् ॥ २५ ॥

२६] ति० टी०-भूयोऽभ्यधिकम् ॥ २६ ॥

रा० टी०-शुभानीति । शुभानि शुभसूचकानि आत्मगतानि एतानि वीर्याधिक्यादीनि चिन्हानि रामो विज्ञाय रावणं भूयोऽभ्यदर्यत् ॥ २६ ॥

२७] ति० टी०-राघवाद्राघवस्य राघवोत्सुकादिति यावत् विघूर्णहृदयो विक्लवहृदयः ॥ २७ ॥

रा० टी०-हरीणामिति । हरीणामश्मनिकरैः राघवात् राघवस्य शरवर्षैश्च हन्यमानो दशग्रीवः विघूर्णहृदयोऽभवत्॥२७॥

गो० टी०-हरीणां चेति । राघवात् राघवस्य । निर्भक्तिकत्वयय आर्षः । विघूर्णहृदयः भ्रान्तहृदयः ॥ २७ ॥

२८] ति० टी०-विक्लवेन विसंज्ञेनान्तरात्मना यदा वीर्यं तत्कार्यं नारेभे. शस्त्रं शस्त्रप्रयोगं च नारेभे, तदा रामोऽस्य न प्रत्यकरोत् । संहाराय नातिप्रहितवान् इति भावः ॥ २८ ॥

रा० टी०-यदेति । यदा विक्लवेन अन्तरात्मना उपलक्षितो रावणः शस्त्रं तत्प्रयोगं नारेभे अत एव शरासनं न चकर्ष तदा अस्य रावणस्योपरि वीर्यं तद्धेतुकशरप्रक्षेपादि न प्रत्यकरोत् राम इति शेषः ॥ २८ ॥

गो० टी०-यदा चेत्यादिश्लोकत्रयमेकान्वयम् । यदा शस्त्रं नारेभे शस्त्रं न प्रयुक्तवान् । शरासनं च न व्यकर्षत् । यदा च विक्लवेन विवशेन, अन्तरात्मना मनसा हेतुना, अस्य रामस्य वीर्यं स्ववीर्यं च न प्रत्यकरोत् न प्रतिजघान । तेन रावणेन क्षिप्ताः शरा अपि विक्रियाणि शस्त्राणि च न रणार्थाय वर्तन्ते । छेदनभेदनादिरूपप्रयोजनं कर्तुं यदा नाशक्नुवन् । तदा मृत्युकाले अभिवर्ततः अभिवर्तमानस्य, अस्य रावणस्य, रथनेता सूतः असंभ्रान्तः सन् तदवस्थं पूर्वोक्तावस्थम् रावणं समीक्ष्य तस्य रथं युद्धात् युद्धस्थलात्, शनैः अपवाहयत् अपावाहयत् । अन्यत्रानयदिति योजना २८-३० इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चोत्तरशततमः सर्गः ॥१०५॥

१ दुष्टात्मन्निति गो. पाठः । २ व्यकर्षीदिति गो. रा. पाठः ।

क्षिप्ताश्चाशु शरास्तेन शस्त्राणि विविधानि च । मरणार्थाय वर्तन्ते मृत्युकालोऽभ्यवर्तत ॥ २९ ॥
सूतस्तु रथनेतास्य तदवस्थं निरीक्ष्य तम् । शनैर्युद्धादसंभ्रान्तो रथं तस्यापवाहयत् ॥ ३० ॥
रथं च तस्याथ जवेन सारथिर्निवार्य भीमं जलदस्वनं तदा ।
जगाम भीत्या समरान्महीपतिं निरस्तवीर्यं पतितं समीक्ष्य ॥ ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्र्यधिकशततमः सर्गः ॥ १०३ ॥

चतुरधिकशततमः सर्गः ।

रावणो लब्धसंज्ञोऽन्यत्रामरथं वीक्षमाणः क्रोधेनापि मन्यसे मां कातरमन्यथा कुतोऽयमपवाहितो रथस्त्वयेत्यादिदुर्वचनैः सूतं तर्जयांचक्रे तथाभिहितेन सारथिना रथान् श्रान्तानवेक्ष्य तत्खेदं परिजिहीर्षता मयेदमकारि न तु भीत्येवेनमुक्तः स प्रशस्य हस्ताभरणमर्पितवान् ततो रावणादिष्टः सूतोऽचिरात्स्यन्दनं रामाभिमुखमकरोत् ।

स तु मोहात्समुसंक्रुद्धः कृतान्तबलचोदितः । क्रोधसंरक्तनयनो रावणः सूतमब्रवीत् ॥ १ ॥
हीनवीर्यमिवाशक्तं पौरुषेण विवर्जितम् । भीरुं लघुमिवासत्त्वं विहीनमिव तेजसा ॥ २ ॥
विमुक्तमिव मायाभिरस्त्रैरिव बहिष्कृतम् । मामवज्ञाय दुर्बुद्धे त्वया बुध्या विचेष्टसे ॥ ३ ॥
किमर्थं मामवज्ञाय मच्छन्दमनवेक्ष्य च । त्वया शत्रुसमक्षं मे रथोऽयमपवाहितः ॥ ४ ॥

२९] ति० टी०–अपि तु मूर्च्छातः प्रागेव क्षिप्ताः शरा अस्य रावणस्य मरणार्थाय मरणरूपप्रयोजनाय प्रवर्तन्ते स्म एवमस्य मृत्युकालोऽभ्यवर्ततोपस्थितः ॥ २९ ॥

रा० टी०–क्षिप्ता इति । यानि मरणार्थाय वर्तन्ते तानि शराः शस्त्राणि च क्षिप्ताः रामेणेति शेषः अतः मृत्युकालोऽभ्यवर्तत रावणस्येति शेषः ॥ २९ ॥

३०–३१] ति० टी०–मृत्युकाल उपस्थितस्य रथं सूतोऽपवाहयत् ॥ ३० ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीयआदि-
काव्ये युद्धकाण्डे त्र्यधिकशततमः सर्गः ॥ १०३ ॥

रा० टी०–सूत इति । अस्य रावणस्य सूतः सा चेष्टारहिता अवस्था यस्य तं रावणं निरीक्ष्य युद्धात् तस्य रावणस्य रथमपवाहयत् अपावाहयत् ॥ ३० ॥

रा० टी०–रथमिति । सारथिः महीपतिं रावणं निरस्तवीर्यमत एव पतितं समीक्ष्य तस्य रावणस्य रथं निवार्य निवर्त्य जगाम रणात् बहिर्देशमिति शेषः ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे चतुरधिकशततमः सर्गः ॥ १०४ ॥

१] ति० टी०–स तु मोहादिति । शनैर्मोहेन मुक्त इति शेषः ॥ १ ॥

रा० टी०–सूतकर्तृकरथापवाहनानन्तरकालिकं कृतान्तमाह—स इत्यादिभिः । कृतान्तस्य कालस्य बलेन चोदितः आसन्नमरणकाल इत्यर्थः अत एव मोहात् संक्रुद्धो रावणः सूतमब्रवीत् ॥ १ ॥

गो० टी०–अथ रावणस्यप्रत्यानयनम् षट्शततमे—स तु मोहादित्यादि । मोहात् अविवेकात् ॥ १ ॥

२] ति० टी०–हीनवीर्यं हीनबलम् अशक्तमस्त्रादिप्रयोगसामर्थ्यहीनम् । लघुमल्पचित्तम् असत्त्वमधीरम् तेजः पराभिभवसामर्थ्यम् ॥ २ ॥

३] ति० टी०–अवज्ञायावमत्य । स्वबुद्ध्या स्वेच्छया ॥ ३ ॥

रा० टी०–तदाकारमाह—हीनेत्यादिभिः । हीनवीर्यं बलरहितमिव अशक्तं सामर्थ्यरहितमिव पौरुषेण पुरुषधर्मेण विवर्जितं विप्रमित्यर्थः अत एव भीरुमिव अत एव लघुं क्षुद्रमिव अत एव तेजसा विहीनमिव अत एव असत्त्वं सत्त्वरहितमिव मायाभिर्विनिर्मुक्तमिव अस्त्रैः बहिष्कृतमिव मामवज्ञाय अनादृत्य बुध्या स्वमत्या विचेष्टसे स्वेच्छयैवमेकान्वयि॥२॥३॥

गो० टी०–हीनवीर्यमित्येत्यादिश्लोकद्वयमेकान्वयम् । यत्र यत्र इव शब्दो नास्ति तत्रानुषङ्गनीयः । हीनवीर्यमिव हीनबलमिव अशक्तमिव निरुत्साहमिव असत्त्वमिव अधीरमिव । तेजसा पराभिभवसहनेन ॥ २ ॥ ३ ॥

४] ति० टी०–मच्छन्दं मदभिप्रायम् ॥ ४ ॥

रा० टी०–किमर्थमिति । मामवज्ञाय अत एव छन्दं मदभिप्रायमनवेक्ष्य शत्रुसमक्षं वध्यमानो मे रथः त्वया किमर्थमपवाहितः ॥ ४ ॥

गो० टी०–किमर्थमिति । मच्छन्दं मदभिप्रायम् वशाभिप्रायश्छन्द इत्यमरः ॥ ४ ॥

---

१ अपीति गो. रा.पाठः । २ कालेऽभिवर्तत इति गो. पाठः । ३ समिति गो. पाठः । ४ इदं पद्यं गो. पुस्तके नास्ति । ५ शत्रोरिति गो. पाठः ।

त्वयाद्य हि ममानार्य चिरकालमुपार्जितम् । यशो वीर्यं च तेजश्च प्रत्ययश्च विनाशितः ॥ ५ ॥
शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः । पश्यतो युद्धलुब्धोऽहं कृतः कापुरुषस्त्वया ॥ ६ ॥
यैस्त्वं कथमिदं मोहान्न चेद्वहसि दुर्मते । सत्योऽयं प्रतितर्को मे परेण त्वमुपस्कृतः ॥ ७ ॥
नहि तद्विद्यते कर्म सुहृदो हितकाङ्क्षिणः । रिपूणां सदृशं त्वैतद्यत्त्वयैतदनुष्ठितम् ॥ ८ ॥
निवर्तय रथं शीघ्रं यावन्नोपैति मे रिपुः । यदि वाध्युषितोऽसि त्वं स्मर्यते यदि मे गुणैः ९ ॥
एवं परुषमुक्तस्तु हितबुद्धिरबुद्धिना । अब्रवीद्रावणं सूतो हितं सानुनयं वचः ॥ १० ॥
न भीतोऽस्मि न मूढोऽस्मि नोपजप्तोऽस्मि शत्रुभिः । न प्रमत्तो न निःस्नेहो विस्मृता न च सत्क्रिया ॥ ११ ॥
मया तु हितकामेन यशश्च परिरक्षता । स्नेहप्रसन्नमनसा हितमित्यप्रियं कृतम् ॥ १२ ॥
नास्मिन्नर्थे महाराज त्वं मां प्रियहिते रतम् । कश्चिल्लघुरिवानार्यो दोषतो गन्तुमर्हसि ॥ १३ ॥

५] ति० टी०–प्रत्ययो महिषयो लोकस्य शरत्व-विश्वासः ॥ ५ ॥

रा० टी०–त्वयेति । अथ रथापवाहनसमये त्वया मम-यश.प्रभृतिर्विनाशितः तव प्रत्ययः अयं महाशूर इति विश्वासः ॥ ५ ॥

गो० टी०–त्वयेति । प्रत्ययः रावणस्य युधि पलायनं नास्तीति सर्वेषां विश्वासः । विनाशित इत्यस्य यश आदिषु लिङ्गविपरिणामः ॥ ५ ॥

६] ति० टी०–शत्रोः पश्यतः सतस्त्वयाहं कापुरुषः कु-त्सितपुरुषः कृतः ॥ ६ ॥

रा० टी०–शत्रोरिति । विक्रमैर्मया रञ्जनीयस्य शत्रोः प-श्यतः युद्धलुब्धः अतियुद्धाभिलाषी अहं त्वया कापुरुषः कृतः ६

गो०टी०–शत्रोरिति । शत्रोः पश्यतः शत्रौ पश्यति ॥६॥

७] ति० टी०–यत्यतस्त्वमिमं रथं कथमपि चेन्नोद्वहसि मोहादप्यज्ञानादपि शत्रोरभिमुखं न प्रापयसि, स त्वं परेणो-पस्कृत उत्कोचेन विकारं प्रापित इत्येवं मे प्रतितर्कः सत्यः । उपाद्वैकृतेऽर्थे करोतेः क्षुद् ॥ ७ ॥

रा० टी०–यदिति । च यदि मोहात् मोहं प्राप्य कथमपि इमं रथं यस्मात् नोद्वहसि तदा तस्मात् परेण रिपुणा त्वमु-पस्कृतः उत्कोचादिना वशं प्रापितः इति प्रतितर्कः सत्यः ॥७॥

गो० टी०–य इति । यः नोद्वहसि अभिमुखं न प्राप-यसि, किं त्वपवाहयसि स त्वम् उपस्कृतः परेणोत्कोचा-दिना वशीकृत इत्यं प्रतितर्कः सत्यः प्रतिभाति ॥ ७ ॥

८] ति० टी०–नहि तत्त्वदनुष्ठितं कर्म सुहृदो विद्यते भ-वति । यत्त्वयानुष्ठितं तथापवाहनकर्मेत्यर्थः ॥ ८ ॥

रा० टी०–नेति । यदेतत् कर्म त्वयानुष्ठितं तत् रिपूणां सदृशं हि अत एव सुहृदः एतत् कर्म न विद्यते ॥ ८ ॥

गो० टी०–न हीति । न त्वयैतत् स्वनुष्ठितमिति । त्व-यानुष्ठितमेतत् न तु स्वनुष्ठितं तत् ॥ ८ ॥

९] ति० टी०–अध्युषितश्चिरकाले मत्समीपे स्थितः[१] मे गुणः । मत्कृतोपकार इत्यर्थः ॥ ९ ॥

रा० टी०–निवर्तयेति । यदि त्वमध्युषितः चिरं मत्स-मीपे स्थितोसि अत एव यदि मे गुणास्त्वया स्मर्यन्ते तदा या-वत् मे रिपुर्नायैति अपगच्छति तावदेव मे रथं निवर्तय ॥९॥

गो० टी०–निवर्तयेति । अध्युषितः सहवासी सुहृ-दिति यावत् उपचयोपसर्गितो वा । गुणाः सत्काराः ॥ ९ ॥

१०] ति० टी०–हितबुद्धिः सूतः ॥ १० ॥

रा० टी०–एवमिति । अबुद्धिना एवं परुषमुक्तस्तु सानुनयं हितं वचोऽब्रवीत् ॥ १० ॥

गो० टी०–एवमिति ॥ १० ॥

११] ति० टी०–नोपजप्त उपजापं भेदं न प्रापितः । सत्क्रिया । त्वत्कृतेति शेषः ॥ ११ ॥

रा० टी०–तदाकारमाह—नेत्यादिभिः । अहं भीत-त्वादिविशिष्टो न तत्रोपजप्तः उत्कोचादिना रिपुवशं प्राप्तः॥ ११॥

गो० टी०–न भीतोस्मीति । नोपजप्तः उपजापं भेदं न गमितः भेदोपजापावित्यमरः ॥ ११ ॥ १२ ॥

१२] ति० टी०–यशश्च परिरक्षता जीवनरक्षणेना-स्मीयं त्वदीयं च यशो रक्षतेत्यर्थः । स्नेहप्रसन्नमनसा स्नेहार्द्र-हृदयेन । रथापवाहनं शरत्वात्त्वाप्रियमपि हितमिति निश्चित्य कृतम् ॥ १२ ॥

रा० टी०–अपवाहने हेतुमाह—मयेति । यशः तव स्वस्यापि यशःकारणीभूतजीवनं परिरक्षता अत एव हितकामेन स्नेहेन प्रसन्नं युक्तं मनो यस्य तेन मया अप्रियम् भवत्प्रीत्यविषयीभूतमितीदं हितमेव कृतम् ॥ १२ ॥

१३] ति० टी०–अस्मिन्नर्थे युद्धादपोहनरूपे कार्ये-ऽनार्यो लघुरिवाविमृश्यकारी क्षुद्र इव दोषतो गन्तुं दोषवत्त्वेन ज्ञातुं नार्हसीत्यर्थः ॥ १३ ॥

रा० टी०–नेति । प्रियहिते रतं मामस्मिन् अपवाह-

१ समार्जितमिति गो. रा. पाठः । २ यस्तं रथमिममिति गो. पाठः । ३ चैतदिति गो. रा. पाठः । ४ न त्वयैतत्स्वनुष्ठितमिति गो.पाठः । ५ उपै-तीति गो. रा. पाठः । ६ वासीति गो. पाठः । ७ स्मर्यन्ते इति गो. रा. पाठः । ८ वेति गो. पाठः । ९ गुणा इति गो. रा. पाठः । १० प्रस्कन्नेति गो. पाठः । ११ प्रियमिति गो. पाठः ।

श्रूयतां प्रेति दास्यामि यन्निमित्तं मया रथः । नदीवेग इवाम्भोभिः संयुगे विनिवर्तितः ॥ १४ ॥
श्रमं तवावगच्छामि महता रणकर्मणा । नहि ते वीर्यसौमुख्यं प्रकर्षे नोपधारये ॥ १५ ॥
रथोद्वहनखिन्नाश्च भग्नो मे रथवाजिनः । दीना घर्मपरिश्रान्ता गावो वर्षहता इव ॥ १६ ॥
निमित्तानि च भूयिष्ठं यानि प्रादुर्भवन्ति नः । तेषु तेष्वभिपक्वेषु लक्षयाम्यप्रदक्षिणम् ॥ १७ ॥
देशकालौ च विज्ञेयौ लक्षणानीङ्गितानि च । दैन्यं हर्षश्च खेदश्च रथिनश्च महाबलैः ॥ १८ ॥
स्थलनिम्नानि भूमेश्च समानि विषमाणि च । युद्धकालश्च विज्ञेयः परस्यान्तरदर्शनम् ॥ १९ ॥
उपयानापयाने च स्थानं प्रत्यपसर्पणम् । सर्वमेतद्रथस्थेन ज्ञेयं रथकुटुम्बिना ॥ २० ॥

नरकर्मण्ये लघुः क्षुद्रः अत एव अनार्यः आर्यमार्गविरोधीत्वं दोषतः दोषवत्तया अवगन्तुं नार्हसि ॥ १३ ॥

गो० टी०-नेति । अस्मिन्नर्थे स्थापयाहनरकर्मण्ये, कथिन् कुत्रापि कुले जातः, लघुः अल्पबुद्धिः, अनार्यः दुष्टहृदय इव मां दोषतः गन्तुं ज्ञातुं नार्हसि । गत्यर्था ज्ञानार्थाः ॥ १३ ॥

१४] ति० टी०-कृतस्तवाह—श्रूयतामिति । यदुत्तरं प्रतिदास्यामि तच्छ्रूयताम् । यन्निमित्तं रथो विवर्तितस्तच्च श्रूयताम् । रथो रथवेगः चन्द्रोदयेन प्रवृद्धसमुद्रास्भोभिर्नदीवेग इव संयुगे संयुगाद्विवर्तितः ॥ १४ ॥

रा० टी०-श्रूयतामिति । यन्निमित्तमम्भोभिर्नदीवेग इव रथो विनिवर्तितः तन्निमित्तं प्रतिदास्यामि कथयिष्यामीत्यर्थः त्वया श्रूयताम् ॥ १४ ॥

गो० टी०-श्रूयतामिति । यन्निमित्तं यत्कारणात् " निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् " इति प्रमरः । नदीवेगः । आभोगे उन्नतप्रदेशे आभोगाद्विवेग इव रथः संयुगाद्विनिवर्तित इत्यर्थः । आभोगे संयुग इत्यत्र विभक्तिव्यत्ययः ॥ १४ ॥

१५-१६] ति० टी०-रणकर्मणा युद्धेन । वीर्यसौमुख्यं वीर्यकार्यं प्रति सौमुख्यं वीर्यसौमुख्यम् । प्रकर्षे शत्रोरपेक्षयाधिक्यम् । प्रहारम्' इति पाठे शत्रुविषयकमित्यर्थः॥१५॥

रा० टी०-कथनाकारमाह—श्रममित्यादिभिः । महता रणकर्मणा तव श्रममवगच्छामि अजानामत एव वीर्यसौमुख्यं वीर्यस्य अधिकपराक्रमस्य सौमुख्यं प्राकट्यं यस्मिन् तं ते प्रकर्षं नोपधारये अपश्यम ॥ १५ ॥

गो० टी०-श्रममिति । सौमुख्यं उन्मुखत्वम तन्मूलं प्रकर्षम ॥ १५ ॥

रा० टी०-रथेति । रथोद्वहनेन खिन्नाः मे रथवाजिनो वर्षहता गाव इव भग्ना बभूवुरिति शेषः ॥ १६ ॥

गो० टी०-रथेति । अत्र आसन्निति शेषः ॥ १६ ॥

१७] ति० टी०-निमित्तानि दुर्निमित्तानि । अभिपक्वेषु-जातेष्वप्रदक्षिणं प्रतिकूलं लक्षयामीति संबन्धः ॥ १७ ॥

रा० टी०-निमित्तानीति । यानि यानि निमित्तानि प्रादुर्भवन्ति अभिपक्वेषु अवलोकितेषु तेषु तेषु निमित्तेषु भूयिष्ठमधिकमप्रदक्षिणमप्रकूलं लक्षयामि अलक्षयम ॥ १७ ॥

गो० टी०-निमित्तानि चेति । अभिपक्वेषु आविर्भूतेषु सत्सु । अप्रदक्षिणं प्रतिकूलम् ॥ १७ ॥

१८] ति० टी०-ननु सन्त्यिमानि किं तवेतद्विचारणेत्याशङ्क्याह—देशेत्यादिना । लक्षणानि शुभाशुभनिमित्तानि । इङ्गितानि मुखप्रसादवैमुख्यादिचेष्टाः । दैन्यमनुत्साहः ॥ १८॥

रा० टी०-ननु दर्शनेन तव किमित्यत आह—देशेति । रथिनः देशकालौ विज्ञेयौ लक्षणादीनि च विज्ञेयानि सारथिना ज्ञातव्यानि एतेन सारथिना रथिनो हितमेव कर्तव्यमिति सूचितम ॥ १८ ॥

गो० टी०-निमित्तानि किमर्थं त्वया विचारणीयानीत्यतआह—देशेत्यादिना । लोकत्रयमेकान्वयम । लक्षणानि शुभाशुभनिमित्तानि इङ्गितानि मुखप्रसादवैमुख्यादीनि दैन्यम अनुत्साहः । स्थलानि स्थलप्रदेशाः । निम्नानि अवनतप्रदेशाः समानि सर्वत्र समप्रदेशाः विषमाणि निम्नोन्नतप्रदेशाः । युद्धकाल इति पूर्वोक्तानुवादः । अन्तरदर्शनं, इदृशत इति दर्शनं, द्रष्टव्यम् । द्रष्टव्यं रन्ध्रमित्यर्थः । अन्तरदर्शं रन्ध्रदर्शनम कर्तव्यमित्यध्याहारो वा । उपयानं समीपगमनम अपयानं पार्श्वतो गमनम् स्थानं स्थैर्येणावस्थानम प्रत्यपसर्पणम् अभिमुखस्थित्या पृष्ठतोऽपसरणम् । रथकुटुम्बिना सारथिना ॥ १८-२० ॥

१९] ति० टी०-स्थले समम । निम्नं नीचम । तस्यैव विवरणम—समानीत्यादि । अन्तरदर्शनं प्रहाराय छिद्रदर्शनम् ॥ १९ ॥

रा० टी०-स्थलेति । भूमेः स्थलान्युन्नतानि निम्नानि अवनतानि विषमाणि उभयात्मकानि समानि च विज्ञेयानि परस्य रिपोः अन्तरदर्शनं प्रहारक्षमयत्र विज्ञेयम ॥ १९ ॥

२०] ति० टी०-उपयानापयाने रथस्य रिपुसमीपप्रापणनिवर्तने । तत्कालाविति यावत् । स्थानं स्थैर्येणावस्थानम । प्रत्यपसर्पणमभिमुखस्थितस्यैव पृष्ठतोऽपसरणं रथकुटुम्बिना रथनिर्वाहकेण सारथिना ॥ २० ॥

---

१ त्वभिधास्यामीति गो. पाठः । २ आभोगे इति गो. पाठः । ३ वीरेति गो. पाठः । ४ दोषधारये इति गो. पाठः । ५ त इमे इति गो. पा. । ६ खेदश्च हर्षश्चेति गो. पाठः । ७ बलाबलमिति गो. रा. पा. ।

तव विश्रामहेतोस्तु तथैषां रथवाजिनाम् । रौद्रं वर्जयता खेदं क्षमं कृतमिदं मया ॥ २१ ॥
स्वेच्छया[1] न मया वीर रथोऽयमपवाहितः । भर्तुः[2] स्नेहपरीतेन[3] मयेदं यत्कृतं प्रभो[4] ॥ २२ ॥
आज्ञापय यथातत्त्वं वक्ष्यस्यरिनिषूदन । तत्करिष्याम्यहं वीर गतानृण्येन चेतसा[5] ॥ २३ ॥
संतुष्टस्तेन वाक्येन रावणस्तस्य सारथेः । प्रशस्यैनं बहुविधं युद्धलुब्धोऽब्रवीदिदम् ॥ २४ ॥
रथं शीघ्रमिमं सूत राघवाभिमुखं नय । नाहत्वा समरे शत्रून्निवर्तिष्यति रावणः ॥ २५ ॥
एवमुक्त्वा रथस्थस्य रावणो राक्षसेश्वरः । ददौ तस्य शुभं ह्येकं हस्ताभरणमुत्तमम् ॥
श्रुत्वा रावणवाक्यानि सारथिः सन्यवर्तत[6] ॥ ॥ २६ ॥

ततो द्रुतं रावणवाक्यचोदितः प्रचोदयामास हयान्स सारथिः ।
स राक्षसेन्द्रस्य ततो महारथः क्षणेन रामस्य रणाग्रतोऽभवत् ॥ ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुरधिकशततमः सर्गः ॥ १०४ ॥

रा० टी०–उपेति । उपयानापयाने रिपुसमीपं रथप्रापणनिवर्तने स्थानं सम्मुखे चिरं स्थापनं प्रत्यपसर्पणं रिपुपृष्ठदेशे स्थापनं सर्वमेतत् रथकुटुम्बिना रथमात्रसेवानिरतेन रथस्थेन ज्ञेयम् ॥ २० ॥

२१] ति० टी०–रौद्रं क्रूरं खेदं वर्जयता परिहरता ॥२१॥

रा० टी०–प्रकृतमाह—तवेति । खेदं वर्जयता मया विश्रामहेतोः क्षमं युक्तमिदमपवाहनं कृतम ॥ २१ ॥

गो० टी०–तवेत्यादिसार्धश्लोक एकान्वयः । तथा वाजिनां विश्रामहेतोश्चेत्यन्वयः । रौद्रं दुःसहम् वर्जयता अपनयता हेतौ शतृप्रत्ययः । क्षमं युक्तम् । स्वेच्छया अपनयननिमित्तं विना ॥ २१–२२ ॥

२२] ति० टी०–स्वेच्छया निमित्तं विना मया यदिदं कृतं तद्भर्तृस्नेहपरीतेन तद्भयेनैव कृतम् ॥ २२ ॥

रा० टी०–स्वेच्छेति । स्वस्यैव इच्छा यस्मिन् तत् यानं गतिर्यस्य तत्संबोधनम् भर्तृस्नेहपरीतेन मया अयं रथोपवाहितः अतः कृतमिदमपवाहनं यत् अतिप्रयत्नविशिष्टम् विचारेणैव कृतमित्यर्थः ॥ २२ ॥

गो० टी०–भर्तृस्नेहेत्यर्धम् । मया यत्कृतं तदिदं भर्तृस्नेहपरीतेनैव कृतमित्यर्थः ॥ २३ ॥

२३–२६] ति० टी०–यथा त्वं तत्कार्यस्वरूपं वक्ष्यसि तत्करिष्यामि । गतानृण्येन दत्तऋणत्रयेण क्वापि मनो न बध्नतेत्यर्थः ॥ २३–२६ ॥

रा० टी०–आज्ञापयेति । त्वं यथा तत्त्वमाज्ञापय त्वं वक्ष्यसि कथयिष्यसि तत् गतं प्राप्तमानृण्यं तव रथेन ऋणाभावो यस्मिन् तेन मनसा करिष्यामि ॥ २३ ॥

गो० टी०–आज्ञापयेति । यथातत्त्वं यत् कार्यस्वरूपं वक्ष्यसि तत्तथा, गतानृण्येन आनृण्यं गतेन, आनृण्यं कर्तव्यमिति कृतसंकल्पेन, चेतसा मनसा करिष्यामि ॥२४॥२५॥

रा० टी०–सन्तुष्ट इति । सारथेर्वाक्येन संतुष्टो रावणः एनं सारथिं बहुविधं प्रशस्य युद्धलुब्धस्सन् अब्रवीत् ॥ २४ ॥

रा० टी०–तदाकारमाह–रथमिति । रथं राघवाभिमुखं नय तत्र हेतुः शत्रून् अहत्वा रावणो न निवर्तिष्यति निवर्तिष्यते ॥ २५ ॥

रा० टी०–एवमिति । रावणः एवमुक्त्वा तस्य तस्मै एकं हस्ताभरणं ददौ ॥ २६ ॥

गो० टी०–रथमिति । निवर्तिष्यति निवर्तिष्यते २६–२८

२७] ति० टी०–महारथ इति कर्मधारयः । रणाग्रतो रणेऽग्रतः । संमुख इत्यर्थः । 'रणेऽग्रतः' इति पाठान्तरम् ॥२७॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुरधिकशततमः सर्गः ॥१०४॥

रा० टी०–श्रुत्वेति । सारथिस्सन्न्यवर्तत अर्द्धं पृथक् तत इति रावणवाक्यचोदितः सारथिः हयान् प्रचोदयामास ततोऽनन्तरम् राक्षसेन्द्रस्य महारथः रामस्य रणाग्रतोऽभवत्२७

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोभूषणे युद्धकाण्डे पंचाधिकशततमः सर्गः ॥ १०५ ॥

गो० टी०–तत इति । महांश्चासौ रथश्च महारथ इति विग्रहः ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥१०६॥

---

१ चेति गो. पाठः । २ न मया स्वेच्छयेति गो. पाठः । ३ भर्तृस्नेहेति गो. रा. पाठः । ४ विभा इति गो. पाठः । ५ ततस्तुष्ट इति गो. ततो हृष्ट इति रा. पाठः । ६ वाक्यं त्विति गो. पाठः ।

पञ्चाधिकशततमः सर्गः ।

युद्धं दिदृक्षुरगस्त्यो देवैः समागम्य युद्धायाग्रतः समुपस्थितं रावणं विलोक्य चिन्ताकुलाय कौसल्येयाय सर्वशत्रुनिबर्हणं मङ्गलप्रदं चादित्यहृदयमुपदिदेश ।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् । रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् । उपगम्याब्रवीद्रामममगस्त्यो भगवांस्तदा ॥ २ ॥
राम राम महाबाहो शृणु गुह्यं सनातनम् । येन सर्वानरीन्वत्स समरे विजयिष्यसे ॥ ३ ॥
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् । जयावहं जपं नित्यमक्षयं परमं शिवम् ॥ ४ ॥

१] ति० टी०—अथ रावणवैभवं दृष्ट्वा वत्समिव भगवन्तं रामं भगवद्ब्रह्मदत्तरावणवैभवनिवर्तनमन्त्र्य भगवद्ब्रह्मानुग्रहैकसाध्यत्वात्तदनुग्रहसिद्धये विद्यामण्डलऋषिरगस्त्यो ब्रह्मरूपादित्यहृदयदेवताकत्वादादित्यहृदयाख्यं स्तोत्रमुपदिशति स्मेत्याह—**ततो युद्धेत्यादि** । अस्य स्तोत्रस्यागस्त्यऋषिरनुष्टुप्छन्दः, आदित्यहृदयभूतो भगवान्ब्रह्मा देवता, निरस्ताशेषविघ्नतया ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोगः । अस्य षडङ्गं प्रणवेन 'रश्मिमते नमः' इत्यनेन वा । गायत्र्या षडङ्गमित्यन्ये । ततो युद्धेत्यादि त्वरस्वेत्यन्तं स्तोत्रम् । एवं भयनाशनं तन्मूलकनगस्त्यादुपदेशग्रहणं लोकानुग्रहाय । लोकस्य जयसाधनवस्तुप्रकाशनार्थमिति तत्त्वम् । युद्धपरिश्रान्तमनेकाहोरात्रयुद्धपरिश्रान्तं नमित्र स्थितम् । समरे समरविषये चिन्तया प्रबलोऽयमरिः कथं जेतव्य इति चिन्तया युक्तम् । सारथिनापवाहितं रावणं प्रातर्युद्धायाग्रतो रामसंमुखे समुपस्थितं दृष्ट्वा । स्थितं धनुरवष्टभ्य स्थितं रामम् ॥ १ ॥

२] ति० टी०—दैवतैः समागम्य मिलित्वा रणं द्रष्टुमभ्यागतो भगवानगस्त्योऽन्तर्यामिभगवत्प्रेरणया देवनियोगतश्लोकविशेषणं रामसुपागम्योवति भास्करोऽब्रवीत् ॥ २ ॥

रा० टी०—रावणकर्तृकरामसम्मुखागमनानन्तरकालिकं वृत्तान्तमाह—**तत इत्यादिभिः** । ततो युद्धेत्यादि त्वरस्वेत्यन्तं स्तोत्रमिदम् अस्य स्तोत्रस्यागस्त्य ऋषिरनुष्टुप्छन्दः आदित्यहृदयभूतरामो देवता निरस्तविघ्नतया ब्रह्मविद्यासिद्धौ च सर्वत्र जयसिद्धौ च विनियोगः इति योज्यम् अस्य षडङ्गं प्रणवेन रश्मिमते नम इत्यनेन वा गायत्र्या वेति आम्नानां संप्रदायः श्लोकार्थस्तु युद्धाय युद्धं कर्तुं समुपस्थितं युद्धे पूर्वसंग्रामे परिश्रान्तमत एव चिन्तया समरे अग्रतो रामाग्रे स्थितं रावणं दृष्ट्वा रणं द्रष्टुं दैवतैर्देवैस्समागम्य संघीभूयाभ्यागतो भगवान् निखिलसामर्थ्यविशिष्टोऽगस्त्यः रामसुपागम्याब्रवीत् श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०—अथादित्यहृदयोपदेशः। **ततो युद्धपरिश्रान्तमित्यादिश्लोकद्वयमेकान्वयम्।** रणं द्रष्टुं दैवतैः समागम्य आगतः दैवतैः सहागतः अगस्त्यः, युद्धपरिश्रान्तम् उपस्थितं रावणं दृष्ट्वा कथमेनं परस्वप्रकटनं विना जेष्यामीति चिन्तया स्थितं चिन्तयन्तं च रामं दृष्ट्वा उपागम्याब्रवीत् ॥ १ ॥ २ ॥

३] ति० टी०—किमब्रवीत्तदाह—**राम रामेत्यादि** । येन स्तोत्रेण सर्वानरीन्विजेष्यसि तद्गुह्यं रहस्यम्, सनातनं प्रवाहानादिभूतम् । अनेन स्वकल्पितत्वनिरासः शृणु ॥ ३ ॥

रा० टी०—तदाकारमाह—**रामेति** । येन यत्स्तोत्रपाठजनितफलेन सर्वान् अरीन् समरे विजयिष्यसे विजेष्यसे तद्गुह्यमभक्तेष्वप्रकाश्यं सनातनं नित्यं स्तोत्रं शृणु सनातनमित्यनेनैतस्य आधुनिकत्वनिरासः ॥ ३ ॥

गो० टी०—**राम रामेत्यादिश्लोकत्रयमेकान्वयम्** । रामस्य चिन्ताविष्टत्वात् स्वादरातिशयात्कार्यत्वरया च द्विरुक्तिः । महाबाहो इत्यनेन पूर्वकृतपराक्रमप्रकटनम् । सनातनं वेदवत्नित्यम्, गुह्यं रहस्यम् शृणु । तदेव रहस्यमाह—**आदित्यहृदयमित्यादि** । आदित्यस्य हृदयम् आदित्यमनःप्रसादकमित्यर्थः पुण्यं पठतां पुण्यवर्धकम् । सर्वशत्रुविनाशेऽपि तुल्यायव्ययन्यायेन कथञ्चित्र जयः स्यात्, न तथा भवतीत्याह—**जयावहमिति** । अक्षय्यम् अक्षयफलकम् परमं शिवम् परमपावनम् सर्वमङ्गलमङ्गल्यम् सर्वमङ्गलानामपि मङ्गलम् मङ्गलानां च मङ्गलमितिवत् स्वार्थे यत्प्रत्ययः सर्वश्रेयःसाधनमित्यर्थः । सर्वपापप्रणाशनं सर्वपूर्वापविनाशनम् चिन्ताशोकप्रशमनम् आधिव्याधिनिवर्तकम् आयुर्वर्धनम् विहितायुर्वेदोक्तपथ्यादिकापुण्यप्रदम् उत्तमं जप्येषु श्रेष्ठम् आदित्यहृदयाख्यम् स्तोत्रं जपेत् । आदित्यहृदयस्तोत्रजपे पुण्यादिवृद्धिर्भवति अतोऽत्रेदं तत्कामस्तज्जपेदिति भावः ॥ ३–५ ॥

४] ति० टी०—आदित्यहृदयम् 'य एषोऽन्तरादित्ये हिरण्मयः' इत्यायशेषश्रुतिप्रसिद्धम् । ब्रह्म तद्देवताकत्वात्तदाख्यं स्तोत्रम्, पुण्यं पुण्यजनकम् । अनेन पारत्रिकं फलमुक्तम् सर्वशत्रुविनाशनं जयावहमित्यैहिकं फलम् । जपं जप्यत इति जपं स्तोत्रम् । परमफलमाह—अक्षयं परमम् शिवमपवर्गरूपम् । तत्प्रदमित्यर्थः । कदा तत्राह—नित्यम् । यदि नित्यवत्फलनिरपेक्षं तदा तत्फलमिति भावः । 'जपेन्नित्यम्' इति पाठान्तरम् ॥ ४ ॥

---

१ ऋषि रिति गो. पाठः । २ विजयिष्यसि इति गो. रा. पाठः । ३ जपेदिति गो. रा. पाठः । ४ अक्षय्यमिति गो. पाठः ।

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् । चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥ ५ ॥
रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् । पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः । एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥ ७ ॥

५] ति० टी०-ऐहिकानि फलान्तराणि । सर्वमङ्गलमाङ्गल्यं सर्वमङ्गलरूपाणामपि मङ्गल्यप्रदम् ॥ ५ ॥

रा० टी०-स्तोत्रस्य नाम निर्दिशन्नाह-आदित्येति । द्वाभ्यां सर्वेषां बाह्यान्तराणां शत्रूणां विनाशनमत एव जयावहं विजयप्रापकमक्षयं पाठकर्तृणां धर्मसाधनियोगित्वसंपादकम् अत एव परमं सर्वोत्कृष्टमत एव शिवमैहिकामुष्मिकमंगलप्रदमत एव सर्वमंगलानां मांगल्यं यस्मात् अत एव चिन्ताशोकयोः प्रशमनमापदो वर्हनमुद्यन्तं नित्यं नमः पाठकर्तृणामज्ञानं यस्मात् तद् आदित्यहृदयं य एवोत्तरादित्य इत्यादिश्रुतिपतिपाद्यस्यैहदयवर्तिरामप्रतिपादकं स्तोत्रं नित्यं जपेत् जपमिति पाठे जपनीयमित्यर्थः अस्तीति शेषः श्लोकद्वयमेकान्वयि ५ ।

६] ति० टी०-रश्मिमन्तं पञ्चेन्द्रियद्वारानेकज्ञानरश्मिमते ज्योतीरूपरश्मिमन्तं च, रश्मिशब्दो भक्तवाची तद्वन्तं तन्मध्ये भासमानमित्यर्थः वीप्सा आह । रश्मिमते नमः । समुद्यन्तं लोकान्क्रियासु प्रवर्तयन्तम्, उदयगिरावुदयं प्राप्तं च । समुद्यते नमः । एवं नमोन्ता एतस्य नमस्कारार्चनमन्त्रा इत्युच्यन्ते । देवैः सात्त्विकवृत्तिभिस्सुरैराजसतामसप्रवृत्तिभिश्च नमस्कृतम्, साक्षिचैतन्यत्वेन नित्यमुपजीवितम्, इन्द्रविरोचनादीनामविशेषादाप्यं च । देवासुरनमस्कृताय नमः । विवस्वान्विशेषेण वसमान पूर्वोत्तरादिव्यादत्ते इति वसुः निर्विशेष्यार्थः । सकलव्यवहाराधिष्ठानत्वाद्वसुमन्तम् स्वोदयेन सकलव्यवहारप्रवर्तकत्वात् वसुमत्यम् । विवस्वते नमः । भास्करं ज्ञानज्ञेयभासः करोतीति भास्करम् । तस्य भासा सर्वमिदं विभाति इति श्रुतेः । भास्कराय नमः । भुवनानां मूलादिब्रह्मरन्ध्रान्तयोगावस्थासु भासमानं परमविद्यातारम्, भूरादशेषभुवनानां प्रकाशकतयेश्वरं च । भुवनेश्वराय नमः ॥ ६ ॥

रा० टी०-सूर्यतदन्तर्वर्तिरामयोस्तादात्म्यात् श्लेषेण द्वयोः पूजां निर्दिशन्नाह—रश्मिमन्तमिति । रश्मिमन्तमनेककिरणविशिष्टं भुवनेश्वरमत एव देवासुरैर्नमस्कृतं भास्करं प्रकाशकं समुद्यन्तं नित्यन्तं पूजयस्व यद्वा रश्मिमन्तं तस्य भासा सर्वमिदं विभातीत्यादिश्रुत्या सर्वतेजोमूलतेजोविशिष्टं समुद्यन्तं ब्रह्मविष्णुमहेश्वरान् तत्तत्क्रियासु प्रवर्तयन्तमत एव भुवनेश्वरं ब्रह्माद्दिद्वारा निखिलभुवननियन्तारं विवस्वता विशेषमणिना अन्यते सम्बध्यते तं नित्यं विशेषमणिधारिणमित्यर्थः भास्करं तदन्तर्वर्तिपरमात्मानं पूजयस्व आत्मत्वेन जानीहि वसुतोये मणाविति कोशः ॥ ६ ॥

गो० टी०-स्तोतव्यदेवतास्वरूपमाह—रश्मिमन्तमिति । रश्मिमन्तं स्वर्णवर्णतया प्रशस्तकिरणम् समुद्यन्तम् अर्वोदयादिकं विना सम्यगुदयं प्राप्नुवन्तम् । इदं च ध्येयाभिप्रायेणोक्तम् न तु तदानीं सूर्योदयकालः अगस्त्यागमनकालस्यापराह्णत्वात् । अत एव लक्ष्मणवचनम्—अहं तु वधमिच्छामि क्षिप्रमस्य दुरात्मनः । यावदस्तं न यात्येष क्रूरकर्मा दिवाकर इति । विवस्ते आच्छादयति तेजोन्तरमिति विवस्वान् तम् । स्वभासा सर्वतेजसामाच्छादकमित्यर्थः । भास्करम् भाः करोतीति भास्करः । " दिवाविभानिशाप्रभाभास्वतार० " इत्यादिना टः सकारश्च । भुवनेश्वरं वर्षान्तरपाल्यां समस्तभुवननियन्तारम । पूजयस्व आदित्यहृदयेन तोषयस्वेत्यर्थः । रश्मिमन्तं, रश्मिशब्दो नित्यसूरिपरः तद्वन्तं तन्मध्ये भासमानम । " रश्मिर् रश्मीनां मध्ये तपन्तम " इति सुवर्णसूक्तोक्तेः समुद्यन्तं नित्योदितदशावन्तम । यद्वा यः पृथ्व्यां वेधसे नवीयसे इत्यायुक्तरीत्या नवं नवस्तुतिमित स्थितम ॥ ६ ॥

७] ति० टी०-रश्मिमदादिशब्दप्रतिपाद्यस्य अद्वयत्वं स्फुटयन्नाह—सर्वेति । हि यस्मात्सर्वदेवोपादानकारणत्वादेष सर्वदेवात्मकः । इदं सर्वात्मकत्वोपलक्षणम् । सर्वदेवात्मकाय नमः । तेजस्वी सर्वभासनसमर्थतेजोयुक्तः । तेजस्विने नमः । रश्मिभिर्ज्ञानरश्मिभिः सूर्यं वस्तुजातं भावयति सत्तास्फूर्तिमत्संपादयति सः । रश्मिभिर्योगिनो भावयति ब्रह्मलोकं प्रापयतीत्यर्थ इत्यन्ये । रश्मिभावनाय नमः । एष एतन्मण्डलवर्ती देवासुरगणांश्चेषां लोकांश्च गभस्तिभिर्ज्ञानज्ञेयरश्मिभिः पाति । 'याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति' इति श्रुतेरेष्टिद्वारान्नत्रविराद्दिनेन देवादिगणाँल्लोकान्मनुष्यादींश्च यः पाति । देवासुरगणलोकपालाय नमः । अत्रेष पातीत्युक्त्या सर्वस्य पुरतः स्थितत्वनिर्देशेन सर्वोदयकाले एवास्तोत्रदानमिति लभ्यते ॥ ७ ॥

रा० टी०-तत्पूजने हेतुमाह—सर्वेति । रश्मयः किरणाः भाव्यन्ते अस्मिन्निति एष सूर्यः गभस्तिभिस्स्वकिरणैः देवादीन् पाति अतः एष तेजस्वी सूर्यः सर्वात्मकः सर्वनियन्ता यद्वा सर्वेषां देवाः ब्रह्मादित्रयः तेषामात्मको नियन्ता तेजस्वी निखिलतेजोमूलतेजोविशिष्ट एव रश्मिभानां सूर्यकिरणदीप्तीनाम अवनो रक्षकः एष सूर्यान्तर्वर्ती रामः अत एव एष एव गभस्तिभिः स्वतेजोभिः देवादीन् पाति ॥ ७ ॥

गो० टी०-ननु सत्सु देवतान्तरेषु कथमस्यैव पूज्यत्वं तत्राह—सर्वदेवात्मक इति । सर्वदेवात्मकः सर्वदेवानामात्मा स्वार्थे कः । " सूर्य आत्मा जगतस्तस्थुषश्च " इति श्रुतेः । रश्मिभिर्लोकानुभावयतीति रश्मिभावनः । रश्मिभिः रक्षति इत्यर्थः । एतदेवाह—एष इति । देवासुरगणान् लोकान्

१ मङ्गल्यमिति गो. पाठः । * वस्तुतस्तु वसुतोये धने मणाविति कोशः ।

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः । महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥ ८ ॥
पितरो वसवः साध्या अश्विनौ मरुतो मनुः । वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् । सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १० ॥

देवासुरगणरूपान् जनानित्यर्थः । पाति रक्षति । "यामिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" इति श्रुतेः ॥७॥

८] ति० टी०–एषः 'एषोऽन्तरादित्ये हिरण्मय पुरुष.' इति श्रुतेर्योगजनितसाक्षात्कारविषयः पुरो दृश्यमानश्च ब्रह्मा निस्तुलैश्वर्यवीर्यासङ्ख्येयशक्तिः । ब्रह्मणे नमः । विष्णुः स्वसृष्टस्थितिपालनप्रयोजकतया परिगृहीतविष्णुमूर्तिर्नारायणः । विष्णवे नमः । शिवोऽपरिमितकल्याणपुण्यस्वभावः, मुनिभिरप्यदिचिन्तो भगवान्महादेवश्च । शिवाय नमः । जीवस्थोनिद्वारा कर्णेन्द्रियाणि स्कन्दतीति स्कन्दः, भगवान्मधुसूदनश्च । स्कन्दाय नमः । प्रजानां जन्यवस्तूनां स्वामी । स्वकरद्वारा कर्णोपादानत्वात् । दशयज्ञाधिष्ठितो भगवान्यज्ञपुरुषश्च । प्रजापतये नमः । महेन्द्रः । 'इदि परमैश्वर्ये' इत्यस्माद्धातोः । परमैश्वर्यकाष्ठां प्राप्तः, वज्रहस्तत्वादिचिह्नो देवराजश्च । महेन्द्राय नमः । धनं चेतन्यं सर्वानुग्रहाय सर्वेभ्यो ददाति स्थापयतीति धनदः । 'अन्नादो वसुदानः' इत्युक्तत्वात्फलदः ईश्वरश्च । धनदाय नमः । कालो बुद्धिवृत्तिजातमपरोक्षतया ज्ञापयतीति कालः, मण्डलम्पन्द्रानुमेयः क्रियापरिच्छेदकश्च । कालाय नमः । यमयतीति यमः सर्वान्तर्यामी 'यमो मनसो मम हृदि स्थितः । तेन चेदसि मन्यसे मा शुचो मा कुरुन्गमः ॥' अविद्योऽभेदाभाव इति मनुः । पितृदेवेभ्यः । यमाय नमः । सोमः । उमा । उः केवलनिपातः । उमया । उ सर्वदा प्रभया सहितः सोमो भगवान्सर्वानर्चनीयश्च । सोमः पवते जनिता मतीनाम् ' इति श्रुतेः सर्वकारणं सोमशब्दवाच्यम् । उभया शक्त्या प्रकृत्याख्यया सहित इत्युमेशः । सोमाय नमः । आपः सर्वं चिदात्मकं तस्यान्तःकरणोपाधियुक्तोऽन्तस्थः पतिः, वरुणश्च । अपांपतये नमः॥८॥

९] ति० टी०–पितरो बीजप्रदास्तद्रूपाश्च सर्वेषां बीजप्रदः । 'तासां वयं महद्योनिरहं बीजप्रदः पिता ' इत्युक्तेः । हृत्वे पूजार्थम् । कव्यवाहनरूपः पितृदेवतश्च । पितृदेवताये नमः । वसुरहमर्थः, अष्टौ वसवश्च । वसुमूर्तये नमः । साध्याः साधान्येन योगिनः । प्रमाधनीयत्वात्साध्याः, देवगणविशेषाश्च साध्याः । साध्यमूर्तये नमः । अश्विनौ । अश्विनौ । अश्नोतेर्व्याप्त्यर्थान्तोऽश्वशब्दः । सर्वव्यापौ देवभिषजौ च । अश्विमूर्तये नमः । मरुत् । 'मृङ् प्राणत्यागे' अस्य धातोरुतिप्रत्ययान्तं रूपम् । अनर्थमारक एकोनपञ्चाशत्संख्यमरुद्गणश्च । मरुन्मूर्तये नमः । मनुत इति मनुः सर्वज्ञ आदिराजश्च । मनवे नमः । वातीति वायुः । 'वा गतिगन्धनयोः' गतिज्ञानं ज्ञापनं च, ज्ञाता ज्ञापकश्च, पञ्चवृत्तिः प्राणश्च । वायुमूर्तये नमः । हेतिः वह्निः । स्वे महिम्नि स्वयं प्रतिष्ठितो भूत्वा स्वस्मिन्सर्वं सारं वहतीति वह्निः अग्निश्च । वह्नये नमः । प्रजायन्ते जीवात्मनेति प्रजाः, प्रकृष्टजनिमन्तो विभूत्यध्यायोक्ता देवाश्च । प्रजाराधाय नमः । प्राणयतीति प्राणः । 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ ॥' इति श्रुतेः । प्राणयाचापयतेकः प्राणः । प्राणाय नमः । ऋतूनां ज्ञापनां कर्ता उपादानम्, वसन्तायृतुकर्ता सत्यसङ्कल्पश्च । ऋतुकर्त्रे नमः । 'ऋतुः सुदर्शनः कालः इति सहस्रनामसु पाठात् । 'ऋतु' इति पाठे भिन्नं पदमिति तीर्थः । ऋतां सङ्कल्पजातानां । प्रभाकरो भास्करवत् । शब्दस्पर्शरूपरसगन्धात्मकपञ्चतन्मात्रप्रकाशकयोः शब्दयोः शब्दभेदेन सूर्यान्तरत्वं ज्ञेयम । प्रभाकराय नमः ॥ ९ ॥

१०] ति० टी०–पूजाप्रकारं वेदयितुं साक्षात् नियम्यानां ब्रह्मादिस्थावराणां तद्द्वारा नियम्यानामन्येषां च रामनादाम्नेनाभेदं समादायाह -एष इति द्वाभ्याम् । ब्रह्मादिः एषः सर्वान्तर्वर्तिराम एव तत्तिरूपेण तत्तच्छरीरवृत्त इत्यर्थः । तेन सर्वत्र रामबुद्धिः कर्तव्येति सूचितम् अत एव सरित्समुद्रांश्च हरेश्शरीरं पश्यन्ति च नव प्रणमेदनन्यः इत्यादि सङ्गच्छते श्रीरङ्गधामेश्वरेण ॥ ८ ॥ ९ ॥

१०] ति० टी०–सर्वेषामन्यासत्वमाह – एष ब्रह्मेत्यादिना । अयमेव ब्रह्मादीनामसत्तास्फूर्तिदः सर्वान्तर्यामी इत्यर्थः । प्रजापतिरिति जात्येकवचनम् । नव प्रजापतय उच्यन्ते । आदिशब्देन मुनयश्च्यन्ते तमस्त्व तत्तोन्यः मरुत. आदित्यादिवायवः । तान्मूर्तीश्चसमर्पयन् । प्राणः सर्वान्तर्यामी वायुः ऋतुकर्तेति प्रभाकरविशेषणम् । ऋतूनां वसन्तादीनां कर्ता एष प्रभाकरः ब्रह्मा वेदादिर्यस्मात् ॥ ८ ॥ ९ ॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् । तिमिरोन्मथनः शंभुस्त्वष्टा मार्तण्डकोंऽशुमान् ११ ॥
हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः । अग्निगर्भो दितेः पुत्रः शङ्खः शिशिरनाशनः॥ १२ ॥
व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः । धनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगमः ॥ १३ ॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः । कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥
नक्षत्रग्रहताराणामधिपो विश्वभावनः । तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥ १५ ॥

मूर्तिश्च । सुवर्णसदृशाय नमः । 'सुपर्णस्तपनः' इति पाठे 'द्व्यक्षपर्णा–' इति श्रुतेः सुपर्णत्वं ब्रह्मणः । तपतीति तपन इति तीर्थः । भानुर्भासकः । भानवे नमः । हिरण्यं तेजः प्रज्ञारूपं तद्रतो जगदुत्पत्तिबीजं यस्य सः । यद्वा हिरण्यं रेतोऽण्डोत्पादकं द्रव्यं यस्य सः । यद्वा हिरण्यं तत्साधनं पारद एव रेतो यस्येत्यर्थः । हिरण्यरेतसे नमः । अक्षराधिक्यमार्षम् । दिनेत्यध्ययं प्रकाशवाचकम् । प्रकाशं करोतीति दिवाकरः । दिवाकराय नमः ॥ १० ॥

११] ति० टी०–हरितो दिशोऽश्नुत इति व्याप्नोतीति हरिदश्वः, श्यामवर्णाश्च । हरिदश्वाय नमः । सहस्राण्यनन्तान्यर्चींषि ज्ञानानि यस्य सः । यद्वा सहस्रसंख्याकान्यर्चींषि रश्मयो यस्य । सहस्रार्चिषे नमः । 'सप्तसप्तिः सप्तशीर्षण्याः प्राणा इन्द्रियाणि द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके वाक्चैकेति सप्त प्राणाः प्रभवन्ति तस्मात्' इति श्रुतेः । सप्तप्राणानां सप्तिः प्रवृत्तिर्यतः सः, सप्तसंख्याश्च । 'हयसैन्धवसप्तयः' इति कोशः । सप्तसप्तये नमः । मरीचिमच्छब्दो गभस्तिमच्छब्देन व्याख्यातः । मरीचिमते नमः । अज्ञानलक्षणं तिमिरमुन्मथ्नातीति तिमिरोन्मथनः, अन्धकारनाशनश्च । तिमिरोन्मथनाय नमः । शमपत्नर्गादिरूपं सुखमस्माद्भवतीति शंभुः । शंभवे नमः । त्वक्षति तनूकरोति भक्तानामुत्पत्तिप्रलयरूपानर्थप्रवाहदुःखमिति त्वष्टा, देववर्धकिश्च । त्वष्ट्रे नमः । मृतमचेतनमण्डं ब्रह्माण्डं जीवयतीति मार्तण्डः स एव मार्तण्डकः । मार्तण्डकाय नमः । अंशुमान्मरीचिमत्पर्यायः । अंशुमान्सर्वव्यापकः । 'अश व्याप्तौ' इति धातुः । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति श्रुतेरिति तीर्थः । अंशुमते नमः ॥ ११ ॥

१२] ति० टी०–हिरण्यगर्भः सकलजगदुत्पत्तिस्थितिलयकर्ता ब्रह्मविष्णुरुद्ररूपो हिरण्यगर्भः । भगवते हिरण्यगर्भाय नम इति द्वादशाक्षरी आदित्यहृदयरहस्यमिति कतकः । शिशिरः शीतः सुखस्वभावः । शिशिराय नमः । तपनः 'तप ऐश्वर्ये' । स्वभावत एव सर्वेश्वर इत्यर्थः । तपनाय नमः । अहस्करो दिवाकरपर्यायः । अहस्कराय नमः । रौत्युपदिशति हिरण्यगर्भादिभ्य इति रविः । 'यो वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः । रवये नमः । अग्निः कालाग्निरुद्रो गर्भे यस्य सोऽग्निगर्भः । 'नारायणादुद्रोऽजायत' इति श्रुतेः । अग्निगर्भाय नमः । दितिर्नाशो न विद्यते यस्याः सादितिर्ब्रह्मविद्या तस्याः पुत्रस्तल्लभ्यत्वाद्, आदित्यश्च । अदितेः पुत्राय नमः । शं च खं च शङ्खः । परमानन्दगगनात्मेत्यर्थः । शङ्खाय नमः शिशिरं जाड्यं मन्दबुद्धित्वं नाशयतीति शिशिरनाशनः, हिमनाशकश्च । शिशिरनाशनाय नमः ॥ १२ ॥

१३] ति० टी०–व्योमनाथ आकाशकर्ता । 'आत्मन आकाशः संभूतः' इति श्रुतेः । व्योमनाथाय नमः । तमोभेदी तिमिरोन्मथनपर्यायः । तमोभेदिने नमः । ऋगादीनां पारस्तत्तदुपनिषत्तदुक्तस्तदेकप्रतिपाद्यः । ऋग्यजुःसामपारगाय नमः । घनाधिका वृष्टिः सकलकर्मफलदानरूपा यस्मात्सः, घना संपूर्णा वृष्टिर्यस्मादिति च । घनवृष्टये नमः । अपां सात्त्विकानां मित्रश्चेतन्यदानेनोपकर्तापां मित्रः, जलानामुत्पादकश्च । अपां मित्राय नमः । विन्ध्यं गहनं दुर्गम् । एवंच दुर्गे सौषुम्ने ब्रह्मनाडीमार्गे प्लवंगम शीघ्रगन्ता । किं च विन्ध्यवीथी सूर्यमार्गस्तेन शीघ्रगन्ता च । विन्ध्यवीथीप्लवंगमाय नमः ॥ १३ ॥

१४] ति० टी०–आतपी आ समन्तात्तपो जगत्रिर्माणसंकल्पः सोऽस्यास्तीत्यातपी । 'तप आलोचने' । आतपिने नमः । मण्डलं किरणसमूहस्तद्वान् । यद्वा मण्डश्चतेजनेनेति मण्डले कौस्तुभादि तद्वान् । मण्डलिने नमः । मृत्युः सर्वमृत्युसंपादकः । 'अमुमाहुः परं मृत्युम्' इति श्रुतेः । मृत्यवे नमः । पिङ्गलः पिङ्गलनाडीप्रवर्तनेन कर्ममार्गप्रवर्तक इत्यर्थः । पीतवर्णश्च । पिङ्गलाय नमः । सर्वतापनः सर्वसंहर्ता । 'तप दाहे' । सर्वतापनाय नमः । कविः सर्वज्ञः, कवयिता च । कवये नमः । विश्वो विश्वरूपः । 'विश्वमेवेदं पुरुषः' इति श्रुतेः । विश्वस्मै नमः । महत्तेजः स्वरूपं यस्य सः । महातेजसे नमः । रक्तः पालनेन सर्वरञ्जकः, रक्तवर्णश्च । रक्ताय नमः । सर्वभवोद्भवः सर्वकार्यवर्गोत्पत्तिहेतुः । सर्वभवोद्भवाय नमः ॥ १४ ॥

१५] ति० टी०–नक्षत्रादिनामन्तर्यामितयाधिपः प्रवर्तकः । नक्षत्रग्रहताराधिपाय नमः । विश्वभावनः सर्वोद्भवपर्यायः । विश्वभावनाय नमः । तेजसामग्न्यादितेजसामपि सत्तास्फूर्तिसाधकचिन्मयतेजोरूपः । 'येन सूर्यस्तपति तेजसेद्धः' इति श्रुतेः । तेजसामपि तेजस्विने नमः । द्वादशात्मन्द्वादशमासस्वरूप । प्रागुक्तान्तसर्वमूर्तिरूपाय तुभ्यं नम इत्यर्थः । द्वादशात्मने नमः ॥ १५ ॥

रा० टी०–आदित्य इति । आदत्ते सर्वं स्वीयतया गृह्णाति आदित्यः स्तवति साक्षात्परम्परया च कर्मणि लोकं प्रवर्तयतीति सूर्यः खं हृदयाकाशं गच्छति अन्तर्यामिद्वारा

व्याप्नोतीति खगः पुष्णाति सर्वमिति पूषा गभस्तिः गभस्ति-रतिप्रकाशः तद्वान् सुवर्णसदृशः तप्तचामीकराभः भानुः सर्व-प्रकाशकः हिरण्यं रेतो यस्य दिवं नित्यक्रीडामाकरोतीति दिवाकरः हरितो दिशः अश्नुते इति हरिदश्वः किं च हरिन्नु-तीवस्य देन राज्यप्रदानेन श्वयति वर्द्धते किञ्च हरितस्सर्वदिशः अथा यस्य सर्वत्र परिपूर्ण इत्यर्थः सहस्राणि अपरिमितानि अर्चींषि तेजांसि यस्य सः सप्तभिश्छन्दोपेयैः चक्षुरादिभिः सप्तिः संबन्धो यस्य ब्रह्मरन्ध्रनिवासीत्यर्थः किञ्च सप्त सप्तयोऽश्वा यस्य सप्ताश्वानां नियन्तुर्नियन्तेत्यर्थः हयसैन्यवसप्तय इति कोशः मरीच्यः उपलक्षणतया मरीचिप्रभृतयः मुनयः सन्ति सेवक-त्वेनास्येति मरीचिमान् तिमिरं मूलाविद्यामुन्मथति स्वभ-क्तानां विनाशयति तिमिरोन्मथनः शं कल्याणं भवति अस्मा-दिति शम्भुः तथति महान्तमपि स्वकीयानामपराधं तनत्करोति न गणयतीत्यर्थः त्वष्टाम्रुतमण्डं ब्रह्माण्डं कायति शब्दयति स्व-शक्त्या चैतन्यमुत्पादयतीत्यर्थः अंशुमान् स्वप्रकाशद्वारा सर्वत्र परिपूर्णः हिरण्यो हिरण्यगर्भो गर्भो बालक इव यस्य शिशिरः सर्वतापरहितत्वात् नित्यं नित्यं विलक्षणश्चेत्यनि-शिष्टः तपनः नित्यं महैश्वर्यविशिष्टः अहो दिवसस्य तदुपल-क्षितकालमात्रस्य करः प्रवर्तकः न रविः प्रकाशको यस्य स्वयं-प्रकाश इत्यर्थः किञ्च रौति ब्रह्मादिभ्योऽप्युपदिशति स रविः अग्निः कालाग्निरुद्रो रुद्रः गर्भो यस्य अदितेः पुत्रः अपेन्द्रो स्वयम्भोपेन्द्रस्यापि नियामक इत्यर्थः नित्यं कल्याणगुणानि खानि इन्द्रियाणि यस्य शिशिरं जाड्यं नाशयतीति शिशिरनाशनः व्योमवत् व्यापको नाथः स्वामित्वं यस्य तमसः अज्ञानस्य भेदी स्मृतमात्रत्वेन विघातकः ऋग्यजुस्सामपारेस्तत्र निः ष्णातेत्यर्थः तैर्गीयते सः घनवृष्टिर्दानपरंपरा यस्य अपां विषया शक्तिरहितानां मित्रो मित्रं विन्ध्यवीथ्यां ध्रुवङ्गमः यानराः यस्य आतपो सर्वविषयकज्ञानवान् मण्डली मण्डल्य सर्वभूषणम्यालं ग्रहणं तद्वान् मृत्युः मृत्योरपि विघातकः पिङ्गलः पिङ्गलादिनाडीप्रवर्तकः सर्वेषां रिपूणां तापनः कविः इच्छामात्रेण गण्यपण्यादिनिर्माता विश्वः सकलब्रह्माण्डनियन्ता अत एव महातेजाः रक्तः सर्वविषयकप्रीतिमान् सर्वेभ्यो ब्रह्मा तस्मात्पुद्भवो यस्मात् अत एव नक्षत्रादीनामपि अत एव विश्वे भावनापालनार्थं चिन्तनं यस्य अत एव तेज-सामपि तेजस्वी यस्त्वं तस्मै ते तुभ्यं नमः द्वादशात्मन् द्वादशमासकाल इत्यर्थः आत्मा देहो यस्य तत्संबोधनं किञ्च द्वादशानामादित्यानामात्मा नियन्ता तत्संबोधनम् श्लोकपञ्च-मैकान्वयी ॥ १०–१५ ॥

गो० टी०–एवमादित्यस्वरूपमुपदिश्य तद्विषयमादित्य-हृदयस्तोत्रमुपदिशति—आदित्यः सवितेत्यादिना लोक-साक्षिण इत्यन्तेन । तत्र आदित्यादिप्रथमान्तपदेषु त्वंपद-मध्याहार्यम् । अदितेरपत्यत्वेनावतीर्ण आदित्यः । "दित्यदि-त्यादित्यपत्युत्तरपदाण्ण्यः" इति ण्यप्रत्ययः । अदितेः अख-ण्डिताया भूमेरयं पतिरित्यादित्यः । सूते जगदिति सविता । सुवति प्रेरयति जनान् कर्मणीति सूर्यः । "षू, प्रेरणे" इति धातोः "राजसूयसूर्य०" इति निपातनात् क्यप्प्रत्ययो रुढागमश्च ॥ खे गच्छतीति खगः । लोकोपकारार्थमाकाशे संचरन्नित्यर्थः । वर्षेण पुष्णाति जगदिति पूषा इवर्णश्चेत्यादौ निपातितः । गभस्तयः किरणाः अस्य सन्तीति गभ-स्तिमान् । सुवर्णसदृशः सुवर्णवर्णः । "हिरण्यश्मश्रुर्हिरण्य-केश आप्रणखात् सर्व एव सुवर्ण" इति श्रुतेः । भातीति भानुः । "दाभाभ्यां नुः" इति नुप्रत्ययः । हिरण्यं रेतो यस्य स हिरण्यरेताः हिरण्मयब्रह्माण्डकर्तेत्यर्थः । अक्षरापि-क्षयमार्पन्वात् । दिवा करोतीति दिवाकरः, दिवा अह्नि प्राणिनः चेष्टां करोतीति वा दिवाकरः । हरितः श्यामा अश्वा अस्य सन्तीति हरिदश्वः । सहस्रार्चिः सहस्रकिरणः । सप्तनामा सप्तिरश्वो यस्यासौ सप्तसप्तिः । "एको अश्वो वहति सप्तनामा" इति श्रुतेः । मरीचयोऽस्य सन्तीति मरीचिमान् । प्रकाशवानित्यर्थः । तिमिरान्धत्वनाशनातीति तिमिरोन्मथनः । शं सुखं भवत्यस्मादिति शंभुः । "द्रुप्रकरणे भितद्रादिभ्य उपसंख्यानम्" इति दुः । सर्वाणि रूपाणि त्वष्टति तन-करोतीति त्वष्टा सर्वसंहारक इत्यर्थः । श्रुतेऽण्डे जातो मार्तण्ड. सर्वसंहारे तत्सृष्टये पुनः प्रादुर्भूत इत्यर्थः । अंशवोऽस्य सन्तीत्यंशुमान् । प्रकाशमान इत्यर्थः । हिरण्यं हिरण्मयाण्डम् । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्" इति स्मृतेः । तस्य गर्भो हिरण्यगर्भः । ब्रह्माण्डादूनवर्तीत्यर्थः । यद्वा हिरण्यं हितरमणीयं गर्भनन्दकरणं यस्यासौ हिरण्यगर्भः । तापत्रय-नाशनां विश्रमस्थानत्वाच्छिशिरः । तपतीति तपनः । भासः करोतीति भास्करः । स्तूयते स्तवते सर्वैरिति रविः । "अच इः" इतीप्रत्ययः । दिवा अग्निर्गर्भे यस्यासावग्निगर्भः । "उषन्तं दावादित्यमग्निवुसमारोहति" इति श्रुतेः । अदितेः पुत्रः अदितेः पुत्रत्वेनावतीर्णः । शाम्यति स्वयमेव सायंकाल इति शम्भुः । "शमेः सः" । शिशिरं हिमं नाशयतीति शिशिरनाशनः । व्योम्नो नाथो व्योमनाथः । तमः तमो भेदं शीलमस्यास्तीति तमोभेदी । ऋग्यजुःसामां पारं गच्छतीति ऋग्यजुःसामपारगः । "ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेद तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः" इति श्रुतेः । घना वृष्टिर्यस्मादसौ घनवृष्टिः । "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति स्मृतेः । अत एवापां मित्रः पृथिवीतलमापिबन् । दक्षिणायने विन्ध्यो वीथी संचारभूमिर्यस्यासौ विन्ध्यवीथिः । ध्रुवं यथा तथा गच्छ-तीति ध्रुवङ्गमः । विन्ध्यवीथीध्रुवङ्गम इत्येकपदत्वेन पाठे विन्ध्यवीथी गगनमार्गः आतपोस्यास्तीत्यातपी । मण्डलं वृत्ता-कारो बिम्बोस्यास्तीति मण्डली । मृत्युः विरोधिनिवर्तकः । उदयसमये पिङ्गलवर्णत्वात् पिङ्गलः । सर्वानपि मध्याह्ने ताप-यतीति सर्वतापनः । कविः पण्डितः व्याकरणादिसर्व-शास्त्रप्रवर्तक इत्यर्थः । विश्वः विश्वनिर्वाहकः । महान्ति तेजांसि

नमः पूर्वाय गिरये[1] पश्चिमायाद्रये नमः । ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥
जयाय जयभद्राय हर्यश्वाय नमो नमः । नमो नमः सहस्रांशो आदित्याय नमो नमः[2]॥ १७ ॥
नम[3] उग्राय वीराय सारङ्गाय नमो नमः । नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु[4] ते ॥ १८ ॥
ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे । भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥

यस्य स महातेजाः । रक्तः सर्वेष्वनुरक्तः । सर्वेषां भवः संसारः उद्भवत्यस्मादिति सर्वभवोद्भवः । नक्षत्राणां ग्रहाणां तारणां चाधिपः । विश्वं भावयति स्थापयतीति विश्वभावनः । तेजसामग्न्यादीनां तेजसामपि तेजस्वी प्रशस्ततेजाः । द्वादश आत्मानो मूर्तयो यस्य स द्वादशात्मा । ते च दर्शिताः स्मृतौ- " इन्द्रो धाता भगः पूषा त्वष्टोथ वरुणोर्यमा । अर्चिर्विवस्वान् त्वष्टा च सविता विष्णुरेव च इति । एवंभूतस्त्वमसि अतस्तुभ्यं नम इति योजना ॥ १०-१५ ॥

१६] ति० टी०-पूर्वाय गिरये । तदन्तर्यामिण इत्यर्थः । पूर्वाय गिरये नमः । एवं पश्चिमायाद्रये इति । पश्चिमायाद्रय नमः । ज्योतिर्गणानां पतये । नक्षत्रग्रहताराधिपपर्यायः । ज्योतिर्गणानां पतय नमः । दिनाधिपतय इति दिवाकरपर्यायः । दिनाधिपतये नमः ॥ १६ ॥

रा० टी०-सूर्यमण्डलवर्तिपरमात्मबुद्धिः पर्वतादिष्वपि कर्तव्येति बोधयन्नाह-**नम इति** ॥ १६ ॥

गो० टी०-नमः पूर्वायेत्यादिश्लोकषट्कमेकान्वयम् । पूर्वाय गिरये पूर्वभागस्थगिर्युपलक्षिताय । पश्चिमे गिरये पश्चिमभागस्थपर्वतोपलक्षिताय जयाय उपासकानां जयकराय । जयतीति जयः जयी तस्मा इति वा । जयभद्राय जयभद्रयोः प्रदात्रे । हर्यश्वाय श्यामाश्वाय । अत्र स्तुतित्वान्न पुनरुक्तिः-शिन्त्या आदरातिशयेन नमःशब्दस्य द्विरुक्तिः । उग्राय अनुपासकानामुग्राय । विविधमीरयति प्रेरयति प्राणिनश्चेष्टयतीति वीरः तस्मै सारं शीघ्रं गच्छतीति सारङ्गः तस्मै । एकेन निमिषार्धेन द्विसहस्रयोजनं गच्छतीति पुराणप्रसिद्धिः । ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तृणामीशाय । परब्रह्मरूपत्वेन स्तूयते " असावादित्यो ब्रह्म " इति श्रुतिः अथवा ब्रह्मेशानयोः ब्रह्मरुद्रयोः अप्रच्युतेश अच्युतनियन्ता । सर्वापत्स्वपि पालक इत्यर्थः । वेदापहारगुरुपातकत्वेत्यपीडाद्यापद्विमोचनमहिम्नः फलप्रदातेत्यर्थः । ब्रह्मेशायाच्युतेशायेत्यपि पाठः तस्मै । आदित्यरूपं वर्चो दीप्तिर्यस्य तस्मै आदित्यवर्चसे । भा अस्यास्तीति भास्वान् तस्मै । सर्वभक्षाय सर्वसंहर्त्रे अत एव तस्मिन्समये रौद्राय वपुषे । तमः अन्धकारं हन्तीति तमोघ्नः । आश्रितशत्रून् हन्तीति शत्रुघ्नः । अमितः अपरिच्छिन्नः आत्मा स्वरूपं यस्यासौ अमितात्मा । कृतघ्नं हन्तीति कृतघ्नघ्नः । दैवाय दीप्यमनाय । तप्तचामीकराय हिरण्यवपुषे । वह्नये अग्निरूपेण हव्यवाहनाय । विश्वं जगत् कर्म कर्तव्यं यस्य तस्मै विश्वकर्मणे । सर्वजगत्कर्त्रे इत्यर्थः । लोकसाक्षिणे लोकानां जनानाम् अन्तर्यामितया सुकृतदुष्कृतकर्मसाक्षिणे ॥ १६-२१ ॥

१७] ति० टी०-जयाय ब्रह्मलोकान्तसकलजयप्रदाय, जयाख्यब्रह्मद्वारपालमूर्तये च । जयमूर्तये नमः । जयभद्राय ब्रह्मलोकादिजयप्राप्यं यद्भद्रं भूमानन्दस्तदात्मकाय, जयभद्राख्यद्वितीयद्वारपालमूर्तये च । जयभद्राय नमः । इमावेव शापवशतोऽवतीर्णौ रावणकुम्भकर्णौ । हर्यश्वो हरिदश्वपर्यायः । हर्यश्वाय नमः । सहस्रांशो इति सहस्रार्चिःपर्यायः । सहस्रमनन्ता जीवा अंशवोंऽशा यस्य सः । 'ममैवांशो जीवलोके जीवभूतः' इति स्मृतेः । सहस्रांशवे नमः । आदरातिशयाय नमःशब्दस्य द्विरुक्तिः । आदित्येति नाम्नः प्राधान्यबोधनाय तस्य द्विरुक्तिः । आदित्याय नमः ॥ १७ ॥

रा० टी०-जयेति । सहस्रांशो स्वशरीरभूतसूर्यमण्डलद्वारानेककिरणविशिष्टजयभद्राय विजयकल्याणमयाय अत एव जयाय सकलजयहेतवे हरिवानरोधो यस्य तस्मै आदित्याय अदित्यमण्डलवर्तिने नमः ॥ १७ ॥

१८] ति० टी०-उग्रायेन्द्रियनिग्राहकाय, रुद्ररूपाय च । उग्राय नमः । वीरायेन्द्रियप्रवर्तने स्वतन्त्राय, त्रिपुरसंहारक्षमपराक्रमयुताय च । वीराय नमः । सारं प्रणवस्तत्प्रतिपाद्याय । सारंगाय नमः । पद्मं हृदयकमलं बाह्यं च पद्मं तद्बोधकाय । पद्मप्रबोधाय नमः । प्रचण्डाय सर्वसमर्थायातिकोपनाय च । प्रचण्डाय नमः ॥ १८ ॥

रा० टी०-नम इति । उना शस्त्रेण म्रियते स्वसेव्यत्वेन ज्ञायते इत्युग्रः तस्मै वीराय महाबलाय किञ्च विशेषं सकललोकध्यापनशक्तिं राति स्वभक्तेभ्यो ददाति तस्मै किञ्च वि पक्षिणं जटायुषमित्यर्थः ईरते तत् कृत्यार्थं प्राप्नोति सारङ्गाय पालितविचित्रानेकगुरुकसारण्यव्याघ्रादिविशिष्टाय पद्मस्य बहिरन्तःकमलस्य प्रबोधाय प्रचंडाय चंडिकाया अपि नियामकाय ते नमः ॥ १८ ॥

१९] ति० टी०-ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तृणामीशाय स्वामिने । 'सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दनः ॥' इति स्मृतेः । प्रातरादौ ब्रह्माच्युतेशानश्च । ब्रह्मेशानाच्युतेशाय नमः । सूरः सूर्यपर्यायः । सूराय नमः । आदित्यस्यान्तरं वर्चो ज्ञानं तदूपाय । आदित्यवर्चसे नमः । भास्वते चिदचित्प्रकाशवते । भास्वते नमः । सर्वभक्षाय सर्वं विषयजातं भक्षयतीति सर्वभक्षस्तस्मै । 'यस्य ब्रह्म च क्षत्रं चोभे भवत

१ पश्चिमे गिरये इति गो. पाठः । २ मार्तण्डायेति गो. पाठः । ३ नम इति गो. पाठः । ४ सूर्यायेति गो. पाठः ।

तमोघ्नाय हिमघ्नाय शत्रुघ्नायाभितात्मने । कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥
तप्तचामीकराभाय हरये विश्वकर्मणे । नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥
नाशयत्येष वै भूतं तमेव सृजति प्रभुः । पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः । एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥
देवाश्च क्रतवश्चैव क्रतूनां फलमेव च । यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥ २४ ॥

ओदनं[1] इति श्रुतेः। सर्वभक्षाय नमः। रुद्रःखं तन्मूलो राजद्वेषी तन्मूलाज्ञानं च विद्रावयतीति रुद्रस्तस्मैदं रौद्रम्। अज्ञानसंहारसमर्थज्ञानाकारायेत्यर्थः। रौद्ररूपाय नमः ॥ १९ ॥

२०] ति० टी०–तमोघ्नहिमघ्नौ तिमिरेन्धनशिशिरनाशनपर्यायौ। तमोघ्नाय नमः। हिमघ्नाय नमः। शत्रुर्ज्ञानं भावः निजतत्त्वभगवदनुसंधानजन्मौरुषेण तस्य शातनात्तस्य हन्ता, रिपुकृष्णगदादिहन्ता च। शत्रुघ्नाय नमः। अभितात्मने कालदेशपरिच्छेदरहितस्वरूपाय। अभितात्मने नमः। कृतघ्नघ्नाय कृतं चेतनत्वलक्षणं भगवत्कृतमुपकारं घ्नन्ति विस्मरन्ति ते कृतघ्ना भगवद्विमुखा अजाः संसारिणस्तानयं सागतर्थप्रापणेन हन्ति तादृशाय। कृतघ्नघ्नाय नमः। देवाय चिदानन्दज्योतिःस्वरूपाय। अजस्रातकृत्यस्य निजोदयेन प्रवर्तनशीलश्च। देवाय नमः। ज्योतिषां पतय इति ज्योतिर्गणानां पतये इत्येतत्पर्यायः। ज्योतिषां पतये नमः ॥ २० ॥

रा० टी०–ब्रह्मेति। ब्रह्मेशानाद्यनन्तानामुत्पत्तिप्रलयपालनकर्तृणामीशाय स्वामिने भास्वते सर्वप्रकाशकर्त्रे अत एव सर्वभक्षाय रुद्रादिद्वारा प्रलयकर्त्रे श्रुतित्व यस्य ब्रह्म च ऋचे च यजुषे भयत ओदनः अत एव रौद्राय भयङ्करं वपुर्यस्य तस्मै॥१९॥

रा० टी०–तम इति। तमोघ्नाय सर्वद्वारान्धकारविनाशनाय अत एव हिमघ्नाय अमितः परिच्छेत्तुमशक्यः आत्मा शरीरं यस्य कृतघ्नाय कृतज्ञानां विनाशकाय नमः ॥ २० ॥

२१] ति० टी०–तप्तचामीकराभाय सुवर्णसदृशायेत्यर्थः। तप्तचामीकराभाय नमः। हरन्त्यशेषमज्ञानं तत्कार्यं चेति हरिस्तस्मै। हरये नमः। विश्वं सर्वं कर्म यस्य तस्मै। 'सर्वकर्मा सर्वकामः' इति स्मृतेः। विश्वकर्मणे नमः। तमोभिनिघ्नस्तमोनिघ्नपर्यायः। तमोभिनिघ्नाय नमः। रुचये चिद्रूपत्वादीप्तिमते। रुचये नमः। लोक्यत इति लोको दृश्यप्रपञ्चस्तत्साक्षिणे साक्षात्द्रष्ट्रे, लोकानां पापपुण्यकर्मसाक्षिणे च। लोकसाक्षिणे नमः ॥ २१ ॥

रा० टी०–तप्तेति। तप्तचामीकराभाय द्युतसुवर्णवर्णाय हरये पुनर्वसुप्रादुर्भूताय विश्वं साक्षात् परम्परया चेत्यासां कर्म क्रिया यस्य तमसः अज्ञानस्य अभिनिघ्नाय स्वगुणद्वारा निवर्तकाय रुचये सर्वप्रीतिविषयीभूताय लोकसाक्षिणे नमः ॥२१॥

२२] ति० टी०–एष इत्युक्तार्थः। भूतं प्रपञ्चं प्रतिसृष्टि नाशयति भूतं प्राणिजातं तत्तदायुरन्ते नाशयति स्वदिनान्ते च नाशयति तेन। भूतनाशाय नमः। तमेवोक्तमेवोक्तभूतं जगत्सर्गादौ च सृजति। अतस्तुष्टः प्रभुः प्रकर्षेण स्वशक्तिवैभवेन सकलपदार्थात्मना भवतीति प्रभुः, सकलपदार्थसाक्षाद्दृष्टिता च। प्रभवे नमः। पायति शोषयति गभस्तिभिः। पायते नमः। तपति नाशयति। तपते नमः। वर्षति सृजति। वर्षते नमः ॥ २२ ॥

रा० टी०–क्रियया व्याप्तत्वमत्र दर्शयन्नाह–नाशयतीत्यादिभिः। एषः सर्वमण्डलमध्यस्थः परमात्मा भूतं प्राणिजातं नाशयति स्वादिद्वारा विनाशयति वै अवर्षेण एष सृजति एष एष पायति शोषयति हासयतीत्यर्थः किंच एष पालनार्थं यति प्रेरयतीत्यर्थः विष्णो पालनार्थात्। इण् धातुः गणकार्यस्यात्रित्यत्वात् अतो लुक् सञ्ज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः ॥ २२ ॥

गो० टी०–एतमादित्यमण्डलमध्यमुपदिश्य पुनरपि तत्प्रतिपादकवचनां स्तौति—नाशयतीत्यादिना श्लोकत्रयेण। भवतीति भूतं जगत् नाशयति महाप्रलये पुनरुदये सृजति। अव्ययकालनियन्ता प्रभुः पालकः। पालकत्वमेव प्रपञ्चयति—पायतीति। पायति शोषयति। "पै शोषणे" इति धातुः। एष इति। सुप्तेषु स्वेषु प्राणिषु परिनिष्ठितः अन्तर्यामित्वेन स्थितः जागर्ति। सकलयज्ञकर्मफलप्रदत्वाद्—एष इति। वेदैकवेद्यत्वमाह—वेदा इति। सर्वक्रतुसमाराध्यत्वमाह—क्रतव इति। क्रतुफलप्रदत्वमाह—क्रतवोऽपीति। लौकिकफलप्रदत्वमाह—यानीति। वेदानिति शेषः। सर्वे सर्वात्मकेन रविरूपेण प्रभुर्नियन्ता ॥ २२–२४ ॥

२३] ति०टी०–एष इत्यादेष सुप्तेषु परमेषु स्वयमनुपरतशक्तिनित्यचिद्रूपो जागर्ति। निजमण्डलादेः तत्तः प्राणिषु सुप्तेषु तदर्शनव्यवहारार्थे स्वमण्डले जागर्ति च। सुप्तेषु जाग्रते नमः। भूतेषु परिनिष्ठितोऽन्तर्यामित्वेन स्थितः। भूतेषु परिनिष्ठिताय नमः। अग्नयः पञ्चाग्निद्वयलक्षणाः पञ्चाग्नयस्तेषु होत्रे होमकर्तृद्विपदानुभवरूपः। अग्निहोत्राय नमः। अग्निहोत्रिणां बाह्याभ्यन्तराग्निहोत्रानुष्ठातृणां प्राप्यं सत्त्वगोपवर्गकं फलं तत्प्रदश्च। अग्निहोत्रिणां फलदाय नमः ॥ २३ ॥

रा० टी०–एष इति। भूतेषु सर्वेषु सत्सु परिनिष्ठितः नियामकतया सर्वत्र पूर्णः एष एव जागर्ति एष एवाग्निहोत्रादि ॥ २३ ॥

२४] ति० टी०–देवाः क्रतुदेवा अष्टौ वसव एकादश रुद्रा इत्यादि क्रमेणोपदिष्टास्त्रयस्त्रिंशद्देवाः। क्रतवः सोमाग्न्यमेधान्ताः। क्रतुफलं श्रुत्युक्तं स्वर्गादि। किं च सर्वेषु लोकेषु प्राणिषु

१ वन्हय इति गो. पाठः। २ तदेवेति गो. पाठः। ३ वेदा इति गो. पाठः। ४ सर्व एष रविः प्रभुरिति गो. पाठः।

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च । कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् । एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि[1] ॥ २६ ॥
अस्मिन्क्षणे महाबाहो रावणं त्वं जहिष्यसि[2] । एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा । धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥
आदित्यं प्रेक्ष्य जप्त्वेदं[3] परं हर्षमवाप्तवान् । त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥
रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत्[4] । सर्वयत्नेन महता वृतस्तस्य वधेऽभवत्[5] ॥ ३० ॥
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

यानि कृत्यानि क्रियास्तत्साधनानि च ऋत्विग्यजमानसमिदाज्यपश्वादीनि तैर्निजभक्तद्विजानां संग्रहेण परमप्रभुः परमसमर्थः । परमसमर्थाय भगवते ब्रह्मणे नमः । एवं पञ्चविंशत्युत्तरशतसंख्या भगवत्पूजारहस्यनाममन्त्रा इति कृतकृत्यः 'सर्वदेवात्मको ह्येषः' इत्यारभ्य 'लोकसाक्षिणे' इत्यन्ताष्टोत्तरशतसंख्या एवादित्यहृदयस्तोत्रनाममन्त्रा इति तीर्थः ॥ २४ ॥

रा० टी०–नन्वेकत्र स्थितस्य कथं सर्वात्मकत्वमित्यत आह देवा इति देवादयः लोकेषु यानि कृत्यानि तेषु सर्वेषु परमः प्रभुः परमनियन्ता एष एवेति शेषः तथा च श्रुतिः । कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः । यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ॥ इतेन तदायत्तत्वन्तत्तद्व्यवहार्यत्वेति सञ्चितम् ॥२४॥

२५] ति० टी०–एवं कथितस्य स्तोत्रस्य फलमाह—एनमिति । आदित्यहृदयस्त्वं कीर्तयन्नापदादिषु कश्चिदपि द्विजो नावसीदति न दुःखनिमग्नो भवति । यद्वैनमादित्यहृदयार्थभूतं सर्वापदादिनिमित्तैरेतैर्नाममन्त्रैर्विशिष्य कीर्तयन्स्तुवन्नावसीदति अत्रापत्कालमृत्युः कृच्छ्रं ज्वरादिदुःखम्, भयं चोरादिनिमित्तम् ॥ २५ ॥

रा० टी०–एनमिति । एनं परमात्मानं कीर्तयन् सन् कश्चित्पुरुषो नावसीदति ॥ २५ ॥

गो० टी०–इदानीं स्तोत्रस्य फलमाह—एनमिति । कृच्छ्रेषु कष्टेषु । कान्तारेषु दुर्गममार्गेषु । भयेषु भयहेतुषु सत्सु कश्चित्पुरुषो नावसीदति दुःखितः ॥ २५ ॥ २७ ॥

२६–२७] ति० टी०–यदेवमतः पूजयस्वैनमादित्यहृदयार्थम् । देवदेवं देवानां ब्रह्मविष्णुरुद्राणामपि देवमुपास्यम् । जगतां जनिमृतिधर्मिणां सुरादिलोकानां संसारमात्रस्य च पतिम् । एतदादित्यहृदयं स्तोत्रं त्रिगुणितं संजातत्रिगुणं यथा तथा जप्त्वा विजयिष्यसि विजेष्यति रिपूनिति शेषः२६॥२७

रा० टी०–पूजयस्वेति । एतत्स्तोत्रं त्रिगुणितं त्रिगुणं त्रिवारं जप्त्वा एनं पूजयस्व अत एव युद्धेषु विजयिष्यसि विजेष्यसे ॥ २६ ॥

रा० टी०–विजये कारणमाह—अस्मिन्निति । रावणं त्वं जयिष्यसि हनिष्यसीत्यर्थः एवमुक्त्वा अगस्त्यो यथागतं जगाम ॥ २७ ॥

२८] ति० टी०–नष्टशोको नष्टो रावणविषयचिन्तारूपशोको यस्य सः ॥ २८ ॥

रा० टी०–एतदिति । नष्टः नित्यं निवृत्तशोको यस्य स रामः एतच्छ्रुत्वा सुप्रीतोऽभवत् अत एव धारयामास ॥ २८ ॥

गो० टी०–एतच्छ्रुत्वेत्यादिश्लोकद्वयमेकान्वयम् । त्रिराचम्येत्यन्त्याचमनमाद्याचमनस्याप्युपलक्षणम् । धारयामास जप्त्वेत्यत्र आदित्यहृदयमिति शेषः ॥ २८ ॥ २९ ॥

२९–३०] ति० टी०–इदं शीघ्रसिद्धिकरं स्तोत्रं जप्त्वा हृष्टात्मा प्रातर्युद्धायागतं रावणं प्रेक्ष्य जयार्थं मनसा भगवन्तमगमद्ध्यातवान् ॥ २९ ॥ ३० ॥

रा० टी०–आदित्यमिति । परं हर्षमवाप्तवान् रामः त्रिराचम्य आदित्यं प्रेक्ष्य त्रिर्जप्त्वा आदित्यहृदयमिति शेषः धनुरादाय रावणं प्रेक्ष्य युद्धाय समुपागमत् महता सर्वप्रयत्नेन उपलक्षितस्य तस्य रावणस्य वधे धृतः कृतनिश्चयोऽभवत् श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

गो० टी०–रावणमिति । युद्धाय युद्धं कर्तुम् । "तुमर्थाच्च भाववचनात्" इति चतुर्थी । सर्वयत्नेन सर्वप्रकारेण यत्नेन॥३०॥

३१] ति० टी०–अथ रवी रामं निरीक्ष्य निशाचरपतिसंक्षयं तत्कालं विदित्वा स्वलीलामूर्त्या सुरगणमध्यगतः सन्माशास्वेति वचोऽवदत् ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चोत्तरशततमः सर्गः॥ १०५॥

रा० टी०–अथेति । सुरगणमध्यगतो रविः निशिचरपतिसंक्षयं तत्कालं विदित्वा ज्ञात्वा त्वरेति वचः रामं निरीक्ष्यावदत् ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षडधिकशततमः सर्गः ॥ १०६ ॥

---

१ विजयिष्यसीति गो. रा. पा. । २ जयिष्यसीति रा. वधिष्यसीति गो. पाठः । ३ त्विति गो. त्रिरिति रा. पा. । ४ युद्धायेति गो. रा. पाठः । ५ वधे तस्य धृत इति गो. पाठः ।

षडुत्तरशततमः सर्गः ।

ततो रामरावणयोः सङ्ग्रामं द्रष्टुकामाः ससिद्धर्षिचारणा देवा आगतास्तत्र रामजयशंसिनो रावणस्याशुभावहाश्च महोत्पाताः प्रादुर्बभूवुस्तदा रामः सोत्साहो युद्धेऽधिकं विक्रमं दर्शयामास ।

सारथिः स रथं हृष्टः परसैन्यप्रधर्षणम् । गन्धर्वनगराकारं समुच्छ्रितपताकिनम् ॥ १ ॥
युक्तं परमसंपन्नैर्वाजिभिर्हेममालिभिः । युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम् ॥ २ ॥
ग्रसन्तमिव चाकाशं नादयन्तं वसुंधराम् । प्रणाशं परसैन्यानां स्वसैन्यस्य प्रहर्षणम् ॥ ३ ॥
रावणस्य रथं क्षिप्रं चोदयामास सारथिः । तमापतन्तं सहसा स्वनवन्तं महाध्वजम् ॥ ४ ॥
रथं राक्षसराजस्य नरराजो ददर्श ह । कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा ॥ ५ ॥
दीप्यमानमिवाकाशे विमानं सूर्यवर्चसम् । तडित्पताकागहनं दर्शितेन्द्रायुधप्रभम् ॥ ६ ॥
शरधारा विमुञ्चन्तं धाराधरमिवाम्बुदम् । तं दृष्ट्वा मेघसंकाशमापतन्तं रथं रिपोः ॥ ७ ॥

गो० टी०—अथेति । प्रहृष्यमाणः प्रहर्षयन् । पुरुकित इति यावत् । निशिचरपतिरिति । "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक् । रविः आत्मानं स्तुवन्तं रामं निर्दिश्य मुदितमनाः स्तोत्रेण संतुष्टमनाः प्रहृष्यमाणः सन्, निशिचरपतेः संक्षयं विदित्वा अनुगृह्य सुग्रीवमध्यगतः सन्, त्वरं रावणवधं प्रति त्वरस्वेति वचोऽवदत् । अत्र सुग्रीवमध्यगत इत्यनेन गुहदर्शनार्थं स्वमण्डलादवतीर्य रामसमीपे आगत्य स्थित्वा स्तोत्रफलमनुगृह्णीत्वानियुक्त इति । ननु तत्र ब्रह्मरुद्रादयः सर्वे एकवाक्यतया भवान्नारायणो देव इत्यादिना विष्णोरेव सर्वस्मात् परत्वं महता यत्नेन प्रतिपादितवन्तः, अत्र सर्वेषां सर्वोत्तमत्वमुच्यते, कथमिदं संगच्छते उच्यते यथा मधुविद्यायामादित्यस्य परतया प्रतिपादनेपि तदन्तर्गामित्वेन परमात्मनि मधुविद्यायास्तात्पर्यमिति बादरायणो ब्रह्ममीमांसायामुक्तवान् तथास्य मन्त्रस्यादित्यान्तर्यामिविषयतया सर्वमिदं संगच्छते । नारायणपरत्वं युपक्रमप्रभृत्युपसंहारमविवादमिति पूर्वमेव बहुलं प्रतिपादितम् । ब्रह्मेशानाद्यपेक्षयोत्तरोत्तरत्वेनापि मूर्तित्रयस्य परमात्मजन्यत्वादुपपद्यते । अर्थं च सर्गः केषु चित् कोशेषु न दृश्यते । उदारिणा न व्याख्यातश्च । आरम्भप्रभृतिप्रबन्धप्रतिपादितनारायणपरत्वविरुद्धं चात्र प्रतिभाति सूर्यपरत्वम् । अस्मिंश्च काण्डे त्रिंशदुत्तरशतसर्गाः उदारिणा गणिताः एतदन्तर्भावे एकत्रिंशदुत्तरशतसर्गास्तेन गणिता भवेयुः ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

१] ति० टी०—स सारथी रावणस्य सारथिर्हृष्टः सन्वर्ण्यमानगुणं रथं चोदयामासेत्यन्वयः । गन्धर्वनगराकारं तद्ददाश्चर्यदर्शनम् ॥ १ ॥

रा० टी०—रामरावणयोर्युद्धमेवाह—सारथिरित्यादिभिः । परसैन्यप्रधर्षणं गन्धर्वनगरवदाकारो यस्य अन्याश्चर्यमित्यर्थः समुच्छ्रिता या पताका तद्वन्तं रथमवलोक्य सारथिर्हृष्टो बभूवेति शेषः ॥ १ ॥

गो० टी०—अथ रावणदुर्निमित्तानि—स रथमित्यादिसार्धश्लोकत्रयमेकान्वयम् । अत्र द्वितीयसारथिशब्दः अनेकविशेषणव्यवधानात् पूर्वोत्तरविरमणाय । गन्धर्वनगराकारं गन्धर्वनगरसदृशम् । तल्लक्षणमुक्तं मिहिरेण—चित्रवर्णं चित्ररूपाकारगृहगोपुरम् । अलंकृतमनेकाभैर्वितानध्वजतोरणैः । गन्धर्वनगरं तत्तिदानिमश्वयुङ्कृत् । दृश्यते चेत्यादृग्युद्धमन्योन्यं परणीभुजाभिति । युद्धोपकरणैः धनुष्कवचादिभिः । पताकादुकूलैः ध्वजाः नैर्माल्यानि इति पताकाध्वजमालिनं तम् । "मल, मल्ल, धारणे" इत्यस्माण्णिनिः । ग्रसन्तमिव । स्वविस्तारेणेति भावः । प्रणाशयतीति प्रणाशम् ॥ १-३ ॥

२] ति० टी०—परमसंपन्नैः परमैः रथवहनोचितगुणैर्जवादिभिः संपन्नैः । पताकाध्वजानां मालाभिश्चस्ति तम् । अनेन ध्वजयाद्वन्यमुक्तम् । समुच्छ्रितपताकिनमित्यनेन च तदौन्नत्यमुक्तम् ॥ २ ॥

३] ति० टी०—प्रणाशं प्रणाशकरम् ॥ ३ ॥

रा० टी०—युक्तमिति । परमसम्पन्नैः अतिशीघ्रगामित्वादिगुणविशिष्टैर्वाजिभिर्युक्तं युद्धोपकरणैः शस्त्रादिभिः पूर्णं पताकाध्वजानां माला समूहः तद्वन्तमाकाशं ग्रसन्तमिव वसुंधरां नादयन्तमिव परसैन्यानां प्रणाशं विनाशकं रावणस्य रथं सारथिः क्षिप्रं चोदयामास सार्धश्लोकत्रयमेकान्वयि॥२॥३॥

४-५] ति० टी०—द्वितीयशब्दसारथिशब्दावनेकविशेषणव्यवधानात्पूर्वोत्तरविरमणार्थौ तदनुवादकावेव ॥ ४ ॥ ५ ॥

६-७] ति० टी०—तडित्पताकागहनं तडित्तुल्यपताकाभिर्गहनं संकीर्णम् । दर्शितेन्द्रायुधप्रभं दर्शितेन्द्रायुधस्य प्रभा येन तम् । 'दर्शितेन्द्रायुधाप्रभम्' इति पाठे दर्शितानीन्द्रायुधेन सदृशान्यायुधानि येन तमित्यर्थः ॥ ६ ॥ ७ ॥

---

१ सरथं सारथिरिति गो. पाठः । २ सैन्यानामिति गो. पाठः । ३ स्वनमिति गो. पाठः । ४ इदमर्धं गो. पु. न दृश्यते । ५ आसारमिति गो. रा. पाठः । ६ तमिति गो. पाठः ।

गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम् । विस्फारयन्वै वेगेन बालचन्द्रानतं धनुः ॥ ८ ॥
उवाच मातलिं रामः सहस्राक्षस्य सारथिम् । मातले पश्य संरब्धमापतन्तं रथं रिपोः ॥ ९ ॥
यथापसव्यं पतता वेगेन महता पुनः । समरे हन्तुमात्मानं तथानेन कृता मतिः ॥ १० ॥
तदप्रमादमातिष्ठ प्रत्युद्गच्छ रथं रिपोः । विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम् ॥ ११ ॥
अविक्लवमसंभ्रान्तमव्यग्रहृदयेक्षणम् । रश्मिसंचारनियतं प्रचोदय रथं द्रुतम् ॥ १२ ॥
कामं न त्वं समाधेयः पुरंदररथोचितः । युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये ॥ १३ ॥
परितुष्टः स रामस्य तेन वाक्येन मातलिः । प्रचोदयामास रथं सुरसारथिरुत्तमः ॥ १४ ॥

८-९] ति० टी०-वज्राभिमृष्टस्य वज्राभिहतस्य दीर्यतो गिरेः स्वनस्य सदृशस्वनम् बालचन्द्रवन्नतम् ॥ ८ ॥ ९ ॥

रा० टी०-तमिति । स्वनवन्तं राक्षसराजस्य रथं नरराजो ददर्श ॥ ४ ॥

गो० टी०-तमिति । स्वनवन्तं शब्दवन्तम् महास्वनं प्रतिध्वनियुक्तमित्यर्थः ॥ ४ ॥

रा० टी०-कृष्णेति । कृष्णैर्वाजिभिस्समायुक्तं रौद्रेण भयंकरेण वर्चसा तेजसा युक्तमत एव दीप्यमानं विमानमिव तडित्सदृशपताकाभिरंगदनं निर्विष्टम् दर्शितानि इन्द्रायुधतुल्यानि आयुधानि यस्मिन् धारासारं महाधारं विमुञ्चन्तमम्बुदमिव शरधारां विमुञ्चन्तमत एव मेघसंकाशं दीर्यतो गिरेस्सदृशस्वनमापतन्तं रिपोः रथं स रामो दृष्ट्वा बालचन्द्रवदानतं धनुर्विस्फारयन्सन् सहस्राक्षस्य सारथिमुवाच अर्द्धश्लोकमेकान्वयि ॥ ५-८ ॥

गो० टी०-कृष्णवाजिसमायुक्तमित्यादिसार्धश्लोकत्रयमेकान्वयम् । रौद्रेण उग्रेण । तडित्पताकागदनं तडित्तुल्यपताकावन्तम् । दर्शितेन्द्रायुधायुधं दर्शितानीन्द्रायुधसदृशानि आयुधानि येन तम् । यद्वा दर्शितेन्द्रायुधानि स्वप्रभाविशेषविरचितेन्द्रचापान्यायुधानि यस्मिन् दृश्यन्ते तादृशम । यद्वा आयुधं धनुः दर्शितेन्द्रधनुस्तुल्यवर्णकम् । धारासारं धारासमूहमित्यर्थः । वज्राभिमृष्टस्य वज्राहतस्य । अत एव दीर्यतः भिद्यमानस्य । बालचन्द्रनतम् आरोपितमौर्वीकत्वेन बालचन्द्रवन्नतम् ॥५-८॥

रा० टी०-तदाकारमाह—मातल इत्यादिभिः । हे मातले संरब्धं वेगवन्तं रिपोः रथं त्वं पश्य अर्द्धं पृथक् ॥ ९ ॥

गो० टी०-मातले इत्यर्धमेकं वाक्यम् । संरब्धं वेगवन्तम् ॥ ९ ॥

१०] ति० टी०-यथानुभूयमानप्रकारेणापसव्यं प्रदक्षिणं महता रथवेगेन पतताऽनेन रावणेन समरे आत्मानं मां हन्तुं मतिः कृता प्रथमप्रादक्षिण्येन रथसंचारलक्षणसुनिमित्तसंपादनेनेति शेषः ॥ १० ॥

रा० टी०-यथेति । अपसव्यं अप्रदक्षिणं यथा भवति तथा महता वेगेन पतता अनेन रावणेन आत्मानं परमात्मानमपि समरे हन्तुं मतिः कृता किञ्च आत्मानं स्वमेव समरे हन्तुं मतिः कृता एतेनास्यैवावध्यं विद्वानो भविष्यतीति सूचितम् ॥१०॥

गो० टी०-यथापसव्यमिति । यथा आ अपसव्यमिति छेदः । अपसव्यम् अप्रदक्षिणम् यथा स्यात्तथा महता वेगेन पुनः आपतता आगच्छता तेन रावणेन समरे आत्मानं हन्तुं मतिः कृता । अपसव्यतया गमनं विनाशद्योतकमित्यर्थः ॥१०॥

११] ति० टी०-तत्तस्मादप्रमादं सावधानत्वमातिष्ठासनस्थैर्येण रिपो रावणस्य रथं प्रति प्रत्युद्गच्छ । प्रादक्षिण्येनेवेति शेषः ॥ ११ ॥

रा० टी०-तदिति । वायुः उत्थितं मेघमिव रिपोः रथं विध्वंसयितुमिच्छामि तत् तस्मात् अप्रमादं यथा भवति तथा तिष्ठ अत एव प्रत्युद्गच्छ ॥ ११ ॥

गो० टी०-तदिति । तत् अपसव्यगमनस्य विनाशहेतुत्वात्, अप्रमादमातिष्ठन् सावधानतामवलम्बमानः । अपसव्यतां परिहरन्नित्यर्थः । रिपोः रथं प्रत्युद्गच्छ ॥ ११ ॥

१२] ति० टी०-अविक्लवादिचतुर्गुणयुक्तं यथा तथा द्रुतं रथं प्रचोदय । अविक्लवत्वमभीरुत्वम् असंभ्रान्तत्वं रणक्षोभादक्षुभितचित्तत्वम । अव्यग्रहृदयेक्षणं यत्र । रश्मिसंचारनियतम रश्मिसंचारे नैपुण्यं तत्तत्कालानुगुण्येन संयमनमोचनव्यवस्थापनत्वम् ॥ १२ ॥

रा० टी०-अविक्लवमिति । अविक्लवं भीरुताराहित्यमसम्भ्रान्तं भ्रान्तिराहित्यमव्यग्रहृदयेक्षण व्यग्रतारहितहृदयेक्षणं रश्मीनां संचारे आकुञ्चनप्रसारणे नियतं यथा भवति तथा रथं प्रचोदय ॥ १२ ॥

गो० टी०-अविक्लवमिति । अविक्लवम् अदीनम् । असंभ्रान्तम् अप्रमादम् । अव्यग्रहृदयेक्षणम् अव्याकुलमनोनयनम् । रश्मिसंचारनियतम् नियतरश्मिसंचारम् । एतानि क्रियाविशेषणानि ॥ १२ ॥

१३-१४] ति० टी०-यस्मात्पुरंदररथोचितस्त्वं यद्यपि कामं न समाधेयो न शिक्षणीयः, अथापि युयुत्सुरेकाग्रोऽहं स्मारये सहजं सारथ्यकर्म स्मारये न शिक्षये ॥ १३ ॥ १४ ॥

रा० टी०-कामामिति । यतस्त्वं पुरन्दररथोचितः अतस्त्वं न समाधेयः तथापि युयुत्सुरहं त्वां स्मारये न शिक्षये ॥ १३ ॥

रा० टी०-परितुष्ट इति । रामस्य वाक्येन परितुष्टः सुरसारथिस्तमो मातलिः रथं प्रचोदयामास ॥ १४ ॥

१ तिष्ठन्निति गो. पाठः । २ सत्तम इति गो. रा. पाठः ।

अपसव्यं ततः कुर्वन्रावणस्य महारथम् । चक्रक्षसंभूतरजसा रावणं व्यवधूनयत् ॥ १५ ॥
ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः । रथप्रतिमुखं रामं सायकैरवधूनयत् ॥ १६ ॥
धर्षणामर्षितो रामो धैर्यं रोषेण लम्भयन् । जग्राह सुमहावेगमैन्द्रं बुधि शरासनम् ॥ १७ ॥
शरांश्च सुमहावेगान्सूर्यरश्मिसमप्रभान् । तेंदुपोढं महद्युद्धमन्योन्यवधकाङ्क्षिणोः ॥
परस्पराभिमुखयोर्दंष्ट्रयोरिव सिंहयोः ॥ ॥ १८ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । समीयुर्द्वैरथं द्रष्टुं रावणक्षयकाङ्क्षिणः ॥ १९ ॥
समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः । रावणस्य विनाशाय राघवस्योदयाय च ॥ २० ॥
ववर्ष रुधिरं देवो रावणस्य रथोपरि । वाता मण्डलिनस्तीव्रा ववुरपसव्यं प्रचक्रमुः ॥ २१ ॥
महद्गृध्रकुलं चास्य भ्रममाणं नभःस्थले । येन येन रथो याति तेन तेन प्रधावति ॥ २२ ॥

गो० टी०–काममिति । न समाधेयः नोपदेष्टव्यः । अत्र हेतुः—पुरन्दररथोचित इति । अभ्यस्तपुरन्दररथ इत्यर्थः ॥ १३ ॥ १४ ॥

१५] ति० टी०–अपसव्यं प्रदक्षिणप्रचारम् । व्यवधूनयदकम्पयत् ॥ १५ ॥

रा० टी०–अपसव्यमिति । रावणस्य महारथं अपसव्यं कुर्वन् मातलिः चक्रोक्षिप्तेन रजसा रावणं व्यवधूनयत् व्यवाधूनयत् अकम्पयत् ॥ १५ ॥

गो०टी०–अपसव्यमिति । रावणस्य महारथमपसव्यं कुर्वन् स्वरथस्यापसव्यतां परिहरन्नित्यर्थः । चक्रोक्षिप्तेन रथचक्रोत्थापितेन रजसा, रावणं व्यवधानयत् व्यवहितमकरोत् १५

१६] ति० टी०–रथेन प्रतिमुखं संमुखं रथप्रतिमुखम् ॥ १६ ॥

रा० टी०–तत इति । दशग्रीवः रथप्रतिमुखं रामं सायकैरवधूनयत् अधाधूनयत् ॥ १६ ॥

गो० टी०–तत इति । रथप्रतिमुखं सर्वथाभिमुखम्, अवधूनयत् प्राहरत् ॥ १६ ॥

१७] ति० टी०–धर्षणेनामर्षितो रोषेण सह धैर्यं युद्धाभिर्दी लम्भयन्प्राप्नुवन्निन्द्रस्येदमैन्द्रं शरासनं जग्राह । किं वैन्द्रं पारमेश्वरम् । 'इदि परमैश्वर्ये' इत्युक्तेः । निजामुर्वं नयाहेत्यर्थः ॥ १७ ॥

रा० टी०–धर्षणेति । धर्षणेन अमर्षितो रामः धैर्यं रोषेण लम्भयन् योजयन्सन् ऐन्द्रं शरासनं शरांश्च जग्राह॥१७॥

गो० टी०–धर्षणेत्यादिसार्धश्लोकमेकं वाक्यम । धैर्यं रोषेण लम्भयन् रोषेण निहतधैर्य इत्यर्थः । ऐन्द्रं मातलिनादितं शरासनं शरांश्च जग्राहेति योजना ॥ १७ ॥

१८] ति० टी०–तत्तदा महद्युद्धमुपोढमारब्धमभूत्॥१८॥

रा० टी०–तदिति । इमयोर्सिंहयोरिव अन्योन्यवधकाङ्क्षिणोः रामरावणयोः महद्युद्धमुपोढमारब्धम् ॥ १८ ॥

गो० टी०–तदोपोढमिति । उपोढं प्रवृत्तम् ॥ १८ ॥

१९–२०] ति० टी०–ह्राभ्यां रथाभ्यां प्रवर्तितं द्वयो रथयोरिदं वा द्वैरथं युद्धं द्रष्टुं समीयुर्मिलित्वा गताः॥१९॥२०॥

रा० टी०–तत इति । रावणक्षयकाङ्क्षिणः देवादयः द्वैरथं युद्धं द्रष्टुं समीयुः ॥ १९ ॥

गो० टी०–तत इति । द्वैरथं द्वाभ्यां रथाभ्यां प्रवर्तितं युद्धम् ॥ १९ ॥

रा० टी०–अथानन्तरं दारुणाः उत्पाता. समुत्पेतुः॥२०॥

गो० टी०–समुत्पेतुरिति । अत्रोत्पातानां राघवजयसूचकत्वं रावणवधद्वारा ॥ २० ॥

२१] ति० टी०–उत्पातानाह—ववर्षेति । मण्डलिनो वाताः । वात्यारूपा इत्यर्थः । तीव्रास्तीव्रवेगाः । अपसव्यं विगतमपसव्यं प्रदक्षिणं यथा तथा । वामावर्तां इत्यर्थः ॥२१॥

रा० टी०–उत्पाताकारमाह—ववर्षेति । देव उत्पातविशेषदेवता रावणस्य रथोपरि रुधिरं ववर्ष मण्डलिनः अनेकमण्डलविशिष्टाः वाताः अपसव्यं प्रचक्रमुः ॥ २१ ॥

गो० टी०–ववर्षेति । देवः पर्जन्यः । मण्डलिनो वाताः वात्याः । अपसव्यम् अप्रदक्षिणम्, प्रचक्रमुः चेरुः ॥ २१ ॥

२२] ति० टी०–येन येनेति । मार्गेणेत्यर्थः । गृध्रकुलस्य मृतमांसभोजिनो रावणेन सहागमनेन रावणस्यासन्नमरणे सूच्यते ॥ २२ ॥

रा० टी०–महदिति । नभःस्थले भ्रममाणं गृध्रकुलं येन येन यथा अस्य रावणस्य रथो याति तेन तेन पथा प्रधावति ॥ २२ ॥

गो० टी०–महदिति । अस्य रावणस्य रथो येन मार्गेण याति स्म तेन मार्गेण महद् गृध्रकुलम् नभःस्थले भ्रममाणं सत् प्रधावति स्म । अनेन रावणस्यासन्नमरणत्वं सूचितम् । तदुक्तं शकुनार्णवे—आसन्नमृत्योर्निकटे चरन्ति गृध्रादयो मूर्धि गृहोच्चभाग इति ॥ २२ ॥

१ उत्क्षिप्तेनेति गो. रा. पाठः । २ धानयदिति गो. पाठः । ३ इदमर्धं रा. पु. न दृश्यते । ४ तेजा इति गो. पाठः । ५ तवेति गो. पाठः । समेयुरिति गो. पाठः । ७ जयायेति गो. रा. पाठः । ८ ह्यपेति गो. रा. पाठः ।

संध्यया चावृता लङ्का जपापुष्पनिकाशया । दृश्यते संप्रदीप्तेव दिवसेऽपि वसुंधरा ॥ २३ ॥
सनिर्घाता महोल्काश्च संप्रपेतुर्महास्वनाः । विषादयंस्ते रक्षांसि रावणस्य तदा हिताः ॥ २४ ॥
रावणश्च यतस्तत्र प्रचचाल वसुंधरा । रक्षसां च प्रहरतां गृहीता इव बाहवः ॥ २५ ॥
ताम्राः पीताः सिताः श्वेताः पतिताः सूर्यरश्मयः । दृश्यन्ते रावणस्याग्रे पर्वतस्येव धातवः ॥ २६ ॥
गृध्रैरनुगताश्चास्य वमन्तो ज्वलनं मुखैः । प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः ॥ २७ ॥
प्रतिकूलं ववौ वायू रणे पांसून्समुत्किरन् । तस्य राक्षसराजस्य कुर्वन्दृष्टिविलोपनम् ॥ २८ ॥
निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः । दुर्विषह्यस्वरा घोरं विना जलधरोदयम् ॥ २९ ॥
दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः । पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत् ॥ ३० ॥

२३] ति० टी०–जपापुष्पनिकाशया संध्यया वृता लङ्का संप्रदीप्तेव दृश्यते । अकालेऽपीति शेषः । तदेवाह—दिवसेऽपीति । वसुंधरेति लङ्काविशेषणम् ॥ २३ ॥

रा० टी०–सन्ध्ययेति । जपापुष्पनिकाशया सन्ध्ययावृता लंका वसुन्धरा दिवसेऽपि संप्रदीप्ता इव दृश्यते ॥ २३ ॥

गो० टी०–संध्ययेति । जपापुष्पनिकाशया संध्यया लङ्का आवृता । अत एव वसुंधरा लङ्कापर्यन्तभूमिः रात्रावग्निना संप्रदीप्तेव दिवसेऽपि संप्रदीप्ता दृश्यत इत्यर्थः ॥ २३ ॥

२४] ति० टी०–संप्रपेतुः । रावणस्य पुरस्तादिति शेषः । तदा तस्मिन्काले । अहिता अनर्थसूचकाः ॥ २४ ॥

रा० टी०–सेति । निर्घातसहिताः महोल्काः संप्रपेतुः रावणाग्रे निपेतुः अत एव तदा तस्मिन् काले अहिताः अमङ्गलसूचकत्वेन रिपुभूताः ते निर्घातादयः रक्षांसि विषादयन् व्यषादयन् ॥ २४ ॥

गो० टी०–सनिर्घाता इति । सनिर्घाता महोल्काः संप्रचेरुः । ते उल्काः लिङ्गव्यत्ययः । रावणस्याहिताः प्रतिकूलाः सन्तः रक्षांसि विषादयन् व्यषादयन् ॥ २४ ॥

२५] ति० टी०–वसुंधरा लङ्कापर्यन्तभूः गृहीता इवेति । भयास्तब्धा इति शेषः ॥ २५ ॥

रा० टी०–रावण इति । यतो यत्र देशे रावणः तत्र वसुधा चचाल प्रहरतां रक्षसां बाहवस्तु गृहीता इव बभूवुरिति शेषः ॥ २५ ॥

गो० टी०–रावणश्चेति । यतः यत्र, रावणो गतः तत्र वसुंधरा संचचाल । रावणसमीप एव भूकम्पो जात इत्यर्थः । गृहीता इव बाहवः । कैश्चिद्गृहीता बाहवो यथा प्रहर्तुं न क्षमन्ते तथाभूवन्नित्यर्थः ॥ २५ ॥

२६] ति० टी०–पर्वतस्य धातव इव ताम्रादिरूपाः सूर्यस्य रश्मयो रावणस्याग्रे पतिताः सन्तो दृश्यन्त इति संबन्धः ॥ २६ ॥

रा० टी०–ताम्रा इति । पर्वतस्य धातव इव ताम्रादयः इव सूर्यरश्मयः रावणस्याग्रे दृश्यन्ते ॥ २६ ॥

गो० टी०–ताम्रा इति । सिता अत्यंताश्च सिताश्वेताः । पर्वतस्येवेति । पर्वतस्याङ्गे धातव इवेति योजना ॥ २६ ॥

२७] ति० टी०–अस्य मुखमीक्षन्त्य इत्यन्वयः ॥ २७ ॥

रा० टी०–गृध्रैरिति । मुखैर्मुखेभ्यो ज्वलनं वमन्तः गृध्रैरनुगताः सहिताः अशिवाः अमङ्गलसूचकाः शिवा गोमायवः अस्य रावणस्य मुखमीक्षन्तस्तस्यन्तः संरब्धमतिकोपं यथा भवति तथा प्रणेदुः ॥ २७ ॥

गो० टी०–गृध्रैरिति । गृध्रैरनुगताः गृध्रसहिता इत्यर्थः । शिवाः गोमायवः, मुखैरुदरैर्वलनं वमन्त्यः सत्यः अस्य रावणस्य मुखमीक्षन्त्यः । रावणाभिमुखा इत्यर्थः । संरब्धं कुपितम्, अशिवम् अमङ्गलम् च यथा भवति तथा प्रणेदुः । गृध्राणां साहित्यमात्रं न तु ज्वलनवमनादिकम् ॥ २७ ॥

२८] ति० टी०–दृष्टिविलोपनमशक्तयोर्द्दीक्षणत्वम् ॥ २८ ॥

रा० टी०–प्रतिकूलमिति । राक्षसराजस्य दृष्टिविलोपनं कुर्वन् कर्तुं रणे पांसून् समुत्किरन् सन् वायुः प्रतिकूलं ववौ ॥ २८ ॥

गो० टी०–प्रतिकूलमिति । वायुः रणे पांसून् समाकिरन्, तेन तस्य रावणस्य दृष्टिविलोपनं दृष्टिप्रतिघातं कुर्वन्, प्रतिकूलम् अभिमुखं ववौ ॥ २८ ॥

२९–३०] ति० टी०–इन्द्राशनय इत्यनेनायुधाशनिव्याप्तिः ॥ २९ ॥ ३० ॥

रा० टी०–निपेतुरिति । जलधरस्य मेघस्य उदयं विनादुर्विषह्यस्वराः इन्द्राशनयः अस्य सैन्ये समन्ततो निपेतुः ॥ २९ ॥

रा० टी०–दिश इति । पांसुवर्षेण दिशः प्रदिशश्च तिमिरावृता बभूवुः अत एव नभो दुर्दर्शमभवत् ॥ ३० ॥

गो० टी०–निपेतुरिति । इन्द्राशनयः उल्काशनयः उल्काशब्दयोः स्वरूपमुक्तं मिहिरेण—उल्का शिरसि विशाला निपतन्ती वर्षते च तनुपुच्छा । अशनिः स्वनेन सहिता युक्ता नृगजाश्वतरुपशुमुखेषु । निपतति विदारयन्ती धरातलं चक्रसंस्थानेति ॥ २९ ॥ ३० ॥

---

१ चेत्यति गो. पाठः । २ समिति गो. पाठः । ३ अङ्गे इति गो. रा. पाठः । ४ वमन्त्य इति गो. पाठः । ५ समेति गो. पाठः । ६ स्वना इति गो. पाठः । ७ घोरा इति गो. पाठः । ८ स्वनमिति गो. पाठः ।

कुर्वत्यः कलहं घोरं सारिकास्तद्रथं प्रति । निपेतुः शतशस्तत्र दारुणा दारुणारुताः ॥ ३१ ॥
जघनेभ्यः स्फुलिङ्गाँश्च नेत्रेभ्योऽश्रूणि संततम् । मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ॥ ३२ ॥
एवंप्रकारा बहवः समुत्पाता भयावहाः । रावणस्य विनाशाय दारुणा संप्रजज्ञिरे ॥ ३३ ॥
रामस्यापि निमित्तानि सौम्यानि च शिवानि च । बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः ॥ ३४ ॥
निमित्तानीहँ सौम्यानि राघवस्यँ जयाय वैँ । दृष्ट्वा परमसंहृष्टो हतं मेने च रावणम् ॥ ३५ ॥
ततो निरीक्ष्यात्मगतानि राघवो रणे निमित्तानि निमित्तकोविदः ।
जगाम हर्षं च परां च निर्वृतिं चकार युद्धे ह्यधिकं च विक्रमम् ॥ ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षडुत्तरशततम सर्गः ॥ १०६ ॥

सप्तोत्तरशततमः सर्गः ।

रामरावणयोर्भयानके समरे रावणेनामर्षिणा महच्छौर्यं दर्शितम् दृष्ट्वा देवादयो विस्मिताः तथापि रामो बाणेनारेर्ध्वजं छित्त्वा भूमावपातयत्तद्दृष्ट्वा रामतुरगेषु रावणेन क्षिप्ता विशिखा निरर्थकाः एवमपि रावणपराभवमपश्यन्तो निर्जरमुनिगणास्तेसुर्गोब्राह्मणेभ्यः स्वस्तीत्युक्त्वा रामजयमाशंसिरे ततो रामेण रावणशिरोऽसकृच्छिन्नमपि यथापूर्वमेव स्थितं विलोक्य विस्मितेन चिन्तापरेण च तस्थे ।

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा । सुमहद्वैरथं युद्धं सर्वलोकभयावहम् ॥ १ ॥

३१] ति० टी०-तद्रथं रावणरथं प्रति ॥ ३१ ॥

रा० टी०-कुर्वन्त्य इति । दारुणमारुतं शब्दो यासामत एव दारुणाः शतशस्सारिकाः कलहं कुर्वत्यः सत्यः तद्रथं प्रति निपेतुः ॥ ३१ ॥

गो० टी०-कुर्वन्त्य इति । तद्रथं प्रति तद्रथोपरि॥३१॥

३२-३४] ति० टी०-तुल्यमग्निं च वारि च । जघनेभ्य इत्यायुक्तप्रकारेणेति शेषः ॥ ३२-३४ ॥

रा० टी०-जघनेभ्य इति । तस्य तुरगाः जघनेभ्यः स्फुलिङ्गान् नेत्रेभ्योऽश्रूणि च सततं मुमुचुः अत एव तुल्यमेककालावच्छेदेन अग्निं वारि च मुमुचुः ॥ ३२ ॥

रा० टी०-एवमिति । एवं प्रकारा विनाशकाः बहवः समुत्पाताः संप्रजज्ञिरे ॥ ३३ ॥

गो० टी०-जघनेभ्य इति । तुरगाः जघनेभ्यः स्फुलिङ्गान् नेत्रेभ्यः अश्रूणि च मुमुचुः । एवमग्निं च वारि च तुल्यं यथा भवति तथा मुमुचुः ॥ ३२ ॥ ३३ ॥

रा० टी०-रामस्येति । रामस्य जयशंसीनि शिवानि मङ्गलरूपाणि अत एव सौम्यानि सर्वशो निमित्तानि प्रादुर्भूतानि बभूवुरिति शेषः ॥ ३४ ॥

गो० टी०-एवं रावणपराजयसूचकदुर्निमित्तान्युक्तानि इदानीं, रामजयसूचकनिमित्तान्याह—रामस्यापीति । सौम्यानि मनोज्ञानि शुभानि शुभोदर्काणि अत एव जयशंसीनि निमित्तानि प्रादुर्बभूवुः सत्तां लेभिरे । रामविषये किंचिदकारो हि सत्तालाभहेतुः ॥ ३४ ॥

३५-३६] ति० टी०-परमसंहृष्टो लक्ष्मणो मातलिर्वेति शेषः ॥ ३५ ॥ ३६ ॥

इति श्रीरामानन्दीये श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

रा० टी०-निमित्तानीति । राघवस्य जयाय सौम्यानि निमित्तानि दृष्ट्वा परमसंहृष्टः स देवादिसमूहः रावणं हतं मेने ॥ ३५ ॥

गो० टी०-निमित्तानीति । जयाय निमित्तानि जयसूचकनिमित्तानीत्यर्थः ॥ ३५ ॥

रा० टी०-तत इति । निमित्तकोविदो रामः आत्मानं गतानि प्राप्तानि निमित्तानि निरीक्ष्य हर्षं संतोषं परां निर्वृतिमानन्दं च जगाम अत एव युद्धे अधिकं विक्रमं चकार॥३६॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे सप्ताधिकशततमः सर्गः ॥ १०७ ॥

गो० टी०-तत इति । रणे आत्मगतानि आत्मार्थं प्रादुर्भूतानि । हर्षं पुलकं निर्वृतिं सुखं च जगाम ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

१] ति० टी०-तत इति । द्वैरथं व्यारुयातम् । सुमहदनेकदिनव्यापि ॥ १ ॥

रा० टी०-रामरावणयोर्युद्धमाह-तत इत्यादिभिः । सर्वलोकभयावहं विजयस्यानिश्चयात्सर्वेषां भयकारकं रामरावणयोर्द्वैरथं युद्धं प्रवृत्तम् ॥ १ ॥

१ कुर्वन्त्य इति गो. रा. पाठः । २ दारुणमिति गो. पाठः । ३ स्फुलिङ्गानिति गो. पाठः । ४ शुभानीति गो. पाठः । ५ चेति गो पाठः । ६ राघवः स्येति गो. पाठः । ७ चेति गो. रा. पाठः ।

ततो राक्षससैन्यं च हरीणां च महद्बलम् । प्रगृहीतप्रहरणं निश्चेष्टं समवर्तत ॥ २ ॥
संप्रयुद्धौ तु तौ दृष्ट्वा बलवन्नररक्षसौ । व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः ॥ ३ ॥
नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः । तस्थुः प्रेक्ष्य च सर्वे ते नाभिजग्मुः परस्परम्॥ ४ ॥
रक्षसां रावणं चापि वानराणां च राघवम् । पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ॥ ५ ॥
तौ तु तत्र निमित्तानि दृष्ट्वा राघवरावणौ । कृतबुद्धी स्थिरामर्षौ युयुधाते ह्यभीतवत् ॥ ६ ॥
जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः । धृतौ स्ववीर्यसर्वस्वं युद्धेऽदर्शयतां तदा ॥ ७ ॥
ततः क्रोधादशग्रीवः शरान्संधाय वीर्यवान् । मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम् ॥ ८ ॥
ते शरास्तमनासाद्य पुरंदरध्वजम् । रथशक्तिं परामृश्य निपेतुर्धरणीतले ॥ ९ ॥
ततो रामोऽपि संक्रुद्धश्चापमाकृष्य वीर्यवान् । कृतप्रतिकृतं कर्तुं मनसा संप्रचक्रमे ॥ १० ॥
रावणध्वजमुद्दिश्य मुमोच निशितं शरम् । महासर्पमिवासह्यं ज्वलन्तं स्वेन तेजसा ॥ ११ ॥
रामश्चिक्षेप तेजस्वी केतुमुद्दिश्य सायकम् । जगाम स महीं भित्त्वा दशग्रीवध्वजं शरः ॥ १२ ॥
स निकृत्तोऽपतद्भूमौ रावणस्यन्दनध्वजः । ध्वजस्योन्मथनं दृष्ट्वा रावणः स महाबलः ॥ १३ ॥
संप्रदीप्तोऽभवत्क्रोधादमर्षात्प्रदहन्निव । स रोषवशमापन्नः शरवर्षं ववर्ष ह ॥ १४ ॥

गो० टी०-ततः प्रवृत्तमित्यादि । ज्ञेयं ज्ञात्वा रथाभ्यां प्रवृत्तं युद्धं प्रहृत्तमिति योजना ॥ १ ॥

२] ति० टी०-प्रगृहीतप्रहरणमपि विशेषेण समवर्तत निश्चेष्टोपरागमेवानिष्टत् । तयुद्धदर्शनपारवश्यादिति शेषः ॥ २ ॥

रा० टी०-तत इति । ततः विजयस्याविश्यवाहेनोः प्रगृहीतप्रहरणमपि राक्षससैन्यं हरीणां बलं च निश्चेष्टं समतिष्ठत ॥ २ ॥

गो० टी०-तत इति । निश्चेष्टं समतिष्ठत । युद्धादुत्तदर्शनकुतूहलादिति भावः ॥ २ ॥

३] ति० टी०-तदेवाह—संप्रयुद्धाविति । सम्यग्युद्धारम्भप्रवृत्तौ ॥ ३ ॥

रा०टी०-तदेव भेगन्तरेणाह—संप्रयुद्धाविति । बलवन्नररक्षसौ संप्रयुद्धौ दृष्ट्वा व्याक्षिप्तहृदयाः सर्वे वानरराक्षसाः परं विस्मयं भयमागताः ॥ ३ ॥

गो० टी०-एतदेव विवृणोति द्वाभ्याम्—संप्रयुद्धाविति । संप्रयुद्धौ सम्यग्योद्युमुद्यक्तौ । कर्मणि क्तः बलवत् अत्यन्तम, व्याक्षिप्तहृदयाः युद्धदर्शनसक्तचित्ताः ॥ ३ ॥

४] ति० टी०-भुजैरकलक्षिता इति शेषः नाभिजग्मुः । प्रहर्तुं परस्परमिति शेषः ॥ ४ ॥

रा० टी०-नानेति । नानाप्रहरण नि येषु तैः व्यग्रैर्भुजैरकलक्षिताः ते सर्वे तं युध्यमा स्वस्वस्तामिनं प्रेक्ष्य परस्परं नाभिजग्मुः ॥ ४ ॥

गो० टी०-नानेति । भुजैरित्युपलक्षणे तृतीया ॥ ४ ॥

५] ति० टी०-विस्मिताक्षाणां विस्मयपरवशेन्द्रियाणाम् हरिरक्षसामिति शेषः । चित्रमिव चित्रलिखितमिव ॥ ५ ॥

रा० टी०-रक्षसामिति । रावणं पश्यतां रक्षसां रामं पश्यतां वानराणां च सैन्यं चित्रमिवाबभौ ॥ ५ ॥

गो० टी०-रक्षसामिति । रावणं पश्यतां विस्मिताक्षाणां विकसितनेत्राणां रक्षसां सैन्यम, राघवं पश्यतां विस्मिताक्षाणां वानराणां सैन्यं च चित्रमिवाबभौ ॥ ५ ॥

६] ति० टी०-कृतबुद्धी युद्धविषये निश्चितबुद्धी । अभीतवदभीताहम् ॥ ६ ॥

रा० टी०-ताविति । तौ रामरावणौ निमित्तानि दृष्ट्वा कृतबुद्धी जातनिश्चयौ अत एव [illegible] चेतौ अभीतवत् भीतिरहितं यथा भवति तथा युयुधाते ॥ ६ ॥

गो० टी०-ताविति । निमित्तानि दुर्निमित्तानि शुभनिमित्तानि चेत्यर्थः । कृतबुद्धी निश्चितबुद्धी ॥ ६ ॥

७-८] ति० टी०-निश्चयमाह—जेतव्यमिति मर्तव्यमिति । मृत्युरूपशत्रौ प्रहर्तव्यमित्यर्थ इति कृतकः इति धृतौ एवं निश्चयवन्तौ अदर्शयतामिति श्लेषः ॥ ७ ॥ ८ ॥

रा० टी०-निश्चयस्वरूपमाह—जेतव्यमिति । धृतौ कृतनिश्चयौ युद्धे स्ववीर्यसर्वस्वमदर्शयताम् ॥ ७ ॥

रा० टी०-तत इति । दशग्रीवः शरान् संधाय राघवस्य रथे स्थितं ध्वजमुद्दिश्य मुमोच ॥ ८ ॥

गो० टी०-निश्चयमेवाह—जेतव्यमिति । जयोवश्यंभावीति । मर्तव्यमिति मरणमवश्यंभावीति । आवश्यकत्वार्थं तव्यः कृतौ वैयर्थ्यात् ॥ ७ ॥ ८ ॥

९-१४] ति० टी०-रथशक्तिं दिव्यरथवैभवं रथावयवविशेषं वा परामृश्य प्राप्य तन्महिम्ना केवलं धरणीतले पेतुः ॥ ९-१४ ॥

१ अतिष्ठतेति गो. रा. पाठः । २ तत इति गो. पाठः । ३ संपेतुः प्रेक्ष्य संख्यामिति गो. पाठः । ४ रावणराघवाविति गो. पाठः । ५ आयम्येति गो. पाठः । ६ छिन्नेति गो. पाठः । ७ रावणस्य रथेते गो. पाठः । ८ स्विति गो. रा. । ९ महद्बलमिति गो. पाठः ।

रामस्य तुरगान्दीप्तैः शरैर्विव्याध रावणः । ते दिव्यौ हरयस्तत्र नास्खलन्नापि बभ्रमुः ॥ १५ ॥
बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः । तेषामसंभ्रमं दृष्ट्वा वाजिनां रावणस्तदा ॥ १६ ॥
भूय एव सुसंक्रुद्धः शरवर्षं मुमोच ह । गदाश्च परिघांश्चैव चक्राणि मुसलानि च ॥ १७ ॥
गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान् । मायाविहितमेतत्तु शस्त्रवर्षमपातयत् ॥
सहस्रशस्तदा बाणानभ्रान्तहृदयोद्यमः ॥ ॥ १८ ॥
तुमुलं त्रासजननं भीमं भीमपतिस्वनम् । तद्बभूव महद्युद्धं नैकशस्त्रमयं महत् ॥ १९ ॥
विमुच्य राघवरथं समन्ताद्वानरे बले । सायकैरन्तरिक्षं च चकार सुनिरन्तरम् ॥ २० ॥

रा० टी०–ते इति । शराः रथशक्तिमद्गुतथसामर्थ्यं रामस्य अनुभूय पुरंदररथध्वजमनासाद्य अप्राप्य धरणीतले निपतुः ॥ ९ ॥

गो० टी०–त इति । रथशक्तिं रथबलम्, परामृश्य प्राप्य । रथशक्तिप्रघातेन ध्वजमनासाद्य निपेतुरित्यर्थः ॥ ९ ॥

रा० टी०–तत इति । रामोऽपि कृतप्रतिज्ञः ध्वजच्छेदमित्यर्थः कर्तुं मनसा संप्रचक्रमे ॥ १० ॥

गो० टी०–ततो राम इति । संप्रचक्रमे उद्युक्तवान् । संकल्पितवानित्यर्थः ॥ १० ॥

रा० टी०–रावणेति । रावणध्वजमुद्दिश्य शरं मुमोच ११

गो० टी०–रावणध्वजमिति । असह्यं दुर्दर्शमित्यर्थः ११

रा० टी०–राम इति । रामः केतुमुद्दिश्यैकं शरं विषानलं सायकं चिक्षेप सः दशग्रीवध्वजं भित्त्वा महीं जगाम ॥ १२ ॥

गो० टी०–जगामेति । सः शरः ध्वजं छित्त्वा जगाम न केवलं जगाम ॥ १२ ॥

रा० टी०–स इति । निकृत्तः छिन्नः रावणस्यन्दनस्य ध्वजो भूमावपतत् अर्द्धं पृथक् ॥ १३ ॥

रा० टी०–ध्वजस्येति । रावणः ध्वजस्योन्मथनं दृष्ट्वा क्रोधात् अमर्षाच्च संप्रदीप्तोऽभवत् अत एव प्रदहन्निव तस्थावेति शेषः ॥ १४ ॥

गो० टी०–ध्वजस्येति । क्रोधादमर्षाच्च प्रदहन्निव प्रज्वलन्निव, संप्रदीप्तः ज्वलितः अभवत् ॥ १३ ॥

रा० टी०–स इति । स रावणः शरवर्षं ववर्ष अत एव रामस्य तुरगान् विव्याध ॥ १५ ॥

गो० टी०–स इति । शरवर्षं वमन् वमनिवेत्यर्थः ॥१४॥

१५] ति० टी०–स्खलनाद्यभावे स्वस्थहृदयत्वे च हेतुः–दैव्य इति ॥ १५ ॥

रा० टी०–ते इति । ते हरयः नास्खलन् नापि बभ्रमुः पद्मनालैराहता इव स्वस्थहृदया एव बभूवुश्च ॥ १६ ॥

गो० टी०–त इति । हरयः हरितवर्णाः इन्द्राश्वत्वादिति वः ॥ १५ ॥ १६ ॥

१६–१७] ति० टी०–पद्मनालैः पद्मदण्डैः ॥ १६ ॥ १७ ॥

रा० टी०–तेषामिति । रावणो भूयश्शरवर्षं गदादींश्च मुमोच श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–गदाश्चेति । मुमोचेत्यनुषज्यते ॥ १७ ॥

१८] ति० टी०–गिरिशृङ्गादीनां पातनं कृतस्तत्राह–मायाविहितमिति । एतद्विरिक्षादिदत्तम् । शस्त्रवर्षं शुक्तगदादिशस्त्रवर्षम् ॥ १८ ॥

रा० टी०–मायेति । न भ्रान्तो हृदयोद्यमो यस्य स रावणः मायाविहितमेतत् प्रसिद्धम् शस्त्रवर्षमपातयत् बाणानपातयत् ॥ १९ ॥

गो० टी०–वनपा कथं गदादिमोचनमित्याह–मायेति । शस्त्रवर्षं गदादिवर्षम् मायाविहितम् आश्चर्यकरशक्तिकृतम् तुमुलं नानाविधमित्यर्थः ॥ १८ ॥

१९] ति० टी०–भीमः प्रतिस्वनो यस्मिंस्तत् । नैकाशस्त्रमयं नानाशस्त्रप्रचुरम् । तद्वर्षं प्रागुक्ताश्ववर्षम् ॥ १९ ॥

रा० टी०–तुमुलमिति । नैकशस्त्रमयं तद्वर्षं त्रासजननमभवत्॥ २० ॥

गो० टी०–तद्वर्षमिति । नैकशस्त्रमयम् अनेकशस्त्रप्रचुरम्, तद्वर्षं क्रोधातिशयेन प्रयुक्तं रामशरैर्निवारणाल्लक्ष्यभूतं राघवरथं विमुच्य वानरबले अभवत् । तत्रापतदित्यर्थः ॥१९॥

२०] ति० टी०–राघवरथं विमुच्य क्रोधातिशयेन युक्तत्वाल्लक्ष्यभूतं रामरथमतिक्रम्य वानरं बलेऽपतत् ॥ २० ॥

रा० टी०–विमुच्येति । निस्संगेन एतल्लोकाशक्तिरहितेनात्मनोपलक्षितो दशग्रीवः राघवरथं विमुच्य वानरं बले समन्तात् मुमोच शरानिति शेषः अत एव सायकैः अन्तरिक्षं निरंतरमवकाशरहितं चकार सार्द्धश्लोक एकान्वयी ॥ २१ ॥

गो० टी०–सायकैरित्यादि सार्धश्लोक एकान्वयः ॥ ततः दशग्रीवः अश्रान्तहृदयोद्यमः अविच्छिन्नोत्साहः सन्, निःसङ्गेन अव्यासक्तेन, अन्तरात्मना मनसा उपलक्षितः, सहस्रशो बाणान् मुमोच सायकैरन्तरिक्षं च निरन्तरं चकार ॥ २० ॥

---

१ विद्धा इति गो. पाठः । २ इदमर्धं विंशपद्यात्परं गो. पाठे । ३ अश्रान्तेति गो. रा. पाठः । ४ आर्षत्वात् गो. रा. पाठः ।

मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मना । व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे ॥ २१ ॥
प्रहसन्निव काकुत्स्थः संदधे निशितौञ्छरान् । स मुमोच ततो बाणाञ्छतैशोऽथ सहस्रशः ॥ २२ ॥
तान्दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम् । ताभ्यां नियुक्तेन तदा शरवर्षेण भास्वता ॥ २३ ॥
शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम् । नानिमित्तोऽभवद्बाणो नानिर्भेत्ता न निष्फलः ॥ २४ ॥
अन्योन्यमभिसंहत्य निपेतुर्धरणीतले । तथा विसृजतोर्बाणान्रामरावणयोर्मृधे ॥ २५ ॥
प्रायुङ्क्ष्येतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम् । चक्रतुश्च शरैर्घोरैर्निरुच्छ्वासमिवाम्बरम् ॥ २६ ॥
रावणस्य हयान्रामो हयान्रामस्य रावणः । जघ्नतुस्तौ तदान्योन्यं कृतानुकृतकारिणौ ॥ २७ ॥
एवं तु तौ सुसंक्रुद्धौ चक्रतुर्युद्धमुत्तमम् । मुहूर्तमभवद्युद्धं तुमुलं रोमहर्षणम् ॥ २८ ॥

२१-२३] ति०टी०-निःसङ्गेन प्राणाशासङ्गरहितेन। तत्परं तदनन्तरम्। व्यायच्छमानं व्यायच्छन्तं प्रवर्तयन्तम् २१-२३

रा० टी०-व्यायच्छमानमिति। काकुत्स्थः परं तत् वर्षणं व्यायच्छमानं व्यायच्छन्तं विस्तारयन्तं रावणं दृष्ट्वा शरान् संदधे ॥ २२ ॥

रा० टी०-स इति। स रामः बाणान् मुमोच तान् बाणान् दृष्ट्वा रावणः खं निरंतरमन्तररहितं चक्रे ॥ २३ ॥

गो० टी०-व्यायच्छमानमिति। व्यायच्छमानं व्यायच्छन्तम् यत्नं कुर्वन्तं, रणे तत्परं सक्तम्। प्रहसन्निव संदधे अनायासेन संदधे ॥ २१ ॥ २२ ॥

रा० टी०-तत इति। ताभ्यां रामरावणाभ्यां प्रयुक्तेन शरवर्षेण शरबद्धं द्वितीयमम्बरमिवाभाति ॥ २४ ॥

गो० टी०-ततस्ताभ्यामिति। शरवर्षेण भास्वत् अम्बरं शरबद्धं द्वितीयमम्बरमिवाभातिस्म ॥ २३ ॥

२४] ति० टी०-शरबद्धम्। शरचितं द्वितीयमम्बरमित्यर्थः। भास्वद्भासमानम्। नानिमित्तो निमित्तं लक्ष्यमप्राप्य वर्तमानो नास्ति। न निष्फलो लक्ष्यवेधपरप्रयुक्तवारणान्यतरप्रयोजनशून्यो नाभवत्। नानिर्भेत्ता भेत्ता न। 'नातियत्नः' इति पाठे परप्रयुक्तनिवारणाय यत्नातिक्रान्तो न। निवारणाय प्रयुक्तो निवारयत्येवेत्यर्थः ॥ २४ ॥

रा० टी०-नेति। बाणः अनिमित्तः युद्धोत्साहनिमित्तकत्वेन निमित्तरहितो न अनिर्भेत्ता ताडनादधिकविदारको न निष्फलः लक्ष्यसम्बन्धरहितश्च नाभवत् अहं पृथक् ॥ २५ ॥

गो० टी०-नानिमित्त इत्यर्धम्। अनिमित्तः लक्ष्यविशेषोद्देशरहितः। अनिर्भेत्ता अपेक्षितप्रमाणादधिकभेत्ता। निष्फलः लक्ष्ये पतितोऽपि प्रयोजनाकारी ॥ २४ ॥

२५] ति० टी०-बाणान्विसृजतोस्तयोर्बाणा अन्योन्यमभिसंहत्य स्वस्वप्रयोगकार्यं कृत्वैव धरणीतले निपेतुः ॥२५॥

रा० टी०-अन्योन्यमिति। बाणान् विसृजतोः रामरावणयोर्बाणा अन्योन्यमभिसंहत्य धरणीतले निपेतुः ॥२५॥

गो० टी०-अन्योन्यमिति। तथा विसृजतोः उक्तप्रकारेण विसृजतोः। अत्र बाणा इत्यध्याहार्यम् ॥ २५ ॥

२६] ति० टी०-सव्यं च दक्षिणं च सव्यदक्षिणम्। अत्यन्तसंयोगे द्वितीया। उभयपार्श्वयोरविच्छिन्नं शरानस्यन्तौ निरुच्छ्वासं नीरन्ध्रम् ॥ २६ ॥

रा० टी०-प्रायुङ्क्ष्येतामिति। सव्यदक्षिणमविच्छिन्नं निरन्तरमस्यन्तौ शरानिति शेषः अत एवाम्बरं शरैः निरुच्छ्वासमिव चक्रतुः ॥ २७ ॥

गो० टी०-प्रायुङ्क्ष्येतामिति। अस्यन्तौ शरान् क्षिपन्तौ। इवशब्दो वाक्यालंकारे। निरुच्छ्वासं उच्छ्वासावकाशरहितम् ॥ २६ ॥

२७-२८] ति० टी०-कृतस्यानुकृतं प्रतिक्रिया तत्करणशीलौ ॥ २७ ॥ २८ ॥

रा० टी०-रावणस्येति। कृतानुकृतकारिणौ तौ रामरावणौ अन्योन्यं जघ्नतुः ॥ २८ ॥

रा० टी०-एवमिति। एवमुत्तमं युद्धं चक्रतुः अत एव मुहूर्तं लोमहर्षणमभवत् ॥ २९ ॥

गो० टी०-रावणस्येति। अत्र जघानेति वचनविपरिणामेनानुषज्यते। तौ अन्योन्यं कृतानुकृतकारिणौ कृतप्रतिक्रियाकारिणौ सन्तौ तथा जघ्नतुः हय इवान्यत्रापि सारथ्यादौ जघ्नतुरित्यर्थः ॥ २७ ॥ २८ ॥

रा० टी०-प्रयुध्यमानाविति। प्रयुध्यमानौ यौ रामलक्ष्मणौ तयोर्मध्ये राक्षसाधिपः ध्वजाग्रपातेन रथोत्तमे भृशं प्रचुक्रोध ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे अष्टाधिकशततमः सर्गः ॥ १०८ ॥

गो० टी०-प्रयुध्यमानाविति। यदा बभूवतुरित्यपस्कार्यम् ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने
युद्धकाण्डव्याख्याने नवोत्तरशततमः सर्गः ॥ १०९ ॥

१ सायकान् शिलानिति गो. पाठः। २ रणे शत्रेति गो. पाठः। ३ ततस्ताभ्यां प्रयुक्तेनेति गो. रा. पा. । ४ नातेभेत्तेति गो. रा. पाठः। ५ अयुध्यतामिति गो. पाठः। ६ शरौघैस्तावितिं गो. पा. । ७ तत्रेति गो. पाठः। ८ तौ त्विति गो. पाठः।

[प्रयुध्यमानौ समरे महाबलौ शितैः शरैरावणलक्ष्मणाग्रजौ ।
ध्वजावपातेन स राक्षसाधिपो भृशं प्रचुक्रोध तदा रघूत्तमे ।]

तौ तथा युध्यमानौ तु समरे रामरावणौ । ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना ॥ २९ ॥
अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ । परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ ॥ ३० ॥
परस्परवधे युक्तौ घोररूपौ बभूवतुः । मण्डलानि च वीथीश्च गतप्रत्यागतानि च ॥ ३१ ॥
दर्शयन्तौ बहुविधां सूतौ सारथ्यजां गतिम् । अर्दयन्रावणं रामो राघवं चापि रावणः ॥ ३२ ॥
गतिवेगं समापन्नौ प्रतिवेगैर्निवर्तने । क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ ॥ ३३ ॥
चेरतुः संयुगमहीं सासारौ जलदाविव । दर्शयित्वा तदा तौ तु गतिं बहुविधां रणे ॥ ३४ ॥
परस्परस्याभिमुखौ पुनरेव च तस्थतुः । धुरं धुरेण रथयोर्वक्त्रेण वाजिनाम् ॥ ३५ ॥
पताकाश्च पताकाभिः समीयुः स्थितयोस्तदा । रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः ॥ ३६ ॥
चतुर्भिश्चतुरो दीप्तान्हयान्मृत्यपसर्पयत् । स क्रोधवशमापन्नो हयानामपसर्पणे ॥ ३७ ॥
मुमोच निशितान्बाणान्राघवाय दशाननः । सोऽतिविद्धो बलवता दशग्रीवेण राघवः ॥ ३८ ॥

२९-३१] ति० टी०-तुमुलं रोमहर्षणम् । एतदनन्तरम् ' प्रयुध्यमानौ समरे महाबलौ शितैः शरै रावणलक्ष्मणाग्रजौ । ध्वजावपातेन स राक्षसाधिपो भृशं प्रचुक्रोध तदा रघूत्तमे ॥ इत्येकं श्लोकं प्रक्षिप्यात्र सर्गावच्छेदं कुर्वन्ति, तदयुक्तम् । पश्चादपि तुमुलयुद्धस्यैव सर्गादेकप्रकरणत्वाद् अनवच्छेदस्यैव बहुषु पुस्तकेषु दर्शनाच्चेति कृतकः ॥ २९-३१ ॥

रा० टी०-तयोर्युद्धमेवाह—तावित्यादिभिः । युध्यमानौ रामरावणौ सर्वभूतानि ददृशुः ॥ १ ॥

गो० टी०-अथ रावणशिरश्छेदः—तौ तदेत्यादि । समरे युद्धभूमौ । तदा उत्पातकाले । अन्तरात्मना अन्तःकरणेन उपलक्षितानि ॥ १ ॥

रा० टी०-अर्दयन्तावित्यादि । परस्परमभिक्रुद्धौ अत एव परस्परमभिद्रुतौ अत एव तयोः स्यन्दनोत्तमौ परस्परमर्दयन्तौ परस्परवधे युक्तौ रामरावणौ मण्डलानि मण्डलाकारगतीः वीथीः प्रसिद्धमार्गद्वारा गतीश्च गतप्रत्यागतानि च सूतसारथ्यजां सूतस्य यत्सारथ्यमतिनैपुण्यं तज्जनितां गतिं च दर्शयन्तौ रूपौ बभूवतुः सार्द्धश्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०-अर्दयन्तावित्यादि सार्धश्लोकद्वयमेकान्वयम् ॥ अर्दयन्तौ परस्परं पीडयन्तौ । रथयोः क्रोधादिके रथिकद्वारा । मण्डलानि मण्डलगतीः गतप्रत्यागतानि, शत्रुरथं प्रति गमनं गतं पुनः स्थानं प्रत्यागमनं प्रत्यागतं तयोराहृत्य बहुवचनम् । एवंप्रकारेण बहुविधां सूतसारथ्यजां सूतस्य यत् सारथ्यं सारथिकर्म तज्जाम्, गतिं संचारं दर्शयन्तौ तयोः रथौ घोररूपौ बभूवतुः ॥ २ ॥ ३ ॥

३२-३३] ति० टी०-सारथ्यजां सूतकर्मनैपुण्यजाम् । अर्दयन् । बभूवेति शेषः ॥ ३२ ॥ ३३ ॥

रा० टी०-अर्दयन्निति । प्रवर्तननिवर्तने गतिवेगसमापन्नौ रामो रावणश्च बभूवतुरिति शेषः ॥ ४ ॥

गो० टी०-अर्दयन्निति । रावणमर्दयन् रामो राघवमर्दयन् रावणश्चोभौ प्रवर्तननिवर्तने तद्रूपं गतिवेगं समापन्नौ बभूवतुरिति शेषः ॥ ४ ॥

रा० टी०-क्षिपन्ताविति । सासारौ शरापातसहितौ जलदाविव शरजालानि क्षिपन्तौ तयोः स्यन्दनोत्तमौ संयुगमहीं चेरतुः ॥ ६ ॥

गो० टी०-क्षिपतोरिति । सासारौ सजलधारौ ॥ ६ ॥

३४-३६] ति० टी०-सासारौ धारासंपात आसारस्तत्सहितौ ॥ ३४-३६ ॥

रा० टी०-दर्शयित्वेति । बहुविधां गतिं दर्शयित्वा परस्परस्याभिमुखौ सन्तौ पुनस्तस्थतुः ॥ ६ ॥

गो० टी०-दर्शयित्वेति । तथा गतिं पूर्वोक्तगतिभेदम् ॥ ६ ॥

रा० टी०-धुरमिति । स्थितयोः रथयोर्धुरं युगन्धरम् धुरेण वाजिनां वक्त्रं वक्त्रेण पताकाश्च पताकाभिस्समीयुः ॥ ७ ॥

गो० टी०-धुरमिति । धुरं युगम् धुरेण अकारान्तस्यार्षम् । स्थितयोः युद्धे गतिं विना स्थितयोः तयोरिति शेषः ७

रा० टी०-रावणस्येति । रामः रावणस्य हयान् चतुर्भिः शरैः प्रत्यपसर्पयत् ॥ ८ ॥

गो० टी०-रावणस्येति । प्रत्यपसर्पयत् न्यवर्तयत् ॥८॥

३७-३८] ति० टी०-प्रत्यपसर्पयत् । प्रत्यपसर्पणं नामात्यन्ताभिमुख्यानामेव पश्चार्धेनापसर्पणम् ॥ ३७ ॥ ३८ ॥

रा० टी०-स इति । हयानामपसर्पणेन क्रोधवशमापन्नो दशाननः राघवाय बाणान् मुमोच ॥ ९ ॥

---

१ इदं पद्यमार्षकं गो. रा. पाठः । २ तदेति गो. पाठः । ३ सूतसारथ्यनामेति गो. रा. पाठः । ४ प्रवर्तनेति गो. रा. पाठः । ५ क्षिपन्ताविति रा. पाठः । ६ यथेति गो. पाठः । ७ तथेति गो. पाठः । ८ अथेति गो. पा. । ९ समेयुरिति गो. पाठ. । १० निशाचर इति गो. पा. ।

जगाम न विकारं च न चापि व्यथितोऽभवत् । चिक्षेप च पुनर्बाणान्वज्रसारसमस्वनान् ॥ ३९ ॥
सारथिं वज्रहस्तस्य समादिश्य[1] दशाननः । मातलेस्तु महावेगाः शरीरे पतिताः शराः ॥ ४० ॥
न सूक्ष्ममपि संमोहं व्यथां वा प्रददुर्युधि । तया धर्षणया क्रुद्धो मातलेर्न तथात्मनः ॥ ४१ ॥
चकार शरजालेन राघवो विमुखं रिपुम् । विंशैतिं[2] त्रिंशतिं पंष्टिं शतशोऽथ सहस्रशः[3] ॥ ४२ ॥
मुमोच राघवो वीरः सायकान्स्यन्दने रिपोः । रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ ४३ ॥
गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे । तत्प्रयुक्तं पुनर्युद्धं तुमुलं रोमहर्षणम्[4] ॥ ४४ ॥
गदानां मुसलानां च परिघाणां च निःस्वनैः । शराणां पुङ्खवातैश्च क्षुभिताः सप्त सागराः ॥ ४५ ॥
क्षुब्धानां सागराणां च पातालतलवासिनः । व्यथिता दानवाः सर्वे पन्नगाश्च सहस्रशः[5] ॥ ४६ ॥
चकम्पे मेदिनी कृत्स्ना सशैलवनकानना । भास्करो निष्प्रभश्चासीन्न ववौ चापि मारुतः ॥ ४७ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । चिन्तामापेदिरे सर्वे सकिंनरमहोरगाः ॥ ४८ ॥
स्वस्ति गोब्राह्मणेभ्यस्तु लोकास्तिष्ठन्तु शाश्वताः। जयतां राघवः संख्ये रावणं राक्षसेश्वरम् ॥ ४९ ॥
एवं जपन्तोऽपश्यंस्ते देवाः सर्षिगणास्तदा । रामरावणयोर्युद्धं सुघोरं रोमहर्षणम् ॥ ५० ॥
गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम् । सागरं चाम्बरप्रख्यमम्बरं सागरोपमम्[6] ॥ ५१ ॥
रामरावणयोर्युद्धं रामरावणयोरिव । एवं ब्रुवन्तो ददृशुस्तद्युद्धं रामरावणम् ॥ ५२ ॥

गो० टी०–स इति । अपसर्पणे विषये ॥ ९ ॥

रा० टी०–स इति । दशग्रीवेण अतिविद्धः अतिताडितो राघवः विकारं न जगाम व्यथितो नाभवच्च ॥ १० ॥

गो० टी०–सोऽतिविद्ध इति । विकारं वेदनामचकमुख-विकारम् ॥ १० ॥

३९–४०] ति० टी०–चिक्षेप रावणः क्षिप्तवान् ३९-४०

गो० टी०–चिक्षेपेति । दशाननः वज्रहस्तस्य सारथि-मुद्दिश्य बाणान् चिक्षेप ॥ ११ ॥

गो० टी०–चिक्षेपेति । वज्रपातोऽशनिपातः ॥ ११ ॥

रा० टी०–मातलेरिति । मातलेरशरीरे पतिताः शराः मोहं व्यथां च न प्रददुः ॥ १२ ॥

गो० टी०–मातलेस्त्विति । सूक्ष्मम् अल्पम् ॥ १२ ॥

४१] ति० टी०–मातलेर्व्यथां न प्रददुः । देवत्वेन दिव्य-शक्तिमत्त्वात् । अपसर्पणकाले रावणेन प्रक्षिप्तानामतिवेधसा-मर्थ्ययोगाच्च । यथा मातलेर्धर्षणया क्रुद्धस्तथात्मनो धर्षणया न क्रुद्धः ॥ ४१ ॥

रा० टी०–तयेति । मातलेः तया धर्षणया आत्मनश्च धर्ष-णया न क्रुद्धोऽपि राघवः शरजालेन रिपुं विमुखं चकार ॥१३॥

गो० टी०–तयेति । यथा मातलेः तया धर्षणया क्रुद्धः तथा आत्मनो धर्षणया न क्रुद्धः । एवं क्रुद्धो रिपुं विमुखं चकार १३

४२–४५] ति० टी०–अत एव रिपुं विमुखं चकार ४५॥

रा० टी०–विंशतिमिति । राघवः रिपोः स्यन्दने विं-शत्यादीन् सायकान् मुमोच ॥ १४ ॥

गो० टी०–विंशतमिति । इकारलोपश्छान्दसः ॥१४॥

रा० टी०–रावण इति । रावणोऽपि प्रत्यर्दयत् ॥ १५ ॥

गो० टी०–रावणोऽपीति । रथस्थो रथे निश्चलतया स्थित इत्यर्थः ॥ १५ ॥

रा० टी०–तदिति । तुमुलं युद्धं पुनः प्रवृत्तमत एव गदादीनां निस्वनैरशराणां पुङ्खवातैश्च सप्त सागराः क्षुभिताः अभवन्निति शेषः सार्द्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

गो० टी०–तत् प्रवृत्तमित्यर्थमेकं वाक्यम् ॥ १६ ॥

गो० टी०–गदानामिति । निस्वनैः वेगजैरिति शेषः १७

४६–४९. ति० टी०–क्षुब्धानां सागराणामधोदेशवर्तिपा-तालवासिनो व्यथिता जाता इति शेषः ॥ ४६–४९ ॥

रा० टी०–क्षुब्धानामिति । क्षुब्धानां सागराणां दा-नवाः पन्नगाश्च व्यथिता बभूवुरिति शेषः ॥ १८ ॥

गो० टी०–क्षुब्धानामिति । क्षुब्धेषु सागरेष्वित्यर्थः१८

रा० टी०–चकम्प इति । मेदिनी चकम्पे भास्करस्तु निष्प्रभ आसीत् मारुतस्तु न ववौ ॥ १९ ॥

रा० टी०–तत इति । देवादयः चिन्तामापेदिरे ॥ २० ॥

रा० टी०–स्वस्तीति । राघवो रावणं जयतामेवं जपन्तो देवादयः रामरावणयोर्युद्धमपश्यन् सार्द्धश्लोकएकान्वयी ॥२१॥

५०] ति० टी०–जपन्तो वदन्तः ॥ ५० ॥

रा० टी०–रामेति । गंधर्वादिसंघाः युद्धमतिप्रहरणविशि-ष्टमनुपमं रामरावणयोर्युद्धं दृष्ट्वा गगनं गगनाकारमाकाशमाका-शसदृशमित्यायेवं ब्रुवन्तः सन्तः रामरावणं युद्धं ददृशुः सार्द्ध-श्लोकद्वयमेकान्वयि गगनं गगनाकारमिति श्लोकार्द्धस्थाने सागरं चाम्बरप्रख्यमम्बरं सागरोपममित्यपि पाठो दृश्यते॥२२–२३॥

५१–५२] ति० टी०–वचनप्रकारमाह—गन्धर्वाप्स-रसामिति । अनुपममिति दीर्घं आर्षः । ‘ दृष्ट्वा युद्धमनुप-

१ समुद्दिश्यातं रा. समुद्दिश्य निशाचर इति गो. पाठः । २ विंशतं त्रिंशतमिति गो. पाठः । ३ महदिति गो. पाठः । ४ पन्नगाः सर्वे ववुश्च इति गो. पाठः । ५ गगनं गगनाकारं सागरः सागरोपम इति गो. रा. पाठः ।

ततः क्रोधान्महाबाहू रघूणां कीर्तिवर्धनः । संधाय धनुषा रामः शरमाशीविषोपमम् ॥ ५३ ॥
रावणस्य शिरोऽच्छिनद्दच्छ्रीमज्ज्वलितकुण्डलम् । तच्छिरः पतितं भूमौ दृष्ट्वा लोकैस्त्रिभिस्तदा ॥ ५४ ॥
तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः । तत्क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ॥ ५५ ॥
द्वितीयं रावणशिरश्छिन्नं संयति सायकैः । छिन्नमात्रं च तच्छीर्षं पुनरेवैं प्रदृश्यते ॥ ५६ ॥
तदप्यशनिसंकाशैश्छिन्नं रामस्य सायकैः । एवमेवं शतं छिन्नं शिरसां तुल्यवर्चसाम् ॥ ५७ ॥
न चैव रावणस्यान्तो दृश्यते जीवितक्षये । ततः सर्वास्त्रविद्वीरः कौसल्यानन्दवर्धनः ॥ ५८ ॥
मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः । मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः ॥ ५९ ॥
क्रौञ्चावटे विराधस्तु कबन्धो दण्डकावने । यैः साला गिरयो भग्ना वाली च क्षुभितोऽम्बुधिः ६० ॥
त इमे सायकाः सर्वे युद्धे प्रत्ययिका मम । किं नु तत्कारणं येन रावणे मन्दतेजसः ॥ ६१ ॥
इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे । ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ ६२ ॥
रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः । गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ ६३ ॥

शम्' इत्युत्तरं 'सागरं चारुवरप्रख्यमम्बरं सागरोपमम्' इति पाठे सागरं नैल्यवैपुल्यादिनाम्बरप्रख्यमाकाशतुल्यमिति वक्तुं शक्यम् । एवमम्बरमपि सागरोपममिति शक्यम् । रामरावणयोर्युद्धं तु तदतिरिक्तादृशयुद्धाभावात्सदृशमित्येव वक्तुं शक्यम । तेनानुपमत्वं फलवीत्यनन्वयोऽलंकारः। पूर्वार्धे तूपमेयोपमेति कतकः । सागरशब्दे श्लिष्टरूपक आर्षः, अर्वाचीनादिसः । 'गगनं गगनाकारं सागरः सागरोपमः' इति पाठेऽर्थैक्यायेत्यनन्वय एवेति बोध्यम् । एवं ब्रुवन्तो गन्धर्वादि सङ्घास्तयुद्धं दृष्ट्वुः। रामरावणम्। तत्कर्तृकमित्यर्थः॥ ५२–५३॥

गो० टी०–गन्धर्वेति । गन्धर्वाप्सरसामित्यर्थान्तरं गगनं गगनाकारमिति श्लोकः । तदनन्तरम् एवं ब्रुवन्त इत्यर्थम् । गन्धर्वाप्सरसां संघाः अनुपमम्, युद्धं दृष्ट्वा गगनं गगनाकारमित्येवं ब्रुवन्तः सन्तः पुनर्दृष्ट्वरित्यन्वयः अनुपमत्वमेवाह—गगनमिति । यथा गगनसागरयोः सदृशत्वन्तरामावः तथा रामरावणयुद्धस्य सदृशं युद्धं किंचिन्नास्तीत्यर्थः। सदृशान्तरनिवृत्तिफलकोऽनन्वयालंकारः । रामरावणं रामरावणसंबन्धि ॥ २३ ॥ २४ ॥

५३] ति० टी०–ततस्तद्वाक्यश्रवणानन्तरम् ॥ २३ ॥

रा० टी०–तत इति । रघूणां कीर्तिवर्धनो रामः धनुषा शरं सन्धाय रावणस्य शिरः अच्छिनदत् अच्छिनत् भूमौ पतितं तच्छिरः विभिर्लोकैर्दृष्टं श्लोकद्वयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–ततः क्रुद्ध इत्यादिसार्धश्लोकपञ्चकमेकं वाक्यम् क्षुरं क्षुराग्रकाणम । शिरः अच्छिनदत् अच्छिनत् । एकवचनात्तदानीं रावण एकशिरा एव युद्धमकरोदिति गम्यते । अत एव वक्ष्यति—विशिष्य दीर्घौ निर्गतौ भुजावङ्गदभूषितावित्यादिना । छिन्नमात्रं तु तच्छीर्षमिति । तच्छीर्षं छिन्ने तदानीमेवेत्यर्थः । एकशतं छिन्नम् एकोत्तरशतवारं छिन्नमित्यर्थः । पुनः पुनः शिरश्छेदनं चित्तुपितशत्रुणानिष्टस्यर्थम् । न चेति । जीवितक्षये विषये, अन्तः अवधिः निश्चयो वा, न दृश्यते नाहश्यत ॥ २५–३२ ॥

५४] ति० टी–शिरो छिनदत् ! एकैकश इति शेषः। सकृदशिरसां छेदे तु न पुनः प्ररोह इति कतकः ॥ ५४ ॥

५५–५६] ति० टी०–तस्यैव सदृशम् । यद्भूमौ पतितं तस्यैव सदृशमित्यर्थः ॥ ५५ ॥ ५६ ॥

रा० टी०–तस्येति । तस्य पतितस्य शिरसः सदृशमन्यच्छिरः रावणस्योत्थितमिदं पृथक्—तदिति । तदुत्थितं द्वितीयं रावणशिरः क्षिप्रकारिणा निखिलयुद्धक्रियाणामाशुकर्त्रा अत एव क्षिप्रहस्तेन रामेण सायकैः छिन्नं छिन्नमात्रं छिन्नशिरःसदृशं तत् शीर्षं पुनः प्रदृश्यते सार्धश्लोकैकान्वयी ॥ २६ ॥ २७ ॥

५७] ति० टी०–' एवमेव शतं छिन्नम् ' इति पाठः । तुल्यवर्चसां तुल्याकाराणां शिरसां शतं रामेण छिन्नम । एवं च भगवतः सर्वतोभद्रचक्रपदशतं रामेण रावणीयशिरःशतकर्मभिः पूजितमिति कतकः ॥ २७ ॥

रा० टी०–तदिति । तत् पुनः दृश्यमानं शिरः रामस्य सायकैः छिन्नमेवमनेन प्रकारेण शिरसां शतं शतसंख्याकशिरांसीत्यर्थः रामस्य सायकैः छिन्नं जीवितक्षये जीवननिष्टत्यर्थं रावणस्य शिरसामन्तो न दृश्यते शिरसामित्युभयान्वयि सार्धश्लोक एकान्वयी ॥ २८ ॥

५८–५९] ति० टी०–रावणस्य जीवितक्षयेऽन्तो निश्चयो न दृश्यते ॥ ५८ ॥ ५९ ॥

६०] ति० टी०–क्रौञ्चावटे क्रौञ्चवनसंबन्धिन्यवटे सरसि ६०

६१–६३] ति० टी०–प्रात्ययिका अमोघत्वेन निश्चिताः ॥ ६१–६३ ॥

रा० टी०–तत इति । बहुभिर्मार्गणैर्युक्तो राघवश्चिन्तयामास ॥ २९ ॥

---

१ क्रुद्ध इति गो. रा. पाठः । २ स्थिति गो. रा. पाठः । ३ अन्यत्रमति गो. पाठः । ४ रामेणात गो. पाठः । ५ एकेति गो. पाठः । ६ वने इति गो. अरण्ये इति रा. पाठः । ७ इदमर्धं गो. पुस्तके न दृश्यते । ८ प्रात्ययिका इति रा. पा. । ९ नु इति गो. पाठ. ।

तत्प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् । अन्तरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि ॥ ६४ ॥
देवदानवयक्षाणां पिशाचोरगरक्षसाम् । पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥ ६५ ॥
नैव रात्रिं न दिवसं न मुहूर्तं न च क्षणम् । रामरावणयोर्युद्धं विरामभुपगच्छति ॥ ६६ ॥
दशरथसुतराक्षसेन्द्रयोस्तयोर्जयमनवेक्ष्य रणे स राघवस्य ।
सुरवररथसारथिर्महात्मा रणरतराममुवाच वाक्यमाशु ॥ ॥ ६७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

अष्टोत्तरशततमः सर्गः ।

चिन्तातुरं कर्तव्यमूढं दाशरथिं पश्यता मातलिना ब्रह्मणेन्द्राय वितीर्णं शक्रेण चागस्त्यद्वारा तुभ्यं वितीर्णममोघशरं सन्धाय जहि नान्यथेत्यादिष्टो राघवः प्रहस्तथाकरोत्तेन च दशास्यो भग्नहृदयो गतासुर्भूमौ पपात रामस्योपर्याकाशात्पुष्पवृष्टिरभवत् सुरासुरर्हर्षैः खेदश्च लब्धः ।

अथ संस्मारयामास मातली राघवं तदा । अजानन्निव किं वीर त्वमेनमनुवर्तसे ॥ १ ॥

रा० टी०–तदाकारमाह—मारीच इत्यादिभिः । यैर्मारीचप्रभृतिर्निहतैः यैश्च अस्मदृषिः क्षुभितः ते एव मम प्रात्यायिकाः अमोघत्वेन निश्चिता इमे सर्वे सायकाः येन कारणेन रावणे मन्दतेजसोऽभवन्निति शेषः तत्कारणं किम् इति चिन्तापरोपि रामः संयुगे अप्रमत्त आसीत् अत एव रावणोरसि शरवर्षाणि ववर्ष सार्द्धश्लोकत्रयमेकान्वयि ॥ ३०–३३ ॥

रा० टी०–रावण इति । रावणोऽपि रामं प्रत्यर्दयत् प्रत्यार्दयत् अर्दनानुकूलव्यापारमकरोत् ॥ ३४ ॥

गो० टी०–मारीच इत्यादिसार्धश्लोकद्वयमेकान्वयम् । क्रौञ्चावने कबन्धः दण्डकावने विराध इत्यन्वयः । प्रात्यायिकाः विश्रस्ताः त इमे रावणे विषये मन्दतेजसः अल्पशक्तिकाः अभवन् । तत्कारणं किं नु न जानामीति शेषः ॥ ३२–३५ ॥

६४] ति० टी०–अन्तरिक्षे चेत्यादि । रथयोःकामगत्वात्तत्र तत्र कियत्कालं स्थितेरिति भावः ॥ ६४ ॥

रा० टी०–तदिति । तुमुलं तद्युद्धमन्तरिक्षादौ प्रवृत्तम् ॥ ३६ ॥

गो० टी०–तदिति । त्रिकूटशिखरे पुध्यतोस्तयोरायहकृतगतिवशेन अन्तरिक्षे भूमौ च पुनश्च गिरिमूर्धनि त्रिकूटशिखरे च तन्महद्युद्धं प्रवृत्तमित्यर्थः ॥ ३६ ॥

६५] ति० टी०–सर्वरात्रम् । जातावेकवचनम् । तेनानेकाहोरात्रानित्यर्थः । वस्तुतः शर्वरं सकारस्तृतीयस्तेन त्रय उच्यन्ते । यवरं च वकारश्चतुर्थस्तेन चत्वार उच्यन्ते । मिलित्वा सप्तरात्रमित्यर्थः सप्तरात्रमेव च तयोर्द्वैरथं युद्धमिति वक्ष्यमाणपाद्मकालिकापुराणयोः स्पष्टमिति दिक् ॥ ६५ ॥

रा० टी०–देवेति । देवादीनां पश्यतां सतां तद्युद्धं सप्तरात्रमवर्तत ॥ ३६ ॥

गो० टी०–देवदानवेति । " यस्य च भावेन० " इति भावलक्षणे षष्ठी । सर्वरात्रम् अहोरात्रमित्यर्थः । सप्तरात्रमित्यर्थः । वक्ष्यमाणदिनसंख्याविरोधात् । यद्वा सर्वरात्रमित्यर्थः सप्तरात्रमित्येव सम्यक्पाठः फाल्गुनचतुर्दश्यां हनुमता लङ्कादाहः । पौर्णमास्यां रामस्य समुद्रतीरप्राप्तिः । प्रथमाद्वितीयातृतीयासु दर्भशयनम् । अष्टम्यां सुवेलारोहणम् । नवम्यां युद्धारम्भ इति सप्तरात्रं रामरावणयुद्धमिति । इदं च इतस्तु नवमेऽहनीत्यत्र विस्तृतम् ॥ ३७ ॥

६६] ति० टी०–तदेवाह—नैव रात्रिमिति ॥ ६६ ॥

रा० टी०–नेति । रामरावणयोर्युद्धं रात्र्यादीन् विरामं निवृत्तिं नैवोपगच्छति कालाध्वनोरिति द्वितीया ॥ ३७ ॥

गो० टी०–नैवरात्रमिति । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया ॥ ३८ ॥

६७] ति० टी०–तयोर्मध्ये राघवस्य जयमनवेक्ष्याद्भुत स सुरवरस्य सारथिरिति । रणे रतो रणरतः, रणरतश्चासौ रामश्च तम् ॥ ६७ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

रा० टी०–दशरथेति । सुरवररथसारथिर्मातलिर्दशरथसुतराक्षसेन्द्रयोः युध्यतोस्ततोरिति शेषः राघवस्य जयमनवेक्ष्य रणरतं राममुवाच ॥ ३८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे नवाधिकशततमः सर्गः ॥ १०९ ॥

गो० टी०–दशरथेति । निर्धारणे षष्ठी दशरथसुतराक्षसेन्द्रयोः रामरावणयोर्मध्ये राघवस्य जयमनवेक्ष्य महान् महाबुद्धिरित्यर्थः । सुरवररथसारथिः एनं राममुवाच॥३९॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशोत्तरशततमः सर्गः ॥ ११० ॥

१] ति० टी०–एनमनुवर्तसे एतत्प्रतिभयमद्भुतरसरसीत्यर्थः ॥ १ ॥

---

१ सप्तेति रा.पा.। २ रात्रमिति गो.पा.। ३ जयं शब्दो गो. पुस्तके नास्ति। ४ महान् रणे रतमेनमिति गो. पा.। ५ राघवं मातलिरिति गो.रा. पा.।

विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो । विनाशकालः कथितो यः सुरैः सोऽद्य वर्तते ॥ २ ॥
ततः संस्मारितो रामस्तेन वाक्येन मातलेः । जग्राह स शरं दीप्तं निःश्वसन्तमिवोरगम् ॥ ३ ॥
यं तस्मै प्रथमं प्रादादगस्त्यो भगवानृषिः । ब्रह्मदत्तं महद्बाणममोघं युधि वीर्यवान् ॥ ४ ॥
ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थमपितौजसा । दत्तं सुरपतेः पूर्वं त्रिलोकजयकाङ्क्षिणः ॥ ५ ॥
यस्य वाजेषु पवनः फले पावकभास्करौ । शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥ ६ ॥
जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम् । तेजसा सर्वभूतानां कृतं भास्करवर्चसम् ॥ ७ ॥
संघूममिव कालाग्निं दीप्तमाशीविषोपमम् । नरनागाश्वहन्तारं भेदनं क्षिप्रकारिणम् ॥ ८ ॥
द्वाराणां परिघाणां च गिरीणां चापि भेदनम् । नानारुधिरदिग्धाङ्गं मेदोदिग्धं सुदारुणम् ॥ ९ ॥
वज्रसारं महानादं नानासमितिदारणम् । सर्वत्रासनं भीमं श्वसन्तमिव पन्नगम् ॥ १० ॥
कङ्कगृध्रबर्हिणां च गोमायुगणरक्षसाम् । नित्यभक्षप्रदं युद्धे यमरूपं भयावहम् ॥ ११ ॥
नन्दनं वानरेन्द्राणां रक्षसामवसादनम् । वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः ॥ १२ ॥
तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनम् । द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः ॥ १३ ॥
अभिमन्त्र्य ततो रामस्तं महेषुं महाबलः । वेदप्रोक्तेन विधिना संदधे कार्मुके बली ॥ १४ ॥
तस्मिन्संधीयमाने तु राघवेण शरोत्तमे । सर्वभूतानि संत्रेसुश्चचाल च वसुंधरा ॥ १५ ॥

रा० टी०—मातलिवचनाकारं बोधयितुमाह—अथेति । मातलिः राघवं स्मारयामास तदाकारमाह हे वीर अजानन् कथोपायमवुध्यत्रिव एनं रावणं किं किमर्थमनुवर्तसे ॥ १ ॥

गो० टी०—अथ रावणवधः—अथ संस्मार्यमासेत्यादिश्लोकद्वयमेकान्वयम् । अजानन्निव ब्रह्मास्त्रमजानन्निव, एनं रावणम्, अनुवर्तसे अस्त्रस्य प्रत्यस्त्रप्रयोगमात्रं करोषि । विनाशकालः मानुषेण वधः इत्युक्तः कालः ॥ १ ॥ २ ॥

२-३] ति० टी०—अस्मा एनं प्रति ॥ २ ॥ ३ ॥

रा० टी०—तत्र त्वमेवोपायं वदेत्यत आह—विसृजेति । वधाय वधं कर्तुं पैतामहमस्त्रमस्मैविसृज तत्र हेतुः यो विनाशो विनाशकालः सुरैः कथितः मां प्रतिबोधितः स कालोऽद्य वर्तते ॥ २ ॥

रा० टी०—तत इति । मातलेर्वाक्येन संस्मारितो रामः उरगमिव निःश्वसन्तं दीप्तं शरं जग्राह ॥ ३ ॥

गो० टी०—ततः संस्मारित इत्यादिकादश श्लोका एकान्वयाः । प्रथमं पूर्वं इन्द्रकार्यार्थे । ब्रह्मदत्तमित्येतद्विशेषणेति—ब्रह्मणेत्यादिना । यस्य वाजेषिति । पवनादीनामदिवतात्वेनावस्थानम् । फले अग्रे । तेजसा सारांशेन कृतम् । द्वाराणां गिरीणामुपलक्षणम् । नानारुधिरेति वध्यासुरभेदात् । भेदः मांसविशेषः । वज्रसारं वज्रतुल्यदार्ढ्यम् । नानासमितिदारणं कपटयुद्धस्यापि निवर्तकम् । सर्वत्रासनत्वे हेतुः—भीममिति । दीप्तं श्वसन्तमिति भेदादुपमानभेदः । बलाः गृध्रविशेषाः । रक्षसां पिशाचसहचारिणाम् । यमरूपं यमतुल्यं यथा भवति तथा । भयावहमिति । त्रिलासनात् भेदः । वाजितमिति । गरुत्मतः वाजैः पक्षैः वाजितं संजातपक्षम् । गरुत्पक्षकृतपक्षमित्यर्थः । लोकानां मध्ये उत्तमेषुं प्रहर्षकरमात्मन इत्यन्तस्य जग्राहेत्यनेन संबन्धः ॥ ३-१३ ॥

४] ति० टी०—ब्रह्मदत्तं ब्रह्मणेन्द्राय दत्तम् । इन्द्रेणागस्त्यद्वारा रामाय दत्तम् ॥ ४ ॥

५] ति० टी०—ब्रह्मदत्तशब्दस्यैतत् पर्यायैः स्पष्टीक्रियते—ब्रह्मणेत्यादि ॥ ५ ॥

६] ति० टी०—अस्य बाणस्य ब्रह्मास्त्रप्रहवैशिष्ट्यमाह—यस्येति । वाजेषु वेगमार्गपतनेषु । फले तत्र पवनादीनामदितित्वेनावस्थानम् । गौरवे गुरुत्वभारे आकाशमयम् आकाशवत्सर्वाकाशते प्रकाशते इत्याकाशो ब्रह्म भगवान्भूताकाशो वा । तेन व्याप्तिसामर्थ्यम्, पवनवेग गतिसामर्थ्यम्, पावकादित्यत्वेन दुःसहत्वम्, तादृशं स्वरूपमाह—गौरवे इति ६

७] ति० टी०—सर्वभूतानां पृथिव्यादीनाम् । तेजसा सारांशेन ॥ ७ ॥

८] ति० टी०—क्षिप्रकारिणं क्षिप्रभेदकारिणम् ॥ ८ ॥

९] ति० टी०—द्वाराणां गोपुराणाम् ॥ ९ ॥

१०-११] ति० टी०—नानासमितिदारणमित्यन्तं नाम भगवत्कृतं रामवाणस्य ॥ १० ॥ ११ ॥

१२] ति० टी०—गरुत्मतः वाजैः पक्षैः ॥ १२ ॥

१३] ति० टी०—इक्ष्वाकु रामसन्तत्यपेक्षया भयनाशनं नमुचेर्यमुमभिमन्त्र्येत्यनेनान्वयः ॥ १३ ॥

१४-१५] ति० टी०—अभिमन्त्र्य ब्रह्मास्त्रविषया । वेदो धनुर्वेदरूपेण प्रोक्तो यो मुष्टिस्थितिसंधानादीनां विधिर्विधानं मार्गस्तेनेत्यर्थः ॥ १४ ॥ १५ ॥

रा० टी०—यमिति । इन्द्रार्थं ब्रह्मणा निर्मितं प्रकटितमत एव सुरपतेः सुरपतये ब्रह्मणा दत्तं ब्रह्मदत्तमिन्द्रद्वारा ब्रह्मणा

१ अस्मै इति गो. रा. पाठः । २ महाबाणमिति गो. रा. पाठः । ३ विषं यथेति गो. पाठः । ४ अपीति गो. पाठः । ५ सिक्तेति गो. पाठः । ६ बलानामिति गो. पाठः । ७ नित्यं भक्ष्येति गो. रा. पाठः ।

स रावणाय संक्रुद्धो भृशमायम्य कार्मुकम् । चिक्षेप परमायत्तः शरं मर्मविदारणम् ॥ १६ ॥
स वज्र इव दुर्धर्षो वज्रिबाहुविसर्जितः । कृतान्त इव चावार्यो न्यपतद्रावणोरसि ॥ १७ ॥
स विसृष्टो महावेगः शरीरान्तकरः परः । विभेद हृदयं तस्य रावणस्य दुरात्मनः ॥ १८ ॥
रुधिराक्तः स वेगेन शरीरान्तकरः शरः । रावणस्य हरन्प्राणान्विवेश धरणीतलम् ॥ १९ ॥
स शरो रावणं हत्वा रुधिरार्द्रकृतच्छविः । कृतकर्मा निभृतवत्स तूणीं पुनरुपाविशत् ॥ २० ॥
तस्य हस्ताद्धतस्याशु कार्मुकं चापि सायकम् । निपपात सह प्राणैर्भ्रश्यमानश्च जीवितात् ॥ २१ ॥
गतासुर्भीमवेगस्तु नैर्ऋतेन्द्रो महाद्युतिः । पपात स्यन्दनाद्भूमौ वृत्रो वज्रहतो यथा ॥ २२ ॥
तं दृष्ट्वा पतितं भूमौ हतशेषा निशाचराः । हतनाथा भयत्रस्ताः सर्वतः संप्रदुद्रुवुः ॥ २३ ॥
सर्वतश्चाभिपेतुस्तान्वानरान्द्रुमयोधिनः । दशग्रीववधं दृष्ट्वा वानरा जितकाशिनः ॥ २४ ॥
अर्दिता वानरैर्भग्नाः लङ्कामभ्यपतन्भयात् । हतौजस्त्वात्करुणैर्बाष्पप्रस्रवणैर्मुखैः ॥ २५ ॥

अगस्त्याय समर्पितं महाबाणमगस्त्यो भगवान् अस्मै रामाय प्रथमं प्रादात् यस्य महाबाणस्य वाजेषु पक्षेषु पवनः फले पावकभास्करौ सन्तीति शेषः यस्य शरीरमाकाशमयं यस्य गौरवे गुरुत्वे मेरुमन्दरौ उपमेयौ यद्वद्गुरु इत्यर्थः तं वपुषा जाज्वल्यमानं तेजसा सर्वभूतानां पृथिव्यादीनां कृतं निर्मातारं सधूमं कालाग्निमिव रुद्रादिवृन्दानां भेदनं द्वारादीनां भेदनं नानारुचिरैः निदर्शितानेकशरीरसञ्चरिशोणितैः दिग्गजानि व्याप्तान्यङ्गानि यस्य अत एव गोदोभिर्दिग्धं नानान्मितीनां संग्रामाणां दारणं दारुणम एव सर्वशिल्पस्य कंकादीनां कंकादिभ्यः गृद्धे नित्यं भक्ष्यप्रदं रक्षसामवसादनं विनाशकं गरुत्मतो गरुडस्य चारुचित्रैः विचित्रैर्वाजितैः पक्षैः वाजिनं संयुक्तं लोकानां लोकेभ्यः दक्ष्वाकुभयनाशनमात्मनः प्रहर्षकरं तमुत्तमेषुं विनाशकोत्तमं स्वं स्वकीयं मेहणं वेदप्रोक्तेन विधिना कार्मुके धनुषि रामस्संदधे एकादशश्लोकानामेकान्वयः ४--१४

रा० टी०–तस्मिन्निति । राघवेण शरोत्तमे सन्धीयमाने सति सर्वभूतानि त्रिलोक्यः एतेन तद्बाणस्यातीव भयंकररूपत्वं सूचितम ॥ १५ ॥

गो० टी०–अभिसन्धेयेति । ततः रघुणानन्तरम्, तम इषुम् संदधे ॥ १४ ॥ १५ ॥

१६] ति० टी०–परमायत्तः परमयत्नवान् ॥ १६ ॥

रा० टी०–स इति । स रामः रावणाय शरं चिक्षेप॥१६॥

गो० टी०–स इति । रावणाय चिक्षेपेत्यन्वयः ॥ १६ ॥

१७–१९] ति० टी०–वज्रिबाहुरिति । वज्रितुल्यबलस्य मद्बाहुविनिःसृत इत्यर्थः । वज्रकल्पत्वादमोघत्वादि वा वस्तुतो वज्रिबाहुविसर्जितो वज्र इव दुर्धर्ष इत्यर्थः ॥ १७–१९ ॥

रा० टी०–स इति । वज्रिबाहुना विसर्जितः त्यागितो वज्र इव दुर्धर्षः वारयितुमशक्यः कृतान्तः काल इव चावार्यः स महाबाण रावणोरसि न्यपतत् ॥ १७ ॥

रा०टी०-स इति। विसृष्टस्स शरः रावणस्य हृदयं विभेद१८

रा० टी०–रुधिराक्त इति । रुधिरैः आक्तो व्याप्तः स शरः रावणस्य प्राणान् हरन् सन् धरणीतलं विवेश ॥ १९ ॥

गो० टी०–स वज्र इति । वज्रिबाहुविसर्जितो वज्र इवेत्यन्वयः ॥ १७–१९ ॥

२०–२३] ति० टी०–निभृतवद्विनीतवत् ॥ २०–२३ ॥

रा० टी०–स इति । रावणं हत्वा रुधिरार्द्रा अत एव कृता प्रकटिता छविः शोभाविशेषो येन अत एव कृतकर्मा साधितरामकार्यः स शरः निभृतवत् विनीतवत् स्थितस्तूणीं पुनराविशत्॥२०॥

गो० टी०–स शर इति । निभृतवत् विनीतवत् ॥२०॥

रा० टी०–तस्येति । हतस्य रावणेन विद्धस्य अत एव जीवितात् भ्रश्यमानस्य तस्य रावणस्य हस्तात् ससायकं कार्मुकं प्राणैस्सह निपपात ॥ २१ ॥

रा० टी०–गतासुरिति । गतासुः नैर्ऋतेन्द्रः वज्रहतो वृत्र इव स्यंदनात् पपात ॥ २२ ॥

रा० टी०–तमिति । तं रावणं पतितं दृष्ट्वा हतनाथाः निशाचरास्सर्वतः संप्रदुद्रुवुः वानरान् नर्दन्तस्सन्तः तान् राक्षसान् अभिपेतुः वधार्थं जग्मुः सार्द्धश्लोक एकान्वयी ॥२३॥

गो० टी०–तस्येति । प्राणैः सह जीवितात् प्राणधारणयत्नात्, भ्रश्यमानस्य तस्य हस्तात् ससायकं कार्मुकं पपात ॥ २१–२३ ॥

२४] ति० टी०–अभिपेतुस्तान् । प्रदुद्रुराक्षसानित्यर्थः२४

२५] ति० टी०–हताश्रयत्वाद्धत आश्रयो येषां तत्त्वात् । बाष्पप्रस्रवणैर्मुखैः करुणैः शोकवद्भिरुपलक्षिताः सन्तो लङ्कामभ्यपतन् ॥ २५ ॥

रा० टी०–दशग्रीवेति । वानरैः अर्दिताः बाष्पाणां प्रस्रवणानि येभ्यः तैः करुणैर्मुखैरुपलक्षिताः राक्षसाः हताश्रयत्वाद्धेतोः लंकामभ्यपतन् सार्धश्लोक एकान्वयी ॥२४॥२५॥

गो० टी०–नर्दन्तश्चेत्यादिसार्धश्लोक एकान्वयः । मुखैः उपलक्षिताः । राक्षसा इति शेषः ॥ २५ ॥

१ तं शरं मर्मघातिनमिति गो. पा. । २ आर्द्रीकृतेति गो. रा. पाठः । ३ स्वेति गो. रा. पाठः । ४ आगमदिति गो. पाठः । ५ तत्ससायकमिति गो. रा. पा. ६ नर्दन्त इति गो. रा. पाठः । ७ वानरा इति गो. रा. पाठः । ८ हृष्टैरिति गो. रा. पाठः । ९ गतेति गो. पाठः ।

ततो विनेदुः संहृष्टा वानरा जितकाशिनः । वदन्तो राघवजयं रावणस्य च तद्वधम् ॥ २६ ॥
अथान्तरिक्षे व्यनदत्सौम्यस्त्रिदशदुन्दुभिः । दिव्यगन्धवहस्तत्र मारुतः सुसुखो ववौ ॥ २७ ॥
निपपातान्तरिक्षाच्च पुष्पवृष्टिस्तदा भुवि । किरन्ती राघवरथं दुरावापा मनोहरा ॥ २८ ॥
राघवस्तवसंयुक्ता गगने चैव विश्रुश्रुवे । साधुसाध्विति वागद्या देवतानां महात्मनाम् ॥ २९ ॥
आविवेश महान्हर्षो देवानां चारणैः सह । रावणे निहते रौद्रे सर्वलोकभयंकरे ॥ ३० ॥
ततः सकामं सुग्रीवमङ्गदं च विभीषणम् । चकार राघवः प्रीतो हत्वा राक्षसपुंगवम् ॥ ३१ ॥
ततः प्रजग्मुः प्रशमं मरुद्गणा दिशः प्रसेदुर्विमलं नभोऽभवत् ।
मही चकम्पे न च मारुतो ववौ स्थिरप्रभश्चाप्यभवद्दिवाकरः ॥ ॥ ३२ ॥
ततस्तु सुग्रीवविभीषणाङ्गदाः सुहृद्विशिष्टाः सहलक्ष्मणास्तदा ।
समेत्य हृष्टा विजयेन राघवं रणेऽभिरामं विधिनाभ्यपूजयन् ॥ ॥ ३३ ॥
स तु निहतरिपुः स्थिरप्रतिज्ञः स्वजनबलाभिवृतो रणे बभूव ।
रघुकुलनृपनन्दनो महौजास्त्रिदशगणैरभिसंवृतो महेन्द्रः ॥ ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

२६-२७] ति० टी०-तद्वधम् । तं वधमित्यर्थः २६-२७

रा० टी०-तत इति । संहृष्टाः अत एव राघवस्य जयं रावणस्य वधं च वदन्तो वानराः विनेदुः ॥ २६ ॥

रा० टी०-अथेति । अन्तरिक्षे दुन्दुभिर्व्यनदत् दिव्यगंधवहः अत एव सुसुखो मारुतो ववौ ॥ २७ ॥

गो० टी०-तत इति । तद्वधं तं वधम् ॥ २६-२८ ॥

२८] ति० टी० दुरावापा आप्तुमशक्या ॥ २८ ॥

रा० टी०-निपपातेति । राघवरथं किरन्ती आच्छादयन्ती दुरावापा अन्यैर्दुर्लभा पुष्पवृष्टिः अन्तरिक्षात् भुवि निपपात २८

२९-३०] ति० टी०-राघवस्तवसंयुक्ता साधु साध्विति वाग्गगनेऽपि शुश्रुवे ॥ २९ ॥ ३० ॥

रा० टी०-राघवेति । राघवस्तवेन संयुक्ता साधु साध्विति देवतानां वाक् गगने विश्रुश्रुवे ॥ २९ ॥

गो० टी०-राघवेति । राघवस्तवसंयुक्ता वागित्यन्वयः २९

रा० टी०-आविवेशेति । रावणे निहते सति चारणैः सह विद्यमानानां देवानां हृदये महान् हर्ष आविवेश ॥ ३० ॥

गो० टी०-आविवेशेति । चारणैः सह चारणैः सहितान् देवानित्यर्थः ॥ ३० ॥

३१] ति० टी०-राक्षसपुंगवं हत्वा सुग्रीवादिकं सकामं संपूर्णकामं चकार । रावणवधेन रामकार्ये सिद्धे किल तेषां राज्यं शाश्वतं प्रतिष्ठितं भवति ॥ ३१ ॥

रा० टी०-तत इति । राक्षसपुंगवं हत्वा प्रीतो राघवः सुग्रीवमङ्गदं च सकामं पूर्णमनोरथं चकार ॥ ३१ ॥

गो० टी०-तत इति । सुग्रीवस्य युवराजत्वेन प्रत्युपकारायाङ्गदेनापि रावणवधस्य काङ्क्षितत्वात् सकामत्वम् ॥३१ ॥

३२] ति० टी०-मही न चकम्पे । मारुतो न ववौ । कूर इति शेषः । 'मही चकम्पे नहि' इति पाठे मारुतो ववौ । सुख इति शेषः । स्थिरप्रभश्चेति । अनेनाग्निशक्तनवम्यां यामावशेषदिन इति योगिनम् ॥ ३२ ॥

रा० टी०-तत इति । मरुद्गणाः प्रशमं भयराहित्यमित्यर्थः. प्रजग्मुः अत एव दिशः प्रसेदुः मही च न चकम्पे मारुतो ववौ ससुखमिति शेषः दिवाकरः स्थिरप्रभोऽभवत् ॥३२॥

गो० टी०-तत इति । प्रशमं प्रसादम् । मरुद्गणाः देवगणाः । मही न चकम्पे महीकम्पाभावस्य शुभसूचकत्वात् इत्याहुः । रावणवधपर्यन्तं सकम्पा स्थिता मही तदूर्ध्वमनन्तरं निष्कम्पाऽभवदिति चाहुः । ववौ सुखमिति शेषः ॥ ३२ ॥

३३] ति० टी०-रणेऽभिरामं रणविषये सर्वजगत्पूजनीयपराक्रमम् ॥ ३३ ॥

३४] ति० टी०-रामः स्वजनबलाभिवृतो बभूव । महेन्द्रश्च त्रिदशगणाभिसंवृतो बभूव ॥ ३४ ॥

रा० टी०-तत इति । विजयेन हृष्टाः सुग्रीवादयः राघवं समेत्य अभ्यपूजयन् ॥ ३३ ॥

रा० टी०-स इति । निहतो रिपुर्येन अत एव कृतप्रतिज्ञः स्वजनबलाभिवृतः रघुकुलनृपनन्दनः त्रिदशगणैरभिसंवृत इन्द्र इव रणे रराज ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे दशाधिकशततमः सर्गः ॥ ११० ॥

गो० टी०-ततस्त्विति । सुहृद्विशेषाः जाम्बवदादयः । द्विशब्दः पादपूरणे । विजयेन हृष्टा इत्यन्वयः । विधिना क्रमेण ॥ ३३ ॥ ३४ ॥

गो० टी०-फाल्गुनामावास्यायां रावणवधः । यद्वा चैत्र-

१ रमेति गो. पाठः । २ अपि चेति गो. पाठः । ३ महाबलमिति गो. रा. पाठः । ४ हीति गो. रा. पाठः । ५ आदय इति गो. पाठः । ६ विशेषा इति गो. पाठः । ७ हीति गो. पाठः । ८ राजेति गो. रा. पाठः । ९ यमेति गो. रा. पाठः ।

शुद्धप्रतिपदि शिष्टमावास्यायां प्रातःकाले रावणवधः । पूर्वं सर्वरात्रमवर्तंतेत्युक्तेः ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकादशोत्तरशततमः सर्गः ॥ १११ ॥

३५] नि० टी०—अत्र युद्धदिवसगणनायां कतकतीर्थी—पूर्वं सुवेलारोहणदिने 'ततोऽस्तमगमत्सूर्यः संध्यया प्रतिरञ्जितः। पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्तते ॥' इत्युक्तेस्तदिनं चतुर्दशी-पूर्णिमान्यतरदिति स्पष्टम् ; ततः कृष्णप्रतिपदि युद्धारम्भः, तस्यामेव रात्रौ नागपाशबन्धनद्विमोक्षौ। द्वितीयायां धूम्राक्षवधः। तृतीयायां वज्रदंष्ट्रस्य। चतुर्थ्यामकम्पनस्य। पञ्चम्यां प्रहस्तस्य। षष्ठ्यां रावणभङ्गः। सप्तम्यां कुम्भकर्णवधः। अष्टम्यामतिकायादेः। नवम्यामिन्द्रजितो ब्रह्मास्त्रप्रयोगः। दशम्यां दिवा निकुम्भवधः, तदात्वौ मकराक्षवधः। एकादश्यादित्रयोदश्यन्तदिनत्रयेणेन्द्रजिद्वधः। चतुर्दश्यां मूलबलवधः। अमायां रावणयुद्धारम्भ-तद्वधाविति पञ्चदशदिनानि सर्वं युद्धमिति। अत्रेदं वक्तव्यम्—केयं कृष्णप्रतिपन्मात्रकृष्णस्य वा चैत्रकृष्णस्य वा। नाद्यः। चैत्रे पुष्यनक्षत्रेऽयोध्यातो वनं प्रति रामस्य प्रस्थानमिति स्पष्टमयोध्याकाण्डे। चैत्रे पुष्यश्च शुक्लपक्ष एव, तत्रापि नवम्यादिदिनत्रये एवेति स्पष्टमेव ज्यौतिषादौ। तत्र नवमी रिक्तात्वादभिषेकायोग्या, दशम्येव तु पूर्णास्वाद्योग्या। एवं च चैत्रशुक्लदशम्यां प्रस्थानम्। तत्र माघकृष्णामायां युद्धसमाप्तौ तदुत्तरपञ्चम्यां भरद्वाजाश्रमागमनम्। 'पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः। भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥' इति वक्ष्यमाणत्वात्। तत्र च न चतुर्दशवर्षसमाप्तिरिति भगवतः प्रतिज्ञाहानिः, 'पूर्णे चतुर्दशवर्षे' इत्युक्तेरसंगतिश्च। युद्धोत्तरं तावत्काले लङ्कायामवस्थानस्यालाभाच्च। चैत्रशुक्लपञ्चम्यां तत्रागमनेऽपि पञ्चदिनन्यूनतैवेति तद्धानिस्तदवस्थैव । तदुत्तरद्वितीयदिन एवायोध्याप्रवेशस्य लाभात्। अमान्तमानेन चैत्रकृष्णोत्तरपञ्चम्यां तदाश्रमगतावपि चतुर्दशवर्षतो बहुदिनाधिक्येन चतुर्दशवर्षसमाप्तिदिनेऽयोध्यागमे मया प्राणा देया इति भरतप्रतिज्ञाहानिः। सा च प्रतिज्ञा चित्रकूटे रामसंनिधावित्ययोध्याकाण्डान्ते स्पष्टम्। एतेन चैत्रकृष्णप्रतिपदि युद्धारम्भस्तच्छुक्लप्रतिपदि रावणसंस्कार इति तीर्थोक्तश्चैत्रकृष्णस्येत्यन्योऽपि परास्तः। पूर्णिमान्तमानेन तिथिबद्धद्वादशमासैर्वर्षगणने पञ्चदिनानां न्यूनत्वात्। अमान्तमानेन चैत्रकृष्णग्रहणे बहुदिनाधिक्यम्। सावनमानेन षष्ट्युत्तरत्रिशतदिनैर्वर्षगणने तु तिथिबद्धवर्षान्तत्र षड्दिनाधिक्येन चतुर्दशवर्षाणां चतुरशीत्यहोरात्रबद्धया बहुदिनन्यूनतैव। किं च, महाभारते युधिष्ठिरवनवासे त्रयोदशवर्षमिते किंचित्कालादर्वागेव तेषां प्राक्ट्ये दुर्योधनेन तदसमाप्तावेषां प्राक्ट्येन पुनस्तावत्पर्यन्तं पुनरेतैर्वनवासः कर्तव्यो भविष्यतीति भीष्मं प्रत्युक्ते भीष्मवाक्यं विराटपर्वणि—'पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः। एषामप्यधिका मासाः पञ्च च द्वादश क्षपाः ॥ त्रयोदशानां वर्षाणामिति मे धीयते मतिः। सर्वं यथावच्चरितं यथादेभिः प्रतिश्रुतम्॥ एवमतदुक्तं ज्ञात्वा ततो वीभत्सुरागतः सर्वं चैव महात्मानः सर्वे धर्मार्थकोविदाः ॥ एषां युधिष्ठिरो राजा कस्माद्भेदंपराभ्वसुः ॥' इति। एवं चेदृशव्यवहारे तिथिबद्धद्वादशमासैरेव वर्षगणनाधिक्यमासगणना चोचितैव। एवं चाधिकमासगणनायां धर्महानौ न्याय्यत्वे च स्थिते कस्मादामस्तानुपेक्षेत, भरतो वा तान्न गणयेत्। एवं चामान्तमानेन चतुर्दशीयाश्विनकृष्णे पूर्णिमान्तमानेन कार्तिककृष्णे षष्ठ्यां तत्समाप्तिरित्यायाति, अन्यथा चैत्रशुक्लदशम्यामारब्धस्य वनवासस्य षष्ठ्यां चतुर्दशवर्षसमाप्तिर्न कथमप्युपपद्यते। तद्गणने त्वेकादशदिनन्यूनषण्मासानां चतुर्दशवर्षेषु हृद्धावुपपद्यत एव सा, तस्माद्द्वादशसमाप्युत्तरं त्रयोदशे किंचिद्व्यतीतेऽरण्यकाण्डोक्तमद्रीत्या फाल्गुनाष्टम्यां रावणकृतसीतापहारः। तत्रैवतुर्दशे किंचिद्व्यतीते रामस्य लङ्कासमीपगमनम्। 'वर्तते दशमो मासो द्वौ तु शेषौ सुदुर्गमः' इति सीतोक्तिः सावनमानेन स्वहरणदिनतः कालगणनया। तत्र 'पूर्णचन्द्रप्रदीप्ता च' इति रामोक्त्या पौषशुक्लचतुर्दश्यां पूर्णिमायां वा त्रिकूटशिखरप्राप्तौ रामस्य। किं च हनुमतो लङ्काप्रवेशोत्तरं सीतादर्शनकाले 'हिमव्यपायेन च शीतरश्मिरभ्युत्थितो नैकसहस्ररश्मिः' इति वाक्येन 'द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः' इति रावणवाक्येन मार्गशुक्लदशम्युत्तरं हनुमतो लङ्काप्रवेशो दिनद्वयान्तरं लभ्यते इति निरूपितं सुन्दरकाण्डे। ततो मार्गकृष्णषष्ठ्यां राघवप्रस्थानस्यान्यथोक्तत्वेन पौषपौर्णिमात्वमेवोचितं तत्प्राप्तिदिनस्य। ततो दशपञ्चदिनानि सेनानिवेशतत्प्रेषणादिना गतानि। ततो युद्धारम्भः। तत्र तदारम्भ भाद्रश्रावणोभयामान्तं लङ्कापुराद्धृष्टिः सेन्ययोः संकुलं युद्धम्। ततो बहुराक्षसक्षयेण भीता राक्षसा लङ्कां प्रविष्टा इति तदिनेऽवहारस्तदुत्तरप्रतिपदि रात्रावित्यादिकृत्तशरबन्धस्य इत्यादि। अत एव शरबन्धबद्धराघवदर्शनकाले सीतावाक्यम्—'तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोपदे हतौ' इति। अनेन बहुदिनयुद्धेन बहुषु राक्षसेषु क्षयितेषु कतिपयपृथुपरुषेऽल्पावशिष्टे सैन्ये तयोः शरबन्ध इति लभ्यते। तथा 'अयं ते समहान्कालः शयानस्य महाबल' इति कुम्भकर्णं प्रति रावणोक्त्या सांप्रततन्निद्रायाः षण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम्। निरूपितं चैतत्प्राक्सेतुबन्धादिवृत्तान्तं त्वं न जानीषे इति कुम्भकर्णं प्रति रावणोक्त्या पूर्वमन्त्रकरणोत्तरं मध्ये जागरणाभावस्य प्रतीतेः। किं च शरबन्धनदिनं न कृष्णप्रतिपत्। तस्याः पूर्णिमोत्तरत्वेन संपूर्णरात्रौ चन्द्रसत्तया 'तस्मिंस्तमसि दारुणे' इत्यायुक्तरसंगत्यापत्तेः अतः सा शुक्लप्रतिपद्वाच्या। एवं चामान्तपक्षमात्रं युद्धमित्यस्यात्यन्तमसंगत्यापत्तिः। यत्तु—अमायामेव रावणवध इति, तत्तु न युक्तम्। इन्द्रजिद्बधोत्तरम् 'अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम्। कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ॥' इति रावणं प्रति शुकसारणोक्त्या चतुर्दश्यां रावणप्रेषितबलबधोत्तरममायां निर्गतरावणेन रामलक्ष्मणयोर्युद्धे रात्रौ लक्ष्मणस्य शक्तिघातोत्तरं रावणलङ्काप्रवेशस्योक्ततया, ततो लक्ष्मणशक्तिमोक्षोत्तरं पुना रामरावणयुद्धस्य वाल्मीकिनैव स्पष्ट-

मुक्तत्या तदसंभवात्। किं चादित्यहृदयस्य 'आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्' इत्यनेन सूर्यदर्शनोत्तरं जपस्योक्तत्या रावणमरणोत्तरम् 'स्थिरप्रभश्चाभ्यभवद्दिवाकरः' इत्युक्त्या दिवा तद्वधप्रतीत्या च चिरकालयुद्धोत्तरं लक्ष्मणे शक्तिघातस्य तदर्थमोषधिपर्वतानयनस्य चोक्तत्वेनामावास्यां शक्तिघातप्रतीत्या रणाद्रावणापगमस्य प्रतीत्या च तद्विरोधात्। तथा पाद्मे—'ततो जज्ञे महायुद्धं संकुलं कपिरक्षसाम्। मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यभूत्॥' प्रतिपदि। शुक्लप्रतिपदीत्यर्थः। उक्तयुक्तेः। 'ततो निशि समागम्य मायावी शक्रजिद्बली। बबन्ध नागपाशैस्तौ राघवौ च हरिव्रजान्॥' ततश्चिरकालसंकुलयुद्धोत्तरम्, अन्यथा तस्यां निर्शीथेव वदेत्। अथ द्वितीयेऽह्नि षष्ठ्यामिति चोक्त्या दारुणे तमसीति रामायणोक्त्या च भाद्रश्रावणोभयामोत्तरप्रतिपत्तेतदिति बोध्यम्। 'वैनतेयस्तदाभ्येत्य तानि चास्त्राण्यमोचयत्। द्वितीयेऽह्नि षष्ठ्यामिति चोक्त्या दारुणे तमसीति रामायणोक्त्या च भाद्रश्रावणोभयामोत्तरप्रतिपत्तेतदिति बोध्यम्। 'वैनतेयस्तदाभ्येत्य तानि चास्त्राण्यमोचयत्। द्वितीयेऽह्नि धूम्राक्षं हनुमान्निजघान वै॥ तृतीयेऽह्नि वज्रदंष्ट्रं खड्गाच्छित्त्वा चाङ्गदः। जघान हनुमान्भूयश्चतुर्थेऽह्न्यकम्पनम्॥ प्रहस्तं पञ्चमीतिथ्यां नीलश्चिच्छेद मूर्धनि। रावणः परिघेणोऽभूत्षष्ठ्यां रामेण धन्विना॥ अथ लङ्केश्वरः क्षिप्त्वा कुम्भकर्णं सहोदरम्। शैलमुद्गरघातोग्रधावनार्थैरबोधयत्॥ जघान तं कुम्भकर्णं रामः सप्तमवासरे॥' इदं बोधनं दिनद्वयेन। ते बोधिते कुम्भकर्णम्। सप्तमवासरे बोधनोत्तरं सप्तमवासरे इत्यर्थः। यत्तु बोधने षष्ठ्यां रात्रौ सप्तम्यां चैतद्वध इति, तत्। तदुत्थाने उक्तन्यातिप्रयासस्य रात्रिमात्रेणासंभवात्; रावणमन्दिरगमनकाले सूर्यप्रभया रावणमन्दिरस्थातिभास्वरत्वेनेन मन्त्रादिना सप्तम्यां युद्धासंभवात्, इन्द्रजितो दिवसेन वोधस्य यामषट्केन 'इत्यस्यासंगतत्वाच्च। एवं च भाद्रपूर्णिमायामेतद्वधः। 'जघान लक्ष्मणोऽन्येद्युरतिकायं दशाम्यजम्। बबन्धान्येद्युरिन्द्रारिर्ब्रह्मास्त्रेण नृपौ रणे॥ हनुमता समानीतो महौषधमहीधरः। तस्यानिलसुतस्पर्शात्प्राणे सद्यः समुत्थिताः॥ अन्येद्युः कपिराट् कुम्भं निकुम्भं मातुलोऽवधीत्। तस्यां निशि रघुश्रेष्ठो जघान मकरेक्षणम्॥ मायासीतावधं चक्रे शक्रजिद्रणमूर्धनि। तेन खिन्नोऽवधीद्रामं आरुरुक्षुं लक्ष्मणं सः॥ त्रयोदशाहे सौमित्रिश्चिच्छिदे योगयुक्तया। जघान शक्रजेतारं रामधानेन हेतुना॥' अन्येद्युरन्येषु दिवसेषु। अत्रातिकायग्रहणं त्रिशिरोदेवान्तकनरान्तकमहोदरमहापार्श्वोपलक्षणम्। लक्ष्मणग्रहणमङ्गदहनमतोरुप्युपलक्षणम्। एवं षड्भिर्दिनैः षण्णां वधः पूर्वं क्रमेणैव तद्वयोक्तेः। अन्येद्युः सप्तम्याम्, पर्वतानयनमष्टम्याम्, अन्येद्युर्नवम्याम्, तस्यां निशि नवमीरात्रौ तदन्ते मायासीतावधः। ततो दशमीचतुर्थयाममारभ्य त्रयोदशीचतुर्थयामपर्यन्तमिन्द्रजिद्वधः।' ततोऽवधीन्मूलबलं चतुर्दश्यां रघूद्वहः। दर्शेऽथ निर्ययौ राजा योद्धुं रामेण संयुगे॥ चतुरङ्गबलः सार्धं मन्त्रिभिर्दशकंधरः। छत्रचामरसंयुक्तः सर्वाभरणभूषितः॥ महारथगतो द्वाराद्दुस्तारान्निर्ययौ बहिः। आगतो रक्षसां राजा त्रयाणां देवकण्टकः॥ योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः। तत्र युद्धं समभवद्वानराणां च रक्षसाम्॥ रामरावणयोश्चैव तथा सौमित्रिणा सह। शक्तिं चिक्षेप संक्रुद्धः सोऽनुजं प्रति रावणः॥ वक्षसा धारयामास सौमित्रिस्तां वियद्गताम्। तथा स बाध्यमानः सन्पपात धरणीतले॥ हनुमता जीवितोऽभूद्दोषध्यानयना त्पुनः। ततः क्रुद्धो महातेजा राघवो राक्षसान्तकः। जघान राक्षसान्सर्वांश्चरैः कालान्तकोपमैः। भयात्प्रद्रुद्रुवे रणे लङ्कां प्रतिनिशाचराः॥ जगाम समयं पश्यन्विधेरात्मयुतं विभुः। निकुम्भिलां ततः प्राप्य होमं चक्रे जिगीषया॥ ध्वंसितं वानरैस्तद्भिचारात्मकं विधेः। पुनरुत्थाय पौलस्त्यो रामेण सह योधितुम्॥ दिव्ये स्यन्दनमास्थाय राक्षसैर्निर्ययौ बहिः॥' इदं निर्गमनमाश्विनशुक्लप्रतिपदि। 'ततः शतमखो दिव्यं रथं हर्यश्वसंयुतम्। रावणाय ससूतेन प्रेषयामास भक्तिमान्॥ तं तु मातलिनानीतमारुह्य रथसत्तमम्। स्वयमानः सुरगणैर्युयुधे तेन रक्षसा॥ ततो युद्धमभूद्घोरं रामरावणयोर्महत्। सप्ताह्निकमहोरात्रं शस्त्रास्त्रवृष्टिभीषणम्॥' इति। ततो मातलिरथागमनदिनोत्तरम्। एवं च नवम्यां तद्वधः। तदुक्तं कालिकापुराणे—'रामस्यानुग्रहार्थं वै रावणस्य वधाय च। राज्ञश्चैव महादेवी ब्रह्मणा बोधिता पुरा॥ ततस्तु व्युत्थिता सा नन्दायामाश्विने सिते। जगाम नगरीं लङ्कां यत्रासीद्रावणः पुरा॥' आगत इति शेषः। इदं चागमनं राज्यन्ते तत्रैव मातलिरथागमनम्। 'तत्र गत्वा महादेवी तदा तौ रामलक्ष्मणौ। मुहूर्तेन बोधयामास स्वयमन्तर्हिताम्बिका॥ राक्षसानां वानराणां जग्ध्वा सा मांसशोणितम्। रामरावणयोर्युद्धं सप्ताहं सा व्ययोजयत्॥ व्यतीते सप्तमे रात्रे नवम्यां रावणं ततः। रामेण घातयामास महामाया जगन्मयी॥ यावद्योः स्वयं देवी युद्धकेलिमुदैरयत्। तावद्भ्रष्टानि सर्वेषां सुपूजिता॥ निहते रावणे वीरे नवम्यां सकलैः सुरैः। विशेषपूजां दशम्यामवधीत्लोकपितामहः॥' सकलैः सुरैरित्यस्य संहेति शेषः। 'रामरावणयोस्तु युद्धं चात्रैव भीतिदम्। तृतीयायां तु लङ्कायाः पूर्वोत्तरदिशि स्थितम्॥ स्थातिव्रजत्युक्तायां भीतं सुरबलं महत्। शान्त्यर्थं तारयामास देवेन्द्रो रचनाक्षरैः॥' शान्त्यर्थं भयशान्त्यर्थम्। 'ततस्तु श्रवणेनाथ दशम्यां चण्डिकां शुभाम्। विसृज्य चक्रे शान्त्यर्थं बलनीराजनं हरिः॥' रिपुजनितभयशान्त्यर्थमित्यर्थः। 'नीराजितबलः शक्रस्तत्र रामं सलक्ष्मणम्। संभाष्य प्रययौ स्वर्गं सह देवैः शचीपतिः॥ इति त्रेतापुराकल्पे मनोः स्वायंभुवेऽन्तरे। पुराकल्पे यथा वृत्तं प्रतिकल्पं तथैव तु॥ प्रवर्तते स्वयं देवी दैत्यानां नाशनाय वै॥' स्वायंभुवमन्वन्तररूपे पुराकल्पे इत्यर्थः। प्रतिकल्पम् प्रतिमन्वन्तरमित्यर्थः। जलप्लवसामान्येन तथापि कल्पव्यवहारात्। 'प्रतिकल्पं भवेदामो रावणश्चापि राक्षसः। तथैव जायते युद्धं तथैव त्रिदशागमः॥ एवं रामसहस्राणि रावणानां तथैव च। भवितव्यानि भूतानि तेषु देवी प्रवर्तते॥ तां पूजन्ति सुराः सर्वे बलं नीराजयन्ति च। तथैव च नराः सर्वे कुर्युः पूजां यथाविधि॥ बलनीराजनं राजा कुर्याद्बलविवृद्धये॥'

इति । इयं च ब्रह्मबोधिता महादेव्यग्रौ प्रविष्टा सीतैव भगवच्छक्तिरूपेति प्रतिभाति, अत एव ब्रह्मवैवर्ते प्रथमेंऽशविभागे प्रतिकल्पं विष्णोश्चरितं कीदृशमिति नारदप्रश्ने ब्रह्मवाक्यम्—' स एव भगवान्नूनं प्रतिमन्वन्तरं मुने । वधाय दुष्टदैत्यानां भूमिभारकृतां भुवि ॥ कलिद्वापरयोः संधौ भविष्यति न संशयः । प्रतिकल्पं त्वेवमेव भविष्यति न संशयः ॥ ' इति । ' सहस्रकृत्वो रामोऽपि भविता ब्रह्मणो दिने ' इति ब्रह्मवैवर्ते प्रथमविभागस्थे राधां प्रति कृष्णवाक्ये । दिने इति जातावेकवचनम् । दिनेष्वित्यर्थः । पूर्वं प्रतिमन्वन्तरमित्युक्तेः । प्रतिचतुर्युगं रामावतार इति तु न युक्तम्, चतुर्विंशतितमचतुर्युग्यां रामावतारस्याष्टाविंशतितमचतुर्युग्यां कृष्णावतारस्य हरिवंशे पुराणान्तरे च प्रसिद्धत्वादिति दिक् । आग्नेयरामायणमिति प्रसिद्धग्रन्थे तु—' रामः पञ्चदशे वर्षे पड्वर्षामपि मैथिलीम् । उपयेमे त्वयोध्यायां द्वादशाब्दानुवाससः ॥ सप्तविंशतिमे वर्षे वनवासमकल्पयत् । अष्टादश तु वर्षाणि सीतायास्तु तदाभवन् ॥ त्रिरात्रमुदकाहारश्चतुर्थेऽह्नि फलाशनः । पञ्चमे चित्रकूटे तु रामो वासमकारयत् ॥ अथ त्रयोदशे वर्षे पञ्चवट्यां महामनाः । रामो विरूपयामास घोरां शूर्पणखां वने ॥ ततो माघे सिताष्टम्यां सुहूर्ते रुद्रसंज्ञके । राघवाभ्यां विना सीतां जहार दशकंधरः ॥' ' माघे शुक्लचतुर्दश्याम् ' इति पाठान्तरम् । ' मार्गशुक्लदशम्यां तु वसन्तीं रावणालये । संपातिर्दर्शमे मासे आचख्यौ वानरेषु ताम् ॥ एकादश्यां महेन्द्राग्रात्पुप्लुवे शतयोजनम् । तद्रात्रिशेषे सीताया दर्शनं हि हनूमतः ॥ द्वादश्यां शिंशपावृक्षे हनूमान्पर्यवस्थितः । तस्यां निशायां सीताया विश्वासालापसत्कथाः ॥ अक्षादिभिस्त्रयोदश्यां ततो युद्धमवर्तत । वधो अक्षकुमारस्य वनविध्वंसनं तथा ॥ ब्रह्मास्त्रेण चतुर्दश्यां बद्धः शक्रजिता कपिः । वह्निना पुच्छयुक्तेन लङ्कायाः दहनं तथा ॥ पौर्णमास्यां महेन्द्राद्रौ पुनरागमनं कपेः । मार्गासितप्रतिपदः पञ्चभिः पथि वासरैः ॥ पुनरागम्य षष्ठेऽह्नि ध्वस्तं मधुवनं च तैः । सप्तम्यां प्रत्यभिज्ञानदानं शुद्धिनिवेदनम् ॥ अष्टम्युत्तरफल्गुन्यां मुहूर्ते विजयाभिधे । मध्यं प्राप्ते सहस्रांशौ प्रस्थानं राघवस्य तु ॥ वासरे सप्तमेऽम्भोधौ स्कन्धावारनिवेशनम् । पौषशुक्लप्रतिपदस्तृतीया यावदस्त्रुधेः ॥ उपस्थानं ससैन्यस्य राघवस्य बभूव ह । विभीषणश्चतुर्थ्यां वै रामेण सह संगतः ॥ समुद्रतरणार्थाय पञ्चम्यां मन्त्र उद्यमः । प्रायोपवेशनं चक्रे रामो दिनचतुष्टयम् ॥ समुद्रवरलाभश्च सेतूपायप्रकीर्तनम् । सेतोर्दर्शम्यामारम्भस्त्रयोदश्यां समापनम् ॥ चतुर्दश्यां सुवेलाग्रे रामः सैन्यं न्यवेशयत् । पौर्णमास्या द्वितीयान्तं त्रिदिनैः सैन्यतारणम् ॥ तृतीयाया दशम्यन्तं मन्त्रो गुल्मनिवेशने । शुकसारणयोः सैन्यप्राप्तिरेकादशीदिने ॥ माघे सितायां द्वादश्यां सैन्यसंख्या कृता तु वै । सारणेन कपीनां तु सारासारोपवर्णनम् ॥ त्रयोदश्यामयं यावल्लङ्कायां दिवसैस्त्रिभिः । रावणः सैन्यसंख्यानं रणायोत्साहनं तथा ॥ वयावथाङ्गदो दौत्यं माघशुक्लाष्टिवासरे । माघशुक्लद्वितीयादिदिनैः सप्तभिरेव तु ॥ रक्षसां वानराणां च युद्धमासीत्सुदारुणम् । माघशुक्लनवम्यां तु रात्राविन्द्रजिता रणे ॥ रामलक्ष्मणयोर्नागपाशैर्बन्धो बभूव ह । नागपाशविमोक्षार्थं दशम्यां गरुडोऽभ्यगात् ॥ अत्रावहारः कथितो दशम्यादिदिनद्वयम् । द्वादश्यामाञ्जनेयेन धूम्राक्षस्य वधः कृतः ॥ त्रयोदश्यां तु तेनैव निहतोऽकम्पनो रणे । माघशुक्लचतुर्दश्या यावत्कृष्णादिवासरम् ॥ त्रिदिनेन प्रहस्तस्य नीलेन विहितो वधः । माघासितद्वितीयायामथतुर्यन्तं त्रिभिर्दिनैः ॥ रामेण तुमुले युद्धे रावणो द्रावितो रणात् । पञ्चम्यास्त्वष्टमी यावद्रावणेन प्रबोधितः ॥ कुम्भकर्णः समुत्तस्थावत्रायुद्धं चतुर्दिनम् । कुम्भकर्णो दिनैः षड्भिर्नवम्यास्तु चतुर्दशीम् ॥ रामेण निहतो युद्धे बहुवानरभक्षकः । अमावास्यादिने शोकादवहारो बभूव ह ॥ फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तदिनैस्ततः । नरान्तकप्रभृतयो निहताः पञ्च राक्षसाः ॥ पञ्चम्याः सप्तमी यावदतिकायवधस्त्रयाणाम् । अष्टम्या द्वादशी यावन्निहतौ दिनपञ्चकात् ॥ निकुम्भकुम्भावूर्ध्वं तु मकराक्षश्चतुर्दिनैः । फाल्गुनस्य द्वितीयायां कृष्णे शक्रजिता जितम् ॥ तृतीयायास्तु सप्तम्यां हरयः पञ्चवासरात् । ओषध्यानयने व्यग्रास्तदासीदवहारकः ॥ तत्र त्रयोदशी यावद्दिनैः षड्भिस्तु शक्रजित् । लक्ष्मणेन हतो युद्धे विन्नितोऽभिचरन्कमात् ॥ चतुर्दश्यां दशग्रीवो रणदीक्षाविधिक्रमात् । अमावास्यां ययौ वीरो युद्धाय दशकन्धरः ॥ चैत्रशुक्लप्रतिपदः पञ्चमीदिनपञ्चकैः । रावणस्य प्रधानानां युध्यतामभवत्क्षयः ॥ चैत्रषष्ठ्यष्टमी यावन्महापार्श्वादिमारणम् । चैत्रशुक्लनवम्यां तु सौमित्रेः शक्तिभेदनम् ॥ द्रोणाद्रिराजानयनेनेन लक्ष्मणार्थमुपाहृतः । दशम्यामवहारोऽभूद्रात्रौ युद्धं सुदारुणम् ॥ एकादश्यां तु रामाय रथो मातलिसारथिः । अष्टादशदिने रामो द्वैरथे रावणं वधीत् ॥ द्वादश्याः शुक्लपक्षस्य यावत्कृष्णचतुर्दशीम् । माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्दशीम् ॥ अष्टार्शीतिदिनं युद्धं मध्ये पञ्चदशाहकम् । युद्धावहारे सङ्ग्रामखिलसप्तदिनान्यभूत् ॥ संस्कारो रावणादीनामभावास्यादिनेऽभवत् । वैशाख्यादितिथौ रामः सुवेलं पुनरागमत् ॥ अभिषिक्तो द्वितीयायां लङ्काराज्ये विभीषणः । सीताशुद्धिस्तृतीयायां देवेभ्यो वरलम्भनम् ॥ वैशाखस्य चतुर्थ्यां तु रामः पुष्पकमास्थितः । पूर्णे चतुर्दशे वर्षे पञ्चम्यां माघवस्य तु ॥ भरद्वाजाश्रमं रामः ससीतः पुनरागमत् । नन्दिग्रामे तु षष्ठ्यां वै भरतेन समागतः ॥ सप्तम्यामभिषिक्तोऽसावयोध्यायां रघूत्तमः । जानकी रामसहिता रावणस्य निवेशने ॥ मनुमासास्थितापञ्चदशवासरसंयुते ॥' इति, तत्तु सर्वांशेऽनिश्चितप्रामाण्यम् । कालिकापुराणादिविरोधात् । इदं कल्पान्तरविषयमिति न युक्तम् । तद्विरोधादेव तस्मात्क्रियाविरोधे पुराणेषूपसंहार एव न्याय्यः शाखान्तरोक्ताङ्गोपसंहारवत् । यथा कुम्भकर्णवधोऽत्र रामेणोक्तो भारते लक्ष्मणेन तादृशे विषये, न तु कल्पभेदेन व्यवस्था । जन्मविषय एव तु हरिवंशोक्ता सेति बोध्यम् ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाधिकशततमः सर्गः ॥ १०८ ॥

नवाधिकशततमः सर्गः ।

भ्रातरं निहतमवलोकयतो बिभीषणस्यायुक्तौ विलापः पश्चाद्रामेणौर्ध्वदेहिकसंस्कारकरणे स उपदिष्टः ।

भ्रातरं निहतं दृष्ट्वा शयानं निर्जितं[1] रणे । शोकवेगपरीतात्मा विललाप बिभीषणः ॥ १ ॥
वीरविक्रान्त विख्यात प्रवीण[2] नयकोविद[3] । महार्हशयनोपेत किं शेषे [4]निहतो भुवि ॥ २ ॥
निक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ । मुकुटेनापवृत्तेन भास्करा[5]कारवर्चसा ॥ ३ ॥
तदिदं वीर संप्राप्तं यन्मया पूर्वमीरितम् । काममोहपरीतस्य यत्तन्न[6] रुचितं तव ॥ ४ ॥
यन्न दर्पात्प्रहस्तो वा नेन्द्रजिन्नापरे जनाः । न कुम्भकर्णोऽतिरथो नातिकायो नरान्तकः ॥
न स्वयं बहुं[7] मन्येथास्तस्योदर्कोऽयमागतः । ॥ ५ ॥
गतः सेतुः सुनीता[8]नां गतो धर्मस्य विग्रहः । गतः सत्त्वस्य संक्षेपः सुहृस्तानां गतिर्गता ॥ ६ ॥
आदित्यः पतितो भूमौ मग्नस्तमसि चन्द्रमाः । चित्रभानुः प्रशान्तार्चिर्व्यवसायो निरुद्यमः ॥
अस्मिन्निपतिते [9]वीरे भूमौ शस्त्रभृतां वरे । ॥ ७ ॥

१] ति०टी०—अथ विभीषणविलापः—भ्रातरमिति ॥१॥

रा० टी०—रावणविध्वंसहेतुकं विभीषणविलापमाह—भ्रातरमित्यादिभिः । विभीषणः रामेण निर्जितमत एव निहतं शयानं भ्रातरं रावणं दृष्ट्वा विललाप ॥ १ ॥

गो० टी०—अथ भ्रातृवधदर्शनेन दुःखात् पङ्कतं प्रकृतिसंस्थकृतं शोकं सोढुमशक्नुवन् बिभीषणो विलपति—भ्रातरमित्यादि । शयानं शयानमिव स्थितम् । शोकवेगपरीतात्मा शोकवेगेन परीतमनस्कः । वेगशब्देन दुःखकृतः शोक इति योत्स्यते ॥ १ ॥

२] ति० टी०—प्रवीण समर्थ ॥ २ ॥

३] ति० टी०—अपवृत्तेन रामबाणेनोन्मार्जितेन मुकुटेनोपलक्षितः ॥ ३ ॥

रा० टी०—विलापाकारमाह—वीरेत्यादिभिः । महार्हशयनाय उपेतो योग्यत्वं हृतः अत एव अपवृत्तेन रामबाणेनोन्मार्जितेन भास्करा[5]कारं वर्चो यस्य तेन मुकुटेन उपलक्षितम् दीर्घनिश्चेष्टौ अत्यन्तं चेष्टारहितौ भुजौ निक्षिप्य किं शेषे श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०—वीरेत्यादि । विनीत विधाय शिक्षित विक्षिप्येत्यस्य श्लोकस्य पूर्वश्लोकेनान्वयः । भुजाविति[10]नात्यन्तबद्धे द्विभुजस्थितिर्गम्यते । मुकुटेन उपलक्षित इति शेषः । अपवृत्तेन पतनवेगादिपरिवर्तितेन ॥ २ ॥ ३ ॥

४] ति० टी०—यन्मया पूर्वम् रितं त्वन्निधनान्तमर्थश्लोनाशरूपं तदिदं संप्राप्तम् । उक्तस्यैव विवरणम्—काममोहेति । काममोहपरीतस्य ते यन्मे वचो न रुचितम् ॥ ४ ॥

रा० टी०—तदिति । यस्माद्धेतोः मया पूर्वमीरितं यद्वचः तत् काममोहपरीतस्य ते न रुचितं तत्तस्माद्धेतोः इदं मरणं संप्राप्तं त्वयेति शेषः ॥ ४ ॥

गो० टी०—तदिदमिति । मया पूर्वं समीरितं यद्वचः काममोहपरीतस्य ते न रुचितं नेष्टमासीत् । तदिदं वचः संप्राप्तं, त्वयानुभूतमित्यर्थः ॥ ४ ॥

५] ति० टी०—यन्न प्रहस्तादयो दर्पादिना बहुमन्यन्ते स्वं च वचो न बहु मन्येथास्तस्यादर्कः उत्तरकालिकविपाकः आगतः प्राप्तः ॥ ५ ॥

रा० टी०—यदिति यस्मात् दर्पात् बहु मदुक्तं प्रहस्तादयो नामन्यन्त स्वं च न मन्येथाः तस्य उदर्कः औत्तरकालिकफलमयमागतः प्राप्तः ॥ ५ ॥

गो० टी०—यदित्यादिसार्धश्लोक एकान्वयः । यत्पापकर्म प्रहस्तो दर्पात् नामन्यतेति विपरिणामेनानुपश्यते । एवं सर्वत्र योजनीयम । अतिरथ इत्यतिशयविशेषणम् । अमन्येथाः अमन्यथाः मन्यार्षम् । तृणीकृतवानसीत्यर्थः । तस्य सीताहरणस्य, उदर्कः फलमागतम् ॥ ५ ॥

६] ति० टी०—सुनीतानां धार्मिकाणां सेतुर्गतः । विग्रहः स्वरूपम । सत्त्वस्य बलस्य संक्षेपः संहरणम् । सुहृत्तानां वीराणां गतिर्गता प्राप्ता । त्वयेति शेषः ॥ ६ ॥

७] ति० टी०—अस्मिन्भूमौ पतिते सत्यादित्यभ्रमिपातादित्युक्तं दृश्यते । व्यवसायः प्रवृत्तिलक्षणो धर्मः । निरुद्यमः । स्वतन्त्र्याश्रयाभावाद्विव्यापारोऽभूदित्यर्थः ॥ ७ ॥

रा० टी०—गत इति । अस्मिन् वेदवेदाङ्गपारगे शस्त्रभृतां वरे रावणे भूमौ निपतिते केन चित् निमित्तेन हते सतीत्यर्थः सुनीतानां सेतुर्मर्यादा गतः धर्मस्य विग्रहस्वरूप च गतः सत्त्वस्य बलस्य संक्षेपः प्रकाशो गतः प्रस्तवानां स्तुतीनां गतिर्विषयत्वं गता आदित्यो भूमौ पतितः चन्द्रमाः तमसि ग्रस्तः चित्रभानुरग्निः प्रशान्तार्चिः व्यवसायः उत्साहः निरुद्यमः निरर्थकः संतोऽस्य महत्त्वं योनितम् श्लोकद्वयमेकान्वयि ॥६॥ ७ ॥

१ रामनिर्जितमिति गो. रा. पा.।२ विनीतेति गो. विनीतीति रा. पा. । ३ अथेति गो. रा. पा. । ४ दीप्ते गो. पा. ।५ मया पूर्व समिति गो. पा. । ६ ते न रुचितं वच इति गो. रा.पा. । ७ त्वममन्येथा इति । गो. पा. । ८ प्रस्तावानामिति गो.प्रस्तवानामिति च रा.पा. । ९ भूमौ वीरे इति गो. पा.।

किं शेषमिहलोकस्य गतसत्त्वस्य संप्रति । रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु ॥ ८ ॥
धृतिप्रवालः प्रसभाद्यपुष्पस्तपोबलः शौर्यनिबद्धमूलः ।
रणे महान्राक्षसराजवृक्षः संमर्दितो राघवमारुतेन ॥ ॥ ९ ॥
तेजोविषाणः कुलवंशवंशः कोपप्रसादापरगात्रहस्तः ।
इक्ष्वाकुसिंहावगृहीतदेहः सुप्तः क्षितौ रावणगन्धहस्ती ॥ ॥ १० ॥
पराक्रमोत्साहविजृम्भितार्चिर्निःश्वासधूमः स्वबलप्रतापः ।
प्रतापवान्संयति राक्षसाग्निर्निर्वापितो रामपयोधरेण ॥ ॥ ११ ॥

गो० टी०–गत इति । सुनीतानां नयानां सेतुः मर्यादा । धर्मस्य विग्रहः विरोधः । यद्वा अधर्मस्येति छेदः । विग्रहः देहः । यद्वा धर्मस्य विग्रहः देहः । एषोऽग्निहोत्री च महान्पाश्चेत्यादिना रावणस्य धार्मिकत्वकथनात् । सत्त्वस्य बलस्य, संक्षेपः संग्रहः । प्रस्तावानां प्रकृतस्तुतीनां गतिः विषयः ॥६॥

गो० टी०– आदित्य इत्यादिसार्धश्लोक एकान्वयः । अस्मिन्निति । अस्मिन्पतिते आदित्यः पतित इत्याद्यभेदातिशयोक्तिः । चित्रभानुः वह्निः सर्ववह्नी चित्रभान इत्यमरः । व्यवसायो निश्चयः । रावणसदृशाश्रयाभावाद्व्यवसायः उत्साहशक्तिः निर्व्यापारीभूदित्यर्थः ॥ ७ ॥ ८ ॥

८] ति० टी०–रणे त्वयि पांसुषु प्रसुप्त इव ज्ञाते । इह लङ्कायां वर्तमानस्य गतसत्त्वस्य गताधारबलस्य लोकस्य किं शेषम्, न किमपि । सर्वं नष्टमित्यर्थः ॥ ८ ॥

९] ति० टी०–धृतिर्धैर्यमेव प्रवालो यस्य सः । प्रसभो हठ एवाढ्यं पुष्पं यस्य सः । तप एव बलं यस्य सः । शौर्यमेव निबद्धं दृढावस्थितिसाधनं मूलं यस्य सः ॥ ९ ॥

रा० टी०–किमिति । राक्षसशार्दूले त्वयि रणे पांसुषु प्रसुप्ते इव सति हतवीर्यस्य इह लङ्कायां वियमानस्य लोकस्य जनस्य किं शेषमवशिष्टं न किंचिदित्यर्थः ॥ ८ ॥

रा० टी०–धृतीति । धृतिर्धैर्यमेव प्रवालो नवपल्लवो यस्य प्रसहः प्रसहनमढ्यं पुष्पं यस्य तप एव बलं स्थैर्यशक्तिर्यस्य शौर्यमेव निबद्धं दृढं मूलं यस्य सः महाराक्षसराजरूपो वृक्षः राघवमारुतेन रामरूपमहावातेन संमर्दितः ॥ ९ ॥

गो० टी०–किं शेषमिवेति । राक्षसशार्दूले रावणे पांसुषु प्रसुप्त इव स्थिते । मृत इति यावत् । सांप्रतं हतवीरस्य लोकस्य किमिव शेषम् । सर्वं शून्यमभूदित्यर्थः ॥ ९ ॥

गो० टी०–धृतीति । धृतिरेव प्रवालो यस्य स तथा । धैर्यं हि वृक्षस्य पल्लववत् प्रथमफलम् । प्रसहत इति प्रसहः पचाद्यच् भावप्रधानो निर्देशः स एव अढ्यपुष्पं श्रेष्ठपुष्पं यस्य स तथा। प्रसहनं हि पुष्पवत्कार्यफलस्य अव्यवहितहेतुः । तप एव बलं स्थैर्यांशो यस्य स तथा । शौर्यमेव निबद्धमूलं निश्चलमूलं यस्य स तथा । शौर्यमूलत्वात् तपःप्रभृतीनां सर्वेषाम् ॥ १० ॥

१०] ति० टी०–विषाणं दन्तः । कुले पितृपितामहादयस्तेषां वंशः समूह एव वंशः पृष्ठावयवविशेषो यस्य सः । 'वंशो वेणौ कुले वर्गे पृष्ठ्यावयवेऽपि च' इति विश्वः । कोपापरगात्रः कोप एवापरगात्रं पादाद्यवयवो यस्य सः । प्रसादहस्तः प्रसादः प्रसन्नतैव हस्तः शुण्डादण्ड इत्यर्थः । इक्ष्वाकुसिंहेन रामरूपसिंहेनावगृहीतः पातितो देहो यस्य सः ॥ १० ॥

रा० टी०–तेज इति । तेज एव विषाणो दन्तो यस्य कुलानि पितृपितामहादयस्तेषां वंशस्समूह एव वंशः पृष्ठैकदेशविशेषो यस्य कोपप्रसादौ अपरगात्रहस्तौ क्रमेण पादावयवशुण्डादण्डौ यस्य सः रावणगंधहस्ती इक्ष्वाकुसिंहेन अवगृहीतो देहो यस्य स सन् क्षितौ सुप्तः वंशो वेणौ कुले वर्गे पृष्ठ्यावयवेऽपि चेति विश्वः ॥ १० ॥

गो० टी०–तेज इति । तेजः पराक्रम एव विषाणो यस्य स तथा । तेजो हि विषाणवत् परममेदि । कुलवंशवंशः कुलं पितृपितामहादयः तेषां वंशः सर्गः स एव वंशः पृष्ठावयवविशेषो यस्य स तथा । वंशो वेणौ कुले वर्गे पृष्ठ्यावयवेऽपि चेत्युभयत्रापि विश्वः । कुलेन हि वंशेनेव स्वाश्रितधारणम् । कोप एवापरगात्रं शिरोव्यतिरिक्तशरीरं यस्य स तथा । प्रसाद एव हस्तो यस्य स तथा । कोपस्य बहुत्वादपरगात्रत्वेन रूपणम् । इक्ष्वाकुः रामः स एव सिंहः तेन अवगृहीतदेहः रावणगन्धहस्ती रावण एव मत्तगजः क्षितौ सुप्तः । मृत इत्यर्थः ॥ ११ ॥

११] ति० टी०–पराक्रमोत्साहरूपं विजृम्भितमर्चिर्यस्य सः । क्रोधजो निःश्वास एव धूमो यस्य सः । स्वबलमेव प्रतापो दाहशक्तिर्यस्य सः, अत एव प्रतापवान् ॥ ११ ॥

रा० टी०–पराक्रमेति । पराक्रमोत्साहौ विजृम्भितार्चिः प्रज्वलितज्वाला यस्य निश्वासः क्रोधोच्छ्वास एव धूमो यस्य स्वबलमेव प्रतापः दाहकत्वशक्तिर्यस्य अत एव प्रतापवान् राक्षसाग्निः रामपयोधरेण निर्वापितः ॥ ११ ॥

गो० टी०–पराक्रमेति । पराक्रमोत्साहावेव विजृम्भितार्चिः विस्तृतज्वालः । निश्वास एव धूमो यस्य स तथा । स्वबलप्रतापः स्वबलोष्णः । प्रतापवान् तेजस्वी । राक्षसाग्निः रामपयोधरेण निर्वापितः ॥ १२ ॥

१ इवेति गो. रा. पाठः । २ हतवीर्यस्य साम्प्रतमिति गो. पाठः । ३ प्रसहेति गो. रा. पाठः ।

सिंहर्क्षलाङ्गूलककुद्विषाणः पराभिजिद्गन्धनगन्धवाहः ।
रक्षोदृपश्चापलकर्णचक्षुः क्षितीश्वरव्याघ्रहतोऽयमस्रः ॥ ॥ १२ ॥
वदन्तं हेतुमद्वाक्यं परिदृष्टार्थनिश्चयम् । रामः शोकसमाविष्टमित्युवाच विभीषणम् ॥ १३ ॥
नायं विनष्टो निश्चेष्टः समरे चण्डविक्रमः । अत्युन्नतमहोत्साहः पतितोऽयमशङ्कितः ॥ १४ ॥
नैवं विनष्टाः शोच्यन्ते क्षत्रधर्मव्यवस्थिताः । वृद्धिमाशंसमाना ये निपतन्ति रणाजिरे ॥ १५ ॥
येन सेन्द्रास्त्रयो लोकास्त्रासिता युधि धीमता । अस्मिन्कालसमायुक्ते न कालः परिशोचितुम् ॥ १६ ॥
नैकान्तविजयो युद्धे भूतपूर्वः कदाचन । परैर्वा हन्यते वीरः परान्वा हन्ति संयुगे ॥ १७ ॥

१२] ति० टी०–सिंहर्क्षेति । राक्षसास्त एव लाङ्गूलककुद्विषाणे च यस्य सः । 'सिंहर्क्षा राक्षसाः प्रोक्ता यक्षा उष्णीषिणो मताः' इति निघण्टुः । पराभिजित्परजेता गन्धने पराक्रमाद्युत्साहे गन्धवाहो वायुतुल्यः । 'गन्धनगन्धवाहः' इति पाठान्तरे पाठः । 'गन्धहस्ती' इति पाठे मत्तगजतुल्यः रक्षोदृपो रावणः चापले धर्मादिविषयस्खलनमेव कर्णौ चक्षुर्यस्य । क्षितीश्वरव्याघ्रो रामव्याघ्रः ॥ १२ ॥

रा० टी०–सिंहेति । सिंहर्क्षा राक्षसा एव लाङ्गूलककुद्विषाणानि यस्य परान् रिपूनभिजयति गन्धने उत्साहे गन्धहस्ती मत्तगजसदृशः चापले धर्मेभ्यः स्खलनमेव कर्णौ चक्षुर्यो च यस्य सः रक्षोदृपः राक्षसकुलनीचवदः क्षितीश्वरव्याघ्रेण रामव्याघ्रार्दूलेनावस्रुतो विनाशितः. सिंहर्क्षा राक्षसा प्रोक्ता यक्षा उष्णीषिणो मता इति निघण्टुः. गन्धनं मत्तोत्साहे हिंसने च प्रकाशन इति विश्वः ॥ १२ ॥

गो० टी०–सिंहेति । सिंहर्क्षा राक्षसाः ते एव लाङ्गूलककुद्विषाणानि यस्य स तथा । सिंहर्क्षा राक्षसाः प्रोक्ता यक्षा उष्णीषिणो मता इति निघण्टुः । यक्षा सिंहर्क्षा मूलनक्षत्रं तत्र राक्षसनक्षत्रम् । यथाह ज्योतिषे काश्यपः–अश्विमैत्रा विशाखा च आश्लेषा शततारका । धनिष्ठा चित्रया भक्षा ज्येष्ठा मूला च राक्षसा इति । तत्सदृशाद्राक्षसा अपि तत्सदृशैरुच्यन्ते । राक्षससमूहैर्गर्वहेतुत्वेन लाङ्गूलादिवत् रूपणम् । परानभिजयतीति पराभिजित् । गन्धने परोत्साहे गन्धहस्ती मुख्यः । गन्धनं सूचनोत्साहहिंसनेषु प्रकाशन इति विश्वः । चापले विषयलौल्यमेव तदेव कर्णचक्षुर्यस्य स तथा । रक्षोदृपः रावणदृषभः, क्षितीश्वरव्याघ्रेण रामव्याघ्रेण, हतः अवस्रुतः मृतः ॥ १२ ॥

१३] ति० टी०–परिदृष्टेति । प्रकाशमानोऽर्थनिश्चयो यस्मात्तत् ॥ १३ ॥

रा० टी०–वदन्तमिति । परिदृष्टः स्पष्टं प्रकाशितोऽर्थनिश्चयो यस्मात् तद्वाक्यं वदन्तं शोकसमाविष्टं विभीषणं राम इत्युवाच ॥ १३ ॥

गो० टी०–वदन्तमिति । परिमृष्टार्थनिश्चयं कृतार्थनिश्चयम् ॥ १४ ॥

१४] ति० टी०–अयं समरे निश्चेष्टोऽशक्तो भूत्वा न विनष्टः अपि तु चण्डविक्रमत्वादिगुण एव अयमशङ्कितो मत्युशङ्कारहित एव देवात्पतितः ॥ १४ ॥

रा० टी०–तदाकारमाह–नेति । समरे चण्डो विक्रमो यस्य अत्युन्नतो महोत्साहो यस्य अत एव अशंकितः पराभवशंकारहितः अयं मंगलविशिष्ट यथा भवति तथा पतितोयं निश्चेष्टोपि न विनष्टः अयशस्भावो विभिरिति कोशः ॥ १४ ॥

गो० टी०–नायमिति । अयं निश्चेष्टः निर्विक्रमः न विनष्टः, अपि त्वयं समरे चण्डविक्रमः अत्युन्नतमहोत्साहः अशङ्कितः पतितः विनष्टः ॥ ॥ १४ ॥

१५] ति० टी०–किं कृतमत आह–नैवमिति । वृद्धिमशंसमाना सन्तो ये रणाजिरे निपतन्ति । क्षत्रधर्मव्यवस्थिता एते विनष्टाः न शोच्यन्ते पुण्यलोकप्राप्तेरिति भावः १५

रा० टी०–ननु प्रत्यक्षतो विद्यमानविनाशस्य कथमपलापः कृत इत्यत आह–नेति । ये क्षत्रधर्मव्यवस्थिताः अत एव वृद्धिं स्वविजयमाशंसमानाः रणाजिरे निपतन्ति हे एवं रणादन्यत्र निपतिता इव न शोच्यन्ते अत एव न विनष्टाः किंतु नष्टा इत्यत्रापि विशेषणसाम्यप्रयुक्तो विशिष्टाभास इत्यर्थः ॥ १५ ॥

गो० टी०–यदि समरे विक्रम्य नष्टः तत्र किमित्यत्राह–नैवमित्यादि । ये वृद्धिं स्वलोकविक्रमं आशंसमानाः आकाङ्क्षमाणाः सन्तः, रणाजिरे निपतन्ति । क्षत्रधर्मव्यवस्थिताः क्षत्रधर्मव्यवस्थिता एवं विनष्टाः ते न शोच्यन्ते ॥ १५ ॥

१६] ति० टी०–कालसमायुक्ते कालधर्मसंयुक्ते । एवं दृष्टप्रत्यक्षस्य मरणस्य सत्यमिति भावः ॥ १६ ॥

रा० टी०–येनेति । येन युधि त्रयो लोका त्रासिताः तस्मिन् अस्मिन् रावणे कालेन मृत्युनिमित्तकमरणेन समायुक्ते सति परिशोचितुं कालो न भवति अवसरः ॥ १६ ॥

गो० टी०–न केवलं समरमरणादेव न शोच्यत्वं किंतु यशःप्रत्यासक्त्यापीत्याह–येनेति । येन त्रासितास्तस्मिन् रावणे कालसमायुक्ते शोचितुं न कालः नावसरः । तद्विषये शोको न युक्तः । वीरस्वर्गगमनादिति भावः ॥ १६ ॥

१७] ति० टी०–न भूतपूर्व इत्येतदेवोपपादयति–परैरिति ॥ १७ ॥

---

१ हस्तीति गो. रा. पाठः । २ मृष्टेति गो. पाठः । ३ धर्मभवेति गो. पाठः । ४ तस्मिन्निति गो. पाठः ।

इयं हि पूर्वैः संदिष्टा गतिः क्षत्रियसंमता । क्षत्रियो निहतः संख्ये न शोच्य इति निश्चयः ॥ १८ ॥
तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः । यदिहानन्तरं कार्यं कल्प्यं तदनुचिन्तय ॥ १९ ॥
तमुक्तवाक्यं विक्रान्तं राजपुत्रं विभीषणः । उवाच शोकसंतप्तो भ्रातुर्हितमनन्तरम् ॥ २० ॥

योऽयं विमर्देष्वविभग्नपूर्वः सुरैः समस्तैरपि वासवेन ।
भवन्तमासाद्य रणे विभग्नो वेलामिवासाद्य यथा समुद्रः ॥ २१ ॥
अनेन दत्तानि वनीपकेषु भुक्ताश्च भोगा निभृताश्च भृत्याः ।
धनानि मित्रेषु समर्पितानि वैराण्यमित्रेषु निपातितानि ॥ २२ ॥
एषोऽहिताग्निश्च महातपाश्च वेदान्तगः कर्मसु चाध्वर्यूरः ।
एतस्य यत्प्रेतगतस्य कृत्यं तत्कर्तुमिच्छामि तव प्रसादात् ॥ २३ ॥

रा० टी०—नन्वेवं विजयाभावहेतुकः शोकः कर्तव्य एवेत्यत आह—नेति । वीरः परेरुन्नीयते परान् हन्ति वा अतः एकान्तः एकनिष्ठत्वेन निश्चितो विजयः कदाचन न भूतपूर्वः एतेनावश्यं भाविनोऽर्थस्य शोको निरर्थक इति सूचितम् ॥ १७ ॥

गो० टी०—तथापि मरणे सति कथं न शोचितव्यमित्याशङ्क्य जयवत्पराजयोपि न शोकस्थानमित्याह—नैकान्तेति । एकान्तविजयः न भूतपूर्वः इतः पूर्वं न भूतः । अनैकान्त्यमुपादयति—पराजयेति ॥ १८ ॥

१८] ति० टी०—इयं हि या गतिरनेन प्राप्ता, इयं गतिः पूर्वैर्मन्वादिभिः संदिष्टोपदिष्टा क्षत्रियसंमता क्षत्रियपूजितोत्तमा गतिरेव । अतः संख्ये इतः क्षत्रियो न शोच्य इति निश्चयः॥१८॥

रा० टी०—एतादृशी मृतिः प्रशंसनीयेति बोधयन्नाह—इयमिति । इयं रणे मृतिः पूर्वैः मन्वादिभिस्संदिष्टा क्षत्रियाणां परमधर्मत्वेनोपदिष्टा अत एव क्षत्रियाणां सम्मता अभीप्सिता अत एव समरे निहतः क्षत्रियो न शोच्यः इति निश्चयः ॥ १८ ॥

गो० टी०—क्षत्रधर्मपर्यालोचनेनापि न शोच्य इत्याह—इयं हीति । क्षत्रियः शूरः ॥ १९ ॥

१९-२०] ति० टी०—तत्तस्मादेवं निश्चयं दृष्ट्वा ज्ञात्वा तत्त्वमास्थाय निश्चितत्वमवलम्ब्याव यत्कल्प्यमनुष्ठेयं तदनुचिन्तय । 'सत्त्वमास्थाय' इति पाठे सत्त्वगुणमास्थायेत्यर्थः ॥ १९ ॥ २० ॥

रा० टी०—तदिति । एवमुक्तप्रकारेण निश्चयं दृष्ट्वा ज्ञात्वा तत्त्वं यथार्थमार्गमास्थाय विज्वरश्शोकरहितस्त्वमिह अस्मिन् समये अनन्तरं विघ्नरहितं यथा भवति तथा यत् कार्यं कल्प्यं कर्तव्यं तदनुचिन्तय ॥ १९ ॥

रा० टी०—तमिति । विभीषणः उक्तवाक्यं राजपुत्रमनन्तरं तत्काले कर्तव्यं भ्रातुर्हितमुवाच ॥ २० ॥

गो० टी०—तदेवमिति । दृष्ट्वा ज्ञात्वा । तत्त्वमास्थाय परमार्थबुद्धिमवलम्ब्य । जनिमतामवश्यं मृत्युं ज्ञात्वेत्यर्थः । विज्वरः निःशोकः । यत् कार्यं कर्म कल्प्यम् अनुष्ठेयम् तदनुचिन्तय । कल्प्यमिति पाठे यत् कार्यं कल्प्यम् योग्यमित्यर्थः । कल्प्यो योग्यश्च ते समा इति निघण्टुः ॥ २०-२१ ॥

२१] ति० टी०—विमर्देषु युद्धेषु ॥ २१ ॥

रा० टी०—तदाकारमाह—य इति । योगं रावणः विमर्देषु समेतैस्सुरैस्सह वासवेन अग्रपूर्वो न स रावणः भवन्तमासाद्य वेलामासाद्य समुद्र इव विभग्नः ॥ २१ ॥

गो० टी०—योयमिति । विमर्देषु समरेषु । अनेन महावीरतया सम्यक् संस्कारमर्हतीत्युक्तम् ॥ २२ ॥

२२] ति० टी०—वनीपकेषु याचकेष्वनेन दत्तानि । दानानीति शेषः । निभृता नितरां पोषिताः ॥ २२ ॥

२३] ति० टी०—एषोऽहिताग्निरित्यार्षः संधिः । आहिताग्निरिति छेदः । वेदान्तगोऽधीतोपनिषत्कः कर्मस्वग्निहोत्रादिषु अध्वर्युरः परमानुष्ठाता परमकर्मठ इत्यर्थः ॥ २३ ॥

रा० टी०—अनेनेति । येनानेन दत्तानि दानानीति शेषः सुपूजितानि गुरुदेवतानीति शेषः भृत्याः निभृताः निरंतरं पालिताः अमित्रेषु रिपुषु वैराणि यापितानि य एष हिताग्निः आहिताग्निः सोमौपासनाभावस्तु सञ्ज्ञापूर्वकविधेरनित्यत्वात् कर्मसु यागादिषु अध्वर्युरः उत्तमकर्ता तस्मै तस्य प्रेतं परलोकं गतस्य यत् कृत्यं तत् तव प्रसादात् आज्ञयेत्यर्थः कर्तुमिच्छामि श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०—धर्मशीलत्वाच्च तदर्हतीत्याह—अनेनेति । दत्तानि दानानि कृतानि । सुपूजितानि गुरुदेवतानीति शेषः । निभृताः नितरां भृताः । यापितानि सफलीकृतानीत्यर्थः॥२२॥

गो० टी०—आहिताग्न्यादित्वाच्च तदर्हतीत्याह—एषोहिताग्निरिति । हिताग्निः आहिताग्निः । संधिरार्षः । वेदान्तं गच्छति जानातीति वेदान्तगः । कर्मसु चाध्वर्यवीयः कर्मशूर इत्यर्थः । प्रेतगतस्य प्रेतत्वं गतस्य इच्छामि । पुत्राणां विनष्टत्वेन भ्रातुरेवाधिकारित्वादिति भावः ॥ २४ ॥

१ विमर्देषु न भग्नेति गो. रा. पाठः । २ समेतैः सहेति गो. रा. पाठः । ३ सुपूजितानीति रा. सुपूर्वज्ञानीति गो. पाठः । ४ च यापितानीति गो. रा. पाठः । ५ वीर्य इति गो. पाठः ।

स तस्य वाक्यैः करुणैर्महात्मा संबोधितः साधु विभीषणेन ।
आज्ञापयामास नरेन्द्रसूनुः स्वर्गक्रियामाधानमदीनसत्त्वः ॥ ॥ २४ ॥
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् । क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे नवाधिकशततमः सर्गः ॥ १०९ ॥

दशाधिकशततमः सर्गः ।

रावणपत्नीनां विभीषणोपदेशमात्मनो हितकरमप्यनङ्गीकुर्वतीनां रामं प्रति करुणविलापः । सीतामपहृत्यापि न रामाय प्रत्यर्पयितुं मया न शक्यते यथा येन राक्षसा वधमात्मा च त्रयं तुल्यं निपातितमित्यादिरावणः ।

रावणं निहतं दृष्ट्वा राघवेण महात्मना । अन्तःपुराद्विनिष्पेतुः राक्षस्यः शोककर्शिताः ॥ १ ॥
वार्यमाणाः सुबहुशो वेष्टन्त्यो रणपांसुषु । विमुक्तकेश्यः शोकार्ता गावो वत्सहता यथा ॥ २ ॥
उत्तरेण विनिष्क्रम्य द्वारेण सह राक्षसैः । प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम् ॥ ३ ॥
आर्यपुत्रेति वादिन्यो हा नाथेति च सर्वशः । परिपेतुः कबन्धाङ्कां महीं शोणितकर्दमाम् ॥ ४ ॥

२४] ति० टी०–तस्य स्वर्गीयं स्वर्गाहमाधानं निधानं प्रेतकृत्यम् ॥ २४ ॥

रा० टी०–स इति । विभीषणेन करुणैर्वाक्यैरस्माभिः स सम्बोधितस्स रामः तस्य रावणस्य स्वर्गीयमाधानविधिमाज्ञापयामास ॥ २४ ॥

गो० टी०–स तस्येति । करुणैरित्यनेन दुःखातिशयादिदानीमेवमुक्तमिति गोत्यते । वक्ष्यति हि नाहमस्य संस्कारं करिष्यामीति । स्वर्गीयं स्वर्गाय हितम् । आधानम् अन्त्येष्टिसंज्ञिकं कर्म ॥ २४ ॥

२५] ति० टी०–नन्वेव ममापि स्नेहविषयः अतः संस्कारविषयां शङ्कां मा कुर्वित्यर्थः ॥ २५ ॥

इति श्रीमामभिरमे श्रीरामायणतिलके वाल्मीकीय-
आदिकाव्ये युद्धकाण्डे नवाधिकशततमः सर्गः ॥ १०९ ॥

रा० टी०–मरणान्तानीति । वैराणि मरणान्तानि भवन्ति मरणानन्तरं वैरं न तिष्ठतीत्यर्थः नः प्रयोजनं च हतं जातमतः एष रावणः यथा तव स्नेहविषयः तथा ममापि अतः अस्य संस्कारः क्रियताम् तथा ममाप्येषेत्यनेन रावणस्य स्वामित्यसख्यं व्यञ्जितम् ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे एकादशाधिकशततमः सर्गः ॥ १११ ॥

गो० टी०–वैरातिरेकात् संस्कारे मम द्वेष इति न शङ्कनीयमित्याह—मरणेति । मरणानन्तरमपि वैरस्करणं निष्प्रयोजनमित्याह–निर्वृत्तमिति । प्रयोजनं सीतालाभरूपम । अस्य संस्कारः यायजूकोचितसंस्कारः क्रियताम् । ममाप्येष यथा तव तव यथा भ्राता तथा ममापि भ्राता मद्भ्रातृश्रुतस्य तव भ्रातृत्वात् । त्वमस्य दोषं दृष्ट्वा न करोषि चेदहमेव करिष्यामि भ्रातृषु येन केनापि कर्तव्यमिति भावः । अत्र श्लोके न इति सावलक्षम् । अत्राचार्या व्याचक्ष्युः । मरणान्तानि वैराणि । ऋषिवत्स्थानवर्शमैथिलीहरणमन्त्राणश्रुतहरणादिरूपं सत्प्रवृत्तिभेदाच्चरणमिति, परं कर्तुं । शक्नोतीति शेषः । निर्वृत्तं नः प्रयोजनम । यदि न रावणः स्वर्गमिति यदता मयास्य विषये किंचिद्दुःखं कर्तव्यमिति मनस्यकृतम । तदेवेन, दिवा मयैवमस्य न कर्तव्यं तु कः पश्चिदिति तदता पतिहतमा तत्करणवेदानीमस्य संजात इति भावः । क्रियतामस्य संस्कारः । सत्कृत्यनिष्प्रतिपक्षानहत्वा दुदानीमस्य संजाता अतोऽयं न व्याप्यः । अतः परं यः कर्तव्यं तत्कार्यमेव । ममाप्येष यथा तव । अथ मन्निमानुकूलो जातः अतो मन्मित्रमृतो मयानपि तमनुवर्तितुमर्हति । अथवा एष तव यथा तथा ममापि, अस्य संस्कारस्तव यथा प्राप्तः तथा ममापीत्यर्थः । अयमस्य संस्कारे न करोषि नोऽहमेव करोमि । यद्यपि येन केनापि कर्तव्यं स्वल्पिदं तथापि तिष्ठ अहमेव करिष्यामीत्यर्थ इति ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नवत्यां टीकायां युद्धकाण्डव्याख्याने द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

१] ति० टी०–रावणमिति ॥ १ ॥

रा० टी०–राक्षसीनां विलापं वर्णयितुमाह—रावणमित्यादिभिः । राक्षस्यः अन्तः पुरात् विनिष्पेतुः ॥ १ ॥

गो० टी०–अथ रावणान्तःपुरस्त्रीविलापः—रावणमित्यादिश्लोकद्वयमेकान्वयम । वत्सहताः हतवत्साः ॥ १ ॥ २ ॥

२–४] ति० टी०–वार्यमाणाः पांसुवेष्टनाद्वृष्टो निवार्यमाणा अपि रणपांसुषु वेष्टन्त्यः । वत्सहता हतवत्साः । अयमत्यासन्नवियोगजशोकमात्रे दृष्टान्तः ॥ २–४ ॥

रा० टी०–वार्यमाणा इति । वत्सहता गाव इव दुःखार्ताः अत एव क्षितिपांसुषु वेष्टन्त्यः उत्तरेण द्वारेण विनिष्क्रम्य आयोधनं संग्रामं प्रविश्य हतपतिं विचिन्वन्त्यः आर्य-

१ निर्वृत्तमिति गो. रा. पाठः । २ क्षितीति गो. रा. पाठः । ३ राजेति गो. पाठः ।

ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः । करेण्य इव नर्दन्त्यः केरेणव्यो हतयूथपाः ॥ ५ ॥
ददृशुस्तत्र महाकायं महावीर्यं महाद्युतिम् । रावणं निहतं भूमौ नीलाञ्जनचयोपमम् ॥ ६ ॥
ताः पतिं सहसा दृष्ट्वा शयानं रणपांसुषु । निपेतुस्तस्य गात्रेषु छिन्ना वनलता इव ॥ ७ ॥
बहुमानात्परिष्वज्य काचिदेनं रुरोद ह । चरणौ काचिदालम्ब्य काचित्कण्ठेऽवलम्ब्य च ॥ ८ ॥
उत्क्षिप्य च भुजौ काचिद्भूमौ सुपरिवर्तते । हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत् ॥ ९ ॥
काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती । स्नापयन्ती मुखं बाष्पैस्तुषारैरिव पङ्कजम् ॥ १० ॥
एवमार्ताः पतिं दृष्ट्वा रावणं निहतं भुवि । चुक्रुशुर्बहुधा शोकाद्भयस्ताः पर्यदेवयन् ॥ ११ ॥
येन त्रासितः शक्रो येन त्रासितो यमः । येन वैश्रवणो राजा पुष्पकेण वियोजितः ॥ १२ ॥
गन्धर्वाणामुरगाणां च सुराणां चैव महात्मनाम् । भयं येन रणे दत्तं सोऽयं शेते रणे हतः ॥ १३ ॥
असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योऽपि वा तथा । भयं यो न विजानाति तस्येदं मानुषाद्भयम् ॥ १४ ॥
अवध्यो देवतानां यस्तथा दानवरक्षसाम् । हतः सोऽयं रणे शेते मानुषेण पदातिना ॥ १५ ॥
यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा । सोऽयं कश्चिदिवासत्त्वो मृत्युं मर्त्येन लम्भितः ॥ १६ ॥
एवं वदन्त्यो रुरुदुस्तस्यै ता दुःखिताः स्त्रियः । भूय एव च दुःखार्ता विलेपुश्च पुनः पुनः ॥ १७ ॥
अशृण्वता तु सुहृदां सततं हितवादिनाम् । मरणायाहृता सीता राक्षसाश्च निपातिताः ॥
एताः सममिदानीं ते वयमात्मा च पातितः । ॥ १८ ॥

पुत्रेति हा नाथेति च वादिन्यः सर्वशो राक्षस्यः करेणुभिरिरोरहितैः भङ्क्तमङ्गितमात एव शोणितः कर्दमो यस्यां तां महीं परिषेदुः श्लोकद्वयमेकान्वयि ॥ २–४ ॥

गो० टी०–उत्तरेणेत्यादिश्लोकद्वयमेकान्वयम् । शोणितैः कर्दमो यस्यास्तां शोणितकर्दमाम् ॥ ३ ॥ ४ ॥

५–८] ति० टी०–हतयूथपाः करेण्य इव ददृशुः ॥५–८॥

रा० टी०–ता इति । हतयूथपाः करिण्य इव नर्दन्त्य एताः राक्षस्यो न रेजुः ॥ ५ ॥

गो० टी०–ता इति । हतयूथपा इति करेणुविशेषणम् । अत एव नर्दन्त्यः करेण्य इव विनेदुरित्यन्वयः ॥ ५–७ ॥

रा० टी०–ददृशुरिति । निहतं रावणं ददृशुः ॥ ६ ॥

रा० टी०–ता इति । ताः राक्षस्यः रणपांसुषु शयानं पतिं दृष्ट्वा छिन्ना वनलता इव तस्य गात्रेषु निपेतुः ॥ ७ ॥

रा० टी०–बहुमानादिति । परिष्वज्य रुरोद ॥ ८ ॥

गो० टी०–बहुमानादित्यादिश्लोकत्रयमेकान्वयम् । परिवर्तते चेष्टते । ईक्षती ईक्षमाणा ॥ ८–१० ॥

९] ति० टी०–सुपरिवर्तते लुण्ठति स्म ॥ ९ ॥

रा० टी०–उत्क्षिप्येति । काचित् भुजौ उत्क्षिप्य परिवर्ततेस्म भूमौ ॥ ९ ॥

१०–१२] ति० टी०–स्नापयन्तीत्यत्र वैकल्पिकत्वान्पक्षे मित्त्वाभावः ॥ १०–१२ ॥

रा० टी०–काचिदिति । तथा पङ्कजमिव बाष्पैर्मुखं स्नापयन्ती काचित् रुरोद ॥ १० ॥

रा० टी०–एवमिति । एवमार्ताः राक्षस्यः बहुधानेकप्रकारं चुक्रुशुः पर्यदेवयंश्च ॥ ११ ॥

गो० टी०–एवमिति । चुक्रुशुरिति । क्रोशः विरुक्षरवनिः । परिदेवनम् साक्षरशब्दः ॥ ११–१४ ॥

रा० टी०–विलापप्रकारमाह—येनेत्यादिभिः । येन शक्रप्रभृतिर्वित्रासितः येन च गन्धर्वप्रभृतीनां भयं दत्तं सोयं हतस्सन् शेते श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

रा० टी०–असुरेभ्य इति । यः असुरादिभ्यो भयं न विजानाति अजानात् तस्य इदं भयं मानुषात् प्राप्तमिति शेषः ॥ १४

रा० टी०–अवध्य इति । सोयं मानुषेण हतः शेते ॥

गो० टी०–असुरेभ्य इति । मानुषाद्भयम् । जातमिति शेषः ॥ १४ ॥ १५ ॥

१६–१७] ति० टी०–असत्त्वः कश्चिदिव दुर्बलः प्राकृतप्राणीव लम्भितः प्रापितः ॥ १६ ॥ १७ ॥

रा० टी०–य इति । असत्त्वः अल्पवीर्य इव मृत्युमर्त्येन मर्त्यरूपमृत्युना लम्भितो हिंसितः ॥ १६ ॥

गो० टी०–य इति । कश्चिदिव यः कश्चित् पुरुष इव, लम्भितः प्रापितः ॥ १६ ॥ १७ ॥

रा० टी०–एवमिति । एवं वदन्त्यः स्त्रियः पुनः पुनः रुरुदुः विलेपुश्च ॥ १७ ॥

१८] ति० टी०–सुहृदाम् । वाक्यमिति शेषः । एता वयं आत्मा च ते त्वयेदानीं सममेककाल एव पातितः ॥१८॥

---

१ कोण्ड इति गो. पाठः । २ विनेदुरिति गो. न रेजुरिति रा. पाठः । ३ तमिति गो. रा. पाठः । ४ आलिङ्ग्येति गो. पाठः । ५ उद्धृत्येति गो. पाठः । ६ स्मेति गो. रा. पा. । ७ भाविनात्मनामिति रा. पाठः । ८ महदिति गो. रा. पाठः । ९ न भयं य इति गो. पाठः । १० बहुधेति गो. रा. पाठः । ११ ऽवदत्तस्य ता इति गो. रा. पाठः । १२ पतिताश्च निशाचरा इति गो. रा. पाठ. ।

ब्रुवाणोऽपि हितं वाक्यमिष्टो भ्राता बिभीषणः । दृष्टं परुषितो मोहात्त्वयात्मवधकाङ्क्षिणा ॥ १९ ॥
यदि निर्यातिता ते स्यात्सीता रामाय मैथिली । न नः स्याद्व्यसनं घोरमिदं मूलहरं महत् ॥ २० ॥
वृत्तकामो भवेद्भ्राता रामो मित्रकुलं भवेत् । वयं चाविधवाः सर्वाः सकामा न च शत्रवः ॥ २१ ॥
त्वया पुनर्नृशंसेन सीतां संरुन्धता बलात् । राक्षसा वयमात्मा च वयं तुल्ये निपातितम् ॥ २२ ॥
न कामकारः कामं वा तव राक्षसपुंगव । दैवं चेष्टयते सर्वं हतं दैवेन हन्यते ॥ २३ ॥
वानराणां विनाशोऽयं राक्षसानां च ते रणे । तव चैव महाबाहो दैवयोगादुपागतः ॥ २४ ॥
नैवार्थेन च कामेन विक्रमेण न चाज्ञया । शक्या दैवगतिर्लोके निवर्तयितुमध्यगा ॥ २५ ॥
विलेपुरेवं दीनास्ता राक्षसाधिपयोषितः । कृत्स्ने इव दुःखार्ता वाष्पपर्याकुलेक्षणाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे दशाधिकशततमः सर्गः ॥ ११० ॥

रा० टी०–अदृष्ट्वेति । सुहृदां वाक्यमिति शेषः अदृष्टवता त्वया मरणाय स्वविनाशाय सीता आहृता अतः एव निशाचरा घातिताः अतः एव ते निशाचरैः सर्वं ते आत्मा दारा वयं च पातिताः साद्धिलोक एकार्थ्यौ ॥ १८ ॥

गो० टी०–अदृष्ट्वेति । सुहृदां सुहृदः । षष्ठ्यर्थे षष्ठी । वचनमिति वा शेषः । अदृष्टवता त्वया ॥ १८ ॥

१९] नि० टी०–हितं वाक्यं ब्रुवाणोऽपि यत्परुषितं तत्फलं दृष्टमित्यर्थः ॥ १९ ॥

रा० टी०–ब्रुवाण इति । हितं ब्रुवाणो विभीषणः त्वया परुषितः तस्य इदं फलमिदमिति शेषः ॥ १९ ॥

गो० टी०–एता इति । एताः वयं ते राक्षसाः आत्मा च सर्वे युगपत् इदानीं पातिताः । मारिता इत्यर्थः । युगपदिति । इदः प्रीतिमान् ॥ १९ ॥

२०] नि० टी०–यदि ते त्वया सीता निर्यातिता स्मर्पिता स्यात्तदा न इदं व्यसनं न स्यात् ॥ २० ॥

रा० टी०–यदीति । सीता रामाय ते त्वया निर्यातिता अर्पिता यदि स्यात् तर्हि मूलहरं वंशविनाशकं नो व्यसनं दुःखं न स्यात् ॥ २० ॥

गो० टी०–यदीत्यादिश्लोकद्वयमेकान्वयम् । ते त्वया । निर्यातिता प्रत्यर्पिता । मूलहरं मूलभूतत्वत्पर्यन्तहरम् । वृत्तेति ॥ यदि सीता निर्यातिता स्यात्तदा भ्राता विभीषणो वृत्तकामः निष्पन्नमनोरथः भवेत् । त्ववाक्यकरणादिति भावः । तथा रामः मित्रकुलं कुलमित्रम् । शत्रवः देवादयः ॥ २०॥–२१॥

२१–२२] नि० टी०–भ्राता वृत्तकामो निष्पन्नमनोरथः । त्ववाक्यकरणान्मित्रकुलं मित्रपक्षः । वयमविधवाः स्याम, शत्रवश्च सकामा न स्युः ॥ २१ ॥ २२ ॥

रा० टी०–वृत्तेति । भ्राता विभीषणः वृत्तकामः स्वप्रार्थितसीताप्रदानविषयकाभिलाषप्राप्तो यदि भवेत् तदा रामोपि मित्रकुलं मित्रपक्षो भवेत् वयं तु अविधवाः भवेम शत्रवः सकामा न भवेयुः ॥ २१ ॥

रा० टी०–त्वयेति । त्वया राक्षसाधिपः तुल्यमेककालान्तरालेवैव निपातितः ॥ २२ ॥

गो० टी०–त्वयेति । तुल्यमिति । एकपदक्रियमेव ॥ २२ ॥

२३] नि० टी०–अहं रावणश्च ते अत्याचरणस्य नाशहेतुतामुत्पत्तेदानीं तत्रियामपूर्वं दैवस्य तत्कालत्वं दर्शयन्ति—न कामकार इति । कामः स्वेच्छा । तव च कामकारो न स्वातन्त्र्यप्रवर्तनोऽयं व्यवहारः । किं तर्हि दैवं सर्वं प्राणिजातं चेष्टयते तत्तत्कर्मानुसारेण [illegible] । अतो दैवेन कैनचिदेमिनेन हन्यते ॥ २३ ॥

रा० टी०–नेति । न च राक्षसाः स्वेच्छाचरणं कामं वर्तन्ते । तव च स्वेच्छाचरणं नाशहेतुः यतो दैवमेव चेष्टयते कर्मानुसारेण अतो दैवेन पूर्वं हतमेव हन्यते ॥ २३ ॥

रा० टी०–ते त्वया राक्षसाधिपस्वरूपेण वानरसंहारेण मित्रस्य सुग्रीवस्य [illegible] दर्शयन्ति—न कामकार इति । कामकारः स्वेच्छाचरणं कामं स्वेच्छा । तव च न विद्यते, सर्वं हतं दैवेन दृश्यते । दैवेन हतमन्यो हन्यते ॥ २३ ॥ २४ ॥

२४] नि० टी०–हे तव च वानराणां राक्षसानां तव चार्थे विनाशो दैवादुपागतः ॥ २४ ॥

रा० टी०–वानराणामिति । वानराणां विनाशः दैवयोगात् उपागतः प्राप्तः ॥ २४ ॥

२५–२६] नि० टी०–अर्थेन धनेन । कामेनेच्छया । आज्ञया मर्यादाव्यवस्थापनशक्त्या । उद्यता फलोन्मुखीभूता ॥ २५ ॥ २६ ॥

इति श्रीमद्भारतीतीर्थ रामायणकल्पतरौ रामायणतिलके युद्धकाण्डे दशाधिकशततमः सर्गः ॥ ११० ॥

रा० टी०–नेति । उद्यता दैवगतिः कार्योन्मुखी दैवगतिः अर्थादिना निवर्तयितुं न शक्या ॥ २५ ॥

गो० टी०–नेवेति । उद्यता कार्योन्मुखी दैवगतिः अर्थादिना न निवर्तयितुं शक्या । कामेन स्वेच्छया ॥ २५ ॥

१ वृष्टमिति गो. पा. २ रक्षसां च महाहवे इति गो. पाठः ।

एकादशाधिकशततमः सर्गः ।

मन्दोदर्या दशानन ज्येष्ठपत्न्याः शोकपरिपूर्णः सीतापातिव्रत्यप्रशस्तिगर्भः सुनीतिभूयिष्ठः श्रीचाम्बत्या-नुमतिदर्शकः स्खलितधैर्यो विलापः रामानुमतविभीषणकृतरावणप्रेतसंस्कारश्च ।

तासां विलपमानानां तदा राक्षसयोषिताम् । ज्येष्ठपत्नी प्रिया दीना भर्तारं समुदैक्षत ॥ १ ॥
दशग्रीवं हतं दृष्ट्वा रामेणाचिन्त्यकर्मणा । पतिं मण्डोदरी तत्र कृपणा पर्यदेवयत् ॥ २ ॥
ननु नाम महाबाहो तव वैश्रवणानुज । क्रुद्धस्य प्रमुखे स्थातुं त्रस्यत्यपि पुरंदरः ॥ ३ ॥
ऋषयश्च महान्तोऽपि गन्धर्वाश्च यशस्विनः । ननु नाम तवोद्वेगाच्चारणाश्च दिशो गताः ॥ ४ ॥
स त्वं मानुषमात्रेण रामेण युधि निर्जितः । न व्यपत्रपसे राजन्किमिदं राक्षसेश्वर ॥ ५ ॥
कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितम् । अविषह्यं जघान त्वां मानुषो वनगोचरः ॥ ६ ॥
मानुषाणामविषये चरतः कामरूपिणः । विनाशस्तव रामेण संयुगे नोपपद्यते ॥ ७ ॥
न चैतत्कर्म रामस्य श्रद्दधामि चमूमुखे । सर्वतः समुपेतस्य तव तेनाभिमर्षणम् ॥ ८ ॥

रा० टी०–विलेपुरिति । दीनाः राक्षसाधिपयोषितः एवं विलेपुः ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे द्वादशाधिकशततमः सर्गः ॥ ११२ ॥

गो० टी०–विलेपुरिति । कुत्सयः कौश्यः ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

१] ति० टी०–तासामिति ॥ १ ॥

रा० टी०–सोपक्रमं मन्दोदरीविलापमाह—तासामित्यादिभिः । विलपमानानां रावणयोषितां मध्ये ज्येष्ठा पत्नी भर्तारं समुदैक्षत ॥ १ ॥

गो० टी०–अथ मण्डोदरीप्रलापादि—तासामित्यादि । विलपमानानां विलपन्तीनाम् तथा विलपमानानामित्यन्वयः । दीना सती समुदैक्षत ॥ १ ॥

२] ति० टी०–मण्डोदरी मण्डनभूतोदरी । कृशोदरीत्यर्थः । 'मन्दोदरी' इति पाठेऽप्ययमेवार्थः ॥ २ ॥

रा० टी०–दशग्रीवमिति । रामेण हतं दशग्रीवं दृष्ट्वा कृपणा मन्दोदरी पर्यदेवयत् ॥ २ ॥

गो० टी०–दशग्रीवमिति । मण्डोदरी मण्डनभूतोदरी । कृशोदरीति यावत् । "मडि. भूषायाम्" इति धातोर्भावे कप् प्रत्ययः । मण्डं सारं सुन्दरमिति यावत् । तादृशोदरीत्येके । मण्डा पृथुपिपीलिका तस्या इव उदरं यस्याः सा मण्डोदरीत्यव्याद्रिः ॥ २ ॥

३] ति० टी०–पुरन्दरोऽपि त्रस्यति ॥ ३ ॥

४] ति० टी०–तवोद्वेगाच्च त्रद्वेगं प्राप्य ॥ ४ ॥

रा० टी०–तदाकारमाह—नन्वित्यादिभिः । क्रुद्धस्य तव प्रमुखे स्थातुं पुरंदरोऽपि त्रस्यति ॥ ३ ॥

रा० टी०–ऋषय इति । तवोद्वेगाच्च त्रद्वेगं प्राप्य ऋषिप्रभृतयो दिशो गताः ॥ ४ ॥

गो० टी०–यद्यपि समरमरणं शराणां श्लाघ्यमिति न वीरपत्नी तच्छोचितुमर्हा, तथाप्यसमानान्मानुषात् प्राप्तमिदं लज्जावहमिति—शोचति । ननु नाम तवेत्यादिना सार्धश्लोकेन ॥ नाम प्रसिद्धौ । महोदेवाः ब्राह्मणाश्च । त्रस्यन्तीत्यनुषङ्गः । स कथं मानुषेण जित इति शेषः ॥ ३ ॥ ४ ॥

गो० टी०–ननु नामेत्यादिसार्धश्लोक एकान्वयः ॥ चारणाश्च आकाशचारिणश्च । न व्यपत्रपसे । मानुषविजयेनेति शेषः । किमिदं किमेतमवस्थानकारणमित्यर्थः ॥ ५ ॥

६–१] ति० टी०–वीर्येण त्रैलोक्यमाक्रम्य श्रियान्वितं त्वां मानुषो जघानेति यदत्र किमिति न व्यपत्रपसे ॥ ५ ॥ ६ ॥

रा० टी०–स्व इति । सः सर्वेषां जेता मानुषमात्रेण निर्जितस्त्वं न व्यपत्रपसे इदं किमाश्चर्यमित्यर्थः ॥ ५ ॥

रा० टी०–कथमिति । त्रैलोक्यमाक्रम्य विद्यमानमत एव श्रिया वीर्येण चान्वितमत एव अविषह्यं त्वां मानुषः कथं जघान ॥ ६ ॥

गो० टी०–कथमिति । वीर्येण त्रैलोक्यमाक्रम्य श्रियान्वितं त्वां मानुषस्त्वापि वनगोचरः कथं जघान । अद्भुतमित्यर्थः ॥ ६ ॥

७] ति० टी०–मानुषाणामविषयेऽगोचरे । लङ्कारूपे देशे इत्यर्थः ॥ ७ ॥

रा० टी०–मानुषाणामिति मानुषाणामविषये देशे चरतः कालरूपिणस्तव रामेण विनाशो नोपपद्यते ॥ ७ ॥

गो० टी०–तदेवासंभावितत्वं निरूपयति—मानुषाणामिति । अविषये अगम्यदेशे ॥ ७ ॥

८] ति० टी०–सर्वतः समुपेतस्य जयोपेतस्य तव तेन रामेण यदभिमर्षणं प्रधर्षणमेतदमस्य कर्मेति न श्रद्दधामि ॥ ८ ॥

१ महाबाहो इति रा. महोदेवा इति गो. पाठः । २ ऋषयेति गो. पाठः । ३ मर्शनमिति गो. रा. पाठः ।

[यदैव च जनस्थाने राक्षसैर्बहुभिर्वृतः । खरस्तव हतो भ्राता तदैवासौ न मानुषः ॥
यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि । प्रविष्टो हनुमान्वीर्यात्तदैव व्यथिता वयम् ॥
यदैव वानरैर्घोरैर्वेष्टितः सेतुमर्णवे । तदैव हृदयेनाहं शङ्के रामममानुषम् ॥]
अथवा रामरूपेण कृतान्तः स्वयमागतः । मायां तव विनाशाय विधायाप्रतिमां किताम् ॥ ९ ॥
अथवा वासवेन त्वं धर्षितोऽसि महाबल । वासवस्य तु का शक्तिस्त्वां द्रष्टुमपि संयुगे ॥ १० ॥
महाबलं महावीर्यं देवशत्रुं महौजसम् । व्यक्तमेष महायोगी परमात्मा सनातनः ॥ ११ ॥
अनादिमध्यनिधनो महतः परमो महान् । तमसः परमो धाता शङ्खचक्रगदाधरः ॥ १२ ॥

रा० टी०—नेति । सर्वतः निखिलयुद्धोपकरणैरम्लसुपेतस्य युक्तस्य तव तेन रामेण अभिमर्शनं विनाशः यदेतत् तत् रामस्य कर्मेति न श्रद्दधामि ॥ ८ ॥

गो० टी०—न चैतदिति । सर्वतः समुपेतस्य सर्वयुद्धोपकरणैः पूर्णस्य तव, तेन रामेण अभिमर्शनम् आक्रमणमिति यत्, एतद्रामस्य न श्रद्दधामि रामसम्बन्धिकर्मेति न श्रद्दधामि ८ ९] ति० टी०—नन्व प्रत्यक्षसिद्धे कथमश्रद्धेयरूपत्वा पक्षान्तरम्—अथवेति । तव नाशायाप्रतितर्कितां मच्चित्तनीरोपपत्तिकां मायां विधाय कृतान्तो रामरूपेणागत इति मन्ये इति शेषः ॥ ९ ॥

रा०टी०—अथवेति । तव विनाशाय अप्रतितर्कितां मायां विधाय स्वीकृत्य रामरूपेण कृतान्तः काल एव स्वयमागतः॥९॥

गो० टी०—रावणवधस्य मानुषेणाकृतत्वे केन कृतः स्यादित्याशङ्क्य पक्षान्तरमुपक्षिपति—यदैवेत्यादिना ॥९-११

१०] ति० टी०—अथवा रामरूपेण वासवेन त्वं धर्षितोऽसि । एतत्रोपपद्यत इत्याह—वासवस्येति । महाबलत्वादिविशेषणं त्वां द्रष्टुमपि वासवस्य तु कुतः शक्तिः ॥ १० ॥

रा० टी०—अथवेति । अथवा रामरूपेण वासवेन त्वं धर्षितोऽसि इदत्रोपपद्यते इत्याह त्वां द्रष्टुमपि वासवस्य न शक्तिः कुतो धर्षणमिति शेषः ॥ १० ॥

गो० टी०—एवं सामान्यतो रामस्यामानुषत्वं प्रतिपाद्य उत्तरोत्तरोत्कृष्टयमेन्द्रादिदेवताविशेषत्वं प्रतिपादयति—अथवेत्यादिना । मायां सीतारूपाम् । अप्रतितर्कितां अपरिमितैरुपलावण्याम् ॥ १२ ॥

११] ति० टी०—अतः—व्यक्तमित्यादि । सत्यमेव मन्दोदरी जानीते भगवत्कृपया । महायोगी स्वाभाविकसर्वशक्तियुक्तः परमात्मा आत्मनामप्यात्मा सर्वान्तर्यामीत्यर्थः। 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति' इति श्रुतेः। सनातनः सदास्तित्वयुक्तः ॥ ११ ॥

१२] ति०टी०—अनादिमध्यनिधनो जन्मवृद्धिनाशहीनः। महतः परमो महान्महतो महीयान्। तमसः परमः प्रकृतेः प्रवर्तकः। 'तपसः परमः' इति पाठे सर्वतः फलद इत्यर्थः। धाता स्रष्टा। 'यतो वा इमानि भूतानि जायन्ते' इत्युक्तेः। इदानीं विग्रहगुणानाह—शङ्खेत्यादि ॥ १२ ॥

रा० टी०—व्यक्तमिति । आदिमध्यनिधनरहितः अत एव शाश्वतो नित्यः तमसः अविद्यायाः परो मा लक्ष्मीर्यस्य सः अत एव नित्या श्रीर्विभूतिर्यस्य अत एव महतः ब्रह्मादेः परो मा यस्य अत एव महान् धाता सन्ततप्रकाशद्वारा सर्वाश्रयः शङ्खचक्रगदो विष्णुरपि अधरः किञ्चिन्यूनो यस्मात् श्रीवत्सयुक्तो वक्षो यस्य अतस्यः सर्वैर्दुर्मशक्यः ध्रुवः सर्वत्र परिपूर्णः महान् अनियम्यो यो योग उपायः तद्वान् सनातनः सर्वं ब्रह्माणमातनोतीति सनातनः सत्यपरान् आक्रमते अतिसत्यत्वकैरित्यर्थः विष्णुर्यांपकः अत एव सर्वलोकेश्वरः श्रीमान् अतिशोभाविशिष्टः एष परमात्मा मानुषं रूपमास्थाय प्रकटय्य वानरत्वमुपागतैः देवैः परिवृतस्सन् लोकानां हितकाम्यया सराक्षसपरीवारं त्वां हतवान् व्यक्तं स्फुटमेतत् सार्द्धश्लोकचतुष्टयमेकान्वयि ॥ ११-१४ ॥

गो० टी०—यदैवेत्यादिना सामान्यतोपन्यस्तममानुषत्वमेकत्र व्यवस्थापयितुमाह—व्यक्तमित्यादिना । महायोगित्वादिगुणविशिष्टो यो विष्णुः स एष राम इति श्रीवचनसुधैवैष्णवो विष्णोः सर्वदेवताधारत्वं भगवान् वाल्मीकिर्व्यवस्थापयति। महान् योगः लोकरक्षणोपायचिन्ता सोस्यास्तीति महायोगी। परमश्चासावात्मा च परमात्मा। सर्वजीवात्मभ्य उत्कृष्ट इत्यर्थः। परमत्वमस्य कथमित्याशङ्क्य षड्भावविकाररहितत्वादित्याह—सनातन इति। सदास्तित्वयुक्त इत्यर्थः अनादिमध्यनिधनः जन्मवृद्धिविनाशशून्यः शाश्वतः अपक्षयरहितः ध्रुवः परिणामरहितः। एतैर्विशेषणैर्जीवगतषड्भावविकारशून्यत्वमुक्तम्। श्लोकः विष्णुपुराणे—अपक्षयविनाशाभ्यां परिणामजन्मभिः। वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम् इति ॥ परमात्मशब्दार्थं विवृणोति—महतः परमो महानिति। महान् इन्द्रादिः तस्मान्महान् ब्रह्मादिः तस्मादपि महानित्यर्थः। स्थानविशेषेणापि परमत्वमाह—तमस इति। तमसः प्राकृतमण्डलस्य, परमः परस्तादप्राकृते वैकुण्ठे वियमानः। "आदित्यवर्णं तमसः परस्तात्" "आदित्यवर्णं तमसस्तु पारे" इति श्रुतेः। सर्वत्र व्याप्तस्य कथं तत्रावस्थानमित्याशङ्क्य विग्रहद्वारेत्याह—शङ्खेत्यादिना। सदा शङ्खचक्रधारणप्रयोजनमाह—धातेति। धाता पोषकः। "दृधाञ्, धारणपोषणयोः" इत्यस्मात्तृच्। सर्वदा रक्षणार्थमायुधधार-

१ कुण्डलितश्लोकाः गो. पाठेऽधिकाः परमादिमंदर्थमंशभिन्नमर्थे दृश्यते। २ इदमर्धं गो. रा. पुस्तकयोर्न दृश्यते।

श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः । मानुषं रूपमास्थाय विष्णुः सत्यपराक्रमः ॥ १३ ॥
सर्वैः परिवृत्तो देवैर्वानरत्वमुपागतैः । सर्वलोकेश्वरः श्रीमाँल्लोकानां हितकाम्यया ॥ १४ ॥
स राक्षसपरीवारं देवैशत्रुं भयावहम् । इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया ॥ १५ ॥
स्मरद्भिरिव तद्वैरमिन्द्रियैरेव निर्जितः ॥ यदैव हि जनस्थाने राक्षसैर्बहुभिर्हृतः ॥ १६ ॥
खरस्तु निहतो भ्राता तदा रामो न मानुषः । यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि ॥ १७ ॥
प्रविष्टो हनुमान्वीर्यात्तदैव व्यथिता वयम् । क्रियतामविरोधश्च राघवेणेति यन्मया ॥ १८ ॥
उच्यमानं न गृह्णासि तस्येयं व्युष्टिरागता । अकस्माच्चाभिकामोऽसि सीतां राक्षसपुंगव ॥ १९ ॥
ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य च । अरुन्धत्या विशिष्टां तां रोहिण्याश्चापि दुर्मते ॥ २० ॥
सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम् । वसुधाया हि वसुधां श्रियाः श्रीं भर्तृवत्सलाम् ॥ २१ ॥

णमित्यर्थः । तथोक्तमभियुक्तैः—पातु प्रणतरक्षायां विलम्बमसहिष्णुरिव । सदा पद्मायुधो विपत्सु नः श्रीरङ्गनायक इति ॥ तस्य सर्वेश्वरत्वद्योतकं लक्षणमाह—श्रीवत्सवक्षा इति । श्रीकरो वत्सः श्रीवत्सः स च रक्तवर्णो मत्स्यविशेषः, सः वक्षसि दक्षिणे यस्य स श्रीवत्सवक्षाः । जगद्रक्षणोपयोगिपुरुषकारसंबन्धमाह—नित्यश्रीरिति । नित्या अनपायिनी श्रीर्यस्यासौ नित्यश्रीः । विष्णोः श्रीरनपायिनीत्यन्यत्रोक्तं । अत एवाजय्यः जेतुमशक्यः । "क्षय्यजय्यौ शक्यार्थे" इति निपातनात् । एष रामः एवंभूतः परमात्मा, व्यक्तं निश्चितमिति संबन्धः ॥ १४ ॥१५॥

१३–१४] ति०टी०—नित्यश्रीरनपायिलक्ष्मीकः । अजय्यो जेतुमशक्यः । शाश्वतोऽपक्षयरहितः । ध्रुवः परिणामशून्यः । अनेन षड्भावविकारशून्यत्वमुक्तम् । महायोगित्वादिविशेषणविशिष्टो यो विष्णुः स एव राम इत्यर्थः ॥ १३ ॥ १४ ॥

गो० टी०—एवंभूतस्य परमात्मनः किमर्थमेवं व्यापार इत्याशङ्क्याह द्वाभ्याम्—मानुषमित्यादि । सर्वलोकेश्वरः सर्वलोकानां नियन्ता अनिष्टनिवृत्तीष्टप्राप्तयोः कर्ता । विष्णुः विष्णुसकाशादविनाशित्ववरं परिहृतं मानुषं वपुः आस्थाय परिगृह्य, साक्षात् अव्यवधानेन, लोकानां हितकाम्यया लोकहितेच्छया, सर्वलोकविरोधिनं त्वां हतवान् । व्यक्तमित्यत्रानुषज्यते ॥ १६ ॥ १७ ॥

१५] ति० टी०—सराक्षसपरीवारं राक्षसरूपपरीवारसहितम् । हतवानिति शेषः । देवशत्रुं भयावहमित्यनेन भगवतो वैषम्यनैर्घृण्ये परिहृते । अवतारप्रयोजनं रावणवधप्रयोजनं च देवभयनिवृत्तिरूपं दर्शितम् । पुरा भगवद्दर्शनं तपोनुष्ठानकाले ॥ १५ ॥

रा० टी०—इन्द्रियाणीति । पुरा तपश्चरणसमये इन्द्रियाणि जित्वा त्रिभुवनं त्वया जितं तद्वैरं स्मरद्भिरिव इन्द्रियैर्मनःप्रभृतिभिः त्वं निर्जितः ॥ १५ ॥

गो० टी०—स्वदोषकृत एवायं वध इत्याह—इन्द्रियाणीति ॥ १८ ॥

१६–१८] ति० टी०—तद्वैरं स्वजयनिमित्तं वैरं स्मरद्भिरिन्द्रियैरकर्मप्रवृत्तिसंपादनेन निर्जितः ॥ १६–१८ ॥

रा० टी०—यदेति । यदा यतः खरो निहतः तदा ततः रामो मानुषः प्राकृतमनुष्यो न विलक्षणदिव्यपुरुष इत्यर्थः ॥ १६ ।

रा० टी०—यदेति । यदा लङ्कां हनुमान् प्रविष्टः तदैव वयं व्यथिताः ॥ १७ ॥

रा० टी०—क्रियतामिति । राघवेण सह अविरोधः सीतासमर्पणेन विरोधाभावः क्रियतामिति वचः मया उच्यमानस्त्वं यन्नगृह्णासि अगृह्णाः तस्येयं व्युष्टिः फलभागता॥१८।

गो० टी०—एवं सर्वज्ञा त्वं पूर्वं किमिति नोक्तवतीत्याह—क्रियतामिति । न गृह्णासि नागृह्णाः । व्युष्टिः फलम् । व्युष्टि फले समृद्धौ चेत्यमरः ॥ १९ ॥

१९–२०] ति० टी०—व्युष्टिः फलम् । सीतां प्रत्यभिकामः कामुकः ॥ १९ ॥ २० ॥

रा० टी०—अकस्मादिति । ऐश्वर्यादिविनाशाय सीतां तदानयनं प्रति अकस्मादभिलाषः इच्छायानसि ॥ १९ ॥

गो० टी०—अकस्मादिति । अकस्मादिहैतुकं सीतागृहिण्य अभिकामोसि अभिलाष्यसि, तां प्रति त्वदभिलाषः अयुक्त इत्यर्थः ॥ २० ॥

रा०टी०—अरुन्धत्येति । अरुन्धत्या रोहिण्याश्च मान्यामत एव विशिष्टां सीतां धर्षयता हन्त्रा त्वया असदृशमयोग्यं कृतम् २०

गो० टी०—अयुक्तामेवाह—अरुन्धत्या इति । विशिष्टाम् उत्कृष्टाम् । मान्यामित्यनेन न केवलमरुन्धत्यादिवत् पातिव्रत्यमात्रं, किंतु मातृत्वं चेत्युच्यते । असदृशम् अनुचितम् ॥२१॥

२१] ति० टी०—मान्यामुपास्यदेवताम् । वसुधायासर्वक्षमावन्निदर्शनभूतायां वसुधां निदर्शनभूमिम् । एवं सर्वसौभाग्ययुक्तानां निदर्शनभूतश्रियोऽपि निदर्शनभूताम् ॥ २१ ॥

रा० टी०—वसुधाया इति । वसुधायाः सकलजगदाश्रयभूतक्षितेः वसुधामाश्रयं श्रियः लक्ष्म्या अपि श्रियं पूज्यामित्यर्थः अत एव सर्वानवद्यां सर्वस्मिन् काले सर्वदोषरहिताङ्गविशिष्टां सीतां विजने विरूढजनसहिते अरण्ये छद्मना आनयित्वा आनीय आत्मनः स्वेषां स्वकीयानां च दूषणं विनाशः कृतमिति शेषः सार्द्धश्लोक एकान्वयी ॥ २१ २२ ॥

१ साक्षादिति गो. पाठः । २ हतवांस्त्वां महाद्युतिरिति गो. रा. पाठः । ३ इदं पद्यद्वयं गो. पुस्तके अत्र न दृश्यते । पूर्वं गतमत्रैव सर्गे

सीतां सर्वानवद्याङ्गीमरण्ये विजने शुभाम् । आनयित्वा तु तां दीनां छद्मनात्मस्वदूषणम् ॥ २२ ॥
अप्राप्य [1]तं चैव कामं मैथिलीसंगमे कृतम् । पतिव्रतायास्तपसा नूनं दग्धोऽसि मे प्रभो ॥ २३ ॥
तदैव यन्न दग्धस्त्वं धर्षयंस्तनुमध्यमाम् । देवा बिभ्यैति ते सर्वे सेन्द्राः साग्निपुरोगमाः ॥ २४ ॥
अवश्यमेव लभते फलं पापस्य कर्मणः । भर्तुः पर्यागते काले कर्ता नास्त्यत्र संशयः ॥ २५ ॥
शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते । विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् ॥ २६ ॥
सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः । अनङ्गवशमापन्नस्त्वं तु मोहान्न बुद्ध्यसे ॥ २७ ॥
न कुलेन न रूपेण न दाक्षिण्येन मैथिली । मयाधिका वा तुल्या वा तत्तुं मोहान्न बुद्ध्यसे ॥ २८ ॥
सर्वदा सर्वभूतानां नास्ति मृत्युरलक्षणः । तव तद्दर्शयं मृत्युर्मैथिलीकृतलक्षणः ॥ २९ ॥
सीतानिमित्तजो मृत्युस्त्वया दूरादुपाहृतः । मैथिली सह रामेण विशोका विहरिष्यति ॥ ३० ॥
अल्पपुण्या त्वहं घोरे पतिता शोकसागरे । कैलासे मन्दरे मेरौ तथा चैत्ररथे वने ॥ ३१ ॥

गो० टी०—सा पतिव्रता चेत् किमर्थं न दग्धवतीत्यत्राह-वसुधाया इत्यादिसार्धश्लोकद्वयेन । वसुधायाश्च वसुधाम अत्यन्तलक्षमावतीमित्यर्थः । श्रीमित्यत्र इयङ्भाव आर्षः । सर्वसंपदधिष्ठात्रीमित्यर्थः । भर्तृवत्सलां पतिव्रताम् सर्वानवद्याङ्गीं अनवद्यसर्वाङ्गीम् अरण्ये विजने स्थितामिति शेषः । दीनां त्वदनभिलाषिणीमित्यर्थः । छद्मना मारीचमृगेण आनयित्वा । तं पूर्वमुक्तम् । पतिव्रतायास्तस्यास्तपसा दग्धोऽसि । मे प्रभो इत्यनेन अस्य सर्वस्य महौभाग्यमेव निमित्तमिति द्योत्यते । आत्मस्वदूषणेत्यनेन निजस्वभूताया मम त्यागे त्वदूषणमेव हेतुः न त्वत्सौन्दर्यहानिरित्युच्यते ॥ २२ ॥ २३ ॥

२२] ति०टी०—छद्मनानयित्वानीय । आत्मस्वदूषणम् स्वशब्दः स्वीयवाची । आत्मनः स्वकुलस्य नाशनं कृतमिति शेषः २२

२३] ति० टी०—मैथिलीसंगमे कृतं तं काममप्राप्य पतिव्रतायास्तस्यास्तपसा नूनं निश्चयेन दग्धोऽसि । मे प्रभो मे भर्तः ॥ २३ ॥

रा० टी०—अप्राप्येति । मैथिल्यास्सङ्गमो नित्यं संयोगो यस्मिन् तस्मिन् रामे कृतं कामं सीतामनोरथमप्राप्य असंसाध्य विद्यमानस्त्वं पतिव्रतायाः सीतायाः तपसा पतिव्रतरूपधर्मेण दग्धोसि ॥ २३ ॥

२४] ति० टी०—तां धर्षयंस्तदैव धर्षणसमय एव न दग्ध इति यत् । येन माहात्म्येन देवा बिभ्यति तेन माहात्म्येनेत्यर्थः ॥ २४ ॥

रा० टी०—नन्वपहरणसमये एव कुतो नाहं दग्ध इत्यत आह तदेति । यत् यस्मात् देवाः बिभ्यते तस्माद्धर्षयंस्त्वं तदा धर्षणकाले एव न दग्धः ॥ २४ ॥

गो० टी०—तदैवेति । तनुमध्यमां धर्षयन् सन् त्वं तदैव न दग्ध इति यत् तेन माहात्म्येन त्वत्तो देवा बिभ्यतीति संबन्धः । भीता देवाः कथं ते धर्षणफलं दाहं दद्युरिति भावः ॥ २४ ॥

२५] ति० टी०—काले परिपाकसमये पर्यागते सति २५

२६] ति० टी०—शुभं सुखम । पापं दुःखम ॥ २६ ॥

रा० टी०—अवश्यमिति । पापस्य कर्मणः कर्ता काले विपाकसमये पर्यागते सति पापस्य कर्मणः फलमवश्यमेव लभते अत एव शुभकृत् शुभं सुखं प्राप्नोति पापकृत् पापं दुःखमश्नुते अत एव बिभीषणः सुखं प्राप्तस्त्वं तु पापं दुःखं प्राप्तः श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०—अवश्यमिति । कर्ता घोरं पापस्य फलं काले पर्यागते सति अवश्यं लभते, नात्र संशयः ॥ २५ ॥

गो० टी०—शुभकृदिति । पापं दुःखम ॥ २६ ॥

२७] ति० टी०—तुभ्यं तव । ततः सीतानोऽपि ॥ २७ ॥

रा० टी०—सीतायाः हरणसमयेनादेव न तु हेत्वन्तरमस्तीति बोधयन्ती आह—सन्तीति । रूपेण अभ्यधिकाः अन्याः मत्तोपि भिन्नास्सन्ति ततः अनंगवशं कामस्य एव त्वं मोहात् बुध्यसे सीतापहरणं हितमबुध्यथाः ॥ २७ ॥

गो० टी०—सन्तीति । तुभ्यम् तव ततः तस्याः सीतायाः । न बुध्यस । अभ्यधिकत्वमिति शेषः ॥ २७ ॥

२८] ति० टी०—मैथिली कुलादिना मदधिका न, मत्तुल्यापि न, अथापि तत् तथा त्वं तु त्वं मोहान्न बुद्ध्यसे ॥२८॥

रा० टी०—नेति । मैथिली कुलादिना मया लक्ष्म्या अधिकैव न तु तुल्या तदिति मोहान्मोहं प्राप्य विद्यमानोपि त्वं न बुध्यसे काक्वा बुध्यसे व्यंग्यार्थः एतेन पूजावदुर्थैव तस्यास्स्वीकारः त्वया कृत इति सूचितम् ॥ २८ ॥

गो० टी०—न कुलेनेति । मैथिली मया कुलेन तुल्या अधिका वा न इत्येवं योज्यम । दाक्षिण्येन विद्यामाद्यर्थेन २८

२९-३१] ति० टी०—अलक्षणोलक्षितः । मैथिलीकृतलक्षणो मैथिलीकृतं लक्षणं निमित्तं यस्य सः । मैथिलीहेतुक इत्यर्थः ॥ २९-३१ ॥

रा० टी०—ननु पापबुद्ध्या तद्धरणस्याभावात् कथं मरण-

१ दूषणेति गो. पा. । २ चैव तमिति गो. एव च तमिति रा. पा. । ३ बिभ्यते इति रा. पा. ४ घोरमिति गो. रा. पा. । ५ त्वमिति गो. रा. पा. । ६ तावदिति गो. पा. ।

देवोद्यानेषु सर्वेषु विहृत्य सहिता त्वया । विमानेनानुरूपेण या यास्यतुलया श्रिया ॥ ३२ ॥
पश्यन्ती विविधान्देशांस्तांस्तांश्चित्रसगम्बरा । भ्रंशिता कामभोगेभ्यः सास्मि वीर वधात्तव॥ ३३ ॥
सैवान्येवास्मि संवृत्ता विराज्ञां चञ्चलां श्रियम् । हा राजन्सुकुमारं ते सुभ्रु सुत्वक्समुन्नसम् ॥ ३४ ॥
कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः । किरीटकूटोज्ज्वलितं ताम्रास्यं दीप्तकुण्डलम्॥ ३५ ॥
मदव्याकुललोलाक्षं भूत्वा यत्पानभूमिषु । विविधस्रग्धरं चारु वल्गुस्मितकथं शुभम् ॥ ३६ ॥
तदेवाद्य तवैवं हि वक्त्रं न भ्राजते प्रभो । रामसायकनिर्भिन्नं रक्तं रुधिरविस्रवैः ॥ ३७ ॥
विशीर्णमेदोमस्तिष्कं रूक्षं स्यन्दनरेणुभिः । हा पश्चिमा मे संप्राप्ता दशा वैधव्यदायिनी ॥ ३८ ॥
या मयासीन्न संबुद्धा कदाचिदपि मन्दया । पिता दानवराजो मे भर्ता मे राक्षसेश्वरः ॥ ३९ ॥

मित्यत आह—सर्वदेति । सर्वदा सर्वस्मिन् काले सर्वभूतानां मृत्युः अलक्षणः निमित्तरहितो न अतः तद्वत् तल्लक्षणवान् अयं मृत्युः मैथिल्या कृतं निष्पादितं लक्षणं हेतुमत्त्वं येन सः मैथिलीप्सितविरुद्धाचरणेन विनष्टोऽसीति तात्पर्यम् ॥२९॥

गो० टी०—सर्वत्रेति । अलक्षणः निर्निमित्तः । मैथिल्याः कृतं मैथिलीकृतम् । मैथिल्यानयनमित्यर्थः तदेव लक्षणं निमित्तं यस्य स तथा ॥ २९–३१ ॥

रा० टी०—सीतेति । सीतानिमित्तजो मृत्युः त्वया उपाहृतः त्वय्यपि प्रापितः मैथिली तु रामेण विहरिष्यति अहं तु शोकसागरे पतिता सार्धश्लोक एकान्वयी ॥ ३० ॥

रा० टी०—कैलास इति । यां कैलासादिषु त्वया सह विहृत्य विचित्रसगाद्विशिष्टान् विविधान् देशान् पश्यन्ती सती अतुलया श्रिया यासि अयाम् साहं तव वधात् कामभोगेभ्यो भ्रंशितास्मि साहंश्लोकद्वयमेकान्वयि ॥ ३१–३२ ॥

गो० टी०—कैलास इत्यादिसार्धश्लोकद्वयमेकान्वयम् ॥ यां कैलासादिषु विहृत्य विमानेन विविधान् देशान् पश्यन्ती यासि तथा भ्रंशितास्मीत्येवं संबन्धः ॥ ३२ ॥ ३३ ॥

३२–३३] ति० टी०—श्रिया । उपलक्षितेति शेषः ३२–३३

रा० टी०—सेति । सा कृतविविधभोगाद्भन्या इत्र संवृत्ता वैधव्यं प्राप्तेत्यर्थः अतः राज्ञां श्रियं विद्युदभ्रे पृथक् ॥ ३३ ॥

३४] ति० टी०—सैवाहं सौभाग्यलक्षणवत्त्वेव तव यथान्येव । विधवेव संवृत्तेत्यर्थः । अत्रान्येवेतीवकारेण देवस्त्रिया वस्तुतोवैधव्यं सूचितम् । सुभ्रु शोभनभ्रूयुतम् सुत्वक्शोभनत्वगिन्द्रियस्थानम् ॥ ३४ ॥

३५] ति० टी०—कान्तिराल्हादकरी प्रभा तया चन्द्रतुल्यम् । श्रीरुज्ज्वलता तया पद्मवत् । द्युतिः पराभिभवसामर्थ्यं तेजस्तेन रवितुल्यम् । कूटः समूहः । ताम्रास्यं ताम्रोष्ठम्॥३५॥

३६] ति० टी०—पानभूमिषु मदव्याकुललोलाक्षं भूत्वा । यदभ्राजतेति शेषः । चारु सुन्दरम्, वल्गु चञ्चलम्, स्मितकथं स्मितोपेतकथायुतम् ॥ ३६ ॥

३७] ति० टी०—तदेव ते वक्त्रमेवमेव कथामापन्नं न भ्राजते । तामवस्थामाह—रामेति । रक्तं रक्तवर्णम् ॥ ३७ ॥

रा० टी०—हे इति । शोभने भ्रुवौ यस्मिन् शोभना त्वक् यस्मिन् सम्यक् उन्नता नासिका यस्मिन् कीर्त्यादिभिः इन्द्रादिभिस्तुल्यं किरीटस्य कूटेनाग्रभागेन उज्ज्वलितं प्रकाशितं दीप्ते कुण्डले यस्मिन् ताम्रौ आस्यौ ओष्ठौ यस्मिन् विविधस्रग्धरं वल्गुस्मितेन कथा कथनं यस्मिन् शुभं मंगलकारि चारु रमणीयं यत्तव वक्त्रं पानभूमिषु मदव्याकुललोलाक्षं भूत्वा अभ्राजत् इति शेषः तदेव रामसायकैर्निर्भिन्नमत एव रुधिरविस्रवैः रक्तमरुणं विकीर्णं मेदोस्थितमांसं मस्तिष्कं मज्जा च यस्मिन् रेणुभिः रूक्षं तव वक्त्रं न भ्राजते अद्दृष्टकर्मकान्वयि ॥ ३४–३७ ॥

गो० टी०—सैवेत्यर्धम् । सैव एवं भुक्तभोगेव । अन्येव अभुक्तभोगेव ॥ ३४ ॥

गो० टी०—एवं रावणस्य मतिं राज्यश्रियं च निन्दित्वा भर्तुसौन्दर्यवैपरीत्यं शोचति—हा राजन्नित्यादिश्लोकचतुष्टयमेकान्वयम् । सुत्वक् स्निग्धत्वक् । समुन्नसं समुन्नतनासिकम् । कान्तिः प्रभा श्रीः सौन्दर्यम् द्युतिः तेजः किरीटकूटोज्ज्वलित शिखरतुल्यकिरीटविराजितम् । ताम्रास्यं रक्ताधरमित्यर्थः । चारु सुन्दरं तव यद्वक्त्रं मदव्याकुललोलाक्षं भूत्वा अभ्राजत, तदेवेदं वक्त्रमद्य न भ्राजते । अप्रकाशनिमित्तमाह—रामेति । शिखैः प्रवाहैः । मेदः वसा । मस्तिष्कं मांस विशेषः ॥ ३६–३८ ॥

३८] ति० टी०—विशीर्णं मेदोस्थिगतमांसं मस्तिष्कं मज्जा च यस्य तत् । सा वैधव्यदा पश्चिमा दशा मे मया संप्राप्ता ॥ ३८ ॥

रा० टी०—हेति । मन्दया मया या कदाचित्र संबुद्धा ज्ञाता सा वैधव्यदायिनी पश्चिमा दशा मे संप्राप्ता ॥ ३८ ॥

गो० टी०—हेति । मे वैधव्यकारिणी ते पश्चिमावस्था मृतिः संप्राप्ता ॥ ३९ ॥

३९] ति० टी०—या मया संबुद्धा नासीत् । दानवराजो मयः ॥ ३९ ॥

रा० टी०—ज्ञानाभावे हेतुमाह—पितेति । मे पिता दानवराजो मयः इति गर्वितोऽभवमिति शेषः ॥ ३९ ॥

१ चञ्चलाः श्रिय इति गो. पाठः । २ इदमिति गो. पाठः । ३ सिक्तमिति गो. पाठः । ४ कारिणीति गो. पाठः ।

पुत्रो मे शक्रनिर्जेता इत्यहं गर्विता भृशम् । दम्भारिमथनौः क्रूराः प्रख्यातबलपौरुषाः ॥ ४० ॥
अकृतश्चिद्भया नाथा ममेत्यासीन्मतिर्ध्रुवा । तेषामेवंप्रभावाणां युष्माकं राक्षसर्षभाः ॥ ४१ ॥
कथं भयमसंबुद्धं मानुषादिदमागतम् । स्निग्धेन्द्रनीलनीलं तु प्रांशुशैलोपमं महत् ॥ ४२ ॥
केयूराङ्गदवैदूर्यमुक्ताहारस्रगुज्ज्वलम् । कान्तं विहारेष्वधिकं दीप्तं सङ्ग्रामभूमिषु ॥ ४३ ॥
भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः । तदेवाद्य शरीरं ते तीक्ष्णैर्नैकैश्चरैश्चितम् ॥ ४४ ॥
पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते । श्यावैः शलभैर्युक्तं लघ्वभिर्निरन्तरम् ॥ ४५ ॥
स्वर्पितैर्मर्मसु भृशं संछिन्नस्नायुबन्धनम् । क्षितौ निपतितं राजञ्श्यामं वै रुधिरच्छवि ॥ ४६ ॥
वज्रप्रहारभिन्नो विकीर्ण इव पर्वतः । हा खभ्रः सत्यमेवेदं त्वं रामेण कथं हतः ॥ ४७ ॥
त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः । त्रैलोक्यवसुभोक्तारं त्रैलोक्यैकेशगं महत् ॥ ४८ ॥
जेतारं लोकपालानां क्षेप्तारं शंकरस्य च । दम्भानां निग्रहीतारमाविष्कृतपराक्रमम् ॥ ४९ ॥
लोकक्षोभयितारं च साधुभूतविदारणम् । ओजसा दम्भवाक्यानां वक्तारं रिपुमंनिधौ ॥ ५० ॥
स्वयूथभृत्यगोप्तारं हन्तारं भीमकर्मणाम् । दानवेन्द्राणां यक्षाणां च सहस्रशः ॥ ५१ ॥

गो० टी०—अस्थिरस्य देहस्य विनाशः कुतो न संबुद्ध इत्याह—पितेति । दानवराजः मयः ॥ ४० ॥ ४१ ॥

४०–४४] ति० टी०—अहं गर्विता विशिष्टपतिपुत्रवत्त्वात् । दम्भारिमथनत्वादिधर्मा मम नाथास्तातादयः सन्तीति मम ध्रुवा दृढा मतिरासीत् ॥ ४०–४४ ॥

रा० टी०—दम्भेति । दम्भारीणां मर्दनाः अत एव क्रूराः अत एव अकृतश्चिद्भयाः मम नाथाः इति ध्रुवा मतिरासीत् ॥ ४० ॥

रा० टी०—तेषामिति । एवंप्रभावाणां युष्माकमसंबुद्धमविज्ञातमिदं मानुषाद्भयं कथमागतम ॥ ४१ ॥

गो० टी०—तेषामिति । तेषु युष्मास्वेवंप्रभावेष्वित्यर्थः । मयस्य मरणाभावेपि इदानीमकार्यकरत्वादेवमुक्तम् । असंबुद्धं पूर्वमचिन्तितम् ॥ ४२ ॥

रा० टी०—स्निग्धेति । प्रांशुरुन्नतो यः शैलः तदुपमं केयूरादिभिरुज्ज्वलं विहारेषु अधिकं कांतं शोभाधिष्ठितं संग्रामभूमिषु दीप्तमतितेजोविशिष्टं गुरुपूजासु शंकरपूजने च विनीतं शांतं च यत् शरीरमाभरणभाभिः विद्युद्भिस्तोयद इव भाति अभात् तदेव नैकशरैः श्रितमत एव दुर्लभः संस्पर्शो यस्य तत् शरीरं परिष्वक्तुं न शक्यते सार्द्धश्लोकत्रयमेकान्वयि॥४२–४४॥

गो० टी०—स्निग्धेत्यादिसार्धश्लोकचतुष्टयमेकान्वयम । प्रांशुशैलः उन्नतशैलः । अङ्गदवैहर्यं वैडूर्यमयाङ्गदमिति केयूराद्भेदः । यच्छरीरं भाति आलिङ्गनयोग्यमभूत् तदेव शरीरं दुर्लभसंस्पर्शम् सत् पुनः परिष्वक्तुं न शक्यते । दुर्लभसंस्पर्शत्वमुपपादयति—श्यावेति । श्यावैः शल्यमृगस्य, शलभैः तल्लोमभिः, यद्वत् यथा । कण्टकाकारश्यावलोमवत्त्वेनेति शरविशेषणम् । मर्मसु स्वर्पितैः क्षिप्तैः तत्रैव मर्मसु निरन्तरं लग्नैरिति योजना । श्यावं कपिशवर्णम् । श्यावंतु शल्यस्तल्लोमनि शलली शलभे शल्यम् । श्यावः स्यात्कपिश इत्युभयत्राप्यमरः । स्नायुः धमन्यः । रुधिरसच्छवि रुधिरतुल्यकान्ति । स्वकान्तिं विहाय रुधिरकृतकान्त्यन्तरमित्यर्थः ॥ ४३–४६ ॥

४५] ति० टी०—श्यावैः शल्यकस्य शलभैः कण्टकैरिव लघ्वभिर्निरन्तरम । कृतमिति शेषः ॥ ४५ ॥

४६] ति० टी०—तथा मर्मसु स्वर्पितैर्बाणैः संछिन्नस्नायुबन्धनम् । रुधिरच्छवि तत्सम्बन्धेन रक्तकान्ति ॥ ४६ ॥

रा० टी०—श्यावैरिति । श्यावैः शल्लकस्य शलभैः कण्टकैर्युक्तं शल्लकशरीरमिव मर्मसु स्वर्पितैः अत एव लघ्वभिर्निरंतरमन्तररहितं यथा भवति तथा युक्तमत एव संछिन्नानि स्नायूनां नाडीनां बंधनानि यस्य रुधिरस्य छविर्यस्मिन् तत् क्षितौ निपतितं श्यामं शरीरं वज्रप्रहारपतितः अत एव विकीर्णः पर्वत इव बभातिति शेषः इव उभयान्वयी श्लोकद्वयमेकान्वयि ॥ ४५–४७ ॥

४७] ति० टी०—वज्रप्रहारभिन्नो विकीर्णः पर्वत इव ते शरीरं विकीर्णम् । हा खेदे । खभ्र इदं कथं सत्यमेव जातम् ४७

रा० टी०—हेति । इदं तव मरणं स्वप्नः सत्यं वा अन्ते वाक्यमाह रामेण त्वं कथं हतः शंकायां बीजमाह मृत्योरपि मृत्युस्त्वं मृत्युवशं कथं गतः स्याः ॥ ४८ ॥

गो० टी०—वज्रेत्यर्धम् ॥ अस्मीति शेषः ॥ ४७ ॥

गो० टी०—हेति । इदं ते मरणं स्वप्नः स्वप्नानुभवविषयः सत्यमेव, नात्र संशयः । तत्र हेतुमाह—त्वमिति । तत्रापि हेतुमाह—त्वं मृत्योरिति ॥ ४८ ॥

४८–४९] ति० टी०—यच्छ रत्नम् । महदित्यर्धम् ४८॥४९

५०–५१] ति० टी०—साधुभूतानां साधुजनानां विदारणम् । ओजसा बलेन । दम्भवाक्यानां गर्विश्ववचसाम् ॥५०॥५१॥

---

१ मर्दनाः शूरा इति गो. मर्दना इति च रा. पाठः । २ हंतेति गो. पाठः । ३ ऋषभेति गो. रा. पाठः । ४ दामेति गो. पाठः । ५ नैकैः शरैरिति गो. नैकशरैःश्रितमिति च रा. पाठः । ६ यद्वद्बाणैर्नुन्नैरिति गो. पाठः । ७ श्यावं रुधिरसच्छवीति गो. पाठः । ८ अभिहत इति गो. पतित इति रा. पाठः । ९ नादैरिति गो. रा. पाठः । १० विरावणमिति गो. पाठः । ११ भूरोति रा. पाठः । १२ वर्णाणां गोप्तारमिति गो. पाठः ।

निवातकवचाना तु निग्रहीतारमाहवे । नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च ॥ ५२ ॥
धर्मव्यवस्थाभेत्तारं मायासप्तारमाहवे । देवासुरनृकन्यानामाहर्तारं ततस्ततः ॥ ५३ ॥
शत्रुस्त्रीशोकदातारं नेतारं स्वजनस्य च । लङ्काद्वीपस्य गोप्तारं कर्तारं भीमकर्मणाम् ॥ ५४ ॥
अस्माकं कामभोगानां दातारं रथिनां वरम् । एवंप्रभावं भर्तारं दृष्ट्वा रामेण पातितम् ॥ ५५ ॥
स्थिरास्मि या देहमिमं धारयामि हतप्रिया । शयनेषु महार्हेषु शयित्वा राक्षसेश्वर ॥ ५६ ॥
इह कस्मात्प्रसुप्तोऽसि धरण्यां रेणुगुण्ठितैः । यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद्युधि ॥ ५७ ॥
तदा त्वभिहता तीव्रमद्य त्वस्मिन् निपातिता । सोऽहं बन्धुजनैर्हीना हीना नाथेन च त्वया ॥ ५८ ॥
विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः । प्रपन्नो दीर्घमध्वानं राजन्नद्य सुदुर्गमम् ॥ ५९ ॥
नय मामपि दुःखार्तां न वर्तिष्ये त्वया विना । कस्मात्त्वं मां विहायेह कृपणां गन्तुमिच्छसि ॥ ६० ॥
दीनां विलपतीं मन्दां किं च मां नाभिभाषसे । दृष्ट्वा न खल्वभिक्रुद्धो मामिहामवगुण्ठिताम् ॥ ६१ ॥
निर्गतां नगरद्वारात्पद्भ्यामेवागतां प्रभो । पश्येष्टदार दारांस्ते भ्रष्टलज्जावगुण्ठनान् ॥ ६२ ॥
बहिर्निष्पतितान्सर्वान्कथं दृष्ट्वा न कुप्यसि । अयं क्रीडासहायस्तेऽनाथो लालप्यते जनः ॥ ६३ ॥

५२-५४] ति० टी०—आहवे निग्रहीतारम् । जेतारमिति यावत् ॥ ५२-५४ ॥

५५-५७] ति० टी०—एवंप्रभावं त्वां हतं दृष्ट्वा हतप्रियेमं देहं धारयामि, अतः स्थिरा कठिनहृदयास्मीति जाने॥५५॥५७॥

रा० टी०—त्रैलोक्येति । दृप्तानां निग्रहीतारं दण्डप्रदं त्रिभुवनत्रियो दृप्तवाक्यानां गर्वितवचनानां वक्तारं स्वयूथ्यस्य भृशगोप्तारं निवातकवचानां निग्रहीतारमाहवे मायासप्तारं रथिनां वरमेवंप्रभावं भर्तारं रामेण पातितं दृष्ट्वापि हतप्रियाहमिमं देहं धारयामि अतः स्थिरा अतिदृढहृदयास्मि श्लोकाष्टकमेकान्वयि ॥ ४९-५६ ॥

रा० टी०—शयनेष्विति । महार्हेषु शयनेषु शयित्वा रेणुभिर्गुण्ठितो लिप्तस्तन् धरण्यां कस्मात्प्रसुप्तोसि ॥ ५७ ॥

रा० टी०—यदेति । मे तनयः यदा शस्तो विहिंसितः तदैव तीव्रमभिहताहमद्य निपातितास्मि ॥ ५८ ॥

गो० टी०—त्रैलोक्येत्यादिहतप्रियेत्यन्तं श्लोकाष्टकमेकं वाक्यम् ॥ एवंभूतं भर्तारं दृष्ट्वा यो इमं देहं धारयामि साहं स्थिरास्मि वज्रसारमयास्मि । कथमन्यथा न शीर्येदिति भावः । महदिति त्रैलोक्यवध्यविशेषणम् । यद्वा त्रैलोक्यद्वेगदमिति वा । उद्वेगो भयसंभ्रमः । शंकरस्य अन्तारं कैलासचलनद्वारा । स्वयूथ्यः स्वबन्धवः निवातकवचा नाम केचनासुराः । तेषां संग्रहीतारं तैः सख्ये कृतमित्ययः । स्वजनस्य स्वाश्रितजनस्य, धर्मव्यवस्था आचारव्यवस्था । यज्ञकर्मभेत्तृत्वकथनेनार्तोव स्वतन्त्रत्वमुक्तम् । कन्यानामिति । श्रीमात्रमुच्यते । स्वजनस्य नेतारमिति । पूर्वाभ्यानिष्टनिवर्तकत्वमुक्तम् । अत्रेष्टप्रापकत्वम् । भीमकर्मणां स्वशिरोहरणादीनाम् ॥ ४९-५७ ॥

गो० टी०—यदेति । शस्तः हतः । तदा अभिहता प्रहता । अद्य अस्मिन् त्वद्धनने सति तीव्रं निपातिता । मारितेत्यर्थः ॥५८॥

५८-६०] ति० टी०—तदा त्वभिहताभिघातमात्रं प्राप्ता, अद्य तु निपातितास्मि ॥ ५८-६० ॥

रा० टी०—सेति । शाश्वतीः बह्वीः समाः वर्षाणि शोचिष्ये ॥ ५९ ॥

गो० टी०—नाहमिति । बन्धुजनैः हीनाहं न शोचिष्ये यदि त्वं स्थितः स्याः । किंतु त्वया हीना अत एव कामभोगैर्हीना शोचिष्य इति योजना ॥ ५९ ॥

रा० टी०—प्रपन्न इति । सुदुर्गमं दीर्घमध्वानं प्रपन्नः प्राप्तस्त्वं मामपि नय प्रापय तत्र हेतुः त्वया विनाहं न वर्तिष्ये ॥ ६० ॥

गो० टी०—प्रपन्न इति । दीर्घमध्वानं वीरस्वर्गम् ॥६०॥

रा० टी०—कस्मादिति । मामिह विहाय त्वं कस्मात्प्रस्तुमिच्छसि मां किं कस्मान्नाभिभाषसे ॥ ६१ ॥

गो० टी०—कस्मादिति । विलपितैः प्रलापैः दीनां, मन्दाम् अभाग्याम् ॥ ६१ ॥

६१] ति० टी०—अनवगुण्ठितां भ्रष्टावगुण्ठनाम् ॥ ६१ ॥

रा० टी०—दृष्ट्वेति । नगरद्वारात् पद्भ्यामेव निर्गतामत एव अनवगुण्ठितां भ्रष्टावगुण्ठनामागतां मां दृष्ट्वा खलु किं कुद्धो नासि ॥ ६२ ॥

गो० टी०—दृष्ट्वेति । अनवकुण्ठिताम् अनावरणाम् । इहागतामित्यन्वयः ॥ ६२ ॥

६२-६३] ति० टी०—भ्रष्टं लज्जारक्षकमवगुण्ठनं येषां तान् ॥ ६२ ॥ ६३ ॥

रा० टी०—पश्येति । हे इष्टदार भ्रष्टलज्जावगुंठनान् ते

१ च संग्रहीतारमीश्वरमिति गो. पाठः । २ भ्रष्टलज्ज इति गो. पाठः । ३ अस्मिन्निति गो. पाठः । ४ नाहमिति गो. पाठः । ५ असीति गो. पाठः । ६ वीक्षिष्य इति गो. पाठः । ७ विलपितैरिति गो. पाठः । ८ वेति गो. पाठः । ९ असीति गो. रा. पाठः । १० कुण्ठितामिति गो. पाठः । ११ कुण्ठितानिति गो. पाठः ।

न चैनमाश्वासयसि किं वा न बहुमन्यसे । यास्त्वया विधवा राजन्कृता नैका कुलस्त्रियः ॥ ६४ ॥
पतिव्रता धर्मरता गुरुशुश्रूषणे रताः । ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः ॥ ६५ ॥
त्वया विप्रकृताभिश्च तदा शप्तस्तदागतम् । प्रवादः सत्यमेवायं त्वां प्रति प्रायशो नृप ॥ ६६ ॥
पतिव्रतानां नाकस्मात्पतन्त्यश्रूणि भूतले । कथं च नाम ते राजन्लोकानाक्रम्य तेजसा ॥ ६७ ॥
नारीचौर्यमिदं क्षुद्रं कृतं शौण्डीर्यमानिना । अपनीयाश्रमाद्रामं यन्मृगच्छद्मना त्वया ॥ ६८ ॥
आनीता रामपत्नी सा अपनीय च लक्ष्मणम् । कातर्यं च न ते युद्धे कदाचित्संयुगाग्रहम् ॥ ६९ ॥
तत्तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणम् । अतीतानागतार्थज्ञो वर्तमानविचक्षणः ॥ ७० ॥
मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निःश्वस्य चायतम् । सत्यवाक्स महाबाहो देवरो मे यदब्रवीत् ॥ ७१ ॥

दारान् पश्य बहिर्निष्पतितान्विगतान् तान् दारान् दृष्ट्वा कथं न कुप्यसि ॥ ६३ ॥

गो० टी०–पश्यैतेति । इक्ष्वाकोरिति संबुद्धिः । अपलज्जावकुण्ठितान् हीनलज्जावकुण्ठितान् ॥ ६३ ॥

रा० टी०–अयमिति । क्रीडासहायोऽयं जनः लाल्यते अतः एनं किं न आश्वासयसे न बहु मन्यसे वा ॥ ६४ ॥

गो० टी०–अयमिति । नाथो लाल्यत इति पाठे अनाथ इति छेदः ॥ ६४ ॥

६४] ति० टी०–नैकाः कुलस्त्रियः । रूप्यादीनामिति शेषः ॥ ६४ ॥

६५] ति० टी०–यत्कलमस्मत्कर्म त्वं परवशं शत्रुधीनं गतः ॥ ६५ ॥

रा० टी०–या इति । पतिव्रताः अत एव गुरुशुश्रूषणे रताः याः कुलस्त्रियः त्वया विधवाः कृताः ताभिः विप्रकृताभिः अत एव क्रोधाभितप्ताभिः त्वं शप्तः अत एव यदुद्दिश्य आश्रमं तत् फलमागतं प्राप्तमत एव परम्य मृत्योर्वशं गतः श्लोकद्वयमेकान्वयि ॥ ६५ ॥ ६६ ॥

गो० टी०–यास्त्वयेत्यादिसार्धश्लोक एकान्वयः । परवशं परवशत्वम् । शत्रुवशत्वमिति यावत् ॥ ६५ ॥

६६–६७] ति० टी०–त्वया विप्रकृताभिः कृतापकाराभिस्तदापकारसमयं यच्छप्तं तत्फलमागतम् । विप्रकृतानां पतिव्रतानामश्रूण्यकस्मात्किंचिदनर्थकारणं विना भूतले न पतन्तीति योऽयं प्रवादः प्रायशो जने चरति प्रवर्तते स सत्यं त्वां प्रति जातः तवानर्थकर एव जात इत्यर्थः ॥ ६६ ॥ ६७ ॥

रा० टी०–प्रवाद इति । पतिव्रतानामश्रूणि अकस्मात् अकारणात् न पतन्ति यः पातयति ते विनाशयन्त्येवेत्यर्थः अयं प्रवादः त्वां प्रति सत्यः ॥ ६७ ॥

गो० टी०–त्वयेत्यर्धम् । त्वया विप्रकृताभिः पञ्चभूताभिः । तदा भर्तृवधकाले, यच्छप्तं तत् आगतम् फलदमासीदित्यर्थः ६६

रा० टी०–कथमिति । तेजसा लोकानाक्रम्य वियमानेन शौण्डीर्यमानिना शरत्वाभिमानविशिष्टेन त्वया नारीचौर्यं कथं कृतम् ॥ ६८ ॥

गो० टी०–प्रवाद इति । पतिव्रतानामश्रूणि अकस्मात्किंचित्कलया भूतले न पतन्ति पतन्ति चेत् किंचित् कुर्वन्त्येव इत्येव प्रायशः प्रवादः जनयाती त्वां प्रत्येव सत्यः यथार्थो जातः । पतिव्रतानामाश्रुपातकरणमनर्थावहमित्येवं जनवादः तथा कुर्वति त्वयि दृष्टकः आसीदित्यर्थः ॥ ६७ ॥

गो० टी०–कथमिति । शौण्डीर्यमानिना शरमानिना ६८

६८] ति० टी०–शौण्डीर्यमानिना शिरमानिना ॥ ६८ ॥

रा० टी०–आपनीयेति । भगवत्या मृगव्याजेन रामाश्रमादपनीय दूरदेशं प्रापय्य रामपत्नी त्वया आनीता तत्र कातर्यस्य लक्षणं सूचयति ॥ ६९ ॥

गो० टी०–अपनीयेति । त्वया कर्त्री. मृगच्छद्मना मृगरूपकपटेनापाय । कातर्यलक्षणं भयेनेत्यनेन ॥ ६९ ॥

६९] ति० टी०–कातर्यं भयाधिक्यम् ॥ ६९ ॥

रा० टी०–तत्कथं कातर्यमित्यत्र आह—कातर्यमिति । ते कातर्यं युद्धे कदाचित् संयुगाग्रहं दृष्टो दृष्टिपथे अतः भाग्यस्य विपर्यासात् विपर्ययात् पक्वस्य विनाशोन्मुखस्य तत् कातर्यमनर्थादिति शेषः ॥ ७० ॥

गो० टी०–कातर्यमिति । न एतं कातर्यम् कदाचिदपि न स्मरामि न जानामीत्यर्थः । एवमतत्प्रकृतेरेव भाग्यविपर्यासात् यत्कातर्यं चौर्यकर्मणि तत् पक्वलक्षणं पक्वत्वलक्षणं विनाशज्ञापकमिति यावत् । महतो हीनत्वं ज्ञानिकरमिति लोकप्रवादादिति भावः ॥ ७० ॥

७०] ति० टी०–पक्वलक्षणम् । पक्वत्वस्यविनाशस्य लक्षणमित्यर्थः ॥ ७० ॥

७१] ति० टी०–स देवरो विभीषणो राक्षसानां विनाश आगत इति यदब्रवीत्तदागतमिति शेषः ॥ ७१ ॥

रा० टी०–अनीतेति । अतीतानागतयोरर्थयोर्ज्ञातावर्तमानस्य विचक्षणोऽभिज्ञः सत्यवाक् मे देवरो विभीषणः मैथिलीमाहृतां दृष्ट्वा आयतं दीर्घं ध्यात्वा संचिन्त्य निःश्वस्य च अयं सीतापहारः राक्षसमुख्यानां विनाशस्समुपस्थितः इति यदब्रवीत् तज्जातमिति शेषः श्लोकद्वयमेकान्वयि ॥ ७१॥७२ ॥

गो० टी०–अनीतेत्यादिसार्धश्लोकद्वयमेकान्वयम ।

१ आश्रमे पर्व गो. रा. पाठे । २ यत्तदाशप्तमिति गो. रा. पाठः । ३ यदाशप्तमिति रा. पाठः । ४ शौण्डीर्येति गो. रा. पाठः । ५ तत्तेकातर्यलक्षणमिति गो. रा. पाठः ।

अयं राक्षसमुख्यानां विनाशः प्रेत्युपस्थितः । कामक्रोधसमुत्थेन व्यसनेन प्रसङ्गिना ॥ ७२ ॥
निवृत्तस्त्वत्कृते नाथः सोऽयं मूलहरो महान् । त्वया कृतमिदं सर्वमनाथं राक्षसं कुलम् ॥ ७३ ॥
नहि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः । स्त्रीस्वभावात्तु मे बुद्धिः कारुण्ये परिवर्तते ॥ ७४ ॥
सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः । आत्मानमनुशोचामि त्वद्विनाशेन दुःखिताम्॥ ७५ ॥
सुहृदां हितकामानां न श्रुतं वचनं त्वया । भ्रातॄणां चैव कात्स्न्र्येन हितमुक्तं दशानन ॥ ७६ ॥
हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणम् । विभीषणेनाभिहितं न कृतं हेतुमत्त्वया ॥ ७७ ॥
मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तथा । न कृतं वीर्यमत्तेन तस्येदं फलमीदृशम् ॥ ७८ ॥
नीलजीमूतसंकाश पीताम्बर शुभाङ्गद । स्वगात्राणि विनिक्षिप्य किं शेषे रुधिरावृतैः ॥ ७९ ॥
प्रसुप्त इव शोकार्तां किं मां न प्रतिभाषसे । महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः ॥ ८० ॥

देवरो यदब्रवीत् अयं तद्वाक्यार्थभूतो विनाशः प्रसङ्गिना प्रसक्तेन व्यसनेन हेतुना पर्युपस्थितः ॥ ७१ ॥ ७२ ॥

७२] ति० टी०–व्यसनेन स्त्रीप्रसक्तिलक्षणेन । प्रसङ्गिना प्रसक्तिमता ॥ ७२ ॥

रा० टी०–कामेति । कामक्रोधाभ्यां समुत्थेन अत एव प्रसङ्गिना अतिप्रसक्तेन त्वत्कृतेन व्यसनेन दारापहरणलक्षणेन अर्थः सकलैश्वर्यं निवृत्तः अतः सः दारापहारः महान् मूलहरः ७३

७३–७४] ति० टी०–त्वत्कृतेनार्थोऽनर्थैश्वर्यलक्षणो निवृत्तः । यतः सोऽयं परस्त्रीप्रसक्तिरूपो मूलहरोऽनर्थ इति शेषः ॥ ७३ ॥ ७४ ॥

रा० टी०–त्वयेति । त्वया कृतं प्रवर्तितमिदं राक्षसं कुलमनाथं नाथरहितमभवदिति शेषः अहं पृथक्–नहीति । यद्यपि त्वं न शोचितव्यः तथापि स्त्रीस्वभावात् हेतोः मे बुद्धिः कारुण्ये दैन्ये परिवर्त्तते ॥ ७४ ॥

गो० टी०–निवृत्त इति । त्वत्कृते त्वन्निमित्तम् । निवृत्तः प्रवृत्तः ॥ ७३ ॥

गो० टी०–न हीति । कारुण्यं दैन्ये ॥ ७४ ॥ ७५ ॥

७५] ति० टी०–दुःखितां संप्राप्तदुःखाम् ॥ ७५ ॥

७६] ति० टी०–सुहृदां मारीचादीनाम् ॥ ७६ ॥

रा० टी०–सुकृतमिति । त्वद्विनाशेन दुःखितमात्मानमनुशोचामि ॥ ७५ ॥

रा० टी०–सुहृदामिति । हितकामानां मारीचादीनां भ्रातॄणां च हितयुक्तं वचनं त्वया न श्रुतमङ्गीकृतम् ॥ ७६ ॥

गो० टी०–सुहृदामिति । कात्स्न्र्येनोक्तं हितं त्वया न श्रुतमित्यनुपज्यते ॥ ७६ ॥

७७] ति० टी०–अदारुणं सौम्यम् । हेत्वर्थयुक्तं हेतुप्रयोजनाभ्यां सहितम् हेतुमन्न कृतम् । फलवन्नानुष्ठितमित्यर्थः ॥ ७७ ॥

रा० टी०–हेत्वर्थेति । हेत्वर्थाभ्यां कारणप्रयोजनाभ्यां युक्तमत एव श्रेयस्करमत एव अदारुणं विभीषणेन विधिवदभिहितं वचनं त्वया हेतुमत् सफलं न कृतम् ॥ ७७ ॥

गो० टी०–हेत्विति । हेत्वर्थयुक्तं युक्तिप्रयोजनाभ्यां युक्तम् विधिवत् शास्त्रोक्तप्रकारवत् श्रेयस्करं हितभूतम् । अदारुणं सान्त्वपूर्वकम् विभीषणेनाभिहितं वचनं त्वया हेतुमयुक्तिमथा भवति तथा न गृहीतम् । ज्ञातित्वेन मद्व्यसनं काङ्क्षसे इत्यादिना हेतूपादनपूर्वकं न गृहीतमित्यर्थः ॥ ७७ ॥

७८] ति० टी०–मारीचकुम्भकर्णाभ्यामभिहितमिति शेषः ॥ ७८ ॥

रा० टी०–मारीचेति । वीर्यस्य मत्तेन मदेन मारीचकुम्भकर्णाभ्यामभिहितं मम पितुर्मयस्य च वाक्यं न कृतम् तस्य अकरणस्य ईदृशमिदं फलं प्राप्तम् ॥ ७८ ॥

गो० टी०–मारीचेति । मारीचकुम्भकर्णाभ्यां सह मम पितुर्मयस्य वाक्यं न श्रुतम् तस्य अश्रवणस्य ईदृशं फलम् । आगतमिति शेषः । अत्रानुवादान्मयोप्यस्तीत्यवगन्तव्यम् ७८

७९–८०] ति० टी०–विनिक्षिप्य । भूतले इति शेषः ॥ ७९ ॥ ८० ॥

रा० टी०–नीलेति । किं किमर्थं शेषे ॥ ७९ ॥

रा० टी०–प्रसुप्त इति । दक्षस्य संयुगेषु अपलायिनः यातुधानस्य सुमालिनः दौहित्रीं मां प्रसुप्त इव त्वं किं न प्रतिभाषसे सार्द्धश्लोक एकान्वयी ॥ ८० ॥ ८१ ॥

गो० टी०–नीलेत्यादिसार्धश्लोक एकान्वयः । विनिक्षिप्य भूमौ प्रसार्य प्रसुप्त इव शेषे, शोकार्तां मां च किमिति न प्रतिभाषस इत्यन्वयः ॥ ७९ ॥ ८० ॥

गो० टी०–महावीर्यस्येति । यातुधानस्य माल्यवतः सुमालिनो वा । तत्संबन्धकीर्तनमप्रतिहतकुलप्रभावप्रकटनार्थम् ॥ ८१ ॥ ८२ ॥

---

१ सोऽर्थमिति गो. पाठः । २ परीति गो. समिति रा. पाठः । ३ अनर्थ इति गो. पाठः । ४ रक्षसामिति गो. रा. पाठः । ५ वियोगेनेति गो. पाठः । ६ कृतमिति गो. पाठः । ७ आप्तुत इति गो. आवृतमिति रा. पाठः ।

यातुधानस्य दौहित्रीं किं मां न प्रतिभाषसे । उत्तिष्ठोत्तिष्ठ किं शेषे नैर्ऋते परिभक्षिते कृते ॥ ८१ ॥
अद्य वै निर्भया लङ्का प्रविष्टाः सूर्यरश्मयः । येन त्वं हृदयसे शत्रून्समरे सूर्यवर्चसा ॥ ८२ ॥
वज्रं वज्रधरस्येव सोऽयं ते सततार्चितः । रणे बहुप्रहरणो हेमजालपरिष्कृतः ॥ ८३ ॥
परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा । प्रियामिवोपसंगूढ्य किं शेषे रणमेदिनीम् ॥ ८४ ॥
अप्रियामिव कस्माच्च मां नेच्छस्यभिभाषितुम् । विगस्तु हृदयं यस्या ममेदं न सहस्रधा ॥ ८५ ॥
त्वयि पञ्चत्वमापन्ने फलते शोकपीडितम् । इत्येवं विलपन्ती सा बाष्पपर्याकुलेक्षणा ॥ ८६ ॥
स्नेहोपस्कन्नहृदया तदा मोहमुपागमत् । कश्मलाभिहता सद्यः सा रावणोरसि ॥ ८७ ॥
संध्यानुरक्ते जलदे दीप्ता विद्युदिवोज्ज्वला । तथागतां समुत्थाप्य सपत्न्यस्तां मृगानुगाः ॥ ८८ ॥
पर्यवस्थापयामासुः कैदन्त्यो रुदतीं मृगाः । किं ते न विदिता देवि लोकानां स्थितिरुत्तमा ॥ ८९ ॥
दशाविभागपर्याये राज्ञां वै चञ्चलाः श्रियः । इत्येवमुच्यमाना सा मन्दोदर्यं परुरोद ह ॥ ९० ॥
स्रंपयन्ती तदोच्छ्वासं स्तनौ वक्त्रं मुनिर्मलम् । एतस्मिन्नन्तरे रामो विभीषणमुवाच ह ॥ ९१ ॥
संस्कारः क्रियतां भ्रातुः स्त्रीभिरेतः परिप्लुत्यताम् । तमुवाच ततो धर्मज्ञो विभीषण इदं वचः ॥ ९२ ॥

८१–८२] ति० टी०- यातुधानस्य रक्षसोः ॥८१।८२॥

८३–८५] ति० टी०–ते त्वया सततमर्चितः पूजितः । बहुप्रहरणो बहुहस्तः ॥ ८३–८५ ॥

रा० टी०–उत्तिष्ठेति । नैर्ऋते परिभक्षिते परावधे एते रावणेन संपादिते सति किं शेषे सूर्यरश्मयः निर्भयाः सन्तः लंकामेव प्रविष्टाः ॥ ८२ ॥

रा० टी०–येनेति । येन शत्रून् हृदयसे अहन् सोयं रावणस्य वज्रमिव सततमर्चितः निरंतरं पूजितः हेमजालेन परिष्कृतः परिघः बहुप्रहरणो रणे सहस्रधा छिन्नः अतः एव हेम्नः सकाशात् परिष्कृतः स्वीकृतसंबन्धः ॥ ८३ ॥ ८४ ॥

रा० टी०–प्रियामिति । समरमेदिनीं प्रियामिवोपगूढ्य । तस्मात् शेषे अप्रियामिव मां अभिभाषितुं कथालापं नेच्छसि ॥ ८४ ॥

रा० टी०–विगिति । त्वयि पञ्चत्वमापन्ने सति यस्या मम हृदयं सहस्रधा न फलते विगच्छे तां मां विद्धि ॥ ८५ ॥

गो० टी०–येनेत्यादिश्लोकद्वयमेकान्वयम् । ते त्वया सततार्चितः, रणे शस्त्रबाणैश्छिन्नः, वज्रकल्पस्य वज्रं इव स्थितः ते परिघः अद्य विशीर्णः ॥ ८३–८५ ॥

गो० टी०–धिगिति । यस्या मम हृदयं न फलते न स्फुटति तादृशीं मां धिगित्यन्वयः ॥ ८६ ॥

८६] ति० टी०–फलते स्फुटति ॥ ८६ ॥

रा० टी०–इतीति । इत्येवं विलपन्ती स्नेहेन अवस्कन्नं हृदयं यस्याः सा मन्दोदरी मोहं मूर्छामुपागमत् ॥ ८७ ॥

गो० टी०–इतीति । अवस्कन्नहृदया विलीनहृदया ॥८७॥

८७–८८] ति० टी०–कश्मलो मूर्छा तया पीडिता ॥ ८७ ॥ ८८ ॥

रा० टी०–कश्मलेति । कश्मलेन मूर्छयाभिहता रावणोरसि स्थिता पतिता सा मन्दोदरी संध्यानुरक्ते जलदे सन्ध्याकालरक्तवर्णे मेघे उज्ज्वला विद्युत् । यथा ॥ ८८ ॥

रा० टी०–तथेति । तथागतां मूर्छां प्राप्तां रुदतीं तां मन्दोदरीं मृगानुगाः मृगसदृशाः सपत्न्यः पर्यवस्थापयामासुः स्वास्थ्यं प्रापयामासुः ॥ ८९ ॥

गो० टी०–कश्मलेति । कश्मलेन मूर्छया अभिहता मूर्छिता । मृगा इव ॥ ८८ ॥ ८९ ॥

८९–९२] ति० टी०–दशाविभागस्य पञ्चपञ्चाशत्पर्यायविपाकस्य पर्याये विनाशे राज्ञां चञ्चलाः विपत्तेः न विदिता, किं यूयं लोकानां स्थितिमुत्तमां न जानीथ अपि तु जानीथ एव ॥ ८९ ॥

रा० टी०–तत्पश्चात्– किमिति । दशाविभागयोः पञ्चपञ्चाशद्वर्षयोः पर्याये कालेनावश्यम्भाविनि संहारानामिति शेषः श्रियः सम्पत्तयो राज्ञां लोकानां च अध्रुवा स्थितिः किं ते त्वया न विदिता विदितैवेत्यर्थः ॥ ९० ॥

रा० टी०–इतीति । इत्येवमुच्यमाना सा मन्दोदरी अभिमुखौ उन्नतौ स्तनौ अश्रुस्नातौ विस्रंसैः प्रस्रावैः स्रापयन्ती स्तनौ सस्रंसे प्रस्रुतवती ॥ ९१ ॥

गो० टी०–नेत्यादिश्लोकद्वयमेकान्वयम् । दशाविभागपर्याये दशानां वान्धकौभारयौवनयोर्वाकाश्वसम्बन्धानां विभागस्य

१ दौहित्र किं च मां नाभ्युदीक्षसे इति गो. पाठः । २ प्राप्त इति गो. पाठः । ३ नैर्ऋते इति गो. पाठः । ४ त्वं इति गो. पाठः । ५ शोचिति गो. बहुप्रहरणे इति रा. पाठः । ६ युद्ध त्वं शेषे समरभेदिनीमिति गो. रा. पाठः । ७ एव बाष्पव्याकुलनेत्रेति गो. पाठः । ८ आसते इति गो. पाठः । ९ समुत्पर्येति गो. पाठः । १० रुदन्त्य इति गो. रा. पाठः । ११ न वैदेहीति गो. पाठः । १२ चपलाश्रिय इति गो. रा. पाठः । १३ स्रापयन्तीति गो. रा. पाठः । १४ त्वभिमुखौ स्तनावस्राम्बुविस्रंसैरिति गो. रा. पाठः । १५ स्त्रियश्चेता निवर्तेयमिति गो. पाठः । १६ ते प्रश्लिष्टस्तनोरसं श्रुतवाक्यो विभीषण इति गो. रा. तथापि प्रश्लिष्टमथो इति रा. पाठः ।

विमृश्य बुद्ध्या मेश्रितं धर्मार्थसहितं हितम्[1] । त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा ॥ ९३ ॥
नाहमर्हामि संस्कर्तुं परदाराभिमर्शनम्[2] । भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः ॥ ९४ ॥
रावणो नार्हते पूजां पूज्योऽपिगुरुगौरवात्[3] । नृशंस इति मां रौमे वक्ष्यन्ति मनुजा भुवि ॥ ९५ ॥
श्रुत्वा तस्याँगुणान्मर्त्ये वक्ष्यन्ति सुकृतं पुनः । तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः ॥ ९६ ॥
विभीषणमुवाचेदं वाक्यज्ञो[7] वाक्यकोविदः । तवापि मे प्रियं कार्यं त्वत्प्रभावान्मया जितम् ॥ ९७ ॥
अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वर । अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः ॥ ९८ ॥
तेजस्वी बलवाञ्छूरः सङ्ग्रामेषु च नित्यशः । शतक्रतुमुखैर्देवैः श्रूयते न पराजितः ॥ ९९ ॥
महात्मा बलसंपन्नो रावणो लोकरावणः । मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् ॥१००॥

मेऽस्य पक्षेण प्राप्तो विषये, लोकानामधुना स्थितिः राजा चक्षुल्या स्थिता सह ते त्वया सविदिता नेति कारुः । सुविदितैवेत्यर्थः । लोकानां स्थितिरुपैतीति राजा श्रीश्चक्षुरेति च त्वया सविदितैवेत्यर्थः । उच्यमाना बन्धुबुद्धाद्विभिरिति शेषः । अभिमुखो इतो ॥ ९२–९३ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे समये श्रीमणः पक्षिमाल्यवान् भ्रातुस्संस्कारश्च क्रियतामं इति तत्रः रामो विभीषणमुवाच ॥ ९२ ॥

रा० टी०–सेमिति । श्रुतवाक्ये विभीषणः बुद्ध्या विमृश्य रामस्येव अनुकूल्यमभिप्रायविज्ञानार्थं धर्मार्थसहितमुत्तरं वचः प्रत्युवाच ॥ ९३ ॥

गो० टी०–तमित्यादि । प्रश्रितः विनयान्वितः । विमृश्य एतत् पक्षं प्रतिगतस्य इत्यं तत्कर्तुमिच्छामि तव प्रसादादित्यतमङ्गीकृतं विचिन्त्येत्यर्थः । राक्षस्यैवानुकूल्यार्थं रामेणानुज्ञातोस्मि चेत्तदा करिष्यामि नान्यथेत्येवमनुकूल्यार्थम् ॥ ९३॥

९३–९४] ति० टी०–प्रश्रितं रामस्यानुकूलं यथा तथा राजं प्रत्युवाच । त्यक्तो धर्मो व्रतं च येन तम् । अनृतम् अकृतज्ञादिनम् ॥ ९३ ॥ ९४ ॥

रा० टी०–त्यक्तेति । त्यक्तो धर्मव्रते येन परदाराभिमर्शनं पीत्या इत्यं तं रावणं संस्कर्तुमहं नार्हामि ॥ ९४

रा० टी०–भ्रातृरूप इति । गुरुगौरवात् अभिगुरुत्वात् पूज्योपि सर्वाहिते रतः अतः एव मे शत्रुरेष रावणः पूजां नार्हति ॥ ९५

गो० टी०–त्यक्तेति । त्यक्तो धर्मो व्रतं च येन तम् । अनृतम् अकृतज्ञादिनम् ॥ ९४ ॥

गो० टी०–भ्रातृरूप इति । गुरुगौरवात् गुरुरिति गौरवात्, पूज्योपि उक्तदोषान्मत्तः पूजां नार्हति ॥ ९५ ॥

भानुः संस्काराकरणे त्वां नृशंसं लोका वक्ष्यन्तीत्याशङ्क्य यदन्यु नाम न एव पुनस्तद्गुणं वित्तारयन्तो मां गुणकारिणं वक्ष्यन्तीत्याह—नृशंस इति । संस्काराकरणे नृशंस इति मां कामं मनुष्या वक्ष्यन्ति । तस्य रावणस्य । अगुणान् दोषान् श्रुत्वा असंस्कर्तारं विभीषणेन सुकृतं शोभनं कृतमिति वक्ष्यन्तीत्यर्थः ९६

९५–९६] ति० टी०–गुरुगौरवात्पूज्योऽप्युक्तदोषान्मत्तः पूजां नार्हति नार्हति । हे राम, सर्वे मनुजाः पूर्वं भ्रातृसंस्काराकरणान्मां नृशंस इति वक्ष्यन्ति । पश्चात्त्वयागुणाञ्छ्रुत्वा पुनः सुकृतं सम्यक्कृतमित्येवं वक्ष्यन्ति ॥ ९५ ॥९६॥

रा० टी०–नृशंस इति । हे राम ये मनुजाः मां नृशंसं वक्ष्यन्ति भ्रातुः प्रमीतक्रियाया अकरणेन क्रूरं कथयिष्यन्ति ते एव जनाः तस्य रावणस्य गुणान् नृशंसत्वादीन् श्रुत्वा सुकृतं शोभनकृतत्वं वक्ष्यन्ति ॥ ९६ ॥

रा० टी०–तदिति । रामः विभीषणमुवाच ॥ ९७ ॥

गो० टी०–तच्छ्रुत्वेति । परमप्रीतः सत्यवचनकथनादिति भावः । अप्रीत इति वा छेदः ॥ ९७ ॥

९७] ति० टी०–तवापीति । सर्वोपरीत्यं तवापि प्रियं राज्याभिषेकफलक्षणं मया कार्यं कर्तव्यम् । हि यस्मात्त्वत्प्रभावान्मया जितम् ॥ ९७ ॥

रा० टी०–तदाकारमाह—तवेत्यादिभिः । त्वत्प्रभावात् मे मया जितं विद्युत्तमिति शेषः अतः मे मया तवापि प्रियं राज्यप्रापणं कार्यमतः क्षमं योग्यं वचः त्वं मया अवश्यं वाच्यः ९७

गो० टी०–दोषमङ्गीकृत्यापि गुणबाहुल्यादयं संस्कार्योस्य इत्याह—तवापीत्यादिना । तव त्वया, मे प्रियमपि प्रियमेव कार्यम । चो हेतौ । यस्मात्कारणात्, त्वत्प्रभावात् मे मया जितम् तस्मान्मया त्वं क्षमं हितमेव वाच्यः । मन्तव्यत्वात् त्वद्धितत्वाच्च रावणसंस्कारः क्रियतामित्यर्थः । यद्वा तवापि मे प्रियं कार्यं मद्वैरिणो रावणस्यासंस्करणं नाम मम प्रियं तवापि कर्तव्यमेव । त्वत्प्रभावाच्च मे जितं पूर्वं न तस्य जयसाहाय्यरूपं प्रियं त्वया कृतम् । तथाप्यवश्यं तु क्षम वाच्यः । यदहं तत्र नियोजनीयोसीत्यर्थः ॥ ९८ ॥

९८–९९] ति० टी०–तस्मादवश्यं क्षममभिषेकसंपादनयोग्यं यत्कृत्यं प्रेतनिर्हारलक्षणं तन्मया त्वं वाच्यः । यद्यप्ययं त्वदुक्तदोषवांस्तथापि गुणबाहुल्यात्संस्कार्यं एवेत्याह—अधर्मेत्यादि ॥ ९८ ॥ ९९ ॥

१००] ति० टी०–त्वल्लघुत्वादसंस्कार्य इति चेत्तत्राह—

१ धर्मेश इति गो. रा. पाठः । २ तत्र इति गो. रा. पाठः । ३ अर्होऽस्मीति गो. पाठः । ४ मर्शनमिति गो. पाठः । ५ काममिति गो. पाठः । ६ तत्र गुणानिति रा. पाठः । ७ वाक्यज्ञो वाक्यकोविदमिति गो. रा. पाठः । ८ च मे जितमिति गो. रा. पाठः । ९ संयुगेष्विति गो. पाठः ।

क्रियतामस्य संस्कारो ममाप्येष तथा तव । त्वत्सकाशान्महाबाहो संस्कारं विधिपूर्वकम् ॥ १०१ ॥
क्षिप्रमर्हति धर्मेण त्वं यशोभाग्भविष्यसि । रावणस्य वचः श्रुत्वा त्वरमाणो विभीषणः ॥ १०२ ॥
संस्कारयितुमारेभे भ्रातरं रावणं हतम् । सँ प्रविश्य पुरीं लङ्कां राक्षसेन्द्रो विभीषणः ॥ १०३ ॥
रावणस्याग्निहोत्रं तु निर्यापयति सत्वरम् । शकटान्दारुरूपाणि अग्नीन्वै याजकांस्तथा ॥ १०४ ॥
तथा चन्दनकाष्ठानि काष्ठानि विविधानि च । आगरूणि सुगन्धीनि गन्धांश्च सुरभींस्तथा ॥ १०५ ॥
मणिमुक्ताप्रवालानि निर्यापयति राक्षसः । आजगाम मुहूर्तेन राक्षसैः परिवारितः ॥ १०६ ॥
ततो माल्यवता सार्धं क्रियामेव चकार सः । सौवर्णीं शिबिकां दिव्यामारोप्य क्षौमवाससम् ॥ १०७ ॥
रावणं राक्षसाधीशमश्रुवर्णमुखा द्विजाः । तूर्णमारोप्य विविधैस्तुष्टुवुश्चाभिनन्दितम् ॥ १०८ ॥
पताकाभिश्च चित्राभिः सुमनोभिश्च शिबिकाम् । उत्क्षिप्य शिबिकां तां तु विभीषणपुरोगमाः ॥ १०९ ॥
दक्षिणाभिमुखाः सर्वे गृह्य काष्ठानि भेजिरे । अग्नयो दीप्यमानास्ते तदाध्वर्यवमीरिताः ॥ ११० ॥

मरणान्तानीति । नः सात्त्विकानामस्माकं प्रतीकारे वैरस्यिकं तनरूपं निर्वैरं संपन्नम्, अतः परं न वैरप्रयोजनमस्तीत्यर्थः ॥ ९७ ॥

रा० टी०—अधर्मेति । यद्यपि एष अधर्मयोगेन दुष्टः तथापि तेजस्वित्वादिगुणविशिष्टोऽपि अत एव एष पराजितो न श्रूयते वैरेणापि तु मरणान्तानि वैराणि न भवन्तीति न्यायेन अस्य संस्कारः क्रियताम् । [illegible] इत्यपि ॥ १००–१०१ ॥

गो० टी०—दोषिणः कथमस्मत्संस्कारार्हा इत्याशङ्क्य व्याचष्टे—अधर्मेत्यादिना ॥ ९९ ॥

गो० टी०—संगृह्येत्यपराजितधनुष्टङ्कारेति—दृढतरं कृत्वेति ॥ १०० ॥

गो० टी०—गुणवानुत्तमोऽपि त्वद्वैरी तव संस्कार्य इत्याह—मरणमिति । यथायं तव शत्रुस्तथा ममापि त्वद्वधेन पूज्यायमित्यर्थः ॥ १०१ ॥

१०१] ति० टी०—संदेशतः—अस्य संस्कारः क्रियतामिति । एष यथा तव भ्राता संस्कारादिना स्वकुलाचारतया ममाप्यनुज्ञात एव । चतुर्विधमुक्तिष्वेकापि नास्य । तदुक्तं विष्णुपुराणे—हिरण्यकशिपोर्विष्णुरनभिज्ञो न मत्स्यवत्, दशाननस्त्वेवमप्यनुपपन्नतया जानकीसमासादनेनासौ 'दशरथिरूपदर्शनमेवास्मीत्' । नायमस्यात इत्यात्मकि, विपर्यस्तान्तःकरणस्य मानुषबुद्धिरेव केवलमभूदिति, अत एव शिशुपालकर्णयोः शिशुपालदन्तवक्त्रकरूपेण जन्म श्रूयते । यदि भगवत्संबन्धेऽपि प्राप्तयोरपि जन्म भवति, किं न ब्रह्मणा सह मुक्तिरेवेति सिद्धान्तः ॥ १०१ ॥

रा० टी०—त्वदिति । त्वत्सकाशात् विधिपूर्वं संस्कारमर्हति संस्कारं कुर्वित्यर्थः अतः धर्मेण सुकृतत्वं यशोभाग्भविष्यसि ॥ १०२ ॥

गो० टी०—त्वत्सकाशादिति । यशोभागिति । पापकारिणमपि संस्कृतवानिति यशस्तव भविष्यतीत्यर्थः ॥ १०२ ॥

१०२–१०३] ति० टी०—यशोभागिति रामराजयेन त्वद्वैरी भ्राता संस्कार्यानिति इत्यादिना भविष्यतीत्यर्थः ॥ १०० ॥ १०२ ॥

रा० टी०—रावणमर्हति । विभीषणः रावणं संस्कारमिच्छन्नारेभे ॥ १०३ ॥

रा० टी०—तत्प्रकारमाह—स इत्यादिभिः । विभीषणः स्वयं प्रविश्य पुरीं लङ्कां राक्षसैर्निर्यापयति यथाविधि मेधाध्वर्यया ॥ १०४ ॥

गो० टी०—रावणमर्हतीति । अत्र हेतुः भ्राता त्वत्संस्कारयोग्यात् आत्मनोऽनभिमतम् ॥ १०३ ॥

१०४–१०७] ति० टी०—निर्यापयति । यमेति शेषः ॥ १०४–१०७ ॥

१०८] ति० टी०—मुक्ता मालाविशेषाः । स्तुतिभिर्वेदैरितिहासैर्मिश्रितमभिनन्दनमिति रावणं शिबिकायामारोप्य द्विजा वयमिति शेषः ॥ १०८ ॥

रा० टी०—शकटानीति । राक्षसो विभीषणः शकटानि निर्यापयति [illegible] लोकद्वयसंबन्धि ॥ १०४ ॥ १०५ ॥

रा० टी०—आजगामेति । स विभीषणः मुहूर्तेनाजगाम तत्रोत्तरत्र मालयता सार्धं क्रियां चकार ॥ १०७ ॥

१०८ टी०—तत्प्रकारमाह—तूर्णमारोप्येति । विविधैस्तुष्टुवुश्चाभिनन्दितमिति रावणमारोप्य शिबिकामारोप्य अश्रुवर्णमुखा द्विजाः सामवेदिनो ब्राह्मणाः इति शेषः ॥ १०८ ॥

१०९–११०] ति० टी०—पताकाभिरिति चित्रितां शिबिकां शतकैरुत्थाप्य विभीषणादयः राक्षसानि पूर्वोक्ता दक्षिणामुखाः क्रमशोऽग्निमार्गं भेजिरे ॥ १०९ ॥ ११० ॥

रा० टी०—पताकाभिरिति । चित्राभिः पताकाभिः चित्रितां शिबिकां विभीषणपुरोगमाः राक्षसाः उत्क्षिप्य संवा-

१ दशग्रीव इति गो. पाठः । २ प्राप्तुमर्हति धर्मेणेति गो. पाठः । ३ संस्कारेणानुरूपेण योजयामास रावणमिति गो. पाठः । ४ इत आरभ्य सार्धश्लोकत्रयं गो. पुस्तके न दृश्यते । ५ सौवर्णामिति रा. पा. ।

शरणाभिगताः सर्वे पुरस्तात्तस्य ते ययुः । अन्तःपुराणि सर्वाणि रुदमानानि सत्वरम् ॥ १११ ॥
पृष्ठतोऽनुययुस्तानि प्लवमानानि सर्वतः । रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः ॥ ११२ ॥
चितां चन्दनकाष्ठैश्च पद्मकोशीरचन्दनैः । ब्राह्म्या संवर्तयामासू राङ्कवास्तरणावृताम् ॥ ११३ ॥
[वर्तते वेदविहितो राज्ञो वै पश्चिमः क्रतुः ।]
प्रचक्रू राक्षसेन्द्रस्य पितृमेधमनुत्तमम् । वेदिं च दक्षिणप्राचीं यथास्थानं च पावकम् ॥ ११४ ॥
पृषदाज्येन संपूर्णं स्रुवं स्कन्धे प्रचिक्षिपुः । पादयोः शकटं प्रापुरूर्वोश्चोलूखलं तदा ॥ ११५ ॥
दारुपात्राणि सर्वाणि अरणिं चोत्तरारणिम् । दत्त्वा तु मुसलं चान्यं यथास्थानं विचक्रमुः ॥ ११६ ॥

थ कामानि गृह्य गृहीत्वा च दक्षिणार्णमुखाः सन्तः भेजिरे जग्मुरित्यर्थः साहस्रोक एकान्वयी ॥ १०९ ॥ ११० ॥

रा० टी०–अथेति । अथवुसमीरितास्तेऽग्रयः दीप्यमाना बभूवुरिति शेषः ॥ अथ पृथक् शरणाभिगताः कुण्डस्थास्तेऽग्रयः तस्य रावणस्य पुरस्तात् ययुः ॥ १११ ॥

१११] नि० टी०–शरणाभिगता आधारस्थानकुण्ड स्थाः ॥ १११ ॥

११२] नि० टी०–प्लवमानानि चलनाभ्यासाभावात्त्वरया च प्लवमानानीव ॥ ११२ ॥

रा० टी०–अन्तरिति । सर्वतः प्लवमानानि अन्तःपुराणि पृष्ठतोऽनुययुः ॥ ११२ ॥

रा० टी०–रावणमिति । प्रयते देशे रावणं स्थाप्य स्थापयित्वा भृशदुःखिताः विभीषणप्रभृतयः चन्दनकाष्ठादिभिः निर्मितां रङ्कुः कृष्णसारमृगः तस्यैव शंकते तदेव स्तरः स्तरणं तेन संवृतां चितां ब्राह्म्या वेदोक्त्या संवर्तयामासुः संचक्रुः सार्धश्लोक एकान्वयी ॥ ११३ ॥

११३] नि० टी०–पद्मकेति तन्यवद्यम् । ब्राह्म्या वेदमार्गानुगतक्रियया । रङ्कुः कृष्णसारमृगस्तत्संबन्धि राङ्कवं नेनास्तरणेनास्तृतां चितां संवर्तयामासुश्चक्रुः ॥ ११३ ॥

गो० टी०–चितामिति । चन्दनकाष्ठानां संबन्धिनीम् । पद्मकमुशीरं च गन्धद्रव्यं प्रसिद्धम् । ब्राह्म्या वेदोक्तप्रक्रियया । रङ्कुः मृगविशेषः तत्संबन्धि चर्म राङ्कवं तदेवास्तरणं तेनास्तृतां चितां संवेशयाञ्चक्रुः गोपयाञ्चक्रुः । रावणस्य ऋत्विज इति च शेषः ॥ ११३ ॥

११४] नि० टी०–पितृमेधं पितृमेधविहितं कर्म प्रचक्रुः। तत्प्रकारः—वेदिं चेत्यादि । दक्षिणाप्राचीम् । चितायां दक्षिणाप्रान्देश इत्यर्थः । यथा स्थानं पावकं च प्रचक्रुः । 'दक्षिणपूर्वदेशे आहवनीयं निदधाति, उत्तरपश्चिमे गार्हपत्यम्, दक्षिणपश्चिमे दक्षिणाग्निम् ' इति सत्रोक्तस्थानमनतिक्रम्येत्यर्थः ॥ ११४ ॥

रा० टी०–प्रचक्रुरिति । राक्षसेन्द्रस्य पितृमेधं पितृमेधविहितक्रियां चक्रुः तदाकारमाह दक्षिणप्राचीं चितायाः दक्षिणपूर्वदेशे वेदीं चक्रुः यथास्थानं विहितस्थानमनतिक्रम्य पावकं प्रचक्रुः तथा च शास्त्रं दक्षिणपूर्वदेशे आहवनीयं दधाति उत्तरपश्चिमे गार्हपत्यं दक्षिणपश्चिमे दक्षिणाग्निमिति ॥ ११४ ॥

गो० टी०–वर्तत इति । पश्चिमः क्रतुः अन्त्येष्टिः । वर्तते अवर्तत । चितानिर्माणानन्तरमन्तिमेष्टि चक्रुरित्यर्थः । राक्षसेन्द्रस्य पितृमेधं पितृमेधसंस्कारं च, अनुक्रमं यथाक्रमम् प्रचक्रुः ॥ १०९ ॥

गो० टी०–संप्रदेर्णोलं संस्कारं प्रपद्यायति–वेदिमित्यादिना । दक्षिणप्राच्यां चितायां आग्नेयभागे, वेदिं तत्र यथास्थानं पावकं च चेतार्ग्निं च प्रचक्रुरित्यनुषज्यते । वेद्यां पश्चिमे गार्हपत्यं प्राच्यामाहवनीयम् दक्षिणतो दक्षिणाग्निं च स्थापयामासुरित्यर्थः । प्रपदाज्येन दधिमिश्रघृतेन । पृषदाज्यं मध्याज्यमित्यमरः । संपूर्णं स्रुवं होमपात्रं प्रचिक्षिपुः प्रतिपस्यर्थं चितायामिति शेषः ॥ १०९ ॥

११५] नि० टी०–पृषदाज्येन मध्याज्येन संपूर्णमेवोपलक्षितं स्रुवं स्कन्धे स्कन्धदेशे प्रचिक्षिपुः । यद्यपि ' नाभिके स्रुवौ ' इत्यापस्तम्बेनोक्तम्, तथापि मन्त्रान्तरात्स्कन्धेऽपि निक्षेपः स्रुवस्य बोध्यः । तथा पादयोः शकटमूर्वोरुलूखलमिति च मन्त्रान्तरादेव बोध्यम् ॥ ११५ ॥

११६] नि० टी० दारुपात्रादिसर्वोक्तस्थानस्थानं दत्त्वान्यं मुसलं आत्मीयमुसलं यथास्थानं दत्त्वा च विचक्रमुः पितृमेधं चक्रुः ॥ ११६ ॥

रा० टी०–पृषदेति । पृषदाज्येन सहितेन आज्येन घृतेन संपूर्णं स्रुवं स्कन्धे प्रचिक्षिपुः पादयोश्शकटमूर्वोरुलूखलं च प्रापुः प्रचिक्षिपुः ॥ ११५ ॥

रा० टी०–दारुपात्राणीति । दारुपात्रादीनि अन्यं मुसलं च यथास्थानं दत्त्वा विचक्रमुः पितृमेधं चक्रुः ॥ ११६ ॥

गो० टी०–यज्ञपात्रान्तराणामपि प्रतिपत्तिं दर्शयति—पादयोरित्यादिना श्लोकत्रयेण ॥ शकटं सोमराजानयनशकटम् । उलूखलं यज्ञीयवीह्यवहननसाधनम् । अन्यत् स्थाल्यादिकम् दारुपात्रादिकं यथास्थानं दत्त्वा । शास्त्रदृष्टेन वेदविहितेन, महर्षिविहितेन स्मृतिपुराणेन विधिना क्रमेण, तत्र

१ संवृतामिति गो. पाठः । २ वेद्यां चक्रुरिति गो. पाठः । ३ संवृतामिति रा. पाठ. । ४ इदमर्धमधिकं गो. पाठे । ५ क्रममिति गो. पाठः । ६ दक्षिणप्राच्यामिति गो. पाठः । ७ सर्वे इति गो. पाठः । ८ अन्तरूर्वोरुलूखलमिति गो. पाठः । ९ अन्यदिति गो. पाठः । १० विचक्षणा इति गो.पाठः ।

शास्त्रदृष्टेन विधिना महर्षिविहितेन च । तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः ॥ ११७ ॥
परिस्तरणिकां राज्ञो घृताक्तां समवेशयन् । गन्धैर्माल्यैरलंकृत्य रावणं दीनमानसाः ॥ ११८ ॥
विभीषणसहायास्ते वस्त्रैश्च विविधैरपि । लाजैरवकिरन्ति स्म बाष्पपूर्णमुखास्तथा ॥ ११९ ॥
सै ददौ पावकं तस्य विधियुक्तं विभीषणः । स्नात्वा चैवार्द्रवस्त्रेण तिलान्दर्भविमिश्रितान्॥ १२० ॥
उदकेन च संमिश्रान्प्रदाय विधिपूर्वकम् । [प्रदाय चोदकं तस्मै मूर्ध्ना चैनं नमस्य च ॥]
ताः स्त्रियोऽनुनयामास सान्त्वयित्वा पुनः पुनः ॥ १२१ ॥
गम्यतामिति ताः सर्वा विविशुर्नगरं ततः । प्रविष्टासु पुरीं स्त्रीषु राक्षसेन्द्रो विभीषणः ॥
रामपार्श्वमुपागम्य संमतिष्ठद्विनीतवत् ॥ ॥ १२२ ॥
रामोऽपि सह सैन्येन ससुग्रीवः सलक्ष्मणः । हर्षं लेभे रिपुं हत्वा वृत्रं वज्रधरो यथा ॥ १२३ ॥

तैतो विमुक्त्वा सशरं शरासनं महेन्द्रदत्तं कवचं स तन्महत् ।
विमुच्य रोषं रिपुनिग्रहाच्चितो रामः सौ मौम्यत्वमुपागतोऽरिहा ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकादशाधिकशततमः सर्गः ॥ १११ ॥

चितासमीपे, मेध्यं पवित्रम्, पशुं छागं, हत्वा । हुत्वेत्यं होमपर्यन्तस्याप्युपलक्षणम् । परिस्तरणिकां परिस्तरणानि आस्तरणवस्त्राणि । समवेशयन् विधिपुरस्सरमस्थापयन् ॥ ११७-११९ ॥

११७] ति० टी०—शास्त्रदृष्टेन श्रुतिदृष्टेन महर्षिविहितेन कल्पसूत्रकृदृषिविहितेन ॥ ११७ ॥

११८] ति० टी०—परिस्तीर्यते सुखमनयेति परिस्तरणिका वपा तां राक्षसेन्द्रस्य मुखे समवेशयन् । 'वपाया मुखं प्रोणोति' इति सूत्रात् । तीर्थन्तु 'अनुस्तरणिकां राजन्' इति पठित्वानुस्तरणिकीं राजन्यौ तामालभ्य नखानिर्णेनं यत्र मांसमास्तृतवन्त इत्यर्थः । 'मृतायानुस्तरणीं धत्ते' इति श्रुतेरित्याह ॥ ११८ ॥

रा० टी०—तदाकारमाह—शास्त्रेति । तत्र चितास्थौ शास्त्रदृष्टेन महर्षिभिर्विहितेनोपविष्टेन च विधिना मेध्यं पशुं हत्वा घृताक्तां परिस्तरणिकां वपां राक्षसेन्द्रस्य राज्ञो रावणस्य समवेशयन् सार्धश्लोक एकान्वयी ॥ ११७ ॥ ११८ ॥

रा० टी०—गन्धैरिति । विभीषणसहायास्ते भक्ताः रावणं गन्धादिभिरलंकृत्य लाजैरवकिरन्ति स्म सार्धश्लोक एकान्वयी ॥ ११९ ॥

गो० टी०—अथ शवालङ्कारमाह—गन्धैरित्यादि सार्धश्लोकमेकं वाक्यम् । अवकिरन्ति चितामिति शेषः ॥ ११०-१११

११९-१२०] ति० टी०—वस्त्रैश्चेति । अलंकृत्येत्यनुकर्षः ॥ ११९ ॥ १२० ॥

रा० टी०—स इति । विभीषणः विधियुक्तं यथा भवति तथा पावकं ददौ अग्निं प्रथक् स्नात्वेति । आर्द्रवस्त्रेण तिलान् विधिपूर्वकं प्रदाय तस्थाविति शेषः ॥ १२० ॥

गो० टी०—अथ संस्कारमाह—ददाविति । तस्य तस्मै रावणाय । विधियुक्तं मन्त्रपूर्वकम् ॥ ११० ॥

गो० टी०—स्नात्वेत्यादि । गम्यतामित्यवितिपर्यन्तं त्रिष्टुबिति श्लोकद्वयमेकान्वयम् ॥ दर्भोदकमिश्रितान् तिलान् प्रेतावहनार्थं भूमौ प्रदाय तत्र तस्मै रावणाय पुनः पुनः दत्त्वा ताः स्त्रियः गम्यतामिति पुनः पुनः सान्त्वयित्वा, अनुनयामास दूतीः प्राहिणोत् ॥ ११९ ॥ १२० ॥

१२१] ति० टी०—विधिपूर्वकं प्रदाय । स्थित इति शेषः । तत्र 'जित्वा रावणं दुष्टा रामेणाक्लिष्टकर्मणा । तस्यायुर्दे महाभागे पञ्चभूतानि रावणम् ॥ शरीरधातवो वस्य भीमं रुधिरमेव च । लोकत्रयाक्षिनिस्रावा न च मन्माथदहनम् ॥' इति महाभारतस्थ उक्तस्तेन कस्य वाल्मीकिना दाहसंस्कारानन्तरपूर्वकं दाह उक्त इति चेत्, तस्य रामायणवेलोर्णवत्रियेऽन्यकल्पालंकारपरत्वादिति वदन्ति ॥ १२१ ॥

रा० टी०—ता इति । सान्त्वयित्वा गम्यतामित्युक्त्वा येति शेषः स्त्रियः अनुनयामास विभीषण इति शेषः अत एव ताः स्त्रियो नगरं विविशुः ॥ १२२ ॥

१२२-१२४] ति० टी०—गम्यतामित्युपाचेत्यर्थः । रावणपत्नीरिति शेषः ॥ १२२-१२४ ॥

अयं संस्कारो नवम्यामेव सार्धकाले ॥

इति श्रीरामानिरामे श्रीरामीये रामायणालोके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकादशाधिकशततमः सर्गः ॥ १११ ॥

रा० टी०—प्रविष्टास्विति । स्त्रीषु पुरीं प्रविष्टासु विभीषणः रामपार्श्वमुपागम्य विनीतवत् विनीतिविशिष्टं यथा भवति तथा अतिष्ठत् ॥ १२२ ॥

---

१ चावेति गो. पाठः । २ ददौ चेति गो. पाठः । ३ दूतेति गो. पाठः । ४ इदमर्धमधिकं गो. पाठे । ५ सान्त्वमुक्तेति गो. पाठः । ६ तदेति गो. पाठः । ७ च सर्वासु राक्षसीष्विति गो. रा. पाठः । ८ तदेति गो. रा. पाठः । ९ यथा वृत्रं शतक्रतुरिति गो. रा. पाठः । १० इदं पद्यं गो. पुस्तके न दृश्यते । ११ स्थिति रा. पाठः ।

द्वादशाधिकशततमः सर्गः ।

विभीषणस्य लङ्काराज्ये रामानुमतलक्ष्मणकृताभिषेकः अशोकवनिकानिवासिमैथिल्यै रावणवधस्यकुशलनिवेदनाय रामेण हनुमतः प्रेषणं च ।

ते रावणवधं दृष्ट्वा देवगन्धर्वदानवाः । जग्मुः स्वैः स्वैर्विमानैस्ते कथयन्तः शुभाः कथाः ॥ १ ॥
रावणस्य वधं घोरं राघवस्य पराक्रमम् । सुयुद्धं वानराणां च सुग्रीवस्य च मन्त्रितम् ॥ २ ॥
अनुरागं च वीर्यं च मौरुतेर्लक्ष्मणस्य च । पतित्वैतात्वं सीताया हनूमति पराक्रमम् ॥ ३ ॥
कथयन्तो महाभागा जग्मुर्हृष्टा यथागतम् । राघवस्तु रथं दिव्यमिन्द्रदत्तं शिखिप्रभम् ॥ ४ ॥
अनुज्ञाप्य महाबाहुर्मातलिं प्रत्यपूजयत् । राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः ॥ ५ ॥
दिव्यं तं रथमास्थाय दिवमेवोत्पपात ह । तस्मिंस्तु दिवमारूढे सरथे रथिनां वरः ॥ ६ ॥
राघवः परमप्रीतः सुग्रीवं परिषस्वजे । परिष्वज्य च सुग्रीवं लक्ष्मणेनाभिवादितः ॥ ७ ॥
पूज्यमानो हरिगणैराजगाम बलालयम् । अथोवाच स काकुत्स्थः समीपपरिवर्तिनम् ॥ ८ ॥

रा० टी०–राम इति । रामः हर्षं लेभे ॥ १२३ ॥

रा० टी०–तत इति । रामः महेन्द्रदत्तं शरासनं कवचं च विभुषयित्वा विभुज्य रिपुनिग्रहात् रिपुनिग्रहं संपाद्य सेवं सेनाभासं विभुज्य सुसौम्यत्वमुपागतः ॥ १२४ ॥

इति श्रीमद्गहगीर्वाणीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

गो० टी०–ताः सर्वा इत्युत्तरवाक्यादि । रामपार्श्वमुपागम्येति । रणश्रमेण हनत्वेन रावणस्याशौचाभावादागतः, अत ध्योत्तरदिने राज्याभिषेकोऽयोध्यागमनं चानुष्ठितम् । पथमायां रावणसंस्कारः ॥ ११५ ॥ ११६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

१] ति० टी०–ते रावणेति ॥ १ ॥

रा०टी०–रावणवधानन्तरकार्यकि इत्यन्तमाह–ते इत्यादिभिः । शुभाः हृद्याः कथयन्तः ते देवादयः स्वैः स्वैर्विमानैर्जग्मुः ॥ १ ॥

गो० टी०–अथ विभीषणाभिषेकः–ते रावणवधमित्यादि । अत क्रियाभेदात्सप्तदशद्वयम् ॥ १ ॥

२] ति० टी०–सुग्रीवस्य मन्त्रितं सेनासंमेलनसीताऽन्वेषणादिसर्वकार्यसाधकं मन्त्रमामर्थ्यम् ॥ २ ॥

३] ति० टी०–मारुतिलक्ष्मणयो रामेऽनुरागं वीर्यं च ॥ ३ ॥

रा० टी०–कथान्तरूपं बोधयन्नाह–रावणस्येति । रावणस्य वधादि कथयन्तः महाभागा देवादयो जग्मुः श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–शुभाः कथाः कथयन्त इत्यर्थेन विवरणम्–रावणस्य वधमित्यादि । मन्त्रितं मन्त्रम । सौमित्रेरिति तत्भ्रातुः श्लाघनव्यञ्जनाय, अस्य जननी हि भाग्यवतीति२॥३॥

४] ति० टी०–इन्द्रदत्तमिन्द्रप्रेषितम ॥ ४ ॥

५–६] ति० टी०–अनुज्ञाप्य रथं नयेत्याज्ञां दत्वा । यद्यपि भारते सीताया आगमनोत्तरं रथादवतरणं भगवत उक्तम, तथापि तत्र पौर्वापर्यक्रमे तात्पर्याभावात्र क्षतिः॥५॥६॥

रा० टी०–राघव इति । राघवः रथमनुज्ञाप्य स्वर्गमनं नियुज्य मातलिं प्रत्यपूजयत् ॥ ४ ॥

रा० टी०–राघवेणेति । मातलिः दिवमारुरोह ॥ ५ ॥

रा० टी०–तस्मिन्निति । राघवस्सुग्रीवं परिषस्वजे ॥६॥

गो० टी०–राघवस्त्विति । इन्द्रदत्तम् इन्द्रप्रेरितम् । शिखिप्रभम । अग्निप्रभम । प्रत्यपूजयत् उपचचार ॥ ४–६ ॥

७] ति० टी०–लक्ष्मणेनाभिवादितो राघवः ॥ ७ ॥

रा० टी०–परिष्वज्येति । हरिश्रेष्ठैः पूज्यमानो राघवः बलालयं सेनासंनिवेशस्थानमाजगाम ॥ ७ ॥

गो० टी०–परिष्वज्येति । प्रचोदितः विज्ञप्तः । बलालयं शिबिरम ॥ ७ ॥

८] ति० टी०–बलालयं सेनानिवेशस्थानम् । अथ त्रिभिर्दिनैर्दशरात्रैकादशाहद्वादशाहकर्तव्यक्रियासमाप्तौ । चतुर्थेऽहनीत्यर्थः । नात्र दशाहमाशौचमिति भ्रमितव्यम् । ' उत्तैरा-हवे शस्त्रैः क्षत्रधर्ममृतस्य तु । सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ॥ ' इति मनुस्मृतेः ॥ ८ ॥

रा० टी०–अब्रवीदिति । रामो लक्ष्मणमब्रवीत् ॥ ८ ॥

गो० टी०–अब्रवीदिति । सत्यसंपन्नत्वादिविशेषणं यथोक्तकारित्वद्योतनाय ॥ ८ ॥

---

१ सौमित्रेरिति गो. पाठः । २ इदमर्धं गो. रा. पुस्तकयोर्न दृश्यते । ३ अनुज्ञाय महाभाग इति गो. पाठः । ४ आरुरोह स इति गो. रा. पाठः । ५ सुरसारथिसत्तम इति गो. रा. पाठः । ६ प्रचोदित इति गो पाठः । ७ श्रेष्ठैरिति गो. रा. पाठः । ८ अब्रवीच्च तदा राम इति गो. पाठः ।

सौमित्रिं मित्रसंपन्नं लक्ष्मणं शुभलक्षणम् । विभीषणमिमं सौम्य लङ्कायामभिषेचय ॥ ९ ॥
अनुरक्तं च भक्तं च तथा पूर्वोपकारिणम् । एष मे परमः कामो यदिमं रावणानुजम् ॥ १० ॥
लङ्कायां सौम्य पश्येयमभिषिक्तं विभीषणम् । एवमुक्तस्तु सौमित्री राघवेण महात्मना ॥ ११ ॥
तथेत्युक्त्वा सुसंहृष्टः सौवर्णं घटमाददे । तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान् ॥ १२ ॥
व्यादिदेश महासत्त्वैः समुद्रसलिलं तदा । अतिशीघ्रं ततो गत्वा वानरास्ते मनोजवाः ॥ १३ ॥
आगतास्तु जलं गृह्य समुद्राद्वानरोत्तमाः । तत्रस्थैकं घटं गृह्य संस्थाप्य परमासने ॥ १४ ॥
घटेन तेन सौमित्रिरभ्यषिञ्चद्विभीषणम् । लङ्कायां राक्षसां मध्ये राजानं रामशासनात् ॥१५ ॥
विधिना मन्त्रदृष्टेन सुहृद्गणसमावृतः । अभ्यषिञ्चंस्तदा सर्वे राक्षसा वानरास्तथा ॥ १६ ॥
प्रहर्षमतुलं गत्वा तुष्टुवुः राममेव हि । तस्यामात्या जहर्षिरे भक्ता ये चास्य राक्षसाः ॥ १७ ॥
दृष्ट्वाभिषिक्तं लङ्कायां राक्षसेन्द्रं विभीषणम् । राघवः परमां प्रीतिं जगाम सहलक्ष्मणः ॥ १८ ॥

९-११] ति० टी०—लङ्कायामभिषेचय । राज्ञीत्यर्थः । सत्ये साक्षादिति शेषः ॥ ९-११ ॥

रा० टी०—तदाकारमाह विभीषणमिति । लङ्कायामभिषिक्तं विभीषणं पश्येयमेषः नोऽस्माकं यतः परः शत्रोरिति शेषः अतः अनुरक्तं मद्विषयकानुरागवन्तमत एव भक्तं मयि प्रीत्यनुकूलव्यापारवन्तं विभीषणं लङ्कायामभिषेक्तुं लोकान्तरमेतान्वयि ॥ ९ ॥ १० ॥

रा० टी०—एवमिति । सौमित्रिः तथेत्यवश्यं सौम्ये घटमाददे ॥ ११ ॥

गो० टी०—विभीषणमित्यादिश्लोकद्वयमेकान्वयम् ॥ लङ्कायामभिषेचय लङ्कायां गत्वाभिषेचय । समुद्रस्य एव लङ्काराज्याभिषेके कृतेपि पुनर्विधानं रावणस्तिरस्कारनिमित्तो धर्म । अनुरक्तमित्यनेन मित्रकृत्यमुक्तम् । भक्तमित्येन स्वामिकृत्यम् । उपकारिणमित्यनेनानुरागभक्त्योः कार्यसंबन्धमुक्तम् । परमः काम इत्यनेन शरणागतविभीषणाभिमतरिपुरणमेव विजयस्य प्रधानप्रयोजनमित्युक्तम् ॥ ९ ॥ १० ॥

गो० टी०—एवमिति । घटमिति जात्येकवचनम् ॥ ११ ॥

१२] ति० टी०—तं घटं हस्ते इति जात्येकवचनम् । मनोजवान्वानरान्व्यादिदेश ॥ १२ ॥

रा० टी०—तत्प्रयोजनमाह तामिति । तं सौवर्णं घटं वानरेन्द्राणां हस्ते दत्त्वा समुद्रात् सलिलानये मनोजवान् वानरानादिदेश ॥ १२ ॥

गो० टी०—तमिति । आनये आनयने । हस्त इत्यत्रापि जात्येकवचनम् । वानरेन्द्राणामिति बहुवचनप्रयोगात् ॥ १२ ॥

१३] ति० टी०—समुद्रसलिलं तदानयनम् ॥ १३ ॥

१४-१५] ति० टी०—समुद्रात् । चतुःसमुद्रेभ्य इत्यर्थः । परमासने विभीषणं संस्थाप्य तमभ्यषिञ्चत् ॥ १४ ॥ १५ ॥

१६] ति० टी०—मन्त्रदृष्टेन वेददृष्टेन ॥ १६ ॥

रा० टी०—अतीति । वानरोत्तमाः वानराः अतिशीघ्रं गत्वा तज्जलं गृह्य गृहीत्वा आगताः ॥ १३ ॥

रा० टी०—तत्र इति । तत्रोत्तरसमुद्रे घटं गृह्य गृहीत्वा परमासने संस्थाप्य तेन घटेन तज्जलेन विभीषणमभ्यषिञ्चत् ॥ १४ ॥

रा० टी०—तदेव विभिनक्ति लङ्कायामिति । सुहृद्गणैस्समावृतं लङ्कायां स्वस्य मध्ये आगतमिति शेषः विभीषणं मन्त्रदृष्टेन वेदोक्तेन विधिना रक्षसां राजानं रामशासनात् रामाज्ञयेति शेषः अभ्यषिञ्चत् अत एव अमात्यास्तस्य भक्ताश्च ये राक्षसा जहर्षिरे तोषेणोत्फुल्लमुखा बभूवुरित्यन्वयः ॥ १५ ॥ १६ ॥

गो० टी०—तुष्टुवुरिति । आदरार्थं बहुवचनमित्यर्थः । इति हेतुप्रकरणप्रकाशादिसमाप्तिपर्यन्तमेकान्वयम् । वानरा वानरोत्तमा इति (वानरोत्तमाश्चेति) वानरपदव्याख्यानाय । समुद्रात् समुद्रेभ्यः ॥ १३ ॥ १४ ॥

गो० टी०—लङ्कायामित्यादिसार्धश्लोक एकान्वयः । अत्र रामादिशासनानन्तरमेव लक्ष्मणो विभीषणादिभिः सह लङ्कां प्रविश्य सानित्यवगम्यते । मन्त्रदृष्टेन मन्त्रेषु वेदेषु दृष्टेन स्पष्टमवगम्यमानेन, विधिना प्रकारेण । सुहृद्गणसमावृतमित्यनेन रामाज्ञया अभिषेकमहोत्सवान् । परमासनमित्यनेन रामैकदुर्ग एवासक्तोऽद्यित्यवगम्यते । अत एवैकदुर्ग इत्युक्तम् ॥१५॥१६॥

१७-१८] ति० टी०—भक्ता ये चास्य विभीषणस्यामात्यव्यतिरिक्ता भक्तास्तेऽपीत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०—तुष्टुवुरिति । राघवः परमां प्रीतिमाजगाम॥१७॥

रा० टी०—स इति । विभीषणः रामदत्तं राज्यं प्राप्य प्रकृतयः प्रकृतीः प्रजाः सान्त्वयित्वा रामसुपागमत् ॥ १८ ॥

गो० टी०—स इति । प्रकृतीः अमात्यप्रभृतीन्, सान्त्वयित्वा पुरमित्यादिविताजशोकापनोदनं कृत्वा रामसुपागमत्। लक्ष्मणेन सहेति शेषः ॥ १७ ॥ १८ ॥

१ सत्यसंपन्नमिति गो. सत्यसंपन्नमिति रा. पाठः । २ दीप्तमेजसमिति गो. रा. पाठः । ३ त्वैवेति गो. रा. पाठः । ४ यदीममिति रा. पाठः । ५ स्थिति गो.रा.पा. । ६ दीति गो.रा. पुस्तकयोर्नास्ति । ७ सत्त्वान्समुद्रास्तत्रिकानये इति गो.रा.पा. । ८ इतीति गो. पाठः। ९ कृतमिति गो.रा. पाठः । १० अभ्यषिञ्चत्स धर्मात्मा शुद्धात्मानं विभिषणमिति गो. रा. पाठः । ११ इदं पद्यं गो. रा. पुस्तकयोर्न दृश्यते । १२ इदमर्धं गो. पुस्तके न दृश्यते ।

[स तेद्राज्यं महत्प्राप्य रामदत्तं विभीषणः ।]
सान्त्वयित्वा प्रकृतयस्ततो राममुपागमत् । दिव्यक्षतान्मोदकांश्च लाजाः सुमनसस्तथा ॥ १९ ॥
आजह्रुरथ संहृष्टाः पौरास्तस्मै निशाचराः । स तान्गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत् ॥ २० ॥
माङ्गल्यं मङ्गलं सर्वं लक्ष्मणाय च वीर्यवान् । कृतकाय समृद्धार्थं दृष्ट्वा रामो विभीषणम् ॥
प्रतिजग्राह तत्सर्वं तस्यैव प्रतिकाम्यया ॥ ॥ २१ ॥
ततः शैलोपमं वीरं प्राञ्जलिं प्रणतं स्थितम् । उवाचेदं वचो रामो हनूमन्तं प्लवङ्गमम् ॥ २२ ॥
अनुज्ञाप्य महाराजमिमं सौम्य विभीषणम् । [गच्छ सौम्यपुरीं लङ्कामनुज्ञाप्य यथाविधि ॥]
प्रविश्य नगरीं लङ्कां कौशलं ब्रूहि मैथिलीम् ॥ २३ ॥
वैदेह्यै मां च कुशलं सुग्रीवं च सलक्ष्मणम् । आचक्ष्व वदतां श्रेष्ठ रावणं च हतं रणे ॥ २४ ॥
प्रियमेतदिहाख्याहि वैदेह्यास्त्वं हरीश्वर । प्रतिगृह्य तु संदेशमुपावर्तितुमर्हसि ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वादशाधिकशततमः सर्गः ॥ ११२ ॥

१९] ति० टी०—प्रकृतयः प्रकृतीः स्वपुरराष्ट्रप्रजाः॥१९॥

२०] ति० टी०—पौरास्तस्मै विभीषणायाजह्रुः । राममभीषगमनसंबन्धायामिति शेषः । तानुपहृतान्पदार्थान् ॥ २० ॥

रा० टी०—अक्षतानिति । निशाचराः तस्मै विभीषणाय अक्षतादीन् आजह्रुः ॥ १९ ॥

रा० टी०—स इति । स विभीषणः तान् अक्षतादीन् गृहीत्वा माङ्गल्यं मंगलार्हं सर्वं तद्भवति मंगलं यथा भवति तथा राघवाय रामाय लक्ष्मणाय च न्यवेदयत् ॥ २० ॥

गो० टी०—स तानिति । मङ्गलमर्हतीति मङ्गल्यम् । मङ्गलप्रयोजनमित्यर्थः । मङ्गलं हरिद्रादिमङ्गलद्रव्यम्, सर्वम् उक्ताक्षतादिभिन्नं, रामाय लक्ष्मणाय च न्यवेदयत् ॥ १९ ॥

२१] ति० टी०—लक्ष्मणाय च न्यवेदयत् । प्रतिकाम्या इच्छा ॥ २१ ॥

रा० टी०—कृतेति । रामः विभीषणं समृद्धार्थं दृष्ट्वा तस्य विभीषणस्यैव प्रतिकाम्यया इच्छया तद्विभीषणसमर्पितं सर्वं प्रतिजग्राह ॥ २१ ॥

गो० टी०—कृतकार्यमिति । तस्यैव प्रियकाम्यया न तु स्वभोगेच्छया ॥ २० ॥ २१ ॥

२२] ति० टी०—ततोऽधिकोत्तरं दिवसे तस्य प्रजासान्त्वनोत्तरं रामपूजार्थमागते विभीषणे तत्पूजां कृत्वा नगरं गते सति । सप्तमे दिन इत्यर्थः ॥ २२ ॥

रा० टी०—तत इति । राघवो हनूमन्तमब्रवीत् ॥ २२ ॥

२३-२४] ति० टी०—अनुज्ञाप्य । पुराधिपतित्वात्कर्तव्यार्थं तदनुज्ञापेक्षणम् । आद्यौ सीतां प्रति कुशलप्रश्नः, ततः स्वकुशलनिवेदनम् ॥ २३ ॥ २४ ॥

२५] ति० टी०—संदेशम् । वैदेह्याः प्रतिसंदेशमित्यर्थः ॥ २५ इति श्रीमन्निरामे श्रीरामभक्ते रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वादशाधिकशततमः सर्गः ॥ ११२ ॥

रा० टी०—तदाकारमाह अनुमान्येत्यादिभिः महाराजं विभीषणं यथाविधि अनुमान्य सत्कृत्य लंकां गच्छ तत्र अनुज्ञाप्य विभीषणाज्ञां गृहीत्वा रावणगृहं प्रविश्य विजयेन अभिनन्द्य सम्यक् सन्दर्शयित्वा वैदेह्याः समीपे मां कुशलिनं मया हतं रावणं च आचक्ष्व सार्धश्लोकद्वयमेकान्वयि ॥ २३ ॥ २४ ॥

रा० टी०—प्रियमिति । एतद् प्रियमुदाहृत्य उक्त्वा वैदेह्याः संदेशं प्रतिगृह्य उपावर्तितुं शीघ्रमागन्तुमर्हसि ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुर्दशाधिकशततमः सर्गः ॥ ११४ ॥

गो० टी०—अनुमान्येत्यादिसार्धश्लोकत्रयमेकान्वयम् ॥ विभीषणमनुमान्य लङ्कां गच्छ, विभीषणमनुज्ञाप्य रावणगृहं प्रविश्य, विजयेन विजयकथनेन, अभिनन्द्य सीतां तोषयित्वा, वैदेह्यै मां कुशलिनमाचक्ष्वेति संबन्धः । संदेशं सीतावाचिकम् ॥ २२-२५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

---

१ इदमर्धमधिकं गो. रा. पुस्तकयोः । २ स सान्त्वयित्वा प्रकृतीरिति रा. । प्रकृतीः सान्त्वयित्वा चेति गो. पाठः । ३ अक्षतान्मोदकांल्लाजान् दिव्याः सुमनसस्तेति गो. रा. पाठः । ४ मंगल्यामिति गो. रा. पाठः । ५ पार्श्वत इति गो. पुरत इति रा. पाठः । ६ अब्रवीद्राघवो वाक्यमिति गो. । ७ मान्योति गो. रा. पाठः । ८ इदमर्धमधिकं गो. रा. पुस्तकयोः । ९ रावणगृहं विजयेनाभिनन्द्येति गो. रा. पाठः । १० वैदेह्यै मां कुशलिनमिति गो. मां कुशलिनमिति रा. पाठः । ११ ससुग्रीवमिति गो. रा. पाठः । १२ जगतामिति गो. पाठः । १३ मया हतमिति गो. रा. पाठः । १४ उदाहृत्येति गो. रा. पाठः । १५ मैथिल्या इति गो. रा. पाठः । १६ चेति गो. रा. पाठः ।

त्रयोदशाधिकशततमः सर्गः ।

राघवप्रहितो मारुतिर्लङ्कां प्रविश्य विभीषणानुज्ञातोऽशोकवनिकां गत्वा प्रणम्य वैदेहीं रामादीनां कुशलं रावणवधं चाकथयत तया तु दृष्ट्वा भर्तारं कदा पश्येयमित्यादि पृष्टो हरिरचिरादेव पश्यसीत्युक्त्वा राघवमुपाजगाम ।

इति ब्रुवति सम्प्राप्ते हनूमान्मारुतात्मजः । प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ १ ॥
प्रविश्य च पुरीं लङ्कामनुज्ञाप्य विभीषणम् । ततस्तेनाभ्यनुज्ञातो हनूमान्वृक्षवाटिकाम् ॥ २ ॥
संप्रविश्य यथान्यायं सीतया विदितो हरिः । ददर्श मृजया हीनां सातङ्कां रोहिणीमिव ॥ ३ ॥
वृक्षमूले निरानन्दां राक्षसीभिः परीवृताम् । निभृतः प्रणतः प्रह्वः सोऽभिगम्याभिवाद्य च ॥ ४ ॥
दृष्ट्वा समागतं देवी हनूमन्तं महाबलम् । तूष्णीमास्त तदा दृष्ट्वा स्मृत्वा हर्षाभवत्तदा ॥ ५ ॥
सौम्यं तस्याः मुखं दृष्ट्वा हनूमान्प्लवगोत्तमः । रामस्य वचनं सर्वमाख्यातुमुपचक्रमे ॥ ६ ॥
वैदेहि कुशली रामः सुग्रीवः सहलक्ष्मणः । [विभीषणसहायश्च हरीणां सहितो बलैः ।]
कुशलं त्वाह सिद्धार्थो हतशत्रुरमित्रजित् ॥ ॥ ७ ॥
विभीषणसहायेन रामेण हरिभिः सह । निहतो रावणो देवी लक्ष्मणेन च वीर्यवान् ॥ ८ ॥

१–२] ति० टी०–इति प्रतीति । सीतां प्रति समादिष्ट इत्यर्थः ॥ १ ॥ २ ॥

रा० टी०–मैथिलीं प्रति हनुमत्प्रेषणानन्तरकालिकं वृत्तान्तमाह–इतीत्यादिभिः । हनुमान् निशाचरैः पूज्यमानस्सन् लङ्कां प्रविवेश ॥ १ ॥

गो० टी०–प्रविश्येति । लङ्कां प्रविश्य विभीषणमनुज्ञाप्य तत्रस्थित्यर्थमाज्ञां दत्त्वा तेन विभीषणेन अभ्यनुज्ञातो हनुमान् वृक्षवाटिकां यथान्यायं प्रविश्य सीतया विदितोऽभवदिति शेषः सार्धश्लोक एकान्वयी ॥ २ ॥

गो० टी०–अथ हनुमत्सीतासंवादः—इति प्रतिसमादिष्ट इत्यादि । मारुतात्मज इत्यनेन वेगातिशय उच्यते । पूज्यमान इति । मार्गप्रदर्शनादिभिः पूज्यमानत्वम् ॥ १ ॥

गो० टी०–प्रविश्येत्यादिसार्धश्लोक एकान्वयः । मृजया शरीरसंस्कारेण । सातङ्कां सग्रहपीडाम् ॥ २ ॥

३] ति० टी०–मृजया स्नानादिसंस्कारेण । सातङ्कां ग्रहपीडासहिताम् ॥ ३ ॥

४–६] ति० टी०–निभृतो निश्चलः । प्रह्वो नम्रः । अभिवाद्य च । स्थित इति शेषः ॥ ४–६ ॥

रा० टी०–ददर्शेति । मृजया स्नानादिना हीनां रोहिणीमिव सातङ्कां शंकासहितामत एव निरानंदां राक्षसीभिः परिवृतां वृक्षमूले स्थितामिति शेषः सीतां स हनुमान् ददर्श निभृतः स्वस्थचित्तः शिरसानतः प्रह्वः उच्चारितताल्कालिकशब्दस्सन् अभिवाद्य अभिगम्य तत्समीपं प्राप्य तस्थौ इति शेषः सार्धश्लोक एकान्वयी ॥ ३ ॥ ४ ॥

रा० टी०–दृष्ट्वेति । समागतं हनुमन्तं दृष्ट्वा दुरन्तोत्थेन तत्समाजातेनान्यैः तूष्णीमास्ते दृष्ट्वा सर्वावस्थोल्लोक्य स्मृत्वा त्वमसीत्यमिति संस्मृत्य हर्षाभवत् हर्षाभवदित्येनेन सीतया हर्षमिश्रितमिति सूचितम् ॥ ५ ॥

रा० टी०–सौम्यमिति । हनुमान् तस्याः सीतायाः सौम्यं सुखं दृष्ट्वा रामस्य वचनमाख्यातुमुपचक्रमे ॥ ६ ॥

गो० टी०–निभृत इत्यर्धम् । अभिगम्य समीपं प्राप्य अभिवाद्य स्वनाम संकीर्त्य । प्रणतः कृतप्रणामः सन् । निभृतः निश्चलः प्रह्वः प्रकर्षण संकुचितगात्रः । स्थित इति शेषः । आचार्यास्तु प्रह्वः प्रेषणादि निपुणो बलवेत्यर्थ इति पठन्ति ॥ ४ ॥

गो० टी०–दृष्ट्वेति । तं दृष्ट्वा विस्मयेन तूष्णीमास्त । पुरा दृष्ट्वा स्मृत्वा प्रमुदिताभवत् । यद्वा सीता पूर्वं दृष्ट्वा तूष्णीमास्त । ततो विशेषतो दृष्ट्वा स्मृत्वा हनुमानिति ज्ञात्वा प्रमुदिताभवत् । अथवा तं दृष्ट्वा स्मृत्वा प्रत्यभिज्ञाय प्रमुदिताभवत् । प्रमोदातिरेकेण स्वरूपा सती तूष्णीमास्तेत्यर्थः ॥ ५ ॥

गो० टी०–सौम्यमिति । सौम्यं निजस्वभावेन विकसितम् ॥ ६–१ ॥

७–८] ति० टी०–कुशलं त्वा । त्वामाहेत्यर्थः ॥ ७॥ ८ ॥

रा० टी०–तदा तामाह वैदेहीत्यादिभिः कुशलं रामः त्वा त्वां कुशलमाह ॥ ७ ॥

रा० टी०–विभीषणेति । विभीषणः सहायो यस्य तेन लक्ष्मणेन हरिभिश्च सह विद्यमानेन रामेण रावणो निहतः इति प्रियं ते तुभ्यमाख्यामि कथयामि तव प्रभावात् रामेण विजयो लभ्यः अतः त्वां सभाजयं पूजयामि च सार्धश्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

१ महातेजा रावणस्य निवेशनमिति गो. पाठः । २ इदं पद्यं गो. पुस्तके न दृश्यते । ३ इव रोहिणीमिति गो. रा. पाठः । ४ समा इति गो. पाठः । ५ तमिति गो. रा. पाठः । ६ प्रमुदितामवदिति गो. रा. पाठः । ७ दृष्ट्वा सुखं तस्या इति गो. रा.पा.। ८ सहसुग्रीवलक्ष्मण इति गो. ससुग्रीवः सलक्ष्मण इति रा. पाठः । ९ इदमर्धं मणिकं गो. रा. पाठे । १० अरिदम इति गो. पाठः । ११ नयेन चेति गो पाठः ।

[दृष्ट्वा तु कुशलं रामो वीरस्त्वां रघुनन्दनः । अब्रवीत्परमप्रीतः कृतार्थेनान्तरात्मना ।]
प्रियमाख्यामि ते देवि भूयश्चै त्वां सभाजये । तवै प्रभावाद्धर्मज्ञे महान्रामेण संयुगे ॥ ९ ॥
लब्धोऽयं विजयः सीते स्वस्था भव गतज्वरा । रावणश्च हतः शत्रुर्लङ्का चैव वशीकृता ॥ १० ॥
मया ह्यलब्धनिद्रेण धृतेनै तव निर्जये । प्रतिज्ञैषा विनिस्तीर्णा बद्ध्वा सेतुं महोदधौ ॥ ११ ॥
संभ्रमश्च न कर्तव्यो वर्तन्त्या रावणालये । विभीषणविधेयं हि लङ्कैश्वर्यमिदं कृतम् ॥ १२ ॥
तदाश्वसिहि विस्रब्धं स्वगृहे परिवर्तसे । अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः ॥ १३ ॥
एवमुक्ता तु सा देवी सीता शशिनिभानना । प्रहर्षेणावरुद्धा सा व्याहर्तुं न शशाक ह ॥ १४ ॥
ततोऽब्रवीद्धरिवरः सीतामप्रतिजल्पतीम् । किं त्वं चिन्तयसे देवि किं चै मां नाभिभाषसे १५ ॥
एवमुक्ता हनुमता सीता धर्मपथे स्थिता । अब्रवीत्परमप्रीता बाष्पगद्गदया गिरा ॥ १६ ॥
प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितम् । प्रहर्षवशमापन्ना निर्वाक्यास्मि क्षणान्तरम् ॥ १७ ॥

९-१०] ति० टी०-कोऽसौ संदेशस्तत्राह-प्रियमिति। हे देवि, ते प्रियमाख्यामि । त्वां भूयः सभाजये प्रीणयामि । तव प्रभावात्तव पातिव्रत्यवैभवात्संयुगे रामेणायं महान्विजयो लब्धः ॥ ९ ॥ १० ॥

११] ति० टी०-तव निर्जये । शत्रोरिति शेषः । धृतेन कृतनिश्चयेन । एषा प्रतिज्ञा शत्रुं हत्वा सीतां प्रत्यानेष्यामीत्येवंरूपा ॥ ११ ॥

रा० टी०-रामवचनेनैवाह रावण इति । तव त्वदर्थनिर्जये रावणकर्मकजयार्थं धृतेन कृतनिश्चयेन मया महोदधौ सेतुं बध्वा रावणो निहतः अत एव एषा राक्षसविनाशविषयिणी प्रतिज्ञा विनिर्स्तीर्णा सार्द्धश्लोक एकान्वयी ॥१०॥११॥

गो० टी०-रामसंदेशवाक्यमाह-प्रियमाख्यामीत्यादिश्लोकद्वयमेकान्वयम् । हे देवि, ते प्रियमाख्यामि । त्वां तु भूयः भूयिष्ठम् सभाजये प्रीणये । धर्मज्ञे पातिव्रत्यधर्मज्ञे, त्वं दिष्ट्या जीवसि । अन्यथा मम जयो व्यर्थ एव स्यादिति भावः । मम जयेन मत्पराक्रमेण, नः संयुगे जयो लब्धः । गतव्यथा सती स्वस्था भवेति योजना ॥ १० ॥ ११ ॥

गो० टी०-मयेति । हे सीते; तव निर्जये शत्रुहस्तात्तव विमोचने । दृढेन एकाग्रचित्तेन । अत एव अलब्धनिद्रेण मया महोदधौ सेतुं बद्ध्वा, एषा प्रतिज्ञा रावणं हनिष्यामीति प्रतिज्ञा विनिर्स्तीर्णा प्रतिपालितेत्यर्थः ॥ १२ ॥

१२] ति०टी०-संभ्रमो भयम् । वर्तन्त्या वर्तमानया । यतो विभीषणविधेयं लङ्कैश्वर्यं कृतं तस्मात्त्वं स्वगृह एव परिवर्तसे, अत आश्वसिहि ॥ १२ ॥

रा० टी०-सम्भ्रम इति । रावणालये वर्त्तन्त्या त्वया सम्भ्रमो भयं न कर्तव्यः तत्र हेतुः इदं लङ्कैश्वर्यं विभीषणविधेयं विभीषणाधीनमित्यर्थः कृतम् ॥ १२ ॥

गो० टी०-संभ्रमश्चेति । संभ्रमः व्यग्रता । वर्तन्त्या वर्तमानया ॥ १३ ॥

१३-१६] ति० टी०-' अयं चाभ्येति संहृष्टः ' इति पाठः । अयं विभीषणः ॥ १३-१६ ॥

रा० टी०-तदिति । तत् लङ्कायाः विभीषणीयात्वाद्धेतोः गृह एव परिवर्त्तसे ततस्माद्विश्वस्ता सती त्वमाश्वसिहि स्वास्थ्यं प्राप्नुहि त्वद्दर्शनसमुत्सुकोयं विभीषणः अभ्येति त्वत्समीपे प्राप्नोति ॥ १३ ॥

गो० टी०-तदिति । यस्मात् स्वगृहे परिवर्तसे तस्माद्विश्वस्ता सती आश्वसिहि विश्रान्ता भव । निहतत्वखेदा भवेत्यर्थः । अयं विभीषणः ॥ १४ ॥

रा० टी०-एवमिति । एवमुक्ता अत एव प्रहर्षेणावरुद्धा निरुद्धवचना सा सीता व्याहर्तुं वक्तुं न शशाक ॥ १४ ॥

गो० टी०-एवमिति । समुत्पत्य हर्षेण समुत्थाय । अवरुद्धा अवरुद्धव्यापारा ॥ १५-१७ ॥

रा० टी०-तत इति । अप्रतिजल्पतीमप्रतिजल्पन्तीं सीतां त्वं मां किं किमर्थं नाभिभाषसे इति वचनं हरिवरो हनुमानब्रवीत् ॥ १५ ॥

रा० टी०-एवमिति । परमप्रीता सीता बाष्पैरानन्दाश्रुभिः गद्गदया गिरा अब्रवीत् ॥ १६ ॥

१७] ति० टी०-क्षणान्तरं क्षणरूपकालावकाशमात्रम् ॥ १७ ॥

रा० टी०-तदाकारमाह प्रियमिति । भर्तुर्विजयसंश्रितमेतत्प्रियमुपश्रुत्य प्रहर्षवशमापन्नाहं क्षणान्तरं क्षणमात्रं निर्वाक्या वचनसामर्थ्यरहितास्मि ॥ १७ ॥

गो० टी०-प्रियमिति । क्षणान्तरं क्षणमात्रम् निर्वाक्यास्मि । हर्षावरुद्धव्यापारत्वादिति भावः ॥ १८ ॥

१ इदं पद्यमधिकं गो.पाठे । २ त्वां तु भूय इति गो.त्वां च भूय इति रा.पाठः । ३ दिष्ट्या जीवसि धर्मज्ञे जयेन ममेति गो.पाठः । ४ न इति गो. पा. । ५ व्यथेति गो. रा. पाठः । ६ निहतः पाप इति गो. रा. पाठः । ७ लङ्का चेयं वशे स्थितेति गो. सामात्यः समुतो मृषे इति इति रा. पाठः । ८ दृढेनेति गो. पा. । ९ गन्तव्य इति गो. पा. । १० विश्वस्तेति गो. रा. पा. । ११ अब्रवीच्च हरिश्रेष्ठ इति गो. पा. । १२ समुत्पत्येति गो. हनुमंतेति रा. पा. । १३ व्याजहार न किंचनेति गो. पा. । १४ स्थिति गो. पा. । १५ धर्मेत्यवास्थितेति गो. रा पाठः । १६ हर्षेति गो. पाठः ।

नहि पश्यामि सदृशं चिन्तयन्ती प्लवंगम । आख्यानकस्य भवतो दातुं प्रत्यभिनन्दनम् ॥१८॥
न चैव पश्यामि सदृशं पृथिव्यां तैव किंचन । सदृशं यैत्प्रियाख्याने तव दत्त्वा भवेत्सुखम्॥१९॥
हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च । राज्यं वा त्रिषु लोकेषु एतन्नार्हति भाषितम् ॥२०॥
एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवंगमः । प्रगृहीताञ्जलिर्हर्षात्सीतायाः प्रमुखे स्थितः ॥२१॥
भर्तुः प्रियहिते युक्ते भर्तुर्विजयकाङ्क्षिणि । स्निग्धमेवंविधं वाक्यं त्वमेवार्हस्यनिन्दिते ॥२२॥
[१०तवैतद्वचनं सौम्ये सारवत् स्निग्धमेव च । रत्नौघाद्विविधाच्चापि देवराज्याद्विशिष्यते ॥
अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः । हतशत्रुं विजयिनं रामं पश्यामि सुस्थितम्] ॥
तस्य तद्वचनं श्रुत्वा मैथिली जनकात्मजा । ततः शुभतरं वाक्यमुवाच पवनात्मजम् ॥२३॥

१८] ति० टी०—न केवलं हर्षवशादेव निर्वाक्या. किं तु प्रियाख्यातुस्तव तत्सदृशदेयवस्त्वभावादपीत्याह-नहीति। प्रत्यभिनन्दनं देयवस्तु। आख्यानकस्य त्वत्कृतप्रियाख्यानकस्य सदृशं नास्तीत्यर्थः स्वार्थे कः ॥ १८ ॥

रा० टी०—अवचने कारणान्तरमप्याह नहीति। आख्यानकस्य एतादृशप्रियवक्तुर्भवतः सदृशं योग्यं प्रत्यभिनन्दनं तृप्तिकारकं वस्तु चिन्तयन्ती अहं नैव पश्यामि ॥ १८ ॥

गो० टी०—निर्वाक्यास्मीत्यत्र हेत्वन्तरमाह न हीत्यादि। सदृशं प्रत्यभिनन्दनम् प्रतिप्रियवचनम् ॥ १९ ॥

१९] ति० टी०—उक्तमेवानन्दवशात्पुनराह—न चेति। ईदृशप्रियाख्याने यत्तस्य सदृशं समं तव दातुं योग्यं तत्पृथिव्यामपि न पश्यामि ॥ १९ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह न चेति। प्रियाख्याने एतादृशप्रियकथनसमये यत्सदृशं दत्त्वा विद्यमानाया मम हर्षं भवेत् तत् तव सदृशं योग्यं वस्तु पृथिव्यां किञ्चिन्न पश्यामि१९

गो० टी०—सदृशं प्रदेयवस्त्वपि न पश्यामीत्याह—न हीत्यादिना। अत्र अपिशब्देन अन्तरिक्षस्वर्गौ समुच्चीयेते। त्रिष्वपि लोकेषु न पश्यामि यत् मत्प्रियाख्याने विषये तव दातुं समम् अत्यन्तसदृशं भवेत्॥ २० ॥

२०-२१] ति० टी०—एतद्भाषितं त्वदुक्तं प्रत्यभिनन्दनत्वेन हिरण्यादिकं नार्हति, अत एव तत्प्रियवचने देयं वस्तु लोके नास्तीत्यर्थः ॥ २० ॥ २१ ॥

रा० टी०—हिरण्यमिति। हिरण्यादि एतत्सर्वं भाषितुं तव योग्यत्वेन कथितुं नार्हति कश्चिदिति शेषः॥ २० ॥

गो० टी०—उक्तं विवृणोति—हिरण्यमिति। हिरण्यं रजतम् रजतञ्च हिरण्यमिति श्रुतेः। त्रिषु लोकेषु राज्यं त्रिलोकविषयराजत्वम् नैतदर्हति भाषितुम् हिरण्यायेतत्सर्वमपि प्रियाख्यानसमत्वेन भाषितुं नार्हतीत्यर्थः ॥ २१ ॥

रा० टी०—एवमिति। वैदेह्या एवमुक्तः सीतायाः प्रमुखे सम्मुखे स्थितः प्रगृहीताञ्जलिः प्लवङ्गमः प्रत्युवाच ॥ २१ ॥

गो० टी०—एवमिति। प्रमुखे अग्रे ॥ २२ ॥

२२] ति० टी०—स्निग्धं स्नेहोपेतम्, एवंविधमशक्यप्रीतिदानमित्येवंरूपं त्वमेव भाषितुमर्हसि नान्या अतस्त्वया सर्वोत्तरं यदिदं वचनमुक्तं तदेव परमं प्रत्यभिनन्दनमिति शेषः ॥ २२ ॥

रा० टी०—तदाकारमाह भर्तुरित्यादिभिः। एवंविधं वाक्यं यत् त्वमेवार्हसि ॥ २२ ॥

गो० टी०—प्रतिप्रियवचनं न पश्यामीत्यस्योत्तरमाह—भर्तुरिति।एवंविधं स्निग्धम् वाक्यं भाषितुं त्वमेवार्हसि नान्या। अनेन सर्वोत्तरं प्रीतिप्रियवचनं मत्यं दत्तमित्युक्तं भवति ॥ २३॥

२३] ति० टी०—एतदुत्तरम् तवैतद्वचनं इति त्वत्तोऽहमिप्रियं महत्। रत्नौघाद्विविधाच्चापि देवराज्याद्विशिष्यते ॥ अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः। हतशत्रुं विजयिनं रामं पश्यसि सुस्थितम् ॥ इति श्लोकद्वयं प्रक्षिप्तमिति कतकः ॥ २३ ॥

रा० टी०—तवेति। यतः विविधात् रत्नौघात् देवराज्यादपि तवैतद्वचनं विशिष्यते ॥ २३ ॥

रा० टी०—अर्थत इति। च यतः सुस्थितं रामं पश्यामि तस्मात् देवराज्यादयो गुणाः अर्थतो मया प्राप्ताः ॥ २४ ॥

रा० टी०—तस्येति। मैथिली पवनात्मजमब्रवीच ॥ २५ ॥

गो० टी०—प्रियाख्यानसदृशं प्रदेयं वस्तु नास्तीत्यस्योत्तरमाह—तवेति। एतत् प्रत्यभिनन्दनं न पश्यामीत्येतत् सारवत् प्रत्यभिनन्दनवचनराहित्यकथनेन मद्वचनस्य निरधिकप्रीतिजनकत्वकथनान्महातात्पर्यवत्। स्निग्धं मयि प्रीतिपुरःसरम्। एतद्वचनश्रवणेनैव मया सर्वोत्तरं वस्तु समुपलब्धमिति भावः ॥ २४ ॥

गो० टी०—पूर्वमेव लब्धंदत्तराज्यादिकस्य तत्प्रदानं निरर्थकमित्याशयेनाह—अर्थत इति। रामं विजयिनं पश्यामीति यत् अस्मात् अर्थतः प्रयोजनात् देवराज्यादयो गुणा उत्कर्षाः प्राप्ताः। रामविजयदर्शनमेव राज्यादिकमित्यर्थः२५।२६

१ मत्प्रियाख्यानकस्येति गो. रा. पाठः । २ नहि पश्यामि तत्सौम्य पृथिव्यामपि वानरेति गो. पाठः । ३ अपीति रा. पाठः । ४ मदिति गो. पा. । ५ सुखं भवेदिति रा. भवेत्सुखमितिति गो. पाठः ।६ नैतदर्हति भाषितुमिति गो. रा. पाठः ।७ गृहीताञ्जलिर्वाक्यमिति गो. पाठः ।८ वाक्यमिति रा. पाठः । ९ भाषितुमिति गो. रा. पाठः । १० इदं पद्यद्वयमधिकं गो. पुस्तके ।

अतिलक्षणसंपन्नं माधुर्यगुणभूषणम् । बुद्ध्या ह्यष्टाङ्गया युक्तं त्वमेवार्हसि भाषितुम् ॥२४॥
श्लाघनीयोऽनिलस्य त्वं सुतः परमधार्मिकः । बलं शौर्यं श्रुतं सत्त्वं विक्रमो दाक्ष्यमुत्तमम् ॥२५॥
तेजः क्षमा धृतिः स्थैर्यं विनीतत्वं न संशयः । एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः॥२६॥
अथोवाच पुनः सीतामसंभ्रान्तो विनीतवत् । प्रगृहीताञ्जलिर्हर्षात्सीतायाः प्रमुखे स्थितः ॥२७॥
इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे । हन्तुमिच्छामि ताः सर्वा याभिस्त्वं तर्जिता पुरा २८
क्लिश्यन्तीं पतिदेवां त्वामशोकवनिकां गताम् । घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः ॥२९॥
इह श्रुता मया देवि राक्षस्यो विकृताननाः । असकृत्परुषैर्वाक्यैर्वदन्त्यो रावणाज्ञया ॥३०॥
विकृता विकृताकाराः क्रूराः क्रूरकचेक्षणाः । इच्छामि विविधैर्घातैर्हन्तुमेताः सुदारुणाः ॥३१॥

२४] ति० टी०–अतिलक्षणसंपन्नमाकाङ्क्षायोग्यतादिलक्षणसंपन्नं व्याकरणलक्षणसंपन्नं च माधुर्यं च श्रवणमात्रेणानन्दजनकत्वं तदूपगुण एव भूषणं यस्य तत् अष्टाङ्गया ' शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा । ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ ' इत्युक्ताष्टाङ्गबुद्ध्या युक्तम् ॥ २४ ॥

रा० टी०–तदाकारमाह अतीत्यादिभिः । अतिलक्षणेन आकांक्षायोग्यताप्रत्यासत्तिमत्पदसमूहत्वेन सम्पन्नं माधुर्येण श्रवणमात्रेण आनन्दजनकेन गुणेन भूषितम् अष्टाङ्गयुक्तया बुद्ध्या युक्तं वचनमभिभाषितुं त्वमेवार्हसि बुद्धेरष्टाङ्गानि तु शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणा इति ॥ २६ ॥

गो० टी०–नामूर्येदेत्यादिना राम इव त्वय्यपि तद्वाक्यसौष्ठवं प्रशंसति—अतीति । अतिलक्षणसंपन्नम् आकाङ्क्षायोग्यतासत्तिविधिमत्पदत्वस्वरूपवाक्यलक्षणसंपन्नम् बहुव्याहरतानेन न किञ्चिदपशब्दितमित्युक्तशब्दसाधुत्वसंपन्नम् । माधुर्यगुणभूषितं, संश्रुत्य मधुरवाक्यमित्युक्तरीत्या श्रवणमात्रेणानन्दजनकत्वरूपमाधुर्यगुणभूषितम् । अष्टाङ्गया, ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः, इत्युक्ताष्टाङ्गयुक्तया बुद्ध्या युक्तम् तादृशबुद्धिपूर्वकमित्यर्थः ॥ २४ ॥

२५] ति० टी०–बलमायाससहिष्णुता शौर्यं युद्धोत्साहः सत्त्वं शारीरः सारः ॥ २५ ॥

२६] ति० टी०–तेजः पराभिभवसामर्थ्यम् । एवमाद्या बहवो गुणास्त्वय्येव सन्ति नान्यत्र ॥ २६ ॥

रा० टी०–श्लाघनीय इति । यतः एते बलादयः अन्ये च शोभना बहवो गुणाः त्वय्येव अतः अनिलस्य सुतस्त्वं श्लाघनीयोऽसि अत्र संशयो न तत्र बलं शरीरसामर्थ्यं सत्त्वमिन्द्रियसामर्थ्यं विक्रमः पादविक्षेपविशेष इति न पौनरुक्त्यं श्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

गो० टी०–न केवलं वाक्यतः गुणतोऽपि श्लाघ्योऽसीत्याह—श्लाघनीय इत्यादिना श्लोकद्वयेन । अनिलस्य श्लाघनीयः पुत्रः अनिलादपि संजीवनकर इत्यर्थः । संजीवने चानुशस्यधर्मादित्याह–परमधार्मिक इति । बलं प्रयाससहिष्णुत्वम् शौर्यं युद्धोत्साहः श्रुतं शास्त्रज्ञानम् ' श्रुतं शास्त्रावधृतयो ' रित्यमरः । सत्त्वं शारीरः सारः विक्रमः पराक्रमः दाक्ष्यं सामर्थ्यम् उत्तममिति सर्वविशेषणम् । तेजः पराभिभवनसामर्थ्यम् । क्षमा अपराधसहिष्णुत्वम् धृतिः प्रभावः स्थैर्यं क्षोभके सत्यक्षोभ्यत्वम् विनीतत्वं विनयवत्त्वम् विशिष्टनीतिमत्त्वं वा एते चान्ये च दयादयो बहवो गुणाः, त्वय्येव शोभनाः त्वामाश्रयमधिगम्य शोभमाना भवन्ति न संशयः, नाहमस्तो गुणानारोप्य स्तौमीत्यर्थः ॥ २८–३० ॥

२७–३१] ति० टी०–असंभ्रान्तः स्तुत्याविकृतचित्तः । विनीतवद्विनीतार्हम् ॥ २७–३१ ॥

रा० टी०–अथेति । सीतायाः प्रमुखे संमुखे स्थितां प्रगृहीताञ्जलिः प्रणयसम्भ्रमबद्धयुगलकरो हनुमान् सीताम् पुनरुवाच ॥ २९ ॥

रा० टी०–तदाकारमाह इमा इत्यादिभिः । यदि त्वमनुमन्यसे अनुमतिं करोषि तर्हि याभिस्त्वं तर्जिताः ताः इमा राक्षस्यः हन्तुमिच्छामि समुदायस्य कर्मत्वेनान्वयात् द्वितीया ३०

गो० टी०–इदं तु मे प्रियाख्यानपारितोषिकत्वेन देयमित्यर्थयते–इमा इत्यादिना सार्द्धश्लोकद्वयमेकान्वयम् । क्लिश्यन्तीं पतिदेवतां त्वां प्रति या राक्षस्यो दारुणकथा अब्रुवन् । पुरा याभिस्त्वं तर्जिता इमा राक्षस्यः राक्षसीः, यद्यनुमन्यसे हन्तुमिच्छामि एतद्वरं मे प्रयच्छेति संबन्धः ॥ ३१–३३ ॥

रा० टी०–क्लिश्यन्तीमिति । पतिदेवां त्वां प्रति याः राक्षस्यः घोररूपसमाचाराः भयंकररूपकारिण्यः दारुणा कथाः भयंकरं वदन्त्यश्च ताः एताः सर्वाः मुष्टिभिः पाणिभिश्च जानुप्रहारैश्च दशनानां पातनैश्च विविधैर्घातैः प्रहरणान्तरैश्च हन्तुमिच्छामि अतः एतत् जहीतिस्वरूपं वरं मे प्रयच्छ श्लोकद्वयमेकान्वयि ॥ ३१–३३ ॥

१ भूषितमिति गो. रा. पाठः । २ पुत्र इति गो. पाठः । ३ इदं पद्यं सार्धं गो. रा. पुस्तकयोर्न दृश्यते । इच्छामीति पद्यार्धं मुष्टिभिरित्यर्धस्यानन्तरं दृश्यते ।

राक्षस्यो दारुणकथा वरमेतत्प्रयच्छ मे । मुष्टिभिः पार्ष्णिघातैश्च विशालैश्चैव बाहुभिः॥३२॥
जङ्घाजानुप्रहारैश्च दैन्तानां चैव पीडनैः । भक्षणैः कर्णनासानां केशानां लुञ्चनैस्तथा ॥३३॥
[भृशं शुष्कमुखैश्चैव दारुणैर्लङ्घनैर्हतैः । विभिन्नशङ्खग्रीवांशपार्श्वकैश्च कलेवरैः] ।
निपात्य हन्तुमिच्छामि तव विप्रियकारिणीः । एवं प्रहारैर्बहुभिः संप्रहार्यं यशस्विनि ॥ ३४ ॥
घातये तीव्ररूपाभिर्याभिस्त्वं तर्जिता पुरा । इत्युक्ता सा हनुमता कृपणा दीनवत्सला॥ ३५ ॥
हनूमन्तमुवाचेदं चिन्तयित्वा विमृश्य च । राजसंश्रयवश्यानां कुर्वतीनां पराज्ञया ॥ ३६ ॥
विधेयानां च दासीनां कः कुप्येद्वानरोत्तम । भाग्यवैषम्यदोषेण पुरस्तादुपकृतेन च ॥ ३७ ॥
मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते । मैवं वद महाबाहो देवी ह्येषा परा गतिः ॥ ३८ ॥
प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितम् । दासीनां रावणस्यार्हं मर्षयामीह दुर्वचः ॥ ३९ ॥

३२–३५] ति० टी०–एतद्वरमपकारिराक्षसीगणस्य-स्वम् ॥ ३२–३५ ॥

गो० टी०–हननप्रकारं स्वक्रोधानुरूपं दर्शयति –मुष्टिभिरित्यादिना श्लोकत्रयमेकान्वयम् । घातैः प्रहारैः भक्षणैः खादनैः लुञ्चनैः उन्मूलनैः शुष्कमुखैः नष्टैः दारुणैः पातनैः कपोलताडनैर्वा लङ्घनैः उत्प्लुत्योपरिपातनैः हतैः हन्तेस्ता-तनैः निपात्य भूमौ पातयित्वा मुष्टयादिभिर्हन्तुमिच्छामीत्य-न्वयः ॥ ३४–३६ ॥

रा० टी०–कृन्तनैरिति । कर्णनासानां कृन्तनैः छेदनैः केशानां लुञ्चनैः उत्पाटनैः शुष्कमुखैः तन्निष्प्रेषादिना मुख-शोषणैर्लङ्घनैः लंघनपूर्वकपादप्रहारैः विभिन्नाः शङ्खादयो यत्र तैर्हतैः कलेवरैः निपात्य तव विप्रियकारिणीर्हन्तुमिच्छामि श्लोकत्रयमेकान्वयि ॥ ३४ ॥ ३५ ॥

रा० टी०–उपसंहरन्नाह एवमिति । बहुभिः एवं प्रकारैः विप्रकारैर्हननोपायैः तव कृतकिल्बिषाः एता राक्षसी-र्हन्तुमिच्छामि ॥ ३६ ॥

रा० टी०–एवमिति । वैदेही हनूमन्तमुवाच ॥ ३७ ॥

गो० टी०–उक्तमर्थमावश्यकत्वज्ञापनाय पुनरपि संग्रहेण याचते—एवमिति ॥ ३७ ॥

गो० टी०–एवमुक्तेति । धर्मसहितमिति क्रियाविशे-षणम् ॥ ३८ ॥

३६] ति० टी०–राजसंश्रयादेव राजवश्यानां पराज्ञया कुर्वतीनाम् । शुभमशुभं वेति शेषः ॥ ३६ ॥

रा० टी०–तदाकारमाह–राजेत्यादिभिः । राजसंश्र-यस्य राजसेवायाः वश्यानामत एव पराज्ञया कुर्वतीनां कर्मणीति शेषः अत एव विधेयानां भर्तव्यानां दासीनामु-परि कः कुप्येत् न कोपीत्यर्थः ॥ ३८ ॥

गो० टी०–राजेति । राजसंश्रयवश्यानां राजसेवापर-वशानाम् अत एव पराज्ञया कुर्वतीनाम् राजचोदितकार्यं कुर्व-तीनाम्, विधेयानां चोदितकरणे दृष्टादृष्टानाम्, रावणस्य दासीनां दासीभ्यः, कः कुप्येत् ॥ ३८ ॥

३७–३८] ति० टी०–पुरस्तादुपकृतेन । पूर्वदुष्कृतेन-त्यर्थः ॥ ३७–३८ ॥

रा० टी०–भाग्येति । हि यतस्यो स्वकृतमेवोपभु-ज्यते अतः पुरा पूर्वं दुश्चरितेन दुराचरणेन यो भाग्यवैषम्यस्य सुखभोगकालविपर्ययस्य योगेन तत्र अत्रैव मया प्राप्यते प्राप्ति राक्षसीनामभाग्यवशादेव मया दुःखं प्राप्तमित्यर्थः ॥३८॥

गो०टी० भाग्येति । भाग्यं तस्ययोगेन भाग्यविपर्यययो-गेन । भाग्यव्यापत्तिकृतेनेत्यर्थः । पुरा दुश्चरितेन च पूर्वकृत-दुष्कृतेन च, अतत्रैवास्मिन्नेवादिके प्राप्यते । तत्र हेतुमाह—स्वकृतमिति । हि यस्मात् । स्वकृतमुपभुज्यते स्वकृतकर्मफलं प्राप्यते लोकैः । अतो मयापि भुज्यत इत्यर्थः ॥ ३७ ॥

३९] ति० टी० राज्ञस्य दासीनामेतत्तर्जनादिकं दशायोगात्कर्मपरिपाककालसंबन्धात्प्राप्तव्यमिति मया निश्चि-तम् । अतस्तत्कालसंबन्धादेव दुर्वचः इदं तन्मर्षयामीत्यर्थः ३९

रा० टी०–तत्र तासां दुराचरणात् तासामेव दुःखं लब्ध-व्यमिति भवत्या कथं लब्धमित्यत आह—प्राप्तव्यमिति । दशायोगात् देवानुग्रहकालसम्बन्धात् एतत् दुःखाभासं मयापि प्राप्तव्यमिति निश्चितं निश्चयं अतः दुर्वेलः गृहाशावर-णरहितः वाटिकास्थेत्यर्थः अहम् रावणस्य दासीनामपराधं मर्षयामि ॥ ४० ॥

गो० टी०–प्राप्तव्यमिति । रावणस्य दासीनाम् एतत्तर्ज-नादिकं दशायोगात् भवस्थायोगात् अनुभवयोग्यकालसंबन्धा-दिति यावत् । प्राप्तव्यमिति मया निश्चितम् । दुर्वेलः पूर्वमे-

१ पार्णिभिः सर्वत्राश्वत्थैश्च शोभने इति गो. रा. तत्रापि चैवेत्यस्य स्थाने चापीति रा. पाठः । २ घातैरिति गो. घोरैरिति रा. पा. । ३ दशनानां च पातनैरिति गो. रा. पाठः । ४ कृन्तनैरिति गो. रा. पा. । ५ इदं पद्यमर्धकं गो. रा. पु. । परं नखैः शुष्कमुखीभिश्च दारुणैर्लङ्घनैर्हतैरिति गो. पु. । ६ विप्रकारैरिति गो. रा. पाठः । ७ हन्तुमिच्छाम्यहं देवि तवेमाः कृतकिल्बिषा इति गो. रा.पाठः । ८ एवं मुक्ता हनुमता वैदेही जनकात्मजेति गो. रा. पाठः । ९ उक्तश्च धर्मसहितं हनुमन्तं यशस्विनीति गो. रा. पा. । १० योगेन पुरा दुश्चरितेन चेति गो. रा. पाठः । ११ इदं अर्धं गो. रा. पु. न दृश्यते ।

आज्ञप्ता राक्षसेनेह राक्षस्यस्तर्जयन्ति माम् । हते तस्मिन्न कुर्वन्ति तर्जनं मारुतात्मज ॥ ४० ॥
अयं व्याघ्रसमीपे तु पुराणो धर्मसंहितैः । ऋक्षेण गीतः श्लोकोऽस्ति तं निबोध प्लवंगम ॥ ४१ ॥
न परः पापमादत्ते परेषां पापकर्मणाम् । समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः ॥ ४२ ॥
पापानां वा शुभानां वा वधार्हाणामथापि वा । कार्यं कारुण्यमार्येण न कश्चिन्नापराध्यति ॥ ४३ ॥

तादृशापत्निवारककर्मकरणाशक्ता । अतोऽहमिह राक्षसीविषये मर्षयामीति संबन्धः । दुर्बला कृपापरवशा वा हते रावणे दौर्बल्यान्तराभावात् । परदुःखसहिष्णुत्वमेव हि तदानीं दौर्बल्यम् ॥ ४१ ॥

४०] ति० टी०—राक्षसीतर्जने राजाज्ञामूलत्वमन्वयव्यतिरेकाभ्यां दर्शयति—आज्ञप्ता इति ॥ ४० ॥

रा० टी०—तस्तुतस्तु आसां नापराध इति बोधयन्ती आह—आज्ञप्ता इति । रावणेनाज्ञप्ता एव राक्षस्यः मामतर्जयन् अत एव तस्मिन् रावणे हते सति तर्जनं न कुर्वन्ति ४१

गो० टी०—राक्षसीनामपराधस्य राजाज्ञामूलकत्वमन्वयव्यतिरेकाभ्यां दर्शयति—आज्ञप्ता इति ॥ ४२ ॥

४१] ति० टी०—ईदृशे विषये क्षमैवोचितेतीतिहासमुखेनाह—अयमिति ॥ ४१ ॥

रा० टी०—महतां सहनमेव धर्म इत्यत्र सदाचारं प्रमाणयन्ती आह—अयमिति । पुराणः बहुकालकः धर्मसंहितः व्याघ्रसमीपे ऋक्षेण गीतोऽयं श्लोकोऽस्ति तं श्लोकं निबोध जानीहि इयं पौराणिकी गाथा क्वचिदरण्ये व्याघ्रेण पलायितः कश्चित् व्याधः ऋक्षेणारूढं वृक्षमारुहत् तदा वृक्षसमीपगतो व्याघ्रः वृक्षोपरि स्थितं ऋक्षं वन्यानामयं व्याधो नित्यं विघातकः अतः वृक्षादेनं पातयेत्यब्रवीत् व्याघ्रेणैवमुक्त ऋक्षः स्वस्थाने प्राप्तमेनं न पातयिष्यामि पातने महान् अधर्मः स्यादित्युक्त्वा व्याधमप्याश्वास्य सुखं सुप्ताप सुप्तमृक्षं पातयेति त्वां न भक्षयिष्यामीति व्याघ्रेण प्रेरितो व्याधः तमृक्षमपातयत् ऋक्षस्तत्र्याससबलेन शाखान्तरमवलम्ब्य नापतत् तदा कृतापराधमेनं पातयेति व्याघ्रेणोक्त ऋक्षः कृतापराधमप्येनं रक्षिष्यामीत्युक्त्वा ररक्ष ॥ ४२ ॥

गो० टी०—अथास्यां स्वातन्त्र्येणापकारकरणमभ्युपेत्य तथापि क्षन्तव्यमित्यत्र इतिहासं दर्शयति—अयमिति । पुरा किल कश्चिद्व्याधो व्याघ्रेणानुसृतो वृक्षमारूढः, वृक्षमूलगतो व्याघ्रो वृक्षोपरि स्थितमृक्षं वन्यमृगाणामस्माकं जात्या शत्रुरेषः तस्मादेनं वृक्षात् पातयेत्यब्रवीत् । एवमुक्तो भल्लूकः स्ववासस्थानगतमेनं न पातयिष्यामि तथात्वे धर्महानिः स्यादित्युक्त्वा सुप्ताप । तदनन्तरं त्वां रक्षिष्यामि सुप्तमृक्षं पातयेति व्याघ्रेण चोदितः सन् व्याधस्तमृक्षमपातयत् । स त्वभ्यासवशेन शाखान्तरमवलम्ब्य नापतत् । तदनु कृतापराधमेनं पातयेति पुनः पुनर्व्याघ्रेणोच्यमानोपि भल्लूको बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी गाथा ॥ ४३ ॥

४२] ति० टी०—श्लोकमेवाह—न पर इति । क्वचिदरण्ये व्याघ्रानुद्रुतः कश्चिद्व्याधो ऋक्षारूढं वृक्षमारुहत् । वृक्षमूलगश्च व्याघ्रो वृक्षस्थमृक्षं वन्यानामस्माकं शत्रुमयं व्याधं वृक्षात्पातयेत्यब्रवीत् । एवमुक्तो ऋक्षः स्वावस्थानगतमेनं न पातयिष्यामि, तथात्वे धर्महानिः स्यादित्युक्त्वा सुप्ताप । सुप्तम् ऋक्षं पातयेति व्याघ्रेणोदितो व्याधो ऋक्षमपातयत् । स ऋक्षोऽभ्यासबलेन शाखान्तरमवलम्ब्य नापतत् । तदनन्तरं कृतापराधमेनं पातयेति पुनर्व्याघ्रेणोक्तोऽपि ऋक्षो बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी गाथेति तीर्थस्तत्रत्योऽयं श्लोकः । परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वतां परः प्राज्ञः पुरुषः पापं प्रत्यपकाररूपं नादत्ते न करोति । समयोऽपकर्तृष्वपि प्रत्यपकारवर्जनरूप आचारो रक्षितव्य अत्र हि यतः सन्तश्चारित्रभूषणाः ॥ ४२ ॥

रा० टी०—ऋक्षगीतं श्लोकमाह—नेति । परेषामन्येषां पापकर्मणां पापं परो धर्मात्मा पुरुषो नादत्ते परिगणयति एष समय आचारः रक्षितव्यः एवमेवमाचरणीयमित्यर्थः तत्र हेतुः सन्तो महात्मानः चारित्रं सदाचारमेव भूषयन्ति कुर्वन्ति ॥ ४३ ॥

गो० टी०—तत्रत्यं श्लोकं पठति—न पर इति । सुग्रीवं प्रति रामः कपोतोपाख्यानमिव हनुमन्तमुद्दिश्य देव्यपि स्वाभिप्रेतेर्थे ऋक्षगीतं प्रमाणयति स्म । परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वताम् । परः प्राज्ञः पुरुषः, पापं प्रत्यपकाररूपम्, नादत्ते नाङ्गीकरोति । न करोतीत्यर्थः । समयः आचारः अपकर्तृष्वपि प्रत्यपकारवर्जनरूपः, रक्षितव्यस्तु रक्षितव्य एव । तथा हि, सन्तश्चारित्रभूषणाः । सद्भिश्चारित्रभूषणैरिति वा पाठः ॥ ४४ ॥

४३] ति० टी०—पापानां वा शुभानां वेति । शुभेष्वेव पापेषु वधार्हेष्वप्यार्येण कारुण्यं कार्यं कर्तव्यम् । इतरौ वाशब्दौ वाक्यालङ्कारे । नन्वु सापराधेष्ववश्यं दण्डः कार्योऽत आह—न कश्चिदिति । कश्चिदपि नापराध्यतीति न । सर्वोऽप्यपराध्यत्येवेत्यर्थः । तस्मात्सर्वत्र दयैवोचितेति भावः ॥४३॥

रा० टी०—पापानामिति । शुभानां कर्मणां वा इव वधार्हाणां पापानामपि कारुण्यं दया आर्येण कार्यं नन्वु तथात्वे सापराधेषु दण्डचोदना निरर्थेत्यत आह कश्चित्

१ मामतर्जयन्निति गो. रा. पाठः । २ कुर्युर्हीति गो. पाठः । ३ स्थित इति गो. पाठः । ४ मे. इति गो. पा. । ५ प्लवंगमेति गो. रा. पा. ।

लोकहिंसाविहाराणां क्रूराणां पापकर्मणाम् । कुर्वतामपि पापानि नैव कार्यमशोभनम् ॥ ४४ ॥
एवमुक्तस्तु हनुमान्सीतया वाक्यकोविदः । प्रत्युवाच ततः सीतां रामपत्नीमनिन्दिताम् ॥४५॥
युक्ता रामस्य भवती धर्मपत्नी गुणान्विता । प्रतिसंदिश मां देवि गमिष्ये यत्र राघवः ॥ ४६ ॥
एवमुक्ता हनुमता वैदेही जनकात्मजा । साब्रवीद्द्रष्टुमिच्छामि भर्तारं भक्तवत्सलम्॥ ४७ ॥
तस्यास्तद्वचनं श्रुत्वा हनूमान्मारुतात्मजः । हर्षयन्मैथिलीं वाक्यमुवाचेदं महामतिः ॥ ४८ ॥
पूर्णचन्द्रमुखं रामं द्रक्ष्यस्यद्य सलक्ष्मणम् । स्थितमित्रं हतामित्रं शचीवेन्द्रं सुरेश्वरम् ॥ ४९ ॥
तामेवमुक्त्वा श्रीजन्तीं सीतां साक्षादिव श्रियम् । आजगाम महातेजा हनूमान्यत्र राघवः ॥ ५० ॥
सपदि हरिवरस्ततो हनूमान्प्रतिवचनं जनकेश्वरात्मजायाः ।
कथितमकथयद्यथाक्रमेण त्रिदशवरप्रतिमाय राघवाय ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

नापराध्यतीति न सर्वोऽपि यत् किञ्चित् अपराध्यतीत्यर्थः तेन यथापराधमेव दण्डः कार्य इति सूचितम् तेन राक्षसीनां मारणयोग्योऽपराधो नास्तीति ध्वनितम् ॥ ४४ ॥

गो० टी०–अथ दैव्या अभयप्रदानश्लोकः–पापानामिति । पापानां वा शुभानां वा त्वदभिप्रायेण पापानां वा अस्मदभिप्रायेण शुभानां वा । तदेव ममोद्देश्यं दोषो यद्यपि तस्य स्यादितिवत् । मलिनस्य हि स्नानमपेक्षितम तासां पापत्वादेवास्मदपेक्षा किं शुभानामस्माभिः तत्पुण्यानामेव तद्रक्षकत्वात् तस्मात्तत्पापमेवास्माकमुद्देश्यम् । ननु तर्हि दण्ड्या दण्डनीयाः नादण्ड्या इति धर्मशास्त्रं भवतीमासाद्य भज्येतेत्याशङ्क्य दुष्टोऽपि शरणागतो रक्षणीय इति विशेषशास्त्रं भवन्तमासाद्य किं भज्यतेमित्याह—वधार्हाणामिति। वधार्हाणामपीत्यर्थः सप्तम्यर्थे षष्ठी । प्रत्युद्गम्य अभिलषितमेवाभिलषितवान् खलु भवान् । तत् आर्येण महता पुरुषेण करुणं दयाकार्यम् तिष्ठतु । पुण्यं पापं च इदानीमेतद्दर्शनीयदशां पश्य । यद्वा शुभानामिति दृष्टान्तार्थम् । शुभेषु यथा हेषु यथा करुणं कार्यं तथा पापेषु वधार्हेष्वपि कार्यमित्यर्थः । सापराधादण्डनेतिप्रसङ्गः स्यादित्याशङ्क्याह—न कश्चिन्नापराध्यतीति । सर्वोऽप्यपराध्यतीत्यर्थः ॥ ४५ ॥

४४–५१] ति० टी०–राक्षसानां परहिंसैव स्वभाव इत्यतोऽपि न वध्या इत्याह—लोकेति । अशोभनं दण्डनम ॥ ४४–५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोदशाधिकशततमः सर्गः ॥ ११३ ॥

रा० टी०–लोकेति । लोकहिंसैव विहारो येषामत एव पापानि यत् किञ्चिदपराधानि कुर्वतां रक्षसामेवं प्राणापहारेण अशोभनं दण्डो न कार्यम् ॥ ४५ ॥

गो० टी०–रक्षसां स्वजातिप्रयुक्तहिंसादेरदोषान्नहत्वाच्छास्त्रोक्तदण्डविषयत्वं नास्तीत्याह—लोकेति । अशोभनं दण्डनम् ॥ ४६ ॥ ४७ ॥

रा० टी०–एवमिति । एवमुक्तो हनुमान् सीतां प्रत्युवाच ॥ ४६ ॥

रा० टी०–तदाकारमाह–युक्तेति । रामस्य धर्मपत्नी त्वं मां पति संदिश अहं गमिष्ये ॥ ४७ ॥

गो० टी०–युक्तेति । रामस्य युक्ता । किं पुनर्मद्विधो जन इति स्वस्योक्तमशरणत्वं प्रतिपादितवतो रामस्य शरण्यत्वादिगुणवत्तया सदृशीत्यर्थः अनेन सर्गेण सीताया दयालुत्वम अपराधसहिष्णुत्वं घटकत्वं चोक्तमिति ध्येयम ॥ ४८ ॥

रा० टी०–एवमिति । भर्तारं द्रष्टुमिच्छामि इति वचो वैदेही अब्रवीत् ॥ ४८ ॥

गो० टी०–एवमिति । इच्छामीत्यत्र इतिकरणं दृष्टव्यम ॥ ४९–५२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

रा० टी०–तस्या इति । मैथिलीं हर्षयन् हनुमान् इदं वाक्यमुवाच ॥ ४९ ॥

रा० टी०–तदाकारमाह पूर्णेति । स्थितानि मित्राणि यस्य हताः अमित्रा रिपवो यस्य तं रामं द्रक्ष्यसि ॥ ५० ॥

रा० टी०–तामिति । साक्षात् श्रियं शोभामिव सीता मेवमुक्त्वा हनुमान् आजगाम ॥ ५१ ॥

रा० टी०–सपदीति । हनुमान् जनकेश्वरात्मजाया कथितं प्रतिवचनं यथाक्रमेण राघवाय अकथयत् ॥ ५२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

---

१ रक्षसां कामरूपिणामिति गो. रा. पा. । २ यशस्विनीमिति गो. रा. पा. । ३ यशस्विनीति गो. रा. पाठः । ४ वानरोत्तमेति गो. रा पा. ५ द्युतिरिति गो. रा. पा. । ६ आननामिति गो. रा. पा. । ७ आर्ये इति गो. रा. पा. । ८ स्थिरेति गो. पा. । ९ त्रिदशेश्वरमिति गो. रा. पा. १० राजन्तीमिति गो. रा. पा. । ११ वेगं इति गो. पाठः । १२ इदं पद्यं गो. पु. नास्ति ।

चतुर्दशाधिकशततमः सर्गः ।

हनुमन्निवेदितजानकीयुदन्तो दाशरथिर्बाष्पपर्याकुललोचनः किंचिद्वयात्वा जानकीं साभरणाङ्गरागां शिरःस्नातामुपस्थापय माचिरमिति विभीषणमादिदेश स तु यथानियोगमनुतिष्ठन् महार्हाभरणाम्बरधारिणीं जानकीं शिबिकामारोप्य राघवमुपानयत् ।

तमुवाच महाप्राज्ञः सोऽभिवाद्य प्लवंगमः । रामं कमलपत्राक्षं वरं सर्वधनुष्मताम् ॥ १ ॥
यन्निमित्तोऽयमारम्भः कर्मणां यैः फलोदयः । तां देवीं शोकसंतप्तां द्रष्टुमर्हसि मैथिलीम् ॥ २ ॥
सा हि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा । मैथिली विजयं श्रुत्वा द्रष्टुं त्वामभिकाङ्क्षति ॥ ३ ॥
पूर्वकात्प्रत्ययात्त्वाहमुक्तो विश्वस्तया तया । द्रष्टुमिच्छामि भर्तारमिति पर्याकुलेक्षणा ॥ ४ ॥
एवमुक्तो हनुमता रामो धर्मभृतां वरः । आगच्छत्सहसा ध्यानमीषद्बाष्पपरिप्लुतः ॥ ५ ॥
सँ दीर्घमभिनिःश्वस्य जँगतीमवलोकयन् । उवाच मेघसंकाशं विभीषणमुपस्थितम् ॥ ६ ॥
दिव्याङ्गरागां वैदेहीं दिव्याभरणभूषिताम् । इह सीतां शिरःस्नातामुपस्थापय मा चिरम्॥ ७ ॥
एवमुक्तस्तु रामेण त्वरमाणो विभीषणः । प्रविश्यान्तःपुरं सीतां ¹स्त्रीभिः स्वाभिरचोदयत् ८ ॥

१] ति० टी०–तमुवाचेति ॥ १ ॥

रा० टी०–यथाक्रमकथनमुपक्रमते तमिति । स हनुमान् राममभिवाद्य प्रणम्य उवाच ॥ १ ॥

गो० टी०–अथ सीतानयनम् स उवाचेत्यादि ॥ १ ॥

२–३] ति० टी०–आरम्भ उद्योगः । कर्मणां सेतुबन्धरावणवधादीनां यः फलोदयः फलरूपः ॥ २ ॥ ३ ॥

रा० टी०–तदाकारमाह—यदित्यादिभिः । कर्मणां युद्धादीनामारम्भः कर्मणामयं फलस्य रिपुवधस्य उदयः सिद्धिः यन्निमित्तः या सीतेव निमित्तं यस्य तां सीतां द्रष्टुमर्हसि ॥२॥

रा० टी०–सेति । शोकसमाविष्टा मैथिली तव विजयं श्रुत्वा हर्षमुपागमत् ॥ ३ ॥

गो० टी०–यन्निमित्त इति । आरम्भः उद्योगः, कर्मणां सेतुबन्धादिव्यापाराणाम् फलोदयः, रावणविजयश्च यन्निमित्तः यस्याः सीतायाः लाभार्थः, तां द्रष्टुमर्हसि ॥ २ ॥ ३ ॥

४] ति० टी०–पूर्वकात्प्रत्ययात्संदेशकालिकादात्मीयोऽयमिति विश्वासाद्वतारं द्रष्टुमिच्छामीत्यहमुक्तः, ततः पर्याकुलेक्षणा आसीदिति शेषः ॥ ४ ॥

रा० टी०–पूर्वेति । पूर्वकात् पौर्वकालिकात् प्रत्ययात् विश्वासात् विश्वस्तया तया सीतया भर्तारं द्रष्टुमिच्छामीति वचनमहमुक्तः ॥ ४ ॥

गो० टी०–पूर्वकादिति । पूर्वकात्पूर्वोत्पन्नात् प्रत्ययाद्विश्वासात् ॥ ४ ॥

५–६] ति० टी०–ध्यानमागच्छत् । परगृहोषितायां परगृहे महाँल्लोकापवादो निर्दोषायाः परित्यागे च महान्दोष इति कार्यदौस्थ्यात्कि कर्तव्यमिति चिन्तयामासेत्यर्थः। वस्तुतो मुख्यसीतालाभोऽयं कथं स्यादिति चिन्तया ॥ ५ ॥ ६ ॥

रा० टी०–एवमिति । एवमुक्तो रामः ईषद्बाष्पपरिप्लुतस्सन् ध्यानं विचारविशेषं अगच्छत् अकरोत् ॥ ५ ॥

गो० टी०–एवमिति । रामः ईषद्बाष्पपरिप्लुतः सन् सहसा ध्यानमागच्छत् । रावणभवनोषितसीतापरिग्रहे महान् लोकापवादो भवेत्, निर्दोषायास्तस्याः परित्यागे महान् दोषः स्यादित्येवं कार्यदौस्थ्यात् किं कर्तव्यमिति चिन्तयामासेत्यर्थः ५

रा० टी०–स इति । स रामः दीर्घमुष्णं निःश्वस्य मेदिनीमवलोकयन्सन् उपस्थितं विभीषणमुवाच ॥ ६ ॥

गो० टी०–दीर्घमिति । निःश्वासदैर्घ्येण चिन्तादैर्घ्यं गृह्यते । औष्ण्येन कथं क्लिष्टां तां पुनः क्लेशयिष्यामीत्यन्तस्तापो व्यज्यते । भूमिं समवलोकयन् इति चिन्तापारवश्यं भिनयः। मेघसंकाशमित्यनेन सीतानयने कृतत्वरत्वमुच्यते॥६॥

७–८] ति० टी०–दिव्याङ्गरागामिति । तैस्तस्या रूपाधिक्यामिव्यक्तावीदृश्यर्थेऽयं मे उद्यम इति सर्वाश्चापयितुमेतद्वादः ॥ ७ ॥ ८ ॥

रा० टी०–तदाकारमाह—दिव्येति । सीतामिहोपस्थापय ॥ ७ ॥

गो० टी०–दिव्याङ्गरागामिति । अलङ्कृत्यानयनादेशः उत्तरकालिकपरुषभाषणार्हताप्रतिपादनाय। नहि तादृशदशापन्नां दीनां परुषं भाषितुं युज्यते। तच्च तस्या न परित्यागार्थम् किन्तु चतुर्मुखादिदेवतासाक्षिकेण तस्याः पातिव्रत्यं ख्यापयितुम् । मा चिरं विलम्बो न कार्य इत्यर्थः ॥ ७ ॥

रा० टी०–एवमिति । विभीषणः अन्तःपुरं प्रविश्य सीतां स्वाभिः स्त्रीभिरचोदयत् स्वागमनमबोधयत् ॥ ८ ॥

गो० टी०–एवमित्यादिश्लोकद्वयमेकान्वयम् । स्वाभिः स्त्रीभिरचोदयत् निजस्त्रीमुखेनाचोदयत् । ॥ ८–१० ॥

१ स उवाच महाप्राज्ञमभिगम्येति. गो. पा. । २ वचनमर्थञ्च इति गो. वचन धर्मञ्च इति रा. पा. । ३ चेति गो. रा. पा. । ४ मैथिलीं द्रष्टुमर्हसीति गो. रा. पा. । ५ तव हर्षमुपागमदिति गो. रा. पाठः । ६ भर्तारं द्रष्टुमिच्छामि कृतार्थं सहलक्ष्मणमिति गो, रा. पाठः । ७ दीर्घमुष्णं विनिःश्वस्य मेदिनीमिति गो. पाठः । ८ उष्णमिति रा. पा. । ९ मार्दनीमिति रा. पा. । १० स्वाभिः स्त्रीभिरिति गो. पा. ।

तैतः सीतां महाभागां दृष्ट्वोवाच विभीषणः । मूर्ध्नि बद्धाञ्जलिः श्रीमान्विनीतो राक्षसेश्वरः ॥ ९ ॥
दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता । यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति ॥१० ॥
एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम् । अस्नात्वा द्रष्टुमिच्छामि भर्तारं राक्षसेश्वरम्॥ ११ ॥
तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः । यथाह रामो भर्ता ते तत्तथा कर्तुमर्हसि ॥ १२ ॥
तस्य तद्वचनं श्रुत्वा मैथिली पतिदेवता । भर्तृभक्त्या वृता साध्वी तथेति प्रत्यभाषत॥ १३ ॥
ततः सीतां शिरःस्नातां संयुक्तां प्रतिकर्मणा । महार्हाभरणोपेतां महार्हाम्बरधारिणीम् ॥ १४ ॥
आरोप्य शिबिकां सीतां राक्षसैर्बहुभिर्वृताम् आजहार विभीषणः ॥ १५ ॥
सोऽभिगम्य महात्मानं ज्ञात्वापि ध्यानमास्थितम् । प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत् ॥ १६ ॥
तामागतामुपश्रुत्य रक्षोगृहचरोषिताम् । रोषं हर्षं च दैन्यं च राघवः प्राप शत्रुहा॥ १७ ॥
ततो यानगतां सीतां सविमर्शं विचारयन् । विभीषणमिदं वाक्यमहृष्टो राघवोऽब्रवीत् ॥ १८ ॥
राक्षसाधिपते सौम्य नित्यं मद्विजये रत । वैदेही सन्निकर्षं मे क्षिप्रं समभिगच्छतु ॥ १९ ॥

९–१०] ति० टी०–ततः स्वस्त्रीणां तत्समीपगमनानन्तरम् ॥ ९ ॥ १० ॥

रा० टी०–तत इति । मूर्ध्नि बद्धाञ्जलिर्विभीषणः दृष्ट्वोवाच ॥ ९ ॥

रा० टी०–तदाकारमाह—दिव्येति । हे वैदेहि भर्ता त्वां द्रष्टुमिच्छति अतस्त्वं दिव्याङ्गरागा सती यानमारोह ॥ १० ॥

११] ति० टी०–अस्नात्वा द्रष्टुमिच्छामि । भर्त्राज्ञां विनापि स्नानमकृत्वैव द्रष्टुमिच्छामीत्यर्थः ॥ ११ ॥

रा० टी०–एवमिति । एवमुक्त्वा वैदेही अस्नात्वा स्नानमकृत्वैव द्रष्टुमिच्छामीति वचनं विभीषणं प्रत्युवाच ॥

१२] ति० टी०–तस्यास्तद्वचनं स्नानायनङ्गीकारवचनम् । यथा राम आह तथा कर्तुमर्हसि । 'तां दृष्ट्वा चारुसर्वाङ्गीं यानस्थां शोककर्शिताम् । मलोपचितसर्वाङ्गीं जटिलां कृष्णवाससम् ॥ उवाच रामो वैदेहीं परामर्शविशङ्कितः ॥' इति भारते तु मलोपचितेत्यर्धं पूर्वमिति शेषः ॥ १२ ॥

रा० टी०–तस्या इति । तस्याः वचनं श्रुत्वा यथा राम आह तथैव कर्तुं त्वमर्हसि इति विभीषणः प्रत्युवाच एतेन स्नानं रामेणाप्याज्ञप्तमिति सूचितम् ॥ १२ ॥

गो० टी०–तस्या इति । प्रत्युवाच श्रीमुखेनेति शेषः। यथानियोगं कर्तव्यत्वे हेतुद्वयम्–राजा भर्तेति ॥ १२ ॥

१३–१४] ति० टी०–भर्तृभक्त्या आदृतान्विता १३।१४

रा० टी०–तस्येति । तस्य विभीषणस्य वचनं श्रुत्वा मैथिली तथेति प्रत्यभाषत ॥ १३ ॥

रा० टी०–तत इति । ततः रामाज्ञाश्रवणानन्तरं शिरस्स्नातां सीतां विभीषणः शिबिकामारोप्य आजहार रामसमीपं प्रापयामास श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–तस्येति । अङ्गीकारहेतुद्वयं भर्तृदेवता भर्तृभक्तिव्रतेति ॥ १३–१४ ॥

१५] ति० टी०–श्रीयुक्तवाहनवहनोचितैः । परीक्षितैरित्यर्थः ॥ १५ ॥

१६] ति० टी०–ज्ञात्वापि विभीषणागमनं ज्ञात्वापि ध्यानमास्थितम् । अतः परं किं वक्तव्यं किं कर्तव्यमिति चिन्तायुक्तमित्यर्थः ॥ १६ ॥

रा० टी०–स इति । स विभीषणः रामं ध्यानमास्थितं ज्ञात्वापि प्राप्तां सीतां न्यवेदयत् ॥ १६ ॥

गो० टी०–स इति । ज्ञात्वापि विभीषणागमनं विदित्वापि । अनेन चिन्तानुद्विग्नता ॥ १६ ॥

१७] ति० टी०–रोषं सर्वानर्थमूलत्वान्नया किल सप्तद्वीपानेकेनेदं बहुदुःखमनुभूतमिति रोषः । यद्वा रावणगृहे चिरोषितत्वनिमित्तक आरोपितो रोषो भाविशपथोपयोगी । चिरवियुक्तायां अथ दर्शनमिति हर्षः । चिरकालं मत्प्रतीक्षयानया बहुदुःखमनुभूतमिति दैन्यम् ॥ १७ ॥

रा० टी०–तामिति । आगतां तां सीतामुपश्रुत्य विश्वसनं राघवं हर्षः दैन्यं सीताक्लेशस्मरणजनितदीनता रोषश्च त्रयमाविशत् ॥ १७ ॥

गो० टी०–तामिति । रावणवधपूर्वकसीतागमनेन हर्षः रावणभवनोषितत्वेन दैन्यम् रोषश्च । अत्र रोषो भाविशपथोपयोगित्वादारोपित इति द्रष्टव्यम् ॥ १७ ॥

१८–१९] ति० टी०–अहृष्टः । उक्तधर्मत्रयाक्रान्तत्वात्प्रकटहर्षरहितः ॥ १८ ॥ १९ ॥

रा० टी०–तत इति । सविमर्शं प्रतर्कसहितं विचारयन् अत एव अहृष्टः किञ्चित्संतोषरहितो राघवोऽब्रवीत् ॥ १८ ॥

---

१ इदं पद्यं गो. पु. नास्ति । २ स्नातेति गो. पाठः । ३ अधिपेति गो. पाठः । ४ भक्तिव्रतेति गो. रा. पा. । ५ युवतीभिरलङ्कृतामिति गो रा. पाठः । ६ दीप्तां परार्घ्याम्बरसंवृतामिति गो. रा पाठः । ७ रक्षोभिरिति गो. पाठः । ८ हर्षो दैन्यं च रोषश्च त्रयं राघवमाविशत इति गो.रा. पाठः । ९ ततः पार्श्वगतं दृष्ट्वेति गो. रा. पाठः । १० अहृष्टमिति गो. पाठः । ११ शीघ्रं समुपेति गो. रा. पाठः ।

तस्यै तद्वचनं श्रुत्वा राघवस्य विभीषणः । तूर्णमुत्सारणं तत्र कारयामास धर्मवित् ॥ २० ॥
कञ्चुकोष्णीपिणस्तत्र वेत्रझर्झरपाणयः । उत्सारयन्तस्तान्योधान्समन्तात्परिचक्रमुः ॥ २१ ॥
ऋक्षाणां वानराणां च राक्षसानां च सर्वशः । तृन्दान्युत्सार्यमाणानि दूरमुत्तस्थुरन्ततः॥ २२ ॥
तेषामुत्सार्यमाणानां निःस्वनैः सुमहानभूत् । वायुनोद्धूयमानस्य सागरस्येव निःस्वनः ॥२३॥
उत्साह्यमाणान्दृष्ट्वाथ जगत्यां जातसंभ्रमान् । दाक्षिण्यात्तदमर्षाच्च वारयामास राघवः ॥ २४ ॥
संरम्भाच्चाब्रवीद्रामश्चक्षुषा प्रदहन्निव । विभीषणं महाप्राज्ञं सोपालम्भमिदं वचः ॥ २५ ॥
किमर्थं मामनादृत्य क्लिश्यतेऽयं त्वया जनः । निवर्तयैनमुद्वेगं जनोऽयं स्वजनो मम ॥ २६ ॥
न गृहाणि न वस्त्राणि न प्राकारस्तिरस्क्रिया । नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियाः ॥ २७ ॥

रा० टी०–तदाकारमाह—राक्षसेति । वैदेही मे सन्निकर्षं समीपं क्षिप्रं समभिगच्छतु ॥ १९ ॥

गो० टी०–तत इति । सविमर्शं विचारयन् सवितर्कं चिन्तयन् । अहङ्कृमिति क्रियाविशेषणं विभीषणविशेषणं वा ॥ १७ ॥ १८ ॥

२०] ति० टी०–उत्सारणम् । जनस्येति शेषः ॥२०॥

रा० टी०–तस्येति । विभीषणः राघवस्य वचनं श्रुत्वा उत्सारणे यत्नं कारयामास ॥ २० ॥

गो० टी०–स इति । उत्सारणे जननिवारणे ॥ १९ ॥

२१] ति० टी०–वेत्रैर्वेत्रग्रहणैर्झर्झरास्ताडशब्दवन्तः पाणयो येषाम् ॥ २१ ॥

रा० टी०–तत्प्रकारमाह कञ्चुकेति । कञ्चुकादिमन्तः वेत्रझर्झरपाणयः विभीषणानुचराः पुरुषान् वानरादीन् उत्सारयन्तस्सन्तः समन्तात्परिचक्रमुः ॥ २१ ॥

गो० टी०–कञ्चुकेति । कञ्चुकं वारत्राणम् उष्णीषं शिरोवेष्टनम् । वेत्रेण जर्जराः सदावलम्बनजनितपारुष्याः पाणयो येषां ते ॥ २० ॥

२२–२३] ति० टी०–उत्तस्थुरुत्थाय जग्मुः ॥२२॥२३॥

रा० टी०–ऋक्षाणामिति । अन्ततः समीपदेशात् उत्सार्यमाणानि ऋक्षादीनां तृन्दानि दूरमुत्तस्थुः ॥ २२ ॥

गो० टी०–ऋक्षाणामिति । उत्तस्थुः अपचक्रमुः॥२१॥

रा० टी०–तेषामिति । वायुना उद्धूयमानस्य समुद्रस्य निःस्वन इव उत्सार्यमाणानां निःस्वनस्सुमहानभूत् ॥ २३ ॥

गो० टी०–तेषामिति । उद्धूतमानस्य उज्जृम्भमाणस्य ॥ २२ ॥

२४] ति० टी०–दाक्षिण्यात्स्वभक्तवानरसेनाद्य दाक्षिण्यात्कृपाविशेषात् । तदमर्षात् मदाज्ञां विनोत्सारयतीति विभीषणेऽमर्षः ॥ २४ ॥

रा० टी०–उत्सार्यमाणानिति । उत्सार्यमाणान् अत एव जातसम्भ्रमान् उद्विग्नचित्तान् तान् राघवो दृष्ट्वा दाक्षिण्यात् वानरादिषु कृपाविशेषात् अत एव तस्य निस्सारणस्य अमर्षात् हेतोः वारयामास ॥ २४ ॥

गो० टी०–उत्सार्यमाणानिति । दाक्षिण्याद्वानरेषु दाक्षिण्यात् । अमर्षात् उत्सारणासहनात् ॥ २३ ॥

२५] ति० टी०–संरम्भात्कोपात् ॥ २५ ॥

रा० टी०–संरम्भादिति । संरम्भात् उत्सारणहेतुककोपात् चक्षुषा प्रदहन्निव रामः विभीषणं सोपालम्भं वचोऽब्रवीत् ॥ २५ ॥

गो० टी०–संरम्भ इति । चक्षुषा प्रदहन्निवेति लोचनाभ्यां पिबन्निवेत्युक्तादरपात्रभूतस्य विभीषणस्यैतन्निषेधदर्शनविषयताकरणं स्वजननिग्रहासहिष्णुत्वात् । सीताविषयसमागमे पितरोषविशेषाद्वा ॥ २४ ॥ २५ ॥

२६] ति० टी०–एनमुद्वेगं निवर्तय । अस्य जनस्येति शेषः । कथमेवं युज्यते तत्राह—जनोऽयमिति । स्वजनो भ्रात्रादिस्वजनसदृश एव ॥ २६ ॥

रा० टी०–तदाकारमाह किमर्थमिति । मामनादृत्य अप्रष्ट्वेत्यर्थः अयं जनः किमर्थं क्लिश्यते त्वया क्लेशयते क्लेशो नोचित इत्यर्थः अतः एनमुद्योगं निवर्तय तत्र हेतुः अयं जनो मम स्वजनः स्वकीयलक्ष्मणादिसदृशः ॥ २६ ॥

२७] ति० टी०–किं च व्ययोऽयं जनापसरणप्रयास इत्याह—न गृहाणीति । गृहादित्रयं तिरस्क्रिया आवरणम् । ईदृशा जनापसरणादिव्यापारा न स्त्रिया आवरणम्, किं तु राजसत्कार एव केवलं छत्रचामरादिवत् । किं तर्ह्यावरणं तत्राह—वृत्तमेवावरणमिति ॥ २७ ॥

रा० टी०–नेति । गृहादित्रयमीदृशाः निस्सारणरूपा वा स्त्रियाः स्तिरस्काराः आवरणानि न किन्तु राजसत्काराः स्वस्वपतिकृतसत्क्रियाः वृत्तं स्वस्वाचरणञ्च आवरणम् ॥२७॥

गो० टी०–न गृहाणीति । तिरस्क्रियाः तिरस्कारिण्यः राजसत्काराः उत्सारणादिकम् वृत्तम् आचारः ॥ २६ ॥

१ स तद्वचनमाज्ञायेति गो. पाठः २ उत्सारणे यत्नं कारयामास सर्वत्र इति गो. रा. पाठः । ३ जर्जरेति गो. पाठः । ४ पुरुषा इति गो. पुरुषानिति रा. पा. । ५ सर्वाः ध्वनिरुत्थित इति गो. पाठः । ६ तदृतमानस्येति गो. पाठः ।७ तान्दृष्ट्वा समंताज्जातसंभ्रमानिति गो. रा. पाठः । ८ संरम्भ इति गो. पाठः । ९ उद्योगमिति गो. रा. पाठः । १० प्राकारास्तिरस्क्रिया इति गो. प्राकारास्तिरस्कारा इति रा. पा. ।

व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे । न क्रतौ नो[1] विवाहे वा दर्शनं दूष्यते स्त्रियाः ॥२८॥
सैषा विपद्गता चैव कृच्छ्रेण च समन्विता । दर्शने नास्ति दोषोऽस्या मत्समीपे विशेषतः ॥२९॥
विसृज्य शिबिकां तस्मात्पद्भ्यामेवापसर्पतु । समीपे मम वैदेहीं पश्यन्त्वेते वनौकसः ॥ ३० ॥
एवमुक्तस्तु रामेण सविमर्शो विभीषणः । रामस्योपानयत्सीतां संनिकर्षं विनीतवत् ॥ ३१ ॥
ततो लक्ष्मणसुग्रीवौ हनूमांश्च प्लवंगमः । निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशम् ॥३२॥
(कैलत्रनिरपेक्षैश्च इङ्गितैरस्यदारुणैः । अप्रीतमिव सीतायां तर्कयन्तिस्म राघवम् ॥)
लज्जया त्ववलीयन्ती स्वेषु गात्रेषु मैथिली । विभीषणेनानुगता भर्तारं साभ्यवर्तत ॥ ३३ ॥
विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता । उदैक्षत मुखं भर्तुः सौम्यं सौम्यतरानना ॥ ३४ ॥
अथ समपनुदन्मनःक्रमं सा सुचिरमदृष्टमुदीक्ष्य वै प्रियस्य ।
वदनमुदितपूर्णचन्द्रकान्तं विमलशशाङ्कनिभानना तदासीत् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्दशाधिकशततमः सर्गः ॥ ११४ ॥

२८] ति० टी०—अपि चेदानीं दर्शनमपि नास्या दोषायेत्याह—व्यसनेष्विति । व्यसनं विपत्तिकालः कृच्छ्रं पीडा ॥२८॥

रा० टी०—निस्सारणाभावे हेत्वन्तरमप्याह व्यसनेष्विति । व्यसनादिषु स्त्रियाः दर्शनं न दूष्यते तत्र व्यसनं आपत्कालजनितः खेदः कृच्छ्रं रोगादिजनितः खेद इति न पौनरुक्त्यम् ॥ २८ ॥

गो० टी०—व्यसनेष्विति । व्यसनेषु दुष्टजनविरोधेषु कृच्छ्रेषु राज्यक्षोभादिषु युद्धे युद्धभूमौ ॥ २७ ॥

२९] ति० टी०—प्रकृते दर्शनस्यादोषत्वसाधके धर्ममाह—सैषेति ॥ २९ ॥

रा० टी०—प्रकृतमाह सेति । एषा विपद्गता अत एव कृच्छ्रेण मानसिकदुःखेन समन्विता अत एव अस्याः दर्शने दोषो नास्ति मत्समीपे तु विशेषतो न दोषः ॥ २९ ॥

गो० टी०—सैषेति । कृच्छ्रे वक्ष्यमाणाग्निप्रवेशे २८।२९

३०] ति० टी०—पश्यन्तु । वैदेहीसिद्ध्यर्थम् ॥ ३० ॥

रा० टी०—विसृज्येति । तस्मादुक्तहेतोः पद्भ्यामेव वैदेही अपसर्पतु मम समीपे वैदेहीं वनौकसः पश्यन्तु वैदेह्याः कर्मत्वेन लाभः प्रत्यासत्या ॥ ३० ॥

३१] ति० टी०—सविमर्शं एवंवादादस्यां प्रायेणाभिमानो नास्ति, जिघृक्षा च नास्ति यदि तौ स्यातां तदा राजपत्न्युचितमुपचारमनुमन्येतैवेति चिन्तायुक्त इत्यर्थः ॥ ३१ ॥

रा० टी०—एवमिति । रामेण एवमुक्तः अत एव सविमर्शः विचारसहितो विभीषणः सीतां रामस्य संनिकर्षमुपानयत् ॥ ३१ ॥

गो० टी०—एवमिति । सविमर्शः कृच्छ्रशब्दप्रयोगात्साशङ्कः ॥ ३० ॥ ३१ ॥

३२] ति० टी०—अनयैव बुद्ध्या लक्ष्मणादेरपि व्यथा ३२

रा० टी०—तत इति । लक्ष्मणादयः रामस्य वाक्यं सकोपवचनं निशम्य व्यथिता बभूवुः ॥ ३२ ॥

३३] ति० टी०—लज्जयात्मीयतां जनसमक्षभर्तृसमीपस्थितिजन्यलज्जयात्मीयन्ती संकोचं गच्छन्ती ॥ ३३ ॥

रा० टी०—लज्जयेति । लज्जया स्वेषु गात्रेषु अवलीयन्ती मैथिली भर्तारमभ्यवर्तत ॥ ३३ ॥

गो० टी०—व्यथायां हेतुमाह—कलत्रेति ॥ ३२ ॥

रा० टी०—लज्जयेति । अवलीयन्ती संकुचन्ती ३३॥३४

३४] ति० टी०—विस्मयादिति । बहुमित्रपरिवारसंपन्निदर्शनजो विस्मयः । प्रियदर्शनजो हर्षः ॥ ३४ ॥

रा० टी०—विस्मयादिति । सौम्यतरानना मैथिली विस्मयादितः भर्तुर्मुखमुदैक्षत तत्र विस्मयः रामकोपदर्शनजनितः ॥ ३४ ॥

गो० टी०—विस्मयादिति । विस्मयात् अपहितरामपुनर्दर्शनाद्विस्मयः प्रियस्य दुर्जनेन प्रहर्षः स्नेहः स्वाभाविकः उदीक्षणकालिकसुखप्रभादमाह—सौम्येति ॥ ३४ ॥

३५] ति० टी०—समपनुदत्समपाकुरुत ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्दशाधिकशततमः सर्गः ॥११४॥

रा० टी०—अथेति । सा सीता सुचिरं बहुकालं दृष्टं प्रियस्य वदनमुदीक्ष्य मनःक्रमं समपनुदत् समपाकुरुत् अन्यज्जहौ अत एव विमलशशांकनिभानना सीत् ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे षोडशाधिकशततमः सर्गः ॥ ११६ ॥

गो० टी०—अथेति । उदितपूर्णचन्द्रेण्यनेन कोपरक्तत्वमुक्तम् । विमलशशाङ्केन्यनेन उत्तरकालिकक्षयः सूच्यते ॥३५॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशोत्तरशततमः सर्गः ॥११७॥

१ न विवाहे चेति गो. न विवाहेष्विति रा. पाठः । २ दूष्यतीति गो. पाठः । ३ युद्धेति गो. पाठः । ४ कृच्छ्रे न महति स्थितेति गो. पाठः । ५ अस्या न दोषः स्यादिति गो. पाठः । ६ तदानय समीपं मे शीघ्रमेनां विभीषण । सीता पश्यतुमामेषा सुदुर्गुणहृते स्थितामिति गो. पाठः ७ इदं पद्यकं गो. पुस्तके । ८ तदानीमिति गो. पाठः ।

पञ्चदशाधिकशततमः सर्गः ।

समीपमागतां जानकीं वीक्ष्य राघवः स्त्रियाश्चिरं परगृहवासो निन्दास्पदमतस्त्वां न ग्रहीष्यामि यथेच्छं कुत्रापि गच्छ येन मामकीनवंशो निष्कलङ्क इत्यायुक्त्वा तां नाङ्गीचकार येन सा भृशं खिन्ना रुरोद ।

तां तु पार्श्वे स्थितां प्रह्वां रामः संप्रेक्ष्य मैथिलीम् । हृदयान्तर्गतं भावं व्याहर्तुमुपचक्रमे ॥ १ ॥
एषासि निर्जिता भद्रे शत्रुं जित्वा रणाजिरे । पौरुषात् यदनुष्ठेयं मैयेतदुपपादितम् ॥ २ ॥
गतोऽस्म्यन्तममर्षस्य धर्षणा संप्रमार्जिता । अवमानश्च शत्रुश्च युगपन्निहतौ मया ॥ ३ ॥
अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः । अद्य तीर्णप्रतिज्ञोऽहं प्रभवाम्यद्य चात्मनः ॥ ४ ॥
या त्वं विरहिता नीता चलचित्तेन रक्षसा । दैवसंपादितो दोषो मानुषेण मया जितः ॥ ५ ॥
संप्राप्तमवमानं यस्तेजसा न प्रमार्जति । कस्तस्य पौरुषेणार्थो महताप्यल्पचेतसः ॥ ६ ॥
लङ्घनं च समुद्रस्य लङ्कायार्श्वापि मर्दनम् । सफलं तस्य चैवाद्य कर्म हनूमतः ॥ ७ ॥
युद्धे विक्रमतश्चैव हितं मन्त्रयतस्तथा । सुग्रीवस्य ससैन्यस्य सफलोऽद्य परिश्रमः ॥ ८ ॥
बिभीषणेस्य च तथा सफलोऽद्य परिश्रमः । विगुणं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः ॥९ ॥

१] ति० टी०–तां त्विति ॥ १ ॥

रा० टी०–सीताकर्तृकरामसमीपागमनपूर्वकस्थित्यनंतरकालिकं वृत्तान्तमाह–तामित्यादिभिः । रामः पार्श्वे स्थितां प्रह्वां प्रणतां मैथिलीं सम्प्रेक्ष्य हृदयांतर्गतं भावं स्वाभिप्रायं व्याहर्तुं वक्तुमुपचक्रमे ॥ १ ॥

गो० टी०–अथ रामपरुषोक्तिः–तां तु पार्श्वस्थितामित्यादि । प्रह्वां लज्जया नम्राम् ॥ १ ॥

२] ति० टी०–एषा त्वं शत्रुं जित्वा शत्रोः प्रत्याहृता । पौरुषात्पुरुषयत्नात् ॥ २ ॥

रा० टी०–व्याहरणप्रकारमाह—एषेत्यादिभिः । हे भद्रे ! मया शत्रुं जित्वा त्वं निर्जिता उत्कर्षं प्रापिता अत एव पौरुषात् पुरुषयत्नात् यदनुष्ठेयं तदेतत् उपपादितं कृतम् ॥२॥

गो० टी०–एषेति । एषेति प्रत्यक्षेण दर्शयति । भद्रे इत्यसंबन्धनिवेदकसंबोधनम् । पौरुषायदनुष्ठेयं तदेव कृतम् । न तु स्वश्लाघाय यत्नः कृत इति भावः ॥ २ ॥

३] ति० टी०–अमर्षस्य क्रोधस्यान्तं गतः । धर्षणा शत्रुकृतस्वदारहरणलक्षणाभिभवः ॥ ३ ॥

रा० टी०–गत इति । अमर्षस्य क्रोधस्यान्तं फलं गतः प्राप्तोऽस्मि अत एव धर्षणा शत्रुकर्तृकदारापहरणहेतुकपराभवः संप्रमार्जिता दूरीकृता अत एव अवमानः शत्रुकर्तृकस्यानादरः शत्रुश्च युगपत् मया निहतौ ॥ ३ ॥

गो० टी०–गतोस्मीति । अन्तम् फलम् । हतौ विमृदितौ ॥ ३ ॥

४] ति० टी०–अद्य मे पौरुषं दृष्टम् । लोकैरिति शेषः । तीर्णप्रतिज्ञस्तीर्णा रावणवधविषया प्रतिज्ञा येन सः ॥ ४ ॥

रा० टी०–अद्येति । मे पौरुषमद्य दृष्टं त्वयेति शेषः अत एव मे श्रमः सफलः अत एव अद्य तीर्णा संपूर्णा प्रतिज्ञा राक्षसविनाशविषयकप्रतिज्ञानं यस्य सोहमात्मनः स्वप्रयत्नात् प्रभवामि प्रभाववान् भवामि ॥ ४ ॥

गो० टी०–अद्येति । आत्मनः प्रभवामि स्वतन्त्रो भवामि ॥ ४ ॥

५–६] ति० टी०–मया विरहिता या त्वं चलचित्तेन रक्षसा नीता, असौ दैवसंपादितस्तव दोषो मानुषेण मनुष्यसाध्यपराक्रमेण मया जितोऽपनीतः ॥ ५ ॥ ६ ॥

रा० टी०–येति । विरहिता मया हीना या त्वं चलचित्तेन रक्षसा नीता तस्यास्तव दैवसम्पादितः दैवाद्दृष्टकृतो दोषः मानुषेण मया जितो दूरीकृतः ॥ ५ ॥

गो० टी०–या त्वमिति । मया विरहिता या त्वं चलचित्तेन रक्षसा नीता । तया त्वया हेतुभूतया दैवसंपादितः दोषः अवमानः मानुषेण प्रमार्जितः दैवकृतं पुरुषयत्नेन निवारितमिति भावः ॥ ५ ॥

रा० टी०–सम्प्राप्तमिति । सम्प्राप्तमवमानं यः पुरुषः तेजसा स्वबलेन न प्रमार्जति तस्यात्पतेजसः पुरुषस्य कः पुरुषार्थः न कोपीत्यर्थः ॥ ६ ॥

गो० टी०–धर्षणाया अमार्जने दोषमाह–संप्राप्तमिति । प्रमार्जति प्रमार्ष्टि ॥ ६ ॥

७–९] ति० टी०–अथ सफलमित्यन्वयः ॥ ७–९ ॥

रा० टी०–लङ्घनमिति । समुद्रस्य लङ्घनं लङ्कायाः मर्दनं च हनुमतः कर्म अद्य सफलमत एव श्लाघ्यं प्रशंसनीयम् ॥ ७ ॥

---

१ अन्तर्गत क्रोध इति गो. पाठः । २ मया रणे इति गो. रा. पाठः । ३ तदेतदिति गो. रा पाठः । ४ मया युगपद्धृता विति गो. पाठः । ५ प्रतिज्ञस्वादिति गो. पाठः । ६ इहेति गो. रा. पा. । ७ पुरुषार्थोऽस्ति पुरुषस्येति गो रा. पा. । ८ अवेति गो. पा. । ९ तच्छ्लाघ्यं महत्कर्मेति गो. पाठः । १० च मे इति गो० चन इति रा. पाठः । ११ पूर्वपरार्द्धयोर्भेत्यासेन पा० गो. रा. पुस्तकयोः ।

इत्येवं वदतः श्रुत्वा सीता रामस्य तद्वचः । मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता ॥ १० ॥
पश्यतस्तां तु रामस्य समीपे हृदयप्रियाम् । [प्रभूतान्यावसिक्तस्य पावकस्येव दीप्यतः ॥
स बद्ध्वा भ्रुकुटीं वक्त्रे तिर्यक्प्रेक्षितलोचनः] जनवादभयाद्राजा बभूव हृदयं द्विधा ॥ ११ ॥
सीतामुत्पलपत्राक्षीं नीलकुञ्चितमूर्धजाम् । अवदद्वै वरारोहां मध्ये वानररक्षसाम् ॥ १२ ॥
यत्कर्तव्यं मनुष्येण धर्षणां प्रतिमार्जता । तत्कृतं रावणं हत्वा मयेदं मानकाङ्क्षिणा ॥ १३ ॥
निर्जिता जीवलोकस्य तपसा भावितात्मना । अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक् ॥ १४ ॥
विदितश्चास्तु भद्रं ते योऽयं रणपरिश्रमः । सुहृदां वीर्यनिर्णीतः सुतीर्णः स मया कृतः ॥ १५ ॥
रक्षता तु मया वृत्तमपवादं च सर्वतः । प्रख्यातात्मगुणस्यैव नैर्घृण्यं च परिमार्जता ॥ १६ ॥

गो० टी०–इदानीं हनुमदादिपौरुषस्यापि धर्षणापरिमार्जनहेतुत्वमाह–लङ्कां चेत्यादिना । सङ्क्षुद्रस्य लङ्कां लङ्कायां अवमर्दनम् इत्येवंरूपं हनुमतः श्लाघ्यं कर्म तत्र सफलम् । धर्षणापरिमार्जनेन सफलमित्यर्थः ॥ ७ ॥

रा० टी०–युद्ध इति । युद्धे विक्रमतः नोऽस्माकं हितं मन्त्रयतः सुग्रीवस्य परिश्रमः सफलः ॥ ८ ॥

गो० टी०–युद्ध इति । मन्त्रयतः चिन्तयतः ॥ ८ ॥

रा० टी०–निर्गुणमिति । निर्गुणं निर्विद्यगुणविशिष्टं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः तस्य विभीषणस्य परिश्रमः सफलः ॥ ९ ॥

गो० टी०–निर्गुणमिति । तस्येत्यध्याहार्यम् ॥ ९ ॥

१०] ति० टी०–इत्येवं वदत इत्यर्थात्तस्या मे प्रयोजनं नास्तीति प्रतिकूलवादुःखेनाश्रुपरिप्लुता बभूव ॥ १० ॥

रा० टी०–इतीति । इत्येवं वचो वदतो रामस्य समीपे विद्यमाना मृगीवोत्फुल्लनयना सीता अश्रुपरिप्लुता बभूव १०

गो० टी०–इत्येवमिति । तद्वचः नैरात्म्येनोक्तं वचः । तस्य ब्रुवतः तस्मिन् ब्रुवति सति ॥ १० ॥

११–१३] ति० टी०–तदूपदर्शनादङ्गीकारबुद्धिः । जनवादभयात्त्यागबुद्धिः भावसंश्लिष्ट ॥ ११–१३ ॥

रा० टी०–पश्यत इति । हृदयप्रियां सीतां समीपे पश्यतो रामस्य हृदयं जनवादभयात् हेतोः द्विधा संशयविशिष्टमित्यर्थः बभूव जनवादभयादित्यनेन तत्त्वतः संशयाभावः सूचितः ॥ ११ ॥

गो० टी०–पश्यत इति । पावकस्येति । पावकस्य क्रोधोतीव ज्वलनम् ॥ ११ ॥

रा० टी०–सीतामिति । वानरराक्षसां मध्ये सीतामवदत् ॥ १२ ॥

गो० टी०–स इति । तिर्यक्प्रेक्षितलोचनः तिर्यक्प्रेक्षणं पुरतः सीतादर्शनासहिष्णुत्वकृतम् ॥ १२ ॥

रा० टी०–तदाकारमाह—यदिति । धर्षणां परकृतपराभवं प्रतिमार्जता मानुषेण यत् कर्तव्यं तदिदं रावणं हत्वा मयेदं कृतम् तत्र हेतवः तपसा भावितः परिशीलितः आत्मा परमात्मा येन तेन अगस्त्येन मुनिना निर्जिता जीवलोकस्य दुराधर्षा इत्यत्रवातापिभयात् धर्षयितुमशक्या दक्षिणा दिगिव श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–यत्कर्तव्यमित्यादिपादश्लोक एकान्वयः । हे सीते, धर्षणां परिमार्जता । " मृजेरजादौ विभाषा वृद्धिः" इति वृद्धिः । मनुष्येण यत्कर्तव्यं तत् सकलं कृतम् । शत्रुहस्तादमर्षणादित्यत्रशेषः ॥ १३ ॥

१४–१५] ति० टी०–जीवलोकस्य दुराधर्षेत्यन्वयः । इत्यत्रवातापिभयादिति शेषः । रावणभयात्प्राणिमात्रस्य दुराधर्षा युद्धेन निर्जिता ॥ १४ ॥ १५ ॥

गो० टी०–भावितात्मना ध्यानात्मस्वरूपेण, अगस्त्येन । इत्यत्रक्रान्तत्वाज्जीवलोकस्य दुराधर्षा दुःसंचारा, दक्षिणा दिगिव अमर्षणात् अमर्षहेतोः, शत्रुहस्तान्मया त्वं निर्जितेति संबन्धः ॥ १४ ॥

रा० टी०–विदित इति । योऽयं रणपरिश्रमः सुहृद्वीर्यात् सुतीर्णः स परिश्रमः विदितः प्रसिद्धोऽस्तु यतदर्थमेव कृत इति शेषस्यदर्थमन्यार्थं मया न कृतः एतेन रावणवधादिश्रममन्तरापि स्यादिति सूचितम् तेन अपरिमितगुणवत्त्वेन स्वरूपः स्वगुणो व्यक्तिः, अयं त्वत्कलङ्कापनोदितोऽन्य पर्यायः ॥ १५ ॥

गो० टी०–विदितश्चेति । योऽयं रणपरिश्रमः सुहृदां वीर्यानीर्णः निर्गूढः, सः त्वदर्थं मया न कृत इति विदितोऽस्तु ॥ १५ ॥

१६] ति० टी०–अपवादं स्वदारापहारिणं हन्तुं नाशक्नोदित्यपवादं परिमार्जता । न्यङ्कं नीचत्वं परिमार्जतेदं कृतमिति शेषः ॥ १६ ॥

रा० टी०–रक्षतेति । वृत्तं सदाचारं रक्षता अत एव अपवादं स्वदारापहारिणमप्ययं हन्तुं न शक्नोतीत्यपकीर्तिम्

१ ब्रुवतस्त्वेति गो.पाठः । २ भूयः क्रोधो व्यवर्धतेति गो.पाठः । ३ इदं पद्यं गो. पुस्तके । ४ इदं पद्यं गो. पुस्तके नास्ति । ५ अत्रवीत्पुरुषं सीतामिति गो.पा.६ परीति गो.रा. पा. । ७ मयापि तत्कृतं सीते इति रा.पा. ।८ सकलं सीते इति गो.पा. । ९ शत्रुहस्तादमर्षणादिति गो.रा.पाठः । १० ते भद्रे इति गो. पाठः । ११ स इति गो. पा. । १२ कृतमिति रा. पाठः । १३ सर्वश इति गो. रा. पाठः । १४ व्यङ्कमिति रा.पा.।१५ रक्षतेति गो. पा. ।

प्राप्तचारित्रसंदेहा मम प्रतिमुखे स्थिता । दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढौ ॥ १७ ॥
तद्गच्छ त्वानुजानेऽद्य यथेष्टं जनकात्मजे । एता दश दिशो भद्रे कार्यमस्ति न मे त्वया ॥ १८ ॥
कः पुमांस्तु कुले जातः स्त्रियं परगृहोषिताम् । तेजस्वी पुनरादद्यात्सुहृल्लोभेन चेतसा ॥ १९ ॥
रावणाङ्कपरिक्लिष्टां दृष्टां दुष्टेन चक्षुषा । कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् ॥ २० ॥
यदर्थं निर्जिता मे त्वं सोऽयमासादितो मया । नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामिति ॥२१॥
तदेतद्व्याहृतं भद्रे मयैतत्कृतबुद्धिना । लक्ष्मणे वाथ भरते कुरु बुद्धिं यथासुखम् ॥ २२ ॥
शत्रुघ्ने वाथ सुग्रीवे राक्षसे वा विभीषणे । निवेशय मनः सीते यथा वा सुखमात्मना ॥ २३ ॥
नहि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम् । मर्षयत्येचिरं सीते स्वगृहे पर्यवस्थिताम् ॥ २४ ॥

परिमार्जता अत एव प्रख्यातस्य दुष्टनिग्रहकारकत्वेन प्रसिद्धस्य आत्मवंशस्य व्यङ्गं न्यूनत्वं च परिमार्जता मया एतत् कृतमिति शेषः ॥ १६ ॥

गो० टी०—तर्हि किमर्थमेष परिश्रम इत्यत आह—रक्षतेति । अत्र मया रणपरिश्रमः कृत इत्युपपद्यते । दुष्टं रक्षता अपवादं न्यक्कृतं अयशस्यं च परिरक्षता परिहरता निवारयता मया रणपरिश्रमः कृतः ॥ १६ ॥

१७–१८] ति० टी०—नेत्रातुरस्य नेत्ररोगिणः १७॥१८

रा० टी०—प्राप्तेति । प्राप्तः चारित्रस्य सदाचारस्य संदेहः परगृहोषितात्वेन संशयो यस्याः सा मम प्रतिमुखे सम्मुखे स्थिता त्वं नेत्रातुरस्य नयनपीडाकुलस्य प्रतिमुखे स्थितो दीप इव दृढमत्यन्तं प्रतिकूलासि तत्तस्माद्देनोः त्वा त्वामनुजाने बोधयामि अतः एताः दश दिशः यथेष्टमिच्छामनतिक्रम्य गच्छ त्वया मे कार्यं नास्ति श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०—प्राप्तेति । परगृहवासेन प्राप्तचारित्रसंदेहा त्वं नेत्रातुरस्य दीप इव प्रतिकूलासि । अनेनोपमानेन वस्तुतः सीताया दोषो नास्ति । स्वसंदेहेनाहं प्रतिकूलीकरोमीति व्यज्यते ॥ १७ ॥ १८ ॥

१९] ति० टी०—सुहृल्लोभेन सुहृद्भिरकालस्त्रिय इति लोभो जिघृक्षा यस्य तेन ॥ १९ ॥

रा० टी०—प्रयोजनाभावे हेतुमाह—क इति । सुहृदां लोभो जिघृक्षा यस्मिन् तेन चेतसोपलक्षितः कुले सद्वंशे जातः कस्तेजस्वी परगृहोषितां स्त्रियं पुनरादद्यात् गृह्णीयात् न कोपीत्यर्थः ॥ १९ ॥

गो० टी०—कः पुमानिति । सुहृल्लेखेन सुहृल्लेखा रणरणकम् सुहृल्लेखामर्हतीति सुहृल्लेख्यं तेन । रणरणकातिशयपुरस्कृतेनेत्यर्थः ॥ १९ ॥

२०–२१] ति० टी०—रावणस्य दुष्टेन चक्षुषा कामोपहतनेत्रेण दृष्टाम् । एवं च विपन्नवदग्राह्यामित्यर्थः २०॥२१

रा० टी०—रावणेति । कुलं स्वोत्तमवंशं व्यपदिशन् कथयन्नहं रावणाङ्के परिक्लिष्टामत एव दुष्टेन चक्षुषा दृष्टां त्वां कथमादद्यां गृह्णीयाम् ॥ २० ॥

गो० टी०—रावणेति । व्यपदिशन् कीर्तयन् ॥ २० ॥

रा० टी०—यदर्थमिति । यदर्थं मे मया त्वं निर्जिता निर्जयेन प्राप्ता सोयं त्वदर्शनरूपोर्थः मया आसादितः प्राप्तः अतः यथेष्टं गम्यतां मे अभिष्वङ्गः सङ्गो नास्ति ॥ २१ ॥

गो० टी०—तदर्थमिति । तदर्थं कुलार्थम् । अभिष्वङ्गः आसक्तिः । अनुरागो वा ॥ २१ ॥

२२] ति० टी०—कृतबुद्धिना निश्चितबुद्धिना । अस्मदीयेषु यत्र कुत्रापि तिष्ठेत्याह—लक्ष्मण इत्यादि ॥ २२ ॥

२३] ति० टी०—यथा वा सुखम् । स्वमातृपितृकुले वेत्यर्थः ॥ २३ ॥

रा० टी०—तदिति । कृतबुद्धिना सम्पादितनिश्चयेन मया यस्मात् एतद्व्याहृतं कथितं तत्तस्माद्धेतोः लक्ष्मणादावन्यतमे बुद्धिं कुरु सम्मतिं पृच्छेत्यर्थः अत एव यथात्मनस्सुखं तथा मनो निवेशय श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

गो० टी०—इति प्रव्याहृतमित्यादिश्लोकद्वयमेकान्वयम् । अत्र लक्ष्मणादौ मनस्करणं नाम अनाधाया रक्षकत्वेन तत्तद्गृहे वर्तनम् । भर्त्रा परित्यक्तायाः स्त्रिया बन्धुगृहे वासविधानात् । न स्त्री स्वातन्त्र्यमर्हतीति स्मृतेः न त्वत्रान्यथा ग्रहीतुं युक्तम् । महापुरुषेण तादृशोक्त्ययोगात् ॥ २२–२४ ॥

२४] ति० टी०—सर्वलोकस्य मम च त्वयि दृष्टः संदेहो दुर्निवार इत्याह—न हि त्वामित्यादि ॥ २४ ॥

रा० टी०—नहीति । स्वगृहे चिरं पर्यवस्थितां दिव्यरूपां त्वां रावणो दृष्ट्वा न मर्षयेत् ॥ २४ ॥

---

१ दृढमिति गो. रा पाठः । २ त्वान्यनुजानीतेति गो. अन्यान्यनुजानीतेति रा. पाठः । ३ ह्रीति गो. रा. पाठः । ४ लेख्येनेति गो. पाठः । ५ भ्रष्टामिति गो. पाठः । ६ तदिति गो. पाठः । ७ यद्वः प्रत्याहृतमिति गो. पाठः । ८ इत इति गो. रा. पाठः । ९ इतिप्रेति गो. पाठः । १० सुग्रीवे वानरेन्द्रे वा राक्षसेन्द्रे इति गो. रा. पाठः । ११ मर्षयेत् चिरमिति गो. रा. पाठः । १२ परिवर्तिनीमिति गो. पाठः ।

ततः प्रियार्हश्रवणा तदप्रियं प्रियादुपश्रुत्य चिरस्य मानिनी ।
मुमोच बाष्पं रुदती तदा भृशं गजेन्द्रहस्ताभिहतेव वल्लरी ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

षोडशाधिकशततमः सर्गः ।

एवं रामेण परित्यक्ता वैदेही पतिं विना जीवितुमुत्सहमाना लक्ष्मणेन चितां ज्वलयित्वाऽधोमुखं काकुत्स्थं प्रदक्षिणीकृत्य देवब्राह्मणांश्च प्रणम्य यदि मच्चित्तं रामान्नापसर्पति तत्पावकिः पातु मामिति प्रतिज्ञाय स्त्रीषु रक्षोवानरेषु च हाहेति शब्दायमानेष्वग्नेयमनेष्व्यनल विवेश ।

एवमुक्ता तु वैदेही परुषं रोमहर्षणम् । राघवेण सरोषेण श्रुत्वा प्रव्यथिताभवत् ॥ १ ॥
सा तदाश्रुतपूर्वं हि जने महति मैथिली । श्रुत्वा भर्तुर्वचो घोरं[1] लज्जयावनताभवत् ॥ २ ॥
प्रविशन्तीव गात्राणि स्वानि सौ जनकात्मजा । वाक्शरैरस्तैः[2] सशल्येव[3] भृशमश्रूण्यवर्तयत् ॥ ३ ॥
ततो बाष्पपरिक्लिन्नं[4] प्रमार्जन्ती स्वमाननम् । शनैर्गद्गदया वाचा भर्तारमिदमब्रवीत् ॥ ४ ॥
किं माममदृशं वाक्यमीदृशं श्रोत्रदारुणम् । रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव ॥ ५ ॥
न तथास्मि महाबाहो यथा मामवगच्छसि । प्रत्ययं गच्छ मे स्वेन चारित्रेणैव ते शपे ॥ ६ ॥

२५] ति० टी०—प्रियार्हश्रवणा प्रियश्रवणार्हेत्यर्थः गजेन्द्रहस्ताभिहता वल्लरी यथा तथा बाष्पं मुमोचेत्यर्थः ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

रा० टी०—तत इति । प्रियार्हं श्रवणं यस्याः प्रियश्रवणार्हेत्यर्थः सा चिरस्य मानिनी सर्वकालं सत्कृता सीता प्रियात् रामात् तदप्रियमुपश्रुत्य गजेन्द्रहस्ताभिहता वल्लरीव बाष्पं मुमोच ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे सप्तदशाधिकशततमः सर्गः ॥ ११७ ॥

गो० टी०—तत इति । सत्कृता गजभक्ष्यलतासदृशीभूतः २५

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

१] ति० टी०—एवमिति ॥ १ ॥

रा० टी०—रामपरुषोक्तिश्रवणानन्तरकालिकं सीतावृत्तान्तमाह—एवमित्यादिभिः । सरोषेण राघवेण एवं परुषं रोमहर्षणमुक्ता वैदेही भृशं प्रव्यथिताभवत् ॥ १ ॥

गो० टी०—अथ सीताग्निप्रवेशः—एवमुक्त्वा त्विति । स्पष्टम् ॥ १ ॥

२–४] ति० टी०—जने महति । महाजनसंनिधावित्यर्थः ॥ २–४ ॥

रा० टी०—सेति । अश्रुतपूर्वं रूक्षं भर्तृवचः महति जने तत्सन्निधौ श्रुत्वा मैथिली लज्जया अवनताभवत् ॥ २ ॥

गो० टी०—सेति । जने महति महाजनमध्ये लज्जया व्रीडिता । अतिनम्रमुखी बभूवेत्यर्थः ॥ २ ॥

रा० टी०—प्रविशन्तीति । तैः रामोक्तैः वाक्शरैः सशल्या इव अत एव स्वानि गात्राणि प्रविशन्तीव जनकात्मजा व्यथिताभवत् ॥ ३ ॥

रा० टी०—तत इति । बाष्पैरश्रुभिः परिक्लिन्नं स्वमाननं प्रमार्जन्ती सीता भर्तारमिदमब्रवीत् ॥ ४ ॥

गो० टी०—प्रविशन्तीवेति । गात्राणि प्रविशन्ती संकुचन्तीत्यर्थः ॥ ३ ॥ ४ ॥

५] ति० टी०—अमदृशं त्वया वक्तुं मया श्रोतुं चायोग्यम् । रूक्षं परुषम्, अत एव श्रोत्रदारुणं श्रवणकटु ॥ ५ ॥

रा० टी०—तदाकारमाह—किमित्यादिभिः । प्राकृतः पुरुषः प्राकृतां स्त्रियमिव असदृशमीदृशं रूक्षं वाक्यं किं कथं श्रावयसे ॥ ५ ॥

गो० टी०—किमिति । असदृशं त्वया वक्तुं मया श्रोतुं चायोग्यम् । रूक्षं परुषम् । अत एव श्रोत्रदारुणं श्रवणकटु ॥ ५ ॥

६] ति० टी०—यथा त्वमवगच्छसि दुष्टेयमिति तथा नास्मि । स्वेन चारित्रेण पातिव्रत्यलक्षणेन ते शपे शपथेन तव प्रत्ययं संपादयिष्ये, ततो मे प्रत्ययं गच्छ ॥ ६ ॥

रा० टी०—नेति । यथा मामवगच्छसि इदानीं तर्केण जानासि तथाहं नास्मि प्रत्ययमस्मिन्नर्थे विश्वासं गच्छ तत्र कारणमाह चारित्रेण स्वपातिव्रत्यधर्मेण ते तुभ्यं शपे शपथं करोमि ॥ ६ ॥

गो० टी०—न तथेति । चारित्रेण ममेति शेषः । ते तुभ्यम् । "श्वाघन्दुङ्स्पाशपाम०" इति संप्रदानत्वम् । सुकृतेन शपमाना त्वां शपे ज्ञापयामीत्यर्थः ॥ ६ ॥

---

१ मैथिलीति गो. पाठः । २ सुश्रुशं प्रवेपितेति गो. रा. पाठः । ३ सल्लकीति गो. पाठः । ४ भृशमिति गो. रा. पाठः । ५ तद्वदिति गो. रा. पाठः । ६ रुक्षमिति गो. रा. पाठः । ७ पवेति गो. पाठः । ८ शल्यैरिति गो. पाठः ।

पृथक्स्त्रीणां प्रचारेण जातिं त्वं परिशङ्कसे । परित्यजैनां शङ्कां तु यदि तेऽहं परीक्षिता ॥ ७ ॥
यदहं गात्रसंस्पर्शं गतास्मि विवशा प्रभो । कामकारो न मे तत्र दैवं तत्रापराध्यति ॥ ८ ॥
मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते । पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरी ॥ ९ ॥
सह संवृद्धभावेन संसर्गेण च मानद । यदि तेऽहं न विज्ञाता हता तेनास्मि शाश्वतम् ॥ १० ॥
प्रेषितस्ते महावीर्यो हनुमानवलोककः । लङ्कास्थाहं त्वया राजन्कि तदा न विसर्जिता ॥११॥
प्रत्यक्षं वानरस्यास्य तद्वाक्यसमनन्तरम् । त्वया संत्यक्तया वीर त्यक्तं स्याज्जीवितं मया ॥१२॥

७] ति० टी०–पृथक्स्त्रीणां प्रचारेण चारित्रदर्शनेन हेतुना जातिं स्त्रीजातिं परिशङ्कसे दुष्टां मन्यसे । इदमनुचितमिति शेषः । यदि ते त्वयाहं परीक्षिता तदेमां शङ्कां त्यज ॥७॥

रा० टी०–तर्कस्यायुक्तत्वं बोधयन्ती आह–पृथगिति । पृथक्स्त्रीणां प्राकृतनारीणां प्रचारेण आचारेण न दृष्टान्तभूतेन जातिं प्राकृतविलक्षणनारीमपि त्वं परिशङ्कसे एवं नोचितमित्यर्थः अतो यद्यहं ते परीक्षिता तर्हि एनां शङ्कां परित्यज ॥ ७ ॥

गो० टी०–स्त्रीमात्रसाधारण्येन नाहं दुष्टयेत्याह–पृथक्स्त्रीणामिति । पृथक्स्त्रीणां प्राकृतस्त्रीणाम् प्रचारेण आचारेण हेतुना सर्वासामपि स्त्रीजातिं तथात्वेन शङ्कसे अहम् ते त्वया यदि परीक्षिता ज्ञातस्वभावा, तर्हीमां शङ्कां त्यज ॥ ७ ॥

८] ति० टी०–ननु का ते परीक्षा श्लोकोक्तदृष्टायास्तत्राह—यदहमिति । विवशास्वाधीना सती गात्रसंस्पर्शं गतास्मि प्राप्तास्मि । तत्र मे कामकारो न इच्छापूर्वकता न, तत्र बलात्स्पर्शे दैवमेवापराध्यत्यपराधं कारितवत् । दैवमेवात्र कारणं न मेऽत्रापराध इति भावः ॥ ८ ॥

रा० टी०–ननु राक्षसस्पर्शो जात एवेत्यत आह–यदीति। विवशा स्वानधीनाहं यदि गात्रस्पर्शं गतास्मि तत्र मे कामकारः इच्छापूर्विका प्रवृत्तिर्न अतः तत्र स्पर्शे दैवं देवायदृष्टमेवापराध्यति ॥ ८ ॥

गो० टी०–त्वयि ज्ञातस्वभावायामपि रावणाङ्कस्पर्शलक्षणो दोषस्त्यागहेतुरित्याशङ्क्याह—यद्यहमित्यादि । यद्यपि अहं विवशा सती गात्रसंस्पर्शं गतास्मि, तथापि तत्र मे कामकारः स्वेच्छाचरणम् नास्ति । तर्हि कस्यात्रापराध इत्यत्राह—दैवं तत्रेति ॥ ८ ॥

९] ति० टी०–स्वतो दोषजनकं कर्म तु मे नास्तीत्याह—मदधीनमिति । परैर्ग्रहीतुमशक्यमित्यर्थः । पराधीनेषु परैर्ग्रहीतुं शक्येषु दैवाधीनेषु च । यस्याश्छायास्मि तदधीनानि गात्राणि तयैव तदर्थमेवैषां निर्माणात् हृदयं तु तदीयमेवात्रापीति भावः ॥ ९ ॥

रा० टी०–मदिति । मदधीनं यत् हृदयं मनः तत्त्वय्येव वर्तते अनीश्वरी अहं पराधीनेषु गात्रेषु गात्रस्पर्शेषु सत्सु किं करिष्यामि ॥ ९ ॥

गो० टी०–मदधीनमिति । मदधीनं परैर्ग्रहीतुमशक्यम्, यद्हृदयं तत्तु तस्मिन्काले त्वयि वर्तते अवर्तत । पराधीनेषु परैर्ग्रहीतुं शक्येषु गात्रेषु विषये, अनीश्वरा अस्वतन्त्रा अहं किं करिष्यामि किं कुर्याम् ॥ ९ ॥

१०] ति० टी०–सह युगपत्संवृद्धो भावः परस्परानुरागलक्षणस्तेन संसर्गेण चिरकालसहवासेन च यद्यहं ते त्वया गुणवत्त्वेन न विज्ञाता तेन त्वदज्ञानेन हेतुनाहं शाश्वतं हता चिरकालं दुःखमग्ना कृता ॥ १० ॥

रा० टी०–सहेति । सह एककालावच्छेदेन संवृद्धो भावः परस्परानुरागो यस्मिन् तेन संसर्गेण सार्वकालिकसम्बन्धेन यद्यहं ते न विज्ञाता तर्हि तेन भवदज्ञानेन शाश्वतं निरन्तरमहं हतास्मि ॥ १० ॥

गो० टी०–स्वभावपरिज्ञानहेतुभूतमहसंवर्धनसंसर्गावपि प्रत्ययं यदि नोत्पादयतः तर्हि न किमपि ते प्रत्ययमुत्पादयितुं शक्नुयादित्याशयेनाह–सह संवृद्धेति । सह संवृद्धभावात् स्वभावपरिज्ञानहेतुना सह संवर्धनेन संसर्गेण संश्लेषेण च यद्यहं ते न विज्ञाता । ततः मत्स्वभावाज्ञानेन शाश्वतम् अत्यर्थम् हतास्मि ॥ १० ॥

११] ति० टी०–अवलोककः । अवलोकितुमन्वेष्टुमित्यर्थः । तदा किं न त्वया विसर्जिता पुनरङ्गीकाराभावं किमिति न श्रावितः ॥ ११ ॥

रा० टी०–प्रेषित इति । अवलोककः अवलोकितुं यदा हनुमान् ते त्वया प्रेषितः तदा लङ्कास्थाहं किं किमर्थं न विसर्जिता अङ्गीकाराभावं श्राविता ॥ ११ ॥

गो० टी०–प्रेषित इति । अवलोककः अवलोकितुम । अन्वेष्टुमिति यावत् । " तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम " इति ण्वुलप्रत्ययः ॥ ११ ॥

१२] ति० टी०–तदोक्तौ को विशेषस्तत्राह—प्रत्यक्षमिति । एवं च तदैव जीवत्यागे एतावत्पर्यन्तं महती त्वद्विरहव्यथा न स्यादिति भावः ॥ १२ ॥

रा० टी०–पूर्वं श्रवणे गुणमाह—प्रत्यक्षमिति । तद्वाक्यसमनन्तरं त्यागबोधकवाक्यश्रवणोत्तरकाले अस्य हनुमतः प्रत्यक्षं त्वया संत्यक्तया मया जीवितं त्यक्तं स्यात् अत एव संशये जीवितं जीवनं न्यस्य संस्थाप्य अयं त्वया भ्रमस्ते न स्यात् अत एव विफलः निष्प्रयोजनः अयं तव सुहृज्जनपरिक्लेशश्च न स्यात् श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

१ अनीश्वरेति गो. पाठः ।

न वृथा ते श्रमोऽयं स्यात्संशये न्यस्य जीवितम् । सुहृज्जनपरिक्लेशो न चायं विफलस्तव ॥ १३ ॥
त्वया तु नृपशार्दूल रोषमेवानुवर्तता । लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम् ॥ १४ ॥
अपदेशो मे जनकान्नोत्पत्तिर्वसुधातलात् । प्रथम वृत्तं न वृत्तज्ञ बहु तेन पुरस्कृतम् ॥ १५ ॥
न प्रमाणीकृतः पाणिर्बाल्ये मम निपीडितः । मम भक्तिश्च शीले च सर्वं ते पृष्ठतः कृतम् ॥ १६ ॥
इति ब्रुवन्ती रुदती बाष्पगद्गदभाषिणी । उवाच लक्ष्मणं सीता दीनं ध्यानपरायणम् ॥ १७ ॥
चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजम् । मिथ्यापवादोपहता नाहं जीवितुमुत्सहे ॥ १८ ॥
अप्रीतेन गुणैर्भर्त्रा त्यक्ताया जनसंसदि । या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनम् ॥ १९ ॥
एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा । अमर्षवशमापन्नो राघवं समुदैक्षत ॥ २० ॥
स विज्ञाय मनश्छन्दं रामस्याकारमूचितम् । चितां चकार सौमित्रिर्मते रामस्य वीर्यवान् ॥ २१ ॥
नेहि रामं तदा कश्चित्कालान्तकयमोपमम् । अनुनेतुमथो वक्तुं द्रष्टुं वाप्यशकत्पुरुहूत ॥ २२ ॥
अधोमुखं स्थितं रामं ततः कृत्वा प्रदक्षिणम् । उपावर्तत वैदेही दीप्यमानं हुताशनम् ॥ २३ ॥
प्रणम्य दैवतेभ्यश्च ब्राह्मणेभ्यश्च मैथिली । बद्धांजलिपुटा चेदमुवाचाग्निसमीपतः ॥ २४ ॥
यथा मे हृदयं नित्यं नापसर्पति राघवात् । तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥ २५ ॥

गो० टी०–तदात्वे को विशेष इत्यत आह–प्रत्यक्षमिति ॥ १२ ॥

१३] ति० टी०–जीवितं संशये न्यस्य युद्धे जयस्य संदिग्धत्वात्तत्रैव प्रतिष्ठाप्य योऽयं तथा श्रमः कृतः स न कर्तव्यः स्यात् । तथा विफलः सुहृज्जनपरिक्लेशश्च न कर्तव्यो भवेत् १३

गो० टी०–एवं कृते न केवलं ममैव व्यर्थाभावः तव स्वसुहृदां च जयार्थप्रयासोऽपि न स्यादित्याह–न वृथेति । जीवितं संशये न्यस्य कृतोऽयं श्रम इत्यर्थः ॥ १३ ॥ १४ ॥

१४ [ति० टी०–स्त्रीत्वमेव प्राकृतसाधारणस्त्रीजातित्वेव पुरस्कृतं चिन्तितम् ॥ १४ ॥

रा० टी०–त्वयेति । लघुना मनुष्येणेव रोषमनुवर्तता त्वया स्त्रीत्वं प्राकृतस्त्रीधर्म एव पुरस्कृतम् मयि निक्षिप्तम् ॥१४॥

१५] ति० टी०–मेऽपदेशो वैदेहीत्यादिव्यवहारो जनकाज्जनकयज्ञभूमिसंबन्धमात्रात् । नोत्पत्तिर्जनकादित्यनुकर्षः । कुतस्तर्हि सा तत्राह–वसुधातलात् । एवं मनुष्ययोन्युत्पत्तिरप्राकृतस्त्रीत्वोपपादिकोक्ता । तथा मे बहुमानार्हं वृत्तं चारित्रं च ते त्वया न पुरस्कृतमपरित्यागे हेतुत्वेन न विचारितम् ॥ १५ ॥

रा० टी०–अपदेश इति । मे जनकात् विदेहधर्ममवलोक्य मे अपदेशः धर्मवत्त्वं न पुरस्कृतः वसुधातलात् यज्ञभूमेः उत्पत्तिश्च न पुरस्कृता उत्पत्तिशुद्धयेयं शुद्धैव भविष्यतीति मतिर्न कृतेत्यर्थः तेन हेतुना बहुचिरं कालमनुभूतं मम वृत्तं च न पुरस्कृतम् ॥ १५ ॥

गो० टी०–अपदेशेनेति । अपदेशेन जनकात् जनकमपदिश्येत्यर्थः ॥ १५–१७ ॥

१६–१८] ति० टी०–किं च बाल्ये कृतं धर्मप्रजोद्देश्यकं पाणिग्रहणमपि त्वया परित्यागे न प्रमाणीकृतम् ॥१६–१८॥

रा० टी०–नेति । बाल्ये निपीडितो मे पाणिः त्वया न प्रमाणीकृतः अत एव मम भक्त्यादि पृष्ठतः कृतम् ॥ १६ ॥

रा० टी०–इतीति । इति ब्रुवन्ती सीता लक्ष्मणमुवाच १७

रा० टी०–तदाकारमाह–चितामित्यादिभिः । अस्य व्यसनस्य भेषजमौषधं चितां कुरु तत्र हेतुः मिथ्यापवादोपहताहं जीवितुं नोत्सहे ॥ १८ ॥

गो० टी०–चितामिति । मिथ्योपघातः मिथ्यापवादः१८

१९–२०] ति० टी०–गुणैरप्रीतेन भर्त्रा जनसंसदि त्यक्ताया या गतिः क्षमा तां गतिं गन्तुं हव्यवाहनं प्रवेक्ष्ये । 'अप्रीतस्य गुणैर्भर्तुः' इति पाठान्तरम् । तत्रापि शेषे षष्ठी ॥ १९ ॥ २० ॥

रा० टी०–अप्रीतेनेति । गुणैः आरोपितमश्विप्रदृगुणैः अप्रीतेन भर्त्रा त्यक्तायाः मम या गतिः क्षमा युक्ता तां गतिं गन्तुं हव्यवाहनमपि प्रवेक्ष्ये ॥ १९ ॥

गो० टी०–अप्रीतस्येति । गुणैरप्रीतस्य विद्यमानैः पातिव्रत्यादिगुणैरपि अप्रीतस्य, भर्तुरित्यर्थः तत्यक्तायाः मे, या गन्तुं क्षमा गतिः प्रत्ययजननार्थं या योग्या गतिः, तं हव्यवाहनम् प्रवेक्ष्य इति योजना ॥ १९ ॥

रा० टी०–एवमिति । अमर्षवशमापन्नो लक्ष्मणः राघवं समुदैक्षत ॥ २० ॥

गो० टी०–एवमुक्तस्त्विति । अमर्षवशं दैन्यवशम् २०

२१–२५] ति० टी०–मनश्छन्दं मनोभिप्रायम् । आकारमूचितं भर्तृभावाकारमूचितम् ॥ २१–२५ ॥

१ नरेति गो. रा. पाठः । २ अपदेशेनेति गो. पाठः । ३ बालेनेति गो. पाठः । ४ उपघातेति गो. पाठः । ५ इदं पद्यं गो. पुस्तके नास्ति ।

यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः । तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥२६॥
[कर्मणा मनसा वाचा यथा नातिचराम्यहम् । राघवं सर्वधर्मज्ञं तथा मां पातु पावकः ॥
आदित्यो भगवान्वायुर्दिशश्चन्द्रस्तथैव च । ऊहश्चापि तथा संध्ये रात्रिश्च पृथिवी तथा ॥
यथान्येपि विजानन्ति तथा चारित्रसंयुताम् ॥]
एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम् । विवेश ज्वलनं दीप्तं निःशङ्केनान्तरात्मना ॥ २७ ॥
जनश्च सुमहांस्तत्र बालवृद्धसमाकुलः । ददर्श मैथिलीं दीप्तां प्रविशन्तीं हुताशनम् ॥ २८ ॥
सा तप्तनवहेमाभा तप्तकांचनभूषणा । पपात ज्वलनं दीप्तं सर्वलोकस्य संनिधौ ॥ २९ ॥
ददृशुस्तां विशालाक्षीं पतन्तीं हव्यवाहनम् । सीतां सर्वाणि रूपाणि रुक्मवेदिनिभां तदा ॥ ३० ॥
ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम् । ऋषयो देवगन्धर्वा यज्ञे पूर्णाहुतीमिव ॥ ३१ ॥
प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने । पतन्तीं संस्कृतां मन्त्रैर्वसोर्धारामिवाध्वरे ॥ ३२ ॥
ददृशुस्तां त्रयो लोका देवगन्धर्वदानवाः । शप्तां पतन्तीं निरये त्रिदिवादेवतामिव ॥ ३३ ॥

रा० टी०-स इति । आकारेण चेष्टया सूचितं रामस्य मनसः छन्दमभिप्रायं विज्ञाय रामस्य मते स्थितः सौमित्रिः चितां चकार ॥ २१ ॥

गो० टी०-स इति । आकारः भ्रूसंज्ञादिः । मते सिद्धान्ते । स्थित इति शेषः ॥ २१ ॥

रा० टी०-नहीति । तदा तस्मिन् काले कश्चित्सुहृत् अनुनेतुं विज्ञापयितुं द्रष्टुं वा नाशकत् ॥ २२ ॥

रा० टी०-अधोमुखमिति । वैदेही दीप्यमानं हुताशनं उपावर्तत समीपं अतिष्ठत् ॥ २३ ॥

रा० टी०-प्रणम्येति । वैदेही इदमुवाच ॥ २४ ॥

गो० टी०-अधोमुखमिति । पतिव्रतायाः कथं निर्व्याजं प्रत्ययं पश्यामीति लज्जया मुखदर्शने दाक्षिण्यं भविष्यतीति बुद्ध्या चावनतमुखम् । शनैः रामानुभवेन मन्दं यथा तथा ॥ २२-२४ ॥

रा० टी०-तदाकारमाह—यथेति । द्वाभ्यां यथा यदि मे हृदयं राघवात् नित्यं नापसर्पति तथा तदा पावको मां पातु ॥ २५ ॥

गो० टी०-यथा मामिति । यथा शुद्धचारित्रामेव मामन्यायेन दुष्टां जानाति, तथा चेत् अदुष्टां दुष्टेति जानाति चेत्, पावकः पातु । रामस्य मयि दोषज्ञानम् यथार्थं चेत्पावित्यर्थः ॥ २५ ॥ २६ ॥

२६-२८] ति० टी०-राघवः शुद्धचारित्रामदुष्टामेव मां यदि दुष्टां जानाति, अहं तथा चेददुष्टा चेत्पावको मां सर्वतः पातु । केशाम्बरादिकमपि माधाक्षीदित्यर्थः ॥२६-२८॥

रा० टी०-यथेति । यथा यदि शुद्धचारित्रामेव मां राघवो दुष्टां जानाति तदा पावकः पातु ॥ २६ ॥

रा० टी०-एवमिति । निश्शंकेन अन्तरात्मना मनसा वैदेही हुताशनं परिक्रम्य ज्वलनं विवेश ॥ २७ ॥

रा० टी०-जन इति । बालवृद्धैस्समाकुलः महान् जनः हुताशनं प्रविशन्तीं मैथिलीं ददर्श ॥ २८ ॥

गो० टी०-आदित्य इत्यादिसार्धश्लोक एकान्वयः । आदित्यादयोन्ये च यथा मां चारित्रसंयुतां विजानन्ति, तथा मां पातु पावक इति संबन्धः ॥ २७ ॥

गो० टी०-एवमिति । परिक्रम्य प्रदक्षिणीकृत्य । निःसङ्गेन शरीरे निरभिलाषेण, अन्तरात्मना मनसा । उपलक्षणे तृतीया ॥ २८-३० ॥

२९] ति० टी०-सा तप्तेत्यादि । एतदर्थमेव स्नातायाः अलङ्कारयुतायाः आनयनं कारितम् ॥ २९ ॥

रा० टी०-सेति । सा वैदेही दीप्तं ज्वलनं पपात ॥२९॥

३०-३१] ति० टी०-सर्वाणि रूपाणि सर्वाणि भूतानि । 'सर्वाणि रूपाणि विचित्य धीरः' इत्यादौ तद्बोधकतया प्रसिद्धो रूपशब्दः ॥ ३० ॥ ३१ ॥

रा० टी०-ददृशुरिति । हव्यवाहनं पतन्तीं रुक्मवेदिनिभां सीतां सर्वाणि भूतानि ददृशुः ॥ ३० ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह ददृशुरिति । ऋषिप्रभृतयः पूर्णाहुतीमिव सीतां ददृशुः ॥ ३१ ॥

गो० टी०-ददृशुरिति । आज्याहुतीमिवेत्यादिदृष्टान्तेन देव्याः परमपावनत्वं द्योत्यते ॥ ३१ ॥

३२] ति० टी०-वसोर्धारां संततां घृतधाराम् ॥ ३२ ॥

रा० टी०-प्रचुक्रुशुरिति । अध्वरे मन्त्रैस्संस्कृतां वसोर्घृतस्य धारामिव हव्यवाहने पतन्तीं सीतां दृष्ट्वा स्त्रियः प्रचुक्रुशुः ॥ ३२ ॥

गो० टी०-प्रचुक्रुशुरिति । वसोर्धारां संततां घृतधाराम् । अनेनाज्युज्जृम्भणं गम्यते ॥ ३२ ॥

३३] ति० टी०-शप्तां शापं प्राप्ताम्, अत एव त्रिदिवात्त्रिरये मनुष्ययोन्यादौ पतन्तीम् ॥ ३३ ॥

१ इदं सार्धपद्यमधिकं गो० पुस्तके । २ निःसंगेति गो० पाठः । ३ सीतां कुरुलोकयो लोकाः पुण्याज्याहुतीमिवेति गो० पा० ।

तस्यामग्निं विशन्त्यां तु हाहेति विपुलः स्वनः । रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षोडशाधिकशततमः सर्गः ॥ ११६ ॥

सप्तदशाधिकशततमः सर्गः ॥

सीताया अग्नौ प्रवेशसमये ब्रह्मरुद्रेन्द्रयमवरुणकुबेरा आगत्य हव्यवाहने पतन्तीं जानकीं कथमुपेक्षसे इति प्राञ्जलिं रामं पप्रच्छुः रामस्त्वहं मानवो दशरथजात इत्यात्मानं मन्ये इत्यब्रवीत् ब्रह्मा च भवान्मनुष्योऽपि तु साक्षान्नारायणो रावणायसुरवधार्थं मनुष्यरूपेणावतीर्ण इत्यादि रामायाकथयत् ।

ततो हि दुर्मना रामः श्रुत्वैवं वदतां गिरः । दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १ ॥
ततो वैश्रवणो राजा यमश्च पितृभिः सह । सहस्राक्षश्च देवेशो वरुणश्च जलेश्वरः ॥ २ ॥
पडर्धनयनः श्रीमान्महादेवो वृषध्वजः । कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ ३ ॥
एते सर्वे समागम्य विमानैः सूर्यसंनिभैः । आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ४ ॥
ततः सहस्राभरणान्प्रगृह्य विपुलान्भुजान् । अब्रुवन्विबुधश्रेष्ठा राघवं प्राञ्जलिं स्थितम् ॥ ५ ॥

रा० टी०—दृष्ट्वेति । शक्रामत एव त्रिदिवात् निरये पतन्तीं देवतामिव तां वह्नौ पतन्तीं सीतां त्रयो लोका दृष्टवन्तः ३३

गो० टी०—दृष्ट्वेति । देवाः स्वर्गवासिनः गन्धर्वा भूलोकवासिनः दानवाः पातालवासिनः सकलभोगाहंरूपत्वात् सीतायाः अनलप्रवेशस्यानर्हत्वाभिरण्यपतनानर्हस्वर्गीयदेवताहष्टान्तः ॥ ३३ ॥

३४] ति० टी०—अद्भुतोपम आश्चर्यमिरुपमा जातं यत्प्रवृत्तो सः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षोडशाधिकशततमः सर्गः ॥ ११६ ॥

रा० टी०—तस्यामिति । तस्यामग्नि विशन्त्यां सत्यां अद्भुतोपमः हाहेति विपुलः स्वनो बभूव ॥ ३४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे अष्टादशाधिकशततमः सर्गः ॥ ११८ ॥

गो० टी०—तस्यामिति । अद्भुतोपमः अद्भुततुल्यः । रावणागमनमारभ्य एतावत्पर्यन्तं सीतायाः परमभागवतभूतलक्ष्मणोपचारफलमुपपादितम् । वस्तुतः सीताया रावणागमनकाले अग्नौ प्रविष्टत्वात्तस्याः पुनरगमनार्थं मायासीताया रावणगृहीताया अग्नौ प्रवेश इत्यप्याहुः ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

१] ति० टी०—ततो हीति । एवं वदतां हाहेति वदतां सर्वेषामार्तां गिरः श्रुत्वा ततो हि तत एव दुर्मनाः खिन्नचित्तो रामो बाष्पव्याकुललोचनः प्राकृतस्त्रीवत्सीता एतदनर्हेति तद्वियोगतो बाष्पव्याकुललोचनो भूत्वा मुहूर्तं दध्यौ, किमुक्तं किं कृतं किं चातः परं कर्तव्यमिति चिन्तापरो बभूव ॥ १ ॥

रा० टी०—सीताग्निप्रवेशदर्शनहेतुकरामादिप्रभृतस्वजनशब्दानन्तरकालिकं श्लोकान्तमाह ततः इत्यादिभिः । वदतां गिरः श्रुत्वा दुर्मनाः ततेन प्रतीयमानो रामः मुहूर्तं दध्यौ ॥ १ ॥

गो० टी०—अथ रामस्तदः—ततो हीत्यादि । दुर्मनाः दुःखितमनाः, दध्यौ मनसा ध्यानं कृतवान् ॥ १ ॥

२] ति० टी०—अथावसरे दिक्पालसहितो रुद्रो हिरण्यगर्भश्च रामानुग्रहाय समागतावित्याह—तत इत्यादि ॥ २ ॥

३] ति० टी०—षडर्धनयनः श्रीमान् षडर्धनयनत्रिनेत्र इत्यर्थः । सर्वलोकस्य ब्रह्मलोकपर्यन्तं सर्वलोकवर्तिपदार्थानां स्रष्टा ब्रह्मविदां चतुर्मुखप्रजापतिविष्णुदेवराजादिदिक्पालवसिष्ठादिपुत्रितसंतानजब्राह्मणा ब्रह्मविदस्तेषां वरो ज्येष्ठो हिरण्यगर्भः । 'यो वै ब्रह्माणं विदधाति पूर्वम्, यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः, 'हिरण्यगर्भः समवर्तताग्रे' इति श्रुतेश्च ॥ ३ ॥

४] ति० टी०—एते सर्वे विमानैर्लङ्कामागम्य राघवमभिजग्मुः ॥ ४ ॥

रा० टी०—तत इति । ततोऽनन्तरं वैश्रवणः कुबेरः षडर्धनयनः त्रिनयन इत्यर्थः महादेवो ब्रह्मा अः विष्णुश्च एते सर्वे समागम्य संघीभूय विमानैः लङ्कामागम्य राघवमभिजग्मुः श्रीमान् शब्देन विष्णुलाभो वा बोध्यः श्लोकत्रयमेकान्वयि २—४

गो० टी०—तत इत्यादिश्लोकत्रयमेकं वाक्यम् ॥२—४॥

५] ति० टी०—प्रगृह्येत्यस्य । भारते तु—अग्निप्रवेशं सीताया अनुकृत्य रामस्य चारित्रसंदेहे सीतादुःखं दृष्ट्वा वाय्वग्निवरुणाद्युक्तयैव सीताङ्गीकार उक्तस्तत्रानुक्तोऽप्यग्निप्रवेशो मध्ये दृष्टव्य इत्याहुः । प्राग्रे तु—'सा तेन गर्हिता साध्वी विवेश ज्वलनं तदा' इत्युक्तम् ॥ ५ ॥

१ अमित्रकर्शन इति गो. रा. पाठः । २ परंतप इति गो. रा. पाठ । ३ प्राञ्जलिस्थितमिति समस्तं रा. पाठे ।

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानविदां विभुः । उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ॥
कथं देवगणश्रेष्ठमात्मानं नावबुद्ध्यसे ॥ ॥ ६ ॥
ऋतधामा वसुः पूर्वं वसूनां चै प्रजापतिः । त्रयाणामपि लोकानामादिकर्ता स्वयंप्रभुः ॥ ७ ॥
रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः । अश्विनौ चापि कर्णौ ते सूर्याचन्द्रमसौ दृशौ ॥ ८ ॥
अन्ते चादौ च मध्ये च दृश्यसे च परंतप । उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ ९ ॥
इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः । अब्रवीत्त्रिदशश्रेष्ठान्रामो धर्मभृतां वरः ॥ १० ॥
आत्मानं मानुषं मन्ये रामं दशरथात्मजम् । सोऽहं यत्सै यतश्चाहं भगवांस्तद्ब्रवीतु मे ॥ ११ ॥

रा० टी०–तत इति । त्रिदशश्रेष्ठाः सहस्ताभरणान् हस्ताभरणसहितान् भुजान् प्रगृह्य उद्यम्य प्राञ्जलिस्थितं ध्यानाङ्गत्वेन बद्धकरं राघवं राममब्रुवन् ॥ ५ ॥

गो० टी०–तत इति । प्रगृह्य उद्धृत्य ॥ ५ ॥

६] ति० टी०–कर्ता सर्वस्येति । मनुष्यदेहे राघवे सर्वलोककर्तृत्वानुपपत्तिमूलस्वरूपाभिप्रायेण । ज्ञानविदामौपनिषदज्ञानवताम् । देवगणा इन्द्रादयस्तेषां श्रेष्ठम् । 'विष्णुमुखा वै देवाः' इति श्रुतेः ॥ ६ ॥

रा० टी०–तदाकारमाह–कर्तेत्यादिभिः । सर्वस्य लोकस्य श्रेष्ठः कर्ता सर्वजगत्कर्तुरपि नियामक इत्यर्थः अत एव ज्ञानवतां सर्वविषयकज्ञानविशिष्टानां विभुः स्वामी त्वं हव्यवाहने पतन्तीं सीतां कथमुपेक्षसे एतेन सीताया न किञ्चिद्दोषसंसर्ग इति भवतो ज्ञातमस्तीति सूचितम् तेन अदोषे दोषारोपणमनुचितमिति ध्वनितम् ॥ ६ ॥

गो० टी०–कर्तेत्यादि । पूर्वं ब्रह्मणः अद्वारकं कर्तृत्वम्, अत्रसद्वारकं कर्तृत्वमिति न विरोधः । सर्वज्ञस्त्वं कथमज्ञ इवोपेक्षस इति भावः । देवगणश्रेष्ठं ब्रह्मादिदेवगणे श्रेष्ठम् ॥६॥७॥

७] ति० टी०–ऋतधामेत्यादिश्लोकत्रयं कतकासंमतम् । तीर्थस्त्वेवं व्याचष्टे–पूर्वं पूर्वस्मिन्कल्पे सृष्टेः पूर्वं वा वसूनां मध्ये ऋतधामा नाम वसुः । आदिकर्तांण्डाधिपतिरूपादिसृष्टिकर्ता । स्वयंप्रभुरितरानियम्यः ॥ ७ ॥

रा० टी०–इतीति । नन्वं दशरथसुतं मां कथमेवं वर्णयसीत्यत आह–कथमिति । देवगणश्रेष्ठं सर्वदेवेभ्योऽधिकमात्मानं स्वस्वरूपं कथं नावबुध्यसे अर्थं पृथक् श्रेष्ठत्वमुपादयितुं तद्विभूतीस्तादात्म्येनाह–ऋतेत्यादिभिः । त्रयाणां लोकानामादिकर्ता पूर्वं वसूनामृतधामा वसुः त्वमेव प्रजापतिस्त्वमेव ॥ ७ ॥

गो० टी०–आत्मस्वरूपमेवाह–ऋतधामेत्यादिश्लोकत्रयमेकं वाक्यम् ॥ ऋतधामाख्यो वसुरित्यर्थः । प्रजापतिप्रजास्वामीति वसुविशेषणम् । आदिकर्ता । अण्डाधिपतिपर्यन्ताद्वारकसृष्टिकर्तेत्यर्थः । स्वयं प्रभवतीति स्वयंप्रभुः । अनियम्य इत्यर्थः । रुद्राणां मध्ये अष्टमो रुद्रः, तथा साध्यानामित्यत्रापि । अन्ते चेति । अन्ते प्रलये, आदौ सृष्टेः प्राक् च दृश्यसे । अनेनोत्पत्तिविनाशराहित्यमुक्तम् । एवं सर्वज्ञः सर्वशक्तिः सर्वेश्वरोऽपि सन् अज्ञ इव विदेहकुले प्रादुर्भूतां सीतां किमर्थमुपेक्षस इत्यर्थः ॥ ८–१० ॥

८] ति० टी०–अष्टमो रुद्रो महादेवः । साध्यानामपि पञ्चमो वीर्यवान्रामः । विराड्रूपं वर्णयति—अश्विनौ चेत्यादि ॥ ८ ॥

रा० टी०–रुद्राणामिति । अष्टमो रुद्रो महादेवः साध्यानां पञ्चमः वीर्यवान्राम त्वमेव विराड्रूपत्वं वर्णयति अश्विनौ ते कर्णौ ॥ ८ ॥

९] ति० टी०–अन्ते चादौ चेत्यनेन सर्वभूततत्त्वं त्वमेवेति सूचितम् ॥ ९ ॥

रा० टी०–अन्त इति । अन्ते सृष्टिविनाशे आदौ सृष्टेः पूर्वं त्वमेव दृश्यसे अतः प्राकृतो मानुष इव वैदेहीं कथमुपेक्षसे ॥ ९ ॥

१०] ति० टी०–लोकपालैरिन्द्रादित्रयस्त्रैः पूर्वोक्तैः । लोकस्य भूलोकस्येदानीं साक्षात्स्वामी राघवो रघुकुलजः॥१०॥

रा० टी०–इतीति । लोकस्य स्वामी राघवः त्रिदशश्रेष्ठानब्रवीत् ॥ १० ॥

गो० टी०–इत्युक्त इति । लोकपालैः लोकरक्षकैः ॥११॥

११] ति० टी०–अथ ब्रह्मानुग्रहादेव ब्रह्मविद्यौन्मुख्यस्य श्रुत्यादिसिद्धतया तदौन्मुख्यस्यात्मानं नावबुध्यसे इति ब्रह्मणैव कृतत्वात्तज्जिज्ञासुरिव स्वीयानां स्वस्वरूपबोधनाय ब्रह्माणं गुरुमज्ञ इवोपासददित्याह—आत्मानमिति । अहमात्मानमात्मस्वरूपं सामान्यतोऽहंत्वेन प्रतीयमानं दशरथपुत्रं रामनामकं मनुष्यजातीयपिण्डमेव मन्ये, न तु ततोऽतिरिक्तं किञ्चिद्वेद्मि । भवद्भिरप्युक्तं स्वात्मानं नावबुध्यसे इति । एवं च सोऽहमेवंभूतार्हबुद्धिमान्यश्च परमार्थतो यत्तत्त्वो यतश्च यत्प्रकृतिकश्च तत्सर्वं भगवान्सर्वज्ञः परमगुरुर्मे मह्यमज्ञाय जिज्ञासवे ब्रवीतूपदिशतु । अयमेव ब्रह्मविद्योपदेशमार्गः सर्वत्र श्रुतिस्मृतिषु प्रसिद्धः ॥ ११ ॥

रा० टी०–तदाकारमाह–आत्मानमिति । अहमात्मानं दशरथात्मजं मानुषं मन्ये भगवान् भवान् तु यः यत्स्वरूपोऽहं यस्य स्वामी अहं यतो लोकादागतोऽहं तत्सर्वं ब्रवीतु दया-

१ वतामिति गो. रा. पाठः । २ त्वमिति गो. पा. । ३ त्वं हीति गो. पा. । ४ लोकानामिति गो. पा. । ५ यस्येति गो पा. ।

इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः । अब्रवीच्छृणु मे वाक्यं सत्यं सत्यपराक्रम ॥ १२ ॥
भवान्नारायणो देवः श्रीमांश्चक्रायुधः प्रभुः । एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ॥ १३ ॥
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव । लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ॥ १४ ॥
शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः । अजितः खड्गभृद्विष्णुः कृष्णश्चैव बृहद्बलः ॥ १५ ॥

रणात्मजं मन्ये इत्यनेन तद्वदेव धर्मप्रवर्तना ममाप्युचितेति सूचितम् तेन राक्षसादिष्वपि स्वस्यदाराणां संरक्षणार्थमेवं मया क्रियते इति सूचितम् ॥ ११ ॥

गो० टी०—ब्रह्मादिभिः सामान्यतः स्तूयमानोऽपि सर्वदेवपूजनीयाच्चतुर्भुजात् स्वप्रभावं लोके प्रख्यापयितुं स्वसौशील्यं दर्शयति—आत्मानमिति । आत्मानं मानुषं मन्ये । परत्वापेक्षया मानुषत्वाभिनय एव ममाभिमत इत्यर्थः । अत्रापि विशेषमाह—राममिति । रामं रामनामकम् । ततोऽप्यतिशयमाह—दशरथात्मजमिति । अवतारापेक्षया चक्रवर्तिपुत्रत्वमेव प्रियतममिति भावः । स्वस्य विष्ण्ववतारत्वं सुग्रीवादिभिरनवगतमिति तत्प्रतिपत्त्यर्थं स्वस्वरूपं पृच्छति—योहमिति । योहमिति स्वरूपप्रश्नः । यस्येति संबन्धिपप्रश्नः । यत इति प्रयोजनप्रश्नः । भगवान् तद्भवीत्विति । चक्रवर्तिपुत्रत्वमेव ममात्यन्तप्रियतमम् । स्वयं सर्वज्ञतया ममानभिमतमपि परत्वं प्रकटयत्वित्यर्थः । आकारगोपनविवरणस्यानभिमतत्वेऽपि स्वयमनुमतिदानं रावणनिरसनेन निष्पत्रकार्यतया ॥ १२ ॥ १३ ॥

१२] ति० टी०—इति ब्रुवाणं जिज्ञासते मह्यं ब्रवीत्विति ब्रुवाणम् । वाक्यं देहदेहितत्त्वोपदेशरूपम् ॥ १२ ॥

रा० टी०—इतीति । हे राम ! मे सत्यं वचनं यस्य इति काकुत्स्थं रामं ब्रह्मा अब्रवीत् ॥ १२ ॥

१३] ति० टी०—नारं जीवसमूहोऽयनं स्थानं यस्य स विराड्रूपो नारायणपदवाच्यो यः स त्वमसि । दत्तः स्वप्रकाशः । विराट्चिह्नान्याह—चक्रेति । इदं शङ्खगदादेरप्युपलक्षणम् । एकशृङ्गो वराहः, एकदंष्ट्रो धरणीवराहः । अयं विराड्विष्णुर्भूतेभेदः । भूतभव्यसपत्नजिद्भूतभव्यकालरूपो यः सपत्नो जनिमृतिहेतुत्वात्तं जयति सः । नित्य इति यावत्॥१३॥

रा० टी०—तदाकारमाह—भवानित्यादिभिः । भूताः भूतकालकाः उपलक्षणतया वर्तमानकालका अपि ये सपत्नाः तान् जयति स भवानेव नारायणादिः विभूतीनां तादात्म्यमभिप्रेत्येदम् एवमुत्तरत्रापि बोध्यम् ॥ १३ ॥

गो० टी०—स्वरूपप्रश्नोत्तरमाह—भवानिति । नारा. अयनं यस्यासौ नारायणः । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ इति मनुस्मरणात् । तेन जगत्कारणत्वमुक्तम् । एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी इति श्रुतेः । अवाप्तसमस्तकामस्य जगद्व्यापारानुपपत्तिं परिहरति—देव इति । दीव्यतीति देवः क्रीडाप्रसक्तः । लीलायाः प्रयोजनत्वात् । परिपूर्णस्यापि व्यापारः संभवतीति भावः । त्वं परत्वाधारणं नामधेयमुक्त्वा पत्नीवैशिष्ट्यमाह—श्रीमानिति । नित्यं श्रीरस्यास्तीति श्रीमान् नित्ययोगे मतुप् । असाधारणमाधुर्यमाह—चक्रायुध इति । स्वरूपवैलक्षण्यमाह—विभुरिति । व्यापक इत्यर्थः । फलितं रूपकत्वमाह—एकशृङ्गो वराह इति । प्रलयोदधिसंक्षोभे वराहरूपं कृत्वा भूमेरुद्धारक इत्यर्थः । उद्धृतासि वराहेणेति श्रुतेः । अनिष्टनिवर्तकत्वमाह—भूतभव्यसपत्नजिदिति । भूताः सपत्नाः मधुकैटभादयः भव्याः सपत्नाः शिशुपालादयः तान् जयतीति तथोक्तः ॥ १४ ॥

१४] ति० टी०—तदेवाह—अक्षरमिति । यदक्षरं मध्ये चान्ते चादौ च । सत्यमप्रच्युतस्वरूपं तत्त्वं यद्ब्रह्म तदेव त्वमसीति शेषः । लोकानां धर्मोपकृतप्राणिनां त्वमेव परमो धर्मः । 'यज्ञो वै विष्णुः' इत्यादिश्रुतेरन्तर्यामित्वमप्यन्तर्धर्मस्त्वमेव । विष्वक्सेनः सर्वगताः सेनायो यस्य । चतुर्भुजः शत्रुनिरसनक्षमचतुष्टयवान् ॥ १४ ॥

रा० टी०—अक्षरमिति । सततं सर्वत्र परिपूर्णं मध्ये अन्ते चकारेणादावपि अक्षरमविकारं यद्ब्रह्म तद् भवानेव अत एव धर्मोऽसि त्वमेव ॥ १४ ॥

गो० टी०—अथ सर्वेषामुत्तरार्थमाह—अक्षरमित्यादि । न क्षरतीत्यक्षरम् आप्नोति व्याप्नोतीति वा अक्षरम् । एतद्वै तदक्षरम् गार्गि ब्राह्मणा अभिवदन्तीति श्रुतेः । भवानित्यनूद्यते । अक्षरं भवान् एवमुत्तरत्रापि[1]नुषङ्गनीयम् । बृहति बृंहयतीति च ब्रह्म । बृहति बृंहयति तस्मादुच्यते परं ब्रह्मेति श्रुतिनिर्वचनात्[2] । सत्यम् अविपर्यस्तम् । षड्भावविकारशून्यमित्यर्थः । अस्ति जायते परिणमते विवर्धते अपक्षीयते विनश्यतीति षड् भावविकाराः । मध्ये चान्ते चेति । चकारादादौ चेत्यर्थः । वर्तमानमिति शेषः । नित्यत्वमुक्तमेतेन । लोकानां परो धर्मः सिद्धरूपो धर्मः सर्वलोकश्रेयःसाधनमित्यर्थः । विष्वक्सेना सर्वगता सेना यस्य सः विष्वक्सेनः । सर्वस्वामीत्यर्थः । चतुर्भुजः पुरुषचतुर्विधपुरुषार्थप्रद इत्यर्थः ॥ १४ ॥

१५] ति० टी०—शार्ङ्गधन्वा कालरूपं शार्ङ्गं धनुर्यस्य हृषीकेश इति हृषीकाणामिन्द्रियाणामीशो नियन्ता । पुरुष

१ रामेति गो. रा. पाठः । २ बृंहतीति गो. पा. ।

सेनानीर्ग्रामणीः सर्वं त्वं बुद्धिस्त्वं क्षमा दमः । प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ॥ १६ ॥
इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् । शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥ १७ ॥
सहस्रशृङ्गो वेदात्मा शतशीर्षो महर्षभः । त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ॥ १८ ॥

इति पुरुषणि फलानि सनोति ददाति स पुरुषः, पुरु हृदयपुण्डरीके शेत इति वा पूर्णत्वाद्वा पुरुषः । 'तेनेदं पूर्णं पुरुषेण सर्वम्' इति श्रुतेः । पुरुषोत्तमः । 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥' इति स्मृतेः । अजितो पाप्मनाग्निभिश्राजितः । खड्गधृग्विष्वक्सेनन्दकखड्गधृक् । विष्णुः सर्वव्यापकः । कृष्णस्तद्वर्णः । बृहद्बल इत्यशेषब्रह्माण्डस्य लीलाकन्दुकवद्धारणक्षमः बृहद्बलः ॥ १५ ॥

रा० टी०—शार्ङ्गधन्वेति । शार्ङ्गं धनुर्यस्य स हृषीकेशः पुरुषादिश्च पुरुषोत्तमस्त्वमेव ॥ १५ ॥

गो० टी०—शार्ङ्गधन्वेति । शृङ्गविकारः शार्ङ्गम् धनुर्यस्य स शार्ङ्गधन्वा । "धनुषश्च" इत्यनङादेशः । अनेन रक्षणोपकरणवत्त्वमुक्तम् । हृषीकाणाम् इन्द्रियाणाम् ईशः नियन्ता । सर्वेन्द्रियाकर्षकदिव्यविग्रह इत्यर्थः । पुरु सनोतीति पुरुषः । "षणु, दाने" इत्यस्माद्धातोरंप्रत्ययः । ब्रह्मपद इत्यर्थः । यद्वा पुरि हृदयगुहायां शेत इति पुरुषः । पुरि शयनं पुरुषमीक्षत इति निर्वचनश्रुतेः । यद्वा येन जगत्पूर्णं स पुरुषः । तेनेदं पूर्णं पुरुषेण सर्वमिति श्रुतेः । यद्वा पुरातनत्वात् पुरुषः । पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति श्रुतेः । पुरुषेभ्यः क्षराक्षरेभ्यः उत्तमः पुरुषोत्तमः । यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति हि गीयते । यद्वा पुरुषेषु उत्तमः पुरुषोत्तमः । सप्तमीति योगविभागात्समासोत्तमादिवत् समासः । कैश्चिदपि न जित इत्यजितः । आश्रितसंरक्षणे कदाचिदपि भङ्गं न प्राप्नोतीत्यर्थः । खड्गं नन्दकाख्यं धरतीति खड्गधृत् । विष्णुः व्यापनशीलः । यो दयापदं प्राप्नोति तं तदा तत्रैव स्थितो रक्षतीत्यर्थः । कृष्णः भूनिर्वृतिहेतुः । कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचक इति निर्वचनात् । बृहत् बलं धारणसामर्थ्यं यस्य सः बृहद्बलः ॥ १५ ॥

१५] ति० टी०—सेनानी राजसेनापतिश्च । ग्रामणीर्मन्त्री सर्वं जगत्त्वमेव बुद्धिर्निश्चयात्मिका क्षमा भक्तापराधसहिष्णुता दम इन्द्रियनिग्रहः तद्धर्मकत्वात्तदात्मत्वव्यपदेशः । प्रभवाप्ययौ सृष्टिप्रलयौ तत्कारणत्वात्तद्व्यपदेशः । उपेन्द्रादयस्त्वेव मूर्तिभेदाः ॥ १५ ॥

रा० टी०—सेनानीरिति । सेनान्यादिस्त्वमेव ॥ १५ ॥

गो० टी०—सेनानीरिति । सेनां नयतीति सेनानीः । देवसेनानिर्वाहक इत्यर्थः ग्रामं नयतीति ग्रामणीः । दिव्यजनपदादिपालक इत्यर्थः । बुद्धिः सत्त्वं क्षमा दम इति बुद्ध्यादिप्रवर्तक इत्यर्थः । न देवा यष्टिमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तमिति वचनात् । महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तक इति श्रुतेश्च । प्रभवत्यस्माज्जगदिति प्रभवः उत्पत्तिस्थानम् । सर्वोपादानमित्यर्थः । अप्ययः सर्वजगल्लयस्थानम् । कृष्ण एव हि भूतानामुत्पत्तिरपि चाप्यय इति श्रुतेः । उपेन्द्रः इन्द्रानुजत्वेन प्रथममवतीर्णः । मधुसूदनः वेदापहारकदैत्यसंहारी ॥ १७ ॥

१७] ति० टी०—'प्रजापतिरिन्द्रमसृजत' इत्युक्तेरिन्द्रः कर्म सृष्टिर्यस्य स इन्द्रकर्मा महेन्द्रः सकलेशिता पद्मं वैराजं नाभौ यस्य सः रणान्तकृद्रणे शत्रूणां नाशकर्ता शरण्यं शरणत्वेन प्राप्यम्, शरणं रक्षणं च त्वामेवाहुः । 'परित्राणाय साधूनाम्' इत्युक्तेः ॥ १७ ॥

रा० टी०—इन्द्रेति । इन्द्रकर्मादिस्त्वमेव अत एव शरण्यं शरणार्हितं शरणमाश्रयं च महर्षयः त्वामेव आहुः ॥ १७ ॥

गो० टी०—इन्द्रकर्मेति । इन्द्रस्य कर्मेव कर्म यस्य स इन्द्रकर्मा । तं विष्णुरन्वतिष्ठतेति श्रुतेः । महेन्द्रः निरतिशयैश्वर्यसंपन्नः । पद्मं नाभौ यस्य स पद्मनाभः । ममापि जनक इत्यर्थः । वक्ष्यति हि—पद्मे दिव्येकसंकाशे नाभ्यामुत्पाय मामपि । प्राजापत्यं त्वया कर्म मयि निवेशितमिति ॥ रणे अन्तं शत्रुनाशं करोतीति रणान्तकृत् । शरण्यं शरणार्हम् । तदुचितज्ञानशक्तिदयादिसंपन्नमित्यर्थः शरणं रक्षणोपायम् । उपाये गृहरक्षित्रोः शब्दः शरणमित्ययमिति वचनात् । सर्वस्य शरणं सुहृदिति श्रुतेः । महर्षयः अलौकिकतत्त्वसाक्षात्कारसमर्थाः । दिव्या महर्षयः सनकाद्यः । यत्रर्षयः प्रथमजा ये पुराणा इत्युक्ता नित्यसूरयो वा नित्यनिर्दोषा वेदा वा ॥१७॥

१८] ति० टी०—सहस्रशृङ्गोऽनेकशाखामयशृङ्गवान् । वेदात्मा वेदस्वरूपः । शतशीर्षोऽनेकविधिमयशिरोयुक्तः । महर्षभः श्रेष्ठतमः । शिष्टप्रजापतिरूप इत्यर्थ इति कतकः । त्रयाणां लोकानाम् । सर्वप्रजानामित्यर्थः । स्वयंप्रभुरनन्यप्रेरयः ॥ १८ ॥

रा० टी०—सहस्रेति । सहस्राणि बहूनि शृङ्गाणि शाखा यस्य स वेदात्मा त्वमेव महर्षभः शतशीर्षस्त्वमेव अत एव आदिकर्ता त्वमेव ॥ १८ ॥

गो० टी०—सहस्रशृङ्ग इत्यादिसार्धश्लोक एकान्वयः ॥ सहस्रशृङ्गः सहस्रशाखारूपशृङ्गः । शतजिह्वः अनेकविधौदनारूपजिह्वः । ऋषभः कर्मणामालोचयिता । "ऋष, आलोचने" इति धातुः । महांश्चासावृषभश्च महर्षभः । एवंभूतो वेदात्मा त्वमित्यर्थः । आदिकर्ता समष्टिकर्ता । अनेन

१ च त्वं बुद्धिः सत्त्वमिति गो. पाठः । २ जिह्व इति गो. पा. ।

सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः । त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परात्परः ॥ १९ ॥
प्रभवं निधनं चापि नो विदुः को भवानिति । दृश्यसे सर्वभूतेषु गोषु च ब्राह्मणेषु च ॥ २० ॥
दिक्षु सर्वासु गगने पर्वतेषु नदीषु च । सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रदृक् ॥ २१ ॥
त्वं धारयसि भूतानि पृथिवीं सर्वपर्वतान् । अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः ॥ २२ ॥
त्रींल्लोकान्धारयन्राम देवगन्धर्वदानवान् । अहं ते हृदयं राम जिह्वा देवी सरस्वती ॥ २३ ॥
देवा रोमाणि गात्रेषु ब्रह्मणा निर्मिताः प्रभो । निमेषस्ते स्मृता रात्रिरुन्मेषो दिवसस्तथा ॥ २४ ॥

व्यष्टिकर्तुः स्वस्य व्याहृत्तिः । स्वयंप्रभुः अनन्यप्रेयः । न तस्येशे कश्चनेति श्रुतेः । सिद्धानां मुक्तानाम् । साध्यानां, यत्र पूर्वं साध्याः सन्ति देवा इत्युक्तानां नित्यानामाश्रयः साम्यभोगप्रदः । पूर्वजः आश्रितापेक्षायाः पूर्वं तदुत्पाद्य जनितः ॥ १९ ॥ २० ॥

१९] ति० टी०–सिद्धानामारूढानां साध्यानामारूढानामाश्रयः प्राप्यः, पूर्वजश्चासि । 'अहमस्मि प्रथमजा ऋतस्य' इत्यादि श्रुतेः ॥ १९ ॥

रा० टी०–सिद्धानामिति । सिद्धादीनामाश्रयत्वमेव यज्ञादित्वमेव ॥ १९ ॥

गो० टी०–सर्वकर्मसमाराध्यत्वमाह–त्वं यज्ञ इति । त्वं यज्ञः । यज्ञो वै विष्णुरिति श्रुतेः । यज्ञनिर्वाहकपशुहविराज्यस्रुक्स्रुवादिशरीरको यज्ञाराध्येन्द्रादिशरीरकोऽन्यर्थः । ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतमिति हि गीयते । वषट्कार इत्युपलक्षणम् । आश्रावयेति चतुरक्षरमन्तु औपहिति चतुरक्षरम् यजेति द्व्यक्षरम् ये यजामह इति पञ्चाक्षरमित्युक्तानां सप्तदशाक्षराणाम् । तैराराध्य इत्यर्थः । तथोक्तम्—चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदत्विति । ओंकारः प्रणवाख्यः । ओमित्येकाक्षरं ब्रह्मेति श्रुतेः । परन्तपः उत्कृष्टतप इत्यर्थः । उत्कृष्टतपःसमाराध्य इति यावत् । ते प्रभवं निधनं वा न विदुः, वेदा वैदिकाश्च को भवानिति च न विदुः । अपरिच्छिन्नमहिमत्वात् । क इत्थावेद यत्र स इति श्रुतेः ॥ २१ ॥

२०] ति० टी०–तव प्रभावाद्यपि न जानन्ति को भवानिति चेदंतया न जानन्ति । सार्वात्म्येन स्तौति—दृश्यस इति । सर्वभूतेषु गोष्वित्यादि । उत्तमचेतनेष्वपीत्यर्थः । दृश्यसेऽन्तर्यामितया श्रूयसे ॥ २० ॥

रा० टी०–प्रभवमिति । यस्त्वं सर्वभूतादिषु दृश्यसे तस्य तव प्रभवं प्राकट्यं निधनं तिरोभावं च को भवानिति च न विदुः तत्त्वज्ञा अपीति शेषः एतेन प्राकट्यतिरोभावयोः तदिच्छावशत्वं सूचितम् तत्स्वरूपस्य तु अपारमहिमत्वं सूचितं सार्द्धश्लोक एकान्वयी ॥ २० ॥

गो० टी०–सर्वान्तर्यामित्वमाह—दृश्यस इति । योगिभिरिति शेषः । अनेन संबन्धप्रभन्योत्तरमुक्तम् ॥ २२ ॥

२१] ति० टी०–अत्यन्तमचेतनेष्वपि त्वमन्तर्यामीत्याह–दिक्षिति ॥ २१ ॥

२२] ति० टी०–त्वमेव सहस्रचरणत्वादिविशिष्टमन्तरूपो भूत्वा पृथिव्यादीन्दुर्वहभूतानि च धारयसि । तथान्ते उत्क्रान्ते पृथिव्या उपरिवर्तिनि सलिले त्वं महोरगशयनो दृश्यसे। एवं च पृथिव्या अध उपरि च प्रतिष्ठितस्वशक्तिस्त्वमित्युक्तम् ॥ २२ ॥

रा० टी०–सहस्रेति । सहस्रचरणः सर्वत्र प्रकाशद्वारा परिपूर्णतया अनेकचरणविशिष्टः अत एव शतशीर्षस्त्वं भूतानि धारयसि त्रीन् लोकान् धारयन् पृथिव्याः अन्ते मध्ये सलिले महोरगशेषः त्वमेव दृश्यसे श्लोकद्वयमेकान्वयि ॥२१॥ २२ ॥

गो० टी०–पुरुषसूक्तार्थमाह–सहस्रेति । अत्र शतशब्दः सहस्रवाचकः । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादिति श्रुतेः । श्रीमानिति भूपतित्वस्यात्युपलक्षणम् । श्रीश्च ते लक्ष्मीश्च पत्न्यावित्युत्तरनारायणोक्तेः । अथ सर्वाधारत्वमाह–त्वमिति । भूतानीति भूम्यतिरिक्तमहाभूतपरम् । अनेनाधाराधेयभावसंबन्ध उक्तः ॥ २३ ॥

गो० टी०–दैवैदितप्रलयत्वत्तान्तमाह–अन्त इति । पृथिव्या अन्ते विनाशे । महान्नरगः शेषो यस्य सः शेषशायी सन्, धारयन् कृत्स्नौ धारयन् दृश्यसे । मार्कण्डेयादिभिरिति शेषः२४

२३] ति० टी०–हे राम, त्रींल्लोकान्धारयंस्त्वं विराट् । नारायणोऽसीत्यर्थः । एतेन यतश्चाहमुत्पन्न इति प्रश्नस्योत्तरं दत्तम् । एवं देहत्वमुपदिश्य देहित्वमुपदिशति—अहं ते हृदयमिति । हे राम, ते रामोपग्रहस्य तव हृदयं सर्वाधारभूतमान्तरं त्वदान्मतत्त्वमहमेव ज्ञानस्वरूपः महाकाश इव घटाकाशस्य । तव जिह्वा मन्निर्मिता त्वद्देवी सरस्वती ॥ २३ ॥

२४] ति० टी०–देवा इन्द्रियदेवा दिग्वातार्कादयस्तव गात्रेषु श्रोत्रादिषु ब्रह्मणा मया निर्मिताः, रोमाणि च निर्मितानि । ओषधिवनस्पत्यादिनेति शेषः । निमेषोन्मेषौ च रात्रिदिवसत्वेन प्रसिद्धौ ॥ २४ ॥

रा० टी०–अहमिति । हे राम ! अहं ते हृदयं जिह्वा सरस्वती देवा रोमाणि ते निमेषः रात्रिः ते उन्मेषः उन्मीलनं दिवसः ते गात्रेषु ब्रह्मणा वेदेन निर्मिताः कथिता इत्यर्थः सार्द्धश्लोक एकान्वयी ॥ २३ ॥ २४ ॥

१ परन्तप इति गो.पा. । २ वा ते इति गो.रा. पाठः । ३ वनेष्विति गो रा. पाठः । ४ च सपर्वतामिति गो. पाठः ।

संस्कारास्त्वभवन्वेदा नैतदस्ति त्वया विना । जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् ॥ २५ ॥
अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः । त्वया लोकास्त्रयः क्रान्ताः पुरा[1] त्रैविक्रमैस्त्रिभिः॥२६ ॥
महेन्द्रश्च कृतो राजा बलिं बद्ध्वा सुदारुणम् । सीता लक्ष्मीर्भवान्विष्णुर्देवः कृष्णः प्रजापतिः॥२७ ॥
वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् । तदिदं नस्त्वया कार्यं कृतं धर्मभृतां वर ॥ २८ ॥
निहतो रावणो राम प्रहृष्टो दिवमाक्रम । अमोघं देव वीर्यं ते[2] न ते मोघाः पराक्रमाः[3] ॥ २९ ॥
अमोघं दर्शनं राम अमोघैस्तवं संस्तवः । अमोघास्ते भविष्यन्ति भक्तिमन्तो नरा[4] भुवि[5] ॥ ३० ॥

गो० टी०–अथ अङ्गान्यन्या देवता इत्युक्तसर्वदेवात्मात्मकत्वं दर्शयति–अहं त इत्यादिना । हृदयं वक्षः ब्रह्मणः परब्रह्मणः । ते देवा गात्रेषु स्थिताः रोमाणीव स्थिताः तद्वदविनाभूताः ॥ २५ ॥

गो० टी०–निमेषइति । दिवा अहः । वेदाः संस्काराः निःश्वसितभूता इत्यर्थः । तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यद्ऋग्वेद इत्यादि श्रुतेः । किं बहुना संग्रहेणोच्यत इत्याह–न तदस्ति विना त्वयेति । यस्त्वया विनाभूतं त्वदनन्तर्यामिकम्, तन्नास्तीत्यर्थः ॥ २६ ॥

२५] ति० टी०–संस्काराः संस्क्रियन्ते बोध्यन्त एभिर्लोका इति संस्काराः प्रवृत्तिनिवृत्तिबोधकाः—नैतदस्तीति । त्वया विना यदस्ति तत्किमपि नेत्यर्थः । कार्यकारणरूपं सर्वं जगत्ते शरीरम् । स्थैर्यमशेषप्रजानित्यधारणसामर्थ्यम् । वसुधातलं भूतत्वं त्वमेव ॥ २५ ॥

रा० टी०–संस्कारा इति । संस्काराः प्रवृत्तिनिवृत्तिव्यवहारबोधकास्ते तव वेदा अभवन् अतः त्वया विना एतज्जगन्नास्ति अत एव सर्वं चिदचिदात्मकं जगत् ते शरीरं धैर्यं धारणसामर्थ्यं वसुधातलम् ॥ २५ ॥

गो० टी०–एवं निषेधश्रुत्यर्थमुक्त्वा सर्वं खल्विदं ब्रह्म तत्त्वमसीत्यादिसामानाधिकरण्यश्रुत्यर्थमाह–जगदिति । सर्वं जगत् ते शरीरम् तव नियमेन आधेयं विधेयं शेषभूतं चेत्यर्थः । इदमेव हि शरीरलक्षणम् एवं जगतस्त्वच्छरीरत्वाच्छरीरगतविशेषणानि त्वद्विशेषणानीत्याह–स्थैर्यमिति वसुधातलं वसुधातलस्थैर्यम् । कात्स्न्यवान् यो बिभर्ति तस्मै भूम्यात्मने नम इति विष्णुपुराणोक्तेः । अग्निः अग्नितापः, ते कोपः । सोमः सोमगतप्रसादः, ते प्रसादः, त्वत्प्रसाद इत्यर्थः ॥ २७ ॥

२६] ति० टी०–ते कोपोऽग्निः । ते प्रसादः सोमः । त्वया वामनात्मनावतीर्णेन पुरा पूर्वं त्रिभिर्विक्रमैस्त्रयो लोका भूर्भुवःस्वःस्वरूपाः क्रान्ताः ॥ २६ ॥

रा० टी०–अग्निरिति । ते कोपोग्निः ते प्रसादस्सोमः श्रीवत्सलक्षणो विष्णुश्च गात्रेषु स्वैस्त्रिभिर्विक्रमैः पादप्रक्षेपैः त्रयो लोकाः क्रान्ताः परिमिताः बलिं बद्ध्वा महेन्द्रश्च राजा कृतः सार्द्धश्लोक एकान्वयी ॥ २६ ॥

गो० टी०–त्वयेति । त्वया त्रिविक्रमेण पुराणे पूर्वकाले । लोकाक्रमणफलमाह–महेन्द्र इति । राजा कृतः । त्रैलोक्यस्येति शेषः ॥ २८ ॥

२७] ति० टी०–बलिं बद्ध्वा महेन्द्रश्च राजा कृतः । सीता लक्ष्मीः प्रसिद्धविष्णुपत्न्यभिन्नतत्त्वत्वात् । यो विष्णुः स भवान्देवः प्रकाशरूपः । कृष्णः कृष्णवर्णः । प्रजापतिस्तदभिन्नतत्त्वः ॥ २७ ॥

२८] ति० टी०–स एव त्वं रावणस्य वधाय मानुषीं तनुं प्रविष्टोऽसि । माययेति शेषः । एवं तत्त्वेन त्वया तदिदं रावणवधरूपं नः सर्वेषां देवानां कार्यं कृतम् ॥ २८ ॥

रा० टी०–ननु तथात्वे कथमिह ममागमनमित्यत आह सीतेति । मानुषीं तनुं प्रविष्टः नित्यं प्राप्तः कृष्णः कृष्णवर्णः प्रजानां पतिर्विष्णुः व्यापकस्यापि व्यापकः देवो नित्यविहारी भवान् लक्ष्मीः लक्ष्म्या ईयते सेवार्थं प्राप्यते सा सीता च रावणस्य वधार्थमिहागच्छतामिति शेषः तत्तस्माद्धेतोः इदं रावणवधादिरूपं नः कार्यं त्वया कृतं साईश्लो एकान्वयी ॥ २७ ॥ २८ ॥

गो० टी०–प्रयोजनप्रश्नस्योत्तरमाह–वधार्थमिति । ॥ २९–३१ ॥

२९] ति० टी०–अथ कृतानुमानानुवादपूर्वं वर्तिष्यमाणकर्तव्यमाह—निहत इति । रावणो निहतः । एवं चावतारकार्यं निवृत्तम्, अतःपरं महाराज्येन किञ्चित्कालं प्रहृष्टः सन्दिवं परमाकाश्यं ब्रह्मलोकमाक्रम प्राप्नुहि । एवं सिद्धकार्यत्वात्ते वीर्यं बलममोघम् तन्मूलाः पराक्रमाश्च न मोघा न निष्फलाः, अपि तु सफला एवेत्यर्थः ॥ २९ ॥

रा० टी०–निहत इति । हे राम ते वीर्यं तेजः अमोघं सफलमित्यर्थः ते पराक्रमाश्च मोघा निष्फला न अत एव त्वया रावणो निहतः अत एव दिवं नित्यक्रीडास्थलं अयोध्यामित्यर्थः आक्रम गच्छ ॥ २९ ॥

३०] ति० टी०–अथ रामस्य सर्वोपास्यत्वं सर्वाभीष्टसिद्धिप्रदत्वं चाह—अमोघमिति । हे राम, ते दर्शनमेवं श्रुतेस्ते दर्शनं सुग्रीवादीनाममोघम् । एवं कालान्तरे श्रुत्वा चिन्तनं तद्दृष्टीनामप्यमोघमैहिकाद्यभिकसकलफलसाधनं तव संस्तवो

१ पुराणे इति गो. पाठः । २ देव वीर्यं ते इति रा. बलवीर्यं ते इति गो. पा. । ३ नच मोघस्तव स्तव इति रा. पा. । ४ ते पराक्रम इति गो. पा. । ५ च ये नरा इति गो. तु ये नरा इति रा. पा. ।

ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् । प्राप्नुवन्ति तथौ कामानिह लोके परत्र च ॥ ३१ ॥
इममार्षं स्तवं दिव्यमितिहासं पुरातनम् । ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तदशाधिकशततमः सर्गः ॥ ११७ ॥

अष्टादशाधिकशततमः सर्गः ।

पितामहवाक्यावसाने मूर्तिमान्हव्यवाहनः सीतामङ्के कृत्वा भो रामास्यां पाप न विद्यते रावणेन प्रलोभ्यमाना बहु तर्जितापि चक्षुषा मनसा वाचापि त्वद्गतेनान्तरात्मनेयं रावण नाभिनन्दत्येनां गृह्णीष्वेत्यार्षत् रामोऽप्यहं जानन्नपि निष्पापां लोकवादनिरासकृते एवमकरवमित्युक्त्वा सीतामङ्कीकृत्यानन्दस्य परां काष्ठामन्वभवत् ।

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम् । अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ १ ॥
विधूयार्थ चितां तां तु वैदेहीं हव्यवाहनः । उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ २ ॥
तरुणादित्यसंकाशां तप्तकांचनभूषणाम् । रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥ ३ ॥

रामनारायणेत्येवंरूपोऽमोघः सकलेष्टदः । ये च त्वयि भक्तिमन्तः सोऽहमेवेति गौणवृत्त्या त्वदुपासकास्त्वाहमिति वोपासकास्तेऽप्यमोघं संसारमार्गमतिक्रान्ताः सत्यसंकल्पत्वादिमन्तः सन्तो मल्लोकप्राप्तिरूपामोघफला भविष्यन्ति, किं पुनर्ये सर्वात्मना त्वद्भेदध्यानवन्त इत्यर्थः ॥ ३० ॥

रा० टी०–अमोघमिति । हे राम ते दर्शनममोघं सफलमेवेत्यर्थः तव स्तवः स्तुतिरपि मोघो न अत एव ते भक्तिमन्तो नराः अमोघाः प्राप्तमहाफला एव भविष्यन्ति ३०

गो० टी०–अमोघा इत्यर्धम् । अमोघाः अप्रतिबन्धफलाः ये त्वयि भक्तिमन्तः ते अविलम्बेन फलमभिमतं लभन्त इति इदं चावतारस्यैकं प्रयोजनम् ॥ ३० ॥

३१] ति० टी०–उक्तमर्थमुपसंहरति दाढ्यार्थ—ये त्वामिति ॥ ३१ ॥

रा० टी०–ये इति । ये जनाः पुरुषोत्तमं त्वां ध्रुवं भक्ताः सेवाशीलास्ते जनाः इह लोके परत्र च कामान् प्राप्नुवन्ति ३१

गो० टी०–इदमेव विवृणोति–य इति । त्वामुद्दिश्येति शेषः । अनेन सर्वस्मादपि तपःप्रभृतेः रामभक्तिरेव परो धर्म इत्युक्तम् । काम्यन्त इति कामाः भोगोपकरणानि, इह लोके परत्र च प्राप्नुवन्ति । सदेत्यनेन यावच्छरीरपातमत्र भोगान् भुक्त्वा शरीरावसाने परलोके सर्वान् कामान् प्राप्नुवन्तीत्यर्थः ॥३१॥

३२] ति० टी०–इदानीं तत्परैतत्स्तोत्रपाठफलमुपदिशति—इममिति । ऋषिर्वेदस्तदुक्तसगुणनिर्गुणब्रह्मविद्याप्रतिपादकत्वादार्षः स चासौ स्तवश्चेत्यार्षस्तवस्तम्, अत एव दिव्यं पुरातनं पुराहृत्तप्रतिपादकमितिहासम् । अनादिसिद्धपुरातनब्रह्मविद्याप्रतिपादकत्वात् । एवंभूतं ब्रह्मविद्यास्तवं ये कीर्तयिष्यन्ति तेषां पराभवः परैरिहामुत्रलोकशत्रुभिः पुत्रदारादिभिः पापैश्चाभिभव आक्रमणं नास्ति न भविष्यति च ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तदशाधिकशततमः सर्गः ॥११७॥

रा० टी०–इममिति । मम भक्तस्तुतिरूपं पुरातनं चिरकालकमितिहासं आर्षयोस्संवादरूपमार्षं मन्त्रपारं गतैः प्रोक्तमत एव दिव्यं स्तवं ये नराः कीर्तयिष्यन्ति तेषां पराभवो नास्ति३२

इति श्रीमद्राजाधिराजरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोनविंशत्यधिकशततमः सर्गः ॥ ११९ ॥

गो० टी०–ये रामभक्तिं कर्तुमदक्षास्तेषामिदं स्तोत्रमेव तादृशफलप्रदमित्याह–इममिति । ऋषिः वेदः तत्संबन्धात्तथात्वम् । अत एव पुरातनम् । परभावः पुनरावृत्तिः ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

१] ति० टी०–एतदिति । पितामहसमीरितं शुभं परमशोभनं नित्यब्रह्मात्मप्रतिपादकं वाक्यं श्रुत्वा ध्यात्वा च । प्रस्तुतयावत्स्थानकाले इति शेषः । अङ्केनादाय । 'ऋषिं च पुत्रांश्चादादग्निर्मैथिलम्' इति श्रुत्यर्थमपरोक्षमेव संपादयतीत्यर्थः ॥१॥

रा० टी०–ब्रह्मादिकर्तृकस्तवनानन्तरकालिकं वृत्तान्तमाह—एतदित्यादिभिः । पितामहेन समीरितं कथितं एतद्वाक्यं श्रुत्वा विभावसुवह्निः वैदेहीमादाय अङ्केन शीघ्रगत्या उत्पपात ॥ १ ॥

गो० टी०–एतच्छ्रुत्वेत्यादि । विभावसुः अग्निः ॥ १ ॥

२–३] ति० टी०–मूर्तिमान्मुक्तस्वादिचिह्ननिजमूर्तियुक्तः ॥ २ ॥ ३ ॥

रा० टी०–तदनभङ्गयन्तरेणाह विधूयेत्यादिभिः । हव्यवाहनो वह्निः चितां विधूय दग्ध्वा जनकात्मजां गृहीत्वा उत्तस्थौ ॥ २ ॥

रा० टी०–तरुणेति । नीलाः कुञ्चिताश्च मूर्धजाः यस्याः न क्रियानि अग्निसम्बन्धेनापि विवाधितानि मान्याभरणानि यस्याः अत एव अनिन्दितां वैदेहीं अङ्के रामस्येति शेषः कृत्वा संस्थाप्य रामाय विभावसुर्देवौ श्लोकद्वयमेकान्वयि३॥४

---

१ सदेति गो. ए. पा. । २ नित्यमिति गो. पा. ।

अक्लिष्टमाल्याभरणां तथारूपामनिन्दिताम् । ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ ४ ॥
अब्रवीत्तु तदा रामं साक्षी लोकस्य पावकः । एषा ते राम वैदेही पापमस्यां न विद्यते ॥ ५ ॥
नैव वाचा न मनसा नैवं बुद्ध्या न चक्षुषा । सुवृत्ता वृत्तशौण्डीर्यं[3] न त्वामत्यचरच्छुभा ॥ ६ ॥
रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा । त्वया विरहिता दीना विवशा निर्जने सती ॥ ७ ॥
रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा । रक्षिता राक्षसीभिश्च घोराभिर्घोरबुद्धिभिः ॥ ८ ॥
प्रलोभ्यमाना विविधं तर्ज्यमाना च मैथिली । नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना ॥ ९ ॥
विशुद्धभावां निष्पापां प्रतिगृह्णीष्व मैथिलीम्[10] । न किंचिदभिधातव्या अहमाज्ञापयामि ते ॥ १० ॥
ततः प्रीतमना रामः श्रुत्वैवं वदतां वरः । दध्यौ मुहूर्तं धर्मात्मा हर्षव्याकुललोचनः ॥ ११ ॥
एवमुक्तो महातेजा धृतिमानुरुविक्रमः । उवाच त्रिदशश्रेष्ठं रामो धर्मभृतां वरः ॥ १२ ॥

गो० टी०-स इति । विधूय चितां शिथिलीकृत्य । मूर्तिमान् मदुपस्थविग्रहवान् ॥ २ ॥

गो० टी०-तरुणादित्येत्यादिश्लोकद्वयमेकान्वयम् ॥ तथारूपां प्रवेशकालिकरूपवतीम् । मनस्विनीं प्रसन्नमनस्कामित्यर्थः । अङ्के कृत्वा अङ्केनादायेत्यर्थः ॥ ३-५ ॥

४] ति० टी०-अक्लिष्टेति । अग्निसंबन्धेऽपीति शेषः । तथारूपां पूर्वानुभूतशोभायुक्ताम् ॥ ४ ॥

५] ति० टी०-तदा दानसमये लोकस्य मनोवाक्कायैर्लोककृतपुण्यपापकर्मणः साक्षी साक्षाद्दृष्टा । सर्वदेहान्तर्वर्तिनरात्मना । नित्यप्रतिष्ठितत्वादिति भावः । एषा या मयि रावणहरणकाले प्रविष्टा सैव । एवं हि कूर्मपुराणानुसारेण व्याख्यातम्, तच्च प्राङ्निरूपितम् । पापं रावणस्पर्शरूपमपि ॥ ५ ॥

रा० टी०-अब्रवीदिति । पावकः राममब्रवीत् तदाकारमाह एषा या वैदेही अस्यां पापं न विद्यते ॥ ५ ॥

गो० टी०-एषेति । एषा या पूर्वं मयि प्रविष्टा सैवेत्यर्थः । एतेन मायासीतामग्नि प्रविष्टा साक्षात्सीताग्निना दत्तेति प्रत्युक्तम् । ते त्वदीयेत्यर्थः । एनां परिगृह्णातीति शेषः ॥ ६ ॥

६] ति० टी०-सुवृत्ता वृत्तशौण्डीर्यं त्वां मनआदिभिः प्रत्येकं समुदितैश्च नात्यचरत् ॥ ६ ॥

रा० टी०-नेति । शोभनं वृत्तमाचरणं यस्याः सा सीता वृत्तशौण्डीर्यमाचारनिपुणं त्वां वाग्मादिभिर्नात्यचरत् ॥ ६ ॥

गो० टी०-पापाभावमेवोपपादयति—नैवेत्यादिना । अनुध्यानात्संकल्पात् । अत्यन्ताभिमतां देवीं निर्दोषां जानन्नपि स्ववृत्तावद्यत्वपरिहारार्थं वह्निं प्रवेशयदिति संतोषातिशयाद्वृत्तशौण्डीर्यमिति संबोधनम् ॥ ७ ॥

७] ति० टी०-एषा या इदानीं मयि प्रविष्टा ॥ ७ ॥

रा० टी०-रावणेनेति । वीर्योत्सिक्तेन पराक्रमगर्वविशिष्टेन रावणेन निर्जने त्वया विरहिता अत एव दीना एषा सीता अपनीता अन्तःपुरे रुद्धा च अत एव गुप्ता अन्यैर्दुर्ज्ञेया राक्षसीभिः रक्षिता विविधं प्रलोभ्यमाना तर्ज्यमाना च त्वद्गतेन अन्तरात्मना अन्तःकरणेनोपलक्षिता मैथिली तद्रक्षो रावणं नाचिन्तयत् अगणयत् अतः विशुद्धः भावः त्वद्विषयकप्रीतिर्यस्याः अत एव निष्पापां मैथिलीं प्रतिगृह्णीष्व किंचिन् दुरुक्तं नाभिधातव्यं वक्तव्यमिदमहं ते आज्ञापयामि सम्यग्बोधयामि श्लोकचतुष्टयमेकान्वयि ॥ ७-१० ॥

गो० टी०-एतत्संमति विना कथं रावणः समानीतवानित्यत्राह-रावणेनेत्यादि ॥ ८ ॥

८] ति० टी०-रुद्धा निरुद्धस्वच्छन्दगमनादिव्यवहारा गुप्ता परिहृतस्वजनदर्शना त्वच्चित्ता त्वयि चित्तं यस्याः सा, अत एव त्वत्परायणा त्वद्गतिः ॥ ८ ॥

गो० टी०-विवशा नीतेत्यत्र लिङ्गं दर्शयति-रुद्धेति । त्वयि चित्तं यस्याः सा त्वच्चित्ता त्वमेव परायणमुत्तमगतिर्यस्याः सा त्वत्परायणा ॥ ९ ॥ १० ॥

९] ति० टी०-तद्रक्षो नाचिन्तयत नागणयत । तत्र हेतुरन्तरात्मनस्त्वद्गतत्वम् । एवं च यत्प्रतिबिम्बस्याप्येवं व्यवस्था तद्बिम्बस्य शुद्धत्वे किं वक्तव्यमिति ध्वनिः ॥ ९ ॥

१०] ति० टी०-विशुद्धभावां विशुद्धान्तराम्, अत एव निष्पापाम्—न किञ्चिदिति । मन्नियोगानन्तरं प्रतिग्राह्या न वेति संदेहो न गृह्यामीति निषेधश्च न कर्तव्य इत्यर्थः । कुत एवं तत्राह—आज्ञापयामि ते इति । एवमुक्तिस्तु रामेण स्वस्वरूपाज्ञाननटनात्तदनुसारेण रुद्रमूर्तेर्भगवतोऽप्रेरणेति मन्तव्यम् ॥ १० ॥

गो० टी०-विशुद्धभावामिति । विशुद्धभावां विशुद्धहृदयाम् । अभिधातव्यम् मद्वचनस्योत्तरमिति शेषः ॥ ११ ॥

११-१२] ति० टी०-दध्यौ। किमिहोचितं वक्तव्यमिति ध्यातवानिति शेषः ॥ ११ ॥ १२ ॥

रा० टी०-तत इति । श्रुत्वैव प्रीतमनाः अत एव हर्षेण

१ मनस्विनीमिति गो. पा. । २ नानुध्यानादिति गो. पा. । ३ शौण्डीरेति गो. शौण्डीर्यमिति रा पा. । ४ निर्बन्धाद्वनादिति गो. पा. । ५ संवेविकृतैर्घोरदर्शनैरिति गो. पा. । ६ राघवेति गो. रा. पा. । ७ बाष्पेति गो. पा. । ८ दृष्टेति गो. पाठः ।

अवश्यं चापि लोकेषु सीता पावनमर्हति । दीर्घकालोषिता हीयं रावणान्तःपुरे शुभा ॥ १३ ॥
बालिशो बत कामात्मा रामो दशरथात्मजः । इति वक्ष्यति मां लोको जानकीमविशोध्य हि ॥ १४ ॥
अनन्यहृदयां सीतां मच्चित्तपरिरक्षिणीम्[1] । अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ १५ ॥
इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा । रावणो नातिवर्तेत वेलामिव महोदधिः ॥ १६ ॥
[प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः । उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम् ॥]
न चैं[2] शक्तः दुरात्मा मनसापि हि मैथिलीम् । प्रधर्षयितुमप्राप्यां दीप्तामग्निशिखामिव ॥ १७ ॥
नेयमर्हति वैक्लव्यं रावणान्तःपुरे सतीं[3] । अनन्या हि मया सीता भास्करस्य प्रभा यथा[4] ॥ १८ ॥
विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा । न विहातुं मया शक्या कीर्तिरात्मवता यथा ॥ १९ ॥

व्याकुले व्याप्ते लोचने यस्य स रामः महतीं दध्यौ कर्तव्यं चिन्तयामास ॥ ११ ॥

रा० टी०—एवमिति । एवमुक्तो रामः त्रिदशश्रेष्ठमुवाच ॥ १२ ॥

गो० टी०—तत इति । दध्यौ न दृष्टेन सीता त्यक्तेत्यचिन्तयत् ॥ १२ ॥ १३ ॥

१३–१४] ति० टी०—पावनम् । स्वार्थण्यन्ताद्भावे ल्युट् । शुद्धिमित्यर्थः । जानकीमविशोध्य अहिणं माम् । रावणान्तःपुरे दीर्घकालोषितां तां दशरथात्मजो यद्गृहीतवांस्तत्र कामात्मा कामपरतन्त्रचित्तो बालिशो भूलोकव्यवहारापरिज्ञो यतोऽत इति लोको मां वक्ष्यति । ततः शुद्ध्यर्थमग्निप्रवेशो मयानुमत इति शेषः ॥ १३ ॥ १४ ॥

रा० टी०—तदाकारमाह—अवश्यमित्यादिभिः । जानकीमविशोध्य शोधनमकृत्वा यद्गृहीतारं मां दशरथात्मजः कामात्मा बालिशश्च सन् रावणान्तःपुरे दीर्घकालोषिता या इयं सीता तामगृह्णादिति शेषः इति लोको मां वक्ष्यति इति हेतोः लोकेषु राक्षसादिजनमध्येषु सीता पावनं पूतिक्रियामवश्यमर्हति एतेन एवमेव लोकापवादादपि सर्वथैवत्यमिति विभीषणादिभ्यः उपदेशः सचिवः श्लोकद्वयमेकान्वयि ॥ १३॥१४ ॥

गो० टी०—वस्तुतो निर्दोषत्वेपि अपवादोद्धारायाह—अवश्यमिति । ॥ १४ ॥

गो० टी०—अपवादपरिहारार्थमयं मम प्रयत्न इत्याह—बालिश इति । अविशोध्येति । परिग्रह इति शेषः ॥ १५ ॥

१५] ति० टी०—इयं शुद्धेति हृदये जानाम्येवेत्याह—अनन्येति । मच्चित्तपरिरक्षिणीं मद्गतचित्तत्वेनात्मनो दोषपरिरक्षणशीलाम् ॥ १५ ॥

रा० टी०—अनन्येति । न अन्यस्मिन् हृदयं यस्याः अत एव मच्चित्तस्य परिरक्षिणीमनुकूलां सीतामहमप्यवगच्छामि जानामि ॥ १५ ॥

गो० टी०—अनन्येति । अनन्यहृदयां मय्येव सक्तहृदयाम् । मच्चित्तपरिवर्तिनीं मच्चित्तानुवर्तिनीम् । व्यक्तस्वभावामित्यर्थः । जनकात्मजामिति हेतुगर्भविशेषणम् । जनकपुत्र्याः विमर्शासंपत्तिर्वक्तव्येति भावः ॥ १६ ॥

१६] ति० टी०—स्वेन तेजसा पातिव्रत्येन ॥ १६ ॥

रा० टी०—इमामिति । महोदधिर्वेलामिव स्वतेजसा रक्षितामिमां सीतां रावणो नातिवर्तेत ॥ १६ ॥

गो० टी०—तर्हि किमर्थमुपेक्षितवानित्यत्राह प्रत्ययार्थमिति । प्रत्ययार्थं विश्वासजननार्थमित्यर्थः । सत्यसंश्रयः सत्यैकाश्रयः । यथाद्भुतप्रवर्तनाकाङ्क्षीत्यर्थः ॥ १७ ॥

गो० टी०—एतादृशशुद्धां रावणः कथं नेक्षेतेत्यत्राह—मामर्षीति । ॥ १८ ॥

१५] ति० टी०—प्रधर्षयितुं न शक्तः, अत एताप्राप्याम-शक्यग्रहाम् । तत्र निदर्शनम्—दीप्तामिति ॥ १७ ॥

रा० टी० न चेति । दीप्तामग्निशिखामिव अप्राप्यां मैथिलीं दुरात्मा रावणः मनसापि प्रधर्षयितुं न शक्तः ॥१७॥

गो० टी०—दृष्टान्तान्तरमाह न हीति । अप्राप्यां प्रधर्षणानर्हाम् ॥ १७ ॥

१८] ति० टी०—वैक्लव्यं कार्तर्यपीडाम् । अनन्या हीति । 'अर्धो वा एष आत्मनो यत्पत्नी' इति श्रुतेः । अभिन्नशक्तिमतोरभेदाच्च । अतोऽविद्यमाया रावणप्रधर्षणाभावः स्पष्टमेवोक्तः ॥ १८ ॥ १९ ॥

रा० टी०—नेति । भास्करस्य प्रभेव मया अनन्या इयं सीता रावणान्तःपुरे वैक्लव्यं क्लेशं नार्हति ॥ १८ ॥

गो० टी०—तथाप्येषा तादृशमेवार्यं कथं जह्यात्तत्राह—नेयमिति । रावणेत्यर्थे नेयमर्हति किंतु मर्मेत्यर्थमर्हतीत्यर्थः । तत्र हेतुमाह—अनन्येति । मया अनन्या अभिन्ना अविनाभूतेति यावत् ॥ १८ ॥

रा० टी०—विशुद्धेति । त्रिषु लोकेषु विशुद्धा मैथिली आत्मवता बुद्धिमता जनेन कीर्तिरिव मया विहातुं न शक्या ॥१९॥

गो० टी०—अहमपि तया अनन्य इत्याह—विशुद्धेति २१

१ त्रिष्विति गो. पाठः । २ वक्ष्यन्ति मां सन्त इति गो. पा. । ३ भक्तामिति गो. पा. । ४ वर्तिनीमिति गो. पा. । ५ इदं पद्यमधिकं गो. पा. ६ हीति गो. पा. । ७ वैक्लव्यमिति गो. पा. । ८ शुभेति गो. पा. । ९ भास्करेणेति गो. पा. ।

अवश्यं च मया कार्यं सर्वेषां वो वचो हितम्। स्निग्धानां लोकनाथानामेवं च वदतां हितम्॥ २० ॥
इत्येवमुक्त्वा विजयी महाबलैः प्रशस्यमानः स्वकृतेन कर्मणा।
समेत्य रामः प्रियया महायशाः सुखं सुखार्होऽनुबभूव राघवः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टादशाधिकशततमः सर्गः ॥ ११८ ॥

एकोनविंशाधिकशततमः सर्गः।

महेश्वरो रामोक्तं निशम्य राम रावणजं महद्भयमद्य नष्टमिदानीमयोध्यायां मातृभरतं चाश्वास्य राज्यमपि प्राप्य वंशवृद्धिं कृत्वा स्वर्गमेहीत्युक्त्वा तत्रागतं पितरं दशरथं दर्शयामास ततः सलक्ष्मणं प्रणमन्तं राममङ्के कृत्वा संपरिष्वज्याभिनन्द्य स्नुषां च समाश्वास्यामन्त्र्य च तान्दशरथः स्वर्गमारुरोह।

एतच्छ्रुत्वा शुभं वाक्यं राघवेणानुभाषितम्। ततः शुभतरं वाक्यं व्याजहार महेश्वरः॥ १ ॥
पुष्कराक्ष महाबाहो महावक्षः परंतप! दिष्ट्या कृतमिदं कर्म त्वया धर्मभृतां वर॥ २ ॥
दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः। अपावृत्तं त्वया संख्ये रामरावणजं भयम्॥ ३ ॥
आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम्। कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम्॥ ४ ॥
प्राप्य राज्यमयोध्यायां च नन्दयित्वा सुहृज्जनम्। इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल॥ ५ ॥
इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः। ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि॥ ६ ॥

२०-२१] ति० टी०-सर्वेषां वो वचः सीताग्रहणविषयं मे हितं मयावश्यं कार्यं कतु योग्यम् स्निग्धानां मयि स्नेहवताम्, लोकमान्यानामशेषजगत्पूज्यानाम्, एवं पूर्वोक्तप्रकारेण हितं वदताम् ॥ २० ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे ऽष्टादशाधिकशततमः सर्गः ॥ ११८ ॥

रा० टी०-अवश्यमिति। हितं वदतां लोकनाथानां वो वचः मयावश्यं कार्यम् ॥ २० ॥

गो० टी०-सीतापरिग्रहे भवद्वचनं तु प्रधानहेतुरित्याह-अवश्यमिति। वचनकरणे स्नेहः सर्वपूज्यत्वं हितोपदेष्टृत्वं च हेतुरित्यर्थः ॥ २२ ॥

रा० टी०-इतीति। स्वकृतेन कर्मणा प्रशस्यमानः ब्रह्मादिभिस्तूयमानो रामः सुखं यथा भवति तथा प्रियया समेत्य सुखार्होऽनुबभूव ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे विंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

गो० टी०-इतीति। विदितं स्वेन विदितम्, इदम् उक्तं वचनम् उक्त्वा स्वकृतेन कर्मणा करणेन महाबलैः कर्तृभिः प्रशस्यमानः प्रियया समेत्य सीतां स्वसमीपमानीयेत्यर्थः॥२३॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

१] ति० टी०-एतद्वाक्यं श्रुत्वा पुष्पदाज्ञया सीतामङ्गीकरोम्येवेत्युक्तं वाक्यं श्रुत्वा। ततः सीताग्रहणनियोगाद्व्यापानन्तरम् ॥ १ ॥

रा० टी०-रामकर्तृकसीताग्नीकारानन्तरकालिकं वृत्तान्तमाह-एतदित्यादिभिः। महेश्वरः राघवेणानुभाषितं श्रुत्वा शुभतरं वाक्यं व्याजहार ॥ १ ॥

गो० टी०-देवकार्यस्यकृतत्वात्त्रिदिवमाक्रमेति ब्रह्मणोक्त्वाद्यौके धर्मसंस्थापनपरं रामहृदयं जानन् रुद्रस्तदनुमन्यते-एतच्छ्रुत्वेत्यादि। ॥ १ ॥

२] ति० टी०-महाबाहो हे महोरस्क ॥ २ ॥

रा० टी०-तदाकारमाह-पुष्कराक्षेति। इदं कर्म दिष्ट्या अस्मद्भाग्यवशेन कृतम् ॥ २ ॥

गो० टी०-पुष्कराक्षेति। पुष्करौ पुण्डरीकाक्षौ। अनेन तस्य यथा कथ्यासं पुण्डरीके इव अक्षिणी, पुरुषपुण्डरीकाक्ष इति श्रुतिस्मृतिभ्यामुदीरितस्य परब्रह्मासाधारणचिह्नस्य रामे रुद्रेण प्रतिपादनाद्रामत्वेनावतीर्णो विष्णुरेव वेदान्तवेद्यं परब्रह्मेत्युक्तम्। श्रीनिवासत्वेन महावक्षस्त्वम्। दिष्ट्या भाग्येन। अस्माकमिति शेषः ॥ २ ॥

३] ति० टी०-तमो दुःखम् ॥ ३ ॥

रा० टी०-दिष्ट्येति। प्रवृद्धं रावणजं भयं तमो दुःखं च त्वया अपवृत्तं निवर्तितम् ॥ ३ ॥

गो० टी०-उक्तमेव विवृणोति-दिष्ट्येति। सर्वस्य रावणजं भयमेव प्रवृद्धं तमः अपावृत्तं निरस्तम् ॥ ३ ॥

४] ति० टी०-आश्वास्येति अयोध्यां गत्वेति शेषः ॥४॥

५] ति० टी०-कुले कुलपरिपालननिमित्तं वंशं संतानम्। 'दशवर्षसहस्राणि दशवर्षशतानि च। वत्स्यामि मानुषे लोके' इत्यवतारात्पूर्वं प्रतिज्ञास्त्वात्प्राप्य राज्यमित्यायुक्तम् ॥ ५ ॥

६] ति० टी०-तुरगमेधेनेष्ट्वा भगवन्तं प्रजापतिमिति

१ मान्यानामिति गो.पा.। २ महाबलैरिति गो.पा.। ३ वक इति गो. पा.। ४ स्विमिति गो. पा.। ५ अपावृत्तमिति गो. पा.। ६ अयोध्यामामिति गो. पा.।

एष राजा दशरथो विमानस्थः पिता तव । काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ॥ ७ ॥
इन्द्रलोकं गतः श्रीमांस्त्वया पुत्रेण तारितः । लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ॥ ८ ॥
महादेववचः श्रुत्वा राघवः सहलक्ष्मणः । विमानशिखरस्थस्य प्रणाममकरोत्पितुः ॥ ९ ॥
दीप्यमानं स्वया लक्ष्म्या विरजोऽम्बरधारिणम् । लक्ष्मणेन सह भ्रात्रा ददर्श पितरं प्रभुः ॥ १० ॥
हर्षेण महताविष्टो विमानस्थो महीपतिः । प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा ॥ ११ ॥
आरोप्याङ्कं महाबाहुर्बाष्पमानगतः प्रभुः । बाहुभ्यां संपरिष्वज्य ततो वाक्यं समाददे ॥ १२ ॥
न मे स्वर्गो बहु मतः सैमानश्च सुरर्षभैः । त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते ॥ १३ ॥
(अद्यैव त्वां निहतामित्रं दृष्ट्वा संपूर्णमानसम् । निर्तीर्णवनवासं च प्रीतिरास्यत्परा मम) ॥
कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर । तव प्रव्राजनार्थानि स्थितानि हृदये मम ॥ १४ ॥
त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम् । अद्य दुःखाद्विमुक्तोऽस्मि नीहारादिव भास्करः ॥ १५ ॥
तारितोऽहं त्वया पुत्र सुपुत्रेण महात्मना । अष्टावक्रेण धर्मात्मा कहोलो ब्राह्मणो यथा ॥ १६ ॥

शेषः । अनुत्तमं यशो महद्यश इत्यादिके प्रजापतिनाम । तस्य नाम महद्यशः' इति श्रुतेः । अश्वमेधफले च तत्प्राप्तिरिति । 'प्रजापतिं वा एष ईप्सतीत्याहुः, योऽश्वमेधेन यजते' इति श्रुतेरिति कतकः । त्रिदिवं भूस्वःपदापेक्षया तृतीयं दिवं ब्रह्मलोकम् ॥ ६ ॥

रा० टी०—आश्वास्येति । भरतादीन् दृष्ट्वा आश्वास्य च अयोध्यायां राज्यं प्राप्य इक्ष्वाकूणां कुले कुलपरिपालनार्थं वंशं स्थापयित्वा तुरगमेधेन इष्ट्वा ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं साकेतं गन्तुमर्हसि श्लोकद्वयमेकान्वयि ॥ ४–६ ॥

गो० टी०—आश्वास्येत्यादिश्लोकद्वयमेकान्वयम् ॥ यशस्विनीमिति कैकेयीविशेषणम् तत्सम्बन्धाद्भरतस्यापि तस्या यशस्वित्वम् । लक्ष्मणमातरमित्यनेन सा लक्ष्मणस्नेहाद्विशेषतो वन्द्येत्युक्तम् । अयोध्यायां सहजनं नन्दयिष्येत्यन्वयः । वंशं पुत्रपौत्रादिपरम्पराम् । इक्ष्वाकूणां कुले इक्ष्वाकुकुलनिमित्तम् स्थापयित्वा । प्राप्य चानुत्तमं यश इति तुरगमेधफलोक्तिः । आश्वास्येत्यादिना दशवर्षसहस्राणि दशवर्षशतानि च । यत्स्यामि मानुषे लोके इत्यवतारात्पूर्वं तत्कृतां प्रतिज्ञामनुसृत्य रुद्रेणोक्तम् ॥ ४–६ ॥

७–८] ति० टी०—एष इति । पुरस्तस्यापि देवदेहपरिग्रहेणाज्ञायमानतयाङ्गुल्यानिर्देशः ॥ ७ ॥ ८ ॥

रा० टी०—एष इति । पुत्रेण त्वया त्वद्वियोगेन तारितः प्रस्थापितः इन्द्रलोकं सकलैश्वर्यविशिष्टसाकेतम् गतः अत एव विमानस्थः एष तव पिता दशरथः मानुषे लोके इदानीमागत इति शेषः अतः लक्ष्मणेन सह एनमभिवादय श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

गो० टी०—एष इत्यादिश्लोकद्वयमेकान्वयम् ॥ देवदेहपरिग्रहेणापरिज्ञायमानत्वात् पुरःस्थितोऽप्येष इत्यङ्गुल्या निर्दिश्यते । मानुषे लोके गुरुरित्यनेन, पिता पुत्रेण पितृमान् योनिर्यौनाविति श्रुतिरूपबृंहिता ॥ ७–१० ॥

९–१२] ति० टी० विमानशिखरस्थस्य विमानोपरि प्रतिष्ठितस्य ॥ ९–१० ॥

रा० टी०—महादेवेति । राघवो लक्ष्मणश्च पितुः प्रणाममकरोत् ॥ ९ ॥

रा० टी०—दीप्यमानमिति । स्वया लक्ष्म्या दीप्यमानं पितरं ददर्श ॥ १० ॥

रा० टी०—हर्षेणेति । प्राणैः प्रियतरं पुत्रं दृष्ट्वा महता हर्षेणाविष्टो दशरथः अंके आरोप्य बाहुभ्यां संपरिष्वज्य वाक्यं समाददे उच्चारयामास । श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०—हर्षेणेत्यादिश्लोकद्वयमेकान्वयम् । पुत्रं रामम् ॥ ११ ॥ १२ ॥

१३–१५] ति० टी० सुरर्षभैः समानोऽपि स्वर्गो न बहुमतः ॥ १३–१४ ॥

रा० टी०—तदाकारमाह—नेति । त्वया विहीनस्य मे मम सुरर्षभैः बहुमतोऽपि स्वर्गः समानः त्वत्सहवासमसहमानो न इति सत्यं प्रतिशृणोमि ॥ १३ ॥

गो० टी०—न मे स्वर्ग इति । सुरर्षिभिः समानः देवर्षिभिः समानोऽपि ॥ १३ ॥ १४ ॥

रा० टी०—कैकेय्येति । कैकेय्या उक्तानि तव प्रव्राजनार्थानि यानि वाक्यानि तानि मम हृदये स्थितानि न विस्मर्यन्ते इत्यर्थः ॥ १४ ॥

गो० टी०—कैकेय्येति । हृदये स्थितानि । न विस्मरामीत्यर्थः । तेन दुःखिनोऽस्मीति सूचितम् ॥ १५ ॥

रा० टी०—त्वामिति । कुशलिनं त्वां दृष्ट्वा अद्य दुःखाद्विमुक्तोऽस्मि ॥ १५ ॥

गो० टी०—त्वां त्विति । सलक्ष्मणमित्यनेन द्वितीयपरिष्वङ्गे लक्ष्मणोऽपि विस्मर्याकृत इत्युच्यते ॥ १६ ॥

१६] ति० टी०—अष्टावक्रपिता कहोलनामर्षिः पुत्रेण स्वयमेव तारित इति पौराणिकी कथा ॥ १६ ॥

---

१ सैमानश्च सुरर्षिभिरिति गो. पा. । २ इदं पदं मणिकं गो. पा. ३ तारित इति गो. पा. ।

इदानीं च विजानामि यथा सौम्य सुरेश्वरैः । वधार्थं रावणस्येह पिहितं[1] पुरुषोत्तमम् ॥ १७ ॥
सिद्धार्था खलु कौसल्या या त्वां राम गृहं गतम् । वनाभिवृत्तं संहृष्टा द्रक्ष्यते शत्रुसूदनम् ॥ १८ ॥
सिद्धार्थाः खलु ते राम नरा ये त्वां पुरीं गतम् । राज्ये चैवाभिषिक्तं च द्रक्ष्यन्ते वसुधाधिपम् ॥ १९ ॥
अनुरक्तेन बलिना शुचिना धर्मचारिणा । इच्छेयं त्वामहं द्रष्टुं भरतेन समागतम् ॥ २० ॥
चतुर्दश समाः सौम्य वने निर्यातितास्त्वया । वसता सीतया सार्धं मत्प्रीत्यै लक्ष्मणेन च ॥ २१ ॥
निवृत्तवनवासोऽसि प्रतिज्ञा पूरिता त्वया । रावणं च रणे हत्वा देवताः परितोषिताः ॥ २२ ॥
कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन । भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि ॥ २३ ॥
इति ब्रुवाणं राजानं रामः प्राञ्जलिरब्रवीत् । कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च ॥ २४ ॥
सपुत्रां त्वां त्यजामीति यदुक्ता केकयी त्वया । स शापः केकयीं घोरः सपुत्रां न स्पृशेत्प्रभो ॥ २५ ॥
तथेति स महाराजो राममुक्त्वा कृताञ्जलिम् । लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह ॥ २६ ॥
[रामं शुश्रूषताभक्त्या वैदेह्या सह सीतया । कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते] ॥
धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि । रामे प्रसन्ने स्वर्गं च महिमानं तथोत्तमम् ॥ २७ ॥
रामं शुश्रूष भद्रं ते सुमित्रानन्दवर्धन । रामः सर्वस्य लोकस्य हितेष्वभिरतः सदा ॥ २८ ॥
एते सेन्द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः । अभिवाद्यं महात्मानमर्चन्ति पुरुषोत्तमम् ॥ २९ ॥

रा० टी०–तारित इति । हे पुत्र ! महात्मना पुत्रेण त्वया अहं तारितः तीर्णप्रतिज्ञोऽभवमिति शेषः तत्र दृष्टान्तः अगस्त्येन पुत्रेण कोहलस्तत्पितेव ॥ १६ ॥

गो० टी०–तारितोऽहं त्विति । कहोलो नाम ऋषिरष्टावक्रेण तारित इतीयं कथा भारतोक्ता ॥ १७ ॥

१७–१९] ति० टी०–पिहितं पुरुषोत्तममाच्छादितम् । मत्पुत्रत्वेनेति शेषः ॥ १७–१९ ॥

रा० टी०–इदानीमिति । सुरेश्वरैः रावणस्य वधार्थं पुरुषोत्तमं त्वां यथा पिहितं प्राप्तं तथाहं जानामि एतेन स्वप्रतिज्ञाया अपि पालनं कृतमिति सूचितम् ॥ १७ ॥

गो० टी०–इदानीं त्विति । रावणस्य वधार्थं सुरेश्वरैरिन्द्रमभिषेकविघ्नादिकं कर्म यथा विहितं तथा इदानीमेव जानामि । पुरुषोत्तमेत्यनेन भवान् विष्णुरेव रावणवधार्थं मनुष्यत्वं गत इत्युच्यते ॥ १८ ॥

रा० टी०–सिद्धार्थेति । या वनाभिवृत्तमत एव गृहं गतं द्रक्ष्यते सा कौसल्या सिद्धार्था ॥ १८ ॥

गो० टी०–सिद्धार्थेति । सिद्धार्था कृतार्था । मम स्वर्गसुखादपि तस्याः सुखमधिकमिति भावः ॥ १९ ॥ २० ॥

रा० टी०–सिद्धार्था इति । ये अभिषिक्तं त्वां द्रक्ष्यन्ते ते सिद्धार्थाः ॥ १९ ॥

२०–२३ ति० टी०–द्रष्टुमिच्छेयम् । स्वलोकस्थ एव सन्निति शेषः ॥ २०–२३ ॥

रा० टी०–अनुरक्तेनेति । अनुरक्तेन भरतेन समागतं त्वां द्रष्टुमहमिच्छेयम् ॥ २० ॥

गो० टी०–अनुरक्तेनेति । अवश्यं राम भरतं प्राप्नुहीति भावः ॥ २१–२४ ॥

रा० टी०–चतुर्दशेति । मत्प्रीत्या वने वसता त्वया चतुर्दश समा वर्षाणि निर्यापिता. ॥ २१ ॥

रा० टी०–निवृत्तेति । रावणं हत्वा देवताः परितोषिताः अत एव प्रतिज्ञाः पूरिताः अतः त्वं निवृत्तवनवासोऽसि ॥ २२ ॥

रा० टी०–कृतमिति । श्लाघ्यं कर्म त्वया कृतमत एव यशः प्राप्तमत एव राज्यस्थस्त्वं दीर्घमायुरवाप्नुहि ॥ २३ ॥

२४–२६] ति० टी०–घोरः स शापः सपुत्रां कैकेयीं यथा न स्पृशेत्तथा प्रसादं कुरु ॥ २४–२६ ॥

रा० टी०–इतीति । रामः राजानमब्रवीत् तदाकारमाह–कैकेय्या भरतस्य च प्रसादं प्रसन्नतां कुरु ॥ २४ ॥

रा० टी०–प्रसादाकारमाह सपुत्रामिति । सपुत्रां त्वां त्यजामि इति यत् कैकेयी त्वया उक्ता स घोरश्शापः सपुत्रां कैकेयीं न स्पृशेत् एतेन साकेतं गच्छेति सूचितम् ॥ २५ ॥

रा० टी०–तथेति । महाराजः राममुक्त्वा लक्ष्मणं वाक्यमब्रवीत् ॥ २६ ॥

गो० टी०–कुरु प्रसादमिति । कैकेय्या भरतस्य च कैकेय्यां भरते चेत्यर्थः । संबन्धसामान्ये षष्ठी । यस्मादुक्ता तस्मात् प्रसादं कुर्वितिं संबन्धः ॥ २५ ॥

गो० टी०–स शाप इत्यर्धमेकं वाक्यम् । शापः संबन्धविच्छेदरूपः ॥ २६ ॥ २७ ॥

२७–२९] ति० टी०–स्वर्गं महिमानं च प्राप्स्यसीत्यनुकर्षः ॥ २७–२९ ॥

---

१ विहितमिति गो. पा. । २ द्रक्ष्यत्यरिनिषूदनेति गो. पा. । ३ जलार्द्रमिति गो. पा. । ४ लक्ष्मणेन च भीमतोति गो पा. । ५ इदं पद्यमधिकं गो. पाठे । ६ शुश्रूषेति गो. पाठः । ७ गम्येति गो. पाठः ।

एतत्तदुक्तमव्यक्तमक्षरं ब्रह्मसंमितम् । देवानां हृदयं सौम्य गुह्यं रामः परंतपः ॥ ३० ॥
अवाप्तधर्माचरणं यशश्च विपुलं त्वया । एनं शुश्रूषता व्यैष्ठ्यं वैदेह्या सह सीतया ॥ ३१ ॥
इत्युक्त्वा लक्ष्मणं राज्ञः स्नुषां बद्धाञ्जलिं स्थिताम् । पुत्रीत्याभाष्य मधुरं शनैरेनामुवाच ह ॥ ३२ ॥
कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति । रामेणेदं विशुद्ध्यर्थं कृतं वै त्वद्धितैषिणा ॥ ३३ ॥
सुदुष्करमिदं पुत्रि तव चारित्रलक्षणम् । कृतं यत्तेऽन्यनारीणां यशो ह्यभिभविष्यति ॥ ३४ ॥
न त्वं कामं समाधेया भर्तृशुश्रूषणं प्रति । अवश्यं तु मया वाच्यमेष ते दैवतं परम् ॥ ३५ ॥
इति प्रतिसमादिश्य पुत्रौ सीतां च राघवः । इन्द्रलोकं विमानेन ययौ दशरथो नृपः ॥ ३६ ॥
विमानमास्थाय महानुभावः श्रिया च संदृप्ततनुर्नृपोत्तमः ।
आमन्त्र्य पुत्रौ सह सीतया च जगाम देवप्रवरस्य लोकम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनविंशत्यधिकशततमः सर्गः ॥ ११९ ॥

रा० टी०—तदाकारमाह धर्ममिति । रामे प्रसन्ने सति धर्मादीन् प्राप्स्यसि ॥ २७ ॥

गो० टी०—राममिति । सीतया सह रामं शुश्रूषतेत्यन्वयः ॥ २८ ॥

रा० टी०—राममिति । यतः सर्वस्य लोकस्य हितेषु रामोऽभिरतः अतः रामं शुश्रूष ॥ २८ ॥

गो० टी०—धर्ममिति । स्वर्गं सुखम् । लक्ष्मणस्यापि विष्णवतारत्वं न जानाति दशरथः । महिमानं महत्त्वम् ॥ २९ ॥ ३० ॥

रा० टी०—एत इति । एनं सर्वे महात्मानं राममभिगम्य अर्चन्ति ॥ २९ ॥

गो० टी०—रामस्य सर्वोत्तमत्वं शिष्टाचारेण दर्शयति—एत इति । अर्चन्तीति णिजभाव आर्षः । एत इति हस्तनिर्देशेन रुद्रोपेन्द्रगणः ॥ ३१ ॥

३०] ति० टी०—एतदामरूपं वस्तु । तज्जानीहीति शेषः । यद्देवानां हृदयमुक्तम् । 'देवानां हृदयं ब्रह्मान्वविन्दन्' इति श्रुत्या देवहृदयत्वेनोपदिष्टं तथा देवानां गुह्यम् । 'एतद्वै महोपनिषदं देवानां गुह्यम्' इति श्रुत्या देवगुह्यत्वेनोपदिष्टम् । ब्रह्मसंमितं ब्रह्मणा 'अन्तरस्मिन्निमे लोकाः' इत्यादि श्रुत्या प्रतिपादितम् । अक्षरमशेषजगत्कारणतया नित्यं युद्धचास्मिन् ब्रह्मशब्दोक्तत्वे ॥ ३० ॥

रा० टी०—एतदिति । रामः देवानां ब्रह्मादीनामपि हृदयं नियन्तेत्यर्थः अतस्तदुक्तं रामोक्तिरूपम् अव्यक्तं गूढाभिप्रायमित्यर्थः अत एव गुह्यमत एव ब्रह्मसम्मितं वेदतुल्यमत एव अक्षरं नित्यम् एतेन एतदुक्तमादरणोऽनुष्ठेयमित्युपदेशस्मृचितः ॥ ३० ॥

गो० टी०—एतदिति । देवानां हृदयं सर्वदेवान्तर्यामी । वेदानामिति पाठे वेदतात्पर्यभूतम् उभयशाण्डिल्यादिरूपेण सर्वकर्मसमाराध्यमित्यर्थः । गुह्यं साक्षादपनिषद्वेद्यम् । अव्यक्तं भक्तिशून्यैर्दुर्ज्ञेयम् । अक्षरं षड्भावविकाररहितम् । तदेतत् ब्रह्म रामः रामरूपेण निर्मितम् रामरूपेणावतीर्णमिति उक्तम् । ब्रह्मादिभिरिति शेषः ॥ ३२–३५ ॥

३१–३२] ति० टी०—यत एवं भूतो रामो ब्रह्मादिभिस्त्वत्समक्षमेवोक्तः, अत एनं शुश्रूषता त्वया सर्वधर्माचरणं प्राप्तम । ब्रह्मज्ञयमें सर्वधर्मान्तर्भावस्य संवर्गविद्यायामुक्तत्वादिति भावः ॥ ३१ ॥ ३२ ॥

रा० टी०—अवाप्तमिति । एनं रामं शुश्रूषता त्वया धर्माचरणादि अवाप्तम् ॥ ३१ ॥

रा० टी०—इतीति । राजा बद्धाञ्जलिं स्थितां स्नुषां पुत्रीत्याभाष्य शनैरुवाच ॥ ३२ ॥

३३–३४] ति० टी०—इमं त्यागं प्रति यथेष्टं गम्यतामित्युक्तरूपम् ॥ ३३ ॥ ३४ ॥

रा० टी०—तदाकारमाह—कर्तव्य इति । त्वद्धितैषिणा रामेण इदं यद्विप्रवेशनादि विशुद्ध्यर्थं लोकानां शुद्ध्यर्थं कृतम् अतः त्यागं प्रति मन्युर्न कर्तव्यः ॥ ३३ ॥

रा० टी०—सुदुष्करमिति । सुदुष्करमन्याभिः कर्तुमशक्यं चारित्रलक्षणं यत् कर्म त्वया कृतं तेन कर्मणा नारीणां यशः अभिभविष्यति ॥ ३४ ॥

३५–३७] ति० टी०—यद्यपि भर्तृशुश्रूषां प्रति त्वं न समाधेया न प्रार्थनापूर्वं नियोज्या । तव ते स्वतः प्रवृत्तिसम्भवात् । अथापि मया गुरुत्वादवश्यं वाच्यम् । तदेवाह—ते दैवतं परमिति ॥ ३५–३७ ॥

इति श्रीरामभारतीये श्रीमतीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकोनविंशत्यधिकशततमः सर्गः ॥ ११९ ॥

रा० टी०—नेति । यद्यपि भर्तृशुश्रूषणं प्रति त्वं न समाधेया स्वत एव तत्र प्रवृत्तेत्यर्थः मया तु अवश्यं वाच्यं पित्रादीनां पुत्रादिशिक्षाकर्तृत्वम्यावश्यकत्वादित्यर्थः शिक्षायां हेतुः एष पतिः ते परं दैवतम् ॥ ३५ ॥

रा० टी०—इतीति । राघवो दशरथः इति प्रतिसमादिश्य इन्द्रलोकं ययौ ॥ ३६ ॥

रा० टी०—विमानमिति । नृपोत्तमो दशरथः सीतया

१ निरेति गो. पा. । २ अवाप्तं धर्मचरणमिति गो. रा. पा. । ३ भक्त्येति गो. पा. । ४ स तथोक्त्वामहाबाहुर्लक्ष्मणं प्राञ्जलिं स्थितम् । उवाच राजा धर्मात्मा वैदेहीं वचनं शुभमिति गो.पा. । ५ इदं पद्यं गो.पु. नास्ति । ६ तथा स्नुषामिति गो. पा. । ७ ज्वलन्निति गो. पा. । ८ इदं पद्यं गो. पु. नास्ति ।

विंशाधिकशततमः सर्गः ।

दशरथे स्वर्गं गते वृत्रघ्नाऽस्माकममोघदर्शनमतो वरानीप्सितान्वृणीष्वेत्यनुज्ञातो[1] राघवः सर्वेषां युद्धे मृतानां कपीनां पुनर्जीवनां-ते यत्र तिष्ठेयुस्तत्र जलमूलफलबाहुल्यमकालेऽपीत्याययाचत् तथेत्युक्ते वज्रपाणिना सर्वे वानरा जीवन्त उत्तस्थुरानन्दितं च सहरिलक्ष्मणं राममामन्त्र्य निर्जराः सहर्षं दिवं प्रतिययुः।

प्रतिप्रयाते काकुत्स्थे महेन्द्रः पाकशासनः । अब्रवीत्परमप्रीतो राघवं प्राञ्जलिं स्थितम् ॥ १ ॥
अमोघं दर्शनं राम तवास्माकं नरर्षभ । प्रीतियुक्ताः स्म तेन त्वं ब्रूहि यन्मनसेप्सितम् ॥ २ ॥
एवमुक्तो महेन्द्रेण प्रसन्नेन महात्मना । सुप्रसन्नमना हृष्टो वचनं प्राह राघवः ॥ ३ ॥
यदि प्रीतिः समुत्पन्ना मयि ते विबुधेश्वर । वक्ष्यामि कुरु मे[2] सत्यं वचनं वदतां वर ॥ ४ ॥
मम हेतोः पराक्रान्ता ये गता यमसादनम् । ते सर्वे जीवितं प्राप्य समुत्तिष्ठन्तु वानराः ॥ ५ ॥
मत्कृते विप्रयुक्ता ये पुत्रैर्दारैश्च वानराः । तान्प्रीतमनसः सर्वान्द्रष्टुमिच्छामि मानद ॥ ६ ॥
विक्रान्ताश्चापि शूराश्च न मृत्युं गणयन्ति च । कृतयत्ना विपन्नाश्च जीवयैतान्पुरंदर ॥ ७ ॥
मत्प्रियेष्वभिरक्ताश्च न मृत्युं गणयन्ति ये । त्वत्प्रसादात्समेयुस्ते वरमेतमहं वृणे ॥ ८ ॥
नीरुजो निर्व्रणांश्चैव संपन्नबलपौरुषान् । गोलाङ्गूलांस्तथर्क्षांश्च द्रष्टुमिच्छामि मानद ॥ ९ ॥

सह स्वपुत्रौ भामन्त्र्य पूजां विमलमाप्याय देवप्रवरस्य लोकं जगाम ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणेऽध्यात्मे रामायणशिरोमणौ युद्धकाण्डे एकविंशत्यधिकशततमः सर्गः ॥ १२१ ॥

गो० टी०-न त्वमिति । न समाधेया नोपदेष्टव्या ३६॥३७

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

१] ति० टी०-काकुत्स्थे दशरथे । महेन्द्रः । तत्सहितो ब्रह्मा इत्यर्थः । सत्यसंकल्पस्य तन्मिलेव प्रसिद्धेः । वानराणां संकल्पमात्रेणोत्थानस्य वक्ष्यमाणत्वात् । भारतेऽपि—' ततस्ते ब्रह्मणा प्रोक्ते तथेति वचने तदा । समुत्तस्थुर्महाराज वानरा लब्धचेतसः ॥ ' इत्युक्तम् । पाद्मेऽपि—' पितामहवरात्तूर्णं जीवयामास तान्हरिः ' इति । प्राञ्जलिं स्थितं राघवं प्रतीति शेषः॥१॥

रा० टी०-दशरथगमनानन्तरकालिकं वृत्तान्तमाह—प्रतीत्यादिभिः । काकुत्स्थे दशरथे प्रतिप्रयाते सति महेन्द्रः अन्यैश्चर्यवान् पाकशासनः प्राञ्जलिं दशरथोदंशेन बद्धकरं राघवमब्रवीत् ॥ १ ॥

गो० टी०-अमोघमित्यादि । काकुत्स्थे दशरथे । महेन्द्रः लब्धमहेन्द्रभावः ॥ १ ॥

२-३] ति० टी०-अस्माकं दर्शनं कृतोपकारस्य तवामोघं प्रत्युपकारेण चरितार्थं भवत्विति शेषः । तेन यतः प्रीतियुक्तास्तेनेत्यर्थः ॥ २ ॥ ३ ॥

रा० टी०-तदाकारमाह—अमोघमिति । हे राम! अस्माकं तव दर्शनममोघं निष्फलं न अतः यन्मनसा ईक्षितं तत्प्रीतियुक्तस्त्वं ब्रूहि आज्ञापय ॥ २ ॥

रा० टी०-एवमिति । महेंद्रेण एवमुक्तो राघवः वचनं प्राह ॥ ३ ॥

गो० टी०-अमोघमिति । त्वदस्माकं दर्शनम् अस्मत्कर्तृकं दर्शनम् दशरथपुत्रकामेष्टिकालिकम्, अमोघं रावणवधपर्यन्तं जातमित्यर्थः । तेन प्रीतियुक्तत्वेन, यत् प्रत्युपकाररूपं कार्यमिच्छसि तद्ब्रूहि । केचित्तु त्वत्कर्तृकमस्मद्विषयं दर्शनमित्यर्थ इत्याहुः ॥ २-३ ॥

४] ति० टी०-यद्वचनं वक्ष्यामि तत्सत्यं कुरु ॥ ४ ॥

रा० टी०-तदाकारमाह—यदीत्यादिभिः । हे विबुधेश्वर अहं वक्ष्यामि मे वचनं सत्यं कुरु ॥ ४ ॥

५] ति० टी०-पराक्रान्ताः कृतपराक्रमाः ॥ ५ ॥

रा० टी०-तद्वचनमेवाह—ममेत्यादिभिः । मम हेतोः ये यमसादनं तद्द्वारा स्वर्गं गतास्ते सर्वे जीवितुं जीवनं प्राप्य समुत्तिष्ठन्तु ॥ ५ ॥

६-७] ति० टी०-विप्रयुक्ताः । जीवितनाशेनेति भावः ६॥७

रा० टी०-मदिति । ये वानरा मत्कृते पुत्रैर्दारैश्च विप्रयुक्ताः तान्सर्वान् द्रष्टुमिच्छामि ॥ ६ ॥

रा० टी०-विक्रान्ता इति । शूराः मृत्युं न गणयन्ति अत एव कृतप्रयत्ना विपन्ना मृताश्च अतः एतान् जीवय ॥७॥

गो० टी०-मत्कृत इत्यादिसार्धश्लोकमेकं वाक्यम् । मत्प्रियेषु अभियुक्ता निरताः । समेयुरित्यत्र पुत्रैर्दारैश्चेत्यावर्तनीयम् ॥ ६ ॥ ७ ॥

८-९] ति० टी०-मत्प्रियेषु मत्प्रियकृत्येषु त्वत्प्रसादात्समेयुस्ते । स्वजनैरिति शेषः ॥ ८ ॥ ९ ॥

रा० टी०-मदिति । ये मत्प्रियेषु अभिरक्तास्तन्मृत्युं

१ उक्तस्तु काकुत्स्थः प्रत्युवाच कृताञ्जलिः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया इति गो. पा.। २ ते इति गो. पा.। ३ इदं सार्धश्लोकं गो. पु. नास्ति।

अकाले चापि पुष्पाणि मूलानि च फलानि च । नद्यश्च विमलास्तत्र तिष्ठेयुर्यत्र वानराः ॥ १० ॥
श्रुत्वा तु वचनं तस्य राघवस्य महात्मनः । महेन्द्रः प्रत्युवाचेदं वचनं प्रीतिसंयुतम् ॥ ११ ॥
महानयं वरस्तात यस्त्वयोक्तो रघूत्तम । द्विर्मया नोक्तपूर्वं च तस्मादेतद्भविष्यति ॥ १२ ॥
समुत्तिष्ठन्तु ते सर्वे हता ये युधि राक्षसैः । ऋक्षाश्च सह गोपुच्छैर्निकृत्ताननबाहवः ॥ १३ ॥
नीरुजो निव्रणाश्चैव संपन्नबलपौरुषाः । समुत्थास्यन्ति हरयः सुप्ता निद्राक्षये यथा ॥ १४ ॥
सुहृद्भिर्बान्धवैश्चैव ज्ञातिभिः स्वजनेन च । सर्व एव समेष्यन्ति संयुक्ताः परया मुदा ॥ १५ ॥
अकाले पुष्पशबलाः फलवन्तश्च पादपाः । भविष्यन्ति महाराज नद्यश्च सलिलायुताः ॥ १६ ॥
सव्रणैः प्रथमं गात्रैरिदानीं निव्रणैः समैः । तताः समुत्थिताः सर्वे सुप्तेव हरिसत्तमाः ॥ १७ ॥
बभूवुर्वानराः सर्वे किं त्वेतदिति विस्मिताः । काकुत्स्थे पीडयमाने दृष्ट्वा सर्वे सुरोत्तमाः ॥ १८ ॥
अब्रुवन्परमप्रीताः स्तुत्वा रामं सलक्ष्मणम् । गच्छायोध्यामितो राजन्विमर्जय च वानरान् ॥ १९ ॥
मैथिलीं सान्त्वयस्वैनामनुरक्तां यशस्विनीम् । भ्रातरं भरतं पश्य त्वच्छोकाहतचारिणम् ॥ २० ॥
शत्रुघ्नं च महात्मानं मातृः सर्वाः परंतप । अभिषेचय चात्मानं पौरान्गत्वा प्रहर्षय ॥ २१ ॥
एवमुक्त्वा सहस्राक्षो रामं सौमित्रिणा सह । विमानैः सूर्यसंकाशैर्ययौ हृष्टः सुरैः सह ॥ २२ ॥

न गणयन्ति अगणयन्त ते समेयुः पुत्रादिभिस्सह संगता भवेयुः एतं वरमहं वृणे ॥ ८ ॥

रा० टी०–नीरुज इति । रुगादिरहिताः गोलांगूलास्त्र ऋक्षांश्च द्रष्टुमिच्छामि ॥ ९ ॥

गो० टी०–नीरुज इति । निष्पीडान ॥ ८ ॥

१०–११] ति० टी०–उत्थितानां सर्वेषां सुखलाभाय वरान्तरम्—अकाले चापीति ॥ १० ॥ ११ ॥

रा० टी०–अकाल इति । यत्र वानराः तत्र अकालेऽपि पुष्पादीनि तिष्ठेयुः ॥ १० ॥

रा० टी०–श्रुत्वेति । महेन्द्रः इदं प्रत्युवाच ॥ ११ ॥

गो० टी०–अकाल इति । विमला विमलोदकाः ॥ ९ ॥

गो० टी०–श्रुत्वा त्विति । प्रीतिर्लक्ष्यतेऽनेनेति प्रीतिलक्षणं प्रीतिव्यञ्जकम् ॥ १० ॥

१२–१६] ति० टी०–महानिति । अकस्मादपि मृतस्य पुनरुज्जीवनं दुष्करम्, अपरिमितमृतजीवने च पुनरुत्थिताशक्यमिति भावः ॥ १२–१६ ॥

रा० टी०–तदाकारमाह महानित्यादिभिः । यद्यपि अयं तव वरः ईक्षितः महान् दुःसाध्य इत्यर्थः तथापि एतत् त्वयोक्तं भविष्यति तत्र हेतुः द्विः विरुद्धवचनद्वयं मया नोक्तपूर्वम् ॥ १२ ॥

रा० टी०–समुत्तिष्ठन्त्विति । गोपुच्छैरसद्दे ये ऋक्षाः राक्षसैर्युधि हतास्ते सर्वे समुत्तिष्ठन्तु ॥ १३ ॥

रा० टी०–नीरुज इति । नीरुजः अङ्गभंगरहिताः अत एव निव्रणाः अत एव सम्पन्नबलपौरुषाश्च सन्तो हरयः सुप्ता निद्राक्षये इव समुत्थास्यन्ति ॥ १४ ॥

रा० टी०–सुहृद्भिरिति । सर्वे परया मुदा एकत्रसन्तः सुहृदादिभिः समेष्यन्ति ॥ १५ ॥

रा० टी०–अकाल इति । हे महेन्द्राम पादपाः अकाले पुष्पशबलाः फलवन्तः भविष्यन्ति ॥ १६ ॥

गो० टी०–महानयं वर इति । वरस्य महत्त्वम् इतस्ततो विप्रकीर्णानां वानरपुच्छादिसन्धानसंघातलोकान्तरगतानयनादिसाधारणार्थप्रतिसन्धानम् । द्विर्मया नोक्तपूर्वमिति । उक्तवचनस्य विपरीतं वचनान्तरं नोक्तपूर्वमित्यर्थः ॥ ११–१३ ॥

गो० टी०–अकाल इति । पुष्पशबलाः पुष्पैर्नानावर्णैः । सलिलायुताः सलिलवत्यः ॥ १४ ॥

१७–२२] ति० टी०–ततः समुत्थिताः । देवराजस्पर्शबलादुत्थानमेकक्षणमात्रम् ॥ १७–२२ ॥

रा० टी०–सव्रणैरिति । प्रथमं सव्रणैः इदानीं निर्व्रणैः गात्रैरुपलक्षितास्ते हरिसत्तमाः प्रथमं सुप्ताः विस्मिताः पश्चात् समुत्थिताः इव बभूवुः अत एव एवत्र विस्मिताः सर्वे वानरा विस्मिताः बभूवुः साहसेऽस्मिन् एकाग्र्यात् । इतश्चकः सुप्ता इव इति छेदः तु नञ्समर्थे इत्यत्र योगविभागेन क्रियाविशेषणा अस्मिन्नाख्याते सुप्ता योज्यः ॥ १७ ॥ १८ ॥

गो० टी०–ये निहताः सव्रणास्तेषां निर्व्रणत्वमसमञ्जसमित्याशङ्क्याह—सव्रणैरिति । प्रथमं वरदानात्पूर्वं सव्रणैः, अथ निर्व्रणैः संव्रणैः निर्व्रणीभूतैः गात्रैरुपलक्षिताः, वानरा भविष्यन्तीत्यनुकृष्य योजना ॥ १७ ॥

रा० टी०–काकुत्स्थमिति । सुरोत्तमाः रामं स्तुत्वा अब्रुवन् ॥ १९ ॥

---

१ मुख्यानीति गो. पा. । २ लक्ष्मणमिति गो. पा. । ३ तपस्विनीमिति गो. रा. पा. । ४ एतयोरर्धयोर्व्यत्यासेन पाठो गो. पु. । ५ मामन्येति गो. पा. । ६ हृष्टा जग्मुः सुरा दिवमिति गो. पा. ।

अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदशोत्तमान्। लक्ष्मणेन सह भ्रात्रा वासमाज्ञापयत्तदा ॥ २३ ॥
ततस्तु सा लक्ष्मणरामपालिता महाचमूर्हृष्टजना यशस्विनी ।
श्रिया ज्वलन्ती विरराज सर्वतो निशा प्रणीतेव हि शीतरश्मिना ॥ ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे विंशत्यधिकशततमः सर्गः ॥ १२० ॥

एकविंशाधिकशततमः सर्गः ।

तां रात्रिमुषितं रामं विभीषणः साञ्जलिर्वस्त्राण्याभरणानि च दिव्यानि गृहाणेत्यब्रवीत् रामेण तु भरतं विना नाम्बरादिकं मे बहुमत सत्यसंधोऽयं गमिष्यामि इत्युक्तो विभीषणः पुष्पकं नाम विमानमुपास्थापयत् ।

तां रात्रिमुषितं रामं सुखोदितमरिंदमम् । अब्रवीत्प्राञ्जलिर्वाक्यं जयं पृष्ट्वा विभीषणः ॥ १ ॥
स्नानानि चाङ्गरागाणि वस्त्राण्याभरणानि च । चन्दनानि च माल्यानि दिव्यानि विविधानि च ॥ २ ॥
अलंकारविदश्चैता नार्यः पद्मनिभेक्षणाः । उपस्थितास्त्वां विधिवत्स्नापयिष्यन्ति राघव ॥ ३ ॥
एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणम् । हरीन्सुग्रीवमुख्यांस्त्वं स्नानेनोपनिमन्त्रय ॥ ४ ॥
स तु तान्प्रति धर्मात्मा मम चैतां सुखोचितः । सुकुमारो महाबाहुर्भरतः सत्यसंश्रयः ॥ ५ ॥
तं विना कैकयीपुत्रं भरतं धर्मचारिणम् । न मे स्नानं बहुमतं वस्त्राण्याभरणानि च ॥ ६ ॥

गो० टी०-तत इति । अत्र क्रियाभेदात्सर्वशब्दद्वयम् । किमेतदिति । पुरे मृतस्य कथमेवं जीवनमित्यर्थः ॥१६-१८॥

रा० टी०-तदाकाराभ्यां-गच्छेति । इतो लङ्कायाः अयोध्यां गच्छ मैथिलीं सान्त्वयस्व च ॥ २० ॥

गो० टी०-गच्छायोध्यामित्यादिसार्धश्लोकद्वयमेकान्वयम् । स्वर्लोकात् त्वद्वियोगशोकात् ॥ १९-२२ ॥

रा० टी०-भ्रातरमिति । भरतादीन पश्य आत्मानमभिषिंचय च सार्द्धश्लोक एकान्वयी ॥ २१ ॥

रा० टी०-एवमिति । सहस्राक्षः सुरैस्सह ययौ ॥ २२ ॥

२३] ति० टी०-वासमाज्ञापयत् । यथापूर्वमाज्ञापयत्पित्यर्थः ॥ २३ ॥

रा० टी०-अभिवाद्येति । काकुत्स्थः त्रिदशोत्तमान् अभिवाद्य अभिवादनं कारयित्वा वासं यथा पूर्वं वानरादिनिवासेषु आज्ञापयत् ॥ २३ ॥

गो० टी० अभिवाद्येति । वासमाज्ञापयत् वानराणामिति शेषः ॥ २३ ॥

२४] ति० टी०-यद्यपि रामेणापीच्छामात्रेणैतत्सुकरं तथापि गृहीतमनुष्यदेहत्वात्तत्स्वरूपगोपनाय सेन्द्रब्रह्मद्वारा तथा कृतमिति ध्येयम । येऽप्यमृतवृष्ट्या इन्द्रेण सर्वेमुत्थानं कृतमिति वदन्ति, तत्पक्षेऽपि रावणकैकारदिने सर्वरक्षसां दाहादिसंस्कारपूर्वकं भस्मनः समुद्रे प्रक्षेपात् तदुत्थानशङ्का । पूर्व युद्धकाले एव मृतानां समुद्रे प्रक्षेप इति मूल एव पूर्वमुक्तत्वाच्च । अन्ये तु—ग श्लोकस्तत्राधुनिकप्रक्षिप्तः । नन्वेवमुत्थानमात्रेण सर्वेषां विशल्यता, किं तु चूर्णीकृत्य तस्य क्षेपेणेति प्रागेवोक्तम् । तथा च तद्भावात्र तेषां विशल्यता, मृतानां गन्धाघ्राणाभावाच्च । रावणस्य तथाज्ञाया अश्रवणाच्चेत्याहुः ॥ २४ ॥

इति श्रीरामायणे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे विंशत्यधिकशततमः सर्गः॥१२०॥

रा० टी०-तत इति । श्रिया विजयलक्ष्म्या सर्वतो ज्वलन्ती महाचमूः शीतरश्मिना चन्द्रमसा प्रणीता निशेव रराज ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे द्वाविंशत्यधिकशततमः सर्गः ॥ १२२ ॥

गो० टी०-ततस्त्विति । प्रणीता प्रकाशिता ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

१] ति० टी०-तां रात्रिमिति । यत्र दिने ब्रह्मादयो जग्मुस्तत्संबन्धिन्यां रात्रावित्यर्थः । सुखोदितं सुखप्रश्नम् । जयं पृष्ट्वा जयशब्दं प्रयुज्य ॥ १ ॥

रा० टी०-यथापूर्वनिवासानंतरकालिकं क्षेमान्तमाह—तामित्यादिभिः । विभीषणः यस्यां रात्रौ ब्रह्मादयो गताः तां रात्रिं सुखोदितं सुखकथनविशिष्टं यथा भवति तथा उषितं रामं जयं पृष्ट्वा अब्रवीत् ॥ १ ॥

गो० टी०-अथ रामस्य वीभीषणसत्कारः—तां रात्रिमित्यादि । तां रात्रिम् । यस्मिन् दिने ब्रह्मादयो निर्जग्मुः तां रात्रिमित्यर्थः ॥ १ ॥

२] ति० टी०-स्नानानि स्नानसाधनसुगन्धतैलादीनि २
३-६] ति०टी०-अलंकारविदोऽलंकरणक्रियासमर्थाः ३-६

१ कुमार इति गो. पा. ।

एतत्पश्य यथा क्षिप्रं प्रतिगच्छाम तां पुरीम् । अयोध्यां गच्छतो ह्येष पन्थाः परमदुर्गमः ॥ ७ ॥
एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः । अद्हा त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज ॥ ८ ॥
पुष्पकं नाम भद्रं ते विमानं सूर्यसंनिभम् । मम भ्रातुः कुबेरस्य रावणेन बलीयसा ॥ ९ ॥
हृतं निर्जित्य सङ्ग्रामे कामगं दिव्यमुत्तमम् । त्वदर्थं पालितं चेदं तिष्ठत्यतुलविक्रम ॥ १० ॥
तदिदं मेघसंकाशं विमानमिह तिष्ठति । येन यास्यसि यानेन त्वमयोध्यां गतज्वरः ॥ ११ ॥
अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान् । वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदम् ॥ १२ ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या भार्यया सह । अनिन्दः सर्वकामैस्त्वं ततो राम गमिष्यसि ॥ १३ ॥

रा० टी०—तदाकारमाह—स्नानेति द्वाभ्याम् स्नानानि स्नानसाधनानि अङ्गरागादीनि गृहीत्वेति शेषः उपस्थिता एता नार्यः त्वां स्नापयिष्यंति स्नापयितुमिच्छन्तीत्यर्थः श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

रा० टी०—एवमिति । काकुत्स्थो विभीषणमुवाच तदाकारमाह हरीन् स्नानेन स्नानार्थमुपनिमन्त्र्य ॥ ४ ॥

रा० टी०—तत् त्वमप्युपमन्त्रणं स्वीकुर्वित्यत आह—स इति । सत्यसंश्रयः स भरतः मम हेतोः ताम्यति संतप्तो भवत्यर्थः अतः तं भरतं विना बहुगंधलेपनादिपूर्वं स्नानं मे न मतम् श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०—स्नानानीत्यादिसार्धश्लोकत्रयमेकान्वयम् । स्नानानि स्नानीयजलानि । अत्र सर्वत्रानीयशब्दः प्रयुज्यते । अङ्गरागाणि कुङ्कुमादीनि माल्यानि सरः विलिप्य सोपचारमित्यर्थः ॥ २—४ ॥

गो० टी०—हरीनिति । सुग्रीवप्रमुखान् सुग्रीवप्रमुखानेव हरीन्, स्नानेन स्नानेन हेतुना, अभिनिमन्त्र्य ॥ ५ ॥

गो० टी०—त्वां विना तेषामामन्त्रणे किं कारणमित्यत आह—स त्विति । सः सर्वदा मनसि परिवर्तमानः धर्मात्मा ताम्यति । धर्माचरणेनैव ताम्यतीति भावः । मम हेतोः मल्लाभार्थमित्यर्थः । सत्यसंश्रवः, चतुर्दश हि संवृणे वर्षाणि रघूत्तम । न द्रक्ष्यामि यदि त्वां हि प्रवेक्ष्यामि हुताशनमिति कृतप्रतिज्ञः ॥ ६ ॥

गो० टी०—तं विनेति । तं विना स्नानोपकरणं विना, स्नानं कथं कार्यम् । कैकेयीपुत्रे, मध्यमाम्बा तस्मिन् यद्व्यवसितं तत्किं मयापि कर्तव्यम् । भरतः राज्यं मया च विरहितं राज्यं सम्यक् कृतवन्तम् । धर्माचारिणं, मद्वियोगेन बहुव्रतपरे तस्मिन् कथं मया व्रतत्यागः कर्तुं युक्त इति भावः । न मे स्नानं बहुमतम् । प्रथमं मे स्नानमेव नेष्टं, कथं तदनन्तरभावीनि वस्त्रादीनि ॥ ७ ॥

७-९] ति० टी०—प्रतिगच्छामेति लोट् ॥ ७-९ ॥

१०] ति० टी०—त्वदर्थं पालितं चेदं तिष्ठति । हतेऽपि रावणे इति शेषः ॥ १० ॥

रा० टी०—एतदिति । यतः अयोध्यां गच्छतो जनस्य पन्थाः परमदुर्गमः अतः अयोध्यां यथा येन प्रकारेण क्षिप्रं शीघ्रं प्रतिगच्छाम तत् पश्य विचारय ॥ ७ ॥

रा० टी०—एवमिति । एवमुक्तो विभीषणः काकुत्स्थं प्रत्युवाच तदाकारमाह अद्हा एकदिनेन त्वामयोध्यां प्रापयिष्यामि ॥ ८ ॥

रा० टी०—तदुपायमाह—पुष्पकमित्यादिभिः । रावणेन हृतं मम भ्रातुः कुबेरस्य पुष्पकं नाम विमानं तिष्ठति तत् इदानीं कुबेराय कुतो न दत्तमित्यत आह त्वदर्थमेव मया पालितं न दत्तमित्यर्थः श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०—इत एवेति । अनेन पथा येनाहमागतस्तेनैव । एष इति हस्तनिर्देशपूर्वकमुच्यते । अयोध्याम् आगतः प्राप्तः अयमयोध्यामार्गः, तेन क्षिप्रं तां प्रति गच्छामीत्यर्थः । परमदुर्गम, अतिदुरुत्वादिति भावः ॥ ८ ॥

गो० टी०—मार्गस्य परमदुर्गमत्वमार्षं परिहर्तुमाह—एवमुक्तस्त्विति ॥ ९ ॥

गो० टी०—अद्हा त्वामित्यादिसार्धश्लोकत्रयमेकान्वयम् । किं रावणेन चौर्येणापहृतमित्यत्राह—भ्रातुर्न निर्जित्येति । तर्हि कुबेराय समागताय तत्किमर्थं न दत्तमित्यत्राह—त्वदर्थ इति । त्वदर्थं त्वद्गमनार्थं पालितमिति । न दत्तमित्यर्थः । यद्वा त्वदर्थं त्वत्पूजार्थमेव । मेघसंकाशमिति वेगे दृष्टान्तः ॥१०—१३॥

११] ति० टी०—तदिदमिति । लङ्कायां वर्तमानत्वादि पुष्पकस्यापहृतत्वेन शिबिरस्थैरपि दृश्यमानत्वादिदमिति प्रत्यक्षनिर्देशः । इह लङ्कायाम् ॥ ११ ॥

रा० टी०—तदिति । तदिदं विमानमिह तिष्ठति तेन यानेन विमानेन त्वमयोध्यां यास्यसि ॥ ११ ॥

१२-१३] ति० टी०—वस तावदिहेति । एकदिवसमिति शेषः ॥ १२ ॥ १३ ॥

रा० टी०—अहमिति । हे प्राज्ञ सर्वकामैर्मया अर्चितस्त्वमिह वस ततोऽनेनैव त्वं गमिष्यसि श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०—स्नानाकरणे *द्वित्रिदिनमात्रस्थितिं याचते—

१ इत एव पथेति गो. पा. । * द्वित्रेति युक्तं भाति ।

प्रीतियुक्तस्य विहितां ससैन्यः समुहद्गणः । सत्क्रियां राम मे तावद्गृहाण त्वं मयोद्यताम् ॥ १४ ॥
प्रणयाद्बहुमानाच्च सौहार्देन च राघव । प्रसादयामि प्रेष्योऽहं न खल्वाज्ञापयामि ते ॥ १५ ॥
एवमुक्तस्ततो रामः प्रत्युवाच विभीषणम् । रक्षसां वानराणां च सर्वेषामेव शृण्वताम् ॥ १६ ॥
पूजितोऽस्मि त्वया वीर साचिव्येन परेण च । सर्वात्मना च चेष्टाभिः सौहार्देन परेण च ॥ १७ ॥
न खल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर । तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः ॥ १८ ॥
मां निवर्तयितुं योऽसौ चित्रकूटमुपागतः । शिरसा याचतो यस्य वचनं न कृतं मया ॥ १९ ॥
कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीम् । गुरुं च सुहृदं चैव पौराञ्जानपदैः सह ॥ २० ॥
अनुजानीहि मां सौम्य पूजितोऽस्मि विभीषण । मन्युर्न खलु कर्तव्यः सखे त्वां चानुमानये ॥ २१ ॥
उपस्थापय मे शीघ्रं विमानं राक्षसेश्वर । कृतकार्यस्य मे वासः कथं स्यादिह संमतः ॥ २२ ॥

अहं त इत्यादिना चतुःश्लोक्येकान्वया । गुणान् भक्त्यादिगुणान् । सर्वकामैः भूषणादिभिः । विहितां मया कृताम् । उद्यताम् । इतः परं नोद्योगः कार्यः, येन विलम्बः स्यात्, किं तु पूर्वमेव समुद्युक्तामित्यर्थः । निर्बन्धदोषं परिहरति—प्रणयादिति । प्रणयात् मद्वाक्यमवश्यं श्रोष्यतीति विस्रम्भात् बहुमानात् त्वत्कृतलालनात् । सौहार्देन भक्त्या प्रसादयामि प्रार्थयामि ॥ १४–१७ ॥

१४] ति० टी०–विहितां शास्त्रविहिताम् मयोद्यतां मयोपकृताम् । मे मत्तः ॥ १४ ॥

१५–१६] ति० टी०–न खल्वाज्ञापयामि ते । अत्र हेतुः—प्रेष्योऽहमिति ॥ १५ ॥ १६ ॥

रा० टी०–प्रीतीति । प्रीतियुक्तस्य मे प्रार्थनयेति शेषः मयोद्यतां प्रकृष्टां विहितामुचितां सत्क्रियां गृहाण ॥ १४ ॥

रा० टी०–प्रणयादिति । ते प्रेष्यो भृत्योऽहं प्रणयादिना त्वां प्रसादयामि न त्वाज्ञापयामि ॥ १५ ॥

रा० टी०–एवमिति । रामो विभीषणं प्रत्युवाच ॥१६॥

गो० टी०–एवमिति । उपस्थाप्यताम् उपस्थापयत्विति । भावलक्षणे षष्ठी ॥ १८ ॥

१७] ति० टी०–साचिव्यं मन्त्रसाहाय्यम् । सर्वात्मना च चेष्टाभिरिति । कायवाङ्मनोभिः कृतयुद्धचेष्टाभिः । परेणोत्तमेन । 'सौहार्देनोत्तमेन च' इत्येव क्वचित्पाठः ॥ १७ ॥

रा० टी०–तदाकारमाह—पूजित इत्यादिभिः । परेण सौहार्देनोपलक्षितेन त्वया परेण उत्तमेन साचिव्येन मन्त्रेण सर्वात्मना सर्वप्रयत्नेन च चेष्टाभिः कायव्यापारेण च पूजितोऽस्मि ॥ १७ ॥

गो० टी०–पूजितोऽहमिति । साचिव्येन साहाय्येन । चेष्टाभिः पौरुषैः । सर्वात्मना पूजित इत्यन्वयः ॥ १९ ॥

१८–१९] ति० टी०–अथाप्येतदत्र स्थित्वा त्वत्सत्कारस्वीकारं न कुर्यामिति न विशिष्य कार्यमेव । परंत्वस्वीकारे हेतुमाह—तं त्विति । यस्य वचनं मया न कृतं तं त्विति योजना ॥ १८ ॥ १९ ॥

रा० टी०–नेति । एतत्ते वचनं न कुर्याम् तत्र हेतुः मां निवर्तयितुं यश्चित्रकूटमुपागतः यस्य वचनं मया न कृतं तं भरतं कौशल्यादींश्च द्रष्टुं मे मनस्त्वरते श्लोकत्रयमेकान्वयि ॥ १८–२० ॥

गो० टी०–न खल्वेतदित्यादिश्लोकद्वयमेकान्वयम् । विभीषणवचनाकरणे हेतुमाह—तं त्विति । त्वरायां हेतुमाह—शिरसेति ॥ २०–२१ ॥

२०] ति० टी०–सह द्रष्टुं त्वरते मन इत्यनुषङ्गः ॥२०॥

२१–२२] ति० टी०–अनुमानये । कृतानुमतिको यथा भवामि तथा प्रार्थये इत्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०–अन्विति । यतस्त्वया अहं पूजितोऽस्मि अतो मामनुजानीहि गमनाय आज्ञापय अत एव मन्युर्न कर्तव्यः इति त्वामनुमानये प्रार्थयामि ॥ २१ ॥

रा० टी०–उपेति । मे विमानं शीघ्रमुपस्थापय तत्र हेतुः कृतकार्यस्य मे इह वासः कथं स्यात् ॥ २२ ॥

गो० टी०–कौसल्यामिति । अत्रापि द्रष्टुं त्वरते मे मन इति संबध्यते । पौरांश्च तनयैः सहेत्यत्र पौरैश्च तनयैश्चोन्वेति ॥ २२ ॥

गो० टी०–उपस्थापयेति । *द्वित्रिदिनान्यत्र स्थातव्यमित्यस्योत्तरमाह—कृतेति । निर्वर्तितचतुर्दशवर्षप्रव्राजनस्य कृतकार्यस्य मे इह लङ्कायाम् वासः सम्मतः कथं स्वित्, न सम्मत इत्यर्थः । अन्यथा भरतस्याग्निप्रवेशादिति भावः ॥ २३ ॥

१ परन्तपेति २ गुरुं च सुहृदश्चैवेति गो. रा. पा. । ३ त्वरितं त्वा इति गो. पा. । ४ इदं पद्यमनुजानीहि मामिति पद्यात्पूर्वं गो. पाठे दृश्यते । गो. पा. । * द्वित्रेति युक्तं दृश्यते ।

ऐवमुक्तस्तु रामेण राक्षसेन्द्रो विभीषणः । विमानं सूर्यसंकाशमाजुहाव त्वरान्वितः ॥ २३ ॥
ततः काञ्चनचित्राङ्गं वैदूर्यमणिवेदिकम् । कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम् ॥ २४ ॥
पाण्डुराभिः पताकाभिर्ध्वजैश्च समलंकृतम् । काञ्चनं काञ्चनैर्हर्म्यैर्हेमपद्मविभूषितैः ॥ २५ ॥
प्रकीर्णं किङ्किणीजालैर्मुक्तामणिगवाक्षकम् । घण्टाजालैः परिक्षिप्तं सर्वतो मधुरस्वनम् ॥ २६ ॥
तं मेरुशिखराकारं निर्मितं विश्वकर्मणा । बृहद्भिर्भूषितं हर्म्यैर्मुक्ताजनशोभितैः ॥ २७ ॥
तलैः स्फटिकचित्राङ्गैर्वैदूर्यैश्च वरासनैः । महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २८ ॥
उपस्थितमनाधृष्यं तद्विमानं मनोजवम् । निवेदयित्वा रामाय तस्थौ तत्र विभीषणः ॥ २९ ॥

तत्पुष्पकं प्रकरणाद्विमानमुपस्थितं भूधरसंनिकाशम् ।
दृष्ट्वा तदा विस्मयमाजगाम रामः समोमित्रिसुदारसत्त्वः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे एकविंशत्यधिकशततमः सर्गः ॥ १२१ ॥

२३] ति० टी०—एवमुक्त इति । 'राघवस्य वचः श्रुत्वा राक्षसेन्द्रो विभीषणः । तद्विमानं समादाय तूर्णं प्रतिनिवर्तते' इति क्वचित्पाठः ॥ २३ ॥

२४] ति० टी०—कूटागारैः शालागृहैः ॥ २४ ॥

२५] ति० टी०—पताकाः सन्त्यत्रास्य । हेमपद्मैश्च विभूषितैः काञ्चनैर्हर्म्यैः । काञ्चनं काञ्चनमयमित्यर्थः ॥ २५ ॥

२६–२८] ति० टी०—मुक्तामणिभिः कृता गवाक्षा यस्मिंस्तत् ॥ २६–२८ ॥

२९–३०] ति० टी०—उपस्थितं विमानं निवेदयित्वा विज्ञाप्य ॥ २९ ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीये । आदिकाव्ये युद्धकाण्डे एकविंशत्यधिकशततमः सर्गः ॥ १२१ ॥

रा० टी०—एवमिति । विभीषणः विमानमाजुहाव ॥ २३ ॥

रा० टी०—विमानं वर्णयन्नाह—तत इत्यादित्रिभिः । काञ्चनानि स्वर्णमयानि चित्राण्यङ्गानि यस्य वैदूर्यमणीनां वेदिका यस्मिन् कूटागारैः शालागृहैः परिक्षिप्तं रजतस्येव विशदा प्रभा यस्य पताकाभिर्ध्वजैश्च हेमपद्मविभूषितैः काञ्चनैर्हर्म्यैश्च समलंकृतम् किंकिणीजालैः प्रकीर्णं मुक्तामणिभिर्मुक्ता गवाक्षा यस्मिन् घण्टानां जालैस्समूहैः परिक्षिप्तं हर्म्यैर्भूषितं स्फटिकेन चित्राण्यङ्गानि येषां तैस्तलैः वैदूर्यैः तत्तन्मणिमयैर्महार्हास्तरणोपेतैः महान्ति धनानि येषु तैरासनैरुपपन्नमनाधृष्यमुपस्थितमागतं मनोजवं कांचनं विमानं रामाय निवेदयित्वा निवेद्य विभीषणस्तस्थौ श्लोकपट्कमेकान्वयि २४–२९

रा० टी०—तदिति । कामगं पुष्पकं विमानं दृष्ट्वा रामो विस्मयमाजगाम भ्रातुर्विमानं कथं हृतवान् इति विस्मये हेतुस्मृतिः ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकविंशत्यधिकशततमः सर्गः ॥ १२१ ॥

गो० टी०—अनुजानीहीति । भूतिर्मेऽस्मि विमानप्रदानेनेति शेषः । प्रदत्तत्वेन स्वत्वादुत्तरत्र कुबेराय प्रेषयिष्यति । मन्युः देन्यम् कोपो वा मनुर्दैन्ये क्रतौ कुशीलयमः । त्वरितम् उत्कर्षकरणं त्वरावन्तम् मामिति संबन्धः यद्वा त्वरितं यथा भवति तथा अनुमानय अनुमतिं कारय ॥ २४ ॥

गो० टी०—राघवस्य वचः श्रुत्वेत्यादिश्लोकचतुष्टयमेकं एकम् । प्रतिनिवर्तते पलायते । काञ्चनचित्राङ्गम् काञ्चनमयचित्रावयवम् । इतरत्र स्पष्टम् । परिक्षिप्तं व्याप्तम् रजतप्रभम् रजतवत्तेन अत्र विशदत्वमुच्यते । पताकाभिः केवलध्वजैः अत्र भूमिष्ठैः हर्म्यैः अवान्तरराजगृहैः । हेमपद्मानि लम्बमानानि तैर्विभूषितम् । प्रकीर्णं व्याप्तम । मुक्तामणिगवाक्षितं मुक्तामणिनिर्मितगवाक्षयुक्तम् । घण्टाजालैः परिक्षिप्तम चतुर्षु पार्श्वेषु किङ्किणीजालयुक्तम, कोणेषु घण्टाजालयुक्तम्, अत एव मधुरस्वनम् ॥ २६–२८ ॥

गो० टी०—यन्मेरित्यादिश्लोकत्रयमेकान्वयम । मुक्तारजतमयिभै. तद्भक्तिमद्भिरित्यर्थः । स्फाटिकचित्राङ्गैः स्फटिकमयविचित्रावयवैः । महाधनैः महामूल्यैः ॥ २९–३१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

---

१ राघवस्य वचः श्रुत्वा राक्षसेन्द्रो विभीषणः । तं विमानं समादाय तूर्णं प्रति निवर्तेति गो. पा.। २ बहुभिरिति गो. पा.। ३ इदं पद्यं गो. पु. न दृश्यते।

द्वाविंशत्यधिकशततमः सर्गः ।

भो राघव विमानमानीतमन्यत्किं करवाणीति विभीषणेनानुयुक्तो दाशरथिर्धनरत्नप्रदानेनेमे कृतकृत्याः कपयो पूज्यन्तामित्यादिश्य तेन तथा कारयित्वा च सजानकीलक्ष्मणः स्वयं विमानमारुह्य यदा निष्क्रान्तस्तदा सर्वेषां स्वेन सह जिगमिषां विज्ञाय तुष्टस्तैरपि तदारोह्य वैहायसपथेन प्रस्थितः ।

उपस्थितं तु तं कृत्वा पुष्पकं पुष्पभूषितम् । अविदूरे स्थितो राममित्युवाच विभीषणः ॥ १ ॥
स तु बद्धाञ्जलिपुटो[1] विनीतो राक्षसेश्वरः । अब्रवीत्त्वरयोपेतः किं करोमीति राघवम् ॥ २ ॥
तमब्रवीन्महातेजा लक्ष्मणस्यापशृण्वतः । विमृश्य राघवो वाक्यमिदं स्नेहपुरस्कृतम् ॥ ३ ॥
कृतप्रयत्नकर्माणः सर्व एव वनौकसः । रत्नैरर्थैश्च विविधैः संपूज्यन्तां[2] विभीषण ॥ ४ ॥
सहायाभिस्त्वयेयं लङ्का निर्जिता राक्षसेश्वर । हृष्टैः प्राणभयं त्यक्त्वा सङ्ग्रामेष्वनिवर्तिभिः ॥ ५ ॥
त इमे कृतकर्माणः सर्व एव वनौकसः । धनरत्नप्रदानैश्च कर्मैषां सफलं कुरु ॥ ६ ॥
एवं संमानिताश्चैते नन्द्यमाना यथा त्वया । भविष्यन्ति कृतज्ञेन निर्वृता हरियूथपाः ॥ ७ ॥
त्यागिनं संग्रहीतारं सानुक्रोशं जितेन्द्रियम् । सर्वे त्वामभिगच्छन्ति ततः संबोधयामि[3] ते ॥ ८ ॥

१] ति० टी०–अविदूरे स्थितत्वादिविशेषणो विभीषणः पुष्पकमुपस्थितमासन्नं कृत्वा तं राममित्युवाच ॥ १ ॥

रा० टी०–विभीषणकर्तृकपुष्पकप्रापणानन्तरकालिकं वृत्तान्तमाह—उपस्थितमित्यादिभिः । विभीषणः पुष्पेभूषितं पुष्पकमुपस्थितं कृत्वा राममित्युवाच ॥ १ ॥

गो० टी०–अथ वानरसेनासम्माननम्–उपस्थितमित्यादि । तं दृष्ट्वा दर्शयित्वा । तत्कृत्वेति वा पाठः । प्रत्युवाच विमानमागतमिति शेषः । स त्विति द्वितीयश्लोकसंग्रहो वायं श्लोकः ॥ १ ॥

२] ति० टी०–कथमुवाचेत्यतः—अब्रवीदिति ॥ २ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—स इति । त्वरयोपेतो विभीषणः किं करोमीति राघवमब्रवीत् ॥ २ ॥

गो० टी०–स त्विति । त्वरयोपेतः आदरोपेत इत्यर्थः । किं करोमीति । इतः परं किं करवाणीत्यर्थः ॥ २ ॥

३] ति० टी०–तं किं करोमीत्युक्तवन्तम् । उपशृण्वतो लक्ष्मणस्य । अयं इति शेषः ॥ ३ ॥

रा० टी०–तमिति । राघवो विमृश्य विचार्य स्नेहपुरस्कृतमिदं वाक्यमब्रवीत् ॥ ३ ॥

गो० टी०–तमिति । लक्ष्मणस्यापशृण्वतः लक्ष्मणसमक्षमित्यर्थः ॥ ३ ॥

४] ति० टी०–कृतं प्रयत्नेन कर्म पुष्टकर्म यैस्ते । अर्थैर्विचित्रान्नपानवस्त्रादिभिः ॥ ४ ॥

रा० टी०–तदेव प्रकारमाह—कृतेति । कृतानि प्रयत्नेन अत्युद्योगेन कर्माणि व्यापारा यैः ते वनौकसः रत्नैरर्थैस्तदितरद्रव्यादिभिश्च संपूज्यन्ताम् ॥ ४ ॥

गो० टी०–कृतेति । प्रयत्नकर्म प्रयत्नसाध्यं कर्मेत्यर्थः । अर्थैः प्रयोजनैः वस्त्रादिभिरित्यर्थः ॥ ४ ॥

५–६] ति० टी०–अभीभिः सह लङ्का निर्जितेत्यनेन तव लङ्काप्राप्तिर्वानरपराक्रमादेवेत्युक्तम् । प्राणभयं त्यक्त्वा हृष्टैर्युद्धोत्साहवद्भिः ॥ ५ ॥ ६ ॥

रा० टी०–तदेव भंग्यंतरेणाह—सहेति । प्राणभयं त्यक्त्वा संग्रामेष्वनिवर्त्तिभिर्यैरमीभिस्सह त्वया लंका निर्जितास्ते वानरास्माभि पूज्यन्ताम् अत एव धनरत्नप्रदानैः एषां कर्म सफलं कुरु श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–सहेति । अजिता पूर्वं सुरादिभिरप्यजिता । तव लङ्काराज्यप्राप्तिरेव तदधीनेत्यर्थः । हृष्टैः मयि प्रीतिमद्भिरित्यर्थः ॥ ५ ॥ ६ ॥

गो० टी०–त इम इत्यर्धेन भङ्ग्यन्तरेणाह–धनरत्नेति ॥ ७ ॥

७] ति० टी०–यथा यथान्यायं त्वया कृतज्ञेन नन्द्यमाना निर्वृताः सुखिनो भविष्यन्ति ॥ ७ ॥

रा० टी०–एवमिति । त्वया एवं सम्मानिताः वनौकसः निर्वृत्ताः प्रामानन्दा भविष्यन्ति ॥ ७ ॥

गो० टी०–एवमिति । निर्वृताः सुखिताः । निर्वृता इति पाठे निष्पन्नाः परिपूर्णा इति यावत् ॥ ८ ॥

८] ति० टी०–त्वां तत्सत्कारसमर्थम् । तेषां च सत्कारप्रियत्वं ज्ञात्वैव त्वां तत्सत्कारे नियुङ्क्त इत्याह—त्यागिनमिति । उचितविषय इति शेषः । संग्रहीतारं यथाकालं यथान्यायम् । रत्नादेरिति शेषः ॥ ८ ॥

रा० टी०–इमे अवश्यं सत्करणीया इति बोधयन्नाह—त्यागिनमिति द्वाभ्याम् त्यागिनं देशकालादिप्राप्तौ दातारं संग्रहीतारं प्रजादिभ्यो यथान्यायं ग्रहीतारं सानुक्रोशं दयावन्तं त्वां सर्वे वानराः अभिगच्छन्ति ततः संबोधयामि सम्बोध्य दापयामि ॥ ८ ॥

१ बद्धाञ्जलिः प्रह इति गो. रा. पा. । २ पभिरजितेति गो. पा. । ३ पूज्यन्तां सर्ववानरा इति गो. पूज्यन्तां साधु वानरा इति रा. पा. ।

हीनं रतिगुणैः सर्वैरभिहन्तारमाहवे । सेना त्यजति संविग्ना नृपतिं तं नरेश्वर ॥ ९ ॥
एवमुक्तस्तु रामेण वानरांस्तान्विभीषणः । रत्नार्थसंविभागेन सर्वानेवाभ्यपूजयत् ॥ १० ॥
ततस्तान्पूजितान्दृष्ट्वा रत्नार्थैर्हरियूथपान् । आरुरोह तदा रामस्तद्विमानमनुत्तमम् ॥ ११ ॥
अङ्केनादाय वैदेहीं लज्जमानां मनस्विनीम् । लक्ष्मणेन सह भ्रात्रा विक्रान्तेन धनुष्मता ॥ १२ ॥
अब्रवीत्स विमानस्थः पूजयन्सर्ववानरान् । सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणम् ॥ १३ ॥
मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः । अनुज्ञाता मया सर्वे यथेष्टं प्रतिगच्छत ॥ १४ ॥
यत्तु कार्यं वयस्येन स्निग्धेन च हितेन च । कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा ॥ १५ ॥
किष्किन्धां प्रति यात्वाशु स्वसैन्येनाभिसंवृतः । स्वराज्ये वस लङ्कायां मया दत्ते विभीषण ॥
न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः ॥ १६ ॥
अयोध्यां प्रति यास्यामि राजधानीं पितुर्मम । अभ्यनुज्ञातुमिच्छामि सर्वानामन्त्रयामि वः ॥ १७ ॥
एवमुक्तास्तु रामेण हरीन्द्रा हरयस्तथा । ऊचुः प्राञ्जलयः सर्वे राक्षसश्च विभीषणः ॥ १८ ॥

गो० टी०—अर्थत्ययेन खेदो मा भूदित्याह—त्यागेन मिति । संग्रहीतारं धनप्रदानेन मित्रसंग्रहकारिणमित्यर्थः । संत्यागार्थं त्यागित्वमुक्त्वा दयया त्यागित्वमाह—सानुक्रोशमिति । यशस्विनं त्यागकृतयशोयुक्तम् । संत्यजामि न तु त्यजामीत्यर्थः ॥ ९ ॥

९] ति० टी०—सर्वं रतिगुणैर्दानमानादिलक्षणसेनारमण गुणैर्हीनं क्रूरत्वेनाहवेऽभिहन्तारं घातयन्तं नृपतिं संविग्ना सेना हे नरेश्वर, त्यजति त्यजत्येव । अतो दानादिर्नैते सत्कार्यं एवेति भावः ॥ ९ ॥

रा० टी०—अदाने दोषमाह—हीनमिति । रतिगुणैः रतिरूपगुणोत्पादकैस्सर्वैः दानमानादिभिः हीनं रहितमभिहन्तारमभिचिन्तवचनादिभिः ताडयन्तं नृपतिम् सेना आहवे त्यजति ॥९॥

१०-१४] ति० टी०—रत्नार्थैः । रत्नरूपैरर्थैश्च संविभागेन यथार्हमंशकल्पनयेत्यर्थः । सर्ववानरपूजार्थं हिरण्मयं वासः । भारतेऽपि—'ततस्तीर्त्वा समुद्रस्य यत्र शिष्ये स पार्थिवः । तत्रैवोवास यामिन्या सहितस्तत्र वानरैः । अर्थैश्चान्यानरान्दृष्ट्वा स संमान्यानिपूज्य च । विससर्जयामास तदा रत्नैः संतोष्य सर्वथा ॥' इत्यनेन ॥ १०-१४ ॥

रा० टी०—एवमिति । रामेण एवमुक्तो विभीषणः रत्नार्थयोः संविभागेन यथोचितसंकलनया सर्वान् अभ्यपूजयत् ॥ १० ॥

रा० टी०—तत इति । रामः हरियूथपान् पूजितान् दृष्ट्वा लज्जमानां स्वाभाविकमहाकुलोचितलज्जाविशिष्टां वैदेहीमङ्केनादाय विमानमारुरोह श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

रा० टी०—अब्रवीदिति । विमानस्थः काकुत्स्थः सविभीषणं सुग्रीवं सर्ववानरांश्च पूजयन्सन् अब्रवीत् ॥ १३ ॥

रा० टी०—तदाकारमाह—मित्रेत्यादिभिः । मया अनुज्ञातास्सर्वे यूयं यथेष्टं प्रतिगच्छत ॥ १४ ॥

गो० टी०—सैनिकसम्मानाकरणे दोषमाह—हीनमिति । नृपतिं स्वामिनमपि रतिगुणैः प्रीतिकरैरौदार्यादिगुणैः हीनम् अभिहन्तारं हिंसनशीलम् प्रसादं विना क्रौर्यैकनिरतमिति यावत् । तं नरेश्वरं सेन्याः संविग्नाः आहवे त्यजन्तीति योजना ॥ १० ॥

गो० टी०—एवमिति । संविभागेन यथार्हमंशकल्पनया । समतया प्रदाने अधिकानां क्रोधप्रसङ्गादिति भावः ॥ ११ ॥

गो० टी०—तत इत्यादिश्लोकद्वयमेकान्वयम् ॥ ततः पूजानन्तरं, ततः पूजादर्शनादेव हेतोरिति ततःशब्दद्वययोजना । लज्जमानां सदम्यङ्कारोहणाय *लज्जन्तीम् । रामेणाङ्कारोपणं च श्रीसहायरहितत्वात् । धनुष्मता रामधनुर्धारिणा ॥१२॥१३॥

गो० टी०—अब्रवीदित्यत्र संग्रहेणोक्तं विवृणोति—मित्रेत्यादिना । वानरान् प्रत्याह—मित्रेति ॥ १४ ॥

१५] ति० टी०—अथर्मभीरुणेति छेदः ॥ १५ ॥

रा० टी०—यदिति । वयस्येन सख्या यत् कार्यं तत्सर्वं भवता कृतम् ॥ १५ ॥

गो० टी०—सुग्रीवं प्रत्याह—यत्त्वित्यादिना । सहृदा शोभनहृदयेन । वाशब्द एवकारार्थः । अधर्मभीरुणेति छेदः ॥ १५ ॥ १६ ॥

१६-१८] ति० टी०—सेन्द्रा दिवौकसोऽपि न त्वां धर्षयितुं शक्ताः । सत्यप्रभावादिति भावः न तेभ्य एव किल राक्षसानां भयम् ॥ १६-१८ ॥

रा० टी०—किष्किन्धामिति । स्वसैन्येनाभिसंवृतस्सुग्रीवस्त्वं किष्किन्धां प्रति याहि हे विभीषण त्वं स्वराज्ये लंकायां वस त्वां धर्षयितुं दिवौकसोऽपि न शक्ताः सार्द्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०—अयोध्यामिति । अहमयोध्यां प्रति यास्यामि अतः अभ्यनुज्ञातुं भवत्सम्मतिं ग्रहीतुमिच्छामि अत एव वो युष्मान् आमन्त्रयामि बोधयामि ॥ १७ ॥

रा० टी०—एवमिति । एवमुक्ताः वानराः विभीषणश्च ऊचुः ॥ १८ ॥

---

१ यशस्विनीमिति गो. पा. । * अत्र शतृप्रत्ययो न युक्त इति भाति ।

अयोध्यां गन्तुमिच्छामः सर्वान्नयतु नो भवान । मैथुक्ता विचरिष्यामो वनान्युपवनानि च ॥ १९ ॥
दृष्ट्वा त्वामभिषेकार्हं कौसल्यामभिवाद्य च । अचिरादागमिष्यामः स्वगृहान्नृपसत्तम ॥ २० ॥
एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः । अब्रवीद्वानरान्रामः ससुग्रीवविभीषणान् ॥ २१ ॥
प्रियात्प्रियतरं लब्धं यदहं ससुहृज्जनः । सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥ २२ ॥
क्षिप्रमारोह सुग्रीव विमानं सह वानरैः । त्वमप्यारोह सामात्यो राक्षसेन्द्र विभीषण ॥ २३ ॥
ततः स पुष्पकं दिव्यं सुग्रीवः सह वानरैः । आरुरोह मुदा युक्तः सामात्यश्च विभीषणः ॥ २४ ॥
तेष्वारूढेषु सर्वेषु कौबेरं परमासनम् । राघवेणाभ्यनुज्ञातमुत्पपात विहायसम् ॥ २५ ॥
खगतेन विमानेन हंसयुक्तेन भास्वता । प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत् ॥ २६ ॥
ते सर्वे वानरर्क्षाश्च राक्षसाश्च महाबलाः । यथासुखमसंबाधं दिव्ये तस्मिन्नुपाविशन ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वाविंशत्यधिकशततमः सर्गः ॥ १२२ ॥

गो० टी०–विभीषणं प्रत्याह–स्वेति ॥ स्वराज्ये वस न तु परकीये रावणवदाक्रमितव्यम् । अतो जनस्थानरक्षिणः समानेतव्या इति भावः ॥ १८–२० ॥

गो० टी०–अयोध्यामिति । उद्युक्ताः सावधानाः । जनपदपीडामकुर्वन्त इत्यर्थः ॥ २१–२३ ॥

१९] ति० टी०–सुयुक्ता दर्पयुक्ताः ॥ १९ ॥

रा० टी०–तदाकारमाह–अयोध्यामिति । द्वाभ्यामयोध्यां गन्तुमिच्छामः अतो भवान् नयतु गमने प्रयोजनमाह मुदा हर्षेण युक्ता वयं वनान्युपवनानि च विचरिष्यामः ॥१९॥

२०–२१] ति० टी०–अभिषेकार्हं त्वां दृष्ट्वा तवैव सर्वेषामस्माकं मातरं कौसल्यामभिवाद्य च ॥ २० ॥ २१ ॥

रा० टी०–दृष्ट्वेति । अभिषेकार्हं त्वां दृष्ट्वा स्वगृहान् आगमिष्यामः ॥ २० ॥

रा० टी०–एवमिति । एवमुक्तो राघवोऽब्रवीत् ॥२१॥

२२–२४] ति० टी०–प्रियात्प्रियतरम् । प्रथमतः कृतकृत्यस्यायोध्याप्रवेशनमेव प्रियम्, तत्रापि सुहृद्भिर्भवद्भिः सहितो भरतादिभिः सह प्रीतिं लप्स्ये । राज्याभिषेकसंतोषं लप्स्ये इत्यर्थः ॥ २२–२४ ॥

रा० टी०–तदाकारमाह—प्रियादिति द्वाभ्याम् यतः ससुहृज्जनोऽहं गमिष्यामीति शेषः अतः प्रियात्प्रियतरमतिप्रियमित्यर्थः लब्धं तत्र हेतुः भवद्भिः सहितः पुरीं गतोऽहं प्रीतिं भवत्प्रमुखतां लप्स्ये ॥ २२ ॥

रा० टी०–क्षिप्रमिति । हे सुग्रीव हे विभीषण आरोह ॥ २३ ॥

रा० टी०–तत इति । सेनया सह सामात्यः सुग्रीवो विभीषणश्च पुष्पकमारुरोह ॥ २४ ॥

गो० टी०–प्रियात्प्रियतरमिति । सीतालाभः प्रियं, भरतदर्शनं प्रियात्प्रियम्, भवद्भिः सह पुरप्रवेशः प्रियात्प्रियतरमित्यर्थः ॥ २४ ॥ २५ ॥

गो० टी०–तत इति । शीघ्रं शीघ्रगमिति विमानविशेषणम् । त्वरन्निति सुग्रीवविशेषणात् ॥ २५ ॥

२५] ति० टी०–परमासनमुत्तमयानम् ॥ २५ ॥

रा० टी०–तेष्विति । कौबेरं परमासनं विमानं राघवेणाभ्यनुज्ञातं सत् उत्पपात ॥ २५ ॥

गो० टी०–तेष्विति । आसनं वाहनम् ॥ २७ ॥

२६] ति० टी०–हंसयुक्तेनेति । हंसशब्देन वाहकत्वाकारेण निर्मितहंसप्रतिमा उच्यत इति व्याख्यातारः । प्रहृष्टो हृष्टरोमा । प्रतीतः प्रहृष्टचित्तः ॥ २६ ॥

रा० टी०–खेति । हंसयुक्तेन विमानेनोपलक्षितो रामः कुबेरवद्बभौ ॥ २६ ॥

गो० टी०–खयाविति । हंसयुक्तेन प्रतिमारूपहंसयुक्तेन । प्रतीतः स्वाचितः ॥ २८ ॥

२७] ति० टी०–असंबाधमित्यनेन विमानस्य वैपुल्यमुक्तम् ॥ २७ ॥

इति श्रीरामभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे द्वाविंशत्यधिकशततमः सर्गः ॥ १२२ ॥

रा० टी०–ते इति । ते वानरादयः असंबाधं यथा भवति तथा तस्मिन्पुष्पके उपाविशन् ॥ २७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुर्विंशत्यधिकशततमः सर्गः ॥१२४॥

गो० टी०–ते सर्व इति । यथासुखमसंबाधमिति पदद्वयेन दिव्यस्य पुष्पकस्य अपेक्षितावकाशप्रदत्वं गम्यते ॥२९॥

इति श्रीगो० श्रीरामाय० रत्नकिरीटाख्याने युद्ध० पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

१ उद्युक्ता इति गो. पा.। २ अध्यारोहत्वरन् शीघ्रमिति गो. पा.। ३ ययौ तेनेति. गो. पा. ४ वानरा हृष्टा इति गो. पा.।

त्रयोविंशत्यधिकशततमः सर्गः ।

विमानमारुह्य व्योमाध्वना प्रस्थितो जानकीजानिरियं लङ्केत्र रोमहर्षणो रणोऽत्र कुम्भकर्णोऽत्र तदग्रजो हत इत्यादि तत्तत्स्थलानि सीतां दर्शयन्क्रमेण किष्किंधां प्राप्य कपियोषितोऽपि मामनुयन्तीति वैदेह्यभिलषितमनुमन्यमानस्ता अपि पुष्पकमारोप्य भूयः प्रिये कृष्यमूकोऽयं यत्र सुग्रीवेण संगतोऽहमिति क्रमेण भरतागमस्थलादीन्यपि प्रदर्यान्तेऽयोध्यां प्रादर्शयत् ।

अनुज्ञातं तु रामेण तद्विमानमनुत्तमम् । हंसयुक्तं महानादमुत्पपात विहायसम् ॥ १ ॥
पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः । अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम् ॥ २ ॥
कैलासशिखराकारे त्रिकूटशिखरे स्थिताम् । लङ्कामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा ॥ ३ ॥
एतदायोधनं पश्य मांसशोणितकर्दमम् । हरीणां राक्षसानां च सीते विशसनं महत् ॥ ४ ॥
एष दत्तवरः शेते प्रमाथी राक्षसेश्वरः । तव हेतोर्विशालाक्षि निहतो रावणो मया ॥ ५ ॥
कुम्भकर्णोऽत्र निहतः प्रहस्तश्च निशाचरः । धूम्राक्षश्चात्र निहतो वानरेण हनूमता ॥ ६ ॥
विद्युन्माली हतश्चात्र सुषेणेन महात्मना । लक्ष्मणेनेन्द्रजिच्चात्र रावणिर्निहतो रणे ॥ ७ ॥
अङ्गदेनात्र निहतो विकटो नाम राक्षसः । विरूपाक्षश्च दुर्धर्षो महापार्श्वमहोदरौ ॥ ८ ॥
अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः । त्रिशिरोऽतिकायश्च देवान्तकनरान्तकौ ॥ ९ ॥
युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावुभौ । निकुम्भश्चैव कुम्भश्च कुम्भकर्णात्मजौ बली ॥ १० ॥
वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः । मकराक्षश्च दुर्धर्षो मया युधि निपातितः ॥ ११ ॥
अकम्पनश्च निहतः शोणिताक्षश्च वीर्यवान् । यूपाक्षश्च प्रजङ्घश्च निहतौ तु महाहवे ॥ १२ ॥
विद्युज्जिह्वोऽत्र निहतो राक्षसो भीमदर्शनः । यज्ञशत्रुश्च निहतः सुमाली च महाबलः ॥ १३ ॥
सूर्यशत्रुश्च निहतो ब्रह्मशत्रुस्तथापरः । अत्र मन्दोदरी नाम भार्या ते पर्यदेवयत् ॥ १४ ॥

१] ति० टी०–अनुज्ञातमिति ॥ १ ॥

रा० टी०–विमानारोहणानन्तरकार्यिकं वृत्तान्तमाह–अनुज्ञातमित्यादिभिः । रामेणानुज्ञातं विमानं विहायसमाकाशमुत्पपात तन्मार्गेण जगामेत्यर्थः ॥ १ ॥

गो० टी०–अथ विलासेन सीतायै तत्तत्प्रदर्शनम्–अनुज्ञातं त्वित्यादि ॥ १ ॥

२–३] ति० टी०–पातयित्वा संचार्य ॥ २ ॥ ३ ॥

रा० टी०–पातयित्वेति । रामः चक्षुस्सर्वत्र पातयित्वा प्रसार्य मैथिलीमब्रवीत् ॥ २ ॥

रा० टी०–तदाकारमाह–कैलासेत्यादिभिः । त्रिकूटशिखरस्थितां लंकामीक्षस्व ॥ ३ ॥

गो० टी०–पातयित्वेति । मैथिलीं रामपत्नीलालनीयत्वोक्तिः ॥ २–३ ॥

४] ति० टी०–आयोधनं युद्धभूमिम् । महद्विशसनं वध साधनभूतम् ॥ ४ ॥

रा० टी०–एतदिति । विशसनं वधसाधकमस्त्र एव मांसशोणितायेव कर्दमो यस्मिन् तदायोधनं युद्धस्थानं पश्य ॥४॥

गो० टी०–एतदिति । आयोधनं युद्धभूमिम् । विशस्यन्तेऽस्मिन्निति विशसनम् । अधिकरणे ल्युट् ॥ ४ ॥

५–७] ति० टी०–प्रमाथी प्रमथनशीलः । एष इति तदाङ्गुलिनिर्देशेनम् । अथेदमपि सर्वत्र तत्तद्युद्धभूमिप्रदर्शनमेव । अन्यत्रान्यत्राद्विमानस्थ सर्वयुद्धभूमिप्रत्यक्षं सुगमम् ॥ ५ ॥ ७ ॥

रा० टी०–एष इति । मया निहतो रावणः शेते ॥ ५ ॥

गो० टी० अत्रेति । दत्तवरः ब्रह्मणा दत्तवरः प्रमाथी हिंसकः, शेते । अभयत्वं प्रणेत्यर्थः ॥ ५ ॥

रा० टी०–कुम्भकर्ण इति । धूम्राक्षश्च हनुमता निहतः६

गो० टी०–कुम्भकर्ण इति । प्रहस्तमित्यत्र वीप्सेत्यध्याहार्यम् ॥ ६ ॥

रा० टी०–विद्युन्मालीति । लक्ष्मणेन इन्द्रजित् निहतः७

गो० टी०–विद्युन्मालीति । पूर्वमनुक्तमपि अर्थानुवादात् ग्राह्यम् । एवं विकट इत्यत्रापि ॥ ७ ॥ ८–१० ॥

८–९] ति० टी०–अङ्गदेन विकटो हत इत्यनुवादात्तदपि ज्ञातमिति बोध्यम् ॥ ८ ॥ ९ ॥

रा० टी०–अङ्गदेनेति । विकटः अङ्गदेन निहतः ॥ ८ ॥

रा० टी०–अकम्पन इति । अकम्पनो निहतः त्रिशिरःप्रभृतयो अन्ये च निहताः ॥ ९ ॥

१०] ति० टी०–बली बलिनौ ॥ १० ॥

रा० टी०–युद्धोन्मत्त इति ॥ १० ॥

११–१४] ति० टी०–दंष्ट्रनामा कश्चिदनुवादात् ११॥१४॥

रा० टी०–वज्रदंष्ट्र इति । मकराक्षो मया निपातितः११

१ उत्पपात महामेघः श्वसनेनोद्धतो यथेति गो. पा. । २ अत्रेति गो. पा. । ३ दुर्धर्ष इति गो. पा. । ४ इत आरभ्य श्लोकपञ्चकं गो. पु. न दृश्यते ।

सपत्नीनां सहस्रेण साग्रेण परिवारिता । एतत्तु दृश्यते तीर्थं समुद्रस्य वरानने ॥ १५ ॥
यत्र सागरमुत्तीर्य तां रात्रिमुषिता वयम् । एष सेतुर्मया बद्धः सागरे लवणार्णवे ॥ १६ ॥
तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः । पश्य सागरमक्षोभ्यं वैदेहि वरुणालयम् ॥ १७ ॥
अपारमिव गर्जन्तं शङ्खशुक्तिसमाकुलम् । हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि ॥ १८ ॥
विश्रमार्थं हनुमतो भित्त्वा सागरमुत्थितम् । एतत्कुक्षौ समुद्रस्य स्कन्धावारनिवेशनम् ॥ १९ ॥
अत्रैष पूर्वं महादेवः प्रसादमकरोद्विभुः । एतत्तु दृश्यते तीर्थं सागरस्य महात्मनः ॥ २० ॥

रा० टी०–अकम्पन इति । अयमकम्पनोन्य इति न पौनरुक्त्यम् ॥ १२ ॥

रा० टी०–विद्युज्जिह्व इति ॥ १३ ॥

रा० टी०–सूर्येति । अर्धं प्रथक्-अर्चतीति । साग्रेण किञ्चिदधिकेन सपत्नीनां सहस्रेण परिवारिता मन्दोदरी तं रावणं पर्यदेवयत् व्यलपत् ॥ १४ ॥

१५] ति० टी०–साग्रेण सहस्रादप्यधिकयुक्तेन । तीर्थमवतारः ॥ १५ ॥

रा० टी०–एतदिति । यत्र सागरमुत्तीर्य तां रात्रिं वयमुषिताः तदेतत् समुद्रस्य तीर्थं वटो दृश्यते ॥ १६ ॥

गो० टी०–एतत्त्विति । तीर्थम् उत्तरणस्थानम् । यत्र तीर्थे, तां रात्रिं सागरतरणरात्रिम् ॥ १६ ॥

१६] ति० टी०–यत्रावतारे तां रात्रिं समुद्रोत्तरणदिवसरात्रिम् ॥ १६ ॥

रा० टी०–एष इति । मया बद्धः एष सेतुः नलसेतुर्भवति नलेनैव कारित इत्यर्थः तद्विशेषणं सुदुष्करः नलभिन्नेन कर्तुमशक्यः ॥ १६ ॥

गो० टी०–एष इति । सागरे सागरस्थानिते । सलिलेति क्षीरोदाद्यिव्यावृत्तिः । एष सेतुः, नलसेतुः नलबद्धः । " षिञ् बन्धने " इति धातुः । एतेन नलसेतुः सेतुरित्युक्त्या पूर्वकल्पकृतसेत्वन्तरं व्यावर्त्यते इति प्रत्युक्तम् । पूर्वमेव सेतुसत्त्वे पुनः सेतुकरणवैय्यर्थ्यात् ॥ १२ ॥

१७] ति० टी०–नलसेतुर्मत्प्रियुक्तनलकृतः सेतुर्नलसेतुः । सुदुष्करः । तदतिरिक्तेनेति भावः ॥ अथ वरुणालयत्वादिविशेषणं सागरं पश्य ॥ ॥ १७ ॥

रा० टी०–पश्येति । अभिगर्जन्तमपारं सागरं पश्य॥१७॥

गो० टी०–पश्येति । अपारं मध्ये द्वीपभूतपाररहितम् ॥ १३ ॥

१८] ति० टी०–अथ सागरमध्यप्रदेशागमनकाले मैनाकं दर्शयति—हिरण्यनाभमिति । काञ्चनं काञ्चनप्रचुरं सदृणं च ॥ १८ ॥

रा० टी०–हिरण्येति । हनुमतो विश्रमार्थं सागरं भित्त्वोत्थितं हिरण्यनाभं शैलेन्द्रं समुद्रस्य कुक्षौ पश्य स्कंधावारस्य सेनासमूहस्य निवेशनं निवासस्थानं च पश्य सार्धश्लोक एकान्वयी ॥ १८ ॥ १९ ॥

गो० टी०–हिरण्येति । हिरण्यनाभं मैनाकम् ॥ १४ ॥

१९] ति० टी०–एतन्मैनाकपर्वतस्वरूपम् । समुद्रस्य कुक्षौ वर्तते इति शेषः । एतदित्यावर्तते । एतत्स्कन्धावारनिवेशनं सेनानिवेशनम् । समुद्रोत्तरतीरस्थमिति शेषः ॥१९॥

गो० टी०–एतदित्यर्धम् । कुक्षौ मध्ये । सेतुपरीति शेषः । स्कन्धावारनिवेशनं स्कन्धावारनिवेशनरूपस्थानम् । स्कन्धावारः शिविरम् ॥ १९ ॥

गो० टी०–एतस्मिन्नादि सार्धश्लोकमेकं वाक्यम् ॥ पूजितं पूजितुमर्हम् । पूर्वं सेतोर्दक्षिणकोटिरुक्ता । अत्रोत्तरकोटिरिति ज्ञेयम् । अनुगृह्णाति—एतदिति । पवित्रं पावनम् । महापातकनाशनं च । भविष्यतीति शेषः ॥ १६ ॥

२०] ति० टी०–अत्र पूर्वमिति । अत्र सेतुमूले । पूर्वं सेतुबन्धनात्पूर्वं विभुर्महादेवो मम रामस्य प्रसादमकरोन्मत्स्थापितत्वेनात्र स्थितोऽभूत् । सेतोर्निर्विघ्नतासिद्धये समुद्रप्रसादानन्तरं शिवस्थापनं रामेण कृतमिति गम्यते । अत्र स्थले महात्मनः सागरस्य तीर्थं सेतुनिर्माणमूलप्रदेशत्वात्सेतुबन्ध इति ख्यातं भविष्यतीति शेषः । तथा त्रैलोक्येन पूजितं च भविष्यति ॥ २० ॥

रा० टी०–अत्रेति । अत्र अस्मिन् सेतुमूलभूतदेशे महादेवः महाशम्भुः प्रसादमतिप्रीतिमकरोत् एतेन नीलादिवत् महादेवोऽपि सेतुबंधनसाहाय्यं कृतवान् इति सूचितम् तेन शिवस्य रामे अतिप्रीतिस्सूचिता अत एव स्वसाहाय्यमुचनार्थमिदानीमपि तत्र तस्य स्थितिः प्रसिद्धा यद्वा अत्र अस्मिन् देशे महादेवः प्रसादं प्रहर्षणं सादं प्राप्ति स्वनित्यस्थितिमित्यर्थः अकरोत् सेतुरक्षणार्थं ममाज्ञया अत्रैव स्थित इत्यर्थः न च प्रसन्नतादौ रूढस्य प्रसादशब्दस्य कथमुक्तोर्थ इति वाक्यम् योगरूढिस्वीकारे बाधकाभावात् अत एव यौगिकार्थमादाय पङ्कजशब्दादीनां शुक्तिकादौ प्रवृत्तिः प्रदर्शिता नैयायिकादिभिः अत एव पुनर्भूर्यौगिकः पुंसीत्यादि ग्रंथाः संगच्छन्ते रामकर्तृकशिवस्थापनं पुराणेषु विस्तरतो निरूपितम् अत एव शम्भोः प्रीत्यै यो मयाकारि धर्मः स्वे स्वे काले माननीयो भवद्भिः नानावर्णान् भाविनो भूमिपालान् भूयो भूयो याचते रामचन्द्रः इति रामकृतः ताम्रपत्रलिखितः स्वतोविदीर्णदेवालयैकदेशान्निसृतः इदानींतनसार्वभौमेन वाराणसीं प्रेषितः श्लोकोपि संगच्छते ननु पूर्वमनुक्तेरिदं न युक्त-

१ निषेवितमिति गो. पा. । २ इदमर्धमेतत्तु दृश्यत इत्यादिसार्धश्लोकानन्तरं गो. पु. दृश्यते ।

सेतुबन्ध इति ख्यातं त्रैलोक्येन च पूजितम् । एतत्पवित्रं परमं महापातकनाशनम् ॥ २१ ॥
अत्र राक्षसराजोऽयमाजगाम विभीषणः । एषा सा दृश्यते सीते किष्किन्धा चित्रकानना ॥ २२ ॥
सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः । अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम् २३ ॥

मिति तु न भ्रमितव्यम् । पूर्वमुक्तत्वेऽपि अनयैवोक्त्या पूर्वोक्त्यभावस्यार्किंचित्करत्वेन युक्तत्वे बाधकाभावात् अत एव नयुक्तमारीचवृत्तादीनां पूर्वमुक्तत्वेऽप्युत्तरत्रोक्तनायुक्तम् यद्वा अत्र स्थितस्सन् महादेवः प्रसादं संशयास्पदीभूतरावणसाहाय्यगमननिरोधमकरोत् तथाच मेदिनीमूले प्रत्यन्तशैले च प्रसादस्त्ववरोधन इति एतेन पूर्वं शंभुप्रसादानुक्त्यायमर्थो न युक्त इत्यपास्तम् । आपाततो रमणीया इति दिक् अहं प्रथक् एतदिति । सेतुबन्ध इति ख्यातं त्रैलोक्येन पूजितम् महात्मनस्सागरस्य समीपे एतत् शिवात्मकं तीर्थं दृश्यते सेतुबन्धशब्दार्थस्तु सेतौ सेतुमूलदेशे बध्नाति संबन्धं प्राप्नोतीति ॥ २० ॥

गो० टी०–एवं लङ्कामारभ्य सेतुबन्धपर्यन्तमुक्त्वा ततः उत्तरं दर्शयनस्थानं निर्दिशति—अत्र पूर्वमिति । महादेव इति समुद्रराज उच्यते, औचित्यात् । प्रभुः समुद्रजलाधिष्ठाता । प्रसादमकरोत् । सागरं शोषयिष्यामीति कुपितस्य मे प्रसादं प्रसन्नत्वम् अकरोत् । प्रसादस्तु प्रसन्नतेत्यमरः । न त्वत्र रुद्रो महादेवः । तेन पूर्वं प्रसादकरणानुक्तेः । पूर्वोक्तानामेव बध्नातुवादः कृतः न चाङ्गदेन विकटनिरसनस्य पूर्वमुक्तत्वेऽपि यथानुवादान्तस्सिद्धिः, तथात्रापि भविष्यतीति वाच्यम् । तद्वदत्राविरोधाभावात् । उपलभ्यते हि विरोधः । तथाहि । तत्र प्रसादः किं सेतुनिर्माणकाले वा पुनरागमनकाले वा । नाद्यः । प्रसादकरणहेतुरावणवधादेरभावात्, पूर्वसिद्धसमुद्रप्रसादेनैवोपपत्तेश्च, महादेवसमाख्यायाः समुद्रप्रसादश्रुत्या वाधितुं युक्तत्वाच्च । न द्वितीयः । पूर्वशब्दविरोधात् । न च पूर्वमित्यस्य पूर्वकल्प इत्यर्थ इति वाच्यम् । आत्मानं मानुषं मन्य इति वदता सुग्रीवादिसन्निधौ स्वस्य विष्ण्ववतारत्वद्योतकपूर्ववृत्तोद्घाटनानौचित्यात् । पूर्वकल्पकृतसेतुसद्भावे पुनस्तन्निर्माणवैयर्थ्यात् किं च अत्रेतिपदस्य पूर्वश्लोकोक्तनलकारितसेतुपरामर्शित्वमेवोचितम् । न तु पूर्वकल्पकृतसेतुपरामर्शित्वम् । तस्य सद्भावेऽप्यन्तरितत्वसंभवात् । ननु पुराणान्तरानुसारात्तदर्थपरत्वं युक्तम् । तथा हि कूर्मपुराणे—सेतुमध्ये महादेवमीशानं कृत्तिवाससम् । स्थापयामास वै लिङ्गं पूजयामास रावणः ॥ तस्य हस्तो महादेवः पार्वत्या सह शङ्करः । प्रत्यक्षमेव भगवान् इत्यादि वरमुत्तमम् ॥ ये त्वया स्थापितं लिङ्गं द्रक्ष्यन्तीह द्विजाग्र्यः । महापातकसंयुक्तास्तेषां पापं विनश्यति ॥ अन्यानि च पापानि तीरे तत्र महोदधेः । दर्शनादेव लिङ्गस्य नाशमेष्यन्ति न संशयः ॥ यावत्स्थास्यन्ति तरवो यावदेव च मेदिनी । यावत्सेतुश्च तावच्च स्थास्याम्यत्र तिरोहितः ॥ ज्ञानं जपः श्राद्धं भविष्यत्यक्षयं ततः । स्मरणादेव लिङ्गस्य दिनपापं प्रणश्यति ॥ इत्युक्त्वा भगवान् वाचं परिष्वज्य च राघवम् । ससन्दी सगणो रुद्रस्तत्रैवान्तरधीयतेति ॥ पाद्मे पुराणेऽपि—रामः पुष्पकादवरुह्य महादेवं प्रतिष्ठापितवान् सोऽस्मै प्रसन्नोऽभूदित्युच्यते । एतादृशपुराणवचनानुसारेणायं श्लोको लिङ्गप्रतिष्ठां बोधयतीति । मैवम् उक्तदोषविस्तारात्, इतिहासो हि परिग्रहातिशयात्, ग्रन्थसौष्ठवाच्च, इतिहासपुराणं पञ्चममित्यादौ अधिकाक्षरत्वेऽपि पूर्वप्रयोगेणाभ्यर्हितत्वाच्च । पुराणेभ्यो गरीयानिति वेदः पाचेतसादामीदिति वेदमयश्लोकस्य चतुर्मुखवरप्रदानमूलतया च प्रबलतरः । तद्विरोधे तामसपुराणवचनानि न प्रमाणानि । किं च पुराणं सर्गप्रतिसर्गादिलक्षणयुक्तमिति नेतिहासस्य पुराणकथने तात्पर्यवत् । अथवा, अस्मिन्सर्गे लौकिकाः प्रायशो व्युत्पन्ना दृश्यन्ते इत्युद्वाग्विभूतिभिरुक्तम् । तथा वेदमयम् "अत्र मैण्डोदरीतिश्लोकानन्तरम् पठितव्यम् । तत्र च महादेवप्रसादः स्वपितृदर्शनमेव । अत एव भरतं प्रति हनुमत्प्रेषणावसरे वक्ष्यति महादेवप्रसादाच्च पित्रा मम समागममिति । पुराणान्तरं तु महात्म्यप्रतिपादनपरं बोध्यमिति संक्षेपः ॥ १७ ॥

२१] ति० टी०–एतत्पवित्रं दर्शनात्सर्वपापविशोधनं विशिष्य महापातकनाशनम् । 'सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति' इति स्मृतेः । कूर्मपुराणे रामचरिते त्वत्र स्थाने स्पष्टमेव लिङ्गस्थापनमुक्तम् । त्वत्स्थापितलिङ्गदर्शनेन ब्रह्महत्यादिपापक्षयो भविष्यतीति महादेववरदानं च स्पष्टमेवोक्तम् तत एवावधार्य पूर्वं महादेवः प्रसादमकरोत्, ततः सेतुबन्धनं जातमित्यक्षरार्थः ॥ २१ ॥

रा० टी०–एतदिति । एतत् शिवात्मकं अत्र महापातकनाशनमस्तीति शेषः विभीषणोऽत्रैवाजगाम ॥ २१ ॥

२२–२३ ति० टी०–अत्र राक्षसराज आजगाम । अत्र सेतुबन्धतीर्थं चित्रकानना मधुवनादिदिव्यकाननोपेता या दृश्यते, एषा सुग्रीवस्य पुरी किष्किन्धा ॥ २२ ॥ २३ ॥

रा० टी०–एषेति । मया यत्र वाली हतः सा एषा किष्किन्धा दृश्यते ॥ २२ ॥

गो० टी०–अत्र राक्षसराज इति । अत्र समुद्रराजप्रसादप्रदेशादुत्तरतः ॥ १८ ॥

गो० टी०–एषेति । पम्पातनमधुवनाद्यपेक्षया चित्रकाननेत्युक्तिः ॥ १९ ॥

रा० टी०–अथेति । प्रणयस्य साधुना शोभनतया असति प्रकाशते सा सीता राममब्रवीत् ॥ २३ ॥

गो० टी०–अथेति । प्रणयसाध्वसा प्रणययुक्तसाध्वसवती प्रणतसाध्वसेति पाठे उपनतसाध्वसा । सुग्रीवादिसन्निधानात् प्रणयसाध्वसेति । प्रथमभाषणरूपत्वाद्वा ॥ २० ॥

अब्रवीत्पश्रितं वाक्यं रामं प्रणयसाध्वसा । सुग्रीवप्रियभार्याभिस्तारामुखतो नृप ॥ २४ ॥
अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम् । गन्तुमिच्छे सहायोध्यां राजधानीं त्वया सह ॥ २५ ॥
एवमुक्तोऽथ वैदेह्या राघवः प्रत्युवाच ताम् । एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः २६ ॥
विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह । ब्रूहि वानरशार्दूल सर्वान्वानरपुंगवान् ॥ २७ ॥
स्त्रीभिः परिवृताः सर्वे ह्ययोध्यां यान्तु सीतया । तथा त्वमेभिः सर्वाभिः स्त्रीभिः सह महाबल ॥ २८ ॥
अभित्वरय सुग्रीव गच्छामः प्लवगाधिप । एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा ॥ २९ ॥
वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः । प्रविश्यान्तःपुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत् ॥ ३० ॥
प्रिये त्वं सह नारीणां वानराणां महात्मनाम् । राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया ॥ ३१ ॥
त्वर त्वमभिगच्छामो गृह्य वानरयोषितः । अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः ॥ ३२ ॥
सुग्रीवस्य वचः श्रुत्वा तारा सर्वाङ्गशोभना । आहूय चाब्रवीत्सर्वा वानराणां तु योषितः ॥ ३३ ॥

२४-२५] ति० टी०-प्रणयसाध्वसा प्रणयः साध्वसं च भर्तुः स्वेष्टे प्रवर्तननिमित्तं यस्याः सा । तारामुखतस्तारा-प्रमुखाभिः सुग्रीवस्य प्रियाभिर्भार्याभिः परिवृता गन्तुमिच्छे इच्छामि । अत्रैतदर्थमेकदिनवासः । अत एव भारतेऽङ्गदस्य यौवराज्याभिषेकोऽप्येतस्मिन् उक्तः ॥ २४ ॥ २५ ॥

रा० टी०-तदाकारमाह-सुग्रीवेति । तारामुखतस्तारा-प्रभृतिभिः सुग्रीवप्रियभार्याभिस्सह सहिता अन्येषामङ्गदा-दीनां स्त्रीभिश्च परिवृताहं त्वया सह अयोध्यां गन्तुमिच्छे सार्द्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०-सुग्रीवेत्यादिसार्धश्लोक एकान्वयः । अहं तारामुखतः तारामुखाभिः, सुग्रीवप्रियभार्याभिः सह अन्ये-षां वानरेन्द्राणां स्त्रीभिश्च परिवृता सती त्वया सह अयोध्यां गन्तुम् इच्छे इच्छामीति संबन्धः । आत्मनेपदमार्षम् ॥२१॥

२६-२८] ति० टी०-एवमस्त्विति तामुक्त्वा किष्किन्धां प्राप्य तत्र विमानं संस्थाप्य सुग्रीवं प्रेक्ष्य एतद्वक्ष्यमाण-मुवाच तदेवाह—ब्रूहीति ॥ २६ ॥ २८ ॥

रा० टी०-एवमिति । राघवः एवमस्त्विति तां वैदेहीं प्रत्युवाच किष्किन्धां प्राप्य विमानं संस्थाप्य सुग्रीवमेतदुवाच सार्द्धश्लोकस्सम्मिलितान्वयी ॥ २६ ॥ २७ ॥

गो० टी०-एवमित्यादिसार्धश्लोक एकान्वयः । एवम-स्त्विति सीतां प्रत्युवाच । अथ किष्किन्धां प्राप्य विमानं संस्थाप्य सुग्रीवं प्रेक्ष्योवाचेति संबन्धः ॥ २२ ॥

रा० टी०-तदाकारमाह—ब्रूहीति द्वाभ्याम् सीतया सीताप्रीत्यर्थं स्त्रीभिः परिवृता सर्वे भवन्तः अयोध्यां यान्तु इति वानरपुंगवान् ब्रूहि ॥ २८ ॥

गो० टी०-ब्रूहीति । यान्त्वित्यत्र इतिकरणं द्रष्टव्यम् । सीतया निमित्तभूतया । सीताप्रियार्थमित्यर्थः ॥ २३ ॥

रा० टी०-तथेति । यथा वयं गच्छामः तथा त्वमपि सर्वाभिः स्त्रीभिः सहैव अभित्वरय शीघ्रं गच्छ ॥ २९ ॥

गो० टी०-तथा त्वमपीति । अत्र याहीति विपरिणा-मेन संबन्धः । अभित्वरय । किष्किन्धायां विलम्बो न कार्य इत्यर्थः ॥ २४ ॥

२९-३०] ति० टी०-अभित्वरय । गन्तुमिति शेषः ॥ २९ ॥ ३० ॥

रा० टी०-एवमिति । तैर्वानरैः समावृतो वानराधि-पतिः अन्तःपुरं प्रविश्य तारामुद्वीक्ष्य अब्रवीत् सार्द्धश्लोक एकान्वयी ॥ ३० ॥ ३१ ॥

गो० टी०-एवमुक्त इति । सर्वैः समावृतो वानराधि-पतिरुक्त इत्यन्वयः ॥ २५ ॥

गो० टी०-प्रविश्येति । अर्धमेकं वाक्यम् । प्रवेशः सुग्रीवस्यैव, न तु वानराणाम् । भाषत अभाषत ॥ २६ ॥

३१] ति० टी०-वानराणां नारीणां सह । ताभिः सहेत्यर्थः षष्ठ्यार्थौ ॥ ३१ ॥

३२-३३] ति० टी०-वानरयोषितो गृह्य गृहीत्वा गन्तुं त्वरां कुरु । सर्वाभिः सह गच्छामस्तासामयोध्यां दर्श-यिष्यामः ॥ ३२ ॥ ३३ ॥

रा० टी०-तदाकारमाह—प्रिय इति । महात्मनां वान-राणां नारीणां नारीभिः सहैव मैथिलीप्रियकाम्यया राघवे-णाभ्यनुज्ञाता त्वं वानरयोषितो गृह्य गृहीत्वा त्वर वयमयो-ध्यामभिगच्छामः दशरथस्त्रियः दर्शयिष्यामः युष्मानिति शेषः श्लोकद्वयमेकान्वयि ॥ ३२ ॥ ३३ ॥

रा० टी०-सुग्रीवस्येति । तारा वानराणां योषित आहूय अब्रवीत् ॥ ३४ ॥

गो० टी०-प्रिये त्वमिति । नारीभिः स्त्रीभिः सह अनुज्ञाता । अयोध्यागमनं प्रतीति शेषः । त्वं च वानरस्त्रिय-श्चानुज्ञाता इत्यर्थः । नारीणामिति पाठे तृतीयार्थे षष्ठी ॥२७॥

गो० टी०-त्वरेति । गृह्य गृहीत्वा । आनीयेति यावत् । दर्शयिष्यामः द्रक्ष्यामः । दशरथस्त्रियः दशरथस्त्रियश्च ॥ २८ ॥

---

१ अनयेति गो. पा. । २ स्वदार सहिता इति गो. पा. । ३ नारीभिरिति गो. पा. ।

सुग्रीवेणाभ्यनुज्ञाता गन्तुं सर्वैश्च वानरैः । मम चापि प्रियं कार्यमयोध्यादर्शनेन च ॥ ३४ ॥
प्रवेशं चैव रामस्य पौरजानपदैः सह । विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च ॥ ३५ ॥
तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः । नेपथ्यविधिपूर्वं तु कृत्वा चापि प्रदक्षिणम् ॥ ३६ ॥
अध्यारोहन्विमानं तत्सीतादर्शनकाङ्क्षया । ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः ॥ ३७ ॥
ऋष्यमूकसमीपे तु वैदेहीं पुनरब्रवीत । दृश्यतेऽसौ महान्सीते सविद्युदिव तोयदः ॥ ३८ ॥
ऋष्यमूको गिरिवरः काञ्चनैर्धातुभिर्वृतः । अत्राहं वानरेन्द्रेण सुग्रीवेण समागतः ॥ ३९ ॥
समयश्च कृतः सीते वधार्थं वालिनो मया । एषा सा दृश्यते पम्पा नलिनीचित्रकानना ॥ ४० ॥
त्वया विहीनो यत्राहं विललाप सुदुःखितः । अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी ॥ ४१ ॥
अत्र योजनबाहुश्च कबन्धो निहतो मया । दृश्यतेऽसौ जनस्थाने श्रीमान्सीते वनस्पतिः ॥ ४२ ॥
जटायुश्च महातेजास्तव हेतोर्विनाशिनि । रावणेन हतो यत्र पक्षिणां प्रवरो बली ॥ ४३ ॥

गो० टी०—**सुग्रीवस्येति** । समाङ्गशोभनेत्यनेन पूर्वं स्वयमलंकृतवतीति गम्यते ॥ ३९ ॥

३४] **ति० टी०—सुग्रीवेणाभ्यनुज्ञाता** इयं सर्वैर्वानरैः स्वस्वभर्तृभिः सह गन्तुं त्वर्यतेति शेषः किं च भवतीभिरयोध्यादर्शनेन ममापि प्रियं कार्यम । तदहं ममापि प्रियमिति भावः ॥ ३४ ॥

रा० टी०—**तदाकारमाह—सुग्रीवेणेति** । वानरैः स्वस्वपतिभिस्सह गन्तुं सुग्रीवेण अभ्यनुज्ञाता यूयमिति शेषः अतः अयोध्यादर्शनेन ममापि प्रियं कार्यं भवतीभिरिति शेषः एतेन अहमपि युष्माभिस्सहैव गन्तुमिच्छामीति सूचितम ॥ ३९ ॥

गो० टी०—**सुग्रीवेणेत्यादिश्लोकद्वयमेकान्वयम** । सुग्रीवेण सर्वैर्वानरैः स्वस्वभर्तृभिर्वानरैः सह, अयोध्यां गन्तुमभ्यनुज्ञाताः । यूयमिति शेषः । न केवलं सुग्रीवानुज्ञामात्रं मत्प्रियार्थं च भवतीभिरागन्तव्यमित्याह—मम चापीति । अयोध्यादर्शनेन मम यत्प्रियं तद्भवतीभिः सहागत्य कार्यमित्यर्थः । रामस्य प्रवेशं च दशरथस्य स्त्रीणां विभूतिम् ऐश्वर्यं च । द्रक्ष्याम इति शेषः ॥ ३० ॥ ३१ ॥

३५] **ति० टी०—प्रवेशं चेति** । पश्याम इति शेषः । दशरथस्त्रीणां विभूतिमैश्वर्यं च पश्यामः ॥ ३५ ॥

रा० टी०—**तत्र गमने फलमाह—प्रवेशमिति** । रामस्य प्रवेशादि द्रक्ष्याम इति शेषः ॥ ३६ ॥

३६] **ति० टी०—नेपथ्यविधिरलंकारविधिः** । प्रदक्षिणकरणं विमानस्य ॥ ३६ ॥

रा० टी०—**तारयेति** । वानरयोषितः नेपथ्यविधिः अलंकारकरणं पूर्वं यस्य तं प्रदक्षिणं विमानपरिक्रमणं कृत्वा सीतादर्शनकांक्षया विमानमध्यारोहन् सार्द्धश्लोक एकान्वयी ॥ ३७ ॥

गो० टी०—**तारयेत्याद्यर्धत्रयमेकान्वयम** । नेपथ्यम अलंकारम् । विधिपूर्वेण मङ्गलालम्भनादिविधिपूर्वकमित्यर्थः । अलंकरणाह्वानादिना दिनमेकं गतमित्याहुः । प्रदक्षिणं कृत्वा । विमानमित्येति शेषः । प्रादक्षिण्येन गमनमात्रमस्य विवक्षितम् । अतिविपुलस्य तस्य सप्तः प्रदक्षिणासंभवात् ॥ ३२ ॥

३७-४०] **ति० टी०—अत्र ताभिः सहोत्थितमित्यनेनाभिनवतृण्यां किष्किन्धायामुषित्वा पञ्चम्यां ततः प्रस्थानमिति गम्यते** । उपरि पञ्चम्यां भरद्वाजाश्रमप्रवेशस्य वक्ष्यमाणत्वात् ॥ ३७ ॥ ४० ॥

रा० टी०—**ताभिरिति** । ताभिः स्त्रीभिस्सह उत्थितं विमानं राघवः प्रेक्ष्य वैदेहीं पुनरब्रवीत् ॥ ३८ ॥

रा० टी०—**तदाकारमाह—दृश्यत इत्यादिभिः** । ऋष्यमूको दृश्यते ॥ ३९ ॥

रा० टी०—**अत्रेति** । अत्र ऋष्यमूके सुग्रीवेणाहं समागतः वालिनो वधार्थं समयश्च मया कृतः ॥ ४० ॥

रा० टी०—**एषेति** । यत्र त्वया विहीनोऽहं विललाप सा एषा पम्पा दृश्यते ॥ ४१ ॥

गो० टी०—**ताभिरिति** । उत्थितमित्यनेन तारागमनपर्यन्तं भूमौ विमानं स्थितमिति ज्ञायते ॥ ३३ ॥ ३४ ॥

गो० टी०—**अत्रेति** । समयः संकेतः ॥ ३९ ॥

गो० टी०—**एषेति** । विललाप । लिङ्गमेकवचनम् ३६।३७

४१] **ति० टी०—अस्यास्तीरे** पम्पायास्तीरे ॥ ४१ ॥

रा० टी०—**अस्या इति** । अस्याः पंपायाः तीरे शबरी दृष्टा कबन्धो निहतश्च ॥ ४२ ॥

४२-४३] **ति० टी०—अत्र** पम्पोत्तरदेशे वनस्पतिर्जटायोरावासत्वयोधः ॥ ४२ ॥ ४३ ॥

रा० टी०—**दृश्यते इति** । यत्र रावणेन जटायुर्हतः सोऽसौ वनस्पतिः जनस्थाने दृश्यते सार्द्धश्लोक एकान्वयी ॥४३।४४

गो० टी०—**दृश्यते चेत्यादिसार्धश्लोकमेकं वाक्यम** । श्रीमान् वनस्पतिः जटायुनिवासभूतो वटः । तस्य श्रीमत्त्वं महात्मत्वं जटायुपाधिष्ठितत्वात् ॥ ३८ ॥

---

१ यत्र युद्धं महद्वृत्तं तव हेतोर्विनाशिनि । रावणस्य नृशंसस्य जटायोश्च महात्मन इति गो. पा. ।

[खरश्च निहतो यत्र दूषणश्च निपातितः । त्रिशिराश्च महावीर्यो मया बाणैरजिह्मगैः ।]
एतत्तदाश्रमपदमस्माकं वरवर्णिनि । पर्णशाला तथा चित्रा दृश्यते शुभदर्शने ॥ ४४ ॥
यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात् । एषा गोदावरी रम्या प्रसन्नसलिला शुभा ॥ ४५ ॥
अगस्त्यस्याश्रमश्चैव दृश्यते कर्दलीवृतः । [दीप्तश्चैवाश्रमो ह्येष सुतीक्ष्णस्य महात्मनः ।]
दृश्यते चैव वैदेहि शरभङ्गाश्रमो महान् ॥ ४६ ॥
उपायतः सहस्राक्षो यत्र शक्रः पुरंदरः । एते ते तापसा देवि दृश्यन्ते तनुमध्यमे ॥ ४७ ॥
अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरोपमः । अस्मिन्देशे महाकायो विराधो निहतो मया ॥ ४८ ॥
अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी । असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रकाशते ॥ ४९ ॥
अत्र मां कैकयीपुत्रः प्रमादयितुमागतः । एषा सा यमुना रम्या दृश्यते चित्रकानना ॥ ५० ॥
भरद्वाजाश्रमः श्रीमान्दृश्यते चैष मैथिलि । इयं च दृश्यते गङ्गा पुण्या त्रिपथगा नदी ॥ ५१ ॥
[नानाद्विजगणाकीर्णा संप्रपुष्पितकानना ।]
शृङ्गवेरपुरं चैतद्दृश्यते यत्र सांख्या मम । [एषा सा दृश्यते सीते सरयूर्यूपमालिनी ॥
नानातरुशताकीर्णा संप्रपुष्पितकानना ।] एषा सा दृश्यते सीते राजधानी पितुर्मम ॥
अयोध्यां कुरु वैदेहि प्रणामं पुनरागता ॥ ५२ ॥
ततस्ते वानराः सर्वे राक्षसाः सविभीषणाः । उत्पत्योत्पत्य संहृष्टास्तां पुरीं ददृशुस्तदा ॥ ५३ ॥

४४] ति० टी०–एतत्तदाश्रमपदम । पञ्चवट्याश्रमस्थानमित्यर्थः ॥ ४४ ॥

रा० टी०–एतदिति । यत्र रावणेन त्वं हृता तदस्माकमाश्रमपदमेतदेव अत एव पर्णशाला तथा पूर्ववच्चित्रा दृश्यते सार्धश्लोक एकान्वयी ॥ ४३ ॥

गो० टी०–खरश्चेत्यादिसार्धश्लोक एकान्वयः । तत् पञ्चवटीति प्रसिद्धम् ॥ ३९ ॥ ४० ॥

४५] ति० टी०–यत्र पूर्वां पर्णशालायाम् ॥ ४५ ॥

रा०टी०–एषेति । एषा गोदावरी अगस्त्यस्याश्रमश्च दृश्यते

गो० टी०–एषा गोदावरीति । अयमेव पाठः सम्यक्। एषा मन्दाकिनीति पाठे अगस्त्याश्रमसमीपे मन्दाकिनीति काचिदत्रेति ज्ञेयम। एतच्छ्लोकात्पूर्वं पर्णशालेति श्लोकः पठनीयः ४१

४६] ति० टी० अगस्त्याश्रमो दृश्यते । एतत्समीप एव प्राग्दृष्टिः स्थाश्रमः ॥ ४६ ॥

रा० टी०–दृश्यत इति । यत्र शक्र उपयातः स शरभंगाश्रमो दृश्यते सहस्राक्षपुरन्दरशब्दयौगिकत्वात् पौनरुक्त्यम्॥४३

गो० टी०–दीप्तश्चेत्यर्धम् ॥ ४३ ॥

गो० टी०–वैदेहीति । पुरंणि शत्रुशरीराणि शत्रुपुराणि वा दारयतीति पुरन्दरः ॥ ४३ ॥

४७] ति० टी०–एते ते तापसाः । पूर्वानुभूता इत्यर्थः ४७

रा० टी०–एत इति । यत्र सूर्यवैश्वानरोपमोऽत्रिरते ते तापसाश्च दृश्यन्ते ॥ ४८ ॥

४८] ति० टी०–कुलपतिराश्रमस्वामी । ' कुलमन्वयसंघातगृहोत्पत्त्याश्रमेषु च ' इत्यजयः ॥ ४८ ॥

रा० टी०–अस्मिन्निति । अस्मिन् देशे विराधो मया निहतः अत्रैव तापसी अनसूया त्वया दृष्टा ॥ ४९ ॥

गो० टी०–अस्मिन्देश इत्यर्धम् ॥ ४४ ॥

गो० टी०–एते ह्रीत्यादिसार्धश्लोक एकान्वयः । तापसावासाः । अस्माभिर्देश वर्णाणि गर्वोपेतमिति भावः । तापसी अनसूया ॥ ४३ ॥ ४६ ॥

४९–५१] ति० टी०–तापस्यत्रिपत्नी ॥ ४९ ॥ ५१ ॥

रा० टी०–असाविति । असौ सुतनु शैलानामिन्द्रः चित्रकूटः प्रकाशते अत्रैव कैकेयीपुत्रो भरत आगतः ॥ ५० ॥

रा० टी०–एषेति । एषा यमुना दृश्यते एष भरद्वाजाश्रमो दृश्यते ॥ ५१ ॥

रा० टी०–इयमिति । इयं गंगा दृश्यते यत्र मम सखा गुहः तत् शृंगवेरपुरं दृश्यते ॥ ५२ ॥

रा० टी०–एषेति । यूपमालिनी यज्ञस्तम्भमयी सरयूर्दृश्यते ॥ ५३ ॥

गो० टी०–एषा सेत्यर्धम् ॥ ५३ ॥

गो० टी०–भरद्वाजेत्यर्धम् । यत्र भरद्वाजाश्रमः । पूर्वं दृष्ट इति शेषः । श्रीमान् स एष प्रदेशः प्रकाशते । अदूरवर्तितया सम्यक् दृश्यते ॥ ४८ ॥

गो० टी०–एषा त्रिपथगेति । वरवर्णिनीति सीतासंबोधनम् ॥ ४९ ॥

५२–५३] ति० टी०–यत्र मम सखा गुहस्तच्छृङ्गवेरपुरमेतत् । दृश्यते इति शेषः । एषा सा मम पितू राजधान्य-

१ इदं पद्यमधिकं गो. पुस्तके दृश्यते २ दर्शनेति गो. पा. । ३ पश्य मैथिलीति गो. पा. । ४ इदमर्धमधिकं गो. पुस्तके । ५ इदमर्धमेते ते तापसा इत्यर्धात्प्राग्दृश्यते गो. पुस्तके । ६ इदमर्धमधिकं गो. पाठे । ७ शृङ्गिवेरेति गो. पा. । ८ समागत इति गो. पा. । ९ इदं पद्यमधिकं गो. पुस्तके ।

ततस्तु तां पाण्डुरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिभिर्वृताम् ।
पुरीमपश्यन्प्लवगाः सराक्षसाः पुरीं महेन्द्रस्य यथामरावतीम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोविंशत्यधिकशततमः सर्गः ॥ १२३ ॥

चतुर्विंशत्यधिकशततमः सर्गः ।

चतुर्दशे वत्सरे पूर्णे कौसल्येयो भरद्वाजमुनिमुपसङ्गम्यानिमिषं च मातॄणां भरतस्य चानामयं पप्रच्छ स तु सर्वेषां कुशलमभिधायाद्यात्रोषित्वा श्वो गच्छ वृणीष्वानिमिषान्वानिति लक्ष्मणाग्रजमुवाच अथोऽभ्यर्थितस्त्रिलुप्ता पक्वाफलाः नगाश्च मधुस्रवाः सन्त्विति रामेण प्रार्थितः स तथाकरोत् ।

पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः । भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥ १ ॥

गोध्या दृश्यते । गङ्गातीरवर्तिभरद्वाजाश्रमप्रदेशगे विमाने तस्यान्तरिक्षतयोमप्रदेशवृत्तित्वादयोध्यादिदर्शनम् । अयोध्यां प्रति प्रणामं कुरु ॥ ९२ ॥ ९३ ॥

रा० टी०—एषेति । मम पितुः राजधानी दृश्यते अयोध्यां पुनरागता सती प्रणामं कुरु ॥ ९४ ॥

रा० टी०—तत इति । वानरान्यः उत्पत्योत्पत्य पुरीमयोध्यां ददृशुः ॥ ९५ ॥

गो० टी०—शृङ्गिवेरपुरमित्यर्थम् । यत्र गङ्गः स्नानादेः तच्छृङ्गिवेरपुरम् एतदित्यन्वयः ॥ ९० ॥

गो० टी०—एषा सेति । पुष्पमालिनी इत्याकृतिभिर्गति यानानन्तरं कीर्त्यर्थं शिलाभिः कृतपुष्पवतीत्यर्थः ॥ ९१ ॥

गो० टी०—एषा सेति । अयोध्यामिति । अदिश्येति शेषः । विमानस्याकाशगतत्वेन दूरस्था अपि गङ्गा शृङ्गिवेरपुरसरय्वयोध्या दृश्या इति बोध्यम् । भरद्वाजाश्रमे हि तदा स्थितिः ॥ ९२ ॥ ९३ ॥

९४] ति० टी०—विशालकक्ष्यां विशालरथ्याम् ॥ ९४ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे त्रयोविंशत्यधिकशततमः सर्गः ॥ १२३ ॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—तत इति । पुष्पकमारूढाः महेंद्रस्यामरावतीमिव अयोध्यां ददृशुः ॥ ९५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे पञ्चविंशत्यधिकशततमः सर्गः ॥ १२५ ॥

गो० टी०—ततस्त्विति । पाण्डुरत्वादिस्वभावोक्तिः ॥ ९४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥

१] ति० टी०—पूर्णे इति । पञ्चम्यां चतुर्दशे वर्षे पूर्णं सति तदिने भरद्वाजाश्रमं प्राप्य मुनिं भरद्वाजं ववन्दे ॥ १ ॥

रा० टी०—सिंहावलोकनन्यायेन मार्गवृत्तान्तमाह—पूर्णे इत्यादिभिः । पंचम्यां चतुर्दशे वर्षे पूर्णं सति लक्ष्मणाग्रजः भरद्वाजाश्रमं प्राप्य मुनिं ववन्दे ॥ १ ॥

गो० टी०—अथ भरद्वाजाश्रमवासः—पूर्ण इति । पूर्णं चैत्रशुक्लपञ्चम्यामयोध्यानो निर्गमनम् । तदारभ्य चतुर्दशवर्षे पूर्णं सति पञ्चम्यां चैत्रशुक्लपञ्चम्याम् । तथा हि चैत्रशुक्लपञ्चम्यां निर्गमः, तदह्यां तमसातीरे निवासः षष्ठ्यां शृङ्गिवेरपुरे सप्तम्यां वनस्पतिमूले अष्टम्यां भरद्वाजाश्रमे नवम्यां यमुनातीरे दशम्यां रामशिबिरप्राप्तिः एकादश्यां गुहचारमुखेन विदितवृत्तान्तस्य सुमन्त्रस्य सायाह्ने अयोध्याप्रवेशः । तदात्रावेव दशरथस्य निर्याणम् एकादश्यां राजसेवोत्तरां निक्षेपः द्वादश्यां भरतं प्रति दूतप्रेषणम् ते च दूता मार्गे त्रयोदशीं चतुर्दशीं चापनीय पौर्णमास्यां रात्रौ केकयनगरं प्रविविशुः । प्रतिपदि भरतस्यायोध्यां प्रत्यागमनम् तत्र च मार्गे सप्त रात्रीरुषित्वा अष्टमे दिने त्वरातिशयेनाहोरात्रमात्रेण नवम्यां सूर्योदये भरतस्यायोध्याप्रवेशः तस्यामेव दशरथसंस्कारः । तदारभ्य त्रयोदशदिने वैशाखशुक्लपञ्चम्यां चतुर्दशदिने च भरतेन राज्ञः श्राद्धकर्मकरणम् षष्ठ्यां तदीयानामखिलदहनदेशशोधनम् सप्तम्यां मार्गशोधनाय कर्मान्तिकप्रेषणम् कर्मान्तिकैश्च दशम्यामर्धं चतुर्दिनैः मार्गशोधनम् । एकादश्यां भरतस्य रामसकाशं प्रति गमनम् तदह्नौ गङ्गातीरे निवासः द्वादश्यां भरद्वाजाश्रमे त्रयोदश्यां रामसमागमः चतुर्दशीपौर्णमासीपतिपत्सु चित्रकूटे भरतस्य निवासः वैशाखबहुलद्वितीयायां भरतस्यायोध्यां प्रति प्रयाणम् चतुर्थ्यामयोध्याप्रवेशः । इत्येवं साध्यमाने गते वैशाखबहुलपञ्चम्यां रामस्य चित्रकूटान्निर्गमः अत्र्याश्रमप्रवेशश्च । षण्मासाश्रममण्डलवासेन सह मासेषु दशसंवत्सरेषु गतेषु अवशिष्टकाले पञ्चवटीवासे तत्र त्रयोदशवर्षेषु गतेषु तत्र चतुर्दशे वर्षे चैत्रमासे सीताहरणम् वैशाखे सुग्रीवदर्शनम् आषाढे वालिवधः आश्वयुजे मैत्र्योद्योगः फाल्गुने प्रायोपवेशः फाल्गुनशुक्लचतुर्दश्यां लङ्कादाहः फाल्गुनामावास्यायां रावणवधः चैत्रशुक्लप्रतिपदि रावणसंस्कारादि । द्वितीयायां विभीषणाभिषेकः, सीताप्राप्तिदेवताप्रस्थानानि च । तृतीयायां लङ्कातो निर्गमः । चतुर्थ्यां किष्किन्धायां वासः । पञ्चम्यां भरद्वाजाश्रमे वासः

१ संकुलामिति गो. रा. पा. ।

सोऽपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम् । शृणोषि कच्चिद्भगवन्सुभिक्षानामयं पुरे ॥ २ ॥
कच्चित्स युक्तो भरतो जीवन्त्यपि च मातरः । एवमुक्तस्तु रामेण भरद्वाजो महामुनिः ॥
प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत् ॥ ३ ॥
औज्ञावशत्वे भरतो जटिलस्त्वां प्रतीक्षते । पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे ॥ ४ ॥
त्वां पुरा चीरवसनं प्रविशन्तं महावनम् । स्त्रीतृतीयं च्युतं राज्याद्धर्मकामं चं केवलम् ॥ ५ ॥
पदातिं त्यक्तसर्वस्वं पितृनिर्देशकारिणम् । सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरम् ॥ ६ ॥
दृष्ट्वा तु करुणापूर्वं ममासीत्समितिंजय । कैकेयीवचने युक्तं वन्यमूलफलाशिनम् ॥ ७ ॥
सांप्रतं तुं समृद्धार्थं समित्रगणबान्धवम् । समीक्ष्य विजितारिं चै ममाभूत्प्रीतिरुत्तमा ॥ ८ ॥

अत्र वक्तव्योपपत्तयस्तत्र तत्र प्रदर्शिताः। अस्मिन् प्रकारे हनुमत्सन्निधाने, द्वौ मासौ रक्षितव्यौ मे इति रावणवचनं सीतासान्त्वनपरम् । मासादूर्ध्वं न जीविष्य इति सीतावचनं तु सम्यक् संगच्छते । मासशब्दस्य वर्तमानमासपरत्वं चासकृदुक्तम् । रावणेन दश मासा गताः अवशिष्टौ द्वौ मासाविति युक्तिर्मधुपानमत्ततया अविवेककृता । सीताया मासादूर्ध्वमिति वचनं तु वर्तमानमासपरमिति विवेकः । भरद्वाजाश्रमं प्राप्येत्यनेन महतां स्थानमपि प्राप्यमित्युक्तम् । नियतः नियतकरणत्रयः ॥ १ ॥

२] ति० टी०–पुरेऽयोध्यायां सुभिक्षं चानामयं च सुभिक्षानामयम् । सुभिक्षमश्वसमृद्धिः । 'अनामयं स्यादारोग्यम्' । शृणोषि कच्चिद् शिष्यादिषुक्वेनेशेषः ॥ २ ॥

रा० टी०–स इति । स रामः भरद्वाजमभिवाद्य अपृच्छत् अहं पृथक् तदाकारमाह—शृणोषीति । पुरे अयोध्यायां सुभिक्षमश्वादिसम्पत्तिमनामयं रोगराहित्यं शृणोषि भरतः सुयुक्तः पालनादौ निरतः अस्तीति शेषः मातरो जीवन्ति ॥ २ ॥

गो० टी०–स इत्यादिसार्धश्लोक एकान्वयः । सुभिक्षानामयम् । भिक्षयन्त इति भिक्षाः भक्षाणि भिक्षाणां समृद्धिः सुभिक्षम् समृद्धावव्ययीभावः आमयस्याभावोनामयम् प्रमन्यप्रतिषेधेऽपि समासस्येष्टत्वात्साधुः । सुभिक्षं चानामयं चेति विग्रहः । अनामयम् आरोग्यम । अनामयं स्यादारोग्यमित्यमरः । युक्तः प्रजापालने समाहितः ॥ २ ॥

३] ति० टी०–स भरतो युक्तः । प्रजापालने समाहित इत्यर्थः । स्मितपूर्वम् । सर्वज्ञोऽपि भगवानजानन्निव मां पृच्छतीति स्मितकरणम् । प्रहृष्टवत्प्रहृष्टार्हम् ॥ ३ ॥

रा० टी०–एवमिति । एवमुक्तो भरद्वाजः प्रहृष्टवत् स्मितपूर्वं च यथा भवति तथा प्रत्युवाच ॥ ३ ॥

गो० टी०–एवमिति । प्रहृष्टवत् प्रहृष्टम् । क्रियाविशेषणम् । स्मितपूर्वम् । सर्वज्ञोऽप्यजानान इव पृच्छतीति स्मितम् । यद्वा किं भरतः प्रजापालनसंतुष्टो वर्तत इति प्रभसारं मत्वा परतन्त्रे तस्मिन् कथमित्थं संभवतीति स्मितकरणम् ॥ ३ ॥

४–६] ति० टी०–ते पादुके पुरस्कृत्य सर्वं कुशलं गृहे पुरे च संपादयन्भरतस्त्वां प्रतीक्षते ॥ ४ ॥ ६ ॥

७] ति० टी०–उच्यमानविशेषणं त्वां दृष्ट्वा मम पुरा करुणा दैन्यमासीत् ॥ ७ ॥

रा० टी०–तदाकारमाह—आज्ञेत्यादिभिः । भरतः ते पादुके पुरस्कृत्य राजस्थानीयत्वेन संस्थाप्य त्वां प्रतीक्षते गृहे च कुशलमस्तीति शेषः ॥ ४ ॥

रा० टी०–त्वामिति । पुरा देवादिपालनार्थम् महावनं प्रविशन्तं स्त्री एव तृतीया यस्य राज्यात् अभिषेकात् च्युतमत एव त्यक्तसर्वस्वमत एव सर्वभोगैः परित्यक्तं स्वर्गच्युतममरमिव पदातिं त्वां पूर्वं दृष्ट्वा मम करुणा आसीत् सांप्रतं तु समृद्धः संसिद्धः अर्थो यस्य तं विजितारिं त्वां समीक्ष्य ममोत्तमा प्रीतिरभूत् अर्द्धश्लोकमेकान्वयि ॥ ५–८ ॥

गो० टी०–अत एव तदनुरूपमुत्तरयति–पङ्क्तिं । स्नानाभावात्पङ्क्तिदिग्धत्वम् । स्नानाभावेऽपि नित्यानुष्ठानं दीक्षितवत् गौणस्नानेन । स्नानाभावे निमित्तमाह–जटिल इति । जटिलः जटावान् पिच्छलादित्वादिलच् । जटिलानां वारुणस्नानम् निषिद्धमिति भावः । कथं त्वपररात्रेषु सरयूमवगाहत इत्यायुक्तिस्तु कादाचित्कस्नानपरत्वेऽप्युपपद्यते । यद्वा सदा अनास्तृतभूमिशयनादिना वा तादृशत्वम् । एवं व्रतनिष्ठो भरतस्ते पादुके राज्याय पुरस्कृत्य त्वां प्रतीक्षते । त्वदागमनाकाङ्क्षया वर्तत इत्यर्थः । कच्चिच्च युक्तो भरत इत्यस्योत्तरमुक्त्वा, जीवन्त्यपि च मातर इत्यस्योत्तरमाह–सर्वं चेति । तव गृहे यद्यदस्ति तत्सर्वम् कुशलं क्षेमयुक्तम् । जीवन्त्यपि चेति समुच्चाय्य प्रष्टाः सर्वे मातृपरिचारकादयो जीवन्तीत्यर्थः ॥ ४ ॥

गो० टी०–त्वां पुरेत्यादिश्लोकत्रयमेकं वाक्यम् । पुराचीरवसनं पुरातनचीरवसनम् । अतो न पूर्वपदेन पौनरुक्त्यम् । करुणा दुःखम् । परदुःखदुःखित्वं हि करुणा ॥६–७॥

८] ति० टी०–सांप्रतं तु समृद्धत्वादिगुणं समीक्ष्य ममोत्तमा प्रीतिरभूत् । जातेत्यर्थः ॥ ८ ॥

गो० टी०–सांप्रतमिति । साम्प्रतम् इदानीम् तु त्वां

१ पङ्क्तिदिग्धस्विति गो. पा. । २ स्विति गो. पा. । ३ त्वामिति गो. पा. ।

सर्वं च सुखदुःखं ते विदितं मम राघव । यत्त्वया विपुलं प्राप्तं जनस्थाननिवासिना ॥ ९ ॥
ब्राह्मणार्थे नियुक्तस्य रक्षतः सर्वतापसान् । रावणेन हृता भार्या बभूवेयमनिन्दिता ॥ १० ॥
मारीचदर्शनं चैव सीतोन्मथनमेव च । कबन्धदर्शनं चैव पम्पाभिगमनं तथा ॥ ११ ॥
सुग्रीवेण च ते सख्यं यत्रै वाली हतस्त्वया । मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च ॥ १२ ॥
विदितायां च वैदेह्यां नलसेतुर्यथा कृतः । यथा चादीपिता लङ्का प्रहृष्टैर्हरियूथपैः ॥ १३ ॥
सपुत्रबान्धवामात्यः सबलः सहवाहनः । यथा च निहतः संख्ये रावणो बैलदर्पितः॥ १४ ॥
यैर्यथा च निहते तस्मिन्रावणे देवकण्टके । समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः ॥ १५ ॥
सर्वं ममैतद्विदितं तपसा धर्मवत्सल । संपर्तन्ति च मे शिष्याः प्रवृत्त्याख्याः पुरीमिमाम्॥ १६ ॥
अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर । अर्घ्यं प्रतिगृहाणेदमयोध्यां श्वो गमिष्यसि ॥ १७ ॥
तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः । वाढमित्येव संहृष्टः श्रीमान्वरमयाचत ॥ १८ ॥

समीक्ष्य । स्थितस्येति शेषः । प्रीतिः । जातेति शेषः । अनुत्तमेत्यनेन देवकार्यकरणहेतुत्वात् पूर्वमपि काचित् प्रीतिरासीदिति द्योत्यते ॥ ८ ॥

९] ति० टी०–सर्वं ते सुखं दुःखं च विदितमित्येतत्प्रकाशयति––यत्त्वयेति । जनस्थाननिवासिना त्वया यद्विपुलं खरवधादिना दुःखं प्राप्तं तन्मया विदितम् ॥ ९ ॥

रा० टी०–सर्वमिति । यत् विपुलमधिकं सुखदुःखं त्वया प्राप्तं तत्सर्वं मे विदितमस्ति ॥ ९ ॥

गो० टी०–सर्वमित्यर्धम् । सुखं पञ्चवटीवासादिकृतम् । दुःखं सीताहरणजम् ॥ ९ ॥

गो० टी०–यत्त्वयेत्यादिसार्धश्लोकषट्कमेकान्वयम । ब्राह्मणार्थे ऋषिजनरक्षणार्थे, नियुक्तस्य तैर्याचितस्य । अत एव रक्षितुः खरादिवधमुखेन पालयितुः, तव भार्या हृता बभूवेति यत् तच्चेति योजना । हृता हर्तुमीप्सिता । आशंसायां क्तः । अतो न सीतोन्मथनमित्यनेन पौनरुक्त्यम । वरः मृत वानरजीवनादिः ॥ १०–१५ ॥

१०] ति० टी०–तदनन्तरं ब्राह्मणार्थे ब्रह्मविदां ब्रह्मर्षीणां प्रयोजने रक्षाप्रयोजने नियुक्तस्य, अत एव सर्वतापसान्रक्षतस्तव भार्येयं हृता बभूवेत्येतच्च मे विदितम् ॥ १० ॥

रा० टी०–तदेव निदर्शयन्नाह—ब्राह्मणेत्यादिभिः । ब्राह्मणार्थे नियुक्तस्य ब्रह्मवेत्तृकार्यसिद्धये नियुक्तस्य ब्रह्मादिभिः प्रार्थितस्य अत एव सर्वतापसान् रक्षतस्तव भार्या रावणेन हृता बभूव ॥ १० ॥

११] ति० टी०–मारीचदर्शनम् । रावणस्य सीताहरणार्थमिति शेषः । सीतोन्मथनं सीताया राक्षसीभिर्लङ्कायां क्षेपणम् ॥ ११ ॥

१२ ति० टी०–वातात्मजस्य कर्म समुद्रलङ्घनादिदग्धलङ्कादहनान्तम् ॥ १२ ॥

१३–१५] ति० टी०–प्रहृष्टैर्हरियूथपैर्लङ्कादीपितेति यद्दिग्विजययानन्तरं कृतं तच्च विदितम् ॥ १३ ॥ १५ ॥

रा० टी०–एतच्च मारीचदर्शनादि च सर्वं तपसा ज्ञानचक्षुषा मे विदितं सार्धश्लोकषट्कमेकान्वयि ॥ ११–१५ ॥

१६] ति० टी०–इतो महाश्रमान्मे शिष्याः प्रवृत्त्याख्यास्तव प्रवृत्तिमुदन्तमाचक्षते प्रवृत्त्याख्यारतथाभूताः सन्तस्तव पुरीमयोध्यां संपतन्ति । अतस्त्वत्पुरीवृत्तान्तोऽपि ज्ञायत इति शेषः १६

१७] अहमप्यत्रेति । विद्मा इति भावः । दद्मि ददामि । अर्घ्यं प्रतिगृहाण । मया दातुं प्रतिज्ञातस्य वरस्य वरणात्पूर्वमिति शेषः ॥ १७ ॥

रा० टी०–पौरुषोत्पत्तिज्ञाने हेत्वन्तरमाह—सम्पतन्तीति । प्रवृत्त्याख्याः प्रवृत्तिकथनशीलाः मे शिष्याः पुरीमयोध्यां सम्पतन्ति प्रतिदिनं गच्छन्ति अतेन अयोध्यावृत्तं तेभ्यो नित्यं प्रतिश्रूणोमीति सूचितम् अतेन भरद्वाजस्य अयोध्योपासकत्वं व्यञ्जितम् अर्घं पृथक्–अहमिति । अहं वरमर्घं ते तुभ्यं दद्मि ददामि भवन्तं गृहाण यः आगामिदिवसे अयोध्यां गमिष्यसि गन्तासि ॥ १७ ॥

गो० टी०–अहमिति । वरम दद्मि ददामि । अत्र आश्रमे अर्घ्यं पूजाम् गृहाणेति संबन्धः ॥ १६ ॥

१८] ति० टी०–वाढमित्येव । प्रतिगृह्येति शेषः ॥ १८ ॥

रा० टी०–तस्येति । तस्य भरद्वाजस्य वाक्यं वाढमित्युक्त्वा नृपात्मजो वरमयाचत ॥ १८ ॥

गो० टी०–तस्येत्यादिसार्धश्लोकद्वयमेकान्वयम् । वाढमिति प्रतिगृह्य, तस्मिन् दिने तत्र पूजामङ्गीकृत्येत्यर्थः । श्रीमान् अयात्र स्थित्वा भरतं प्रति दूतप्रेषणमुचितमिति जानवानित्यर्थः । मधूनि स्रवन्तीति मधुस्रवाः । गच्छतः ममेति शेषः । मयि गच्छति सतीत्यर्थः । भवन्तु । अत्रेतिकरणं बोध्यम । इति वरमयाचतेति संबन्धः ॥ १७ ॥ १८ ॥

१ वधादिकमिति गो. पा. । २ यच्चेति गो. पा. । ३ देवकण्टक इति गो. वरदर्पित इति रा. पा. । ४ इदमर्घ गो. पुस्तके नास्ति । ५ इदमर्घ्यं गो. पु. नास्ति ।

अकालफलिनो वृक्षाः सर्वे चापि मधुस्रवाः । फलान्यमृतगन्धीनि बहूनि विविधानि च ॥ १९ ॥
भवन्तु मार्गे भगवन्नयोध्यां प्रति गच्छतः । तथेति च प्रतिज्ञा ते वचनात्समनन्तरम् ॥ २० ॥
अभवन्पादपास्तत्र स्वर्गपादपसंनिभाः । निष्फलाः फलिनश्चासन्विपुष्पाः पुष्पशालिनः ॥२१॥
शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः । सर्वतो योजनास्तिस्रो गच्छतामभवंस्तदा ॥ २२ ॥
ततः प्रहृष्टाः प्लवगर्षभास्ते बहूनि दिव्यानि फलानि चैव ।
कामादुपाश्नन्ति सहस्रशस्ते मुदान्विताः स्वर्गजितो यथैव ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे चतुर्विंशत्यधिकशततमः सर्गः ॥ १२४ ॥

पञ्चविंशत्यधिकशततमः सर्गः ।

अयोध्यायामवलोकिताया रावणवैरिणा भरतस्य स्वकुशलनिवेदनाय तदिङ्गितज्ञानार्थं च संदिष्टो मारुतिरत्वनि गृहं निवेद्याचिरादेव भरतमुपेत्य स्मारं स्मारं काकुत्स्थसंदेशमस्खलनिवेदयंस्तेनानन्दाश्रुभिः सकुतुकमाश्वासितोऽभूत् ।

अयोध्यां तु समालोक्य चिन्तयामास राघवः । प्रियंकामः प्रियं रामस्ततस्त्वरितविक्रमः ॥ १ ॥
चिन्तयित्वा ततो दृष्टिं वानरेषु न्यपातयत् । उवाच धीमांस्तेजस्वी हनूमन्तं प्लवंगमम् ॥ २ ॥

१९] ति० टी०–वरमाह—अकालेति ॥ १९ ॥

२०–२२] ति० टी०–अयोध्यां प्रति गच्छतो मम मार्गे एवं वृक्षादयो भवन्तु । वानराणां विश्रामार्थमिति शेषः ॥२०–२२॥

रा० टी०–तदाकारमाह—अकालेत्यादिभिः । अयोध्यां प्रति गच्छतां मे मार्गे वृक्षाः अकालफलिनः मधुस्रवाश्च भवन्तु फलानि च अमृतगंधीनि बहूनि च भवन्तु सार्द्धश्लोकैकान्वयी ॥ १९ ॥ २० ॥

रा० टी०–तथेति । तथा इति प्रतिज्ञाते भरद्वाजप्रतिज्ञायां सत्यां वचनात् प्रतिज्ञावाक्यात् समनन्तरमेव गच्छतां सर्वेषां भरद्वाजाश्रमादारभ्य अयोध्यापर्यन्तमार्गस्य चतुर्दिक्षु तिस्रो योजनाः पादपाः स्वर्गपादपसन्निभा अभवन् अत एव नगा मधुस्रवा अभवन् निष्फला नगाः फलिनः विपुष्पाः पुष्परहिताः पुष्पशालिनः आसन् शुष्कास्समग्रपत्राश्चाभवन् सार्द्धश्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०–तथेति चेत्यादिसार्धश्लोकद्वयमेकान्वयम । योजना योजनानि । "सुपां सुलुक्" इत्यादिना पूर्वसवर्णादेशः । अत्यन्तसंयोगे द्वितीया । गच्छतां वानराणां फलिनश्चासन्निति क्रमेणान्वयः । इदं चोत्तरदिनकार्यं सौकर्याय कृपिणा दर्शितम ॥ १९–२१ ॥

२३] ति० टी०–जयन्तीति जिनः । स्वर्गजित इव मुदान्वितास्ते प्रसिद्धा वानराः कामान्यथेच्छमुपाश्नन्ति स्म ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्य युद्धकाण्डे चतुर्विंशत्यधिकशततमः सर्गः ॥१२४॥

रा० टी०–तत इति । सहस्रशः प्लवगर्षभाः दिव्यानि फलानि कामादिच्छातः स्वर्गजित इव उपाश्नन्ति ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे चतुर्विंशत्यधिकशततमः सर्गः ॥ १२६ ॥

गो० टी०–तत इति । ते प्रस्थिताः स्वर्गजितो यथा स्वर्गिण इव ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशत्युत्तरशततमः सर्गः ॥१२७॥

१–२] ति० टी०–पञ्चम्यां चतुर्दशवर्षस्य पूर्णत्वात्तदिने भरद्वाजाश्रमे विलम्बस्य प्राप्तत्वाच्चतुर्दशमासौ यदि त्वां न पश्यामि तदा हुताशनं प्रवेक्ष्यामीति भरतोक्तेर्भरतस्य स्वागमननिवेदनाय हनुमत्प्रेषणं कृतवानित्याह–अयोध्यां त्विति । समालोक्य । भरद्वाजाश्रमे विमानादवतरणसमये इति भावः । सुग्रीवादीनां सम्यक्शिष्टाचारकरणाय सुहृष्टरूपतदाकारज्ञानाय च पूर्वं हनुमत्प्रेषणम्, अत एव पार्श्वे पञ्चम्यामेव विसृष्टहनुमत्प्रवेशसमये भरतवर्णनमेवं कृतम्—'अग्निप्रवेशे सोद्योगकाले भ्रातुरनागमात् । न्यवेदयत्तदा तस्मै श्रीरामागमनोत्सवम् ॥' इति । किं च । प्रियकाम इति । सुग्रीवादीनां प्रियकामोऽयोध्यायां सर्वतत्प्रियपूरणकामस्तेषां प्रियं यथा भवति तथा चिन्तयामास । कर्तव्यजातमिति शेषः ॥ १ ॥ २ ॥

रा० टी०–भरद्वाजाश्रमे वासनिश्चयानन्तरकालिकं वृत्तान्तमाह—अयोध्यामित्यादिभिः । अयोध्यां समालोक्य प्रियकामः अयोध्यावासिनां प्रियमिच्छुः रामः प्रियं यथा भवति तथा चिन्तयामास चतुर्दशवर्षसमाप्तिदिने यदि त्वां न पश्यामि तर्हि हुताशनं प्रवेक्ष्यामीति भरतोक्तिं सस्मारेत्यर्थः ॥ १ ॥

गो० टी०–अथ भरतं प्रति हनुमत्प्रेषणमष्टाविंशत्युत्तरशततमे–अयोध्यां त्विति । अर्धमेकं वाक्यम् । समालोक्य समालोच्येत्यर्थः । आश्रमस्थस्य तदवलोकनासंभवात् । चिन्तयामास । कर्तव्यमिति शेषः ॥ १ ॥

---

१ कल्याणीति गो. सम्मानीति रा., पा. । २ जयेति गो. पा. । ३ इदमर्धमुत्तरश्लोकपूर्वार्द्धं च गो. पुस्तके नास्ति ।

अयोध्यां त्वरितो गत्वा शीघ्रं प्लवगसत्तम । जानीहि कच्चित्कुशली जनो नृपतिमन्दिरे ॥ ३ ॥
शृङ्गवेरपुरं प्राप्य गुहं गहनगोचरम् । निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥ ४ ॥
श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम् । भविष्यति गुहः प्रीतः सममात्मसमः सखा ॥ ५ ॥
अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च । निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ ६ ॥
भरतस्तु त्वया वाच्यः कुशलं वचनान्मम । सिद्ध्यर्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम् ॥ ७ ॥
हरणं चापि वैदेह्या रावणेन बलीयसा । सुग्रीवेण च संवादं वालिनश्च वधं रणे ॥ ८ ॥
मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया । लङ्घयित्वा महातोयमापगापतिमव्ययम् ॥ ९ ॥
उपयानं समुद्रस्य सागरस्य च दर्शनम् । यथा च कारितः सेतू रावणश्च यथा हतः ॥ १० ॥
वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च । महादेवप्रसादाच्च पित्रा मम समागमम् ॥ ११ ॥
उपयातं च मां सौम्य भरताय निवेदय । सह राक्षसराजेन हरीणामीश्वरेण च ॥ १२ ॥
जित्वा शत्रुगणान्रामः प्राप्य चानुत्तमं यशः । उपायाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ १३ ॥
एतच्छ्रुत्वा यमाकारं भजते भरतस्ततः । स च ते वेदितव्यः स्यात्सर्वं यच्चापि मां प्रति ॥ १४ ॥
ज्ञेयाः सर्वे च वृत्तान्ता भरतस्येङ्गितानि च । तत्त्वेन मुखवर्णेन दृष्ट्या व्याभाषितेन च ॥ १५ ॥

रा० टी०-चिन्तयित्वेति । चिन्तयित्वा भरतस्याग्रिप्रवेशनिवारणोपायभूतसंदेशः प्रेषणीय इति निश्चित्य वानरेषु दृष्टिं न्यपातयत् हनुमन्तमुवाच ॥ २ ॥

३] ति० टी०-यथा क्षिप्रमयोध्यां प्राप्यते तथा त्वरितः सन्नयोध्यां गच्छ । नृपतिमन्दिरं वर्तमानः सर्वोऽपि जनः कुशलीति जानीहि ॥ ३ ॥

रा० टी०-तदाकारमाह—अयोध्यामित्यादिभिः । त्वरितस्त्वमयोध्यां गच्छ नृपतिमंदिरं जनः कुशली कनिदिति शीघ्रं जानीहि च ॥ ३ ॥

गो० टी०-जानीहीत्यर्धम् । नृपतिमन्दिरं जनः मात्रादिः ॥ २ ॥

४] ति० टी०-गहनं काननं गोचरो देशो यस्य तम् । मम कुशलं मद्वचनाद्ब्रूहि ॥ ४ ॥

रा० टी०-शृंगवेरेति । शृंगवेरपुरं प्राप्य गहनं वनं गोचरो देशो यस्य तं गुहं मम वचनात् कुशलं ब्रूहि ॥ ४ ॥

गो० टी०-शृङ्गिवेरेति । गहनगोचरं वनचारिणम् ॥३॥

५-६] ति० टी०-आत्मसमः । तत्सदृशः । तत्त्वज्ञानित्वात् ॥ ५ ॥ ६ ॥

रा० टी०-तत्प्रयोजनमाह-श्रुत्वेति । गुहः मां कुशलिनं श्रुत्वा प्रीतो भविष्यति ननु तेन तव किमित्यत आह स गुहः ममात्मसमः सखा एतेन तत्प्रीतिर्ममैव प्रीतिरिति ध्वनितम् ॥५॥

गो० टी०-गुहाय निवेदनस्य प्रयोजनमाह-श्रुत्वा त्विति । विगतज्वरं मद्विश्लेषचिन्ताज्वररहितम् यथा तथेति भविष्यतीति क्रियाविशेषणम् । आत्मसमः हीनजातिमनवेक्ष्य प्रेमातिशयेन गुहमिश्वाकुकुलीनममन्यत ॥ ४ ॥

रा० टी०-प्रयोजनान्तरमाह-अयोध्याया इति । प्रीतो गुहः अयोध्यायाः मार्गं भरतस्य प्रवृत्तिं च निवेदयिष्यति ॥६॥

गो० टी०-अयोध्यायाश्चेति । प्रवृत्तिं वृत्तान्तम् ॥ ६ ॥

७-८] ति० टी०-सिद्ध्यर्थं निर्व्यूढपितृवचनपरिपालनरूपप्रयोजनम् ॥ ७ ॥ ८ ॥

९] ति० टी०-यथा त्वयाधिगता । अस्खलितव्रता यथा स्यात्तथेत्यर्थः ॥ ९ ॥

१०] ति० टी०-उपयानं पुनः स्वयमस्मत्समीपागमनम् । वानरसेनया सह समुद्रतीरगमनं वा । सागरस्य स्वरूपेण प्रत्यक्षतो दर्शनं दर्शनदानम् ॥ १० ॥

११] ति० टी०-महेन्द्रादिकर्तृकं वरदानं वानरसम्भूतानरूपम् । अत्र ब्रह्मवरुणयोरपि वरदानकर्तृत्वोक्तेः पूर्वं महेन्द्रसहितो ब्रह्मेति व्याख्यातम् ॥ ११ ॥

१२-१३] ति० टी०-उपयातं नगरसमीपमागतम् ॥ १२ ॥ १३ ॥

१४] ति० टी०-एतच्छ्रुत्वेवंप्रकारं मदागमनं श्रुत्वा यमाकारं खेदानन्दमूचकमाकारम् । स आकारो यद्यपि भरतस्य मां प्रति कर्तव्यं तत्र वेदितव्यम् ॥ १४ ॥

१५] ति० टी०-तदेवाह—ज्ञेया इति । मुखवर्णेन प्रीतिखेदोचितविकाससंकोचाद्याकारेणेत्यर्थः । तत्त्वेन यथार्थेन वृत्तान्ता ज्ञेया इत्यन्वयः ॥ १५ ॥

रा० टी०-भरत इति । भरतः मम वचनात् कुशलं वाच्यः तस्मै भरताय मां सिद्ध्यर्थं शंस ॥ ७ ॥

रा० टी०-हरणमिति । वैदेह्या हरणादि भरताय निवेदय श्लोकपञ्चकमेकान्वयि ॥ ८-१२ ॥

१ इदमर्धं गो. पुस्तके नास्ति । २ शृङ्गीति गो. पा. । ३ संसर्गमिति गो. पा. । ४ एतदध्योर्द्वयोः श्लोकयोर्व्यत्ययेन पाठो गो. पुस्तके । ५ अथाकारमिति गो. पा. ।

सर्वकामसमृद्धं हि हस्त्यश्वरथसंकुलम् । पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः ॥ १६ ॥
संगत्या भरतः श्रीमान्राज्येनार्थी स्वयं भवेत् । प्रशास्तु वसुधां सर्वामखिलां रघुनन्दनः ॥ १७ ॥
तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर । यावन्न दूरं याताः स्मः क्षिप्रमागन्तुमर्हसि ॥ १८ ॥

रा० टी०–जित्वेति । समृद्धार्थो राम. मित्रैस्सह उपयाति एतद्वचनं श्रुत्वा मां प्रति यमाकारमभिप्रायं भरतो भजते प्राप्नोति स आकारो वेदितव्यः यदन्यच्चेष्टादि तत्सर्वं वेदितव्यं श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

रा० टी०–ज्ञानोपायमाह—ज्ञेया इति । भस्तस्य इङ्गितानि सर्वे तन्मीपवर्तिसम्बन्धिनोऽपि वृत्तान्ता मुखवर्णादिना तत्त्वेन विज्ञेयाः ॥ १५ ॥

गो० टी०–भरतस्त्विति । सिद्धार्थं निर्वृत्तपितृवचनपरिपालनरूपप्रयोजनम् ॥ ६ ॥

गो० टी०–हरणमित्यादिश्लोकपञ्चकमेकान्वयम् । रणे सुग्रीववालिनोर्युद्धे । वालिनो वध इत्यर्थः । यथा चेति । महातोयम् अन्ययम् आपगापतिं लङ्घयित्वा त्वया सीता यथा अधिगता तथा शंसेत्यन्वयः । समुद्रस्योपयानम् समुद्रं प्रति गमनमित्यर्थः । संबन्धसामान्ये षष्ठी । समीपयाने वा । सागरस्य समुद्रराजस्य । ब्रह्मणा वरुणेन चेति सहार्थे तृतीया । अनेन महेन्द्रेण वानरसमुत्थापनरूपवरप्रदाने ब्रह्मायत्तमतिरस्तीति योतितम् । पित्रा मम समागममित्येतदन्तस्य शंसेति पूर्वेण संबन्धः । उपयानमिति । अन्यथा चतुर्थ्यामेव चतुर्दशवर्षांतिक्रमान् सोग्नि प्रविशेदिति भावः । सौम्येत्यनेन मन्दं मन्दं कथय। अन्यथा हठान्मदागमनश्रवणे हर्षोऽस्य उन्मत्तको भवेदिति भावः ॥ ७–१२ ॥

गो० टी०–त्वमेव राज्यं पालयेति मयोक्ते भरतस्तदङ्गीकरोति न वेति तदाकारस्त्वया ज्ञातव्य इत्याह–एतच्छ्रुत्वेति । एतत् उपयानम् । आकारं मुखप्रसादादिकम् । मां प्रति यत् इङ्गितचेष्टादिकम् ॥ १३ ॥

गो० टी०–जित्वा शत्रुगणानित्यादिश्लोकद्वयमेकान्वयम । एतच्छ्लोकान्ते इत्युक्तत्वेत्यध्याहर्तव्यम् । ज्ञेया इति श्लोकेन पूर्वोक्तमेव विशेष्यते । तत्त्वेनेत्यस्य ज्ञेया इत्यनेन सबन्धः । अत्रापि पूर्ववद्राज्यं पालयेति मदुक्ति भरतः किमङ्गीकरोतीति परीक्षस्वेति भावः । अन्यथा भरतप्रकृतेः रामप्रकृतेश्च विरुद्धं स्यात् यावेवमूचतुः । न सर्वे भ्रातरस्तात भवन्ति भरतोपमा इति, यावत् चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसा धारयिष्यामि न मे शान्तिर्भविष्यतीति च ॥ १४ ॥ १५ ॥

१६] ति० टी०–नन्व तादृशसौहृदवति कोऽन्यथा शङ्कायाः प्रसङ्गोऽत आह—सर्वकामेत्यादि । पितृपैतामहं तत्क्रमेणागतं नावर्तयेत् । अनेन भ्रातर एवं शङ्क्या इति लोकान्बोधयति ॥ १६ ॥

रा० टी०–ननु सदैवैकाकाराभिप्रायस्य भरतस्याभिप्रायज्ञाने किं फलमित्यत आह—सर्वेति । सर्वकामैः समृद्धं राज्यं कस्य मनः न आवर्तयेत् अन्यथा कुर्यात् ॥ १६ ॥

गो० टी०–ननु किं परीक्षणीयं सर्वस्यापि राज्याधिपत्यकाङ्क्षित्वादित्याशङ्क्याह—सर्वेति । पितृपितामहशब्दौ कुलपरम्परोपलक्षकौ । पितृपितामहेभ्य आगतम् उत्तरपदवृद्धिरार्षी । नावर्तयेत् नाकर्षेत् । कस्य भरतादन्यस्यैवेत्यर्थः ॥ १६ ॥

१७] ति० टी०–तस्य राज्याकाङ्क्षा चेत्किं करिष्यतीत्याशङ्क्य स एव राज्यं प्रशास्त्वित्याह—संगत्येति । संगत्या चिरकालपरिचयेन कैकयीसंगत्या वा । यदि कैकयीवत्स्वयमपि राज्येनार्थी भवेत्तर्हि स एव वसुधां शास्तु । वयं यत्र क्वापि तपसा कालं नेष्याम इति शेषः ॥ १७ ॥

रा० टी०–तन्मनसोन्यथाभावे किं करिष्यसीत्यत आह–संगत्येति । संगत्या चिरकालं राज्यप्राप्त्या राज्येन स्वयमर्थी राज्याभिलाषीत्यर्थः यदि भरतो भवेत् तर्हि सर्वां वसुधां प्रशास्तु तन्ममापि मुदावहमिति तात्पर्यम् ॥ १७ ॥

गो० टी०–एवं भरतेङ्गिते ज्ञाते तव किं कर्तव्यमित्याह–संगत्येति । संगत्या अस्मत्संगत्या । यद्यपि पूर्वं सर्वात्मना न राज्यपालनमङ्गीकरोमीत्युक्तम् । तथापि चतुर्दशवर्षपर्यन्तं मद्विरहातुरतया मद्दर्शनजहर्षप्रकर्षातिरेकेण त्वमभिषिक्तो भवेति मदुक्तिमङ्गीकरिष्यति किमिति भावः । भरतः मत्प्रीत्यर्थम् पूर्वं राज्यभारमङ्गीकृतवान् खलु । स्वयं श्रीमान् स्वाभाविकपारतन्त्र्यश्रीमान् भवेदित्याशंसायां लिङ् । प्रशास्तु वसुधां कृत्स्नाम् । ततो मदभिषेकसंभ्रमं न लब्धवान् । अहं तु भरताभिषेकमहोत्सवमनुभवेयम् । अत एव अयोध्याकाण्डेऽपि, शनैर्जगाम सापेक्ष इत्युक्तम् । भरताभिषेकदर्शनसापेक्ष इत्यर्थः । अखिलाम् खिलरहिताम् । समृद्धजनामित्यर्थः । कथमसौ भरणक्षम इत्यत्राह–रघुनन्दन इति । त्रैलोक्यभरणक्षमकुलोद्भूत इत्यर्थः ॥ १७ ॥

१८] ति० टी०–यावदस्मादाश्रमादूरं याता न स्मः । अयोध्याया अतिसमीपं न प्राप्ताः स्म इति यावत् । क्षिप्रमागन्तुमर्हसि । तावदिति शेषः ॥ १८ ॥

रा० टी०–तस्येति । तस्य भरतस्य बुद्धिं निश्चयं व्यवसायमुद्योगं च क्षिप्रे विज्ञाय यावद्वयं न दूरयाताः तावदेव आगन्तुमर्हसि ॥ १८ ॥

गो० टी०–तस्येति । बुद्धिं मत्समिधाने कथं चिद्राज्यमङ्गीकरिष्यतीति बुद्धिम्, व्यवसायं सर्वात्मना नाङ्गीकरि-

१ राज्यार्थी नेदिति गो. पा. ।

इति प्रतिसमादिष्टो हनूमान्मारुतात्मजः । मानुषं धारयन्रूपमयोध्यां त्वरितो ययौ ॥ १९ ॥
अथोत्पपात वेगेन हनूमान्मारुतात्मजः । गरुत्मानिव वेगेन जिघृक्षन्नुरगोत्तमम् ॥ २० ॥
लङ्घयित्वा पितृपथं विहगेन्द्रालयं शुभम् । गङ्गायमुनयोर्भीमं समतीत्य समागमम् ॥ २१ ॥
शृङ्गवेरपुरं प्राप्य गुहमासाद्य वीर्यवान् । स वाचा शुभया हृष्टो हनूमानिदमब्रवीत् ॥ २२ ॥
सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः । ससीतः सह सौमित्रिः स त्वां कुशलमब्रवीत् ॥ २३ ॥
पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः । भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यैव राघवम् ॥ २४ ॥
एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहः । उत्पपात महावेगोद्वेगवानविचारयन् ॥ २५ ॥
सोऽपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा । वैरूथीं गोमतीं चैव भीमं शालवनं तथा ॥ २६ ॥
प्रजाश्च बहुसाहस्रीः स्फीताञ्जनपदानपि । स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः ॥ २७ ॥
आससाद द्रुमान्फुल्लान्नन्दिग्रामसमीपगान् । सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् ॥ २८ ॥

व्यतीति व्यवसायं च, ज्ञात्वा अङ्गीकरिष्यति चेदमादेशावधूरं न याताः स्म तावदागन्तुमर्हसि । अन्यथा नागच्छेति भावः । अत एव हनुमानपि तस्य व्यवसायं ज्ञात्वा नागतवानिति ज्ञेयम । केचित्तु भरतभावज्ञोऽपि रामः सर्वात्मना स्वरतीऽपि राज्ञा परीक्षणीय इति लोके राजनीतिप्रवर्तनार्थमेवमतिशङ्कावचनमुक्तवान । वस्तुतः स्वस्य अटिति गमने भरतस्य हर्ष उन्मस्तको भवेदिति । तस्मात्तस्याय हनुमन्तं प्रेषितवान। तदाशयज्ञो हनुमानपि रामागमनमुक्त्वा भरतेन सहैवागतवानित्याहुः ॥ १८ ॥

१९] ति० टी०—मानुषमित्यर्धं संक्षेपः ॥ १९ ॥

रा० टी०—इतीति । इति प्रतिसमादिष्टो हनुमान् मानुषं रूपं धारयन् सन् अयोध्यां ययौ ॥ १९ ॥

गो० टी०—इतीति । प्रतिसमादिष्टः प्रतिकूलं समादिष्टः। अहृदयं समादिष्ट इत्यर्थः । ययौ यातुमुद्युक्तः ॥ १९ ॥

२०] ति० टी०—तस्यैव प्रपञ्चः—उत्पपातेत्यादि॥२०॥

रा० टी०—अथेति । हनुमान् उरगोत्तमं जिघृक्षन् गरुत्मानिव वेगेनोत्पपात ॥ २० ॥

गो० टी०—अथेति । अथ उद्योगानन्तरम् । वेगेन जिघृक्षन् इवेत्यन्वयः ॥ २० ॥

२१-२३] ति० टी०—पितृपथं वायुमार्गम । अन्तरिक्षमित्यर्थः । तद्विशेषणं विहगेन्द्रालयं श्रेष्ठविहगानां संचारस्थानम् ॥ २१ ॥ २३ ॥

रा० टी०—लङ्घयित्वेति । पितृपथं वायुमार्गं विहगेन्द्रालयं गरुडगृहं च लंघयित्वा अत एव गंगायमुनयोस्समागमं समतीत्य अतिक्रम्य शृंगवेरपुरं प्राप्य गुहमासाद्य प्राप्य हनुमानिदमब्रवीत् श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

रा० टी०—तदाकारमाह—सखेति । रामः त्वां कुशलमब्रवीत् ॥ २३ ॥

गो० टी०—लङ्घयित्वेत्यादिश्लोकद्वयमेकान्वयम । पितृपथं स्वपितृपथम । वायुमार्गमित्यर्थः । भुजगेन्द्रालयमिति गङ्गागमुनासंगमविशेषणम् ॥ २१-२३ ॥

२४] ति० टी०—अथ पञ्चमीं पञ्चमीसंबन्धिनीं रजनीमुषित्वाथ स्थित्वा श्वो गमिष्यसीति भरद्वाजानुज्ञातं राघवं त्वं प्रातरेव द्रक्ष्यसि ॥ २४ ॥

रा० टी०—पंचमीमिति । पंचमीं रजनीं पञ्चमतिथिमात्रे मुनेर्भरद्वाजस्य वचनादुषित्वा अभ्यनुज्ञातं राघवमेव द्रक्ष्यसि ॥ २४ ॥

गो० टी०—पञ्चमीमिति । पञ्चमीं पञ्चमीसंबन्धिनीम । अद्य रजनीम् एतां रजनीम् उषित्वा । निर्गतमिति शेषः । भरद्वाजाभ्यनुज्ञातम् । प्रातरिति शेषः । अद्येव अचिरेणैव ॥२४॥

२५] ति० टी०—संप्रहृष्टतनूरुहः । जगदानन्दरामसेवकत्वाभिमानेति भावः । अविचारयन् । अध्वश्रममिति शेषः॥२५॥

रा० टी०—एवमिति । हनुमान् एवमुक्त्वा अविचारयन् अध्वश्रममगणयन् महावेगादुत्पपात ॥ २५ ॥

गो० टी०—एवमिति । संप्रहृष्टतनूरुहः सकललोकानन्दकारिरामप्रत्यागमनम् मया श्रावयितव्यं लब्धमित्यस्माद्धेतोरिति भावः । महावेगः महावेगस्वभावः । वेगवान् तादात्विकवेगवान् । अविचारयन् मार्गस्थवनगिरिनदीसौन्दर्यादिकमगणयन्निति भावः ॥ २५ ॥

२६-२७] ति० टी०—रामतीर्थं परशुरामतीर्थम् । वालुकिनीं तदाख्याम् । शालवनं शालवृक्षवनम् ॥ २६ ॥ २७ ॥

२८] ति० टी०—सुराधिपस्योपवने नन्दनाख्ये चैत्ररथे कुबेरोद्यानं चात्र दृष्टव्यम् ॥ २८ ॥

रा० टी०—स इति । स हनुमान् रामतीर्थं वालुकिनीं तदभिधां नदीं च शालवनं च बहुसाहस्रीः प्रजाश्चापश्यत् सार्धश्लोक एकान्वयी ॥ २६ ॥

रा० टी०—स इति । कपिकुञ्जरः दूरमध्वानं गत्वा नंदिग्रामसमीपगान् द्रुमान् आससाद तत्र दृष्टान्तः स्त्रीभिः स्वलंकृतैः

---

१ मध्यं सन्निपातमतीत्य चेति गो. पा. । २ गोमतीं तां च सोऽपश्यदिति गो. पा. । ३ एतदाद्ययोर्द्वयोरर्धयोर्व्यत्यासेन पाठो गो. पु. ।

स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः स्वलंकृतैः । क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम् ॥ २९ ॥
ददर्श भरतं दीनं कृशमाश्रमवासिनम् । जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम् ॥ ३० ॥
फलमूलाशिनं दान्तं तापसं धर्मचारिणम् । समुन्नतजटाभारं वल्कलाजिनवाससम् ॥ ३१ ॥
नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम् । पादुके ते पुरस्कृत्य प्रशासन्तं वसुंधराम् ॥ ३२ ॥
चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात् । उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः ॥ ३३ ॥
बलमुख्यैश्च युक्तैश्च कापायाम्बरधारिभिः । नहि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम् ॥ ३४ ॥
परिभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलाः । तं धर्ममिव धर्मज्ञं देहबन्धमिवापरम् ॥ ३५ ॥
उवाच प्राञ्जलिर्वाक्यं हनूमान्मारुतात्मजः । वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम् ॥ ३६ ॥

रममाणैस्सपुत्रैः पुत्रसहितैः पौत्रैश्च सेवितान् सुराधिपस्योपवने चैत्ररथे कुबेरोद्याने द्रुमानिव अर्द्धचतुष्टयमेकान्वयि ॥२७॥२८॥

गो० टी०-सोऽपश्यदित्यादिस्सार्धश्लोकमेकं वाक्यम । रामतीर्थं परशुरामतीर्थम । तां प्रसिद्धाम् । प्रजाः कोसलजनपदस्थाः ॥ २६ ॥

गो० टी०-स गत्वेत्यादिश्लोकद्वयमेकान्वयम । फुल्लान् फुल्लपुष्पान् । स्त्रीभिः सपुत्रैर्दृढैश्च । स्त्रीबालवृद्धाविशेषेण सर्वेषामानन्दकरत्वादिति भावः । सुराधिपस्य उपवने नन्दनवने, चैत्ररथे च स्थितान् द्रुमान् यथा तत्सदृशानित्यर्थः ॥२७॥२८॥

२९-३१] ति० टी०-स्वलंकृतै रममाणैः पुत्रपौत्रैः सहिताभिः स्त्रीभिर्गृह्यमाणपुष्पानिति द्रुमविशेषणम् ॥ २९-३१ ॥

३२] ति० टी०-भावितात्मानं ध्यातपरमात्मानम्, अत एव ब्रह्मर्षिसमतेजसम् ॥ ३२ ॥

३३] ति० टी०-चातुर्वर्ण्यस्य लोकस्य । स्वार्थे ष्यञ् । चतुर्वर्णरूपस्य लोकस्य ॥ ३३ ॥

रा० टी०-क्रोशमात्र इति । चीरकृष्णाजिनाम्बरं भ्रातृव्यसनेन कर्शितं बाधितचित्तम अत एव कृशम् अत एव मलेन दिग्धं व्याप्तमंगं यस्य अत एव समुन्नतो जटाभारो यस्य वल्कलमजिनमेव वासो यस्य अत एव दीनं क्षीणपरिकरविशिष्टम ॥ नियतं यतचित्तं भावितः परिशीलितः आत्मा परमात्मा येन पादुके पुरस्कृत्य वसुधां प्रशासन्तं कापायाम्बरधारिभिः अमात्यैः पुरोहितैश्च बलमुख्यैश्च उपस्थितमाश्रमवासिनं नन्दिग्रामीयपर्णशालास्थितम् भरतमयोध्यायाः क्रोशमात्रे क्रोशपरिमितोर्ध्वदेशे स्थितो हनुमान् ददर्श एकत्राजिनसन्नद्धः मृगचर्मपरः परत्र व्याघ्रादिचर्मपर इति न पौनरुक्त्यम् अर्द्धदशकमेकान्वयि ॥ २९-३३ ॥

गो० टी०-क्रोशमात्रे त्वित्यादिश्लोकपञ्चकमेकान्वयम् । क्रोशमात्रे *घटिकाद्वयमात्रे घटिकाद्वयगन्तव्यभूमौ । क्रोशलक्षणमुक्तं ज्यौतिषदर्पणे-यवोदरैरङ्गुलमष्टसंख्यैर्हस्तोऽङ्गुलैः षड्भिर्नितैश्चतुर्भिः । हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषामिति । दीनं रामादर्शनेन । दान्तं बहिरिन्द्रियनियहशालिनम् । समुन्नतजटाभारमिति ॥ पूर्वं जटावत्त्वोक्तिः, अत्र तद्भारस्य समुन्नतत्वोक्तिरिति वैषम्यम् । वल्कलाजिनवाससमित्युत्तरीयोक्तिः । अतश्चीरकृष्णाजिनाम्बरमित्यनेन न पुनरुक्तिः । नियतं नियतवाचम् । भावितात्मानं ध्यातात्मानमिति मनोनियमोक्तिः । ते पूर्वं रामेण दत्ते । चातुर्वर्ण्यस्य चतुर्वर्णरूपस्य स्वार्थे ष्यञ् लोकस्य जनस्य । युक्तैः सन्नद्धैः । योगः सन्नद्धनोपायध्यानसङ्गतियुक्तिष्वित्यमरः ॥ २९-३३ ॥

३४] ति० टी०-बलमुख्यैर्बलाध्यक्षैर्युक्तैः कापायाम्बरधारिभिः । 'यथा राजा तथा प्रजा' इति न्यायात् । तदेवाह—नहि ते इति ॥ ३४ ॥

रा० टी०-नहीति । धर्मवत्सलाः पौराः राजपुत्रं परिभोक्तुं तं परित्यज्य भोगं कर्तुं नैव व्यवस्यन्ति एतेन पौराणामपि भोगराहित्यं व्यक्तम ॥ ३४ ॥

गो० टी०-भ्रातृवियोगाद्भरतस्य वल्कलादिधारणमस्तु अमात्यादीनां तत् किंनिमित्तमित्याशङ्क्य तत्र कारणमाह—न हीति । राजपुत्रं भरतं परिवर्जयित्वा भोक्तुं समीचीनवस्त्राभरणादीन्यनुभवितुम्, न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । "अपपरी वर्जने" इति परेः कर्मप्रवचनीयसंज्ञा आचार्याः प्राहुः । परि परितो वर्तमाना अपि पौराः भरतं भोक्तुम् अनुभवितुम् । द्रष्टुमिति यावत् । न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । तदर्शने निराशा भवन्तीत्यर्थः । तत्र हेतुमाह—राजपुत्रमिति । रामविरहानन्तरक्षणे मृतस्य पुत्रः खल्वयम् । अथ रामानागमेन किमयमस्माभिर्लभ्यत इति भावः । हेत्वन्तरमाह—धर्मवत्सलं धर्मार्थतया स्वात्मत्यागे पितृसदृशमित्यर्थः । चतुर्दशे वर्षे पूर्णेपि रामागमनादर्शनात् प्राणत्यागे व्यवसितं भरतमालोक्यतां पौराणां खेदातिशयोऽनेन श्लोकेन सूच्यते ॥ ३४ ॥

३५-३६] ति० टी०-परिभोक्तुं परित्यज्य भोक्तुम् । द्वितीय इवशब्दो वाक्यालंकारे । 'इव' इति वैकत्र पाठः । देहबन्धं मनुष्यदेहसंबन्धवन्तम् ॥ ३५ ॥ ३६ ॥

रा० टी०-तमिति । देहबंधं मनुष्यदेहवंतमपरं धर्ममिव धर्मज्ञं तं भरतं प्राञ्जलिरेव हनुमान् उवाच ॥ ३५ ॥

---

१ वत्सलमिति गो. पा. २ देहवन्तमिति गो. पा. । *इदं च लेखनमसंबद्धं भाति घटिकार्धस्थानवगादिना ।

अनुशोचसि काकुत्स्थं स त्वां कौशलमब्रवीत् । प्रियमाख्यामि ते देव शोकं त्यज सुदारुणम् ॥३७॥
अस्मिन्मुहूर्ते भ्रात्रा त्वं रामेण सह संगतः । निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम् ॥ ३८ ॥
उपयाति समृद्धार्थः सह मित्रैर्महाबलैः । लक्ष्मणश्च महातेजा वैदेही च यशस्विनी ॥
सीता समग्रा रामेण महेन्द्रेण शची यथा ॥ ॥ ३९ ॥
एवमुक्तो हनुमता भरतः कैकयीसुतः । पपात सहसा हृष्टो हर्षान्मोहमुपागमत् ॥ ४० ॥
ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः । हनूमन्तमुवाचेदं भरतः प्रियवादिनम् ॥ ४१ ॥
अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य संभ्रमात् । सिषेच भरतः श्रीमान्विपुलैरश्रुबिन्दुभिः ॥ ४२ ॥
देवो वा मानुषो वा त्वमनुक्रोशादिहागतः । प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम्॥ ४३ ॥
गवां शतसहस्रं च ग्रामाणां च शतं परम् । सकुण्डलाः शुभाचारा भार्याः कन्यास्तु षोडश॥ ४४ ॥
हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः । सर्वाभरणसंपन्नाः संपन्ना कुलजातिभिः ॥ ४५ ॥

रा०टी०–तदाकारमाह—वसन्तमित्यादिभिः । दण्डकारण्ये वसन्तं यंत्वमनुशोचसि स रामः त्वां कौशलमब्रवीत् ॥ ३६ ॥

गो० टी०–तमिति । देहवन्तमपरं धर्ममिव स्थितम् । द्वितीय इवशब्दो वाक्यालंकारे ॥ ३५ ॥ ३६ ॥

३७] ति० टी०–शोकं त्यज सुदारुणमित्यनेनास्य पाप्तोऽग्रिमप्रवेशोद्यमः सूचित इति बोध्यम ॥ ३७ ॥

रा० टी०–प्रियमिति । अस्मिन्मुहूर्ते शीघ्रमित्यर्थः भ्रात्रा रामेण सह संगतः त्वं भविष्यसीति शेषः अतः शोकं त्यज इति प्रियमहमाख्यामि ॥ ३७ ॥

गो० टी०–प्रियमिति । संगतः भविष्यतीति शेषः । अत्रापरिचितत्वात् भरतं हनुमान् नावन्दत । यद्वा प्राञ्जलिरिति पदं वन्दनपूर्वकाञ्जलिपरम् । अथवा भरतदर्शनेन प्रियाख्याने क्षणविलम्बेऽपि प्राणहानिशङ्कया सति कृत्य इति न्यायेन वन्दनोद्देश्यवस्तुनि शीर्यमाणे किं वन्दनेनेति तदज्ञीवकं प्रियाख्यानमेवाकरोत् । यद्वा तदशादर्शनेन स्वरूपं विस्मरम् ॥ ३७ ॥

३८–३९] ति० टी०–अस्मिन्मुहूर्ते । अचिरादित्यर्थः । संगतो भविष्यसीति शेषः ॥ ३८ ॥ ३९ ॥

रा० टी०–निहत्येति । रावणं निहत्य मैथिलीं प्रतिलभ्य रामो लक्ष्मणश्च महेन्द्रेण शचीव रामेण समग्रा सहिता सीता च उपयाति अर्द्धचतुष्टयमेकान्वयि ॥ ३८ ॥ ३९ ॥

गो० टी०–निहत्येति । समृद्धार्थः संपूर्णमनोरथः ॥३८॥

गो० टी०–लक्ष्मणश्चेति । समग्रा संपूर्णमनोरथा । उपपात इति शेषः ॥ ३९ ॥

४०–४१] ति० टी०–उत्कटहर्षोऽपि चित्तवैवश्यहेतुरितिहत्वा पपातेत्यादि ॥ ४० ॥ ४१ ॥

४२] ति० टी०–अशोकजैर्हर्षजैरित्यश्रुबिन्दुभिरित्यनेनान्वितम् ॥ ४२ ॥

रा० टी०–तत इति । भरतस्सम्भ्रमात् आदरात् कपिमालिङ्ग्य प्रीतिमयैः अत एव अशोकजैः अशोकः शोकसंसर्गशून्यः परमानन्द इत्यर्थः तज्जनितैः अश्रुबिन्दुभिः सिषेच इदमुवाच च अर्द्धचतुष्टयमेकान्वयि ॥ ४१ ॥ ४२ ॥

गो० टी०–एवमिति । हृष्टः पपात हर्षान्मोहं जगाम हेत्यनेन वार्ताश्रवणमात्रेणैतादृशावस्थे भरते भ्रटिति रामागमने कावस्था भवेदिति ऋषिर्विस्मयते ॥ ४० ॥ ४१ ॥

गो० टी०–अशोकजैरिति । भरतः कपिमालिङ्ग्य अशोकजैः शोकजभिन्नैः प्रीतिमयैः आनन्दजैरित्यर्थः विपुलैः गुरुभिः ॥ ४२ ॥

४३–४५] ति० टी०–अनुक्रोशात्कृपया प्रियाख्यानस्य कर्तरि लुट् प्रियाख्यानकर्तुः किं प्रियं ददामि एतत्प्रियाख्यानसमं न किंचित्पश्यामीति भावः ॥ ४३ ॥ ४५ ॥

रा० टी०–तदाकारमाह—देव इत्यादिभिः । अनुक्रोशात् स्वकृपातः इहागतस्त्वं देवो वा मानुषो वा तद्वदेवत्यर्थः प्रियाख्यानस्य प्रियवक्तुस्ते किं ददामि इति ब्रुवतो ममापि प्रियं स्वेप्सितं वदेति शेषः ॥ ४३ ॥

रा० टी०–तूष्णीं स्थितं तं प्रत्याह—गवामिति । द्वाभ्याम् । षोडश कन्याः भार्यास्ते दास्यामीति शेषः ॥ ४४ ॥

रा० टी०–हेमेति । हेमवर्णाः सर्वाभरणसम्पन्नाः कुलजातिभिश्च सम्पन्नाः सुनासोरूः शशिसौम्याननाः स्त्रियः भवदार्यायाः कर्मकरीरित्यर्थः दास्यामीति शेषः॥ ४५ ॥

रा० टी०–एवमिति । हृष्टो भरतः पपात हर्षात् मोहमविवेकमुपागमच्च ॥ ४० ॥

गो० टी०–देवो नेत्यादिश्लोकत्रयमेकान्वयम् ॥ परिगृहीतमनुष्यदेहेऽपि हनुमति तेजोविशेषात् संशयः । अनुक्रोशात् दयया, प्रियं ब्रुवतस्ते, प्रियाख्यानस्य प्रियवचनस्य, पारितोषिकत्वेन गवादिकं ददामि भार्याः भरणार्हाः कन्याः अनूढाः स्त्रियः ॥ ४३–४५ ॥

निशम्य रामागमनं नृपात्मजः कपिप्रवीरस्य तदाद्भुतोपमम् ।
प्रहर्षितो रामदिदृक्षयाभवत्पुनश्च हर्षादिदमब्रवीद्वचः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चविंशत्यधिकशततमः सर्गः ॥ १२५ ॥

षड्विंशत्यधिकशततमः सर्गः ।

प्रहृष्टेन भरतेनानुयुक्तो मारुतिः शूर्पणखाकर्णनासच्छेदकुद्धखरदूषणवधादिसीताहरणमध्यरावणवधान्तं रामविजयोत्कर्षकं निखिलवृत्तमकथयत् ।

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम् । शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम् ॥ १ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति माम् । एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ २ ॥
राघवस्य हरीणां च कथमासीत्समागमः । कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः ॥ ३ ॥
स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः । आचचक्षे ततः सर्वं रामस्य चरितं वने ॥ ४ ॥
यथा प्रव्राजितो रामो मातुर्दत्तौ वरौ तव । यथा च पुत्रशोकेन राजा दशरथो मृतः ॥ ५ ॥
यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात्प्रभो । त्वयायोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम् ॥ ६ ॥
चित्रकूटगिरिं गत्वा राज्येनामित्रकर्शनैः । निमन्त्रितस्त्वया भ्राता धर्ममाचरता सताम् ॥ ७ ॥
स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम् । आर्यस्य पादुके गृह्य यथासि पुनरागतः ॥ ८ ॥
सर्वमेतन्महाबाहो यथावद्दिदितं तव । त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे ॥ ९ ॥

४६] ति० टी०–निशम्य प्रहर्षितो रामदिदृक्षया । अत्र युक्तोऽभवदिति शेषः ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे पञ्चविंशत्यधिकशततमः सर्गः ॥ १२५ ॥

रा० टी०–निशम्येति । नृपात्मजो भरतः अद्भुतोपमं रामागमनं कपिप्रवीरस्य कपिप्रवीरात् निशम्य श्रुत्वा प्रहर्षितोऽभवत् रामदिदृक्षयोपलक्षितस्सन् इदं वचोऽब्रवीच्च ॥ ४६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तविंशत्यधिकशततमः सर्गः ॥ १२७ ॥

गो० टी०–निशम्येति । रामदिदृक्षया उपलक्षितो भरतः । अद्भुता उपमा यस्य तद् अद्भुतोपमम् निरुपममित्यर्थः । तदागमनम्, कपिप्रवीरस्य कपिप्रवरात्, निशम्य । तस्य श्रणोतीतिवत्षष्ठी । प्रहर्षितोऽभवत् ॥ ४६ ॥

इति श्रीगो० श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

१] ति० टी०–बहूनि वर्षाणि सुमहद्वनं गतस्य मम नाथस्य कीर्तनं श्रणोम्यहम् ॥ १ ॥

२] ति० टी०–अत इयं लौकिकी गाथा कल्याणीति मां प्रति प्रतिभाति । बतेति हर्षे । तां गाथामाह—एतीति ॥ २ ॥

रा० टी०–भरतवचनाकारमाह—बहूनीत्यादिभिः । मम प्रीतिकरं बहूनि वर्षाणि वनं गतस्य नाथस्य कीर्त्तनं श्रणोमि ॥ १ ॥

रा० टी०–कल्याणीति । जीवन्तं नरं वर्षशतादपि आनन्द एति इयं लौकिकी गाथा मां कल्याणी एव प्रतिभाति इव एवार्थे २

गो० टी०–बहूनीत्यादिश्लोकद्वयमेकान्वयम् । बहूनि वर्षाणि वनं गतस्येति संबन्धः । वर्षशतादपीत्यत्रेतिकरणं द्रष्टव्यम् । वर्षशतात्परमिति शेषः ॥ १ ॥ २ ॥

३] ति० टी०–सह मित्रैरित्यस्य सुग्रीवादिमित्रसहितैरित्यर्थः तन्मुखादवगत्य पृच्छति—राघवस्येति । किमाश्रित्य किं निमित्तमाश्रित्येत्यर्थः ॥ ३ ॥

रा० टी०–राघवस्येति । राघवस्य हरीणां च समागमः कस्मिन्देशे किं प्रयोजनमाश्रित्य कथमासीत् ॥ ३ ॥

गो० टी०–राघवस्येति । अत्र वानरसमागमप्रश्नेन पूर्वं भरतः सामान्यतो वानरसेनासन्नाहं श्रुतवानिति गम्यते । किमाश्रित्य किं प्रयोजनमवलम्ब्य ॥ ३ ॥

४] ति० टी०–बृस्यां तापसासने ॥ ४ ॥

रा० टी०–स इति । राजपुत्रेण भरतेन बृस्यां तापसासने समुपवेशितः पृष्टश्च स हनुमान् रामस्य चरितमाचचक्षे ॥ ४ ॥

गो० टी०–स इति । बृस्यां तपस्विसमुचितासने । बर्हिनामासनं बृसीत्यमरः ॥ ४ ॥

५] ति० टी०–यथा शब्दानां तवानुभवसिद्ध इत्यर्थः । मातृ राज्ञा वरौ दत्तौ । तत एव राज्ञा रामः प्रव्राजित इति यथा तवानुभवसिद्धमित्यर्थः । एवमग्रेऽपि ॥ ५ ॥

६–७] ति० टी०–राजगृहात्तदाख्यात्केकयपुरात् ॥ ६ ॥ ७ ॥

८–९] ति० टी०–विसर्जितम् । रामेणेति शेषः ॥ ८ ॥ ९ ॥

---

१ कर्शनेति गो. पा. ।

अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम् । परिक्षुनमिवात्यर्थं तद्वनं समपद्यत ॥ १० ॥
तद्धस्तिमृदितं घोरं सिंहव्याघ्रमृगाकुलम् । प्रविवेशाथ विजनं स महद्दण्डकावनम् ॥ ११ ॥
तेषां पुरस्ताद्बलवान्गच्छतां गहने वने । विनदन्सुमहानादं विराधः प्रत्यदृश्यत ॥ १२ ॥
तमुत्क्षिप्य महानादमूर्ध्ववाहुमधोमुखम् । निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम् ॥ १३ ॥
तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ । सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः ॥ १४ ॥
शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः । अभिवाद्य मुनीन्सर्वाञ्जनस्थानमुपागमत् ॥ १५ ॥
चतुर्दश सहस्राणि जनस्थाननिवासिनाम् । हतानि वसता तत्र राघवेण महात्मना ॥ १६ ॥
एकेन सह संगम्य रामेण रणमूर्धनि । अर्द्धचतुर्थभागेन निःशेषा राक्षसाः कृताः ॥ १७ ॥
महाबला महावीर्यास्तपसो विघ्नकारिणः । निहता राघवेणाजौ दण्डकारण्यवासिनः ॥ १८ ॥
राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे । दूषणं चाग्रतो हत्वा त्रिशिरास्तदनन्तरम् ॥ १९ ॥

रा० टी०—तदाकारमाह—यथेत्यादिभिः । यथा तव मातुः वरौ दत्तौ राज्ञेति शेषः यथा च रामः प्रव्राजितः यथा च दशरथः अमृतः मृतसदृशः लोकान्तरं प्राप्त इत्यर्थः यथा च राजगृहात् स्वमातुलसदनात् दूतैस्त्वमानीतः त्वया च यथा राज्यं नेप्सितं यथा च चित्रकूटगिरिं गत्वा भ्राता रामः त्वया निमन्त्रितः प्रार्थितः यथा च राज्ञो वचने स्थितेन रामेण राज्यं विसर्जितं त्वत्प्रार्थनयापि नाङ्गीकृतमित्यर्थः यथा च पादुके गृहीत्वा पुनरागतोसि एतत्सर्वं कृतं तव यथावद्दिदितमतः त्वयि प्रतिप्रयाते सति यदृत्तं तन्मे मत्तो निबोध श्लोकपञ्चकमेकान्वयि ॥ ६–९ ॥

गो० टी०—वक्ष्यमाणवृत्तान्ते प्रामाण्यसिद्धये तत्पूर्ववृत्तं संग्रहेणानुवदति—यथेत्यादिना । अत्र यथेत्यस्य येन प्रकारेणेत्यर्थः । मातुः मात्रे राज्येन निमन्त्रित इत्यन्वयः । अभिव्रकर्शनेत्यनेन राज्यकरणसामर्थ्ये स्वस्य सत्यपि ज्येष्ठानुवृत्त्यर्थं निमन्त्रित इति गम्यते ॥ ६–९ ॥

१०] ति० टी०—परिक्षुनं परिक्षीणम् । पीडितमिति यावत् ॥ २० ॥

रा० टी०—अपयाते इति । त्वयि अपयाते चित्रकूटात्पराङ्मुखे सति समुद्भ्रान्ता मृगद्विजाः यस्मिन् तद्वनं परिक्षुनं परिक्षीणमिव यथा भवति तथा समपद्यत ॥ १० ॥

गो० टी०—अपयाते इति । समुद्भ्रान्तेति । अपूर्वपुरुषदर्शनेनेति भावः । परिक्षुनं परितप्तम् ॥ १० ॥

११–१२] ति० टी०—तत्तदनन्तरम् ॥ ११ ॥ १२ ॥

रा० टी०—तदिति । हस्तिभिर्मृदितं प्रमर्दितं दण्डकावनं प्रविवेश ॥ ११ ॥

रा० टी०—तेषामिति । गच्छतां तेषां रामादीनां पुरस्तात् विराधः प्रत्यदृश्यत ॥ १२ ॥

गो० टी०—तदिति । तत् प्रसिद्धम् । हस्तिभिः वनगजैः मृदितम् ॥ ११ ॥ १२ ॥

१३–१६] ति० टी०—निखाते गर्ते प्रक्षिपन्ति स्म प्रक्षिप्तवन्तावित्यर्थः ॥ १३ ॥ १६ ॥

रा० टी०—समिति । नदन्तं कुञ्जरमिव महानादं समुत्क्षिप्य कृत्वेत्यर्थः विधमानं विराधं निखाते प्रक्षिपन्ति स्म १३

रा० टी०—तदिति । सायाह्ने शरभंगस्याश्रममीयतुः प्रापतुः ॥ १४ ॥

रा० टी०—शरभंग इति । रामः जनस्थानमुपागमत् ॥ १५ ॥

रा० टी०—चतुर्दशेति । राघवेण राक्षसां चतुर्दश सहस्राणि हतानि ॥ १६ ॥

गो० टी०—तमिति । निखाते अवटे । प्रक्षिपन्ति स्मेति बहुवचनेन सीतयापि तत्र किंचित्साहाय्यं कृतमिति गम्यते ॥ १३–१५ ॥

गो० टी०—ततः पश्चादित्यर्थम् ॥ १६ ॥

गो० टी०—तत इति । कर्णनासमित्यत्र प्राप्यवृत्त्यादेकत्वम् ॥ १७ ॥

गो० टी०—चतुर्दशेति । स्पष्टम् ॥ १८ ॥

१७–१९] ति० टी०—अर्द्धचतुर्थभागेन । इदं च राक्षसार्दनयुद्धसंनाहसीतागृहाप्रेषणादिसर्वव्यापारापेक्षया । युद्धकालस्यधोपिकसुहृत्तेनेत्यारण्यकाण्ड उक्तः ॥ १७ ॥ १९ ॥

रा० टी०—तदेव सविशेषमाह—एकेनेति । एकेन रामेण सह संगम्य विधमानाः राक्षसा. अन्ततः चतुर्थभागेन निःशेषाः कृताः रामेणेति शेषः ॥ १७ ॥

रा० टी०—महाबला इति । तपसो विघ्नकारिणः राघवेण निहताः ताडिताः विनिष्पिष्टाः हिंसिताश्च खरश्च निहतः दूषणं हत्वा त्रिशिराश्च निहतः श्लोकद्वयमेकान्वयि ॥१८॥१९॥

गो० टी०—एकेनेति । संगताः पार्थक्येन विना सर्वे राक्षसाः परस्परं मिलिताः सन्तः, एकेन रामेण सह संगम्य निःशेषाः कृता इत्यन्वयः । अर्द्धचतुर्थभागेनेत्यत्र अर्द्धश्चतुर्थो

पश्चाच्छूर्पणखा नाम रामपार्श्वमुपागता । ततो रामेण संदिष्टो लक्ष्मणः सहसोत्थितः ॥ २० ॥
प्रगृह्य खड्गं चिच्छेद कर्णनासे महाबलः । ततस्तेनार्दिता बाला रावणं समुपागता ॥ २१ ॥
रावणानुचरो घोरो मारीचो नाम राक्षसः । लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ २२ ॥
सा राममब्रवीद्दृष्ट्वा वैदेही गृह्यतामिति । अयं मनोहरः कान्त आश्रमो नो भविष्यति॥ २३ ॥
ततो रामो धनुष्पाणिर्मृगं तमनुधावति । स तं जघान धावन्तं शरेणानतपर्वणा ॥ २४ ॥
अथ सौम्य दशग्रीवो मृगयां याति राघवे । लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा॥ २५ ॥
जग्राह तरसा सीतां ग्रहः खे रोहिणीमिव । त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् ॥ २६ ॥
प्रगृह्य सहसा सीतां जगामाशु स राक्षसः । ततस्त्वद्भुतसंकाशाः स्थिताः पर्वतमूर्धनि ॥ २७ ॥
सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः । ददृशुर्विस्मिताकारा रावणं राक्षसाधिपम् ॥ २८ ॥
ततैः शीघ्रतरं गत्वा तद्विमानं मनोजवम् । आरुह्य सह वैदेह्या पुष्पकं स महाबलः ॥ २९ ॥

यामः तस्य भागः त्रिपादघटिकान्यूनार्धांशः तेन । अन्यथा अर्धाधिकमुद्गर्तेनेति पूर्वोक्तविरोधः प्रसज्येत ॥ १९ ॥

गो० टी०–महाबला इति । श्लोके तपसो विघ्नकारिण इत्युक्त्या राक्षसहननं तपोविघ्नशान्त्यर्थमिति दर्शितम् ॥ २० ॥

गो० टी०–राक्षसा इत्यर्धम् ॥ २१ ॥

२०] ति० टी०–ननु राक्षसां वधे को हेतुस्तत्राह—पश्चादिति । जनस्थानोपागमानन्तरमित्यर्थः ॥ २० ॥

२१–२२] ति० टी०–कर्णनासे चिच्छेद । ततस्तत्प्रेरितचतुर्दशसहस्रराक्षसां वध इति शेषः । ततः खरादिवधानन्तरम् । तेन लक्ष्मणेन पूर्वमर्दिता सा बाला मूर्खा रावणमुपागमत् ॥ २१ ॥ २२ ॥

रा० टी०–राक्षसानां वधं निमित्तमाह—पश्चादिति । या रामाधरपानस्य चात् याचनकर्त्री शूर्पणखा रामपार्श्वमुपागता ततस्तस्याः कर्णनासे लक्ष्मणश्चिच्छेद ततस्तस्मादेव हेतोस्तेन रामेण अर्दिताः जनस्थानराक्षसा निहता इत्यर्थः ननु तस्याः का गतिरित्यत आह बाला अज्ञा शूर्पणखा तु रावणं समुपागता श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

रा० टी०–रावणेति । मारीचः मृगो भूत्वा वैदेहीं लोभयामास ॥ २२ ॥

गो० टी०–तत इत्यर्धम् । बाला मूर्खा । मूर्खेभर्केपि बालः स्यादित्यमरः ॥ २२ ॥ २३ ॥

२३] ति० टी०–मृगमिति शेषः । दृष्ट्वा राममब्रवीत् । तदेवाह—अयं मृगो गृह्यताम् । गृहीतेनानेनाश्रमो मनोहरो भविष्यति ॥ २३ ॥

रा० टी०–सेति । वैदेही दृष्ट्वा मृगमिति शेषः अयं मृगः नः आश्रमः खेलनाश्रयो भविष्यति अतः गृह्यतामिति राममब्रवीत् ॥ २३ ॥

गो० टी०–अथैनमिति । एनं राममं । गृह्यतां मृगइति शेषः ॥ २४ ॥ २५ ॥

२४–२६] ति० टी०–अनुधावत्यनुधावति स्म॥२४॥२६॥

रा० टी०–तत इति । रामः मृगमनुधावति अन्वधावत् अत एव तं मृगं शरेण जघान ॥ २४ ॥

रा० टी०–अथेति । अथ कपटमृगागमनानंतरं राघवे मृगयां याति सति दशग्रीवः आश्रमं सीताकान्ततेजं प्रविवेश सीतां जग्राह च सार्द्धश्लोक एकान्वयी ॥ २५ ॥

रा० टी०–त्रातुकाममिति । त्रातुकामं सीतारक्षणेच्छुं जटायुषं हत्वा सीतां प्रगृह्य राक्षसो रावणो जगाम ॥२६॥

गो० टी०–अथेति । निष्क्रान्त इति । क्रूरत्वान्निष्क्रान्तिकारणानुक्तिः । अत एवाह कामन्दकः–प्रियं पथ्यं च नथ्यं च वदेद्धर्मार्थमेव च । अश्राव्यमयशस्यं च परोक्षे कर्तु चोत्सृजेदिति ॥ २६ ॥

गो० टी०–जग्राहेति । तरसा बलात्कारेण । ग्रहः अङ्गारक इति यावत् ॥ २७ ॥ २८ ॥

२७] ति० टी०–सहसा बलात्कारेण ॥ २७ ॥

२८] ति० टी०–विस्मिता ददृशुः । ऊर्ध्वावाद्य इति भावः ॥ २८ ॥

रा० टी०–तत इति । सीतां गृहीत्वा गच्छन्तं रावणं पर्वतमूर्द्धनि स्थिताः वानराः ददृशुः सार्द्धश्लोक एकान्वयी ॥ २७ ॥ २८ ॥

गो० टी०–ततस्त्विति सार्धश्लोक एकान्वयः । अद्भुतसंकाशाः अद्भुताकाराः ॥ २९ ॥ ३० ॥

२९] ति० टी०–तत इति । अनेन मार्गे कृष्किन्धापितं गुप्ते देशे आसीत्स्मृतिमात्रेण वा तदुपस्थानं बोध्यम॥२९॥

रा० टी०–तत इति । पुष्पकं विमानमारुह्य लंकां प्रविवेश सार्द्धश्लोक एकान्वयी ॥ २९ ॥

---

१ इदं सार्धपद्यं " चतुर्दश सहस्राणीति पद्यात्पूर्वं गो. पुस्तके दृश्यते । २ मृगं याते इति गो. पा. । ३ इदं पद्यं गो. पु. नास्ति ।

प्रविवेश तदा लङ्कां रावणो राक्षसेश्वरः । तां सुवर्णपरिष्कारे शुभे महति वेश्मनि ॥ ३० ॥
प्रवेश्यै मैथिलीं वाक्यैः सान्त्वयामास रावणः । तृणवद्धापितं तस्य तं च नैर्ऋतपुंगवम् ॥ ३१ ॥
अचिन्तयन्ती वैदेही ह्यशोकवनिकां गता । न्यवर्तत तदा रामो मृगं हत्वा तदा वने ॥ ३२ ॥
निवर्तमानः काकुत्स्थो दृष्ट्वा गृध्रं स विव्यथे । गृध्रं हतं तदा दृष्ट्वा रामः प्रियतरं पितुः ॥ ३३ ॥
मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः । गोदावरीमनुचरन्वनोद्देशांश्च पुष्पितान् ॥ ३४ ॥
आसेदतुर्महारण्ये कबन्धं नाम राक्षसम् । ततः कबन्धवचनाद्रामः सत्यपराक्रमः ॥ ३५ ॥
ऋष्यमूकगिरिं गत्वा सुग्रीवेण समागतः । ततः समागमः पूर्वं प्रीत्या हार्दो व्यजायत ॥ ३६ ॥
भ्रातॉ निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा । इतरेतरसंवादात्प्रगाढः प्रणयस्तयोः ॥ ३७ ॥
रामः स्वबाहुवीर्येण स्वराज्यं प्रत्यपादयत् । वालिनं समरे हत्वा महाकायं महाबलम् ॥ ३८ ॥
सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः । रामाय प्रतिजानीते राजपुत्र्यास्तु मार्गणम् ॥ ३९ ॥
आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना । दश कोट्यः प्लवंगानां सर्वाः प्रस्थापिता दिशः ॥ ४० ॥

३०–३१] ति० टी०–तदा । तत इत्यर्थः । सुवर्णपरिष्कारे सुवर्णप्राकारे ॥ ३० ॥ ३१ ॥

३२–३४] ति०टी–तृणवदचिन्तयन्त्यगणयन्ती ३२॥३४॥

३५] ति० टी०–कबन्धवचनात् । निहतदग्धकबन्धवचनादित्यर्थः ॥ ३५ ॥

रा० टी०–तामिति । सुवर्णः स्वर्णमयः परिष्कारः प्राकारो यस्य तस्मिन् वेश्मनि प्रविश्य रावणो मैथिलीं सान्त्वयामास सान्त्वनानुकूलव्यापारं चकार ॥ ३० ॥

गो०टी०–तामिति । सुवर्णपरिष्कान्ते सुवर्णानुलिप्ते ॥ ३१ ॥

रा० टी०–तृणवदिति । तस्य रावणस्य भाषितं तं रावणं च अचिन्तयन्ती अगणयन्ती वैदेही अशोकवनिकां गतावदिति शेषः ॥ ३१ ॥ ३२ ॥

गो० टी०–तृणवदिति । तस्य रावणस्य भाषितं तृणवत् । मत्वेति शेषः । तं च नैर्ऋतपुङ्गवम् अचिन्तयन्ती वैदेही अशोकवनिकां गता । तत्रैव स्थितेत्यर्थः ॥ ३२ ॥ ३३ ॥

रा०टी०–न्यवर्तत इति । रामो मृगं हत्वा न्यवर्तत निवर्तमानः काकुत्स्थः गृध्रं दृष्ट्वा हतं गृध्रमवलोक्य विव्यथे ॥ ३३ ॥

गो० टी०–निवर्तमान इति । अदृष्ट्वेति छेदः । सीतामिति शेषः सीतां गृध्रं चादृष्ट्वा प्रविव्यथ इत्यन्वयः ॥ ३४ ॥

रा० टी०–गृध्रमिति । गृध्रं हतं दृष्ट्वा वैदेहीं मार्गमाणो रामः गोदावरीमनुचरन् सन् कबन्धं नाम राक्षसमासेदतुः जग्मतुरित्यर्थः श्लोकद्वयमेकान्वयि ॥ ३४ ॥ ३५ ॥

गो० टी०–गृध्रमित्यादिसार्धश्लोक एकान्वयः । ततो वैदेहीं मार्गमाणो राघवः पितुः प्रियसखं हतं गृध्रं दृष्ट्वा गोदावरीं तद्वनोद्देशांश्चान्वचरत् । पुष्पितानित्यनेन पुष्पलोभेन किं सीतात्र गतेति मतिर्व्यज्यते ॥ ३५ ॥

गो० टी०–आसेदतुरित्यर्धमेकं वाक्यम् । राघवाविति शेषः ॥ ३६ ॥ ३७ ॥

३६] ति० टी०–तयोः पूर्वं परस्परसांनिध्यात्पूर्वं रामस्य श्रवणेन सुग्रीवस्य दूरादर्शनेन हार्दः समागमः । मानसं सख्यं जातमित्यर्थः ॥ ३६ ॥

रा० टी०–तत इति । कबन्धवचनात् निहतदग्धकबन्धवाक्यात् ऋष्यमूकगिरिं गत्वा सुग्रीवेण समागमोऽभवदिति शेषः ॥ ३६ ॥

गो० टी०–तयोरिति । तयोः रामसुग्रीवयोः, पूर्वं दर्शनात् प्रागेव, हार्दः समागमः मानसः संबन्धः व्यजायत । मनसा परस्परं सख्यमाचकाङ्क्षातं इत्यर्थः ॥ ३८ ॥

३७–३८] ति० टी०–तत्र हेतुमाह—भ्रात्रेति । अतस्तयोः परस्परसंवादात्प्रगाढः प्रणय आसीत् ॥ ३७ ॥ ३८ ॥

रा० टी०–तत इति । क्रुद्धेन वालिना निरस्तो यस्सुग्रीवस्तेन सह पूर्वं हार्दो दूरतो दर्शनेन मानसः समागमो व्यजायत अनन्तरमितरेतरसंवादात् तयोः रामसुग्रीवयोः प्रगाढः प्रणयः स्नेहः व्यजायत सार्द्धश्लोक एकान्वयी ॥ ३८॥

रा० टी०–राम इति । रामः स्वबाहुवीर्येण स्वराज्यं सुग्रीवाधिपत्यं प्रत्यपादयत् अर्द्धं पृथक् तत्प्रकारमाह—वालिनमिति । वालिनं हत्वा सुग्रीवो राज्ये स्थापितः रामेणेति शेषः ॥ ३९ ॥

गो० टी०–सुग्रीवस्य कृतः सख्यापेक्षेत्यत्र आह–भ्रात्रेति ॥ ३९ ॥

गो० टी०–इतरेतरेति । इतरेतरसंवादात् अन्योन्यप्रयोजनकथनात् प्रणयः प्रगाढः अतिशयितः अभूत् ॥ ४० ॥

गो० टी०–रामस्येति । अत्र सुग्रीव इति शेषः । सुग्रीवः रामस्य बाहुवीर्येण वालिनं हत्वा स्वराज्यम् प्रत्यपादयत समपादयदिति संबन्धः ॥ ४१ ॥

३९.] ति० टी०–रामायेति । अत्र क्रमो न विवक्षितः ३९

४०] ति० टी०–आदिष्टा नियुक्ताः ॥ ४० ॥

---

१ प्रविश्येति गो. पा. । २ अन्वचरादिति गो. पा. । ३ तयोरिति गो. पा. । ४ भ्रात्रेति गो. रा. पा. ।

तेषां नो विप्रनष्टानां विन्ध्ये पर्वतसत्तमे । भृशं शोकाभितप्तानां महान्कालोऽत्यवर्तत ॥ ४१ ॥
भ्राता तु गृध्रराजस्य संपातिर्नाम वीर्यवान् । समाख्याति स्म वसतीं सीतां रावणमन्दिरे ॥ ४२ ॥
सोऽहं दुःखपरीतानां दुखं तज्ज्ञातिनां नुदन् । आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ॥
तत्राहमेकामद्राक्षमशोकवनिकां गताम् ॥ ॥ ४३ ॥
कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम् । तया समेत्य विधिवत्पृष्ट्वा सर्वमनिन्दिताम् ॥ ४४ ॥
अभिज्ञानं मया दत्तं रामनामाङ्कुलीयकम् । अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः ॥ ४५ ॥
मया च पुनरागम्य रामस्याक्लिष्टकर्मणः । अभिज्ञानं मया दत्तमर्चिष्मान्स महामणिः ॥ ४६ ॥
श्रुत्वा तां मैथिलीं रामस्त्वाशशंसे च जीवितम् । जीवितान्तमनुप्राप्तः पीत्वामृतमिवातुरः ॥ ४७ ॥
उद्योजयिष्यन्नुद्योगं दध्रे लङ्कावधे मनः । जिघांसुरिव लोकान्ते सर्वाँल्लोकान्विभावसुः ॥ ४८ ॥
ततः समुद्रमासाद्य नलं सेतुमकारयत् । अतरत्कपिवीराणां वाहिनी तेन सेतुना ॥ ४९ ॥
प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः । लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम् ॥ ५० ॥
स शक्रेण समागम्य यमेन वरुणेन च । महेश्वरस्वयंभूभ्यां तथा दशरथेन च ॥ ५१ ॥
तैश्च दत्तवरः श्रीमान्ऋषिभिश्च समागतैः । सुरर्षिभिश्च काकुत्स्थो वरँल्लिप्सुः परंतपः ॥ ५२ ॥
स तु दत्तवरः प्रीत्या वानरैश्च समागतः । पुष्पकेण विमानेन किष्किन्धामभ्युपागमत् ॥ ५३ ॥

रा० टी०–रामायेति । सुग्रीवश्च राजपुत्र्यास्सीताया मार्गणमन्वेषणं प्रतिजानीते अत एव सुग्रीवेणादिष्टाः प्रवङ्गानां दश कोट्यः दिशः प्रस्थापिताः साद्धश्लोक एकान्वयी ॥ ४० ॥४१॥

गो० टी०–सुग्रीव इति । राज्ये स्थापितः सुग्रीवः सर्ववानरैः सहितोऽभूत् ॥ ४२ ॥

गो० टी०–रामायेति । सुग्रीव इति शेषः । प्रतिजानीते प्रतिज्ञातवान् ॥ ४३ ॥

गो० टी०–आदिष्टा इति । आदिष्टाः मार्गणायादिष्टाः, दिशः प्रस्थापिताश्च ॥ ४४ ॥

४१–४२] ति० टी०–विप्रनष्टानां बिलप्रवेशानन्तरं निर्गममार्गमजानताम् । 'विप्रकृष्टानाम्' इति पाठेऽतीतकालानामित्यर्थः ॥ ४१ ॥ ४२ ॥

रा०टी०–तेषामिति। तेषां मध्ये विन्ध्यपर्वतसत्तमे विप्रनष्टानां बिलप्रवेशादज्ञातमार्गाणामस्माकं महान् कालोऽत्यवर्तत४२

रा० टी०–भ्रातेति । गृध्रराजस्य जटायुषस्सम्पातिर्नाम भ्राता रावणमन्दिरे वसन्तीं सीतां समाख्याति स्म ॥ ४३ ॥

गो० टी०–तेषामिति । तेषां स्थापितानाम्, विप्रकृष्टानाम् बहुकालविलम्बितानाम् । यद्वा स्वयंप्रभाबिले प्रविष्टतया दूरं गतानाम् ॥ ४५ ॥ ४६ ॥

४३-४४]ति०टी०-ज्ञातिनामित्यत्र दीर्घाभाव आर्षः४३-४४

रा० टी०–स इति । तद्ज्ञातिनां सम्पातिवचनेन सीतास्थितिज्ञानवतां दुःखमतिदुर्गमलङ्कायां सीतायाः स्थितात्वेन सीतादर्शनाशक्यज्ञानजनितखेदम् नुदन्नहं योजनानां शतं प्लुतोऽभवमिति शेषः एतेन ज्ञातिनामित्यत्र दीर्घाभाव आर्ष इति भट्टाद्युक्तिश्चिन्त्या ॥ ४४ ॥

रा० टी०–तत्रेति । तत्र अशोकवनिकां गताम् । एकां सीतामहमद्राक्षम् ॥ ४५ ॥

गो० टी०–सोऽहमिति । ज्ञातिनामिति नकारान्तत्वमार्षम् । प्लुतः समुद्र इति शेषः ॥ ४७ ॥

गो० टी०–तत्राहमिति । तत्र रावणालये ॥ ४८ ॥

रा० टी०–तयेति । तया सीतया सह समेत्य स्थित्वा अनिन्दितां सीतां विधिवत्पृष्ट्वा रामस्य नाम यस्मिन् तत् अङ्गुलीयकमभिज्ञानं मया दत्तम् ॥ ४६ ॥

गो० टी०–तयेति । अनिन्दितां सीताम् सर्वं वृत्तान्तं पृष्ट्वा । प्रच्छिर्द्विकर्मकः । पृष्ट्वा स्थिताय मे मह्यम्, सः प्रसिद्धः महामणिः अभिज्ञानं दत्तम् ॥ ४९ ॥

४५–४७] ति० टी०–मणिम् । सीतासकाशाच्चूडामणिं लब्ध्वेत्यर्थः ॥ ४५ ॥ ४७ ॥

रा० टी०–अभिज्ञानमिति। मणिमभिज्ञानं लब्ध्वा चरितार्थः सिद्धप्रयोजनोऽहमागतः अद्धं पृथक् मयेति रामस्य समीपे मया शीघ्रगत्या मया पुनरागम्य महामणिरभिज्ञानं दत्तम्॥४७॥

गो० टी०–अभिज्ञानमित्यर्धम् ॥ ५० ॥

गो०टी०-मया चेति। क्रियाभेदान्मयाशब्दद्वयं प्रयुक्तम्५१

रा० टी०–श्रुत्वेति । जीवितान्तमद्यप्राप्तो रामो मैथिलीं श्रुत्वा जीवितं जीवनमाशशंसे ॥ ४८ ॥

गो० टी०–श्रुत्वेति । जीवितमाशशंसे, ततः पूर्वं जीविते निराशः स्थित इति व्यक्तम् । जीवितान्तं प्राप्तः, आतुरः अमृतं पीत्वा यथा जिवीतमाशास्ते तथेत्यर्थः ॥ ५२ ॥

४८–५३] ति० टी०–उद्युज्यते जयोऽनेनेत्युद्योगं बलं तद्योजयिष्यन्प्रोत्साहयिष्यन् ॥ ४८ ॥ ५३ ॥

---

१ कृष्णानामिति गो. पी. २ च मे दत्तमर्चिष्मान्स महामणिरिति गो. पा. । ३ कामामिति गो. पा. ।

तौ गङ्गां पुनरासाद्य वसन्तं मुनिसंनिधौ । अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ॥ ५४ ॥
ततः सौ वाक्यैर्मधुरैर्हनूमतो निशम्य हृष्टो भरतः कृताञ्जलिः ।
उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णः खलु मे मनोरथः ॥ ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे षड्विंशत्यधिकशततमः सर्गः ॥ १२६ ॥

सप्तविंशत्यधिकशततमः सर्गः ॥

ततः परां काष्ठां मुदो वहन्भरतः शत्रुघ्नद्वारा नगरं स्वलंकार्य मन्त्रिभिश्चतुरंगसेनया वोपेतः यानारूढकौसल्यादिमातृः पुरस्कृत्य निष्क्रम्य विमानस्थमेव रामं यदा ववन्दे तदा रामादिष्टं विमानं भूमाववातरत् भरतस्तदारुह्य पुनस्तं च सीतां प्रणम्य सुग्रीवादीन् परिषस्वजे रामस्तु कौसल्यादिमातॄरभिवाद्य पौराञ्जानपदांश्च सादरं पश्यन् भवद्राज्यं प्रतिगृह्णीति भरतेन पार्थितस्तेन योजितपादुकः सपरिवारस्तेनैव पुष्पकेण भरताश्रममुपगम्य तद्विमानं कुबेराय प्राहिणोत् ।

श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः । हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा ॥ १ ॥
दैवतानि च सर्वाणि चैत्यानि नगरस्य च । सुगन्धमाल्यैर्वार्दिव्यैरर्चन्तु शुचयो नराः ॥ २ ॥

५४] ति० टी०—मुनिसंनिधावद्य वसन्तं त्वां द्रष्टुमर्हसि । आश्विनशुक्लचतुर्दश्यामश्विनी तद्भवे इति षष्ठ्यां पुष्यस्य संभवः । पूर्णिमायामश्विन्यामप्येकर्क्षत्वेन वा ॥ ५४ ॥

रा० टी०—उद्योजयिष्यन्निति । उद्योगमुद्योजयिष्यन् कुर्वन् रामः लंकावधे मनो दधे तत्र दृष्टान्तः लोकान्ते भुवननाशसमये विभावसुरिव ॥ ४९ ॥

गो० टी०—उद्योजयिष्यन्निति । उद्योगमुद्योजयिष्यन् उद्योगं कुर्वन् । ओदनपाकं पचतीतिवत् । विभावसुः अग्निः ॥ ५३ ॥

रा० टी०—तत इति । ततः समुद्रमासाद्य नलसेतुमकारयत् तेन सेतुना कपिवीराणां वाहिनी अतरत् ॥ ५० ॥

गो० टी०—तत इति । नलं सेतुमकारयत् नलेन सेतुमकारयत् ॥ ५८ ॥

रा० टी०—प्रहस्तमिति । रामो रावणमवधीत् ॥ ५१ ॥

रा० टी०—स इति । स रामः शक्रादिभिस्समागम्य तैर्दत्तवरस्तान् वरान् स्वेप्सितान् लेभे अर्द्धचतुष्टयमेकान्वयि ॥ ५२ ॥ ५३ ॥

रा० टी०—स इति । दत्तवरः प्रापितविभीषणादिमनोरथस्स रामः वानरैस्समागतस्तान् किष्किन्धामभ्युपागमत् ॥ ५४ ॥

रा० टी०—तामिति । गंगां पुनरासाद्य मुनिसन्निधौ भरद्वाजसमीपे वसन्तं रामं श्वः पुष्ययोगेण अविघ्नं यथा भवति तथा द्रष्टुमर्हसि ॥ ५९ ॥

गो० टी०—तामिति । पुनर्गङ्गामासाद्य मुनिसन्निधौ भरद्वाजसमीपे, अद्य वसन्तं तम् अविघ्नं यथा भवति तथा श्वः पुष्ययोगेन द्रष्टुमर्हसि । पुष्ययोगलाभार्थम् अद्य गङ्गातीरे रामः स्थित इति भावः ॥ ५९ ॥

५५] ति० टी०—कृताञ्जलिः । रामं स्मृत्वेति शेषः । मे मनोरथः पूर्णः खल्वित्युवाच ॥ ५५ ॥

इति श्रीराजाधिराजे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे षड्विंशत्यधिकशततमः सर्गः ॥ १२६ ॥

रा० टी०—तत इति । हनुमतो मधुरैः वाक्यैः निशम्य रामवृत्तान्तं श्रुत्वा हृष्टो भरतः मे मनोरथः पूर्णः इति मनसः प्रहर्षिणीं वाणीमुवाच ॥ ५६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे अष्टाविंशत्यधिकशततमः सर्गः ॥ १२८ ॥

गो० टी०—तत इति । सत्यम् अविरुद्धभङ्ग्या सत्यत्वेन ज्ञातम् । मनोरथ इत्यनन्तरमिति शेषः द्रष्टव्यम् ॥ ६० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥

१] ति० टी०—परमानन्दम् । परकरं वच इति शेषः ॥ १ ॥

रा० टी०—हनुमद्वचनश्रवणानन्तरकालिकं वृत्तान्तमाह—श्रुत्वेत्यादिभिः । भरतः परमः भानंदो यस्मात् तद्वचनं श्रुत्वा हृष्टं शत्रुघ्नमाज्ञापयामास ॥ १ ॥

गो० टी०—श्रुत्वेत्यादि ॥ परमानन्दम् परमानन्दकरम् । वच इति शेषः ॥ १ ॥

२] ति० टी०—दैवतानि कुलदेवतानि । नगरस्य चैत्यानि साधारणदेवतायतनानि । अर्चन्त्वर्चयन्तु ॥ २ ॥

रा० टी०—तदाकारमाह—दैवतानीत्यादिभिः । दैवतानि कुलदेवान् नगरस्य चैत्यानि देवालयानि शुचयो नराः अर्चन्तु पूजयन्तु ॥ २ ॥

गो० टी०—दैवतानीति । चैत्यानि चतुष्पथमण्डपान् अर्चन्तु अर्चयन्तु ॥ २ ॥

१ तमिति गो. पा. । २ त्वं सत्यं हनुमद्वचो महदिति गो. पा. ।

सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा । सर्वे वादित्रकुशला गणिकाश्चैव सर्वशः ॥ ३ ॥
राजदारास्तथामात्याः सैन्याः सेनाङ्गनागणाः । ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः॥ ४ ॥
अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम् । भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा ॥ ५ ॥
विष्टीरनेकसाहस्रीश्चोदयामास भाँगशः । समीकुरुत निम्नानि विषमाणि समानि च ॥ ६ ॥
स्थानानि च निरस्यन्तां नन्दिग्रामादितः परम् । सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा ॥ ७ ॥
ततोऽभ्यवकिरन्त्वन्ये लाजैः पुष्पैश्च सर्वतः । समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ॥ ८ ॥
शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति । सग्दाममुक्तपुष्पैश्च सुवर्णैः पञ्चवर्णकैः ॥ ९ ॥
राजमार्गमसंबाधं किरन्तु शतशो नराः । ततस्तच्छासनं श्रुत्वा शत्रुघ्नस्य मुदान्विताः ॥ १० ॥
धृष्टिर्जयन्तो विजयः सिद्धार्थश्चार्थसाधकः । अशोको मन्त्रपालश्च सुमन्त्रश्चापि निर्ययुः ॥ ११ ॥
मत्तैर्नागसहस्रैश्च संध्वजैः सुविभूषितैः । अपरे हेमकक्षाभिः सगजाभिः करेणुभिः ॥ १२ ॥
निर्ययुस्तुरगाकान्ता रथैश्च सुमहारथाः । शक्त्यृष्टिपाशहस्तानां सध्वजानां पताकिनाम्॥ १३ ॥
तुरगाणां सहस्रैश्च मुख्यैर्मुख्यतरान्वितैः । पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ १४ ॥
ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः । कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥ १५ ॥
[कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् ।]

३] ति० टी०–स्तुतिपुराणज्ञा इति सूतलक्षणरूपं सूत-विशेषणम् । वैतालिका वंशावलीकीर्तकाः ॥ ३ ॥

४–५] ति० टी०–राजदारा मातरः । सैन्या राज-भवनाद्बहिर्वसन्तोऽभ्यन्तराः । सेनागणा आटविकान्तसेना-भेदास्तथाङ्गनागणाः श्रेणी नानाजातीयसङ्घः ॥ ४ ॥ ५ ॥

६] ति० टी०–विष्टीर्भृतिकरान् । भागशो विभज्येति शेषः । विषमाणि स्थलान्यत्युन्नतदेशाः समानि च स्थानानि निरस्य-न्तामयं भेदो निराक्रियताम् । सर्वं समं क्रियतामिति यावत्॥६॥

७] ति० टी०–इतो नन्दिग्रामात्परं यावदयोध्याम् । तावत एव गन्तव्यदेशत्वादिति भावः ॥ ७ ॥

८] ति० टी०–समुच्छ्रितपताका रथ्याः कर्म ॥ ८ ॥

९–१०] ति०टी०–सूर्यस्योदयनं प्रति । श्वः सूर्योदयकाले यथा सर्वं सज्जं भवति तथा कुरुतेत्यर्थः । विरलपुष्पबन्धाः स्रजः निबिडपुष्पबन्धं दाम । मुक्तपुष्पाणि बन्धरहितानि पुष्पाणि । पुष्पविशेषणम्—सुवर्णैरिति । पञ्चवर्णकैः पञ्च-वर्णकल्पितैरलंकारैः ॥ ९ ॥ १० ॥

११–१५] ति० टी०–वृद्धादयोऽष्टमन्त्रिणो निर्ययुः । उदयात्पूर्वं यथोक्तराजमार्गसत्कारं कृत्वा प्रतिनिर्ययुरि-त्यर्थः ॥ ११ ॥ १५ ॥

रा० टी०–सूता इति । रामस्य शशिनिभं मुखं द्रष्टुं सूतादयोऽभिनिर्यान्तु तत्र वैतालिकाः वंशावलीवक्तारः राज-दाराः कौशल्याप्रभृतयः सेनाङ्गनानां गणास्समूहाः श्रेणी अनेकजातीनां संघः सार्द्धश्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–सूता इत्यादिसार्धश्लोक एकान्वयः । सूताः स्तुतिशीलाः । वैतालिकाः बन्दिनः ॥ ३ ॥

रा० टी०–भरतस्येति । शत्रुघ्नः अनेकसाहस्रीर्विष्टीः भृतिकरान् चोदयामास ॥ ५ ॥

रा० टी०–चोदनप्रकारमाह—समीत्यादिभिः । इतः अयोध्यायाः परं नन्दियामात् नन्दिग्रामपर्यन्तं निम्नानि अत्यधोदेशाः विषमाणि उन्नतनिम्नविशिष्टानि समानि सर्वाणि स्थलानि समीकुरुत एकाकारतया रचयत स्थानानि मार्ग-मध्यवर्तिदेवायतनानि तु निरस्यन्तां त्यज्यन्तां तानि यथापूर्वमेव तिष्ठन्त्वित्यर्थः हिमशीतेन वारिणा पृथिवीं सिञ्च-न्तु च सार्द्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

रा० टी०–तत इति । अन्ये लाजादिभिरभ्यवकिरन्तु समुच्छ्रिताः याः पताकास्ताः रथ्याः मार्गः सगजादिभिरुपल-क्षितानि वेश्मानि अनेकविधभवनानि च सूर्योदयनं प्रति पुरवरोत्तमे पुरवरेभ्यः वाराणस्यादिभ्योऽप्युत्तममयोध्यापुरं शो-भयन्तु श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

गो० टी०–भरतस्येत्यादिश्लोकपञ्चकमेकान्वयम् । विष्टीः भृतिं विना कर्मकरान् । नन्दिग्रामादितः परम् । अयोध्यापर्यन्तमित्यर्थः अन्ये पुरुषाः हिमवच्छीतेन वारिणा सिञ्चन्तु । ततः सेचनानन्तरम्, लाजादिभिः किरन्तु । रथ्याः समुच्छ्रितपताकाः, कुर्वन्त्विति शेषः । सूर्योदयनं प्रति सूर्योदयमारभ्य । यावत्सूर्योदयमिति वा । स्रजः मालिकाः तासां दामभिः पट्टिभिः, मुक्तपुष्पैः अमूलबद्धपञ्चवर्णादि-भिश्च वेश्मानि शोभयन्तु । सुगन्धैः पञ्चवर्णकैः पञ्चविधवर्ण-

---

१ सङ्घश इति गो. पा. । २ इदं पदं गो पु. राजमार्गमसंबाधमित्यर्धान्तरं दृश्यते । ३ वीर्यवानिति गो. पा. । ४ रथूकानीति गो. पा. । ५ सर्वश इति गो.पा. । ६ पताकास्विति रा.पा. । ७ सुगन्धैरिति गो.पा. । ८ इदमर्धं गो.पु.नास्ति । ९ शतकुम्भविभूषितैरिति गो.पा. । १० इदमर्धमधिकं गो.पु.।

द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः । माल्यमोदकहस्तैश्च मन्त्रिभिर्भरतो वृतः ॥ १६ ॥
शङ्खभेरीनिनादैश्च वन्दिभिश्चाभिनन्दितः । आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ॥ १७ ॥
पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम् । शुक्ले च वालव्यजने राजार्हे हेमभूषिते ॥ १८ ॥
उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः । भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः ॥ १९ ॥
प्रत्युद्ययौ तदा रामं महात्मा सचिवैः सह । अश्वानां खुरशब्दैश्च रथनेमिस्वनेन च ॥ २० ॥
शङ्खदुन्दुभिनादेन संचचालेव मेदिनी । गजौघानां बृंहितैश्चापि शङ्खदुन्दुभिनिःस्वनैः ॥ २१ ॥
कृत्स्नं तु नगरं तत्तु नन्दिग्राममुपागमत् । समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम् ॥ २२ ॥

द्रव्यचूर्णैः, राजमार्गं किरन्तु । राजमार्गं वर्णद्रव्यचूर्णैः नानाविधलतापद्मादिचित्ररेखाः कुर्वन्त्वित्यर्थः ॥ ८ ॥

रा० टी०-राजेति । शतशो नराः राजमार्गमसम्बाधं कर्तुमिति शेषः किरन्तु तिष्ठन्तु अर्द्धं पृथक् ॥ तत इति । शङ्खघ्नस्य शासनं श्रुत्वा धृष्टिप्रभृतयो नागसहस्रैर्निर्ययुः अर्द्धचतुष्टयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०-अथ परेद्युः प्रातः रामभक्त्यतिशयेन सर्वेषां निर्गमनं दर्शयति-राजदारा इत्यादिना । श्रेणीमुख्याः श्रेणीमुखाः तथा गणाः । श्रेणी श्रेणय इति यावत् । अत्र श्लोके निर्ययुरिति वक्ष्यमाणमनुषज्यते ॥ ९ ॥

गो० टी०-अमात्यान्विशिष्य दर्शयति-धृष्टिरित्यादिना । सार्धश्लोक एकान्वयः । अत्र धृष्ट्यादयो गजारूढा ययुरित्यर्थः ॥ १० ॥ ११ ॥

रा० टी०-अपर इति । अपरे नगजाभिः गजसहिताभिः करेणुभिर्निर्ययुः तुरगाः आक्रान्ता यैस्ते रथाः रथैर्निर्ययुः ॥ १२ ॥

गो० टी०-अपर इति । अपरे राजान्तरङ्गाः पुरुषाः करेणुभिर्निर्ययुः ॥ १२ ॥

रा० टी०-शक्तीति । शक्त्यादिपूर्णहस्तानां सध्वजानां पताकिनां च जनानां सहस्रैः मुख्यतरान्वितैर्मुख्यैः तुरगाणां सहस्रैश्च पदातीनां सहस्रैश्च परिवृता वीरा ययुः सार्द्धश्लोक एकान्वयी ॥ १३ ॥ १४ ॥

गो० टी०-शक्तीत्यादिसार्धश्लोक एकान्वयः । उक्तविशेषणानां तुरगाणां सहस्रैः पदातीनां सहस्रैश्च परिवृता वीरा ययुः ॥ १३ ॥

रा० टी०-तत इति । यानान्युपारूढाः दशरथस्त्रियः कौशल्यां सुमित्रां च प्रमुखे अग्रे कृत्वा निर्ययुः ॥ १५ ॥

गो० टी०-तत इति । प्रमुखे अग्रे ॥ १४ ॥

१६] ति० टी०-नैगमा वणिजः । 'वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्' इत्यमरः ॥ १६ ॥

१७-१८] ति०टी०-आर्यपादौ श्रीरामपादुके॥१७-१८॥

१९-२२] ति० टी०-उपवासकृश इत्यनेन रामादेरपि किंचित्कालमुपवासोऽनुमेयः । तत्पूर्वमागमनश्रवणपूर्वकम् ॥ १९ ॥ २२ ॥

रा० टी०-द्विजातीति । द्विजातिमुख्यैर्ब्राह्मणैः श्रेणीषु नगरवासिसमूहेषु मुख्यैर्नैगमैः वणिग्भिश्च माल्यमोदकहस्तैः माल्यमोदकविशिष्टहस्तविशिष्टैर्मन्त्रिभिर्वैदिकब्राह्मणैश्च वृतः शंखभेरीनिनादैः वन्दिभिश्च अभिनन्दितो भरतः आर्यपादौ रामपादुके शिरसा गृहीत्वा शुक्लमाल्योपशोभितं छत्रं वालव्यजने चादाय सचिवैस्सह रामं प्रत्युद्ययौ सार्द्धश्लोकचतुष्टयमेकान्वयि ॥ १६-१९ ॥

गो०टी०-कैकेय्येति । अत्र भरतेनोपक्षयानाहृतत्वात् पश्चान्निर्गत्य कैकेय्या नन्दिग्रामप्राप्तिकाले साहित्यमुच्यते ॥ १९ ॥

रा० टी०-अश्वानामिति । अश्वानां खुरशब्दादिभिर्मेदिनी संचचालेव ॥ २० ॥

गो० टी०-कृत्स्नमित्यर्धम् । अत्र नगरशब्देन तत्रत्यजना लक्ष्यन्ते ॥ १६ ॥

रा० टी०-गजानामिति । गजानां बृंहितादिभिस्सह कृत्स्नं नगरं तत्स्थजनो नन्दिग्राममुपागमत् ॥ २१ ॥

गो० टी०-अश्वानामिति । संचचाल कम्पितेव ॥१७॥

गो० टी०-अथोक्तपरिवारैः सह भरतस्य नन्दिग्रामान्निर्गमं दर्शयति-द्विजातिमुख्यैरित्यादिभिः सार्धैश्चतुर्भिः श्लोकैः । ततो महात्मा भरतः सर्वैर्वृतः प्रत्युद्ययाविति वाक्यार्थः । सनैगमैः सवणिग्भिः । 'वैदेहकः सार्थवाहो नैगमो वाणिजो वणिगित्यमरः' । मन्त्रिभिः वसिष्ठादिभिः । सचिवैः सुमन्त्रादिभिः । आर्यपादौ रामपादुके । हेमभूषिते हेमदण्डभूषिते । तत्पूर्वं श्रवणादिहर्षमागतः । श्रवणात्पूर्वं तु नास्य हर्षोऽभूदित्यर्थः ॥ १८-२१ ॥

रा० टी०-समीक्ष्येति । भरतः पवनात्मज समीक्ष्येत्युवाच अर्द्धं पृथक् ॥ २२ ॥

गो० टी०-समीक्ष्येत्यर्धम् । समीक्ष्य समन्ताद्रामागमनं निरीक्ष्य ॥ २२ ॥

---

१ इदं सार्धपद्यं द्विजातिमुख्यैर्धर्मात्मेतिपद्यात्पूर्वमेव गो.पुस्तके पठितम् तत्रापि कृत्स्नं तु नगरमित्यर्धमेवादौ दृश्यते । २ इदमर्धं गो.पुस्तके नास्ति ।

कच्चिन्न खलु कापेयी सेव्यते चलचित्तता । नहि पश्यामि काकुत्स्थं राममार्यं परंतपम् ॥ २३ ॥
कच्चिन्न चानुदृश्यन्ते कपयः कामरूपिणः । अथैवमुक्ते वचने हनूमानिदमब्रवीत् ॥ २४ ॥
अर्थ्यं विज्ञापयन्नेव भरतं सत्यविक्रमम् । सदाफलान्कुसुमितान्वृक्षान्प्राप्य मधुस्रवान् ॥ २५ ॥
भरद्वाजप्रसादेन मत्तभ्रमरनादिनान् । तस्य चैव वरो दत्तो वासवेन परंतप ॥ २६ ॥
ससैन्यस्य तदातिथ्यं कृतं सर्वगुणान्वितम् । निःस्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम् ॥२७॥
मन्ये वानरसेना सा नदीं तरति गोमतीम् । रजोवर्षं समुद्भूतं पश्य सालवनं प्रति ॥ २८ ॥
मन्ये सालवनं रम्यं लोलयन्ति प्लवंगमाः । तदेतद्दृश्यते दूराद्विमानं चन्द्रसन्निभम् ॥ २९ ॥
विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम् । रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना ॥ ३० ॥

२३-२४] ति० टी०-यावत्र दूरं यातोऽस्मि । क्षिप्रमागन्तुमर्हसीति हनूमन्तं प्रति रामोक्तभरते सर्वां कथामुक्त्वा पुना रामसमीपं गत्वा रामं प्रति भरतवृत्तान्तं निवेद्य पुनर्नन्दिग्रामं प्रति रामाज्ञया गते एतद्वरतवचस्तं प्रतीति बोध्यम् । कापेयी कपिस्वभावप्रयुक्ता चलचित्तता न सेव्यते नानुष्ठीयते कचित् । मिथ्या नोच्यते कचिदित्यर्थः । कुत एवं शङ्का तत्राह—नहीति ॥ २३ ॥ २४ ॥

रा० टी०-तदाकारमाह—कच्चिदिति । रामं न पश्यामि कपयोपि नानुदृश्यन्ते अतः कापेयी कपिजातिषु दृश्यमाना चलचित्तता तु कचिन्न सेव्यते भवन्तमिति शेषः एतेन चांचल्यवशादेव रामागमनं त्वयोक्तमिति प्रतीयते इति सूचितम् साईश्लोक एकान्वयी ॥ २३ ॥

गो० टी०-कच्चिदित्यादिसार्धश्लोक एकान्वयः । कच्चिदिति प्रश्ने । सेव्यते । त्वयेति शेषः । तत्र हेतुमाह—नहीति । रामस्य दूरागमनेऽपि नासीरचारिणः कपयो दृश्येरन्, तेषां कामरूपित्वेन स्वरूपेणादर्शनेऽपि रूपान्तरेण वा दृश्येरन् । तदपि नास्तीत्यर्थः ॥ २३ ॥

रा० टी०-अथेति । एवमुक्ते सति अर्थ्यमर्थादनपेतं सत्यमित्यर्थः विज्ञापयन् सन् हनुमान् भरतमब्रवीत् ॥ २४ ॥

गो० टी०-अथेति । अर्थं विलम्बहेतुम् । 'अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिष्वि'ति वैजयन्ती ॥ २४ ॥

२५] ति० टी०-एवं मिथ्यावादित्वशङ्कायां तन्निवृत्तयेऽर्थ्यमर्थादनपेतं विज्ञापयन्निदमब्रवीत् । सदाफलत्वादिविशिष्टान्वृक्षान्प्राप्य प्रहृष्टानां वनौकसां भूमौ निःस्वनः श्रूयते, अतस्त्वं प्रयाहीति शेषः ॥ २५ ॥

२६] ति० टी०-वृक्षाणां तथाविधत्वं कुतस्तत्राह—भरद्वाजप्रसादेनेति । तेनापि कथमेवं शक्यं तत्राह—तस्य चेति । भरद्वाजस्य चेत्यर्थः । वासवेनेति । तत्तपःप्रसादितेनेत्यर्थः ॥ २६ ॥

२७] ति० टी०-यदेवमतः ससैन्यस्य तव रामस्य च भरद्वाजेन सर्वगुणान्वितमातिथ्यं कृतम् ॥ २७ ॥

रा० टी०-तदाकारमाह—सदेत्यादिभिः । भरद्वाजप्रसादेन सदाफलान् मधुस्रवान् द्रुमान् प्राप्य प्रहृष्टानां वनौकसां निःस्वनः श्रूयते ननु भरद्वाजे कथमेवं शक्तिरित्यत आह वासवेन एषः सर्वसामर्थ्यसम्पादकशक्तिविशेषः दत्तः अत एव तदा भवद्गमनसमये ससैन्यस्य तवातिथ्यं कृतं साईश्लोकद्वयमेकान्वयि ॥ २५-२७ ॥

गो० टी०-सदेति । भरद्वाजप्रसादेन सदाफलानिति-संबन्धः । पाप्य वानराः हृष्यन्तीति च शेषः ॥ २५ ॥

गो० टी०-तस्य चेति । ससैन्यस्य रामस्य वासवेन एष वरो दत्तः अकालफलित्ववरो दत्तः, तथा सर्वगुणान्वितम् आतिथ्यं मधुस्रवत्वरूपं भरद्वाजेन कृतम्, अतोऽकालफलित्वं मधुस्रवत्वं च वनस्य युक्तमित्यर्थः ॥ २६ ॥

गो० टी०-एवं विलम्बहेतुमुक्त्वा समीपागमनचिह्नं दर्शयति—निःस्वन इति । इदानीं वानरसेना गोमतीं नदीं तरतीति मन्ये । यस्मात् भीमो निःस्वन इति भावः ॥ २७ ॥

२८] ति० टी०-यतो ध्वनिः श्रूयते, अतः सा सेना गोमतीं तरतीति मन्ये । 'वालुकीम्' इति पाठान्तरम् । क्षणानन्तरमाह—रजोवर्षमिति ॥ २८ ॥

रा० टी०-मन्ये इति । वानरसेना गोमतीं तरति इत्यहं मन्ये तत्र गमकमाह सालवनं प्रति समुद्भूतं रजोवर्षं पश्य एतेन इदं रजो वानराणामेवेति सूचितम् ॥ २८ ॥

गो० टी०-ततोऽपि सन्निकर्षमाह—रज इति । समुद्भूतं रजोवर्षं पश्य । तस्माद्वालुकिनीं[1] नदीं प्रति यातीति मन्ये ॥ २८ ॥

गो० टी०-क्षिप्रं वानरसेनाया अनागमने हेतुमाह—मन्य इति । तस्मात्तस्याः विलम्बः ॥ २९ ॥

२९] ति० टी०-क्षणोत्तरमाह—तदेतदिति ॥ २९ ॥

३०] ति० टी०-मनसा ब्रह्मनिर्मितम् । ब्रह्मणा सृष्टत्वसाम्याद्विश्वकर्मणा निर्मितम् ॥ ३० ॥

रा० टी०-मन्ये इति । सालवनं प्लवङ्गमाः लोलयन्तीत्यहं मन्ये तदेतद्विमानमपि चन्द्रसन्निभं दृश्यते ॥ २९ ॥

१ वालुकिनीमिति गो. पा. ।

तरुणादित्यसंकाशं विमानं रामवाहनम् । धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ॥ ३१ ॥
एतस्मिन्भ्रातरौ वीरौ वैदेह्या सह राघवौ । सुग्रीवश्च महातेजा राक्षसश्च विभीषणः ॥ ३२ ॥
ततो हर्षसमुद्भूतो निःस्वनो दिवमस्पृशत् । स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते ॥ ३३ ॥
रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः । ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे ॥ ३४ ॥
प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः । यथार्थेनार्घ्यपाद्याद्यैस्ततो राममपूजयत् ॥ ३५ ॥
मनसा ब्रह्मणा सृष्टं विमाने भरताग्रजः । रराज पृथुदीर्घाक्षो वज्रपाणिरिवामरैः ॥ ३६ ॥
ततो विमानाग्रगतं भरतो भ्रातरं तदा । ववन्दे प्रणतो रामं मेरुस्थमिव भास्करम् ॥ ३७ ॥
ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् । हंसयुक्तं महावेगं निपपात महीतलम् ॥ ३८ ॥
आरोपितो विमानं तद्भरतः सत्यविक्रमः । राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ३९ ॥
तं समुत्थाय काकुत्स्थश्चिरस्याक्षिपथं गतम् । अङ्कं भरतमारोप्य मुदितः परिषस्वजे ॥ ४० ॥
ततो लक्ष्मणमासाद्य वैदेहीं च परंतपः । अथाभ्यवादयद्भीतो भरतो नाम चाब्रवीत् ॥ ४१ ॥
सुग्रीवं केकयीपुत्रो जाम्बवन्तमथाङ्गदम् । मैन्दं च द्विविदं नीलमृषभं चैव सस्वजे ॥ ४२ ॥
सुषेणं च नलं चैव गवाक्षं गन्धमादनम् । शरभं पनसं चैव परिवारः परिषस्वजे ॥ ४३ ॥
ते कृत्वा मानुषं रूपं वानराः कामरूपिणः । कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा ॥ ४४ ॥
अथाब्रवीद्राजपुत्रः सुग्रीवं वानरर्षभम् । परिष्वज्य महातेजा भरतो धर्मिणां वरः ॥ ४५ ॥

रा० टी०—ननु विमानं कुतो लब्धमित्यत आह—विमानमिति । रावणं हत्वा विमानं महात्मना रामेण लब्धम् ३०

गो० टी०—विमानं तु दृश्यत इत्याह—तदेतदिति । पुष्पकं विमानं पुष्पकाख्यं विमानम् ॥ ३० ॥ ३१ ॥

३१] ति० टी०—एतद्दिव्यं मनोजवं विमानं प्रसादेन ब्रह्मणः प्रसादेन धनदस्य भवतीति शेषः । 'परेण तपसा लेभे यत्कुबेरः पितामहात्' इति सुन्दरकाण्डोक्तेः ॥ ३१ ॥

रा० टी०—विमाननिर्माणे कारणमाह—तरुणेति । धनदस्य प्रसादेन कुबेरप्रीत्यर्थं मनोजवमेतद्विमानं ब्रह्मणा निर्मितमिति शेषः ॥ ३१ ॥

गो० टी०—तरुणेति । दिव्यं मनोजवं तरुणादित्यसंकाशं रामवाहनमेतद्विमानम्, प्रसादेन धनदस्य ब्रह्मप्रसादेन धनदस्य, लब्धमित्यर्थः । परेण तपसा लेभे यत्कुबेरः[1] पितामहादिति सुन्दरकाण्डोक्तेः ॥ ३२ ॥

३२-३३] ति० टी०—एतस्मिन्विमाने राघवौ सुग्रीवो विभीषणश्च तिष्ठतीति शेषः ॥ ३२ ॥ ३३ ॥

३४] ति० टी०—तत आसन्ने भरतादयस्तं ददृशुरित्याह—ददृशुरिति ॥ ३४ ॥

रा० टी०—एतस्मिन्निति । एतस्मिन्विमाने रामादयस्तिष्ठन्तीति शेषः ॥ ३२ ॥

रा० टी०—तत इति । ततो हनुमद्वचनश्रवणानन्तरं रामोऽयमिति कीर्तितः[1] स्त्रीबालयुववृद्धानां निस्वनः दिवमस्पृशत्॥३३॥

रा० टी०—रथेति । ते अयोध्यावासिनो नराः विमानस्थं रामं ददृशुः ॥ ३४ ॥

गो० टी०—एतस्मिन्निति । आसत इति शेषः॥३३॥३५॥

३५-३८] ति० टी०—यथार्थेन स्वागतेन । अन्वर्थेन स्वागतेनेत्यर्थः । यथागतं परमकल्याणं तत्स्वागतमित्यर्थोनुगतिमनेत्यर्थः ॥ ३५ ॥ ३८ ॥

रा० टी०—प्राञ्जलिरिति । राघवोन्मुखः रामदृष्टिपथं प्राप्तो भरतः अर्घ्यपाद्याद्यैः यथार्थेन प्रसादनरूपप्रयोजनमनतिक्रम्य राममपूजयत् ॥ ३५ ॥

रा० टी०—मनसेति । भरताग्रजो रामः अपरो वज्रपाणिरिव विमानस्थो रराज ॥ ३६ ॥

रा० टी०—तत इति । भरतः विमानाग्रगतं रामं ववन्दे ३७

रा० टी०—तत इति । तद्विमानं रामाभ्यनुज्ञातं सत् महीतलं निपपात ॥ ३८ ॥

गो० टी०—प्राञ्जलिरिति । यथार्थेन स्वागतेन । चतुर्दश वर्षं पूर्णं अवश्यमागमिष्यामीति प्रतिज्ञानुसारिणा स्वागमनेनेत्यर्थः । अपूजयत् अस्तावयत् ॥ ३६ ॥ ३८ ॥

३९-४०] ति० टी०—अभ्यवादयत् । [*]अभ्यवन्ददित्यर्थः ॥ ३९ ॥ ४० ॥

रा० टी०—आरोपितेति । तद्विमानमारोपितः रामेणारोहितो भरतः राममासाद्य पुनरभ्यवादयत् ॥ ३९ ॥

रा० टी०—तमिति । चिरस्य बहुकालात् अक्षिपथं गतं भरतमङ्कं आरोप्य परिषस्वजे ॥ ४० ॥

गो० टी०—आरोपित इति । अत्र भरतस्य विमानारोपणं सर्वेषां प्रदर्शनार्थमिति बोध्यम् ॥ ४० ॥ ४१ ॥

४१-४५] ति० टी०—लक्ष्मणमासाद्य वन्दमानं लक्ष्मणं

१ कीर्तित इति रा.पा.। २ स्वागतेन यथार्थेनेति गो.रा.पा.। ३ अपर इति गो.रा.पा.। ४ तले इति गो.पा.। ५ उत्थाप्येति गो.पा.। *परस्मैपद प्रयोगश्चिन्त्यः ।

त्वमस्माकं चतुर्णां वै भ्राता सुग्रीवपञ्चमः । सौहृदाज्जायते मित्रमपकारोऽरिलक्षणम् ॥ ४६ ॥
विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत् । दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम् ॥ ४७ ॥
शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम् । सीतायाश्चरणौ वीरो विनयादभ्यवादयत् ॥ ४८ ॥
रामो मातरमासाद्य विवर्णां शोककर्शिताम् । जग्राह प्रणतः पादौ मनो मातुः प्रहर्षयन् ॥ ४९ ॥
अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम् । स मातृश्च ततः सर्वाः पुरोहितमुपागमत् ॥ ५० ॥
स्वागतं ते महाबाहो कौसल्यानन्दवर्धन । इति प्राञ्जलयः सर्वे नागरा राममब्रुवन् ॥ ५१ ॥
तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः । व्याकोशानीव पद्मानि ददर्श भरताग्रजः ॥ ५२ ॥
पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् । चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित्॥ ५३ ॥

परिष्वङ्गादिना संभाव्य । 'अन्येद्युः पाञ्चजन्यात्मा कैकेय्यां भरतोऽभवत् । तदन्येद्युः सुमित्रायामनन्तात्मा च लक्ष्मणः ॥ सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत्प्रिये ॥' इति पाद्मे शिवोक्तेः । *वैदेहीमभ्यवादयदभ्यवन्दत् । परे तु—यद्यपि लक्ष्मणो भरतात्कनिष्ठो वयसा । स्पष्टं चेदं जन्मप्रकरणे, तथापि ज्येष्ठानुवर्तनेन स्वापेक्षयाधिकगुणत्वेन स्वव्यवहारेण ज्येष्ठानुवृत्तिरूपकर्तव्येति भरतं प्रत्युपदेशदानेन च गुरुत्ववुद्ध्या तस्य न निरुचितैव । किं च कौसल्यायै प्रथमं दत्तपायसांशत्वाल्लक्ष्मणस्य ज्येष्ठत्वम् । ततो हि कैकेय्यै पायसार्पणं तदंशजश्च शत्रुघ्न इति स एव भरतात्कनिष्ठः, अत एव वैदेही चेति चकारः स्वरसतः संगच्छते, अत एव शत्रुघ्नकृतो लक्ष्मणनमस्कार उपपद्यते । तयोर्युगपदुत्पन्नत्वादित्याहुः ॥४१॥४५॥

४६-४९] ति० टी०—पञ्चमो भ्राता भ्रातृविषयकपञ्चत्वसंख्यापूरणः । सौहृदात्पूर्वकोपकारात् ॥ ४६ ॥ ४९ ॥

रा० टी०—तत इति । भरतो लक्ष्मणमासाद्य अभ्यवादयत् लक्ष्मणेन प्रणाममकारयत् हेतुमति णिच् अथ वैदेहीमासाद्य अभ्यवादयत् अवन्दत् अत्र स्वार्थे णिच् उभयार्थलाभस्तु शब्दाद्दृश्या नाम प्रणामोपयोगिस्वाभिधामब्रवीच्च ॥ ४१ ॥

रा० टी०—सुग्रीवमिति । कैकयीपुत्रः सुग्रीवप्रभृतिं सस्वजे सुषेणप्रभृतिं च परिष्वजे श्लोकद्वयमेकान्वयि४२।४३

रा० टी०—ते इति । ते वानराः ते अमृतरूपाथोध्यायां मानुषं रूपं कृत्वा भरतं कुशलं पर्यपृच्छन् ॥ ४४ ॥

रा० टी०—अथेति । भरतः सुग्रीवं परिष्वज्य अब्रवीत्४५

रा० टी०—तदाकारमाह—त्वमिति । हे सुग्रीव अस्माकं चतुर्णां पञ्चमो भ्राता त्वमसीति शेषः तत्र हेतुः सौहृदात् कापट्यरहितोपकारात् मित्रं तु भ्रातुर्न भिन्नमिति तात्पर्यं प्रसङ्गादाह अपकारस्तु अरिलक्षणं रिपुत्वसम्पादकमित्यर्थः ॥ ४६ ॥

रा० टी०—विभीषणमिति । त्वया सहायेन सुदुष्करं कर्म दिष्ट्या भाग्योदयेन कृतं रामेणेति शेषः इति सान्त्ववाक्यं भरतो विभीषणमब्रवीत् ॥ ४७ ॥

रा० टी०—शत्रुघ्न इति । शत्रुघ्नः राममभिवाद्य सीतायाः चरणावभ्यवादयत् ॥ ४८ ॥

रा० टी०—राम इति । रामः मातरं कौशल्यामासाद्य मातुर्मनो हर्षयन् सन् पादौ जग्राह ॥ ४९ ॥

गो० टी०—तत इति । लक्ष्मणमासाद्य कृतनमस्कारं लक्ष्मणमालिङ्गनेन संभाव्य । इदं च लक्ष्मणस्य कनिष्ठत्वात् । लक्ष्मणेन चिकीर्षितो नमस्कारो रामसन्निधौ भरतेन प्रतिषेधित इति चाहुः । वैदेहीं चाभ्यवादयत् चकारो रामनमस्कारं समुच्चिनोति । न संख्ये भरतानुज इत्युक्तेः । सीतामादाय गच्छ त्वमग्रतो भरताग्रजेत्यत्र बहुव्रीहिरित्युक्तम् । न च वैपरीत्यं शङ्क्यम् । पूर्व्ये जातस्तु भरतः, सार्पे जातौ तु सौमित्री इति जन्मक्रमोक्तेः । पायसप्रदाने विवाहे च प्राथम्यं तत्र परिहृतम् । लक्ष्मणासादनानन्तरं सीतानमस्काराभिधानात् सीता तारादिभिः सह राममसमीप एव किंचिदन्यत्र स्थितेत्यवगम्यते ॥ ४२ ॥

गो० टी०—त इति । मानुषं रूपं कृत्वा स्थिता इति शेषः ॥ ४३ ॥ ४९ ॥

गो० टी०—राम इति । मनो मातुः प्रसादयन्निति पूर्वं स्वद्वाक्यं नाश्रौषमिति त्वया मनस्तापो न कार्य इत्येवं प्रसन्नामकरोदित्यर्थः ॥ ५० ॥

५०-५१] ति० टी०—कैकेयीं च यशस्विनीम् । अस्या मनोदार्ढ्येन राजा नरकान्तारितः, देवा ब्रह्मर्षयश्च परमं सुखं प्राप्ताः रामस्य च यशो जातम्, अत एषा यशस्विन्येव ॥ ५० ॥ ५१ ॥

रा० टी०—अभिवाद्येति । स रामः सुमित्रां कैकेयीं चाभिवाद्य ततः तस्मात्स्थलात्सवाः मातृः पुरोहितं च उपागमत् गत्वाभ्यवादयत् ॥ ५० ॥

गो० टी०—अभिवाद्येति । यशस्विनीं, रावणजयस्य तन्मूलत्वात् । सर्वैः प्रशस्यमानामित्यर्थः । पुरोहितं वसिष्ठम्, अभिवाद्येत्यनुषज्यते । अभिवाद्योपागमदित्यन्वयः ॥ ५१ ॥

रा० टी०—स्वागतमिति । हे महाबाहो त्वया स्वागतमिति वचः सर्वे नागराः राममब्रुवन् ॥ ५१ ॥

५२-५३] ति०टी०—व्याकोशानि विकसितानि ५२॥५३

---

१ पञ्चादिति गो. पा. । २ विवर्णामिति गो. पा. । *अत्रापि परस्मैपदप्रयोगश्चिन्त्यः ।

अब्रवीच्च तदा रामं भरतः सकृताञ्जलिः । एतत्ते सैकलं राज्यं न्यासं निर्यातितं मया ॥ ५४ ॥
अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः । यत्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ॥ ५५ ॥
अवेक्षतां भवान्कोशं कोष्ठागारं गृहं बलम् । भवतस्तेजसा सर्वं कृतं दशगुणं मया ॥ ५६ ॥
तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् । मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ॥ ५७ ॥
ततः प्रहर्षाद्भरतमङ्कमारोप्य राघवः । ययौ तेन विमानेन ससैन्यो भरताश्रमम् ॥ ५८ ॥
भरताश्रममासाद्य ससैन्यो राघवस्तदा । अवतीर्य विमानाग्रादवतस्थे महीतले ॥ ५९ ॥
अब्रवीत्तु तदा रामस्तद्विमानमनुत्तमम् । वह वैश्रवणं देवमनुजानामि गम्यताम् ॥ ६० ॥
ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् । उत्तरां दिशमुद्दिश्य जगाम धनदालयम् ॥ ६१ ॥
विमानं पुष्पकं दिव्यं संगृहीतं तु रक्षसा । अगमद्धनदं वेगाद्रामवाक्यप्रचोदितम् ॥ ६२ ॥

पुरोहितस्यात्मसखस्य राघवो बृहस्पतेः शक्र इवामराधिपः ।
निपीड्य पादौ पृथगासने शुभे सदैव तेनोपविवेश वीर्यवान् ॥ ॥ ६३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तविंशत्यधिकशततमः सर्गः ॥ १२७ ॥

रा० टी०—तानीति । नागरैः प्रगृहीतानि अञ्जलिसहस्राणि व्याकोशानि विकसितानि पद्मानीव भरताग्रजो ददर्श ॥ ५२ ॥

रा० टी०—पादुके इति । भरतः रामस्य पादुके स्वयं गृहीत्वा नरेन्द्रस्य रामस्य चरणाभ्यां योजयामास ॥ ५३ ॥

५४–५६] नि० टी०—एतदेतावत्कालं मया रक्षितं न्यासभूतं मयि स्थितं राज्यं मया ते निर्यातितं तुभ्यं निवेदितम् ॥ ५४ ॥ ५६ ॥

रा० टी०—अब्रवीदिति । भरतो राममब्रवीत् तदाकारमाह न्यासं न्यासत्वेन मया गृहीतं ते राज्यं मया निर्यातितं एतावत्कालं पालितम् ॥ ५४ ॥

रा० टी०—अद्येति । यस्मात् अयोध्यां पुनरागतं राजानं त्वां पश्यामि तस्मात् मे मनोरथः संवृतः अत एव मे जन्म कृतार्थम् ॥ ५५ ॥

रा० टी०—अवेक्षतामिति । यत् भवतस्तेजसा मया दशगुणं कृतं तत् कोशादि भवान् अवेक्षताम् ॥ ५६ ॥

गो० टी०—एतत्ते इत्यादिसार्धश्लोकद्वयमेकान्वयम् । हे राजन्, मया रक्षितं न्यासत्वेन पालितम् एतद्राज्यम् ते निर्यातितं तुभ्यं निवेदितम् । कोष्ठागारं धान्यशालाम् दशगुणत्वं रामनिर्गमनकालिककोशापेक्षया ॥ ५५ ॥ ५६ ॥

५७–६२] नि० टी०—विभीषणश्च बाष्पं मुमोच । ईदृशा अपि भ्रातरः सन्तीत्यानन्देन स्वस्य तद्वैपरीत्यजशोकेन च ॥ ५७ ॥ ६२ ॥

रा० टी०—तथेति । तथा ब्रुवाणं भरतं दृष्ट्वा वानरा विभीषणश्च बाष्पमानन्दाश्रु मुमुचुः ॥ ५७ ॥

गो० टी०—तथेति । मुमुचुरिति । स्वकुलीनेष्वेतादृशभ्रातृदृष्टयदर्शनादिति भावः ॥ ५७ ॥

रा० टी०—तत इति । राघवः भरतमङ्कमारोप्य विमानेन भरताश्रमं ययौ ॥ ५८ ॥

रा० टी०—भरतेति । राघवः भरताश्रममासाद्य विमानादवतीर्य महीतले अवतस्थे ॥ ५९ ॥

गो० टी०—तत इति । भरताश्रमम् नन्दिग्रामम् ५८॥५९

रा० टी०—अब्रवीदिति । त्वया गम्यतां वैश्रवणं कुबेरं त्वं वह इत्यहमनुजानामि आज्ञापयामि इति वचः रामो विमानमब्रवीत् ॥ ६० ॥

गो० टी०—अब्रवीदिति । गम्यतामित्यनन्तरमिति-करणं बोध्यम् ॥ ६० ॥

रा० टी०—तत इति । तद्विमानं धनदालयमुद्दिश्य उत्तरां दिशं जगाम ॥ ६१ ॥

गो० टी०—तत इति । दिशमागम्य दिशमुद्दिश्य ॥६१॥

रा० टी०—तदेव भङ्ग्यन्तरेणाह—विमानमिति । रक्षसा रावणेन गृहीतं विमानं रामवाक्यप्रचोदितं सत् धनदमगमत् ॥ ६२ ॥

६३] नि० टी०—पुरोहितस्येति । वसिष्ठपुत्रस्य सुयज्ञस्येत्यर्थः । 'आत्मसमस्य' इति पाठान्तरम् । ब्रह्मज्ञत्वादिति भावः । वसिष्ठस्येत्यर्थ इति तीर्थः ॥ ६३ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डे सप्तविंशत्यधिकशततमः सर्गः ॥ १२७ ॥

रा० टी०—पुरोहितस्येति । पुरोहितस्य आत्मसखस्य वसिष्ठस्येत्यर्थः. पादौ बृहस्पतेश्शक्र इव निपीड्य तेन वसिष्ठेन सह पृथगासने उपविवेश ॥ ६३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ युद्धकाण्डे एकोनत्रिंशदधिकशततमः सर्गः ॥ १२९ ॥

१ रक्षितं राजन् राज्यमिति गो. पा. । २ इदं पद्यं गो. पुस्तके नास्ति । ३ राघव इति गो. पा. ।

अष्टाविंशाधिकशततमः सर्गः ।

भरतात्प्रतिगृहीतराज्यो रामः सुग्रीवादिभिः सीता च वानरपत्नीभिश्च सह सुज्ञातावलंकृतौ । सुग्रीवो गजं रामस्तु ससुहृदथं चारुह्य सानन्दं पुरं प्रविष्टौ । ततो वानरैश्चतुःसमुद्रवार्यानाय्य वसिष्ठादिमहर्षिभिरभिषिक्तो रामः सुग्रीवविभीषणादीन्सपरिगृह्य रत्नभूषणादिभिः परितोष्य स्वस्थानं गमयित्वा रञ्जितपौरजानपदश्रिः शशास मेदिनीमीजे च पौण्डरीकादिभिः क्रतुभिर्भूरिदक्षिणैः । तदा न किंचिदशुभमभवत् काण्डान्ते पठनादिना शुभप्रारम्भिकथनं काण्डसमाप्तिश्च ।

शिरस्यञ्जलिमाधाय कैकेयीनन्दिवर्धनः । बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम् ॥ १ ॥
पूजिता मामिका माता दत्तं राज्यमिदं मम । तदहामि पुनस्तुभ्यं यथा त्वमदृदा मम ॥ २ ॥
धुरमेकाकिना न्यस्तां वृषभेण बलीयसा । किशोरवद्धुरं भारं न वोढुमहमुत्सहे ॥ ३ ॥
वारिवेगेन महता भिन्नः सेतुरिव क्षरन् । दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम् ॥ ४ ॥

गो० टी०–पुरोहितस्येति । आत्मसमस्य स्वानुरूपस्य, पृथगासने तेन सहैवोपविवेश । पृथगासने युगपदेवोपविविशतुरित्यर्थः ॥ ६२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

१] ति० टी०–शिरस्यिति ॥ १ ॥

रा० टी०–रामं प्रति भरतोक्तिमाह–शिरस्यित्यादिभिः । भरतः शिरस्यञ्जलिमादाय रामं बभाषे ॥ १ ॥

गो० टी०–एवं शुष्पकं धनदाय प्रेषयित्वा वसिष्ठेन च सहागम्य भरतानुज्ञां विना नायोध्यां प्रवेष्टव्येति तात्पर्येण नन्दिग्राम एवात्मनोपविष्टे रामे निविशेषु च पौरजानपदेषु सन्निहितासु च भ्रातृषु तादात्विकमदर्शनक्लिन्नदर्शननिपुणो भरतः स्वदयमप्रजाय निवेदयति—शिरस्यञ्जलिमित्यादिना । शिरस्यञ्जलिमाधायेत्यनेन पूर्वकृता प्रपत्तिः स्मार्यते । अनन्यगतिकत्वसूचिका मुद्रा व्यञ्जितिः । कैकेयानन्दवर्धन इत्यनेन भरतवचने कैकेयीसन्तोषो मुखप्रसादादिनानुगम्यत इति द्योत्यते ॥ १ ॥

२] ति० टी०–त्वया मामिका माता पूजिता । तदुत्तरवनवासानुष्ठानात् । मया चित्रकूटे तव समर्पितमिदं राज्यं त्वं पुनश्चित्रकूट एव मम दत्तवान्, तत्पुनस्तुभ्यमहं ददामि । ननु कथं दत्तस्य पुनर्दानं तत्राह – यथेति । यथा त्वं मदत्तं राज्यं मह्यमददास्तथा मयापि स्वदत्तं तुभ्यं दीयते इत्यर्थः ॥ २ ॥

रा० टी०–तदाकारमाह–पूजितेत्यादिभिः । मामिका माता त्वया पूजिता तदाज्ञाकरणात्सत्कृता अत एव इदं राज्यं मम मह्यं दत्तं तद्राज्यं यथा त्वं ममाददाः तथा अहं तुभ्यं ददामि ॥ २ ॥

गो० टी०–रामस्य राज्यपरिग्रहे अपरिहार्यं हेतुं दर्शयति—पूजितेति । मामिका मत्संबन्धिनी, माता पूजिता । राज्यपरित्यागपूर्वकवनवासाङ्गीकारेण त्वया तोषिता । अनन्तरमिदं राज्यम्, मम मयि, चित्रकूटे दत्तम् । तद्राज्यम् त्वं यथा येन प्रकारेण ममाददाः तेन प्रकारेण तुभ्यं ददामि । न्यासरूपेण मयि स्थापितं राज्यं न्यासरूपत्वाप्रहाणेनैव पुनर्ददामीत्यर्थः ॥ २ ॥

३] ति० टी०–ननु त्वदृतराज्यभोगमहं करिष्यामि, राज्यं तु त्वमेव पालयेत्याह—धुरमिति । एकाकिना स्वसमानपूर्वबलीयस्तान्तररहितेन बलीयसा वृषभेण बलीवर्देन न्यस्तां क्षिप्तां किशोरवत्पार्श्ववर्तिवत्सवत् बालवत्सो यथा वोढुं नोत्सहते, तथा गुरुं राज्यस्य भारं वोढुं नाहमुत्सहे ॥ ३ ॥

रा० टी०–ननु स्वस्मिन्नेव संस्थाप्यतामित्यत आह–धुरमिति । एकाकिना स्वसमानद्वितीयरहितेन बलीयसा वृषभेण न्यस्तां क्षिप्तां धुरं भारं किशोरवत् कैशोर्यवत् वत्स इत्यर्थः यथा वोढुं नोत्सहते तथा गुरुं भारं वोढुमहं नोत्सहे यथा तथेत्यध्याहृतम् ॥ ३ ॥

गो० टी०–अयोध्यायां राज्यभोगान् यथाकामं भोक्ष्ये राज्यं त्वमेव परिपालयेत्याकाङ्क्षायामाह—धुरमिति । यद्वा पुनरर्थनपर्यन्तं न्यासधारणं न दोष इत्याशङ्क्याह–धुरमिति । एकाकिना असहायेन, बलीयसा वृषभेण न्यस्तां धुरम् किशोरवत् बालवत्स इव, गुरुं भारम् वोढुं नोत्सहे ॥ ३ ॥

४] ति० टी०–नोत्सहे इत्यत्र हेतुमाह—वारीति । महता वारिवेगेन भिन्नः क्षरन्सेतुर्यथा दुर्निबन्धो बहुमशक्यः, एवमसंवृतमशक्यसंवरणं राज्यच्छिद्रं चोरादिनिबन्धनं दुर्निबन्धनं बहुमशक्यमित्येव मन्ये । अहमिति शेषः ॥ ४ ॥

रा० टी०–वारीति । महता वारिवेगेन भिन्नः अत एव क्षरन् सेतुरिव असंवृतं प्रसिद्धं राज्यच्छिद्रं चोरादुपद्रवः दुर्बन्धनं निवारयितुमशक्यमिदमहं मन्ये ॥ ४ ॥

गो० टी०–तर्हि कथमेतावत्पर्यन्तं सोढमित्यत आह—वारीति । महता वारिवेगेन भिन्नः अत एव क्षरन्, बहिर्निःसरन्, जलसेतुरिव, इदं राज्यच्छिन्द्रं छिद्रवद्राज्यम्, असंवृतं संवरणरहितं सत्, दुर्बन्धनं मन्ये । यथा महता वारिवेगेन भिन्नः क्ष-

१ आनन्देति गो. पा. ।

गतिं खर इवाश्वस्य हंसस्येव च वायसः । नान्वेतुमुत्सहे वीर तव मार्गमरिंदम ॥ ५ ॥
यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने । महानपि दुरारोहो महास्कन्धः प्रशाखवान् ॥ ६ ॥
शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन् । तस्य नानुभवेदर्थं यस्य हेतोः स रोपितः ॥ ७ ॥
एषोपमा महाबाहो त्वमर्थं वेत्तुमर्हसि । यद्यस्मान्मानुजेन्द्र त्वं भर्ता भृत्यान्न शाधि हि ॥ ८ ॥
जगदभ्याभिषिक्तं त्वामनुपश्यतु रोचय । प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम् ॥ ९ ॥
तूर्यसंघातनिर्घोषैः काञ्चीनूपुरनिःस्वनैः । मधुरैर्गीतशब्दैश्च प्रतियुद्धस्व शोभने च ॥ १० ॥
यावदावर्तते चक्रं यावती च वसुंधरा । तावल्लोकस्य स्वामित्वमनुवर्तय ॥ ११ ॥
भरतस्य वचः श्रुत्वा रामः परपुरंजयः । तथेति प्रतिजग्राह निषसादासने शुभे ॥ १२ ॥

नन्व् सेतुर्वारिवेगाहतिनिरोधकतृणपुलशस्यापूरणादिसंस्करणम् विना न वहुं शक्यते । एवं वहुविधक्लिष्टं राज्यमपि मन्त्रगोपनादिराजगुणावरणं विना पालयितुं न शक्यमिति भावः ॥४॥

५] ति० टी०—तव मार्गं रक्षणीयरक्षणचातुर्यम् ॥ ५ ॥

रा० टी०—गतिमिति । अश्वस्य गतिं खर इव हंसस्य वायस इव तव मार्गं गतिमन्वेतुमाचरितुं नोत्सहे ॥ ५ ॥

गो० टी०—अहमिव भवानपि लोकान् गुणैर्वशीकरोतीत्यत्राह—गतिमिति ॥ ५ ॥

६–७] ति० टी०—अन्तर्निवेशने गृहारामे कश्चिद्वृक्ष आरोपितः, स महत्त्वादिगुणविशिष्ट्य जातः, तत्र स पुष्पितो भूत्वा फलान्यदर्शयन्यदि विशीर्येत विशीर्णपुष्पो वा स्वयमेतो वा विशीर्णो भवति, ततोऽस्य फलस्य हेतोर्येन रोपितः स तदा रोपणादिक्लेशस्यार्थं फलं नानुभवेदिति स यथा वृथा प्रयासः ॥ ६ ॥ ७ ॥

८] ति० टी०—एषोपमा तव । हे महाबाहो, यदि त्वं भक्तान्भृत्यानस्मान्न शाधि । तदेति शेषः । तस्य त्वं वेत्तुमर्हसि अन्यापदेशवचनार्थमित्यर्थः । राजा पालनाख्यार्थे महता यत्नेनोपाय संवर्धितेन त्वया प्रजापालनं संपादनीयम् तदकरणे तु तादृशवृक्षतुल्यस्त्वमिति भावः ॥ ८ ॥

रा० टी०—यथेति । अन्तर्निवेशने स्वारामस्य मध्ये आरोपितः अत एव महान् प्रवृद्धः अत एव महास्कन्धः प्रकृष्टा शाखा येषां नवपल्लवानां तद्वान् दुरारोहः अन्यैरारोपयितुमशक्यो वृक्षः पुष्पितो भूत्वा फलानि न प्रदर्शयन्यदि शीर्येत तदा यस्य हेतोः स वृक्षो येन रोपितः सः तस्यारोपस्य फलं यथा नानुभवेत् तथा हे महाबाहो यदि भृत्यान् अस्मान्न शाधि तर्हि एषा अफलवृक्षसंवन्धिनी उपमा ते भविष्यतीति शेषः अर्थमेतन्महिज्ञापनां त्वं वेत्तुं ज्ञातुमर्हसि श्लोकत्रयमेकान्वयि ॥ ६–८ ॥

गो० टी०—तर्हि ममैवोपो द्वलेन भवानेव राज्यं परिपालयित्वाशङ्क्य तर्हि तातेन भवत्पोषणं विफलं स्यादित्याह—यथा चेत्यादिश्लोकत्रयेण ॥ अन्तर्निवेशने आरोपितः उप्तः, वृक्षः महान् जातः, सुदुरारोहो महास्कन्धप्रशाखवान् पुष्पितोऽपि भूत्वा फलानि न प्रदर्शयन् यथा शीर्येत अकस्मो भवति । एषा च यस्य फलस्य हेतोर्येन रोपितः, सः रोपयित्रा तस्य वृक्षस्य अर्थं तत्फलम् नानुभवेत् । मनुजेन्द्र भक्तान् भृत्यान् अस्मान्न शाधि यदि । महाबाहो एषोपमा त्वदर्थमुक्तेति वेत्तुमर्हसीति योजना । अत्र वृक्षरामयोरारोपयितृदशरथयोश्च उपमानोपमेयभावः । बीजावापस्य पुत्रेष्ट्यादेश महास्कन्धस्य सचिवस्कन्धस्य च प्रशाखत्वस्य सुग्रीवादिमित्रगणस्य च पुष्पाणां कल्याणगुणानां च राज्याकरणस्य फलाभावस्य च साम्यं द्योत्यते ॥ ६ ॥ ८ ॥

९] ति० टी०—यदेवमतः—जगदभ्येत्यादि ॥ ९ ॥

रा० टी०—जगदिति । अभिषिक्तमत एव मध्याह्ने प्रतपन्तमादित्यमिव दीप्ततेजसं त्वां जगदय अनुपश्यतु ॥९॥

गो० टी०—भवतस्तु राज्यपरिपालने महती शक्तिरित्याह—जगदिति ॥ ९ ॥

१०] ति० टी०—तूर्यघोषादिभी राजोपचारैः प्रतिबुध्यस्व शोभने चेत्यर्थः ॥ १० ॥

रा० टी०—तूर्येति । तूर्यसंघातनिर्घोषादिभिः राजसामग्रीभिः उपलक्षितस्त्वम् प्रतिबुध्यस्व जागृहि शोभने च ॥ १० ॥

गो० टी०—सर्वभोगार्हस्यापीत्थं भोगान् भुनक्ष्वेत्याह—तूर्येति । काञ्चीनूपुरनिःस्वनशब्देन प्रबोधकलक्षितस्य सख्यते ॥ १० ॥

११] ति० टी०—चक्रं ज्योतिश्चक्रं यावदावर्तते । अनेन कालावधिरुच्यते । यावती च वसुंधरेति देशावधिरुच्यते ॥११॥

रा० टी०—यावदिति । चक्रं ज्योतिश्चक्रमिति यावत् । यावती यावत्कालस्थितिः, तावत तावत्कालम्, सर्वस्य राज्यस्य स्वामित्वमनुवर्तय । स्वामित्वानुवर्तनं हि पालनमेव ॥ ११ ॥

१२] ति० टी०—प्रतिजग्राह । भरतस्य वच इति शेषः ॥ १२ ॥

१ सर्वत्र इति गो. पा. । २ सर्वत्र इति गो. पा. ।

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धनाः । सुखहस्ताः सुशीघ्राश्च राघवं पर्यवारयन् ॥ १३ ॥
पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले । सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥ १४ ॥
विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः । महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन् ॥ १५ ॥
प्रतिकर्म च रामस्य कारयामास वीर्यवान् । लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥ १६ ॥
प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः । आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥ १७ ॥
ततो वानरपत्नीनां सर्वासामेव शोभनम् । चकार यत्नात्कौसल्या प्रहृष्टा पुत्रवत्सला ॥ १८ ॥
ततः शत्रुघ्नवचनात्सुमन्त्रो नाम सारथिः । योजयित्वाभिचक्राम रथं सर्वाङ्गशोभनम् ॥ १९ ॥
अग्र्यैर्कामलसंकाशं दिव्यं दृष्ट्वा रथं स्थितम् । आरुरोह महाबाहू रामः पौरपुरंजयः ॥ २० ॥
सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती । स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ॥ २१ ॥
सर्वाभरणजुष्टाश्च ययुस्ताः शुभकुण्डलाः । सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः ॥ २२ ॥

रा० टी०–भरतस्येति । रामः भरतस्य वचः प्रतिजग्राह निषसाद च ॥ १२ ॥

गो० टी०–भरतस्येति । निषसादेति । भरत इति शेषः ॥ १२ ॥

१३] ति० टी०–श्मश्रुवर्धनाः तच्छेदका नापिता इत्यर्थः । 'वर्धनच्छेदनेऽथ द्वे आनन्दनसभाजने' इत्यमरः ॥ १३ ॥

रा० टी०–तत इति । शत्रुघ्नवचनाद्धेतोः शीघ्राः शीघ्रं क्रियानिष्पादकाः सुखः सुखप्रदः हस्तो येषां अत एव निपुणाः श्मश्रूणां वर्धनाः शोधनादिना वर्धका राघवं पर्यवारयन्॥१३॥

गो० टी०–तत इति । श्मश्रुवर्धकाः श्मश्रुकर्तकाः । 'वर्धनं छेदनेऽथ द्वे आनन्दनसभाजने' इत्यमरः । सुशीघ्राः अभिषेकमुद्वर्तानतिलङ्घनं विना शीघ्रं कर्तुं समर्थाः । उपासत श्मश्रूण्यवर्धन्त । भरतलक्ष्मणापेक्षया श्मश्रुवर्धकानां बहुवचनम् । राघवमिति भरतलक्ष्मणयोः प्रदर्शनार्थम् ॥ १३ ॥

१४–१५] ति० टी०–पूर्वं त्विति । अत्र भरतलक्ष्मणयोः स्नानाभिधानकाले शत्रुघ्नस्य तदनभिधानं तु स्नानकारयितृत्वात् । उपलक्षणं वा ॥ १४ ॥ १५ ॥

रा० टी०–पूर्वमिति । भरतादौ यथाक्रमं पूर्वं स्नाते सति विशोधिता जटा यस्य सः महार्हवसनोपेतो रामः श्रिया ज्वलन्सन् तस्थौ श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

गो० टी०–पूर्वमित्यादिश्लोकद्वयमेकान्वयम् । न मे स्नानं बहुमतं, तं विना ककर्यासतमित्युक्त्या प्रथमं स्नानं भरतस्य, सुग्रीवस्यापि किष्किन्धानिर्गमनप्रभृतिस्नानाभावादयं स्नानम् तथा विभीषणस्यापि लङ्कानिर्गमनप्रभृतिस्नानाभावात् शत्रुघ्नस्य स्नानश्रवणमधिकर्तृत्वेन तदानीमवसराभावात् पूर्वं व्रतग्रहणानुक्तेश्च । नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोनघ इति संक्षेपोक्तेरत्रापि शत्रुघ्नस्नानमर्थसिद्धमित्याहुः । जटाशोधनं शुद्धकेशीकरणम् । स्नात इति कर्तरि क्तः । नानावर्णपुष्पयुक्तत्वेन चित्रमाल्यत्वम् । कुङ्कुमकर्पूरकस्तूर्यादिवस्तुभेदेन चित्रानुलेपनत्वम् । महार्हवसनं पीताम्बरम् । श्रिया अलंकारश्रिया, तत्र सिंहासने, ज्वलन् प्रकाशमानः तस्थौ ॥ १४ ॥ १५ ॥

१६] ति० टी०–इक्ष्वाकुकुलवर्धनः शत्रुघ्नः ॥ १६ ॥

रा० टी०–प्रतीति । इक्ष्वाकुकुलवर्द्धनो भरतः रामस्य लक्ष्मणस्य च प्रतिकर्म अलंकारक्रियां कारयामास ॥ १६ ॥

गो० टी०–प्रतिकर्मेति । प्रतिकर्म हारादयलंकरणम् । इक्ष्वाकुकुलवर्धनः शत्रुघ्नः ॥ १६ ॥

१७] ति० टी०–प्रतिकर्मालंकरणम् । आत्मनैव न सैरन्ध्रीहस्तेनेत्यर्थः ॥ १७ ॥

रा० टी०–प्रतीति । दशरथस्त्रियः आत्मना स्वेनैव सीतायाः प्रतिकर्म चक्रुः ॥ १७ ॥

गो० टी०–प्रतिकर्मेति । आत्मनैव स्वयमेव ॥ १७ ॥

१८] ति० टी०–शोभनमलंकरणम् ॥ १८ ॥

१९–२०] ति० टी०–अभिचक्राम समीपमाजगाम ॥ १९ ॥ २० ॥

रा० टी०–तत इति । वानरपत्नीनां शोभनमलंकरणं कौशल्या चकार ॥ १८ ॥

रा० टी०–तत इति । सुमंत्रो नाम सारथिः शत्रुघ्नवचनात् रथं योजयित्वा अभिचक्राम रामसमीपं प्राप ॥१९॥

रा० टी०–अग्र्यैरिति । रामः रथमुपस्थितं दृष्ट्वा आरुरोह ॥ २० ॥

गो०टी०–तत इति । शोभनम् प्रतिकर्मेत्यर्थः॥१८–२०॥

२१–२२] ति० टी०–दिव्यनिभैर्दिव्यकान्तिभिर्वस्त्रैर्युक्तौ जग्मतुः । रथस्थं राममनुजग्मतुरित्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०–सुग्रीव इति । दिव्यनिभैर्वस्त्रैरुपलक्षितौ सुग्रीवो हनुमाँश्च जग्मतुः रामरथेन सहेति शेषः ॥ २१ ॥

रा० टी०–सर्वेति । नगरं द्रष्टुमुत्सुकाः सुग्रीवपत्न्यः सीता च ययुः ॥ २२ ॥

---

१ श्मश्रुवर्धकेति गो. पा. । २ अर्कमण्डलेति गो. पा. । ३ रथोत्तममिति गो.पा. । ४ सत्यपराक्रम इति गो. पा. । ५ वराभरणसंपन्ना इति गो.पा. ।

अयोध्यायां च सचिवा राज्ञो दशरथस्य वै । पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥ २३ ॥
अशोको विजयश्चैव सिद्धार्थश्च समाहिताः । मन्त्रयन्रामवृद्ध्यर्थं वृत्त्यर्थं नगरस्य च ॥ २४ ॥
सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः । कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् ॥ २५ ॥
इति ते मन्त्रिणः सर्वे संदिश्य वै पुरोहितः । नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥ २६ ॥
हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः । प्रययौ रथमास्थाय रामो नगरमुत्तमम् ॥ २७ ॥
जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे । लक्ष्मणो व्यजनं तस्य मूर्ध्नि सैवीजयंस्तदा ॥ २८ ॥
श्वेतं च बालव्यजनं जगृहे परितः स्थितः । अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः ॥ २९ ॥
ऋषिसङ्घैस्तदाकाशे देवैश्च समरुद्गणैः । स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥ ३० ॥
ततः शत्रुंजयं नाम कुञ्जरं पर्वतोपमम् । आरुरोह महातेजा सुग्रीवः प्लवगर्षभः ॥ ३१ ॥
नव नागसहस्राणि ययुरास्थाय वानराः । मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥ ३२ ॥
शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निःस्वनैः । प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम् ॥ ३३ ॥

गो० टी०–सुग्रीव इति । दिव्यनिर्मैः दिव्यवस्त्रमयैः वस्त्रैरुपलक्षितावितिं शेषः ॥ २१ ॥ २२ ॥

२३] ति० टी०–अयोध्यायां चेति । तस्मिन्नन्तरं इत्यादिः । पुरोहितं वसिष्ठम् । अर्थवत्प्रयोजनोपेतम् । रामाभिषेकोपयुक्तमशेषविचारं चक्रुरित्यर्थः ॥ २३ ॥

रा० टी०–अयोध्यायामिति । दशरथस्य सचिवाः पुरोहितं वशिष्ठं पुरस्कृत्य अर्थवत्तया भवति तथा मंत्रयामासुः अभिषेकविषयकृत्यं विचारयामासुः ॥ २३ ॥

गो० टी०–अयोध्यायामिति । गत्वेति शेषः । मन्त्रयामासुः अभिषेकोपयोगिमङ्गलद्रव्यसंपादनार्थम् एवं कर्तव्यमिति मन्त्रयामासुः ॥ २३ ॥

२४] ति० टी०–तदेवाह—अशोक इत्यादि । अशोकादयो रामवृद्ध्यर्थं नगरस्य च वृत्त्यर्थं संगता मन्त्रयन्तमन्त्रयन् ॥ २४ ॥

रा० टी०–अप्रसिद्धसचिवानां नामानि निर्दिशन् तदेवाह–अशोक इति । अशोकादयश्च मंत्रयन् अमंत्रयन् ॥ २४ ॥

गो० टी०–उक्तमर्थं विवृणोति–अशोक इति । मन्त्रयन् अमन्त्रयन् ॥ २४ ॥

२५] ति० टी०–तदेवाह—सर्वमेवेति । कर्तुमर्हथेति भृत्यान्प्रत्युक्तिः ॥ २५ ॥

२६–२७] ति० टी०–मन्त्रिणः पुरोहितश्चैवं संदिश्य निर्ययुः ॥ २६ ॥ २७ ॥

रा० टी०–तदाकारमाह–सर्वमिति । रामस्याभिषेकार्थं यथस्कर्तव्यं तत्सर्वं मंगलपूर्वकं कर्तुमर्हथ ॥ २५ ॥

रा० टी०–इतीति । मंत्रिणः पुरोहितश्च इति संदिश्य आज्ञाप्य नगरान्निर्ययुः ॥ २६ ॥

रा० टी०–हरीति । रथमास्थायेन्द्र इव रामो रथमास्थाय प्रययौ ॥ २७ ॥

गो० टी०–सर्वमित्यादिश्लोकद्वयमेकान्वयम् । अर्हथेति पूजायां बहुवचनम् ॥ २५ ॥ २६ ॥

गो०टी०–हरीति । हरियुक्तं हरितवर्णैरश्वैर्युक्तम् ॥ २७ ॥

२८] ति० टी०–लक्ष्मणो व्यजनं तालवृन्तमग्र्यम् ॥ २८ ॥

२९–३१] ति० टी०–अपरं श्वेतं बालव्यजनं विभीषणो जगृहे ॥ २९ ॥ ३१ ॥

३२] ति० टी०–नवनागसहस्राणि । नवसहस्रसंख्याकगजानित्यर्थः ॥ ३२ ॥

रा० टी०–जग्राहेति । भरतो रश्मीन् हयरज्जूः जग्राह शत्रुघ्नः तस्य रामस्य सर्मीपे मूर्ध्नि छत्रमाददे लक्ष्मणः सम्वीजयन संवीजयितुं व्यजनमाददे ॥ २८ ॥

रा० टी०–श्वेतमिति । चन्द्रसंकाशम् अपरं तालव्यजनापेक्षया भिन्नं बालव्यजनं चामरं विभीषणो जगृहे ॥ २९ ॥

रा० टी०–ऋषीति । ऋषिसंघादिभिः स्तूयमानस्य रामस्य समीपे मधुरध्वनिः शुश्रुवे ॥ ३० ॥

रा० टी०–तत इति । सुग्रीवः शत्रुंजयं नाम कुञ्जरमारुरोह ॥ ३१ ॥

रा० टी०–नवेति । वानराः मानुषं विग्रहं कृत्वा नवनागसहस्राणि आस्थाय ययुः ॥ ३२ ॥

गो० टी०–जग्राहेत्यादिश्लोकद्वयमेकान्वयम् । रश्मीन् जग्राह सारथ्यमकरोत् । लक्ष्मण इति । पुरतः स्थितो लक्ष्मणः व्यजनं तालवृन्तकम् मूर्ध्नि सम्पर्यवीजयत् । श्वेतं बालव्यजनं च जग्राह । अहं सर्वं करिष्यामीति त्वरया उभयग्रहणम । अपरं चन्द्रसंकाशमित्यत्र जग्राहेत्यनुषज्यते ॥ २८ ॥ २९ ॥

गो० टी०–ऋषीति । समरुद्गणैः सवायुगणैः । रामस्य मधुरध्वनिः रावणनिरसनाश्ववदानकथनध्वनिः ॥ ३० – ३२ ॥

३३] ति० टी०–शङ्खशब्दप्रणादैः । शङ्खशब्दैर्जनानां हर्ष-

१ वै इति गो.पा. । २ सुमन्त्रश्चैव संगता इति गो.पा. । ३ ऋद्ध्यर्थमिति गो.पा. । ४ तु पुरोहितमिति गो.पा. । ५ संपर्यवीजयन्निति गो. पा. ।

दृष्टशुस्ते समायान्तं राघवं सपुरःसरम् । विराजमानं वपुषा रथेनातिरथं तदा ॥ ३४ ॥
ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः । अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् ॥ ३५ ॥
अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः । श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः ॥ ३६ ॥
स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः । प्रव्याहरद्भिर्मुदितैर्मङ्गलानि व्रतो ययौ ॥ ३७ ॥
अक्षतं जातरूपं च गावः कन्याः सहद्विजाः । नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥ ३८ ॥
सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे । वानराणां च तत्कर्म ह्यौचचक्षेऽथ मन्त्रिणाम् ॥३९॥
श्रुत्वा च विस्मयं जग्मुरयोध्यापुरवासिनः । वानराणां च तत्कर्म राक्षसानां च तद्बलम् ॥ ४० ॥
[विभीषणस्य संयोगमाचचक्षेथ मन्त्रिणाम् ।]
द्युतिमानेतदाख्याय रामो वानरसंयुतः । हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश सः ॥ ४१ ॥
ततो ह्यभ्युच्छ्रयन्पौराः पताकाश्च गृहे गृहे । ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ॥ ४२ ॥
अथाब्रवीद्राजपुत्रो भरतं धर्मिणां वरम् । अर्थोपहितया वाचा मधुरं रघुनन्दनः ॥ ४३ ॥
पितुर्भवनमासाद्य प्रवेश्यं च महात्मनः । कौसल्यां च सुमित्रां च कैकेयीमभिवादय ॥ ४४ ॥
तच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत् । मुक्तावैदूर्यसंकीर्णं सुग्रीवाय निवेदय ॥ ४५ ॥
तस्य तद्वचनं श्रुत्वा भरतः सत्यविक्रमः । हस्ते गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ॥ ४६ ॥

प्रणादैरेत्यर्थः । तदुक्तं पाद्मे–'आगतो रावणद्वेषी कुम्भकर्णस्य रान्तकः । अतिकायेन्द्रजिच्छेत्ता महर्षिजनरञ्जकः ॥ समाप्तदेवताकार्यः सीतेशो लक्ष्मणानुजः । सत्येकनिरतः शास्ता परदारसहोदरः ॥ सुग्रीवराज्यदो धन्वी रावणानुजराज्यदः । शरणागतसंत्राता धर्मस्थापनतत्परः ॥ रामो दाशरथिः श्रीमान्भगवान्भरताग्रजः । शरण्यो राम इत्येवं भुवि काहलध्वनिः ॥' इति ॥ ३३ ॥

रा० टी०–शङ्खेति । शङ्खशब्दप्रणादादिभिरुपलक्षितो रामः पुरीमयोध्यां प्रययौ प्रणादो मनुष्यशब्दः ॥ ३३ ॥

गो० टी०–शङ्खेति । शङ्खशब्दप्रणादैः शङ्खशब्दैः जनहर्षप्रणादैरेत्यर्थः ॥ ३३ ॥

३४] ति० टी०–ते नागराः ॥ ३४ ॥

३५–३६] ति० टी०–ते नागरा वर्धयित्वा । आशीर्भिरिति शेषः ॥ ३५ ॥ ३६ ॥

रा० टी०–दृष्टशुरिति । समायान्तं राघवं ते नागरा दृष्टशुः ॥ ३४ ॥

रा० टी०–वर्द्धयित्वेति । रामेण प्रतिनन्दिताः नागराः काकुत्स्थं रामं वर्द्धयित्वा आशीर्वचनैस्संवर्ध्य अनुजग्मुः ॥३५॥

रा० टी०–अमात्यैरिति । अमात्यादिभिर्वृतो रामः नक्षत्रैरेतच्चन्द्रमा इव विरुरुचे ॥ ३६ ॥

गो० टी०–दृष्टशुरिति । ये नगरं प्रविश्य वसिष्ठं पुरस्कृत्य रामाभिषेकमसञ्चयन् ते शुमन्त्रादयः ॥ ३४ ॥ ३५ ॥

गो० टी०–अमात्यैरिति । प्रकृतिभिः पौरजनैः ॥३६॥

३७] ति० टी०–तूर्यैस्तूर्यवादकैः । स्वस्तिकश्च तालवदेव करतलधार्यः । मङ्गलानि प्रव्याहरद्भिरित्यन्वयः ॥ ३७ ॥

रा० टी०–स इति । तूर्यैरुपलक्षितैः तालस्वस्तिकपाणिभिः मंगलानि प्रव्याहरद्भिः पुरोगामिभिर्वृतो रामो ययौ ॥ ३७ ॥

गो० टी०–सेति । तूर्यैः तूर्यवादकैः । स्वस्तिको वाद्यविशेषः । मङ्गलानि प्रव्याहरद्भिः मङ्गलपाठकैः ॥ ३७ ॥

३८–४१] ति० टी०–अक्षतादिकं मङ्गलार्थम् । जातरूपमक्षतम् संपादितहरिद्रादिवर्णविशेषमित्यर्थः । अक्षतादीनां पुरतो यानं तद्ग्राहिपुरुषद्वारा ॥ ३८ ॥ ४१ ॥

रा० टी०–अक्षतमिति । अक्षतादयः मोदकहस्ता नराश्च रामस्य पुरतो ययुः अचेतनगमनं चेतनसहकारेण बोध्यम् ॥ ३८ ॥

गो० टी०–अक्षतं जातरूपमिति । हरिद्रया जातरूपमक्षतम्, वहद्भिरिति शेषः ॥ ३८ ॥

रा० टी०–सख्यमिति । रामः सुग्रीवे सख्यमनिलात्मजे प्रभावं च वानराणां च कर्म च मन्त्रिणां मध्ये आचचक्षे ॥ ३९ ॥

गो० टी०–सख्यं चेत्यादिसार्धश्लोकमेकं वाक्यम् ॥ सख्यं ज्ञातमिति शेषः मन्त्रिणां मन्त्रिभ्यः ॥ ३९ ॥

रा० टी०–श्रुत्वेति । अयोध्यापुरवासिनः वानराणां कर्म राक्षसानां बलं च श्रुत्वा विस्मयं जग्मुः ॥ ४० ॥

रा० टी०–द्युतिमानिति । द्युतिमान् स रामः एतदाख्याय अयोध्यां प्रविवेश ॥ ४१ ॥

गो० टी०–श्रुत्वेत्यर्धम् । श्रुत्वा सुग्रीवसख्यादिकमिति शेषः ॥ ४० ॥ ४१ ॥

४२–४३] ति०टी०–अभ्युच्छ्रयन्नभ्युदश्रयन् ॥४२॥४३॥

४४–४६] ति० टी०–पितुर्भवनमासाद्य तत्र महात्मनः

१ राक्षसानां च तद्बलमिति गो. पा. । २ इदमर्धं " विभीषणस्य संयोगमित्यर्धानन्तरं पठ्यते गो. पुस्तके । ३ इदमर्धं मधिकं गो. पुस्तके । ४ प्रविश्येति गो. पा. । ५ आभाष्य चेति गो. पा. ।

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च । गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ॥ ४७ ॥
उवाच च महातेजाः सुग्रीवं राघवानुजः । अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ॥ ४८ ॥
सौवर्णान्वानरेन्द्राणां चतुर्णां चतुरो घटान् । ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ॥ ४९ ॥
तथा प्रत्यूषसमये चतुर्णां सागराम्भसाम् । पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥ ५० ॥
एवमुक्ता महात्मानो वानरा वारणोपमाः । उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः ॥ ५१ ॥
जाम्बवांश्च हनूमांश्च वेगदर्शी च वानरः । ऋषभश्चैव कलशाञ्जलपूर्णानथानयन् ॥ ५२ ॥
नदीशतानां पञ्चानां जैलं कुम्भैरुपाहरन् । पूर्वान्समुद्रात्कलशं जलपूर्णमथानयत् ॥ ५३ ॥
सुषेणः सत्त्वसंपन्नः सर्वरत्नविभूषितम् । ऋषभो दक्षिणात्पूर्णं समुद्राज्जलमानयत् ॥ ५४ ॥
रक्तचन्दनकैर्पूरैः संतृतं काञ्चनं घटम् । गवयः पश्चिमात्तोयमाजहार महार्णवात् ॥ ५५ ॥
रत्नकुम्भेन महता शीतं मारुतविक्रमः । उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः ॥ ५६ ॥

सुग्रीवादीन्मुख्यान्प्रवेश्य कौसल्याया अभिवादय । तानेरेति शेषः । इति भरतमब्रवीदिति संबन्धः । तत्र पूर्वं सुग्रीवादिप्रवेशबीजमुक्तं पाद्मे—'स्वं श्रीमद्भवनं रामो भक्तपादाब्जरेणुभिः । शुद्धीकर्तुमना राजा हनूमन्तमकल्मषम् ॥ विभीषणं च सुग्रीवं गृहं प्रावेशयत्तदा ॥' इति । आपाततस्तु कौसल्यादिप्रणामकरणं फलमिति भाति । आन्तरं मुख्यं तु पाद्मोक्तं बोध्यम् । पूर्वं तु रामेणैकान्त एव तद्भवनं कृतम्, न तु सर्वसमक्षमिति गम्यते ॥ ४४ ॥ ४६ ॥

रा० टी०—तत इति । ततो रामागमनाहेतोः पौराः गृहं गृहे पताकाः अभ्युच्छ्रयन् अभ्युदश्रयन् उदस्थापयन् घोषणाकानामध्युषितं पितुर्गृहमासमाद् राम इति शेषः ॥ ४२ ॥

गो० टी०—तत इति । अभ्युच्छ्रयन् अभ्युदश्रयन्, उत्सव्य स्थापितवन्तः ॥ ४२ ॥

गो० टी०—घोषणाकेत्यर्धम् । राम इति शेषः ॥ ४३ ॥

रा० टी०—अथेति । रघुनंदनो रामः अर्थोपहितया प्रयोजनसहितया वाचा मधुरं यथा भवति तथा भरतमब्रवीत् ॥ ४३

रा० टी०—तदाकारमाह—पितुरिति द्वाभ्याम् पितुर्भवनमासाद्य प्रवेश्य च सुग्रीवमितिशेषः कौसल्याप्रभृतीरभिवादय ॥ ४४ ॥

गो० टी०—अथाब्रवीदित्यादि । श्लोकद्वयमेकान्वयम् । अथ रघुनन्दनः महात्मनः पितुर्भवनमासाद्य प्रविश्य च कौसल्याप्रभृतीरभिवाद्य च भरतमब्रवीदिति योजना ॥ ४४॥४५ ॥

रा० टी०—तदिति । साशोकवनिकम् अशोकवनिकाविशिष्टं मुक्तावैदूर्यसंकीर्णं मद्भवनं सुग्रीवाय निवेदय ॥ ४६ ॥

रा० टी०—तस्येति । तस्य रामस्य तद्वचनं श्रुत्वा भरतः सुग्रीवं हस्ते गृहीत्वा तमालयं प्रविवेश ॥ ४६ ॥

गो० टी०—यच्चेति । साशोकवनिकम् अन्तःपुरोद्यानसहितम् ॥ ४६ ॥ ४७ ॥

४७] ति० टी०—ततः शत्रुघ्नेन प्रचोदिता राजभवनरक्षका अभ्यन्तरप्रदेशप्रदर्शनार्थं तैलप्रदीपान्-गृहीत्वा भरतसुग्रीवयोः पुरः प्रविविशुः ॥ ४७ ॥

रा० टी०—तत इति । तत भरतकर्तृकभवनप्रवेशसमये शत्रुघ्नेन प्रचोदिताः भृत्याः तैलप्रदीपान् तैलाक्तबहुपलमयदीपविशेषान् पर्यङ्कास्तरणानि च गृहीत्वा विविशुः ॥ ४७ ॥

गो० टी०—तत इति । विविशुः । परिचारिका इति शेषः ॥ ४८–५० ॥

४८] ति० टी०—उवाचेति । रामभवनप्रदर्शनानन्तरमिति शेषः । राघवानुजो भरतः ॥ ४८ ॥

रा० टी०—उवाचेति । राघवानुजो भरतः रामस्याभिषेकाय दूतानाज्ञापय इति वचनं सुग्रीवमुवाच ॥ ४८ ॥

४९] ति० टी०—चतुर्णां चतुःसागरगामिनां जाम्बवदादीनाम् ॥ ४९ ॥

रा० टी०—सौवर्णानिति । सः भरतेन बोधितः सुग्रीवस्सौवर्णान् चतुरो घटान् चतुर्णां वानरेन्द्राणां ददौ ॥ ४९ ॥

गो० टी०—यथेति । हे वानराः, चतुर्णां सागराम्भसाम् चतुर्भिः सागराम्भोभिः पूर्णैर्घटैः उपलक्षिताः प्रत्यूषसमये यथा प्रतीक्षध्वं यथास्मान् प्रतीक्षिष्यध्वे तथा कुरुतेति योजना । सागरजलानयननियोगो नदीजलानयननियोगस्योपलक्षकः ॥ ५१–५३ ॥

५०–५१] ति० टी०—चतुर्णां सागराम्भसां तैः[illegible] र्घटैः सहिताः प्रत्यूषसमये यथास्मान्प्रतीक्षध्वं प्रतीक्षिष्यध्वे तथा कुरुतेति योजना ॥ ५० ॥ ५१ ॥

रा० टी०—तत्प्रयोजनमाह—यथेति । चतुर्णां सागरा[illegible] पूर्णैर्घटैरुपलक्षिता यूयं प्रत्यूषसमये यथा प्रतीक्षध्वं [illegible] निति शेषः तथा कुरुत ॥ ५० ॥

रा० टी०—एवमिति । एवमुक्ताः वारणोपमाः इव शीघ्रगाः वानराः गगनमुत्पेतुः ॥ ५१ ॥

५२–५६] ति० टी०—जाम्बवांश्चेति । अत्र

१ जलं कुम्भेषु चाहरन्निरिति गो. पा. । २ शालामिति गो. पा. ।

आजहार स धर्मात्मानिलः सर्वगुणान्वितः । ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् ॥ ५७ ॥
अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह । पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ॥ ५८ ॥
ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह । रामं रत्नमये पीठे ससीतं संन्यवेशयत् ॥ ५९ ॥
वसिष्ठो विजयश्चैव जाबालिरथ काश्यपः । कात्यायनो गौतमश्च वामदेवस्तथैव च ॥ ६० ॥
अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना । सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ६१ ॥
ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा । योधैश्चैवाभ्यषिञ्चंस्ते संप्रहृष्टैः सनैगमैः ॥ ६२ ॥
सर्वौषधिरसैश्चापि दैवतैर्नभसि स्थितैः । चतुर्भिर्लोकपालैश्च सर्वैर्देवैश्च संगतैः ॥ ६३ ॥
ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम् । अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम् ॥ ६४ ॥
तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः । सभायां हेमकक्षायां शोभितायां महाधनैः ॥ ६५ ॥
रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः । नानारत्नमये पीठे कल्पयित्वा यथाविधि ॥ ६६ ॥
किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना । ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः ॥ ६७ ॥
छत्रं तस्य च जग्राह शत्रुघ्नः पाण्डुरं शुभम् । श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ॥ ६८ ॥

सुषेणगवयादिपञ्चशतवानरपरिग्रहः । तद्वक्ष्यति—**नदीशतानां पञ्चानामिति** । अत एव सुषेणगवययोः समुद्रजलाहरणेन वक्ष्यमाणेन न विरोधः ॥ ५२ ॥ ५६ ॥

रा० टी०—**जाम्बवानिति** । जाम्बवदादयः जलपूर्णान् समुद्रजलैः पूरितान् कलशान् अनायन् पञ्चानां शतानां नदीनां जलं च उपाहरन् स्वस्वगन्तव्यसमुद्रदिग्वर्तिनदीभ्योऽपि जलानायनयित्यर्थः अत्र वेगदर्शिशब्देन गवयो गृह्यते वेगं दर्शयति तल्लील इति व्युत्पत्तेः अत एव गवयः पश्चिमादिति वक्ष्यमाणेन न विरोधः सार्द्धश्लोक एकान्वयी ॥ ५२ ॥

रा० टी०—**आनयनकर्तॄन् विभज्याह—पूर्वादिति** । सुषेण. शोभनसेनावान जाम्बवानित्यर्थः पूर्वात्समुद्रात् जवेन पूर्णं कलशमानयत् जलं च पूर्वसमुद्रस्थेति प्रत्यासत्या लब्धम्॥५३॥

गो० टी०—जलपूर्णानधानयत्रित्युक्तमेवार्थं विवृणोति—**नदीशतानामिति** ॥ ५४ ॥

गो० टी०—एवं जाम्बवदुक्तमर्द्धगद्यसुषेणेनदीजलानयनमुक्त्वा सुषेणपंभगवयानलेः सागरजलानयनं दर्शयति—**पूर्वा-**[illegible] ॥ ५५ ॥

रा० टी०—**ऋषभ इति** । ऋषभः रक्तचंदनकर्पूरैः सम्भृत्वा[illegible]नं घटं गृहीत्वेति शेषः दक्षिणात् समुद्रात् [illegible]नयत् ॥ ५४ ॥

रा० टी०—**गवय इति** । गवयः पश्चिमात् महार्णवात् जलमाजहार ॥ ५५ ॥

रा० टी०—**उत्तरादिति** । उत्तरात्समुद्रात् आनिलः [illegible]ततो हनुमान् जलमाजहार ॥ ५६ ॥

रा० टी०—**ऋषभो दक्षिणादिति** । अयं चर्षभः पूर्व-[illegible]रः ॥ ५६–५८ ॥

[illegible]] ति० टी०—आनिलो हनुमान् । तत्प्रसिद्धं नदीसागराणां जलम् ॥ ५७ ॥

५८] ति० टी०—श्रेष्ठाय पुरोहिताय वसिष्ठाय ॥ ५८ ॥

रा० टी०—**तत इति** । शत्रुघ्नः सचिवैः सह रामस्याभिषेकाय वानरश्रेष्ठैरानीतं जलं प्रेक्ष्य पुरोहिताय श्रेष्ठाय वशिष्ठाय सुहृद्भ्यश्च न्यवेदयत् सार्धश्लोक एकान्वयी ॥ ५७ ॥ ५८ ॥

गो० टी०—तत इत्यादिसार्धश्लोक एकान्वयः । तत् प्रसिद्धम् । तज्जलं तेषां नदीसागराणां जलम् ॥ ५९–६२ ॥

५९–६०] ति० टी०—प्रयतः प्रयत्नवान् । रत्नमये पीठे रत्नसिंहासने । ससीतं सीतासहितम् ॥ ५९ ॥ ६० ॥

६१] ति० टी०—प्रसन्नेन निर्मलेन सकलवैदिकमन्त्रमन्त्रितत्वादतिपवित्रेण च सलिलेन नरव्याघ्रमभ्यषिञ्चन् ॥ ६१ ॥

रा० टी०—**तत इति** । ततः शत्रुघ्नवचनश्रवणानन्तरं ब्राह्मणैः सह प्रयतो वशिष्ठः रत्नमये पीठे ससीतं सीतासहितं रामं सन्न्यवेशयत् ॥ ५९ ॥

रा० टी०—**वशिष्ठ इति** । वशिष्ठादयः प्रसन्नेन सुगन्धिना सलिलेन पुरुषव्याघ्रं राममभ्यषिञ्चन् श्लोकद्वयमेकान्वयि ॥ ६० ॥ ६१ ॥

६२] ति० टी०—**ऋत्विग्भिरित्यादि** । अत्र वसिष्ठादयः प्रयोजककर्तारः कन्याभिः षोडशसंख्याभिः । अभ्यषिञ्चन्नभ्यषेचयन् । ते वसिष्ठादयः नैगमा वणिजः ॥ ६२ ॥

६३] ति० टी०—नभसि स्थितैः सर्वदेवसहितैर्लोकपालदैवतैः सर्वौषधिरसैरभ्यषेचयन्वसिष्ठादयः ॥ ६३ ॥

रा० टी०—**तत्प्रकारं बोधयन्नाह—ऋत्विग्भिरिति** । ते वसिष्ठादयः पूर्वं सर्वौषधिरसैः चकारात्सलिलेन च करणैः ऋत्विगादिभिः प्रयोज्यैः पुरुषव्याघ्रं राममभ्यषिञ्चन् अभ्यषेचयन् श्लोकद्वयमेकान्वयि ॥ ६२ ॥ ६३ ॥

गो० टी०—**ऋत्विग्भिरिति** । ते वसिष्ठादयः ऋत्विगादिभिः सहाभ्यषिञ्चन्निति योजना ॥ ६३ ॥

---

५ नक इति गो. पा. । २ वामदेवश्चेति गो. पा. । ३ सुयज्ञश्च गौतमो विजयस्तथेति गो. पा. । ४ प्रहृष्टा इति गो. पा. ।

अपरं[1] चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः । मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम्[2]॥ ६९ ॥
राघवाय ददौ वायुर्वासवेन प्रचोदितः । सर्वरत्नसमायुक्तं मणिभिश्च[3] विभूषितम् ॥ ७० ॥
मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः । प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ ७१ ॥
अभिषेके तदर्हस्य तदा रामस्य धीमतः । भूमिः सस्यवती चैव फलवन्तश्च पादपाः ॥ ७२ ॥
गन्धवन्ति च पुष्पाणि बभूवुः राघवोत्सवे । सहस्रशतमश्वानां धेनूनां च गवां तथा ॥ ७३ ॥
ददौ शतसहस्रान्तं द्विजेभ्यो मनुजर्षभः । त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः॥ ७४ ॥
नानाभरणवस्त्राणि महार्हाणि च राघवः । अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम्[4]॥ ७५ ॥
सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजाधिपः । वैदूर्यमयचित्रे च चन्द्ररश्मिविभूषिते ॥ ७६ ॥
वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ । मणिप्रवरजुष्टं[5] तं मुक्ताहारमनुत्तमम् ॥ ७७ ॥
सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम्[6] । अजे वाससी दिव्ये शुभान्याभरणानि च ॥ ७८ ॥

गो० टी०–सर्वौषधिरसैरित्यत्रापि अभ्यषिञ्चन्त इत्यनुषज्यते ॥ ६४ ॥ ६५ ॥

६४] ति० टी०–येन किरीटेन मनुरभिषिक्तो युक्तः ॥ ६४ ॥

६५] ति० टी०–अन्ववायो वंशः । येन वसिष्ठेन तद्वंशे राजानं उच्यमानगुणायां सभायामभिषेचिताः ॥ ६५ ॥

६६] ति० टी०–तस्यां सभायां पीठे दीप्यमानं रामं कल्पयित्वोपवेश्य यथाविधमभिषिच्य ॥ ६६ ॥

६७–६८] ति० टी०–पश्चादभिषेकानन्तरं तेन किरीटेन तेन वसिष्ठेन राघवः समयोक्ष्यत संयुक्तः कृतः । ऋत्विग्भिश्च भूषणैः संयुक्तः कृतः आर्षो लुक् ॥ ६७ ॥ ६८ ॥

रा० टी०–ब्रह्मणेति । पूर्वं ब्रह्मणा निर्मितं यत् किरीटं येन च पुरा अभिषिक्तो मनुः योजित इति शेषः यत्र च तस्य मनोः अन्ववाये वंशे विशेषणविशिष्टायां सभायामभिषेचिता राजानो येन योजिता इति शेषः तेन किरीटेन तत्पश्चात् अभिषेकादुत्तरकाले तेन वसिष्ठेन प्रयोक्तृकेन ऋत्विग्भिः प्रयोज्यैः दीप्ततेजसं रामं नानारत्नमये पीठे यथाविधि कल्पयित्वा उपवेश्य राघवः समयोक्ष्यत समयोक्ष्यन्त श्लोकचतुष्टयमेकान्वयि ॥ ६४–६७ ॥

रा० टी०–छत्रमिति । शत्रुघ्नः छत्रं जग्राह सुग्रीवः श्वेतं बालव्यजनं जग्राह अपरं द्वितीयं बालव्यजनं विभीषणो जग्राह सार्धश्लोक एकान्वयी ॥ ६८ ॥

६९–७०] ति० टी०–शतपुष्करां शतपद्मनिर्मिताम् ॥ ६९ ॥ ७० ॥

रा० टी०–मालामिति । वासवेन प्रचोदितो वायुः काञ्चनीं मालां राघवाय ददौ ॥ ६९ ॥

गो० टी०–मालामिति । शतपुष्करां शतपद्माम् ॥ ६९ ॥

रा० टी०–सर्वेति । शक्रप्रचोदितः वायुरित्यनुषज्यते मुक्ताहारं नरेन्द्राय रामाय ददौ ॥ ७० ॥

गो० टी०–सर्वेति । सर्वरत्नैः नवरत्नैः समायुक्तम्, मणिरत्नेन मणिश्रेष्ठेन नायकेन मध्ये विराजन्तं, मुक्ताहारं मुक्ताप्रधानहारम् ददौ । वायुरित्यनुषज्यते ॥ ६७ ॥ ६८ ॥

७१] ति० टी०–शक्रप्रचोदित इति । वायुरित्यनुषज्यते । वायुद्वारा दिव्यां स्वीयां काञ्चनमालां मुक्ताहारं च सभामध्यस्थो ददावित्यर्थः ॥ ७१ ॥

रा० टी०–प्रजगुरिति । तदर्हस्य देवादिगानयोग्यस्य रामस्य अभिषेके देवगन्धर्वाः प्रजगुः अप्सरोगणाः ननृतुश्च ॥ ७१ ॥

७२] ति० टी०–तदर्हस्य देवगीतनृत्तार्हस्य । अभिषेके सतीत्यर्थः ॥ ७२ ॥

रा० टी०–भूमिरिति । भूमिः सस्यवती प्रशस्तसस्यविशिष्टा बभूव ॥ ७२ ॥

गो० टी०–पूर्वं रामश्लेषे, अपि शुष्काः परिम्लाना इत्युक्तावस्थं वसुजातं रामसंश्लेषे तादृगवस्थां विहाय प्रफुल्लसमभूदित्याह–भूमिरिति ॥ ६९ ॥

७३] ति० टी०–सहस्रशतं लक्षम्, धेनूनां गवाम् । नवप्रसूतगवामित्यर्थः । शतशब्दोऽनन्तवाची वा ॥ ७३ ॥

७४–७८] ति० टी०–पूर्वं गवादिदानानि कृत्वा तदनन्तरं भूयसीत्वेन त्रिंशत्कोटीर्हिरण्यं ददौ ॥ ७४–७८ ॥

रा० टी०–सहस्रेति मनुजर्षभो रामः पूर्वमश्वानां गवां च सहस्रशतं लक्षमित्यर्थः शतशब्दांश्च द्विजेभ्यो ददौ ॥ ७३ ॥

रा० टी०–त्रिंशदिति । पुनरनन्तरं हिरण्यस्य त्रिंशत्कोटीः ब्राह्मणेभ्यो ददौ ॥ ७४ ॥

गो० टी०–सहस्रशतमिति । धेनूनां नवप्रसूतिकानाम् । धेनुः स्यात्प्रसूतिकेत्यमरः । पूर्वं हिरण्यदानादेः पूर्वम् । सुग्रीवादिभ्यः पूर्वं वा ॥ ७० ॥ ७१ ॥

रा० टी०–अर्केति । मनुजाधिपो रामः काञ्चनीं स्रजं सुग्रीवाय प्रायच्छत् ॥ ७२ ॥

गो० टी०–अर्करश्मीति । मणिविग्रहां मणिप्रचुराङ्ग ७२

---

१ अपरं चन्द्रसंकाशं बालव्यजनमुत्तमम् । हृष्टो रामस्य जग्राह राक्षसेन्द्रो विभीषण इति गो. पा. । २ मणिरत्नेति गो.पा. । ३ वज्ररत्नेति गो. पा. ।

अवेक्षमाणा वैदेही प्रददौ वायुसूनवे । अवमुच्यात्मनः कण्ठाद्धारं जनकनन्दिनी ॥ ७९ ॥
अवैक्षत हरीन्सर्वान्भर्तारं च मुहुर्मुहुः । तामिङ्गितज्ञः संप्रेक्ष्य बभाषे जनकात्मजाम् ॥ ८० ॥
प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि । अथ सा वायुपुत्राय तं हारमसितेक्षणा ॥ ८१ ॥
तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः । पौरुषं [3]विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा ॥ ८२ ॥
हनूमांस्तेन हारेण शुशुभे वानरर्षभः । चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाचलः ॥ ८३ ॥
सर्वे वानरवृद्धाश्च ये चान्ये वानरोत्तमाः । वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ॥ ८४ ॥
विभीषणोऽथ सुग्रीवो हनूमाञ्जाम्बवांस्तथा । सर्वे वानरमुख्याश्च रामेणाक्लिष्टकर्मणा ॥ ८५ ॥
यथार्हं पूजिताः सर्वे कामै रत्नैश्च पुष्कलैः । प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम् ॥ ८६ ॥
तैता द्विविदमैन्दाभ्यां नीलाय च परंतपः । सर्वान्कामगुणान्वीक्ष्य प्रददौ वसुधाधिपः ॥ ८७ ॥
दृष्ट्वा सर्वे महात्मानस्ततस्ते वानरर्षभाः । विसृष्टाः पार्थिवेन्द्रेण किष्किन्धां समुपागमन् ॥८८॥
सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम् । पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम्॥ ८९ ॥

रा० टी०–वैदूर्येति । वैदूर्यमये एव चित्रे अङ्गदे अङ्गदाय ददौ ॥ ७६ ॥

गो० टी०–वैदूर्येति । धृतिमान् प्रीतिमान् ॥ ७३ ॥

रा० टी०–मणीति । मणिप्रवरैर्जुष्टं मुक्ताहारं सीतायै प्रददौ ॥ ७७ ॥

गो० टी०–मणिप्रवरेरिति । सीतायै प्रददौ हनुमते दातव्यमित्याशयेन ददौ ॥ ७४ ॥

रा० टी०–अजरे इति । वैदेही अवेक्षमाणा राममवलोकयन्ती तदभिप्रायं लब्धेत्यर्थः वाससी आभरणानि च वायुसूनवे प्रददौ ॥ ७८ ॥

गो० टी०–अरजे इति । अरजे निर्मले अकारान्तत्वमार्षम् । अवेक्षमाणा भर्तारमिति शेषः । स्त्रियाः स्वातन्त्र्याभावात् भर्तृनुज्ञां काङ्क्षितवतीति भावः ॥ ७५ ॥

७९–८०] ति० टी०–अवेक्षमाणा तत्कृतसुपकारं चिन्तयन्ती प्रददौ । प्रदातुमियेपेत्यर्थः । आत्मनः कण्ठाद्धारमवमुच्य दित्सया भर्तृमतगे भर्तारमवैक्षत ॥ ७९ ॥ ८० ॥

रा० टी०–अवमुच्येति । जनकनन्दिनी आत्मनः कण्ठात् हारमवमुच्य हरीन् भर्तारं च मुहुर्मुहुरवैक्षत ॥ ७९ ॥

गो० टी०–अवमुच्येति । हारं रामदत्तम् । सदसि मध्ये हारप्रदानं कस्मै चित् पारितोषिकतया दापयितुमिति निश्चित्य अयं हारः एषु कस्मै देय इत्याशयेनावैक्षतेत्यर्थः॥७६॥

रा० टी०–तामिति । इङ्गितज्ञः अभिप्रायाभिज्ञो रामः जनकात्मजां संप्रेक्ष्य यस्योपरि त्वं तुष्टासि तस्मै हारं प्रदेहि इति बभाषे ॥ ८० ॥

गो० टी०–तामिङ्गितज्ञ इत्यादिसार्धश्लोक एकान्वयः । प्रदेहीति । यस्य यस्मिन् पौरुषं बलम् समुद्रलङ्घनेन विक्रमो लङ्कादहनेन बुद्धिः अशोकवनिकाप्रवेशेन सर्वशः सर्वाणि, यस्मिन् सन्नीति यस्य संतुष्टासि तस्मै देहीति योजना अन्यथा अन्येषां निन्दोक्तिरेव स्यात् ॥ ७७ ॥ ७८ ॥

८१] ति० टी०–अथ भर्तृनुमत्यनन्तरं सा वायुपुत्राय ददाविति शेषः ॥ ८१ ॥

८२–८५] ति० टी०–तत्र हेतुः पौरुषादि तेजआदि च । यत्र हनुमति नित्यदा नित्यम् आर्षो दाप्रत्ययः ॥ ८२–८५ ॥

८६] ति० टी०–कामैः स्रक्चन्दनान्नपानायैः ॥ ८६ ॥

रा० टी०–अथेति । सा सीता यस्मिन् एतानि तेजःप्रभृतीनि नित्यदा तिष्ठन्तीति शेषः तस्मै वायुपुत्राय ददाविति शेषः किञ्च यस्मिन् हारे तेजःप्रभृतीनि तिष्ठन्तीति यत्प्रभावात्तद्धारिणि भवन्तीत्यर्थः तं वायुपुत्राय ददौ सार्द्धश्लोक एकान्वयी ॥ ८१ ॥ ८२ ॥

रा० टी०–हनूमानिति । तेन हारेण हनुमान् चन्द्रांशुचयेन गौरो यः श्वेताभ्रः तेन अचल इव शुशुभे ॥ ८३ ॥

रा० टी०–सर्व इति । वानरवृद्धाः वानरोत्तमाश्च सर्वे यथार्हं प्रतिपूजिताः ॥ ८४ ॥

रा० टी०–विभीषण इति । विभीषणादयः सर्वे वानरमुख्याश्च रामेण यथार्हं पूजिताः अत एव प्रहृष्टमनसस्ते सर्वे यथागतं जग्मुः स्वस्वनिवेशस्थानमिति शेषः श्लोकद्वयमेकान्वयि ॥ ८५ ॥ ८६ ॥

८७–८९] ति० टी०–वीक्ष्य मैन्दद्विविदनीलान्दृष्ट्वा तेभ्यः सर्वान्कामगुणानत्युत्तमान्रत्नादीन्ददौ ॥ ८७–८९ ॥

रा० टी०–तत इति । वसुधाधिपः सर्वान् वानरान् कामगुणान् प्रेप्सितगुणविशिष्टान् पदार्थान् वीक्ष्य द्विविदादिभ्यः प्रददौ ॥ ८७ ॥

रा० टी०–दृष्ट्वेति । दृष्ट्वा अभिषेकमवलोक्य विसृष्टाः पार्थिवेन्द्रेण रामेण विसृष्टाः वानरर्षभाः किष्किन्धां समुपागमन् ॥ ८८ ॥

रा० टी०–गोवलीवर्दन्यायेन पुनराह–सुग्रीव इति । रामाभिषेचनं दृष्ट्वा विद्यमानः रामेण पूजितः सुग्रीवः किष्किन्धां प्राविशत् ॥ ८९ ॥

---

१ ददौ सेति गो. पा. । २ इदमर्धं गो. पुस्तके नास्ति । ३ इदमर्धं मध सा वायुपुत्र इत्यर्धांत्प्रागूह्यते गो. पुस्तके । ४ इदं पदं सर्वे वानरवृ० प्रागूह्यते गो. पुस्तके । ५ सर्वेति गो. पा. ।

विभीषणोऽपि धर्मात्मा सह तैर्नैर्ऋतर्षभैः । लब्ध्वा कुलधनं राजा लङ्कां प्रायान्महायशाः ॥९०॥
स राज्यमखिलं शासन्निहतारिर्महायशाः । राघवः परमोदारः शशास परया मुदा ॥
उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ॥ ॥ ९१ ॥
आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन ।
तुल्यं यथौ त्वं पितृभिःपुरस्तात्तथौवराज्ये धुरमुद्वहस्व ॥ ॥ ९२ ॥
सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् ।
नियुज्यमानो भुवि यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ॥ ॥ ९३ ॥

गो० टी०–तत इति । कामगुणान् काम्यन्त इति कामाः प्रार्थनीयाः गुणाः येषां ते तान् आभरणादिवस्तुविशेषान् ॥ ७९ ॥ ८० ॥

९०] ति० टी०–लब्ध्वा कुलधनमिति । स्वकुलधनं लङ्कारराज्यमित्यर्थः । यत्तु इक्ष्वाकुकुलदैवतं रङ्गं विमानमिति, तत्त । पाद्मेऽवतारसमाप्तिसमये तदानयनोक्तत्वात् । तथा च तत्र विभीषणं प्रति रामवचनम् । यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावदस्तु स्वराज्यस्थः कालं मम पदं व्रज ॥ इत्युक्त्वा प्रददौ तस्मै स्वनिक्षेपामहिण्वे । श्रीरङ्गस्वामिनं स्वार्चामिक्ष्वाकुकुलदैवतम् ॥ रङ्गं विमानमादाय लङ्कां प्रायाद्विभीषणः ॥' इति ॥ ९० ॥

रा० टी०–विभीषण इति । कुलधनं स्वराज्यं लब्ध्वा आगतो विभीषणः लङ्कां प्रायात् अत्र कुलधनशब्देन रङ्गनाथग्रहणमिति केचित् ॥ ९० ॥

गो० टी०–विभीषणोऽथेऽति । अत्र संभावितपरिणयने प्रथमं कीर्तनाल्लब्ध्वा कुलधनमित्यनुवादाच्च आदावेव विभीषणः संभावित इति बोध्यम ॥ ८१–८३ ॥

गो० टी०–सुग्रीव इत्यर्धम् । अत्रापि वचनव्यत्ययेन किष्किन्धामभ्युपागमदित्यनुषज्यते ॥ ८४ ॥

गो० टी०–लब्ध्वेत्यर्धम् । कुलधनम् इक्ष्वाकुकुलधनम् लङ्कारराज्यमिति केचित् ॥ ८६ ॥

९१] ति० टी०–शासन्दुष्टनिग्रहं कुर्वन्शशास पालयामास ॥ ९१ ॥

रा० टी०–स इति । निहतारिः रामः राज्यं शासन्सन् परया मुदा शशास स्वराजइत्यर्थः ॥ ९१ ॥

गो० टी०–स इति । शासन् दुष्टनिग्रहं कुर्वन् । शशास बुभुजे इत्यर्थः । धातूनामनेकार्थत्वात् ॥ ८६ ॥ ८७ ॥

९२] ति० टी०–चतुरङ्गबलेन सह पूर्वराजाध्युषितामिमां गां मया सहातिष्ठ । पूर्वे राजानो मन्वादयस्तैरध्युषितां पालिताम् । कीदृशमास्थानं मया भुवः कर्तव्यं भवता सहेत्याह—तुल्यमित्यादि । पुरस्तान्महाराज्याभिषेकात्पूर्वं पितृभिः स्वपितृभिस्तुल्यं यथा भवति तथा तैर्या यौवराज्ये पूर्वेण तां धुरमुद्वहस्व । आत्मना सह वनवासे दुःखाभावाद्राज्ये सहसुखानुभवार्थं लक्ष्मणं प्रति यौवराज्यप्रार्थनेति भावः ॥ ९२ ॥

रा० टी०–उवाचेति । रामो लक्ष्मणमुवाच अहं पृथ तदाकारमाह–आतिष्ठेति । पूर्वराजैरध्युषितां बलेन सैन्ये सहितामिमां गां मया सह आतिष्ठ तत्र राजत्वेन समानकक्ष्ययोः स्थितिर्न युज्यत इत्यत आह पुरस्तात् पूर्वस्मिन् क पितृभिः तुल्यं यथा भवति तथा यौवराज्ये स्थितस्सन् धुर दूहस्व ॥ ९२ ॥

गो० टी०–लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुन्ध मिति पूर्वाभिषेकारम्भे भरतामन्त्रिवाने प्रतिज्ञानात् र द्विनाभिभाषत इति नियमाल्लक्ष्मणमेव यौवराज्ये नियुं आतिष्ठेति । पूर्वराजैः मन्वादिभिः अध्युषितां भा पालय । पितृभिः पितृपितामहप्रपितामहैः, या भूता तां मया तुल्यं यथा भवति तथा यौवराज्ये स्थित्वा उद्वहस्व ॥

९३] ति० टी०–सर्वात्मना पर्यनुनीयमानः । भरते वियमानेऽहं यौवराज्यानर्ह इति निषेधे क्रियमाणे पुनःपुनरनुनीयमान इत्यर्थः । नियुज्यमानोऽपि न्यायप्राप्तयौवराज्येन भरतेनानुनीयमानोऽपि योगं यौवराज्य नोपैति नेच्छति स्म । ततो भरतं यौवराज्येऽभ्यषेचयत् ।

रा० टी०–सर्वात्मनेति । सर्वात्मना सर्वप्रकारेण राज्ये पर्यनुनीयमानः रामेणेति शेषः नियुज्यमानः नापीति शेषः सौमित्रिः योगं युवराजत्वसम्बन्धं यदा न अङ्गीचकार ततस्तदा महात्मा रामः भरतं यौवराज्ये षिञ्चत् ॥ ९३ ॥

गो० टी०–सर्वेति । यौवराज्ये नियुज्यमानः यौव मङ्गीकुरुष्वेति नियम्यमानः, पर्यनुनीयमानः, पुनः पुनः पृच्छ्यमानः सत्रपि च, सर्वात्मना सर्वप्रकारेणापि, य सम्मतिम् नोपैति स्वशेषत्वविरुद्धत्वज्ञानाज्ज्येष्ठे भर थमाने स्वस्य तदनुचितत्वज्ञानाच्चेति भावः । तं अ

● १ सर्वात्मनाऽसौ सर्वार्हं पालयेति इति गो० पा० ।

पौण्डरीकाश्वमेधाभ्यां वाजिमेधेन चासकृत् । अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवात्मजः ॥ ९४ ॥
राज्यं दशसहस्राणि प्राप्य वर्षाणि राघवः । दशाश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान् ॥ ९५ ॥
आजानुलम्बिबाहुः स महावक्षाः प्रतापवान् । लक्ष्मणानुचरो रामः शशास पृथिवीमिमाम् ॥ ९६ ॥
राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् । ईजे बहुविधैर्यज्ञैः ससुतभ्रातृबान्धवः ॥ ९७ ॥
न पर्यदेवन्विधवा न च व्यालकृतं भयम् । न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति ॥ ९८ ॥
निर्दस्युरभवल्लोको नानर्थं कश्चिदस्पृशत् । नच स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ॥ ९९ ॥
सर्वं मुदितमेवासीत्सर्वो धर्मपरोऽभवत् । राममेवानुपश्यन्तो नाभ्यहिंसन्परस्परम् ॥ १०० ॥
आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः । निरामया विशोकाश्च रामे राज्यं प्रशासति ॥ १०१ ॥
[रामो रामो राम इति प्रजानामभवन् कथाः । रामभूतं जगदभूद्रामे राज्यं प्रशासति ॥]
नित्यमूला नित्यफलास्तरवस्तत्र पुष्पिताः । कालवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः ॥ १०२ ॥
[ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः ।]
स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः । आसन्प्रजा धर्मपरा रामे शासति नानृताः ॥ १०३ ॥
सर्वे लक्षणसंपन्नाः सर्वे धर्मपरायणाः । दशवर्षसहस्राणि रामो राज्यमकारयत् ॥ १०४ ॥
धैर्ये यशस्यमायुष्यं राज्ञां च विजयावहम् । आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम् १०५
यः शृणोति सदा लोके नरः पापात्प्रमुच्यते । पुत्रकामश्च पुत्रान्वै धनकामो धनानि च ॥ १०६ ॥

९४-१००] ति० टी०-पौण्डरीकाश्वमेधेत्यादिरितरण्डार्थसंक्षेपः । पौण्डरीकाश्वमेधाभ्यामिति सामान्यतस्त्वा तत्रैव विशेषमाह—वाजिमेधेन चासकृदिति ॥ ९४-१०० ॥

रा० टी०-पौण्डरीकेति । पार्थिवात्मजो रामः पौण्डरादिभिः यज्ञैरयजत् ॥ ९४ ॥

रा० टी०-राज्यमिति । राघवः दशसहस्राणि दशगुणितसहस्राणि त्रिंसहस्राणि येषु त्रयस्त्रिंशत्सहस्रवर्षाणीत्यर्थः तं प्राप्य दशाश्वमेधानाजह्रे तन्मध्ये यत्र यत्राकालमकरोत् दशसहस्राणि त्रिंशद्वर्षसहस्रपर्यन्तं राज्यं प्राप्य कृत्वा मेधानाजह्रे त्रिंसहस्रवर्षपर्यन्तं चकार अत एव दशवर्षसहस्राणि दशवर्षशतानि चेति बालकाण्डोक्तेन न विरोधः ॥ ९५ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणवर्णयन्नाह-आजान्विति । रामः पृथिवीं शशास ॥ ९६ ॥

रा० टी०-पौण्डरीकेति । अत्रोत्तरकाण्डान्तर्भावोक्तिर्वनपरमध्याधानपूर्वकं पूर्वकृतत्वेपि रामेण कृता इत्यस्योपलक्षणम् ॥ ९०-९२ ॥

रा० टी०-राघव इति । राघवः ससुतभ्रातृबान्धवस्सन् ईजे ॥ ९७ ॥

रा० टी०-राघव इति । चार्षीति निपातसमुदायोवर्धोऽभिलक्ष्यक्रमः । सप्तम्यर्थजातिवाचक एवेत्यर्थः ॥ ९३ ॥

रा० टी०-नेति । रामे राज्यं प्रशासति सति विधवाः [illegible] विधवा नाभवन्नित्यर्थः ॥ ९८ ॥

रा० टी०-निर्दस्युरिति । लोको निर्दस्युरभवत् अनर्थं कथिदास्पृशत् अत एव वृद्धाः बालानां प्रेतकार्याणि न कुर्वते बाला न म्रियन्त इत्यर्थः ॥ ९९ ॥

गो० टी०-न पर्यदेवन्निति नापर्यदेवयन्नित्यर्थः ॥ ९४ ॥ ९९ ॥

रा० टी०-सर्वमिति । सर्वजनजातं मुदितमेवासीत् राममेवानुपश्यन्तो जनाः परस्परं नाभ्यहिंसन् ॥ १०० ॥

गो० टी०-सर्वमिति । राममेवेति । अन्योन्यनिर्मूलनवैरे सत्यपि रामभुवं म्लानं भविष्यतीति मत्वा परस्परं नाभ्यहिंसन् । परमधार्मिके राममेवानुचिन्तयन्तोऽन्योन्यवैरं प्रजहुरित्यर्थः ॥ ९६-१०२ ॥

१०१-१०४] ति० टी०-वर्षसहस्राण्यासन् जना इति शेषः ॥ १०१-१०४ ॥

रा० टी०-आसन्निति । वर्षसहस्राणि अनेकसहस्रवर्षाणीत्यर्थः पुत्रसहस्रिणस्सन्तः आसन् ॥ १०१ ॥

रा० टी०-नित्येति । तरवः पुष्पितास्संतः नित्यमूलाः नित्यफलाश्च भवन्तीति शेषः ॥ १०२ ॥

रा० टी०-स्वकर्मसु । प्रजाः स्वैरेव कर्मभिः तुष्टाः सन्तः कर्मसु प्रवर्तन्ते अत एव धर्मपराः यागादिशीला आसन् १०३॥

रा० टी०-सर्वे इति । सर्वे जना लक्षणसंपन्नाः शुभप्रदलक्षणयुक्ताः सर्वधर्मपरायणाः परमात्मधर्मनिरताः आसन् दशवर्षसहस्राणि त्रयस्त्रिंशद्वर्षाणीत्यर्थः रामो राज्यमकारयत् अकरोत् ॥ १०४ ॥

१०५-१०६] ति० टी०-आर्षमृषिवेदस्तत्संबन्धि । वेदोपबृंहणमिति यावत् । पुरा पुरातनम् ॥ १०५ ॥ १०६ ॥

---

४ गो. [illegible] ४ सहस्रातीति गो. पा. । ५ अनर्थ इति गो.पा. । ६ इदं पञ्चमर्षिकं [illegible]

लभते मनुजो लोके श्रुत्वा रामाभिषेचनम् । महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति ॥ १०७ ।
राघवेण यथा माता सुमित्रा लक्ष्मणेन च । भरतेन च कैकेयी जीवपुत्रास्तथा स्त्रियः ॥ १०८ ।
[भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः ।]
श्रुत्वा रामायणमिदं दीर्घमायुश्च विन्दति । रामस्य विजयं चेमं सर्वमक्लिष्टकर्मणः ॥ १०९ ।
शृणोति य इदं काव्यं पुरा वाल्मीकिना कृतम् । श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ ॥ ११० ।
समागम्य प्रवासान्ते रमन्ते सह बान्धवैः । शृण्वन्ति य इदं काव्यं पुरा वाल्मीकिना कृतम् ११
ते प्रार्थितान्वरान्सर्वान्प्राप्नुवन्तीह राघवात् । श्रवणेन सुराः सर्वे प्रीयन्ते संप्रशृण्वताम् ॥ ११२
विनायकाश्च शाम्यन्ति गृहे तिष्ठति यस्य वै । विजयेत महीं राजा प्रवासी स्वस्तिमान्भवेत्॥११३
स्त्रियो रजस्वलाः श्रुत्वा पुत्रान्सूयुरनुत्तमान् । पूजयंश्च पठंश्चैनमितिहासं पुरातनम् ॥ ११४
सर्वपापैः प्रमुच्येत दीर्घमायुरवाप्नुयात् । प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात्॥११५

१०७–१११] ति० टी०–रामाभिषेचनम् । तदवधिकमित्यर्थः रिपूनधितिष्ठति । तान्विजयते इत्यर्थः॥१०७–१११॥

रा० टी०–धर्म्यमिति । पुरा वाल्मीकिना कृतं आर्षं वेदप्रतिपाद्यवस्तुप्रतिपादकमिदमादिकाव्यं राज्ञां धर्मादिप्रापकं विजयावहं चास्तीति शेषः ॥ १०६ ॥

गो० टी०–अथ रामायणपठने फलं दर्शयति–धन्यमित्यादिसार्धश्लोकमेकं वाक्यम् । ऋषिः वेदः तत्संबन्धि । वेदोपबृंहणमिति यावत् । पुरा अवतारात्पूर्वम् । रामोत्तरतापनीयमूलत्वेन पुरातनमिति वार्थः । यद्वा पुरा सर्वकल्पेभ्यः पूर्वम् । न त्ववतारात्पूर्वमित्यर्थः । 'प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः । चकार चरितं कृत्स्नं विचित्रपदमात्मवान्' इति रामे प्राप्तराज्ये सति चकारेत्युपक्रमात्, रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवानिति राज्यप्राप्तिपर्यन्तं भूततया निर्दिश्य ततः परं ब्रह्मलोकं प्रयास्यतीत्येतदन्तं भविष्यता निर्देशात्, कोन्वस्मिन् साम्प्रतं लोके इत्यादौ साम्प्रतशब्दप्रयोगात्, रामभूतं जगदभूद्रामे राज्यं प्रशासतीति सकललोकविदितरामविषयप्रश्नानुपपत्तेः सर्वथा परिहृतत्वात् । इतिहासं पुरातनमित्यस्य आदिकाव्यत्वात्सङ्गतेरन्येषामपि विरोधाभासानां छुपरिहार्यत्वाच्चायमेवार्थः ॥ १०३ ॥

रा० टी०–य इति । यो नरः सदा शृणोति स पापात्सदा प्रमुच्यते अर्द्धं पृथक् ॥ १०६ ॥

रा० टी०–पुत्रेति । रामाभिषेचनं श्रुत्वा पुत्रकामो मनुजः पुत्रान् लभते धनकामो धनानि लभते राजा महीं विजयते प्राप्नोति रिपूनधितिष्ठति निराकरोति यथा राघवादिना कौशल्यादयः जीवपुत्राः जीवनप्रदपुत्रविशिष्टाः तथा स्त्रियो भवन्तीति शेषः सार्द्धश्लोकद्वयमेकान्वयि ॥ १०७॥१०८ ॥

रा० टी०–श्रुत्वेति । अक्लिष्टकर्मणो रामस्य विशेषेण जयो यस्मिन् तदेतद्रामायणं श्रुत्वा दीर्घमायुर्विन्दति ॥ १०९ ॥

गो० टी०–पुत्रकामस्त्वित्यादिसार्धश्लोकद्वयमेकं वाक्यम् । रामाभिषेचनम् रामाभिषेकावधिकम्, अधितिष्ठति आक्रम्य तिष्ठतीत्यर्थः । माता कौसल्या । जीवपुत्राः न्तीति शेषः ॥ १०४–१०७ ॥

रा० टी०–शृणोतीति । य इदं शृणोति सोऽसौ दुरतितरति ॥ ११० ॥

रा० टी०–समागम्येति । ये इदं काव्यं शृण्वंति प्रवासात्समागम्य बान्धवैस्सह रमन्ते राघवात् प्रार्थितान् प्राप्नुवन्ति सार्द्धश्लोक एकान्वयी ॥ १११ ॥ ११

गो० टी०–शृणोति य इत्यादिश्लोकद्वयमेकान्वयम् । दुर्गाणि दारिद्र्यादीनि ॥ १०८ ॥ १०९ ॥

११२] ति० टी०–'संप्रशृण्वताम्' इति पाठः ॥१

रा० टी०–श्रवणेनेति । संप्रशृण्वतां जनानां श्रवणेन सर्वे सुराः प्रीयन्ते यस्य गृहे तिष्ठति पुस्तकं पाठकं तस्यापि विनायकाः विघ्नाः शाम्यन्ति ॥ ११३ ॥

गो० टी०–श्रवणेनेति । विनायकाः विघ्नग्रहाः ॥ ११०–११२ ॥

११३] ति० टी०–विनायका विघ्नकारिणो देवशेषाः ॥ ११३ ॥

रा० टी०–विजयेतेति । राजा महीं विजयेत प्राप्नुयात् प्रवासी विदेशस्थः स्वस्तिमान् भवेत् स्त्रियः श्रुत्वा अनुत्तमान् अत्युत्तमान् पुत्रान् सूयुः

११४–११५] ति० टी०–स्त्रियो रजस्वलाः न्तरं षोडशदिनावधि ॥ ११४ ॥ ११५ ॥

रा० टी०–पूजयञ्चिति । पुरातनमितिहासं पठंश्च सर्वपापैः प्रमुच्यते ॥ ११५ ॥

रा० टी०–प्रणम्येति । क्षत्रियैर्नित्यं श्रोतव्य ऐश्वर्यं पुत्रलाभश्च भविष्यति ॥ ११६ ॥

गो० टी०–ब्राह्मणवत् क्षत्रियस्यापि प प्रणम्येति । वैश्यादीनां कैङ्कुतिकसिद्धं पूर्वकं श्रवणम् ॥ ११३–११६ ॥

१ इदमर्धमधिकं गो. पुस्त. । २ आर्षमिति गो. पा. । ३ समागत्य प्रवासान्ते भजते चापिति गो. पा. । ४ इदं गो. राघवान्सबान्धवादिह राघवादिति गो. पुस्तके । ६ तिष्ठन्तीति गो. पा.

ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः । रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा ॥ ११६ ॥
[साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते ।]
प्रीयते सततं रामः स हि विष्णुः सनातनः । आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः ॥ ११७ ॥
एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः । प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥११८॥
देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा । रामायणस्य श्रवणे तृप्यन्ति पितरः सदा ॥ ११९ ॥
भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् । ये लिखन्तीह च नरास्तेषां वासस्त्रिविष्टपे ॥ १२० ॥

कुटुम्बवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च ।
श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिम् ॥ ॥ १२१ ॥
आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिकरं शुभं च ।
श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः ॥ ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाविंशत्यधिकशततमः सर्गः ॥ १२८ ॥

ते श्रीगोमतीतीरनैमिष्यारण्याश्वमेधसप्ततन्तुवाटगतमुनीन्द्रद्विजेन्द्रादिवसुधाधिपेन्द्रपरिवृतस्य मुनिवृन्दारकवृन्दवन्द्यमानकोरकाकारचरणयुगलस्य सद्भ्रातृसन्मित्रसन्मन्त्रिसहितस्य साकेतपुरवराधीश्वरस्य दीनानां दैन्यहरण उदीर्णवीर्योत्सिक्तरावणवधार्थं देवैः प्रार्थितस्य रघुकुलतिलकसंभूतस्य श्रीसीताविशेषकस्य लक्ष्मीपतेः साम्यांशस्य लक्ष्मीवतो राजाधिराजस्य लोकाभिरामस्य निकटोक्तयोः श्रीरामात्मजयोरादिकविशिष्ययोः कुशलवयोराख्याने श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां श्रीमद्युद्धकाण्डे पञ्चविंशेऽहि वर्तमानकथाप्रसङ्गः समाप्तः ।

१६-११९] ति० टी०-सदेत्यनेन कालत्रयेऽपी- ॥ ११६-११९ ॥

रा० टी०-रामायणमिति । रामायणं शृण्वतः पठतः योपरि सनातनः ब्रह्मादीनामपि रचयिता विष्णुः स्वप्रारा सर्वत्र परिपूर्ण आदिदेवः सर्वदेवानामादिः महादेवः विहारकर्ता नारेण नीत्यैव अयते गच्छति परमनीतिर्यथः हरिः पुनर्वसुतृतीयचरणे प्रादुर्भूतो रामः प्रीयते ोक एकान्वयी ॥ ११७ ॥

रा० टी०-एवमिति । विष्णोर्बलं प्रवर्द्धतां स्तुत्यादिना देवानां मध्ये एतदाख्यानं पुराकृतं प्रवृत्तं देवैः पठितः अतः यूयमपि प्रव्याहरत पठत शिष्यानुद्दिश्येति ११८ ॥

रा० टी०-देवा इति । ग्रहणात् पठनात् श्रवणाच्च सर्वे ष्यन्ति रामायणस्य श्रवणे पितरः सदैव तृप्यन्ति ११९

रा० टी०-आयुष्यमिति । सौभ्रातृकं सौभ्रातृकरम् । ब्रकरम् ॥ ११७-११९ ॥

ति० टी०-ये ऋषिणा कृतां मुनिना तां । रामायणमित्यर्थः । लिखन्ति च ो ब्रह्मलोके । 'शृण्वन्रामायणं भक्त्या यः ति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा॥'

इति वचनात् । अत्र फलश्रुतिश्लोकाः कतकव्याख्याने नोपलभ्यन्ते ॥ १२०-१२२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये युद्धकाण्डेऽष्टाविंशत्यधिकशततमः सर्गः ॥ १२८ ॥

निर्मलं कतकक्षोदादपि रामायणार्णवम् ।
अत्यन्तं निर्मलं चक्रे रामः स्वसतिवासया ॥
भट्टनागेशपूज्येन सेतुः श्रीरामवर्मणा ।
कृतः सर्वोपकृतये श्रीमद्रामायणाम्बुधौ ॥
युद्धे हतो दशग्रीवः सगणो वीतकल्मषः ।
पश्यन्नात्मकं विश्वं स्वयं रामो बभूव ह ॥
युद्धे युद्धादिभिः श्रान्तान्वानरान्प्रतिपूज्य च ।
स्वानन्देनास्थितोऽयोध्यां रामः पातु स सर्वतः ॥

रा० टी०-भक्त्येति । रामस्य भक्त्या ये इमां संहितां लिखन्ति तेषां त्रिविष्टपे साकेते वासो भवति ॥ १२० ॥

रा० टी०-कुटुम्बेति । इदं काव्यं श्रुत्वा सर्वार्थमर्थसिद्धिं प्राप्नोति ॥ १२१ ॥

रा० टी०-आयुष्यमिति । यतः इदमायुष्यत्वादिविशिष्टा मतः ऋद्धिकामैः पुरुषैः एतच्छ्रोतव्यम् ॥ १२२ ॥

बध्वा सेतुमपाम्निधौ सुखततः
श्रीवानरेन्द्रेण युक्

तके । २ एतत्पदद्वय "मेवमेतेत्पुरावृत्तमित्यर्धार्धपूर्वमेव गो. पु. दृश्यते ।

अनुभ्रातृविभीषणेन सहितः
श्रीकोशलेशः परम् ।
हत्वा रावणमात्मबन्धुसहितं
संप्राप्य सीतां मुदा
पश्यन् मार्गनिवासमाशु कथयन्
श्रीकोशलां प्राप्तवान् ॥ १ ॥
वाल्मीकिरामायणटीकयाशु
प्रीयान्महात्मा रघुवंशनाथः
युद्धस्थयावैव समाप्तिभाजा
श्रीमत्त्रिवेण्यामखिलार्थदाता ॥ २ ॥
इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
युद्धकाण्डे त्रिंशदधिकशततमस्सर्गः ॥ १३० ॥

गो० टी०-भक्त्येति । संहितातुल्यत्वाद् संहितेति व्यपदेशः ॥ १२० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नं-
किरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशदुत्त-
रशततमः सर्गः ॥ १३१ ॥

इत्थं श्रीमच्छठारेश्वरणसरसिजद्वन्द्वसेवातिरेका-
दुद्भूतोदारबोधः कुशिकसुतकुलापाम्पतेरोषधीशः ।
श्रीमान् गोविन्दराजो वरदगुरुयतो भावनाचार्यवर्य-
प्रेम्णैव प्रेर्यमाणो व्यतनुत विपुलां युद्धकाण्डस्य टीकाम् ॥१॥

इति श्रीवाल्मीकिरामायणे युद्धकाण्डं समाप्तम् ।

गुजराती मुद्रणालयस्थानि क्रय्यसंस्कृतपुस्तकानि।

मूल्यं मार्गव्ययः

१ **श्रीमद्भगवद्गीता** प्रथमो गुच्छः **Bhagavat-Geeta** with 7 commentaries श्रीमच्छङ्कराचार्यविरचितं **भाष्यम्**, आनन्दगिरिकृतं **शाङ्करभाष्यव्याख्यानम्**, **आनन्दतीर्थीय (मध्व) भाष्यम्**, जयतीर्थविरचिता **प्रमेयदीपिका** टीका, **रामानुजभाष्यम्**, पुरुषोत्तमजी-प्रकाशिता **अमृततरङ्गिणी**, नीलकण्ठविरचितो **भावप्रदीपः**, एतैः समेता मञ्जुलैराक्षरसाक्षरैर्मुद्रिता पृष्ठान्यष्टशतपरिमितानि सुचिक्कणानि। मू० रू. ६-०-० ०-७-०

२ **श्रीमद्भगवद्गीता** द्वितीयो गुच्छः **BhagavatGeeta** with 8 commentaries निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता-'**तत्त्वप्रकाशिका**,' श्रीमधुसूदनसरस्वती-कृता—'**गूढार्थदीपिका**,' श्रीशङ्करानन्दप्रणीता '**तात्पर्यबोधिनी**,' श्रीधरस्वामिकृता—'**सुबोधिनी**,' श्रीसदानन्दविरचितः—'**भावप्रकाशः**,' श्रीधनपतिसूरिविरचिता-'**भाष्योत्कर्ष-दीपिका**,' दैवज्ञपण्डितश्रीसूर्यविरचिता—'**परमार्थप्रपा**,' पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः-'**अर्थसंग्रहः**' इत्येताभिर्व्याख्याभिः सहिता। अत्र श्लोकाः स्थूलतमाक्षरैष्टीकाश्च स्थूलाक्षरैर्मुद्रिताः, वृद्धा मा क्लेशिषतेति। मू. रू. १०-०-० ०-१५-०

३ **उत्तरगीता** **Uttara-Geeta** with Gaudapadiya commentary गौडपादीयदीपिकाख्यव्याख्यायुता भगवत्पादश्रीशंकराचार्याणां परमगुरुभिः श्रीशुकाचार्याणां च शिष्यैः श्रीगौडपादाचार्यैः प्रणीतेयं व्याख्येयेतावत्कथनमल्पस्या महिमानमवगमयितुम्। मूल्यम् रू. ०-३-० ०-०

४ **श्रीमद्वाल्मीकिरामायणम्। Valmiki Ramayana** with 3 well-known commentaries सर्वतन्त्रस्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो जीविकाप्रदातुः शृङ्गवेरपुराधीशस्य वीरमणेः श्रीरामराजस्य नाम्ना प्रणीतया **रामायणतिलकाख्यया टीकया**, पण्डितश्रीवंशीधर-शिवसहायाभ्यां प्रणीतया **रामायणशिरोमण्याख्यया टीकया**, श्रीगोविन्दराजप्रणीतया **भूषणाख्यया टीकया** च सह मुद्रयितुमारब्धमस्माभिः। तत्र सप्तभिः खण्डैः समापयिष्यामः।

बालकाण्डम्। प्रथमं खण्डम् **Bal Kand** उपरिनिर्दिष्टटीकात्रयोपेतम्। मूल्यम् रू. ... ३-०-० ०-५-०

अयोध्याकाण्डम्। द्वितीयखण्डम् **Ayodhya Kand** ऊर्ध्वनिर्दिष्टटीकात्रयोपेतम्। मू. रू. ... ५-०-० ०-७-०

अरण्यकाण्डम्। तृतीयखण्डम्। **Aranya Kand** उपरिनिर्दिष्टटीकात्रयोपेतम्। मू. रू. ... २-१२-० ०-४-०

किष्किन्धाकाण्डम्। चतुर्थखण्डम्। **Kishkindha Kand** उपरिनिर्दिष्टटीकात्रयोपेतम्। मू. रू. २-१०-० ०-४

सुन्दरकाण्डम्। पञ्चमखण्डम्। **Sundar Kand** उपरिनिर्दिष्टटीकात्रयोपेतम्। मू. रू. ... ३-०-० ०-४-०

युद्धकाण्डम्। षष्ठं खण्डम् **Yuddha Kand** उपरिनिर्दिष्टटीकात्रयोपेतम्। मू. रू. ... ८-०-० ०-११-०

५ **स्तोत्रमुक्ताहारः—Stotra-Muktahar** containing 256 stotras अस्मिन् २५६ स्तोत्राणि संगृहीतानि। यद्यपि सन्ति भूरीणि स्तोत्रपुस्तकानि मुद्रितानि भूरिभिस्तथापि न तेष्वियतां स्तोत्ररत्नानां संग्रहः। अस्माभिः पूर्वममुद्रितानां स्तोत्राणां पुस्तकानि काश्यादिक्षेत्रेभ्यो भूयसा प्रयासेन द्रविणव्ययेन च समासाद्य तेभ्यश्च प्रसादगुणयुक्तानि स्तोत्राणि संकलय्य संशोध्य च तानि भाविकजनानां कृतेऽत्र समावेशितानि तदाशास्महे श्रद्धावन्तो जनाः सफलयिष्यन्ति प्रयत्नमस्माकममुमिति। मूल्यम् रू. ०-८-० ०-२-०

६ **स्तोत्रमुक्ताहारः-Stotra-Muktahar** 2nd part containing 159 stotras द्वितीयो भागः। स्तोत्रसंख्या २५७-४१६ मूल्यम् रु. ०-८-० ०-२-०

७ **संस्कारमयूखः—Samskar Mayukha** मीमांसकनीलकण्ठभट्टसुतशंकरभट्टकृतः। अत्र संस्काराणां स्वरूपं कालः इतिकर्तव्यता वर्णधर्मा आश्रमधर्माश्च विस्तरतो मूलवचनोपन्यासपुरःसरं निरूपिताः। मूलवचनानि चाप्रतिपत्तिप्रतिपत्तिसंभावनास्थलेषु क्रमेण पर्यायशब्दप्रदर्शनेन मीमांसकाभिमतन्यायानुसरणेन च व्याख्यातानि। अन्ते कातीयसूत्रानुसारिप्रयोगाश्च दत्ताः। पूर्वं वाराणस्यादिषु मुद्रितोऽप्ययं वर्णपदवाक्यप्रशंसाक्रियादिदोषप्रचुरतयाऽप्रविभक्तविषयतया च भृशं दुर्बोधो

		मूल्यं	मार्गव्यय
	विपरीतबोधकरश्चासीत् । अस्माभिस्तु ग्रन्थकृतैव पुनः शोधितस्य वर्धितस्य चास्य ग्रन्थस्य पुस्तकमासाद्य विषयांश्च प्रविभज्य शोधने च महान्तमायासमास्थाय मुद्रितः । मू. रू.	०-१२-०	०-१-०
८	**आचारमयूखः—Achara Mayukha** नीलकंठभट्टकृतः प्रातःस्मरणादिशयनान्तस्यादिक्रियाकलापस्य निरूपणपरो ग्रन्थः । मूल्यम् रू.	०-८-०	०-१-०
९	**समयमयूखः—Samaya Mayukha** नीलकंठभट्टकृतः विहितकर्मणां कालस्य निर्णायकः मूल्य रू.	१-४-०	०-१-०
१०	श्राद्धमयूखः नीलकंठभट्टकृतः **Shraddha Mayukha** in the press ...		
११	व्यवहारमयूखः " **Vyavahar Mayukha** in the press ...		
१२	**मनुस्मृतिः-कुल्लूकभट्टकृतटीकया सहिता Manu Smriti** with a commentary by Kulluka Bhatta ग्रन्थान्तरेषु मनुनाम्नोल्लिखितैरिदानींतनमनुस्मृतिपुस्तकेष्वनुपलभ्यमानैः श्लोकैः, पद्यानां वर्णानुक्रमकोशेन, विषयानुक्रमेण च सहिता सूक्ष्मेक्षिकया संशोधिता च । मू. रू.	१-८-०	०-३-०
१३	**विदुरनीतिः-Vidura-Niti** with a commentary संस्कृतटीकोपेता नीतिशास्त्राभ्यासिनां विद्यार्थिनामतीवोपयोगिनी । मू. रू.	०-४-०	०-१-०
१४	**वेदान्तरहस्यम्-Vedanta Rahasya** वेदान्तवागीशभट्टाचार्यविरचितम् । अत्राद्वैतमतसिद्धान्तो निरूपितः । उपपत्तिश्च प्रदर्शिता । भाषाऽतिसरला प्रौढा च । मूल्यम् रू.	०-१-०	०-६-०
	विशिष्टाद्वैतमतविजयवादः-Vishishtadvaita-Mata-Vijaya-Vada नरहरिपण्डितकृतः । अत्र विशिष्टाद्वैतमते परेषामाक्षेपान्निराकृत्य विशिष्टाद्वैत एवोपनिषदां तात्पर्यं व्यवस्थापितम् । मू. रू.	०-१-०	०-६-०
६	**रघुवंशमहाकाव्यम्-Raghuvamsha** with Mallinatha's commetary श्रीकालिदासकृतम् मल्लिनाथकृतसंजीविन्याख्यटीकासहितम् । मू. रू.	०-१०-०	०-३-०
७	**रघुवंशमहाकाव्यं**-Only First Five Sargas of the same with a commentary by Mallinatha मल्लिनाथकृतटीकोपेतम् । सर्गाः १-५ मूल्यम् रू.	०-४-०	०-१-०
८	**कुमारसंभवं महाकाव्यम्—Kumar Sambhav** with 3 known commentaries कविवरश्रीकालिदासविरचितमिदं सप्तमसर्गपर्यन्तं मल्लिनाथकृत**संजीविन्या** चारित्र्यवर्धनकृत**शिशुहितैषिण्या** च संवलितं, तत आसमाप्ति सीतारामकृत**संजीविन्याऽलंकृतं** सुललितैरायसाक्षरैर्मुद्रितमतीव दर्शनीयमस्ति । मू. रू.	१-४-०	०-२-०
	कारिकावली सिद्धान्तमुक्तावलीसहिता-Karikavalee with Siddhanta Muktavali and other notes न्यायवैशेषिकदर्शनयोर्व्युत्पित्सूनां कृते प्रणीतेषु प्रकरणग्रन्थेषु सिद्धान्तमुक्तावलीसमुद्भासिता कारिकावली मूर्धाभिषिक्तेत्यत्र न विदुषां वैमत्यं किंतु तत्र दीधितिकुटपसृतया विवेकसरण्या संक्षेपतः सूक्ष्ममतमानामर्थानामुपनिबद्धतया प्रायः त्रियन्ति नव्याश्छात्राः, इति तेषामुपकारायास्माभिः प्रायः सर्वेषु विषमस्थलेष्वतिविस्तृतां सरलां सुबोधां च टिप्पनीं पण्डितजीवरामशास्त्रिभिः कारयित्वा तया सहेयं दृढतरेषु सुचिक्कणेषु पत्रेषु स्थूलाक्षरैर्मुद्रिता । साधेशतात्यधिकपत्रयुतामपीमां सर्वसौलभ्यायाल्पीयसा मूल्येन वितरामः । मू. रू.	०-७-०	०-१-०
२०	**वैशेषिकदर्शनम्-Vaisheshika Darshana** with several commentaries श्रीशंकरमिश्रकृत—**वैशेषिकसूत्रोपस्कार**—जयनारायणतर्कपञ्चाननभट्टाचार्यप्रणीत—**विवृत्ति**—चन्द्रकान्तभट्टाचार्यप्रणीत—**भाष्य**सहितम् । मू. रू.	२-०-०	०-३-०
२१	**वादार्थसंग्रहः** प्रथमो भागः—**Vadartha-Samgraha** First Part अत्र शेषकृष्णकृतं स्फोटतत्त्वनिरूपणं, श्रीकृष्णभौनिकृता स्फोटचन्द्रिका, गोडबोलेकृतः प्रातिपदिकसंज्ञावादः, वाक्यवादः, हरियशोमिश्रकृता वाक्यदीपिकेति पञ्च ग्रन्थाः संकलिताः । पण्डितानां प्रौढच्छात्राणां च बहूपकारकः । मू. रू.	६-६-०	०-०-६
२२	**वादार्थसंग्रहः** द्वितीयो भागः—Second Part अत्र भवानन्दसिद्धान्तवागीशकृतं षट्कारकविवेचनम्, जयरामभट्टाचार्यकृतः कारकवादः समासवादश्च, एवकारवादश्चेति चत्वारो ग्रन्थाः सन्ति । मू. रू. ...	०-६-०	०-०-६
२३	**वादार्थसंग्रहः** तृतीयो भागः—Third Part अत्र कृष्णाचार्यकृतः '**वादसुधाकरः**' मौनि-		

		मूल्यं	मार्गव्ययः
	श्रीकृष्णकृतः 'लघुविभक्त्यर्थनिर्णयः' रामकिशोरकृता–'शाब्दबोधप्रकाशिका' चेति शाब्दिकानां त्रयो ग्रन्थाः सन्ति । मू. रू.	०–८–०	०–१–०
२४	**न्यायबिन्दुः—Nyayabindu** with a commentary by Vaidyanatha ... पूर्वमीमांसायाः अधिकरणार्थसंग्राहको ग्रन्थः । तत्सदुपाख्यभट्टवैद्यनाथकृतः । टिप्पनीसहितः । मू. रू....	१–४–०	–०२–०
२५	**महाभागवतम्—Maha Bhagavata** देवीपुराणम् । अस्मिन् भगवत्या ब्रह्मस्वरूपिण्या महाकाल्या दाक्षायणी—गङ्गा—पार्वती—श्रीकृष्णेत्यवतारचतुष्टयचरितानि, महाकाल्या मूलस्थानं च प्रधानतयोपवर्णितानि । प्रसङ्गाद्रामचरितं स्कन्दचरितं पाण्डवचरितं गणेशोत्पत्तिर्गङ्गावतरणं भगवतीगीता ललितासहस्रनाम शिवसहस्रनामादयश्च विषया निरूपिताः । सार्धपञ्चसाहस्री सहितेयम् । मू. रू. ...	२–०–०	०–३–०
२६	**तैत्तिरीयोपनिषत्—Taittiriya-Upanishat** with Bhashya and a commentary by Anandgiri श्रीमच्छङ्करभगवत्पादकृतभाष्येणानन्दगिरिकृतटीकायुतेन तैत्तिरीयविद्याप्रकाशेन च सहिता । मूल्यम् रू.	१–०–०	०–२–०
२७	**दशरूपकम्–Dasha Rupaka** with commentaries नाट्यशास्त्रं धनञ्जयविरचितमवलोकसहितं पञ्चनदीयपण्डितसुदर्शनाचार्यप्रणीतप्रभाख्यव्याख्यासहितं च । मू. रू.	१–०–०	०–२–०
२८	**ब्रह्मसूत्रवृत्तिः—Brahma Sutra Vritti** अद्वैतमञ्जरी । भगवत्पाद (आद्यशंकराचार्य) शिष्यकृता । मूल्यम् रू.	०–१२–०	०–२–०
२९	**चन्द्रालोकः—Chandraloka** with a commentary श्रीपीयूषवर्षजयदेवकविविरचितोऽलंकारग्रन्थः । पायगुण्डोपाह्ववैद्यनाथ (बालभट्ट) विरचितरमाख्यव्याख्यासहितः । मूल्यम् रू. ...	०–८–०	०–१–०
३०	**श्रीमहाभारतविराटपर्व—Mahabharata-Virata Parva** with eight commentaries नीलकण्ठकृतभारतभावदीप–अर्जुनमिश्रकृतदीपिका–चतुर्भुजमिश्रकृतप्रकाश—सर्वज्ञनारायणकृतभारतार्थप्रकाश—विमलबोधकृतदुर्घटार्थप्रकाशिनी—रामकृष्णकृतविरोधार्थभञ्जनी–विषमपदविवरण–वादिराजतीर्थविरचितलक्षाभरणव्याख्यैतैः कोपेतं विपुलपाठभेदसहितं च । मू.रू.	३–८–०	०–१–०
३१	**श्रीमहाभारते उद्योगपर्व–Udyoga Parva** with numerous commentaines. In the press.		
३२	**चम्पूभारतम्–Champubharata** with a commentary by Narayanasuri श्रीखण्डे इत्युपाह्वनारायणसूरिविरचितटीकासहितम् । मू. रू.	२–०–०	०–३–०
३३	**उपदेशसाहस्री—Updeshasahasri** with a commentary श्रीमच्छंकराचार्यकृता रामतीर्थकृतपदयोजनिकाटीकासहिता । विषयानुक्रमणिकया, श्लोकानुक्रमणिकया, नैष्कर्म्यसिद्धिकृतश्लोकप्रदर्शनेन, अन्योद्धृतग्रन्थान्तरस्थवाक्यानुक्रमणिकया, शुद्धिवृद्धिभ्यां च सहिता । मू. रू. ...	१–८–०	०–२–०
३४	**पारस्करगृह्यसूत्रम्—Paraskar Grihya-Sutra** with numerous Bhashyas some of which were either not published or unavailable, as well as Sutras etc. शीकर्कोपाध्याय—जयराम–हरिहर—गदाधर–विश्वनाथप्रणीत–भाष्यपञ्चकसमलंकृतम्–कामदेवभाष्यसहितवाप्यादिप्रतिष्ठाकण्डिका–शौचसूत्र–हरिहरभाष्योपेतस्नानसूत्र–कर्क–गदाधरकृतभाष्य–कृष्णमिश्रकृतश्राद्धकाशिकोपेतश्राद्धसूत्र–भोजनसूत्रैरुपरिशिष्टसहितं च	६–८–०	०–८–०
३५	**कुट्टिनीमतम्—Kuttini Mata** in the press		

हिन्दी—HINDI

३६	**चन्द्रकान्त–Chandrakanta** (Hindi) (First Part) (वेदान्त ज्ञानका मुखग्रन्थ) प्रथम भाग. यह वह ग्रन्थ है कि, जो नितान्त निर्भ्रान्त वेदान्त सिद्धान्तका एकांत प्रतिपादक **"चन्द्रकान्त"** मणि बम्बई प्रान्तके प्रसिद्ध साप्ताहिक **'गुजराती'** पत्रके मुख्य–आद्य संपादक गुजराती भाषाके सुविख्यात लेखक, अनेक ग्रन्थोंके निर्माता देशभक्तधुरीण, साराभारविवेकप्रवीण, वैश्यकुलभूषण श्रीमान् शेठ **इच्छाराम सूर्यराम** देसाईके शुद्ध हृदयमें देदीप्यमान प्रबोधरत्नभाण्डागारका चमचमाता हुआ एक अमूल्य रत्न है. कि. रू.	२–०–०	०–४–०
३७	**चन्द्रकान्त—Chandrakanta** (Hindi) 2nd part In the press		

३८ **युक्तिप्रकाश—Yukti Prakasha** (Hindi) विचारसागरका कर्ता साधु श्रीनिश्चल- मूल्यं मार्गेन्ययः
दासजीने किया हुआ यह ग्रन्थ हिन्दुस्तानी भाषामें है. इसमें वेदान्तके ३९ सिद्धान्त बहुत अच्छीतरहसे सिद्ध किये गये हैं. निश्चलदासकी वाणी सब जिज्ञासुलोकोंको ज्ञात होनेसे विशेष निरूपणकी कुछ जरूरत है नहीं. और जिज्ञासुलोकोंको ये ग्रन्थ बहुत उपयुक्त हैं. पक्की जिल्द और अच्छा कागज. मूल्यं रू.... १-०-० ०-२-०

मराठी—MARATHI

३९ **चन्द्रकान्त—Chandrakanta** (Marathi) या सुप्रसिद्ध गुजराती पुस्तकाच्या गुजरातीं भाषेमध्यें आजपर्यंत आठ आवृत्ति प्रसिद्ध झाल्या आहेत. आणि हिन्दीभाषा जाणणारे रसिकलोक याच्या प्रथम भागाचा रसास्वाद घेत असून दुसऱ्या भागाचा आस्वाद घेण्याकरितां अत्यंत उत्सुक झाले आहेत. हा ग्रन्थ "गुजराती" साप्ताहिकाचे प्रसिद्ध सद्गत् तंत्री **इच्छाराम सूर्यराम** देसाई यांनी लिहिलेला आहे. अशा या ग्रन्थाचें मराठीभाषा जाणणाऱ्या मुमुक्षुजनांकरितां रा. रा. एस्. आर. वाघेकर यांनीं मराठी भाषान्तर केलें असून त्यांत ठिकठिकाणीं मूळग्रन्थाला अनुसरून प्रमाणरूप असलेलीं सत्पुरुषांचीं वचनें देऊन या पुस्तकाची योग्यता व उपयुक्तता वृद्धिंगत केली आहे. या पुस्तकाच्या वाचनानें हिन्दी व गुजराती लोकांच्या जीवनक्रमांत फारच सुधारणा झाली आहे. सरळ व सुबोध उपदेश, गोष्टी यांच्या द्वारानें वेदान्तशास्त्र, ज्ञान, कर्म, व भक्तिमार्ग यांच्या प्राप्तीला याशिवाय दुसरा योग्य असा ग्रंथ मराठीभाषेमध्यें क्वचितच मिळेल. किंमत रु. ३-०-० ०-४-०

४० **चन्द्रकान्त—Chandrakanta** (Marathi) 2nd part in the press ...

'गुजराती' मुद्रणालयाधिपतिः।
कोट सर्कल सासूनबिल्डिंग—मुंबई.

नोंध—सब पुस्तकका व्ही. पी. खर्च जुदा पडेगा.

☞ हमारा गुजराती पुस्तकके सूचीके लिये पत्र भेजना.



गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम् ।
सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् ॥ ५१ ॥
रामरावणयोर्युद्धं रामरावणयोरिव ।
एवं ब्रुवन्तो ददृशुस्तद्युद्धं रामरावणम् ॥ ५२ ॥

युद्धकाण्डं सर्गः १०७

BOUND BY
BOSE & CO
23, G... Mukh...jee Ro...
Bhowanipur, Calcutta - 25
2-8-71

RAMÂYAN

OF

VÂLMÎKI

WITH THREE COMMENTARIES CALLED

TILAKA, SHIROMANI, and **BHOOSHANA**

WITH NUMEROUS READINGS AND NOTES

UTTAR-KANDA

EDITED BY

SHASTRI SHRINIVAS KATTI MUDHOLKAR

SANSKRITA ADHYAPAKA IN THE ELPHINSTONE COLLEGE, BOMBAY.

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

(All Rights Reserved)

PRINTED AND PUBLISHED BY MANILAL ITCHARAM DESAI AT

THE GUJARATI PRINTING PRESS

NO. 8, SASSOON BUILDINGS, CIRCLE, FORT,

BOMBAY.

SHAKA 1842 A. D. 1920

Price Rs. 6-0-0

सीताभूमिप्रवेशः



यथाहं राघवादन्यं मनसापि न चिंतये ।
तथा मे माधवी देवी विवरं दातुमर्हति ॥

उत्त० स. ९७ श्लो. १४.

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रामायणम् ।

रामायणतिलक–रामायणशिरोमणि–गोविन्दराजीयरामायण-
भूषणेतिटीकात्रयोपेतम् ।

उत्तरकाण्डम् ।

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

एल्फिन्स्टन्कॉलेज्संज्ञकांग्लपाठशालायां संस्कृताध्यापकैर्मुधोळकरोपाह्व–
कट्टी–श्रीनिवासशास्त्रिभिः

संशोधितं पाठान्तरैः सनाथीकृतं स्थलविशेषेषु टिप्पणीभिः समलंकृतं च।

मुम्बय्याम्
'गुजराती' मुद्रणालयाधिपतिना स्वीये मुद्रणालये मुद्रयित्वा प्रकाशितम् ।
शकः १८४२, खिस्ताब्दः १९२०.

मूल्यं रूपकषट्कम् ।

॥ श्रीः ॥

आदिकविश्रीवाल्मीकिमहामुनिप्रणीतम्

रामायणम् ।

तिलक-रामायणशिरोमणि-गोविन्दराजीये(भूषणे)ति-

टीकात्रयसमलंकृतम्

उत्तरकाण्डम् ।

प्रथमः सर्गः ।

श्रीरामं विजयिनं श्रुत्वा प्रहृष्टानामभिनन्दितुकामानां चतुर्दिग्वासिनामृषीणामयोध्यायामागमनम् । रावणादिवधतुष्टानपि विशेषत इन्द्रजिद्वृत्तिविस्मितान्मुनीन्प्रतीन्द्रजिच्चरित्रश्रवणे सकुतूहलं रामस्य प्रश्नः ।

प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते । आजग्मुर्मुनयः सर्वे राघवं प्रतिनन्दितुम् ॥ १ ॥

तिलकटीका ।

उत्तरे तूत्तरं कार्यं कृत्वायोध्यां निजे पदे ।
स्थापयित्वा स्वयं रेजे रामो नः कुलदैवतम् ॥

१] अथ रावणस्य ब्रह्मानुग्रहजबलवैभवप्रतिपादनद्वारा तज्जेतृत्वेन भगवति पराक्रमातिशयं प्रतिपादयितुं त्वदत्त-वैभवं त्वयैवोपसंहृतमिति भगवन्महिमानं च स्तोतुमुपय आगता इत्याह-प्राप्तेति । राक्षसानां वधे कृतेऽनन्तरं प्राप्तरा-ज्यस्य प्राप्तराज्याभिषेकस्य समीपं मुनय आजग्मुः । किमर्थम् । राघवं प्रतिनन्दितुम् । तद्वैभवमभिष्टोतुमित्यर्थः ॥ १ ॥

रामायणशिरोमणिः ।

स्वस्ति श्रीसदयं जितरिपुभयं शरणदसुनयं नृपनृपतिम्
सीतायुतशयनं पङ्कजनयनं कृतसखिचयनं दीनगतिम्
वन्दे श्रीरामं परमभिरामं जलदश्यामं मुकुटधरम्
सीताकरकरकं मनसिजहरकं श्रितसुखपरकं सकलवरम् ॥१॥
वन्दे रणधीरं श्रीमहावीरं सुखितसमीरं पवनसुतम्
परसेवानिरतं परकृतिविरतं भुवने विततं वीरसुतम्
जयति श्रीगङ्गा दुरितनिभङ्गा यमुनासङ्गा गिरा युता
यत्तीरनिवासी सुखसुखभासी परप्रकाशी जन्हुसुता ॥ २ ॥
श्रीभारद्वाजो जयति विराजो मुनिगणराजो यस्य गुरुः
वल्मीकिप्रसूतो नित्यं पूतो जितयमदूतो भक्तगुरुः
रामायणकर्तां संस्तुतिहर्तां दुःखविदत्तः दयानिधिम्
वन्दे गुरुमीशं सकलसुधीशं कृतपृथिवीशं शर्मविधिम् ॥ ३ ॥
कृत्वारसकाण्डे श्रुतिरसभाण्डे सद्ब्रह्माण्डे विदिततमे
रामायणतिलकं तत्त्वनिमिलकं हृतहृद्विलकं सुखपरमे
कूर्मः श्रुतिसारं श्रीविस्तारं श्रितजनतारं शिरोमणिम्
मत्तररतिकारं हृतभवभारं स्वन्धविदारं व युमणिम् ॥ ४ ॥

षड्भिः काण्डैः राज्याभिषेकपर्यन्तं रामचरितं संवर्ण्यो-त्तरवृत्तान्तं वर्णयितुमुत्तरकाण्ड आरभ्यते तत्र प्रथमे सर्गे ऋषीणामागमनं वर्णयन्नाह—प्राप्तेत्यादिभिः । राक्षसानां वधे कृते सति सर्वे मुनयो राघवं प्रतिनन्दितुं प्राप्तराज्यस्य रामस्य समीपमाजग्मुः ॥ १ ॥

भूषणटीका ।

श्रीमद्वत्सकुलप्रदीपशठजित्पादारविन्दद्वयी—
सेवालब्धसमस्तशास्त्रवितितिर्गोविन्दराजाह्वयः ।
श्रीरामायणभूषणेऽत्र मुकुटीभूतां परामुत्तरे
ग्रन्थे व्याकृतिमातनोति विदुषां प्रीतिः पुनर्वर्धताम् ॥१॥

प्राप्तेत्यादि । राक्षसानां वधे कृते सति प्राप्तराज्यस्य रामस्य अनादरे षष्ठी प्राप्तराज्यं राममनादृत्य राघवं लक्ष्मणं प्रतिनन्दितुं सर्वे ऋषय आजग्मुः । प्राधान्येनेन्द्रजिद्वधं प्रशं-सिष्यन्ति रामस्य समीप इति शेष इत्येके । अत्र प्रेति गायत्र्या एकविंशाक्षरम् ॥ १ ॥ २ ॥

कौशिकोऽथ यवक्रीतो गार्ग्यो गालव एव च । कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये श्रिताः॥ २ ॥
स्वस्त्यात्रेयश्च भगवान्नमुचिः प्रमुचिस्तथा । अगस्त्योऽत्रिश्च भगवान्सुमुखो विमुखस्तथा ॥ ३ ॥
आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशम् । नृषद्गुः कवषी धौम्यः कौपेयश्च महानृषिः ॥ ४ ॥
तेऽप्याजग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशम् । वसिष्ठः कश्यपोऽथात्रिर्विश्वामित्रः सगौतमः ॥ ५ ॥
जमदग्निर्भरद्वाजस्तेऽपि सप्तर्षयस्तथा । उदीच्यां दिशि सप्तैते नित्यमेव निवासिनः ॥ ६ ॥
संप्राप्यैते महात्मानो राघवस्य निवेशनम् । विष्ठिताः प्रतिहारार्थं हुताशनसमप्रभाः ॥ ७ ॥
वेदवेदाङ्गविदुषो नानाशास्त्रविशारदाः । द्वाःस्थं प्रोवाच धर्मात्मा अगस्त्यो मुनिसत्तमः ॥ ८ ॥
निवेद्यतां दाशरथेर्ऋषयो वयमागताः । प्रतीहारस्ततस्तूर्णमगस्त्यवचनाद्रुतम् ॥ ९ ॥
समीपं राघवस्याशु प्रविवेश महात्मनः । नयेङ्गितज्ञः सद्वृत्तो दक्षो धैर्यसमन्वितः ॥ १० ॥
स रामं दृश्य सहसा पूर्णचन्द्रसमद्युतिम् । अगस्त्यं कथयामास संप्राप्तमृषिसत्तमम् ॥ ११ ॥
श्रुत्वा प्राप्तान्मुनींस्तांस्तु बालसूर्यसमप्रभान् । प्रत्युवाच ततो द्वाःस्थं प्रवेशय यथासुखम् ॥ १२ ॥
दृष्ट्वा प्राप्तान्मुनींस्तांस्तु प्रत्युत्थाय कृताञ्जलिः । पाद्यार्घ्यादिभिरानर्च गां निवेद्य च सादरम् ॥१३॥

२] ति० टी०–पूर्वस्यां दिशि ये श्रिताः । पूर्वदिशि प्रधानतया ये स्थिता इत्यर्थः ॥ २ ॥

३–५] ति० टी०–स्वस्तिकर आत्रेय स्वस्त्यात्रेयः ॥३–५॥

६] ति० टी०–तेऽपि । उक्तवसिष्ठादिरूपाः सप्तर्षयोऽप्यागता इत्यर्थः । तेषां स्वरूपकथनम्—उदीच्यां दिशीत्यादि । ननु पुरोहितो वसिष्ठो नित्यं समीप एव वर्तते, को नामासौ वसिष्ठो य उत्तरदिशः कश्यपादिभिः सहागत इति चेच्छृणु । यथागस्त्यस्तेजोमण्डले नक्षत्रमये नित्यस्थितोऽपि योगबलेन भूलोके स्वाश्रमस्थोऽपि, तथा वसिष्ठोऽपि ज्योतिर्मण्डले सप्तर्षिमध्यगोऽप्यस्ति, भूलोके च । तत्र सप्तर्षिमण्डलस्थस्तैः सहागत इत्युच्यते इति वदन्ति ॥ ६ ॥

रा० टी०–ऋषीणां नाम निर्देशनाह—कौशिक इत्यादिभिः । पूर्वस्यां दिशि ये श्रिताः स्थिताः कौशिकादयस्ते ये च दक्षिणां दिशं श्रिताः स्वस्त्यात्रेयप्रभृतयस्ते च आजग्मुः तत्र स्वस्तिसम्पादक आत्रेय इति कर्मधारयः दत्तात्रेय इति पाठान्तरम् सार्द्धश्लोकद्वयमेकान्वयि ॥ ३ ॥

रा० टी०–नृषद्गुरिति । ये पश्चिमां दिशं श्रिताः ते नृषद्गुप्रभृतयोऽप्याजग्मुः ॥ ४ ॥

गो० टी०–स्वस्तीति । स्वस्तिकरः आत्रेयः ॥ ३ ॥४॥

रा० टी०–वशिष्ठ इति । उदीच्यां दिशि नित्यं निवासिनो य एते प्रसिद्धाः वसिष्ठादयःसप्तर्षयस्तेप्याजग्मुरित्यनुकृष्यते सार्द्धश्लोक एकान्वयी ॥ ५ ॥

गो० टी०–वसिष्ठ इति । उक्ता वसिष्ठादयः सप्तेत्यर्थः । ननु वसिष्ठः अयोध्यायां पुरोहिततया नित्यं वर्तमानः कथमिदानीमुदीच्या दिशः समागत इत्युच्यते । सत्यम् । यथाऽगस्त्यो ज्योतिर्मण्डलस्थोपि भुवि तपःसमार्जनाय शरीरान्तरे स्थित आगतस्तथा वसिष्ठोऽपि ज्योतिर्मण्डलस्थः सप्तर्षिभिः समागत इति बोध्यम् । तदागमनदशायां नगरस्थो वसिष्ठो नायातः अत एव न परिगणितः । कौशिकः कुशिकवंश्यो विश्वामित्रादन्यः ॥ ५ ॥ ६ ॥

७] ति० टी०–प्रतिहारो द्वाःस्थः । तदर्थं तन्मुखेन रामाय स्वागमननिवेदनार्थम् विष्ठिताः द्वारि स्थिता इत्यर्थः ॥ ७ ॥

रा० टी०–संप्राप्येति । वेदवेदाङ्गविदुषः तद्विद्वांसः एते पूर्वोक्ता महात्मानो राघवस्य निवेशनं संप्राप्य प्रतिहारार्थं प्रतीहारद्वारा रामाज्ञापूर्वकतद्वेश्मस्वप्रवेशार्थं विष्ठिताः संस्थिताः बभूवुरिति शेषः सार्धश्लोक एकान्वयी ॥ ७ ॥

गो० टी०–संप्राप्येति । प्रतिहारो द्वाःस्थः 'द्वारि द्वाःस्थं प्रतीहार' इत्यमरः ॥ ७ ॥ १२ ॥

८] ति० टी०–अवस्थानानन्तरं सर्वानुमत्यागस्त्यो द्वाःस्थमुवाच ॥ ८ ॥

रा० टी०–द्वाःस्थमिति । वयमृषय आगताः इति दाशरथेस्समीपं निवेद्यतामिति द्वाःस्थं प्रत्यगस्त्यः प्रोवाच ॥ ८ ॥

९] ति० टी०–किमुवाच तदाह—निवेद्यतामिति । तूर्णमिति मानसी त्वरा । द्रुतमिति कायिकयुक्ता ॥ ९ ॥

१०–१२] ति० टी०–आश्वित्यनेन राजावसरपरीक्षाभावो विवक्षितः ॥ १० ॥ १२ ॥

रा० टी०–प्रतिहार इति । प्रतिहारः अगस्त्यवचनात् राघवस्य समीपं प्रविवेश जगाम–दत्तयेति । नयेङ्गितसत्त्वादिविशिष्टः स प्रतिहारः रामं दृश्य दृष्ट्वा प्राप्तमगस्त्यं कथयामास सार्धश्लोक एकान्वयी ॥ १०–११ ॥

रा० टी०–श्रुत्वेति । मुनीन् प्राप्तान् श्रुत्वा यथासुखं प्रवेशयेति द्वाःस्थं प्रत्युवाच राम इति शेषः ॥ १२ ॥

१३] ति० टी०–निवेद्य । प्रत्येकमिति शेषः ॥ १३ ॥

१ अथेति गो. पा. । २ नृषद्गुरिति गो. रा. पा. । ३ कवष इति रा. पा. । ४ रौद्रेय इति गो.पा. । ५ ते इति गो.पाठः । ६ ऋषीनस्मात्समागतानिति गो. पाठः । ७ ऋषिभिः सहेति गो. पाठः ।

रामोऽभिवाद्य प्रयत आसनान्यादिदेश ह । तेषु काञ्चनचित्रेषु महत्सु च वरेषु च ॥ १४ ॥
कुशान्तर्धानदत्तेषु मृगचर्मयुतेषु च । यथार्हमुपविष्टास्ते आसनेष्वृषिपुंगवाः ॥ १५ ॥
रामेण कुशलं पृष्टाः सशिष्याः सपुरोगमाः । महर्षयो वेदविदो रामं वचनमब्रुवन् ॥
कुशलं नो महाबाहो सर्वत्र रघुनन्दन । ॥ १६ ॥
त्वां तु दिष्ट्या कुशलिनं पश्यामो हतशात्रवम् । दिष्ट्या त्वया हतो राजन्रावणो लोकरावणः ॥१७॥
नहि भारः स ते राम रावणः पुत्रपौत्रवान् । सधनुस्त्वं हि लोकांस्त्रीन्विजयेथा न संशयः ॥१८॥
दिष्ट्या त्वया हतो राम रावणः पुत्रैपौत्रवान् । दिष्ट्या विजयिनं त्वाद्य पश्यामः सह सीतया ॥१९॥
लक्ष्मणेन च धर्मात्मन्भ्रात्रा त्वद्धितकारिणा । मातृभिर्भ्रातृसहितं पश्यामोऽद्य वयं नृप ॥ २० ॥
दिष्ट्या प्रहस्तो विकटो विरूपाक्षो महोदरः । अकम्पनश्च दुर्धर्षो निहतास्ते निशाचराः ॥ २१ ॥
यस्य प्रमाणाद्विपुलं प्रमाणं नेह विद्यते । दिष्ट्या ते समरे राम कुम्भकर्णो निपातितः ॥ २२ ॥
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ । दिष्ट्या ते निहता राम महावीर्या निशाचराः ॥ २३ ॥
[कुम्भश्चैव निकुम्भश्च राक्षसौ भीमदर्शनौ । दिष्ट्या तौ निहतौ राम कुम्भकर्णसुतौ मृधे ॥
युद्धोन्मत्तश्च मत्तश्च कालान्तकयमोपमौ । यज्ञकोपश्च बलवान्धूम्राक्षो नाम राक्षसः ॥
कुर्वन्तः कदनं घोरमेते शस्त्रास्त्रपारगाः । अन्तकप्रतिमैर्बाणैर्दिष्ट्या विनिहतास्त्वया] ॥
दिष्ट्या त्वं राक्षसेन्द्रेण द्वन्द्वयुद्धमुपागतः । देवतानामवध्येन विजयं प्राप्तवानसि ॥ २४ ॥

रा० टी०–दृष्ट्वेति । प्राप्तान्मुनीन्दृष्ट्वा कृताञ्जलिः रामः प्रत्युवाच सत्कारकारकवचनमुच्चारयामास गां वृषभं निवेद्य प्रत्येकं दत्त्वा पाद्यार्घ्यादिभिः आनर्च च ॥ १३ ॥

गो० टी०–तानिति । अभिवाद्येति । समुदायं प्रतीति शेषः ॥ १३ ॥ १६ ॥

१४] ति० टी०–वरेषु बहुमूल्येषु ॥ १४ ॥

१५] ति० टी०–कुशान्तर्धानदत्तेषु कुशैरन्तर्धानं दत्तं कृतं येषु । कुशास्तृतेष्वित्यर्थः ॥ १५ ॥

रा० टी०–राम इति । प्रयतो रामः अभिवाद्य प्रणम्य आसनानि आदिदेश स्थातुमाज्ञापयामास अर्हं पृथक् । तेष्विति । ऋषिपुङ्गवाः कांचनान्येव चित्राणि तेषु महत्सु विशालेषु वरेषु उत्तमेषु कुशाः अन्तर्धानदत्ता अधोदेशे स्थापिता येषु किं च कुशैरन्तर्धानदत्तानि तिरोहितीकृतानि कुशैरास्तृतानीत्यर्थः तेषु मृगचर्मयुतेषु आसनेषु यथार्हमुपविष्टाः बभूवुरिति शेषः सार्धश्लोक एकान्वयी ॥ १४ ॥ १५ ॥

१६] ति० टी०–सपुरोगमाः पुरोगमैः प्रधानैः सहिताः १६

रा० टी०–रामेणेति । रामेण कुशलं पृष्टाः महर्षयः राममब्रुवन् तत्प्रकारमाह–कुशलमित्यादिभिः । हे महाबाहो हतशात्रवं निहतशत्रुसमूहं कुशलिनं नित्यं कुशलयुक्तं त्वां दिष्ट्या भाग्यवशेन यस्मात्पश्यामः तस्मात् नोऽस्माकं कुशलं सर्वत्र सर्वदेशेषु अस्तीति शेषः ॥ १६ ॥

गो० टी०–कुशलमिति । सर्वत्र पुरकोशादिषु । दिष्ट्या दैवात् । हतशात्रवं हतशत्रुम् ॥ १७ ॥

१७] ति० टी०–हतशात्रवं हतशत्रुसमूहं त्वां भाग्येन कुशलिनं पश्यामः, तेन नः कुशलमेव । यत्त्वया शत्रुर्हतस्तेनैवास्माकं कुशलमित्यर्थः ॥ १७ ॥

रा० टी०–दिष्ट्येति । दिष्ट्या अस्मद्भाग्यवशेन रावणस्त्वया हतः अहं पृथक् ॥ १७ ॥

गो० टी०–दिष्ट्येति । रावणस्ते न हि भारः । तद्वधस्ते ईषत्कर्मेत्यर्थः ॥ १८ ॥

१८–१९] ति० टी०–दिष्ट्या त्वया हत इत्युक्त्वा पुनर्विचार्याहुः–नहीति । पुत्रपौत्रवानपि रावणस्ते न भारः । तद्वधस्तवेषत्कर इत्यर्थः । तदेव दर्शयति—सधनुरिति । विजयेथाः । 'विपराभ्यां जेः' इति तङ् ॥ १८ ॥ १९ ॥

रा० टी०–नहीति । हि यतः सधनुः धनुषा सहितस्त्वं त्रीन् लोकान् विजयेथा अतः स प्रसिद्धो रावणस्ते भारः भारवत्पीडाप्रदो न ॥ १८ ॥

रा० टी०–दिष्ट्येति । दिष्ट्या भाग्यवशेन त्वा त्वां पश्यामः ॥ १९ ॥

गो० टी०–तदेव दर्शयति—सधनुरित्यादि । विजयेथा इति "विपराभ्याम्०" इत्यात्मनेपदम् ॥ १९ ॥ २१ ॥

२०–२१] ति० टी०–लक्ष्मणेन चेति । अस्यार्धस्य दिष्ट्या राक्षसा हता इति शेषः । मातृभिरित्यस्य दिष्ट्येत्यादिः । युक्तमिति शेषः ॥ २० ॥ २१ ॥

रा० टी०–लक्ष्मणेनेति । अत्रापि दिष्ट्येत्यनुकृष्यते॥२०॥

रा० टी०–दिष्ट्येति ॥ २१ ॥

२२–२४] ति० टी०–यस्य प्रमाणादाकारप्रमाणात् ॥ २२–२४ ॥

---

१ राक्षसेश्वर इति गो. पाठः । २ पद्यत्रयमिदमधिकं गो. पाठे

संख्ये तस्य न किंचित्तु रावणस्य पराभवः । द्वन्द्वयुद्धमनुप्राप्तो दिष्ट्या ते रावणिर्हतः ॥ २५ ॥
दिष्ट्या तस्य महाबाहो कालस्येवाभिधावतः । मुक्तः सुरारिपोर्वीर प्राप्तश्च विजयस्त्वया ॥ २६ ॥
अभिनन्दाम ते सर्वे संश्रुत्येन्द्रजितो वधम् । अवध्यः सर्वभूतानां महामायाधरो युधि ॥ २७ ॥
विस्मयस्त्वेष चास्माकं तं[2] श्रुत्वेन्द्रजितं हतम् । [एते चान्ये च बहवो राक्षसाः कामरूपिणः ॥
दिष्ट्या त्वया हता वीरा रघूणां कुलवर्द्धन] । दत्त्वा पुण्यामिमां वीर सौम्यामभयदक्षिणाम् ॥
दिष्ट्या वर्धसि काकुत्स्थ जयेनामित्रकर्शन ॥ २८ ॥
श्रुत्वा तु वचनं तेषां मुनीनां भावितात्मनाम् । विस्मयं परमं गत्वा रामः प्राञ्जलिरब्रवीत् ॥ २९ ॥
भगवन्तः कुंभकर्णं रावणं च निशाचरम् । अतिक्रम्य महावीर्यौ किं प्रशंसथ रावणिम् ॥ ३० ॥
महोदरं प्रहस्तं च विरूपाक्षं च राक्षसम् । मत्तोन्मत्तौ च दुर्धर्षौ देवान्तकनरान्तकौ ॥
अतिक्रम्य महावीरान्[5] किं प्रशंसथ रावणिम् ॥ ३१ ॥
अतिकायं त्रिशिरसं धूम्राक्षं च निशाचरम् । अतिक्रम्य महावीर्यान्किं प्रशंसथ रावणिम् ॥ ३२ ॥
कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः । केन वा कारणेनैष रावणादतिरिच्यते ॥ ३३ ॥

रा० टी०–यस्येति । यस्य प्रमाणात् शरीरमहत्वात् विपुलमधिकं महत्त्वं न विद्यते स कुंभकर्णो निपातितः त्वयेति शेषः ॥ २२ ॥

रा० टी०–त्रिशिरा इति ॥ २३ ॥

रा० टी०–दिष्ट्येति । राक्षसेन्द्रेण रावणेन द्वन्द्वयुद्धमुपागतस्त्वं दिष्ट्यैव विजयं प्राप्तवान् असि ॥ २४ ॥

गो० टी०–यस्येति । प्रमाणात् शरीरपरिमाणात् २२–२६

२५] ति० टी०–दृश्यरावणवधेन तव भारस्तिरोहितः रावणिवध एव तु दुष्कर इत्याहुः—संख्ये तस्येति । संख्ये तस्य रावणस्य त्वत्कर्तृकः पराभव आक्रमणमिति यत्तत्र किंचित्, अपि तु दिष्ट्या तिरोधानसाधनयानभङ्गेन द्वन्द्वयुद्धमनुप्राप्तः, अत एव हतो रावणिरिति यदिदमेव बह्विति शेषः ॥ २५ ॥

रा० टी०–संख्ये इति । येन त्वया दिष्ट्या द्वन्द्वयुद्धमुपागतो रावणिर्हतः तस्य तव रावणस्य पराभवः रावणकर्मकपराभूतिः किञ्चित्र ॥ २५ ॥

२६] ति० टी०–कालस्येवालक्ष्यमभिधावतस्तस्य मुक्तशरबन्धादिकृतपरमकृच्छ्रादिति शेषः ॥ २६ ॥

रा० टी०–दिष्ट्येति । कालस्येवाभिधावतः सुरारिपोरिन्द्रजितः मुक्तः तत्प्रक्षेपितब्रह्मास्त्रादिना रहितो भव इति शेषः अत एव त्वया विजयः प्राप्तः ॥ २६ ॥

गो० टी०–दिष्ट्या त्वमिति । द्वन्द्वयुद्धमुपागतः सन् विजयं प्राप्तवानसीत्यन्वयः ॥ २७ ॥ २८ ॥

२७] ति० टी०–विस्मयहेतुरवध्य इति । यतः सोऽवध्यत्वादिगुणः, अत एव च एष एवेन्द्रजिद्वधोऽस्माकं विस्मयो विस्मयकर इत्यन्वयः । तत्तस्मादिन्द्रजितं हतं श्रुत्वा वयं तुष्टा इति शेषः ॥ २७ ॥

२८] ति० टी०–अभयदक्षिणामभयदानं दत्त्वा । ऋषिभ्य इति शेषः । वर्धसि वर्धसे ॥ २८ ॥

रा० टी०–अभिनन्दामेति । यः सर्वभूतानामवध्यः । स्येन्द्रजितो वधं संश्रुत्य ते अत्रागताः वयं सर्वं अभिनन्दाम अभिनन्दामः ॥ २७ ॥

रा० टी०–विस्मय इति । इन्द्रजितं हतं श्रुत्वा अस्माकमेषः इन्द्रजिद्वधश्रवणजनितो विस्मयो बभूवेति शेषः अर्द्धं पृथक्। दत्त्वेति। इमां इन्द्रजिद्वधसम्भूतां अभयदक्षिणां दत्त्वा जयेन वर्द्धसि दिष्ट्यैतत् ॥ २८ ॥

गो० टी०–दिष्ट्या तस्येति मुक्तः । तस्य रावणेः । शरबन्धादिति शेषः ॥ २९–३२ ॥

गो० टी०–दत्त्वेति। अभयदक्षिणामभयदानम् । देवर्षिभ्य इत्यर्थः। वर्धसि वर्धसे ॥ ३३ ॥

२९] ति० टी०–विस्मयं गत्वा । रावणिवधविषयवाक्येनेति शेषः ॥ २९ ॥

रा० टी०–श्रुत्वेति । रामोऽब्रवीत् ॥ २९ ॥

गो० टी०–श्रुत्वेति। विस्मयं गत्वा रावणिवधविषयवाक्येनेति शेषः ॥ ३४ ॥ ३८ ॥

३०-३२] ति० टी०–तदेवाह—भगवन्त इति संबोधनम् ॥ ३०–३२ ॥

रा० टी०–तदाकारमाह—भगवन्त इत्यादिभिः । रावणिं किं किमर्थं प्रशंसथ ॥ ३० ॥

रा० टी०–तदेव भंग्यन्तरेणाह–महोदरमिति। महोदरादीनतिक्रम्य रावणिं किं प्रशंसथ सार्द्धश्लोक एकान्वयी ३१॥३२

३३] ति० टी०–कीदृशोऽस्य प्रभावादिः । यतो युष्माभिः प्रशस्यत इति शेषः । प्रभावस्तपःप्रभावः । बलं शारीरम् ॥ ३३ ॥

१ सोऽवध्य इति गो. पाठः । २ तदिति गो. पाठः । ३ पद्यमेकभिदमधिकं गो. पाठे । ४ कर्णेति रा. पाठः । ५ वीर्यानिति गो. रा. पाठः ।

शक्यं यदि मया श्रोतुं न खल्वाज्ञापयामि वः । यदि गुह्यं न चेद्वक्तुं श्रोतुमिच्छामि कथ्यताम्॥३४॥
शक्रोऽपि विजितस्तेन कथं लब्धवरश्च सः । कथं च बलवानन्पुत्रो न पिता तस्य रावणः॥३५॥
कथं पितुश्चाप्यधिको महाहवे शक्रस्य जेता हि कथं स राक्षसः ।
वराश्च लब्धाः कथयस्व मेऽद्य पौप्रच्छतश्चास्य मुनीन्द्र सर्वम् ॥ ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

अगस्त्यस्तावदादौ रावणकुलं तज्जन्म च कथयितुं प्रवृत्तस्तत्र प्रजापतिसुतस्य पुलस्त्यस्योत्पत्तिं तत्तपोवर्णनं तस्य तृणबिन्दुकन्यायाः पाणिग्रहणं ततो विश्रवोऽभिधमुनेः संभवं च कथयामास ।

तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः । कुम्भयोनिर्महातेजा वाक्यमेतदुवाच ह ॥ १ ॥
शृणु राम तथा वृत्तं तस्य तेजोबलं महत् । जघान शत्रून्येनासौ न च वध्यः स शत्रुभिः ॥२॥
तावत्ते रावणस्येदं कुलं जन्म च राघव । वरप्रदानं च तथा तस्मै दत्तं ब्रवीमि ते ॥ ३ ॥

रा० टी०–कीदृश इति । अस्येन्द्रजितः प्रभावः कीदृशः केन कारणेन एष इन्द्रजित् रावणादतिरिच्यते अधिकः प्रतीयते ॥ ३३ ॥

३४] ति० टी०–शक्यमिति । यदि गुह्यं न भवति, यदि युष्माभिर्वक्तुं शक्यम्, यदि च मया श्रोतुं शक्यं तदा कथ्यताम् श्रोतुमिच्छामि केवलम्, न खलु वक्तुमाज्ञापयामि॥३४॥

रा० टी०–शक्यमिति । यदि मया श्रोतुं शक्यं गुह्यं च न अत एव त्वया वक्तुं शक्यं तदा श्रोतुमिच्छामि अतः कथ्यताम् ॥ ३४ ॥

गो० टी०–शक्यमित्यादि । यदि गुह्यं न भवति । यदि युष्माभिः वक्तुं शक्यं यदि मया च श्रोतुम् तदा कथ्यताम् । अहं तु श्रोतुमिच्छामि केवलं नतु वक्तुमित्याज्ञापयामि॥३४॥

३५-३६] ति० टी०–पिता रावणो न बलवान्पुत्रापेक्षयेति च कथम् ॥ ३५ ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रथमः सर्गः ॥ १ ॥

रा० टी०–शक्र इति । शक्रोऽपि तेन कथं विजितः स इन्द्रजित् लब्धवरः कथं पुत्रश्च कथं बलवान् तस्य पिता तु कथं न बलवान् ॥ ३५ ॥

रा० टी०–कथमिति । स इन्द्रजित् पितुरधिकः कथं स राक्षसः शक्रस्य जेता कथं वराश्च कथं लब्धाः इति सर्वं मे सन्निधौ कथयस्व ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे प्रथमः सर्गः ॥ १ ॥

गो० टी०–शक्र इति । पिता रावणो न बलवान् पुत्रापेक्षयेति कथम् ॥ ४० ॥ ४१ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने प्रथमः सर्गः ॥ १ ॥

१] ति० टी०–अथ रावणाद्युत्पत्तिशेषतया तत्कूटस्थपौलस्त्योत्पत्तिमाह—तस्य तद्वचनमिति ॥ १ ॥

रा० टी०–रामप्रश्नश्रवणानन्तरकालिकं वृत्तान्तमाह—तस्येत्यादिभिः । कुम्भयोनिः राघवस्य वचनं श्रुत्वा एतद्वाक्यमुवाच ॥ १ ॥

२] ति० टी०–तस्य तेजआयुद्दिश्य तथा वृत्तं वृत्तकथां ब्रवीमि त्वं शृणु । असौ रावणिर्येन कारणेन शत्रूञ्जघान स च शत्रुभिर्न वध्यस्तत्कारणं शृणु ॥ २ ॥

रा० टी०–तदाकारमाह—शृणु इत्यादिभिः । येन तेजोबलेन असौ इन्द्रजित् शत्रून् जघान स्वयं च शत्रुभिर्न वध्यः तत् महत्तेजो बलं यथा वृत्तं तथा शृणु ॥ २ ॥

गो० टी०–शृण्विति । असौ रावणिः न च शत्रुभिर्वध्यः । तत्कारणं शृण्विति संबन्धः ॥ २ ॥

३] ति० टी०–तावत्प्रथमं रावणस्य कुलादि ब्रवीमि पश्चाद्रावणेश्च वक्ष्यामीति शेषः । ' तावत्ते रावणस्य ' इति पाठः ॥ ३ ॥

रा० टी०–तावदिति । तावदादौ रावणस्य कुलं जन्म च तस्मै रावणाय वरप्रदानं च यथा दत्तं तथा ब्रवीमि ॥ ३ ॥

गो० टी०–तावदिति । तावत् प्रथमम् । रावणस्यैव कुलादिकं यमहं ते ब्रवीमि । पश्चाद्रावणेश्चेति शेषः ॥ ३ ॥

१ तत्पृच्छत इति गो. पाठः । २ राममिति गो. पाठः । ३ कथेति गो. पाठः

पुरा कृतयुगे राम प्रजापतिसुतः प्रभुः । पुलस्त्यो नाम ब्रह्मर्षिः साक्षादिव पितामहः ॥४॥
नानुकीर्त्या गुणास्तस्य धर्मतः शीलतस्तथा । प्रजापतेः पुत्र इति वक्तुं शक्यं हि नामतः ॥ ५ ॥
प्रजापतिसुतत्वेन देवानां वल्लभो हि सः । इष्टः सर्वस्य लोकस्य गुणैः शुभ्रैर्महामतिः ॥ ६ ॥
स तु धर्मप्रसङ्गेन मेरोः पार्श्वे महागिरेः । तृणबिन्द्वाश्रमं गत्वाप्यैवसन्मुनिपुंगवः ॥ ७ ॥
तपस्तेपे स धर्मात्मा स्वाध्यायनियतेन्द्रियः । गत्वाश्रमपदं तस्य विघ्नं कुर्वन्ति कन्यकाः ॥ ८ ॥
ऋषिपन्नगकन्याश्च राजर्षितनयाश्च याः । क्रीडन्त्योऽप्सरसश्चैव तं देशमुपपेदिरे ॥ ९ ॥
सर्वर्तुषूपभोग्यत्वाद्रम्यत्वात्काननस्य च । नित्यशस्तास्तु तं देशं गत्वा क्रीडन्ति कन्यकाः १०
देशस्य रमणीयत्वात्पुलस्त्यो यत्र स द्विजः । गायन्त्यो वादयन्त्यश्च लासयन्त्यस्तथैव च ॥ ११ ॥
मुनेस्तपस्विनस्तस्य विघ्नं चक्रुरनिन्दिताः । अथ रुष्टो महातेजा व्याजहार महामुनिः ॥ १२ ॥
या मे दर्शनमागच्छेत्सा गर्भं धारयिष्यति । तास्तु सर्वाः प्रतिश्रुत्य तस्य वाक्यं महात्मनः॥१३॥

४] ति० टी०-तत्र कुलमाह—**पुरेति**। पुलस्त्यो दशप्रजापतिष्वेकः पितामह इव । तपोवैभवजनितनिग्रहानुग्रहसामर्थ्यैरिति भावः ॥ ४ ॥

रा० टी०-तद्वचनाकारमाह—**पुरेत्यादिभिः**। पुरा पूर्वं कृतयुगे साक्षात् पितामह इव पुलस्त्यो नाम ब्रह्मर्षिः प्रजापतिसुतो बभूवेति शेषः ॥ ४ ॥

गो० टी०-तत्र प्रथमं कुलमाह—**पुरेत्यादि** । पुलस्त्यः दशप्रजापतिष्वेकः । पितामह इव पितृतुल्य इत्यर्थः ॥ ४ ॥

५-६] ति० टी०-तदेवाह—**नानुकीर्त्या इति**। विविच्य वर्णयितुमशक्यत्वादित्यर्थः । धर्मतः शीलतश्चोत्पन्ना गुणा इत्यन्वयः । अथ प्रकारान्तरेण तद्भवं बोधयति—प्रजापतेरिति । प्रजापतेः पुत्र इति नामत एव तत्संकीर्तनत एव तद्गुणाधिक्यं वक्तुं शक्यम् । प्रजापतिपुत्रत्वोक्त्या तस्येवास्याप्यनन्तकल्याणगुणत्वमुक्तं भवतीत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०-**नेति**। धर्मतो धर्मात् शीलतः शीलाच्च याताः तस्य पुलस्त्यस्य गुणाः अनुकीर्त्या कथनेनैव न ज्ञायन्त इति शेषः स्वत एव प्रकटिता इत्यर्थः अत एव अनुकीर्त्या परोपदेशेनैव नामतो नामोच्चारणेनैव वा प्रजापतेः पुत्र इति वक्तुं न शक्यं तदर्शनमात्रेणैव अयं प्रजापतेः पुत्र इति ज्ञायते इत्यर्थः ॥ ५ ॥

रा० टी०-**प्रजापतीति**। स पुलस्त्यः प्रजापतिसुतत्वेन गुणैश्च देवानां सर्वस्य लोकस्य च वल्लभः प्रियः अत एव इष्टः इच्छाविषयीभूतश्च बभूवेति शेषः ॥ ६ ॥

गो० टी०-तदेवाह-**नानुकीर्त्या इति**। धर्मतः शीलतश्चोत्पन्न इति शेषः। ते गुणा नानुकीर्त्या विविच्याशक्यवर्ण्याः। किन्तु प्रजापतिपुत्रनामत एव तत्संकीर्तनमात्रं तत एतस्यैव वैभवं वक्तुं शक्यम् । प्रजापतिपुत्रत्वोक्त्यैव तस्य वैभवं वर्णितं भवतीत्यर्थः ॥ ५ ॥ ६ ॥

७] ति० टी०-धर्मप्रसङ्गेन तपःसंपादनेच्छया ॥ ७ ॥

रा० टी०-**स इति**। स पुलस्त्यः धर्मप्रसङ्गेन तपआसक्त्या मेरोः पार्श्वे विद्यमानं तृणबिन्द्वाश्रमं गत्वा न्यवसत् ॥ ७ ॥

गो० टी०-**स त्वित्यादि** । धर्मप्रसङ्गेन तपःसम्पादनेच्छयेत्यर्थः । तृणबिन्दुनाम ऋषिः ॥ ७-९ ॥

८-९] ति० टी०-विघ्नं कुर्वन्ति तणाग्निन्यायेन, न तु बुद्धिपूर्वम् ॥ ८ ॥ ९ ॥

रा० टी०-**तप इति**। स पुलस्त्यः तपस्तेपे तस्य पुलस्त्यस्य आश्रमपदं गत्वा कन्यकाः विघ्नं कुर्वन्ति वह्निघृतकुम्भसम्बन्धन्यायेन तपोविघातमकुर्वन् ॥ ८ ॥

रा० टी०-तत्प्रकारमाह—**ऋषीत्यादिभिः**। ऋषिपन्नगकन्यादयः तं देशमुपपेदिरे ॥ ९ ॥

१०] ति० टी०-तदेवाह—**सर्वर्तुष्विति**। तं देशमाश्रमदेशम् ॥ १० ॥

रा० टी०-तत्रागमने हेतुं वदन्नाह-**सर्वेति**। तं पुलस्त्यसंबन्धिनं देशं नित्यशो गत्वा कन्यकाः क्रीडन्ति ॥ १० ॥

गो० टी०-**सर्वर्तिवेति**। तं देशमाश्रमपदम् ॥ १० ॥

११-१३] ति० टी०-वादयन्त्यः । वीणादिकमिति शेषः । लासयन्त्यो नृत्यन्त्यः ॥ ११-१३ ॥

रा० टी०-**देशस्येति**। अनिन्दिताः कन्यकाः तस्य पुलस्त्यस्य विघ्नं तपोविघातं चक्रुः सार्द्धश्लोक एकान्वयी ॥११॥

रा० टी०-**अथेति**। अथ तपोविघातानन्तरं या स्त्री मे दर्शनमागच्छेत् सा गर्भं धारयिष्यति इति वचः महामुनिः पुलस्त्यो व्याजहार ॥ १२ ॥

रा० टी०-**ता इति** । ताः कन्यकाः तस्य पुलस्त्यस्य वाक्यं प्रतिश्रुत्य ब्रह्मशापभयात् भीतास्सत्यः तं देशं नोपचक्रमुः ॥ १३ ॥

गो० टी०-**देशस्येति**। लासयन्त्यः नृत्यन्त्यः॥११-१५॥

१ हृष्ट इति गो. पाठः । २ न्यवसदिति गो. रा. पाठः । ३ देवेति गो. पाठः ।

ब्रह्मशापभयाद्भीतास्तं देशं नोपचक्रमुः । तृणबिन्दोस्तु राजर्षेस्तनया न शृणोति तत् ॥ १४ ॥
गत्वाश्रमपदं तत्र विचचार सुनिर्भया । न चापश्यच्च सा तत्र कांचिदभ्यागतां सखीम्॥१५॥
तस्मिन्काले महातेजाः प्राजापत्यो महानृषिः । स्वाध्यायमकरोत्तत्र तपसा भावितः स्वयम् ॥ १६ ॥
सा तु वेदश्रुतिं श्रुत्वा दृष्ट्वा वै तपसो निधिम् । अभवत्पाण्डुदेहा सा सुव्यञ्जितशरीरजा ॥ १७ ॥
बभूव च समुद्विग्ना दृष्ट्वा तद्दोषमात्मनः । इदं मे किंत्विति ज्ञात्वा पितुर्गत्वाश्रमे स्थिता ॥ १८ ॥
तां तु दृष्ट्वा तथाभूतां तृणबिन्दुरथाब्रवीत् । किं त्वमेतत्त्वसदृशं धारयस्यात्मनो वपुः ॥ १९ ॥
सा तु कृत्वाञ्जलिं दीना कन्योवाच तपोधनम् । न जाने कारणं तात येन मे रूपमीदृशम् ॥ २० ॥
किं तु पूर्वं गतास्म्येका महर्षेर्भावितात्मनः । पुलस्त्यस्याश्रमं दिव्यमन्वेष्टुं स्वसखीजनम् ॥ २१ ॥
न च पश्याम्यहं तत्र कांचिदभ्यागतां सखीम् । रूपस्य तु विपर्यासं दृष्ट्वा त्रासादिहागता ॥ २२ ॥
तृणबिन्दुस्तु राजर्षिस्तपसा द्योतितप्रभः । ध्यानं विवेश तच्चापि अपश्यदृषिकर्मजम् ॥ २३ ॥
स तु विज्ञाय तं शापं महर्षेर्भावितात्मनः । गृहीत्वा तनयां गत्वा पुलस्त्यमिदमब्रवीत् ॥ २४ ॥
भगवंस्तनयां मे त्वं गुणैः स्वैरेव भूषिताम् । भिक्षां प्रतिगृहाणेमां महर्षे स्वयमुद्यताम् ॥ २५ ॥

१४-१५] ति० टी०-तदिति । शापवाक्यमित्यर्थः । न शृणोति न शुश्राव ॥ १४ ॥ १५ ॥

रा० टी०-तृणेति । राजर्षेः तृणबिन्दोस्तनया तत् पुलस्त्योच्चारितं न शृणोति अशृणोत् अत एव सुनिर्भया सती आश्रमपदं पुलस्त्याश्रमं गत्वा विचचार अभ्यागतां कांचित्सखीं तत्र नापश्यच्च सार्द्धश्लोक एकान्वयी ॥ १४-१५ ॥

१६] ति० टी०-स्वाध्यायं वेदाध्ययनम् ॥ १६ ॥

रा० टी०-तस्मिन्निति । तपसा स्वयं भावितः प्रकाशितः पुलस्त्यः तत्र तस्मिन् देशे स्वाध्यायं वेदाध्ययनमकरोत् ॥ १६ ॥

गो० टी०-तस्मिन्निति । स्वाध्यायमकरोत् वेदमपठदित्यर्थः ॥ १६ ॥

१७] ति० टी०-वेदश्रुतिं वेदध्वनिं श्रुत्वा कोऽधीत इति गत्वा तपसो निधिं दृष्ट्वा च पाण्डुदेहा गर्भोत्पत्त्या सुव्यञ्जितशरीरजा शरीराजायत इति शरीरजो गर्भः सुप्रकाशितो यस्याः सा ॥ १७ ॥

रा० टी०-सेति सा तृणबिन्दुतनया वेदश्रुतिं वेदानां वाक्यानि श्रुत्वा अत एव तपसो निधिं पुलस्त्यं दृष्ट्वा उच्चारयितृनिश्चयार्थमवलोक्य सुव्यञ्जितः प्रकाशितः शरीरजो गर्भो यस्याः अत एव पाण्डुदेहा अभवत् ॥ १७ ॥

गो० टी०-सात्विति । वेदश्रुतिं वेदध्वनिं श्रुत्वा कोऽधीत इति गत्वा दृष्ट्वा चेत्यर्थः । पाण्डुदेहा गर्भिणीत्वात् । सुव्यञ्जितः शरीरजो यस्याः सा तथा ॥ १७ ॥

१८] ति० टी०-तद्दोषं गर्भसंभवरूपदोषं दृष्ट्वोद्विग्ना बभूव । किं त्विति । दोषस्वरूपमिति ज्ञात्वेत्यर्थः ॥ १८ ॥

रा० टी०-बभूवेति । आत्मनो दोषं दृष्ट्वा इदं किमिति ज्ञात्वा सञ्चिन्त्य समुद्विग्ना तृणबिन्दुतनया पितुराश्रमे गत्वा स्थिता बभूव ॥ १८ ॥

गो० टी०-बभूवेति । इदं मे किम् एतत्किमिति ज्ञात्वा गर्भकारणमिदं किन्त्विति ज्ञात्वेत्यर्थः ॥ १८ ॥ २३ ॥

१९-२०] ति०टी०-असदृशं कन्यात्वस्यायुक्तम्१९-२०

रा० टी०-तामिति । तथा भूतां गर्भवतीं तां कन्यां दृष्ट्वा असदृशं स्वकुलायोग्यमेतत् कन्यात्वसमये गर्भयुक्तमात्मनो वपुश्शरीरं किं किमर्थं त्वं धारयसि इति वचः तृणबिन्दुरब्रवीत् ॥ १९ ॥

रा० टी०-सेति । सा कन्या तपोधनं तृणबिन्दुमुवाच तदाकारमाह मे रूपं येनेदृशं तत्कारणं न जाने ॥ २० ॥

२१-२२] ति० टी०-पूर्वं गता प्रथमं गता ॥२१॥२२॥

रा० टी०-कारणज्ञानार्थं स्ववृत्तमाह—किमिति द्वाभ्याम् । स्वसखीजनमन्वेष्टुं पुलस्त्यस्याश्रममेकाहं गतास्मि २१

रा० टी०-नेति । तत्र पुलस्त्यस्याश्रमे अभ्यागतां सखीं न पश्यामि अपश्यं रूपस्य विपर्यासं तु दृष्ट्वा इह तव समीपे आगता ॥ २२ ॥

२३] ति० टी०-तच्चापि । गर्भकारणमित्यर्थः ॥ २३ ॥

रा० टी०-तृणेति । तृणबिन्दुः ध्यानं विवेश अत एव तत् गर्भं ऋषिकर्मजं पुलस्त्यशापसमुद्भूतमपश्यत् अजानात् ॥२३॥

२४] ति० टी०-तनयां गृहीत्वा पुलस्त्यं गत्वा ॥ २४ ॥

रा० टी०-स इति । स तृणबिन्दुः महर्षेः शापं विज्ञाय तनयां गृहीत्वा पुलस्त्यं गत्वाब्रवीत् ॥ २४ ॥

गो० टी०-स त्विति । तनयां गृहीत्वा पुलस्त्यं गत्वेत्यन्वयः ॥ २४ ॥

२५] ति० टी०-इमां भिक्षां प्रतिगृहाण भिक्षात्वेन स्वीकुर्वित्यब्रवीत् । ननर्ध्वरेतसो मम नानया प्रयोजनम्

१ सापश्यात्स्थेतेति गो. पाठः । २ ह्यपश्यदिति गो. पाठः ।

तपश्चरणयुक्तस्य श्राम्यमाणेन्द्रियस्य[1] ते । शुश्रूषणपरा नित्यं भविष्यति न संशयः ॥ २६ ॥
तं ब्रुवाणं तु तद्वाक्यं राजर्षिं धार्मिकं तदा । जिघृक्षुरब्रवीत्कन्यां बाढमित्येव स द्विजः ॥ २७ ॥
दत्त्वा तु[2] तनयां राजा स्वमाश्रमपदं गतः । सापि तत्रावसत्कन्या तोषयन्ती पतिं गुणैः ॥ २८ ॥
तस्यास्तु शीलवृत्ताभ्यां तुतोष मुनिपुंगवः । प्रीतः स तु महातेजा वाक्यमेतदुवाच ह ॥ २९ ॥
परितुष्टोऽस्मि सुश्रोणि गुणानां संपदा भृशम् । तस्मादेवि ददाम्यद्य पुत्रमात्मसमं तव ॥
उभयोर्वंशकर्तारं पौलस्त्य इति विश्रुतम् ॥ ॥ ३० ॥
यस्मात्तु विश्रुतो वेदस्त्वयेहाध्ययतो[3] मम । तस्मात्स विश्रवा नाम भविष्यति न संशयः ॥ ३१ ॥
एवमुक्ता तु सा देवी प्रहृष्टेनान्तरात्मना । अचिरेणैव कालेनामूत विश्रवसं सुतम् ॥
त्रिषु लोकेषु विख्यातं यशोधर्मसमन्वितम् ॥ ॥ ३२ ॥
श्रुतिमान्समदर्शी च व्रताचाररतस्तथा । पितेव तपसा युक्तो अभवद्विश्रवा[4] मुनिः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे द्वितीयः सर्गः ॥ २ ॥

तत्राह—**स्वयमुद्यतामिति** । 'उद्यतामाहृतां भिक्षां पुरस्तादप्रवेदिताम् । भोज्यां मेने प्रजानाथो अपि दुष्कृतकर्मणः ॥' इत्युक्तेः । स्वयमुद्यतेयं ग्राह्यैवेत्यर्थः ॥ २५ ॥

रा० टी०—तदाकारमाह—**भगवन्निति द्वाभ्याम्** । स्वयमुद्यतामिमां मे कन्यां भिक्षां प्रतिगृह्णाण ॥ २५ ॥

गो० टी०—**भगवन्निति** । इमां भिक्षां गृहाणेति भिक्षात्वेन स्वीकुरुष्वेति अब्रवीदिति पूर्वेणान्वयः । नन्वूर्ध्वरेतसा मया कथं ग्राह्या किं वा नेऽनया प्रयोजनमित्यत्राह—उद्यतामिति । "उद्यतामाहृतां भिक्षां पुरस्तादप्रवेदिताम् । भोज्यां मेने प्रजानाथो ह्यपि दुष्कृतकर्मणः" इत्युक्तेः स्वयमुद्यतेयं ग्राह्यैवेत्यर्थः ॥ २५ ॥ २७ ॥

२६] ति० टी०—तत्प्रतिग्रहफलमाह—**शुश्रूषणपरेति** २६

रा० टी०—तत्प्रयोजनमाह—**तप इति** । ते शुश्रूषणपरा भविष्यति ॥ २६ ॥

२७] ति० टी०—यथान्यायं पाणिग्रहणपूर्वकमिति शेषः२७

रा० टी०—**तमिति** । द्विजः स पुलस्त्यः कन्यां जिघृक्षुः सन् बाढमित्यब्रवीत् ॥ २७ ॥

२८-२९] ति० टी०—तदेवोक्तम्—**तोषयन्ती पतिमिति** ॥ २८ ॥ २९ ॥

रा० टी०—**दत्त्वेति** । राजा तनयां दत्त्वा स्वमाश्रमपदं गतः कन्या तु तत्रावसत् ॥ २८ ॥

रा० टी०—**तस्या इति** । तस्याः कन्यायाः शीलवृत्ताभ्यां मुनिपुङ्गवः पुलस्त्यस्तुतोष प्रीतस्सन् एतदुवाच च ॥ २९ ॥

गो० टी०—**दत्त्वेति** । यथान्यायं पाणिग्रहणपूर्वकमित्यर्थः ॥ २८ ॥ ३० ॥

३०] ति० टी०—उभयोः । मातुः पितुश्चेत्यर्थः ॥ ३० ॥

रा० टी०—तदाकारमाह—**परीति** । गुणानां सम्पदा सम्पत्या अहं परितुष्टोऽस्मि तस्मात् हेतोः आत्मसमं स्वसदृशं पौलस्त्य इति विश्रुतं पुत्रं ददामि सार्द्धश्लोक एकान्वयी ॥ ३० ॥

गो० टी०—**उभयोरिति** । उभयोरपि मातुः पितुश्चेत्यर्थः । अध्ययतः अधीयानस्येत्यर्थः । वेदो विश्रुतः गर्भेहेतुरिति शेषः ॥ ३१ ॥ ३४ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकूटाख्याने उत्तरश्रीरामायणव्याख्याने द्वितीयः सर्गः ॥ २ ॥

३१-३३] ति० टी०—अध्ययतोऽधीयानस्य । वेदो विश्रुतः । गर्भेहेतुरिति शेषः ॥ ३१ ॥ ३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्वितीयः सर्गः ॥ २ ॥

रा० टी०—**यस्मादिति** । अध्ययतः अधीयानस्य मम वेदः त्वयेह विश्रुतः तस्मात् स ते पुत्रः विश्रवा नाम भविष्यति ॥ ३१ ॥

रा० टी०—**एवमिति** । एवमुक्ता सा तृणबिन्दुसुता त्रिषु लोकेषु विख्यातं विश्रवसं सुतमसूत सार्द्धश्लोक एकान्वयी ॥ ३२ ॥

रा० टी०—**श्रुतिमानिति** । विश्रवा मुनिः पितेव तपसा युक्तोऽभवत् पूर्वरूपाभावः आर्षः ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्वितीयः सर्गः ॥ २ ॥

१ श्रम्यमाणेति गो. पाठः । २ स तु यथान्यायमिति गो. पाठः । ३ एष इति गो. पाठः । ४ ह्यभवदिति गो. पाठः ।

तृतीयः सर्गः ।

विश्रवसोऽपि कुबेराख्यतनयस्योत्पत्तिः कुबेराय तत्तपःपरितुष्टेन ब्रह्मणा वरद्वयं वितीर्णं ततश्चतुर्थलोकपालत्वं पुष्पकविमानं च प्राप्य लङ्कायामुवास कुबेरः ।

अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुंगवः । अचिरेणैव कालेन पितेव तपसि स्थितः ॥ १ ॥
सत्यवाञ्शीलवान्दान्तः स्वाध्यायनिरतः शुचिः। सर्वभोगेष्वसंसक्तो नित्यं धर्मपरायणः ॥ २ ॥
ज्ञात्वा तस्य तु तद्वृत्तं भरद्वाजो महामुनिः । ददौ विश्रवसे भार्यां स्वसुतां देववर्णिनीम्॥ ३ ॥
प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा । प्रजान्वीक्षिकया बुद्ध्या श्रेयो ह्यस्य विचिन्तयन् ४॥
मुदा परमया युक्तो विश्रवा मुनिपुंगवः । स तस्यां वीर्यसंपन्नमपत्यं परमाद्भुतम् ॥ ५ ॥
जनयामास धर्मज्ञः सर्वैर्ब्रह्मगुणैर्वृतम् । तस्मिञ्जाते तु संहृष्टः स बभूव पितामहः ॥ ६ ॥
दृष्ट्वा श्रेयस्करीं बुद्धिं धनाध्यक्षो भविष्यति । नाम चास्याकरोत्प्रीतः सार्धं देवर्षिभिस्तदा ॥ ७ ॥
यस्माद्विश्रवसोऽपत्यं सादृश्याद्विश्रवा इव । तस्माद्वैश्रवणो नाम भविष्यत्येष विश्रुतः ॥ ८ ॥
स तु वैश्रवणस्तत्र तपोवनगतस्तदा । अवर्धताहुतिहुतो महातेजा यथानलः ॥ ९ ॥
तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः । चरिष्ये परमं धर्मं धर्मो हि परमा गतिः ॥ १० ॥

१-२] ति० टी०-अथ पौलस्त्याद्विश्रवसः कुबेरोत्पत्तिः—अथेति ॥ १ ॥ २ ॥

रा० टी०-विश्रवसो वृत्तान्तमाह—अथेत्यादिभिः । सत्यादिविशिष्टो विश्रवाः पितेव तपसि स्थितो बभूवेति शेषः श्लोकद्वयमेकान्वयि ॥ १-२ ॥

३] ति० टी०-तस्य तद्वृत्तम् । विश्रवसस्तादृशं चरितमित्यर्थः । देववर्णिनीं देवसमानरूपां तन्नाम्नीं च ॥ ३ ॥

रा० टी०-ज्ञात्वेति । भरद्वाजः तस्य विश्रवसः तत् उत्तमं वृत्तं ज्ञात्वा विश्रवसे स्वसुतां ददौ ॥ ३ ॥

गो० टी०-ज्ञात्वेति । तस्य तद्वृत्तं विश्रवसस्तादृशं चरितमित्यर्थः । देववर्णिनीं देवसमानरूपाम् ॥ ३ ॥

४] ति० टी०-प्रजान्वीक्षिकया प्रजानां शुभाशुभवीक्षणरूपया बुद्ध्या ज्योतिःशास्त्रसिद्धया । अस्योत्पादयिष्यमाणपुत्रस्य श्रेयोगुणं चिन्तयन् ॥ ४ ॥

५] ति० टी०-तस्यां भार्यायाम् ॥ ५ ॥

६] ति० टी०-सर्वैर्ब्रह्मगुणैः शमतपःशौचादिगुणैर्युक्तमपत्यं जनयामास । पितामहो वैश्रवणपितामहः । पुलस्त्य इत्यर्थः । अत्र स्थाने प्रजान्वेषिकयेत्यर्थमिति कतकस्वरसः । प्रजामन्विच्छति प्रजान्वेषिका, तद्गुणागुणपर्यालोचिका ज्योतिःशास्त्रविषया बुद्धिः, तयास्य वैश्रवणस्य श्रेयो विचिन्तयन्पुलस्त्यस्तस्मिन्विश्रवसः पुत्रे जाते तुष्टो बभूवेति तेन व्याख्यानात् ॥ ६ ॥

रा० टी०-प्रतीति । विश्रवाः प्रजान्वीक्षिकया प्रजानां शुभाशुभविचारिकया बुद्ध्या अस्य लोकस्य श्रेयो विचिन्तयन् सन् भरद्वाजसुतां धर्मेण वैवाहिकविधिना प्रतिगृह्य तस्यां भरद्वाजसुतायां ब्रह्मगुणैर्वृतमपत्यं जनयामास तस्मिन्नपत्ये जाते सति पितामहस्सन्तुष्टो बभूव श्लोकत्रयमेकान्वयि ॥ ४-६ ॥

गो० टी०-प्रतिगृह्येत्यादिश्लोकपञ्चकमेकं वाक्यम् । सर्वैर्ब्रह्मगुणैः । शमदमादिभिरित्यर्थः । पितामहः वैश्रवणपितामहः । पुलस्त्य इत्यर्थः । प्रजामन्विच्छतीति प्रजान्वेषिका "प्रत्ययस्थात्०" इतीत्वम् । अस्य विश्रवसस्तस्मिन्पुत्रे जाते तुष्टो बभूव । श्रेयस्करीं धनेशत्वरूपश्रेयःप्राप्तिहेतुभूतां जन्मलग्नपर्यालोचनया कालान्तरे धनाध्यक्षनामको भविष्यतीति निश्चित्य तत्काले विश्रवसोपत्यत्वाद्वैश्रवण इति विश्रुतो भविष्यतीति नाम च चकार । "विश्रवसो विश्रवणं वा" इति विश्रवणादेशः ॥ ४ ॥ १० ॥

७] ति० टी०-श्रेयस्करीं धनेशत्वरूपश्रेयःप्राप्तिहेतुभूतां तपोविषयां तस्य बुद्धिं दृष्ट्वा । जन्मलग्नपर्यालोचनयेति शेषः । धनाध्यक्षो भविष्यति कालान्तरे एवंनामा भविष्यतीति संहृष्टो बभूवेत्यन्वयः ॥ ७ ॥

रा० टी०-दृष्ट्वेति । अस्य विश्रवसो बुद्धिं श्रेयस्करीं दृष्ट्वा ज्ञात्वा अयं धनाध्यक्षो भविष्यतीति हेतोः प्रीतस्सन् देवर्षिभिस्सार्द्धं नामाकरोत् ॥ ७ ॥

८-१०] ति० टी०-यतो विश्रवसोऽपत्यं रूपसादृश्याद्विश्रवा इव स इवेति व्यवहारविषयस्तस्माद्वैश्रवण इति विश्रुतः प्रसिद्धो भविष्यति नाम । अपत्यप्रत्ययसंनियोगेन विश्रवसो विश्रवणादेशः ॥ ८ ॥ १० ॥

रा० टी०-यस्मादिति । सादृश्यात् रूपादिना तौल्यात् हेतोः विश्रवा इवैषः यस्मात् विश्रवसोऽपत्यं तस्मात् वैश्रवणो

१ सभिति गो. पाठः । २ तस्येति गो. पाठः ।

स तु वर्षसहस्राणि तपस्तप्त्वा महावने । यन्त्रितो नियमैरुग्रैश्चकार सुमहत्तपः ॥ ११ ॥
पूर्णे वर्षसहस्रान्ते तं तं विधिमकल्पयत् । जलाशी मारुताहारो निराहारस्तथैव च ॥
एवं वर्षसहस्राणि जग्मुस्तान्येकवर्षवत् ॥ ॥ १२ ॥
अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह । गत्वा तस्याश्रमपदं ब्रह्मेदं वाक्यमब्रवीत् ॥ १३ ॥
परितुष्टोऽस्मि ते वत्स कर्मणानेन सुव्रत । वरं वृणीष्व भद्रं ते वरार्हस्त्वं महामते ॥ १४ ॥
अथाब्रवीद्वैश्रवणः पितामहमुपस्थितम् । भगवँल्लोकपालत्वमिच्छेयं लोकरक्षणम् ॥ १५ ॥
अथाब्रवीद्वैश्रवणं परितुष्टेन चेतसा । ब्रह्मा सुरगणैः सार्धं बाढमित्येव हृष्टवत् ॥ १६ ॥
अहं वै लोकपालानां चतुर्थं स्रष्टुमुद्यतः । यमेन्द्रवरुणानां च पदं यत्तव चेप्सितम् ॥ १७ ॥
तद्गच्छ वैत धर्मज्ञ निधीशत्वमवाप्नुहि । शक्राम्बुपयमानां च चतुर्थस्त्वं भविष्यसि ॥ १८ ॥
एतच्च पुष्पकं नाम विमानं सूर्यसंनिभम् । प्रतिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज ॥ १९ ॥
स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम् । कृतकृत्या वयं तात दत्त्वा तव वरद्वयम् ॥ २० ॥
इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह । गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्तलम् ॥ २१ ॥
धनेशः पितरं प्राह प्राञ्जलिः प्रयतात्मवान् । भगवँल्लब्धवानस्मि वरमिष्टं पितामहात् ॥ २२ ॥

नाम विश्रुतः ख्यातो भविष्यति वैश्रवणशब्दार्थः विश्रवसोऽपत्यमिति अपत्यप्रत्ययसंसर्गे विश्रवश्शब्दस्य विश्रवणादेशः ॥८॥

रा० टी०–स इति । तपोवनगतः वैश्रवणः आहुतिहुतोऽनल इवावर्धत ॥ ९ ॥

रा० टी०–तपोवनगमने हेतुमाह–तस्येति । हि यतः धर्मः परमा गतिः अतः परमं धर्मं चरिष्ये इति बुद्धिः आश्रमपदस्थस्य श्रमनिवर्तकस्थाने स्थितस्य तस्य वैश्रवणस्य जज्ञे ॥१०॥

११] ति० टी०–तपस्तप्त्वालोच्य नियमैर्यन्त्रितः । संजातनियमं इत्यर्थः ॥ ११ ॥

रा० टी०–स इति । तपः तप्त्वा स्वश्रेयस्करत्वेन निश्चित्य वर्षसहस्राणि सुमहत्तपश्चकार ॥ ११ ॥

गो० टी०–स त्विति । नियमेन यन्त्रितः संजातबन्धनः ॥ ११

१२] ति० टी०–तं तं विधिम् । वक्ष्यमाणजलाशित्वादिविधिमित्यर्थः ॥ १२ ॥

रा० टी०–तत्प्रकारं बोधयन्नाह—पूर्ण इति । जलाशित्वादिविशिष्टो वैश्रवणः पूर्णे नियमपूर्त्यर्थं वर्षसहस्रान्ते वर्षसहस्रमध्ये तं तत्तत्काले विहितं विधिं विधानमकल्पयत् अकरोत् अदन्तोप्यन्तशब्दो मध्यवाची ॥ १२ ॥

रा० टी०–एवमिति । तानि तपःपराणि वर्षसहस्राणि एकवर्षवज्जग्मुः अर्द्धं पृथक् ॥ १२ ॥

गो० टी०–पूर्ण इति । तं तं विधिम् । विधिमेवाह–जलाशीत्यादि ॥ १२ ॥ १४ ॥

१३–१४] ति० टी०–अथ भगवत्प्रसादवैभवमाह—अथ प्रीत इति ॥ १३ ॥ १४ ॥

रा० टी०–अथेति । अथानन्तरं ब्रह्मा तस्य वैश्रवणस्याश्रमपदं गत्वा इदमब्रवीत् ॥ १३ ॥

रा० टी०–तदाकारमाह—परितुष्ट इति । त्वं वरं वृणीष्व ॥ १४ ॥

१५–१६] ति० टी०–लोकपालत्वं वित्तरक्षणं वैराजनिधिनाथत्वम् ॥ १५ ॥ १६ ॥

रा० टी०–अथेति । लोकपालत्वं वित्तरक्षणं चाहमिच्छेयमिति वैश्रवणः पितामहमब्रवीत् ॥ १५ ॥

रा० टी०–अथेति । ब्रह्मा हृष्टवत् हर्षयुक्तं यथा भवति तथा बाढमित्येव अब्रवीत् ॥ १६ ॥

गो० टी०–अथेति । वित्तरक्षणम् अशेषनिधिपतित्वम् ॥ १५ ॥ १७ ॥

१७–१८] ति० टी०–चतुर्थं चतुर्णां पूरणम् । यमादित्रयस्य यत्पदं लोकपालपदं यत्तवेप्सितं त्वं तद्गच्छ निधीशत्वं चाप्नुहि । एवं सति त्वं शक्रादीनां चतुर्थो भविष्यसीति संबन्धः ॥ १७ ॥ १८ ॥

रा०टी०–ब्रह्मोक्तिमेवाह–अहमिति । यत्पदं तवेप्सितं तत् यमादीनां लोकपालानां सम्बन्धि चतुर्थं पदं स्रष्टुमहमुद्यतः १७

गो०टी०–यमेति । यदीप्सितं तद्गच्छ निधीशत्वमवाप्नुहि १८

रा० टी०–तदिति । त्वं निधीशत्वमवाप्नुहि शक्रादीनां चतुर्थश्च त्वं भविष्यसि ॥ १८ ॥

१९] ति० टी०–त्रिदशैः समतां व्रज । नलकूबरपुत्रत्वेनैव तिष्ठेत्यर्थः ॥ १९ ॥

रा० टी०–एतदिति । पुष्पकं नाम विमानं प्रतिगृह्णीष्व अत एव त्रिदशैस्समतां व्रज ॥ १९ ॥

गो० टी०–एतच्चेति । त्रिदशैः समतामिति । नतु ऋषिपुत्रवद्वर्तस्वेत्यर्थः ॥ १९ ॥ २७ ॥

२०–२२] ति० टी०–वरद्वयं निधीशत्वपुष्पकदानरूपम् ॥ २०–२२ ॥

---

१ वित्तमिति गो.पा.। २ खमिति गो.पा.। ३ स्थलमिति गो.पा.। ४ वने स इति गो.पा.। ५ अस्य चोत्तरस्य पादस्य व्यत्यासेन पाठो गो. पु.।

निवासनं न मे देवो विदधे स प्रजापतिः । तं पश्य भगवन्कंचिन्निवासं साधु मे प्रभो ॥
न च पीडा भवेद्यत्र प्राणिनो यस्य कस्यचित् ॥ ॥ २३ ॥
एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुंगवः । वचनं प्राह धर्मज्ञं[1] श्रूयतामिति सत्तम ॥ २४ ॥
दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः । तस्याग्रे तु विशाला सा महेन्द्रस्य पुरी यथा ॥ २५ ॥
लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा । राक्षसानां निवासार्थं यथेन्द्रस्यामरावती ॥ २६ ॥
तत्र त्वं वस भद्रं ते लङ्कायां नात्र संशयः । हेमप्राकारपरिखा[2] यन्त्रशस्त्रसमावृता ॥ २७ ॥
रमणीया पुरी सा हि रुक्मवैदूर्यतोरणा । राक्षसैः सा परित्यक्ता पुरा विष्णुभयार्दितैः ॥ २८ ॥
शून्या रक्षोगणैः सर्वैः रसातलतलं गतैः । शून्या संप्रति लङ्का सा प्रभुस्तस्या न विद्यते ॥ २९ ॥
स त्वं तत्र निवासाय गच्छ पुत्र यथासुखम् । निर्दोषस्तत्र ते वासो न बाधैस्[3]तत्र कस्यचित् ॥ ३० ॥
एतच्छ्रुत्वा स धर्मात्मा धर्मिष्ठं वचनं पितुः । निवासयामास तदा लङ्कां पर्वतमूर्धनि ॥ ३१ ॥
नैर्ऋतानां सहस्रैस्तु हृष्टैः प्रमुदितैः सदा[4] । अचिरेणैव कालेन संपूर्णा तस्य शासनात् ॥ ३२ ॥
स तु तत्रावसत्प्रीतो धर्मात्मा नैर्ऋतर्षभः । समुद्रपरिखायां स लङ्कायां विश्रवात्मजः ॥ ३३ ॥
काले काले तु धर्मात्मा पुष्पकेण धनेश्वरः । अभ्यागच्छद्विनीतात्मा पितरं मातरं च हि ॥ ३४ ॥

रा० टी०–स्वस्तीति । तव वरद्वयं दत्वा कृतकृत्याः वयं गमिष्यामः ॥ २० ॥

रा० टी०–इतीति । ब्रह्मा स्वस्थानं गतः अहं पृथक् । गतेष्विति । ब्रह्मपूर्वेषु देवेषु नभस्तलं गतेषु सत्सु धनेशो वैश्रवणः पितरं विश्रवसं प्राह ॥ २१–२२ ॥

२३–२६]ति०टी०–निवासनम् । निवासमित्यर्थः २३–२६

रा० टी०–तदाकारमाह—**निवासनमिति** । प्रजापतिः मे निवासनं निवासस्थानं न विदधे आज्ञापयामास अतः यत्र प्राणिनः पीडा न भवेत् तं कञ्चित् निवासं पश्य आलोच्य देहि सार्द्धश्लोक एकान्वयी ॥ २३ ॥

रा० टी०–एवमिति । विश्रवाः श्रूयतामिति वचनं प्राह ॥ २४ ॥

रा० टी०–तदुक्तिमेवाह—**दक्षिणस्येत्यादिभिः** । उदधेस्तीरे त्रिकूटो नाम पर्वतोऽस्तीति शेषः तस्याग्रे शिखरे महेन्द्रस्य पुरीव लङ्का नाम पुरी वर्त्तत इति शेषः सार्द्धश्लोक एकान्वयी ॥ २५ ॥

रा० टी०–राक्षसानामिति । इन्द्रस्य अमरावती इव राक्षसानां निवासार्थं या लङ्का तस्यां त्वं वस ॥ २६ ॥

२७–३०] ति० टी०–यन्त्ररूपैः शस्त्रैः समावृता २७–३०

रा० टी०–ननु तस्यां राक्षसास्सन्तीत्यत आह—**हेमेति** । लङ्का विष्णुभयार्दितैः राक्षसैः पुरा परित्यक्ता अत एव सर्वैः रक्षोगणैः शून्या श्लोकद्वयमेकान्वयि ॥ २७ ॥

रा० टी०–शून्येति । तस्याः लङ्कायाः प्रभुर्न विद्यते अत एव सा लङ्का शून्या अतो यथासुखं निवासाय तव त्वं गच्छ तत्र कस्यचिद्बाधो न अत एव ते वासो निर्दोषो भविष्यतीति शेषः सार्द्धश्लोक एकान्वयी ॥ ३० ॥

गो० टी०–हेमेति । यन्त्ररूपैः शस्त्रैः समावृता॥२८–३१॥

३१] ति० टी०–निवासयामास । निवासमकरोदित्यर्थः ॥ ३१ ॥

रा० टी०–एतदिति । स वैश्रवणः पितुर्वचनं श्रुत्वा पर्वतमूर्द्धनि विद्यमानो लङ्कां निवासयामास ॥ ३१ ॥

गो० टी०–एतदिति । प्रमुदितैः सह निवासयामासेति योजना ॥ ३२ ॥

३२–३४] ति० टी०–प्रमुदितैर्नैर्ऋतानां सहस्रैः सह निवासयामासेति संबन्धः । संपूर्णा धनधान्यादिसर्वैश्वर्यपूर्णा । शासनात्पालनात् ॥ ३२–३४ ॥

रा० टी०–नैर्ऋतानामिति । तस्य वैश्रवणस्य शासनात् नैर्ऋतानां सहस्रैर्बहुभिर्नैर्ऋतैरित्यर्थः सम्पूर्णा लङ्काभवदिति शेषः ॥ ३२ ॥

रा० टी०–स इति । नैर्ऋतर्षभो विश्रवात्मजः लङ्कायामवसत् ॥ ३३ ॥

रा० टी०–काल इति । काले काले सेवासमये धनेश्वरः पुष्पकेण पितरं मातरं चाभ्यगच्छत् ॥ ३४ ॥

गो० टी०–अचिरेणेति । संपूर्णधनधान्यादिसर्वैश्वर्यपूर्णेत्यर्थः ॥ ३३ ॥ ३६ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने तृतीयः सर्गः ॥ ३ ॥

१ धर्मज्ञः इति गो. रा. पाठः । २ परिखेति गो. पाठः । ३ बाधेति गो. पाठः । ४ सहेति गो. पाठः ।

स देवगन्धर्वगणैरभिष्टुतस्तथाप्सरोनृत्यविभूषितालयः ।
गभस्तिभिः सूर्य इवावभासयन्पितुः समीपं प्रययौ स वित्तपः ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ।

पुना रामेण पृष्टोऽगस्त्यो राक्षसवंशवर्णनप्रस्तावेन हेतितनयस्य विद्युत्केशस्योत्पत्तिं तत्तनयस्य सुकेशस्य च जन्म तस्य च कारुण्यमापन्नाभ्यां पार्वतीपरमेश्वराभ्यां पुरस्याकाशगस्य तथामरत्वस्य च प्राप्तिमकथयत् ।

श्रुत्वागस्त्येरितं वाक्यं रामो विस्मयमागतः । कथमासीत्तु लङ्कायां संभवो रक्षसां पुरा ॥ १ ॥
ततः शिरः कम्पयित्वा त्रेताग्निसमविग्रहम् । तमगस्त्यं मुहुर्दृष्ट्वा स्मयमानोऽभ्यभाषत ॥ २ ॥
भगवन्पूर्वमप्येषा लङ्कासीत्पिशिताशिनाम् । श्रुत्वेदं भगवद्वाक्यं जातो मे विस्मयः परः ॥ ३ ॥
पुलस्त्यवंशादुद्भूता राक्षसा इति नः श्रुतम् । इदानीमन्यतश्चापि संभवः कीर्तितस्त्वया ॥ ४ ॥
रावणात्कुम्भकर्णाच्च प्रहस्ताद्विकटादपि । रावणस्य च पुत्रेभ्यः किं नु ते बलवत्तराः ॥ ५ ॥

३५] ति० टी०—अवभासयन्शोभमानः अप्सरोनृत्यैर्विभूषितमालयं पुष्पकं यस्य सः ॥ ३५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे तृतीयः सर्गः ॥ ३ ॥

रा० टी०—स इति । अप्सरसां नृत्यैः विभूषितमालयं पुष्पकं यस्य स वित्तपः गभस्तिभिः स प्रसिद्धः सूर्य इव अवभासयन् सन् पितुस्समीपं प्रययौ ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे तृतीयः सर्गः ॥ ३ ॥

१] ति० टी०—लङ्कायां पूर्वमपि रक्षःस्थितिं श्रुत्वा विस्मितेन रामेण तेषामुत्पत्त्यादिप्रश्नेऽगस्त्येन तत्प्रतिपादनं श्रुत्वेति विस्मयमागत इत्युक्तम्, तत्र किंविषयकश्रवणाद्विस्मयप्राप्तिस्तत्राह—कथमिति । पुरा धनदावस्थितेः पूर्वमपि रक्षसां संभवोऽवस्थानादिसंभव इति यदुक्तम्, तत्तु कथमासीदिति विस्मयमागतः ॥ १ ॥

रा० टी०—अगस्त्यवचनश्रवणानन्तरकालिकं वृत्तान्तमाह—श्रुत्वेत्यादिभिः । रामः विस्मयमागतः प्राप्त. विस्मयाकारमाह पुरा पूर्वं लङ्कायां रक्षसां संभवः कथमासीत् राक्षससम्भवस्य विश्रवस एव प्रसिद्धत्वात् इति तात्पर्यम् ॥ १ ॥

गो० टी०—श्रुत्वेत्यादि । लङ्कायां धनदाधिष्ठानात् पूर्वमपि रक्षसां संभवः अपःस्थानादिसंभवः इति यदुक्तं तत् श्रुत्वा विस्मयमागत इत्यन्वयः ॥ १ ॥

२] ति० टी०—ततो विस्मयप्राप्त्यनन्तरम् । मुहुः स्मयमानो विस्मयं कुर्वन् ॥ २ ॥

रा० टी०—तत इति । स्मयमानो विस्मयं प्राप्नुवन् रामः अगस्त्यं मुहुर्दृष्ट्वा अभ्यभाषत ॥ २ ॥

गो० टी०—तत इत्यादि । ततो मुहुः शिरः कम्पयित्वा विस्मयमागतः सन् अगस्त्यं दृष्ट्वाऽभ्यभाषत ॥ २ ॥

३] ति० टी०—तदेवाह—भगवन्निति । पूर्वमपि विश्रवःपुत्रवैश्रवणरावणयोः पूर्वमपि लङ्का पिशिताशिनामावास आसीदिति भगवद्वाक्यमन्यतोऽपि रक्षःसंभवपरं श्रुत्वा मे विस्मयो जातः ॥ ३ ॥

रा० टी०—तदाकारमाह—भगवन्नित्यादिभिः । पूर्वमपि लङ्का पिशिताशिनां राक्षसानामासीत् इदं भगवतो भवतो वाक्यं श्रुत्वा मे परो विस्मयो जातः ॥ ३

गो० टी०—भगवन्निति । पूर्वं रावणकुबेरयोः पूर्वमपि लङ्का पिशिताशिनामासीदावास आसीदितीदानीमुक्तं श्रुत्वा मम विस्मयो जनितः ॥ ३ ॥

४] ति० टी०—तदेवाह—पुलस्त्येति । नोऽस्माकम् । अन्यतश्चापि संभवः कीर्तितः । लङ्का राक्षसानां निवासार्थं निर्मितेति विश्रवोवाक्यानुवादेनेत्यर्थः ॥ ४ ॥

रा० टी०—विस्मये कारणमाह—पुलस्त्येति । राक्षसाः पुलस्त्यवंशादुद्भूता इति नोऽस्माभिः श्रुतमिदानीं तु अन्यतोऽपि सम्भवः राक्षसोत्पत्तिः त्वया कीर्तितः एतेन पूर्वराक्षसोत्पत्तिं वर्णयेति सूचितम् ॥ ४ ॥

गो० टी०—कुतो विस्मय इत्याशङ्क्य विरुद्धश्रवणादित्याह—पुलस्त्येति । नः अस्माभिः पूजायां बहुवचनम् । श्रुतं कर्णाकर्णिकयेति शेषः ॥ ४–७ ॥

५] ति० टी०—रावणपुत्रा इन्द्रजिदतिकायादयस्तेभ्यस्ते बलवत्तराः किं नु । यतो विष्णुना तद्विद्रावणे यतितमिति भावः ॥ ५ ॥

रा० टी०—रावणादिति । रावणादिभ्यः ते पौर्वकालिकराक्षसा बलवत्तराः किं नु एतदुत्तरं वदेति तात्पर्यम् ॥५॥

क एषां पूर्वको ब्रह्मन्किंनामा च बलोत्कटः । अपराधं च कं प्राप्य विष्णुना द्राविताः कथम् ॥ ६ ॥
एतद्विस्तारतः सर्वं कथयस्व ममानघ । कुतूहलमिदं मह्यं नुद भानुर्यथा तमः ॥ ७ ॥
राघवस्य वचः श्रुत्वा संस्कारालंकृतं शुभम् । अथ विस्मयमानस्तमगस्त्यः प्राह राघवम् ॥ ८ ॥
प्रजापतिः पुरा सृष्ट्वा अपः[1] सलिलसंभवः । तासां गोपायने सत्त्वानसृजत्पद्मसंभवः ॥ ९ ॥
ते सत्त्वाः सत्त्वकर्तारं विनीतवदुपस्थिताः । किं कुर्म इति भाषन्तः क्षुत्पिपासाभयार्दिताः ॥ १० ॥
प्रजापतिस्तु तान्[3]सर्वान्प्रत्याह प्रहसन्निव । आभाष्य वाचा यत्नेन रक्षध्वमिति मानवाः ॥ ११ ॥
रक्षाम[5] इति तत्रान्यैर्यक्षाम[6] इति चापरैः । भुंक्षिताभुंक्षितैरुक्तस्ततस्तानाह भूतकृत् ॥ १२ ॥

६] ति० टी०–पूर्वकः कूटस्थस्तद्वंश्याश्च राक्षसाः कमपराधं प्राप्य विष्णुना द्राविताः कथं च द्राविताः ॥ ६ ॥

रा० टी०–क इति । तेषां पूर्वराक्षसां पूर्वकः प्रथमः को बलोत्कटः अतिबलः कमपराधं प्राप्य विष्णुना कथं द्रावितः ६

७] ति० टी०–प्राचीनरक्षःकथनेन मह्यं कृतमिदं कुतूहलं भानुर्यथा तमो नुदति तथा नुद ॥ ७ ॥

रा० टी०–एतदिति । एतत् यत्पृष्टं सर्वं विस्तरतः कथयस्व अत एव भानुस्तम इव मह्यं ममेदं कौतूहलं नुद निवर्त्तय ॥ ७ ॥

८] ति० टी०–संस्कारालंकृतं पदवाक्यार्थसंस्कारयुतम् । विस्मयमानः । सर्वज्ञोऽप्येवं नाटयतीति विस्मयः ॥ ८ ॥

रा० टी०–राघवस्येति । संस्कारैः पदवाक्यार्थसंस्कृतिभिरलंकृतम् राघवस्य वचः श्रुत्वा विस्मयमानोगस्त्यः राघवं प्राह ॥ ८ ॥

गो० टी०–राघवस्येति । संस्कारेति पदवाक्यार्थजसंस्कारेति यावत् । ईषद्विस्मयमान इति । सर्वज्ञोप्यजानन्निव पृच्छतीति विस्मितम् ॥ ८ ॥

९] ति० टी०–अपः सृष्ट्वा । भूमेरधोभागवर्तिनीरपः सृष्ट्वेत्यर्थः । तत्र सलिलसंभवः प्रजापतिरभूदित्यन्वयः । 'अप एव ससर्जादौ तासु वीर्यमवासृजत् । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥ तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥' इति मनुक्तेः । 'आपो वा इदमग्र आसन् । स प्रजापतिः पुष्करपर्णे समभवत्' । तथा 'आपो वा इदमग्रे सलिलमासीत् । तस्मिन्प्रजापतिर्वायुर्भूत्वाचरत् । स इमामपश्यत् । तां वराहो भूत्वाहरत्' 'इति श्रुतेश्च । तदेव पद्मसंभव इत्यनेन दर्शितम् । तासां स्वसृष्टानामपां गोपायने रक्षणनिमित्तं सत्त्वान्भूतानि । जन्तूनित्यर्थः ॥ ९ ॥

रा० टी०–तदाकारमाह—**प्रजापतिरित्यादिभिः** । प्रजापतिः सर्वेषां स्वामी परमात्मशरीरप्रकाशं पुरा पूर्वं अपो जलानि सृष्ट्वा आकाशादिक्रमेणोत्पाद्य सलिलसंभवः सलिलात्सलिलपद्मात् प्रादुर्भूतो बभूवेति शेषः रजोगुणग्रहणेन ब्रह्माभवदिति शेषः पद्मसम्भवो ब्रह्मा तु तासां पद्मद्वारा स्वोत्पादनहेतूनामपां गोपायने रक्षणार्थं सत्त्वान् प्राणिविशेषानसृजत् ॥ ९ ॥

गो० टी०–प्रजापतिरिति । सलिलसंभवः पद्मसंभवः सलिले पद्मसंभव इत्यर्थः प्रजापतिः ब्रह्मा । अहरन्ते अपः सृष्ट्वा भूमेरधः स्थिताः समुद्ररूपिणीः सृष्ट्वा रात्र्यवसाने तत्रैव सलिले विष्णुनाभिकमले वर्तमानः प्रजापतिः तासामपां गोपायने रक्षणनिमित्तम् सत्त्वान् जन्तूनसृजत् । पुँल्लिङ्गत्वमार्षम् ॥ ९ ॥

१०] ति० टी०–विनीतवत्पितरि विनीताः सन्तः क्षुत्पिपासाजनितभयेनार्दिताः ॥ १० ॥

रा० टी०–ते इति । ते सृष्टाः सत्त्वाः किं कुर्म इति भाषन्तस्सन्तः सत्त्वकर्त्तारं ब्रह्माणमुपस्थिता बभूवुरिति शेषः॥१०॥

गो० टी०–त इति । तानि सत्त्वानि किं कुर्मः किं करवामेति भाषन्तः क्षुत्पिपासाभयार्दिताः सन्तः सत्त्वकर्तारं स्वस्रष्टारं विनीतवदुपस्थिताः ॥ १० ॥

११] ति० टी०–प्रहसन्निव । उक्तभयखिद्यमानस्वप्रजाविषयकदयावशात्प्रहासः । मानवा इत्यनेन तेषामुभयत्रत्यनुग्रहः सूचितः । वाचा हे सत्त्वानीति वाचाभाष्य संबोध्य यत्नेनेमा अपो रक्षध्वमिति तानि सत्त्वान्याह ॥ ११ ॥

रा० टी०–प्रजापतिरिति । प्रजापतिर्ब्रह्मा हे मानवाः मत्सृशक्त्या सम्भूताः इत्याभाष्य सम्बोध्य रक्षध्वमिति तान् सृष्टान् सत्त्वान् प्रत्याह ॥ ११ ॥

गो० टी०–प्रजापतिस्त्विति । प्रहसन्निव भयार्दितस्वप्रजाविषयदयावशात् प्रहसन्नित्यर्थः । मानदः बहुमानदः । भयनिवृत्तिमनुगृह्णन्नित्यर्थः । हे सत्त्वानीति वाचा आभाष्य संबोध्य रक्षध्वं यत्नेन रक्षध्वमिमा अप इति ॥ ११ ॥

१२] ति० टी०–तत्र तेषु भगवन्नियुक्तभूतेषु मध्ये । भगवत्प्रयुक्तरक्षध्वमितिपदस्याविनाशेनावस्थापनमर्थ इति केचन प्रपन्नाः, उत्तरोत्तराभिवर्धनरूपपूजनमर्थ इति परे प्रपन्नाः । तत्राद्या रक्षामेति प्रतिवचनं दत्तवन्तः । परे यक्षामेति । 'यक्ष पूजायाम्' । उभयमपि लोडुत्तमबहुवचनम् । बुभुक्षिताबुभुक्षितैरित्यस्य स्थाने भुङ्क्षिताभुङ्क्षितैरित्यार्षमभ्यासलोपानुस्वाराभ्याम् । अबुभुक्षिताः पिपासिताः ॥ १२ ॥

---

१ ईषदिति गो. पाठः । २ ह्यप इति गो. पाठः । ३ तान्याह सत्त्वानीति गो. पाठः । ४ मानद इति गो. पाठः । ५ रक्षामेति चेति गो. पाठः । ६ जक्षाम इति गो. पाठः । * इदं चिन्त्यं सत्त्वमस्त्री तु जन्तुष्वित्यमरोक्तेः ।

रक्षाम इति यैरुक्तं राक्षसास्ते भवन्तु वः । यैक्षाम इति यैरुक्तं यक्षा एव भवन्तु वः ॥ १३ ॥
तत्र हेतिः प्रहेतिश्च भ्रातरौ राक्षसाधिपौ । मधुकैटभसंकाशौ बभूवतुररिंदमौ ॥ १४ ॥
प्रहेतिर्धार्मिकस्तत्र तपोवनगतस्तदा । हेतिर्दारक्रियार्थे तु परं यत्नमथाकरोत् ॥ १५ ॥
स कालभगिनीं कन्यां भयां नाम महाभयाम् । उदावहदमेयात्मा स्वयमेव महामतिः ॥ १६ ॥
स तस्यां जनयामास हेती राक्षसपुंगवः । पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम् ॥ १७ ॥
विद्युत्केशो हेतिपुत्रः स दीप्तार्कसमप्रभः । व्यवर्धत महातेजास्तोयमध्य इवाम्बुजम् ॥ १८ ॥
स यदा यौवनं भद्रमनुप्राप्तो निशाचरः । ततो दारक्रियां तस्य कर्तुं व्यवसितः पिता ॥ १९ ॥
संध्यादुहितरं सोऽथ संध्यातुल्यां प्रभावतः । वरयामास पुत्रार्थे हेती राक्षसपुंगवः ॥ २० ॥
अवश्यमेव दातव्या परस्मै सेति संध्यया । चिन्तयित्वा सुता दत्ता विद्युत्केशाय राघव ॥ २१ ॥
संध्यायास्तनयां लब्ध्वा विद्युत्केशो निशाचरः । रमते सँ तया सार्धं पौलोम्या मघवानिव ॥ २२ ॥
केनचित्त्वथ कालेन राम सालँकटङ्कटा । विद्युत्केशाद्गर्भमाप घनराजिरिवार्णवात् ॥ २३ ॥

रा० टी०–रक्षाम इति । बुभुक्षिताः बुभुक्षिता अपि वयं रक्षाम इत्यन्यैः कैश्चित् बुभुक्षितैः बुभुक्षितैरुक्तः बुभुक्षिता अपि वयं यक्षाम पूजयाम इत्यपरैः बुभुक्षितैरुक्तश्च भूतकृद्ब्रह्मा तानाह बुभुक्षिता बुभुक्षितैरित्यार्षं यक्षपूजायामिति धातोर्लोटि यक्षामेति ॥ १२ ॥

गो० टी०–तानि सत्त्वान्याह–रक्षामेति । तत्र तेषु सत्त्वेषु मध्ये । अन्यैः कैश्चित्सत्त्वैः रक्षामेत्युक्तः । तथापरैर्जक्षामेत्युक्तः प्रजापतिः । उभयमपि लोडुत्तमबहुवचनम् । "जक्ष, भक्ष-हसनयोः" । कैश्चित्र वयं रक्षाम किन्तु जक्षामेत्युक्तः । कैः रक्षामेत्युक्तम् कैर्वा जक्षामेत्युक्तं तत्राह–बुभुक्षिताबुभुक्षितैरिति अभ्यासलोपश्छान्दसः । अबुभुक्षितैः रक्षामेत्युक्तं बुभुक्षितैस्तु जक्षामेत्युक्तमिति क्रमः ॥ १२ ॥

१३] ति० टी०–वो युष्माकं मध्ये ॥ १३ ॥

रा० टी०–तदाकारमाह–रक्षामेति । वो युष्माकं मध्ये रक्षामेति यैरुक्तं ते राक्षसाः भवन्तु यक्षाम इति यैरुक्तं ते यक्षाः भवन्तु ॥ १३ ॥

गो० टी०–रक्षामेति । वः युष्माकं मध्ये । यैः रक्षामेत्युक्तं ते राक्षसा भवन्तु । यैर्जक्षामेत्युक्तं ते यक्षा भवन्तु । वर्णव्यत्यय आर्षः ॥ १३ ॥ १४ ॥

१४] ति० टी०–तत्र भगवत्सृष्टभगवद्विभक्तजातिभेदरक्षोमध्ये । मधुकैटभावसुरौ ॥ १४ ॥

रा० टी०–तत्रेति । तत्र राक्षसमध्ये मधुकैटभसंकाशौ हेतिः प्रहेतिश्च भ्रातरौ बभूवतुः ॥ १४ ॥

१५] ति० टी०–तपोवनगतः । विरक्तः सन्निति शेषः १५

रा० टी०–प्रहेतिरिति । तत्र तयोर्मध्ये प्रहेतिः तपोवनगतोऽभवदिति शेषः हेतिस्तु दारक्रियार्थं उद्वाहार्थं यत्नमकरोत् ॥ १५ ॥

गो० टी०–प्रहेतिरिति । तत्र राक्षसेषु । तपोवनगत इति । विरक्तो भूत्वेति शेषः ॥ १५ ॥

१६–१८] ति० टी०–परं यत्नमेव दर्शयति—स इति । कालो वैवस्वतः । स्वयमेवेति । गत्वा प्रार्थनां कृत्वेति शेषः ॥ १६–१८ ॥

रा० टी०–स इति । स हेतिः भयां नाम कालभगिनीं स्वयमेव उदाहवत् ॥ १६ ॥

रा० टी०–स इति । पुत्रवतां श्रेष्ठो हेतिः तस्यां कालभगिन्यां विद्युत्केशमिति श्रुतं पुत्रं जनयामास ॥ १७ ॥

गो० टी०–स इति । कालो यमः । स्वयमेवेति । प्रार्थनां गत्वेत्यर्थः । अस्यैव विवरणं दारक्रियार्थ इत्यादि ॥१६॥१७॥

रा० टी०–विद्युत्केश इति । हेतिपुत्रो विद्युत्केशः अम्बुजमिव तोयमध्ये व्यवर्द्धत ॥ १८ ॥

गो० टी०–विद्युत्केश इति । तोयं मध्ये यस्य स तोयमध्यः ॥ १८ ॥

१९] ति० टी०–पिता हेतिः ॥ १९ ॥

रा० टी०–स इति । निशाचरः स विद्युत्केशः यदा यौवनमनुप्राप्तः ततस्तदा तस्य विद्युत्केशस्य दारक्रियां कर्तुं पिता हेतिः व्यवसितोऽभवदिति शेषः ॥ १९ ॥

गो० टी०–स इति । पिता हेतिः ॥ १९–२३

२०–२३] ति० टी०–प्रभावतः सन्ध्यातुल्यामिति संबन्धः सन्ध्यादुहिता सालकटङ्कटाख्या । इयं च रक्षाप्राधान्येन भगवत्सृष्टत्वाद्राक्षसी ॥ २०–२३ ॥

रा० टी०–सन्ध्येति । हेतिः प्रभावतः सन्ध्यातुल्यां सन्ध्यादुहितरं वरयामास ॥ २० ॥

रा० टी०–अवश्यमिति । सा कन्या परस्मै एव अवश्यं दातव्या इति चिन्तयित्वा संध्यासुता विद्युत्केशाय दत्ता ॥ २१ ॥

रा० टी०–संध्याया इति । विद्युत्केशः तया संध्यासुतया सार्द्धं रमते ॥ २२ ॥

१ जक्षाम इति गो. पाठः । २ भयावह्यामिति. गो पाठः । ३ केश इति गो. पाठः । ४ रमेति गो. पाठः । ५ सालमिति रा. पा.

ततः सा राक्षसी गर्भं घनगर्भसमप्रभम् । प्रसूता मन्दरं गत्वा गङ्गा गर्भमिवाग्निजम् ॥
समुत्सृज्य तु सा गर्भं विद्युत्केशरतार्थिनी ॥ ॥ २४ ॥
रेमे तु सार्धं पतिना विसृज्य सुतमात्मजम् । उत्सृष्टस्तु तदा गर्भो घनशब्दसमस्वनः ॥ २५ ॥
तयोत्सृष्टः स तु शिशुः शरदर्कसमद्युतिः । निधायास्ये स्वयं मुष्टिं रुरोद शनकैस्तदा ॥ २६ ॥
ततो वृषभमास्थाय पार्वत्या सहितः शिवः । वायुमार्गेण गच्छन्वै शुश्राव रुदितस्वनम् ॥ २७ ॥
अपश्यदुमया सार्धं रुदन्तं राक्षसात्मजम् । कारुण्यभावात्पार्वत्या भवस्त्रिपुरमूदनः ॥ २८ ॥
तं राक्षसात्मजं चक्रे मातुरेव वयःसमम् । अमरं चैव तं कृत्वा महादेवोऽक्षरोऽव्ययः ॥ २९ ॥
पुरमाकाशगं प्रादात्पार्वत्याः प्रियकाम्यया । उभयापि वरो दत्तो राक्षसीनां नृपात्मज ॥ ३० ॥
सद्योपलब्धिर्गर्भस्य प्रसूतिः सद्य एव च । सद्य एव वयःप्राप्तिं मातुरेव वयःसमम् ॥ ३१ ॥
ततः सुकेशो वरदानगर्वितः श्रियं प्रभोः प्राप्य हरस्य पार्श्वतः ।
चचार सर्वत्र महान्महामतिः खगं पुरं प्राप्य पुरंदरो यथा ॥ ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

रा० टी०–**केन चिदिति** । सालंकटंकटा तदभिधा संध्यादुहिता केनचित् कालेन विद्युत्केशात् गर्भमाप ॥ २३ ॥

२४] ति० टी०–घनगर्भसमप्रभं जलगर्भमेघसमकान्तिम् प्रसूता प्रसूतवती । अग्निजं गर्भम् अग्निविसृष्टं माहेश्वरं गर्भमित्यर्थः । विद्युत्केशरतार्थिनी विद्युत्केशेन सह रतं क्रीडामर्थयति तादृशी । बभूवेति शेषः ॥ २४ ॥

रा० टी०–**तत इति** । सा सालंकटंकटा मन्दरं गत्वा अग्निजमग्निना त्यक्तं शांभवं गर्भं गंगेव गर्भं प्रसूता अभवदिति शेषः ॥ २४ ॥

गो० टी०–**तत इति** । प्रसूता प्रसूतवती । अग्निजं गर्भमिति । अग्निना विसृष्टं माहेश्वरं गर्भमित्यर्थः । घनगर्भोऽशनिः ॥ २४–२७ ॥

२५–२७] ति० टी०–तत आत्मनः सकाशाज्जातं सुतं विसृज्य पतिना रेमे ॥ २५–२७ ॥

रा० टी०–**समुत्सृज्येति** । सा संध्यातनया विद्युत्केशरतार्थिनी सती गर्भं समुत्सृज्य विद्युत्केशसमीपमगच्छदिति शेषः अत एव आत्मजं सुतं विसृज्य पतिसमीपं प्राप्ता सा पतिना पत्या सार्द्धं रेमे उत्सृष्टो गर्भस्तु घनशब्दसमस्वनोऽभवदिति शेषः सार्द्धश्लोक एकान्वयी ॥ २५ ॥

रा० टी०–**तयेति** । तया संध्यासुतया उत्सृष्टः शिशुः आस्ये स्वमुखे मुष्टिं निधाय रुरोद ॥ २६ ॥

रा० टी०–**तत इति** । वायुमार्गेण गच्छन् शिवः रुदतः स्वनं शुश्राव ॥ २७ ॥

२८] ति० टी०–कारुण्यभावात्कारुण्ययुक्तो भावश्चित्तं तस्मात्पार्वत्या । प्रेरित इति शेषः ॥ २८ ॥

रा० टी०–**अपश्यदिति** । रुदन्तं राक्षसात्मजं भवः उमया सार्द्धमपश्यत् अत एव पार्वत्याः कारुण्यभावाद्धेतोः राक्षसात्मजं मातुर्वयस्समं मातृवयस्सदृशवयस्कं चक्रे सार्द्धश्लोक एकान्वयी ॥ २८ ॥

गो० टी०–**अपश्यदिति** । कारुण्येन सहितः भावश्चित्तं कारुण्यभावः तस्मात् ॥ २८ ॥

२९] ति० टी०–मातुरेव वयःसमम् । मातृवयस्कमित्यर्थः ॥ २९ ॥

रा० टी०–**अमरमिति** । महादेवः तं राक्षसममरं कृत्वा आकाशगं पुरं पुराकारविमानं प्रादात् ॥ २९ ॥

गो० टी०–**तमिति** । अक्षरोऽव्यय इति षड्भावराहित्योपलक्षणम् । पार्वत्या प्रेरित इति शेषः । इदमेव दर्शयति–वक्ष्यमाणप्रियकाम्ययेति ॥ २९ ॥ ३० ॥

३०] ति० टी०–तदाह—**पार्वत्याः प्रियकाम्ययेति** ॥ ३० ॥

रा० टी०–**उमयेति** । उमयापि राक्षसीनां राक्षसीभ्यो वरो दत्तः अर्द्धं पृथक् ॥ ३०

३१] ति० टी०–सद्योपलब्धिरित्यार्षः संधिः ॥ ३१ ॥

रा० टी०–वराकारमाह—**सद्य इति** । गर्भस्य सद्योपलब्धिः शीघ्रं प्राप्तिः सन्धिरार्षः सद्यःप्रसूतिरुत्पत्तिश्च मातुर्वयस्समयमेव सद्यो वयःप्राप्तिः ॥ ३१ ॥

गो० टी०–**सद्य इति** । सद्योपलब्धिरित्यार्षः संधिः । मातुरेव वयःसमं वयःप्राप्तिरिति योजना ॥ ३१ ॥

३२] ति० टी०–सुकेश इत्यनुवादात्तन्नामकत्वमस्य बोध्यम् । खगमाकाशगम् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

---

१ विस्मृत्येति गो. पाठः । २ राक्षसानामिति गो. पाठः । ३ प्राप्तिरिति गो. रा. पाठः ।

पञ्चमः सर्गः ।

सुकेशात्पुत्रत्रयस्य जननं तेषां तपश्चरणं तेन तुष्टाद्ब्रह्मणो वरप्राप्तिस्तन्मत्तानां तेषामखिलसुरासुराणां पीडां पीडितानामसुराणां लङ्कायां प्रच्छन्नवासं सुकेशतनयानां पृथगपत्योत्पत्तिं च कुम्भजोऽकथयत् ।

सुकेशं धार्मिकं दृष्ट्वा वरलब्धं च राक्षसम् । ग्रामणीर्नाम गन्धर्वो विश्वावसुसमप्रभः ॥ १ ॥
तस्य देववती नाम द्वितीया श्रीरिवात्मजा । त्रिषु लोकेषु विख्याता रूपयौवनशालिनी ॥ २ ॥
तां सुकेशाय धर्मात्मा ददौ रक्षः श्रियं यथा । वरदानकृतैश्वर्यं सा तं प्राप्य पतिं प्रियम् ॥ ३ ॥
आसीद्देववती तुष्टा धनं प्राप्येव निर्धनः । स तया सह संयुक्तो रराज रजनीचरः ॥ ४ ॥
अञ्जनादभिनिष्क्रान्तः करेण्वेव महागजः । ततः काले सुकेशस्तु जनयामास राघव ॥
त्रीन् पुत्रान्जनयामास त्रेताग्निसमविग्रहान् । ॥ ५ ॥
माल्यवन्तं सुमालिं च मालिं च बलिनां वरम् । त्रींस्त्रिनेत्रसमान्पुत्रान्राक्षसान्राक्षसाधिपः ॥ ६ ॥
त्रयो लोका इवाव्यग्राः स्थितास्त्रय इवाग्नयः । त्रयो मन्त्रा इवात्युग्रास्त्रयो घोरा इवामयाः ॥ ७ ॥

रा० टी०–तत इति । प्रभोः हरस्य पार्श्वतस्समीपे श्रियं प्राप्य खगं पुरं च प्राप्य वरदानगर्वितस्सुकेशः सर्वत्र चचार ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

गो० टी०–तत इति । सुकेश इत्यनुवादादेव तन्नामकरणं सिद्धम् । खगम् आकाशगम् ॥ ३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

१–२] ति० टी०–वरलब्धं लब्धवरम् ॥ १ ॥ २ ॥

रा० टी०–सुकेशवृत्तान्तमाह—सुकेशमित्यादिभिः । वरलब्धं लब्धवरं सुकेशं दृष्ट्वा ग्रामणीर्नाम गन्धर्वः प्रससादेति शेषः ॥ १ ॥

रा० टी०–प्रसादफलमाह—तस्येति । तस्य ग्रामण्यः देववती नाम या आत्मजा तां सुकेशाय ददौ सार्द्धश्लोक एकान्वयी ॥ २ ॥

गो० टी०–सुकेशमित्यादिसार्धद्वयम् । वरलब्धं लब्धवरम् । गन्धर्व आसीत् स तं सुकेशं दृष्ट्वा तस्मै सुकेशाय ददावित्यन्वयः । रक्षःश्रियं राक्षसश्रियम् ॥ १–३ ॥

३–४] ति० टी०–वरदानेन कृतमैश्वर्यं यस्य तम् ॥ ३ ॥ ४ ॥

रा० टी०–वरेति । वरदानकृतमैश्वर्यं यस्य तं पतिं सा देववती धनं प्राप्य निर्धन इव तुष्टा आसीत् ॥ ३ ॥

रा० टी०–स इति । तया देववत्या सह संयुक्तो रजनीचरः अञ्जनात् दिग्गजात् अभिनिष्क्रान्त उत्पन्नः करेण्वा सह संयुक्तो महागज इव रराज ॥ ४ ॥

गो० टी०–स इति । अञ्जनादञ्जनाख्यगजात् अभिनिष्क्रान्त उत्पन्नः महागजः करेण्वेव रराज ॥ ४–६ ॥

५–६] ति० टी०–अञ्जनादञ्जनाख्यदिग्गजादभिनिष्क्रान्त उत्पन्नः । किं जनयामासेत्यत्राह—त्रीन्पुत्राञ्जनयामासेति । 'तान्पुत्रान्' इति पाठान्तरम् । तान्प्रसिद्धान्वक्ष्यमाणान्वेत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०–तत इति । काले उत्पत्तिसमये सुकेशो जनयामास अर्द्धं पृथक् ॥ ५ ॥

रा० टी०–किं जनयामासेत्याकांक्षायामाह त्रीन् माल्यवत्प्रभृतीन् पुत्रान् जनयामास ॥ ६ ॥

रा० टी०–त्रीनिति । राक्षसाधिपः त्रिनेत्रसमान् शम्भुसदृशान् त्रीन् पुत्रान् अवलोक्य मुमुदे इति शेषः अर्द्धं पृथक् ॥ ६ ॥

७] ति० टी०–मन्त्रा इव । उत्साहप्रभुमन्त्रशक्तिमयास्त्रिमन्त्राख्विवेदाश्च । आमयत्रयं वातपित्तश्लेष्मरूपम् । अत्रोपमाचतुष्टये स्थिरत्वतेजस्वित्वापरिमितसामर्थ्यहिंसकत्वानि साधारणधर्माः ॥ ७ ॥

रा० टी०–पुत्रान् एव वर्णयति–त्रय इति । त्रयो लोकाः सर्वावलोकनकर्त्तारो ब्रह्मादय इव अव्यग्राः त्रयोऽग्नय इव स्थिताः संस्थापिताः त्रयो ब्रह्मादित्रितयसंबन्धिनो मंत्रा इव अत्युग्राः त्रयः वातादित्रितयजत्वेन त्रिविधाः आमया महारोगा इव घोराः अभवन्निति शेषः ॥ ७ ॥

गो० टी०–त्रयो लोका इत्यादि श्लोकद्वयम् । त्रयो मन्त्राः उत्साहप्रभुमन्त्रशक्तयः । त्रयो वेदा वा । त्रय आमयाः वातपित्तश्लेष्मरूपाः । त्रेताग्निसमवर्चस इति तेजोतिशय उक्तः । पूर्वसाहित्यप्रधानात्व्याधयोपेक्षिता इति संधिरार्षः ॥७–१३॥

१ देववत्यामिति गो. पाठः ।

त्रयः सुकेशस्य सुतास्त्रेताग्निसमतेजसः । विवृद्धिमगमंस्तत्र व्याधयोपेक्षिता इव ॥ ८ ॥
वरप्राप्तिं पितुस्ते तु ज्ञात्वैश्वर्यं तपोबलात् । तपस्तप्तुं गता मेरुं भ्रातरः कृतनिश्चयाः ॥ ९ ॥
प्रगृह्य नियमान्घोरान्राक्षसा नृपसत्तम । विचेरुस्ते तपो घोरं सर्वभूतभयावहम् ॥ १० ॥
सत्यार्जवशमोपेतैस्तपोभिर्भुवि[2] दुर्लभैः । संतापयन्तस्त्रीँल्लोकान्सदेवासुरमानुषान् ॥ ११ ॥
ततो विभुश्चतुर्वक्त्रो विमानवरमाश्रितः । सुकेशपुत्रानामन्त्र्य वरदोऽस्मीत्यभाषत ॥ १२ ॥
ब्रह्माणं वरदं ज्ञात्वा सेन्द्रैर्देवगणैर्वृतम् । ऊचुः प्राञ्जलयः सर्वे वेपमाना इव द्रुमाः ॥ १३ ॥
तपसाराधितो देव यदि नो दिशसे वरम् । अजेयाः शत्रुहन्तारस्तथैव चिरजीविनः ॥
प्रभविष्णो भवामेति परस्परमनुव्रताः । ॥ १४ ॥
एवं भविष्यतीत्युक्त्वा सुकेशतनयान्विभुः । स ययौ ब्रह्मलोकाय ब्रह्मा ब्राह्मणवत्सलः ॥ १५ ॥
वरं लब्ध्वा तु ते सर्वे राम रात्रिचरास्तदा । सुरासुरान्प्रबाधन्ते वरदानसुनिर्भयाः ॥ १६ ॥
तैर्बाध्यमानास्त्रिदशाः सर्षिसङ्घाः सचारणाः । त्रातारं नाधिगच्छन्ति निरयस्था यथा नराः ॥ १७ ॥
अथ ते विश्वकर्माणं शिल्पिनां वरमव्ययम् । ऊचुः समेत्य संहृष्टा राक्षसा रघुसत्तम ॥ १८ ॥
ओजस्तेजोबलवतां महतामात्मतेजसा । गृहकर्ता भवानेव देवानां हृदयेप्सितम् ॥ १९ ॥
अस्माकमपि तावत्त्वं गृहं कुरु महामते । हिमवन्तमुपाश्रित्य मेरुमन्दरमेव वा ॥ २० ॥
महेश्वरगृहप्रख्यं गृहं नः क्रियतां महत् । विश्वकर्मा ततस्तेषां राक्षसानां महाभुजः ॥ २१ ॥
निवासं कथयामास शक्रस्येवामरावतीम् । दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः ॥ २२ ॥

८-१३] ति० टी०-व्याधयोपेक्षिता इव । उपेक्षिता अचिकित्सिता व्याधय इवेत्यर्थः । संधिरार्षः ॥ ८-१३ ॥

रा० टी०-त्रय इति । सुकेशस्य त्रयस्सुताः उपेक्षिता व्याधय इव विवृद्धिमगमन् ॥ ८ ॥

रा० टी०-वरेति । ते त्रयः पुत्राः पितुर्वरप्राप्तिं तयोर्मातापित्रोस्तपोबलादैश्वर्यं च ज्ञात्वा तपस्तप्तुं कृतनिश्चयाः सन्तः मेरुं गताः ॥ ९ ॥

रा० टी०-प्रगृह्येति । राक्षसाः घोरं तपो विचेरुः ॥१०॥

रा० टी०-सत्येति । सत्यादिभिरुपैतैः तपोभिः त्रीन् लोकान् संतापयन्तो बभूवुरिति शेषः ॥ ११ ॥

रा० टी०-तत इति । चतुर्वक्त्रो ब्रह्मा सुकेशपुत्रानामंत्र्य सम्बोध्य वरदोऽस्मीत्यभाषत ॥ १२ ॥

रा० टी०-ब्रह्माणं वरदं ज्ञात्वा प्राञ्जलयस्सर्वे राक्षसाः ब्रह्माणमूचुः ॥ १३ ॥

१४] ति० टी०-दिशसे ददासि । अजेया जेतुमनर्हाः प्रभविष्णवः यणार्षः । प्रभव इति यावत् । परस्परमनुव्रताः, अनुरक्ताश्च भवामेत्यनुकर्षः ॥ १४ ॥

रा० टी०-तदाकारमाह-तपसेति । नस्तपसाराधितस्त्वं यदि वरं दिशसे ददासि तदा अजेयत्वादिविशिष्टाः वयं भवाम प्रभविष्णवः प्रभाववन्तः सज्ज्ञापूर्वकविधेरनित्यत्वात् गुणाभावः सार्द्धश्लोक एकान्वयी ॥ १४ ॥

गो० टी०-तपसेति । प्रभविष्णवः यणार्षः । अनुव्रताः । अनुरक्ताश्च भवामेत्यनुकर्षः ॥ १४ ॥ १५ ॥

१५-१७] ति० टी०-ब्रह्मलोकाय तं प्राभुम् । ब्राह्मणवत्सलः । तेषां स्वमुखजत्वाज्ज्येष्ठत्वाच्च तेषु वात्सल्यम् ॥ १५-१७ ॥

रा० टी०-एवमिति । ब्रह्मा एवं भविष्यत इति सुकेशतनयान् उक्त्वा ब्रह्मलोकाय ययौ अत एव ज्ञापकादनुगुणः १५

रा० टी०-वरमिति । वरं लब्ध्वा अत एव वरदानेन सुनिर्भयाः ते त्रयः सुरासुरान् प्रबाधन्ते ॥ १६ ॥

रा० टी०-तैरिति । तैर्बध्यमानाः त्रिदशाः निरयस्था नरा इव त्रातारं नाधिगच्छन्ति प्राप्नुवन् ॥ १७ ॥

गो० टी०-एवमिति । ब्रह्मलोकाय ब्रह्मलोकं गन्तुम् । "तुमर्थे०" इत्यादिना चतुर्थी ॥ १६-२२ ॥

१८] ति० टी०-अथ ते माल्यवदादयः । अव्ययं चिरजीविनम् ॥ १८ ॥

रा० टी०-अथेति । ते सुकेशसुताः विश्वकर्माणं समेत्य ऊचुः ॥ १८ ॥

१९-२२] ति० टी०-ओजस्तेजोबलवताम्, अत एव महतां देवानां भवानेवात्मतेजसात्मसामर्थ्येन गृहकर्ता स त्वमस्माकमपि हृदयेप्सितं गृहं कुर्विति संबन्धः ॥ १९-२२ ॥

रा० टी०-तदाकारमाह-ओज इति सार्द्धद्वयाभ्याम् ।

१ ईश्वरेति गो. पाठः । २ अतीति गो. पाठः । ३ भविष्यतीति गो. भविष्यतेति च रा. पा. । ४ वक्ष्यमाना इति गो. रा.पा. । ५ अपेति गो.पा.।
* इदं चिन्त्यम् " क्रियार्थोपपदस्येत्यनेनैवात्र चतुर्थीति भाति ।

सुवेल इति चाप्यन्यो द्वितीयो राक्षसेश्वराः । शिखरे तस्य शैलस्य मध्यमेऽम्बुदसंनिभे ॥ २३ ॥
शकुनैरपि दुष्प्रापे टङ्कच्छिन्नचतुर्दिशि । त्रिंशद्योजनविस्तीर्णा शतयोजनमायता ॥ २४ ॥
स्वर्णप्राकारसंवीता हेमतोरणसंवृता । मया लङ्केति नगरी शैक्याज्ञप्तेन निर्मिता ॥ २५ ॥
तस्यां वसत दुर्धर्षा यूयं राक्षसपुंगवाः । अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥ २६ ॥
लङ्कादुर्गं समासाद्य राक्षसैर्बहुभिर्वृताः । भविष्यथ दुराधर्षाः शत्रूणां शत्रुसूदनाः ॥ २७ ॥
विश्वकर्मवचः श्रुत्वा ततस्ते राक्षसोत्तमाः । सहस्रानुचरा भूत्वा गत्वा तामवसन्पुरीम् ॥ २८ ॥
दृढप्राकारपरिखां हैमैर्गृहशतैर्वृताम् । लङ्कामवाप्य ते हृष्टा न्यवसन्रजनीचराः ॥ २९ ॥
एतस्मिन्नेव काले तु यथाकामं च राघव । नर्मदा नाम गन्धर्वी बभूव रघुनन्दन ॥ ३० ॥
तस्याः कन्यात्रयं ह्यासीद्ध्रीश्रीकीर्तिसमद्युति । ज्येष्ठक्रमेण सा तेषां राक्षसानामराक्षसी ॥ ३१ ॥
कन्यास्ताः प्रददौ हृष्टा पूर्णचन्द्रनिभाननाः । त्रयाणां राक्षसेन्द्राणां तिस्रो गन्धर्वकन्यकाः ॥ ३२ ॥

महतां देवानां गृहकर्त्ता भवानेव अतः हिमवन्तं मेरुमन्दरं चोपाश्रित्य अस्माकमपि हृदयेप्सितं गृहं कुरु श्लोकद्वयमेकान्वयी ॥ १९ ॥ २० ॥

रा० टी०-महेश्वरेति । महेश्वरगृहप्रख्यं महत् विशालं नो गृहं क्रियताम् अर्द्धं पृथक् । विश्वकर्मेति । विश्वकर्मा शक्रस्यामरावतीमिव तेषां निवासं कथयामास ॥ २१ ॥

रा० टी०-तत् कथनमेवाह—दक्षिणस्येति । उदधेः दक्षिणे तीरे त्रिकूटो नाम पर्वतोऽस्तीति शेषः अन्यस्ततो भिन्नः द्वितीयस्तत्सदृशः सुवेल इति ख्यातः पर्वतोऽस्ति ॥२३॥

गो० टी०-दक्षिणस्येत्यादि सार्धत्रयम् । अम्बुदसन्निभे मेघसमानरूपे मध्यमे शिखरे । शकुनैरपि दुष्प्राप इत्यत्र हेतुः टङ्कच्छिन्नचतुर्दिशीति ॥ २३-२६ ॥

२३] ति० टी०-द्वितीयः । तत्सदृश इत्यर्थः । मध्यमे शिखर इति संबन्धः ॥ २३ ॥

२४-२५] ति० टी०-शकुनैरपि दुष्प्रापे इत्यत्र हेतुः—टङ्कच्छिन्नचतुर्दिशि ॥ २४ ॥ २५ ॥

रा० टी०-शिखर इति । टंकच्छिन्नचतुर्दिशि टंकेन शिलाविदारकखनित्रविशेषेण छिन्नाः चतुर्दिशः सर्वदिग्वर्त्याश्रयाः यस्य तस्मिन् किञ्च टंकेन असिना छिन्नाः विद्धाः सर्वदिग्वर्त्याश्रयाः यस्य तस्मिन् असिप्राहृतसर्वदिशीत्यर्थः किञ्च टंकवत् छिन्नाः छेदकाः चतुर्दिशः सर्वदिग्वर्तितटाः यस्य तस्मिन् 'टंकोनीलकपित्थे च खनित्रे टंकनेस्त्रियाम् जंघायां स्त्री पुमान् कोपे कोशासिग्रावदारणे' इति मेदिनी। अत एव शकुनैः पक्षिभिरपि दुष्प्रापे अम्बुदसंनिभे तस्य त्रिकूटस्य शैलस्य शिखरे त्रिंशद्योजनविस्तीर्णा शतयोजनमायता स्वर्णप्राकारैस्संवीता आच्छादिता लंका नाम नगरी मया निर्मिताऽस्तीति शेषः अर्द्धचतुष्टयमेकान्वयि ॥ २४ ॥ २५ ॥

२६-२७] ति० टी०-अमरावतीं समासाद्येति नवाक्षरपादतार्धी ॥ २६ ॥ २७ ॥

रा० टी०-तस्यामिति । हे राक्षसपुंगवाः तस्यां लङ्कायां यूयं वसत ॥ २६ ॥

रा० टी०-लंकेति । राक्षसैर्वृताः भवन्तः लङ्कादुर्गं समासाद्य शत्रूणां दुर्धर्षा भविष्यन्ति ॥ २७ ॥

गो० टी०-अमरावतीमिति । अमरावतीं समासाद्येति पदवशादक्षराधिक्यम् ॥ २७ ॥ २८ ॥

२८-३०] ति० टी०-सहस्रमनेकेऽनुचरा येषां ते सहस्रानुचराः ॥ २८ ॥ ३० ॥

रा० टी०-विश्वकर्मेति । राक्षसोत्तमाः सहस्रानुचरा भूत्वा पुरीं लंकां गत्वा अवसन् ॥ २८ ॥

रा० टी०-तदेव भंग्यन्तरेणाह—दृढेति । दृढाः प्राकाराः परिखाश्च यस्याः हैमैः हेममयैः गृहशतैर्वृतां लंकामवाप्य हृष्टाः रजनीचराः न्यवसन् ॥ २९ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नेव काले नर्मदा नाम गंधर्वी बभूव ॥ ३० ॥

गो० टी०-विश्वकर्मेति । सहस्रमनेके अनुचरा येषां ते सहस्रानुचराः ॥ २९-३१ ॥

३१-३२] ति० टी०-अराक्षसी राक्षसजातिभिन्ना ३१।३२

रा० टी०-तस्या इति । तस्याः गंधर्व्याः ह्रीप्रभृतिसमद्युति कन्यात्रयमासीत् अर्द्धं पृथक् ॥ ३१ ॥

रा० टी०-ज्येष्ठेति । अराक्षसी राक्षसजातिभिन्ना सा नर्मदा ज्येष्ठक्रमेण राक्षसानां राक्षसेभ्यः ताः तिस्रः कन्याः प्रददौ ॥ ३२ ॥

गो० टी०-तस्या इति । अराक्षसी राक्षसजातिव्यतिरिक्ता ॥ ३२ ॥

रा० टी०-त्रयाणामिति । भगदैवते नक्षत्रे मात्रा गंधर्वकन्यका दत्ताः ॥ ३३ ॥

गो० टी०-कन्या इति । भगदैवतनक्षत्रमुत्तराफाल्गुनी ॥ ३३-४३ ॥

१ तत्र सत्तमा इति गो. पाठः । २ शक्रेति गो. पाठः ।

दत्ता मात्रा महाभागा नक्षत्रे भगदैवते । कृतदारास्तु ते राम सुकेशतनयास्तदा ॥ ३३ ॥
चिक्रीडुः सह भार्याभिरप्सरोभिरिवामराः । ततो माल्यवतो भार्या सुन्दरी नाम सुन्दरी॥ ३४ ॥
स तस्यां जनयामास यदपत्यं निबोध तत् । वज्रमुष्टिर्विरूपाक्षोदुर्मुखश्चैव राक्षसः ॥ ३५ ॥
सुप्तघ्नो यज्ञकोपश्च मत्तोन्मत्तौ तथैव च । अनला चाभवत्कन्या सुन्दर्यो राम सुन्दरी ॥ ३६ ॥
सुमालिनोऽपि भार्यासीत्पूर्णचन्द्रनिभानना । नाम्ना केतुमती राम प्राणेभ्योऽपि गरीयसी॥ ३७ ॥
सुमाली जनयामास यदपत्यं निशाचरः । केतुमत्यां महाराज तन्निबोधानुपूर्वशः ॥ ३८ ॥
प्रहस्तोऽकम्पनश्चैव विकटः कालिकामुखः[1] । धूम्राक्षश्चैव दण्डश्च सुपार्श्वश्च महाबलः ॥ ३९ ॥
संह्रादिः प्रघसश्चैव भासकर्णश्च राक्षसः । राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिता[2]: ॥
कुम्भीनसी च इत्येते सुमालेः प्रसवाः स्मृताः । ॥ ४० ॥
मालेस्तु वसुदा नाम गन्धर्वी रूपशालिनी । भार्यासीत्पद्मपत्राक्षी स्वक्षी[3] यक्षीवरोपमा ॥ ४१ ॥
सुमालेरनुजस्तस्यां जनयामास यत्प्रभो । अपत्यं कथ्यमानं तु मया त्वं शृणु राघव ॥ ४२ ॥
अनलश्चानिलश्चैव हरः संपातिरेव च । एते विभीषणामात्या मालेयास्ते[4] निशाचराः॥ ४३ ॥
ततस्तु ते राक्षसपुंगवास्त्रयो निशाचरैः पुत्रशतैश्च संवृताः
सुरान्सहेन्द्रानृषिनागयक्षान्बबाधिरे तान्बहुवीर्यदर्पिताः ॥ ४४ ॥
जगद्भ्रमन्तोऽनिलवद्बुरासदा रणेषु मृत्युप्रतिमाननेजसः ॥
वरप्रदानादपि गर्विता भृशं क्रतुक्रियाणां प्रशमंकराः सदा ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

३३-४०] ति० टी०-मात्रा दत्ताः । मात्रा नर्मदयेच्छया दत्ता इत्यर्थः । भगदैवतं नक्षत्रमुत्तराफाल्गुनी॥३३-४०॥

रा० टी०-कृतेति । कृतदाराः सुकेशतनया भार्याभिः सह चिक्रीडुः ॥ ३४ ॥

रा० टी०-तत इति । सुन्दरी सौन्दर्यविशिष्टा सुन्दरी नाम माल्यवतो भार्या अभवदिति शेषः स माल्यवान् तस्यां सुन्दर्यां यदपत्यं जनयामास तत् निबोध ॥ ३५ ॥

रा० टी०-तत्त्बोधमेवाह वज्रेति । वज्रमुष्टिप्रभृतयः पुत्राः सुन्दर्यामभवन् अनला कन्या चाभवत् सार्द्धश्लोक एकान्वयी ॥ ३६ ॥

रा० टी०-सुमालिन इति । सुमालिनो भार्या नाम्ना केतुमती आसीत् ॥ ३७ ॥

रा० टी०-सुमालीति । केतुमत्यां सुमाली यदपत्यं जनयामास तत् अनुपूर्वशो निबोध ॥ ३८ ॥

रा० टी०-तद्बोधनमेवाह-प्रहस्त इति । प्रहस्तप्रभृतयः इत्येते सुमालेः प्रसवा-स्मृताः इकारान्तोपि सुमालिशब्दः सार्द्धश्लोकद्वयमेकान्वयि ॥ ३९ ॥ ४० ॥

४१-४२] ति० टी०-स्वक्षी मधुरदृग्युताक्षी । यक्षीवरा यक्षीश्रेष्ठा तयोपमीयते सा यक्षीवरोपमा ॥ ४१ ॥ ४२ ॥

रा० टी०-मालेरिति । यक्षीवरोपमा वसुदा नाम गंधर्वी मालेर्भार्या आसीत् ॥ ४१ ॥

रा० टी०-सुमालेरिति । सुमालेरनुजः माली तस्यां वसुदायां यदपत्यं जनयामास तत् मया कथ्यमानं त्वं शृणु४२

४३-४४] ति० टी०-मालेयाः । 'इतश्चानित्रः' इति ढक् ॥ ४३ ॥ ४४ ॥

रा० टी०-तत् कथनमेवाह-अनल इति । अनलादयो मालेयाः विभीषणामात्याः अभवन्निति शेषः ॥ ४३ ॥

रा० टी०-तत इति । राक्षसपुंगवाः सहेन्द्रान् सुरान् ऋषिप्रभृतींश्च बबाधिरे ॥ ४४ ॥

४५] ति० टी०-प्रशमंकरा इत्यार्षः खच् ॥ ४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

रा० टी०-जगदिति । अनिलवज्जगद्भ्रमन्तः रणेषु दुरासदाः वरप्रदानात् भृशं गर्विताः राक्षसाः क्रतुक्रियाणां सदा प्रशमंकरा दृपका इत्यर्थः बभूवुः ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

गो० टी०-अनिल इति । मालेया इति "इतश्च०" इति ढक् ॥ ४४ ॥ ४५ ॥

गो० टी०-जगदिति । प्रशमंकरा इत्यार्षः खच् ॥४६॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

---

१ कालकामुक इति गो. पाठः । २ स्मितेति गो. रा. पाठः । ३ स्विति गो. पाठः । ४ अतौति गो. पाठः

षष्ठः सर्गः

वरदप्तैः सुकेशतनयैर्बाध्यमानाः मुनिदेवादयो भीताः शङ्करं प्रार्थ्यापि तेन निराकृतास्ते विष्णुमुपजग्मुः तेषु च विष्णोरभयं प्राप्य निवृत्तेषु माल्यवदादयोऽपि निजरोधोगं विमृश्य तान् भृशं पीडयांचक्रुः वासुदेवस्तु गरुडमारुह्य ताञ्जेतुमागच्छत् ।

तैर्बध्यमाना देवाश्च ऋषयश्च तपोधनाः । भयार्ताः शरणं जग्मुर्देवदेवं महेश्वरम् ॥ १ ॥
जगत्सृष्टृच्यन्तकर्तारमजमव्यक्तरूपिणम् । आधारं सर्वलोकानामाराध्यं परमं गुरुम् ॥ २ ॥
ते समेत्य तु कामारिं त्रिपुरारिं त्रिलोचनम् । ऊचुः प्राञ्जलयो देवा भयगद्गदभाषिणः ॥ ३ ॥
सुकेशपुत्रैर्भगवन्पितामहवरोद्धतैः । प्रजाध्यक्ष प्रजाः सर्वा बाध्यन्ते रिपुबाधनैः ॥ ४ ॥
शैरणान्यशरण्यानि आश्रमाणि कृतानि नः । स्वर्गाच्च देवान्प्रच्याव्य स्वर्गे क्रीडन्ति देववत् ॥ ५ ॥
अहं विष्णुरहं रुद्रो ब्रह्माहं देवराडहम् । अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम् ॥ ६ ॥
इति माली सुमाली च माल्यवांश्चैव राक्षसाः । बाधन्ते समरोद्दर्पा ये च तेषां पुरःसराः ॥ ७ ॥
तन्नो देव भयार्तानामभयं दातुमर्हसि । अशिवं वपुरास्थाय जहि वै देवकण्टकान् ॥ ८ ॥
इत्युक्तस्तु सुरैः सर्वैः कपर्दी नीललोहितः । सुकेशं प्रति सापेक्षः प्राह देवगणान्प्रभुः ॥ ९ ॥
अहं तान्न हनिष्यामि ममावध्या हि ते सुराः । किं तु मन्त्रं प्रदास्यामि यो वै तान्निहनिष्यति ॥ १० ॥

१-३] ति० टी०-अथ माल्यवदापीडितदेवगणस्य विष्णुनाभयदानं श्रुत्वा नारायणप्रेरकदेवगणवधे तेषां प्रवृत्तिः—तैर्बध्यमाना इति ॥ १-३ ॥

रा० टी०-राक्षसानां वृत्तान्तमेवाह—तैरित्यादिभिः । तैः राक्षसैर्बध्यमाना देवादयः महेश्वरं शरणं जग्मुः ॥ १ ॥

रा० टी०-जगदिति । जगतः सृष्टेः अन्तस्य विनाशस्य च कर्तारमुत्पत्त्यादित्रयकारणमित्यर्थः । कामारिं त्रिपुरारिं देवास्समेत्य भयगद्गदभाषिणः सन्तः ऊचुः श्लोकद्वयमेकान्वयि॥२॥३॥

गो० टी०-तैरित्यादि । शरण्यानि शरणार्हाणि देवपित्रतिथिपशुपक्ष्यादिरक्षणार्हाणि ॥ १-६ ॥

४] ति० टी०-प्रजाध्यक्षस्य भगवतः प्रजापतेः प्रजा देवनरतिर्यगादिरूपाः । रिपुबाधनैः । रिपूणां बाधनं बाधस्तैर्हेतुभिरित्यर्थः ॥ ४ ॥

रा० टी०-तद्वचनाकारमाह—सुकेशेत्यादिभिः । अरिपुबाधनैः न रिपवो येषां ते महान्त इत्यर्थः । तानपि बाधन्ते तैः सुकेशपुत्रैः सर्वाः प्रजाः बाध्यन्ते ॥ ४ ॥

५-६] ति० टी०-शरणानि शरणार्हाणि देवपित्रतिथिपशुपक्ष्यादिरक्षणार्हाणि । देवान्प्रच्याव्य ये सर्वे स्वर्गे देववत्क्रीडन्ति ॥ ५ ॥ ६ ॥

रा० टी०-शरण्यानीति । देवान् स्वर्गात्प्रच्याव्य स्वर्गे क्रीडन्ति अत एव शरण्यानि रक्षणार्हाणि नोऽस्माकमाश्रमाणि अशरण्यानि कृतानि ॥ ५ ॥

रा० टी०-अहमिति । विष्णुप्रभृतिरहमेव इति मत्वा मालिप्रभृतयः ये तेषां पुरःसरास्ते च बाधन्ते श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

७] ति० टी०-समरे सङ्ग्रामे उद्दर्प उत्साहो येषां ते॥७॥

गो० टी०-इतीति। समरे उद्दर्पो येषां ते समरोद्दर्पाः॥७॥

८] ति० टी०-अशिवमसौम्यम् । रौद्रमिति यावत् । 'रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्या' इति श्रुतेः ॥ ८ ॥

रा० टी०-तदिति । भयार्तानां नोऽस्माकमभयं दातुमर्हसि तदुपायमाह—अशिवं खलानाममंगलकारकं वपुरास्थाय प्रकटय्य देवकण्टकान् जहि ॥ ८ ॥

गो० टी०-अशिवमिति । अशिवमसौम्यं क्रूरमित्यर्थः ॥ ८ ॥

९] ति० टी०-सुकेशं प्रति सापेक्षः । सुकेशस्य स्वेनोज्जीवितत्वान्माल्यवदादीनां तत्पुत्रत्वात्स्वकर्तृकतत्संहारस्यानौचित्यं मन्वान इत्यर्थः ॥ ९ ॥

रा० टी०-इतीति। सुरैरित्युक्तोपि सुकेशं प्रति सापेक्षः पूर्वं स्वरक्षित्वात् इदानीमपि स्वस्मात्तद्रक्षाकांक्षी कपर्दी शिवः देवगणान् प्राह ॥ ९ ॥

गो० टी०-इत्युक्त इति । सुकेशं प्रति सापेक्ष इति । सुकेशस्य स्वाश्रितत्वात्तत्पुत्रवधानौचित्यम् इत्याशङ्क्येत्यर्थः ॥९॥

१०] ति० टी०-ममावध्या उक्तहेतोर्वधानर्हाः । मन्त्रमुपायम् ॥ १० ॥

रा० टी०-तदाकारमाह—अहमिति । ते सुराः ममावध्याः मया पालितत्वाद्धन्तुमनर्हाः अतः अहं तान् न हनिष्यामि किन्तु यस्तान् निहनिष्यति तं मन्त्रमुपायं प्रदास्यामि बोधयामि ॥ १० ॥

१ शरण्यानीति गो. रा. पाठः । २ ह्याश्रमाणीति गो. पाठः । ३ मयेति गो. पाठः ।

एतमेव समुद्योगं पुरस्कृत्य महर्षयः । गच्छध्वं शरणं विष्णुं हनिष्यति स तान्प्रभुः ॥ ११ ॥
ततस्तु जयशब्देन प्रतिनन्द्य महेश्वरम् । विष्णोः [1]समीपमाजग्मुर्निशाचरभयार्दिताः ॥ १२ ॥
शङ्खचक्रधरं देवं प्रणम्य बहुमान्य च । ऊचुः संभ्रान्तवद्वाक्यं सुकेशतनयान्प्रति ॥ १३ ॥
सुकेशतनयैर्देव त्रिभिस्त्वेतान्निसंनिभैः । आक्रम्य वरदानेन स्थानान्यपहृतानि नः ॥ १४ ॥
लङ्का नाम पुरी दुर्गा त्रिकूटशिखरे स्थिता । तत्र स्थिताः प्रबाधन्ते सर्वान्नः क्षणदाचराः ॥ १५ ॥
स त्वमस्मद्धितार्थाय जहि तान्मधुसूदन । शरणं त्वां वयं प्राप्ता गतिर्भव सुरेश्वर ॥ १६ ॥
चक्रकृत्तास्यकमलान्निवेदय यमाय वै । भयेष्वभयदोऽस्माकं नान्योऽस्ति भवता विना॥ १७ ॥
राक्षसान्समरे हृष्टान्सानुबन्धान्मदोद्धतान् । नुद त्वं नो भयं देव नीहारमिव भास्करः ॥ १८ ॥
इत्येवं दैवतैरुक्तो देवदेवो जनार्दनः । अभयं भयदोऽरीणां दत्त्वा देवानुवाच ह ॥ १९ ॥
सुकेशं राक्षसं जाने ईशानवरदर्पितम् । तांश्चास्य तनयाञ्जाने येषां ज्येष्ठः स माल्यवान् ॥२०॥
तानहं समतिक्रान्तमर्यादान्राक्षसाधमान् । निहनिष्यामि संक्रुद्धः सुरा भवत विज्वराः ॥ २१ ॥
इत्युक्तास्ते सुराः सर्वे विष्णुना प्रभविष्णुना । यथावासं ययुर्हृष्टाः प्रशंसन्तो जनार्दनम् ॥ २२ ॥
विबुधानां समुद्योगं माल्यवांस्तु निशाचरः । श्रुत्वा तौ भ्रातरौ वीराविदं वचनमब्रवीत् ॥ २३ ॥
अमरा ऋषयश्चैव संगम्य किल शंकरम् । अस्मद्वधं परीप्सन्त इदं वचनमब्रुवन् ॥ २४ ॥
सुकेशतनया देव वरदानबलोद्धताः । बाधन्तेऽस्मान्समुद्दृप्ता घोररूपाः पदे पदे ॥ २५ ॥

गो० टी०–प्रथमं रुद्रसमीपगमनं कृतोयमनर्थं इति द्योतयितुमाह—अहमिति । मन्त्रमुपायम् ॥ १० ॥

११–१२] ति० टी०–एतमेव समुद्योगम्, न तु कालान्तरीयमित्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–एतमिति । एतं स्वदैन्योच्चारणादिरूपं समुद्योगं पुरस्कृत्य यूयं विष्णुं शरणं गच्छध्वं स विष्णुस्तान् हनिष्यति ॥ ११ ॥

रा० टी०–तत इति । निशाचरभयार्दिताः देवादयः जयशब्देन महेश्वरं प्रतिनन्द्य विष्णोस्समीपमाजग्मुः ॥ १२ ॥

गो० टी०–एतमिति । एतमेव समुद्योगमिति । न तु कालान्तरीयमित्यर्थः । प्रभुर्ममापि प्रभुः ॥ ११ ॥ १२ ॥

१३–१७] ति० टी०–संभ्रान्तवत्संभ्रान्तार्हम् । सुकेशतनयान्प्रति । तानुद्दिश्येत्यर्थः ॥ १३–१७ ॥

रा०टी०–शंखेति । शंखचक्रधरं विष्णुं प्रणम्य सुकेशतनयान्प्रति सुकेशतनयेभ्यः सम्भ्रान्तवत् भयविशिष्टं वाक्यमूचुः१३

रा० टी०–तदाकारमाह—सुकेशेत्यादिभिः । सुकेशतनयैः वरदानेन हेतुना नोस्मानाक्रम्य स्थानानि अपहृतानि १४

रा० टी०–नन्वे भवन्तोपि अन्यत्रैव तिष्ठन्तु इत्यत आहुः—लङ्केति । त्रिकूटशिखरे स्थिता लङ्का नाम पुरी अस्तीति शेषः अत्र स्थित्वा क्षणदाचराः राक्षसाः नोऽस्मान् प्रबाधन्ते ॥१५॥

रा० टी०–स इति । शरणं त्वां वयं प्राप्ताः अतो गतिरस्माकमाश्रयो भव अत एव अस्मद्धितार्थाय तान् राक्षसान् जहि१६

रा० टी०–राक्षसानिति । सानुबन्धान् अनुचरसहितान् राक्षसान् हत्वेति शेषः । भास्करो नीहारमिव नो भयं नुद १७

गो० टी०–शङ्केति । सम्भ्रान्तवत् संभ्रान्ताः सन्तः ॥ १३–१७ ॥

१८–२०] ति० टी०–सानुबन्धान्सानुचरान्राक्षसान् । जहीति शेषः । नो भयं च नुद ॥ १८–२० ॥

रा० टी०–इतीति । जनार्दनः अभयं दत्वा देवानुवाच १८

रा० टी०–तदाकारमाह—सुकेशमिति । ईशानवरेण दर्पितं सुकेशमस्य तनयाँश्च जाने ॥ १९ ॥

गो० टी०–राक्षसानिति । सानुबन्धाः सानुचराः ॥ १८–२४ ॥

२१–२२] ति० टी०–अतिक्रान्तमर्यादान् । मर्यादा वध्यावध्यव्यवस्था ॥ २१ ॥ २२ ॥

रा० टी०–तानिति । राक्षसाधमान् अहं निहनिष्यामि अतो हे सुराः यूयं विज्वरा भवत ॥ २० ॥

रा० टी०–इतीति । विष्णुना इत्युक्तास्सुराः यथावासं ययुः ॥ २१ ॥

२३] ति० टी०–तौ भ्रातरौ सुमालिमालिनौ ॥ २३ ॥

रा० टी०–विबुधानामिति । माल्यवान् विबुधानां देवानां समुद्योगं श्रुत्वा भ्रातराविदमब्रवीत् ॥ २२ ॥

२४] ति० टी०–परीप्सन्त इच्छन्तः ॥ २४ ॥

रा टी०–तदाकारमाह—अमरा इत्यादिभिः । अस्मद्वधं परीप्सन्तः समिच्छन्तः अमरा ऋषयश्च शंकरं संगम्य इदमब्रुवन् ॥ २४ ॥

२५] ति० टी०–पदे पदे प्रतिक्षणम् ॥ २५ ॥

१ दुष्टानिति गो. पाठः ।

राक्षसैरभिभूताः स्मो न शक्ताः स्म प्रजापते । स्वेषु सद्मसु संस्थातुं भयात्तेषां दुरात्मनाम् ॥ २६ ॥
तदस्माकं हितार्थाय जहि तांश्च त्रिलोचन । राक्षसान्हुंकृतेनैव दह प्रदहतां वर ॥ २७ ॥
इत्येवं त्रिदशैरुक्तो निशम्यान्धकसूदनः । शिरः करं च धुन्वान इदं वचनमब्रवीत् ॥ २८ ॥
अवध्या मम ते देवाः सुकेशतनया रणे । मन्त्रं तु वः प्रदास्यामि यस्तान्वै निहनिष्यति॥ २९ ॥
योऽसौ चक्रगदापाणिः पीतवासा जनार्दनः । हरिर्नारायणः श्रीमाञ्शरणं तं प्रपद्यथ ॥ ३० ॥
हरादवाप्य ते मन्त्रं कामारिमभिवाद्य च । नारायणालयं प्राप्य तस्मै सर्वं न्यवेदयन् ॥ ३१ ॥
ततो नारायणेनोक्ता देवा इन्द्रपुरोगमाः । सुरारींस्तान्हनिष्यामि सुरा भवत निर्भयाः ॥ ३२ ॥
देवानां भयभीतानां हरिणा राक्षसर्षभौ । प्रतिज्ञातो वधोऽस्माकं चिन्त्यतां यदिह क्षमम्॥ ३३ ॥
हिरण्यकशिपोर्मृत्युरन्येषां च सुरद्विषाम् । नमुचिः कालनेमिश्च संह्लादो वीरसत्तमः ॥ ३४ ॥
राधेयो बहुमायी च लोकपालोऽथ धार्मिकः । यमलार्जुनौ च हार्दिक्यः शुम्भश्चैव निशुम्भकः॥ ३५ ॥
असुरा दानवाश्चैव सत्त्ववन्तो महाबलाः । सर्वे समरमासाद्य न श्रूयन्तेऽपराजिताः ॥ ३६ ॥
सर्वैः क्रतुशतैरिष्टं सर्वे मायाविदस्तथा । सर्वे सर्वास्त्रकुशलाः सर्वे शत्रुभयंकराः ॥ ३७ ॥
नारायणेन निहताः शतशोऽथ सहस्रशः । एतज्ज्ञात्वा तु सर्वेषां क्षमं कर्तुमिहार्हथ ॥
दुःखं नारायणं जेतुं यो नो हन्तुमिहेच्छति । ॥ ३८ ॥
ततः सुमाली माली च श्रुत्वा माल्यवतो वचः । ऊचतुर्भ्रातरं ज्येष्ठमर्श्विनाविव वासवम् ॥ ३९ ॥

रा० टी०–तदाकारमाह—सुकेशेति । सुकेशतनयाः पदे पदे क्षणे क्षणे अस्मान् बाधन्ते ॥ २५ ॥

गो० टी०–सुकेशेति । पदे पदे प्रतिक्षणमित्यर्थः२५–२७

२६–२७] ति० टी०–प्रजापते दुष्टनिग्रहद्वारा प्रजारक्षक ॥ २६ ॥ २७ ॥

रा० टी०–राक्षसैरिति । राक्षसैरभिभूताः वयं स्वेषु सद्मसु स्थातुं न शक्ताः स्म ॥ २६ ॥

रा० टी०–तदिति । अस्माकं हितार्थाय राक्षसान् जहि तत्स्वरूपमाह हुंकृतेनैव दह ॥ २७ ॥

२८] ति० टी०–शिरः करं च धुन्वानः । ‘ विषण्णोऽपि–’ इति न्यायेन स्ववधानर्हा इत्याशयेनेति भावः ॥ २८ ॥

रा० टी०–इतीति । अन्धकसूदनः शिवः शिरः करं च धुन्वानः हननाभावसूचकत्वेन चालयमानः सन् इदमब्रवीत्२८

गो० टी०–इतीति । शिरः करं च धुन्वान इति सुरोक्तस्यासह्यताद्योतनम् ॥ २८ ॥

२९–३०] ति० टी०–तदेवाह–अवध्या इति।२९।३०॥

रा० टी०–तदाकारमाह–अवध्या इति द्वाभ्याम् २९

रा० टी०–य इति । यो हरिः तं शरणं प्रपद्यथ ॥ ३० ॥

गो० टी०–अवध्या इति । अवध्यत्वे हेतुः सुकेशतनया इति ॥ २९ ॥ ३८ ॥

३१–३३]ति०टी०–ते देवा मन्त्रमवाप्येत्यन्वयः ३१–३३

रा० टी०–हरादिति । ते देवादयः हरात् मन्त्रमवाप्य नारायणालयं प्राप्य तस्मै सर्वं स्वदृत्तं न्यवेदयन् ॥ ३१ ॥

रा० टी०–तत इति । सुरारीन् अहं हनिष्यामि अतो हे सुराः निर्भया भवत इति नारायणेन देवा उक्ताः ॥ ३२ ॥

रा० टी०–देवानामिति । भयभीतानां देवानां मध्ये हरिणा अस्माकं वधः प्रतिज्ञातः अतो हे राक्षसर्षभौ क्षममुचितं चिन्त्यताम् ॥ ३३ ॥

३४–३५] ति० टी०–चिन्ताहत्वं दर्शयति—हिरण्येत्यादि ॥ ३४ ॥ ३५ ॥

३६–३८] ति० टी०–अपराजिता इति छेदः॥३६–३८॥

रा० टी०–नन्वतिप्रबलत्वात् अस्माकं मृत्युर्नैव भविष्यतीत्यत आह–हिरण्येति । हिरण्यकशिपोः अन्येषां च सुरद्विषां मृत्युरभवदेवेति शेषः । अत एव नमुचिप्रभृतयो महाबलाः समरमासाद्य पराजितास्सन्तः न श्रूयन्ते मृता इत्यर्थः । श्लोकत्रयमेकान्वयि ॥ ३४–३६ ॥

रा० टी०–ननु ते केवलबलवन्त एव वयन्तु यागादिक्रियावन्त इति नास्माकं भयमित्यत आह—सर्वैरिति । शतशः सहस्रशो ये नारायणेन निहताः तैस्सर्वैः क्रतुशतैः अनेकक्रतुभिरिष्टं सर्वं मायावित्वादिविशिष्टाश्च अभवन्निति शेषः । अतः यो नोस्मान् हन्तुमिच्छति तं नारायणं जेतुं दुःखमतः सर्वेषामेतद्वृत्तं ज्ञात्वा क्षममुचितं कर्तुमर्हथ एतेन नारायणविरोधिनां सुकर्माणि फलदानि न भवन्तीति सूचितम् । सार्द्धश्लोकद्वयमेकान्वयि ॥ ३७ ॥ ३८ ॥

३९] ति० टी०–अश्विनाविव वासवमिति । ‘भगांशाविव’ इति पाठे भगस्तदंशोऽर्यमा ताविवेत्यर्थः ॥ ३९ ॥

१ स्मेति गो. रा. पाठः । २ विज्वरा इति गो. पाठः । ३ इदमर्धं गो. पुस्तके नास्ति । ४ भगांशाविति गो. पाठः ।

स्वधीतं दत्तमिष्टं च ऐश्वर्यं परिपालितम् । आयुर्निरामयं प्राप्तं सुधर्मैः स्थापितः पथि ॥ ४० ॥
देवसागरमक्षोभ्यं शस्त्रैः समवगाह्य च । जिता द्विषो ह्यप्रतिमास्तन्नो मृत्युकृतं भयम् ॥ ४१ ॥
नारायणश्च रुद्रश्च शक्रश्चापि यमस्तथा । अस्माकं प्रमुखे स्थातुं सर्वे बिभ्यति सर्वदा ॥ ४२ ॥
विष्णोर्द्वेषस्य नास्त्येव कारणं राक्षसेश्वर । देवानामेव दोषेण विष्णोः प्रचलितं मनः ॥ ४३ ॥
तस्मादद्यैव सहिताः सर्वेऽन्योन्यसमावृताः । देवानेव जिघांसामो येभ्यो दोषः समुत्थितः ॥ ४४ ॥
एवं संमन्त्र्य बलिनः सर्वसैन्यमुपासिताः । उद्योगं घोषयित्वा तु सर्वे नैर्ऋतपुंगवाः ॥ ४५ ॥
युद्धाय निर्ययुः क्रुद्धाः जम्भवृत्रादयो यथा । इति ते राम संमन्त्र्य सर्वोद्योगेन राक्षसाः ॥ ४६ ॥
युद्धाय निर्ययुः सर्वे महाकाया महाबलाः । स्यन्दनैर्वारणैश्चैव हयैश्च कंरिसंनिभैः ॥ ४७ ॥
खरैर्गोभिरथोष्ट्रैश्च शिशुंमारैर्भुजंगमैः । मकरैः कच्छपैर्मीनैर्विहंगैर्गरुडोपमैः ॥ ४८ ॥
सिंहैर्व्याघ्रैर्वराहैश्च सृमरैश्चमरैरपि । त्यक्त्वा लङ्कां गताः सर्वे राक्षसा बलगर्विताः ॥ ४९ ॥
प्रयाता देवलोकाय योद्धुं दैवतशत्रवः । लङ्काधिपर्ययं दृष्ट्वा यानि लङ्कालयान्यथ ॥ ५० ॥
भूतानि भयदर्शीनि विमनस्कानि सर्वशः । रथोत्तमैरुह्यमानाः शतशोऽथ सहस्रशः ॥ ५१ ॥

रा० टी०–तत इति । सुमाली माली च माल्यवतो वचः श्रुत्वा ज्येष्ठं भ्रातरमूचतुः ॥ ३९ ॥

गो० टी०–तत इति । भगांशाविव । भगः पूर्वफल्गुनीनक्षत्रदेवता तदंशः अर्यमा उत्तरफल्गुनीनक्षत्रदेवता ॥३९–४२॥

४०–४२] ति० टी०–निरामयं नीरोगम् । सुधर्मः शोभनो धर्मः । पथि स्थापितः । प्राक्सम्यगनुष्ठितैरध्ययनादिभिरिति शेषः । यतो द्विषो देवा जितास्तत्तस्मादस्माकं मृत्युकृतं भयं नास्तीत्यर्थः । कर्तव्यावशेषाभावान्मृत्यावपि न क्षतिरिति भावः ॥ ४०–४२ ॥

रा० टी०–तदाकारमाह–स्वधीतमित्यादिभिः । पथि कुलपरंपरायां सुधर्मः स्थापितः एतेनैतत्कर्मप्रभावादस्माकं विजयो भविष्यतीति सूचितम् ॥ ४० ॥

रा० टी०–देवेति । देवसागरं देवरूपसमुद्रं शस्त्रैस्समवगाह्य अप्रतिमाः द्विषो जिताः अत एव प्रमुखे सङ्ग्रामे स्थातुं नारायणादयो बिभ्यति तत्तेषामस्माकं मृत्युकृतं भयं नो नास्ति श्लोकद्वयमेकान्वयि ॥ ४१ ॥ ४२ ॥

४३] ति० टी०–विष्णोर्द्वेषस्य कारणं नास्ति । अस्माभिस्तदपराधाकरणादिति भावः । विष्णोर्दोषश्च नास्त्यत्र कारणम् । 'राक्षसेश्वर' इति पाठे विष्णोरस्मद्वधप्रतिज्ञायां यः कारणं स्यात्ताहशो विष्णोः सहजो दोषो नास्तीत्यर्थः । कथं तर्हीदानीमस्मासु द्वेषो विष्णोरत आह—देवानामिति । दोषेणोपजापेन ॥ ४३ ॥

रा० टी०–नन्वेवं तथात्वे कथं विष्णुना वधः प्रतिज्ञात इत्यत आह—विष्णोरिति । यद्यपि विष्णोर्द्वेषस्य कारणं नास्त्येव तथापि देवानां दोषेणैव विष्णोर्मनः प्रचलितम् ॥ ४३ ॥

गो० टी०–विष्णोरिति । विष्णोर्द्वेषस्य कारणं नास्तीति । अस्माभिस्तदपकाराकरणादिति भावः ॥ ४३ ॥

४४–४७] ति० टी०–जिघांसामः । स्वार्थे सनार्षः । हन्म इत्यर्थः ॥ ४४–४७ ॥

४८] ति० टी०–खरादयो वाहनानि ॥ ४८ ॥

रा० टी०–तस्मादिति । तस्मादुक्तहेतोः येभ्यो दोषः समुत्थितः तान् देवानेव सहिताः परस्परं हितत्वेन विद्यमानाः अन्योन्यसमावृताः वयं जिघांसामः ॥ ४३ ॥

रा० टी०–एवमिति । सैन्यमुपासिताः पालितसैन्याः सर्वे राक्षसपुंगवाः एवं संमन्त्र्य उद्योगं घोषयित्वा संस्मार्य जृम्भवृत्रादयः युद्धाय निर्ययुः सार्द्धश्लोक एकान्वयी ॥ ४४ ॥४५॥

रा० टी०–तत्प्रकारमाह—इतीति । सर्वोद्योगेन निखिलयत्नेनोपलक्षिता राक्षसाः स्यन्दनादिभिर्युद्धाय निर्ययुः श्लोकत्रयमेकान्वयि ॥ ४६–४८ ॥

गो० टी०–तस्मादिति । जिघांसाम इति स्वार्थे सनार्षः ॥ ४४–४६ ॥

गो० टी०–वाहनान्याह—स्यन्दनैरित्यादिना । सृमरैः गवयैः ॥ ४७–४९ ॥

४९] ति० टी०–सृमरो गवयः । सृमरचमरयोर्नीलश्वेतपुच्छयोगाद्भेद इति तीर्थः ॥ ४९ ॥

रा० टी०–त्यक्त्वेति । बलगर्विता ये राक्षसा योद्धुं देवलोकाय गतास्ते प्रयाताः प्राप्ताः ॥ ४९ ॥

५०–५१] ति०टी०–लङ्काधिपर्ययं लङ्कानाशम् । लङ्कालयानि भूतानि तत्रत्यानि दैवतानि विमनस्कान्यासन् ॥५०-५१

रा० टी०–लंकेति । यानि लंकालयानि भूतानि पशुप्रभृतीनि लंकाधिपर्ययं कुशकुनादिना लंकाया विध्वंसं दृष्ट्वा ज्ञात्वा भयदर्शीनि अत एव विमनस्कानि बभूवुरिति शेषः॥५०॥

रा० टी०–रथोत्तमैरिति । शतशः सहस्रशो राक्षसाः

१ प्रापित इति गो. पाठः । २ देवस्येति गो. पाठः । ३ समुद्युक्ता इति गो. पाठः । ४ सर्वसैन्यसमावृता इति गो. पाठः । ५ जिघांसामेति गो. पाठः । ६ सर्वे इति गो. रा. पाठः । ७ समावृता इति गो. पाठः । ८ बला इवेति गो. पाठः । ९ गिरीति गो. पाठः । १० शिंशिति गो. पाठः ।

प्रयाता राक्षसास्तूर्णं देवलोकं प्रयत्नतः । रक्षसामेव मार्गेण दैवतान्यपचक्रमुः ॥ ५२ ॥
[भूतानि भयदर्शीनि विषमस्थानि सर्वशः ।
भौमाश्चैवान्तरिक्षाश्च कालाज्ञप्ता भयावहाः । उत्पाता राक्षसेन्द्राणामभावाय समुत्थिताः ॥ ५३ ॥
अस्थीनि मेघा वसृपुरुष्णं शोणितमेव च । वेलां समुद्राश्चोत्क्रान्ताश्चेलुश्चाप्यथ भूधराः ॥ ५४ ॥
अट्टहासान्विमुञ्चन्तो घननादसमस्वनाः । वाश्यन्त्यश्च शिवास्तत्र दारुणं घोरदर्शनाः ॥ ५५ ॥
संपतन्त्यथ भूतानि दृश्यन्ते च यथाक्रमम् । गृध्रचक्रं महच्चात्र प्रज्वालोद्वारिभिर्मुखैः ॥ ५६ ॥
रक्षोगणस्योपरिष्टात्परिभ्रमति कालवत् । कपोता रक्तपादाश्च सारिका विद्रुता ययुः ॥ ५७ ॥
काका वाश्यन्ति तत्रैव बिडालाश्च द्विपादिकाः । उत्पातांस्ताननादृत्य राक्षसा बलदर्पिताः ॥ ५८ ॥
यान्त्येव न निवर्तन्ते मृत्युपाशावपाशिताः । माल्यवांश्च सुमाली च माली च सुमहाबलः ॥ ५९ ॥
पुरःसरा राक्षसानां ज्वलिता इव पावकाः । माल्यवन्तं तु ते सर्वे माल्यवन्तमिवाचलम् ॥ ६० ॥
निशाचरा आश्रयन्ति धातारमिव देवताः । तद्बलं राक्षसेन्द्राणां महाभ्रघननादितम् ॥ ६१ ॥
जयेप्सया देवलोकं ययौ मालिवशे स्थितम् । राक्षसानां समुद्योगं तं तु नारायणः प्रभुः ॥ ६२ ॥
देवदूतादुपश्रुत्य चक्रे युद्धे तदा मनः । ससज्जायुधतूणीरो वैनतेयोपरि स्थितः ॥ ६३ ॥
आसाद्य कवचं दिव्यं सहस्रार्कसमद्युति । आवध्य शरसंपूर्णे इषुधी विमले तदा ॥ ६४ ॥

प्रयत्नतो देवलोकं प्रयाताः दैवतानि तु रक्षसां मार्गेणैव अपचक्रमुः अपगताः बभूवुः सार्द्धश्लोक एकान्वयी ॥ ५२ ॥

गो० टी०–लङ्केति । लङ्काविपर्ययं लङ्काविनाशम् दृष्ट्वा यानि लङ्कानिल्यानि भूतानि तत्रत्यानि दैवतानि विमनस्कान्यासन्निति शेषः ॥ ५० ॥ ५१ ॥

५२] ति० टी०–रक्षसामेव मार्गेण तथात्रया सहैवापचक्रमुरपगताः ॥ ५२ ॥

गो०टी०–प्रयाता इति । रक्षसां मार्गेण तथात्रया सहैवापचक्रमुः ॥ ५२ ॥

५३–५४] ति० टी०–कालाज्ञप्ताः कालप्रेरिता भौमादय उत्पाताः ॥ ५३ ॥ ५४ ॥

रा० टी०–भौमा इति । कालेनाज्ञप्ताः प्रेरिताः भौमादय उत्पाताः राक्षसेन्द्राणामभावाय समुत्थिताः ॥ ५३ ॥

रा० टी०–उत्पाताकारमाह—अस्थीनीत्यादिभिः । मेघाः अस्थीनि उष्णं शोणितं च वसृपुः घननादेन समः स्वनो येषां ते अत एव अट्टहासान् विमुञ्चन्त इव समुद्राः वेलामुत्क्रान्ताः भूपराश्चेलुश्च सार्द्धश्लोक एकान्वयी ॥ ५४ ॥

गो० टी०–भौमाश्चेति । कालाज्ञप्ताः कालप्रेरिताः ॥ ५३–५७ ॥

५५] ति०टी०–घननादेन मेघस्वनेन समः स्वनो येषां ते विमुञ्चन्त इत्यस्य जाता इति शेषः। एवं वाशन्त्य इत्यस्यापि ५५

रा० टी०–वाश्यन्त्य इति । दारुणं वाश्यन्त्यश्शिवाः घोरदर्शना बभूवुरिति शेषः । भूतानि पृथिव्यादीनि सम्पतन्तीव दृश्यन्ते ॥ ५५ ॥

५६–५८] ति० टी०–गृध्रचक्रं गृध्रसमूहः ॥५६–५८॥

रा० टी०–गृध्रेति । महत् गृध्रचक्रं गृध्रसमूहः प्रज्वालोद्वारिभिर्मुखैरुपलक्षितं सत् रक्षोगणस्योपरिष्टात् कालवत्परिभ्रमति ॥ ५६ ॥

रा० टी०–कपोता इति । कपोतादयः विद्रुताः पलायिताः सन्तो ययुः काकादयः तत्रैव वाश्यन्ति ॥ ५७ ॥

रा० टी०–उत्पातानिति । बलगर्विताः मृत्युपाशेनावपाशिताः बद्धाः राक्षसाः उत्पातानानादृत्य यान्त्येव न निवर्तन्ते५८

गो० टी०–उत्पातानिति । मृत्युपाशावपाशिताः संजातबन्धनाः ॥ ५८ ॥

५९]ति०–टी०–मृत्युपाशैरवपाशिताः संजातबन्धनाः५९

रा० टी०–माल्यवानिति । राक्षसानां पुरस्सराः माल्यवत्प्रभृतयः पावका इव ज्वलिता बभूवुरिति शेषः ॥ ५९ ॥

गो०टी०–माल्यवानिति । माल्यवन्तं पर्वतम् ५९–६७

६०]ति०टी०–माल्यवन्तमचलं माल्यवदाख्यकुलपर्वतम् ।

रा० टी०–माल्यवन्तमिति । निशाचराः माल्यवन्तमचलमिव माल्यवन्तमाश्रयन्ति ॥ ६० ॥

६१–६४] ति० टी०–महाभ्रघननादितं महामेघसमूहवन्नादितं संजातनादम् ॥ ६१–६४ ॥

१ इदमर्धमधिकं गो. पु. । २ ज्वलनेति गो. पाठः । ३ राक्षसानामुपरि खे भ्रमतेऽलातचक्रवदिति गो. पाठः । ४ वै इति गो.रा. पाठः ।५ द्विपादय इति गो. पाठः । ६ बला इति गो. पाठः । ७ आसन्पुरःसरास्तेषां कतूनामिति गो. पाठः । ८ चेति गो. पाठः । ९ ह्याश्रयन्तीति गो. पाठः ।

श्रोणिसूत्रं च खड्गं च विमलं कमलेक्षणः । शङ्खचक्रगदाशार्ङ्गखड्गांश्चैव वरायुधान् ॥ ६५ ॥
[2]संपूर्णं गिरिसंकाशं वैनतेयमथास्थितः । राक्षसानामभावाय ययौ तूर्णतरं प्रभुः ॥ ६६ ॥
सुपर्णपृष्ठे स बभौ श्यामः पीताम्बरो हरिः । काञ्चनस्य गिरेः शृङ्गे सतडित्तोयदो यथा ॥ ६७ ॥
स सिद्धदेवर्षिमहोरगैश्च गन्धर्वयक्षैरुपगीयमानः ।
समाससाद[3]सुरसैन्यशत्रु[4]श्चक्रासिशार्ङ्गायुधशङ्खपाणिः ॥ ॥ ६८ ॥
सुपर्णपक्षानिलनुन्नपक्षं भ्रमत्पताकं प्रविकीर्णशस्त्रम् ।
चचाल तद्राक्षसराजसैन्यं चलोपलं नील[5]मिवाचलाग्रम् ॥ ॥ ६९ ॥
ततः शि[6]तैः शोणितमांसरूषितैर्युगान्तवैश्वानरतुल्यविग्रहैः ।
निशाचराः संपरिवार्य माधवं वरायुधै[7]र्निर्विभिदुः सहस्रशः ॥ ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ।

स नारायणः शङ्खनादेनासुरांस्त्रासयन्भयानके समरे चक्रेण मालिनः शीर्षमपातयत् मालिनं हत दृष्ट्वा शोकार्तौ भ्रातरौ भग्नं स्वबलं गृहीत्वा लङ्कां प्रविविशतुः ।

नारायणगिरिं ते तु गर्जन्तो राक्षसाम्बुदाः । अर्दयन्तोऽस्त्रवर्षेण वर्षेणेवाद्रिमम्बुदाः ॥ १ ॥
श्यामावदातस्तैर्विष्णुर्नीलैर्नक्तंचरोत्तमैः । वृतोऽञ्जनगिरीर्वायं वर्षमाणैः पयोधरैः ॥ २ ॥

६५-६८] ति० टी०-श्रोणिसूत्रं खड्गबन्धनभूतम् ६६-६८

रा० टी०-तदिति । मालिवधे स्थितं महाभ्रघनवत् नादितं नादविशिष्टं राक्षसेन्द्राणां बलं जयेप्सया देवलोकं ययौ ६१

रा० टी०-राक्षसानामिति । नारायणः राक्षसानां समुद्योगं देवदूतादुपश्रुत्य युद्धे मनश्चक्रे अत एव वैनतेयोपरि स्थितस्सन् आयुधतूणीरौ ससज्ज जग्राह सार्द्धश्लोक एकान्वयी॥ ६२॥

रा० टी०-आयुधतूणीर इति पाठे आयुधेन युक्तस्तूणीरो यस्येत्यर्थः ॥ ६३ ॥

रा० टी०-आसाद्येति । कवचमासाद्य शरसम्पूर्णं इषुधी श्रोणिसूत्रादीश्चावध्य वैनतेयमास्थितस्सन् राक्षसानामभावाय तूर्णतरं ययौ अर्द्धपद्यमेकान्वयि ॥ ६४-६६ ॥

रा० टी०-सुपर्णेति । काञ्चनस्य गिरेरुच्चैर्गे सतडित्तोयद इव पीताम्बरो हरिः सुपर्णस्य गरुडस्य पृष्ठे बभौ ॥६७॥

रा० टी०-स इति । देवर्षिप्रभृतिभिरुपगीयमानः अमरेभ्यो यानि सैन्यानि राक्षससेनाः तेषां शत्रुश्शातयिता विष्णुस्समाससाद जगाम ॥ ६८ ॥

६९.] ति०टी०-सुपर्णपक्षानिलेन नुन्नपक्षं क्षोभितबलम् । चलोपलं चला उपला यस्य तत् ॥ ६९ ॥

रा० टी०-सुपर्णेति । सुपर्णपक्षानिलेन नुन्नाः प्रकम्पिताः पक्षाः मुख्यराक्षसा यस्मिन् भ्रमन्ती पताका यस्मिन् प्रविकीर्णानि शस्त्राणि यस्मिन् तत् राक्षसराजसैन्यं चलानि उपलानि यस्य तत् नीलमचलाग्रमिव चचाल ॥ ६९ ॥

गो० टी०-सुपर्णेति । नुन्नपक्षं क्षोभितबलम् । चलोपलमिति बहुव्रीहिः ॥ ६८ ॥

७०] ति० टी०-विग्रह आकारः ॥ ७० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणतिलके उत्तरकाण्डे षष्ठः सर्गः ॥ ६ ॥

रा० टी०-तत इति । निशाचराः शितैर्वरायुधैर्माधवं संपरिवार्य निर्विभिदुः ॥ ७० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षष्ठः सर्गः ॥ ६ ॥

गो० टी०-तत इति । विग्रहः आकारः ॥ ६९ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षष्ठः सर्गः ॥ ६ ॥

१] ति०-टी०-अथ राक्षसोपरुद्धेन हरिणा तद्विद्रावणम् नारायणगिरिमिति । रूपकमिदम् ॥ १ ॥

रा० टी०-युद्धमेव वर्णयति—नारायणेत्यादिभिः । नारायणगिरिं तदुपपर्वतमस्त्रवर्षेणार्दयन्तः राक्षसाम्बुदाः वर्षेणाद्रिमर्दयन्तोऽम्बुदा इव गर्जन्तो बभूवुरिति शेषः ॥ १ ॥

२] ति० टी०-श्यामः मन्त्रवदातो निर्मलः । अञ्जनगिरीवेति विभक्तिलोप आर्षः, ततः संधिः ॥ २ ॥

---

१ आख्यप्रवरेति गो. पाठः । २ सुवर्णेति रा. सुपर्णमिति च गो. पाठः । ३ अमरेति रा. पा. ४ शत्रूनिति गो. पाठः ५ नील इवाचलेन्द्र इति गो. पाठः । ६ शरैरिति गो. पाठः । ७ ववर्षुः शरैरिति गो. पाठः । ८ आसीदिति गो. पाठः ।

शलभा इव केदारं मशका इव पावकम् । यथामृतघटं दंशा मकरा इव चार्णवम् ॥ ३ ॥
तथा रक्षोधनुर्मुक्ता वज्रानिलमनोजवाः । हरिं विशन्ति स्म शरा लोका इव विपर्यये ॥ ४ ॥
स्यन्दनैः स्यन्दनगता गजैश्च गजमूर्धगाः । अश्वारोहास्तथाश्वैश्च पादाताश्चाम्बरे स्थिताः ॥ ५ ॥
राक्षसेन्द्रा गिरिनिभाः शरैः शक्त्यृष्टितोमरैः । निरुच्छ्वासं हरिं चक्रुः प्राणायामा इव द्विजम् ॥ ६ ॥
निशाचरैस्ताड्यमानो मीनैरिव महोदधिः । शार्ङ्गमायम्य दुर्धर्षो राक्षसेभ्योऽसृजच्छरान् ॥ ७ ॥
शरैः पूर्णायतोत्सृष्टैर्वज्रकल्पैर्मनोजवैः । चिच्छेद विष्णुर्निशितैः शतशोऽथ सहस्रशः ॥ ८ ॥
विद्राव्य शरवर्षेण वर्षं वायुरिवोत्थितम् । पाञ्चजन्यं महाशङ्खं प्रदध्मौ पुरुषोत्तमः ॥ ९ ॥
सोऽम्बुजो हरिणाध्मातः सर्वप्राणेन शङ्खराट् । ररास भीमनिर्ह्रादस्त्रैलोक्यं व्यथयन्निव ॥ १० ॥
शङ्खराजरवः सोऽथ त्रासयामास राक्षसान् । मृगराज इवारण्ये समदानिव कुञ्जरान् ॥ ११ ॥
न शेकुरश्वाः संस्थातुं विमदाः कुञ्जराभवन् । स्यन्दनेभ्यश्च्युता वीराः शङ्खरावितदुर्बलाः ॥ १२ ॥
शार्ङ्गचापविनिर्मुक्ता वज्रतुल्याननाः शराः । विदार्य तानि रक्षांसि सुपुङ्खा विविशुः क्षितिम् ॥ १३ ॥
भिद्यमानाः शरैः संख्ये नारायणकरच्युतैः । निपेतू राक्षसा भूमौ शैला वज्रहता इव ॥ १४ ॥

रा० टी०–श्यामेति । वर्षमाणैः पयोधरैर्हेतोरञ्जनगिरिरिव श्याम एव अवदातो निर्मलो विष्णुर्नीलैर्नक्तंचरोत्तमैः व्रतोऽभवदिति शेषः । अञ्जनगिरीत्यत्र सुपां सुलुगिति सोर्लुक् ॥२॥

गो० टी०–श्यामेति । श्यामः सत्त्ववदातः शुभ्रः श्यामावदातः निर्मल इत्यर्थः । अञ्जनगिरीवेति विभक्तिलोपः छान्दसः ॥ २ ॥

३] ति० टी०–अमृतघटं क्षौद्रघटं । दंशाः । वनमक्षिका इत्यर्थः ॥ ३ ॥

४] ति० टी०–वज्रानिलमनोजवाः वज्रसारा अनिलमनोवज्जवो वेगो येषां ते । विपर्यये प्रलयकाले लोका यथा हरिं विशन्ति तद्वत् ॥ ४ ॥

रा० टी०–शलभा इति । शलभाः केदारं शाल्यादिक्षेत्रमिव मशकाः पावकमिव अमृतेन मधुना युक्तं घटं दंशा वनमक्षिका इव मकराः अर्णवमिव विपर्यये प्रलयसमये लोका इव रक्षोधनुर्मुक्ताः शराः हरिं विशन्तिस्म श्लोकद्वयमेकान्वयि॥३॥४॥

गो० टी०–शलभा इति । अमृतघटं मधुघटम् । दंशाः वनमक्षिकाः । तथेति । वज्राः वज्रधारा इव स्थिताः अनिलमनोजवाश्च । विपर्यये संहारकाले हरिं लोकाः प्रजा इव ॥३॥४॥

५] ति० टी०–स्यन्दनादिभिः सहाम्बरे स्थितास्तद्वताः५

रा० टी०–स्यन्दनैरिति । स्यन्दनगताः स्यन्दनारोहाः स्यन्दनैस्सह गजमूर्द्धगाः गजश्रेष्ठारूढाः गजैस्सह अश्वारोहाः अश्वैस्सह पदाताश्च अम्बरे स्थिताः ॥ ५ ॥

गो० टी०–स्यन्दनैरिति ॥ ५ ॥

६–७] ति० टी०–हरिं निरुच्छ्वासं चक्रुः ॥ ६ ॥ ७ ॥

रा० टी०–राक्षसेन्द्र इति । राक्षसेन्द्राः शरादिभिः शक्त्यादिभिः हरिं निरुच्छ्वासं चक्रुः तत्र दृष्टान्तः प्राणायामाः प्राणायामसमयः द्विजमिव ॥ ६ ॥

रा० टी०–निशाचरैरिति । निशाचरैस्ताड्यमानो दुराधर्षो हरिः शार्ङ्गं धनुरायम्य राक्षसेभ्यश्शरान् असृजत् ॥७॥

गो० टी०–राक्षसेन्द्रा इति । हरिं निरुच्छ्वासं चक्रुः उच्छ्वासानवसरवन्तं कृतवन्तः ॥ ६ ॥ ७ ॥

८–९] ति० टी०–पूर्णायतोत्सृष्टैः पूर्णाकृष्टतयोत्सृष्टैः । वज्रकल्पैर्वज्रवदकुण्ठैः ॥ ८ ॥ ९ ॥

रा० टी०–शरैरिति । विष्णुः पूर्णायतेन अत्यन्तमाकृष्टतया उत्सृष्टैस्त्वत्यक्तैः शरैः शतशः सहस्रशो राक्षसान् चिच्छेद ॥ ८ ॥

रा० टी०–विद्राव्येति । वर्षं वायुरिव शरवर्षेण विद्राव्य पाञ्चजन्यशंखं प्रदध्मौ ॥ ९ ॥

गो० टी०–शरैरिति । पूर्णायततया उत्सृष्टैः वज्रवक्त्रैः वज्रमिवाकुण्ठं वक्त्रं येषां तैः ॥ ८ ॥ ९ ॥

१०–११] ति० टी०–अम्बुजः शङ्खः । सर्वप्राणेन सर्वबलेन । शङ्खराडिति विशेषणम् ध्मातो वादितः॥ १० ॥११॥

रा० टी०–स इति । सर्वप्राणेन अतिप्रयत्नेन हरिणा ध्मातः शंखराट् अम्बुजः शंखः त्रैलोक्यं व्यथयन्निव ररास१०

रा० टी०–शंखेति । मृगराजः कुञ्जरानिव शंखराजरवः राक्षसान् त्रासयामास ॥ ११ ॥

गो० टी०–स इति । अम्बुजः शङ्खः । सर्वप्राणेन सर्वबलेन । ध्मातः आध्मानितः ॥ १० ॥ ११ ॥

१२–१४] ति० टी०–भवन्नभवन् शङ्खरावितेन शङ्खशब्देन दुर्बलाः क्षीणबलाः । स्वार्थे णिः ॥ १२ ॥ १४ ॥

रा० टी०–नेति । शंखरावितेन शंखस्वनेन दुर्बलाः अश्वाः रथतुरगाः संस्थातुं न शेकुः कुञ्जरा रथगजाः विमदाभवन् अभवन् अत एव वीराः स्यन्दनेभ्यः च्युताः ॥ १२ ॥

१ पर्वतमिति गो. पाठः । २ पृष्टेति गो. पाठः । ३ वक्त्रैरिति गौ. पाठः । ४ वर्षेति गो. पाठः ।

व्रणानि परगात्रेभ्यो विष्णुचक्रकृतानि हि[1] । असृक्क्षरन्ति धाराभिः स्वर्णधारा इवाचलाः ॥ १५ ॥
शङ्खराजरवश्चापि शार्ङ्गचापरवस्तथा । राक्षसानां रवांश्चापि ग्रसते वैष्णवो रवः ॥ १६ ॥
तेषां शिरोधरान्धूताञ्छरध्वजधनूंषि च । रथान्पताकास्तूणीरांश्चिच्छेद स हरिः शरैः ॥ १७ ॥
सूर्यादिव करा घोरा वार्योघा[2] इव सागरात् । पर्वतादिव नागेन्द्रा धारौघा इव चाम्बुदात् ॥ १८ ॥
तथा शार्ङ्गविनिर्मुक्ताः शरा नारायणेरितात्[3] । निर्धावन्तीषवस्तूर्णं शतशोथ सहस्रशः ॥ १९ ॥
शरभेण यथा सिंहाः सिंहेन द्विरदा यथा । द्विरदेन यथा व्याघ्रा व्याघ्रेण द्वीपिनो यथा ॥ २० ॥
द्वीपिनेव यथा श्वानः शुना मार्जारको यथा । मार्जारेण यथा सर्पाः सर्पेण च यथाखवः ॥ २१ ॥
तथा ते राक्षसाः सर्वे विष्णुना प्रभविष्णुना । द्रवन्ति द्राविताश्चान्ये शायिताश्च महीतले ॥ २२ ॥
राक्षसानां सहस्राणि निहत्य मधुसूदनः । वारिजं पूरयामास तोयदं सुरराडिव ॥ २३ ॥
नारायणशरत्रस्तं शङ्खनादसुविह्वलम् । ययौ लङ्कामभिमुखं प्रभग्नं राक्षसं बलम् ॥ २४ ॥
प्रभग्ने राक्षसबले नारायणशराहते । सुमाली शरवर्षेण निववार रणे हरिम् ॥ २५ ॥
स तु तं छादयामास नीहार इव भास्करम् । राक्षसाः सत्त्वसंपन्नाः पुनर्धैर्यं समादधुः ॥ २६ ॥
अथ सोऽभ्यपतद्रोषाद्राक्षसो बलदर्पितः । महानादं प्रकुर्वाणो राक्षसाञ्जीवयन्निव ॥ २७ ॥

रा० टी०–शार्ङ्गेति । वज्रतुल्याननाः शराः रक्षांसि विदार्य क्षितिं विविशुः ॥ १३ ॥

रा० टी०–भिद्यमाना इति । शरैर्भिद्यमानाः राक्षसाः वज्रहताः शैला इव भूमौ निपेतुः ॥ १४ ॥

गो० टी०–न शेकुरिति । कुञ्जराभवन्नित्यार्षः संधिः । भवन्निति वा छेदः शङ्खरावितेन शङ्खध्वनिना स्वार्थे णिः १२ ॥ १४

१५] ति० टी०–स्वर्णधाराः गैरिकधराः । 'गैरिकेऽपि सुवर्णं स्यात्' ॥ १५ ॥

रा० टी०–व्रणानीति । विष्णुचक्रकृतानि व्रणानि परगात्रेभ्यः स्वार्थोवयवेभ्यः धाराभिः असृक् रुधिरं क्षरन्ति तत्र दृष्टान्तः स्वर्णधाराः गैरिकप्रवाहान् अचला इव गैरिकेपि सुवर्णं स्यादिति भट्टाः वस्तुतस्तु शोभनानि गैरिकसंसर्गेण शोभाविशिष्टानि ऋणानि जलानि यासु ता एव धाराः इत्यर्थः ॥ १५ ॥

१६] ति० टी०–रवांश्चापि । अपिना प्राणांश्च वैष्णवो विष्णूत्पादितः ॥ १६ ॥

रा० टी०–शंखराजेति । वैष्णवः विष्णुनोत्पादितः अरवः अरं प्रकाशं वाति प्राप्नोति सः शंखराजरवः शार्ङ्गचापरवश्च राक्षसानां रवान् ग्रसते किञ्च वैष्णवः विष्णुमुखोच्चारितो रवश्चेत्यर्थः ॥ १६ ॥

१७–१८] ति० टी०–शिरोधरान्कण्ठान् ॥ १७ ॥ १८ ॥

१९–२०] ति० टी०–विनिर्मुक्ता विनिर्मोक्तुं प्रक्रान्ताः शरा आसन्निति पृथग्योज्यम् । अथ नारायणेरितान्नारायणव्यापारत इषवो निर्धावन्ति । सहस्रशः शतशः ॥ १९ ॥ २० ॥

रा० टी०–तेषामिति । हरिः तेषां रक्षसां धूतान् प्रकम्पितान् शिरोधरान् कण्ठान् शरादींश्च चिच्छेद ॥ १७ ॥

रा० टी०–सूर्यैति । सूर्यात् कराः किरणा इव सागरात् वार्योघाः वारिसमूहा इव पर्वतात् नागेन्द्रा महासर्पा इव अम्बुदात् मेघात् धारौघा इव नारायणेरिताः नारायणव्यापारात् शार्ङ्गविनिर्मुक्ताः शरा विघातकाः इषवः तूर्णं निर्धावन्ति श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

रा० टी०–शरभेणेति । सिंहेन द्विरदो हस्ती यथा व्याघ्रेण द्वीपिनः क्षुद्रव्याघ्रा यथा द्वीपिना श्वानो यथा सर्पेण आखवो मूषका यथा तथा सर्वे राक्षसाः विष्णुना द्राविताः सन्तो द्रवन्ति अन्ये च महीतले शायिता निहता इत्यर्थः । श्लोकत्रयमेकान्वयि ॥ २०–२२ ॥

गो० टी०–तथेति । शार्ङ्गविनिर्मुक्ताः इत्येतद्विद्वणोति–निर्धावन्तीति । द्वीपिनः क्षुद्रव्याघ्राः ॥ १९ ॥ २० ॥

२१] ति० टी०–द्वीपी क्षुद्रव्याघ्रः आखवो मूषिकाः २१

२२–२३] ति० टी०–महीतले शायिताः । अनुद्रुत्येति शेषः ॥ २२ ॥ २३ ॥

गो० टी०–द्वीपिनेति । आखवो मूषिकाः ॥ २१ ॥ २२ ॥

रा० टी०–राक्षसानामिति । मधुसूदनः राक्षसानां सहस्राणि निहत्य वारिजं समुद्रं पूरयामास तत्र दृष्टान्तः तोयदं मेघं सुरराट् इव वारिजशब्दार्थस्तु वारि जनयति मेघद्वारा प्रकटयतीति ॥ २३ ॥

गो० टी०–राक्षसानामिति । सुरराडिवेति इन्द्रस्य मेघनियन्तृत्वात्तथोक्तम् ॥ २३ ॥

२४] ति० टी०–राक्षसं रक्षःसंबन्धि ॥ २४ ॥

रा० टी०–नारायणेति । नारायणशरेण त्रस्तं शंखनादेन सुविह्वलं राक्षसं बलं लंकामभिमुखं सत् ययौ ॥ २४ ॥

गो० टी०–नारायणेति । राक्षसं रक्षःसंबन्धि ॥ २४–२८ ॥

२५–२७] ति० टी०–निववार वारयामास ॥ २५–२७ ॥

१ वै इति गो. पाठः । २ ऊर्मयः सागरादिवेति गो. पाठः । ३ ईरिता इति गो. पाठः ।

उत्क्षिप्य लम्बाभरणं धुन्वन्करमिव द्विपः । ररास राक्षसो हर्षात्सतडित्तोयदो यथा ॥ २८ ॥
सुमालेर्नर्दतस्तस्य शिरो ज्वलितकुण्डलम् । चिच्छेद यन्तुरश्वाश्च भ्रान्तास्तस्य तु रक्षसः ॥ २९ ॥
तैरश्वैर्भ्राम्यते भ्रान्तैः सुमाली राक्षसेश्वरः । इन्द्रियाश्वैः परिभ्रान्तैर्धृतिहीनो यथा नरः ॥ ३० ॥
ततो विष्णुं महाबाहुं प्रपतन्तं रणाजिरे । हते सुमालेरश्वैश्च रथे विष्णुरथं प्रति ॥
माली चाभ्यद्रवद्युक्तः प्रगृह्य सं शरासनम् ॥ ॥ ३१ ॥
मालेर्धनुश्च्युता बाणाः कार्तस्वरविभूषिताः । विविशुर्हरिमासाद्य क्रौञ्चं पत्ररथा इव ॥ ३२ ॥
अर्द्यमानः शरैः सोऽथ मालिमुक्तैः सहस्रशः । चुक्षुभे न रणे विष्णुर्जितेन्द्रिय इवाधिभिः ॥ ३३ ॥
अथ मौर्वीस्वनं कृत्वा भगवान्भूतभावनः । मालिनं प्रति बाणौघान्ससर्जासिगदाधरः ॥ ३४ ॥
ते मालिदेहमासाद्य वज्रविद्युत्प्रभाः शराः । पिबन्ति रुधिरं तस्य नागा इव सुधारसम् ॥ ३५ ॥
मालिनं विमुखं कृत्वा शङ्खचक्रगदाधरः । मालिमौलिं ध्वजं चापं वाजिनश्चाप्यपातयत् ॥ ३६ ॥
विरथस्तु गदां गृह्य माली नक्तंचरोत्तमः । आपुप्लुवे गदापाणिर्गिर्यग्रादिव केसरी ॥ ३७ ॥
गदया गरुडेशानमीशानमिव चान्तकः । ललाटदेशेऽभ्यहनद्वज्रेणेन्द्रो यथाचलम् ॥ ३८ ॥
गदयाभिहतस्तेन मालिना गरुडो भृशम् । रणात्पराङ्मुखं देवं कृतवान्वेदनातुरः ॥ ३९ ॥

रा० टी०–प्रभग्न इति । राक्षसबले नारायणशराहते अत एव प्रभग्ने सति सुमाली शरवर्षेण हरिं निवबार ॥ २५ ॥

रा० टी०–स इति । तु यदा नीहारं भास्करमिव स सुमाली तं विष्णुं छादयामास तदा सत्वसम्पन्ना बलवन्तो राक्षसाः धैर्यं पुनस्समादधुः ॥ २६ ॥

रा० टी०–अथेति । अथानन्तरं स सुमाली राक्षसान् जीवयन्निव अभ्यपतत् हरिसम्मुखं प्राप ॥ २७ ॥

२८] लम्बाभरणं लम्बमानमाभरणमुत्क्षिप्य विधुन्वन्। द्विपः करमिव शुण्डादण्डमिव ॥ २८

रा० टी०–उत्क्षिप्येति । लम्बाभरणं लम्बायमानमाभरणं यस्मिन् तं करमुत्क्षिप्य द्विपः करमिव धुन्वन्सन् राक्षसो ररास तत्र दृष्टान्तः सतडित्तोयदो यथा ॥ २८ ॥

२९] ति० टी०–यन्तुः शिरश्चिच्छेद । ततस्तस्याश्वा नष्टसारथित्वादनवस्थितगतिकाः । आसन्नित्यर्थः ॥ २९ ॥

रा० टी०–सुमालेरिति । सुमालेर्यन्तुस्सारथेश्च शिरः चिच्छेद अतः तस्य रक्षसोऽश्वाः भ्रान्ताः अनवस्थितगतयो बभूवुरिति शेषः ॥ २९ ॥

गो० टी०–सुमालेरिति । यन्तुः सारथेः । भ्रान्ताः नष्टसारथिकत्वादनवस्थितगतिका इत्यर्थः ॥ २९ ॥

३०] ति० टी०–भ्राम्यते भ्राम्यते स्म ॥ ३० ॥

रा० टी०–तैरिति । सुमाली भ्रान्तैरश्वैर्भ्राम्यते बभ्राम तत्र दृष्टान्तः परिभ्रान्तैः इन्द्रियाश्वैर्धृतिहीना नर इव ॥ ३० ॥

गो० टी०–तैरिति । इन्द्रियार्थैरश्वैः धृतिहीनो नरः यथा तथा सुमाली बभ्रामेत्यर्थः ॥ ३०—३३ ॥

३१] ति० टी०–सुमाले रथेऽश्वैर्हते इतस्ततोऽपकृष्यमाणे सति रथाद्वप्लुत्य विष्णुरथं प्रति धनुः प्रगृह्य युक्तोऽभ्यद्रवत्३१

रा० टी०–तत इति । सुमालेः रथे विष्णुरथं प्रतिहते प्रापिते सति माली विष्णुमभ्यद्रवत् सार्द्धश्लोक एकान्वयी ३१

३२–३४] ति० टी०–क्रौञ्चं क्रौञ्चाद्रिम् । पत्ररथाः पक्षिणः ॥ ३२ ॥ ३४ ॥

रा० टी०–मालेरिति । मालेर्धनुश्च्युताः बाणाः क्रौञ्चं तदभिधगिरिं पत्ररथाः पक्षिण इव हरिमासाद्य विविशुः॥३२॥

रा० टी०–अर्द्यमान इति । मालिमुक्तैश्शरैरर्द्यमानः प्राप्यमानोऽपि विष्णुः आधिभिः जितेन्द्रिय इव न चुक्षुभे ॥३३॥

रा० टी०–अथेति । असिगदाधरो विष्णुः मालिनं प्रति बाणौघान् ससर्ज ॥ ३४ ॥

गो० टी०–अथेति । मौर्वीस्वनं श्रुत्वेत्यनेन मालिशरस्याच्छिन्नगतिर्गम्यते ॥ ३४ ॥

३५] ति० टी०–नागाः सर्पाः ॥ ३५ ॥

रा० टी०–ते इति । ते शराः मालिदेहमासाद्य तस्य मालिदेहस्य रुधिरं नागास्सुधारसमिव पिबन्ति ॥ ३५ ॥

गो० टी०–त इति । नागाः सर्पाः । सुधारसम् अमृतम् गरुडानीतम् ॥ ३५ ॥

३६–३७] ति० टी०–मालिमौलिं मालिमुकुटम् ३६॥३७

रा० टी०–मालिनमिति । शंखादिधरो विष्णुर्मालिनं शरैर्विमुखं विकृतानतं कृत्वा मालिमौलिप्रभृतीन् अपातयत्३६

रा० टी०–विरथ इति । विरथो माली गिर्यग्रात् केसरी सिंह इव आपुप्लुवे ॥ ३७ ॥

गो० टी०–मालिनमिति । मालिमौलिं मालिमुकुटम् ॥ ३६ ॥ ३७ ॥

३८–३९] ति० टी०–गरुडानां पक्षिणामीशानं गरुडम् ।

१ सशरं धनुरिति गो. पाठः । २ अरिनिपूदन इति गो. पाठः ।

पराङ्मुखे कृते देवे मालिना गरुडेन वै । उदतिष्ठन्महाञ्शब्दो रक्षसामभिनर्दताम् ॥ ४० ॥
रक्षसां रुवतां रावं श्रुत्वा हरिहयानुजः । तिर्यगास्थाय संक्रुद्धः पक्षीशे भगवान्हरिः ॥ ४१ ॥
पराङ्मुखोऽप्युत्ससर्ज मालेश्चक्रं जिघांसया । तत्सूर्यमण्डलाभासं स्वभासा भासयन्नभः ॥ ४२ ॥
कालचक्रनिभं चक्रं मालेः शीर्षमपातयत् । तच्छिरो राक्षसेन्द्रस्य चक्रोत्कृत्तं विभीषणम् ॥
पपात रुधिरोद्गारि पुरा राहुशिरो यथा । ॥ ४३ ॥
ततः सुरैः संप्रहृष्टैः सर्वप्राणसमीरितः । सिंहनादरवो मुक्तः साधु देवेतिवादिभिः ॥ ४४ ॥
मालिनं निहतं दृष्ट्वा सुमाली माल्यवानपि । सवलौ शोकसंतप्तौ लङ्कामेव प्रधावितौ ॥ ४५ ॥
गरुडस्तु समाश्वस्तः संनिवृत्य यथा पुरा । राक्षसान्द्रावयामास पक्षवातेन कोपितः ॥ ४६ ॥
चक्रकृत्तास्यकमला गदासंचूर्णितोरसः । लाङ्गलग्लपितग्रीवा मुसलैर्भिन्नमस्तकाः ॥ ४७ ॥
केचिच्चैवासिना छिन्नास्तथान्ये शरताडिताः । निपेतुरम्बरात्तूर्णं राक्षसाः सागराम्भसि ॥ ४८ ॥
नारायणोऽर्पापुवराशनीभिर्विदारयामास धनुर्विमुक्तैः ।
नक्तंचरान्धृतविमुक्तकेशान्यथाशनीभिः सतडिन्महाभ्रः ॥ ॥ ४९ ॥
भिन्नातपत्रं पतमानशस्त्रं शरैरपध्वस्तविनीतवेषम् ।
विनिःसृतान्त्रं भयलोलनेत्रं वलं तदुन्मत्ततरं बभूव ॥ ॥ ५० ॥

ईशानमन्तक इव । श्वेतारण्ये मार्कण्डेयरक्षणार्थं कस्यचिद्राज्ञो रक्षणार्थं चेशानान्तकयोर्युद्धमभूत् तदान्तकेन रुद्रोपर्यायुध-प्रक्षेपः कृत इति पुराणप्रसिद्धेयं कथा ॥ ३८ ॥ ३९ ॥

रा० टी०–गदयेति । ईशानं शिवमंतक इव गरुडानां पक्षिविशेषाणामीशानं ललाटदेशेभ्यहनत् ॥ ३८ ॥

रा० टी०–गदयेति । मालिना गदयाभिहतो गरुडः वेदनातुरस्सन् देवं विष्णुं गणात् पराङ्मुखं कृतवान् विष्णुं गृहीत्वैव बहिर्गत इत्यर्थः ॥ ३९ ॥

गो० टी०–गदयेति । गरुडाः पक्षिणः तदीशानं वैनतेयम् ॥ ३८—४० ॥

४०] ति० टी०–मालिना गरुडेन मालिताडनपराङ्मुखगरुडेन देवे पराङ्मुखः कृत इत्यन्वयः ॥ ४० ॥

रा० टी०–पराङ्मुख इति । मालिना गरुडेन सह देवे विष्णौ पराङ्मुखे कृते सति अभिनर्दतां रक्षसां महान् शब्दः उदतिष्ठत् ॥ ४० ॥

४१] ति० टी०–हरिहयानुज इन्द्रानुजः । तिर्यगिति विमुखे पक्षीशे तिर्यग्वलितग्रीवमास्थाय स्थित्वा ॥ ४१ ॥

रा० टी०–रक्षसामिति । हरिहयस्य इन्द्रस्य अनुगो विष्णुः रक्षसां एवं श्रुत्वा संक्रुद्धः सन् पक्षीशे तिर्यगास्थाय मालेर्जिघांसया चक्रं ससर्ज सार्द्धश्लोक एकान्वयी ॥ ४१ ॥

गो० टी०–रक्षसामिति । हरिहयानुजः इन्द्रानुजः ४१-४४

४२-४३] ति० टी०–मालेर्जिघांसया चक्रमुत्ससर्ज । कालचक्रनिभं दिनमासादिरूपेण परिवर्तमानकालचक्रसदृशम् । तेनाप्रतिघात्यत्वमुक्तम् ॥ ४२ ॥ ४३ ॥

रा० टी०–तदिति । स्वभासा नभो भासयत् तच्चक्रं मालेश्शीर्षमपातयत् ॥ ४२ ॥

रा० टी०–तदिति । विभीषणं भयंकरं राक्षसेन्द्रस्य शिरः राहुशिर इव पपात ॥ ४३ ॥

४४-४६] ति० टी०–सर्वप्राणसमीरितः सर्वबलेन प्रवर्तितः ॥ ४४—४६ ॥

रा० टी०–तत इति । साधु देवेति वादिभिस्सुरैस्सर्वप्राणसमीरितः अतिप्रयत्नेन युक्तः सिंहनादरवः मुक्तः कृतः ४४

रा० टी०–मालिनमिति । सुमाली माल्यवानपि लंकामेव प्रधावितौ बभूवतुरिति शेषः ॥ ४५ ॥

रा० टी०–गरुड इति । समाश्वस्तो गरुडस्संनिवृत्य रणभूमिमागम्येत्यर्थः । पक्षवातेन राक्षसान् द्रावयमास ॥४६॥

गो० टी०–तत इति । सर्वप्राणसमीरितः सर्वबलेन प्रवर्तितः ॥ ४५—४९ ॥

४७-४८] ति० टी०–लाङ्गलेन हलेन ग्लपिता हता ग्रीवा येषां ते ॥ ४७ ॥ ४८ ॥

रा० टी०–इदानीं विष्णुकर्तृकराक्षसविघातमाह—चक्रेत्यादिभिः । चक्रेण कृत्तानि छिन्नानि आस्यकमलानि येषां लाङ्गलेन हलेन ग्लपिता अपहृता ग्रीवा येषां ते केचित् असिना छिन्नाः अन्ये शरताडिताः राक्षसाः सागराम्भसि निपेतुः श्लोकद्वयमेकान्वयि ॥ ४७ ॥ ४८ ॥

४९] ति० टी०–अशनीभिरिति दीर्घ आर्षः । मुक्तविधूतकेशान्मुक्तकेशान्विधूतकेशांश्च ॥ ४९ ॥

रा० टी०–नारायण इति । धनुर्मुक्तैः इषुवराशनीभिः । अशनिसदृशेषुवरैः नक्तंचरान् अवशिष्टराक्षसान् नारायणो विदारयामास तत्र दृष्टान्तः अशनीभिः अशनिभिः सतडित्महाभ्रः तदभिमानिदेव इव शरीरस्य महाभ्रोपमा पीताम्बरस्य तडिदुपमा ॥ ४९ ॥

गो० टी०–नारायण इति । अशनीभिरित्यार्षो दीर्घः ५० ५०] ति० टी०–शरैरपध्वस्तो दूरीकृतो विनीतवेषः

सिंहार्दितानामिव कुञ्जराणां निशाचराणां सह कुञ्जराणाम् ।
रवाश्च वेगाश्च समं बभूवुः पुराणसिंहेन विमर्दितानाम् ॥ ॥ ५१ ॥
ते वार्यमाणा हरिबाणजालैः स्वबाणजालानि समुत्सृजन्तः ।
धावन्ति नक्तंचरकालमेघा वायुप्रणुन्ना इव कालमेघाः ॥ ॥ ५२ ॥
चक्रप्रहारैर्विनिकृत्तशीर्षाः संचूर्णिताङ्गाश्च गदाप्रहारैः ।
असिप्रहारैर्द्विविधा विभिन्नाः पतन्ति शैला इव राक्षसेन्द्राः ॥ ॥ ५३ ॥
विलम्बमानैर्मणिहारकुण्डलैर्निशाचरैर्नीलबलाहकोपमैः ।
निपात्यमानैर्ददृशे निरन्तरं निपात्यमानैरिव नीलपर्वतैः ॥ ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ।

ततो माल्यवान्सुमाली च चिरं घोरं युद्ध्वापि विष्णुना पराभूतौ हतावशिष्टबलपरिवृतौ लङ्कां विहाय रसातलं प्रविष्टौ धनदस्तु लङ्कायां मुदित उवास ।

हन्यमाने बले तस्मिन्पद्मनाभेन पृष्ठतः । माल्यवान्संनिवृत्तोऽथ वेलामेत्य इवार्णवः ॥ १ ॥
संरक्तनयनः क्रोधाच्चलन्मौलिर्निशाचरः । पद्मनाभमिदं प्राह वचनं पुरुषोत्तमम् ॥ २ ॥

सौम्यवेषो यस्य तत् । उन्मत्ततरमतिशयेन विस्मृतस्वपरविवेकम् ॥ ५० ॥

रा० टी०–भिन्नेति । शरैर्भिन्नानि छिन्नानि आतपत्राणि यस्मिन् पतमानानि शस्त्राणि यस्मिन् अपध्वस्ताः विनीतवेषा यस्य विनिस्सृतानि अंत्राणि यस्मात् तद्बलमुन्मत्ततरं विस्मृतविवेकं बभूव ॥ ५० ॥

गो० टी०–भिन्नातपत्रमिति । उन्मत्ततरम् अतिशयेन विस्मृतस्वपरविवेकम् ॥ ५१ ॥

५१] ति० टी०–पुराणसिंहेन नृसिंहेन ॥ ५१ ॥

रा० टी०–सिंहार्दितानामिति । सिंहार्दितानां कुञ्जराणां रवा वेगा इव पुराणसिंहेन विष्णुना विमर्दितानां सह कुञ्जराणां निशाचराणां रवाः हाहेति स्वनाः वेगाः पतनादिषु व्यापारविशेषाः समं बभूवुः ॥ ५१ ॥

गो० टी०–सिंहार्दितानामिति । पुराणसिंहेन नरसिंहेन ॥ ५२ ॥

५२] ति० टी०–समुत्सृजन्तस्त्यक्तवन्तः ॥ ५२ ॥

रा० टी०–ते इति । हरिबाणजालैः वार्यमाणाः आत्रियमाणाः स्वबाणजालानि समुत्सृजन्तः नक्तंचरकालमेघा धावन्ति५२

गो० टी०–त इति । समुत्सृजन्तस्त्यक्तवन्तः ॥ ५३ ॥

५३] ति० टी०–द्विविधाविभिन्नाः द्विविधया प्रकारद्वयेन विभिन्ना खण्डिताः ॥ ५३ ॥

रा० टी०–चक्रेति । राक्षसेन्द्राः शैला इव पतन्ति॥५३॥

गो० टी०–चक्रप्रहारैरिति । द्विविधया द्विप्रकारेण विभिन्नाः । खण्डिता इत्यर्थः ॥ ५४ ॥ ५५ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्तमः सर्गः ॥ ७ ॥

५४] ति० टी०–भूमण्डलमिति शेषः । तन्निरन्तरं व्याप्तं ददृशे ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे सप्तमः सर्गः ॥ ७ ॥

रा० टी०–विलम्बमानैरिति । विलम्बमानैर्हस्तादीनां छिन्नत्वेन अवलंबरहितैः अत एव निपात्यमानैः मणिहारकुण्डलैः नीलबलाहकोपमैः नीलपर्वतैरिव नीलपर्वतसदृशैः निशाचरैश्च निरन्तरमन्तररहितं ददृशे भुवस्तलमिति शेषः ॥ ५४॥

इति श्रीरामाभिरामे श्रीरामीये रामायणशिरोमणौ वाल्मीकीय आदिकाव्ये उत्तरकाण्डे सप्तमः सर्गः ॥ ७ ॥

१] ति० टी०–अथ सुमालिमाल्यवतोः पराजितयोर्लङ्कां विहाय पातालप्रवेशः—**हन्यमाने इति** । पृष्ठत इति । अनुद्रुत्येति शेषः । एत्य इत्येत्यसंधिरार्षः अर्णवो वेलामेत्य यथा निवर्तते तथा निवृत्त इत्यर्थः ॥ १ ॥

रा० टी०–माल्यवतो युद्धं वर्णयन्नाह—**हन्यमान इत्यादिभिः** । बले पद्मनाभेन हन्यमाने सति माल्यवान् वेलामे-

१ भिन्ना इति गो. पाठः ।

नारायण न जानीषे क्षात्रधर्मं पुरातनम् । अयुद्धमनसो भीतानस्मान्हंसि यथेतरः ॥ ३ ॥
पराङ्मुखवधं पापं यः करोति सुरेश्वर । स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणाम् ॥ ४ ॥
युद्धश्रद्धाथवा तेऽस्ति शङ्खचक्रगदाधर । अहं स्थितोऽस्मि पश्यामि बलं दर्शय यत्तव ॥ ५ ॥
माल्यवन्तं स्थितं दृष्ट्वा माल्यवन्तमिवाचलम् । उवाच राक्षसेन्द्रं तं देवराजानुजो बली ॥ ६ ॥
युष्मत्तो भयभीतानां देवानां वै मयाभयम् । राक्षसोत्सादनं दत्तं तदेतदनुपाल्यते ॥ ७ ॥
प्राणैरपि प्रियं कार्यं देवानां हि सदा मया । सोऽहं वो निहनिष्यामि रसातलगतानपि ॥ ८ ॥
देवदेवं ब्रुवाणं तं रक्ताम्बुरुहलोचनम् । शक्त्या विभेद संक्रुद्धो राक्षसेन्द्रो भुजान्तरे ॥ ९ ॥
माल्यवद्भुजनिर्मुक्ता शक्तिर्घण्टाकृतस्वना । हरेरुरसि बभ्राज मेघस्थेव शतह्रदा ॥ १० ॥
ततस्तामेव चोत्कृष्य शक्तिं शक्तिधरप्रियः । माल्यवन्तं समुद्दिश्य चिक्षेपाम्बुरुहेक्षणः ॥ ११ ॥
स्कन्दोत्सृष्टेव सा शक्तिर्गोविन्दकरनिःसृता । काङ्क्षन्ती राक्षसं प्रायान्महोल्केवाञ्जनाचलम्॥ १२ ॥
सा तस्योरसि विस्तीर्णे हारभारावभासिते । औपतद्राक्षसेन्द्रस्य गिरिकूट इवाशनिः ॥ १३ ॥
तया भिन्नतनुत्राणः प्राविशद्विपुलं तमः । माल्यवान्पुनराश्वस्तस्तस्थौ गिरिरिवाचलः ॥ १४ ॥
ततः कालायसं शूलं कण्टकैर्बहुभिश्चितम् । प्रगृह्याभ्यहनद्देवं स्तनयोरन्तरे दृढम् ॥ १५ ॥

त्य अर्णव इव पृष्ठतः सन्निवृत्तः क्रोधात् संरक्तनयनः अत एव चलन्मौलिर्निशाचरो माल्यवान् पद्मनाभमिदं प्राह श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो०टी०–हन्यमान इत्यादि। पृष्ठतः अनुद्रुत्येति शेषः१-२

३] ति० टी०–योऽस्मान्हंसि स त्वं न जानीषे इत्यन्वयः । यथेतरः प्राकृतजन इव ॥ ३ ॥

रा० टी०–तदाकारमाह—नारायणेत्यादिभिः । अयुद्धमनसो भीतान् अस्मान् राक्षसान् इतरः पापात्मेव यस्मात्त्वं हंसि अतः क्षात्रधर्मं त्वं न जानीषे ॥ ३ ॥

गो० टी०–नारायणेति । यथोत्तरः क्षुद्रजन इव ॥३–५॥

४] ति० टी०–पराङ्मुखवधरूपं पापम् । स हन्ता इतो देहादूतः सन्स्वर्गं न लभते । 'स हन्ता न हतः इति पाठे हतः । दैवहत इत्यर्थः ॥ ४ ॥

रा० टी०–पराङ्मुखेति । पराङ्मुखवधं पापं यो गतः पराङ्मुखमनुप्राप्तस्सन् करोति स हन्ता स्वर्गं न लभते ॥ ४ ॥

५] ति० टी०–तत्तव बलमहं यथा पश्यामि तथा दर्शयेत्यर्थः ॥ ५ ॥

रा० टी०–युद्धेति । यदि ते युद्धश्रद्धा तर्हि यत्तव बलं तद्दर्शय अहं स्थितोस्मि पश्यामि च ॥ ५ ॥

६] अथ पराङ्मुखवधदोषः स्वप्रतिज्ञापालनप्रवृत्तस्य नास्तीत्याह—उवाचेत्यादि ॥ ६ ॥

रा० टी०–माल्यवन्तमिति । देवराजानुजो विष्णुः माल्यवन्तमुवाच ॥ ६ ॥

गो० टी०–पराङ्मुखवधोक्तदोषः स्वप्रतिज्ञापालनपरस्य नास्तीत्याह–माल्यवन्तमिति ॥ ६—१० ॥

७–१०] ति० टी०–मया भयभीतानां देवानामभयं वै दत्तम्,तदेतदभयदानं राक्षसोत्सादनं कुर्वता मयानुपाल्यते ७॥१०

रा० टी०–तदाकारमाह—युष्मत्त इति । राक्षसानामुत्सादनं यस्मिन् तद्देवानामभयं मया दत्तं तदेतत् अनुपाल्यते प्रतिज्ञापालनार्थमेव हन्यते इत्यर्थः ॥ ७ ॥

रा० टी०–प्राणैरिति । येन मया देवानां प्रियं प्राणैरपि कार्यं सोहं रसातलगतानपि वो युष्मान् निहनिष्यामि ॥ ८ ॥

रा० टी०–देवेति । राक्षसेन्द्रः देवदेवं विष्णुं भुजांतरे विभेद ॥ ९ ॥

रा० टी०–माल्यवदिति । माल्यवतो भुजात् निर्मुक्ता शक्तिः मेघस्था शतह्रदा विद्युदिव बभ्राज ॥ १० ॥

११–१२ ति० टी०–शक्तिधरो गुहः स प्रियो यस्य तस्य प्रियो वा ॥ ११ ॥ १२ ॥

रा० टी०–तत इति । शक्तिधरः गुहः प्रियो यस्य तस्य प्रियो वा विष्णुः तां माल्यवन्निर्मुक्तां शक्तिमुत्कृष्य माल्यवन्तं समुद्दिश्य चिक्षेप ॥ ११ ॥

रा० टी०–स्कन्देति । स्कन्देन उत्सृष्टेव गोविन्दकरनिस्सृता शक्तिः राक्षसं कांक्षन्ती हन्तुमिच्छन्ती सती अञ्जनाचलं महोल्केव प्रायात् ॥ १२ ॥

गो टी०–तत इति । तामेव स्ववक्षोलग्नामेव । शक्तिधरप्रियः छत्रह्मण्यप्रियः । माहेश्वराचैनं चिन्त्यम् ॥ ११ ॥ १२ ॥

१३] ति० टी०–हारभारो हारसमूहस्तेनावभासिते । गिरिकूटे गिरिश्रृङ्गे ॥ १३ ॥

रा० टी०–सेति । हारभारावभासिते राक्षसेन्द्रस्योरसि गिरिकूटे अशनिरिव अपतत् ॥ १३ ॥

गो० टी०–सेति । हारभासा मुक्ताहारकान्त्या । कूटं श्रृङ्गम् ॥ १३ ॥

१४–१५] तमो मोहम् ॥ १४ ॥ १५ ॥

---

१ त्यनुरेतर इति गो. पाठः । २ माहेन्द्रीति गो. पाठः । ३ अपतदिति गो. रा. पाठः । ४ काङ्क्षन्तीति गो. पाठः ।

तथैव रणरक्तस्तु मुष्टिना वासवानुजम् । ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः ॥ १६ ॥
ततोऽम्बरे महाञ्छब्दः साधुसाध्विति चोत्थितः । आहत्य राक्षसो विष्णुं गरुडं चाप्यताडयत् ॥ १७ ॥
वैनतेयस्ततः क्रुद्धः पक्षवातेन राक्षसम् । व्यपोहद्बलवान्वायुः शुष्कपर्णचयं यथा ॥ १८ ॥
द्विजेन्द्रपक्षवातेन द्रावितं दृश्य पूर्वजम् । सुमाली स्वबलैः सार्धं लङ्कामभिमुखो ययौ ॥ १९ ॥
पक्षवातबलोद्धूतो माल्यवानपि राक्षसः । स्वबलेन समागम्य ययौ लङ्कां ह्रिया वृतः ॥ २० ॥
एवं ते राक्षसा रामं हरिणा कमलेक्षण । बहुशः संयुगे भग्ना हतप्रवरनायकाः ॥ २१ ॥
अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं बलार्दिताः । त्यक्त्वा लङ्कां गता वस्तुं पातालं सहपत्नयः ॥ २२ ॥
सुमालिनं समासाद्य राक्षसं रघुसत्तम । स्थिताः प्रख्यातवीर्यास्ते वंशे सालकटङ्कटे ॥ २३ ॥
ये त्वया निहतास्ते तु पौलस्त्या नाम राक्षसाः । सुमाली माल्यवान्माली ये च तेषां पुरःसराः ॥ ॥
सर्वे एते महाभागा रावणाद्बलवत्तराः ॥ ॥ २४ ॥
न चान्यो राक्षसान्हन्ता सुरारीन्देवकण्टकान् । ऋते नारायणं देवं शङ्खचक्रगदाधरम् ॥ २५ ॥

रा० टी०–तयेति । तया शक्त्या भिन्नं तनुत्राणं यस्य भिन्नगात्र इत्यर्थः । माल्यवान् विपुलं तमो मोहं प्राविशत् पुनराश्वस्तस्तस्थौ तस्थौ ॥ १४ ॥

रा० टी०–तत इति । अम्बरे स्थितो माल्यवान् कालायसं शूलं प्रगृह्य देवं विष्णुं स्तनयोरभ्यहनत् अभ्यहन् ॥१५॥

गो० टी०–तयेति । तमः मोहः ॥ १४ ॥ १५ ॥

१६–१७] ति० टी०–रणरक्तो रणप्रियः । अपक्रान्तः पृष्ठतः पराङ्मुखः ॥ १६ ॥ १७ ॥

रा० टी०–तथेति । रणरक्तो निशाचरः मुष्टिनापि वासवानुजं ताडयित्वा धनुर्मात्रमपक्रान्तोऽभवदिति शेषः ॥१६॥

रा० टी०–तत इति । ततोऽनन्तरमम्बरे साधुसाध्विति महान् शब्द उत्थितः राक्षसानामिति शेषः । राक्षसस्तु विष्णुं गरुडं चाहत्य अताडयत् ॥ १७ ॥

गो० टी०–तथेति । रणे रक्तः रणप्रियः । मुष्टिना च ताडयित्वा अपक्रान्तः । पृष्ठत इति शेषः ॥ १६ ॥ १७ ॥

१८] ति० टी०–वायुः शुष्कपर्णचयं यथा व्यपोहति, तथा राक्षसं पक्षवातेन व्यपोहयत् ॥ १८ ॥

रा० टी०–वैनतेय इति । वैनतेयः पक्षवातेन राक्षसं व्यपोहत् अचालयत् तत्र दृष्टान्तः वायुः शुष्कपर्णचयं यथा१८

गो० टी०–वैनतेय इति । वायुः शुष्कपर्णं यथा व्यपोहति तथा पक्षपातेन राक्षसं व्यपौहत् ॥ १८ ॥

१९–२१] ति० टी०–दृश्य दृष्ट्वा ॥ १९–२१ ॥

रा० टी०–द्विजेन्द्रमिति । सुमाली द्विजेन्द्रपक्षवातेन द्रावितं पूर्वजं दृश्य दृष्ट्वा लंकामभिमुखस्सन् ययौ ॥ १९ ॥

रा० टी०–पक्षेति । पक्षवातबलेनोद्धूतः अत एव ह्रिया वृतो माल्यवानपि स्वबलेन समागम्य लंकां ययौ ॥ २० ॥

रा० टी०–एवमिति । एवं बहुशो राक्षसा हरिणा भग्नाः ॥ २१ ॥

गो० टी०–द्विजेन्द्रेति । दृश्य दृष्ट्वा ॥ १९—२१ ॥

२२] ति०टी०–सहपत्नयः सस्त्रीकाः ॥ २२ ॥

रा० टी०–अशक्नुवन्त इति । विष्णुं प्रति योद्धुमशक्नुवन्तस्सहपत्नयः सपत्नीकाः राक्षसाः लंकां त्यक्त्वा पातालं वस्तुं गताः ॥ २२ ॥

गो० टी०–अशक्नुवन्त इति । सहपत्नयः सस्त्रीका इत्यर्थः ॥ २२ ॥

२३] ति० टी०–सालकटङ्कटे सालकटङ्कटा माल्यवदादेः पितामही विद्युत्केशपत्नी तदीये वंशे वृद्धाच्छाभाव आर्षः । सुमालिनं समासाद्याश्रित्य राक्षसाः स्थिताः ॥ २३ ॥

रा० टी०–सुमालिनमिति । सालकटंकटे सालकटङ्कटा माल्यवत्प्रभृतीनां पितामही विद्युत्केशपत्नी तस्या अयं तस्मिन् वंशे विद्यमानं सुमालिनम् समासाद्य प्रख्यातवीर्यास्ते विष्णुपराभूता राक्षसाः स्थिताः ॥ २३ ॥

गो० टी०–सुमालिनमिति । सालकटङ्कटे सालकटङ्कटा माल्यवदादीनां पितामही विद्युत्केशपत्नी तस्याः संबन्धी सालकटङ्कटः तस्मिन्वंशे प्रख्यातवीर्याः वृद्धाच्छाभाव आर्षः ॥ २३ ॥

२४] ति० टी०–पौलस्त्याः पुलस्त्यवंश्याः त्वया ये कुम्भकर्णादयो हतास्तेभ्यस्तथा रावणाच्च माल्यवदादयो बलवत्तराः ॥ २४ ॥

रा० टी०–ये इति । रावणात् रावणापराधाद्धेतोः एते पौलस्त्या राक्षसाः रावणप्रभृतयस्त्वया निहतास्ते ये माल्यवत्प्रभृतयः ये च तेषां पुरस्सरास्तेभ्यो बलवत्तरा अभवन्निति शेषः । सार्द्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०–य इति । ये पौलस्त्या रावणादयो निहतास्तेभ्यः रावणाच्च माल्यवदादयो बलवत्तराः ॥ २४ ॥

२५] ति० टी०–तर्हि किं मे प्राशस्त्यं भवद्भिरुच्यते–न

१ तेनेति गो. पाठः । २ भयेति गो. पाठः । ३ सर्वे तेभ्यो. महाभागेति गो. पाठः ।

भवान्नारायणो देवश्चतुर्बाहुः सनातनः । राक्षसान्हन्तुमुत्पन्नो ह्यजय्यः प्रभुरव्ययः ॥ २६ ॥
नष्टधर्मव्यवस्थानां काले काले प्रजाकरः । उत्पद्यते दस्युवधे शरणागतवत्सलः ॥ २७ ॥
एषा मया तव नराधिप राक्षसानामुत्पत्तिरद्य कथिता सकला यथावत् ।
भूयो निबोध रघुसत्तम रावणस्य जन्मप्रभावमतुलं ससुतस्य सर्वम् ॥ ॥ २८ ॥
चिरात्सुमाली व्यचरद्रसातलं स राक्षसो विष्णुभयार्दितस्तदा ।
पुत्रैश्च पौत्रैश्च समन्वितो बली ततस्तु लङ्कामवसद्धनेश्वरः ॥ ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डेऽष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।

ततः सुमालिनो दुहितरि कैकस्यां रावणकुम्भकर्णयोरीश्वरभक्ताग्रेसरस्य विभीषणस्य शूर्पणखाभिधतनयायाश्चोत्पत्तिः तत्र रावणकुम्भकर्णौ जननीप्रेरितौ घोरं तपश्चरतुः तुष्टाचतुर्मुखाज्जयावहान्वरॉल्लेभाते

कस्यचित्त्वथ कालस्य सुमाली नाम राक्षसः । रसातलान्मर्त्यलोकं सर्वं वै विचचार ह ॥ १ ॥
नीलजीमूतसंकाशस्तप्तकाञ्चनकुण्डलः । कन्यां दुहितरं गृह्य विना पद्ममिव श्रियम् ॥ २ ॥
राक्षसेन्द्रः स तु तदा विचरन्वै महीतले । तदापश्यत्स गच्छन्तं पुष्पकेण धनेश्वरम् ॥ ३ ॥

चान्य इति। तदपि प्राशस्त्यं तवैवेति भावः । राक्षसान्हन्तारं । 'न लोक–' इति षष्ठीनिषेधः । देवकण्टकान् देवपीडाकरान्देवशत्रून् । यस्त्वं हन्ता स नारायणमृते नारयणं विनान्यो न केवलमनुष्यो न ॥ २५ ॥

रा० टी०–नेति। नारो नीतिस्तेनैव अयते गच्छतीति नारायणस्तं मर्यादापुरुषोत्तममित्यर्थः । तथाहि न्याय्यात्पथः प्रचलनं यतो नैवास्य विद्यते अतो नारायणो रामो विद्वद्भिः परिकीर्तित इत्याप्तवाक् देवं नित्यविहारिणम् शंखचक्रगदाधरम् शंखचक्रगदास्सन्ति अस्येति स नारायणो धरो यस्मात् तं विष्णोरुत्तममित्यर्थः । ऋते विना अन्यः राक्षसान् साकेतावतीर्णपौलस्त्यरक्षसः हन्ता न ॥ २५ ॥

गो० टी०–तर्हि किं मे प्राशस्त्यं भवद्भिरुच्यत इति शङ्कायां तत्प्राशस्त्यमपि तवैवेत्याह–न चान्य इति। राक्षसान्हन्तेति । स त्वम् ॥ २५—२९ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टमः सर्गः ॥ ८

२६–२९] ति० टी०–उक्तमेवार्थमन्वयमुखेनाह—भवानिति। उत्पन्नो मायया गृहीतदेहः ॥ २६ ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे अष्टमः सर्गः ॥ ८ ॥

रा० टी०–नन्वं स क इत्यत आह—भवानिति । नारायणो मर्यादापुरुषोत्तमो देवो नित्यविहारी चतुर्बाहुः । चतुरोऽर्थादीन् वाहयति आश्रितेभ्यः प्रापयतीति सः सनातनो नित्यः अजय्यः सर्वैर्जेतुमशक्यः प्रभुः नियन्तुरपि नियन्ता अव्ययः सर्वविकारशून्यः भवानेव राक्षसान् राक्षसत्वं हन्तुं निवर्तयितुमुत्पन्नः प्रादुर्भूतः ॥ २६ ॥

रा० टी०–द्वयोः प्रादुर्भावो यथाकालं सर्वदैवेति बोधयन्नाह—नष्टेति । नष्टा धर्मव्यवस्था यैस्तेषां रक्षसां काले विनाशसमये काले भवदुपदेशे सति प्रजाकरो विष्णुः उत्पद्यते दस्युवधे चोरप्रायसाकेतावतीर्णप्रतापिरावणविघातार्थं शरणागतवत्सलो भवान् उत्पद्यते ॥ २७ ॥

रा० टी०–एषेति। रावणस्य जन्म प्रभावं च निबोध वर्णयामीत्यर्थः ॥ २८ ॥

रा० टी०–प्रतिज्ञामाह—चिरादिति। ततो रसातलगमनानन्तरं धनेश्वरः कुबेरः अवसत् ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टमः सर्गः ॥ ८ ॥

१] ति० टी०–रसातलादिति। निसृत्येति शेषः॥१॥

२–३] ति० टी०–कन्यामविवाहिताम्। विना पद्मं पद्मं त्यक्त्वा स्थिताम् ॥ २ ॥ ३ ॥

रा० टी०–सुमालिनो वृत्तान्तमाह—कस्य चिदित्यादिभिः। कस्यचित्कालस्य अथानन्तरं सुमाली राक्षसः कन्यां कमनीयां दुहितरं गृह्य गृहीत्वा रसातलात् आगम्य मर्त्यलोकं विचचार श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

रा० टी०–राक्षसेन्द्र इति। महीतले विचरन् राक्षसेन्द्रः स सुमाली महीतले विचरन्सन्नास्तेति शेषः । अर्धं पृथक् तदेति । पितरं विश्रवसं द्रष्टुं गच्छन्तं धनेश्वरं स सुमाली अपश्यत् ॥ ३ ॥

१ स्थातेति गो. पाठः । २ तलमिति गो. पाठः ।

गच्छन्तं पितरं द्रष्टुं पुलस्त्यतनयं विभुम् । तं दृष्ट्वामरसंकाशं गच्छन्तं पावकोपमम् ॥ ४ ॥
रसातलं प्रविष्टः सन्मर्त्यलोकात्सविस्मयः । इत्येवं चिन्तयामास राक्षसानां महामतिः ॥ ५ ॥
किं कृत्वा श्रेय इत्येवं वर्धेमहि कथं वयम् । नीलैर्जीमूतसंकाशस्तप्तकाञ्चनकुण्डलः ॥ ६ ॥
राक्षसेन्द्रः स तु तदा चिन्तयत्सुमहामतिः । अथाब्रवीत्सुतां रक्षः कैकसीं नाम नामतः ॥ ७ ॥
पुत्रि प्रदानकालोऽयं यौवनं व्यतिवर्तते । प्रत्याख्यानाच्च भीतैस्त्वं न वरैः परिगृह्यसे ॥ ८ ॥
तत्कृते च वयं सर्वे यन्त्रिता धर्मबुद्धयः । त्वं हि सर्वगुणोपेता श्रीः साक्षादिव पुत्रिके ॥ ९ ॥
कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम् । न ज्ञायते च कः कन्यां वरयेदिति कन्यके ॥१०॥
मातुः कुलं पितृकुलं यत्र चैव च दीयते । कुलत्रयं सदा कन्यां संशये स्थाप्य तिष्ठति ॥११॥
सा त्वं मुनिवरं श्रेष्ठं प्रजापतिकुलोद्भवम् । भज विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् ॥१२॥
ईदृशास्ते भविष्यन्ति पुत्राः पुत्रि न संशयः । तेजसा भास्करसमो यादृशोऽयं धनेश्वरः ॥१३॥
सा तु तद्वचनं श्रुत्वा कन्यका पितृगौरवात् । तत्र गत्वा च सा तस्थौ विश्रवा यत्र तप्यते ॥१४॥

गो० टी०–कस्यचिदिति । विना पद्यं पद्यं त्यक्त्वा स्थितम् ॥ १—९ ॥

४] ति० टी०–अमरसंकाशमृषिपुत्रत्वेऽपि प्राप्तदेवरूपम ४

५–७] ति० टी०–तं दृष्ट्वा पुनारसातलं प्रविष्ट इत्यर्थः । 'रसातलात्प्रविष्टः सन्मर्त्यलोकम् ' इति पाठे उक्तानुवाद एवायम् इत्येवं चिन्तयामासेत्यन्वयः ॥ ५ ॥ ७ ॥

रा० टी०–तमिति । राक्षसानां मध्ये महामतिः सुमाली गच्छन्तं तं धनेश्वरं दृष्ट्वा मर्त्यलोकात् रसातलं प्रविष्टस्सन् इत्येवं चिन्तयामास सार्द्धश्लोक एकान्वयी ॥ ४ ॥ ५ ॥

रा० टी०–चिन्ताकारमाह—किमिति । राक्षसेन्द्रः किं कृत्वा एवं कुबेरसदृशं श्रेयः प्राप्नुयाम इति शेषः । कथं वा वर्द्धेमहि इत्यचिन्तयत् सार्द्धश्लोक एकान्वयी ॥ ६ ॥

रा० टी०–अथेति । कैकसीं नाम पुत्रीं नामतः प्रसिद्धमब्रवीत् अर्द्धं पृथक् ॥ ७ ॥

गो० टी०–किंकृतमिति । राक्षसानां श्रेयः किंकृतं स्यात् केनोपायेन कृतं स्यात् । कथं वयं वर्धेमहीत्येवं चिन्तयामासेति योजना ॥ ६ ॥

८] ति० टी०–प्रत्याख्यानाद्भीतैः प्रत्याख्यानशङ्कया भीतैर्न वरैर्न प्रतिगृह्यसे याच्यसे। यद्वा प्रत्याख्यानभीतैरस्माभिस्त्वं वरैः परिगृह्यसे प्रतिग्रहं न कार्यसे ॥ ८ ॥

रा० टी०–तदाकारमाह—पुत्रीत्यादिभिः। यतस्ते यौवनं व्यतिवर्तते अतोऽयं प्रदानकालः विवाहसमयः ननु समयप्राप्तौ कश्चिन्मां वरिष्यत्येवेत्यत आह प्रत्याख्यानात् अनङ्गीकारसंशयाद्भीतैर्वरैः त्वं न परिगृह्यसे ॥ ८ ॥

गो० टी०–पुत्रीति । प्रत्याख्यानात् भीतैरस्माभिस्त्वं वरैर्न प्रतिगृह्यसे । प्रतिग्रहं न प्राप्तोपीत्यर्थः ॥ ७ ॥

९] ति० टी०–त्वत्कृते तव विशिष्टवरलाभार्थं । यन्त्रिताः कृतप्रयासाः । धर्मबुद्धयो विवाहधर्मसिद्धिनिमित्तं विचारवन्तः९

रा० टी०–त्वदिति । धर्मबुद्धयो वयं त्वत्कृते यन्त्रिताः संकुचिताः हि यतः त्वं सर्वगुणोपेता अत एव श्रीरिवासि एतेन त्वत्सदृशः पतिर्दुर्लभ इति द्योतितम् ॥ ९ ॥

गो० टी०–त्वत्कृत इति । यन्त्रिताः कृतप्रयासाः । धर्मबुद्धयः विवाहधर्मनिमित्तचिन्तावन्तः ॥ ८ ॥

१०] ति० टी०–कन्यापितृत्वस्य दुःखत्वमेवाह–न ज्ञायत इति । को वरयेदिति न ज्ञायते इति दुःखम् ॥ १० ॥

रा० टी०–कन्येति । कः कन्यां वरयेत् इति न ज्ञायते अतो मानकाङ्क्षिणां कन्यापितृत्वं दुःखं दुःखहेतुः ॥ १० ॥

गो० टी०–कन्यापितृत्वस्य दुःखत्वमेव प्रदर्शयति–न ज्ञायत इति ॥ ९ ॥

११] ति० टी०–वरणानन्तरमपि दुखःमेवेत्याह—मातुः कुलमिति । संशये स्थाप्य तिष्ठति । कथमस्याश्चारित्रभ्रंशो न भविष्यतीत्येवं कुलत्रयं चिन्ताक्रान्तं भवतीत्यर्थः॥११॥

रा० टी०–सर्वत्र विदृण्वन्नाह—मातुरिति । यत्र यस्मिन् दीयते तच्च कुलत्रयं संशये कथमस्यास्सदाचारो निर्विघ्स्यतीति विचिकित्सायामित्यर्थः । स्थाप्य स्थापयित्वा तिष्ठति ॥ ११ ॥

गो० टी०–अथ वरणानन्तरमपि विशिष्य दुःखहेतुत्वं कन्याया इत्याह—मातुरिति । संशये स्थाप्य तिष्ठतीति । कथमस्याश्चारित्रभ्रंशो न भविष्यतीति कुलत्रयं चिन्ताकुलमेव सदा भवतीत्यर्थः ॥ १० ॥

१२] ति० टी०–सा त्वं विश्रवसं भज सेवस्व । सेवनेन च भर्तृत्वेन वरय ॥ १२ ॥

रा० टी०–सेति । विश्रवसं त्वं स्वयं वरय भज च १२

१३–१४] ति० टी०–कीदृशास्तत्राह—यादृशोऽयं धनेश्वर इति ॥ १३ ॥ १४ ॥

रा० टी०–ईदृशा इति । ते पुत्राः ईदृशा भविष्यन्ति ननु

१ स्वच्छन्दमिति गो.पाठः। २ तपनेति गो. पाठः। ३ कृतमिति गो.पाठः। ४ पद्यमिदं गो. पु. नास्ति । ५ प्रतीति गो.पाठः । ६ प्रेति गो. पाठः ।

एतस्मिन्नन्तरे राम पुलस्त्यतनयो द्विजः । अग्निहोत्रमुपातिष्ठच्चतुर्थ इव पावकः ॥ १५ ॥
अविचिन्त्य तु तां वेलां दारुणां पितृगौरवात् । उपसृत्याग्रतस्तस्य चरणाधोमुखी स्थिता ॥ १६ ॥
विलिखन्ती मुहुर्भूमिमङ्गुष्ठाग्रेण भामिनी । स तु तां वीक्ष्य सुश्रोणीं पूर्णचन्द्रनिभाननाम् ॥ १७ ॥
अब्रवीत्परमोदारो दीप्यमानां स्वतेजसा । भद्रे कस्यासि दुहिता कुतो वा त्वमिहागता
किं कार्यं कस्य वा हेतोस्तत्त्वतो ब्रूहि शोभने ॥ ॥ १८ ॥
एवमुक्ता तु सा कन्या कृताञ्जलिरथाब्रवीत् । आत्मप्रभावेण मुने ज्ञातुमर्हसि मे मतम् ॥ १९ ॥
किं तु मां विद्धि ब्रह्मर्षे शासनात्पितुरागताम् । कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि ॥ २० ॥
स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह । विज्ञातं ते मया भद्रे कारणं यन्मनोगतम् ॥ २१ ॥
सुताभिलाषो मत्तस्ते मत्तमातंगगामिनि । दारुणायां तु वेलायां यस्मात्त्वं मामुपस्थिता ॥ २२ ॥

कीदृशा इत्यत आह यादृशोऽयं धनेश्वरः तादृशः तेजसा भास्करसमो भविष्यति वचनविपरिणामेनात्रापि अन्वयः किञ्च तेजसा भास्करसमो यादृशोऽयं धनेश्वरः ईदृशास्ते पुत्रा भविष्यन्ति ॥ १३ ॥

रा० टी०–सेति । पितृगौरवात् हेतोः कन्यका यत्र विश्रवास्तप्यते तत्र गत्वा तस्थौ ॥ १४ ॥

१५] ति० टी०–उपातिष्ठत् । प्रदोषेऽग्निहोत्रं कृतवानित्यर्थः ॥ १५ ॥

रा० टी०–एतस्मिन्निति । पुलस्त्यतनयः अग्निहोत्रमुपातिष्ठत् ॥ १५ ॥

गो० टी०–एतस्मिन्निति । उपातिष्ठत् प्रदोषे अग्निहोत्रं कृतवानित्यर्थः ॥ १४ ॥

१६] ति० टी०–दारुणां तां वेलाम् । प्रदोषकालमित्यर्थः । पितृगौरवादुपसृत्य महाबलपराक्रमत्वेन ख्यातस्य सुमालिनः पुत्री, अहमतो न प्राकृतेनर्षिणानादरणीयेत्याशयेनेत्यर्थः । चरणमवलोकयदयः प्रवर्तितं मुखं यस्याः सा चरणाधोमुखी स्थिता ॥ १६ ॥

रा० टी०–अविचिन्त्येति । तां प्रदोषाभिधां दारुणां वेलामविचिन्त्य तस्य विश्रवसोऽग्रत उपसृत्य चरणाधोभागे मुखं यस्याः सा ऋषिचरणमवलोकयन्तीत्यर्थः । अंगुष्ठाग्रेण भूमिं विलिखन्ती सती स्थिताभवदिति शेषः सार्द्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०–अविचिन्त्येति । पितृगौरवात् पितरि बहुमानात् चरणाधोमुखी चरणसमीपाधोमुखी । विलिखन्तीति चिन्तानुभावः ॥ १५ ॥

१७] ति० टी०–अङ्गुष्ठाग्रेण मुहुर्भूमिं विलिखन्त्यधोमुखी स्थितेति संबन्धः ॥ १७ ॥

रा० टी०–स इति । स विश्रवा तां कैकसीं वीक्ष्य अब्रवीत् ॥ १७ ॥

गो० टी०–सत्विति । कुतः कस्मादेशात् । किं कार्यं मया कर्तव्यं कस्य हेतोः कस्मै प्रयोजनाय ॥ १६ ॥ १७ ॥

१८] ति० टी०–किं कार्यमस्माभिरनुष्ठेयं त्वं कस्य हेतोः किंनिमित्तमिहागता ॥ १८ ॥

रा० टी०–तदाकारमाह—भद्र इत्यादिभिः । हे भद्रे ! त्वं कस्य दुहितासि कुतो हेतोस्त्वमिहागता किं कार्यं कर्तव्यमस्माभिरिति शेषः इति तत्त्वतस्त्वं ब्रूहि ॥ १८ ॥

१९] ति० टी०–मे मतमभिमतं भर्त्रेपेक्षालक्षणम् । तस्य लज्जावशात्स्ववाचा कथनमनुचितमिति भावः ॥ १९ ॥

रा० टी०–एवमिति । एवमुक्ता कन्या अब्रवीत् तदाकारमाह—आत्मनस्स्वस्य प्रभावेण तपोबलेन मे मतमभिप्रायं ज्ञातुमर्हसि ॥ १९ ॥

गो० टी०–एवमिति । मे मतं स्वदर्तृकत्वाभिलाषित्वम् ॥ १८ ॥

२०] ति० टी०–स्ववक्तव्यांशमाह—किं त्विति ॥ २० ॥

रा० टी०–यत्स्वेन वक्तव्यं तदाह—किमिति । नाम्ना कैकसी या नाम प्रसिद्धा तां मां पितुरादेशनात् आज्ञातः । आगतां विद्धि शेषं त्वं ज्ञातुमर्हसि ॥ २० ॥

गो० टी०–तच्च वक्तुं लज्जावशादनुचितमिति सूचयित्वा वक्तुमुचितमाह–किन्त्विति ॥ १९ ॥

२१] ति० टी०–कारणमागमनकारणम् ॥ २१ ॥

रा० टी०–स इति । स कैकस्योक्तो मुनिर्विश्रवा ध्यानं गत्वा कृत्वेत्यर्थः । एतद्वाक्यमुवाच तदाकारमाह—ते मनोगतं कारणमागमनहेतुर्मया विज्ञातम् ॥ २१ ॥

गो० टी०–स त्विति । कारणमागमनकारणम् ॥ २० ॥

२२] ति० टी०–तदेवाह—सुतेति ॥ २२ ॥

रा० टी०–स्वविज्ञातमेवाह—सुतेति । मत्तस्ते सुताभिलाषोऽस्तीति शेषः । अहं पृथक्—दारुणायामिति । यस्मात् त्वं दारुणायां वेलायामुपस्थिता तस्मात् यादृशान् सुतान् जनयिष्यसि तादृशान् शृणु ॥ २२ ॥

गो० टी०–तदेवाह–सुतेति ॥ २१ ॥

शृणु तस्मात्सुतान्भद्रे यादृशाञ्जनयिष्यसि । दारुणान्दारुणाकारान्दारुणाभिजनप्रियान् ॥ २३ ॥
प्रसविष्यसि सुश्रोणि राक्षसान्क्रूरकर्मणः । सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः ॥ २४ ॥
भगवन्नीदृशान्पुत्रांस्त्वत्तोऽहं ब्रह्मवादिनः । नेच्छामि सुदुराचारान्प्रसादं कर्तुमर्हसि ॥ २५ ॥
कन्यया त्वेवमुक्तस्तु विश्रवा मुनिपुंगवः । उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम् ॥ २६ ॥
पश्चिमो यस्तव सुतो भविष्यति शुभानने । मम वंशानुरूपः स धर्मात्मा च न संशयः ॥ २७ ॥
एवमुक्ता तु सा कन्या राम कालेन केन चित् । जनयामास बीभत्सं रक्षोरूपं सुदारुणम् ॥ २८ ॥
दशग्रीवं महादंष्ट्रं नीलाञ्जनचयोपमम् । ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम् ॥ २९ ॥
तस्मिञ्जाते ततस्तस्मिन्सज्वालकवलाः शिवाः । क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रमुः ॥ ३० ॥
ववर्ष रुधिरं देवो मेघाश्च खरनिःस्वनाः । प्रवभौ न च सूर्यो वै महोल्काश्चापतन्भुवि ॥ ३१ ॥
चकम्पे जगती चैव ववुर्वाताः सुदारुणाः । अक्षोभ्यः क्षुभितश्चैव समुद्रः सरितां पतिः ॥ ३२ ॥
अथ नामाकरोत्तस्य पितामहसमः पिता । दशग्रीवः प्रसूतोऽयं दशग्रीवो भविष्यति ॥ ३३ ॥
तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः । प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते ॥ ३४ ॥
ततः शूर्पणखा नाम संजज्ञे विकृताऽनना । विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः ॥ ३५ ॥

२३–२४] ति० टी०–दारुणान्क्रूरस्वभावान्दारुणाभिजनाः क्रूरबन्धवो राक्षसरूपाः प्रिया येषां तान् ॥ २३ ॥ २४ ॥

रा० टी०–दारुणानिति । क्रूरकर्मणः अत एव दारुणान् क्रूरस्वभावान् अत एव दारुणाभिजनप्रियान् दारुणाकारान् राक्षसान् प्रसविष्यसि जनयिष्यसि ॥ २३ ॥

रा० टी०–सेति । सा कैकसी अब्रवीत् अर्द्धं पृथक् २४॥

गो० टी०–शृण्विति । दारुणान् क्रूरस्वभावान् दारुणाकारान् क्रूरवेषान् दारुणाभिजनप्रियान् दारुणाभिजने क्रूरबन्धौ राक्षसरूपे प्रियं येषां तान् ॥ २३—२८ ॥

२५–२६] ति० टी०–भगवन्ब्रह्मवादिनस्त्वत्त ईदृशान्पुत्रान्नेच्छामि, अत उत्तमपुत्रार्थं प्रसादं कर्तुमर्हसीत्यन्वयः २५।२६

रा० टी०–तदाकारमाह—ईदृशान् । दुराचारान् पुत्रान् त्वत्तोऽहं नेच्छामि अतः प्रसादं कर्तुमर्हसि ॥ २५ ॥

रा० टी०–कन्ययेति । विश्रवाः कैकसीं भूय उवाच २६

२७–२९] ति० टी०–पश्चिमः कनिष्ठः स मम वंशानुरूपो धर्मात्मा चेति न संशयः ॥ २७–२९ ॥

रा० टी०–तदाकारमाह—पश्चिम इति । पश्चिमः कनिष्ठः तव सुतः विभीषण इत्यर्थः । मम वंशानुरूपो धर्मात्मा भविष्यति ॥ २७ ॥

रा० टी०–एवमिति । एवमुक्ता सा कैकसी केन चित् कालेन बीभत्सं दारुणं रक्षोरूपं दशग्रीवं जनयामास अर्द्धचतुष्टयमेकान्वयि ॥ २८ ॥ २९ ॥

३०–३२] ति० टी०–सज्वालकवला ज्वालारूपास्यान्तर्गतकवलसहिताः ॥ ३०–३२ ॥

रा० टी०–तस्मिन्निति । तस्मिन् क्रूरत्वसंपादके काले तस्मिन् रावणे जाते सति सज्वालकवलाः ज्वालारूपमुखान्तर्गतकवलविशिष्टाः शिवाः क्रव्यादा गृध्रादयश्च अपसव्यानि मण्डलानि प्रचक्रमुः ॥ ३० ॥

गो० टी०–तस्मिन्निति । सज्वालकवलाः ज्वालारूपास्यान्तर्गतकवलाः शिवाः क्षुद्रजम्बुकाः ॥ २९ ॥

रा० टी०–ववर्षेति । देवः रुधिरं ववर्ष मेघाः खरनिःस्वनाः अभवन्निति शेषः सूर्यः न प्रबभौ महोल्काश्च भुवि अपतन् ॥ ३१ ॥

रा० टी०–चकम्प इति । अक्षोभ्योऽपि समुद्रः क्षुभितो भवतीति शेषः ॥ ३२ ॥

गो० टी०–ववर्षेति । देवः पर्जन्यदेवः ॥ ३०—३२ ॥

३३–३५] ति० टी०–दशग्रीव इति । कामरूपत्वाच्चान्तःपुरादावेकवक्त्रत्वं द्विभुजत्वं चास्येति बोध्यम् ॥ ३३–३५ ॥

रा० टी०–अथेति । तस्य दशग्रीवस्य पिता यतोऽयं दशग्रीवः प्रसूतः अतो दशग्रीवः तन्नामा भविष्यति इति नामाकरोत् ॥ ३३ ॥

रा० टी०–तस्येति । यस्य प्रमाणात् शरीरवैपुल्यात् विपुलमधिकं प्रमाणं वैपुल्यं न विद्यते स कुंभकर्णः तस्य रावणस्यानन्तरं जातः ॥ ३४ ॥

रा० टी०–तत इति । ततः कुम्भकर्णजननानन्तरं शूर्पणखा नाम संजज्ञे विभीषणस्तु पश्चिमः कनिष्ठः सुतोऽभवदिति शेषः ॥ ३५ ॥

गो० टी०–तस्य त्विति । यस्य प्रमाणाद्विपुलं प्रमाणं नेह विद्यते नैवास्ति । प्रमाणभूतेष्विति शेषः ॥ ३३—३६ ॥

१ भविष्यतीति गो० पाठः । २ तु तत्काले इति गो० पाठः ।

तस्मिञ्जाते महासत्त्वे पुष्पवर्षं पपात ह । नभःस्थाने दुन्दुभयो देवानां प्राणदंस्तथा ॥
वाक्यं चैवान्तरिक्षे च साधु साध्विति तत्तदा ॥ ॥ ३६ ॥
तौ तु तत्र महारण्ये वर्धाते महौजसौ । कुम्भकर्णदशग्रीवौ लोकोद्वेगकरौ तदा ॥ ३७ ॥
कुम्भकर्णः प्रमत्तस्तु महर्षीन्धर्मवत्सलान् । त्रैलोक्ये[1] नित्यासंतुष्टो भक्षयन्विचचार ह ॥ ३८ ॥
विभीषणस्तु धर्मात्मा नित्यं धर्मे[2]व्यवस्थितः । स्वाध्यायनियताहार उवास विजितेन्द्रियः ॥ ३९ ॥
अथ वैश्रवणो देवस्तत्र कालेन केन चित् । आगतः पितरं द्रष्टुं पुष्पकेण धनेश्वरः ॥ ४० ॥
तं दृष्ट्वा कैकसी तत्र ज्वलन्तमिव तेजसा । आगम्य राक्षसी तत्र दशग्रीवमुवाच ह ॥ ४१ ॥
पुत्र वैश्रवणं पश्य भ्रातरं तेजसा वृतम् । भ्रातृभावे समे चापि पश्यात्मानं त्वमीदृशम् ॥ ४२ ॥
दशग्रीव तथा यत्नं कुरुष्वामितविक्रम । यथा त्वमपि मे पुत्र भवेर्वैश्रवणोपमः ॥ ४३ ॥
मातुस्तद्वचनं श्रुत्वा दशग्रीवः प्रतापवान् । अमर्षमतुलं लेभे प्रतिज्ञां चाकरोत्तदा ॥ ४४ ॥
सत्यं ते प्रतिजानामि भ्रातृतुल्योऽधिकोऽपि वा । भविष्याम्योजसा चैव संतापं त्यज हृद्गतम् ॥ ४५ ॥
ततः क्रोधेन तेनैव दशग्रीवः सहानुजः । चिकीर्षुर्दुष्करं कर्म तपसे धृतमानसः ॥ ४६ ॥

३६] ति० टी०–अन्तरिक्षे साधुसाध्विति वाक्यं तदासीदिति शेषः ॥ ३६ ॥

रा० टी०–तस्मिन्निति । तस्मिन् विभीषणे जाते सति पुष्पवर्षं पपात देवानां दुन्दुभयः प्राणदंश्च अन्तरिक्षे साधु साध्विति वाक्यमश्रूयतेति शेषः सार्द्धश्लोक एकान्वयी ॥३६॥

३७] ति० टी०–तत्र महारण्ये पितुर्विश्रवस आश्रमारण्ये ॥ ३७ ॥

रा० टी०–ताविति । कुम्भकर्णदशग्रीवौ वर्द्धाते ॥३७॥

गो० टी०–ताविति । तत्र महारण्ये पितुराश्रमारण्ये ॥ ३७ ॥ ३८ ॥

३८] ति० टी०–नित्यासंतुष्टः कियदपि भक्षणे न कदाचिदपि संतुष्टः ॥ ३८ ॥

रा० टी०–कुम्भकर्ण इति । नित्यासन्तुष्टः कुम्भकर्णः त्रैलोक्ये महर्षीन् भक्षयन्सन् विचचार ॥ ३८ ॥

३९–४१] ति० टी०–स्वाध्यायनियताहारः । स्वाध्यायनियतो नियताहारश्चेत्यर्थः ॥ ३९–४१ ॥

रा० टी०–विभीषण इति । धर्मात्मा विभीषणस्तु स्वाध्यायाय वेदाध्ययनाय नियतः आहारो यस्य विजितानि इन्द्रियाणि येन तादृशश्सन् उवास ॥ ३९ ॥

रा० टी०–अथेति । वैश्रवणः कुबेरः केन चित्कालेन पितरं द्रष्टुं पुष्पकेणागतः ॥ ४० ॥

रा० टी०–तमिति । कैकसी राक्षसी राक्षसकन्या तेजसा ज्वलन्तमिव तं धनेशं दृष्ट्वा दशग्रीवमुवाच ॥ ४१ ॥

गो० टी०–विभीषण इति । स्वाध्यायं नियतम् आहारः अहरहरिति स्वाध्यायनियताहारः ॥ ३९—४१ ॥

४२] ति० टी०–आत्मानमीदृशं पश्य । कुबेरवद्दिव्यवैभवरहितं प्राकृतरक्षोरूपमित्यर्थः ॥ ४२ ॥

रा० टी०–तदाकारमाह–पुत्रमिति । समे तुल्येऽपि भ्रातृभावे भ्रातॄणां धर्मे तेजसा वृतं भ्रातरं वैश्रवणमीदृश ऐश्वर्यहीनमात्मानं च पश्य ॥ ४२ ॥

गो० टी०–पुत्रेति । आत्मानमीदृशं कुबेरवद्दिव्यवैभवरहितम् । दरिद्रमित्यर्थः ॥ ४२—४८ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने नवमः सर्गः ॥ ९ ॥

४३–४५] ति० टी०–तस्मादृशग्रीवेति ॥ ४३–४५ ॥

रा० टी०–दशग्रीवेति । यथा त्वमपि वैश्रवणोपमो भवेः तथा यत्नं कुरुष्व ॥ ४३ ॥

रा० टी०–मातुरिति । दशग्रीवः अमर्षं लेभे प्रतिज्ञामकरोच्च ॥ ४४ ॥

रा० टी०–तदाकारमाह–सत्यमिति । भ्रातृतुल्योऽधिकोवाहं भविष्यामि इति सत्यं ते प्रतिजानामि अतस्संतापं त्यज ॥ ४५ ॥

४६] ति० टी०–तपसे तपोऽर्थम् । धृतमानसो निश्चितान्तःकरणः ॥ ४६ ॥

रा० टी०–तत इति । सहानुजो दशग्रीवः क्रोधेन दुष्करं कर्म चिकीर्षुस्सन् तपसे धृतमानसोऽभवदिति शेषः ॥ ४६ ॥

१ तदेति गो. पाठः । २ त्रैलोक्यं भक्षयन्नित्यासन्तुष्ट इति गो. पाठः । ३ धर्मे इति गो. पाठः ।

प्राप्स्यामि तपसा काममिति कृत्वाध्यवस्य च । आगच्छदात्मसिद्ध्यर्थं गोकर्णस्याश्रमं शुभम् ॥४७॥
स राक्षसस्तत्र सहानुजस्तदा तपश्चचारातुलमुग्रविक्रमः ।
अतोषयच्चापि पितामहं विभुं ददौ स तुष्टश्च वराञ्जयावहान् ॥ ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।

रावणादीनां कीदृशं तपश्चरणमित्यादि पृष्टोऽगस्त्यस्तत्कथयति सुघोरतपसा तुष्टः प्रजापतिर्दशग्रीवाय मानवेतरावध्यत्वं कुम्भकर्णाय चिरकालस्वापं विभीषणाय च सद्धर्माचरणरतत्वं वितताररेत्यादि ।

अथाब्रवीन्मुनिं रामः कथं ते भ्रातरो वने । कीदृशं तु तदा ब्रह्मंस्तपस्तेपुर्महाबलाः ॥ १ ॥
अगस्त्यस्त्वब्रवीत्तत्र रामं सुप्रीतमानसम् । तांस्तान्धर्मविधींस्तत्र भ्रातरस्ते समाविशन् ॥ २ ॥
कुम्भकर्णस्ततो यत्तो नित्यं धर्मपथे स्थितः । तताप ग्रीष्मकाले तु पञ्चाग्नीन्परितः स्थितः ॥ ३ ॥
मेघाम्बुसिक्तो वर्षासु वीरासनमसेवत । नित्यं च शिशिरे काले जलमध्यप्रतिश्रयः ॥ ४ ॥
एवं वर्षसहस्राणि दश तस्यापचक्रमुः । धर्मे प्रयतमानस्य सत्पथे निष्ठितस्य च ॥ ५ ॥
विभीषणस्तु धर्मात्मा नित्यं धर्मपरः शुचिः । पञ्चवर्षसहस्राणि पादेनैकेन तस्थिवान् ॥ ६ ॥
समाप्ते नियमे तस्य ननृतुश्चाप्सरोगणाः । पपात पुष्पवर्षं च तुष्टुवुश्चापि देवताः ॥ ७ ॥
पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत । तस्थौ चोर्ध्वशिरोबाहुः स्वाध्याये धृतमानसः ॥ ८ ॥

४७-४८] ति० टी०–इति कृत्वा इति बुद्धिं कृत्वा । अध्यवस्य तथा निश्चित्य च ॥ ४७ ॥ ४८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे नवमः सर्गः ॥ ९ ॥

रा० टी०–प्राप्स्यामीति । तपसा कामं प्राप्स्याम्येव इति कृत्वा विचार्य अध्यवस्य निश्चित्य च गोकर्णस्याश्रममागच्छत् ॥ ४७ ॥

रा० टी०–स इति । राक्षसो रावणः तपश्चचार अत एव पितामहं ब्रह्माणमतोषयत् अत एव तुष्टस्स पितामहः जयावहान् वरान् ददौ ॥ ४८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे नवमः सर्गः ॥ ९ ॥

१] ति० टी०–भ्रातरो रावणकुम्भकर्णविभीषणाः ॥ १ ॥

रा० टी०–रावणतपोवर्णनफलकं रामप्रश्नमाह–अथेति । भ्रातरस्ते रावणादयः कीदृशं कथं च तपस्तेपुः इति मुनिमगस्त्यं रामोऽब्रवीत् ॥ १ ॥

२] ति० टी०–तांस्तान्धर्मविधीन्धर्मानुष्ठानानि ॥ २ ॥

रा० टी०–अगस्त्य इति । ते भ्रातरः यान् यान् धर्मविधीन् समाविशन् अकुर्वन् तान् तान् अगस्त्यो राममब्रवीत् ॥ २ ॥

३] ति० टी०–संक्षेपेणोक्तं प्रपञ्चयति—कुम्भकर्ण इत्यादि । 'वह्निभिः सूर्यपञ्चमैः' इति पाठे सूर्यः पञ्चमो येषां तैर्वह्निभिरित्यर्थः 'पञ्चाग्नीन्परितः स्थितः' इति पाठेऽपि सूर्यसहिता एव पञ्चाग्नयः ॥ ३ ॥

रा० टी०–तदाकारमाह–कुम्भकर्ण इत्यादिभिः । यत्तो नियतचित्तः कुम्भकर्णः ग्रीष्मकाले परितश्चतुर्दिक्षु आकाशे च पञ्चाग्नीन् स्थितः स्थापितस्सन् ततापः ॥ ३ ॥

४–७] ति० टी०–वामोरूपरि दक्षिणजङ्घां प्रतिष्ठाप्य स्थितिर्वीरासनम् । जलमध्यं प्रतिश्रय आवासो यस्य सः ॥ ४–७ ॥

रा० टी०–मेघेति । वर्षासु मेघाम्बुसिक्तः सन् वीरासनमसेवत शिशिरे तु नित्यं जलमध्यं प्रतिश्रय आश्रयो यस्य स आसीदिति शेषः ॥ ४ ॥

रा० टी०–एवमिति । तस्य कुम्भकर्णस्य एवं दशवर्षसहस्राणि अपचक्रमुः ॥ ५ ॥

रा० टी०–विभीषण इति । विभीषणस्तु पञ्चवर्षसहस्राणि एकेन पादेन तस्थिवान् ॥ ६ ॥

रा० टी०–समाप्त इति । तस्य विभीषणस्य नियमे समाप्ते सति अप्सरोगणाः ननृतुः देवतास्तुष्टुवुश्च ॥ ७ ॥

गो० टी०–मेघेति । वीरासनं नाम वामोरूपरि दक्षिणजङ्घां प्रतिष्ठाप्य स्थितिः ॥ ४—७ ॥

८] ति० टी०–सूर्यानुवृत्तिमाह—उर्ध्वशिरोबाहुरिति ॥ ८ ॥

१ चकारेति गो. पाठः । २ क्षुभिता इति गो. पाठः ।

एवं विभीषणस्यापि स्वर्गस्थस्येव नन्दने । दशवर्षसहस्राणि गतानि नियतात्मनः ॥ ९ ॥
दशवर्षसहस्रं तु निराहारो दशाननः । पूर्णे वर्षसहस्रे तु शिरश्चाग्नौ जुहाव सः ॥ १० ॥
एवं वर्षसहस्राणि नव तस्यातिचक्रमुः । शिरांसि नव चाप्यस्य प्रविष्टानि हुताशनम् ॥ ११ ॥
अथ वर्षसहस्रे तु दशमे दशमं शिरः । छेत्तुकामे दशग्रीवे प्राप्तस्तत्र पितामहः ॥ १२ ॥
पितामहस्तु सुप्रीतः सार्धं देवैरुपस्थितः । तव तावद्दशग्रीव प्रीतोऽस्मीत्यभ्यभाषत ॥ १३ ॥
शीघ्रं वरय धर्मज्ञ वरो यस्तेऽभिकाङ्क्षितः । कं ते कामं करोम्यद्य न वृथा ते परिश्रमः ॥ १४ ॥
अथाब्रवीद्दशग्रीवः प्रहृष्टेनान्तरात्मना । प्रणम्य शिरसा देवं हर्षगद्गदया गिरा ॥ १५ ॥
भगवन्प्राणिनां नित्यं नान्यत्र मरणाद्भयम् । नास्ति मृत्युसमः शत्रुरमरत्वमहं वृणे ॥ १६ ॥
एवमुक्तस्तदा ब्रह्मा दशग्रीवमुवाच ह । नास्ति सर्वामरत्वं ते वरमन्यं वृणीष्व मे ॥ १७ ॥
एवमुक्ते तदा राम ब्रह्मणा लोककर्तृणा । दशग्रीव उवाचेदं कृताञ्जलिरथाग्रतः ॥ १८ ॥
सुपर्णनागयक्षाणां दैत्यदानवरक्षसाम् । अवध्योऽहं प्रजाध्यक्ष देवतानां च शाश्वत ॥ १९ ॥
नहि चिन्ता ममान्येषु प्राणिष्वमरपूजित । तृणभूता हि ते मन्ये प्राणिनो मानुषादयः ॥ २० ॥
एवमुक्तस्तु धर्मात्मा दशग्रीवेण रक्षसा । उवाच वचनं देवः सह देवैः पितामहः ॥ २१ ॥
भविष्यत्येवमेतत्ते वचो राक्षसपुंगव । एवमुक्त्वा तु तं राम दशग्रीवं पितामहः ॥ २२ ॥
शृणु चापि वरो भूयः प्रीतस्येह शुभो मम । हुतानि यानि शीर्षाणि पूर्वमग्नौ त्वयानघ ॥ २३ ॥
पुनस्तानि भविष्यन्ति तथैव तव राक्षस । वितरामीह ते सौम्य वरं चान्यं दुरासदम् ॥ २४ ॥

रा० टी०–पञ्चेति । पञ्चवर्षसहस्राणि सूर्यमेव अन्ववर्तत अनुवर्तनाकारमाह ऊर्ध्वशिरोबाहुस्सन् तस्थौ ॥ ८ ॥

गो० टी०–पञ्चेति । सूर्यं चेवेति चकारेण पूर्ववदेकपादस्थितिः समुच्चीयते ॥ ८ ॥

९–१६] ति० टी०–स्वर्गस्थस्य देवस्य नन्दन इवेत्यनेन तपःप्रवृत्तिसंतोषो दर्शितः ॥ ९–१६ ॥

रा० टी०–एवमिति । नन्दने स्वर्गस्थस्येव एवं वर्तमानस्य विभीषणस्यापि दशवर्षसहस्राणि गतानि एतदुपमालङ्कारेण विभीषणस्य वासनाराहित्यं सूचितम् ॥ ९ ॥

रा० टी०–दशेति । दशाननस्तु दशवर्षसहस्रं निराहारोऽभवदिति शेषः वर्षसहस्रे पूर्णे तु अग्नौ शिरो जुहाव ॥ १० ॥

रा० टी०–एवमिति । एवं प्रतिवर्षसहस्रं शिरोहवनप्रकारेण तस्य रावणस्य वर्षसहस्राणि अतिचक्रमुः अत एव नव शिरांसि हुताशनं प्रविष्टानि ॥ ११ ॥

रा० टी०–अथेति । दशमे वर्षसहस्रे दशग्रीवे दशमं शिरः छेत्तुकामे सति पितामहस्तत्र प्राप्तः ॥ १२ ॥

रा० टी०–पितामह इति । देवैस्सार्द्धमुपस्थितः पितामहः हे दशग्रीव ! तव प्रीतोऽस्मि अतो यस्तेऽभिकांक्षितो वरः तं शीघ्रं वरय ते कं कामं करोमि ते परिश्रमो वृथा न इत्यभ्यभाषत श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

रा० टी०–अथेति । दशग्रीवः शिरसा देवं प्रणम्याब्रवीत् ॥ १५ ॥

रा० टी०–तदाकारमाह–भगवन्निति । मरणादन्यत्र अन्यत् प्राणिनां भयं न अतो मृत्युसमश्शत्रुर्न अतोऽमरत्वमहं वृणे ॥ १६ ॥

गो० टी०–एवमिति । स्वर्गस्थस्य देवस्य नन्दन इवेत्यनेन तपःप्रवृत्तिसंतोष उक्तः ॥ ९—३० ॥

१७–१८] ति० टी०–मे मत्तः ॥ १७ ॥ १८ ॥

रा० टी०–एवमिति । सर्वामरत्वं ते नास्ति अतोऽन्यं वरं वृणीष्व ॥ १७ ॥

रा० टी०–एवमिति । ब्रह्मणा एवमुक्तो दशग्रीव इदमुवाच ॥ १८ ॥

१९–२२] ति० टी०–उक्तमेवं वरं सापेक्षमाह—सुपर्णेति ॥ १९–२२ ॥

रा० टी०–तदाकारमाह–सुपर्णेति । सुपर्णादीनामवध्योऽहं भवेयमिति शेषः ॥ १९ ॥

रा० टी०–नन्वन्येभ्यो भयसत्वे किमनया प्रार्थनयेत्यत आह–नहीति । ये मानुषादयः प्राकृता मनुष्यप्रभृतयः प्राणिनः ते ममाग्रे तृणभूता इत्यहं मन्ये अतोऽन्येषु प्राणिषु मम चिन्ता न ॥ २० ॥

रा० टी०–एवमिति । एवमुक्तः पितामहस्ते वचः अभिलषितमित्यर्थः भविष्यत्येव एवं वचनमुक्त्वा भूयोऽपरो वरो मम मत्तः शृणु इत्युवाच श्लोकद्वयमेकान्वयि ॥ २१ ॥ २२ ॥

२३–२४] ति० टी०–भूयोऽन्यः शुभो वरो दीयते तच्छृणु ॥ २३ ॥ २४ ॥

रा० टी०–तदाकारमाह–हुतानीति । यानि शीर्षाणि त्वया हुतानि तानि पुनस्तथैव भविष्यन्ति ॥ २३ ॥

छन्दतस्तव रूपं मनसा यद्यथेप्सितम् । [भैविष्यति न सन्देहो मद्वरात्तवराक्षस] ॥
एवं पितामहोक्तं[1] च दशग्रीवस्य रक्षसः । ॥ २५ ॥
अग्नौ हुतानि शीर्षाणि पुनस्तान्युत्थितानि वै । एवमुक्त्वा तु तं राम दशग्रीवं पितामहः ॥ २६ ॥
विभीषणमथोवाच वाक्यं लोकपितामहः । विभीषण त्वया वत्स धर्मसंहितबुद्धिना ॥ २७ ॥
परितुष्टोऽस्मि धर्मात्मन्वरं वरय सुव्रत । विभीषणस्तु धर्मात्मा वचनं प्राह साञ्जलिः॥ २८ ॥
वृतः सर्वगुणैर्नित्यं चन्द्रमा रश्मिभिर्यथा । भगवन्कृतकृत्योऽहं यन्मे लोकगुरुः स्वयम् ॥ २९ ॥
प्रीतेन यदि दातव्यो वरो मे शृणु सुव्रत । परमापद्गतस्यापि धर्मे मम मतिर्भवेत् ॥ ३० ॥
अशिक्षितं च ब्रह्मास्त्रं भगवन्प्रतिभातु मे । या या मे जायते बुद्धिर्येषु येष्वाश्रमेषु च ॥ ३१ ॥
सा सा भवतु धर्मिष्ठा तं[3]तं धर्मं च पालये । एष मे परमोदार वरः परमको मतः[4] ॥ ३२ ॥
नहि धर्माभिरक्तानां लोके किंचन दुर्लभम् । पुनः प्रजापतिः प्रीतो विभीषणमुवाच ह ॥ ३३ ॥
धर्मिष्ठ त्वं यथा वत्स तथा चैतद्भविष्यति । यस्माद्राक्षसयोनौ ते जातस्यामित्रनाशन ॥ ३४ ॥
नाधर्मे जायते बुद्धिरमरत्वं ददामि ते । इत्युक्त्वा कुम्भकर्णाय वरं दातुमवस्थितम् ॥ ३५ ॥
प्रजापतिं सुराः सर्वे वाक्यं प्राञ्जलयोऽब्रुवन् । न तावत्कुम्भकर्णाय प्रदातव्यो वरस्त्वया ॥ ३६ ॥

रा० टी०–वितरामीति । मनसा यत्तवेप्सितं तद्रूपं तव छन्दतः इच्छयैव यथावद्भविष्यतीति शेषः इत्यन्यं वरं वितरामि ददामि ॥ २४ ॥

२५–२८] ति० टी०–अन्यं वरं च वितरामीत्युक्तं तमेवाह—छन्दत इति । मनसा यद्यथेप्सितं रूपं तत्तच्छन्दत इच्छामात्रेण भविष्यति ॥ २५–२८ ॥

रा० टी०–एवमिति । दशग्रीवस्य अग्नौ हुतानि शीर्षाणि पुनरुत्थितानि अभवन्निति शेषः ॥ २५ ॥

रा० टी०–एवमिति । लोकपितामह एवमुक्त्वा विभीषणमुवाच ॥ २६ ॥

रा० टी०–तदाकारमाह–विभीषणेति । हे विभीषण त्वयाहं परितुष्टः परितोषितोऽस्मि अतो वरं वरय ॥ २७ ॥

रा० टी०–विभीषण इति । सर्वगुणैर्वृतो विभीषणः वचनं प्राह ॥ २८ ॥

२९] ति० टी०–हे भगवन्, लोकगुरुरुत्पत्तिज्ञप्तिदाता भवान्यन्मह्यं प्रीत एतेनैवाहं कृतकृत्योऽस्मि, सर्वगुणैः पुरुषार्थैर्वृतश्चास्मि । त्वत्प्रीतेरेव सर्वपुरुषार्थसाधनत्वात् ॥ २९ ॥

रा० टी०–तदाकारमाह–भगवन्निति । लोकगुरुः भवान् यत्स्वयं मे समीपमागत इति शेषः अतोऽहं कृतकृत्यः अतः प्रीतेन भवता यदि वरो दातव्यः तर्हि शृणु ॥ २९ ॥

३०] ति० टी०–अथापि यदि प्रसन्नेन त्वयावश्यं कश्चिद्वरो दातव्यस्तदा तं वरं शृणु । परमापद्गतस्य सांसारिकव्यवहारतः परमामापदं प्राप्तस्यापि मम धर्मे नारायणे मतिर्भवेत् । 'रामो विग्रहवान्धर्मः' इत्युक्तेरत्र धर्मपदेन नारायणः । अन्यथा 'सा सा भवतु धर्मिष्ठ' इत्यनेन पौनरुक्त्यं स्यात्॥३०॥

रा० टी०–तदाकारमाह–परमेति । परमापद्गतस्यापि मम मतिः धर्मे एव भवेत् अशिक्षितमपि ब्रह्मास्त्रं मे प्रतिभातु ॥ ३० ॥

गो० टी०–परमेति श्लोकद्वयमेकं वाक्यम् । ब्रह्मास्त्रं ब्रह्मास्त्रमन्त्रम् । पालये पालयेयम् ॥ ३१—३८ ॥

३१] ति० टी०–अशिक्षितम् । सद्गुरूपदेशं विनापीत्यर्थः । ब्रह्मास्त्रं ब्रह्मविद्या । येति । एतद्वरणमशेषब्रह्मविद्यासिद्धिप्रतिबन्धकनिवृत्तये ॥ ३१ ॥

रा० टी०–या येति । येषु येषु आश्रमेषु ब्रह्मचर्यादिषु या या मे बुद्धिर्जायते जायेत सा सा धर्मिष्ठा तत्तदाश्रमोचितधर्मविशिष्टा भवतु अत एव तं तं धर्ममहं पालये पालयेयम् ॥ ३१ ॥

३२] ति० टी०–एतद्वाभाय तत्तद्धर्मं च पालये पालयेयम् । परमोदार परमदातः ॥ ३२ ॥

रा० टी०–नन्वैश्वर्यादिः कुतो न प्रार्थ्यते इत्यत आह–एष इति । हि यतः धर्माभिरक्तानां किंचन न दुर्लभमतः एष एव वरः परमकः अत्युत्तमो मे मतः ॥ ३२ ॥

३३] ति० टी०–ईदृशस्य वरस्य परमकत्वं स्वयमेवाह—नहीति ॥ ३३ ॥

रा० टी०–पुनरिति । प्रजापतिः विभीषणं पुनरुवाच तदाकारमाह हे धर्मिष्ठ ! यथा त्वं तथैव एतत्तव प्रार्थनमतः एतत् भविष्यत्येव ॥ ३३ ॥

३४–३६] ति० टी०–राक्षसयोनौ जातस्यापि यतोऽधर्मे बुद्धिर्न जायते, ततः प्रीतोऽहममरत्वं ते ददामि । एवमप्रार्थितममरत्वं ब्रह्मणः सकाशाद्धर्मबलाल्लब्धं विभीषणेनेति निष्कामतया देवोपासनं सर्वार्थसाधनमिति बोध्यम् ॥ ३४–३६ ॥

रा० टी०–तस्मादिति । यस्मात् राक्षसयोनौ जात-

१ इदमर्धमधिकं गो. पाठे । २ उक्तस्येति गो. रा. पाठः । ३ खिति गो. पाठः । ४ उपेति गो. पाठः ।

जानीषे हि यथा लोकांस्त्रासयत्येष दुर्मतिः । नन्दनेऽप्सरसः सप्त महेन्द्रानुचरा दश ॥ ३७ ॥
अनेन भक्षिता ब्रह्मन्नृषयो मानुषास्तथा । अलब्धवरपूर्णेन यत्कृतं राक्षसेन तु ॥ ३८ ॥
यद्येष वरलब्धः स्याद्भक्षयेद्भुवनत्रयम् । वरव्याजेन मोहोऽस्मै दीयतामामितप्रभ ॥ ३९ ॥
लोकानां स्वस्ति चैवं स्याद्भवेदस्य च संमतिः । एवमुक्तः सुरैर्ब्रह्माचिन्तयत्पद्मसंभवः ॥ ४० ॥
चिन्तिता चोपतस्थेऽस्य पार्श्वे देवी सरस्वती । प्राञ्जलिः सा तु पार्श्वस्था प्राह वाक्यं सरस्वती ॥ ४१ ॥
ईयमस्म्यागता देव किं कार्यं करवाण्यहम् । प्रजापतिस्तु तां प्राप्तां प्राह वाक्यं सरस्वतीम् ॥ ४२ ॥
वाणि त्वं राक्षसेन्द्रस्य भव वाग्देवतेप्सिता । तथेत्युक्त्वा प्रविष्टा सा प्रजापतिरथाब्रवीत् ॥ ४३ ॥
कुम्भकर्ण महाबाहो वरं वरय यो मतः । कुम्भकर्णस्तु तद्वाक्यं श्रुत्वा वचनमब्रवीत् ॥ ४४ ॥
स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम् । एवमस्त्विति तं चोक्त्वा प्रायाद्ब्रह्मा सुरैः समम् ॥ ४५ ॥
देवी सरस्वती चैव राक्षसं तं जहौ पुनः । ब्रह्मणा सह देवेषु गतेषु च नभःस्थलम् ॥ ४६ ॥

स्यापि ते बुद्धिः अधर्मे न जायते तस्मात् अमरत्वं मरणराहित्यं ते ददामि ॥ ३४ ॥

रा० टी०–इतीति । कुम्भकर्णाय वरं दातुमवस्थितं प्रजापतिं सर्वे सुराः अब्रुवन् ॥ ३५ ॥

रा० टी०–तदाकारमाह–नेत्यादिभिः । एष कुम्भकर्णः यथा लोकान् त्रासयति तथा त्वं जानीषे तस्मात् कुम्भकर्णाय वरस्त्वया न दातव्यः ॥ ३६ ॥

३७-३८] ति० टी०–एष दुर्मतिस्त्रीन्लोकाँस्त्रासयतीति जानीषे । तदेव दर्शयति—नन्दने इति ॥ ३७ ॥ ३८ ॥

रा० टी०–त्रासनमेवाह–नन्दन इति । नन्दने इन्द्रवने सप्ताप्सरसः दश महेन्द्रानुचराश्च अनेन कुम्भकर्णेन भक्षिताः ऋषयो मानुषाश्च भक्षिताः बहव इति शेषः ॥ ३७ ॥

रा० टी०–अलब्धेति । अलब्धवरपूर्णेन न लब्धो वरः पूर्णः पूर्णावस्था च येन तेन राक्षसेन कुम्भकर्णेन यद्यस्मात् हेतोः कृतं बहूनां भक्षणमिति शेषः तस्माद्धेतोः यद्येष पूर्णावस्थो वरलब्धः स्यात् तर्हि भुवनत्रयं भक्षयेत् ॥ ३८ ॥

गो० टी०–अलब्धवरपूर्वेण पूर्वमलब्धवरेण कुम्भकर्णेन यत् भक्षणात्मकं कर्म कृतं तत् तस्मात् कारणात् वरलब्धः लब्धवरः स्याद्यदि भुवनत्रयमपि भक्षयेदित्यर्थः ॥ ३९ ॥

३९] ति० टी०–मोहोऽज्ञानम् ॥ ३९ ॥

रा० टी०–ननु किं कर्तव्यमित्यत आह—वरेति । वरव्याजेन अस्मै मोहः विवेकाभावो दीयताम् एवं सति लोकानां स्वस्ति स्यात् अस्य कुम्भकर्णस्य सम्मतिस्सम्मानं च भवेत् ३९

गो० टी०–वरव्याजेनेति । मोहः अज्ञानम् । एवं मोहस्यैव प्रदाने अस्य च सन्नतिः शिक्षा भवेत् ॥ ४० ॥

४०-४२] ति० टी०–एवं मोहदानेनैव लोकानां स्वस्ति स्यात्, अस्य संमतिः संमानं च स्यात् । अचिन्तयत् । देवीमिति शेषः ॥ ४०–४२ ॥

रा० टी०–एवमिति । एवमुक्तो ब्रह्मा अचिन्तयत् सरस्वतीमिति शेषः अत एव चिन्तिता सरस्वती अस्य ब्रह्मणः पार्श्वमुपतस्थे ॥ ४० ॥

रा० टी०–प्रांजलिरिति । अहमिदमागतास्मि किं कार्यं करवाणि इति वाक्यं पार्श्वस्था सरस्वती प्राह ॥ ४१ ॥

गो० टी०–एवमिति । अचिन्तयत् । देवीमिति शेषः ॥ ४१ ॥ ४२ ॥

रा० टी०–प्रजापतिरिति । हे वाणि त्वं देवतेप्सिता देवानामीप्सितप्रदा सती राक्षसेन्द्रस्य वाग्भव इति वाक्यं प्रजापतिः सरस्वतीं प्राह ॥ ४२ ॥

गो० टी०–प्रजापतिरिति । भव या देवतेप्सिता । यादृग्रूपा दैवतैः काङ्क्षिता तादृशी भवेत्यर्थः ॥ ४३ ॥

४३] ति० टी०–अस्यास्ये देवतेप्सिता देवानामिष्टा वाग्भव । याचतः कुम्भकर्णस्य वदनादेवानुकूला निःसरेत्यर्थः । अथाब्रवीत् । सरस्वतीप्रवेशानन्तरमित्यर्थः ॥ ४३ ॥

रा० टी०–तथेति । सा सरस्वती तथेत्युक्त्वा प्रविष्टा कुम्भकर्णस्य मुखे इति शेषः प्रजापतिस्तु यो मत ईप्सितः तं वरं वरय इति वाक्यमब्रवीत् ॥ ४३ ॥

गो० टी०–तथेति । प्रविष्टा सा देवतोक्तरूपा प्रविष्टेत्यर्थः ॥ ४४—४८ ॥

४४] ति० टी०–तद्वाक्यं ब्रह्मवाक्यम् ॥ ४४ ॥

रा० टी०–कुम्भकर्ण इति । हे देवदेव अनेकानि एकभिन्नानि कपिञ्जलाधिकरणन्यायेन त्रीणीत्यर्थः वर्षाणि स्वप्तुं ममेप्सितमस्तीति वचनमब्रवीत् एतेन वरान्तरयाचनाभावमात्रेणैव देवानां सन्तोषो जात इति ध्वनितम् अत एव युद्धकाण्डोक्तः तस्मात्त्वमद्यप्रभृति मृतकल्पश्शयिष्यस इति पुनर्ब्रह्मशापस्संगच्छते अत एव रावणप्रार्थनानन्तरकालिकं शयिताश्चैष षण्मासमेकाहं जागरिष्यतीति ब्रह्मप्रसादवचनं सानुकूलम् एतेन अत्र षण्मासादर्वाक् जागरणं नेति नियमः तदधिकापि निद्रा भवत्येवेति वरस्वरूपं बोध्यमिति भट्टोक्तिश्चिन्त्या तस्य वरान्तरत्वात् अत्रत्यवरबोधकश्लोकेनेदृशार्थालाभाच्चेति दिक् ॥ ४४ ॥

४५–४६] ति० टी०–एवमित्यत्र षण्मासादर्वाग्जाग-

१ पूर्वेणेति गो. पाठः । २ तदेष इति गो. पाठः । ३ इदमिति रा. पा. । ४ येति गो. पाठः ।

विमुक्तोऽसौ सरस्वत्या स्वां संज्ञां च ततो गतः । कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः॥ ४७ ॥
ईदृशं किमिदं वाक्यं ममाद्य वदनाच्युतम् । अहं व्यामोहितो दैवैरिति मन्ये तदागतैः ॥ ४८ ॥
एवं लब्धवराः सर्वे भ्रातरो दीप्ततेजसः । श्लेष्मातकवनं गत्वा तत्र ते न्यवसन्सुखम् ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ।

नरवाहनाधीना लङ्केयमस्मदीया त्वया पुनर्ग्रहीतव्येति मातामहेनोपदिष्टो रावणः कुबेरे पूज्यभावात्तदनङ्गीकुर्वन्नपि प्रहस्तोपदेशात्पुनर्यक्षेश्वरान्निर्भर्त्सनात्मसात्कृतवान् ।

सुमाली वरलब्धांस्तु ज्ञात्वा चैतान्निशाचरान् उदतिष्ठद्भयं त्यक्त्वा सानुगः स रसातलात् ॥ १ ॥
मारीचश्च प्रहस्तश्च विरूपाक्षो महोदरः उदतिष्ठन्सुसंरब्धाः सचिवास्तस्य रक्षसः ॥ २ ॥
सुमाली सचिवैः सार्धं वृतो राक्षसपुंगवैः अभिगम्य दशग्रीवं परिष्वज्येदमब्रवीत् ॥ ३ ॥
दिष्ट्या ते वत्स संप्राप्तश्चिन्तितोऽयं मनोरथः यस्त्वं त्रिभुवनश्रेष्ठाल्लब्धवान्वरमुत्तमम् ॥ ४ ॥
यत्कृते च वयं लङ्कां त्यक्त्वा याता रसातलम् तद्धतं नो महाबाहो महद्विष्णुकृतं भयम् ॥ ५ ॥
असकृत्तद्भयाद्भग्नाः परित्यज्य स्वमालयम् विद्रुताः सहिताः सर्वे प्रविष्टाः स्म रसातलम्॥ ६ ॥

रणं नेति नियमः । तदधिका निद्रा तु भवत्येवेति वरस्वरूपं बोध्यम् । अत एव 'षण्मासान्स्वपिति' इति पूर्वं विभीषणोक्त्या वर्षाण्यनेकानीति कुम्भकर्णोक्त्या च न पूर्वोक्तस्य विरोधः ॥ ४५ ॥ ४६ ॥

रा० टी०–एवमिति । ब्रह्मा एवमस्त्वित्युक्त्वा प्रायात् सरस्वती तु तं राक्षसं जहौ ॥ ४५ ॥

रा० टी०–ब्रह्मणेति । देवेषु नभःस्थलं गतेषु सत्सु सरस्वत्या विमुक्तः कुम्भकर्णः स्वां संज्ञां प्रकृतिं गतोऽभवदिति शेषः ॥ ४६ ॥

४७–४८] ति० टी०–स्वां संज्ञां यथाप्राप्तस्वबुद्धिं गतः प्राप्तः ॥ ४७ ॥ ४८ ॥

रा० टी०–कुम्भकर्ण इति । ईदृशं वाक्यं मम वदनात् किं किमर्थं च्युतमिति कुम्भकर्णः चिन्तयामास ॥ ४७ ॥

रा० टी०–तन्निश्चयमाह–अहमिति । दैवैरहं व्यामोहित इति मन्ये अहं पृथक् ॥ ४८ ॥

४९] ति० टी०–श्लेष्मातकवनं तत्प्रचुरं पितुस्तपोवनम् ॥ ४९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे दशमः सर्गः ॥ १० ॥

रा० टी०–एवमिति । लब्धवरास्सर्वे भ्रातरः श्लेष्मातकवनं गत्वा तत्र सुखं न्यवसन् ॥ ४९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे दशमः सर्गः ॥ १० ॥

गो० टी०–अहमिति । श्लेष्मातकवनं तत्प्रचुरं पितुस्तपोवनमित्यर्थः ॥ ४९ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने दशमः सर्गः ॥ १० ॥

१] ति० टी०–अथ धनदमपसार्य रावणस्य लङ्काप्रवेशः—सुमालीति ॥ १ ॥

रा० टी०–रावणादीनां लब्धवरानन्तरकालिकं वृत्तान्तमाह–सुमालीत्यादिभिः । सुमाली एतान् रावणादीन् वरलब्धान् ज्ञात्वा अत एव भयं त्यक्त्वा रसातलादुदतिष्ठत्॥१॥

२–४] ति० टी०–तस्य सचिवाः सुमालिनः सचिवाः २–४

रा० टी०–मारीच इति । तस्य सुमालिनः सचिवाः मारीचादयः उदतिष्ठन् ॥ २ ॥

रा० टी०–सुमालीति । राक्षसपुङ्गवैर्वेष्टितस्सुमाली सचिवैस्सार्द्धं दशग्रीवमभिगम्य परिष्वज्य च इदमब्रवीत् ॥ ३ ॥

रा० टी०–तदाकारमाह–दिष्ट्येत्यादिभिः । दिष्ट्या भाग्यवशेन यस्त्वं त्रिभुवनश्रेष्ठात् उत्तमं वरं लब्धवान् तेन ते त्वया चिन्तितोऽयं मनोरथः संप्राप्तः ॥ ४ ॥

५–६] ति० टी०–यत्कृते यद्विष्णुभयनिमित्तस्तद्भयं नोऽस्माकं गतम् ॥ ५ ॥ ६ ॥

रा० टी०–यदिति । यत्कृते वयं रसातलं याताः तद्विष्णुकृतं नोऽस्माकं भयं गतम् ॥ ५ ॥

रा० टी०–असकृदिति । तस्य विष्णोर्भयात् असकृत् भग्नाः अत एव स्वमालयं परित्यज्य विद्रुताः पलायिता वयं सर्वे रसातलं प्रविष्टाः स्म ॥ ६ ॥

१ भीता इति गो. पाठः

अस्मदीया च लङ्केयं नगरी राक्षसोषिता[1] । निवेशिना तव भ्रात्रा धनाध्यक्षेण धीमता ॥ ७ ॥
यदि नामात्र शक्यं स्यात्साम्ना दानेन वानघ । तरसा वा महाबाहो प्रत्यानेतुं कृतं भवेत् ॥ ८ ॥
त्वं च[2] लङ्केश्वरस्तात भविष्यसि न संशयः । त्वया राक्षसवंशोऽयं निमग्नोऽपि समुद्धृतः ॥ ९ ॥
सर्वेषां नः प्रभुश्चैव भविष्यसि महाबल । अथाब्रवीदशग्रीवो मातामहमुपस्थितम् ॥ १० ॥
वित्तेशो गुरुरस्माकं नार्हसे वक्तुमीदृशम् । साम्ना[3] हि राक्षसेन्द्रेण प्रत्याख्यातो गरीयसा॥११॥
किंचिन्नाह तदा रक्षो ज्ञात्वा तस्य चिकीर्षितम्[4] । कस्यचित्त्वथ कालस्य वसन्तं रावणं ततः ॥ १२ ॥
[उक्तवन्तं तथा वाक्यं दशग्रीवं निशाचरः ।]
प्रहस्तः प्रश्रितं वाक्यमिदमाह स रावणम्[5] । दशग्रीव महाबाहो नार्हसे वक्तुमीदृशम् ॥ १३ ॥
सौभ्रात्रं नास्ति शूराणां शृणु चेदं वचो मम । अदितिश्च दितिश्चैव भगिन्यौ सहिते हि ते[6] ॥ १४ ॥
भार्ये परमरूपिण्यौ कश्यपस्य प्रजापतेः । अदितिर्जनयामास देवांस्त्रिभुवनेश्वरान्[7] ॥ १५ ॥
दितिस्त्वजनयद्दैत्यान्कश्यपस्यात्मसंभवान् । दैत्यानां किल धर्मज्ञ पुरैयं[8] वसनार्णवा ॥ १६ ॥
सपर्वता मही वीर तेऽभवन्प्रभविष्णवः । निहत्य तांस्तु समरे विष्णुना प्रभविष्णुना ॥ १७ ॥
देवानां वशमानीतं त्रैलोक्यमिदमव्ययम् । नैतदेको भवानेव करिष्यति विपर्ययम् ॥ १८ ॥
सुरासुरैराचरितं तत्कुरुष्व वचो मम । एवमुक्तो दशग्रीवः प्रहृष्टेनान्तरात्मना ॥ १९ ॥

गो० टी०–यत्कृत इति । महद्विष्णुकृतं यद्वयं तन्निरस्तमित्यर्थः ॥ ५—७ ॥

७] ति० टी०–निवेशिता अधिष्ठिता ॥ ७ ॥

रा० टी०–अस्मदीयेति । या धनाध्यक्षेण निवेशिता सेयं लंकास्मदीया अत एव पूर्वं राक्षसैरुषिता ॥ ७ ॥

८–१०] ति० टी०–सामादिना लङ्कां प्रत्यानेतुं यदि नाम शक्यं स्यात्तदा नः कार्यं कृतं भवेत् ॥ ८—१० ॥

रा० टी०–यदीति । साम्ना दानेन वा तरसा शौर्येण वा लंका प्रत्यानेतुमस्मान् प्रापयितुं यदि शक्यं स्यात् तदा कृतमस्मत्प्रयोजनं साधितं स्यात् ॥ ८ ॥

गो० टी०–यदीत्यादि । सामादिना लङ्कां प्रचालयितुं यदि नाम शक्यं स्यात्तदा नः कार्यं भवेदित्यर्थः॥ ८—११ ॥

रा० टी०–ननु तेन मम किं सेत्स्यतीत्यत आह–त्वमिति । त्वं लंकेश्वरो भविष्यसि अत एव निमग्नोयं राक्षसवंशः त्वया समुद्धृतः अतः सर्वेषां नः प्रभुर्भविष्यसि सार्द्धश्लोक एकान्वयी९

रा० टी०–अथेति । वित्तेशः अस्माकं गुरुः अतः ईदृशं वक्तुं नार्हसि इति वचनं दशग्रीवः मातामहं सुमालिनमब्रवीत्१०

११–१३] ति० टी०–नार्हसे । ज्येष्ठनिरसनं वक्तुं नार्हसीत्यर्थः ॥ ११—१३ ॥

रा० टी०–सामेति । राक्षसेन्द्रेण रावणेन साम्ना प्रत्याख्यातः सुमाली रक्षः तस्य रावणस्य चिकीर्षितं ज्ञात्वा किञ्चिन्नाह ॥ ११ ॥

रा० टी०–कस्य चिदिति । कस्य चित्कालस्यापगमे सतीति शेषः वसन्तं रावणं प्रश्रितं वाक्यं प्रहस्त आह ॥१२॥

रा० टी०–तदाकारमाह—दशग्रीवेत्यादिभिः । यतः शूराणां सौभ्रात्रं नास्ति अतः ईदृशं वक्तुं नार्हसे सुमालिनं प्रतीति शेषः ॥ १३ ॥

१४–१६] ति० टी०–अदितिदिती भिन्नोदरभगिन्यौ । ते सहिते हिते परस्परानुकूले भूत्वा कश्यपस्य भार्ये अभूतामिति शेषः ॥ १४–१६ ॥

रा० टी०–तत्र शिष्टाचारं प्रमाणयति—अदितिरिति । अदितिर्दितिश्च कश्यपस्य भार्ये बभूवतुरिति शेषः ॥ १४ ॥

रा० टी०–अदितिरिति । अदितिर्देवान् जनयामास दितिस्तु दैत्यान् जनयत् अजनयत् ॥ १५ ॥

रा० टी०–दैत्यानामिति । पुरा इयं मही दैत्यानामभवदिति शेषः अत एव ते दैत्याः प्रभविष्णवः प्रभाववन्त इत्यर्थः अभवन् ॥ १६ ॥

गो० टी०–अदितिश्चेति । सहिते हिते अन्योन्यानुरक्ते ॥ १५—१८ ॥

१७] ति० टी०–ते दैत्याः पुरा प्रभविष्णवोऽभवन्पश्चाद्विष्णुना तान्दैत्यान्निहत्य ॥ १७ ॥

रा० टी०–निहत्येति । विष्णुना दैत्यान् निहत्य इदं त्रैलोक्यं देवानां वशमानीतम् ॥ १७ ॥

१८–१९] ति० टी०–विपर्ययं भ्रातृद्रोहरूपम्॥१८॥१९॥

रा० टी०–नेति । एतत् परस्वामिकपुरादिस्वाधीनीकरणं विपर्ययमेको भवानेव न करिष्यति किं तु सुरासुरैरप्याचरितं तत्तस्मात् हेतोः मम वचनं पुरस्वाधीनीकारकवाक्यं कुरुष्व ॥ १८ ॥

१ उचितेति गो. पाठः । २ खिति गो. पाठः । ३ अपीति गो. पाठः । ४ इदमर्धमधिकं गो. पु. । ५ कारणमिति गो. पाठः । ६ पुत्रानिति गो. पाठः । ७ पुरीति गो. पाठः । ८ सवनार्णवेति गो. रा. पाठः ।

चिन्तयित्वा मुहूर्तं वै बाढमित्येव सोऽब्रवीत् । स तु तेनैव हर्षेण तस्मिन्नहनि वीर्यवान् ॥ २० ॥
वनं गतो दशग्रीवः सह तैः क्षणदाचरैः । त्रिकूटस्थः स तु तदा दशग्रीवो निशाचरः ॥ २१ ॥
प्रेषयामास दौत्येन प्रहस्तं वाक्यकोविदैः । प्रहस्त शीघ्रं गच्छ त्वं ब्रूहि नैर्ऋतपुंगवम् ॥ २२ ॥
वचसा मम वित्तेशं सामपूर्वमिदं वचः । इयं लङ्का पुरी राजन्राक्षसानां महात्मनाम् ॥ २३ ॥
त्वया निवेशिता सौम्य नैतद्युक्तं तवानघ । तद्भवान्यदि नो ह्यद्य दद्यादतुलविक्रम ॥ २४ ॥
कृता भवेन्मम प्रीतिर्धर्मश्चैवानुपालितः । स तु गत्वा पुरीं लङ्कां धनदेन सुरक्षिताम् ॥ २५ ॥
अब्रवीत्परमोदारं वित्तपालमिदं वचः । प्रेषितोऽहं तव भ्रात्रा दशग्रीवेण सुव्रत ॥ २६ ॥
त्वत्समीपं महाबाहो सर्वशस्त्रभृतां वर । [तच्छ्रूयतां महाप्राज्ञ सर्वशास्त्रविशारद ॥
वचनं मम वित्तेश यद्ब्रवीति दशाननः ॥ ॥ २७ ॥
इयं किल पुरी रम्या सुमालिप्रमुखैः पुरा । भुक्तपूर्वा विशालाक्ष राक्षसैर्भीमविक्रमैः ॥ २८ ॥
तेन विज्ञाप्यते सोऽयं सांप्रतं विश्रवात्मज । तदेषा दीयतां तात याचतस्तस्य सामतः ॥ २९ ॥
प्रहस्तादपि संश्रुत्य देवो वैश्रवणो वचः । प्रत्युवाच प्रहस्तं तं वाक्यं वाक्यविदां वरः ॥ ३० ॥
दत्ता ममेयं पित्रा तु लङ्का शून्या निशाचरैः । निवेशिता च मे रक्षो दानमानादिभिर्गुणैः ॥ ३१ ॥
ब्रूहि गच्छ दशग्रीवं पुरी राज्यं च यन्मम । तवाप्येतन्महाबाहो भुङ्क्ष्व राज्यमकण्टकम् ॥ ३२ ॥

रा० टी०–एवमिति । दशग्रीवः बाढमित्येवं वचनमब्रवीत् ॥ १९ ॥

गो० टी०–नैतदिति । विपर्ययं भ्रातृद्रोहरूपम् सुरासुरैराचरितं मार्गम् ॥ १९—२० ॥

२०] ति० टी०–तस्मिन्नहनि प्रहस्तोपदेशदिन एव ॥ २० ॥

रा० टी०–स इति । तेन लंकापुरं प्राप्स्यामीति निश्चयजनितेन हर्षेणोपलक्षितो दशग्रीवः तैः प्रहस्तादिभिः क्षणदाचरैस्सह वनं गतः ॥ २० ॥

गो० टी०–स त्विति । तस्मिन्नहनि प्रहस्तोपदेशाहनि वनं श्लेष्मातकवनम् ॥ २१ ॥

२१–२३] ति० टी०–वनं लङ्कासमीपवनं गतस्त्रिकूटस्थो भूत्वा प्रहस्तं दौत्येन प्रेषयामास ॥ २१—२३ ॥

रा० टी०–त्रिकूटस्थ इति । त्रिकूटस्थो दशग्रीवः प्रहस्तं दौत्येन प्रेषयामास ॥ २१ ॥

गो० टी०–त्रिकूटस्थ इति । त्रिकूटस्थो भूत्वा प्रहस्तं दूत्येन प्रेषयामास ॥ २२ ॥

रा० टी०–प्रेषणप्रकारमाह–प्रहस्तेत्यादिभिः । हे प्रहस्त मम वचसा मत्संदेशत्वेन वित्तेशं सामपूर्वमिदं वचो ब्रूहि ॥ २२ ॥

रा० टी०–संदेशाकारमाह–इयमिति द्वाभ्याम् । रक्षसामियं लंका त्वया निवेशिता अधिष्ठिता एतत्तव न युक्तम् ॥ २३ ॥

गो० टी०–प्रहस्तेति । नैर्ऋतपुङ्गवं कुबेरम् । लङ्कायां पूर्वस्थितनैर्ऋताधिपत्यात् ॥ २३—३७ ॥

२४-२६] ति० टी०–त्वया निवेशिताधिष्ठिता । तां यदि भवान्नो दद्यात्तर्हि मम प्रीतिः कृता भवेत् ॥ २४–२६ ॥

२७] ति० टी०–दशाननो यद्ब्रवीति तद्वचनं मम मुखाच्छृण्विति शेषः ॥ २७ ॥

रा० टी०–तदिति । तद्राक्षसीयत्वात् हेतोः यदि नोऽस्मभ्यं भवान् दद्यात् तर्हि मम प्रीतिः कृता भवेत् ॥ २४ ॥

रा० टी०–स इति । सः रावणेन शिक्षितः प्रहस्तः लंकां गत्वा वित्तपालमिदं वचोऽब्रवीत् ॥ २५ ॥

रा० टी०–तदाकारमाह–प्रेषित इति । दशग्रीवेण त्वत्समीपमहं प्रेषितः अतः यदशाननो ब्रवीति अत्रवीत् तदेव मम वचनमवेहीति शेषः सार्द्धश्लोक एकान्वयी ॥ २६—२७ ॥

२९-३२] ति० टी०–तेनेति । येन पूर्वं राक्षसैर्भुक्ता तेन हेतुना सांप्रतं दीयताम् । सोऽयमर्थो विज्ञाप्यते ॥ २९–३२ ॥

रा० टी०–तद्वचनाकारमाह—इयमिति द्वाभ्याम् । इयं लंका राक्षसैः भुक्तपूर्वा अभवदिति शेषः अतः तेन रावणेन सः लंकारूपोऽयमर्थः विज्ञाप्यते याच्यते इत्यर्थः । तत्तस्माद्धेतोः एषा लंका याचतो रावणस्य दीयतां श्लोकद्वयमेकान्वयि ॥ २८—२९ ॥

रा० टी०–प्रहस्तादिति । वैश्रवणः प्रहस्तात् संश्रुत्य प्रहस्तं प्रत्युवाच ॥ ३० ॥

रा० टी०–तदाकारमाह—दत्तेति सार्द्धद्वाभ्याम् । रक्षो हे रावण निशाचरैरशून्या इयं लंका मम मह्यं पित्रा दत्ता अत एव दानमानादिभिर्गुणैर्निवेशिता यथायोग्यं संस्थापिता च ३१

रा० टी०–ब्रूहीति । यत् मम पुरी राज्यं च तदेतत्तवापि अतः अकण्टकं यथा भवति तथा भुङ्क्ष्व ॥ ३२ ॥

---

१ कोविद मिति गो. पाठः । २ इदमर्धमधिकं गो. पाठे । ३ विशारद इति गो. पाठः । ४ निवासिते च मे यक्षैरिति गो. पाठः

अतिभक्तं त्वया सार्धं राज्यं यच्चापि मे वसु । एवमुक्त्वा धनाध्यक्षो जगाम पितुरन्तिकम् ॥ ३३ ॥
अभिवाद्य गुरुं प्राह रावणस्य यदीप्सितम् । एष तात दशग्रीवो दूतं प्रेषितवान्मम ॥ ३४ ॥
दीयतां नगरी लङ्का पूर्वं रक्षोगणोषिता । मयात्र यदनुष्ठेयं तन्ममाचक्ष्व सुव्रत ॥ ३५ ॥
ब्रह्मर्षिस्त्वेवमुक्तोऽसौ विश्रवा मुनिपुंगवः । प्राञ्जलिं धनदं प्राह शृणु पुत्र वचो मम ॥ ३६ ॥
दशग्रीवो महाबाहुरुक्तवान्मम संनिधौ । मया निर्भर्त्सितश्चासीद्बहुशोक्तः सुदुर्मतिः ॥ ३७ ॥
स क्रोधेन मया चोक्तो ध्वंससे[1] च पुनः पुनः । श्रेयोऽभियुक्तं[2] धर्म्यं च शृणु पुत्र वचो मम ॥ ३८ ॥
वरप्रदानसंमूढो मान्यामान्यं सुदुर्मतिः । न वेत्ति मम शापाच्च प्रकृतिं दारुणां[3] गतः ॥ ३९ ॥
तस्माद्गच्छ महाबाहो कैलासं धरणीधरम् । निवेशय निवासार्थं त्यक्त्वा लङ्कां सहानुगः ॥ ४० ॥
तत्र मन्दाकिनी रम्या नदीनामुत्तमा नदी । काञ्चनैः सूर्यसंकाशैः पङ्कजैः संवृतोदका ॥ ४१ ॥
कुमुदैरुत्पलैश्चैव अन्यैश्चैव सुगन्धिभिः । तत्र देवाः सगन्धर्वाः साप्सरोरगकिंनराः ॥ ४२ ॥
विहारशीलाः सततं रमन्ते सर्वदाश्रिताः । नहि क्षमं तवानेन वैरं धनद रक्षसा ॥
जानीषे हि यथानेन लब्धः परमको वरः ॥ ॥ ४३ ॥
एवमुक्तो गृहीत्वा तु तद्वचः पितृगौरवात् । सदारपुत्रः सामात्यः सवाहनधनो गतः ॥ ४४ ॥
प्रहस्तोऽथ दशग्रीवं गत्वा वचनमब्रवीत् । प्रहृष्टात्मा महात्मानं सहामात्यं सहानुजम् ॥ ४५ ॥

३३-३६] ति० टी०-मम राज्यं वसु च त्वया विभक्तमस्तीति शेषः । एवं त्वदीयमपि मयेति ॥ ३३—३६ ॥

रा० टी०-अभेदं हेतुमाह—अविभक्तमिति । मे राज्यं वसु च मया अविभक्तमेवमुक्त्वा धनाध्यक्षः पितुरन्तिकं जगाम ॥ ३३ ॥

रा० टी०-अभिवाद्येति । गुरुं पितरमभिवाद्य रावणस्य यदीप्सितं तत्प्राह अर्द्धं पृथक् ईप्सिताकारमाह-एष इति । दशग्रीवः मम समीपे दूतं प्रेषितवान् तत्प्रयोजनमाह नगरी लंका दीयताम् अत्र अस्मिन् विषये यन्मयानुष्ठेयं तत् मम समीपे आचक्ष्व सार्द्धश्लोक एकान्वयी ॥ ३४ ॥ ३५ ॥

रा० टी०-ब्रह्मर्षिरिति । एवमुक्तो विश्रवाः धनदं प्राह३६

३७] ति० टी०-बहुशोक्त इति संधिरार्षः ॥ ३७ ॥

रा० टी०-तदाकारमाह—दशग्रीव इति । दशग्रीवः मम सन्निधौ उक्तवान् मया बहुशो भर्त्सितश्चासीत् अत एव त्वं ध्वंससे मर्यादामिति शेषः इति क्रोधेन मयोक्तश्च अतः श्रेयोभिर्युक्तं ममेदं वचश्शृणु बहुशोक्त इत्यत्र सन्धिस्तु त्रिपाद्याः क्वचिदसिद्धत्वाभावबोधनात् श्लोकद्वयमेकान्वयि ॥३७॥३८॥

गो० टी०-दशग्रीव इति । बहुशोक्त इति संधिः छान्दसः ॥ ३८ ॥

३८] ति० टी०-ध्वंससे । ध्वस्तधर्मन्यायमर्यादो जायसे इत्यर्थः ॥ ३८ ॥

गो० टी०-स इति । ध्वंसते ध्वस्तधर्मन्यायमर्यादो जायते ॥ ३९ ॥

३९] ति० टी०-मम शापात्तन्मातृदर्शनकालकृतात् ३९

रा० टी०-तदाकारमाह-वरेति । वरप्रदानेन संमूढः मम शापात् तन्मातृकर्तृकासमययाचनहेतुकदुरुक्त्या दारुणां प्रकृतिं गतो रावणः मान्यामान्यं न वेत्ति एतेन मदुक्तं न स्वीकृतमिति सूचितम् तस्मात् कैलासं धरणीधरं त्वं गच्छ निवासार्थं निवेशय स्वानुगान् संस्थापय श्लोकद्वयमेकान्वयि३९॥४०

गो० टी०-वरप्रदानादिति । मम शापात् । तन्मातृदर्शनकालकृतादिति शेषः ॥ ४० ॥

४०] ति० टी०-निवासार्थं निवेशय। पुरमिति शेषः४०

गो० टी०-तस्मादिति । निवासार्थं निवेशय निवेशनं पुरं कुरु ॥ ४१—५१ ॥

४१-४४] ति० टी०-सूर्यसंकाशैः सूर्यवदुज्ज्वलैः४१-४४

रा० टी०-तत्स्थानस्य वासयोग्यत्वं बोधयंस्राह-तत्रेति । पंकजैः संवृतमुदकं यस्यास्सा कुमुदादिभिरुपलक्षिता मन्दाकिनी नाम नदी तत्रास्तीति शेषः सार्द्धश्लोक एकान्वयी॥४१॥

रा० टी०-तत्रेति । तत्र कैलासे विहारशीला देवादयः सर्वदा श्रितास्सन्तस्सततं रमन्ते ॥ ४२ ॥

रा० टी०-नहीति । अनेन रावणेन यथा वरो लब्धः तथा त्वं जानीषे अतः रक्षसा रावणेन वैरं तव न क्षमं योग्यम् ॥ ४३ ॥

रा० टी०-एवमिति । एवमुक्तो धनदः तत् पित्रोक्तं वचो गृहीत्वा दारादिसहितस्सन् गतः कैलासमिति शेषः ॥ ४४ ॥

४५] ति० टी०-एवं प्रहस्तवचः श्रुत्वा रावणः प्रहृष्टात्माभवदिति शेषः ॥ ४५ ॥

रा० टी०-प्रहस्त इति । प्रहस्तः दशग्रीवं गत्वाब्रवीत्४५

१ अभीति रा. अवीति गो. पाठः । २ ध्वंसत इति गो. पा. । ३ आश्रिति गो. पाठः

शून्या सा नगरी लङ्का त्यक्तत्वैनां धनदो गतः । प्रविश्य तां सहास्माभिः स्वधर्मं तत्र पालय ॥ ४६ ॥
एवमुक्तो दशग्रीवः प्रहस्तेन महाबलः । विवेश नगरीं लङ्कां भ्रातृभिः सबलानुगैः ॥ ४७ ॥
धनदेन परित्यक्तां सुविभक्तमहापथाम् । आरुरोह स देवारिः स्वर्गं देवाधिपो यथा ॥ ४८ ॥
स चाभिषिक्तः क्षणदाचरैस्तदा निवेशयामास पुरीं दशाननः ।
निकामपूर्णा च बभूव सा पुरी निशाचरैर्नीलबलाहकोपमैः ॥ ४९ ॥
धनेश्वरस्त्वथ पितृवाक्यगौरवान्न्यवेशयच्छशिविमले गिरौ पुरीम् ।
स्वलंकृतैर्भवनवरैर्विभूषितां पुरंदरः स्वरिव यथामरावतीम् ॥ ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः

रावणादिभ्रातृत्रयस्य स्वस्वयोग्यदारैरमन्दोदर्यादिभिर्विवाहः मयासुरस्य दशग्रीवायामोघशक्तयायुधार्पणम् मन्दोदर्यामिन्द्रजिदुत्पत्तिश्च ।

राक्षसेन्द्रोऽभिषिक्तस्तु भ्रातृभिः सहितस्तदा । ततः प्रदानं राक्षस्या भगिन्याः समचिन्तयत् ॥१॥
ददौ तां कालकेन्द्राय दानवेन्द्राय राक्षसीम् । स्वसां शूर्पणखां नाम विद्युज्जिह्वाय राक्षसः ॥ २ ॥
अथ दत्त्वा स्वयं रक्षो मृगयामटते स्म तत् । तत्रापश्यत्ततो राम मयं नाम दितेः सुतम् ॥ ३ ॥
कन्यासहायं तं दृष्ट्वा दशग्रीवो निशाचरः । अपृच्छत्को भवानेको निर्मनुष्यमृगे वने ॥ ४ ॥
अनया मृगशावाक्ष्या किमर्थं सह तिष्ठसि । मयस्तदाब्रवीद्राम पृच्छन्तं तं निशाचरम् ॥ ५ ॥
श्रूयतां सर्वमाख्यास्ये यथावृत्तमिदं तत्त्वं । हेमा नामाप्सरास्तत्र श्रुतपूर्वा यदि त्वया ॥ ६ ॥
दैवतैर्मम सा दत्ता पौलोमीव शतक्रतोः । तस्यां भक्तमना ह्यासं दशवर्षशतान्यहम् ॥ ७ ॥

४६-४८] ति० टी०–यतस्त्यक्त्वैनां गतस्ततोऽस्माभिः सह सा तां प्रविश्य धर्मं प्रतिपालयेति प्रहस्तेनोक्तो रावणस्तां प्रविवेश ॥ ४६—४७ ॥

रा० टी०–तत्स्वरूपमाह—शून्येति । लंका शून्या तत्र हेतुः धनदः एनां लंकां त्यक्त्वा गतः अतः तां लंकां प्रविश्य स्वधर्मं पालय ॥ ४६ ॥

रा० टी०–एवमिति । एवमुक्तो दशग्रीवः लंकां विवेश ॥

रा० टी०–तदेव भंग्यन्तरेणाह—धनदेनेति । सुविभक्ताः महापथा यस्यां तां लंकां स्वर्गं देवाधिप इव आरुरोह ॥४८॥

४९] ति० टी०–निकामपूर्णात्यन्तपूर्णा ॥ ४९ ॥

रा० टी०–स इति । क्षणदाचरैः राक्षसैरभिषिक्तो दशाननः पुरीं लंकां निवेशयामास अत एव पुरी निशाचरैः निकामपूर्णा बभूव ॥ ४९ ॥

५०] ति० टी०–शशिविमले गिरौ कैलासे । 'पुरंदरस्येव तदामरावतीम्' इति पाठोऽपुक्तश्छन्दोभङ्गाभावाय ॥५०॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकादशः सर्गः ॥ ११ ॥

रा० टी०–धनेश्वर इति । धनेश्वरः शशिविमले गिरौ पुरीं पुरन्दरः स्वरमरावतीमिव न्यवेशयत् ॥ ५० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकादशः सर्गः ॥ ११ ॥

गो० टी०–धनेश्वर इति । शशिविमले गिरौ कैलासे पुरीमलकाम् । अत्र छन्दोभङ्ग आर्षो ज्ञेयः ॥ ५२ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तर-श्रीरामायणव्याख्याने एकादशः सर्गः ॥ ११ ॥

१-२] ति० टी०–अथेन्द्रजिदुत्पत्तिः—राक्षसेन्द्र इति ॥ १ ॥ २ ॥

रा० टी०–रावणकर्तृकलंकाप्रवेशानन्तरकालिकं वृत्तमाह–राक्षसेन्द्र इत्यादिभिः । अभिषिक्तः भ्रातृभिस्सहितः राक्षसेन्द्रः भगिन्याः शूर्पणखायाः प्रदानं समचिन्तयत् ॥ १ ॥

रा० टी०–ददाविति । शूर्पणखां विद्युज्जिह्वाय ददौ ॥२॥

गो० टी०–स्वसारमिति । कालकेयाय कालकपुत्राय ॥ २—६

३-७] ति० टी०–रामेति संबुद्धिः ॥ ३—७ ॥

१ प्रतीति गो. पाठः । २ पुरंदरस्येव तदेति गो. पाठः । ३ भ्रातृभ्यामिति गो. पाठः । ४ स्वसारमिति गो.पाठः । ५ कालकेयायेति गो. रा. पा. । ६ ददाविति गो.पाठः । ७ ममेति गो. पाठः । ८ तातेति गो. पाठः । ९ तातेति गो. पाठः ।

THE KUPPUSWAMI SASTRI RESEARCH INSTITUTE MYLAPORE, CHENNAI-4

सा च दैवतकार्येण त्रयोदश समा गताः । वर्षे चतुर्दशे चैव ततो हेममयं पुरम् ॥ ८ ॥
वज्रवैदूर्यचित्रं च मायया निर्मितं मया । तत्राहमवसं दीनस्तया हीनः सुदुःखितः ॥ ९ ॥
तस्मात्पुराद्दुहितरं गृहीत्वा वनमागतः । इयं ममात्मजा राजंस्तस्याः कुक्षौ विवर्धिता ॥ १० ॥
भर्तारमनया सार्धमस्याः प्राप्तोऽस्मि मार्गितुम् । कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम्॥ ११ ॥
कन्या हि द्वे कुले नित्यं संशये स्थाप्य तिष्ठति । पुत्रद्वयं ममाप्यस्यां भार्यायां संबभूव ह ॥ १२ ॥
मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः । एवं ते सर्वमाख्यातं याथातथ्येन पृच्छतः ॥ १३ ॥
त्वामिदानीं कथं तात जानीयां को भवानिति । एवमुक्तं तु तद्रक्षो विनीतमिदमब्रवीत् ॥ १४ ॥
अहं पौलस्त्यतनयो दशग्रीवश्च नामतः । मुनेर्विश्रवसो यस्तु तृतीयो ब्रह्मणोऽभवत् ॥ १५ ॥
एवमुक्तस्तदा राम राक्षसेन्द्रेण दानवः । महर्षेस्तनयं ज्ञात्वा मयो दानवपुंगवः ॥ १६ ॥
दातुं दुहितरं तस्मै रोचयामास तत्रै वै । करेण तु करं तस्या ग्राहयित्वा मयस्तदा ॥ १७ ॥

रा०टी०–अथेति । रक्षो रावणः दत्वा शूर्पणखामिति शेषः मृगयामुद्दिश्य तद्वनमटते स्म तत्र वने दितेस्सुतमपश्यत् ॥३॥

रा० टी०–कन्येति । कन्यायाः सहायं तं मयं दृष्ट्वा दशग्रीवोऽपृच्छत् तदाकारमाह निर्गता मनुष्यमृगा यस्मात् अतिभयङ्करमित्यर्थः किंच निर्मनुष्या मनुष्यरहिता मृगा यस्मिन् मृगमात्रसेवितमित्यर्थः तस्मिन् वने एकः पुरुषान्तररहितो भवान् कः अनया कन्यया सह किमर्थं तिष्ठति तदा पृच्छन्तं निशाचरं मयोऽब्रवीत् श्लोकद्वयमेकान्वयि ॥ ४–५ ॥

रा० टी०–तदाकारमाह—श्रूयतामित्यादिभिः । यथावृत्तं वृत्तमनतिक्रम्य सर्वमिदं तव सन्निधावाख्यास्ये अतः श्रूयताम् अर्द्धं पृथक् आख्यानाकारमाह—हेमेत्यादिभिः । यदि कदाचित् त्वयापि श्रुतपूर्वा हेमानामाप्सरा दैवतैर्मम दत्ता तस्यां दशवर्षशतानि सक्तमनाः अहमासं सार्द्धश्लोक एकान्वयी ॥ ६ ॥ ७ ॥

गो० टी०–तस्यामिति । वर्षं चतुर्दशसंख्याविशिष्टं वर्षं च गतमित्यर्थः ॥ ७ ॥

८] ति० टी०–गता । देवलोकमिति शेषः । ततस्त्रयोदश समा वर्षाणि गताः गतानि । चतुर्दशं च तद्विरहितस्य गतमित्यनुकर्षः । हेममयं सुवर्णप्रचुरम् ॥ ८ ॥

९] ति० टी०–मायया विचित्रनिर्माणशक्त्या निर्मितम्९

रा० टी०–सेति । सा हेमा दैवतकार्येण हेतुना स्वर्गं गतेति शेषः तत आरभ्य त्रयोदश समाः वर्षाणि गताः चतुर्दशं च वर्षं गतं ततोऽनन्तरं हेममयं पुरं मया मायया निर्मितं तत्र पुरे तया हीनोहमवसम् श्लोकद्वयमेकान्वयि ॥ ८—९ ॥

गो० टी०–तस्या इति । हेममयं पुरं हेमपुरम् । मायया विचित्रनिर्माणशक्त्या ॥ ८ ॥ ९ ॥

१०] ति० टी०–तस्याः कुक्षौ । हेमाया गर्भे इत्यर्थः१०

रा० टी०–तस्मादिति । तस्याः हेमायाः कुक्षौ विवर्द्धिता इयं या ममात्मजा तां दुहितरं गृहीत्वा तस्मात् हेममयात् पुरात् वनमागतः ॥ १० ॥

गो० टी०–तस्मादिति । तस्याः कुक्षौ । हेमाया गर्भे इत्यर्थः ॥ १० ॥

११] ति० टी०–मार्गितुं प्राप्तोऽस्मि । मानकांक्षिणामभिमानेच्छूनां दुःखमभिमाननिवर्तकत्वात् ॥ ११ ॥

रा० टी०–आगमनप्रयोजनमाह–भर्त्तारमिति । अस्याः भर्त्तारं मार्गितुमनया सार्द्धं प्राप्तोस्मि हि यतः कन्यापितृत्वं दुःखं हि यतः कन्या द्वे कुले कुलद्वयं संशये स्थाप्य स्थापयित्वा तिष्ठति सार्द्धश्लोक एकान्वयी ॥ ११ ॥

गो० टी०–भर्तारमिति । अस्या भर्त्तारं मार्गितुम् अनया प्राप्तोस्मि ॥ ११ ॥ १२ ॥

१२] ति० टी०–अस्यां हेमायाम् ॥ १२ ॥

रा० टी०–पुत्रेति । अस्यां हेमायां प्रथमो मायावी तदनन्तरो दुन्दुभिः इति पुत्रद्वयमपि संबभूव पृच्छतस्ते समीपे याथातथ्येन एवं सर्वमाख्यातं सार्द्धश्लोक एकान्वयी ॥ १२ ॥

१३–१४] ति० टी०–मायावी तन्नामकः ॥ १३–१४ ॥

रा० टी०–त्वामिति । को भवानिति त्वामिदानीं कथं जानीयाम् एतेन त्वमपि स्वकुलादि वदेति सूचितम् एवमुक्तं तद्रक्षो रावण इदमब्रवीत् ॥ १४ ॥

गो० टी०–मायावीति । मायावी च वालिना पलायितोत्रैव प्रविष्टो नाशित इति ज्ञेयम् ॥ १३–१७ ॥

१५] ति० टी०–पौलस्त्यतनय इत्युक्तमेवार्थं स्पष्टमाह–मुनेरिति । यो मुनिर्विश्रवा ब्रह्मणस्तृतीयापत्यं तस्य भगवतो विश्रवसोऽहं तनय इत्यर्थः ॥ १५ ॥

रा० टी०–तदाकारमाह–अहमिति । यो ब्रह्मणस्तृतीयस्तृतीयापत्यमभवत् तस्मात् विश्रवसो मुनेरहं जातोऽस्मीति शेषः अत एव पौलस्त्यतनयः नामतो दशग्रीवोहमस्मि ॥१५॥

१६–१७] ति० टी०–तं महर्षेस्तनयं ज्ञात्वा दुहितरं तस्मै दातुं रोचयामास । तत्र वै महाकुलप्रसूतत्वज्ञानकाले ॥ १६ ॥

रा० टी०–एवमिति । राक्षसेन्द्रेण एवमुक्तः दानवपुङ्गवो दानवो मयः महर्षेस्तनयं ज्ञात्वा तस्मै रावणाय दुहितरं दातुं रोचयामास सार्द्धश्लोक एकान्वयी ॥ १६ ॥

१ गता वर्षाश्चतुर्दश । तस्याः कृते च हेमायाः सर्वमिति गो. पाठः । २ हर्षमुपागत इति गो. पाठः । ३ यत्रेति गो. पाठः ।

प्रहसन्प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः । इयं ममात्मजा राजन्हेमयाप्सरसा धृता ॥ १८ ॥
कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम् । बाढमित्येव तं राम दशग्रीवोऽभ्यभाषत ॥ १९ ॥
प्रज्वाल्य तत्र चैवाग्निमकरोत्पाणिसंग्रहम् । स हि तस्य मयो राम शापाभिज्ञस्तपोधनात् ॥ २० ॥
विदित्वा तेन सा दत्ता तस्य पैतामहं कुलम् । अमोघां तस्य शक्तिं च प्रददौ परमाद्भुताम् ॥ २१ ॥
परेण तपसा लब्धां जघ्निवाँल्लक्ष्मणं यया । एवं सै कृत्वा दारान्वै लङ्कायाः ईश्वरः प्रभुः ॥ २२ ॥
गत्वा तु नगरीं भार्ये भ्रातृभ्यां समुपाहरत् । वैरोचनस्य दौहित्रीं वज्रज्वालेति नामतः ॥ २३ ॥
तां भार्यां कुम्भकर्णस्य रावणः समकल्पयत् । गन्धर्वराजस्य सुतां शैलूषस्य महात्मनः ॥ २४ ॥
सरमां नाम धर्मज्ञां लेभे भार्यां विभीषणः । तीरे तु सरसो वै तु संजज्ञे मानसस्य हि ॥ २५ ॥
सरस्तदा मानसं तु वव्रृधे जलदागमे । मात्रा तु तस्याः कन्यायाः स्नेहेनाक्रन्दितं वचः ॥२६॥
सरो मा वैर्धतेत्युक्तं ततः सा सरमाभवत् । एवं ते कृतदारा वै रेमिरे तत्र राक्षसाः ॥ २७ ॥
स्वां स्वां भार्यामुपादाय गन्धर्वा इव नन्दने । ततो मन्दोदरी पुत्रं मेघनादमजीजनत् ॥ २८ ॥
स एष इन्द्रजिन्नाम युष्माभिरभिधीयते । जातमात्रेण हि पुरा तेन रावणसूनुना ॥ २९ ॥
रुदता सुमहान्मुक्तो नादो जलधरोपमः । जडीकृता च सा लङ्का तस्य नादेन राघव ॥ ३० ॥
पिता तस्याकरोन्नाम मेघनाद इति स्वयम् । सोवर्धत तदा राम रावणान्तःपुरे शुभे ॥ ३१ ॥
रक्ष्यमाणो वरस्त्रीभिश्छन्नः काष्ठैरिवानलः । मातापित्रोर्महाहर्षं जनयन्रावणात्मजः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्वादशः सर्गः ॥ १२ ॥

रा० टी०–करणेति । मयः तस्याः कन्यायाः करं करेण रावणहस्तेन ग्राहयित्वा प्रहसन्सन् राक्षसेन्द्रं रावणमिदं प्राह १७

१८–१९] ति० टी०–धृता धृतगर्भा । प्रसूतेत्यर्थः ॥

रा० टी०–तदाकारमाह–इयमिति । हेमया धृता मन्दोदरी नाम ममात्मजा कन्या पत्न्यर्थं प्रतिगृह्यतां त्वयेति शेषः॥१८॥

रा० टी०–बाढमिति । दशग्रीवः बाढमित्यभ्यभाषत अत एव अग्निं प्रज्वाल्य पाणिसंग्रहं पाणिग्रहणविधिमकरोत् ॥१९॥

गो० टी०–इयमिति । धृता धृतगर्भा प्रसूतेत्यर्थः १८–१९

२०] ति० टी०–तपोधनाज्जातशापाभिज्ञः । दारुणप्रकृतिर्भविष्यतीति श्रुतशापवृत्तान्त इत्यर्थः ॥ २० ॥

रा० टी०–स इति । यद्यपि मयः तपोधनात् विश्रवसो जातस्य शापस्य अभिज्ञस्तथापि तस्य रावणस्य पैतामहं कुलं ज्ञात्वा तेन मयेन सा कन्या दत्ता हि यद्यपीत्यर्थे ॥ २० ॥

गो० टी०–स हीति । शापाभिज्ञ इति । दारुणप्रकृतिर्भविष्यतीति श्रुतशापवृत्तान्त इति भावः । पुलस्त्यशापश्चैत्केवलं कुलमेव बह्वमन्यतेत्यर्थः ॥ २०–२४ ॥

२१] ति० टी०–तेन हेतुना । यद्यस्मै इयं कन्या न दीयते तदा दारुणप्रकृतित्वान्मां निगृह्य बलादति ग्रहीष्यतीति ज्ञानेन महाकुलप्रसूतत्वज्ञानेन चेत्यर्थः ॥ २१ ॥

रा० टी०–अमोघामिति । यया लक्ष्मणं जघ्निवान् तां शक्तिं प्रददौ ॥ २१ ॥

२२] ति० टी०–लब्धाम् । मयेनेति शेषः ॥

रा० टी०–एवमिति । लंकाया ईश्वरः एवं दारान् कृत्वा नगरीं लङ्कां गत्वा भ्रातृभ्यामपि भार्ये समुपाहरत् विवाहविधिना प्रापयत् ॥ २२ ॥

२३–२४] ति० टी०–भ्रातृभ्यां सह समुपाहरदूढवान् । 'उदवाहयत्' इति पाठान्तरम् ॥ २३ ॥ २४ ॥

रा० टी०–तत्प्रकारमाह—वैरोचनेत्यादिभिः । नामतः प्रज्वालेति वैरोचनस्य या दौहित्री तां दौहित्रीं कुम्भकर्णस्य भार्यां रावणस्समकल्पयत् ॥ २३ ॥

रा० टी०–गन्धर्वेति । विभीषणः गन्धर्वराजस्य शैलूषस्य सरमां नाम सुतां भार्यां लेभे ॥ २४ ॥

२५] ति० टी०–सरमाया विभीषणपत्न्या नाम निर्वक्ति—तीरे त्विति ॥ २५ ॥

२६–२९] ति० टी०–तदास्या मानससरस्तीर उत्पत्तिकाले । मानसं सरो जलदागमनिमित्ततस्तच्छिशुपर्यन्तं वव्रृधे । ततो भीतायाः कन्याया आक्रन्दितं श्रुत्वा तस्या मात्रा कन्यास्नेहेन सरो मा वर्धतेत्युक्तम् । ततः सा कन्या सरमाभवत् । पृषोदरादित्वात्साधुः ॥ २६—२९ ॥

३०-३२] ति०टी०–जलधरोपमो जलधरनादोपमः ३०-३२

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे द्वादशः सर्गः ॥ १२ ॥

१ स्वीकृतदारो वै इति गो. पाठः । २ वर्धयस्वेतीति गो. पाठः । ३ गम्येति गो. पाठः ।

त्रयोदशः सर्गः ।

अथ कुम्भकर्णो निद्रयाहमाकुलः सुखशयनाय विवित्तं गृहं कारयेति तेनोक्तेन दशशिरसा निर्मापिते मन्दिरे चिरं सुष्वाप ततो देवर्षियक्षगन्धर्वान्प्रबाधमानं दशग्रीवं निशम्य तस्मात्तमपावर्तयितुं मनुष्यधर्मा संदेशहरं प्राहिणोत् । तदुक्तमनादृत्य द्रुतो लङ्केश्वरस्त्रैलोक्यविजयाकांक्षी निर्ययौ धनेश्वरमेवादौ ।

अथ लोकेश्वरोत्सृष्टा तत्र कालेन केन चित् । निद्रा समभवत्तीव्रा कुम्भकर्णस्य रूपिणी ॥ १ ॥
ततो भ्रातरमासीनं कुम्भकर्णोऽब्रवीद्वचः । निद्रा मां बाधते राजन्कारयस्व ममालयम् ॥ २ ॥
विनियुक्तास्ततो राज्ञा शिल्पिनो विश्वकर्मवत् । विस्तीर्णं योजनं स्निग्धं ततो द्विगुणमायतम् ॥ ३ ॥
दर्शनीयं निरावाधं कुम्भकर्णस्य चक्रिरे । स्फाटिकैः काञ्चनैश्चित्रैः स्तम्भैः सर्वत्र शोभितम् ॥ ४ ॥
वैदूर्यकृतसोपानं किङ्किणीजालकं तथा । दान्ततोरणविन्यस्तं वज्रस्फटिकवेदिकम् ॥ ५ ॥
मनोहरं सर्वसुखं कारयामास राक्षसः । सर्वत्र सुखदं नित्यं मेरोः पुण्यां गुहामिव ॥ ६ ॥
तत्र निद्रां समाविष्टः कुम्भकर्णो महाबलः । बहून्यब्दसहस्राणि शयानो न चै बुद्ध्यते ॥ ७ ॥
निद्राभिभूते तु तदा कुम्भकर्णे दशाननः । देवर्षियक्षगन्धर्वान्संजघ्ने हि निरङ्कुशः ॥ ८ ॥
उद्यानानि विचित्राणि नन्दनादीनि यानि च । तानि गत्वा सुसंक्रुद्धो भिनत्ति स्म दशाननः ॥ ९ ॥
नदीं गज इव क्रीडन्वृक्षान्वायुरिव क्षिपन् । नगान्वज्र इवोत्सृष्टो विध्वंसयति राक्षसः ॥ १० ॥

रा०टी०–सरमानामत्वे कारणमाह–तीर इतिद्वाभ्याम्। यदा मानसस्य सरसः तीरे सा संजज्ञे तदा जलदागमे सति मानसं सरो वर्द्धते तस्याः मात्रा तु सरो मा वर्द्धत इत्याक्रन्दितं विक्लवं वच उक्तं ततो हेतोः सा सरमाभवत् श्लोकद्वयमेकान्वयि ॥ २५–२६ ॥

रा० टी०–एवमिति । एवं कृतदाराः ते रावणप्रभृतयः स्वां स्वां भार्यामुपादाय रेमिरे ॥ २७ ॥

रा० टी०–तत इति । मेघनादं मन्दोदरी अजीजनत् स मन्दोदरीजनित एष मेघनादो युष्माभिरिन्द्रजिन्नामाभिधीयते कथ्यते ॥ २८ ॥

रा० टी०–मेघनादनामत्वे कारणमाह—जातेति । जातमात्रेण रुदता रावणसूनुना जलधरोपमो महानादो मुक्तः अत एव तस्य नादेन लङ्का जडीकृता अतः तस्य बालस्य मेघनाद इति नाम पिता स्वयमकरोत् अर्द्धचतुष्टयमेकान्वयि ॥२९॥३०॥

रा० टी०–स इति । वरस्त्रीभिः रक्ष्यमाणः काष्ठैः छन्नोऽनल इव स मेघनादः मातापित्रोर्महाहर्षं जनयन् सन् रावणान्तःपुरे अवर्द्धत सार्द्धश्लोक एकान्वयी ॥ ३१ ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्वादशः सर्गः ॥ १२ ॥

गो० टी०–सरमाशब्दं निर्वक्ति–तीरे इत्यादि । सरो वा वर्धयत्येतयुक्त्या सरमेति नामासीत् पृषोदरादित्वात्साधुः ॥ ३१–३२ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणभूषणव्याख्याने द्वादशः सर्गः ॥ १२ ॥

१—२] ति० टी०–लोकेश्वरेण ब्रह्मणोत्सृष्टा प्रेषिता रूपिणी जृम्भादिरूपेण रूपवती समभवत्प्राप्ता ॥ १ ॥ २ ॥

रा० टी०–कुम्भकर्णवृत्तान्तं वर्णयन्नाह–अथेत्यादिभिः। केनचित्कालेन लोकेश्वरेण ब्रह्मणोत्सृष्टा तद्वचनप्रभावेणोत्पन्नेत्यर्थः रूपिणी जृम्भादिरूपविशिष्टा कुम्भकर्णस्य निद्रा तीव्रा समभवत् ॥ १ ॥

रा० टी०–तत इति । हे राजन् निद्रा मां बाधते अतः ममालयं चिरशयनयोग्यगृहं कारयस्व इति वचः कुम्भकर्णो भ्रातरं श्रवणमब्रवीत् ॥ २ ॥

गो० टी०–अथेत्यादि । लोकेश्वरेण ब्रह्मणोत्सृष्टा प्रेषिता रूपिणी मूर्ता ॥ १ ॥ २ ॥

३—४] ति० टी०–विश्वकर्मवत्तत्सदृशाः । विस्तीर्णं योजनम् । तिर्यङ्मानेनेति शेषः । ततस्तिर्यङ्मानात् । एवं च युद्धकाण्डे यद्योजनायतामित्युक्तं तद्द्विगुणयोजनायतामित्यर्थकं बोध्यम् ॥ ३ ॥ ४ ॥

रा० टी०–विनियुक्ता इति । राज्ञा रावणेन विनियुक्ता विश्वकर्मवत् शिल्पिनः योजनं विस्तीर्णं ततो द्विगुणमायतं स्फाटिकादिभिः स्तम्भैश्शोभितं किंकिणीनां जालं यस्मिन्दान्तेन गजदन्तनिर्मितेन तोरणेन विन्यस्तं वज्रस्फटिकानां वेदिका यस्मिन् तदालयं चक्रिरे श्लोकत्रयमेकान्वयि ॥ ३-५ ॥

गो० टी०–विनियुक्ता इति । विस्तीर्णं योजनमिति । तिर्यङ्मानेनेति शेषः । ततो द्विगुणमायतम् । युद्धकाण्डे योजनायतमित्युक्तं द्विगुणयोजनायतपरम् ॥ ३ ॥ ४ ॥

५—१०] ति० टी०–किङ्किणीजालकं किङ्किणीनां

१ शुभ्रमिति गो. पाठः । २ प्रेति गो. पाठः ।

यथावृत्तं तु विज्ञाय दशग्रीवं धनेश्वरः । कुलानुरूपं धर्मज्ञो वृत्तं संस्मृत्य चात्मनः ॥ ११ ॥
सौभ्रात्रदर्शनार्थं तु दूतं वैश्रवणस्तदा । लङ्कां संप्रेषयामास दशग्रीवस्य वै हितम् ॥ १२ ॥
स गत्वा नगरीं लङ्कामाससाद विभीषणम् । मानितस्तेन धर्मेण पृष्टश्चागमनं प्रति ॥ १३ ॥
पृष्ट्वा च कुशलं राज्ञो ज्ञातीनां च विभीषणः । सभायां दर्शयामास तमासीनं दशाननम् ॥ १४ ॥
स दृष्ट्वा तत्र राजानं दीप्यमानं स्वतेजसा । जयेति वाचा संपूज्य तूष्णीं समभिवर्तते ॥ १५ ॥
सँ तत्रोत्तमपर्यङ्के वरास्तरणशोभिते । उपविष्टं दशग्रीवं दूतो वाक्यमथाब्रवीत् ॥ १६ ॥
राजन्वदामि ते सर्वं भ्राता तव यदब्रवीत् । उभयोः सदृशं वीर वृत्तस्य च कुलस्य च ॥ १७ ॥
साधु पर्याप्तमेतावत्कृत्यश्चारित्रसंग्रहः । साधु धर्मे व्यवस्थानं क्रियतां यदि शक्यते ॥ १८ ॥

जालानि यस्मिंस्तत् । दान्ततोरणं दन्तविकारतोरणं तस्य विन्यस्तं विन्यासो यत्र तत् ॥ ९—१० ॥

गो० टी०–वैडूर्येति । किङ्किणीजालकं प्रान्तेषु किङ्किणीजालयुक्तम् । दान्तो दन्तविकारः ॥ ९–१० ॥

रा० टी०–मनोहरमिति । मेरार्गुहामिव मनोहरमालयं राक्षसः कारयामास ॥ ६ ॥

रा० टी०–तत्रेति । तत्रालये निद्रां समाविष्टः अत एव बहून्यब्दसहस्राणि शयानः कुम्भकर्णो न बुध्यते जागर्ति ॥७॥

रा० टी०–निद्रेति । कुम्भकर्णे निद्राभिभूते सति निरंकुशो दशाननः देवादीन् संजघ्ने ॥ ८ ॥

रा० टी०–उद्यानानीति । सुसंकुद्धः देवकर्तृककुम्भकर्णवरयाचनकालककुम्भकर्णवचनविपरीतकरणस्मृतिजनितक्रोधविशिष्टो दशाननः नन्दनादीनि यान्युद्यानानि तानि भिनत्ति स्म ॥ ९ ॥

रा० टी०–नदीमिति । राक्षसो रावणः नद्यादीन् विध्वंसयति ॥ १० ॥

११] ति० टी०–आत्मनः कुलानुरूपं वृत्तं संस्मृत्येति । बोधनीयत्वेनेति शेषः ॥ ११ ॥

रा० टी०–तथेति । धनेश्वरः तथावृत्तं दशग्रीवं विज्ञाय कुलानुरूपमात्मनो वृत्तं संस्मृत्य च सौभ्रात्रदर्शनार्थं दशग्रीवस्य हितं दूतं संप्रेषयामास श्लोकद्वयमेकान्वयि ॥ ११-१२ ॥

गो० टी०–तथेति । कुलानुरूपं वृत्तमिति । असक्तमिति शेषः ॥ ११ ॥

१२] ति० टी०–सौभ्रात्रदर्शनार्थं तद्दर्शयितुम् । हितमिति । वक्तुमिति शेषः ॥ १२ ॥

गो० टी०–सौभ्रात्रेति । हितं हितपरम् ॥ १२ ॥

१३] ति० टी०–आगमन् । प्रतिकार्यमिति शेषः॥१३॥

रा० टी०–स इति । स दूतः लङ्कां गत्वा विभीषणमासासाद प्राप तेन विभीषणेन मानितः आगमनं प्रति आगमनप्रयोजनमित्यर्थः पृष्टश्च ॥ १३ ॥

गो०टी०–स इति । आगमनं प्रतीति कार्यमिति शेषः१३

१४] ति० टी–राज्ञो धनदस्य । तं कुबेरदूतम् ॥ १४ ॥

रा० टी०–पृष्ट्वेति । विभीषणः राज्ञः कुबेरस्य ज्ञातीनां च कुशलं पृष्ट्वा दशाननं दर्शयामास ॥ १४ ॥

गो० टी०–पृष्ट्वेति । राज्ञः कुबेरस्य । तं दूतम्॥१४॥१६॥

१५–१६] ति० टी०–तूष्णीं समभिवर्तते । क्षणमात्रमिति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–स इति । स दूतः राजानं रावणं दृष्ट्वा जयेति वाचा सम्पूज्य तूष्णीं समभिवर्तत समभ्यवर्त्तत अतिष्ठत्॥१५॥

रा० टी०–स इति । स दूतः उत्तमपर्यंके उपविष्टं दशग्रीवमब्रवीत् ॥ १६ ॥

१७] ति० टी०–उभयोर्मातापित्रोः कुलस्य तयोर्वृत्तस्य च सदृशम् ॥ १७ ॥

रा० टी०–तदाकारमाह—राजन्निति । उभयोः मातापित्रोः कुलस्य वृत्तस्य सदाचारस्य च सदृशं तव भ्राता यदब्रवीत् तत्सर्वं वदामि ॥ १७ ॥

गो० टी०–राजन्निति । उभयोरिति उभयोर्मातापित्रोः । कुलस्याभिजनस्य तयोर्वृत्तस्य च सदृशं यथा तथा॥ १७ ॥

१८] ति० टी०–साधु सम्यक् । एतावत्पर्याप्तमेतावदेव पापमलम् । इतः परं चारित्रसंग्रहः कृत्यः कार्यः । तदेव दार्ढ्याय पुनराह—साध्विति । व्यवस्थानं व्यवस्थितिः । यदि शक्यते इत्यनेन क्रूरत्वान्नियोगबुद्धिर्व्यावर्त्यते । कतकस्तु—'कृतश्चारित्रसंग्रहः' इति पठित्वा साधु सम्यक्चारित्रसंग्रह आचारसंग्रहः कृतः संपादितश्चेदेतावदेव पर्याप्तमिहामुत्राभ्युदयाय । अस्यैव विवरणं साध्वित्याह ॥ १८ ॥

रा० टी०–तदाकारमाह—साध्विति । एतावत् एतत्परिमितमेव पापमित्यर्थः पर्याप्तं बहु कृतमित्यर्थः इतःप्रभृति न कर्तव्यमिति तात्पर्यम् अतः चारित्रस्य सदाचारस्य संग्रहः साधु यथा भवति तथा कृत्यः कार्यः अतो यदि शक्यते तर्हि धर्मे व्यवस्थानमास्था साधु क्रियताम् ॥ १८ ॥

गो० टी०–साध्विति । साधु सम्यक् । चारित्रसंग्रहः कृतश्चेदेतावदेव पर्याप्तम् । उक्तमर्थं विवृणोति—साध्वित्यादि । व्यवस्थानं व्यवस्थितिः । यदि शक्यत इत्युक्त्या ज्येष्ठतया नियोगबुद्धिर्व्यावर्तते ॥ १८ ॥

---

१ तथेति गो. रा. पाठः । २ वर्तेतेति गो. रा. पाठः । ३ तमिति गो. पाठः । ४ कृत इति गो. पाठः ।

दृष्टं मे नन्दनं भग्नमृषयो निहताः श्रुताः । देवतानां समुद्योगस्त्वत्तो राजन्मया श्रुतः ॥ १९ ॥
निराकृतश्च बहुशस्त्वयाहं राक्षसाधिप । सापराधोऽपि बालो हि रक्षितव्यः स्वबान्धवैः॥२०॥
अहं तु हिमवत्पृष्ठं गतो धर्ममुपासितुम् । रौद्रं व्रतं समास्थाय नियतो नियतेन्द्रियः ॥ २१ ॥
तत्र देवो मया दृष्ट उमया सहितः प्रभुः । सव्यं चक्षुर्मया दैवात्तत्र देव्यां निपातितम्॥ २२ ॥
कान्विषेति महाराज न खल्वन्येन हेतुना । रूपं चानुपमं कृत्वा रुद्राणी तत्र तिष्ठति ॥ २३ ॥
देव्या दिव्यप्रभावेण दग्धं सव्यं ममेक्षणम् । रेणुध्वस्तमिव ज्योतिः पिङ्गलत्वमुपागतम् ॥ २४ ॥
ततोऽहमन्यद्विस्तीर्णं गत्वा तस्य गिरेस्तटम् । तूष्णीं वर्षशतान्यष्टौ समधारं महाव्रतम् ॥ २५ ॥
समाप्ते नियमे तस्मिंस्तत्र देवो महेश्वरः । ततः प्रीतेन मनसा प्राह वाक्यमिदं प्रभुः ॥ २६ ॥
प्रीतोऽस्मि तव धर्मज्ञ तपसानेन सुव्रत । मया चैतद्व्रतं चीर्णं त्वया चैव धनाधिप ॥ २७ ॥
तृतीयः पुरुषो नास्ति यश्चरेद्व्रतमीदृशम् । व्रतं सुदुष्करं ह्येतन्मयैवोत्पादितं पुरा ॥ २८ ॥
तत्सखित्वं मया सौम्य रोचयस्व धनेश्वर । तपसा निर्जितश्चैव सखा भव ममानघ ॥ २९ ॥

१९] ति० टी०–उपदेशप्रयोजकमसद्भूतं दृश्यते श्रूयते चेत्याह—दृष्टमिति । मे मया त्वत्तस्त्वन्निमित्तो देवतानां समुद्योगः प्रतिक्रियासंपादनविषय इति शेषः ॥ १९ ॥

रा० टी०–तत्कृतपापस्वरूपं बोधयन्नाह—दृष्टमिति । त्वत्तस्त्वया भग्नं नन्दनं दृष्टं त्वत्तो निहता ऋषयः श्रुताः अत एव समुद्योगः त्वद्बधोपायकरणं श्रुतः ॥ १९ ॥

गो० टी०–तस्य क्रूरत्वान्मायाचारित्रव्यवस्थानेन विना किं कृतमित्यत्राह–दृष्टमित्यादिना । त्वत्तः त्वया । मम मया । समुद्योग इति । प्रतिक्रियाकरणायेति शेषः ॥१९॥

२०] ति० टी०–यद्यपि त्वयाहं निराकृतः, अथापि मम त्वं रक्ष्य एव । तत्र हेतुः—सापराधोऽपीति । स्वबान्धवैः पित्रादिभिः ॥ २० ॥

रा० टी०–निराकृत इति । यद्यपि त्वयाहं बहुशो निराकृतः तथापि सापराधोऽपि बालः स्वबान्धवैः रक्षितव्यः एतेन त्वद्रक्षणार्थमेवेदं मयोच्यते इति सूचितम् तेन मद्वचनानादरे तव कल्याणं न भवितेति ध्वनितम् ॥ २० ॥

गो० टी०–निराकृत इति । रमणीयाः तोषणीयाः स्वबान्धवाः बाल्यादज्ञानादपराद्धाः त्वया कृतापराधा आसन्नित्यर्थः ॥ २० ॥

२१–२२] ति० टी०–त्वद्रक्षणहेतोरेव—अहं त्विति । रौद्रं रुद्रप्रसादकरम् ॥ २१ ॥ २२॥

२३] ति० टी०–किमिति देव्यां चक्षुर्निपातितं तत्राह–कान्विति । अन्येन हेतुना । विकारादिनेत्यर्थः । कान्विति सूचितविस्मयहेतुमाह—रूपं चेति ॥ २३ ॥

रा० टी०–ननु पापाचरणसमये एव कुतो न निवारितमित्यत आह—अहमित्यादिभिः । रौद्रं व्रतं समास्थाय धर्ममुपासितुं हिमवत्पृष्ठमहं गतः ॥ २१ ॥

रा० टी०–तत्रेति । तत्र हिमवत्पृष्ठे उमया सहितो देवो मया दृष्टः दैवात् भाग्यवशात् का नु एषा इति हेतोः सव्यं वामं चक्षुः देव्या निपातितमन्येन हेतुना न तत्र तस्मिन् समये अनुपमं रूपं कृत्वा रुद्राणी तिष्ठति अतिष्ठत श्लोकद्वयमेकान्वयि ॥ २२–२३ ॥

गो० टी०–अहमिति । रौद्रं रुद्रप्रसादकव्रतम् । इदं तु केदारव्रतमित्याहुः ॥ २१—२८ ॥

२४] ति० टी०–दग्धं नष्टम् । सव्येतरत्तु रेणुध्वस्तं रेणुस्पर्शकलुषीकृतम् । ज्योतिषा तेजसा पिङ्गलं तस्य भावस्तत्त्वम् । यद्वा कलुषितज्योतिरिव पिङ्गत्वं प्राप्तमित्यर्थः २४

रा० टी०–देव्या इति । देव्याः रुद्राण्याः दिव्यप्रभावेण मम सव्यमीक्षणं चक्षुर्दग्धं मम ज्योतिः इतरनयनकान्तिः रेणुध्वस्तमिव पिङ्गलत्वमुपागतम् ॥ २४ ॥

२५–२६] ति० टी०–समधारं समधारयम्॥२५॥२६॥

रा० टी०–तत इति । ततोऽनन्तरं गिरेरन्यत्तटं गत्वा अष्टौ वर्षशतानि तूष्णीं महाव्रतं समधारं समधारयम् ॥ २५ ॥

रा० टी०–समाप्त इति । नियमे समाप्ते सति महेश्वरः इदं वाक्यं प्राह ॥ २६ ॥

२७–२८] ति० टी०–एतद्व्रतं त्वदाचरितं महाव्रतम् ॥ २७ ॥ २८ ॥

रा० टी०–तदाकारमाह—प्रीत इति । अहं प्रीतोस्मि तत्र हेतुः य एतद्व्रतं चरेत् स तृतीयो नास्ति सार्धश्लोक एकान्वयी ॥ २७ ॥ २८ ॥

रा० टी०–एतद्व्रतकर्तुस्तृतीयस्याभावे हेतुं वदन्नाह—व्रतमिति । एतद्व्रतं पुरा मयैव उत्पादितं तन्मयोत्पादितव्रताचरणाद्धेतोः मया सखित्वं समारोचय अत एव मम सखा भव सार्द्धश्लोक एकान्वयी ॥ २९ ॥

गो० टी०–व्रतमिति । रोचयस्व स्वरुचितं कुरु॥२९॥३१॥

२९] ति० टी०–रोचयस्व । रुचितं कृण्वित्यर्थः ॥ २९ ॥

---

१ वृत्तमिति गो. पाठः । २ सह देव्या मयेति गो. पाठः । ३ का न्विषयमिति गो. पाठः । ४ ह्रीति गो. पाठः । ५ आधारमिति गो. पाठेः। ६ प्रीति गो. पाठः । ७ दुष्कृतमिति रा. निश्चयमिति च गो. पाठः ।

देव्या दग्धं प्रभावेण यच्च सव्यं तवेक्षणम् । पैङ्गल्यं[1] यदवाप्तं[2] हि देव्या रूपनिरीक्षणात् ॥ ३० ॥
एकाक्षिपिङ्गलीत्येव[3] नाम स्थास्यति शाश्वतम् । एवं तेन सखित्वं च प्राप्यानुज्ञां च शंकरात् ॥३१॥
आगतेन[4] मया चैवं श्रुतस्ते पापनिश्चयः । तदधर्मिष्ठसंयोगान्निवर्त कुलदूषणात् ॥ ३२ ॥
चिन्त्यते हि वधोपायः सर्पिसङ्घैः[5] सुरैस्तव । एवमुक्तो दशग्रीवः कोपसंरक्तलोचनः[6] ॥ ३३ ॥
हस्तान्दन्तांश्च संपिष्य[7] वाक्यमेतदुवाच ह । विज्ञातं ते मया दूत वाक्यं यत्त्वं प्रभाषसे[8] ॥ ३४ ॥
नैर्वं त्वमसि नैवासौ भ्रात्रा येनासि चोदितः । हितं नैष ममैतद्धि ब्रवीति धनरक्षकः[9] ॥ ३५ ॥
महेश्वरसखित्वं तु मूढः श्रावयते किल । नैवेदं[10] क्षमणीयं मे यदेतद्भाषितं त्वया ॥ ३६ ॥
यदेतावन्मया कालं दूत तस्य तु मर्षितम् । न हन्तव्यो गुरुर्ज्येष्ठो मयायमिति मन्यते ॥ ३७ ॥
तस्य त्विदानीं श्रुत्वा मे वाक्यमेषा कृता मतिः । त्रीँल्लोकानपि जेष्यामि बाहुवीर्यमुपाश्रितः ॥ ३८ ॥
एतन्मुहूर्तमेवाहं तस्यैकस्य तु वै कृते । चतुरो लोकपालांस्तान्नयिष्यामि यमक्षयम् ॥ ३९ ॥

३०] ति० टी०-पैङ्गल्यमिति । इतरदिति शेषः॥३०॥

रा० टी०-देव्या इति । देव्याः प्रभावेण यत्सव्यं तवेक्षणं दग्धं पैङ्गल्यं च यदवाप्तं तेन हेतुना एकाक्षपिङ्गली इति मम शाश्वतं स्थास्यति सार्द्धश्लोक एकान्वयी ॥ ३० ॥

३१] ति० टी०-एवं तेन शिवेन ॥ ३१ ॥

रा० टी०-एवमिति । एवं सखित्वं प्राप्य आगतेन मया ते पापनिश्चयः श्रुतः एतेन पापाचरणसमये मया न श्रुतमिति व्यञ्जितम् ॥ ३१ ॥

३२-३३] ति० टी०-निवर्त निवर्तस्व ॥ ३२ ॥ ३३ ॥

रा० टी०-तदिति । हि यतः ते वधोपायः सुरैश्चिन्त्यते तत्तस्माद्धेतोः अधर्मिष्ठसंयोगात् निवर्त निवर्तस्व ॥ ३२ ॥

रा० टी०-एवमिति । दशग्रीवः हस्तान् दंतांश्च संपिष्य एतद्वाक्यमुवाच ॥ ३३ ॥

गो० टी०-आगत्येति । आगत्य स्वगृहमागत्य । मे स्थितेन मया । अधर्मः तव पापविनिश्चयः श्रुतः ॥ ३२ ॥

गो० टी०-तदिति । तदधर्मत्वाद्धेतोः । कुलदूषणादधर्मिष्ठसंसर्गान्निवर्त निवर्तस्व ॥ ३३ ॥ ३४ ॥

३४] ति० टी०-वाक्यं विज्ञातं वाक्यतात्पर्यार्थो विज्ञातः ॥ ३४ ॥

रा० टी०-तदाकारमाह—विज्ञातमित्यादिभिः । यत्त्वं प्रभाषसे तन्मया विज्ञातमनिष्टमेव भाषसे इत्यर्थः अतः त्वं नैवासि येन च त्वं चोदितोऽसि स भ्रातापि नैवास्ति उभावपि हनिष्यामीति तात्पर्यम् ॥ ३४ ॥

गो० टी०-विज्ञातमिति । वाक्यं विज्ञातमिति वाक्यतात्पर्यार्थो विज्ञात इत्यर्थः ॥ ३५ ॥

३५] ति० टी०-येन भ्राता चोदितोऽसौ भ्राता त्वं च नैवासि न भविष्यसि । तत्र हेतुः—हितमिति । एष धनरक्षको मे हितं नैव ब्रवीति ॥ ३५ ॥

रा० टी०-हितमिति । धनरक्षकः एतत् मम हितं न ब्रवीति किन्तु महेश्वरसखित्वं श्रावयते ॥ ३५ ॥

गो० टी०-हितमिति । धनरक्षको मे हितमिति ब्रवीति । एतद्धि मे न हितं न सममनुचितं चेत्यर्थः । हे मूढ महेश्वरसखित्वं तदूपबलसंपत्तिं श्रावयसे किल ॥ ३६ ॥

३६] ति० टी०-किं तर्हि ब्रवीतीत्यत्राह—महेश्वरसखित्वमिति । तदूपबलसंपदमित्यर्थः कुबेरेण स्ववृत्तान्तोक्तावपि रावणः स्वदुर्मत्या विपरीतं गृहीतवान् । यत्त्वयैतत्कुबेरप्रावल्यं भाषितं तत्रैव क्षमणीयं क्षमार्हम् ॥ ३६ ॥

रा० टी०-नेति । तस्य कुबेरस्य एतद्वचनं यत्त्वया भाषितं तत्रैव क्षमणीयम् तथापि तावत्कालं मयेदं मर्षितम् एकं यदिति संबोधनं यत्नशीलेति तदर्थः ॥ ३६ ॥

गो० टी०-न चेदमिति । इदं न मर्षणीयं यत्त्वयाभिहितं भाषितं तदपि न मर्षणीयमित्यर्थः ॥ ३७ ॥

३७] ति० टी०-एतावत्कालं मया तस्य मर्षितं क्षान्तं तदिति हेतोर्यतो मदन्तरात्मेतः पूर्वमयं ज्येष्ठो गुरुर्न हन्तव्य इति मन्यते मन्यते स्म ततो हेतोरित्यर्थः ॥ ३७ ॥

रा० टी०-एतावत्कालपर्यन्तं क्षमायां हेतुं वदन्नाह—नेति । ज्येष्ठो गुरुः अतो यत्न हन्तव्यः इति मया मन्यते अमन्यत इदानीं तस्य वाक्यं श्रुत्वा तु एषा मतिः कृता ॥३७॥

गो० टी०-न हन्तव्य इति । मम हृदयं गुरुः न हन्तव्य इति पूर्वमेव मन्यते स्म । तथापि तस्यैकस्य ते एषा मतिर्जायते । कृतशब्दार्थमाह-त्रीनिति ॥ ३८ ॥ ३९ ॥

३८] ति० टी०-एषा मतिः कृता । केत्यत्राह—त्रीनिति ॥ ३८ ॥

रा० टी०-तत्स्वरूपमाह-त्रीनिति । एकस्य तस्य धनदस्य कृते त्रीन् लोकान् जेष्यामि चतुरो लोकपालांस्तु यमक्षयं नयिष्यामि नेष्यामि सार्द्धश्लोक एकान्वयी ॥ ३८ ॥

३९] ति० टी०-एतन्मुहूर्तमस्मिन्मुहूर्ते । तस्यैकस्य तु वैकृते । वधप्रसङ्ग इत्यर्थः ॥ ३९ ॥

१ इदमर्धं 'प्रीतः प्रीतेन मनसेति षड्विंशपद्योत्तरार्धात्परतः पठितं गो.पु. । २ पिङ्गलेति गो. पाठः । ३ आगत्य च श्रुतोयं मे तव पापविनिश्चय इति गो. पाठः । ४ क्रुद्ध इति गो. पाठः । ५ हस्ताविति गो. पाठः । ६ संपीज्येति गो.पाठः । ७ यस्येति गो.पाठः । ८ एतदिति गो. पाठः । ९ चेति गो.पाठः ।

एवमुक्त्वा तु लङ्केशो दूतं खड्गेन जघ्निवान् । ददौ भक्षयितुं ह्येनं राक्षसानां दुरात्मनाम्॥ ४० ॥
ततः कृतस्वस्त्ययनो रथमारुह्य रावणः । त्रैलोक्यविजयाकांक्षी ययौ यत्र धनेश्वरः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ।

रावणानुचराणां यक्षाणां च परस्परजयैषिणां रोमहर्षणः संग्रामः तत्र यक्षाणां पराजयश्च ।

ततः सै सचिवैः सार्धं षड्भिर्नित्यबलोद्धतः । महोदरप्रहस्ताभ्यां मारीचशुकसारणैः ॥ १ ॥
धूम्राक्षेण च वीरेण नित्यं समरगर्धिना । वृतः संप्रययौ श्रीमान्क्रोधाल्लोकान्दहन्निव ॥ २ ॥
पुराणि स नदीः शैलान्वनान्युपवनानि च । अतिक्रम्य मुहूर्तेन कैलासं गिरिमागमत् ॥ ३ ॥
संनिविष्टं गिरौ तस्मिन्राक्षसेन्द्रं निशम्य तु । युद्धेप्सुं तं कृतोत्साहं दुरात्मानं समन्त्रिणम् ॥ ४ ॥
यक्षा न शेकुः संस्थातुं प्रमुखे तस्य रक्षसः । राज्ञो भ्रातेति विज्ञाय गता यत्र धनेश्वरः ॥ ५ ॥
ते गत्वा सर्वमाचख्युर्भ्रातुस्तस्य चिकीर्षितम् । अनुज्ञाता ययुर्हृष्टा युद्धाय धनदेन ते ॥ ६ ॥
ततो बलानां संक्षोभो व्यवर्धत ईवोदधेः । तस्य नैऋतराजस्य शैलं संचलयन्निव ॥ ७ ॥
ततो युद्धं समभवद्यक्षराक्षससंकुलम् । व्यथिताश्चाभवंस्तत्र सचिवा राक्षसस्य ते ॥ ८ ॥
स दृष्ट्वा तादृशं सैन्यं दशग्रीवो निशाचरः । हर्षनादान्बहून्कृत्वा स क्रोधादभ्यधावत ॥ ९ ॥

रा० टी०-एवमिति । लंकेशः दूतं जघ्निवान् राक्षसानां राक्षसेभ्यः भक्षयितुं ददौ च ॥ ३९ ॥

गो० टी०-एतदिति । तस्यैकस्य कृते वधप्रसङ्ग इति शेषः ॥ ४० ॥

४०-४१] ति० टी०-एनं खड्गच्छिन्नं दूतं भक्षयितुमाज्ञां कृतवानिति शेषः ॥ ४०-४१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

रा० टी०-तत इति । रावणः त्रैलोक्यविजयाकांक्षी सन् यत्र धनेश्वरस्तत्र ययौ ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

गो० टी०-एवमिति । एनं खड्गच्छिन्नमित्यर्थः४१॥४२॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

१-३] ति० टी०-अथादौ कुबेरजयः-तत इति॥१-३॥

रा० टी०-रावणगमनप्रकारं बोधयन्नाह-तत इत्यादिभिः षड्भिः । महोदरप्रभृतिभिः सचिवैस्सार्द्धं नित्यं बलोद्धतस्स रावणः सचिवैर्वृतस्सन् लोकान्दहन्निव संप्रययौ श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

रा० टी०-पुराणीति । स रावणः मुहूर्तेन पुरादीनतिक्रम्य कैलासमागमत् ॥ ३ ॥

४] ति० टी०-समन्त्रिणं महोदरादिषण्मन्त्रिसहितम्॥४॥

५-६] ति० टी०-न शेकुरित्यत्र हेतुः—राज्ञो भ्रातेति । कुबेरस्य भ्रातेत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०-सन्निविष्टमिति । युद्धेप्सुं राक्षसेन्द्रं रावणम् तस्मिन् गिरौ सन्निविष्टं निशम्य राज्ञो धनदस्य भ्रातेति विज्ञाय यक्षास्संमुखे स्थातुं न शेकुः अतो यत्र धनेश्वरः तत्र गताः श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

रा० टी०-ते इति । ते यक्षाः भ्रातुः रावणस्य चिकीर्षितं तस्य धनदस्य समीपे आचख्युः धनदेन अनुज्ञातास्सन्तः युद्धाय ययुश्च ॥ ६ ॥

गो० टी०-यक्षा इति । न शेकुरित्यत्र हेतुमाह-राज्ञो भ्रातेति ॥ ५—८ ॥

७-८] ति० टी०-तस्य नैर्ऋतराजस्य बलानां संक्षोभः शैलं कैलासं चालयन्निव व्यवर्धत । उदधेः क्षोभो यथा ॥७॥८॥

रा० टी०-तत इति । उदधेस्संक्षोभ इव नैर्ऋतराजस्य बलानां संक्षोभः शैलं सञ्चालयन्निव व्यवर्द्धत ॥ ७ ॥

रा० टी०-तत इति । यक्षैः राक्षसैश्च संकुलं युद्धं समभवत् राक्षसस्य सचिवास्तु व्यथिता अभवन् ॥ ८ ॥

९] ति० टी०-हर्षनादान्हर्षजसिंहनादान् ॥ ९ ॥

रा० टी०-स इति । रावणः बहून् हर्षनादान् कृत्वा सक्रोधात् क्रोधत्वसहितात् हेतोः अभ्यधावत ॥ ९ ॥

गो० टी०-स दृष्ट्वेति । हर्षनादं सिंहनादम् ॥ ९ ॥

१ त्विति गो. पाठः । २ अत्यर्थमिति गो. पाठः । ३ महोदरेरिति गो. पाठः । ४ अधावतेति गो. रा. पाठः ।

ये तु ते राक्षसेन्द्रस्य सचिवा घोरविक्रमाः । तेषां सहस्रमेकैको यक्षाणां समयोधयत् ॥ १० ॥
ततो गदाभिर्मुसलैरसिभिः शक्तितोमरैः । हन्यमानो दशग्रीवस्तत्सैन्यं समगाहत ॥ ११ ॥
स निरुच्छ्वासवत्तत्र वध्यमानो दशाननः । वर्षद्भिरिव जीमूतैर्धाराभिरवरुध्यत ॥ १२ ॥
न चकार व्यथां चैव यक्षशस्त्रैः समाहतः । महीधर इवाम्भोदैर्धाराशतसमुक्षितः ॥ १३ ॥
स महात्मा समुद्यम्य कालदण्डोपमां गदाम् । प्रविवेश ततः सैन्यं नयन्यक्षान्यमक्षयम् ॥ १४ ॥
स कक्षमिव विस्तीर्णं शुष्केन्धनमिवाकुलम् । वातेनाग्निरिवादीप्तो यक्षसैन्यं ददाह तत् ॥ १५ ॥
तैस्तु तत्र महामात्यैर्महोदरशुकादिभिः । अल्पावशेषास्ते यक्षाः कृता वातैरिवाम्बुदाः ॥ १६ ॥
केचित्समाहता भग्नाः पतिताः समरे क्षितौ । ओष्ठांश्च दशनैस्तीक्ष्णैरदशन्कुपिता रणे ॥ १७ ॥
श्रान्ताश्चान्योन्यमालिङ्ग्य भ्रष्टशस्त्रा रणाजिरे । सीदन्ति च तदा यक्षाः कूला इव जलेन ह ॥ १८ ॥
हतानां गच्छतां स्वर्गं युध्यतामपि धावताम् । प्रेक्षतामृषिसङ्घानां बभूव न तदान्तरम् ॥ १९ ॥
भग्नांस्तु तान्समालक्ष्य यक्षेन्द्रांस्तु महाबलान् । धनाध्यक्षो महावाहुः प्रेषयामास यक्षकान् ॥ २० ॥
एतस्मिन्नन्तरे राम विस्तीर्णबलवाहनः । प्रेषितो न्यपतद्यक्षो नाम्ना संयोधकण्टकः ॥ २१ ॥
तेन चक्रेण मारीचो विष्णुनेव रणे हतः । पतितो भूतले शैलात्क्षीणपुण्य इव ग्रहः ॥ २२ ॥

१०-११] ति० टी०-ये रावणसचिवास्तेषामेकैकस्तेषां सहस्रसंख्यानां यक्षाणां सहस्रमयोधयत् ॥ १० ॥ ११ ॥

रा० टी०-ये इति । ये राक्षसेन्द्रस्य सचिवाः तेषामेकैकः यक्षाणां सहस्रं समयोधयत् ॥ १० ॥

रा० टी०-तत इति । गदादिभिर्हन्यमानो दशग्रीवः तेषां यक्षाणां सैन्यं समगाहत अमथ्नात् ॥ ११ ॥

गो० टी०-ये त्विति । सहस्राणां यक्षाणामेकैकं सहस्रं प्रत्येकमयोधयन् ॥ १०—१८ ॥

१२] ति० टी०-धाराभिः शस्त्रसमूहैः ॥ १२ ॥

रा० टी०-स इति । वर्षद्भिर्जीमूतैरिव यक्षैरिति शेषः धाराभिर्बाणपरम्पराभिः निरुच्छ्वासवत् यथा भवति तथा वध्यमानो दशाननः अवरुध्यत अवारुध्यत ॥ १२ ॥

१३-१४] ति० टी०-धाराशतसमुक्षितः शस्त्रक्षतजन्यरुधिरधाराशतसमुक्षितः ॥ १३ ॥ १४ ॥

रा० टी०-नेति । यक्षशस्त्रैः समाहतो रावणः अम्भोदैर्धाराशतसमुक्षितो महीधर इव व्यथां न चकार प्राप ॥ १३ ॥

रा० टी०-स इति । स रावणः गदां समुद्यम्य यक्षान् यमक्षयं नयन् नेतुं सैन्यं प्रविवेश ॥ १४ ॥

१५] ति० टी०-कक्षं तृणं तद्वद्विस्तीर्णम् । शुष्केन्धनमिवाकुलं शुष्केन्धने आकुलत्वं च झटिति वह्निव्याप्यत्वम् । यक्षसैन्यं वातेनादीप्तोऽग्निरिव रावणो ददाह ॥ १५ ॥

रा० टी०-स इति । स रावणः कक्षादीन् आदीप्तो रिव यक्षसैन्यं ददाह ॥ १५ ॥

१६] ति० टी०-रावणेन सह वर्तमानैस्तैरमात्यैर्यक्षा अल्पावशेषाः कृताः ॥ १६ ॥

रा० टी०-तैरिति । अल्पावशेषाः ये यक्षाः ते महोदरशुकादिभिः वातैरम्बुदा इव कृताः विनाशिताः ॥ १६ ॥

१७] ति० टी०-भग्ना भग्नगात्राः ॥ १७ ॥

रा० टी०-केचिदिति । केचित्समाहताः भग्नाः भग्नगात्राः सन्तः समरे क्षितौ पतिताः अपरे कुपिताः दशनैरोष्ठानदशन् १७

१८] ति० टी०-कूला इति लिङ्व्यत्ययः ॥ १८ ॥

रा० टी०-श्रान्ता इति । रणाजिरे भ्रष्टशस्त्राः श्रान्ताः यक्षाः जलेन कूलाः कूलानीव अन्योन्यमालिङ्ग्यैव सीदन्ति इव एवार्थे ॥ १८ ॥

१९-२१] ति० टी०-भूतले धावतां परैर्हतानामथानन्तरं स्वर्गं गच्छतां गत्वा तत्र स्थितानां व्योम्नि स्थित्वा युद्धं प्रेक्षतां प्रेक्षमाणानामृषिसङ्घानां च दिव्याकाशेऽन्तरं स्थातुमवकाशो न बभूव ॥ १९-२१ ॥

रा० टी०-हतानामिति । हननादिक्रियाविशिष्टानां विशिष्टान् प्रेक्षतामृषिसंघानामृषिसंघैः अन्तरमवकाशसहितं न बभूव अन्तरिक्षमिति शेषः किञ्च हननादिक्रियाविशिष्टैर्यक्षैः प्रेक्षणक्रियाविशिष्टऋषिसङ्घैश्च अन्तरमवकाशसहितं नभो न बभूव ॥ १९ ॥

रा० टी०-भग्नानिति । धनाध्यक्षः यक्षेन्द्रान् भग्नान् समालक्ष्य यक्षकान् महायक्षान्तराणि प्रेषयामास ॥ २० ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नन्तरे समये नाम्ना संयोधकण्टको यक्षो न्यपतत् ॥ २१ ॥

गो० टी०-हतानामिति । पृथिवीतले युध्यतां हतानामत एव स्वर्गस्थानां तथा व्योम्नि स्थित्वा युद्धं प्रेक्षतां प्रेक्षमाणानामृषिसंघानां च दिवि आकाशे अन्तरमवस्थातुमवकाशः न बभूव । व्योम्नि निबिडमभूदित्यर्थः ॥ १९—२८ ॥

२२] ति० टी०-तेन संयोधकण्टकाख्येन यक्षेण चक्रेण हतः पीडितो मारीचः शैलात्कैलासाद्भूतले पतितः । संयोधानां समक्षंयोढृणां कण्टकः संहर्तेति संयोधकण्टकः ॥ २२ ॥

१ दुरात्मेति गो. पाठः । २ आयत्त इति गो. पाठः । ३ पृथिवीतल इति गो. पाठः । ४ न बभूवान्तरं दिवीति गो. पाठः ।

ससंज्ञस्तु मुहूर्तेन स विश्रम्य निशाचरः । तं यक्षं योधयामास स च भग्नः प्रदुद्रुवे ॥ २३ ॥
ततः काञ्चनचित्राङ्गं वैदूर्यरजतोक्षितम् । मर्यादां प्रतिहाराणां तोरणान्तरमाविशत् ॥ २४ ॥
तं तु राजन्दशग्रीवं प्रविशन्तं निशाचरम् । सूर्यभानुरिति ख्यातो द्वारपालो न्यवारयत्॥ २५ ॥
स वार्यमाणो यक्षेण प्रविवेश निशाचरः । यदा तु वारितो राम न व्यतिष्ठत्स राक्षसः ॥२६॥
ततस्तोरणमुत्पाट्य तेन यक्षेण ताडितः । रुधिरं प्रस्रवन्भाति शैलो धातुस्रवैरिव ॥ २७ ॥
स शैलशिखराभेण तोरणेन समाहतः । जगाम न क्षितिं वीरो वरदानात्स्वयंभुवः ॥ २८ ॥
तेनैव तोरणेनाथ यक्षस्तेनाभिताडितः । नादृश्यत तदा यक्षो भस्मीकृततनुस्तदा ॥ २९ ॥
ततः प्रदुद्रुवुः सर्वे दृष्ट्वा रक्षःपराक्रमम् । ततो नदीर्गुहाश्चैव विविशुर्भयपीडिताः ॥
त्यक्तप्रहरणाः श्रान्ता विवर्णवदनास्तदा ॥ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ।

अमरविस्मयकारिणि तस्मिन् रणेऽसुरहतये धनाध्यक्षप्रहितेन माणिभद्रेण हतेऽपि निशाचरसङ्घे रावणस्तं पराभूयान्तेऽलकेशमपि जित्वा कामगं पुष्पकाख्यं व्योमयानमपि तस्यापाहरत् ।

ततस्ताँल्लक्ष्य वित्रस्तान्यक्षेन्द्रांश्च सहस्रशः । धनाध्यक्षो महायक्षं माणिचारमथाब्रवीत् ॥ १ ॥
रावणं जहि यक्षेन्द्र दुर्वृत्तं पापचेतसम् । शरणं भव वीराणां यक्षाणां युद्धशालिनाम् ॥ २ ॥
एवमुक्तो महाबाहुर्माणिभद्रः सुदुर्जयः । वृतो यक्षसहस्रैस्तु चतुर्भिः समयोधयत् ॥ ३ ॥
ते गदामुसलप्रासैः शक्तितोमरमुद्गरैः । अभिघ्नन्तस्तदा यक्षा राक्षसान्समुपाद्रवन् ॥ ४ ॥
कुर्वन्तस्तुमुलं युद्धं चरन्तः श्येनवल्लघु । बाढं प्रयच्छ नेच्छामि दीयतामिति भाषिणः ॥ ५ ॥
ततो देवाः सगन्धर्वा ऋषयो ब्रह्मवादिनः । दृष्ट्वा तत्तुमुलं युद्धं परं विस्मयमागमन् ॥ ६ ॥
यक्षाणां तु प्रहस्तेन सहस्रं निहतं रणे । महोदरेण चानिन्द्यं सहस्रमपरं हतम् ॥ ७ ॥
क्रुद्धेन च तदा राजन्मारीचेन युयुत्सुना । निमेषान्तरमात्रेण द्वे सहस्रे निपातिते ॥ ८ ॥

रा० टी०–तेनेति । विष्णुनेव तेन संयोधकण्ठकेन चक्रेण हतस्ताडितो मारीचः शैलात् भूतले पतितः ॥ २२ ॥

२३–३०] ति० टी०–स च यक्षश्च ॥ मर्यादां जनप्रवेशावधिं प्रतीहाराणां तोरणान्तरं द्वारमध्यमिति तीर्थः । आविशत् रावण इति शेषः ॥ धातुस्रवैर्युतः शैल इव ॥ तोरणेन तोरणस्थदण्डेन ॥ भस्मीकृततनुरिति । चूर्णीकृततनुरित्यर्थः ॥ २९–३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

रा० टी०–सेति । मुहूर्तेन ससञ्ज्ञः स मारीचः यक्षं योधयामास स यक्षस्तु भग्नस्सन् प्रदुद्रुवे ॥ तत इति । काञ्चनेन चित्राण्यङ्गानि यस्य वैदूर्यरजताभ्यामुक्षितं प्रतिहाराणां मर्यादां तोरणान्तरं बहिर्द्वारमध्यमाविशत् रावण इति शेषः ॥ तमिति । प्रविशन्तं दशग्रीवं द्वारपालो न्यवारयत् ॥ स इति । यक्षेण वार्यमाणोऽपि रावणः प्रविवेश अर्द्धं पृथक्–यदेति । वारितो रावणः यदा न व्यतिष्ठत् ततस्तदा तोरणं तस्य दण्डमुत्पाट्य यक्षेण ताडितः अत एव रुधिरं स्रवन् रावणः धातुस्रवैरुपलक्षितः शैल इव भाति सार्द्धश्लोक एकान्वयी ॥ स इति । तोरणेन समाहतः स रावणः स्वयंभुवो वरदानात् हेतोः क्षितिं न जगाम ॥ तेनेति । तेन रावणेन तेनैव तोरणेन अभिताडितः अत एव भस्मीकृता चूर्णीकृता तनुर्यस्य स यक्षो नादृश्यत ॥ तत इति । रक्षःपराक्रमं दृष्ट्वा सर्वे यक्षाः प्रदुद्रुवुः नदीर्गुहाश्च विविशुश्च सार्धश्लोक एकान्वयी ॥ २३–३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

गो० टी०–तेनैवेति । भस्मीकृततनुरिति । रावणकृततोरणदण्डसमाहननेन चूर्णित इत्यर्थः ॥ २९ ॥ ३० ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

१–८] ति० टी०–अथ पुष्पकग्रहः—तत इति । लक्ष्य लक्षयित्वा । माणिचारो माणिभद्रः ॥ १–८ ॥

१ रजसेति गो. पाठः । २ भद्रमिति गो. पा. ।

क्व च यक्षार्जवं युद्धं क्व च मायाबलाश्रयम् । रक्षसां पुरुषव्याघ्र तेन तेऽभ्यधिका युधि ॥ ९ ॥
धूम्राक्षेण समागम्य माणिभद्रो महारणे । मुसलेनोरसि क्रोधात्ताडितो न च कम्पितः ॥१०॥
ततो गदां समाविध्य माणिभद्रेण राक्षसः । धूम्राक्षस्ताडितो मूर्ध्नि विह्वलः स पपात ह ॥११॥
धूम्राक्षं ताडितं दृष्ट्वा पतितं शोणितोक्षितम् । अभ्यधावत संग्रामे माणिभद्रं दशाननः ॥ १२ ॥
संक्रुद्धमभिधावन्तं माणिभद्रो दशाननम् । शक्तिभिस्ताडयामास तिसृभिर्यक्षपुंगवः ॥ १३ ॥
ताडितो माणिभद्रस्य मुकुटे प्राहरद्रणे । तस्य तेन प्रहारेण मुकुटं पार्श्वमागतम् ॥ १४ ॥
[ततः संयुध्यमानेन विष्टब्धो न व्यकम्पत ।]
ततः[1]प्रभृति यक्षोऽसौ पार्श्वमौलिर्[2]भूत्किल ! तस्मिंस्तु विमुखीभूते माणिभद्रे महात्मनि ॥
संनादः सुमहान्राजंस्तस्मिन्शैले व्यवर्धत ॥ ॥ १५ ॥
ततो दूरात्प्रददृशे धनाध्यक्षो गदाधरः । शुक्रप्रौष्ठपदाभ्यां च पद्मशङ्खसमावृतः ॥ १६ ॥

रा० टी०-यक्षपराभवानन्तरकालिकं वृत्तान्तमाह-तत इत्यादिभिः । धनाध्यक्षः यक्षेन्द्रान् वित्रस्तान् लक्ष्य लक्षयित्वा अवलोक्य माणिभद्रं महायक्षमब्रवीत् ॥ १ ॥

रा० टी०-तदाकारमाह—रावणमिति । दुर्वृत्तं रावणं जहि अत एव वीराणां शरणमाश्रयो भव ॥ २ ॥

रा० टी०-एवमिति । एवमुक्तश्चतुर्भिर्यक्षसहस्रैर्वृतो माणिभद्रस्समयोधयत् ॥ ३ ॥

रा० टी०-युद्धाकारमाह—ते इत्यादिभिः । गदादिभिरभिघ्नन्तो यक्षाः राक्षसान् समुपाद्रवन् ॥ ४ ॥

रा० टी०-कुर्वन्त इति । युद्धं कुर्वन्तः अत एव श्येनवत् लघु क्षिप्रं यथा भवति तथा चरन्तो यक्षादयः प्रयच्छ युद्धमिति शेषः नेच्छामि निवर्तितुमिति शेषः दीयतां स्वशस्त्रमिति शेषः किञ्च दीयतां छिद्यताम् अस्य शस्त्रमिति शेषः इतिभाषिणो बभूवुरिति शेषः ॥ ५ ॥

रा० टी०-तत इति । देवादयः तुमुलं युद्धं दृष्ट्वा परं विस्मयमागमन् ॥ ६ ॥

रा० टी०-यक्षाणामिति । प्रहस्तेन यक्षाणां सहस्रं निहतं महोदरेण तु अपरं सहस्रं हतम् ॥ ७ ॥

रा० टी०-क्रुद्धेनेति । मारीचेन द्वे सहस्रे निपातिते ८

गो० टी०-ततस्तानित्यादि । माणिचारः माणिभद्रः ॥ १ ॥ १३ ॥

९-१३] ति० टी०-ते राक्षसाः ॥ ९-१३ ॥

रा० टी०-तत्र हेतुमाह-क्व चेति । यक्षाणामार्जवः सरलता यस्मिन् तद्युद्धं क्व मायाबलाश्रयं च क्व द्वयोर्महदन्तरालमित्यर्थः तेन हेतुना युधि राक्षसा अभ्यधिकाः ॥ ९ ॥

रा० टी०-धूम्राक्षेणेति । धूम्राक्षेण समागम्य उरसि मुशलेन ताडितोपि माणिभद्रः न कम्पितः ॥ १० ॥

रा० टी०-तत इति । माणिभद्रेण गदां समाविध्य दृढं गृहीत्वा मूर्ध्नि ताडितः अत एव विह्वलो भूत्वा धूम्राक्षः पपात११

रा० टी०-धूम्राक्षमिति । दशाननो माणिभद्रमभ्यधावत ॥ १२ ॥

रा० टी०-संक्रुद्धमिति । माणिभद्रः अभिधावन्तं दशाननं तिसृभिः शक्तिभिः ताडयामास ॥ १३ ॥

१४]ति०टी०-ताडित इति । तिसृभिः शक्तिभिस्ताडितो राक्षसेन्द्रो गदया माणिभद्रस्य मुकुटे मुकुटस्थले प्राहरत् । तच्च मुकुटस्थलं तेन प्रहारेण पार्श्वमेकपार्श्वमागतं प्राप्तम् ॥ १४ ॥

रा० टी०-ताडित इति । ताडितो रावणः माणिभद्रस्य मुकुटे प्राहरत् तेन प्रहारेण तस्य माणिभद्रस्य मुकुटं पार्श्वमेकपार्श्वभागमागतम् पतितमित्यर्थः ॥ १४ ॥

गो० टी०-ताडित इति । ताडितः शक्तिताडितः रावणः माणिभद्रं गदया मुकुटे प्राहरत् । तच्च मुकुटम् प्रहारात्पार्श्वमागतम् ॥ १४ ॥

१५] ति० टी०-संनादो रक्षसाम् ॥ १५ ॥

रा० टी०-तत इति । ततःप्रभृति तत्कालादारभ्य असौ माणिभद्रः पार्श्वमौलिरभूत् अर्द्धं पृथक् तस्मिन्निति माणिभद्रे विमुखीभूते संग्रामान्निवृत्ते सति तस्मिन् शैले सुमहान् सन्नादो व्यवर्द्धत ॥ १५ ॥

गो० टी०-तत इति । संयुद्ध्यमानेन माणिभद्रेण विष्टब्धो निरुद्धः न व्यकम्पत ॥ १५ ॥

१६] ति० टी०-पद्मशङ्खसमावृतः शङ्खपद्मनिध्यभिमानिदेवसंवृतः शुक्रप्रौष्ठपदाभ्यां निधिरक्षकमन्त्रिभ्यां सह धनाध्यक्षः प्रददृशे भ्रातरमिति संबन्धः ॥ १६ ॥

रा० टी०-तत इति । ततस्सन्नादश्रवणानन्तरं शुक्रप्रौष्ठपदाभ्यां तत्तत्संज्ञकनिधिरक्षकाभ्यामुपलक्षितः पद्मशंखैः तदभिमानिदेवैस्समावृतो धनाध्यक्षो ददृशे ॥ १६ ॥

गो० टी०-शङ्खपद्मसमावृतः शङ्खपद्मनिध्यभिमानिदेवैः संवृतः । शुक्रप्रोष्ठपदाभ्यां च सह प्रददृशे शुक्रप्रोष्ठपदौ मन्त्रिणौ ॥ १६ ॥

१ तमिति गो. पाठः । २ इदमर्धमधिकं गो. पाठे । ३ तदेति गो. पाठः । ४ इति स्मृत इति गो. पाठः

स दृष्ट्वा भ्रातरं संख्ये शापाद्विभ्रष्टगौरवम् । उवाच वचनं धीमान्युक्तं पैतामहे कुले ॥ १७ ॥
यन्मया वार्यमाणस्त्वं नावगच्छसि दुर्मते । पश्चादस्य फलं प्राप्य ज्ञास्यसे निरयं गतः ॥ १८ ॥
यो हि मोहाद्विषं पीत्वा नावगच्छति दुर्मतिः । स तस्य परिणामान्ते जानीते कर्मणः फलम् ॥१९॥
दैवैतानि न नन्दन्ति धर्मयुक्तेन केन चित् । येन त्वमीदृशं भावं नीतस्तेन्च न बुद्ध्यसे ॥ २० ॥
मातरं पितरं विप्रमाचार्यं चावमन्यें वै । स पश्यति फलं तस्य प्रेतराजवशं गतः ॥ २१ ॥
अध्रुवे हि शरीरे यो न करोति तपोर्जनम् । स पश्चात्तप्यते मूढो मृतो गत्वात्मनो गतिम् ॥ २२ ॥
[धर्माद्राज्यं धनं सौख्यमधर्माद्दुःखमेव च । तस्माद्धर्मं सुखार्थाय कुर्यात्पापं विसर्जयेत् ॥
पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना । तस्मादात्मापघातार्थं मूढः पापं करिष्यति]॥
कस्य चिन्न हि दुर्बुद्धेश्छन्दतो जायते मतिः । यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ २३ ॥
ऋद्धिं रूपं बलं पुत्रान्वित्तं शूरत्वमेव च । प्राप्नुवन्ति नरा लोके निर्जितं पुण्यकर्मभिः ॥ २४ ॥

१७] ति० टी०–शापाद्विश्रवसः कृतादारुणस्वभावो भविष्यतीति शापात् । विभ्रष्टगौरवं वन्दनादिप्रयोजकश्रेष्ठत्व-गौरवरहितम् अकृतवन्दनादिव्यवहारमिति यावत् । पैतामहे कुले युक्तं तत्कुले उत्पत्तेर्युक्तं वचनमुवाचेत्यर्थः ॥ १७ ॥

रा० टी०—स इति । स धनाध्यक्षः शापात् दारुणस्व-भावो भविष्यतीति वचनात् विभ्रष्टं गौरवं गुरुत्वप्रयुक्तप्रणा-मादिर्यस्य तं भ्रातरं रावणं दृष्ट्वा पैतामहे कुले युक्तमुचितं वचनमुवाच ॥ १७ ॥

गो० टी०–स इति । शापात् पितृकृतदारुणत्वशापात् विभ्रष्टगौरवः वन्दनादिप्रयोजकश्रेष्ठगौरवरहितः । युक्तमिति पै-तामहे कुले उत्पत्तेरिति शेषः ॥ १७ ॥

१८] ति० टी०–वार्यमाणः । असद्वृत्तादिति शेषः । नावगच्छसि । अस्य मद्वचनाकरणस्य पूज्यपूजाव्यतिक्रमादि-दोषस्य च फलं परिपाकं प्राप्य तद्वशान्निरयं गतो ज्ञास्यसे । अहं साधु न कृतवान्, किं तु पापमेवेति परितप्स्यसे इत्यर्थः ॥ १८ ॥

रा० टी०–तदाकारमाह–यदिति । मया वार्यमाणस्त्वं यन्नावगच्छसि बुध्यसे तस्मात् अस्य दुष्कृतकर्मणः फलं प्राप्य निरयं गतस्सन् ज्ञास्यसे ज्ञास्यसि ॥ १८ ॥

गो० टी०–यदिति । अस्य फलं कुलाचारस्य फलं परि-पाकं प्राप्य ॥ १८ ॥ १९ ॥

१९] ति० टी०–तत्कालानवगतदुःखसाधनस्य कालान्तरे फलपाकतो ज्ञाने दृष्टान्तः—यो हीति ॥ १९ ॥

रा० टी०–नन्वस्वकृतकर्माणि पापत्वेन मयि न प्रतीयन्ते इति कथं तेषां निरयदातृत्वमित्यत आह–य इति । यो मोहात् अविवेकात् विषं पीत्वापि नावगच्छति जानाति स दुर्मतिः अस्य विषस्य परिणामान्ते रूपांतरप्राप्तौ कर्मणः विषपानस्य फलं जानीते एतेन अज्ञातस्यापि कर्मणः फलं भवतीति सूचितम् ॥ १९ ॥

२०] ति० टी०–दैवतानि ब्रह्मरुद्रादयः । धर्मयुक्तेन केन चित्प्राक्तनेन व्यापारेण त्वामिदानीं नाभिनन्दन्ति त्वयि विमुखा भवन्ति । संप्रति त्वयि धर्माभावाद्येन देवतानभि-नन्दनेन त्वमीदृशं भावं क्रूरं नीतः प्रापितः सन्नावबुद्ध्यसे॥२०॥

रा० टी०–दैवतानीति । येन केन चित् हेतुना ईदृशं ऋषिप्रभृतिहिंसारूपं भावं धर्मं नीतः प्राप्तस्त्वं तत् हिंसनं न बुध्यसे पापत्वेन न जानासि ज्ञात्वा न निवर्तसे इत्यर्थः तेन हेतुना धर्मयुक्तेनोपलक्षितानि दैवतानि ब्रह्मादयो न नन्दन्ति एतेन तव विनाशकालः संप्राप्त इति सूचितम् ॥ २० ॥

गो० टी०–देवता इति । धर्मयुक्तेन तव केन चिद्व्यापारेण त्वामिदानीं नाभिनन्दन्ति । धर्माभावात्त्वयि विमुखा भवन्ती-त्यर्थः । येन देवतावैमुख्येन । त्वमीदृशं क्रूरं भावं नीतः सन्ना-ऽवबुध्यसे ॥ २० ॥ २१ ॥

२१] ति० टी०–तस्य मात्राद्यवमानस्य । अत्र मात्रादि-पदं पूज्योपलक्षणम् ॥ २१ ॥

रा० टी०–नन्वस्तु तेषां नन्दनमित्यत आह–मातर-मिति । यः मात्रादीन् अवमान्य वर्तत इति शेषः सः तस्य फलं प्रेतराजवशं गतस्सन् पश्यति ॥ २१ ॥

२२] ति० टी०–तपोर्जनं तपःसंपादनम् । आत्मनो गतिमात्मनः कर्मसंपादितां गतिम् ॥ २२ ॥

रा० टी०–अध्रुव इति । अध्रुवे शरीरे यस्तपोर्जनं पर-मात्मतोषकतपसः संग्रहं न करोति स मूढो मृतस्सन् आत्मनः स्वक्रियायाः गतिं फलं गत्वा पश्चात्तप्यते ॥ २२ ॥

गो० टी०–अध्रुव इति । तपसः आर्जनं संपादनम् २२-२४

२३–२४] ति० टी०–दुर्बुद्धेर्बुद्धिरहितस्य कस्य चित्क-स्यापि पुरुषस्य छन्दतः पित्रादिसेवां विना स्वेच्छामोत्थेण मतिः शुभा मतिर्न जायते, अतो मात्रादिसेवाहीनो यादृशं स्वदुर्मत्यनुरूपं दुष्कर्म कुरुते तादृशं तदनुरूपं निरयगामित्वा-दिरूपं फलमश्नुते प्राप्नोति ॥ २३ ॥ २४ ॥

१ देवता अवमतीति गो. पाठः । २ सन्नवितति गो. पाठः । ३ यो हीति गो. पाठः । ४ मन्यते इति गो. पाठः । ५ इदं पञ्चद्वयमधिकं गो. पु. । ६ बुद्धिरूपं फलं पुत्रान् शौर्यं वीर्यमेव चेति गो. पाठः ।

एवं निरयगामी त्वं यस्य ते मतिरीदृशी । न त्वां समभिभाषिष्येऽसद्वृत्तेष्वेष निर्णयः ॥ २५ ॥
एवमुक्तास्ततस्तेन तस्यामात्याः समाहताः । मारीचप्रमुखाः सर्वे विमुखा विप्रदुद्रुवुः ॥ २६ ॥
ततस्तेन दशग्रीवो यक्षेन्द्रेण महात्मना । गदयाभिहतो मूर्ध्नि न च स्थानात्प्रकम्पितः ॥ २७ ॥
ततस्तौ राम निघ्नन्तौ तदान्योन्यं महामृधे । न विह्वलौ न च श्रान्तौ तावुभौ यक्षराक्षसौ ॥ २८ ॥
आग्नेयमस्त्रं तस्मै स मुमोच धनदस्तदा । राक्षसेन्द्रो वारुणेन तदस्त्रं प्रत्यवारयत् ॥ २९ ॥
ततो मायां प्रविष्टोऽसौ राक्षसीं राक्षसेश्वरः । रूपाणां शतसाहस्रं विनाशाय चकार च ॥ ३० ॥
व्याघ्रो वराहो जीमूतः पर्वतः सागरो द्रुमः । यक्षो दैत्यस्वरूपी च सोऽदृश्यत दशाननः ॥ ३१ ॥
बहूनि च करोति स्म दृश्यन्ते न त्वसौ ततः । प्रतिगृह्य ततो राम महदस्त्रं दशाननः ॥
जघान मूर्ध्नि धनदं व्याविद्ध्य महतीं गदाम् ॥ ॥ ३२ ॥
एवं स तेनाभिहतो विह्वलः शोणितोक्षितः । कृत्तमूल इवाशोको निपपात धनाधिपः ॥ ३३ ॥
ततः पद्मादिभिस्तत्र निधिभिः स तदा वृतः । धनदोच्छ्वासितस्तैस्तु वनमानीय नन्दनम् ॥ ३४ ॥

रा० टी०–नन्वेवं मतिर्मयि कुतो नास्तीत्यत आह–कस्य चिदिति। कस्य चित् दुर्बुद्धेः छन्दतः गुर्वादिसेवामन्तरा मतिः सुबुद्धिर्न जायते अत एव यादृशं कर्म निषिद्धक्रियां कुरुते तादृशं फलमश्नुते ॥ २३ ॥

रा० टी०–तदेव विशदयन्नाह–ऋद्धिमिति। नराः पुण्यकर्मभिर्निर्जितं सम्पादितमृद्ध्यादि प्राप्नुवन्ति ॥ २४ ॥

गो० टी०–कस्य चिदिति। दुर्बुद्धेर्बुद्धिरहितस्य कस्यापि पुरुषस्य। छन्दतः पितृमात्रादिसेवां विना स्वेच्छामात्रेण धीर्मतिः शुभमतिर्न हि जायते ॥ २५ ॥ २६ ॥

२५] ति० टी०–एवमिति। एवं क्रूरकर्मा त्वं निरयगामी भविष्यसि। यस्य त ईदृशी मतिः, अतस्त्वां न समभिभाषिष्ये। एष एवासद्वृत्तेषु सद्वृत्तानां निर्णयोऽनुष्ठेयनिश्चयः २५

रा० टी०–एवमिति। यस्य ते मतिः ईदृशी स त्वमेवं खललोकवन्निरयगाम्यसि अतः त्वां न समभिभाषिष्ये ननु संभाषणाभावेन किमित्यत आह असद्वृत्तेषु एषः भाषणाभाव एव निर्णयः ॥ २५ ॥

गो० टी०–एवमिति। एवं क्रूरकर्मा त्वं निरयगामी भविष्यसि। यस्य ते ईदृशी मतिः तादृशं त्वां न समभिभाषिष्ये। दुर्वृत्तस्य विषये एष एव हि निर्णय इत्यर्थः ॥ २७ ॥

२६] ति० टी०–एवमुक्ता रावणवदेव यूयमप्यसंभाष्या इत्युक्ताः। तत एवंवचनानन्तरं तेन धनदेन समाहतास्ताडिता मारीचप्रमुखाः सर्वे विमुखा युद्धविमुखा विप्रदुद्रुवुः ॥ २६ ॥

रा० टी०–एवमिति। तेन धनदेन एवं रावणवचनवदुक्ता यूयमपि न संभाष्या इति कथिता इत्यर्थः अत एव समाहताः ताडिताः मारीचप्रमुखाः विमुखास्सन्तो विप्रदुद्रुवुः॥२६॥

गो० टी०–एवमुक्ता इति। रावणवत् यूयमपसंभाष्या इत्युक्ता इत्यर्थः। समाहताः धनदेन ताडिताः ॥ २८ ॥

२७–२९] ति० टी०–ततस्तद्विद्रावणानन्तरम् । तेन धनदेन ॥ २७–२९ ॥

रा० टी०–तत इति। ततो विद्रवणानन्तरम् तेन धनदेन गदया मूर्ध्नि अभिहतोऽपि दशग्रीवः स्थानात् न प्रकम्पितः॥२७॥

रा० टी०–तत इति। अन्योन्यं निघ्नन्तौ यक्षराक्षसौ विह्वलौ न श्रान्तौ च न ॥ २८ ॥

रा० टी०–आग्नेयमिति । धनदः आग्नेयमस्त्रं तस्मै रावणाय मुमोच राक्षसेन्द्रस्तु वारुणेन तदस्त्रं प्रत्यवारयत् २९

३०] ति० टी०–राक्षसेश्वरो रावणो विनाशाय धनदनाशाय रूपाणां शतसाहस्रं चकार ॥ ३० ॥

रा० टी०–तत इति। राक्षसीं मायां प्रविष्टो राक्षसेश्वरः विनाशाय अरीणां विध्वंसाय रूपाणां शतसाहस्रं चकार ॥३०॥

गो० टी०–तत इति। मायां प्रविष्टः अदृश्यत्वं प्राप्त इत्यर्थः। निधिभिर्देवताभिः। धनदोच्छ्वासित इति संधिरार्षः ॥ ३२ ॥ ३७ ॥

३१] ति० टी०–रूपाण्याह—व्याघ्र इति ॥ ३१ ॥

रा० टी०–रूपाणि बोधयन्नाह—व्याघ्र इति। व्याघ्रत्वाद्यन्यतमविशिष्टो दशाननोऽदृश्यत ॥ ३१ ॥

३२–३३] ति० टी०–बहूनि शस्त्रवर्षाणि च करोति स्म। तान्येव दृश्यन्ते न त्वसौ तथा मायाप्रयुक्तव्याघ्रादय एव दृश्यन्ते न त्वसौ ॥ ३२ ॥ ३३ ॥

रा० टी०–बहूनीति । दशाननः बहूनि रूपाणि करोति स्म तान्येव रूपाणि दृश्यन्ते असौ दशाननस्तु न दृश्यते अद्धा पृथक् ॥ ३२ ॥

रा० टी०–प्रतीति । ततोऽनन्तरं दशाननः महदस्त्रं गदां प्रतिगृह्य व्याविध्य प्रक्षिप्य धनदं मूर्ध्नि जघान ॥ ३३ ॥

रा० टी०–एवमिति । एवं तेनाक्षेणाभिहतः अत एव शोणितेनोक्षितो धनाधिपः कृत्तमूलोऽशोकस्तदभिधश्च इव निपपात ॥ ३४ ॥

३४] ति० टी०–निधिभिर्निधिदेवताभिः। धनदोच्छ्वासित इति संधिरार्षः ॥ ३४ ॥

१ बभूवतुरमर्षणाविति गो. पाठः

निर्जित्य राक्षसेन्द्रस्तं धनदं हृष्टमानसः । पुष्पकं तस्य जग्राह विमानं जयलक्षणम् ॥ ३५ ॥
काञ्चनस्तम्भसंवीतं वैदूर्यमणितोरणम् । मुक्ताजालप्रतिच्छन्नं सर्वकामफलद्रुमम् ॥ ३६ ॥
मनोजवं कामगमं कामरूपं विहंगमम् । मणिकाञ्चनसोपानं तप्तकाञ्चनवेदिकम् ॥ ३७ ॥
देवोपवाह्यपक्षय्यं सदादृष्टिमनःसुखम् । बह्वाश्चर्यं भक्तिचित्रं ब्रह्मणा परिनिर्मितम् ॥ ३८ ॥
निर्मितं सर्वकामैस्तु मनोहरमनुत्तमम् । न तु शीतं न चोष्णं च सर्वर्तुसुखदं शुभम् ॥ ३९ ॥
स तं राजा समारुह्य कामगं वीर्यनिर्जितम् । जितं त्रिभुवनं मेने दर्पोत्सेकात्सुदुर्मतिः ॥
जित्वा वैश्रवणं देवं कैलासात्समवातरत् ॥ ॥ ४० ॥
सं तेजसा विपुलमवाप्य तं जयं प्रतापवान्विमलकिरीटहारवान् ।
रराज वै परमविमानमास्थितो निशाचरः सदसि गतो यथानलः ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।

अनन्तरं पुष्पकमारुह्य महासेनप्रसूतिं शरवणं गत्वा कैलासं प्रविविक्षुमात्मानं निवारयन्तं नन्दीश्वरं वानरमुखं वीक्ष्य प्रहसन् रावणस्तेन शप्तोऽपि न निवर्तमानः कैलासं चालयन् रुद्रपादाङ्गुष्ठपीडनदुर्धरभारतद्गिरिनिष्पिष्टाखिलभुजः शाश्वतीः समाः परितोष्य बहुभिः स्तोत्रैः शङ्करं तल्लब्धवरः खड्गं च चन्द्रहासाख्यं गृहीत्वा न्यवर्तत ।

स जित्वा धनदं राम भ्रातरं राक्षसाधिपः । महासेनप्रसूतिं तद्ययौ शरवणं महत् ॥ १ ॥
अथापश्यदशग्रीवो रौक्मं शरवणं महत् । गभस्तिजालसंवीतं द्वितीयमिव भास्करम् ॥ २ ॥

रा० टी०–तत इति । ततो निपातानन्तरं पद्मादिभिर्निधिभिस्तद्देवताभिर्वेष्टितो धनदः तैः पद्मादिभिर्नन्दनमानीय उच्छ्रासितः सन्धिरार्षः ॥ ३५ ॥

३५–३७] ति० टी०–जयलक्षणं जयचिह्नम् । ख्यापयन्तीति शेषः ॥ ३५–३७ ॥

३८–४१] ति० टी०–ब्रह्मणा विश्वकर्मणा ॥ ३८–४१ ॥

रा० टी०–निर्जित्येति । राक्षसेन्द्रो धनदं निर्जित्य काञ्चनस्तम्भैस्सम्वीतं वैदूर्यमणेस्तोरणं बहिर्द्वारं यस्मिन् सर्वकामफलाः द्रुमाः यस्मिन् कामरूपाः विहंगमाः यस्मिन् मणिना युक्तानि काञ्चनानि सोपानानि यस्मिन् तप्तकाञ्चनी वेदिका यस्मिन् देवैरुपवाह्या यस्येति वा सदादृष्टिमनःसुखं भक्त्या यथोचितगृहविभागेन चित्रं ब्रह्मणा विश्वकर्मणा परिनिर्मितं परिनिर्मापितं सर्वकामैर्निर्मितं संयुक्तं न शीतमतिशीतभिन्नं नचोष्णमत्युष्णभिन्नमत एव सर्वर्तुषु सुखदं पुष्पकं नाम तस्य विमानं जग्राह श्लोकपञ्चकमेकान्वयि ॥३६–४०॥

रा० टी०–स इति । राजा रावणः वीर्येण निर्जितं तं पुष्पकं समारुह्य त्रिभुवनं जितं मेने ॥ ४१ ॥

गो० टी०–निर्जित्येति । जयलक्षणं जयचिह्नम् । ख्यापयन्तीति शेषः ॥ ३८ ॥ ४५ ॥

इति श्रीगो०श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पंचदशः सर्गः ॥ १५ ॥

४२] ति० टी०–कतकस्तु त्रयस्त्रिंशच्छ्लोकसंख्यामत्र सर्गे लिलेख ॥ ४२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

रा० टी०–जित्वेति । वैश्रवणं जित्वा कैलासात् समवातरत् रावण इति शेषः अर्द्धं पृथक् स इति । विमलकिरीटहारवान् रावणः विपुलं जयमवाप्य सदसि गतस्सन् अनल इव रराज ॥ ४२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

१–२] ति० टी०–स जित्वेति । महासेनस्य स्कन्दस्य प्रसूतिर्यस्मिंस्तच्छरवणं ययौ ॥ १ ॥ २ ॥

रा० टी०–पुष्पकविमाननयनानन्तरकालिकं वृत्तांतमाह—स इत्यादिभिः । रावणः धनदं जित्वा महासेनस्य स्कन्दस्य प्रसूतिरुत्पत्तिर्यस्मिन् तत् शरवणं ययौ ॥ १ ॥

रा० टी०–अथेति । गभस्तीनां किरणानां जालैस्सम्वीतमत एव द्वितीयं भास्करमिव वनानि जलानि अन्तरे यस्य तं कञ्चित् पर्वतमारुह्य पुष्पकं विष्टम्भितं रावणः प्रेक्षते प्रैक्षत सार्द्धश्लोक एकान्वयी ॥ २ ॥

गो० टी०–स जित्वेत्यादि । महासेनप्रसूतिं स्कन्दप्र-

१ क्रामेति गो. रा. पाठः । २ स्वेति गो. पाठः ।

स पर्वतं समारुह्य कंचिद्रम्यवनान्तरम् । प्रेक्षते पुष्पकं तत्र रामविष्टम्भितं तदा ॥ ३ ॥
विष्टब्धं किमिदं कस्मान्नागमत्कामगं कृतम् । अचिन्तयद्राक्षसेन्द्रः सचिवैस्तैः समावृतः ॥ ४ ॥
किंनिमित्तमिच्छया मे नेदं गच्छति पुष्पकम् । पर्वतस्योपरिष्टस्य कर्मेदं कस्यचिद्भवेत् ॥ ५ ॥
ततोऽब्रवीत्तदा राम मारीचो बुद्धिकोविदः । नेदं निष्कारणं राजन्पुष्पकं यन्न गच्छति ॥ ६ ॥
अथ वा पुष्पकमिदं धनदान्नान्यवाहनम् । अतो निस्पन्दमभवद्धनाध्यक्षविनाकृतम् ॥ ७ ॥
इति वाक्यान्तरे तस्य करालः कृष्णपिङ्गलः । वामनो विकटो मुण्डी नन्दी ह्रस्वभुजो बली ॥ ८ ॥
ततः पार्श्वमुपागम्य भवस्यानुचरोऽब्रवीत् । नन्दीश्वरो वचश्चेदं राक्षसेन्द्रमशङ्कितः ॥ ९ ॥
निवर्तस्व दशग्रीव शैले क्रीडति शंकरः । सुपर्णनागयक्षाणां देवगन्धर्वरक्षसाम् ॥ १० ॥
सर्वेषामेव भूतानामगम्यः पर्वतः कृतः । [तेन्निवर्तस्व दुर्बुद्धे मा विनाशमवाप्स्यसि ॥]
इति नन्दिवचः श्रुत्वा क्रोधात्कम्पितकुण्डलः । ॥ ११ ॥
रोषात्तु ताम्रनयनः पुष्पकादवरुह्य सः । कोऽयं शंकर इत्युक्त्वा शैलमूलमुपागतः ॥ १२ ॥
सोऽपश्यन्नन्दिनं तत्र देवस्यादूरतः स्थितम् । दीप्तं शूलमवष्टभ्य द्वितीयमिव शंकरम् ॥ १३ ॥

स्थितिस्थानम् । अपश्यदित्यादि पूर्वसर्गान्तोक्तसंक्षेपप्रपञ्चनम् ॥ १ ॥ २ ॥

३] ति० टी०–विष्टम्भितं निरुद्धसंचारम् ॥ ३ ॥

गो० टी०–स इति । विष्टम्भितं रुद्राज्ञया रुद्धसंचारम् । कामगं पुष्पकम् अगममिति राक्षसश्चिन्तयामासेत्यन्वयः ३॥४

४] ति० टी०–कामगं स्वामिचित्तानुकूलसंचारवत्कृतं निर्मितमिदं विष्टब्धं किम् । तदेवाह–कस्मान्नागमदित्यचिन्तयत् ॥ ४ ॥

रा० टी०–विष्टब्धमिति । कामगं कृतकामगत्वेन रचितमिदं पुष्पकं कस्मान्नागमत् किं किमर्थं विष्टब्धं निरुद्धमिति राक्षसेन्द्रोऽचिन्तयत् ॥ ३ ॥

५] ति० टी०–मे ममेच्छया पुष्पकं न गच्छति तदिदं किंनिमित्तमिति विचिन्त्य स्वयमेव हेतुं तर्कयति–पर्वतस्येति। पर्वतोपरि स्थितस्येत्यर्थः । कस्य चित्पुरुषस्येदं कर्म स्तम्भनकर्म भवेत् ॥ ५ ॥

रा० टी०–किमिति । इच्छया इदं पुष्पकं किंनिमित्तं कस्मात् कारणान्न गच्छति स्वनिश्चयमाह पर्वतस्योपरिष्टस्य पर्वतोपरिभागे स्थितस्य कस्य चित् इदं कर्म भवेत् ॥ ४ ॥

गो० टी०–किंनिमित्तमिति । कस्य कस्य पुरुषस्य इदं कर्म भवेत् ॥ ५–२२ ॥

६] ति० टी०–मारीचोऽपि तदुक्तमेवानुवदति–तत इति । पुष्पकं न गच्छतीति यत्तेदं निष्कारणम् ॥ ६ ॥

रा० टी०–तत इति । मारीचोऽब्रवीत् तदाकारमाह—यत्पुष्पकं न गच्छति तन्निष्कारणं न किञ्चित्कारणमस्त्येवेत्यर्थः ॥ ५ ॥

७–८] ति० टी०–कारणमूहयित्वाह–अथवेति । धनदान्नान्यवाहनम् । धनदादन्यस्य वाहनं नेत्यर्थः ॥ ७ ॥ ८॥

९–१०] ति० टी०–पार्श्वं । रावणस्येति शेषः । अशङ्कित उपागम्यान्नवीदित्यन्वयः ॥ ९ ॥ १० ॥

रा० टी०–अथवेति । अथवा इदं पुष्पकं धनदात् अन्यस्य वाहनं न अत एव धनाध्यक्षेण विनाकृतं निस्पन्दं गमनरहितमभवत् ॥ ६ ॥

रा० टी०–इतीति । तस्य मारीचस्य इति वाक्यांतरे कथनमध्यसमये करालो भयंकरः कृष्णपिङ्गलः वामनः खर्वः अत एव ह्रस्वभुजो भवस्यानुचरो नन्दी नित्यानन्दयुक्तो नन्दीश्वरः इदं वाक्यमब्रवीत् अर्द्धचतुष्टयमेकान्वयि ॥ ७–८ ॥

रा० टी०–तदाकारमाह—निवर्तस्वेत्यादिभिः । शैले शंकरः क्रीडति अत एव सुपर्णादीनामगम्यः पर्वतः कृतः अतस्त्वं निवर्तस्व सार्द्धश्लोक एकान्वयी ॥ ९–१० ॥

११] ति० टी०–कृतः। ईश्वरेच्छयेति शेषः ॥ ११ ॥

रा० टी०–इतीति । नन्दिवचः श्रुत्वा स रावणः पुष्पकादवरुह्य कोऽयं शंकर इत्युक्त्वा शैलमूलमुपागतोऽभवदिति शेषः सार्द्धश्लोक एकान्वयी ॥ ११ ॥

१२–१३] ति० टी०–शैलमूलमुपागतः । अन्तरिक्षात्पर्वतं प्राप्तः ॥ १२ ॥ १३ ॥

रा० टी०–स इति । स रावणः देवस्य शिवस्यादूरतः स्थितं नन्दिनमपश्यत् ॥ १२ ॥

१ अपश्यदिति गो. पाठः । २ पुष्पकं दृष्ट्वा ह्यगममिति गो. पाठः । ३ चेच्छयेति गो. पाठः । ४ इदमर्धमधिकं गो. पाठे

तं दृष्ट्वा वानरमुखमवज्ञाय स राक्षसः । प्रहासं मुमुचे तत्र सतोय इव तोयदः ॥ १४ ॥
तं क्रुद्धो भगवान्नन्दी शंकरस्यापरा तनुः । अब्रवीत्तत्र तद्रक्षो दशाननमुपस्थितम् ॥ १५ ॥
यस्माद्वानररूपं मामवज्ञाय दशानन । अशनीपातसंकाशमपहासं प्रमुक्तवान् ॥ १६ ॥
तस्मान्मैद्वीर्यसंयुक्ता मद्रूपसमतेजसः[1] । उत्पत्स्यन्ति वधार्थं हि कुलस्य तव वानराः ॥ १७ ॥
नखदंष्ट्रायुधाः क्रूर[2] मनःसंपातरंहसः । युद्धोन्मत्ता बलोद्रिक्ताः शैला इव विसर्पिणः[3] ॥ १८ ॥
ते तव प्रबलं दर्पमुत्सेधं च पृथग्विधम् । व्यपनेष्यन्ति संभूय सहामात्यसुतस्य च ॥ १९ ॥
किं त्विदानीं मया शक्यं हन्तुं त्वां हे निशाचर । न हन्तव्यो हतस्त्वं हि पूर्वमेव स्वकर्मभिः ॥ २० ॥
इत्युदीरितवाक्ये तु देवे तस्मिन्महात्मनि । देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता ॥ २१ ॥
अचिन्तयित्वा स तदा नन्दिवाक्यं महाबलः । पर्वतं तु समासाद्य वाक्यमाह दशाननः ॥ २२ ॥
पुष्पकस्य गतिश्छिन्ना यत्कृते मम गच्छतः । तमिमं शैलमुन्मूलं करोमि तव गोपते ॥ २३ ॥
केन प्रभावेण भवो नित्यं क्रीडति राजवत् । विज्ञातव्यं न जानीते भयस्थानमुपस्थितम् ॥ २४ ॥
एवमुक्त्वा ततो राम भुजान्विक्षिप्य पर्वते । तोलयामास तं शीघ्रं[4] स शैलः समकम्पत ॥ २५ ॥
चालनात्पर्वतस्यैव गणा देवस्य कम्पिताः । चचाल पार्वती चापि तदाश्लिष्टा महेश्वरम् ॥ २६ ॥
ततो राम महादेवो देवानां प्रवरो हरः । पादाङ्गुष्ठेन तं शैलं पीडयामास लीलया ॥ २७ ॥

१४-१८] ति० टी०-प्रहासं मुमुचे । कृतवानित्यर्थः ॥ १४-१८ ॥

रा० टी०-तमिति । राक्षसो रावणः तं नन्दिनं दृष्ट्वा अवज्ञाय अनादृत्य तोयद इव प्रहासं मुमुचे चकार ॥ १३ ॥

रा० टी०-तमिति । शंकरस्यापरा तनुः क्रुद्धो नन्दी दशाननमब्रवीत् ॥ १४ ॥

रा० टी०-तदाकारमाह—यस्मादिति । यस्मात् वानररूपं मामवज्ञाय अपहासं प्रमुक्तवानसि तस्मात् मद्वीर्यसंयुक्ताः अहं वीर्यसंयुक्तो यैस्ते मद्रूपस्य समं तेजो रूपं येषां किञ्च मद्रूपसमे सकलमद्रूपे तेजो यैः ते वानराः तव कुलस्य वधार्थमुत्पत्स्यन्ति अर्द्धचतुष्टयमेकान्वयि ॥ १५-१६ ॥

रा० टी०-नखेति । मनस्सम्पात इव रंहो वेगो येषां विसर्पिणः शैला इव ये वानराः ते तव प्रबलं दर्पं गर्वमुत्सेधं शरीरोन्नतत्वं च व्यपनेष्यन्ति अर्द्धचतुष्टयमेकान्वयि १७-१८

१९] ति० टी०-दर्प आन्तरः । उत्सेधः शारीरः॥१९॥

२०] ति० टी०-किंत्विति । हे निशाचर, त्वां हन्तुं यद्यपि मया शक्यमथापीदानीं न हन्तव्यः । भगवद्वचनानुपालनायेति शेषः । किं च त्वं पूर्वमेव स्वकर्मभिः स्वदुष्कृतैर्हत एवासि । कालान्तरे मद्रूपैरेव हन्तव्यो भविष्यसीति भावः२०

रा० टी०-किमिति । हे निशाचर यद्यपि त्वां हन्तुमिदानीं मया शक्यं तथापि त्वं न हंतव्यः हि यतः स्वकर्मभिः पूर्वमेव हतोऽसि॥ १९ ॥

२१-२२] ति० टी०-तद्वाक्यसमनन्तरं देवदुन्दुभ्यादिप्रवृत्तिस्तु तच्छापेन रावणवधनिश्चयजसंतोषात् ॥२१॥२२॥

रा० टी०-इतीति । देवे नन्दीश्वरे इत्युदीरितवाक्ये सति देवदुन्दुभयो नेदुः

रा० टी०-अचिन्तयित्वेति । महाबलो रावणः नन्दिवाक्यमचिन्तयित्वा पर्वतं समासाद्य वाक्यमाह ॥ २१ ॥

२३-२४] ति० टी०-यत्कृते यदाश्रयक्रीडानिमित्त गच्छतो मम पुष्पकस्य गतिश्छिन्ना त्वया । हे गोपते रुद्र, तवेमं पर्वतमुन्मूलं करोमि ॥ २३ ॥ २४ ॥

रा० टी०-तदाकारमाह—पुष्पकस्येति । यत्कृते यदर्थं पुष्पकस्य गतिस्त्वया छिन्ना तमिमं शैलमुन्मूलं करोमि॥२२॥

रा० टी०-केनेति । भवः प्रभावेण नित्यं क्रीडति विज्ञातव्यमुपस्थितभयस्थानं न जानीते च ॥ २३

गो० टी०-पुष्पकस्येति । गोपते हे वृषभपते रुद्र२३-२७

२५] ति० टी०-पर्वते पर्वताधस्तात् ॥ २५ ॥

रा० टी०-एवमिति । एवमुक्त्वा स रावणः पर्वते भुजान् विक्षिप्य तं पर्वतं तोलयामास अत एव शैलस्समकम्पत ॥ २४ ॥

२६-२७] ति० टी०-आश्लिष्टाश्लिष्टवती । कर्तरि क्तः ॥ २६ ॥ २७ ॥

रा० टी०-चालनादिति । पर्वतस्य चालनात् देवस्य शम्भोर्गणाः कम्पिताः पार्वती चचाल अत एव महेश्वरमाश्लिष्टाभवदिति शेषः ॥ २६ ॥

रा० टी०-तत इति । महादेवः तं शैलं पादांगुष्ठेन लीलयैव पीडयामास ॥ २६ ॥

१ मद्रूपसंपन्ना मद्वीर्यसमतेजस इति गो. पाठः । २ क्रूरा इति गो. पाठः । ३ शैलमिति गो. पाठः

पीडितास्तु ततस्तस्य शैलैस्तम्भोपमा भुजाः । विस्मिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः ॥ २८ ॥
रक्षसा तेन रोषाच्च भुजानां पीडनात्तथा । मुक्तो विरावः सहसा त्रैलोक्यं येन कम्पितम् ॥२९॥
मेनिरे वज्रनिष्पेषं तस्यामात्या युगक्षये । तदा वर्त्मसु चलिता देवा इन्द्रपुरोगमाः ॥ ३० ॥
समुद्राश्चापि संक्षुब्धाश्चलिताश्चापि पर्वताः । यक्षा विद्याधराः सिद्धाः किमेतदिति चाब्रुवन् ॥३१॥
[अथ ते मन्त्रिणस्तस्य विक्रोशन्तमथाब्रुवन् ।]
तोषयस्व महादेवं नीलकण्ठमुमापतिम् । तमृते शरणं नान्यं पश्यामोऽत्र दशानन ॥ ३२ ॥
स्तुतिभिः प्रणतो भूत्वा तमेव शरणं व्रज । कृपालुः शंकरस्तुष्टः प्रसादं ते विधास्यति ॥ ३३ ॥
एवमुक्तस्तदामात्यैस्तुष्टाव वृषभध्वजम् । सामभिर्विविधैः स्तोत्रैः प्रणम्य स दशाननः ॥
संवत्सरसहस्रं तु रुदतो रक्षसो गतम् ॥ ॥ ३४ ॥
ततः प्रीतो महादेवः शैलाग्रे विष्टितं प्रभुः । मुक्त्वा चास्य भुजान्राम प्राह वाक्यं दशाननम् ॥३५॥
प्रीतोऽस्मि तव वीर्यस्य शौटीर्याच्च दशानन । शैलाक्रान्तेन यो मुक्तस्त्वयारावः सुदारुणः ॥३६॥
यस्माल्लोकत्रयं चैतद्रावितं भयमागतम् । तस्मात्त्वं रावणो नाम नाम्ना राजन्भविष्यसि ॥३७॥
देवता मानुषा यक्षा ये चान्ये जगतीतले । एवं त्वामभिधास्यन्ति रावणं लोकरावणम् ॥ ३८ ॥
गच्छ पौलस्त्य विस्रब्धं पथा येन त्वमिच्छसि । मया चैवाभ्यनुज्ञातो राक्षसाधिप गम्यताम् ॥ ३९ ॥

२८-२९] ति० टी०-तस्य पर्वताधोभागगता भुजाः पीडिताः । अभवन्निति शेषः ॥ २८ ॥ २९ ॥

३०-३१] ति० टी०-तस्यामात्यास्तदीयं शब्दं युगक्षये जायमानं वज्रनिष्पेषं मेनिरे तदा तच्छब्दश्रवणकाले । वर्त्मस्विति । वर्त्मसु स्थिता देवा वर्त्मभ्यः प्रचलिता इत्यर्थः॥३१

रा० टी०-पीडिता इति । तस्य रावणस्य शैलस्तम्भोपमा भुजाः पीडिताः अत एव सचिवा विस्मिता अभवन्२७

गो० टी०-पीडिता इति । अधोगताः पर्वतस्याधोभागमताः भुजाः पीडिता आसन् ॥ २८ ॥ ३९ ॥

रा० टी०-रक्षसेति । रोषात् भुजानां पीड़नाच्च रक्षसा विरावो रोदनमुक्तः कृतः येन त्रैलोक्यं कम्पितमत एव तस्य रावणस्यामात्या युगक्षये जातं वज्रनिष्पेषं मेनिरे सार्द्धश्लोक एकान्वयी ॥ २८—२९ ॥

रा० टी०-तदेति । वर्त्मसु तारापथेषु स्थिताः देवाः चलिता अभवन् समुद्राश्च संक्षुब्धाः अत एव यक्षादयः किमेतदित्यब्रुवन् सार्द्धश्लोक एकान्वयी ॥ ३० ॥

३२-३५] ति० टी०-अथ तन्मन्त्रिण आहुः—तोषयस्वेति ॥ ३२-३५ ॥

रा० टी०-तोषयस्वेति । यतो महादेवं विना अन्यं शरणं न पश्यामः अतः तमेव तोषयस्व ॥ ३१ ॥

रा० टी०-तत्प्रकारमाह—स्तुतिभिरिति । स्तुतिभिः प्रणतो भूत्वा तन्महादेवमेव शरणं व्रज तुष्टः शंकरः ते प्रसादं विधास्यति ॥ ३२ ॥

रा० टी०-एवमिति । एवममात्यैरुक्तो दशाननः प्रणम्य सामभिः सान्त्वनकारकैः विविधैः स्तोत्रैः वृषभध्वजं तुष्टाव ॥ ३३ ॥

रा० टी०-संवत्सरेति । रुदतो रक्षसः संवत्सरसहस्रं गतम् अर्द्धं पृथक् ॥ ३४ ॥

रा० टी०-तत इति । प्रीतो महादेवः अस्य रावणस्य भुजान् मुक्त्वा दशाननं प्राह ॥ ३५ ॥

३६] ति० टी०-शौटीर्यात् । चात्स्तुतेः ॥ ३६ ॥

रा० टी०-तदाकारमाह—प्रीत इत्यादिभिः । शैलाक्रान्तेन त्वया शौण्डीर्यात् अतिबलात् यो रावः त्वया मुक्तः तेन तव रावेण प्रीतोऽस्मि ॥ ३६ ॥

३७-३८] ति० टी०-रावितं शब्दितम् ॥ ३७ ॥ ३८ ॥

रा० टी०-यस्मादिति । यस्मात् लोकत्रयं त्वया रावितं तस्मात् नाम्ना रावणो नाम प्रसिद्धं भविष्यसि ॥ ३७ ॥

रा० टी०-देवतेति । देवतादयः एवं लोकरावणं त्वां रावणमभिधास्यन्ति कथयिष्यन्ति ॥ ३८ ॥

३९] ति० टी०-मयाभ्यनुज्ञातः । पुष्पकेण गमनायेति शेषः । असीति च, अतो गम्यताम् ॥ ३९ ॥

रा० टी०-गच्छेति । हे पौलस्त्य विस्रब्धं मद्विषये सविश्वासं यथा भवति तथा येन पथाध्वना गम्यतां स्वस्थानसंयोगमिच्छसि तेन पथा मयाभ्यनुज्ञातस्त्वं गच्छ ॥ ३९ ॥

गो० टी०-मया त्वमभ्यनुज्ञातः । पुष्पकेण गमनायेति शेषः ॥ ४० ॥ ४२ ॥

१ शैलस्याधोगता इति गो. पाठः । २ तदेति गो. पाठः । ३ स्थेति गो. पाठः । ४ इदमर्धमधिकं गो. पाठे । ५ विष्टित इति गो. रा. पाठः । ६ वीर्यस्येति गो. पाठः ।

एवमुक्तस्तु लङ्केशः शंभुना स्वयमब्रवीत् । प्रीतो यदि महादेव वरं मे देहि याचतः ॥ ४० ॥
अवध्यत्वं मया प्राप्तं देवगन्धर्वदानवैः । राक्षसैर्गुह्यकैर्नागैर्ये चान्ये बलवत्तराः ॥ ४१ ॥
मानुषान्न गणे देव स्वल्पास्ते मम संमताः । दीर्घमायुश्च मे प्राप्तं ब्रह्मणस्त्रिपुरान्तक ॥
वाञ्छितं चायुषः शेषं शस्त्रं त्वं च प्रयच्छ मे ॥ ॥ ४२ ॥
एवमुक्तस्ततस्तेन रावणेन स शंकरः । ददौ खड्गं महादीप्तं चन्द्रहासमिति श्रुतम् ॥
आयुषश्चावशेषं च ददौ भूतपतिस्तदा ॥ ॥ ४३ ॥
दत्त्वोवाच ततः शंभुर्नावज्ञेयमिदं त्वया । अवज्ञातं यदि हि ते मामेवैष्यत्यसंशयः ॥ ४४ ॥
एवं महेश्वरेणैव कृतनामा स रावणः । अभिवाद्य महादेवमारुरोहाथ पुष्पकम् ॥ ४५ ॥
ततो महीतलं राम पर्यक्रामत रावणः । क्षत्रियान्सुमहावीर्यान्बाधमानस्ततस्ततः ॥ ४६ ॥
केचित्तेजस्विनः शूराः क्षत्रिया युद्धदुर्मदाः । तच्छासनमकुर्वन्तो विनेशुः सपरिच्छदाः ॥ ४७ ॥
अपरे दुर्जयं रक्षो जानन्तः प्राज्ञसंमताः । जिताः स्म इत्यभाषन्त राक्षसं बलदर्पितम् ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षोडशः सर्गः ॥ १६ ॥

४०-४१] ति० टी०-यदि प्रीतो यदि च वरं ददासि तदा याचतो मे देहीत्यर्थः ॥ ४० ॥ ४१ ॥

रा० टी०-एवमिति । लंकेशोऽब्रवीत् तदाकारमाह यदि त्वं प्रीतस्तदा याचतो मे वरं देहि ॥ ४० ॥

रा० टी०-वराकारं बोधयितुमाह अवध्यत्वमिति देवादिभिरवध्यत्वं दीर्घमायुश्च ब्रह्मणो मया प्राप्तं मानुषान्प्राकृतमनुष्यांस्तु न गणे गणयामि अतः आयुषः शेषं ब्रह्मदत्तायुषो भोगादवशिष्टमायुः शस्त्रं च प्रयच्छ सार्द्धश्लोकद्वयमेकान्वयि आयुश्शेषयाचनेन तस्यातिभीतत्वं व्यक्तम् ॥ ४१ ॥ ४२ ॥

४२] ति० टी०-न गणे । न गणयामीत्यर्थः । तत्र हेतुः-स्वल्पा इति । स्वल्पबलवीर्या इत्यर्थः । वाञ्छितं चायुषः शेषं भगवद्दत्तदीर्घायुष्याद्यो भागो गतस्तस्माच्छेषमवशिष्टमायुर्वाञ्छितं तदेतैर्दुष्कर्मभिर्यथा विनष्टं न भवति तथा प्रयच्छ । तस्मिंश्चायुषि सर्वजयाय शस्त्रं च दिव्यं प्रयच्छ ॥ ४२ ॥

गो० टी०-मानुषानिति । न गणे न गणयामि ॥४२॥

गो० टी०-वाञ्छितमिति । ब्रह्मदत्तदीर्घायुष्याद्यो भागः ततस्तस्माच्छेषमवशिष्टं वाञ्छितमिदानीमेव दुष्कर्मणा केनाप्यविनष्टं मे प्रयच्छ ॥ ४४ ॥

४३] ति० टी०-आयुषश्चावशेषं ददौ । शापाद्यनाद्दयत्वेन ददावित्यर्थः ॥ ४३ ॥

रा० टी०-एवमिति । एवमुक्तश्शंकरः चन्द्रहासमिति श्रुतं खड्गं ददौ आयुषोऽवशेषं च ददौ सार्धश्लोक एकान्वयी ४३

गो० टी०-ददाविति । आयुषश्चेति । ब्रह्मा दीर्घायुष्यस्त्वेतावांस्तत्रास्यापमृत्यवो देवतादिभ्यः प्राप्ताः परित्यक्ता भवन्तु । रामेण वध इति स्थित्वा मत्वेत्यर्थः ॥ ४५ ॥

४४-४८] ति० टी०-इदं नावज्ञेयम् । शस्त्रस्यास्य पूजौदासीन्यं न कार्यमित्यर्थः ॥ ४४-४८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षोडशः सर्गः ॥ १६ ॥

रा० टी०-दत्त्वेति । शम्भुर्दत्त्वा इदं शस्त्रं त्वया नावज्ञेयं यद्यवज्ञातं स्यात् तर्हि मामेव एष्यति इत्युवाच ॥ ४५ ॥

रा० टी०-एवमिति । रावण पुष्पकमारुरोह ॥ ४६ ॥

रा० टी०-तत इति । क्षत्रियान् बाधमानो रावणः महीतलं पर्यक्रामत ॥ ४७ ॥

रा० टी०-बाधमेव विशदयन्नाह-केचिदिति । तच्छासनमकुर्वन्तः केचित् क्षत्रियाः विनेशुः रावणेन विनाशिता इत्यर्थः ॥ ४८ ॥

रा० टी०-अपरे इति । प्राज्ञैस्सम्मताः अयमजेय इत्युपदिष्टाः अत एव दुर्जयं रक्षो जानन्तः अपरे क्षत्रियाः जिताः स्म इति राक्षसं रावणमभाषन्त ॥ ४९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षोडशः सर्गः ॥ १६ ॥

गो० टी०-दत्त्वेति । इदं खड्गरूपास्त्रं नावज्ञेयम् । एकस्मिन्नपि दिने पूजौदासीन्यं न कर्तव्यमित्यर्थः । अवज्ञातं यदि ॥ ४६—५० ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षोडशः सर्गः ॥ १६ ॥

१ स्थित्वेति गो. पाठः । २ तत्रे इति गो. पाठः । ३ इतस्तत इति गो. पाठः ।

सप्तदशः सर्गः ।

एव पुनराहिण्डमानस्य रावणस्य वेदवत्या दर्शनं कामुकतया बलाद्धर्षयंस्तया धर्षणतपसाऽत एवाग्निं प्रविशन्त्या द्वितीयजन्मनि त्वां समूलं नाशयिष्यामीति शप्तः अत एव भो दाशरथे सैव वेदवती मैथिली तत्कृते राक्षसवंशध्वंस इति कुम्भयोनिः शंसति ।

अथ राजन्महाबाहुर्विचरन्पृथिवीतले । हिमवद्वनमासाद्य परिचक्राम रावणः ॥ १ ॥
तत्रापश्यत्स वै कन्यां कृष्णाजिनजटाधराम् । आर्षेण विधिना युक्तां दीप्यन्तीं देवतामिव ॥ २ ॥
स दृष्ट्वा रूपसंपन्नां कन्यां तां सुमहाव्रताम् । काममोहपरीतात्मा पप्रच्छ प्रहसन्निव ॥ ३ ॥
किमिदं वर्तसे भद्रे विरुद्धं यौवनस्य ते । नहि युक्ता तवैतस्य रूपस्यैवं प्रतिक्रिया ॥ ४ ॥
रूपं तेऽनुपमं भीरु कामोन्मादकरं नृणाम् । न युक्तं तपसि स्थातुं निर्गतो ह्येष निर्णयः ॥ ५ ॥
कस्यासि किमिदं भद्रे कश्च भर्ता वरानने । येन संभुज्यसे भीरु स नरः पुण्यभाग्भुवि ॥ ६ ॥
पृच्छतः शंस मे सर्वं कस्य हेतोः परिश्रमः । एवमुक्ता तु सा कन्या रावणेन यशस्विनी ॥ ७ ॥
अब्रवीद्विधिवत्कृत्वा तस्यातिथ्यं तपोधना । कुशध्वजो नामं पिता ब्रह्मर्षिरमितप्रभः ॥
बृहस्पतिसुतः श्रीमान्बुद्ध्या तुल्यो बृहस्पतेः ॥ ॥ ८ ॥
तस्याहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः । संभूता वाङ्मयी कन्या नाम्ना वेदवती स्मृता ॥९॥
ततो देवाः सगन्धर्वा यक्षराक्षसपन्नगाः । ते चापि गत्वा पितरं वरणं रोचयन्ति मे ॥ १० ॥
न च मां स पिता तेभ्यो दत्तवान्राक्षसेश्वर । कारणं तद्वदिष्यामि निशामयं महाभुज ॥ ११ ॥

१] ति० टी०–अथ वेदवत्या रावणस्य शापदानकथनपूर्वकं सैवेयं जनकात्मजेति कथनम्—अथ राजन्निति ॥१॥

रा० टी०–रावणवृत्तान्तमेवाह—अथेत्यादिभिः । रावणः हिमवद्वनमासाद्य परिचक्राम ॥ १ ॥

गो० टी०–अथ राजन्नित्यादि । आर्षेण विधिना तपोनुष्ठानेन ॥ १ ॥ २ ॥

२] ति० टी०–आर्षेण विधिना तपोनुष्ठानेन ॥ २ ॥

रा० टी०–तत्रेति । तत्र हिमवद्वने आर्षेण विधिना युक्तामृषिप्रोक्तकर्मकर्त्रीमित्यर्थः कृष्णाजिनजटाधरां कन्यामपश्यत् ॥ २ ॥

३] ति० टी०–प्रहसन्निवारण्ये मयानाथा सुकन्या प्राप्तेति संतोषजः प्रहास इति कतकः ॥ ३ ॥

रा० टी०–स इति । रूपसम्पन्नां कन्यां दृष्ट्वा मोहपरीतात्मा रावणः प्रहसन्निव पप्रच्छ ॥ ३ ॥

गो० टी०–स इति । प्रहसन्निति । दुर्लभकन्यालाभात्प्रहासः ॥ ३ ॥

४] ति० टी०–एवं प्रतिक्रिया इदमाचरणम् ॥ ४ ॥

रा० टी०–तदाकारमाह—किमित्यादिभिः । ते यौवनस्य विरुद्धं विरोधीदं किं किमर्थं वर्तसे तव एतस्य रूपस्य एवं प्रतिक्रिया विपर्ययो न युक्तम् ॥ ४ ॥

गो० टी०–किमिति । इदं प्रतिक्रिया । इदं यौवनप्रतिकूलक्रिया ॥ ४—२० ॥

५] ति० टी०–निर्गतः प्रसिद्ध एष निर्णयः । वृद्धानामिति शेषः ॥ ५ ॥

रा० टी०–तदेव स्पष्टमाह—रूपमिति । ते अनुपमं रूपं नृणां कामोन्मादकरमस्तीति शेषः अतः तपसि स्थातुं त्वया न युक्तमेष निर्णयः निर्गतोऽस्माभिर्ज्ञातः ॥ ५ ॥

६] ति० टी०–कस्यासि । दुहितेति शेषः । किमिदं व्रतमित्यर्थः ॥ ६ ॥

रा० टी०–कस्येति । त्वं कस्यासि इदं किं क्रियते इति शेषः ते भर्ता कः येन त्वं सम्भुज्यसे स नरः भुवि पुण्यभाक् ते परिश्रमः कस्य हेतोः इति पृच्छतो मे शंस सार्द्धश्लोक एकान्वयी ॥ ६ ॥

७–८] ति० टी०–कस्य हेतोः किंफलनिमित्तम् ॥७॥८॥

रा० टी०–एवमिति । एवमुक्ता कन्या तस्य रावणस्य विधिवत् आतिथ्यं कृत्वाऽब्रवीत् ॥ ७ ॥

रा० टी०–तदाकारमाह–कुशध्वज इत्यादिभिः । मम पिता बृहस्पतिसुतः कुशध्वजः ॥ ८ ॥

९] ति० टी०–वेदाभ्यासं कुर्वतो महात्मनस्तस्य सकाशाद्वाङ्मयी वाङ्मयवेदमूर्तिः कन्याहं संभूता, अत एवाहं पित्रा नाम्ना वेदवतीति स्मृता । भगवतः शक्तिर्लक्ष्मीरेव रावणवधाय रावणं शमुमत्रावतीर्णा । अस्या वाङ्मयीत्वं सार्वात्म्यात्, अत एव वक्ष्यति पितुर्मे विष्णुर्जामाताभिप्रेत इति ॥ ९ ॥

१०–११] ति० टी०–ते देवादयो वरणं रोचयन्ति । रुचिः क्रियासामान्ये । वरणं कुर्वन्ति स्मेत्यर्थः ॥ १० ॥ ११ ॥

१ स महीतले इति गो. पाठः । २ तपस इति गो. पाठः । ३ ममेति गो. पाठः । ४ इदं पद्यं रा. पुस्तके नास्ति । ५ संभूयेति गो. पाठः । ६ निशाचर निशामयेति गो. पाठः ।

पितुस्तु मम जामाता विष्णुः किल सुरेश्वर । अभिप्रेतस्त्रिलोकेशस्तस्मान्नान्यस्य मे पिता॥ १२ ॥
दातुमिच्छति तस्मै तु तच्छ्रुत्वा बलदर्पितः । शंभुर्नाम ततो राजा दैत्यानां कुपितोऽभवत् ॥
तेन रात्रौ शयानो मे पिता पापेन हिंसितः ॥ ॥ १३ ॥
ततो मे जननी दीना तच्छरीरं पितुर्मम । परिष्वज्य महाभागा प्रविष्टा हव्यवाहनम् ॥ १४ ॥
ततो मनोरथं सत्यं पितुर्नारायणं प्रति । करोमीति तमेवाहं हृदयेन समुद्वहे ॥ १५ ॥
इति प्रतिज्ञामारुह्य चरामि विपुलं तपः । एतत्ते सर्वमाख्यातं मया राक्षसपुंगव ॥ १६ ॥
नारायणो मम पतिर्न त्वन्यः पुरुषोत्तमात् । आश्रये नियमं घोरं नारायणपरीप्सया ॥ १७ ॥
विज्ञातस्त्वं हि मे राजन्नाच्छ पौलस्त्यनन्दन । जानामि तपसा सर्वं त्रैलोक्ये यद्धि वर्तते ॥ १८ ॥
सोऽब्रवीद्रावणो भूयस्तां कन्यां सुमहाव्रताम् । अवरुह्य विमानाग्रात्कंदर्पशरपीडितः ॥ १९ ॥
अवलिप्तासि सुश्रोणि यस्यास्ते मतिरीदृशी । वृद्धानां मृगशावाक्षि भ्राजते पुण्यसंचयः ॥ २० ॥
त्वं सर्वगुणसंपन्ना नार्हसे वक्तुमीदृशम् । त्रैलोक्यसुन्दरी भीरु यौवनं तेऽतिवर्तते ॥ २१ ॥
अहं लङ्कापतिर्भद्रे दशग्रीव इति श्रुतः । तस्य मे भव भार्या त्वं भुङ्क्ष्व भोगान्यथासुखम् २२
कश्च तावदसौ यं त्वं विष्णुरित्यभिभाषसे । वीर्येण तपसा चैव भोगेन च बलेन च ॥
सैं मया नो समो भद्रे यं त्वं कामयसेऽङ्गने ॥ ॥ २३ ॥

रा० टी०-तत इति । ततो ये देवादयः ते पितरं गत्वा मे वरणं रोचयन्ति ॥ ९ ॥

रा० टी०-नेति । स पिता मां तेभ्यो न दत्तवान् तत्र कारणं वदिष्यामि त्वं निशामय शृणु ॥ १० ॥

१२-१४] ति० टी०-अन्यस्य। अन्यस्मै इत्यर्थः१२-१४

रा० टी०-तत् कारणमेवाह-पितुरित्यादिभिः । मम पितुर्जामाता विष्णुरभिप्रेतः तस्मात् मे पिता अन्यस्य अन्यस्मै दातुं नेच्छति तच्छ्रुत्वा दैत्यानां राजा शम्भुः तस्मै मत्पित्रे कुपितोऽभवत् अर्द्धचतुष्टयमेकान्वयि ॥ ११ ॥ १२ ॥

रा० टी०-तेनेति । तेन शम्भुना राज्ञा शयानो मम पिता हिंसितोऽभवदिति शेषः अर्द्धं पृथक् ॥ १३ ॥

रा० टी०-तत इति । ततः पितुर्मरणात् दीना मे जननी मम पितुश्शरीरं परिष्वज्य हव्यवाहनमग्निं प्रविष्टा १४

१५] ति० टी०-नारायणं नारस्य जीवसमूहस्यायनम्, नारा आपोऽयनं यस्येति वा, तं प्रतिगतं पितुर्मनोरथं सत्यं करोमीतीच्छया तं नारायणमेव हृदयेनोद्वहे ॥ १५ ॥

रा० टी०-तत इति । नारायणं प्रति पितुर्मनोरथं सत्यं करोमि इति हेतोः तं नारायणमेव हृदयेनाहं समुद्वहे ॥१५॥

१६-१७] ति० टी०-इति प्रतिज्ञां प्रागुक्तेच्छाविषयविषयाम् । आरुह्य कृत्वा ॥ १६ ॥ १७ ॥

रा० टी०-इतीति । इति पितृकृतां प्रतिज्ञामारुह्य अनुरुह्य विपुलं तपश्चरामि एतत्सर्वं वृत्तान्तमाख्यातम् ॥ १६ ॥

रा० टी०-नारायण इति । पुरुषोत्तमात् रामात् योऽन्यः अत्यन्तभिन्नो न स नारायण एव मम पतिः अत एव नारायणपरीप्सया घोरं नियममाश्रये ॥ १७ ॥

१८-१९] ति० टी०-कथं विज्ञातस्तत्राह-जानामीति ॥ १८ ॥ १९ ॥

रा० टी०-विज्ञात इति । यत् त्रैलोक्ये वर्तते तत्सर्वं तपसाहं जानामि अतः मे मया त्वं विज्ञातः अतः हे पौलस्त्यनन्दन त्वं गच्छ ॥ १८ ॥

रा० टी०-स इति । कन्दर्पशरपीडितो रावणः विमानाद्यात् अवरुह्य भूयोऽब्रवीत् ॥ १९ ॥

२०-२२] ति० टी०-पुण्यसंचयः पुण्यसंग्रहणं वृद्धानामेव भ्राजते । न तु युवत्या इत्यर्थः ॥ २० -२२ ॥

रा० टी०-तदाकारमाह-अवलिप्तेति । त्वमवलिप्ता गर्वविशिष्टासि स्वकर्तव्यं न जानासीति तात्पर्यं तेन तपस्त्वया न कर्तव्यमिति सूचितं ननु तपसां निरवलम्बनत्वापत्तिरित्यत आह पुण्यसंचयो वृद्धानां भ्राजते ॥ २० ॥

रा० टी०-त्वमिति । सर्वगुणसम्पन्ना त्वमीदृशं तपश्चरणविषयकं वचो वक्तुं नार्हसे तत्र हेतुः ते यौवनमतिवर्तते २१

रा० टी०-ननु तपश्चरणाभावे विष्णोरप्राप्ता ममोद्वाहाभावापत्तिरित्यत आह-अहमिति । योऽहं लंकापतिः तस्य मे भार्या त्वं भव अत एव भोगान् यथासुखं भुंक्ष्व ॥ २२ ॥

गो० टी०-अवलिप्तेति । वृद्धानामिति । पुण्यसंचयः पुण्यसंग्रहणं वृद्धानामेव भ्राजते ननु बालयूनोः ॥ २१—३९ ॥

२३] ति० टी०-कश्चेति । मदपेक्षयात्यल्पवीर्यादियुक्तः ॥ २३ ॥

रा० टी०-क इति । यं त्वं विष्णुरित्यभिभाषसे स कः

१ दंभुरिति गो. पाठः । २ अभ्यादिति रा. पा. । ३ नीति गो. पाठः । ४ न मया स इति गो. पाठः

इत्युक्तवति तस्मिंस्तु वेदवत्यथ साब्रवीत् । मा मैवमिति सा कन्या तमुवाच निशाचरम् ॥२४॥
त्रैलोक्याधिपतिं विष्णुं सर्वलोकनमस्कृतम् । त्वदृते राक्षसेन्द्रान्यः कोऽवमन्येत बुद्धिमान् ॥ २५ ॥
एवमुक्तस्तया तत्र वेदवत्या निशाचरः । मूर्धजेषु तदा कन्यां कराग्रेण परामृशत् ॥ २६ ॥
ततो वेदवती क्रुद्धा केशान्हस्तेन साच्छिनत् । असिर्भूत्वा करस्तस्याः केशांश्छिन्नांस्तदाकरोत् २७
सा ज्वलन्तीव रोषेण दहन्तीव निशाचरम् । उवाचाग्निं समाधाय मरणाय कृतत्वरा ॥ २८ ॥
धर्षितायास्त्वयानार्य न मे जीवितमिष्यते । रक्षस्तस्मात्प्रवेक्ष्यामि पश्यतस्ते हुताशनम् ॥ २९ ॥
यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने । तस्मात्तव वधार्थं हि समुत्पत्स्येऽहं पुनः ॥ ३० ॥
नहि शक्यः स्त्रिया हन्तुं पुरुषः पापनिश्चयः । शापे त्वयि मयोत्सृष्टे तपसश्च व्ययो भवेत्॥ ३१ ॥
यदि त्वस्ति मया किंचित्कृतं दत्तं हुतं तथा । तस्मात्त्वयोनिजा साध्वी भवेयं धर्मिणः सुता ॥३२॥
एवमुक्त्वा प्रविष्टा सा ज्वलितं जातवेदसम् । पपात च दिवो दिव्या पुष्पवृष्टिः समन्ततः ॥ ३३ ॥
[पुनरेव समुद्भूता पद्मे पद्मसमप्रभा । तस्मादपि पुनः प्राप्तां पूर्ववत्तेन रक्षसा ॥
कन्यां कमलगर्भाभां प्रगृह्य स्वगृहं ययौ । प्रगृह्य रावणस्त्वेतां दर्शयामास मन्त्रिणे ॥
लक्षणज्ञो निरीक्ष्यैव रावणं चैवमब्रवीत् । गृहस्थैषा हि सुश्रोणी त्वद्वधायैव दृश्यते ॥
एतच्छ्रुत्वार्णवे राम तां प्रचिक्षेप रावणः । सा चैव क्षितिमासाद्य यज्ञायतनमध्यगा ॥
राज्ञो हलमुखोत्कृष्टा पुनरप्युत्थिता सती ।]
सैषा जनकराजस्य प्रसूता तनया प्रभो । तव भार्या महाबाहो विष्णुस्त्वं हि सनातनः ॥३४॥

मत्तो हीन इत्यर्थः अहं पृथक् तदेव भंग्यंतरेणाह–वीर्येणेति। यं त्वं कामयसे स विष्णुः वीर्यादिना मया समो न ॥ २३ ॥

२४–२६] ति० टी०–मा मैवम् । विष्णुविषये वदेति शेषः ॥ २४–२६ ॥

रा० टी०–इतीति । तस्मिन् रावणे इत्युक्तवति सति वेदवती मा मेति वचो निशाचरमुवाच ॥ २४

रा० टी०–त्रैलोक्येति । त्वदृते त्वां विना कोन्यो बुद्धिमान् त्रैलोक्याधिपतिं विष्णुमवमन्येत ॥ २५ ॥

रा० टी०–एवमिति । निशाचरः कराग्रेण मूर्द्धजेषु कन्यां परामृशत् ॥ २६ ॥

२७–२८] ति० टी०–हस्तेन केशच्छेदः कथं तत्राह—असिर्भूत्वेति ॥ २७ ॥ २८ ॥

रा० टी०–तत इति । क्रुद्धा वेदवती हस्तेन केशान् अच्छिनत् ननु हस्तेन कथं केशच्छेद इत्यत आह तस्याः करः असिर्भूत्वा केशान् छिन्नान् अकरोत् ॥ २७ ॥

रा० टी०–सेति । सा वेदवती अग्निं समाधाय रावणायोवाच ॥ २८ ॥

२९] ति० टी०–धर्षितायाः केशस्पर्शेन स्त्रीभावं प्रापितायाः ॥ २९ ॥

रा० टी०–तदाकारमाह—धर्षिताया इति । त्वया धर्षितायाः मे जीवितं नेष्यते तस्मात् ते पश्यतः सतः हुताशनं प्रवेक्ष्यामि ॥ २९ ॥

३०] ति० टी०–पुनः समुत्पत्स्यति। समुत्पत्स्ये इत्यर्थः३०

रा० टी०–यस्मादिति । यस्मात्त्वयाहं धर्षिता तस्मात्तव वधार्थमहं पुनस्समुत्पत्स्यति समुत्पत्स्ये ॥ ३० ॥

३१] ति० टी०–व्ययः । ब्रह्मवरदानादिदानीं तव मरणाभावेन वृथा व्यय इत्यर्थः ॥ ३१ ॥

रा० टी०–नहीति । पापनिश्चयः पुरुषः स्त्रिया हन्तुं न शक्यः स्पर्शशङ्कया पापिना सह युद्धं न योग्यमिति तात्पर्यम् । शापे उत्सृष्टे तु तपसो व्ययो भवेत् एतेन उपायतः त्वां घातयिष्यामीति सूचितम् ॥ ३१ ॥

३२] ति० टी०–अयोनिजा भूत्वा धर्मिणो धर्मिष्ठस्य न्यायतः सुता भवेयम् ॥ ३२ ॥

रा० टी०–यदीति । यदि मया किञ्चिदत्तास्ति तदा तस्मात् धर्मिणो जनकस्य सुता भवेयं प्राप्नुयाम् समुदायस्य कर्मत्वविवक्षया न द्वितीया ॥ ३२ ॥

३३] ति० टी०–अत्रापि पुष्पवर्षं रावणनाशनिश्चयजसंतोषात् ॥ ३३ ॥

रा० टी०–एवमिति । सा वेदवती जातवेदसं वह्निं प्रविष्टा तदा पुष्पवृष्टिः समन्ततो दिवः पपात ॥ ३३ ॥

३४] ति० टी०–सैषा । कृतरावणवधप्रतिज्ञा । वेदवत्येवेत्यर्थः । विष्णुस्त्वमिति । अनेन सीताया लक्ष्मीत्वं स्फुटमेवोक्तम् । तदुक्तं पराशरेण—' राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि' इति ॥ ३४ ॥

१ समुत्पत्स्येह्यहमिति गो० पाठः । २ इदं सार्धपद्यचतुष्टयमधिकं गो. पु.

पूर्वं क्रोधहतः शत्रुर्यया सौ निहतस्तया । उपाश्रयित्वा शैलाभस्तव वीर्यममानुषम् ॥ ३५ ॥
एवमेषा महाभागा मर्त्येषूत्पत्स्यते पुनः । क्षेत्रे हलमुखोत्कृष्टे वेद्यामग्निशिखोपमा ॥ ३६ ॥
एषा वेदवती नाम पूर्वमासीत्कृते युगे । त्रेतायुगमनुप्राप्य वधार्थं तस्य रक्षसः ॥
उत्पन्ना मैथिलकुले जनकस्य महात्मनः । सीतोत्पन्ना तु सीतेति मानुषैः पुनरुच्यते ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ।

दिग्विजयप्रसङ्गेन पर्यटतो रावणस्य यजतो मरुत्तस्य संगमः विघ्नहायाहूतः स राजा ऋत्विग्भिर्दीक्षितत्वान्निषिद्धस्तावन्मात्रेणापि रावणः स्वजयमुद्घोष्य गतः तद्भयाद्गृहीतरूपान्तरेन्द्रादिभ्यो मयूरादीनां पृथक्पृथग्वरप्राप्तिश्च ।

प्रविष्टायां हुताशं तु वेदवत्यां स रावणः । पुष्पकं तु समारुह्य परिचक्राम मेदिनीम् ॥ १ ॥

रा० टी०–सेति । सा वेदवती प्राप्तीच्छाविषयीभूता जनकराजस्य तनया नित्यपुत्री एषा सीता तव भार्या प्रभूता तत्रैव प्रादुर्भूता स्वं तु सनातनः सनति सर्वं रचयतीति सनं यतो वा इमानि भूतानि जायन्ते इत्यादिश्रुतिप्रतिपादितं प्रकाशत्रह्म तदुपलक्षितब्रह्मादीन् आतनोति तत्तत्कार्यप्रवर्तकत्वेन विस्तारयति स विष्णुरसीति शेषः वेदवती प्राप्तीच्छावतीत्यनेन वेदवत्यपि तत्रैव कुले प्रादुर्भूतेति सूचितम् तेन एतत्सम्मत्यैव मन्थरया सर्वं विपरीतं कारितमिति व्यक्तम् वेदवत्येव भरतेन विवाहितेति बालायोध्ययोर्निरूपितम् ॥ ३४ ॥

३५] ति० टी०–यथा वेदवत्या पूर्वं तदवतारे क्रोधहतो यः शत्रुः सोऽसौ शैलाभः पुनस्तथैव यथाप्रतिज्ञं त्वां पतिं प्राप्य पतिभूतस्य तवामानुषं वीर्यमुपाश्रयित्वोपाश्रित्य निहतः । अनेन सीतैव रावणवधे मुख्यं कारणम्, रामे तु हन्तृत्वमारोपितमिति सूचितम् ॥ ३५ ॥

रा० टी०–पूर्वमिति । यया वेदवत्या शैलाभः शत्रुरसौ रावणः पूर्वं क्रोधहतः क्रोधेन हतो निहतप्रायः तया वेदवत्या उपाश्रयित्वा जानकीमाश्रित्य निहतः अतः तव वीर्यममानुषं प्राकृतमानुषवीर्याद्विलक्षणम् ॥ ३५ ॥

गो० टी०–पूर्वमित्यादि । वेदवत्या यः शत्रुः क्रोधाहितः सोऽसौ शैलाभः शत्रू रावणः पुनस्तथैव यथाप्रतिज्ञं पतिं च प्राप्तया पतिभूतस्य तव मानुषं वीर्यमुपाश्रयित्वा अद्य निहतः ३६

३६] ति० टी०–भाविकल्पेष्वप्येवमेवावतारादिकल्पेन ' कल्पो व्याख्येयः ' इति न्यायादित्याह—एवमिति । एषा महाभागा एवमेव मर्त्येषु भाविषु हलमुखोत्कृष्टे क्षेत्रे पुनःपुनरुत्पत्स्यते । उक्तप्रयोजनायेति शेषः । उत्पत्तिरत्राविर्भावः । एतेन भगवतोऽपि तथावतारः सूचित एव ॥ ३६ ॥

रा० टी०–उपसंहरन्नाह—एवमिति । एषा सीता हलमुखोत्कृष्टे क्षेत्रे पुनः प्रतापसख्यस्य रावणभवनसमये मर्त्येषूत्पत्स्यते ॥ ३६ ॥

गो० टी०–एवमित्यादि । उत्पत्स्येयम् । व्यत्यय आर्षः ॥ ३७–३९ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुराख्याने उत्तर-
श्रीरामायणव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

३७] ति० टी०–सीताविर्भावो वैशाखे शुक्लनवम्यामिति महासुन्दरीतन्त्रे उक्तम्—' वैशाखे शुक्लनवम्यामुत्पन्ना सावनीसुता । सीतामुखात्सा संजाता पालिता जनकेन च ॥ रामपत्नी महाभागा सीता नामेति विश्रुता । तस्मिन्दिने रामभक्ताः श्रद्धाभक्तिसमन्विताः ॥ महोत्सवपराः सर्वे वित्तशाठ्यविवर्जिताः । गीतवादित्रनृत्याद्यैः रामभक्तिपरायणाः ॥ वैशाखसितनवम्यां पुराणपठनं तथा । लक्ष्मीमुक्तं पठेत्तत्र याति रामं सनातनम् ॥ सौभाग्यं धनधान्यं च पुत्रसंततिविस्तृतम् । रामप्रसादाल्लभते मुच्यते सर्वपातकात् ॥' इति । उपसंहरति—एषेति । ' आर्मीत्कृते युगे ' इत्यनन्तरं त्रेतायुगमिति । जनकस्योत्पन्ना । न्यायतः पुत्रीत्वेनोत्पत्त्येत्यर्थः ॥३७॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

रा० टी०–वेदवत्याः उत्पत्तिप्रकारं बोधयन्नाह—एषेति । या एषा वेदवती पूर्वं कृतयुगे आसीत् सा त्रेतायुगमनुप्राप्य रक्षसस्तस्य रावणस्य वधार्थं मन्थराप्रेरणाद्वारकहननार्थम् महात्मनो जनकस्य मैथिलकुले उत्पन्ना ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
उत्तरकांडे सप्तदशः सर्गः ॥ १७ ॥

१] ति० टी०–प्रविष्टायामिति ॥ १ ॥

रा० टी०–वेदवत्याः वह्निप्रवेशानन्तरकालिकं वृत्तमाह–प्रविष्टायामित्यादिभिः । रावणः पुष्पकं समारुह्य मेदिनीं परिचक्राम ॥ १ ॥

गो० टी०–प्रविष्टायामित्यादि । उशीरबीजमिति देशनाम ॥ १–८ ॥

१ आहित इति गो. पा. । २ इदमर्धमधिकं गो. पु. ।

ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः । उशीरबीजमासाद्य ददर्श स तु रावणः ॥ २ ॥
संवर्तो नाम ब्रह्मर्षिः साक्षाद्भ्राता बृहस्पतेः । याजयामास धर्मज्ञः सर्वैर्देवगणैर्वृतः ॥ ३ ॥
दृष्ट्वा देवास्तु तद्रक्षो वरदानेन दुर्जयम् । तिर्यग्योनिं समाविष्टास्तस्य धर्षणभीरवः ॥ ४ ॥
इन्द्रो मयूरः संवृत्तो धर्मराजस्तु वायसः । कृकलासो धनाध्यक्षो हंसश्च वरुणोऽभवत् ॥ ५ ॥
अन्येष्वपि गतेष्वेवं देवेष्वरिनिषूदन । रावणः प्राविशद्यज्ञं सारमेय इवाशुचिः ॥ ६ ॥
तं च राजानमासाद्य रावणो राक्षसाधिपः । प्राह युद्धं प्रयच्छेति निर्जितोऽस्मीति वा वद ॥७॥
ततो मरुत्तो नृपतिः को भवानित्युवाच तम् । अवहासं ततो मुक्त्वा रावणो वाक्यमब्रवीत् ॥८॥
अकुतूहलभावेन प्रीतोऽस्मि तव पार्थिव । धनदस्यानुजं यो मां नावगच्छसि रावणम् ॥ ९ ॥
त्रिषु लोकेषु कोऽन्योऽस्ति यो न जानाति मे बलम् । भ्रातरं येन निर्जित्य विमानमिदमाहृतम् ॥ १० ॥
ततो मरुत्तः स नृपस्तं रावणमथाब्रवीत् । धन्यः खलु भवान्येन ज्येष्ठो भ्राता रणे जितः ॥
न त्वया सदृशः श्लाघ्यस्त्रिषु लोकेषु विद्यते । नाधर्मसहितं श्लाघ्यं तल्लोकं प्रतिसंहितम् ॥
कर्म दौरात्म्यकं कृत्वा श्लाघ्यसे भ्रातृनिर्जयात् ॥ ॥ ११ ॥
कं त्वं प्राक्चरितं धर्मं चरित्वा लब्धवान्वरम् । श्रुतपूर्वं हि न मया भाषसे यादृशं स्वयम् ॥ १२ ॥

२] ति० टी०–उशीरबीजमिति देशनाम ॥ २ ॥

रा० टी०–तत इति । रावणः उशीरबीजं तदभिधं देशमासाद्य प्राप्य देवैस्सह यजन्तं मरुत्तं नृपतिं ददर्श ॥ २ ॥

रा० टी०–सम्वर्त्त इति । सम्वर्त्तो नाम ब्रह्मर्षिः याजयामास ॥ ३ ॥

३–५] ति० टी०–देवगणैर्वृतः । अपरोक्षतया हविर्भागार्थमवस्थितैरिति शेषः ॥ ३–० ॥

रा० टी०–दृष्ट्वेति । तस्य रावणस्य धर्षणेन भीरवो देवाः दुर्जयं रक्षो दृष्ट्वा तिर्यग्योनिसमाविष्टाः ॥ ४ ॥

रा० टी०–समावेशप्रकारमाह–इन्द्र इति । इन्द्रो मयूरः सम्वृतः आविष्टत्वेन बभूव ॥ ५ ॥

६–७] ति० टी०–अन्येष्वपि देवेष्वेवंगतेषु । तिर्यग्योनिस्वरूपं गतेष्वित्यर्थः ॥ ६ ॥ ७ ॥

रा० टी०–अन्येष्विति । अन्येषु अपि देवेषु एवं गतेषु तिर्यग्योनिं प्रविष्टेषु सत्सु सारमेयः श्वा इव अशुचिः रावणः यज्ञं प्राविशत् ॥ ६ ॥

रा० टी०–तमिति । तं मरुत्तराजानमासाद्य युद्धं प्रयच्छ निर्जितोऽस्मीति वद वा इति वचनं रावणः प्राह ॥ ७ ॥

८] ति० टी०–मुक्त्वा कृत्वा ॥ ८ ॥

रा० टी०–तत इति । मरुत्तो नृपतिः को भवान् इति तं रावणमुवाच रावणस्तु अवहासमुक्त्वा कृत्वा अब्रवीत् ॥ ८ ॥

९] ति० टी०–अकुतूहलभावेन मां दृष्ट्वाप्यविस्मयनिर्भयानादरभावेन यो नावगच्छसि तस्य तव प्रीतोऽस्मि ॥ ९ ॥

रा० टी०–तदाकारमाह–अकौतूहलेति । यस्त्वं धनदस्यानुजं रावणं मां नावगच्छसि जानासि तस्य तव अकौतूहलभावेन मां दृष्ट्वापि भयानुत्पत्त्या प्रीतोऽस्मि ॥ ९ ॥

गो० टी०–अकुतूहलेति । अकुतूहलभावेन मां दृष्ट्वाप्यविस्मयनिर्भयानादरभावेनेत्यर्थः । यो नावगच्छसि तस्य तवेत्यन्वयः ॥ ९–१२ ॥

१०] ति० टी०–कोऽन्योऽस्ति न कोऽपि । सर्वेऽपि जानन्तीत्यर्थः ॥ १० ॥

रा० टी०–त्रिष्विति । येन मया भ्रातरं निर्जित्य इदं विमानमाहृतं तस्य मे बलमन्यस्त्रिष्वपि लोकेषु नास्ति यो न जानाति स कोऽस्ति ॥ १० ॥

११] ति० टी०–अथ मरुत्तो व्याजस्तुत्याह—धन्य इति ॥ ११ ॥

रा० टी०–तत इति । मरुत्तो नृपः रावणमब्रवीत् अर्धं पृथक् तदाकारमाह–धन्य इत्यादिभिः । येन त्वया ज्येष्ठो भ्राता जितः तस्य तव सदृशः श्लाघ्यो नास्ति अतो भवान् धन्यः ॥ ११ ॥

१२] ति० टी०–' लोकेषु विद्यते ' इत्युत्तरम् ' नाधर्मसहितं श्लाघ्यं न लोकप्रतिसंहितम् । कर्म दौरात्म्यकं कृत्वा श्लाघसे भ्रातृनिर्जयात् ॥ ' इत्येकः श्लोकः प्रक्षिप्तः । उक्तार्थत्वादिति कतकः । कं त्वमिति । केवलं पूज्यपूजारहितं कं धर्मं प्राक्चरित्वा वरं लब्धवानसि । तथाविधोऽपि कश्चिद्धर्मइति चेन्न श्रुतपूर्वं इत्याह—श्रुतेति । यादृशं भाषसे ज्येष्ठपीडारूपं समाचारम् ॥ १२ ॥ १३ ॥

रा० टी०–कमिति । कं धर्मं चरित्वा वरं लब्धवान् मया तु यादृशं स्वकर्म स्वं स्वयं भाषसे तादृशं न श्रुतपूर्वम् ॥

रा० टी०–तिष्ठेति । त्वां यमक्षयमद्य प्रेषयामि अतो जीवन्न प्रतियास्यसि ॥ १३ ॥

गो० टी०–कं त्वमिति । प्राक् पूर्वम् । त्वं केवलं धर्म-

१ दर्शनेति गो. प्राछ । २ राजेति गो. पाठः । ३ समासाद्येति गो. पाठः । ४ इदं पद्यमधिकं गो. पुस्तके । ५ भाषस इति गो. रा. पाठः ।

तिष्ठेदानीं न मे जीवन्प्रतियास्यसि दुर्मते । अद्य त्वां निशितैर्बाणैः प्रेषयामि यमक्षयम् ॥१३॥
ततः शरासनं गृह्य सायकांश्च नराधिपः । रणाय निर्ययौ क्रुद्धः संवर्तो मार्गमावृणोत् ॥१४॥
सोऽब्रवीत्स्नेहसंयुक्तं मरुत्तं तं महानृपिः । श्रोतव्यं यदि मद्वाक्यं संप्रहारो न ते क्षमः ॥१५॥
माहेश्वरमिदं सत्रमसमाप्तं कुलं दहेत् । दीक्षितस्य कुतो युद्धं क्रोधित्वं दीक्षिते कुतः ॥१६॥
संशयश्च जये नित्यं राक्षसश्च सुदुर्जयः । स निवृत्तो गुरोर्वाक्यान्मरुत्तः पृथिवीपतिः ॥
विसृज्य सशरं चापं स्वस्थो मखमुखोऽभवत् ॥ ॥ १७ ॥
ततस्तं निर्जितं मत्वा घोषयामास वै शुकः । रावणो जयतीत्युच्चैर्हर्षान्नादं विमुक्तवान् ॥ १८ ॥
तान्भक्षयित्वा तत्रस्थान्महर्षीन्यज्ञमागतान् । वितृप्तो रुधिरैस्तेषां पुनः संप्रययौ महीम् ॥ १९ ॥
रावणे तु गते देवाः सेन्द्राश्चैव दिवौकसः । ततः स्वां योनिमासाद्य तानि सत्त्वानि चाब्रुवन् ॥ २० ॥
हर्षात्तदाब्रवीदिन्द्रो मयूरं नीलबर्हिणम् । प्रीतोऽस्मि तव धर्मज्ञ भुजंगाद्धि न ते भयम् ॥ २१ ॥
इदं नेत्रसहस्रं तु यत्तद्बर्हे भविष्यति । वर्षमाणे मयि मुदं प्राप्स्यसे प्रीतिलक्षणम् ॥
एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः ॥ ॥ २२ ॥
नीलाः किल पुरा बर्हा मयूराणां नराधिप । सुराधिपाद्वरं प्राप्य गताः सर्वेऽपि बर्हिणः ॥ २३ ॥

दोषहीनं धर्मं चरित्वा किमपि वरं लब्धवानिति श्रुतपूर्वम् । इदानीं यादृशं भ्रातृविजयरूपमधर्मं भाषसे तत्र श्रुतपूर्वमित्यर्थः ॥ १३--१४ ॥

१४] ति० टी०–मार्गमावृणोत् । रणायागतस्य रावणस्येति भावः ॥ १४ ॥

रा० टी०–तत इति । नराधिपो मरुत्तः सायकान् गृह्य गृहीत्वा रणाय निर्ययौ सम्वर्त्तऋषिस्तु मार्गं मरुत्तपथमावृणोत् ॥ १४ ॥

गो० टी०–तत इति । मार्गमावृणोत् । निर्यातमस्येति शेषः ॥ १५ ॥

१५] ति० टी०–महानृपिः संवर्तः ॥ १५ ॥

रा० टी०–स इति । ऋषिः मरुत्तमब्रवीत् तदाकारमाह यदि मद्वाक्यं श्रोतव्यं तर्हि ते संप्रहारो न क्षमः युक्तः ॥ १५ ॥

गो० टी०–स इति । महानृपिः । तत्पुरोहित इत्यर्थः ॥ १६--२१ ॥

१६] ति० टी०–माहेश्वरं तदैवत्यम् । सत्रं यागः॥१६॥

रा० टी०–अयुक्तत्वे हेतुमाह--माहेश्वरमिति । असमाप्तं माहेश्वरं सत्रं दीक्षितस्य कुलं दहेत् अतो दीक्षितस्य युद्धं कुतः क्रोधित्वं च कुतः न सम्भवतीत्यर्थः ॥ १६ ॥

१७-१८] ति०टी०–मखमुखो मखसमाप्त्युन्मुखः१७-१८

रा० टी०–संशय इति । जये नित्यं संशयः राक्षसश्च दुर्जयः अतो युद्धं न कर्त्तव्यमिति तात्पर्यम् अहं पृथक् स इति गुरोर्वाक्यात् निवृत्तो मरुत्तः चापं विसृज्य स्वस्थस्सन् मखमुखः अभवत् ॥ १७ ॥

रा० टी०–तत इति । शुकः रावणामात्यः रावणो जयतीति नादं विमुक्तवान् ॥ १८ ॥

१९] ति० टी०–वितृप्तो विशेषेण तृप्तः ॥ १९ ॥

रा० टी०–तानिति । यज्ञमागतान् महर्षीन् भक्षयित्वा तेषां रुधिरैर्वितृप्तो रावणः पुनः सम्प्रययौ ॥ १९ ॥

२०-२१] ति० टी०–स्वां योनिं स्वस्वप्रकृतिमासाद्य तानि सत्त्वानि प्राक्कार्यवशगृहीतमूर्तिजातीयप्राणिनः ॥२१॥

रा० टी०–रावण इति । रावणे गते सति देवाः स्वां योनिमासाद्य तानि स्वस्वप्रवेशाधिकरणीभूतानि सत्त्वानि अब्रुवन् ॥ २० ॥

रा० टी०–तदाकारमाह--हर्षादित्यादिभिः । इन्द्रो मयूरमब्रवीत् तदाकारमाह अहं तव प्रीतोऽस्मि अतो भुजङ्गात् ते भयं न ॥ २१ ॥

गो० टी०–रावण इति । स्वां योनिं स्वस्वप्रकृतिमासाद्य । तानि सत्त्वानि । प्राक्कार्यवशगृहीतमूर्तिसजातीयप्राणिन इत्यर्थः ॥ २२--२३ ॥

२२] ति० टी०–प्रीतिलक्षणं मत्प्रीतिचिह्नम् ॥ २२ ॥

रा० टी०–इदमिति । इदं मदीयं यत्तेत्रसहस्रं तत्ते बर्हे भविष्यति मयि वर्षमाणे तु मुदं प्राप्स्यसे ॥ २२ ॥

रा० टी०–एवमिति । एवमिन्द्रो वरं प्रादात् अथ पृथक् मयूराणां पूर्वरूपमाह नीला इति मयूराणां बर्हाः पुरा नीला एव नेत्ररहिता इत्यर्थः सुराधिपात् वरं प्राप्य तु सर्वे मयूराः बर्हिणः प्रशस्तबर्हविशिष्टाः नेत्रयुक्तपक्षवन्तो बभूवुरित्यर्थः २३॥

गो०टी०–इदमिति । प्रीतिलक्षणां मत्प्रीतिचिह्नभूताम् २४

२३] ति० टी०–नीलाः किलेति । नेत्ररहिताः केवलं नीला इत्यर्थः ॥ २३ ॥

गो० टी०–नीला इति । नीलाः किलेति । नेत्ररहिता इत्यर्थः ॥ २५ ॥

१ लक्षणामिति गो० पाठः ।

धर्मराजोऽब्रवीद्राम प्राग्वंशे वायसं प्रति । पक्षिंस्तवास्मि सुप्रीतः प्रीतस्य वचनं शृणु ॥ २४ ॥
यथान्ये विविधै रोगैः पीड्यन्ते प्राणिनो मया । ते न ते प्रभविष्यन्ति मयि प्रीते न संशयः ॥ २५ ॥
मृत्युतस्ते भयं नास्ति वरान्मम विहंगम । यावत्त्वां न वधिष्यन्ति नरास्तावद्भविष्यसि ॥ २६ ॥
ये च मद्विषयस्था वै मानवाः क्षुधयार्दिताः । त्वयि भुक्ते सुतृप्तास्ते भविष्यन्ति सबान्धवाः ॥ २७ ॥
वरुणस्त्वब्रवीद्धंसं गङ्गातोयविचारिणम् । श्रूयतां प्रीतिसंयुक्तं ततैः पत्ररथेश्वरम् ॥ २८ ॥
वर्णो मनोरमः सौम्यश्चन्द्रमण्डलसंनिभः । भविष्यति तवोदग्रः शुद्धफेनसमप्रभः ॥ २९ ॥
मच्छरीरं समासाद्य कान्तो नित्यं भविष्यसि । प्राप्स्यसे चातुलां प्रीतिमेतन्मे प्रीतिलक्षणम् ॥ ३० ॥
हंसानां हि पुरा राम नैं वर्णः सर्वपाण्डुरः । पक्षा नीलाग्रसंवीताः क्रोडाः शष्पाग्रनिर्मलाः ॥ ३१ ॥
अथाब्रवीद्वैश्रवणः कृकलासं गिरौ स्थितम् । हैरण्यं संप्रयच्छामि वर्णं प्रीतस्तवाप्यहम् ॥ ३२ ॥
सद्रव्यं च शिरो नित्यं भविष्यति तवाक्षयम् । एष काञ्चनको वर्णो मत्प्रीत्या ते भविष्यति ॥ ३३ ॥

२४] ति० टी०–प्राग्वंशे प्राग्वंशविगेहे ॥ २४ ॥

रा० टी०–धर्मराज इति । प्राग्वंशे प्राक्तनविगृहे संस्थितं वायसं धर्मराजोऽब्रवीत् तदाकारमाह अहं सुप्रीतोस्मि अतः प्रीतस्य मे वचनं शृणु ॥ २५ ॥

गो० टी०–धर्मराज इति । प्राग्वंशे यज्ञशालादारुणि२६

२५] ति० टी०–ते रोगास्ते तव मयि प्रीते सति न प्रभविष्यन्ति ॥ २५ ॥

रा० टी०–तदाकारमाह--यथेत्यादिभिः । यैर्विविधैः रोगैः अन्ये प्राणिनः पीड्यन्ते ते रोगाः ते न प्रभविष्यन्ति अत एव मृत्युतः अकारणकमृत्योः ते भयं नास्ति अतो नराः यावत्त्वां न वधिष्यन्ति तावत्त्वं भविष्यसि स्थास्यसि न मरिष्यसीत्यर्थः श्लोकद्वयमेकान्वयि ॥ २६-२७ ॥

गो० टी०–यथेति । ते तव । ते रोगाः । न प्रभविष्यन्ति । प्रीते इति च्छेदः ॥ २७ ॥

२६] ति० टी०–मृत्योरशक्यपरिहारत्वादाह—यावदिति ॥ २६ ॥

गो० टी०–मृत्युत इति । "जातस्य हि ध्रुवो मृत्युः" इत्यशक्यपरिहारत्वादाह–यावत्त्वामित्यादि ॥ २८ ॥

२७–२९] ति०टी०–मद्विषयस्था यमलोकस्थाः २७-२९

रा० टी०–ये इति । क्षुधयार्दिताः मद्विषयस्थाः संयमन्यां प्राप्ताः ये मानवाः ते त्वयि भुक्ते तत्पुत्रादिना भोजिते सति सुतृप्ताः भविष्यन्ति ॥ २८ ॥

रा० टी०–वरुण इति । वरुणो हंसमब्रवीत् तदाकारमाह हे पत्ररथेश्वर प्रीतिसंयुक्तं वचः श्रूयताम् ॥ २९ ॥

रा० टी०–तदाकारमाह--वर्ण इति । तव वर्णः चन्द्रमण्डलसन्निभः शुद्धफेनसमप्रभश्च भविष्यति ॥ ३० ॥

गो० टी०–एत इति । मद्विषयस्था यमलोकस्थाः२९-३१

३०] ति० टी०–मच्छरीरं जलम् । जलमूर्तित्वात्तस्य ॥ ३० ॥

रा० टी०–मच्छरीरमिति । मच्छरीरं जलं नित्यं समासाद्य कान्तो भविष्यसि अतुलां प्रीतिं प्राप्स्यसि एतद्वचनं मे प्रीतिलक्षणम् ॥ ३१ ॥

गो० टी०–मच्छरीरमिति । मच्छरीरं जलमूर्तिम्॥३२॥

३१-३२] ति० टी०–नीलेन नीलवर्णेनाग्रेऽग्रदेशे संवीताः प्राप्ताः । शष्पं बालतृणं तदग्रवन्निर्मलाः । कोमलश्यामवर्णा इत्यर्थः । क्रोडं भुजान्तरम् ॥ ३१ ॥ ३२ ॥

रा० टी०–हंसानामिति । पुरा हंसानां वर्णः सर्वपाण्डुरो न किन्तु पक्षाः नीलेन नीलवर्णेन अग्रे अग्रभागे संवीताः युक्ताः क्रोडाः भुजांतराणि तु शष्पाग्रवत् बालतृणाग्रभागवत् निर्मलाः ॥ ३२ ॥

रा० टी०–अथेति । वैश्रवणः कृकलासमब्रवीत् तदाकारमाह तव प्रीतोहं हैरण्यं वर्णं संप्रयच्छामि अतः तव शिरः नित्यं सद्रव्यं सुवर्णवर्णं भविष्यति एष एतत्प्रकारकः काञ्चनको वर्णस्ते भविष्यति श्लोकद्वयमेकान्वयि ॥ ३३-३४ ॥

गो० टी०–हंसानामिति । क्रोडः भुजान्तरम् । शष्पाग्रनिर्मलाः बालतृणाग्रवन्निर्मलाः । कोमलश्यामवर्णा इत्यर्थः ॥ ३३--३४ ॥

३३] ति० टी०–शिरो नित्यं सद्रव्यम् । स्वर्णवर्णमित्यर्थः। तदेवाह–एष काञ्चनक इति । पूर्वं हि कृकलासा अञ्जनवर्णा इत्याहुः ॥ ३३ ॥

गो० टी०–सद्रव्यमिति । एतदेवाह—एष काञ्चनक इति ॥ ३९ ॥

गो० टी०–स्वभवनमिति । मरुत्तेन सह स्वर्गमित्यर्थः३६

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्यानेऽष्टादशः सर्गः ॥ १८ ॥

१ त्विति गो. पाठः । २ हारिणमिति गो. पाठः । ३ वच इति गो. पाठः । ४ ईश्वरेति गो. रा. पा. । ५ नीलवर्णः सपाण्डुर इति गो. पाठः ।

एवं दत्त्वा वरांस्तेभ्यस्तस्मिन्यज्ञोत्सवे सुराः । निवृत्ते सह राज्ञा ते पुनः स्वभवनं गताः ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ।

एवं जगज्जिगीषू रावणोऽनरण्येनेक्ष्वाकुवंशराजेन संगतोऽन्ते सुदारुणं युध्यमानेनापि पराभूतेन त्रिविष्टपमारुरुक्षुणा तेनारेऽध्यमाचिरादेव मत्कुलावतारिणा रामेण पराजेष्यसे इति शप्तः ।

अथ जित्वा मरुत्तं स प्रययौ राक्षसाधिपः नगराणि नरेन्द्राणां युद्धकाङ्क्षी दशाननः ॥ १ ॥
समासाद्य तु राजेन्द्रान्महेन्द्रवरुणोपमान् अब्रवीद्राक्षसेन्द्रस्तु युद्धं मे दीयतामिति ॥ २ ॥
निर्जिताः स्मेति वा ब्रूत एष मे हि सुनिश्चयः अन्यथा कुर्वतामेवं मोक्षो नैवोपपद्यते ॥ ३ ॥
ततस्त्वभीरवः प्राज्ञाः पार्थिवा धर्मनिश्चयाः मन्त्रयित्वा ततोऽन्योन्यं राजानः सुमहाबलाः॥ ४ ॥
निर्जिताः स्मेत्यभाषन्त ज्ञात्वा वरबलं रिपोः दुष्यन्तः सुरथो गाधिर्गयो राजा पुरूरवः ॥ ५ ॥
एते सर्वेऽब्रुवंस्तात निर्जिताः स्मेति पार्थिवाः अथायोध्यां समासाद्य रावणो राक्षसाधिपः॥ ६ ॥
सुगुप्तामनरण्येन शक्रेणेवामरावतीम् स तं पुरुषशार्दूलं पुरंदरसमं बले ॥ ७ ॥
प्राह राजानमासाद्य युद्धं देहीति रावणः निर्जितोऽस्मीति वा ब्रूहि त्वमेवं मम शासनम्॥ ८ ॥
अयोध्याधिपतिस्तस्य श्रुत्वा पापात्मनो वचः अनरण्यस्तु संक्रुद्धो राक्षसेन्द्रमथाब्रवीत् ॥ ९ ॥
दीयते द्वन्द्वयुद्धं ते राक्षसाधिपते मया संतिष्ठ क्षिप्रमायत्तो भव चैवं भवाम्यहम् ॥ १० ॥

३४] ति० टी०–राज्ञा सह स्वभवनं गताः । मरुत्तेन सह स्वर्गमित्यर्थः ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

रा० टी०–एवमिति । यज्ञोत्सवे निवृत्ते सति राज्ञा सह सुराः स्वभवनं गताः ॥ ३५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डेऽष्टादशः सर्गः ॥ १८ ॥

१–२] ति० टि०–अथेति ॥ १ ॥ २ ॥

३] ति० टी०–एवमकुर्वतां युद्धं निर्जिताः स्मेतिवचनं वा कुर्वताम् । अन्यथा प्रकारान्तरेण मोक्षो मदुपरोधान्नास्तीत्यर्थः॥ ३ ॥

रा० टी०–रावणकर्तृकमरुत्तविजयानन्तरकालिकं वृत्तमाह–अथेत्यादिभिः । राक्षसाधिपः मरुत्तं जित्वा नरेन्द्राणां नगराणि ययौ ॥ १ ॥

रा० टी०–समासाद्येति । राक्षसेन्द्रः राजेन्द्रान् समासाद्य युद्धं मे दीयतां निर्जिताः स्मेति ब्रूत वा अन्यथा कुर्वतां युष्माकं मोक्षः मत्कर्तृकत्यागः नैवोपपद्यते एष एव मे सुनिश्चयः इत्यब्रवीत् श्लोकद्वयमेकान्वयि ॥ २-३ ॥

४] ति० टी०–अभीरवः सन्तोऽपि राजानः पार्थिवाः पृथ्वीपतयो निर्जिताः स्मेत्यभाषन्त ॥ ४ ॥

रा० टी०–तत इति । अभीरवोपि प्राज्ञाः पार्थिवाः रिपोः रावणस्य वरबलं ज्ञात्वा अन्योन्यं मंत्रयित्वा निर्जिताः स्मेत्यभाषन्त सार्द्धश्लोक एकान्वयी ॥ ४ ॥

५–९] ति० टी०–तानाह—दुष्यन्त इति । भिन्नभिन्नकालवर्तिनो दुष्यन्तादयः स्वस्वकाले रावणं प्रति जितत्ववादं वरदानादुक्तवन्तः ॥ ५–९ ॥

रा० टी०–दुष्यन्त इति । दुष्यन्तादयोऽपि निर्जिताः स्मेत्यब्रुवन् ॥ ६ ॥

रा० टी०–अथेति । रावणः अनरण्येन गुप्तामयोध्यां समासाद्य अतिष्ठत् इति शेषः ॥ ६ ॥

रा० टी०–स इति । रावणः तमनरण्यं समासाद्य युद्धं देहि निर्जितोस्मीति ब्रूहि वा एवं मम शासनमाज्ञास्तीति शेषः इति प्राह सार्द्धश्लोक एकान्वयी ॥ ७-८ ॥

रा० टी०–अयोध्येति । अनरण्यः राक्षसेन्द्रमब्रवीत्॥९॥

१०] ति० टी०–अहं चैवं भवामि । आयत्तो भवामीत्यर्थः ॥ १० ॥

रा० टी०–तदाकारमाह–दीयत इति । मया द्वन्द्वयुद्धं दीयते अतस्त्वमायत्तो भव अहमायत्तो भवामि ॥ १० ॥

१ निवृत्ता इति गो. पाठः ।

अथ पूर्वं श्रुतार्थेन निर्जितं सुमहद्बलम् । निष्क्रामत्तन्नरेन्द्रस्य बलं रक्षोवधोद्यतम् ॥ ११ ॥
नागानां दशसाहस्रं वाजिनां नियुतं तथा । रथानां बहुसाहस्रं पत्तीनां च नरोत्तम ॥ १२ ॥
महीं संछाद्य निष्क्रान्तं सपदातिरथं रणे । ततः प्रवृत्तं सुमहद्युद्धं युद्धविशारद ॥ १३ ॥
अनरण्यस्य नृपते राक्षसेन्द्रस्य चाद्भुतम् । तद्रावणबलं प्राप्य बलं तस्य महीपतेः ॥ १४ ॥
प्राणश्यत तदा सर्वं हव्यं हुतमिवानले । युद्ध्वा च सुचिरं कालं कृत्वा विक्रममुत्तमम्॥ १५ ॥
प्रज्वलन्तं तमासाद्य क्षिप्रमेवावशेषितम् । प्राविशत्संकुलं तत्र शलभा इव पावकम् ॥ १६ ॥
[नैश्यति स्म बलं तत्र हव्यं हुतमिवानले] ।
सोऽपश्यत्तन्नरेन्द्रस्तु नश्यमानं महाबलम् । महार्णवं समासाद्य वनापगशतं यथा ॥ १७ ॥
ततः शक्रधनुःप्रख्यं धनुर्विस्फारयन्स्वयम् । आससाद नरेन्द्रस्तं रावणं क्रोधमूर्च्छितः ॥ १८ ॥
अनरण्येन तेऽमात्या मारीचशुकसारणाः । प्रहस्तसहिता भग्ना व्यद्रवन्त मृगा इव ॥ १९ ॥
ततो बाणशतान्यष्टौ पातयामास मूर्धनि । तस्य राक्षसराजस्य इक्ष्वाकुकुलनन्दनः ॥ २० ॥
तस्य बाणाः पतन्तस्ते चक्रिरे न क्षतं क्वचित् । वारिधारा इवाभ्रेभ्यः पतन्त्यो गिरिमूर्धनि ॥ २१ ॥
ततो राक्षसराजेन क्रुद्धेन नृपतिस्तदा । तलेनाभिहतो मूर्ध्नि स रथान्निपपात ह ॥ २२ ॥
स राजा पतितो भूमौ विह्वलैः प्रविवेपितः । वज्रदग्ध इवारण्ये सालो निपतितो यथा ॥ २३ ॥

गो० टी०–दीयत इति । संतिष्ठ । एवमहं भवामीति । आपत्तौ भवामीत्यर्थः ॥ १० ॥

११–१३] ति० टी०–पूर्वं श्रुतार्थेन श्रुतरावणवृत्तान्तेन निर्जितम् । भावे क्तः । निर्जयं प्रति यत्सुमहद्बलं नियुक्तं तन्नरेन्द्रस्य बलं रक्षोवधोद्यतं निष्क्रामन्निरक्रामत्॥१३॥

रा० टी०–अथेति । पूर्वं श्रुतोऽर्थो रावणवृत्तं येन तेन अनरण्येन नियुक्तं यत्सुमहद्बलं तत् नरेन्द्रस्य बलं रक्षोवधोद्यतं सत् निष्क्रामत् निरक्रामत् ॥ ११ ॥

रा० टी०–सेनासंख्यां कुर्वन्नाह–नागानामिति । सपदातिभिः रथैश्च सहितं बलं महीं संछाद्य निष्क्रान्तं सार्धश्लोक एकान्वयी ॥ १२ ॥

रा० टी०–तत इति । अनरण्यस्य राक्षसेन्द्रस्य च सुमहद्युद्धं प्रवृत्तम् ॥ १३ ॥

गो० टी०–अथेति । पूर्वं रावणगमनात्पूर्वं श्रुतार्थेन श्रुतरावणवृत्तान्तेन । तन्नरेन्द्रस्य बलम् । निष्क्रामत् निरक्रामत्११-१५

१४–१५] ति० टी०–तस्य महीपतेर्बलं रावणबलं प्राप्य सुचिरं कालं युद्धोत्तममधिकं विक्रमं च कृत्वा तदा सर्वं प्राणश्यत ॥ १४ ॥ १५ ॥

रा० टी०–तदिति । महीपतेर्बलं रावणबलं प्राप्य अनिले हुतं हव्यमिव प्राणश्यत ॥ १४ ॥

रा० टी०–युध्वेति । अवशेषितं बलं सुचिरं कालं युध्वा प्रज्वलन्तं पावकं शलभा इव संकुलं रिपुसैन्यं प्राविशत् सार्धश्लोक एकान्वयी ॥ १५ ॥

१६] ति० टी०–प्रज्वलन्तं रावणमासाद्य क्षिप्रमेवावशेषितमल्पावशिष्टं सत्तत्र रणे पावकं प्राप्य शलभा इव संकुलं नाशं प्राविशत्प्राप्तमभूत् ॥ १६ ॥

गो० टी०–प्रज्वलन्तमिति । समासाद्येति । तं रावणमासाद्य क्षिप्रमेवावशेषितम् अल्पावशिष्टमभवदित्यर्थः । तत्र रणे शलभाः पावकमिव संकुलं समूहनाशनम् प्राविशत् प्रापत्१६-२१

१७–२२] ति० टी०–वनापगशतं वनं जलं तत्पूर्णनदीशतम् । आपो ह्रस्वः ॥ १७–२२ ॥

रा० टी०–स इति । नरेन्द्रो महार्णवं समासाद्य वनेन जलेन युक्तमापगाशतं बहुनदीमिव किञ्च आपगशतस्य वनानि जलानि वनापगशतमिव नश्यमानं महाबलमपश्यत् ॥ १६ ॥

रा० टी०–तत इति । नरेन्द्रो धनुर्विस्फारयन्सन् रावणं स्वयमाससाद ॥ १७ ॥

रा० टी०–अनरण्येनेति । अनरण्येन भग्नाः मारीचादयो मृगा इव व्यद्रवन्त ॥ १८ ॥

रा० टी०–तत इति । इक्ष्वाकुकुलनन्दनः अष्टौ बाणशतानि राक्षसराजस्य रावणस्य मूर्धनि पातयामास ॥ १९ ॥

रा० टी०–तस्येति । गिरिमूर्धनि अभ्रेभ्यः पतन्त्यो वारिधारा इव पतन्तस्तस्य बाणाः क्वचित् क्षतं न चक्रिरे २०

रा० टी०–तत इति । राक्षसराजेन मूर्ध्नि अभिहतो नृपतिः रथान्निपपात ॥ २१ ॥

२३] ति० टी०–वज्रदग्धोऽशनिहतः ॥ २३ ॥

रा० टी०–स इति । वज्रदग्धो निपतितस्साल इव विह्वलो राजा प्रविवेपितस्सन् भूमौ पतितो दृश्यत इति शेषः ॥२२॥

---

१ इदमर्धमधिक गो. पाठे । २ विह्वलाङ्गः प्रवेपित इति गो. पाठः ।

तं प्रहस्याब्रवीद्रक्ष इक्ष्वाकुं पृथिवीपतिम् । किमिदानीं फलं प्राप्तं त्वया मां प्रति युद्ध्यता ॥ २४ ॥
त्रैलोक्ये नास्ति यो द्वन्द्वं मम दद्यान्नराधिप । शङ्के प्रसक्तो भोगेषु न शृणोपि बलं मम ॥ २५ ॥
तस्यैवं ब्रुवतो राजा मन्दासुर्वाक्यमब्रवीत् । किं शक्यमिह कर्तुं वै कालो हि दुरतिक्रमः ॥ २६ ॥
नाहं निर्जितो रक्षस्त्वया चात्मप्रशंसिना । कालेनैव विपन्नोऽहं हेतुभूतस्तु मे भवान् ॥ २७ ॥
किं त्विदानीं मया शक्यं कर्तुं प्राणपरिक्षये । नाहं विमुखो रक्षो युध्यमानस्त्वया हतः ॥ २८ ॥
इक्ष्वाकुपरिभावित्वाद्वचो वक्ष्यामि राक्षस । यदि दत्तं यदि हुतं यदि मे सुकृतं तपः ॥
यदि गुप्ताः प्रजाः सम्यक्तदा सत्यं वचोऽस्तु मे ॥ ॥ २९ ॥
उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम् । रामो दाशरथिर्नाम यस्ते प्राणान्हरिष्यति ॥ ३० ॥
ततो जलधरोदग्रस्ताडितो देवदुन्दुभिः । तस्मिन्नुदाहृते शापे पुष्पवृष्टिश्च खाच्च्युता ॥ ३१ ॥
ततः स राजा राजेन्द्र गतः स्थानं त्रिविष्टपम् । स्वर्गते च नृपे तस्मिन्राक्षसः सोऽपसर्पत ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः

मर्त्यलोकाभिगीपुं रावणं त्वत्पुरो मशकायमानेन जराव्याधिशताकुलेन च क्षुद्रमर्त्यलोकेन किमतः प्रेतराजं निगृह्णीष्वेत्युपदिश्य नारदः प्राहिणोत् स्वयं तद्द्रष्टुकामः समुपाद्रवद्यमपुरम् ।

ततो वित्रासयन्मर्त्यान्पृथिव्यां राक्षसाधिपः । आससाद घने तस्मिन्नारदं मुनिपुंगवम् ॥ १ ॥

२४-२६] ति० टी०-इक्ष्वाकुं तद्वंश्यमनरण्यम् । किं फलं प्राप्तम् । निर्जितोऽस्मीति वचनमनुक्त्वेति शेषः २४-२६

रा० टी०-तमिति । रक्षः पृथिवीपतिं प्रहस्याब्रवीत् तदाकारमाह मां प्रति युध्यता त्वया किं फलं प्राप्तम् ॥ २३ ॥

रा० टी०-त्रैलोक्य इति । यो द्वन्द्वं युद्धं दद्यात् स त्रैलोक्ये नास्ति इत्यहं शङ्के मन्ये त्वं तु भोगेषु प्रसक्तस्सन् मम बलं न शृणोपि अशृण्वोः ॥ २४ ॥

रा० टी०-तस्येति । मंदासुः राजा वाक्यमब्रवीत् तदाकारमाह यतः कालो दुरतिक्रमः अतो मया किं कर्तुं शक्यम् ॥२५॥

गो० टी०-तमिति । इक्ष्वाकुमिक्ष्वाकुवंश्यम् । किं फलं प्राप्तम् । निर्जितोऽस्मीति वचनमनुक्त्वेति शेषः ॥२४-२६॥

२७-२८] ति० टी०-अहं त्वया न निर्जितः, किं तु प्राप्तेन कालेनैव विपन्न इत्यर्थः ॥ २७ ॥ २८ ॥

रा० टी०-नेति । त्वयाहं न निर्जितः किन्तु कालेनैव अहं विपन्नः पञ्चत्वं प्राप्तः भवांस्तु हेतुभूत एव एतेन स्वमृत्युकालं ज्ञात्वैवाहं युद्धे प्रवृत्तोऽस्मीति सूचितम् ॥ २६ ॥

रा० टी०-किमिति । प्राणपरिक्षये प्राणापगमसमये मया किं कर्तुं शक्यं युद्धमेव कर्तुं योग्यमित्यर्थः अत एव अहं न विमुखः युद्धात् पराङ्मुखः किन्तु युध्यमानस्त्वयैव हतः २७

गो० टी०-न ह्यहमिति । त्वया न जित इति । अपि तु प्राप्तेनैव कालेन विपन्न इत्यर्थः ॥ २७ ॥ २८ ॥

२९-३०] ति० टी०-इक्ष्वाकुपरिभावित्वात् । त्वदुक्तावमाननवाक्यस्येक्ष्वाकुकुलपरिभवरूपत्वादित्यर्थः । वचः शापरूपम् ॥ २९ ॥ ३० ॥

रा० टी०-इक्ष्वाकिति । इक्ष्वाकोरेव परिभवति तच्छीलः तत्वात् तवेति शेषः इदं वचो वक्ष्यामि अहं पृथक् ॥२८॥

रा० टी०-यदीति । मम वचस्तत्यमस्तु ॥ २९ ॥

रा० टी०-तद्वचनाकारमाह-उत्पत्स्यते इति । यस्ते प्राणान् हरिष्यति स रामः इक्ष्वाकूणां कुले एव उत्पत्स्यते ३०

गो० टी०-इक्ष्वाकिति । इक्ष्वाकुपरिभावित्वात् तत्कुलपरिभावित्वादित्यर्थः ॥ २९-३१ ॥

३१] ति० टी०-पुष्पवृष्टिरित्रापि प्राग्वत् ॥ ३१ ॥

रा० टी०-तत इति । शापे रावणविघातबोधकवचने उदाहृते राज्ञा कथिते जलधरोदग्रः अधिकशब्दवान् देवदुन्दुभिः ताडितोऽभवदिति शेषः ॥ ३१ ॥

३२] ति० टी०-अपसर्पतापासर्पत् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनविंशः सर्गः ॥ १९ ॥

रा० टी०-तत इति । राजा अनरण्यः त्रिविष्टपं स्वर्गं स्थानं गतः तस्मिन् स्वर्गते सति राक्षसो रावणोऽपसर्पत अगच्छत् ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

गो० टी०-तत इति । अपसर्पत अपासर्पत् । अपगतवानित्यर्थः ॥ ३२ ॥

इति श्री० मणि०उत्तरश्री० एकोनविंशः सर्गः ॥ १९ ॥

१] ति० टी०-आससाद घने तस्मिन्निति । तस्मिन्काले घने घनपृष्ठे स्थितं मुनिश्रेष्ठं नारदमाससाद ॥ १ ॥

तस्याभिवादनं कृत्वा दशग्रीवो निशाचरः । अब्रवीत्कुशलं पृष्ट्वा हेतुमागमनस्य च ॥ २ ॥
नारदस्तु महातेजा देवर्षिरमितप्रभः । अब्रवीन्मेघपृष्ठस्थो रावणं पुष्पके स्थितम् ॥ ३ ॥
राक्षसाधिपते सौम्य तिष्ठ विश्रवसः सुत । प्रीतोऽस्म्यभिजनोपेत विक्रमैरूर्जितैस्तव ॥ ४ ॥
विष्णुना दैत्यघातैश्च गन्धर्वोरगधर्षणैः । त्वया समं विमर्दैश्च भृशं हि परितोषितः ॥ ५ ॥
किंचिद्वक्ष्यामि तावत्तु श्रोतव्यं श्रोष्यसे यदि । [श्रुत्वा चानन्तरं कार्यं त्वया राक्षससत्तम ।]
तन्मे निगदतस्तात समाधिं श्रवणे कुरु ॥ ॥ ६ ॥
किमयं वध्यते तात त्वयावध्येन दैवतैः । हत एव ह्ययं लोको यदा मृत्युवशं गतः ॥ ७ ॥
देवदानवदैत्यानां यक्षगन्धर्वरक्षसाम् । अवध्येन त्वया लोकः क्लेष्टुं योग्यो[3] न मानुषः॥ ८ ॥
नित्यं श्रेयसि संमूढं महद्भिर्व्यसनैर्वृतम् । हन्यात्कस्तादृशं लोकं जराव्याधिशतैर्युतम्॥ ९ ॥
तैस्तैरनिष्टोपगमैरजस्रं यत्र कुत्र कः । मतिमान्मानुषे लोके युद्धेन प्रणयी भवेत् ॥ १० ॥
क्षीयमाणं दैवहतं क्षुत्पिपासाजरादिभिः । विषादशोकसंमूढं लोकं त्वं क्षपयस्व मा ॥ ११ ॥

रा० टी०–अयोध्यातो निर्गमनानन्तरकालिकं रावणवृत्तमाह–तत इत्यादिभिः । राक्षसाधिपः मर्त्यान् वित्रासयन्सन् घने मेघसमीपे स्थितं नारदमाससाद ॥ १ ॥

गो० टी०–ततो वित्रासयन्नित्यादि—आससाद । घने तस्मिन्निति । तस्मिन्काले घनं घनपृष्ठे स्थितं नारदमित्यर्थः ॥ १ ॥

२–३] ति० टी०–कुशलं पृष्ट्वागमनस्य हेतुमब्रवीत् । पप्रच्छेत्यर्थः ॥ २ ॥ ३ ॥

रा० टी०–तस्येति । निशाचरः कुशलं पृष्ट्वा आगमनस्य हेतुमब्रवीत् अपृच्छदित्यर्थः ॥ २ ॥

रा० टी०–नारद इति । नारदो रावणमब्रवीत् ॥ ३ ॥

गो० टी०–तस्येति—हेतुमागमनस्य चेत्यत्रापि पृष्ट्वेत्यन्वयः ॥ २-३ ॥

४] ति० टी०–तिष्ठ । मद्वचः श्रोतुमिति शेषः ॥ ४ ॥

रा० टी०–तदाकारमाह—राक्षसाधिपत इति । हे अभिजनोपेत दुर्जितैः प्रवृद्धैः तव विक्रमैः अहं प्रीतोऽस्मि त्वं तिष्ठ ॥ ४ ॥

गो० टी०–राक्षसाधिपत इति । तिष्ठेति । मद्वचनं श्रोतुमिति शेषः । विष्णुर्दैत्यघातादिदृष्टान्तार्थः ॥ ४–५ ॥

५] ति० टी०–विष्णुना दैत्यघातादिभिरहं तोषितः । त्वया समं गन्धर्वोरगधर्षणैर्विमर्दैर्भाविभिः परितोषितो भविष्यामीत्यर्थः ॥ ५ ॥

रा० टी०–विष्णुनेति । दैत्यघातैः दैत्यानां घातो येषु तैर्विमर्दैर्विष्णुनाहं परितोषितः गन्धर्वोरगधर्षणे गन्धर्वादीनां धर्षणं येषु तैर्विमर्दैस्तु समं कृत्वं यथा भवति तथा त्वयाहं परितोषितोऽस्मि ॥ ५ ॥

६] ति० टी०–समाधिं चित्तैकाग्र्यम् ॥ ६ ॥

रा० टी०–किञ्चिदिति । यदि त्वं श्रोष्यसे तर्हि किञ्चिद्वक्तव्यं वक्ष्यामि निगदतो मम श्रवणे समाधिं चित्तैकाग्र्यं कुरु ॥ ६ ॥

गो० टी०–किंचिदिति–समाधिमैकाग्र्यम् ॥ ६ ॥

७–८] ति० टी०–अयं लोको मर्त्यलोकः । दैवतैरवध्येनेत्यनेन मर्त्येभ्यो भयराहित्यमुक्तम् ॥ ७ ॥ ८ ॥

रा० टी०–तद्वचनाकारमाह—किमिति । यदा अयं लोको मृत्युवशं गतः तदा हत एव अतः दैवतैरवध्येन त्वया किं किमर्थं वध्यते ॥ ७ ॥

रा० टी०–देवेति । मानुषो लोकः क्लेष्टुं त्वया न योग्यः ॥ ८ ॥

गो० टी०–अयं लोकः । त्वया अवध्येनेति छेदः ॥७-९॥

९] ति० टी०–श्रेयसि संमूढं श्रेयआचरणे बुद्धिहीनम् । व्यसनान्येव जरेत्यादिना स्पष्टीकृतानि ॥ ९ ॥

रा० टी०–नित्यमिति । श्रेयसि कल्याणमार्गे सम्मूढं तमजानन्तमित्यर्थः अत एव व्यसनैर्दुःखैर्वृतं जराव्याधिशतैर्युतं तादृशं मानुषं लोकं को हन्यात् ॥ ९ ॥

१०] ति० टी०–नानाविधैरनिष्टोपगमैरनिष्टसंबन्धैर्यत्रकुत्र यत्रकुत्रापि पीडिते मानुषे लोके को मतिमांस्तस्य युद्धेन वधे प्रणयी भवेत्, न कोऽपि ॥ १० ॥

रा० टी०–तैरिति । तैस्तैः प्रसिद्धैः अनिष्टोपगमैः अनिष्टत्वेन प्रतीयमानैर्विशिष्टे यत्रकुत्र मानुषे लोके युद्धेन कः प्रणयी भवेत् ॥ १० ॥

गो० टी०–तैस्तैरिति । युद्धेनेति । मतिमान् कदा तस्मिन्मर्त्यलोके युद्धेन वधप्रणयी भवेत् न कोपीत्यर्थः ॥१०॥

११] ति० टी०–किं च मृतमारणवधुद्धेन तेषां वधो व्यर्थ इत्याह—क्षीयमाणमिति । विषादो व्याध्यादिजं दुःखम् । शोको बन्धुवियोगादिजं दुःखम् ॥ ११ ॥

रा० टी०–क्षीयमाणमिति । मा क्षपयस्व विनाशय ११

---

१ ते इति गो. पाठः । २ इदमर्धमधिकं गो. पाठे । ३ युक्त इति गो. पाठः ।

पश्य तावन्महाबाहो राक्षसेश्वर मानुषम् । मूढमेवं विचित्रार्थं यस्य न ज्ञायते गतिः ॥ १२ ॥
क्वचिद्वादित्रनृत्यादि सेव्यते मुदितैर्जनैः । रुद्यते चापरैरार्तैर्धाराश्रुनयनाननैः ॥ १३ ॥
मातापितृसुतस्नेहभार्याबन्धुमनोरमैः । मोहितोऽयं जनो ध्वस्तः क्लेशं स्वं नावबुध्यते॥ १४ ॥
तत्किमेवं परिक्लिश्य लोकं मोहनिराकृतम् । जित एव त्वया सौम्य मर्त्यलोको न संशयः॥१५॥
अवश्यमेभिः सर्वैश्च गन्तव्यं यमसादनम् । तन्निगृह्णीष्व पौलस्त्य यमं परपुरंजय ॥ १६ ॥
तस्मिञ्जिते जितं सर्वं भवत्येव न संशयः । एवमुक्तस्तु लङ्केशो दीप्यमानं स्वतेजसा ॥ १७ ॥
अब्रवीन्नारदं तत्र संप्रहस्याभिवाद्य च । महर्षे देवगन्धर्वविहार समरप्रिय ॥ १८ ॥
अहं समुद्यतो गन्तुं विजयार्थं रसातलम् । ततो लोकत्रयं जित्वा स्थाप्य नागान्सुरान्वशे ॥
समुद्रममृतार्थं च मथिष्यामि रसालयम् ॥ ॥ १९ ॥
अथाब्रवीदशग्रीवं नारदो भगवानृषिः । क्व खल्विदानीं मार्गेण त्वयेहान्येन गम्यते ॥ २० ॥
अयं खलु सुदुर्गम्यः प्रेतराजपुरं प्रति । मार्गो गच्छति दुर्धर्ष यमस्यामित्रकर्शन ॥ २१ ॥

गो० टी०–किं च मृतमारणवद्युद्धेन तेषां वधो व्यर्थ इत्याह–क्षीयमाणमिति ॥ ११-१२ ॥

१२] ति० टी०–यस्य मनुष्यलोकस्य गतिर्दुःखादिभोगकालो न ज्ञायते तेन लोकेनेति शेषः । एवं ज्ञानराहित्येन मूढमपि विचित्रार्थं नानाविधक्षुद्रपुरुषार्थसक्तं मानुषं लोकं पश्य ॥ १२ ॥

रा०टी०–पश्येति । यस्य गतिः अवस्थितिर्न ज्ञायते तं मानुषं लोकं विचित्रार्थमनेकविधाधिव्याधिविशिष्टं पश्य जानीहि१२

१३] ति० टी०–तदेवाह–क्वचिदिति । धाराश्रुनयनोपेतमाननं येषां तैः ॥ १३ ॥

रा० टी०–क्वचिदिति । क्वचित् कदाचित् मुदितैर्जनैर्वादित्रनृत्यादि सेव्यते धाराश्रुभिः अश्रुधाराभिरुपलक्षितैर्नयनैर्युक्तमाननं येषां तैरपरैः रुद्यते ॥ १३ ॥

गो० टी०–क्वचिदिति–धाराश्रुनयनाननैः धाराभूताश्रुनयनयुक्तमुखैः ॥ १३ ॥

१४] ति० टी०–मात्रादिस्नेहैर्भार्यादिमनोरमैः । भार्यादिविषयकमनोरथैरित्यर्थः । मोहितः, अत एव ध्वस्तोऽयः पतितः । स्वं क्लेशं पारलौकिकम् ॥ १४ ॥

रा० टी०–मातेति । मात्रादिस्नेहैः भार्याबन्धुषु मनोरमैः अनेकविधमनोरथैर्मोहितः अत एव ध्वस्तोयं जनः स्वं क्लेशं नावबुध्यते ॥ १४ ॥

गो० टी०–मातेति—भार्याबन्धुमनोरमैः भार्याबन्धुषु मनोरमो मनोरमणं प्रीतिर्येषां तैः क्लेशं पारलौकिकदुःखम्॥१४॥

१५–१७] ति० टी०–एवंप्रकारेण मोहेनाज्ञानेन निराकृतं प्रच्यावितार्थम् ॥ १५–१७ ॥

रा० टी०–तदिति । त्वया मर्त्यलोको जित एव उत्तमानां जये तदधमाः जितप्राया एवेत्यर्थः तत्तस्मात् हेतोः मोहनिराकृतं लोकं परिक्लिश्य किं न किमपीत्यर्थः ॥ १५ ॥

रा० टी०–अवश्यमिति । सर्वैर्यमसादनमवश्यं गन्तव्यं यम एव सर्वेभ्यः प्रबल इत्यर्थः अतो यमं निगृह्णीष्व तस्मिन् जिते सति सर्वं जितं भवति भविष्यति सार्द्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०–एवमिति । एवमुक्तो लंकेशो नारदमब्रवीत्१७

गो० टी०–अलमेनं परिक्लिश्येति—मोहनिराकृतः अज्ञानेन प्रच्यावितार्थः ॥ १५–१७ ॥

१८] ति० टी०–देवगन्धर्वविहार तल्लोकक्रीडापर, समरप्रिय समरदर्शनप्रिय ॥ १८ ॥

रा० टी०–तदाकारमाह–महर्ष इति । देवगन्धर्वाणां विहारः विहरणमिव तत्सम्बोधनं विजयार्थं रसातलं गन्तुमहं समुद्यतोस्मि ॥ १८ ॥

गो० टी०–महर्ष इति–देवगन्धर्वविहार देवगन्धर्वैर्गानपरैर्विहारपर । समरप्रिय समरदर्शनप्रिय ॥ १८ ॥

१९] ति० टी०– ततो रसातलजयानन्तरम् । रसस्यामृतरूपरसस्यालयं समुद्रं मथिष्यामि ॥ १९ ॥

रा० टी०–तत इति । नागान्सुरांश्च वशे आस्थाप्य अमृतार्थं रसालयं रसानामाश्रयं समुद्रं मथिष्यामि ॥ १९ ॥

गो० टी०–तत इति–रसालयम् अमृतरसालयम् । खल्विति ॥ १९ ॥

२०] ति० टी०–इदानीं रसातलं जिगमिषुणा त्वयान्येन मार्गेण रसातलमार्गव्यतिरिक्तमार्गेण क्व खलु गम्यते ॥२०॥

रा० टी०–अथेति । नारदो दशग्रीवमब्रवीत् तदाकारमाह अन्येन मार्गेण त्वया क्व खलु किमर्थं गम्यते यमराजपुरमार्गेणैव गम्यतामित्यर्थः ॥ २० ॥

गो० टी०–अथेति–इदानीं रसातलजिगमिषुणा त्वया अन्येन मार्गेण रसातलमार्गव्यतिरिक्तमार्गेण क्व गम्यते॥२०॥

२१] ति० टी०–कस्य देशस्य तत्स्थं मार्गोऽत आह–अयं खल्विति । सुदुर्गम्यः सुदुर्गमः । यदार्षः । यमस्य यमपुरस्य ॥ २१ ॥

---

१ अलमेनमिति गो. पाठः । २ त्वया ह्यन्येति गो. पाठः । ३ दुर्धर्ष इति गो. पाठः ।

स तु शारदमेघाभं हासं मुक्त्वा दशाननः । उवाच कृतमित्येव वचनं चेदमब्रवीत् ॥ २२ ॥
तस्मादेवं महाब्रह्म वैवस्वतवधोद्यतः । गच्छामि दक्षिणामाशां यत्र सूर्यात्मजो नृप ॥ २३ ॥
मया हि भगवन्क्रोधात्प्रतिज्ञातं रणार्थिना । अवजेष्यामि चतुरो लोकपालानिति प्रभो ॥ २४ ॥
तदिह प्रस्थितोऽहं वै पितृराजपुरं प्रति । प्राणिसंक्लेशकर्तारं योजयिष्यामि मृत्युना ॥ २५ ॥
एवमुक्त्वा दशग्रीवो मुनिं तमभिवाद्य च । प्रययौ दक्षिणामाशां प्रविष्टः सह मन्त्रिभिः ॥ २६ ॥
नारदस्तु महातेजा मुहूर्तं ध्यानमास्थितः । चिन्तयामास विप्रेन्द्रो विधूम इव पावकः ॥ २७ ॥
येन लोकास्त्रयः सेन्द्राः क्लिश्यन्ते सचराचराः । क्षीणे चायुषि धर्मेण स कालो जेष्यते कथम् ॥ २८ ॥
स्वदत्तकृतसाक्षी यो द्वितीय इव पावकः । लब्धसंज्ञा विचेष्टन्ते लोका यस्य महात्मनः ॥ २९ ॥
यस्य नित्यं त्रयो लोका विद्रवन्ति भयार्दिताः । तं कथं राक्षसेन्द्रोऽसौ स्वयमेव गमिष्यति ॥ ३० ॥
यो विधाता च धाता च सुकृतं दुष्कृतं तथा । त्रैलोक्यं विजितं येन तं कथं विजयिष्यते ॥
अपरं किं तु कृत्वैवं विधानं संविधास्यति ॥ ॥ ३१ ॥

रा० टी०–ननु कः स मार्ग इत्यत आह–अयमिति । सुदुर्गम्यः अन्यैर्गंतुमशक्यः अयं मत्समीपस्थ एव मार्गः प्रेतराजपुरं प्रति गच्छति एतेन यमपुरमेव गच्छेति सूचितम्॥२१॥

गो० टी०–कस्य तर्ह्ययं मार्ग इत्यपेक्षायामाह–अयं खलित्यादि–सुदुर्गम्यः सुदुर्गमः । यदार्षः ॥ २१ ॥

२२] ति० टी०–हासं मुक्त्वा कृत्वा शारदमेघाभं नारदं प्रति कृतमिति वचोऽब्रवीत् यमपुरमार्गेण गमनं तज्जयश्च मम सिद्ध एवेत्यब्रवीदित्यर्थः ॥ २२ ॥

रा० टी०–स इति । दशाननः हासं मुक्त्वा कृत्वा कृतं भवदुक्तमंगीकृतमिदं वचनमब्रवीत् ॥ २२ ॥

गो० टी०–स त्विति–हासं मुक्त्वेति । कृत्वेति यावत् । शारदमेघाभं नारदं प्रति कृतमित्येवावोचत् । तन्मार्गेणैव गमनं तज्जयश्च मम सिद्ध एवेत्युवाचेत्यर्थः ॥ २२ ॥

२३–२५] ति० टी०–यस्मात्त्वया मार्ग उपदिष्टो यतश्चतुर्दिक्पालजयो मया प्रतिज्ञातस्तस्मादेवमनेनैव मार्गेण हे महाब्रह्म ! ' कुमहद्भ्यामन्यतरस्याम् ' इत्यच् । दक्षिणामाशां गच्छामि ॥ २३–२५ ॥

रा० टी०–तद्वचनमेव स्पष्टमाह—तस्मादिति । हे महाब्रह्म तस्मात् भवदुक्तहेतोः दक्षिणामाशां गच्छामि ॥२३॥

रा० टी०–तत्र गमनस्यावश्यकत्वमाह–मयेति । चतुरो लोकपालान् अहमवजेष्यामीति रणार्थिना मया प्रतिज्ञातम् ॥ २४ ॥

रा० टी०–तदिति । पितृराजपुरं प्रति प्रस्थितोऽहं प्राणिसंक्लेशकर्तारं यमं मृत्युना योजयिष्यामि ॥ २५ ॥

गो० टी०–तस्मादिति–यस्मान्मार्ग उपदिष्टः यतश्च मया चतुर्दिक्पालजयः प्रतिज्ञातस्तस्मादित्यर्थः ॥ २३–२८ ॥

२६–२७] ति० टी०–प्रययौ । नारदसमीपदेशात् । ततो दक्षिणामाशां प्रविष्टः ॥ २६ ॥ २७ ॥

रा० टी०–एवमिति । मंत्रिभिस्सह प्रविष्टो दशग्रीवः दक्षिणामाशां प्रययौ ॥ २६ ॥

रा० टी०–नारद इति । ध्यानमास्थितो नारदः मुहूर्तं चिन्तयामास ॥ २७ ॥

२८] ति० टी०–आयुषि क्षीणे सति धर्मेण धर्ममार्गेण त्रयो लोका येन क्लिश्यन्ते दण्ड्यन्ते स कालः कथमनेन जेष्यते ॥ २८ ॥

रा० टी०–तदाकारमाह–येनेति । आयुषि क्षीणे सति येन त्रयो लोकाः क्लिश्यन्ते क्लेश्यन्ते स कालो यमः कथं जेष्यते ॥ २८ ॥

२९–३०] ति० टी०–यश्च कालः प्राणिनां स्वदत्तं च स्वकृतं च स्वदत्तकृते तयोः साक्षी । दत्तं दानम् । इदं विहितयागादेरप्युपलक्षणम् । कृतशब्देन कायक्लेशरूपं तपः । स कथं जेष्यत इति संबन्धः । यस्य लब्धसंज्ञा यतो लब्धसंज्ञा विचेष्टन्ते । व्यवहरन्तीत्यर्थः । यद्वा यस्य महात्मनः । अनुग्रहादिति शेषः ॥ २९ ॥ ३० ॥

रा० टी०–स्वदत्तेति । स्वदत्तस्य दानस्य कृतस्य कायक्लेशादिकर्मणश्च यस्साक्षी यस्य प्रभावादिति शेषः लब्धसंज्ञा लोका विचेष्टन्ते यस्य भयार्दिताः लोकाः विद्रवन्ति तं यमं राक्षसेन्द्रः स्वयमेव कथं गमिष्यति अर्द्धचतुष्टयमेकान्वयि॥३०॥

रा० टी०–य इति । यस्सुकृतं दुष्कृतं च विधाता कारयिता धाता तत्फलप्रापक इत्यर्थः येन च त्रैलोक्यं विजितं तं कथं विजयिष्यते विजेष्यते ॥ ३१ ॥

गो० टी०–स्वदत्तं स्वकृतं च । स्वदत्तस्वकृतशब्देन कायक्लेशरूपं तपः महात्मनः अनुग्रहादिति शेषः ॥ २९-३० ॥

३१] ति० टी०–यो लोकस्य धाता विधाता सामान्यतो विशेषतश्च कर्ता । यः सुकृतं दुष्कृतम् । तत्फलद इत्यर्थः। येन कालेन विजयिष्यते विजेष्यते । अपरं किं त्विति काल

१ अहं ब्रह्मन्निति गो. पाठः । २ विजेष्यन्ते इति गो. पाठः । ३ कृत्वायमिति गो, कृत्वैवमिति, च रा. पाठः ।

कौतूहलं समुत्पन्नो यास्यामि यमसादनम् । विमर्दं द्रष्टुमनयोर्यमराक्षसयोः स्वयम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ।

देवर्षिर्नारदो रावणागमनवृत्तं यावत्प्रस्तौति तावदेव स निशाचर आगत्य दुष्कृतकारिणो बद्धाञ्जीवान् मुक्तवान्सहसा । तच्छ्रवणकुपितकृतान्तप्रेषितभटैः सह पौलस्त्यस्य श्रोतृकुतूहलजनकं महद्युद्धमभवत् ।

एवं संचिन्त्य विप्रेन्द्रो जगाम लघुविक्रमः । आख्यातुं तद्यथावृत्तं यमस्य सदनं प्रति ॥ १ ॥
अपश्यत्स यमं तत्र देवमग्निपुरस्कृतम् । विधानमनुतिष्ठन्तं प्राणिनो यस्य यादृशम् ॥ २ ॥
स तु दृष्ट्वा यमः प्राप्तं महर्षिं तत्र नारदम् । अब्रवीत्सुखमासीनमर्घ्यमावेद्य धर्मतः ॥ ३ ॥
कच्चित्क्षेमं नु देवर्षे कच्चिद्धर्मो न नश्यति । किमागमनकृत्यं ते देवगन्धर्वसेवित ॥ ४ ॥
अब्रवीत्तु तदा वाक्यं नारदो भगवानृषिः । श्रूयतामभिधास्यामि विधानं च विधीयताम् ॥ ५ ॥
एष नाम्ना दशग्रीवः पितृराज निशाचरः । उपयाति वशं नेतुं विक्रमैस्त्वां सुदुर्जयम् ॥ ६ ॥
एतेन कारणेनाहं त्वरितो ह्यागतः प्रभो । दण्डप्रहरणस्याद्य तव किं नु भविष्यति ॥ ७ ॥

एव सर्वसाधनम्, अयं तु कालातिरिक्तमपरं किं नु विधानं कालव्यतिरिक्तसाधनसंपादनं कृत्वा कालजयं संविधास्यति३१

रा० टी०-अपरमिति । एवं विधानं यमेन सह युद्धं कृत्वा अपरं किं संविधास्यति अहं पृथक् ॥ ३२ ॥

गो० टी०-धाता विधाता सामान्यतो विशेषतश्च कर्ता ॥

गो० टी०-अपरमिति-काल एव सर्वसाधनम् । अयं तु कालातिरिक्तमपरं किं विधानं साधनसंपादनं कृत्वा कालजयं संविधास्यतीत्येवं कौतूहलसमुत्पन्नोऽहं यमस्य सदनं द्रष्टुं यास्यामि ॥ ३२-३३ ॥

इति श्रीगो० मणिमु० उत्तरश्री० विंशः सर्गः॥ २०॥

३२] ति० टी०-इत्येवं कौतूहलं समुत्पन्नोऽहं यमसादनं द्रष्टुं यास्यामि ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे विंशः सर्गः ॥ २० ॥

रा० टी०-कौतूहलेति । कौतूहलसमुत्पन्नोऽहं यमराक्षसयोर्विमर्दं संग्रामं द्रष्टुं यास्यामि ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे विंशः सर्गः ॥ २० ॥

१] ति० टी०-एवमिति ॥ १ ॥

रा०टी०-नारदकर्तृकयमसदनगमनं वर्णयन्नाह-एवमिति। विप्रेन्द्रो नारदः यथावृत्तमाख्यातुं यमस्य सदनं प्रतिजगाम॥१॥

२-३] ति० टी०-अग्निः पुरस्कृतः सर्वसाक्षितया येन तम् यस्य प्राणिनो यादृशं विधानं पुण्यपापरूपं कर्म तादृशमनुतिष्ठन्तं तत्तदनुगुणफलं प्रयच्छन्तम् । यद्वा यस्य यादृशं विधानं निग्रहानुग्रहरूपं कृत्यमनुतिष्ठन्तमित्यर्थः ॥ २ ॥ ३ ॥

रा० टी०-अपश्यदिति । अग्निः पुरस्कृतः साक्षितया अग्रे स्थापितो येन तं प्राणिनो यस्य यादृशं विधानं कर्म तादृशमनुतिष्ठन्तं तदनुसारेण फलं प्रयच्छन्तमित्यर्थः यमं देवमपश्यत् ॥ २ ॥

रा० टी०-स इति । यमः महर्षिं प्राप्तं दृष्ट्वा धर्मतोऽर्घ्यमावेद्य अब्रवीत् ॥ ३ ॥

गो० टी०-अपश्यदिति । अग्निः पुरस्कृतः साक्षितया येनासौ अग्निपुरस्कृतः तम् । प्राणिनो विधानं निग्रहानुग्रहकृत्यमुपतिष्ठन्तमनुतिष्ठन्तम् ॥ २-४ ॥

४] ति० टी०-कच्चित्क्षेममित्यादि। लोके इति शेषः४

रा० टी०-तदाकारमाह—कच्चिदिति । आगमनस्य कृत्यं प्रयोजनं किम् ॥ ४ ॥

५-६] ति० टी०-विधानं च । मत्तः श्रुताया आपदः प्रतिक्रियां चेत्यर्थः ॥ ५ ॥ ६ ॥

रा० टी०-अब्रवीदिति। नारदोऽब्रवीत् तदाकारमाह-अहं अभिधास्यामि कथयिष्यामि त्वया श्रूयताम् ॥ ५ ॥

रा० टी०-अभिधानप्रकारमाह—एष इति द्वाभ्याम् । नाम्ना दशग्रीवः विक्रमैस्त्वां वशं नेतुमुपयाति दण्डः कालदण्डः प्रहरणं यस्य तस्य तव किन्नु जयः पराजयो वा भविष्यति एतेन कारणेनाहमागतः श्लोकद्वयमेकान्वयि ॥ ६ ॥ ७ ॥

गो० टी०-अब्रवीदिति । विधानं मत्तः श्रुतापदः प्रतिक्रियामित्यर्थः ॥ ५ ॥ ६ ॥

७] ति० टी०-दण्डः कालदण्डः प्रहरणं यस्य तव किं नु भविष्यति । जयः पराजयो वेत्यर्थः ॥ ७ ॥

गो० टी०-एतेनेति । दण्डः कालदण्डः प्रहरणमायुधं यस्य तस्य तव किन्नु भविष्यतीति । जयोऽपजयो वेत्यर्थः ॥७-११॥

१ कौतूहलसमुत्पन्न इति गो. रा. पाठः । २ उपेति गो. पाठः ।

एतस्मिन्नन्तरे दूरादंशुमन्तमिवोदितम् । ददृशुर्दीप्तमायान्तं विमानं तस्य रक्षसः ॥ ८ ॥
तं देशं प्रभया तस्य पुष्पकस्य महाबलः । कृत्वा वितिमिरं सर्वं समीपमभ्यवर्तत ॥ ९ ॥
सोऽपश्यत्स महाबाहुर्दशग्रीवस्ततस्ततः । प्राणिनः सुकृतं चैव भुञ्जानांश्चैव दुष्कृतम् ॥ १० ॥
अपश्यत्सैनिकांश्चास्य यमस्यानुचरैः सह । यमस्य पुरुषैरुग्रैर्घोररूपैर्भयानकैः ॥ ११ ॥
ददर्श वध्यमानांश्च क्लिश्यमानांश्च देहिनः । क्रोशतश्च महानादं तीव्रनिष्टनतत्परान् ॥ १२ ॥
कृमिभिर्भक्ष्यमाणांश्च सारमेयैश्च दारुणैः । श्रोत्रायासकरा वाचो वदतश्च भयावहाः ॥ १३ ॥
संतार्यमाणान्वैतरणीं वहुशः शोणितोदकाम् । वालुकासु च तप्तासु तप्यमानान्मुहुर्मुहुः ॥ १४ ॥
असिपत्रवने चैव भिद्यमानानधार्मिकान् । रौरवे क्षारनद्यां च क्षुरधारासु चैव हि ॥ १५ ॥
पानीयं याचमानांश्च तृषितान्क्षुधितानपि । शवभूतान्कृशान्दीनान्विवर्णान्मुक्तमूर्धजान् ॥ १६ ॥
मलपङ्कधरान्दीनान्रुक्षांश्च परिधावतः । ददर्श रावणो मार्गे शतशोऽथ सहस्रशः ॥ १७ ॥
कांश्चिच्च गृहमुख्येषु गीतवादित्रनिःस्वनैः । प्रमोदमानानद्राक्षीद्रावणः सुकृतैः स्वकैः ॥ १८ ॥
गोरसं गोप्रदातारो अन्नं चैवान्नदायिनः । गृहांश्च गृहदातारः स्वकर्मफलमश्नतः ॥ १९ ॥
सुवर्णमणिमुक्ताभिः प्रमदाभिरलंकृतान् । धार्मिकानपरांस्तत्र दीप्यमानान्स्वतेजसा ॥ २० ॥
ददर्श सँ महाबाहू रावणो राक्षसाधिपः । ततस्तान्भिद्यमानांश्च कर्मभिर्दुष्कृतैः स्वकैः ॥ २१ ॥
रावणो मोचयामास विक्रमेण बलाद्बली । प्राणिनो मोक्षितास्तेन दशग्रीवेण रक्षसा ॥ २२ ॥
सुखमापुर्मुहूर्तं ते ह्यतर्कितमचिन्तितम् । प्रेतेषु मुच्यमानेषु राक्षसेन महीयसा ॥ २३ ॥

८–११] ति० टी०–विमानशब्दः पुल्लिङ्गोऽपि ॥८–११॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे समये उदितमंशुमन्तमिव दीप्तमायान्तं तस्य रावणस्य विमानं ददृशुः॥८

रा० टी०–तमिति । पुष्पकस्य प्रभया तं देशं वितिमिरं कृत्वा समीपमभ्यवर्तत ॥ ९ ॥

रा० टी०–स इति । दशग्रीवः सुकृतं दुष्कृतं च भुंजानान् प्राणिनोऽपश्यत् ॥ १० ॥

रा० टी०–अपश्यदिति । अनुचरैस्सह यमस्य सैनिकान् अपश्यत् अर्द्धं पृथक् यमस्येति यमस्य पुरुषैर्वध्यमानान् देहिनोऽपश्यत् ॥ ११ ॥

१२–१३] ति० टी०–तीव्रनिष्टनो दुःखितशब्दस्तत्परान् ॥ १२ ॥ १३ ॥

१४–१८] ति० टी०–संतार्यमाणान्वैतरणीमित्यक्षराधिक्यमार्षम् ॥ १४–१८ ॥

रा० टी०–क्रोशत इति । कृमिभिः सारमेयैः श्वभिश्च भक्ष्यमाणान् अत एव महानादं यथा भवति तथा क्रोशतः अत एव तीव्रो यो निष्टनः देव यमराज रक्षेत्यादिशब्दः तत्परान् अत एव श्रोत्रायासकराश्श्रवणदुःखोत्पादिकाः वाचो वदतः शोणितोदकां वैतरणीं सन्तार्यमाणाश्च तप्तासु वालुकासु तप्यमानांश्च असिपत्रवने भिद्यमानांश्च रौरवादौ पानीयं याचमानांश्च तृषितान् क्षुधितांश्च अत एव परिधावतः शतशः सहस्रशोऽधार्मिकान् रावणो मार्गे ददर्श सार्द्धश्लोकपञ्चकमेकान्वयि ॥ १२–१७ ॥

रा० टी०–कांश्चिदिति । स्वकैस्सुकृतैर्हेतुभिः गीतादिभिः प्रमोदमानान् कांश्चिद्रावणोऽद्राक्षीत् ॥ १८ ॥

गो० टी०–ददर्शेति । तीव्रो निष्टनः क्रूरशब्दः ॥१२–१३॥

गो० टी०–श्रोत्रेति । संतार्यमाणान् वैतरणीमिति संज्ञापदवशात् पादाक्षराधिक्यम् ॥ १४–३६ ॥

१९–२०] ति० टी०–गृहदातारो गृहदातॄन् । अश्नत उपभुञ्जानान् ॥ १९–२० ॥

रा० टी०–गोरसमिति । गोरसादिस्वकर्मफलमश्नतो गोप्रदावादीन् सुवर्णादिभिरलंकृतांश्च अपरान् धार्मिकान् रावणो ददर्श सार्द्धश्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

२१–२२] ति० टी०–भिद्यमानान्पीड्यमानान् । 'वध्यमानान्' इति पाठान्तरम् ॥ २१ ॥ २२ ॥

रा० टी०–तत इति । रावणो दुष्कृतैः कर्मभिर्भिद्यमानान् नानायातनाः प्राप्नुवतोऽधर्मिष्ठान् विक्रमेण शीघ्रगमनेन बलात् मोचयामास ॥ २१ ॥

रा० टी०–प्राणिन इति । दशग्रीवेण मोक्षिताः प्राणिनः अतर्कितं सुखं मुहूर्तमापुः ॥ २२ ॥

२३] ति० टी०–अचिन्तितमित्यतर्कितमित्यस्यैव विवरणम् ॥ २३ ॥

रा० टी०–प्रेतेष्विति । प्रेतेषु मुच्यमानेषु सत्सु प्रेतगोपाः राक्षसेन्द्रमभिद्रवन् ॥ २३ ॥

१ सोऽभ्यवर्ततेति गो. पाठः । २ कर्मेति गो. पाठः । ३ ह्यन्नमिति गो. पाठः । ४ स्विति गो. पाठः । ५ मोचिता इति गो. पाठः ।

प्रेतगोपाः सुसंक्रुद्धा राक्षसेन्द्रमभिद्रवन् । ततो हलहलाशब्दः सर्वदिग्भ्यः समुत्थितः ॥
धर्मराजस्य योधानां शूराणां संप्रधावताम् ॥ ॥ २४ ॥
ते प्रासैः परिघैः शूलैर्मुसलैः शक्तितोमरैः । पुष्पकं समधर्षन्त[1] शूराः शतसहस्रशः ॥ २५ ॥
तस्यासनानि प्रासादान्वेदिकास्तोरणानि च । पुष्पकस्य बभञ्जुस्ते शीघ्रं मधुकरा इव ॥ २६ ॥
देवनिष्ठानभूतं तद्विमानं पुष्पकं मृधे । भज्यमानं तथैवासीदक्षयं ब्रह्मतेजसा ॥ २७ ॥
असंख्या सुमहत्यासीत्तस्य सेना महात्मनः । शूराणामग्रयातॄणां सहस्राणि शतानि च ॥ २८ ॥
ततो वृक्षैश्च शैलैश्च प्रासादानां शतैस्तथा । ततस्ते सचिवास्तस्य यथाकामं यथाबलम् ॥ २९ ॥
अयुध्यन्त महावीराः स च राजा दशाननः । ते तु शोणितदिग्धाङ्गाः सर्वशस्त्रसमाहताः ॥ ३० ॥
अमात्या राक्षसेन्द्रस्य चक्रुरायोधनं महत् । अन्योन्यं ते महाभागा जघ्नुः प्रहरणैर्भृशम् ॥ ३१ ॥
यमस्य च महाबाहो रावणस्य च मन्त्रिणः । अमात्यांस्तांस्तु संत्यज्य यमयोधा महाबलाः ॥३२॥
तमेव चाभ्यधावन्त शूलवर्षैर्दशाननम् । ततः शोणितदिग्धाङ्गः प्रहारैर्जर्जरीकृतः ॥
फुल्लाशोक इवाभाति पुष्पके राक्षसाधिपः । ॥ ३३ ॥
स तु शूलगदाप्रासाञ्छक्तितोमरसायकान् । मुमोचैं च शिलावृक्षान्मुमोचास्त्रबलाद्बली ॥ ३४ ॥
तरूणां च शिलानां च शस्त्राणां चातिदारुणम् । यमसैन्येषु तद्वर्षं पपात धरणीतले ॥ ३५ ॥
तांस्तु सर्वान्विनिर्भिद्य तदस्त्रमपहत्य च । जघ्नुस्ते राक्षसं घोरमेकं शतसहस्रशः ॥ ३६ ॥

२४-२६] ति० टी०-प्रेतगोपाः प्रेतरक्षकाः ॥२४-२६

रा० टी०-तत इति । धर्मराजस्य योधानां सम्प्रधावतां सतां हलहलाशब्दः सर्वदिग्भ्यस्समुत्थितः ॥ २४ ॥

रा० टी०-ते इति । शतसहस्रशः ते यमदूताः पुष्पकं समधर्षन्त ॥ २५ ॥

रा० टी०-तस्येति । पुष्पकस्य आसनादीन् ते यमदूता बभञ्जुः ॥ २६ ॥

२७] ति० टी०-देवनिष्ठानभूतं देवाधिष्ठानभूतं भज्यमानमपि तथैवासीदभग्नमासीत् ॥ २७ ॥

रा० टी०-देवेति । देवनिष्ठानभूतं देवादीनामधिष्ठानत्वं प्राप्तं ब्रह्म विभु तेजसोपलक्षितमक्षयमपि पुष्पकं भज्यमानमासीत् ॥ २७ ॥

२८-३०] ति० टी०-तस्य यमस्य ॥ २८-३० ॥

रा० टी०-असंख्येति । यस्य अग्रयातॄणां शूराणां शतानि सहस्राणि अभवन्निति शेषः तस्य यमस्य सेना सुमहती अत एव असंख्या संख्यातुमशक्या आसीत् ॥ २८ ॥

रा० टी०-तत इति । तस्य दशाननस्य ततो युद्धविस्तारकर्त्तारः सचिवाः दशाननश्च वृक्षादिभिः यथाबलमयुध्यन्त सार्द्धश्लोक एकान्वयी ॥ २९ ॥

रा० टी०-ते इति । सर्वशस्त्रैस्समाहताः अत एव शोणितदिग्धाङ्गा अपि राक्षसेन्द्रस्यामात्याः महदायोधनं चक्रुः॥३०॥

३१-३३] ति० टी०-आयोधनं युद्धम् ॥ ३१-३३ ॥

रा० टी०-अन्योन्यमिति । यमस्य रावणस्य च मन्त्रिणोऽन्योन्यं जघ्नुः ॥ ३१ ॥

रा० टी०-अमात्यानिति । यमयोधाः अमात्यान् संत्यज्य दशाननमेवाभ्यधावन्त ॥ ३२

रा० टी०-तत इति । शोणितदिग्धाङ्गो राक्षसाधिपः फुल्लाशोक इवाभाति ॥ ३३ ॥

३४] ति० टी०-स रावणोऽस्त्रबलादस्त्रसामर्थ्याच्छूलादीन्मुमोच ॥ ३४ ॥

रा० टी०-स इति । स रावणः शूलादीन् मुमोच शिलावृक्षांश्च मुमोच ॥ ३४ ॥

३५] ति० टी०-तद्वर्षं रावणविसृष्टशस्त्रवर्षं यमसैन्येषु पतित्वा धरणीतले पपात ॥ ३५ ॥

रा० टी०-तरूणामिति । तरुप्रभृतीनां तद्वर्षं धरणीतले विद्यमानेषु यमसैन्येषु पपात ॥ ३५ ॥

३६] ति० टी०-तांश्शूलगदाप्रासादीन्निर्भिद्य भङ्क्त्वा। तदस्त्रं रावणप्रयुक्तं शस्त्रवर्षकरमस्त्रमपहत्य निरस्य ॥ ३६ ॥

रा० टी०-तानिति । शतसहस्रशस्ते यमदूताः तान् यमसैन्यवर्तिनो विनिर्भिद्य तदस्त्रमपहत्य संछिद्य एकं राक्षसं रावणं जघ्नुः ॥ ३६ ॥

गो० टी०-तानिति । तदस्त्रं रावणप्रयुक्तं प्रागुक्तशस्त्रवर्षसाधकमपहत्य निरस्य ॥ ३७-४१ ॥

१ अवर्षन्तेति गो. पाठः । २ मुसलानीति गो. पा. ।

परिवार्य च तं सर्वे शैलं मेघोत्करा इव । भिन्दिपालैश्च शूलैश्च निरुच्छ्वासमपोथयन् ॥ ३७ ॥
विमुक्तकवचः क्रुद्धः सिद्धैः शोणितविस्रवैः । ततः स पुष्पकं त्यक्त्वा पृथिव्यामवतिष्ठत ॥ ३८ ॥
ततः स कार्मुकी वाणी समरे चाभिवर्धत । लब्धसंज्ञो मुहूर्तेन क्रुद्धस्तस्थौ यथान्तकः ॥ ३९ ॥
ततः पाशुपतं दिव्यमस्त्रं संधाय कार्मुके । तिष्ठ तिष्ठेति तानुक्त्वा तच्चापं व्यपकर्षत ॥ ४० ॥
आकर्णात्स विकृष्याथ चापमिन्द्रारिराहवे । मुमोच तं शरं क्रुद्धस्त्रिपुरे शंकरो यथा ॥ ४१ ॥
तस्य रूपं शरस्यासीत्सधूमज्वालमण्डलम् । वनं दहिष्यतो घर्मे दावाग्नेरिव मूर्च्छतः ॥ ४२ ॥
ज्वालामाली स तु शरः क्रव्यादानुगतो रणे । मुक्तो गुल्मान्द्रुमांश्चापि भस्म कृत्वा प्रधावति॥४३॥
ते तस्य तेजसा दग्धाः सैन्या वैवस्वतस्य तु । बले तस्मिन्निपतिता माहेन्द्रा इव केतवः ॥ ४४ ॥
ततस्तु सचिवैः सार्धं राक्षसो भीमविक्रमः । ननाद सुमहानादं कम्पयन्निव मेदिनीम् ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ।

ततो यमरावणयोर्यदा चिरं युद्धं प्रवृत्तमपि स यमस्याजय्यो दृष्टस्तदा तं जिघांसुः शमनो बद्धपरिकरः प्रजापतिना मत्तोऽयं लब्धवरो देवादिभिरबाध्य इत्यतो न हन्तव्य इति निवारितः सद्योऽन्तर्हितो नारदश्च हृष्टो दिवं गतः ।

स तस्य तु महानादं श्रुत्वा वैवस्वतः प्रभुः । शत्रुं विजयिनं मेने स्वबलस्य च संक्षयम् ॥ १ ॥
स हि योधान्हतान्मत्वा क्रोधसंरक्तलोचनः । अब्रवीत्त्वरितः सूतं रथो मे उपनीयताम् ॥ २ ॥
तस्य सूतस्तदा दिव्यमुपस्थाप्य महारथम् । स्थितः स च महातेजा अध्यारोहत तं रथम् ॥ ३ ॥

३७-४५] ति० टी०-निरुच्छ्वासं यथा भवति तथा रावणं शस्त्रैरपोथयन् ॥ ३७-४५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकविंशः सर्गः ॥ २१ ॥

रा० टी०-परिवार्येति । तं रावणं सर्वे यमदूताः भिन्दिपालादिभिः निरुच्छ्वासं यथा भवति तथा अपोथयन्३७

रा० टी०-विमुक्तेति । विमुक्तकवचः छिन्नवर्मा अत एव क्रुद्धो रावणः पुष्पकं त्यक्त्वा पृथिव्यामवतिष्ठत अवातिष्ठत३८

रा० टी०-तत इति । मुहूर्तेन लब्धसञ्ज्ञो रावणः कार्मुकादिविशिष्टस्सन् अभिवर्धत उत्साहवानभवदित्यर्थः अत एव तस्थौ ॥ ३९ ॥

रा० टी०-तत इति । पाशुपतमस्त्रं कार्मुके सन्धाय तिष्ठ तिष्ठेति तान् यमदूतानुक्त्वा चापं व्यपकर्षत ॥ ४० ॥

रा० टी०-आकर्णादिति । आकर्णात् कर्णपर्यन्तं चापं विकृष्य शरं मुमोच ॥ ४१ ॥

रा० टी०-तस्येति । धर्मे वनं दहिष्यतः मूर्छतो दावाग्नेस्सधूमज्वालमण्डलमिव शरस्य रूपमासीत् ॥ ४२ ॥

रा० टी०-ज्वालेति । क्रव्यादैरनुगतः ज्वालामाली ज्वालासमूहवान् मुक्तश्शरो गुल्मादीन् भस्म कृत्वा प्रधावति ४३

रा० टी०-ते इति । तस्य रावणशरस्य तेजसा दग्धाः वैवस्वतस्य सैन्याः माहेन्द्राः केतव इव बले निपतिताः॥४४॥

रा० टी०-तत इति । राक्षसः मेदिनीं कम्पयन्निव सुमहानादं यथा भवति तथा ननाद ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकविंशः सर्गः ॥ २१ ॥

गो० टी०-ज्वालामालीति । क्रव्यादैः स्वसृष्टैरनुगतस्तथा ॥ ४४-४६ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकविंशः सर्गः ॥ २१ ॥

१] ति० टी०-स तस्येति ॥ १

रा० टी०-रावणकृतनादानन्तरकालिकं वृत्तान्तमाह—स इत्यादिभिः । वैवस्वतः तस्य रावणस्य नादं श्रुत्वा शत्रुं विजयिनं स्वबलस्य संक्षयं च मेने ॥ १ ॥

गो० टी०-स तस्य त्वित्यादि ॥ १ ॥

२-३] ति० टी०-उपनीयतामित्यब्रवीदित्यन्वयः॥२॥३

रा० टी०-स इति । स यमः योधान् हतान् मत्वा मे रथः उपनीयतामिति सूतमब्रवीत् ॥ २ ॥

रा० टी०-तस्येति । तस्य सूतः महारथमुपस्थाप्य स्थितोऽभवदिति शेषः स यमस्तु रथमध्यारोहत ॥ ३ ॥

गो० टी०-स हीति । उपनीयतामित्यब्रवीदित्यन्वयः ॥ २ ॥ ३ ॥

१ सिक्त इति गो. रा. पा. । २ विचकर्ष स इति गो. पा. । ३ रणे इति गो. पा. । ४ ह्यध्यारोहेति गो. पा. ।

प्रासमुद्गरहस्तश्च मृत्युस्तस्याग्रतः स्थितः । येन संक्षिप्यते सर्वं त्रैलोक्यमिदमव्ययम् ॥ ४ ॥
कालदण्डस्तु पार्श्वस्थो मूर्तिमानस्य चाभवत् । यमप्रहरणं दिव्यं तेजसा ज्वलदग्निवत् ॥ ५ ॥
(तस्य पार्श्वेषु निच्छिद्राः कालपाशाः प्रतिष्ठिताः । पावकस्पर्शसंकाशः स्थितो मूर्तश्च मुद्गरः) ॥
ततो लोकत्रयं क्षुब्धमकम्पन्त दिवौकसः । कालं दृष्ट्वा तथा क्रुद्धं सर्वलोकभयावहम् ॥ ६ ॥
ततस्त्वचोदयत्सूतस्तानश्वान्रुचिरप्रभान् । प्रययौ भीमसंनादो यत्र रक्षःपतिः स्थितः ॥ ७ ॥
मुहूर्तेन यमं ते तु हया हरिहयोपमाः । प्रापयन्मनसस्तुल्या यत्र तत्प्रस्तुतं रणम् ॥ ८ ॥
दृष्ट्वा तथैव विकृतं रथं मृत्युसमन्वितम् । सचिवा राक्षसेन्द्रस्य सहसा विप्रदुद्रुवुः ॥ ९ ॥
लघुसत्त्वतया ते हि नष्टसंज्ञा भयार्दिताः । नेह युद्धं समर्थाः स्म इत्युक्त्वा प्रययुर्दिशः ॥ १० ॥
स तु तं तादृशं दृष्ट्वा रथं लोकभयावहम् । नाक्षुभ्यत दशग्रीवो न चापि भयमाविशत् ॥ ११ ॥
स तु रावणमासाद्य व्यसृजच्छक्तितोमरान् । यमो मर्माणि संक्रुद्धो रावणस्य न्यकृन्तत ॥ १२ ॥
रावणस्तु ततः स्वस्थः शरवर्षं मुमोच ह । तस्मिन्वैवस्वतरथे तोयवर्षमिवाम्बुदः ॥ १३ ॥
ततो महाशक्तिशतैः पात्यमानैर्महोरसि । नाशक्नोत्प्रतिकर्तुं स राक्षसः स्वल्पपीडितः ॥ १४ ॥
एवं नानाप्रहरणैर्यमेनामित्रकर्षिणा । सप्तरात्रं कृतः संख्ये विसंज्ञो विमुखो रिपुः ॥ १५ ॥
तदा सात्तुमुलं युद्धं यमराक्षसयोर्द्वयोः । जयमाकाङ्क्षतोर्वीर समरेष्वनिवर्तिनोः ॥ १६ ॥

४–७] ति० टी०–तस्य यमस्य । येन मृत्युना युगान्ते सर्वं जगत्संक्षिप्यते । संहियत इत्यर्थः । अव्ययं प्रवाहनित्यम् ॥ ४–७ ॥

रा० टी०–प्रासेति । येन त्रैलोक्यं संक्षिप्यते विनाश्यते स मृत्युः प्रासादिहस्तस्सन् तस्य यमस्याग्रतः स्थितो बभूवेति शेषः एतेन मृत्योर्यमानुचरत्वं सूचितम् ॥ ४ ॥

गो० टी०–येनेति । येन मृत्युना । युगान्ते सर्वं सकृदेव संहियत इत्यर्थः । अव्ययं प्रवाहनित्यम् ॥ ४ ॥

रा० टी०–कालेति । यमप्रहरणं कालदण्डो मूर्तिमान्सन् पार्श्वस्थोऽभवत् ॥ ५ ॥

रा० टी०–तत इति । कालं क्रुद्धं दृष्ट्वा लोकत्रयं क्षुब्धमत एव दिवौकसः अकम्पन्त ॥ ६ ॥

गो० टी०–तस्येति । निश्छिद्राः निरन्तराः ॥ ५–७ ॥

रा० टी०–तत इति । सूतोऽश्वानचोदयत् अत एव यत्र रक्षःपतिः रावणः स्थितः तत्र प्रययौ ॥ ७ ॥

गो० टी०–तत इति । ततः प्रचोदयन् सूतस्तान् हयान्रुचिरप्रभानित्यत्र चो इति गायत्री ॥ ८ ॥

८] ति० टी०–मनसस्तुल्या मनःसमानवेगाः । प्रस्तुतं प्रारब्धम् ॥ ८ ॥

रा० टी०–मुहूर्तेनेति । यत्र रणं प्रस्तुतं प्रवृत्तं तत्र मुहूर्तेन हयाः प्रापयन् ॥ ८ ॥

गो०टी०–मुहूर्तेनेति । मनस्तुल्याः मनस्तुल्यवेगा इत्यर्थः ९

९] ति० टी०–विकृतं घोरं विकृतसंनाहं च ॥ ९ ॥

रा० टी०–दृष्ट्वेति । मृत्युना समन्वितमत एव विकृतं घोरं रथं दृष्ट्वा राक्षसेन्द्रस्य सचिवाः विप्रदुद्रुवुः ॥ ९ ॥

गो०टी०–दृष्ट्वेति । विकृतं घोरसन्नाहरूपविकारवन्तम् १०

१०–१४] ति० टी०–लघुसत्त्वतयाल्पबलतया १०–१४

रा० टी०–तदेव सहेतुकमाह—लघुसत्त्वेति । लघुसत्त्वतया मृत्युपेक्षयानुमितस्वाल्पबलेन हेतुना भयार्दिताः अत एव नष्टसंज्ञाः रावणस्य सचिवाः वयं न योद्धुं समर्थाः स्म इत्युक्त्वा प्रययुः ॥ १० ॥

रा० टी०–स इति । दशग्रीवः तादृशं मृत्युसहितमतः सर्वलोकभयावहं तं यमं दृष्ट्वा नाक्षुभ्यत् भयं नाविशत् प्राप्नोच्च ११

रा० टी०–स इति । यमः रावणमासाद्य शक्तितोमरान् व्यसृजत् अत एव रावणस्य मर्माणि न्यकृन्तत ॥ १२ ॥

रा० टी०–रावण इति । रावणः वैवस्वते रथे शरवर्षं मुमोच ॥ १३ ॥

रा० टी०–तत इति । अल्पपीडितो राक्षसः महोरसि पात्यमानैः महाशक्तिशतैः प्रतिकर्तुं नाशक्नोत् ॥ १४ ॥

गो०टी०–लघ्विति । लघुसत्त्वतया अल्पवीर्यतया ११-२४

१५–१६] ति० टी०–सप्तरात्रम् । युद्धं कृत्वेति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–एवमिति । अमित्रकर्शिना यमेन रिपुः रावणः सप्तरात्रं विसंज्ञो विमुखश्चाभवत् ॥ १५ ॥

---

१ मदिति गो. पा. । २ पद्यमिदमधिकं गो. पु. । ३ प्रेति गो. पाठः । ४ योद्धुमिति गो. पा. । ५ उपेति गो. पा. । ६ शौरिरिति गो. पा. । ७ श्लथेति गो. रा. पा. ।

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । प्रजापतिं पुरस्कृत्य समेतास्तद्रणाजिरे[1] ॥ १७ ॥
संवर्त इव लोकानां युध्यतोरभवत्तदा । राक्षसानां च मुख्यस्य प्रेतानामीश्वरस्य च ॥ १८ ॥
राक्षसेन्द्रोऽपि विस्फार्य चापमिन्द्राशनिप्रभम् । निरन्तरमिवाकाशं कुर्वन्बाणांस्ततोऽसृजत् ॥ १९ ॥
मृत्युं चतुर्भिर्विशिखैः सूतं सप्तभिरार्दयत् । यमं शतसहस्रेण शीघ्रं मर्मस्वताडयत् ॥ २० ॥
ततः क्रुद्धस्य वदनाद्यमस्य समजायत । ज्वालामाली सनिःश्वासः सधूमः कोपपावकः ॥२१॥
तदाश्चर्यमथो दृष्ट्वा देवदानवसंनिधौ । प्रहर्षितौ सुसंरब्धौ मृत्युकालौ बभूवतुः ॥ २२ ॥
ततो मृत्युः क्रुद्धतरो वैवस्वतमभाषत । मुञ्च मां समरे यावद्धन्मीमं पापराक्षसम् ॥ २३ ॥
नैषा रक्षो भवेदद्य मर्यादा हि निसर्गतः । हिरण्यकशिपुः श्रीमान्नमुचिः शम्बरस्तथा ॥ २४ ॥
निसुन्दिर्धूमकेतुश्च बलिर्वैरोचनोऽपि च । शंभुर्दैत्यो महाराजो वृत्रो बाणस्तथैव च ॥ २५ ॥
राजर्षयः शास्त्रविदो गन्धर्वाः समहोरगाः । ऋषयः पन्नगा दैत्या यक्षाश्च ह्यप्सरोगणाः ॥ २६ ॥
युगान्तपरिवर्ते च पृथिवी समहार्णवा । क्षयं नीता महाराज सपर्वतसरिद्द्रुमा ॥ २७ ॥
एते चान्ये च बहवो बलवन्तो दुरासदाः । विनिपन्ना मया दृष्टाः किमुतायं निशाचरः ॥ २८ ॥
मुञ्च मां साधु धर्मज्ञ यावदेनं निहन्म्यहम् । नहि कश्चिन्मया दृष्टो बलवानपि जीवति ॥ २९ ॥
बलं मम न खल्वेतन्मर्यादैषा निसर्गतः । स दृष्टो न मया काल मुहूर्तमपि जीवति ॥ ३० ॥

रा० टी०–तदेति । तदा सञ्ज्ञाप्राप्तिकाले यमराक्षसयोस्तुमुलं युद्धमासीत् ॥ १६ ॥

१७-२०] ति० टी०–समेताः प्राप्ताः ॥ १७-२० ॥

रा० टी०–तत इति । गंधर्वादयः प्रजापतिं पुरस्कृत्य रणाजिरं समेता बभूवुरिति शेषः ॥ १७ ॥

रा० टी०–संवर्त इति । राक्षसानां मुख्यस्य रावणस्य प्रेतानामीश्वरस्य यमस्य च युध्यतोः सतोः लोकानां संवर्तः प्रलयकाल इवाभवत् ॥ १८ ॥

रा० टी०–राक्षसेन्द्र इति । राक्षसेन्द्रोपि चापं विस्फार्य आकाशं निरन्तरं कुर्वन्निव बाणानसृजत् ॥ १९ ॥

रा० टी०–मृत्युमिति । चतुर्भिर्विशिखैः मृत्युं सप्तभिस्सूतं चार्दयत् शतसहस्रेण यममताडयत् ॥ २० ॥

२१] ति० टी०–ततः क्रुद्धस्येत्यनेनैतावत्पर्यंतं भगवान्यमो ब्रह्मवरदानं स्मृत्वा मारणबुद्धिं विहाय युद्धमात्रं कृतवानिति सूचितम् ॥ २१ ॥

रा० टी०–तत इति । धूमो ज्वालामाली निःश्वासः कोपपावकः यमस्य वदनान्समजायत ॥ २१ ॥

२२] ति० टी०–प्रहर्षितौ । युद्धायेति शेषः । सुसंरब्धावतिक्रुद्धौ ॥ २२ ॥

रा० टी०–तदिति । तन्मुखात्पावकनिस्सरणरूपमाश्चर्यं दृष्ट्वा मृत्युकालौ प्रहर्षितौ बभूवतुः ॥ २२ ॥

२३] ति० टी०–मुञ्च । आज्ञापयेत्यर्थः ॥ २३ ॥

रा० टी०–तत इति । मृत्युः वैवस्वतमभाषत तदाकारमाह यावत्पापराक्षसं हन्मि तावन्मां समरे मुञ्च ॥ २३ ॥

२४] ति० टी०–निसर्गतः स्वभावसिद्धा ह्येषा दृष्टा । मयैतद्रक्षो न भवेत्र जीवेदित्येवंरूपा मर्यादा ममेत्यर्थः । तदेवाह—हिरण्येति ॥ २४ ॥

२५-२७] ति० टी०–शंभुः कुशध्वजब्रह्मर्षिहन्ता दैत्यः ॥ २५-२७ ॥

रा० टी०–नेति । रक्षो न भवेत् विनङ्क्ष्यतीत्यर्थः निसर्गतः स्वभावतः एषा मर्यादा मत्कृतनियमः अर्द्धं पृथक् ननु रावणस्यातिप्रबलत्वे कथं तद्विघातो भविष्यतीत्यत आह—हिरण्येति । हिरण्यकशिपुप्रभृतयः पृथिवी च युगानामन्तपरिवर्ती यस्मात् तस्मिन्मयि सति क्षयं नीताः सार्द्धश्लोकत्रयमेकान्वयि ॥ २४-२७ ॥

गो० टी०–हिरण्यकशिपुरित्यादि । दम्भुर्नाम कश्चिदसुरः । विनिपन्नाः विनाशं प्राप्ताः । दृष्टाः दृष्टमात्राः ॥२५-२९॥

२८] ति० टी०–विनिपन्नाः विनिपातं विनाशं प्राप्ताः । दृष्टाः दृष्टमात्रा एव ॥ २८ ॥

रा० टी०–एत इति । एते अन्ये च विनिपन्ना मृताः मया दृष्टाः अयं निशाचरः किमुत ॥ २८ ॥

२९] ति० टी०–यावन्निहन्मि । हनिष्यामीत्यर्थः ॥२९॥

रा० टी०–मुञ्चेति । बलवानपि जीवति नित्यं प्राणधारणं करोतीति कश्चिन्मया न दृष्टः अतो मां मुञ्च ॥ २९ ॥

गो० टी०–मुञ्चेति । यावन्निहन्मि निहनिष्यामीत्यर्थः । यावद्योगे भविष्यदर्थे लट् ॥ ३० ॥

३०] ति० टी०–एतन्मया दृष्टो मुहूर्तमपि न जीवतीति मम वचनं बलं बलप्रकाशनमात्रपरं न खलु । यतो निसर्गतोऽनादिसृष्टिस्वभावेनैषा मम दृष्टिरेव प्राणिनां जीवितस्य मर्यादा । यदेवमतः—स दृष्ट इति । संहारचक्षुषा दृष्ट इत्यर्थः ३०

१ अजिरमिति गो. रा. पा. । २ युध्यतोरिति गो.पा. । ३ विसंधिरिति गो. पा. । ४ दम्भुरिति गो. पा. । ५ अपीति गो. पा. ।

तस्यैवं वचनं श्रुत्वा धर्मराजः प्रतापवान् । अब्रवीत्तत्र तं मृत्युं त्वं तिष्ठैनं निहन्म्यहम् ॥३१ ॥
ततः संरक्तनयनः क्रुद्धो वैवस्वतः प्रभुः । कालदण्डममोघं तु तोलयामास पाणिना ॥ ३२ ॥
यस्य पार्श्वेषु निहिताः कालपाशाः प्रतिष्ठिताः । पावकाशनिसंकाशो मुद्गरो मूर्तिमान्स्थितः ॥ ३३ ॥
दर्शनादेव यः प्राणान्प्राणिनामपि कर्षति । किं पुनः स्पृशमानस्य पात्यमानस्य वा पुनः ॥ ३४ ॥
स ज्वालापरिवारस्तु निर्दहन्निव राक्षसम् । तेन स्पृष्टो बलवता महाप्रहरणोऽस्फुरत् ॥ ३५ ॥
ततो विदुद्रुवुः सर्वे तस्मात्त्रस्ता रणाजिरे । सुराश्च क्षुभिताः सर्वे दृष्ट्वा दण्डोद्यतं यमम् ॥ ३६ ॥
तस्मिन्प्रहर्तुकामे तु यमे दण्डेन रावणम् । यमं पितामहः साक्षादर्शयित्वेदमब्रवीत् ॥ ३७ ॥
वैवस्वत महाबाहो न खल्वमितविक्रम । न हन्तव्यस्त्वयैतेन दण्डेनैष निशाचरः ॥ ३८ ॥
वरः खलु मयैतस्मै दत्तस्त्रिदशपुंगव । स त्वया नानृतः कार्यो यन्मया व्याहृतं वचः ॥ ३९ ॥
यो हि मामनृतं कुर्याद्देवो वा मानुषोऽपि वा । त्रैलोक्यमनृतं तेन कृतं स्यान्नात्र संशयः ॥ ४० ॥
क्रुद्धेन विप्रमुक्तोऽयं निर्विशेषं प्रियाप्रिये । प्रजाः संहरते रौद्रो लोकत्रयभयावहः ॥ ४१ ॥

रा० टी०–बलमिति । एतद्विनशनं मम बलमेव न किन्तु एषा जन्ममरणरूपामर्यादा निसर्गतः स्वभावतः अतो यो मुहूर्त्तमपि जीवति मद्व्यापारे सतीति शेषः स मया न दृष्टः॥३०॥

गो० टी०–बलमिति । मया दृष्टो मुहूर्तमपि न जीवतीत्येतत् मद्वचनं बलं न खलु बलप्रकाशनं न भवति । किन्तु निसर्गतः स्वभावतः सिद्धा मर्यादा एषा । अनादिसृष्टिरेवंविधेत्यर्थः । उक्तमर्थमुपसंहरति स दृष्ट इति ॥ ३१ ॥

३१-३२] ति० टी०–तं मृत्युम् । एनमयमहं निहन्मीत्यन्वयः ॥ ३१ ॥ ३२ ॥

३३-३५] ति० टी०–मूर्तिमान्स्थितः । यस्य पार्श्वे इत्यनुषङ्गः ॥ ३३–३५ ॥

रा० टी०–तस्येति । त्वं तिष्ठ अहमेव निहन्मि इति वचनं धर्मराजो मृत्युमब्रवीत् ॥ ३१ ॥

रा० टी०–तत इति । वैवस्वतायः यस्य पार्श्वे कालपाशाः सुनिहिता[1] मुद्गरश्च स्थितः यो दर्शनादेव प्राणिनां प्राणानपकर्षति स्पृश्यमानस्य पात्यमानस्य वापकर्षतीति किं वक्तव्यं तं कालदंडं पाणिना तोलयामास उत्थाप्य जग्राहेत्यर्थः श्लोकत्रयमेकान्वयि ॥ ३२–३४ ॥

रा० टी०–स इति । ज्वालैव परिवारो यस्य सः तेन यमेन स्पृष्टः महाप्रहरणः स कालदण्डो राक्षसं निर्दहन्निवास्फुरत् ॥ ३५ ॥

गो० टी०–तस्येति । अयमेनं निहन्म्यहम् अहमेनमयं निहन्मि । अविलम्बेन हन्मीत्यर्थः ॥ ३२–४० ॥

३६] ति० टी०–तस्मात्कालदण्डात्त्रस्तास्तत्र रणाजिरे वर्तमानाः सर्वे प्राणिनो विदुद्रुवुः । दण्डोद्यतमुद्यतदण्डम्॥३६॥

रा० टी०–तत इति । ततः तस्मादण्डात् त्रस्ताः सर्वे राक्षसा विदुद्रुवुः सुरा अपि दण्डोद्यतं यमं दृष्ट्वा क्षुभिताः३६

३७] ति० टी०–पितामहो यमं साक्षादर्शयित्वा स्वदिव्यमूर्त्या प्रत्यक्षो भूत्वा ॥ ३७ ॥

रा० टी०–तस्मिन्निति । दण्डेन यमे रावणं प्रहर्तुकामे सति पितामहो यमं दर्शयित्वा आत्मानमिति शेषः इदमब्रवीत् ॥ ३७ ॥

३८] ति० टी०–नञ्द्वयेन न हन्तव्यो न हन्तव्य इत्याद्वृत्तिः ॥ ३८ ॥

रा० टी०–तदाकारमाह—वैवस्वतेति । हे न पापिबन्धक नः पुमान्सुगते बन्धे इति मेदिनी किंच हे अन सर्वशुद्धिकर्तृत्वेन सर्वरक्षक हे वैवस्वत एतेन दण्डेन एष निशाचरः त्वया न हन्तव्यः ॥ ३८ ॥

३९] ति० टी०–वरो देवगणावध्यत्वरूपः ॥ ३९ ॥

रा० टी०–तत्र हेतुमाह—वर इति । अस्मै मया वरो देवादीनामवध्यत्वं दत्तः स वरः त्वया अनृतो न कार्यः अत एव यत् सुप्रयत्नं वचो मया व्याहृतम् ॥ ३९ ॥

४०] ति० टी०–अनृतमनृतवचनं कुर्यात् । मदाज्ञामुल्लङ्घयेति शेषः । त्रैलोक्यमिति । सर्वसमष्टित्वान्ममेति भावः ॥ ४० ॥

रा० टी०–अनृतकरणे दोषमाह—य इति । यो मामनृतं कुर्यात् तेन त्रैलोक्यमनृतं स्यात् ॥ ४० ॥

गो० टी०–यो हीति । अनृतमसत्यवादिनं कुर्यात् । मृत्युपुरस्कृतः मृत्युना पुरस्कृतः । बहुव्रीहिश्च ॥ ४१–४४ ॥

४१] ति० टी०–ननु त्वदत्तवरतया तव प्रियो यदि रावणस्तर्हि मुक्तोऽपि कालदण्डः किं कुर्यात्तत्राह—क्रुद्धेनेति । प्रियाप्रिये । समाहारद्वन्द्वः । मत्प्रियाप्रियप्राणिविषये क्रुद्धेन त्वयायं विप्रमुक्तः स्वविषयभूतास्ताः सर्वाः प्रजा निर्विशेषं यथा भवति तथा संहरत एव ॥ ४१ ॥

रा० टी०–ननु भवद्वरप्रदानप्रभावादेवायं रावणं न प्रहरिष्यतीत्यत आह—क्रुद्धेनेति । क्रुद्धेन त्वया विप्रमुक्तोयं दण्डः प्रियाप्रिये निर्विशेषं यथा भवति तथा प्रजाः संहरते संहरिष्यति ॥ ४१ ॥

---

१ सुनिहिता इति रा. निखिला इति गो. पा. । २ अयेति गो. रा. पा. । ३ स्पृश्येति गो. रा. पा. । ४ त्वया तेनेति गो. पा. ।

अमोघो ह्येष सर्वेषां प्राणिनाममितप्रभः कालदण्डो मया सृष्टः सर्वे मृत्युपुरस्कृतः ॥ ४२ ॥
तन्न खल्वेष ते सौम्य पात्यो रावणमूर्धनि नह्यस्मिन्पतिते कश्चिन्मुहूर्तमपि जीवति ॥ ४३ ॥
यदि ह्यस्मिन्निपतिते न म्रियेतैष राक्षसः म्रियते वा दशग्रीवस्तदाप्युभयतोऽनृतम् ॥ ४४ ॥
तन्निवर्तय लङ्केशादण्डमेतं समुद्यतम् सत्यं च मां कुरुष्वाद्य लोकांस्त्वं यद्यवेक्षसे॥४५॥
एवमुक्तस्तु धर्मात्मा प्रत्युवाच यमस्तदा एष व्यावर्तितो दण्डः प्रभविष्णुर्हि नो भवान्॥ ४६ ॥
किं त्विदानीं मया शक्यं कर्तुं रणगतेन हि न मया यद्ययं शक्यो हन्तुं वरपुरस्कृतः ॥ ४७ ॥
एष तस्मात्प्रणश्यामि दर्शनादस्य रक्षसः इत्युक्त्वा सरथः साश्वस्तत्रैवान्तरधीयत ॥ ४८ ॥
दशग्रीवस्तु तं जित्वा नाम विश्राव्य चात्मनः आरुह्य पुष्पकं भूयो निष्क्रान्तो यमसादनात्॥४९॥
स तु वैवस्वतो देवैः सह ब्रह्मपुरोगमैः जगाम त्रिदिवं हृष्टो नारदश्च महामुनिः ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

४२-४३] ति० टी०-सर्वेषां प्राणिनां ब्रह्मसृष्टप्राणिमात्रस्य विनिपातन इत्यर्थः । सर्वमृत्युपुरस्कृतः । तत्पुरुषो बहुव्रीहिश्च ॥ ४२ ॥ ४३ ॥

रा० टी०-अमोघ इति । यतस्मर्वमृत्युपुरस्कृतः सर्वेषां मृत्युकारीत्यर्थः कालदण्डो मया सृष्टः अत एष दण्डः सर्वेषां प्राणिनाममोघः मिथ्याफलको न स सर्वलक्ष्यान्हनिष्यतीत्यर्थः ॥ ४२ ॥

रा० टी०-तदिति । तदुक्तहेतोः एष दण्डः रावणमूर्द्धनि न पात्यः हि यतस्तस्मिन् दण्डे पतिते सति मुहूर्तमपि न जीवति ॥ ४३ ॥

गो० टी०-यदीति । उभयतोऽनृतं मया कालदण्डस्य मोघत्वसंपादने दण्डस्यानृतत्वं रक्षोमरणोपेक्षणे वरवचनस्यानृतत्वमिति ॥ ४५ ॥ ४६

४४-४५] ति० टी०-उभयत इति । दण्डपातेऽपि रावणजीवने दण्डस्यानृतत्वं रक्षोमरणे मदुक्तवरवचनस्यानृतत्वमित्यर्थः ॥ ४४ ॥ ४५ ॥

रा० टी०-यदीति । अस्मिन्दण्डे निपतिते सति राक्षसो दशग्रीवः न म्रियेत म्रियते वा उभयतोपि अनृतं मरणे वरस्यानृतत्वममरणे दंडप्रभावस्यानृतत्वमिति तात्पर्यम् ॥४४॥

रा० टी०-तदिति । यदि लोकान् अवेक्षसे तदा समुद्यतमेतं दण्डं लंकेशान्निवर्तय अत एव मां सत्यं कुरुष्व ॥४५॥

४६] ति० टी०-प्रभविष्णुः स्वामी ॥ ४६ ॥

रा० टी०-एवमिति । एवमुक्तः धर्मात्मा यमः प्रत्युवाच तदाकारमाह यतो भवान्नोस्माकं प्रभविष्णुः अत एष नो दण्डो भवता व्यावर्त्ति ॥ ४६ ॥

गो० टी०-एवमिति । प्रभविष्णुः स्वामी ॥ ४७ ॥

४७] ति० टी०-यतो मया हन्तुं न शक्यस्तस्मादिदानीं मया किं तु कर्तुं शक्यं योग्यम । इति संचिन्त्येति शेषः॥४७॥

रा० टी०-निवर्तने हेतुमाह—किमिति । यदि वरपुरस्कृतोयं रावणः मया हन्तुं न शक्यः तर्हि रणगतेन मया किं कर्तुं शक्यम् न किमपीत्यर्थः ॥ ४७ ॥

गो० टी०-किंत्विति । यस्मान्मया न हन्तव्यस्तस्मादिदानीं मया किंतु शक्यं कर्तुमिति । संचिन्त्येति शेषः ॥४८॥

४८] ति० टी०-अस्य रक्षसो दर्शनाच्चक्षुष्पथात्प्रणश्यामीत्युक्त्वा । ब्रह्माणमिति शेषः ॥ ४८ ॥

रा० टी०-एष इति । तस्मादण्डप्रक्षेपाभावाद्धेतोः रक्षसो दर्शनादर्शनं परित्यज्य एषोहं प्रणश्यामि अदृश्यो भवामि इत्युक्त्वा रथादिसहितो यमः तत्रैवान्तरधीयत ॥ ४८ ॥

गो० टी०-अस्य रक्षसो दर्शनादर्शनपथात् । एष इति । प्रणश्यामि "णश, अदर्शने" अन्तर्हितो भविष्यामीत्यर्थः । इत्युक्त्वेति ब्रह्माणमिति शेषः ॥ ४९ ॥ ५० ॥

४९] ति० टी०-तं जित्वा । भगवत्कृपयेति शेषः॥४९॥

रा० टी०-दशग्रीव इति । दशग्रीवः तं यमं जित्वा आत्मनो नाम विश्राव्य च पुष्पकमारुह्य यमसदनान्निष्क्रान्तोऽभवदिति शेषः ॥ ४९ ॥

५०] ति० टी०-हृष्टः । ब्रह्मणः सत्यपरिपालनं संवृत्तमिति यमादीनां हर्षः ॥ ५० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

रा० टी०-स इति । ब्रह्मा पुरोगमो येषां तैर्देवैस्सह वैवस्वतो नारदश्च त्रिदिवं जगाम ॥ ५० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

गो० टी०-स त्विति । वैवस्वतः ब्रह्मपुरोगमैर्देवैः हृष्टः अभूदिति शेषः ॥ ५१ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

१ पूर्वमिति गो. पा. । २ लङ्केशमिति गो. पा. । ३ त्विति गो. पा. ।

त्रयोविंशः सर्गः ।

ततो रावणो वरुणालयं गत्वा तं प्रचेतसमपि जिगाय ।

ततो जित्वा दशग्रीवो यमं त्रिदशपुंगवम् । रावणस्तु रणश्लाघी स्वसहायान्ददर्श ह ॥ १ ॥
ततो रुधिरसिक्ताङ्गं प्रहारैर्जर्जरीकृतम् । रावणं राक्षसा दृष्ट्वा विस्मयं समुपागमन् ॥ २ ॥
जयेन वर्धयित्वा च मारीचप्रमुखास्ततः । पुष्पकं भेजिरे सर्वे सान्त्विता रावणेन तु ॥ ३ ॥
ततो रसातलं रक्षः प्रविष्टः पयसां निधिम् । दैत्योरगगणाध्युष्टं वरुणेन सुरक्षितम् ॥ ४ ॥
स तु भोगवतीं गत्वा पुरीं वासुकिपालिताम् । कृत्वा नागान्वशे हृष्टो ययौ मणिमयीं पुरीम् ॥ ५ ॥
निवातकवचास्तत्र दैत्या लब्धवरा वसन् । राक्षसस्तान्समागम्य युद्धाय समुपाह्वयत् ॥ ६ ॥
ते तु सर्वे सुविक्रान्ता दैतेया बलशालिनः । नानाप्रहरणास्तत्र प्रहृष्टा युद्धदुर्मदाः ॥ ७ ॥
शूलैस्त्रिशूलैः कुलिशैः पट्टिशासिपरश्वधैः । अन्योन्यं विभिदुः क्रुद्धा राक्षसा दानवास्तथा ॥ ८ ॥
तेषां तु युध्यमानानां साग्रः संवत्सरो गतः । न चान्यैतरतस्तत्र विजयो वा क्षयोऽपि वा ॥ ९ ॥
ततः पितामहस्तत्र त्रैलोक्यगतिरव्ययः । आजगाम द्रुतं देवो विमानवरमास्थितः ॥ १० ॥
निवातकवचानां तु निवार्य रणकर्म तत् । वृद्धः पितामहो वाक्यमुवाच विदितार्थवत् ॥ ११ ॥
नह्ययं रावणो युद्धे शक्यो जेतुं सुरासुरैः । न भवन्तः क्षयं नेतुमपि सामरदानवैः ॥ १२ ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–यमपुराद्गमनानन्तरकालिकं रावणवृत्तान्तमाह—तत इत्यादिभिः । दशग्रीवो रावणस्तु यमं जित्वा स्वसहायान्ददर्श ॥ १ ॥

गो० टी०–तत इति । दृष्टवत् यमादपि कथं चिन्मुक्ता इति हृष्टाः सन्तः ॥ १ ॥ २ ॥

२–३] ति० टी०–विस्मयमिति । यमादपि मुक्त इति विस्मयः ॥ २ ॥ ३ ॥

रा० टी०–तत इति । रुधिरसिक्ताङ्गं रावणं दृष्ट्वा राक्षसा विस्मयं समुपागमन् ॥ २ ॥

रा० टी०–जयेनेति । रावणेन सान्त्विताः मारीचप्रमुखाः पुष्पकं भेजिरे ॥ ३ ॥

४] ति० टी०–रसातलं जिगमिषुः पयसां निधिं प्रविष्टः । मार्गवशादिति शेषः । अध्युष्टमध्युषितम् ॥ ४ ॥

रा० टी०–तत इति । रक्षो रावणो रसातलं प्रवेष्टुमिति शेषः दैत्यादिभिरध्युष्टमध्युषितं पयसां निधिं प्रविष्टः ॥ ४ ॥

गो० टी०–तत इति । रसातलं गच्छन् पयसां निधिं प्रविष्टः । मार्गवशादिति शेषः ॥ ४ ॥

५] ति० टी०–भोगवती समुद्रादधःपाताललोकवर्तिनी नागानां पुरी । तस्यां नागान्वशे कृत्वा स्वीयत्वेन स्थापयित्वा ॥ ५ ॥

रा० टी०–स इति । स रावणः भोगवतीं पुरीं गत्वा नागान्वशे कृत्वा मणिमयीं पुरीं ययौ ॥ ५ ॥

गो० टी०–स त्विति । भोगवती नाम समुद्रादधःपाताललोकवर्तिनी नागपुरी । तत्र नागान् स्ववशे कृत्वा स्वीयत्वेन स्थापयित्वा ॥ ५ ॥

६–१०] ति० टी०–वसन्नित्यडभावः आर्षः । लब्धवराः । ब्रह्मणः सकाशादिति भावः । अत एवाग्रे भगवता तैः सह रावणस्य सख्यकारणम् ॥ ६–१० ॥

रा० टी०–निवातेति । तत्र मणिमयपुरे निवातकवचाः वसन् अवसन् राक्षसो रावणः तान्निवातकवचान् युद्धाय समुपाह्वयत् ॥ ६ ॥

रा० टी०–ते इति । दैतेयाः ते निवातकवचाः प्रहृष्टाः बभूवुः इति शेषः ॥ ७ ॥

रा० टी०–शूलैरिति । राक्षसा दानवाश्च शूलादिभिः अन्योन्यं विभिदुः ॥ ८ ॥

रा० टी०–तेषामिति । युयुध्यमानानां तेषां साग्रः किञ्चिदधिकस्सम्वत्सरो गतः तत्र तस्मिन्सम्वत्सरे अन्यतरतः अन्यतरस्य राक्षसस्य दानवस्य वा विजयः क्षयः पराभवो वा नाभवदिति शेषः ॥ ९ ॥

रा० टी०–तत इति । पितामहो द्रुतमाजगाम ॥ १० ॥

गो० टी०–निवातेति । वसन् अवसन् । लब्धवराः । ब्रह्मण इति शेषः ॥ ६ ॥ १० ॥

११–१२] ति० टी०–वृद्धोऽनादिवृद्धः । सर्वदेवासुरकूटस्थ इत्यर्थः । विदितार्थवत्सुस्पष्टावगताभिधेयम् ॥११॥१२॥

रा० टी०–निवातेति । पितामहः निवातकवचानां रणकर्म निवार्य विदितार्थवत्प्रसिद्धार्थविशिष्टं वाक्यमुवाच ॥११॥

रा० टी०–तदाकारमाह—नहीति । अयं रावणः सुरा-

१ दृष्टवदिति गो. पा. । २ गच्छन्निति गो. पा. । ३ राक्षसानिति गो. पा. । ४ अन्यतरयोरिति गो. पा. ।

राक्षसस्य सखित्वं च भवद्भिः सह रोचते । अविभक्ताश्च सर्वार्थाः सुहृदां नात्र संशयः ॥ १३ ॥
ततोऽग्निसाक्षिकं सख्यं कृतवांस्तत्र रावणः । निवातकवचैः सार्धं प्रीतिमानभवत्तदा ॥ १४ ॥
अर्चितस्तैर्यथान्यायं संवत्सरमथोषितः । स्वपुरान्निर्विशेषं च प्रियं प्राप्तो दशाननः ॥ १५ ॥
तत्रोपधार्य मायानां शतमेकं समाप्तवान् । सलिलेन्द्रपुरान्वेषी भ्रमति स्म रसातलम् ॥ १६ ॥
ततोऽश्मनगरं नाम कालकेयैरधिष्ठितम् । गत्वा तु कालकेयांश्च हत्वा तत्र बलोत्कटान् ॥ १७ ॥
शूर्पणख्याश्च भर्तारमसिना प्राच्छिनत्तदा । श्यालं च बलवन्तं च विद्युज्जिह्वं बलोत्कटम् ॥ १८ ॥
जिह्वया संलिहन्तं च राक्षसं समरे तदा । तं विजित्य मुहूर्तेन जघ्ने दैत्यांश्चतुःशतम् ॥ १९ ॥
ततः पाण्डुरमेघाभं कैलासमिव भास्वरम् । वरुणस्यालयं दिव्यमपश्यद्राक्षसाधिपः ॥ २० ॥
क्षरन्तीं च पयस्तत्र सुरभिं गामवस्थिताम् । यस्याः पयोभिर्निष्पन्दात्क्षीरोदो नाम सागरः॥२१॥
ददर्श रावणस्तत्र गोदृपेन्द्रवरारणिम् । यस्माच्चन्द्रः प्रभवति शीतरश्मिर्निशाकरः ॥ २२ ॥
यं समाश्रित्य जीवन्ति फेनपाः परमर्षयः । अमृतं यत्र चोत्पन्नं स्वधा च स्वधभोजिनाम्॥२३॥
यां ब्रुवन्ति नरा लोके सुरभिं नाम नामतः । प्रदक्षिणं तु तां कृत्वा रावणः परमाद्भुताम् ॥
प्रविवेशमहाघोरं गुप्तं बहुविधैर्बलैः ॥ ॥ २४ ॥

सुरैरपि जेतुं न शक्यः अत एव सामरदानवैः अमरदानवसहितैः लोकैस्सहिता भवन्तः क्षयं नेतुं न शक्ताः इति शेषः॥१२॥

गो० टी०–निवातेति । दृढः सर्वदेवासुरकूटस्थः। विदितार्थवत् वाक्यमित्यन्वयः ॥ ११ ॥ १२ ॥

१३] ति० टी०–रोचते । कर्तव्यत्वेन ममेति शेषः । सख्यफलमाह—**अविभक्ताश्चेति** । सर्वार्था धनधान्यादिसमस्तभोगोपकरणपदार्था जयाजयाद्यभिमानाश्च सुहृदामविभक्ताः साधारणभूताः ॥ १३ ॥

रा० टी०–**राक्षसस्येति** । भवद्भिस्सह राक्षसस्य सखित्वं रोचते अस्मभ्यमिति शेषः च यतः सुहृदां सर्वार्थाः अविभक्ताः विभक्तुमनर्हाः एतेन सखित्वे सति युद्धकारणं नङ्क्ष्यतीति सूचितम् ॥ १३ ॥

गो० टी०–**राक्षसस्येति** । रोचते । कर्तव्यत्वेन ममेति शेषः । सख्यप्रयोजनं दर्शयति—अविभक्ता इति ॥ १३ ॥ १६ ॥

१४–१५] ति० टी०–ततो भगवद्वचनानन्तरम्१४॥१५

रा० टी०–**तत इति** । रावणः निवातकवचैस्सार्द्धं सख्यं कृतवान् अत एव प्रीतिमानभवत् ॥ १४ ॥

रा० टी०–**अर्चित इति** । तैर्निवातकवचैरर्चितो दशाननः सम्वत्सरमुषितः स्वपुरान्निर्विशेषं प्रियं प्राप्तश्च ॥ १५ ॥

१६–१७] ति० टी०–उपधार्य सखित्वेनानुसृत्य । समाप्तवान्प्राप्तवान् ॥ १६ ॥ १७ ॥

१८] ति० टी०–श्यालत्वादिगुणकमपि विद्युज्जिह्वमच्छिनत् । श्यालोऽत्र भगिनीपतिः ॥ १८ ॥

१९–२०] ति० टी०–नृशंसत्वाद्रावणीयान्राक्षसाज्जिह्वया संलिहन्तमास्वादयन्तम् । भक्षयन्तमिति यावत् १९॥२०

रा० टी०–**तत्रेति** । तत्र मणिमयपुरे उपधार्य मायानां निवातकवचानामेकं शतं समाप्तवान् साहाय्यार्थं गृहीतवान् रावणः सलिलेन्द्रस्य वरुणस्य पुरान्वेषी सन् रसातलं भ्रमति स्म॥१६॥

गो० टी०–**तत इति** । उपधार्य अनुसृत्य मायानामसुरमायायोगविद्यानाम् ॥ १६ ॥

रा० टी०–**तत इति** । कालकेयैरधिष्ठितमश्मनाम नगरं गत्वा तत्र कालकेयान् हत्वा शूर्पनख्याः भर्तारं विद्युज्जिह्वं श्यालं च असिना प्राच्छिनत् तं कालकेयं विजित्य मुहूर्तेन चतुश्शतान् ? दैत्यान् जघ्ने श्लोकत्रयमेकान्वयि ॥ १७–१९ ॥

रा० टी०–**तत इति** । राक्षसाधिपः वरुणस्यालयमपश्यत् ॥ २० ॥

रा० टी०–**तत इत्यादि**श्लोकचतुष्कमेकं वाक्यम् । श्यालस्य च्छेद निमित्तमाह । राक्षसान् स्वकीयान् जिह्वया संलिहन्तमास्वादयन्तं भक्षयन्तमिति यावत् ॥ १७—२१ ॥

२१] ति० टी०–तत्र वरुणालये स्थितां सुरभिं गां चापश्यदित्यनुकर्षः—**सागर इति** । समभवदिति शेषः॥२१॥

रा० टी०–**क्षरन्तीमिति** । यस्याः पयोभिर्निष्यन्दात् पयःप्रस्रवात् यस्मात्सागरात् चन्द्रः प्रभवति यं संसृत्य फेनपाः परमर्षयो जीवन्ति यत्रामृतं स्वधभोजिनां स्वधा चोत्पन्नं स क्षीरोदो नाम सागरोऽभवत् यां नामतस्सुरभिं ब्रुवन्ति तां पयः क्षरन्तीं गोदृपेन्द्रस्य महादृपस्य वरारणिं मातरमवस्थितां सुरभिं ददर्श सार्द्धश्लोकत्रयमेकान्वयि ॥ २१–२३ ॥

गो० टी०–**क्षरन्तीमिति** । सुरभिमित्यत्रापि अपश्यदित्यनुकर्षः । सागर इति । समभवदिति शेषः ददर्शेति । गोदृपेन्द्रस्य रुद्रदृपभस्य वरारणिं साक्षान्मातरम् । यस्माच्चन्द्र इति । इन्दूत्पादकः क्षीरसमुद्र इत्यर्थः । एवमुत्तरत्रापि यच्छब्दा व्याख्येयाः ॥ २२ ॥

२२]ति० टी०–गोदृपेन्द्रो महादृपस्तस्य वरारणिं साक्षान्मातरम् । यस्माच्चन्द्र इति । यदुत्पादितक्षीरसमुद्रादित्यर्थः २२

२३–२४] ति० टी०–यं क्षीरसमुद्रम् । स्वधभोजिना-

१ अर्थते इति गो. पा. । २ ततोपधार्येति गो. पा. । ३ तथेति गो. पा. । ४ निष्यंदादिति गो. पा. ।

ततो धाराशतार्कीर्णं शारदाभ्रनिभं तदा । नित्यप्रहृष्टं ददृशे वरुणस्य गृहोत्तमम् ॥ २५ ॥
ततो हत्वा बलाध्यक्षान्समरे तैश्च ताडितः । अब्रवीच्च ततो योधान्राजा शीघ्रं निवेद्यताम् ॥२६॥
युद्धार्थी रावणः प्राप्तस्तस्य युद्धं प्रदीयताम् । वद वा नभयं तेऽस्ति निर्जितोऽस्मीति साञ्जलिः॥२७॥
एतस्मिन्नन्तरे क्रुद्धा वरुणस्य महात्मनः । पुत्राः पौत्राश्च निष्कामन्गौश्च पुष्कर एव च॥ २८ ॥
ते तु तैत्र गुणोपेता बलैः परिवृताः स्वकैः । युक्त्वा रथान्कामगमानुद्यद्भास्करवर्चसः ॥ २९ ॥
ततो युद्धं समभवद्दारुणं रोमहर्षणम् । सलिलेन्द्रस्य पुत्राणां रावणस्य च धीमतः ॥ ३० ॥
अमात्यैश्च महावीर्यैर्दशग्रीवस्य रक्षसः । वारुणं तद्बलं सर्वं क्षणेन विनिपातितम् ॥ ३१ ॥
समीक्ष्य स्वबलं संख्ये वरुणस्य सुतास्तदा । अर्दिताः शरजालेन निवृत्ता रणकर्मणः ॥ ३२ ॥
महीतलगतास्ते तु रावणं दृश्य पुष्पके । आकाशमाशु विविशुः स्यन्दनैः शीघ्रगामिभिः॥३३॥
महदासीत्ततस्तेषां तुल्यं स्थानमवाप्य तत् । आकाशयुद्धं तुमुलं देवदानवयोरिव ॥ ३४ ॥
ततस्ते रावणं युद्धे शरैः पावकसंनिभैः । विमुखीकृत्य संहृष्टा विनेदुर्विविधान्रवान् ॥ ३५ ॥
ततो महोदरः क्रुद्धो राजानं वीक्ष्य धर्षितम् । त्यक्त्वा मृत्युभयं क्रुद्धो युद्धाकाङ्क्षी व्यलोकयत्॥३६॥
तेन ते वारुणा युद्धे कामगाः पवनोपमाः । महोदरेण गदया हतास्ते प्रययुः क्षितिम् ॥ ३७ ॥
तेषां वरुणसूनूनां हत्वा योधान्हयांश्च तान् । मुमोचाशु महानादं विरथान्प्रेक्ष्य तान्स्थितान् ॥३८॥
ते तु तेषां रथाः साश्वाः सह सारथिभिर्वरैः[6] । महोदरेण निहताः पतिताः पृथिवीतले ॥ ३९ ॥

मित्यार्षो ह्रस्वः स्वधाभोजिनां पितॄणाम् । स्वधा पितृभक्ष्यं कव्यम् । देवानाममृतवत् ॥ २३ ॥ २४ ॥

गो० टी०–यमित्यादि । स्वधभोजिनामिति ह्रस्वः आर्षः । स्वधाभोजिनां पितॄणाम् । स्वधा पितृभक्षं कव्यम् । धाराशताकीर्णं जलधाराशतैराकीर्णम् । निर्जितोस्मीति वद । एवं चेत्ते भयं नास्तीत्यब्रवीदिति निवेद्यतामित्यन्वयः ॥२३-२७॥

रा० टी०–प्रदक्षिणमिति । तां सुरभिं प्रदक्षिणं कृत्वा रावणो बलैर्गुप्तं वरुणालयं प्रविवेश ॥ २४ ॥

२५] ति० टी०–धाराशतैर्जलधाराशतैराकीर्णं व्याप्तम् प्रहृष्टं प्रहृष्टजनम् ॥ २५ ॥

रा० टी०–तत इति । ततः वरुणपुरप्रवेशानन्तरं धाराशतैः अनेकजलधाराभिराकीर्णं शारदाभ्रनिभं नित्यं प्रहृष्टं वरुणस्य गृहोत्तमं ददृशे ॥ २५ ॥

२६] ति० टी०–तैर्वरुणबलाध्यक्षैस्ताडितस्तांश्च समरे हत्वाभिताड्य ॥ २६ ॥

रा० टी०–तत इति । तैर्बलाध्यक्षैस्ताडितो रावणो बलाध्यक्षान् हत्वा सन्ताड्य अब्रवीत्तदाकारमाह राजा वरुणो निवेद्यतां मदागमनं बोध्यताम् ॥ २६

२७] ति० टी०–युद्धं वा दीयतां साञ्जलिर्निर्जितोऽस्मीति वा वद । एवं चेत्ते भयं नास्तीति रावणोऽब्रवीदिति वो राजा निवेद्यतामित्यन्वयः ॥ २७ ॥

रा० टी०–बोधनप्रकारमाह—युद्धार्थीति । युद्धार्थी रावणः प्राप्तस्तस्य रावणस्य युद्धं प्रदीयताम् साञ्जलिस्तन्निर्जितोस्मीति वद वा ततस्ते भयं न ॥ २७ ॥

२८-२९] ति० टी०–गौश्च पुष्करश्च पुत्राणां पौत्राणां च बलाध्यक्षौ ॥ २८ ॥ २९ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे समये वरुणस्य पुत्राः पौत्राश्च गौः पुष्करश्च तदभिधौ पुत्रपौत्रयोर्बलाध्यक्षौ च निष्कामन् निरक्रामन् ॥ २८ ॥

रा० टी०–ते इति । गुणैः शौर्यादिभिरुपेताः स्वकैर्बलैः परिवृताः ते वरुणस्य पुत्रपौत्राः उद्यद्भास्करवर्चसः रथान् युक्त्वा प्रायुरिति शेषः ॥ २९ ॥

गो० टी०–एतस्मिन्निति । गौश्च पुष्करश्चेति पुत्राणां पौत्राणां च बलाध्यक्षौ ॥ २८ ॥ ३३ ॥

३०] ति० टी०–वरुणपुत्राणां रावणस्य च रोमहर्षणं युद्धं समभवदित्यन्वयः ॥ ३० ॥

रा० टी०–तत इति । रोमहर्षणं युद्धं समभवत् ॥३०॥

३१] ति० टी०–रावणामात्यैश्च वारुणं बलं सर्वं पातितम् ॥ ३१ ॥

रा० टी०–अमात्यैरिति । दशग्रीवस्यामात्यैः वारुणं बलं विनिपातितम् ॥ ३१ ॥

३२-३३] ति० टी०–वरुणस्य सुताः प्रथमं महीतलगता एव रावणेन युद्धमकुर्वन् । तत्र रावणामात्यैराकाशस्थैर्निपातितं स्वबलं दृष्ट्वा तादृशयुद्धस्यानुरूपतां विचार्य युद्धान्निवृत्ता महीं त्यक्त्वा स्वयमप्याकाशमेव गता इत्यर्थः३२॥३३

रा० टी०–समीक्ष्येति । शरजालेनार्दिताः वरुणस्य सुताः स्वबलं निपातितमिति शेषः समीक्ष्य रणकर्मणो निवृत्ताः॥३२॥

रा० टी०–महीतलेति । महीतलगताः वरुणस्य सुताः रावणं पुष्पके दृश्य दृष्ट्वा स्यन्दनैराकाशमाविविशुः ॥ ३३ ॥

३४-३९] ति० टी०–तुल्यं स्थानमाकाशलक्षणम् । आकाशे युद्धमाकाशयुद्धम् ॥ ३४-३९ ॥

१ वीर्यैति गो. पाठः । २ भास्वरेति गो. पा. । ३ वीर इति गो. पा. । ४ दारुणा इति गो. पा. । ५ वै इति गो. पाठः । ६ हतैरिति गो. पा. ।

ते तु त्यक्त्वा रथान्पुत्रा वरुणस्य महात्मनः । आकाशे विष्ठिताः शूराः स्वप्रभावान्न विव्यथुः ४०
धनूंषि कृत्वा सज्जानि विनिर्भिद्य महोदरम् । रावणं समरे क्रुद्धाः सहिताः समवारयन् ॥ ४१ ॥
सायकैश्चापविभ्रष्टैर्वज्रकल्पैः सुदारुणैः । दारयन्ति स्म संक्रुद्धा मेघा इव महागिरिम् ॥ ४२ ॥
ततः क्रुद्धो दशग्रीवः कालाग्निरिव मूर्च्छितः । शरवर्षं महाघोरं तेषां मर्मस्वपातयत् ॥ ४३ ॥
मुसलानि विचित्राणि ततो भल्लशतानि च । पट्टिशांश्चैव शक्तीश्च शतघ्नीर्हेतीरपि ॥
पातयामास दुर्धर्षस्तेषामुपरि विष्ठितः । [अपविद्धास्तु ते वीरा विनिष्पेतुः पदातयः॥ ४४ ॥
ततस्तेनैव सहसा सीदन्ति स्म पदातिनः । महापङ्कमिवासाद्य कुञ्जराः षष्टिहायनाः ॥ ४५ ॥
सीदमानान्सुतान्दृष्ट्वा विह्वलान्सं महाबलः । ननाद रावणो हर्षान्महानम्बुधरो यथा ॥ ४६ ॥
ततो रक्षो महानादान्मुक्त्वा हन्ति स्म वारुणान् । नानाप्रहरणोपेतैर्धारापातैरिवाम्बुदः ॥ ४७ ॥
ततस्ते विमुखाः सर्वे पतिता धरणीतले । रणात्स्वपुरुषैः शीघ्रं गृहाण्येव प्रवेशिताः ॥ ४८ ॥
तानब्रवीत्ततो रक्षो वरुणाय निवेद्यताम् । रावणं त्वब्रवीन्मन्त्री प्रहासो नाम वारुणः ॥ ४९ ॥
गतः खलु महाराजो ब्रह्मलोकं जलेश्वरः । गान्धर्वं वरुणः श्रोतुं यं त्वमाह्वयसे युधि ॥ ५० ॥

रा० टी०–महदिति । तुल्यं स्थानमवाप्य विद्यमानानां तेषां तुमुलं महदाकाशयुद्धमासीत् ॥ ३४ ॥

रा० टी०–तत इति । ते वरुणस्य पुत्रपौत्राः शरैः रावणं विमुखीकृत्य विविधान् रवान् हर्षशब्दान् विनेदुः ॥ ३५ ॥

रा० टी०–तत इति । महोदरः राजानं रावणं घर्षितं वीक्ष्य मृत्युभयं त्यक्त्वा युद्धाकांक्षी सन् व्यलोकयत् ॥ ३६ ॥

रा० टी०–तेनेति । तेन महोदरेण ते वारुणाः हया योधाश्च गदया हता बभूवुरिति शेषः अत एव ते क्षिति प्रयुः ॥ ३७ ॥

रा० टी०–तेषामिति । वरुणसूनवां योधान् हयांश्च हत्वा तान् विरथान्प्रेक्ष्य चाशु महानादं मुमोच ॥ ३८ ॥

रा० टी०–ते इति । तेषां सारथिभिस्सह साश्वा रथा महोदरेण निहताः अत एव पृथिवीतले निपतिताः ॥ ३९ ॥

गो० टी०–महदिति । स्थानमाकाशरूपम् । आकाशे युद्धम् आकाशयुद्धम् ॥ ३४—३९ ॥

४०–४४] ति० टी०–आकाशे विष्ठिताः सहजदेवतात्वप्रयुक्तवैभवेनाकाश एव स्थिता न विव्यथुश्च व्यथिताश्च नाभवन् ॥ ४०–४४ ॥

रा० टी०–ते इति । वरुणस्य पुत्राः रथान् त्यक्त्वा स्वप्रभावादाकाशे विष्ठिता बभूवुरिति शेषः विव्यथुश्च न॥४०॥

गो० टी०–ते त्विति । स्वप्रभावात् देवतात्वप्रभावात् ॥ ४०—४९ ॥

रा० टी०–धनूंषीति । धनूंषि सज्जानि कृत्वा सहिता वरुणस्य पुत्राः रावणं समवारयन् ॥ ४१ ॥

रा० टी०–सायकैरिति । संक्रुद्धाः वारुणाः सायकैर्दारयन्ति स्म ॥ ४२ ॥

रा० टी०–तत इति । दशग्रीवः तेषां वारुणानां मर्मसु शरवर्षमपातयत् ॥ ४३ ॥

रा० टी०–मुसलानीति । विष्ठितः पुष्पके संस्थितो दशग्रीवः मुसलादीनि तेषां वारुणानामुपरि पातयामास सार्द्धश्लोक एकान्वयी ॥ ४४ ॥

गो० टी०–अपविद्धा इति । षष्टिहायनं परिमाणं येषां ते षष्टिहायनाः ॥ ४६–४९ ॥

४५] ति० टी०–तेनैव रावणप्रयुक्तशरवर्षेण । षष्टिहायनाः षष्टिवर्षाः ॥ ४५ ॥

रा० टी०–तत इति । तेन रावणास्त्रेण पदातिनः सीदन्ति स्म तत्र दृष्टान्तः महापंकमासाद्य कुञ्जरा इव ॥ ४५ ॥

४६] ति० टी०–सुतान्वरुणस्येति ॥ ४६ ॥

रा० टी०–सीदमानानिति । तान् वारुणान् सीदमानान् दृष्ट्वा रावणो ननाद ॥ ४६ ॥

४७–४८] ति० टी०–वारुणान्वरुणपुत्रान् ॥४७॥४८॥

रा० टी०–तत इति । रक्षो रावणो महानादान्मुक्त्वा नानाप्रहरणोपेतैः उपस्थितानेकप्रहरणैर्वारुणान् हन्ति स्म॥४७॥

रा० टी०–तत इति । ते वारुणाः धरणीतले पतिताः अत एव विमुखाः संग्रामाद्रहिताः अत एव स्वपुरुषैः गृहाण्येव प्रवेशिता बभूवुरिति शेषः ॥ ४८ ॥

४९–५०] ति० टी०–वारुणो वरुणस्यायम्॥४९॥५०॥

रा० टी०–तानिति । रक्षो रावणः वरुणाय निवेद्यतामिति वचः तान्वारुणानब्रवीत् प्रहासो नाम मन्त्री तु रावणमब्रवीत् ॥ ४९ ॥

रा० टी०–तदाकारमाह—गत इति । यं त्वमाह्वयसे स वरुणः गांधर्वं श्रोतुं ब्रह्मलोकं गतः ॥ ५० ॥

गो० टी०–तानिति । वरुणस्यायं वारुणः ॥ ५०–५४ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

---

१ अभिद्रवन्निति गो. पाठः । २ निर्गत इति गो. पाठः । ३ शरवर्षंमहाघोरैस्तेषां मर्मस्वताडयदिति गो. पाठः । ४ तोमरांस्तोथेति गो. पाठः । ५ अर्धमेतदधिकं गो. पु. । ६ इदमर्धं "मुसलानि विचित्राणीति" पथात्प्राग्गो. पुस्तके पठ्यते । ७ सुमहौजस इति गो. पाठः । ८ प्रहस्त इति गो.पा.।

तत्किं तव यथौ वीर परिश्रम्य गते नृपे । ये तु संनिहिता वीराः कुमारास्ते पराजिताः ॥५१ ॥
राक्षसेन्द्रस्तु तच्छ्रुत्वा नाम विश्राव्य चात्मनः । हर्षान्नादं विमुञ्चन्वै निष्क्रान्तो वरुणालयात् ॥५२ ॥
आगतस्तु पथा येन तेनैव विनिवृत्य सः । लङ्कामभिमुखो रक्षो नभस्तलगतो ययौ ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥[1]

५१–५३] ति० टी०–तत्तस्माद्धे वीर, नृपे तथागते इह तथा परिश्रम्य तव किम्, न किमपि ॥ ५१–५३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

रा० टी०–तदिति। ये सन्निहिताः वीराः ते त्वया पराजिताः ततस्तस्माद्धेतोः नृपे वरुणे गते सति परिश्रम्य परिश्रमं कृत्वा तव किं न किमपीत्यर्थः ॥ ५१ ॥

रा० टी०–राक्षसेन्द्र इति । राक्षसेन्द्रो रावणः तत्प्रहासोक्तं श्रुत्वा वरुणालयात् निष्क्रान्तो बभूवेति शेषः ॥५३॥

रा० टी०–आगत इति । नभस्तलगतः स रावणः येन पथा आगतः तेनैव विनिवृत्य लङ्कामभिमुखः सन् ययौ॥५४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

१ इत उत्तरं पञ्च सर्गाः प्रक्षिप्ताः क्वचिद्दृश्यन्ते—

ततोऽस्मनगरं भूयो विचेरुर्युद्धदुर्मदाः । यत्रापश्यद्दशग्रीवो गृहं परमभास्वरम् ॥ १ ॥
वैदूर्यतोरणाकीर्णं मुक्ताजालविभूषितम् । सुवर्णस्तम्भगहनं वेदिकाभिः समन्ततः ॥ २ ॥
वज्रस्फटिकसोपानं किङ्किणीजालसंवृतम् । बह्वासनयुतं रम्यं महेन्द्रभवनोपमम् ॥ ३ ॥
दृष्ट्वा गृहवरं रम्यं दशग्रीवः प्रतापवान् । कस्येदं भवनं रम्यं मेरुमन्दरसंनिभम् ॥ ४ ॥
गच्छ प्रहस्त शीघ्रं त्वं जानीष्व भवनोत्तमम् । एवमुक्तः प्रहस्तस्तु प्रविवेश गृहोत्तमम् ॥ ५ ॥
निःशून्यं प्रेक्षत वरं पुनः कक्ष्यान्तरं ययौ । सप्तकक्ष्यान्तरं गत्वा ततो ज्वालामपश्यत ॥ ६ ॥
ततो दृष्टः पुमांस्तत्र हृष्टो हासं मुमोच सः । श्रुत्वा स तु महाहासमूर्ध्वरोमाभवत्तदा ॥ ७ ॥
ज्वालामध्ये स्थितस्तत्र हेममाली विमोहितः । आदित्य इव दुष्प्रेक्ष्यः साक्षादिव यमः स्थितः ॥ ८ ॥
तथा दृष्ट्वा तु वृत्तान्तं त्वरमाणो विनिर्गतः । विनिर्गम्यात्रवीत्सर्वं रावणाय निशाचरः ॥ ९ ॥
अथ राम दशग्रीवः पुष्पकादवरुह्य सः । प्रवेष्टुमिच्छन्वेश्माथ भित्त्वाञ्जनचयोपमः ॥ १० ॥
चन्द्रमौलिर्वपुष्मांश्च पुरुषोऽस्याग्रतः स्थितः । द्वारमावृत्य सहसा ज्वालाजिह्वो भयानकः ॥ ११ ॥
रक्ताक्षश्चारुदशनो बिम्बोष्ठश्चारुदर्शनः । महाभीषणनासश्च कम्बुग्रीवो महाहनुः ॥ १२ ॥
रूढश्मश्रुर्निगूढास्थिर्दंष्ट्रालो लोमहर्षणः । गृहीत्वा लोहमुसलं द्वारं विष्टभ्य तिष्ठति ॥ १३ ॥
अथ संदर्शनात्तस्य ऊर्ध्वरोमा बभूव सः । हृदयं कम्पते चास्य वेपथुश्चाप्यजायत ॥ १४ ॥
निमित्तान्यमनोज्ञानि दृष्ट्वा राम व्यचिन्तयत् । अथ चिन्तयतस्तस्य स एव पुरुषोऽब्रवीत् ॥ १५ ॥
किं त्वं चिन्तयसे रक्षो ब्रूहि विस्रब्धमानसः । युद्धातिथ्यमहं वीर करिष्ये रजनीचर ॥ १६ ॥
एवमुक्त्वा स तद्रक्षः पुनर्वचनमब्रवीत् । योत्स्यसे बलिना सार्धमथवा मन्यसे कथम् ॥ १७ ॥
रावणोऽभिहितो भूय ऊर्ध्वरोमा व्यजायत । अथ धैर्यं समालम्ब्य रावणो वाक्यमब्रवीत् ॥ १८ ॥
गृहेषु तिष्ठते को हि तद्ब्रूहि वदतां वर । तेनैव सार्धं योत्स्यामि यथा वा मन्यते भवान् ॥ १९ ॥
स एनं पुनरप्याह दानवेन्द्रोऽत्र तिष्ठति । एष वै परमोदारः शूरः सत्यपराक्रमः ॥ २० ॥
वीरो बहुगुणोपेतः पाशहस्त इवान्तकः । बालार्क इव तेजस्वी समरेष्वनिवर्तकः ॥ २१ ॥
अमर्षी दुर्जयो जेता बलवान्गुणसागरः । प्रियंवदः संविभागी गुरुविप्रप्रियः सदा ॥ २२ ॥
कालाकाङ्क्षी महासत्त्वः सत्यवाक्सौम्यदर्शनः । दक्षः सर्वगुणोपेतः शूरः स्वाध्यायतत्परः ॥ २३ ॥
एष गच्छति वात्येष ज्वलते तपते तथा । देवैश्च भूतसङ्घैश्च पन्नगैश्च पतत्रिभिः ॥ २४ ॥
भयं यो नाभिजानाति तेन त्वं योद्धुमिच्छसि । बलिना यदि ते योद्धुं रोचते राक्षसेश्वर ॥ २५ ॥
प्रविश त्वं महासत्त्व सङ्गामं कुरु मा चिरम् । एवमुक्तो दशग्रीवः प्रविवेश यतो बलिः ॥ २६ ॥
स विलोक्याथ लङ्केशं जहास दहनोपमः । आदित्य इव दुष्प्रेक्ष्यः स्थितो दानवसत्तमः ॥ २७ ॥

१ कृतेति रा. गो. पाठः ।

अथ संदर्शनादेव बलिर्वै विश्वरूपवान् । स गृहीत्वा च तद्रक्षः उत्सङ्गे स्थाप्य चाब्रवीत् ॥ २८ ॥
दशग्रीव महाबाहो किं ते कामं करोम्यहम् । किमागमनकृत्यं ते ब्रूहि त्वं राक्षसेश्वर ॥ २९ ॥
एवमुक्तस्तु बलिना रावणो वाक्यमब्रवीत् । श्रुतं मया महाभाग बद्धस्त्वं विष्णुना पुरा ॥ ३० ॥
सोऽहं मोक्षयितुं शक्तो बन्धनात्त्वां न संशयः । एवमुक्ते ततो हासं बलिर्मुक्त्वैनमब्रवीत् ॥ ३१ ॥
श्रूयतामभिधास्यामि यत्त्वं पृच्छसि रावण । य एष पुरुषः श्यामो द्वारे तिष्ठति नित्यदा ॥ ३२ ॥
एतेन दानवेन्द्राश्च तथान्ये बलवत्तराः । वशं नीता बलवता पूर्वं पूर्वतराश्च ये ॥ ३३ ॥
बद्धः सोऽहमनेनैवं कृतान्तो दुरतिक्रमः । क एनं पुरुषो लोके वञ्चयिष्यति मानवः ॥ ३४ ॥
सर्वभूतापहर्ता वै य एष द्वारि तिष्ठति । कर्ता कारयिता चैव धाता च भुवनेश्वरः ॥ ३५ ॥
न त्वं वेद न चैवाहं भूतभव्यभवत्प्रभुः । कलिश्चैवैष कालश्च सर्वभूतापहारकः ॥ ३६ ॥
लोकत्रयस्य सर्वस्य हर्ता स्रष्टा तथैव च । संहरत्येष भूतानि स्थावराणि चराणि च ॥ ३७ ॥
पुनश्च सृजते सर्वमनाद्यन्तं महेश्वरः । इष्टं चैव हि दत्तं च हुतं चैव निशाचर ॥ ३८ ॥
सर्वमेव हि लोकेशो धाता गोप्ता न संशयः । नैवंविधं महद्भूतं विद्यते भुवनत्रये ॥ ३९ ॥
अहं त्वं चैव पौलस्त्य ये चान्ये पूर्ववत्तराः । नेता स्रष्टा पशुं रशनया यथा ॥ ४० ॥
वृत्रो दनुः शुकः शंभुर्निशुम्भः शुम्भ एव च । कालनेमिश्च प्राह्लादिः कूटो वैरोचनो मृदुः ॥ ४१ ॥
यमलार्जुनौ च कंसश्च केटभो मधुना सह । एते तपन्ति द्योतन्ति वान्ति वर्षन्ति चैव हि ॥ ४२ ॥
सर्वैः क्रतुशतैरिष्टं सर्वैस्तप्तं महत्तपः । सर्वे ते सुमहात्मानः सर्वे वै योगधर्मिणः ॥ ४३ ॥
सर्वैरैश्वर्यमासाद्य भुक्तं भोगैर्महत्तरैः । दत्तमिष्टमधीतं च प्रजाश्च परिपालिताः ॥ ४४ ॥
स्वपक्षेष्वनुगोप्तारः प्रहन्तारः परेष्वपि । सामरेष्वपि लोकेषु नैतेषां विद्यते समम् ॥ ४५ ॥
शरास्त्वभिजनोपेताः सर्वशास्त्रार्थपारगाः । सर्वविद्याप्रवेत्तारः सङ्ग्रामेष्वनिवर्तकाः ॥ ४६ ॥
सर्वैस्त्रिदशराज्यानि कारितानि महात्मभिः । युद्धे सुरगणाः सर्वे निर्जिताश्च सहस्रशः ॥ ४७ ॥
देवानामप्रिये सक्ताः स्वपक्षपरिपालकाः । प्रमत्ताश्चोपसक्ताश्च बालार्कसमतेजसः ॥ ४८ ॥
यैस्तु देवान्प्रधर्षेत[1] तदेषां विष्णुरीश्वरः । उपायपूर्वकं नाशं स वेत्ता भगवान्हरिः ॥ ४९ ॥
प्रादुर्भावं विकुरुते येनैतन्निधनं नयेत् । पुनरेवात्मनात्मानमधिष्ठाय स तिष्ठति ॥ ५० ॥
एवमेतेन देवेन दानवेन्द्रा महात्मना । ते हि सर्वे क्षयं नीता बलिनः कामरूपिणः ॥ ५१ ॥
समरे च दुराधर्षाः श्रूयन्ते येऽपराजिताः । तेऽपि नीता महद्भूताः कृतान्तबलचोदिताः ॥ ५२ ॥
एवमुक्त्वाथ प्रोवाच राक्षसं दानवेश्वरः । यदेतद्दृश्यते वीर चक्रं दीप्तानलोपमम् ॥ ५३ ॥
एतद्गृहीत्वा गच्छ त्वं मम पार्श्वं महाबल । ततोऽहं तव व्याख्यास्ये मुक्तिकारणमव्ययम् ॥ ५४ ॥
तत्कुरुष्व महाबाहो मा विलम्बस्व रावण । एतच्छ्रुत्वा गतो रक्षः प्रहर्षं च महाबलः ॥ ५५ ॥
यत्र स्थितं महादिव्यं कुण्डलं रघुनन्दन । लीलयोत्पाटनं चक्रे रावणो बलदर्पितः ॥ ५६ ॥
न च चालयितुं शक्तो रावणोऽभूत्कथंचन । लज्जया स पुनर्भूयो यत्नं चक्रे महाबलः ॥ ५७ ॥
उत्क्षिप्तमात्रे दिव्ये च पपात भुवि राक्षसः । छिन्नमूलो यथा शालो रुधिरौघपरिप्लुतः ॥ ५८ ॥
एतस्मिन्नन्तरे जज्ञे शब्दः पुष्पकसंभवः । राक्षसेन्द्रस्य सचिवैर्मुक्तो हाहाकृतो महान् ॥ ५९ ॥
ततो रक्षो मुहूर्तेन चेतनां लभ्य चोत्थितम् । लज्जावनतभूतं बलिर्वाक्यमुवाच हं ॥ ६० ॥
आगच्छ राक्षसश्रेष्ठ वाक्यं शृणु मयोदितम् । यत्त्वया चोद्यतं वीर कुण्डलं मणिभूषितम् ॥ ६१ ॥
एतद्धि पूर्वजस्यासीत्कर्णाभरणमीक्ष्यताम् । एतत्पतितवच्चैवमत्र भूमौ महाबल ॥ ६२ ॥
अन्यत्पर्वतसानौ हि पतितं कुण्डलादनु । मुकुटं वेदिसामीप्ये पतितं युध्यतो भुवि ॥ ६३ ॥
हिरण्यकशिपोः पूर्वं मम पूर्वपितामहात् । न तस्य कालो मृत्युर्वा न व्याधिर्न विहिंसकाः ॥ ६४ ॥
न दिवा मरणं तस्य न रात्रौ संध्ययोर्नहि । न शुष्केण न चार्द्रेण न च शस्त्रेण केनचित् ॥ ६५ ॥
विद्यते राक्षसश्रेष्ठ तस्य नास्त्रेण केनचित् । प्रह्लादेन समं चक्रे वादं परमदारुणम् ॥ ६६ ॥
तस्य वादे समुत्पन्ने धीरो लोकभयंकरः । सर्ववर्यस्य वीरस्य प्रह्लादस्य महात्मनः ॥ ६७ ॥
उत्पन्नो राक्षसश्रेष्ठ नृसिंहाकृतिरूपधृक् । दृष्टं च तेन रौद्रेण क्षुब्धं सर्वमशेषतः ॥ ६८ ॥
तत उद्धृत्य बाहुभ्यां नखैर्निन्ये यमक्षयम् । एष तिष्ठति द्वारस्थो वासुदेवो निरञ्जनः ॥ ६९ ॥

---

१ यस्तु देवान्प्रधर्षेत स एष इति गो॰ पाठः ।

तस्य देवाधिदेवस्य गदतो मे शृणुष्व ह । वाक्यं परमभावेन यदि ते वर्तते हृदि ॥ ७० ॥
इन्द्राणां च सहस्राणि सुराणामयुतानि च । ऋषीणां चैव मुख्यानां शतान्यब्दसहस्रशः ॥ ७१ ॥
वशं नीतानि सर्वाणि य एष द्वारि तिष्ठति । तस्य तद्वचनं श्रुत्वा रावणो वाक्यमब्रवीत् ॥ ७२ ॥
मया प्रेतेश्वरो दृष्टः कृतान्तः सह मृत्युना । पाशहस्तो महाज्वाल ऊर्ध्वरोमा भयानकः ॥ ७३ ॥
दंष्ट्रालो वियुजिह्वश्च सर्पट्यश्चिकरोमवान् । रक्ताक्षो भीमवेगश्च सर्वसत्त्वभयंकरः ॥ ७४ ॥
आदित्य इव दुष्प्रेक्ष्यः समरेष्वनिवर्तकः । पापानां शासिता चैव स मया युधि निर्जितः ॥ ७५ ॥
न च मे तत्र भीः काचिद्यथा वा दानवेश्वर । एनं तु नाभिजानामि तद्भवान्वक्तुमर्हति ॥ ७६ ॥
रावणस्य वचः श्रुत्वा बलिर्वैरोचनोऽब्रवीत् । एष त्रैलोक्यधाता च हरिर्नारायणः प्रभुः ॥ ७७ ॥
अनन्तः कपिलो जिष्णुर्नरसिंहो महाद्युतिः । क्रतुधामा सुधामा च पाशहस्तो भयानकः ॥ ७८ ॥
द्वादशादित्यसदृशः पुराणपुरुषोत्तमः । नीलजीमूतसंकाशः सुरनाथः सुरोत्तमः ॥ ७९ ॥
ज्वालामाली महाबाहो योगी भक्तजनप्रियः । एष धारयते लोकानेष वै सृजते प्रभुः ॥ ८० ॥
एष संहरते चैव कालो भूत्वा महाबलः । एष यज्ञश्च याज्यश्च चक्रायुधधरो हरिः ॥ ८१ ॥
सर्वदेवमयश्चैव सर्वभूतमयस्तथा । सर्वलोकमयश्चैव सर्वज्ञानमयस्तथा ॥ ८२ ॥
सर्वरूपी महारूपी बलदेवो महाभुजः । वीरहा वीर चक्षुष्मांस्त्रैलोक्यगुरुरव्ययः ॥ ८३ ॥
एनं मुनिगणाः सर्वे चिन्तयन्तीह मोक्षिणः । य एनं वेत्ति पुरुषं न च पापैर्विलिप्यते ॥ ८४ ॥
स्मृत्वा स्तुत्वा तथेष्ट्वा च सर्वमस्मादवाप्यते । एतच्छ्रुत्वा तु वचनं रावणो निर्ययौ तदा ॥ ८५ ॥
क्रोधसंरक्तनयन उद्यतास्त्रो महाबलः । तथाभूतं च तं दृष्ट्वा हरिर्मुसलधृक्प्रभुः ॥ ८६ ॥
नैनं हन्म्यधुना पापं चिन्तयित्वेति रूपधृक् । अन्तर्धानं गतो राम ब्रह्मणः प्रियकाम्यया ॥ ८७ ॥
न च तं पुरुषं तत्र पश्यते रजनीचरः । हर्षान्नादं विमुञ्चन्वै निष्क्रामन्वरुणालयात्
येनैव संप्रविष्टः स पथा तेनैव निर्ययौ ॥ ॥ ८८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ १ ॥

अथ संचिन्त्य लङ्केशः सूर्यलोकं जगाम ह । मेरुशृङ्गे वरे रम्ये उषित्वा तत्र शर्वरीम् ॥ १ ॥
पुष्पकं तत्समारुह्य रवेस्तुरगसंनिभम् । नानापातगतिर्दिव्यं विहारवियति स्थितम् ॥ २ ॥
यत्रापश्यद्रविं देवं सर्वतेजोमयं शुभम् । वरकाञ्चनकेयूररत्नाम्बरविभूषितम् ॥ ३ ॥
कुण्डलाभ्यां शुभाभ्यां तु भ्राजन्मुखविकासितम् । केयूरनिष्काभरणं रक्तमालावलम्बिनम् ॥ ४ ॥
रक्तचन्दनदिग्धाङ्गं सहस्रकिरणोज्ज्वलम् । तमादिदेवमादित्यमुच्चैःश्रवसवाहनम् ॥ ५ ॥
अनाद्यन्तममध्यं च लोकसाक्षिं जगत्पतिम् । तं दृष्ट्वा प्रवरं देवं रावणो रक्षसां वरः ॥ ६ ॥
स प्रहस्तमुवाचाथ रवितेजोबलार्दितः । गच्छामात्य वदस्वैनं निदेशान्मम शासनम् ॥ ७ ॥
युद्धार्थं रावणः प्राप्तो युद्धं तस्य प्रदीयताम् । निर्जितोऽस्मीति वा ब्रूहि पक्षमेकतरं कुरु ॥ ८ ॥
तस्य तद्वचनादक्षः सूर्यस्यान्तिकमागमत् । पिङ्गलं दण्डिनं चैव पश्यते द्वारपालकौ ॥ ९ ॥
ताभ्यामाख्याय तत्सर्वं रावणस्य विनिश्चयम् । तूष्णीमास्ते प्रहस्तस्तु तत्र तेजोंशुदीपितः ॥ १० ॥
दण्डी गतो रवेः पार्श्वं प्रणम्याख्यातवान्रवेः । श्रुत्वा तु सूर्यस्तद्वृत्तं दण्डिनो रावणस्य ह ॥ ११ ॥
उवाच वचनं धीमान्बुद्धिपूर्वं क्षपापहः । गच्छ दण्डिञ्जयस्वैनं निर्जितोऽस्मीति वा वद ॥ १२ ॥
यत्तेऽभिकाङ्क्षितं कार्षीः कंचित्कालं क्षपाचरम् । स गत्वा वचनात्तस्य राक्षसस्य महात्मनः ॥ १३ ॥
कथयामास तत्सर्वं सूर्योक्तवचनं तदा । स श्रुत्वा वचनं तस्य दण्डिनो राक्षसेश्वरः
घोषयित्वा जगामाथ स्वजयं राक्षसाधिपः ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ २ ॥

अथ संचिन्त्य लङ्केशः सोमलोकं जगाम ह । मेरुशृङ्गवरे रम्ये रजनीमुख्य वीर्यवान् ॥ १ ॥
अथ स्यन्दनमारूढो दिव्यस्रगनुलेपनः । अप्सरोगणमुख्येन सेव्यमानस्तु गच्छति ॥ २ ॥
रतिश्रान्तोऽप्सरोङ्केषु चुम्बितः स विबुध्यते । दृष्टस्तु पुरुषस्तेन दृष्ट्वा कौतूहलान्वितः ॥ ३ ॥

---

१ सोऽपश्यदिति गो. पाठः ।

अथापश्यदृषिं तत्र दृष्ट्वा चैवमुवाच तम् । स्वागतं तव देवर्षे कालेनैवागतो ह्यसि ॥ ४ ॥
कोऽयं स्यन्दनमारूढो ह्यप्सरोगणसेवितः । निर्लज्ज इव संयाति भयस्थानं न विन्दति ॥ ५ ॥
रावणेनैवमुक्तस्तु पर्वतो वाक्यमब्रवीत् । शृणु वत्स यथातत्त्वं वक्ष्ये चाहं महामते ॥ ६ ॥
अनेन निर्जिता लोका ब्रह्मा चैवाभितोषितः । एष गच्छति मोक्षाय सुसुखं स्थानमुत्तमम् ॥ ७ ॥
तपसा निर्जिता यद्वद्भवता राक्षसाधिप । प्रयाति पुण्यकृत्तद्वत्सोमं पीत्वा न संशयः ॥ ८ ॥
त्वं तु राक्षसशार्दूल शरः सत्यपराक्रमः । नैवेदृशेषु कुह्यन्ति बलिनो धर्मचारिषु ॥ ९ ॥
अथापश्यदथवरं महाकायं महौजसम् । जाज्वल्यमानं वपुषा गीतवादित्रनिःस्वनैः ॥ १० ॥
क्वैष गच्छति देवर्षे भ्राजमानो महाद्युतिः । किंनरैश्च प्रगायद्भिर्नृत्यद्भिश्च मनोरमम् ॥ ११ ॥
श्रुत्वा चैनमुवाचाथ पर्वतो मुनिसत्तमः । एष शरो रणे योद्धा सङ्ग्रामेष्वनिवर्तकः ॥ १२ ॥
युध्यमानस्तथैवैष प्रहारैर्जर्जरीकृतः । कृती शरो रणे जेता स्वाम्यर्थे त्यक्तजीवितः ॥ १३ ॥
सङ्ग्रामे निहतोऽमित्रैर्हत्वा च समरे बहून् । इन्द्रस्यातिथिरेवैष अथ वा यत्र गच्छति ॥ १४ ॥
नृत्यगीतपरैर्लोकैः सेव्यते नरसत्तमः । पप्रच्छ रावणो भूयः कोऽयं यात्यर्कसंनिभः ॥ १५ ॥
रावणस्य वचः श्रुत्वा पर्वतो वाक्यमब्रवीत् । य एष दृश्यते राजन्विमाने सर्वकाञ्चने ॥ १६ ॥
अप्सरोगणसंयुक्ते पूर्णचन्द्रनिभानने । सुवर्णदो महाराज विचित्राभरणाम्बरः ॥ १७ ॥
एष गच्छति शीघ्रेण यानेन तु महाद्युतिः । पर्वतस्य वचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ १८ ॥
एते वै यान्ति राजानो ब्रूहि त्वमृषिसत्तम । को ह्यत्र याचितो दद्यायुद्धातिथ्यं ममाद्य वै ॥ १९ ॥
तं ममाख्याहि धर्मज्ञ पिता मे त्वं हि धर्मतः । एवमुक्तः प्रत्युवाच रावणं पर्वतस्तदा ॥ २० ॥
स्वर्गार्थिनो महाराज नेते युद्धार्थिनो नृपाः । वक्ष्यामि ते महाभाग यस्ते युद्धं प्रदास्यति ॥ २१ ॥
स तु राजा महातेजाः सप्तद्वीपेश्वरो महान् । मांधातेत्यभिविख्यातः स ते युद्धं प्रदास्यति ॥ २२ ॥
पर्वतस्य वचः श्रुत्वा रावणो वाक्यमब्रवीत् । कुतोऽसौ तिष्ठते राजा तत्समाचक्ष्व सुव्रत ॥ २३ ॥
सोऽहं यास्यामि तत्रैव यत्रासौ नरपुंगवः । रावणस्य वचः श्रुत्वा मुनिर्वचनमब्रवीत् ॥ २४ ॥
युवनाश्वसुतो राजा मांधाता राजसत्तमः । सप्तद्वीपससुद्रान्तां जित्वेहाभ्यागमिष्यति ॥ २५ ॥
अथापश्यन्महाबाहुस्त्रैलोक्ये वरदर्पितः । अयोध्यायाः पतिं वीरं मांधातारं नृपोत्तमम् ॥ २६ ॥
सप्तद्वीपाधिपं यान्तं चन्दनेन विराजता । काञ्चनेन विचित्रेण माहेन्द्राभेण भास्वता ॥ २७ ॥
जाज्वल्यमानं रूपेण दिव्यगन्धानुलेपनम् । तमुवाच दशग्रीवो युद्धं मे दीयतामिति ॥ २८ ॥
एवमुक्तो दशग्रीवं प्रहस्येदमुवाच ह । यदि ते जीवितं नेष्टं ततो युद्धस्व राक्षस ॥ २९ ॥
मांधातुर्वचनं श्रुत्वा रावणो वाक्यमब्रवीत् । वरुणस्य कुबेरस्य यमस्यापि न विद्यथे ॥ ३० ॥
किं पुनर्मानुषात्त्वत्तो रावणो भयमाविशेत् । एवमुक्त्वा राक्षसेन्द्रः क्रोधात्संप्रज्वलन्निव ॥ ३१ ॥
आज्ञापयामास तदा राक्षसान्युद्धदुर्मदान् । अथ क्रुद्धास्तु सचिवा रावणस्य दुरात्मनः ॥ ३२ ॥
ववर्षुः शरजालानि क्रुद्धा युद्धविशारदाः । अथ राज्ञा बलवता कङ्कपत्रैः शिलाशितैः ॥ ३३ ॥
इषुभिस्ताडिताः सर्वे प्रहस्तशुकसारणाः । महोदरविरूपाक्षा ह्यकम्पनपुरोगमाः ॥ ३४ ॥
अथ प्रहस्तस्तु नृपमिषुवर्षैरवाकिरत् । अप्राप्तानेव तान्पर्वान्प्रचिच्छेद नृपोत्तमः ॥ ३५ ॥
भुशुण्डीभिश्च भल्लैश्च भिन्दिपालैश्च तोमरैः । नरराजेन दह्यन्ते तृणभारा इवाग्निना ॥ ३६ ॥
ततो नृपवरः क्रुद्धः पञ्चभिः प्रविभेद तम् । तोमरैश्च महावेगैः पुनः क्रौञ्चमिवाग्रिजः ॥ ३७ ॥
ततो सुहुर्भ्रामयित्वा सुदूरं यमसंनिभम् । प्राहरत्सोऽतिवेगेन राक्षसस्य रथं प्रति ॥ ३८ ॥
स पपात महावेगो सुदूरो वज्रसंनिभः । स तूर्णं पातितस्तेन रावणः शक्रकेतुवत् ॥ ३९ ॥
तदा स नृपतिः प्रीत्या हर्षोद्गतबलो बभौ । सकलेन्दुकलाः स्पृष्ट्वा यथाम्बु लवणाम्भसः ॥ ४० ॥
ततो रक्षोबलं सर्वं हाहाभूतमचेतनम् । परिवार्याथ तं तस्थौ राक्षसेन्द्रं समन्ततः ॥ ४१ ॥
ततश्चिरात्समाश्वस्य रावणो लोकरावणः । मांधातुः पीडयामास देहं लङ्केश्वरो भृशम् ॥ ४२ ॥
मूर्च्छितं तु नृपं दृष्ट्वा प्रहृष्टास्ते निशाचराः । चुक्रुशुः सिंहनादांश्च प्रक्ष्वेलन्तो महाबलाः ॥ ४३ ॥
लब्धसंज्ञो सुहूर्तेन अयोध्याधिपतिस्तदा । दृष्ट्वा तं मन्त्रिभिः शत्रुं पूज्यमानं निशाचरैः ॥ ४४ ॥
जातकोपो दुराधर्षश्चन्द्रार्कसदृशद्युतिः । महता शरवर्षेण पातयद्राक्षसं बलम् ॥ ४५ ॥
चापस्यैव निनादेन तस्य बाणरवेण च । संचचाल ततः सैन्यमुद्भूत इव सागरः ॥ ४६ ॥
तद्युद्धमभवद्घोरं नरराक्षससंकुलम् । अथाविष्टौ महात्मानौ नरराक्षससत्तमौ ॥ ४७ ॥

कार्मुकासिधरौ वीरौ वीरासनगतौ तदा । मांधाता रावणं चैव रावणश्चैव तं नृपम् ॥ ४८ ॥
क्रोधेन महताविष्टौ शरवर्षं मुमोचतुः । तौ परस्परसंक्षोभात्प्रहारैः क्षतविक्षतौ ॥ ४९ ॥
कार्मुकेऽस्त्रं समाधाय रौद्रमस्त्रममुञ्चत । आग्नेयेन तु मांधाता तदस्त्रं पर्यवारयत् ॥ ५० ॥
गान्धर्वेण दशग्रीवो वारुणेन च राजराट् । गृहीत्वा स तु ब्रह्मास्त्रं सर्वभूतभयावहम् ॥ ५१ ॥
वेदयामास मांधाता दिव्यं पाशुपतं महत् । तदस्त्रं घोररूपं तु त्रैलोक्यभयवर्धनम् ॥ ५२ ॥
दृष्ट्वा त्रस्तानि भूतानि स्थावराणि चराणि च । वरदानात्तु रुद्रस्य तपसाराधितं महत् ॥ ५३ ॥
ततः संकम्पते सर्वं त्रैलोक्यं सचराचरम् । देवाः संकम्पिताः सर्वे लयं नागाश्च संगताः ॥ ५४ ॥
अथ तौ मुनिशार्दूलौ ध्यानयोगादपश्यताम् । पुलस्त्यो गालवश्चैव वारयामास तं नृपम् ५५ ॥
सोपालम्भैश्च विविधैर्वाक्यैः राक्षससत्तमम् । तौ तु कृत्वा तदा प्रीतिं नरराक्षसयोस्तदा
संप्रस्थितौ सुसंहृष्टौ पथा येनैव चागतौ ५६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ २३ ॥

गताभ्यामथ विप्राभ्यां रावणो राक्षसाधिपः । दशयोजनसाहस्रं प्रथमं तु मरुत्पथम् ॥ १ ॥
यत्र तिष्ठन्ति नित्यं हि हंसाः सर्वगुणान्विताः । अथ ऊर्ध्वं तु गत्वा वै मरुत्पथमनुत्तमम् ॥ २ ॥
दशयोजनसाहस्रं तदेव परिगण्यते । तत्र संनिहिता मेघास्त्रिविधा नित्यशः स्थिताः ॥ ३ ॥
आग्नेयाः पक्षिणो ब्राह्मास्त्रिविधास्तत्र ते स्थिताः । अथ गत्वा तृतीयं तु वायोः पन्थानमुत्तमम् ॥ ४ ॥
नित्यं यत्र स्थिताः सिद्धाश्चारणाश्च मनस्विनः । दशैव तु सहस्राणि योजनानां तथैव च ॥ ५ ॥
चतुर्थं वायुमार्गं तु शीघ्रं गत्वा परंतप । वसन्ति यत्र नित्यस्था भूताश्च सविनायकाः ॥ ६ ॥
अथ गत्वा स वै शीघ्रं पञ्चमं वायुगोचरम् । दशैव च सहस्राणि योजनानां तथैव च ॥ ७ ॥
गङ्गा यत्र सरिच्छ्रेष्ठा नागा वै कुमुदादयः । कुञ्जरास्तत्र तिष्ठन्ति ये तु मुञ्चन्ति सीकरम् ॥ ८ ॥
गङ्गातोयेषु क्रीडन्ति पुण्यं वर्षन्ति सर्वशः । ततो रविकरभ्रष्टं वायुना पेशलीकृतम् ॥ ९ ॥
जलं पुण्यं प्रपतति हिमं वर्षति राघव । ततो जगाम षष्ठं स वायुमार्गं महाद्युते ॥ १० ॥
योजनानां सहस्राणि दशैव तु स राक्षसः । यत्रास्ते गरुडो नित्यं ज्ञातिबान्धवमत्कृतः ॥ ११ ॥
दशैव तु सहस्राणि योजनानां तथोपरि । सप्तमे वायुमार्गे च यत्रैते ऋषयः स्मृताः ॥ १२ ॥
अत ऊर्ध्वं तु गत्वा वै सहस्राणि दशैव तु । अष्टमं वायुमार्गं तु यत्र गङ्गा प्रतिष्ठिता ॥ १३ ॥
आकाशगङ्गा विख्याता आदित्यपथसंस्थिता । वायुना धार्यमाणा सा महावेगा महास्वना ॥ १४ ॥
अत ऊर्ध्वं प्रवक्ष्यामि चन्द्रमा यत्र तिष्ठति । अशीतिं तु सहस्राणि योजनानां प्रमाणतः ॥ १५ ॥
चन्द्रमास्तिष्ठते यत्र नक्षत्रग्रहसंयुतः । शतं शतसहस्राणि रश्मयश्चन्द्रमण्डलात् ॥ १६ ॥
प्रकाशयन्ति लोकांस्तु सर्वसत्त्वसुखावहाः । ततो दृष्ट्वा दशग्रीवं चन्द्रमा निर्दहन्निव ॥ १७ ॥
स तु शीताग्निना शीघ्रं प्रादहद्रावणं तदा । नासहंस्तस्य सचिवाः शीताग्निभयपीडिताः ॥ १८ ॥
रावणं जयशब्देन प्रहस्तोऽथैनमब्रवीत् । राजञ्शीतेन वध्यामो निवर्तामः इतो वयम् ॥ १९ ॥
चन्द्ररश्मिप्रतापेन रक्षसां भयमाविशत् । स्वभाव एष राजेन्द्र शीतांशोर्दहनात्मकः ॥ २० ॥
एतच्छ्रुत्वा प्रहस्तस्य रावणः क्रोधमूर्च्छितः । विस्फार्य धनुरुग्रम्य नाराचैस्तमपीडयत् ॥ २१ ॥
अथ ब्रह्मा तदागच्छत्सोमलोकं त्वरान्वितः । दशग्रीव महाबाहो साक्षाद्विश्रवसः सुत ॥ २२ ॥
गच्छ शीघ्रमितः सौम्य मा चन्द्रं पीडयस्व वै । लोकस्य हितकामो वै द्विजराजो महाद्युतिः ॥ २३ ॥
मन्त्रं च संप्रदास्यामि प्राणात्ययगतिर्यदा । यस्त्वेतं संस्मरेन्मन्त्रं नासौ मृत्युमवाप्नुयात् ॥ २४ ॥
एवमुक्तो दशग्रीवः प्राञ्जलिर्देवमब्रवीत् । यदि तुष्टोऽसि मे देव लोकनाथ महाव्रत ॥ २५ ॥
यदि मन्त्रश्च मे देयो दीयतां मम धार्मिक । यं जप्त्वाहं महाभाग सर्वदेवेषु निर्भयः ॥ २६ ॥
असुरेषु च सर्वेषु दानवेषु पतत्रिषु । त्वत्प्रसादात्तु देवेश स्यामजेयो न संशयः ॥ २७ ॥
एवमुक्तो दशग्रीवं ब्रह्मा वचनमब्रवीत् । प्राणात्ययेषु जप्तव्यो न नित्यं राक्षसाधिप ॥ २८ ॥
अक्षसूत्रं गृहीत्वा तु जपेन्मन्त्रमिमं शुभम् । जप्त्वा तु राक्षसपते त्वमजेयो भविष्यसि ॥ २९ ॥
अजप्त्वा राक्षसपते न ते सिद्धिर्भविष्यति । शृणु मन्त्रं प्रवक्ष्यामि येन राक्षसपुंगव ॥ ३० ॥
मन्त्रस्य कीर्तनादेव प्राप्स्यसे समरे जयम् । नमस्ते देवदेवेश सुरासुरनमस्कृत ॥ ३१ ॥

भूतभव्य महादेव हरिपिङ्गललोचन । बालस्त्वं वृद्धरूपी च वैयाघ्रवसनच्छद ॥ ३२ ॥
अर्चनीयोऽसि देव त्वं त्रैलोक्यप्रभुरीश्वरः । हरो हरितनेमी च युगान्तदहनोऽबलः ॥ ३३ ॥
गणेशो लोकशंभुश्च लोकपालो महाभुज । महाभागो महाशूली महादंष्ट्री महेश्वरः ॥ ३४ ॥
कालश्च बलरूपी च नीलग्रीवो महोदरः । देवान्तगस्तपोन्तश्च पशूनां पतिरव्ययः ॥ ३५ ॥
शूलपाणिर्वृषः केतुर्नेता गोप्ता हरो हरिः । जटी मुण्डी शिखण्डी च लकुटी च महायशाः ॥ ३६ ॥
भूतेश्वरो गणाध्यक्षः सर्वात्मा सर्वभावनः । सर्वगः सर्वहारी च स्रष्टा च गुरुरव्ययः ॥ ३७ ॥
कमण्डलुधरो देवः पिनाकी धूर्जटिस्तथा । माननीयश्च ओङ्कारो वरिष्ठो ज्येष्ठसामगः
मृत्युश्च मृत्युभूतश्च पारियात्रश्च सुव्रतः ॥ ३८ ॥
ब्रह्मचारी गुहावासी वीणापणवतूणवान् । अमरो दर्शनीयश्च बालसूर्यनिभस्तथा ॥ ३९ ॥
श्मशानवासी भगवानुमापतिरनिन्दितः । भगस्याक्षिनिपाती च पूष्णो दशननाशनः ॥ ४० ॥
ज्वरहर्ता पाशहस्तः प्रलयः काल एव च । उल्कामुखोऽग्निकेतुश्च मुनिर्दीप्तो विशांपतिः ॥ ४१ ॥
उन्मादो वेपनकरश्चतुर्थो लोकसत्तमः । वामनो वामदेवश्च प्राक्प्रदक्षिणवामनः ॥ ४२ ॥
भिक्षुश्च भिक्षुरूपी च त्रिजटी कुटिलः स्वयम् । शक्रहस्तप्रतिष्टम्भी वसूनां स्तम्भनस्तथा ॥ ४३ ॥
ऋतुर्ऋतुकरः कालो मधुर्मधुकलोचनः । वानस्पत्यो वाजसनो नित्यमाश्रमपूजितः ॥ ४४ ॥
जगद्धाता च कर्ता च पुरुषः शाश्वतो ध्रुवः । धर्माध्यक्षो विरूपाक्षस्त्रिधर्मा भूतभावनः ॥ ४५ ॥
त्रिनेत्रो बहुरूपश्च सूर्यायुतसमप्रभः । देवदेवोऽतिदेवश्च चन्द्रार्द्धकृतजटस्तथा ॥ ४६ ॥
नर्तको लासकश्चैव पूर्णेन्दुसदृशाननः ब्रह्मण्यश्च शरण्यश्च सर्वज्ञीवमयस्तथा ॥ ४७ ॥
सर्वतूर्यनिनादी च सर्वबन्धविमोक्षकः । मोहनो बन्धनश्चैव सर्वदा निधनोत्तमः ॥ ४८ ॥
पुष्पदन्तो विभागश्च मुख्यः सर्वहरस्तथा । हरिश्मश्रुर्धनुर्धारी भीमो भीमपराक्रमः ॥ ४९ ॥
मया प्रोक्तमिदं पुण्यं नामाष्टशतमुत्तमम् । सर्वपापहरं पुण्यं शरण्यं शरणार्थिनाम्
जप्तमेतद्दशग्रीव कुर्याच्छत्रुविनाशनम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ ४ ॥

दत्त्वा तु रावणस्यैवं वरं स कमलोद्भवः । पुनरेवागमत्क्षिप्रं ब्रह्मलोकं पितामहः ॥ १ ॥
रावणोऽपि वरं लब्ध्वा पुनरेवागमत्तथा । केनचित्त्वथ कालेन रावणो लोकरावणः ॥ २ ॥
पश्चिमार्णवमागच्छत्सचिवैः सह राक्षसः । द्वीपस्थो दृश्यते तत्र पुरुषः पावकप्रभः ॥ ३ ॥
महाजाम्बूनदप्रख्य एक एव व्यवस्थितः । दृश्यते भीषणाकारो युगान्तानलसंनिभः ॥ ४ ॥
देवानामिव देवेशो ग्रहाणामिव भास्करः । शरभाणां यथा सिंहो हस्तिष्वैरावतो यथा ॥ ५ ॥
पर्वतानां यथा मेरुः पारिजातश्च शाखिनाम् । तथा तं पुरुषं दृष्ट्वा स्थितं मध्ये महाबलम् ॥ ६ ॥
अब्रवीच्च दशग्रीवो युद्धं मे दीयतामिति । अभवत्तस्य सा दृष्टिर्ग्रहमाला इवाकुला ॥ ७ ॥
दन्तान्संदशतः शब्दो यन्त्रस्येवाभिधावतः । जगर्जोच्चैः स बलवान्सहामात्यो दशाननः ॥ ८ ॥
स गर्जन्विविधैर्नादैर्लम्बहस्तं भयानकम् । दंष्ट्रालं विकटं चैव कम्बुग्रीवं महोरसम् ॥ ९ ॥
मण्डूककुक्षिं सिंहास्यं कैलासशिखरोपमम् । पद्मपादतलं भीमं रक्ततालुकराम्बुजम् ॥ १० ॥
महानादं महाकायं मनोनिलसमं जवे । भीममाबद्धतूणीरं सघण्टाबद्धचामरम् ॥ ११ ॥
ज्वालामालापरिक्षिप्तं किङ्किणीजालनिःस्वनम् । मालया स्वर्णपद्मानां कण्ठदेशेऽवलम्बया ॥ १२ ॥
ऋग्वेदमिव शोभन्तं पद्ममालाविभूषितम् । सोऽञ्जनाचलसंकाशं काञ्चनाचलसंनिभम् ॥ १३ ॥
प्राहरद्राक्षसपतिः शूलशक्त्यृष्टिपट्टिशैः । द्वीपिना स सिंह इव ऋषभेणेव कुञ्जरः ॥ १४ ॥
सुमेरुरिव नागेन्द्रैर्नदीवेगैरिवार्णवः । अकम्पमानः पुरुषो राक्षसं वाक्यमब्रवीत् ॥ १५ ॥
युद्धश्रद्धां हि ते रक्षो नाशयिष्यामि दुर्मते । रावणस्य च यो वेगः सर्वलोकभयंकरः ॥ १६ ॥
तथा वेगसहस्राणि संश्रितानि तमेव हि । धर्मस्तस्य तपश्चैव जगतः सिद्धिहेतुकौ ॥ १७ ॥
ऊरू त्वाश्रित्य तस्थाते मन्मथः शिश्नमाश्रितः । विश्वेदेवाः कटीभागे मरुतो बस्तिपार्श्वयोः ॥ १८ ॥
मध्येऽष्टौ वसवस्तस्य समुद्राः कुक्षितः स्थिताः । पार्श्वादिषु दिशः सर्वाः सर्वसंधिषु मारुतः ॥ १९ ॥

---

१ अनङ्ग इति गो. पाठः ।

पृष्ठं च भगवान्रुद्रो हृदयं च पितामहः । पितरश्चाश्रिताः पृष्ठं हृदयं च पितामहाः ॥ २० ॥
गोदानानि पवित्राणि भूमिदानानि यानि च । सुवर्णवरदानानि कक्षलोमानुगानि च ॥ २१ ॥
हिमवान्हेमकूटश्च मन्दरो मेरुरेव च । नरं तु तं समाश्रित्य अस्थिभूता व्यवस्थिताः ॥ २२ ॥
पाणिर्वज्रोऽभवत्तस्य शरीरे शौरवस्थिता । कृकाटिकायां संध्या च जलवाहाश्च ये घनाः ॥ २३ ॥
बाहू धाता विधाता च तथा विद्याधरादयः । शेषश्च वासुकिश्चैव विशालाक्ष इरावतः ॥ २४ ॥
कम्बलाश्वतरौ चोभौ कर्कोटकधनंजयौ । स च घोरविषो नागस्तक्षकः सोपतक्षकः ॥ २५ ॥
करजानाश्रिताश्चैव विषवीर्यमुमुक्षवः । अग्निरास्यमभूत्तस्य स्कन्धौ रुद्रैरधिष्ठितौ ॥ २६ ॥
पक्ष्मास्तेवश्चैव दंष्ट्रयोरुभयोः स्थिताः । नासे कुहूरमावास्या छिद्रेषु वायवः स्थिताः ॥ २७ ॥
ग्रीवा तस्याभवद्देवी वीणा चापि सरस्वती । नासत्यौ श्रवणे चोभौ नेत्रे च शशिभास्करौ ॥ २८ ॥
वेदाङ्गानि च यज्ञाश्च तारारूपाणि यानि च । सुदृत्तानि च वाक्यानि तेजांसि च तपांसि च ॥ २९ ॥
एतानि नररूपस्य तस्य देहाश्रितानि वै । तेन वज्रप्रहारेण लब्धमात्रेण लीलया ॥ ३० ॥
पाणिना पीडितं रक्षो निपपात महीतले । पतितं राक्षसं ज्ञात्वा विद्राव्य स निशाचरान् ॥ ३१ ॥
ऋग्वेदप्रतिमः सोऽथ पद्ममालाविभूषितः । प्रविवेश च पातालं निजं पर्वतसंनिभः ॥ ३२ ॥
उत्थाय च दशग्रीव आहूय सचिवान्स्वयम् । क्व गतः सहसा ब्रूत प्रहस्तशुकसारणाः ॥ ३३ ॥
एवमुक्ता रावणेन राक्षसास्ते तदाब्रुवन् । प्रविष्टः स नरोऽत्रैव देवदानवदर्पहा ॥ ३४ ॥
अथ संगृह्य वेगेन गरुत्मानिव पन्नगम् । स तु शीघ्रं बिलद्वारं संप्रविश्य च दुर्मतिः ॥ ३५ ॥
प्रविवेश च तद्द्वारं रावणो निर्भयस्तदा । स प्रविश्य च पश्यद्वै नीलाञ्जनचयोपमान् ॥ ३६ ॥
केयूरधारिणः शूरान्रक्तमाल्यानुलेपनान् । वरहाटकरत्नार्थैर्विविधैश्च विभूषितान् ॥ ३७ ॥
दृश्यन्ते तत्र नृत्यन्त्यस्तिस्रः कोट्यो महात्मनाम् । नृत्योत्सवा वीतभया विमलाः पावकप्रभाः ॥ ३८ ॥
नृत्यन्त्यः पश्यते तांस्तु रावणो भीमविक्रमः । द्वारस्थो रावणस्तत्र तासु कोटिषु निर्भयः ॥ ३९ ॥
यथा दृष्टः स तु नरस्तुल्यांस्तानपि सर्वशः । एकवर्णानेकवेषानेकरूपान्महौजसः ॥ ४० ॥
चतुर्भुजान्महोत्साहांस्तत्रापश्यत्स राक्षसः । तांस्तु दृष्ट्वा दशग्रीव ऊर्ध्वरोमा बभूव ह ॥ ४१ ॥
स्वयंभुवा दत्तवरस्ततः शीघ्रं विनिर्ययौ । अथापश्यत्परं तत्र पुरुषं शयने स्थितम् ॥ ४२ ॥
पाण्डुरेण महार्हेण शयनासनवेश्मना । शेते स पुरुषस्तत्र पावकेनावगुण्ठितः ॥ ४३ ॥
दिव्यस्रगनुलेपा च दिव्याभरणभूषिता । दिव्याम्बरधरा साध्वी त्रैलोक्यस्यैकभूषणम् ॥ ४४ ॥
वालव्यजनहस्ता च देवी तत्र व्यवस्थिता । लक्ष्मी देवी सपद्मा वै भ्राजते लोकसुन्दरी ॥ ४५ ॥
प्रविष्टः स तु रक्षेन्द्रो दृष्ट्वा तां चारुहासिनीम् । जिघृक्षुः सहसा साध्वीं सिंहासनसमास्थिताम् ॥ ४६ ॥
विनापि सचिवैस्तत्र रावणो दुर्मतिस्तदा । हस्ते ग्रहीतुमन्विच्छन्मन्मथेन वशीकृतः ॥ ४७ ॥
सुप्तमाशीविषं यद्वद्रावणः कालनोदितः । अथ क्षुप्तो महाबाहुः पावकेनावगुण्ठितः ॥ ४८ ॥
ग्रहीतुकामं तं ज्ञात्वा व्यपविद्धपटं तदा । जहासोच्चैर्भृशं देवस्तं दृष्ट्वा राक्षसाधिपम् ॥ ४९ ॥
तेजसा सहसा दीप्तो रावणो लोकरावणः । कृत्तमूलो यथा शाखी निपपात महीतले ॥ ५० ॥
पतितं राक्षसं ज्ञात्वा वचनं चेदमब्रवीत् । उत्तिष्ठ राक्षसश्रेष्ठ मृत्युस्ते नाद्य विद्यते ॥ ५१ ॥
प्रजापतिवरो रक्ष्यस्तेन जीवसि राक्षस । गच्छ रावण विस्रब्धो नाधुना मरणं तव ॥ ५२ ॥
लब्धसंज्ञो मुहूर्तेन रावणो भयमाविशत् । एवमुक्तस्तदोत्थाय रावणो देवकण्टकः ॥ ५३ ॥
लोमहर्षणमापन्नो ह्यब्रवीत्तं महाद्युतिम् । को भवान्वीर्यसंपन्नो युगान्तानलसंनिभः ॥ ५४ ॥
ब्रूहि त्वं को भवान्देव कुतो भूत्वा व्यवस्थितः । एवमुक्तस्ततो देवो रावणेन दुरात्मना ॥ ५५ ॥
प्रत्युवाच हसन्देवो मेघगम्भीरया गिरा । किं ते मया दशग्रीव वध्योऽसि न चिरान्मम ॥ ५६ ॥
एवमुक्तो दशग्रीवः प्राञ्जलिर्वाक्यमब्रवीत् । प्रजापतेस्तु वचनान्नाहं मृत्युपथं गतः ॥ ५७ ॥
न स जातो जनिष्यो वा मम तुल्यः सुरेष्वपि । प्रजापतिवरं यो हि लङ्घयेद्वीर्यमाश्रितः ॥ ५८ ॥
न तत्र परिहारोऽस्ति प्रयत्नश्चापि दुर्बलः । त्रैलोक्ये तं न पश्यामि यो मे कुर्याद्वरं वृथा ॥ ५९ ॥
अमरोहं सुरश्रेष्ठ तेन मां नाविशद्भयम् । अथापि च भवेन्मृत्युस्त्वद्वस्तान्नान्यतः प्रभो ॥ ६० ॥
यशस्यं श्लाघनीयं च त्वद्वस्तान्मरणं मम । अथास्य गात्रे संपश्यद्रावणो भीमविक्रमः ॥ ६१ ॥

१ क्रीडतः प्रेक्षतेतान्वै राक्षस इति गो. पाठः ।

चतुर्विंशः सर्गः ।

बलैश्वर्यमत्तो रावणः यां यां सुंदरीं कन्यां स्त्रीं वा पश्यति तद्बन्धुजनं हत्वा तां तां विमानमारोप्य गच्छतिस्म हठात् अर्थात्तम-निच्छन्तीभिराक्रोशन्तीभिश्चानेनैव कर्मणायं नश्येदित्युदीरिते देवदुंदुभयो नेदुरयं च तेन विमना निष्प्रभश्चासीत् । केनचित्कालेन रावणः स्वेनैवाज्ञानात्कालकेयरणे शूर्पणखापतिरपि हत इति भगिनीमुखेन जानन्दुःखितस्तां सान्त्वयन् खराभिधभ्रातृनिकटं प्राहिणोत् ।

निवर्तमानः संहृष्टो रावणः स दुरात्मवान् । जहे पथि नरेन्द्रर्षिदेवदानवकन्यकाः ॥ १ ॥
दर्शनीयां हि यां रक्षः कन्यां स्त्रीं वापि पश्यति । हत्वा बन्धुजनं तस्या विमाने तां रुरोध सः ॥ २ ॥
एवं पन्नगकन्याश्च राक्षसासुरमानुषीः । यक्षदानवकन्याश्च विमाने सोऽध्यरोपयत् ॥ ३ ॥
ता हि सर्वाः समं दुःखान्मुमुचुर्वाष्पजं जलम् । तुल्यमग्न्यर्चिषां तत्र शोकाग्निभयसंभवम् ॥ ४ ॥
ताभिः सर्वानवद्याभिर्नदीभिरिव सागरः । आपूरितं विमानं तद्भयशोकाशिवाश्रुभिः ॥ ५ ॥
नागगन्धर्वकन्याश्च महर्षितनयाश्च याः । दैत्यदानवकन्याश्च विमाने शतशोऽरुदन् ॥ ६ ॥
दीर्घकेश्यः सुचार्वङ्ग्यः पूर्णचन्द्रनिभाननाः । पीनस्तनतटा मध्ये वज्रवेदिसमप्रभाः ॥ ७ ॥
रथकूबरसंकाशैः श्रोणिदेशैर्मनोहराः । स्त्रियः सुराङ्गनाप्रख्या निष्टप्तकनकप्रभाः ॥ ८ ॥
शोकदुःखभयत्रस्ता विह्वलाश्च सुमध्यमाः । तासां निश्वासवातेन सर्वतः संप्रदीपितम् ॥ ९ ॥

१] ति० टी०–अथ लङ्कागतेन हतभर्तृकायाः स्वसुराश्वासनम्—निवर्तमान इति ॥ १ ॥

रा० टी०–लंकाकर्मकरावणप्रस्थानानन्तरकालिकं हृतान्तमाह—निवर्तमानइत्यादिभिः । निवर्तमानो रावणः पथि नरेन्द्रादिकन्याकाः जहे ॥ १ ॥

२-३] ति० टी०–रक्षः इति संबुद्धिः । कन्यानहा । स्त्री सभर्तृका ॥ २ ॥ ३ ॥

रा० टी०–तत्प्रकारमाह—दर्शनीयामिति । रक्षः दर्शनीयां कन्यां स्त्रीं स्त्रियं सभर्तृकां वा यां पश्यति तस्या बन्धुजनं हत्वा तां विमाने रुरोध ॥ २ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण पन्नगकन्यायाः विमाने अध्यरोपयत् ॥ ३ ॥

गो० टी०–दर्शनीयामिति । रक्षः स इति संबन्धः । कन्या अनहा । स्त्री सभर्तृका ॥ १-४ ॥

४] ति० टी०–अग्न्यर्चिषां तुल्यं शोकाग्निना भयेन च संभवो यस्य तद्बाष्पजं जलं मुमुचुः ॥ ४ ॥

रा० टी०–ता इति । ताः हताः सर्वा अग्न्यर्चिषां तुल्यं शोकाग्निभयसंभवं वाष्पजं जलं सममेककालावच्छेदेन मुमुचुः४

५-६] ति० टी०–भयं शोकः । अशिवाश्च दुःखाश्च याभिस्ताभिर्विमानमापूरितम् । नदीभिः सागर इव॥५॥६॥

रा० टी०–ताभिरिति । नदीभिस्सागर इव ताभिः हताभिः तद्विमानमापूरितम् ॥ ५ ॥

रा० टी०–नागेति । नागादिकन्या अरुदन् ॥ ६ ॥

गो० टी०–ताभिरिति । भयशोकाभ्याम् अशिवमश्रु यासां ताभिः ॥ ५-९ ॥

७-९] ति० टी०–वज्रयुता वेदिर्वज्रवेदिस्तन्मध्यसमप्रभाः

तस्य देवस्य सकलं त्रैलोक्यं सचराचरम् । आदित्या मरुतः साध्या वसवोऽश्विनावपि ॥ ६२ ॥
रुद्राश्च पितरश्चैव यमो वैश्रवणस्तथा । समुद्रा गिरयो नद्यो वेदा विद्यास्त्रयोऽग्नयः ॥ ६३ ॥
ग्रहास्तारागणा व्योम सिद्धा गन्धर्वचारणाः । महर्षयो वेदविदो गरुडोऽथ भुजंगमाः ॥ ६४ ॥
ये चान्ये देवतासङ्घाः संस्थिता दैत्यराक्षसाः । गात्रेषु शयनस्थस्य दृश्यन्ते सूक्ष्ममूर्तयः ॥ ६५ ॥
आह रामोऽथ धर्मात्मा ह्यगस्त्यं मुनिसत्तमम् । द्वीपस्थः पुरुषः कोऽसौ तिस्रः कोट्यस्तु काश्च ताः ॥ ६६ ॥
शयानः पुरुषः कोऽसौ दैत्यदानवदर्पहा । रामस्य वचनं श्रुत्वा ह्यगस्त्यो वाक्यमब्रवीत् ॥ ६७ ॥
शृणुतामभिधास्यामि देवदेव सनातन । भगवान्कपिलो नाम द्वीपस्थो नर उच्यते ॥ ६८ ॥
ये तु नृत्यन्ति वै तत्र स्वरास्ते तस्य धीमतः । तुल्यतेजःप्रभावास्ते कपिलस्य नरस्य वै ॥ ६९ ॥
नासौ कुद्धेन दृष्टस्तु राक्षसः पापनिश्चयः । न बभूव तदा तेन भस्मसाद्राम रावणः ॥ ७० ॥
खिन्नगात्रो नगप्रख्यो रावणः पतितो भुवि । वाक्शरैस्तं विभेदाशु रहस्यं पिशुनो यथा ॥ ७१ ॥
अथ दीर्घेण कालेन लब्धसंज्ञः स राक्षसः । आजगाम महातेजा यत्र ते सचिवाः स्थिताः ॥ ७२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ ५ ॥

१ स्विति गो.रा.पा.। २ गन्धर्वेति गो.पा.। ३ रक्षः स इति गो.पा.। ४ इति गो.पा.। ५ चेति गो.पा.। ६ स्तन्यस्तथा वज्रवेदिमध्यसमप्रभाः ॥ इति गो.पा.।

अग्निहोत्रमिवाभाति संनिरुद्धाग्निपुष्पकम् । दशग्रीववशं प्राप्तास्तास्तु शोकाकुलाः स्त्रियः॥ १० ॥
दीनवक्त्रेक्षणाः श्यामा मृग्यः सिंहवशा इव । काचिच्चिन्तयती तत्र किं नु मां भक्षयिष्यति ॥ ११ ॥
काचिद्दध्यौ सुदुःखार्ता अपि मां मारयेदयम् । इति मातृः पितॄन्स्मृत्वा भर्तॄन्भ्रातॄंस्तथैव च ॥ १२ ॥
दुःखशोकसमाविष्टा विलेपुः सहिताः स्त्रियः । कथं नु खलु मे पुत्रो भविष्यति मया विना ॥ १३ ॥
कथं माता कथं भ्राता निमग्नाः शोकसागरे । हा कथं नु करिष्यामि भर्तुस्तस्मादहं विना ॥ १४ ॥
मृत्यो प्रसादयामि त्वां नय मां दुःखभागिनीम् । किं नु तदुष्कृतं कर्म पुरा देहान्तरे कृतम् ॥ १५ ॥
एवं स्म दुःखिताः सर्वाः पतिताः शोकसागरे । न खल्विदानीं पश्यामो दुःखस्यास्यान्तमात्मनः१६॥
अहो धिङ् मानुषं लोकं नास्ति खल्वधमः परः । यद्दुर्बला बलवता भर्तारो रावणेन नः ॥ १७ ॥
सूर्येणोदयता काले नक्षत्राणीव नाशिताः । अहो सुबलवद्रक्षो वधोपायेषु रज्यते ॥ १८ ॥
अहो दुर्वृत्तमास्थाय नात्मानं वेत्ति दुर्मतिः । सर्वथा सदृशस्तावद्विक्रमोऽस्य दुरात्मनः ॥ १९ ॥
इदं त्वसदृशं कर्म परदाराभिमर्शनम् । यस्मादेष परक्यासु रमते राक्षसाधमः ॥ २० ॥
तस्माद्वै स्त्रीकृतेनैव वधं प्राप्स्यति दुर्मतिः । सतीभिर्वरनारीभिरेवं वाक्येऽभ्युदीरिते ॥ २१ ॥
नेदुर्दुन्दुभयः खस्थाः पुष्पवृष्टिः पपात च । शप्तः स्त्रीभिः स तु समं हतौजा इव निष्प्रभः ॥ २२ ॥
पतिव्रताभिः साध्वीभिर्बभूव विमना इव । एवं विलपितं तासां शृण्वन्राक्षसपुंगवः ॥ २३ ॥
प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः । एतस्मिन्नन्तरे घोरा राक्षसी कामरूपिणी ॥ २४ ॥
सहसा पतिता भूमौ भगिनी रावणस्य सा । तां स्वसारं समुत्थाप्य रावणः परिसान्त्वयन् ॥२५॥

मध्यभागे इति भावः । यद्वा वज्रतुल्यवर्णा वेदिः पीतवर्णा भ्रमरिकातिसूक्ष्मकटिपट्टपदविशेषस्तन्मध्येत्यादिरर्थः ॥ ७–९ ॥

रा० टी०–दीर्घेति । दीर्घाः केशाः यासां पीनाः स्तनतटाः यासां मध्ये स्तनयोरन्तराले वज्रवेदिसमा प्रभा यासां रथकूबरसंकाशैः श्रोणीदेशैः मनोहराः सुराङ्गनाप्रख्याः शोकदुःखभयत्रस्ताः तिष्ठन्त्यो याः स्त्रियः तासां निश्वासवातेन सर्वतस्संप्रदीपितं पुष्पकं संनिरुद्धोऽग्निर्यस्मिंस्तदग्निहोत्रमिवाभाति सार्द्धश्लोकत्रयमेकान्वयि ॥ ७–९ ॥

१०] ति० टी०–संनिरुद्धा अग्नयो यस्मिंस्तादृशमग्निहोत्रमग्निकुण्डमिव पुष्पकं भाति ॥ १० ॥

रा० टी०–दशग्रीवेति । सिंहवशा मृग्य इव दशग्रीववशं प्राप्ताः स्त्रियः शोकाकुला बभूवुरिति शेषः ॥ १० ॥

गो० टी०–अग्निहोत्रमिति । संनिरुद्धा अग्नयो यस्मिंस्तादृशम् अग्निहोत्रमग्निकुण्डमिव पुष्पकं भाति ॥ १०–१९ ॥

११–१३] ति० टी०–चिन्तयती । चिन्तयन्ती बभूवेति शेषः ॥ ११–१३ ॥

रा० टी०–काचिदिति । किं मां भक्षयिष्यतीति चिन्तयन्ती बभूवेति शेषः काचित्तु अयं मां मारयेदिति दध्यौ ११

रा० टी०–इतीति । मातृप्रभृतीः स्मृत्वा दुःखशोकसमाविष्टास्स्त्रियो विलेपुः ॥ १२ ॥

रा० टी०–विलापाकारमाह––कथमिति । मया विना शोकसागरे निमग्नः मे पुत्रप्रभृतिः कथं भविष्यति ॥ १३ ॥

१४–१६] ति० टी०–तस्माद्भर्तुर्विनाकृताहं कथं नु करिष्यामि । एतदानुकूल्यमिति शेषः ॥ १४–१६ ॥

रा० टी०–हेति । तस्मात्प्रसिद्धाद्भर्तुर्विनाहं कथं नु करिष्यामि अहं पृथक् ॥ १४ ॥

रा० टी०–मृत्यो इति । हे मृत्यो मया देहान्तरे किं दुष्कृतं कर्म कृतं बहु कृतमित्यर्थः अतो दुःखभागिनीं मामपि नय१५

रा० टी०–एवमिति । एवं शोकसागरे पतिताः वयमस्य दुःखस्यान्तं न पश्यामः ॥ १६ ॥

१७] ति० टी०–नास्त्यधमः परः । मानुषाल्लोकादिति शेषः । तत्रैव हेतुः—यद्दुर्बला इति ॥ १७ ॥

१८] ति० टी०–वधोपायेषु वधसंपादकेषूपायेषु शस्त्रघातादिषु ॥ १८ ॥

रा० टी०–अहो इति । यस्माद्धेतोः दुर्बला नो भर्तारः उदयता सूर्येण नक्षत्राणीव बलवता रावणेन नाशिताः अतो मानुषं लोकं धिक् अत एव परो मनुष्यलोकाद् भिन्नो लोकोऽधमो न मनुष्यलोक एवाधम इत्यर्थः अत एव सुबलवद्रक्षः वधोपायेषु रज्यते अनुरक्तोऽभवत् श्लोकद्वयमेकान्वयि ॥१७॥१८॥

१९] ति० टी०–जुगुप्सते निन्दति । अस्य विक्रमः सर्वथा सदृशो योग्यः । तपःसंपादितभगवत्प्रसादस्येति शेषः१९

रा० टी०–अहो इति । दुर्वृत्तमास्थाय विद्यमानमात्मानं न जुगुप्सते अहो आश्चर्यमेतत् अहं पृथक् सर्वथेति अस्य दुरात्मनो विक्रमः सदृशः कुलोचितः परदाराभिमर्शनं कर्म तु असदृशम् १९

२०–२५] ति० टी०–परक्यासु परकीयासु॥२०–२५॥

१ युज्यते इति गो. पा. ।

अब्रवीत्किमिदं भद्रे वक्तुकामासि मां द्रुतम् । सा बाष्पपरिरुद्धाक्षी रक्ताक्षी वाक्यमब्रवीत् ॥२६॥
कृतास्मि विधवा राजंस्त्वया बलवता बलात् । एते राजंस्त्वया वीर्यैर्दैत्या विनिहता रणे ॥ २७ ॥
कालकेया इति ख्याताः सहस्राणि चतुर्दश । प्राणेभ्योऽपि गरीयान्मे तत्र भर्ता महाबलः ॥ २८ ॥
सोऽपि त्वया हतस्तात रिपुणा भ्रातृगन्धिना । त्वयास्मि निहता राजन्स्वयमेव हि बन्धुना ॥ २९ ॥
राजन्वैधव्यशब्दं च भोक्ष्यामि त्वत्कृतं ह्यहम् । ननु नाम त्वया रक्ष्यो जामाता समरेष्वपि ॥ ३० ॥
स त्वया निहतो युद्धे स्वयमेव न लज्जसे । एवमुक्तो दशग्रीवो भगिन्या क्रोशमानया ॥ ३१ ॥
अब्रवीत्सान्त्वयित्वा तां सामपूर्वमिदं वचः । अलं वत्से रुदित्वा ते न भेतव्यं च सर्वशः ॥ ३२ ॥
दानमानप्रसादैस्त्वां तोषयिष्यामि यत्नतः । युद्धप्रमत्तो व्याक्षिप्तो जयाकाङ्क्षी क्षिपञ्शरान् ॥३३॥
नाहमज्ञासिषं युध्यन्स्वान्परान्वापि संयुगे । जामातरं न जाने स्म प्रहरन्युद्धदुर्मदः ॥ ३४ ॥
तेनासौ निहतः संख्ये मया भर्ता तव स्वसः । अस्मिन्काले तु यत्प्राप्तं तत्करिष्यामि ते हितम् ३५

रा० टी०-यस्मादिति । यस्मात् एष रावणः परकीयासु परकीयासु स्त्रीषु रमते तस्मात् स्त्रीकृतेन स्त्रीप्रयत्नेनैव दुर्मतिः रावणः वधं प्राप्स्यति ॥ २० ॥

रा० टी०-सतीभिरिति । सतीभिर्नारीभिः एवं वाक्ये अभ्युदीरिते सति दुन्दुभयो नेदुः पुष्पवृष्टिः पपात च २१

रा० टी०-शप्त इति । साध्वीभिः साधुरीर्गतिर्यासां ताभिः स्त्रीभिः शप्तोऽत एव हतौजा इव अत एव निष्प्रभो रावणः विमना एव बभूव एक इव एवार्थे ॥ २२ ॥

रा० टी०-एवमिति । राक्षसपुंगवः एवं तासां विलपितं श्रुण्वन्सन् लङ्कां प्रविवेश ॥ २३ ॥

रा० टी०-एतस्मिन्निति । एतस्मिन्नन्तरे समये रावणस्य भगिनी सा शूर्पणखा भूमौ रावणसमीपदेशे पतिता॥२४॥

रा० टी०-तामिति । रावणः परिसान्त्वयन्सन्स्वसारं समुत्थाप्य मां किं वक्तुकामासि इदं वचोऽब्रवीत् ॥२५ ॥

गो० टी०-इदमिति । परकीयासु परकीयासु॥ २०--२८॥

२६-२८] ति०टी०-भद्रे मे मह्यं किं द्रुतं वक्तुकामासि । एवं वदता विद्युज्जिह्ववधोऽपि विशिष्य न ज्ञायत इति सूच्यते ॥ २६-२८ ॥

रा० टी०-सेति। सा शूर्पनखा वाक्यमब्रवीत् अर्धं पृथक्२६

रा० टी०-तदाकारमाह—कृतेत्यादिभिः। हे राजन् चतुर्दश सहस्राणि कालकेया इति ख्याता एते दैत्याः त्वया निहताः तत्र दैत्येषु प्राणेभ्योपि गरीयान्मे भर्त्ता भ्रातृगंधिना रिपुणा त्वया हतः अत एव त्वयाहं विधवा कृता अत एव त्वत्कृतं वैधव्यशब्दं भोक्ष्यामि अत एव अहमपि त्वया निहतास्मि सार्द्धश्लोकत्रयमेकान्वयि ॥ २७-२९ ॥

२९] ति० टी०-यतो मे भर्ता हतः, अतोऽहं बन्धुना त्वया स्वयमेव हतास्मि ॥ २९ ॥

गो० टी०-सोपीति । यतो मे भर्ता हतः अत एव साहं स्वयं स्वबन्धुनैव त्वया निहतास्मि ॥ २९ ॥

३०-३१] ति० टी०-न त्विति पृथक्पदं। जामाता नाम समरेष्वपि रक्ष्यो तु न । काकुः । रक्ष्य एवेत्यर्थः३०-३१

रा० टी०-नन्विति । यो जामाता समरेष्वपि त्वया रक्ष्यः स जामाता युद्धे त्वया स्वयं निहतः अतोपि त्वं न लज्जसे ॥ ३० ॥

रा० टी०-एवमिति । भगिन्या एवमुक्तो दशग्रीवः तां भगिनीं सान्त्वयित्वा इदमब्रवीत् अर्द्धं पृथक् ॥ ३१ ॥

गो० टी०-राजन्नित्यादि सार्धम् । न त्विति पृथक् पदम् । जामाता नाम समरेष्वपि रक्ष्यो न तु नेति काकुः । रक्ष्य एव किलेत्यर्थः ॥ ३०-३४ ॥

३२-३४] ति० टी०-न भेतव्यं च सर्वशः । बान्धवादिभ्योऽपि मा भैषीः । स्वैरं चरेत्यर्थ इति तीर्थः ॥३२-३४ ॥

रा० टी०-तदाकारमाह—अलमित्यादिभिः । दानादिभिः त्वां तोषयिष्यामि अतः ते त्वया न भेतव्यमत एव रुदित्वा अलं रोदनं न कुर्वित्यर्थः ॥ ३२ ॥

रा० टी०-युद्धेति । युद्धप्रमत्तोहं शरान् क्षिपन्सन् स्वान् परान् नाज्ञासिषम् ॥ ३३ ॥

रा० टी०-अत एव युद्धदुर्मदोहं जामातरं न जाने स्म तेन हेतुना तव भर्ता मया निहतः ॥ ३४ ॥

३५] ति० टी०-अस्मिन्काले तु यत्प्राप्तम् । कर्तव्यत्वेनेति शेषः ॥ ३५ ॥

रा० टी०-अस्मिन्निति । अस्मिन्काले यत्प्राप्तं योग्यमित्यर्थः तत्ते हितं करिष्यामि हितमेवाह भ्रातुः खरस्य पार्श्वतः पार्श्वे वस ॥ ३५ ॥

गो० टी०-अस्मिन्निति । अस्मिन् काले तु यत्प्राप्तं मत्कर्तव्यत्वेनेति शेषः । मातृष्वसेयस्य खरस्य भ्रातृत्वात् भ्रातुरित्युच्यते । पार्श्वतो वनसमीपे वसेत्यर्थः । मम तु राज्यपरवशस्य न त्वत्समानने अवकाश इति भावः ॥ ३५ ॥

---

१ मे इति गो. पा. । २ रा इति गो पा. । ३ गृह्णनेति गो.पा.। ४ कृते इति गो.पा.। ५ नावगच्छामि युद्धेषु स्वान्परान्वाप्यहं शुभे इति गो.पा.।

भ्रातुरैश्वर्ययुक्तस्य खरस्य वस पार्श्वतः चतुर्दशानां भ्राता ते सहस्राणां भविष्यति ॥३६॥
प्रभुः प्रयाणे दाने च राक्षसानां महाबलः तत्र मातृष्वसेयस्ते भ्रातायं वै खरः प्रभुः ॥ ३७ ॥
भविष्यति तवादेशं सदा कुर्वन्निशाचरः शीघ्रं गच्छत्वयं वीरो दण्डकान्परिरक्षितुम् ॥ ३८ ॥
दूषणोऽस्य बलाध्यक्षो भविष्यति महाबलः तत्र ते वचनं शूरः करिष्यति तदा खरः ॥ ३९ ॥
रक्षसां कामरूपाणां प्रभुरेष भविष्यति एवमुक्त्वा दशग्रीवः सैन्यमस्यादिदेश ह ॥ ४० ॥
चतुर्दश सहस्राणि रक्षसां वीर्यशालिनाम् स तैः परिवृतः सर्वैः राक्षसैर्घोरदर्शनैः ॥ ४१ ॥
आगच्छत खरः शीघ्रं दण्डकानकुतोभयः स तत्र कारयामास राज्यं निहतकण्टकम् ॥
सा च शूर्पणखा तत्र न्यवसद्दण्डके वने ॥ ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ।

रावणो निकुम्भिलां गत्वा निर्वर्तितयागेन शक्रजिता साकं मन्दिरं प्रविष्टस्तत्र विभीषणमुखान्मातृष्वसुः सुतां मधुना स्तां निशम्य रोषेण तं जिघांसुः ससैन्यस्तत्र गत्वा तया कुम्भीनस्या मे भर्ता मधुर्न वध्य इति प्रार्थितस्तथास्त्विति तदङ्गीकृत्य तेन मधुना सहैव त्रिलोकीं जेतुं निष्क्रान्तः ।

स तु दत्त्वा दशग्रीवो वलं[1] घोरं खरस्य तत् । भगिनीं च समाश्वास्य हृष्टः स्वस्थतरोऽभवत्॥ १ ॥
ततो निकुम्भिला नाम लङ्कोपवनमुत्तमम् । तद्राक्षसेन्द्रो बलवान्प्रविवेश सहानुगः ॥ २ ॥

३६] ति० टी०–भ्रातुर्मातृष्वसेयस्य खरस्य समीपे पार्श्वतो वस । तत्समीपे वसेत्यर्थः । मम राज्यपारवश्येन त्वत्संमाननेऽवकाशाभाव इति भावः ॥ ३६ ॥

रा० टी०–ननु तत्र वासेन किमित्यत आह—**चतुर्दशानामिति** । चतुर्दशानां सहस्राणां रक्षसां प्रयाणे दाने च प्रभुर्भविष्यति ॥ ३६ ॥

गो० टी०–**चतुर्दशानामिति** । चतुर्दशानां सहस्राणां प्रयाणे प्रेषणे दाने अन्नपानवस्त्रादिदाने प्रभुस्ते भ्रातेत्यन्वयः । भविष्यतीति । तवादेशं त्वद्वचः सदा कुर्वन्भविष्यति ॥३६-४२॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

३७] ति० टी०–प्रयाणे प्रेषणे दानेऽन्नवस्त्रादिदाने प्रभुस्ते भ्रातेत्यन्वयः ॥ ३७ ॥

रा० टी०–ननु तेन मम किमित्यत आह—**तत्रेति** । तत्र प्राप्तप्रभुत्वे ते मातृष्वसेयो भ्रातायं खरः तवादेशं कुर्वन्सत्रैव प्रभुर्भविष्यति एतेन तवाज्ञाभङ्गकरणे तत्प्रभुत्वं विनाशयिष्यामीति सूचितम् ॥ ३७ ॥

३८–४२] ति० टी०–तवादेशं सदा कुर्वन्भविष्यति ॥ ३८–४२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

रा० टी०–**शीघ्रमिति** । अयं खरः दण्डकान्परिरक्षितुं शीघ्रं गच्छतु अस्य खरस्य बलाध्यक्षस्तु दूषणो भविष्यति ॥ ३८ ॥

रा० टी०–**तत्रेति** । खरः यदा ते वचनं करिष्यति तदा रक्षसां प्रभुरेव भविष्यति तत्प्रभुत्वं न कदापि नङ्क्ष्यतीत्यर्थः ॥ ३९ ॥

रा० टी०–**एवमिति** । दशग्रीवः एवमुक्त्वा रक्षसां चतुर्दश सहस्राणि अस्य खरस्य सैन्यं भवितुमिति शेषः आदिदेश ॥ ४० ॥

रा० टी०–**स इति** । राक्षसैः परिवृतः खरः दण्डकानागच्छत ॥ ४१ ॥

रा० टी०–**स इति** । स खरः तत्र दण्डकारण्ये निहतकंटकं राज्यं कारयामास शूर्पणखा तु दण्डके वने न्यवसत् ॥४२॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

१] ति० टी०–स त्विति ॥ १ ॥

रा० टी०–खरप्रेषणानन्तरकालिकं वृत्तान्तमाह—**स इत्यादिभिः** । वलं खरस्य दत्वा भगिनीं समाश्वास्य च हृष्टो दशग्रीवस्स्वस्थतरोऽभवत् ॥ १ ॥

गो० टी०–**स तु दत्त्वेत्यादि** ॥ १ ॥

२] ति० टी०–निकुम्भिला लङ्कापश्चिमद्वारदेशवर्ति कर्मसिद्धिहेतुभूतं काननम् ॥ २ ॥

१ सदेति गो. पा. । २ दण्डकावन इति गो. पा. । ३ वनमिति गो. पा. ।

ततो यूपशताकीर्णं सौम्यचैत्योपशोभितम् । ददर्श विष्ठितं यज्ञं श्रिया संप्रज्वलन्निव ॥ ३ ॥
ततः कृष्णाजिनधरं कमण्डलुशिखाध्वजम् । ददर्श स्वसुतं तत्र मेघनादं भयावहम् ॥ ४ ॥
तं समासाद्य लङ्केशः परिष्वज्याथ बाहुभिः । अब्रवीत्किमिदं वत्स वर्तसे ब्रूहि तत्त्वतः ॥ ५ ॥
उशना त्वब्रवीत्तत्र यज्ञसंपत्समृद्धये । रावणं राक्षसश्रेष्ठं द्विजश्रेष्ठो महातपाः ॥ ६ ॥
अहमाख्यामि ते राजञ्श्रूयतां सर्वमेव तत् । यज्ञास्ते सप्त पुत्रेण प्राप्तास्ते[1] बहुविस्तराः ॥ ७ ॥
अग्निष्टोमोऽश्वमेधश्च यज्ञो बहुसुवर्णकः । राजसूयस्तथा यज्ञो गोमेधो वैष्णवस्तथा ॥ ८ ॥
माहेश्वरे प्रवृत्ते तु यज्ञे पुंभिः सुदुर्लभे । वरांस्ते लब्धवान्पुत्रः साक्षात्पशुपतेरिह ॥ ९ ॥
कामगं स्यन्दनं दिव्यमन्तरिक्षचरं ध्रुवम् । मायां च तामसीं नाम यया संपद्यते तमः ॥ १० ॥
एतया किल सङ्ग्रामे मायया राक्षसेश्वर । प्रयुक्तया गतिः शक्या नहि ज्ञातुं सुरासुरैः ॥ ११ ॥
अक्षयाविषुधी बाणैश्चापं चापि सुदुर्जयम् । अस्त्रं च बलवद्राजञ्छत्रुविध्वंसनं रणे ॥ १२ ॥
एतान्सर्वान्वरांल्लब्ध्वा पुत्रस्तेऽयं दशानन । अद्य यज्ञसमाप्तौ च त्वां द्रिदृक्षन्स्थितो ह्यहम् ॥ १३ ॥
ततोऽब्रवीदशग्रीवो न शोभनमिदं कृतम् । पूजिताः शत्रवो यस्माद्व्यैरिन्द्रपुरोगमाः ॥ १४ ॥

रा० टी०–तत इति । राक्षसेन्द्रः निकुम्भिलानाम लङ्कोपवनं लङ्कापश्चिमद्वारवर्तिकर्मसिद्धिकारणीभूतोपवनविशेषं प्रविवेश ॥ २ ॥

गो० टी०–तत इति । निकुम्भिला नाम लङ्कायाः पश्चिमद्वारवर्ति काननम् ॥ २ ॥

३] ति० टी०–चैत्यं देवायतनम् । विष्ठितं प्रवृत्तम् ॥३॥

रा० टी०–तत इति । यूपशतैराकीर्णं चैत्येन देवायतनेन शोभितं विष्ठितं संस्थितं यज्ञं यागशालां श्रिया प्रज्वलन्निव रावणो ददर्श ॥ ३ ॥

गो० टी०–तत इति । चैत्यं देवायतनम् । विष्ठितं प्रवृत्तम् । कमण्डलुः शिखा दण्डो ध्वजश्च यस्य स तथा । अनेन ब्रह्मचर्यं सूचितम् न तु ब्रह्मचर्याश्रमः । अग्निष्टोमादियाजित्वं ध्वात्वोपदेशात् ॥ ३–५ ॥

४–५] ति० टी०–कमण्डलुः शिखा ध्वजो दण्डश्च यस्य तम् । अर्शआद्यजन्तम् । दण्डकमण्डलुयुक्तमित्यर्थः । अनेन ब्रह्मचर्यं सूचितम्, न तु ब्रह्मचर्याश्रमः । अग्निष्टोमयाजित्वस्यानुपदमेव वक्ष्यमाणत्वात् ॥ ४ ॥ ५ ॥

रा० टी०–तत इति । कमण्डलुना सह शिखा ध्वजो दण्डो यस्य तं मेघनादं ददर्श ॥ ४ ॥

रा० टी०–तमिति । लङ्केशः तं मेघनादं समासाद्य परिष्वज्य च इदमाचरणं किं किमर्थं वर्तसे करोषि इति त्वं तत्वतो ब्रूहि इत्यब्रवीत् ॥ ५ ॥

६] ति० टी०–उशना त्वब्रवीदिति । पुत्रस्य यजमानत्वेन मौनित्वात्सोऽवददिति भावः । यज्ञसंपत्समृद्धये यजमानस्य मौनात्यागेन तत्समृद्धिर्भवति ॥ ६ ॥

रा० टी०–उशना इति । तत्र तस्मिन्समये यज्ञसंपत्समृद्धये आगतः इति शेषः उशना शुक्रोऽब्रवीत् एतेन पुत्रस्य मौनव्रतित्वं ध्वनितम् ॥ ६ ॥

गो० टी०–उशना इति ॥ उशना गुरुः शुक्राचार्यः । प्रवर्तकत्वात् स्वयमब्रवीदिति भावः ॥ ६ ॥

७] ति० टी०–ते प्रसिद्धास्ते सप्त यज्ञाः ॥ ७ ॥

रा० टी०–तदाकारमाह–अहमित्यादिभिः । हे राजन् एतद्वृत्तं सर्वमहमाख्यामि त्वया श्रूयताम् आख्यानमेवाह बहुविस्तराः सप्त यज्ञाः प्राप्ताः कृताः ॥ ७ ॥

गो० टी०–अहमिति । यज्ञाः प्रसिद्धाः ॥ ७–१७ ॥

८] ति० टी०–तदेवाह—अग्निष्टोम इति ॥ ८ ॥

९–१२] ति० टी०–पशुपते रुद्रात् ॥ ९–१२ ॥

रा० टी०–यज्ञानां नामानि निर्दिशन्नाह–अग्निष्टोम इति । अग्निष्टोमादयो यज्ञाः कृताः माहेश्वरे यज्ञे प्रवृत्ते तु ते पुत्रः पशुपतेर्वरान् लब्धवान् श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

रा० टी०–वराकारमाह—कामगमित्यादिभिः । स्यन्दनादि यया तमः रिपूणामज्ञानं संपद्यते तां मायां च लब्धवानिति शेषः ॥ १० ॥

रा० टी०–अज्ञानाकारमाह—एतयेति । प्रयुक्तया कृतया एतया लब्धया मायया गतिः मायाकर्तॄणां गमनं सुरासुरैर्ज्ञातुं न शक्या ॥ ११ ॥

रा० टी०–अक्षयाविति । बाणैस्सह अक्षयाविषुधी तूणीरौ शत्रुविध्वंसनमस्त्रं च लब्धवानिति शेषः ॥ १२ ॥

१३] ति० टी०–पुत्रोऽहं च त्वां द्रिदृक्षन्स्थितः ॥१३॥

रा० टी०–एतानिति । हे दशानन एतान्वरान् लब्ध्वा ते पुत्रः अहं च त्वां दिदृक्षुः सन्स्थितः ॥ १३ ॥

१४] ति० टी०–न शोभनं कृतमित्यत्र हेतुः—पूजिता

१ स्थिति गो. पा. । २ दिदृक्षुरिति गो. पा. ।

एहीदानीं कृतं यैद्धि सुकृतं तन्न संशयः । आगच्छ सौम्य गच्छामः स्वैमेव भवनं प्रति॥ १५ ॥
ततो गत्वा दशग्रीवः सपुत्रः सविभीषणः । स्त्रियोऽवतारयामास सर्वास्ता वाष्पगद्गदाः॥ १६ ॥
लक्षिण्यो रत्नभूताश्च देवदानवरक्षसाम् । तस्य तासु मतिं ज्ञात्वा धर्मात्मा वाक्यमब्रवीत्॥१७॥
ईदृशैस्त्वं समाचारैर्यशोर्थकुलनाशनैः । धर्षणं प्राणिनां ज्ञात्वा स्वमतेन विचेष्टसे॥ १८ ॥
ज्ञातींस्तान्धर्षयित्वेमास्त्वयानीता वराङ्गनाः । त्वामतिक्रम्य मधुना राजन्कुम्भीनसी हृता॥ १९ ॥
रावणस्त्वब्रवीद्वाक्यं नावगच्छामि किं त्विदम् । कोऽयं यस्तु त्वयाख्यातो मधुरित्येव नामतः ॥२०॥
विभीषणस्तु संक्रुद्धो भ्रातरं वाक्यमब्रवीत् । श्रूयतामस्य पापस्य कर्मणः फलमागतम् ॥ २१ ॥
मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः । माल्यवानिति विख्यातो वृद्धः प्राज्ञो निशाचरः२२॥
पिता ज्येष्ठो जनन्या नो ह्यस्माकं चार्यकोऽभवत् । तस्य कुम्भीनसी नाम दुहितुर्दुहिताभवत् ॥ २३ ॥
मातृष्वसुरथास्माकं सा च कन्यानलोद्भवा । भवत्यस्माकमेवैषा भ्रातॄणां धर्मतः स्वसा ॥ २४ ॥

इति । तपसैव ब्रह्मादयो देवास्तोषणीयाः, न त्विन्द्रादिप्रीणनोपेतयागेनेति भावः ॥ १४ ॥

रा० टी०–तत इति । दशग्रीवोऽब्रवीत् तदाकारमाह यस्मात् शत्रवः पूजिताः तस्मादिदं शोभनं न कृतम् ॥ १४ ॥

१५–१६] ति० टी०–यत्कृतं तत्कृतमेव । अकर्तुमशक्यत्वादतः परं मा कुर्विति भावः ॥ १५ ॥ १६ ॥

रा० टी०–स्वासन्तोषजन्यतद्गीतिनिवारणायाह—एहीति । यत्कृतं तत् सुकृतमेव अतस्संशयो न कार्य इति शेषः अत आगच्छ वयमपि गच्छामः ॥ १५ ॥

रा० टी०–तत इति । दशग्रीवो गत्वा स्वभवनमिति शेषः वाष्पगद्गदा लक्षिण्यः सुलक्षणयुक्ता देवदानवरक्षसां स्त्रियः अवतारयामास सार्द्धश्लोक एकान्वयी ॥ १६ ॥

१७] ति० टी०–लक्षिण्यः सुलक्षणयुक्ताः । रत्नभूता उत्तमवस्तुभूताः ॥ १७ ॥

रा० टी०–तस्येति । धर्मात्मा विभीषणः तस्य रावणस्य तासु स्त्रीषु मतिं दुष्टाभिप्रायं ज्ञात्वा अब्रवीदर्द्धं पृथक् १७

१८] ति० टी०–ज्ञात्वा तेषां पापजनकत्वं ज्ञात्वापि स्वमतेनोल्लङ्घितधर्मन्यायमर्यादया । स्वेच्छयेत्यर्थः ॥ १८ ॥

रा० टी०–तदाकारमाह—ईदृशैरित्यादिभिः । ज्ञात्वा इष्टानिष्टं बुद्ध्वापि स्वमतेन स्वेच्छयैव यशोर्थकुलनाशनैः ईदृशैः समाचारैः समाचरणैः प्राणिनां धर्षणं पीडामित्यर्थः विचेष्टसे करोषि ॥ १८ ॥

गो० टी०–ईदृशैरिति । स्वमतेन स्वेच्छया । उल्लङ्घितशास्त्रमर्यादयेत्यर्थः ॥ १८ ॥

१९] ति० टी०–ताञ्ज्ञातीनानीतस्त्रीबन्धून् ॥ १९ ॥

रा० टी०–अधर्मणः फलं झटिति भवतीति बोधयन्नाह–ज्ञातीनिति । ज्ञातीन् प्रशस्तजातिमतः यतो धर्षयित्वा वराङ्गना आनीताः अत एव कुम्भीनसी तदभिधा भगिनी मधुना हृता ॥ १९ ॥

गो० टी०–ज्ञातीनिति । ज्ञातीन् आनीतस्त्रीबन्धून् । अस्य कर्मणः परदारापहरणरूपपापस्य । फलमागतं स्वीयस्वसुर्बलान्मधुना हरणम् ॥ १९ ॥ २२ ॥

२०] ति० टी०–नावगच्छामि नेमं वृत्तान्तं जानामि । किं त्विदं कथं संपन्नम् ॥ २० ॥

रा० टी०–रावण इति । इदमपहरणं किं किंकारणकं यस्तु नामतो त्वया मधुरिति ख्यातः सोयं क इति नावगच्छामि जानामि इति वाक्यं रावणोऽब्रवीत् ॥ २० ॥

२१–२२] ति० टी०–अस्य पापस्य कर्मणः परदारग्रहणरूपस्य फलं स्वीयस्वसुर्मध्वसुरेण बलाद्धरणरूपम् २१–२२

रा० टी०–विभीषण इति । विभीषणोऽब्रवीत्तदाकारमाह अस्य दारापहणादेः पापस्य कर्मणः फलमागतम् ॥२१॥

रा० टी०–फलाकारमाह—मातेत्यादिभिः । नोस्माकं मातामहस्य सुमालिनः माल्यवानिति विख्यातो यो ज्येष्ठो भ्राता अत एव अस्माकं जनन्या ज्येष्ठः पिता ज्येष्ठपितृव्य इत्यर्थः अत एव आर्यकः श्रेष्ठः अभवत् तस्य दुहितुः पुष्पोत्करामिधा या दुहिता कुम्भीनसी नामाभवत् श्लोकद्वयमेकान्वयि ॥ २२ ॥ २३ ॥

२३] ति० टी०–आर्यको मातामहः ॥ २३ ॥

गो० टी०–पितेति । अस्माकं जनन्याः सुमालिसुतायाः कैकस्याः ज्येष्ठा भगिनी काचिदस्ति । सा तु नाम्ना पुष्पोत्कचा । अपरा कुम्भीनसीति पूर्वमुक्ता । अस्माकं त्वार्यको माल्यवान् अस्माकं ज्येष्ठमातामहः । अस्माकं जनन्याश्च ज्येष्ठः पिता । तस्य माल्यवतः कुम्भीनसी नाम दुहितास्ति । अनलोद्भवा अनला माल्यवतः सुता तस्याः कन्या कुम्भीनसीत्यर्थः । अस्मन्मातामहस्य सुमालिनः द्वे पुत्र्यौ प्रसिद्धे पुष्पोत्कचा कैकसी चेति तयोर्ज्येष्ठः पिता माल्यवान् तस्य पुत्री अनला तस्याः कन्या कुम्भीनसी सा अस्माकं स्वसा । ज्येष्ठमातामहपुत्र्याः पुत्रीत्वादत एव धर्मतः स्वसेत्युक्ता ॥ २३ ॥ २४ ॥

२४] ति० टी०–अत्रेदं बोध्यम्—अस्मन्मातामहस्य

१ विद्धीति गो. पा. । २ स्वमिति गो. पा. । ३ ज्ञातिनामिति गो. पा. । ४ भ्रातेति गो. पा. ।

सा हृता मधुना राजन्राक्षसेन बलीयसा । यज्ञप्रवृत्ते पुत्रे तु मयि चान्तर्जलोषिते ॥ २५ ॥
कुम्भकर्णो[1] महाराज निद्रामनुभवत्यथ । निहत्य राक्षसश्रेष्ठानमात्यानिह संमतान् ॥ २६ ॥
धर्षयित्वा हृता राजन्गुप्ताप्यन्तःपुरे तव[2] । श्रुत्वापि तन्महाराज क्षान्तमेव हतो न सः[3]॥ २७ ॥
यस्मादवश्यं दातव्या कन्या भर्त्रे हि भ्रातृभिः । तदेतत्कर्मणो ह्यस्य फलं पापस्य दुर्मतेः ॥ २८ ॥
अस्मिन्नेवाभिसंप्राप्तं लोके विदितमस्तु ते । विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः॥ २९ ॥
दौरात्म्येनात्मनोद्भूतस्तप्ताम्भा[3] इव सागरः । ततोऽब्रवीद्दशग्रीवः क्रुद्धः संरक्तलोचनः ॥ ३० ॥
कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु नः । भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः॥३१॥
वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः । अद्य तं समरे हत्वा मधुं रावणनिर्भयम् ॥ ३२ ॥
सुरलोकं गमिष्यामि युद्धाकाङ्क्षी सुहृद्वृतः । अक्षौहिणीसहस्राणि चत्वार्यद्भ्याणि रक्षसाम् ३३

सुता कैकसी, तज्ज्येष्ठाभगिनी पुष्पोत्कटा, कनिष्ठा कुम्भीनसीति पूर्वमुक्तम् । सुमालिभ्राता माल्यवानस्मन्मातुर्ज्येष्ठः पितेत्यस्माकमार्यकः सः । तस्य कन्यानला तत्कन्या कुम्भीनसी सुमाल्यपत्न्यभूतकुम्भीनस्या अन्या इति । सा च कुम्भीनस्यस्माकं मातृष्वसुः कन्या भवति । अनलाया अस्मत्कनिष्ठमातृत्वात्, अत एषा शूर्पणखावदनलाकन्या कुम्भीनसी धर्मतो न्यायतः स्वसा भवति ॥ २४ ॥

रा० टी०–मातृष्वसुरिति । अस्माकं मातृष्वसुस्तु अनला तदभिधा कन्या उद्भवा जाता एषा अनला अस्माकं भ्रातॄणां धर्मतः स्वसा भवति ॥ २४ ॥

२५] **ति० टी०–यज्ञप्रवृत्ते** तेन दीक्षावत्त्वायुद्धप्रवृत्तिनिवारणम् । 'यज्ञप्रमत्ते' इति पाठे यज्ञेन प्रमत्ते स्वगृहकृत्यविस्मृतिमति । अन्तर्जलोषिते । तपोर्थमिति शेषः ॥ २५ ॥

रा० टी०–सेति । पुत्रे मेघनादे यज्ञप्रवृत्ते सति मयि च अन्तर्जलोषिते सति तपोर्थमिति शेषः यः कुम्भकर्णः तस्मिन्निद्रामनुभवति सति राक्षसश्रेष्ठानिहत्य मधुना राक्षसेन सानला हृता श्लोकद्वयमेकान्वयि ॥ २५ ॥ २६ ॥

गो० टी०–सेति । यज्ञप्रमत्तः यज्ञेन प्रमत्तः । विस्मृतस्वगृहकृत्य इत्यर्थः । अन्तर्जलोषित इति तपोर्थमिति शेषः ॥ २५ ॥

२६] **ति० टी०–इह संमतान्** । प्रसिद्धान्स्थितांश्चेत्यर्थः ॥ २६ ॥

गो० टी०–कुम्भकर्ण इति । इह गृहे । वर्तमानानिति शेषः । सम्मतान् सिद्धान् ॥ २६ ॥

२७] **ति० टी०–मधोः** स्वसृहरणं श्रुत्वाप्यस्माभिः क्षान्तमेव, न तु स हतः ॥ २७ ॥

रा० टी०–धर्षयित्वेति । अन्तःपुरे गुप्तापि धर्षयित्वा हृतेति श्रुत्वापि यस्मात्कन्या भर्त्रे दातव्या तस्मादस्माभिः क्षान्तमेव स मधुर्न हतः सार्द्धश्लोक एकान्वयी ॥ २७ ॥

गो० टी०–धर्षयित्वेति । श्रुत्वा चैवं मधुना स्वसृहरणं मत्वा अस्माकं क्षान्तमेव न तु मधुर्हतः ॥ २७ ॥

२८] **ति०टी०–कुतस्तत्राह–यस्मादिति** । भ्रातृभिरिति गुरुपरम् । तदेतद्ब्राह्मादिन्याय्यविधिं विना बलात्कन्याहरणरूपम् । अस्य कर्मणः परदारहरणरूपस्य पापस्य ॥ २८ ॥

रा० टी०–तदिति । अस्य दारापहरणरूपस्य कर्मणः एतत्स्वभगिनीहरणजनितोपहासरूपं फलमस्मिन्नेव लोके त्वयाभिसंप्राप्तमिति ते विदितमस्तु ॥ २८ ॥

गो० टी०–यस्मादिति । भ्रातृभिरस्माभिरित्यर्थः । तदिति । आढ्य कल्याणपूर्वकं कन्यादानं विना बलात् कन्याग्रहणम् अस्य पापस्य कर्मणः फलम् ॥ २८ ॥

२९] **ति० टी०–अस्मिन्नेवास्मिन्क्षण** एव । अभिसंप्राप्तं फलत्वेन प्राप्तं ते इदं कर्म तत्कालं तत्फलप्राप्तिश्च लोके विदितमस्तु । परदारहरणस्य अटिति फलदातेति ज्ञात्वा लोकस्ततोनिवर्त्स्यत इति भावः ॥ २९ ॥

रा० टी०–विभीषणेति । रावणो विभीषणवचः श्रुत्वा तप्ताम्भास्सागर इव आत्मना कृतेन दौरात्म्येन उद्भूतः ॥२९॥

गो० टी०–अस्मिन्निति । अस्मिन्नेव दृष्टान्ते अभिसंप्राप्तम् अतः परमन्यत्रापि लोके विदितमस्तु ॥ २९–३१ ॥

३०–३१] **ति० टी०–आत्मना** कृतेन दौरात्म्येनोद्भूतः पीडितस्तप्ताम्भाः सागर इव जातः । अतितप्तो जात इत्यर्थः ॥ ३० ॥ ३१ ॥

रा० टी०–तत इति । दशग्रीवोऽब्रवीत् तदाकारमाह मे रथः कल्प्यताम् ॥ ३० ॥

रा० टी०–भ्रातेति । कुम्भकर्णादयः वाहनान्यधिरोहन्तु ॥ ३१ ॥

३२] **ति० टी०–रावणनिर्भयं** रावणान्निर्भयम् ॥ ३२ ॥

रा० टी०–अद्येति । रावणान्निर्गतं भयं यस्य तं मधुं हत्वा युद्धकांक्षी अहं सुरलोकं गमिष्यामि ॥ ३२ ॥

गो० टी०–अद्येति । रावणान्निर्भयो रावणनिर्भयः३२-४०

३३] **ति० टी०–अद्भ्याणि** मुख्यानि ॥ ३३ ॥

रा० टी०–अक्षौहिणीति । अद्भ्याणि मुख्यानि चत्वारि अक्षौहिणीसहस्राणि निर्ययुः ॥ ३३ ॥

१ कर्णे इति गो. पा. । २ साक्षिति गो. पा. । ३ तप्ताम्भ इति गो. पा.

नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम् । इन्द्रजिच्चग्रतः सैन्यात्सैनिकान्परिगृह्य च ॥ ३४ ॥
जगाम रावणो मध्ये कुम्भकर्णश्च पृष्ठतः । विभीषणश्च धर्मात्मा लङ्कायां धर्ममाचरन् ॥ ३५ ॥
शेषाः सर्वे महाभागा ययुर्मधुपुरं प्रति । खरैरुष्ट्रैर्हयैर्दीप्तैः शिंशुमारैर्महोरगैः ॥ ३६ ॥
राक्षसाः प्रययुः सर्वे कृत्वाकाशं निरन्तरम् । दैत्याश्च शतशस्तत्र कृतवैराश्च दैवतैः ॥ ३७ ॥
रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन्हि पृष्ठतः । स तु गत्वा मधुपुरं प्रविश्य च दशाननः ॥ ३८ ॥
न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान् । साच प्रह्वाञ्जलिर्भूत्वा शिरसा चरणौ गता ॥ ३९ ॥
तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी तदा । तां समुत्थापयामास न भेतव्यमिति ब्रुवन् ॥ ४० ॥
रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते । साब्रवीद्यदि मे राजन्प्रसन्नस्त्वं महाभुज ॥ ४१ ॥
भर्तारं न ममेहाद्य हन्तुमर्हसि मानद । नहीदृशं भयं किंचित्कुलस्त्रीणामिहोच्यते ॥ ४२ ॥
भयानामपि सर्वेषां वैधव्यं व्यसनं महत् । सत्यवाग्भव राजेन्द्र मामवेक्षस्व याचतीम् ॥ ४३ ॥
त्वयाप्युक्तं महाराज न भेतव्यमिति स्वयम् । रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम् ॥ ४४ ॥
क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम् । सह तेन गमिष्यामि सुरलोकं जयाय हि ॥ ४५ ॥
तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात् । इत्युक्ता सा समुत्थाप्य प्रसुप्तं तं निशाचरम् ॥ ४६ ॥
अब्रवीत्संप्रहृष्टेव राक्षसी सा पतिं वचः । एष प्राप्तो दशग्रीवो मम भ्राता महाबलः ॥ ४७ ॥
सुरलोकजयाकाङ्क्षी साहाय्ये त्वां वृणोति च । तदस्य त्वं सहायार्थं सबन्धुर्गच्छ राक्षस ॥ ४८ ॥

३४] ति० टी०–सैन्यादग्रतः सर्वसैन्यस्य पुरस्तात्सेनासमवेताः सैनिकास्तान्परिगृह्य ययौ ॥ ३४ ॥

रा० टी०–इन्द्रजिदिति । इन्द्रजित्सैनिकान् परिगृह्य सैन्यादग्रतो जगाम रावणो मध्ये जगाम कुम्भकर्णस्तु पृष्ठतो जगाम ॥ ३४ ॥

३५–३८] ति० टी०–कुम्भकर्णस्तदिने देवाल्लब्धजागरो युद्धाय निर्गत इति बोध्यम् । लङ्कायां धर्ममाचरन् । तत्रैव स्थित इत्यर्थः ॥ ३५–३८ ॥

रा० टी०–विभीषण इति । विभीषणस्तु लङ्कायां धर्ममाचरन् शेषाः मधुपुरं प्रति ययुः ॥ ३५ ॥

रा० टी०–खरैरिति । राक्षसाः खरादिभिराकाशं निरन्तरं कृत्वा प्रययुः ॥ ३६ ॥

रा० टी०–दैत्या इति । दैत्याः गच्छन्तं रावणमन्वगच्छन् ॥ ३७ ॥

रा० टी०–स इति । दशाननो मधुपुरं प्रविश्य भगिनीं दृष्टवान् मधुं तु न ददर्श ॥ ३८ ॥

३९] ति० टी०–प्रह्वाञ्जलिः कृतनम्रत्वचिह्नाञ्जलिः३९॥

रा० टी०–सेति । कुम्भीनसी प्रह्वांजलिर्भूत्वा शिरसा राक्षसराजस्य चरणौ गताभवदिति शेषः ॥ ३९ ॥

४०] ति० टी०–तां पादपतितां स्वसारं कुम्भीनसीमुत्थापयामास ॥ ४० ॥

रा० टी०–तामिति । न भेतव्यमिति ते किं करवाणीति च ब्रुवन् रावणस्तां कुम्भीनसीमुत्थापयामास ॥ ४० ॥

४१] ति० टी०–किं चापीति । अन्यदपि प्रियमित्यर्थः ॥ ४१ ॥

रा० टी०–सेति । सा कुम्भीनसी अब्रवीत् तदाकारमाह यदि त्वं प्रसन्नः तर्हि मम भर्त्तारं हन्तुं नार्हसि ॥ ४१ ॥

गो० टी०–रावण इति । अन्यदपि तव प्रियमित्यर्थः४१

४२–४८] ति० टी०–ईदृशं भयं भर्तृवधसमानम्४२-४८

रा० टी०–हननाभावे हेतुमाह—नेति । सर्वेषां भयानां तद्धेतूनां मध्ये वैधव्यं महद्व्यसनं भयहेतुः अतः ईदृशं पतिहननसदृशं भयं कुलस्त्रीणां किञ्चिन्नोच्यते ॥ ४२ ॥

गो० टी०–न हीति । ईदृशं भयं भर्तृवधसंभवं भयमित्यर्थः ॥ ४२ ॥

रा० टी०–सत्यवागिति । यतो न भेतव्यमिति त्वयोक्तमतस्सत्यवाग्भव अत एव याचतीं याचन्तीं मामवेक्षस्व मत्प्रार्थितं देहीत्यर्थः ॥ ४३ ॥

रा० टी०–रावण इति । रावणस्त्वसारमब्रवीत् तदाकारमाह तव भर्त्ता क्वास्तीति मम शीघ्रं निवेद्यताम् ॥ ४४ ॥

रा० टी०–वधशंकामपाकुर्वन् तत्प्रयोजनमाह—सहेति । तत्र कारुण्यसौहार्दाद्धेतोर्मधोर्वधान्निवृत्तो योहं सोहं तेन मधुना सह जयाय सुरलोकं गमिष्यामि ॥ ४५ ॥

रा० टी०–इतीति । सा कुम्भीनसी प्रसुप्तं निशाचरं पतिं समुत्थाप्य अब्रवीत् ॥ ४६ ॥

रा० टी०–तदाकारमाह—एष इति । सुरलोकजयाकांक्षी प्राप्तो दशग्रीवस्साहाय्ये त्वां वृणोति ॥ ४७ ॥

१ आचरदिति गो. रा. पा. । २ शिंशिति गो. पा. । ३ जयावहे इति गो. पा. ।

स्निग्धस्य भजमानस्य युक्तमर्थाय कल्पितुम् । तस्यास्तद्वचनं श्रुत्वा तथेत्याह मधुर्वचः ॥ ४९ ॥
ददर्श राक्षसश्रेष्ठं यथान्यायमुपेत्य सः । पूजयामास धर्मेण रावणं राक्षसाधिपम् ॥ ५० ॥
प्राप्य पूजां दशग्रीवो मधुवेश्मनि वीर्यवान् । तत्र चैकां निशामुष्य गमनायोपचक्रमे ॥ ५१ ॥
ततः कैलासमासाद्य शैलं वैश्रवणालयम् । राक्षसेन्द्रो महेन्द्राभः सेनामुपनिवेशयत् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ।

रावणेनाकामापि रम्भा धर्षणं प्राप्ता मनसा वृतं नलकूबरं पतिं गत्वा तमुदन्तं न्यवेदयत तच्छ्रुत्वा नलकूबरोऽपि इतः प्रभृति स यद्यकामां धर्षयेत्तर्हि तस्य मूर्धा सप्तधा शकलीभवेदिति जलं गृहीत्वा शशाप तम् तद्दशग्रीवः श्रुत्वा ततः प्रभृति नाकामामन्यरोचयत्तेनापहृतानामितरस्त्रीणां महान्मोदः प्राप्तः ।

स तु तत्र दशग्रीवः सह सैन्येन वीर्यवान् । अस्तं प्राप्ते दिनकरे निवासं समरोचयत् ॥ १ ॥
उदिते विमले चन्द्रे तुल्यपर्वतवर्चसि । प्रसुप्तं सुमहत्सैन्यं नानाप्रहरणायुधम् ॥ २ ॥
रावणस्तु महावीर्यो निषण्णः शैलमूर्धनि । स ददर्श गुणांस्तत्र चन्द्रपादपशोभितान् ॥ ३ ॥
कर्णिकारवनैर्दीप्तैः कदम्बवकुलैस्तथा । पद्मिनीभिश्च फुल्लाभिर्मन्दाकिन्या जलैरपि ॥ ४ ॥
चम्पकाशोकपुंनागमन्दारतरुभिस्तथा । चूतपाटललोध्रैश्च प्रियङ्ग्वर्जुनकेतकैः ॥ ५ ॥

रा० टी०-तदिति । स्निग्धस्य स्नेहविशिष्टस्य अत एव भजमानस्य अर्थाय अर्थं कल्पयितुं युक्तं तत्तस्मादेतोः अस्य रावणस्य सहायार्थं सबन्धुस्त्वं गच्छ ॥ ४८ ॥

गो०टी०-सत्यवाग् भवेति । न भेतव्यमिति वचनं सत्यं कुर्वित्यर्थः ॥ ४३-४९ ॥

४९] ति० टी०-अर्थाय प्रयोजनाय कल्पयितुं साहाय्यं संपादयितुं युक्तम् । स्निग्धस्य मत्प्रेक्षया त्वयि स्निग्धस्य । भजमानस्य त्वयि जामातृभावं भजतः ॥ ४९ ॥

रा० टी०-तस्या इति । मधुः तथेति वच आह अर्द्धं पृथक् ॥ ४९ ॥

५०-५२] ति० टी०-यथान्यायमुपचारपूर्वम् ५०-५२

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

रा० टी०-ददर्शेति । स मधुः यथान्यायमुपेत्य ददर्श पूजयामास च अर्धद्वयमेकान्वयि ॥ ५० ॥

रा० टी०-प्राप्येति । दशग्रीवः मधुवेश्मनि पूजां प्राप्य तत्रैकां निशामुष्य गमनायोपचक्रमे ॥ ५१ ॥

रा० टी०-तत इति । राक्षसेन्द्रः वैश्रवणालयं कैलासं शैलमासाद्य सेनामुपनिवेशयत् उपन्यवेशयत् ॥ ५२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

गो० टी०-ददर्शेति । यथान्याय्यमिति अर्घ्यायुपचारमित्यर्थः ॥ ५०-५२ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

१] ति० टी०-अथ रावणस्य नलकूबरशापप्राप्तिः—स तु तत्रेति ॥ १ ॥

रा० टी०-सेनोपनिवेशानन्तरकालिकं वृत्तान्तमाह—स इत्यादिभिः । दशग्रीवो दिनकरे अस्तं प्राप्ते सति निवासमरोचयत् ॥ १ ॥

२] ति० टी०-तुल्यपर्वतवर्चसि स्वनिविष्टकैलासपर्वततुल्यप्रभे ॥ २ ॥

रा० टी०-उदित इति । अतुल्यः रावणेन तोलयितुमशक्यो यः कैलाशः तद्वद्वर्चो यस्य तस्मिन् चन्द्रे उदिते सति सैन्यं प्रसुप्तम् ॥ २ ॥

गो० टी०-उदित इति । तुल्यपर्वतवर्चसि स्वनिविष्टकैलासवत्तुल्याभे ॥ २ ॥

३] ति० टी०-गुणान्कैलासपर्वतीयसकलकामभोगार्हधर्मान् ॥ ३ ॥

रा० टी०-रावण इति । शैलमूर्धनि निषण्णो रावणः चन्द्रैः पादपैश्च शोभितान् गुणान् कैलासावयवान् ददर्श ॥३॥

गो० टी०-रावण इति । गुणान् भोगार्हधर्मान् ॥ ३ ॥

४-५] ति० टी०-पद्मिन्यः सरांसि तासां फुल्लत्वं तत्कालोचितविकासवत्कह्लारादिभिर्बोध्यम् ॥ ४ ॥ ५ ॥

THE KUPPUSWAMI SASTRI RESEARCH INSTITUTE MYLAPORE, CHENNAI-4

तगरैर्नारिकेरैश्च प्रियालपनसैस्तथा । (आम्रबिल्वैस्तमालैश्च प्रियालबकुलैरपि) ॥
एतैरन्यैश्च तरुभिरुद्भासितवनान्तरे ॥ ॥ ६ ॥
किंनरा मदनेनार्ता रक्ता मधुरकण्ठिनः । समं संप्रजगुर्यत्र मनस्तुष्टिविवर्धनम् ॥ ७ ॥
विद्याधरा मदक्षीवा मदरक्तान्तलोचनाः । योषिद्भिः सह संक्रान्ताश्चिक्रीडुर्जहृषुश्च वै ॥ ८ ॥
घण्टानामिव संनादः शुश्रुवे मधुरस्वनः । अप्सरोगणसङ्घानां गायतां धनदालये ॥ ९ ॥
पुष्पवर्षाणि मुञ्चन्तो नगाः पवनताडिताः । शैलं तं वासयन्तीव मधुमाधवगन्धिनः ॥ १० ॥
मधुपुष्परजःपृक्तं गन्धमादाय पुष्कलम् । प्रववौ वर्धयन्कामं रावणस्य सुखोऽनिलः ॥ ११ ॥
गेयात्पुष्पसमृद्ध्या च शैत्याद्वायोर्गिरेर्गुणात् । प्रवृत्तायां रजन्यां च चन्द्रस्योदयनेन च ॥ १२ ॥
रावणः सै महावीर्यः कामस्य वशमागतः । विनिःश्वस्य विनिःश्वस्य शशिनं समवैक्षत ॥ १३ ॥
एतस्मिन्नन्तरे तत्र दिव्याभरणभूषिता । सर्वाप्सरोवरा रम्भा पूर्णचन्द्रनिभानना ॥ १४ ॥
दिव्यचन्दनलिप्ताङ्गी मन्दारकृतमूर्धजा । दिव्योत्सवकृतारम्भा दिव्यपुष्पविभूषिता॥ १५ ॥
चक्षुर्मनोहरं पीनं मेखलादामभूषितम् । समुद्वहन्ती जघनं रतिप्राभृतमुत्तमम् ॥ १६ ॥
कृतैर्विशेषकैरार्द्रैः षड्तुकुसुमोद्भवैः । बभावन्यतमेव श्रीः कान्तिश्रीद्युतिकीर्तिभिः ॥१७॥

रा० टी०–कर्णिकारेति। कर्णिकारवनादिभिः उद्भासितं प्रकाशितं वनान्तरं यस्य तस्मिन्शैले मदेनार्ताः किन्नराः समं संप्रजगुः यत्र यस्मिन्गाने मनस्तुष्टिविवर्धनं भवतीति शेषः श्लोकचतुष्टयमेकान्वयि ॥ ४–७ ॥

गो० टी०–कर्णिकारेति । कदम्बगहनैः कदम्बवनैः४-५

६] ति० टी०–ईदृशे वनान्तरे प्रजगुरित्यन्वयः ॥ ६ ॥

गो० टी०–एतैरिति । रक्ता रागयुक्ताः। मधुरकण्ठिनः मधुरकण्ठध्वनयः। समं स्वस्त्रीभिरिति शेषः ॥ ६--९ ॥

७–९] ति० टी०–रक्ता रागयुक्ताः। मधुरकण्ठिनो मधुरकण्ठध्वनयः समम् स्वस्त्रीभिरिति शेषः। यत्र कैलासे ॥७–९॥

रा० टी०–विद्येति । मदेन क्षीवाः मत्ताः योषिद्भिस्सह संक्रान्ताः मिलिताः विद्याधराः चिक्रीडुर्जहृषुश्च ॥ ८

रा० टी०–घण्टानामिति। धनदालये गायतामप्सरोगणसंघानां घण्टानां सन्नाद इव मधुरस्वनः शुश्रुवे ॥ ९ ॥

१०] ति० टी०–वासयन्त्यधिवासयन्ति सुगन्धं कुर्वन्ति । मधुमाधवगन्धिनो वसन्तीयसर्वपुष्पसुगन्धयः ॥ १० ॥

रा० टी०–पुष्पेति । पवनेन ताडिताः प्रकम्पिताः अत एव पुष्पवर्षाणि मुञ्चन्तः अत एव मधुना अनेकपुष्परसेन युक्तो यो माधवो वसन्तः तस्मिन्निव गन्धो येषां ते नगाः वृक्षाः तं शैलं वासयन्तीव ॥ १० ॥

गो० टी०–पुष्पवर्षाणीति । वासयन्ति अधिवासयुक्तं कुर्वन्ति । मधुमाधवगन्धिनः नित्यमेव मधुमाधवाभ्यां चैत्रवैशाखाभ्यां वसन्तमासाभ्यां गन्धिनः तत्कृतपुष्पगन्धा इत्यर्थः१०

११–१४] ति० टी०–मधुना मकरन्देन पुष्परजसा पृक्तं मिलितम् ॥ ११–१४ ॥

रा० टी०–मध्विति । अनिलः मधुपुष्परजोभ्यां पृक्तं संयुक्तं गंधमादाय रावणस्य कामं वर्द्धयन् सन् प्रववौ ॥११॥

रा० टी०–गेयादिति । रजन्यां प्रवृत्तायां सत्यां गेयात् गानात् पुष्पसमृद्ध्यादिभ्यश्च चन्द्रस्योदयनेन च कामस्य वशमागतो रावणो विनिःश्वस्य विनिःश्वस्य शशिनं समवैक्षत श्लोकद्वयमेकान्वयि ॥ १२–१३ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे सर्वाप्सरोभ्यो वरा मन्दारैः कल्पतरुकुसुमैः कृता अलंकृता मूर्द्धजाः यस्याः दिव्योत्सवाय कृतः आरम्भो यया रतिप्राभृतं रतेः उपायनभूतं मनोहरं चक्षुः पीनं जघनं च समुद्वहन्ती रम्भा कृतैः रचितैः विशेषकैः हरिचन्दनादिकृतकपोलादिचित्रविशेषैः षड्तुकुसुमोद्भवैरार्द्रैर्हारैश्च कान्त्यादिभिश्च अन्यतमा अन्या श्रीरिव बभौ तत्र कान्तिः शरीरशोभा श्रीराभरणसंपत्तिः द्युतिः प्रकाशविशेषः षड्ऋत्वित्यत्र गुण आर्षः श्लोकचतुष्टयमेकान्वयि ॥ १४–१७ ॥

गो० टी०–मध्विति । मधुपुष्परजःपृक्तं मधुना मकरन्देन पुष्परजसा च संपृक्तम् ॥ ११–१४ ॥

१५] ति० टी०–मन्दारेति । मन्दारैः कल्पवृक्षकुसुमैः कृतालंकारा मूर्धजाः कचा यस्याः सा । दिव्योत्सवाय दिव्यरतये कृत आरम्भो गमनरूपो यया ॥ १५ ॥

१६] ति० टी०–रतिप्राभृतं रत्युपायनभूतम् ॥ १६ ॥

गो० टी०–दिव्येति । मन्दारकृतमूर्धजा मन्दारपुष्पकृतालंकारकेशीत्यर्थः । रतिप्राभृतं रत्युपदाभूतं रतिवर्धकमित्यर्थः ॥ १५ ॥ १६ ॥

१७] ति० टी०–विशेषकैर्हारैश्चन्दनादिकल्पितैः कपो-

१ कैलैरिति गो. रा. पा. । २ इदमर्धमधिकं गो. पुस्त. । ३ स्विति गो. पा. । ४ दिव्यपुष्पविभूषितेति गो. पा. । ५ पूर्णचन्द्रनिभाननेति गो. पा. । ६ श्रीकान्तीति समस्तो गो. पु. ।

नीलं सतोयमेघाभं वस्त्रं समवगुण्ठिता । यस्या वक्त्रं शशिनिभं भ्रुवौ चापनिभे शुभे ॥ १८ ॥
ऊरू करिकराकारौ करौ पल्लवकोमलौ । सैन्यमध्येन गच्छन्ती रावणेनोपलक्षिता ॥ १९ ॥
तां समुत्थाय गच्छन्तीं कामबाणवशं गतः । करे गृहीत्वा लज्जन्तीं स्मयमानोऽभ्यभाषत ॥ २० ॥
क्व गच्छसि वरारोहे कां सिद्धिं भजसे स्वयम् । कस्याभ्युदयकालोऽयं यस्त्वां समुपभोक्ष्यते ॥२१॥
त्वदाननरसस्याद्य पद्मोत्पलसुगन्धिनः । सुधामृतरसस्येव कोऽद्य तृप्तिं गमिष्यति ॥ २२ ॥
स्वर्णकुम्भनिभौ पीनौ शुभौ भीरु निरन्तरौ । कस्योरस्थलसंस्पर्शं दास्यतस्ते कुचाविमौ ॥ २३ ॥
सुवर्णचक्रप्रतिमं स्वर्णदामचितं पृथु । अध्यारोक्ष्यति कस्तेऽद्य जघनं स्वर्गरूपिणम् ॥२४॥
मद्विशिष्टः पुमान्कोऽद्य शक्रो विष्णुरथाश्विनौ । मामतीत्य हि यच्च त्वं यासि भीरु न शोभनम् ॥२५॥
विश्रम त्वं पृथुश्रोणि शिलातलमिदं शुभम् । त्रैलोक्ये यः प्रभुश्चैव मदन्यो नैव विद्यते ॥ २६ ॥
तदेवं प्राञ्जलिः प्रह्वो याचते त्वां दशाननः । भर्तुर्भर्ता विधाता च त्रैलोक्यस्य भजस्व माम् ॥२७॥
एवमुक्ताब्रवीद्रम्भा वेपमाना कृताञ्जलिः । प्रसीद नार्हसे वक्तुमीदृशं त्वं हि मे गुरुः ॥ २८ ॥

लादिषु चित्रकैः पडर्तुकुसुमोद्भवैः गुण आर्षः । षड्ऋतुकुसुमकल्पितैरलंकारैः कान्त्या प्रत्यवयवशोभारूपसौन्दर्येण श्रियाभरणसंपदा द्युत्या लावण्येन कीर्त्या च । अन्यतमा स्वार्थे तमः । अन्या श्रीरिव लक्ष्मीरिव बभावित्यर्थः ॥ १७ ॥

गो०टी०–कृतैरिति । षडर्तुकुसुमोद्भवैः षड्ऋतुकुसुमोद्भवैरित्यर्थः । ऋकारस्य गुणश्छान्दसः । विशेषकैरलंकारैरित्यर्थः १७

१८-१९] ति० टी०–समवगुण्ठिता प्राप्ततवती ॥ १८ ॥ १९ ॥

रा० टी०–नीलमिति । यस्या वक्त्रं शशिनिभं करौ पल्लवकोमलौ सा सतोयमेघाभं नीलं वस्त्रं समवगुंठिता धृतवती सैन्यमध्येन गच्छन्ती रंभा रावणेनोपलक्षिताभवदिति शेषः श्लोकद्वयमेकान्वयि ॥ १८ ॥ १९ ॥

गो० टी०–वभाविति । श्रीकान्तिद्युतिमती ह्रिया देवस्त्रीविशेषाणामन्यतमेव स्थिता । अभिसान्त्वेन नीलवस्त्रमादाय समवकुण्ठिता प्राप्ततवती ॥ १८–२० ॥

२०] ति० टी०–गच्छन्तीं तां समुत्थाय करे गृहीत्वाभ्यभाषतेत्यन्वयः ॥ २० ॥

रा० टी०–तामिति । कामबाणवशं गतो रावणः समुत्थाय गच्छन्तीं तां रम्भां करे गृहीत्वा स्मयमानस्सन् अभ्यभाषत ॥ २० ॥

२१] ति० टी०–कां सिद्धिं कस्य संभोगसिद्धिम् ॥ २१ ॥

रा० टी०–तदाकारमाह—क्वेत्यादिभिः । कां किंसंबंधिनीं सिद्धिं भोगसंपत्तिं भजसे पूरयसि यस्त्वां भोक्ष्यते तस्य कस्यायमभ्युदयकालः अन्तर्भावितणिजर्थो भजिः॥२१॥

गो० टी०–केति । कां सिद्धिं कस्य भोगसिद्धिमित्यर्थः । सुधामृतरसस्येव अमृतादमृतरसस्येवेत्यर्थः । तृप्तियोगे षष्ठी ॥ २१–२३ ॥

२२-२३] ति० टी०–आननरसस्य । अधरामृतेनेत्यर्थः ॥ २२ ॥ २३ ॥

रा० टी०–त्वदिति । त्वदाननरसस्य त्वदाननरसैः कस्तृप्तिं गमिष्यति किञ्च सुधामृतरसस्येव त्वदाननरसस्य उपभोक्ता कः तृप्तिं गमिष्यति न कोपीत्यर्थः ॥ २२ ॥

रा० टी०–स्वर्णेति । निरन्तरौ संश्लिष्टावित्यर्थः इमौ ते कुचौ कस्य जनस्य उरःस्थलसंस्पर्शं यथा भवति तथा दास्यतः ॥ २३ ॥

२४] ति० टी०–स्वर्गरूपिणं स्वर्गो निरतिशयसुखं तस्य रूपं यस्यास्ति । निरतिशयसुखहेतुभूतमित्यर्थः ॥ २४ ॥

रा० टी०–सुवर्णेति । सुवर्णचक्रप्रतिमं सुवर्णचक्रेण सदृशं स्वर्णदाम्नैव चितं रचितम् स्वर्गरूपिणमतिशयसुखस्वरूपं ते जघनं कोऽध्यारोक्ष्यति ॥ २४ ॥

२५] ति० टी०–यच्च यासि तत्र शोभनमित्यन्वयः ॥ २५ ॥

रा० टी०–मदिति । मद्विशिष्टः शक्रादन्यतमः कः न कोपीत्यर्थः । अतः मामतीत्य यच्च यासि तत्र शोभनम् ॥ २५ ॥

२६] ति० टी०–त्रैलोक्ये यः प्रभुः स्यात्स मदन्यो नैवेत्यर्थः । तेन त्रैलोक्यप्रभोर्ममान्यार्थमुपेक्षा न युक्तेति भावः २६

रा० टी०–विश्रमेति । त्रैलोक्ये यः प्रभुः स मदन्यो न विद्यते अहमेव प्रभुरित्यर्थः अतः यदिदं शिलातलं तत्र त्वं विश्रम ॥ २६ ॥

२७-२८] ति० टी०–त्रैलोक्यस्य भर्तुरपि भर्ता विधाता च । तं मां भजस्वेत्यर्थः ॥ २७ ॥ २८ ॥

रा० टी०–तदिति । त्रैलोक्यस्य भर्तुः स्वामिनोपि भर्ता स्वामी अत एव विधाता पालयिता दशाननः त्वां याचते अतो मां भजस्व ॥ २७ ॥

रा० टी०–एवमिति । रम्भा अब्रवीत् तदाकारमाह

---

१ वीक्षितेति गो. पा. । २ आरोहतीति गो. पा. । ३ इदं चिन्त्यं " यदन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावद्विवचविषये निर्धारणे वर्तेते इति सिद्धान्तकौमुदी । ४ कर्मत्वेनैवान्वयोपपत्तौ व्याख्यातृविवक्षितक्रियाविशेशणत्वं मृग्यफलं क्लिष्टकल्पनाग्रस्तमित्यपि भाति ।

अन्येभ्योऽपि[1] त्वया रक्ष्या प्राप्नुयां धर्षणं यदि । तद्धर्मतः स्नुषा तेऽहं तत्त्वमेतद्ब्रवीमि ते ॥ २९ ॥
अथाब्रवीद्दशग्रीवश्चरणाधोमुखीं स्थिताम् । रोमहर्षमनुप्राप्तां दृष्टमात्रेण तां तदा ॥ ३० ॥
सुतस्य यदि मे भार्या ततस्त्वं हि स्नुषा भवेः । बाढमित्येव सा रम्भा प्राह रावणमुत्तरम् ॥ ३१ ॥
धर्मतस्ते सुतस्याहं भार्या राक्षसपुंगव । पुत्रः प्रियतरः प्राणैर्भ्रातुर्वैश्रवणस्य ते ॥ ३२ ॥
विख्यातस्त्रिषु लोकेषु नलकूवर इत्ययम् । धर्मतो यो भवेद्विप्रः क्षत्रियो वीर्यतो भवेत् ॥ ३३ ॥
क्रोधाद्यश्च भवेदग्निः क्षान्त्या च वसुधासमः । तस्यास्मि कृतसंकेता लोकपालसुतस्य वै ॥ ३४ ॥
तमुद्दिश्य तु मे सर्वं विभूषणमिदं कृतम् । यथा तस्य हि नान्यस्य भावो मां प्रति तिष्ठति३५
तेन सत्येन मां राजन्मोक्तुमर्हस्यरिंदम । स हि तिष्ठति धर्मात्मा मां प्रतीक्ष्य समुत्सुकः॥३६॥
तत्र विघ्नं तु तस्येह कर्तुं नार्हसि मुञ्च माम् । सद्भिराचरितं मार्गं गच्छ राक्षसपुंगव ॥ ३७ ॥
माननीयो मम त्वं हि पालनीया तथास्मि ते । एवमुक्तो दशग्रीवः प्रत्युवाच विनीतवत् ॥ ३८ ॥
स्नुषास्मि यदवोचस्त्वमेकपत्नीष्वयं क्रमः । देवलोकस्थितिरियं सुराणां शाश्वती मता ॥ ३९ ॥
पतिरप्सरसां नास्ति न चैकस्त्रीपरिग्रहः । एवमुक्त्वा स तां रक्षो निवेश्य च शिलातले॥ ४० ॥

गुरू राजा त्वमीदृशं वक्तुं नार्हसे अतः त्वं प्रसीद एवं न वदेत्यर्थः ॥ २८ ॥

२९] ति० टी०–अन्येभ्योऽपि यदि धर्षणं प्राप्नुयां तदापि त्वया रक्ष्या, अत एवं वक्तुं नार्हसि ॥ २९ ॥

रा० टी०–अन्येभ्य इति । यस्मात् तेऽहं धर्मतः स्नुषा इति सत्यं ब्रवीमि तस्मात्यदि अन्येभ्योपि धर्षणं प्राप्नुयाम् तदापि त्वया रक्ष्या ॥ २९ ॥

३०] ति० टी०–चरणाधोमुखीं चरणावलोकनेनाधोमुखतया स्थिताम् ॥ ३० ॥

रा० टी०–अथेति । दशग्रीवः चरणाधोमुखीं चरणयोरध एव मुखं यस्यास्ताम् स्वचरणाग्रमात्रावलोकनकर्त्रीमित्यर्थः दृष्टमात्रेण रोमहर्षं भयहेतुकरोमोद्गममनुप्राप्तां रम्भामब्रवीत् ३०

३१] ति० टी०–सुतस्य । इन्द्रजित इत्यर्थः ॥ ३१ ॥

रा० टी०–तदाकारमाह—**सुतस्येति** । यदि मे सुतस्य भार्या त्वं भवेः ततस्तदा त्वं मे स्नुषा अतो बाढं त्वद्वचनमङ्गीकृतं तदा रम्भा रावणमुत्तरमाह ॥ ३१ ॥

३२] ति० टी०–धर्मतः संकेतधर्मतः ॥ ३२ ॥

रा० टी०–तदाकारमाह—**धर्मत इति** । ते सुतस्याहं भार्यास्मीति शेषः अहं पृथक् ननु कथं त्वं मत्पुत्रभार्येत्यत आह—**पुत्र इत्यादिभिः** । नलकूवरः इत्ययं यो विख्यातः ॥ ३२ ॥ ३३ ॥

३३] ति० टी०–धर्मतो धर्मानुष्ठानविषये ॥ ३३ ॥

रा० टी०–यः धर्मतो विप्रो भवेत् वीर्यतः क्षत्रियो भवेत् क्रोधाद्योग्निः क्षान्त्या यो वसुधासमः ते भ्रातुर्वैश्रवणस्य प्राणैः प्रियतरः पुत्रः तस्य लोकपालसुतस्य नलकूवरस्य कृतसंकेता रत्यर्थं संकेतवत्यस्मि अत एव तमुद्दिश्यैव कृतं रचितमिदं मे विभूषणमत एव यथा तस्य नलकूवरस्य भावः प्रेम मां प्रति तिष्ठति तथान्यस्य न श्लोकचतुष्टयमेकान्वयि ॥३४॥३५॥

गो० टी०–धर्मत इति । धर्मतः धर्मानुष्ठानविषये ॥३४॥

३४] ति० टी०–कृतसंकेता कृतरतिसंकेता ॥ ३४ ॥

गो० टी०–तस्येति । कृतसंकेता । कृतरतिसंकेता यथा तस्य भावो मां प्रति नान्यस्य तथा ममापि भावस्तं प्रति तिष्ठतीत्यर्थः । स्नुषास्मि यदवोचः स्नुषास्मीति यदवोच इत्यर्थः ॥ ३९–४२ ॥

३५–३८] ति० टी०–यथा तस्य भावो मां प्रति तिष्ठति तथा ममापि भावस्तं प्रति तिष्ठतीति शेषः । नान्यस्य नान्यं प्रतीत्यर्थः ॥ ३५ ॥ ३८ ॥

३९] ति० टी०–स्नुषास्मि यदिति । स्नुषास्मीति यदवोच इत्यर्थः । देवलोकस्थितिर्देवलोकमर्यादा ॥ ३९ ॥

रा० टी०–तेनेति । धर्मात्मा नलकूवरः मां प्रतीक्ष्य तिष्ठति तेन नलकूवरकृतेन सत्येन मत्प्रतीक्षणेन मां मोक्तुमर्हसि तस्य सुतस्य विघ्नं कर्तुं नार्हसि अतो मां मुञ्च सार्द्धश्लोकद्वयमेकान्वयि ॥ ३६ ॥ ३७ ॥

रा० टी०–सद्भिरिति । सद्भिराचरितं मार्गं त्वं गच्छ त्वं तु मे माननीयोसि अहं तु ते पालनीयास्मि ॥ ३८ ॥

रा० टी०–एवमिति । दशग्रीवः प्रत्युवाच अयं क्रमः एकपतिनिरूपितपत्नीत्वविशिष्टासु एव देवलोकस्थितिर्दृष्टत्तन्तु अप्सरसां पतिर्नास्ति सुराणां च एकस्त्रीपरिग्रहो नास्ति इयं शाश्वती निरन्तरा मता सार्द्धश्लोक एकान्वयी ॥ ३९ ॥ ४० ॥

४०] ति० टी०–इयमितीदं शब्दार्थः—**पतिरिति** ।

---

१ ह्रीति गो. पा. । २ एवेति गो. रा. पा. । ३ सुतस्येति गो. रा. पा. ।

कामभोगाभिसंरक्तो मैथुनायोपचक्रमे । सा विमुक्ता ततो रम्भा भ्रष्टमाल्यविभूषणा॥ ४१ ॥
गजेन्द्राक्रीडमथिता नदीवाकुलतां गता । लुलिताकुलकेशान्ता करवेपितपल्लवा ॥ ४२ ॥
पवनेनावधूतेव लता कुसुमशालिनी । सा वेपमाना लज्जन्ती भीता करकृताञ्जलिः॥ ४३ ॥
नलकूबरमासाद्य पादयोर्निपपात ह । तदवस्थां च तां दृष्ट्वा महात्मा नलकूबरः ॥ ४४ ॥
अब्रवीत्किमिदं भद्रे पादयोः पतितासि मे । सा वै निःश्वसमाना तु वेपमाना कृताञ्जलिः॥ ४५ ॥
तस्मै सर्वं यथातत्त्वमाख्यातुमुपचक्रमे । एष देव दशग्रीवः प्राप्तो गन्तुं त्रिविष्टपम् ॥ ४६ ॥
तेन सैन्यसहायेन निशेयं परिणामिता । आयान्ती तेन दृष्टास्मि त्वत्सकाशमरिंदम ॥ ४७ ॥
गृहीता तेन पृष्टास्मि कस्य त्वमिति रक्षसा । मया तु सर्वं यत्सत्यं तस्मै सर्वं निवेदितम् ॥ ४८ ॥
काममोहाभिभूतात्मा नाश्रौषीत्तद्वचो मम । याच्यमानो मया देव स्नुषा तेऽहमिति प्रभो॥ ४९ ॥
तत्सर्वं पृष्ठतः कृत्वा बलात्तेनास्मि धर्षिता । एवं त्वमपराधं मे क्षन्तुमर्हसि सुव्रत ॥ ५० ॥
नहि तुल्यं बलं सौम्य स्त्रियाश्च पुरुषस्य हि । एतच्छ्रुत्वा तु संक्रुद्धस्तदा वैश्रवणात्मजः ॥ ५१ ॥
धर्षणां तां परां श्रुत्वा ध्यानं संप्रविवेश ह । तस्य तत्कर्म विज्ञाय तदा वैश्रवणात्मजः ॥ ५२ ॥

अप्सरसां नियतः पतिर्नास्ति । सुराणामप्येकाप्सरःपरिग्रहो भार्यात्वेन नास्तीत्यर्थः ॥ ४० ॥

रा० टी०–एवमिति । रक्षो रावणः एवमुक्त्वा तां रम्भां शिलातले निवेश्य मैथुनायोपचक्रमे ॥ ४१ ॥

४१] ति० टी०–विमुक्ता । संभोगानन्तरमिति शेषः॥४१॥

रा० टी०–सेति । गजेन्द्राक्रीडेन मथिता नदीव आकुलतां गता लुलितेन प्रकम्पेन आकुला व्याप्ताः केशान्ता यस्याः करे वेपितः पल्लवः कमलं यस्याः अत एव भ्रष्टे प्रच्युते माल्यविभूषणे यस्याः सा रम्भा ततो रत्यनन्तरं विमुक्ताभवदिति शेषः सार्द्धश्लोक एकान्वयी ॥ ४२ ॥

गो० टी०–सा विमुक्तेति । संभोगानन्तरमिति शेषः । गजेन्द्राक्रीडमथिता गजेन्द्राक्रीडेन मथिता । करवेपितपल्लवा वेपितकरपल्लवा ॥ ४३--४७ ॥

४२-४६] ति० टी०–करवेपितपल्लवा वेपितकरपल्लवा ॥ ४२ ॥ ४६ ॥

रा० टी०–पवनेनेति । भीता अत एव पवनेनावधूता कुसुमशालिनी बहुकुसुमविशिष्टा लतेव वेपमाना लज्जन्ती करकृताञ्जलिस्सा रम्भा नलकूबरमासाद्य पादयोर्निपपात सार्द्धश्लोक एकान्वयी ॥ ४३ ॥ ४४ ॥

रा० टी०–तदिति । सा वर्णितावस्था यस्याः तां रम्भां दृष्ट्वा नलकूबरो मे पादयोः पतितासि इदं किमित्यब्रवीत् ॥ ४५ ॥

रा० टी०–सेति । निःश्वसमाना सा रम्भा तस्मै नलकूबराय यथातत्त्वमाख्यातुमुपचक्रमे ॥ ४६ ॥

रा० टी०–तदाकारमाह—एष इति । दशग्रीवः त्रिविष्टपं गन्तुं प्राप्तः सैन्यसहायेन तेन दशग्रीवेण इयं निशा परिणामिता यापिता मया सहेति शेषः ॥ ४७ ॥

गो० टी०–एष इति । परिणामिता यापितेत्यर्थः । इहेति शेषः ॥ ४८--५२ ॥

४७] ति० टी०–परिणामिता यापिता इहेति शेषः ॥ ४७ ॥

रा० टी०–तदाकारमाह—आयान्तीति । त्वत्सकाशमायान्ती अहं तेन रावणेन दृष्टास्मि अत एव तेन रक्षसा गृहीताहं कस्य त्वमिति पृष्टास्मि ॥ ४८ ॥

४८-५१] ति० टी०–अत्र सर्वपदस्य द्विरुपादानं भयवशात्र दोषाय ॥ ४८ ॥ ५१ ॥

रा० टी०–मयेति । यत्सत्यं तत् सर्वं मया तस्मै रावणाय निवेदितं काममोहाभिभूतात्मा रावणस्तु सर्वं तन्मम वचो नाश्रौषीत् ॥ ४९ ॥

रा० टी०–याच्यमान इति । तेऽहं स्नुषा इति मया याच्यमानो यो रावणस्तेन तत् मयाचितं पृष्ठतः कृत्वा अनादृत्येत्यर्थः अभिधर्षितास्मि ॥ ५० ॥

रा० टी०–एवमिति । हि यतः स्त्रियाः पुरुषस्य बलं तुल्यं न तस्मादेवमुक्तप्रकारेण जातं मेऽपराधं क्षन्तुमर्हसि ॥५१॥

रा० टी०–एतदिति । वैश्रवणात्मजः एतच्छ्रुत्वा क्रुद्धोऽभवदिति शेषः अत एव धर्षणां श्रुत्वैव ध्यानं संप्रविवेश तत्सत्यत्वनिश्चयायेति शेषः ॥ ५२ ॥

गो० टी०–एतदिति । ध्यानं संप्रविवेशेति । एतदुक्तः सत्यो वाऽसत्यो वेति ज्ञातुमिति शेषः ॥ ५३ ॥ ५४ ॥

५२] ति० टी०–ध्यानं संप्रविवेश । एतदुक्तार्थः सत्योऽसत्यो वेति जिज्ञासार्थमिति भावः ॥ ५२ ॥

रा० टी०–तस्येति । वैश्रवणात्मजो मुहूर्तात् मुहूर्तमात्रध्यानात् तस्य रावणस्य तत्कर्म विज्ञाय निश्चित्य क्रोधताम्राक्षः सन् पाणिना तोयं जग्राह ॥ ५३ ॥

मुहूर्तात्क्रोधताम्राक्षस्तोयं जग्राह पाणिना । गृहीत्वा सलिलं सर्वमुपस्पृश्य यथाविधि॥ ५३ ॥ ॥
उत्ससर्ज तदा शापं राक्षसेन्द्राय दारुणम् । अकामा तेन यस्मात्त्वं बलाद्धर्षे प्रधर्षिता ॥ ५४ ॥
तस्मात्स युवतीमन्यां नाकामामुपयास्यति । यदा ह्यकामां कामार्तो धर्षयिष्यति योषितम्॥५५॥
मूर्धा तु सप्तधा तस्य शकलीभविता तदा । तस्मिन्नुदाहृते शापे ज्वलिताग्निसमप्रभे ॥ ५६ ॥
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्युता । पितामहमुखाश्चैव सर्वे देवाः प्रहर्षिताः ॥ ५७ ॥
ज्ञात्वा लोकगतिं सर्वो तस्य मृत्युं च रक्षसः । [ऋषयः पितरश्चैव प्रीतिमापुरनुत्तमाम्] ॥
श्रुत्वा तु स दशग्रीवस्तं शापं रोमहर्षणम् ॥ ॥ ५८ ॥
नारीषु मैथुनीभावं नाकामास्वभ्यरोचयत् । तेन नीताः स्त्रियः प्रीतिमापुः सर्वाः पतिव्रताः ॥
नलकूबरनिर्मुक्तं शापं श्रुत्वा मनःप्रियम् ॥ ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ।

रावणमायान्तं वीक्ष्य भीतः शक्रस्तं जेतुं विष्णुं प्रार्थयत । स तु वरगर्वितस्यास्य न हननकालोऽयं प्राप्ते समये हनिष्याम्यतस्त्वमेव युध्यस्वेति प्रोवाच ततस्तयोः समरे घोरे वसुना सावित्राख्येन सुमाली राक्षसो हतः अन्येऽसुराश्च त्रस्ताः पलायन्त ।

कैलासं लङ्घयित्वा तु ससैन्यवलवाहनः । आससाद महातेजा इन्द्रलोकं दशाननः ॥ १ ॥
तस्य राक्षससैन्यस्य समन्तादुपयास्यतः । देवलोकेऽभवो शब्दो भिद्यमानार्णवोपमः॥ २ ॥
श्रुत्वा तु रावणं प्राप्तमिन्द्रश्चलित आसनात् । देवानथाब्रवीत्तत्र सर्वानेव समागतान् ॥ ३ ॥
आदित्यांश्च वसून्रुद्रान्साध्यांश्च समरुद्गणान् । संज्ञा भवत युद्धार्थं रावणस्य दुरात्मनः ॥ ४ ॥
एवमुक्तास्तु शक्रेण देवाः शक्रसमा युधि । संनह्य सुमहासत्त्वा युद्धश्रद्धासमन्विताः ॥ ५ ॥

५३–५५] ति० टी०–सर्वमुपस्पृश्य । चक्षुरादीन्द्रियगणं सर्वमित्यर्थः ॥ ५३ ॥ ५४ ॥

रा० टी०–गृहीत्वेति । सलिलं गृहीत्वा यथाविध्युपस्पृश्य शापमुत्ससर्ज ॥ शापाकारमाह–अकामेति । यस्मात् अकामा त्वं तेन रावणेन प्रधर्षिता तस्मादन्यामकामां युवतीं स रावणो नोपयास्यति ॥ ५४ ॥ ५५ ॥

गो० टी०–गृहीत्वेति । उपस्पृश्य चक्षुरादीन्द्रियमिति शेषः ॥ ५५ ॥ ५६ ॥

रा० टी०–तत्र हेतुमाह—यदेति । कामार्तो रावणो यदा अकामां योषितं धर्षयिष्यति तदा तस्य रावणस्य मूर्धा सप्तधा शकलीभविता ॥ ५६ ॥

गो०टी०-यदेति। सप्तधा सप्तप्रकारेण शकलीभविता५७-५८

५६] ति० टी०–सप्तधा तस्येति । सप्तधातुवशात्सप्तप्रकारेण । विशकलीभविता लुट् ॥ ५६ ॥

रा० टी०–तस्मिन्निति । शापे उदाहृते सति देवदुंदुभयो नेदुः ॥ ५७ ॥

५७] ति० टी०–दुन्दुभिवाद्यादयः संतोषात् ॥ ५७ ॥

रा० टी०–पितामहेति । सर्वे देवाः लोकगतिं रक्षसो मृत्युं च ज्ञात्वा प्रहर्षिता बभूवुरिति शेषः ॥ ५८ ॥

५८] ति० टी०–तमेव संतोषहेतुमाह—ज्ञात्वेति । लोकगतिं लोकस्य तत्कृतपीडामूलदुर्दशां तस्य रक्षसो मृत्युं च ज्ञात्वेत्यर्थः ॥ ५८ ॥

गो० टी०–ज्ञात्वेति । लोकगतिं लोकस्य तत्पीडामूलदुर्दशाम् । इदं च वचनं सीतादेव्या अक्षतत्वस्य सम्यग्रामबोधनार्थम् ॥ ५९–६१ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

५९] ति० टी०–नाकामास्वभ्यरोचयत् । इदं वचनं सीतादेव्या अक्षतत्वस्य सम्यग्रामं प्रति बोधनार्थम् । तेन रावणेन नीताः प्राक्स्वान्तःपुरं नीताः पतिव्रताः स्त्रियश्च तं स्वेष्टं शापं श्रुत्वा प्रीतिमापुः ॥ ५९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

रा० टी०–श्रुत्वेति । दशग्रीवः शापं श्रुत्वा अकामासु नारीषु मैथुनीभावं नाभ्यरोचयत् ॥ ५८ ॥

रा० टी०–तेनेति । तेन रावणेन नीताः पतिव्रताः स्त्रियः मनःप्रियं शापं श्रुत्वा प्रीतिमापुः ॥ ६० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

१–५] ति० टी०–अथ युद्धे सुमालिवधः—कैलास-

१ यथेति गो. पा. । २ इदमर्धमधिकं गो. पु. । ३ अथेति गो. पा. । ४ निशाचर इति गो. पा. । ५ लोकं ययौ शब्दो मथ्यमानेति गो. पा. । ६ सवसूनिति गो. पा. । ७ विश्वान्साध्यानिति गो. पा. । ८ सज्जीभवतेति गो. रा. पा. ।

स तु दीनः परित्रस्तो महेन्द्रो रावणं प्रति । विष्णोः समीपमागत्य वाक्यमेतदुवाच ह ॥ ६ ॥
विष्णो कथं करिष्यामि रावणं राक्षसं प्रति । अहोऽतिबलवद्रक्षो युद्धार्थमभिवर्तते ॥ ७ ॥
वरप्रदानाद्बलवान्न खल्वन्येन हेतुना । तत्तु सत्यं वचः कार्यं यदुक्तं पद्मयोनिना ॥ ८ ॥
तद्यथा नमुचिर्वृत्रो बलिर्नरकशम्बरौ । त्वद्बलं समवष्टभ्य मया दग्धास्तथा कुरु ॥ ९ ॥
नह्यन्यो देवदेवेश त्वदृते मधुसूदन । गतिः परायणं चापि त्रैलोक्ये सचराचरे ॥ १० ॥
त्वं हि नारायणः श्रीमान्पद्मनाभः सनातनः । त्वयेमे स्थापिता लोकाः शक्रश्चाहं सुरेश्वरः ॥ ११ ॥
त्वया सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम् । त्वामेव भगवन्सर्वे प्रविशन्ति युगक्षये ॥ १२ ॥
तदाचक्ष्व यथा तत्त्वं देवदेव मम स्वयम् । असिचक्रसहायस्त्वं योत्स्यसे रावणं प्रति ॥ १३ ॥
एवमुक्तः स शक्रेण देवो नारायणः प्रभुः । अब्रवीन्न परित्रासः कर्तव्यः श्रूयतां च मे ॥ १४ ॥
न तावदेष दुष्टात्मा शक्यो जेतुं सुरासुरैः । हन्तुं चापि समासाद्य वरदानेन दुर्जयः ॥ १५ ॥
सर्वथा तु महत्कर्म करिष्यति बलोत्कटः । राक्षसः पुत्रसहितो दृष्टमेतन्निसर्गतः ॥ १६ ॥

मिति । कैलासं लङ्घयित्वेन्द्रलोकमाससाद । तस्य मेरूपरि प्रतिष्ठितत्वात् ॥ १ ॥ ५ ॥

रा० टी०-कैलासनिवासानन्तरकालिकं वृत्तान्तमाह—**कैलासमित्यादिभिः** । दशाननः कैलासं लङ्घयित्वा इन्द्रलोकमाससाद ॥ १ ॥

रा० टी०-**तस्येति** । समन्तादुपयास्यतः राक्षससैन्यस्य शब्दः भिद्यमानार्णवोपमस्सन् बभौ ॥ २ ॥

रा० टी०-**श्रुत्वेति** । रावणं प्राप्तं श्रुत्वा आसनाच्चलित इन्द्रः आदित्यादीन् देवान् रावणस्य युद्धार्थं सज्जीभवत इत्यब्रवीत् श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

रा० टी०-**एवमिति** । एवमुक्ताः महासत्त्वा देवाः सत्वरत्व युद्धश्रद्धासमन्विताः बभूवुरिति शेषः ॥ ५ ॥

गो० टी०-**कैलासमित्यादि** ॥ १-८ ॥

६-७] ति० टी०-रावणं प्रति परित्रस्तः । भगवद्वचनस्य परिपालनीयत्वादिति भावः ॥ ६ ॥ ७ ॥

रा० टी०-**स इति** । रावणं प्रति परित्रस्तः अत एव दीनो महेन्द्रः विष्णोस्समीपमागत्य एतदुवाच ॥ ६ ॥

रा० टी०-तदाकारमाह—**विष्णो इति** । अतिबलवद्रक्षो रावणः युद्धार्थमभिवर्तते अतः रावणं प्रति कथं करिष्यामि ७

८] ति० टी०-बलवत्त्वे हेतुमाह—**वरप्रदानादिति** ॥ ८ ॥

रा० टी०-**वरेति** । रावणो वरप्रदानाद्बलवान् अन्येन हेतुना न तत्र हेतुः पद्मयोनिना यदेवाद्यवध्यत्वं वच उक्तं तत्सत्यं कार्यम् सर्वैरिति शेषः ॥ ८ ॥

९] ति० टी०-तद्बलमपरिमितं तावकं बलमाश्रित्य यथा दग्धास्तथा रावणस्यापि वधोपायत्वं कुरु मे आख्याहि ॥ ९ ॥

रा० टी०-**तदिति** । तद्वरदानहेतुकातिबलवत्त्वाद्धेतोः यथा तद्बलं समवष्टभ्य नमुचिप्रभृतयो मया दग्धाः तथा कुरु केनचिदुपायेन अयमपि विदग्धो भवत्वित्यर्थः ॥ ९ ॥

गो० टी०-**तद्यथेति** । त्वद्बलमाहात्म्य यथा नमुच्यादयो हतास्तथा अस्यापि हननोपायं कुर्वित्यर्थः ॥ ९ ॥

१०-१२] ति० टी०-देवेति देवेशेति च विष्णुसंबोधनम् । गती रक्षकः । परायणमाश्रयः ॥ १० ॥ १२ ॥

रा० टी०-**नहीति** । त्रैलोक्ये गतिः रक्षकः परायणं परमाश्रयश्च त्वदृते त्वां विना अन्यो न ॥ १० ॥

रा० टी०-**त्वमिति** । नारायणस्त्वं सनातनो नित्यः अत एव त्वयैव लोकाः शक्रश्च स्थापिताः ॥ ११ ॥

रा० टी०-**त्वयेति** । इदं त्वयैव सृष्टं युगक्षये त्वामेव प्रविशन्ति भूतानीति शेषः ॥ १२ ॥

गो० टी०-**नेति** । देवेति संबुद्धिः ॥ १०-१२ ॥

१३] ति० टी०-तत्तस्मान्मम यथा जयः स्यात्तथा तत्त्वमुपायमाचक्ष्व । स्वयमेव वा योत्स्यसे तद्धीति शेषः ॥ १३ ॥

रा० टी०-**तदिति** । असिचक्रसहायस्त्वं रावणं प्रति यथा योत्स्यसे तथा ममाचक्ष्व ॥ १३ ॥

गो० टी०-**तदेति** । तत्तस्मात्कारणात् । यथा मे जयः स्यात् तथा तत्त्वमुपायतत्त्वम् आचक्ष्व । स्वयमेव युद्धयस्वेति वा । ब्रूहीति शेषः ॥ १३-१५ ॥

१४] ति० टी०-मे । वचनमिति शेषः ॥ १४ ॥

रा० टी०-**एवमिति** । नारायणो मे वचः श्रूयतामित्यब्रवीत् तदाकारमाह परित्रासो न कर्तव्यः ॥ १४ ॥

१५] ति० टी०-वरदानेन दुर्जय एष युधि समासाद्य सुरासुरैर्जेतुं हन्तुं च न शक्यः ॥ १५ ॥

रा० टी०-**ननु तर्हि रावणं जहीत्यत आह—नेति** । वरदानेन दुर्जयः एष रावणो जेतुं हन्तुं चापि न शक्यः ॥ १५ ॥

१६] ति० टी०-महत्कर्म युद्धम् । निसर्गतः सहजज्ञानशक्त्या दृष्टमवगतम् ॥ १६ ॥

---

१ महावीर्यपराक्रमः । असौ हीति गो. पा. । २ नास्तीति गो. पा. । ३ अपीति गो. पा. ।

यत्तु मां त्वमभाषिष्ठा युद्ध्यस्वेति सुरेश्वर । नाहं तं प्रतियोत्स्यामि रावणं राक्षसं युधि ॥ १७ ॥
नाहत्वा समरे शत्रुं विष्णुः प्रतिनिवर्तते । दुर्लभश्चैव कामोऽद्य वरगुप्ताद्धि रावणात् ॥ १८ ॥
प्रतिजाने च देवेन्द्र त्वत्समीपे शतक्रतो । भवितास्मि यथास्याहं रक्षसो मृत्युकारणम् ॥ १९ ॥
अहमेव निहन्तास्मि रावणं सपुरःसरम् । देवता नन्दयिष्यामि ज्ञात्वा कालमुपागतम् ॥ २० ॥
एतत्ते कथितं तत्त्वं देवराज शचीपते । युद्ध्यस्व विगतत्रासः सुरैः सार्धं महाबल ॥ २१ ॥
ततो रुद्राः सहादित्या वसवो मरुतोऽश्विनौ । संनद्धा निर्ययुस्तूर्णं राक्षसानभितः पुरात् ॥ २२ ॥
एतस्मिन्नन्तरे नादः शुश्रुवे[1] रजनीक्षये । तस्य रावणसैन्यस्य प्रयुद्धस्य[2] समन्ततः ॥ २३ ॥
ते प्रबुद्धा[3] महावीर्या[4] अन्योन्यमभिवीक्ष्य वै । सङ्ग्राममेवाभिमुखा अभ्यवर्तन्त हृष्टवत् ॥ २४ ॥
ततो दैवतसैन्यानां संक्षोभः समजायत । तदक्षयं महासैन्यं दृष्ट्वा समरमूर्धनि ॥ २५ ॥
ततो युद्धं समभवद्देवदानवरक्षसाम् । घोरं तुमुलनिर्ह्रादं नानाप्रहरणोद्यतम् ॥ २६ ॥
एतस्मिन्नन्तरे शूरा राक्षसा घोरदर्शनाः । युद्धार्थं समवर्तन्त सचिवा रावणस्य ते ॥ २७ ॥
मारीचश्च प्रहस्तश्च महापार्श्वमहोदरौ । अकम्पनो निकुम्भश्च शुकः सारण एव च ॥ २८ ॥
संह्रादो धूमकेतुश्च महादंष्ट्रो घटोदरः । जम्बुमाली महाह्रादो विरूपाक्षश्च राक्षसः ॥ २९ ॥
सुप्तघ्नो यज्ञकोपश्च दुर्मुखो दूषणः खरः । त्रिशिराः करवीराक्षः सूर्यशत्रुश्च राक्षसः ॥ ३० ॥
महाकायोऽतिकायश्च देवान्तकनरान्तकौ । एतैः सर्वैः[5] परिवृतो महावीर्यैर्महाबलः ॥ ३१ ॥
रावणस्यार्यकः सैन्यं सुमाली प्रविवेश ह । स दैवतगणान्सर्वान्नानाप्रहरणैः शितैः ॥ ३२ ॥
व्यध्वंसयत्सर्समं क्रुद्धो वायुर्जलधरानिव । तद्दैवतबलं राम हन्यमानं निशाचरैः ॥ ३३ ॥
प्रणुन्नं सर्वतो दिग्भ्यः सिंहनुन्ना मृगा इव । एतस्मिन्नन्तरे शूरो वसूनामष्टमो वसुः ॥
सावित्र इति विख्यातः प्रविवेश रणाजिरम् ॥ ॥ ३४ ॥
[6]सैन्यैः परिवृतो हृष्टैर्नानाप्रहरणोद्यतैः । त्रासयञ्शत्रुसैन्यानि प्रविवेश रणाजिरम् ॥ ३५ ॥
तथादित्यौ महावीर्यौ त्वष्टा पूषा च [7]तौ समम् । निर्भयौ सह सैन्येन तदा प्राविशतां रणे ॥ ३६ ॥

रा० टी०–सर्वथेति । पुत्रसहितो राक्षसः निसर्गतः राक्षसस्वभावात् महदुग्रं कर्म करिष्यति इति दृष्टं मया ज्ञातम् १६

गो० टी०–सर्वेति । मे महत्कर्म युद्धकर्म करिष्यतीत्येतत्सहजज्ञानशक्त्या दृष्टमवगतम् ॥ १६ ॥

१७–१८] ति० टी०–प्रतियोत्स्यामि । इदानीमिति शेषः ॥ १७ ॥ १८ ॥

रा० टी०–यत्त्विति । युध्यस्वेति यन्मां त्वमभाषिष्ठाः तत्रेदमुत्तरमिति शेषः रावणमहं न प्रतियोत्स्यामि ॥ १७ ॥

रा० टी०–तत्र हेतुमाह—नेति । विष्णुः युद्धात्र प्रतिनिवर्तते वरगुप्तादावणात्तु कामो विजयप्राप्तीच्छा दुर्लभः ॥१८॥

गो० टी०–यत्त्विति । नाहं प्रतियोत्स्यामि इदानीमिति शेषः ॥ १७–२२ ॥

१९–२१] ति० टी०–यथा भवितास्मि तथा प्रतिजाने इत्यर्थः ॥ १९ ॥ २१ ॥

रा० टी०–ननु तर्हि कथमस्माकं स्थितिरित्यत आह—प्रतिजान इति । अस्य रक्षसो मृत्युकारणमहं यथा यथावद्भवितास्मि इति त्वत्समीपे प्रतिजाने कारणं भवितास्मीत्यनेन स्वस्य साक्षाद्धननकर्तृत्वाभावस्सूचितः ॥ १९ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—अहमिति । रावणमहमेव निहन्तास्मि घातयितास्मि अत एव देवताः नन्दयिष्यामि ॥ २० ॥

रा० टी०–एतदिति । एतत्तत्त्वं ते कथितमतः सुरैस्सार्धं विगतत्रासस्त्वं युध्यस्व राक्षसैरिति शेषः ॥ २१ ॥

२२] ति० टी०–अभितः संमुखे ॥ २२ ॥

रा० टी०–तत इति । सन्नद्धा रुद्रादयः पुरात्स्वर्गाद्राक्षसानभितो निर्ययुः ॥ २२ ॥

२३–३६] ति०टी०–प्रयुद्धस्य प्रकृष्टं युद्धं यस्य । करवीराक्षः करवीरपुष्पसदृशनेत्रः ॥ २३ ॥ ३६ ॥

रा० टी०–एतस्मिन्निति । रजनीक्षये प्रयुद्धस्य प्रकृष्टयुद्धकर्तुः रावणसैन्यस्य नादः समन्ततश्शुश्राव ॥ २३ ॥

---

१ सर्वे रिति गो. पा. । २ शुश्रुवे इति गो. पा. । ३ प्रयुद्धा इति गो. पा. । ४ ह्यन्योन्यमिति गो. पा. । ५ वीर्य इति गो. पा. । ६ सुसमिति गो. रा. पा. । ७ इदं पद्यं रा. पु. न दृश्यते । ८ हृष्ट इति गो. पा. । ९ दीप्तावितिगो. पा. ।

ततो युद्धं समभवत्सुराणां सह राक्षसैः । क्रुद्धानां रक्षसां कीर्तिं समरेष्वनिवर्तिनाम् ॥ ३७ ॥
ततस्ते राक्षसाः सर्वे विबुधान्समरे स्थितान् । नानाप्रहरणैर्घोरैर्जघ्नुः शतसहस्रशः ॥ ३८ ॥
देवाश्च राक्षसान्घोरान्महाबलपराक्रमान् । समरे विमलैः शस्त्रैरुपनिन्युर्यमक्षयम् ॥ ३९ ॥
एतस्मिन्नन्तरे राम सुमाली नाम राक्षसः । नानाप्रहरणैः क्रुद्धस्तत्सैन्यं सोऽभ्यवर्तत ॥ ४० ॥
स दैवतबलं सर्वं नानाप्रहरणैः शितैः । व्यध्वंसयत संक्रुद्धो वायुर्जलधरं यथा ॥ ४१ ॥
ते महाबाणवर्षैश्च शूलप्रासैः सुदारुणैः । हन्यमानाः सुराः सर्वे न व्यतिष्ठन्त संहताः॥ ४२ ॥
ततो विद्राव्यमाणेषु दैवतेषु सुमालिना । वसूनामष्टमः क्रुद्धः सावित्रो वै व्यवस्थितः ॥ ४३ ॥
संवृतः स्वैरथानीकैः प्रहरन्तं निशाचरम् । विक्रमेण महातेजा वारयामास संयुगे ॥ ४४ ॥
ततस्तयोर्महद्युद्धमभवल्लोमहर्षणम् । सुमालिनो वसोश्चैव समरेष्वनिवर्तिनोः ॥ ४५ ॥
ततस्तस्य महाबाणैर्वसुना सुमहात्मना । निहतः पन्नगरथः क्षणेन विनिपातितः ॥ ४६ ॥
हत्वा तु संयुगे तस्य रथं बाणशतैश्चितम् । गदां तस्य वधार्थाय वसुर्जग्राह पाणिना ॥ ४७ ॥
ततः प्रगृह्य दीप्ताग्रां कालदण्डोपमां गदाम् । तां मूर्ध्नि पातयामास सावित्रो वै सुमालिनः ॥ ४८ ॥
सा तस्योपरि चोल्काभा पतन्ती [1]विबभौ गदा । इन्द्रप्रमुक्ता गर्जन्ती गिराविव महाशनिः ॥ ४९ ॥
तस्य नैवास्थि न शिरो न मांसं ददृशे तदा । गदया भस्मतां नीतं निहतस्य रणाजिरे ॥ ५० ॥
तं दृष्ट्वा निहतं संख्ये राक्षसास्ते समन्ततः । व्यद्रवन्सहिताः सर्वे क्रोशमानाः परस्परम् ॥
विद्राव्यमाणा वसुना राक्षसा नावतस्थिरे ॥ ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो० टी०–**एतस्मिन्निति** । प्रकृष्टं युद्धं यस्य तत्प्रयुद्धम् ॥ २३ ॥

रा० टी०–**ते इति** । प्रवृद्धास्ते राक्षसाः अन्योन्यमभिवीक्ष्य संग्राममेवाभिमुखास्सन्तोऽभ्यवर्त्तन्त ॥ **तत इति** । तत् राक्षसीयं महासैन्यं दृष्ट्वा दैवतसैन्यानां संक्षोभस्समजायत॥ **तत इति** । नानाप्रहरणानि उद्यतानि यस्मिन् अत एव तुमुलनिर्हादं तुमुलशब्दवत् अत एव घोरं युद्धं समभवत् ॥ **एतस्मिन्निति** । रावणस्य सचिवाः युद्धार्थं समवर्त्तन्त ॥ **मारीच इति** । एतैर्मारीचादिभिः परिवृतो रावणस्यार्यको मातामहस्सुमाली सैन्यं देवसेनां प्रविवेश सार्द्धश्लोकचतुष्टयमेकान्वयि ॥ २४–३१ ॥

गो० टी०–**त इति** । हृष्टवत् हृष्टाः सन्तः ॥ २४–२९ ॥

गो० टी०–**सुमग्न इति** । करवीरपुष्पवत् अक्षिणी यस्य सः करवीराक्षः ॥ ३०–३५ ॥

रा० टी०–**स इति** । स सुमाली दैवतगणान् व्यध्वंसयत् ॥ **तदिति** । सिंहहतान्मृगा इव हन्यमानं दैवतबलं सर्वतो दिग्भ्यः प्रणुन्नम् पलायितम् । **एतस्मिन्निति** । सावित्र इति विख्यातोऽष्टमो वसुः रणाजिरं प्रविवेश ॥ **तथेति** । निर्भयौ त्वष्टा पूषा चादित्यौ सैन्येन सह प्राविशताम् ॥ ३२–३५ ॥

३७–४५] ति० टी०–समरेष्वनिवर्तिनां रक्षसां कीर्तिं प्रति क्रुद्धानां सुराणां राक्षसैः सह युद्धं समभवदिति योजना ॥ ३७ ॥ ४९ ॥

रा० टी०–**तत इति** । समरेष्वनिवर्त्तिनां रक्षसां कीर्तिं प्रति क्रुद्धानां सुराणां राक्षसैस्सह युद्धं समभवत् ॥ **तत इति** । राक्षसाश्शतशस्सहस्रशो विबुधान् जघ्नुः ॥ **देवा इति** । देवाः राक्षसान् यमक्षयमुपनिन्युः ॥ **एतस्मिन्निति** । सुमाली नाम राक्षसः तद्दैवसम्बन्धि सैन्यमभ्यवर्त्तत ॥ **स इति** । स सुमाली दैवतबलं व्यध्वंसयत ॥ **ते इति** । संहताः सम्यक्कृतं हननं येषां तेपि सुराः महाबाणवर्षादिभिर्हन्यमानाः सन्तः न व्यतिष्ठन्त ॥ **तत इति** । सुमालिना दैवतेषु विद्राव्यमाणेषु सत्सु सावित्रो ऽष्टमो वसुर्व्यवस्थितः । **संवृत इति** । स्वैरनीकैस्संवृतः सावित्रः प्रहरन्तं निशाचरं सुमालिनं वारयामास ॥ **तत इति** । सुमालिनो वसोश्च महद्युद्धमभवत् ॥ ३६—४४ ॥

गो० टी०–**तत इति** । समरेष्वनिवर्तिनां रक्षसां कीर्तिं क्रुद्धानां सुराणां राक्षसैः सह युद्धमभवदिति योजना ३६–४४

४६–५१] ति० टी०–तस्य सुमालिनः ॥ ४६ ॥ ५१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय
आदिकाव्य उत्तरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

रा० टी०–**तत इति** । वसुना महाबाणैस्तस्य सुमालिनः पन्नगरथो निहतः अतः क्षणेन विनिपातितः ॥ ४५ ॥

१ इवेति गो. रा. पा. । २ एतदग्रे प्रति किंचान्यदुपयुक्तं पदमावश्यकम्

अष्टाविंशः सर्गः ।

ततो जयन्तमेघनादयोर्विस्मयकरे रणे पुलोमा जयन्तं गृहीत्वा सागरं प्रविष्टः देवास्तु जयन्तं प्रनष्टं विज्ञाय व्यथितास्ततः क्रुद्धस्य शक्रस्य रावणस्य च भयानको विग्रहः प्रवृत्तः ।

सुमालिनं हतं दृष्ट्वा वसुना भस्मसात्कृतम् । स्वसैन्यं विद्रुतं चापि लक्षयित्वार्दितं सुरैः ॥ १ ॥
ततः स बलवान्क्रुद्धो रावणस्य सुतस्तदा । निवर्त्य राक्षसान्सर्वान्मेघनादो व्यवस्थितः ॥ २ ॥
स रथेन महार्हेण कामगेन महारथः । अभिदुद्राव सेनां तां वनान्यग्निरिव ज्वलन् ॥ ३ ॥
ततः प्रविशतस्तस्य विविधायुधधारिणः । विदुद्रुवुर्दिशः सर्वा दर्शनादेव देवताः ॥ ४ ॥
न बभूव तदा कश्चिद्युयुत्सोरस्य संमुखे । सर्वानाविद्ध्य वित्रस्तांस्ततः शक्रोऽब्रवीत्सुरान् ॥५॥
न भेतव्यं न गन्तव्यं निवर्तध्वं रणे सुराः । एष गच्छति पुत्रो मे युद्धार्थमपराजितः ॥ ६ ॥
ततः शक्रसुतो देवो जयन्त इति विश्रुतः । रथेनाद्भुतकल्पेन सङ्ग्रामे सोऽभ्यवर्तत ॥ ७ ॥
ततस्ते त्रिदशाः सर्वे परिवार्य शचीसुतम् । रावणस्य सुतं युद्धे समासाद्य प्रजघ्निरे ॥ ८ ॥
तेषां युद्धं समभवत्सदृशं देवरक्षसाम् । महेन्द्रस्य च पुत्रस्य राक्षसेन्द्रसुतस्य च ॥ ९ ॥
ततो मातलिपुत्रस्य गोमुखस्य स रावणिः । सारथेः पातयामास शरान्कनकभूषणान् ॥ १० ॥
शचीसुतश्चापि तथा जयन्तस्तस्य सारथिम् । तं चापि रावणिः क्रुद्धः समन्तात्प्रत्यविध्यत ॥ ११ ॥
स हि क्रोधसमाविष्टो वली विस्फारितेक्षणः । रावणिः शक्रतनयं शरवर्षैरवाकिरत् ॥ १२ ॥
ततो नानाप्रहरणाञ्छितधारान्सहस्रशः । पातयामास संक्रुद्धः सुरसैन्येषु रावणिः ॥ १३ ॥
शतघ्नीमुसलप्रासगदाखड्गपरश्वधान् । महान्ति गिरिशृङ्गाणि पातयामास रावणिः ॥ १४ ॥

रा० टी०–हत्वेति । बाणशतैः चितं तस्य सुमालिनो रथं हत्वा तस्य सुमालिनो वधार्थाय गदां जग्राह ॥ ४६ ॥

रा० टी०–तत इति । सावित्रः गदां प्रगृह्य सुमालिनो मूर्ध्नि पातयामास ॥ ४७ ॥

रा० टी०–सेति । गिरौ इन्द्रप्रयुक्ता महाशनिरिव तस्य सुमालिन एव उपरि पतन्ती गदा बभौ ॥ ४८ ॥

रा० टी०–तस्येति । निहतस्य तस्य सुमालिनोऽस्थिप्रभृति गदया भस्मतां नीतमत एव न दृष्टशे ॥ ४९ ॥

रा० टी०–तमिति । राक्षसाः तं सुमालिनं निहतं दृष्ट्वा परस्परं क्रोशमानास्सन्तः व्यद्रवन् ॥ ५० ॥

रा० टी०–विद्राव्यमाणा इति । वसुना विद्राव्यमाणाः राक्षसाः नावतस्थिरे अद्धा पृथक् ॥ ५१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

गो० टी०–सुमालिन इति । तस्य सुमालिनः ४५-५०

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

१–२] ति० टी०–सुमालिनमिति ॥ १ ॥ २ ॥

रा० टी०–सुमालिविघातानन्तरकालिकं वृत्तमाह—सुमालिनमित्यादिभिः । वसुना भस्मसात्कृतमत एव हतं सुमालिनं दृष्ट्वा अत एव स्वसैन्यं सुरैरर्दितमत एव विद्रुतं लक्षयित्वा क्रुद्धो मेघनादः राक्षसान् निवर्त्य व्यवस्थितो बभूवेति शेषः श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०–सुमालिनमित्यादि ॥ १ ॥ २ ॥

३–४] ति० टी०–तां सेनां देवसेनाम् ॥ ३ ॥ ४ ॥

रा० टी०–स इति । महारथो मेघनादः ज्वलन् अग्निर्वनानीव तां देवसंबन्धिनीं सेनामभिदुद्राव ॥ ३ ॥

रा० टी०–तत इति । विप्रविशतः तस्य मेघनादस्य दर्शनादेव देवताः दिशो विदुद्रुवुः ॥ ४ ॥

गो० टी०–सुरथेनेति । तां सेनां देवसेनाम् ॥ ३ ॥४॥

५–१४] ति० टी०–आविद्ध्य वेधं प्राप्य वित्रस्तान् ॥ तेषां देवरक्षसां सदृशं बलवीर्यानुरूपं युद्धमभवत् ॥५ ॥ १४॥

रा० टी०–नेति । युयुत्सोः मेघनादस्य सम्मुखे कश्चिन्न बभूव वित्रस्तान्सुरान् आविध्य पलायमानोचितदुरुक्त्या संताड्य शक्रोऽब्रवीत् ॥ ५ ॥

रा० टी०–तदाकारमाह—नेति । अपराजितः एष मे पुत्रः युद्धार्थं गच्छति अतो न भेतव्यं न गन्तव्यमपसर्तव्यं निवर्त्तध्वमपसरणादिति शेषः ॥ ६ ॥

१ अग्निवर्णेनेति गो. पाठः । २ पुत्रे तु गोमुखे राक्षसात्मजः । सारथौ इति गो. पाठः ।

ततः प्रव्यथिता लोकाः संजज्ञे च तमस्ततः । तस्य रावणपुत्रस्य शत्रुसैन्यानि निघ्नतः ॥ १५ ॥
ततस्तदैवतबलं समन्तात्तं शचीसुतम् । बहुप्रकारमस्वस्थमभवच्छरपीडितम् ॥ १६ ॥
नाभ्यजानन्त चान्योन्यं रक्षो वा देवताथवा । तत्र तत्र विपर्यस्तं समन्तात्परिधावत ॥ १७ ॥
देवा देवान्निजघ्नुस्ते राक्षसान्राक्षसास्तथा । संमूढास्तमसा छन्ना व्यद्रवन्नपरे तथा ॥ १८ ॥
एतस्मिन्नन्तरे वीरः पुलोमा नाम वीर्यवान् । दैत्येन्द्रस्तेन संगृह्य शचीपुत्रोऽपवाहितः ॥ १९ ॥
संगृह्य तं तु दौहित्रं प्रविष्टः सागरं तदा । आर्यकः स हि तस्यासीत्पुलोमा येन सा शची ॥२०॥
ज्ञात्वा प्रणाशं तु तदा जयन्तस्याथ देवताः । अप्रहृष्टास्ततः सर्वा व्यथिताः संप्रदुद्रुवुः ॥ २१ ॥
रावणिस्त्वथ संक्रुद्धो बलैः परिवृतः स्वकैः । अभ्यधावत देवांस्तान्मुमोच च महास्वनम् ॥ २२ ॥

रा० टी०–तत इति । अद्भुतः कल्पः कल्पना यस्य तेन रथेन जयन्त इति विश्रुतः शक्रसुतस्सङ्ग्रामे अभ्यवर्तत ॥ ७ ॥

रा० टी०–तत इति । त्रिदशाः शचीसुतं परिवार्य रावणस्य सुतं प्रजघ्निरे ॥ ८ ॥

गो० टी०–न बभूवेति । आविध्य आवेष्यं प्राप्य वित्रस्तान् ॥ ५–८ ॥

रा० टी०–तेषामिति । देवरक्षसां सदृशं योग्यं महेन्द्रस्य पुत्रस्य राक्षसेन्द्रसुतस्य च युद्धं समभवत् ॥ ९ ॥

गो० टी०–तेषामिति । तेषां सदृशम् बलवीर्यानुरूपमित्यर्थः ॥ ९ ॥

रा० टी०–तत इति । मातलिपुत्रस्य सारथेः गोमुखस्य तदभिधस्योपरि रावणिः शरान्पातयामास ॥ १० ॥

रा० टी०–शचीसुत इति । शचीसुतो जयन्तः तस्य रावणेः सारथिं प्रत्यविध्यत क्रुद्धो रावणिस्तु तं जयन्तं प्रत्यविध्यत ॥ ११ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—स इति । रावणिः शक्रतनयं शरवर्षैरवाकिरत् ॥ १२ ॥

रा० टी०–तत इति । रावणिः सुरसैन्येषु नानाविधान्सहस्रशः प्रहरणान्पातयामास ॥ १३ ॥

रा० टी०–प्रहरणानां नाम निर्देशत्वाह—शतघ्नीति । रावणिः शतघ्नीप्रभृतीन्पातयामास ॥ १४ ॥

गो० टी०–तत इति । गोमुख इति मातलिसुतनाम १०-१४

१५] ति० टी०–प्रव्यथिता लोका भूरादयस्तत्प्रजाश्च । तमः संजज्ञे । रावणपुत्रमाययेति शेषः ॥ १५ ॥

रा० टी०–तत इति । शत्रुसैन्यानि निघ्नतो रावणपुत्रस्य माययेति शेषः तमोऽन्धकारः संजज्ञे ततोऽन्धकारात् लोकाः प्रव्यथिताः ॥ १५ ॥

गो० टी०–तत इति । तमः संजज्ञे रावणपुत्रस्य माययेति शेषः ॥ १५ ॥ १६ ॥

१६] ति० टी०–तं शचीसुतं हित्वेति शेषः ॥ १६ ॥

रा० टी०–तत इति । शचीसुतं समन्तात् शचीसुतस्य चतुर्दिक्षुशरपीडितं देवतबलं बहुप्रकारमस्वस्थमभवत् ॥ १६ ॥

१७–१८] ति० टी०–विपर्यस्तं विशीर्णम् । परिधावत पर्यधावत ॥ १७ ॥ १८ ॥

रा० टी०–नेति । रक्षो देवता वा अन्योन्यं नाभ्यजानन्त अभ्यजानात् अत एव विपर्यस्तं विपरीतं यथा भवति तथा परिधावत पर्यधावन् ॥ १७ ॥

रा० टी०–विपर्ययफलमाह—देवा इति । तमसा छन्ना अत एव सम्मूढाः देवाः देवान्निजघ्नुः तादृशाः राक्षसा अपि राक्षसान्निजघ्नुः अपरे बहवो व्यद्रवन् ॥ १८ ॥

गो० टी०–नाभ्यजानन्तेति । विपर्यस्तं विशीर्णम् १७।१८

१९] ति० टी०–तेन जयन्तमातामहेन पुलोम्ना ॥१९॥

रा० टी०–एतस्मिन्निति । पुलोमा नाम यो दैत्येन्द्रस्तेन शचीपुत्रस्संगृह्यापवाहितः ॥ १९ ॥

गो० टी०–एतस्मिन्निति । पुलोमा नामास्तीति शेषः । तेन पुलोम्ना । येन सा शची उत्पादितेति शेषः । तस्मात् शची पौलोमीति नामवती जातेत्यर्थः ॥ १९ ॥ २० ॥

२०] ति० टी०–येन सा शची । उत्पादितेति शेषः ॥ २० ॥

रा० टी०–संगृह्येति । येन शची उत्पादितेति शेषः स पुलोमा तस्य जयन्तस्य आर्यको मातामह आसीत् अत एव दौहित्रं जयन्तं प्रगृह्य सागरं प्रविष्टः ॥ २० ॥

२१–२२] ति० टी०–प्रणाशमदर्शनम् । व्यथिताः, अत एवाप्रहृष्टाः खिन्नाः ॥ २१ ॥ २२ ॥

रा० टी०–ज्ञात्वेति । जयन्तस्य प्रणाशमदर्शनं ज्ञात्वा व्यथिता अत एव अप्रहृष्टाः देवताः संप्रदुद्रुवुः ॥ २१ ॥

रा० टी०–रावणिरिति । स्वकैर्बलैः परिवृतो रावणिः देवानभ्यधावत महास्वनं मुमोच च ॥ २२ ॥

गो० टी०–ज्ञात्वेति । प्रणाशमदर्शनम् । व्यथिताः अत एवाप्रहृष्टाः ॥ २१–२४ ॥

१ महादिति गो. पाठः । २ जीवितमिति गो. पाठः ।

दृष्ट्वा प्रणाशं पुत्रस्य दैवतेषु च विद्रुतम् । मातलिं चाह देवेशो रथः समुपनीयताम् ॥ २३ ॥
स तु दिव्यो महाभीमः सज्ज एव महारथः । उपस्थितो मातलिना वाह्यमानो महाजवः ॥ २४ ॥
ततो मेघा रथे तस्मिंस्तडिच्चन्तो महाबलाः । अग्रतो वायुचपला नेदुः परमनिःस्वनाः ॥ २५ ॥
नानावाद्यानि वाद्यन्त गन्धर्वाश्च समाहिताः । ननृतुश्चाप्सरःसङ्घा निर्याते त्रिदशेश्वरे ॥ २६ ॥
रुद्रैर्वसुभिरादित्यैरश्विभ्यां समरुद्गणैः । वृतो नानाप्रहरणैर्निर्ययौ त्रिदशाधिपः ॥ २७ ॥
निर्गच्छतस्तु शक्रस्य परुषः पवनो ववौ । भास्करो निष्प्रभश्चैव महोल्काश्च प्रपेदिरे ॥ २८ ॥
एतस्मिन्नन्तरे शूरो दशग्रीवः प्रतापवान् । आरुरोह रथं दिव्यं निर्मितं विश्वकर्मणा ॥ २९ ॥
पन्नगैः सुमहाकायैर्वेष्टितं लोमहर्षणैः । येषां निःश्वासवातेन प्रदीप्तमिव संयुगे ॥ ३० ॥
दैत्यैर्निशाचरैश्चैव स रथः परिवारितः । समराभिमुखो दिव्यो महेन्द्रं सोऽभ्यवर्तत ॥ ३१ ॥
पुत्रं तं वारयित्वा तु स्वयमेव व्यवस्थितः । सोऽपि युद्धाद्विनिष्क्रम्य रावणिः समुपाविशत् ३२॥
ततो युद्धं प्रवृत्तं तु सुराणां राक्षसैः सह । शस्त्राणि वर्षतां तेषां मेघानामिव संयुगे ॥ ३३ ॥
कुम्भकर्णस्तु दुष्टात्मा नानाप्रहरणोद्यतः । नाज्ञायत तदा रौद्रे युद्धे केनाभ्यपद्यत ॥ ३४ ॥
दन्तैः पादैर्भुजैर्हस्तैः शक्तितोमरमुद्गरैः । येन तेनैव संक्रुद्धस्ताडयामास देवताः ॥ ३५ ॥

२३-२४] ति० टी०-विद्रुतं पलायनम् ॥ २३ ॥ २४ ॥

रा० टी०-दृष्ट्वेति । देवेशपुत्रस्य प्रणाशं देवतेषु विद्रुतं पलायनं च दृष्ट्वा रथः समुपनीयतामिति मातलिमाह ॥२३॥

रा० टी०-स इति । मातलिना वाह्यमानो महारथः उपस्थितो बभूवेति शेषः ॥ २४ ॥

२५] ति० टी०-तत इन्द्रस्य तद्रथारोहणानन्तरम् । वायुचपला वायुप्रवर्तिताः ॥ २५ ॥

रा० टी०-तत इति । ततः इन्द्रकर्तृकरथारोहणानन्तरं रथे अग्रतोऽग्रभागे स्थिता इति शेषः वारिचपलाः मेघाः नेदुः २५

गो० टी०-तत इति। वायुचपलाः वायुचलिताः २५-३३

२६-३१] ति० टी०-वाद्यन्तावाद्यन्त । समाहिता गगने प्रवृत्ताः ॥ २६ ॥ ३१ ॥

रा० टी०-नानेति । त्रिदशेश्वरे निर्याते सति गन्धर्वाः वाद्यानि वाद्यन्त अवाद्यन्त अप्सरस्संघास्तु ननृतुः ॥ २६ ॥

रा०टी०-रुद्रैरिति। रुद्रादिभिर्वृतस्त्रिदशाधिपो निर्ययौ २७

रा० टी०-निर्गच्छत इति । शक्रस्य निर्गच्छतः सतः पवनः परुषस्सन्ववौ महोल्काः प्रपेदिरे ददृशिरे इत्यर्थः ॥२८॥

रा० टी०-एतस्मिन्निति । दशग्रीवः सुमहाकायैः पन्नगैर्वेष्टितमेषां पन्नगानां निश्वासवातेन प्रदीप्तमिव दिव्यं रथमारुरोह श्लोकद्वयमेकान्वयि ॥ २९ ॥ ३० ॥

रा० टी०-दैत्यैरिति । स रथः दैत्यैर्निशाचरैश्च परिवारितोभवदिति शेषः अत एव समराभिमुखस्स रथः महेन्द्रमभ्यवर्त्तत ॥ ३१ ॥

३२-३३] ति० टी०-युद्धायुद्धस्थानात् । समुपाविशत्तूष्णीमास्त ॥ ३२ ॥ ३३ ॥

रा० टी०-पुत्रमिति । पुत्रं वारयित्वा स्वयं रावणो व्यवस्थितोभवदिति शेषः रावणिस्तु युद्धाद्विनिष्क्रम्य समुपाविशत् तूष्णीमतिष्ठत् ॥ ३२ ॥

रा० टी०-तत इति । मेघानामिव शस्त्राणि वर्षतां सुराणां राक्षसैस्सह युद्धं प्रवृत्तम् ॥ ३३ ॥

३४] ति० टी०-कुम्भकर्णस्त्विति । अस्य जागरितस्य युद्धादिप्रसङ्गेऽनेकदिनमपि जागरणमित्यतो ज्ञायते । नानाप्रहरणोद्यत उद्यतनानाप्रहरणः केनाभ्यपद्यत केन युद्धं कृतवानिति नाज्ञायत । अपि तु प्राप्तेन सर्वेणाप्ययुध्यतेत्यर्थः ॥ ३४ ॥

रा० टी०-कुम्भकर्ण इति । तदा तस्मिन् जागरणदिन एव नानाप्रहरणोद्यतो यः कुम्भकर्णः तेन केन सह युद्धमभ्यपद्यत इति नाज्ञायत स्वकीयैः परकीयैश्च सहायुध्यत इत्यर्थः एतेन तस्य मत्ततातिशयः सूचितः ॥ ३४ ॥

गो० टी०-कुम्भकर्णस्त्विति । नानाप्रहरणोद्यतः उद्यतनानाप्रहरणः । नाज्ञायत अयं मया योद्धव्य इत्येको लक्ष्यत्वेन न ज्ञायते । अपि तु नहि केनापि अयुध्यत । येन केनापि प्राप्तेन सर्वेणाप्ययुद्ध्यतेत्यर्थः ॥ ३४ ॥

३५] ति० टी०-अपि च प्रहरणनियमोऽपि नास्तीत्याह—दन्तैरिति ॥ ३५ ॥

रा० टी०-मत्ततावशादेव तस्य प्रहरणनियमोपि नास्तीति बोधयन्नाह—दन्तैरिति । दन्तादिभिरुपलक्षितः कुम्भकर्णः येन तेन दन्ताद्यन्यतमेन अन्येन च देवतास्ताडयामास ॥३५॥

गो० टी०-दन्तैरिति । प्रयुद्धः प्रकृष्टयुद्धः ॥ ३५-३९ ॥

---

१ साध्यैश्चेति गो पाठः । २ परुषमिति गो. पाठः । ३ आसीदिति गो. पाठः । ४ दैत्य इति गो. पाठः । ५ घोरमिति गो. पाठः । ६ युद्धे सह केनाप्ययुध्यतेति गो. पाठः । ७ भुजाभ्यां पद्भ्यां च शक्तितोमरसायकैरिति गो. पाठः । ८ कैनैव संरब्ध इति गो. पाठः ।

सै तु रुद्रैर्महाघोरैः संगम्याथ निशाचरः । प्रयुद्धस्तैश्च संग्रामे क्षतः शस्त्रैर्निरन्तरम् ॥ ३६ ॥
[वैभौ शस्त्राचिततनुः कुम्भकर्णः क्षरन्नसृक् । विद्युत्स्तनितनिर्घोषो धारावानिव तोयदः]
ततस्तद्राक्षसं सैन्यं प्रयुद्धं समरुद्गणैः । रणे विद्रावितं सर्वं नानाप्रहरणैस्तदा ॥ ३७ ॥
केचिद्विनिहताः कृत्ताश्चेष्टन्ति स्म महीतले । वाहनेष्ववसक्ताश्च स्थिता एवापरे रणे ॥ ३८ ॥
रथान्नागान्खरानुष्ट्रान्पन्नगांस्तुरगांस्तथा । शिंशुमारान्वराहांश्च पिशाचवदनानपि ॥ ३९ ॥
तान्समालिङ्ग्य वाहुभ्यां विष्टब्धाः केचिदुत्थिताः । देवैस्तु शस्त्रसंभिन्ना मम्रिरे च निशाचराः ॥ ४० ॥
चित्रकर्म इवाभाति सर्वेषां रणसंप्लवः । निहतानां प्रसुप्तानां राक्षसानां महीतले ॥ ४१ ॥
शोणितोदकनिष्पन्दा काकगृध्रसमाकुला । प्रवृत्ता संयुगमुखे शस्त्रग्राहवती नदी ॥ ४२ ॥
एतस्मिन्नन्तरे क्रुद्धो दशग्रीवः प्रतापवान् । निरीक्ष्य तु वलं सर्वं दैवतैर्विनिपातितम् ॥ ४३ ॥
स तं प्रतिविगाह्याशु प्रवृद्धं सैन्यसागरम् । त्रिदशान्समरे निघ्नञ्शक्रमेवाभ्यवर्तत ॥ ४४ ॥
ततः शक्रो महच्चापं विस्फार्य सुमहास्वनम् । यस्य विस्फारनिर्घोषैः स्तनन्ति स्म दिशो दश ४५
तद्विकृष्य महच्चापमिन्द्रो रावणमूर्धनि । पावकादित्यवर्चसः ॥ ४६ ॥
तथैव च महावाहुर्दशग्रीवो निशाचरः । शक्रं कार्मुकविभ्रष्टैः शरवर्षैरवाकिरत् ॥ ४७ ॥

३६] ति० टी०–प्रयुद्धः कृतप्रकृष्टयुद्धः ॥ ३६ ॥

रा० टी०–स इति । रुद्रैर्निशाचरैस्सह संगम्य प्रयुद्धः स कुम्भकर्णः शस्त्रैर्निरन्तरं क्षतोऽभवदिति शेषः ॥ ३६ ॥

३७] ति० टी०–समरुद्गणैः । देवैरिति शेषः ॥ ३७ ॥

रा० टी०–तत इति । नानाप्रहरणैस्समरुद्गणैर्मरुद्गणसहितैर्देवैरिति शेषः प्रयुद्धं राक्षसं सैन्यं रणविद्रावितमभवदिति शेषः ॥ ३७ ॥

३८] ति० टी०–कृत्ताश्छिन्नाः । केचिन्मोहाद्वाहनेभ्यो निपतितदेहा अपि वाहनेष्ववसक्ता एव स्थिता इत्यर्थः ॥ ३८ ॥

रा० टी०–केचिदिति । कृत्ताः छिन्नाः अत एव विनिहताः केचिन्महीतले चेष्टन्ति स्म अपरे वाहनेषु रथादिषु अवसक्ता दृढं ग्रहणवन्तः स्थिताः मरणेऽपीति शेषः ॥ ३८ ॥

३९] ति० टी०–तदेवाह—रथानिति ॥ ३९ ॥

४०] ति० टी०–रथादीन्वाहुभ्यां समालिङ्ग्य विष्टब्धाः केचिदुत्थिता मूर्च्छिताः कालेन गतमूर्च्छा उत्थिताः । मम्रिरे मृताः ॥ ४० ॥

रा० टी०–रथानिति । केचित् रथादीन् वाहुभ्यां समालिङ्ग्य विष्टब्धाः चेष्टाराहित्येन स्थिता उत्थिताः केचित्तु देवैश्शस्त्रसम्भिन्नास्सन्तः मम्रिरे श्लोकद्वयमेकान्वयि॥३९-४०॥

गो० टी०–रथानित्यादिश्लोकद्वयमेकं वाक्यम् । विष्टब्धाः अवलम्ब्य स्थिताः । केचिदुच्छ्रिताश्च केवलं स्थिताश्च ॥ ४० ॥ ४१ ॥

४१–४७] ति० टी०–चित्रकर्म इवेत्यसंधिरार्षः । यथा सिद्धमायानिर्मितं चित्रकर्माश्चर्यकरं तथैव तेषां परसंप्लवो रणसंमर्द आभाति स्म ॥ ४१–४७ ॥

रा० टी०–चित्रेति । महीतले विशेषणविशिष्टानां रणसंप्लवः चित्रकर्मेवाभाति असन्धिरार्षः ॥ ४१ ॥

रा० टी०–शोणितेति । शोणितरूपोदकस्य निष्यन्दः प्रसवो यस्यां काकगृध्रैस्समाकुला शस्त्राण्येव ग्राहाः तद्वती नदी संयुगमुखे संग्राममूर्धनि प्रवृत्ता ॥ ४२ ॥

रा० टी०–एतस्मिन्निति । दैवतैर्विनिपातितं वलं स्वसैन्यं निरीक्ष्य क्रुद्धो दशग्रीवः प्रवृद्धं सैन्यसागरं प्रविगाह्य प्रविश्येत्यर्थः त्रिदशान्निघ्नन्सन् शक्रमेवाभ्यवर्तत श्लोकद्वयमेकान्वयि ॥ ४३ ॥ ४४ ॥

रा० टी०–तत इति । विस्फार्य प्रवर्त्तितो यस्य निर्घोषः दश दिशः स्तनतिस्म तत्तुमहास्वनं सुमहच्चापं शक्रो विस्फार्य रणमूर्द्धनि अतिष्ठदिति शेषः ॥ ४५ ॥

रा० टी०–तदिति । इन्द्रः चापं विकृष्य रावणमूर्द्धनि पावकादित्यवर्चसः शरान्पातयामास ॥ ४६ ॥

रा० टी०–अथेति । दशग्रीवः शरवर्षैः शक्रमवाकिरत्॥४७

गो० टी०–चित्रेति । चित्रकर्म इवेति वाक्ये सन्धिरनित्यः । रणसंघर्षः रणसंमर्दः । चित्रकर्मेवाश्चर्यकर आभातीत्यर्थः ॥ ४२–४८ ॥

१ तत इति गो. पाठः । २ इदं पद्यमधिकं गो. पु. । ३ स्तितैरिति गो. पाठः । ४ रण इति गो. पाठः । ५ शिंशिति गो. पाठः । ६ तथेति गो. पाठः । ७ स तेषामिति गो. पाठः । ८ मत्तानामिति गो. पाठः । ९ निष्पन्दकङ्कैति गो. पाठः । १० आगादिति गो. पाठः । ११ घोषेणेति गो. पाठः । १२ निपातयामासेति गो. पाठः । १३ व्यवस्थित इति गो.पाठः ।

प्रयुध्यतोरथ तयोर्बाणवर्षैः समन्ततः । नाज्ञायत तदा किंचित्सर्वं हि तमसा वृतम् ॥ ४८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे ऽष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।

शक्रारावणयो रणे वृत्रघ्ना ग्रस्तं स्वपितरं निशम्येन्द्रजिन्मायायुद्धेन बिडौजसं बद्ध्वा पित्राभिनन्दितो लङ्कां निनाय ।

ततस्तमसि संजाते सर्वे ते देवराक्षसाः । आयुद्ध्यन्त बलोन्मत्ताः मूदयन्तः परस्परम् ॥ १ ॥
[ततैस्तु देवसैन्येन राक्षसानां बृहद्बलम् । दशांशं स्थापितं युद्धे शेषं नीतं यमक्षयम् ॥
तस्मिंस्तु तामसे युद्धे सर्वे ते देवराक्षसाः । अन्योन्यं नाभ्यजानन्त युध्यमानाः परस्परम्]
इन्द्रश्च रावणश्चैव रावणिश्च महाबलः । तस्मिंस्तमोजालवृते मोहमीयुर्न ते त्रयः ॥ २ ॥
स तु दृष्ट्वा बलं सर्वं रावणो निहतं क्षणात् । क्रोधमभ्यगमत्तीव्रं महानादं च मुक्तवान् ॥ ३ ॥
क्रोधात्सूतं च दुर्धर्षः स्यन्दनस्थमुवाच ह । परसैन्यस्य मध्येन यावदन्तो नयस्व माम् ॥ ४ ॥
अद्यैवं त्रिदशान्सर्वान्विक्रमैः समरे स्वयम् । नानाशस्त्रमहासारैर्नयामि यमसादनम् ॥ ५ ॥
अहमिन्द्रं वधिष्यामि धनदं वरुणं यमम् । त्रिदशान्विनिहत्याशु स्वयं स्थास्याम्यथोपरि ॥६॥
विषादो नैव कर्तव्यः शीघ्रं वाहय मे रथम् । द्विः खलु त्वां ब्रवीम्यद्य यावदन्तं नयस्व माम् ॥७॥

४८] ति० टी०–सर्वं हि तमसा वृतम् । उभयशरवर्षकृतसर्वदिक्छादनेनेति भावः ॥ ४८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टाविंशः सर्गः ॥ २८ ॥

रा० टी०–प्रयुध्यतोरिति । तयोः शक्रदशग्रीवयोः प्रयुध्यतोस्ततः सर्वं जगत्तमसा वृतमभवत् अत एव किञ्चिन्नाज्ञायत ॥ ४८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

गो० टी०–प्रयुध्यतोरिति । तमसावृतम् उभयशरवर्षसर्वदिक्छादनकृतेनेति शेषः ॥ ४९ ॥

इति श्रीगो०श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

१-३] ति० टी०–देवाश्च राक्षसाश्च देवराक्षसाः॥१-३॥

रा० टी०–तमआवरणानन्तरकालिकं वृत्तमाह—तत इत्यादिभिः । तमसि संजाते सति देवराक्षसाः अयुध्यन्त॥१॥

रा० टी०–इन्द्र इति । तमोजालेन वृते सति इन्द्रादयस्त्रय एव मोहं नेयुः ॥ २ ॥

रा० टी०–स इति । रावणः बलं निहतं दृष्ट्वा तीव्रं क्रोधमभ्यागमत् अत एव महानादं मुक्तवान् ॥ ३ ॥

४-५] ति० टी०–परसैन्यस्यान्तो यावत्तावन्मां मध्येन परसेनामध्यमार्गेण नयस्व ॥ ४ ॥ ५ ॥

रा० टी०–क्रोधादिति । दुर्धर्षो रावणः स्यन्दनस्थं सूतमुवाच तदाकारमाह यावत्पर्यन्तं परसैन्यस्यान्तः तावत्पर्यंतं परसैन्यस्य मध्येन मां नयस्व ॥ ४ ॥

रा० टी०–अद्येति । शस्त्राण्येव महासाराणि तैस्सर्वान् त्रिदशान्यमसादनं नयामि ॥ ५ ॥

गो० टी०–क्रोधादिति । यावदन्त इति । परसैन्यस्यान्तो यावत् तावन्मध्येन मां नयस्व ॥ ६ ॥ ७ ॥

६] ति० टी०–अधोपरि । सर्वेषामुपरिष्टादित्यर्थः ॥६॥

रा०टी०–अहमिति । इन्द्रादीन्वधिष्यामि ब्राह्मणवशिष्ठन्यायेन न पूर्वेण पौनरुक्त्यं त्रिदशान्विनिहत्य उपरि स्वर्गे स्वयं स्थास्यामि ॥ ६ ॥

गो० टी०–अहमिति । अधोपरि सर्वेषामुपरिष्टादित्यर्थः ॥ ८ ॥

७] ति० टी०–अथ देवसेनामध्यप्रवेशे कथं भविष्यतीति विषण्णं सारथिं पुनरप्याह—द्विः खल्विति । द्विर्द्विवारं ब्रवीमि । तत्कथं न नयसीति शेषः ॥ ७ ॥

रा० टी०–विषाद इति । यावदन्तं रिपुसेनान्तपर्यन्तं मां नयस्वेति त्वां द्विर्ब्रवीमि ॥ ७ ॥

गो० टी०–देवसेनामध्ये प्रवेशे किं भविष्यतीति विषण्णं सारथिं पुनश्चाह—द्विः खल्वित्यादि । यावदन्तो नयस्व मामिति द्विः द्विवारम् त्वां ब्रवीमि खलु । तत्कथं न नयसीत्यर्थः ॥ ९ ॥

१ अयुध्यन्तेति गो. पाठः । २ पद्यइयमिदमधिकं गो. पु. । ३ एतानिति गो. पाठः । ४ अथेति गो. पाठः । ५ चेति गो. पाठः । ६ अन्त इति गो. पाठः ।

अयं स नन्दनोद्देशो यत्र वर्तामहे वयम् । नय मामद्य तत्र त्वमुदयो यत्र पर्वतः ॥ ८ ॥
तस्य तद्वचनं श्रुत्वा तुरगान्स मनोजवान् । आदिदेशाथ शत्रूणां मध्येनैव च सारथिः ॥ ९ ॥
तस्य तं निश्चयं ज्ञात्वा शक्रो देवेश्वरस्तदा । रथस्थः समरस्थस्तान्देवान्वाक्यमथाब्रवीत्॥ १० ॥
सुराः शृणुत मद्वाक्यं यत्तावन्मम रोचते । जीवन्नेव दशग्रीवः साधु रक्षो निगृह्यताम् ॥ ११ ॥
एष ह्यतिबलः सैन्ये रथेन पवनौजसा । गमिष्यति प्रवृद्धोर्मिः समुद्र इव पर्वणि ॥ १२ ॥
नह्येष हन्तुं शक्योऽद्य वरदानात्सुनिर्भयः । तद्ग्रहीष्यामहे रक्षो यत्ता भवत संयुगे ॥ १३ ॥
यथा बलौ निरुद्धे च त्रैलोक्यं भुज्यते मया । एवमेतस्य पापस्य निरोधो मम रोचते ॥ १४ ॥
ततोऽन्यं देशमास्थाय शक्रः संत्यज्य रावणम् । अयुध्यत महाराज राक्षसांस्त्रासयन्रणे ॥ १५ ॥
उत्तरेण दशग्रीवः प्रविवेशानिवर्तकः । दक्षिणेन तु पार्श्वेन प्रविवेश शतक्रतुः ॥ १६ ॥
ततः स योजनशतं प्रविष्टो राक्षसाधिपः । देवतानां बलं सर्वं शरवर्षैरवाकिरत् ॥ १७ ॥
ततः शक्रो निरीक्ष्याथ प्रनष्टं तु स्वकं बलम् । न्यवर्तयदसंभ्रान्तः समावृत्य दशाननम् ॥ १८ ॥
एतस्मिन्नन्तरे नादो मुक्तो दानवराक्षसैः । हा हताः स्म इति ग्रस्तं दृष्ट्वा शक्रेण रावणम् ॥ १९ ॥

८-१३] ति० टी०-अपरिमितदेवसेनाया अन्तस्य दुर्ज्ञेयत्वादाह—**अयमिति** । नन्दनमारभ्योदयपर्वतान्तं सेना तिष्ठतीति भावः ॥ ८-१३ ॥

रा० टी०-सेनायाः आद्यन्तौ बोधयन्नाह—**अयमिति**। यत्र वयं वर्तामहे सोऽयं नन्दनोद्देशः सेनाया आदिरित्यर्थः यत्रोदयः पर्वतः तत्र मां नय स एव सेनान्त इत्यर्थः ॥ ८ ॥

रा० टी०-**तस्येति** । सारथिः शत्रूणां मध्येन मार्गेणैव तुरगान् आदिदेश चालयामासेत्यर्थः ॥ ९ ॥

रा० टी०-**तस्येति** । शक्रः तस्य रावणस्य निश्चयं ज्ञात्वा समरस्थः सन्देवान्वाक्यमब्रवीत् ॥ १० ॥

रा० टी०-तदाकारमाह—**सुरा इत्यादिभिः**। हे सुराः यद्वाक्यं मम रोचते तद्यूयं शृणुत तदाकारमाह दशग्रीवः जीवन्नेव निगृह्यताम् ॥ ११ ॥

रा० टी०-निग्रहणयोग्यतां बोधयन्नाह-**एष इति**। एष रावणः पवनौजसा रथेन पर्वणि प्रवृद्धोर्मिः समुद्र इव गमिष्यति१२

रा० टी०-ननु वध्यतामेव किमर्थं निगृह्यते इत्यत आह—**नहीति** । वरदानान्निर्भयस्य एष रावणः हन्तुं न शक्यः तत्तस्माद्धेतोः रक्षो रावणं ग्रहीष्यामहे अतः यूयं यत्ता उद्युक्ता भवत ॥ १३ ॥

गो० टी०-अपरिमितदेवसेनायाः क आदिः कोन्त इत्याह—**अयमिति**। वयं यत्र वर्तामहे स नन्दनोद्देशः एष आदिः। एनमारभ्य उदयपर्वतो यत्र तत्र मामद्य नय सोन्तो देवसेनायाः ॥ १०-१३ ॥

१४] ति० टी०-यथा बलौ बलिदैत्ये निरुद्धे कृतनिरोधे सति मया त्रैलोक्यं भुज्यते, एवमस्य पापस्य निरोधस्त्रैलोक्यरक्षार्थं मम कर्तव्यत्वेन रोचते इत्यब्रवीदिति पूर्वेण संबन्धः ॥ १४ ॥

रा० टी०-यथेति । बलौ निरुद्धे सति त्रैलोक्यं मया यथा यथावद्भुज्यते एवमत एव एतस्य रावणस्य निरोधो मम रोचते ॥ १४ ॥

गो० टी०-यथेति । बलौ महाबलौ । निरुद्धे अहत्वैव कृतविरोधे सति । एवमेतस्य निरोधोपीत्यब्रवीदिति पूर्वेणान्वयः ॥ १६ ॥

१५] ति० टी०-ततोऽन्यं देशं रावणावस्थितदेशादन्यं देशम् । **रावणं संत्यज्येति** । वज्रपातादिना प्रहर्तुमशक्यत्वात्पुरःस्थितिर्निष्प्रयोजनेत्याशयेन तं त्यक्त्वा ॥ १५ ॥

रा० टी०-**तत इति** । ततः स्वोक्त्यनन्तरं शक्रः रावणं संत्यज्य अन्यं देशमास्थाय राक्षसान् त्रासयन्सन् अयुध्यत१५

गो० टी०-**ततोन्यमिति** । रावणावस्थितदेशादित्यर्थः। रावणं संत्यज्येति । वज्रादिना प्रहर्तुमशक्यत्वात् पुरस्थितिर्निष्प्रयोजनेति मत्वेति शेषः ॥ १७ ॥

१६-१७] ति० टी०-उत्तरेण प्रविवेश । देवसेनामिति शेषः । अनिवर्तकोऽनिवर्तितुम् ॥ १६ ॥ १७ ॥

रा० टी०—**उत्तरेणेति**। दशग्रीवः उत्तरेण मार्गेण प्रविवेश तदा शतक्रतुस्तु दक्षिणेन पार्श्वेन प्रविवेश ॥ १६ ॥

रा० टी०-**तत इति** । योजनशतं देवतानां बलं प्रविष्टो रावणः शरवर्षैर्बलमवाकिरत् ॥ १७ ॥

गो० टी०-**उत्तरेणेति** । देवसेनामिति शेषः १८॥१९॥

१८-१९] ति० टी०-दशाननं न्यवर्तयदित्यत्र हेतुः—**असंभ्रान्तः समावृत्येति** ॥ १८ ॥ १९ ॥

रा० टी०-**तत इति** । शक्रः स्वकं बलं प्रनष्टं निरीक्ष्य दशाननं समावृत्य बलं न्यवर्तयत् ॥ १८ ॥

रा० टी०-**एतस्मिन्निति** । एतस्मिन्नन्तरे समये शक्रेण रावणं ग्रस्तं दृष्ट्वा दानवराक्षसैः हा हता स्म **इति** नादो मुक्तः१९

---

१ महे इति गो. रा. पाठः । २ सैन्यैरिति गो. पाठः ।

ततो रथं समास्थाय रावणिः क्रोधमूर्च्छितः । तत्सैन्यमतिसंक्रुद्धः प्रविवेश सुदारुणम् ॥ २० ॥
तां प्रविश्य महामायां प्राप्तां पैशुपतेः पुरा । प्रविवेश सुसंरब्धस्तत्सैन्यं समभिद्रवत् ॥ २१ ॥
स सर्वा देवतास्त्यक्त्वा शक्रमेवाभ्यधावत । महेन्द्रश्च महातेजा नापश्यच्च सुतं रिपोः ॥ २२ ॥
विमुक्तकवचस्तत्र वध्यमानोऽपि रावणिः । त्रिदशैः सुमहावीर्यैर्न चकार च किंचन ॥ २३ ॥
स मातलिं समायान्तं ताडयित्वा शरोत्तमैः । महेन्द्रं बाणवर्षेण भूय एवाभ्यवाकिरत् ॥ २४ ॥
ततस्त्यक्त्वा रथं शक्रो विससर्ज च सारथिम् । ऐरावतं समारुह्य मृगयामास रावणिम् ॥ २५ ॥
स तत्र मायाबलवानदृश्योऽथान्तरिक्षगः । इन्द्रं मायापरिक्षिप्तं कृत्वा स प्राद्रवच्छरैः ॥ २६ ॥
स तं यदा परिश्रान्तमिन्द्रं जज्ञेऽथ रावणिः । तदैनं मायया बद्ध्वा स्वसैन्यमभितोऽनयत् ॥ २७ ॥
तं तु दृष्ट्वा बलात्तेन नीयमानं महारणात् । महेन्द्रममराः सर्वे किं नु स्यादित्यचिन्तयन् ॥ २८ ॥
दृश्यते न स मायावी शक्रजित्समितिंजयः । विद्यावानपि येनेन्द्रो माययापैहृतो बलात् ॥ २९ ॥
एतस्मिन्नन्तरे क्रुद्धाः सर्वे सुरगणास्तदा । रावणं विमुखीकृत्य शरवर्षैरवाकिरन् ॥ ३० ॥
रावणस्तु समासाद्य आदित्यांश्च वसूंस्तदा । न शशाक स सङ्ग्रामे योद्धुं शत्रुभिरर्दितः ॥ ३१ ॥
स तं दृष्ट्वा परिम्लानं प्रहारैर्जर्जरीकृतम् । रावणिः पितरं युद्धे दर्शनस्थोऽब्रवीदिदम् ॥ ३२ ॥

गो० टी०–तत इति । न्यवर्तयत स्वसेनया दशाननं समावृत्य न्यवर्तयत् ॥ २० ॥ २१ ॥

२०] ति० टी०–तत्सैन्यम् ॥ २० ॥

रा० टी०–तत इति । ततः नादश्रवणानन्तरमतिसंक्रुद्धमत एव क्रोधेन मूर्छितो रावणिस्तत् देवसंबन्धि सैन्यं प्रविवेश ॥२०॥

गो० टी०–तत इति । तत्सैन्यं देवसैन्यम् ॥ २२ ॥

२१–२२] ति० टी०–पुरःस्थित्या देवसेनाजयस्याशक्यत्वान्मायां श्रयते—तामिति । समभिद्रवत् । समभ्यद्रावयदित्यर्थः ॥ २१ ॥ २२ ॥

रा०टी०–तामिति। पुरा पशुपतेः प्राप्तां महामायां प्रविश्य तत् देवसंबन्धि सैन्यं प्रविवेश समभिद्रवत् समभ्यद्रावयत्॥२१॥

रा० टी०–स इति । स रावणिः शक्रमेवाभ्यधावत महेन्द्रस्तु रिपोस्सुतं नापश्यत् ॥ २२ ॥

गो टी०–तामिति । गोपतिना रुद्रेण ॥ २३–२८ ॥

२३-२६] ति०टी०–किंचन । किमपि भयमित्यर्थः२३।२६

रा० टी०–विमुक्तेति । त्रिदशैर्वध्यमानः अत एव विमुक्तकवचोऽपि रावणिः किञ्चित्र चकार भयमिति शेषः॥२३॥

रा० टी०–स इति । रावणिः समायान्तं मातलिमिन्द्रसारथिं ताडयित्वा बाणवर्षेण महेन्द्रं भूयोऽप्यभ्यवाकिरत् २४

रा० टी०–तत इति । शक्रः ऐरावतं समारुह्य रावणिं मृगयामास ॥ २५ ॥

रा० टी०–स इति । मायाबलवान् अत एव अदृश्यः अन्तरिक्षगः स रावणिः इन्द्रं मायया परिक्षिप्तं व्याकुलं कृत्वा आस इतस्ततो जगाम शरैरिन्द्रं प्राद्रवच्च ॥ २६ ॥

२७] ति० टी०–स्वसैन्यमभितोऽनयत् । स्वसैन्यपार्श्वमनयदित्यर्थः ॥ २७ ॥

रा० टी०–स इति । रावणिः इन्द्रं यदा परिश्रान्तं जज्ञे बुबुधे तदा एनमिन्द्रं मायया बध्वा स्वसैन्यमभितोऽनयत् ॥२७॥

गो० टी०–स इति । स्वसैन्यमभितः स्वसेनायाः पार्श्वम् ॥ २९ ॥ ३० ॥

२८–३१] ति० टी०–महेन्द्रं तेन बलान्नीयमानं दृष्ट्वा विद्यावानप्यसुरमायासंहारविद्यावानपीन्द्रो येन रावणिना मायया नीयते स न दृश्यते, एतत्किं न्विति चुक्रुशुः॥२८-३१॥

रा० टी०–तमिति । सर्वे अमराः बलात्सैन्यात्तेन रावणिना नीयमानं महेन्द्रं दृष्ट्वा किंनु स्यात् अस्माभिः किंकर्तव्यमित्यर्थः इत्यचिन्तयन् ॥ २८ ॥

रा० टी०–दृश्यत इति । विद्यावान् आसुरमायाविघातकविद्यायुक्तोपीन्द्रो येन मायया बलात्सैन्यादपहृतः स मायावी न दृश्यते ॥ २९ ॥

रा० टी०–एतस्मिन्निति । सुरगणाः रावणं विमुखीकृत्य शरवर्षैरवाकिरन् ॥ ३० ॥

रा० टी०–रावण इति । शत्रुभिरर्दितो रावणः आदित्यान्वसूंश्च समासाद्य योद्धुं न शशाक ॥ ३१ ॥

गो० टी०–दृश्यत इति । विद्यावानपि असुरमायासंहार्यपि येनानेन रावणिना मायया नीयते । एतत्किं न्विति चुक्रुशुः ॥ ३१–३३ ॥

३२] ति० टी०–युद्धे दर्शनस्थ इति अदर्शनस्थ इति छेदः अन्तर्हित एवाब्रवीदित्यर्थः । दर्शने महेन्द्रनाशभियेति भावः३२

रा० टी०–स इति । अदर्शनस्थो रावणिः प्रहारैर्जर्जरीकृतमत एव परिम्लानं पितरमिदमब्रवीत् ॥ ३२ ॥

गो० टी०–स तमिति । युद्धे अदर्शनस्थोऽब्रवीदिति । सति दर्शने महेन्द्र एव नाशयेदिति भावः ॥ ३४ ॥

१ गोपतिनेति गो. पाठः । २ नीयते इति गो. पाठः ।

आगच्छ तात गच्छामो रणकर्म निवर्तताम् । जितं नो विदितं तेऽस्तु स्वस्थो भव गतज्वरः ॥३३॥
अयं हि सुरसैन्यस्य त्रैलोक्यस्य च यः प्रभुः । स गृहीतो देवबलाद्भग्नदर्पाः सुराः कृताः ॥ ३४ ॥
यथेष्टं भुङ्क्ष्व लोकांस्त्रीन्निगृह्यारातिमोजसा । वृथा किं ते श्रमेणेह युद्धमद्य तु निष्फलम् ॥ ३५ ॥
ततस्ते दैवतगणा निवृत्ता रणकर्मणः । तच्छ्रुत्वा रावणेर्वाक्यं शक्रहीनाः सुरा गताः॥३६॥
अथ स रणविगतमुत्तमौजास्त्रिदशरिपुः प्रथितो निशाचरेन्द्रः ।
स्वसुतवचनमादृतः प्रियं तत्समनुनिशम्य जगाद चैव सूनुम् ॥ ३७ ॥
अतिबलसदृशैः पराक्रमैस्त्वं मम कुलवंशविवर्धनः प्रभो ।
यदयमतुलबलस्त्वयाद्य वै त्रिदशपतिस्त्रिदशाश्च निर्जिताः ॥ ३८ ॥
नय रथमधिरोप्य वासवं नगरमितो व्रज सेनया वृतस्त्वम् ।
अहमपि तव पृष्ठतो द्रुतं सह सचिवैरनुयामि हृष्टवत् ॥ ३९ ॥
अथ स बलवृतः सवाहनस्त्रिदशपतिं परिगृह्य रावणिः ।
स्वभवनमधिगम्य वीर्यवान्कृतसमरान्विससर्ज राक्षसान् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

३३] ति० टी०–हे तात ! आगच्छ गच्छामः । स्वपुरमिति शेषः । रणकर्म निवर्ततां निवृत्तमस्तु । समाप्तमस्त्वित्यर्थः । कुतो निवृत्तिस्तत्राह—नोऽस्माकं जितं जयः संवृत्तः भावे निष्ठा स जयस्ते विदितोऽस्तु ॥ ३३ ॥

रा० ठी०–तदाकारमाह—आगच्छेति । नोऽस्माभिर्जितं देवजातमिति शेषः इति ते विदितमस्तु अतः विगतज्वरस्त्वस्थश्च भव अत एव आगच्छ अत एव रणकर्म निवर्ततां वयं गच्छामः ॥ ३३ ॥

गो० टी०–आगच्छेति । निवर्ततां निवृत्तमस्तु समाप्तमस्तु । कथं निवृत्तिरित्यत्राह—जितमिति । भावे निष्ठा॥३३॥

३४–३६] ति० टी०–कथं जयस्तत्राह—अयं हीति । देवबलादेवसेनायाः ॥ ३४–३६ ॥

रा० टी०–जये हेतुमाह—अयमिति । सुरसैन्यस्य त्रैलोक्यस्य च यः प्रभुः स मया देवबलात् देवसैन्यात् गृहीतः अत एव सुराः भग्नदर्पाः कृताः ॥ ३४ ॥

रा० टी०–यथेष्टमिति । अरातिमरिं निगृह्य यथेष्टं भुङ्क्ष्व अतः युद्धं निष्फलमत एव वृथा श्रमेण किं निवर्ततामित्यर्थः ॥ ३५ ॥

रा० टी०–तत इति । दैवतगणाः सुराः रावणेर्वाक्यं श्रुत्वा रणकर्मणो निवृत्ताः सन्तः गताः स्वं स्वं स्थानमिति शेषः॥३६॥

गो० टी०–अयं हीति । दैवबलात् देवसेनायाः३६–३८

३७–३९] ति० टी०–रणविगतो विगतरणः॥३७-३९॥

रा० टी०–अथेति । प्रियं तत् स्वसुतवचनं समनुनिशम्य रणाद्विगतः प्रथितो विख्यातो निशाचरेन्द्रः सूनुं सुतं जगाद३७

रा० टी०–अतिबलेति । यस्मात्त्रिदशपतिः त्रिदशाश्च त्वया निर्जिताः तस्मात्सदृशैः अस्मत्कुलोचितैः पराक्रमैरुपलक्षितस्त्वं मम कुलवंशविवर्द्धनोसि ॥ ३८ ॥

गो० टी०–अथेति । रणविगतज्वरः विगतरणाज्वर इत्यर्थः ॥ ३९ ॥ ४० ॥

रा० टी०–नयेति । वासवं रथमधिरोप्य नगरं लंकां नय तत्प्रकारमाह सेनया वृतस्त्वमितो लोकान्व्रज अहमपि हृष्टवद्धर्षविशिष्टं यथा भवति तथा तव पृष्ठतोऽनुयामि ॥ ३९ ॥

गो० टी०–नयेति । त्वरितमुपनयस्वेति पाठे निर्जिता इति पूर्वेणान्वयः ॥ ४१ ॥

५०] ति० टी०–राक्षसान्विससर्ज । स्वस्वभवनं प्रतीति शेषः ॥ ४० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

रा० टी०–अथेति । बलैर्वृतो रावणिः त्रिदशपतिं परिगृह्य स्वभवनमभिगम्य कृतसमरान् राक्षसान्विससर्ज तदूहगमनाय आज्ञापयत् ॥ ४० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

गो० टी०–अथेति । राक्षसान्विससर्जेति स्वं स्वं निवेशं प्रतीति शेषः ॥ ४२ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

---

१ दैवेति गो. पा. । २ स्वस्थचेता बभूव ह इति गो. पा. । ३ रणविगतज्वरः प्रभुर्विजयमवाप्य निशाचराधिपः । स्वभवनमभितो जगाम हृष्टः स्वसुतमवाप्य च वाक्यमब्रवीदिति गो. पा. । ४ तैर्मम कुलमानविवर्धनं कृतमिति गो. पा. । ५ अतुल्येति गो. पा. । ६ गच्छत इति गो. पा. ।

त्रिंशः सर्गः ।

इन्द्रमोचनाय देवैः प्रार्थितः प्रजापतिस्तत्रागत्येन्द्रजिते वरान्वितीर्थं तेन मोचितं शक्रं विमनसं वीक्ष्य पुरा त्वत्कृताहत्याधर्षण-कुपितगौतमेन शप्तोऽस्यतो वैरिबद्धस्त्वमिति तं समाश्वास्य त्रिदिवं प्रापयत् ।

जिते महेन्द्रेऽतिबले रावणस्य सुतेन वै । प्रजापतिं पुरस्कृत्य ययुर्लङ्कां सुरास्तदा ॥ १ ॥
तत्र रावणमासाद्य पुत्रभ्रातृभिरावृतम् । अब्रवीद्गगने तिष्ठन्सामपूर्वं प्रजापतिः ॥ २ ॥
वत्स रावण तुष्टोऽस्मि पुत्रस्य तव संयुगे । अहोऽस्य विक्रमौदार्यं तव तुल्योऽधिकोऽपि वा ॥३॥
जितं हि भवता सर्वं त्रैलोक्यं स्वेन तेजसा । कृता प्रतिज्ञा सफला प्रीतोऽस्मि सुसुतस्य ते ॥ ४ ॥
अयं च पुत्रोऽतिबलस्तव रावण वीर्यवान् । जगतीन्द्रजिदित्येव परिख्यातो भविष्यति ॥ ५ ॥
बलवान्दुर्जयश्चैव भविष्यत्येव राक्षसः । यं समाश्रित्य ते राजन्स्थापितास्त्रिदशा वशे ॥ ६ ॥
तन्मुच्यतां महाबाहो महेन्द्रः पाकशासनः । किंचास्य मोक्षणार्थाय प्रयच्छन्तु दिवौकसः ॥ ७॥
अथाब्रवीन्महातेजा इन्द्रजित्समितिंजयः । अमरत्वमहं देव वृणे यद्येष मुच्यते ॥ ८ ॥
[चतुष्पदां खेचराणामन्येषां वा महौजसाम् । वृक्षगुल्मक्षुपलतातृणोपलमहीभृताम् ॥
सर्वेऽपि जन्तवोऽन्योन्यं भेतव्ये सति बिभ्यति । अतोऽत्र लोके सर्वेषां सर्वस्माच्च भवेद्भयम् ।]
ततोऽब्रवीन्महातेजा मेघनादं प्रजापतिः । नास्ति सर्वामरत्वं हि कस्यचित्प्राणिनो भुवि ॥ ९ ॥
पक्षिणश्चतुष्पदो वा भूतानां वा महौजसाम् । श्रुत्वा पितामहेनोक्तमिन्द्रजित्प्रभुणाव्ययम् ॥ १० ॥

१-२] ति० टी०-अथ ब्रह्मणेन्द्रमोचनमिन्द्राधासनं च—जिते इति ॥ १ ॥ २ ॥

रा० टी०-रावणादिकर्तृकलङ्काप्रवेशानन्तरकालिकं वृत्तान्तमाह—जित इत्यादिभिः । रावणस्य सुतेन महेन्द्रातिबले जिते सति सुराः प्रजापतिं पुरस्कृत्य लङ्कां ययुः ॥१॥

रा० टी०-तत्रेति । प्रजापतिः रावणमासाद्य गगने तिष्ठन्सत्रब्रवीत् ॥ २ ॥

गो० टी०-जित इत्यादि ॥ १ ॥ २ ॥

३] ति० टी०-अहोऽस्येति संधिरार्षः । तव तुल्यः । एष इति शेषः ॥ ३ ॥

रा० टी०-तदाकारमाह—वत्सेत्यादिभिः । तव पुत्रस्योपरि तुष्टोस्मि तत्र हेतुः अस्य तव पुत्रस्य विक्रमौदार्यमहो आश्चर्यमतोऽयं तव तुल्योऽधिको वा ॥ ३ ॥

गो० टी०-वत्सेति । अहोस्येति संधिरार्षः ॥ ३ ॥

४-६] ति० टी०-त्रैलोक्राज्ञेष्यामीति या प्रतिज्ञा कृता सा सफला जाता ॥ ४-६ ॥

रा० टी०-जितमिति । भवता त्रैलोक्यं जितमत एव प्रतिज्ञा सफला कृता अत एव सुसुतस्य ते प्रीतोस्मि ॥ ४ ॥

रा० टी०-अयमिति । अतिबलस्त्वयायं पुत्रः इन्द्रजिदित्येवं जगति परिख्यातो भविष्यति ॥ ५ ॥

रा० टी०-बलवानिति । यं पुत्रं समाश्रित्य त्रिदशाः वशे स्थापिताः स राक्षसः दुर्जयो भविष्यति भवति ॥ ६ ॥

गो० टी०-जितमिति । स्वसुतेन स्वसुतबलेन । त्वया कृता प्रतिज्ञा चतुरो दिक्पालान् जेष्यामीति कृता प्रतिज्ञा ४-१०

७-८] ति० टी०-तन्मुच्यतां त्रिदशानां वशे स्थापितत्वात्तावत एवार्थस्य स्वत्संपाद्यत्वादिति भावः । अस्य मोक्षणार्थाय । अन्यदप्यभीष्टं दिवौकसः किं प्रयच्छन्तु तद्वदेति शेषः ॥ ७ ॥ ८ ॥

रा० टी०-तदिति । तत् त्वत्प्रयोजनस्य सिद्धत्वाद्धेतोः महेन्द्रः परमैश्वर्यवान्पाकशासनः त्वया मुच्यतामस्य पाकशासनस्य मोक्षणार्थाय दिवौकसः किं प्रयच्छन्तु तद्वदेत्यर्थः॥७॥

रा० टी०-अथेति । इन्द्रजिदब्रवीत्तदाकारमाह हे देव यदि एष इन्द्रो मुच्यते मोच्यते तदा अमरत्वमहं वृणे ॥ ८ ॥

९] ति० टी०-सर्वामरत्वं सर्वतो निमित्तात्सर्वस्मिन्नपि मरणराहित्यं मत्सृष्टप्राणिनां नास्ति ॥ ९ ॥

रा० टी०-तत इति । प्रजापतिः मेघनादमब्रवीत्तदाकारमाह पक्षिणः पक्षिणां मध्ये चतुष्पदः चतुष्पदां मध्ये महौजसां भूतानां मनुष्याणां वा मध्ये कस्यचित्प्राणिनः सर्वामरत्वं नास्ति स्थलद्वये जात्यभिप्रायेणैकवचनं सार्द्धश्लोक एकान्वर्यात्

गो० टी०-तत इत्यादिसार्धमेकं वाक्यम् । सर्वामरत्वं सर्वस्मादपि निमित्तात्सर्वस्मिन्नपि काले मरणराहित्यं भुवि मत्सृष्टप्राणिनां नास्ति पक्ष्यादिभ्यो यन्मरणम् ॥ ११॥१२ ॥

१०] ति० टी०-तान्प्राणिन आह—पक्षिण इति । महौजसो भूता द्विपादाः ॥ १० ॥

१ महेद्रातिबल इति रा. पाठः । २ स्वसुतेन वै इति गो. पाठः । ३ पद्यद्वयमिदमधिकं गो. पुस्तके । ४ द्विपद इति योग्यं भाति ।

अथाब्रवीत्स तत्रस्थं मेघनादो महाबलः । श्रूयतां वा भवेत्सिद्धिः शतक्रतुविमोक्षणे ॥ ११ ॥
ममेष्टं नित्यशो हव्यैर्मन्त्रैः संपूज्य पावकम् । सङ्ग्राममवतर्तुं च शत्रुनिर्जयकाङ्क्षिणः ॥ १२ ॥
अश्वयुक्तो रथो मह्यमुत्तिष्ठेत्तु विभावसोः । तत्स्थस्यामरता स्यान्मे एष मे निश्चितो वरः ॥१३॥
तस्मिन्यज्ञसमाप्ते च जप्यहोमे विभावसौ । युध्येयं देव सङ्ग्रामे तदा मे स्याद्विनाशनम्॥ १४ ॥
सर्वो हि तपसा देव तृणोत्यमरतां पुमान् । विक्रमेण मया त्वेतदमरत्वं प्रवर्तितम् ॥ १५ ॥
एवमस्त्विति तं चाह वाक्यं देवः पितामहः । मुक्तश्चेन्द्रजिता शक्रो गताश्च त्रिदिवं सुराः॥ १६ ॥
एतस्मिन्नन्तरे राम दीनो भ्रष्टामरद्युतिः । इन्द्रश्चिन्तापरीतात्मा ध्यानतत्परतां गतः ॥ १७ ॥
तु दृष्ट्वा तथाभूतं प्राह देवः पितामहः । शतक्रतो किमु पुरा करोति स्म सुदुष्कृतम् ॥ १८ ॥
अमरेन्द्र मया बुद्ध्या प्रजाः सृष्टास्तथा प्रभो । एकवर्णाः समाभाषा एकरूपाश्च सर्वशः ॥ १९ ॥

रा० टी०–श्रुत्वेति । प्रभुणा पितामहेनोक्तमिन्द्रजित् श्रुत्वा तत्रस्थं पितामहमब्रवीत् ॥ १० ॥

११] ति० टी०–श्रूयतां वेति । वाथवा सर्वामरत्वासंभवे शतक्रतुविमोक्षणे तदुपाप्तिमित्तायां मे सिद्धिः काङ्क्षिता सा श्रूयताम् ॥ ११ ॥

रा० टी०–तदाकारमाह—श्रूयतामिति । शतक्रतुविमोक्षणे विमोक्षणार्थं या सिद्धिर्भवेत्सा श्रूयतामहं पृथक् ॥ ११ ॥

गो० टी०–अथेति । पूर्वोक्तविवरणमेतत् श्रूयतामिति । वा अथवेत्यर्थः । सर्वामरत्वाभावेपि शतक्रतुविमोक्षणे तन्निमित्तं मया सिद्धिः काङ्क्षिता सा श्रूयताम् ॥ १२ ॥

१२-१३] ति० टी०–तदेवाह—ममेष्टमिति । तदा मे स्याद्विनाशनं नान्यदेत्येवंरूपं ममेष्टमित्यग्निमेण संबन्धः । नित्यशो नियमेन मन्त्रैस्तत्पूर्वकं हव्यैः पावकं संपूज्य शत्रुनिर्जयकाङ्क्षिणः सङ्ग्राममवतर्तुं प्रवेष्टुं वाञ्छतो ममाश्वयुक्तो रथो विभावसोस्तत्कालमुत्तिष्ठेत् तत्स्थस्य तदर्थे निश्चितो ममामरता च स्यादेव एष मे निश्चितो वरः ॥ १२ ॥ १३ ॥

रा० टी०–तदाकारमाह—ममेत्यादिभिः । संग्राममवतर्तुं शत्रुनिर्जयकाङ्क्षिणो ममेष्टं हव्यैर्मन्त्रैः पावकं संपूज्य विद्यमानस्यैव भवेदिति शेषः ॥ १२ ॥

रा० टी०–इष्टमेवाह—अश्वेति । विभावसोः हुतवन्हेः अश्वयुक्तो रथो मह्यमुपतिष्ठेत् तत्स्थस्य तादृशरथे स्थितस्य मे अमरता स्यात् एष वरो मे निश्चितः ॥ १३ ॥

गो० टी०–ममेति । नित्यशो नियमेन । हव्यैः पावकं संपूज्य शत्रुनिर्जयकाङ्क्षिणः संग्राममवतर्तुं प्रवेष्टुं वाञ्छतो ममाश्वयुक्तो रथो विभावसोरग्रेः तत्कालमुत्तिष्ठेत् तस्य मे संग्रामे अमरता स्यादेव एष मे निश्चयो वरः ॥ १२ ॥ १३ ॥

१४] ति० टी०–तस्मिन्साङ्ग्रामिकयागेऽपेक्षितं यज्जप्यहोमम् समाहारद्वन्द्वः । तस्मिन्नसमाप्ते यदि युद्धयेयं युद्धं कुर्यां तदा मे विनाशनं स्यादिति ममेष्टमित्यन्वयः ॥ १४ ॥

रा० टी०–तस्मिन्निति । विभावसौ वन्हौ जप्ये जपे होमे च असमाप्ते सति यद्यहं युध्येयं तदा मे विनाशनं स्यात्१४

गो० टी०–तस्मिन्निति । तस्मिन् सांग्रामिकयागे अपेक्षिते विभावसौ जप्यहोमे चासमाप्ते तु यदि युध्येयं तदैव संग्राम एव विनाशनं भवित्विति ममेष्टमिति संबन्धः । प्रकारान्तरेण विनाशो मा भूदित्यर्थः ॥ १६ ॥

१५-१६] ति० टी०–लोकविलक्षणक्रिययायं मे वरलाभ इत्याह—सर्वो हीति ॥ १५ ॥ १६ ॥

रा० टी०–इदं याचितं त्वरितमेव देहीति बोधयन्नाह—सर्व इति । सर्वो जनः तपसा अमरतां तृणोति मया तु विक्रमेण इन्द्रनिग्रहेणेत्यर्थः एतदमरत्वं प्रवर्तितं कृतमेतेन वरप्राप्तिमन्तरा इन्द्रमोक्षो न भवितेति ध्वनितम् ॥ १५ ॥

रा० टी०–एवमिति । पितामहः तमिन्द्रजितमेवमस्त्विति वाक्यमाह अत एव इन्द्रजिता शक्रो मुक्तः अत एव सुराः त्रिदिवं गताः ॥ १६ ॥

गो० टी०–मयात्रैतद्वरं लोकविलक्षणं प्राप्यत इति विस्मयते—सर्व इत्यादि । प्रवर्तितं प्रकीर्तितम् । दातव्यत्वेनेति शेषः ॥ १७ ॥ १८ ॥

१७] ति० टी०–भ्रष्टा अमराणां द्युतिर्यस्य सः ॥ १७ ॥

रा० टी०–एतस्मिन्निति । भ्रष्टा अमरद्युतिर्यस्य अतः चिन्तापरीतात्मा इन्द्रः ध्यानतत्परतां गतः निरन्तरं दध्यौ केन कर्मणैवं पराभूतिमहं प्राप्त इति विचारयामासेत्यर्थः १७

गो० टी०–एतस्मिन्निति । भ्रष्टाम्बरद्युतिः भ्रष्टा अमराणां देवानां द्युतिर्यस्य स तथा ॥ १९ ॥

१८] ति० टी०–हे शतक्रतो ! एवमिदानीं शोचन्निति शेषः । तादृशो भवान्पुरा सुदुष्कृतं किमु करोति स्म कस्मात्कृतवानसि ॥ १८ ॥

रा० टी०–तमिति । तथाभूतं ध्यानतत्परं तमिन्द्रं पितामहो दृष्ट्वा प्राह तदाकारमाह–हे शतक्रतो ! पुरा पूर्वं सुदुष्कृतमेतत्पराभूतिकारणीभूतमहापापं किं भवान्करोति स्म एतेन ज्ञातं चेदुच्यतामिति सूचितम् ॥ १८ ॥

गो०टी०–तमिति । हे शतक्रतो! एवमिदानीं शोचन् भवान् पुरा सुदुष्करं किमु करोति स्म कस्मात्कृतवानसीत्यर्थः॥२०॥

१९] ति० टी०–ननु किं मया कृतं तत्राह—अमरे-

---

१ निश्चय इति गो. पाठः । २ भवत्व इति गो. पाठः ।

तासां नास्ति विशेषो हि दर्शने लक्षणेऽपि वा । ततोऽहमेकाग्रमनास्ताः प्रजाः समचिन्तयम्[1]॥ २० ॥
सोऽहं तासां विशेषार्थं स्त्रियमेकां विनिर्ममे । यद्यत्प्रजानां प्रत्यङ्गं विशिष्टं तत्तदुद्धृतम् ॥ २१ ॥
ततो मया रूपगुणैरहल्या स्त्री विनिर्मिता । हलं नामेह वैरूप्यं[2] हल्यं तत्प्रभवं भवेत् ॥ २२ ॥
यस्य न विद्यते हल्यं तेनाहल्येति विश्रुता । अहल्येत्येव च मया तस्या नाम प्रकीर्तितम्[3] ॥ २३ ॥
निर्मितायां च देवेन्द्र तस्यां नार्यां सुरर्षभ । भविष्यतीति कस्यैषा मम चिन्ता ततोऽभवत्[4]॥ २४ ॥
त्वं तु शक्र तदा नारीं जानीषे मनसा प्रभो । स्थानाधिकतया पत्नी ममैषेति पुरंदर[5] ॥ २५ ॥
सा मया न्यासभूता तु गौतमस्य महात्मनः । न्यस्ता बहूनि वर्षाणि तेन निर्यातिता च ह[6]॥ २६ ॥
ततस्तस्य परिज्ञाय महास्थैर्यं महामुनेः । ज्ञात्वा तपसि सिद्धिं च पत्न्यर्थं स्पर्शिता तदा ॥२७॥
स तया सह धर्मात्मा रमते स्म महामुनिः । आसन्निराशा देवास्तु गौतमे दत्तया तया ॥ २८ ॥
त्वं क्रुद्धस्त्विह कामात्मा गत्वा तस्याश्रमं मुनेः[7] । दृष्ट्वांश्च तदा तां स्त्रीं दीप्तामग्निशिखामिव ॥ २९ ॥
सा त्वया धर्षिता शक्र कामार्तेन समन्युना । दृष्टस्त्वं सें तदा तेन आश्रमे[8] परमर्षिणा ॥ ३० ॥

न्द्रेति । वर्णो देहकान्तिः । एकविधदेहकान्तयः । समाभाषाः समवचनाः । एकरूपाः समानवयोवस्थाः ॥ १९ ॥

रा० टी०–नन्वु मया न ज्ञातमित्यत आह—**अमरेन्द्रे**-त्यादिभिः । हे अमरेन्द्र एकवर्णाः समानवर्णविशिष्टाः समाभाषाः समानभाषायुक्ताः एकरूपाः एकविधशरीरावयवसंनिवेशाः प्रजाः मया वुद्धया सृष्टाः अत एव तासां प्रजानां दर्शने रूपे लक्षणे वर्णादौ च विशेषो नास्ति ततः तस्माद्धेतोः अहं प्रजाः समचिन्तयं विशेषप्रतिपत्त्यर्थं व्यचारयम् श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–एतादृशदुःखबीजं मया कृतमित्यवाह—**अमरेन्द्रेत्यादि** । एकवर्णाः समाभाषाः एकरूपकान्तिस्वराः । एकरूपाः समानवयोवस्थाकालाः ॥ २१ ॥

२०] ति० टी०–दर्शने रूपलक्षणे वर्णादौ ॥ २० ॥

गो० टी०–**तासामिति** । दर्शने सौन्दर्ये लक्षणे नयनावयवसौष्ठवे च तासां विशेषो नासीत् । ततोहमिति । एकाग्रमनाः सावधानः सन् ताः प्रजा उद्दिश्य पर्यचिन्तयम् । तासां विशेषकरणप्रकारमचिन्तयं वा ॥ २२ ॥

२१] ति० टी०–तासां विशेषार्थं किंचिल्किंचिदङ्गवैकल्यप्रयुक्तपरस्परवैलक्षण्यसिद्ध्यर्थम ॥ २१ ॥

रा० टी०–**स इति** । सः कृतविचारोहं तासां प्रजानां विशेषार्थमेकां स्त्रियं विनिर्ममे अत एव प्रजानां प्रत्यङ्गं यद्यद्विशिष्टं विशेषः तत्तदुद्धृतं प्रकटितम् ॥ २१ ॥

गो० टी०–**सोहमिति**। तासां विशेषार्थं किंचित्किंचिदङ्गवैकल्यप्रयुक्तपरस्परवैलक्षण्यसिद्ध्यर्थमेकां स्त्रियं विनिर्ममे निर्मितवानस्मि । यद्यदिति । प्रत्यङ्गं अङ्गमङ्गम् यद्यद्विशिष्टं सारभूतं सौन्दर्यं तत्तदुद्धृतम् ॥ २३ ॥

२२-२३] ति० टी०–तत्प्रभवं वैरूप्यप्रभवम । हल्यं निन्द्यत्वम् ॥ २२ ॥ २३ ॥

रा० टी०–**तत इति** । ततोऽनन्तरं रूपगुणैरुपलक्षिता अहल्या स्त्री मया विनिर्मिता अहल्याशब्दस्य निर्वचनमाह हलं वैरूपं विरूपोभवेत् हल्यं तु तत्प्रभवं तद्धर्मो भवेत् ॥ २२ ॥

रा० टी०–**यस्या इति** । यस्याः येन हेतुना हल्यं वैरूप्यं न विद्यते तेन हेतुना सा अहल्येति विश्रुता अत एव मयापि तस्या नाम अहल्येति प्रकीर्तितम् ॥ २३ ॥

गो० टी०–**तत इति** । रूपगुणैः प्रत्यङ्गमुद्धृतैः सौन्दर्यगुणैः । अहल्या नामाङ्कना काचिद्विनिर्मिता ॥ २४ ॥ २५ ॥

२४] ति० टी०–कस्यैषा भविष्यति। भार्येति शेषः॥२४॥

रा० टी०–**निर्मितायामिति** । तस्यामहल्यायां निर्मितायां सत्यामेषा कस्य स्त्री भविष्यतीति मम चिन्ताऽभवत्॥२४

गो० टी०–**निर्मितायामिति**। भविष्यतीति कस्यैषा पत्नी भविष्यतीति चिन्ताभवत् । तत्तुल्यवराभावादिति भावः ॥२६॥

२५] ति० टी०–स्थानाधिकतया देवाधिपतित्वरूपाधिकस्थानप्राप्त्या हेतुना विनापि मदनुमतिं ममैषा पत्नीति जानीषे ॥ २५ ॥

रा० टी०–**त्वमिति** । स्थानाधिकतया सर्वोपरि स्थानवत्त्वेन हेतुना एषा अजानतकामा ममैव पत्नी इति नारीं मनसा त्वं जानीषे ॥ २५ ॥

गो० टी०–**त्वमिति** । स्थानाधिकतया त्रैलोक्याधिपतित्वेन हेतुनेत्यर्थः । ममैषा पत्नीति मनसा जानीषे । अस्मदनुमतिं विना तां प्रार्थितवानसीत्यर्थः ॥ २७ ॥

२६] ति० टी०–निर्यातिता पुनः प्रत्यर्पिता ॥ २६ ॥

रा० टी०–**सेति**। सा अहल्या न्यासभूता सती गौतमस्य समीपे बहूनि वर्षाणि न्यस्ता तेन गौतमेन निर्यातिता मह्यं पुनः समर्पिता च ॥ २६ ॥

गो० टी०–**सेति** । निर्यातिता पुनः प्रत्यर्पिता ॥ २८ ॥

२७-३०] ति० टी०–स्थैर्यं जितेन्द्रियत्वं तपोविषयां सिद्धिं च ज्ञात्वा स्पर्शिता भार्यात्वेन दत्ता ॥ २७–३० ॥

---

१ परीति गो.पा.। २ वैरूपमिति गो.पा.। ३ वर्तितमिति गो.पा.। ४ संक्रुद्धस्त्वं हि धर्मात्मन्निति गो.पा.। ५ चेति गो.पा.। ६ ह्याश्रमे इति गो.पा.।

ततः क्रुद्धेन तेनासि शप्तः परमतेजसा । गतोऽसि येन देवेन्द्र दशाभागविपर्ययम् ॥ ३१ ॥
यस्मान्मे धर्षिता पत्नी त्वया वासव निर्भयात् । तस्मात्त्वं समरे शक्र शत्रुहस्तं गमिष्यसि ॥ ३२ ॥
अयं तु भावो दुर्बुद्धे यस्त्वयेह प्रवर्तितः । मानुषेष्वपि लोकेषु भविष्यति न संशयः ॥ ३३ ॥
तत्रार्थे तस्य यः कर्ता त्वय्यर्थं निपतिष्यति । न च ते स्थावरं स्थानं भविष्यति न संशयः ॥ ३४ ॥
यश्च यश्च सुरेन्द्रः स्याद्ध्रुवः स न भविष्यति । एष शापो मया मुक्त इत्यसौ त्वां तदाब्रवीत् ॥ ३५ ॥
तां तु भार्यां सुनिर्भर्त्स्य सोऽब्रवीत्सुमहातपाः । दुर्विनीते विनिध्वंस ममाश्रमसमीपतः ॥ ३६ ॥
रूपयौवनसंपन्ना यस्मात्त्वमनवस्थिता । तस्माद्रूपवती लोके न त्वमेका भविष्यति ॥ ३७ ॥

रा० टी०–तत इति । तस्य गौतमस्य महास्थैर्यं जितेन्द्रियत्वं तपसि सिद्धिं च ज्ञात्वा पत्न्यर्थं स्पर्शिता तस्मै मया दत्ता ॥ २७ ॥

रा० टी०–स इति । स गौतमः तया अहल्यया रमते स्म देवास्तु तया गौतमे दत्तया हेतुना निराशाः आसन् ॥ २८ ॥

रा० टी०–त्वमिति । कामात्मा त्वं तु क्रुद्धस्सन्मुनेराश्रमं गत्वा अग्निशिखामिव दीप्तां तामहल्यां दृष्टवानसि ॥ २९ ॥

रा० टी०–सेति । कामार्तेन त्वया सा अहल्या धर्षिता त्वं तु परमर्षिणा दृष्टः ॥ ३० ॥

गो० टी०–तत इति । स्थैर्यं जितेन्द्रियत्वम् । तपसि तपोविषये । स्पर्शिता दत्ता ॥ २९–३२ ॥

३१–३२] ति० टी०–दशाभागोऽवस्थाभेद ऐश्वर्यरूपस्तस्य विपर्ययं बन्धनरूपां विपरीतावस्थाम् ॥ ३१–३२ ॥

रा० टी०–तत इति । ततः तस्माद्धेतोः क्रुद्धेन तेन मुनिना शप्तोऽसि तेन शापेन दशाभागेन कालप्राप्त्या विपर्ययं पराभूतिं गतोऽसि ॥ ३१ ॥

रा० टी०–शापाकारमाह—यस्मादिति । यस्मान्मे पत्नी त्वया धर्षिता तस्मात्त्वं शत्रुहस्तं गमिष्यसि ॥ ३२ ॥

गो० टी०–तत इति । दशाभागविपर्ययं दशाभागोवस्थाविशेषः तस्य विपर्ययं सहजसात्त्विकावस्थाविपर्ययमित्यर्थः ३३

३३] ति० टी०–अयं तु भावः । जारभाव इत्यर्थः । मानुषेष्वपि शास्त्राधिकारिष्वपि भविष्यति । राज्ञस्तव दोषादित्यर्थः ॥ ३३ ॥

रा० टी०–शापांतरमाह—अयमिति । यः अयं परस्त्रीधर्षणरूपो भावः त्वयेह प्रवर्तितः स भावः मानुषेष्वपि लोकेषु भविष्यति ॥ ३३ ॥

गो० टी०–अयं त्विति । अयं भावः मानुषेष्वपि शास्त्राधिकारिष्वपि भविष्यति । राज्ञस्तव दोषादिति भावः ॥ ३४ ॥

३४] ति० टी०–तत्रार्थमिति । यो जारभावेन पापस्य कर्ता तत्र पुरुषे पापस्यार्धं निपतिष्यति । त्वय्यर्धम् स्थावरं स्थिरम् ॥ ३४ ॥

रा० टी०–नन्वं तेन मम किमित्यत आह—तत्रेति । तस्य पापस्य यः कर्ता तत्र तस्मिन्पुरुषे यत्पापं तस्यार्द्धं त्वयि निपतिष्यति तत्फलमाह ते स्थानं स्थावरं निश्चलं न भविष्यति सोपद्रुतमेव भविष्यतीत्यर्थः ॥ ३४ ॥

गो० टी०–तत्रेति । तत्र जारभावे यो धर्मः समुत्थास्यति तस्य यः कर्ता तत्र पुरुषे तस्याधर्मस्यार्धं निपतिष्यति त्वय्यर्धम निपतिष्यतीत्यर्थः । "राजा राष्ट्रकृतं पापम्" इति न्यायात् । स्थावरम् स्थिरम् स्थानं पदम् ॥ ३५ ॥

३५] ति० टी०–न केवलं तवैवास्थिरत्वम्, अपि तु—यश्चेत्यादि । सोऽपि ध्रुवः स्थिरो न भविष्यति । मध्ये मध्ये भ्रंशः स्यादिति भावः ॥ ३५ ॥

रा० टी०–द्वितीयं फलमाह—य इति । यश्च यश्च सुरेन्द्रः स्यात् स ध्रुवः स्थिरो न भविष्यति उपद्रुत एव भविष्यतीत्यर्थः एष शापः मया मुक्तः दत्त इत्यर्थः असौ गौतम इत्यब्रवीत् ॥ ३५ ॥

गो० टी०–न केवलं तवैवास्थिरत्वमपि तु अन्यस्यापि जारस्येत्याह—यश्चेति । हे सुरेन्द्र! य एवं जारः स्यात्सोऽपि ध्रुवो मा भविष्यतीत्यर्थः ॥ ३६ ॥ ३७ ॥

३६] ति० टी०–विनिध्वंस ध्वस्तसौरूप्या भव ॥ ३६ ॥

रा० टी०–तामिति । मुनिः तामहल्यां सुनिर्भर्त्स्य ममाश्रमसमीपत आश्रमसमीपे त्वं विनिध्वंस ध्वंसं प्राप्नुहि इत्यब्रवीत् ॥ ३६ ॥

३७] ति० टी०–यस्मात्त्वमनवस्थिता तस्मादेतावत्कालं त्वमेकैव रूपवतीति यत्स्थितं तन्न भविष्यति ॥ ३७ ॥

रा० टी०–तद्वचनान्तरमाह—रूपेत्यादिभिः । रूपादिसम्पन्ना त्वं यस्मादनवस्थितासि तस्मात्त्वमेवैका रूपवती न भविष्यसि बहवो रूपवत्यो भविष्यन्तीत्यर्थः ॥ ३७ ॥

गो० टी०–रूपेति । ममाश्रमसमीपतो यस्मात्त्वमनवस्थिता तस्मादेवैतत्पर्यन्तं त्वमेकैव रूपवतीति यद् स्थितं तन्न भविष्यति ॥ ३८ ॥

१ राज्ञश्चिति गो. पाठः । २ भविष्यसीति रा. पाठः ।

रूपं च ते प्रजाः सर्वा गमिष्यन्ति न संशयः । यत्तदेकं समाश्रित्य विभ्रमोऽयमुपस्थितः ॥ ३८ ॥
तदाप्रभृति भूयिष्ठं प्रजा रूपसमन्विता । सा तं प्रसादयामास महर्षिं गौतमं तदा ॥ ३९ ॥
अज्ञानाद्धर्षिता विप्र त्वद्रूपेण दिवौकसा । न कामकाराद्विप्रर्षे प्रसादं कर्तुमर्हसि ॥ ४० ॥
अहल्यया त्वेवमुक्तः प्रत्युवाच स गौतमः । उत्पत्स्यति महातेजा इक्ष्वाकूणां महारथः ॥ ४१ ॥
रामो नाम श्रुतो लोके वनं चाप्युपयास्यति । ब्राह्मणार्थे महाबाहुर्विष्णुर्मानुषविग्रहः ॥ ४२ ॥
तं द्रक्ष्यसि यदा भद्रे ततः पूता भविष्यसि । स हि पावयितुं शक्तस्त्वया यद्दुष्कृतं कृतम् ॥ ४३ ॥
तस्यातिथ्यं च कृत्वा वै मत्समीपं गमिष्यसि । वत्स्यसि त्वं मया सार्धं तदा हि वरवर्णिनि ॥ ४४ ॥
एवमुक्त्वा स विप्रर्षिराजगाम स्वमाश्रमम् । तपश्चचार सुमहत्सा पत्नी ब्रह्मवादिनः ॥ ४५ ॥
शापोत्सर्गाद्धि तस्येदं मुनेः सर्वमुपस्थितम् । तत्स्मर त्वं महाबाहो दुष्कृतं यत्त्वया कृतम् ॥ ४६ ॥
तेन त्वं ग्रहणं शत्रोर्यातो नान्येन वासव । शीघ्रं वै यज यज्ञं त्वं वैष्णवं सुसमाहितः ॥ ४७ ॥
पावितस्तेन यज्ञेन यास्यसे त्रिदिवं ततः । पुत्रश्च तव देवेन्द्र न विनष्टो महारणे ॥ ४८ ॥
नीतः संनिहितश्चैव आर्यकेण महोदधौ । एतच्छ्रुत्वा महेन्द्रस्तु यज्ञमिष्ट्वा च वैष्णवम् ॥ ४९ ॥
पुनस्त्रिदिवमाक्रामदन्वशासच्च देवराट् । एतदिन्द्रजितो नाम बलं यत्कीर्तितं मया ॥ ५० ॥
निर्जितस्तेन देवेन्द्रः प्राणिनोऽन्ये तु किं पुनः । आश्चर्यमिति रामश्च लक्ष्मणश्चाब्रवीत्तदा ॥ ५१ ॥
अगस्त्यवचनं श्रुत्वा वानरा राक्षसास्तदा । विभीषणस्तु रामस्य पार्श्वस्थो वाक्यमब्रवीत् ॥ ५२ ॥

३८–४१] ति० टी०–किं तु तावकं सुन्दरं रूपं सर्वाः प्रजा गमिष्यन्ति । यस्मादेकमेकस्यं तद्रूपमाश्रित्यायं विभ्रमः कामविकार उपस्थितः । प्रकृत इन्द्रस्येति शेषः ॥ ३८–४१ ॥

४२–४६] ति० टी०–ब्राह्मणार्थे विश्वामित्रार्थे॥४२-४६॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—रूपमिति । यदेकं रूपं समाश्रित्य ते विभ्रम उपस्थितः तद्रूपं सर्वाः प्रजाः गमिष्यन्ति प्राप्स्यन्ति ॥ ३८ ॥

गो० टी०–रूपं चेति । तद्रूपं प्रसिद्धं तव सौन्दर्यं सर्वाः प्रजाः स्त्रियः गमिष्यन्तीति । विभ्रमः काममोहः ॥ ३९-४६ ॥

रा० टी०–तदेति । तदाप्रभृति शापकालादारभ्य प्रजा भूयिष्ठमधिकं यथा भवति तथा रूपसमन्विताऽभवत् इति शेषः सा अहल्या तु गौतमं प्रसादयामास ॥ ३९ ॥

रा० टी०–प्रसादनप्रकारमाह–अज्ञानादिति । त्वद्रूपेण त्वत्सदृशरूपवता दिवौकसा अज्ञानात् भ्रमादहं धर्षितास्मि कामकारात् स्वेच्छाप्रवृत्त्या न अतः प्रसादं कर्तुमर्हसि ॥ ४० ॥

रा० टी०–अहल्ययेति । गौतमः प्रत्युवाच तदाकारमाह इक्ष्वाकूणां महारथो विष्णुर्व्यापकव्यापकः मानुषविग्रहः नित्यं नराकृतिः रामो नाम उत्पत्स्यति वनमप्युपयास्यति श्लोकद्वयमेकान्वयि ॥ ४१–४२ ॥

रा० टी०–तमिति । तं रामं यदा द्रक्ष्यसि तदा पूता भविष्यसि तत्र हेतुमाह स इति स रामः यत्त्वया दुष्कृतं कृतं तत्पावयितुं निवर्तयितुं शक्तः ॥ ४३ ॥

रा० टी०–तस्येति । तस्य शक्तस्य रामस्य आतिथ्यं कृत्वा मत्समीपं गमिष्यसि तदा मत्समीपप्राप्तिसमये मया सार्धं वत्स्यसि ॥ ४४ ॥

रा० टी०–एवमिति । स गौतमः स्वमाश्रममाजगाम ब्रह्मवादिनः पत्नी तु सुमहत्तपः चचार ॥ ४५ ॥

रा० टी०–प्रकृतमाह—शापेति । मुनेश्शापोत्सर्गादिदं शत्रुग्रहणमुपस्थितं तत्तस्माद्धेतोः यदुष्कृतं त्वया कृतं तत्स्मर ४६

४७–४८] ति० टी०–नान्येन हेतुनेत्यर्थः ॥४७॥४८॥

रा० टी०–तेनेति । यतस्तेन स्वकृतदुष्कर्मणैव शत्रोः ग्रहणं यातः अन्येन हेतुना न तस्माद्वैष्णवं यज्ञं त्वं यज ॥४७॥

गो० टी०–तदिति । नान्येनेति । नतु हेत्वन्तरेणेत्यर्थः ॥ ४७ ॥ ४८ ॥

रा० टी०–यागफलमाह—पावित इति । यज्ञेन पावितस्त्वं त्रिदिवं यास्यसे तेव पुत्रश्च विनष्टो मृतो न भविष्यतीति शेषः ॥ ४८ ॥

गो० टी०–पुत्रश्चेति । नीत इति । आर्यकेण मातामहेन । नीतः महोदधौ सन्निहितः सम्यङ् निहितः निक्षिप्तः४९-५१

४९–५२] ति० टी०–आर्यकेण पुलोम्ना । यज्ञमिष्ट्वेति । देवानां न यज्ञेष्वधिकार इति जैमिन्युक्तं तु प्रमादादिति निरूपितं प्राक् ॥ ४९–५२ ॥

रा०टी०–ननु पुत्रः क्रास्तीत्यत आह-नीत इति। आर्यकेण मातामहेन महोदधौ नीतः निहितः स्थापितश्च अहं पृथक् । एतदिति । महेन्द्रः वैष्णवं यज्ञमिष्ट्वा त्रिदिवमाक्रामत् अन्वशासच्च गणकार्यस्यानित्यत्वात् न शपो लुक् ॥ ४९ ॥

रा० टी०–एतदिति । तेनेन्द्रजिता यदीन्द्रो निर्जितः तदा अन्ये किम् यदिन्द्रजितो बलं तदेतत्कीर्तितम् ॥ ५० ॥

आश्चर्यं स्मारितोऽस्म्यद्य यत्तद्दृष्टं पुरातनम् । अगस्त्यं त्वब्रवीद्रामः सत्यमेतच्छ्रुतं च मे ॥ ५३ ॥
एवं राम समुद्भूतो रावणो लोककण्टकः । सपुत्रो येन सङ्ग्रामे जितः शक्रः सुरेश्वरः ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ।

पुना रामेण पृष्टोऽगस्त्यो रावणस्य माहिष्मतीपुरगमनं नर्मदास्नानं लिङ्गार्चनादिकं चाकथयत् ।

ततो रामो महातेजा विस्मयात्पुनरेव हि । उवाच प्रणतो वाक्यमगस्त्यमृषिसत्तमम् ॥ १ ॥
भगवन्राक्षसः क्रूरो यदाप्रभृति मेदिनीम् । पर्यटत्कि तदा लोकाः शून्या आसन्द्विजोत्तम ॥२॥
राजा वा राजमात्रो वा किं तदा नात्र कश्चन । धर्षणं यत्र न प्राप्तो रावणो राक्षसेश्वरः ॥ ३ ॥
उताहो हतवीर्यास्ते बभूवुः पृथिवीक्षितः । बहिष्कृता वरास्त्रैश्च बहवो निर्जिता नृपाः ॥ ४ ॥

रा० टी०-**आश्चर्यमिति** । अगस्त्यवचनं श्रुत्वा रामो लक्ष्मणश्च आश्चर्यमित्यब्रवीत् वानरा राक्षसाश्च आश्चर्यमित्यब्रुवन्वचनपरिणामेन अत्राप्यन्वयः ॥ ५१ ॥

गो० टी०-**आश्चर्यमिति** । रामः अगस्त्यवचः श्रुत्वा आश्चर्यमित्यब्रवीत् । तथा लक्ष्मणः तथा वानरा राक्षसाश्चाब्रुवन्नित्यनुषङ्गः ॥ ५२ ॥

रा० टी०-**विभीषण इति** । विभीषणोऽब्रवीदर्द्धं पृथक् ५२

गो० टी०-**विभीषणस्त्विति** । हे राम अगस्त्यस्तु आश्चर्यं यद्दृष्टं पुरातनमब्रवीत्तत्सर्वं मया दृष्टमिदानीम् । अहं स्मारितोस्मि । विभीषणसंवादेन सर्वस्यागस्त्योक्तस्य सत्यत्वं दर्शितम् ॥ ५३—५५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

५३-५४] ति० टी०-आश्चर्यं स्मारितोऽस्मीति । यदगस्त्येनोक्तं तत्सर्वं मया दृष्टमिति सत्यमेवागस्त्येनोक्तमिति रामं प्रति विभीषणेनोक्तम् । श्रुतं च मे । विभीषणमुखादिति शेषः ॥ ५३ ॥ ५४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिंशः सर्गः ॥ ३० ॥

रा० टी०-तदाकारमाह-**आश्चर्यमिति** । यत्पुरातनं दृष्टं तदाश्चर्यं स्मारितोस्मि एतन्मे मया श्रुतं सत्यमिति रामोऽगस्त्यमब्रवीत् ॥ ५३ ॥

रा० टी०-**एवमिति** । येन संग्रामे शक्रो जितः स रावणः एवं समुद्भूतः ॥ ५४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रिंशः सर्गः ॥ ३० ॥

१] ति० टी०-अथ रावणपराजयकथनम्—**तत इति** । विस्मयाद्भगवत्प्रसादवैभवश्रवणजविस्मयादिव ॥ १ ॥

रा० टी०-अगस्त्यं प्रति रामस्य प्रश्नान्तरमाह—**तत इत्यादिभिः** । रामोगस्त्यं पुनरुवाच ॥ १ ॥

गो० टी०-**ततो राम इत्यादि** ॥ १ ॥ २ ॥

२] ति० टी०-लोका मनुष्यलोकप्राणिनः । शून्याः शूरत्वगुणशून्याः ॥ २ ॥

रा० टी०-तदाकारमाह-**भगवन्नित्यादिभिः** । राक्षसो रावणो यदाप्रभृति लोकाः पृथिवीजनाः शून्या रावणसदृशशूरवीररहिता आसन् किम् ॥ २ ॥

३] ति० टी०-तदेवाह—**राजेति** । राजा क्षत्रियः । राजमात्रोऽक्षत्रियः केवलप्रभुः ॥ ३ ॥

रा० टी०-**राजेति** । यत्र यदा रावणो धर्षणं न प्राप्तः तदा राजा राजपुत्रो वा कश्चन न किमुताहो पृथिवीक्षितः पृथिवीं प्राप्ता नृपाऽशस्त्रैर्निर्जिताः अत एव हतवीर्या अत एव बहिष्कृता बभूवुः किम श्लोकद्वयमेकान्वयि ॥ ३-४ ॥

गो० टी०-**राजेति** । येन कारणेन रावणो धर्षणं न प्राप्तः तस्मात्तदा तत्काले राजा वा राजमात्रो वा अक्षत्रियोऽपि प्रभुर्वा कश्चन नासीत् ॥ ३ ॥

४] ति० टी०-उताहोऽथवा विद्यमाना एव हतवीर्या वीर्यरहिता वीर्यवत्त्वेऽपि वरास्त्रैर्दिव्यास्त्रैर्बहिष्कृताः । यद्बहवो नृपा निर्जिता इति वदसीति शेषः ॥ ४ ॥

गो० टी०-**उताहो इति** पक्षान्तरे वर्तते । अथवा विद्यमाना एव पृथिवीक्षितः हतवीर्याः वीर्यरहिता आसन् अथवा वीर्यवत्त्वेपि वरास्त्रैर्दिव्यास्त्रैर्बहिष्कृताः सन्तः निर्जिता इत्युवाचेति पूर्वेणान्वयः ॥ ४ ॥

राघवस्य वचः श्रुत्वा अगस्त्यो भगवानृषिः । उवाच रामं प्रहसन्पितामह इवेश्वरम् ॥ ५ ॥
इत्येवं बाधमानस्तु पार्थिवान्पार्थिवर्षभ । चचार रावणो राम पृथिवीं पृथिवीपते ॥ ६ ॥
ततो माहिष्मतीं नाम पुरीं स्वर्गपुरीप्रभाम् । संप्राप्तो यत्र सांनिध्यं सदासीद्वसुरेतसः ॥ ७ ॥
तुल्य आसीन्नृपस्तस्य प्रभावाद्वसुरेतसः । अर्जुनो नाम यत्राग्निः शरकुण्डेशयः सदा ॥ ८ ॥
तमेव दिवसं सोऽथ हैहयाधिपतिर्बली । अर्जुनो नर्मदां रन्तुं गतः स्त्रीभिः सहेश्वरः ॥ ९ ॥
तमेव दिवसं सोऽथ रावणस्तत्र आगतः । रावणो राक्षसेन्द्रस्तु तस्यामात्यानपृच्छत ॥ १० ॥
क्वार्जुनो नृपतिः शीघ्रं सम्यगाख्यातुमर्हथ । रावणोऽहमनुप्राप्तो युद्धेप्सुर्नृवरेण ह ॥ ११ ॥
ममागमनमप्यग्रे युष्माभिः संनिवेद्यताम् । इत्येवं रावणेनोक्तास्तेऽमात्याः सुविपश्चितः ॥१२॥
अब्रुवन्राक्षसपतिमसांनिध्यं महीपतेः । श्रुत्वा विश्रवसः पुत्रः पौराणामर्जुनं गतम् ॥ १३ ॥
अपसृत्यागतो विन्ध्यं हिमवत्संनिभं गिरिम् । स तमभ्रमिवाविष्टमुद्भ्रान्तमिव मेदिनीम् ॥ १४ ॥
अपश्यद्रावणो विन्ध्यमालिखन्तमिवाम्बरम् । सहस्रशिखरोपेतं सिंहाध्युषितकंदरम् ॥ १५ ॥

५-६] ति० टी०-प्रहसन् । केनापि क्षत्रियेण दुरात्मनः कथं पराभवो न जात इति भगवतो रामस्यामर्षं दृष्ट्वागस्त्यहासः । पितामहश्चतुर्मुखो ब्रह्मा ईश्वरमग्निप्रधानं शौर्यादिक्षत्रगुणं रुद्रम् ॥ ५ ॥ ६ ॥

रा० टी०-राघवस्येति । पितामहः ईश्वरं शंभुमिव अगस्त्यो रामबुवाच ॥ ५ ॥

रा०टी०-तदाकारमाह-इत्येवमिति । इत्येवमुक्तप्रकारेण पार्थिवान् बाधमानो रावणः पृथिवीं चचार ॥ ६ ॥

गो० टी०-रावणापजयस्मरणप्रीत्या प्रहसन्नित्युक्तम् । रामस्यामर्षो वर्तत इति मुनेर्मन्दहासो वा । ईश्वरम् अग्निप्रधानशौर्यादिक्षत्रगुणं रुद्रम् ॥ ५ ॥ ६ ॥

७] ति० टी०-स्वर्गपुर्यमरावती । वसुरेतसः सदा सांनिध्यमग्रेर्नित्यसंनिधानमित्यर्थः ॥ ७ ॥

रा० टी०-तत इति । यत्र वसुरेतसो वन्हेस्सदा सांनिध्यं संस्थितिः तां माहिष्मतीं नाम पुरीं संप्राप्तः रावण इति शेषः ॥ ७ ॥

गो० टी०-तत इति । वसुरेतस. अग्नेः सान्निध्यं प्राकारूपेण नित्यसान्निध्यमस्तीत्यर्थः ॥ ७ ॥

८] ति० टी०-तस्याग्नेः प्रभावात्प्रसादाद्वसुरेतसोऽग्नेस्तुल्य आसीत् । यत्रार्जुनराज्यवेलायामग्निः शरकुण्डेशयः शरास्तृतकुण्डे वसति । शत्रूणामभिचारार्थं शरपरिस्तृतकुण्डे नित्यं संनिहितो वर्तत इत्यर्थः ॥ ८

रा० टी०-तुल्य इति । यत्र माहिष्मत्यां शरकुण्डेशयः शरास्तृतकुण्डेवासी अग्निः तत्र वसुरेतसो वन्हेः प्रभावात् तस्य वन्हेस्तुल्यः अर्जुनो नाम नृप आसीत् ॥ ८ ॥

गो० टी०-तुल्य इति । शरकुण्डेशयः शरास्तरणवत् कुण्डमग्निकुण्डं तत्र शेत इति तथा । पचाद्यच् । "शयवासवासिषु०" इत्यलुक् ॥ ८ ॥

९-१२] ति० टी०-तमेव दिवसं यस्मिन्दिने रावणो गतस्तस्मिन्नेव दिवसे नर्मदां रन्तुं नर्मदायां क्रीडितुम् ईश्वरो राजा ९-१२

रा० टी०-तमिति । तमेव दिवसं तस्मिन्नेव दिने रावणप्राप्तिदिवसे इत्यर्थः हैहयाधिपतिः अर्जुनः स्त्रीभिस्सह रन्तुं नर्मदां गतः तमेव दिवसं तस्मिन्नेव दिवसे तु आगतो रावणः लोकरोदनकारयिता रावणः तस्यार्जुनस्य अमात्यानपृच्छत् श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

रा० टी०-तदाकारमाह-क्वेति । अर्जुनः क्वास्ति इति शीघ्रमाख्यातुमर्हथ युद्धेप्सुः रावणोऽहमनुप्राप्तः अतः ममागमनमपि युष्माभिस्स रावणो निवेद्यतां बोध्यताम् सार्द्धश्लोक एकान्वयी ॥ ११ ॥

गो० टी०-तमेव दिवसमिति । यस्मिन्दिवसे रावणो गतस्तस्मिन्नेव दिवसे इत्यर्थः । स्त्रीभीरन्तुं नर्मदां गत इत्यन्वयः । ईश्वरः राजा ॥ ९—११ ॥

रा० टी०-इतीति । इत्येवं रावणेनोक्ता अमात्याः महीपतेरर्जुनस्य असान्निध्यं तत्राविद्यमानत्वं राक्षसपतिमब्रुवन्१२

गो० टी०-इतीति । अब्रुवन् ब्रुवते स्म ॥ १२ ॥

१३] ति० टी०-राक्षसपतिं प्रति महीपतेरसांनिध्यमब्रुवन् । पौराणां सुखादिति शेषः ॥ १३ ॥

रा० टी०-श्रुत्वेति । विश्रवसः पुत्रो रावणः पौराणां पौरेभ्यः अर्जुनं गतं श्रुत्वा अपसृत्य तत्पुरान्निर्वर्त्य विंध्यं गिरिं गतः ॥ १३ ॥

गो० टी०-श्रुत्वेति । विश्रवसः पुत्रो रावणः । पौराणां सुखादिति शेषः । अपसृत्य पुरान्निर्गत्य ॥ १३ ॥

१४] ति० टी०-अपसृत्य । पुरादिति शेषः । अभ्रं महामेघमिवाविष्टमाकाशसंवृतं तेनात्युच्चत्वम् । मेदिनीमुद्भ्रान्तमिवोद्विग्नोद्वतमिव ॥ १४ ॥

१५] ति० टी०-सहस्रशिखरोपेतमनेकशृङ्गयुतम् ॥१५॥

१ ह्यगस्य इति गो. पाठः । २ निर्गत्येति युक्तं भाति ।

प्रपातपतितैः शीतैः साट्टहासमिवाम्बुभिः । देवदानवगन्धर्वैः साप्सरोभिः सकिंनरैः ॥ १६ ॥
स्वस्त्रीभिः क्रीडमानैश्च स्वर्गभूतं महोच्छ्रयम् । नदीभिः स्यन्दमानाभिः स्फटिकप्रतिमं जलम् १७॥
फणाभिश्चलजिह्वाभिरनन्तमिव विष्ठितम् । उत्क्रामन्तं दरीवन्तं हिमवत्संनिभं गिरिम् ॥१८॥
पश्यमानस्ततो विन्ध्यं रावणो नर्मदां ययौ । चलोपलजलां पुण्यां पश्चिमोदधिगामिनीम् ॥१९॥
महिषैः सृमरैः सिंहैः शार्दूलर्क्षगजोत्तमैः । उष्णाभितप्तैस्तृषितैः संक्षोभितजलाशयाम् ॥२०॥
चक्रवाकैः सकारण्डैः सहंसजलकुक्कुटैः । सारसैश्च सदा मत्तैः क्रौञ्चद्भिः सुसमावृताम् ॥२१॥
फुल्लद्रुमकृतोत्तंसां चक्रवाकयुगस्तनीम् । विस्तीर्णपुलिनश्रोणीं हंसावलिसुमेखलाम् ॥२२॥
पुष्परेण्वनुलिप्ताङ्गीं जलफेनामलांशुकाम् । जलावगाहसुस्पर्शां फुल्लोत्पलशुभेक्षणाम् ॥ २३ ॥
पुष्पकादवरुह्याशु नर्मदां सरितां वराम् । इष्टामिव वरां नारीमवगाह्य दशाननः ॥ २४ ॥
स तस्याः पुलिने रम्ये नानामृगनिनिषेविते । उपोपविष्टः सचिवैः सार्धं राक्षसपुंगवः ॥ २५ ॥
प्रख्याय नर्मदां सोऽथ गङ्गेयमिति रावणः । नर्मदादर्शने हर्षमाप्तवान्स दशाननः ॥ २६ ॥
उवाच सचिवांस्तत्र सलीलं शुकसारणौ । एष रश्मिसहस्रेण जगत्कृत्वेव काञ्चनम् ॥ २७ ॥

रा० टी०–स इति । मेदिनीमुद्भ्रान्तं भित्त्वोद्गतमिव आविष्टमाकाशे सन्निबद्धं महामेघमिव अत एव अम्बरं लिखन्तमिव सिंहैरध्युषिताः कन्दरा यस्य तं विंध्यं रावणोपश्यन् सार्द्धश्लोक एकान्वयी ॥ १४ ॥ १५ ॥

गो० टी०–स इत्यादिसार्धपञ्चकम् । अभ्रमिव महामेघमिवाविष्टम् । मेदिनीमुद्भ्रान्तमिव उद्भियोद्गतमिव । सहस्रशिखरोपेतम् । प्रपातपतितैः तटात्पतितैः । " प्रपातस्तु तट " इत्यमरः। स्फटिकप्रतिमं जलं स्यन्दमानाभिर्नदीभिर्हेतुभिर्जिह्वाभिरुपलक्षितमनन्तमिव विष्ठितम् उत्क्रामन्तमूर्ध्वं व्याप्नुवानम् । उत्क्रावन्तमिति पाठान्तरम् । चलोपलजलाम् उपलेषु चलानि जलानि यस्यास्तां चलोपलामलामिति पाठे जलवेगेन चलोपलतया निर्मलाम् ॥ १४—२१ ॥

१६] ति० टी०–' प्रपातस्त्वतटो भृगुः '। ततः पतितैरेतैः साट्टहासमिव ॥ १६ ॥

१७–१८] ति० टी०–स्फटिकप्रतिमं जलं स्यन्दमानाभिर्नदीभिः कृत्वा चलजिह्वाभिः फणाभिरुपलक्षितमनन्तमिव विष्ठितम् । उत्क्रामन्तमूर्ध्वं व्याप्नुवानम् ॥ १७ ॥ १८ ॥

१९–२१] ति० टी०–चलान्युपलेषु जलानि यस्यास्ताम् ॥ १९—२१ ॥

रा० टी०–प्रपातेति । प्रपातात् उन्नततटात्पतितैः शीतैरम्बुभिस्साट्टहासमट्टहाससहितमिव यथा भवति तथा क्रीडमानैर्देवादिभिस्स्वर्गभूतं महोच्छ्रयमत्युन्नतं स्फटिकप्रतिमं जलं स्यन्दमानाभिर्नदीभिः चला जिह्वा यासां ताभिः फणाभिः विष्ठितमनन्तमिव उत्क्रामन्तमत्युन्नतत्वेन ऊर्ध्वं गच्छन्तमिव गिरिं विंध्यं पश्यमानः पश्यन् रावणः चलानि उपलसहितानि जलानि यस्यां तां पश्चिमोदधिगामिनीं नर्मदां ययौ श्लोकचतुष्टयमेकान्वयि ॥ १६–१९ ॥

रा० टी०–महिषैरिति । उष्णेनाभितप्तैः अत एव तृषितैः महिषादिभिस्संक्षोभिता जलाशया यस्याः तां चक्रवाकादिभिः सुसमावृतां फुल्लद्रुमैः कृतानि उत्तंसानि भूषणानि यया चक्रवाकावेव युगस्तनौ यस्या विस्तीर्णपुलिनमेव श्रोणी यस्याः समासान्तविधेरनित्यत्वात्कबभावः हंसावलिरेव सुमेखला यस्याः पुष्परेणुभिः अनुलिप्तानि अंगानि यस्याः जलफेनान्येव अमलानि अंशुकानि यस्याः जलावगाह एव सुस्पर्शो यस्याः फुल्लोत्पलमेव शुभेक्षणं यस्याः तामिष्टां पूजितां वरां नारीमिव नर्मदां दशाननः पुष्पकादवरुह्य अवगाह्य तस्याः नर्मदायाः पुलिने सचिवैस्सार्द्धमुपोपविष्टः श्लोकषट्कमेकान्वयि ॥ २०–२५ ॥

२२] ति० टी०–अथ नर्मदां स्त्रीत्वेन वर्णयति—फुल्ल ॥ २२ ॥

२३–२५] ति० टी०–जनानां जलावगाहे सुखस्पर्शरूपगुणा यस्यास्ताम् ॥ २३ ॥ २५ ॥

गो० टी०–अथ नर्मदायाः स्त्रीसाम्यमाह—फुल्लद्रुमेत्यादिना ॥ नर्मदां गङ्गेयमिति प्रख्याय प्रशस्य । सलीलं सविलासम् ॥ २२—२६

२६] ति० टी०–नर्मदां गङ्गेयमिति प्रख्याय प्रशस्य । अनेन नर्मदायास्तद्वत्पापनाशकत्वं तत्तटकृतशिवपूजादेर्महाफलत्वं गङ्गायाः सर्वोत्कृष्टत्वं च सूचितम् ॥ २६ ॥

रा० टी०–प्रख्यायेति । रावणः नर्मदां गंगेयमिति प्रख्याय बोधयित्वा नर्मदादर्शने हर्षमाप्तवान् ॥ २६ ॥

२७] ति० टी०–सलीलं सविलासम् । काञ्चनं तन्मयम् ॥ २७ ॥

१ तौयैः साट्टहासमिवाम्बुभिमिति गो. पाठः । २ गणेति गो. पाठः । ३ सुक्रौञ्चद्भिः समावृतामिति गो. पाठः । ४ सामिति गो. पाठः

तीक्ष्णतापकरः सूर्यो नभसो मध्यमास्थितः । मामासीनं विदित्वैव चन्द्रायति दिवाकरः ॥ २८ ॥
नर्मदाजलशीतश्च सुगन्धिः श्रमनाशनः । मद्भयादनिलो ह्येष वात्यसौ सुसमाहितः ॥ २९ ॥
इयं वापि सरिच्छ्रेष्ठा नर्मदा शर्मवर्धिनी । नक्रमीनविहंगोर्मिः सभयेवाङ्गना स्थिता ॥ ३० ॥
तद्भवन्तः क्षताः शस्त्रैर्नृपैरिन्द्रसमैर्युधि । चन्दनस्य रसेनेव रुधिरेण समुक्षिताः ॥ ३१ ॥
ते यूयमवगाहध्वं नर्मदां शर्मदां शुभाम् । सार्वभौममुखा मत्ता गङ्गामिव महागजाः ॥ ३२ ॥
अस्यां स्नात्वा महानद्यां पाप्मनो विप्रमोक्ष्यथ । अहमप्यद्य पुलिने शरदिन्दुसमप्रभे ॥ ३३ ॥
पुष्पोपहारं शनकैः करिष्यामि कपर्दिनः । रावणेनैवमुक्तास्तु प्रहस्तशुकसारणाः ॥ ३४ ॥
समहोदरधूम्राक्षा नर्मदां विजगाहिरे । राक्षसेन्द्रगजैस्तैस्तु क्षोभिता नर्मदा नदी ॥ ३५ ॥
वामनाञ्जनपद्माद्यैर्गङ्गा इव महागजैः । ततस्ते राक्षसाः स्नात्वा नर्मदायां महाबलाः॥३६॥
उत्तीर्य पुष्पाण्याजह्रुर्बल्यर्थं रावणस्य तु । नर्मदापुलिने हृद्ये शुभ्राभ्रसदृशप्रभे ॥ ३७ ॥
राक्षसैस्तु मुहूर्तेन कृतः पुष्पमयो गिरिः । पुष्पेष्वपहृतेष्वेवं रावणो राक्षसेश्वरः ॥ ३८ ॥
अवतीर्णो नदीं स्नातुं गङ्गामिव महागजः । तत्र स्नात्वा च विधिवज्जप्त्वा जप्यमनुत्तमम् ॥३९॥
नर्मदासलिलात्तस्मादुत्ततार स रावणः । ततः क्लिन्नाम्बरं त्यक्त्वा शुक्लवस्त्रसमावृतः ॥४०॥

२८-२९] ति० टी०-चन्द्रायति चन्द्र इवाचरति आर्षं परस्मैपदम् ॥ २८ ॥ २९ ॥

रा० टी०-उवाचेति । रावणस्सचिवान् शुकसारणौ च सलीलमुवाच अर्द्धं पृथक् तदाकारमाह-एष इत्यादिभिः । नभसो मध्यमास्थितः अत एव तीक्ष्णतापकरः दिवाकरो दिनहेतुः सूर्यः रश्मिसहस्रेण कांचनं कांचनमयमिव जगत्कृत्वा मामासीनं विदित्वा चन्द्रायति चन्द्र इव शीतं करोति सार्द्धश्लोकद्वयमेकान्वयि ॥ २७ ॥ २८ ॥

रा० टी०-नर्मदेति । नर्मदाजलेन शीतः शोभनो गंधो यस्मिन् अत एव श्रमनाशनः एषोऽनिलः मद्भयात् सुसमाहितः मन्दः सन्नित्यर्थः वाति ॥ २९ ॥

गो० टी०-एष इत्यादिसार्धम् । काञ्चनं कृत्वा सुवर्णं कृत्वेत्यर्थः । चन्द्रायति चन्द्रवदाचरति नर्मवर्धिनी प्रीतिवर्धिनीत्यर्थः ॥ २७—३१ ॥

३०-३१] ति० टी०-नक्रादियुता ऊर्मयो यस्याः सा ॥ ३० ॥ ३१ ॥

३२-३४] ति० टी०-अवगाहध्वं स्नानं कुरुत । सार्वभौममुखाः सार्वभौमनामकदिग्गजादयः । ' महापद्मः ' इति पाठान्तरम् । महापद्मो दिग्गजः ॥ ३२ ॥ ३४ ॥

रा० टी०-इयमिति । नक्रादियुक्ता ऊर्मयो यस्याः सा शर्मणः सुखस्य वर्द्धिनीयं नर्मदापि सभयाङ्गनेव स्थिता एतेन स्वप्रतापातिशयस्सूचितः ॥ ३० ॥

रा० टी०-तदिति । तन्नर्मदाजलस्य शर्मकारित्वाद्धेतोः शस्त्रैः क्षताः अत एव चन्दनस्य रसेनेव रुधिरेण समुक्षिताः भवन्तः नर्मदामवगाहध्वम् तत्र दृष्टान्तः सार्वभौममुखाः सार्वभौमाभिधप्रभृतयः महागजाः गङ्गामिव श्लोकद्वयमेकान्वयि ३१॥३२

गो० टी०-त इति । अवगाहध्वं स्नानं कुरुत शर्मदां सुखदां महापद्मः पुण्डरीकाख्यः दिग्गजस्तन्मुखाः महागजा इव ॥३२॥

रा० टी०-स्नानफलमाह-अस्यामिति । अस्यां नर्मदायां स्नात्वा पाप्मनः पापात् यूयं विप्रमोक्ष्यथ अहं पृथक् अहमिति अहमपि शरदिन्दुसमप्रभे पुलिने कपर्दिनोर्थं पुष्पोपहारं करिष्यामि ॥ ३३ ॥

रा० टी०-रावणेनेति । प्रहस्तादयः नर्मदां विजगाहिरे ॥ ३४ ॥

गो० टी०-अहमिति । पुष्पोपहारं पुष्पबलिम् ॥३३-३९

३५] ति० टी०-राक्षसेन्द्रा एव गजास्तैः ॥ ३५ ॥

रा० टी०-राक्षसेति । वामनादिकैर्महागजैर्गंगेव राक्षसेन्द्रगजैर्नर्मदा क्षोभिता ॥ ३५ ॥

३६] ति० टी०-वामनाद्या दिग्गजाः । गङ्गा इव महागजैरित्यसंधिरार्षः ॥ ३६ ॥

रा० टी०-तत इति । राक्षसा नर्मदायां स्नात्वा उत्तीर्य च रावणस्य बल्यर्थं रावणकर्तृकपूजार्थम् पुष्पाण्याजहुः ॥३६॥

३७-४०] ति० टी०-रावणस्य बल्यर्थं रावणकर्तृकशिवपूजार्थम् ॥ ३७—४० ॥

रा० टी०-नर्मदेति । शुभ्राभ्रसदृशी प्रभा यस्य तस्मिन्नर्मदापुलिने राक्षसैः पुष्पमयो गिरिः कृतः ॥ ३७ ॥

रा० टी०-पुष्पेष्विति । रावणः गंगां महागज इव नदीं स्नातुमवतीर्णः ॥ ३८ ॥

रा० टी०-तत्रेति । रावणः स्नात्वा नर्मदास उत्ततार ॥ ३९ ॥

रा० टी०-तत इति । क्लिन्नाम्बरं त्यक्त्वा शुक्लवस्त्रसमावृतोऽभवदिति शेषः अर्द्धं पृथक् ॥ ४० ॥

१ नर्मेति गो. पाठः । २ महापद्मेति गो. पाठः । ३ पाप्मानमिति गो. पाठः ।

रावणं प्राञ्जलिं यान्तमन्वयुः सर्वराक्षसाः । तद्वर्तीवशमापन्ना मूर्तिमन्त इवाचलाः ॥ ४१ ॥
यत्र यत्र च याति स्म रावणो राक्षसेश्वरः । जाम्बूनदमयं लिङ्गं तत्र तत्र स्म नीयते ॥ ४२ ॥
वालुकावेदिमध्ये तु तल्लिङ्गं स्थाप्य रावणः । अर्चयामास गन्धैश्च पुष्पैश्चामृतगन्धिभिः ॥ ४३ ॥
ततः सतामार्तिहरं परं वरं वरप्रदं चन्द्रमयूखभूषणम् ।
समर्चयित्वा स निशाचरो जगौ प्रसार्य हस्तान्प्रणनर्त चाग्रतः ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ।

नर्मदाम्भसि क्रीडन्कार्तवीर्यो युद्धे रावणकृतं स्वबलनाशं शृण्वन्सहसागत्य रावणेन भृशं युद्ध्वा तं बद्ध्वा तदमात्येष्वाक्रोत्स्वपि स्वपुरं निनाय ।

नर्मदापुलिने यत्र राक्षसेन्द्रः स दारुणः । पुष्पोपहारं कुरुते तस्मादेशाददूरतः ॥ १ ॥
अर्जुनो जयतां श्रेष्ठो माहिष्मत्याः पतिः प्रभुः । क्रीडते सह नारीभिर्नर्मदातोयमाश्रितः ॥ २ ॥
तासां मध्यगतो राजा रराज च तदार्जुनः । करेणूनां सहस्रस्य मध्यस्थ इव कुञ्जरः ॥ ३ ॥
जिज्ञासुः स तु बाहूनां सहस्रस्योत्तमं बलम् । रुरोध नर्मदावेगं बाहुभिर्बहुभिर्वृतः ॥ ४ ॥
कार्तवीर्यभुजासक्तं तज्जलं प्राप्य निर्मलम् । कूलोपहारं कुर्वाणं प्रतिस्रोतः प्रधावति ॥ ५ ॥

गो० टी०–तत्रेति । तत्र नर्मदापुलिने प्राञ्जलिं रुद्रं प्रति कृताञ्जलिम् ॥ ४० ॥

४१] ति० टी०–रावणं प्राञ्जलिं नियमेनेश्वरं प्रति कृताञ्जलिम् । तद्वर्तीवशमित्यार्षो दीर्घः । मूर्तिमन्तः प्राप्याकारवन्तोऽचला इव राक्षसाः ॥ ४१ ॥

रा० टी०–रावणमिति । प्रांजलिं देवोदेशेन कृतांजलिं यान्तं रावणं तद्वर्तीवशं तद्गमनाधीनत्वमापन्नाः प्राप्ता मूर्तिमन्तोऽचला इव सर्वराक्षसाः अन्वयुः तद्वर्तीत्यत्र दीर्घ आर्षः ॥४१॥

गो० टी०–तदिति साधम् । तद्वर्तीवशमितिच्छान्दसो दीर्घः । मूर्तिमन्तः प्राप्याकाराः अचला इव स्थिताः राक्षसाः तत्र तत्र नीयत इति प्रतिदिवसं देवपूजार्थं तैः राक्षसैरिति शेषः । यदा कैलासे रावणः पीडितो विमुक्तः तदाप्रभृति तत्प्रीत्यर्थं रावणो लिङ्गपूजां करोति स्मेति ज्ञेयम् ॥ ४१ ॥ ४२ ॥

४२] ति० टी०–तत्र तत्र स्म नीयते । प्रतिदिवसं पूजार्थं राक्षसैरिति शेषः ॥ ४२ ॥

रा० टी०–यत्रेति । रावणो यत्र यत्र याति स्म तत्र तत्र जाम्बूनदमयं लिंगं नीयते स्म राक्षसैरिति शेषः ॥ ४२ ॥

४३] ति० टी०–तल्लिङ्गं जाम्बूनदमयं नित्यपूजालिङ्गम् । ऐश्वर्यकामनया हि तल्लिङ्गपूजा रावणस्य । ऐश्वर्यकामस्य सौवर्णलिङ्गपूजायास्तन्त्रेपुक्तेः ॥ ४३ ॥

रा० टी०–वालुकेति । रावणः वालुकावेदिमध्ये लिङ्गं स्थाप्य स्थापयित्वा गंधैश्चन्दनादिभिः पुष्पैश्चार्चयामास ॥४३॥

४४] ति० टी०–जगौ । सामानीति शेषः ॥ ४४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकत्रिंशः सर्गः ॥ ३१ ॥

रा० टी०–तत इति । सतामार्तिहरं चन्द्रमयूखा भूषणानि यस्य तं शिवं समर्चयित्वा समर्च्य निशाचरो जगौ हस्तान् प्रसार्य ननर्त च ॥ ४४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

गो० टी०–तत इति । जगाविति । सामगानं कृतवानित्यर्थः । सान्नां सहस्रशाखापारगो रावण इति प्रसिद्धिः ॥४३॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तर-श्रीरामायणव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

१–४] ति० टी०–नर्मदेति ॥ १–४ ॥

रा० टी०–रावणकर्तृकशिवार्चनकालिकं वृत्तान्तमाह नर्मदेत्यादिभिः । राक्षसेन्द्रः यत्र पुष्पोपहारं कुरुते अकरोत् तस्मादेशाददूरतो निकटे जयतां श्रेष्ठोऽर्जुनः नर्मदातोयमाश्रितस्सन्नारीभिस्सह क्रीडते श्लोकद्वयमेकान्वयि ॥ १–२ ॥

रा० टी०–तासामिति । तासां नारीणां मध्यगतोऽर्जुनः करेणूनां सहस्रस्य मध्यस्थः कुंजर इव रराज ॥ ३ ॥

रा० टी०–जिज्ञासुरिति । बहुभिर्बाहुभिर्वृतोऽर्जुनः बाहूनां सहस्रस्य बलं जिज्ञासुस्सन्नर्मदावेगं बाहुभी रुरोध–बाहुभिरिति । उभयान्वयि ॥ ४ ॥

५] ति० टी०–निर्मलं तज्जलं कार्तवीर्यभुजैरासक्तमासङ्गं

---

१ स्विति गो. रा. पाठः ।

समीननक्रमकरः सपुष्पकुशसंस्तरः । स नर्मदाम्भसो वेगः प्रावृट्काल इवाबभौ ॥ ६ ॥
स वेगः कार्तवीर्येण संप्रेषित इवाम्भसः । पुष्पोपहारं सकलं रावणस्य जहार ह ॥ ७ ॥
रावणोऽर्धसमाप्तं तमुत्सृज्य नियमं तदा । नर्मदां पश्यते कान्तां प्रतिकूलां यथा प्रियाम् ॥ ८ ॥
पश्चिमेन तु तं दृष्ट्वा सागरोद्गारसंनिभम् । वर्धन्तमम्भसो वेगं पूर्वामाशां प्रविश्य तु ॥ ९ ॥
ततोऽनुद्भ्रान्तशकुनां स्वभावे परमे स्थिताम् । निर्विकाराङ्गनाभासामपश्यद्रावणो नदीम् ॥ १० ॥
सव्येतरकराङ्गुल्या ह्यशब्दास्यो दशाननः । वेगप्रभावमन्वेष्टुं सोऽदिशच्छुकसारणौ ॥ ११ ॥
तौ तु रावणसंदिष्टौ भ्रातरौ शुकसारणौ । व्योमान्तरगतौ वीरौ प्रस्थितौ पश्चिमामुखौ ॥ १२ ॥
अर्धयोजनमात्रं तु गत्वा तौ रजनीचरौ । पश्येतां पुरुषं तोये क्रीडन्तं सहयोषितम् ॥ १३ ॥
बृहत्सालप्रतीकाशं तोयव्याकुलमूर्धजम् । मदरक्तान्तनयनं मदव्याकुलचेतसम् ॥ १४ ॥
नदीं बाहुसहस्रेण रुन्धन्तमरिमर्दनम् । गिरिं पादसहस्रेण रुन्धन्तमिव मेदिनीम् ॥ १५ ॥
बालानां वरनारीणां सहस्रेण समावृतम् । समदानां करेणूनां सहस्रेणेव कुञ्जरम् ॥ १६ ॥
तमद्भुततरं दृष्ट्वा राक्षसौ शुकसारणौ । संनिवृत्तावुपागम्य रावणान्तमथोचतुः ॥ १७ ॥

बन्धनं प्राप्य प्रतिस्रोतः प्रतिप्रवाहम् । प्रतिकूलमिति यावत् । प्रधावति ॥ ५ ॥

रा० टी०–कार्तवीर्येति । कार्तवीर्यस्य भुजैरासक्तं तन्नर्मदासंबंधि निर्मलं जलं कूलोपहारं कूलदेशे पूजां कुर्वाणं रावणं प्राप्य प्रतिश्रोतः प्रतिप्रवाहं कूलपर्यन्तमित्यर्थः प्रधावति ॥५॥

गो० टी०–कार्तवीर्येति । प्रतिस्रोतः प्रतिप्रवाहम् ॥ ५ ॥

६] ति० टी०–कुशसंस्तरः कुशास्तरणम् । स तु तत्पुलिने कर्मनिमित्तं ऋषिगणकृतः ॥ ६ ॥

रा० टी०–सेति । मीनादिसहितः पुष्पादिसहितः नर्मदांभसः स वेगः प्रावृट्काले इव आबभौ ॥ ६ ॥

गो० टी–समीनेति । कुशसंस्तरः कुशास्तरणम् ॥६॥७॥

७] ति० टी०–संप्रेषित इव रावणं प्रतीति शेषः ॥ ७ ॥

रा० टी०–स इति । कार्तवीर्येण संप्रेषित इवाम्भसो वेगः रावणस्य पुष्पोपहारं जहार ॥ ७ ॥

८] ति० टी०–पश्यते पश्यति स्म ॥ ८ ॥

रा० टी०–रावण इति । रावणः अर्द्धसमाप्तं नियममुत्सृज्य प्रतिकूलां प्रियामिव नर्मदां पश्यते पश्यति ॥ ८ ॥

गो० टी०–रावण इत्यादिश्लोकद्वयम्। सागरोद्गारसन्निभं समुद्रपरीवाहसन्निभम् । पूर्वामाशां प्रविश्य त्विति पूर्वामाशां प्रविश्य पश्यत इत्यन्वयः । रावण इति शेषः ॥ ८ ॥ ९ ॥

९] ति० टी०–सागरोद्गारश्चन्द्रोदयकालिकसमुद्रपरिवृद्धिः । तेन हि समुद्रगा नद्यस्तत्समीपदेशे विपरीतप्रवाहाः क्रियन्त इति प्रसिद्धम् । पश्चिमेन मार्गेण पूर्वामाशां प्रविश्य वर्धन्तमम्भसो वेगं दृष्ट्वा प्रतिकूलां कान्तां प्रियामिव नर्मदां पश्यति स्मेत्यन्वयः । 'पूर्वामाशां प्रविश्यति' इति पाठे रावण इति शेषः । तस्य कियद्दूरे वृद्धिरिति निर्णयार्थमिति भावः। 'तस्मात्प्रविश्य तु' इत्येव पाठो युक्तः कतकसंमतश्च ॥ ९ ॥

रा० टी०–पश्चिमेनेति । पश्चिमेन मार्गेण पूर्वामाशां दिशं प्रविश्य सागरोद्गारेण चन्द्रोदयकालिकसागरवृद्ध्या सन्निभं सदृशं वर्धन्तमम्भसो वेगं दृष्ट्वा निर्विकारां प्रावृट्कालाभावेन विकारसमयरहितामत एव परमे सर्वकालिके इत्यर्थः स्वभावे स्थिताम् अत एव न उद्भ्रान्ताः शकुनाः पक्षिणो यस्याः तामङ्गनाभासां नदीं रावणोऽपश्यत् अजानात् एतेन अन्येन केन चिदयमुपद्रवः कृत इति रावणेन निश्चितमिति सूचितम् श्लोकद्वयमेकान्वयि ॥ ९–१० ॥

१०] ति० टी०–ततः पूर्वदिशि ॥ १० ॥

गो० टी०–तत इति । स्वभावस्य नदीस्वभावस्योपरमेऽलंभावे स्थितां नदीमपश्यत् । नद्या एव स्वभावो निमित्तान्तरेण वेति जिज्ञासयेति शेषः ॥ १० ॥

११] ति० टी०–सव्येतरकराङ्गुल्या दक्षिणहस्ताङ्गुल्या शीघ्रान्वेषणद्योतकाभिनयं कृत्वान्वेष्टुमादिशत् ॥ ११ ॥

रा० टी०–सव्येति । न शब्दः आस्ये मुखे यस्य नियमेन मौनीभूत इत्यर्थः दशाननः वेगप्रभवं वेगोत्पत्तिकारणमन्वेष्टुं ज्ञातुं सव्येतरस्य दक्षिणस्य करस्य अंगुल्या शुकसारणौ आदिशत् आज्ञापयत् ॥ ११ ॥

गो० टी०–सव्येति । सव्येतरकराङ्गुल्या सशब्दं शीघ्रान्वेषणद्योतिहुंकारसंहितं यथा तथा ॥ ११ ॥ १२ ॥

१२] ति० टी०–व्योमान्तरगतावाकाशमार्गगौ ॥ १२ ॥

रा० टी०–ताविति । रावणेन संदिष्टौ शुकसारणौ पश्चिमामुखौ सन्तौ प्रस्थितौ बभूवतुरिति शेषः ॥ १२ ॥

१३–१४] ति० टी०–पश्येतामपश्यताम् ॥ १३ ॥ १४ ॥

रा०टी०–अर्द्धेति । अर्द्धयोजनमात्रं गत्वा तोये क्रीडन्तं पुरुषं पश्येतामपश्यताम् ॥ १३ ॥

१५–१७] ति० टी०–मेदिनीं पादसहस्रेण रुन्धन्तं गिरिमिव संस्थितम् ॥ १५ —१७ ॥

---

१ सशब्दं चेति गो. पा. । २ तमीमिति गो. रा. पा. । ३ रावणं तमिति गो. रा. पा. ।

बृहत्सालप्रतीकाशः कोऽप्यसौ राक्षसेश्वर । नर्मदां रोधवद्रुद्ध्वा क्रीडापयति योषितः ॥ १८ ॥
तेन बाहुसहस्रेण संनिरुद्धजला नदी । सागरोद्वारसंकाशानुद्वारान्सृजते मुहुः ॥ १९ ॥
इत्येवं भाषमाणौ तौ निशम्य शुकसारणौ । रावणोऽर्जुन इत्युक्त्वा सैं ययौ युद्धलालसः ॥ २० ॥
अर्जुनाभिमुखे तस्मिन्रावणे राक्षसाधिपे । चण्डः प्रवाति पवनः सनादः सैंरजस्तथा ॥ २१ ॥
सकृदेव कृतो रावः सैंरक्तपृषतो घनैः । महोदरमहापार्श्वधूम्राक्षशुकसारणैः ॥ २२ ॥
संवृतो राक्षसेन्द्रस्तु तत्रागाद्यत्र चार्जुनः । अदीर्घेणैव कालेन स तदा राक्षसो बली ॥ २३ ॥
तं नर्मदाह्रदं भीममाजगामाञ्जनप्रभः । स तत्र स्त्रीपरिवृतं वासिताभिरिव द्विपम् ॥ २४ ॥
नरेन्द्रं पश्यते राजा राक्षसानां तदार्जुनम् । स रोषाद्रक्तनयनो राक्षसेन्द्रो बलोद्धतः ॥ २५ ॥
इत्येवमर्जुनामात्यानाह गम्भीरया गिरा । अमात्याः क्षिप्रमाख्यात हैहयस्य नृपस्य वै ॥ २६ ॥
युद्धार्थं समनुप्राप्तो रावणो नाम नामतः । रावणस्य वचः श्रुत्वा मन्त्रिणोऽथार्जुनस्य ते॥ २७ ॥
उत्तस्थुः सौंयुधास्तं च रावणं वाक्यमब्रुवन् । युद्धस्य कालो विज्ञातैः साधु भो साधु रावण ॥२८ ॥
यः क्षीबं स्त्रीगैंतं चैव योद्धुमुत्सहैंसे नृपम् । स्त्रीसमक्षैंगतं यत्त्वं योद्धुमुत्सहसे नृपम् ॥ २९ ॥

रा० टी०–बृहदिति । बृहत्सालप्रतीकाशं महासालसदृशं तोयेषु व्याकुलाः प्रक्षिप्ता मूर्द्धजा यस्य तोयेन व्याकुला व्याप्ता मूर्द्धजा यस्येति वा मदेन रक्तान्तं नयनं यस्य रक्तमन्तनयनं नयनान्तभागो यस्येति वा पादसहस्रेण मेदिनीं रुन्धन्तं गिरिमिव बाहुसहस्रेण नदीं रुन्धन्तं करेणूनां सहस्रेण समावृतं कुंजरमिव नारीणां सहस्रेण समावृतमद्भुततमं तमर्जुनं शुकसारणौ दृष्ट्वा सन्निवृत्तौ सन्तौ रावणमुपागम्य ऊचतुः श्लोकचतुष्टयमेकान्वयि ॥ १४–१७ ॥

गो० टी०–अर्धयोजनेति । पश्येतामपश्यतामित्यर्थः ॥ १३—१७ ॥

१८–१९] ति० टी०–रोधवद्रुध्यतेऽनेनेति रोधः सेतुस्तद्वदित्यर्थः । क्रीडापयति क्रीडयति पुगार्षः ॥ १८ ॥ १९ ॥

रा० टी०–तदाकारमाह–बृहदिति द्वाभ्याम् । बृहत्सालप्रतीकाशः कोपि पुरुषः रोधवत् सेतुवन्नर्मदां रुद्ध्वा योषितः क्रीडापयति क्रीडयति ॥ तेनेति । बाहुसहस्रेण सन्निरुद्धजला नदी नर्मदा सागरोद्वारसंकाशान् चन्द्रोदयकालिकसागरवृद्धिसदृशानुद्वारान् वृद्धीः मुहुस्सृजते करोति ॥ १८ ॥ १९ ॥

गो० टी०–बृहत्सालेति । रोधवत्तटवत् । अकारान्तत्वमार्षम् । क्रीडापयतीति पुगार्षः । क्रीडयतीत्यर्थः ॥१८॥१९॥

२०—२१] ति० टी०–निशम्य दृष्ट्वार्जुन इत्युक्त्वान्यस्यैवंविधसामर्थ्यासंभवयुक्त्या ॥ २० ॥ २१ ॥

रा० टी०–इतीति । इत्येवं भाषमाणौ शुकसारणौ निशम्य तद्भाषण श्रुत्वा युद्धलालसो रावणः अर्जुनस्स इत्युक्त्वा ययौ ॥ अर्जुनेति । रावणे अर्जुनाभिमुखे सति पवनः चण्डस्सन् सनादस्सस्वनः सन् सरजाः रजसा सहितश्च सन्प्रवाति॥२०॥२१॥

गो० टी०–इत्येवमिति । निशाम्य दृष्ट्वा । अर्जुन इत्युक्त्वे अन्यस्यैवं सामर्थ्यं न संभवतीति युक्त्येति शेषः ॥२०॥२१

२२–२४] ति० टी०–सरक्तपृषतो रक्तबिन्दुसहितो रावः शब्दः सकृदेव रावणप्रस्थानेन सहैवैकवारं च घनैः कृतः । रक्तवर्षुकमेघानां सकृद्रावोऽप्युत्पात इति कतकः ॥ २२—२४ ॥

रा० टी०–सकृदिति । सरक्तपृषतः रक्तबिन्दुसहितः रावः स्वनः सकृदेव घनैः कृतः अयमप्युत्पात इति तात्पर्यम् अर्द्धं पृथक् । महोदरेति । महोदरादिभिस्समावृतो राक्षसेन्द्रः यत्रार्जुनस्तत्रागात् ॥ अदीर्घेणेति । राक्षसो रावणः अदीर्घेणैव कालेन नर्मदाह्रदमाजगाम ॥ २२ ॥ २३ ॥

गो० टी०–रावणस्योत्पातमाह–सकृदिति । सरक्तः रक्तवर्षसहितः रावः शब्दः सकृदेकवारमेव घनैः प्रेषितः कृतः । वर्षुकमेघानां सकृद्राव उत्पात इति भावः ॥ २२॥२३ ॥

रा० टी०–स इति । वासिताभिः करेणुभिर्द्विपमिव स्त्रीभिः परिवृतमर्जुनं राक्षसानां राजा पश्यते पश्यति ॥२४॥

गो० टी०–स तत्रेति । वासिताभिः करेणुभिः । वासिता स्त्री करेण्वां चेत्यमरः । पश्यते पश्यति ॥ २४ ॥ २५ ॥

२५] ति० टी०–पश्यते पश्यति स्म ॥ २५ ॥

रा० टी०–स इति । राक्षसेन्द्रः अर्जुनामात्यान् गंभीरया गिरा इत्येवमाह ॥ २६ ॥

२६-२७] ति० टी०–इत्येवं वक्ष्यमाणप्रकारेण ॥२६॥२७॥

रा० टी०–तदाकारमाह–अमात्या इति । हे अमात्याः नामतो रावणः युद्धार्थं नाम प्रसिद्धम् समनुप्राप्तः इति वचः हैहयस्य नृपस्य समीपे शीघ्रमाख्यात ॥ २६ ॥

रा० टी०–रावणस्येति । अर्जुनस्य मन्त्रिणः रावणस्य वचः श्रुत्वा सायुधाः सन्तः उत्तस्थुः रावणमब्रुवंश्च ॥ २७ ॥

गो० टी०–इतीति । इत्येवं वक्ष्यमाणप्रकारेण ॥२६॥२७॥

२८–२९] ति० टी०–अर्जुनमन्त्रिणो व्यङ्ग्योक्त्या रावणं

१ निशाम्येति गो. पाठः । २ प्रेति गो. पाठः । ३ सरजा इति गो.रा.पा. । ४ रक्तः प्रेषित इति गो.पा. । ५ अर्थाति गो.पा. । ६ सायुधास्तिष्ठेति गो पा.। ७ शेष इति गो.पा. । ८ वृतमिति गो.पा. । ९ उत्सहते इति गो.पा.। १० समक्ष गतमिति रा.समक्षं कथं यत्त्वयोद्धुमुत्सहसेऽर्जुनमिति गो.पा. ।

वौसितामभ्यगं मत्तं शार्दूल इव कुञ्जरम् ।
क्षमस्वाद्य दशग्रीव उष्यतां रजनी त्वया । युद्धश्रद्धा तु यद्यस्ति श्वस्तात समरेऽर्जुनम् ॥३०॥
यदि वापि त्वरा तुभ्यं युद्धतृष्णासमाहृत । निपात्यास्मान्रणे युद्धमर्जुनेनोपयास्यसि ॥ ३१ ॥
ततस्तै रावणामात्यैरमात्यास्ते नृपस्य तु । सूदिताश्चापि ते युद्धे भक्षिताश्च बुभुक्षितैः ॥ ३२ ॥
ततो हलहलाशब्दो नर्मदातीरगो वभौ । अर्जुनस्यानुयात्राणां रावणस्य च मन्त्रिणाम्॥३३॥
इषुभिस्तोमरैः प्रासैस्त्रिशूलैर्वज्रकर्षणैः । सरावणानदेयन्तः समन्तात्समभिद्रुताः ॥ ३४ ॥
हैहयाधिपयोधानां वेग आसीत्सुदारुणः । सनक्रमीनमकरसमुद्रस्येव निःस्वनः ॥ ३५ ॥
रावणस्य तु तेऽमात्याः प्रहस्तशुकसारणाः । कार्तवीर्यबलं क्रुद्धा निर्हन्ति स्म स्वतेजसा ॥ ३६ ॥
अर्जुनाय तु तत्कर्म रावणस्य समन्त्रिणः । क्रीडमानाय कथितं पुरुषैर्भयैर्विह्वलैः ॥ ३७ ॥
श्रुत्वा न भेतव्यमिति स्त्रीजनं स तदार्जुनः । उत्ततार जलात्तस्माद्वज्रज्ञातोयादिवाञ्जनः ॥ ३८ ॥
क्रोधदूषितनेत्रस्तु स तदार्जुनपावकः । प्रजज्वाल महाघोरो युगान्त इव पावकः ॥ ३९ ॥

निन्दन्ति—युद्धस्येत्यादि । हे रावण ! त्वया साधु सम्यग्युद्धस्य कालो विज्ञातः । यस्त्वं क्षीबं मदपानमत्तं स्त्रीगतं स्त्रीगोष्ठीगतं साधु सम्यग्योद्धुमुत्सहसे । उक्तमेव स्पष्टं पुनराह—स्त्रीसमक्षगतमिति यत्तत्सम्यक्कालो विज्ञातः ॥ २८–२९ ॥

रा० टी०–तदाकारमाह–युद्धस्येत्यादिभिः । भो रावण यस्त्वं क्षीबं मदपाने मत्तं स्त्रीगतं स्त्रीभिस्सहितं नृपमर्जुनं योद्धुं साधु उत्सहसे तेन त्वया युद्धस्य कालः विज्ञातः न विज्ञात इत्यर्थः अविज्ञात इति छेदो वा ॥ २८ ॥

गो० टी०–युद्धस्येत्यादि । व्यङ्ग्योक्तिः ॥ २८ ॥

रा० टी०–स्त्रीति । स्त्रीसमक्षं गतं नृपं योद्धुं यत् यस्त्वमुत्सहसे स त्वमद्य क्षमस्व अत एव रजनी इयं रात्रिः त्वया उष्यताम् ॥ २९ ॥

गो० टी०–य इत्यादिसार्धद्वयम् क्षीबं मत्तम् । उष्यताम् इहेति शेषः ॥ २९—३३ ॥

३०] ति० टी०–स्वभावेनाहुः—क्षमस्वेति । अद्य दिवसे युद्धविलम्बं क्षमस्व सहस्व उष्यताम् । इहेति शेषः । पृथ्येति पदम् । समरे श्रद्धा यद्यस्ति तदा श्वोऽर्जुनं युध्य युध्यस्व ॥ ३० ॥

रा०टी०–युद्धेति । यदि ते युद्धश्रद्धास्ति तर्हि समरे समर्थस्त्वं श्वः प्रातःकाले अर्जुनं प्राप्नुहीति शेषः अर्द्धं पृथक् ॥३०॥

३१–३२] ति० टी०–हे युद्धतृष्णासमाहृत, यदि वा अथवा ते त्वरा यदि युद्धे तदास्मान्युद्धे निपात्यार्जुनेन युद्धं प्राप्स्यसि ॥ ३१ ॥ ३२ ॥

रा० टी०–यदीति । हे युद्धतृष्णासमाहृत यदि वा अथवा तुभ्यं त्वरा प्राप्नोतीति शेषः तदा त्वं रणेस्मान् निपात्य अर्जुनेन युद्धमुपयास्यसि ॥ ३१ ॥

रा० टी०–तत इति । बुभुक्षितैरावणामात्यैः नृपस्यार्जुनस्यामात्या निषूदिता हिंसिता भक्षिताश्च ॥ ३२ ॥

३३] ति० टी०–हलहलेति शब्दानुकारः । अनुयात्रा अनुचराः मन्त्रिण इत्यर्थः ॥ ३३ ॥

रा० टी०–तत इति । अर्जुनस्यानुयात्राणामनुयायिनां रावणस्य मन्त्रिणां च नर्मदातीरगो हलहलाशब्दो बभौ ॥३३॥

३४] ति० टी०–कर्षणमायुधविशेषः । सरावणान्रावणसहितान्मन्त्रिणोऽदयन्तोऽर्जुनमन्त्रिणो बभूवुरिति शेषः॥३४॥

रा० टी०–इषुभिरिति । समन्तात्समभिद्रुता इतस्ततश्चलन्तोऽर्जुनयोधाः सरावणान् रावणसहितान् राक्षसान् अदयन्तो बभूवुरिति शेषः ॥ ३४ ॥

गो० टी०–इषुभिरिति । कर्षणमायुधविशेषः ॥ ३४ ॥

३५–३६] ति० टी०–नक्रादिसहितसमुद्रस्येव स्वन आसीत् ॥ ३५ ॥ ३६ ॥

रा० टी०–हैहयेति । हैहयाधिपयोधानां वेगः नक्रादिसहितसमुद्रस्य निःस्वन इव सुदारुण आसीत् ॥ ३५ ॥

रा० टी०–रावणस्येति । प्रहस्तादयः कार्तवीर्यबलं स्वतेजसा निघ्नन्ति स्म ॥ ३६ ॥

गो० टी०–हैहयेति । वेगो युद्धवेगः ॥ ३५—३८ ॥

३७] ति० टी०–समन्त्रिणो मन्त्रिसहितस्य रावणस्य ३७

रा० टी०–अर्जुनायेति । पुरुषैरर्जुनानुचरैः समन्त्रिणो रावणस्य कर्म अर्जुनाय कथितम् ॥ ३७ ॥

३८] ति० टी०–स्त्रीजनम् । न भेतव्यमित्युक्त्वेति शेषः । अञ्जनो दिग्गजः ॥ ३८ ॥

रा० टी०–श्रुत्वेति । अर्जुनः श्रुत्वा न भेतव्यमित्युक्तावेति शेषः तस्मान्नर्मदाजाद्वाज्ञातोयादञ्जनो महागज इव स्त्रीजनमुत्ततार ॥ ३८ ॥

३९] ति० टी०–अर्जुनरूपः पावक इति रूपकम् । युगान्ते प्रलयकाले ॥ ३९ ॥

रा० टी०–क्रोधेति । युगान्ते पावक इव महाघोरोऽर्जुनपावकः प्रजज्वाल ॥ ३९ ॥

१ इदपर्धमधिकं गो. पुस्त. । २ युद्धे इति गो. युद्धश्रद्धेति रा.पा. । ३ अद्यास्ति मतिर्योद्धुं युद्धतृष्णासमावृतेति गो. पा. । ४ निहत्येति गो.पा. । ५ यातृणामिति गो. पा. । ६ निर्दहन्ति स्म तेजसेति गो. पा. । ७ द्वाररक्षिभिरिति गो. पा. । ८ तं तत इति गो. पा. । ९ तत इति गो. पा. ।

स तूर्णतरमादाय वरहेमाङ्गदो गदाम् । अभिदुद्राव रक्षांसि क्षमांसीव दिवाकरः ॥ ४० ॥
बाहुविक्षेपकरणां समुद्यम्य महागदाम् । गारुडं वेगमास्थाय आपपातैव सोऽर्जुनः ॥ ४१ ॥
तस्य मार्गं समारुद्ध्य विन्ध्योऽर्कस्येव पर्वतः । स्थितो विन्ध्य इवाकम्प्यः प्रहस्तो मुसलायुधः ॥४२॥
ततोऽस्य मुसलं घोरं लोहबद्धं मदोद्धतः । प्रहस्तः प्रेषयन्क्रुद्धो ररास च यथान्तकः ॥ ४३ ॥
तस्याग्रे मुसलस्याग्निरशोकापीडसंनिभः । प्रहस्तकरमुक्तस्य बभूव प्रदहन्निव ॥ ४४ ॥
आधावमानं मुसलं कार्तवीर्यस्तदार्जुनः । निपुणं वञ्चयामास गदया गतविक्लवः ॥ ४५ ॥
ततस्तमभिदुद्राव सगदो हैहयाधिपः । भ्रामयाणो गदां गुर्वीं पञ्चबाहुशतोच्छ्रयाम् ॥४६॥
ततो हतोऽतिवेगेन प्रहस्तो गदया तदा । निपपात स्थितः शैलो वज्रिवज्रहतो यथा ॥४७॥
प्रहस्तं पतितं दृष्ट्वा मारीचशुकसारणाः । समहोदरधूम्राक्षा अपसृष्टा रणाजिरात् ॥ ४८ ॥
अपक्रान्तेष्वमात्येषु प्रहस्ते चैव निपातिते । रावणोऽभ्यद्रवत्तूर्णमर्जुनं नृपसत्तमम् ॥ ४९ ॥
सहस्रबाहोस्तद्युद्धं विशद्धाहोश्च दारुणम् । नृपराक्षसयोस्तत्र आरब्धं रोमहर्षणम् ॥ ५० ॥
सागराविव संक्षुब्धौ चलमूलाविवाचलौ । तेजोयुक्ताविवादित्यौ प्रदहन्ताविवानलौ ॥ ५१ ॥
बलोद्धतौ यथा नागौ वासितार्थे यथा वृषौ । मेघाविव विनर्दन्तौ सिंहाविव बलोत्कटौ ॥ ५२ ॥
रुद्रकालाविव क्रुद्धौ तौ तदा राक्षसार्जुनौ । परस्परं गदां गृह्य ताडयामासतुर्भृशम् ॥ ५३ ॥
वज्रप्रहारानचला यथा घोरान्विषेहिरे । गदाप्रहारांस्तौ तत्र सेहाते नरराक्षसौ ॥ ५४ ॥

गो० टी०–क्रोधेति । युगान्ते युगान्तकाले उत्थितो घोरः पावक इव ॥ ३९ ॥ ४० ॥

४०] ति० टी०–अभिदुद्राव द्रावयामास ॥ ४० ॥

रा० टी०–स इति । वरो हेमांगदो यस्य सोर्जुनः तूर्णतरमतिशीघ्रं गदामादाय रक्षांसि अभिदुद्राव ॥ ४० ॥

४१] ति० टी०–बाहुविक्षेपकरणां बाहुभिर्विक्षेपकरणं भ्रमसंपादनं यस्यास्ताम् । गारुडं वेगं गरुडसदृशवेगम् । आपपातैव, न तु विलम्बितवानित्यर्थः ॥ ४१ ॥

रा० टी०–बाहुति अर्जुनो गारुडं गरुडसदृशवेगां गदां समुद्यम्यापपातैव मनागपि विलम्बं न चकारेत्यर्थः ॥ ४१ ॥

गो० टी०–बाहुभिर्विक्षेपकरणं भ्रमणं यस्यास्ताम् । वेगः शैघ्र्यम् । आपपातैव न तु विलम्बितवान् ॥ ४१ ॥ ४२ ॥

४२] ति० टी०–विन्ध्यपर्वतोऽर्कमार्गं रुद्ध्वा स्थित इति पौराणिकी कथा ॥ ४२ ॥

रा०टी०-तस्येति। विंध्योर्कस्य मार्गमिव तस्यार्जुनस्य मार्गं समारुध्य विंध्य इवाकम्प्यः प्रहस्तः स्थितोऽभवदिति शेषः॥४२॥

४३] ति० टी०–अस्य प्रेषयन्तस्य संहारार्थं क्षिपन् ४३

रा० टी०–तत इति । महोद्धतः प्रहस्तः अस्य अर्जुनस्य अर्जुनाय घोरं मुसलं प्रेषयन्प्रक्षिपन् सन्नन्तकः काल इव ररास४३

गो० टी०–तत इति । अस्य प्रेषयन् अर्जुनस्य संहारार्थं क्षिपन् ॥ ४३ ॥

४४]ति०टी०-अशोकापीडमशोकपुष्पशिखा तत्संनिभः४४

रा० टी०–तस्येति । अशोकापीडेन अशोकपुष्पशिखया सन्निभस्सदृशोऽग्निः प्रहस्तकरमुक्तस्य मुसलस्याग्रे प्रदहन्निव बभूव ॥ ४४ ॥

गो० टी०–तस्येति । अशोकपुष्पकृतः आपीडः अशोकापीडः ॥ ४४ ॥

४५] ति० टी०–गतविक्लवो गतभयः ॥ ४५ ॥

रा० टी०–आधावमानमिति । गदयोपलक्षितोर्जुनः निपुणं नैपुण्येन प्रयुक्तमत एव आधावमानं मुसलं वंचयामास निपुणमिति वञ्चनक्रियाविशेषणं वा ॥ ४५ ॥

गो० टी०–अथेति । वञ्चयामास प्रतिहतवानित्यर्थः । सगदः गदासहितः । अगदः अरोगः अप्रतिबन्ध इति यावत् विक्रमो यस्येति विग्रहः ॥ ४५ ॥

४६] ति० टी०–पञ्चबाहुशतैरुच्छ्रय उत्क्षेपो यस्यास्ताम् ॥ ४६ ॥

रा० टी०–तत इति । सगदो गदासहितो हैहयाधिपः पञ्चबाहुशतैः उच्छ्रय उच्छेधो यस्याः तां गदां भ्रामयाणो भ्रामयमाणस्सन् तं प्रहस्तमभिदुद्राव ॥ ४६ ॥

गो०टी०–तत इति । पञ्चबाहुशतैः उच्छ्रय उत्क्षेपो यस्याः सा ॥ ४६ ॥

४७–५१] ति० टी०–शैल इव स्थितो निपपात ४७–६१

५२–५४] ति० टी०–वासितार्थे । करिणीरूपप्रयोजनाय युयुधाते इति शेषः ॥ ५२ ॥ ५४ ॥

१ महोद्धत इति गो. पा. । २ अम्बुद इति गो. पा. । ३ सगदो गदविक्रमः इति गो. पा. । ४ प्रहस्तमिति गो. पा. । ५ तथेति गो. पा. । ६ वीति गो. पा. ।

यथाशनिरवेभ्यस्तु जायतेऽथ प्रतिश्रुतिः । तथा तयोर्गदापोथैर्दिशः सर्वाः प्रतिश्रुताः॥ ५५ ॥
अर्जुनस्य गदा सा तु पात्यमानाहितोरसि । काञ्चनाभं नभश्चक्रे विद्युत्सौदामनी यथा ॥ ५६ ॥
तथैव रावणेनापि पात्यमाना मुहुर्मुहुः । अर्जुनोरसि निर्भाति गदोल्केव महागिरौ ॥ ५७ ॥
नार्जुनः खेदमायाति न राक्षसगणेश्वरः । सैममासीत्तयोर्युद्धं यथा पूर्वं बलीन्द्रयोः ॥ ५८ ॥
शृङ्गैरिव वृषायुध्यन्दन्ताग्रैरिव कुञ्जरौ । परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ ॥ ५९ ॥
ततोऽर्जुनेन क्रुद्धेन सर्वप्राणेन सा गदा । स्तनयोरन्तरे मुक्ता रावणस्य महोरसि ॥ ६० ॥
वरदानकृतत्राणे सा गदा रावणोरसि । दुर्बलेव यथावेगं द्विधाभूतापतत्क्षितौ ॥ ६१ ॥
स त्वर्जुनप्रयुक्तेन गदाघातेन रावणः । अपासर्पद्धनुर्मात्रं निपसाद च निष्टनन् ॥ ६२ ॥
स विह्वलं तदालक्ष्य दशग्रीवं ततोऽर्जुनः । सहसोत्पत्य जग्राह गरुत्मानिव पन्नगम् ॥ ६३ ॥
स तु बाहुसहस्रेण बलाद्बद्ध्वा दशाननम् । बबन्ध बलवान्राजा बलिं नारायणो यथा ॥ ६४ ॥

रा० टी०–तत इति । गदया अतिवेगेन हतः स्थितः स्थिरबुद्धिः प्रहस्तः वज्रिवज्रहतशैल इव निपपात ॥ ४७ ॥

रा० टी०–प्रहस्तमिति । मारीचादयः रणाजिरादपसृष्टाः निवृत्ता बभूवुरिति शेषः ॥ ४८ ॥

रा०टी०–अपक्रान्तेष्विति । रावणः अर्जुनमभ्यद्रवत्४९

रा० टी०–सहस्रेति । नृपराक्षसयो रोमहर्षणं युद्धमारब्धम् ॥ ५० ॥

गो० टी०–तथेति । तथा शैल इव स्थितः निपपात४७–५०

रा० टी०–युद्धमेव वर्णयति सागराविति-संक्षुब्धौ संक्षोभं प्राप्तौ सागराविव बलेनोद्धतौ नागौ महागजाविव वासितार्थं गवार्थं वृषाविव विनर्दन्तौ मेघाविव बलोत्कटौ उत्कटबलौ सिंहाविव क्रुद्धौ रुद्रकालाविव राक्षसार्जुनौ गदां गृह्य गृहीत्वा परस्परं ताडयामासतुः श्लोकत्रयमेकान्वयि ॥५१–५३॥

रा० टी०–वज्रेति । अचला गिरयः वज्रप्रहारान् यथा विषेहिरे तथा नरराक्षसौ गदाप्रहरान् सेहाते ॥ ५४ ॥

गो० टी०–सागराविति्यादिश्लोकत्रयम् वाशितार्थं करेण्वर्थं । युध्यन्ताविति शेषः ॥ ५१—५४ ॥

५५] ति० टी०–अशनिरवेभ्योऽशनिपातध्वनिभ्यः प्रतिश्रुतिः प्रतिध्वनिः । गदापोथैर्गदापातैः प्रतिश्रुताः प्रतिध्वनिमत्यः ॥ ५५ ॥

रा० टी०–यथेति । अशनिरवेभ्यः प्रतिश्रुतिः प्रतिध्वनिविशिष्टा यथा जायते तथा तयोः राक्षसार्जुनयोः गदापोथैः गदायाः पातैः सर्वाः दिशः प्रतिश्रुताः बभूवुरिति शेषः ॥५५॥

गो० टी०–तथेति । प्रतिश्रुताः प्रतिश्रुतवन्त इत्यर्थः । मत्वर्थीयाजन्तः । गदापोथैः गदापातैः ॥ ५५ ॥

५६–५७] ति० टी०–अहितोरसि रावणोरसि सौदामनी विद्युद्विशेषेण द्योतमाना नभ इव रावणोरो गदा काञ्चनाभं काञ्चनवर्णं चक्रे । प्रकाशितं चक्रे इति यावत् ॥ ५६ ॥ ५७ ॥

रा० टी०–अर्जुनस्येति । अहितस्य रावणस्योरसि पात्यमानार्जुनस्य गदा विद्युत्सौदामनीव नभः काञ्चनाभञ्चक्रे ॥५६॥

रा० टी०–तथेति । अर्जुनोरसि रावणेन तथैव पात्यमाना गदा महागिरावुल्का इव निर्भाति ॥ ५७ ॥

गो० टी०–अर्जुनस्येति । विद्युद्विशेषेण द्योतमाना सौदामनी नभ इव राक्षसोरः काञ्चनाभं स्वर्णवर्णं चकार॥५६—६०॥

५८] ति० टी०–न राक्षसगणेश्वरः खेदमायाति ॥ ५८ ॥

रा० टी०–नेति । अर्जुनः खेदं नायाति प्राप्नोति अत एव बलीन्द्रयोरिव तयोर्युद्धं सममासीत् ॥ ५८ ॥

५९–६०] ति० टी०–वृषायुध्यन् । वृषायुध्यन्नित्यर्थः ॥ ५९ ॥ ६० ॥

रा० टी०–शृंगैरिति । शृंगैर्वृषाद्यावृषाविव परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ अयुध्यन् अयुध्यतां सुपां सुलुगिति डादेशः ॥ ५९ ॥

रा० टी–तत इति । अर्जुनेन रावणस्य महोरसि स्तनयोरन्तरे मध्ये सर्वप्राणेन सर्वप्रयत्नेन गदा मुक्ता ॥ ६० ॥

६१] ति० टी०–दुर्बलेव बलरहितेव । यथावेगं स्ववेगोचितं प्रहर्तुमसमर्था स्वयमेव द्विधाभूता क्षितावपतत् । तत्र हेतुः—वरदानकृतत्राणे इति ॥ ६१ ॥

रा० टी०–वरेति । वरदानेन कृतं त्राणं यस्य तस्मिन् रावणोरसि पातितेति शेषः सा गदा दुर्बला अवेगमिव यथा भवति तथा द्विधाभूता सती क्षितौ अपतत् ॥ ६१ ॥

गो० टी०–वरदानेति । दुर्बलेव बलरहितेव । यथावेगं स्ववेगोचितम् । प्रहर्तुं स्वयं द्विधा भूत्वा क्षितावपतत् । तत्र हेतुः-वरदानकृतत्राण इति ॥ ६१ ॥

६२–६४] ति० टी०–अपासर्पदपराङ्मुख एव पृष्ठतोऽगच्छत् । निष्टनन् रुदन् ॥ ६२—६४ ॥

रा० टी०–स इति । रावणः अर्जुनप्रयुक्तेन गदाघातेन धनुर्मात्रमपासर्पन् निष्टनन् रुदन्सन् निपसाद च ॥ ६२ ॥

रा० टी०–स इति । अर्जुनः दशग्रीवं विह्वलमालक्ष्य सहसोत्पत्य गरुत्मान् पन्नगमिव जग्राह ॥ ६३ ॥

---

१ इदमिति गो. पा. । २ मुक्तेनेति गो. पा. ।

बध्यमाने दशग्रीवे सिद्धचारणदेवताः । साध्वीतिवादिनः पुष्पैः किरन्त्यर्जुनमूर्धनि ॥ ६५ ॥
व्याघ्रो मृगमिवादाय मृगराडिव कुञ्जरम् । ररास हैहयो राजा हर्षादम्बुदवन्मुहुः ॥ ६६ ॥
प्रहस्तस्तु समाश्वस्तो दृष्ट्वा बद्धं दशाननम् । सहसा राक्षसः क्रुद्ध अभिदुद्राव हैहयम् ॥ ६७ ॥
नक्तंचराणां वेगस्तु तेषामापततां बभौ । उद्भूत आतपापाये पयोदानामिवाम्बुधौ ॥ ६८ ॥
मुञ्च मुञ्चेति भाषन्तस्तिष्ठतिष्ठेति चासकृत् । मुसलानि चँ शूलानि सोत्ससर्ज तदा रैणे ॥ ६९ ॥
अप्राप्तान्येव तान्याशु असंभ्रान्तस्तदार्जुनः । आयुधान्यमरारीणां जग्राहारिनिषूदनः ॥ ७० ॥
ततस्तॉन्येव रक्षांसि दुर्धरैः प्रवरायुधैः । भित्त्वा विद्रावयामास वायुरम्बुधरानिव ॥ ७१ ॥
राक्षसांस्त्रासँयामास कार्तवीर्यार्जुनस्तदा । रावणं गृह्य नगरं प्रविवेश सुहृद्वृतः ॥ ७२ ॥
स कीर्यमाणः कुसुमाक्षतोत्करैर्द्विजैः सपौरैः पुरुहूतसंनिभः ।
तैंतोऽर्जुनः स्वां प्रविवेश तां पुरीं बलिं निगृह्येव सहस्रलोचनः ॥ ७३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ।

पुलस्त्यस्तच्छ्रुत्वा माहिष्मतीमुपागम्य कृतवीर्यतनयगृहीतसपर्यातिथ्यो रावणं मोचयित्वा तेन च सहस्रभुजमैत्रीं विरचय्य ब्रह्मलोकं गतः रावणस्तु निर्जितः कथंचिल्लज्जितो गतः ।

रावणग्रहणं तत्तु वायुग्रहणसंनिभम् । ततः पुलस्त्यः शुश्राव कथितं दिवि दैवतैः ॥ १ ॥

रा० टी०–स इति । सोऽर्जुनः दशाननं गृह्य गृहीत्वा बबन्ध ॥ ६४ ॥

गो० टी०–स त्विति । निष्टनन् रटन् ॥ ६२—६४ ॥

६५-६७] ति० टी०–साध्वीति वादिन इति दीर्घ आर्षः ॥ ६५—६७ ॥

रा० टी०–वध्यमान इति । दशग्रीवे वध्यमाने सति साध्वीतिवादिनः सिद्धादयः पुष्पैरर्जुनमूर्द्धनि किरन्ति साध्वीतीत्यत्र दीर्घ आर्ष इति भट्टाः साध्वीत्यस्याध्याहृतबन्धनप्राप्तिविशेषणत्वे तु नार्षकल्पनेति दिक् ॥ ६५ ॥

रा० टी०–व्याघ्र इति । मृगमादाय व्याघ्र इव हैहयो राजा अम्बुदवन्मुहुः ररास आनन्दस्वनं चकार ॥ ६६ ॥

रा० टी०–प्रहस्त इति । समाश्वस्तः प्रहस्तः दशाननं बद्धं दृष्ट्वा हैहयमभिदुद्राव ॥ ६७ ॥

गो० टी०–बध्यमान इति । साध्वीतिवादिनः इयं क्रिया साध्विति वदन्तः ॥ ६५—७३ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

६८] ति० टी०–आतपापाये वर्षाकाले ॥ ६८ ॥

रा० टी०–नक्तमिति । आपततां नक्तंचराणां रक्षसामुद्भूतो वेगः आतपापाये ग्रीष्मापगमे अम्बुधौ पयोदानां वेग इव बभौ ॥ ६८ ॥

६९] ति० टी०–सोत्ससर्जेत्यार्षम् । सहैव त्यक्तवन्त इत्यर्थः ॥ ६९ ॥

रा० टी०–मुञ्चेति । मुञ्च मुञ्चेति तिष्ठ तिष्ठेति भाषन्तो राक्षसाः प्रापुरिति शेषः स प्रहस्तस्तु मुसलानि शूलानि च उत्ससर्ज संधिरार्षः ॥ ६९ ॥

७०-७३] ति० टी०–अप्राप्तान्येव स्वसमीपमनागतान्येवान्तरिक्षस्थान्येवामरारीणां तान्यायुधानि रावणग्राहिकरव्यतिरिक्तकरैराशु जग्राह ॥ ७०–७३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

रा० टी०–अप्राप्तानीति । असंभ्रान्तोऽर्जुनः अप्राप्तान्येव अमरारीणामायुधानि जग्राह ॥ तत इति । अर्जुनः तैर्गृहीतैरेव प्रवरायुधैः रक्षांसि भित्त्वा वायुरम्बुधरानिव विद्रावयामास ॥ राक्षसानिति । कार्तवीर्यार्जुनः रावणं गृह्य गृहीत्वा नगरं प्रविवेश ॥ तदेव भंग्यन्तरेणाह—स इति । द्विजैः कुसुमाक्षतोत्करैः कुसुमाक्षतानां समूहैः कीर्यमाणोऽर्जुनः बलिं निगृह्य सहस्रलोचन इव स्वां पुरीं प्रविवेश ॥ ७०–७३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

१] ति० टी०–अथ पुलस्त्येन रावणमोचनम्—रावणेति ॥ १ ॥

---

१ त राक्षसैः क्रुद्धश्चाभीति गो. पा. । २ उद्भूत इति रा. पा. । ३ सशूला नीति गो. पा. । ४ अर्जुन इति गो. पा. । ५ तैरेवेति गो. रा. पा. । ६ त्रासयित्वा स्विति गो. पा. । ७ तदेति गो. पा. ।

ततः पुत्रकृतस्नेहात्कम्प्यमानो महाधृतिः । माहिष्मतीपतिं द्रष्टुमाजगाम महानृषिः ॥ २ ॥
स वायुमार्गमास्थाय वायुतुल्यगतिर्द्विजः । पुरीं माहिष्मतीं प्राप्तो मनःसंपातविक्रमः ॥ ३ ॥
सोऽमरावतिसंकाशां हृष्टपुष्टजनावृताम् । प्रविवेश पुरीं ब्रह्मा इन्द्रस्येवामरावतीम् ॥ ४ ॥
पादचारमिवादित्यं निष्पतन्तं सुदुर्दृशम् । ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन् ॥ ५ ॥
पुलस्त्य इति विज्ञाय वचनाद्धैहयाधिपः । शिरस्यञ्जलिमाधाय प्रत्युद्गच्छत्तपस्विनम् ॥ ६ ॥
पुरोहितोऽस्य गृह्यार्घ्यं मधुपर्कं तथैव च । पुरस्तात्प्रययौ राज्ञः शक्रस्येव बृहस्पतिः ॥ ७ ॥
ततस्तमृषिमायान्तमुद्यन्तमिव भास्करम् । अर्जुनो दृश्य संभ्रान्तो ववन्देन्द्र इवेश्वरम् ॥ ८ ॥
स तस्य मधुपर्कं गां पाद्यमर्घ्यं निवेद्य च । पुलस्त्यमाह राजेन्द्रो हर्षगद्गदया गिरा ॥ ९ ॥
अद्यैवममरावत्या तुल्या माहिष्मती कृता । अद्याहं तु द्विजेन्द्र त्वां यस्मात्पश्यामि दुर्दृशम् ॥१०॥
अद्य मे कुशलं देव अद्य मे कुशलं व्रतम् । अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ ११ ॥
यत्ते देवगणैर्वन्द्यौ वन्देऽहं चरणौ तव । इदं राज्यमिमे पुत्रा इमे दारा इमे वयम् ॥
ब्रह्मन्किं कुर्मः किं कार्यमाज्ञापयतु नो भवान् । ॥ १२ ॥
तं धर्मेऽग्निषु पुत्रेषु शिवं पृष्ट्वा च पार्थिवम् । पुलस्त्योवाच राजानं हैहयानां तथार्जुनम् ॥१३॥
नरेन्द्राम्बुजपत्राक्ष पूर्णचन्द्रनिभानन । अतुलं ते बलं येन दशग्रीवस्त्वया जितः ॥ १४ ॥

रा० टी०– अर्जुनस्य स्वपुरप्रवेशानन्तरकालिकं वृत्तान्तमाह—रावणेत्यादिभिः । दैवतैः कथितं वायुग्रहणसन्निभं रावणग्रहणं रावणकर्मकगृहीतिं पुलस्त्यः शुश्राव ॥ १ ॥

२] ति० टी०–कम्प्यमानोऽनुकम्पया युज्यमानः ॥ २ ॥

रा० टी०–तत इति । पुत्रकृतस्नेहात्कम्पमानः महानृषिः पुलस्त्यः माहिष्मतीपतिं द्रष्टुमाजगाम ॥ २ ॥

गो० टी०–तत इति । कम्प्यमानः अनुकम्पायुक्ततया संपश्यमानः । यद्वा पौत्रस्नेहात्कम्पित इत्यर्थः । महाधृतेरपि कम्पितं हृदयमित्यर्थः ॥ २ ॥

३] ति० टी०–मनःसंपातविक्रमो मनस्तुल्यगतिः ॥ ३ ॥

रा० टी०–स इति । मनसस्सम्पातवद्विक्रमो गतिर्यस्य सः वायुतुल्यगतिः स पुलस्त्यः वायुमार्गमास्थाय माहिष्मतीं पुरीं प्राप्तः ॥ ३ ॥

गो० टी०–स इति । मनःसंपातविक्रमः मनोगतिः । वायुतुल्यगतिः वायुसमानवेगः ॥ ३ ॥

४] ति० टी०–अमरावतिसंकाशाम् आर्षो ह्रस्वः ॥ ४ ॥

रा० टी०–स इति । स पुलस्त्यः अमरावतिसंकाशां हृष्टपुष्टजनैः आवृतां पुरीं माहिष्मतीम् ब्रह्मा इन्द्रस्यामरावतीमिव प्रविवेश ॥ ४ ॥

गो० टी०–स इति । अमरावतिसंकाशामित्यत्र "ङ्याप्पोः संज्ञाछन्दसोर्बहुलम्" इति ह्रस्वः ॥ ४ ॥

५] ति० टी०–सुदुर्दृशम् । सुदुर्दर्शमित्यर्थः । प्रत्यभिज्ञाय द्वाःस्था मन्त्रिणो वा ॥ ५ ॥

रा० टी०–पादेति । पादचारमादित्यमिव निष्पतन्तं प्रत्यभिज्ञाय ते अर्जुनानुचराः अर्जुनाय न्यवेदयन् ॥ ५ ॥

गो० टी०–पादचारमिति । सुदुर्दृशं दुर्दर्शमिति यावत् प्रत्युद्गच्छत् । ईश्वरं ब्रह्माणम् ॥ ६—११ ॥

६-७] ति० टी०–प्रत्युद्गच्छत्प्रत्युदगच्छत् ॥ ६ ॥ ७ ॥

रा० टी०–पुलस्त्य इति । वचनात् अनुचराणामुक्त्या पुलस्त्य इति विज्ञाय हैहयाधिपः शिरस्यंजलिमाधाय तपस्विनं पुलस्त्यं प्रत्युद्गच्छत् आगमशास्त्रस्यानित्यत्वात् अदृविरहः ॥६॥

रा० टी०–पुरोहित इति । अस्य अर्जुनस्य पुरोहितः अस्य ऋषेः अर्घ्यं मधुपर्कं च गृह्य गृहीत्वा राज्ञः पुरस्तात् प्रययौ ॥ ७ ॥

८-१२] ति० टी०–ईश्वरं ब्रह्माणम् ॥

रा० टी०–तत इति । आयान्तमृषिमर्जुनो दृश्य दृष्ट्वा ववन्दे गुणोत एव निर्देशात् ॥ ८ ॥

रा० टी०–स इति । राजेन्द्रः तस्य तस्मै ऋषये मधुपर्कादि निवेद्य पुलस्त्यमाह ॥ ९ ॥

रा० टी०–तदाकारमाह–अद्येति । यस्मात्त्वामद्य पश्यामि तस्मादद्यैवमद्यैव अमरावत्या तुल्या माहिष्मती कृता ॥ १० ॥

रा० टी०–अद्येति । यतस्तौ चरणौ अहं वन्दे अतः अद्य मे कुशलादीनि सार्द्धश्लोक एकान्वयी ॥ ११ ॥

रा० टी०–इदमिति । इदं राज्यादि तवैवेति शेषः अतो वयं किं कार्यं कुर्मः तद्भवान्नोस्मभ्यमाज्ञापयतु ॥ १२ ॥

गो० टी०–इदमिति । किं कुर्मि किं करवाणि किं वा कार्यं मया ॥ १२ ॥

१३-१४] ति० टी०–शिवं कुशलम् । पुलस्त्योवाचेति संधिरार्षः ॥ १३ ॥ १४ ॥

१ कम्पमान इति रा. पा. २ आकुलामिति गो. पा. । ३ दुर्दर्शमिति गो. पा. । ४ कुर्मीति गो. पा ।

भयाद्यस्योपतिष्ठेतां निष्पन्दौ सागरानिलौ । सोऽयं मृधे त्वया बद्धः पौत्रो मे रणदुर्जयः॥ १५ ॥
पुत्रकस्य यशः पीतं नाम विश्रावितं त्वया । मद्वाक्याद्याच्यमानोऽद्य मुञ्च वैत्सदशाननम्॥ १६ ॥
पुलस्त्याज्ञां प्रगृह्यार्थं न किंचन वचोऽर्जुनः । मुमोचैवं पार्थिवेन्द्रो राक्षसेन्द्रं प्रहृष्टवत् ॥ १७ ॥

स तं प्रमुच्य त्रिदशारिमर्जुनः प्रपूज्य दिव्याभरणस्रगम्बरैः ।
अहिंसकं सख्यमुपेत्य साग्निकं प्रणम्य तं ब्रह्मसुतं गृहं ययौ ॥ १८ ॥

पुलस्त्येनापि संत्यक्तो राक्षसेन्द्रः प्रतापवान् । परिष्वक्तः कृतातिथ्यो लज्जमानो विनिर्जितः॥१९॥
पितामहसुतश्चापि पुलस्त्यो मुनिपुंगवः । मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम ह ॥ २० ॥
एवं स रावणः प्राप्तः कार्तवीर्यात्प्रधर्षणम् । पुलस्त्यवचनाच्चापि पुनर्मुक्तो महाबलः ॥ २१ ॥
एवं बलिभ्यो बलिनः सन्ति राघवनन्दन । नावज्ञा हि परे कार्या य इच्छेच्छ्रेय आत्मनः॥ २२ ॥

ततः स राजा पिशिताशनानां सहस्रबाहोरुपलभ्य मैत्रीम् ।
पुनर्नृपाणां कदनं चकार चचार सर्वां पृथिवीं च दर्पात् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रा० टी०–तमिति । पुलस्त्यः वर्मादिषु शिवं प्रष्ट्वा राजानमर्जुनमुवाच गुणसाधुरत एव निर्देशात् ॥ १३ ॥

रा० टी०–तदाकारमाह—नरेन्द्रेति । येन त्वया दशग्रीवो जितः तस्य ते बलमतुलम् ॥ १४ ॥

गो० टी०–तमिति । शिवं कुशलम् । पुलस्त्येत्यादिना सन्धिरार्षः ॥ १३—१५ ॥

१५] ति० टी०–यस्य रावणस्य ॥ १५ ॥

रा० टी०–तत्र हेतुमाह–भयादिति । यस्य भयात्सागरानिलौ निस्पन्दौ सन्तौ उपतिष्ठेतां सोयं मे पौत्रः त्वया बद्धः१५

१६] ति० टी०–पुत्रकस्य मदीयबालस्य रावणस्य यशः पीतं नाशितम्,स्वीयं नाम च रावणजिदित्येवं त्रैलोक्ये विश्रावितम्१६

रा० टी०–पुत्रकस्येति। त्वया पुत्रकस्य अनुकम्पनीयपुत्रस्य यशः पीतमत एव नाम विश्रावितं प्रख्यापितमतः मद्वाक्याद्याच्यमानस्त्वं दशाननं मुञ्च ॥ १६ ॥

गो० टी०–पुत्रकस्येति । पुत्रकस्य मदीयबालकस्य नाम विश्रावितं रावणजिदिति नाम त्वया त्रैलोक्ये विश्रावितम् । वत्सं बालम् ॥ १६ ॥

१७] ति० टी०–न किंचिद्वच ऊचे, किं तु 'क्रियाकेवलमुत्तरम्' इति मुमोचैव । प्रहृष्टवद्ब्रह्मपुत्रो मां प्रार्थितवानिति संतोषयुक्तः सन् ॥ १७ ॥

रा० टी०–पुलस्त्येति । अर्जुनः पुलस्त्याज्ञां प्रगृह्य किञ्चन वचः नोवाचेति शेषः राक्षसेन्द्रं तु प्रहृष्टवत् प्रहर्षविशिष्टं यथा भवति तथा मुमोचैव ॥ १७ ॥

गो० टी०–पुलस्त्येति । किंचिद्वचोपि नोवाच किंचन अविद्यमानं किंचिद्वचनं न किंचिदप्यवददित्यर्थः । अपि तु क्रिया केवलमुत्तरमिति मुमोचेत्यर्थः । प्रहृष्टवत् ब्रह्मणा प्रार्थनीयोस्मीति संतोषयुक्तः सन् ॥ १७ ॥

१८] ति० टी०–अहिंसकं सख्यं परस्परहिंसाप्रवृत्तिनिवारणसाधनम् । साग्निकमग्निसाक्षित्वसहितम् ॥ १८ ॥

रा०टी०–स इति । अर्जुनः त्रिदशारिं प्रमुच्य दिव्याभरणस्रगंबरैः प्रपूज्य च अहिंसकं कस्यचिद्धिंसायां साहाय्यरहितमनिवर्त्यं वा साग्निकं सख्यमुपेत्य ब्रह्मसुतं प्रणम्य गृहं ययौ१८

गो० टी०–स इति । परस्परहिंसाप्रवृत्तिनिवारणसाधनभूतं साग्निकमग्निसाक्षिपूर्वम् ॥ १८ ॥

१९–२१] ति० टी०–पुलस्त्येनापि संत्यक्तो गच्छ लङ्कामित्यनुज्ञातः । अपिनार्जुनेनापि त्यक्तो बन्धनान्मुक्तः । कृतातिथ्यः । अर्जुनेनेति शेषः ॥ १९–२१ ॥

रा० टी०–पुलस्त्येनेति । पुलस्त्येन कृतातिथ्यः परिष्वक्तः संत्याजितः मोचित इत्यर्थः विनिर्जितो राक्षसेन्द्रः लज्जमानस्तन्ययाविति शेषः ॥ १९ ॥

रा० टी०–पितामहेति । पुलस्त्यः ब्रह्मलोकं जगाम॥२०॥

रा० टी०–एवमिति । रावणः कार्तवीर्यादेवं प्रधर्षणं प्राप्तः पुलस्त्यवचनात्पुनर्मुक्तश्च ॥ २१ ॥

गो० टी०–पुलस्त्येनेति । अपिना अर्जुनेनापीति समुच्चीयते कृतातिथ्य इति अर्जुनेनेति शेषः ॥ १९–२३ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

२२–२३] ति० टी०–बलिभ्योऽपि बलिनः सन्ति । ईश्वरसृष्टेर्विचित्रत्वादित्याशयः । यः श्रेय इच्छेत्तेन परे परस्मिन्नवज्ञा न कार्या ॥ २२ ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३

रा० टी०–एवमिति। हे राघवनन्दन! बलिभ्यो बलिनो-

१ वत्समिति गो. पा. । २ ऊचे इति गो. पा. । ३ मुमोच वै इति गो. पा. ।

चतुस्त्रिंशः सर्गः ।

अथ वाली योद्धुमागतं रावणं कक्षावलम्बितं भूत्वा चतुर्ष्वपि सागरेषु स्नात्वा सन्ध्यामुपास्य च किष्किन्धामागत्योत्सृज्य पतितं तं को भवानिति पप्रच्छ रावणस्तु स्वमनोरथं निवेद्य तद्वलं बहु प्रशस्य तेनाग्निसाक्षिकं सख्यं विधाय तत्र मासमुषित्वामात्यैर्नीतः ।

अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः । चचार पृथिवीं सर्वामनिर्विण्णस्तथा कृतः ॥ १ ॥
राक्षसं वा मनुष्यं वा शृणुतेऽयं बलाधिकम् । रावणस्तं समासाद्य युद्धे ह्वयति दर्पितः ॥ २ ॥
ततः कदाचित्किष्किन्धां नगरीं वालिपालिताम् । गत्वाह्वयति युद्धाय वालिनं हेममालिनम् ॥ ३ ॥
ततस्तु वानरामात्यौस्तारस्तारापिता प्रभुः । उवाच वानरो वाक्यं युद्धप्रेप्सुमुपागतम् ॥ ४ ॥
राक्षसेन्द्र गतो वाली यस्ते प्रतिबलो भवेत् । कोऽन्यः प्रमुखतः स्थातुं तव शक्तः प्लवंगमः ॥ ५ ॥
चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण । इदंमुहूर्तमायाति वाली तिष्ठ मुहूर्तकम् ॥ ६ ॥
एतानस्थिचयान्पश्य य एते शङ्खपाण्डुराः । युद्धार्थिनामिमे राजन्वानराधिपतेजसा ॥ ७ ॥
यद्वामृतरसः पीतस्त्वया रावण राक्षस । तदा वालिनमासाद्य तदन्तं तव जीवितम् ॥ ८ ॥

धिकबलवन्तस्सन्ति अतः य आत्मनः श्रेय इच्छेत्तेन परे रिपौ अवज्ञा न कार्या ॥ २२ ॥

रा० टी०-तत इति । पिशिताशनानां राजा रावणः सहस्रबाहोर्मैत्रीमुपलभ्य नृणां कदनं पुनश्चकार अत एव सर्वां पृथिवीं चचार ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ
उत्तरकाण्डे त्रयस्त्रिंशस्सर्गः ॥ ३३

१] ति० टी०-अथ रावणस्य वालिदर्शनम्—अर्जुनेनेति । अनिर्विण्णः कृतः । पुलस्त्येन विमोच्यार्जुनसख्यं प्रापय्य तेन पूजयित्वा विसर्जितत्वात्पराभवजनितनिर्वेदरहितः कृत इत्यर्थः ॥ १ ॥

रा० टी०-रावणकर्तृकपृथिवीपर्यटनकालोद्भवं वृत्तान्त-

अनिर्विण्णः युद्धाद्वैराग्यरहितः कृतो यो राक्षसाधिपः स सर्वां पृथिवीं चचार ॥ १ ॥

२-३] ति० टी०-युद्धे ह्वयति । युद्धनिमित्तमाह्वयतीत्यर्थः ॥ २ ॥ ३ ॥

रा० टी०-राक्षसमिति । रावणः यं बलाधिकं शृणुते तं युद्धे ह्वयति ॥ २ ॥

रा० टी०-तत इति । कदाचित्किष्किन्धां गत्वा युद्धाय वालिनमाह्वयति आह्वयत् ॥ ३ ॥

गो० टी०-राक्षसमिति । युद्धे युद्धनिमित्तम् ह्वयति आह्वयति स्म ॥ २ ॥ ३ ॥

४] ति० टी०-वानरामात्या वालिमन्त्रिणस्तानाह—तार एकः । तारापिता सुषेणः प्रभुर्युवराजः सुग्रीवश्चोवाच ॥ ४ ॥

रा० टी०-तत इति । उपागतं युद्धप्रेप्सुं रावणं वानरामात्या वानरस्य अमात्याः तारः तदभिधो वानरः तारापिता

शुषेणः प्रभुरंगदश्च वानरः सुग्रीवश्च उवाच तारतारापित्रोरेव सर्वविशेषणं वा ॥ ४ ॥

गो० टी०-तत इति । वानरामात्यः वालिनोमात्यः मन्त्री तार उवाच । तथा तारापिता सुषेणश्चोवाच । प्रभुः युवराजः सुग्रीवश्चोवाच ॥ ४ ॥

५] ति० टी० किमूचुस्तदाह—राक्षसेन्द्रेति । ते तुभ्यं प्रतिबलाः । युद्धं दातुमिति शेषः ॥ ५ ॥

रा० टी०-तदाकारमाह—राक्षसेन्द्रेत्यादिभिः । यस्ते प्रतिबलो भवेत्स वाली गतः समुद्रसमीप इति शेषः अतः तवप्रमुखतः स्थातुमन्यः प्लवंगमः कः शक्तः न कोपीत्यर्थः॥५॥

गो० टी०-राक्षसेन्द्रेति । ते तुभ्यम । प्रतिबल इति । युद्धं दातुमिति शेषः ॥ ५ ॥ ६ ॥

६] ति० टी०-चतुर्भ्यः समुद्रेभ्यश्चतुर्षु समुद्रेषु । संध्यां सम्यग्ध्येयदेवतां ब्रह्मरूपामन्वास्य ध्यात्वेदं मुहूर्तमस्मिन्मुहूर्ते आयाति ॥ ६ ॥

रा० टी०-ननु कदागमिष्यतीत्यत आह—चतुर्भ्य इति । चतुर्भ्यः समुद्रेभ्यः चतुर्षु समुद्रेषु संध्यामन्वास्य कृत्वा इदमेव मुहूर्तं वाली आयाति अतः मुहूर्तकं तिष्ठ ॥ ६ ॥

७] ति० टी०-तेन ते युद्धमयोग्यमित्याह—एतानिति ॥ ७ ॥

रा० टी०-वस्तुतस्तु वालिना युद्धयोग्यता तव नास्तीति बोधयन्नाह—एतानित्यादिभिः । वानराधिपस्य वालिनः तेजसा युद्धार्थिनामेते प्राप्ते सति शंखपाण्डुराः इमे येस्थिचयास्तानिमान् अस्थिचयान् पश्य ॥ ७ ॥

गो० टी०-एतानिति । युद्धार्थिनामिति वानराधिपतेजसा मृतानां युद्धार्थिनामिमे । एवं त्वमपि भविष्यसीति भावः ॥७॥

८] ति० टी०-यद्वेति यद्यप्यर्थे । यद्यप्यमृतरसः पीतो

१ अमात्य इति गो. पा. ।

पश्येदानीं जगच्चित्रमिमं विश्रवसः सुत । इदंमुहूर्तं तिष्ठस्व दुर्लभं ते भविष्यति ॥ ९ ॥
अथवा त्वरसे मर्तुं गच्छ दक्षिणसागरम् । वालिनं द्रक्ष्यसे तत्र भूमिष्ठमिव पावकम् ॥ १० ॥
स तु तारं विनिर्भर्त्स्य रावणो लोकरावणः । पुष्पकं तत्समारुह्य प्रययौ दक्षिणार्णवम् ॥ ११ ॥
तत्र हेमगिरिप्रख्यं तरुणार्कनिभाननम् । रावणो वालिनं दृष्ट्वा संध्योपासनतत्परम् ॥ १२ ॥
पुष्पकादवरुह्याथ रावणोऽञ्जनसंनिभः । ग्रहीतुं वालिनं तूर्णं निःशब्दपदमव्रजत् ॥ १३ ॥
यदृच्छया तदा दृष्टो वालिनापि स रावणः । पापाभिप्रायकं दृष्ट्वा चकार न तु संभ्रमम् ॥१४॥
शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा । न चिन्तयति तं वाली रावणं पापनिश्चयम् ॥ १५ ॥
जिघृक्षमाणमायान्तं रावणं पापचेतसम् । कक्षावलम्बिनं कृत्वा गमिष्ये त्रीन्महार्णवान्॥१६॥
द्रक्ष्यन्त्यरिं ममाङ्कस्थं स्रंसदूरुकराम्बरम् । लम्बमानं दशग्रीवं गरुडस्येव पन्नगम् ॥ १७ ॥
इत्येवं मतिमास्थाय वाली मौनेमुपास्थितः । जपन्वै नैगमान्मन्त्रांस्तस्थौ पर्वतराडिव ॥ १८ ॥

भवति तदा तथापि वालिनमासाद्य तव जीवित तदन्तं तत्समीपगमनपर्यन्तम् ॥ ८ ॥

रा० टी०-यद्धेति । यद्वा यद्यपि त्वयामृतरसः पीतः तदा तथापि वालिनमासाद्य प्राप्य विद्यमानस्य तव जीवितं तदन्तं तद्वालियुद्धमेव अन्तोवसानं यस्य तदेव ॥ ८ ॥

गो० टी०-यद्धेति । तदा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपप्राप्तिपर्यन्तमित्यर्थः ॥ ८ ॥

९-१०] ति० टी०-जगच्चित्रं सर्वाश्चर्यभूतम् । इमं वालिनं पश्य । दुर्लभं ते भविष्यति । जीवितमिति शेषः ९॥१०

रा० टी०-पश्येति । इमं मुहूर्तं तिष्ठस्व इदानीमेव चित्रं जगत्पश्य अनन्तरं दुर्लभं भविष्यति मरिष्यमाणत्वादित्यर्थः ९

रा० टी०-अथवेति । अथवा दक्षिणसागरं गच्छ तत्र पावकमिव भूमिष्ठं वालिनं द्रक्ष्यसे ॥ १० ॥

गो० टी०-पश्येति । जगच्चित्रं जगतः सर्वस्याप्याश्चर्यभूतं व्यापारमिदानीं पश्य । दुर्लभं जीवितमिति शेषः॥ ९ ॥ १० ॥

११] ति० टी०-तारम् । तारादीनित्यर्थः ॥ ११ ॥

रा० टी०-स इति । स रावणः तारं विनिर्भर्त्स्य पुष्पकमारुह्य दक्षिणार्णवं प्रययौ ॥ ११ ॥

गो० टी०-स त्विति । तारं तारादीन् । यद्वा पूर्वं तार एवोक्तवान् तस्य तारापितृत्वं सम्बन्धविशेषात् ॥ ११ ॥ १२ ॥

१२] ति० टी०-संध्योपासनतत्परं सम्यग्ध्येयब्रह्मध्यानतत्परम् ॥ १२ ॥

रा० टी०-तत्रेति । रावणः संध्योपासनतत्परं वालिनं दृष्ट्वा अतिष्ठत् इति शेषः ॥ १२ ॥

१३] ति० टी०-निःशब्दपदं निःशब्दः पदविक्षेपो यस्यां क्रियायां तथा ॥ १३ ॥

रा० टी०-पुष्पकादिति । रावणः वालिनं ग्रहीतुं निःशब्दपदं शब्दरहितचरणप्रक्षेपविशिष्टं यथा भवति तथा अव्रजत्१३

गो० टी०-पुष्पकादिति । निःशब्दं निःशब्दचरणविन्यासम् ॥ १३ ॥

१४] ति० टी०-पापाभिप्रायकं पापाभिप्रायवन्तम् १४

रा० टी०-यदृच्छयेति । रावणः वालिना यदृच्छया दृष्टः पापाभिप्रायकं रावणं दृष्ट्वापि संभ्रमं न चकार वाली इति शेषः ॥ १४ ॥

गो० टी०-यदृच्छयेति । पापाभिप्रायवान् बन्धनाभिप्रायवान् ॥ १४ ॥

१५] ति० टी०-सिंहो वा सिंह इव ॥ १५ ॥

रा० टी०-शशमिति । शशमालक्ष्य सिंहो वा इव पन्नगमालक्ष्य गरुड इव वाली पापनिश्चयं रावणं न चिन्तयति अचिन्तयत् अगणयत् ॥ १५ ॥

गो० टी०-शशमिति । सिंहो वा सिंह इव ॥ १५ ॥

१६] ति० टी०-जिघृक्षमाणमित्यादिरित्येवमित्यन्तो वालिनो विचारः ॥ १६ ॥

रा० टी०-वालिनो विचारमाह—जिघृक्षमाणमिति । जिघृक्षमाणमायान्तं रावणं कक्षावलम्बिनं कृत्वा त्रीन्महार्णवान् गमिष्ये ॥ १६ ॥

गो० टी०-जिघृक्षमाणमित्याराभ्य इत्येवमित्यन्तं वालिविचारः ॥ १६ ॥

१७] ति० टी०-द्रक्ष्यन्ति । देवादय इति शेषः । ममाङ्कस्थम् । कक्षस्थमित्यर्थः स्रंसत्स्रंसमानान्यूरुकरावम्बरं वस्त्रं च यस्य तम् । गरुडस्येति । अङ्कस्थमित्यनुकर्षः ॥ १७ ॥

रा० टी०-द्रक्ष्यन्तीति । स्रंसन्ति ऊरुकराम्बराणि यस्य गरुडस्यांके लम्बमानं पन्नगमिव ममांकस्थं दशग्रीवं द्रक्ष्यन्ति लोका इति शेषः ॥ १७ ॥

गो० टी०-द्रक्ष्यन्तीति । द्रक्ष्यन्ति देवादय इति शेषः ममाङ्कस्थं कक्षस्थमिति यावत् । गरुडस्येति । अङ्कस्थमित्यनुकर्षः ॥ १७ ॥

१८] ति० टी०-नैगमान्वैदिकान् । बाल्यादयो हि स्वयं प्रतिभातसकलवेदाः । जपंस्तदर्थं ध्यायन् ॥ १८ ॥

---

१ भूमिस्थामिति गो. पा. । २ कर्णमिति गो. पा. ।

तावन्योन्यं जिघृक्षन्तौ हरिराक्षसपार्थिवौ । प्रयत्नवन्तौ तत्कर्म ईहतुर्बलदर्पितौ ॥ १९ ॥
हस्तग्राहं तु तं मत्वा पादशब्देन रावणम् । पराङ्मुखोऽपि जग्राह वाली सर्पमिवाण्डजः ॥२०॥
ग्रहीतुकामं तं गृह्य रक्षसामीश्वरं हरिः । खमुत्पपात वेगेन कृत्वा कक्षावलम्बिनम् ॥ २१ ॥
तं च पीड्यमानं तु वितुदन्तं नखैर्मुहुः । जहार रावणं वाली पवनस्तोयदं यथा ॥ २२ ॥
अथ ते राक्षसामात्या ह्रियमाणे दशानने । मुमोक्षयिषवो वालिं रवमाणा अभिद्रुताः ॥ २३ ॥
अन्वीयमानस्तैर्वाली भ्राजतेऽम्बरमध्यगः । अन्वीयमानो मेघौघैरम्बरस्थ इवांशुमान् ॥ २४ ॥
तेऽशक्नुवन्तः संप्राप्तुं वालिनं राक्षसोत्तमाः । तस्य बाहूरुवेगेन परिश्रान्ता व्यवस्थिताः ॥ २५ ॥
वालिमार्गादपाक्रामन्पर्वतेन्द्रोऽपि गच्छतः । किं पुनर्जीवनप्रेप्सुर्विभ्रद्वै मांसशोणितम् ॥ २६ ॥
अपक्षिगणसंपातान्वानरेन्द्रो महाजवः । क्रमशः सागरान्सर्वान्संध्याकालमवन्दत ॥ २७ ॥
संपूज्यमानो यातस्तु खचरैः खचरोत्तमः । पश्चिमं सागरं वाली आजगाम सरावणः ॥ २८ ॥

रा० टी०–इतीति । मौनमुपास्थितो वाली इत्येवं मतिमास्थाय नैगमान् मंत्रान् जपन्सन् पर्वतराडिव तस्थौ ॥ १८ ॥

गो० टी०–इतीति । कर्णसुपाश्रितः पादशब्दश्रवणार्थं कर्णसुपाश्रितमनाः । नैगमान् वैदिकान् । देवकुमारत्वान्मन्त्रवत्त्वम् ॥ १८ ॥ १९ ॥

१९] ति० टी०–तत्कर्म ग्रहणकर्म ॥ १९ ॥

रा० टी०–ताविति । हरिराक्षसपार्थिवौ अन्योन्यं जिघृक्षन्तौ अत एव प्रयत्नवन्तौ सन्तौ तद्ग्रहणकारकं कर्म ईहतुः चक्रतुः ॥ १९ ॥

२०–२२] ति० टी०–हस्तग्राहं हस्तैर्ग्रहणाभिप्रायवन्तं पादशब्देन मत्वा सूक्ष्मेण पादशब्देन पश्चादायान्तं ज्ञात्वा पराङ्मुखोऽपि तदिगवलोकनरहितोऽपि 'हस्तग्राह्यम्' इति पाठे रावणपादशब्देन तादृशं मत्वेत्यर्थः । अण्डजो गरुडः ॥२०–२२॥

रा० टी०–हस्तेति । पादशब्देन रावणं हस्तग्राहं मत्वा पराङ्मुखोपि वाली अण्डजो गरुडः सर्पमिव जग्राह ॥ २० ॥

रा० टी०–ग्रहीतुमिति । हरिर्वाली ग्रहीतुकामं रक्षसामीश्वरं गृह्य गृहीत्वा कक्षावलम्बिनं कृत्वा च खमुत्पपात॥२१॥

गो० टी०–हस्तेति । हस्तग्राहं हस्तैर्ग्रहणाभिप्रायवन्तम् । पादशब्देन सूक्ष्मपादशब्देन ॥ २०–२१ ॥

रा० टी०–तमिति । नखैर्वितुदन्तमत एव पीड्यमानं रावणं वाली पवनस्तोयदमिव जहार ॥ २२ ॥

गो० टी०–तं चेति । आपीड्यमानम् "णिचश्च" इत्यात्मनेपदम् ॥ २२–२४ ॥

२३–२४] ति० टी०–मुमोक्षयिषव इति । मोक्षशब्दात्तत्करोतीत्यन्तात्सन् । रवमाणाः क्रोशन्तः ॥ २३॥२४॥

रा०टी०–अथेति । राक्षसामात्या दशानने ह्रियमाणे सति मुमोक्षयिषवः रावणं मोचयितुमिच्छवः अत एव रवमाणाश्च सन्तः वालिमभिद्रुता बभूवुरिति शेषः ॥ २३ ॥

रा० टी०–अन्वीयमान इति । मेघौघैरन्वीयमानोऽम्बरस्थोंशुभानिव तैराक्षसामात्यैरन्वीयमानोऽम्बरमध्यगो वाली भ्राजते ॥ २४ ॥

२५] ति० टी०–अशक्नुवन्त इति पदम् ॥ २५ ॥

रा० टी०–ते इति । वालिनं संप्राप्तुमशक्नुवन्तो राक्षसोत्तमाः तस्य वालिनो बाहूरुवेगेन परिश्रान्तास्सन्तः व्यवस्थिता बभूवुरिति शेषः ॥ २५ ॥

गो०टी०–तेऽशक्नुवन्त इति। अशक्नुवन्त इति पदम्२५

२६] ति० टी०–यतः पर्वतेन्द्रा अपि वालिमार्गादपाक्रामन् । मांसशोणितं बिभ्रज्जीवनप्रेप्सुः प्राणी तस्य मार्गादपक्रामतीति किं वक्तव्यम् ॥ २६ ॥

रा० टी०–वालीति । गच्छतो गच्छन्तः पर्वतेन्द्रा अपि वालिमार्गादपाक्रामन् अपासरन् तर्हि मांसशोणितं बिभ्रत् जीवितं प्रेप्सुः अपक्रामति चेत्किम् पर्वतेन्द्रापीत्यत्र सन्धिरत एव निर्देशात् ॥ २६ ॥

गो० टी०–वालीति । हि यस्मात्पर्वतेन्द्रा अपि वालिमार्गादपाक्रामन् । मांसादिमान् जीवितप्रेप्सुः प्राणी गच्छतस्तस्य मार्गादपाक्रामतीति किं पुनः । पर्वतेन्द्रा हीति च पाठः ॥२६॥

२७] ति० टी०–अपक्षिगणसंपातान्यावता कालेन वाली गच्छति तावता कालेन पक्षिगणैरप्यप्राप्यान्सागरान्क्रमशोऽगच्छन्निति शेषः । संध्याकालं प्रातःसंध्याकालध्येयदेवतारूपं ब्रह्मावन्दत ध्यातवान् ॥ २७ ॥

रा० टी०–अपक्षीति । सन्ध्याकालं प्राप्येति शेषः न पक्षिगणानां संपातः गमनं येषु तान् सर्वान् सागरान् क्रमशः वानरेन्द्रोऽवन्दत ॥ २७ ॥

गो० टी०–अपक्षिगणेति । अपक्षिगणसंपातान् पक्षिगणैरप्यशक्यसंपातान् सागरान् क्रमशोऽगच्छन्निति शेषः संध्याकालं प्रातःसंध्याकालदेवतारूपमवन्दत ॥ २७ ॥

२८] ति० टी०–सरावणः कक्षस्थरावणसहितः ॥ २८ ॥

रा० टी०–क्रमं बोधयन्नाह–सम्पूज्यमान इति । यातः

१ ह्रियमाणं दशाननमिति गो. पा. । २ हीति गो. पा. । ३ सभाज्यमानो भूतैस्तु खेचरैः खेचरोत्तम इति गो. पा.

तस्मिन्संध्यामुपासित्वा स्नात्वा जप्त्वा च वानरः । उत्तरं सागरं प्रायाद्वहमानो दशाननम् ॥ २९ ॥
बहुयोजनसाहस्रं वहमानो महाहरिः । वायुवच्च मनोवच्च जगाम सह शत्रुणा ॥ ३० ॥
उत्तरे सागरे संध्यामुपासित्वा दशाननम् । वहमानोऽगमद्वाली पूर्वं वै स महोदधिम् ॥ ३१ ॥
तत्रापि संध्यामन्वास्य वासविः सहरीश्वरः । किष्किन्धामभितो गृह्य रावणं पुनरागमत् ॥ ३२ ॥
चतुर्ष्वपि समुद्रेषु संध्यामन्वास्य वानरः । रावणोद्वहनश्रान्तः किष्किन्धोपवनेऽपतत् ॥ ३३ ॥
रावणं तु मुमोचाथ स्वकक्षात्कपिसत्तमः । कुतस्त्वमिति चोवाच प्रहसन्रावणं मुहुः ॥ ३४ ॥
विस्मयं तु महद्गत्वा श्रमलोलनिरीक्षणः । राक्षसेन्द्रो हरीन्द्रं तमिदं वचनमब्रवीत् ॥ ३५ ॥
वानरेन्द्र महेन्द्राभ राक्षसेन्द्रोऽस्मि रावणः । युद्धेप्सुरिह संप्राप्तः स चाद्यासादितस्त्वया ॥ ३६ ॥
अहो बलमहो वीर्यमहो गाम्भीर्यमेव च । येनाहं पशुवद्गृह्य भ्रामितश्चतुरोऽर्णवान् ॥ ३७ ॥
एवमश्रान्तवद्वीर शीघ्रमेव च वानर । मां चैवोद्वहमानस्तु कोऽन्यो वीरो भविष्यति॥ ३८ ॥
त्रयाणामेव भूतानां गतिरेषा प्लवंगम । मनोनिलसुपर्णानां तव चात्र न संशयः ॥ ३९ ॥

प्रचलितः खचरैः देवादिभिः सम्पूज्यमानः खचरोत्तमःसरावणो वाली पश्चिमं सागरमाजगाम ॥ २८ ॥

गो० टी०-सभाज्यमान इति । सभाज्यमानः पूज्यमानः पश्चिममित्यादि दक्षिणे संध्याङ्गशौचम् । पश्चिमे मन्त्रपूर्वकसंध्याङ्गस्नानम् । उत्तरे प्रोक्षणादिकम् । पूर्ववैर्घ्यप्रदानादिकमिति अन्यथा संध्याचतुष्टयाभावात् तदङ्गस्यापि तत्त्वेन व्यपदेशात् ॥ २८-३१ ॥

२९-३१] ति०टी०-तस्मिन्संध्यामुपासित्वा स्नात्वेत्यादि । दक्षिणसमुद्रतटेऽपि । 'जपन्वै नैगमान्मन्त्रान्' इत्युक्ते समुद्रचतुष्टयेऽपि प्रातःसंध्याकालस्योदयात्पूर्वं परतश्च मिलित्वा त्रिमुहूर्तात्मकस्य मध्ये चतुःसमुद्रतटावच्छेदेन किंचित्किंचित्कालं ध्येयब्रह्मणो ध्याननियमस्तत्प्रतिपादकमन्त्रस्मरणनियमश्च वालिन इति गम्यते । ईदृशं व्रतं च महेन्द्रो रावणस्य समूलनाशाय पुत्रद्वारानुतिष्ठतीति बोध्यम् । यत्तु तस्य दक्षिणसमुद्रे शौचम्, पश्चिमे स्नानम्, उत्तरे आपोहिष्ठादिमन्त्रैर्मार्जनम्, पूर्वसमुद्रेऽर्घ्यादीत्येवं संध्यावन्दनशेषानुष्ठानत्वाच्चतुर्षु समुद्रेषु संध्यामन्वास्येत्युक्तिरिति कतकतीर्थादयः, तत् 'जपन्वै नैगमान्मन्त्रान्' इति दक्षिणसमुद्रस्नानकालोक्त्या विरुध्यते । मदुक्तरीत्या सामञ्जस्याच्च । संध्याकाले गायत्र्यर्थं ब्रह्मणो ध्यानमेव प्रधानं स एव संध्यापदार्थ इति स्पष्टं श्रुतिस्मृतिविदाम् ॥ २९—३१ ॥

रा० टी०-तस्मिन्निति । दशाननं वहमानो वानरो वाली तस्मिन्पश्चिमसागरे संध्यामुपासित्वा उपास्य उत्तरं प्रायात् २९

रा० टी०-बहिति । बहुयोजनसाहस्रं वहमानो महाहरिर्वाली वायुवत् मनोवच्च शत्रुणा सह जगाम ॥ ३० ॥

रा० टी०-उत्तर इति । वाली पूर्वं महोदधिमगमत् ३१

३२-३३] ति० टी०-वासवापत्यं वासविः ॥३२॥३३॥

रा० टी०-तत्रेति । वासविः वासवापत्यं वाली रावणं गृह्य गृहीत्वा किष्किंधामभितः पुनरागमत् ॥ ३२ ॥

रा० टी०-चतुर्ष्विति । रावणोद्वहनः अत एव श्रान्तो वानरो वाली किष्किंधोपवने अपतत् प्राप्तोत् ॥ ३३ ॥

गो० टी०-तत्रेति । वासवस्यापत्यं वासविः ॥३२॥३३॥

३४-३५] ति० टी०-प्रहसन्निति । मां जिघृक्षुर्दुरात्मा स्वयमेव ग्रहणं प्राप्त इति तोषात्प्रहासः ॥ ३४-३५ ॥

रा० टी०-रावणमिति । कपिसत्तमो वाली कक्षाद्रावणं मुमोच कुतस्त्वमागत इति प्रहसन्सन्तुवाच च ॥ ३४ ॥

रा० टी०-विस्मयमिति । श्रमेण लोलानि चञ्चलानि निरीक्षणानि नयनानि यस्य स राक्षसेन्द्रः हरीन्द्रमब्रवीत्॥३५॥

गो० टी०-रावणमिति । प्रहसन्निति । मां जिघृक्षुः स्वयमेव दुरात्मा निगृहीत इति प्रहसन् ॥ ३४ ॥ ३५ ॥

३६-३७] ति० टी०-आसादितः कक्षनिक्षेपं प्रापितः ॥ ३६-३७ ॥

रा० टी०-तदाकारमाह—वानरेन्द्रेति । युद्धेप्सुरिह सम्प्राप्तः रावणो राक्षसेन्द्रोहमस्मि स चाहं त्वया आसादितः पीडितः ॥ ३६ ॥

रा० टी०-अहो इति । येन त्वया पशुवद्गृह्य गृहीत्वा चतुरोर्णवानहं भ्रामितः तस्य तव बलादि अहो आश्चर्यम्॥३७॥

गो० टी०-वानरेन्द्रेति । अश्रान्तवत् त्वयासादित इति कक्षनिक्षेपं प्रापित इत्यर्थः ॥ ३६ ॥ ३७ ॥

३८-३९] ति० टी०-अश्रान्तवदश्रान्तः सन् । मां पर्वतसमानभारम् ॥ ३८-३९ ॥

रा० टी०-एवमिति । अश्रान्तवदेवं शीघ्रं मामुद्वहमानः अन्यः को भविष्यति न कोपीत्यर्थः ॥ ३८ ॥

रा० टी०-त्रयाणामिति । एषा एतादृशी गतिः मनआदीनां त्रयाणां तव एव ॥ ३९ ॥

---

१ महार्णवानिति गो. पा. । २ वीरः क्रमिष्यतीति गो. पा. ।

सोऽहं दृष्टबलस्तुभ्यमिच्छामि हरिपुंगव । त्वया सह चिरं सख्यं सुस्निग्धं पावकाग्रतः ॥ ४० ॥
दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम् । सर्वमेवाविभक्तं नौ भविष्यति हरीश्वर ॥ ४१ ॥
ततः प्रज्वालयित्वाग्निं तावुभौ हरीराक्षसौ । भ्रातृत्वमुपसंपन्नौ परिष्वज्य परस्परम् ॥ ४२ ॥
अन्योन्यं लम्बितकरौ ततस्तौ हरिराक्षसौ । किष्किन्धां विशतुर्हृष्टौ सिंहौ गिरिगुहामिव ॥४३॥
स तत्र मासमुषितः सुग्रीव इव रावणः । अमात्यैरागतैर्नीतस्त्रैलोक्योत्सादनार्थिभिः ॥ ४४ ॥
एवमेतत्पुरावृत्तं वालिना रावणः प्रभो । धर्षितश्च वृतश्चापि भ्राता पावकसंनिधौ ॥ ४५ ॥
बलमप्रतिमं राम वालिनोऽभवदुत्तमम् । सोऽपि त्वया विनिर्दग्धः शलभो वह्निना यथा॥४६॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ।

रामेण पृष्टः कुम्भयोनिर्हनुमज्जन्मपराक्रमादिचरितं सश्लाघं तं शंसति ।

अपृच्छत तदा रामो दक्षिणाशाश्रयं मुनिम् । प्राञ्जलिर्विनयोपेत इदमाह वचोऽर्थवत् ॥ १ ॥
अतुलं बलमेतद्वै वालिनो रावणस्य च । न त्वेताभ्यां हनुमता समं त्विति मतिर्मम ॥ २ ॥
शौर्यं दाक्ष्यं बलं धैर्यं प्राज्ञता नयसाधनम् । विक्रमश्च प्रभावश्च हनूमति कृतालयाः ॥ ३ ॥

गो० टी०–एवमिति । अश्रान्तः सन् । मां चैव महाद्रिसमानभारमित्यर्थः ॥ ३८ ॥ ३९ ॥

४०] ति० टी०–तुभ्यं तव ॥ ४० ॥

रा० टी०–स इति । तुभ्यं तव दृष्टबलं येन सोहं त्वया सह पावकाग्रतः सुस्निग्धं चिरं सख्यमिच्छामि ॥ ४० ॥

गो० टी०–सोहमिति । तुभ्यं तवेत्यर्थः ॥ ४०–४३ ॥

४१–४३] ति० टी०–नावावयोः ॥ ४१–४३ ॥

रा० टी०–सख्याकारमाह—दारा इति । नौ आवयोः दारप्रभृति सर्वमविभक्तं भविष्यति ॥ ४१ ॥

रा० टी०–तत इति । हरिराक्षसौ अग्निं प्रज्वालयित्वा प्रज्वाल्य परस्परं परिष्वज्य अन्योन्यं लम्बितकरौ सन्तौ भ्रातृत्वमुपसम्पन्नौ प्राप्तौ बभूवतुरिति शेषः ततोनन्तरं हरिराक्षसौ सिंहौ गिरिगुहामिव किष्किंधां विशतुः विविशतुः॥४२॥

४४] ति० टी०–आगतैः । सहेति शेषः ॥ ४४ ॥

रा० टी०–स इति । स रावणः सुग्रीव इव तत्र किष्किंधायां मासमुषितः अनन्तरममात्यैर्नीतश्च ॥ ४३ ॥

गो० टी०–स इति । सुग्रीव इवेति भ्रातृभावेनेत्यर्थः । आगतैरिति सहेति शेषः ॥ ४४ ॥

४५–४६] ति० टी०–धर्षितो वालिना रावणः पश्चात्पावकनिकटे भ्राता कृतः सोदरभावतया स्नेहः कृतः ॥ ४५–४६॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रा० टी०–उपसंहरन्नाह—एवमिति । वालिना रावणः धर्षितः भ्राता च कृतः एवमेतत्पुरावृत्तं कथितमिति शेषः॥४४॥

रा० टी०–बलमिति । यस्य वालिनः अप्रतिमं बलमभवत् सोपि वाली वन्हिना शलभ इव त्वया निर्दग्धः ॥ ४५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

गो० टी०–एवमिति । भ्राता कृतः सोदरभावतया स्नेहीकृतः ॥ ४५ ॥ ४६ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

१] ति० टी०–अथ रावणवाल्यपेक्षयापि हनुमतो बलवत्वं मन्यमानेन रामेण महाबलो हनुमान्सुग्रीवार्थे वालिनं किं न हतवानिति प्रश्ने उत्तरमाह—अपृच्छतेति । दक्षिणाशा दक्षिणदिक् । अपृच्छतेत्यस्य विवरणमिदमाहेति ॥ १ ॥

रा० टी०–अगस्त्यं प्रति रामस्य प्रभान्तरमाह—अपृच्छतेत्यादिभिः । दक्षिणाशाश्रयं दक्षिणदिङ्निवासिनं मुनिमगस्त्यं रामोऽपृच्छत् प्रष्टुमैच्छत अत एव इदं वच आह ॥१॥

गो० टी०–अपृच्छतेत्यादि । अपृच्छतेत्यस्य विवरणम् इदं वचनमिति ॥ १ ॥

२] ति० टी०–अतुलमनुपमम् । एताभ्यामेतयोः । षष्ठ्यर्थे चतुर्थ्यर्षी । एतयोर्बलं हनुमता तद्बलेन न सममित्यर्थः॥ २ ॥

रा० टी०–तदाकारमाह–अतुलमित्यादिभिः। वालिनो रावणस्य च बलं यद्यप्यतुलं तथापि एताभ्यामेतयोर्वालिरावणयोः हनुमता समं साम्यं नैव इति मम मतिर्निश्चयः ॥ २ ॥

गो० टी०–अतुलमिति । एताभ्यामिति एतयोरित्यर्थः । षष्ठ्यर्थे बहुलं छन्दसीति वक्तव्यम् । षष्ठ्यर्थे चतुर्थी ॥ २ ॥

३] ति० टी०–न केवलं बलमेवाधिकं किंत्वन्यदपी-

दृष्ट्वैव सागरं वीक्ष्य सीदन्तीं कपिवाहिनीम् । समाश्वास्य महाबाहुर्योजनानां शतं प्लुतः ॥ ४ ॥
धर्षयित्वा पुरीं लङ्कां रावणान्तःपुरं तदा । दृष्टा संभाषिता चापि सीता ह्याश्वासिता तथा॥ ५ ॥
सेनाग्रगा मन्त्रिसुताः किंकरा रावणात्मजः । एते हनुमता तत्र एकेन वितिपातिताः ॥ ६ ॥
भूयो बन्धाद्विमुक्तेन भाषयित्वा दशाननम् । लङ्का भस्मीकृता येन पावकेनेव मेदिनी ॥ ७ ॥
न कालस्य न शक्रस्य न विष्णोर्वित्तपस्य च । कर्माणि तानि श्रूयन्ते यानि युद्धे हनूमतः ॥ ८ ॥
एतस्य बाहुवीर्येण लङ्का सीता च लक्ष्मणः । प्राप्ता मया जयश्चैव राज्यं मित्राणि बान्धवाः॥ ९॥
हनूमान्यदि मे नै स्याद्वानराधिपतेः सखा । प्रवृत्तिमपि को वेत्तुं जानक्याः शक्तिमान्भवेत्॥ १०॥
किमर्थं वाली [3]चैतेन सुग्रीवप्रियकाम्यया । तदा वैरे समुत्पन्ने न दग्धो वीरुधो यथा ॥ ११ ॥
नहि वेदितवान्मन्ये हनूमानात्मनो बलम् । यद्दृष्ट्वाञ्जीवितेष्टं क्लिश्यन्तं वानराधिपम् ॥ १२ ॥
एतन्मे भगवन्सर्वं हनूमति महार्मुने । विस्तरेण यथातत्त्वं कथयामरपूजित ॥ १३ ॥
राघवस्य वचः श्रुत्वा हेतुयुक्तमृषिस्ततः । हनूमतः समक्षं तमिदं वचनमब्रवीत् ॥ १४ ॥

त्याह—शौर्यमिति । दाक्ष्यं क्षिप्रकारित्वं बलं शारीरम् । धैर्यं केनाप्यप्रकम्प्यता । प्राज्ञता शीघ्रं कार्याकार्यनिर्णेतृता नयसाधनं राजनीतिकृत्यसंपादनम् ॥ ३ ॥

रा० टी०—तत्र हेतुमाह—शौर्यमित्यादिभिः । हनूमति शौर्यादयः कृतालयाः सन्तीति शेषः एवं सर्वे गुणाः तयोर्न सन्ति इति तात्पर्यम् ॥ ३ ॥

गो० टी०—शौर्यमिति । नयसाधनं नीतिकृत्यसंपादनम् । नेति । कालस्य यमस्य ॥ ३—८ ॥

४-६] ति० टी०—तानेव गुणानाह—दृष्ट्वेति । सागरं वीक्ष्य सीदन्तीं कपिवाहिनीं दृष्ट्वा तां समाश्वास्य योजनशतं प्लुतः ॥ ४-६ ॥

रा० टी०—अनुभूतान् हनूमतो गुणान्वर्णयति—दृष्ट्वेत्यादिभिः । सागरं वीक्ष्य सीदन्तीं कपिवाहिनीं दृष्ट्वा महाबाहुर्हनूमान्योजनानां शतं प्लुतः ॥ ४ ॥

रा० टी०—धर्षयित्वेति । सीता आश्वासिता च ॥ ५ ॥

रा० टी०—सेनेति । एते मन्त्रिसुतादयः एकेन हनुमता विनिपातिताः ॥ ६ ॥

७] ति० टी०—बन्धाद्ब्रह्मास्त्रबन्धात् ॥ ७ ॥

८] ति० टी०—यानि कर्माणि हनूमतो दृष्टानि तानि कालस्य यमस्येन्द्रादेश्च न श्रूयन्ते ॥ ८ ॥

रा० टी०—भूय इति । भूयोबन्धात् अधिकरज्जुबन्धनं प्राप्य विमुक्तेन ब्रह्मास्त्रबन्धनरहितेन येन हनुमता दशाननं भाषयित्वा पावकेन मेदिनीव लंका भस्मीकृता तस्य हनुमतः यानि कर्माणि श्रूयन्ते तानि कर्माणि कालस्य यमस्य न शक्रस्य च न वित्तपस्य विदा ज्ञानेनैव तपः आलोचनं दर्शनं यस्य तस्य विष्णोश्च न उपलक्षणमेतत् ब्रह्मशिवयोरपि अत एव न पतत्प्रकर्षदोषः श्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

९] ति० टी०—लङ्का प्राप्ता । विभीषणाय देयत्वेन प्रतिज्ञातेत्यर्थः । लक्ष्मणप्राप्तिरौषधपर्वतानयनेन ॥ ९ ॥

रा० टी०—एतस्येति । एतस्य हनूमतो बाहुवीर्येणैव मया लंकादयः प्राप्ताः ॥ ९ ॥

गो० टी०—एतस्येति । लङ्का प्राप्ता विभीषणाय देयत्वेन प्राप्तेत्यर्थः । लक्ष्मणः प्राप्त इति । ओषध्यानयनेनेति शेषः॥ ९॥

१०] ति० टी०—न स्यात् । सहाय इति शेषः ॥ १० ॥

रा० टी०—हनूमानिति । मे हनूमान्यदि न स्यात्तर्हि जानक्याः प्रवृत्तिमपि वेत्तुं कः शक्तिमान् भवेत् ॥ १० ॥

गो० टी०—हनुमानिति । हनुमान्यदि नो न स्यात्सहायत्वे नेति शेषः ॥ १० ॥

११] ति० टी०—वीरुध इत्यकारान्तो वृक्षवाची । 'किमर्थं वालिघातेन' इति पाठे सुग्रीवप्रियकाम्यया वालिघाते किमर्थं न प्रवृत्त इत्यर्थः । पदच्छेदशेषपूरणाभ्यां गूढत्वात्तस्यैव विवरणम्—तदा वैर इत्यादि ॥ ११ ॥

रा० टी०—नन्वु किमेतत्तद्भलवर्णननेत्यत आह—किमर्थमिति । एतेन हनूमता वैरे समुत्पन्ने सति सुग्रीवप्रियकाम्यया वाली वीरुध इव किमर्थं न दग्धः ॥ ११ ॥

गो० टी०—किमर्थमिति । वीरुध इत्यकारान्तो वृक्षवाची ॥ ११ ॥

१२] ति० टी०—बाल्यहनने हेतुं स्वयमेव राम ऊहति—नहीति । जीवितेष्टं जीवितादपि प्रियम् ॥ १२ ॥

रा० टी०—नन्वु भवतैव तर्केण निश्चीयतामित्यत आह—नहीति यद्यस्माज्जीवितेष्टं जीवनमिव प्रियं क्लिश्यन्तं वानराधिपं दृष्टवानेव वालिवधं न कृतवानित्यर्थः तस्माद्धनूमान् आत्मनो बलं नैव विदितवानित्यहं मन्ये ॥ १२ ॥

गो० टी०—बाल्यवधहेतुं स्वयं रामः ऊहति—न हीत्यादि ॥ १२ ॥

१३-१४] ति० टी०—हनूमति तद्विषये पृष्टमेतत्सर्वं कथयेत्यन्वयः ॥ १३-१४ ॥

१ दृष्ट्वेति गो. पा. । २ नः इति गो. पा. । ३ अनेनैवेति गो. पा. । ४ मत्तोविति गो. पा. । ५ तदेति गो. पा.

सत्यमेतद्रघुश्रेष्ठ यद्ब्रवीषि हनूमति । न बले विद्यते तुल्यो न गतौ न मतौ परः ॥ १५ ॥
अमोघशापैः शापैस्तु दत्तोऽस्य मुनिभिः पुरा । न वेत्ता हि बलं सर्वं बली सन्नरिमर्दनः ॥ १६ ॥
बाल्येऽप्येतेन यत्कर्म कृतं राम महाबल । तन्न वर्णयितुं शक्यमिति बाल्यतयास्य ते ॥ १७ ॥
यदि वास्ति त्वभिप्रायः संश्रोतुं तव राघव । समाधाय मतिं राम निशामय वदाम्यहम् ॥ १८ ॥
सूर्यदत्तवरस्वर्णः सुमेरुर्नाम पर्वतः । यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता ॥ १९ ॥
तस्य भार्या बभूवेष्टा ह्यञ्जनेति परिश्रुता । जनयामास तस्यां वै वायुरात्मजमुत्तमम् ॥ २० ॥
शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना । फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा ॥ २१ ॥
एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः । रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ॥ २२ ॥
तदोद्यन्तं विवस्वन्तं जपापुष्पोत्करोपमम् । ददर्श फललोभाच्च ह्युत्पपात रविं प्रति ॥ २३ ॥
बालार्काभिमुखो बालो बालार्क इव मूर्तिमान् । ग्रहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः ॥ २४ ॥

रा० टी०-एतदिति । हनुमति हनुमद्विषये एतन्मया पृष्टं सर्वं यथातत्त्वं विस्तरेण कथय ॥ १३ ॥

रा० टी०-राघवस्येति । ऋषिरगस्त्यः हनुमतः समक्षं इदमब्रवीत् ॥ १४ ॥

गो० टी०-एतदिति । हनुमत्येतदिति हनुमद्विषये पृष्टमित्यर्थः ॥ १३ ॥ १४ ॥

१५] ति० टी०-यद्ब्रवीषीति । आत्मनोबलं न जानातीत्येतन्न बल इति च ॥ १५ ॥

रा० टी०-तदाकारमाह—सत्यमित्यादिभिः । यस्माद्बलादौ परो हनुमद्विषः तुल्यः तत्सदृशो न विद्यते तस्माद्धनुमति तद्विषये सत्यं ब्रवीषि ॥ १५ ॥

गो० टी०-सत्यमिति । यद्ब्रवीषि हे रघुश्रेष्ठ तदेतत्सत्यम् । स आत्मनो बलं न हि वेदेत्यर्थः ॥ १५ ॥

१६] ति० टी०-तदेवाह—अमोघेति ॥ १६ ॥

रा० टी०-ननु तादृशबलवत्त्वं कुतोनेन वाली न पराभूत इत्यत आह-अमोघेति । पुरा पूर्वमस्यास्मै हनुमते बली सन्नपि भवान् सर्वं बलमात्मनो वीर्यं न वेत्ता इति शापः अमोघशापैर्मुनिभिर्दत्तः ॥ १६ ॥

गो० टी०-तदेव दर्शयति-अमोघेत्यादि ॥ १६ ॥

१७] ति० टी०-बाल्यतया बाल्यभावेन । अजानतेत्यर्थः । अनेनास्यते ॥ १७ ॥

रा० टी०-बाल्य इति । बाल्येपि बाल्यतया एतेन हनुमता यत्कर्म कृतं तदस्य कर्म ते तुभ्यं वर्णयितुं न शक्यम् ॥ १७ ॥

गो० टी०-बाल्य इति । बालतया आस्यत इति बालतया बालभावेन अजानतेत्यर्थः ॥ १७ ॥

१८] ति० टी०-निशामय शृणु ॥ १८ ॥

रा० टी०-यदिति । संश्रोतुं तवाभिप्रायो यद्यस्ति तदा मतिं समाधाय स्थिरीकृत्य अहं वदामि त्वं निशामय शृणु ॥ १८ ॥

गो० टी०-यदीति । निशामय शृणु ॥ १८ ॥

१९] ति० टी०-सूर्यदत्तवरेण स्वर्णः स्वर्णरूपः सुमेरुः । सावर्णमेरुः ॥ १९ ॥

रा० टी०-वचनाकारमाह-सूर्येति । केशरी नामास्य हनुमतः पिता यत्र राज्यं प्रशास्ति सः सूर्यदत्तवरः अत एव स्वर्णः सुवर्णमयः मेरुर्नाम पर्वतोस्तीति शेषः ॥ १९ ॥

गो० टी०-सूर्येति । सूर्यदत्तवरस्वर्णः सूर्यदत्तवरेण स्वर्णरूपः । सुमेरुः सुवर्णमेरुः ॥ १९ ॥

२०] ति० टी०-परिश्रुता प्रसिद्धा ॥ २० ॥

रा० टी०-तस्येति । अञ्जनेति परिश्रुता तस्य केशरिणो भार्या बभूव तस्यामञ्जनायां वायुः आत्मजं जनयामास ॥ २० ॥

गो० टी०-तस्येति । परिश्रुता प्रसिद्धा ॥ २० ॥

२१] ति० टी०-शालिशूकनिभाभासं शाल्यग्रसमानवर्णम् । प्रासूत प्रसूतवती ॥ २१ ॥

रा० टी०-शालीति । शालिनः शूकस्य अग्रभागस्य निभा आभा दीप्तिर्यस्य तमिमं हनुमन्तमञ्जना यदा प्रासूत तदा फलान्याहर्तुकामा सती गहने वने निष्क्रान्ता ॥ २१ ॥

गो० टी०-शालिशूकेति । शालिशूकसमाभासं शाल्यग्रवत्पिङ्गलाभासम् । काञ्चनाद्रिकमनीयविग्रहमित्युक्तेः । प्रासूत प्रसूतवती ॥ २१ ॥

२२-२४] ति० टी०-शरवणे शिशुः । कुमारस्वामीत्यर्थः ॥ २२-२४ ॥

रा० टी०-एष इति । मातुर्वियोगात् क्षुधया च भृशार्दितः शिशुरेष हनुमान् शरवणे शिशुः कुमारस्वामीव रुरोद ॥ २२ ॥

रा० टी०-तदेति । तदा उद्यन्तं विवस्वन्तं ददर्श फललोभादिदं फलं प्राप्नुयामीत्याकाङ्क्षातः रविं प्रति उत्पपात च ॥ २३ ॥

रा० टी०-बालेति । मूर्तिमान् बालार्क इव बालो बालार्कं ग्रहीतुकामो बालार्काभिमुखो हनुमान् अम्बरमध्यगस्सन्बालार्कं प्लवते ॥ २४ ॥

गो० टी०-एष इति । शरवणे शिशुः स्कन्दः ॥ २२-२९ ॥

१ हनूमत इति गो. पा. । २ शप्त इति गो. पा. । ३ येनेति गो. पा. । ४ मर्दन इति गो. मर्दनमिति रा. पा. । ५ एषेति गो. पा. । ६ अमुमिति गो. पा. ।

एतस्मिन्प्लवमाने तु शिशुभावे हनूमति । देवदानवयक्षाणां विस्मयः सुमहानभूत् ॥ २५ ॥
नाप्येवं वेगवान्वायुर्गरुडो नै मनस्तथा । यथायं वायुपुत्रस्तु क्रमतेऽम्बरमुत्तमम् ॥ २६ ॥
यदि तावच्छिशोरस्य ईदृशो गतिविक्रमः । यौवनं बलमासाद्य कथं वेगो भविष्यति ॥ २७ ॥
तमनुप्लवते वायुः प्लवन्तं पुत्रमात्मनः । सूर्यदाहभयाद्रक्षंस्तुषारचयशीतलः ॥ २८ ॥
बहुयोजनसाहस्रं क्रामन्नेव गतोम्बरम् । पितुर्बलाच्च बाल्याच्च भास्कराभ्याशमागतः॥ २९ ॥
शिशुरेष त्वदोपज्ञ इति मत्वा दिवाकरः । कार्यं चास्मिन्समायत्तमित्येवं न ददाह सः ॥ ३० ॥
यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः । तमेव दिवसं राहुर्जिघृक्षति दिवाकरम् ॥ ३१ ॥
अनेन च परामृष्टो राहुः सूर्यरथोपरि । अपक्रान्तस्ततस्त्रस्तो राहुश्चन्द्रार्कमर्दनः ॥ ३२ ॥
इन्द्रस्य भवनं गत्वा सरोषः सिंहिकासुतः । अब्रवीद्भ्रुकुटिं कृत्वा देवं देवगणैर्वृतम् ॥ ३३ ॥
बुभुक्षापनयं दत्त्वा चन्द्रार्कौ मम वासव । किमिदं तत्त्वया दत्तमन्यस्य बलसूदन ॥ ३४ ॥
अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः । अथान्यो राहुरासाद्य जग्राह सहसा रविम् ॥ ३५ ॥
स राहोर्वचनं श्रुत्वा वासवः संभ्रमान्वितः । उत्पपातासनं हित्वा उद्वहन्काञ्चनीं स्रजम् ॥ ३६ ॥
ततः कैलासकूटाभं चतुर्दन्तं मदस्रवम् । शृङ्गारधारिणं प्रांशुं स्वर्णघण्टाट्टहासिनम् ॥ ३७ ॥
इन्द्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरम् । प्रायाद्यत्राभवत्सूर्यः सहानेन हनूमता ॥ ३८ ॥

२५-२९] ति० टी०-शिशुभावे बाल्यावस्थायां हनुमति प्लवमाने सति ॥ २५-२९ ॥

रा० टी०-एतस्मिन्निति । शिशूनां भावो धर्मोऽस्मिन् तस्मिन्नेतस्मिन् हनुमति प्लवमाने सति देवादीनां सुमहान् विस्मयोऽभूत् ॥ २५ ॥

रा० टी०-नेति । अयं वायुपुत्रः यथाम्बरं क्रमते एवं तथा वायुप्रभृतिर्न ॥ २६ ॥

रा० टी०-यदिति । शिशोरस्य यदीदृशो बलविक्रमः तर्हि यौवनं बलमासाद्य अस्य वेगः कथं कीदृशो भविष्यति इति विचार्येति शेषः सूर्यदाहभयाद्रक्षन् तुषारचयशीतलो वायुः प्लवन्तमात्मनः पुत्रमनुप्लवते श्लोकद्वयमेकान्वयि ॥२७॥२८॥

रा० टी०-बह्वीति । बहुयोजनसाहस्रमम्बरं क्रामन्नेव हनूमान्पितुर्बलात् बाल्यात् बालभावाच्च हेतोर्भास्करस्याभ्यासं समीपमागतः

३०-३१] ति० टी०-दोषज्ञो विद्वान्स न भवतीत्यदोषज्ञः तत्र हेतुः—शिशुरिति ॥ ३०-३१ ॥

रा० टी०-शिशुरिति । एषः शिशुः अत एव अदोषज्ञः दाहादिदोषस्य अजाता अस्मिन्कार्ये रामकृत्ये च समायत्तमधीनतया स्थितमित्येवं विचार्य दिवाकरो न ददाह ॥ ३० ॥

रा० टी०-यमिति । यमेव दिवसं यस्मिन्नेव दिने एष हनुमान् भास्करं ग्रहीतुं प्लुतः तमेव दिवसं राहुर्दिवाकरं जिघृक्षति ॥ ३१ ॥

गो० टी०-शिशुरिति । दोषज्ञः विद्वान् स न भवतीत्यदोषज्ञः दोषज्ञो वैयविद्वांसावित्यमरः ॥ ३०-३१ ॥

३२-३३] ति० टी०-सूर्यरथोपरि तदुपरितनप्रदेशे । अनेन हनुमता परामृष्टः स्पृष्टो राहुस्ततो मण्डलात्त्रस्तः सन्नपक्रान्तः ॥ ३२ ॥ ३३ ॥

रा० टी०-अनेनेति । अनेन हनुमता सूर्यरथोपरि तन्मण्डलोपरि परामृष्टो राहुः त्रस्तस्संस्ततः तस्मादेशादपक्रान्तः ॥३२॥

रा० टी०-इन्द्रस्येति । सिंहिकासुतो राहुस्सरोषस्सन् भ्रुकुटीं भ्रुवः कौटिल्यं कृत्वा देवमिन्द्रमब्रवीत् ॥ ३३ ॥

गो० टी०-अनेनेति । स राहुः परामृष्टः ॥ ३२-३९ ॥

३४-३६] ति० टी०-हे वासव ! चन्द्रार्कौ मम यथाकालं बुभुक्षापनयं बुभुक्षापनीयतेऽनेनेति व्युत्पत्त्याऽन्नं दत्त्वा तदन्नम् ॥ ३४-३६ ॥

रा० टी०-तदाकारमाह-बुभुक्षेति द्वाभ्याम्। हे वासव! मम बुभुक्षाया अपनयं दूरीकर्तारं चन्द्रार्कौ दत्त्वा तत् भक्ष्यं त्वया अन्यस्य अन्यस्मै दत्तमिदं किन्नोचितमित्यर्थः ॥ ३४ ॥

रा० टी०-नन्वन्यस्मै दत्तमिति त्वया कथं ज्ञायते इत्यत आह—अद्येति । पर्वकाले सूर्यं जिघृक्षुरहमागतः अथ अनन्तरमन्यो राहुरासाद्य रविं जग्राह ॥ ३५ ॥

रा० टी०-स इति । वासवः राहोर्वचनं श्रुत्वा आसनं हित्वोत्पपात ॥ ३६ ॥

३७] ति० टी०-शृङ्गारधारिणं नानाशृङ्गारधारिणम् । स्वर्णघण्टाशब्दरूपाट्टहासवन्तम् ॥ ३७ ॥

३८] ति० टी०-करीन्द्रमैरावतम् । अनेन हनुमता सह यत्र देशे सूर्यस्तं प्रायात् ॥ ३८ ॥

रा० टी०-तत इति । मदस्रवं प्रांशुमत्युन्नतं स्वर्णघण्टा

१ वेति गो. पा. । २ क्रमत्येष इति गो. पा. । ३ स इन्द्रभवनमिति गो. पा. ।

अथातिरभसेनागाद्राहुरुत्सृज्य वासवम् । अनेन च स वै दृष्टः प्रधावञ्शैलकूटवत् ॥ ३९ ॥
ततः सूर्यं समुत्सृज्य राहुं फलमवेक्ष्य च । उत्पपात पुनर्व्योम ग्रहीतुं सिंहिकासुतम् ॥ ४० ॥
उत्सृज्यार्कमिमं राम प्रधावन्तं प्लवंगमम् । अवेक्ष्यैवं परावृत्तो[1] मुखशेषः पराङ्मुखः ॥ ४१ ॥
इन्द्रमाशंसमानस्तु त्रातारं सिंहिकासुतः । इन्द्र इन्द्रेति संत्रासान्मुहुर्मुहुरभाषत ॥ ४२ ॥
राहोर्विक्रोशमानस्य प्रागेवालक्षितं स्वरम् । श्रुत्वेन्द्रोवाच मा भैर्पारहमेनं निषूदये ॥ ४३ ॥
ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि । फलैं[2]तं हस्तिराजानमभिदुद्राव मारुतिः ॥ ४४ ॥
तथास्य धावतो रूपमैरावतजिघृक्षया । मुहूर्तमभवद्घोरमिन्द्रा[3]ग्न्युपरि भास्वरम् ॥ ४५ ॥
एवमाधावमानं तु नातिक्रुद्धः शचीपतिः । हस्तान्तादतिमुक्तेन कुलिशेनाभ्यताडयत् ॥ ४६ ॥
ततो गिरौ पपातैष इन्द्रवज्राभिताडितः । पतमानस्य चैतस्य वा[4]मा हनुरभज्यत ॥ ४७ ॥
तस्मिंस्तु पतिते चोपि वज्रताडनविह्वले । चुक्रोधेन्द्राय पवनः प्रजानामहिताय सः ॥ ४८ ॥
प्रचारं स तु संगृह्य प्रजास्वन्तर्गतः प्रभुः । गुहां प्रविष्टः स्वसुतं शिशुमादाय मारुतः ॥ ४९ ॥
विण्मूत्राशयमावृत्य प्रजानां परमार्तिकृत् । रुरोध सर्वभूतानि यथा वर्षाणि वासवः ॥ ५० ॥
वायुप्रकोपाद्भूतानि निरुच्छ्वासानि सर्वतः । संधिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे ॥ ५१ ॥

तत्स्वन एव अट्टहासः तद्धनुं करीन्द्रमिन्द्र आरुह्य राहुं पुरस्सरं कृत्वा सूर्यो यत्र हनुमता सहाभवत् तत्र प्रायात् श्लोकद्वयमेकान्वयि ॥ ३७ ॥ ३८ ॥

३९-४०] ति० टी०-अतिरभसेनातिवेगेनागात् । वासवादपि पूर्वमिति शेषः । अनेन हनुमता । स राहुः ॥३९-४०॥

रा० टी०-अथेति । राहुः वासवमुत्सृज्य अतिरभसेनागात् इन्द्रप्राप्तेः पूर्वमेव हनुमत्समीपं प्राप्तेत्यर्थः अनेन हनुमता तु शैलकूटवत्प्रधावन् स राहुः दृष्टः ॥ ३९ ॥

रा० टी०-तत इति । राहुं फलमवेक्ष्य सूर्यं समुत्सृज्य च सिंहिकासुतं ग्रहीतुं व्योम पुनरुत्पपात हनुमानिति शेषः॥४०॥

गो० टी०-तत इति । महाशैलकूटवत् बृहत्तरफलमवेक्ष्येत्यर्थः ॥ ४० ॥

४१-४२] ति० टी०-एवमवेक्ष्य महाशैलकूटवद्बृहत्तरमवेक्ष्य । मुखशेष इति राहोः स्वरूपकथनम् ॥ ४१-४२ ॥

रा० टी०-उत्सृज्येति । मुखमेव शेषः राहुरित्यर्थः एवं प्रधावन्तं प्लवंगममवेक्ष्य परावृत्तो बभूवेति शेषः पराङ्मुखः सिंहिकासुतः त्रातारमिन्द्रमाशंसमानं त्राणार्थं कथयमानस्सन् इन्द्र इन्द्रेति मुहुर्मुहुरभाषत श्लोकद्वयमेकान्वयि ॥४१॥४२॥

गो० टी०-उत्सृज्येति । मुखशेष इति राहुस्वरूपकथनम् ॥ ४१-४९ ॥

४३] ति० टी०-प्रागेवालक्षितं स्वरं राहुदर्शनात्पूर्वमेवायं राहोः स्वर इति निश्चितम् ॥ ४३ ॥

रा० टी०-राहोरिति । प्राक् राहुदर्शनात्पूर्वमेव आलक्षितं विज्ञातं विक्रोशमानस्य राहोः स्वरं श्रुत्वैव अहमेनं निषूदये अतस्त्वं माभैषीः इतीन्द्र उवाच ॥ ४३ ॥

४४-४५] ति० टी०-इदमपि महत्फलमिति मत्वा । हस्तिराजानमैरावतम् ॥ ४४-४५ ॥

रा०टी०-ऐरावतमिति । मारुतिः ऐरावतं दृष्ट्वा इदमपि महत्फलं तत्तस्माद्धेतोर्हस्तिराजानं हस्तिराजमभिदुद्राव ॥४४॥

रा० टी०-तथेति । ऐरावतजिघृक्षया धावतोऽस्य हनुमतो रूपमिन्द्राग्न्युपरि भास्वरं प्रकाशमानं सत् मुहूर्तं घोरमभवत्॥४५॥

४६] ति० टी०-हस्तान्ताद्धस्ताग्रात् ॥ ४६ ॥

रा० टी०-एवमिति । नातिक्रुद्धः हनुमद्ग्रास्येन हेतुना अतिक्रोधरहितश्शचीपतिः हस्तान्तात् हस्ताग्रभागात् अतिमुक्तेन कुलिशेन एवमाधावमानं हनुमन्तमभ्यताडयत् ॥ ४६ ॥

गो० टी०-एवमिति । हस्तान्तात् हस्ताग्रात् । हस्तान्त इति समीप इत्यर्थः ॥ ४६-४८ ॥

४७-४८] ति० टी०-वामा हनुः । हनुशब्दः स्त्रियाम् । 'तत्परा हनुः' इति कोशात् ॥ ४७-४८ ॥

रा० टी०-तत इति । इन्द्रवज्राभिताडितः एष हनुमान् गिरौ पपात पतमानस्य तस्य वामा हनुरभज्यत ॥ ४७ ॥

रा० टी०-तस्मिन्निति । तस्मिन्हनुमति वज्रताडनविह्वले अत एव पतिते सति प्रजानां स्वपुत्रस्य अहिताय इन्द्राय पवनश्चुकोप आदराद्बहुवचनं किञ्च प्रजानामहिताय हनुमत्प्रहारद्वारा प्रजानामहितकर्त्रे इत्यर्थः ॥ ४८ ॥

४९] ति० टी०-प्रचारं देहिमात्रहितभूतं स्वप्रचारं संगृह्य संक्षिप्य । अन्तर्गतः सर्वदेहान्तरगतः । प्रभुः सर्वजगत्प्रवृत्तिनिवृत्तिकर्ता ॥ ४९ ॥

रा० टी०-प्रचारमिति । प्रजास्वंतर्गतः प्रभुः प्रवृत्तिनिवृत्त्योः समर्थो मारुतः प्रचारं स्वव्याप्तिं संगृह्य निवर्त्य शिशुमल्पवयस्कं स्वसुतमादाय गुहां प्रविष्टोभवदिति शेषः॥४९॥

गो० टी०-प्रचारमिति । प्रचारं स्वीयं देहियात्रहेतुभूतम् । गृह्य संक्षिप्य । अन्तर्गतः सर्वदेहान्तर्गतः ॥ ४९ ॥

५०-५१] ति० टी०-रुरोध निरुद्धस्वगतिप्रचारमकरोत्

---

१ परावृत्येति गो. पा. । २ फलं मत्वा हस्तिराजमिति गो. पा. । ३ इन्द्राग्न्योरिवेति गो. पा. । ४ वाम इति गो.पा. । ५ वाहे इति गो.पा. ।

निःस्वाध्यायवषट्कारं निष्क्रियं धर्मवर्जितम् । वायुप्रकोपात्त्रैलोक्यं निरयस्थमिवाभवत् ॥ ५२ ॥
ततः प्रजाः सगन्धर्वाः सदेवासुरमानुषाः । प्रजापतिं समाधावन्दुःखिताश्च सुखेच्छया ॥ ५३ ॥
ऊचुः प्राञ्जलयो देवा महोदरनिभोदराः । त्वया तु भगवन्सृष्टाः प्रजानाथ चतुर्विधाः ॥ ५४ ॥
त्वया दत्तोऽयमस्माकमायुषः पवनः पतिः । सोऽस्मान्प्राणेश्वरो भूत्वा कस्मादेषोऽद्य सत्तम॥५५॥
रुरोध दुःखं जनयन्नन्तःपुर इव स्त्रियः । तस्मात्त्वां शरणं प्राप्ता वायुनोपहता वयम् ॥ ५६ ॥
वायुसंरोधजं दुःखमिदं नो नुद दुःखहन् । एतत्प्रजानां श्रुत्वा तु प्रजानाथः प्रजापतिः ॥ ५७ ॥
कारणादिति चोक्त्वासौ प्रजाः पुनरभाषत । यस्मिंश्च कारणे वायुश्चुक्रोध च रुरोध च ॥ ५८ ॥
प्रजाः शृणुध्वं तत्सर्वं श्रोतव्यं चात्मनः क्षमम् । पुत्रस्तस्यामरेशेन इन्द्रेणाद्य निपातितः ॥ ५९ ॥
राहोर्वचनमास्थाय ततः स कुपितोऽनिलः । अशरीरः शरीरेषु वायुश्चरति पालयन् ॥ ६० ॥
शरीरं हि विना वायुं समतां याति दारुभिः । वायुः प्राणः सुखं वायुर्वायुः सर्वमिदं जगत्॥ ६१ ॥
वायुना संपरित्यक्तं न सुखं विन्दते जगत् । अद्यैव च परित्यक्तं वायुना जगदायुषा ॥ ६२ ॥

एवंविधार्थस्य देवशक्यत्वे दृष्टान्तः—यथेति । वासवो यथा वर्षाण्यादृत्य रुन्धे ॥ ५०–५१ ॥

रा० टी०–विण्मूत्रेति । प्रजानां विण्मूत्राशयम् आवृत्य अवरुध्य विद्यमानः अत एव परमार्तिकृन्मारुतः सर्वभूतानि रुरोध व्यापाररहितानि चकारेत्यर्थः तत्र दृष्टान्तः वासवो वर्षाणि वृष्टीर्यथा ॥ ५० ॥

रा० टी०–वाय्विति । वायुप्रकोपात् निरुच्छ्वासानि अत एव म्रियमाणैस्संधिभिः काष्ठभूतानि भूतानि जज्ञिरे बभूवुः॥५१॥

गो० टी०–विण्मूत्रेति । रुरोधेति । निरुद्धस्वगतिप्रचारमकरोत् । एवंविधार्थस्य देवानां शक्यत्वे दृष्टान्तः यथा वर्षाणीति ॥ ५०–५३ ॥

५२–५३] ति० टी०–स्वाध्यायो वेदाध्ययनम् । वषट्कारो यागः निष्क्रियं संसारशून्यम् । निरयस्थमिव । अतिशयितदुःखवदित्यर्थः ॥ ५२–५३ ॥

रा० टी०–निस्स्वाध्यायेति । वायुप्रकोपात् निस्स्वाध्यायवषट्कारं स्वाध्यायो वेदाध्ययनं वषट्कारो यागः ताभ्यां रहितं निष्क्रियं स्नानादिक्रियारहितमत एव धर्मवर्जितं त्रैलोक्यं निरयस्थमिवाभवत् ॥ ५२ ॥

रा० टी०–तत इति । गंधर्वादयः सुखेच्छया प्रजापतिं समाधावन् प्राप्नुवन् ॥ ५३ ॥

५४–५७] ति० टी०–महोदरेति । महोदररोगयस्तोदरवदुदरं येषां ते ॥ ५४–५७ ॥

रा० टी०–ऊचुरिति । महोदरनिभानि महोदराभिधरोगविशिष्टोदरसदृशानि उदराणि येषां ते देवा ऊचुः तदाकारमाह हे प्रजानाथ चतुर्विधा अण्डजादिभेदेन चतुष्प्रकाराः प्रजाः त्वयैव सृष्टाः ॥ ५४ ॥

रा० टी०–त्वयेति । त्वयाऽस्माकमायुषः पतिरयं पवनो दत्तः प्राणेश्वरो भूत्वा स पवनः अन्तःपुरस्त्रिय इव अस्मान्दुःखं जनयन्सन् कस्माद्रुरोध तस्माद्रोधोद्भतोवायु नोपहता वयं शरणं त्वां प्राप्ताः श्लोकद्वयमेकान्वयि ॥ ५५ ॥ ५६ ॥

गो० टी०–ऊचुरिति । महोदरनिभोदराः वायुःस्तमात् महोदरव्याधिग्रस्तोदरवदुदरं येषान्ते तथा ॥ ५४–५६ ॥

रा० टी०–वाय्विति । हे दुःखहन् वायुसंरोधजमिदं नो दुःखं त्वं नुद निवर्तय अर्द्धं पृथक् एतदिति प्रजानां नाथः आशिषां प्रापकः प्रजापतिः प्रजानामेतद्वचनं श्रुत्वा कारणात्कस्माच्चिद्धेतोः इति इदं जातमित्युक्त्वा प्रजाः पुनरभाषत१७

गो० टी०–एतदिति । कारणादिति । चोक्त्वा किंचित्कारणमत्रास्तीत्युक्त्वा ॥ ५७–६२ ॥

५८–६०] ति० टी०–कारणादित्युक्त्वा किंचित्कारणमत्रास्तीत्युक्त्वा यस्मिन्कारणे वायुश्चुक्रोध तत्कारणं पुनरभाषत ॥ ५८–६० ॥

रा० टी०–तदाकारमाह—यस्मिन्निति । यस्मिन्कारणे सति वायुः चुक्रोध रुरोध च तत् आत्मनः श्रोतव्यं क्षमं क्षन्तव्यं कारणं यूयं शृणुध्वम् ॥ ५८ ॥

रा० टी०–कारणमेवाह–पुत्र इति । तस्यानिलस्य पुत्रः राहोर्वचनमास्थाय इन्द्रेण निपातितः ततः तस्माद्धेतोः अनिलः संकुपितोभवदिति शेषः ॥ ५९ ॥

रा० टी०–अशरीर इति । अशरीरो वायुः पालयन्सन्शरीरेषु चरति अत एव वायुं विना शरीरं दारुभिस्समतां याति स्थातुं न शक्तमित्यर्थः ॥ ६० ॥

६१–६२] ति० टी०–दारुभिः समतां याति । क्षणमपि न चलतीत्यर्थः ॥ ६१–६२ ॥

रा० टी०–वायुरिति । वायुना संपरित्यक्तं जगत् सुखं न विन्दते ॥ ६१ ॥

रा० टी०–अद्येति । वायुना जगत् अद्यैव परित्यक्तम् अत एव काष्ठकुड्योपमाः स्थिता लोका इति शेषः ॥ ६२ ॥

---

१ त्विति गो. पा. ।

अद्यैव ते निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिताः। तद्यामस्तत्र यत्रास्ते मारुतो रुक्प्रदो हि नः ॥
मा विनाशं गमिष्याम अप्रसाद्यादितेः सुतम् । ॥ ६३ ॥
ततः प्रजाभिः सहितः प्रजापतिः सदेवगन्धर्वभुजंगगुह्यकैः ।
जगाम यत्रास्यति तत्र मारुतः सुतं सुरेन्द्राभिहतं प्रगृह्य सः ॥ ६४ ॥
ततोऽर्कवैश्वानरकाञ्चनप्रभं सुतं तदोत्सङ्गगतं सदागतेः ।
चतुर्मुखो वीक्ष्य कृपामथाकरोत्सदेवगन्धर्वऋषियक्षराक्षसैः ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पंचत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ।

अत्रापि मारुतेश्चरितमेव कथयित्वा मैत्रावरुणिः स्वाश्रमं जिगमिषुरभूत्तदा रामः अचिरादेवाहं यागमारप्स्ये तदा भवानागमनेनानुगृह्णातु मामिति प्रार्थ्य गृहीततदनुमतिश्च तं सादरं प्राहिणोत् ।

ततः पितामहं दृष्ट्वा वायुः पुत्रवधार्दितः । शिशुकं तं समादाय उत्तस्थौ धातुरग्रतः ॥ १ ॥
चलकुण्डलमौलिस्रक्तपनीयविभूषणः । पादयोर्न्यपतद्वायुस्त्रिरुपस्थाय वेधसे ॥ २ ॥
तं तु वेदविदा तेन लम्बाभरणशोभिना । वायुमुत्थाप्य हस्तेन शिशुं तं परिमृष्टवान् ॥ ३ ॥
स्पृष्टमात्रस्ततः सोऽथ सलीलं पद्मजन्मना । जलसिक्तं यथा सस्यं पुनर्जीवितमाप्तवान् ॥ ४ ॥

६३] ति० टी०–रुक्प्रदः शूलादिरोगप्रदः । गमिष्याम अप्रसाद्येत्यसंधिरार्षः ॥ ६३ ॥

रा० टी०–तदिति । तत्तस्माद्धेतोः नोस्माकं रुक्प्रदः रुजां प्रदाता मारुतो यत्रास्ते तत्र यामः अदितेस्सुतं पवनमप्रसाद्य विनाशं मा न गमिष्यामः ॥ ६३ ॥

गो० टी०–तदिति । रुक्प्रदः शूलरोगप्रदः । गमिष्याम अप्रसाद्येति संधिरार्षः ॥ ६३ ॥

६४] ति० टी०–आस्त्यास्ते ॥ ६४ ॥

रा० टी०–तत इति । मारुतः सुरेन्द्राभिहतं सुतं प्रगृह्य यत्रास्यति आस्ते तत्र प्रजापतिर्जगाम ॥ ६४ ॥

गो० टी०–तत इति । तत्रास्यतीति । यत्र अस्यति तिष्ठतीति यावत् ॥ ६४ ॥

६५] ति० टी०–सदागतेर्वायोः । गन्धर्वऋषियक्षेति गुरुलघुभेद आर्षः ॥ ६५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रा० टी०–तत इति । चतुर्मुखः सदागतेः पवनस्य उत्संगगतं सुतं वीक्ष्य कृपामकरोत् चरमपादेऽक्षराधिक्यं छन्दसां वैलक्षण्यद्योतनाय ॥ ६५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चत्रिंशस्सर्गः ॥ ३५ ॥

गो० टी०–तत इति । सदागतेर्वायोः । गन्धर्वर्षियक्षेति गुरुलघुभेद आर्षः ॥ ६५ ॥

इति श्रीगोविन्द० मणिमुकुटाख्याने उत्तरश्रीरामायण० पञ्चत्रिंशः सर्गः ॥ ३५ ॥

१] ति० टी०–तत इति ॥ १ ॥

रा० टी०–ब्रह्मकर्तृकपवनसुतदर्शनानन्तरकालिकं वृत्तान्तमाह–तत इत्यादिभिः । पुत्रवधार्दितो वायुः पितामहं दृष्ट्वा शिशुकमनुकम्पितसुतं समादाय धातुरग्रत उत्तस्थौ ॥ १ ॥

गो० टी०–ततः पितामहमित्यादि ॥ १ ॥

२] ति० टी०–स्रक्तपनीयेति । तपनीयस्रगित्यर्थः । त्रिरुपस्थाय न्यपतत् । उपस्थानपूर्वकं त्रिः साष्टाङ्गं प्रणतवानित्यर्थः ॥ २ ॥

रा० टी०–चलदिति । चलती कुण्डले यस्य मौलिरितिश्रेष्ठा स्रक् यस्य स एव स इति कर्मधारयः तपनीयानि स्वर्णमयानि विभूषणानि यस्य स वायुः वेधसे त्रिरुपस्थाय उपस्थानपूर्वकं प्रणम्य पादयोर्न्यपतत् ॥ २ ॥

गो० टी०–चलदित्यादि । तिस्रोपस्थाय त्र्युपस्थाय । अलुगप्यार्षः । त्रिरुपस्थाय चेति पाठः न्यपतदिति । उपस्थानपूर्वकं त्रिःसाष्टाङ्गमनमदित्यर्थः ॥ २ ॥

३–४] ति० टी०–वेदविदानादीतोऽशेषवेदार्थविदा लम्बाभरणशोभिना हस्तेन वायुमुत्थाप्य । परिमृशः स्पर्शः ॥ ३ ॥ ४ ॥

रा० टी०–तमिति । वेदविद् ब्रह्मा आतेन विस्तृतेन

१ सुता इति गो. पा. । २ तत्रास्यति यत्रेति गो. पा. ।

प्राणवन्तमिमं दृष्ट्वा प्राणो गन्धवहो मुदा । चचार सर्वभूतेषु संनिरुद्धं यथापुरा ॥ ५ ॥
मरुद्रोधाद्विनिर्मुक्तास्ताः प्रजा मुदिताभवन् । शीतवातविनिर्मुक्ताः पद्मिन्य इव साम्बुजाः ॥ ६ ॥
ततस्त्रियुग्मस्त्रिककुत्त्रिधामा त्रिदशार्चितः । उवाच देवता ब्रह्मा मारुतप्रियकाम्यया ॥ ७ ॥
भो महेन्द्राग्निवरुणा महेश्वरधनेश्वराः । जानतामपि वः सर्वं वक्ष्यामि श्रूयतां हितम् ॥ ८ ॥
अनेन शिशुना कार्यं कर्तव्यं वो भविष्यति । तद्दद्ध्वं वरान्सर्वे मारुतस्यास्य तुष्टये ॥ ९ ॥
ततः सहस्रनयनः प्रीतियुक्तः शुभाननः । कुशेशयमयीं मालामुत्क्षिप्येदं वचोऽब्रवीत् ॥ १० ॥
मत्करोत्सृष्टवज्रेण हनुरस्य यथा हतः । नाम्ना वै कपिशार्दूलो भविता हनुमानिति ॥ ११ ॥
अहमस्य प्रदास्यामि परमं वरमद्भुतम् । इतः प्रभृति वज्रस्य ममावध्यो भविष्यति ॥ १२ ॥
मार्तण्डस्त्वब्रवीत्तत्र भगवांस्तिमिरापहः । तेजसोऽस्य मदीयस्य ददामि शतिकां कलाम्॥१३॥

लम्बाभरणशोभिना हस्तेन वायुसुत्थाप्य तं हनुमन्तं परिमृष्टवान् वेदविदेति छेदे तु हस्तस्यैवेदमपि विशेषणं वेदस्थापनकर्त्रेति तदर्थः ॥ ३ ॥

रा० टी०–स्पृष्टमात्र इति । पद्मजन्मना स्पृष्टमात्रो हनुमान् जलसिक्तं सस्यमिव जीवितं पुनरवाप्तवान् ॥ ४ ॥

गो० टी०–तमिति । हनुमज्जीवनार्थम् अङ्गुल्यग्रविन्यस्तवेदपदेन वेदविदा विदितनिखिलवेदवेदान्तेन ब्रह्मणा लम्बाभरणशोभिना हस्तेन तं शिशुं च परिमृष्टवान् ॥ ३–४ ॥

५–६] ति० टी०–सर्वभूतेषु संनिरुद्धं संत्यक्तनिरोधं यथा भवति तथा । यथापुरा यथापूर्वं प्राणापानात्मना चचार५–६

रा० टी०–प्राणवन्तमिति । प्राणो जीवनकर्ता गंधवहो वायुः इमं हनुमन्तं प्राणवन्तं दृष्ट्वा सर्वभूतेषु संनिरुद्धं प्राणादिजातम् यथा पुरा पूर्ववच्चचार चालयामास यदि तु सामान्ये नपुंसकत्वकल्पनया सन्निरुद्धमित्यपि वायुविशेषणं तदा नान्तर्भावितणिजर्थकल्पना ॥ ५ ॥

गो० टी०–प्राणवन्तमिति । सर्वभूतेषु सन्निरुद्धम् अन्तःप्रतिष्ठितं यथा भवति तथा प्राणः प्राणभूतश्चचार ॥ ६ ॥

रा० टी०–मरुदिति । मरुतो रोधाद् विनिर्मुक्ताः प्रजाः साम्बुजा अम्बुजसहिताः पद्मिन्यः कुमुदास्सरस्यो वा इव मुदिताभवन् अभवन् ॥ ६ ॥

गो० टी०–मरुदिति । शीतदाहो हिमेन दाहः । शीतवातविनिर्मुक्ता इति च पाठः ॥ ६ ॥

७] ति० टी०–त्रियुग्मस्त्रीणि युग्मानि यस्य सः । तानि यशोवीर्यं ऐश्वर्यश्रियौ ज्ञानवैराग्ये च त्रिककुत्त्रिमूर्तिप्रधानः । त्रिधामा त्रिलोकस्थानः ॥ ७ ॥

रा० टी०–तत इति । त्रीणि यशोवीर्यं ऐश्वर्यश्रियौ ज्ञानवैराग्ये च युग्मानि यस्य त्रिककुत्त्रिमूर्तिमुख्यः त्रयो लोका धाम स्थानं यस्य त्रिदशैरर्चितो ब्रह्मा मारुतप्रियकाम्यया देवताः उवाच ॥ ७ ॥

गो० टी०–तत इति । त्रीणि युग्मानि यस्यासौ त्रियुग्मः । तानि तु ऐश्वर्यं वीर्यं यशः श्रीः ज्ञानं वैराग्यम् । त्रिककुत् त्रिमूर्तिप्रधानः । त्रिधामा त्रिलोकगृहः । त्रिदशार्चितः देवार्चितः ॥ ७ ॥

८–९] ति० टी०–वक्ष्यामि श्रूयतामिति गुरुवैषम्यमार्षम् ॥ ८–९ ॥

रा० टी०–तदाकारमाह–भो महेन्द्रेति द्वाभ्याम् । भो महेन्द्रादयः सर्वं जानतामपि वो युष्माकं हितं वक्ष्यामि अतः श्रूयताम् ॥ ८ ॥

रा० टी०–तद्वचनमेवाह—अनेनेति । शिशुना अनेन हनुमता कर्तव्यं वः कार्यं भविष्यति तत्तस्माद्धेतोः मारुतस्य तुष्टये सर्वे यूयं वरान् ददध्वम् ॥ ९ ॥

गो० टी०–भो इति । ईश इत्यनेन रुद्रः इत्युच्यते प्रजेश्वरः यमः । वक्ष्यामि श्रूयतामिति गुरुवैषम्यमार्षम् ॥ ८ ॥९

१०–११] ति० टी०–कुशेशयमयीं काञ्चनपद्ममयीम् ॥ १०–११ ॥

रा० टी०–तत इति । ततो ब्रह्मवचनश्रवणानन्तरं सहस्रनयनः कुशेशयमयीं कांचनपद्मनिर्मितां मालाम् उत्क्षिप्य उत्क्षेपणपूर्वकं प्रदाय अब्रवीत् ॥ १० ॥

रा० टी०–तदाकारमाह–मदिति । द्वाभ्याम् । यथा यतः मत्करोत्सृष्टवज्रेण अस्य हनुर्हतः अतः कपिशार्दूलः नाम्ना हनुमान् इति भविता ॥ ११ ॥

गो० टी०–तत इति । कुशेशयमयीं काञ्चनपद्ममयीमित्यर्थः ॥ १०–१२ ॥

१२] ति० टी०–अहं मालापूर्वं वरं दास्यामि ॥ १२ ॥

रा० टी०–अहमिति । इतः प्रभृति मम वज्रस्य अवध्यो भविष्यति इति वरमहमस्य प्रदास्यामि प्रददामि ॥ १२ ॥

१३] ति० टी०–शतिकां कलां शततममंशम् ॥ १३ ॥

रा० टी०–मार्तण्ड इति । मार्तण्डस्सूर्योब्रवीत्तदाकारमाह मदीयस्य तेजसः शतिकां कलां शततममंशमस्य अस्मै ददामि ॥ १३ ॥

गो० टी०–मार्तण्ड इति । शतिकां शतैकांशभूताम्॥१३॥

१ ईशवरुणप्रजेश्वरधनेश्वराः इति गो० पा० ।

यदा चै शास्त्राण्यध्येतुं शक्तिरस्य भविष्यति । तदास्य शास्त्रं दास्यामि येन वाग्मी भविष्यति॥१४॥
[नैचास्य भविता कश्चित्सदृशः शास्त्रदर्शने ।]
वरुणश्च वरं प्रादान्नास्य मृत्युर्भविष्यति । वर्षायुतशतेनापि मत्पाशादुदकादपि ॥ १५ ॥
यमो दण्डादवध्यत्वमरोगत्वं च दत्तवान् । वरं ददामि संतुष्ट अविषादं च संयुगे ॥ १६ ॥
गदेयं मामिका नैनं संयुगेषु वधिष्यति । इत्येवं धनदः प्राह तदा ह्येकाक्षिपिङ्गलः ॥ १७ ॥
मत्तो मदायुधानां च अवध्योऽयं भविष्यति । इत्येवं शंकरेणापि दत्तोऽस्य परमो वरः ॥ १८ ॥
विश्वकर्मा च दृष्ट्वैमं बालं प्रति महारथः । [शिल्पिनां प्रवरः प्रादाद्वरमस्य महामतिः ॥]
मत्कृतानि च शस्त्राणि यानि दिव्यानि तानि च । तैरवध्यत्वमापन्नश्चिरजीवी भविष्यति ॥ १९ ॥
दीर्घायुश्च महात्मा च ब्रह्मा तं प्राब्रवीद्वचः । सर्वेषां ब्रह्मदण्डानामवध्यत्वं भविष्यति ॥ २० ॥
ततः सुराणां तु वरैर्दृष्ट्वा ह्येनमलंकृतम् । चतुर्मुखस्तुष्टमना वायुमाह जगद्गुरुः ॥ २१ ॥
अमित्राणां भयकरो मित्राणामभयंकरः । अजेयो भविता पुत्रस्तव मारुत मारुतिः ॥ २२ ॥
कामरूपः कामचारी कामगः प्लवतां वरः । भवत्यव्याहतगतिः कीर्तिमांश्च भविष्यति ॥ २३ ॥
रावणोत्सादनार्थानि रामप्रीतिकराणि च । रोमहर्षकराण्येव कर्ता कर्माणि संयुगे ॥ २४ ॥

१४-१५] ति० टी०-शास्त्रं शास्त्राध्ययनं तदर्थज्ञानं च ॥ १४-१५ ॥

रा० टी०-यदेति । यदा शास्त्राणि अध्येतुमस्य शक्तिर्भविष्यति तदा अस्य अस्मै शास्त्रं दास्यामि अध्यापयिष्यामि ॥ १४ ॥

गो० टी०-यदा त्विति । शास्त्रं शास्त्रार्थज्ञानम् । ऐन्द्र्याकरणमित्यर्थः ॥ १४ ॥

रा० टी०-वरुण इति । वर्षायुतशतेनापि बहुभिरपि वर्षैर्मत्पाशादुदकाच्चास्य मृत्युर्न भविष्यति इति वरं वरुणः प्रादात् ॥ १५ ॥

गो० टी०-न चेति । शास्त्रदर्शने शास्त्रज्ञाने वरुणोक्तवरस्तु स्वयुद्धनिमित्तमरणाभावमात्रम् ॥ १५-१७ ॥

१६-१७] ति० टी०-तुष्ट अविषादमित्यार्षोऽसंधिः ॥ १६-१७ ॥

रा० टी०-यम इति । दण्डावध्यत्वमरोगत्वं च यमो दत्तवान् अहं पृथक् वरमिति संयुगे अविषादम् मामिका गदा एनं न वधिष्यति इति च वरं संतुष्टोहं ददामि इत्येकाक्षिपिंगलो धनदः प्राह सार्द्धश्लोक एकान्वयी ॥ १६ ॥ १७ ॥

१८-१९] ति० टी०-मदायुधानां शूलादिपाशुपतास्त्रान्तानाम् ॥ १८-१९ ॥

रा० टी०-मत्त इति । मत्तो मदायुधानां च अवध्योयं भविष्यति इत्येवं वरः शंकरेण दत्तः ॥ १८ ॥

गो० टी०-मत्त इति । परमो वरः शूलपाशुपतास्त्रायवध्यत्वमित्यर्थः ॥ १८ ॥

रा० टी०-विश्वकर्मेति । मत्कृतानि यानि तानि मद्बुद्धिविषयीभूतानि यानि च दिव्यानि शस्त्राणि तैरवध्यत्वमापन्नः प्राप्तोयं चिरजीवी भविष्यति इति वरं विश्वकर्मा ददाविति शेषः सार्द्धश्लोक एकान्वयी ॥ १९ ॥

गो० टी०-विश्वकर्मेति । यज्ञायायुधानामपि विश्वकर्मनिर्मितत्वेपि तदतिरिक्तायुधपरमिदम् ॥२०-२६ ॥

२०-२४] ति० टी०-महात्मा महानात्मा यस्य सः । ब्रह्मज्ञ इति यावत् । सर्वेषां ब्रह्मास्त्रान्तानाम् । ब्रह्मदण्डो ब्रह्मर्षिक्रियमाणः संहारोदेश्यकः शापो न भविष्यति । अस्येति शेषः ॥ २०-२४ ॥

रा० टी०-दीर्घेति । दीर्घायुर्महात्मा अतिप्रयत्नवान् भविष्यति ब्रह्मदण्डानामवध्यत्वं च भविष्यति प्राप्स्यति इति वरं ब्रह्मा तं प्राब्रवीत् भविष्यर्तातिशब्दाद्वत्या उभयान्वयी दीर्घायुर्महात्मनोर्ब्रह्मविशेषणत्वे तु नेयं कल्पना ॥ २० ॥

गो० टी०-सर्वेषामिति । सर्वेषां ब्रह्मास्त्रान्तानामित्यर्थः । ब्रह्मदण्डानां ब्रह्मशापानां ब्रह्मायुधानां वा । दीर्घायुश्चेति ॥१९॥

रा० टी०-तत इति । सुराणां वरैरलंकृतमेनं हनुमन्तं दृष्ट्वा चतुर्मुखो ब्रह्मा वायुमाह ॥ २१ ॥

रा० टी०-तदाकारमाह—अमित्राणामिति । मारुतिः तव पुत्रः अजेयो भविता ॥ २२ ॥

रा० टी०-कामरूप इति । प्लवतां वरो हनुमान् कामगत्वादिविशिष्टो भवति भविष्यति ॥ २३ ॥

रा० टी०-रावण इति । रामप्रीतिकराणि कर्माणि अयं कर्ता ॥ २४ ॥

१ त्विति गो.पा.। २ इदमर्धमधिकं गो.पा.। ३ नित्यश्च इति गो.पा.। ४ एनं बालमूर्योपमं शिशुमिति गो.पा.। ५ इदमर्धमधिकं गो.पुस्त.। ६ संयुगे इति गो. पा. । ७ इदंपद्य " इत्येवं शक्रेणापीत्यष्टादशपद्योत्तरार्धपरतो गो. पुस्तके तत्रापि पूर्वोत्तरपादयोर्व्यत्यासोऽपि दृश्यते । ८ अयमिति गो.पाठः।

एवमुक्त्वा तमामन्त्र्य मारुतं त्वमरैः सह । यथागतं ययुः सर्वे पितामहपुरोगमाः ॥ २५ ॥
सोऽपि गन्धवहः पुत्रं प्रगृह्य गृहमानयत् । अञ्जनायास्तमाख्याय वरदत्तं विनिर्गतः ॥ २६ ॥
प्राप्य राम वरानेष वरदानबलान्वितः । जवेनात्मनि संस्थेन सोऽसौ पूर्ण इवार्णवः ॥ २७ ॥
तरसा पूर्यमाणोऽपि तदा वानरपुंगवः । आश्रमेषु महर्षीणामपराध्यति निर्भयः ॥ २८ ॥
स्रुग्भाण्डान्यग्निहोत्राणि वल्कलानां च संचयान् । भग्नविच्छिन्नविध्वस्तान्संशान्तानां करोत्ययम् २९
एवंविधानि कर्माणि प्रावर्तत महाबलः । सर्वेषां ब्रह्मदण्डानामवध्यः शंभुना कृतः ॥ ३० ॥
जानन्त ऋषयः सर्वे सहन्ते तस्य शक्तितः । तथा केसरिणा त्वेष वायुना सोऽञ्जनीसुतः॥ ३१ ॥
प्रतिषिद्धोऽपि मर्यादां लङ्घयत्येव वानरः । ततो महर्षयः क्रुद्धा भृग्वङ्गिरसवंशजाः ॥ ३२ ॥
शेपुरेनं रघुश्रेष्ठ नातिक्रुद्धातिमन्यवः । बाधसे यत्समाश्रित्य बलमस्मान्प्लवंगम ॥ ३३ ॥
तद्दीर्घकालं वेत्तासि नास्माकं शापमोहितः । यदा ते स्मार्यते कीर्तिस्तदा ते वर्धते बलम् ॥ ३४ ॥
ततस्तु हृततेजौजा महर्षिवचनौजसा । एषो श्रमाणि तान्येव मृदुभावं गतोऽचरत् ॥ ३५ ॥

२५-२८] ति० टी०–एवमुक्त्वा । महेन्द्रादय इत्यर्थः । अमरैः परिवारदेवगणैः वरदत्तं दत्तवरम् ॥ २५–२८ ॥

रा० टी०–एवमिति । मारुतमेवमुक्त्वा आमन्त्र्य तदाज्ञां गृहीत्वेत्यर्थः अमरैस्सह पितामहपुरोगमाः सर्वे ययुः ॥ २५ ॥

रा० टी०–स इति । स वायुः पुत्रं प्रगृह्य गृह्यमानयत् तं वरदत्तं दत्तं वरमञ्जनाया आख्याय विनिर्गतश्च गृहादिति शेषः २६

रा० टी०–प्राप्येति । एष हनुमान् वरान्प्राप्य वरदानबलान्वितोभवदिति शेषः अत एव आत्मनि संस्थेन जवेन अर्णव इव पूर्णोभवदिति शेषः ॥ २७ ॥

रा० टी०–तरसेति । वानरपुंगवः महर्षीणामाश्रमेषु अपराध्यति ॥ २८ ॥

गो० टी०–स इति । वरदत्तं दत्तवरम् ॥ २८–२९ ॥

२९] ति० टी०–स्रुग्भाण्डानि यज्ञोपकरणानि । अग्निहोत्राण्यग्निहोत्रसाधनभूताग्नयः । भग्नविच्छिन्नविध्वस्तशब्दाः स्रुग्भाण्डादिषु क्रमेण योज्याः । संशान्तानां सम्यक्शान्तानाम् शान्तिप्रधानानामृषीणामिति यावत् ॥ २९ ॥

रा० टी०–तदाकारमाह—स्रुगिति । संशान्तानामत्यन्तशान्तिविशिष्टानामृषीणां स्रुगभाण्डादीनि भग्नविछिन्नविध्वस्तान् करोति ॥ २९ ॥

गो० टी०–स्रुग्भाण्डानीति । स्रुग्भाण्डानि यज्ञोपकरणानि । संशान्तानां शान्तिप्रधानानाम् ॥ ३० ॥

३०] ति० टी०–प्रावर्तत । प्रावर्तयदित्यर्थः । शंभुना ब्रह्मणा ॥ ३० ॥

रा० टी०–एवमिति । शम्भुना ब्रह्मणा ब्रह्मदण्डानामवध्यः कृतो महाबलो हनुमानेवंविधानि कर्माणि प्रावर्तत अकरोत् जानन्त ऋषयस्तु तस्य ब्रह्मादेः शक्तितः हेतोः सहन्ते सार्द्धश्लोक एकान्वयी ॥ ३० ॥

गो० टी०–एवमिति । शंभुना ब्रह्मणा । शम्भू ब्रह्मत्रिलोचनावित्यमरः ॥ ३१ ॥

३१–३२] ति० टी०–जानन्तः । वरदानमिति शेषः । तस्य ब्रह्मणः शक्तितो वरसामर्थ्यात्सहन्ते क्षमन्ते तस्य चेष्टितमिति शेषः ॥ ३१–३२ ॥

रा० टी०–तथेति । केशरिणा वायुना च प्रतिषिद्धोपि स हनुमान् मर्यादां दृढसेवितपथं लंघयत्येव तेन तस्य बालत्वं सूचितम् ॥ ३१ ॥

गो० टी०–जानन्त इति । तस्य शक्तितः ब्रह्मणो वरशक्तितः ॥ ३२ ॥ ३३ ॥

रा० टी०–तत इति । क्रुद्धा निवृत्तकोपा अत एव विमन्यवः उपदेशादिना स्वाश्रितजनकोपनिवर्तकाः अपि महर्षयः नातिक्रुद्धा बालापराधो न गणनीय इत्यादि विचारेणातिक्रोधरहिताः स्वीकृतेषत्कोपा इत्यर्थः सन्तः एनं हनुमन्तं शेपुः एतेन ऋषीणां मर्यादापालकत्वं ध्वनितम् ॥ ३२ ॥

गो०टी०–तत इति । नातिक्रुद्धातिमन्यवः । क्रोधो जिघांसा मन्युरमर्षः अतिक्रुद्धाः अतिमन्यवश्च न भवन्तीति तथा ॥३४॥

३३] ति० टी०–क्रोधो जिघांसा । मन्युरमर्षः । अतिक्रुद्धा अतिमन्यवश्च न भवन्तीत्यर्थः ॥ ३३ ॥

३४] ति० टी०–तद्दीर्घेति । तद्बलमित्यर्थः ॥ ३४ ॥

रा० टी०–शापाकारमाह–बाधस इति । यद्बलं समाश्रित्य अस्मांस्त्वं बाधसे तद्बलमस्माकं शापेन मोहितस्त्वं दीर्घकालं बहुकालपर्यन्तं न वेत्तासि विस्मरिष्यसीत्यर्थः ३३॥३४

गो० टी०–बाधस इति । तद्दीर्घेति तद्बलम् ॥ ३५ ॥

३५] ति० टी०–हृततेजौजा अपहृतस्ववीर्यबलज्ञानः । एषो श्रमाणीत्यार्षः संधिः ॥ ३५ ॥

रा० टी०–पदेति । यदा कीर्तिः स्मार्यते केनचिदिति

१ वल्कलाजिनेति गो. पा. । २ तं वै क्षमन्त इति गो. पा. । ३ अंजनेति गो. पा. ।

अथर्क्षरजसो नाम वालिसुग्रीवयोः पिता । सर्ववानरराजासीत्तेजसा इव भास्करः ॥ ३६ ॥
स तु राज्यं चिरं कृत्वा वानराणां महेश्वरः । ततस्त्वर्क्षरजा नाम कालधर्मेण योजितः ॥ ३७ ॥
तस्मिन्नस्तमिते चाथ मन्त्रिभिर्मन्त्रकोविदैः । पित्र्ये पदे कृतो वाली सुग्रीवो वालिनः पदे ॥ ३८ ॥
सुग्रीवेण समं त्वस्य अद्वैधं छिद्रवर्जितम् । आबाल्यं सख्यमभवदनिलस्याग्निना यथा ॥ ३९ ॥
एष शापवशादेव न वेद बलमात्मनः । वालिसुग्रीवयोर्वैरं यदा राम समुत्थितम् ॥ ४० ॥
न ह्येष राम सुग्रीवो भ्राम्यमाणोऽपि वालिना । देव जानाति न ह्येष बलमात्मनि मारुतिः ॥ ४१ ॥
ऋषिशापाहृतबलस्तदैव कपिसत्तमः । सिंहः कुञ्जररुद्धो वा आस्थितः सहितो रणे ॥ ४२ ॥
पराक्रमोत्साहमतिप्रतापसौशील्यमाधुर्यनयानयैश्च ।
गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽप्यधिकोऽस्ति लोके ॥ ४३ ॥

शेषः तदा ते बलं वर्द्धते वर्द्धिष्यते अर्द्धं पृथक् । तत इति । ततः शापानन्तरं महर्षिवचनौजसा हृततेजौजाः अत एव मृदुभावं गतः एष हनूमान् अश्रमाणि श्रमनिवर्तकानि तान्येव स्थानानि अचरत् तेजौजा इत्यत्र संधिरार्षः तेजशब्दस्यादन्तत्वं वा ॥ ३६ ॥

गो० टी०-तत इति । हृततेजौजाः अपहृतस्ववीर्यबलज्ञान इत्यर्थः । एषोश्रमाणीति आर्षः संधिः ॥ ३६ ॥

३६-३७] **ति० टी०-**ऋक्षरजस इत्यकारान्तः ॥ ३६-३७ ॥

रा० टी०-अथेति । ऋक्षरजसो नाम वालिसुग्रीवयोः पिता सर्ववानरराजा सर्ववानरराज आसीत् ॥ ३६ ॥

रा० टी०-स इति । ऋक्षरजा नाम स वालिसुग्रीवयोः पिता कालधर्मेण मरणेन योजितो बभूवेति शेष ऋक्षरजसर्क्षरजसौ पर्यायौ ॥ ३७ ॥

गो०टी०-अथेति । ऋक्षरजस इत्यकारान्तोप्यस्ति ३७-३८

३८] वालिनः पदे यौवराज्ये ॥ ३८ ॥

रा० टी०-तस्मिन्निति । तस्मिन् ऋक्षरजस अस्तं मरणमिते प्राप्ते सति मन्त्रिभिः पित्र्ये पदे वाली कृतः राजत्वं प्रापित इत्यर्थः सुग्रीवस्तु वालिनः पदे कृतः युवराजत्वेन स्थापित इत्यर्थः ॥ ३८ ॥

गो० टी०-तस्मिन्निति । वालिनः पदे यौवराज्ये ॥ ३९ ॥

३९] **ति० टी०-**अद्वैधमेकप्रकारम् । आबाल्यं बाल्यमारभ्य ॥ ३९ ॥

रा० टी०-सुग्रीवेणेति । अद्वैधमेकाकारं छिद्रवर्जितं परस्परं दोषदर्शनरहितं सुग्रीवेण सममस्य हनूमतस्सख्यमाबाल्यात् बाल्यादारभ्य अभवत् तत्र दृष्टान्तः अनिलस्य सख्यमग्निना यथा ॥ ३९ ॥

गो० टी०-सुग्रीवेणेति । अस्य हनूमतः सुग्रीवेण सह आबाल्यं बाल्यमारभ्य ॥ ४०-४३ ॥

४०] **ति० टी०-**यदा वैरसमुत्थितं तदैष हनुमाञ्शापवशादेवात्मनो बलं न वेद ॥ ४० ॥

४१] **ति० टी०-**ननु हनूमतो ज्ञानाभावेऽपि सुग्रीवः किमिति न बोधितवांस्तत्राह—**न ह्येष इति ।** वालिना भ्राम्यमाण एष सुग्रीवोऽपि तद्बलं न वेदेत्यनुकर्षः तदपि देवकार्यं यावदेव । तदा तु जाम्बवता स्मारितः समुद्रतीरे तज्ज्ञातवान् उक्तमेव पुनराह—**देवेति** ॥ ४१ ॥

रा० टी०-एष इति । शापवशादेव एष हनूमान् आत्मनो बलं न वेद अर्द्धं पृथक् । वालीति यदा वालिसुग्रीवयोर्वैरं समुत्थितं तदा वालिना भ्राम्यमाणः एष सुग्रीवः बलं हनूमतो वीर्यं न जानाति मारुतिरपि आत्मनि वियमानं बलं न जानाति सार्द्धश्लोक एकान्वयी ॥ ४० ॥ ४१ ॥

४२] **ति० टी०-**तदा सुग्रीवविपत्समये आहृतबलोऽपहृतस्ववलपरिज्ञानः, अत एव रणे कुञ्जररुद्धः 'सिंह इव सहितः सुग्रीवसहितः यमास्थितः स्थित एव, न तु युद्धं कृतवानिति । 'सिंहः कुञ्जररुद्धेव' इति पाठान्तरम् । तत्र संधिरार्षः ॥ ४२ ॥

रा० टी०-ऋषीति । तदा वालिसुग्रीववैरसमये ऋषिशापेन आहृतं बलं यस्य स एष हनूमान् कुंजररुद्धः सिंहो वा इव सहितस्सुग्रीवेण संयुक्तस्सन्रणे आस्थितः ॥ ४२ ॥

गो०टी०-सिंह इति । रणे युद्धादौ स्वबलमास्थितोऽभूत् ४४

४३] **ति० टी०-**पराक्रमो महत्स्वपि युद्धकार्येषूत्साहः उत्साहपदेनेतरकार्यविषयः सः मतिरर्थनिर्धारणम् प्रतापः प्रभावः सौशील्यं सुस्वभावत्वम् माधुर्यं वाचि नयानयौ तत्परिज्ञाने प्रवृत्तिनिवृत्ती इत्यन्ये गाम्भीर्यमापद्यक्षोभः सुवीर्यं स्वरक्षणेन परपराभवः धैर्यमकम्प्यचित्तता । हनूमत एतैर्गुणैः कोऽप्यधिकः । न कोऽपीत्यर्थः ॥ ४३ ॥

रा० टी०-पराक्रमेति । पराक्रमादिभिः हनूमतोऽधिकः लोके कस्मिंश्चिद्भुवने कोस्ति न कोपीत्यर्थः तत्र नयानयौ सौशील्यमाधुर्ययोर्ज्ञाने किञ्च नयो महात्मस्तु विनम्रता अनयः खलेषु पारुष्यम् वीर्यं स्वरक्षणेन परविजयः ॥ ४३ ॥

गो० टी०-पराक्रमेति । सौशील्यं सुस्वभावत्वम् । माधुर्यं वाचः । नयानयौ प्रवृत्तिनिवृत्ती । गाम्भीर्यं चित्तस्य । धैर्यम् आपद्यक्षोभः ॥ ४५ ॥

१ भास्करप्रभ इति गो. पा. । २ हरीश्वर इति गो. पा. । ३ संगत इति गो. पा. । ४ अभीति गो. पा. ।

असौ पुनर्व्याकरणं ग्रहीष्यन्सूर्योन्मुखः प्रष्टुमना कपीन्द्रः ।
उद्यद्गिरेरस्तगिरिं जगाम ग्रन्थं महद्धारयनप्रमेयः ॥ ४४ ॥
ससूत्रवृत्त्यर्थपदं महार्थं ससंग्रहं सिद्ध्यति वै कपीन्द्रः ।
नह्यस्य कश्चित्सदृशोऽस्ति शास्त्रे वैशारदे छन्दगतौ तथैव ॥ ४५ ॥
सर्वासु विद्यासु तपोविधाने प्रस्पर्धतेऽयं[2] हि गुरुं सुराणाम् ।
[[3]सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि ते प्रसादात् ।]
प्रवीविविक्षोरिव सागरस्य लोकान्दिधक्षोरिव पावकस्य
लोकैक्षयेष्वेव यथान्तकस्य हनूमतः स्थास्यति कः पुरस्तात् ॥ ४६ ॥
एषेव चान्ये च महाकपीन्द्राः सुग्रीवमैन्दद्विविदाः सनीलाः ।
सतारतारेयनलाः सरम्भास्त्वत्कारणाद्राम सुरैर्हि सृष्टाः ॥ ४७ ॥
गैंजो गवाक्षो गवयः सुदंष्ट्रो मैन्दः प्रभो ज्योऽतिमुखो नलश्च ।
एते च ऋक्षाः सह वानरेन्द्रैस्त्वत्कारणाद्राम सुरैर्हि सृष्टाः ॥ ४८ ॥
तदेत्कथितं सर्वं यन्मां त्वं परिपृच्छसि । हनूमतो बालभावे कर्मैतत्कथितं मया ॥ ४९ ॥
श्रुत्वागस्त्यस्य कथितं रामः सौमित्रिरेव च । विस्मयं परमं जग्मुर्वानरा राक्षसैः सह ॥ ५० ॥
अगस्त्यस्त्वब्रवीद्रामं सर्वमेतच्छुतं त्वया । दृष्टः संभाषितश्चासि राम गच्छामहे वयम् ॥ ५१ ॥
श्रुत्वैतद्राघवो वाक्यमगस्त्यस्योग्रतेजसः । प्राञ्जलिः प्रणतश्चापि महर्षिमिदमब्रवीत् ॥ ५२ ॥
अद्य मे देवतास्तुष्टाः पितरः प्रपितामहाः । युष्माकं दर्शनादेव नित्यं तुष्टाः सबान्धवाः ॥ ५३ ॥

४४-४५] ति० टी०-उद्यद्गिरेरुदयगिरेः । महद्ग्रन्थं धारयन्नर्थतः पाठतश्च गृह्णन् । धारयनप्रमेय इति नुडभाव आर्षः । सूर्यसांमुख्यार्थं तावद्गमनम् ॥ कोऽसौ ग्रन्थस्तत्राह- **ससूत्रेति** । सूत्रमष्टाध्यायीलक्षणम् । वृत्तिस्तात्कालिकसूत्रवृत्तिः । अर्थपदं सूत्रार्थबोधकपदवद्वार्तिकम् । महार्थं महाभाष्यं पतञ्जलिकृतम् । ससंग्रहं व्याडिकृतसंग्रहाख्यग्रन्थसहितम् । सिध्यति वै सिद्धो भवति । शास्त्रान्तरेष्वपीत्यर्थः । तदेवाह— नह्यस्य सदृशः शास्त्रे कश्चित् । छन्दगतौ पूर्वोत्तरमीमांसामुखेन वेदार्थनिर्णये । वैशारदे वैदुष्ये । विशिष्य नवमव्याकरणकर्ता हनूमानिति च प्रसिद्धिरिति कतकः ॥ ४४ ॥ ४५ ॥

रा० टी०-**असाविति** । व्याकरणं ग्रहीष्यन् ग्रहीतुमिच्छन् अत एव प्रष्टुमनाः सूर्यात्प्रश्नविषयिकेच्छावान् अत एव सूर्योन्मुखः असौ हनूमान् महद्ग्रन्थं धारयन् धारयितुरुद्यद्गिरेः अस्तं गिरिं जगाम डमुडभाव आगमशास्त्रस्यानित्यत्वात् ॥ **स इति** । कपीन्द्रः सूत्रादिसहितं महार्थं महाभाष्यं सूर्यादेवीत्येति शेषः सिध्यति सिद्धोभवत् अत एव शास्त्रादा अस्य सदृशः कश्चिन्न तत्रार्थपदं सूत्रार्थबोधकं वार्तिकमित्यर्थः संग्रहः सौत्रधात्वादिशास्त्रं सांख्यादि वैशारदं नैपुण्यसम्पादकशिक्षादि छन्दगतिः छन्दसां ज्ञानमदन्तोऽपि छन्दशब्दः प्रसिद्धः ॥ ४४ ॥ ४५ ॥

गो० टी०-**असाविति** । उद्यद्गिरेः उदयगिरेरित्यर्थः । महद्ग्रन्थं व्याकरणग्रन्थम् । धारयन् अर्थतः पाठतश्च गृह्णन्नित्यर्थः । धार इति पाठे नुडभाव आर्षः । धारयते इति पाठान्तरम् ॥ **ससूत्रेति** । सूत्रमष्टाध्यायी । लक्षणं वृत्तिः सूत्रार्थमात्रप्रतिपादकग्रन्थः । अर्थपदं वार्तिकम् उक्तानुक्तदुरुक्तिचिन्तानुरूपम् । महार्थं भाष्यं विस्तरविवरणरूपम् । संग्रहं प्रकरणादि साध्यति साधयति धारयतीत्यर्थः । शास्त्रान्तरेष्वपि वैशारदे वैदुष्ये । छन्दगतौ छन्दःशास्त्रे ॥ ४६-४८ ॥

४६] ति० टी०-उक्तमेव स्पष्टयति—**सर्वास्विति** । अयं गुरुं प्रस्पर्धते । प्रवीविविक्षोर्युगान्ते भूमिमाप्लावयितुं तां प्रकर्षेण विशेषेण वेष्टुमिच्छोः । प्रवी इति दीर्घ आर्षः । लोकक्षय युगान्तकाले ॥ ४६ ॥

रा० टी०-**सर्वास्विति** । अयं हनूमान् विद्याश्च तपोविधाने च सुराणां गुरुं प्रस्पर्द्धते इव हि शब्द इवार्थे अर्द्धं पृथक् प्रेति सागरस्य सागरं प्रवीविविक्षोः प्रकर्षेण विशेषेण वेष्टुं प्रवेष्टुमिच्छोः पञ्चजनवधोद्यतविष्णोरिव वेदीर्घं आर्षः लोकान् दिधक्षोः पावकस्येव लोकक्षयेषु अन्तकस्य कालस्येव हनूमतः पुरस्तात्कस्यास्यति ॥ ४६ ॥ ४७ ॥

गो० टी०-**प्रेति** । प्रवीविविक्षोर्युगान्ते भूमिमाप्लावयितुं प्रकर्षेण विशेषेण वेष्टुमिच्छोः । युगक्षये काले युगान्तकाल इत्यर्थः ॥ ४६ ॥

४७-५३] ति० टी०-एषेव एष इव । संधिरार्षः । अन्येऽपि सृष्टाः । तारेयोऽङ्गदः ॥ ४७-५३ ॥

---

१ साध्यतीति गो. पा. । २ य इति गो. पा. । ३ इदमर्धमधिकं गो. पुस्त. । ४ युगक्षये ह्येवेति गो. पा. । ५ इदं पद्यं गो. पुस्त. नास्ति ।

विज्ञाप्यं तु ममैतद्धि यद्वदाम्यागतस्पृहः । तद्भवद्भिर्मम कृते कर्तव्यमनुकम्पया ॥ ५४ ॥
पौरजानपदान्स्थाप्य स्वकार्येष्वहमागतः । क्रतूनेहं करिष्यामि प्रभावाद्भवतां सताम् ॥ ५५ ॥
सदस्या मम यज्ञेषु भवन्तो नित्यमेव तु । भविष्यथ महावीर्या ममानुग्रहकाङ्क्षिणः ॥ ५६ ॥
अहं युष्मान्समाश्रित्य तपोनिर्धूतकल्मषान् । अनुगृहीतः पितृभिर्भविष्यामि सुनिर्वृतः ॥ ५७ ॥
तदागन्तव्यमनिशं भवद्भिरिह संगतैः । अगस्त्याद्यास्तु तच्छ्रुत्वा ऋषयः संशितव्रताः॥५८॥
एवमस्त्विति तं प्रोच्य प्रयातुमुपचक्रमुः । एवमुक्त्वा गताः सर्वे ऋषयस्ते यथागतम् ॥ ५९ ॥
राघवश्च तमेवार्थं चिन्तयामास विस्मितः । ततोऽस्तं भास्करे याते विसृज्य नृपवानरान् ॥६०॥
संध्यामुपास्य विधिवत्तदा नरवरोत्तमः । प्रवृत्तायां रजन्यां तु सोऽन्तःपुरचरोऽभवत् ॥६१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०-एष इति । एष हनूमानिव अन्येऽपि सुग्रीवादयः त्वत्कारणात्त्वत्सेवारूपहेतोस्सुरैः सृष्टाः प्रार्थनया प्रकटिताः अत्र गुणः त्रिपाद्या क्वचिदसिद्धत्वाभाववोधनात् ॥ ४८ ॥

रा० टी०-गज इति । गजादयः ऋक्षाश्च वानरैस्सह सुरैः सृष्टाः ॥ ४९ ॥

रा० टी०-तदिति । यच्चं परिप्रच्छसि तद्धनमतो बालभावे कर्म मया कथितम् ॥ ५० ॥

रा० टी०-श्रुत्वेति । रामादयः विस्मयं जग्मुः ॥ ५१ ॥

रा० टी०-अगस्त्य इति । एतन्मदुक्तं त्वया श्रुतं त्वं च मया दृष्टः संभाषितश्चासि अतः वयं गच्छामहे इति वचनमगस्त्यो राममब्रवीत् ॥ ५२ ॥

रा० टी०-श्रुत्वेति । राघवः महर्षिमिदमब्रवीत् ॥ ५३ ॥

रा० टी०-तदाकारमाह—अद्येत्यादिभिः । युष्माकं दर्शनादेव मे देवतादयस्तुष्टाः ॥ ५४ ॥

गो० टी०-एवेवेति । संधिरार्षः । तारेयोऽङ्गदः॥५०-५१॥

५४] ति० टी०-ममैतद्वक्ष्यमाणलक्षणं विज्ञाप्यमस्ति, अत आगतस्पृहोऽहं यद्वदामि तद्भवद्भिर्मत्कृते मन्निमित्तमनुकम्पया कर्तव्यम् ॥ ५४ ॥

रा० टी०-विज्ञाप्यमिति । आगता स्पृहा करिष्यमाणकार्यविषयकवाञ्छा यस्य सोऽहं मम यद्विज्ञाप्यं तदेतद्वदामि अतः तन्मया विज्ञापितं मत्कृते अनुकम्पया दयया भवद्भिः कर्तव्यम् ॥ ५५ ॥

गो० टी०-विज्ञाप्यमिति । मम एतद्वक्ष्यमाणं विज्ञाप्यमस्ति । आगतस्पृहोऽहं यद्वदामि तद्भवद्भिः मत्कृते मन्निमित्तम् अनुकम्पया कर्तव्यम्॥ ५५ ॥

५५] ति० टी०-अहमागतो वनवासात्पौरादीन्स्वकार्येषु स्थाप्य क्रतून्करिष्यामि ॥ ५५ ॥

रा० टी०-स्वविज्ञाप्याकारमाह—पौरेत्यादिभिः । स्वकार्येषु पौरजानपदान् स्थाप्य स्थापयित्वा आगतोऽहं भवतां प्रभावात्प्रसादात् क्रतून्करिष्यामि ॥ ५६ ॥

गो० टी०-पौरेति । आगतः वनादागतः अहम् ॥ ५७ ॥

५६] ति० टी०-सदस्या विधिदर्शिनः । महावीर्या महातपोवीर्ययुक्ताः ॥ ५६ ॥

रा० टी०-सदस्या इति । ममानुग्रहकाङ्क्षिणो भवन्तः मम यज्ञेषु सदस्या नित्यं निश्चितं भविष्यथ ॥ ५७ ॥

गो० टी०-सदस्या विधिदर्शिनः । महावीर्याः महातपोवीर्याः ॥ ५८ ॥

५७] ति० टी०-युष्मानाश्रित्यानिशं सुनिर्वृतोऽहं पितृभिरनुगृहीतो भविष्यामि ॥ ५७ ॥

रा० टी०-अहमिति । युष्मान् संस्मृत्य पितृभिरनुगृहीतोहं सुनिर्वृतो भविष्यामि ॥ ५८ ॥

गो० टी०-अहमिति । अनुगृहीत इति । अनुगृही इत्यर्थः । अनिशं सुनिर्वृत इत्यन्वयः ॥ ५९-६१ ॥

५८-५९] ति० टी०-तदा आगन्तव्यमिति छेदः ५८-५९

रा० टी०-तदेति । तदा यागारंभपूर्वकाले संगतैस्सहितैर्भवद्भिः अनिशं-निरन्तरमागन्तव्यमद्धं पृथक् अगस्त्याद्या इति अगस्त्याद्याः प्रयातुमुपचक्रमुः ॥ ५९ ॥

रा० टी०-एवमिति । ऋषयः एवमुक्त्वा यथागतमागतमनतिक्रम्य गताः अद्धं पृथक् ॥ ६० ॥

गो० टी०-एवमिति । तमेवार्थं यागरूपप्रयोजनम् ॥ ६२ ॥ ६३ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

६०-६१] ति० टी०-तमेवार्थं यागरूपम् ॥ ६०॥६१॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

रा० टी०-राघव इति । तं यागरूपमर्थं राघवश्चिन्तयामास अद्धं पृथक् । तत इति । भास्करे अस्तं याते सति नृपान्वानरांश्च विसृज्य संध्यां विधिवदुपास्य रजन्यां प्रवृत्ता-

१ वेति गो. पा. । २ तदिति गो. पा. ।

सप्तत्रिंशः सर्गः ।

रामस्तु प्रातरुत्थाय स्नात्वा हुताग्निः प्रविश्य देवागारं तत्र देवताः पितॄंश्चार्चयित्वा वसिष्ठादिभिर्मुनिभिः सुधीवादिभिर्वानरैर्विभीषणादिभिश्च राक्षसैरमात्यैश्च परिवृतः सभां प्रविश्य तैस्तैः पुराणैर्महात्मभिः सुमधुराः कथाश्चकार ।

अभिषिक्ते तु काकुत्स्थे धर्मेण विदितात्मनि । व्यतीता या निशा पूर्वा पौराणां हर्षवर्धिनी॥ १ ॥
तस्यां रजन्यां व्युष्टायां प्रातर्नृपतिबोधकाः । वन्दिनः समुपातिष्ठन्सौम्या नृपतिवेश्मनि ॥ २ ॥
ते रक्तकण्ठिनः सर्वे किंनरा इव शिक्षिताः । तुष्टुवुर्नृपतिं वीरं यथा वत्सं प्रहर्षिणः ॥ ३ ॥
वीर सौम्य प्रबुध्यस्व कौसल्याप्रीतिवर्धन । जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप ॥ ४ ॥
विक्रमस्ते यथा विष्णो रूपं चैवाश्विनोरिव । बुद्ध्या बृहस्पतेस्तुल्यः प्रजापतिसमो ह्यसि ॥ ५ ॥
क्षमा ते पृथिवीतुल्या तेजसा भास्करोपमः । वेगस्ते वायुना तुल्यो गाम्भीर्यमुदधेरिव ॥ ६ ॥
अप्रकम्प्यो यथा स्थाणुश्चन्द्रे सौम्यत्वमीदृशम् । नेदृशाः पार्थिवाः पूर्वं भवितारो नराधिप ॥ ७ ॥
यथा त्वमसि दुर्धर्षो धर्मनित्यः प्रजाहितः । न त्वां जहाति कीर्तिश्च लक्ष्मीश्च पुरुषर्षभ ॥ ८ ॥
श्रीश्च धर्मश्च काकुत्स्थ त्वयि नित्यं प्रतिष्ठितौ । एताश्चान्याश्च मधुरा वन्दिभिः परिकीर्तिताः ॥ ९ ॥
सूताश्च संस्तवैर्दिव्यैर्बोधयन्ति स्म राघवम् । स्तुतिभिः स्तूयमानाभिः प्रत्यबुध्यत राघवः॥१०॥

यां सत्यां नरवरोत्तमो रामः अन्तःपुरचरोऽभवत् साईश्लोक एकान्वयी ॥ ६१ ॥ ६२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

१-२] ति० टी०-ऋषिगणा अभिषेककाले संप्राप्ताः कथितकथा विसृष्टाः । ततोऽभिषेकदिनस्य या निशा सा पौराणां पूर्वा प्रथमा हर्षवर्धिन्यभूत्सा च व्यतीतेत्यन्वयः १-२

रा० टी०-रामप्रबोधनप्रकारमाह—अभिषिक्त इत्यादिभिः । रामे अभिषिक्ते सति या निशा व्यतीता तस्यां रजन्यां व्युष्टायां प्रभातत्वं प्राप्तायां प्रातःकाले नृपतीनां बोधकाः प्रबोधकर्तारः वन्दिनः नृपतेः रामस्य वेश्मनि समुपातिष्ठन् श्लोकद्वयमेकान्वयि ॥ १ ॥ २ ॥

गो० टी०-अभिषिक्त इत्यादि । ऋषिगणास्त्वभिषेककाले संप्राप्ताः कथितकथाः विसृष्टाश्च अभिषेकदिनस्य या निशा पौराणां हर्षवर्धिनी पूर्वा प्रथमा निशाऽसीत् सा च व्यतीता १-३

३] ति० टी०-रक्तकण्ठिनो मधुरकण्ठाः ॥ ३ ॥

रा० टी०-ते इति । किंनरा इव शिक्षिताः ते वन्दिनः नृपतिं रामं यथावत्तुष्टुवुः ॥ ३ ॥

४] ति० टी०-त्वयि सुप्ते ब्राह्मे मुहूर्ते उत्थाय धर्मानुष्ठानरहिते सति सर्वं जगत्सुप्तधर्मकं भविष्यति । 'यथा राजा तथा प्रजा' इति न्यायात् ॥ ४ ॥

रा० टी०-स्तुतिप्रकारमाह—वीरेत्यादिभिः । त्वयि सुप्ते सति सर्वं जगत् स्वपिति अतस्त्वं प्रबुध्यस्व ॥ ४ ॥

गो० टी०-वीरेति । त्वयि सुप्ते सर्वं स्वपितीति त्वयि ब्राह्मे मुहूर्ते उत्थाय धर्मानुष्ठानरहिते सति सर्वं जगत्सुप्तधर्मकं भवति । यथा राजा तथा प्रजा इतिन्यायादिति भावः ॥ ४ ॥

५-६] ति० टी०-प्रजापतिसमः । प्रजापरिपालन इति भावः ॥ ५ ॥ ६

रा० टी०-विक्रम इति । अत्रोपमानोपमेयभावः इषुवत्सविता गच्छतीत्यादाविव बोध्यः किञ्च ते विक्रमो यथा तथा विष्णोर्विक्रमः ते रूपमिव अश्विनोः रूपं प्रजापतिसमो यस्य अत एव बृहस्पतेरपि बुध्या त्वं तुल्यः तोलयितुं शक्यः अ न असि अयमकारः बुध्या अ इति छित्वा लब्धः ॥ ५ ॥

रा० टी०-क्षमेति । पृथिवी तुल्या यस्याः सा ते क्षमा भास्करः उपमेयो यस्य सः ते वेगः वायुनापि अतुल्यः तोलयितुमशक्यः तव गांभीर्यमिव उदधेर्गांभीर्यम् ॥ ६ ॥

गो० टी०-विक्रम इति । बृहस्पतेस्तुल्यो बुद्ध्येति । प्रजापतिसमोसि । प्रजापरिपालन इति शेषः ॥ ५ ॥ ६ ॥

७-८] ति० टी०-ईदृशं सौम्यत्वं त्वद्वृत्तिसौम्यत्वं चन्द्रे नान्यत्र पूर्वम् अभूवन्निति शेषः भवितारः अग्रे इति शेषः॥७॥८॥

रा० टी०-अप्रकम्प्य इति । त्वं यथा अप्रकम्प्यः तथा स्थाणुः ईदृशं त्वत्सौम्यत्वसदृशं चन्द्रे सौम्यत्वमत एव ईदृशाः त्वत्सदृशाः पार्थिवाः पूर्वं नाभवन्निति शेषः न वा भवितारः अग्रे इति शेषः अत एव चन्द्रे सौम्यत्वमीदृशमित्यनेन न वैरूप्यम् ॥ ७ ॥

गो० टी०-अप्रकम्प्य इति । ईदृशाः पार्थिवाः पूर्वं नाभूवन्निति शेषः । न भवितार इति । अग्र इति शेषः ॥ ७ ॥

रा० टी०-यथेति । धर्मो नित्यो यस्य स प्रजाहितस्त्वं यथा यथावद्दुर्धर्षोसि अत एव कीर्तिर्लक्ष्मीश्च त्वां न जहाति॥८॥

गो० टी०-यथेति । न जहाति न त्यजति ॥ ८-११ ॥

९-१०] ति० टी०-एताश्चान्याश्च । उक्तय इति शेषः ॥ ९ ॥ १० ॥

स तद्विहाय शयनं पाण्डुराच्छादनास्तृतम् । उत्तस्थौ नागशयनाद्धरिर्नारायणो यथा ॥ ११ ॥
तमुत्थितं महात्मानं प्रह्वाः प्राञ्जलयो नराः । सलिलं भाजनैः शुभ्रैरुपतस्थुः सहस्रशः ॥ १२ ॥
कृतोदकः शुचिर्भूत्वा काले हुतहुताशनः । देवागारं जगामाशु पुण्यमिक्ष्वाकुसेवितम् ॥ १३ ॥
तत्र देवान्पितॄन्विप्रानर्चयित्वा यथाविधि । बाह्यकक्षान्तरं रामो निर्जगाम जनैर्वृतः ॥ १४ ॥
उपतस्थुर्महात्मानो मन्त्रिणः सपुरोहिताः । वसिष्ठप्रमुखाः सर्वे दीप्यमाना इवाग्नयः ॥ १५ ॥
क्षत्रियाश्च महात्मानो नानाजनपदेश्वराः । रामस्योपाविशन्पार्श्वे शक्रस्येव यथामराः ॥ १६ ॥
भरतो लक्ष्मणश्चात्र शत्रुघ्नश्च महायशाः । उपासांचक्रिरे हृष्टा वेदास्त्रय इवाध्वरम् ॥ १७ ॥
याताः प्राञ्जलयो भूत्वा किंकरा मुदिताननाः । मुदिता नाम पार्श्वस्था वह्वः समुपाविशन् ॥ १८ ॥
वानराश्च महावीर्या विंशतिः कामरूपिणः । सुग्रीवप्रमुखा राममुपासन्ते महौजसः ॥ १९ ॥
विभीषणश्च रक्षोभिश्चतुर्भिः परिवारितः । उपासते महात्मानं धनेशमिव गुह्यकः ॥ २० ॥
तथा निगमवृद्धाश्च कुलीना ये च मानवाः । शिरसा वन्द्य राजानमुपासन्ते विचक्षणाः ॥ २१ ॥
तथा परिवृतो राजा श्रीमद्भिर्ऋषिभिर्वरैः[2] । राजभिश्च महावीर्यैर्वानरैश्च सराक्षसैः ॥ २२ ॥

रा० टी०-श्रीरिति । श्रीः समाधिकरहितमैश्वर्यं धर्मश्च त्वयि नित्यं प्रतिष्ठितौ एताः अन्याश्च वाचः बन्दिभिः परिकीर्तिताः ॥ ९ ॥

रा० टी०-सूता इति। दिव्यैः संस्तवैः मृता बोधयन्ति स्म स्तूयमानाभिः कथ्यमानाभिः स्तुतिभिः राघवः प्रत्यबुध्यत ॥ १० ॥

११] ति० टी०-पाण्डुराच्छादनमुत्तराच्छादनपटः ॥११॥

रा० टी०-स इति। पाण्डुराच्छादनविशिष्टमास्तृतमास्तरणं यस्मिन् तच्छयनं विहाय हरिः पुनर्वसुप्रादुर्भूतस्स राम उत्तस्थौ तत्र दृष्टान्तः नागशयनान्नारायणो यथा स यथोत्तस्थौ तथा नारायण उत्तस्थाविति वा ॥ ११ ॥

१२] ति० टी०-सलिलम् । गृहीत्वेति शेषः । शौचार्थमिति भावः ॥ १२ ॥

रा०टी०-तमिति। उत्थितं तं रामं प्रह्वाः कृतप्रणामाः सहस्रशो नराः भृत्याः भाजनैः सलिलमुपतस्थुः प्रापयामासुः ॥१२॥

गो०टी०-समुत्थितमिति। सलिलं गृहीत्वेति शेषः॥१२॥

१३-१७] ति० टी०-देवागारं देवपूजागृहम् ॥१३-१७

रा० टी०-कृत्वेति । उदकं तत्संबन्धि स्नानादि कृत्वा अत एव शुचिर्भूत्वा काले समये हुतः हुताशनो वह्निर्येन स रामः देवागारं जगाम ॥ १३ ॥

रा० टी०-तत्रेति । रामः देवादीन् यथाविध्यर्चयित्वा बाह्यकक्षान्तरं निर्जगाम ॥ १४ ॥

रा० टी०-उपतस्थुरिति । मन्त्रिणः सपुरोहिताः पुरोहितत्वमात्राक्रान्तसहिताः पुरोहितत्वसहिता वा वशिष्ठप्रमुखा उपतस्थुः रामसमीपं प्रापुः ॥ १५ ॥

रा० टी०-क्षत्रिया इति । जनपदेश्वराः रामस्य पार्श्वे उपाविशन् ॥ १६ ॥

रा० टी०-भरत इति। भरतादयस्त्रयस्त्रिकाण्डकात्मकाः वेदा अध्वरमिव उपासां रामोपासनां चक्रिरे ॥ १७ ॥

गो० टी०-कृतोदकेति। कृतोदकशुचिः उदकेन कृतशौच इत्यर्थः। देवागारं देवपूजागृहम् ॥ १३ ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तर-
श्रीरामायणव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

१८] ति० टी०-मुदिता नाम तन्नामकाः किंकराः॥१८॥

रा० टी०-याता इति । याताः प्राप्ताः मुदिताननाः मुदिता नाम किंकराः प्राञ्जलयो भूत्वा पार्श्वस्थाः सन्तः समुपाविशन् ॥ १८ ॥

१९-२१] ति० टी०-विंशतिर्वानराः सुग्रीवाङ्गदहनुमज्जाम्बवत्सुषेणतारनीलनलमैन्द्विविदकुमुदशरभशतबलिगन्धमादनगजगवाक्षगवयधूम्ररम्भज्योतिर्मुखा विंशतिः प्रधानवानरा इत्यर्थ इति कतकः ॥ १९-२१ ॥

रा० टी०-वानरा इति । सुग्रीवप्रमुखाः विंशतिर्वानराः राममुपासन्ते ॥ १९ ॥

रा० टी०-विभीषण इति । विभीषणः उपासते ॥२०॥

रा० टी०-यथेति । निगमवृद्धाः वेदार्थपरिपक्काः कुलीनाः ते मानवाः राजानं यथा यथावदुपासन्ते ॥ २१ ॥

२२] ति० टी०-ऋषिभिः । ऋषयोऽत्र वसिष्ठाद्याः ॥२२॥

रा० टी०-तथेति । देवेश्वरः शंभुः ऋषिभिर्यथोपास्यते तथा ऋषिप्रभृतिभिः परिवृतो राजा राम उपास्यते उपासनकर्तृत्वं च प्रत्यासत्या ऋषिप्रभृतीनामेव परिवृत इत्यस्य सीतासंयुक्त इत्यर्थे ऋष्यादीनां कर्तृत्वेनैवान्वयः सार्द्धश्लोक एकान्वयी ॥ २२ ॥

१ बहुवचनं गो. रा. पुस्त. । २ वृत इति गो. पा. ।

यथा देवेश्वरो नित्यमृषिभिः समुपास्यते । अधिकस्तेन रूपेण सहस्राक्षाद्विरोचते ॥ २३ ॥
तेषां समुपविष्टानां तास्ताः सुमधुराः कथाः । कथ्यन्ते धर्मसंयुक्ताः पुराणज्ञैर्महात्मभिः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥[१]

२३-२४] ति० टी०–तेन रूपेण सर्वलोकोपास्यत्वाकारेण ॥ २३ ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

रा० टी०–अधिक इति । तेन मानुषीयेण रूपेणोपलक्षितो रामः सहस्राक्षादधिको विरोचते अर्द्धं पृथक् ॥ २३ ॥

रा० टी०–तेषामिति । समुपविष्टानां तेषां वशिष्ठादीनां मध्ये धर्मसंयुक्ताः सुमधुराः कथाः पुराणज्ञैः कथ्यन्ते ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तत्रिंशस्सर्गः ॥ ३७ ॥

१ एतदुत्तरं वालिसुग्रीवोत्पत्तीतिहासो रावणस्य श्वेतद्वीपगमनेतिहासश्च कतिपयैः सर्गैरगस्त्योक्तितया क्वचित्पुस्तकेषु दृश्यते, ते तु पूर्वसर्गान्त एवागस्त्यस्य स्वाश्रमगमनकथनादसंगताः, कतकतीर्थायनाद्दतत्वाच्च तिलककारेणापि न व्याख्याताः ते सर्गा यथा—

एतच्छ्रुत्वा तु निखिलं राघवोऽगस्त्यमब्रवीत् । य एषर्क्षरजा नाम वालिसुग्रीवयोः पिता ॥ १ ॥
जननी का च भवनं सा त्वया परिकीर्तिता । वालिसुग्रीवयोश्चापि नामनी केन हेतुना ॥ २ ॥
एतद्ब्रह्मन्समाचक्ष्व कौतूहलमिदं हि नः । स प्रोक्तो राघवेणैवमगस्त्यो वाक्यमब्रवीत् ॥ ३ ॥
शृणु राम कथामेतां यथापूर्वं समासतः । नारदः कथयामास ममाश्रममुपागतः ॥ ४ ॥
कदाचिदटमानोऽसावतिधर्ममुपागतः । अर्चितस्तु यथान्यायं विधिदृष्टेन कर्मणा ॥ ५ ॥
सुखासीनः कथामेनां मया पृष्टः स कौतुकात् । कथयामास धर्मात्मा महर्षे श्रूयतामिति ॥ ६ ॥
मेरुर्नगवरः श्रीमाञ्जाम्बूनदमयः शुभः । तस्य यन्मध्यमं शृङ्गं सर्वदैवतपूजितम् ॥ ७ ॥
तस्मिन्दिव्या सभा रम्या ब्रह्मणः शतयोजना । तस्यामास्ते सदा देवः पद्मयोनिश्चतुर्मुखः ॥ ८ ॥
योगमभ्यसतस्तस्य नेत्राभ्यां यदसृज्यत । तद्गृहीतं भगवता पाणिना चर्चितं तु तत् ॥ ९ ॥
निक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्तृणा । तस्मिन्नश्रुकणे राम वानरः संबभूव ह ॥ १० ॥
उत्पन्नमात्रस्तु तदा वानरश्च नरोत्तम । समाभाष्य प्रियैर्वाक्यैरुक्तः किल महात्मना ॥ ११ ॥
पश्य शैलं सुविस्तीर्णं सुरैरध्युषितं सदा । तस्मिन्रम्ये गिरिवरे बहुमूलफलाशनः ॥ १२ ॥
ममान्तिकचरो नित्यं भव वानरपुंगव । कंचित्कालमिहास्व त्वं ततः श्रेयो भविष्यति ॥ १३ ॥
एवमुक्तः स चैतेन ब्रह्मणा वानरोत्तमः । प्रणम्य शिरसा पादौ देवदेवस्य राघव ॥ १४ ॥
उक्तवाँल्लोककर्तारमादिदेवं जगत्पतिम् । यथाज्ञापयसे देव स्थितोऽहं तव शासने ॥ १५ ॥
एवमुक्त्वा हरिर्देवं ययौ हृष्टमनास्तदा । स तदा द्रुमखण्डेषु फलपुष्पघनेषु च ॥ १६ ॥
ब्रह्मन्प्रतिबलः शीघ्रं वने फलकृताशनः । चिन्वन्मधूनि मुख्यानि चिन्वन्पुष्पाण्यनेकशः ॥ १७ ॥
दिने दिने च सायाह्ने ब्रह्मणोऽन्तिकमागमत् । गृहीत्वा राम मुख्यानि पुष्पाणि च फलानि च ॥ १८ ॥
ब्रह्मणो देवदेवस्य पादमूले न्यवेदयत् । एवं तस्य गतः कालो बहु पर्यटतो गिरिम् ॥ १९ ॥
कस्यचित्त्वथ कालस्य समतीतस्य राघव । ऋक्षराड् वानरश्रेष्ठस्तृषया परिपीडितः ॥ २० ॥
उत्तरं मेरुशिखरं गतस्तत्र च दृष्टवान् । नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ॥ २१ ॥
चलत्केसरमात्मानं कृत्वा तस्य तटे स्थितः । ददर्श तस्मिन्सरसि वक्त्रच्छायामथात्मनः ॥ २२ ॥
कोऽयमस्मिन्मम रिपुर्वसत्यन्तर्जले महान् । रूपं चान्तर्गतं तत्र वीक्ष्य तत्पश्यतो हरिः ॥ २३ ॥
क्रोधाविष्टमना ह्येष नियतं मावमन्यते । तदस्य दुष्टभावस्य पुष्कलं कुमतेर्गृहम् ॥ २४ ॥
एवं स चिन्त्य मनसा स वै वानरचापलात् । आप्लुत्य चापतत्तस्मिन्ह्रदे वानरसत्तमः ॥ २५ ॥
उत्प्लुत्य तस्मात्स ह्रदादुत्थितः प्लवगः पुनः । तस्मिन्नेव क्षणे राम स्त्रीत्वं प्राप स वानरः ॥ २६ ॥
मनोज्ञरूपा सा नारी लावण्यललिता शुभा । विस्तीर्णजघना सुभ्रूर्नीलकुन्तलमूर्धजा ॥ २७ ॥
सुग्धस्मितवक्त्रा च पीनस्तनतटा शुभा । ह्रदतीरे च सा भाति ऋजुयष्टिर्लता यथा ॥ २८ ॥

36111

त्रैलोक्यसुन्दरी कान्ता सर्वचित्तप्रमाथिनी । लक्ष्मीव पद्मरहिता चन्द्रज्योत्स्नेव निर्मला ॥ २९ ॥
रूपेणाप्यभवत्सा तु श्रियं देवीमुमा यथा । द्योतयन्ती दिशः सर्वास्तथाभूत्सा वराङ्गना ॥ ३० ॥
एतस्मिन्नन्तरे देवो निष्टप्तः सुरनायकः । पादावुपास्य देवस्य ब्रह्मणस्तेन वै पथा ॥ ३१ ॥
तस्यामेव च वेलायामादित्योऽपि परिभ्रमन् । तस्मिन्नेव पदे सोऽभूत्यस्मिन्सा तनुमध्यमा ॥ ३२ ॥
युगपत्सा तदा दृष्टा देवाभ्यां सुरसुन्दरी । कंदर्पवशगौ तौ तु दृष्ट्वा तां संबभूवतुः ॥ ३३ ॥
ततः क्षुभितसर्वाङ्गौ सुरेन्द्रौ पन्नगाविव । तद्रूपमद्भुतं दृष्ट्वा न्याजितौ धैर्यमात्मनः ॥ ३४ ॥
ततस्तस्यां सुरेन्द्रेण स्कन्नं शिरसि पातितम् । अनासाद्यैव तां नारीं संनिवृत्तमथाभवत् ॥ ३५ ॥
ततः सा वानरपतिं जज्ञे वानरमीश्वरम् । अमोघरेतसस्तस्य वासवस्य महात्मनः ॥ ३६ ॥
वालेषु पतितं बीजं वाली नाम बभूव सः । भास्करेणापि तस्यां वै कंदर्पवशवर्तिना ॥ ३७ ॥
बीजं निषिक्तं ग्रीवायां विधानमनुवर्तत । तेनापि सा वरतनुर्नोक्ता किंचिद्वचः शुभम् ॥ ३८ ॥
निवृत्तमदनश्चाथ सूर्योऽपि समपद्यत । ग्रीवायां पतितं बीजं सुग्रीवः समजायत ॥ ३९ ॥
एवमुत्पाद्य तौ वीरौ वानरेन्द्रौ महाबलौ । दत्त्वा तु काञ्चनीं मालां वानरेन्द्रस्य वालिनः ॥ ४० ॥
अक्षय्यां गुणसंपूर्णां शक्रस्तु त्रिदिवं ययौ । सूर्योऽपि स्वसुतस्यैव निरूप्य पवनात्मजम् ॥ ४१ ॥
कृत्येषु व्यवसायेषु जगाम सवितास्वरम् । तस्यां निशायां व्युष्टायामुदिते च दिवाकरे ॥ ४२ ॥
स तद्वानररूपं तु प्रतिपेदे पुनर्नृप । स एव वानरो भूत्वा पुत्रौ स्वस्य प्लवंगमौ ॥ ४३ ॥
पिङ्गेक्षणौ हरिवरौ वलिनौ कामरूपिणौ । मधून्यमृतकल्पानि पायितौ तेन तौ तदा ॥ ४४ ॥
गृह्य ऋक्षरजास्तौ तु ब्रह्मणोऽन्तिकमागमत् । दृष्ट्वर्क्षरजसं पुत्रं ब्रह्मा लोकपितामहः ॥ ४५ ॥
बहुशः सान्त्वयामास पुत्राभ्यां सहितं हरिम् । सान्त्वयित्वा ततः पश्चादेवदूतमथादिशत् ॥ ४६ ॥
गच्छ मद्वचनादृक्षं किष्किन्धां नाम वै शुभाम् । सा ह्यस्य गुणसंपन्ना महती च पुरी शुभा ॥ ४७ ॥
तत्र वानरयूथानि सुबहूनि वसन्ति च । बहुरत्नसमाकीर्णा वानरैः कामरूपिभिः ॥ ४८ ॥
पुण्या पुण्यवती दुर्गा चातुर्वर्ण्यपुरस्कृता । विश्वकर्मकृता दिव्या मन्त्रियोगाच्च शोभना ॥ ४९ ॥
तत्रर्क्षरजसं दृष्ट्वा सपुत्रं वानरर्षभम् । यूथपालान्समाहूय यांश्चान्यान्प्राकृतान्हरीन् ॥ ५० ॥
तेषां संभाष्य सर्वेषां मदीयं जनसंसदि । अभिषेचय राजानमारोप्य महदासने ॥ ५१ ॥
दृष्टमात्राश्च ते सर्वे वानरेण च धीमता । अस्यर्क्षरजसो नित्यं भविष्यन्ति वशानुगाः ॥ ५२ ॥
इत्येवमुक्ते वचने ब्रह्मणा तं हरीश्वरम् । पुरतः कृत्य दूतोऽसौ प्रययौ तां पुरीं शुभाम् ॥ ५३ ॥
स प्रविश्यानिलगतिस्तां गुहां वानरोत्तमः । स्थापयामास राजानं पितामहनियोगतः ॥ ५४ ॥
राज्याभिषेकविधिना स्नातोऽथाभ्यर्चितस्तथा । स बद्धमुकुटः श्रीमानभिषिक्तः स्वलंकृतः ॥ ५५ ॥
आज्ञापयामास हरीन्सर्वान्मुदितमानसः । सप्तद्वीपसमुद्रायां पृथिव्यां ये प्लवंगमाः ॥ ५६ ॥
वालिसुग्रीवयोरेष एष ऋक्षरजःपिता । जननी चैष तु हरिरित्येतद्भद्रमस्तु ते ॥ ५७ ॥
यश्चैतच्छ्रावयेद्विद्वान्यश्चैतच्छृणुयान्नरः । सिद्ध्यन्ति तस्य कार्याणि मनसो हर्षवर्धनाः ॥ ५८ ॥

एतच्च सर्वं कथितं मया विभो प्रविस्तरेणेह यथार्थतस्तत् ।
उत्पत्तिरेषा रजनीचराणामुक्ता तथैवेह हरीश्वराणाम् ॥ ५९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ १ ॥

एतां श्रुत्वा कथां दिव्यां पौराणीं राघवस्तदा । भ्रातृभिः सहितो वीरो विस्मयं परमं ययौ ॥ १ ॥
राघवोऽथ ऋषेर्वाक्यं श्रुत्वा वचनमब्रवीत् । कथेयं महती पुण्या त्वत्प्रसादाच्छ्रुता मया ॥ २ ॥
बृहत्कौतूहले चास्मिन्संवृतो मुनिपुंगव । उत्पत्तिर्यादृशी दिव्या वालिसुग्रीवयोर्द्विज ॥ ३ ॥
किं चित्रं मम ब्रह्मर्षे सुरेन्द्रतपनावुभौ । जातौ वानरशार्दूलौ बलेन वलिनां वरौ ॥ ४ ॥
एवमुक्ते तु रामेण कुम्भयोनिरभाषत । एवमेतन्महाबाहो वृत्तमासीत्पुरा किल ॥ ५ ॥
अथापरां कथां दिव्यां शृणु राजन्सनातनीम् । यदर्थं राम वैदेही रावणेन पुरा हृता ॥ ६ ॥
तत्तेऽहं कीर्तयिष्यामि समाधिं श्रवणे कुरु । पुरा कृतयुगे राम प्रजापतिसुतं प्रभुम् ॥ ७ ॥
सनत्कुमारमासीनं रावणो राक्षसाधिपः । वपुषा सूर्यसंकाशं ज्वलन्तमिव तेजसा ॥ ८ ॥
विनयावनतो भूत्वा ह्यभिवाद्य कृताञ्जलिः । उक्तवान्रावणो राम तमृषिं सत्यवादिनम् ॥ ९ ॥

को ह्यस्मिन्प्रवरो लोके देवानां बलवत्तरः । यं समाश्रित्य विबुधा जयन्ति समरे रिपून् ॥ १० ॥
कं जयन्ति द्विजा नित्यं कं ध्यायन्ति च योगिनः । एतन्मे शंस भगवन्विस्तरेण तपोधन ॥ ११ ॥
विदित्वा हृद्गतं तस्य ध्यानदृष्टिर्महायशाः । उवाच रावणं प्रेम्णा श्रूयतामिति पुत्रक ॥ १२ ॥
यो वै भर्ता जगत्कृत्स्नं यस्योत्पत्तिं न विद्महे । सुरासुरैर्नतो नित्यं हरिर्नारायणः प्रभुः ॥ १३ ॥
यस्य नाभ्युद्भवो ब्रह्मा विश्वस्य जगतः पतिः । येन सर्वमिदं सृष्टं विश्वं स्थावरजंगमम् ॥ १४ ॥
तं समाश्रित्य विबुधा विधिना हरिमध्वरे । पिबन्ति ह्यमृतं चैव मानिताश्च यजन्ति तम् ॥ १५ ॥
पुराणैश्चैव वेदैश्च पञ्चरात्रैस्तथैव च । ध्यायन्ति योगिनो नित्यं क्रतुभिश्च यजन्ति तम् ॥ १६ ॥
दैत्यदानवरक्षांसि ये चान्ये चामरद्विषः । सर्वांञ्जयति सङ्ग्रामे सदा सर्वैः स पूज्यते ॥ १७ ॥
श्रुत्वा महर्षेस्तद्वाक्यं रावणो राक्षसाधिपः । उवाच प्रणतो भूत्वा पुनरेव महामुनिम् ॥ १८ ॥
दैत्यदानवरक्षांसि ये हताः समरेऽरयः । कां गतिं प्रतिपद्यन्ते किं च ते हरिणा हताः ॥ १९ ॥
रावणस्य वचः श्रुत्वा प्रत्युवाच महामुनिः । दैवतैर्निहता नित्यं प्राप्नुवन्ति दिवः स्थलम् ॥ २० ॥
पुनस्तस्मात्परिभ्रष्टा जायन्ते वसुधातले । पूर्वार्जितैः सुखैर्दुःखैर्जायन्ते च म्रियन्ते च ॥ २१ ॥

ये ये हताश्चक्रधरेण राजंस्त्रैलोक्यनाथेन जनार्दनेन ।
ते ते गतास्तन्निलयं नरेन्द्राः क्रोधोऽपि देवस्य वरेण तुल्यः ॥ २२ ॥
श्रुत्वा ततस्तद्वचनं निशाचरः सनत्कुमारस्य मुखाद्विनिर्गतम् ।
तथा प्रहृष्टः स बभूव विस्मितः कथं न यास्यामि हरिं महाहवे ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ २ ॥

एवं चिन्तयतस्तस्य रावणस्य दुरात्मनः । पुनरेवापरं वाक्यं व्याजहार महामुनिः ॥ १ ॥
मनसश्चेप्सितं यत्तद्भविष्यति महाहवे । सुखी भव महाबाहो कंचित्कालमुदीक्षय ॥ २ ॥
एवं श्रुत्वा महाबाहुस्तमृषिं प्रत्युवाच सः । कीदृशं लक्षणं तस्य ब्रूहि सर्वमशेषतः ॥ ३ ॥
राक्षसेशवचः श्रुत्वा स मुनिः प्रत्यभाषत । श्रूयतां सर्वमाख्यास्ये तव राक्षसपुंगव ॥ ४ ॥
स हि सर्वगतो देवः सूक्ष्मोऽव्यक्तः सनातनः । तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ ५ ॥
स भूमौ दिवि पातालें पर्वतेषु वनेषु च । स्थावरेषु च सर्वेषु नदीषु नगरीषु च ॥ ६ ॥
ओङ्कारश्चैव सत्यश्च सावित्री पृथिवी च सः । चराचरेश्वरो देवो ह्यनन्त इति विश्रुतः ॥ ७ ॥

अहश्च रात्रिश्च उभे च संध्ये दिवाकरश्चैव यमश्च सोमः ।
स एव कालो ह्यनिलोऽनलश्च स ब्रह्मरुद्रेन्द्र स एव चापः ॥ ८ ॥
विद्योतति ज्वलति भाति लोकान्सृजत्ययं संहरति प्रशास्ति ।
क्रीडां करोत्यव्ययलोकनाथो विष्णुः पुराणो भवनाशकैकः ॥ ९ ॥

अथवा बहुनानेन किमुक्तेन दशानन । तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ॥ १० ॥
नीलोत्पलदलश्यामः किंजल्कारुणवाससा । प्रावृट्काले यथा व्योम्नि सतडित्तोयदो यथा ॥ ११ ॥
श्रीमान्मेघवपुः श्यामः शुभः पङ्कजलोचनः । श्रीवत्सेनोरसा युक्तः शशाङ्ककृतलक्षणः ॥ १२ ॥
तस्य नित्यं शरीरस्था मेघस्थेव शतह्रदाः । सङ्ग्रामरूपिणी लक्ष्मीर्देहमाश्रित्य तिष्ठति ॥ १३ ॥
न शक्यः स सुरैर्द्रष्टुं नासुरैर्न च पन्नगैः । यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ॥ १४ ॥
नहि यज्ञफलैस्तात न तपोभिस्तु संचितैः । शक्यते भगवान्द्रष्टुं न दानेन न चेज्यया ॥ १५ ॥
तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैस्तत्परायणैः । शक्यते भगवान्द्रष्टुं ज्ञाननिर्दग्धकिल्बिषैः ॥ १६ ॥
अथवा पृच्छय रक्षेन्द्र यदि तं द्रष्टुमिच्छसि । कथयिष्यामि ते सर्वं श्रूयतां यदि रोचते ॥ १७ ॥
कृते युगे व्यतीते वै सुखे त्रेतायुगस्य तु । हितार्थं देवमर्त्यानां भविता नृपविग्रहः ॥ १८ ॥
इक्ष्वाकूणां च यो राजा भाव्यो दशरथो भुवि । तस्य सूनुर्महातेजा रामो नाम भविष्यति ॥ १९ ॥
महातेजा महाबुद्धिर्महाबलपराक्रमः । महाबाहुर्महासत्त्वः क्षमया पृथिवीसमः ॥ २० ॥
आदित्य इव दुष्प्रेक्ष्यः समरे शत्रुभिस्तदा । भविता हि तदा रामो नरो नारायणः प्रभुः ॥ २१ ॥
पितुर्नियोगात्स विभुर्दण्डके विविधे वने । विचरिष्यति धर्मात्मा भ्रात्रा सह महामनाः ॥ २२ ॥
तस्य पत्नी महाभागा लक्ष्मी सीतेति विश्रुता । दुहिता जनकस्यैषा उत्थिता वसुधातलात् ॥ २३ ॥

रूपेणाप्रतिमा लोके सर्वलक्षणलक्षिता । छायेवानुगता रामं निशाकरमिव प्रभा ॥ २४ ॥
शीलाचारगुणोपेता साध्वी धैर्यसमन्विता । सहस्रांशो रश्मिरिव ह्येका मूर्तिरिव स्थिता ॥ २५ ॥
एवं ते सर्वमाख्यातं मया रावण विस्तरात् । महतो देवदेवस्य शाश्वतस्याव्ययस्य च ॥ २६ ॥
एवं श्रुत्वा महाबाहू राक्षसेन्द्रः प्रतापवान् । त्वया सह विरोधेच्छुश्चिन्तयामास राघव ॥ २७ ॥
सनत्कुमारात्तद्वाक्यं चिन्तयानो मुहुर्मुहुः । रावणो मुमुदे श्रीमान्युद्धार्थं विचचार ह ॥ २८ ॥
श्रुत्वा च तां कथां रामो विस्मयोत्फुल्ललोचनः । शिरसश्चालनं कृत्वा विस्मयं परमं गतः ॥ २९ ॥

श्रुत्वा तु वाक्यं स नरेश्वरस्तदा मुदा युतो विस्मयमानचक्षुः ।
पुनश्च तं ज्ञानवतां प्रधानमुवाच वाक्यं वद मे पुरातनम् ॥ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ ३ ॥

ततः पुनर्महातेजाः कुम्भयोनिर्महायशाः । उवाच रामं प्रणतं पितामह इवेश्वरम् ॥ १ ॥
शृणुतामिति चोवाच रामं सत्यपराक्रमम् । कथाशेषं महातेजाः कथयामास स प्रभुः ॥ २ ॥
यथाख्यानं श्रुतं चैव यथावृत्तं यथा तथा । प्रीतात्मा कथयामास राघवाय महामतिः ॥ ३ ॥
एतदर्थं महाबाहो रावणेन दुरात्मना । सुता जनकराजस्य हृता राम महामते ॥ ४ ॥
एतां कथां महाबाहो नारदः सुमहायशाः । कथयामास दुर्धर्षे मेरौ गिरिवरोत्तमे ॥ ५ ॥
देवगन्धर्वसिद्धानामृषीणां च महात्मनाम् । कथाशेषं पुनःसोऽथ कथयामास राघव ॥ ६ ॥
नारदः सुमहातेजाः प्रहसन्निव मानद । तां कथां शृणु राजेन्द्र महापापप्रणाशनीम् ॥ ७ ॥
यां तु श्रुत्वा महाबाहो ऋषयो दैवतैः सह । ऊचुस्तं नारदं सर्वे हर्षपर्याकुलेक्षणम् ॥ ८ ॥
यश्चेमां श्रावयेन्नित्यं शृणुयाद्वापि भक्तितः । स पुत्रपौत्रवान्राम स्वर्गलोके महीयते ॥ ९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ ४ ॥

ततः स राक्षसो राम पर्यटन्पृथिवीतले । विजयार्थी महाशूरो राक्षसैः परिवारितः ॥ १ ॥
दैत्यदानवरक्षःसु यं शृणोति बलाधिकम् । तमाह्वयति युद्धार्थी रावणो बलदर्पितः ॥ २ ॥
एवं स पर्यटन्सर्वी पृथिवीं पृथिवीपते । ब्रह्मलोकान्निवर्तन्तं समासाद्याथ रावणः ॥ ३ ॥
व्रजन्तं मेघपृष्ठस्थमंशुमन्तमिवापरम् । तमभिसृत्य प्रीतात्मा ह्यभिवाद्य कृताञ्जलिः ॥ ४ ॥
उवाच हृष्टमनसा नारदं रावणस्तदा । आव्रह्मभुवनं लोकास्त्वया दृष्टा ह्यनेकशः ॥ ५ ॥
कस्मिँल्लोके महाभाग मानवा बलवत्तराः । योद्धुमिच्छामि तैः सार्धं यथाकामं यदृच्छया ॥ ६ ॥
चिन्तयित्वा मुहूर्तं तु नारदः प्रत्युवाच तम् । अस्ति राजन्महाद्वीपं क्षीरोदस्य समीपतः ॥ ७ ॥
तत्र ते चन्द्रसंकाशा मानवाः सुमहाबलाः । महाकाया महावीर्या मेघस्तनितनिःस्वनाः ॥ ८ ॥
महामात्रा धैर्यवन्तो महापरिघबाहवः । श्वेतद्वीपे मया दृष्टा मानवा राक्षसाधिप ॥ ९ ॥
बलवीर्यसमोपेतान्यादृशांस्त्वमिहेच्छसि । नारदस्य वचः श्रुत्वा रावणः प्रत्युवाच ह ॥ १० ॥
कथं नारद जायन्ते तस्मिन्द्वीपे महाबलाः । श्वेतद्वीपे कथं वासः प्राप्तस्तैस्तु महात्मभिः ॥ ११ ॥
एतन्मे सर्वमाख्याहि प्रभो नारद तत्त्वतः । त्वया दृष्टं जगत्सर्वं हस्तामलकवत्सदा ॥ १२ ॥
रावणस्य वचः श्रुत्वा नारदः प्रत्युवाच ह । अनन्यमनसो नित्यं नारायणपरायणाः ॥ १३ ॥
तदाराधनसक्ताश्च तच्चित्तास्तत्परायणाः । एकान्तभावानुगतास्ते नरा राक्षसाधिप ॥ १४ ॥
तच्चित्तास्तद्गतप्राणा नरा नारायणं सदा । श्वेतद्वीपे तु तैर्वास अर्जितः सुमहात्मभिः ॥ १५ ॥
ये हता लोकनाथेन शार्ङ्गमानम्य संयुगे । चक्रायुधेन देवेन तेषां वासो जितिष्टपे ॥ १६ ॥
नहि यज्ञफलैस्तात न तपोभिर्न संयमैः । न च दानफलैर्मुख्यैः स लोकः प्राप्यते सुखम् ॥ १७ ॥
नारदस्य वचः श्रुत्वा दशग्रीवः सुविस्मितः । ध्यात्वा तु सुचिरं कालं तेन योत्स्यामि संयुगे ॥ १८ ॥
आपृच्छ्य नारदं प्रायाच्छ्वेतद्वीपाय रावणः । नारदोऽपि चिरं ध्यात्वा कौतूहलसमन्वितः ॥ १९ ॥
दिदृक्षुः परमाश्चर्यं तत्रैव त्वरितं ययौ । स हि केलिकरो विप्रो नित्यं च समरप्रियः ॥ २० ॥
रावणोऽपि ययौ तत्र राक्षसैः सह राघव । महता सिंहनादेन दारयन्स दिशो दश ॥ २१ ॥
गते तु नारदे तत्र रावणोऽपि महायशाः । प्राप्य श्वेतं महाद्वीपं दुर्लभं यत्सुरैरपि ॥ २२ ॥

तेजसा तस्य द्वीपस्य रावणस्य बलीयसः । तत्तस्य पुष्पकं यानं वातवेगसमाहतम् ॥ २३ ॥
अवस्थातुं न शक्नोति वाताहत इवाम्बुदः । सचिवा राक्षसेन्द्रस्य द्वीपमासाद्य दुर्दृशम् ॥ २४ ॥
अब्रुवन्रावणं भीता राक्षसा जातसाध्वसाः । राक्षसेन्द्र वयं मूढा भ्रष्टसंज्ञा विचेतसः ॥ २५ ॥
अवस्थातुं न शक्ष्यामो युद्धं कर्तुं कथंचन । एवमुक्त्वा दुद्रुवुस्ते सर्व एव निशाचराः ॥ २६ ॥
रावणोऽपि हि तद्यानं पुष्पकं हेमभूषितम् । विसर्जयामास तदा सह तैः क्षणदाचरैः ॥ २७ ॥
गतं तु पुष्पकं राम रावणो राक्षसाधिपः । कृत्वा रूपं महाभीमं सर्वराक्षसवर्जितः ॥ २८ ॥
प्रविवेश तदा तस्मिन्श्वेतद्वीपे स रावणः । प्रविशन्नेव तत्राशु नारीभिरुपलक्षितः ॥ २९ ॥
एकया स स्मितं कृत्वा हस्ते गृह्य दशाननम् । पृष्टश्चागमनं ब्रूहि किमर्थमिह चागतः ॥ ३० ॥
को वा त्वं कस्य वा पुत्रः केन वा प्रहितो वद । इत्युक्तो रावणो राजन्क्रुद्धो वचनमब्रवीत् ॥ ३१ ॥
अहं विश्रवसः पुत्रो रावणो नाम राक्षसः । युद्धार्थमिह संप्राप्तो न च पश्यामि कंचन ॥ ३२ ॥
एवं कथयतस्तस्य रावणस्य दुरात्मनः । प्राहसंस्ते ततः सर्वे सुस्वनं युवतीजनाः ॥ ३३ ॥
तासामेका ततः क्रुद्धा बालवद्गृह्य लीलया । भ्रामितस्तु सखीमध्ये मध्ये गृह्य दशाननम् ॥ ३४ ॥
सखीमन्यां समाहूय पश्य त्वं कीटकं धृतम् । दशास्यं विंशतिभुजं कृष्णाञ्जनसमप्रभम् ॥ ३५ ॥
हस्ताद्धस्तं स च क्षिप्तो भ्राम्यते श्रमलालसः । भ्राम्यप्राणेन बलिना राक्षसेन विपश्चिता ॥ ३६ ॥
पाणावेकाथ संदष्टो रोषेण वनिता शुभा । मुक्तस्तयाशुभः कीटो धुन्वन्त्या हस्तवेदनात् ॥ ३७ ॥
गृहीत्वान्या तु रक्षेन्द्रमुत्पपात विहायसा । ततस्तामपि संक्रुद्धो विददार नखैर्भृशम् ॥ ३८ ॥
तया सह विनिर्भूतः सहसैव निशाचरः । पपात सोऽम्भसो मध्ये सागरस्य भयातुरः ॥ ३९ ॥
पर्वतस्येव शिखरं यथा वज्रविदारितम् । प्रापतत्सागरजले तथासौ विनिपातितः ॥ ४० ॥
एवं स रावणो राम श्वेतद्वीपनिवासिभिः । युवतीभिर्विगृह्याशु भ्रामितश्च ततस्ततः ॥ ४१ ॥
नारदोऽपि महातेजा रावणं प्राप्य धर्षितम् । विस्मयं सुचिरं कृत्वा प्रजहास ननर्त च ॥ ४२ ॥
एतदर्थं महाबाहो रावणेन दुरात्मना । विज्ञायापहृता सीता त्वत्तो मरणकाङ्क्षया ॥ ४३ ॥
भवान्नारायणो देवः शङ्खचक्रगदाधरः । शार्ङ्गपाणायुधो वज्री सर्वदेवनमस्कृतः ॥ ४४ ॥
श्रीवत्साङ्को हृषीकेशः सर्वदेवाभिपूजितः । पद्मनाभो महायोगी भक्तानामभयप्रदः ॥ ४५ ॥
वधार्थं रावणस्य त्वं प्रविष्टो मानुषीं तनुम् । किं न वेत्सि त्वमात्मानं यथा नारायणो ह्यहम् ॥ ४६ ॥
मा मुह्यस्व महाभाग स्मर चात्मानमात्मना । गुह्याद्गुह्यतरस्त्वं हि ह्येवमाह पितामहः ॥ ४७ ॥
त्रिगुणश्च त्रिवेदी च त्रिधामा च त्रिराघव । त्रिकालकर्म त्रैविद्य त्रिदशारिप्रमर्दन ॥ ४८ ॥
भयाक्रान्तास्त्रयो लोकाः पुराणैर्विक्रमैस्त्रिभिः । त्वं महेन्द्रानुजः श्रीमान्बलिबन्धनकारणात् ॥ ४९ ॥
अदित्या गर्भसंभूतो विष्णुस्त्वं हि सनातनः । लोकाननुग्रहीतुं वै प्रविष्टो मानुषीं तनुम् ॥ ५० ॥
तदिदं साधितं कार्यं सुराणां सुरसत्तम । निहतो रावणः पापः सपुत्रगणबान्धवः ॥ ५१ ॥
प्रहृष्टाश्च सुराः सर्वे ऋषयश्च तपोधनाः । प्रशान्तं च जगत्सर्वं त्वत्प्रसादात्सुरेश्वर ॥ ५२ ॥
सीता लक्ष्मीर्महाभागा संभूता वसुधातलात् । त्वदर्थमिह चोत्पन्ना जनकस्य गृहे प्रभो ॥ ५३ ॥
लङ्कामानीय यत्नेन मातेव परिरक्षिता । एवमेतत्समाख्यातं तव राम महायशः ॥ ५४ ॥
ममापि नारदेनोक्तमृषिणा दीर्घजीविना । यथा सनत्कुमारेण व्याख्यातं तस्य रक्षसः ॥ ५५ ॥
तेनापि च तदैवाशु कृतं सर्वमशेषतः । यश्चैतच्छ्रावयेच्छ्राद्धे विद्वान्ब्राह्मणसंनिधौ ॥ ५६ ॥
अक्षयं तदक्षयं दत्तं पितॄणामुपतिष्ठति । एतां श्रुत्वा कथां दिव्यां रामो राजीवलोचनः ॥ ५७ ॥
परं विस्मयमापन्नो भ्रातृभिः सह राघवः । वानराः सहसुग्रीवा राक्षसाः सविभीषणाः ॥ ५८ ॥
राजानश्च सहामात्या ये चान्येऽपि समागताः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा धर्मसमन्विताः ॥ ५९ ॥
सर्वे चोत्फुल्लनयनाः सर्वे हर्षसमन्विताः । राममेवानुपश्यन्ति भृशमत्यन्तहर्षिताः ॥ ६० ॥
ततोऽगस्त्यो महातेजा राघवं चेदमब्रवीत् । दृष्टाः सभाजिताश्चापि राम यास्यामहे वयम् ॥
एवमुक्त्वा गताः सर्वे पूजितास्ते यथागतम् ॥ ६१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ ५ ॥

अष्टात्रिंशः सर्गः ।

राघवेण सादरं पूजिता जनकादयो भूभृतः स्वकान्देशान्ययुः ।

एवमास्ते महाबाहुरहन्यहनि राघवः । प्रशासत्सर्वकार्याणि पौरजानपदेषु च ॥ १ ॥
ततः कतिपयाहःसु वैदेहं मिथिलाधिपम् । राघवः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह ॥ २ ॥
भवान्हि गतिरव्यग्रा भवता पालिता वयम् । भवतस्तेजसोग्रेण रावणो निहतो मया ॥ ३ ॥
इक्ष्वाकूणां च सर्वेषां मैथिलानां च सर्वशः । अतुलाः प्रीतयो राजन्संबन्धकपुरोगमाः ॥ ४ ॥
तद्भवान्स्वपुरं यातु रत्नान्यादाय पार्थिव । भरतश्च सहायार्थं पृष्ठतश्चानुयास्यति ॥ ५ ॥
स तथेति तैतः कृत्वा राघवं वाक्यमब्रवीत् । प्रीतोऽस्मि भवतो राजन्दर्शनेन नयेन च ॥ ६ ॥
यान्येतानि तु रत्नानि मदर्थं संचितानि वै । दुहित्रोस्तान्यहं राजन्सर्वाण्येव ददामि वै ॥ ७ ॥
[एवमुक्त्वा तु काकुत्स्थं जनको हृष्टमानसः । प्रययौ मिथिलां श्रीमांस्तमनुज्ञाय राघवम्]
ततः प्रयाते जनके केकयं मातुलं प्रभुम् । राघवः प्राञ्जलिर्भूत्वा विनयाद्वाक्यमब्रवीत् ॥ ८ ॥
इदं राज्यमहं चैव भरतश्च सलक्ष्मणः । आयत्तास्त्वं हि नो राजन्गतिश्च पुरुषर्षभ ॥ ९ ॥

१] ति० टी०–अथ सामन्तराजविसर्जनम्—एवमास्ते इति । एवं सर्वोपास्यत्वेन प्रशासत् । शत्रन्तम अभ्यस्तत्वात्नुमभावः ॥ १ ॥

रा० टी०–इत ऊर्ध्वं कतिपयसर्गाः प्रक्षिप्तास्ते न व्याख्याताः स्वस्वपुरं प्रतिजनकादीनां प्रस्थापनमुपक्रमत्वाह—एवमिति । अहन्यहनि पौरजानपदेषु सर्वकार्याणि प्रशासद्राघवः एवमास्ते ॥ १ ॥

गो० टी०–अथ सामन्तराजविसर्जनम्—एवमित्यादि । एवं पूर्वोक्तप्रकारेण । सर्वोपास्यमान इत्यर्थः । प्रशासदिति शत्रन्तं पदम् ॥ १ ॥ २ ॥

२] ति० टी०–कतिपयाहःसु । गतेष्विति शेषः ॥ २ ॥

रा० टी०–तत इति । कतिपयाहःसु गतेष्विति शेषः राघवः प्रांजलिर्भूत्वा मिथिलाधिपमेतदुवाच ॥ २ ॥

३] ति० टी०–भवान्हि गतिरव्यग्रा । अचला प्रतिष्ठेत्यर्थः । भवता वयं पालिताः कन्याप्रदानादिना पालितवंशाः । तेजसा तपोवीर्येण ॥ ३ ॥

रा० टी०–तदाकारमाह—भवानित्यादिभिः । भवता वयं पालिता अत एव भवानेव अव्यग्रा निश्चला गतिरस्माकमाश्रयः अत एव भवतस्तेजसा मया रावणो निहतः ॥ ३ ॥

गो० टी०–भवानिति । भवान् हि गतिः अव्यग्रेति । अचला प्रतिष्ठेत्यर्थः । भवता पालिता इति । कन्याप्रदानादिना परिपालितवंशा इत्यर्थः । तेजसा तपोवीर्येण । पाविता इति च पाठः ॥ ३ ॥ ४ ॥

४] ति० टी०–संबन्धकपुरोगमाः संबन्धकं संबन्धः पुरोगमोऽग्रेसरो यासां ताः संबन्धः प्रीतयश्चेत्यर्थः ॥ ४ ॥

रा० टी०–इक्ष्वाकूणामिति । इक्ष्वाकूणां मैथिलानां च संबन्धकस्सम्बंधः पुरोगमः पूर्वं प्रवृत्तो यासां ताः प्रीतयस्सन्तीति शेषः ॥ ४ ॥

५] ति० टी०–रत्नान्यादायास्माभिर्दीयमानोत्तमवस्तूनि । भरतः पृष्ठतोऽनुयास्यति । इष्टबन्धूनामनुगमनरूपसत्कारार्थम् ५

रा० टी०–तदिति । रत्नान्यादाय भवान्स्वपुरं यातु ॥५॥

गो० टी०–तदिति । रत्नानि अस्माभिर्दीयमानानि उत्तमवस्तूनि ॥ ५ ॥

६] ति० टी०–स तथेति । कृत्वा । अङ्गीकृत्येत्यर्थः॥६॥

रा० टी०–स इति । स जनकः तथेति कृत्वा अब्रवीत् तदाकारमाह भवतो दर्शनेन नयेन च अहं प्रीतोऽस्मि ॥ ६ ॥

गो० टी०–स इति । तथेति कृत्वा तथास्त्वित्यङ्गीकृत्येत्यर्थः ॥ ६ ॥

७] ति० टी०–मदर्थं प्रीत्या मम दानार्थम् ॥ ७ ॥

रा० टी०–यानिति । मदर्थं यानि रत्नानि संचितानि तान्यहं दुहित्रे ददामि ॥ ७ ॥

गो० टी०–यानीति । मदर्थं मत्प्रीतिदानार्थम् ॥ ७ ॥ ८ ॥

८] ति० टी०–केकयं मातुलं युधाजितम् ॥ ८ ॥

रा० टी०–तत इति । जनके प्रयाते सति राघवः केकयं मातुलमब्रवीत् ॥ ८ ॥

गो० टी०–तत इति । केकयं मातुलमिति युधाजितमित्यर्थः ॥ ९ ॥

९] ति० टी०–एतद्राज्यमयोध्याराज्यमहं रामो भरतलक्ष्मणौ आयत्ताः त्वयीति शेषः । त्वदधीना इत्यर्थः । हे राजन्! हे केकययुवराज ! नोऽस्माकं त्वं गतिरापदिष्टबन्धुः ॥ ९ ॥

---

१ त्ते इति गो. पाठः । २ नृप इति गो. पाठः । ३ दुहित्रे तानि वै इति गो. पाठः । ४ इदं पद्यमधिकं गो. पु. । ५ प्रभुरिति गो. पाठः ६ वाक्यमेतदुवाच हेति गो. पाठः ।

राजा हि वृद्धः संतापं त्वदर्थमुपयास्यति । तस्माद्गमनमद्यैव रोचते तव पार्थिव ॥ १० ॥
लक्ष्मणेनानुयात्रेण पृष्ठतोऽनुगमिष्यते । धनमादाय बहुलं रत्नानि विविधानि च ॥ ११ ॥
युधाजित्तु तथेत्याह गमनं प्रति राघवं । रत्नानि च धनं चैव त्वय्येवाक्षय्यमस्त्विति ॥ १२ ॥
प्रदक्षिणं चै राजानं कृत्वा केकयवर्धनः । रामेण च कृतः पूर्वमभिवाद्य प्रदक्षिणम् ॥ १३ ॥
लक्ष्मणेन सहायेन प्रयातः केकयेश्वरः । हतेऽसुरे यथा वृत्रे विष्णुना सह वासवः ॥ १४ ॥
तं विसृज्य ततो रामो वयस्यमकुतोभयम् । प्रतर्दनं काशिपतिं परिष्वज्येदमब्रवीत् ॥ १५ ॥
दर्शिता भवता प्रीतिर्दर्शितं सौहृदं परम् । उद्योगश्च त्वया राजन्भरतेन कृतः सह ॥ १६ ॥
तद्भवानद्य काशेय पुरीं वाराणसीं व्रज । रमणीयां त्वया गुप्तां सुप्राकारां सुतोरणाम् ॥ १७ ॥
एतावदुक्त्वा चोत्थाय काकुत्स्थः परमासनात् । पर्यष्वजत धर्मात्मा निरन्तरमुरोगतम् ॥ १८ ॥

रा० टी०–तदाकारमाह—इदमिति । त्वं नोऽस्माकं गतिः अत एव राज्यादयः आयत्ताः त्वदधीनाः ॥ ९ ॥

गो० टी०–इदमिति । आयत्ताः । त्वयीति शेषः । गतिः आपद्बन्धुरित्यर्थः ॥ १० ॥

१०] ति० टी०–राजा केकयः ॥ १० ॥

रा० टी०–राजेति । हि यतः वृद्धो राजा तव पिता त्वदर्थं संतापमुपयास्यति तस्मात्ते गमनं रोचते ॥ १० ॥

गो० टी०–राजेति । राजा केकयः ॥ ११ ॥

११–१२] ति० टी०–अनुयात्रेणानुयात्रोपचाररूपेण । अनुगमिष्यते । भवानिति शेषः ॥ ११ ॥ १२ ॥

रा० टी०–लक्ष्मणेनेति । धनादीन्यादाय पृष्ठतोऽनुयात्रेण गमनशीलेन अनुगमिष्यते भवानिति शेषः ॥ ११ ॥

रा० टी०–युधाजिदिति । युधाजिद्गमनं प्रति तथेति रत्नादीनि अक्षय्यं यथा भवति तथा त्वय्येवास्त्विति च आह ॥ १२ ॥

गो० टी०–लक्ष्मणेनेति । अनुयात्रेण अनुयात्रोपचाररूपेण अनुयात्रानुरूपोपचारार्थम् अनुगमिष्यते । भवानिति शेषः । लक्ष्मणस्त्वनुयात्रार्थं पृष्ठतोऽनुगमिष्यतीति पाठः ॥ १२ ॥ १३ ॥

१३] ति० टी०–मातुलत्वाद्रामेणाभिवाद्य प्रदक्षिणं कृतो युधाजित्पश्चात्सार्वभौमत्वाद्राजानं प्रदक्षिणं कृत्वा प्रयात इत्यन्वयः ॥ १३ ॥

रा० टी०–प्रदक्षिणमिति । पूर्वं रामेणाभिवाद्य मातुलत्वात्प्रणम्य प्रदक्षिणं कृतः केकयवर्द्धनो युधाजिद्राजानं सर्वराजराजं रामं प्रदक्षिणं कृत्वा सहायेन लक्ष्मणेन सह प्रयातः गमने दृष्टान्तः अहरे वृत्रे हते सति विष्णुना सह वासवो यथा श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

गो० टी०–प्रदक्षिणमिति । रामेण पूर्वमभिवाद्य प्रदक्षिणं कृतः केकयवर्द्धनः राजानं रामम् प्रदक्षिणीकृत्य प्रयातः । रामस्य मूर्धाभिषिक्तत्वाज्ज्येष्ठेन मातुलेनापि रामं प्रति प्रदक्षिणादिकरणम् ॥ १४ ॥

१४–१५] ति० टी०–वृत्रासुरे हते सति विष्णुनोपेन्द्रेण सह स्थितो वासवो यथा विष्णुं विसृजति तथा तं केकयं विसृज्येत्यर्थः ॥ १४ ॥ १५ ॥

गो० टी०–लक्ष्मणेनेति । वृत्रे हते सति विष्णुना उपेन्द्रेण सह स्थितो वासवः यथा विसृजति तथा लक्ष्मणमनुयात्रार्थं विसृज्येत्यर्थः ॥ १५ ॥ १६ ॥

रा० टी०–तमिति । तं युधाजितं विसृज्य संप्रेष्य रामः काशिपतिं प्रतर्दनं परिष्वज्य इदमब्रवीत् ॥ १५ ॥

१६] ति० टी०–यस्मात्त्वया भरतेन सह रणसहायार्थमुद्योगः कृतस्तस्माद्भवता परमा प्रीतिर्दर्शिता परमसौहृदं च दर्शितम् । एवमनुवादादेवोद्योगकरणं गम्यते ॥ १६ ॥

रा० टी०–तदाकारमाह—दर्शितेति । यस्मात् भरतेन सह त्वया उद्योगः कृतः तस्मात् भवता प्रीतिर्दर्शिता तत्तस्माद्धेतोः हे काशेय भवान् वाराणसीं व्रज व्रजतु यदि तु भवानित्यस्य दीप्तिमानित्यर्थः तदाक्षिप्तत्वच्चलद्धार्थस्य विशेषणं भवानिति श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०–दर्शितेति । यस्मात्त्वया भरतेन सह मम रणसहायार्थमुद्योगः कृतः । यस्माद्भवता परमा प्रीतिर्दर्शिता परं सौहार्दं च दर्शितम् । अनेनानुवादेन रावणसंहारार्थं काशीराजेन संगतमिति सिद्धम् ॥ १७ ॥

१७] ति० टी०–काशिदेशे भवः काशेयः । दृगार्षः । भवान्पुरीं व्रज व्रजतु ॥ १७ ॥

गो० टी०–तदिति । काशेय काशीदेशे भव । दृग्भाव आर्षः ॥ १८ ॥

१८] ति० टी०–उरोगतं यथा तथा निरन्तरम् गाढं पर्यष्वजत ॥ १८ ॥

रा० टी०–एतावदिति । कौशल्याप्रीतिवर्धनः काकुत्स्थो रामः निरन्तरमुरोगतं प्रतर्दनं पर्यष्वजत विसर्जयामास च सार्द्धश्लोक एकान्वयी ॥ १८ ॥

गो० टी०–एतावदिति । उरोगतं यथा भवति तथा निरन्तरं गाढं पर्यष्वजत ॥ १९ ॥ २० ॥

---

१ राघवमिति गो. पाठः । २ स इति गो. पाठः । ३ सुप्रकाशामिति गो. पाठः ।

विसर्जयामास तदा कौसल्याप्रीतिवर्धनः । राघवेण कृतानुज्ञः कौशेयो ह्यकुतोभयः ॥ १९ ॥
वाराणसीं ययौ तूर्णं राघवेण विसर्जितः । विसृज्य तं काशिपतिं त्रिशतं पृथिवीपतीन्[1] ॥ २० ॥
प्रहसन्राघवो वाक्यमुवाच मधुराक्षरम् । भवतां प्रीतिरव्यग्रा तेजसा परिरक्षिता ॥ २१ ॥
धर्मश्च नियतो नित्यं सत्यं च भवतां सदा । युष्माकं चानुभावेन तेजसा च महात्मनाम्[2] ॥ २२ ॥
हतो दुरात्मा दुर्बुद्धी रावणो राक्षसाधमः । हेतुमात्रमहं तत्र भवतां तेजसा हतः ॥ २३ ॥
रावणः सगणो युद्धे सपुत्रामात्यबान्धवः । भवन्तश्च समानीता भरतेन महात्मना ॥ २४ ॥
श्रुत्वा जनकराजस्य काननान्तनयां हृताम् । उद्युक्तानां च सर्वेषां पार्थिवानां महात्मनाम् ॥ २५ ॥
कालोऽप्यतीतः सुमहान्गमनं रोचयाम्यतः । प्रत्यूचुस्तं च राजानो हर्षेण महता वृताः ॥ २६ ॥
दिष्ट्या त्वं विजयी राम रौद्र्यं चापि प्रतिष्ठितम्[1] । दिष्ट्या प्रत्याहृता सीता दिष्ट्या शत्रुः पराजितः २७
एष नः परमः काम एषा नः प्रीतिरुत्तमा । यत्त्वां विजयिनं राम पश्यामो हतशात्रवम् ॥ २८ ॥
एतत्त्वय्युपपन्नं च यदस्मांस्त्वं प्रशंससे । प्रशंसार्हे न जानीमः प्रशंसां वक्तुमीदृशीम् ॥ २९ ॥
आपृच्छामो गमिष्यामो हृदिस्थो नः सदा भवान् । वर्तामहे महाबाहो प्रीत्यात्र महता वृताः ॥ ३० ॥
भवेच्च ते महाराज प्रीतिरस्मासु नित्यदा । बाढमित्येव राजानो हर्षेण परमान्विताः ॥ ३१ ॥

१९-२०] ति० टी०-तदा । तत इत्यर्थः ॥१९॥२०॥

रा० टी०-राघवेणेति । राघवेण कृतानुज्ञा गमनाज्ञा यस्मै अत एव विसर्जितः प्रेषितः काशेयः वाराणसीं ययौ १९

रा० टी०-विसृज्येति । राघवः त्रिशतं पृथिवीपतीन् उवाच ॥ २० ॥

गो० टी०-विसृज्येति । प्रहसन्निति । त्रिशतसंख्याक-पृथिवीपतिदर्शनजसंतोषात्प्रहासः ॥ २१ ॥

२१] ति० टी०-प्रहसन्निति । अनेकशतसंख्यस्वसुहृत्पृथिवीपतिदर्शनजसंतोषात्प्रहासः । भवतां तेजसाव्यग्रा निश्चलतया स्थिता प्रीतिर्वनात्पुनरागत्यानुभवयोग्यतया परिरक्षिता मयि भवद्भिर्मुहुर्मालोच्य न भवतां मयि प्रीतिः, किं तु स्वीयसत्त्वभावेनैवेत्याशयः ॥ २१ ॥

रा० टी०-तदाकारमाह—भवतामिति । अव्यग्रा निश्चला भवतां प्रीतिः भवतां तेजसा प्रतापेनैव परिरक्षिता अत एव भवतां धर्मः नियतो निरन्तरः सत्यं च नित्यं ध्वंसाप्रतियोगि ॥ २१ ॥

गो० टी०-भवतामिति । भवतां तेजसा अव्यग्रा प्रतिष्ठिता प्रीतिः वनाय निर्गतस्य मे पुनश्चागत्यानुभवयोग्यतया परिरक्षिता । भवतां तेजसा धर्मश्च नियतः । सत्यं च नियतम् ॥ २२-२४ ॥

२२-२३] ति० टी०-उक्तमेवार्थं स्पष्टयति—धर्मश्चेति ॥ २२ ॥ २३ ॥

रा० टी०-युष्माकमिति । युष्माकमनुभावेन प्रभावेण तेजसा च रावणो हतः ॥ २२ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—हेतुमात्रमिति । रावणः भवतां तेजसैव हतः अहं तु तत्र हनने हेतुमात्रम् ॥२३॥

२४-२७] ति० टी०-रावणो हत इति शेषः । भवन्तश्च समानीता मेलिताः । एवं च दैवाद्भवतां क्लेशानुभवो न संपन्न इति शेषः ॥ २४-२७ ॥

रा० टी०-भवन्त इति । काननाद्धृतां जनकराजस्य तनयां श्रुत्वा भरतेन ये भवन्तस्समानीताः तेषामुद्युक्तानां भवतां सुमहान्कालोऽतीतः अतो भवतां गमनं रोचयामि अर्द्धचतुष्टयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०-भवन्त इति । भवन्तश्च समानीताः संमेलिताः ॥ २५-२७ ॥

रा० टी०-प्रत्यूचुरिति । राजानः तं रामं प्रत्यूचुः अहं पृथक् तदाकारमाह—दिष्ट्येत्यादिभिः । दिष्ट्या अस्मद्भाग्यवशेन त्वं विजयी दिष्ट्यैव शत्रुश्च पराजितः ॥ २६ ॥ २७ ॥

गो० टी०-दिष्ट्येति । हतशात्रवं हतशत्रुम् ॥ २८-३१ ॥

२८] ति० टी०-हतशात्रवं हतशत्रुसमूहम् ॥ २८ ॥

रा० टी०-एष इति । विजयिनं त्वां यत्पश्यामः तदेष एव नः परमः कामः इच्छाविषयीभूतः एष एव प्रीतिः प्रीतिहेतुः ॥ २८ ॥

२९] ति० टी०-एतत्त्वय्युपपन्नम् । सकललोकमनोरमणत्वादिति भावः । प्रशंसार्हे सकललोकप्रशंसार्हस्वभावयुक्त, ईदृशीं भवदुक्तप्रशंसाजातीयां प्रशंसां वक्तुं न जानीमः, अतस्तामकृत्वैव ॥ २९ ॥

रा० टी०-एतदिति । हे प्रशंसार्हे यदस्मान् त्वं प्रशंससे तत्त्वयि उपपन्नं युक्तमेव वयं तु ईदृशीं प्रशंसां वक्तुं न जानीमः ॥ २९ ॥

३०-३१] ति० टी०-यथा सदा भवान्नो हृदिस्थः, एवं वयमपि त्वद्विषयया महत्या प्रीत्या वृतास्तव हृदि यथा

१ काशीशोपीति गो. पाठः । २ स्वराज्येऽपि प्रतिष्ठित इति गो. पाठः ।

ऊचुः प्राञ्जलयः सर्वे राघवं गमनोत्सुकाः । पूजितास्ते च रामेण जग्मुर्देशान्स्वकान्स्वकान् ३२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ।

भरतलक्ष्मणशत्रुघ्नपालिता राजानः स्वकं पुरं गत्वा भरतादीन्निवर्त्य तद्वारासंख्येयानुपहारान् रामाय प्राहिण्वन् रामस्तु सुग्रीव-विभीषणादिकपिराक्षसेन्यस्तदुपकृतिस्मरणपूर्वकं रत्नानि महार्हाण्याभरणानि च प्रतिपाद्य तैः सह मासद्वयं सुखं नीतवान् ।

ते प्रयाता महात्मानः पार्थिवास्ते प्रहृष्टवत् । गजवाजिसहस्रौघैः कम्पयन्तो वसुंधराम् ॥ १ ॥
अक्षौहिण्यो हि तत्रासन्राघवार्थे समुद्यताः । भरतस्याज्ञयानेकाः प्रहृष्टबलवाहनाः ॥ २ ॥
ऊचुस्ते च महीपाला बलदर्पसमन्विताः । न रामरावणं युद्धे पश्यामः पुरतः स्थितम् ॥ ३ ॥
भरतेन वयं पश्चात्समानीता निरर्थकम् । हता हि राक्षसाः क्षिप्रं पार्थिवैः स्युर्न संशयः ॥ ४ ॥
रामस्य बाहुवीर्येण रक्षिता लक्ष्मणस्य च । सुखं पारे समुद्रस्य युध्येम विगतज्वराः ॥ ५ ॥
एताश्चान्याश्च राजानः कथास्तत्र सहस्रशः । कथयन्तः स्वराज्यानि जग्मुर्हर्षसमन्विताः॥ ६ ॥

वर्तामहे तथास्मासु ते प्रीतिश्च भवेद्भृशम् । द्वेषेण हृदयस्थता मा भूदित्येतदुक्तिः—**बाढमित्येवेति** । रामेणोक्ता इति शेषः ॥ ३० ॥ ३१ ॥

३२] ति० टी०—गमिष्यामः इत्यूचुरिति पूर्वेणान्वयः । पूजितास्ते चेत्यादिना वृत्तक्रियानुवादः ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टात्रिंशः सर्गः ॥ ३८ ॥

रा० टी०—**आपृच्छाम** इति । वयं गमिष्यामः अत एव आपृच्छामः आज्ञां गृह्णीमः अत्र त्वत्सन्निधौ महता महत्या प्रीत्याढ्या वयं वर्त्तामहे अतो भवान्नो हृदिस्थः सदा भवत्विति शेषः सामान्ये नपुंसकम् ॥ ३० ॥

रा० टी०—हृदिस्थत्वप्रकारमाह—**भवेदिति** । ते प्रीतिरस्मासु नित्यदा भवेत् परमुत्कृष्टं यथा भवति तथा हर्षेणान्विताः गमनोत्सुकाः राजानः बाढं भवदुक्तमङ्गीकृतमित्यूचुः अत एव रामेण पूजिताः सत्कृतास्ते स्वकान्स्वकान्देशान् जग्मुः श्लोकद्वयमेकान्वयि ॥ ३१ ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टात्रिंशः सर्गः ॥ ३८ ॥

गो० टी०—**बाढमित्येवेति** । रामेणोक्ता इति शेषः । गमिष्याम इत्यूचुरिति पूर्वेणान्वयः ॥ ३२–३३ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्री-रामायणव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

१] ति० टी०—अथ विसृज्य राजभिः स्वदेशस्थैः प्रेषितोपहारग्रहः—**प्रयाता इति** । प्रहृष्टवत्प्रहृष्टाः ॥ १ ॥

रा० टी०—राजां वृत्तमाह—**ते** इत्यादिभिः । ते रामेणाज्ञापिताः ते प्रसिद्धाः पार्थिवा गजवाजिसहस्रौघैः वसुंधरां कंपयन्तस्सन्तः प्रहृष्टवत् प्रहर्षविशिष्टं यथा भवति तथा प्रयाताः ॥ १ ॥

गो० टी०—त इत्यादि । प्रहृष्टवत् प्रहृष्टाः सन्तः ॥ १ ॥

२] ति० टी०—राघवार्थं राघवस्य रणसहायार्थं ॥ २ ॥

रा० टी०—**अक्षौहिण्य** इति । राघवार्थं राघवसाहाय्यार्थं तत्र राघवसमीपे प्रहृष्टानि बलवाहनानि यासु ता अनेका अक्षौहिण्यः भरतस्याज्ञया आसन् ॥ २ ॥

गो० टी०—**अक्षौहिण्य** इति । राघवार्थ इति । रामसहायार्थमित्यर्थः ॥ २ ॥

३] ति० टी०—**रामरावणमिति** । रामशत्रुं रावणमित्यर्थः मध्यमपदलोपी समासः ॥ ३ ॥

रा० टी०—ऊचुरिति । ते मार्गे स्थिता महीपाला ऊचुः तदाकारमाह रामरावणम् रामस्य शत्रुं रावणं युद्धे पुरतः स्थितं वयं न पश्यामः अपश्याम अतः भरतेन पश्चाद्युद्धातीतकाले वयं निरर्थकं समानीताः पूर्वमेव वयमानेतव्या इति तात्पर्यम् सार्द्धश्लोक एकान्वयी ॥ ३ ॥

गो० टी०—ऊचुरिति । रामरावणं रामस्य रावणम् । वध्यघातुकसंबन्धः षष्ठ्यर्थः । रामं रावणमिति पाठे युद्धे रामं रावणं च युद्ध्यमानौ रामरावणावित्यर्थः ॥ ३ ॥

४–६] ति० टी०—पश्चाद्रावणवधानन्तरम् । पार्थिवैर्हताः स्युः । यदि पूर्वं समानीताः स्युरिति शेषः ॥ ४–६ ॥

रा० टी०—**हता** इति । बाहुवीर्येण रक्षिताः वयं समुद्रस्य पारे सुखं युद्धेम अत एव पार्थिवैरस्माभिः सर्वे राक्षसाः हताः स्युः सार्द्धश्लोक एकान्वयी ॥ ४ ॥

रा० टी०—**एता** इति । सहस्रशः कथाः कथयन्तो राजानः स्वराज्यानि जग्मुः ॥ ६ ॥

---

१ चैवेति गो. पाठः ।

स्वानि राज्यानि मुख्यानि ऋद्धानि मुदितानि च। समृद्धधनधान्यानि पूर्णानि वसुमन्ति च ॥ ७ ॥
यथापुराणि ते गत्वा रत्नानि विविधान्यथ। रामस्य प्रियकामार्थमुपहारं नृपा ददुः ॥ ८ ॥
अश्वान्यानानि रत्नानि हस्तिनश्च मदोत्कटान्। चन्दनानि च मुख्यानि दिव्यान्याभरणानि च ॥९॥
मणिमुक्ताप्रवालांस्तु दास्यो रूपसमन्विताः। अजाविकं च विविधं रथांस्तु विविधान्बहून् ॥ १० ॥
भरतो लक्ष्मणश्चैव शत्रुघ्नश्च महाबलः। आदाय तानि रत्नानि स्वां पुरीं पुनरागताः ॥ ११ ॥
आगम्य च पुरीं रम्यामयोध्यां पुरुषर्षभाः। तानि रत्नानि चित्राणि रामाय समुपानयन् ॥ १२ ॥
प्रतिगृह्य च तत्सर्वं रामः प्रीतिसमन्वितः। सुग्रीवाय ददौ राज्ञे महात्मा कृतकर्मणे ॥ १३ ॥
विभीषणाय च ददौ तथान्येभ्योऽपि राघवः। राक्षसेभ्यः कपिभ्यश्च यैर्वृतो जयमाप्तवान् ॥ १४ ॥
ते सर्वे रामदत्तानि रत्नानि कपिराक्षसाः। शिरोभिर्धारयामासुर्भुजेषु च महाबलाः ॥ १५ ॥
हनूमन्तं च नृपतिरिक्ष्वाकूणां महारथः। अङ्गदं च महाबाहुमङ्कमारोप्य वीर्यवान् ॥ १६ ॥
रामः कमलपत्राक्षः सुग्रीवमिदमब्रवीत्। अङ्गदस्ते सुपुत्रोऽयं मन्त्री चाप्यनिलात्मजः ॥१७॥
सुग्रीवमन्त्रिते युक्तौ मम चापि हिते रतौ। अर्हतो विविधां पूजां त्वत्कृते वै हरीश्वर ॥ १८॥
इत्युक्त्वा व्यर्पयामुच्याङ्गाङ्गदभूषणानि महायशाः। स ववन्ध महार्हाणि तदाङ्गदहनूमतोः ॥ १९ ॥
आभाष्य च महावीर्यान्राघवो यूथपर्षभान्। नीलं नलं केसरिणं कुमुदं गन्धमादनम् ॥ २० ॥
सुषेणं पनसं वीरं मैन्दं द्विविदमेव च। जाम्बवन्तं गवाक्षं च विनतं धूम्रमेव च ॥ २१ ॥
वलीमुखं प्रजङ्घं च संनादं च महाबलम्। दरीमुखं दधिमुखमिन्द्रजानुं च यूथपम् ॥ २२ ॥
मधुरं श्लक्ष्णया वाचा नेत्राभ्यामार्पिवन्निव। सुहृदो मे भवन्तश्च शरीरं भ्रातरस्तथा ॥ २३ ॥
युष्माभिरुद्धृतश्चाहं व्यसनात्कानने।कसः। धन्यो राजा च सुग्रीवो भवद्भिः सुहृदां वरैः ॥२४॥
एवमुक्त्वा ददौ तेभ्यो भूषणानि यथार्हतः। वस्त्राणि च महार्हाणि सम्व्यजे च नरर्षभः ॥ २५ ॥

गो० टी०-भरतेनेति। पश्चाद्रावणवधानन्तरम्॥४-६॥

७] ति० टी०-उक्तानि स्वराज्यान्यनया विशिनष्टि—स्वानीत्यादि। मुख्यानि प्रसिद्धानि। धनं जीवाजीवरूपम्। वसुमन्ति महानिधिमन्ति ॥ ७ ॥

रा० टी०-स्वानिति। ते नृपाः स्वानि राज्यानि स्वानि पुराणि च यथा यथावद्गत्वा रामस्य प्रियकामार्थं विविधानि रत्नादीन्युपहारान्ददुः तत्राजाविकमजाश्च अविका अवयश्च एतेषां समाहारः इति श्लोकचतुष्टयमेकान्वयि ७-१०

गो० टी०-स्वानीति। मुख्यानीति। प्रसिद्धानीत्यर्थः। धनं जीविकाजीवरूपम्। वसुमन्ति महानिधिमन्ति ॥ ७ ॥

८-९] ति० टी०-यथापुराणि यथापूर्वमक्षतशरीरतया पुराणि गत्वा प्रियकामार्थमिष्टकामार्थं ददुः। आनुयात्रिकेभ्यः। भरतलक्ष्मणशत्रुघ्नेभ्य इति शेषः ॥ ८ ॥ ९ ॥

गो० टी०-यथेति। यथापुराणि यथाप्राप्तस्वस्वपुराणि। उपहारान् प्रत्युपहारान् ॥ ८ ॥ ९ ॥

१०-१४] ति० टी०-अजाविकं विशिष्टचर्मवत् १०-१४

गो० टी०-मणीति। अजाविकान् चर्ममयान्। तल्पविशेषानित्यर्थः। अजाविकं च विविधमिति वा पाठः॥१०-१४॥

रा० टी०-भरत इति। भरतादयः रत्नानि तदुपलक्षितराजसमर्पितवस्तुजातानि आदाय पुरीमयोध्यां पुनरागताः ११

रा० टी०-आगम्येति। पुरुषर्षभाः भरतादयः आगम्य रत्नानि रामाय समुपानयन् ॥ १२ ॥

रा० टी०-प्रतिगृह्येति। रामः प्रतिगृह्य तत्सर्वं यैर्वृतो जयमाप्तवान् तेभ्यः सुग्रीवादिभ्यः ददौ श्लोकद्वयमेकान्वयि ॥ १३ ॥ १४ ॥

१५] ति० टी०-शिरोभिः किरीटकुण्डलादीनां धारणम्। अङ्गदादीनां भुजेषु धारणम् ॥ १५ ॥

रा० टी०-ते इति। कपिराक्षसाः रत्नानि शिरोभिः शिरःसु भुजेषु च धारयामासुः ॥ १५ ॥

गो० टी०-त इति। शिरोभिरिति। मुकुटकुण्डलादीनीति भावः। बाहुभिरिति। अङ्गदादीनीत्यर्थः। भुजेषु चेति पाठः ॥ १५-२६ ॥

१६-१७] ति० टी०-अङ्कमारोप्य। बालाविवेति शेषः। अनेन भगवता स्वस्य निरतिशयबलवत्त्वेनेश्वरत्वं सूचितम् ॥ १६ ॥ १७ ॥

१८-२५] ति० टी०-मन्त्रिते मन्त्रे ॥ १८-२५ ॥

---

१ उपहारानिति गो. पाठः। २ अजाविकांस्तु विविधान् रथांस्तु विविधान्ददुरिति गो. पाठः। ३ महाबला इति गो. पाठः। ४ आहरन्निति गो. पाठः। ५ बाहुभिरिति गो. पाठः। ६ व्यर्पेति गो. पाठः।

ते पिबन्तः सुगन्धीनि मधूनि मधुपिङ्गलाः । मांसानि च सुमृष्टानि मूलानि च फलानि च॥२६॥
एवं तेषां निवसतां मासः साग्रो ययौ तदा । मुहूर्तमिव ते सर्वे रामभक्त्या च मेनिरे ॥ २७ ॥
रामोऽपि रेमे तैः सार्धं वानरैः कामरूपिभिः । राक्षसैश्च महावीर्यैर्ऋक्षैश्चैव महाबलैः ॥ २८ ॥
एवं तेषां ययौ मासो द्वितीयः शिशिरः सुखम् । वानराणां प्रहृष्टानां राक्षसानां च सर्वशः॥ २९ ॥
इक्ष्वाकुनगरे रम्ये परां प्रीतिमुपासताम् । रामस्य प्रीतिकरणैः कालस्तेषां सुखं ययौ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।

रावणः सुग्रीवादिवानरान् विभीषणादिनिशाचरांश्च स्वं स्वं स्थानं समधुरभाषणं सपूज्य प्राहिणोत् ।

तथा स्म तेषां वसतामृक्षवानररक्षसाम् । राघवस्तु महातेजाः सुग्रीवमिदमब्रवीत् ॥ १ ॥

रा० टी०–**हनूमन्तमिति** । रामः हनूमन्तमङ्गदं च अङ्कमारोप्य सुग्रीवमब्रवीत् सार्द्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०–तदाकारमाह—**अंगद** इति । हे हरीश्वर हे सुग्रीव त्वत्कृते मन्त्रिते मन्त्रे युक्तौ मम हिते रतौ ते पुत्रोंगदः ते मन्त्री अनिलात्मजश्च विविधां पूजामर्हतः इत्युक्त्या अंगादूषणानि व्यवसुच्य अंगदहनूमतोर्बन्ध सार्द्धश्लोकद्वयमेकान्वयि ॥ १७–१९ ॥

रा० टी०–**आभाष्येति** । राघवः यूथपर्षभान् नीलादीन् आभाष्य सम्बोध्य भवन्तो ये सुहृदादयः यतो युष्माभिः व्यसनादहमुद्धृतः भवद्भिः सह सुग्रीवो धन्यः एवं मधुरं यथा भवति तथा श्लक्ष्णया वाचोक्त्वा तेभ्यः यथार्हतः यथायोग्यं भूषणादीनि ददौ सस्वजे च श्लोकषट्कमेकान्वयि ॥२०–२५॥

२६] ति० टी०–मांसानि चेत्यस्य भुञ्जत इति शेषः २६

रा० टी०–**ते इति** । ते मधुपिंगलाः मधूनि पुष्परसान्पिबन्तः मांसानि राज्यभोग्यवस्तूनि मूलानि च खादन्तश्चातिष्ठन्निति शेषः मांसं स्याद्भोग्यवस्तुनीति कोशः ॥ २६ ॥

२७–३०] ति० टी०–**एवं तेषामिति** । वसन्तेऽभिषिक्तेन रामेण मासानन्तरं विशेषसत्कारप्राप्तौ शिशिरः शिशिर्तुसंबन्धी द्वितीयो मासः सुखं गत इत्युक्त्या संवत्सरपर्यन्तं तेषां रामसमीपे वास उक्त इति तीर्थादयः । वस्तुतोऽधिकमासगणनयामान्तमानेनाश्विनकृष्णपक्षेऽयोध्याप्रवेशेन तत्रैव तदुत्तरशुक्लपक्षे वाभिषेकः । साग्रो मास इत्यनेन कार्तिकान्ता स्थितिरुक्ता । ततः शिशिरो द्वितीयो मासः फाल्गुनो गत इति हेमन्तशिशिरावर्षशरच्च तत्र वास इति पञ्चमासपर्यन्तं तत्र वास इति लभ्यते इति मम भाति । पूर्वकाण्डान्तसंक्षेपेणोक्तस्यैवार्थस्यात्र काण्डे विस्तरेणोक्तिरिति बोध्यम् । एवं तेषामिति भरतायानीतरत्नविशेषैर्विशेषसत्कारप्राप्तिपर्यन्तं निवसतां तेषां साग्राः पञ्चषट्दिनाधिका मासा गताः प्रीतिकरणैः समानैः ॥२७–३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रा० टी०–**एवमिति** । एवं निवसतां तेषां सुग्रीवादीनां साग्रः किंचिदधिको मासो ययौ ते रामभक्त्योपलक्षिताः सुग्रीवादयः मुहूर्तमिव मेनिरे साग्रमासमित्यर्थतो लब्धम्॥२७॥

रा० टी०–**राम इति** । रामः वानरादिभिः सह रेमे॥२८॥

गो० टी०–एवं तेषां निवसतामिति । आभरणादिभिः सत्कृतानां निवसतां तेषां साग्रः पञ्च षड्दिनाधिकः मासो गतः ॥ २७ ॥ २८ ॥

रा० टी०–**एवमिति** । एवं मुहूर्तत्वेन रूपेण द्वितीयः शिशिरः मासो माघः ययौ एतेन सम्वत्सरो व्यतीत इति सूचितम् ॥ २९ ॥

गो० टी०–**एवं तेषामिति** । वसन्तेऽभिषिक्तेन रामेण मासानन्तरमपि अविशेषसत्कारं प्राप्तानां तेषां द्वितीयः शैशिरो मासः फाल्गुनमासः सुखं गतः । अभिषेकानन्तरं संवत्सरं सुखमुषितास्त इत्यर्थः ॥ २९ ॥

रा० टी०–**इक्ष्वाकुरिति** । रामस्य प्रीतिकरणैः अतिसत्कारैः परां प्रीतिमुपासतां तेषां सुग्रीवादीनां कालः संवत्सरात्मकसमयः सुखं ययौ ॥ ३० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९॥

गो० टी०–**इक्ष्वाकुनगर इति**। प्रीतिकरणैः समानैः॥ ३० इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

१] ति० टी०–अथ तेषां विसर्जनम् । **वसतां तेषामिति** निर्धारणे षष्ठी ॥ १ ॥

रा० टी०–सुग्रीवादीन्प्रति रामोक्तिमाह–**तथेत्यादिभिः**। राघवः **सुग्रीवमब्रवीत्** ॥ १ ॥

गम्यतां सौम्य किष्किन्धां दुराधर्षां सुरासुरैः । पालयस्व सहामात्यै राज्यं निहतकण्टकम् ॥ २ ॥
अङ्गदं च महाबाहो प्रीत्या परमया युतः । पश्य त्वं हनुमन्तं च नलं च सुमहाबलम् ॥ ३ ॥
सुषेणं श्वशुरं वीरं तारं च बलिनां वरम् । कुमुदं चैव दुर्धर्षं नीलं चैव महाबलम् ॥ ४ ॥
वीरं शतबलिं चैव मैन्दं द्विविदमेव च । गजं गवाक्षं गवयं शरभं च महाबलम् ॥ ५ ॥
ऋक्षराजं च दुर्धर्षं जाम्बवन्तं महाबलम् । पश्य प्रीतिसमायुक्तो गन्धमादनमेव च ॥ ६ ॥
ऋषभं च सुविक्रान्तं प्लवंगं च सुपाटलम् । केसरिं शरभं शुम्भं शङ्खचूडं महाबलम् ॥ ७ ॥
ये ये मे सुमहात्मानो मदर्थे त्यक्तजीविताः । पश्य त्वं प्रीतिसंयुक्तो मा चैषां विप्रियं कृथाः ॥ ८ ॥
एवमुक्त्वा च सुग्रीवमाश्लिष्य च पुनः पुनः । विभीषणमुवाचाथ रामो मधुरया गिरा ॥ ९ ॥
लङ्कां प्रशाधि धर्मेण धर्मज्ञस्त्वं मतो मम । पुरस्य राक्षसानां च भ्रातुर्वैश्रवणस्य च ॥ १० ॥
मा च बुद्धिमधर्मे त्वं कुर्या राजन्कथंचन । बुद्धिमन्तो हि राजानो ध्रुवमश्नन्ति मेदिनीम् ॥ ११ ॥
अहं च नित्यशो राजन्सुग्रीवसहितस्त्वया । स्मर्तव्यः परया प्रीत्या गच्छ त्वं विगतज्वरः ॥ १२ ॥
रामस्य भाषितं श्रुत्वा ऋक्षवानरराक्षसाः । साधुसाध्विति काकुत्स्थं प्रशशंसुः पुनःपुनः ॥ १३ ॥
तव बुद्धिर्महाबाहो वीर्यमद्भुतमेव च । माधुर्यं परमं राम स्वयंभोरिव नित्यदा ॥ १४ ॥
तेषामेवं ब्रुवाणानां वानराणां च रक्षसाम् । हनूमान्प्रणतो भूत्वा राघवं वाक्यमब्रवीत् ॥ १५ ॥
स्नेहो मे परमो राजंस्त्वयि तिष्ठतु नित्यदा । भक्तिश्च नियता वीर भावो नान्यत्र गच्छतु ॥ १६ ॥

गो० टी०–तथास्मेत्यादि । तेषामिति भावलक्षणे षष्ठी तेषु वसत्स्विति यावत् ॥ १ ॥

२-९] ति० टी०–किष्किन्धां प्रतीति शेषः ॥ २–९ ॥

रा० टी०–तदाकारमाह–गम्यतामित्यादिभिः । महामात्यैर्युक्तस्त्वं राज्यं पालयस्व अत एव किष्किन्धां प्रति गम्यताम् प्रतीत्यध्याहृतम् यदि तु किष्किन्धां राज्यं च पालयस्व अत एव गम्यतामित्यन्वयस्तदा नाध्याहृतिकल्पना ॥ २ ॥

रा० टी०–अंगदमिति । प्रीत्या युक्तस्त्वमंगदं हनुमन्तं च पश्य ॥ ३ ॥

रा० टी०–सुषेणमिति । प्रीतिसमायुक्तस्त्वं सुषेणादीन्पश्य श्लोकचतुष्टयमेकान्वयि ॥ ४–७ ॥

रा० टी०–ये इति । मदर्थं त्यक्तजीविता ये अन्ये च तान्पश्य एषां दर्शनकर्मीभूतानां विप्रियं मा कृथाश्च ॥ ८ ॥

रा० टी०–एवमिति । सुग्रीवमुक्त्वाश्लिष्य च रामो विभीषणमुवाच ॥ ९ ॥

गो० टी०–गम्यतामिति । किष्किन्धां प्रतीति शेषः २–८

१०] ति० टी०–पुरस्य पुरवर्तिप्राणिनां राक्षसानाम् । वैश्रवणस्य । संमतोऽसीति शेषः ॥ १० ॥

रा० टी०–तदाकारमाह—लङ्कामित्यादिभिः । मम पुरस्य लंकायाश्च राक्षसानां च वैश्रवणस्य च मतोभिमतस्त्वं. लंकां धर्मेण प्रशाधि पालयेत्यर्थः ॥ १० ॥

गो० टी०–लङ्कामिति । पुरस्य पुरवर्तिप्राणिनां राक्षसादीनाम् स्वभ्रातुर्वैश्रवणस्य च संमतो ह्यसि परमाप्तोसि । भ्रातुर्वैश्रवणस्य चेति पाठे संमतोसीति शेषः ॥ ९ ॥

११] ति० टी०–ध्रुवं चिरकालम् ॥ ११ ॥

रा० टी०–मा चेति । अधर्मे बुद्धिं कथंचन मा कुर्याः हि यतो बुद्धिमन्तः धर्मविषयकबुद्धियुक्ताः राजानः मेदिनीं ध्रुवमश्नन्ति ॥ ११ ॥

गो० टी०–मा चेति । ध्रुवं शाश्वतम् ॥ १०–१२ ॥

१२-१३] ति० टी०–अहं चेति । अनेन रावणवत्क्रूरबुद्धिः कदापि न कार्या । तथा सति सुग्रीवादयो रावणमिव त्वामपि नाशयिष्यन्तीति व्यङ्ग्यम् ॥ १२ ॥ १३ ॥

रा० टी०–अहमिति । सुग्रीवसहितोहं त्वया नित्यशः प्रीत्या स्मर्तव्यः विगतज्वरस्त्वं गच्छ लङ्कामिति शेषः ॥ १२ ॥

रा० टी०–रामस्येति । ऋक्षादयः काकुत्स्थं साधुसाध्विति प्रशशंसुः ॥ १३ ॥

१४-१५] ति० टी०–अद्भुतं जगदाश्चर्यभूतम् । स्वयंभोरिवानन्तकल्याणगुणस्य भगवतो ब्रह्मण इव ॥ १४ ॥ १५ ॥

रा० टी०–तवेति । हे राम तव बुद्धिप्रभृति स्वयम्भोरिव नित्यदा नित्यमस्तीति शेषः ॥ १४ ॥

रा० टी०–तेषामिति । हनुमान् राघवमब्रवीत् ॥ १५ ॥

गो० टी०–तवेति । अद्भुतं वीर्यं जगदद्भुतकरं शौर्यम् ॥ १३ ॥ १४ ॥

१६] ति० टी०–नित्यदा सर्वकाले । स्नेहो नाम प्रियायां

१ इदमर्धं गो. पुस्त. नास्ति । २ जाम्बवन्तं महाबलमिति गो. पाठः । ३ इदमर्धं गो. पुस्त. न दृश्यते । ४ च मे इति गो. रा. पाठः । ५ स्वभ्रातुः संमतो ह्यसाविति गो. पाठः । ६ प्रवण इति गो. पाठः ।

यावद्रामकथा वीर चरिष्यति महीतले । तावच्छरीरे वत्स्यन्तु प्राणा मम न संशयः ॥ १७ ॥
यच्चैतच्चरितं दिव्यं कथा ते रघुनन्दन । तन्मयाप्सरसो रामं श्रावयेयुर्नरर्षभ ॥ १८ ॥
तच्छ्रुत्वाहं ततो वीर तव चर्यामृतं प्रभो । उत्कण्ठां तां हरिष्यामि मेघलेखामिवानिलः ॥ १९ ॥
एवं ब्रुवाणं रामस्तु हनूमन्तं वरासनात् । उत्थाय सस्वजे स्नेहाद्वाक्यमेतदुवाच ह ॥ २० ॥
एवमेतत्कपिश्रेष्ठ भविता नात्र संशयः । चरिष्यति कथा यावदेषा लोके च मामिका ॥ २१ ॥
तावत्ते भविता कीर्तिः शरीरेऽप्यसवस्तथा । लोका हि यावत्स्थास्यन्ति तावत्स्थास्यन्ति मे कथाः२२
एकैकस्योपकारस्य प्राणान्दास्यामि ते कपे । शेषस्येहोपकाराणां भवाम ऋणिनो वयम् ॥ २३ ॥
मदङ्गे जीर्णतां यातु यत्त्वयोपकृतं कपे । नरः प्रत्युपकाराणामापत्स्वायाति पात्रताम् ॥ २४ ॥
ततोऽस्य हारं चन्द्राभं मुक्त्य कण्ठात्स राघवः । वैदूर्यतरलं कण्ठे बबन्ध च हनूमतः ॥ २५ ॥

प्रियस्येव सदा स्मृतिहेतुः । भक्तिर्नाम परलोकगतित्वेनोपास्यत्वबुद्धिः । नित्यदेत्यनेन जलं विना मत्स्यस्येव क्षणमपि तं विना जीवितुमशक्यत्वं सूचितम् । अन्यत्र भावो मा गच्छतु विषयान्तरे इत्यर्थः ॥ १६ ॥

रा० टी०–तदाकारमाह स्नेह इत्यादिभिः मे परमः स्नेहः त्वयि नित्यदा नित्यं तिष्ठतु विपतया अस्तु अत एव मे परमः भावः प्रेम अन्यत्र त्वदतिरिक्ते न गच्छतु अत एव मे भक्तिस्त्वत्कर्मकसेवा नियतास्तु ॥ १६ ॥

गो० टी०–स्नेह इति । स्नेहः सुहृदि प्रीतिः । भक्तिः उत्कृष्टे प्रीतिः ॥ १६ ॥

१७] ति० टी०–तावद्वत्स्यन्ति । त्वत्कथाश्रवणपरमामृतास्वादनबलादिति भावः । न तु तदुत्तरमित्याशयः । 'वत्स्यन्तु' इति पाठे वसन्तित्यर्थः । आर्षः स्यः । एतेन मुक्तिमप्यनादृत्य त्वत्कथामृतपानमेवाकाङ्क्षितमिति दर्शितम् ॥ १७ ॥

रा० टी०–यावदिति । यावन्महीतले तव कथा चरिष्यति तावदेव मम प्राणाः शरीरे वत्स्यन्तु वसन्तु ॥ १७ ॥

गो० टी०–यावदिति । तावच्छरीरे वत्स्यन्ति त्वत्कथामृतरसास्वादबलादिति भावः ॥ १६–२० ॥

१८] ति० टी०–ते तव कथारूपं यदेतद्दिव्यचरितं तदित्यन्वयः ॥ १८ ॥

रा० टी०–यदिति । ते कथारूपं यद्दिव्यं चरितं तत् अप्सरसः मम मह्यं श्रावयेयुः ॥ १८ ॥

१९–२०] ति० टी०–उत्कण्ठां त्वद्दर्शनविषयाम् १९॥२०

रा० टी०–कथाश्रवणे प्रयोजनमाह–तदिति । तत् अद्भुतं तव चर्यामृतमाचरणरूपपीयूषं श्रुत्वा तां दुस्त्यजामुत्कण्ठां भवद्वियोगजनितदुःखमनिलो मेघलेखामिव हरिष्यामि ॥ १९ ॥

रा० टी०–एवमिति । रामः हनुमन्तं सस्वजे एतदुवाच च ॥ २० ॥

२१] ति० टी०–एवमेतदित्येवंशब्दार्थः—चरिष्यति कथेत्यादि ॥ २१ ॥

२२] ति० टी०–एवं च हनुमते भगवताकारनित्यत्वं कल्पस्थायित्वरूपं दत्तमित्याभाति ॥ २२ ॥

रा० टी०–तदाकारमाह—एवमिति । यावल्लोकास्थास्यन्ति तावन्मे कथाः स्थास्यन्ति यावन्मामिका कथा लोके चरिष्यति तावत्ते शरीरे असवः स्थास्यन्ति तावत्ते कीर्तिश्च भविता सार्द्धश्लोक एकान्वयि ॥ २१ ॥ २२ ॥

गो० टी०–एवं शब्दार्थं विवृणोति–लोका हीति २१॥२२

२३] ति० टी०–उपकाराणां मध्ये शेषस्येत्यर्थः ॥ २३ ॥

रा० टी०–एकैकस्येति । एकैकस्योपकारस्यार्थे प्राणान्दैवादिनिखिलप्रपञ्चहृदयस्थत्वादिभेदेन भिन्नवायून् तत्कृत्यानि देवादिनिखिलप्रपञ्चेन्द्रियकृत्यानि वा एकशेषेणोभयकृत्यानि वा ते दास्यामि त्वदधीनतां प्रापयिष्यामीत्यर्थः एतेन तत्कालादारभ्य देवादिनिखिलप्रपञ्चकृत्यं हनुमदनुमत्यैव भवतीति सूचितम् निखिलप्राणलाभस्तु सामान्योक्तेर्विनिगमनाविरहेण लब्धः रामप्राणानां तु न तेन ग्रहणम् वक्ष्यमाणकार्याणां रामस्य स्वातन्त्र्येण कर्तृत्वानुपपत्तेः उक्तप्रकाराणां मध्ये शेषस्य उर्वरितस्य उपकारस्य ऋणिनो वयं भवामः॥ २३ ॥

२४] ति० टी०–प्रत्युपकाराणां पात्रतां नर आपत्स्वायातीत्यनेन प्रत्युपकारार्थिन उपकृतावापत्प्रार्थना भवति सा मे कदापि मा भूदिति व्यङ्ग्यम् ॥ २४ ॥

रा० टी०–मदिति । हे कपे ! यत्त्वयोपकृतमकृतप्रत्युपकृतिकोपकरणम् तन्मदङ्गे मद्धृदये एव जीर्णतां यातु सदैव तिष्ठत्वित्यर्थः ननु समर्थत्वादिदानीमेव शेषोपि प्रत्युपकारः कथं न क्रियते इत्यत आह नरः आपत्स्वेव प्रत्युपकाराणां पात्रतां याति एतेन हनुमतः सर्वदैव आपद्भावस्सूचितः ॥ २४ ॥

२५] ति० टी०–कण्ठान्मुच्य । स्वीयाद्विमुञ्चेत्यर्थः । तरलो हारमध्यमणिः ॥ २५ ॥

रा० टी०–तत इति । राघवः वैदूर्यं तरलं मध्यमणिर्यस्य तं हारं कंठान्मुच्य मुक्त्वा हनुमतः कण्ठे बबन्ध ॥ २५ ॥

गो० टी०–तत इति । तरलो हारमध्यगो मणिः ॥ २३ ॥

१ वत्स्यन्तीति गो. पाठः । २ नामेति गो. पाठ. । ३ स्थास्यति मे कथेति गो. पाठः । ४ इदमर्धमेतदग्रिमार्धं च गो. पुस्तके नावलोक्येते ।

तेनोरसि निबद्धेन हारेण महता कपिः । रराज हेमशैलेन्द्रश्चन्द्रेणाक्रान्तमस्तकः ॥ २६ ॥
श्रुत्वा तु राघवस्यैतदुत्थायोत्थाय वानराः । प्रणम्य शिरसा पादौ निर्जग्मुस्ते महाबलाः ॥ २७ ॥
सुग्रीवः स च रामेण निरन्तरमुरोगतः । विभीषणश्च धर्मात्मा सर्वे ते बाष्पविक्लवाः ॥ २८ ॥
सर्वे च ते बाष्पकलाः साश्रुनेत्रा विचेतसः । संमूढा इव दुःखेन त्यजन्तो राघवं तदा ॥ २९ ॥
कृतप्रसादास्तेनैवं राघवेण महात्मना । जग्मुः स्वं स्वं गृहं सर्वे देही देहमिव त्यजन् ॥ ३० ॥
ततस्तु ते राक्षसऋक्षवानराः प्रणम्य रामं रघुवंशवर्धनम् ।
वियोगजाश्रुप्रतिपूर्णलोचनाः प्रतिप्रयातास्तु यथा निवासिनः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ।

गतेषु सर्वेषु कुबेरानुज्ञया पुनरागतं पुष्पकं गन्धपुष्पादिभिश्चार्चयित्वा प्राप्तेऽवसरे चिन्तितं त्वमायाहीत्यादिश्य यथेच्छं गच्छेति तत्प्रेष्य भ्रातृभिः सह सुखमालपन्नुवास कंचित्कालं राघवः ।

विसृज्य च महावाहुर्ऋक्षवानरराक्षसान् । भ्रातृभिः सहितो रामः प्रमुमोद सुखं सुखी ॥ १ ॥

२६] ति० टी०–हेमशैलेन्द्रो मेरुश्चन्द्रेणाक्रान्तमस्तकस्तादृशः पर्वतो यथा आमूलशिखरं तत्किरणैर्व्याप्तो भवति तथा हनूमांस्तद्रत्नकिरणव्याप्तो जात इत्यर्थः ॥ २६ ॥

रा० टी०–तेनेति । उरसि बद्धेन हारेण महाकपिः रराज तत्र दृष्टान्तः चन्द्रेणाक्रान्तं युक्तं मस्तकं यस्य स हेमशैलेन्द्रः सुमेरुरिव हेमशैलेन्द्रशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः सामर्थ्यादेकदेशेऽन्वयः पुरोहितोयं राजेत्यादाविव विना वर्ति वत्यर्थं गमयतीति न्यायस्वीकारे तु न क्विबन्तकल्पना २६

गो० टी०–तेनेति । हेमशैलेन्द्रः मेरुः । चन्द्रेण चन्द्रकिरणैः आक्रान्तमस्तकः आक्रान्तकर्णप्रदेश इत्यर्थः॥२४॥२५॥

२७] ति० टी०–श्रुत्वेति । हनूमदुद्देश्यकमेकैकस्येत्यादि वाक्यम् ॥ २७ ॥

रा० टी०–श्रुत्वेति । वानरा राघवस्य पादौ प्रणम्य निर्जग्मुः ॥ २७ ॥

२८] ति० टी०–निरन्तरमुरोगतो गाढं परिष्वक्तः॥२८॥

रा० टी०–सुग्रीव इति । सुग्रीवः विभीषणश्च रामेण रामस्य निरन्तरमुरोगतोऽभवदिति शेषः अत एव सर्वे वानराः बाष्पविक्लवाः बभूवुरिति शेषः ॥ २८ ॥

गो० टी०–सुग्रीव इति । निरन्तरम् उरोगत इति गाढपरिष्वक्त इत्यर्थः ॥ २६ ॥

२९] ति० टी०–बाष्पकलाः कण्ठस्य बाष्परुद्धत्वेनाव्यक्तभाषिणः, तत एव दुःखातिशयेन साश्रुनेत्राः । विचेतसः शून्यमनसः, अतः संमूढा इव मूर्छिता इव बभूवुरिति शेषः २९

रा० टी०–सर्व इति । राघवं त्यजन्तः अत एव बाष्पाणां कला येषामत एव साश्रुनेत्राः सर्वे वानराः दुःखेन वियोगजनितखेदेन सम्मूढा इव विचेतसो बभूवुरिति शेषः ॥ २९ ॥

गो० टी०–सर्व इति । विचेतसः वियोगखिन्नचेतसः२७

३०–३१] ति० टी०–देहं त्यजन्देहीव रामवियोगखिन्नाः अभूवन्निति शेषः । शरीरात्माभिमानिनां देहत्यागेनेव तेषां रामविश्लेषेण खेदोऽभूदित्यर्थः ॥ ३१ ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

रा० टी०–कृतेति । देहं त्यजन्देहीव सर्वे सुग्रीवाद्यः स्वं स्वं गृहं जग्मुः ॥ ३० ॥

रा० टी०–उपसंहरन्नाह–तत इति । यथा यथावन्निवासिनः रामसमीपे निवसनशीला अपि राक्षसादयः वियोगजाश्रुप्रतिपूर्णलोचनास्सन्तः रामं प्रणम्य प्रतिप्रयाताः स्वं स्वं पुरमिति शेषः ॥ ३१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

गो० टी०–कृतेति । देहं त्यजन् देहीव रामवियोगखिन्ना इत्यर्थः । युद्धकाण्डान्ते वानरादीनां विसर्जनोक्तिः काण्डसमापनायात्रैव विसर्जनं तत्रोक्तमिति मन्तव्यम् ॥ २८ ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

१] ति० टी०–अथ धनदप्रेषितपुष्पकस्य संपूज्य पुनरिच्छोपस्थापनतया विसर्जनम्—विसृज्येति ॥ १ ॥

रा० टी०–वानरविसर्जनानन्तरकालिकं वृत्तमाह–विसृज्येत्यादिभिः । सुखी नित्यसुखविशिष्टो रामः ऋक्षादीन्विसृज्य प्रमुमोद ऋक्षादयः स्वस्वगृहे स्वस्वदाराद्यवाप्या सुखं मोक्ष्यन्ते इति बुद्ध्या प्रमोदं प्रापेत्यर्थः एतेन रामस्य भक्तसुखसुखित्वं व्यक्तम् ॥ १ ॥

अथापराह्णसमये भ्रातृभिः सह राघवः । शुश्राव मधुरां वाणीमन्तरिक्षान्महाप्रभुः ॥ २ ॥
सौम्य राम निरीक्षस्व सौम्येन वदनेन माम् । कुबेरभवनात्प्राप्तं विद्धि मां पुष्पकं प्रभो ॥ ३ ॥
तव शासनमाज्ञाय गतोऽस्मि भवनं प्रति । उपस्थातुं नरश्रेष्ठ स च मां प्रत्यभाषत ॥ ४ ॥
निर्जितस्त्वं नरेन्द्रेण राघवेण महात्मना । निहत्य युधि दुर्धर्षं रावणं राक्षसेश्वरम् ॥ ५ ॥
ममापि परमा प्रीतिर्हते तस्मिन्दुरात्मनि । रावणे सगणे चैव सपुत्रे सहबान्धवे ॥ ६ ॥
स त्वं रामेण लङ्कायां निर्जितः परमात्मना । वह सौम्य त्वमेव त्वमहमाज्ञापयामि ते ॥ ७ ॥
परमो ह्येष मे कामो यत्त्वं राघवनन्दनम् । वहेर्लोकस्य संयानं गच्छस्व विगतज्वरः ॥ ८ ॥
सोऽहं शासनमाज्ञाय धनदस्य महात्मनः । त्वत्सकाशमनुप्राप्तो निर्विशङ्कः प्रतीच्छै[2] माम् ॥ ९ ॥
अधृष्यः सर्वभूतानां सर्वेषां धनदाज्ञया । चराम्यहं प्रभावेण तवाज्ञां परिपालयन् ॥ १० ॥
एवमुक्तस्तदा रामः पुष्पकेण महाबलः । उवाच पुष्पकं दृष्ट्वा विमानं पुनरागतम् ॥ ११ ॥
यद्येवं स्वागतं तेऽस्तु विमानवर पुष्पक । आनुकूल्याद्धनेशस्य वृत्तदोषो न नो भवेत् ॥ १२ ॥
लाजैश्चैव तथा पुष्पैर्भूषैश्चैव सुगन्धिभिः । पूजयित्वा महाबाहू राघवः पुष्पकं तदा ॥ १३ ॥

गो० टी०-विसृज्येत्यादि । प्रमुमोद सुखं सुखी । स्वतः सुखी रामः आश्रितदुःखनिवृत्त्या सुखं प्रमुमोद । अविच्छिन्नप्रमोदमगमदित्यर्थः । अत्र प्रमुमोदेति दकारो गायत्र्यक्षरम् ॥ १ ॥

२] ति० टी०-अन्तरिक्षात् । अन्तरिक्षचरान्निःसृतामित्यर्थः ॥ २ ॥

रा० टी०-अथेति । राघवः अपराह्णसमये अन्तरिक्षादुदीरितां वाणीं शुश्राव ॥ २ ॥

गो० टी०-अथेति । अन्तरिक्षात्प्रभाषिताम् अन्तरिक्षगतेनोक्ताम् । पुष्पकाभिमानिदेवतयोक्तामित्यर्थः । अन्तरिक्षाद्विनिस्सृतामिति च पाठः ॥ २-७ ॥

३-४] ति० टी०-पुष्पकं विद्धि । पुष्पकाधिष्ठातृदेवतायाः अयं वादः ॥ ३ ॥ ४ ॥

रा० टी०-वाण्याकारमाह-सौम्येत्यादिभिः । कुबेरभवनात्प्राप्तं पुष्पकं मां विद्धि अतः सौम्येन वदनेन उपलक्षितस्त्वं मां निरीक्षस्व ॥ ३ ॥

रा० टी०-तवेति । तव शासनमाज्ञामाज्ञाय ज्ञात्वा भवनं प्रत्यहं गतोस्मि स धनदस्तु उपस्थातुं त्वत्समीपं निवसितुं मां प्रत्यभाषत ॥ ४ ॥

५-७] ति० टी०-निर्जितः । अतस्तमेव वहेति शेषः ५-७

रा० टी०-तद्भाषणाकारमाह-निर्जित इत्यादिभिः । राघवेण रावणं निहत्य त्वं निर्जितोसि ॥ ५ ॥

रा० टी०-ममेति । रावणे हते सति ममापि परमा प्रीतिरभवदिति शेषः ॥ ६ ॥

रा० टी०-स इति । स रामेण निर्जितस्त्वं तं राममेव वह इत्यहमाज्ञापयामि ॥ ७ ॥

८-११] ति० टी०-किं च मद्वहनादपि सर्वलोकप्रियरामवहनं मम परमप्रियमित्याह—परम इति । लोकस्य भूराद्यशेषाभिमतलोकप्रापणस्य । संयानं समीचीनयानभूतस्त्वं राघवनन्दनं वहेरिति यदेष मे परमः कामः, अतस्त्वं गच्छेति संबन्धः ॥ ८-११ ॥

रा० टी०-परम इति । लोकस्य संयानं सकलभुवनाश्रयं राघवनन्दनं यत्त्वं वहेः एष मे मम परमः काम इच्छा अतः त्वं गच्छस्व ॥ ८ ॥

रा० टी०-स इति । धनदस्य शासनमाज्ञाय अहं त्वत्सकाशमनुप्राप्तः अतः निर्विशंकस्त्वं मां प्रतीच्छ ॥ ९ ॥

रा० टी०-अधृष्य इति । प्रभावेण स्वतेजसा सर्वभूतानामधृष्योहं धनदाज्ञया तवाज्ञां परिपालयन्सन्सर्वेषां लोकानां मध्ये चरामि चरिष्यामि ॥ १० ॥

रा० टी०-एवमिति । रामः पुष्पकमुवाच ॥ ११ ॥

गो० टी०-परम इति । लोकस्य संयानमिति । लोकसंचरणमित्यर्थः ॥ ८-१२ ॥

१२-१३] ति० टी०-वृत्तदोषः सद्व्यवहारातिक्रमदोषः ॥ १२ ॥ १३ ॥

रा० टी०-तदाकारमाह-यदीति । यद्येवं धनदाज्ञा तर्हि ते स्वागतमस्तु तत्र हेतुः धनेशस्यानुकूल्याद्धेतोः नोस्माकं वृत्तदोषः सद्व्यवहारातिक्रमरूपोऽधर्मो न भवेत् ॥ १२ ॥

रा० टी०-लाजैरिति । राघवः लाजादिभिः पुष्पकं पूजयित्वा यदाहं स्मरे त्वामिति शेषः तदा त्वमागच्छ अतस्त्वया गम्यताम् यथेच्छं विचर्यतामित्युवाच सार्द्धश्लोक एकान्वयी ॥ १३ ॥

१ प्रभाषितामिति गो. पाठः । २ प्रतीक्षेति गो. पाठः ।

गम्यतामिति चोवाच आगच्छ त्वं स्मरे यदा । सिद्धानां च गतौ सौम्य मा विषादेन योजय॥ १४ ॥
प्रतिघातश्च ते मा भूद्यथेष्टं गच्छतो दिशः । एवमस्त्विति रामेण पूजयित्वा विसर्जितम् ॥ १५ ॥
अभिप्रेतां दिशं तस्मात्प्रायात्तत्पुष्पकं तदा । एवमन्तर्हिते तस्मिन्पुष्पके सुकृतात्मनि ॥ १६ ॥
भरतः प्राञ्जलिर्वाक्यमुवाच रघुनन्दनम् । विबुधैरात्मनि दृश्यन्ते त्वयि वीर प्रशासति ॥ १७ ॥
अमानुषाणि सत्त्वानि व्याहृतानि मुहुर्मुहुः । अनामयश्च मर्त्यानां साग्रो मासो गतो ह्ययम्॥ १८ ॥
जीर्णानामपि सत्त्वानां मृत्युर्नायाति राघव । अरोगप्रसवा नार्यो वपुष्मन्तो हि मानवाः ॥ १९ ॥
हर्षश्चाभ्यधिको राजञ्जनस्य पुरवासिनः । काले वर्षति पर्जन्यः पातयन्नमृतं पयः ॥ २० ॥
वाताश्चापि प्रवान्त्येते स्पर्शयुक्ताः सुखाः शिवाः । ईदृशो नश्चिरं राजा भवेदिति नरेश्वरः ॥ २१ ॥
कथयन्ति पुरे राजन्पौरजानपदास्तथा । एता वाचः सुमधुरा भरतेन समीरिताः ॥
श्रुत्वा रामो मुदा युक्तो बभूव नृपसत्तमः । ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

१४-१५] ति० टी०-स्मरे स्मरामि । हे सौम्य, सिद्धानां गतौ व्योममार्गे । विषादेनास्मद्वियोगदुःखेन मा योजय आत्मानमिति शेषः । सुखमास्वेति तात्पर्यम् ॥ १४-१५ ॥

रा० टी०-सिद्धानामिति । गतौ स्वगमने सिद्धानां गगनस्थसिद्धान् विषादेन मा योजय स्वगमनेन सिद्धान् न पीडयेत्यर्थः । अत एव यथेष्टं दिशो गच्छतस्ते प्रतिघातः शापेन विघातो माभूत् ॥ १४ ॥

रा० टी०-एवमिति । रामेण पूजयित्वा विसर्जितं पुष्पकमस्त्वित्युक्त्वा तस्माद्रामसमीपादभिप्रेतां दिशं प्रायात्१५

गो० टी०-गम्यतामिति । स्मरे स्मरामि । सिद्धानां च गतौ आकाशमार्गे । आत्मानं विषादेन अस्मद्वियोगदुःखेन मा योजय । विमुक्तगत्या गतदुःखः सुप्रतिष्ठितः सुखमास्स्वेत्यर्थः सिद्धानां गतौ मा माम् अविषादेन अश्रमेण योजय प्रापयेति वार्थः ॥ १४-१६ ॥

१६] ति० टी०-पुष्पकं पुष्पमिव लघ्विति पुष्पकम् । संज्ञायां कन् ॥ १६ ॥

रा० टी०-एवमिति । सुकृतः अतिप्रयत्नेन निर्मितः आत्मा शरीरं यस्य किंच सुकृतैः अतिपुण्यवद्भिरेव युक्तः आत्मा यस्य तस्मिन्पुष्पके अन्तर्हिते सति भरतो रघुनन्दनमुवाच ॥ १६ ॥

१७] ति० टी०-विबुधात्मनि देवमूर्तौ ॥ १७ ॥

रा० टी०-तदाकारमाह-विबुधेत्यादिभिः । विबुधानां देवानामपि आत्मनि नियन्तरि त्वयि प्रशासति सति अमानुषाण्यपि सत्त्वानि मुहुर्मुहुर्व्याहृतानि मनुष्यवदाभाषमाणानि दृश्यन्ते एतेन रामप्रभावस्य अघटितघटनापटीयस्त्वं सूचितम् ॥ १७ ॥

गो० टी०-विविधेति । विविधात्मनि नानारूपे । चित्र इत्यर्थः । अमानुषाणां सत्त्वानां पुष्पकादीनामित्यर्थः ॥ १७ ॥

१८] ति० टी०-कानि दृश्यन्ते तदाह—अमानुषाणीति । सत्त्वानि पुष्पकादीनि । व्याहृतानि । मत्वर्थीयाजन्तम् । व्याहारयन्ति । साग्रो मास इति जातावेकवचनम् । मासा इत्यर्थः ॥ १८ ॥

रा० टी०-अनामय इति । साग्रः किंचिदधिकः योयं मासः भवदभिषेकादारभ्य मासपरिमितकालो गतः तस्मिन्काले जीर्णानामपि मर्त्यानां मरणधर्माणामनामयः रोगराहित्यमस्तीति शेषः मृत्युश्च नायाति इयं भरतोक्तिः वानरस्थितिकाले एव बोध्या अत एव साग्रो मासो गत इति न विरुध्यते ॥ १८ ॥

गो० टी०-अनामय इति । साग्रो मासो गत इति । अभिषेकानन्तरं साग्रो मासो गतः । तावन्मात्रेणानामयादिगुणप्रादुर्भाव इत्याश्चर्यमित्यर्थः । अनेन पुष्पकागमं मासाभ्यन्तर एव तत्कालवृत्तान्तः भरतेन निदर्शित इत्यवगम्यते । पुनः फाल्गुनमासप्राप्तेः पूर्वमुक्तत्वात् ॥ १८ ॥

१९-२२] ति० टी०-तावन्मात्रेणैव मर्त्यानामनामयादिगुणप्रादुर्भाव इत्याह—जीर्णानामिति । वपुष्मन्तो हृष्टपुष्टवपुर्युक्ताः ॥ १९-२२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

रा० टी०-अरोगेति । नार्यः अरोगप्रसवाः सन्ति मानवाः वपुष्मन्तः प्रशस्तशरीरवन्तस्सन्ति अत एव हर्षोऽधिकोस्ति१९

रा० टी०-काल इति । पर्जन्यः काले एव वर्षति॥२०॥

रा० टी०-ईदृश इति । ईदृशो नो राजा चिरं भवेत् इति पौरादयः कथयन्ति ॥ २१ ॥

रा० टी०-एता इति । रामो मुदा युक्तो बभूव ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

१ विविधेति गो. पाठः । २ षष्ठ्यन्तं गो. पु. । ३ सत्त्वानामिति गो. पाठः । ४ अनश्वर इति गो. पाठः ।

द्विचत्वारिंशः सर्गः ।

रामोऽयोध्यानिकटवर्त्यशोकवनिकां प्रविश्य सीतया विहरन् शिशिरं नीत्वा जानक्या गर्भचिन्हानि च वीक्ष्य तां प्रशस्य देवो किमिष्टं तवापत्यकालोयमतः पूरणीयं हि मया यद्यदपेक्षसे इत्यवोचत् सा तु नास्ति किमपि प्रार्थनीयमथापि मूळफलाशिनां मुनीनामाश्रमे रात्रिमेकामपि वस्तुमिच्छामीत्यब्रवीत् दाशरथिस्तु श्व एव तत्करिष्यामीत्यभाषत ।

स विसृज्य ततो रामः पुष्पकं हेमभूषितम् । प्रविवेश महाबाहुरशोकवनिकां तदा ॥ १ ॥
चन्दनागुरुचूतैश्च तुङ्गकालेयकैरपि । देवदारुवनैश्चापि समन्तादुपशोभिताम् ॥ २ ॥
चम्पकागुरुपुंनागमधूकपनसासनैः । शोभितां पारिजातैश्च विधूमज्वलनप्रभैः ॥ ३ ॥
लोध्रनीपार्जुनैर्नागैः सप्तपर्णातिमुक्तकैः । मन्दारकदलीगुल्मलताजालसमावृताम् ॥ ४ ॥
प्रियङ्गुभिः कदम्बैश्च तथा च वकुलैरपि । जम्बूभिर्दाडिमैश्चैव कोविदारैश्च शोभिताम् ॥ ५ ॥
सर्वदा कुसुमैः रम्यैः फलवद्भिर्मनोरमैः । दिव्यगन्धरसोपेतैस्तरुणाङ्कुरपल्लवैः ॥ ६ ॥
तथैव तरुभिर्दिव्यैः शिल्पिभिः परिकल्पितैः । चारुपल्लवपुष्पाढ्यैर्मत्तभ्रमरसंकुलैः ॥ ७ ॥
कोकिलैर्भृङ्गराजैश्च नानावर्णैश्च पक्षिभिः । शोभितां शतशश्चित्रां चूतवृक्षावतंसकैः ॥ ८ ॥
शातकुम्भनिभाः केचित्केचिदग्निशिखोपमाः । नीलाञ्जननिभाश्चान्ये भान्ति तत्र स्म पादपाः ॥ ९ ॥
सुरभीणि च पुष्पाणि माल्यानि विविधानि च । दीर्घिका विविधाकाराः पूर्णाः परमवारिणा ॥१०॥

गो० टी०–अरोगेति । वपुष्मन्तः दृष्टपुष्टवपुर्युक्ताः । सुखी सुखमिति वक्ष्यमाणसर्गकथानुवादसंग्रहः ॥ १९–२२ ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

१] ति० टी०–स इति । अशोकवनिका नाम महाप्रभूणामन्तःपुरैः सह विहारयोग्यमुपवनम् ॥ १ ॥

रा० टी०–पुष्पकविसर्जनानन्तरकालिकं रामवृत्तान्तमाह–स इत्यादिभिः । रामः चन्दनादिभिरुपशोभितां चंपकादिभिश्च शोभितां मंदारादिजालैः समावृतां प्रियङ्गुप्रभृतिभिः शोभितां सर्वदा नित्यं कुसुमानि येषु तैर्दिव्यैस्तरुभिः शिल्पिभिः परिकल्पितैश्च तरुभिः कोकिलादिपक्षिभिश्च शोभितां शतशः चूतवृक्षावतंसकैश्चित्रामशोकवनिकां रामः प्रविवेश श्लोकाष्टकमेकान्वयि ॥ १–८ ॥

गो० टी०–स विसृज्येति । अशोकवनिकामन्तःपुरगतं लीलोद्यानम् ॥ १ ॥

२] ति० टी०–तुङ्गः पुंनागविशेषः । कालेयकं रक्तचन्दनम् ॥ २ ॥

३] ति० टी०–असनः सर्जः ॥ ३ ॥

४] ति० टी०–नीपः कदम्बः । अर्जुनः ककुभः । नागो नागकेसरः ॥ ४ ॥

५] ति० टी०–कदम्बो धूलीकदम्बः ॥ ५ ॥

६] ति० टी०–सर्वदा कुसुमैर्नित्यं कुसुमयुक्तैः । दिव्यगन्धरसोपेतैर्दिव्यगन्धरसपुष्पफलयुतैः ॥ ६ ॥

गो० टी०–चन्दनेति । तुङ्गः पुन्नागविशेषः कालेयो रक्तचन्दनवृक्षः ॥ २–६ ॥

७] ति० टी०–दिव्यैः शिल्पिभिर्वृक्षारोपणादिशिल्पवद्भिः ॥ ७ ॥

गो० टी०–तथैवेति । दिव्यैः शिल्पिभिरिति । ऋतुभिरित्यर्थः । दोहलकादिभिर्वा ॥ ७ ॥

८–९] ति० टी०–चूतवृक्षपुष्परजोऽवतंसभूतं येषां तैः पक्षिभिः ॥ ८ ॥ ९ ॥

गो० टी०–कोकिलैरिति । चूतवृक्षावतंसकैः चूतवृक्षाग्रस्थैरित्यर्थः ॥ ८–१० ॥

रा० टी०–शातकुम्भेति । केचित्पादपाः शातकुम्भनिभाः सुवर्णसदृशाः तत्र अशोकवनिकायां भान्ति स्म ॥ ९ ॥

१०] ति० टी०–माल्यानि पुष्पगुच्छाः ॥ १० ॥

रा० टी०–सुरभीणीति । माल्यानि मालाभ्यो हितानि पुष्पाणि सन्तीति शेषः अर्द्धं पृथक्–दीर्घिका इति । माणिक्यैः कृतानि सोपानानि यासां स्फटिकाः स्फटिकमयाः अन्तरकुट्टिमाः मध्यनिबद्धभूमयो यासां फुल्लानि पद्मोत्पलवनानि यासां दात्यूहशुकैः संघुष्टाः पुष्पशबलैः तीरजैस्तरुभिरुपशोभिताः विविधाकारैः प्राकारैः शिलातैलैश्च शोभिताः विविधाकाराः परमवारिणा पूर्णाः दीर्घिका वाप्यः सन्तीति शेषः अर्द्धषट्कमेकान्वयि ॥ १०–१२ ॥

रा० टी०–तत्रेति । तत्र वापीनां समीपे वनोद्देशे वनैकदेशे वैदूर्यमणिसन्निभैः शाद्वलैः हरितनृणैः परमोपेतां पुष्पि-

१ अशोकेति गो. पाठः । २ तत्रस्येति गो. पाठः ।

माणिक्यकृतसोपानाः स्फाटिकान्तरकुट्टिमाः । फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः ॥ ११ ॥
दात्यूहशुकसंघुष्टा हंससारसनादिताः । तरुभिः पुष्पशबलैस्तीरजैरुपशोभिताः ॥ १२ ॥
प्राकारैर्विविधाकारैः शोभिताश्च शिलातलैः । तत्रैव च वनोद्देशे वैदूर्यमणिसंनिभैः ॥ १३ ॥
शाद्वलैः परमोपेतां पुष्पितद्रुमकाननाम् । तत्र संघर्षजातानां वृक्षाणां पुष्पशालिनाम् ॥ १४ ॥
प्रस्तराः पुष्पशबला नभस्तारागणैरिव । नन्दनं हि यथेन्द्रस्य ब्राह्मं चैत्ररथं यथा ॥ १५ ॥
तथाभूतं हि रामस्य काननं संनिवेशनम् । बह्वासनगृहोपेतां लतासन्नसमावृताम् ॥ १६ ॥
अशोकवनिकां स्फीतां प्रविश्य रघुनन्दनः । आसने च शुभाकारे पुष्पप्रकरभूषिते ॥ १७ ॥
कुशास्तरणसंस्तीर्णे रामः संनिषसाद ह । सीतामादाय हस्तेन मधुमैरेयकं शुचि ॥ १८ ॥
पाययामास काकुत्स्थः शचीमिव पुरंदरः । मांसानि च सुमृष्टानि फलानि विविधानि च ॥ १९ ॥
रामस्याभ्यवहारार्थं किंकरास्तूर्णमाहरन् । उपानृत्यंश्च राजानं नृत्यगीतविशारदाः ॥ २० ॥

तद्रुमाणि काननानि अवान्तरवनानि यस्याः तामशोकवनिकां ददर्शेति शेषः ॥ १३ ॥

११-१३] ति० टी०-स्फाटिकेति । स्फटिकरत्ननिबद्धान्तरे मध्ये कुट्टिमा बद्धभूमयश्च ताः ॥ ११-१३ ॥

गो० टी०-माणिक्येति । स्फाटिकान्तरकुट्टिमाः स्फटिकमयसोपानप्रान्तरत्नानार्हाः निबद्धभूमयः । अन्यथा सर्वत्रान्तरे स्फटिककुट्टिमत्वे पद्माद्युत्पत्तिविरोधात् ॥ ११-१३ ॥

१४] ति० टी०-परमोपेतामत्यन्तसंयुक्ताम् । संघर्षान्स्पर्धया जातानां जातपुष्पाणाम् ॥ १४ ॥

रा० टी०-तत्रेति । तत्र तस्मिन्प्रदेशे संघर्षः परस्परं संश्लेषो जातो येषां तेषाम् पुष्पशालिनां वृक्षाणां पुष्पैः शबलाः प्रस्तराः तारागणैर्नभ इव बभूवुरिति शेषः अर्द्धद्वयमेकान्वयि ॥ १४ ॥

गो० टी०-शाद्वलैरिति । परमोपेताम् अत्यन्तसंयुक्ताम् । संघर्षजातानां स्पर्धयैव जातानाम् । जातपुष्पाणामित्यर्थः ॥ १४ ॥

१५] ति० टी०-प्रस्तराः पाषाणाः । पुष्पैर्नानावर्णैर्वृक्षेभ्यः पतितैः । शबलाः शबलवर्णाः प्रस्तरास्तारागणैर्नभ इव रेजुः । ब्राह्मं ब्रह्मनिर्मितम् । चैत्ररथं कुबेरस्य ॥ १५ ॥

रा० टी०-नन्दनमिति । समीचीनानि निवेशनानि वेश्मानि यस्मिंस्तत् । रामस्य काननं नन्दनादि यथा तथाभूतमस्तीति शेषः ॥ १५ ॥

गो० टी०-प्रस्तरा इति । प्रस्तराः वृक्षमूलेषु शयनार्थं स्थापिताः श्लक्ष्णशिलाः । ब्राह्मं ब्रह्मनिर्मितम् । संनिवेशनं समीचीनसंस्थानोपेतम् ॥ १५ ॥

१६-१७] ति० टी०-संनिवेशनं समीचीनसंस्थानोपेतम् । बह्वासनगृहोपेतां बह्वनामवस्थानोचितगृहयुतां लतासनसमावृतां लतानामासनं परिक्षेपो येषु तैर्लतासन्नैर्लतागृहैः समावृतामुपेताम् ॥ १६ ॥ १७ ॥

रा० टी०-बह्विति । बह्वनि आसनानि येषु तैर्गृहैरुपेतां युक्ताम् लतानामासनैः विस्तारैस्समावृतामशोकवनिकां रामः प्रविश्य पुष्पाणां प्रकरैस्समूहैः भूषिते कुशरूपास्तरणेन संस्तीर्णे शुभाकारे आसने रामस्तन्निषसाद अर्द्धचतुष्टयमेकान्वयि १६।१७

गो० टी०-बह्विति । बह्वासनगृहोपेताम् । अनेकावस्थानयोग्यगृहोपेतामित्यर्थः । लतागृहसमावृतां लतामयगृहसमावृताम् ॥ १६ ॥

गो० टी०-आसन इति । कुथास्तरणसंवीते उपर्यास्तरणावृते ॥ १७ ॥

१८-१९] ति० टी०-कुशास्तरणं नामोपर्यास्तरणम् । मैरेयकं मधु मैरेयकसंज्ञकं मधु मद्यम् । मैरेयमाधवो धात्रीधातकीगुडवारिभिः इति वैजयन्ती ॥ १८ ॥ १९ ॥

रा० टी०-सीतामिति । काकुत्स्थो रामो मैरेयकं मद्यमिव मादकं मधु पुष्परसं हस्तेनादाय सीतां पाययामास ॥ १८ ॥

रा० टी०-मांसानीति । किंकराः मांसानि राज्यभोग्यवस्तूनि शाल्योदनादीनि फलानि च रामस्याभ्यवहारार्थमाहरन् ॥ १९ ॥

गो० टी०-सीतामिति । मैरेयकं धातकीगुडमिश्रवारिभिः कृतं मद्यम् । मैरेयमासवे धात्रीधातकीगुडवारिभिरिति वैजयन्ती ॥ १८ ॥ १९ ॥

२०] ति० टी०-राजानमुपानृत्यन्राजसमीपेऽनृत्यन् २०

रा० टी०-उपेति । किन्नरीभिः परिवारिता अप्सरोगणसंघाः राजानं राममुपानृत्यन्त ॥ २० ॥

गो० टी०-उपानृत्यन्निति । उपनृत्यन्तीति वा पाठः । राजानमिति । राजानमुप राज्ञः समीपे । पानवशं पानजमदवशम् ॥ २०-२३ ॥

१ स्फटिकेति गो. रा. पाठः । २ बह्विश्रेति गो. पाठः । ३ गृहेति गो. पाठः ।

अप्सरोरगसङ्घाश्च किंनरीपरिवारिताः । दक्षिणा रूपवत्यश्च स्त्रियः पानवशं गताः ॥ २१ ॥
उपानृत्यन्त काकुत्स्थं नृत्यगीतविशारदाः । मनोभिरामा रामास्ता रामो रमयतां वरः ॥ २२ ॥
रमयामास धर्मात्मा नित्यं परमभूषिताः । स तया सीतया सार्धमासीनो विरराज ह ॥ २३ ॥
अरुन्धत्या इवासीनो वसिष्ठ इव तेजसा । एवं रामो मुदा युक्तः सीतां सुरसुतोपमाम् ॥ २४ ॥
रमयामास वैदेहीमहन्यहनि देववत् । तथा तयोर्विहरतोः सीताराघवयोश्चिरम् ॥ २५ ॥
अत्यक्रामच्छुभः कालः शैशिरो भोगदः सदा । [दशवर्षसहस्राणि गतानि सुमहात्मनोः ॥]
प्राप्तयोर्विविधान्भोगानतीतः शिशिरागमः । ॥ २६ ॥
पूर्वाह्णे धर्मकार्याणि कृत्वा धर्मेण धर्मवित् । शेषं दिवसभागार्धमन्तःपुरगतोऽभवत् ॥ २७ ॥
सीतापि देवकार्याणि कृत्वा पौर्वाह्णिकानि वै । श्वश्रूणामकरोत्पूजां सर्वासामविशेषतः ॥ २८ ॥
अभ्यगच्छत्ततो रामं विचित्राभरणाम्बरा । त्रिविष्टपे सहस्राक्षमुपविष्टं यथा शची ॥ २९ ॥
दृष्ट्वा तु राघवः पत्नीं कल्याणेन समन्विताम् । प्रहर्षमतुलं लेभे साधुसाध्विति चाब्रवीत् ॥ ३० ॥

२१-२२] ति० टी०-दक्षिणाः कुशलाः । पानवशं गताः पानजमदवशं गताः ॥ २१ ॥ २२ ॥

२३-२५] ति० टी०-रमयामास तोषयामास २३-२५

रा० टी०-दक्षिणा इति । नृत्यगीतविशारदाः पानस्य मादकपुष्परसस्य वशं गताः दक्षिणाः दक्षिणदेशोद्भवाः स्त्रियः उपानृत्यन्त ॥ २१ ॥

रा० टी०-मन इति । सीतायाः सार्द्धमासीनो रामः ताः नृत्यकर्त्रीः अप्सरःप्रभृतीः रमयामास परस्परं विहर्तुं प्रेरयामास अरुंधत्या सहासीनो वशिष्ठ इव विरराज च अर्द्धचतुष्टयमेकान्वयि ॥ २२ ॥ २३ ॥

रा० टी०-एवमिति । मुदा युक्तो रामः एवमनेन प्रकारेण अहन्यहनि सीतां रमयामास ॥ २४ ॥

रा० टी०-तथेति । सीताराघवयोर्विहरतोस्ततोः सदा सर्वकालं भोगप्रदः शैशिरः कालः अत्यक्रामत् ॥ २५ ॥

गो० टी०-तथेति । शिशिरः शुभोत्यक्रामदिति । पुनश्च संवत्सरोतीत इत्यर्थः । वानरादिसुहृत्संलापादिना क्रीडावसराभावात्तैः सह एकसंवत्सरो गतः । तद्विसर्जनानन्तरं क्रीडया पुनरेकः संवत्सरो गतः । तथा चाभिषेकानन्तरं वर्षद्वयं जातम् ॥ २४ ॥ २५ ॥

२७-३०] ति० टी०-'सीताराघवयोश्चिरम्' इत्यनन्तरम् 'अत्यक्रामच्छुभः कालः शैशिरो भोगदः सदा' इत्येव श्लोकः । वानराणां गमनोत्तरं पुनश्च संवत्सरोऽतीत इति कतकव्याख्यानात् । 'दशवर्षसहस्राणि गतानि सुमहात्मनोः' इति प्रक्षिप्तमिति गम्यते । 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः' इति वाल्मीकिशापाच्च । सीतात्यागोत्तरमश्वमेधप्रवृत्त्या तदन्ते 'दशवर्षसहस्राणि वाजिमेधानथाकरोत्' इति वाल्मीकयुक्तेश्च । यद्वा वर्षशब्दो दिनपरः । विवाहोत्तरं तावन्ति गतानि द्वादशाधिकमयोध्यायां चतुर्दश वने एकं पुनरयोध्यायामित्येवं किंचिदधिकसप्तविंशतिर्गतानीति बोध्यम् । पूर्वाह्णे द्विधाभागेनेदम् । तदाह-शेषं दिवसभागार्धमिति । अवशिष्टमर्धमित्यर्थः ॥ २७-३० ॥

रा० टी०-दशेति । शिशिरे आगमः अत्यन्तप्राप्तिर्यस्य स भोगः यदा अतीतः तदा विविधान् भोगान् प्राप्तयोः सीतारामयोर्दश वर्षसहस्राणि त्रिंशद्वर्षसहस्राणीत्यर्थः गतानि एतेन सहस्रत्रयवर्षाणि यज्ञार्थमवशिष्टानीति फलितम् । त्रयोदशाब्दसाहस्रमिति भागवतेन तु न विरोधः तत्र त्रयोदशपरमितवर्षाणि अब्दसाहस्रं चेत्यर्थः न्यूनतादोषस्तु न तत्र दीक्षाग्रहणावधिकयागसमाप्तिकालपरिमाणबोधनस्यैव विवक्षितत्वात् अत्र तु सामग्रीसम्पादनादिकालपरिमाणबोधकत्वमिति दिक् ॥ २६ ॥

रा० टी०-भोगकालानन्तरदिवसकृत्यं बोधयन्नाह-पूर्वाह्ण इति । पूर्वाह्णधर्मकार्याणि कृत्वा शेषमवशिष्टं दिवसभागार्द्धमालोक्येति शेषः अन्तःपुरगतोऽभवत् ॥ २७ ॥

रा० टी०-सीतेति । सीतापि पौर्वाह्णिकानि देवकार्याणि कृत्वा श्वश्रूणां पूजामकरोत् पूर्वाह्ण एवेति शेषः ॥ २८ ॥

रा० टी०-अभ्यगच्छदिति । ततः पूर्वाह्णकालानन्तरं विचित्राभरणाम्बरा सीता राममभ्यगच्छत् तत्र दृष्टान्तः त्रिविष्टपे उपविष्टं सहस्राक्षं शची यथा ॥ २९ ॥

रा० टी०-दृष्ट्वेति । कल्याणेन कल्याणजनकगर्भेणेत्यर्थः समन्वितां पत्नीं राघवो दृष्ट्वा अतुलं प्रहर्षं लेभे साधु साध्वित्यब्रवीच्च ॥ ३० ॥

गो० टी०-पूर्वाह्ण इति । शेषं दिवसभागार्धम् अपराह्ण इत्यर्थः ॥ २६-२९ ॥

---

१ इदमर्धं गो. पुस्त. नास्ति । २ बालाश्चेति गो. पाठः । ३ इदमर्धं गो. पुस्त. नास्ति अत्रत्रिंशतितमपद्योत्तरार्धेन गतार्थं च । ४ भूषित इति गो. पाठः । ५ सहेति गो. पाठः । ६ इदमर्धमधिकं गो. रा. पु. ।

अब्रवीच्च वरारोहां सीतां सुरसुतोपमाम् । अपत्यलाभो वैदेहि त्वय्ययं समुपस्थितः ॥ ३१ ॥
किमिच्छसि वरारोहे कामः किं क्रियतां तव । स्मितं कृत्वा तु वैदेही रामं वाक्यमथाब्रवीत् ॥ ३२ ॥
तपोवनानि पुण्यानि द्रष्टुमिच्छामि राघव । गङ्गातीरोपविष्टानामृषीणामुग्रतेजसाम् ॥ ३३ ॥
फलमूलाशिनां देव पादमूलेषु वर्तितुम् । एष मे परमः कामो यन्मूलफलभोजिनाम् ॥ ३४ ॥
अप्येकरात्रिं काकुत्स्थ निवसेयं तपोवने । तथेति च प्रतिज्ञातं रामेणाक्लिष्टकर्मणा ॥
विश्रब्धा भव वैदेहि श्वो गमिष्यस्यसंशयम् । ॥ ३५ ॥
एवमुक्त्वा तु काकुत्स्थो मैथिलीं जनकात्मजाम् । मध्यकक्षान्तरं रामो निर्जगाम सुहृद्वृतः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ।

राम सभां प्रविश्य चारान्स्वविषये प्रजानामनुरागादिकं पृच्छन्तं कोऽपि राजन् भवदीयं सर्वं मनोहारीति शंसन्ति पौराः जानपदाश्च परं केवलं जानकीं परगृहवासदूषितामपि तत्रभवान्भवान्कथमन्वमन्यतेति शङ्कातङ्काकुलचेतस इत्याचष्ट ।

तत्रोपविष्टं राजानमुपासन्ते विचक्षणाः । कथानां बहुरूपाणां हास्यकाराः समन्ततः ॥ १ ॥
विजयो मधुमत्तश्च काश्यपो मङ्गलः कुलैः । सुराजिः कालियो भद्रो दन्तवक्रः सुमागधः ॥ २ ॥
एते कथा बहुविधाः परिहाससमन्विताः । कथयन्ति स्म संहृष्टा राघवस्य महात्मनः ॥ ३ ॥

३१] ति० टी०–ममापत्यलाभस्त्वयि समुपस्थितः । गर्भलक्षणं तव स्पष्टं वर्तत इत्यर्थः ॥ ३१ ॥

रा० टी०–अब्रवीदिति । सीतामब्रवीत् राम इति शेषः तदाकारमाह अपत्यस्य लाभो यस्मिन्सोयं कालः समुपस्थितः अतस्त्वं किं किमपि इच्छसि अतस्तव किं कः कामोभिलाषो मया क्रियताम् तदाज्ञापयेति तात्पर्यम् सार्द्धश्लोक एकान्वयी ॥ ३१ ॥

गो० टी०–अब्रवीदिति । अपत्येति । ममायमपत्यलाभस्त्वयि समुपस्थितः । तव गर्भलक्षणं दृश्यत इत्यर्थः ३०–३४

३२–३४] ति० टी०–किंकामः किंविषयो मनोरथः । स्मितं कृत्वा । स्ववतारकृत्यं पूर्णमिति व्राह्मणशापस्य सत्यत्वकरणौचित्यं च हासेन सूचितम् ॥ ३२–३४ ॥

रा० टी०–स्मितमिति । वैदेही राममब्रवीत् अर्द्धं पृथक् ॥ ३२ ॥

रा० टी०–तदाकारमाह–तप इति । फलमूलाशिनामृषीणां पादमूलेषु वर्तितुं तानि सेवितुमित्यर्थः तपोवनानि द्रष्टुमिच्छामि सार्धश्लोक एकान्वयी ॥ ३३ ॥

रा० टी०–एष इति । यतो जितसर्वकरणा ये मूलफलभोजिनः तेषां तपोवने एकरात्रिमपि निवसेयम् एष मे परमः कामोभिलाषः ॥ ३४ ॥

३५] ति० टी०–अप्येकरात्रिमित्यनेन चिरकालवासमनोरथो ध्वनितः ॥ ३५ ॥

रा० टी०–तथेति । अक्लिष्टमबाध्यं कर्म यस्य तेन रामेण तु तथेति ज्ञातम् ॥ ३५ ॥

रा० टी०–विस्रब्धेति । श्वः असंशयं गमिष्यसि अतः विस्रब्धा विश्वस्ता भव अर्थं पृथक् ॥ ३६ ॥

गो० टी०–तथेति । विस्रब्धा भव । महाराजो महिषीं मां कथमाश्रमं प्रति नेष्यतीति शङ्कां मा कुर्वित्यर्थः ३५॥३६

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

३६] ति० टी०–विस्रब्धा भव । महाराजो महिषीं मां कथमाश्रमं प्रेषयिष्यतीति शङ्कां मा कुर्वित्यर्थः ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

रा० टी०–एवमिति । काकुत्स्थो रामः एवमुक्त्वा मध्यकक्षान्तरं निर्जगाम ॥ ३७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

१–२] ति० टी०–अथ कथाप्रसङ्गात्सीताप्रसङ्गेन स्वदोषश्रवणं रामस्य–तत्रेति । बहुरूपाणां कथानां प्रकथनद्वारेण हास्यकारा उपासन्ते ॥ १ ॥ २ ॥

३] ति० टी०–कथा वार्ताः ॥ ३ ॥

रा० टी०–सीताप्रेषणप्रतिज्ञानन्तरकालिकं वृत्तान्तमाह–

१ स्वयि मे इति गो. पाठः । २ एकरात्रमिति गो. पाठः । ३ कुत इति गो. पाठः । ४ सुराज इति गो. पाठः ।

ततः कथायां कस्यांचिद्राघवः समभाषत । काः कथा नगरे भद्र वर्तन्ते विषयेषु च ॥ ४ ॥
मामाश्रितानि कान्याहुः पौरजानपदा जनाः । किं च सीतां समाश्रित्य भरतं किं च लक्ष्मणम्॥५॥
किं नु शत्रुघ्नमुद्दिश्य कैकेयीं किं नु मातरम् । वक्तव्यतां च राजानो वने राज्ये व्रजन्ति च॥६॥
एवमुक्ते तु रामेण भद्रः प्राञ्जलिरब्रवीत् । स्थिताः शुभाः कथा राजन्वर्तन्ते पुरवासिनाम्॥७॥
अयं तु विजयं सौम्य दशग्रीववधार्जितम् । भूयिष्ठं स्वपुरे पौरैः कथ्यन्ते पुरुषर्षभ ॥ ८ ॥
एवमुक्तस्तु भद्रेण राघवो वाक्यमब्रवीत् । कथयस्व यथातत्त्वं सर्वं निरवशेषतः ॥ ९ ॥
शुभाशुभानि वाक्यानि कान्याहुः पुरवासिनः । श्रुत्वेदानीं शुभं कुर्यां नकुर्यामशुभानि च ॥ १० ॥
कथयस्व च विस्रब्धो निर्भयं विगतज्वरः । कथयन्ति यथा पौराः पापा जनपदेषु च ॥ ११ ॥
राघवेणैवमुक्तस्तु भद्रः सुरुचिरं वचः । प्रत्युवाच महाबाहुं प्राञ्जलिः सुसमाहितः ॥ १२ ॥
शृणु राजन्यथा पौराः कथयन्ति शुभाशुभम् । चत्वरापणरथ्यासु वनेषूपवनेषु च ॥ १३ ॥

तत्रेत्यादिभिः । बहुरूपाणां कथानां हास्यकाराः हास्यपूर्वकं कथनशीलाः विचक्षणाः कथानिपुणाः तत्र तस्मिन्समये राजानं रामसुपासन्ते ॥ १ ॥

रा० टी०–तेषां नामानि निर्दिशन्नाह–विजय इति । एते विजयादयः परिहाससमन्विताः बहुविधाः कथाः राघवस्य समीपे कथयन्ति स्म श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–तत्रेत्यादि ॥ १–३ ॥

४] ति० टी०–विषयेषु देशेष्विति सामान्यतः प्रश्नः ॥४॥

रा० टी०–तत इति । राघवः समभाषत तदाकारमाह–हे भद्र नगरे! विषयेषु देशेषु च काः कथाः जनानां वचनानि वर्तन्ते ॥ ४ ॥

गो० टी०–तत इति । विषयेषु देशेषु ॥ ४ ॥ ५ ॥

५] ति० टी०–विशिष्य पृच्छति—मामाश्रितानि कानि वाक्यान्याहुः ॥ ५ ॥

रा० टी०–तत्र विशेषं पृच्छति–मामिति द्वाभ्याम् । पौरा जानपदाश्च मामाश्रितानि मद्विषयाणि कानि वचनान्याहुः सीतां समाश्रित्य संस्मृत्य च किमाहुः भरतादीनुद्दिश्य च किमाहुः सार्द्धश्लोक एकान्वयी ॥ ५ ॥

६] ति० टी०–दुःखेन स्वदेशवृत्तान्ताज्ञाने राजानः सर्वजननिन्दाद्वारा नरकं प्राप्नुवन्तीत्याशयेनाह—वक्तव्यतां चेति । वने तापसाश्रमे राज्ये च धर्मादिविचारहीना राजानो वक्तव्यतां सर्वजनकृतदुर्भाषणविषयतां व्रजन्ति ॥ ६ ॥

रा० टी०–ननु राजवृत्तकथने जनानां न शक्तिरित्यत आह–वक्तव्यतामिति । वने राज्ये च वियमानानां जनानां वक्तव्यतां वचनविषयत्वं राजानोपि व्रजन्ति किंच ननु किमनेन प्रश्नेनेत्यत आह–**वक्तव्यतामिति** । वने राज्ये च वियमानानां जनानां वक्तव्यतां वचनं राजानो व्रजन्ति जानन्तीत्यर्थः एतेनैवं ज्ञानस्य शिष्टाचरितत्वेन प्रामाण्यं सूचितम्॥६॥

गो० टी०–किं न्विति । वक्तव्यतां च राजानो नवे राज्ये व्रजन्ति हीति च पाठः । नवे राज्ये सति राजानो वक्तव्यतां सम्यगसम्यग्वा कीर्तनीयतां व्रजन्ति हि ॥ ६–१३ ॥

७] ति० टी०–सर्वज्ञोऽप्यज्ञ इव भृग्वाद्युक्तशापं भृग्वादिषु दयया सत्यं चिकीर्षुः सीतावियोगमिच्छन्नेव देशवृत्तान्तं पृच्छति । गृहीतमनुष्यरूपतया व्यवहारानुसारेण लोकनिन्द्यं सदपि कर्म त्याज्यमिति बोधनायेति बोध्यम् । पुरवासिनां संबन्धितया स्थिताः कथाः शुभा वर्तन्त इति संबन्धः ॥ ७ ॥

रा० टी०–एवमिति । भद्रोऽब्रवीत् तदाकारमाह पुरवासिनां स्थिताः कथाः वचनानि शुभा वर्तन्ते ॥ ७ ॥

८] ति० टी०–विजयमिति । उद्दिश्येति शेषः । कथ्यन्ते । वार्ता इति शेषः ॥ ८ ॥

रा० टी०–तद्वचनमेवाह–अयमिति । अयं त्वदीयः दशग्रीववधार्जितो विजयः भूयिष्ठमत्यन्तं कथ्यते ॥ ८ ॥

९] ति० टी०–निरवशेषतः । शुभाशुभविषयं सर्वं कथयेत्यर्थः ॥ ९ ॥

रा० टी०–एवमिति । राघवोब्रवीत् तदाकारमाह यथातत्त्वं याथार्थ्यमनतिक्रम्य निरवशेषं अवशेषरहितं सर्वं कथयस्व९

१०] ति० टी०–नन्वशुभश्रवणे किं प्रयोजनं तत्राह—शुभेत्यादि ॥ १० ॥

रा० टी०–तत्प्रयोजनमाह–शुभेति । पुरवासिनो वाक्यानि श्रुत्वा शुभं तत्संमतकार्यमित्यर्थः कुर्याम् अशुभानि न कुर्याम् ॥ १० ॥

११–१३] ति० टी०–ननु राजसमक्षमशुभवाक्यकथनमशक्यमित्यत आह—कथयस्वेति । निर्भयं विस्रब्धो मम किं रामो वदिष्यतीति भयशून्यं विश्वस्तो विगतज्वर एवमशुभं कथं वाच्यमिति मनःसंतापशून्यः। पापाः पापानि ॥११–१३॥

रा० टी०–कथयस्वेति । पौराः जनपदेषु वियमानाः पापा अपि जनाः यथा कथयन्ति तथा विस्रब्धो विश्वासवान् त्वं निर्भयं कथयस्व ॥ ११ ॥

१ अमुमिति गो. विजयः अर्जित इति च रा. पाठः । २ कथ्यत इति रा. पाठः ।

दुष्करं कृतवान्रामः समुद्रे सेतुबन्धनम् । अश्रुतं पूर्वकैः कैश्चिद्देवैरपि सदानवैः ॥ १४ ॥
रावणश्च दुराधर्षो हतः सबलवाहनः । वानराश्च वशं नीता ऋक्षाश्च सह राक्षसैः ॥ १५ ॥
हत्वा च रावणं संख्ये सीतामाहृत्य राघवः । अमर्षं पृष्ठतः कृत्वा स्ववेश्म पुनरानयत् ॥ १६ ॥
कीदृशं हृदये तस्य सीतासंभोगजं सुखम् । अङ्कमारोप्य तु पुरा रावणेन बलाद्धृताम् ॥ १७ ॥
लङ्कामपि पुरा नीतामशोकवनिकां गताम् । रक्षसां वशमापन्नां कथं रामो न कुत्स्यति ॥ १८ ॥
अस्माकमपि दारेषु सहनीयं भविष्यति । यथा हि कुरुते राजा प्रजास्तमनुवर्तते ॥ १९ ॥
एवं बहुविधा वाचो वदन्ति पुरवासिनः । नगरेषु च सर्वेषु राजञ्जनपदेषु च ॥ २० ॥
तस्यैवं भाषितं श्रुत्वा राघवः परमार्तवत् । उवाच सुहृदः सर्वान्कथमेतद्वदन्तु माम् ॥ २१ ॥

रा० टी०-राघवेणेति । भद्रः प्रत्युवाच ॥ १२ ॥

रा० टी०-तदाकारमाह-शृणु इत्यादिभिः । पौराः चत्वरादिषु शुभाशुभं केषांचित् शुभं केषांचिदशुभमित्यर्थः यथा कथयन्ति तथा शृणु ॥ १३ ॥

१४-१५] ति० टी०-पूर्वकैः राजभिर्देवैरपि कृतमित्यश्रुतमश्रुतपूर्वम् ॥ १४ ॥ १५ ॥

रा० टी०-तत्कथनमेवाह-दुष्करमित्यादिभिः । पूर्वकैः कैश्चिदुष्करमत एव अश्रुतं समुद्रे सेतुबन्धनं रामः कृतवान्१४

रा० टी०-रावण इति । रावणो हतः ॥ १५ ॥

१६] ति० टी०-सीतामाहृत्य ततो जातं सीताविषयं रावणस्पर्शममर्षं क्रोधं पृष्ठतः कृत्वा । विस्मृत्येत्यर्थः ॥ १६ ॥

रा० टी०-हत्वेति । अमर्षमक्षमां पृष्ठतः कृत्वा क्षमां कृत्वेत्यर्थः अपहरणकाले एवेच्छामात्रेण रावणमहत्वेति तात्पर्यम् संख्ये रावणं हत्वा सीतां स्ववेश्म पुनरानयत् ॥ १६ ॥

गो० टी०-हत्वेत्यादि । सीतामाहृत्य तदनन्तरजातममर्षं रावणस्पर्शजं पृष्ठतः कृत्वा विसृज्येत्यर्थः ॥ १६ ॥

१७] ति० टी०-कीदृशं सुखम् । कुत्सितमेवेत्यर्थः । तत्र हेतुः—अङ्कमित्यादि ॥ १७ ॥

१८] ति० टी०-न कुत्स्यति । न जुगुप्सते इत्यर्थः १८

रा० टी०-कीदृशमिति । सीतासंभोगजं सीता च आत्रह्मादिद्वारा सर्वरक्षाकारको रामश्च तयोः सम्भोगाज्जातं यत्सुखं तस्या हृत् अयं रावणः कीदृशम् अतिक्रूरहृदय इत्यर्थः सामान्ये नपुंसकम् यदि तु अयमित्यस्य न याति रामशरणं प्राप्नोति तदृशो रावण इत्यर्थः तदा न सामान्यनपुंसकत्वकल्पना अङ्कं पृथक् प्रसङ्गतो रावणापकृतिं संवर्ण्य पुनरपि रामकीर्तिमाह अङ्कमिति पुरा पूर्वं बलादपि लङ्कामानीतां रावणेन प्रापितामत एव अशोकवनिकां गतामत एव रक्षसां वशमापन्नां पुरा स्वधर्मपूर्त्या उपलक्षितामपि सीतां बलात् के वन्हौ रोप्य आरोप्य शपथार्थं संस्थाप्य विद्यमानः अङ् सर्वसत्कारकर्त्ता रामः आवणेन इयं विशुद्धेत्यादिवक्तव्या धृतां दैवैः स्वीकारितां सीताम् आर प्राप कथं थं पापमेव कं सुखं यस्य तं रावणं तु न कुत्स्यति कदापि न निन्दतीत्यर्थः अत एव एकस्य पुंस्त्वस्य न वैयर्थ्यम् बलादिति विनिगमनाविरहाद्-भयान्वयि अत एव अस्माकमपि दारेषु स्त्रीषु च सहनीयं भविष्यति स्त्रीषु सहनीयत्वं च तदपराधस्मरणेपि तन्निन्दाया अकरणत्वम् स्त्रीषु सहनीयत्वं च तदपराधशङ्काहेतुकपरीक्षाकरणजनितदुःखेप्वनुद्विग्नत्वम् दारशब्देनोभयलाभस्त्वेकशेषेण मूलन्तु विनिगमनाविरहः प्रकरणं च तत्र हेतुः यथा येन प्रकारेण यं धर्मं राजा कुरुते तथा तं धर्मं प्रजाः अनुवर्तते अनुवर्तन्ते कुर्वन्ति मयूरश्चो पुंसि स्यात् सुखशीपर्जलेपु कमिति मेदिनी थं रक्षणे मङ्गले च साध्वसे च नपुंसकमित्यपि सैव सार्द्धश्लोकद्वयमेकान्वयि ॥ १७-१९ ॥

गो० टी०-कीदृशमिति । कीदृशं कुत्सितमेवेत्यर्थः । तत्र हेतुः अङ्कमित्यादि ॥ १७ ॥ १८ ॥

१९-२०] ति० टी०-सहनीयं भविष्यति एवंविधं कश्मलमिति भावः । तत्र हेतुः—यथा हीति । प्रजास्तमनुवर्ततेऽनुवर्तन्ते ॥ १९ ॥ २० ॥

गो० टी०-अस्माकमिति । सहनीयमिति । एवं कश्मलमित्यर्थः ॥ १९ ॥ २० ॥

रा० टी०-एवमिति । पुरवासिनः एवं बहुविधा अनेकविधकीर्तिवाचिका वाचो वदन्ति ॥ २० ॥

२१] ति० टी०-परमार्तवत्परमदुःखीवाकारं कृत्वा । वस्तुतो भगवति हर्षदुःखयोरभावादेवमुक्तिः । सर्वान्सुहृदो भद्रव्यतिरिक्तानपि कथमेतद्वदोक्तमेतदयशोवाक्यं तत्त्वमतत्त्वं वेति भवन्तोऽपि वदन्त्वित्युवाच ॥ २१ ॥

रा० टी०-तस्येति । तस्य भद्रस्य एवं भाषितं श्रुत्वा परमार्तवत् परमार्तानपि वदते तदभीष्टसंपादनेन प्रकाशयति सत्कारवचनमुच्चारयति वा स रामः कथमेतत् सत्यमसत्यं वा भद्रः कथयतीत्यर्थः मां यूयं *ब्रवीथ इति सर्वान्सुहृद उवाच ॥ २१ ॥

गो० टी०-तस्येति । परमार्तवत् परमदुःखी भूत्वा । सर्वान् सुहृद इति । भद्रव्यतिरिक्तानित्यर्थः । कथमेतदिति । भद्रोक्तमेतत् अपयशोवचनं कथं तत्त्वमतत्त्वं वेति भवद्भिश्च निवेद्यतामित्यर्थः ॥ २१ ॥

१ हृदयमिति रा. पाठः । २ कुत्सत इति गो. पाठः । ३ प्रभेति गो. पाठः । *ब्रूथेति युक्तमिति भाति ।

सर्वे तु शिरसा भूमावभिवाद्य प्रणम्य च । प्रत्यूचू राघवं दीनमेवमेतन्न संशयः ॥ २२ ॥
श्रुत्वा तु वाक्यं काकुत्स्थः सर्वेषां समुदीरितम् । विसर्जयामास तदा वयस्यान्शत्रुसूदनः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ।

राघवो द्वाःस्थेन लक्ष्मणभरतशत्रुघ्नानान्याश्रुभिराप्लुतवदनोऽब्रवीत् ।

विसृज्य तु सुहृद्वर्गं बुद्ध्या निश्चित्य राघवः । समीपे द्वाःस्थमासीनमिदं वचनमब्रवीत् ॥ १ ॥
शीघ्रमानय सौमित्रिं लक्ष्मणं शुभलक्षणम् । भरतं च महाभागं शत्रुघ्नमपराजितम् ॥ २ ॥
रामस्य वचनं श्रुत्वा द्वाःस्थो मूर्ध्नि कृताञ्जलिः । लक्ष्मणस्य गृहं गत्वा प्रविवेशानिवारितः ॥ ३ ॥
उवाच सुमहात्मानं वर्धयित्वा कृताञ्जलिः । द्रष्टुमिच्छति राजा त्वां गम्यतां तत्र मा चिरम्॥४॥
बाढमित्येव सौमित्रिः कृत्वा राघवशासनम् । प्राद्रवद्रथमारुह्य राघवस्य निवेशनम् ॥ ५ ॥
प्रयान्तं लक्ष्मणं दृष्ट्वा द्वाःस्थो भरतमन्तिकात् । उवाच भरतं तत्र वर्धयित्वा कृताञ्जलिः ॥ ६ ॥
विनयावनतो भूत्वा राजा त्वां द्रष्टुमिच्छति । भरतस्तु वचः श्रुत्वा द्वाःस्थाद्रामसमीरितम् ॥ ७ ॥
उत्पपातासनात्तूर्णं पद्भ्यामेव महाबलः । दृष्ट्वा प्रयान्तं भरतं त्वरमाणः कृताञ्जलिः ॥ ८ ॥
शत्रुघ्नभवनं गत्वा ततो वाक्यमुवाच ह । एह्यागच्छ रघुश्रेष्ठ राजा त्वां द्रष्टुमिच्छति ॥ ९ ॥
गतो हि लक्ष्मणः पूर्वं भरतश्च महायशाः । श्रुत्वा तु वचनं तस्य शत्रुघ्नः परमासनात् ॥ १० ॥

२२-२३] ति० टी०-एतद्वदोक्तमेवं तत्त्वमेव॥२२॥२३॥
इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

रा० टी०-सर्व इति । एतत् भद्रोक्तमेवमेव इति वचनं दीनमुचितवियोगस्मृत्या क्षीणचित्तं राघवं सर्वे प्रत्यूचुः ॥ २२ ॥

रा० टी०-श्रुत्वेति । काकुत्स्थः वयस्यान्विसर्जयामास ॥ २३ ॥
इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

गो० टी०-सर्व इति । एवमेतत् यथा भद्रेणोक्तम् एतत्त्वमेव ॥ २२ ॥ २३ ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

१-३] ति० टी०-अथ स्वचिकीर्षितकथनाय भ्रात्रानयनम्—विसृज्य त्विति । निश्चित्य कर्तव्यमिति शेषः॥१-३॥

रा० टी०-सुहृद्वर्गविसर्जनानन्तरकालिकं वृत्तान्तमाह—विसृज्येत्यादिभिः। राघवः बुद्ध्या सीताया गर्भवतीत्वेन नायं संभोगकालः स चैकत्र स्थितौ दुर्निवार इति सीतावनगमनप्रार्थनं समीचीनमेव मत्कर्तव्यान्तराभावे यागोप्यारब्धव्यस्तत्रापि संभोगस्यानौचित्यमेवेति तावत्पर्यन्तं सीतया वने एव स्थातव्यमिति विचारेण निश्चित्य यागपर्यन्तं सीतावनस्थितिविषयकनिश्चयं कृत्वा समीपे आसीनं द्वाःस्थमब्रवीत् ॥ १ ॥

रा० टी०-तदाकारमाह—शीघ्रमिति । लक्ष्मणप्रभृतीन् शीघ्रमानय ॥ २ ॥

रा० टी०-रामस्येति । द्वाःस्थः लक्ष्मणस्य गृहं गत्वा अनिवारितस्सन्प्रविवेश ॥ ३ ॥

गो० टी०-विसृज्येत्यादि । निश्चित्येति । कर्तव्यमिति शेषः ॥ १-३ ॥

४-५] ति० टी०-वर्धयित्वा । जयाशिषेति शेषः । मा चिरम् । विलम्बो न कार्य इत्यर्थः ॥ ४ ॥ ५ ॥

रा० टी०-उवाचेति । कृतांजलिर्द्वाःस्थः सुमहात्मानं लक्ष्मणं वर्द्धयित्वा द्वाःस्थोचितवर्द्धकशब्दमुच्चार्य राजा रामः त्वां द्रष्टुमिच्छति अतो गम्यतामिति वचनमुवाच ॥ ४ ॥

रा० टी०-बाढमिति । सौमित्रिः राघवस्य निवेशनं प्राद्रवत् ॥ ५ ॥

गो० टी०-उवाचेति । वर्धयित्वेति । जयाशिषेति शेषः । मा चिरं विलम्बो मा भूत् ॥ ४ ॥ ५ ॥

६-१०] ति० टी०-भरतमन्तिकात् । भरतसमीपं प्राप्येत्यर्थः । कृताञ्जलिः । भरतायेति शेषः ॥ ६-१० ॥

रा० टी०-प्रयातमिति । द्वाःस्थः भरतमन्तिकात् भर-

---

१ श्रुत्वेति गो. रा. पाठः । २ वयौ बलीति गो. पाठः ।

शिरसा वन्द्य धरणीं प्रययौ यत्र राघवः । द्वाःस्थस्त्वागम्य रामाय सर्वानेव कृताञ्जलिः॥११॥
निवेदयामास तथा भ्रातॄन्स्वान्समुपस्थितान् । कुमारानागताञ्छ्रुत्वा चिन्ताव्याकुलितेन्द्रियः १२॥
अवाङ्मुखो दीनमना द्वाःस्थं वचनमब्रवीत् । प्रवेशय कुमारांस्त्वं मत्समीपं त्वरान्वितः ॥ १३ ॥
एतेषु जीवितं मह्यमेते प्राणाः प्रिया मम । आज्ञप्तास्तु नरेन्द्रेण कुमाराः शुक्लवाससः॥ १४ ॥
प्रह्वाः प्राञ्जलयो भूत्वा विविशुस्ते समाहिताः । ते तु दृष्ट्वा मुखं तस्य सग्रहं शशिनं यथा ॥ १५ ॥
संध्यागतमिवादित्यं प्रभया परिवर्जितम् । वाष्पपूर्णं च नयने दृष्ट्वा रामस्य धीमतः ॥
हतशोभं यथा पद्मं मुखं वीक्ष्य च तस्य ते । ॥ १६ ॥
ततोऽभिवाद्य त्वरिताः पादौ रामस्य मूर्धभिः । तस्थुः समाहिताः सर्वे रामस्त्वश्रूण्यवर्तयत् ॥१७॥
तान्परिष्वज्य बाहुभ्यामुत्थाप्य च महाबलः । आसनेष्वासतेत्युक्त्वा ततो वाक्यं जगाद ह॥१८॥
भवन्तो मम सर्वस्वं भवन्तो जीवितं मम । भवद्भिश्च कृतं राज्यं पालयामि नरेश्वराः ॥ १९ ॥
भवन्तः कृतशास्त्रार्था बुद्ध्या च परिनिष्ठिताः । संभूय च मदर्थोऽयमन्वेष्टव्यो नरेश्वराः ॥ २० ॥
तथा वदति काकुत्स्थे अवधानपरायणाः । उद्विग्नमनसः सर्वे किं नु राजाभिधास्यति॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

तस्य समीपं गत्वेति शेषः विनयावनतो भूत्वा राजा त्वां द्रष्टुमिच्छति इति वचनमुवाच सार्द्धश्लोक एकान्वयी ॥ ६ ॥

रा० टी०–भरत इति । रामसमीरितं वचः द्वाःस्थात् भरतः श्रुत्वा आसनात्तूर्णमेव उत्पपात पद्भ्यामेव जगामेति शेषः ॥ ७ ॥

गो० टी०–प्रयान्तमिति । भरतमन्तिकात् भरतस्यान्तिकमित्यर्थः । गत्वेति शेषः कृताञ्जलिः भरतायेति शेषः६।७

रा० टी०–दृष्ट्वेति । शत्रुघ्नभवनं गत्वोवाच द्वाःस्थ इति शेषः ॥ ८ ॥

रा० टी०–तदाकारमाह–एहीति । राजा त्वां द्रष्टुमिच्छति इत्येहि जानीहि अतः आगच्छ व्रज लक्ष्मणो भरतश्च पूर्वं गतः गत्यर्थानां ज्ञानार्थत्वं भाष्यादौ प्रसिद्धमेव ॥ ९ ॥

रा० टी०–श्रुत्वेति । शत्रुघ्नः शिरसा धरणीमावन्द्य यत्र राघवस्तत्र प्रययौ ॥ १० ॥

गो० टी०–उत्पपातेति । उत्पपात उत्थाय जगाम८–१०

११–१३] ति० टी०–शिरसा वन्द्य धरणीं शिरसा धरणीं प्राप्य । रामाय वन्दित्वेत्यर्थः ॥ ११–१३ ॥

रा० टी०–द्वाःस्थ इति । द्वाःस्थ आगम्य समुपस्थितान्स्वान्समीपान्भ्रातॄन्विवेदयामास ॥ ११ ॥

रा० टी०–कुमारानिति । चिन्तया भविष्यत्सीताविरोगस्मृत्या व्याकुलितानीन्द्रियाणि यस्य अत एव दीनमना अत एव अवाङ्मुखो रामः द्वाःस्थमब्रवीत् ॥ १२ ॥

गो० टी०–शिरसेति । शिरसा धरणीं प्राप्य रामाय वन्दित्वेत्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–तदाकारमाह–प्रवेशयेति । एतेषु कुमारेष्वेव मह्यं मम जीवितमेतदधीनं मम जीवनमित्यर्थः अत एव एते मम प्राणप्रियाः अतः कुमारान्मत्समीपं प्रवेशय ॥ १३ ॥

गो० टी०–प्रवेशयेति । मह्यं ममेत्यर्थः ॥ १३ ॥ १४ ॥

१४] ति०टी०–मह्यं मम जीवितमेतेषु स्थितमिति शेषः१४

रा० टी०–आज्ञप्ता इति । प्रह्वा शिरसा प्रणताः कुमाराः प्राञ्जलयो भूत्वा विविशुः ॥ १४ ॥

१५–१८] ति० टी०–सग्रहं सोपरागम् ॥ १५–१८ ॥

रा० टी०–ते इति । सग्रहं राहुणा ग्रस्तं शशिनमिव संध्यागतमादित्यमिव तस्य रामस्य प्रभया कान्त्या परिवर्जितं भविष्यद्वियोगचिन्तया प्रभाहीनमिव मुखं दृष्ट्वा आसन्निति शेषः ॥ १५ ॥

रा० टी०–वाष्पेति । वाष्पपूर्णं रामस्य नयने दृष्ट्वा हतशोभं पद्ममिव मुखं च वीक्ष्य रामस्य पादावभिवाद्य समाहितास्सन्तस्तस्थुः रामस्तु अश्रूण्यवर्तयत् मुमोच अर्द्धचतुष्टयमेकान्वयि ॥ १६–१७ ॥

रा० टी०–तानिति । महाबलो रामः तान्भ्रातॄन्परिष्वज्य आसनेषु । आसत इत्युक्त्वा वाक्यं जगाद ॥ १८ ॥

गो० टी०–ते त्विति । सग्रहं सोपरागम् ॥ १५–१९ ॥

१९] ति० टी०–भवद्भिः कृतं संपादितम् ॥ १९ ॥

रा० टी०–तत्स्वरूपमाह–भवन्त इत्यादिभिः । भवद्भिः कृतं सम्पादितं राज्यं पालयामि ॥ १९ ॥

२०–२१] ति० टी०–कृतशास्त्रार्था अनुष्ठितशास्त्रार्थानुष्ठानाः मदर्थो वक्ष्यमाणः । अन्वेष्टव्योऽनुसरणीयः ॥२०–२१॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

१ धरणीं प्राप्येति गो. पाठः । २ शत्रुतेजस इति गो. पाठः ।

पञ्चचत्वारिंशः सर्गः ।

स्वाश्रुदर्शनदूनमानसान्भ्रातॄनग्निप्रवेशपूताया अपि वैदेह्याः संबद्धं लोकापवादमाख्याय नाहमन्यतो बिभेमि यथाकीर्तेरतः सौमित्रे श्व एव रथमारोप्य गङ्गातीराश्रमेक्षणोत्सुकां तां भागीरथ्याः परपारे वाल्मीकेराश्रमे विसृज नाहमत्र केनापि प्रतिवक्तव्य इति तं समादिश्य संविवेश ।

तेषां समुपविष्टानां सर्वेषां दीनचेतसाम् । उवाच वाक्यं काकुत्स्थो मुखेन परिशुष्यता॥ १ ॥
सर्वे शृणुत भद्रं वो मा कुरुध्वं मनोऽन्यथा । पौराणां मम सीतायां यादृशी वर्तते कथा ॥ २ ॥
पौरापवादः सुमहांस्तथा जनपदस्य च । वर्तते मयि वीभत्सा सा मे मर्माणि कृन्तति ॥ ३ ॥
अहं किल कुले जात इक्ष्वाकूणां महात्मनाम् । सीतापि सत्कुले जाता जनकानां महात्मनाम्॥ ४ ॥
जानासि त्वं यथा सौम्य दण्डके विजने वने । रावणेन हृता सीता स च विध्वंसितो मया ॥ ५ ॥
तत्र मे बुद्धिरुत्पन्ना जनकस्य सुतां प्रति । अत्रोपितामिमां सीतामानयेयं कथं पुरीम् ॥ ६ ॥

रा० टी०–भवन्त इति । कृतः हृदये सन्निवेशितः शास्त्रार्थो यैः बुध्या परिनिष्ठिताः परिपक्वाः परिपक्वबुद्धिमन्त इत्यर्थः भवन्तस्सम्भूय एकचित्ततां प्राप्य अयमुपस्थितो मदर्थः अन्वेष्टव्यः स्वीकरणीयः ॥ २० ॥

रा० टी०–तथेति । अवधानपरायणाः स्वस्थचित्ता अपि सर्वे भरतादयः काकुत्स्थे तथा वदति सति राजा रामः किमभिधास्यति कथयिष्यतीति चिन्तया उद्विग्नमनसोऽभवन्निति शेषः ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

गो० टी०–भवन्त इति । कृतशास्त्रार्थाः अनुष्ठितशास्त्रार्थाः ॥ २० ॥ २१ ॥

इति श्रीगोविंदराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

१] ति० टी०–अथ हेतुकथनपूर्वं लक्ष्मणस्य सीताविसर्जने विनियोगः–तेषामिति ॥ १ ॥

रा० टी०–भरतादीन् प्रति रामोक्तिमाह–तेषामित्यादिभिः । दीनचेतसाम् रामदैन्यदर्शनजनितदैन्यविशिष्टचित्तवतां समुपविष्टानां तेषां भरतादीनां समीपे परिशुष्यता मुखेनोपलक्षितः काकुत्स्थ उवाच ॥ १ ॥

गो० टी०–तेषामित्यादि ॥ १ ॥

२] ति० टी०–अन्यथा मा कुरुध्वम् । मदभिप्रायानवकूलभावं मा कुरुध्वमित्यर्थः तमेवाभिप्रायमाह—पौराणामिति । सीताविषये पौराणां यादृशी कथा वर्तते तां मत्तः श्रुणुतेति संबन्धः ॥ २ ॥

रा० टी०–तदाकारमाह–सर्वे इत्यादिभिः । मम मद्विषये सीतायां सीताविषये च यादृशी कथा वर्तते तां कथां सर्वे यूयं शृणुत अन्यथा श्रवणविमुखं मनो मा कुरुध्वम् ॥ २ ॥

गो० टी०–सर्वे इति । मा कुरुध्वं मनोन्यथा । मदभिप्रायानवकूलम् मा कुरुध्वमित्यर्थः । तमेवाभिप्रायमाविष्करोति—पौराणामित्यादि । सीतायां विषये यादृशी कथा वर्तते तां कथां मत्सकाशात् श्रुणुतेत्यन्वयः ॥ २ ॥

३–५] ति० टी०–तां कथामाह–पौरापवाद इति । पौराणां मयि मद्विषये वीभत्सा कृत्सा वर्तते सा मे मम मर्माणि कृन्तति ॥ ३–५ ॥

रा० टी०–पौरेति । मे मते महान् पौरापवादः पौरकर्तृकनिन्दा जनपदस्यापवादश्चेति शेषः मर्माणि कृन्तति सा उभयकर्तृका वीभत्सा निन्दा अमयि मद्विरोधिनि वर्तते मम तु स्तुतिरेव वर्तते इति तात्पर्यम् एतेन स्वराज्यस्य धर्मादिसंपन्निमत्वं सूचितम तेन राज्यविषयकस्वकृत्यन्तराभावो ध्वनितः ॥ ३ ॥

रा० टी०–तत्र हेतुमाह–अहमिति । महात्मनाम् इक्ष्वाकूणां कुलेऽहं जातः सीतापि महात्मनाम् जनकानां सत्कुले जाता एतेनोभयोरधर्मसंसर्गसम्भावनाया असम्भवः सूचितः तेन निन्दाया अविषयत्वं ध्वनितम् ॥ ४ ॥

रा० टी०–शुद्धवंशोत्पन्नत्वेन स्वशुद्धिमुक्त्वा कर्मणापि स्वशुद्धिं बोधयितुमाह–जानासीति । दण्डके वने यथा सीता हृता रावणश्च मया विध्वंसितः तथा त्वं जानासि धर्मपूर्वकमेव सर्वं कृतमिति तात्पर्यम् ॥ ५ ॥

गो० टी०–का कथा वर्तत इत्यत्राह—पौरापवाद इत्यादि । मयि मद्विषये वीभत्सा कृत्सा वर्तते सा मम सर्वमर्माणि कृन्तति ॥ ३—१० ॥

६] ति० टी०–कथमानयेयं न कथमपि ॥ ६ ॥

रा० टी०–तत्रेति । अत्रोपितां सीतामहं कथमानयेयमिति मे बुद्धिरुत्पन्ना ॥ ६ ॥

प्रत्ययार्थं ततः सीता विवेश ज्वलनं तदा । प्रत्यक्षं तव सौमित्रे देवानां हव्यवाहनः ॥ ७ ॥
अपापां मैथिलीमाह वायुश्चाकाशगोचरः । चन्द्रादित्यौ च शंसेते सुराणां संनिधौ पुरा ॥ ८ ॥
ऋषीणां चैव सर्वेषामपापां जनकात्मजाम् । एवं शुद्धसमाचारा देवगन्धर्वसंनिधौ ॥ ९ ॥
लङ्काद्वीपे महेन्द्रेण मम हस्ते निवेदिता । अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम्१० ।
ततो गृहीत्वा वैदेहीमयोध्यामहमागतः । अयं तु मे महान्वादः शोकश्च हृदि वर्तते ॥ ११ ॥
पौरापवादः सुमहांस्तथा जनपदस्य च । अकीर्तिर्यस्य गीयेत लोके भूतस्य कस्यचित्॥१२॥
पतत्येवाधमाँल्लोकान्यावच्छब्दः प्रकीर्त्यते । अकीर्तिर्निन्द्यते देवैः कीर्तिर्लोकेषु पूज्यते ॥ १३ ॥
कीर्त्यर्थं तु समारम्भः सर्वेषां सुमहात्मनाम् । अप्यहं जीवितं जह्यां युष्मान्वा पुरुषर्षभाः॥ १४ ॥
अपवादभयाद्भीतः किं पुनर्जनकात्मजाम् । तस्माद्भवन्तः पश्यन्तु पतितं शोकसागरे ॥ १५ ॥
नहि पश्याम्यहं भूतं किंचिदुःखमतोऽधिकम् । श्वस्त्वं प्रभाते सौमित्रे सुमन्त्राधिष्ठितं रथम्॥ १६ ॥
आरुह्य सीतामारोप्य विषयान्ते समुत्सृज । गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः ॥ १७ ॥

७-८] ति० टी०-सीताया अपापतां प्रत्यापयति भ्रातृभ्यः-प्रत्ययार्थमिति । देवानां संनिधाविति शेषः ७॥८

रा० टी०-प्रत्ययार्थमिति । प्रत्ययार्थम् स्वशुद्धिप्रतीत्युपपत्यर्थं सीता ज्वलनं विवेश ततस्तदा हव्यवाहनो वन्हिः वायुश्च मैथिलीमपापामाह चन्द्रादित्यौ च जनकात्मजामपापां शंसेते अशंसताम् सार्द्धश्लोकद्वयमेकान्वयि ॥ ७ ॥ ८ ॥

९] ति० टी०-ऋषीणां चेति । संनिधावित्यर्थः ॥ ९ ॥

रा० टी०-एवमिति । शुद्धसमाचारा जानकी महेन्द्रेण मम हस्ते निवेदिता ॥ ९ ॥

१०] ति० टी०-लङ्काद्वीपे महेन्द्रेणेति । 'लङ्काद्वीपे तदाग्निना' इति पाठान्तरम् ॥ १० ॥

रा० टी०-अन्तरिति । मेऽन्तरात्मा सीतां शुद्धां वेत्ति ततः तस्माद्धेतोः वैदेहीं गृहीत्वा अयोध्यामहमागतः ॥ १० ॥

११] ति० टी०-अयं त्विति । प्राक्प्रतिपादितरीत्या तत्त्वार्थेऽन्यस्मिन्स्थितेऽपीति शेषः । महान्वादो वर्तते निन्दा वर्तते । तच्छ्रवणाच्छोकश्च हृदि वर्तते ॥ ११ ॥

रा० टी०-इदानीं कुम्भकर्णभक्षणादिना मृतानां लोकनिन्दितराक्षसानां कथं गतिरिति शोचन्नाह-अयमिति । आदौ कुम्भकर्णभक्षणकर्मीभूतस्य राक्षसजातस्य सुमहान् एव पौरापवादः पौरकर्तृकनिन्दा जनपदस्य चापवाद इति शेषः मे हृदि महानेव शोकः शोकहेतुर्वर्तत एव एतेन तत्कल्याणार्थं यत्नः कर्तव्य इति सूचितम् वातुचा एवार्थाः ॥ ११ ॥

गो० टी०-अयं त्विति । महान्वाद इति । वर्तत इति शेषः । शोकश्चेति ॥ तच्छ्रवणादिति शेषः । कोयं वाद इत्यत्राह—पौरेत्यादि ॥ ११ ॥

१२] ति० टी०-कोऽसौ वादस्तत्राह—पौरेति । सीताविषया पौरनिन्दा भूतस्य प्राणिनः ॥ १२ ॥

रा० टी०-ननु युद्धे कथञ्चिदपि मृतानां कल्याणमेव भविष्यतीति किं लोकापवादेनेत्यत आह-अकीर्तिरिति । लोके यस्याकीर्तिर्गीयेत स जनः यावच्छब्दः अकीर्तिबोधकपदं प्रकीर्त्यते तावदधमाँल्लोकान्पतति ॥ १२ ॥

गो० टी०-अकीर्तिरिति । भूतस्य प्राणिनः । शब्दः अकीर्तिबोधकः ॥ १२-१४ ॥

१३-१४] ति० टी०-शब्दोऽकीर्तिबोधकः । अधमाँल्लोकान्निरयान् ॥ १३ ॥ १४ ॥

रा० टी०-अकीर्तिरिति । देवैः अकीर्तिर्निन्द्यते कीर्तिश्च पूज्यते अत एव सुमहात्मनां कीर्त्यर्थं समारम्भः उद्योगः॥१३॥

रा० टी०-अपीति । अपवादभयाद्भीतोहमपि अपवादभयात् युष्मान् जह्याम् त्याजयेयम् अपवादभीतिर्न प्राप्नोत्विति सदैवेच्छामीत्यर्थः जनकात्मजां च जह्याम् त्याजयेयम् जीवितं स्वात्मानं जह्यामिति किम् ॥ १४ ॥

१५] ति० टी०-शोकसागरेऽकीर्तिजे ॥ १५ ॥

रा० टी०-तस्मादिति । तस्मात् लोकापवादस्यानर्थकरत्वात् हेतोः किञ्चिदपवादं भूतं प्राप्तं जनं शोकसागरपतितं पश्यन्तु हि यतः अतोऽपवादात् अधिकं दुःखं न पश्यामि॥१५॥

गो० टी०-तस्मादिति । भूतमुत्पन्नम् ॥ १

१६] ति० टी०-भूतमुत्पन्नम्, अत एतदकीर्तिजात् । अतः श्वः प्रभाते त्वं रथमारुह्य विषयान्ते स्वदेशात्परतः सीतामुत्सृज ॥ १६ ॥

रा० टी०-इदानीं सीताप्रार्थितसिद्धये गर्भवतीसंगमो न कर्तव्य इति मर्यादापालनाय च स्वकीयप्रजापराधादिविध्वंसफलकस्त्रीसङ्गमाभावादिधर्मसाध्ययागकरणाय चाह—श्वरिति । श्वरागामिनि प्रभाते रथमारुह्य सीतामारोप्य आरोह्य च विषयान्ते सीतेप्सितदेशान्ते समुत्सृज संस्थापय१६

गो० टी०-श्व इति । विषयान्ते स्वदेशाद्बहिः॥ १६ ॥

१७] ति० टी०-क्व विषयान्तरे तत्राह-गङ्गाया इति । परे पारे गङ्गोल्लङ्घनलभ्ये पारे ॥ १७ ॥

१ निवेशितेति गो. पाठः ।

आश्रमो दिव्यसंकाशस्तमसातीरमाश्रितः । तत्रैतां विजने देशे विसृज्य रघुनन्दन ॥ १८ ॥
शीघ्रमागच्छ सौमित्रे[2] कुरुष्व वचनं मम । न चास्मि प्रतिवक्तव्यः सीतां प्रति कथंचन॥ १९ ॥
तस्मात्त्वं गच्छ सौमित्रे नात्र कार्या विचारणा । अप्रीतिर्हि परा मह्यं त्वयैतत्प्रतिवारिते[3] ॥ २० ॥
शापिता हि मया यूयं पादाभ्यां[4] जीवितेन च । ये मां वाक्यान्तरे ब्रूयुरनुनेतुं[5] कथंचन ॥
अहिता नाम ते नित्यं मदभीष्टविघातनात् । ॥ २१ ॥
मानयन्तु भवन्तो मां यदि मच्छासने स्थिताः । इतोऽद्य नीयतां सीता कुरुष्व वचनं मम ॥ २२ ॥
पूर्वमुक्तोऽहमनया गङ्गातीरेऽहमाश्रमान्[6] । पश्येयमिति तस्याश्च कामः संवर्त्यतामयम्[7] ॥ २३ ॥
एवमुक्त्वा तु काकुत्स्थो बाष्पेण[8] विहितेक्षणः । सं[9] विवेश स धर्मात्मा भ्रातृभिः परिवारितः॥
शोकसंविग्नहृदयो निशश्वास यथा द्विपः । ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

१८] ति० टी०–तमसासंज्ञं नदीद्वयमयोध्यासमीपे गङ्गावाक्तत्परपारे च । दिव्यसंकाशो दिव्यदेशसदृशः ॥१८॥

रा० टी०–देशान्तमेव बोधयन्नाह—**गङ्गाया इति** । गङ्गायाः परे दक्षिणे पारे तीरे तमसायाः तदभिधनद्याः तीरमाश्रितः दिव्यसंकाशः सर्वसम्पत्तिमत्त्वेनायोध्यादिसदृशः वाल्मीकेराश्रमः अस्तीति शेषः तत्र आश्रमे विजने विगतः जनो जनकसदृशो वाल्मीकिर्यस्मात् वाल्मीकिरहितदेशे इत्यर्थः एनां सीतां विसृज्य संस्थाप्येत्यर्थः शीघ्रमागच्छ विजनं इत्येतत्सन्निधिगमने त्वामपि स्थापयिष्यतीति सूचितम् जनकसदृशत्वं च दशरथसखत्वेन अयोध्यासमीपवर्तितमसातोन्येयं तमसा नदीति बोध्यम् श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०–तं विशेषयति—**गङ्गाया इत्यादि** १७–१९

१९] ति० टी०–सीतां प्रति सीतापरित्यागमुद्दिश्य १९

रा० टी०–चेष्टादिना तत्र हेतुं प्रष्टुकामामाह–**नेति**। सीतां प्रति सीतासंस्थापने हेतुमित्यर्थः न प्रतिवक्तव्यः प्रष्टव्योस्मि तस्मात् अत्र प्रेषणविषये विचारणा न कार्या एतेन हेतुप्रश्ने गर्भसमये यागसमये चात्र स्थितौ अनुचितसंगमो दुर्निवारो भवितेति वक्तव्यं स्यात् तत्कथने च चिरकालकवियोगो ज्ञातो भविष्यतीति लक्ष्मणस्य शोकातिशयो भविष्यतीति हेतुर्ध्वनितः तेन शोकवल्लक्ष्मणदर्शनासहिष्णुत्वं रामस्य व्यक्तम्॥१९॥

२०] ति० टी०–मह्यं ममैतत्प्रतिवारिते । एतस्य प्रतिवारणे इत्यर्थः ॥ २० ॥

रा० टी०–प्रेषणस्यावश्यकत्वं बोधयन्नाह–**अप्रीतिरिति** । त्वया एतत्परिवारिते एतस्य निवारणे सति मह्यं मम परा अप्रीतिः अत एव पादाभ्यां जीवितेन जीवनेन च मया यूयं शापिताः शपथं कारिताः ॥ २० ॥

गो० टी०–**अप्रीतिरिति** । मह्यं मम । भुजाभ्यामिति वीरवचनम् ॥ २० ॥

२१] ति० टी०–'भुजाभ्याम्' इति पाठेऽपि पादाभ्यामित्येवार्थः । ये वाक्यान्तरेऽस्मद्वाक्यमध्ये मामनुनेतुं ब्रुयुस्ते मदभीष्टविघातनात्नित्यं ममाहिता नाम अहिता इति प्रसिद्धम् ॥ २१ ॥

रा० टी०–ये इति । वाक्यान्तरं मद्वाक्याद्भिन्नवाक्ये अनुनेतुं प्रापयितुं ये मां ब्रुयुस्ते मदभीष्टविघातनाद्धेतोः अहिता रिपवः ॥ २१ ॥

गो० टी०–य इति । वाक्यान्तरे अस्मद्वाक्यमध्ये । अनुनेतुं ये ब्रुयुस्ते शापिता इति पूर्वेणान्वयः ॥ २१ ॥

२२] ति० टी०–किं तर्हि कर्तव्यं तत्राह—**मानयन्त्विति** ॥ २२ ॥

रा० टी०–**मानयन्त्विति** । भवन्तो यदि मच्छासने स्थिताः तर्हि मां मानयन्तु अत एव मम वचनं कुरुष्व अत एव इतः सीता नीयतामत्र क्वचिद्भद्रत्वं तु लक्ष्मणे प्राधान्यमारोप्य ॥ २२ ॥

गो० टी०–फलितमाह—**मानयन्त्विति** ॥ २२ ॥

२३] ति० टी०–ननु सीते, विसर्जनाय वनं चलेति कथं वक्तुं शक्यं तत्राह—**पूर्वमिति** । संवर्त्यतामनुष्ठीयताम् ॥२३॥

रा० टी०–ननु गमनाय मया प्रार्थितापि सा यदि न गच्छेत् तर्हि किं कर्तव्यमित्यत आह–**पूर्वमिति** । अनया सीतया गंगातीरं आश्रमानहं पश्येयमिति पूर्वमहमुक्तः अतः तस्याः कामोभिलाषः संवर्त्यताम् संपाद्यताम् ॥ २३ ॥

गो० टी०–कथमिमं नृशंसत्वं सोढुं शक्यमित्यत्राह–**पूर्वमित्यादि** । संवर्त्यताम् अनुष्ठीयताम् ॥ २३ ॥

२४] ति० टी०–भ्रातृभिः परिवारितः प्रविवेश । तान्विसृज्य । स्ववेश्मेति शेषः ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

रा० टी०–**एवमिति** । बाष्पेण भविष्यत्सीतावियोग-

१ एनामिति गो. रा. पा. । २ भद्रं ते इति गो. पा. । ३ परीति रा. पा. । ४ भुजाभ्यामिति गो. पा. । ५ पिहितानन इति गो. रा. पा. । ६ प्रेति गो. पा. । ७ संलग्नेति गो. पा. ।

षट्चत्वारिंशः सर्गः ।

देवि त्वदिष्टं गङ्गातीरवासं प्रयेत्यादिष्टोऽहमग्रजेनातः सज्जः स्यन्दन इति भाषमाणः सौमित्रिस्तां मुनिपत्नीवितरणकृते गृहीतमहार्घाभरणवाससं जानकीं दुरुत्पातखिन्नचेतसमपि वेगवता रथेन स्वयं रुदन्नेव गङ्गातीरमनयत् ।

ततो रजन्यां व्युष्टायां लक्ष्मणो दीनचेतनः । सुमन्त्रमब्रवीद्वाक्यं मुखेन परिशुष्यता ॥ १ ॥
सारथे तुरगाञ्शीघ्रान्योजयस्व रथोत्तमे । स्वास्तीर्णं राजवचनात्सीतायाश्चासनं शुभम् ॥ २ ॥
सीता हि राजवचनादाश्रमं पुण्यकर्मणाम् । मया नेया महर्षीणां शीघ्रमानीयतां रथः ॥ ३ ॥
सुमन्त्रस्तु तथेत्युक्त्वा युक्तं परमवाजिभिः । रथं सुरुचिरप्रख्यं स्वास्तीर्णं सुखशय्यया ॥ ४ ॥
आनीयोवाच सौमित्रिं मित्राणां मानवर्धनम् । रथोऽयं समनुप्राप्तो यत्कार्यं क्रियतां प्रभो ॥ ५ ॥
एवमुक्तः सुमन्त्रेण राजवेश्मनि लक्ष्मणः । प्रविश्य सीतामासाद्य व्याजहार नरर्षभः ॥ ६ ॥
त्वया किलैष नृपतिर्वरं वै याचितः प्रभुः । नृपेण च प्रतिज्ञातमाज्ञप्तश्चाश्रमं प्रति ॥ ७ ॥
गङ्गातीरे मया देवि ऋषीणामाश्रमान्शुभान् । शीघ्रं गत्वा तु वैदेहि शासनात्पार्थिवस्य नः ॥ ८ ॥
अरण्ये मुनिभिर्जुष्टे अवनेया भविष्यसि । एवमुक्ता तु वैदेही लक्ष्मणेन महात्मना ॥ ९ ॥
प्रहर्षमतुलं लेभे गमनं चाप्यरोचयत् । वासांसि च महार्हाणि रत्नानि विविधानि च ॥१०॥
गृहीत्वा तानि वैदेही गमनायोपचक्रमे । इमानि मुनिपत्नीनां दास्याम्याभरणान्यहम् ॥११॥

स्मृतिजनिताश्रुणा पिहितमाननं यस्य स काकुत्स्थः एवमुक्त्वा संविवेश द्विपस्य इव निश्वास च ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०-एवमिति । भ्रातृभिः परिवारितः प्रविवेशेति । भ्रातॄन् विसृज्य स्ववेश्म प्रविवेशेत्यर्थः ॥ २४ ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

१] ति० टी०-अथ लक्ष्मणेन सीतानयनम्—तत इति ॥ १ ॥

रा० टी०-रामाज्ञापनानन्तरकालिकं वृत्तमाह—तत इत्यादिभिः । रजन्यां व्युष्टायां प्रभातत्वं प्राप्तायां लक्ष्मणस्सुमन्त्रमब्रवीत् ॥ १ ॥

गो० टी०-तत इत्यादि ॥ १ ॥

२] ति० टी०-सीतायाः शुभमासनं राजभवनादानीय स्वास्तीर्णं रथं कुरु ॥ २ ॥

रा० टी०-तदाकारमाह—सारथ इति । राजवचनाच्छीघ्रान् शीघ्रगामिनः तुरगान् रथोत्तमे योजयस्व सीतायाः आसनं स्वास्तीर्णं शोभनास्तरणसहितं कुर्विति शेषः ॥ २ ॥

गो० टी०-सारथ इति । स्वास्तीर्णमिति । सीतायाश्च शुभमासनं राजभवनादानीय स्वास्तीर्णं रथं कुरु ॥ २ ॥

३] ति० टी०-किमर्थं सीतायाः आसनं तत्राह—सीता हीति ॥ ३ ॥

रा० टी०-तत्प्रयोजनमाह—सीतेति । महर्षीणामाश्रमं मया सीता नेया अतः रथश्शीघ्रमानीयताम् ॥ ३ ॥

गो० टी०-कुत इत्यत्राह—सीता हीत्यादि ॥ ३ ॥

४-६] ति० टी०-सुरुचिरप्रख्यं सुन्दरशोभम् ॥ ४-६ ॥

रा०टी०-सुमन्त्र इति । सुमन्त्रस्तु सुखशय्यया स्वास्तीर्णं रथमानीय अयं रथः समनुप्राप्तः अतो यत्कार्यं तत्क्रियतामिति वचनं सौमित्रिमुवाच श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

रा० टी०-एवमिति । लक्ष्मणः राजवेश्मनि प्रविश्य सीतामासाद्य प्राप्य व्याजहार उवाच ॥ ६ ॥

गो० टी०-सुमन्त्र इति । सुरुचिरप्रख्यं सुन्दरशोभम् ॥ ४—१३ ॥

७] ति० टी०-एष नृपतिः रामः प्रतिज्ञातमङ्गीकृतम् । आश्रमं प्रति नयनमिति शेषः । आज्ञप्तः । आश्रमं नेतुमिति शेषः ॥ ७ ॥

रा० टी०-तदाकारमाह—त्वयेति । त्वया वरं याचितो यः प्रभुः एषः तेन नृपेण रामेण प्रतिज्ञातं त्वत्प्रार्थितं स्वीकृतमत एव आश्रमं प्रति प्रयाणायेति शेषः आज्ञप्तः अहमिति शेषः ॥ ७ ॥

८-११] ति० टी०-शीघ्रं गत्वा । गङ्गातीरमिति शेषः । मुनीनामाश्रमान्प्रत्यवनेयावरोप्य प्रापणीया ॥ ८-११ ॥

रा० टी०-गङ्गेति । नोस्माकं पार्थिवस्य रामस्य शासनाद्धेतोः ऋषीणामाश्रमान् गत्वा मुनिभिर्जुष्टे अरण्ये मया अवनेया प्रापणीया भविष्यसि सार्धश्लोक एकान्वयी ॥ ८ ॥

---

१ भवनादिति गो. पाठः । २ कुर्विति गो. पाठः । ३ अर्पेति गो. पाठः ।

वस्त्राणि च महार्हाणि धनानि विविधानि च । सौमित्रिस्तु तथेत्युक्त्वा रथमारोप्य मैथिलीम् ॥१२॥
प्रययौ शीघ्रतुरगं रामस्याज्ञामनुस्मरन् । अब्रवीच्च तदा सीता लक्ष्मणं लक्ष्मिवर्धनम् ॥ १३ ॥
अशुभानि बहून्येव पश्यामि रघुनन्दन । नयनं मे स्फुरत्यद्य गात्रोत्कम्पश्च जायते ॥ १४ ॥
हृदयं चैव सौमित्रे अस्वस्थमिव लक्षये । औत्सुक्यं परमं चापि अधृतिश्च परा मम ॥ १५ ॥
शून्यामेव च पश्यामि पृथिवीं पृथुलोचन । अपि स्वस्ति भवेत्तस्य भ्रातुस्ते भ्रातृवत्सल ॥ १६ ॥
श्वश्रूणां चैव मे वीर सर्वासामविशेषतः । पुरे जनपदे चैव कुशलं प्राणिनामपि ॥ १७ ॥
इत्यञ्जलिकृता सीता देवता अभ्ययाचत । लक्ष्मणोऽथ ततः श्रुत्वा शिरसा वन्द्य मैथिलीम्॥१८॥
शिवमित्यब्रवीद्धृष्टो हृदयेन विशुष्यता । ततो वासमुपागम्य गोमतीतीर आश्रमे ॥ १९ ॥
प्रभाते पुनरुत्थाय सौमित्रिः सूतमब्रवीत् । योजयस्व रथं शीघ्रमद्य भागीरथीजलम् ॥ २० ॥
शिरसा धारयिष्यामि त्रियैम्बक इवौजसा । सोऽश्वान्विचारयित्वा तु रथे युक्तान्मनोजवान २१॥
आरोहस्वेति वैदेहीं सूतः प्राञ्जलिरब्रवीत् । सा तु सूतस्य वचनादारुरोह रथोत्तमम् ॥ २२ ॥
सीता सौमित्रिणा सार्धं सुमन्त्रेण च धीमता । आससाद विशालाक्षी गङ्गां पापविनाशिनीम्॥२३॥

रा० टी०-एवमिति । वैदेही प्रहर्षं लेभे गमनमरोचयच्च ॥ ९ ॥

रा० टी०-वासांसीति । वैदेही गमनायोपचक्रमे ॥१०॥

रा० टी०-इमानीति । आभरणादीनि मुनिपत्नीनां दास्यामि इति लक्ष्मणमब्रवीदिति शेषः ॥ ११ ॥

१२-१३] ति० टी०-तथेत्युक्त्वा यथेष्टं प्रयच्छेत्युक्त्वा ॥ १२ ॥ १३ ॥

रा० टी०-सौमित्रिरिति । शीघ्रतुरगा यस्मिंस्तं रथं मैथिलीमारोप्य सौमित्रिः प्रययौ ॥ १२ ॥

रा० टी०-अब्रवीदिति । सीता लक्ष्मणमब्रवीत् तत्स्वरूपमाह बहून्यशुभानि चिरकालकपतिवियोगसूचककुशकुनान् चकारेण शुभान्यपि अहम् पश्यामि अत एव चः सार्थः १३

१४] ति० टी०-नयनं दक्षिणम् ॥ १४ ॥

रा० टी०-तदाकारमाह-नयनमिति । मे नयनं स्फुरति दक्षिणमिति शेषः अत एव हृदयमस्वस्थमेव लक्षये ॥ १४ ॥

गो० टी०-नयनमिति । हृदयं मनः ॥ १४ ॥

१५] ति० टी०-हृदयं मनः । औत्सुक्यं नगरविषयं रामविषयं वा ॥ १५ ॥

रा० टी०-नन्वेवं सति तिष्ठन्त्यत आह-औत्सुक्यमिति । परमौत्सुक्यं शुभसूचकमुनिदर्शनविषयकान्यौत्कण्ठ्यं च जायते इति शेषः अतः अधृतिः स्थितिविषयकधैर्याभावः जायते अत एव पृथिवीं शून्यामेव पश्यामि इदानीं मुनिदर्शनादन्यन्सुखप्रदं नावलोकयामीत्यर्थः ॥ १५ ॥

गो० टी०-औत्सुक्यमिति । औत्सुक्यं पुण्याश्रमदर्शनविषयजम् शून्यां सुखशून्याम् ॥ १५ ॥ १६ ॥

१६-१७] ति० टी०-शून्यां सुखशून्याम् ॥१६॥१७॥

रा० टी०-इदानीं अशकुनदर्शनस्याकिञ्चित्करत्वं सम्पादयन्ती आह—अपीति । ते भ्रातुः मे श्वश्रूणां च अपि स्वस्ति भवेदिति शेषः पुराद्यौ प्राणिनां च कुशलं भवेदित्येवं प्रकारेण देवताः सीता अभ्ययाचत एतेन रामादीनां स्वस्तित्वे संगमो भवितैवेति किं विलम्बेनेति सीताभिप्रायः सूचितः अर्धचतुष्टयमेकान्वयि ॥ १६ ॥ १७ ॥

गो० टी०-पुर इति । अञ्जलिकृता कृताञ्जलिः ॥ १७ ॥

१८] ति० टी०-अञ्जलिकृता कृताञ्जलिः । अथ दुर्निमित्तवस्तु ॥ १८ ॥

रा० टी०-लक्ष्मण इति । विशुष्यता पूर्वं रामाश्रुपातदर्शनहेतुकविशेषं प्राप्नुवता हृदयेनोपलक्षितो हृष्टः पश्चात् सीताहर्षदर्शनहेतुकहर्षप्राप्तो लक्ष्मणः अथ सीतोक्तपदार्थं श्रुत्वा मैथिलीमाबन्ध्य शिवं मंगलमित्यब्रवीत् ॥ १८ ॥

गो० टी०-लक्ष्मण इति । तमर्थमिति । दुर्निमित्तरूपं वस्त्वित्यर्थः । हृष्टः हृष्टः इव ॥ १८ ॥ १९ ॥

१९-२०] ति० टी०-शिवमित्यब्रवीद्धृष्टो हृष्ट इव१९-२०

रा० टी०-तत इति । गोमतीतीरे विद्यमाने आश्रमे वासमुपागम्य प्रभाते सौमित्रिः सूतमब्रवीत् ॥ १९ ॥

रा० टी०-तदाकारमाह—योजयस्वेति । अद्य अस्मिन्दिने भागीरथीजलं त्रियम्बकः त्र्यंबकः शिव इव शिरसा धारयिष्यामि अतः रथं शीघ्रं योजयस्व पर्वतस्त्र्यम्बको यथेति पाठे तृपमाद्वयमिति भट्टाः ॥ २० ॥

गो० टी०-योजयस्वेति । शिरसा धारयिष्यामि त्र्यम्बकः पर्वते यथेति । दृष्टान्ते रुद्रोपि स्नानार्थमेव गङ्गां धारयेति गम्यते ॥ २०—२२ ॥

२१-२३] ति० टी० 'पर्वतस्त्र्यम्बको यथा' इति पाठे उपमाद्वयम् । त्र्यम्बक इव पर्वतो हिमवानिवेति वा । अश्वांश्चतुरः ॥ २१-२३ ॥

१ तुरगैरिति गो. पाठः । २ त्र्यंबकः पर्वते यथेति गो. पाठः । ३ रथाय चतुरो रथे युक्त्वा मनोजवानिति गो. पाठः ।

अथार्धदिवसं गत्वा भागीरथ्या जलाशयम् । निरीक्ष्य लक्ष्मणो दीनः प्ररुरोद महास्वनः ॥ २४ ॥
सीता तु परमायत्ता दृष्ट्वा लक्ष्मणमातुरम् । उवाच वाक्यं धर्मज्ञा किमिदं रुद्यते त्वया ॥ २५ ॥
जाह्नवीतीरमासाद्य चिराभिलषितं मम । हर्षकाले किमर्थं मां विषादयसि लक्ष्मण ॥ २६ ॥
नित्यं त्वं रामपार्श्वेषु वर्तसे पुरुषर्षभ । कच्चिद्विनाकृतस्तेन द्विरात्रं शोकमागतः ॥ २७ ॥
ममापि दयितो रामो जीवितादपि लक्ष्मण । न चाहमेवं शोचामि मैवं त्वं बालिशो भव ॥ २८ ॥
तारयस्व च मां गङ्गां दर्शयस्व च तापसान् । ततो मुनिभ्यो वासांसि दास्याम्याभरणानि च २९॥
ततः कृत्वा महर्षीणां यथार्हमभिवादनम् । तत्र चैकां निशामुष्य यास्यामस्तां पुरीं पुनः ॥ ३० ॥
ममापि पद्मपत्राक्षं सिंहोरस्कं कृशोदरम् । त्वरते हि मनो द्रष्टुं रामं रमयतां वरम् ॥ ३१ ॥
तस्यास्तद्वचनं श्रुत्वा प्रमृज्य नयने शुभे । नाविकानाह्वयामास लक्ष्मणः परवीरहा ॥
इयं च सज्जा नौश्चेति दाशाः प्राञ्जलयोऽब्रुवन् । ॥ ३२ ॥
तितीर्षुर्लक्ष्मणो गङ्गां शुभां नावमुपारुहत् । गङ्गां संतारयामास लक्ष्मणस्तां समाहितः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।

रामानुजः सीतां नौकया जाह्नव्याः पारं प्रापय्य विषण्णो निन्द्यकर्मकरणान्मृत्युमात्मन इच्छन् किमेवं करोषीति तया पृष्टः सन् रामनोगतं निशमय्य देवि मा शुचः पितुर्मम सखा वाल्मीकिस्तस्याश्रमे सुखं वसान्ते कन्याणं प्राप्स्यसीत्यब्रवीत् ।

अथ नावं सुविस्तीर्णां नैषादीं राघवानुजः । आरुरोह समायुक्तां पूर्वमारोप्य मैथिलीम् ॥ १ ॥

रा० टी०-स इति । स्वैर्युक्तानधान् विचारयित्वा अतिचाञ्चल्यस्य किञ्चित्कृत्यं इतस्ततस्संचाल्य आरोहस्वेति वैदेहीमब्रवीत् ॥ १ ॥

रा० टी०-सेति । सीता सौमित्रिणा सार्धं रथोत्तममारुरोह गंगामाससाद जगाम । सार्धश्लोक एकान्वयी २२॥२३

गो० टी०-आससादेति । जलाशयं जलप्रवाहम् २३-२६

२४-२५] ति० टी०-जलाशयं जलप्रवाहम् ॥२४-२५

रा० टी०-अथेति । अर्धदिवसे मध्याह्ने भागीरथ्या जलाशयं गत्वा निरीक्ष्य च दीनः आसन्नसीतावियोगवृद्ध्या दैन्यविशिष्टो महास्वनस्सन् लक्ष्मणः प्ररुरोद ॥ २४ ॥

रा० टी०-सीतेति । सीता लक्ष्मणमातुरं दृष्ट्वोवाच तदाकारमाह इदं त्वया किं किमर्थं रुद्यते ॥ २५ ॥

२६] ति० टी०-मम चिराभिलषितं जाह्नवीतीरमासाद्य किं रुद्यते इत्यन्वयः ॥ २६ ॥

रा० टी०-जान्हवीति । मम चिराभिलषितं जान्हवीतीरमासाद्य हर्षकाले मां किमर्थं विषादयसि ॥ २६ ॥

२७-३३] ति० टी०-द्विरात्रं तेन विना कृतः शोकमागतः कचित् ॥ २७-३३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रा० टी०-स्वसंभावितमाह—नित्यमिति । रामपार्श्वेषु त्वं नित्यं वर्तसे अत एव द्विरात्रं तेन विनाकृतस्त्वं कच्चिच्छोकमागतः ॥ २७ ॥

रा० टी०-ममेति । एवं त्वत्सदृशमहं न शोचामि अतः एवं शोकेन त्वं बालिशो मा भव ॥ २८ ॥

रा० टी०-तारयस्वेति । मुनिभ्यः वासांसि आभरणानि च दास्यामि ॥ २९ ॥

रा० टी०-तत इति । तत्र महर्षीणामभिवादनं कृत्वा एकां निशामुष्य च तामयोध्यां यास्यामः ॥ ३० ॥

रा० टी०-ममेति । ममापि मनः रामं द्रष्टुं त्वरते॥३१॥

रा० टी०-तस्या इति । लक्ष्मणः नयने प्रमृज्य नाविकान् आह्वयामास ॥ ३२ ॥

रा० टी०-इयमिति । इयं नौस्सज्जा इति दाशाः नाविका अब्रुवन् अर्थं पृथक् तितीर्षुरिति लक्ष्मणः नावमुपारुहत् लक्ष्मणः तां सीतां गङ्गां संतारयामास ॥ ३३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

गो० टी०-नित्यमिति । पार्श्वेष्विति पूजायां बहुवचनम् । शोकमागतः कच्चिदित्यन्वयः ॥ २७—३४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

१] ति० टी०-नैषादीं निषादोपनीतां गुहाख्यनिषादसंबन्धिनीमिति वा समायुक्तां सज्जीकृताम् ॥ १ ॥

रा० टी०-तरणप्रकारं वर्णयन्नाह—अथेत्यादिभिः ।

सुमन्त्रं चैव सरथं स्थीयतामिति लक्ष्मणः । उवाच शोकसंतप्तः प्रयाहीति च नाविकम् ॥ २ ॥
ततस्तीरमुपागम्य भागीरथ्याः स लक्ष्मणः । उवाच मैथिलीं वाक्यं प्राञ्जलिर्बाष्पसंवृतः ॥ ३ ॥
हृद्गतं मे महच्छल्यं यस्मादार्येण धीमता । अस्मिन्निमित्ते वैदेहि लोकस्य वचनीकृतः ॥ ४ ॥
श्रेयो हि मरणं मेऽद्य मृत्युर्वा यत्परं भवेत् । न चास्मिन्नीदृशे कार्ये नियोज्यो लोकनिन्दिते ॥५॥
प्रसीद च न मे पापं कर्तुमर्हसि शोभने । इत्यञ्जलिकृतो भूमौ निपपात स लक्ष्मणः ॥ ६ ॥
रुदन्तं प्राञ्जलिं दृष्ट्वा काङ्क्षन्तं मृत्युमात्मनः । मैथिली भृशसंविग्ना लक्ष्मणं वाक्यमब्रवीत् ॥ ७ ॥
किमिदं नावगच्छामि ब्रूहि तत्त्वेन लक्ष्मण । पश्यामि त्वां न च स्वस्थमपि क्षेमं महीपतेः ॥ ८ ॥
शापितोऽसि नरेन्द्रेण यत्त्वं संतापमागतः । तद्ब्रूयाः संनिधौ मह्यमहमाज्ञापयामि ते ॥ ९ ॥
वैदेह्या चोद्यमानस्तु लक्ष्मणो दीनचेतनः । अवाङ्मुखो वाष्पगलो वाक्यमेतदुवाच ह ॥ १० ॥

राघवानुजः नैषादीं निषादेनानीतां नावं पूर्वं मैथिलीमारोप्य आरुरोह ॥ १ ॥

गो० टी०–अथेत्यादि । निषादस्य गृहस्थेयं नैषादी ताम् समागुक्तां सज्जीकृताम् ॥ १ ॥

२] ति० टी०–स्थीयताम् । अर्वाचीनगङ्गातीर एवेति । शेषः । प्रयाहि परं तीरमिति शेषः ॥ २ ॥

रा० टी०–सुमन्त्रमिति । लक्ष्मणः स्थीयतामिति सुमन्त्रं प्रयाहीति नाविकं चोवाच ॥ २ ॥

गो० टी०–सुमन्त्रमिति । स्थीयतामिति । गङ्गातीर एवेति शेषः ॥ २ ॥

३] ति० टी०–तीरं परं तीरम् । उवाच । सीतामिति शेषः ॥ ३ ॥

रा० टी०–तत इति । लक्ष्मणः मैथिलीं वाक्यमुवाच ३

गो० टी०–तत इति । तीरं दक्षिणतीरमित्यर्थः ॥ ३ ॥

४] ति० टी०–वैदेहि, अस्मिन्निमित्ते यस्माद्धीमताप्यार्येण लोकनिन्दाहेतुभूते क्रूरकार्ये यदहं नियुक्तस्तल्लोकस्य वचनीकृतः । यलोप आर्षः । वचनीयो निन्द्यः कृतः, अतो मे महच्छल्यं हृदतं हृदयं प्रविष्टम ॥ ४ ॥

रा० टी०–तदाकारमाह—हृदिति । अस्मिन्निमित्ते त्वन्मात्रप्रेषणपूर्वकसुनिरहितदेशाधिकरणकसंस्थापनरूपकारणेनेत्यर्थः यस्मादहं लोकस्य निखिलधर्मद्रष्टुर्वाल्मीकेरित्यर्थः । वचनी निर्जनदेशे त्वत्स्वामिनीं सन्त्यज्य लक्ष्मणो गत इति अतिक्रूरः स इति दुर्वचनविषयः कृतः तस्मात्तच्छल्यं मे हृद एतद्हृदये निविष्टमिव ॥ ४ ॥

गो० टी०–हृद्गतमित्यादि । हे वैदेहि ! यस्मिन्निमित्ते यत्कृत्यानुष्ठानतः अहं लोकस्य वचनीकृतः वचनीयः कृतः । यलोप आर्षः । निन्द्यः संपादितो भवेयम । अस्मिन्निमित्ते धीमता सर्वज्ञेन आर्येण यस्मादहं नियुक्तः तेन हेतुना मे महच्छल्यं हृदतम् ॥ ४ ॥

५] ति० टी०–एवं महच्छल्यं प्राप्नवतो मे यन्मरणं तत्प्रागवस्था मूर्च्छा मृत्युर्मुख्यं मरणं वा यद्वैवेत्परं श्रेयो भवेत् । न च न त्वीदृशे लोकनिन्द्येऽस्मिन्वक्ष्यमाणे कार्येऽहं नियोज्यो नियोक्तुमर्हो भवामि । अथापि राजनियोगस्य सर्वथा कर्तव्यत्वान्नियोगं करोमीति शेषः ॥ ५ ॥

रा० टी०–श्रेय इति । अस्मिन्नुपस्थिते ईदृशे अतिक्रूरत्वेन प्रतीयमाने अत एव लोकनिन्दिते कार्ये अहं न नियोज्यः हि यस्मान्नियोजनान्मे मरणं श्रेयः यन्मृत्युः तस्मादपि परं यद्वैवेत्तच्छ्रेयो वा ॥ ५ ॥

गो० टी०–श्रेय इति । एवं महच्छल्यं प्राप्नवतो मे मृत्युः मरणं हि वा यत् यदि स्यात् । अथ तदेव मे परं श्रेयो भवेत् । न चेत्यादि । ईदृशे लक्ष्मणो निर्घृण इति लोकनिन्द्ये अस्मिन् वक्ष्यमाणरूपे कार्ये न चाहं नियोज्योऽस्मि नियोक्तुमर्होस्मि । तथा विनियुक्तस्य कार्यस्य सर्वथैव कर्तव्यत्वादिति शेषः । अतः प्रसीदेत्यादि योज्यम ॥ ५ ॥ ६ ॥

६] ति० टी०–यदेवमतः–प्रसीदेति । पापं कर्तुम् । दोषं जातुमित्यर्थः । अञ्जलिकृतः कृताञ्जलिः ॥ ६ ॥

रा० टी०–प्रसीदेति । मे मह्यं पापमयं पापीति बुद्धिं कर्तुं नार्हसि प्रसीद च इत्युक्त्वा भूमौ निपपात ॥ ६ ॥

७] ति० टी०–मृत्युं काङ्क्षन्तं परमहच्छल्यवशात् ॥७॥

रा० टी०–रुदन्तमिति । मैथिली लक्ष्मणमब्रवीत् ॥७॥

गो० टी०–रुदन्तमिति । मृत्युं काङ्क्षन्तम् । परमहच्छल्यवशादिति शेषः ॥ ७ ॥

८] ति० टी०–नावगच्छामि । रोदनादिहेतुमिति शेषः । महीपतेः रामस्य क्षेममपि सौख्यमपि न पश्यामि ॥ ८ ॥

रा० टी०–तदाकारमाह—किमित्यादिभिः । इदं भवदुक्तमहं नावगच्छामि जानामि अतः तत्त्वेन ब्रूहि त्वां स्वस्थं न पश्यामि अतो महीपतेः रामस्य क्षेमं स्वास्थ्येन स्थितिमपि न पश्यामि ॥ ८ ॥

गो० टी०–किमिदमिति । नावगच्छामि एवं रोदनादेर्हेतुमिति शेषः । महीपतेः रामस्य क्षेममपि सुखमपि न पश्यामि ॥ ८ ॥

९–१०] ति० टी०–यस्मात्त्वमेवं संतापमागतस्तस्मा-

१ कलमिति गो. पाठः ।

श्रुत्वा परिषदो मध्ये ह्यपवादं सुदारुणम् । पुरे जनपदे चैव त्वत्कृते जनकात्मजे ॥ ११ ॥
रामः संतप्तहृदयो मा निवेद्य गृहं गतः । न तानि वचनीयानि मया देवि तवाग्रतः ॥ १२ ॥
यानि राज्ञा हृदि न्यस्तान्यमर्षात्पृष्ठतः कृतः । सा त्वं त्यक्ता नृपतिना निर्दोषा मम संनिधौ॥१३॥
पौरापवादभीतेन ग्राह्यं देवि न तेऽन्यथा । आश्रमान्तेषु च मया त्यक्तव्या त्वं भविष्यसि॥ १४ ॥
राज्ञः शासनमादाय तथैव किल दौर्हृदम् । तदेतज्जाह्नवीतीरे ब्रह्मर्षीणां तपोवनम् ॥ १५ ॥
पुण्यं च रमणीयं च मा विषादं कृथाः शुभे । राज्ञो दशरथस्यैवं पितुर्मे मुनिपुंगवः ॥ १६ ॥

स्वं नरेन्द्रेण प्रत्युत्तरतया शापपूर्वं क्रूरं कर्मण्याज्ञप्त इति मन्ये इति शेषः । मह्यं मम संनिधावाज्ञापयामि । ते त्वामित्यर्थः ॥ ९ ॥ १० ॥

रा० टी०–शापित इति । यत् यस्मै कार्याय नरेन्द्रेण शापितः अवश्यं करणाय शपथं कारितः अत एव सन्तापमागतोसि तत्त्वं मम सन्निधौ ब्रूयाः अहं ते आज्ञापयामि ॥ ९ ॥

रा० टी०–वैदेह्येति । वैदेह्या चोद्यमानो लक्ष्मणः एतद्वाक्यमुवाच ॥ १० ॥

गो० टी०–शापित इति । यस्मात्त्वमेवं संतापमागतः तस्मात्त्वं नरेन्द्रेणैव शापितोऽसि । मह्यं मम । आज्ञापयामि त इति । त्वामित्यर्थः ॥ ९ ॥ १० ॥

११] ति० टी०–त्वत्कृतेऽपवादं निन्दां श्रुत्वा संतप्तहृदयो गृहं गत इत्यन्वयः ॥ ११ ॥

रा० टी०–तदाकारमाह—श्रुत्वेति । त्वत्कृते त्वत्कर्तृकवनगमनप्रयत्ने सति सन्तप्तहृदयः निश्चितभविष्यत्त्वद्वियोगस्मृत्या खिद्यमानमनो रामः पुरे जनपदे चोच्यमानां मां स्वविजयसम्पत्तिम् सदारुणं परमदयालुनां हृदयप्रकम्पकम अपवादं कुम्भकर्णभक्षितराक्षसकर्मकनिन्दां च परिषदो मध्ये श्रुत्वा निवेद्य अस्मान् श्रावयित्वा च गृहं गतः सार्द्धश्लोक एकान्वयी ॥ ११ ॥

गो० टी०–श्रुत्वेत्यादिश्लोकद्वयमेकान्वयम । त्वत्कृते अपवादं श्रुत्वा सा त्वं त्यक्तेत्यन्वयः ॥ ११ ॥

१२] ति० टी०–कोऽसौ मन्त्रिमित्रः पौरापवादस्तत्राह–न तानीति । यानि वचनानि राज्ञामर्षाद्धृदि न्यस्तानि तानि हे देवि, मया तवाग्रतो न वचनीयानि न वक्तुं शक्यानि, अत एव तेषां वादो मया पृष्ठतः कृतः ॥ १२ ॥

रा० टी०–नेति । पृष्ठतः मृतस्यापीत्यर्थः कृतः शत्रोः किं च पृष्ठतः कृतः स्वानादरकर्तुरपि राक्षसस्येत्यर्थः अमर्षात् दुःखासहनात् हेतोः यानि कृत्यानि राज्ञा रामेण हृदि न्यस्तानि न कथितानीत्यर्थः तानि अग्रतः कस्यचित्समीपे मया न वचनीयानि वक्तव्यानि तव त्वया च न वचनीयानि एतेन रामाभिप्रायस्य ईश्वराणामपि दुर्ज्ञेयत्वं व्यक्तम् ॥ १२ ॥

गो० टी०–कोयमपवाद इत्यत्राह–न तानीति । यानि वचनानि राज्ञा अमर्षात् हृदि न्यस्तानि तानि तवाग्रतो मया न वचनीयानि वक्तुमशक्यानि । अत एवामर्षः मया पृष्ठतः कृतः । नोपन्यस्त इत्यर्थः ॥ १२ ॥

१३–१४] ति० टी०–ननु मदीयनिर्दोषत्वं राजा त्वं च न जानासि । किं तत्राह—निर्दोषेति । यद्यपि त्वं मम संनिधावग्न्यादिभिर्निर्दोषा ख्यापिता, तथापि पौरापवादभीतेन सा निर्दोषापि त्वं त्यक्ता । अन्यथा वास्तवदोषवदुद्धयेति ते त्वया न ग्राह्यम । यदेवमत आश्रमान्तेष्वाश्रमसमीपेषु ॥१३॥१४॥

रा० टी०–सेति । निर्दोषा सर्वकालं दोषसंसर्गरहिता त्वं पौरापवादात् पौरः पूर्वं प्रार्थित इत्यर्थः य आपवः सर्वपावनकारकमुनिदर्शनमित्यर्थः तस्मात् हेतोः अभीतेन सर्वकालं भयरहितेन नृपतिना रामेण मम सन्निधौ त्यक्ता अतः अन्यथा अयं रामाभिप्रायं ज्ञात्वा न वदतीत्यादि न ग्राह्यम् ज्ञातव्यम ॥ १३ ॥

गो० टी०–सा त्वमिति । तथापि ते तव विषये । पौरापवादभीतेन राज्ञा यदादिष्टं तन्मया च ग्राह्यम । नान्यथा न तु त्वयि दोषबुद्धयेत्यर्थः ॥ १३ ॥

रा० टी०–स्वकर्तव्यमाह—आश्रमे इति । दौर्हृदं दुर्ज्ञेयाभिप्रायं राज्ञः शासनमादायागतेन मया आश्रमान्तेषु वाल्मीक्याश्रमपरभागे त्वं त्यक्तव्या संस्थाप्या भविष्यसि १४

गो० टी०–ततः किमित्यत्राह–आश्रमान्तेष्विति। तदेवं किल दौर्हृदं गर्भः । गर्भिण्या अभिलषितमवश्यं कार्यम । तस्मादप्याश्रमान्तेषु त्यक्तव्येत्यर्थः ॥ १४ ॥ १५ ॥

२५] ति० टी०–दौर्हृदं चाज्ञाय । गर्भिण्या अभिलषितमवश्यं कार्यमिति ज्ञात्वेत्यर्थः ॥ १५ ॥

रा० टी०–तदिति । तत् स्वप्रार्थितं पुण्यं रमणीयं ब्रह्मर्षीणां तपोवनमेतदेव अतो विषादं मा कृथाः ॥ १५ ॥

१६] ति० टी०–पुण्यं रमणीयं तपोवनं प्राप्य मा विषादं कृथाः ॥ १६ ॥

रा० टी०–ननु एकाकिन्या मम कथमिह स्थितिरित्यत आह—राज्ञ इति । वाल्मीकिः मे पितुः परमकः अत्युत्तमः सखा एतेन तत्र न साहाय्यान्तरापेक्षेति सूचितम् ॥ १६ ॥

गो० टी०–राज्ञ इति । परमकः परमात्मकल्पावान् ॥ १६–१८ ॥

इति श्रीगोविन्दराजविरचिते भणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१ आज्ञायेति गो. पा. । २ दशरथस्यैष इति गो. पाठः ।

सखा परमको विप्रो वाल्मीकिः सुमहायशाः । पादच्छायामुपागम्य सुखमस्य महात्मनः ॥
उपवासपरैकाग्रा वस त्वं जनकात्मजे । ॥ १७ ॥
पतिव्रतात्वमास्थाय रामं कृत्वा सदा हृदि । श्रेयस्ते परमं देवि तथा कृत्वा भविष्यति ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ।

देवरोक्तमाकर्ण्य मूर्छितयापि लब्धचेतनया वैदेह्या त्यागहेतं पृष्टो बिडौजःसपत्नदूता कात्स्न्येन तत्कथयित्वा अशदुःखितामपि तां तत्र निधाय तदादिष्टः पुरं ययौ ।

लक्ष्मणस्य वचः श्रुत्वा दारुणं जनकात्मजा । परं विषादमागम्य वैदेही निपपात ह ॥ १ ॥
सा मुहूर्तमिवासंज्ञा बाष्पपर्याकुलेक्षणा । लक्ष्मणं दीनया वाचा उवाच जनकात्मजा ॥ २ ॥
मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण । धात्रा यस्यास्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते ॥ ३ ॥
किं नु पापं कृतं पूर्वं को वा दारैर्वियोजितः । याहं शुद्धसमाचारा त्यक्ता नृपतिना सती ॥ ४ ॥
पुराहमाश्रमे वासं रामपादानुवर्तिनी । अनुरुध्यापि सौमित्रे दुःखे च परिवर्तिनी ॥ ५ ॥
सा कथं ह्याश्रमे सौम्य वत्स्यामि विजनीकृता । आख्यास्यामि च कस्याहं दुःखं दुःखपरायणा ॥ ६ ॥

१७-१८] ति० टी०-परमक इत्यनुकम्पायां कन् । अस्य पादच्छायां पादमूलमुपागम्य । एतत्पारतन्त्र्यं प्राप्य-त्यर्थः ॥ १७ ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

रा० टी०-पादेति । अस्य वाल्मीकेः पादच्छायां चरण-मूलमुपागम्य पतिव्रतात्वं पतिव्रतायर्ममास्थाय संस्थाप्य रामं सदा हृदि कृत्वा एकाग्रायतचित्ता उपवासपरा पतिव्रतोचित-भोजनपरा त्वं सुखं वस तथा कृत्वा ते परमं श्रेयो भविष्यति श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

१] ति० टी०-अथ विसृष्टसीतासंदेशं गृहीत्वा लक्ष्मण-परावृत्तिः-लक्ष्मणस्येति ॥ १ ॥

रा० टी०-लक्ष्मणवचनश्रवणानन्तरकालिकं सीतावृत्तान्त-माह—लक्ष्मणस्येत्यादिभिः । वैदेही विवादं रामवियोगज-दुःखमागम्य निपपात एतेन चिरं वियोगो भवितेति तया निश्चितमिति व्यक्तम ॥ १ ॥

गो० टी०-लक्ष्मणस्येति ॥ १ ॥

२] ति० टी०-बाष्पपर्याकुलेक्षणा । संज्ञां प्राप्येति शेषः २

रा० टी०-सेति । सा सीता लक्ष्मणमुवाच ॥ २ ॥

गो० टी०-सेति । बाष्पव्याकुलितेक्षणेत्यनेन पुनः संज्ञा-प्राप्तिः सूचिता ॥ २ ॥

३] ति० टी०-दुःखमूर्तिः सकलदुःखसमूहः ॥ ३ ॥

रा० टी०-तदाकारमाह—मामिकेत्यादिभिः । यस्याः मे तनुः तथा तेन प्रकारेण दुःखमूर्तिः प्रदृश्यते सेयं प्रदृश्य-माना मामिका तनुः दुःखाय दुःखमेव भोक्तुं धात्रा ब्रह्मणा सृष्टा प्रार्थनया प्रकटिता ॥ ३ ॥

गो० टी०-मामिकेति । मामिकेयं तनुः धात्रा दुःखायैव सृष्टा । यस्मात्कारणात् यस्या मे दुःखमूर्तिः प्रदृश्यते॥३॥४॥

४] ति० टी०-सती पतिव्रता ॥ ४ ॥

रा० टी०-चिरकालकवियोगे हेतुमजानती आह—किमिति । शुद्धः समाचारः आचरणं यस्याः सती पतिव्रता याहं नृपतिना रामेण त्यक्ता तया मया पूर्वं किं नु कृतम् ॥४॥

५] ति० टी०-हे सौमित्रे, पुरा पूर्वकाले रामपादा-नुवर्तिनी भूत्वा दुःखे वनवासदुःखे परिवर्तिनी वर्तमानाप्यनु-रुध्य तन्मोद्रा । आश्रमे वासमरोचयमिति शेषः ॥ ५ ॥

रा० टी०-अपूर्वमेवेदं दुःखं प्रवृत्तमिति बोधयन्ती आह—पुरेति । पुरा पूर्वं रामपादानुवर्तिनी अहमाश्रमे मुनीनां निवासस्थाने वासमनुरुध्य कृत्वापि अदुःखे दुःख-विरोधिनि सुखे इत्यर्थः एव परिवर्तिनी वियमाना अभव-मिति शेषः एतेन रामसंयोगे प्रातिभासिकं दुःखमपि सुखमे-वेति सूचितम् ॥ ५ ॥

गो० टी०-पुरेति । अनुरुध्यापि सोद्यपि ॥ ५ ॥

६] ति० टी०-साहमिदानीं विजनीकृतेत्यजनरहिता कृता कथमाश्रमे वत्स्यामि । कस्य च स्वीयं दुःखमहमाख्यास्यामि । विजनवनस्थेति शेषः ॥ ६ ॥

रा० टी०-सेति । विजनीकृता सुखसंपादकरामराहित्यं

किं नु वक्ष्यामि मुनिषु कर्म चासत्कृतं प्रभो । कस्मिन्वा कारणे त्यक्ता राघवेण महात्मना ॥ ७ ॥
न खल्वद्यैव सौमित्रे जीवितं जाह्नवीजले । त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते ॥ ८ ॥
यथाज्ञं कुरु सौमित्रे त्यज्यैं मां दुःखभागिनीम् । निदेशे स्थीयतां राज्ञः शृणु चेदं वचो मम ॥ ९ ॥
श्वश्रूणामविशेषेण प्राञ्जलिप्रग्रहेण च । शिरसा वन्द्य चरणौ कुशलं ब्रूहि पार्थिवम् ॥ १० ॥
शिरसाभिनतो ब्रूयाः सर्वासामेव लक्ष्मण । वक्तव्यश्चापि नृपतिर्धर्मेषु सुसमाहितः ॥ ११ ॥
जानासि च यथा शुद्धा सीता तत्त्वेन राघव । भक्त्या च परया युक्ता हिता च तव नित्यशः॥ १२ ॥
अहं त्यक्ता चैं ते वीर अयशोभीरुणा जने । यच्च ते वचनीयं स्यादपवादैः समुत्थितः ॥ १३ ॥

प्रापिता अत एव दुःखपरायणा सा रामपादपरायणाहमाश्रमे मुनिनिवासस्थानेपि कथं वत्स्यामि दुःखं कस्य कस्मै आख्यास्यामि ॥ ६ ॥

गो० टी०–सेति । विजनीकृता इष्टजनविरहिता कृता ॥ ६ ॥ ७ ॥

७] ति० टी०–किं न्विति । महात्मना राघवेण केन कारणेन त्यक्ता, किं वा त्यागकारणमसत्कर्म त्वया कृतमिति प्रष्टृषु मुनिषु किं नु वक्ष्यामि । त्यागकारणपापस्य कस्याप्यकरणाद्वक्तव्यं प्रत्युत्तरं न किमपि पश्यामीत्याशयः॥ ७॥

रा० टी०–किमिति । राघवेण कस्मिन्कारणे त्वं त्यक्तेति पृच्छन्तिवति शेषः मुनिषु मुनिमध्ये किमसत्कृतं कर्म वक्ष्यामि असत्कर्मणः संभव एव नास्तीति तात्पर्यम् ॥ ७ ॥

८] ति० टी०–अपि च जीवितत्यागोऽप्यशक्य इत्याह–न खल्विति । तदत्यागहेतुमाह–राजवंश इति । राजसंतानः परिहास्यते । विच्छिद्यते इत्यर्थः । मयि गर्भस्य विद्यमानत्वादिति भावः ॥ ८ ॥

रा० टी०–प्राणत्यागमपि कर्तुं न शक्नोमीत्याह—नेति । जाह्नवीजले जीवितं न त्यजेयं तत्र हेतुः मे भर्तुः राजवंशः परिहास्यते कथमेतस्य पत्नी मृतेति इत्यापवादं वक्त्वा परिहासं करिष्यतीत्यर्थः ॥ ८ ॥

गो० टी०–न खल्विति । त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते इत्युत्तरार्धपाठः । अत्यागकारणमुच्यते । राजवंशः राजसन्तानः परिहास्यते विच्छिद्यते । मयि गर्भस्य विद्यमानत्वादिति शेषः । मया देहो धर्तव्य इति भावः । यद्वा । त्यजेयं राघवं वंशे भर्तुर्मां परिहास्यतीति पाठः । रामकृतक्रौर्यादेवैव जाह्नवीजले जीवन्त्यक्तव्यः । तथापि तं न त्यजेयम् । कुतो भर्तुर्वंशे निष्कलङ्के राघवमेकं मा परिहास्यति मा परिहसतु । व्यत्ययस्त्वार्षः । जीवितत्यागं स्त्रीहत्यामूलोपवादः रामस्य स्यादिति भावः । अथैवेत्यनेन प्रस्तावानन्तरन्तु त्याज्यमेवेत्यर्थः ॥ ८ ॥

९] ति० टी०–त्वं च राजशासनं कुर्वित्याह—यथाज्ञमिति । इदं वचो मत्संदेशरूपम् ॥ ९ ॥

रा० टी०–ननु मया किं कर्तव्यमित्यत आह—यथेति । राज्ञो रामस्य निदेशे आज्ञापने स्थीयताम् आज्ञापितं स्मर्यतामित्यर्थः अत एव आज्ञां रामाज्ञापितं यथा यथावत्कुरु अत एव मां त्यज ममेदं वचः शृणु च ॥ ९ ॥

गो० टी०–त्वं तु राजशासनं कुर्वित्याह–यथाज्ञमिति॥९॥

१०–१२] ति० टी०–प्रग्रहेण प्रकृष्टाञ्जलिग्रहणसमेतेन शिरसेत्यन्वयः । चरणौ वन्द्य । मत्प्रतिनिधितयेति भावः । पार्थिवं च वन्दयित्वा कुशलं ब्रूहि ॥ १०–१२ ॥

रा० टी०–तद्वचनाकारमाह—श्वश्रूणामित्यादिभिः । प्राञ्जलिप्रग्रहेण प्रणयसूचकबद्धयुगलकरकरणेन श्वश्रूणां चरणौ अविशेषेणावन्द्य पार्थिवं रामं कुशलं ब्रूहि ॥ १० ॥

रा० टी०–शिरसेति । शिरसाभिनत एव त्वं सर्वासां श्वश्रूभिन्नानामपि मध्ये ब्रूयाः कुशलमिति शेषः नृपतिः रामोपि वक्तव्यः ॥ ११ ॥

रा० टी०–रामोद्देश्यकवचनाकारमाह—जानासीत्यादिभिः । तव परया भक्त्या युक्ता अत एव नित्यशो हिताहिताचरणे युक्ता सीता यथा शुद्धा तथा त्वं तत्त्वेन जानासि १२

गो० टी०–श्वश्रूणामिति । चरणौ आवन्द्येति । मदर्थमिति शेषः ॥ १०–१२ ॥

१३] ति० टी०–जनेऽयशोभीरुणा जननिमित्तायशोभीरुणैव त्वया त्यक्ता । नान्यथेति जानामीति शेषः । वचनीयं निन्दा । अपवादोऽभिशापः ॥ १३ ॥

रा० टी०–इदानीं कथञ्चित्त्यागहेतुं विज्ञायाह—अहमिति । ते अपवादः अपापमदधररसपानाद्यभावाय वादो यत्नः समुत्थितः कर्तव्यत्वेन प्राप्तः अत एव अयशोभीरुणा अयशसः अकर्तव्यं कृतमिति दुष्कीर्तिभीरुणा त्वया अजने देशे अहं त्यक्ता अतः स्यात् तवार्भाष्टसिद्धिर्भवेत् तत्र हेतुः यत् ते अवचनीयम् सौशील्यादिना अवक्तव्याधरपानाद्यभावादि तन्मयापि परिहर्तव्यम् तत्र हेतुः त्वमेव मे परमा गतिः त्वदनुसारेणैव मया वर्तितव्यमित्यर्थः साईश्लोक एकान्वयी १३

गो० टी०–अहमिति । अयशोभीरुणैव त्वया त्यक्ता अनार्येवेत्यर्थः । वचनीयं जुगुप्सनम् । तन्मया परिहर्तव्यम् । त्वदाज्ञया वनस्थल इति शेषः ॥ १३–१७ ॥

---

१ वा सत्कृतं च किमिति गो.पाठः । २ चिविति गो.पा. । ३ त्यजेति गो.रा.पाठः । ४ त्वयेति गो.पाठ. । ५ अपवादसमुत्थितोऽपीति गो. पाठः

मया च परिहर्तव्यं त्वं हि मे परमा गतिः । वक्तव्यश्चैव नृपतिर्धर्मेण सुसमाहितः ॥ १४ ॥
यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा । परमो ह्येष धर्मस्ते तस्मात्कीर्तिरनुत्तमा ॥ १५ ॥
यत्तु पौरेजने राजन्धर्मेण समवाप्नुयात् । अहं तु नानुशोचामि स्वशरीरं नरर्षभ ॥ १६ ॥
यथापवादः पौराणां तथैव रघुनन्दन । पतिर्हि देवता नार्याः पतिर्बन्धुः पतिर्गुरुः ॥ १७ ॥
प्राणैरपि प्रियं तस्माद्भर्तुः कार्यं विशेषतः । इति मद्वचनाद्रामो वक्तव्यो मम संग्रहः ॥ १८ ॥
निरीक्ष्य मां च गच्छ त्वमृतुकालातिवर्तिनीम् । एवं ब्रुवन्त्यां सीतायां लक्ष्मणो दीनचेतनः ॥ १९ ॥
शिरसा वन्द्य धरणीं व्याहर्तुं न शशाक ह । प्रदक्षिणं च तां कृत्वा रुदन्नेव महास्वनः ॥ २० ॥
ध्यात्वा मुहूर्तं तामाह किं मां वक्ष्यसि शोभने । दृष्टपूर्वं न ते रूपं पादौ दृष्टौ तवानघे ॥ २१ ॥
कथमत्र हि पश्यामि रामेण रहितां वने । इत्युक्त्वा तां नमस्कृत्य पुनर्नावमुपारुहत् ॥ २२ ॥
आरुरोह पुनर्नावं नाविकं चाभ्यचोदयत् । स गत्वा चोत्तरं तीरं शोकभारसमन्वितः ॥ २३ ॥
संमूढ इव दुःखेन रथमध्यारुहद्द्रुतम् । मुहुर्मुहुः परावृत्य दृष्ट्वा सीतामनाथवत् ॥ २४ ॥
चेष्टन्तीं परतीरस्थां लक्ष्मणः प्रययावथ । दूरस्थं रथमालोक्य लक्ष्मणं च मुहुर्मुहुः ॥
निरीक्षमाणां तूद्विग्नां सीतां शोकः समाविशत् । ॥ २५ ॥

१४-१५] ति० टी०-अथ प्रजाविषये संदेशमाह—वक्तव्यश्चेति ॥ १४ ॥ १५ ॥

रा० टी०-संदेशान्तरमाह—वक्तव्य इति । यथा येन प्रकारेण भ्रातृषु वर्तेथास्तथा पौरेष्वपि ॥ १४ ॥

रा० टी०-तत्र हेतुं वदन्ती आह—परम इति । एष उक्तस्ते राजः परमो धर्मः अत एव तस्मात् तदनुष्ठानात् अनुत्तमा परमोत्तमा कीर्तिः अतः यत् परमयत्नवान् भवान् धर्मेण साम्यदृष्ट्या पौरजने समवाप्नुयात् वर्तेत इत्यर्थः ॥१५॥

१६] ति० टी०-एष धर्मः कस्तत्राह-यत्त्विति । धर्मेण धर्मकृतलक्षणेन यदवाप्नुयात्पुण्यमेव परमो धर्मः॥१६॥

रा० टी०-ननु तव शोके कथं मम कीर्तिरित्यत आह—अहमिति । पौराणामज्ञातहेतुकपुरवासिनामपवादभियं किञ्चिदपराधवती अत एव चिरं वियोजितेत्यादिवक्ष्यमाणदुरुक्तिं च अहं नानुशोचामि ॥ १६ ॥

१७] ति० टी०-यथा पौराणामपवादं परिहृत्य स्थितिर्भवति तथैव रघुनन्दन, वर्तस्वेति शेषः ॥ १७ ॥

रा० टी०-शोकाभावे हेतुमाह—पतिरिति । हि यतः नार्याः पतिरेव देवतादिः तस्माद्भर्तुः प्रियं प्राणैरपि कार्यम् १७

१८] ति० टी०-मम संग्रहः । मया रामं प्रति वक्तव्यसंदेशस्य संग्रह इत्यर्थः ॥ १८ ॥

रा० टी०-इतीति । इति मम संग्रहः संग्रहकर्त्ता रामः इति उक्तमशेषं मद्वचनाद्वक्तव्यः ऋतुकालातिवर्तिनीं गर्भवतीमित्यर्थः मा मां निरीक्ष्य त्वं गच्छ ॥ १८ ॥

गो० टी०-प्राणैरिति । ऋतुकालातिवर्तिनीं गर्भलक्षणवतीम् ॥ १८-२६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१९-२०] ति० टी०-ऋतुकालातिवर्तिनीं गर्भलक्षणवतीं मा मां निरीक्ष्य गच्छ । पुनः रामादिकृतापवादप्रसक्तिनिवृत्तये इति भावः ॥ १९ ॥ २० ॥

रा० टी०-एवमिति । लक्ष्मणः धरणीं सीताचरणसमीपभूमिमवन्द्य व्याहर्तुं किंचिदपि वक्तुं न शशाक ॥ १९ ॥

रा० टी०-प्रदक्षिणमिति । रुदन्नेव लक्ष्मणः मुहूर्तं ध्यात्वा तां सीतामाह तदाकारमाह हे शोभने मां किं वक्ष्यसि एतेन संभावितसीतादुरुक्तेर्भीतिरूचिता ॥ २० ॥

२१-२३] ति० टी०-किं मां वक्ष्यसि । निरीक्ष्य मां गच्छेति किं वदसीत्यर्थः । शोकवशात्कालान्तरे प्रयोगो न दोषाय । तथा निरीक्षणस्यायोग्यतोपपादकम्-दृष्टपूर्वमिति ॥ २१-२३ ॥

रा० टी०-दृष्टेति । ते रूपं मया दृष्टपूर्वं न पादौ तु दृष्टौ अतः अत्रास्मिन्समये रामेण रहितां त्वां कथं पश्यामि२१

रा० टी०-इतीति । इत्युक्त्वा तां पुनर्नमस्कृत्य नावमुपारुहत् नौकासमीपमगच्छत् सार्द्धमेकान्वयि ॥ २२ ॥

रा० टी०-आरुरोहेति । नावमारुरोह अर्द्धं पृथक्—स इति । लक्ष्मणः उत्तरं तीरं गत्वा रथमध्यारुहत् अध्यारोहत् ॥ २३ ॥

२४-२५] ति० टी०-अनाथवदनाथैव, न तु वस्तुतोऽनाथा । पूर्णचिद्घनस्वरूपत्वादिति भावः ॥ २४ ॥ २५ ॥

रा० टी०-मुहुरिति । अनाथवत् रक्षकरहितामिव चेष्टन्तीं सीतां मुहुर्मुहुः परावृत्य दृष्ट्वा लक्ष्मणः प्रययौ ॥२४॥

रा० टी०-दूरस्थमिति । दूरस्थं रथं लक्ष्मणं चालोक्य उद्विग्नां सीतां निरीक्ष्यमाणं च शोकः समाविशत् ॥ २५ ॥

---

१ इतीति गो. पाठः । २ जनः इति गो. पाठः । ३ यथापवादमिति गो. तथापवादमिति रा. पाठः । ४ आरुह्य चेति गो. पा. ।

सा दुःखभारावनता यशस्विनी यशोधरा नाथमपश्यती सती ।
रुरोद सा वर्हिणनादिते वने महास्वनं दुःखपरायणा सती ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ।

मुनिबालकनिवेदितजानकीवृत्तो वाल्मीकिस्तत्रागत्य पतिव्रतां पूताचारां च भवतीं ज्ञानचक्षुषा वेद्मीति तां समाश्वास्य तदविदूरस्थतापसीसात्कृत्य च स्वाश्रमं ययौ ।

सीतां तु रुदतीं दृष्ट्वा ते तत्र मुनिदारकाः । प्राद्रवन्यत्र भगवानास्ते वाल्मीकिरुग्रधीः ॥ १ ॥
अभिवाद्य मुनेः पादौ मुनिपुत्रा महर्षये । सर्वं[1] निवेदयामासुस्तस्यास्तु रुदितस्वनम् ॥ २ ॥
अदृष्टपूर्वा भगवन्कस्याप्येषा महात्मनः । पत्नी श्रीरिव संमोहाद्विरौति[2] विकृताननना ॥ ३ ॥
भगवन्साधु पैश्येस्त्वं देवतामिव खाच्च्युताम् । नद्यास्तु तीरे भगवन्वरस्त्री कापि दुःखिता ॥ ४ ॥
दृष्टास्माभिः प्ररुदिता दृढं शोकपरायणा । अनर्हा दुःखशोकाभ्यामेकां[3] दीना अनाथवत् ॥ ५ ॥
[न ह्येनां मानुषीं विद्मः सत्क्रियास्याः प्रयुज्यताम् । आश्रमस्याविदूरे च त्वामियं शरणं गता ॥
त्रातारमिच्छते साध्वी भगवंस्त्रातुमर्हसि । तेषां तु वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित् ॥

२६] ति० टी०–दुःखभारावनता सेव । यशोधरा पातिव्रत्ययशोवती ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रा०टी०–सेति । दुःखपरायणा अत एव दुःखभारावनता यशस्विनी प्रशस्तयशोविशिष्टा अत एव यशसा अधराः सकलनार्यो यस्याः सा सीता नाथमपश्यती सती महास्वनं रुरोद२६

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

१–२] ति० टी०–अथ वाल्मीकिना स्वाश्रमे सीतानयनम्–सीतां त्विति । मुनिदारका मुनिपुत्राः । उग्रधीरुग्रतपोविषयबुद्धिः ॥ १ ॥ २ ॥

रा० टी०–लक्ष्मणगमनानन्तरकालिकं वृत्तमाह—सीतामित्यादिभिः । यत्र वाल्मीकिरास्ते तत्र मुनिदारकाः प्राद्रवन् ॥ १ ॥

रा० टी०–अभिवाद्येति । मुनिपुत्राः तस्याः सीतायाः रुदितस्वनं निवेदयामासुः ॥ २ ॥

गो० टी०–सीतां त्वित्यादि ॥ १ ॥ २ ॥

३–४] ति० टी०–निवेदयामासुरित्यस्य विस्तरः–अदृष्टेति ॥ ३ ॥ ४ ॥

रा० टी०–निवेदनाकारमाह–अदृष्टेत्यादिभिः । अदृष्टपूर्वा दृष्टपूर्वभिन्ना कस्यापि महात्मनः श्रीरिव पत्नी सम्मोहाद्विकृताननना सती विरौति ॥ ३ ॥

रा०टी०–भगवन्निति । खाच्च्युतां देवतामिव स्त्रियमिति शेषः त्वं साधु पश्येः अहं पृथक् नद्या इति दुःखशोकाभ्यां दुःखशोकयोः अनर्हा अयोग्या अनाथवद्दीना अत एव दुःखिता अत एव शोकपरायणा या कापि अनिर्वचनीया वरस्त्री नद्यास्तीरे अस्माभिर्दृष्टा तामेनां मानुषीं प्राकृतमनुष्यजातिं न विद्मः अतः अस्याः सत्क्रिया सत्कारः प्रयुज्यतां क्रियतां सार्द्धश्लोक एकान्वयी ॥ ४ ॥ ५ ॥

रा० टी०–आश्रमस्येति । आश्रमस्य अविदूरे निकटे शरणं रक्षकं त्वां गता प्राप्ता इयं साध्वी त्रातारमिच्छते इच्छति अतस्त्रातुमर्हसि ॥ ६ ॥

रा० टी०–तेषामिति । तपसा तपोबलेन लब्धं चक्षुः सकलदर्शनसामर्थ्यं तद्वान् वाल्मीकिः बुद्ध्या तपोलब्धस्वज्ञानेन निश्चित्य तत्त्वेन ज्ञात्वा यत्र मैथिली तत्र प्राद्रवत् प्राद्रवदित्यनेन वाल्मीकेः सीतायां वात्सल्यातिशयो व्यञ्जितः ॥ ७ ॥

रा० टी०–तमिति । प्रयातं वाल्मीकिमभिप्रेत्य ज्ञात्वा शिष्याः एनं प्राद्रवन्निति शेषः अर्द्धं पृथक् तमिति । रुचिरमर्घ्यमादाय पद्भ्यामेव किंचिद्देशमभिद्रुत्य जान्हवीतीरमागमत् सीतां ददर्श च सार्द्धश्लोक एकान्वयी ॥ ९ ॥

गो० टी०–सर्वं निवेदयामासुरित्येतद्विवृणोति—अदृष्टेत्यादि ॥ ३ ॥ ४ ॥

५] ति० टी०–अनर्हा । दुःखस्येति शेषः । दुःखशोकाभ्यां दीना अनाथवद्वर्तते तामिमां साधु पश्येः, दृष्ट्वानुगृह्णाच ॥५॥

गो० टी०–दृष्टेति । अनर्हेति । दुःखस्येति शेषः॥५–११॥

१ सर्वमिति गो. पाठः । २ पश्येति गो. पाठः । ३ एकां दीनां ह्यनाथवदिति गो. पाठः । ४ इदं सार्धं पद्यचतुष्टयमधिकं गो. रा. पु. ।

तपसा लब्धचक्षुष्मान् प्राद्रवद्यत्र मैथिली । तं प्रयान्तमभिप्रेत्य शिष्या ह्येनं महामतिम् ॥
तं तु देशमभिप्रेत्य किंचित्पद्भ्यां महामतिः । अर्घ्यमादाय रुचिरं जाह्नवीतीरमागमत् ॥
ददर्श राघवस्येष्टां सीतां पत्नीमनाथवत्] ।
तां सीतां शोकभारार्तां वाल्मीकिर्मुनिपुंगवः । उवाच मधुरां वाणीं ह्लादयन्निव तेजसा ॥ ६ ॥
स्नुषा दशरथस्य त्वं रामस्य महिषी प्रिया । जनकस्य सुता राज्ञः स्वागतं ते पतिव्रते ॥ ७ ॥
आयान्ती चासि विज्ञाता मया धर्मसमाधिना । कारणं चैव सर्वं मे हृदयेनोपलक्षितम् ॥ ८ ॥
तत्र चैव महाभागे विदितं मम तत्त्वतः । सर्वं च विदितं मह्यं त्रैलोक्ये यद्धि वर्तते ॥ ९ ॥
अपापां वेद्मि सीते ते तपोलब्धेन चक्षुषा । विस्रब्धा भव वैदेहि सांप्रतं मयि वर्तसे ॥ १० ॥
आश्रमस्याविदूरे मे तापस्यस्तपसि स्थिताः । तास्त्वां वत्से यथा वत्सं पालयिष्यन्ति नित्यशः॥११॥
इदमर्घ्यं प्रतीच्छ त्वं विस्रब्धा विगतज्वरा । यथा स्वगृहमभ्येत्य विषादं चैव मा कृथाः ॥ १२ ॥
श्रुत्वा तु भाषितं सीता मुनेः परममद्भुतम् । शिरसा वन्द्य चरणौ तथेत्याह कृताञ्जलिः ॥ १३ ॥

६-७] ति० टी०-एतदुत्तरम् । 'तां सीताम्' इति श्लोकः । मध्ये 'नन्वेनां मानुषीं विद्यः सत्क्रियास्याः प्रयुज्यताम् । आश्रमस्याविदूरे च त्वामियं शरणं गता ॥ त्रातारमिच्छते साध्वी भगवंस्त्रातुमर्हसि । तेषां तु वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित् ॥ तपसा लब्धचक्षुष्मान्प्राद्रवद्यत्र मैथिली । तं प्रयान्तमभिप्रेत्य शिष्या ह्येनं महामतिम् । तं तु देशमभिद्रुत्य किंचित्पद्भ्यां महामतिः । अर्घ्यमादाय रुचिरं जाह्नवीतीरमागमत् ॥ ददर्श राघवस्येष्टां सीतां पत्नीमनाथवत् ॥' इति श्लोकचतुष्टयमर्धाधिकं प्रक्षिप्तमिति कतकः । तां सीतां मुनिपुत्रैर्दृष्ट्वानुग्राह्यत्वेनोक्तां शोकग्रस्तां तां सीतां तत्समीपे गत्वा दृष्टां वाल्मिकिरुवाचेति सोपस्कारः संबन्धः ॥ ६ ॥ ७ ॥

रा० टी०-तामिति । वाल्मीकिः सीतामुवाच ॥ १० ॥

रा० टी०-तदाकारमाह-स्नुषेत्यादिभिः । त्वं रामस्य प्रिया महिष्यसीति शेषः अतस्ते स्वागतम् ॥ ११ ॥

८] ति० टी०-धर्मसमाधिना योगजधर्मलब्धध्यानपरिपाकेन । कारणं चागमनकारणम् । हृदयेनोपलक्षितम् । ध्यानेनेति भावः ॥ ८ ॥

रा० टी०-तथा ज्ञाने हेतुं वदन्नाह-आयान्तीति । स्वधर्मे भवत्पादसेवारूपपरमकर्मणि समाधिः चित्तैकाग्र्यं यस्य तेन मया हृदयेन स्वहृद्यानपूतमनसा आयान्ती त्वं विज्ञातासि अत एव कारणं तवागमने हेतुरपि उपलक्षितं ज्ञातम् ॥ १२ ॥

गो० टी०-आयान्तीति । कारणमिति । आगमनकारणमित्यर्थः ॥ १२ ॥

९] ति० टी०-तव चैवेति । तत्त्वतस्तत्त्वं तव तत्त्वं शुद्धभावत्वरूपं मम मया विदितम् । तदेवाह—सर्वं चेति । मह्यं मम ॥ ९ ॥

रा० टी०-तवेति । यतः त्रैलोक्ये यद्वर्तते तत्सर्वं मह्यं मम विदितमतः तवापि अभिप्रेतमिति शेषः मम विदितम् १३

गो० टी०-तव चैवेति । शुद्धभावत्वमिति शेषः । मम मया । मह्यं मम ॥ १३ ॥

१०] ति० टी०-तदेव पुनराह—अपापामिति । ते त्वां मयि वर्तसे । मत्समीपे निवसिष्यसीत्यर्थः ॥ १० ॥

रा० टी०-अपापामिति । ते त्वामपापामवलोकनमात्रेण पापनिवर्तिकाम् वेद्मि मयि मत्समीपे यतस्त्वं वर्तसे अतः विस्रब्धा रामप्रीतिविषयकविश्वासयुक्ता भव ॥ १४ ॥

गो० टी०-अपापामिति । मयि वर्तस इति । मत्समीपे निवसिष्यसीत्यर्थः ॥ १४ ॥ १५ ॥

११] ति० टी०-आश्रमस्याविदूरे समीपे एकान्ते तपश्चरणार्थं तापस्योऽपि स्थिताः सन्ति । तासां निवासोऽस्तीत्यर्थः । यथा वत्सं पुत्रमिव ॥ ११ ॥

रा० टी०-आश्रमस्येति । मे आश्रमस्य अविदूरे तापस्यः तपसि त्वदर्शनहेतुकतपश्चरणे स्थिताः सन्तीति शेषः ताः तापस्यः हे वत्से त्वां यथा वत्सं पालयिष्यन्ति वत्से इत्युक्त्या जनकेन सहैतस्य महती मैत्रीति सूचिता तद्वारैव दशरथेन मैत्रीति पूर्वेण न विरोधः ॥ १५ ॥

१२-१३] ति० टी०-यथा स्वगृहमभ्येत्य तिष्ठसि तथैव तिष्ठेति शेषः ॥ १२ ॥ १३ ॥

रा० टी०-इदमिति । इदं महत्तमर्घ्यं प्रतीक्ष गृहाण यथा स्वगृहमभ्येत्य विषादं न करोषीति शेषः तथा विषादं मा कृथाः१६

रा० टी०-श्रुत्वेति । सीता तथेत्याह ॥ १७ ॥

गो० टी०-इदमिति । यथा स्वगृहमभ्येत्येति । तथैवावतिष्ठस्वेति शेषः ॥ १६-१८ ॥

१ अभिद्रुत्येति रा० पा० । २ प्रतीक्षेति रा० पा० ।

तं प्रयान्तं मुनिं सीता प्राञ्जलिः पृष्ठतोऽन्वगात्। तं दृष्ट्वा मुनिमायान्तं वैदेह्या मुनिपत्नयः ॥
उपाजग्मुर्मुदा युक्ता वचनं चेदमब्रुवन्। ॥ १४ ॥
स्वागतं ते मुनिश्रेष्ठ चिरस्यागमनं च ते। अभिवादयामस्त्वां सर्वा उच्यतां किं च कुर्महे॥ १५ ॥
तासां तद्वचनं श्रुत्वा वाल्मीकिरिदमब्रवीत्। सीतेयं समनुप्राप्ता पत्नी रामस्य धीमतः ॥ १६ ॥
स्नुषा दशरथस्यैषा जनकस्य सुता सती। अपापा पतिना त्यक्ता परिपाल्या मया सदा॥ १७ ॥
इमां भवत्यः पश्यन्तु स्नेहेन परमेण हि। गौरवान्मम वाक्याच्च पूज्या वोऽस्तु विशेषतः॥ १८ ॥
मुहुर्मुहुश्च वैदेहीं परिदाय महायशाः। स्वमाश्रमं शिष्यवृतः पुनरायान्महातपाः ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः।

अयोध्यां प्रति निवर्तमानयोर्लक्ष्मणसुमन्त्रयोः परस्परसंभाषणे सौमित्रिं प्रति सुमन्त्रः पूर्वं श्रुतं रामस्य सीतावियोगे निदानं कथयति।

दृष्ट्वा तु मैथिलीं सीतामाश्रमे संप्रवेशिताम्। संतापमगमद्धोरं लक्ष्मणो दीनचेतनः ॥ १ ॥
अब्रवीच्च महातेजाः सुमन्त्रं मन्त्रसारथिम्। सीतासंतापजं दुःखं पश्य रामस्य सारथे ॥ २ ॥

१४] ति० टी०–वैदेह्या सहेति शेषः। मुनिपत्नयस्तापस्यो मुदा युक्ता अब्रुवन्वाल्मीकिम् ॥ १४ ॥

रा० टी०–तमिति। सीता मुनिं पृष्ठतोन्वगादर्द्धं पृथक् तमिति। वैदेह्या सहायान्तं मुनिं मुनिपत्नयः सीतामननशीलाः स्त्रियः उपाजग्मुः इदमब्रुवन् च ॥ १८ ॥

गो० टी०–तमिति। मुदा युक्ता इति। मुनिपत्नयः तापस्यः अब्रुवन्निति। वाल्मीकिमिति शेषः ॥ १९ ॥

१५–१६] ति० टी०–चिरस्य तवागमनं दृष्ट्वा स्थिता वयमभिवादयामः। अभिवादयाम किं च कुर्महे ॥ १५॥१६ ॥

रा० टी०–तद्वचनाकारमाह–स्वागतमिति। वयं किं कुर्महे उच्यताम् ॥ १९ ॥

रा० टी०–तासामिति। वाल्मीकिरब्रवीत् अर्द्धं पृथक् तद्वचनाकारमाह–स्नुषेति। अपापा सेवकानां पापनिवर्तिका मया सदा परिपाल्या इयं सीता पतिना पत्या त्यक्ता इह प्रापिता सार्द्धश्लोक एकान्वयी ॥ २० ॥

गो० टी०–स्वागतमिति। चिरस्यागमनमिति। प्रतीक्ष्य स्थिता वयम् अभिवादयामहे। एतेन सीतायाः समाश्वासादिना विलम्बो जात इत्यवगम्यते ॥ २०—२३ ॥

१७–१८] ति० टी०–सदेति। पूर्वं पूर्वावतारेष्वप्येवमेव परिपालितेत्यर्थः ॥ १७ ॥ १८ ॥

रा० टी०–इमामिति। गौरवात् अतिप्रशस्तवंशोत्पन्नत्वादिना गुरुत्वात् मम वाक्याच्च वो युष्माकं विशेषतः पूज्या अतः परमेण स्नेहेन भवन्त्यः इमां पश्यन्तु ॥ २१ ॥

१९] ति० टी०–परिदाय तापसीनां हस्ते दत्त्वा ॥१९॥

इति श्रीरामाभिरामे श्रीरामोये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनपञ्चाशः सर्गः ॥ ४९ ॥

रा० टी०–मुहुरिति। शिष्यवृतवाल्मीकिः वैदेहीं मुहुर्मुहुः परिदाय पत्नीभ्यो ग्राहयित्वा स्वमाश्रमं पुनरायात् ॥२२॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

गो० टी०–मुहुरिति। प्रणिधाय तापसीनां हस्ते दत्त्वा ॥ २४ ॥

इति श्रीगो०श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

१] ति० टी०–अथ लक्ष्मणस्य सुमन्त्रेणाश्वासनम्—दृष्ट्वा त्विति। उदङ्मुखे स्थित्वा वाल्मीकिकर्तृकसीताप्रवेशदर्शनम् ॥ १ ॥

रा० टी०–लक्ष्मणवृत्तमाह–दृष्ट्वेत्यादिभिः। आश्रमे संप्रवेशितां वाल्मीकिनेति शेषः मैथिलीं दृष्ट्वा दीनचेतनो लक्ष्मणः संतापमगमत् एतेन तावत्कालं लक्ष्मणो दूरतः पश्यन्नतिष्ठदिति सूचितम् ॥ १ ॥

गो० टी०–दृष्ट्वा त्वित्यादि ॥ १ ॥

२] ति० टी०–मन्त्रसारथिं मन्त्रसहायभूतं सारथिम्। सीतासंतापजं सीतावियोगजसंतापजम् ॥ २ ॥

रा० टी०–अब्रवीदिति। मन्त्रसारथिं मन्त्रित्वसमानाधिकरणसारथित्वविशिष्टं सुमन्त्रं महातेजा लक्ष्मणोऽब्रवीत् तदा-

१ प्रणिधायेति गो० पाठः।

ततो दुःखतरं किं नु राघवस्य भविष्यति । पत्नीं शुद्धसमाचारां विसृज्य जनकात्मजाम् ॥ ३ ॥
व्यक्तं दैवादहं मन्ये राघवस्य विनाभवम् । वैदेह्या सारथे नित्यं दैवं हि दुरतिक्रमम् ॥ ४ ॥
यो हि देवान्सगन्धर्वानसुरान्सह राक्षसैः । निहन्याद्राघवः क्रुद्धः स दैवं पर्युपासते ॥ ५ ॥
पुरा रामः पितुर्वाक्याद्दण्डके विजने वने । उषित्वा नव वर्षाणि पञ्च चैव महावने ॥ ६ ॥
ततो दुःखतरं भूयः सीताया विप्रवासनम् । पौराणां वचनं श्रुत्वा नृशंसं प्रतिभाति मे ॥ ७ ॥
को नु धर्माश्रयः सूत कर्मण्यस्मिन्यशोहरे । मैथिलीं समनुप्राप्तः पौरैर्हीनार्थवादिभिः ॥ ८ ॥
एता वाचो बहुविधाः श्रुत्वा लक्ष्मणभाषिताः । सुमन्त्रः श्रद्धया प्राज्ञो वाक्यमेतदुवाच ह ॥ ९ ॥
न संतापस्त्वया कार्यः सौमित्रे मैथिलीं प्रति । दृष्टमेतत्पुरा विप्रैः पितुस्ते लक्ष्मणाग्रतः ॥ १० ॥

कारमाह सीतासंतापजं वियोगजनितसीतासंतापस्मृतिजनितं रामस्य दुःखं त्वं पश्य ॥ २ ॥

गो० टी०-अब्रवीदिति । मन्त्रसहायभूतः सारथिर्मन्त्रसारथिः । सीतासंतापजं सीताविरहसंतापजमित्यर्थः ॥२॥३॥

३] ति० टी०-पत्नीं विसृज्य यत्स्थितः । ततो विसृज्य स्थितेः ॥ ३ ॥

रा० टी०-तत इति । ततः संतापजनितदुःखादुःखतरमधिकदुःखं पत्नीं विसृज्य विद्यमानस्य राघवस्य किंतु भविष्यति न किमपीत्यर्थः ॥ ३ ॥

४] ति० टी०-वैदेह्या विनाभवं वैदेहीवियोगेनावस्थानं दैवात्प्राचीनदुरदृष्टवशादहं मन्ये । यतो दैवं दुरतिक्रमम् ॥४॥

रा० टी०-व्यक्तमिति । दैवात् अदृष्टात् विनापि वैदेह्या सह रामस्य आभवं चिन्ताजनकं दुरतिक्रमं दैवं कस्यचिददृष्टमहं मन्ये कस्यचिददृष्टवशादेव एवं वियोगो जात इति तात्पर्यम् ॥ ४ ॥

गो० टी०-व्यक्तमिति । विनाभवं सीतावियोगेनावस्थानं वैदेह्या सार्धं विनाभवमित्यर्थः । दैवात्प्राग्भवाददृष्टादित्यर्थः ॥ ४ ॥

५] ति० टी०-दैवं पर्युपासते दैवमनुवर्तते । न तु तन्निरसितुं शक्नोतीत्यर्थः ॥ ५ ॥

रा० टी०-देवस्य दुरतिक्रमत्वे हेतुं वदन्नाह—य इत्यादिभिः । स राघवोपि दैवं पर्युपासते एतेन राघवस्य सर्वमर्यादापालकत्वं सूचितम् ॥ ५ ॥

गो० टी०-य इति । दैवमनुवर्तते न तु तन्निरसितुं शक्नोतीत्यर्थः ॥ ५ ॥ ६ ॥

६] ति० टी०-यत्पुरा दण्डके उषित्वा दुःखमन्वभूत्तत्पितृवाक्यगौरवादुचितमिति शेषः ॥ ६ ॥

रा० टी०-पुरेति । रामः नव पञ्च च वर्षाणि दुःखं प्राप्नोदिति शेषः ॥ ६ ॥

७] ति० टी०-इदं त्वपरिपाल्यवचसां पौराणां वचनं श्रुत्वा परिमितकालत्वादुःखतरं सीताविप्रवासनं यत्कृतवांस्तन्नृशंसं क्रूरकल्पमिति भाति ॥ ७ ॥

रा० टी०-तत इति । सीतायाः वचनमुच्यमानं भूयो बहुकालकं सीताया विप्रवासनं ततः वनवासदुःखाद्भूयो दुःखतरमत एव नृशंसमतिक्रूरं मे प्रतिभाति ॥ ७ ॥

गो० टी०-तत इति । ततः सीतायाः विप्रवासनं नृशंसं क्रूरकृत्यमिति प्रतिभाति ॥ ७ ॥

८-९] ति० टी०-को न्विति । हीनार्थवादिभिर्न्यायहीनार्थवादिभिः । पौरैर्हेतुभिर्मैथिलीं प्रति यशोहरे साध्वीं वने विसृष्टवानित्ययशस्करेऽस्मिन्कर्मणि सीतापरित्यागकर्मण्यनुष्ठिते सति को नु धर्माश्रयो धर्मपरिग्रहः संप्राप्तो रामेण । धर्माणां सत्स्त्रीमूलत्वात् । तत्त्यागे सर्वोऽपि धर्मो नाशित एवेत्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०-क इति । हीनार्थवादिभिः यशोहरेस्मिन्मैथिलीत्यागरूपे कर्मणि वियमानः एतत्कर्मकर्तेत्यर्थः अत एव अर्थेन निखिलार्थसाधकसीतया हीनोयं लक्ष्मण इति वादिभिः पौरैस्समनुप्राप्तोहं मैथिलीं प्रति मैथिलीत्यागवृत्तान्तप्रभे इत्यर्थः को धर्माश्रयः किं वक्ष्यामीत्यर्थः ॥ ८ ॥

रा० टी०-एता इति । सुमन्त्रः एतद्वाक्यमुवाच ॥ ९ ॥

गो० टी०-को न्विति । हीनार्थवादिभिः पौरैर्हेतुभिः । मैथिलीं प्रति यशोहरे साध्वीं वने विसृष्टवानिति अपयशस्करेऽस्मिन् कर्मणि सीतापरित्यागरूपकर्मण्यनुष्ठिते सति कोनु धर्माश्रयः धर्मपरिग्रहः रामेण संप्राप्तः । प्रत्युत साध्वीत्यागादधर्म एव स्यादिति भावः ॥ ८ ॥ ९ ॥

१०] ति० टी०-दृष्टमिति । पुरा पूर्वस्मिन्काले । तव पितुरग्रत एतत्सीताविप्रवासनादि वक्ष्यमाणं विप्रैर्दृष्टमेव । दृष्टेत्यर्थः ॥ १० ॥

रा० टी०-तदाकारमाह-नेति । ते पितुरग्रतः अग्रे पुरा पूर्वमेतद्वनगमनादि विप्रैर्दृष्टं बोधितम् अतस्त्वया संतापो न कार्यः ॥ १० ॥

गो० टी०-नेति । दृष्टमिति । हे लक्ष्मण ! पुरा तव पितुरग्रतः अल्पभाग्यवान् रामः दुःखप्रायो भविष्यतीत्येतद्दृष्टं दृष्ट्वा मह्यमुक्तमित्यर्थः । फलितमाह—प्राप्स्यत इति ॥१०-१२॥

१ अनुवर्तत इति गो. पाठः । २ प्रतिसमिति गो. पाठः

भविष्यति दृढं रामो दुःखप्रायो विसौख्यभाक् । प्राप्स्यते च महाबाहुर्विप्रयोगं प्रियैर्द्वयम् ॥ ११ ॥
त्वां चैव मैथिलीं चैव शत्रुघ्नभरतौ तथा । सत्यजिष्यति धर्मात्मा कालेन महता महान् ॥ १२ ॥
इदं त्वयि न वक्तव्यं सौमित्रे भरतेऽपि वा । राज्ञा वो व्याहृतं वाक्यं दुर्वासा यदुवाच ह ॥ १३ ॥
महाजनसमीपे च मम चैव नरर्षभ । ऋषिणा व्याहृतं वाक्यं वसिष्ठस्य च संनिधौ ॥ १४ ॥
ऋषेस्तु वचनं श्रुत्वा मामाह पुरुषर्षभः । मृतं न क्वचिदेवं ते वक्तव्यं जनसंनिधौ ॥ १५ ॥
तस्याहं लोकपालस्य वाक्यं तत्सुसमाहितः । नैव जात्वनृतं कुर्यामिति मे सौम्य दर्शनम् ॥ १६ ॥
सर्वथैव न वक्तव्यं मया सौम्य तवाग्रतः । यदि ते श्रवणे श्रद्धा श्रूयतां रघुनन्दन ॥ १७ ॥
यद्यप्यहं नरेन्द्रेण रहस्यं श्रावितं पुरा । तथाप्युदाहरिष्यामि दैवं हि दुरतिक्रमम् ॥ १८ ॥
येनेदमीदृशं प्राप्तं दुःखं शोकसमन्वितम् । न त्वया भरतस्याग्रे शत्रुघ्नस्यापि संनिधौ ॥ १९ ॥

११] ति० टी०–तदेवाह—भविष्यतीति । इदं ध्रुवं दुःखप्रायो दुःखबहुलः । अतो विसौख्यभाक्सौख्यवियोगभाक्च भविष्यतीति दृढमित्यन्वयः । यदेवमतः—प्राप्स्यते चेत्यादि ११

रा० टी०–विप्रवचनाकारमाह–भविष्यतीति । विसौख्यभाक् विशेषसुखभोक्तापि रामः प्रियैः विप्रयोगं प्राप्स्यते अत एव रामोपि दुःखप्रायः दुःखिसदृशः भविष्यति इदं निश्चितमेतत् ॥ ११ ॥

१२] ति० टी०–प्रियैर्वियोगमित्येतदेव विवृणोति–त्वां चेति । दुर्वासःसंभाषणनिमित्तके निर्याणकाले लक्ष्मणत्यागः । शत्रुघ्नभरतयोस्तु मधुराराज्यगन्धर्वराज्ययोः करणाय प्रतिष्ठापनमेव त्यागः ॥ १२ ॥

रा० टी०–वियोगाकारमाह—त्वामिति । रामः स्वदादीन् त्यजिष्यति त्यक्ष्यति ॥ १२ ॥

१३] ति० टी०–राज्ञा दशरथेन वो युष्मान्प्रति व्याहृतमेषां कथमग्रे भावीत्येवं प्रश्नवाक्यं श्रुत्वा यदुर्वासा उवाच तदिदं त्वयि त्वया सौमित्रे शत्रुघ्ने भरते च न वाच्यम् ॥ १३ ॥

रा० टी०–इदमिति । दुर्वासा यदुवाच राज्ञा दशरथेन च व्याहृतमस्माकमग्रे कथितं तदिदं मयोक्तं भरते भरतसन्निधौ त्वयि त्वया नैव वक्तव्यम् भरते न वक्तव्यमित्यनेन भरतोद्देश्यक एव वक्ष्यमाणः शाप इति सूचितं तेन तज्ज्ञाने भरतस्य दुःखाल्पत्वं भविष्यतीति सूचितं वश्चार्थे उशब्द एवार्थे ॥ १३ ॥

गो० टी०–इदमिति । इदं रहस्यं त्वयि भरते वा न वक्तव्यम् । इदं शब्दार्थमाह–राज्ञेति । राज्ञा दशरथेन । वः तदिदं त्वयि भरतेऽपि न वक्तव्यमित्यर्थः ॥ १३ ॥

१४] ति० टी०–दुर्वासोवाक्यं त्वया कथमवगतं तत्राह–महाजनेति । महान्तो जना यस्य दशरथस्य तस्य मम च संनिधौ । राजसमीपस्थितं मामनुत्थाप्यैव वसिष्ठसंनिधौ च ऋषिणोक्तम् । एवं त्रयाणामग्र एतदुक्तमिति त्रय एतत्परिज्ञा इत्युक्तम् ॥ १४ ॥

रा० टी०–ननु कस्मिन्समये दुर्वाससोक्तमित्यत आह—महाजनेति । महाजनसमीपादौ ऋषिणा वाक्यं व्याहृतम् १४

गो० टी०–दुर्वाससो वचनं कथं त्वयावगतमित्यत्राह—महाजनेति । महाजनसमीपे दशरथसमीप इत्यर्थः । मम वसिष्ठस्य च सन्निधौ । ऋषिणा दुर्वाससा वाक्यं व्याहृतम् । त्रिभिरेवेदं दृत्तं ज्ञातमिति भावः ॥ १४ ॥

१५] ति० टी०–ऋषेर्दुर्वाससः पुरुषर्षभो दशरथः । एवं ते श्रुतमतिरहस्यं त्वया न क्वचिद्वक्तव्यमित्यर्थः ॥ १५ ॥

रा० टी०–ऋषेरिति । पुरुषर्षभो दशरथः एवमिदं वचनं जनसन्निधौ ते तव न वक्तव्यमिति मामाह ॥ १५ ॥

गो० टी०–ऋषेरिति । एवं ते त्वया श्रुतं रहस्यमित्यर्थः ॥ १५ ॥

१६] ति० टी०–तस्य लोकपालस्य दशरथस्य वाक्यं नानृतं कार्यमिति सुसमाहितः सावधानचित्तो भविष्यामीति मे दर्शनं संकल्पः ॥ १६ ॥

रा० टी०–तस्येति । लोकपालस्य तस्य दशरथस्य वाक्यमनृतं मिथ्या जातु कदाचिदपि न कुर्या इति मे दर्शनं निश्चयः अत एव तवाग्रतोपि मया सर्वथा अविचारेणापीत्यर्थः न वक्तव्यं यदि श्रवणे ते श्रद्धा तदा श्रूयतामेतेन अतिश्रद्धालुसन्निधौ वक्तव्यमेवेति राजाज्ञा सूचिता ॥ १६ ॥ १७ ॥

गो० टी०–तस्येति । समाहितं सम्यग्गुप्तम् तस्य वाक्यं मया जातु अनृतं न कार्यमिति मम दर्शनं मतम् । तस्मात् त्वयि भरते च न वक्तव्यमिति भावः ॥ १६ ॥

१७] ति० टी०–यदेवमतः—सर्वथेति । तवाग्रे न वक्तव्यम् । रहस्यश्रवणेऽत्युत्कटश्रद्धारहितस्येत्यर्थः । श्रद्धायां तु वक्ष्यामीत्याह–यदि ते इति । लक्ष्मणस्य परमाप्तत्वाद्राजपुत्रत्वाच्च जनसंनिधावेव नरेन्द्रेण प्रतिषेधाच्च दुःखितदुःखनिवारणाय रहस्यप्रकटनेऽपि न दोष इति सुमन्त्राशयः ॥ १७ ॥

गो० टी०–सर्वथैवेति । न वक्तव्यमिति । राजरहस्यमिति शेषः । तवातिश्रद्धारहितस्य ॥ १७ ॥

१८–१९] ति० टी०–पुनस्तदेवाह–यद्यपीति । यद्यपि नरेन्द्रेण रहस्यमप्रकाश्यमित्युक्तं तथापि कथनयोग्ये काले

१ अपीति गो. पाठः । २ ध्रुवमिति गो. पाठः । ३ उभौ संत्यजिष्यतीति गो. पाठः । ४ कार्यमिति गो. पाठः । ५ श्रावितः इति गो. पाठः ६ भरते वाच्यमिति गो. पाठः ।

तच्छ्रुत्वा भाषितं तस्य गम्भीरार्थपदं महत् । तथ्यं ब्रूहीति सौमित्रिः सूतं [1]तं वाक्यमब्रवीत्॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ।

ऊर्मिलाजानिनानुयुक्तः सुमन्त्रो वसिष्ठाश्रमे दुर्वाससा कथितपूर्वं भृगोः शापमेव तवाग्रजस्य पत्नीवियोगहेतुं जानीहीति व्याजहार ।

तथा संचोदितः सूतो लक्ष्मणेन महात्मना । तद्वाक्यमृषिणा प्रोक्तं व्याहर्तुमुपचक्रमे ॥ १ ॥
पुरा नाम्ना हि दुर्वासा अत्रेः पुत्रो महामुनिः । वसिष्ठस्याश्रमे पुण्ये वार्षिक्यं समुवास ह ॥ २ ॥
तमाश्रमं महातेजाः पिता ते सुमहायशाः । पुरोहितं महात्मानं दिदृक्षुरगमत्स्वयम् ॥ ३ ॥
स दृष्ट्वा सूर्यसंकाशं ज्वलन्तमिव तेजसा । उपविष्टं वसिष्ठस्य सव्यपार्श्वे महामुनिम् ॥ ४ ॥
तौ मुनी तापसश्रेष्ठौ विनीतावभ्यवादयत् । स ताभ्यां पूजितो राजा स्वागतेनासनेन च ॥
पाद्येन फलमूलैश्च उवास मुनिभिः सह । ॥ ५ ॥

एकस्य निकटे उदाहरिष्यामि । एवं ज्ञात्वा दुःखं न कार्यमित्याह–दैवं हीति येन दैवेनेदृशं दुःखं प्राप्तं तदैवं दुरतिक्रममिति ज्ञात्वा शोकं त्यजेत्यर्थः । 'दैवं हि सुमहद्भूतम्', 'येनेदमीदृशं प्राप्यम्' इति च पाठे राज्ञाप्रकाश्यत्वोक्तौ हेतुः–दैवं हीत्यादि । येन दैवेन प्राचीनकर्मणा शोकसममीदृशं दुःखं त्वया प्राप्यं प्रापणीयं तदैवं हि यस्मात्सुमहद्भूतं केनापि दुःशकज्ञानम्, अतो राज्ञाप्रकाश्यमुक्तम् । यदि तु पूर्वं भवदादीनामग्रे उक्तं स्यात्तदास्यार्थस्यावश्यभावित्वज्ञानात्तवेदृशं दुःखं न स्यादिति कतकादयः । अतो न त्वया भरतादिसंनिधौ वाच्यमिति शेषः ॥ १८ ॥ १९ ॥

रा० टी०–यद्यपीति । यद्यपि नरेन्द्रेण अहं रहस्यं श्रावितं तथापि येन शोकसमन्वितमीदृशं दुःखं प्राप्तं तं दुरतिक्रमं दैवं परमात्मेच्छामुदाहरिष्यामि सार्द्धश्लोक एकान्वयी।१८

गो० टी०–यद्यपीति । तथाप्यप्रकाश्यस्यापि प्रकाशने हेतुमाह—दैवं हि दुरतिक्रममिति । हि यस्मादैवं प्राचीनं कर्म दुरतिक्रमं तस्मादित्यर्थः ॥ १८ ॥

रा० टी०–नेति । भरतस्याग्रे शत्रुघ्नस्य सन्निधावपि त्वया न वक्तव्यमिति शेषः शत्रुघ्नस्यापि इत्यनेन तज्ज्ञाने भरतोवश्यं ज्ञास्यतीति सूचितं तेन तयोः परा मैत्री व्यञ्जिता अर्द्धं पृथक् ॥ १९ ॥

गो० टी०–दुरतिक्रमे हेतुः—येनेदमिति । एवं भवदुःखातिशयदर्शनात् श्रद्दालवे तुभ्यं मया वक्तव्यमिति भावः॥१९॥

२०] ति० टी०–गम्भीरार्थपदं प्रागुक्तं सत्यं तथ्यं भाषितं श्रुत्वा सौमित्रिः शोकनिवृत्तये तद्ब्रूहि विस्तरेण ब्रूहीत्यब्रवीत् ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

रा० टी०–तदिति । गंभीरे व्यंग्यविशिष्टे अर्थपदे यस्मिंस्तत् तस्य सुमन्त्रस्य भाषितं श्रुत्वा सौमित्रिः तथ्यं ब्रूहीति सूतं वाक्यमब्रवीत् ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

गो० टी०–तदिति । गम्भीरार्थपदमिति । पूर्वोक्तं भाषितम् ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

१] ति० टी०–अथ तत्कथनम्–तथा संचोदित इति१

रा० टी०–सौमित्रिप्रभानन्तरकालिकं वृत्तमाह–तथेत्यादिभिः । सूतः ऋषिणा प्रोक्तं तद्वाक्यं व्याहर्तुं वक्तुमुपचक्रमे१

गो० टी०–तथेत्यादि ॥ १ ॥

२–३] ति० टी०–वार्षिक्यं वर्षासु भवं चातुर्मास्यनियममुद्दिश्योवास । यतीनां वर्षाकाले भ्रमणनिषेधाद्वार्षिकमासचतुष्टयमेकत्रैव स्थितवानित्यर्थः ॥ २ ॥ ३ ॥

रा० टी०–तद्वचनाकारमाह–पुरेत्यादिभिः । दुर्वासा वशिष्ठस्याश्रमे वार्षिक्यं वर्षासंबन्धि चतुरो मासान्समुवास॥२॥

रा० टी०–तमिति । पुरोहितं वशिष्ठं दिदृक्षुस्ते पिता तं वशिष्ठस्वामिकमाश्रमं स्वयमगमत् ॥ ३ ॥

गो० टी०–पुरेति । पुरा वार्षिक्यं वर्षासु भवं चातुर्मास्यनियममुद्दिश्योवास दुर्वासा हीति नाम्ना ॥ २–५ ॥

४–५] ति० टी०–महामुनिं दुर्वाससं दृष्ट्वा ॥ ४ ॥ ५ ॥

रा० टी०–स इति । स दशरथः वशिष्ठस्य सव्यपार्श्वे उपविष्टं महामुनिं दुर्वाससं दृष्ट्वा तौ वशिष्ठदुर्वाससौ मुनी अभ्यवादयत् सार्द्धश्लोक एकान्वयी ॥ ४ ॥

१ वाक्यमथेति गो. पाठः ।

तेषां तत्रोपविष्टानां तास्ताः सुमधुराः कथाः । बभूवुः परमर्षीणां मध्यादित्यगतेऽहनि ॥ ६ ॥
ततः कथायां कस्यांचित्प्राञ्जलिः प्रग्रहो नृपः । उवाच तं महात्मानमत्रेः पुत्रं तपोधनम् ॥ ७ ॥
भगवन्किंप्रमाणेन मम वंशो भविष्यति । किमायुश्च हि मे रामः पुत्राश्चान्ये किमायुषः ॥ ८ ॥
रामस्य च सुता ये स्युस्तेषामायुः कियद्भवेत् । काम्यया भगवन्ब्रूहि वंशस्यास्य गतिं मम ॥ ९ ॥
तच्छ्रुत्वा व्याहृतं वाक्यं राज्ञो दशरथस्य दुर्वासाः सुमहातेजा व्याहर्तुमुपचक्रमे ॥ १० ॥
शृणु राजन्पुरावृत्तं तदा देवासुरे युधि दैत्याः सुरैर्भर्त्स्यमाना भृगुपत्नीं समाश्रिताः ॥
तया दत्ताभयास्तत्र न्यवसन्नभयास्तदा ॥ ११ ॥
तया परिगृहीतांस्तान्दृष्ट्वा क्रुद्धः सुरेश्वरः चक्रेण शितधारेण भृगुपत्न्याः शिरोऽहरत् ॥ १२ ॥
ततस्तां निहतां दृष्ट्वा पत्नीं भृगुकुलोद्वहः शशाप सहसा क्रुद्धो विष्णुं रिपुकुलार्दनम् ॥ १३ ॥
यस्मादवध्यां मे पत्नीमवधीः क्रोधमूर्च्छितः तस्मात्त्वं मानुषे लोके जनिष्यसि जनार्दन ॥ १४ ॥
तत्र पत्नीवियोगं त्वं प्राप्स्यसे बहुवार्षिकम् शापाभिहतचेतास्तुं स्वात्मना भावितोऽभवत् ॥१५॥

रा० टी०–स इति । ताभ्यां मुनिभ्यां पूजितस्स राजा मुनिभिस्सह उवास ॥ ५ ॥

६] ति० टी०–मध्यादित्यगते मध्यगतादित्ये ॥ ६ ॥

रा० टी०–तेषामिति । मध्ये समत्वेन प्रतीयमानाकाशे आदित्यो यस्मिन् तदेव गतं प्राप्तं तस्मिन्नहनि अह्नोमध्यभागे मध्याह्ने इत्यर्थः परमऋषीणां तास्ताः प्रसिद्धाः सुमधुराः कथाः बभूवुः ॥ ६ ॥

गो० टी०–तेषामिति । मध्यादित्यगते मध्यगतादित्ययुक्त इत्यर्थः । मध्याह्न इति फलितार्थः ॥ ६ ॥

७] ति० टी०–प्रग्रह ऊर्ध्वबाहुः ॥ ७ ॥

रा० टी०–तत इति । प्रकृष्टः ग्रहो ज्ञानं यस्य स नृपो दशरथः प्रांजलिस्सन् कस्यां चित्कथायां सत्यां तं दुर्वाससमुवाच ॥ ७ ॥

गो० टी०–तत इति । प्रग्रहः सविनय इत्यर्थः ॥ ७ ॥

८–१०] ति० टी०–किंप्रमाणेन मत्पुत्रपर्यन्तं ततोऽप्यधिकं वा ॥ ८–१० ॥

रा० टी०–तदाकारमाह–भगवन्निति द्वाभ्याम् । किंप्रमाणेन कियत्कालपर्यन्तमित्यर्थः मम वंशो भविष्यति ॥ ८॥

रा० टी०–रामस्येति । मम काम्यया इच्छया मम वंशस्य गतिं ब्रूहि ॥ ९ ॥

रा० टी०–तदिति । दुर्वासा व्याहर्तुं वक्तुमुपचक्रमे॥१०॥

गो० टी०–भगवन्निति । किंप्रमाणेन उत ततोऽप्यधिकप्रमाणेनेत्यर्थः । किमायुश्च मे राम इति ॥ ८–१० ॥

११–१३] ति० टी०–एवं रामस्य शापवशाद्दुःखोपेतं चिरायुष्यं वक्तुं पीठिकामाह–शृणु राजन्निति । पुरा पूर्वस्मिन्काले । भृगुपत्नीं स्वपुरोहितमातरम् ॥ ११–१३ ॥

रा० टी०–तद्वचनाकारमाह–शृण्वित्यादिभिः । पुरावृत्तं पौर्वकालिकवृत्तांतं शृणु वृत्तान्तमेवाह तदा तात्कालिके देवासुरे युधि सुरैर्भर्त्स्यमाना दैत्याः भृगुपत्नीं समाश्रिता बभूवुरिति शेषः अत एव तया भृगुपत्न्या दत्तमभयं येभ्यः अत एव अभया दैत्याः तत्र भृगुपत्नीसन्निधौ न्यवसन् सार्धश्लोक एकान्वयी ॥ ११ ॥ १२ ॥

रा० टी०–तयेति । तया भृगुपत्न्या परिगृहीतांस्तान् दैत्यान्दृष्ट्वा क्रुद्धः सुरेश्वरो विष्णुः भृगुपत्न्याः शिरः चक्रेणाहरत् ॥ १३ ॥

रा० टी०–तत इति । भृगुकुलोद्वहः भृगुरित्यार्थः विष्णुं शशाप ॥ १४ ॥

गो० टी०–एवं पृष्टश्चिरायुष्टं दुःखोपेतं, शापवशादिति वक्तुं पीठिकामाह—शृणु राजन्नित्यादि ॥ ११–१४ ॥

१४] ति० टी०–अवध्यां स्त्रीत्वादृषिपत्नीत्वाच्च वधानर्हाम् ॥ १४ ॥

रा० टी०–शापाकारमाह—यस्मादिति । मानुषे लोके जनिष्यसि ॥ १५ ॥

गो० टी०–यस्मादिति । अवध्यां स्त्रीत्वादृषिपत्नीत्वाचेति भावः ॥ १५ ॥

१५] ति० टी०–शापाभिहतचेता धर्मपक्षाश्रयदेवानुग्रहाय प्रवृत्त ईश्वरः स्वोपास्यो मया त्वयभिमानेन शप्तः । ईश्वरत्वाद्यदि तं निरस्येत्तदा मिथ्यावचनत्वेन नरकप्राप्तिः स्यादिति पश्चात्तापपरीतचित्तः । स्वात्मनान्तर्यामिणा भावितः स्वशापस्वीकारार्थमीश्वरं प्रति तपश्चरणार्थं प्रेरित इत्यर्थः ॥ १५ ॥

रा० टी०–जनने दोषमाह–तत्रेति । पत्नी पत्नीमान् पत्नीसहित इत्यर्थः त्वं बहुवार्षिकं वियोगं प्रियवियुक्तिं भवान् प्राप्स्यते पत्नीत्यत्र व्रीह्यादित्वादिनिः किं च ग्रहणरूपधात्वर्थविहितणिच्प्रकृतिकघञन्तप्रकृतिकतद्धितान्तप्रकृतिकप्रथमान्तः पत्नीति अत एव प्रियैर्द्रुतमिति पूर्वेण न विरोधः तु अनन्तरम्

१ चेति गो. पाठः । २ स इति गो. पाठः ।

अर्चयामास तं देवं भृगुः शापेन पीडितः । तपसाराधितो देवो ह्यब्रवीद्भक्तवत्सलः ॥ १६ ॥
लोकानां संप्रियार्थं तु तं शापं गृह्यमुक्तवान् । इति शप्तो महातेजा भृगुणा पूर्वजन्मनि ॥ १७ ॥
इहागतो हि पुत्रत्वं तव पार्थिवसत्तम । राम इत्यभिविख्यातस्त्रिषु लोकेषु मानद ॥ १८ ॥
तत्फलं प्राप्स्यते चापि भृगुशापकृतं महत् । अयोध्यायाः पतीरामो दीर्घकालं भविष्यति॥१९॥
सुखिनश्च समृद्धाश्च भविष्यन्त्यस्य येऽनुगाः । दशवर्षसहस्राणि दशवर्षशतानि च ॥ २० ॥
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति । समृद्धैश्चाश्वमेधैश्च इष्ट्वा परमदुर्जयः ॥ २१ ॥
राजवंशांश्च बहुशो बहून्संस्थापयिष्यति । द्वौ पुत्रौ तु भविष्येते सीतायां राघवस्य तु ॥ २२ ॥
स सर्वमखिलं राज्ञो वंशस्याह गतागतम् । आख्याय सुमहातेजास्तूष्णीमासीन्महामुनिः॥२३॥
तूष्णींभूते तदा तस्मिन्राजा दशरथो मुनौ । अभिवाद्य महात्मानौ पुनरायात्पुरोत्तमम् ॥ २४ ॥

शापेन शापदानहेतुकतपश्च्युत्या अभिहतं चेतो यस्य स भृगुः स्वात्मना स्वमनसा भाषितः चिन्तान्वितः अभवत्॥१६॥

गो० टी०–तत्रेति । बहुवार्षिकं कालमित्यर्थः ॥ १६ ॥

१६] ति० टी०–शापेन शापस्य मोघत्वभयेन पीडितो भृगुस्तं देवमर्चयामास ॥ १६ ॥

रा० टा०–अर्चयामासेति । शापेन तदानेन पीडितो भृगुः देवं विष्णुमर्चयामास देवस्तु अब्रवीत् ॥ १७ ॥

गो० टी०–शापेति । शापाभिहतचेताः पश्चात्तापपरीतचित्त इत्यर्थः । स्वात्मना भावितो भगवच्छापनिवृत्त्यर्थं स्वस्वरूपमचिन्तयदित्यर्थः । पुनः शापेन शापमोघभयेन पीडितः सन् भृगुस्तं देवमर्चयामास ॥ १७ ॥ १८ ॥

१७] ति० टी०–किमब्रवीत्तदाह–लोकानामिति । लोकानां भूरादीनाम् । संप्रियार्थं सम्यग्रावणवधादिरूपप्रियसंपादनार्थम् । तं शापं मनुष्यत्वादिप्रापकं गृह्यमङ्गीकार्यमेव स्वस्योक्तवान् । इति शप्त उक्तप्रकारेण शप्तः पूर्वजन्मनि कश्यपपुत्ररूपोपेन्द्रावतारे । अत्र पूर्वजन्मनि भृगुणा शप्त इत्युक्त्वा तद्वंश्यर्षिशापो भावी, अत्रापि शरीरे भगवतः सूचितः । स पाद्मे दर्शितः—' आह्य लक्ष्मणं प्राह रामो राजीवलोचनः । शृणु मे वचनं गुह्यं सीतात्यागकारणम् ॥ वाल्मीकिनाथ भृगुणा शप्तोऽस्मि किल लक्ष्मण । तस्मादेनां त्यजाम्यद्य जनो नैवात्र कारणम् ॥' इति । वाल्मीकेरपि प्राचेतसत्वाद्भृगुवंश्यत्वेन भृगुत्वमस्तीति वदन्ति । एतच्च निरूपितं बालकाण्डे विस्तरेणास्माभिर्ग्रन्थोपक्रमे ' मा निषाद ' इति श्लोके ॥१७॥

१८] ति० टी०–तच्छापवशादेव स्वेच्छया तव पुत्रत्वभागतः ॥ १८ ॥

१९–२०] ति० टी०–तत्फलं पत्नीवियोगेन चिरवासलक्षणं प्राप्स्यते ॥ १९ ॥ २० ॥

रा० टी०–तद्वचनाकारमाह–लोकानामिति । लोकानां रावणादिभ्यो भीतजनानां संप्रियार्थं तं भवदुक्तशापं गृह्यं मया ग्राह्यमेवावेहीति शेषः इति वचनं पूर्वजन्मनि जन्मनः पूर्वसमये भृगुणा शप्तो विष्णुरुक्तवान् इति हेतोः त्रिषु लोकेषु अभिविख्यातो विष्णुः भरत इत्यर्थः रामे रामजन्मसन्निधौ तव पुत्रत्वमिहायोध्यायां गतः प्राप्तः तत्र प्रमाणं वैकुंठेशस्तु भरतः क्षीराब्धीशस्तु लक्ष्मणः शत्रुघ्नस्तु स्वयं भूमा रामसेवार्थमागता इत्यादि अत एव भृगुशापकृतं महत्फलं प्राप्स्यते रामस्तु दीर्घकालं बहुकालपर्यंतमयोध्याधिपतिः प्रकटाऽयोध्यापालको भविष्यति एतेन भरतोद्देश्यकभृगुशापहेतुकभरतदुःखभोगार्थमपि रामस्य दण्डकारण्यविवासनं सीतात्यागश्चेति सूचितं श्लोकत्रयमेकान्वयि ॥ १८–२० ॥

गो० टी०–तपसेति । तं शापं मनुष्यजन्मादिप्रापकं लोकानां संहितार्थं सम्यग्रावणवधरूपहितसंपादनार्थम् । ग्राह्यं परिग्राह्यमेवेत्युक्तवान् ॥ १९ ॥

गो० टी०–इतीति । पूर्वजन्मनि काश्यपात् विष्णुसंज्ञकोपेन्द्रावतारे ॥ २० ॥

रा० टी०–सुखिन इति । अस्य रामस्य येऽनुगास्ते सुखिनो भविष्यन्ति अर्द्धं पृथक् दशेति ब्रह्मलोकं साकेतं गमिष्यति ॥ २१ ॥

गो० टी०–राम इति । तत्फलं पत्नीवियोगेन । तत्कालवासरूपम् ॥ २१–२५ ॥

२१] ति० टी०–ब्रह्मलोकं हिरण्यगर्भस्य लोकं वैकुण्ठम् । तस्यापि हिरण्यगर्भलोकैकदेशत्वमिति भावः ॥ २१ ॥

२२] ति० टी०–बहून्राजवंशान् । लक्ष्मणादिपुत्रद्वारेति भावः । एतेन रामपुत्राणामपि चिरजीवित्वमुक्तप्रायमेव॥२२॥

रा० टी०–समृद्धैरिति । परमदुर्जयो रामः अश्वमेधैरिष्ट्वा बहून्राजवंशान्स्थापयिष्यति राघवस्य तु सीतायां द्वौ पुत्रौ भविष्येते सार्द्धश्लोक एकान्वयी ॥ २२–२३ ॥

२३–२४] ति० टी०–स दुर्वासाः ॥ २३ ॥ २४ ॥

रा० टी०–स इति । स दुर्वासा सर्वं कृत्स्नं राज्ञो वंशस्य गतागतमखिलं च्युतिरहितं यथा भवति तथा आह आख्याय तूष्णीमासीच्च ॥ २४ ॥

रा० टी०–तूष्णीमिति । तस्मिन् दुर्वाससि तूष्णींभूते सति पुरोत्तममयोध्यां पुनरायात् ॥ २५ ॥

१ ग्राह्यमिति गो. पाठः ।

एतद्वचो मया तत्र मुनिना व्याहृतं पुरा । श्रुतं हृदि च निक्षिप्तं नान्यथा तद्भविष्यति ॥ २५ ॥
सीतायाश्च ततः पुत्रावभिषेक्ष्यति राघवः । अन्यत्र न त्वयोध्यायां मुनेस्तु वचनं यथा ॥ २६ ॥
एवं गते न संतापं कर्तुमर्हसि राघव । सीतार्थे राघवार्थे वा दृढो भव नरोत्तम ॥ २७ ॥
श्रुत्वा तु व्याहृतं वाक्यं सूतस्य परमाद्भुतम् । प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत् ॥ २८ ॥
ततः संवदतोरेवं सूतलक्ष्मणयोः पथि । अस्तमर्के गते वासं केशिन्यां तावथोषतुः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ।

इन्द्रजिदरिस्तु प्रविश्यायोध्यां प्रणम्याग्रजं भो देवानुष्ठित आर्यादेशो दैवस्य दुरतिक्रमत्वाच्छोके माकृथाश्चेत इत्यायुपादिशत्तेन स्वरहन्ता परां निर्वृतिमलभत ।

तत्र तां रजनीमुष्य केशिन्यां रघुनन्दनः । प्रभाते पुनरुत्थाय लक्ष्मणः प्रययौ तदा ॥ १ ॥
ततोऽर्धदिवसे प्राप्ते प्रविवेश महारथः । अयोध्यां रत्नसंपूर्णां हृष्टपुष्टजनावृताम् ॥ २ ॥
सौमित्रिस्तु परं दैन्यं जगाम सुमहामतिः । रामपादौ समासाद्य वक्ष्यामि किमहं गतः ॥ ३ ॥
तस्यैवं चिन्तयानस्य भवनं शशिसंनिभम् । रामस्य परमोदारं पुरस्तात्समदृश्यत ॥ ४ ॥
राज्ञस्तु भवनद्वारि सोऽवतीर्य नरोत्तमः । अवाङ्मुखो दीनमनाः प्रविवेशानिवारितः ॥ ५ ॥
स दृष्ट्वा राघवं दीनमासीनं परमासने । नेत्राभ्यामश्रुपूर्णाभ्यां ददर्शाग्रजमग्रतः ॥ ६ ॥
जग्राह चरणौ तस्य लक्ष्मणो दीनचेतनः । उवाच दीनया वाचा प्राञ्जलिः सुसमाहितः ॥ ७ ॥
आर्यस्याज्ञां पुरस्कृत्य विसृज्य जनकात्मजाम् । गङ्गातीरे यथोद्दिष्टे वाल्मीकेराश्रमे शुभे ॥ ८ ॥

२५–२९] ति० टी०–नान्यथा भविष्यति । सत्यमेव भविष्यतीत्यर्थः ॥ २५–२९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

रा० टी०–एतदिति । मया श्रुतं मुनिना व्याहृतमेतद्वचः मया हृदि निक्षिप्तं तन्मुनिवचोऽन्यथा न भविष्यति॥२६॥

रा० टी०–सीताया इति । राघवः यथा मुनिवचनं तथैव पुत्रावन्यत्राभिषेक्ष्यति न त्वयोध्यायाम् ॥ २७ ॥

रा० टी०–एवमिति । राघव हे लक्ष्मण ! एवं गते ज्ञाते सति संतापं कर्तुं नार्हसि अतो दृढो भव ॥ २८ ॥

रा० टी०–श्रुत्वेति । अतुलं प्रहर्षं लेभे लक्ष्मण इति शेषः प्रहर्षं लेभे इत्यनेन सीतारामयोः सर्वज्ञत्वात् एतज्ज्ञानस्याप्यावश्यकत्वेन तयोर्वास्तवः शोको नास्तीति सूचितम् तेन लक्ष्मणस्य तत्सुखसुखित्वं व्यञ्जितम् ॥ २९ ॥

रा० टी०–तत इति । तौ सूतलक्ष्मणौ केशिन्यां तदभिधनदीतीरे गोमतीसमीपे इत्यर्थः ऊषतुः ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

गो० टी०–सीताया इति । स सर्वमिति स दुर्वासा इत्यर्थः ॥ २६–३२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

१] ति० टी०–अथागतेन लक्ष्मणेन रामाश्वासनम्–तत्रेति । केशिनी काचिन्नदीति कतकः ॥ १ ॥

रा० टी०–शयनोत्थानानन्तरकालिकं वृत्तान्तमाह तत्रेत्यादिभिः । लक्ष्मणः प्रभाते उत्थाय पुनः प्रययौ ॥ १ ॥

गो० टी०–तत्रेत्यादि । तत्र पथीत्यर्थः ॥ १—५ ॥

२–५] ति० टी०–दिवसस्यार्धमर्धदिवसम् ॥ २–५ ॥

रा० टी०–तत इति । महारथो लक्ष्मणः अयोध्यां प्रविवेश ॥ सौमित्रिरिति । गतः अयोध्यां प्राप्तः सौमित्रिः रामपादौ समासाद्य अहं किं वक्ष्यामीति परं दैन्यं जगाम ॥ तस्येति । तस्य लक्ष्मणस्य पुरस्तात् परमोदारम् अतिवृहत् रामस्य भवनम् समदृश्यत ॥ राज्ञ इति । नरोत्तमो लक्ष्मणः राज्ञो भवनद्वारि अवतीर्य प्रविवेश ॥ २–५ ॥

६–८] ति० टी०–अश्रुपूर्णाभ्यां नेत्राभ्यामुपलक्षितम् ॥ ६–८ ॥

१ इदं पद्यं "द्वौ पुत्रौ तु भविष्येते" इति द्वाविंशपद्योत्तरार्धपरतो गो. पुस्तके तत्रापि पूर्वोत्तरार्धयोर्व्यत्यासेन पाठश्च । २ रथोत्तमादिति गो. पाठः। ३ शुचाविति गो. पाठः ।

तत्र तां च शुभाचारामाश्रमान्ते यशस्विनीम् । पुनरप्यागतो वीरपादमूलमुपासितुम् ॥ ९ ॥
मा शुचः पुरुषव्याघ्र कालस्य गतिरीदृशी । त्वद्विधा नहि शोचन्ति बुद्धिमन्तो मनस्विनः ॥ १० ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ ११ ॥
तस्मात्पुत्रेषु दारेषु मित्रेषु च धनेषु च । नातिप्रसङ्गः कर्तव्यो विप्रयोगो हि तैर्ध्रुवम् ॥ १२ ॥
शक्तस्त्वमात्मनात्मानं विनेतुं मनसा मनः । लोकान्सर्वांश्च काकुत्स्थ किं पुनः शोकमात्मनः ॥ १३ ॥
नेदृशेषु विमुह्यन्ति त्वद्विधाः पुरुषर्षभाः । अपवादः स किल ते पुनरेष्यति राघव ॥ १४ ॥
यदर्थं मैथिली त्यक्ता अपवादभयान्नृप । सोऽपवादः पुरे राजन्भविष्यति न संशयः ॥ १५ ॥

रा० टी०–स इति । स लक्ष्मणः दृष्ट्वा किं वक्ष्यामीति संचिन्त्य दीनम् वियोगजनितदुःखहेतुकदैन्यविशिष्टम् अत एव अश्रुपूर्णाभ्यां नेत्राभ्यामुपलक्षितम् राघवम् अग्रतो ददर्श ॥ ६ ॥

रा० टी०–जग्राहेति । लक्ष्मणः तस्य रामस्य चरणौ जग्राह उवाच च ॥ ७ ॥

रा० टी०–तदाकारमाह—आर्यस्येति । आर्यस्य तव आज्ञां पुरस्कृत्य गृहीत्वा वाल्मीकेराश्रमे जनकात्मजां विसृज्य पादमूलम् तव चरणमुपासितुम् पुनरप्यागतोस्मीति शेषः । शुभाचाराम् ताम् सीताम् आश्रमान्ते आश्रममध्ये ते मुनयो निन्युरिति शेषः अदन्तोप्यन्तशब्दः मध्यवाचित्वेन प्रसिद्धः श्लोकद्वयमेकान्वयि ॥ ८–९ ॥

गो० टी०–स इति । नेत्राभ्यामश्रुपूर्णाभ्यामुपलक्षितमग्रजम् ॥ ६—८ ॥

९] ति० टी०–उपासितुम् । तवेति शेषः ॥ ९ ॥

गो० टी०–तत्रेति । पादमूलं तवेति शेषः ॥ ९—११ ॥

१०] ति० टी०–मा शुचः । सीताविरोगेनेति शेषः १०

रा० टी०–मेति । कालस्य तन्नियन्तुः गतिरिच्छा ईदृशी अघटितस्यापि प्रापिका अतः त्वद्विधा भवत्सदृशा बुद्धिमन्तो जनाः न शोचन्ति एतेन तव शोकः न सम्भवतीति व्यञ्जितम् अतः हे पुरुषव्याघ्र त्वं माशुचः ॥ १० ॥

११] ति० टी०–यया बुद्ध्या मनस्विनो न शोचन्ति तां बुद्धिमाह–सर्वे इति । निचया रावणादेरिव महत्तरैश्वर्याणि । अवश्यं क्षयान्तान्येव नाशान्तान्येव, समुच्छ्रया इन्द्रजिदादेरिव शौर्यवीर्यादिजनितौन्नत्यानि पतनान्तान्येव । संयोगा युवयोरिव विप्रयोगान्ताः, सर्वस्य जनिमतो जीवितं मरणान्तमेव ॥ ११ ॥

रा० टी०–परमात्मेच्छायाः कार्यमाह–सर्व इति । सर्वे निचयाः प्रकृतैश्वर्याणि क्षयान्ताः क्षयपर्यवसानकाः समुच्छ्रयाः वृद्धयः पतनान्ताः संयोगाः विप्रयोगान्ताः वियोगपर्यवसानका जीवितमुत्पत्तिः मरणान्तम् ॥ ११ ॥

१२] ति० टी०–यत एवं तस्मादेष्वतिप्रसङ्गोऽत्यासक्तिः १२

रा० टी०–तस्मादिति । पुत्रादिषु अतिप्रसंगः बहुस्नेहः न कर्तव्यः हि यतः तैः पुत्रादिभिः विप्रयोगः वियोगः ध्रुवम् सामान्ये नपुंसकम् ध्रुव इति पाठो वा एतेन अनेनैव विचारेण शोकाभावो भवतीति व्यञ्जितम् ॥ १२ ॥

गो० टी०–तस्मादिति । अतिप्रसङ्गः अत्यासक्तिः ॥ १२ ॥

१३] ति० टी०–निजस्वरूपपर्यालोचनयापि शोको न कार्य इत्याह–शक्त इति । विनेतुं शिक्षितुम् । निग्रहीतुम् । सांसारिकदुःखाद्धारयितुमित्यर्थः । आत्मनेत्यत्रान्तःकरणोपाधिर्जीवो भोक्तात्मा । आत्मानमन्तःकरणम् । मनसान्तःकरणेन । मनस्तद्वृत्तिविशेषरूपम् । अत्र मनःशब्दो भोगोपकरणेन्द्रियोपलक्षणम् । हे काकुत्स्थ ! सर्वलोकांश्च विनेतुमन्तर्यामिरूपेण शिक्षितुं समर्थस्त्वमात्मनः शोकं निवारयितुं समर्थ इति किं वक्तव्यमित्यर्थः ॥ १३ ॥

रा० टी०–शक्त इति । आत्मना बुद्ध्या मनसा च सहितमात्मानमीश्वरम् विनेतुं नियन्तुं त्वं शक्तः अत एव सर्वांल्लोकान् जनान् विनेतुं शक्तः अतः आत्मनः शोकम् विनेतुं दूरीकर्तुम् शक्तश्चेत्किंवक्तव्यम् अत एव त्वद्विधा भवत्सेवावन्तः ईदृशेषु वियोगादिषु न विमुह्यन्ति सार्द्धश्लोक एकान्वयी ॥ १३ ॥

गो० टी०–शक्तस्त्वमात्मनात्मानं विनेतुं मनसैव हीति । आत्मना स्वयमेव मनसैव करणेनात्मानं स्वात्मानं लोकांश्च विनेतुं शिक्षितुं शक्तः । सांसारिकदुःखाद्धारयितुमित्यर्थः ॥ १३ ॥

१४] ति० टी०–तदेवाह–नेदृशेष्विति । किंचैवं शोके क्रियमाणेऽज्ञप्रजानिबन्धनोऽनर्थ उभयतः पाशरज्जुरिव दुर्मोच इत्याह–अपवाद इति ॥ १४ ॥

रा० टी०–शोके दोषमाह—अपवाद इति । सः अयं न नित्यज्ञानवान् इत्यादिरपवादः ते तुभ्यम् पुनरेष्यति अर्द्धं पृथक् ॥ १४ ॥

गो० टी०–नेदृशेष्विति । अपवादः पुनरेष्यति प्रकारान्तरेणेति शेषः ॥ १४ ॥

१५] ति० टी०–हे नृप ! अपवादभयाद्धीतेन त्वया यदर्थं यदपवादनिवृत्तये सीता त्यक्ता सोऽपवादः हे राजन् ! परगृहोषितां स्त्रियं त्यक्त्वा सर्वदा तामेवानुशोचतीति प्रकारान्तरेण स भविष्यति नात्र संशयः । यत्तु कतकेनाद्यादिना शुद्धत्वेनोक्तां स्वयं दृष्टशुद्धिं गर्भिणीमपि रामः प्राकृतवद्विसृष्ट-

१ ध्रुव हीति गो. पाठः ।

स त्वं पुरुषशार्दूल धैर्येण सुसमाहितः । त्यजेमां दुर्बलां बुद्धिं संतापं मा कुरुष्व ह ॥ १६ ॥
एवमुक्तः स काकुत्स्थो लक्ष्मणेन महात्मना । उवाच परया प्रीत्या सौमित्रिं मित्रवत्सलः ॥ १७ ॥
एवमेतन्नरश्रेष्ठ यथा वदसि लक्ष्मण । परितोषश्च मे वीर मम कार्यानुशासने ॥ १८ ॥
निवृत्तिश्चागता सौम्य संतापश्च निराकृतः । भवद्वाक्यैः सुरुचिरैरनुनीतोऽस्मि लक्ष्मण ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ।

भो लक्ष्मण नितरां शोकसंविग्नोऽपि मधुराक्षरेणार्तिहारिणा तव सुवचसा पुनर्नवीकृतोऽस्म्यद्य चतुर्षु घस्रेषु[1] प्रेक्षितं राजकार्यमनुतिष्ठामि यत आलस्यपराहतो नृगनृपः कृकलासतां गतो ब्रह्मशापेनेति जानकीजानिरनुजं बभाण ।

लक्ष्मणस्य तु तद्वाक्यं निशम्य परमाद्भुतम् । सुप्रीतश्चाभवद्रामो वाक्यमेतदुवाच ह ॥ १ ॥
दुर्लभस्त्वीदृशो बन्धुरस्मिन्काले विशेषतः । यादृशस्त्वं महाबुद्धे[2]र्मम सौम्य मनोऽनुगः ॥ २ ॥
यच्च मे हृदये किंचिद्वर्तते शुभलक्षण । तन्निशामय च श्रुत्वा कुरुष्व वचनं मम ॥ ३ ॥

वानिति पुरे देवादिपुरेऽपवादो भविष्यतीति व्याख्यातम्, तत्तु शोकत्यागानुपपादकतयोपेक्षितम् ॥ १५ ॥

रा० टी०–**यदर्थमिति** । अपवादात् दुरुक्तेर्भयमतति तत्संबोधनम् * * यदर्थम् यत्प्रयोजनमुद्दिश्य मैथिली त्यक्ता स पुरोग्रे अपवादः अस्थिरो भविष्यति एतेन शोकस्य सर्वकार्यविध्वंसकत्वं ध्वनितम् ॥ १५ ॥

गो० टी०–तदेवोपपादयति—**यदर्थमिति** । हे नृप! परीवादभयाद्गीतेन त्वया यदर्थं यदपवादपरिहारार्थम् मैथिली त्यक्ता सोपवादः पुनः प्रकारान्तरेण भविष्यति । सीतामपवादात्यक्त्वा पुनः शोचति तस्मात्तस्यामतिमात्रोऽयं काम्बुकस्य रामस्यानुराग इति पुनरप्यपवादो भविष्यतीत्यर्थः ॥१५-१७॥

१६–१७] ति० टी०–यदेवमत इमां बुद्धिं शोकबुद्धिं त्यज ॥ १६ ॥ १७ ॥

रा० टी०–**स इति** । धैर्येण सुसमाहितस्त्वम् दुर्बलां बुद्धिं त्यज अत एव सन्तापं मा कुरुष्व ॥ १६ ॥

रा० टी०–**एवमिति** । काकुत्स्थो रामः सौमित्रिमुवाच तदाकारमाह—**एवमिति द्वाभ्याम्** । एतद्भवदुक्तम् एवमेव अतः त्वम् यथा यथावद्वदसि अत एव मम कार्यानुशासने मे परितोषः ॥ १७ ॥

१८–१९] ति० टी०–प्रजापालनाय मामेवं बोधयतीति लक्ष्मणाशयं ज्ञात्वा तदङ्गीकृत्योत्तरमाह–**एवमेतदिति श्लोकद्वयेन** । हे लक्ष्मण ! वीर सौम्य लक्ष्मणेत्यादरेण बहुशः संबोधनम् । राज्यपरिपालनं त्यक्त्वैवं शोकोऽपवाद इत्युक्तं त्वया । एतदेवमेव, सत्यमेव अतस्त्वद्वाक्यैरनुनीतोऽस्मि । अतो मम दुःखनिवृत्तिरागता जाता, संतापश्च मया निराकृतः । अत एव मम कार्यानुशासने प्रजारक्षणकार्यस्यानुष्ठाने मे मया परितोषः प्राप्त इति शेषः ॥ १८ ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

रा० टी०–**निवृत्तिरिति** । भवद्वाक्यैरनुनीतः शिक्षितोस्मि अत एव निवृत्तिरागता अत एव सन्तापो निराकृतः ॥ १८ ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्विपञ्चाशत्तमः सर्गः ॥ ५२ ॥

गो० टी०–**एवमिति** । कार्यानुशासने गङ्गातीरत्यागरूपे त्वत्कृते ॥ १८ ॥

गो० टी०–**निर्वृतिरिति** । निर्वृतिः सुखम् ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

१–३] ति० टी०–अथ रामेण लक्ष्मणोक्तस्यौचित्यप्रदर्शनाय प्रजारक्षणस्यावश्यकत्वबोधनं प्रजाकृत्यावेक्षणफलकप्रजाह्वानाय लक्ष्मणप्रेषणं च—**लक्ष्मणस्य त्विति** । परमाद्भुतं सर्वं क्षयान्ता इत्यादिवाक्यम् ॥ १–३ ॥

रा० टी०–लक्ष्मणं प्रति रामस्य वचनान्तरमाह–**लक्ष्मणस्येत्यादिभिः** । रामः सुप्रीतोऽभवत् एतद्वाक्यमुवाच च ॥१॥

रा० टी०–तद्वचनाकारमाह–**दुर्लभ इत्यादिभिः** । अस्मिन् विपत्त्याभाससम्पादके काले मम मनोऽनुगः यादृशस्त्वम् ईदृशः स्नेहवान् बन्धुः विशेषतो दुर्लभः ॥ २ ॥

रा० टी०–**यदीति** । यन्मम हृदये वर्त्तते तन्निशामय शृणु मम वचनं कुरुष्व च ॥ ३ ॥

१ घनामिति गो. पाठः । २ बुद्धे इति गो. पाठः ।

चत्वारो दिवसाः सौम्य कार्यं पौरजनस्य चै । अकुर्वाणस्य सौमित्रे तन्मे मर्माणि कृन्तति ॥ ४ ॥
आहूयन्तां प्रकृतयः पुरोधा मन्त्रिणस्तथा । कार्यार्थिनश्च पुरुषाः स्त्रियो वा पुरुषर्षभ ॥ ५ ॥
पौरकार्याणि यो राजा न करोति दिने दिने । संवृते नरके घोरे पतितो नात्र संशयः ॥ ६ ॥
श्रूयते हि पुरा राजा नृगो नाम महायशाः । बभूव पृथिवीपालो ब्रह्मण्यः सत्यवाक्शुचिः ॥ ७ ॥
स कदाचिद्गवां कोटीः सवत्साः स्वर्णभूषिताः । नृदेवो भूमिदेवेभ्यः पुष्करेषु ददौ नृपः ॥ ८ ॥
ततः सङ्गाद्गता धेनुः सवत्सा स्पर्शितानघ । ब्राह्मणस्याहिताग्नेस्तु दरिद्रस्योञ्छवर्तिनः ॥ ९ ॥
स नष्टां गां क्षुधार्तो वै अन्विषंस्तत्र तत्र ह । नापश्यत्सर्वराष्ट्रेषु संवत्सरगणान्बहून् ॥ १० ॥
ततः कनखलं गत्वा जीर्णवत्सां निरामयाम् । ददृशे तां स्विकां धेनुं ब्राह्मणस्य निवेशने ॥ ११ ॥
अथ तां नामधेयेन स्वकेनोवाच ब्राह्मणः । आगच्छ शबलेत्येवं सा तु शुश्राव गौः स्वरम् ॥ १२ ॥
तस्य तं स्वरमाज्ञाय क्षुधार्तस्य द्विजस्य वै । अन्वगात्पृष्ठतः सा गौर्गच्छन्तं पावकोपमम् ॥ १३ ॥
योऽपि पालयते विप्रः सोऽपि गामन्वगाद्रुतम् । गत्वा च तमृषिं चष्टे मम गौरिति सत्वरम् ॥ १४ ॥
स्पर्शिता राजर्सिहेन मम दत्ता नृगेण ह । तयोर्ब्राह्मणयोर्वादो महानासीद्विपश्चितोः ॥ १५ ॥

गो० टी०-लक्ष्मणस्येत्यादि ॥ १—४ ॥

४] ति० टी०-चत्वारो दिवसाः । गता इति शेषः । तत्प्रजाननुशासनम् ॥ ४ ॥

रा० टी०-तद्वचनाकारमाह-चत्वार इति । पौरजनस्य कार्यम् अकुर्वाणस्य मम चत्वारो दिवसा गता इति शेषः अतः तत् प्रजापालनाकरणं मे मर्माणि कृन्तति अतः प्रकृतिप्रभृतयः आहूयन्ताम् एतेन तत्तद्विज्ञापितं करिष्यामीति सूचितम् श्लोकद्वयमेकान्वयि ॥ ४–५ ॥

५ ति० टी०-स्त्रियो वा । कार्यार्थिन्य इति शेषः ॥ ५ ॥

गो० टी०-आहूयन्तामिति । स्त्रियश्चेति । कार्यार्थिन्य इत्यनुषज्यते ॥ ५ ॥

६] ति० टी०-संवृते वायुस्पर्शहीने । पतितः । भवेदिति शेषः ॥ ६ ॥

रा० टी०-प्रजापालनाकरणे दोषमाह-पौरेत्यादिभिः । स राजा संवृते सर्वतः पिहिते घोरे नरके पतितो भवतीति शेषः ॥ ६ ॥

गो० टी०-पौरेति । पतितः स्वकर्मणेति शेषः । स मृतो नरके घोरे पात्यते नात्र संशय इति च पाठः ॥ ६—८ ॥

७] ति० टी०-ब्रह्मण्यो ब्राह्मणभक्तः ॥ ७ ॥

रा० टी०-तत्र दृष्टान्तमाह—श्रूयते इत्यादिभिः । श्रूयते प्रजापालनाकर्तुः दुःखमिति शेषः श्रवणाकारमाह पुरा नाम ब्रह्मण्यो राजा बभूव ॥ ७ ॥

८] ति० टी०-पुष्करेषु पुष्करतीर्थेषु ॥ ८ ॥

रा० टी०-स इति । नृदेवो नृगः गवां कोटीर्भूमिदेवेभ्यः कदाचिद्ददौ ॥ ८ ॥

९] ति० टी०-सङ्गाद्राजदानार्थं नीयमानबहुगोसङ्गात् । स्पर्शिता ब्राह्मणाय दत्ता । 'बहुदोहिनी' इति पाठान्तरम् । आहिताग्नेर्दरिद्रस्येत्यनेनाग्निहोत्रहविरर्थमपि धेन्वन्तराभाव उक्तः उञ्छः क्षेत्रपतितान्नस्य कणश आदानम् ॥ ९ ॥

रा० टी०-तत इति । ततस्तदासंगात् स्पृश्यमाणगवान्तरसंसर्गात् गता प्राप्ता आहिताग्नेर्ब्राह्मणस्य सवत्सा धेनुः स्पर्शिता ब्राह्मणान्तरोद्देश्येन नृगेण संकल्पिता ॥ ९ ॥

गो० टी०-तत इति । सङ्गात् राज्ञा दत्तबहुगोसङ्गात् ॥ ९ ॥ १० ॥

१०] ति० टी०-स नष्टगुः ॥ १० ॥

रा० टी०-स इति । बहून् संवत्सरगणान्नष्टां गां तत्र तत्रान्विष्यन् स ब्राह्मणः नापश्यत् ॥ १० ॥

११] ति० टी०-जीर्णवत्साम् । संवत्सरगणान्बहूनित्युक्तेः ॥ ११ ॥

रा० टी०-तत इति । ततः कनखलं हरिद्वारांतर्गतक्षेत्रं गत्वा ब्राह्मणस्य निवेशने स्वकां धेनुं ददृशे ददर्श ॥११॥

गो० टी०-तत इति । कनखलं कनखलाख्यग्रामम् ॥ ११—१४ ॥

१२-१३] ति० टी०-स्वकेन स्वकृतेन ॥ १२-१३ ॥

रा० टी०-अथेति । ब्राह्मणः आगच्छ सबलेत्येवम् स्वकेन स्वकृतेन नामधेयेन तां धेनुमुवाच अथ अनंतरं सा गौः स्वरमाहिताग्नेराह्वानं शुश्राव ॥ १२ ॥

रा० टी०-तस्येति । क्षुधार्तस्य तस्याहिताग्नेः तं स्वनमाज्ञाय गौः पावकोपमम् गच्छन्तमाहिताग्निं पृष्ठतोऽन्वगात् १३

१४-१५] ति० टी०-योऽपि नृगतो लब्धदानस्तमृषिं गवानुगम्यमानमृषिम् । कतकतीर्थे तु—तमृषिं यस्य गेहे स्थिता तं त्वरन्तः कृतगवासेधो द्विजो नृगेण स्पर्शिता दत्तेत्याचष्टे इत्यनुकर्ष इति व्याचख्यतुः । मम तु भाति—गवानुगमनादन्वेष्टृब्राह्मणीयत्वं सिद्धम् । नृगतो मया लब्धेति

---

१ वै इति गो. पाठः । २ चेति गो. पाठः । ३ राज्येष्विति गो. पाठः ।

विवदन्तौ ततोऽन्योन्यं दातारमभिजग्मतुः । तौ राजभवनद्वारि न प्राप्तौ नृगशासनम् ॥ १६ ॥
अहोरात्राण्यनेकानि वसन्तौ क्रोधमीयतुः । ऊचतुश्च महात्मानौ तावुभौ द्विजसत्तमौ ॥
क्रुद्धौ परमसंप्राप्तौ वाक्यं घोराभिसंहितम् । ॥ १७ ॥
अर्थिनां कार्यसिद्ध्यर्थं यस्मात्त्वं नैषि दर्शनम् । अदृश्यः सर्वभूतानां कृकलासो भविष्यसि ॥ १८ ॥
बहुवर्षसहस्राणि बहुवर्षशतानि च । श्वभ्रे त्वं कृकलीभूतो दीर्घकालं निवत्स्यसि ॥ १९ ॥
उत्पत्स्यते हि लोकेऽस्मिन्यदूनां कीर्तिवर्धनः । वासुदेव इति ख्यातो विष्णुः पुरुषविग्रहः ॥ २० ॥
स ते मोक्षयिता शापाद्राजंस्तस्माद्भविष्यसि । कृता च तेन कालेन निष्कृतिस्ते भविष्यति ॥ २१ ॥
भारावतरणार्थं हि नरनारायणावुभौ । उत्पत्स्येते महावीर्यौ कलौ युग उपस्थिते ॥ २२ ॥
एवं तौ शापमुत्सृज्य ब्राह्मणौ विगतज्वरौ । तां गां हि दुर्बलां वृद्धां ददतुर्ब्राह्मणाय वै ॥ २३ ॥
एवं स राजा तं शापमुपभुङ्क्ते सुदारुणम् । कार्यार्थिनां विमर्दो हि राज्ञां दोषाय कल्पते ॥ २४ ॥

परेण सोऽभियुक्तोऽन्यगादित्यत्र कर्तुरेव गत्वेत्यत्र कर्तृत्वप्रतीतेरक्षरस्वारस्यसिद्धत्वं चेति ॥ १४–१६ ॥

रा० टी०–य इति । यः पाल्यते सोऽपि विप्रः गामन्वगात् गत्वा च मम गौरिति सत्वरम् चक्रे अकथयत् ॥१४॥

रा० टी०–ननु कथं तवेत्यत आह—स्पर्शितेति । नृगेण स्पर्शिता संकल्पिता मम मह्यं दत्ता च इति ब्राह्मणयोर्महान् वाद आसीत् ॥ १५ ॥

गो० टी०–स्पर्शितेति । स्पर्शिता दत्ता ॥ १५–१७ ॥

१६–१८] ति० टी०–नृगशासनं राजसविधे प्रवेशनियोगे ॥ १६–१८ ॥

रा० टी०–विवदन्ताविति । अन्योऽन्यं विवदन्तौ दातारं नृगमभिजग्मतुः राजभवनद्वारि स्थितौ तौ ब्राह्मणौ नृगस्य शासनं प्रवेशाय आज्ञां न प्राप्तौ ॥ १६ ॥

रा० टी०–अह इति । अनेकानि अहोरात्राणि निवसन्तौ द्विजसत्तमौ क्रोधमीयतुः क्रुद्धौ उभौ घोराभिसंहितं कठिनत्वेन मिश्रितं वाक्यमूचतुश्च ॥ १७ ॥

रा० टी०–तद्वाक्याकारमाह—अर्थिनामिति । यस्मात् दर्शनम् नैषि प्राप्नोषि तस्मात् सर्वभूतानामदृश्यः कृकलासः त्वं भविष्यसि ॥ १८ ॥

गो० टी०–अर्थिनामिति । कृकलासः सरटः॥१८–२०॥

१९] ति० टी०–कृकलीभूतः कृकलासीभूतः ॥ १९ ॥

रा० टी०–तदवधिं बोधयन्नाह—बह्वित्यादिभिश्चतुर्भिः । कृकली कृकलासीभूतस्त्वं बहुवर्षसहस्राणि श्वभ्रे महागर्ते दीर्घकालं महानुपदेशो यथा भवति तथा निवत्स्यसि १९

२०] ति० टी०–एवं शापं दत्त्वा समनुतप्तचित्तौ स्वयमेव शापावसानं चक्रतुरित्याह—उत्पत्स्यत इति । वासुदेवो वसुदेवापत्यम् । यद्वा सर्वभूतेषु वासाद्वासुः स चासौ देवः । पुरुषविग्रहः पुरुषशरीरसदृशशरीरः ॥ २० ॥

रा० टी०–शापमुक्त्वा तदनुग्रहमाह—उत्पत्स्यते इति । अस्मिन् लोके यदूनां कीर्तिवर्द्धनो विष्णुः उत्पत्स्यते ॥ २० ॥

२१] ति० टी०–स ते त्वां शापान्मोक्षयिता । हे राजन्! तस्माच्च त्वं भविष्यसि । कृकलास इति शेषः । तेन कालेन कृष्णावतारावधिकालेन । नात्रेतेन्यर्थः निष्कृतिः शापमोक्षः२१

रा० टी०–स इति । स वासुदेवः ते त्वां शापात् मोक्षयिता तस्माद्धेतोः त्वं भविष्यसि प्राप्स्यसि दिव्यरूपमिति शेषः ननु पापिनः कथं दिव्यरूपत्वमित्यत आह कृता पापभोगं कारयित्वा तेन कृष्णावतारावधिकेन कालेन ते निष्कृतिः प्रायश्चित्तं भविष्यति ॥ २१ ॥

गो० टी०–स इति । निष्कृतिः शापमोक्षः ॥ २१ ॥२२॥

२२] ति० टी०–तं कालमाह—भारेति । कलौ यत्किंचिच्चतुर्युगीस्थे कलावित्यर्थः ॥ २२ ॥

रा० टी०–कृष्णावतारप्रयोजनं बोधयन्नाह—भारेति कलौ युगे उपस्थिते समीपं प्राप्ते सति नरनारायणौ उत्पत्स्येते ॥ २२ ॥

२३] ति० टी०–ब्राह्मणाय । अन्यस्मा इति शेषः॥२३॥

रा० टी०–एवमिति । शापमुत्सृज्य विगतज्वरौ निवृत्तक्रोधवेगौ ब्राह्मणौ गां ब्राह्मणाय ददतुः ॥ २३ ॥

गो० टी०–एवमिति । ब्राह्मणाय कस्मैचित् अन्यस्मा इत्यर्थः ॥ २३ ॥ २४ ॥

२४] ति० टी०–नृगवच्छीघ्रं प्रजागुणदोषाविचारे राज्ञां दोष इत्याह—कार्यार्थिनामिति । विमर्दः कलहो राज्ञां प्रजानां न्यायान्यायविचारमकुर्वताम् ॥ २४ ॥

रा० टी०–एवमिति । एवमुक्तप्रकारेण नृगः तं शापमुपभुङ्क्ते प्राप्नोति हि यतः कार्यार्थिनां विमर्दः कलहः राज्ञां दोषाय कल्पते ॥ २४ ॥

गो० टी०–कार्यार्थिनामिति । विमर्दः कलहः । अभिवर्तन्तामागच्छन्तु । कार्यिणः कार्यार्थिनः । अभिवर्तन्तु काङ्क्षिण इति पाठः ॥ २५ ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१ संहितमिति गो. रा. पाठः । २ अस्मिन्कृकलासो वै इति गो. पाठः

तच्छीघ्रं दर्शनं मह्यमभिवर्तन्तु कार्यिणः । सुकृतस्य हि कार्यस्य फलं नावैति पार्थिवः ॥
तस्माद्गच्छ प्रतीक्षस्व सौमित्रे कार्यवाञ्जनः । ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ।

स राजा मन्त्रिण आहूय स्वस्थित्यै शिल्पिभिः शीतवातातपादिवारकाणि श्वभ्राणि रचयित्वा समाश्वसिहि पुत्रक यद्भव्यं तदेव लभ्यते नान्यथेत्याश्वुपदिश्य स्वमात्मजं स्वाधिकारे विनियुज्य च कृकलासरूपभृत्सन् गर्तमविशदिति नृगचरितश्रवणोत्सुकं रामोऽकथयदनुजम् ।

रामस्य भाषितं श्रुत्वा लक्ष्मणः परमार्थवित् । उवाच प्राञ्जलिर्वाक्यं राघवं दीप्ततेजसम् ॥ १ ॥
अल्पापराधे काकुत्स्थ द्विजाभ्यां शाप ईदृशः । महान्नृगस्य राजर्षेर्यमदण्ड इवापरः ॥ २ ॥
श्रुत्वा तु पापसंयुक्तमात्मानं पुरुषर्षभ । किमुवाच नृगो राजा द्विजौ क्रोधसमन्वितौ ॥ ३ ॥
लक्ष्मणेनैवमुक्तस्तु राघवः पुनरब्रवीत् । शृणु सौम्य यथा पूर्वं स राजा शापविक्षतः ॥ ४ ॥
अथाध्वनि गतौ विप्रौ विज्ञाय स नृपस्तदा । आहूय मन्त्रिणः सर्वान्नैगमान्सपुरोधसः ॥ ५ ॥
तानुवाच नृगो राजा सर्वांश्च प्रकृतीस्तथा । दुःखेन सुसमाविष्टः श्रूयतां मे समाहिताः ॥ ६ ॥

२५] ति० टी०–अभिवर्तन्त्वभिवर्तयन्तु । मह्यं मम कार्यिणः प्रजा अधिकारिणश्च । ननु नृगस्याप्येवमवस्था चेदलं सुकृतकर्मणेति शङ्कावन्तं लक्ष्मणं लक्षयित्वाह—**सुकृतस्येति** । कार्यस्य कर्तव्यस्य सुकृतस्य प्रजापालनधर्मस्य फलं पार्थिवो नावैति । काकुः । प्राप्नोत्येवेत्यर्थः । कार्यवाञ्जनः । क आयाति तत्प्रतीक्षस्व द्वारि स्थित्वेति शेषः ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रा० टी०–**तदिति** । तदुक्तहेतोः कार्यिणो जनाः मह्यं मम दर्शनम् शीघ्रमभिवर्त्तन्तु प्राप्नुवन्तु ननु परमधर्मवतो नृगस्य यद्यनिष्टप्राप्तिः तर्हि किं धर्मेणेत्यत आह सुकृतस्य विचारेण निष्पादितस्य कार्यस्य फलमिष्टप्राप्तिं पार्थिवो नावैति प्राप्नोति काङ्क्षा प्राप्नोत्येवेत्यर्थः तस्मात् कार्यवान् जनः त्वं प्रतीक्षस्व किञ्च यः कार्यवान् जनः तं प्रतीक्षस्वेत्यन्वयः सार्द्धश्लोक एकान्वयी ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

१] ति० टी०–अथ लक्ष्मणेन विशिष्य नृगवृत्तान्तप्रश्ने तदुत्तरम्—**रामस्येति** ॥ १ ॥

रा० टी०–रामवचनश्रवणानन्तरकालिकं वृत्तमाह—**रामस्येत्यादिभिः** । लक्ष्मणः वाक्यमुवाच ॥ १ ॥

गो० टी०–**रामस्येत्यादि** ॥ १ ॥

२] ति० टी०–ईदृशः शापः । दत्त इति शेषः ॥ २ ॥

रा० टी०–तदाकारमाह–अल्पेत्यादिभिः । अपरो यमदण्ड इव महान् शापो दत्त इति शेषः ॥ २ ॥

गो० टी०–**अल्पेति** । अल्पेष्वपराधे परीक्षार्थमागतत्वात् गोदानद्वारा द्विजाभ्यां नारदपर्वताभ्यां यमदण्ड इव महान् शापो दत्तः ॥ २ ॥ ३ ॥

३] ति० टी०–पापसंयुक्तं शापरूपपापसंयुक्तम् ॥ ३ ॥

रा० टी०–**श्रुत्वेति** । पुरुषर्षभो नृगः आत्मानं पापेन पापहेतुकशापेन संयुक्तं श्रुत्वा द्विजौ किमुवाच ॥ ३ ॥

४] ति० टी०–शापविक्षतः स राजा यथा पूर्वमुवाच तद्वक्ष्यामि शृण्विति संबन्धः ॥ ४ ॥

रा० टी०–**लक्ष्मणेनेति** । राघवोऽब्रवीत् तदाकारमाह शापेन विक्षतो राजा यथोवाच तथा श्रृण्विति शेषः ॥ ४ ॥

गो० टी०–**लक्ष्मणेनेति** । हे सौम्य! शापविक्षतः सन् स राजा यथा पूर्वमुवाच तच्छृण्विति योजना ॥ ४ ॥

५] ति० टी०–द्विजौ प्रति किमुवाचेति शङ्कायां तयोरदर्शनमेवाभूदित्याह—**अथेति** । अध्वनि व्योमाध्वनि गतौ तौ विज्ञाय । ध्यानेनामुकाविति ज्ञात्वेत्यर्थः । नैगमाः पौराः ॥५॥

रा० टी०–**अथेति** । नृपो नृगः सपुरोधसो मन्त्रिणः नैगमान् पौरांश्च सुसमाहितः प्रकृतीः प्रजाश्च आहूय युष्माभिः श्रूयतामिति तानुवाच श्लोकद्वयमेकान्वयि ॥ ५–६ ॥

गो० टी०–**अथेति** । अध्वनि व्योमाध्वनि गतौ ध्यानेन अमुकाविति विज्ञायेत्यर्थः । नैगमान् पौरान् ॥ ५ ॥

६] ति० टी०–श्रूयताम् । मे वचनमिति शेषः ॥ ६ ॥

गो० टी०–**तानिति** । श्रूयतामिति । वचनमिति शेषः॥६॥

१ सभाद्वितैरिति गो० पाठः ।

नारदः पर्वतश्चैव मम दत्त्वा महद्भयम् । गतौ त्रिभुवनं भद्रौ वायुभूतावनिन्दितौ ॥ ७ ॥
कुमारोऽयं वसुर्नाम स चेहाद्याभिषिच्यताम् । श्वभ्रं च यत्सुखस्पर्शं क्रियतां शिल्पिभिर्मम ॥ ८ ॥
यत्राहं संक्षयिष्यामि शापं ब्राह्मणनिःसृतम् । वर्षघ्नमेकं श्वभ्रं तु हिमघ्नमपरं तथा ॥ ९ ॥
ग्रीष्मघ्नं तु सुखस्पर्शमेकं कुर्वन्तु शिल्पिनः । फलवन्तश्च ये वृक्षाः पुष्पवत्यश्च या लताः ॥ १० ॥
विरोप्यन्तां बहुविधाश्छायावन्तश्च गुल्मिनः । क्रियतां रमणीयं च श्वभ्राणां सर्वतोदिशम् ॥ ११ ॥
सुखमत्र वसिष्यामि यावत्कालस्य पर्ययः । पुष्पाणि च सुगन्धीनि क्रियंतां तेषु नित्यशः॥ १२ ॥
परिवार्य यथा मे स्युरध्यर्धं योजनं तथा । एवं कृत्वा विधानं स संनिवेश्य वसुं तदा ॥ १३ ॥
धर्मनित्यः प्रजाः पुत्र क्षत्रधर्मेण पालय । प्रत्यक्षं ते यथा शापो द्विजाभ्यां मयि पातितः॥१४॥
नरश्रेष्ठ सरोषाभ्यामपराधेऽपि तादृशे । मा कृथास्त्वनुसंतापं मत्कृते हि नरर्षभ ॥ १५ ॥
कृतान्तः कुशलः पुत्र येनास्मि व्यसनीकृतः । प्राप्तव्यान्येव प्राप्नोति गन्तव्यान्येव गच्छति॥ १६ ॥
लब्धव्यान्येव लभते दुःखानि च सुखानि च । पूर्वं जात्यन्तरे वत्स मा विषादं कुरुष्व ह ॥ १७ ॥

७] ति० टी०–नारदपर्वतौ मुनी यदृच्छया समागत्य द्विजेन्द्रप्रयुक्तस्य शापस्य निवेदनेन मम महद्भयं दत्त्वोक्त्वा त्रिभुवनं तृतीयं भुवनं ब्रह्मलोकं गतौ वायुभूतौ वायुवदतिवेगौ। यद्वा तौ ब्राह्मणावेतौ तत्संज्ञौ । तत्प्रयुक्तशापज्ञानं च राज्ञो ध्यानेनेति बोध्यम् ॥ ७ ॥

रा० टी०–तद्वचनाकारमाह—**नारद** इत्यादिभिः । नारदः पर्वतश्च ऋषी मम मह्यम् महद् भयम् ब्राह्मणाभ्यां दत्तं शापमित्यर्थः दत्वा श्रावयित्वा त्रिभुवनं त्रयाणां ब्रह्मादीनां भुवनं लोकं वायुभूतौ सन्तौ गतौ ॥ ७ ॥

गो० टी०–**नारद** इति । त्रिभुवनं ब्रह्मलोकमित्यर्थः ॥७॥

८–१०] ति० टी०–श्वभ्रं गर्तः ॥ ८–१० ॥

रा० टी०–तत्तु तर्हि किं कर्त्तव्यमित्यत आह–**कुमार इति** । योयं वसुनाम मम कुमारः सोद्याभिषिच्यताम् यत्राहं ब्राह्मणनिस्सृतं शापं संक्षयिष्यामि तत्र यत्सुखस्पर्शं स्वभ्रं गर्तं तत् शिल्पिभिः क्रियताम् कार्यताम् सार्धश्लोक एकान्वयी ॥ ८ ॥

रा० टी०–श्वभ्रप्रकारमाह वर्षहननकर्त्रादि श्वभ्रं शिल्पिनः कुर्वन्तु ॥ ९ ॥

गो० टी०–**कुमार इति** । श्वभ्रं गर्तः ॥ ८ ॥ ९ ॥

रा० टी०–**फलवन्त इति** । छायावन्तः निबिडच्छायाविशिष्टा गुल्मिनः वृक्षा लताश्च विरोप्यन्ताम् ॥ १० ॥

गो० टी०–**फलवन्त इति** । गुल्मिनः कक्षवृक्षाः १०-११

११] ति० टी०–गुल्मिनः कक्षवृक्षाः ॥ ११ ॥

रा० टी०–विरोपणदेशवत्तां बोधयितुमाह—**क्रियतामिति**। श्वभ्राणां सर्वतो दिशं परिवार्य अध्यर्धं योजनं रमणीयं यथा स्यात्तथा क्रियताम् ॥ ११ ॥

१२–१३] ति० टी०–अध्यर्धं योजनं परिवार्य यथा पुष्पाणि स्युस्तथा क्रियंतामित्यन्वयः॥ १२–१३ ॥

रा० टी०–**एवमिति** । हे पुत्र ! एवं मदुक्तप्रकारेण विधानं कृत्वा वसुमग्निं सन्निवेश्य स मदुपदिष्टः अत एव धर्मनित्यः नित्यं धर्मविशिष्टस्त्वं प्रजाः क्षत्रधर्मेण पालय ॥ १२ ॥

गो० टी०–**पुष्पाणीति** । पुष्पाणि यथा अध्यर्धं योजनं परिवार्य स्युः तथा क्रियन्तामित्यर्थः ॥ १२ ॥ १३ ॥

१४] ति० टी०–हे पुत्र! धर्मनित्यो भूत्वा प्रजाः क्षत्रधर्मेण पालयेत्यादेरेवमुक्तत्वेत्यनेनाष्टादशश्लोकस्थप्रथमपादेन संबन्धः ॥ १४ ॥

रा० टी०–नन्विदानीमेव कथमेवं ब्रूषे इत्यत आह—**प्रत्यक्षमिति** । तादृशे अपराधे सत्येव द्विजाभ्यां यथा पापिवत् शापस्ते प्रत्यक्षं पातितः ॥ १३ ॥

गो० टी०–**प्रत्यक्षमिति** । तादृशेऽल्पेपीत्यर्थः ॥१४॥

१५] ति० टी०–तादृशेऽप्यल्पेऽपि ॥ १५ ॥

रा० टी०–**मेति**। येनाहं व्यसनीकृतः स कृतान्तः कृतं कर्म कुशलः फलदाने निपुणः अतः मत्कृते अनुसन्तापं मा कृथाः१४

गो० टी०–**मा कृथा इति** । कृतान्तः ईश्वरः ॥ १५ ॥

१६] ति० टी०–कृतान्तः प्राचीनकर्म । कुशलः सुखदुःखप्रापणप्रभुः । व्यसनी व्यसनवान् । प्राप्तव्यानि प्राप्नोत्येवेत्यपि योजना । प्राप्तव्यान्येकत्रस्थले एव तिष्ठतो यत्नं विना प्राप्याणि । गन्तव्यानि स्वयमन्यत्र गत्वा प्राप्याणि ॥ १६ ॥

१७] ति० टी०–लब्धव्यानि स्थले एव तिष्ठतो यत्नलभ्यानि । पूर्वं जात्यन्तरे संपादितकारणानीति शेषः । सुखानि दुःखानि प्राप्तव्यादीनि प्राप्नोतीत्यर्थः । अनेन दुःखाद्यनुभवे नान्यो मूलम्, किं तु स्वकृतकर्मैवेत्युक्तम् ॥ १७ ॥

रा० टी०–कर्मणो बलवत्त्वमेवाह—**प्राप्तव्यानीति** । पूर्वं जात्यन्तरे पूर्वजन्मनि जातकर्मवशादिति शेषः प्राप्तव्यानि प्रापणीयानि वस्तून्येव प्राप्नोति अतः विषादं मा कुरुष्व सार्द्धश्लोक एकान्वयी ॥ १६–१६ ॥

१ देवोऽवेति गो. पाठः । २ इदं पद्यं रा. पुस्तके नास्ति ३ त्वमिति रा. पा. ।

एवमुक्त्वा नृपस्तत्र सुतं राजा महायशाः । श्वभ्रं जगाम सुकृतं वासाय पुरुषर्षभ ॥ १८ ॥
एवं प्रविश्यैवं[1] नृपस्तदानीं श्वभ्रं महैद्रत्नविभूषितं तत् ।[2]
संपादयामास तदा महात्मा शापं द्विजाभ्यां हि रुषा विमुक्तम् । ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुःष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ।

पुनः कथाश्रवणकुतूहलिनं तं रामो निमिवसिष्ठयोर्विदेहत्वप्राप्ति परस्परशापेनेति कथयामास ।

एष ते नृगशापस्य विस्तरोऽभिहितो मया । यद्यस्ति श्रवणे श्रद्धा शृणुष्वेहापरां कथाम् ॥ १ ॥
एवमुक्तस्तु रामेण सौमित्रिः पुनरब्रवीत् । तृप्तिराश्चर्यभूतानां कथानां नास्ति मे नृप ॥ २ ॥
लक्ष्मणेनैवमुक्तस्तु राम इक्ष्वाकुनन्दनः । कथां परमधर्मिष्ठां व्याहर्तुमुपचक्रमे ॥ ३ ॥
आसीद्राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम् । पुत्रो द्वादशमो वीर्ये धर्मे च परिनिष्ठितः ॥ ४ ॥
स राजा वीर्यसंपन्नः पुरं देवपुरोपमम् । निवेशयामास तदा अभ्याशे गौतमस्य तु ॥ ५ ॥
पुरस्य सुकृतं नाम वैजयन्तमिति श्रुतम् । निवेशं यत्र राजर्षिर्निमिश्चक्रे महायशाः ॥ ६ ॥
तस्य बुद्धिः समुत्पन्ना निवेश्य सुमहापुरम् । यजेयं दीर्घसत्रेण पितुः प्रह्लादयन्मनः ॥ ७ ॥

गो० टी०-प्राप्तव्यानीति । पूर्वं जात्यन्तरे । प्राप्तव्यान्येव प्राप्नोति गन्तव्यान्येव गच्छति । लब्धव्यान्येव लभते दुःखानि च सुखानि च ॥ १६—१९ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

१८] ति० टी०-सुकृतं सुष्ठु कृतम् ॥ १८ ॥

रा० टी०-एवमिति । सुकृतमतिप्रयत्नेन निर्मितम् श्वभ्रं राजावासाय जगाम ॥ १७ ॥

१९] ति० टी०-संपादयामास संपादयांचकार । अनुभवति स्मेत्यर्थः ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुष्पञ्चाशः सर्गः ॥५४॥

रा० टी०-एवमिति । नृपः श्वभ्रं प्रविश्य द्विजाभ्यां विमुक्तं शापं सम्पादयामास शापप्राप्तिं प्रार्थयामासेत्यर्थः१८॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

१] ति० टी०-अथ रामेण पुनर्ब्राह्मणापराधेन शापप्राप्तिकथाभाषणम् । एष ते इति । इह राज्ञामपराधविषये॥१॥

रा० टी०-लक्ष्मणं प्रति रामस्योक्तिमाह-एष इति । नृप हे लक्ष्मण ! एष शापस्य विस्तरः मयाभिहितः यदि श्रवणे कथान्तरश्रुतौ श्रद्धास्ति तर्हि अपरां कथां शृण्वत्र शृणु ॥१॥

गो० टी०-एष त इत्यादि । इह राजापराधविषये ॥१॥

२-३] ति० टी०-कथानाम् । श्रवणे इति शेषः ॥२-३॥

रा० टी०-एवमिति । आश्चर्यभूतानां कथानां श्रवणादिति शेषः मे तृप्तिर्नास्तीति वचनम् सौमित्रिरब्रवीत् ॥ २ ॥

रा० टी०-लक्ष्मणेनेति । रामः परमधर्मिष्ठां परमधर्मसूचिकां कथां व्याहर्तुमुपचक्रमे ॥ ३ ॥

गो० टी०-एवमिति । तृप्तिः कथानां संबन्धिनीत्यर्थः ॥ २—४ ॥

४] ति० टी०-इक्ष्वाकूणामिक्ष्वाकुपुत्राणाम् । द्वादशमो द्वादशसंख्यापूरणः । संख्यादेरपि मडागमः ॥ ४ ॥

रा० टी०-व्याहरणाकारमाह-आसीदिति । इक्ष्वाकूणां द्वादशमः द्वादशः निमिर्नाम पुत्रो राजासीत् ॥ ४ ॥

५] ति० टी०-गौतमस्याभ्याशे गौतमाश्रमसमीपे ॥५॥

रा० टी०-स इति । स निमिर्गौतमस्याभ्यासे समीपे देवपुरोपमम् पुरं निवेशयामास कारयामास ॥ ५ ॥

गो० टी०-स इति । गौतमस्येति । गोतमाश्रमस्येत्यर्थः ॥ ५ ॥

६] ति० टी०-सुकृतं सुष्ठु कृतं निवेशं वासं यत्र चक्रे तस्य पुरस्येत्वन्वयः ॥ ६ ॥

रा० टी०-पुरस्येति । यत्र पुरे निमिर्निवेशमावासं चक्रे तस्य पुरस्य वैजयन्तमिति श्रुतं प्रसिद्धं नाम सुकृतम् ॥ ६ ॥

गो० टी०-पुरस्येति । वैजयन्तमिन्द्रप्रासादम् । साहश्यात्तद्व्यपदेशः ॥ ६—९ ॥

७] ति० टी०-पितुरिक्ष्वाकोः । दीर्घसत्रं बहुकालसाध्यो बहुयजमानकः सत्राख्यो यागः ॥ ७ ॥

---

१ एवं प्रविश्यैवेति गो. रा. पाठः । २ महारत्नेति गो. पाठः ।

ततः पितरमामन्त्र्य इक्ष्वाकुं हि मनोः सुतम् । वसिष्ठ वरयामास पूर्वं ब्रह्मर्षिसत्तमम् ॥ ८ ॥
अनन्तरं स राजर्षिर्निमिरिक्ष्वाकुनन्दनः । अत्रिमङ्गिरसं चैव भृगुं चैव तपोनिधिम् ॥ ९ ॥
तमुवाच वसिष्ठस्तु निमिं राजर्षिसत्तमम् । वृतोऽहं पूर्वमिन्द्रेण अन्तरं प्रतिपालय ॥ १० ॥
अनन्तरं महाविप्रो गौतमः प्रत्यपूरयत् । वसिष्ठोऽपि महातेजा इन्द्रयज्ञमथाकरोत् ॥ ११ ॥
निमिस्तु राजा विप्रांस्तान्समानीय नराधिपः । अयजद्भिमवत्पार्श्वे स्वपुरस्य समीपतः ॥ १२ ॥
पञ्चवर्षसहस्राणि राजा दीक्षामथाकरोत् । इन्द्रयज्ञावसाने तु वसिष्ठो भगवानृषिः ॥ १३ ॥
सकाशमागतो राज्ञो हौत्रं कर्तुमनिन्दितः । तदन्तरमथापश्यद्गौतमेनाभिपूरितम् ॥ १४ ॥
कोपेन महताविष्टो वसिष्ठो ब्रह्मणः सुतः । स राज्ञो दर्शनाकाङ्क्षी मुहूर्तं समुपाविशत् ॥
तस्मिन्नहनि राजर्षिर्निद्रयापहृतो भृशम् । ॥ १५ ॥
ततो मन्युर्वसिष्ठस्य प्रादुरासीन्महात्मनः । अदर्शनेन राजर्षेर्व्याहर्तुमुपचक्रमे ॥ १६ ॥
यस्मात्त्वमन्यं वृतवान्मामवज्ञाय पार्थिव । चेतनेन विनाभूतो देहस्ते पार्थिवैष्यति ॥ १७ ॥
ततः प्रबुद्धो राजा तु श्रुत्वा शापमुदाहृतम् । ब्रह्मयोनिमथोवाच सँ राजा क्रोधमूर्च्छितः ॥ १८ ॥
अजानतः शयानस्य क्रोधेन कलुषीकृतः । उक्तवान्मम शापाग्निं यमदण्डमिवापरम् ॥ १९ ॥
तस्मात्त्वापि ब्रह्मर्षे चेतनेन विनाकृतः । देहः सँ सुचिरप्रख्यो भविष्यति न संशयः ॥ २० ॥

रा० टी०-**तस्येति** । पितुर्मनः प्रल्हादयन् प्रल्हादयितुं दीर्घसत्रेण यजेयमिति बुद्धिः सुमहापुरं निवेश्य कारयित्वा वियमानस्य तस्य निमेः समुत्पन्ना ॥ ७ ॥

८-९]**ति०टी०**-पूर्वं वसिष्ठवरणं ततोऽन्यादिवरणम् ८-९

रा० टी०-**तत इति** । ततः तादृशबुद्धिसमुत्पत्त्यनन्तरं मनोः सुतमिक्ष्वाकुं पितरमामन्त्र्य पृष्ट्वा पूर्वं वसिष्ठं वरयामास यागकारयितृत्वं स्वीकारयामास अनन्तरमत्रिप्रभृतिं वरयामास श्लोकद्वयमेकान्वयि ॥ ८-९ ॥

१०] **ति० टी०**-अन्तरं प्रतिपालयेन्द्रयागसमाप्तिपर्यन्तावकाशं प्रतीक्षस्व । इन्द्रं याजयित्वा त्वां याजयिष्य इति भावः । देवानामपि यज्ञाधिकारः प्राङ् निरूपितः १०

रा० टी०-**तमिति** । * * पूर्वमहमिन्द्रेण वृतः अतः अन्तरं तावत्कालं परिपालय क्षमस्व तद्यागं कारयित्वा तव यागं कारयिष्यामीति तात्पर्यम् इति वशिष्ठ उवाच ॥ १० ॥

गो० टी०-**तमिति** । प्रतीक्ष प्रतीक्षस्व । प्रतीक्ष त्वं तदन्तरमिति च पाठः । तदनन्तरं त्वां याजयिष्य इति शेषः १०

११] **ति० टी०**-अनन्तरं वसिष्ठगमनानन्तरम् । गौतमः प्रत्यपूरयद्वसिष्ठकर्तव्यं हौत्रार्त्विज्यम् । राज्ञ इति शेषः॥ ११ ॥

रा० टी०-**अनन्तरमिति** । अनन्तरं वसिष्ठगमनानन्तरकाले गौतमः प्रत्यपूरयत् यागकारयितृत्वं स्वीचकार वसिष्ठस्तु इन्द्रयज्ञमकरोत् ॥ ११ ॥

गो० टी०-**अनन्तरमिति** । गौतमः प्रत्यपूरयत् । वसिष्ठकर्तव्यं हौत्रमिति शेषः ॥ ११ ॥

१२-१३]**ति०टी०**-तान्विप्रान् । अन्यादीनित्यर्थः १२-१३

१४] **ति० टी०**-तदन्तरं वसिष्ठेन प्रतीक्षणीयमित्युक्तमवकाशं गौतमेन पूरितमपश्यत् । कर्तव्यमार्त्विज्यं गौतमेन क्रियमाणमपश्यदित्यर्थः ॥ १४ ॥

रा० टी०-**निमिरिति** । निमिर्विप्रान्समानीय पंचवर्षसहस्राणि दीक्षां तत्प्रतिज्ञामकरोत् अत एव अयजत् सार्द्धश्लोक एकान्वयी ॥ १२ ॥

रा० टी०-**इन्द्रेति** । हौत्रं कर्म कर्तुं राज्ञः सकाशमागतो वसिष्ठः गौतमेनाभिपूरितं यागमिति शेषः तदन्तरं प्रतीक्षणीयकालमपश्यत् सार्द्धश्लोक एकान्वयी ॥ १३-१४ ॥

गो० टी०-**निमिरिति** । तानन्यादीन् ॥ १२ ॥ १४ ॥

१५-१६] **ति० टी०**-निद्रयापहृतः । असमाप्ते एव सत्रे इति भावः ॥ १५-१६ ॥

रा० टी०-**कोपेनेति** । कोपेनाविष्टः अत एव राज्ञो दर्शनाकांक्षी वसिष्ठः मुहूर्तं समुपाविशत् ॥ १५ ॥

रा० टी०-**तस्मिन्निति** । तस्मिन्नहनि राजर्षिः निद्रयापहृतोऽभवदिति शेषः ततो राजर्षेरदर्शनेन हेतुना वसिष्ठस्य मन्युः प्रादुरासीत् अत एव व्याहर्तुं शापमिति शेषः उपचक्रमे सार्द्धश्लोक एकान्वयी ॥ १६ ॥

गो० टी०-**स इति** । असमाप्तसत्र इति शेषः ॥१५-१६॥

१७-१९]**ति०टी०**-मामवज्ञायेत्यस्य स्वपिपि चेति शेषः चेतनेन विनाभूतः । मृत इत्यर्थः । एष्यति भविष्यति १७-१९

२०] **ति० टी०**-चेतनेन विनाकृतो मृतः । सुचिरा प्रख्या शोभा यस्य सः ॥ २० ॥

रा० टी०-**तदाकारमाह-यस्मादिति** । यस्मात् त्वम-

१ धनमिति गो. पाठः । २ उपागमदिति गो. पाठः । ३ तव भविष्यतीति गो. पाठः । ४ सेरंभादिति गो. पाठः । ५ मुक्तवान्मयीति गो.पाठः । ६ सुरुचिरेति गो. रा. पाठः ।

इति रोषवशादुभौ तदानीमन्योन्यं शपितौ नृपद्विजेन्द्रौ ।
सहसैव बभूवतुर्विदेहौ तत्तुल्याधिगतप्रभाववन्तौ । ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ।

वसिष्ठस्य विदेहत्वनिवृत्तिकथाप्रसङ्गेनोर्वश्या मित्रशापेन मनुष्यलोकगमनकथा ।

रामस्य भाषितं श्रुत्वा लक्ष्मणः परवीरहा । उवाच प्राञ्जलिर्भूत्वा राघवं दीप्ततेजसम् ॥ १ ॥
निक्षिप्य[1] देहौ काकुत्स्थ कथं तौ द्विजपार्थिवौ । पुनर्देहेन संयोगं जग्मतुर्देवसंमतौ ॥ २ ॥
लक्ष्मणेनैवमुक्तस्तु राम इक्ष्वा[3]कुनन्दनः । प्रत्युवाच महातेजा लक्ष्मणं पुरुषर्षभः ॥ ३ ॥
तौ परस्परशापेन देहं[4]मुत्सृज्य धार्मिकौ । अभूतां नृपविप्रर्षी वायुभूतौ तपोधनौ ॥ ४ ॥
अशरीरः शरीरस्य कृतेऽन्यस्य महामुनिः । वसिष्ठस्तु[5] महातेजा जगाम पितुरन्तिकम् ॥ ५ ॥
सोऽभिवाद्य ततः पादौ देवदेवस्य धर्मवित् । पितामहमथोवाच वायुभूत इदं वचः ॥ ६ ॥
भगवन्निमिशापेन विदेहत्वमुपागमम् । । देवदेव[6] महादेव वायुभूतोऽहमण्डज ॥ ७ ॥

न्यं दृतवान् तस्मात्ते देहः चेतनेन विनाभूतः एष्यति भविष्यति ॥ १७ ॥

रा० टी०–तत इति । राजा प्रजानां रञ्जको राजा निमिर्ब्रह्मयोनिं वसिष्ठमुवाच ॥ १८ ॥

रा० टी०–तदाकारमाह–अजानत इति । क्रोधेन कलुषीकृतस्त्वं यस्मात् मम शापाग्निमुक्तवान् तस्मात् सुरुचिरप्रख्यः अतिशोभावानपि ते देहः चेतनेन विना भविष्यति अर्द्धचतुष्टयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–तस्मादिति । चेतनेन विना कृत इति । मृत इत्यर्थः सुरुचिरप्रख्यः सुरुचिरकान्तिः ॥ २० ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

२१] ति०टी०–तदिति ब्रह्मनाम । ब्रह्मणस्तुल्यं तुल्यतयाधिगतः प्राप्तो यः प्रभावस्तद्वन्तौ । ब्रह्मतुल्यप्रभावाविति यावत् ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रा० टी०–इतीति । इत्युक्तप्रकारेण रोषवशात् अन्योन्यं शपितौ ताभ्यामेव तुल्यत्वेनाधिगतः ज्ञातो यः प्रभावः तद्वन्तौ नृपद्विजेन्द्रौ विदेहौ बभूवतुः ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पंचपञ्चाशः सर्गः ॥ ५५ ॥

१] ति० टी०–अथ त्यक्तदेहयोः पुनर्देहप्राप्तिप्रश्नोत्तरे–रामस्येति ॥ १ ॥

रा० टी०–वसिष्ठोत्पत्तिं पिप्रच्छिषोर्लक्ष्मणस्य रामं प्रति प्रश्नमाह–रामस्येति द्वाभ्याम् । लक्ष्मणः राघवमुवाच॥१॥

गो० टी०–रामस्येत्यादि ॥ १ ॥

२–४] ति० टी०–देवसंमतौ देवपूजितौ ॥ २–४ ॥

रा० टी०–तद्वचनाकारमाह—निक्षिप्येत्यादिभिः । द्विजपार्थिवौ देहेन पुनस्संयोगं कथं जग्मतुः ॥ २ ॥

रा० टी०–लक्ष्मणेनेति । रामः प्रत्युवाच ॥ ३ ॥

रा० टी०–तदाकारमाह—ताविति । नृपब्रह्मर्षी परस्परशापेन देहमुत्सृज्य वायुभूतावभूताम् ॥ ४ ॥

गो० टी०–निक्षिप्येति । देवसम्मतौ देवतुल्यौ ॥ २–४ ॥

५] ति० टी०–अन्यस्य शरीरस्य कृतेऽन्यस्थूलशरीरप्राप्तिनिमित्तम् ॥ ५ ॥

रा० टी०–अशरीर इति । अन्यस्य शरीरस्य कृते उत्पत्त्यर्थम् अशरीरो वसिष्ठः पितुर्ब्रह्मणोन्तिकं जगाम ॥ ५ ॥

गो० टी०–अशरीर इति । अन्यस्य शरीरस्य कृते अन्यशरीरप्राप्त्यर्थमित्यर्थः ॥ ५–७ ॥

६] ति० टी०–अभिवाद्याभिवादनाद्यशरीरस्यापि तपःप्रभावाल्लिङ्गदेहेनोपपन्नम् ॥ ६ ॥

रा० टी०–स इति । स वसिष्ठः पितामहमुवाच ॥ ६ ॥

७] ति० टी०–उपागमं प्राप्तः ॥ ७ ॥

रा० टी०–तदाकारमाह–भगवन्निति । अण्डज हे ब्रह्माण्डनिष्पादक निमिशापेन विदेहत्वं देहराहित्यमुपागमम् अत एव वायुभूतोहमस्मीति शेषः ॥ ७ ॥

१ वाक्यमिति गो.पा. । २ निक्षिप्येति गो. रा. पाठः । ३ चेक्ष्वाकेति गो.पा. । ४ देहाविति गो.पा. । ५ त्विति गो. पा. । ६ लोकनाथ महादेव अण्डजोऽपि त्वमब्जज इति गो. पा. ।

सर्वेषां देहहीनानां महदुःखं भविष्यति । लुप्यन्ते सर्वकार्याणि हीनदेहस्य वै प्रभो ॥ ८ ॥
देहस्यान्यस्य सद्भावे प्रसादं कर्तुमर्हसि । तमुवाच ततो ब्रह्मा स्वयंभूरमितप्रभः ॥ ९ ॥
मित्रावरुणजं तेज आविश त्वं महायशः । अयोनिजस्त्वं भविता तत्रापि द्विजसत्तम ॥
धर्मेण महता युक्तः पुनरेष्यसि मे वशम् । ॥ १० ॥
एवमुक्तस्तु देवेन अभिवाद्य प्रदक्षिणम् । कृत्वा पितामहं तूर्णं प्रययौ वरुणालयम् ॥ ११ ॥
तमेव कालं मित्रोऽपि वरुणत्वमकारयत् । क्षीरोदेन सहोपेतः पूज्यमानः सुरेश्वरैः ॥ १२ ॥
एतस्मिन्नेव काले तु उर्वशी परमाप्सराः । यदृच्छया तमुद्देशमागता सखिभिर्वृता ॥ १३ ॥
तां दृष्ट्वा रूपसंपन्नां क्रीडन्तीं वरुणालये । तदाविशत्परो हर्षो वरुणं चोर्वशीकृते ॥ १४ ॥
स तां पद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम् । वरुणो वरयामास मैथुनायाप्सरोवराम् ॥ १५ ॥
प्रत्युवाच ततः सा तु वरुणं प्राञ्जलिः स्थिता । मित्रेणाहं वृता साक्षात्पूर्वमेव सुरेश्वर ॥ १६ ॥
वरुणस्त्वब्रवीद्वाक्यं कंदर्पशरपीडितः । इदं तेजः समुत्सृक्ष्ये कुम्भेऽस्मिन्देवनिर्मिते ॥ १७ ॥

८] ति० टी०–महदुःखस्य भविष्यत्त्वे सर्वकार्यविलोपः सर्वकार्याणि ऐहिकामुष्मिकसर्वप्रयोजनानि ॥ ८ ॥

रा० टी०–नन्वं किं देहराहित्येनेत्यत आह—**सर्वेषामिति** । हीनदेहस्य सर्वकार्याणि कृत्यानि लुप्यन्ते अत एव देहहीनानां महदुःखं भविष्यति ॥ ८ ॥

गो० टी०–**सर्वेषामिति** । सर्वकार्याणि ऐहिकामुष्मिकसकलप्रयोजनानि ॥ ८ ॥

९] ति० टी०–सद्भावे प्राप्तौ ॥ ९ ॥

रा० टी०–**देहस्येति** । अन्यस्य देहस्य सद्भावे उत्पत्त्यर्थं प्रसादं कर्तुमर्हसि अर्द्धं पृथक्–**तमिति** । स्वयंभूः तं वसिष्ठमुवाच अर्द्धं पृथक् ॥ ९ ॥

गो० टी०–**तमिति** । तेजो रेतः ॥ ९ ॥

१०] ति० टी०–मित्रावरुणजं तद्विसृष्टम् । तत्रापि मित्रावरुणरेतःप्रवेशेऽपि । मे वशं मत्पुत्रत्वेन पूर्ववत्प्रजापतित्वमपि प्राप्स्यसीति भावः ॥ १० ॥

रा० टी०–तदाकारमाह–**मित्रेति** । मित्रावरुणजं मित्रावरुणोत्सृष्टं तेजः त्वमाविश तत्रावेशेऽपि त्वमयोनिजो भविता अत एव धर्मेण युक्तस्त्वं मे वशं मत्पुत्रत्वमित्यर्थः पुनरेष्यसि किंच मे धर्मेण युक्तस्त्वं वशम् पूर्वशरीरकान्ति पुनरेष्यसि यद्यप्युत्तरत्र कुम्भे वरुणतेजस्सेक एव वक्ष्यते तथापि तदुत्तरत्र वरुणवीर्यसेकात्पूर्वमुर्वश्याः संनिधौ मित्रवीर्यसेकोपि तस्मिन्नेव कुम्भे वक्ष्यते इति वीर्ययोः संमिलितत्वादुभयोरप्युभयजत्वव्यवहार उपपद्यते इति दिक् सार्द्धश्लोक एकान्वयी॥१०॥

गो० टी०–**अयोनिज इति** । तत्रापि मित्रावरुणतेजःप्रवेशेपि । अयोनिजत्वं रेतोजन्यत्वेपि योनावप्रवेशादिति भावः । मे वशं मदधीनताम् ॥ १० ॥ ११ ॥

११] ति० टी०–वरुणालयं समुद्रम् ॥ ११ ॥

रा० टी०–**एवमिति** । देवेन ब्रह्मणा एवमुक्तो वसिष्ठः वरुणालयं समुद्रं प्रययौ ॥ ११ ॥

१२] ति० टी०–तमेव कालं तस्मिन्नेव काले वसिष्ठागमनकाले मित्रः पूषार्यमादित्यसूर्यमंडलस्थमूर्तिभेदः सुरेश्वरैः पूज्यमानः सन्क्षीरोदेन क्षीरोदात्मकेन वरुणेनोपेतः सन्वरुणत्वं वरुणतादात्म्यमकारयद्भावयति स्म । यद्वा मित्रोऽपि वरुणत्वं वरुणाधिकारमकरोदित्यर्थः । एवं च मित्रतादात्म्यापन्नेन वरुणेन विसृष्टत्वाद्वरुणरेतोविसर्गस्यापि पूर्वं मित्रदृतोर्वशीनिमित्तत्वाच्च वरुणरेतोऽपि मित्रावरुणरेतो भवतीति मित्रावरुणजं तेज आविवेशेत्यनेन न विरोधः ॥ १२ ॥

रा० टी०–**तमिति** । तमेव कालम् तस्मिन्नेव काले वसिष्ठागमनसमये इत्यर्थः क्षीरोदेन तदभिधसमुद्रेण सहोपेतः तत्र स्थित इत्यर्थः मित्रः सूर्यविशेषः वरुणत्वम् तदधिकारमकारयत् अकरोत् अत एव मित्रावरुणजं तेज आविवेशेत्युपपद्यते ॥ १२ ॥

गो० टी०–**तमेवेति** । तमेव कालं तस्मिन्नेव काले । मित्रः सूर्यमूर्तिभेदः वरुणत्वमकारयत् । केनापि हेतुना उभावपि युगपद्वरुणराज्यमकुर्वतामित्यर्थः । तथैवोत्तरत्र वक्ष्यति–मित्रः वरुणत्वं प्रापेति ॥ १२—१९ ॥

१३] ति० टी०–एतस्मिन्नेव काले वरुणात्मना मित्रावस्थानकाले ॥ १३ ॥

रा० टी०–**एतस्मिन्निति** । एतस्मिन्नेव काले तमुद्देशं तत्स्थानमुर्वशी आगता ॥ १३ ॥

१४–१६] ति० टी०–वरुणालये क्षीरोदे ॥ १४–१६ ॥

रा० टी०–**तामिति** । तामुर्वशीं दृष्ट्वा विद्यमानं वरुणम् उर्वशीकृते उर्वश्यर्थम् परो हर्षोऽविशत् ॥ १४ ॥

रा० टी०–**स इति** । वरुणः अप्सरोवरामुर्वशीम् मैथुनाय वरयामास ॥ १५ ॥

रा० टी०–**प्रत्युवाचेति** । पूर्वमहम् मित्रेण वृता मैथुनायेति शेषः इति वचनं सोर्वशी वरुणं प्रत्युवाच **एतेन तुभ्यं** रतिं न दास्यामीति सूचितम् ॥ १६ ॥

१७] ति० टी०–इदं तेजः तदर्शनक्षुभितवीर्यरूपम् । देवनिर्मिते कुम्भे पुत्रोत्पत्तिसमर्थतया ब्रह्मसृष्टे ॥ १७ ॥

एवमुत्सृज्य सुश्रोणि त्वय्यहं वरवर्णिनि । कृतकामो भविष्यामि यदि नेच्छसि संगमम् ॥ १८ ॥
तस्य तल्लोकनाथस्य वरुणस्य सुभाषितम् । उर्वशी परमप्रीता श्रुत्वा वाक्यमुवाच ह ॥ १९ ॥
काममेतद्भवत्वेवं हृदयं मे त्वयि स्थितम् । भावश्चाप्यधिकं तुभ्यं देहो मित्रस्य तु प्रभो ॥ २० ॥
उर्वश्या एवमुक्तस्तु रेतस्तन्महदद्भुतम् । ज्वलदग्निसमप्रख्यं तस्मिन्कुम्भे न्यषीदत् ॥ २१ ॥
उर्वशी त्वगमत्तत्र मित्रो वै यत्र देवता । तां तु मित्रः सुसंक्रुद्ध उर्वशीमिदमब्रवीत् ॥ २२ ॥
मयाभिमन्त्रिता पूर्वं कस्मात्त्वमवसर्जिता । पतिमन्यं वृतवती किमर्थं दुष्टचारिणि ॥ २३ ॥
अनेन दुष्कृतेन त्वं मत्क्रोधकलुषीकृता । मनुष्यलोकमास्थाय कंचित्कालं निवत्स्यसि ॥ २४ ॥
बुधस्य पुत्रो राजर्षिः काशिराजः पुरूरवाः । तमभ्यागच्छ दुर्बुद्धे स ते भर्ता भविष्यति ॥ २५ ॥
ततः सा शापदोषेण पुरूरवसमभ्यगात् । प्रतिष्ठाने पुरूरवं बुधस्यात्मजमौरसम् ॥ २६ ॥
तस्य जज्ञे ततः श्रीमानायुः पुत्रो महाबलः । नहुषो यस्य पुत्रस्तु बभूवेन्द्रसमद्युतिः ॥ २७ ॥
वज्रमुत्सृज्य वृत्राय श्रान्तेऽथ त्रिदिवेश्वरे । शतं वर्षसहस्राणि येनेन्द्रत्वं प्रशासितम् ॥ २८ ॥
सा तेन शापेन जगाम भूमिं तदोर्वशी चारुदती सुनेत्रा ।
बहूनि वर्षाण्यवसच्च सुभ्रूः शापक्षयादिन्द्रसदो ययौ च ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये उत्तरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

रा० टी०–वरुण इति । वरुणोऽब्रवीत् तदाकारमाह देव-निर्मिते अस्मिन् कुम्भे इदं तेजः सम्युत्सक्ष्ये प्रक्षेप्स्यामि ॥१७॥

१८–१९] ति० टी०–त्वयि त्वन्निमित्तमित्यर्थः । कृत-कामः कृतकामभोगः ॥ १८–१९ ॥

रा० टी०–ननु सम्युत्सर्जनेन किं भविष्यतीत्यत आह— एवमिति । यदि संगमं नेच्छसि तदा त्वयि त्वत्सन्निधौ एवमिदं तेज उत्सृज्य कृतकामः जातमनोरथो भविष्यामि १८

रा० टी०–तस्येति । उर्वशी वाक्यमुवाच ॥ १९ ॥

२०]ति० टी०–काममधिकं मे हृदयं चित्तं त्वयि स्थितम् तुभ्यं तव च भावोऽधिकं मयि स्थितः, अत एतदेवं भवतु । कुम्भे वीर्योत्सर्गो भवतु । हे प्रभो ! देहस्तु मम पूर्ववृतस्य मित्रस्यास्तु । भावेन भोगस्त्वया सह मम देहेन भोगो मित्रेणा-स्त्विवत्युक्तं भवति ॥ २० ॥

रा० टी०–तदाकारमाह–काममिति । मे देहो मित्रस्य हृदयं तु त्वयि स्थितम् तत्र हेतुः मे भावः प्रीतिः तुभ्यं त्वय्य-धिकमेव वर्तते अतः एतत् भवदुक्तम् कामं यथेष्टम् भवतु॥२०॥

गो० टी०–काममिति । मित्रत्वात्पूर्वस्थितवरुणाविरोधेन राज्यमकरोत् । एतदेव मे भवतु । मे हृदयं चित्तं त्वयि स्थितमेव भवतु । अभ्यधिको भावश्च तुभ्यं तव च मयीति शेषः॥२०॥२१॥

२१–२२] ति० टी०–रेतस्तद्भावसंभोगक्षुभितम्॥२१–२२

रा० टी०–उर्वश्या इति । उर्वश्या एवमुक्तो वरुणः मह-दद्भुतं तद्रेतः कुम्भे न्यवासृजत् प्राक्षिपत् ॥ २१ ॥

रा० टी०–उर्वशीति । उर्वशी तु यत्र मित्रः तत्रागमत् मित्रस्तु उर्वशीमिदमब्रवीत् ॥ २२ ॥

गो० टी०–उर्वशी त्विति । कस्मात्त्वमवसर्जिता विसृ-ष्टवती । मामिति शेषः । कस्मात्त्वमसि वर्जितेति च पाठः । सुसंक्रम्य सम्यक् परिष्वज्य । तस्याः स्वस्मिन्ननुरागाभाव-मालोक्येत्यर्थः । तां तु मित्रः सुसंक्रम्येति च पाठः ॥२२-२३॥

२३] ति०टी०–अवसर्जिता विसृष्टवती । मामिति शेषः२३

रा० टी०–तदाकारमाह–मयेति । मया अभिमन्त्रिता मै-थुनाय दत्ता त्वं कस्मादवसर्जिता त्यक्तवती किमर्थं च अन्यं पतिं वृतवती एतेन पत्यन्तरविषयककामनां विना अन्यत्र गमनम् न संभवतीति निश्चयस्सूचितः ॥ २३ ॥

२४–२५] ति० टी०–अनेन दुष्कृतेन । एकं पतिमङ्गी-कृत्य तत्समये द्वितीयवरणं साधारणस्त्रीणामपि महदुष्कृतमि-त्यनेन बोधितम् । मनुष्यलोकमास्थाय । अनेन देवरूपेणै-वेति शेषः ॥ २४–२५ ॥

रा० टी०–अनेनेति । अनेन मत्त्यागरूपेण दुष्कृतेन मत्क्रोधकलुषीकृता त्वं मनुष्यलोकमास्थाय प्राप्य कंचित् कालं निवत्स्यसि ॥ २४ ॥

रा० टी०–बुधस्येति । बुधस्य पुत्रः पुरूरवा अस्तीति शेषः तमभ्यागच्छ प्राप्नुहि स ते भर्ता भविष्यति ॥ २५ ॥

गो० टी०–अनेनेति । मानुषं लोकमास्थायेत्यनेन देव-रूपेणेवेति शेषः ॥ २४—२९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामा०भूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

२६–२९] ति० टी०–पुरूरवं पुरूरवसम् ॥ २६–२९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

१ पालस्येति गो.पा.। २ शिखेति गो.पा.। ३ ह्यपेति गो.पा.। ४ तस्मात्त्वमिति गो.पा.। ५ तमद्य गच्छेति गो.पा. । ६ यातेति गो.पा.। ७ भ्रान्त इति गो.पाठः

सप्तपञ्चाशः सर्गः ।

वसिष्ठस्य मित्रावरुणसंभवत्वकथा निमेश्च सर्वभूतनेत्रवृत्तित्वकथा जनकराजोत्पत्तिकथा च ।

तां श्रुत्वा दिव्यसंकाशां कथामद्भुतदर्शनाम् । लक्ष्मणः परमप्रीतो राघवं वाक्यमब्रवीत् ॥ १ ॥
निक्षिप्तदेहौ काकुत्स्थ कथं तौ द्विजपार्थिवौ । पुनर्देहेन संयोगं जग्मतुर्देवसंमतौ ॥ २ ॥
तस्य तद्भाषितं श्रुत्वा रामः सत्यपराक्रमः । तां कथां कथयामास वसिष्ठस्य महात्मनः ॥ ३ ॥
यः स कुम्भो रघुश्रेष्ठ तेजःपूर्णो महात्मनोः । तस्मिंस्तेजोमयौ विप्रौ संभूतावृषिसत्तमौ ॥ ४ ॥
पूर्वं समभवत्तत्र अगस्त्यो भगवानृषिः । नाहं सुतस्तवेत्युक्त्वा मित्रं तस्मादपाक्रमत् ॥ ५ ॥
तद्धि तेजस्तु मित्रस्य उर्वश्याः पूर्वमाहितम् । तस्मिन्समभवत्कुम्भे तत्तेजो यत्र वारुणम् ॥ ६ ॥

रा० टी०-तत इति । सा उर्वशी पुरूरवे पुरुरवःस्वामिके प्रतिष्ठाने पुरे पुरूरवसमभ्यगात् ॥ २६ ॥

रा० टी०-तस्येति । त्रिदिवेश्वरे इन्द्रे हृताय वज्रमुत्सृज्य श्रान्ते सन्तप्ते सति शतं वर्षसहस्राणि येनेंद्रत्वमिन्द्रराज्यं प्रशासितं स नहुषो यस्य पुत्रो बभूव स आयुः तदभिधः पुत्रः तस्य बुधस्य जज्ञे अर्द्धचतुष्टयमेकान्वयि ॥ २७-२८ ॥

रा० टी०-सेति । उर्वशी शापेन भूमिं जगाम अत एव बहूनि वर्षाणि अवसत् शापक्षयात् शापक्षयं प्राप्य इन्द्रसदनं इन्द्रस्य सभां ययौ च ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

१] ति० टी०-अथ तद्विसृष्टरेतःसकाशादेहोत्पत्तिप्रकारकथनम्—तामिति । दिव्यसंकाशां दिव्यरूपाम् ॥ १ ॥

रा० टी०-रामं प्रति लक्ष्मणस्य पुनः प्रश्नमाह—तामित्यादिभिः । लक्ष्मणः राघवमब्रवीत् ॥ १ ॥

गो० टी०-तामित्यादि । दिव्यसंकाशां दिव्यरूपाम्॥१॥

२] ति० टी०-निक्षिप्तदेहौ विसृष्टदेहौ पुनर्देहसंयोगं कथं जग्मतुः ॥ २ ॥

रा० टी०-तदाकारमाह—निक्षिप्तेति । निक्षिप्तदेहौ त्यक्तशरीरौ द्विजपार्थिवौ देहेन पुनः सयोगं कथं जग्मतुः॥२॥

गो० टी०-निक्षिप्तेति । निक्षिप्तदेहौ । कुम्भे वरुणतेजोविसर्जनमुक्तं तावता प्रकृष्टदेहसिद्धिप्रश्नो न दत्तोत्तर इति पुनः प्रश्नः कृत इति मन्तव्यम् ॥ २ ॥

३] ति० टी०-कुम्भे वरुणेन रेतोविसर्ग उक्तः । तावता देहसिद्धिप्रश्नोत्तरं न लब्धमिति पुनः प्रश्नः । तां कथां वसिष्ठस्य देहोत्पत्तिविषयामवशिष्टां कथाम् ॥ ३ ॥

रा० टी०-तस्येति । रामः वशिष्ठस्य कथां कथयामास ३

गो० टी०-तस्येति । तां कथां वसिष्ठस्य देहोत्पत्तिविषयिणीं कथाम् ॥ ३ ॥

४] ति० टी०-महात्मनोर्मित्रावरुणयोस्तेजःपूर्णः । अत्रैवमाख्यायिका—प्रथममुर्वशीं मित्रो दृष्ट्वा तामामन्त्रितवान् । तया च त्वन्निवासमागच्छामीत्युक्तस्तदा वरुणलोकस्थ एव मित्रस्तदर्शनाद्धटस्खलितं निजतेजः कुम्भ उत्सृज्य स्वं निवासं जगाम । पश्चाद्वरुणोऽपि तां दृष्ट्वा स्खलितं तेजः कुम्भे व्यसृजत् । ततो मित्रनिवासं गता मित्रेण शप्ता चेति ॥ ४ ॥

रा० टी०-य इति । महात्मनोर्मित्रावरुणयोस्तेजसा पूर्णः स प्रसिद्धो यः कुम्भस्तस्मिन्कुम्भे तेजोमयौ विप्रौ वसिष्ठागस्त्यौ सम्भूतौ समभूताम् ॥ ४ ॥

गो० टी०-यस्त्विति । तेजोमयौ निरवधिकतेजस्कौ॥४॥

५] ति० टी०-नाहं सुतस्तवेति । यद्यपि मित्रेणापि कुम्भे रेत उत्सृष्टं तथापि तवैवैकस्य पुत्रो न भवामीत्युक्त्वापाक्रमत् ॥ ५ ॥

रा० टी०-पूर्वमिति । तत्र तस्मिन् कुम्भे पूर्वमगस्त्यस्समभवत् अहं तव एव सुतो न वरुणस्याप्यस्मीत्यर्थः इति मित्रमुक्त्वा तस्मात् मित्रसमीपात् अपाक्रमत् ॥ ५ ॥

गो० टी०-पूर्वमिति । तत्र कुम्भे । पूर्वं वरुणतेजोनिधानात्पूर्वम् मित्रं प्रति नाहं तव सुत इत्युक्त्वा तस्मात्कुम्भादपाक्रमत् उदतिष्ठत ॥ ५ ॥

६] ति० टी०-एवमुक्तौ बीजमाह—तद्धि तेज इति । अगस्त्योत्पत्तिहेतुभूतं मित्रस्य तेज उर्वश्याः पूर्वमुर्वशीनिमित्तवरुणवीर्यविसर्गात्पूर्वमाहितम् तस्मिन्कुम्भे तस्मिन्नेव कुम्भे वारुणं तेजः समभवत्संगतमभवत् । यत्र कुम्भे तत्तेजो मित्रस्य तेज आसीत्, अतस्तेजोऽन्तरसंगतादुत्पत्तेर्नैकस्य तव सुत इत्युक्तमगस्त्येन, अत एव मैत्रावरुणिरित्यगस्त्यनाम ॥ ६ ॥

रा० टी०-अगस्त्यस्य प्रथमोत्पत्तौ निमित्तमाह-तदिति । यत्र वारुणं तेजः समभवत् प्राप्नोत् तस्मिन्कुम्भे उर्वश्याः सन्निधौ मित्रस्य तेजः पूर्वमाहितम् अतोऽगस्त्यः पूर्वमभवत् इति तात्पर्यम् ॥ ६ ॥

गो० टी०-निषेधस्य का वा प्रसक्तिरित्यत्राह—तद्धि तेज इति । उर्वश्या निमित्तभूतायाः । मित्रतेजस्तस्मिन् कुम्भे पूर्वम् उपरि आहितम् अर्पितं तस्मात्प्रतिषेधः कृत इति भावः

१ क्षिति गो. पाठः । २ ह्यगस्त्य इति गो. पाठः । ३ उर्वस्या इति गो. रा. पाठः

कस्यचित्त्वथ कालस्य मित्रावरुणसंभवः । वसिष्ठस्तेजसा युक्तो जज्ञे इक्ष्वाकुदैवतम् ॥ ७ ॥
तमिक्ष्वाकुर्महातेजा जातमात्रमनिन्दितम् । वव्रे पुरोधसं सौम्य वंशस्यास्य हिताय नः ॥ ८ ॥
एवं त्वपूर्वदेहस्य वसिष्ठस्य महात्मनः । कथितो निर्गमः सौम्य निमेः शृणु यथाभवत्[1] ॥ ९ ॥
दृष्ट्वा विदेहं राजानमृषयः सर्व एव ते । तं च ते याजयामासुर्यज्ञदीक्षां मनीषिणः ॥ १० ॥
तं च देहं नरेन्द्रस्य रक्षन्ति स्म द्विजोत्तमाः । गन्धैर्माल्यैश्च वस्त्रैश्च पौरभृत्यसमन्विताः ॥ ११ ॥
ततो यज्ञे समाप्ते तु भृगुस्तत्रेदमब्रवीत् । आनयिष्यामि ते चेतस्तुष्टोऽस्मि तव पार्थिव॥ १२ ॥
सुप्रीताश्च सुराः सर्वे निमेश्चेतस्तदाब्रुवन् । वरं वरय राजर्षे क्व ते चेतो निरूप्यताम् ॥ १३ ॥
एवमुक्तः सुरैः सर्वैर्निमेश्चेतस्तदाब्रवीत् । नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः ॥ १४ ॥

यद्वा पूर्ववरुणकाले उर्वश्या आहितं तेजः सखीसन्निधानात् असंभोगात्कुम्भे तत्र निक्षिप्तमिति भावः । अस्मिंस्तु पक्षे मित्रपदं मित्रावरुणपरम् । सर्वथा न मित्रावरुणतेजोजोऽगस्त्यः किन्तु कुम्भमात्रसंभवः । अत एव कुम्भसंभवः कलशीभव इत्यादिव्यवहारः । अयोनिजश्चायं कुम्भस्य मैत्रावरुणत्वात् मैत्रावरुणिरित्यपि व्यवहारः । क्वचित् वसिष्ठस्तु मैत्रावरुणतेजोज एवेत्याह-यस्मात्तेजस्तु मित्रस्योर्वश्यां पूर्वमाहितम् । तत्तेजो यत्र वारुणमिति । अन्ये त्वाहुः । नाहं सुतस्तवेत्यादि । पुत्रो न भवामीत्यर्थः । उत्तरस्य प्रसक्तिं दर्शयति-तद्धीति । अगस्त्यस्य उत्पत्तिबीजभूतं मित्रस्य तत्तेजः उर्वश्याः पूर्वमुर्वश्या निमित्ततः मित्रेण तस्मिन् कुंभे वरुणवीर्यविसर्जनात्पूर्वमेवाहितम् । तस्मिन्नेव कुम्भे वारुणमपि तेज उर्वशीनिमित्तकं समभवत् । तस्मात्रैकस्य तव सुत इत्युक्तम् अगस्त्येन । अत एव मैत्रावरुणिरित्यगस्त्यनाम कुम्भाजन्यत्वात्कुम्भसंभव इत्याहुः ॥ ६ ॥

७-८ ति० टी०-तदनन्तरं कस्यचित्कालस्य मित्रावरुणसंभवः । अत्रोपपतिरुक्ता—वसिष्ठो यज्ञे तेजसा युक्तो मित्रावरुणयोर्दिव्यतेजसा युक्तः॥ ७ ॥ ८ ॥

रा०टी०-कस्य चिदिति । कस्यचित्कालस्याथानन्तरम् मित्रावरुणसम्भवः मित्रावरुणयोस्संभवः पितृत्वसंभावना यस्य सः इक्ष्वाकुदैवतं वशिष्ठः जज्ञे ॥ ७ ॥

रा० टी०-तमिति । इक्ष्वाकुः नो वंशस्य हिताय तं वसिष्ठं पुरोधसं वव्रे ॥ ८ ॥

गो० टी०-कस्य चिदिति । अगस्त्योत्पत्तेः बहुकालानन्तरमित्यर्थः । मित्रावरुणयोस्तेज आविशेति पूर्वं ब्रह्मनियोगः ॥ ७ ॥ ८ ॥

९-१०] ति० टी०-अपूर्वदेहस्य नूतनदेहवतो वसिष्ठस्य निर्गम उत्पत्तिप्रकारः कथितः । यथा भवद्वृत्तान्त इति शेषः ॥ ९ ॥ १० ॥

रा० टी०-एवमिति । वसिष्ठस्यापूर्वदेहस्य निर्गमः कथितः अस्य निमेर्वृत्तमिति शेषः यथाऽभवत्तथा श्रुणु ॥ ९ ॥

रा०टी०-दृष्ट्वेति । ऋषयः राजानं विदेहं दृष्ट्वा अचिन्तयन् इति शेषः अत एव ते ऋषयः यज्ञदीक्षां गृहीत्वेति शेषः याजयामासुः ॥ १० ॥

गो० टी०-एवमिति । अपूर्वदेहस्य नूतनदेहस्य । निर्गमः उत्पत्तिः ॥ ९ ॥ १० ॥

११] ति० टी०-रक्षन्ति स्म । तैलकटाहे इति शेषः११

रा० टी०-तमिति । द्विजोत्तमा गंधादिभिः नरेन्द्रस्य देहं रक्षन्ति स्म ॥ ११ ॥

गो० टी०-तमिति । रक्षन्ति स्मेति तैलकटाहादाविति शेषः ॥ ११ ॥

१२] ति० टी०-भृगुस्तत्र । यज्ञसमाप्तिकाले इत्यर्थः । इदं वक्ष्यमाणम् । हे पार्थिव ! पार्थिवदेहाभिमानिप्रत्यगात्मन्, तव तुष्टोऽस्मि । अतस्ते चेतो जीवं देहे आनयिष्यामीत्यब्रवीत् ॥ १२ ॥

रा० टी०-तत इति । हे पार्थिव ! अहं तुष्टोस्मि अतः तव देहे इति शेषः चेतः चैतन्यं आनयिष्यामि भृगुः तत्राब्रवीत् ॥ १२ ॥

गो० टी०-तत इति । भृगुः तत्र तस्मिन् । यज्ञसमाप्तिकाल इत्यर्थः । इदं वक्ष्यमाणम् । हे पार्थिव ! देहाभिमानिप्रत्यगात्मन् । तव तुष्टोस्मि अतस्ते चेतः जीवमानयिष्यामि देह इत्यब्रवीत् ॥ १२ ॥

१३] ति० टी०-तथा सुप्रीताः सर्वे सुराश्च निमेश्चेत आनयिष्याम इत्यब्रुवन् । हे राजन्! वरं वरय । ते चेतः क्व निरूप्यताम् स्थाप्यतामिति चाब्रुवन् ॥ १३ ॥

रा० टी०-सुप्रीता इति । तदा भृगूक्तिसमये निमेश्चेतः प्रति सुप्रीतास्सुराः हे राजर्षे! वरं वरय ते चेतः क्व निरूप्यतां संस्थाप्यताम् इत्यब्रुवन् ॥ १३ ॥

गो० टी०-सुप्रीता इति । तदा सुप्रीताः सर्वे सुराश्च निमेश्चेत आनयिष्याम इत्यब्रुवन् । अथ हे राजर्षे ! वरं वरय ते चेतस्त्वाकृष्ट्वा क्व निरूप्यतां क्व स्थाप्यतामिति चाब्रुवन्निति संबन्धः क्व ते चेतो निरूप्यतामिति च पाठः ॥ १३ ॥

१४] ति० टी०-निमेश्चेतश्चेतोभिमानी प्रत्यगात्माब्रवीत् । योगवशाच्छिङ्गदेहेनैवेति भावः । किमब्रवीत्तदाह—सर्वभू-

१ भवेदिति गो. पाठः

बाढमित्येव विबुधा निमेश्चेतस्तदाब्रुवन्। नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि ॥ १५ ॥
त्वत्कृते च निमिष्यन्ति चक्षूंषि पृथिवीपते। वायुभूतेन चरता विश्रामार्थं मुहुर्मुहुः ॥ १६ ॥
एवमुक्त्वा तु विबुधाः सर्वे जग्मुर्यथागतम्। ऋषयोऽपि महात्मानो निमेर्देहं समाहरन् ॥ १७ ॥
अरणिं तत्र निक्षिप्य मथनं चक्रुरोजसा। मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा ॥ १८ ॥
अरण्यां मथ्यमानायां प्रादुर्भूतो महातपाः। मथनान्मिथिरित्याहुर्जननाज्जनकोऽभवत् ॥ १९ ॥
यस्माद्विदेहात्संभूतो वैदेहस्तु ततः स्मृतः। एवं विदेहराजश्च जनकः पूर्वकोऽभवत् ॥
मिथिर्नाम महातेजास्तेनायं मैथिलोऽभवत्। ॥ २० ॥
इति सर्वमशेषतो मया कथितं संभवकारणं तु सौम्य।
नृपपुंगव शापजं द्विजस्य द्विजशापाच्च यदद्भुतं नृपस्य। ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

तानां नेत्रेषु देहवर्तिसर्वस्थानेभ्यः सूर्यात्मकत्वेन प्रशस्ततया स्वयैवभवायुगपद्वसेयम् ॥ १४ ॥

रा० टी०–एवमिति। एवमुक्तः निमेश्चेतः सर्वभूतानां नेत्रेषु अहं वसेयमित्यब्रवीत् ॥ १४ ॥

गो० टी०–एवमिति। निमेश्चेतः चेतोभिमानी प्रत्यगात्मा तदाब्रवीत्। किमिति, सर्वभूतानां नेत्रेषु सर्वभूतवर्तिनेत्रेषु वैभवात् वसेयं न त्वेकस्मिन्नित्यर्थः ॥ १४ ॥

१५] ति० टी०–वायुभूतः। वायुसदृशलघुभूतलिङ्गदेहाश्रित इत्यर्थः ॥ १५ ॥

रा० टी०–बाढमिति। विबुधाः सर्वभूतानां नेत्रेषु बाढं चरिष्यसीति निमेश्चेतोऽब्रुवन् ॥ १५ ॥

गो० टी०–बाढमिति। वायुभूतः नागाद्युपवायुभूत इत्यर्थः ॥ १५ ॥

१६–१७] ति० टी०–निमिष्यन्ति निमेषधर्मं प्राप्स्यन्ति। चक्षूंषि। सर्वभूतानामिति शेषः। वायुभूतेन चरता त्वया करणेन विश्रामार्थं त्वत्संबन्धेन जायमानस्य खेदस्यापनोदार्थमित्यर्थः ॥ १६ ॥ १७ ॥

रा० टी०–त्वदिति। त्वत्कृते त्वत्स्थितिहेतुकश्रमे सति विश्रमार्थं वायुभूतेन त्वया सहितानि चक्षूंषि मुहुर्मुहुः निमिष्यन्ति ॥ १६ ॥

गो० टी०–त्वत्कृत इति। त्वत्कृते त्वदवस्थाननिमित्तं निमिष्यन्ति निमेषधर्मं प्राप्स्यन्ति। विश्रमार्थमिति। उन्मीलनखेदापनोदनार्थमित्यर्थः ॥ १६ ॥

रा० टी०–एवमिति। विबुधा यथागतं जग्मुः ऋषयस्तु निमेर्देहं समाहरन् जगृहुः ॥ १७ ॥

गो० टी०–एवमिति। देहं केवलमित्यर्थः ॥ १७ ॥

१८–१९] ति० टी०–तत्र यज्ञभूमावरणिं निक्षिप्य निमेर्देहमेवारणिं कृत्वा। मन्त्रहोमैः पुत्रीयमन्त्रपूर्वकहोमैः ॥ १८ ॥ १९ ॥

रा० टी०–अरणिमिति। महात्मानो मुनयः पुत्रहेतोः मन्त्रहोमैः अरणिं तत्र निमिशरीरे निक्षिप्य मन्थनं चक्रुः ॥ १८ ॥

गो० टी०–अरणिमिति। मन्त्रहोमैः पोत्रीयमन्त्रहोमैः। तादृशमन्त्रपूर्वकहोमैरित्यर्थः ॥ १८ ॥

रा० टी०–अरण्यामिति। अरण्यां मथ्यमानायां सत्यां महातपाः सुतः प्रादुर्भूतः मथनात् हेतोर्मिथिरित्याहुः जननात् अद्भुतजनेर्हेतोः जनकोऽभवत् ॥ १९ ॥

गो० टी०–अरण्यामिति। विदेहाद्विगतो देहो विदेहः तस्मात्संभूतो वैदेहः जनकः ॥ १९ ॥ २० ॥

इति श्रीगोविन्द० श्रीरामा० मणिमुकुटाख्याने उत्तरश्रीरामायण० सप्तपञ्चाशः सर्गः ॥ ५७ ॥

२०–२१] ति० टी०–विदेहाद्विगतचेतोदेहात्। अयं जनकवंशः ॥ २० ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

रा० टी०–यस्मादिति। यस्मात् विदेहात् प्राणवियुक्तदेहात् संभूतः ततः तस्मात् वैदेहः स्मृतः एवमनेन प्रकारेणमिथिर्नाम जनकः पूर्वकः प्रथमोऽभवत् तेन हेतुना अयं मिथिवंशः मैथिलोऽभवत् सार्द्धश्लोक एकान्वयी ॥ २० ॥

रा० टी०–इतीति। नृपपुंगवशापजम् द्विजस्य यदद्भुतं शरीरत्यागः द्विजशापाच्च नृपस्य यदद्भुतम् तच्च संभवस्य पुनर्जन्मनः कारणं च अशेषतो मया कथितम् ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

१ विश्रमेति गो. रा. पाठः। २ इदं पद्यं गो. पु. नास्ति।

अष्टपञ्चाशः सर्गः ।

देवयान्यवमानसंदीपितक्रोधानलेन भार्गवेण नाहुषाय ययातये दत्तो जराप्राप्तिशापः ।

एवं ब्रुवति रामे तु लक्ष्मणः परवीरहा । प्रत्युवाच महात्मानं ज्वलन्तमिव तेजसा ॥ १ ॥
महदद्भुतमाश्चर्यं विदेहस्य पुरातनम् । निर्वृत्तं राजशार्दूल वसिष्ठस्य मुनेश्च ह ॥ २ ॥
निमिस्तु क्षत्रियः शूरो विशेषेण च दीक्षितः । न क्षमं कृतवान्राजा वसिष्ठस्य महात्मनः ॥ ३ ॥
एवमुक्तस्तु तेनायं रामैः क्षत्रियपुंगवः । उवाच लक्ष्मणं वाक्यं सर्वशास्त्रविशारदम् ॥ ४ ॥
रामो रमयतां श्रेष्ठो भ्रातरं दीप्ततेजसम् । न सर्वत्र क्षमा वीर पुरुषेषु प्रदृश्यते ॥ ५ ॥
सौमित्रे दुःसहो रोषो यथा क्षान्तो ययातिना । सत्त्वानुगं पुरस्कृत्य तन्निबोध समाहितः ॥ ६ ॥
नहुषस्य सुतो राजा ययातिः पौरवर्धनः । तस्य भार्याद्वयं सौम्य रूपेणाप्रतिमं भुवि ॥ ७ ॥
एका तु तस्य राजर्षेर्नाहुषस्य पुरस्कृता । शर्मिष्ठा नाम दैतेयी दुहिता वृषपर्वणः ॥ ८ ॥
अन्या तूशनसः पत्नी ययातेः पुरुषर्षभ । न तु सा दयिता राज्ञो देवयानी सुमध्यमा ॥ ९ ॥
तयोः पुत्रौ तु संभूतौ रूपवन्तौ समाहितौ । शर्मिष्ठाजनयत्पूरुं देवयानी यदुं तदा ॥ १० ॥

१] ति० टी०–अथ लक्ष्मणस्य ब्राह्मणं प्रति शापायुक्तत्वशङ्कायां तादृशक्षमाशीला अपि सन्तीत्याह प्रसङ्गादामः—**एवं ब्रुवतीति** ॥ १ ॥

रा० टी०–रामं प्रति लक्ष्मणस्योक्तिमाह–**एवमित्यादिभिः** । तेजसा ज्वलन्तमिव महात्मानं रामं लक्ष्मणः प्रत्युवाच ॥ १ ॥

२] ति० टी०–**महदिति** । मुनेर्वसिष्ठस्य । मुनेः सह प्रसङ्ग इति शेषः ॥ २ ॥

रा० टी०–तदाकारमाह–**महदिति द्वाभ्याम्** । अद्भुतम् अत् सर्वत्र प्राप्ता भूः चिन्तनं यस्य तत्र हेतुः तम् अमृतप्रायम् अत एव आश्चर्यम् विदेहस्य वशिष्ठस्य च निर्वृत्तं चरितमस्तीति शेषः ॥ २ ॥

गो० टी०–**महदिति** । पुण्यश्रवणत्वेन महदद्भुतम् । आश्चर्यादप्याश्चर्यमित्यर्थः । निमेः सहेति । प्रसङ्ग इति शेषः ॥२॥

३–५] ति० टी०–न क्षमं कृतवान् । अनुचितमेव कृतवानित्यर्थः ॥ ३–५ ॥

रा० टी०–**निमिरिति** । दीक्षितो निमिः वशिष्ठस्य क्षमं क्षमा यथा भवति तथा न कृतवान् एतेन निमिना क्षन्तव्यमिति सूचितम् ॥ ३ ॥

रा० टी०–**एवमिति** । रामः सर्वाभिरामदाता अत एव रमयतां श्रेष्ठो रामः लक्ष्मणमुवाच सार्द्धश्लोक एकान्वयी ॥ ४ ॥

रा० टी०–तदाकारमाह–**नेत्यादिभिः** । यथा ययातिना सत्त्वानुगं सत्त्वगुणानुसारिपन्थानं पुरस्कृत्य दुस्सहो रोषं क्षान्तः तथा क्षमा सर्वत्र पुरुषेषु न प्रदृश्यते अतः ययातिचरितं समाहितस्त्वं **निबोध** शृणु सार्द्धश्लोक एकान्वयी ॥५॥६॥

गो० टी०–**निमिरिति** । महात्मनि वसिष्ठे विषये कथं धार्मिकः निमिः अमर्षं चकारेति पृष्टवन्तं लक्ष्मणं प्रति ययातिक्षमाकथनम् " आप्तान् पृष्टः कोविदारानाचष्टे" इति न्यायं कथं नानुसरेत् । मैवं महान् दोषः । चिन्तायाः अकर्तव्याभिप्रायात् । गुणवतो गुणकीर्तनस्य ॥ ३ ॥ ५ ॥

६] ति० टी०–सत्त्वानुगं सत्त्वगुणानुगतम् । मार्गमिति शेषः । पुरस्कृत्यावलम्ब्य तं प्रकारं निबोध ॥ ६ ॥

गो० टी०–**सौमित्र इति** । यथा येन प्रकारेण । सत्त्वानुगं सत्त्वगुणानुमतम् । मार्गमिति शेषः । तं प्रकारं निबोध ॥ ६ ॥ ७ ॥

७] ति० टी०–पौरान्वर्धयतीति पौरवर्धनः ॥ ७ ॥

रा० टी०–तच्चरितमेवाह–**नहुषस्येत्यादिभिः** । नहुषस्य सुतः ययातिरभवदिति शेषः तस्य ययातेः रूपेण अप्रतिमम् असदृशम् भार्याद्वयमासीत् ॥ ७ ॥

८] ति० टी०–पुरस्कृता पूजिता । दैतेयी दितेः पौत्री८

रा० टी०–**एकेति** । वृषपर्वणो दुहिता शर्मिष्ठा नामैका भार्या नाहुषस्य ययातेः पुरस्कृता आदृतेत्यर्थः ॥ ८ ॥

गो० टी०–**एकेति** । पुरस्कृता पूजिता । दैतेयी दितेः पुत्री ॥ ८ ॥

९–१०] ति० टी०–अन्या तूशनसः सुता ययातेः पत्नी देवयानी, सा तु न दयिता नेष्टा ॥ ९ ॥ १० ॥

रा० टी०–**अन्येति** । अन्या उशनसः कन्येति शेषः देवयानी ययातेः पत्नी अभवत् सा देवयानी राज्ञो ययातेर्दयिता प्रिया नाभवदिति शेषः ॥ ९ ॥

रा० टी०–**तयोरिति** । शर्मिष्ठा पूरुमजनयत् देवयानी तु यदुमजनयत् तयोः पुत्रौ रूपवन्तौ संभूतौ ॥ १० ॥

गो० टी०–**अन्येति** । उशनसः शुक्रस्य ॥ ९–१९ ॥

१ निमेः सहेति गो. पाठः । २ क्षमामिति गो. पा. । ३ श्रीमानिसि गो. पा.

पूरुस्तु दयितो राज्ञो गुणैर्मातृकृतेन च । ततो दुःखसमाविष्टो यदुर्मातरमब्रवीत् ॥ ११ ॥
भार्गवस्य कुले जाता देवस्याक्लिष्टकर्मणः । सहसे हृद्गतं दुःखमवमानं च दुःसहम् ॥ १२ ॥
आवां च सहितौ देवि प्रविशाव हुताशनम् । राजा तु रमतां सार्धं दैत्यपुत्र्या बहुक्षपाः ॥ १३ ॥
यदि वा सहनीयं ते मामनुज्ञातुमर्हसि । क्षम त्वं न क्षमिष्येऽहं मरिष्यामि न संशयः ॥ १४ ॥
पुत्रस्य भाषितं श्रुत्वा परमार्तस्य रोदतः । देवयानी तु संक्रुद्धा सस्मार पितरं तदा ॥ १५ ॥
इङ्गितं तदभिज्ञाय दुहितुर्भार्गवस्तदा । आगतस्त्वरितं तत्र देवयानी स्म यत्र सा ॥ १६ ॥
दृष्ट्वा चाप्रकृतिस्थां तामप्रहृष्टामचेतनाम् । पिता दुहितरं वाक्यं किमेतदिति चाब्रवीत् ॥ १७ ॥
पृच्छन्तमसकृत्तं वै भार्गवं दीप्तचेतसम् । देवयानी तु संक्रुद्धा पितरं वाक्यमब्रवीत् ॥ १८ ॥
अहमग्निं विषं तीक्ष्णमपो वा मुनिसत्तम । भक्षयिष्ये प्रवेक्ष्ये वा न तु शक्ष्यामि जीवितुम्॥१९॥
न मां त्वमवजानीषे दुःखितामवमानिताम् । वृक्षस्यावज्ञया ब्रह्मंश्छिद्यन्ते वृक्षजीविनः ॥ २० ॥
अवज्ञया च राजर्षेः परिभूय च भार्गव । मय्यवज्ञां प्रयुङ्क्ते हि न च मां बहु मन्यते ॥ २१ ॥
तस्यास्तद्वचनं श्रुत्वा कोपेनाभिपरिप्लुतः । व्याहर्तुमुपचक्राम भार्गवो नहुषात्मजम् ॥ २२ ॥
यस्मान्मामवजानीषे नाहुष त्वं दुरात्मवान् । वर्यसा जरया जीर्णः शैथिल्यमुपयास्यसि ॥ २३ ॥
एवमुक्त्वा दुहितरं समाश्वास्य स भार्गवः । पुनर्जगाम ब्रह्मर्षिर्भवनं स्वं महायशाः ॥ २४ ॥

स एवमुक्त्वा द्विजपुंगवाग्र्यः सुतां समाश्वास्य च देवयानीम् ।
पुनर्ययौ सूर्यसमानतेजा दत्त्वा च शापं नहुषात्मजाय ॥ ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

११-१३] ति० टी०-मातृकृतेन । राजप्रियमातृत्वेनेति शेषः ॥ ११-१३ ॥

रा० टी०-पूरुरिति । गुणैः मातृकृतेन पितृप्रेमास्पदीभूतमातृपुत्रत्वेन च पूरुस्तु राज्ञो ययातेः दयितः प्रियोऽभवत् ततः तस्माद्धेतोर्यदुर्मातरमब्रवीत् ॥ ११ ॥

रा० टी०-तदाकारमाह-भार्गवस्येत्यादिभिः । भार्गवस्य कुले जाता त्वं दुस्सहमवमानं पतिकृततिरस्क्रियामत एव हृदि गतं दुःखं सहसे ॥ १२ ॥

रा० टी०-आवामिति । हे देवि! आवां हुताशनं वह्निं प्रविशाव राजा तु दैत्यपुत्र्या सार्धं बहुक्षपा बहुरात्रीः रमताम् ॥ १३ ॥

१४-१५] ति० टी०-मामनुज्ञातुमर्हसि । अग्निप्रवेशार्थमिति शेषः ॥ १४ ॥ १५ ॥

रा० टी०-यदीति । यदि ते सहनीयं तर्हि मामेव अनुज्ञातुमर्हसि हुताशनप्रवेशायेति शेषः अहं मरिष्याम्येव ॥ १४ ॥

रा० टी०-पुत्रस्येति । देवयानी पितरं संस्मार ॥ १५ ॥

१६] ति० टी०-' इङ्गितम्' इति पाठे सखेदरोषभावमित्यर्थः । ' ईप्सितम्' इति पाठान्तरम् ॥ १६ ॥

रा० टी०-इङ्गितमिति । भार्गवः दुहितुरिङ्गितमभिप्रायमभिज्ञाय यत्र देवयानी तत्र त्वरितमागतः ॥ १६ ॥

गो० टी०-इङ्गितमिति । इङ्गितं सखेदरोषभावम् ॥१६॥

१७-१९] ति० टी०-अप्रकृतिस्थामस्वस्थाम् । अप्रहृष्टां हर्षहीनाम् । अचेतनां क्षुभितचित्ताम् ॥ १७-१९ ॥

रा० टी०-दृष्ट्वेति । अप्रहृष्टां हर्षरहिताम् अत एव अप्रकृतिस्थां स्वभावेनानवस्थितां दुहितरं दृष्ट्वा एतत् हर्षाभावादि किं किंनिमित्तकमिति पितात्रवीत् दुःखहेतुम् पृच्छदित्यर्थः ॥१७॥

रा० टी०-पृच्छन्तमिति । पृच्छन्तं पितरं देवयान्यब्रवीत् ॥ १८ ॥

गो० टी०-दृष्ट्वेति । अप्रकृतिस्थामस्वस्थामप्रहृष्टां हर्षरहिताम् । अचेतनां क्षुभितचित्ताम् ॥ १७ ॥ १८ ॥

रा० टी०-तदाकारमाह—अहमित्यादिभिः । अहं जीवितुं न शक्ष्यामि अतः अन्यान्यतमं यथासम्भवं भक्षयिष्ये प्रवेक्ष्ये वा अग्नाविति योग्यप्रत्यासत्तिभ्यां लब्धम् ॥ १९ ॥

गो० टी०-अहमिति । अग्निं प्रवेक्ष्यामि विषं भक्षयिष्य इति संबन्धः ॥ १९ ॥

२०-२५] ति० टी०-दुःखितामपमानितां मां त्वं न जानीषे न जानासि । अवप्रयोगो धात्वर्थमात्रे आर्षः । इदं च मदवमाननं राज्ञस्त्वदवगणनमूलमेवेत्यन्यापदेशेनाह-वृक्षस्येति । वृक्षस्यावज्ञया त्रोटनादिलक्षणया वृक्षजीविनो वृक्षाश्रितपुष्पपत्रादयश्छिद्यन्ते नाश्यन्ते ॥ प्रकृते किं तत्राह—

१ त्विति गो. पा. । २ प्रवेक्ष्यामीति गो. पा. । ३ परिप्लुत इति गो. पा. । ४ जरया परयेति गो. पा.

एकोनषष्टितमः सर्गः ।

स्वपुत्रात्पूरोर्जराविनिमयेन ययातेस्तारुण्यप्राप्तिः महता कालेन भोगतृष्णाव्यावृत्तेः पुनः पूरोर्यथापूर्वं तारुण्यप्राप्तिस्तस्यैव च राज्येऽभिषेकः यदवे ययातिदत्तशापश्च ।

श्रुत्वा तूशनसं क्रुद्धं तदार्तो नहुषात्मजः । जरां परमिकां प्राप्य यदुं वचनमब्रवीत् ॥ १ ॥
यदो त्वमसि धर्मज्ञो मदर्थं प्रतिगृह्यताम् । जरां परमिकां पुत्र भोगै रंस्ये महायशः ॥ २ ॥
न तावत्कृतकृत्योऽस्मि विषयेषु नरर्षभ । अनुभूय तदा कामं ततः प्राप्स्याम्यहं जराम् ॥ ३ ॥
यदुस्तद्वचनं श्रुत्वा प्रत्युवाच नरर्षभम् । पुत्रस्ते दयितः पूरुः प्रतिगृह्णातु वै जराम् ॥ ४ ॥
बहिष्कृतोऽहमर्थेषु संनिकर्षाच्च पार्थिव । प्रतिगृह्णातु वै राजन्यैः सहाश्नासि भोजनम् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राजा पूरुमथाब्रवीत् । इयं जरा महाबाहो मदर्थं प्रतिगृह्यताम् ॥ ६ ॥
नाहुषेणैवमुक्तस्तु पूरुः प्राञ्जलिरब्रवीत् । धन्योऽस्म्यनुगृहीतोऽस्मि शासनेऽस्मि तव स्थितः ७ ॥

हे भार्गव ! राजर्षेस्त्वय्यवज्ञया हेतुभूतया मां परिभूय मय्यवज्ञां प्रयुङ्क्ते ॥ २० ॥ –२५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टपञ्चाशः सर्गः ॥ ५८ ॥

रा० टी०-नेति । अपमानिताम् अत एव दुःखितां मां त्वं नावजानीषे जानासि नन्तु तव पुत्रादीनां सुखित्वे किं तवापमानेनेत्यत आह वृक्षस्य अवज्ञया तत्पूर्वकच्छेदेन वृक्षजीविनः तदवयवा अपि छिद्यन्ते एतेन मदवमानेनैव पुत्रादयोप्यवमानिता इति सूचितम् ॥ २० ॥

गो०टी०-नेति । दुःखितामवमानितां नावजानीषे न जानीषे न जानासि । अवोपसर्गो धात्वर्थमात्रे वर्तते । अन्यापदेशेनाह–वृक्षस्येति । वृक्षस्यावज्ञया छेदनादिना वृक्षजीविनः पत्रपुष्पादयश्छिद्यन्ते ॥ २० ॥

रा० टी०-अवज्ञयेति । राजर्षेः अवज्ञया परिभूय अस्मदीयाननादृत्य मयि अवज्ञां प्रयुङ्क्ते अत एव मां न बहु मन्यते एतेन अस्मदनादरेण तवाप्यनादरो जात एवेति सूचितम् ॥२१॥

रा० टी०-तस्या इति । भार्गवः नहुषात्मजं ययातिं व्याहर्तुं शप्तुमुपचक्राम ॥ २२ ॥

रा० टी०-शापाकारमाह—यस्मादिति । यस्मान्मामवजानीषे तस्मात् जरया वयसा जीर्णस्त्वं शैथिल्यमुपयास्यसि ॥ २३ ॥

रा० टी०-एवमिति । भार्गवः स्वभवनं जगाम ॥ २४ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—स इत्यादिभिः । स उशना नहुषात्मजाय शापं दत्त्वा पुनर्ययौ ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

गो० टी०-तदेवोपपादयति–अवज्ञयेत्यादि । हे भार्गव ! राजर्षिस्त्वय्यवज्ञया हेतुभूतया मां परिभूय मय्यवज्ञां प्रयुङ्क्ते । अवज्ञाय स राजर्षिः परिभूय च भार्गवमिति पाठे भार्गवविषयावमानाबहुमानाभ्यां मय्यवज्ञानबहुमानाभावं करोतीत्यर्थः ॥ २१–२५ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

१–४] **ति० टी०-अथ शापसहनमाह—श्रुत्वेति** । जरां पलितताम्रुशनःप्रसादादन्यत्र संक्रमयोग्यां प्राप्य । यदुं देवयानीपुत्रम् ॥ १–४ ॥

रा० टी०-उशनोगमनानन्तरकालिकं वृत्तमाह—श्रुत्वेत्यादिभिः । नहुषात्मजः परमिकां जरां प्राप्य यदुमब्रवीत् १

रा० टी०-तदाकारमाह—यदो इत्यादिभिः । अहं भोगैस्तत्साधनैः स्त्रीभिः रंस्ये अतः परमिका मे जरा मदर्थं मद्भोगसिद्धये त्वया प्रतिगृह्यतां तत्र हेतुः यतस्त्वं धर्मज्ञोऽसि २

रा० टी०-रमणे हेतुमाह—नेति । विषयेषु अहं न कृतकृत्योऽस्मि अतः कामं यथेच्छमनुभूय जरां प्राप्स्यामि पुनर्ग्रहीष्यामीत्यर्थः ॥ ३ ॥

रा० टी०-यदुरिति । यदुः प्रत्युवाच तदाकारमाह—**पुत्र इति** । पूरुः पुत्रः ते दयितः प्रियः अतः जरां प्रतिगृह्य तिष्ठत्विति शेषः ॥ ४ ॥

गो० टी०-श्रुत्वेत्यादि॥ १–४ ॥

५–७] **ति० टी०-संनिकर्षाच्च** समीपावस्थानोपलालनादिकृत्याच्च **बहिष्कृतः** ॥५–७॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह—बहिरिति । अर्थेषु अर्थेभ्यः सन्निकर्षात् सामीप्याच्च अहं बहिष्कृतः अतः यैः सह भोजनमन्नमश्नासि तेभ्यः प्रतिगृह्णातु ॥ ५ ॥

रा० टी०-तस्येति । इयं जरा त्वया प्रतिगृह्यताम् इति वचनम् राजा पूरुमब्रवीत् ॥ ६ ॥

१ परिमितामिति गो. पा. । २ कः सहाश्नातीति गो. पा.

पूरोर्वचनमाज्ञाय नाहुषः परया मुदा । प्रहर्षमतुलं लेभे जरां संक्रामयच्च ताम् ॥ ८ ॥
ततः स राजा तरुणः प्राप्य यज्ञान्सहस्रशः । बहुवर्षसहस्राणि पालयामास मेदिनीम् ॥ ९ ॥
अथ दीर्घस्य कालस्य राजा पूरुमथाब्रवीत् । आनयस्व जरां पुत्र न्यासं निर्यातयस्व मे ॥ १० ॥
न्यासभूता मया पुत्र त्वयि संक्रामिता जरा । तस्मात्प्रतिग्रहीष्यामि तां जरां मा व्यथां कृथाः॥११॥
प्रीतश्चास्मि महाबाहो शासनस्य प्रतिग्रहात् । त्वां चाहमभिषेक्ष्यामि प्रीतियुक्तो नराधिपम् ॥१२॥
एवमुक्त्वा सुतं पूरुं ययातिर्नहुषात्मजः । देवयानीसुतं क्रुद्धो राजा वाक्यमुवाच ह ॥ १३ ॥
राक्षसस्त्वं मया जातः क्षत्ररूपो दुरासदः । प्रतिहंसि ममाज्ञां त्वं[1] प्रजार्थे विफलो भव ॥ १४ ॥
पितरं गुरुभूतं मां यस्मात्त्वमवमन्यसे । राक्षसान्यातुधानांस्त्वं जनयिष्यसि दारुणान्॥१५॥
न तु सोमकुलोत्पन्ने वंशे स्थास्यति दुर्मतेः । वंशोऽपि भवतस्तुल्यो दुर्विनीतो भविष्यति ॥ १६ ॥
तमेवमुक्त्वा राजर्षिः पूरुं राज्यविवर्धनम् । अभिषेकेण संपूज्य आश्रमं प्रविवेश ह ॥ १७ ॥
ततः कालेन महता दिष्टान्तमुपजग्मिवान् । त्रिदिवं स[2] गतो राजा ययातिर्नहुषात्मजः ॥ १८ ॥
पूरुश्चकार तद्राज्यं धर्मेण महता वृतः । प्रतिष्ठाने पुरवरे काशिराज्ये महायशाः ॥ १९ ॥
यदुस्तु जनयामास यातुधानान्सहस्रशः । पुरे क्रौञ्चवने दुर्गे राजवंशबहिष्कृ[3]ते ॥ २० ॥

रा० टी०–नाहुषेणेति । अहं तव शासने आज्ञायां स्थितोऽस्मि अतः धन्योऽस्मि इति वचनम् पूरुरब्रवीत् ॥ ७ ॥

गो० टी०–बहिष्कृत इति । सन्निकर्षात् समीपावस्थापनादिकृत्याच्च बहिष्कृतः ॥ ९–७ ॥

८–१०] ति० टी०–जरां संक्रामयदसंक्रामयत् । योगबलादिति शेषः ॥ ८–१० ॥

रा० टी०–पूरोरिति । नाहुषः प्रहर्षं लेभे अत एव जरां संक्रामयत् समक्रामयत् योगबलेन स्वशरीरात्संगृह्य पूरुशरीरे समस्थापयत् ॥ ८ ॥

रा० टी०–तत इति । तरुणः स नाहुषः सहस्रशो यज्ञान् प्राप्य कृत्वा मेदिनीं पालयामास ॥ ९ ॥

रा० टी०–अथेति । दीर्घस्य कालस्य अपगमे इति शेषः राजा नाहुषः पूरुमब्रवीत् तदाकारमाह न्यासं जरां निर्यातयस्व निःसारयस्व आनयस्व मां प्रापयस्व च ॥ १० ॥

गो० टी०–पूरोरिति । जरां संक्रामयदिति । योगबलादिति शेषः ॥ ८–१० ॥

११–१३] ति० टी०–[1] तस्मात्पूरो मया जातः प्रतिदेहि जरां मम[2] इति पाठे यस्मान्मया न्यासभूता जरा त्वयि संक्रामिता तस्मान्मया जातः । मत्तो जात इत्यर्थः ॥११–१३

रा० टी०–न्यासेति । जरा न्यासभूता सती त्वयि मया संक्रामिता प्रापिता तस्मात् जरां प्रतिग्रहीष्यामि अतः व्यथां मा कृथाः ॥ ११ ॥

रा० टी०–प्रीत इति । शासनस्य ममाज्ञायाः प्रतिग्रहाद्धेतोः अहं प्रीतोस्मि अतः प्रीतियुक्तोहं त्वां नराधिपमभिषेक्ष्यामि ॥ १२ ॥

रा०टी०–एवमिति । ययातिः देवयानीसुतं यदुमब्रवीत्[3]

गो० टी०–न्यासभूतेति । हे पुत्र ! त्वयि मया संक्रामिता जरा तस्मान्मया जातः ॥ ११–१३ ॥

१४–१५] ति० टी०–प्रजार्थं प्रजानामाधिपत्यलक्षणे प्रयोजने विफलो भव । राज्याधिपत्यरहितो भवेत्यर्थः१४।१५

रा० टी०–तदाकारमाह—राक्षस इति । क्षत्ररूपस्त्वं राक्षसो जातः अत एव यस्त्वं ममाज्ञां प्रतिहंसि स त्वं प्रजार्थे विफलो भव राज्यरहितो भवेत्यर्थः ॥ १४ ॥

रा० टी०–तत्र हेतुं वदन्नाह—पितरमिति । यस्मात् मामवमन्यसे तस्मात् राक्षसान् यातुधानान् तद्भिशेषांश्च जनयिष्यसि ॥ १५ ॥

गो०टी०–राक्षस इति । प्रजार्थे विफलो भवेति प्रजया पुत्रेण पितुः सकाशात्प्राप्यार्थः राज्याधिलक्षणरूपः तस्मिन्विफलः उक्तप्रयोजनरहित इत्यर्थः ॥ १४ ॥ १५ ॥

१६] ति० टी०–दुर्मतेस्तव । संतान इति शेषः । योऽप्यराक्षसस्तव संतानः सोऽपि क्षत्रियमात्रमेव, न तु सोमवंशराजपदाभिषिक्तः । भवत्तुल्यदुर्विनीतत्वादिति भावः ॥१६॥

रा० टी०–नेति । सोमकुलोत्पन्ने वंशे त्वं न स्थास्यसि राजत्वेनेति शेषः भवतः वंशोपि दुर्विनीतः भविष्यति ॥ १६ ॥

गो० टी०–न त्विति । त्वयेति शेषः ॥ १६–२० ॥

१७–२०] ति० टी०–आश्रमं वानप्रस्थाश्रमम् १७–२०

रा० टी०–तमिति । राजर्षिः पूरुमभिषेकेन संपूज्य सत्कृत्य आश्रमं वानप्रस्थं प्रविवेश ॥ १७ ॥

रा० टी०–तत इति । ययातिः दिष्टान्तं प्रारब्धभोगपर्यवसानम् जग्मिवान् अत एव त्रिदिवं गतः ॥ १८ ॥

रा० टी०–पूरुरिति । प्रतिष्ठाने अतिप्रतिष्ठिते पुरवरे काशिराज्ये स्थितः पूरुः राज्यं चकार ॥ १९ ॥

---

१ यदिति गो. पा. । २ समिति गो. पा. । ३ कृतः इति गो. रा. पा. ।

एष तूशनसा मुक्तः शापोत्सर्गो ययातिना । धारितः क्षत्रधर्मेण यं निमिश्चक्षमे न च ॥ २१ ॥
एतत्ते सर्वमाख्यातं दर्शनं सर्वकारिणाम् । अनुवर्तामहे सौम्य दोषो न स्याद्यथा नृगे ॥ २२ ॥
इति कथयति रामे चन्द्रतुल्याननेन प्रविरलतरतारं व्योम जज्ञे तदानीम् ।
अरुणकिरणरक्ता दिग्बभौ चैव पूर्वा कुसुमरसविमुक्तं वस्त्रमागुण्ठितेव । ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनषष्टितमः सर्गः ॥ ५९१ ॥[1]

रा० टी०–यदुरिति । राजवंशबहिष्कृतो यदुः पुरे कौञ्चवने च सहस्रशो यातुधानान् जनयामास ॥ २० ॥

२१] ति० टी०–यमृषिशापं निमिर्न चक्षमे न क्षान्तवान् । तादृश उशनसा मुक्तः शापोत्सर्गो महाशापो ययातिना धारितः ॥ २१ ॥

रा० टी०–एष इति । यं शापं निमिर्न चक्षमे सः उशनसा मुक्तः शापोत्सर्गः महाशापः ययातिना धारितः ॥ २१ ॥

गो० टी०–ययातिवृत्तान्तप्रतिपादनस्य प्रकृतोपयोगमाह–एष तूशनसेति । यमृषिशापं निमिर्न चक्षमे तादृशः शापो ययातिना धारित इत्यर्थः ॥ २१ ॥

२२] ति० टी०–एतत्ते सर्वं प्रजाकार्यानवलोकने शापः केषांचित्तदक्षमा केषांचिल्लक्षमेत्यादिकं सर्वमाख्यातम् । अतः कारः कृत्यं तत्रेषामस्ति ते कारिणस्तेषां कार्यापेक्षिणां सर्वेषां दर्शनमनुवर्तामहेऽङ्गीकुर्मः । यथा नृगे दोषो जातस्तथा दोषो मम न स्याच्च भवेदित्येतदर्थमित्यर्थः ॥ २२ ॥

रा० टी०–एतदिति । यथा नृगे दोषः तथा न स्यादतः सर्वेषां कारिणां सद्वस्तुप्रयोजनवताम् दर्शनमीदृगज्ञानं यथा भवति तथानुवर्त्तामहे एतत्सर्वमाख्यातं कथितम् ॥ २२ ॥

गो० टी०–एतदिति । कारः कृत्यमेषामस्तीति कारिणः । कार्यापेक्षिण इत्यर्थः ॥ २२ ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

२३] ति० टी०–विमुक्तं युक्तम् ॥ २३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

रा० टी०–इतीति । चन्द्रतुल्यानने रामे इति कथयति सति व्योम आकाशं प्रविरलतरा तारा यस्मिन् तद्वज्ञे बभूव अत एव अरुणकिरणरक्ता पूर्वा दिक् कुसुमरसविमुक्तं वस्त्रमागुण्ठिता धृतवतीव बभौ ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

१ एतदुत्तरं श्यामातुराख्यानं गृध्रोलूकाख्यानं च क्वचिद्दृश्यते. तत्तीर्थकृतकाग्रस्पृष्टत्वेन प्रक्षिप्तमिति तिलककारेणापि न व्याख्यातम्. तच्च—

ततः प्रभाते विमले कृत्वा पौर्वाह्णिकीं क्रियाम् । धर्मासनगतो राजा रामो राजीवलोचनः ॥ १ ॥
राजधर्मानवेक्षन्वै ब्राह्मणैर्नैगमैः सह । पुरोधसा वसिष्ठेन ऋषिणा कश्यपेन च ॥ २ ॥
मन्त्रिभिर्व्यवहारज्ञैस्तथान्यैर्धर्मपाठकैः । नीतिज्ञैरथ सभ्यैश्च राजभिः सा सभा वृता ॥ ३ ॥
सभा यथा महेन्द्रस्य यमस्य वरुणस्य च । शुशुभे राजसिंहस्य रामस्याक्लिष्टकर्मणः ॥ ४ ॥
अथ रामोऽब्रवीत्तत्र लक्ष्मणं शुभलक्षणम् । निर्गच्छ त्वं महाबाहो सुमित्रानन्दवर्धन ॥ ५ ॥
कार्यार्थिनश्च सौमित्रे व्याहर्तुं त्वमुपाक्रम । रामस्य भाषितं श्रुत्वा लक्ष्मणः शुभलक्षणः ॥ ६ ॥
द्वारदेशमुपागम्य कार्यिणश्चाह्वयत्स्वयम् । न कश्चिदब्रवीत्तत्र मम कार्यमिहाद्य वै ॥ ७ ॥
नाधयो व्याधयश्चैव रामे राज्यं प्रशासति । पक्वसस्या वसुमती सर्वौषधिसमन्विता ॥ ८ ॥
न बालो म्रियते तत्र न युवा न च मध्यमः । धर्मेण शासितं सर्वं न च बाधा विधीयते ॥ ९ ॥
दृश्यते न च कार्यार्थी रामे राज्यं प्रशासति । लक्ष्मणः प्राञ्जलिर्भूत्वा रामायैवं न्यवेदयत् ॥ १० ॥
अथ रामः प्रसन्नात्मा सौमित्रिमिदमब्रवीत् । भूय एव तु गच्छ त्वं कार्यिणः प्रविचारय ॥ ११ ॥
सम्यक्प्रणीतया नीत्या नाधर्मो विद्यते क्वचित् । तस्माद्राजभयात्सर्वे रक्षन्तीह परस्परम् ॥ १२ ॥
बाणा इव मया मुक्ता इह रक्षन्ति मे प्रजाः । तथापि त्वं महाबाहो प्रजा रक्षस्व तत्परः ॥ १३ ॥
एवमुक्तस्तु सौमित्रिर्निर्जगाम नृपालयात् । अपश्यद्वारदेशे वै श्वानं तावदवस्थितम् ॥ १४ ॥
तमेवं वीक्षमाणो वै विक्रोशन्तं मुहुर्मुहुः । दृष्ट्वाथ लक्ष्मणस्तं वै स पप्रच्छाथ वीर्यवान् ॥ १५ ॥

१ आनने चेति गो. रा. पा. ।

किं ते कार्यं महाभाग ब्रूहि विस्रब्धमानसः । लक्ष्मणस्य वचः श्रुत्वा सारमेयोऽभ्यभाषत ॥ १६ ॥
सर्वभूतशरण्याय रामायाक्लिष्टकर्मणे । भयेष्वभयदात्रे च तस्मै वक्तुं समुत्सहे ॥ १७ ॥
एतच्छ्रुत्वा च वचनं सारमेयस्य लक्ष्मणः । राघवाय तदाख्यातुं प्रविवेशालयं शुभम् ॥ १८ ॥
निवेद्य रामस्य पुनर्निर्जगाम नृपालयात् । वक्तव्यं यदि ते किंचित्तत्त्वं ब्रूहि नृपाय वै ॥ १९ ॥
लक्ष्मणस्य वचः श्रुत्वा सारमेयोऽभ्यभाषत । देवागारे नृपागारे द्विजवेश्मसु वै तथा ॥ २० ॥
वह्निः शतक्रतुश्चैव सूर्यो वायुश्च तिष्ठति । नात्र योग्यास्तु सौमित्रे योनीनामधमा वयम् ॥ २१ ॥
प्रवेष्टुं नात्र शक्ष्यामि धर्मो विग्रहवान्नृपः । सत्यवादी रणपटुः सर्वसत्त्वहिते रतः ॥ २२ ॥
पाद्मुण्यस्य पदं वेत्ति नीतिकर्ता स राघवः । सर्वज्ञः सर्वदर्शी च रामो रमयतां वरः ॥ २३ ॥
स सोमः स च मृत्युश्च स यमो धनदस्तथा । वह्निः शतक्रतुश्चैव सूर्यो वै वरुणस्तथा ॥ २४ ॥
तस्य त्वं ब्रूहि सौमित्रे प्रजापालः स राघवः । अनाज्ञप्तस्तु सौमित्रे प्रवेष्टुं नेच्छयाम्यहम् ॥ २५ ॥
आनृशंस्यान्महाभाग प्रविवेश महाद्युतिः । नृपालयं प्रविश्याथ लक्ष्मणो वाक्यमब्रवीत् ॥ २६ ॥
श्रूयतां मम विज्ञाप्यं कौसल्यानन्दवर्धन । यन्मयोक्तं महाबाहो तव शासनजं विभो ॥ २७ ॥
श्वा वै ते तिष्ठते द्वारि कार्यार्थी समुपागतः । लक्ष्मणस्य वचः श्रुत्वा रामो वचनमब्रवीत् ॥
संप्रवेशय वै क्षिप्रं कार्यार्थी योऽत्र तिष्ठति ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ १ ॥

श्रुत्वा रामस्य वचनं लक्ष्मणस्त्वरितस्तदा । श्वानमाहूय मतिमान्राघवाय न्यवेदयत् ॥ १ ॥
दृष्ट्वा समागतं श्वानं रामो वचनमब्रवीत् । विवक्षितार्थं मे ब्रूहि सारमेय न ते भयम् ॥ २ ॥
अथापश्यत तत्रस्थं रामं श्वा भिन्नमस्तकः । ततो दृष्ट्वा स राजानं सारमेयोऽब्रवीद्वचः ॥ ३ ॥
राजैव कर्ता भूतानां राजा चैव विनायकः । राजा सुप्तेषु जागर्ति राजा पालयति प्रजाः ॥ ४ ॥
नीत्या सुनीतया राजा धर्मं रक्षति रक्षिता । यदा न पालयेद्राजा क्षिप्रं नश्यन्ति वै प्रजाः ॥ ५ ॥
राजा कर्ता च गोप्ता च सर्वस्य जगतः पिता । राजा कालो युगं चैव राजा सर्वमिदं जगत् ॥ ६ ॥
धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः । यस्माद्धारयते सर्वं त्रैलोक्यं सचराचरम् ॥ ७ ॥
धारणाद्विद्विषां चैव धर्मेणारञ्जयन्प्रजाः । यस्माद्धारणमित्युक्तं स धर्म इति निश्चयः ॥ ८ ॥
एष राजन्परो धर्मः फलवान्प्रेत्य राघव । नहि धर्माद्ध्रुवं किंचिदुष्प्रापमिति मे मतिः ॥ ९ ॥
दानं दया सतां पूजा व्यवहारेषु चार्जवम् । एष राम परो धर्मो रक्षणात्प्रेत्य चेह च ॥ १० ॥
त्वं प्रमाणं प्रमाणानामसि राघव सुव्रत । विदितश्चैव ते धर्मः सद्भिराचरितस्तु वै ॥ ११ ॥
धर्माणां त्वं परं धाम गुणानां सागरोपमः । अज्ञानाच्च मया राजन्नुक्तस्त्वं राजसत्तम ॥ १२ ॥
प्रसादयामि शिरसा न त्वं क्रोद्धुमिहार्हसि । गुनः स वचनं श्रुत्वा राघवो वाक्यमब्रवीत् ॥ १३ ॥
किं ते कार्यं करोम्यद्य ब्रूहि विस्रब्ध मा चिरम् । रामस्य वचनं श्रुत्वा सारमेयोऽब्रवीदिदम् ॥ १४ ॥
धर्मेण राष्ट्रं विन्देत धर्मेणैवानुपालयेत् । धर्मांच्छरण्यतां याति राजा सर्वभयापहः ॥ १५ ॥
इदं विज्ञाय यत्कृत्यं श्रूयतां मम राघव । भिक्षुः सर्वार्थसिद्धश्च ब्राह्मणावसथे वसन् ॥ १६ ॥
तेन दत्तः प्रहारो मे निष्कारणमनागसः । एतच्छ्रुत्वा तु रामेण द्वाःस्थः संप्रेषितस्तदा ॥ १७ ॥
आनीतश्च द्विजस्तेन सर्वसिद्धार्थकोविदः । अथ द्विजवरस्तत्र रामं दृष्ट्वा महाद्युतिः ॥ १८ ॥
किं ते कार्यं मया राम तद्ब्रूहि त्वं ममानघ । एवमुक्तस्तु विप्रेण रामो वचनमब्रवीत् ॥ १९ ॥
त्वया दत्तः प्रहारोऽयं सारमेयस्य वै द्विज । किं तवापकृतं विप्र दण्डेनाभिहतो यतः ॥ २० ॥
क्रोधः प्राणहरः शत्रुः क्रोधोऽमित्रमुखो रिपुः । क्रोधो ह्यसिर्महातीक्ष्णः सर्वं क्रोधोऽपकर्षति ॥ २१ ॥
तपते यजते चैव यच्च दानं प्रयच्छति । क्रोधेन सर्वं हरति तस्मात्क्रोधं विसर्जयेत् ॥ २२ ॥
इन्द्रियाणां प्रदुष्टानां हयानामिव धावताम् । कुर्वीत धृत्या सारथ्यं संहृत्येन्द्रियगोचरम् ॥ २३ ॥
मनसा कर्मणा वाचा चक्षुषा च समाचरेत् । श्रेयो लोकस्य चरतो न द्वेष्टि न च लिप्यते ॥ २४ ॥
न तत्कुर्यादसिस्तीक्ष्णः सर्पो वा व्याहतः पदा । अरिर्वा नित्यसंक्रुद्धो यथात्मा दुरनुष्ठितः ॥ २५ ॥
विनीतविनयस्यापि प्रकृतिर्न विधीयते । प्रकृतिं गूहमानस्य निश्चयेन कृतिर्ध्रुवा ॥ २६ ॥
एवमुक्तः स विप्रो वै रामेणाक्लिष्टकर्मणा । द्विजः सर्वार्थसिद्धस्तु अब्रवीद्रामसंनिधौ ॥ २७ ॥

मया दत्तप्रहारोऽयं क्रोधेनाविष्टचेतसा । भिक्षार्थमटमानेन काले विगतभैक्षके ॥ २८ ॥
रथ्यास्थितस्त्वयं श्वा वै गच्छ गच्छेति भाषितः । अथ स्वैरेण गच्छंस्तु रथ्यान्ते विषमः स्थितः ॥ २९ ॥
क्रोधेन क्षुधयाविष्टस्ततो दत्तोऽस्य राघव । प्रहारो राजराजेन्द्र शापि मामपराधिनम् ॥ ३० ॥
त्वया शस्तस्य राजेन्द्र नास्ति मे नरकाद्भयम् । अथ रामेण संपृष्टाः सर्व एव सभासदः ॥ ३१ ॥
किं कार्यमस्य वै ब्रूत दण्डो वै कोऽस्य पात्यताम् । सम्यक्प्रणिहिते दण्डे प्रजा भवति रक्षिता ॥ ३२ ॥
भृग्वङ्गिरसकुत्साद्या वसिष्ठश्च सकाश्यपः । धर्मपाठकमुख्याश्च सचिवा नैगमास्तथा ॥ ३३ ॥
एते चान्ये च बहवः पण्डितास्तत्र संगताः । अवध्यो ब्राह्मणो दण्डैरिति शास्त्रविदो विदुः ॥ ३४ ॥
ब्रुवते राघवं सर्वे राजधर्मेषु निष्ठिताः । अथ ते मुनयः सर्वे राममेवाब्रुवंस्तदा ॥ ३५ ॥
राजा शास्ता हि सर्वस्य त्वं विशेषेण राघव । त्रैलोक्यस्य भवाञ्शास्ता देवो विष्णुः सनातनः ॥ ३६ ॥
एवमुक्ते तु तैः सर्वैः श्वा वै वचनमब्रवीत् । यदि तुष्टोऽसि मे राम यदि देयो वरो मम ॥ ३७ ॥
प्रतिज्ञातं त्वया वीर किं करोमीति विश्रुतम् । प्रयच्छ ब्राह्मणस्यास्य कौलपत्यं नराधिप ॥ ३८ ॥
कालञ्जरे महाराज कौलपत्यं प्रदीयताम् । एतच्छ्रुत्वा तु रामेण कौलपत्येऽभिषेचितः ॥ ३९ ॥
प्रययौ ब्राह्मणो हृष्टो गजस्कन्धेन सोऽर्चितः । अथ ते रामसचिवाः स्मयमाना वचोऽब्रुवन् ॥ ४० ॥
वरोऽयं दत्त एतस्य नायं शापो महाद्युते । एवमुक्तस्तु सचिवै रामो वचनमब्रवीत् ॥ ४१ ॥
न यूयं गतितत्त्वज्ञाः श्वा वै जानाति कारणम् । अथ पृष्टस्तु रामेण सारमेयोऽब्रवीदिदम् ॥ ४२ ॥
अहं कुलपतिस्तत्र आसं शिष्टान्नभोजनः । देवद्विजातिपूजायां दासीदासेषु राघव ॥ ४३ ॥
संविभागी शुभरतिर्देवद्रव्यस्य रक्षिता । विनीतः शीलसंपन्नः सर्वसत्त्वहिते रतः ॥ ४४ ॥
सोहं प्राप्त इमां घोरामवस्थामधमां गतिम् । एवं क्रोधान्वितो विप्रस्त्यक्तधर्मा हिते रतः ॥ ४५ ॥
क्रुद्धो नृशंसः परुष अविद्वांश्चाप्यधार्मिकः । कुलानि पातयत्येव सप्त सप्त च राघव ॥ ४६ ॥
तस्मात्सर्वास्ववस्थासु कौलपत्यं न कारयेत् । यमिच्छेन्नरकं नेतुं सपुत्रपशुबान्धवम् ॥ ४७ ॥
देवेष्वधिष्ठितं कुर्याद्गोषु तं ब्राह्मणेषु च । ब्रह्मस्वं देवताद्रव्यं स्त्रीणां बालधनं च यत् ॥ ४८ ॥
दत्तं हरति यो मूढ इष्टैः सह विनश्यति । ब्राह्मणद्रव्यमादत्ते देवानां चैव राघव ॥ ४९ ॥
सद्यः पतति घोरे वै नरके वीचिसंज्ञके । मनसापि हि देवस्वं ब्रह्मस्वं च हरेत्तु यः ॥ ५० ॥
निरयान्निरयं चैव पतत्येव नराधमः । तच्छ्रुत्वा वचनं रामो विस्मयोत्फुल्ललोचनः ॥ ५१ ॥
श्वाप्यगच्छन्महातेजा यत एवागतस्ततः । मनस्वी पूर्वजात्या स जातिमात्रोऽपदूषितः ॥
वाराणस्यां महाभागः प्रायं चोपविवेश ह ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ २ ॥

अथ तस्मिन्वनोद्देशे रम्ये पादपशोभिते । नदीकीर्णे गिरिवरे कोकिलानेककूजिते ॥ १ ॥
सिंहव्याघ्रसमाकीर्णे नानाद्विजगणाश्रिते । गृध्रोलूकौ प्रवसतो बहुवर्षगणानपि ॥ २ ॥
अथोलूकस्य भवनं गृध्रः पापविनिश्चयः । ममेदमिति कृत्वासौ कलहं तेन चाकरोत् ॥ ३ ॥
राजा सर्वस्य लोकस्य रामो राजीवलोचनः । तं प्रपद्यावहे शीघ्रं यस्यैतद्भवनं भवेत् ॥ ४ ॥
इति कृत्वा मतिं तां तु निश्चयार्थं सुनिश्चिताम् । गृध्रोलूकौ प्रपेयातां कोपाविष्टौ ह्यमर्षितौ ॥ ५ ॥
रामं प्रपद्य तौ शीघ्रं कलिव्याकुलचेतसौ । तौ परस्परविद्वेषात्स्पृशतश्चरणौ तदा ॥ ६ ॥
अथ दृष्ट्वा नरेन्द्रं तं गृध्रो वचनमब्रवीत् । सुराणामसुराणां च प्रधानस्त्वं मतो मम ॥ ७ ॥
बृहस्पतेश्च शुक्राच्च विशिष्टोऽसि महाद्युते । परावरज्ञो भूतानां कान्त्या चन्द्र इवापरः ॥ ८ ॥
दुर्निरीक्ष्यो यथा सूर्यो हिमवांश्चैव गौरवे । सागरश्चैव गाम्भीर्ये लोकपालो यमो ह्यसि ॥ ९ ॥
क्षान्त्या धरण्या तुल्योऽसि शीघ्रत्वे ह्यनिलोपमः । गुरुस्त्वं सर्वसंपन्नः कीर्तियुक्तश्च राघव ॥ १० ॥
अमर्षी दुर्जयो जेता सर्वास्त्रविधिपारगः । शृणुष्व मम वै राम विज्ञाप्यं नरपुंगव ॥ ११ ॥
ममालयं पूर्वकृतं बाहुवीर्येण राघव । उलूको हरते राजंस्तत्र त्वं त्रातुमर्हसि ॥ १२ ॥
एवमुक्ते तु गृध्रेण उलूको वाक्यमब्रवीत् । सोमाच्छतक्रतोः सूर्याद्धनदाद्वा यमात्तथा ॥ १३ ॥
जायते वै नृपो राम किंचिद्भवति मानुषः । त्वं तु सर्वमयो देवो नारायण इवापरः ॥ १४ ॥
याचते सौम्यता राजन्सम्यक्प्रणिहिता विभो । समं चरसि चान्विष्य तेन सोमांशको भवान् ॥ १५ ॥

क्रोधे दण्डे प्रजानाथ दाने पापभयापहः । दाता हर्तासि गोप्तासि तेनेन्द्र इव नो भवान् ॥ १६ ॥
अधृष्यः सर्वभूतेषु तेजसा चानलोपमः । अभीक्ष्णं तपसे लोकांस्तेन भास्करसंनिभः ॥ १७ ॥
साक्षाद्वित्तेशतुल्योऽसि अथवा धनदाधिकः । वित्तेशस्येव पद्मा श्रीर्नित्यं ते राजसत्तम ॥ १८ ॥
धनदस्य तु कार्येण धनदस्तेन नो भवान् । समः सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥ १९ ॥
शत्रौ मित्रे च ते दृष्टिः समतां याति राघव । धर्मेण शासनं नित्यं व्यवहारे विधिक्रमात् ॥ २० ॥
यस्य रुष्यसि वै राम तस्य मृत्युर्विधावति । गीयसे तेन वै राम यम इत्यभिविक्रमः ॥ २१ ॥
यश्चैष मानुषो भावो भवतो नृपसत्तम । आनृशंस्यपरो राजा सत्त्वेषु क्षमयान्वितः ॥ २२ ॥
दुर्बलस्य त्वनाथस्य राजा भवति वै बलम् । अचक्षुषोत्तमं चक्षुरगतेः स गतिर्भवान् ॥ २३ ॥
अस्माकमपि नाथस्त्वं श्रूयतां मम धार्मिक । ममालयं प्रविष्टस्तु गृध्रो मां बाधते नृप ॥ २४ ॥
त्वं हि देव मनुष्येषु शास्ता वै नरपुंगव । एतच्छ्रुत्वा तु वै रामः सचिवानाह्वयत्स्वयम् ॥ २५ ॥
धृष्टिर्जयन्तो विजयः सिद्धार्थो राष्ट्रवर्धनः । अशोको धर्मपालश्च सुमन्त्रश्च महाबलः ॥ २६ ॥
एते रामस्य सचिवा राज्ञो दशरथस्य च । नीतियुक्ता महात्मानः सर्वशास्त्रविशारदाः ॥ २७ ॥
ह्रीमन्तश्च कुलीनाश्च नये मन्त्रे च कोविदाः । तानाहूय च धर्मात्मा पुष्पकादवतीर्य च ॥ २८ ॥
गृध्रोलूकविवादं तं पृच्छति स्म रघूत्तमः । कति वर्षाणि वै गृध्र तवेदं निलयं कृतम् ॥ २९ ॥
एतन्मे कारणं ब्रूहि यदि जानासि तत्त्वतः । एतच्छ्रुत्वा तु वै गृध्रो भाषते राघवं स तम् ॥ ३० ॥
इयं वसुमती राम मनुष्यैः परितो यदा । इत्थिनैराकृता सर्वा तदा प्रभृति मे गृहम् ॥ ३१ ॥
उलूकश्चाब्रवीद्रामं पादपैरुपशोभिता । यदेयं पृथिवी राजंस्तदाप्रभृति मे गृहम् ॥
एतच्छ्रुत्वा तु वै रामः सभासदमुवाच ह ॥ ३२ ॥

न सा सभा यत्र न सन्ति वृद्धा वृद्धा न ते ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति न तत्सत्यं यच्छलेनानुविद्धम् ॥ ३३ ॥

ये तु सभ्याः सदा ज्ञात्वा तूष्णीं ध्यायन्त आसते । यथाप्राप्तं न ब्रुवते ते सर्वेऽनृतवादिनः ॥ ३४ ॥
जानन्न ब्राह्मवीत्प्रश्नान्कामात्क्रोधाद्भयात्तथा । सहस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति ॥ ३५ ॥
तेषां संवत्सरे पूर्णे पाश एकः प्रमुच्यते । तस्मात्सत्येन वक्तव्यं जानता सत्यमञ्जसा ॥ ३६ ॥
एतच्छ्रुत्वा तु सचिवा राममेवाब्रुवंस्तदा । उलूकः शोभते राजन्न तु गृध्रो महामते ॥ ३७ ॥
त्वं प्रमाणं महाराज राजा हि परमा गतिः । राजमूलाः प्रजाः सर्वा राजा धर्मः सनातनः ॥ ३८ ॥
शास्ता नृणां नृपो येषां ते न गच्छन्ति दुर्गतिम् । वैवस्वतेन मुक्तास्तु भवन्ति पुरुषोत्तमाः ॥ ३९ ॥
सचिवानां वचः श्रुत्वा रामो वचनमब्रवीत् । श्रूयतामभिधास्यामि पुराणे यदुदाहृतम् ॥ ४० ॥
द्यौः सचन्द्रार्कनक्षत्रा सपर्वतमहावना । सलिलार्णवसंपूर्णं त्रैलोक्यं सचराचरम् ॥ ४१ ॥
एक एव तदा ह्यासीद्युक्तो मेरुरिवापरः । पुरा भूः सह लक्ष्म्या च विष्णोर्जठरमाविशत् ॥ ४२ ॥
तां निगृह्य महातेजाः प्रविश्य सलिलार्णवम् । सुष्वाप देवो भूतात्मा बहून्वर्षगणानपि ॥ ४३ ॥
विष्णौ सुप्ते तदा ब्रह्मा विवेश जठरं ततः । रुद्धस्रोतं तु तं ज्ञात्वा महायोगी समाविशत् ॥ ४४ ॥
नाभ्यां विष्णोः समुत्पन्ने पद्मे हेमविभूषिते । स तु निर्गम्य वै ब्रह्मा योगी भूत्वा महाप्रभुः ॥ ४५ ॥
सिसृक्षुः पृथिवीं वायुं पर्वतान्समहीरुहान् । तदन्तरे प्रजाः सर्वाः समनुष्यसरीसृपाः ॥ ४६ ॥
जरायुजाण्डजाः सर्वाः स ससर्ज महातपाः । तत्र श्रोत्रमलोत्पन्नः कैटभो मधुना सह ॥ ४७ ॥
दानवौ तौ महावीर्यौ घोररूपौ दुरासदौ । दृष्ट्वा प्रजापतिं तत्र क्रोधाविष्टौ बभूवतुः ॥ ४८ ॥
वेगेन महता तत्र स्वयंभुवमधावताम् । दृष्ट्वा स्वयंभुवा मुक्तो रावो वै विकृतस्तदा ॥ ४९ ॥
तेन शब्देन संप्राप्तौ दानवौ हरिणा सह । अथ चक्रप्रहारेण सूदितौ मधुकैटभौ ॥ ५० ॥
मेदसा प्लाविता सर्वा पृथिवी च समन्ततः । भूयो विशोषिता तेन हरिणा लोकधारिणा ॥ ५१ ॥
शुद्धां वै मेदिनीं तां तु दृष्ट्वैः सर्वामपूरयत् । ओषध्यः सर्वसस्यानि निष्पद्यन्त पृथग्विधाः ॥ ५२ ॥
मेदोगन्धा तु धरणी मेदिनीत्यभिसंज्ञिता । तस्मान्न गृध्रस्य गृहमूलूकस्येति मे मतिः ॥ ५३ ॥
तस्माद्गृध्रस्तु दण्ड्यो वै पापो हर्ता परालयम् । पीडां करोति पापात्मा दुर्विनीतो महानयम् ॥ ५४ ॥
अथाशरीरिणी वाणी अन्तरिक्षात्प्रबोधिनी । मावधीं राम गृध्रं त्वं पूर्वदग्धं तपोबलात् ॥ ५५ ॥
कालगौतमदग्धोऽयं प्रजानाथो नरेश्वर । ब्रह्मदत्तेति नाम्नैष शूरः सत्यव्रतः शुचिः ॥ ५६ ॥

षष्टितमः सर्गः ।

यमुनातीरवासिनामुग्रतपसामृषीणामनुभूतलवणासुरत्रासानां दाशरथिनिकटे स्वसंकटं निवेदयितुमागमनम् । तेषामासनपाद्यादिसत्कारपूर्वकमागमनहेतुप्रश्नो रामस्य ।

तयोः संवदतोरेवं रामलक्ष्मणयोस्तदा वासन्तिकी निशा प्राप्ता न शीता न च घर्मदा ॥ १ ॥
ततः प्रभाते विमले कृतपूर्वाह्णिकक्रियः अभिचक्राम काकुत्स्थो दर्शनं पौरकार्यवित् ॥ २ ॥
ततः सुमन्त्रस्त्वागम्य राघवं वाक्यमब्रवीत् एते प्रतिहता राजन्द्वारि तिष्ठन्ति तापसाः ॥ ३ ॥
भार्गवं च्यवनं चैव पुरस्कृत्य महर्षयः दर्शनं ते महाराज चोदयन्ति कृतत्वराः ॥ ४ ॥
प्रीयमाणा नरव्याघ्र यमुनातीरवासिनः तस्य तद्वचनं श्रुत्वा रामः प्रोवाच धर्मवित् ॥ ५ ॥
प्रवेश्यन्तां महाभागा भार्गवप्रमुखा द्विजाः राज्ञस्त्वाज्ञां पुरस्कृत्य द्वाःस्थो मूर्ध्ना कृताञ्जलिः ॥६॥

१] ति० टी०-अथ लवणासुरपीडितऋषीणां रामसमीपागमनम्—तयोरिति । एवं संवदतोः प्रतिदिवसं धर्मसंवादं कुर्वतोः । तत्पूर्वं प्रजारक्षणं कुर्वतोरिति यावत् । वासन्तिकी वसन्तकालभवा निशा प्राप्ता । कालान्तरे इति शेषः । इदं कालवचनं ऋषिकार्योचितत्वप्रदर्शनार्थम् ॥ १ ॥

रा० टी०-रामकर्तृकेतिहासवर्णनानन्तरकालिकं वृत्तमाह—तयोरित्यादिभिः । रामलक्ष्मणयोः सम्वदतोस्ततोः वासन्तिकी वसन्तर्तुसम्बन्धिनी निशा प्राप्ता ॥ १ ॥

गो० टी०-तयोरित्यादि । वासन्तिकी वसन्ते भवा । एवं प्रतिदिवसं संवदतोर्धर्मसंवादं कुर्वतोः । तत्पूर्वं प्रजारक्षणं कुर्वतोरिति शेषः । वासन्तिकी निशा प्राप्तेति । कालान्तर इति शेषः । एतेन वसन्ते समानीता देवी पुनर्वसन्ते त्यक्तेति सूचयति । इदं च कालवचनम् ऋषिकार्योचितप्रदर्शनार्थम् ॥१॥२

२] ति० टी०-दर्शनमभिचक्राम । प्रजा दृश्यन्ते यत्र स्थाने तत्स्थानं दर्शनमभिचक्राम जगाम ॥ २ ॥

रा० टी०-तत इति । कृतपूर्वाह्णिकक्रियः पौरकार्यवित्काकुत्स्थो रामः दर्शनं प्रजाकर्तृकावलोकनं यथा भवति तथा अभिचक्राम ॥ २ ॥

३] ति० टी०-प्रतिहताः । द्वारि निरुद्धा इत्यर्थः ॥३॥

रा० टी०-तत इति । सुमन्त्रः राघवमब्रवीत् अर्द्धं पृथक् तदाकारमाह-एते इति । भार्गवं च्यवनं पुरस्कृत्य अप्रतिहताः अनिवारिताः अपि यमुनातीरवासिनः एते महर्षयः द्वारि तिष्ठन्ति ते दर्शनमुद्दिश्य कृतत्वराः सन्तः चोदयन्ति स्वागमनबोधनार्थं प्रेरयन्ति च अर्द्धचतुष्टयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०-तत इति । द्वारि प्रतिहता निरुद्धा इत्यर्थः ॥३॥

४-५] ति० टी०-भृगुगोत्रापत्यं च्यवनं पुरस्कृत्य हे महाराज ! तव दर्शनं प्रत्यस्मांश्चोदयन्ति प्रेरयन्ति ॥ ४ ॥ ५ ॥

गो० टी०-भार्गवेति । भृगोर्गोत्रापत्यं भार्गवः स चासौ च्यवनश्च तम् । महाराज्ञः महाराजस्य दर्शनं प्रति अस्मदादीन् चोदयन्ति प्रेरयन्ति महाराज्ञश्चोदयन्तीति च पाठः ॥ ४ ॥

रा० टी०-तस्येति । भार्गवप्रमुखाः द्विजाः प्रवेश्यन्ताम् इति रामः प्रोवाच ॥ ५ ॥

गो० टी०-तस्येति । भार्गवप्रमुखाः च्यवनप्रमुखाः ५॥६

६] ति० टी०-भार्गवप्रमुखाश्च्यवनप्रमुखाः ॥ ६ ॥

रा० टी०-राज्ञ इति । द्वाःस्थः तापसान्प्रवेशयामास॥६॥

गृहं त्वस्यागतो विप्रो भोजनं प्रत्यमार्गत । सार्द्धं वर्षशतं चैव भोक्तव्यं नृपसत्तम ॥ ९७ ॥
ब्रह्मदत्तः स वै तस्य पाद्यमर्घ्यं स्वयं नृपः । हार्दं चैवाकरोत्तस्य भोजनार्थं महाद्युतेः ॥ ९८ ॥
मांसमस्याभवत्तत्र आहारे तु महात्मनः । अथ क्रुद्धेन मुनिना शापो दत्तोऽस्य दारुणः ॥ ९९ ॥
गृध्रस्त्वं भव वै राजन्मा मैनं ह्यथ सोऽब्रवीत् । प्रसादं कुरु धर्मज्ञ अज्ञानान्मे महाव्रत ॥ ६० ॥
शापस्यान्तं महाभाग क्रियतां वै ममानघ । तदज्ञानकृतं मत्वा राजानं मुनिरब्रवीत् ॥ ६१ ॥
उत्पत्स्यति कुले राज्ञां रामो नाम महायशाः । इक्ष्वाकूणां महाभागो राजा राजीवलोचनः ॥ ६२ ॥
तेन स्पृष्टो विपापस्त्वं भविता नरपुंगव । स्पृष्टो रामेण तच्छ्रुत्वा नरेन्द्रः पृथिवीपतिः ॥ ६३ ॥
गृध्रत्वं त्यक्तवान्राजा दिव्यगन्धानुलेपनः । पुरुषो दिव्यरूपोऽभूदुवाचेदं च राघवम् ॥ ६४ ॥
साधु राघव धर्मज्ञ त्वत्प्रसादादहं विभो । विमुक्तो नरकाद्घोराच्छापस्यान्तः कृतस्त्वया ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे प्रक्षिप्तः सर्गः ॥ ३ ॥

१ पौर्वाह्णिकेति गो. पाठः । २ राज्ञ इति गो. पाठः । ६ मुर्ध्नेति गो. पाठः

प्रवेशयामास तदा तापसान्सुदुरासदान् । शतं समधिकं तत्र दीप्यमानं स्वतेजसा ॥ ७ ॥
प्रविष्टं राजभवनं तापसानां महात्मनाम् । ते द्विजाः पूर्णकलशैः सर्वतीर्थाम्बुसत्कृतैः ॥ ८ ॥
गृहीत्वा फलमूलं च रामस्याभ्याहरन्बहु । प्रतिगृह्य तु तत्सर्वं रामः प्रीतिपुरस्कृतः ॥ ९ ॥
तीर्थोदकानि सर्वाणि फलानि विविधानि च । उवाच च महाबाहुः सर्वानेव महामुनीन् ॥ १० ॥
इमान्यासनमुख्यानि यथार्हमुपविश्यताम् । रामस्य भाषितं श्रुत्वा सर्व एव महर्षयः ॥ ११ ॥
बृसीषु रुचिराख्यासु निषेदुः काञ्चनीषु ते । उपविष्टानृषींस्तत्र दृष्ट्वा परपुरंजयः ॥
प्रयतः प्राञ्जलिर्भूत्वा राघवो वाक्यमब्रवीत् । ॥ १२ ॥
किमागमनकार्यं वः किं करोमि समाहितः । आज्ञाप्योऽहं महर्षीणां सर्वकामकरः सुखम् ॥ १३ ॥
इदं राज्यं च सकलं जीवितं च हृदि स्थितम् । सर्वमेतद्द्विजार्थे मे सत्यमेतद्ब्रवीमि वः ॥ १४ ॥
तस्य तद्वचनं श्रुत्वा साधुकारो महानभूत् । ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ॥ १५ ॥
ऊचुश्चैवं महात्मानो हर्षेण महता वृताः । उपपन्नं नरश्रेष्ठ तवैव भुवि नान्यतः ॥ १६ ॥
बहवः पार्थिवा राजन्नातिक्रान्ता महाबलाः । कार्यस्य गौरवं मत्वा प्रतिज्ञां नाभ्यरोचयन् ॥ १७ ॥

७] ति० टी०–समधिकं किंचिदधिकं शतम् ॥ ७ ॥

रा० टी०–शतमिति । समधिकं किञ्चिदधिकं तापसानां शतं राजभवनं प्रविष्टम् ॥ ७ ॥

गो० टी०–शतमिति । समधिकम् अधिकसहितम्७–१२

८] ति० टी०–पूर्णकलशैरुपलक्षिताः ॥ ८ ॥

रा० टी०–ते इति । द्विजाः सत्कृतैः समीचीनतया निष्पादितैः पूर्णकलशैः तीर्थाम्बु बहुफलं च गृहीत्वा रामस्य रामाय अभ्याहरन् ॥ ८ ॥

९–१०] ति० टी०–फलमूलं गृहीत्वा रामस्याभ्याहरन् ॥ ९ ॥ १० ॥

रा० टी०–प्रतीति । रामः तत्सर्वं सर्वाणि तीर्थोदकानि सर्वाणि फलानि च प्रतिगृह्य आसनमुख्यानि आसनमुख्येषु उपविश्यताम् इत्युवाच अर्द्धचतुष्टयमेकान्वयि ॥ ९ ॥ १० ॥

११] ति० टी०–उपविश्यताम् । एषु भवद्भिरिति शेषः ॥ ११ ॥

रा० टी०–रामस्येति । महर्षयः बृसीषु ऋषियोग्यासनेषु निषेदुः ॥ ११ ॥

१२] ति० टी०–रुचिराख्यास्तु रुचिरशोभास्तु ॥ १२ ॥

रा० टी०–उपविष्टानिति । राघवो वाक्यमब्रवीत्॥१२॥

१३] ति० टी०–किं करोमि किं कुर्याम् । सर्वकामकरः सर्वाभीष्टसाधकः ॥ १३ ॥

रा० टी०–तदाकारमाह–किमिति । अहं महर्षीणां सर्वकामकरः निखिलकृत्यसाधकः अत एव आज्ञाप्यः अतः वः आगमनकार्यं किं तद्धीत्यर्थः समाहितोहं किं करोमि ॥१३॥

गो०टी०–किमिति । किं करोमि किं कुर्याम् । सर्वकामकरः सर्वाभीष्टसाधकः ॥ १३ ॥ १४ ॥

१४] ति० टी०–हृदि स्थितम् । हृत्पुण्डरीकप्रदेशे स्थितमित्यर्थः ॥ १४ ॥

रा० टी०–इदमिति । मे राज्यादि सर्वं द्विजार्थमेव एतत्सत्यमहं ब्रवीमि ॥ १४ ॥

१५] ति० टी०–साधुकारः साधुसाधिति शब्दप्रयोगः १५

रा० टी०–तस्येति । तस्य रामस्य वचनं श्रुत्वा ऋषीणां साधुकारः साधुसाधिति शब्दोऽभूत् ॥ १५ ॥

गो० टी०–तस्येति । साधुकारः साधु साधिति संभाषणम् ॥ १५ ॥

१६] ति० टी०–तवैवोपपन्नं त्वय्येवेदृशं वचो युक्तं नान्यतो नान्यस्य ॥ १६ ॥

रा० टी०–ऊचुरिति । महात्मान ऊचुः तदाकारमाह–तवैव उपपन्नं युक्तमेवं वचनमिति शेषः अन्यतः अन्यस्य न१६

गो० टी०–ऊचुरिति । नान्यतः नान्वस्य ॥ १६ ॥

१७] ति० टी०–कार्यस्य गौरवं मत्वा तच्छ्रवणादुत्तरमपि करिष्यामीति प्रतिज्ञां नाभ्यरोचयन्न कुर्वन्ति । अशक्यत्वेनेति भावः । भवांस्त्वर्थमश्रुत्वैव प्रतिज्ञातवानित्याश्चर्यम् ॥ १७ ॥

रा० टी०–बहव इति । अतिक्रान्ताः अस्माभिः प्राप्ताः बहवः पार्थिवाः कार्यस्य गौरवं मत्वा प्रतिज्ञां मत्कार्यसाधनविषयकनिश्चयं नाभ्यरोचयन् अकुर्वन् ॥ १७ ॥

गो०टी०–बहव इति । कार्यस्य गौरवं मत्वा ततः पूर्वं करिष्यामीति प्रतिज्ञां नाभ्यरोचयन् न कुर्वन्ति । अशक्यनियोगापत्तिभयादिति शेषः ॥ १७ ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

१ ते इति गो. पाठः

त्वया पुनर्ब्राह्मणगौरवादियं कृता प्रतिज्ञा ह्यनवेक्ष्य कारणम् ।
ततश्च कर्ता ह्यसि नात्र संशयो महाभयात्रातुमृषींस्त्वमर्हसि । ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ।

काकुत्स्थेनानुयुक्तानां मुनीनां मध्ये भार्गवो लवणपितुर्मधोः किंचिच्चरितं प्रसङ्गाद्भवानीपतेः शूलप्राप्तिं च कथयित्वा तदात्मजस्यास्यापि स्वपितृप्राप्तशूलेन त्रिलोकीपीडां विशेषतस्तापसपीडनं स्वेषामनन्यगतिकत्वं चाकथयत् ।

ब्रुवद्भिरेवमृषिभिः काकुत्स्थो वाक्यमब्रवीत् । किं कार्यं ब्रूत मुनयो भयं तावदपैतु वः ॥ १ ॥
तथा ब्रुवति काकुत्स्थे भार्गवो वाक्यमब्रवीत् । भयानां शृणु यन्मूलं देशस्य च नरेश्वर ॥ २ ॥
पूर्वं कृतयुगे राजन्दैतेयः सुमहामतिः । लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥ ३ ॥
ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः । सुरैश्च परमोदारैः प्रीतिस्तस्यातुलाभवत् ॥ ४ ॥
स मधुर्वीर्यसंपन्नो धर्मं च सुसमाहितः । बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः ॥ ५ ॥
शूलं शूलाद्विनिष्कृष्य महावीर्यं महाप्रभम् । [बहूनिवर्षसहस्राणि रुद्रप्रीत्याकरोत्तपः ॥
रुद्रः प्रीतोऽभवत्तस्मै वरं दातुं ययौ च सः] । ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह ॥ ६ ॥
त्वयायमतुलो धर्मो मत्प्रसादकरः शुभः । प्रीत्या परमया युक्तो ददाम्यायुधमुत्तमम् ॥ ७ ॥

१८] ति० टी०–तदाह—त्वयेति ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

रा० टी०–त्वयेति । ब्राह्मणगौरवाद्धेतोः कारणमनवेक्ष्य प्रभृतः अज्ञात्वापि त्वया इयं कार्यसाधनविषयिणी प्रतिज्ञा कृता ततः प्रतिज्ञाकरणाद्धेतोः कर्तासि अस्मत्कार्यमिति शेषः अत एव ऋषीन् महाभयात्त्रातुं त्वमेवार्हसि ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

१] ति० टी०–अथ ऋषिभिः स्वकार्यनिवेदनम्—एवं ब्रुवद्भिः । भयत्राणमिति शेषः । ऋषिभिः । प्रेरित इति शेषः । किं कार्यम् । किं जन्यभयत्राणं कार्यमित्यर्थः ॥ १ ॥

रा० टी०–ऋषीन्प्रति रामोक्तिमाह—ब्रुवद्भिरिति । एवं ब्रुवद्भिः ऋषिभिः प्रार्थितः काकुत्स्थः वो युष्माकं किं कार्यं तद्ब्रूत वो भयमपैतु इति वाक्यमब्रवीत् ॥ १ ॥

गो० टी०–एवमित्यादि ॥ १ ॥ २ ॥

२] ति० टी०–देशस्य च चादस्माकं भयानां यन्मूलं तच्छृणु ॥ २ ॥

रा० टी०–तथेति । भार्गवोऽब्रवीत् तदाकारमाह–देशस्य भयानां यन्मूलं तच्छृणु ॥ २ ॥

३–५] ति० टी०–लोलायाः पुत्रो लोलापुत्रः ॥ ३–५ ॥

रा० टी०–पूर्वमिति । कृतयुगे ब्रह्मण्यः शरण्यश्च ज्येष्ठः मधुर्नाम लोलापुत्रः अभवत् अत एव सुरैस्सह तस्य मधोः अतुला प्रीतिरभवत् श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

रा० टी०–स इति । स मधुः धर्मं सुसमाहितोऽभवदिति शेषः तस्य मधोर्बहुमानात् रुद्रस्यातिपूजनात् रुद्रेण अद्भुतो वरो दत्तः ॥ ५ ॥

गो० टी०–पूर्वमिति । लोलायाः पुत्रो लोलापुत्रः॥ ३–६॥

६] ति० टी०–विनिष्कृष्य तच्छक्तिमाकृष्य ॥ ६ ॥

रा० टी०–वराकारमाह—शूलमिति । महात्मा रुद्रः महावीर्यं शूलं शूलाद्विनिष्कृष्य ददौ एतदुवाच च ॥ ६ ॥

गो०टी०–शूलमिति । शूलाच्छूलं विनिष्कृष्येति । स्वशूलाच्छक्तिमाकृष्य सृष्ट्वेत्यर्थः ॥ ७ ॥ ८ ॥

७] ति० टी०–यतस्त्वया मत्प्रसादकरो धर्मः कृतः अत आयुधं ददामि ॥ ७ ॥

रा० टी०–तदाकारमाह—त्वयेति । मत्प्रसादकरः अतुलो धर्मः यतस्त्वया कृत इति शेषः अतः परमया प्रीत्या युक्तोहं उत्तममायुधं ददामि ॥ ७ ॥

---

१ बल इति गो. पा । २ धर्मे इति गो. पाठः । ३ पद्यमिदमधिकं गो. पु. । ४ कृत इति गो. पाठः ।

यावत्सुरैश्च विप्रैश्च न विरुध्येर्महासुर । तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति ॥ ८ ॥
यश्च मामभियुञ्जीत युद्धाय विगतज्वरः । तं शूलो भस्मसात्कृत्वा पुनरेष्यति ते करम् ॥ ९ ॥
एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः । प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥ १० ॥
भगवन्मम वंशस्य शूलमेतदनुत्तमम् । भवेत्तु सततं देव सुराणामीश्वरो ह्यसि ॥ ११ ॥
तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः । प्रत्युवाच महादेवो नैतदेवं भविष्यति ॥ १२ ॥
मा भूत्ते विफला वाणी मत्प्रसादकृता शुभा । भवतः पुत्रमेकं तु शूलमेतद्धनिष्यति ॥ १३ ॥
यावत्करस्थः शूलोऽयं भविष्यति सुतस्य ते । अवध्यः सर्वभूतानां शूलहस्तो भविष्यति ॥ १४ ॥
एवं मधुर्वरं लब्ध्वा देवात्सुमहदद्भुतम् । भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम् ॥ १५ ॥
तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या । विश्वावसोरपत्यं सा पर्ण्यनलायां महाप्रभा ॥ १६ ॥
तस्याः पुत्रो महावीर्यो लवणो नाम दारुणः । बाल्यात्प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥ १७ ॥
तं पुत्रं दुर्विनीतं तु दृष्ट्वा क्रोधसमन्वितः । मधुः स शोकमापेदे न चैनं किंचिदब्रवीत् ॥ १८ ॥
स विहाय इमं लोकं प्रविष्टो वरुणालयम् । शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत् ॥ १९ ॥
स प्रभावेण शूलस्य दौरात्म्येनात्मनस्तथा । संतापयति लोकांस्त्रीन्विशेषेण च तापसान् ॥ २० ॥

८-१२] ति० टी०-यावच्च विरुध्येर्विरोधं न कुर्याः । अन्यथा नाशमदर्शनम् ॥ ८-१२ ॥

रा० टी०-शूलस्थितेरवधिमाह—**यावदिति**। यावत् सुरैर्न विरुध्येः तावत्कालमेव इदं शूलं तव स्यात् अन्यथा तादृग्विरोधे नाशमेष्यति ॥ ८ ॥

रा० टी०-य इति । युद्धाय यस्त्वामभियुञ्जीत तं जनं शूलो भस्मसात्कृत्वा ते करं पुनरेष्यति ॥ ९ ॥

रा० टी०-एवमिति । महासुरः एतद्वाक्यमुवाच ॥१०॥

रा० टी०-तदाकारमाह—**भगवन्निति**। एतत् शूलं मम वंशस्य भवेत् न ममैवेत्यर्थः ॥ ११ ॥

रा० टी०-तमिति । शिवः मधुं प्रत्युवाच तदाकारमाह—यद्यपि एतत्तवोक्तमेवं मया दत्तं न भविष्यति तथापि मत्प्रसादकृता ते वाणी विफला माभूत् अतः भवत एकं पुत्रमेतच्छूलं भविष्यति प्राप्स्यति श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

गो० टी०-यावदिति । अनाशमदर्शनम् ॥ ९-१३ ॥

१३-१५] ति० टी०-मत्प्रसादकृता मत्प्रसादजसंतोषोक्ता । भविष्यति प्राप्स्यति ॥ १३-१५ ॥

गो० टी०-मेति । मत्प्रसादकृता मत्प्रसादजसंतोषजनितेत्यर्थः ॥ १४-१६ ॥

रा० टी०-तत्फलमाह—**यावदिति**। अयं शूलः यावत्ते सुतस्य करस्थो भविष्यति तावत्कालं शूलहस्तस्तव सुतः सर्वभूतानामवध्यो भविष्यति ॥ १४ ॥

रा० टी०-एवमिति । मधुः एवं वरं लब्ध्वा सुप्रभं भवनं कारयामास ॥ १५ ॥

१६-१८] ति० टी०-कुम्भीनसी मान्यवत्सुता, यानलायाः सुता रावणस्वसा पूर्वं मधुना हृतेत्युक्ता । तदेवाह-अनलायामिति । कुम्भीनसीपितरमाह-विश्वावसोरिति १६-१८

रा० टी०-तस्येति । तस्य मधोः प्रिया पत्नी या कुंभीनसी सा अनलायां जाता विश्वावसोरपत्यम् ॥ १६ ॥

रा० टी०-तस्या इति । लवणो नाम दारुणः तस्याः कुंभीनस्याः पुत्रः बाल्यात्प्रभृति पापान्येव समाचरत् ॥ १७ ॥

रा० टी०-तमिति । मधुः पुत्रं दुर्विनीतं दृष्ट्वा शोकमापेदे एनं पुत्रं किञ्चिन्नाब्रवीच्च ॥ १८ ॥

गो० टी०-तस्येति । कुम्भीनसी मान्यवत्पुत्र्याः अनलायाः सुता रावणस्वसा पूर्वं मधुना हृतेति विभीषणेन रावणं प्रत्युक्ता । हिः प्रसिद्धौ ॥ १७-१९ ॥

१९-२०] ति० टी०-वरं यावच्छूलं तव हस्ते तावदवध्यत्वं तवेत्येवंरूपं वरदत्तान्तं न्यवेदयत् ॥ १९ ॥ २० ॥

रा० टी०-स इति । स मधुः लवणे शूलं निवेश्य तस्मै लवणाय वरं शंभुनोक्तवचनं न्यवेदयत् अकथयत् वरुणालयं प्रविष्टोऽभवच्चेति शेषः ॥ १९ ॥

रा० टी०-स इति । स लवणः त्रीन् लोकान् विशेषेण तापसांश्च सन्तापयति ॥ २० ॥

गो० टी०-स इति । वरं न्यवेदयत् यावच्छूलं तव हस्ते तावदवध्यत्वं तवेत्येवंरूपं वरदत्तान्तम् ॥ २०-२९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

१ त्वामिति गो. रा. पाठः । २ तेजा इति गो. पाठः । ३ भजिष्यते इति गो. पाठः । ४ ह्यनलायामिति गो. पाठः । ५ लवणः इति गो.रा.पा. ।

एवंप्रभावो लवणः शूलं चैव तथाविधम् । श्रुत्वा प्रमाणं काकुत्स्थ त्वं हि नः परमा गतिः॥ २१ ॥
बहवः पार्थिवा राम भयार्तैर्ऋषिभिः पुरा । अभयं याचिता वीर त्रातारं न च विन्दहे ॥ २२ ॥
ते वयं रावणं श्रुत्वा हतं सबलवाहनम् । त्रातारं विन्दहे तात नान्यं भुवि नराधिपम् ॥
तत्परित्रातुमिच्छामो लवणाद्भयपीडितान् । ॥ २३ ॥
इति राम निवेदितं तु ते भयजं कारणमुत्थितं च यत् ।
विनिवारयितुं भवान्क्षमः कुरु तं काममहीनविक्रम । ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ।

रामः पुनस्तत्स्थानाहारकर्माणि तापसमुखान्निशम्य न भेतव्यमचिरादेव तं घातयिष्यामीति प्रतिश्रुत्य भवतां को हन्ता लवणमिति भ्रातनपृच्छत् ततः संनद्धं भरतं निरुद्ध्य स्वयं निष्क्रान्तं शत्रुघ्नं प्रशस्य साधु लवणं हत्वा तत्रैव त्वं राज्यं प्रशाधीति सीतापतिस्तमभाषत।

तथोक्ते तानृषीन्रामः प्रत्युवाच कृताञ्जलिः । किमाहारः किमाचारो लवणः क्व च वर्तते ॥ १ ॥
राघवस्य वचः श्रुत्वा ऋषयः सर्व एव ते । ततो निवेदयामासुर्लवणो वर्तते यथा ॥ २ ॥
आहारः सर्वसत्त्वानि विशेषेण च तापसाः । आचारो रौद्रता नित्यं वासो मधुवने तथा ॥ ३ ॥
हत्वा बहुसहस्राणि सिंहव्याघ्रमृगाण्डजान् । मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥ ४ ॥
ततोऽन्तराणि सत्त्वानि खादते स महाबलः । संहारे समनुप्राप्ते व्यादितास्य इवान्तकः ॥ ५ ॥
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् । घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥ ६ ॥
प्रतिज्ञाय तदा तेषां मुनीनामुग्रतेजसाम् । स भ्रातॄन्सहितान्सर्वानुवाच रघुनन्दनः ॥ ७ ॥

२१–२३] ति० टी०–त्वं प्रमाणम् । यथोचितकरणे इति शेषः ॥ २१–२३ ॥

रा० टी०–उपसंहरन्नाह–एवमिति । लवण एवंप्रभावः तथाविधं शूलं च श्रुत्वा प्रमाणं शास्त्रप्रामाण्यं यथा भवेत्तथा त्वं नः परमा गतिर्भवेति शेषः पापिनामेव दृढौ शास्त्रप्रामाण्यं निवर्त्तेतेति तात्पर्यम् ॥ २१ ॥

रा० टी०–बहव इति । भयार्तैर्ऋषिभिः बहवः पार्थिवाः पुरा अभयं याचिताः त्रातारं तु न विन्दहे ॥ २२ ॥

रा० टी०–ननु मां त्रातृत्वेन कथं वेत्सीत्यत आह–ते इति । रावणं हतं श्रुत्वा त्वां त्रातारं विन्दहे अन्यं त्रातारं न विन्दहे तत्तस्माद्धेतोः रावणाद्भयपीडितान् ऋषीन् परित्रातुं त्वया परित्राणं कारयितुमिच्छामः सार्द्धश्लोक एकान्वयी २३

२४] ति० टी०–भयजं भयजनकम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

रा० टी०–इतीति । भयजं भयकारकं यत्कारणमुत्थितं तत्कारणं ते तुभ्यं निवेदितमतः विनिवारयितुं भवान् एव क्षमः अतः तमस्मदीयं काममीप्सितं कुरु ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

१] ति० टी०–अथ शत्रुघ्नस्य तद्वधार्थं प्रेषणम्–तथोक्ते इति । परित्राणमिच्छाम इत्युक्ते ॥ १ ॥

रा० टी०–ऋषिप्रार्थनानन्तरकालिकं वृत्तमाह–तथेत्यादिभिः । लवणः किमाहारः क्व वर्त्तते च इति रामः ऋषीन् प्रत्युवाच ॥ १ ॥

गो० टी०–अथ शत्रुघ्नस्य लवणासुरवधार्थं प्रेषणं–तथेत्यादि ॥ १ ॥

२–४] ति० टी०–यथा वव्रधे यादृगाहारादिनावर्धत तन्निवेदयामासुः ॥ २–४ ॥

रा० टी०–राघवस्येति । ऋषयः लवणो यथा वव्रधे तथा निवेदयामासुः ॥ २ ॥

रा० टी०–तदाकारमाह–आहार इति । सर्वसत्त्वानि प्राणिनः आहारः तापसास्तु विशेषेणाहारः नित्यं रौद्रता तु आचारः मधुवने वासः लवणस्येति शेषः ॥ ३ ॥

रा० टी०–आहारमेव विशिष्याह–हत्वेति द्वाभ्याम् । बहुसहस्राणि सिंहादीन् हत्वा आह्निकमाहारं कुरुते ॥ ४ ॥

गो० टी०–राघवस्येति । यथा वव्रधे यादृगाहारादिना वर्धते स्म तथा निवेदयामासुः ॥ २–७ ॥

५–७] ति० टी०–ततोऽन्तराणि । अन्यान्यपीत्यर्थः ५–७

रा० टी०–तत इति । संहारे समनुप्राप्ते अन्तक इव

१ दिपानिति गो० । २ तथेति गो० पाठः ।

को हन्ता लवणं वीरः कस्यांशः स विधीयताम् । भरतस्य महाबाहोः शत्रुघ्नस्य च धीमतः ॥ ८ ॥
राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् । अहमेनं वधिष्यामि ममांशः स विधीयताम् ॥ ९ ॥
भरतस्य वचः श्रुत्वा धैर्यशौर्यसमन्वितम् । लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥ १० ॥
शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् । कृतकर्मा महाबाहुर्मध्यमो रघुनन्दनः ॥ ११ ॥
आर्येण हि पुरा शून्या त्वयोध्या परिपालिता । संतापं हृदये कृत्वा आर्यस्यागमनं प्रति ॥ १२ ॥
दुःखानि च बहूनीह अनुभूतानि पार्थिव । शयानो दुःखशय्यासु नन्दिग्रामे महायशाः ॥ १३ ॥
फलमूलाशनो भूत्वा जटी चीरधरस्तथा । अनुभूयेदृशं दुःखमेष राघवनन्दनः ॥ १४ ॥
प्रेष्ये मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात् । तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् ॥ १५ ॥
एवं भवतु काकुत्स्थ क्रियतां मम शासनम् । राज्ये त्वामभिषेक्ष्यामि मधोस्तु नगरे शुभे ॥ १६ ॥
निवेशय महाबाहो भरतं यद्यवेक्षसे । शूरस्त्वं कृतविद्यश्च समर्थश्च निवेशने ॥ १७ ॥

व्यादितास्यो लवणः ततोऽन्तराणि भिन्नानि वराहादीन्यपि सत्वानि खादते खादति रात्राविति शेषः ॥ ५ ॥

रा० टी०–तदिति । तदक्षोहं घातयिष्यामि अतो भयं व्यपगच्छतु इति वचनं राघवो मुनीन् उवाच ॥ ६ ॥

रा० टी०–प्रतिज्ञायेति । स रामः मुनीनामग्रे प्रतिज्ञाय सहितान् भ्रातॄन् उवाच ॥ ७ ॥

८–९] ति० टी०–कस्यांश इति पृष्ट्वा स्वयमेव निश्चिनोति—भरतस्येति । लक्ष्मणेन मया च रावणवधवल्लवणवधो भरतशत्रुघ्नाभ्यां कार्य इति भावः ॥ ८ ॥ ९ ॥

रा० टी०–तदाकारमाह–क इति । लवणं को वीरो हन्ता अतः स हननयोग्यो लवणः भरतस्य शत्रुघ्नस्य वा कस्यांशः हननभागो विधीयताम् ॥ ८ ॥

रा० टी०–राघवेणेति । एनं लवणमहं वधिष्यामि अतः सोऽधरः ममांशः हननदायादो विधीयताम् इति वाक्यं भरतोऽब्रवीत् ॥ ९ ॥

गो० टी०–क इति । कस्यांश इति पृष्ट्वा स्वयमेव निश्चिनोति । भरतस्येति ॥ ८ ॥ ९ ॥

१०–११] ति० टी०–आसनं हित्वा । आसनादुत्थायेत्यर्थः ॥ १० ॥ ११ ॥

रा० टी०–भरतस्येति । लक्ष्मणावरजश्शत्रुघ्नः आसनं हित्वा तस्थौ ॥ १० ॥

रा० टी०–शत्रुघ्न इति । शत्रुघ्नोऽब्रवीत् ॥ ११ ॥

गो० टी०–भरतस्येति । आसनं हित्वा आसनादुत्थायेत्यर्थः ॥ १०–१५ ॥

१२–१४] ति० टी०–पूर्वं त्वद्वियोगदुःखितस्य भरतस्य पुनरपि क्लेशाय प्रेषणमयुक्तमित्याशयेनाह—आर्येणेति । आर्येण त्वया शून्यायोध्या भरतेन पालिता । आर्यस्यागमनं प्रति तावत्पर्यन्तम् ॥ १२–१४ ॥

रा० टी०–तदाकारमाह–आर्येणेत्यादिभिः । आर्यस्य तवागमनं प्रति आर्येण भरतेन पुरा त्वया शून्या अयोध्या परिपालिता अत एव बहूनि दुःखान्यनुभूतानि सार्द्धश्लोक एकान्वयी ॥ १२ ॥

रा० टी०–दुःखाकारमाह—शयान इति । फलमूलाशनादिर्भूत्वा दुःखशय्यासु शयानस्सन् नन्दिग्रामे महायशा भरतोऽतिष्ठदिति शेषः ॥ १३ ॥

रा० टी०–अनुभूयेति । एष भरतः ईदृशं दुःखमनुभूय मयि प्रेष्ये स्थिते सति प्रेषणे इति शेषः भूयः क्लेशमवाप्नुयात् अहमेव प्रेषणीय इति तात्पर्यम् ॥ १४ ॥

१५–१६] ति० टी०–प्रेष्ये विशिष्य भरतस्य नियो-

रा० टी०–तथेति । राघवो रामः पुनरब्रवीत् एवं भवदुक्तं भवतु अतः मम शासनं क्रियताम् ॥ १५

रा०टी०–शासनकरणे फलमाह–राज्य इति । मधोः राज्ये त्वामभिषेक्ष्यामि अतो भरतं यद्यवेक्षसे श्रान्तत्वेनेति शेषः तदा नगरे अयोध्यायामेव निवेशय संस्थापय प्रजाः संस्थापयेत्यर्थो वा ॥ १६ ॥

गो० टी०–राज्य इति । निवेशय अत्रैव नगर इति शेषः । अथवा तत्रैव तिष्ठेति भावः । अवेक्षसे अक्लेशनीयत्वेनेति शेषः ॥ १६ ॥

१७] ति० टी०–यद्यवेक्षसे । अक्लेशनीयत्वेनेति शेषः । तदा भरतं निवेशय । अत्रैव स्थापयेत्यर्थः । निवेशने नूतननगरनिवेशने त्वं समर्थः ॥ १७ ॥

रा० टी०–शूर इति । शूरः निवेशने नगरनिर्मापणे समर्थश्च त्वं यमुनाजुष्टं नगरं जनपदान् देशान् शुभान् मङ्गलयुक्तांश्च कारयेति शेषः ॥ १७ ॥

गो० टी०–शूर इति । निवेशने नूतनगृहनिर्माण इत्यर्थः ॥ १७ ॥

१ नन्दन इति गो. पाठः । २ अवसत्पुरेति गो. पाठः ।

नगरं यमुनाजुष्टं तथा जनपदाञ्शुभान् । यो हि वंशं समुत्पाद्य पार्थिवस्य निवेशने ॥ १८ ॥
न विधत्ते नृपं तत्र नरकं स हि गच्छति । स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् ॥ १९ ॥
राज्यं प्रशाधि धर्मेण वाक्यं मे यद्यवेक्षसे । उत्तरं च न वक्तव्यं शूर वाक्यान्तरे मम ॥ २० ॥
बालेन पूर्वजस्याज्ञा कर्तव्या नात्र संशयः । अभिषेकं च काकुत्स्थ प्रतीच्छस्व ममोद्यतम् ॥
वसिष्ठप्रमुखैर्विप्रैर्विधिमन्त्रपुरस्कृतम् । ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।

वसिष्ठादिभिः सहाभिषेक्तुं प्रवृत्तोऽग्रजः ज्येष्ठेषु सत्स्वपि कथं ममाभिषेक इति लज्जमानमतिपूज्यत्वात्प्रत्युत्तराक्षमं लक्ष्मणानुजं लवणराज्येऽभिषिच्याङ्गमारोप्यामोघशरं प्रदायायं सशूलश्चैदवध्योऽतः समयं परिपाल्य शूलविनाकृतो हन्तव्य इत्युपादिशत् तापसाश्च लवणं हतप्राय ममन्यन्त ।

एवमुक्तस्तु रामेण परां व्रीडामुपागमत् । शत्रुघ्नो वीर्यसंपन्नो मन्दं मन्दमुवाच ह ॥ १ ॥
अधर्मं विद्म काकुत्स्थ अस्मिन्नर्थे नरेश्वर । कथं तिष्ठत्सु ज्येष्ठेषु कनीयानभिषिच्यते ॥ २ ॥

१८] ति० टी०–मधोर्नगरे त्वामभिषेक्ष्यामीति यदुक्तं तत्र हेतुमाह—यो हीति । निवेशने नगरे ॥ १८ ॥

रा० टी०–तत्राभिषेके हेतुमोह–य इति । यः पार्थिवस्य वंशं समुत्पाद्य पार्थिवस्य निवेशने नृपं न विधत्ते स उत्पाटयिता नरकं गच्छति ॥ १८ ॥

गो० टी०–मधोस्तु नगरे त्वामभिषेक्ष्यामीत्यत्र हेतुमाह–यो हीति । नृपं तत्रेति । उत्पाटितवंशनृपराज्य इत्यर्थः १८॥१९

१९] ति० टी०–नृपं तत्रोत्पाटितवंशनृपराज्ये ॥ १९॥

रा० टी०–स इति । यदि मे वाक्यमवेक्षसे विचारयसि तर्हि लवणं हत्वा राज्यं धर्मेण प्रशाधि ॥ १९ ॥

२०–२१] ति० टी०–उत्तरं न वक्तव्यम् । लवणं हत्वा त्वत्समीप एव मया स्थेयमित्यादि न वाच्यमित्यर्थः २०॥२१

२२] ति० टी०–विधिमन्त्रपुरस्कृतं विधिना मन्त्रेण पुरस्कृतम् ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

रा० टी०–वियोगभीरुत्वेन राज्येच्छारहितं विज्ञाय आह–उत्तरमिति । बालेन कनिष्ठेन पूर्वजस्याज्ञा कर्तव्या अतो मम वाक्यान्तरे राज्यकरणाज्ञापने उत्तरं न करिष्यामीति प्रतिवचनं न कर्त्तव्यम् ॥ २० ॥

गो० टी०–उत्तरं च न वक्तव्यमिति । त्वत्समीप एव मया वस्तव्यमित्यादिकमित्यर्थः ॥ २० ॥

रा० टी०–अभिषेकमिति । ममोद्यतमाज्ञापितं विप्रैः विधिमन्त्रपुरस्कृतमभिषेकं प्रतीक्षस्व स्वीकुरु ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

गो० टी०–अभिषेकमिति । विधिना मन्त्रेण च पुरस्कृतम् ॥ २१ ॥

इति श्रीगोविन्दराजविरचिते मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

१] ति० टी०–अथ रामेण स्वसंनिधावेव मधुराज्ये शत्रुघ्नमभिषिच्य लवणवधोपायोपदेशपूर्वकं तद्वधार्थं दिव्यास्त्रप्रदानम्—एवमिति । परां व्रीडामनुचितराज्याभिषेकोक्तिश्रवणजां लज्जाम्, अत एव मन्दं मन्दमुवाच ॥ १ ॥

रा० टी०–रामाज्ञाश्रवणानन्तरकालिकं शत्रुघ्नवृत्तमाह एवमित्यादिभिः । रामेणैवमुक्तश्शत्रुघ्नः परां व्रीडामुपागमत् मन्दं मन्दमुवाच च ॥ १ ॥

गो०टी०–अथ रामेण स्वसन्निधावेव मधुराज्ये शत्रुघ्नमभिषिच्य लवणवधोपायोपदेशपूर्वकं तद्वधार्थं दिव्यास्त्रप्रदानम् एवमित्यादि ॥ १ ॥

२] ति० टी०–तदेवाह—अधर्ममिति । विद्म वेद्मि । अस्मिन्नित्येतद्विशदयन्नधर्महेतुमाह—कथमिति । कनीयानभिषिच्यते । न कथमपीत्यर्थः । अत एवाधर्म इत्यर्थः ॥ २ ॥

रा० टी०–तदाकारमाह–अधर्ममित्यादिभिः । ज्येष्ठेषु तिष्ठत्सु कनीयान् कथमभिषिच्यते नोचितमित्यर्थः अतः अस्मिन् भवदाज्ञापिते अर्थे राज्याभिषेके अधर्मं विद्म वेद्मि २

गो० टी०–अधर्ममिति । विद्म वेद्मीत्यर्थः । अस्मिन्नित्युक्तं विवृणोति–कथमित्यादि । तिष्ठत्सु ज्येष्ठेष्विति गुरुवैषम्यमार्षम् । कथमभिषिच्यते न कथमपि । अधर्म एवेत्यर्थः ॥ २ ॥

१ इदमर्धं गो. पुस्त. नास्ति । २ मयेति गो. पाठः ।

अवश्यं करणीयं च शासनं पुरुषर्षभ । तव चैव महाभाग शासनं दुरतिक्रमम् ॥ ३ ॥
त्वत्तो मया श्रुतं वीर श्रुतिभ्यश्च मया श्रुतम् । नोत्तरं हि मया वाच्यं मध्यमे प्रतिजानति ॥ ४ ॥
व्याहृतं दुर्वचो घोरं हन्तास्मि लवणं मृधे । तस्यैवं मे दुरुक्तस्य दुर्गतिः पुरुषर्षभ ॥ ५ ॥
उत्तरं नहि वक्तव्यं ज्येष्ठेनाभिहिते पुनः । अधर्मसहितं चैव परलोकविवर्जितम् ॥ ६ ॥
सोऽहं द्वितीयं काकुत्स्थ न वक्ष्यामीति चोत्तरम् । मा द्वितीयेन दण्डो वै निपतेन्मयि मानद ॥ ७ ॥
कामकारो ह्यहं राजंस्तवास्यै पुरुषर्षभ । अधर्मं जहि काकुत्स्थ मत्कृते रघुनन्दन ॥ ८ ॥

३] ति० टी०–तव शासनं चावश्यं करणीयम्, यतस्तव शासनं वेदशासनवदुरतिक्रममतिक्रमितुमशक्यम् । एवं चोभयतः पाशा रज्जुरियं मे जातेत्यर्थः ॥ ३ ॥

रा० टी०–ननु अधर्मं त्वं माङ्गीकुर्वित्यत आह–अवश्यमिति । तव शासनं दुरतिक्रममस्ति अतः तव शासनमवश्यं करणीयमेतेन तवाज्ञापितोकरणेपि महानधर्मो भविष्यतीति सूचितम् ॥ ३ ॥

गो० टी०–अवश्यमिति । तव शासनं चावश्यं करणीयमित्यर्थः ॥ ३ ॥

४] ति० टी०–ज्येष्ठे विद्यमाने कनिष्ठाभिषेकोऽधर्मस्तथा ज्येष्ठवाक्याकरणं चाधर्म इति त्वया कथमवगतं तत्राह—त्वत्त इति । स्वद्गुरोस्त्वत्तः श्रुतिभ्यश्च मयैवं श्रवणमिति भावः । एवमधर्मसंकटप्राप्तिरपि मे स्वदोषमूलेत्याह—नोत्तरं हीति । मध्यमे भ्रातरि भरते घोरं लवणं हन्तास्मीति प्रतिजानति सति, हि यस्मान्मया ज्येष्ठवचनमुल्लङ्घ्योत्तरं न वाच्यं न वक्तुं योग्यम् । तद्वचस्तिरस्काररूपत्वात् ॥ ४ ॥

रा० टी०–ननु ज्येष्ठसत्वे कनिष्ठाभिषेको नोचित इति ज्येष्ठाज्ञापितं न त्याज्यमिति च कथं त्वया ज्ञातमित्यत आह–त्वत्त इति । त्वत्तः श्रुतिभ्यश्च श्रुतमत एव मध्यमे भरते प्रतिजानति प्रतिज्ञां कुर्वति सत्यपि उत्तरं मया न प्रतिवाच्यम् एतेन अविचारादुत्तरमुक्तमिति सूचितम् ॥ ४ ॥

गो० टी०–त्वत्त इति । मध्यमे भ्रातरि भरत इत्यर्थः । घोरं लवणं हन्तास्मीति प्रतिजानति सति । हि यस्मात् । मया उत्तरं ज्येष्ठवच उल्लङ्घ्य न वाच्यं वक्तुं न योग्यम् ॥ ४ ॥

५] ति० टी०–तथापि मृधे युद्धे घोरं लवणं हन्तास्मीत्येतदुर्वचो व्याहृतं तस्यास्य दुरुक्तस्य फलभूतेयं दुर्गतिर्ज्येष्ठातिक्रमहेतुना निरयप्रापकाभिषेकप्राप्तिस्तत्प्रापकत्वद्वाक्यातिक्रमप्राप्तिर्वा जातेति शेषः ॥ ५ ॥

रा० टी०–व्याहृतमिति । अहं लवणं हन्तास्मि इति यदुर्वचो मया व्याहृतं तस्यैव दुरुक्तस्य फलमिति शेषः दुर्गतिः ज्येष्ठातिक्रमहेतुकनिरयप्राप्तिकारणीभूताभिषेकप्राप्तिर्मे जाता ५

गो० टी०–व्याहृतमिति । तथाप्यहं मृधे युद्धे लवणं हन्तास्मीति दुर्वचो व्याहृतं तस्यास्य मे दुरुक्तस्येयं दुर्गतिः दुष्टकार्यस्य प्राप्तिः । तच्च ज्येष्ठातिक्रमेण आत्माभिषेचनम्॥५॥

६] ति० टी०–अतिपीडावशादुक्तमेव पुनर्वदति—उत्तरं हीति । ज्येष्ठेन भरतेन त्वया वाभिहिते उत्तरं न वक्तव्यं वक्तुमनर्हमेव । किं च तन्मूलकं त्वयाधर्मसहितम्, अत एव परलोकविवर्जितमभिषेकशासनं कृतम् । तच्च दुरतिक्रममिति शेषः ॥ ६ ॥

रा० टी०–उत्तरमिति । ज्येष्ठेनाभिहिते सति यदुत्तरं तत् अधर्मसहितमधर्मस्य मूलमत एव परलोकविवर्जितम् अत एव न कर्त्तव्यम् अत एव सः भरतवचनातिक्रमणस्य कर्त्ताप्यहं द्वितीयं भवदुक्तेरुत्तरं कर्त्तुं न शक्ष्यामि अत एव द्वितीयेन त्वद्रूपज्येष्ठवचनस्योत्तरेण मयि दण्डः अभिषेकप्राप्तिरिवापराधर्मप्राप्तिर्मा निपतेत् श्लोकद्वयमेकान्वयि ॥ ६-७ ॥

गो० टी०–उक्तमर्थं व्यावर्तयति–उत्तरं हीत्यादि । ज्येष्ठेन भरतेनाभिहिते सति ततः परमुत्तरं न वक्तुमुचितमेव । किंचाधर्मसहितमपि । अत एव परलोकविवर्जितमपि । तव शासनं च दुरतिक्रममिति शेषः ॥ ६ ॥

७] ति० टी०–यदेवमतः—सोऽहं भरतोक्तेः प्रथमं कृतोत्तरवचनः । हे काकुत्स्थ ! तव ज्येष्ठस्योक्तेरभिषेकं प्रतीच्छेत्यस्या द्वितीयमुत्तरमिति हेतोर्न वक्ष्यामि । कुतस्तत्राह—मा द्वितीयेनेति । यथा भरते जिगमिषत्यहं गमिष्यामीत्युत्तरेण प्रथमेन राज्याभिषेकापत्तिरूपो दण्डः पतितः, तस्येदानीं त्वयाभिषेकं प्रतीच्छेत्युक्ते तदनङ्गीकारोत्तरेण द्वितीयेन मम दण्डो मा निपतेदिति ॥ ७ ॥

गो० टी०–फलितमाह–सोहमित्यादि । भरतोक्तेः प्रथमं कृतोत्तरवचनः सोहं हे काकुत्स्थ ! तव ज्येष्ठस्योत्तरं द्वितीयं न वक्ष्यामि । तत्र हेतुमाह–मेति । द्वितीयेन ज्येष्ठप्रत्युत्तरेण दण्डो मयि मा निपतेत् । भरते जिगमिषत्यहं गमिष्यामीत्युत्तरेण प्रथमेन राज्याभिषेकापत्तिरूपो दण्डः पतितः । त्वया अभिषेकं प्रतीच्छेत्युक्ते तदनङ्गीकारोत्तरेण द्वितीयेन मयि दण्डो मा निपतेदिति भावः ॥ ७ ॥

८] ति० टी०–यदेवमतो हे राजन् ! अहमस्य तव कामकारोऽभीष्टनियोगकर्तास्मि । यतः, अतो हे रघुनन्दन ! मत्कृते मदनुष्ठिते राज्याभिषेकस्वीकारेऽधर्मं जहि, ममाधर्मसंबन्धो यथा न भवेत्तथा कुरु । इहामुत्र सर्वलोकस्य मध्यन्याय्यकारित्वबुद्धिं परिहर ॥ ८ ॥

१ तवेति गो. पाठः । २ अस्मीति गो. पा. ।

एवमुक्ते तु शूरेण शत्रुघ्नेन महात्मना । उवाच रामः संहृष्टो भरतं लक्ष्मणं तथा ॥ ९ ॥
संभारानभिषेकस्य आनयध्वं समाहिताः । अद्यैव पुरुषव्याघ्रमभिषेक्ष्यामि राघवम् ॥ १० ॥
पुरोधसं च काकुत्स्थ नैगमानृत्विजस्तथा । मन्त्रिणश्चैव तान्सर्वानानयध्वं ममाज्ञया ॥ ११ ॥
राज्ञः शासनमाज्ञाय तथाकुर्वन्महारथाः । अभिषेकसमारम्भं पुरस्कृत्य पुरोधसम् ॥ १२ ॥
प्रविष्टा राजभवनं राजानो ब्राह्मणास्तथा । ततोऽभिषेको वव्रृधे शत्रुघ्नस्य महात्मनः ॥ १३ ॥
संप्रहर्षकरः श्रीमान्राघवस्य पुरस्य च । अभिषिक्तस्तु काकुत्स्थो बभौ चादित्यसंनिभः॥१४॥
अभिषिक्तः पुरा स्कन्दः सेन्द्रैरिव दिवौकसैः । अभिषिक्ते तु शत्रुघ्ने रामेणाक्लिष्टकर्मणा ॥ १५ ॥
पौराः प्रमुदिताश्वासन्ब्राह्मणाश्च बहुश्रुताः । कौसल्या च सुमित्रा च मङ्गलं केकयी तथा ॥ १६ ॥
चक्रुस्ता राजभवने याश्चान्या राजयोषितः । ऋषयश्च महात्मानो यमुनातीरवासिनः ॥ १७ ॥
हतं लवणमाशंसुः शत्रुघ्नस्याभिषेचनात् । ततोऽभिषिक्तं शत्रुघ्नमङ्कमारोप्य राघवः ॥
उवाच मधुरां वाणीं तेजस्तस्याभिपूरयन् । ॥ १८ ॥
अयं शरस्त्वमोघस्ते दिव्यः परपुरंजयः । अनेन लवणं सौम्य हन्तासि रघुनन्दन ॥ १९ ॥
सृष्टः शरोऽयं काकुत्स्थ यदा शेते महार्णवे । स्वयंभूरजितो दिव्यो यं नापश्यन्सुरासुराः ॥ २० ॥

रा० टी०–**कामकार इति** । यतोहं तव कामकारः इच्छानुकूलवर्त्ती अतो मत्कृते मया निष्पादिते अयुक्तेऽप्यभिषेके अधर्मं तद्बुद्धिं जहि त्यज एतेन रामोऽघटितघटनापटीयानिति शत्रुघ्ननिश्चयस्सूचितः ॥ ८ ॥

गो० टी०–फलितमाह–**कामकार इति** । अहं तव कामकारोस्मि अभीष्टनियोगकर्तास्मि । मत्कृते मदनुष्ठितराज्याभिषेकस्वीकारे । अधर्मं ज्येष्ठातिक्रमेण राज्यप्राप्तिनिमित्तम् । काकुत्स्थेत्यत्रापि प्राधान्याल्लोकस्य अधर्मम् अधर्मबुद्धिम् जहि परिहर ॥ ८ ॥

९] ति० टी०–एवमुक्ते स्वातन्त्र्यं विहायाभिषेकाङ्गीकारवाक्ये उक्ते ॥ ९ ॥

रा० टी०–**एवमिति** । राम उवाच ॥ ९ ॥

गो० टी०–**एवमिति** । संहृष्ट इति । कृताभिषेकनियोगत्वादिति भावः । अभिषेकस्य संभारान् अभिषेकोपकरणानि लक्ष्मणं भरतं तथेति । प्राधान्यात् सुमन्त्रादीनपीत्यर्थः । अन्यथाऽनयध्वमिति बहुवचनं विरुध्येत ॥ ९ ॥ १७

१०–११] ति० टी०–आनयध्वमिति बहुवचनं सुमन्त्राद्यभिप्रायेण ॥ १० ॥ ११ ॥

रा० टी०–तदाकारमाह—**सम्भारानित्यादिभिः** । पुरुषव्याघ्रं शत्रुघ्नमप्यैवाभिषेक्ष्यामि अतः अभिषेकस्य सम्भारान् सामग्रीः आनयध्वम् ॥ १० ॥

रा० टी०–**पुरोधसमिति** । पुरोधःप्रभृतीन् आनयध्वम् ॥ ११ ॥

१२] ति० टी०–अभिषेकसमारम्भमभिषेकोपकरणवन्तं पुरोधसं पुरस्कृत्य ॥ १२ ॥

१३–१७] ति० टी०–राजानः क्षत्रिया ब्राह्मणाश्च राजभवनं प्रविष्टाः ॥ १३–१७ ॥

रा० टी०–राज्ञे इति । महारथाः तथा यथाज्ञप्तमकुर्वन् अत एव अभिषेकस्य समारम्भं सामग्रीं पुरोधसं च पुरस्कृत्य राजानो ब्राह्मणाश्च राजभवनं प्रविष्टाः ततोऽनन्तरं शत्रुघ्नस्याभिषेको वव्रृधे प्रवव्रृते श्लोकद्वयमेकान्वयि ॥ १२—१३ ॥

रा० टी०–**सम्प्रहर्षेति** । दिवौकसैरभिषिक्तः स्कन्द इव अभिषिक्तः काकुत्स्थश्शत्रुघ्नः आदित्यनिभो बभौ सार्द्धश्लोक एकान्वयी ॥ १४ ॥

रा० टी०–**अभिषिक्त इति** । शत्रुघ्ने अभिषिक्ते सति पौरप्रभृतयः प्रमुदिता आसन् कौशल्याप्रभृतयस्तु मङ्गलं चक्रुः अर्द्धचतुष्टयमेकान्वयि ॥ १५ ॥ १६ ॥

रा० टी०–**ऋषय इति** । शत्रुघ्नस्याभिषेचनाद्धेतोः ऋषयः लवणं हतमाशंसुः ॥ १७ ॥

१८] ति० टी०–आशंसुराशंसुर्निश्चितवन्तः । तेजः शत्रुसंहारोचितबलवीर्यम् ॥ १८ ॥

रा० टी०–**तत इति** । तस्य शत्रुघ्नस्य तेजः पूरयन्सन् राघव उवाच ॥ १८ ॥

गो० टी०–**तत इति** । तेजः शत्रुसंहारोचितबलवीर्यम् ॥ १८ ॥

१९] ति० टी०–अयं शरः दीयत इति शेषः ॥ १९ ॥

रा० टी०–तदाकारमाह—**अयमित्यादिभिः** । अयममोघश्शरः ते तुभ्यं मया दीयते इति शेषः अनेन शरेणैव लवणं त्वं हन्तासि ॥ १९ ॥

गो० टी०–**अयमिति** । अयं मया दीयमानः ॥ १९ ॥

२०] ति० टी०–शरस्यामोघत्वहेतुमाह—**सृष्ट इति** ।

१ पुरोहितं च काकुत्स्थमिति गो. पा. । २ तथेति गो. पा. । ३ शत्रुघ्न इति गो. पा. । ४ मरुद्गणैरिति गो. पा. ।

अदृश्यः सर्वभूतानां तेनायं हि शरोत्तमः । सृष्टः क्रोधाभिभूतेन विनाशार्थं दुरात्मनोः ॥ २१ ॥
मधुकैटभयोर्वीर विघाते सर्वरक्षसाम् । स्रष्टुकामेन लोकांस्त्रींस्तौ चानेन हतौ युधि ॥ २२ ॥
तौ हत्वा जनभोगार्थं कैटभं तु मधुं तथा । अनेन शरमुख्येन ततो लोकांश्चकार सः ॥ २३ ॥
नायं मया शरः पूर्वं रावणस्य वधार्थिना । मुक्तः शत्रुघ्न भूतानां महान्ह्रासो भवेदिति ॥ २४ ॥
यच्च तस्य महच्छूलं त्र्यम्बकेण महात्मना । दत्तं शत्रुविनाशाय मधोरायुधमुत्तमम् ॥ २५ ॥
तत्संनिक्षिप्य भवने पूज्यमानं पुनः पुनः । दिशः सर्वाः समासाद्य प्राप्नोत्याहारमुत्तमम् ॥ २६ ॥
यदा तु युद्धमाकाङ्क्षन्यदि कश्चित्समाह्वयेत् । तदा शूलं गृहीत्वा तुं भस्म रक्षः करोति हि ॥ २७ ॥
स त्वं पुरुषशार्दूल तमायुधविनाकृतम् । अप्रविष्टं पुरं पूर्वं द्वारि तिष्ठ धृतायुधः ॥ २८ ॥

स्वयंभूर्जन्मरहितोऽजितो विष्णुर्यदा प्रलयकाले महार्णवे शेते । यं तदा सुरा असुराश्च नापश्यन् । कैमुतिकन्यायेन सर्वभूताऽदृश्यः । महार्णवे शयनं च वायुरूपेण । ' प्रजापतिर्वायुर्भूत्वा चरेत् ' इति श्रुतेरिति कतकः । तेन विष्णुना साक्षादयं शरोत्तमः सृष्टः ॥ २० ॥

रा० टी०–शरस्य तादृशप्रभावे हेतुमाह—**सृष्ट** इति । स्वयम्भूरजितो यदा महार्णवे शेते अत एव सुरासुराः यं नापश्यन् तेनायं शरस्सृष्टः अत एव अयं शरोत्तमः सार्द्धश्लोक एकान्वयी ॥ २० ॥ २१ ॥

गो० टी०–अमोघत्वे हेतुमाह-**सृष्ट** इत्यादि ॥२०॥२१॥

२१-२२] ति० टी०–तदा किमर्थं तत्सृष्टिस्तत्राह-**सृष्ट** इति । त्रींल्लोकान्स्रष्टुकामेन भगवता हिरण्यगर्भेण तस्याः सृष्टेर्मधुकैटभयोः सर्वरक्षसां च सकाशाद्विघाते विघ्ने प्राप्ते तयोर्दुरात्मनोर्विनाशार्थं क्रोधाभिभूतेनायं शरः सृष्टः । सत्यसंकल्पत्वाच्चानेन तौ हतौ । 'सृष्टः क्रोधाभिभूतेन प्रभो सर्वदुरात्मनोः' इति पाठेऽभिपित्वाच्छत्रुघ्नसंबोधनं प्रभो इति ॥ २१ ॥ २२ ॥

२३] ति० टी०–उपसंहरति—**तौ हत्वेति** । जनभोगार्थं जनानां भोग्यभोगस्थानादिसंपादनद्वारा भोगसिद्ध्यर्थं लोकांश्चकार । निष्प्रत्यूहं ससर्जेत्यर्थः । अनेन स्वस्य विष्णुत्वं दृढीकृतम् ॥ २३ ॥

रा० टी०–तत्सर्जने कारणमाह—**स्रष्टु** इति । क्रोधाभिभूतेन विष्णुना मधुकैटभयोस्सर्वरक्षसां तदनुयायिनिखिलराक्षसानां च विघाते विघातार्थं सृष्टः ॥ २२ ॥

रा० टी०–**स्रष्टुकामेनेति** । स्रष्टुकामेन अनेन विष्णुना तौ मधुकैटभौ हतौ अद्धं पृथक् । **ताविति** । अनेन शरमुख्येन तौ कैटभं मधुं च हत्वा जनभोगार्थं जनानां भोगसिद्ध्यर्थं लोकान् चकार ॥ २३ ॥

गो० टी०–**सृष्ट** इति । विघाते सृष्टिविघ्ने वर्तमानयोः तत्परयोरित्यर्थः । सृष्टः क्रोधाभिभूतेन विनाशे सर्वरक्षसाम् । मधुकैटभयोर्वीर विघाते सर्वरक्षसामिति च पाठः ॥ २२॥२३॥

२४] ति० टी०–नायं मुक्तस्त्रत्र हेतुः—लोकानां ह्रासो भवेदिति । अल्पलक्ष्ये महास्त्रप्रयोगेण तन्मात्रहनने न शाम्यति, किं तु भूतानि संहरति । अतो भूतदयया न क्षिप्त इति भावः । अनेन रावणादपि लवणस्य महाबलत्वेन दिव्यशरपर्यासविषयत्वमुक्तम् ॥ २४ ॥

रा० टी०–**नेति** । भूतानां महान् ह्रासः विनाशो भवेत् इति विचार्य रावणस्य वधार्थिनापि मया न मुक्तः ॥ २४ ॥

गो० टी०–**नायमिति** । अनेन शरेण महान् त्रासो भवेदित्यलक्ष्यविषये महास्त्रप्रयोगे तदीयांश्च सर्वान् लक्षीकृत्य नाशयेदिति भावः । अनेन रावणादपि बलीयान् लवण इति सूचितम् । महान् ह्रासो भवेदिति च पाठः ॥ २४ ॥

२५-२७] ति० टी०–अथ निकुम्भिलायां समाप्तयागस्येन्द्रजित इव गृहीतशूलस्य तस्य दुर्जयत्वान्निकुम्भिलानिरोधमिव पुरप्रवेशनिरोधमुपदिशति—**यच्च तस्येत्यादि** । मधोर्दत्तमित्यन्वयः ॥ २५-२७ ॥

रा० टी०–लवणवृत्तमाह—**यदिति** । त्र्यम्बकेन यच्छूलं मधोर्दत्तं तत् मुहुर्मुहुः पूज्यमानं यथा भवति तथा भवने संनिक्षिप्य सर्वा दिशः समासाद्य आहारं प्राप्नोति ॥ २५ ॥

गो० टी०–गृहीतशूलस्य तस्य दुर्जयत्वात्तदग्रहणाय पुरप्रवेशनिरोधमुपदिशति–यच्च तस्येत्यादि ॥ मधोर्दत्तमित्यन्वयः ॥ २५ ॥ २६ ॥

रा० टी०–**यदेति** । यदि यः कश्चित् युद्धमाकांक्षन्सन् यदा समाह्वयेत् तदैव रक्षो लवणः शूलं गृहीत्वा तं भस्म करोति ॥ २६ ॥

गो० टी०–**यदेति** । युद्धमाकाङ्क्षतिति । अनेन सहेति शेषः ॥ २७ ॥

२८] ति० टी०–आयुधविनाकृतमायुधरहितम् । युध्यस्वेति शेषः । तत्प्रकारमाह—**अप्रविष्टमिति** । पुरमप्रविष्टं प्रतीक्षन्पूर्वमेव द्वारि तिष्ठ ॥ २८ ॥

रा० टी०–तद्धयप्रकारमाह—**स इति** । स तद्धयाकाङ्क्षी त्वं पुरमप्रविष्टमत एव आयुधेन विनाकृतं रहितं लवणमुद्दिश्य द्वारि तत्पुरद्वारे धृतायुधस्सन् तिष्ठ ॥ २७ ॥

१ खिति गो. पा. । २ वर्तमानयोरिति गो. पा. । ३ त्रास इति गो. पा. । ४ स तमिति गो. पाठः । ५ कश्चिदेनमिति गो. पा. । ६ तमिति गो. पाठः ।

अप्रविष्टं च भवनं युद्धाय पुरुषर्षभ । आह्वयेथा महाबाहो ततो हन्तासि राक्षसम् ॥ २९ ॥
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति । यदि त्वेवं कृतं वीर विनाशमुपयास्यति ॥ ३० ॥
एतत्ते सर्वमाख्यातं शूलस्य च विपर्ययः । श्रीमतः शितिकण्ठस्य कृत्यं हि दुरतिक्रमम् ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुष्षष्टितमः सर्गः ।

तेन सार्धं गजवाजिरथादि महद्बलं दत्वा त्वेमेक एव धनुष्पाणिर्गच्छ बलमिदं यमस्वसुस्तीरे स्थापय ग्रीष्मेऽपयाते वर्षारम्भे त जर्हीत्युपादिशच्छत्रुघ्नं रामः स तु कौसल्यावसिष्ठरामादीनभिवन्द्य प्रदक्षिणीकृत्य च प्रस्थितः ।

एवमुक्त्वा च काकुत्स्थं प्रशस्य च पुनः पुनः । पुनरेवापरं वाक्यमुवाच रघुनन्दनः ॥ १ ॥
इमान्यश्वसहस्राणि चत्वारि पुरुषर्षभ । रथानां द्वे सहस्रे च गजानां शतमुत्तमम् ॥ २ ॥
अन्तरापणवीथ्यश्च नानापण्योपशोभिताः । अनुगच्छन्तु काकुत्स्थं तथैव नटनर्तकाः ॥ ३ ॥
हिरण्यस्य सुवर्णस्य नियतं पुरुषर्षभ । आदाय गच्छ शत्रुघ्न पर्याप्तधनवाहनः ॥ ४ ॥

गो० टी०–स इति । तमायुधविनाकृतम् आयुधविवर्जितमुपलक्ष्येति शेषः ॥ २८ ॥ २९ ॥

२९] ति० टी० उक्तमेवार्थं दार्ढ्याय स्पष्टमाह—अप्रविष्टं चेति ॥ २९ ॥

रा० टी०–अप्रविष्टमिति । भवनमप्रविष्टं राक्षसमेनं लवणमाह्वय ततस्तस्मात् त्वं हन्तासि ॥ २८ ॥

३०] ति० टी०–यदि त्वेवमुक्तरीत्या कृतमनुष्ठितं भवति, तदावश्यं विनाशमुपयास्यति ॥ ३० ॥

रा० टी०–अन्यथेति । यथेवं कृतं त्वया भवेदिति शेषः तदैव स लवणो विनाशमुपयास्यति अन्यथा क्रियमाणे शूलग्रहणसमये गमने सतीति शेषः अवध्यो भविष्यति ॥२९॥

गो० टी०–अन्यथेति । यदि त्वेवं कृत इति । यदात्वेवमुक्तरीत्या कृतमनुष्ठितं भवति तदा त्वेवं कृते सति सः अवश्यं विनाशमुपयास्यति ॥ ३० ॥

३१] ति० टी०–विपर्ययः परिहारः किमेननु निर्बन्धेन, बाणेन शूलं छित्त्वा तमपि हनिष्यामि तत्राह—श्रीमत इति । कृत्यं शूलमाहात्म्यं दुरतिक्रममतिक्रमितुमशक्यम् । शक्तावप्यनुचितं चेत्यर्थः । ईश्वरकृतमर्यादापालनार्थमेवास्मदवतारादिति भावः ॥ ३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

रा० टी०–एतदिति । शितिकण्ठस्य कृत्यं दुरतिक्रमं केनिदपि लङ्घयितुमशक्यमतः शूलस्य विपर्ययः परिहारो यथा भवेत् तथा एतत्सर्वं ते आख्यातम् ॥ ३० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

गो० टी०–एतदिति । विपर्ययः परिहार इत्यर्थः । श्रीमत इति । कृत्यमाज्ञापनम् । अत्र कश्चिज्जनपति–अत्र रामेण दुरतिक्रमत्वं शूलिन उक्तमिति विष्णोरप्यधिको रुद्र इति तन्न । अवतारमर्यादया तादृशोक्तिसंभवाद्यथा ब्रह्मास्त्रबन्धने दुरतिक्रमो ब्रह्मणो महिमेत्यादि । यद्वा दुरतिक्रमं कृत्यं भगवतैव तन्य बहुमन्तव्यत्वादिति भावः ॥ ३१ ॥

इति श्रीगोविन्दराजविरचिते उत्तरश्रीरामायणव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

१–२] ति० टी०–अथ शत्रुघ्नप्रस्थानम्—एवमिति । प्रशस्य स्तुत्वा ॥ १ ॥ २ ॥

रा० टी०–शत्रुघ्नं प्रति रामस्य वचनान्तरमाह—एवमित्यादिभिः । रघुनन्दनः काकुत्स्थं शत्रुघ्नमपरं वाक्यमुवाच १

रा० टी०–तदाकारमाह—इमानीत्यादिभिः । चत्वार्यश्वसहस्राणि रथानां द्वे सहस्रे च गजानां शतं च नानापण्यैरुपशोभिताः अन्तराः पुरान्तरवर्तिन्यः या आपणवीथ्यः मार्गपणाः नटनर्तकाश्च काकुत्स्थमनुगच्छन्तु श्लोकद्वयमेकान्वयि ॥ २–३ ॥

गो० टी०–अथ शत्रुघ्नप्रस्थापनम्–एवमित्यादि ॥१॥२

३] ति० टी०–अन्तरा नगरमध्यवर्तिन्यो या आपणवीथ्यो वीथ्यो वीथिस्था वणिजो नानाविधैः पण्यैः क्रयविक्रयार्हद्रव्यैरुपशोभिता युक्ता अनुगच्छन्तु । ‘ नानावर्णोपशोभिताः’ इति पाठे नानावर्णैर्ब्राह्मणादिभिरुपशोभिता इत्यर्थ इति कतकः । ‘पण्य’ इति पाठ एव युक्तः । नटा वाक्यार्थाभिनयकर्तारः । नर्तकाः पदार्थाभिनयकर्तारः ॥ ३ ॥

गो० टी०–अन्तरेति । अन्तरा मध्ये निवासस्थले नानापण्यैरुपशोभिताः । नानावर्णोपशोभिता इति पाठे वर्णा ब्राह्मणादयः । आपणवीथ्यस्तत्प्रवर्तकाः ॥ ३ ॥

४] ति० टी०–सुवर्णस्योत्कृष्टवर्णस्य । नियुतं लक्षमि-

बलं च सुभृतं वीर हृष्टतुष्टमनुद्धतम् । संभाषासंप्रदानेन रक्षयस्व नरोत्तम ॥ ५ ॥
न ह्यर्थास्तत्र तिष्ठन्ति न दारा न च बान्धवाः । सुप्रीतो भृत्यवर्गस्तु यत्र तिष्ठति राघव ॥ ६ ॥
अतो हृष्टजनाकीर्णां प्रस्थाप्य महतीं चमूम् । एक एव धनुष्पाणिर्गच्छ त्वं मधुनो वनम् ॥ ७ ॥
यथा त्वां न प्रजानाति गच्छन्तं युद्धकाङ्क्षिणम् । लवणस्तु मधोः पुत्रस्तथा गच्छेरशङ्कितम् ॥ ८ ॥
न तस्य मृत्युरन्योऽस्ति कश्चिद्धि पुरुषर्षभ । दर्शनं योऽभिगच्छेत स वध्यो लवणेन हि ॥ ९ ॥
सै ग्रीष्म अपयाते तु वर्षारात्र उपागते । हन्यास्त्वं लवणं सौम्य स हि कालोऽस्य दुर्मतेः॥१०॥
महर्षींस्तु पुरस्कृत्य प्रयान्तु तव सैनिकाः । यथा ग्रीष्मावशेषेण तरेयुर्जाह्नवीजलम् ॥ ११ ॥

त्येके, दशलक्षमित्यन्ये । पर्याप्तधनवाहनः जीवनपर्याप्तधनः । युद्धपर्याप्तवाहन इत्यर्थः ॥ ४ ॥

रा० टी०–हिरण्येति । पर्याप्तधनवाहनस्त्वं सुवर्णस्य उत्कृष्टवर्णविशिष्टस्य अत्युत्तमस्येत्यर्थः हिरण्यस्य तन्मयमुद्रायाः नियुतं दशलक्षमादाय गच्छ ॥ ४ ॥

गो० टी०–हिरण्यस्येति । पर्याप्तधनवाहन इत्यत्र धनं पश्वादयः ॥ ४ ॥

५] ति० टी०–बलं सुभृतं हृष्टं तुष्टम , अत एव त्वय्यनुद्धतं यथा भवति तथा कुरु । वेतनादिप्रदानेनेत्यर्थः । किं च संभाषायाः सम्यग्वचनस्य संप्रदानेनोक्त्या रक्षय तत् ॥ ५ ॥

रा०टी०–बलमिति । सुभृतं सुरक्षितमत एव हृष्टतुष्टं प्राप्तानन्दसन्तोषमत एव अनुद्धतं स्वप्रत्युद्धतिरहितं यथा भवति तथा भाषासम्प्रदानेनैनं समीचीनवचनोक्त्या रक्षयस्व ॥ ५ ॥

गो० टी०–बलं चेति । सुभृतं सुसंपूर्णम । संभाषायाः सम्यग्वचनस्य संप्रदानेन उक्त्या ॥ ५ ॥

६] ति० टी०–किमेवं बलादरेण तत्राह—न ह्यर्था इति । यत्र रिपुसंकटे भृत्यास्तिष्ठन्ति तत्रार्थादयो न तिष्ठन्तीत्येते सर्वे आदर्तव्या इत्यर्थः ॥ ६ ॥

रा० टी०–तत्र हेतुमाह–न हीति । यत्र उत्कटरिपुसंघाते सुप्रीतो भृत्यवर्गस्तिष्ठति तत्र अर्थादयो न तिष्ठन्ति अर्थादिभिः प्रयोजनसिद्धिर्न भविष्यतीत्यर्थः ॥ ६ ॥

गो० टी०–न हीति । यत्र प्रदेशे तिष्ठसि स्थास्यसि तत्र वनप्रदेशे अर्था न सन्ति अतः सर्वं गृहीत्वा गन्तव्यमित्यर्थः ॥ ६ ॥

७] ति० टी०–नन्वेवं किं सेनया तर्हि लवणेन योत्स्यामि, नेत्याह—अत इति । अतोऽयोध्याया इदानीमेव महतीं चमूं प्रस्थाप्यैक एव त्वं मधुनो वनं मधोर्वनं गच्छ । अयं भावः—सुखेन जाह्नवीतरणाय ग्रीष्मकाल एव प्रस्थाय जाह्नवीमुत्तीर्य किंचित्कालं तत्र स्थित्वा तद्बलं तत्रैव संस्थाप्य स्वयमेक एव मधुवनं प्राप्य वर्षाप्रादुर्भावे लवणं जहीति ॥७॥

रा० टी०–तत इति । एक एव त्वं मधुनो वनं गच्छ ७

गो० टी०–तत इति । प्रस्थाप्य संस्थाप्य । मासमात्रोषितः अयोध्यायां पथि एक एव गच्छ ॥ ७ ॥

८] ति० टी०–तदेवाह—यथेति । अशङ्कितं त्वदागमनशङ्कारहितं यथा तथा गच्छेः ॥ ८ ॥

रा० टी०–गमनप्रकारमाह–यथेति । गच्छन्तं त्वां लवणो यथा न जानाति तथा अशङ्कितं यथा भवति तथा गच्छेः८

गो० टी०–यथेति । एवं हि पूर्वजेन संमन्त्रितो लवणवधार्थं सेनया सह शत्रुघ्नो यातीति वार्तापरिहारार्थं केवलं बलमेवाग्रे मुनिभिः सह गच्छतु । तच्च ग्रीष्मावशेषेण शनैः शनैर्गङ्गायाः परतीरे विशतु । ब्राह्मणैः समुद्योजितं बलं श्रुत्वा स विश्रब्धं वर्तते । तत्रान्तरे त्वमस्मान्नगरात् केवलं ब्राह्मणान् गृहीत्वा अज्ञातं गत्वा तं जहीति । अशङ्कितं त्वदागमनशङ्कारहितम यथा भवति तथा ॥ ८ ॥

९] ति० टी०–तस्य लवणस्यान्योऽशङ्किततया तदुपरोधकत्वयतिरिक्तो मृत्युर्नास्तीत्येतदुपपादयति—दर्शनमिति। युद्धाकाङ्क्षी समायातीति तत्कर्तृकज्ञानविषयो यो भवेदित्यर्थः९

रा० टी०–नेति । यो दर्शनं शूलसहितलवणस्य दृष्टिपथमभिगच्छेत स लवणेन वध्यः अतस्तस्य मृत्युः तदपायः अन्यः कश्चिन्नास्ति ॥ ९ ॥

गो० टी०–नेति । मृत्युर्मारकः । अन्यः अशङ्कितत्वया तदुपरोधकत्वयतिरिक्तः नास्ति । एतदेवोपपादयति–दर्शनमित्यादि९

१०] ति० टी०–वसन्ते प्रस्थितस्यापि युद्धकालो नायमित्याह—स इति । वर्षारात्रे वर्षाकाले वर्षासु केऽपि युद्धार्थं न यतन्त इति निर्भयो निःशूल एव चरति, अतः स एवास्य वधकाल इति भावः ॥ १० ॥

रा० टी०–वधकालं बोधयन्नाह–स इति । स वधार्थी त्वं ग्रीष्मे अपयाते सति वर्षारात्रे चोपागते सति लवणं त्वं हन्याः स वर्षाकाल एव अस्य दुर्मतेः कालः एतेन वर्षाकाले राज्ञां गमनाभावेन तद्भीतिराहित्यात् शूलं न गृह्णातीति सूचितम १०

गो० टी०–वसन्ते प्रस्थितस्यापि न स युद्धकाल इत्याह–स हीत्यादि । वर्षारात्रे वर्षाकाले । समासान्त आर्षः । स हि काल इति । वर्षासु राजानः केपि युद्धाय न निर्गच्छन्तीति निर्भयो निःशूल एव चरति । अतः स एवास्य वधावसर इति भावः ॥ १० ॥

११] ति० टी०–तर्हि नेदानीं गन्तव्यमित्याशङ्क्य

१ पुष्टमिति गो. पाठः । २ स हि ग्रीष्म इति गो. पाठः ।

तत्र स्थाप्य बलं सर्वं नदीतीरे समाहितः । अग्रतो धनुषा सार्धं गच्छ त्वं लघुविक्रमैं ॥ १२ ॥
एवमुक्तस्तु रामेण शत्रुघ्नस्तान्महाबलान् । सेनामुख्यान्समानीय ततो वाक्यमुवाच ह ॥ १३ ॥
एते वो गणिता वासा यत्र तत्र निवत्स्यथ । स्थातव्यं चाविरोधेन यथा बाधा न कस्यचित्॥१४॥
तथा तांस्तु समाज्ञाप्य प्रस्थाप्य च महद्बलम् । कौसल्यां च सुमित्रां च कैकेयीं चाभ्यवादयत्॥१५॥
रामं प्रदक्षिणीकृत्य शिरसाभिप्रणम्य च । लक्ष्मणं भरतं चैव प्रणिपत्य कृताञ्जलिः ॥ १६ ॥
पुरोहितं वसिष्ठं च शत्रुघ्नः प्रयतात्मवान् । रामेणै चाभ्यनुज्ञातः शत्रुघ्नः शत्रुतापनः ॥
प्रदक्षिणमथो कृत्वा निर्जगाम महाबलः । ॥ १७ ॥
निर्याप्य सेनामथ सोऽग्रतस्तदा गजेन्द्रवाजिप्रवरौघसंकुलाम् ।
उपास्यमानः स नरेन्द्रपार्श्वतः प्रैतिप्रयातो रघुवंशवर्धनः । ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुष्षष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ।

प्रस्थितेन मार्गे वाल्मीक्याश्रमं प्रविश्य तदविदूरे च यज्ञायतनं प्रेक्ष्य कस्येदमिति पृच्छता शत्रुघ्नेनाभिहितः स वाल्मीकिस्तस्मै यज्ञपूर्ववृत्तकथनादिहेतुकवाल्मीषपादेतिहासमाचख्यौ ।

प्रस्थाप्य च बलं सर्वं मासमात्रोषितः पथि । एक एवाशु शत्रुघ्नो जगाम त्वरितं तदा ॥ १ ॥
द्विरात्रमन्तरे शूर उष्य राघवनन्दनः । वाल्मीकेराश्रमं पुण्यमगच्छद्वासमुत्तमम् ॥ २ ॥
सोऽभिवाद्य महात्मानं वाल्मीकिं मुनिसत्तमम् । कृताञ्जलिरथो भूत्वा वाक्यमेतदुवाच ह ॥ ३ ॥

स्वदेशे कार्यान्तरसाधनार्थमेव प्रथमतः शनैः सेनामात्रगमनं कार्यमित्याह—**महर्षीनिति** ॥ ११ ॥

रा० टी०—नन्वं तस्मिन्काले एव गमनं भवतु किं वसन्तकालगमनेनेत्यत आह-**महर्षीनिति** । तव सैनिकाः प्रयान्तु भवत एव ग्रीष्मावशेषेण जाह्नवीजलं यथावत्तरेयुः ॥ ११ ॥

गो० टी०—तर्हीदानीं निर्गमने किं प्रयोजनमित्यत्राह—**महर्षीनिति** ॥ ११ ॥

१२-१३]**ति०टी०**—तत्र जाह्नवीपरतीरेऽग्रतस्ततः परभूते मार्गे । धनुषा सार्धम । नान्येन बलेनेत्यर्थः ॥ १२ ॥ १३ ॥

रा० टी०—**तत्रेति** । नदीतीरं गङ्गोत्तरतटे बलं स्थाप्य स्थापयित्वा त्वं धनुषा सार्द्धमग्रतो गच्छ ॥ **एवमिति** । शत्रुघ्नः सेनामुख्यान् समानीय ततस्तानुवाच ॥ १२ ॥ १३ ॥

गो० टी०—**तत्रेति** । तत्र जाह्नवीपरतीरे । अग्रतः परमार्गे इत्यर्थः । धनुषा सार्धं नान्येन बलेनेत्यर्थः ॥ १२ ॥१३॥

१४] **ति० टी०**—एते प्रसिद्धा वो युष्माकं वासा गणिता एव सन्ति । यत्र यत्र वासे वत्स्यथ तत्र तत्राविरोधेन स्थातव्यम । तदेवाह—**यथेति**। इदं सैनिकान्प्रति वाक्यम१४

रा० टी०—तदाकारमाह—**एत इति** । यत्र यस्मिन् स्थले वो गणिताः अतिशयेन ज्ञाताः वासाः सेनोचितवासगृहाणि तत्र यूयं निवत्स्यथ यथा कस्यचिद्बाधः पीडा न भवेत् तथा अविरोधेन स्थातव्यम ॥ १४ ॥

गो० टी०—**एत इति** । एते प्रसिद्धा इत्यर्थः । वः युष्माकम । वासा गणिताः यत्र यत्र गणिते वासे निवत्स्यथ तत्र तत्राविरोधेनैव स्थातव्यम ॥ १४ ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुराख्याने उत्तरश्रीरामायणव्याख्याने चतुष्षष्टितमः सर्गः ॥ ६४ ॥

१५-१८] **ति० टी०**—अनेन केवलसैनैव प्रस्थिता, शत्रुघ्नस्तु पश्चादयोध्यात एकक एव गमिष्यतीति ज्ञायते१५-१८

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुष्षष्टितमः सर्गः ॥ ६४ ॥

रा० टी०—**तथेति** । तथोक्तप्रकारेण तान् सेनामुख्यान् समाज्ञाप्य महद्बलं प्रस्थाप्य च कौशल्याप्रभृतीरभ्यवादयद्—राममिति। शत्रुघ्नः रामादीन् प्रदक्षिणीकृत्य कृताञ्जलिस्सन् अतिष्ठदिति शेषः सार्द्धश्लोक एकान्वयी ॥ **रामेणेति** । रामेणाभ्यनुज्ञातश्शत्रुघ्नः प्रदक्षिणं कृत्वा राममिति शेषः **निर्जगाम** ॥ **निर्याप्येति** । स शत्रुघ्नः सेनां निर्याप्य उपास्यमानः सन् सेनापतिभिरिति शेषः नरेन्द्रस्य रामस्य पार्श्वतः पार्श्वात् प्रतिप्रयातोऽभवदिति शेषः ॥ १५-१८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुष्षष्टितमः सर्गः ॥ ६४ ॥

१-३] **ति० टी०**—अथ सेनाप्रस्थानोत्तरं मासमात्रमयो-

१ विक्रम इति गो.पाठः । २ "इदमर्ध" रामं प्रदक्षिणीकृत्येति षोडशपद्यपूर्वार्धोत्तरं दृश्यते गो.पु. ।३ प्रस्थाप्येति गो.पाठः । ४ अथेति गो.पाठः।

भगवन्वस्तुमिच्छामि गुरोः कृत्यादिहागतः । श्वः प्रभाते गमिष्यामि प्रतीचीं दारुणां दिशम्[1] ॥ ४ ॥
शत्रुघ्नस्य वचः श्रुत्वा प्रहस्य मुनिपुंगवः । प्रत्युवाच महात्मानं स्वागतं ते महायशः ॥ ५ ॥
स्वमाश्रममिदं सौम्य राघवाणां कुलस्य वै[2] । आसनं पाद्यमर्घ्यं च निर्विशङ्कः प्रतीच्छ मे ॥ ६ ॥
प्रतिगृह्य तदा पूजां फलमूलं च भोजनम् । भक्षयामास काकुत्स्थस्तृप्तिं च परमां गतः ॥ ७ ॥
स भुक्त्वा फलमूलं च महर्षिं तमुवाच ह । पूर्वा यज्ञविभूतीयं[3] कस्याश्रमसमीपतः ॥ ८ ॥
तत्तस्य भाषितं श्रुत्वा वाल्मीकिर्वाक्यमब्रवीत् । शत्रुघ्न शृणु यस्येदं बभूवायतनं पुरा ॥ ९ ॥
युष्माकं पूर्वको राजा सौदासस्तस्य भूपतेः । पुत्रो वीर्यसहो नाम वीर्यवानतिधार्मिकः ॥ १० ॥
स बाल एव सौदासो मृगयामुपचक्रमे । चञ्चूर्यमाणं ददृशे स शूरो राक्षसद्वयम् ॥ ११ ॥
शार्दूलरूपिणौ घोरौ मृगान्बहुसहस्रशः । भक्षमाणावसंतुष्टौ पर्याप्तिं नैव जग्मतुः ॥ १२ ॥
स तु तौ राक्षसौ दृष्ट्वा निर्मृगं च वनं कृतम् । क्रोधेन महताविष्टो जघानैकं महेषुणा ॥ १३ ॥
विनिपात्य तमेकं तु सौदासः पुरुषर्षभः । विज्वरो विगतामर्षो हतं रक्षो ह्यदैक्षत ॥ १४ ॥

ध्यायामुषित्वा पश्चादेकाकिनो गच्छतः शत्रुघ्नस्य मार्गवशाद्वाल्मीक्याश्रमप्राप्तिः—प्रस्थाप्येति । मासमात्रोषितः । अयोध्यायामिति शेषः । पथ्येक एवासहाय एव जगाम १-३

रा० टी०—शत्रुघ्नयात्राकालं बोधयन्नाह—प्रस्थाप्येत्यादिभिः । बलं प्रस्थाप्य मासमात्रोषितश्शत्रुघ्नः एक एव पथि जगाम १

रा० टी०—द्विरात्रमिति । शरदश्शत्रुघ्नः अन्तरे मार्गमध्ये द्विरात्रमुष्य वासं वासयोग्यं वाल्मीकेराश्रममगच्छत् ॥ २ ॥

रा० टी०—स इति । स शत्रुघ्नः वाल्मीकिमभिवाय कृताञ्जलिर्भूत्वा पतद्वाक्यमुवाच ॥ ३ ॥

गो० टी०—प्रस्थाप्येत्यादि ॥ १—३ ॥

४-५] ति० टी०—दारुणाम । लवणाधिष्ठितत्वात् ४-५

रा० टी०—तदाकारमाह—भगवन्निति । गुरोः रामस्य कृत्यात् कार्यात् इहागतोहं वस्तुमिच्छामि श्वः प्रभाते प्रतीचीं दिशं गमिष्यामि गन्तास्मि ॥ ४ ॥

गो० टी०—रामेण यथाज्ञप्तगमनं संग्रहेणोक्त्वा अयोध्यातो द्विरात्रगमनानन्तरवृत्तमाह—भगवन्निति । वारुणीं वरुणपालिताम् । दारुणां दिशमिति पाठे दारुणां लवणाधिष्ठितत्वादिति भावः ॥ ४ ॥

रा० टी०—शत्रुघ्नस्येति । मुनिपुङ्गवः प्रत्युवाच तदाकारमाह ते तव स्वागतम् ॥ ५ ॥

गो० टी०—शत्रुघ्नस्येति । प्रहस्येति । अनिवेदितमपि शत्रुघ्नागमननिमित्तं ज्ञातव्यमित्यभिप्रायः ॥ ५ ॥

६-७] ति० टी०—इदमाश्रमं राघवाणां कुलस्य स्वमेव स्वीयमेव ॥ ६ ॥ ७ ॥

रा० टी०—स्वमिति । राघवाणां कुलस्य इदं स्वं स्वकीयमाश्रमम् अतः निर्विशङ्कस्सन् मे दत्तमासनादि प्रतीक्ष गृहाण ॥ ६ ॥

रा० टी०—प्रतीति । काकुत्स्थः पूजां प्रतिगृह्य फलादि भक्षयामास ॥ ७ ॥

गो० टी०—स्वमिति । राघवाणां कुलस्य स्वं स्वभूतम्[2] ॥ ७

८] ति० टी०—पूर्वा यज्ञविभूतीयमित्यार्षः संधिः । आश्रमसमीपतः पूर्वा पूर्वप्रदेशे दृश्यमाना पुरातनी चेयं यज्ञविभूतिर्ऋषादियज्ञोपकरणसमृद्धिः कस्य यजमानस्येत्यर्थः ॥ ८ ॥

रा० टी०—स इति । स शत्रुघ्नः आश्रमस्य समीपतो निकटे पूर्वा पुरातनी इयं यज्ञविभूतिः कस्येति वाक्यमुवाच सन्धिरार्ष इति भट्टाः ॥ ८ ॥

गो० टी०—स इति । इयं यज्ञविभूतिस्ते कस्याश्रमसमीपत इति । तवाश्रमसमीपतः इयं वर्तमाना यज्ञविभूतिः यज्ञस्य समृद्धिः कस्य यजमानस्य ॥ ८ ॥

९-१०] ति० टी०—यस्य यजमानस्येदमायतनं बभूव तच्छृणु ॥ ९ ॥ १० ॥

रा० टी०—तदिति । इदमायतनं यस्य पुरा बभूव तं शृणु इति वाक्यं वाल्मीकिरब्रवीत् ॥ ९ ॥

रा० टी०—तद्वचनमेवाह—युष्माकमित्यादिभिः । युष्माकं पूर्वकः सौदासस्तदभिधो राजा बभूव तस्य सौदासस्य वीर्यसहो नाम पुत्रो बभूव ॥ १० ॥

गो० टी०—तदिति । आयतनं यज्ञायतनम् ॥ ९ ॥ १० ॥

११-१२] ति० टी०—चञ्चूर्यमाणं मुहुर्मुहुश्चरन्तम्[3] ११।१२

रा० टी०—स इति । बाल एव सौदासः मृगयामुपचक्रमे स सौदासः चञ्चूर्यमाणमतिशयेन जंतून् हिंसन्तं राक्षसद्वयं ददृशे ॥ ११ ॥

रा० टी०—शार्दूलेति । शार्दूलरूपिणौ बहुसहस्रशो मृगान् भक्षमाणौ राक्षसौ असन्तुष्टौ सन्तौ पर्याप्तिं परिपूर्णतां नैव जग्मतुः ॥ १२ ॥

गो० टी०—स इति । चञ्चूर्यमाणं मुहुर्मुहुः चरन्तम् । चरतेर्यङन्ताच्छानच् । " उत्परस्यातः " इत्युत्वम् ॥ ११॥१२॥

१३-१४] ति० टी०—निर्मृगं कृतं वनं च दृष्ट्वेत्यनुकर्षः ॥ १३ ॥ १४ ॥

---

१ वारुणीमिति गो. पा. । २ ह्रीति गो. पाठः । ३ इयं यज्ञविभूतिस्ते इति गो. पाठः ।

निरीक्षमाणं तं दृष्ट्वा सहायं तस्य रक्षसः । संतापमकरोद्घोरं सौदासं चेदमब्रवीत् ॥ १५ ॥
यस्मादनपराधं तं सहायं मम जघ्निवान् । तस्मात्त्वापि पापिष्ठ प्रदास्यामि प्रतिक्रियाम् ॥१६॥
एवमुक्त्वा तु तद्रक्षस्तत्रैवान्तरधीयत । कालपर्याययोगेन राजा मित्रसहोऽभवत् ॥ १७ ॥
राजापि यजते यज्ञमस्याश्रमसमीपतः । अश्वमेधं महायज्ञं तं वसिष्ठोऽप्यपालयत् ॥ १८ ॥
तत्र यज्ञो महानासीद्बहुवर्षगणायुतः । समृद्धः परया लक्ष्म्या देवयज्ञसमोऽभवत् ॥ १९ ॥
अथावसाने यज्ञस्य पूर्ववैरमनुस्मरन् । वसिष्ठरूपी राजानमिति होवाच राक्षसः ॥ २० ॥
अद्यैं यज्ञावसानान्ते सामिषं भोजनं मम । दीयतामितिँ शीघ्रं वै नात्र कार्या विचारणा॥ २१ ॥
तच्छ्रुत्वा व्याहृतं वाक्यं रक्षसा ब्रह्मरूपिणा । सूदान्संस्कारकुशलानुवाच पृथिवीपतिः ॥ २२ ॥
हविष्यं सामिषं स्वादु यथा भवति भोजनम् । तथा कुरुत शीघ्रं वै परितुष्येद्यथा गुरुः ॥ २३ ॥
शासनात्पार्थिवेन्द्रस्य मूदः संभ्रान्तमानसः । तच्च रक्षः पुनस्तत्र सूदवेषमथाकरोत् ॥ २४ ॥
स मानुषमथो मांसं पार्थिवाय न्यवेदयत् । इदं स्वादु हविष्यं च सामिषं चान्नमाहृतम् ॥ २५ ॥

रा० टी०-स इति । सौदासः निर्मृगं कृतं वनं च दृष्ट्वा एकं राक्षसं जघान ॥ १३ ॥

रा० टी०-विनिपात्येति । एकं रक्षो विनिपात्य विज्वरः सौदासः हतं रक्ष उदैक्षत ॥ १४ ॥

गो० टी०-स इति । निर्मृगं कृतं वनं च दृष्ट्वेत्यन्वयः ॥ १३ ॥ १४ ॥

१५-१६] ति० टी०-तस्य हतस्य रक्षसः सहायं सहायभूतमात्मानं निरीक्षमाणं तं राजानं दृष्ट्वा संतापमकरोत् ॥ १५ ॥ १६ ॥

रा० टी०-निरीक्षमाण इति । तस्य प्रसिद्धस्य रक्षसः स्वस्य रक्षोमात्रस्य वा सहायं निरीक्षमाणं सौदासं दृष्ट्वा सन्तापमकरोत् राक्षसान्तरमिति शेषः इदमब्रवीच्च ॥ १५ ॥

रा० टी०-तदाकारमाह-यस्मादिति । यस्मात् अनपराधं मम सहायं त्वं जघ्निवान् तस्मात् प्रतिक्रियां तवापि दास्यामि ॥ १६ ॥

गो० टी०-निरीक्षमाणमिति । निरीक्षमाणं स्वसहायभूतं द्वितीयरक्षो निरीक्षमाणं प्रथमरक्षो दृष्ट्वा ॥ १५ ॥ १६ ॥

१७] ति० टी०-कालपर्याययोगेन बहुकालानन्तरं प्राप्य राज्यप्रापककर्मवशेन मित्रसहो राजाभवत् । वीर्यसहस्यैव मित्रसह इति नामान्तरम् ॥ १७ ॥

रा० टी०-एवमिति । रक्षः तत्रैवान्तरधीयत मित्रसहः मित्रसहाभिधः सौदासपुत्रस्तु कालपर्याययोगेन कालक्रमवशात् राजाभवत् एतेन पूर्वं राज्ये संस्थाप्य सौदासः परलोकचित्तोऽभवदिति सचितम् ॥ १७ ॥

गो० टी०-एवमिति । कालपर्याययोगेन बहुकालातिवाहजकर्मयोगेन युक्तोऽभवत् ॥ १७ ॥

१८] ति० टी०-अस्याश्रममिति लुप्तषष्ठीकम । अस्याश्रमस्य समीपतो राजा यज्ञं यजते स्म ॥ १८ ॥

रा० टी०-राजेति । राजा सौदासः अश्वमेधं महायज्ञं यजते तं यज्ञं वशिष्ठोपालयत् ॥ १८ ॥

गो० टी०-राजेति । अस्याश्रमसमीपत इति । अस्याश्रमस्येत्यविभक्तिकनिर्देशः ॥ १८—२१ ॥

१९-२३] ति० टी०-गणायुत इत्यत्राङ्प्रश्लेषः१९-२३

रा० टी०-तत्रेति । परया लक्ष्म्या समृद्धः बहुवर्षगणायुतः महान् यज्ञ आसीत् अत एव देवयज्ञसमोऽभवत् ॥ १९ ॥

रा० टी०-अथेति । राक्षसः वशिष्ठरूपी भूत्वा राजानमित्युवाच ॥ २० ॥

रा० टी०-तदाकारमाह-अद्येति । अद्य सामिषं मांससहितं भोजनं मम दीयतामत्र अस्मिन्समये विचारणा किमर्थमयमभक्ष्यं याचते इति विचारो न कार्यः ॥ २१ ॥

रा० टी०-तदिति । पृथिवीपतिः सूदान् पाककर्तॄन् उवाच ॥ २२ ॥

रा० टी०-तदाकारमाह-हविष्यमिति । यथा गुरुः परितुष्येत् तथा सामिषं हविष्यभोजनं स्वादु यथा भवति तथा कुरुत ॥ २३ ॥

गो० टी०-तदिति । भक्ष्यसंस्कारकुशलसूवाचेति । भोजनार्थमिति शेषः ॥ २२—२५ ॥

२४] ति० टी०-संभ्रान्तमानसः । अभूदिति शेषः । पाकत्वरयेति शेषः । सूदवेषमिति । तत्र महानसे सूदान्तरवेषं गृहीत्वा मुख्यसूदेन पाकसमये मानुषं मांसं प्राचिक्षिपदिति शेषः ॥ २४ ॥

रा० टी०-शासनादिति । पार्थिवेन्द्रस्य शासनात् शासनं प्राप्यापि सूदः संभ्रान्तमानसः गुरुकर्तृकाभक्ष्यभक्षणेच्छाश्रवणेनोद्विग्नचित्तोऽभवदिति शेषः तद्रक्षस्तु सूदवेषमकरोत् ॥ २४ ॥

२५] ति० टी०-अथानन्तरं सूदवेषो राक्षसः पार्थि-

१ त्विति गो.पाठः । २ अमीति गो.पाठः। ३ अस्य यज्ञस्य जातोऽन्त इति गो.पाठः।४ इहेति गो.पा.।५ भक्ष्येति अग्रे कुशलमिति च गो.पाठः।

स भोजनं वसिष्ठाय पक्त्वा सार्धमुपाहरत् । मदयन्त्या नरश्रेष्ठ सामिषं रक्षसा हृतम् ॥ २६ ॥
ज्ञात्वा तदामिषं विप्रो मानुषं भोजनागतम् । क्रोधेन महताविष्टो व्याहर्तुमुपचक्रमे ॥ २७ ॥
यस्मात्त्वं भोजनं राजन्ममैतद्दातुमिच्छसि । तस्माद्भोजनमेतत्ते भविष्यति न संशयः ॥ २८ ॥
ततः क्रुद्धस्तु सौदासस्तोयं जग्राह पाणिना । वसिष्ठं शप्तुमारेभे भार्या चैनमवारयत् ॥ २९ ॥
राजन्प्रभुर्यतोऽस्माकं वसिष्ठो भगवानृषिः । प्रतिशप्तुं न शक्तस्त्वं देवतुल्यं पुरोधसम् ॥ ३० ॥
ततः क्रोधमयं तोयं तेजोबलसमन्वितम् । व्यसर्जयत धर्मात्मा ततः पादौ सिषेच च ॥ ३१ ॥
तेनास्य राज्ञस्तौ पादौ तदा कल्मापतां गतौ । तदाप्रभृति राजासौ सौदासः सुमहायशाः ॥ ३२ ॥
कल्माषपादः संवृत्तः ख्यातश्चैव तथा नृपः । स राजा सह पत्न्या वै प्रणिपत्य मुहुर्मुहुः ॥
पुनर्वसिष्ठं प्रोवाच यदुक्तं ब्रह्मरूपिणा । ॥ ३३ ॥
तच्छ्रुत्वा पार्थिवेन्द्रस्य रक्षसा विकृतं च तत् । पुनः प्रोवाच राजानं वसिष्ठः पुरुषर्षभम् ॥ ३४ ॥
मया रोषपरीतेन यदिदं व्याहृतं वचः । नैतच्छक्यं वृथा कर्तुं प्रदास्यामि च ते वरम् ॥ ३५ ॥
कालो द्वादश वर्षाणि शापस्यान्तो भविष्यति । मत्प्रसादाच्च राजेन्द्र अतीतं न स्मरिष्यसि ॥ ३६ ॥
एवं स राजा तं शापमुपभुज्यारिसूदनः । प्रतिलेभे पुना राज्यं प्रजाश्चैवान्वपालयत् ॥ ३७ ॥

वाय मानुषमांसं पक्वं न्यवेदयत् । इदमन्नं सिद्धमिति निवेदनप्रकारः ॥ २५ ॥

रा० टी०–स इति । स मदरूपी राक्षसः सामिषमिदं स्वादु हविष्यमन्नं मया आहृतमित्युक्त्वेति शेषः मानुषं मांसं पार्थिवाय न्यवेदयत् ॥ २६ ॥

२६] ति० टी०–राजापि सामिषं मानुषमप्यमानुषं तद्धविष्यमित्येव विज्ञाय पत्न्या सार्धं वसिष्ठायोपाहरत् ॥२६॥

रा० टी०–स इति । मदयन्त्या पत्न्या सार्धं स राजा रक्षसाहृतं सामिषं भोजनं वसिष्ठाय उपाहरत् ॥ २६ ॥

गो० टी०–स इति । मदयन्त्या राजपत्न्या ॥२६–३२॥

२७] ति० टी०–मानुषमामिषं भोजनागतं ज्ञात्वा । भोजनरसवशेनेति भावः ॥ २७ ॥

रा० टी०–ज्ञात्वेति । भोजनागतं मानुषमामिषं ज्ञात्वा क्रोधेनाविष्टो वशिष्ठः । व्याहर्तुमुपचक्रमे ॥ २७ ॥

२८-३२]ति०टी०-एतद्भोजनं मानुषामिषभोजनम्२८-३२

रा० टी०–तद्वचनाकारमाह–यस्मादिति । यस्मात् एतन्मानुषामिषं मम दातुमिच्छसि तस्मात् एतत् मानुषामिषमेव ते भोजनं भविष्यति राक्षसो भविष्यसीत्यर्थः ॥ २८ ॥

रा० टी०–तत इति । सौदासः तोयं जग्राह वसिष्ठं शप्तुमारेभे च भार्या तु एनं सौदासमवारयत् ॥ २९ ॥

रा० टी०–वारणाकारमाह–राजन्निति । यतः वसिष्ठोऽस्माकं प्रभुः तस्मात् पुरोधसं वशिष्ठं प्रति शप्तुं त्वं न शक्तः ॥ ३० ॥

रा० टी०–तत इति । तेजोबलसमन्वितं तोयं व्यसर्जयत् अत्यजत् ततः तेन त्यक्तजलेन पादौ सिषेच पादोपर्यत्यजदित्यर्थः ॥ ३१ ॥

रा० टी०–तेनेति । तेन सेकेन हेतुना अस्य सौदासस्य पादौ कल्मापतां श्यामत्वं गतौ अत एव तदाप्रभृति कल्माषपादः सम्वृत्तो जातः सौदासः ख्यातः तेनैव नाम्ना प्रसिद्धोऽभवदिति शेषः सार्द्धश्लोक एकान्वयी ॥ ३२ ॥

३३] ति० टी०–वसिष्ठं शुद्धवसिष्ठम् । ब्रह्मरूपिणा मायावसिष्ठेन यदुक्तं सामिषभोजनप्रार्थनम् ॥ ३३ ॥

रा० टी०–स इति । स सौदासः मुहुर्मुहुः प्रणिपत्य ब्रह्मरूपिणा राक्षसेन यदुक्तं तद्वशिष्ठं प्रोवाच ॥ ३३ ॥

गो० टी०–स इति । ब्रह्मरूपिणा वसिष्ठरूपधरेण यदुक्तं तद्वचो वसिष्ठं प्रति प्रोवाच ॥ ३३ ॥

३४–३५] ति० टी०–तद्रक्षसा । विकृतं कृतमिति शेषः । एतद्राजवचनं श्रुत्वा पुनर्वसिष्ठः प्रोवाच ॥ ३४ ॥ ३५ ॥

रा टी०–तदिति । रक्षसा एव विकृतं तद्भोजनमिति पार्थिवेन्द्रस्य पार्थिवेन्द्रात् श्रुत्वा वशिष्ठो राजानं पुनः प्रोवाच३४

रा० टी०–तदाकारमाह–मयेति । यदिदं वचो मया व्याहृतं तदेतत् तथा कर्तुं न शक्यमतः ते वरं प्रदास्यामि ३५

गो० टी०–तदिति । तत्पार्थिवेन्द्रस्य प्रणिपातवाक्यं रक्षोविकृतं च श्रुत्वा । रक्षसाधिकृतमिति पाठे अधिकृतं राजद्वेषमाश्रित्य कृतम् ॥ ३४ ॥ ३५ ॥

३६–३७] ति० टी०–द्वादशवर्षाणि कालः । व्यतीतश्चेदिति शेषः । अतीतं स्वकं राजत्वं च न शापभोगकाले स्मरिष्यसि ॥ ३६ ॥ ३७ ॥

रा० टी०–वराकारमाह–काल इति । द्वादश वर्षाणि व्यतीतानि चेदिति शेषः शापस्यान्तो विनाशो भविष्यति मत्प्रसादात् हेतोरतीतं शापकालिकाभक्ष्यभक्षणादि न स्मरिष्यसि ॥ ३६ ॥

१ भाजनं गतमिति गो. पाठः ।

तस्य कल्माषपादस्य यज्ञस्यायतनं शुभम् । आश्रमस्य समीपेऽस्मिन्यन्मां पृच्छसि राघव॥ ३८ ॥
तस्य तां पार्थिवेन्द्रस्य कथां श्रुत्वा सुदारुणाम् । विवेश पर्णशालायां महर्षिमभिवाद्य च ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।

वाल्मीकेराश्रमं यस्यां रात्र्यां पर्णशाला प्रविष्टः शत्रुघ्नः तस्यामेवार्धरात्रसमये सीतायां कुशलवाख्यमपत्यद्वयं संजातं तच्छ्रुत्वा तत्र गत्वा मातर्दिष्ट्येति तामभिनन्द्यान्येद्युर्निष्क्रम्य पथि सप्तरात्रं गमयित्वा यमुनातीरवासिमुन्याश्रममभ्ययात् ।

यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत् । तामेव रात्रिं सीतापि प्रसूता दारकद्वयम् ॥ १ ॥
ततोऽर्धरात्रसमये बालका मुनिदारकाः । वाल्मीकेः प्रियमाचख्युः सीतायाः प्रसवं शुभम्॥२॥
भगवन्रामपत्नी सा प्रसूता दारकद्वयम् । ततो रक्षां महातेजः कुरु भूतविनाशिनीम् ॥ ३ ॥
तेषां तद्वचनं श्रुत्वा महर्षिः समुपागमत् । बालचन्द्रप्रतीकाशौ देवपुत्रौ महौजसौ ॥ ४ ॥
जगाम तत्र हृष्टात्मा ददर्श च कुमारकौ । भूतघ्नीं चाकरोत्ताभ्यां रक्षां रक्षोविनाशिनीम्॥ ५ ॥
कुशमुष्टिमुपादाय लवं चैव तु स द्विजः । वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम्॥६ ॥

रा० टी०–एवमिति । राजा शापमेवमुपभुज्य राज्यं पुनः प्रतिलेभे ॥ ३७ ॥

गो० टी०–काल इति । व्यतीतं न स्मरिष्यसि । मया हठाच्छप्तं न मनसि कुर्वित्यर्थः ॥ ३६ ॥ ३७ ॥

३८] ति० टी०–कल्माषपाद इति मित्रसहस्यैव नामान्तरम् ॥ ३८ ॥

रा० टी०–तस्येति । आश्रमस्य समीपे विद्यमानं तत् कल्माषपादस्य यज्ञस्यायतनम् ॥ ३८ ॥

गो० टी०–तस्येति । कल्माषपाद इति तस्य नामान्तरम् । शापानन्तरम् मित्रसहः कुपितः सन् वसिष्ठं शप्तुं जलमादद । स्वयमेव मां नियुज्य कथं पुनः स्वयमेव कुप्यतीति । तदा तद्भार्या समागत्य सर्वथा गुरुर्न प्रतिशपार्ह इति प्रतिषिद्धवती । ततो राजा तद्वचः साध्विति मत्वा शापाय गृहीतं जलं स्वपादे प्रक्षिप्तवान् । तदाप्रभृति कल्माषपादनामाभवत् । कल्माषं कोपगृहीतशापजलकृतनीलरूपता ॥ ३८ ॥ ३९ ॥

इति श्रीगोविन्दराजविर० श्रीरा० भूषणे मणिमुकुटाख्याने उ० श्रीरामायणव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

३९] ति० टी०–विवेश। शत्रुघ्नः स्वप्नुमिति शेषः॥३९॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चषष्टितमः सर्गः ॥६५॥

रा० टी०–तस्येति । तस्य कल्माषपादस्य कथां श्रुत्वा पर्णशालायां विवेश ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

१] ति० टी०–अथ शत्रुघ्नस्य तस्मिन् एव सीताप्रसवज्ञानपूर्वकमृषिभिः सह मधुवनप्रस्थानम्—यामेवेति । यस्यां रात्र्यां प्रसूता प्रसूतवती ॥ १ ॥

रा० टी०–पर्णशालाप्रवेशानन्तरकालिकं वृत्तमाह-यामित्यादिभिः । यां यस्यां रात्रिं रात्रौ शत्रुघ्नः पर्णशालायां समाविशत् तां तस्यामेव रात्रिं रात्रौ सीता दारकद्वयं पुत्रयुग्मं प्रसूता प्रसूतवती ॥ १ ॥

गो० टी०–यामेवेत्यादि । यस्यां रात्र्यामित्यर्थः । दारकद्वयं पुत्रद्वयम् । प्रसूता प्रसूतवती ॥ १ ॥ २ ॥

२] ति० टी०–मुनिदारका मुनिपुत्राः

रा० टी०–तत इति । बालकाः अल्पवयस्काः मुनिदारकाः प्रियं प्रीतिविषयीभूतं सीतायां प्रसवं वाल्मीकिमाचख्युः ॥ २ ॥

३] ति० टी०–भूतविनाशिनीं चतुःषष्टिबालग्रहविनाशिनीम् ॥ ३ ॥

रा० टी०–आख्यानाकारमाह–भगवन्निति । सा सीता दारकद्वयं प्रसूता तत्तस्माद्धेतोः भूतविनाशिनीं रक्षां कुरु ॥३॥

गो० टी०–भगवन्निति । भूतविनाशिनीं बालग्रहविनाशिनीम् ॥ ३—५ ॥

४–५] ति० टी०–देवपुत्रौ तत्सदृशौ । द्रष्टुमिति शेषः४-५

रा० टी०–तेषामिति । महर्षिः समुपागमत् अर्द्धं पृथक्–बालेति । देवपुत्रौ तत्सदृशौ कुमारकौ जगाम प्राप ददर्श च ॥ ४ ॥

रा० टी०–भूतघ्नीमिति । भूतघ्नीं रक्षोविनाशिनीं च रक्षां ताभ्यामकरोत् अर्द्धं पृथक् ॥ ५ ॥

६] ति० टी०–भूतघ्नीं रक्षोविनाशिनीं च रक्षामकरोदि-

१ अस्येति गो० पाठः ।

यस्तयोः पूर्वजो जातः स कुशैर्मन्त्रसत्कृतैः । निर्मार्जनीयस्तु तदा कुश इत्यस्य नाम तत् ॥ ७ ॥
यश्चावरो भवेत्ताभ्यां लवेन सुसमाहितः । निर्मार्जनीयो वृद्धाभिर्लवेति च स नामतः ॥ ८ ॥
एवं कुशलवौ नाम्ना तावुभौ यमजातकौ । मत्कृताभ्यां च नामभ्यां ख्यातियुक्तौ भविष्यतः॥९॥
तां रक्षां जगृहुस्तां च मुनिहस्तात्समाहिताः । अकुर्वंश्च ततो रक्षां तयोर्विगतकल्मषाः ॥ १० ॥
तथा तां क्रियमाणां च वृद्धाभिर्गोत्रनाम च । संकीर्तनं च रामस्य सीतायाः प्रसवौ शुभौ ॥ ११ ॥
अर्धरात्रे तु शत्रुघ्नः शुश्राव सुमहत्प्रियम् । पर्णशालां ततो गत्वा मातर्दिष्ट्येति चाब्रवीत्॥ १२ ॥

त्युक्तम्, तत्प्रकारमाह—कुशमुष्टिमिति । कुशमुष्टिं लवं चोपादाय रक्षां प्रददौ। तृनकुशानामग्रभागः कुशमुष्टिरित्युच्यते, तेषामधोभागो लव इति। तत्र कतिपयसाग्रकुशान्गृहीत्वा मध्ये द्विधा छित्त्वा तदग्राधोभागाभ्यां क्रमाज्ज्येष्ठकनिष्ठयोः प्रमार्जनफलकं तदूपं रक्षादानं वृद्धानां स्त्रीणां हस्ते इति बोध्यम्॥६॥

रा० टी०–रक्षाप्रकारमाह–कुशमिति । वाल्मीकिः कुशमुष्टिं तृनकुशानामग्रभागं लवं तेषामधोभागं चोपादाय रक्षां प्रददौ चकार ॥ ६ ॥

गो० टी०–कुशमुष्टिमिति । लवं चैवेति । अधःप्रदेशतृनकुशमुष्टयेकदेशमित्यर्थः कुशमुष्टयग्राधोभागाभ्यां क्रमाज्ज्येष्ठकनिष्ठयोः प्रमार्जनमिति द्रष्टव्यम् ॥ ६ ॥

७] ति० टी०–निर्मार्जनीयो निर्मार्जनार्हो यतो जातस्ततोऽस्य कुश इति नाम भविष्यतीत्यर्थः ॥ ७ ॥

रा० टी०–य इति । तयोर्बालयोर्मध्ये यो जातः पूर्वजो ज्येष्ठः सः मन्त्रसत्कृतैः कुशैर्निर्मार्जनीयः अतः अस्य ज्येष्ठस्य तदा नामकरणसमये तत् कुश इति नाम भविष्यति ॥ ७ ॥

गो० टी०–य इति । निर्मार्जनीयः निर्मार्जनार्हो यतो जातः ततः कुश इति नामाकरोदिति शेषः॥ ७ ॥

८] ति० टी०–ताभ्याम् । तयोर्मध्ये इत्यर्थः । स लवेन कुशाधोभागमुष्टिना वृद्धाभिर्निर्मार्जनीयः सूतीगृहे ऋषेः प्रवेशाभावाद्वृद्धाभिरिति । स लवेति नामतो भविष्यतीति शेषः। जातकर्मण एवाय दिवसे कर्तव्यता, न तु नामकरणस्यापीति भविष्यतीति शेषपूरणम् ॥ ८ ॥

रा० टी०–य इति । ताभ्यां तयोर्योऽवरः कनिष्ठः स वृद्धाभिर्निर्मार्जनीयः लवेन सुसमाहितश्च भवेत् अभवत् अतः नामतो नाम्ना लवेति भविष्यति एतेन प्रादुर्भावकाले कनिष्ठस्तिरोहितचैतन्योऽभवदिति सूचितम् ॥ ८ ॥

गो० टी०–यश्चापर इति । ताभ्यां तयोः कुमारयोर्मध्य इत्यर्थः । लवेन तृनकुशमुष्टयधोभागेन । वृद्धाभिर्मार्जनीय इति । सूतिकागृहमध्ये ऋषिप्रवेशाभावात् ॥ ८ ॥

९] ति० टी०–यमजातकौ यमलौ ॥ ९ ॥

रा० टी०–उपसंहरन्नाह–एवमिति । यमजातकौ युग्मजन्मानौ यौ नाम्ना करिष्यमाणाभिधया युक्तौ भविष्यत इति शेषः तौ कुशलवौ मत्कृताभ्यां नामभ्यां ख्यातियुक्तौ भविष्यतः जन्मकाले एव नामनिरुक्त्या ऋषेर्हर्षातिशयश्च सूचितः ९

गो० टी०–एवमिति । ख्यातियुक्तौ भविष्यत इति । यमजातकौ यमलौ ॥ ९ ॥

१०] ति० टी०–समाहिता वृद्धास्तां मुनिहस्तान्मुनिना दीयमानां रक्षां जगृहुः ॥ १० ॥

रा० टी०–तामिति । ताः रक्षाकरणे प्रसिद्धाः समाहिता वृद्धाः रक्षां रक्षाकरणसामग्रीं मुनिहस्तात् जगृहुः ततो रक्षामकुर्वन् ॥ १० ॥

गो० टी०–तामिति । ततः अनन्तरम् । समाहितास्ता वृद्धाः मुनिहस्तात्तां मुनिना दीयमानां रक्षां च जगृहुः। पुत्रयोः प्रदानार्थमिति शेषः। रक्षामकुर्वन्निति । वृद्धा इति शेषः ॥ १० ॥

११] ति० टी०–गोत्रनाम च गोत्रं च नाम च । तत्र नाम्नः करिष्यमाणत्वेन श्रवणम् । रामस्य संकीर्तनम् । भगवन्रामपत्नी सा प्रसूतेति मुनिदारकवचनश्रवणात् ॥ ११ ॥

१२] ति० टी०–ततस्तत्श्रवणानन्तरम् । पर्णशालां सीतायाः प्रसवपर्णशलां गत्वा मातर्दिष्ट्या दैवयोगेन ते पुत्रजन्मेति शेष इत्यब्रवीदित्यर्थ इति कतकः । ' पर्णशालां गतो रात्रौ दिष्ट्या दिष्ट्येति चाब्रवीत् ' इति पाठे स्वपर्णशालास्थः सर्वमिदं श्रुत्वा स्वात्मन्येव भाग्यं भाग्यमित्यब्रवीदित्यर्थः । आर्षपाठेऽपि वाल्मीकिदत्तपर्णशालां पूर्वमेव गत्वा स्थितः, ततः श्रवणानन्तरं मातर्भाग्येनेदं तव पुत्रजन्मेति स्वात्मन्येवाब्रवीदित्यर्थो वक्तुं शक्यः । रामानुज्ञां विना रामत्यक्तसंभाषणस्यानौचित्यादिति तीर्थः ॥ १२ ॥

रा० टी०–तथेति । क्रियमाणां तां रक्षां तन्मन्त्रान् गोत्रनाम च शुभौ प्रसवौ उद्दिश्य रामस्य सीतायाः संकीर्तनं च शत्रुघ्नः अर्धरात्रे शुश्राव ततोऽनन्तरं पर्णशालां गत्वा हे मातः ! दिष्ट्येत्यब्रवीत् श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–तथेति । जन्म च नाम चेति । यद्यपि जातकर्म पुत्रजन्मदिवसे कर्तव्यं न तु नामकरणं तथाप्येवंनामकौ भविष्यत इति ऋषिवचनात्तच्छ्रवणमात्रमिति मन्तव्यम् । संकीर्तनं च रामस्येति । रामपत्नीप्रसूतेति मुनिदारकवचःश्रवणात्। वाल्मीकेः पर्णशालां गत्वा सामान्यतो दिष्ट्या दृष्टेति सूचयन् मुनिं प्रति हर्षेणाह—अर्धरात्र इत्यादिना । अनेन सीता विसृष्टेति रामादित्रयव्यतिरिक्तेन ज्ञातमिति सूचितम् ॥ ११ ॥ १२ ॥

१ अपर इति गो. पाठः। २ जन्मेति गो. पाठः।

तदा तस्य प्रहृष्टस्य शत्रुघ्नस्य महात्मनः । व्यतीता वार्षिकी रात्रिः श्रावणी लघुविक्रमा ॥१३॥
प्रभाते सुमहावीर्यः कृत्वा पौर्वाह्णिकीं क्रियाम् । मुनिं प्राञ्जलिरामन्त्र्य ययौ पश्चान्मुखः पुनः ॥१४॥
स गत्वा यमुनातीरं सप्तरात्रोषितः पथि । ऋषीणां पुण्यकीर्तीनामाश्रमे वासमभ्ययात् ॥१५॥
स तत्र मुनिभिः सार्धं भार्गवप्रमुखैर्नृपः । कथाभिरभिरूपाभिर्वासं चक्रे महायशाः ॥ १६ ॥
स काञ्चनाद्यैर्मुनिभिः समेतैः रघुप्रवीरो रजनीं तदानीम् ।
कथाप्रकारैर्बहुभिर्महात्मा विरामयामास नरेन्द्रसूनुः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।

रात्रौ शत्रुघ्नो भृगुनन्दनं च्यवनं लवणशूलमाहात्म्यं पृष्टवान् शूलधार्यसमवध्य इति कथाप्रस्तावे भक्तपूर्वजो मान्धातापत्येन शूलसहायेन भस्मसात्कृतः आमिषार्थं शूलं विना गच्छन्तं तं श्वः प्रभाते निरुध्य हनिष्यसि नात्र संदेह इति च्यवनः शत्रुघ्नं प्रत्यब्रवीत् ।

अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो भृगुनन्दनम् । पप्रच्छ च्यवनं विप्रं लवणस्य यथाबलम् ॥ १ ॥
शूलस्य च बलं ब्रह्मन्के च पूर्वं विनाशिताः । अनेन शूलमुख्येन द्वन्द्वयुद्धमुपागताः ॥ २ ॥
तस्य तद्वचनं श्रुत्वा शत्रुघ्नस्य महात्मनः । प्रत्युवाच महातेजाश्च्यवनो रघुनन्दनम् ॥ ३ ॥

१३] ति० टी०–वार्षिकी वर्षाकालिकी । तत्रापि श्रावणी श्रावणमासीया । दीर्घतरापि लघुविक्रमा शीघ्रगमना व्यतीता ॥ १३ ॥

रा० टी०–तदेति । लघुविक्रमा क्षिप्रं गमनशीला श्रावणी श्रवणयुक्ता वार्षिकी रात्रिर्व्यतीता ॥ १३ ॥

गो० टी०–तथेति । वर्षासु भवा वार्षिकी तत्रापि श्रावणी श्रावणमासवर्तिनी काचिद्रात्रिरिति । लघुविक्रम इत्यत्रेण संबन्धः । लघुविक्रमेति पाठे शीघ्रगमनेति रात्रिविशेषणम् १३

१४-१५] ति० टी०–मुनिं वाल्मीकिम् ॥ १४ ॥ १५ ॥

रा० टी०–प्रभात इति । प्रभाते पश्चान्मुखस्सन् ययौ ॥ १४ ॥

रा० टी०–स इति । पथि सप्तरात्रोषितः शत्रुघ्नः यमुनातीरं गत्वा ऋषीणामाश्रमे वासमभ्ययात् कर्तुमारभत ॥१५॥

गो० टी०–प्रभात इति । मुनिं वाल्मीकिम् ॥१४॥१५॥

१६] ति० टी०–स तत्र यमुनातीरे । यत्तु गङ्गातीर इति कतकस्तत्पूर्वापरसदर्भविरुद्धम् ॥ १६ ॥

रा० टी०–स इति । तत्राश्रमेषु वास चक्रे ॥ १६ ॥

गो० टी०–स इति । मुनिभिः सार्धमित्यनेन सेना गङ्गातीर एव स्थापितेति सूचितम् ॥ १६ ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरा० भूषणे मणिमुकुटाख्याने उ०श्रीरामायणव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

१७] ति० टी०–सकाञ्चनाद्यैरिति । काञ्चनेति च्यवनस्य नामान्तरम् । ' सभार्गवाद्यैः ' इति पाठान्तरम् ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्षष्टितमः सर्गः ॥६६॥

रा० टी०–स इति । स शत्रुघ्नः समेतैः काञ्चनाद्यैः च्यवनप्रभृतिभिर्मुनिभिस्सह बहुभिः कथाप्रकारैः विलक्षणकथाभिः रजनीं विरामयामास ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

१-३] ति० टी०–अथ रात्र्यामिति । प्रवृत्तायां जातायां लवणबलं शूलबलम् । पूर्वं शूलेन विनाशिताश्च के इति पप्रच्छेति संबन्धः ॥ १-३ ॥

रा० टी०–प्रातःकालिकं शत्रुघ्नवृत्तमाह–अथेत्यादिभिः । शत्रुघ्नः लवणस्य बलं च्यवनं यथा यथावत् पप्रच्छ ॥ १ ॥

गो० टी०–अथेत्यादि । प्रवृत्तायामागतायामित्यर्थः । पप्रच्छ शूलवृत्तान्तमिति शेषः ॥ १ ॥

रा० टी०–तदाकारमाह—शूलस्येति । अनेन शूलमुख्यं यस्य तेन लवणेन यथावत् द्वन्द्वयुद्धमुपागतास्सन्तः के जनाः पूर्वं शूलस्य शूलेन विनाशिताः ॥ २ ॥

रा० टी०–तस्येति । च्यवनो रघुनन्दनं प्रत्युवाच ॥३॥

गो० टी०–शूलस्येति । अनेन द्वन्द्वयुद्धमुपागताः के पूर्वं शूलेन निपातिता इति पप्रच्छेति योजना । ब्रह्मन्नित्यारभ्य प्रश्नवचनम् । अनेनेति लवणः परामृश्यते । अनेन लवणबलं शूलबलं च पृष्टं भवति ॥ २ ॥ ३ ॥

१ सप्तेत इति गो० पाठः ।

असंख्येयानि कर्माणि यान्यस्य रघुनन्दन । इक्ष्वाकुवंशप्रभवे यद्वृत्तं तच्छ्रुणुष्व मे ॥ ४ ॥
अयोध्यायां पुरा राजा युवनाश्वसुतो बली । मांधाता इति विख्यातस्त्रिषु लोकेषु वीर्यवान् ॥ ५ ॥
स कृत्वा पृथिवीं कृत्स्नां शासने पृथिवीपतिः । सुरलोकमितो जेतुमुद्योगमकरोन्नृपः ॥ ६ ॥
इन्द्रस्य च भयं तीव्रं सुराणां च महात्मनाम् । मांधातरि कृतोद्योगे देवलोकजिगीषया ॥ ७ ॥
अर्धासनेन शक्रस्य राज्यार्धेन च पार्थिवः । वन्द्यमानः सुरगणैः प्रतिज्ञामध्यरोहत ॥ ८ ॥
तस्य पापमभिप्रायं विदित्वा पाकशासनः । सान्त्वपूर्वमिदं वाक्यमुवाच युवनाश्वजम् ॥ ९ ॥
राजा त्वं मानुषे लोके न तावत्पुरुषर्षभ । अकृत्वा पृथिवीं वश्यां देवराज्यमिहेच्छसि ॥ १० ॥
यदि वीर समग्रा ते मेदिनी निखिला वशे । देवराज्यं कुरुष्वेह सभृत्यबलवाहनः ॥ ११ ॥
इन्द्रमेवं ब्रुवाणं तं मांधाता वाक्यमब्रवीत् । क्व मे शक्र प्रतिहतं शासनं पृथिवीतले ॥ १२ ॥
तमुवाच सहस्राक्षो लवणो नाम राक्षसः । मधुपुत्रो मधुवने न तेऽज्ञां कुरुतेऽनघ ॥ १३ ॥
तच्छ्रुत्वा विप्रियं घोरं सहस्राक्षेण भाषितम् । व्रीडितोऽवाङ्मुखो राजा व्याहर्तुं न शशाक ह ॥१४॥
आमन्त्र्य तु सहस्राक्षं प्रायान्किंचिदवाङ्मुखः । पुनरेवागमच्छ्रीमानिमं लोकं नरेश्वरः ॥ १५ ॥
स कृत्वा हृदयेऽमर्षं सभृत्यबलवाहनः । आजगाम मधोः पुत्रं वशे कर्तुमरिंदमः ॥ १६ ॥
स काङ्क्षमाणो लवणं युद्धाय पुरुषर्षभः । दूतं संप्रेषयामास सकाशं लवणस्य सः[3] ॥ १७ ॥
स गत्वा विप्रियाण्याह बहूनि मधुनः सुतम् । वदन्तमेवं तं दूतं भक्षयामास राक्षसः ॥ १८ ॥

४-७] ति० टी०-अस्य शत्रुस्य लवणस्य चासंख्येयानि कर्माणि यानि सन्ति तेषु इक्ष्वाकुवंशप्रभवे मांधातरि यन्महत्कर्मास्य वृत्तं तच्छृणुष्व ॥ ४-७ ॥

रा० टी०-तदाकारमाह—असंख्येयानीति । असंख्येयानि यान्यस्य लवणस्य कर्माणि तेषां मध्ये इक्ष्वाकुवंशप्रभवे यत्कर्म प्रवृत्तं तन्मे शृणुष्व ॥ ४ ॥

रा० टी०-तत्कर्माण्येवाह-अयोध्यायामित्यादिभिः । मांधाता इति विख्यातः युवनाश्वसुतः अयोध्यायां राजा बभूवेति शेषः ॥ ५ ॥

रा० टी०-स इति । पृथिवीपतिर्मान्धाता पृथिवीं शासने स्ववशे कृत्वा सुरलोकं जेतुमितः अयोध्यातः उद्योगमकरोत् ॥ ६ ॥

रा० टी०-इन्द्रस्येति । मांधातरि कृतोद्योगे सति इन्द्रस्य सुराणां च तीव्रं भयमभवदिति शेषः ॥ ७ ॥

गो० टी०-असंख्येयानीति । अस्य शत्रुसंहारकर्माणि तान्यसंख्येयानि । तत्र प्रसिद्धमेकं दर्शयति—इक्ष्वाकुवंशप्रभव इति । यद्वृत्तं यद्व्यापारम् तच्छृणुष्व ॥ ४-७ ॥

८-९] ति० टी०-शक्रस्यार्धासनेनार्धराज्येन च युक्तः पार्थिवो राजा भूत्वा सुरगणैर्वन्द्यमानः स्थास्ये इति प्रतिज्ञां कृत्वा दिवमध्यरोहत । राजेत्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०-अर्द्धेति । शक्रस्यार्द्धासनेन राज्यार्द्धेन च युक्तोपि पार्थिवो मांधाता प्रतिज्ञां सर्वं ग्रहीतुं संकल्पमध्यारोहत अकरोत् ॥ ८ ॥

रा० टी०-तस्येति । पाकशासन इन्द्रः तस्य मांधातुः पापमभिप्रायं ज्ञात्वा सान्त्वपूर्वं वाक्यमुवाच ॥ ९ ॥

गो० टी०-अर्धेति । शक्रस्यार्धासनेन अर्धराज्येन च युक्तः पार्थिवो राजा भूत्वा सुरगणैर्वन्द्यमानः स्थास्य इति प्रतिज्ञां कृत्वा दिवमध्यारोहत ॥ ८ ॥ ९ ॥

१०] ति० टी०-तावत्प्रथमं मानुषे एव लोके सर्वात्मना राजा नासि, स त्वं पृथिवीमेव वश्यामकृत्वा कथमिह देवराज्यमिच्छसि ॥ १० ॥

रा० टी०-तदाकारमाह—राजेति द्वाभ्याम् । यस्त्वं देवराज्यमिहेच्छसि स त्वं पृथिवीं निखिलवसुधां वश्यामकृत्वा मानुषे लोकेपि राजा न ॥ १० ॥

गो० टी०-राजा त्वमिति । तावत्प्रथमतः । मानुष एव लोके सर्वात्मना न राजासि स त्वं पृथिवीमेव वश्यामकृत्वा कथमिह देवराज्यमिच्छसि ॥ १०-१२ ॥

११-१२] ति० टी०-यदि समग्रा मेदिनी ते तव वशे भविष्यति तदा देवराज्यं कुरु ॥ ११ ॥ १२ ॥

रा० टी०-यदीति । यदि समग्रा अग्रभागसहिता निखिला मेदिनी ते वशे भवेदिति शेषः तदा इह लोके राज्यं कुरुष्व ॥ ११ ॥

रा० टी०-इन्द्रमिति । हे शक्र ! पृथिवीतले मे शासनं क्व प्रतिहतमिति वाक्यं मांधाता अब्रवीत् ॥ १२ ॥

१३-१८] ति० टी०-न ते ज्ञाम् । न ते आज्ञामित्यर्थः । संधिरार्षः ॥ १३-१८ ॥

---

१ मान्धातेति स विख्यात इति गो. पा. । २ ह्रियेति गो. पाठः । ३ हीति गो. पाठः ।

चिरायमाणे दूते तु राजा क्रोधसमन्वितः । अर्दयामास तद्रक्षः शरवृष्ट्या समन्ततः ॥ १९ ॥
ततः प्रहस्य तद्रक्षः शूलं जग्राह पाणिना । वधाय सानुबन्धस्य मुमोचायुधमुत्तमम् ॥ २० ॥
तच्छूलं दीप्यमानं तु सभृत्यबलवाहनम् । भस्मीकृत्वा नृपं भूमौ[1] लवणस्यागमत्करम् ॥ २१ ॥
एवं स राजा सुमहान्हतः सबलवाहनः । शूलस्य तु बलं सौम्य अप्रमेयमनुत्तमम् ॥ २२ ॥
श्वः प्रभाते तु लवणं वधिष्यसि न संशयः । अगृहीतायुधं क्षिप्रं ध्रुवो हि विजयस्तव ॥ २३ ॥
लोकानां स्वस्ति चैवं[2] स्यात्कृते कर्मणि च त्वया । एतत्ते सर्वमाख्यातं लवणस्य दुरात्मनः ॥ २४ ॥
शूलस्य च बलं घोरमप्रमेयं नरर्षभ । विनाशश्चैव मांधातुर्यत्रेनाभूच्च पार्थिव ॥ २५ ॥
त्वं श्वः प्रभाते लवणं महात्मन्वधिष्यसे नात्र तु संशयो मे ।
शूलं विना निर्गतमामिषार्थं ध्रुवो जयस्ते भविता नरेन्द्र । ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०–तमिति । मधुवने विद्यमानो लवणो नाम राक्षसः ते आज्ञां न कुरुते इति वाक्यं सहस्राक्ष उवाच आज्ञाशब्दाकारलोप आर्षः ज्ञाशब्दस्यैवाज्ञेत्यर्थो वा ॥ १३ ॥

रा० टी०–तदिति । सहस्राक्षेण भाषितं श्रुत्वा व्रीडितः अत एव अवाङ्मुखो राजा व्याहर्तुं न शशाक ॥ १४ ॥

रा० टी०–आमन्त्र्येति । किञ्चिदवाङ्मुखो राजा सहस्राक्षमामन्त्र्य तदाज्ञां गृहीत्वा प्रायात् आगच्छत् अत एव इमं मानुषं लोकं पुनरागमत् प्राप्नोत् ॥ १५ ॥

रा० टी०–स इति । सः मांधाता मधोः पुत्रं वशीकर्तुमाजगाम मधुवनमिति शेषः ॥ १६ ॥

रा० टी०–स इति । युद्धाय लवणं काङ्क्षमाणस्तः वायुवेगस्स राजा लवणस्य सकाशं समीपं दूतं सम्प्रेषयामास स वायुः । परदेशदूरगमनमित्यादिना सशब्दस्य वायुपरत्वम्॥१७॥

रा० टी०–स इति । स दूतो गत्वा मधुनस्थतं विप्रियाणि अप्रियाणि वचांस्याह एवं वदन्तं दूतं राक्षसो लवणो भक्षयामास ॥ १८ ॥

गो० टी०–तमिति । तेजामिति संधिरार्षः । ते आज्ञाम् ॥ १३—१८ ॥

१९-२२] ति० टी०–चिरायमाणे विलम्बं कुर्वाणे १९-२२

रा० टी०–चिरायेति । दूते चिरायमाणे विलम्बं कुर्वति सति क्रोधसमन्वितो राजा रक्षो लवणं मर्दयामास ॥ १९ ॥

रा० टी०–तत इति । रक्षो लवणस्सानुबन्धस्य सपरिकरस्य मान्धातुर्वधाय शूलं जग्राह मुमोच च ॥ २० ॥

रा० टी–तदिति । शूलं सभृत्यबलवाहनं नृपं भस्मीकृत्वा लवणस्य करमगमत् ॥ २१ ॥

रा० टी०–एवमिति । सबलवाहनो राजा एवं हतः अतः शूलस्य बलमप्रमेयं विद्धीति शेषः ॥ २२ ॥

गो० टी०–चिरायमाण इति । चिरायमाणे विलम्बं कुर्वाणे ॥ १९–२२ ॥

२३–२६] ति० टी०–अथ श्रुतशूलबलं प्रति स्वविजयसंदेहनिवृत्तय आह—श्वः प्रभाते इति ॥ २३–२६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

रा० टी०–ननु शूलस्यैवं बलवत्त्वे मम विजयः कथमित्यत आह—श्वरिति । अगृहीतायुधं लवणं श्वरागामिनि प्रभाते वधिष्यसि अतस्ते विजयो ध्रुवः ॥ २३ ॥

रा०टी०–लोकानामिति । एवं कर्मणि त्वया कृते सति लोकानां स्वस्ति स्यात् अर्द्धं पृथक् । एतदिति । लवणस्य शूलस्य एतद्बलं सर्वमाख्यातं येन बलेन मांधातुर्विनाशो यत्नेन इन्द्रप्रयत्नेनाभूत् सार्द्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

रा० टी०–उपसंहरन्नाह–त्वमिति । आमिषार्थं शूलं विना निर्गतं लवणं त्वं श्वः प्रभाते वधिष्यस्यतस्ते विजयो ध्रुवो भविता ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

गो० टी०–अथ श्रुतशूलबलं प्रति स्वविजयसन्देहनिवृत्तय आह—श्वः प्रभात इत्यादि ॥ २३—२६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

---

१ भूय इति गो. पाठः । २ एवेति गो. पाठः ।

अष्टषष्टितमः सर्गः ।

प्रभाते धनुष्पाणिः शत्रुघ्नो यमुनामुत्तीर्य मधुपुरद्वारि आमिषार्थं बहिर्गते लवणं पालयन्स्थितः । ततः प्राणिनां भारमुद्वहन् स क्रूरकर्मा प्रत्यागच्छत् तेन दृष्टो द्वन्द्वयुद्धं याचितः क्रूरशब्दैर्मर्मभेदिभिर्विद्धश्च ।

कथां कथयतस्तेषां जयं चाकाङ्क्षतां शुभम् । व्यतीता रजनी शीघ्रं शत्रुघ्नस्य महात्मनः ॥ १ ॥
ततः प्रभाते विमले तस्मिन्काले स राक्षसः । निर्गतस्तु पुरद्वारि भक्ष्याहारप्रचोदितः ॥ २ ॥
एतस्मिन्नन्तरे वीरः उत्तीर्य यमुनां नदीम् । तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ॥ ३ ॥
ततोऽर्धदिवसे प्राप्ते क्रूरकर्मा स राक्षसः । आगच्छद्बहुसाहस्रं प्राणिनां भारमुद्वहन् ॥ ४ ॥
ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् । तमुवाच ततो रक्षः किमनेन करिष्यसि ॥ ५ ॥
ईदृशानां सहस्राणि सायुधानां नराधम । भक्षितानि मया रोषात्कालेनानुगतो ह्यसि ॥ ६ ॥
आहारश्चाप्यसंपूर्णो ममायं पुरुषाधम । स्वयं प्रविष्टोऽद्य मुखं कथमासाद्य दुर्मते ॥ ७ ॥
तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः । शत्रुघ्नो वीर्यसंपन्नो रोषादश्रूण्यवासृजत् ॥ ८ ॥
तस्य रोषाभिभूतस्य शत्रुघ्नस्य महात्मनः । तेजोमया मरीच्यस्तु सर्वगात्रैर्विनिष्पतन् ॥ ९ ॥
उवाच च सुसंक्रुद्धः शत्रुघ्नः स निशाचरम् । योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह ॥ १० ॥
पुत्रो दशरथस्याहं भ्राता रामस्य धीमतः । शत्रुघ्नो नाम शत्रुघ्नो वधाकाङ्क्षी तवागतः ॥ ११ ॥

१] ति० टी०–अथ प्रातःकाले लवणे क्वचिद्गते मधुपुरद्वारं निरुध्य स्थितेन शत्रुघ्नेन मध्याह्ने प्रतिनिवृत्तस्य युद्धायाह्वानम्—**कथामिति** । तेषां वचः श्रुत्वानस्य शत्रुघ्नस्य रजनी व्यतीता ॥ १ ॥

रा० टी०–प्रातःकालिकं वृत्तमाह–**कथामित्यादिभिः**। तेषामृषीणां कथां कथयतां सतां शत्रुघ्नस्य रजनी शीघ्रं व्यतीता१

गो० टी०–**कथामित्यादि** ॥ १ ॥

२-४] ति० टी०–भक्ष्यस्याहार आहरणं तेन प्रचोदितः प्रेरितः ॥ २-४ ॥

रा०टी०-**तत इति**। भक्ष्यस्य आहारेणानयनेन प्रचोदितः प्रेरितः भक्ष्यानयनमना इत्यर्थः लवणः प्रभाते पुरान्निर्गतः २

रा० टी०–**एतस्मिन्निति** । वीरश्शत्रुघ्नः यमुनानदीमुत्तीर्य मधुपुरद्वारि तीर्त्वा प्राप्य अतिष्ठत् ॥ ३ ॥

रा० टी०–**तत इति** । राक्षसो लवणः प्राणिनां बहुसाहस्रं भारमुद्वहन् अर्द्धदिवसे ततो वनात् आगच्छत् ॥ ४ ॥

गो० टी०–**तत इति**। भक्ष्याहारप्रचोदितः भक्ष्यस्याहारः आहरणं तेन प्रचोदितः ॥ २-४ ॥

५-६] ति० टी०–किमनेन। आयुधेनेत्यर्थः ॥५॥६॥

रा० टी०–**तत इति** । रक्षः शत्रुघ्नं ददर्श अनेनायुधेन किं करिष्यसीत्युवाच च ॥ ५ ॥

रा० टी०–नन्वायुधेन त्वां हनिष्यामीत्यत आह—**ईदृशानामिति** । ईदृशानां सायुधानां सहस्राणि मया भक्षितानि अतः त्वं कालेन अन्तसमयेन अनुगतोसि ॥ ६ ॥

गो० टी०–**तत इति** । अनेनायुधेन ॥ १-७ ॥

७-८] ति० टी०–स्वयमासाद्यागत्य मम मुखं कथमद्य प्रविष्टोऽसि ॥ ७ ॥ ८ ॥

रा० टी०–**आहार इति** । ममानीतोयमाहारः असंपूर्णः परिपूर्णनृप्तिकारको न अतः स्वयमासाद्य प्राप्य मम मुखं प्रविष्टस्त्वं कथं निवर्त्तसे इति शेषः ॥ ७ ॥

रा० टी०–**तस्येति** । एवं भाषमाणस्य हसतश्च तस्य लवणस्याग्रे शत्रुघ्नो रोषादश्रूण्यवासृजत् अत्यजत् ॥ ८ ॥

गो० टी०–**तस्येति** । रोषादिति । दुःखानन्दाभ्यामिव रोषादप्यश्रु जायते ॥ ८ ॥

९-११] ति० टी०–गात्रैर्विनिष्पतन्विनिरपतन् । मरीच्यो मरीचयः ॥ ९-११ ॥

रा० टी०–**तस्येति** । शत्रुघ्नस्य सर्वगात्रैः तेजोमया मरीच्यो मरीचयः विनिष्पतन् विनिरपतन् ॥ ९ ॥

रा० टी०–**उवाचेति** । शत्रुघ्नः निशाचरमुवाच तदाकारमाह रामस्य भ्राता तव वधाकाङ्क्षी आगतः शत्रुघ्नो नामाहं त्वया सह द्वन्द्वयुद्धं प्रहारो यथा भवति तथा योद्धुमिच्छामि श्लोकद्वयमेकान्वयि ॥ १० ॥ ११ ॥

गो० टी०–**तस्येति** । गात्रैः विनिष्पतन्निति । गात्रेभ्यो विनिष्पतन्नित्यर्थः ॥ ९-११ ॥

---

१ कथयतामिति गो. रा. पाठः । २ धीर इति गो.पाठः । ३ वीरः शत्रुघ्न इति गो. पाठः । ४ कालमाकाङ्क्षसे न किमिति गो. पाठः । ५ जस्येति गो. पाठः । ६ निस्येति गो. पाठः ।

तस्य मे युद्धकामस्य द्वन्द्वयुद्धं प्रदीयताम् । शत्रुस्त्वं सर्वभूतानां न मे जीवन्गमिष्यसि ॥ १२ ॥
तस्मिंस्तथा ब्रुवाणे तु राक्षसः प्रहसन्निव । प्रत्युवाच नरश्रेष्ठं दिष्ट्या प्राप्तोऽसि दुर्मते ॥ १३ ॥
मम मातृष्वसुर्भ्राता रावणो नाम राक्षसः । हतो रामेण दुर्बुद्धे स्त्रीहेतोः पुरुषाधम ॥ १४ ॥
तच्च सर्वं मया क्षान्तं रावणस्य कुलक्षयम् । अवज्ञां पुरतः कृत्वा मया यूयं विशेषतः ॥ १५ ॥
निहताश्च हि ते[2] सर्वे परिभूतास्तृणं यथा । भूताश्चैव भविष्याश्च यूयं च पुरुषाधमाः ॥ १६ ॥
तस्य ते युद्धकामस्य युद्धं दास्यामि दुर्मते । तिष्ठ त्वं च मुहूर्तं तु यावदायुधमानये ॥ १७ ॥
ईप्सितं यादृशं तुभ्यं सज्जये यावदायुधम् । तमुवाचाशु शत्रुघ्नः क्व मे जीवन्गमिष्यसि ॥ १८ ॥
स्वैयमेवागतः शत्रुर्न मोक्तव्यः कृतात्मना । यो हि विक्लवया बुद्ध्या प्रसरं शत्रवे दिशेत्[4] ॥
स हतो मन्दबुद्धिः[5] स्याद्यथा कापुरुषस्तथा । ॥ १९ ॥
तस्मात्सुदृष्टं कुरु जीवलोकं शरैः शितैस्त्वां विविधैर्नयामि ।
यमस्य गेहाभिमुखं हि पापं रिपुं त्रिलोकस्य च राघवस्य । ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

१२-१३] ति० टी०-मे मत्तो जीवन्न गमिष्यसि१२।१३

रा० टी०-तस्येति । द्वन्द्वयुद्धं मे प्रदीयतां त्वयेति शेषः तत्र हेतुः सर्वभूतानां शत्रुस्त्वं मे समीपात् जीवन्न गमिष्यसि१२

रा० टी०-तस्मिन्निति । राक्षसः प्रत्युवाच तदाकारमाह दिष्ट्या भाग्यवशेनैव त्वं प्राप्तोसि ॥ १३ ॥

गो० टी०-तस्येति । मे मत्तो जीवन्न गमिष्यसि ॥१२।१३

१४] ति० टी०-मम मातृष्वसुर्भ्राता । कुम्भीनसीसंबन्धतः शूर्पणखास्य मातृष्वसा तद्भ्राता रावणः ॥ १४ ॥

रा० टी०-त्वं मयावश्यं हन्तव्य एवेति बोधयन्नाह—ममेति । मम मातृष्वसुर्भ्राता रावणो हतः ॥ १४ ॥

गो० टी०-मम मातृष्वसुरिति । अयमर्थः पूर्वमुक्तः १४

१५] ति० टी०-मयावज्ञां पुरतः कृत्वा यूयं विशेषतः क्षान्ता इत्यनुकर्षः ॥ १५ ॥

रा० टी०-तदिति । रावणस्य कुलक्षयं कुलक्षयदुःखं मया क्षान्तमवज्ञामस्माकमनादरं पुरतः कृत्वा विद्यमाना यूयं मयि मया विशेषतः क्षान्ताः लिङ्गविपरिणामेनात्राप्यन्वयः क्षयशब्दः अर्शआद्यजन्तः ॥ १५ ॥

गो० टी०-तच्चेति । मयावज्ञां पुरतः कृत्वा यूयं विशेषतः क्षान्ता इति संबन्धः । मया पूर्वं विशेषत इति पाठान्तरम् १५

१६-१७] ति० टी०-भूताश्च भविष्याश्च यूयं वर्तमानाश्च पुरुषाधमाः सर्वेऽपि मे मया निहताः । छकरहननत्वं वर्तमानेषु व्यङ्ग्यम् । परे तृणं यथा तथा परिभूताश्च । मांधातृपरिभवेन परिभूता इति युष्मास्ववज्ञां कृत्वा इतः पूर्वं भवन्तो न हता इति भावः ॥ १६ ॥ १७ ॥

रा० टी०-ननु सामर्थ्याभावाच्छान्तं किं तादृशक्षमयेत्यत आह—निहता इति । ते तव कुलप्रधानाः ये भूताः ते मया निहताः अत एव भविष्याः तदपेक्षया भविष्यत्कालकाः यूयं तृणमिव परिभूताः अनादृताः ॥ १६ ॥

गो० टी०-निहताश्चेति । भूताश्च भविष्याश्च वर्तमानाश्च पुरुषाः सर्वेपि मे मया निहताः । केचित्परे तृणं यथा भवति तथा परिभूताश्च । अलक्षीकृताश्च ॥ १६ ॥

रा० टी०-तस्येति । ते युद्धं दास्यामि अतो यादृशमायुधं तुभ्यं त्वदर्थमीप्सितं तादृशमायुधं यावदानये सज्जये च तावन्मुहूर्तं त्वं तिष्ठ सार्द्धश्लोक एकान्वयी ॥ १७ ॥

गो० टी०-तस्येति । यादृशं तुभ्यमीप्सितं तादृशं युद्धं दास्यामि । सज्जये यावदायुधमिति । आयुधं गृहीत्वा सज्जयिष्ये तावत्तिष्ठेत्यर्थः ॥ १७ ॥

१८] ति० टी०-तुभ्यं त्वां हन्तुं यादृशमायुधं ममेप्सितं तादृशं यावत्सज्जये सज्जं करोमि । त्वं तावत्तिष्ठेति शेषः ॥ १८ ॥

रा० टी०-तमिति । शत्रुघ्नः तं लवणमुवाच तदाकारमाह स्वयमागतश्शत्रुर्न मोक्तव्यः अतः जीवन् त्वं क्व गमिष्यसि न त्यक्ष्यामीति तात्पर्यम् ॥ १८ ॥

गो० टी०-तमिति । तमायुधं जिघृक्षुमित्यर्थः ॥ १८ ॥

१९-२०] ति० टी०-प्रसरमवकाशम् ॥ १९ ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टषष्टितमः सर्गः ॥ ६८ ॥

रा० टी०-त्यागे दोषमाह—य इति । विक्लवया विचाररहितया बुद्ध्या यः शत्रवे प्रसरमवकाशं दिशेत् दद्यात् स मन्दबुद्धिः कापुरुष इव हतस्स्यात् ॥ १९ ॥

रा० टी०-तस्मादिति । त्रिलोकस्य राघवस्य च रिपुमतः पापं तन्मयमत एव यमस्य गेहाभिमुखं त्वां शितैश्श-

१ राक्षसाधिप इति गो.पाठः । २ मे इति गो.पाठः । ३ शत्रुर्यदृच्छयाटव इति गो.पाठः । ४ ददाविति गो.पाठः । ५ मन्दबुद्धित्वादिति गो.पाठः ।

एकोनसप्ततितमः सर्गः ।

शत्रुघ्नवाक्यप्रहारैः पीडितः स निशाचरो गृहं न गत्वा शूलं विनापि वृक्षादिभिरेव युयुधे शत्रुघ्नोपीतरायुधैरजय्यं तं ज्ञात्वाग्रजवितीर्णामोघशरेणान्ते कालवशं निनाय ।

तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः । क्रोधमाहारयत्तीव्रं तिष्ठतिष्ठेति चाब्रवीत् ॥ १ ॥
पाणौ पाणिं स निष्पिष्य दन्तान्कटकटाय्य च । लवणो रघुशार्दूलमाह्वयामास चासकृत् ॥ २ ॥
तं ब्रुवाणं तथा वाक्यं लवणं घोरदर्शनम् । शत्रुघ्नो देवशत्रुघ्न इदं वचनमब्रवीत् ॥ ३ ॥
शत्रुघ्नो न तदा जातो यदान्ये निर्जितास्त्वया । तदद्य बाणाभिहतो व्रज त्वं यमसादनम् ॥ ४ ॥
ऋषयोऽप्यद्य पापात्मन्मया त्वां निहतं रणे । पश्यन्तु विप्रा विद्वांसस्त्रिदशा इव रावणम् ॥ ५ ॥
त्वयि मद्बाणनिर्दग्धे पतितेऽद्य निशाचरे । पुरे जनपदे चापि क्षेममेव भविष्यति ॥ ६ ॥
अद्य मद्बाहुनिष्क्रान्तः शरो वज्रनिभाननः । प्रवेक्ष्यते ते हृदयं पद्ममंशुरिवार्कजः ॥ ७ ॥
एवमुक्तो महावृक्षं लवणः क्रोधमूर्च्छितः । शत्रुघ्नोरसि चिक्षेप स च तं शतधाच्छिनत् ॥ ८ ॥
तद्दृष्ट्वा विफलं कर्म राक्षसः पुनरेव तु । पादपान्सुबहून्गृह्य शत्रुघ्नायासृजद्बली ॥ ९ ॥
शत्रुघ्नश्चापि तेजस्वी वृक्षानापततो बहून् । त्रिभिश्चतुर्भिरेकैकं चिच्छेद नतपर्वभिः ॥ १० ॥
ततो बाणमयं वर्षं व्यसृजद्राक्षसोपरि । शत्रुघ्नो वीर्यसंपन्नो विव्यधे न स राक्षसः ॥ ११ ॥
ततः प्रहस्य लवणो वृक्षमुद्यम्य वीर्यवान् । शिरस्यभ्यहनच्छूरं सस्ताङ्गः स मुमोह वै ॥ १२ ॥
तस्मिन्निपतिते वीरे हाहाकारो महानभूत् । ऋषीणां देवसङ्घानां गन्धर्वाप्सरसां तथा ॥ १३ ॥

रैर्नयामि यमस्य गेहमिति शेषः तस्मात् जीवलोकं सुदृष्टं कुरु पुनर्न द्रक्ष्यसीति तात्पर्यम् ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

गो० टी०–यो हीति । प्रसरमवकाशम् । शूलग्रहणार्थमित्यर्थः ॥ १९ ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

१] **ति० टी०**–अथ लवणवधः—**तदिति** ॥ १ ॥

रा० टी०–शत्रुघ्नवचनश्रवणानंतरकालिकं वृत्तमाह–**तदित्यादिभिः** । क्रोधमाहारयत् प्राप अत एव तिष्ठतिष्ठेत्यब्रवीत्[1] ।

गो० टी०–अथ लवणवधः—**तच्छ्रुत्वेत्यादि** ॥१– ९ ॥

२–६] **ति० टी०**–कटकटाय्य कटकटाशब्दवत् कृत्वा ॥ २–६ ॥

रा० टी०–**पाणाविति** । लवणः रघुशार्दूलमाह्वयामास २

रा० टी०–**तमिति** । शत्रुघ्नः इदमब्रवीत् ॥ ३ ॥

रा० टी०–तदाकारमाह—**शत्रुघ्न इति** । यदा अन्ये राजानः त्वया निर्जिताः तदा शत्रुघ्नो न जातः ततस्माद्धेतोः अद्य शत्रुघ्नजननसमये बाणाभिहतस्त्वं यमसादनं व्रज ॥ ४ ॥

रा० टी०–**ऋषय इति** । ऋषयो विद्वांसो विप्राः मया हते त्वां हतं रावणं त्रिदशा देवा इव पश्यन्तु ॥ ५ ॥

रा० टी०–त्वयीति । निशाचरे[2] त्वयि मद्बाणनिर्दग्धे अत एव पतिते सति क्षेममेव भविष्यति ॥ ६ ॥

७–११] **ति० टी०**–वज्रनिभाननो वज्रायुधसमाग्रभागः । अंशुः किरणः ॥ ७–११ ॥

रा० टी०–अद्येति । मद्बाहुनिष्क्रान्तश्शरः अर्कजांशुः पद्ममिव ते हृदयं प्रवेक्ष्यते ॥ ७ ॥

रा० टी०–एवमिति । लवणो महावृक्षं शत्रुघ्नोरसि चिक्षेप स शत्रुघ्नः तं वृक्षं शतधाच्छिनत् ॥ ८ ॥

रा० टी०–तदिति । राक्षसः कर्म स्वकृतव्यापारं विफलं दृष्ट्वा पादपान् गृह्य गृहीत्वा असृजत् ॥ ९ ॥

रा० टी०–**शत्रुघ्न इति** । शत्रुघ्नः आपततो वृक्षान् एकैकं वृक्षं त्रिभिश्चतुर्भिर्वा नतपर्वभिश्शरैः चिच्छेद ॥ १० ॥

रा० टी०–**तत इति** । शत्रुघ्नः राक्षसोपरि[3] बाणमयं वर्षं व्यसृजत् राक्षसस्तु न विव्यधे ॥ ११ ॥

गो० टी०–**शत्रुघ्नश्चेति** । एकैकमिति । वृक्षमिति शेषः ॥ १०–१३ ॥

१२–१३] **ति० टी०**–सस्ताङ्गो गलिताङ्गः ॥१२॥ १३ ॥

रा० टी०–**तत इति** । लवणो वृक्षमुद्यम्य उत्थाप्य शूरं शत्रुघ्नं शिरस्यभ्यहनत् अभ्यहन् अत एव सस्तं प्रकम्पितमङ्गं यस्य स शत्रुघ्नो मुमोह ॥ १२ ॥

रा० टी०–**तस्मिन्निति** । तस्मिन् शत्रुघ्ने निपतिते सति ऋषिप्रभृतीनां महान् हाहाकारोऽभूत ॥ १३ ॥

---

१ वीति गो. पाठः । २ निशाचरेति गो. पाठः । ३ उरसीति गो. पाठः ।

तमवज्ञाय तु हतं शत्रुघ्नं भुवि पातितम् । रक्षो लब्धान्तरमपि न विवेश स्वमालयम् ॥ १४ ॥
नापि शूलं प्रजग्राह तं दृष्ट्वा भुवि पातितम् । ततो हत इति ज्ञात्वा तान्भक्षान्समुदावहत् ॥ १५ ॥
मुहूर्तालब्धसंज्ञस्तु पुनस्तस्थौ धृतायुधः । शत्रुघ्नो वै पुरद्वारि ऋषिभिः संप्रपूजितः ॥ १६ ॥
ततो दिव्यममोघं तं जग्राह शरमुत्तमम् । ज्वलन्तं तेजसा घोरं पूरयन्तं दिशो दश ॥ १७ ॥
वज्राननं वज्रवेगं मेरुमन्दरसंनिभम् । नतं पर्वसु सर्वेषु संयुगेष्वपराजितम् ॥ १८ ॥
असृक्चन्दनदिग्धाङ्गं चारुपत्रं पतत्रिणम् । दानवेन्द्राचलेन्द्राणामसुराणां च दारुणम् ॥ १९ ॥
तं दीप्तमिव कालाग्निं युगान्ते समुपस्थितम् । दृष्ट्वा सर्वाणि भूतानि परित्रासमुपागमन् ॥ २० ॥
सदेवासुरगन्धर्वं मुनिभिः साप्सरोगणम् । जगद्धि सर्वमस्वस्थं पितामहमुपस्थितम् ॥ २१ ॥
ऊचुश्च देवदेवेशं वरदं प्रपितामहम् । देवानां भयसंमोहो लोकानां संक्षयं प्रति ॥ २२ ॥
[कच्चिल्लोकक्षयो देव संप्राप्तो वा युगक्षयः । नेदृशं दृष्टपूर्वं च न श्रुतं प्रपितामह ॥]
तेषां तद्वचनं श्रुत्वा ब्रह्मा लोकपितामहः । भयकारणमाचष्ट देवानामभयंकरः ॥ २३ ॥
उवाच मधुरां वाणीं शृणुध्वं सर्वदेवताः । वधाय लवणस्याजौ शरः शत्रुघ्नधारितः ॥ २४ ॥
तेजसा तस्य संमूढाः सर्वे स्मः सुरसत्तमाः । एषो पूर्वस्य देवस्य लोककर्तुः सनातनः ॥ २५ ॥
शरस्तेजोमयो वत्सा येन वै भयमागतम् । एष वै कैटभस्यार्थे मधुनश्च महाशरः ॥ २६ ॥

१४–१६] ति० टी०–लब्धान्तरं शूलग्रहणाय स्वगृहप्रवेशं प्रति लब्धावकाशमपि ॥ १४–१६ ॥

रा० टी०–तमिति । शत्रुघ्नं हतमवज्ञाय लब्धांतरं प्राप्तप्रवेशावसरमपि रक्षस्स्वमालयं न विवेश अत एव शूलं न प्रजग्राह भुवि पातितं शत्रुघ्नं दृष्ट्वा हत इति ज्ञात्वा च भक्ष्यान् समुदावहत् श्लोकद्वयमेकान्वयि ॥ १४ ॥ १५ ॥

रा० टी०–मुहूर्त्तादिति । मुहूर्त्तात् लब्धसञ्ज्ञश्शत्रुघ्नः ऋषिभिस्सम्प्रपूजितस्सन् पुरद्वारि पुनस्तस्थौ ॥ १६ ॥

गो० टी०–तमिति । लब्धान्तरमपि शूलग्रहणं प्रति लब्धावकाशमपीत्यर्थः ॥ १४–१८ ॥

१७] ति० टी०–पूरयन्तं दिशो दश । स्वतेजसेति शेषः १७

रा० टी०–तत इति । तेजसा ज्वलन्तमत एव दश दिशः पूरयन्तं शरं जग्राह ॥ १७ ॥

१८] ति० टी०–गौरवेण मेरुमन्दरसंनिभम् ॥ १८ ॥

रा० टी०–वज्रेति । वज्रस्याननमिव आननं यस्य नतं दैवैरपि नमस्कृतं सँय्युगेषु अपराजितं असृक्चन्दनाभ्यां दिग्धमङ्गं यस्य दानवेन्द्रादीनां दारुणं दारकं युगान्ते समुपस्थितं कालाग्निमिव दीप्तं पतत्रिणं शरं दृष्ट्वा सर्वाणि भूतानि परित्रासमुपागमन् श्लोकत्रयमेकान्वयि ॥ १८–२० ॥

१९–२०] ति० टी०–असृग्रूपैश्चन्दनैर्लिप्ताङ्गं पतत्रिणं बाणम् । दानवेन्द्ररूपाणामचलेन्द्राणाम् ॥ १९ ॥ २० ॥

गो० टी०–असृगिति । असृक्चन्दनदिग्धाङ्गम् असृग्रूपैश्चन्दनैः लिप्तदेहम् । पतत्रिणं बाणम् । दानवेन्द्ररूपाः अचलेन्द्राः तेषां दारणम् ॥ १९–२६ ॥

२१] ति० टी०–मुनिभिः । सहितमिति शेषः । पितामहं चतुर्मुखं ब्रह्माणम् ॥ २१ ॥

रा० टी०–सेति । मुनिभिस्सह सहितमस्वस्थं सर्वं जगत् पितामहं ब्रह्माणमुपस्थितम् ॥ २१ ॥

२२–२३] ति० टी०–नेदृशं दृष्टपूर्वं न श्रुतं वा लोकानां संक्षयं प्रति । लोकक्षयो भवेत्किमिति भयसंमोहः ॥ २२ ॥ २३ ॥

रा० टी०–ऊचुरिति । प्रपितामहं ब्रह्माणमूचुः आगता मुनिप्रभृतय इति शेषः तदाकारमाह लोकानां संक्षयं प्रति लोका विनङ्क्ष्यन्तीति सम्भावनया देवानां भयसम्मोहोऽस्तीति शेषः ॥ २२ ॥

रा० टी०–तेषामिति । ब्रह्मा भयकारणमाचष्टे अत एव हे सर्वदेवताः! यूयं शृणुध्वमिति मधुरां वाणीमुवाच सार्द्धश्लोक एकान्वयी ॥ २३ ॥

२४] ति० टी०–शत्रुघ्नधारितः । तेन धृत इत्यर्थः ॥ २४ ॥

रा० टी०–तदाकारमाह–वधायेति । लवणस्य वधाय शत्रुघ्नधारितो यः शरः तस्य तेजसा सुरसत्तमास्सम्मूढाः ॥ २४ ॥

२५–२६] ति० टी०–एषो पूर्वस्येति । पूर्वस्य लोककर्तुर्देवस्यैष शरः आर्षः संधिः ॥ २५ ॥ २६ ॥

रा० टी०–शरस्य तादृशतेजस्वित्वे कारणं वदन्नाह–एष इत्यादिभिः । येन भयमागतं प्राप्तं स एषः न पूर्वो यस्माद् तस्य नित्यस्येत्यर्थः लोककर्तुर्विष्णोः शरः ॥ २५ ॥

रा० टी०–तच्छरस्योत्पादने हेतुं वदन्नाह—एष इति । कैटभस्य मधुनश्चार्थे निहत्यर्थमेष शरः महात्मना विष्णुना सृष्टः दैत्ययोर्मधुकैटभयोर्वधार्थे येन शरः सृष्टः स एष एव विष्णुः

२ दारणमिति गो. पाठः । २ समुपस्थिते इति गो. पाठः । ३ उवाचेति गो. पाठः । ४ पचमिदमधिकं गो. पु. । ५ लोकानामिति गो. पाठः । ६ एष इति गो. पाठः ।

सृष्टो महात्मना तेन वधार्थे दैत्ययोस्तयोः । एक एव प्रजानाति विष्णुस्तेजोमयं शरम् ॥ २७ ॥
एषा एव तनुः पूर्वा विष्णोस्तस्य महात्मनः । इतो गच्छत पश्यध्वं वध्यमानं महात्मना ॥ २८ ॥
रामानुजेन वीरेण लवणं राक्षसोत्तमम् । तस्य ते देवदेवस्य निशम्य वचनं सुराः ॥ २९ ॥
आजग्मुर्यत्र युध्येते शत्रुघ्नलवणावुभौ । तं शरं दिव्यसंकाशं शत्रुघ्नकरधारितम् ॥ ३० ॥
ददृशुः सर्वभूतानि युगान्ताग्निमिवोत्थितम् । अकाशमावृतं दृष्ट्वा देवैर्हि रघुनन्दनः ॥ ३१ ॥
सिंहनादं भृशं कृत्वा ददर्श लवणं पुनः । आहूतश्च पुनस्तेन शत्रुघ्नेन महात्मना ॥ ३२ ॥
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः । आकर्णात्स विकृष्याथ तद्धनुर्धन्विनां वरः ॥ ३३ ॥
स मुमोच महाबाणं लवणस्य महोरसि । उरस्तस्य विदार्याशु प्रविवेश रसातलम् ॥ ३४ ॥
गत्वा रसातलं दिव्यः शरो विबुधपूजितः । पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥ ३५ ॥
शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः । पपात सहसा भूमौ वज्राहत इवाचलः ॥ ३६ ॥
तच्च शूलं महद्दिव्यं हते लवणराक्षसे । पश्यतां सर्वदेवानां रुद्रस्य वशमन्वगात् ॥ ३७ ॥

एकेषुपातेन भयं निपात्य लोकत्रयस्यास्य रघुप्रवीरः ।
विनिर्दभावुत्तमचापबाणस्तमः प्रणुद्यैव सहस्ररश्मिः । ॥ ३८ ॥
ततो हि देवा ऋषिपन्नगाश्च प्रपूजिरे ह्यप्सरसश्च सर्वाः ।
दिष्ट्या जयो दाशरथेरवाप्तस्त्यक्त्वा भयं सर्प इव प्रशान्तः । ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनसप्ततितमः सर्गः ॥ ६९ ॥

तेजोमयं शरं प्रजानाति मशकार्थो धूम इत्यादाविवार्थशब्दो निवृत्तिपरः सार्द्धश्लोक एकान्वयी ॥ २६ ॥ २७ ॥

गो० टी–एष इति । तेन भगवतेत्यर्थः ॥ २७ ॥

२७] ति० टी०–तेन भगवतेत्यर्थः । तमेवं तेजोमयं शरमेको विष्णुरेव प्रजानाति तदपरमूर्तित्वात् ॥ २७ ॥

गो० टी०–एक एवेति । महात्मनस्तस्य विष्णोरेषा शरमयी तनुरेव पूर्वा प्राचीनमूर्तिः । एषा एवेत्यसंधिरार्षः२८

२८–३८] ति० टी०–तदेवाह—एषा एवेति । असंधिरार्षः । महात्मनस्तस्य विष्णोरेषा शरमयी तनुरेव पूर्वा प्राचीना मूर्तिः । वध्यमानं लवणमित्यन्वयः ॥ २८–३८ ॥

रा० टी०–नन्वु दाशरथौ शत्रुघ्ने कथं विष्णुत्वमित्यत आह–एषेति । एषा शत्रुघ्नतनुरेव विष्णोः पूर्वा तनुः इतो हेतोः रामानुजेन वध्यमानं लवणं यूयं पश्यध्वम् पश्यत अत एव गच्छत सार्द्धश्लोक एकान्वयी ॥ २८ ॥

रा० टी०–तस्येति । यत्र शत्रुघ्नलवणौ युध्येते तत्र सुरा आजग्मुः ॥ २९ ॥

रा० टी०–तमिति । उत्थितं युगान्ताग्निमिव दिव्यसंकाशं दिव्यत्वेन प्रकाशमानं शत्रुघ्नकरधारितं शरं सर्वभूतानि ददृशुः३०

रा० टी०–आकाशमिति । रघुनन्दनः सिंहनादं कृत्वा आगतं लवणं पुनर्ददर्श ॥ ३१ ॥

रा० टी०–आहूत इति । शत्रुघ्नेन आहूतो लवणः युद्धाय समुपस्थितोऽभवदिति शेषः ॥ ३२ ॥

रा० टी०–आकर्णादिति । स वायुवेगः स शत्रुघ्नः धनुराकर्णात् विकृष्य लवणस्य महोरसि महाबाणं मुमोच॥३३॥

रा० टी०–उर इति । शरस्तु तस्य लवणस्य उरो विदार्य रसातलं प्रविवेश अर्द्धं पृथक् ॥ ३४ ॥

रा० टी०–गत्वेति । शरः रसातलं गत्वा इक्ष्वाकुकुलनन्दनं पुनरागमत् ॥ ३५ ॥

रा० टी०–शत्रुघ्नेति । लवणः वज्राहतोऽचल इव भूमौ पपात ॥ ३६ ॥

रा० टी०–तदिति । लवणराक्षसे हते सति तत् रुद्रदत्तशूलं रुद्रस्य वशमन्वगात् ॥ ३७ ॥

रा० टी०–एकेष्विति । रघुप्रवीरः एकेषुपातेन एकबाणप्रहारेण लोकत्रयस्य भयं निपात्य तमः प्रणुद्य सहस्ररश्मिः सूर्य इव विनिर्दभौ ॥ ३८ ॥

गो०टी०–इत इति । वध्यमानं लवणमिति संबन्धः२९–४०

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनसप्ततितमः सर्गः ॥६९॥

३९] ति० टी०–भयं त्यक्त्वा जयोऽवाप्तः । सर्प इव सर्पसदृशो लवणश्च प्रशान्तः ॥ ३९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनसप्ततितमः सर्गः॥६९॥

रा० टी०–तत इति । भयं त्यक्त्वा विद्यमानस्य दाशरथेः

---

१ तूणमिति गो. पाठः । २ तेनेति गा. पाठः । ३ भूरामिति गो. पाठः ।

सप्ततितमः सर्गः ।

हते लवणे सेन्द्राग्नयोऽमरास्तत्रैत्य शत्रुघ्नमभिनन्द्य तदिच्छानुरूपवरदानेन परितोष्य दिवमारुरुहुः सोऽपि तस्मिन्पुरे सेनामानाय्य सुदीर्घकालं प्रजाः परिपाल्य द्वादशे वत्सरेऽप्रजचरणदर्शने मतिं दधार ।

हते तु लवणे देवाः सेन्द्राः साग्निपुरोगमाः । ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनम् ॥ १ ॥
दिष्ट्या ते विजयो वत्स दिष्ट्या लवणराक्षसः । हतः पुरुषशार्दूल वरं वरय सुव्रत ॥ २ ॥
वरदास्तु महाबाहो सर्व एव समागताः । विजयाकाङ्क्षिणस्तुभ्यममोघं दर्शनं हि नः ॥ ३ ॥
देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृताञ्जलिः । प्रत्युवाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ॥ ४ ॥
इयं मधुपुरी रम्या मधुरा देवनिर्मिता । निवेशं प्रामुयाच्छीघ्रमेष मेऽस्तु वरः परः ॥ ५ ॥
तं देवाः प्रीतमनसो बाढमित्येव राघवम् । भविष्यति पुरी रम्या शूरसेना न संशयः ॥ ६ ॥
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा । शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ॥ ७ ॥
सा सेना शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनम् । निवेशनं च शत्रुघ्नः श्रावणेन समारभत् ॥ ८ ॥
सा पुरा दिव्यसंकाशो वर्षे द्वादशमे शुभे । निविष्टैः शूरसेनानां विषयश्चाकुतोभयः ॥ ९ ॥
क्षेत्राणि सस्ययुक्तानि काले वर्षति वासवः । अरोगवीरपुरुषा शत्रुघ्नभुजपालिता ॥ १० ॥

जयः दिष्ट्या प्राप्तः सर्प इव लवणः दिष्ट्या प्रशान्तः इति देवादयः प्रभूजिरे शत्रुघ्नमिति शेषः ॥ ३९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

१-२] ति० टी०-अथ देवप्रसादतो महतीं प्रतिष्ठां शत्रुघ्नस्य—हते इति ॥ १ ॥ २ ॥

रा० टी०-लवणवधानन्तरकालिकं वृत्तमाह—हत इत्यादिभिः । देवाः सुमधुरां वाणीमूचुः ॥ १ ॥

रा० टी०-तदाकारमाह—दिष्ट्येत्यादिभिः । लवणराक्षसो हतः अतो वरं वरय ॥ २ ॥

गो० टी०-हते त्वित्यादि ॥ १—४ ॥

३-४] ति० टी०-तुभ्यं तव ॥ ३ ॥ ४ ॥

रा० टी०-तत्र हेतुमाहुः—वरदा इति । तुभ्यं तव विजयाकाङ्क्षिणो वरदा वयं समागताः ॥ ३ ॥

रा० टी०-ननु किमागमनेनेत्यत आहुः नो दर्शनममोघं निष्फलं न ॥ ३ ॥

रा० टी०-देवानामिति । शत्रुघ्नः प्रत्युवाच ॥ ४ ॥

५] ति० टी०-मधुरा मनोहरा । निवेशं सपौरजानपदमहाबलसेनानिवेशभूतमहाराजधानीत्वं प्राप्नुयात् ॥ ५ ॥

रा० टी०-तदाकारमाह-इयमिति । निवेशमतिचमत्कारप्रवेशम् प्राप्नुयात् ॥ ५ ॥

गो० टी०-इयमिति । मधुरा मनोहरा । निवेशं राजधानीत्वम् ॥ ५ ॥

६] ति० टी०-शूरसेना शूरा सेना यस्यां सा ॥ ६ ॥

रा० टी०-याचनानन्तरकालिकं वृत्तमाह-तमित्यादिभिः । देवाः तं शत्रुघ्नं बाढमित्युक्त्वा तथा तेन प्रकारेण पुरी मधुरा शूरसेना शूरसेनजनपदजननिवासभूता भविष्यति इति चोक्त्वा दिवमारुरुहुः सार्द्धश्लोक एकान्वयी ॥ ६ ॥

गो० टी०-तमिति । शूरा सेना यस्यां सा शूरसेना ६ ॥ ७

७] ति० टी०-तां सेनां गङ्गातीरं स्थापिताम् ॥ ७ ॥

रा० टी०-शत्रुघ्न इति । तां गङ्गातीरे स्थापितां सेनां शत्रुघ्नः समुपानयत् मधुरामायातुं प्रैरयत् अर्द्धं पृथक् ॥ ७ ॥

८] ति० टी०-श्रावणेन श्रावणमासावलम्बनेन । निवेशनं स्थापनं सेनायाः । पौरजानपदानां च समारभदारभते स्म ॥ ८ ॥

रा० टी०-सेति । सेना शीघ्रमागच्छत् शत्रुघ्नस्तु श्रावणेन श्रावणमासीत्यर्थः निवेशनं प्रवेशं समाचरत् ॥ ८ ॥

गो० टी०-सेति । श्रावणेन श्रावणमासालम्बनेन । निवेशनम् स्थापनम् समारभत् समारभते स्म ॥ ८ ॥

९-१०] ति० टी०-द्वादशमे द्वादशे । पुरा पूर्वं प्राथमिके द्वादशे वर्षे निविष्टः । शूरसेनानां विषयो देशः । 'सा पुरी' इति पाठे सा पुरी निविष्टा । विषयो देशश्च निविष्ट इत्यर्थः ॥ ९ ॥ १० ॥

रा० टी०-स इति । द्वादशमे द्वादशे वर्षे पुरा सर्वसंपद्विशिष्टमधुरया निविष्टः शूरसेनानां सः प्रसिद्धो विषयो देशः अकुतोभयः अत एव दिव्यसंकाशो बभूवेति शेषः ॥ ९ ॥

रा० टी०-अकुतोभयत्वे हेतुं वदन्नाह-क्षेत्राणीति । वासवः काले एव वर्षति अत एव क्षेत्राणि सस्ययुक्तानि भव-

१ सा पुरा दिव्यसंकाशेति गो० पाठः । २ निविष्टेति गो० पाठः

अर्धचन्द्रप्रतीकाशा यमुनातीरशोभिता । शोभिता गृहमुख्यैश्च चत्वरापणवीथिकैः ॥
चातुर्वर्ण्यसमायुक्ता नानावाणिज्यशोभिता । ॥ ११ ॥
यच्च तेन पुरा शुभ्रं लवणेन कृतं महत् । तच्छोभयति शत्रुघ्नो नानावर्णोपशोभिताम् ॥ १२ ॥
आरामैश्च विहारैश्च शोभमानं समन्ततः । शोभितां शोभनीयैश्च तथान्यैर्देवमानुषैः ॥ १३ ॥
तां पुरीं दिव्यसंकाशां नानापण्योपशोभिताम् । नानादेशगतैश्चापि वणिग्भिरुपशोभिताम् ॥ १४ ॥
तां समृद्धां समृद्धार्थः शत्रुघ्नो भरतानुजः । निरीक्ष्य परमप्रीतः परं हर्षमुपागमत् ॥ १५ ॥
तस्य बुद्धिः समुत्पन्ना निवेश्य मधुरां पुरीम् । रामपादौ निरीक्षेऽहं वर्षे द्वादश आगते ॥ १६ ॥
ततः स तां अमरपुरोपमां पुरीं निवेश्य वै विविधजनाभिसंवृताम् ।
नराधिपो रघुपतिपाददर्शने दधे मतिं रघुकुलवंशवर्धनः । ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ।

शत्रुघ्नस्ततो निष्क्रम्यायोध्यां जिगमिषुर्मध्येमार्गं वाल्मीकेराश्रमं प्रविश्य तस्मात्सादरं गृहीतातिथिसत्कारस्तद्रचितरामचरितं सुमधुरं यथावृत्तं समाकर्ण्य मुहूर्तमिवासंज्ञो बाष्पार्द्रनेत्रश्च संवृत्तः सैनिकाश्च तद्वीक्ष्य प्राप्तविस्मयाः समभवन् ।

ततो द्वादशमे वर्षे शत्रघ्नो रामपालिताम् । अयोध्यां चक्रमे गन्तुमल्पभृत्यबलानुगः ॥ १ ॥

न्तीति शेषः अर्द्धं पृथक् । पुरीमेव वर्णयति-अरोगेत्यादिभिः । अरोगाः वीरपुरुषा यस्याम् नानावाणिजैर्वणिग्भिः शोभिता आस्तेति शेषः अर्धचतुष्टयमेकान्वयि ॥ १०॥११ ॥

गो० टी०-सेति । द्वादशमे द्वादश इत्यर्थः। पुरा पूर्वम्। प्रथमे द्वादशे वर्षे सा पुरी निविष्टा । शूरसेनानां राज्ञां विषयो देशश्चाकुतोभयो जातः ॥ ९॥१० ॥

११] ति० टी०-अर्धचन्द्रप्रतीकाशेति पुरीसंस्थानकथनम् । वीथिकस्याक्षीत्वमार्षम् ॥ ११ ॥

गो० टी०-अर्धचन्द्रेति । अर्धचन्द्रप्रतीकाशा अर्धचन्द्राकारसंस्थाना ॥ ११ ॥

१२-१७] ति० टी०-तेन लवणेन यद्गृहं पुरा पूर्वं कृतं तदेव शुभ्रं सुधाधवलं कृत्वा नानावर्णैश्चित्ररूपशोभितं यथा भवति तथा शोभयति स्मेत्यर्थः ॥ १२-१७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

रा० टी०-यदिति । यत् गृहं लवणेन शुभ्रं श्वेतं कृतं तत् नानावर्णोपशोभितं यथा भवति तथा शत्रुघ्नश्शोभयति अशोभयत् अकारयत् ॥ १२ ॥

रा० टी०-आरामैरिति । आरामादिभिः समन्ततः शोभमानां शोभनीयैः शोभाविशिष्टैर्देवमानुषैः शोभितां नानापण्यैरुपशोभितां वणिग्भिरुपशोभितां च अत एव समृद्धां तामप्रतिदां तां प्रसिद्धां पुरीं मधुरां परमप्रीतश्शत्रुघ्नो निरीक्ष्य परं हर्षमुपागमत् अर्द्धषट्कमेकान्वयि ॥ १३-१५ ॥

गो० टी०-यच्च तेनेति । यत्पुरा तेन लवणेन कृतं तदेव शुभ्रं सुधाधवलं कृत्वा शोभयति स्म ॥ १२—१५ ॥

रा० टी०-तस्येति । द्वादशे वर्षे आगते सति अहं रामपादौ निरीक्षे इति मधुरां निवेश्य वियमानस्य तस्य शत्रुघ्नस्य बुद्धिस्समुत्पन्ना ॥ १६ ॥

रा० टी०-तदेव भंग्यन्तरेणाह-तत इति । नराधिपः शत्रुघ्नः रघुपतिपाददर्शने मतिं दधे ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

गो० टी०-तस्येति । रामपादाविति । द्वादशवर्षातिक्रमे भ्रातृदर्शनस्य दुष्टत्वादिति भावः ॥ १६ ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

१] ति० टी०-अथ शत्रुघ्नस्यागमनसमये वाल्मीक्याश्रमे रामचरितश्रवणम्—ततो द्वादशमे इति । अल्पभृत्या बलानि चानुगा अनुयायिनो यस्य सः ॥ १ ॥

रा०टी०-शत्रुघ्नस्य अयोध्यागमनं वर्णयितुमाह-तत इति । शत्रुघ्नः द्वादशे वर्षे द्वादशे अल्पभृत्यबलानुगो भूत्वा अयोध्यां गन्तुं चक्रमे ॥ १ ॥

गो० टी०-तत इत्यादि ॥ १—५ ॥

१ आग तैरिति गो. पाठः ।

ततो मन्त्रिपुरोगांश्च बलमुख्यान्निवर्त्य च । जगाम हयमुख्येन रथानां च शतेन सः ॥ २ ॥
स गत्वा गणितान्वासान्सप्ताष्टौ रघुनन्दनः । वाल्मीकेराश्रममागत्य वासं चक्रे महायशाः ॥ ३ ॥
सोऽभिवाद्य ततः पादौ वाल्मीकेः पुरुषर्षभः । पाद्यमर्घ्यं तथातिथ्यं जग्राह मुनिहस्ततः ॥ ४ ॥
बहुरूपाः सुमधुराः कथास्तत्र सहस्रशः । कथयामास स मुनिः शत्रुघ्नाय महात्मने ॥ ५ ॥
उवाच च मुनिर्वाक्यं लवणस्य वधाश्रितम् । सुदुष्करं कृतं कर्म लवणं निघ्नता त्वया ॥ ६ ॥
बहवः पार्थिवाः सौम्य हताः सबलवाहनाः । लवणेन महाबाहो युध्यमाना महाबलाः ॥ ७ ॥
स त्वया निहतः पापो लीलया पुरुषर्षभ । जगतश्च भयं तत्र प्रशान्तं तव तेजसा ॥ ८ ॥
रावणस्य वधो घोरो यत्नेन महता कृतः । इदं चै सुमहत्कर्म त्वया कृतमयत्नतः ॥ ९ ॥
प्रीतिश्चास्मिन्परा जाता देवानां लवणे हते । भूतानां चैव सर्वेषां जगतश्च प्रियं कृतम् ॥ १० ॥
तच्च युद्धं मया दृष्टं यथावत्पुरुषर्षभ । सभायां वासवस्याथ उपविष्टेन राघव ॥ ११ ॥
ममापि परमा प्रीतिर्हृदि शत्रुघ्न वर्तते । उपाघ्रास्यामि ते मूर्ध्नि स्नेहस्यैषा परा गतिः ॥ १२ ॥
इत्युक्त्वा मूर्ध्नि शत्रुघ्नमुपाघ्राय महामतिः । आतिथ्यमकरोत्तस्य ये च तस्य पदानुगाः ॥ १३ ॥
स भुक्तवान्नरश्रेष्ठो गीतमाधुर्यमुत्तमम् । शुश्राव रामचरितं तस्मिन्काले यथा कृतम् ॥ १४ ॥

२] ति० टी०–बलमुख्यान्बलप्रधानान् ॥ २ ॥

रा० टी०–तत इति । स शत्रुघ्नः हया मुख्या यस्मिन् तेन रथानां शतेन जगाम ॥ २ ॥

३–५] ति० टी०–गणितान्वासान् । पूर्वमेवैतावद्भिर्वासैर्वाल्मीक्याश्रमं यास्यामीति संख्यातान्वाल्मीकेरयं वाल्मीकिः स चासावाश्रमस्तम् ॥ ३–५ ॥

रा० टी०–स इति । स शत्रुघ्नः गणितान् ज्ञातान् सप्तवासान् निवासस्थानानि गत्वा वाल्मीकाश्रममागत्य आष्टौ अकारेण एकेन युक्ता अष्टौ नव दिनानीव्यर्थः वासं चक्रे अकारच्छेदस्तु वक्ष्यमाणरामायणश्रवणविघ्नपरोधेन ॥ ३ ॥

रा० टी०–स इति । स शत्रुघ्नः वाल्मीकेः पादौ अभिवाद्य मुनिहस्ततः पाद्यादि जग्राह ॥ ४ ॥

रा० टी०–बहुरूपा इति । मुनिः सुमधुराः कथाः रामगाथाः शत्रुघ्नाय कथयामास ॥ ५ ॥

६–७] ति० टी०–लवणस्य वधाश्रितम् । कथालापमिति शेषः । 'न कृतं तव पूर्वकैः' इति पाठे तव पूर्वकैर्मांधात्रादिभिर्यत्र कृत तत्त्वया कृतमित्यर्थः ॥ ६ ॥ ७ ॥

रा० टी०–उवाचेति । मुनिः लवणस्य वधाश्रितं वाक्यं वचनमुवाच तदाकारमाह लवणं निघ्नता त्वया सुदुष्करं कर्म कृतम् ॥ ६ ॥

रा० टी०–सुदुष्करत्वं प्रकटयन्नाह–बहव इति । लवणेन बहवः पार्थिवा हताः ॥ ७ ॥

गो० टी०–उवाचेति । लवणस्य वधाश्रितं वृत्तान्तमिति शेषः ॥ ६—१० ॥

८] ति० टी०–तत्र तन्निमित्तम् ॥ ८ ॥

रा० टी०–स इति । स लवणः त्वया लीलया निहतः अत एव तत्र स्मिन् हनने सति तव तेजसा जगतो भयं प्रशान्तम् ॥ ८ ॥

९–१०] ति० टी०–सुमहत्कर्म रावणवधादपि महदुष्करमिदं कर्म लवणवधकर्म त्वयायत्नतो लीलयैव कृतम् ९॥१०

रा० टी०–तदेव भङ्ग्यन्तरेणाह–रावणस्येति । महता रामेण अयत्नेन ईषत्नतः रावणस्य वधः कृतः त्वयापि इदं लवणहननं सुमहत्कर्म अयत्नतः कृतम् ॥ ९ ॥

रा० टी०–प्रीतिरिति । यतस्त्वया जगतः प्रियं कृतमतः लवणे हते सति देवादीनां परा प्रीतिर्जाता ॥ १० ॥

११] ति० टी०–वासवसभायामुपविष्टेनापि मया तद्युद्धं यथावद्दृष्टम् । दिव्यचक्षुषेति शेषः । दृष्टमित्यस्य श्रुतमित्यर्थो वा ॥ ११ ॥

रा० टी०–ननु त्वया लवणयुद्धं कथं ज्ञातमित्यत आह–तदिति । वासवस्य सभायामुपविष्टेन मया तद्युद्धं यथावद्दृष्टमेतेन इन्द्रोपि युद्धदर्शनार्थमागत इति सूचितम् ॥ ११ ॥

गो० टी०–तच्चेति । सभायामिति । युद्धं द्रष्टुमाग*तायामिति शेषः ॥ ११ ॥

१२–१३] ति० टी०–मूर्ध्न्याघ्राणं परा गतिः परं कार्यं स्नेहस्य ॥ १२ ॥१३ ॥

रा० टी०–ममेति । मम परमप्रीतिर्वर्त्तते अतः ते मूर्ध्नि उपाघ्रास्यामि तत्र हेतुः एषा मद्धृदये समागता प्रीतिः स्नेहस्य परा गतिः काष्ठा ॥ १२ ॥

रा० टी०–इतीति । महामतिर्वाल्मीकिः तस्य शत्रुघ्नस्य ये च तस्य पदानुगाः तेषां च आतिथ्यमकरोत् ॥ १३ ॥

गो० टी०–ममेति । परा गतिः परमप्रयोजनम्१२॥१३

१४] ति० टी०–गीतस्य माधुर्यं यत्र तादृशं रामच-

१ मुख्यैश्चेति गो. पाठः । २ वाल्मीक्याश्रममिति गो. पाठः । ३ खिति गो. पाठः । ४ क्रममिति गो. पाठः । * आगतेनेति निर्दोषं भाति ।

तन्त्रीलयसमायुक्तं त्रिस्थानकरणान्वितम् । संस्कृतं लक्षणोपेतं समतालसमन्वितम् ॥ १५ ॥
शुश्राव रामचरितं तस्मिन्काले पुरा कृतम् । तान्यक्षराणि सत्यानि यथावृत्तानि पूर्वशः ॥ १६ ॥
श्रुत्वा पुरुषशार्दूलो विसंज्ञो बाष्पलोचनः । स मुहूर्तमिवासंज्ञो विनिःश्वस्य मुहुर्मुहुः ॥ १७ ॥
तस्मिन्गीते यथावृत्तं वर्तमानमिवाशृणोत् । पदानुगाश्च ये राज्ञस्तां श्रुत्वा गीतिसंपदम् ॥ १८ ॥
अवाङ्मुखाश्च दीनाश्च ह्याश्चर्यमिति चाब्रुवन् । परस्परं च ये तत्र सैनिकाः संबभाषिरे ॥ १९ ॥
किमिदं क्व च वर्तामः किमेतत्स्वप्नदर्शनम् । अर्थो यो नः पुरा दृष्टस्तमाश्रमपदे पुनः ॥ २० ॥

रितं तस्मिन्काले पूर्वकाले यथा रामेण कृतं तादृशमेव काव्यनिबद्धं शुश्राव । क्वचिदाश्रमप्रदेशे गायतोः कुशलवयोर्मुखादिति शेषः ॥ १४ ॥

रा० टी०–स इति । भुक्तवान् कृतभोजनः शत्रुघ्नो रामयोः चरितानि यस्मिन् अत एव उत्तमं गीतमाधुर्यं गीतेन लवकुशगानेन माधुर्यमतिमधुरत्वं यस्मिन् तद्रामायणं यथाकृतं वाल्मीकिकृतमनतिक्रम्य शुश्राव ॥ १४ ॥

गो० टी०–स इति । गीतमाधुर्यमिति । आश्रमान्तरे गायतोः कुशलवयोरिति शेषः ॥ १४ ॥

१५] ति० टी०–तन्त्रीलयसमायुक्तं तन्त्र्याः वीणातन्त्र्युत्पध्वनेर्लयस्य तालपरिच्छेदस्य समनुरुद्धम् । त्रीणि स्थानान्युरःकण्ठशिरांसि तेषु करणं मन्द्रमध्यतारभेदेनोच्चारणं तेनान्वितम् । संस्कृतं संस्कृतवाक्यवद्धम् । लक्षणोपेतं व्याकरणलक्षणैर्वृत्तलक्षणैः काव्यलक्षणैः संगीतशास्त्रलक्षणैश्चोपेतम् । समतालेन गानोचितेन तालशब्देन समन्वितम् ॥ १५ ॥

रा० टी०–तदेव विशिष्याह–तन्त्रीति । तन्त्री वीणाज्या लक्षणया तद्ध्वनिः लयः तालादिपरिच्छेदः ताभ्यां युक्तं किंच तन्त्रीषु वीणाध्वनिषु यो लयः तेन समायुक्तं त्रिषु उरः कण्ठशिरस्सु स्थानेषु करणम् मंद्रमध्यतारभेदेनोच्चारणं तेनान्वितम् संस्कृतम् व्याकरणसंस्कारविशिष्टपदवाक्यविशिष्टं लक्षणैः काव्यसंगीतशास्त्रोक्तलक्षणैः उपेतं समतालेन समन्वितं पुरा पूर्वं कृतं रामचरितं तस्मिन् काले शुश्रावशत्रुघ्न इति शेषः सार्द्धश्लोक एकान्वयी ॥ १५ ॥

गो० टी०–तन्त्रीति । तन्त्रीलयसमायुक्तं तन्त्री वीणा लयस्तालमानम् । त्रिस्थानकरणान्वितं हृदयकण्ठमुखलक्षणवर्णोत्पत्तिस्थानेन करणेन अन्वितं संयुक्तम् । संस्कृतं संस्कृतशब्दरूपम् । लक्षणं व्याकरणलक्षणम् । समतालेन गानोचितताल्शब्देन च समन्वितम् रामचरितं रामचरितविषयम्॥१५॥

१६] ति० टी०–रामचरितं रामचरितगीतम् । तस्मिन्काले पुरा पूर्वं रामेण यथा कृतं स्वानुभूतं च तथैव शुश्राव । तदेव पुनराह—तानीति । अक्षराण्यक्षरघटितवाक्यानि । सत्यानि सत्यार्थानि पूर्वशः पूर्वकाले यथावृत्तानि यथावृत्तार्थकानि । यद्वा यथावृत्तानि वृत्तलक्षणमनतिक्रम्य निबद्धानि । पूर्वश आनुपूर्व्येण ॥ १६ ॥

रा० टी०–तानीति । तानि गीतानि यथावृत्तानि वृत्तमनतिक्रम्य वियमानानि अत एव सत्यानि मृषासंसर्गशून्यानि अक्षराणि पदवाक्यघटितवर्णानि श्रुत्वा बाष्पलोचनः शत्रुघ्नः विसंज्ञः सम्यग्ज्ञानरहितः अभवदिति शेषः ॥ १६ ॥

गो० टी०–तानीति । पूर्वशः पूर्वस्मिन् काले । यथावृत्तानि यथाप्रवृत्तान्यनुभवसिद्धानि । अक्षराणि गीताक्षराणि१६

१७] ति० टी०–श्रुत्वा पुरुषशार्दूलः शत्रुघ्नो विसंज्ञो हर्षाद्विवेकशून्योऽभूदिति शेषः । स मुहूर्तमसंज्ञ इव स्थितः पश्चाल्लब्धविवेको विस्मयातिरेकान्मुहुर्मुहुर्निःश्वस्य ॥ १७ ॥

रा० टी०–स इति । मुहूर्तमसंज्ञ इव शत्रुघ्नः मुहुर्मुहुर्विनिःश्वस्य तस्मिन् गीते वृत्तं पूर्वं जातमपि चरितं वर्तमानमिव यथावदाशृणोत् ॥ १७ ॥

गो० टी०–स इति । तस्मिन् गीते वर्तमानमिव स्थितम् ॥ १७ ॥

१८] ति० टी०–तस्मिन्गीते यथावृत्तमतीतमपि वर्तमानमिवाशृणोत् । रसावेशादतीता अप्यर्थाः प्रत्यक्षवद्भान्तीति भावः । ये च राज्ञो मधुराराजस्य शत्रुघ्नस्य पदानुगास्तेऽपि गीतिसंपदं श्रुत्वा ॥ १८ ॥

रा० टी०–पदेति । राज्ञः शत्रुघ्नस्य ये पदानुगाः पदानामतिगायकाः ते गीतिसम्पदं श्रुत्वा दीनाः च्युतगानगर्वाः अत एव अवाङ्मुखाः सन्तः आश्चर्यमित्यब्रुवन् ॥ १८ ॥

गो० टी०–पदानुगाश्चेति । अवाङ्मुखाश्च दीनाश्चेति । एवं रामचरित्रगायकोस्माभिर्न दृष्ट इत्यवाङ्मुखत्वादि१८॥१९

१९] ति० टी०–एवं रामचरितगायकोऽस्माभिर्न दृश्यत इति खेदादवाङ्मुखत्वत्वादिविशिष्टाः सन्त आश्चर्यमित्यब्रुवन् । यद्वा ये तु गीतिकुशलास्ते स्वस्य तादृशगीतिनैपुण्याभावादवाङ्मुखा इत्यर्थः । ये च सैनिकास्ते परस्परं संबभाषिरे ॥ १९ ॥

रा० टी०–परस्परमिति । ये सैनिकाः ते तत्र तस्मिन् समये परस्परं संबभाषिरे तद्भाषणाकारमाह—किमिति । इदं गानत्वेन प्रतीयमानं किम् कस्यचिन्मायां सत्यं वेत्यर्थः वयं क्व वर्तामः पृथिव्यां लोकान्तरे वेत्यर्थः एतत् किं स्वप्नदर्शनं नवेत्यर्थः ॥ १९ ॥

२०] ति० टी०–तदेवाह—किमिति । क्व वर्तामः । आश्रमेऽन्यत्र वा योऽर्थो नोऽस्माकमस्माभिः पुरा दृष्टस्तमर्थमाश्रमपदे शृणुमः । किमिदम् । आश्रमवर्तिभिरनुभवेनाशक्यनिबन्धनत्वादिति भावः ॥ २० ॥

रा० टी०–अर्थ इति । योर्थः पुरा दृष्टः तमर्थम् आश्र-

शृणुमः किमिदं स्वैप्ने गीतबन्धनमुत्तमम् । विस्मयं ते परं गत्वा शत्रुघ्नमिदमब्रुवन् ॥ २१ ॥
साधु पृच्छ नरश्रेष्ठ वाल्मीकिं मुनिपुंगवम् । शत्रुघ्नस्त्वब्रवीत्सर्वान्कौतूहलसमन्वितान् ॥ २२ ॥
सैनिकानक्षमोऽस्माकं परिप्रष्टुमिहेदृशः । आश्चर्याणि बहूनीह भवन्त्यस्याश्रमे मुनेः ॥ २३ ॥
न तु कौतूहलाद्युक्तमन्वेष्टुं तं महामुनिम् । एवं तद्वाक्यमुक्त्वा तु सैनिकान्रघुनन्दनः ॥
अभिवाद्य महर्षिं तं स्वं निवेशं ययौ तदा । ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ।

शत्रुघ्नः प्रभाते वाल्मीकिना परिष्वक्तः प्रणम्य तं निष्क्रम्य राममुपगम्याभिवन्द्य च भवद्विरहं सोढुमक्षमोऽत्रागतः एवं ब्रुवन्नपि सप्तरात्रादधिकं न वस्तव्यं यतः प्रकृतिमण्डलपरिरक्षणं क्षत्रियधर्म इति तेन स्फुटं प्रोक्तः स स्वपुरीं गतः ।

तं शयानं नरव्याघ्रं निद्रा नाभ्यागमत्तदा । चिन्तयानमनेकार्थं रामगीतमनुत्तमम् ॥ १ ॥
तस्य शब्दं मधुरं तन्त्रीलयसमन्वितम् । श्रुत्वा रात्रिर्जगामाशु शत्रुघ्नस्य महात्मनः ॥ २ ॥
तस्यां रजन्यां व्युष्टायां कृत्वा पौर्वाह्णिकक्रमम् । उवाच प्राञ्जलिर्वाक्यं शत्रुघ्नो मुनिपुंगवम् ॥ ३ ॥

मपदे शृणुमः अतः उत्तमं गीतबन्धनं किं स्वप्ने अनुभूयते इति शेषः ॥ २० ॥

गो० टी०–अर्थ इति । पुरा दृष्टः अपरोक्षदृष्टः । तमर्थमाश्रमपदे आश्रमस्थाने शृणुमः । किन्विदमाश्रमासंभावितमित्यर्थः ॥ २०—२२ ॥

२१] **ति० टी०–यदेवमतः** स्वप्नेऽस्मदीये एव गीतबन्धमाश्रितो भवेत्तत्र दुर्घटस्यापि सुघटत्वादिति संबभाषिरे इति संबन्धः ॥ २१ ॥

रा० टी०–विस्मयमिति । हे नरश्रेष्ठ ! वाल्मीकिं पृच्छ कथमेवमाश्चर्यमनुभूयते इति ब्रूहीत्यर्थः इदं ते सैनिका. अब्रुवन् ॥ २१ ॥

२२] **ति० टी०–साधु पृच्छेति** । किंकर्तृकं गानमितीति शेषः ॥ २२ ॥

रा० टी०–शत्रुघ्न इति । सशत्रुघ्नः सर्वान् सैनिकान् अब्रवीत् अर्द्धम्पृथक् ॥ २२ ॥

२३] **ति० टी०–ईदृशोऽर्थः** परिप्रष्टुं न क्षमः ॥ २३ ॥

रा० टी०–तदाकारमाह–सैनिका इति । अस्य मुनेः आश्रम इहास्मिन्काले बहून्याश्चर्याणि भवन्ति अतः ईदृशः अ तप्रभाववान्मुनिः अस्माकं परिप्रष्टुं न क्षम. ॥ २३ ॥

गो० टी०–आश्चर्याणीति । अन्वेष्टुमवगन्तुं प्रष्टुं चेत्यर्थः ॥ २३ ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

२४] **ति० टी०–अन्वेष्टुमवगन्तुं प्रष्टुं च** ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकसप्ततितमः सर्गः ॥ ७१ ॥

रा० टी०–तदेवभङ्ग्यन्तरेणाह–नेति । कौतूहलात् अनिर्वचनीयाश्चर्यार्द्धतोः मुनिमन्वेष्टुं बोधयितुं न युक्तम् एतेन सीता तदानीं राममसमीपे एव स्थितेति शत्रुघ्नेनावलोकितमिति व्यञ्जितम् । अर्द्धम्पृथक्–**एवमिति** । रघुनन्दनः शत्रुघ्नः एवं तद्वाक्यमुक्त्वा महर्षिमभिवाद्य स्वं निवेशं शयनस्थानं ययौ ॥२४॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

१] **ति० टी०–अथ** शत्रुघ्नस्य रामं दृष्ट्वा पुनः प्रतिनिवृत्तिः–**तमिति** ॥ १ ॥

रा० टी०–निवासस्थानगमनानन्तरकालिकं शत्रुघ्नवृत्तमाह–**तमित्यादिभिः** । अनेके अनेकविधत्वेनप्रतिभासमाना अर्था यस्मिन् तत् चिन्तयानं कः सिद्धान्तार्थ इति चिन्ताविशिष्टं शयानं तं शत्रुघ्नं निद्रा नाभ्यागमत् प्राप्नोत् ॥ १ ॥

गो० टी०–तं शयानमित्यादि ॥ १—३ ॥

२] **ति० टी०–तस्य** रामगीतस्य ॥ २ ॥

रा० टी०–तस्येति । क्षमधुरं शब्दं श्रुत्वा वियमानस्य तस्य शत्रुघ्नस्य रात्रिः आशु जगाम ॥ २ ॥

३] **ति० टी०–पौर्वाह्णिकक्रमं** शौचस्नानाघ्र्यसंध्यावन्दनब्रह्मयज्ञानुष्ठानरूपं पूर्वाह्णसंबन्ध्याचारक्रमम् ॥ ३ ॥

रा० टी०–तस्यामिति । रजन्यां व्युष्टायां व्यतीतायां पौर्वाह्णिकक्रमं पूर्वाह्णोचितशौचस्नानसंध्यावदनब्रह्मयज्ञानुष्ठानरूपकर्मपरंपरां कृत्वा मुनिपुङ्गवमुवाच ॥ ३ ॥

---

१ स्वप्न इति गो. पाठः । २ चेति गो. पाठः ।

भगवन्द्रष्टुमिच्छामि राघवं रघुनन्दनम् । त्वयानुज्ञातमिच्छामि सहैभिः संशितव्रतैः ॥ ४ ॥
इत्येवं वादिनं तं तु शत्रुघ्नं शत्रुसूदनम् । वाल्मीकिः संपरिष्वज्य विससर्ज स राघवम् ॥ ५ ॥
सोऽभिवाद्य मुनिश्रेष्ठं रथमारुह्य सुप्रभम् । अयोध्यामगमत्तूर्णं राघवोत्सुकदर्शनः ॥ ६ ॥
स प्रविष्टः पुरीं रम्यां श्रीमानिक्ष्वाकुनन्दनः । प्रविवेश महाबाहुर्यत्र रामो महाद्युतिः ॥ ७ ॥
स रामं मन्त्रिमध्यस्थं पूर्णचन्द्रनिभाननम् । पश्यन्नमरमध्यस्थं सहस्रनयनं यथा ॥ ८ ॥
सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा । उवाच प्राञ्जलिर्भूत्वा रामं सत्यपराक्रमम् ॥ ९ ॥
यदाज्ञप्तं महाराज सर्वं तत्कृतवानहम् । हतः स लवणः पापः पुरी चास्य निवेशिता ॥ १० ॥
द्वादशैतानि वर्षाणि त्वां विना रघुनन्दन । नोत्सहेयमहं वस्तुं त्वया विरहितो नृप ॥ ११ ॥
स मे प्रसादं काकुत्स्थ कुरुष्वामितविक्रम । मातृहीनो यथा वत्सो न चिरं प्रवसाम्यहम् ॥ १२ ॥
एवं ब्रुवाणं काकुत्स्थः परिष्वज्येदमब्रवीत् । मा विषादं कृथाः शूर नैतत्क्षत्रियचेष्टितम् ॥ १३ ॥
नावसीदन्ति राजानो विप्रवासेषु राघव । प्रजा हि परिपाल्या हि क्षत्रधर्मेण राघव ॥ १४ ॥
काले काले तु मां वीर अयोध्यामवलोकितुम् । आगच्छ त्वं नरश्रेष्ठ गन्तासि च पुरं तव ॥ १५ ॥
ममापि त्वं सुदयितः प्राणैरपि न संशयः । अवश्यं करणीयं च राज्यस्य परिपालनम् ॥ १६ ॥
तस्मात्त्वं वस काकुत्स्थ सप्तरात्रं मयाऽ सह । ऊर्ध्वं गन्तासि मथुरां सभृत्यबलवाहनः ॥ १७ ॥
रामस्यैतद्वचः श्रुत्वा धर्मयुक्तं मनोनुगम् । शत्रुघ्नो दीनया वाचा बाढमित्येव चाब्रवीत् ॥ १८ ॥

४–६] ति० टी०–राघवं रघुगोत्रापत्यं रघुनन्दनं रघुकुलस्यानन्दजनकम् । त्वयानुज्ञातं तवानुज्ञाम् । एभिर्मुनिभिः सहेच्छामि ॥ ४–६ ॥

रा० टी०–भगवन्निति । राघवमहं द्रष्टुमिच्छामि अतः संशितव्रतैः अतितीक्ष्णव्रतविशिष्टैः एभिः ऋषिभिस्सह विद्यमानेन त्वया अनुज्ञातमाज्ञामिच्छामि ॥ ४ ॥

रा० टी०–इतीति । वाल्मीकिः शत्रुघ्नं परिष्वज्य विससर्ज ॥ ५ ॥

रा० टी०–स इति । राघवस्य दर्शनाय उत्सुकः राघवोत्सुकदर्शनः अयोध्यां तूर्णमगमत् राजदन्तादित्वादर्शनस्य परनिपातः ॥ ६ ॥

गो० टी०–भगवन्निति । राघवं रघुगोत्रापत्यम् । रघुनन्दनं रघुकुलनन्दनम् । त्वयानुज्ञातुमिति तवानुज्ञामित्यर्थः । एभिरिति । मुनिभिरिति शेषः ॥ ४—१२ ॥

७–९] ति० टी०–पुरीमयोध्याम् ॥ ७–९ ॥

रा० टी०–स इति । पुरीमयोध्यां प्रविष्टः शत्रुघ्नः यत्र रामः तत्र प्रविवेश ॥ ७ ॥

रा० टी०–स इति । अमरमध्यस्थं सहस्रनयनमिन्द्रमिव मन्त्रिमध्यस्थं रामं पश्यन् सो वायुवेगः स शत्रुघ्नोभिवाद्य रामम्रुवाच श्लोकद्वयमेकान्वयि ॥ ८ ॥ ९ ॥

१०] ति० टी०–अस्य पुरी निवेशिता सर्वप्रजानिवेशनेन प्रतिष्ठापिता ॥ १० ॥ १२ ॥

रा० टी०–तदाकारमाह–यदिति । यद्भवताज्ञप्तं तदहं कृतवान् कृतमेवाह लवणो हतः अस्य लवणस्य पुरी निवेशिता च ॥ १० ॥

रा० टी०–द्वादशेति । त्वां विना एतानि द्वादश वर्षाणि व्यतीतानीति शेषः अतः त्वया विरहितोहं वस्तुं नोत्सहेयम् ॥ ११ ॥

रा० टी०–स इति । मातृहीनो वत्स इव अहं चिरं न प्रवसामि अतो मे प्रसादं कुरुष्व मत्प्रार्थितं स्वीकुर्वित्यर्थः १२

१३] ति० टी०–क्षत्रियचेष्टितं क्षत्रियाचारः ॥ १३ ॥

रा० टी०–एवमिति । काकुत्स्थः एवं ब्रुवाणं शत्रुघ्नमब्रवीत् तदाकारमाह एतद्भवदुक्तं क्षत्रियचेष्टितम् क्षत्रियोचितकथनं न अतः विषादं मा कृथाः ॥ १३ ॥

गो० टी० एवमिति। क्षत्रियचेष्टितं क्षत्रियविचारः १३-२१

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

१४] ति० टी०–हि यस्मात्तः क्षत्रियाणां प्रजाः सर्वथा परिपाल्या इति हि प्रसिद्धम् ॥ १४ ॥

रा० टी०–अनुचितत्वमेव प्रकटयन्नाह–नेति । क्षत्रधर्मेण प्रजा परिपाल्या एव राजभिरिति शेषः अतः राजानः विप्रवासेषु नावसीदन्ति ॥ १४ ॥

१५–१८] ति० टी०–मामवलोकितुमयोध्यामागच्छ । तव पुरं स्वपुरं गन्तासि । गच्छेत्यर्थः ॥ १५–१८ ॥

रा० टी०–काल इति । मामयोध्यां चावलोकितुं काले-

---

१ ज्ञातुमिति गो. पाठः । २ तापनमिति गो. पाठः । ३ वाक्यमिति गो. पाठः । ४ एते गता वर्षा इति गो. पाठः । ५ शत्रुघ्नमिति गो. पाठः । ६ इहावसेति गो. पा. ।

सप्तरात्रं च काकुत्स्थो राघवस्य यथाज्ञया । उष्य तत्र महेष्वासो गमनायोपचक्रमे ॥ १९ ॥
आमन्त्र्य तु महात्मानं रामं सत्यपराक्रमम् । भरतं लक्ष्मणं चैव महारथमुपारुहत् ॥ २० ॥
दूरं पद्भ्यामनुगतो लक्ष्मणेन महात्मना । भरतेन च शत्रुघ्नो जगामाशु पुरीं तदा ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ।

शत्रुघ्नं प्रैष्य सुखेन कंचित्समयं गमयति कौसल्येये कथन जानपदो वृद्धविप्रः अकालमृतं स्वमात्मजं गृहीत्वा अकालनिधनं भूपदोषहेतुकमित्युद्घोष्योद्विग्नो विलपन् भूपतिसभाद्वारमागमत् ।

प्रस्थाप्य तु स शत्रुघ्नं भ्रातृभ्यां सह राघवः । प्रमुमोद सुखी राज्यं धर्मेण परिपालयन् ॥ १ ॥
ततः कतिपयाहःसु वृद्धो जानपदो द्विजः । मृतं बालमुपादाय राजद्वारमुपागमत् ॥ २ ॥
[रुदैन्बहुविधा वाचः स्नेहदुःखसमन्वितः । असकृत्पुत्र पुत्रेति वाक्यमेतदुवाच ह ॥]
किं नु मे दुष्कृतं कर्म पुरा देहान्तरे कृतम् । रुदन्बहुविधा वाचः स्नेहदुःखसमन्वितः ॥
असकृत्पुत्र पुत्रेति वाक्यमेतदुवाच ह । ॥ ३ ॥
किं नु मे दुष्कृतं कर्म पुरा देहान्तरे कृतम् । यदहं पुत्रमेकं तु पश्यामि निधनं गतम् ॥ ४ ॥
अप्राप्तयौवनं बालं पञ्चवर्षसहस्रकम् । अकाले कालमापन्नं मम दुःखाय पुत्रक ॥ ५ ॥

काले यथोचितसमये आगच्छ अनंतरं तव पुरं मधुरां त्वं गन्तासि ॥ १५ ॥

रा० टी०–**ममेति** । यद्यपि त्वं ममापि सुहृदयितः तथापि राज्यस्य परिपालनमवश्यं करणीयम् तस्माद्धेतोः सप्तरात्रं मया सह त्वं वस ऊर्ध्वं मधुरां गंतासि श्लोकद्वयमेकान्वयि ॥ १६ ॥ १७ ॥

रा० टी०–**रामस्येति** । धर्मयुक्तमेतद्रामस्य वचः श्रुत्वा शत्रुघ्नः दीनया वाचा बाढमित्येवाब्रवीत् ॥ १८ ॥

१९-२१] ति० टी०–यथाज्ञया यथावत्कृतयाज्ञया १९-२१

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्ये उत्तरकाण्डे द्विसप्ततितमः सर्ग ॥ ७२ ॥

रा० टी०–**सप्तेति** । काकुत्स्थः शत्रुघ्नः राघवस्याज्ञया सप्तरात्रं यथा यथावत् उष्य उषित्वा गमनाय उपचक्रमे ॥ १९ ॥

रा० टी०–**आमन्त्र्येति** । महारथमुपारुहत् उपारोहत् शत्रुघ्न इति शेषः ॥ २० ॥

रा० टी०–**दूरमिति** । लक्ष्मणेन भरतेन च पद्भ्यां दूरमनुगतः शत्रुघ्नः पुरीं मधुरामाशु जगाम ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

१] ति० टी०–**अथ मृतबालकब्राह्मणस्य राजद्वारि विलपः—प्रस्थाप्येति** । भ्रातृभ्यां लक्ष्मणभरताभ्याम् ॥ १ ॥

रा० टी०–**शत्रुघ्नगमनानन्तरकालिकं वृत्तमाह–प्रस्थाप्येत्यादिभिः** । राघवः भ्रातृभ्यां लक्ष्मणभरताभ्यां सह प्रमुमोद प्रमुमुदे ॥ १ ॥

गो० टी०–अथ मृतबालकब्राह्मणस्य राजद्वारि विलापः–**प्रस्थाप्येत्यादि** ॥ १ ॥ २ ॥

२] ति० टी०–कतिपयाहःसु । गतेष्विति शेषः ॥ २ ॥

रा० टी०–**तत इति** । कतिपयाहःसु गतेष्विति शेषः जानपदः जनपदे भवः सुवृद्धो द्विजः राजद्वारमुपागमत् ॥ २ ॥

३] ति० टी०–स्नेहेन पुत्रस्नेहेन तन्मरणदुःखेन च समन्वितः ॥ ३ ॥

रा० टी०–**रुदन्निति** । स्नेहदुःखसमन्वितः स्नेहहेतुकदुःखेन समन्वितो द्विजः बहुविधा वाचः असकृत् पुत्र पुत्रेति च रुदन् उच्चारयन् एतद्वाक्यमुवाच ॥ ३ ॥

गो० टी०–**रुदन्निति** । असकृत् पुत्र पुत्रेति स्नेहसमन्विता बहुविधा वाचः रुदन् विलपन् । रुदन् बहुविधं विप्र इति च पाठः ॥ ३ ॥ ४ ॥

४] ति० टी०–यस्मान्निधनं गतं त्वां पश्यामि, अतो मे मया किं दुष्कृतं कृतम् ॥ ४ ॥

रा० टी०–तद्वचनाकारमाह–**किमित्यादिभिः** । यत् यस्मात् दुष्कृतात् एकमपि पुत्रं निधनं मरणं गतं पश्यामि ॥ ४ ॥

५] ति० टी०–किं च हे पुत्रका ! प्राप्तयौवनं मम दुःखाय अकाले कालमापन्नं पश्यामीत्यनुषङ्गः । पञ्चवर्षसहस्रकम् वर्षशब्दोऽत्र दिनपरः । 'सहस्रसंवत्सरं सत्रमुपासीत' इतिवत् । तेन षोडशवर्षमित्यर्थ इत्येके । तेन किंचिन्यूनचतुर्दशवर्षमित्यर्थ इत्यन्ये ॥ ५ ॥

१ भ्यामिति गो. पा. । २ पद्यमिदमधिकं गो. रा. पु. । ३ त्वामिति गो. पाठः ।

अल्पैरहोभिर्निधनं गमिष्यामि न संशयः । अहं च जननी चैव तव शोकेन पुत्रक ॥ ६ ॥
न स्मराम्यनृतं ह्युक्तं न च हिंसां स्मराम्यहम् । सर्वेषां प्राणिनां पापं न स्मरामि कदाचन ॥ ७ ॥
केनाद्य दुष्कृतेनायं बाल एव ममात्मजः । अकृत्वा पितृकार्याणि गतो वैवस्वतक्षयम् ॥ ८ ॥
नेदृशं दृष्टपूर्वं मे श्रुतं वा घोरदर्शनम् । मृत्युरप्राप्तकालानां रामस्य विषये ह्ययम् ॥ ९ ॥
रामस्य दुष्कृतं किंचिन्महदस्ति न संशयः । यथा हि विषयस्थानां बालानां मृत्युरागतः ॥ १० ॥
नह्यन्यविषयस्थानां बालानां मृत्युतो भयम् । सैं राजञ्जीवयस्वैनं बालं मृत्युवशं गतम् ॥ ११ ॥
राजद्वारि मरिष्यामि पत्न्या सार्धमनाथवत् । ब्रह्महत्यां ततो राम समुपेत्य सुखी भव ॥ १२ ॥
भ्रातृभिः सहितो राजन्दीर्घमायुरवाप्स्यसि । उषिताः स्म सुखं राज्ये तवास्मिन्सुमहाबल ॥ १३ ॥
इदं तु पतितं तस्मात्तव राम वशे स्थितान् । कालस्य वशमापन्नाः स्वल्पं हि नहि नः सुखम् ॥१४॥

रा० टी०–अप्राप्तेति । पञ्चवर्षसमन्वितमत एव बालमत एव अप्राप्तयौवनमकाले कालं मरणमापन्नं त्वां मम दुःखाय पश्यामीत्यनुकृष्यते ॥ ५ ॥

गो० टी०–अप्राप्तेति । कालमापन्नं कालवशं गतम् ५॥६

६] ति० टी०–तव शोकेनाहं तव जननी च निधनं गमिष्यामि ॥ ६ ॥

रा० टी०–अल्पैरिति । तव शोकेन अहं तव जननी च निधनं गमिष्यामि ॥ ६ ॥

७] ति० टी०–अस्य मरणे मत्कृतं किंचित्र कारणमित्याह—नेति । सर्वेषां प्राणिनां तद्विषयमनृतहिंसातिरिक्तमपि पापं मनोवाक्कायैरनिष्टाचरणं स्वकृतं न स्मरामि । अकृतत्वादेव । 'सर्वेषां प्राणिनां प्राणं न कदाचन विद्यते' इति पाठे सर्वेषां प्राणिनां प्राणमुद्दिश्य मया कृतहिंसां न स्मरामि । अतो मम कदाचन जन्मान्तरेऽपि पापं न विद्यते । जन्मान्तरे तत्करणे संस्कारेणैतज्जन्मन्यपि तत्र प्रवृत्तिः स्यादिति भावः ७

रा० टी०–ननु सर्वोपि जनः स्वकृतं भुङ्क्ते अतः किमर्थं शोचसीत्यत आह–नेति । उक्तस्ववचनमनृतं मिथ्या न स्मरामि हिंसां च न स्मरामि सर्वेषां प्राणिनाम् पापं सर्वप्राणिकर्तृकपापाचरणं न स्मरामि स्मृत्वा न कथयामीत्यर्थः ॥ ७ ॥

गो० टी०–नेति । न स्मरामि । अकृतत्वादेवेति भावः ७॥८

८] ति० टी०–पितृकार्याणि श्राद्धादीनि ॥ ८ ॥

रा० टी०–केनेति । बाल एव ममात्मजः पितृकार्याणि अकृत्वा केन दुष्कृतेन वैवस्वतक्षयं गतः ॥ ८ ॥

९] ति० टी०–रामस्य विषये देशे ॥ ९ ॥

रा० टी०–मरणस्यासंभवे हेतुमाह—नेति । रामस्य विषये देशे अप्राप्तकालानामीदृशं मृत्युः दृष्टपूर्वं न श्रुतमपि न सामान्ये नपुंसकम् ॥ ९ ॥

गो० टी०–नेति । विषये देशे । यथा सर्वानुभवादितः पूर्वं नेदृशं दृष्टपूर्वम् ॥ ९ ॥

१०] ति० टी०–तस्माद्राजदोषादेवेदं बालमरणमित्याह—रामस्येति ॥ १० ॥

रा० टी०–स्वोहितमाह–रामस्येति । यथा येन हेतुना बालानां मृत्युरागतः तस्मात् रामस्य किंचित् महत् दुष्कृतमस्ति ॥ १० ॥

गो० टी०–अथ तु—रामस्य दुष्कृतमित्यादि ॥१०॥

११] ति० टी०–स राजन्नित्याभिमुख्येन वादः ॥११॥

रा० टी०–नहीति । हि यतः अन्यविषयस्थानां बालानां मृत्युतो भयं न अतः स त्वमेनं बालं जीवयस्व ॥ ११ ॥

गो० टी०–न हीति । त्वं राजन्नित्यादिना आभिमुख्येन वादः ॥ ११ ॥

१२] ति० टी०–सुखी भवेति व्यङ्ग्योक्तिः ॥ १२ ॥

रा० टी०–राजेति । राजद्वारि मरिष्यामि ततोनन्तरं हे राम ! ब्रह्महत्यां समुपेत्य सुखी भव दुःखी एव भविष्यसीत्यर्थः ॥ १२ ॥

गो० टी०–राजद्वारीति । सुखी भवेत्यादि व्यङ्ग्योक्तिः ॥ १२ ॥

१३] ति० टी०–उषिताः स्म । एतावत्कालमिति शेषः ॥ १३ ॥

रा० टी०–भ्रातृभिरिति । तव राज्ये वयं सुखमुषिताः स्म अतः दीर्घमायुरवाप्स्यसि व्यञ्जनपानसुखमुषिताः अतो दीर्घमायुर्नावाप्स्यसीति बोधितम् ॥ १३ ॥

गो० टी०–भ्रातृभिरिति । उषिताः स्म । एतावत्कालमिति शेषः ॥ १३ ॥

१४] ति० टी०–इदं बालकमरणदुःखम् । हि यत इदानीं वयं कालस्य वशमापन्नाः, हि तस्मात्तव राज्ये नोऽस्माकं स्वल्पमपि सुखं नहि ॥ १४ ॥

रा० टी०–इदमिति । तव वशे स्थितान् अस्मान् इदं पतितं प्राप्तम् इदमाकारमाह यतो वयं कालस्य वशमापन्नाः अतः स्वल्पमपि सुखं नोस्माकं न ॥ १४ ॥

गो० टी०–इदमिति । तव वशे राज्ये नोस्माकं स्वल्पमपि सुखं न ॥ १४ ॥

१ कृतं नैव स्मराम्यहमिति गो० पाठः । २ यथेति गो० पाठः । ३ त्वमिति गो० पाठः । ४ स्थिता इति गो० पाठः

ब्रह्म क्षत्रं च तत्सर्वं यत्पूर्वमवरं च यत् । युगयोरुभयोरासीत्समवीर्यसमन्वितम् ॥ १३ ॥
अपश्यन्तस्तु ते सर्वे विशेषमधिकं ततः । स्थापनं चक्रिरे तत्र चातुर्वर्ण्यस्य संमतम् ॥ १४ ॥
तस्मिन्युगे प्रज्वलिते धर्मभूते ह्यनावृते । अधर्मः पादमेकं तु पातयत्पृथिवीतले ॥
अधर्मेण हि संयुक्तस्तेजो मन्दं भविष्यति । ॥ १५ ॥
आमिषं यच्च पूर्वेषां राजसं च मलं भृशम् । अनृतं नाम तद्भूतं क्षिप्रेन पृथिवीतले ॥ १६ ॥

ह्मणानुष्ठितेन तपसान्विताः क्षत्रिया जायन्ते। तादृशं त्रेतायुगं नामाभूदिति संबन्धः। कृतयुगे ब्राह्मणमात्रनिष्ठं तपस्त्रेतायां क्षत्रियसाधारणमभूदिति भावः । त्रयीविहितत्रेताग्निसाध्यकर्मसु प्रवृत्त्या युगस्य त्रेतासंज्ञेति पुराणविदः । किंच तत्र त्रेतायुगे त्रेतायुगाख्ये युगे महात्मानस्तपोयुक्ता ये मानवा ब्राह्मणाः क्षत्रिया वा सन्ति तदपेक्षया पूर्वस्मिञ्जन्मनि पूर्वजाते कृतयुगे तपोभाजो ये मानवास्ते वीर्येण प्रभावेण तपसा तपोतिशयेनाधिका उत्कृष्टाः ॥ १२ ॥

रा० टी०–वीर्येणेति। पूर्वजन्मनि युगे सत्ययुगे इत्यर्थः ते ब्राह्मणा एव वीर्येण तपसा चाधिकाः मानवाः क्षत्रियास्तु त्रेतायुगे एव वीर्येण तपसा चाधिकाः ॥ १२ ॥

गो० टी०–त्रेतायुगे तपस्विनो जाताः क्षत्रियाः कृतयुगे तपस्विभिर्ब्राह्मणैः किं तुल्याः नेत्याह–वीर्येणेति। अत्र त्रेतायुगे युगे त्रेतायुगाख्ये युगे महात्मानो ये मानवाः सन्ति तदपेक्षया पूर्वजन्मनि पूर्वस्मिन् कृतयुगे ये मानवास्ते तपसा वीर्येण चाधिकाः ॥ १२ ॥

१३] ति० टी०–अथ त्रेताकालिकक्षत्रियाणां कृतकालिकब्राह्मणेभ्यो न्यूनता, त्रेताकालिकब्राह्मणेस्तु समतेत्याह—**ब्रह्म क्षत्रमिति**। उभयोर्युगयोर्मध्ये कृतयुगे ब्रह्मपूर्वं तपोवीर्याभ्यामुत्कृष्टं क्षत्रं चावरं च ताभ्यां तपोवीर्याभ्यां न्यूनमासीत्तत्सर्वं ब्रह्मक्षत्ररूपमुभयं त्रेतायां समवीर्यसमन्वितमासीत्। कृते क्षत्रियाणां तपस्यनधिकारात्तयुगीयेभ्यो ब्राह्मणेभ्यस्तेषां न्यूनता। त्रेतायां तूभयोरपि तपोधिकारादुभावपि तपोवीर्याभ्यां समाविति भावः। अर्थात्कृतयुगब्राह्मणेभ्यस्त्रेतायुगब्राह्मणानामपि न्यूनत्वमुक्तम् ॥ १३ ॥

रा० टी०–**ब्रह्मेति**। पूर्वमवरं तपसा हीनमित्यर्थः यत् क्षत्रं क्षत्रियकुलं तत् समवीर्यसमन्वितं सत्ययुगीयवीर्यसदृशवीर्ययुक्तम् ब्रह्म ब्राह्मणकुलं च तत्सर्वमुभयोर्युगयोः यत् इन्द्रियनिग्रहवदित्यर्थः आसीत् ॥ १३ ॥

गो० टी०–त्रेतायुगब्राह्मणास्तुल्या एवेत्याह–**ब्रह्मेति**। उभयोर्युगयोः कृतत्रेतयोः कृते यद्ब्रह्म पूर्वमुत्कृष्टम् यच्च त्रेतायामपकृष्टं क्षत्रम् तदुभयं त्रेतायां समप्रधानमासीत् ॥ १३ ॥

१४] ति० टी०–अतस्त्रेतायुगे ब्राह्मणक्षत्रिययोस्तपोविशेषेण तयोर्मध्ये ब्राह्मणस्य ततः क्षत्रादधिकं विशेषमपश्यन्तो मन्वादयः सर्वे तात्कालिका धर्मप्रवर्तनाधिकृताः। चातुर्वर्ण्यस्य स्वार्थे ष्यञ्। ब्राह्मणादिचतुर्वर्णानां संमतमनादितः सर्वलोकसंमतं स्थापनं वर्णानामाचारभेदकस्थापनं शास्त्रं तत्र त्रेतायुगे चक्रिरे। कृते तु विनैव स्थापनं स्वयमेव सर्वे वर्णाः स्वस्वधर्मरता इति भावः ॥ १४ ॥

रा० टी०–**अपश्यन्त इति**। ते तात्कालिकाधिकारिण इत्यर्थः सर्वे मनुप्रभृतयः ततः ब्राह्मणक्षत्रियादधिकममन्यदित्यर्थः अपश्यन्त आसन्निति शेषः अत एव सर्वे मन्वादयः चातुर्वर्ण्यस्य चतुर्णां वर्णानां सम्मतं सर्वसम्मतिविषयीभूतं स्थापनमाचारभेदेन विभागं चक्रिरे एतेन सेवाकर्तृत्विना क्षत्रियाणां मनःप्रसादो न जात इति ध्वनितम् ॥ १४ ॥

गो० टी०–एतदेवाह–**अपश्यन्निति**। सर्वे जनाः। ततः क्षत्रियात्। ब्राह्मणस्याधिक विशेषं तु नापश्यन्। अपश्यन्तस्तु ते सर्व इति पाठः । तत्स्थापनमाचारभेदं वेदोदितं चक्रिरे। चातुर्वर्ण्यस्येत्यत्र स्वार्थे ष्यञ्। कृतयुगे तपस्तदभावाभ्यामुभयोर्वैलक्षण्यं स्पष्टम् । त्रेतायुगे उभयोरपि तपस्साम्यात् वैलक्षण्यकरमाचारभेदमकल्पयन्नित्यर्थः। एवं वैश्यशूद्रयोरपि वेदपुराणोक्ताचारव्यवस्थां महान्तोकल्पयन्नित्यर्थः ॥ १४ ॥

१५] ति० टी०–तस्मिंस्त्रेतायुगे धर्मभूते वर्णाश्रमप्रयुक्तयागादिधर्मबहुलेऽनावृते धर्माचरणप्रतिबन्धकपापरहिते प्रज्वलिते तेनैव धर्मेण प्रदीप्ते सत्यधर्मो हिंसानृतासंतोषविग्रहरूपचतुष्पात्पृथिवीतले पादं चतुर्थांशं पातयदपातयत्। प्रवर्तयामासेत्यर्थः। एवं च त्रेतापुरुषाः कृतयुगपुरुषा इव निर्मलज्ञानराहित्याद्ब्रह्मज्ञानाधिकारशून्या अग्निहोत्रादिधर्मे एव प्रवृत्ताः। ज्ञानाभावादेव चाधर्मोऽपि पादेन प्रवृत्त इति भावः। अत एव ते कृतयुगपुरुषेभ्यः क्षीणा इत्याह—**अधर्मेणेति**। यतस्तेन संयुक्तो लोको वर्णाश्रमाधिकृतो भवति ततस्तस्य तेजो मन्दं भविष्यति ॥ १५ ॥

रा० टी०–**तस्मिन्निति**। धर्मभूते प्रचुरधर्मविशिष्टे अत एव अनावृते तत्तावरकमहाज्ञानविशिष्टजनरहिते तस्मिन् त्रेतायुगे अधर्मः अनृतहिंसासन्तोषविग्रहरूपपादचतुष्टयविशिष्टो धर्मविरोधी एकं पादं चरणं पृथिवीतले पातयत् अपातयत् १५

गो० टी०–**तस्मिन्निति**। धर्मभूते यज्ञादिधर्मप्रधाने अनावृते अधर्मावरणरहिते। तस्मिन् त्रेतायुगे प्रवृत्ते अधर्मः पादं चतुर्थांशं पातयदपातयत् वर्तयामास । त्रेतायुगपुरुषाः कृतयुगपुरुषवद्विमलज्ञानरहिततया ब्रह्मज्ञानाधिकारशून्याः वर्णाश्रमधर्मानेवाचरन्। अतो विमलज्ञानाभावादधर्मः पादमवतीर्ण इत्यर्थः ॥ १५ ॥

१६] ति० टी०–एवं च तेषां कृष्यादिकमेव जीवनो-

---

१ अपरमिति गो. पाठः । २ पादेनेति गो. पाठः ।

अनृतं पातयित्वा तु पादमेकमधर्मतः । ततः प्रादुष्कृतं पूर्वमायुषः परिनिष्ठितम् ॥ १७ ॥
पतिते त्वनृते तस्मिन्नधर्मेण महीतले । शुभान्येवाचरँल्लोकः सत्यधर्मपरायणः ॥ १८ ॥
त्रेतायुगे च वर्तन्ते ब्राह्मणाः क्षत्रियाश्च ये । तपोऽतप्यन्त ते सर्वे शुश्रूषामपरे जनाः ॥ १९ ॥
स्वधर्मः परमस्तेषां वैश्यशूद्रं तदागमत् । पूजां च सर्ववर्णानां शूद्राश्चक्रुर्विशेषतः ॥ २० ॥

पाय इत्याह—**आमिषमिति** । पूर्वेषां कृतयुगस्थानां भृशमत्यर्थं मलं मलवत्त्याज्यं यद्राजसं रजोगुणमूलमामिषं जीवनोपायरूपं कृष्याद्यासीत्तदनृतं नाम । 'सेवाश्ववृत्तिरनृतं कृषिः' इति कोशात् । तद्रूपेण पादेन पृथिवीतले भूतं प्राप्तम् । अधर्मेणेति शेषः । कृते त्वकृष्टपच्याहारा इति भाव इति तीर्थः । कतकस्तु—अपि च पूर्वेषां स्वस्ववंश्यानां यच्चामिषं पुरदेशगृहक्षेत्रादि तदुद्दिश्य राजसं रजोगुणमूलं द्वेषलक्षणं भवति । त्रेतायामिति शेषः । 'काम एष क्रोध एष रजोगुणसमुद्भवः' इत्युक्तेः कोनामाधर्मस्य पादस्तत्राह—**अनृतमिति** । येन पृथिवीक्षिप्तेन पादेन तत्प्रागुक्तं द्वेषरूपं मलं भूतं तदनृतं नाम । देहात्मताधीरूपमिथ्याज्ञानात्मकः सर्वानर्थमूलोऽहंकारमयः प्रथमः पाद इत्यर्थ इत्याह ॥ १६ ॥

रा० टी०—**अधर्मेणेति** । अधर्मेण अधर्मचरणेन संयुक्तो जनः मन्दं तेजो भविष्यति प्राप्स्यति अर्द्धम् पृथक् ॥ १६ ॥

रा०टी०—**आमिषमिति** । पृथिवीतले भूतमधर्मेण प्रापितं चरणमनृतं नाम अनृतनामकमित्यर्थः तत्तस्य चरणस्य क्षिप्तेन हेतुना यत् राजसं कामक्रोधं पूर्वेषां सत्ययुगस्थानां मलम् मलवत्त्यक्तम् तत् आमिषम् त्रेतायुगस्थबहूनां भोग्यमभवदिति शेषः आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनीति कोशः ॥१७॥

गो० टी०—एवमीषत्पापसंबन्धात्तदातनानां जनानां प्रभावः पूर्वयुगपुरुषेभ्यः क्षीणोभूदित्याह—**अधर्मेण हीति** । भविष्यतीति भूते लट् । एवं त्रेतायुगजनानां प्रभावस्याल्पत्वेन सत्यसंकल्पत्वाकृष्टपच्यत्वादिसिद्ध्यभावात् कृष्यादिकमेव जीवनोपायोभूदित्याह—**आमिषमिति** । सर्वेषां कृतयुगब्राह्मणानां राज्ञां च भृशं मलं मलवन्निन्द्यमानमामिषं जीवनोपायः अनृतं कृषिर्नाम प्रसिद्धं यदस्ति तत्पृथिवीतले पादेन भूतं स्थितम् । कृतयुगपुरुषतुल्यवैभवाभावेनाकृष्टपच्यत्वाद्यभावात् त्रेतायुगपुरुषाणाम् अनृतमेव जीवनोपायोभूदित्यर्थः । सेवाश्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृतमित्यमरः ॥ १६ ॥ १७ ॥

१७] ति० टी०—तत्पादपाते किं भवतीत्याह—**अनृतमिति** । उक्तरूपमेकमनृतपादं पातयित्वा निक्षिप्याधर्मतोऽधर्मेण पूर्वयुगेऽपरिमितस्यायुषः परिनिष्ठितं परिमाणं प्रादुष्कृतं तेन कृतयुगपुरुषापेक्षया त्रेतापुरुषाणां प्रभावादिन्यूनता आयुर्न्यूनता चोक्ता ॥ १७ ॥

रा० टी०—कामक्रोधप्राप्तौ दोषमाह—**अनृतमिति** । अधर्मतः अधर्मेण अनृतमेकं पादं पातयित्वा ततः अनृतकार्यभूतकामक्रोधात् आयुषः परिनिष्ठितं परिनिष्ठितत्वं सत्ययुगायुःप्रमाणापेक्षयाल्पप्रमाणकत्वमित्यर्थः प्रादुष्कृतम् एतेन प्रभावादीनामप्यल्पत्वं सूचितम् ॥ १८ ॥

गो० टी०—एवमायुषः क्षयोप्यभूदित्याह—**अनृतमिति** । अधर्मतः अधर्मस्तदेकं पादमनृतलक्षणं जीवनोपायं पातयित्वा निक्षिप्य । ततस्तेनैव पातेन पूर्वं प्रथममायुषः परिनिष्ठितं विनाशः प्रादुष्कृतं प्रादुर्भूतम् । कृतयुगपुरुषापेक्षया त्रेतायुगपुरुषा न्यूनायुषोऽभवन्नित्यर्थः ॥ १८ ॥

१८] ति० टी०—अथायुःक्षयकारकाधर्मपादपरिहारहेतुव्यापारोपदेशः—**पातिते त्विति** । अधर्मेण तस्मिन्ननृते उक्तलक्षणानृतपादे महीतले पातिते सति तत्प्रयुक्तायुःक्षयपरिहाराय शुभान्येव यज्ञदानतपोरूपपुण्यकर्माण्येवाचरँल्लोको धर्माधिकारी तद्बलात्सत्यधर्मपरायणो भवति । अनेन त्रेतायां यज्ञाद्यनुष्ठानेन शुद्धचित्तस्य झटिति देहात्माभिमाननिवृत्तिरित्युक्तम् ॥ १८ ॥

रा० टी०—**पातित इति** । अधर्मेण अनृते पातिते सति लोकः एतद्वृत्तज्ञाता जनः सत्यधर्मपरायणः दृढं सत्याश्रितस्सन् शुभान्येवाचरत् अनृतसंसर्गभिया शुभकर्मतो न व्यवर्तन्त इत्यर्थः ॥ १९ ॥

गो० टी०—एवमनुभावस्यायुषः क्षये प्रवृत्ते सति भीताः सन्तः त्रेतायुगपुरुषा. शुभाचरणे निरता आसन्नित्याह—**पातिते त्विति** । अधर्मे अधर्मजायुःक्षये । पातिते त्वनृते तस्मिन्नधर्मेणेति च पाठः ॥ १९ ॥

१९] ति० टी०—उक्तमेव स्पष्टीकरोति—**त्रेतेति** । ब्राह्मणाः क्षत्रियाश्च ये त एव यज्ञादिशुद्धचित्तास्तपोऽतप्यन्त । अपरे सर्वे विट्शूद्रसंकरविशेषाः । ब्राह्मणक्षत्रियशुश्रूषां चक्रुरिति शेषः ॥ १९ ॥

रा० टी०—फलितमाह—**त्रेतेति** । त्रेतायुगे ये ब्राह्मणाः क्षत्रियाश्च वर्त्तन्ते ते सर्वे तपोऽतप्यन्त अपरे जनाः वैश्यप्रभृतयः शुश्रूषां ब्राह्मणक्षत्रियसेवामेवाकुर्वन्निति शेषः ॥ २० ॥

गो० टी०—शुभाचारे भेदमेव दर्शयति—**त्रेतेति** । शुश्रूषां पूर्ववर्णपरिचर्याम् । अपरे वैश्यशूद्राः । अकुर्वन्निति शेषः २०

२०] ति० टी०—अथ तेषां मध्ये वैश्यशूद्रम् । समाहारद्वन्द्वः । शुश्रूषारूपः परमः स्वधर्म उत्कृष्टः स्वधर्मो भूत्वागमत्प्राप्तोऽभूत् । तदेवाह—**पूजां चेति** । सर्ववर्णानां त्रैवर्णिकानाम् । एवं च वैश्यस्य कृष्यादिकरणेन द्विवर्णसेवाधर्म इत्यर्थादुक्तमिति बोध्यम् ॥ २० ॥

रा० टी०—**स्वधर्म इति** । तेषां ब्राह्मणादीनां मध्ये

१ पतिते इति गो. पाठः । २ स धर्मे इति गो. पाठः ।

एतस्मिन्नन्तरे तेषामधर्मे चानृते च ह । ततः पूर्वं पुनर्ह्रासमगमन्नृपसत्तम ॥ २१ ॥
ततः पादमधर्मस्य द्वितीयमवतारयत् । ततो द्वापरसंख्या सा युगस्य समजायत ॥ २२ ॥
तस्मिन्द्वापरसंख्ये तु वर्तमाने युगक्षये । अधर्मश्चानृतं चैव वृद्धिं लोके पुरुषर्षभ ॥ २३ ॥
अस्मिन्द्वापरसंख्याने तपो वैश्यान्समाविशत् । त्रिभ्यो युगेभ्यस्त्रीन्वर्णान्क्रमाद्वै तप आविशत्॥२४॥
त्रिभ्यो युगेभ्यस्त्रीन्वर्णान्धर्मश्च परिनिष्ठितः । न शूद्रो लभते धर्मं युगतस्तु नरर्षभ ॥ २५ ॥
हीनवर्णो नृपश्रेष्ठ तप्यते सुमहत्तपः । भविष्यच्छूद्रयोन्यां हि[4] तपश्चर्या कलौ युगे ॥ २६ ॥

वैश्यशूद्रं समाहारद्वन्द्वः तत् ब्राह्मणक्षत्रियशुश्रूषणम् स्वधर्मः स्वावश्यकर्तव्यत्वेन रूपेण विद्यमानस्सन् आगमत् प्राप्नोत् शूद्रास्तु सर्ववर्णानां वैश्यपर्यन्तानां विशेषतः पूजां चक्रुः ॥२१॥

गो० टी०–शुश्रूषावत् पूर्वोक्तकृष्यादिकमपि वैश्यशूद्रयोः परमधर्मोभूदित्याह–**स धर्म इति** । स्वधर्मः परम इति च पाठः । पूजां चेति । वैश्यानां हि शुश्रूषा । अतोपि कृष्यादिकमेव परमो धर्मोभूत् । शूद्राणां कृष्यादिभ्योपि शुश्रूषैव विशिष्टो धर्मोभूदित्यर्थः ॥ २१ ॥

२१] **ति० टी०–अथ द्वापरप्रवृत्तिं दर्शयितुमाह—एतस्मिन्निति** । एतस्मिन्नन्तरे त्रेतायुगावसानकाले तेषां वैश्यशूद्राणामनृतरूपेऽधर्मपादे सम्यक्प्राप्ते सतीति शेषः । ततः पूर्वं ब्राह्मणाः क्षत्रिया ह्रासमगमन्प्राप्ताः । ' त्रासमुपागमन् ' इति पाठे सेवकदोषस्य स्वामिप्राप्यत्वाद्राष्ट्रदोषाद्भीता बभूवुः ॥२१॥

रा० टी०–द्वापरप्रवृत्तिं दर्शयितुमाह–एतस्मिन्निति । एतस्मिन्नन्तरे वैश्यशूद्रविशेषसेवासमये त्रेतायुगावसानसमये इत्यर्थः तेषां वैश्यशूद्राणाम् अनृते अनृतरूपे अधर्मे अधर्मप्रथमपादे प्राप्ते सतीति शेषः पूर्वं ब्राह्मणक्षत्रियाः ह्रासं तादृशसेवकसंसर्गेणाल्पतेजःप्रभृतित्वमगमन् ॥ २२ ॥

गो० टी०–एवं त्रेतायुगे लोकस्थितिमुक्त्वा तदवस्थानकालस्थितिमाह—एतस्मिन्निति । एतस्मिन्नन्तरे त्रेतायुगावसानकाले । अधर्मे अधर्मकार्ये आयुषः क्षये । अनृते कृष्यायुपाये च प्रवृत्ते सति क्षीणायुषो वृत्तिकर्शिताश्च । पूर्वं त्रेतायुगस्थाः । ह्रासं विनाशमगमन् ॥ २२ ॥

२२] **ति० टी०–ततस्तदनन्तरमधर्मस्य द्वितीयं पादं ममतारूपमधर्मोऽवतारयत्** । ततो द्वितीयपादावतारणादेव तृतीययुगस्य द्वापरसंख्या द्वापर इति नाम । पृषोदरादित्वात्साधुः॥२२॥

रा० टी०–तत इति । ततोऽनन्तरमधर्मस्य द्वितीयपादं हिंसामित्यर्थः अवतारयत् उदपादयत् तत्तस्माद्धेतोः युगस्य तृतीयस्येत्यर्थः द्वापरसंख्याद्वापराभिधा समजायत द्वौ अपरौ धर्मौ आगतौ यस्मिन् पृषोदरादित्वात् साधुः ॥ २३ ॥

गो०टी०–तत इति । अधर्मः सः त्रेतायुगप्रसारितैकपादः२३

२३] **ति० टी०–तत्कालिकलोकस्थितिमाह—तस्मिन्निति** । द्वापरसंख्ये द्वापराख्ये युगस्याधर्मपादद्वयस्य क्षये आश्रयभूते युगे वर्तमाने तद्रूपाश्रयं प्राप्याधर्मो निहितातिक्रमरूपोऽनृतं च वृद्धे । अहंभावममतयोराधिक्यात् । तीर्थस्तु-

अधर्मवृद्धिरित्यल्पायुष्ट्वम्, अनृतवृद्धिः प्रयासबाहुल्येन कृषि साफल्यमित्याह ॥ २३ ॥

रा०टी०–तस्मिन्निति । युगस्य अधर्मपादद्वयस्य क्षये आश्रयभूते किं च युगक्षये त्रेतावसाने द्वापरसंख्ये द्वापराख्ये वर्तमाने सति अधर्मः अधर्मद्वितीयपादो हिंसा अनृतं च वृद्धे२४

गो० टी०–तस्मिन्निति । अधर्मस्याभिवृद्धिर्नाम त्रेतायुगपुरुषेभ्योल्पायुष्यम् । अनृतस्याभिवृद्धिस्तु प्रयासबाहुल्येन कृषेः सफलत्वम् ॥ २४ ॥

२४] **ति० टी०–तद्वृद्धिफलमाह—वैश्यांस्तपः समाविशत्** । एवं त्रिभ्यो युगेभ्यः सप्तम्यर्थे चतुर्थी । त्रिषु युगेषु२४

रा० टी०–अस्मिन्निति । द्वापरसंख्याते द्वापराह्वये तपो वैश्यान् समाविशत् अर्द्धं पृथक् ॥ २५ ॥

गो० टी०–तस्मिन्निति । तपः वैश्यान् समाविशत् । वैश्यास्तपोधिकारिणोऽभवन्नित्यर्थः । एवं युगत्रयधर्मानभिधाय प्रकृतं वक्तुं तत्रोपयुक्तमर्थं संक्षिप्याह–**त्रिभ्य इति** । हेतौ पञ्चमी२५

२५] **ति० टी०–तथा त्रिषु युगेषु त्रीन्वर्णानवलम्ब्य धर्मस्तपोरूपः परिनिष्ठितः परिनिष्ठितोऽभूत्** । धर्मं तपोलक्षणं शूद्रो युगतो युगत्रयेऽपि न लभते ॥ २५ ॥

रा० टी०–फलितमाह–त्रिभ्य इति । त्रिभ्यो युगेभ्यः त्रिषु युगेषु यो धर्मस्तपश्चरणं त्रीन्वर्णान् परिनिष्ठितः क्रमप्राप्तः स्वधर्मत्वेन प्राप्तः तं धर्मं युगतः त्रिषु युगेषु शूद्रो न लभते अलभत्२६

गो०टी०–त्रिभ्य इति । प्रकृतं बालवधहेतुमाह–**हीनेति**२६

२६] **ति० टी०–किं तु हीनवर्णः शूद्रः कदाचित्सुमहत्तपस्तप्यते** । कदा तत्राह—**भविष्यदिति** । भविष्यत्कालर्तिन्यां शूद्रयोन्यां शूद्रजातौ कलौ युगे तपश्चर्या भविष्यति, न त्वेतत्कालिके इति भावः ॥ २६ ॥

रा० टी०–हीनेति । कलौ युगे भविष्यच्छूद्रयोन्यां तपश्चर्यापि स्वधर्म इति शेषः अत एव कलौ युगे हीनवर्णः सुमहत्तपः तप्यते तप्ता ॥ २७ ॥

गो० टी०–भविष्यदिति । इकारलोपश्छान्दसः । तपश्चर्या तपश्चरणाधिकारः । शूद्राणां तपश्चर्या कलियुग एव धर्मो भविष्यति अस्मिन्युगे स्वधर्म इत्याह–**अधर्म इति** । रामराज्यस्य त्रेतायुगत्वेपि, अधर्मः परमो राजन् द्वापरे शूद्रजन्मन इत्युक्तेः, किमुत त्रेतायामित्यर्थः ॥ २७–३० ॥

---

१ मृशमिति गो. पाठः । २ अधर्मः स इति गो. पाठः । ३ संज्ञे इति गो. पाठः । ४ वै इति गो. पाठः ।

अधर्मः परमो राजन्द्वापरे शूद्रजन्मनः । स वै विषयपर्यन्ते तव राजन्महातपाः ॥ २७ ॥
अद्य तप्यति दुर्बुद्धिस्तेन बालवधो ह्ययम् । यो ह्यधर्ममकार्यं वा विषये पार्थिवस्य तु ॥ २८ ॥
करोति चाश्रीमूलं तत्पुरे वा दुर्मतिर्नरः । क्षिप्रं च नरकं याति स च राजा न संशयः ॥ २९ ॥
अधीतस्य च तप्तस्य कर्मणः सुकृतस्य च । षष्ठं भजति भागं तु प्रजा धर्मेण पालयन् ॥ ३० ॥
षड्भागस्य च भोक्तासौ रक्षते न प्रजाः कथम् । स त्वं पुरुषशार्दूल मार्गस्व विषयं स्वकम् ॥ ३१ ॥
दुष्कृतं यत्र पश्येथास्तत्र यत्नं समाचर । एवं चेद्धर्मवृद्धिश्च नृणां चायुर्विवर्धनम् ॥
भविष्यति नरश्रेष्ठ बालस्यास्य च जीवितम् । ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ।

नारदवचनं निशम्य प्रहृष्टो रामो लक्ष्मणमुखेन जरदग्निजन्मानं समाश्वास्य नगरे भरतलक्ष्मणौ निक्षिप्य स्मरणसमसमयसंनिहितपुष्पकमारुह्य प्रतीचीमुदीचीं प्राचीं च हरितं क्रमेण विचिन्वन्नपि तत्र कंचनाधर्ममपश्यन्दक्षिणां दिशं गत्वा तत्र कस्मिंश्चित्सरसि लम्बमानमधोमुखं तपस्यन्तमुपलभ्य को भवान् जातिः का किमर्थोऽयं यत्न इत्याद्यपृच्छत् ।

नारदस्य तु तद्वाक्यं श्रुत्वामृतमयं यथा[1] । प्रहर्षमतुलं लेभे लक्ष्मणं चेदमब्रवीत् ॥ १ ॥
गच्छ सौम्य द्विजश्रेष्ठं समाश्वासय सुव्रत[2] । बालस्य च शरीरं तत्तैलद्रोण्यां निधापय ॥ २ ॥
गन्धैश्च परमोदारैस्तैलैश्च सुसुगन्धिभिः[3] । यथा न क्षीयते बालस्तथा सौम्य विधीयताम् ॥ ३ ॥

२७] ति० टी०–यद्येवमतो द्वापरेऽपि शूद्रजन्मनस्तपोधारणं परमोऽधर्मः किमुताद्य त्रेतायाम् । स शूद्रो वै निश्चयेन तव विषयपर्यन्ते देशसमीपे महातपा भूत्वा दुर्बुद्धिरत्र तपति । तेनैव हेतुनायं बालवधो जातः ॥ २७ ॥

रा० टी०–प्रकृतमाह–अधर्म इति । द्वापरे शूद्रजन्मनः परमोऽधर्मः तप इति शेषः यदि द्वापरे एवाधर्मः तर्हि त्रेतायां किं वक्तव्यमिति काव्यार्थापत्त्यलङ्कारः सूचितः अर्द्धं पृथक् । स इति । तव विषयपर्यन्ते देशान्ते स शूद्रः महातपास्सन् अद्य तप्यति तेन हेतुना अयं बालवधः ॥ २८ ॥

२८–३०] ति० टी०–उक्तमेव दार्ढ्याय पुनराह—यो हीति । यो हि दुर्मतिः पार्थिवस्य विषये देशे पुरे वाधर्मं विहितधर्मलोपमकार्यं निषिद्धकृत्यं वा करोति तदेव पुरे राज्ये वाश्रीमूलमलक्ष्मीमूलं भवति, तदनिवारयन्स राजा क्षिप्रं नरकं याति, इहामुत्र च परमकश्मलं प्राप्नोति नात्र संशयः॥२८–३०॥

रा० टी०–ननु तत्पापेन अयं बालः कथं मृत इत्यत आह–य इति । यो नरः पार्थिवस्य विषये पुरे वा अधर्मं धर्मविरुद्धम् अकार्यं स्वस्याकर्तव्यं धर्मं वा करोति तस्य तत्करणमश्रीमूलं विपत्तिकारणं तत्समीपवासिनामपीति शेषः सः अधर्मनिवारणस्याकर्ता राजा तु क्षिप्रं नरकं याति सार्द्धश्लोक एकान्वयी ॥२९॥३०॥

३१] ति० टी०–नन्वन्यदीयाधर्मेण कथं राज्ञः कश्मलप्राप्तिरत आह—षड्भागस्येति । रक्षार्थं धनधान्यपुण्यादिषड्भागवेतनभोक्ता कथं न रक्षेत् । न्यायेन रक्षायां धर्मादिषड्भागप्राप्तिवदरक्षणेऽधर्मभागप्राप्तिरपीति भावः । अतः स त्वमिति ॥ ३१ ॥

रा० टी०–ननु प्रजाकृताधर्मेण राज्ञः कथं नरकप्राप्तिरित्यत आह- अधीतस्येति । धर्मेण प्रजाः पालयन् राजा अधीतादेः षष्ठं भागमंशं भजति प्राप्नोति अतः षड्भागस्य भोक्ता असौ राजा प्रजाः कथं न रक्षते एतेन पालनाकरणमधर्मः राजानं विनाशयत्येवेति सूचितम् सार्द्धश्लोक एकान्वयी ॥३१॥

गो० टी०–कथमन्येषु पापं कुर्वाणेषु राज्ञो नरकप्राप्तिस्तत्राह–षड्भागस्येति ॥ ३१ ॥

३२] ति० टी०–यत्नं निवारणयत्नम् ॥ ३२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलक वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

रा० टी०–स इति । विषयं देशं मार्गस्व यत्र जने दुष्कृतं पश्येथाः तत्र तस्मिन् यत्नं निवारणोपायं समाचर ॥ ३२ ॥

रा० टी०–एवमिति । एवमनेन प्रकारेण चेद्यदि करिष्यसीति शेषः तर्हि अस्य बालस्य जीवितं च भविष्यति॥३३॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

गो० टी०–स इति । तत्र यत्नं निराकरणयत्नम्॥३२॥३३॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुःसप्ततितमः सर्गः ॥ ७४ ॥

१–३] ति० टी०–अथ शूद्रतपस्विनोऽन्विष्य दर्शनम्–नारदस्येति ॥ १–३ ॥

१ नेति गो. पाठः । २ तदेति गो. तथेति रा. पा. । ३ सुव्रतमिति गो. पाठः । ४ अपीति गो. पा. ।

यथा शरीरो बालस्य गुप्तः सन्क्लिष्टकर्मणः । विपत्तिः परिभेदो वा न भवेच्च तथा कुरु ॥ ४ ॥
एवं [1]संदिश्य काकुत्स्थो लक्ष्मणं शुभलक्षणम् । मनसा पुष्पकं दध्यावागच्छेति महायशाः ॥ ५ ॥
इङ्गितं स तु विज्ञाय पुष्पको हेमभूषितः । आजगाम मुहूर्तेन समीपे राघवस्य वै ॥ ६ ॥
सोऽब्रवीत्प्रणतो भूत्वा अयमस्मि नराधिप । वश्यस्तव महाबाहो किंकरः समुपस्थितः ॥ ७ ॥
भाषितं रुचिरं श्रुत्वा पुष्पकस्य नराधिपः । अभिवाद्य महर्षींस्त विमानं सोऽध्यरोहत ॥ ८ ॥
धनुर्गृहीत्वा तूणी च खड्गं च रुचिरप्रभम् । निक्षिप्य नगरे चैतौ[2] सौमित्रिभरतावुभौ ॥ ९ ॥
प्रायात्प्रतीचीं हरितं विचिन्वंश्च ततस्ततः । उत्तरामगमच्छ्रीमान्दिशं हिमवतावृताम् ॥ १० ॥
अपश्यमानस्तत्रापि स्वल्पमप्यथ दुष्कृतम् । पूर्वामपि दिशं सर्वामथोऽपश्यन्नराधिपः ॥ ११ ॥
प्रविशुद्धसमाचारामादर्शतलनिर्मलाम् । पुष्पकस्थो महाबाहुस्ततदापश्यन्नराधिपः ॥ १२ ॥
दक्षिणां दिशमाक्रामत्ततो राजर्षिनन्दनः । शैवलस्योत्तरे पार्श्वे ददर्श सुमहत्सरः ॥ १३ ॥
तस्मिन्सरसि तप्यन्तं तापसं सुमहत्तपः । ददर्श राघवः श्रीमाँल्लम्बमानमधोमुखम् ॥ १४ ॥
राघवस्तमुपागम्य तप्यन्तं तप उत्तमम् । उवाच चैं नृपो वाक्यं धन्यस्त्वमसि सुव्रत ॥ १५ ॥
कस्यां योन्यां तपोवृद्ध वर्तसे दृढविक्रम । कौतूहलात्त्वां पृच्छामि रामो दाशरथिर्ह्यहम् ॥ १६ ॥

रा० टी०–नारदवचनश्रवणानंतरकालिकं वृत्तमाह–नारदस्येत्यादिभिः । इदमब्रवीच्च राम इति शेषः ॥ १ ॥

रा० टी०–तदाकारमाह–गच्छेत्यादिभिः । द्विजश्रेष्ठं समाश्वास्य बालस्य शरीरं तु गंधादिभिः युक्तायाम् तैलद्रोण्यां निधाय यथा येन प्रकारेण बालस्तत् शरीरं न क्षीयते तथा विधीयतां श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–नारदस्येत्यादि ॥ १–३ ॥

४–५] ति० टी०–यथा न क्षीयते तथा विधीयतामित्युक्तमेव विवृणोति—यथेति । क्लिष्टकर्मणः शुभाचारस्य बालस्य शरीरः । अर्धचादिः । गुप्तः सन्यथा न क्षीयते तथा विधीयतामिति पूर्वेणान्वयः । विपत्तिः स्वरूपनाशः । शरीरस्येति शेषः । परिभेदः संधिबन्धकेशादिविश्लेषजो रूपभेदश्च । तदुभयं यथा न भवति तथा कुरु ॥ ४ ॥ ५ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—यथेति । क्लिष्टकर्मणः विनष्टक्रियस्य मृतस्येत्यर्थः बालस्य शरीरः विपत्तिः स्वरूपनाशवान् परिभेदः रूपविपर्ययविशिष्टो वा यथा न भवेत् तथा कुरु४

रा० टी०–एवमिति । काकुत्स्थः आगच्छेति मनसा पुष्पकं दध्यौ ॥ ५ ॥

गो० टी०–उक्तार्थस्य विवरणं—यथेत्यादि । बालस्य शरीर इति लिङ्व्यत्ययः । विपत्तिः स्वरूपनाशः । भेदः सन्धिबन्धादिविनिर्मुक्तिः ॥ ४ ॥ ५ ॥

६–९] ति० टी०–पुष्पकस्तदधिष्ठातृचेतनः ॥ ६–९ ॥

रा० टी०–इङ्गितमिति । पुष्पकः इङ्गितमभिप्रायं विज्ञाय आजगाम ॥ ६ ॥

रा० टी०–स इति । हे नराधिप ! तव वश्यः किङ्करः अत एव समुपस्थितः अयमहमस्मि इति स पुष्पकोऽब्रवीत्॥७॥

रा० टी०–भाषितमिति । सः धर्मविरोधिविघातकस्य रामः विमानमध्यरोहत ॥ ८ ॥

रा० टी०–धनुरिति । धनुरादि गृहीत्वा सौमित्रिभरतौ नगरे निक्षिप्य संस्थाप्य विचिन्वन्सन् प्रतीचीं पश्चिमां हरितं दिशं प्रायात् ततोऽनन्तरमुत्तरां दिशमगमत् श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

गो० टी०–इङ्गितमिति । स त्विति । पुष्पकाधिष्ठातृचेतन इत्यर्थः ६–९ ॥

१०] ति० टी०–हरितं दिशं विचिन्वन् । शुद्धतपस्विनमिति शेषः ॥ १० ॥

गो० टी०–प्रायादिति । हरितं दिशं विचिन्वन्निति । शुद्धतपस्विनमिति शेषः ॥ १० ॥

११–१२] ति० टी०–अपश्यमानोऽपश्यन् ॥११॥१२॥

रा० टी०–अपश्यमान इति । तत्र पश्चिमोत्तरयोः स्वल्पमपि दुष्कृतमपश्यमानो रामः पूर्वां दिशमपश्यत् ॥ ११ ॥

रा० टी०–प्रविशुद्धेति । प्रविशुद्धः समाचारो यस्यामत एव आदर्शतलवन्निर्मलां पूर्वामिति शेषः नराधिपोऽपश्यत् ॥ १२ ॥

गो० टी०–अपश्यमान इति । अपश्यमानः अपश्यन् ॥ ११ ॥ १२ ॥

१३–१६] ति० टी०–शैवलस्य शैवलाख्यस्य विन्ध्यसमीपदक्षिणभागवर्तिगिरेः ॥ १३–१६ ॥

रा० टी०–दक्षिणामिति । राजर्षिनन्दनः दक्षिणां दिशमाक्रामत् ततोऽनन्तरं शैवलस्य तदभिधविन्ध्यासमीपदक्षिणभागवर्त्तिपर्वतस्य उत्तरे पार्श्वे सुमहत्सरो ददर्श ॥ १३ ॥

रा० टी०–तस्मिन्निति । तस्मिन्सरसि सुमहत्तपस्त-

१ आदिश्येति गो. पा. । २ वीरावित्रि गो. पा. । ३ स तदेति गो. पा. ।

कोऽर्थो मनीषितस्तुभ्यं स्वर्गलाभो परोऽथवा । वराश्रयो यदर्थं त्वं तपस्यन्यैः सुदुश्चरम् ॥ १७ ॥
यमाश्रित्य तपस्तप्तं श्रोतुमिच्छामि तापस । ब्राह्मणो वासि भद्रं ते क्षत्रियो वासि दुर्जयः ॥
वैश्यस्तृतीयो वर्णो वा शूद्रो वा सत्यवाग्भव । ॥ १८ ॥
इत्येवमुक्तः स नराधिपेन अवाक्शिरा दाशरथाय तस्मै ।
उवाच जातिं नृपपुंगवाय यत्कारणं चैव तपःप्रयत्नः । ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

षट्सप्ततितमः सर्गः ।

राघवप्रश्नमाकर्ण्य शूद्रोऽहं सशरीरः स्वर्गं जिगमिषुः शम्बूकनामेति कथयतस्तस्य दाशरथिः खड्गेन शिरश्चिच्छेद ततस्तुष्टान्देवान्मृतबालजीवनमयाचच्च तथात्वित्युक्तवद्भिर्निर्जरैरेगस्त्याश्रममासाद्य तत आतिथ्यं तद्दिश्राणितमहार्हाभरण जग्राह ततस्तद्भूषणपूर्ववृत्तमप्यपृच्छत्तम् ।

तस्य तद्वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः । अवाक्शिरास्तथाभूतो वाक्यमेतदुवाच ह ॥ १ ॥
शूद्रयोन्यां प्रजातोऽस्मि तप उग्रं समास्थितः । देवत्वं प्रार्थये राम सशरीरो महायशः ॥ २ ॥
न मिथ्याहं वदे राम देवलोकजिगीषया । शूद्रं मां विद्धि काकुत्स्थ शम्बूको नाम नामतः ॥ ३ ॥
भाषतस्तस्य शूद्रस्य खड्गं सुरुचिरप्रभम् । निष्कृष्य कोशाद्विमलं शिरश्चिच्छेद राघवः ॥ ४ ॥

प्यन्तमधोमुखं यथा भवति तथा लम्बमानं तापसं राघवो ददर्श ॥ १४ ॥

रा० टी०–राघव इति । राघवः उवाच तदाकारमाह त्वं धन्योसि ॥ १५ ॥

रा० टी०–कस्यामिति । हि तपोदृढ त्वं कस्यां योन्यां वर्तसे उत्पन्नोसीत्यर्थः इति कौतूहलात् त्वां रामोहं पृच्छामि १६

गो० टी०–दक्षिणामिति । शैवलाख्यस्य विन्ध्यसमीपवर्तिगिरेः ॥ १३–१६ ॥

१७] ति० टी०–कोऽर्थ इति । तुभ्यं तव वराश्रयः प्रीतदेवतावरलभ्यो मनीषितोऽभीष्टोऽर्थः कः स्वर्गलाभः परोऽन्यो वा यदर्थं तपसि ॥ १७ ॥

रा० टी०–क इति । अन्यैः सुदुश्चरं तपः यदर्थं तपसि स मनीषितोर्थः स्वर्गलाभः कः कश्चिदपरो वा तद्वदेत्यर्थः १७

गो० टी०–कोर्थ इत्यादि । तुभ्यं तव । वराश्रयः तपःप्रीतदेवतावरलभ्यो मनीषितोभीष्टोर्थः स्वर्भोगो वा अन्यो वा । यमाश्रित्य ॥ १७ ॥

१८–१९] ति० टी०–सत्यवाग्भव सत्यं वद ॥ १८ ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

रा० टी०–उपसंहरन्नाह—यमिति । यं देहमाश्रित्य तपस्तप्तं तेन देहेनोपलक्षितस्त्वं ब्राह्मणो वासि क्षत्रियो वासीति च श्रोतुमिच्छामि ॥ १८ ॥

रा० टी०–इतीति । अवाक्शिरास्तापसः जातिं यत्कारणमुद्दिश्य तपःप्रयत्नस्तच्च दाशरथायोवाच ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

गो० टी०–ब्राह्मण इति । सत्यवाग्भव सत्यं कथयेत्यर्थः ॥ १८ ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

१–२] ति० टी०–अथ शूद्रशिरश्छेदेन बालोजीवनम्–तस्येति ॥ १ ॥ २ ॥

रा० टी०–तापसवचनमेव वर्णयितुमाह—तस्येति । अवाक्शिरास्तापसः एतदुवाच ॥ १ ॥

रा० टी०–तदाकारमाह–शूद्रेति । उग्रं तप आस्थितोऽहं शूद्रयोन्यां प्रजातोस्मि सशरीरः दिव्यशरीरे आस्थायुक्तोहं देवत्वमितो गमनं प्रार्थये ॥ २ ॥

गो० टी०–तस्येत्यादि । ॥ १–३ ॥

३] ति० टी०–मिथ्यावचनाभावे हेतुः—देवलोकजिगीषया ॥ ३ ॥

रा० टी०–नेति । अहं मिथ्या न वदे अतः देवलोकजिगीषया विशिष्टं मां शंबूकं नाम शूद्रं विद्धि जानीहि ॥ ३ ॥

४] ति० टी०–तस्य शिर इत्वन्वयः ॥ ४ ॥

रा० टी०–भाषत इति । राघवः शूद्रस्य शिरः कोशात्

---

१ तपस्यसीति गो. पा. । २ भुग्वेति गो. पा. । ३ प्रसूतोऽस्मि शम्बूको नाम नामत इति गो. । ४ तप उग्रं समास्थितम् इति गो. पाठः ।

तस्मिञ्शूद्रे हते देवाः सेन्द्राः साग्निपुरोगमाः । साधुसाध्विति काकुत्स्थं ते[1] शशंसुर्मुहुर्मुहुः ॥ ५ ॥
पुष्पवृष्टिर्महत्यासीद्दिव्यानां सुसुगन्धिनाम् । पुष्पाणां वायुमुक्तानां सर्वतः प्रपपात ह ॥ ६ ॥
सुप्रीताश्चाब्रुवन्रामं देवाः सत्यपराक्रमम् । सुरकार्यमिदं देवै सुकृतं ते महामते ॥ ७ ॥
गृहाण च वरं सौम्य यं त्वमिच्छस्यरिंदम । स्वर्गभाङ् नहि शूद्रोऽयं त्वत्कृते रघुनन्दन ॥ ८ ॥
देवानां भाषितं श्रुत्वा रामः सत्यपराक्रमः । उवाच प्राञ्जलिर्वाक्यं सहस्राक्षं पुरंदरम् ॥ ९ ॥
यदि देवाः प्रसन्ना मे द्विजपुत्रः स जीवतु । दिशन्तु वरमेतं मे ईप्सितं परमं मम ॥ १० ॥
ममापचाराद्बालोऽसौ ब्राह्मणस्यैकपुत्रकः । अप्राप्तकालः कालेन नीतो वैवस्वतक्षयम् ॥ ११ ॥
तं जीवयथ भद्रं वो नानृतं कर्तुमर्हथ । द्विजस्य संश्रुतोऽर्थो मे जीवयिष्यामि ते सुतम्॥१२॥
राघवस्य तु तद्वाक्यं श्रुत्वा विबुधसत्तमाः । प्रत्युचू राघवं प्रीता देवाः प्रीतिसमन्वितम् ॥ १३ ॥
निर्वृतो भव काकुत्स्थ सोऽस्मिन्नहनि बालकः । जीवितं प्राप्तवान्भूयः समेतश्चापि बन्धुभिः ॥ १४ ॥

खड्गं निष्कृष्य विमलं मलसंसर्गराहित्यं यथा भवति तथा चिच्छेद नचैतत्तपश्चर्यायां विरुद्धत्वे परमात्मदर्शनम् परमपुरुषार्थप्रापकरामशस्त्रकरणकहननं च विरुद्धम् निषिद्धाचरणस्य निषिद्धफलकत्वादिति वाच्यम् तस्य परमपुरुषार्थप्रापकस्त्यावलम्बित्वेन विरोधाभावात् एतेन शीघ्रं परमात्मप्राप्त्यर्थमेव विरुद्धाचरणमप्यनेन कृतमिति बोध्यम् एतेन तस्यार्तप्रपन्नत्वं व्यक्तम् तत्प्रणामाशयकरणेन प्रणामादिकरणेतिदयालू रामो न हनिष्यतीति तन्निश्चयो व्यक्तः ॥ ४ ॥

गो० टी०–भाषत इति । तस्य शिर इत्यन्वयः ॥४॥५॥

५] ति० टी०–अग्निपुरोगमो वायुब्रह्मा तत्सहिताः ॥५॥

रा० टी०–तस्मिन्निति । देवाः साधुसाध्विति काकुत्स्थं शशंसुः ॥ ५ ॥

६-७] ति० टी०–पुष्पवृष्टेः प्रपचनम्—दिव्यानामिति । प्रपपात । वृष्टिरिति शेषः ॥ ६ ॥ ७ ॥

रा० टी०–पुष्पेति । महती पुष्पवृष्टिरासीत् तत्प्रकारमाह सुगन्धिनाम् पुष्पाणां वृष्टिरिति शेषः सर्वतः प्रपपात सुप्रीता इति सुप्रीताः देवाः सत्यपराक्रमं राममब्रुवन् तदाकारमाह इदं शूद्रतपोनिवारणरूपम् सुरकार्यं त्वया सुकृतम् ॥ ६ ॥ ७ ॥

गो० टी०–पुष्पवृष्टिरिति । पुष्पवृष्टिः पपातेति शेषः । पुष्पवृष्टिश्च महतीति पाठे तस्यैव प्रपञ्चनम् दिव्यानामित्यादि । प्रपपातेति वृष्टिरिति शेषः ॥ ६ ॥ ७ ॥

८-९] ति० टी०–किंनाम सुरकार्यं तत्राहुः—स्वर्गभागिति । हि यतः शूद्रस्तपसा स्वर्गानर्हः सोऽसौ त्वत्कृते त्वत्कृततपोनिवर्तनेन स्वर्गभाङ् न जातः, अतो देवकार्यं कृतमिति भावः ॥ ८ ॥ ९ ॥

रा० टी०–गृहाणेति । त्वत्कृते त्वत्कर्तृकच्छेदने सति अयं शूद्रो न अतः स्वर्गभाक् अतः यत्त्वमिच्छसि तद्वरं गृहाण एतेन दुष्टाचरणप्रवृत्तौ देवानां दुःखं भवतीति सूचितम् ॥ ८ ॥

रा० टी०–देवानामिति । रामः पुरन्दरमुवाच ॥ ९ ॥

गो० टी०–गृहाणेति । सुरकार्यमेवाह–स्वर्गभागिति हि यस्माच्छूद्रः तपसा स्वर्गं नार्हः सोऽसौ त्वत्कृततपोनिवर्तनेन स्वर्गभाक् न कृतः । तस्मादेव देवकार्यं कृतमित्यर्थः । ममेति । वैवस्वतक्षयं यमगृहम् ॥ ८–११ ॥

१०] ति० टी०–एतं वरं मे दिशन्तु । एतद्वरदानमेव ममेप्सितमित्यन्वयात्र ममेति पुनरुक्तम् ॥ १० ॥

रा० टी०–तदाकारमाह–यदीति । हे देवाः ! यदि यूयं प्रसन्नाः तर्हि स मृतो द्विजपुत्रः जीवतु इदम्परमभीप्सितं वरं मे दिशन्तु एतेन दत्ताधिकाराणामिन्द्रादीनां सम्माननं सूचितम् ॥ १० ॥

११] ति० टी०–वैवस्वतक्षयं यमसदनम् ॥ ११ ॥

रा० टी०–तादृशवरयाचने हेतुमाह—ममेति । ब्राह्मणस्य एकपुत्रकः अनुकम्पितैकपुत्रः बालः अत एव अप्राप्तकालः ममापचारात् कालेन मृत्युना वैवस्वतस्य क्षयं निवासं नीतः एतेन परमसत्यवतोभिप्रायं विज्ञाय पूर्वमेव तदभिप्रेतपूर्तिर्न कृतेति पश्चात्तापः सूचितः ॥ ११ ॥

१२] ति० टी०–ते तव सुतं जीवयिष्यामीत्ययमर्थो मे मया द्विजस्य संश्रुतः प्रतिज्ञातः, अतस्तं जीवयथ । मामनृतं कर्तुं नार्हथ ॥ १२ ॥

रा० टी०–तमिति । ते सुतमहं जीवयिष्यामि इति द्विजस्यार्थः मे मया संश्रुतः प्रतिज्ञातः अतः तं बालं जीवयथ अनृतं कर्तुं नार्हथ ॥ १२ ॥

गो० टी०–तमिति । द्विजस्येति । ते तव सुतं जीवयिष्यामीत्ययमर्थो मे मया द्विजस्य संश्रुतः प्रतिज्ञातः ॥ १२ ॥ १३ ॥

१३] ति० टी०–प्रीतिसमन्वितं युक्तम् ॥ १३ ॥

रा० टी०–राघवस्येति । देवाः राघवं प्रत्यूचुः ॥ १३ ॥

१४] ति० टी०–अस्मिन्नहनि शूद्रशिरश्छेददिवसे विनापि वरं जीवितं प्राप्तवानित्यर्थः ॥ १४ ॥

रा० टी०–तदाकारमाह–निर्वृत इति । बालकः अस्मि-

---

१ प्रेति गो. तमिति रा. पा. । २ सौम्येति गो. पा. । ३ राघवः सुसमाहित इति गो. पा. । ४ या त इति गो. पाठः ।

यस्मिन्मुहूर्ते काकुत्स्थ शूद्रोऽयं विनिपातितः । तस्मिन्मुहूर्ते बालोऽसौ जीवेन समयुज्यत ॥ १५ ॥
स्वस्ति प्रामुहि भद्रं ते साधु याम नरर्षभ । अगस्त्यस्याश्रमपदं द्रष्टुमिच्छाम राघव ॥ १६ ॥
तस्य दीक्षा समाप्ता हि ब्रह्मर्षेः सुमहात्मनः । द्वादशं हि गतं वर्षं जलशय्यां समासतः ॥ १७ ॥
काकुत्स्थ तद्गमिष्यामो मुनिं समभिनन्दितुम् । त्वं चापि[2] गच्छ भद्रं ते द्रष्टुं तमृषिसत्तमम् ॥ १८ ॥
स तथेति प्रतिज्ञाय देवानां रघुनन्दनः । आरुरोह विमानं तं पुष्पकं हेमभूषितम् ॥ १९ ॥
ततो देवाः प्रयातास्ते विमानैर्बहुविस्तरैः । रामोऽप्यनुजगामाशु कुम्भयोनेस्तपोवनम् ॥ २० ॥
दृष्ट्वा तु देवान्संप्राप्तानगस्त्यस्तपसां निधिः । अर्चयामास धर्मात्मा सर्वांस्तानविशेषतः ॥ २१ ॥
प्रतिगृह्य ततः पूजां संपूज्य च महामुनिम् । जग्मुस्ते त्रिदशा हृष्टा नाकपृष्ठं सहानुगाः[3] ॥ २२ ॥
गतेषु तेषु काकुत्स्थः पुष्पकादवरुह्य च । ततोऽभिवादयामास अगस्त्यमृषिसत्तमम् ॥ २३ ॥
सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा । आतिथ्यं परमं प्राप्य निषसाद नराधिपः ॥ २४ ॥
तमुवाच महातेजाः कुम्भयोनिर्महातपाः । स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव ॥ २५ ॥
त्वं मे बहुमतो राम गुणैर्बहुभिरुत्तमैः । अतिथिः पूजनीयश्च मम राजन्हृदि स्थितः[4] ॥ २६ ॥
सुरा हि कथयन्ति त्वामागतं शूद्रघातिनम् । ब्राह्मणस्य तु धर्मेण त्वया जीवापितः सुतः ॥ २७ ॥

ऽहनि जीवितं प्राप्तवान् बंधुभिस्समेतश्च अभूदिति शेषः अतस्त्वं निर्वृतः परमानन्दयुक्तो भव ॥ १४ ॥

गो० टी०-निर्वृत इति । अस्मिन्नहनि त्वया शूद्रशिरश्छेददिवसे वरं विनापि स्वयमेव जीवितं प्राप्तवानित्यर्थः ॥ १४ ॥ १५ ॥

१५] ति० टी०-उक्तमेवार्थमहःशब्दविवाक्षितार्थप्रदर्शनेन प्रकाशयन्ति—यस्मिन्मुहूर्त इति ॥ १५ ॥

रा० टी०-तदेव भङ्ग्यन्तरेणाह-यस्मिन्निति । यस्मिन्मुहूर्ते शूद्रस्त्वया विनिपातितः तस्मिन्मुहूर्त्ते एव बालः जीवेन समयुज्यत ॥ १५ ॥

१६-१८] ति० टी०-यामेति लोट् ॥ १६-१८ ॥

रा० टी०-स्वस्तीति । त्वं स्वस्ति प्रामुहि सर्वान् प्रापय ते भद्रं वयं तु अगस्त्यस्याश्रमपदं द्रष्टुमिच्छाम अतः याम॥१६॥

रा० टी०-तत्र गमने हेतुमाह—तस्येति । जलशय्यां समासतः तस्यागस्त्यस्य द्वादशं वर्षं गतम् अतः दीक्षा समाप्ता तत्तस्माद्धेतोः मुनिं समभिनन्दितुं गमिष्यामः त्वमपि ऋषिसत्तमं द्रष्टुं गच्छ श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०-स्वस्तीति । यामेति लोडुत्तमबहुवचनम् ॥ १६—२० ॥

१९-२०] ति० टी०-तथेति प्रतिज्ञाय । देवानाम् देवान्प्रति तथास्त्वित्युक्त्वेत्यर्थः ॥ १९ ॥ २० ॥

रा० टी०-स इति । रघुनन्दनः पुष्पकमारुरोह ॥ १९ ॥

रा० टी०-तत इति । देवाः बहुविस्तरैर्विमानैः कुंभयोनेस्तपोवनं प्रयाताः रामोप्यनुजगाम ॥ २० ॥

२१-२५] ति० टी०-अविशेषतः । अपक्षपाततत इत्यर्थः ॥ २१—२५ ॥

रा० टी०-दृष्ट्वेति । अगस्त्यः तान्देवानर्चयामास॥२१॥

रा० टी०-प्रतीति । त्रिदशाः नाकपृष्ठं स्वर्गं जग्मुः॥२२॥

रा० टी०-गतेष्विति । काकुत्स्थः पुष्पकादवरुह्य अगस्त्यमभिवादयामास ॥ २३ ॥

रा० टी०-स इति । नराधिपः स रामः परमातिथ्यं प्राप्य निषसाद ॥ २४ ॥

रा० टी०-तमिति । कुम्भयोनिः तं राममुवाच तदाकारमाह दिष्ट्या भाग्यवशेन त्वं प्राप्तोसि ॥ २५ ॥

गो०टी०-दृष्ट्वेति। अविशेषतः अपक्षपातत इत्यर्थः२१-२५

२६] ति० टी०-उत्तमैर्बहुभिर्गुणैस्त्वं बहुमतो बहुमान्यः। अतिथित्वाच्च पूज्यः । विशेषतश्च त्वं मे पूज्य इत्याह-मम हृदि स्थित इति । अन्तर्यामिस्वरूपत्वादिति भावः । अत एव सदा स्मरणविषयतयापि हृदि स्थितः, अतो ध्येयत्वाच्च त्वं पूज्यः । यद्वा हृदि स्थितः । तेन स्वस्वरूपत्वमप्युक्तम् ॥२६॥

रा० टी०-त्वमिति । उत्तमैर्बहुभिर्गुणैर्वृतः मम हृदि स्थितः बहुमतः अत्यन्तमीप्सितः त्वमतिथिः पूजनीय एव २६

गो० टी०-त्वमिति । हृदि स्थित इति । परब्रह्मभूतत्वान्मम त्हृदये सदा स्थित इत्यर्थः ॥ २६ ॥

२७] ति० टी०-ब्राह्मणस्य सुतः । शूद्रहननधर्मेण त्वया जीवापितो जीवनं प्रापितः । पुगार्षः ॥ २७ ॥

रा० टी०-सुरा इति । येन त्वया ब्राह्मणस्य सुतः जीवापितः जीवं जीवनमापितः प्रापितः तं शूद्रघातिनमागतं त्वां सुराः कथयन्ति अकथयन् ॥ २७ ॥

गो० टी०-सुरा हीति । जीवापितः जीवनं प्रापितः । पुगार्षः । अत्र त्वयेत्यत्र येति गायत्र्यक्षरं त्रयोविंशमित्याहुः ॥ २७—३० ॥

---

१ सुवेरिति गो. पाठः । २ आगच्छेति गो. पां. । ३ अनुगैरिति गो. पा. । ४ नित्यमिति गो. पाठः ।

उष्यतां चेह रजनीं सकाशे मम राघव । त्वं हि नारायणः श्रीमांस्त्वयि सर्वं प्रतिष्ठितम्॥२८॥
त्वं प्रभुः सर्वदेवानां पुरुषस्त्वं सनातनः । प्रभाते पुष्पकेण त्वं गन्ता स्वपुरमेव हि ॥ २९ ॥
इदं चाभरणं सौम्य निर्मितं विश्वकर्मणा । दिव्यं दिव्येन वपुषा दीप्यमानं स्वतेजसा ॥ ३० ॥
प्रतिगृह्णीष्व काकुत्स्थ मत्प्रियं कुरु राघव । दत्तस्य हि पुनर्दाने सुमहत्फलमुच्यते ॥ ३१ ॥
भरणे हि भवाञ्शक्तः फलानां महतामपि । त्वं हि शक्तस्तारयितुं सेन्द्रानपि दिवौकसः॥ ३२ ॥
तस्मात्प्रदास्ये विधिवत्तत्प्रतीच्छ नराधिप । [दिव्यैर्माभरणं चित्रं प्रदीप्तमिव भास्करम्] ॥
अथोवाच महात्मानमिक्ष्वाकूणां महारथः । ॥ ३३ ॥
[रामो मतिमतां श्रेष्ठः क्षत्रधर्ममनुस्मरन् । प्रतिग्रहोऽयं भगवन्ब्राह्मणस्याविगर्हितः ॥
क्षत्रियेण कथं विप्र प्रतिग्राह्यं भवेत्ततः । प्रतिग्रहो हि विप्रेन्द्र क्षत्रियाणां सुगर्हितः ॥
ब्राह्मणेन विशेषेण दत्तं तद्वक्तुमर्हसि । एवमुक्तस्तु रामेण प्रत्युवाच महानृषिः ॥
आसन्कृतयुगे राम ब्रह्मभूते पुरायुगे । अपार्थिवाः प्रजाः सर्वाः सुराणां तु शतक्रतुः॥
ताः प्रजा देवदेवेशं राजार्थं समुपाद्रवन् । सुराणां स्थापितो राजा त्वया देव शतक्रतुः ॥
प्रयच्छास्मासु लोकेश पार्थिवं नरपुंगवम् । यस्मै पूजां प्रयुञ्जाना धूतपापाश्चरेमहि ॥
न वसामो विना राज्ञा एष नो निश्चयः परः । ततो ब्रह्मा सुरश्रेष्ठो लोकपालान्सवासवान् ॥
समाहूयाब्रवीत्सर्वांस्तेजोभागान्प्रयच्छत । ततो ददुर्लोकपालाः सर्वे भागान्स्वतेजसः ॥

२८] ति० टी०—नारायणो नारस्य जीवसमूहस्य स्थानम् । तदेवाह-त्वयि सर्वमिति ॥ २८ ॥

२९] ति० टी०—सनातनः पुरुषो ब्रह्म ॥ २९ ॥

रा० टी०—उष्यतामिति । यतः त्वम् सर्वभूतानां प्रभुः अत एव त्वं नारायणः नरेण नीत्यैव अयते गच्छति सनातनः पुरुषस्त्वमसि अत एव त्वयि सर्वं प्रतिष्ठितमतः मम सकाशे समीपे रजनी उष्यतां प्रभाते एव स्वपुरं गन्ता भवान् इति शेषः श्लोकद्वयमेकान्वयि ॥ २८ ॥ २९ ॥

३०] ति० टी०—दिव्येन वपुषा संनिवेशेन दिव्यम्, अत एव स्वतेजसा दीप्यमानम् । आभरणं वलयरूपम् ॥३०॥

३१] ति० टी०—ननु क्षत्रियस्य ब्राह्मणाद्दत्तग्रहणमनुचितं तत्राह—मत्प्रियं कुर्विति । मत्प्रियार्थमनुचितमपि कार्यमित्याशयः । किं च राजत्वाद्दित्तहस्ततया त्वद्दर्शनस्य ममानुचिततया एतद्ग्रहणे मम प्रियं भवति, तव च दोषो नास्ति । भक्तदत्ताङ्गीकारे इव हविषोऽङ्गीकार इव च दोषाभावाच्चेत्याशयः । ननु तव किं प्रियं तत्राह—दत्तस्येति । येन केनापि दत्तस्यानुपभुज्य पुनः स्वेष्टदेवादिभ्यो दाने महत्फलमुच्यते । 'लब्धावष्टगुणं पुण्यम्' इति स्मरणात् । एवं च महाफलहेतुत्वान्नुभ्यं तद्दानं मम प्रियमिति भावः ॥ ३१ ॥

रा० टी०—इदमिति । विश्वकर्मणा निर्मितं स्वतेजसा दीप्यमानमिदमाभरणं वलयरूपमित्यर्थः दिव्येन वपुषोपलक्षितस्त्वं प्रतिगृह्णीष्व धारय अत एव मत्प्रियं कुरु प्रियकरणे हेतुमाह दत्तस्य मनसा समर्पितस्य वस्तुनः पुनर्दाने महत्फलम् अत्यर्थनिष्पत्तिरुच्यते श्लोकद्वयमेकान्वयि ॥३०॥३१॥

गो० टी०—दत्तस्येति । पारितोषिकतया येन केनापि दत्तस्योत्तमवस्तुनः स्वयमनुपभुज्यान्यस्मै दानं सुमहत्फलमुच्यते । भरण इति । मरुतां देवानामपि । भरणे रक्षणे । अपिशब्दात् किमुतैतद्धरण इत्यर्थः । भरणेपि भवान् शक्तः फलानां महतामपीति च पाठः ॥ ३१-४७ ॥

३२-३३] ति० टी०—नन्वन्यस्मा एव तर्हि देयं तत्राह—भरणे हीति । आभरणस्य धारणे भवानेव शक्तो योग्यः । किं च महतामपि फलानां ब्रह्मलोकादीनां दाने च त्वं शक्त इति शेषः । ननु मत्तोऽपि महद्भ्य इन्द्रादिभ्यो दीयतां तत्राह—त्वं हीति । ते त्वत्तो न महान्त इति भावः ॥ ३२ ॥ ३३ ॥

रा० टी०—ननु मद्धारणेन कार्यनिष्पत्तिरित्यत आह—भरण इति । महताम् अत्युत्कृष्टानां फलानां भरणे धारणे दाने इत्यर्थः भवानेव शक्तः ननु फलदायकत्वेन देवाः प्रसिद्धा इत्यत आह सेन्द्रान् दिवौकसोपि तारयितुं स्वलोकं प्रापयितुं त्वमेव समर्थः एतेन अगस्त्यस्य साकेतप्राप्तीच्छा सूचिता ॥ ३२ ॥

रा० टी०—तस्मादिति । तस्मात् सर्वथेष्टत्वाद्धेतोः विधिवत्प्रदास्ये आभरणमिति शेषः तत्प्रतीक्ष धारय अथ अनन्तरमिक्ष्वाकूणां महारथो रामः महात्मानमगस्त्यमुवाच ननु किमुत्राचेत्यत आह दीप्तस्य तस्याभरणस्य आगममेव प्रष्टुमुपचक्रमे अर्धं पृथक् ॥ ३३ ॥

१ इदमुष्यतांचेहरजनीमिति अष्टाविंशपद्यपूर्वार्धोत्तरं दृश्यते गो. पुस्तके । २ सेन्द्राणां मरुतामिति गो. पाठः । ३ प्रतीक्षेति रा. पा. । ४ अर्धमिदमधिकं गो. पुस्त. । ५ इमानि पद्यान्यधिकानि गो. पु. ।

अक्षुपच्च ततो ब्रह्मा यतो जातः क्षुपो नृपः । तं ब्रह्मा लोकपालानां समांशैः समयोजयत् ॥
ततो ददौ नृपं तासां प्रजानामीश्वरं क्षुपम् । तत्रैन्द्रेण च भागेन महीमाज्ञापयन्नृपः ॥
वारुणेन तु भागेन वपुः पुष्यति पार्थिवः । कौबेरेण तु भागेन वित्तपाभां ददौ तदा ॥
यस्तु याम्योऽभवद्भागस्तेन शास्ति स्म स प्रजाः । तत्रैन्द्रेण नरश्रेष्ठ भागेन रघुनन्दन ॥
प्रतिगृह्णीष्व भद्रं ते तारणार्थं मम प्रभो । तद्रामः प्रतिजग्राह मुनेस्तस्य महात्मनः ॥
दिव्यमाभरणं चित्रं प्रदीप्तमिव भास्करम् । प्रतिगृह्य ततो रामस्तदाभरणमुत्तमम्] ॥
आगमं तस्य दीप्तस्य प्रष्टुमेवोपचक्रमे । अत्यद्भुतमिदं दिव्यं वपुषा युक्तमद्भुतम् ॥ ३४ ॥
कथं वा भवता प्राप्तं कुतो वा केन वा हृतम् । कौतूहलतया ब्रह्मन्पृच्छामि त्वां महायशः ॥ ३५ ॥
आश्चर्याणां बहूनां हि निधिः परमको भवान् । एवं ब्रुवति काकुत्स्थे मुनिर्वाक्यमथाब्रवीत् ॥
शृणु राम यथावृत्तं पुरा त्रेतायुगे युगे । ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ।

पुरा त्रेतायुगे तपश्चरितुं पक्षिमृगवर्जितमरण्यं गच्छन्नहमेकं स्वर्गिणं विमानादवरुह्य शवं भक्षयन्तं निशाम्य कथमहो चारुरूपस्येदृशं गर्हितं चर्वणमिति तमपृच्छमित्यगस्त्यो राममकथयत् ।

पुरा त्रेतायुगे राम बभूव बहुविस्तरम् । समन्ताद्योजनशतं विमृगं पक्षिवर्जितम् ॥ १ ॥
तस्मिन्निर्मानुषेऽरण्ये कुर्वाणस्तप उत्तमम् । अहमाक्रमितुं सौम्य तदारण्यमुपागमम् ॥ २ ॥

३४] ति० टी०-किंविषयकमुवाचेत्यत्राह—आगममिति । प्राप्तिमार्गमित्यर्थः । इदं दिव्यमत्यद्भुतम् । अत्याश्चर्यमित्यर्थः । अद्भुतं यथा भवति तथा वपुषा संनिवेशविशेषेण युक्तम् ॥ ३४ ॥

रा० टी०-अतीति । वपुषा अवयवसंनिवेशेन अद्भुतं यथा भवति तथा युक्तमत एव अत्यद्भुतमिदं दिव्यमाभरणं भवता कथं केन प्रकारेण कुतः कस्माद्धेतोश्च प्राप्तं केन चाहृतम् ॥ ३४ ॥

गो० टी०-प्रतिगृह्णीति । आगमं प्राप्तिमार्गम् ॥ ४८ ॥

३५] ति० टी०-कथं केन प्रकारेण कुतो हेतोः केन पुरुषेणाहृतं दत्तम् ॥ ३५ ॥

रा० टी०-कौतूहलेति । भवान् बहूनामाश्चर्याणां परमको निधिः अतः कौतूहलतया त्वां पृच्छामि ॥ ३५ ॥

गो० टी०-अत्यद्भुतमिति । कुतो वा केन वा निमित्तेन केन पुरुषेण वा हृतमुपहृतम् । दत्तमिति यावत् ४९॥५०

३६] ति० टी०-पुरा त्रेतायुगे युगे पूर्वतनत्रेतायुगाख्ये युगे ॥ ३६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

१ तदिति गो. पाठः ।

रा० टी०-एवमिति । अयुगे युगविलक्षणे त्रेतायुगे यथावृत्तं तथा त्वं शृणु इति मुनिर्वाक्यमब्रवीत् ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

गो० टी०-एवमिति । त्रेतायुगे त्रेतायुगाख्ये ९१ ॥९२

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

१] ति० टी०-अथ तत्प्राप्तिकथनम्—पुरेति । पूर्वचतुर्युगवर्तित्रेतायुगे बहुविस्तरं बहुविस्तारं पक्षिवर्जितमरण्यमभूदिति शेषः ॥ १ ॥

रा० टी०-तद्वृत्ताकारमाह-पुरेत्यादिभिः । विमृगं मृगरहितं पक्षिवर्जितम् समंतात् योजनशतमत एव बहुविस्तरमरण्यमिति शेषः बभूव ॥ १ ॥

गो० टी०-पुरेत्यादि । पुरा त्रेतायुगे पूर्वचतुर्युगवर्तित्रेतायुगे । बहुविस्तरं बहुविस्तारम् । पक्षिवर्जितमिति । अरण्यमभूदिति शेषः ॥ १ ॥

२] ति० टी०-तस्मिन्नरण्ये तदेकदेशे उत्तमं तपः कुर्वाणोऽहं तदारण्यमाक्रमितुमासमन्तात्पर्यटनेन कृत्स्नमवगन्तुमुपागममुपगतवानस्मि ॥ २ ॥

तस्य रूपमरण्यस्य निर्देष्टुं न शशाक ह । फलमूलैः सुखास्वादैर्बहुरूपैश्च कानने[1]ः ॥ ३ ॥
तस्यारण्यस्य मध्ये तु सरो योजनमायतम् । हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् ॥ ४ ॥
पद्मोत्पलसमाकीर्णं समतिक्रान्तशैवलम् । तदाश्चर्यमिवात्यर्थं सुखास्वादमनुत्तमम् ॥ ५ ॥
अरजस्कं तदाक्षोभ्यं श्रीमत्पक्षिगणायुतम् । तस्मि[3]न्सरःसमीपे तु महदद्भुतमाश्रमम् ॥ ६ ॥
पुराणं पुण्यमत्यर्थं तपस्विजनवर्जितम् । तत्राहमवसं रात्रिं नैदाघीं पुरुषर्षभ ॥ ७ ॥
प्रभाते कल्यमुत्थाय सरस्तदुपचक्रमे । अथापश्यं शवं तत्र सुपुष्टमरैजः क्वचित् ॥ ८ ॥
[पङ्क्ति भेदेन पुष्टाङ्गं समाश्रितसरोवरम् ।]
तिष्ठन्तं परया लक्ष्म्या तस्मिंस्तोयाशये नृप । तमर्थं चिन्तयानोऽहं मुहूर्तं तत्र राघव ॥ ९ ॥
विष्टि[6]तोऽस्मि सरस्तीरे किन्विदं स्यादिति प्रभो । अथापश्यं मुहूर्तात्तु दिव्यमद्भुतदर्शनम् ॥ १० ॥
विमानं परमोदारं हंसयुक्तं मनोजवम् । अत्यर्थं स्वर्गिणं त विमाने रघुनन्दन ॥ ११ ॥
उपास्तेऽप्सरसां वीर सहस्रं दिव्यभूषणम् । गायन्ति कांश्चिद्रम्याणि वादयन्ति तथापराः॥१२॥

रा० टी०–तस्मिन्निति । तस्मिन्नरण्ये तदेकदेश उत्तमं तपः कुर्वाणोहं तदरण्यमाक्रमितुं समंततः पर्यटितुमुपागमम्॥२॥

गो० टी०–तस्मिन्निति । तस्मिन्नरण्ये तदेकदेशे । तपः ऽहं तदरण्यमाक्रमितुम् आसमन्तात्पर्यटनं कृत्वा कात्स्न्येनावगन्तुमुपागमम् उपगतवान् ॥ २ ॥

३–४] ति० टी०–तस्य रूपमिति । सुखावहम् स्वरूपमित्यर्थः । न शशाक न शक्तवान् । अपरोक्षे लिडार्षः । तदेवाह—फलमूलैरिति ॥ ३–४ ॥

रा० टी०–तस्येति । फलादिभिरुपलक्षितस्य तस्यारण्यस्य रूपं निर्देष्टुमेतादृशमिति वक्तुं न शशाक कश्चिदपीति शेषः ॥ ३ ॥

रा० टी०–तस्येति । योजनमायतं पद्मोत्पलैस्समाकीर्णं समतिक्रान्तशैवलं शैवलरहितमित्यर्थः सुखं सुखकरमास्वादमास्वादविशिष्टतोयं यस्य अत्यर्थमाश्चर्यमिव अक्षोभ्यं संचालयितुमशक्यं पक्षिगणैरायतं तस्यारण्यस्य मध्ये सरोऽस्तीति शेषः सार्धं श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०–तस्येति । निर्देष्टुं परिज्ञातुम् । न शशाक नाशक्नुवम् । तस्य रूपमिति । सुखावहं रूपमित्यर्थः ॥३॥४॥

५–६] ति० टी०–सुखास्वादं सुखावहप्राशनपानीयवत् ॥ ५ ॥ ६ ॥

गो० टी०–पद्मेति । सुखास्वादम् । सुखावहप्राशनपानीयवदित्यर्थः ॥ ५ ॥

रा० टी०–तस्मिन्निति । तपस्विजनवर्जितमाश्रमं तस्मिन् सरस्समीपेऽस्तीति शेषः ॥ ६ ॥

गो० टी०–अरजस्कमिति । अरजस्कं निर्मलम् ॥ ६ ॥

७] ति० टी०–नैदाघीं निदाघसंबन्धिनीम् ॥ ७ ॥

रा० टी०–तत्रेति । तत्र सरस्समीपे नैदाघीं रात्रिमहमवसं प्रभाते कालयं प्रातः कर्तव्यं स्नानादि कर्तुमिति शेषः उत्थाय तत् सरोहमुपचक्रमे जगाम अपरोक्षेपि लिडार्षः ॥ ७ ॥

गो०टी०–पुराणमिति । नैदाघीं निदाघसंबन्धिनीम् ७

८] ति० टी०–काल्यं प्रातःकर्तव्यं स्नानादिकर्मोद्दिश्योत्थाय तत्सरो गन्तुमुपचक्रमे । अपरोक्षे लिडार्षः । अरजो निर्मलम् ॥ ८ ॥

रा० टी०–अथेति । तस्मिन् तोयाशये परया लक्ष्म्या शोभया तिष्ठन्तं सुपुष्टं शवं मृतशरीरमपश्यम् ॥ ८ ॥

गो० टी०–प्रभात इति । काले साधु काल्यं, प्रातःकालकर्तव्यं स्नानकर्म उद्दिश्य उत्थाय उपचक्रमे । अपरोक्षेपि लिडार्षः ॥ ८ ॥

९–१०] ति० टी०–लक्ष्म्या उपेतमिति शेषः । तमर्थं चिन्तयानः किमिदं स्यादिति चिन्तयानः । शवः सन्नपि निर्मलो लक्ष्मीयुक्तश्चेति । किमिदमिति स्वदृष्टार्थविषयकचिन्तां कुर्वाण इत्यर्थः ॥ ९ ॥ १० ॥

११–१२] ति० टी०–अत्यर्थमतिरूपवन्तम् ॥११॥१२॥

रा० टी०–तमिति । तमरजः शवरूपमर्थमिदं किं स्यात् एवं निर्मलत्वं न संभवतीत्यर्थः इति मुहूर्तं चिन्तयानोहं सरस्तीरे विष्टितोस्मि ॥ ९ ॥

रा० टी०–अथेति । मुहूर्तात् विमानमहमपश्यं तत्र विमाने स्वर्गिणं चापश्यं सार्द्धश्लोक एकान्वयी ॥ १० ॥ ११॥

रा० टी०–उपास्त इति । दिव्यानि भूषणानि यस्य तदप्सरसां सहस्रमुपास्ते स्वर्गिणमिति शेषः अर्द्धं पृथक् उपासनाप्रकारमाह–गायन्तीत्यादिभिः । काश्चिद्गायन्ति अपराः नृत्यन्ति ॥ १२ ॥

गो०टी०–पङ्क्ति भेदेनेति । लक्ष्म्या उपेतमिति शेषः९-१५

---

१ पादपैरिति गो. पाठः । २ तथेति गो. पाठः । ३ समीपे तस्य सरस इति गो. पाठः । ४ अजरमिति गो. पाठः । ५ अर्धमिदमधिकं गो. पुस्त. । ६ ऊषित इति गो. पाठः । ७ दिव्यगेयानीति गो. पाठः ।

मृदङ्गवीणापणवान्नृत्यन्ति[1] च तथापराः । अपराश्चन्द्ररश्म्याभैर्हेमदण्डैर्महाधनैः ॥ १३ ॥
दोधूयुर्वदनं तस्य पुण्डरीकनिभेक्षणाः[3] । ततः सिंहासनं हित्वा मेरुकूटमिवांशुमान् ॥ १४ ॥
पश्यतो मे तदा राम विमानादवरुह्य च । तं शवं भक्षयामास स स्वर्गी रघुनन्दन ॥ १५ ॥
ततो[4] भुक्त्वा यथाकामं मांसं बहु सुपीवरम् । अवतीर्य सरः स्वर्गी संस्प्रष्टुमुपचक्रमे ॥ १६ ॥
उपस्पृश्य यथान्यायं स स्वर्गी रघुनन्दन[5] । आरोढुमुपचक्राम विमानवरमुत्तमम् ॥ १७ ॥
तमहं देवसंकाशमारोहन्तमुदीक्ष्य वै । अर्थाहमब्रुवं वाक्यं तमेव पुरुषर्षभ ॥ १८ ॥
को भवान्देवसंकाश आहारश्च विगर्हितः[6] । त्वयेदं भुज्यते सौम्य किमर्थं वक्तुमर्हसि ॥ १९ ॥
कस्य स्यादीदृशो भाव आहारो देवसंमत[7] । आश्चर्यं वर्तते सौम्य श्रोतुमिच्छामि तत्त्वतः ॥
नाहमौपयिकं मन्ये तव भक्ष्यमिमं शवम् । ॥ २० ॥

इत्येवमुक्त स नरेन्द्र नाकी कौतूहलात्सूनृतया गिरा च ।
श्रुत्वा च वाक्यं मम सर्वमेतत्सर्वं तथा चाकथयन्ममेति ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

१३] ति० टी०–चन्द्ररश्म्याभैः चामरैरिति शेषः ॥१३॥

रा० टी०–अपरा इति । अपराः चन्द्ररश्म्याभैः हेम्नः दंडाः येषु तैः व्यजनैः तदुद्भूतपवनैः तस्य स्वर्गिणो मुखं दोधूयुः पुनःपुनः पवनसंसर्गवत् कुर्युरित्यर्थः ॥ १३ ॥

१४] ति० टी०–दोधूयुरिति यङ्लुगन्तस्य ॥ १४ ॥

रा० टी०–तत इति । ततः सरःसमीपप्राप्त्यनन्तरं मेरुकूटमिव सिंहासनं हित्वा त्यक्त्वा विमानादवरुह्य च स्वर्गी शवं भक्षयामास सार्द्धश्लोक एकान्वयी ॥ १४ ॥

१५] ति० टी०–पश्यतो मे । समक्षमिति शेषः ॥१५॥

१६–१९] ति० टी०–संस्प्रष्टुं शुद्धाचमनं कर्तुम् १६-१९

रा० टी०–तत इति । बहु सुपीवरं मांसं भुक्त्वा सरः अवतीर्य प्राप्य स्वर्गी संस्प्रष्टुं आचमितुमुपचक्रमे ॥ १५ ॥

रा० टी०–उपस्पृश्येति । स्वर्गी यथान्यायमुपस्पृश्य विमानवरमारोढुमुपचक्राम ॥ १६ ॥

रा० टी०–तमिति । अहमारोहन्तमुदीक्ष्य तमब्रुवन्१७

रा० टी०–तदाकारमाह देवसंकाशो भवान् कः विगर्हितः आहारश्च कः इदं विगर्हितं त्वया किमर्थं भुज्यते वक्तुमर्हसि पृष्ठमिति शेषः ॥ १८ ॥ १९ ॥

गो०टी०–तथेति । संस्प्रष्टुं शुद्धाचमनं कर्तुमित्यर्थः१६-१९

२०–२१] ति० टी०–हे देवसंमत देवतुल्य ! ईदृश आहार ईदृशो भावश्च कस्य स्यान्न कस्यापि । अतो हेतोस्त्वयीदं द्वयं दृष्ट्वा आश्चर्यं मे वर्तते, तस्मात्सर्वं तत्त्वतः श्रोतुमिच्छामि ॥ २० ॥ २१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

रा० टी०–ननु देव एव अहमित्यत आह–कस्येति । हे देव! ईदृशः त्वत्सदृशः भावोऽभिप्रायः ईदृशः आहारश्च कस्य देवस्य संमतः स्यात् न कस्यापीत्यर्थः अतः आश्चर्यं वर्तते अतः श्रोतुमिच्छामि तत्र हेतुः शवमिमं तवौपयिकं योग्यं भक्ष्यं नाहं मन्ये सार्द्धश्लोक एकान्वयी ॥ २० ॥

रा० टी०–इतीति । इत्येवमुक्तो नाकी सर्वमेतन्मम वाक्यं श्रुत्वा सर्वं निखिलोत्तरम् मामकथयत् ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तसप्ततितमः सर्गः ॥ ७७ ॥

गो० टी०–कस्येति । आहारः ईदृशो भावश्च देवसंमतः । अतः आश्चर्यमेव वर्तते । अहमित्यस्य क्रियाभेदाद्भेदः । अतस्तत्सर्वं तत्त्वतः श्रोतुमिच्छामि ॥ २०–२२ ॥

इति श्रीगो० श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

---

१ क्ष्वेलयन्ति तथान्या इति गो. पा. । २ च चामरैरिति गो. पा. । ३ ईक्षणमिति गो. पाठः । ४ तथेति गो. पाठः । ५ पुंगवेति गो. पाठः । ६ विमानमब्रुवं वाक्यं स्वर्गिणमिति गो. पाठः । ७ संमत इति गो. पाठः ।

अष्टसप्ततितमः सर्गः ।

मया दुश्चरं तपस्तप्त्वा ब्रह्मलोकं गतेनापि क्षुत्पिपासाबाधितेन विरिंचिः पृष्टस्तदा भोस्तपश्चरितं नत्वन्नादि किंचिद्दत्तमत्तोऽरण्ये गच्छ स्वं शवं भक्षयेस्तत्रैवागस्त्यदर्शनेन पूतो भवसीत्यवदत् तथाद्य भवांस्तारयमित्यवदत्सः मया तारितेन तेनेदं दिव्यमाभरणं वितीर्णमिति कुम्भजन्मा रामं जगाद ।

श्रुत्वा तु भाषितं वाक्यं मम राम शुभाक्षरम् । प्राञ्जलिः प्रत्युवाचेदं स स्वर्गी रघुनन्दन ॥ १ ॥
शृणु ब्रह्मन्पुरा वृत्तं ममैतत्सुखदुःखयोः । अनतिक्रमणीयं चै यथा पृच्छसि मां द्विज ॥ २ ॥
पुरा वैदर्भको राजा पिता मम महायशाः । सुदेव इति विख्यातस्त्रिषु लोकेषु वीर्यवान् ॥ ३ ॥
तस्य पुत्रद्वयं ब्रह्मन्द्वाभ्यां स्त्रीभ्यामजायत । अहं श्वेत इति ख्यातो यवीयान्सुरथोऽभवत् ॥ ४ ॥
ततः पितरि स्वर्याते पौरा मामभ्यषेचयन् । तत्राहं कृतवान्राज्यं धर्म्यं च सुसमाहितः ॥ ५ ॥
एवं वर्षसहस्राणि समतीतानि सुव्रत । राज्यं कारयतो ब्रह्मन्प्रजा धर्मेण रक्षतः ॥ ६ ॥
सोऽहं निमित्ते कस्मिंश्चिद्विज्ञातायुर्द्विजोत्तम । कालधर्मं हृदि न्यस्य ततो वनमुपागमम् ॥ ७ ॥
सोऽहं वनमिदं दुर्गं मृगपक्षिविवर्जितम् । तपश्चर्तुं प्रविष्टोऽस्मि समीपे सरसः शुभे ॥ ८ ॥
भ्रातरं सुरथं राज्ये अभिषिच्य महीपतिम् । इदं सरः समासाद्य तपस्तप्तं मया चिरम् ॥ ९ ॥
सोऽहं वर्षसहस्राणि तपस्त्रीणि महावने । तप्त्वा सुदुष्करं प्राप्तो ब्रह्मलोकमनुत्तमम् ॥ १० ॥
तस्येमे स्वर्गभूतस्य क्षुत्पिपासे द्विजोत्तम । बाधेते पैरमे वीर ततोऽहं व्यथितेन्द्रियः ॥ ११ ॥

१-४] ति० टी०-श्रुत्वेति । सुखदुःखयोर्दिव्यदेहशवभक्षणनिमित्तकयोः कारणमित शेषः । अनतिक्रमणीयमेव तत्कारणं यथा पृच्छसि तथा वक्ष्यामि शृण्विति संबन्धः १-४

रा० टी०-स्वर्गिणो वाक्यमाह—श्रुत्वेत्यादिभिः । स्वर्गी प्रत्युवाच ॥ १ ॥

रा० टी०-तद्वचनाकारमाह-शृण्वित्यादिभिः । यथा यत्त्वं पृच्छसि तत् मम सुखदुःखयोः अनतिक्रमणीयम् पुरावृत्तं कारणं शृणु ॥ २ ॥

रा० टी०-कारणाकारमाह-पुरेत्यादिभिः । सुदेव इति विख्यातः मम पिता अभवदिति शेषः ॥ ३ ॥

रा० टी०-तस्येति । तस्य सुदेवस्य पुत्रद्वयमजायत पुत्रयोर्नाम आह श्वेत इति ख्यातोऽहमभवं यवीयान्सुरथश्चाभवत् ॥ ४ ॥

गो० टी०-शृण्विति । सुखदुःखयोरिति । देवस्वशवशुक्तरूपयोः कारणमिति शेषः ॥ २-४ ॥

५-६] ति० टी०-धर्म्यं धर्मादनपेतं यथा तथा कृतवान् ॥ ५ ॥ ६ ॥

रा० टी०-तत इति । पौराः मामभ्यषेचयन् तत्र तस्मिन्काले सुसमाहितोऽहं धर्म्यं राज्यं कृतवान् ॥ ५ ॥

रा० टी०-एवमिति । एवं राज्यं कारयतो मम वर्षसहस्राणि समतीतानि व्यतीतानि ॥ ६ ॥

गो० टी०-तत इति । धर्म्यं धर्मादनपेतं यथा भवति तथा ॥ ५ ॥ ६ ॥

७-१०] ति० टी०-कस्मिंश्चित्रिमित्ते केनचिल्लक्षणेन कालधर्मं मृत्युं हृदि न्यस्य ज्ञात्वा ॥ ७—१० ॥

रा० टी०-स इति । कस्मिंश्चित्रिमित्ते केनचित्कारणेन उपायेनेत्यर्थः विज्ञातमायुः तदियत्ता येन सोऽहं कालधर्मं अल्पकालेन अवश्यं देहविघातं हृदि न्यस्य वनमुपागमम् ॥ ७ ॥

रा० टी०-स इति । सरसः समीपे तपश्चर्तुमिदं वनमहं प्रविष्टोस्मि ॥ ८ ॥

रा० टी०-सिंहावलोकनन्यायेनाह-भ्रातरमिति । सुरथं भ्रातरं महीपतिमभिषिच्य इदं सरस्समासाद्य मया चिरं तपस्तप्तम् ॥ ९ ॥

रा० टी०-स इति । त्रीणि वर्षसहस्राणि तपस्तप्त्वा ब्रह्मलोकं प्राप्तः ॥ १० ॥

गो० टी०-सोहमिति । निमित्ते कस्मिंश्चिदिति । केनचित्रिमित्तेन लक्षणेन सामुद्रिकादिना । विज्ञातायुः निश्चितायुस्वधिः । कालधर्मं हृदि न्यस्य । स्वस्य मरणकालं ज्ञात्वेत्यर्थः ॥ ७-१० ॥

११] ति० टी०-स्वर्गभूतस्य स्वर्गं ब्रह्मलोकं भूतस्य प्राप्तस्य ॥ ११ ॥

रा० टी०-तस्येति । स्वर्गं ब्रह्मलोकं भूतस्य प्राप्तस्य मे क्षुत्पिपासे बाधेते ततस्तस्माद्धेतोः अहं व्यथितेन्द्रियो भवामीति शेषः ॥ ११ ॥

गो० टी०-तस्येति । स्वर्गभूतस्य स्वर्गं प्राप्तस्य । स्वर्गोत्र ब्रह्मलोकः ॥ ११-१४ ॥

१ ह्रीति गो. पाठः । २ परमोदारेति गो. पाठः

गत्वा त्रिभुवनश्रेष्ठं पितामहमुवाच ह । भगवन्ब्रह्मलोकोऽयं क्षुत्पिपासाविवर्जितः ॥ १२ ॥
कस्यायं कर्मणः पाकः क्षुत्पिपासानुगो ह्यहम् । आहारः कश्च मे देव तन्मे ब्रूहि पितामह ॥ १३ ॥
पितामहस्तु मामाह तवाहारः सुदेवज । स्वादूनि स्वानि मांसानि तानि भक्षय नित्यशः॥१४॥
स्वशरीरं त्वया पुष्टं कुर्वता तप उत्तमम् । अनुप्तं रोहते श्वेत[1] न कदाचिन्महामते ॥ १५ ॥
[तृप्तिर्नैतेऽस्ति सूक्ष्मापि वने सत्वनिषेविते । पुरात्तुं भिक्षमाणाय भिक्षायै यतये नृप ॥
न हि दत्ता त्वयेन्द्राभ यस्मादतिथयेऽपि वै ।][2]
दत्तं न तेऽस्ति सूक्ष्मोऽपि तप एव निषेवसे । तेन स्वर्गगतो वत्स बाध्यसे क्षुत्पिपासया ॥ १६ ॥
स त्वं सुपुष्टमाहारैः स्वशरीरमनुत्तमम् । भक्षयित्वामृतरसं तेन तृप्तिर्भविष्यति[3] ॥ १७ ॥
यदा तु तद्वनं श्वेत अगस्त्यः[4] सै महानृषिः । आगमिष्यति दुर्धर्षस्तदा कृच्छ्राद्विमोक्ष्यते ॥ १८ ॥
स हि तारयितुं सौम्य शक्तः सुरगणानपि । किं पुनस्त्वां महाबाहो क्षुत्पिपासावशं गतम् ॥ १९ ॥
सोऽहं भगवतः श्रुत्वा देवदेवस्य निश्चयम् । आहारं गर्हितं कुर्मि स्वशरीरं द्विजोत्तम ॥ २० ॥
बहून्वर्षगणान्ब्रह्मन्भुज्यमानमिदं मया । क्षयं नाभ्येति ब्रह्मर्षे तृप्तिश्चापि ममोत्तमा ॥ २१ ॥

१२] ति० टी०–त्रिभुवनश्रेष्ठं तृतीये भुवने भूस्वःपदापेक्षया तृतीयब्रह्मलोके श्रेष्ठम् । हिरण्यगर्भमित्यर्थः । यद्वा त्रिष्वपि भुवनेषु श्रेष्ठमित्यर्थः ॥ १२ ॥

१३–१४] ति० टी०–क्षुत्पिपासे अनुगे यस्य सः १३॥१४

रा० टी०–गत्वेति । पितामहमुवाच अहमिति शेषः हर्षातिशयात्परोक्ष्यं वचनाकारमाह ब्रह्मलोकः क्षुत्पिपासावर्जितोऽस्तीति शेषः अहं तु क्षुत्पिपासानुगः अयमपि क्षुत्पिपासागमः कस्य कर्मणः पाकः फलम् मे आहारश्च कः तन्मे ब्रूहि श्लोकद्वयमेकान्वयि ॥ १२ ॥ १३ ॥

रा० टी०–पितामह इति । पितामहो मामाह तदाकारमाह स्वादूनि स्वानि मांसान्येव तवाहारः अतस्तानि भक्षय१४

१५] ति० टी०–स्वशरीरं त्वया पुष्टं केवलम् ॥ १५ ॥

रा० टी०–ननु ब्रह्मलोके ममैकस्यैवंभूतत्वे किं कारणमित्यत आह—स्वेति । हे श्वेत ! उत्तमं तपः कुर्वता त्वया स्वशरीरमेव पुष्टं दानरूपवापो न कृत इत्यर्थः स्वेन अनुप्तं तु कदा किंचिन्न रोहते ॥ १५ ॥

गो० टी०–स्वशरीरं त्वया पुष्टमिति । मुख्यं तपो न कृतं स्वशरीरमेव केवलं त्वया पुष्टम् । अनुप्तमकृतावापं बीजं न रोहते हि ॥ १५ ॥ १६ ॥

१६] ति० टी०–ते सूक्ष्मः । लिङ्व्यत्ययः । अल्पमपि दत्तं दानं ते नास्ति देवपित्रतिथिषु, किं तु तप एव निषेवसे । असेविष्टेति यावत् । तपो मनस इन्द्रियाणां चैकाग्र्यं मन्मात्रविषयकत्वरूपं तादृशतपःफलं ब्रह्मलोकप्राप्तिर्जाता तव । स्वर्गगतः परस्वर्गगतः ॥ १६ ॥

रा० टी०–दत्तमिति । यस्त्वं तपो निषेवसे तेन त्वया सूक्ष्मोऽपि भक्ष्यादिर्न दत्तं सामान्ये नपुंसकम् तेन हेतुना स्वर्गगतोपि त्वं क्षुत्पिपासया बाध्यसे ॥ १६ ॥

गो० टी०–दत्तमिति । सूक्ष्मोपि लिङ्व्यत्यय आर्षः । सूक्ष्ममपि अत्यल्पमपि । ते दत्तं दानं नास्ति देवपित्रतिथिषु । किन्तु तप एव केवलं निषेवसे निषेवितवानित्यर्थः । " मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः " इत्युक्तम् । दृढसमाधिरूपं तप एव कृतमित्यर्थः ॥ १७–२० ॥

१७] ति० टी०–तेन मांसभक्षणेन ते तृप्तिः क्षुदादिनिवृत्तिर्भविष्यति ॥ १७ ॥

रा० टी०–स इति । आहारैस्त्वार्जितपदार्थैः निष्पन्नमिति शेषः अमृतरसममृतवत्सारांशं भक्षयित्वा स त्वं बलवत्स्वशरीरं सुपुष्टं सुपोषितम् अतः तेन मांसभक्षणेन तृप्तिः क्षुन्निवृत्तिः भविष्यति ॥ १७ ॥

१८–१९] ति० टी०–विमोक्ष्यते । विमोचयिष्यत इत्यर्थः ॥ १८ ॥ १९ ॥

रा० टी०–अतिखिन्नं मामवलोक्याह—यदेति । तत् तव तपस्सम्बंधिवनं अगस्त्य आगमिष्यति तदा कृच्छ्रात् विमोक्ष्यते अगस्त्यस्त्वामिति शेषः ॥ १८ ॥

रा० टी०–ननु दुर्निवारणीयं कृच्छ्रं कथं निवारयिष्यतीत्यत आह—स इति । सोऽगस्त्यः सुरगणानपि तारयितुं शक्तः त्वां तारयितुं शक्तश्चेति किम् ॥ १९ ॥

२०] ति० टी०–स्वशरीरमेव भगवदाज्ञया नित्योपस्थितमाहारं कुर्मि करोमि ॥ २० ॥

रा० टी०–स इति । भगवतो ब्रह्मणः निश्चयं निश्चितवचनं श्रुत्वा गर्हितं स्वशरीरमाहारं भक्ष्यं कुर्मि करोमि ॥ २० ॥

गो० टी०–सोहमिति । कुर्मि करोमि ॥ २१ ॥ २२ ॥

२१] ति० टी०–तदेवाह—क्षयं नाभ्येतीति ॥ २१ ॥

रा० टी०–बहूनिति । बहून् वर्षगणान् मया भुज्यमानमिदं स्वं शरीरं क्षयं नाभ्येति मम तृप्तिश्च भवति ॥ २१ ॥

१ श्वेते इति गो. पाठः । २ सार्धपद्यमिदमधिकं गो. पुस्त. । ३ तृप्तिरिति गो. पाठः । ४ स्विति गो० रा. पाठः ।

तस्य मे कृच्छ्रभूतस्य कृच्छ्रादस्माद्विमोक्षय । अन्येषां न गतिर्ह्यत्र कुम्भयोनिमृते द्विजम् ॥ २२ ॥
इदमाभरणं सौम्य धारणार्थं द्विजोत्तम । प्रतिगृह्णीष्व भद्रं ते प्रसादं कर्तुमर्हसि ॥ २३ ॥
इदं तावत्सुवर्णं च धनं वस्त्राणि च द्विज । भक्ष्यं भोज्यं च ब्रह्मर्षे ददाम्याभरणानि च ॥ २४ ॥
सर्वान्कामान्प्रयच्छामि भोगांश्च मुनिपुंगव । तारणे[2] भगवन्मह्यं प्रसादं कर्तुमर्हसि ॥ २५ ॥
तस्याहं स्वर्गिणो वाक्यं श्रुत्वा दुःखसमन्वितम् । तारणायोपजग्राह तदाभरणमुत्तमम् ॥ २६ ॥
मया प्रतिगृहीते तु तस्मिन्नाभरणे शुभे । मानुषः पूर्वको देहो राजर्षेर्विननाश ह ॥ २७ ॥
प्रनष्टे तु शरीरेऽसौ राजर्षिः परया मुदा । तृप्तः प्रमुदितो राजा जगाम त्रिदिवं सुखम् ॥ २८ ॥
तेनेदं शक्रतुल्येन दिव्यमाभरणं मम । तस्मिन्निमित्ते काकुत्स्थ दत्तमद्भुतदर्शनम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥

एकोनाशीतितमः सर्गः ।

कथमिदमरण्यमृगद्विजमिति रामेण पृष्टः कुम्भयोनिः कथयति पुरा कृतयुगे मनुरिक्ष्वाकुमात्मजं जनयित्वा राज्येऽभिषिच्य धर्मेण प्रजाः शाधीत्यादिश्य च ब्रह्मलोकं गतः तत इक्ष्वाकुः शतमात्मजान्प्रसूय तेष्ववरजाय दण्डाख्याय मूर्खपुत्राय विन्ध्यशैवलयोर्मध्ये राज्यं प्रादादिति ।

तदद्भुततमं वाक्यं श्रुत्वागस्त्यस्य राघवः । गौरवाद्विस्मयाच्चैव भूयः प्रष्टुं प्रचक्रमे ॥ १ ॥

२२-२३] ति० टी०-कृच्छ्रभूतस्य कृच्छ्रं प्राप्तस्य । दुर्गोचरो मां कृच्छ्राद्विमोक्षयेत्यर्थः । ननु कथमहमगस्त्य इति त्वयावगतस्तत्राह—अन्येषामिति । कुम्भयोनिं द्विजमृते भयादन्येषामत्र निर्मानुषे गतिर्नास्ति, अतस्त्वमगस्त्य इति निर्णीतमिति भावः ॥ २२ ॥ २३ ॥

रा० टी०-तस्येति । कृच्छ्रं भूतस्य प्राप्तस्य प्राप्तं मे मामस्मात्कृच्छ्रात् विमोक्षय हि यतः कुंभयोनिं भवन्तमृते विना अत्र अस्मिन् विमोक्षणे अन्येषां गतिर्न ॥ २२ ॥

रा० टी०-इदमिति । आभरणं प्रतिगृह्णीष्व प्रसादं कर्तुमर्हसि ॥ २३ ॥

गो० टी०-तस्येति । कृच्छ्रभूतस्य कृच्छ्रं प्राप्तस्य । विमोचय मामिति शेषः ॥ २३-२७ ॥

२४] ति० टी०-नन्वेतद्दानस्यात्रदानत्वाभावात्कथं पुनरेतदानेऽपि दुःखमोक्षस्तत्राह—इदमिति । अस्य सर्वदत्त्वादेतद्दानं सर्वदानात्मकमिति भावः ॥ २४ ॥

रा० टी०-इदमिति । इदं सुवर्णादि तुभ्यं ददामि भक्ष्यादि ददामीत्यनेन पूर्वं भक्ष्यसत्त्वेपि तादृशभक्ष्येण तस्य तृप्तिर्न जातेति सूचितम् ॥ २४ ॥

२५-२६] ति० टी०-तस्माद्यदिदं प्रयच्छामि तत्सर्वान्कामान्सर्वभोगांश्च प्रयच्छामीति जानीहि । तारणे तारणनिमित्तम् ॥ २५ ॥ २६ ॥

रा० टी०-सर्वानिति । कामान् इच्छाविषयीभूतान् भोगान् प्रयच्छामि अतः तारणे तारणार्थं मह्यं प्रसादं कर्तुमर्हसि ॥ २५ ॥

रा० टी०-तस्येति । स्वर्गिणस्तारणाय तदाभरणमहमुपजग्राह रामप्रभजनितहर्षांतिशयात्पारोक्ष्यम् ॥ २६ ॥

२७] ति० टी०-मया प्रतिगृहीते । तत्सुकृतबलादिति शेषः । ननाश ह । पुनर्भक्षणाय नोपस्थितोऽभूदित्यर्थः ॥ २७ ॥

रा० टी०-मयेति । मया आभरणे प्रतिगृहीते सति राजर्षेः पूर्वको मानुषो देहो विननाश ॥ २७ ॥

गो० टी०-मयेति । तस्मिन् तारणनिमित्ते विननाश ह । पुनर्भक्षणाय नोपस्थितमित्यर्थः ॥ २८-३० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टसप्ततितमः सर्गः ॥ ७८ ॥

२८] ति० टी०-प्रमुदितः क्षुत्पिपासारहिततयातिसंतोषं प्राप्तः ॥ २८ ॥

रा० टी०-प्रनष्ट इति । शरीरे प्रनष्टे सति परया राजदीप्त्योपलक्षितः प्रमुदितो राजर्षिः परया मुदोपलक्षितं त्रिदिवं सुखं यथा भवति तथा जगाम ॥ २८ ॥

२९] ति० टी०-तस्मिन्निमित्ते स्वतारणरूपे निमित्ते २९

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥

रा० टी०-उपसंहरन्नाह—तेनेति । तेन स्वर्गिणा तस्मिन् क्षुन्निवृत्त्यादिरूपे निमित्ते अद्भुतदर्शनमाभरणं मम मह्यं दत्तम् २९

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टसप्ततितमः सर्गः ॥ ७८ ॥

१] ति० टी०-अथ रामेण वनस्य निर्जनस्वहेतुप्रभे तद्व-

१ ददानीति गो. पाठः । २ तारण इति गो. पाठः ।

भगवंस्तद्वनं घोरं तपस्तप्यति यत्र सः । श्वेतो वैदर्भको राजा कथं तद्धि मृगद्विजम् ॥ २ ॥
तद्वनं स कथं राजा शून्यं मनुजवर्जितम् । तपश्चर्तुं प्रविष्टः स श्रोतुमिच्छामि तत्त्वतः ॥ ३ ॥
रामस्य वचनं श्रुत्वा कौतूहलसमन्वितम् । वाक्यं परमतेजस्वी वक्तुमेवोपचक्रमे ॥ ४ ॥
पुरा कृतयुगे राम मनुर्दण्डधरः प्रभुः । तस्य पुत्रो महानासीदिक्ष्वाकुः कुलनन्दनः ॥ ५ ॥
तं पुत्रं पूर्वकं राज्ये निक्षिप्य भुवि दुर्जयम् । पृथिव्यां राजवंशानां भव कर्तेत्युवाच तम् ॥ ६ ॥
तथैव चैं प्रतिज्ञातं पितुः पुत्रेण राघव । ततः परमसंतुष्टो मनुः पुत्रमुवाच ह ॥ ७ ॥
प्रीतोऽस्मि परमोदार कर्ता चासि न संशयः । दण्डेन च प्रजा रक्ष मा च दण्डमकारणे ॥ ८ ॥
अपराधिषु यो दण्डः पात्यते मानवेषु वै । स दण्डो विधिवन्मुक्तः स्वर्गं नयति पार्थिवम् ॥ ९ ॥
तस्माद्दण्डे महाबाहो यत्नवान्भव पुत्रक । धर्मो हि परमो लोके कुर्वतस्ते भविष्यति ॥ १० ॥
इति तं बहु संदिश्य मनुः पुत्रं समाधिना । जगाम त्रिदिवं हृष्टो ब्रह्मलोकं सनातनम् ॥ ११ ॥
प्रयाते त्रिंदिवे तस्मिन्निक्ष्वाकुरमितप्रभः । जनयिष्ये कथं पुत्रानिति चिन्तापरोऽभवत् ॥ १२ ॥

र्णनम्–तदिति । गौरवात्सर्वज्ञः सर्ववक्ता परमगुरुरिति संभावनयेत्यर्थः ॥ १ ॥

रा० टी०–आभरणप्राप्तिकारणश्रवणानन्तरकालिकं वृत्तमाह–तदित्यादिभिः । राघवः अगस्त्यस्य वाक्यं श्रुत्वा विस्मयाद् विस्मयं प्राप्य अगस्त्यस्य गौरवाद् गुरुत्वात्सर्वज्ञत्वादित्यर्थः भूयः प्रष्टुं प्रचक्रमे ॥ १ ॥

गो० टी०–तदित्यादि । गौरवाद् सर्वज्ञः सर्ववक्तेति संभावनया ॥ १ ॥

२] ति० टी०–यत्र स तपस्तप्यति तद्वनं कथममृगद्विजम् ॥ २ ॥

रा० टी०–प्रश्नाकारमाह—भगवन्निति । यत्र श्वेतस्तपस्तप्यति अतप्यत् तद्वनममृगद्विजम् कथमभवदिति शेषः २

गो० टी०–भगवन्निति । स यत्र तप्यति तद्वनं कथममृगद्विजम् ॥ २ ॥

३-४] ति० टी०–तादृशं तद्वनं तपश्चर्तुं चरितुं प्रविष्टः ॥ ३ ॥ ४ ॥

रा० टी०–तदिति । स राजा तपश्चर्तुं मनुजवर्जितमत एव शून्यं वनं कथं प्रविष्टः सः श्रुतसामान्यवृत्तान्तोऽहं तत्त्वतः श्रोतुमिच्छामि ॥ ३ ॥

रा० टी०–रामस्येति । परमतेजस्वी अगस्त्यः वक्तुमुपचक्रमे ॥ ४ ॥

गो० टी०–तदिति । कथं तादृशं तद्वनं तपश्चर्तुं चरितुं प्रविष्टः ॥ ३ ॥ ४ ॥

५-७] ति० टी०–दण्डधरो राजा प्रभुर्वर्णाश्रमविभागतद्धर्मप्रवर्तनाधिकृतः ॥ ५-७ ॥

रा० टी०–पुरेत्यादिभिः । कृतयुगे मनुर्नाम दण्डधरो राजा अभवदिति शेषः तस्य पुत्रः इक्ष्वाकुरासीत् ॥ ५ ॥

रा० टी०–तमिति । पूर्वकं ज्येष्ठं पुत्रं तमिक्ष्वाकुं राज्ये राज्यरक्षायां निक्षिप्य नियोज्य राजवंशानां कर्ता भवेत्युवाच ॥ ६ ॥

रा० टी०–तथेति । पुत्रेण इक्ष्वाकुणा तथेति प्रतिज्ञाते सत्येव सन्तुष्टो मनुः पुत्रमुवाच ॥ ७ ॥

गो० टी०–पुरेति । दण्डधरो राजा प्रभुः वर्णाश्रमविभागतद्धर्मप्रवर्तनाधिकृतः ॥ ५-७ ॥

८] ति० टी०–दण्डेन क्षत्रियसहजधर्मभूतेन शिक्षणेन । अकारणे च दण्डं मा पातयेति शेषः ॥ ८ ॥

रा० टी०–तदाकारमाह–प्रीत इत्यादिभिः । त्वं कर्तासि प्रजापालनमिति शेषः अतः प्रीतोऽस्मि पालनोपायमाह दण्डेनेत्यादिभिः दण्डेन प्रजा रक्ष अकारणे दण्डकारणरहिते जने दण्डं मा कुर्विति शेषः ॥ ८ ॥

गो० टी०–प्रीत इति । दण्डेन चेति । क्षत्रियसहजधर्मभूतेन । अकारणे दण्डं मा पातयेति शेषः ॥ ८ ॥

९] ति० टी०–नन्वपराधिनां दण्डः कथं कर्तुं युक्तस्तत्राह—अपराधिष्विति । विधिवद्यथाशास्त्रम् । यथापराधं मुक्तः । प्रवर्तित इत्यर्थः ॥ ९ ॥

रा० टी०–दण्डे फलमाह—अपराधिष्विति । यो दण्डः पात्यते विधिवन्मुक्तः कृतस्स दण्डः पार्थिवं स्वर्गं नयति ॥ ९ ॥

गो० टी०–नन्वपराधिनां दण्डो युक्तः कर्तुमिति तत्राह–अपराधिष्वित्यादि । विधिवद्यथाशास्त्रम् यथापराधम् । मुक्तः प्रवर्तित इत्यर्थः ॥ ९ ॥ १० ॥

१०] ति० टी०–कुर्वतः । दण्डमिति शेषः ॥ १० ॥

रा० टी०–तस्मादिति । दण्डे यत्नवान् भव कुर्वतः यत्नमिति शेषः ते परमो धर्मो भविष्यति ॥ १० ॥

११-१२] ति० टी०–समाधिना प्रणवानुसंधानसहितचित्तैकाग्र्येण, अत एव ब्रह्मलोकं जगाम ॥ ११ ॥ १२ ॥

१ स्यादिति गो. पाठः । २ हेति गो. पाठ । ३ इतीति गो. पाठः । ४ भिदिवमिति गो. पाठः ।

कर्मभिर्बहुरूपैश्च तैस्तैर्मनुसुतस्तदा । जनयामास धर्मात्मा शतं देवसुतोपमान् ॥ १३ ॥
तेषामवरजस्तात सर्वेषां रघुनन्दन । मूढश्चाकृतविद्यश्च न शुश्रूषति पूर्वजान् ॥ १४ ॥
नाम तस्य च दण्डेति पिता चक्रेऽल्पतेजसः । अवश्यं दण्डपतनं शरीरेऽस्य भविष्यति ॥ १५ ॥
अपश्यमानस्तं देशं घोरं पुत्रस्य राघव । विन्ध्यशैवलयोर्मध्ये राज्यं प्रादादरिंदम ॥ १६ ॥
स दण्डस्तत्र राजाभूद्रम्ये पर्वतरोधसि । पुरं चाप्रतिमं राम न्यवेशयदनुत्तमम् ॥ १७ ॥
पुरस्य चाकरोन्नाम मधुमन्तमिति प्रभो । पुरोहितं तूशनसं वरयामास सुव्रतम् ॥ १८ ॥
एवं स राजा तद्राज्यमकरोत्सपुरोहितः । प्रहृष्टमनुजाकीर्णं देवराजो यथा दिवि ॥ १९ ॥
ततः स राजा मनुजेन्द्रपुत्रः सार्धं च तेनोशनसा तदानीम् ।
चकार राज्यं सुमहान्महात्मा शक्रो दिवीवोशनसा समेतः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनाशीतितमः सर्गः ॥ ७९ ॥

अशीतितमः सर्गः ।

पितृदत्तं राज्यं शासद्दण्ड एकदा भार्गवाश्रमं गत्वा तत्र तदात्मजामरजाख्यामकामयमानामपि मनसिजपीडितो बलाद्रमयित्वा स्वनगरं प्रयातः भार्गवदुहिता तु बलात्कृतिदुःखिता पितरं प्रतीक्षमाणा तस्थौ ।

एतदाख्याय रामाय महर्षिः कुम्भसंभवः । अस्यामेवापरं वाक्यं कथायामुपचक्रमे ॥ १ ॥

रा० टी०–इतीति । मनुः पुत्रं बहु संदिश्य त्रिदिवं त्रयाणां ब्रह्मादीनां दिवः स्तुतिर्यस्य तं ब्रह्मलोकं जगाम ॥ ११ ॥

रा० टी०–प्रयात इति । इक्ष्वाकुः पुत्रान्कथं जनयिष्ये इति चिंतापरोभवत् ॥ १२ ॥

गो० टी०–इतीति । समाधिना योगेन ॥ ११ ॥ १२ ॥

१३] ति० टी०–बहुरूपैर्यज्ञदानतपोलक्षणैः ॥ १३ ॥

रा० टी०–चिंतानन्तरकालिकं वृत्तमाह–कर्मभिरिति । बहुरूपैर्यज्ञदानाद्यात्मकैः तैस्तैः प्रसिद्धैः कर्मभिर्मनुसुतः शतं पुत्रान् जनयामास ॥ १३ ॥

गो० टी०–कर्मभिरिति । बहुरूपैरिति । यज्ञदानतपोलक्षणैरित्यर्थः ॥ १३ ॥

१४] ति० टी०–पूर्वजाञ्ज्येष्ठान् ॥ १४ ॥

रा० टी०–तेषामिति । तेषां पुत्राणाम् अवरजः कनिष्ठः मूर्खत्वादिविशिष्टोभवत् अत एव पूर्वजान् न शुश्रूषति शुश्रूषते सेवितुमिच्छति ॥ १४ ॥

गो० टी०–तेषामिति । पूर्वजाः ज्येष्ठाः ॥ १४ ॥

१५] ति० टी०–दण्डेति । नामकरणं पितुः सर्वज्ञत्वादन्वर्थावसायपूर्वकमित्याह–अवश्यमिति ॥ १५ ॥

रा० टी०–नामेति । अस्य शरीरे दण्डपतनमवश्यं भविष्यति अतः पिता तस्य कनिष्ठस्य दण्डेति नाम चक्रे ॥१५॥

गो० टी०–नामेति । दण्ड इत्याख्याकरणं पितुः सर्वज्ञत्वात् अन्वर्थतावसायपूर्वकमित्याह–अवश्यमित्यादि ॥ १५॥१६ ॥

१६] ति० टी०–घोरं देशमपश्यमानाः । दण्डराज्ययोग्यं घोरं देशमपश्यन्नित्यर्थः ॥ १६ ॥

रा० टी०–अपश्यमान इति । पुत्रस्य दण्डस्य योग्यं घोरं देशमपश्यमान इक्ष्वाकुः विन्ध्यशैवलयोर्मध्ये राज्यं प्रादात्॥१६॥

१७–१९] ति० टी०–पर्वतरोधसि पर्वततटप्राये १७-१९

रा० टी०–स इति । तत्र दण्डो राजाभूत् पुरं च न्यवेशयत् अवासयत् ॥ १७ ॥

रा० टी०–पुरस्येति । पुरस्य मधुमन्तमिति नामाकरोत् पुरोहितं तु उशनसं वरयामास ॥ १८ ॥

रा० टी०–एवमिति । राजा दण्डः तद्राज्यमकरोत् १९

गो० टी०–स इति । पर्वतरोधसि पर्वततटप्रान्ते १७–२०

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनाशीतितमः सर्गः ॥७९॥

२०] ति० टी०–शक्रोऽत्र बलिः ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनाशीतितमः सर्गः ॥ ७९ ॥

रा० टी०–उपसंहरन्नाह—तत इति । राजा उशनसा सार्धं राज्यं चकार तत्र दृष्टान्तः दिवि उशनसा समेतः शक्र इव अभूतोपमेषा ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

१] ति० टी०–एवमुक्तोपोद्घातां प्रकृतकथामाह—एत-

१ सुतानिति गो. पाठः । २ मेधस इति गो. पाठः । ३ देवराजं यथा वृषेति गो. पाठः

ततः स दण्डः काकुत्स्थ बहुवर्षगणायुतम् । अकरोत्तत्र दान्तात्मा राज्यं निहतकण्टकम् ॥ २ ॥
अथ काले तु कस्मिंश्चिद्राजा भार्गवमाश्रमम् । रमणीयमुपाक्रामच्चैत्रे मासि मनोरमे ॥ ३ ॥
तत्र भार्गवकन्यां स रूपेणाप्रतिमां भुवि । विचरन्तीं वनोद्देशे दण्डोऽपश्यदनुत्तमाम् ॥ ४ ॥
स दृष्ट्वा तां सुदुर्मेधा अनङ्गशरपीडितः । अभिगम्य सुसंविग्नः[1] कन्यां वचनमब्रवीत् ॥ ५ ॥
कुतस्त्वमसि सुश्रोणि कस्य वासि सुता शुभे । पीडितोऽहमनङ्गेन पृच्छे[2]मि त्वां शुभानने ॥ ६ ॥
तस्य त्वेवं ब्रुवाणस्य मोहोन्मत्तस्य कामिनः । भार्गवी प्रत्युवाचेदं वचः सानुनयं त्विदम्[3] ॥ ७ ॥
भार्गवस्य सुतां विद्धि देवस्याक्लिष्टकर्मणः । अरजां नाम राजेन्द्र ज्येष्ठामाश्रमवासिनीम् ॥ ८ ॥
मा मां स्पृश बलाद्राजन्कन्या पितृवशा ह्यहम् । गुरुः पिता मे राजेन्द्र त्वं च शिष्यो महात्मनः ॥ ९ ॥
व्यसनं सुमहत्क्रुद्धः स ते दद्यान्महातपाः । यदि वान्यन्मया कार्यं धर्मदृष्टेन सत्पथा ॥ १० ॥
वरयस्व नरश्रेष्ठ पितरं मे महाद्युतिम् । अन्यथा तु फलं तुभ्यं भवेद्घोराभिसंहितम् ॥ ११ ॥
क्रोधेन हि पिता मेऽसौ त्रैलोक्यमपि निर्दहेत् । दास्यते चानवद्याङ्ग तव मा याचितः पिता ॥ १२ ॥
एवं ब्रुवाणामरजां दण्डः कामवशं गतः । प्रत्युवाच मदोन्मत्तः शिरस्याधाय चाञ्जलिम्॥१३॥

दिति । अस्यामेवापरं वाक्यमुपक्रान्तकथायामेव संबद्धम् । तत्पृष्टोत्तरभूतमित्यर्थः ॥ १ ॥

रा० टी०–अगस्त्यकर्तृककथान्तरमाह—एतदित्यादिभिः । कुंभसम्भवोऽगस्त्यः अस्यां कथायां समाप्तायामिति शेषः अपरं वाक्यम् उपचक्रमे ॥ १ ॥

गो० टी०–एतदित्यादि । अस्यामेवापरं वाक्यमिति । प्रोक्तदानकथायामेव संबद्धम् अपरं तत्पृष्टोत्तरभूतं कथान्तरमित्यर्थः ॥ १ ॥ २ ॥

२] ति० टी०–दान्तात्मा जितेन्द्रियः ॥ २ ॥

रा० टी०–तत इति । स दण्डः बहुवर्षगणायुतम् राज्यमकरोत् ॥ २ ॥

३–६] ति० टी०–भार्गवः शुक्रस्तत्संबन्धिनमाश्रममुपाक्रामदगमत् ॥ ३–६ ॥

रा० टी०–अथेति । राजा दण्डकः कस्मिंश्चित्कालेऽगस्त्यसमये भार्गवमाश्रममुपाक्रामत् अगच्छत् ॥३॥

रा० टी०–तत्रेति । स दण्डः वनोद्देशे विचरन्तीं रूपेणाप्रतिमामत एव अनुत्तमामतिश्रेष्ठां भार्गवकन्यां तत्राश्रमे अपश्यत् ॥ ४ ॥

रा० टी०–स इति । तां दृष्ट्वा अनङ्गशरपीडितः अत एव सुसंविग्नः स दण्डः कन्यां दृष्ट्वा अभिगम्य समीपं प्राप्याब्रवीत् ॥ ५ ॥

रा० टी०–तदाकारमाह—कुत इति । कुतस्त्वमागतेति शेषः अनङ्गेन पीडितोऽहं त्वां पृच्छामि ॥ ६ ॥

गो० टी०–अथेति । भार्गवः शुक्रः तस्यायमपि भार्गवः तम् ॥ ३–६ ॥

७–९] ति० टी०–मोहेन रागमोहेनोन्मत्तस्योचितानुचितविवेकरहितस्य ॥ ७–९ ॥

रा० टी०–तस्येति । एवं ब्रुवाणस्य तस्य दण्डकस्य समीपे भार्गवी सानुनयम् इदं वचः प्रत्युवाच ॥ ७ ॥

रा० टी०–तदाकारमाह–भार्गवस्येति । भार्गवस्य ज्येष्ठामरजां नाम सुताम् आश्रमवासिनीं पित्राश्रमवसनशीलां त्वं विद्धि ॥ ८ ॥

रा० टी०–मेति । अहं कन्या अत एव पितृवशा मे पिता ते गुरुः त्वं च शिष्यः अतः बलात् मां मा स्पृश ॥९॥

गो० टी०–तस्येति । मोहेन काममोहेन । उन्मत्तः उचितानुचितवनकर्मविवेकरहितः ॥ ७–९ ॥

१०] ति० टी०–यदि वान्यत्कामभोगानुकूल्यं तर्हि धर्मदृष्टेन सत्पथा सन्मार्गेण मां वरयस्व ॥ १० ॥

रा० टी०–तत्र दोषमाह–व्यसनमिति । स मे पिता सुमहद्व्यसनं ते तुभ्यं दद्यात् अहं पृथक् यदीति । यदि मया सह अन्यत् मदुक्तभिन्नरतिमित्यर्थः त्वया कार्यं तर्हि धर्मदृष्टेन धर्मात्मभिः प्रवर्त्तितेन सत्पथा समीचीनमार्गेण मे पितरं वरयस्व विवाहार्थं याचयस्वेत्यर्थः अनित्यत्वादृजभावः ॥ १० ॥

गो० टी०–यदि वान्यदित्यादि । यदि वान्यत्कामभोगानुकूल्यम् ॥ १० ॥

११] ति० टी०–अन्यथावरणे घोराभिसंहितं महानर्थफलम् ॥ ११ ॥

१२–१३] ति० टी०–याचितः पिता मा मां तव दास्यते इत्यन्वयः ॥ १२ ॥ १३ ॥

रा० टी०–अन्यथेति । अन्यथा मदुक्तविपरीतकरणे घोराभिसंहितमतिघोरताविशिष्टं फलं तुभ्यं भवेत् हि यतः क्रोधेन विशिष्टो मे पिता त्रैलोक्यमपि निर्दहेत् तव याचितः पिता तु मां दास्यते सार्द्धश्लोक एकान्वयी ॥ ११ ॥ १२ ॥

---

१ संविग्नामिति गो. पाठः । २ गच्छामीति गो. पाठः । ३ नृपमिति गो. पाठः । ४ नृपेति गो. पाठः ।

प्रसादं कुरु सुश्रोणि न कालं क्षेप्तुमर्हसि । त्वत्कृते हि मम प्राणा विदीर्यन्ते वरानने ॥ १४ ॥
त्वां प्राप्य तु वधो वापि पापं वापि सुदारुणम् । भक्तं भजस्व मां भीरु भजमानं सुविह्वलम् ॥ १५ ॥
एवमुक्त्वा तु तां कन्यां दोर्भ्यां प्राप्यै बलाद्बली । विस्फुरन्तीं यथाकामं मैथुनायोपचक्रमे ॥ १६ ॥
तमनर्थं महाघोरं दण्डः कृत्वा सुदारुणम् । नगरं प्रययावाशु मधुमन्तमनुत्तमम् ॥ १७ ॥
अरजापि रुदन्ती सा आश्रमस्याविदूरतः । प्रतीक्षते सुसंत्रस्ता पितरं देवसंनिभम् ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

एकाशीतितमः सर्गः ।

भार्गवस्तु सुताक्रोशमाकर्ण्य कोपपरीतात्मा तर्जनपदान् बहिः स्थापयित्वा सर्वं तद्देशं सप्तरात्रावधिमात्रेणैव शापानलेन दग्ध्वा भस्मसाच्चकार पूर्वं दण्डाधिष्ठितत्वादिदं दण्डकारण्यमुच्यत इत्येतदन्तं लोपामुद्राभर्ता दाशरथयेऽकथयत् ।

स मुहूर्तादुपश्रुत्य देवर्षिरमितप्रभः । स्वमाश्रमं शिष्यवृतः क्षुधार्तः संन्यवर्तत ॥ १ ॥
सोऽपश्यदरजां दीनां रजसा समभिप्लुताम् । ज्योत्स्नामिव ग्रहग्रस्तां प्रत्यूषे न विराजतीम् ॥ २ ॥
तस्य रोषः समभवत्क्षुधार्तस्य विशेषतः । निर्दहन्निव लोकांस्त्रीञ्शिष्यांश्चैतदुवाच ह ॥ ३ ॥

रा० टी०–एवमिति । एवं ब्रुवाणामरजां शिरस्यञ्जलिमाधाय दण्डः प्रत्युवाच ॥ १३ ॥

गो० टी०–अन्यथेति । घोराभिसंहितं महानर्थसंबद्धम् ॥ ११–१३ ॥

१४] ति० टी०–क्षेप्तुं विलम्बं कर्तुम् ॥ १४ ॥

रा० टी०–तदाकारमाह—प्रसादमिति । त्वत्कृते त्वत्सङ्गमविलम्बे मम प्राणा विदीर्यन्ते अतः प्रसादं कुरु कालं क्षेप्तुमसङ्गमेन विलम्बयितुं नार्हसि ॥ १४ ॥

गो० टी०–प्रसादमिति । कालं क्षेप्तुं विलम्बं कर्तुमित्यर्थः ॥ १४ ॥

१५] ति० टी०–त्वां प्राप्य यदि वधादिर्भवेत्तदा भवतु नामेति शेषः ॥ १५ ॥

रा० टी०–ननु तथात्वे त्वद्विघातो भविष्यतीत्यत आह—त्वामिति । त्वां प्राप्य विद्यमानस्य मे वधो वा पापं वा भवत्विति शेषः वधादौ न दुःखं सङ्गमविलम्बे एव दुःखमिति तात्पर्यमतः भक्तं मां भजस्व ॥ १५ ॥

गो० टी०–त्वामिति । त्वां प्राप्य मे यदि वधादिर्भवेत् भवतु नामेति शेषः ॥ १५ ॥

१६–१७] ति० टी०–विस्फुरन्तीं विलुठन्तीम् १६–१७

रा० टी०–एवमिति । दोर्भ्यां कन्यां प्राप्य यथाकामं मैथुनाय उपचक्रमे ॥ १६ ॥

रा० टी०–तमिति । दण्डः महाघोरमनर्थं कृत्वा मधुमन्तं नगरं प्रययौ ॥ १७ ॥

गो० टी०–एवमिति । विस्फुरन्तीं विलुठन्तीम् १६॥१७

१८] ति० टी०–अरजापीति आकारान्तं नाम । पितरं प्रतीक्षते स्म ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽशीतितमः सर्गः ॥ ८० ॥

रा० टी०–अरजेति । आश्रममस्याविदूरतः सुसंत्रस्ता रुदन्ती अरजा पितरं प्रतीक्षते ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अशीतितमः सर्गः ॥ ८० ॥

गो० टी०–अरजापीति । प्रतीक्षन्ती पितरमास्त इति शेषः । प्रतीक्षते स्म संत्रस्तेति पाठः ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अशीतितमः सर्गः ॥ ८० ॥

१] ति० टी०–कथाशेषपूरणम्–स इति । उपश्रुत्य शिष्यमुखादरजावृत्तान्तमित्यर्थः ॥ १ ॥

रा० टी०–अरजाप्रतीक्षानन्तरकालिकं वृत्तमाह–स इत्यादिभिः । देवर्षिः स भार्गवः मुहूर्तात् उपश्रुत्य शिष्यादिद्वारा अरजावृत्तान्तं श्रुत्वा स्वमाश्रमं संन्यवर्तत ॥ १ ॥

गो० टी०–स मुहूर्तादित्यादि । उपश्रुत्येति शिष्यमुखाद्वृत्तान्तमिति शेषः ॥ १ ॥

२–३] ति० टी०–प्रत्यूषे प्रातःकाले । न विराजतीमशोभमानाम् ॥ २ ॥ ३ ॥

रा० टी०–स इति । रजसा समभिप्लुताम् अत एव ग्रहग्रस्तां प्रत्यूषे प्रातःकाले न विराजतीं ज्योत्स्नामिव अरजां स भार्गवोऽपश्यत् ॥ २ ॥

---

१ मे वधो वा स्याच्छापो वा यदि दारुणः इति गो. पाठः । २ गृह्णेति गो. पाठः । ३ एतमर्थमिति गो. पाठः । ४ प्रतीक्षन्तीति गो. पाठः

पश्यध्वं विपरीतस्य दण्डस्याविदितात्मनः । विपत्तिं घोरसंकाशां क्रुद्धादग्निशिखामिव ॥ ४ ॥
क्षयोऽस्य दुर्मतेः प्राप्तः सानुगस्य महात्मनः । यः प्रदीप्तां हुताशस्य शिखां वै स्पष्टुमर्हति ॥ ५ ॥
यस्मात्स कृतवान्पापमीदृशं घोरसंहितम् । तस्मात्प्राप्स्यति दुर्मेधाः फलं पापस्य कर्मणः ॥ ६ ॥
सप्तरात्रेण राजासौ सपुत्रबलवाहनः । पापकर्मसमाचारो वधं प्राप्स्यति दुर्मतिः ॥ ७ ॥
समन्ताद्योजनशतं विषयं चास्य दुर्मतेः । धक्ष्यते पांसुवर्षेण महता पाकशासनः ॥ ८ ॥
सर्वसत्वानि यानीह स्थावराणि चराणि च । महता पांसुवर्षेण विलयं सर्वतोऽगमन् ॥ ९ ॥
दण्डस्य विषयो यावत्तावत्सर्वं समुच्छ्रयम् । पांसुवर्षमिवालक्ष्यं सप्तरात्रं भविष्यति ॥ १० ॥
इत्युक्त्वा क्रोधताम्राक्षस्तमाश्रमनिवासिनम् । जनं जनपदान्तेषु स्थीयतामिति चाब्रवीत् ॥ ११ ॥
श्रुत्वा तूशनसो वाक्यं सोऽश्रमावसथो जनः । निष्क्रान्तो विषयात्तस्मात्स्थानं चक्रेऽथ बाह्यतः ॥ १२ ॥

रा० टी०-तस्येति । त्रीन् लोकान् निर्दहन्निव तस्य रोषः समभवत् अत एव शिष्यानुवाच ॥ ३ ॥

गो० टी०-स इति । प्रत्यूषे प्रातःकाले ॥ २ ॥ ३ ॥

४] ति० टी०-विपरीतस्य विपरीतानुष्ठानवतः । क्रुद्धान्मत्तो जायमानामग्निशिखासदृशीं विपत्तिं विनाशं पश्यध्वम् ४

रा० टी०-तदाकारमाह-पश्यध्वमित्यादिभिः । विपरीतस्य विरुद्धमार्गवर्त्तिनः दण्डस्य क्रुद्धामग्निशिखामिव घोरसङ्काशां विपत्तिं पश्यध्वम् ॥ ४ ॥

गो० टी०-पश्यध्वमिति । विपरीतस्य विपरीतानुष्ठानस्य विपत्तिं विनाशं मत्क्रोधतो जायमानामिति शेषः । अग्निशिखामिव स्थितां क्रुद्धामरजाम् । क्रुद्धादग्निशिखामिवेति पाठे क्रुद्धान्मत्तो जायमानामग्निशिखासदृशीं विपत्तिं विनाशं पश्यध्वम् ॥ ४ ॥

५] ति० टी०-अस्य क्षयः प्राप्तस्तत्र हेतुः-य इति ॥५॥

रा० टी०-क्षय इति । यः प्रदीप्तां हुताशस्य शिखां स्पष्टुमर्हति तस्य दण्डकस्य क्षयः प्राप्तः ॥ ५ ॥

गो० टी०-क्षय इति । अस्य प्राप्तः क्षय इति योजना॥५॥

६-७] ति० टी०-सामान्येनोक्तं विशेषेणाह-यस्मादिति । ईदृशं मत्पुत्रीधर्षणरूपम् ॥ ६ ॥ ७ ॥

रा० टी०-यस्मादिति । दुर्मेधा दण्डः पापस्य कर्मणः फलं प्राप्स्यसि ॥ ६ ॥

रा० टी०-फलस्वरूपं बोधयन्नाह-सप्तेति । पापकर्मसमाचारोसौ राजा सप्तरात्रेण वधं प्राप्स्यति ॥ ७ ॥

गो० टी०-शिखां वै स्पष्टुमिच्छतीत्युक्तान्यापदेशार्थं विशदयति-यस्मादित्यादि । ईदृशमिति मत्पुत्रीधर्षणरूपमित्यर्थः ॥ ६ ॥ ७ ॥

८] ति० टी०-धक्ष्यते नाशयिष्यति ॥ ८ ॥

रा० टी०-वधाकारमाह—समन्तादिति । पाकशासनः समंतायोजनशतमस्य विषयं देशं पांसुवर्षेण धक्ष्यते विनाशयिष्यतीत्यर्थः ॥ ८ ॥

गो० टी०-समन्तादिति । धक्ष्यत इति । नाशयिष्यतीत्यर्थः ॥ ८ ॥

९] ति० टी०-विलयमगमन्विलयं गमिष्यन्ति ॥ ९ ॥

रा० टी०-सर्वेति । सर्वतः सर्वदिग्भ्यः महता पांसुवर्षेण सर्वसत्वानि विलयमगमन् गमिष्यन्ति ॥ ९ ॥

गो० टी०-सर्वेति । विलयमगमन् गमिष्यन्तीति यावत्॥९

१०] ति० टी०-सर्वमुच्छ्रयं चराचरप्राणिमात्रमुच्छ्रयत उद्भवतीत्युच्छ्रयः पांसुवर्षमिवालक्ष्यम् । प्रसिद्धप्रलयकालिकमहापांसुवर्षमिव प्राप्य सप्तरात्रं सप्तरात्रिपर्यन्तमलक्ष्यं भविष्यति। विनष्टपुरपौरजानपदं भविष्यतीत्यर्थः ॥ १० ॥

रा० टी०-दण्डस्येति । समुच्छ्रयमतिवृद्धिविशिष्टं यावद्दण्डस्य विषयः तावत्सर्वं सप्तरात्रं पांसुवर्षं प्राप्येति शेषः अलक्ष्यं भविष्यति ॥ १० ॥

गो० टी०-दण्डस्येति । सर्वसमुच्छ्रयं चराचरप्राणिमात्रमित्यर्थः । उच्छ्रयत्यस्मादित्युच्छ्रयम् । पांसुवर्षमिवालक्ष्यमिति । पांसुवर्षं प्रसिद्धप्रलयपांसुमहावर्षमिव प्राप्य सप्तरात्रं सप्तरात्रपर्यन्तमलक्ष्यं भविष्यतीति । विनष्टपुरपौरजानपदकं । भविष्यतीत्यर्थः ॥ १० ॥

११] ति० टी०-तमाश्रमनिवासिनं स्वाश्रमनिवासिनम् । जनपदान्तेषु दण्डजनपदसीमान्तदेशेषु ॥ ११ ॥

रा० टी०-इतीति । क्रोधताम्राक्षो भार्गवः आश्रमनिवासिनं जनं जनपदान्तेषु दण्डस्वामिकदेशान्तेषु स्थीयतामित्यब्रवीत् ॥ ११ ॥

गो० टी०-इतीति । तदाश्रमवासिनमिति । स्वाश्रमनिवासिनमित्यर्थः। जनपदान्तेषु दण्डजनपदसीमान्तदेशेष्वित्यर्थः११

१२] ति० टी०-सोऽश्रमावसथ इत्यार्षः संधिः । स आश्रमनिवासीत्यर्थः । एतावता कथं तदमृगद्विजमित्यस्योत्तरमुक्तम् ॥ १२ ॥

रा० टी०-श्रुत्वेति । आश्रमावसथः आश्रमे निवासी जनः तस्मात् दण्डसम्बन्धिनो विषयात् निष्क्रान्तस्सन् बाह्यतः तद्देशबहिर्भूतदेशे स्थानं चक्रे सोश्रमादित्यार्ष इति भट्टाः ॥ १२ ॥

गो० टी०-श्रुत्वेति । सोश्रमावसथ इति छान्दसः सन्धिः । एतावता कथं तदमृगद्विजमित्यस्योत्तरं निरुक्तम्॥१२॥

१ क्रुद्धामिति गो. रा. पाठः । २ दुरात्मन इति गो. पाठः । ३ भूत्वेति गो. पाठः । ४ वदाश्रमेति गो. पाठः ।

स तथोक्त्वा मुनिजनमरजामिदमब्रवीत् । इहैव वस दुर्मेधे आश्रमे सुसमाहिता ॥ १३ ॥
इदं योजनपर्यन्तं सरः सुरुचिरप्रभम् । अरजे विज्वरा भुङ्क्ष्व कालश्चात्र प्रतीक्ष्यताम्॥१४॥
त्वत्समीपे च ये सत्त्वा वासमेष्यन्ति तां निशाम् । अवध्याः पांसुवर्षेण ते भविष्यन्ति नित्यदा ॥ १५ ॥
श्रुत्वा नियोगं ब्रह्मर्षेः सारजा भार्गवी तदा । तथेति पितरं प्राह भार्गवं भृशदुःखिता ॥ १६ ॥
इत्युक्त्वा भार्गवो वासमन्यत्र समकारयत् । तच्च राज्यं नरेन्द्रस्य सभृत्यबलवाहनम् ॥ १७ ॥
सप्ताहाद्भस्मसाद्भूतं यथोक्तं ब्रह्मवादिना । तस्यासौ दण्डविषयो विन्ध्यशैवलयोर्नृप ॥ १८ ॥
शप्तो ब्रह्मर्षिणा तेन वैधर्म्ये सहिते कृते । ततः प्रभृति काकुत्स्थ दण्डकारण्यमुच्यते ॥ १९ ॥
तपस्विनः स्थिता ह्यत्र जनस्थानमतोऽभवत् । एतत्ते सर्वमाख्यातं यन्मां पृच्छसि राघव ॥ २० ॥
संध्यामुपासितुं वीर समयो ह्यतिवर्तते । एते महर्षयः सर्वे पूर्णकुम्भाः समन्ततः ॥ २१ ॥
कृतोदका नरव्याघ्र आदित्यं पर्युपासते । स तैर्ब्राह्मणमभ्यस्तं सहितैर्ब्रह्मवित्तमैः ॥
रविरस्तंगतो राम गच्छोदकमुपस्पृश । ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

१३] ति० टी०-अथ निर्जनं वनं कथं तपसे प्रविष्ट इत्यस्योत्तरमाह-स तथेति । वासप्रयोजनमाह—सुसमाहिता । शोभनसमाधिमती भूत्वेत्यर्थः । समाध्यनुष्ठाने निमित्तमाह—दुर्मेधे इति । यस्माद्दण्डधर्षणसहिष्णुर्दुर्मतिरसि, अतस्तत्पापनिवृत्तये समाधिरावश्यक इति भावः ॥ १३ ॥

रा० टी०-स इति । स भार्गवः अरजामिदमब्रवीत् तदाकारमाह इहैवाश्रमे सुसमाहिता त्वं वस एतेन अरजाया अपि किञ्चिदपराधस्सूचितः ॥ १३ ॥

गो० टी०-निर्जनम् वनं कथं तपसे प्रविष्ट इत्यस्योत्तरमाह-स तथेत्यादि । तव समलत्वात् इहैव वसेति । वासप्रयोजनमाह-सुसमाहितेति । शोभनसमाधिमतीत्यर्थः । समाध्यनुष्ठानस्यापि निमित्तमाह-दुर्मेध इति । यस्माद्दण्डसहिष्णुदुर्बुद्धिरसि, ततः तादृशमलमोचनार्थं समाधिमती सती वसेत्यर्थः ॥ १३ ॥

१४] ति० टी०-पांसुवर्षे कथं वासस्तत्राह—इदमिति १४

रा० टी०-इदमिति । इदं सरः भुङ्क्ष्व अत्रैव स्थित्वेति शेषः कालः अपराह्णनिवृत्तिसमयः प्रतीक्ष्यताम् त्वयेति शेषः१४

गो० टी०-कथं वस्तुं शक्यं पांसुवर्ष इत्यत्राह-इदं योजनपर्यन्तमित्यादि ॥ १४ ॥

१५-१७] ति० टी०-ये सत्त्वाः पशुपक्ष्यादयो वासमेष्यन्ति । सप्तरात्रमध्येऽपीति शेषः । एवं चोशनोऽनुग्रहेण सरःप्रदेशस्य सुखावासत्वादत्र तपसे प्रविष्ट इति भावः १५-१७

रा० टी०-नन्वस्याश्रमस्यापि आशु विनाशित्वात् कथमत्र वास इत्यत आह—त्वदिति । त्वत्समीपे ये सत्त्वा प्राणिनः निशां निशायां वासमेष्यन्ति ते पांसुवर्षेण अवध्या भविष्यन्ति ॥ १५ ॥

रा० टी०-श्रुत्वेति । अरजा भृशदुःखितापि पितरं तथेति प्राह ॥ १६ ॥

रा० टी०-इतीति भार्गवः अन्यत्र वासं समकारयत् अर्द्धं पृथक् । तदिति । नरेन्द्रस्य राज्यं ब्रह्मवादिना यथोक्तं सप्ताहात् भस्मसाद्भूतम् ॥ १७ ॥

गो० टी०-त्वत्समीप इति । सत्त्वाः पक्ष्यादयः । एवं चोशनसोनुग्रहेण सरःप्रदेशस्य सुखावहत्वात्सुखवासत्वाच्चात्र तपसे प्रविष्ट इति भावः ॥ १५-१७ ॥

१८] ति० टी०-तस्यासौ । व्यत्ययात्षष्ठी । सोऽसावित्यर्थः । विन्ध्यशैवलयोः मध्ये इति शेषः ॥ १८ ॥

रा० टी०-तस्येति । असहिते असहनीये वैधर्म्ये कृते सति ब्रह्मर्षिणा शप्तः विंध्यशैवलयोर्मध्ये विद्यमानः तस्य दण्डस्य दण्डविषयः दण्डविशिष्टदेशः असावेव ॥ १८ ॥

गो० टी०-तस्येति । तस्यासौ व्यत्ययात् षष्ठी । सोसावित्यर्थः । सहिते पूर्णधर्मपूर्णसौख्यसहित इत्यर्थः । कृते कृतयुगे ॥ १८—२० ॥

१९-२१] ति० टी०-सहितं पूर्णधर्मपूर्णसौख्यसहितं कृते कृतयुगे तेन राज्ञा वैधर्म्यं धर्मवैपरीत्ये कृते सति यो ब्रह्मर्षिणा शप्तः सोऽसावित्यन्वयः॥ १९-२१ ॥

रा० टी०-तत इति । ततः प्रभृति दण्डकारण्यमुच्यते हि यतः तपस्विनः स्थिताः अतः जनस्थानमभवत् ॥ १९ ॥

रा० टी०-एतदिति । सन्ध्यामुपासितुं समयोतिवर्तते अत एव महर्षयः कृतोदकाः सन्तः आदित्यं पर्युपासते श्लोकद्वयमेकान्वयि ॥ २० ॥ २१ ॥

गो० टी०-एत इति । कृतोदकाः कृतस्नानादिकर्माण इत्यर्थः ॥ २१ ॥

२२] ति० टी०-कृतोदकाः कृतस्नानादिकर्माणः । स रविर्ब्रह्मवित्तमैः सहितैस्तीर्थसमीपे संगतैरभ्यस्तं ब्राह्मणं ब्राह्मणपठितोपनिषद्बोधितज्ञानाभ्यासं तल्लक्षणां पूजां प्राप्येति शेषः । रविरस्तं गतः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकाशीतितमः सर्गः ॥८१॥

द्व्यशीतितमः सर्गः ।

रामः प्रभाते सरसि स्नात्वा सन्ध्यामन्वास्य मुनिदत्तकंदमूलशाल्यादीनि पूर्वदिने एव गृहीतत्वादमुक्त्वैवागस्त्यादींस्तपोधनानभिवाद्य पुष्पकमारुह्य साकेतं प्रविश्य विसृज्य च तद्विमानं भरतलक्ष्मणयोरानयनाय प्रतीहारं प्राहिणोत् ।

ऋषेर्वचनमाज्ञाय रामः संध्यामुपासितुम् । अपाक्रामत्सरः पुण्यमप्सरोगणसेवितम् ॥ १ ॥
तत्रोदकमुपस्पृश्य संध्यामन्वास्य पश्चिमाम् । आश्रमं प्राविशद्रामः कुम्भयोनेर्महात्मनः ॥ २ ॥
तस्यागस्त्यो बहुगुणं कन्दमूलं तथौषधम् । शाल्यादीनि पवित्राणि भोजनार्थमकल्पयत् ॥ ३ ॥
स भुक्तवान्नरश्रेष्ठस्तदन्नममृतोपमम् । प्रीतश्च परितुष्टश्च तां रात्रिं समुपाविशत् ॥ ४ ॥
प्रभाते काल्यमुत्थाय कृत्वाह्निकमरिंदमः । ऋषिं समुपचक्राम गमनाय रघूत्तमः ॥ ५ ॥
अभिवाद्याब्रवीद्रामो महर्षिं कुम्भसंभवम् । आपृच्छे त्वाश्रमं गन्तुं मामनुज्ञातुमर्हसि ॥ ६ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि दर्शनेन महात्मनः । द्रष्टुं चैवागमिष्यामि पावनार्थं ममात्मनः ॥ ७ ॥
तथा वदति काकुत्स्थे वाक्यमद्भुतदर्शनम् । उवाच परमप्रीतो धर्मनेत्रस्तपोधनः ॥ ८ ॥

रा० टी०-स इति । रविरस्तं गतः अतः सहितैः संगीभूतैः ब्रह्मवित्तमैर्ब्रह्मर्षिभिस्सह गच्छ ब्राह्मणं ब्राह्मणोपदिष्टमभ्यस्तं समीपवर्त्ति उदकमुपस्पृश च ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

गो० टी०-स तैरिति । स रविः ब्रह्मवित्तमैः तीर्थसमीपे सहितैः संगतैस्तैर्ऋषिभिरभ्यस्तं ब्राह्मणं ब्रह्ममन्त्रतन्त्रयोगाभ्यासलक्षणपूजां प्राप्येति शेषः ॥ २२ ॥

इति श्रीगोविंदराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

१-२] ति० टी०-ऋषेरिति ॥ १ ॥ २ ॥

रा० टी०-अगस्त्यवचनश्रवणानन्तरकालिकं वृत्तमाह—ऋषेरित्यादिभिः । रामः अप्सरोगणसेवितं सरः अपाक्रामत् अगच्छत् ॥ १ ॥

रा० टी०-तत्रेति । तत्र सरसि पश्चिमां सायङ्कालिकीं संध्यामन्वास्य कुंभयोनेराश्रमं प्राविशत् ॥ २ ॥

गो० टी०-ऋषेरित्यादि ॥ १ ॥ २ ॥

३-४] ति० टी०-कन्दमूलं कन्दरूपं मूलम् । औषधं जरापलितघ्नं दिव्यौषधम् ॥ ३ ॥ ४ ॥

रा० टी०-तस्येति । तस्य रामस्य भोजनार्थं कन्दादीन् अगस्त्योऽकल्पयत् ॥ ३ ॥

रा० टी०-स इति । अन्नं भुक्तवान् अत एव परितुष्टः अत एव प्रीतो रामस्तां रात्रिं समुपाविशत् ॥ ४ ॥

गो० टी०-तस्येति । कन्दमूलं कन्दरूपं मूलं कन्दमूलम् । तथा ओषधिं दिव्यौषधिरूपम् । जरापलितघ्नमित्यर्थः । एवं बहुगुणप्रयोजनार्थं ददौ । भोजनार्थं तु शालिपवित्राणि पवित्रशाल्यन्नानीत्यर्थः ॥ ३ ॥ ४ ॥

५-६] ति० टी०-प्रभात उत्थाय काल्यं प्रातःकालिकमाह्निकं कृत्वा गमनायानुज्ञां ग्रहीतुमृषिं तत्समीपं समुपचक्राम जगाम ॥ ५ ॥ ६ ॥

रा० टी०-प्रभात इति । प्रभाते उत्थाय काल्यं प्रातःकालिकमाह्निकं कृत्वा गमनाय गमनं कर्तुमृषिं समुपचक्राम ॥ ५ ॥

रा० टी०-अभिवाद्येति । रामो महर्षिमब्रवीत् तदाकारमाह स्वाश्रमं गन्तुमापृच्छे प्रार्थयामि अतोऽनुज्ञातुमर्हसि६

गो० टी०-प्रभात इति । काल्यं प्रातःकालिकमाह्निकम् कृत्वा । गमनायेति । गमनानुज्ञार्थमित्यर्थः ॥ ५ ॥ ६ ॥

७] ति० टी०-आगमिष्यामि । अतः परमपि यदाकाङ्क्षा भविष्यतीति शेषः । महात्मनः सकाशादात्मनः पावनार्थमित्यर्थः ॥ ७ ॥

रा० टी०-धन्य इति । तव दर्शनेन अहं धन्योस्मि अत एव अनुगृहीतोस्मि त्वयेति शेषः पावनार्थं भव महात्मनो भवतः द्रष्टुमागमिष्यामि पुनः कदाचिदिति शेषः ॥ ७ ॥

गो० टी०-धन्य इति । आगमिष्यामीति । अतः परमपि यदाकाङ्क्षा तदा आत्मनः पावनार्थमागमिष्यामीत्युक्त्वानित्यर्थः ॥ ७ ॥

८] ति० टी०-तथा वदत्यात्मनः पावनार्थं गमिष्यामीति वदति । परमप्रीतः । एवं विनयवचनादिति शेषः । धर्मो योगधर्मो नेत्रं सर्वज्ञानसाधनं चक्षुर्यस्य सः ॥ ८ ॥

रा० टी०-तथेति । धर्मनेत्रः धर्मप्रवर्त्तकः अगस्त्यः उवाच ॥ ८ ॥

गो० टी०-तथेति । परमप्रीत इति । एवं विनयवचनादिति शेषः । धर्मनेत्र इति । धर्मो नेत्रं ज्ञानसाधनं यस्य स तथा ॥ ८ ॥ ९ ॥

१ उपेति गो. पाठः । २ स्वां पुरीमिति गो. पाठः । ३ इहेति गो. पाठः ।

अन्यद्भुतमिदं वाक्यं तव राम शुभाक्षरम् । पावनः सर्वभूतानां त्वमेव रघुनन्दन ॥ ९ ॥
मुहूर्तमपि राम त्वां येऽनुपश्यन्ति केचन । पाविताः स्वर्गभूताश्च पूज्यास्ते त्रिदिवेश्वरैः ॥ १० ॥
ये च त्वां घोरचक्षुर्भिः पश्यन्ति प्राणिनो भुवि । हतास्ते यमदण्डेन सद्यो निरयगामिनः ॥ ११ ॥
ईदृशस्त्वं रघुश्रेष्ठ पावनः सर्वदेहिनाम् । भुवि त्वां कथयन्तो हि[3] सिद्धिमेष्यन्ति राघव॥१२॥
त्वं गच्छारिष्टमव्यग्रः पन्थानमकुतोभयम् । प्रशाधि राज्यं धर्मेण गतिर्हि जगतो भवान् ॥ १३ ॥
एवमुक्तस्तु मुनिना प्राञ्जलिः प्रग्रहो नृपः । अभ्यवादयत प्राञ्जस्तमृषिं सत्यशीलिनम्[4] ॥ १४ ॥
अभिवाद्य ऋषिश्रेष्ठं तांश्च सर्वांस्तपोधनान् । अध्यारोहत्तदव्यग्रः पुष्पकं हेमभूषितम्[5] ॥ १५ ॥
तं प्रयान्तं मुनिगणा आशीर्वादैः समन्ततः । अपूजयन्महेन्द्राभं सहस्राक्षमिवामराः ॥ १६ ॥
स्वस्थः स ददृशे रामः पुष्पके हेमभूषिते । शशी मेघसमीपस्थो यथा जलधरागमे ॥ १७ ॥
ततोऽर्धदिवसे प्राप्ते पूज्यमानस्ततस्ततः । अयोध्यां प्राप्य काकुत्स्थो मध्यकक्षामवातरत्[6]॥१८॥
ततो विसृज्य रुचिरं पुष्पकं कामगामिनम्[7] । विसर्जयित्वा गच्छेति स्वस्ति तेऽस्त्विति च प्रभुः१९॥

९] ति० टी०–अथागस्त्यो रामस्य ब्रह्मत्वं हृदिकृत्याह—पावनः सर्वभूतानामिति । सर्वजीवानाम् । 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता' इति शास्त्रादित्याशयः । त्वमेवेत्यनेन सर्वपावनस्य भगवद्रूपत्वमेवोक्तम् ॥ ९ ॥

रा० टी०–तदाकारमाह–अतीति । त्वमेव सर्वभूतानां पावनः स्वतः पावनकर्त्ता अतः इदं पावनार्थमागमिष्यामीति वाक्यमत्यद्भुतम् ॥ ९ ॥

१०] ति० टी०–ये त्वां पश्यन्ति । चित्ते स्वतस्त्वब्रह्मतया पश्यन्तीत्यर्थः । तव लीलावतारमूर्तिं विष्णुत्वेन चक्षुषा च ये पश्यन्तीत्यर्थः । ते पाविताः । त्वद्ध्यानदर्शनाभ्यामिति शेषः । अत एव देहान्ते स्वर्गभूताः परमपरं वा स्वर्गं प्राप्ताः, अत एव ते सर्वदैवतैः पूज्याः । एवमनुकूलदृष्टेः फलमुक्तम् ॥ १० ॥

रा० टी०–मुहूर्तमिति । ये मुहूर्तमपि त्वामनुपश्यन्ति ते पाविताः पावनकर्त्तारस्सन्तः सर्वलोकेषु त्रिदिवेश्वरैरपि पूज्या भवन्तीति शेषः पाविता इत्यत्र कृतपूर्वीकटमित्यादिवत्कर्मावित्रक्षया कर्तरि निष्ठाभावनिष्ठान्तप्रकृतिकः अर्शआद्यच् वा ॥ १० ॥

गो० टी०–मुहूर्तमिति । स्वर्गभूताः स्वर्गं प्राप्ताः१०॥११

११] ति० टी०–अथ प्रतिकूलदृष्टेस्तदाह—ये चेति । प्राणिन इति सामान्योक्त्या तपःप्रभावे सत्यपि त्वद्वैमुख्यमात्रेण निरयगामितोक्ता । परं तु ते सद्यस्तत्क्षणमेव निरयगामिन इत्युक्त्या कालान्तरे तादृशरीत्यापि त्वद्दर्शनमाहात्म्यात्ते स्वर्गमोक्षभाज इति सूचितम् ॥ ११ ॥

रा०टी०–ये इति । ये प्राणिनः घोरचक्षुर्भिस्त्वां पश्यन्ति ते निरयगामिनस्सन्तः यमदण्डेन हता भवन्तीति शेषः ॥११॥

१२] ति० टी०–ईदृशः सकलकल्याणगुणः परमानन्दरूपः सर्वदेहिनां पावनोऽसि, अतः कालान्तरे त्वां कथयन्तस्त्वच्चरितं कीर्तयन्तोऽपि सिद्धिं ब्रह्मतारूपां चित्तशुद्धिद्वारा एष्यन्ति प्राप्स्यन्ति । किं च ईदृशस्त्वं पावन इतरविलक्षणपावनत्वस्वभावः । ये त्वां रागद्वेषकामभयान्यतमैरपि कथयन्तस्ते सिद्धिं मोक्षं गमिष्यन्ति ॥ १२ ॥

रा० टी०–ईदृश इति । अत एव त्वां कथयन्तो जनाः सिद्धिमेष्यन्ति ॥ १२ ॥

गो० टी०–ईदृश इति । सिद्धिं परमं तत्त्वं ब्रह्मभावम्१२

१३] ति० टी०–रिष्टं दुःखम् । अरिष्टं सुखम् । गतिः स्वर्गादिगतिसाधनम् ॥ १३ ॥

रा० टी०–त्वमिति । अरिष्टं विघ्नरहितम् अत एव अकुतोभयं पन्थानं त्वं गच्छ राज्यं प्रशाधि हि यतः भवान् एव जगतो गतिः ॥ १३ ॥

गो० टी०–गच्छेति । अरिष्टं सुखम् ॥ १३ ॥

१४-१७] ति० टी०–प्रग्रह उद्यतबाहुः ॥ १४–१७ ॥

रा० टी०–एवमिति । प्राञ्जलिभिः प्रग्रहः प्रग्रहणं यस्य स नृपो रामः ऋषिमगस्त्यमभ्यवादयत ॥ १४ ॥

रा० टी०–अभिवाद्येति । तत्पुष्पकमव्यग्रो रामः अध्यारोहत् ॥ १५ ॥

रा० टी०–तमिति । मुनिगणाः आशीर्वादैः प्रयान्तं रामं समन्ततोऽपूजयन् ॥ १६ ॥

रा० टी०–स्वस्थ इति । जलधरागमे मेघसमीपस्थः शशी प्रातिपदिकश्चन्द्र इव हेमभूषिते पुष्पके रामो ददृशे एतेनोपमालङ्कारेण रामस्सर्वेनमस्कृतोऽभूदिति सूचितम् ॥ १७ ॥

गो० टी०–एवमिति । प्रग्रहः उद्यतबाहुः ॥ १४–१७॥

१८] ति० टी०–मध्यकक्षाम् । प्राप्येति शेषः ॥ १८ ॥

रा० टी०–तत इति । ततस्ततः तत्र तत्र पूज्यमानो रामः अर्द्धदिवसे प्राप्ते सति अयोध्यां प्राप्य मध्यकक्षामवातरत् प्राप्नोत् ॥ १८ ॥

गो० टी०–तत इति । मध्यकक्ष्यां प्राप्येति शेषः१८-१९

१९] ति० टी०–विसृज्य स्वरहितं कृत्वा । विसर्जयित्वा । कुबेरं वहेत्यनुज्ञाय ॥ १९ ॥

१ चेति गो. पाठः । २ सर्वदैवतैरिति गो. पाठः। ३ अपी गो. पाठः। ४ पुण्यशालिनमिति गो. पाठः। ५ कक्ष्यामवारुह। आरुहदिति गो. पाठः। ६ तदिति गो. पाठः ।

कक्षान्तरस्थितं क्षिप्रं द्वास्थं रामोऽब्रवीद्वचः । लक्ष्मणं भरतं चैव गत्वा तौ लघुविक्रमौ ॥
ममागमनमाख्याय शब्दापयत मा चिरम् । ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

द्व्यशीतितमः सर्गः ।

भरतलक्ष्मणौ राजसूययागेन यियक्षामीति स्वाशयमवगमयन्तमग्रजं राजसूये भूतीनां महान्क्षयः राजानस्तु निखिला भवत्यत्यनुरक्ता अतो न मत्य रोचते भवन्मनोगतमिति भरतो न्यवेधत् ।

तच्छ्रुत्वा भाषितं तस्य रामस्याक्लिष्टकर्मणः । द्वास्थः कुमारावाहूय राघवाय न्यवेदयत् ॥ १ ॥
दृष्ट्वा तु राघवः प्राप्तावुभौ भरतलक्ष्मणौ । परिष्वज्य तैतो रामो वाक्यमेतदुवाच ह ॥ २ ॥
कृतं मया यथा तथ्यं द्विजकार्यमनुत्तमम् । धर्मसेतुमथो भूयः कर्तुमिच्छामि राघवौ ॥ ३ ॥
अक्षयश्चाव्ययश्चैव धर्मसेतुर्मतो मम । धर्मप्रवचनं चैव सर्वपापप्रणाशनम् ॥ ४ ॥
युवाभ्यामात्मभूताभ्यां राजसूयमनुत्तमम् । सहितो यष्टुमिच्छामि तत्र धर्मस्तु शाश्वतः ॥ ५ ॥
इष्ट्वा तु राजसूयेन मित्रः शत्रुनिबर्हणः । सुहुतेन सुयज्ञेन वरुणत्वमुपागमत् ॥ ६ ॥
सोमश्च राजसूयेन इष्ट्वा धर्मेण धर्मवित् । प्राप्तश्च सर्वलोकेषु कीर्तिं स्थानं च शाश्वतम् ॥ ७ ॥

रा० टी०-तत इति । प्रभुः रामः पुष्पकं विसृज्य त्यक्त्वा गच्छेति विसर्जयित्वा विसर्ज्य उक्त्वेत्यर्थः स्वस्ति तेऽस्तु इत्युवाचेति शेषः ॥ १९ ॥

२०] ति० टी०-शब्दापयत । दौवारिकेणाह्वयस्वेत्यर्थः। बहुवचनमार्षम् । आह्वानं कारयेत्यर्थः ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

रा० टी०-कक्षेति । रामः कक्षान्तरस्थितं चारमब्रवीत् अहं पृथक् तदाकारमाह-लक्ष्मणमिति । लक्ष्मणं भरतं च गत्वा ममागमनमाख्याय उक्त्वा शब्दापयत आह्वयत यूयमिति शेषः ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

गो० टी०-कक्ष्यान्तरेति । विनिक्षिप्तं योजितमिति यावत् । शब्दापयतेति पुगार्षः । आत्मानं शब्दवन्तं कुर्वित्यर्थः । बहुवचनमार्षम् ॥ २० ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्व्यशीतितमः सर्गः ॥ ८२ ॥

१-२] ति० टी०-अथ रामस्य राजसूयकरणेच्छा भरतेन क्षत्रियकुलनाशप्रसङ्गतो निवार्यते—तच्छ्रुत्वेति ॥१॥२॥

रा० टी०-रामाज्ञापनश्रवणानन्तरकालिकं वृत्तमाह—तदित्यादिभिः । द्वास्थः कुमारावाहूय न्यवेदयत् ॥ १ ॥

रा० टी०-दृष्ट्वेति । रामः एतदुवाच ॥ २ ॥

गो० टी०-तच्छ्रुत्वेत्यादि ॥ १ ॥ २ ॥

३] ति० टी०-द्विजकार्यं यथा प्रतिज्ञातं तथा तथ्यं कृतम् । बाल जीवित इत्यर्थः । 'धर्मसेतुं राजा राजसूयेन यजेत' इति विधिना राजासाधारणभूतं धर्ममर्यादारूपमित्यर्थः ३

रा० टी०-तदाकारमाह-कृतमित्यादिभिः । हे राघवौ ! तथ्यं सत्यं द्विजकार्यं मया यथावत्कृतम् अथो अनन्तरं धर्मसेतुं धर्ममर्यादां राजसूयमित्यर्थः कर्तुमिच्छामि ॥ ३ ॥

गो० टी०-कृतमिति । द्विजकार्यं यथा प्रतिज्ञातं तत्तथा तथ्यं कृतम् । बालो जीवित इत्यर्थः । धर्मसेतुं राजधर्ममर्यादाभूतं राजसूयमित्यर्थः ॥ ३ ॥

४] ति० टी०-अक्षयः बहुकालानुभवयोग्यफलत्वात् । अव्ययः सजातीयधर्मान्तरहेतुत्वात् । राजसूयानुष्ठानमेवंभूतमिति किं वक्तव्यम् । यत्कीर्तनमपि विशिष्टफलमित्याह—एवं धर्मप्रवचनं चेति । मम मर्यादाभूतराजसूयधर्मसंकीर्तनं चेत्यर्थः । ' य उ चैनमेवं वेद ' इति श्रुतेः ॥ ४ ॥

रा० टी०-अक्षय इति । यतः धर्मप्रवचनं प्रभूतधर्मचर्चा सर्वपापप्रणाशनं भवति अतः अक्षयः बहुकालसाध्यः अव्ययः नित्यफलकः धर्मसेतुर्मम मतः कर्तव्यत्वेनेप्सितः ॥ ४ ॥

गो० टी०-अक्षय्य इति । धर्मप्रसाधकं धर्मवर्धकमित्यर्थः । धर्मप्रवचनमिति च पाठः ॥ ४ ॥

५-७] ति० टी०-तत्र राजसूये शाश्वतो धर्मः । क्षत्रियस्यासाधारणोऽक्षयकीर्तिहेतुर्धर्म इत्यर्थः ॥ ५-७ ॥

रा० टी०-धर्मसेतोर्निर्वचनं कुर्वन्नाह—युवाभ्यामिति । युवाभ्यां सहितोऽहं राजसूयं यष्टुमिच्छामि तत्र हेतुः तत्र राजसूये शाश्वतः निरन्तरो धर्मः ॥ ५ ॥

१ विनिक्षिप्तमिति गो. पाठः । २ प्रियाविति गो. पाठः । ३ तदेति गो. पा. । ४ प्रसाधकं खेतदिति गो. पाठः । ५ ह्रीति गो. पाठः ।

अस्मिन्नहनि यच्छ्रेयश्चिन्त्यतां तन्मया सह । हितं चायतियुक्तं च प्रयतौ वक्तुमर्हथः ॥ ८ ॥
श्रुत्वा तु राघवस्यैतद्वाक्यं वाक्यविशारदः । भरतः प्राञ्जलिर्भूत्वा वाक्यमेतदुवाच ह ॥ ९ ॥
त्वयि धर्मः परः साधो त्वयि सर्वा वसुंधरा । प्रतिष्ठिता महाबाहो यशश्चामितविक्रम ॥ १० ॥
महीपालाश्च सर्वे त्वां प्रजापतिमिवामराः । निरीक्षन्ते महात्मानं लोकनाथं यथा वयम् ॥ ११ ॥
पुत्राश्च पितृवद्राजन्पश्यन्ति त्वां महाबल । पृथिव्या गतिभूतोऽसि प्राणिनामपि राघव ॥ १२ ॥
स त्वमेवंविधं यज्ञमार्हतोसि कथं नृप । पृथिव्या राजवंशानां विनाशो यत्र दृश्यते ॥ १३ ॥
पृथिव्यां ये च पुरुषा राजन्पौरुषमागताः । सर्वेषां भविता तत्र संक्षयः सर्वकोपजः ॥ १४ ॥
सर्वे पुरुषशार्दूल गुणैरतुलविक्रम । पृथिवीं नार्हसे हन्तुं वशे हि तव वर्तते ॥ १५ ॥
भरतस्य तु तद्वाक्यं श्रुत्वामृतमयं यथा । प्रहर्षमतुलं लेभे रामः सत्यपराक्रमः ॥ १६ ॥
उवाच च शुभं वाक्यं कैकेय्यानन्दवर्धनम् । प्रीतोऽस्मि परितुष्टोऽस्मि तवाद्य वचनेऽनघ ॥ १७ ॥
इदं वचनमक्लीवं त्वया धर्मसमागतम् । व्याहृतं पुरुषव्याघ्र पृथिव्याः परिपालनम् ॥ १८ ॥

रा० टी०–तत्र शिष्टाचारं प्रमाणयन्नाह–इष्ट्वेति । मित्रः सुयज्ञेन राजसूयेन इष्ट्वा वरुणत्वमुपागमत् ॥ ६ ॥

रा० टी०–सोम इति । सोमः सर्वलोकेषु कीर्तिं शाश्वतं स्थानं च प्राप्तः ॥ ७ ॥

गो० टी०–युवाभ्यामिति । तत्र धर्मो हि शाश्वत इति । तत्र राजसूये । क्षत्रियस्यासाधारणः अक्षयकीर्तिहेतुर्धर्म इत्यर्थः ॥ ५–७ ॥

८–९] ति० टी०–हितमिहलोकसुखम् । आयतियुक्तम् । उत्तरकाले च हितमित्यर्थः ॥ ८ ॥ ९ ॥

रा० टी०–अस्मिन्निति । यत् श्रेयः अत्यन्तकल्याणं तत् अस्मिन्नहनि चिन्त्यतां तत्र हेतुः आयतियुक्तमुत्तरकालवृद्धिसहितं हितं प्रयतौ युवां वक्तुमर्हथः ८ ॥

रा० टी०–श्रुत्वेति । भरतः एतदुवाच ॥ ९ ॥

गो० टी०–अस्मिन्निति । हितम् । इह लोके सुखम् आयतियुक्तम् । उत्तरः काल आयतिः । उत्तरकाले च हितमित्यर्थः ॥ ८ ॥ ९ ॥

१०] ति० टी०–सर्वा वसुंधरा प्रतिष्ठिता । सार्वभौमत्वादित्याशयः ॥ १० ॥

रा० टी०–तदाकारमाह–त्वयीत्यादिभिः । त्वयि परो धर्मो वर्तत इति शेषः सर्वा वसुन्धरा यशश्च त्वय्येव प्रतिष्ठिता ॥ १० ॥

गो० टी०–त्वयीति । सर्वा वसुंधरा प्रतिष्ठितेति । सार्वभौमत्वादिति भावः ॥ १० ॥ ११ ॥

११] ति० टी०–प्रजापतिममरा इव परमाप्तत्वेन निरीक्षन्त इत्यर्थः ॥ ११ ॥

रा० टी०–महीपाला इति । सर्वे महीपालाः अमराश्च प्रजापतिं त्वां वयमिव यथावन्निरीक्षन्ते ॥ ११ ॥

१२] ति टी०–पुत्राः पितृवत् । पितरमिवेत्यर्थः ॥१२॥

रा० टी०–पुत्रा इति । पुत्राः पितृवत् त्वां पश्यन्ति महीपालादय इति शेषः अतः पृथिव्याः सकलभूमेः प्राणिनां च त्वं गतिर्भूतोसि ॥ १२ ॥

गो० टी०–प्रजा इति । पितृवत्पितरमिव ॥ १२–१४ ॥

१३] ति० टी०–स त्वं सर्वप्रियः । एवंविधत्वं दर्शयति—पृथिव्यामिति ॥ १३ ॥

रा० टी०–स इति । राजवंशानां यत्र यस्मिन् राजसूये विनाशो दृश्यते तमेवंविधं यज्ञं स सकलप्रियस्त्वं कथमाहर्तासि ॥ १३ ॥

१४] ति० टी०–राजसूयस्य सर्वराजविजयपूर्वं साधनीयत्वात्तत्र चास्मासु प्रवृत्तेषु पृथिव्यां ये क्षत्रियाः पौरुषमागताः शौर्यं प्राप्तास्तेषां सर्वेषां तत्र राजसूयार्थविजये सर्वप्रकोपजः संक्षयोऽवश्यं भविता । एवंविधं क्षत्रियनाशकं यज्ञं सर्वराजभिः पितृवदुपास्यमानः कथमाहर्तुमर्हसि । सर्वथैवानुचितं तवेत्यर्थः ॥ १४ ॥

रा० टी०–विनाशहेतुं वदन्नाह—पृथिव्यामिति । ये पुरुषाः पौरुषं बलगर्वमागताः सर्वेषां तेषां तत्र राजसूयहेतुकराजविजयसमये सर्वकोपजः सर्वाभिमानिविषयकक्रोधजनितः संक्षयो भविता ॥ १४ ॥

१५–१६] ति० टी०–सर्वं तव वशे वर्तत इत्यन्वयः ॥ १५ ॥ १६ ॥

रा० टी०–सर्वमिति । तव वशे सर्वं जगद्वर्तते अतः पृथिवीं तद्वर्त्याभिमानिनोपि हन्तुं त्वं नार्हसि ॥ १५ ॥

रा० टी०–भरतस्येति । रामः अतुलं प्रहर्षं लेभे ॥१६॥

गो० टी०–स त्वमिति । तव वशे वर्तते तव स्वाधीने वर्तते इत्यर्थः ॥ १५–१८ ॥

१७–१८] ति० टी०–वचने वचनरूपे निमित्ते । अनघेति संबुद्धिः ॥ १७ ॥ १८ ॥

---

१ कर्तुमिति गो. पाठः । २ प्रजा इति गो. पाठः । ३ स त्वमिति गो. पाठः । ४ तदेति गो. पाठः । ५ समाहितमिति गो. पाठः ।

एष्यदस्मदभिप्रायाद्राजसूयात्क्रतूत्तमात् । निवर्तयामि धर्मज्ञ तव सुव्याहृतेन च ॥ १९ ॥
लोकपीडाकरं कर्म न कर्तव्यं विचक्षणैः । बालानां तु शुभं वाक्यं ग्राह्यं लक्ष्मणपूर्वज ॥
तस्माच्छ्रृणोमि ते वाक्यं साधु युक्तं महाबले ॥ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

चतुरशीतितमः सर्गः ।

भरतोक्तमङ्गीकुर्वाणं रामं वाजिमेधयागे प्राशस्त्यं कथयन् तत्प्रसंगाद्वृत्रासुरकथां निशमयति सौमित्रिः ।

तथोक्तवति रामे तु भरते च महात्मनि । लक्ष्मणोऽथ शुभं वाक्यमुवाच रघुनन्दनम् ॥ १ ॥
अश्वमेधो महायज्ञः पावनः सर्वपाप्मनाम् । पावनस्तव दुर्धर्षो रोचतां रघुनन्दन ॥ २ ॥
श्रूयते हि पुरावृत्तं वासवे सुमहात्मनि । ब्रह्महत्यावृतः शक्रो हयमेधेन पावितः ॥ ३ ॥
पुरा किल महाबाहो देवासुरसमागमे । वृत्रो नाम महानासीद्दैतेयो लोकसंमतः ॥ ४ ॥

रा० टी०–उवाचेति । कैकेयानन्दवर्द्धनं भरतमुवाच तदाकारमाह तव वचने परितुष्टोस्मि अत एव प्रीतोस्मि १७

रा० टी०–इदमिति । धर्मस्य समागमो यस्मिन् अत एव पृथिव्याः परिपालनं येन तदिदमकीर्तं वचनं त्वया व्याहृतम् ॥ १८ ॥

१९] ति० टी०–एष्यदस्मदभिप्रायादस्मदभिप्रायमेष्यतः । अस्मच्चिकीर्षां प्राप्स्यत इत्यर्थः । निवर्तयामि । अभिप्रायमिति शेषः । तत्र हेतुस्तव सुव्याहृतम् ॥ १९ ॥

रा० टी०–एष्यदिति । एष्यन् प्राप्नुवन् अस्मदभिप्रायो यस्मिन् तस्माद्राजसूयात् तव सुव्याहृतेन वचनेन निवर्त्तयामि स्वोहितमिति शेषः ॥ १९ ॥

गो० टी०–एष्यदिति । एष्यदस्मदभिप्रायात् । अस्मदभिप्रायमेष्यतः मामकचिकीर्षामाजिगमिषत इत्यर्थः॥१९॥२०॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

२०] ति० टी०–तुरप्यर्थं । बालानामपि यद्वाक्यं युक्तमुचितं साधु शुभावहं च तद्ग्राह्यमेव, हि यस्मात्तस्माते वाक्यमीदृशं श्रृणोमि ॥ २० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

रा० टी०–तत्र हेतुमाह–लोकेति । विचक्षणैः पुरुषैः लोकपीडाकरं कर्म न कर्तव्यम् अर्द्धं पृथक् बालानामिति बालानामपि शुभं वाक्यं ग्राह्यं तस्माद्धेतोः युक्तं ते वाक्यं साधु श्रृणोमि ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

१] ति० टी०–अथ लक्ष्मणेनाश्वमेध एव सर्वार्थसाधकोऽनुष्ठेय इत्युक्त्वा तदुपोद्बलकं वृत्रवधाख्यानं प्रस्तूयते–तथेति ॥ १ ॥

रा० टी०–रामोक्तानन्तरकालिकवृत्तमाह—तथेत्यादिभिः । लक्ष्मणः रघुनन्दनमुवाच ॥ १ ॥

गो० टी०–तथोक्तवतीत्यादि ॥ १ ॥

२] ति० टी०–सर्वपाप्मनां पावनोऽस्ति । यतश्च स पावनः, अतो रोचताम् । अनुष्ठातुमिति शेषः ॥ २ ॥

रा० टी०–तदाकारमाह—अश्वेत्यादिभिः । सर्वपापानां पावनो निवर्त्तकोऽश्वमेधोस्तीति शेषः अतः दुर्धर्षः सर्वयज्ञाच्छ्रेष्ठ इत्यर्थः पावनोऽश्वमेधः तव रोचताम् ॥ २ ॥

गो० टी०–अश्वमेध इति । रोचतामित्यादि । अनुष्ठातुमिति शेषः । "सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति श्रुतेः ॥ २ ॥

३] ति० टी०–अश्वमेधस्य सर्वपापशोधकत्वम् 'सर्वं पाप्मानं तरति तरति ब्रह्महत्याम्' इति श्रुतिसिद्धं बोधयितुं पुराणवृत्तान्तमाह–श्रूयते हीति । वासवे वासवविषये ॥ ३ ॥

रा० टी०–अश्वमेधप्रवृत्तौ शिष्टाचारं प्रमाणयन्नाह—श्रूयते इत्यादिभिः । वासवे इन्द्रे पुरावृत्तमश्वमेधप्रवृत्तिः श्रूयते तत्प्रयोजनं वदन्नाह शक्रः हयमेधेन पावितः ॥ ३ ॥

गो० टी०–एवमश्वमेधस्य ब्रह्महत्यान्तसर्वपापशोधकत्वे पुरावृत्तकथनं–श्रूयते हीत्यादि ॥ ३ ॥ ४ ॥

४] ति० टी०–देवासुरसमागमे देवासुरस्नेहकाले ॥ ४ ॥

रा० टी०–तदेव सकारणमाह–पुरेत्यादिभिः । देवासुरयोः समागमे स्नेहकाले योजनशतं विस्तीर्णं ततस्त्रिगुणमुच्छ्रितः वृत्रो नाम दैतेयो य आसीत् सः अनुरागेण स्त्रीयत्वगवेंण हेतुना त्रीन् लोकान् स्नेहात्पश्यति श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

१ मते इति गो. पाठः ।

विस्तीर्णो योजनशतमुच्छ्रितस्त्रिगुणं ततः । अनुरागेण लोकांस्त्रीन्स्नेहात्पश्यति सर्वतः ॥ ५ ॥
धर्मज्ञश्च कृतज्ञश्च बुद्ध्या च परिनिष्ठितः । शशास पृथिवीं स्फीतां धर्मेण सुसमाहितः ॥ ६ ॥
तस्मिन्प्रशासति तदा सर्वकामदुघा मही । रसवन्ति प्रसूनानि मूलानि च फलानि च ॥ ७ ॥
अकृष्टपच्या पृथिवी सुसंपन्ना महात्मनः । स राज्यं तादृशं भुङ्क्ते स्फीतमद्भुतदर्शनम् ॥ ८ ॥
तस्य बुद्धिः समुत्पन्ना तपः कुर्यामनुत्तमम् । तपो हि परमं श्रेयः संमोहमितरत्सुखम् ॥ ९ ॥
स निक्षिप्य सुतं ज्येष्ठं पौरेषु मधुरेश्वरम् । तप उग्रं समातिष्ठत्तापयन्सर्वदेवताः ॥ १० ॥
तपस्तप्यति वृत्रे तु वासवः परमार्तवत् । विष्णुं समुपसंक्रम्य वाक्यमेतदुवाच ह ॥ ११ ॥
तपस्यता महाबाहो लोकाः सर्वे विनिर्जिताः । बलवान्स हि धर्मात्मा नैनं शक्ष्यामि शासितुम्॥१२॥
यद्यसौ तप आतिष्ठेद्भूय एव सुरेश्वर । यावल्लोका धरिष्यन्ति तावदस्य वशानुगाः॥ १३ ॥
तं चैनं परमोदारमुपेक्षसि महाबलम् । क्षणं हि न भवेद्वृत्रः क्रुद्धे त्वयि सुरेश्वर ॥ १४ ॥
यदा हि प्रीतिसंयोगं त्वया विष्णो समागतः । तदा प्रभृति लोकानां नाथत्वमुपलब्धवान् ॥ १५ ॥

५–८] ति० टी०–ततस्त्रिगुणम् । योजनशतत्रयमित्यर्थः। त्रीँल्लोकांस्तद्वर्तिप्राणिनोऽनुरागेण स्त्रीयत्वाभिमानेन हेतुना स्नेहात्संतोषयुक्तचक्षुषा पश्यति स्म ॥ ५–८ ॥

गो० टी०–विस्तीर्ण इति । ततस्त्रिगुणमिति । योजनशतत्रयमित्यर्थः । अनुरागेण मदीयत्वाभिमानेन हेतुना, स्नेहात् ॥ ५–८ ॥

रा० टी०–धर्मज्ञ इति । धर्मज्ञः धर्माणां वेत्ता अत एव कृतज्ञः सुसमाहितो वृत्रः धर्मेण पृथिवीं शशास ॥ ६ ॥

रा० टी०–तस्मिन्निति । तस्मिन्वृत्रे प्रशासति सति मही सर्वकामदुघा आसीत् अत एव प्रसूनानि मूलानि फलानि च रसवन्ति बभूवुरिति शेषः ॥ ७ ॥

रा० टी०–अकृष्टेति । महात्मनः पृथिवी अकृष्टे स्वयमेव पच्यते सा अत एव सुसम्पन्ना आसीदिति शेषः अत एव स वृत्रः अद्भुतदर्शनं तादृशं राज्यं भुङ्क्ते ॥ ८ ॥

९] ति० टी०–इतरत्सुखं विषयसुखम् । संमोहं संमोहकरम् ॥ ९ ॥

रा० टी०–तस्येति । तपः एव परमं श्रेयः इतरत्सुखं तु संमोहं सम्मोहकारकमतः अनुत्तमं तपोहं कुर्यामिति बुद्धिः तस्य वृत्रस्य समुत्पन्ना ॥ ९ ॥

गो० टी०–तस्येति । इतरत्सुखमिति । वैषयिकसुखमित्यर्थः ॥ ९ ॥

१०] ति० टी०–मधुरेश्वरं मधुरश्चासौ तन्नामकत्वादीश्वरस्तम् ॥ १० ॥

रा० टी०–तत्प्रकारमाह—स इति । मधुराणां मधुरवक्तृणामीश्वरमतिमधुरवाचमित्यर्थः ज्येष्ठं सुतं पौरेषु निक्षिप्य-उग्रं तपस्समातिष्ठत् ॥ १० ॥

गो० टी०–स इति । मधुरः सौम्यश्चासावीश्वरश्च मधुरेश्वरः तम् । मधुराया नगर्या ईश्वरं वा ॥ १० ॥

११–१२] ति० टी०–परमार्तवत्परमार्तः सन्॥११-१२॥

रा० टी०–तप इति । वासवः परमार्तवत् विष्णुं समुपसंक्रम्य प्राप्य एतदुवाच ॥ ११ ॥

रा० टी०–तदाकारमाह–तपस्यतेत्यादिभिः । तपस्यता वृत्रेण सर्वे लोकाः विनिर्जिताः तपोबलेन स्ववशीकृता अतः धर्मात्मा स वृत्रः बलवान् अतः एनं वृत्रं शासितुं न शक्ष्यामि ॥ १२ ॥

गो० टी०–तप इति । परमार्तवत् परमार्तः सन्॥११॥१२॥

१३] ति० टी०–भूयोऽतःपरमपि । धरिष्यन्ति । भूतजातमिति शेषः । तावदस्य वशानुगाः सर्वे वयं देवगणा भविष्याम इति शेषः॥ १३ ॥

रा० टी०–यदीति । असौ वृत्रः यदि भूयस्तपः आतिष्ठेत् तदा लोकाः यावद्भूतजातं धरिष्यन्ति तावत् अस्य वृत्रस्य वशानुगा भविष्यन्तीति शेषः ॥ १३ ॥

गो० टी०–यदीति । भूय एव अतः परमपीत्यर्थः । भूतजातमपीति शेषः ॥ १३ ॥

१४] ति० टी०–क्षणं न भवेत् । न जीवेदित्यर्थः ॥१४॥

रा० टी०–तमिति । हि यतः त्वयि क्रुद्धे सति वृत्रः क्षणमपि न भवेत् विनश्येदित्यर्थः अतः एनं वृत्रं त्वं समुपेक्षसि समुपेक्षा न युक्तेति तात्पर्यम् ॥ १४ ॥

गो० टी०–तं चेति । क्षणमपि न भवेत् न जीवेदित्यर्थः१४

१५] ति० टी०–त्वत्संतोषेणैव तस्य सौख्यमित्याह—यदा हीति । तदारभ्यैवेदं तस्य माहात्म्यमिति शेषः॥१५॥

रा० टी०–यदेति । त्वया सह यदा यत्कालादारभ्य प्रीतिसंयोगं समागतः तत्कालादारभ्यैव एतस्य महत्त्वमिति शेषः अर्द्धं पृथक् । इमे इति । वृत्रस्य घातेन हेतुभूतेन दिवौकसः त्वां निरीक्षन्ते प्रतीक्षन्ते अतः तेषां दिवौकसां साह्यं साहाय्यं कुरुष्व ॥ १४ ॥

१ वृत्रेणेति गो० पाठः । २ असुरेश्वर इति गो० पाठः । ३ बलमिति गो० पाठः ।

स त्वं प्रसादं लोकानां कुरुष्व सुसमाहितः । त्वत्कृते नहि सर्वं स्यात्प्रशान्तमरुजं जगत् ॥ १६ ॥
इमे हि सर्वे विष्णो त्वां निरीक्षन्ते दिवौकसः । वृत्रघातेन महता तेषां साह्यं कुरुष्व ह ॥ १७ ॥
त्वया हि नित्यशः साह्यं कृतमेषां महात्मनाम् । असह्यमिदमन्येषामगतीनां गतिर्भवान् ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

पञ्चाशीतितमः सर्गः ।

ततो विष्ण्वंशपूरणेन शक्रो वज्रेण वृत्रं जघान ब्रह्महत्यया च पीडितः इन्द्रोऽश्वमेधेन मां यजतां तेन पावयिष्यामि तमिति पद्मनाभः शरणागतानमरानादिदेश ।

लक्ष्मणस्य तु तद्वाक्यं श्रुत्वा शत्रुनिबर्हणः । वृत्रघातमशेषेण कथयेत्याह सुव्रत ॥ १ ॥
राघवेणैवमुक्तस्तु सुमित्रानन्दवर्धनः । भूय एव कथां दिव्यां कथयामास सुव्रतः ॥ २ ॥
सहस्राक्षवचः श्रुत्वा सर्वेषां च दिवौकसाम् । विष्णुर्देवानुवाचेदं सर्वानिन्द्रपुरोगमान् ॥ ३ ॥
पूर्वं सौहृदवद्धोऽस्मि वृत्रस्येह महात्मनः । तेन युष्मत्प्रियार्थं हि नाहं हन्मि महासुरम् ॥ ४ ॥
अवश्यं करणीयं च भवतां सुखमुत्तमम् । तस्मादुपायमाख्यास्ये सहस्राक्षो वधिष्यति ॥ ५ ॥
त्रेधाभूतं करिष्यामि आत्मानं सुरसत्तमाः । तेन वृत्रं सहस्राक्षो वधिष्यति न संशयः ॥ ६ ॥

गो०टी०–यदा हीति । उपलब्धवान् वृत्र इति शेषः॥१५॥

१६] ति० टी०–त्वत्कृतेन । रक्षणेनेति शेषः ॥ १६ ॥

गो० टी०–स त्वमिति । रक्षणेनेति शेषः ॥ १६ ॥

१७] ति० टी० वृत्रघातेन हेतुना तेषां साह्यमुपकारं कुरु । हशब्दः पादपूरकः ॥ १७ ॥

गो० टी०–इमे हीति । वृत्रघातेन हेतुना साह्यम् उपकारं कुरु । हशब्दः पादपूरकः ॥ १७ ॥

१८] ति० टी०–यद्यपीदं सुरसाहाय्यकरणमन्येषामसुराणामसह्यं तथापि कुरु । यस्मादगतीनामस्माकं सुराणां भवानेव गतिः शरणम् ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

रा० टी०–ननु किमर्थं त्वत्साहाय्यकरणमित्यत आह—त्वयेति । एषां देवानां साह्यं साहाय्यं त्वया नित्यशः कृतं ननु भवन्तोऽप्यतिबलवन्तः अतो भवद्भिरेव कुतो न पराभाव्यते इत्यत आह इदं दैत्यरूपं वस्तु अन्येषामसह्यमतः अगतीनामस्माकं गतिर्भवानेव ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

गो० टी०–त्वया हीति । अन्येषामिदमसह्यम् । अन्येषामसुराणां यद्यपि त्वत्साह्यमसह्यमथापि तत्कुरु । हि यस्माद्भवानेवागतीनां गतिः तस्मात् ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामा०भूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

१] ति० टी०–अथ प्रकृतोपयुक्तशेषकथापूरणम्—लक्ष्मणस्येति ॥ १ ॥

रा० टी०–लक्ष्मणं प्रति राघवस्य पुनः प्रश्नमाह—लक्ष्मणस्येति । शत्रुनिबर्हणो रामः वृत्रघातमशेषेण कथयेत्याह ॥ १ ॥

गो० टी०–लक्ष्मणस्येत्यादि ॥ १–३ ॥

२–३] ति० टी०–दिव्यां कथां प्रकृताम् ॥ २ ॥ ३ ॥

रा० टी०–राघवेणेति । सुमित्रानन्दवर्द्धनः दिव्यां कथां भूयः कथयामास ॥ २ ॥

रा० टी०–तदाकारमाह–सहस्राक्षेत्यादिभिः । दिवौकसां मध्ये सहस्राक्षवचः श्रुत्वा विष्णुर्देवानुवाच ॥ ३ ॥

४–५] ति० टी०–पूर्व युष्माभिस्तद्वधप्रार्थनात्पूर्वम् । सौहृदवद्धः प्रीतिबद्धः ॥ ४ ॥ ५ ॥

रा० टी०–तदाकारमाह—पूर्वमित्यादिभिः । पूर्वं वृत्रस्य सौहृदवद्धोस्मि तेन हेतुना महासुरं युष्मत्प्रियार्थं न हन्मि ॥ ४ ॥

रा० टी०–ननु तर्हि अस्माकं कल्याणं कथं भविष्यतीत्यत आह–अवश्यमिति । भवतां सुखमवश्यं करणीयम् मयेति शेषस्तस्माद्धेतोः उपायं वृत्रवधयत्नमाख्यास्ये अतः सहस्राक्षो वधिष्यति वृत्रमिति शेषः ॥ ५ ॥

गो० टी०–पूर्वमिति । सौहृदवद्धः भक्तिबद्धः । पूर्वमिति । युष्माभिस्तद्वधप्रार्थनात्पूर्वमित्यर्थः ॥ ४ ॥ ५ ॥

६] ति० टी०–त्रेधाभूतं त्रेधाविभक्तम् । आत्मानं स्वतेजोमूर्तिम् ॥ ६ ॥

रा०टी०–उपायाकारमाह–त्रेधेति । द्वाभ्याम् । आत्मा-

१ खिति गो. पाठः । २ येन वृत्रो निहन्यते इति गो. पा. ।

एकांशो वासवं यातु द्वितीयो वज्रमेव तु । तृतीयो भूतलं यातु तदा वृत्रं हनिष्यति ॥ ७ ॥
तथा ब्रुवति देवेशे देवा वाक्यमथाब्रुवन् । एवमेतन्न संदेहो यथा वदसि दैत्यहन् ॥ ८ ॥
भद्रं तेऽस्तु गमिष्यामो वृत्रासुरवधैषिणः । भजस्व परमोदार वासवं स्वेन तेजसा ॥ ९ ॥
ततः सर्वे महात्मानः सहस्राक्षपुरोगमाः । तदारण्यमुपाक्रामन्यत्र वृत्रो महासुरः ॥ १० ॥
ते पश्यंस्तेजसा भूतं तपन्तमसुरोत्तमम् । पिबन्तमिव लोकांस्त्रीन्निर्दहन्तमिवाम्बरम् ॥ ११ ॥
दृष्ट्वैव चासुरश्रेष्ठं देवास्त्रासमुपागमन् । कथमेनं वधिष्यामः कथं न स्यात्पराजयः ॥ १२ ॥
तेषां चिन्तयतां तत्र सहस्राक्षः पुरंदरः । वज्रं प्रगृह्य पाणिभ्यां प्राहिणोद्वृत्रमूर्धनि ॥ १३ ॥
कालाग्निनेव घोरेण दीप्तेनैव महार्चिषा । पतता वृत्रशिरसा जगत्त्रासमुपागमत् ॥ १४ ॥
असंभाव्यं वधं तस्य वृत्रस्य विबुधाधिपः । चिन्तयानो जगामाशु लोकस्यान्तं महायशाः ॥ १५ ॥
तमिन्द्रं ब्रह्महत्याशु गच्छन्तमनुगच्छति । अपतच्चास्य गात्रेषु तमिन्द्रं दुःखमाविशत् ॥ १६ ॥
हतारयः प्रनष्टेन्द्रा देवाः साग्निपुरोगमाः । विष्णुं त्रिभुवनेशानं मुहुर्मुहुरपूजयन् ॥ १७ ॥

नं स्वतेजः त्रेधा भूतं करिष्यामि तेन हेतुना वृत्रं सहस्राक्षो वधिष्यति ॥ ६ ॥

गो० टी०–त्रिधेति । त्रिधाभूतं त्रेधा विभक्तमित्यर्थः ॥ ६ ॥

७–१०] ति० टी०–तृतीयो भूतलं यातु । पतद्वृक्षदेहधारणार्थमित्यर्थः । इन्द्रस्य वृत्रहननजब्रह्महत्यानिवृत्तिं यावद्भूलोकरक्षणार्थं चेत्यपि बोध्यम् ॥ ७–१० ॥

रा० टी०–अंशविभागाकारमाह–एकेति । तदा वृत्रं हनिष्यति इन्द्र इति शेषः ॥ ७ ॥

रा० टी०–तथेति । देवा वाक्यमब्रुवन् तदाकारमाह–यथा त्वं वदसि एतत्त्वद्वचनमेवमेव ॥ ८ ॥

रा० टी०–भद्रमिति । वृत्रासुरवधैषिणो वयं गमिष्यामः ते भद्रमस्तु वासवं स्वेन तेजसा भजस्व च ॥ ९ ॥

रा० टी०–तत इति । ततः प्रार्थनानन्तरं सर्वे देवाः यत्र वृत्रः तदरण्यमुपाक्रामन् ॥ १० ॥

गो० टी०–एकांश इति । तृतीयो भूतलं यात्विति । वृक्षदेहधारणशक्तिसिद्ध्यर्थम् । इन्द्रस्य वृत्रहननजब्रह्महत्याबाधानिवृत्तिर्यावद्भूरारक्षणार्थं चेत्यर्थः ॥ ७–१० ॥

११–१३] ति० टी०–तेजसा प्रागुक्तलक्षणेन स्वेन तेजसा भूतं व्याप्तं पिबन्तमित्यादि तपआधिक्यपरम् ॥ ११-१३ ॥

रा० टी०–ते इति । तपन्तमत एव तेजसा भूतं व्याप्तं त्रीन् लोकान् पिबन्तमिव अम्बरं निर्दहन्तमिव असुरोत्तमं ते देवाः अपश्यन् ॥ ११ ॥

रा० टी०–दृष्ट्वेति । देवाः असुरश्रेष्ठं दृष्ट्वैव त्रासमुपागमन् अथ पृथक् कथमिति एनं कथं वधिष्यामः पराजयोऽस्माकं पराभूतिः कथं न स्यात् इति तेषां चिन्तयतां सतां पुरन्दरः वज्रं वृत्रमूर्धनि प्राहिणोत् सार्धश्लोक एकान्वयी ॥ १२ ॥ १३ ॥

गो० टी०–त इति । भूतं व्याप्तम् । पिबन्तमित्यादिकं तेजोदुर्धर्षत्वपरम् ॥ ११–१३ ॥

१४] ति० टी०–दीप्तेन दीप्यमानेन महार्चिषा महार्चिष्मदयःपिण्डादिसदृशेन वज्रेण वज्रकृतच्छेदेन हेतुना पतता वृत्रशिरसा जगत्त्रासमुपागमत् ॥ १४ ॥

रा० टी०–कालेति । घोरेण कालाग्निनेव यतता वृत्रशिरसा जगत् त्रासं भीतिमुपागमत् ॥ १४ ॥

गो० टी०–कालाग्निनेति । तप्तेन दीप्यमानेन । "तप, संतापदीप्त्योः" इति धातुः । दीप्तेनेति च पाठः । वज्रेण छेदनहेतुना पतता वृत्रशिरसा जगत्त्रासमुपागमत् ॥ १४ ॥

१५] ति० टी०–असंभाव्यमनपराधिनस्तप्यतस्तूर्ष्णीं स्थितस्य वधमनुचितं चिन्तयानो विबुधाधिपो लोकस्यान्तं लोकालोकात्परं तमःप्रदेशं जगाम ब्रह्महत्याभिया पलायितोऽभूत् ॥ १५ ॥

रा० टी०–असंभाव्यमिति । असंभाव्यमनपराधित्वेन ब्राह्मणत्वेन च संभावनारहितं वृत्रस्य वधम् चिन्तयानो विबुधाधिपः लोकस्यान्तं जगाम ॥ १५ ॥

गो० टी०–असंभाव्यमिति । असंभाव्यमनपराधिनस्तप्यतो वृत्रस्य वधमसंभाव्यमनुचितं कृतमिति चिन्तयानो विबुधाधिपः लोकस्यान्तमन्तर्देशं लोकालोकात्परं तमःप्रदेशं जगाम । ब्रह्महत्याभिया पलायितोभूत् ॥ १५ ॥

१६–१७] ति० टी०–तमिन्द्रमनुगमनं तदभिमानिदेवतारूपेण । इन्द्रहतपुत्रेण त्वष्ट्रा मुनिना पुत्रेच्छया 'स्वाहेन्द्रशत्रुर्वर्धस्व' इति होमे कृते आहवनीयाज्जातो वृत्रो ब्राह्मण इति । तमिन्द्रं ब्रह्महत्याग्रस्तमिन्द्रम् ॥ १६ ॥ १७ ॥

रा० टी०–तमिति । गच्छन्तमिन्द्रं ब्रह्महत्या आधनुगच्छति अत एव अस्य इन्द्रस्य गात्रेषु अपतत् अत एव इन्द्रं दुःखमाविशत् प्राप्नोत् ॥ १६ ॥

रा० टी०–हतेति । हतारयो देवा विष्णुं मुहुर्मुहुरपूजयन् सत्कृतमकुर्वन् ॥ १७ ॥

१ शक्रस्तदा वृत्रं वधिष्यतीति गो. पाठः । २ तदरण्यमिति गो. रा. पाठः । ३ तप्यन्तमिति गो. पाठः । ४ तप्तेनेति गो. पाठः ।

त्वं गतिः परमेशान पूर्वजो जगतः पिता । रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ॥ १८ ॥
हतश्चायं त्वया वृत्रो ब्रह्महत्या च वासवम् । बाधते सुरशार्दूल मोक्षं तस्य विनिर्दिश ॥ १९ ॥
तेषां तद्वचनं श्रुत्वा देवानां विष्णुरब्रवीत् । मामेव यजतां शक्रः पावयिष्यामि वज्रिणम् ॥ २० ॥
पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः । पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः ॥ २१ ॥
एवं संदिश्य तां वाणीं देवानां चामृतोपमाम् । जगाम विष्णुर्देवेशः स्तूयमानस्त्रिविष्टपम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

षडशीतितमः सर्गः ।

भगवदुक्तप्रकारेण शचीपतीरितविबुधैरश्वमेधसंभारेषु सम्पादितेषु भक्तिप्रह्वामरेन्द्रोऽश्वमेधेनेजे तेन तस्मान्निर्गताया ब्रह्महत्याया अश्वतुर्षु स्थानेषु त्रिदशकृतो विनियोगोऽत एवानेन यजेति सौमित्युक्तं विचार्य रामः प्रहर्षमतुलं लेभे ।

तदा वृत्रवधं सर्वमखिलेन स लक्ष्मणः । कथयित्वा नरश्रेष्ठः कथाशेषं प्रचक्रमे ॥ १ ॥
ततो हते महावीर्ये वृत्रे देवभयंकरे । ब्रह्महत्यावृतः शक्रः संज्ञां लेभे न वृत्रहा ॥ २ ॥
सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः । कालं तत्रावसत्कंचिद्वेष्टमान इवोरगः ॥ ३ ॥
अथ नष्टे सहस्राक्षे उद्विग्नमभवज्जगत् । भूमिश्च ध्वस्तसंकाशा निःस्नेहा शुष्ककानना ॥ ४ ॥

गो० टी०–तमिति । तं पलायमानमिन्द्रम् । ब्रह्महत्या त्वष्ट्रा मुनिना वृत्रस्योत्पादितत्वात् । अस्य गात्रेष्वपतच्च । ब्रह्महत्येति शेषः । तमिन्द्रं ब्रह्महत्याग्रस्तमिन्द्रमित्यर्थः ॥ १६–२२ ॥

इति श्रीगोविन्द० श्रीरामा० मणिमुकुटाख्याने उत्तरश्री-रामायण० पञ्चाशीतितमः सर्गः ॥ ८५ ॥

१८] ति० टी०–पूर्वजो जगतः पिता । 'अहमस्मि प्रथमजा ऋतस्य' इति श्रुतेः । एवं कारणमूर्तिर्हिरण्यगर्भ एव सर्वभूतरक्षोद्देशेन विष्ण्वाकारत्वं पालनशक्तिप्राधान्येन प्राप्तः॥१८॥

रा० टी०–तदाकारमाह–त्वमिति । त्वं पूर्वजः अत एव जगतः पिता गतिश्च अत एव सर्वभूतानां रक्षार्थं विष्णुत्वमुपजग्मिवान् ॥ १८ ॥

१९] ति० टी०–यदर्थं विष्णुमूर्त्यवलम्बनं तत्कार्यं ते कृतं दुष्टवधेनैव शिष्टपालनादित्याह–हतश्चेति ॥ १९ ॥

रा० टी०–यतस्त्वया वृत्रो हतः इन्द्रेण घातितः अतः वासवं ब्रह्महत्या बाधते अतः तस्य बाधस्य मोक्षं विनिर्दिश ॥ १९ ॥

२०–२२] ति० टी०–मामौपासनाग्निहोत्राश्वमेधान्ताशेषयज्ञयजनीयं विशिष्याश्वमेधस्य साक्षादेवतं मामेव शक्रो यजताम् । ' इन्द्राय स्वाहा ' इत्यादिमन्त्रैश्च तत्तद्देवतान्तर्याम्यहमेव तत्तत्पदैर्बोध्य इति भावः ॥ २०–२२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

रा० टी०–तेषामिति । विष्णुरब्रवीत् तदाकारमाह शक्रः मामेव यजतामतः वज्रिणं पावयिष्यामि ॥ २० ॥

रा० टी०–पावनप्रकारमाह–पुण्येनेति । पाकशासनः हयमेधेन मामिष्ट्वा देवानामिन्द्रत्वं पुनरेष्यति ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

१] ति० टी०–अथाश्वमेधतो ब्रह्महत्यानिवृत्तिकथनेनाश्वमेधवैभवकथनेन च तद्यज्ञप्रोत्साहनम्–तदेति । कथाशेषं प्रचक्रमे । वक्तुमिति शेषः ॥ १ ॥

रा० टी०–लक्ष्मणकर्तृकाग्निमदृत्तान्तं वर्णयितुमुपक्रमते–तदेति । लक्ष्मणः वृत्रवधमखिलेन सर्वात्मना कथयित्वा कथाशेषमुपचक्रमे वक्तुमिति शेषः ॥ १ ॥

गो० टी०–तदा वृत्रेत्यादि । कथाशेषं वक्तुमिति शेषः ॥ १ ॥

२] ति० टी०–न संज्ञां लेभे । ग्रहग्रस्तवत्परवशोऽभूदित्यर्थः ॥ २ ॥

रा० टी०–तत इति । वृत्रे हते सति ब्रह्महत्यावृतः वृत्रहा संज्ञां स्वस्थचित्ततां न लेभे ॥ २ ॥

गो० टी०–तत इति । न संज्ञां लेभ इति । ग्रहग्रस्तवदप्रकाशोऽभूदित्यर्थः ॥ २ ॥

३] ति० टी०–कंचित्कालमवसदित्यन्वयः ॥ ३ ॥

रा० टी०–स इति । लोकानामन्तमाश्रित्य नष्टसंज्ञः स शक्रः वेष्टमान उरग इव कञ्चित्कालम् तत्रावसत् ॥ ॥ ३ ॥

गो० टी०–स इति । कंचित्कालमित्यन्वयः ॥ ३ ॥

४] ति० टी०–नष्टेऽदर्शनं प्राप्ते । उद्विग्नम् । अराजकत्वात् । निःस्नेहा इन्द्राभावमूलावृष्ट्यानार्द्रा ॥ ४ ॥

१ तस्या इति गो. पाठः । २ भयमिति गो. पाठः । ३ इदं पदं रा. पुस्तके नास्ति । ४ देवानामप्युतोपमामिति गो. पाठः

निःस्रोतसस्ते सर्वे तु ह्रदाश्च सरितस्तथा । संक्षोभश्चैव सत्त्वानामनावृष्टिकृतोऽभवत् ॥ ५ ॥
क्षीयमाणे तु लोकेऽस्मिन्संभ्रान्तमनसः सुराः । यदुक्तं विष्णुना पूर्वं तं यज्ञं समुपानयन् ॥ ६ ॥
ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः । तं देशं समुपाजग्मुर्यत्रेन्द्रो भयमोहितः ॥ ७ ॥
ते तु दृष्ट्वा सहस्राक्षमावृतं ब्रह्महत्यया । तं पुरस्कृत्य देवेशमश्वमेधं प्रचक्रिरे ॥ ८ ॥
ततोऽश्वमेधः सुमहान्महेन्द्रस्य महात्मनः । वर्तते ब्रह्महत्यायाः पावनार्थं नरेश्वर ॥ ९ ॥
ततो यज्ञे समाप्ते तु ब्रह्महत्या महात्मनः । अभिगम्याब्रवीद्वाक्यं क्व मे स्थानं विधास्यथ॥१०॥
ते तामूचुस्ततो देवास्तुष्टाः प्रीतिसमन्विताः । चतुर्धा विभजात्मानमात्मनैव दुरासदे ॥ ११ ॥
देवानां भाषितं श्रुत्वा ब्रह्महत्या महात्मनाम् । संदधौ स्थानमन्यत्र वरयामास दुर्वसा ॥ १२ ॥
एकेनांशेन वत्स्यामि पूर्णोदासु नदीषु वै । चतुरो वार्षिकान्मासान्दर्पघ्नी कामचारिणी॥ १३ ॥
भूम्यामहं सर्वकालमेकेनांशेन संवदा । वसिष्यामि न संदेहः सत्येनैतद्ब्रवीमि वः ॥ १४ ॥

रा० टी०-अथेति । सहस्राक्षे नष्टे अदृष्टे सति जगदुद्विग्नमभवत् अत एव निःस्नेहा अत एव शुष्ककानना अत एव ध्वस्तसंकाशा भूमिरभवत् ॥ ४ ॥

गो० टी०-अथेति । नष्टे अदृष्टे । उद्विग्नमिति । अराजकत्वादिति शेषः । निस्स्नेहा अनार्द्रा ॥ ४ ॥

५] ति० टी०-तदेवाह-निःस्रोतस इति ॥ ५ ॥

रा० टी०-निःस्रोतस इति । अनावृष्टिकृतः वृष्टिकरणाभावात् ह्रदाः सरितश्च निःस्रोतसोऽभवन् अत एव सत्त्वानां प्राणिनां संक्षोभोऽभवत् अभवदित्यस्य वचनविपरिणामेन पूर्वत्राप्यन्वयः ॥ ५ ॥

गो० टी०-निस्स्रोतस इति । अनावृष्टिकृत इति । इन्द्राभावमूलानावृष्टिकृत इत्यर्थः ॥ ५ ॥

६-७] ति० टी०-समुपानयन्नावेदयन् । स्मृतवन्त इति यावत् ॥ ६ ॥ ७ ॥

रा० टी०-क्षीयमाण इति । सुराः यत् विष्णुना पूर्वमुक्तं तं यज्ञं समुपानयन् अकुर्वन् सामान्ये नपुंसकम् ॥ ६ ॥

रा० टी०-तत्प्रकारमाह-तत इति । यत्रेन्द्रः तत्र सुरगणाः समुपाजग्मुः ॥ ७ ॥

गो० टी०-क्षीयमाण इति । समुपानयन् संपादयन्ति स्म ॥ ६ ॥ ७ ॥

८-१०] ति० टी०-ते देवेशं विष्णुमिन्द्रं वा॥८-१०॥

रा० टी०-ते इति । ते देवाः शक्रं ब्रह्महत्यासमावृतं दृष्ट्वा अत एव पुरस्कृत्य अश्वमेधं प्रचक्रिरे ॥ ८ ॥

रा० टी०-तत इति । ब्रह्महत्यायाः पावनार्थम् महेन्द्रस्याश्वमेधो वर्तते ॥ ९ ॥

रा० टी०-तत इति । यज्ञे समाप्ते सति महात्मनो देवान् अभिगम्य मे स्थानं क्व विधास्यथ इति ब्रह्महत्याब्रवीत् ॥ १० ॥

गो० टी०-त इति । तं देवेशमिति । विष्णुमित्यर्थः॥८-१०

११] ति० टी०-हे दुरासदे ! ब्रह्महत्ये, आत्मानं चतुर्धा विभजेति तामूचुरित्यन्वयः ॥ ११ ॥

रा० टी०-ते इति । हे दुरासदे ! त्वमात्मानं चतुर्धा विभज इति वचनं ते देवाः तां ब्रह्महत्यामूचुः ॥ ११ ॥

गो० टी०-त इति । हे दुरासदे ! ब्रह्महत्ये इति शेषः ॥ ११ ॥

१२] ति० टी०-संदधौ चतुर्धा विभागं संपादितवती । तथा कृत्वा देवेन्द्रादन्यत्र स्थानं वरयामास । दुर्वसा दुःखजनकवासवती ॥ १२ ॥

रा० टी०-देवानामिति । दुर्वसा दुष्टवस्तुयुक्तब्रह्महत्या अन्यत्र इन्द्रातिरिक्तस्थले स्थानं सन्दधौ स्थाननिश्चयं चकार

गो० टी०-देवानामिति । सन्निधौ देवानां सन्निधौ संदधाविति पाठे चतुर्धा विभागं संपादितवतीत्यर्थः । अन्यत्र महेन्द्रादन्यत्र । दुर्वसा महेन्द्रे दुर्वसा ॥ १२ ॥

१३] ति० टी०-तानि स्थानान्याह—एकेनेति । चतुरो वार्षिकान्मासान्पूर्णोदासु पूर्णोदकासु । तेनान्यदाल्पोदकासु न क्षुद्रनदीषु वासः । सोऽपि प्रत्यासत्त्या पूर्णोदकत्वकाले एव स च कालः ' सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ' इत्युक्तः । दर्पघ्नी । पापिनामिति शेषः । तत्रैव वासे हेतुः—कामचारिणीति । तेन गङ्गादिषु न वास इत्युक्तम् ॥ १३ ॥

रा० टी०-तद्वाक्याकारमाह-एकेनेत्यादिभिः । एकेन अंशेन नदीषु चतुरो वार्षिकान्मासान् दर्पघ्न्यहं वत्स्यामि १३

गो० टी०-एकेनेति । चतुर इति । "सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः" इति स्मरणात् । "पक्षा वै मासाः" इति पक्षानुसारेण चतुष्ट्वात् । दर्पघ्नी । अपुण्यकृतामिति शेषः । कामचारिणी । स्नातुमिच्छतामिति शेषः । कामचारिणीति च पाठः ॥ १३ ॥ १४ ॥

१४] ति० टी०-भूम्यामूषररूपेण वासः ॥ १४ ॥

१ उपाक्रमन्निति गो. पाठः । २ तदेति गो. पाठः । ३ संनिधाविति गो. पाठः । ४ वारिणीति गो. पाठः । ५ दुर्वसेति गो. पाठः ।

योऽयंशस्तृतीयो मे स्त्रीषु यौवनशालिषु । त्रिरात्रं दर्पपूर्णासु वसिष्ये दर्पघातिनी ॥ १५ ॥
हन्तारो ब्राह्मणान्ये तु मृषापूर्वमदूषकान् । तांश्चतुर्थेन भागेन संश्रयिष्ये सुरर्षभाः ॥ १६ ॥
प्रत्यूचुस्तां ततो देवा यथा वदसि दुर्वसे । तथा भवतु तत्सर्वं साधयस्व यदीप्सितम् ॥ १७ ॥
ततः प्रीत्यान्विता देवाः सहस्राक्षं ववन्दिरे । विज्वरः पूतपाप्मा च वासवः समपद्यत ॥ १८ ॥
प्रशान्तं च जगत्सर्वं सहस्राक्षे प्रतिष्ठिते । यज्ञं चाद्भुतसंकाशं तदा शक्रोऽभ्यपूजयत् ॥ १९ ॥
ईदृशो ह्यश्वमेधस्य प्रसादो रघुनन्दन । यजस्व सुमहाभाग हयमेधेन पार्थिव ॥ २० ॥

इति लक्ष्मणवाक्यमुत्तमं नृपतिरतीव मनोहरं महात्मा ।
परितोषमवाप हृष्टचेताः सुनिशम्येन्द्रसमानविक्रमौजाः । ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

सप्ताशीतितमः सर्गः ।

लक्ष्मणोक्त्यनन्तरं रामो बाल्हीश्वरस्येलस्य कथामकथयत् मृगयां कुर्वन्निलः सहानुगो महासेनप्रसवस्थानमगमद्यत्रोमायाः प्रीतिकृते रुद्रः स्त्रीरूपं दधौ तत्रत्याः पुरुषसत्त्वा अपि निखिलाः स्त्रीरूपाश्च अर्धात्कार्दमेयोऽपि सबलं स्त्रीभूतमात्मानं जानन्स्थाणुं संसेव्याप्यलब्धार्थः पार्वतीप्रसादेनैकैकं मासं पुंस्त्वं द्वितीयं च स्त्रीत्वमलब्धेति ।

तच्छ्रुत्वा लक्ष्मणेनोक्तं वाक्यं वाक्यविशारदः । प्रत्युवाच महातेजाः प्रहसन्राघवो वचः ॥ १ ॥

रा० टी०-भूम्यामिति । एकेनांशेन सर्वकालं भूम्यां वसिष्यामि वत्स्यामि ॥ १४ ॥

१५] ति० टी०-दर्पघातिनी पुरुषसंभोगकरणसुखविघातिनी ॥ १५ ॥

रा० टी०-य इति । तृतीयोंऽशस्तेन यौवनशालिषु यौवनशालिनीषु अत एव दर्पपूर्णासु दर्पघातिन्यहं त्रिरात्रं वसिष्ये वत्स्यामि ॥ १५ ॥

गो० टी०-योयमिति । दर्पघातिनी । पुरुषसंभोगसुखहारिणीति भावः ॥ १५-२१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

१६-१८] ति० टी०-अदूषकान्ब्रह्मब्रह्मविद्याब्राह्मणब्रह्मलोकानां मार्गान्तरावलम्बेन दूषणकरणरहितान् । उक्तपदार्थेषु दृढविश्वासान् । मृषापूर्वं मृषावादपूर्वं ये राजस्थानादौ घातं कुर्वन्ति, धिक्कारादि कुर्वन्ति, लोहितादिस्रावं कुर्वन्ति, कैमुतिकन्यायेनैव ये प्राणवियोगं कुर्वन्ति तांश्चतुर्थेन भागेन संश्रयिष्ये । ' यो लोहितं करयावतः प्रस्कन्नं पांसूत्संगृह्णात् । तावत्संवत्सरं पितृलोकं न प्रजानात् । तस्माद्ब्राह्मणाय नापगुरेन्न निहन्यान्न लोहितं कुर्यात् ' इति श्रुतेः ॥ १६-१८ ॥

रा० टी०-हन्तार इति । मृषापूर्वं मिथ्यावादमाश्रित्येत्यर्थः अदूषकान् वेदमहात्म्यायुद्देशकदूषणरहितान् ब्राह्मणान् ये हन्तारस्तांडयितारस्तान् चतुर्थेन भागेन संश्रयिष्ये ॥ १६ ॥

रा० टी०-प्रत्यूचुरिति । यथा त्वं वदसि तथा भवतु अतः यत्तवेप्सितं तत्सर्वं साधयस्व इति वचनं देवाः तां ब्रह्महत्यां प्रत्यूचुः ॥ १७ ॥

रा० टी०-तत इति । ततः ब्रह्महत्यापगमनानन्तरं देवाः सहस्राक्षं ववन्दिरे पूतपाप्मा वासवस्तु विज्वरं सन्तापरहितः समपद्यत अभवत् ॥ १८ ॥

१९-२१] ति० टी०-यज्ञं विष्णुम् ॥ १९-२१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

रा० टी०-प्रशान्तमिति । शक्रः यज्ञं विष्णुमपूजयत् ॥ १९ ॥

रा० टी०-ईदृश इति । हे रघुनन्दन ! यस्याश्वमेधस्य ईदृशः प्रसादः तेन हयमेधेन त्वं यजस्व ॥ २० ॥

रा० टी०-इतीति । नृपतिः रामः इति लक्ष्मणवाक्यं निशम्य परितोषमवाप ॥ २१ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥

१] ति० टी०-अथ रामोऽपीलोपाख्यानेनाश्वमेधस्य राज्ञामशेषानर्थनिवृत्तिपूर्वकपरमेष्टसाधनत्वं दर्शयति-तदिति । अश्वमेधमाहात्म्यमजानानं प्रतीव लक्ष्मणस्तद्वैभवमुक्तवानिति भावेन हासः ॥ १ ॥

रा० टी०-लक्ष्मणवचनश्रवणानन्तरकालिकं वृत्तमाह-तदित्यादिभिः । राघवः प्रत्युवाच ॥ १ ॥

गो० टी०-तच्छ्रुत्वेत्यादि । अश्वमेधवैभवं स्वयमपि जानामीति प्रहासः ॥ १ ॥ २ ॥

---

१ स च पूतात्मेति गो. पाठः । २ प्रभाव इति गो. पाठः । ३ निशम्येति गो. पाठः ।

एवमेव नरश्रेष्ठ यथा वदसि लक्ष्मण । वृत्रघातमशेषेण वाजिमेधफलं च यत् ॥ २ ॥
श्रूयते हि पुरा सौम्य कर्दमस्य प्रजापतेः । पुत्रो बाह्लीश्वरः श्रीमानिलो नाम सुधार्मिकः ॥ ३ ॥
स राजा पृथिवीं सर्वां वशे कृत्वा महायशाः । राज्यं चैव नरव्याघ्र पुत्रवत्पर्यपालयत् ॥ ४ ॥
सुरैश्च परमोदारैर्दैतेयैश्च महाधनैः । नागराक्षसगन्धर्वैर्यक्षैश्च सुमहात्मभिः ॥ ५ ॥
पूज्यते नित्यशः सौम्य भयार्तैं रघुनन्दन । अबिभ्यंश्च त्रयो लोकाः सरोषस्य महात्मनः ॥ ६ ॥
स राजा तादृशोऽप्यासीद्धर्मे वीर्ये च निष्ठितः । बुद्ध्या च परमोदारो बाह्लीकेशो महायशाः ॥ ७ ॥
स प्रचक्रे महाबाहुर्मृगयां रुचिरे वने । चैत्रे मनोरमे मासे सभृत्यबलवाहनः ॥ ८ ॥
प्रजघ्ने स नृपोऽरण्ये मृगाञ्छतसहस्रशः । हत्वैव तृप्तिर्नाभूच्च राज्ञस्तस्य महात्मनः ॥ ९ ॥
नानामृगाणामयुतं वध्यमानं महात्मना । यत्र जातो माहासेनस्तं देशमुपचक्रमे ॥ १० ॥
तस्मिन्प्रदेशे देवेश शैलराजसुतां हरः । रमयामास दुर्धर्षः सर्वैरनुचरैः सह ॥ ११ ॥
कृत्वा स्त्रीरूपमात्मानमुमेशो गोपतिध्वजः । देव्याः प्रियचिकीर्षुः संस्तस्मिन्पर्वतनिर्झरे ॥ १२ ॥
यत्र यत्र वनोद्देशे सत्त्वाः पुरुषवादिनः । दृक्षाः पुरुषनामानस्ते सर्वे स्त्रीजनाभवन् ॥ १३ ॥
यच्च किंचन तत्सर्वं नारीसंज्ञं बभूव ह । एतस्मिन्नन्तरे राजा स इलः कर्दमात्मजः ॥ १४ ॥
निघ्नन्मृगसहस्राणि तं देशमुपचक्रमे । स दृष्ट्वा स्त्रीकृतं सर्वं सव्यालमृगपक्षिणम् ॥ १५ ॥

२] ति० टी०–वृत्रघातं वाजिमेधफलं च यथा वदसि तदेवमेवेत्यन्वयः ॥ २ ॥

रा० टी०–तदाकारमाह–एवमित्यादिभिः । यत् यं वृत्रघातम् अश्वमेधफलं च यथा वदसि तदेवमेव ॥ २ ॥

३–५] ति० टी०–अथ स्वस्य परिपूर्णाश्वमेधज्ञातृत्वज्ञापनायाह—श्रूयते इति । बाह्लिदेशविशेषः ॥ ३–५ ॥

रा० टी०–रामोपि अश्वमेधस्य निखिलानर्थनिवृत्तिकरत्वं द्योतयन् वृत्तमुपक्रमते–श्रूयते इत्यादिभिः । बाल्हीश्वरः बाल्हिदेशस्य राजा इलो नाम कर्दमस्य पुत्रः पुरा श्रूयते ॥३॥

रा० टी०–स इति । राजा स इलः राज्यं राजधर्मं स्वीकृत्येति शेषः सर्वां पृथिवीं वशे कृत्वा च सुरादिभिः नित्यशः पूज्यते अत एव सरोषस्य महात्मन इलस्य त्रयो लोकाः अबिभ्यन् अबिभयुः श्लोकत्रयमेकान्वयि ॥ ४–६ ॥

गो० टी०–अथ वृषध्वजप्रियं विष्ण्वाराधनरूपं हयमेधं श्लाघयितुं राम उपक्रमते—श्रूयत इत्यादि । बाह्लिदेशविशेषः ॥ ३–५ ॥

६–८] ति० टी०–भयार्तत्वं कुतस्तत्राह–अबिभ्यन्निति। अबिभयुरित्यर्थः । तत्र हेतुः—सरोषस्येति ॥ ६–८ ॥

गो० टी०–पूज्यत इति । भयार्तैरिति विशेषणं दैतेयादीनाम् । भयहेतुश्च । तदोप इत्याह—अबिभ्यन्निति । बिभ्युरित्यर्थः ॥ ६–९ ॥

रा० टी०–स इति । बाल्हीकेशः स इलः धर्मे वीर्ये च निष्ठित आसीत् ॥ ७ ॥

रा० टी०–स इति । स राजा चैत्रे मासि रुचिरे वने मृगयां प्रचक्रे ॥ ८ ॥

९] ति० टी०–हत्वैव । हत्वापीत्यर्थः ॥ ९ ॥

रा० टी०–प्रजघ्न इति । नृपः शतसहस्रशः मृगान् प्रजघ्ने हत्वापि राज्ञस्तृप्तिर्नाभूत् ॥ ९ ॥

१०–११] ति० टी०–अयुतमयुतसंख्याकम् । वध्यमानमभूदिति शेषः । अथ यत्र महासेनः स्कन्दो जातस्तं देशमुपचक्रमे जगाम ॥ १० ॥ ११ ॥

१२] ति० टी०–गोपतिध्वजो वृषभध्वज आत्मानं स्त्रीरूपं कृत्वा। तत्र पर्वते तिष्ठतीति शेषः । किमर्थमेवं तत्राह–देव्याः प्रियं चिकीर्षुरिति ॥ १२ ॥

रा० टी०–नानेति । महात्मना राज्ञा नानामृगाणामयुतं वध्यमानमभवदिति शेषः अत एव महासेनः स्कन्दः यत्र जातः तं देशमुपचक्रमे राजेति शेषः ॥ १० ॥

रा० टी०–तस्मिन्निति । अनुचरैस्सह तस्मिन् देशे विहरमाणो हरः देव्याः प्रियं चिकीर्षुस्सन् आत्मानं स्त्रीरूपं कृत्वा पर्वतनिर्झरे शैलराजसुतां रमयामास श्लोकद्वयमेकान्वयि ॥ ११ ॥ १२ ॥

गो० टी०–नानेति । अयुतम् अयुतसंख्याकम् । वध्यमानमभूदिति शेषः । यत्र जात इत्यादि । महासेनः स्कन्दः ॥ १०–१२ ॥

१३–१५] ति० टी०–पुरुषवादिनः पुरुष इति वादो व्यपदेशो येषां ते । पुंलिङ्गवत्त्वेन शब्दवाच्या ये पदार्थाः सन्ति, यच्चान्यत्किंचन नपुंसकवाच्यम्, तत्सर्वं नारीसंज्ञं स्त्रीलिङ्गशब्दवाच्यत्वाहं स्त्रीवेषं बभूव ॥ १३–१५ ॥

रा० टी०–यत्रेति । वनोद्देशे यत्र यत्र पुरुषवादिनः पुंबोधकनामविशिष्टा इत्यर्थः सत्त्वाः मृगादयः पुरुषनामानः

---

१ महायशा इति गो.पा. । २ सुधार्मिक इति गो.पा. । ३ ह्यासीदिति गो.पा. । ४ ये खिति गो.पा. । ५ तदेति गो.पा. । ६ पक्षिकमिति गो.पा. ।

आत्मानं स्त्रीकृतं चैव सानुगं रघुनन्दन । तस्य दुःखं महच्चासीद्दृष्ट्वात्मानं तथागतम् ॥ १६ ॥
उमापतेश्च तत्कर्म ज्ञात्वा त्रासमुपागमत् । ततो देवं महात्मानं शितिकण्ठं कपर्दिनम् ॥ १७ ॥
जगाम शरणं राजा सभृत्यबलवाहनः । ततः प्रहस्य वरदः सह देव्या महेश्वरः ॥ १८ ॥
प्रजापतिसुतं वाक्यमुवाच वरदः स्वयम् । उत्तिष्ठोत्तिष्ठ राजर्षे कार्दमेय महाबल ॥ १९ ॥
पुरुषत्वमृते सौम्य वरं वरय सुव्रत । ततः स राजा शोकार्तः प्रत्याख्यातो महात्मना॥२०॥
स्त्रीभूतोऽसौ न जग्राह वरमन्यं सुरोत्तमात् । ततः शोकेन महता शैलराजसुतां नृपः ॥ २१ ॥
प्रणिपत्य उमां देवीं सर्वेणैवान्तरात्मना । ईशे वराणां वरदे लोकानामसि भामिनी ॥ २२ ॥
अमोघदर्शने देवी[1] भज सौम्येन चक्षुषा । हृद्गतं तस्य राजर्षेर्विज्ञाय हरसंनिधौ ॥ २३ ॥
प्रत्युवाच शुभं वाक्यं देवी रुद्रस्य संमता । अर्धस्य देवो वरदो वरार्धस्य तव ह्यहम् ॥ २४ ॥

वृक्षाश्च ते सर्वे स्त्रीजना भवन् अभवन् वादिनामशब्दयोरुपादानेन सर्वेषां नामान्यपि स्त्रीत्वविशिष्टत्वेन प्रसिद्धानि बभूवुरिति सूचितम् ॥ १३ ॥

गो० टी०–ये त्विति । पुरुष इति वादो व्यपदेशो येषामिति पुरुषवादिनः । पुँल्लिङ्गशब्दवाच्या ये पदार्थाः सन्ति ॥१३॥

रा० टी०–तदेव स्फुटमाह—यदिति । यत्किञ्चन वस्तु तत्सर्वं नारीसंज्ञं नारीत्वविशिष्टमित्यर्थः बभूव अर्द्धं पृथक्—एतस्मिन्निति । एतस्मिन्सर्वेषां स्त्रीभवनरूपे अन्तरे समये मृगसहस्राणि निम्नलिखितं देशमुपचक्रमे ॥ १४ ॥

गो० टी०–यच्चेति । अन्यच्च यच्च किञ्चन नपुंसकलिङ्गवाच्यमस्ति तत्सर्वं नारीसंज्ञं स्त्रीलिङ्गशब्दवाच्यार्हं स्त्रीवेषं बभूव१४

रा० टी०–स इति । स इलः सव्यालमृगपक्षिणं सर्वं स्त्रीकृतं दृष्ट्वा सानुगमात्मानं च स्त्रीकृतं दृष्ट्वा अवर्तत इति शेषः अत एव तथागतं विध्वंसानुगमात्मानं स्त्रीकृतं दृष्ट्वा तस्य इलस्य महद्दुःखमासीत् सार्द्धश्लोक एकान्वयी ॥ १५ ॥ १६ ॥

गो० टी०–स दृष्ट्वेत्यादि । अथात्मानं स्त्रीकृतम् ॥१५॥

१६] ति० टी०–सानुगमात्मानं स्त्रीकृतं स्त्रीरूपं कृतं दृष्ट्वा, आत्मानं तथागतं तथावस्थां प्राप्तमात्मान दृष्ट्वा । इदमुत्तरान्वयि ॥ १६ ॥

गो० टी०–तस्येति । तथागतं तथावस्थां प्राप्तमात्मानं दृष्ट्वा तच्चात्मनस्तथाप्राप्तिरूपं कर्म तदिच्छावशात्प्राप्तं ज्ञात्वा त्रासमुपागमत् ॥ १६–१८ ॥

१७–१९] ति० टी०–तच्च आत्मनस्तादृशावस्थाप्राप्तिरूपमुमापतेः कर्म तदिच्छावशप्राप्तं ज्ञात्वा ॥ १७–१९ ॥

रा० टी०–उमापतेरिति । तत्कर्म उमापतेर्ज्ञात्वा त्रासमुपागमत् राजेति शेषः अर्द्धं पृथक्–तत इति । राजा शितिकण्ठं शरणं जगाम ॥ १७ ॥

रा० टी०–तत इति । वरदः वरस्य दाता महेश्वरः वरदः ईप्सितविनाशकस्सन् प्रजापतिसुतमुवाच ॥ १८ ॥

रा० टी०–तदाकारमाह—उत्तिष्ठेति । हे कार्दमेय ! पुरुषत्वमृते विना वरं वरय ॥ १९ ॥

गो० टी०–उत्तिष्ठेति । कार्दमेयेति शुभादित्वाद्ढक् । पुरुषत्वमृते पुरुषत्वं विना ॥ १९ ॥

२०] ति० टी०–पुरुषत्वमृते तद्विना । प्रत्याख्यातः । पुरुषत्वप्राप्तेरिति शेषः ॥ २० ॥

रा० टी०–तत इति । महात्मना शिवेन प्रत्याख्यातः स्त्रीभूतो राजा अन्यं वरं न जग्राह ॥ २० ॥

गो० टी०–तत इति । न च जग्राह स्त्रीभूत इति । गुरुवैषम्यमार्षम् । अन्यद्वरं पुंस्त्ववरणव्यतिरिक्तम् वरं न जग्राह ॥ २० ॥ २१ ॥

२१] ति० टी०–' न च जग्राह स्त्रीभूतः ' इति पाठे गुरुवैषम्यमार्षम् । अन्यं वरं पुंस्त्वातिरिक्तं वरं न जग्राह । ' अन्यद्वाक्यम् ' इति पाठे पुंस्त्वातिरिक्तवरदातृवाक्यं न जग्राहेत्यर्थः ॥ २१ ॥

रा० टी०–तत इति । शोकेनोपलक्षितो नृपः सर्वेणान्तरात्मना निखिलप्रयत्नेन उमां देवीं प्रणिपत्य अवर्ततेति शेषः ॥ २१ ॥

२२] ति० टी०–सर्वेणैवान्तरात्मना मनोबुद्ध्यभिमानलक्षणेन सर्वेणान्तःकरणेन प्रणिपत्य । साष्टाङ्गं प्रणिपत्येत्यर्थः । वराणामीशे, अत एव लोकानां वरदे त्वं भामिनी असि॥२२॥

रा० टी०–प्रणिपाताकारमाह–ईश इति । हे ईशे ! सौम्येन चक्षुषा भज मां पश्येत्यर्थः ॥ २२ ॥

गो० टी०–ईश इति । सौम्येन चक्षुषा अनुग्रहचक्षुषा मां भज अनुगृहाण ॥ २२ ॥ २३ ॥

२३–२४] ति० टी०–अतः—अमोघेत्यादि । सौम्येन चक्षुषानुग्रहचक्षुषा मां भजानुगृहाण ॥ २३ ॥ २४ ॥

रा० टी०–हृदिति । राजर्षेः हृद्गतमभिप्रायं विज्ञाय रुद्रस्य संमता देवी प्रत्युवाच ॥ २३ ॥

रा० टी०–तदाकारमाह—अर्द्धस्येति । अर्द्धस्य वरस्य दातेति शेषः वरदो देवोऽस्ति वरार्द्धस्य दात्री अहमस्मि तस्मात् स्त्रीपुंसोः स्त्रीपुंसयोरावयोर्यावद्वरमिच्छसि तस्यार्द्धं त्वं गृहाण मत्त इति शेषः ॥ २४ ॥

१ उमामिति गो. पाठः । देवि इति गो. रा. पुस्तकयोः ।

तस्मादर्धं गृहाण त्वं स्त्रीपुंसोर्यावदिच्छसि । तदद्भुततरं श्रुत्वा देव्या वरमनुत्तमम् ॥ २५ ॥
संप्रहृष्टमना भूत्वा राजा वाक्यमथाब्रवीत् । यदि देवि प्रसन्ना मे रूपेणाप्रतिमा भुवि ॥ २६ ॥
मासं स्त्रीत्वमुपासित्वा मासं स्यां पुरुषः पुनः । ईप्सितं तस्य विज्ञाय देवी सुरुचिरानना ॥ २७ ॥
प्रत्युवाच शुभं वाक्यमेवमेव भविष्यति । राजन्पुरुषभूतस्त्वं स्त्रीभावं न स्मरिष्यसि ॥ २८ ॥
स्त्रीभूतश्च परं मासं न स्मरिष्यसि पौरुषम् । एवं स राजा पुरुषो मासं भूत्वाथ कार्दमिः ॥
त्रैलोक्यसुन्दरी नारी मासमेकमिलाभवत् । ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

अष्टाशीतितमः सर्गः ।

जलाशये तपस्यन्सोमसुतो बुध इलानुचरस्त्रीः किंपुरुषीभूयात्र पर्वतरोधसि वसतेति प्रोवाच ।

तां कथामैलसंबद्धां रामेण समुदीरिताम् । लक्ष्मणो भरतश्चैव श्रुत्वा परमविस्मितौ ॥ १ ॥
तौ रामं प्राञ्जली भूत्वा तस्य राज्ञो महात्मनः । विस्तरं तस्य भावस्य तदा पप्रच्छतुः पुनः ॥ २ ॥
कथं स राजा स्त्रीभूतो वर्तयामास दुर्गतिः । पुरुषः स यदा भूतः कां वृत्तिं वर्तयत्यसौ ॥ ३ ॥

गो टी०-अर्धस्येत्यादि । स्त्रीपुंसोरर्धस्य । समासाजन्तनिपाताभाव आर्षः । पुरुषत्वप्राप्तिरूपे वरे अर्धस्य देवो वरदो दाता । अर्धस्यैवाहं दात्री । तस्मात्त्वं मत्तोर्धं गृहाण । यावदिच्छसि यदिच्छसि ॥ २४ ॥ २५ ॥

२५-२६] ति० टी०-स्त्रीपुंसोः । समासान्ताभाव आर्षः । स्त्रीपुंसयोरावयोः सकाशाद्वरमिच्छसीति शेषः । तत्र वरदो देवोऽर्धस्य वरस्य दाता, वरार्धस्याहं दात्री, तस्मात्यावदिच्छसि तदर्धं मत्तो गृहाण ॥ २५ ॥ २६ ॥

रा० टी०-तदिति । राजा अब्रवीत् ॥ २५ ॥

रा० टी०-तदाकारमाह-यदीति । मासं स्त्रीत्वमुपासित्वा प्राप्य मासं पुनः पुरुषः स्याम् ॥ २६ ॥

गो० टी०-यदीति । उपासित्वा प्राप्य ॥ २६ ॥ २७ ॥

२७] ति० टी०-उपासित्वा प्राप्य ॥ २७ ॥

रा० टी०-ईप्सितमिति । देवी प्रत्युवाच तदाकारमाह वाक्यं त्वदुक्तमेवमेवं भविष्यति ॥ २७ ॥

२८] ति० टी०-देवी स्वतोनुग्रहान्तरं करोति-राजन्निति ॥ २८ ॥

रा० टी०-तस्य पश्चात्तापनिवारणाय वरान्तरमप्याह-राजन्निति । पुरुषभूतस्त्वं स्त्रीभावं स्वस्त्रीभवनं न स्मरिष्यसि परं मासं स्त्रीभूतस्त्वं पौरुषं पुरुषभवनं न स्मरिष्यसि ॥२८॥

गो० टी०-अनुग्रहान्तरमाह-राजन्नित्यादि ॥ २८ ॥

२९] ति० टी०-कार्दमिः कर्दमापत्यम् ॥ २९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

रा० टी०-एवमिति । कार्दमिः कर्दमापत्यं मासं पुरुषो भूत्वा मासमेकं त्रैलोक्यसुन्दरी इलाभवत् ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्ताशीतितमः सर्गः ॥ ८७ ॥

गो० टी०-एवमिति । कार्दमिः ।"अत इञ्" ॥ २९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्ताशीतितमः सर्गः ॥ ८७ ॥

१] ति० टी०-अथ कथावशेषप्रश्ने तत्प्रतिपादनम्-तां कथमिति ॥ १ ॥

रा० टी०-रामं प्रति इलसम्बन्धिवृत्तविषयकप्रश्नमुपक्रमते-तामित्यादिभिः । ऐलसंबद्धामिलचरितसम्बन्धिनीं कथां श्रुत्वा परमविस्मितो लक्ष्मणो भरतश्च बभूवतुरिति शेषः ॥ १ ॥

गो० टी०-तां कथामित्यादि ॥ १ ॥

२] ति० टी०-तस्य राज्ञ इलस्य । तस्य भावस्य स्त्रीपुंसभावस्य ॥ २ ॥

रा० टी०-तावितिं । तौ लक्ष्मणभरतौ राज्ञः इलस्य तस्य भावस्य पुरुषत्वसमानाधिकरणस्त्रीत्वधर्मस्य विस्तरं पुनः पप्रच्छतुः ॥ २ ॥

गो टी०-तावितिं । प्राञ्जली इति द्विवचनम् । तस्य भावस्येति । स्त्रीपुंसभावस्येत्यर्थः ॥ २ ॥

३] ति० टी०-स्त्रीभूतः, अत एव दुर्गतिः कथं वर्तयामास । तत्कालमिति शेषः । तथा पुरुषभूतोऽसौ कां वृत्तिं वर्तयति ॥ ३ ॥

रा० टी०-तदाकारमाह-कथमिति । राजा इलः

तयोस्तद्भाषितं श्रुत्वा कौतूहलसमन्वितम् । कथयामास काकुत्स्थस्तस्य राज्ञो यथागमम् ॥ ४ ॥
तमेव प्रथमं मासं स्त्री भूत्वा लोकसुन्दरी । ताभिः परिवृता स्त्रीभिर्येऽस्यै पूर्वं पदानुगाः ॥ ५ ॥
तत्काननं विगाह्याशु विजहे लोकसुन्दरी । द्रुमगुल्मलताकीर्णं पद्भ्यां पद्मदलेक्षणा ॥ ६ ॥
वाहनानि च सर्वाणि संत्यक्त्वा वै समन्ततः । पर्वताभोगविवरे तस्मिन्रेमे इला तदा ॥ ७ ॥
अथ तस्मिन्वनोद्देशे पर्वतस्याविदूरतः । सरः सुरुचिरप्रख्यं नानापक्षिगणायुतम् ॥ ८ ॥
ददर्श सा इलाँ तस्मिन्बुधं सोमसुतं तदा । ज्वलन्तं स्वेन वपुषा पूर्णं सोममिवोदितम् ॥ ९ ॥
तपन्तं च तपस्तीव्रमम्भोमध्ये दुरासदम् । यशस्करं कामकरं कारुण्ये पर्यवस्थितम् ॥ १० ॥
सा तं जलाशयं सर्वं क्षोभयामास विस्मिता । सह तैः पूर्वपुरुषैः स्त्रीभूतै रघुनन्दन ॥ ११ ॥
बुधस्तु तां समीक्ष्यैव कामबाणवशं गतः । नोपलेभे तदात्मानं स चचाल तदाम्भसि ॥ १२ ॥
इलां निरीक्षमाणस्तु त्रैलोक्यादधिकां शुभाम् । [10]चित्तं समभ्यतिक्रामत्कान्वियं देवताधिका॥१३॥
न देवीषु न नागीषु नासुरीष्वप्सरःसु च । दृष्टपूर्वा मया काचिद्रूपेणानेन शोभिता ॥ १४ ॥

स्त्रीभूतस्सन् कथं वर्तयामास यदा स पुरुषो भूतः तदा कां वृत्तिं वर्तयति ॥ ३ ॥

गो० टी०-कथमिति । स्त्रीभूतः अत एव दुर्गतिः कथं वर्तयामास । तत्कालमिति शेषः ॥ ३-६ ॥

४] ति० टी०-यथागमं यथाप्राप्तम् ॥ ४ ॥

रा० टी०-तयोरिति । काकुत्स्थः राज्ञः इलस्य यथागमं यथाप्राप्तं वृत्तं कथयामास ॥ ४ ॥

५-६] ति० टी०-लोकसुन्दरी लोकेभ्यः सुन्दरी । एवंभूतापि सा स्त्रीपरिवृता । कास्ताः स्त्रियस्तत्राह—येऽस्येति ॥ ५ ॥ ६ ॥

रा० टी०-तदाकारमाह-तमित्यादिभिः । अस्य राज्ञः ये पूर्वपदानुगाः ताभिः स्त्रीभिः परिवृता स्त्रीभूता लोकसुन्दरी इला प्रथमं मासं गमयामासेति शेषः ॥ ५ ॥

रा० टी०-तदिति । लोकसुन्दरी काननं पद्भ्यां विगाह्य विजहे ॥ ६ ॥

७] ति० टी०-पर्वतानामाभोगो विस्तारस्तस्य विवरे पर्वतमध्यप्रदेशे ॥ ७ ॥

रा० टी०-वाहनानीति । संत्यक्त्वा संत्यज्य पर्वतानामाभोगस्य विस्तारस्य विवरे समन्ततः इला रेमे ॥ ७ ॥

गो० टी०-वाहनानीति । पर्वतानाम् आभोगो विस्तारः ॥ ७ ॥

८-१०] ति० टी०-पर्वतस्याविदूरतः सरो ददर्शेत्यन्वयः यत्रेश्वराज्ञया स्त्रीत्वप्राप्तिस्ततः परस्मिन्नविदूरे प्रदेशे इत्यर्थः । अत एव बुधस्य सरसि तपश्चरतः स्त्रीत्वाप्राप्तिरिति बोध्यम् ॥ ८-१० ॥

रा० टी०-अथेति । वनोद्देशे पर्वतस्य अविदूरतः निकटे सुरुचिरप्रख्यं सरः इला ददर्श तस्मिन् सरसि उदितं पूर्णसोममिव स्वेन वपुषा ज्वलन्तमंभोमध्ये तीव्रं तपस्तपन्तं यशस्करं कामकरं निरपेक्षं सोमसुतं बुधं च ददर्श श्लोकत्रयमेकान्वयि ॥ ८-१० ॥

गो० टी०-अथेति । अविदूरतः यत्र स्त्रीत्वप्राप्तिस्तस्याविदूरत इत्यर्थः । अन्यदेशत्वात् बुधस्य स्त्रीत्वाप्राप्तिरिति भावः ॥ ८-१० ॥

११] ति० टी०-जलाशयं क्षोभयामास । क्रीडयेति शेषः ॥ ११ ॥

रा० टी०-सेति । स्त्रीभूतैः पुरुषैस्सह सा इला सर्वं जलाशयं क्षोभयामास ॥ ११ ॥

गो० टी०-सेति । क्षोभयामासेति । क्रीडयेति शेषः ॥११॥

१२] ति०टी०-आत्मानं नोपलेभे आत्मध्यानं न प्राप्तवान् । काममोहपरवशचित्तोऽभूदित्यर्थः अम्भसि स्थितः स चचाल ॥ १२ ॥

रा० टी०-बुध इति । तामिलां समीक्ष्यैव कामबाणवशं गतो बुधः आत्मानं स्वशरीरं नोपलेभे संस्मार अत एव अंभसि चचाल इतस्ततो बभ्राम ॥ १२ ॥

गो० टी०-बुधस्त्विति । आत्मानं नोपलेभे । आत्मध्यानं न प्राप्तवानित्यर्थः । कामपरवशचित्तोभूदिति भावः॥१२॥

१३-१४] ति० टी०-चित्तं समभ्यतिक्रामत् । इलायामिति शेषः । इलाविषयचिन्तां प्राप्तमभूदित्यर्थः ॥१३॥१४॥

रा० टी०-इलामिति । त्रैलोक्यादधिकामिलां निरीक्षमाणः राजा अतिष्ठदिति शेषः अत एव देवताधिका इयं का इति चित्तं समभ्यतिक्रामत् संचचाल ॥ १३ ॥

रा० टी०-नेति । अनेन रूपेण शोभिता काचिदपि देव्यादिषु मया दृष्टपूर्वा न ॥ १४ ॥

गो० टी०-इलामिति । चिन्तां समभ्यतिक्रामत् । इलायामिति शेषः । इलाविषयकचिन्तां प्राप्त इत्यर्थः । तदेवाह—का न्वित्यादि ॥ १३ ॥ १४ ॥

१ गतामिति गो. पाठः । २ चेति गो. पा. । ३ पूर्वपदानुगा इति गो. पाठः । ४ सेति गो. पाठः । ५ गणैर्युतमिति गो. पा. । ६ त्विलेति गो. पाठः । ७ तारुण्ये इति गो. पाठः । ८ समिति गो. पाठः । ९ त्रैलोक्याभ्यधिकामिति गो. पाठः । १० चिन्तामिति गो. पाठः ।

सदृशीयं मम भवेद्यदि नान्यपरिग्रहः । इति बुद्धिं समास्थाय जलात्कूलमुपागमत् ॥ १५ ॥
आश्रमं समुपागम्य ततस्ताः प्रमदोत्तमाः । शब्दापयत धर्मात्मा तांश्चैनं च ववन्दिरे ॥ १६ ॥
स ताः पप्रच्छ धर्मात्मा कस्यैषा लोकसुन्दरी । किमर्थमागता चैव सर्वमाख्यात मा चिरम् ॥ १७ ॥
शुभं तु तस्य तद्वाक्यं मधुरं मधुराक्षरम् । श्रुत्वा स्त्रियश्च ताः सर्वा ऊचुर्मधुरया गिरा ॥ १८ ॥
अस्माकमेषा सुश्रोणी प्रभुत्वे वर्तते सदा । अपतिः काननान्तेषु सहास्माभिश्चरत्यसौ ॥ १९ ॥
तद्वाक्यमौव्यक्तपदं तासां स्त्रीणां निशम्य च । विद्यामावर्तनीं पुण्यामावर्तयति[2] स द्विजः ॥ २० ॥
सोऽर्थं विदित्वा सकलं तस्य राज्ञो यथा तथा । सर्वा एव स्त्रियस्ताश्च बभाषे मुनिपुंगवः ॥ २१ ॥
अत्र किंपुरुषीर्भूत्वा शैलरोधसि वत्स्यथ । आवासस्तु गिरावस्मिञ्शीघ्रमेव विधीयताम् ॥२२॥
मूलपत्रफलैः सर्वा वर्तयिष्यथ नित्यदा । स्त्रियः किंपुरुषान्नाम भर्तॄन्समुपलप्स्यथ ॥ २३ ॥
तांः श्रुत्वा सोमपुत्रस्य स्त्रियः[5] किंपुरुषीकृताः । उपासांचक्रिरे शैलं बभ्रवस्ता बहुलास्तदा ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टाशीतितमः सर्गः ॥ ८८ ॥

१५] ति० टी०–यदि नान्यपरिग्रहः । अन्यपरिग्रहत्वरहिता ॥ १५ ॥

रा० टी०–सदृशीति । यदि इयमन्यपरिग्रहः अन्यस्य स्त्री न भवेत् तदा मम सदृशी मत्परिग्रहयोग्या ॥ १५ ॥

गो० टी०–सदृशीति । नान्यपरिग्रहः अन्यपरिग्रहत्वरहिता ॥ १५ ॥

१६–१७] ति० टी०–शब्दापयत आह्वयत ॥१६॥१७॥

रा० टी०–आश्रममिति । धर्मात्मा बुधः प्रमदोत्तमाः शब्दापयत आह्वयत् ताः प्रमदोत्तमाश्च एतं बुधं ववन्दिरे॥१६॥

रा० टी०–स इति । स बुधः ताः स्त्रियः पप्रच्छ तदाकारमाह लोकसुन्दरी एका किमर्थमागता एतत्सर्वमाख्यात यूयं कथयत ॥ १७ ॥

गो० टी०–आश्रममिति । शब्दापयत । पुगार्षः१६–१८

१८] ति० टी०–मधुरं संध्यादिकृतश्रुतिकटुत्वरहितम् । मधुराक्षरं टवर्गादिरहितम् ॥ १८ ॥

रा० टी०–शुभमिति । स्त्रियः मधुरया गिरा ऊचुः॥१८॥

१९] ति० टी०–अपतिः पतिहीना ॥ १९ ॥

रा० टी०–तदाकारमाह—अस्माकमिति । अपतिः एषा सुश्रोणी अस्माकं प्रभुत्वे अस्मन्निरूपितस्वामित्वे सदा वर्तते अत एव अस्माभिस्सह काननान्तेषु असौ सदा चरति ॥१९॥

गो० टी०–अस्माकमिति । अपतिः पतिरहिता ॥१९॥

२०] ति० टी०–आव्यक्तपदमासमन्ताद्व्यक्तानि पदानि यत्र तत् । आवर्तनी विद्या सांग्रहणीपर्यायनामिका संवर्तविद्या तामावर्तयति स्म । तद्विद्यैकसाध्यप्रकृतप्रयोजनार्थमिति शेषः२०

रा० टी०–तदिति । तासां स्त्रीणामव्यक्तं प्रकटितवृत्तरहितं वाक्यं व्यक्तं निशम्य द्विजस्स बुधः आवर्तनीमाज्ञातार्थबोधिनीं विद्यामावर्तयति आवर्तयत् अस्मरत् ॥ २० ॥

गो० टी०–तद्वाक्यमिति । अव्यक्तपदम् अस्पष्टाक्षरमित्यर्थः । आवर्तिनीम् आवर्तिन्याख्यां विद्यामावर्तयत आवर्तयति स्म । प्रकृतप्रयोजनार्थम् । द्विजः क्षत्रियो बुधः ॥ २० ॥

२१] ति० टी०–राज्ञः सकलमर्थं वृत्तान्तं विदित्वा । ध्यानयोगत इति शेषः । ताः स्त्रियः । इलाव्यतिरिक्ता इति शेषः॥२१॥

रा० टी०–स इति । राज्ञ इलस्य सकलमर्थं स बुधो विदित्वा सर्वाः स्त्रियो बभाषे ॥ २१ ॥

गो० टी०–स इति । स बुधः तस्य राज्ञः कार्दमेः सकलमर्थं वृत्तान्तम् विदित्वा । योगमाहात्म्यादिति शेषः । ताः स्त्रियः इलासहचरीः ॥ २१ ॥

२२] ति० टी०–किंपुरुषीर्भूत्वा किंपुरुषाख्यदेवयोनिस्त्रियो भूत्वात्रास्मिञ्शैलरोधसि वत्स्यथ । अस्मिन्गिरावावास उटजादिः शीघ्रमेव विधीयताम् ॥ २२ ॥

रा० टी०–तदाकारमाह–अत्रेत्यादिभिः । किंपुरुषीदेवविशेषस्त्रीत्वं भूत्वा संप्राप्य यूयं शैलरोधसि वत्स्यथ अतः अस्मिन् गिरौ आवासः शीघ्रं विधीयताम् ॥ २२ ॥

गो० टी०–अत्रेति । यूयं सर्वाः किंपुरुषीभूत्वा किंपुरुषाख्यदेवयोनिस्त्रियो भूत्वा अत्रास्मिन् शैलस्य रोधसि वत्स्यथ । अतोस्मिन् गिरौ शीघ्रमेव आवासः उटजादिः विधीयताम्॥२२॥

२३] ति० टी०–स्त्रियः किंपुरुषस्त्रियो यूयं किंपुरुषान्नाम प्रसिद्धान्भर्तॄन्समुपलप्स्यथ । अन्विष्य प्राप्स्यथेत्यर्थः ॥२३॥

रा० टी०–मूलेति । सर्वा यूयं मूलादिभिः वर्तयिष्यथ किम्पुरुषान्नाम भर्तॄन् उपलप्स्यथ च ॥ २३ ॥

गो० टी०–मूलपत्रफलैरिति । स्त्रियः किंपुरुषस्त्रियो यूयं किंपुरुषान्नाम प्रसिद्धान् भर्तॄन् समुपलप्स्यथ । अन्विष्य प्राप्स्यथेत्यर्थः ॥ २३ ॥

२४] ति० टी०–किंपुरुषीकृता बुधेन योगबलात्किंपुरुषस्त्रीकृताः । शैलमुपशैलसमीपे आसांचक्रिरे ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे अष्टाशीतितमः सर्गः ॥ ८८ ॥

---

१ अव्यक्तेति गो. व्यक्तमव्यक्तमिति रा. पा. । २ आवर्तयेति गो. पाठः । ३ गतमिति गो. पा. । ४ पुरुषीति गो. पाठः । ५ तामिति गो. पाठः । ६ वाचमिति गो. पाठः ।

एकोननवतितमः सर्गः ।

क्रमेण इलाया बुधस्य च सङ्गमे तस्यां तस्मात्पुरूरवोऽभिधात्मजस्योत्पत्तिः ।

श्रुत्वा किंपुरुषोत्पत्तिं लक्ष्मणो भरतस्तथा आश्चर्यमिति च ब्रूतौमुभौ रामं जनेश्वरम् ॥ १ ॥
अथ रामः कथामेतां भूय एव महायशाः कथयामास धर्मात्मा प्रजापतिसुतस्य वै ॥ २ ॥
सर्वास्ता विहृता दृष्ट्वा किंनर्यऋषिसत्तमः उवाच रूपसंपन्नां तां स्त्रियं प्रहसन्निव ॥ ३ ॥
सोमस्याहं सुदयितः सुतः सुरुचिराननें भजस्व मां वरारोहे भक्त्या स्निग्धेन चक्षुषा ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा शून्ये स्वजनवर्जिते इला सुरुचिरप्रख्यं प्रत्युवाच महाप्रभम् ॥ ५ ॥
अहं कामचरी सौम्य तवास्मि वशवर्तिनी प्रशाधि मां सोमसुत यथेच्छसि तथा कुरु ॥ ६ ॥
तस्यास्तदद्भुतप्रख्यं श्रुत्वा हर्षमुपागतः स वै कामी सह तया रेमे चन्द्रमसः सुतः ॥ ७ ॥
बुधस्य माधवो मासस्तामिलां रुचिराननाम् गतो रमयतोऽत्यर्थं क्षणवत्तस्य कामिनः ॥ ८ ॥
अथ मासे तु संपूर्णे पूर्णेन्दुसदृशाननः प्रजापतिसुतः श्रीमाञ्शयने प्रत्यबुध्यत ॥ ९ ॥
सोऽपश्यत्सोमजं तत्र तपन्तं सलिलाशये ऊर्ध्ववाहुं निरालम्बं तं राजा प्रत्यभाषत ॥ १० ॥
भगवन्पर्वतं दुर्गं प्रविष्टोऽस्मि सहानुगः न च पश्यामि तत्सैन्यं क्व नु ते मामका गताः॥११॥

रा० टी०-ता इति । किंपुरुषीकृता बुधेन स्वयोगबलात् किम्पुरुषस्त्रीत्वेन संपादिताः वृद्धस्त्रियः सोमपुत्रस्य ताः वाचः श्रुत्वा शैलमुपामाद्भक्तिं विविशुः ॥ २४ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टाशीतितमः सर्गः ॥ ८८ ॥

गो० टी०-तामिति । किंपुरुषीकृताः बुधस्य योगबलात्किंपुरुषस्त्रीकृता इत्यर्थः। शैलमुप शैलस्य समीप इत्यर्थः॥२४॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टाशीतितमः सर्गः ॥ ८८ ॥

१-२] ति० टी०-श्रुत्वेति । किंपुरुषोत्पत्तिं किंपुरुषजातित्वेन तासां स्त्रीणामुत्पत्तिम् । ब्रूतामब्रूताम् ॥१॥२॥

रा० टी०-किम्पुरुषस्त्रीत्वोत्पत्तिश्रवणानन्तरकालिकं वृत्तमाह—श्रुत्वेत्यादिभिः । लक्ष्मणो भरतश्च आश्चर्यमिति

रा० टी०-अथेति । रामः प्रजापतिसुतस्य इलस्य एतां कथां भूयः कथयामास ॥ २ ॥

गो० टी०-श्रुत्वेत्यादि । किंपुरुषोत्पत्तिं किंपुरुषत्वेन तासां स्त्रीणामुत्पत्तिमित्यर्थः । अब्रूताम् ॥ १ ॥ २ ॥

३] ति० टी०-विहृता गता दृष्ट्वा । 'विदृताः' इति पाठान्तरम् । प्रहसन्नेव सर्वासां स्वकुक्ष्या निराकरणात्प्रहासः ॥ ३ ॥

रा० टी०-तदाकारमाह—सर्वा इति । किन्नरीर्विज्वराः दृष्ट्वा ऋषिसत्तमो बुधः रूपसम्पन्नामिलामुवाच ॥३॥

गो० टी०-सर्वा इति । सर्वासाम् इलाव्यतिरिक्तानाम् विदृतत्वात् हामः कामविकारमूल एव ॥ ३ ॥

४-५] ति० टी०-भक्त्यानुरागेण स्निग्धं स्नेहयुक्तम्, न केवलं चक्षुषैव तथाभूतम् ॥ ४ ॥ ५ ॥

रा० टी०-तदाकारमाह-सोमस्येति । अहं सोमस्य सुतः अतः स्निग्धेन स्नेहयुक्तेन चक्षुषा मां भजस्व ॥ ४ ॥

गो० टी०-सोमस्येति । भक्त्यानुरागेण । स्निग्धं स्नेहयुक्तम् ॥ ४ ॥

रा० टी०-तस्येति । इला महाप्रभं बुधं प्रत्युवाच ॥ ५ ॥

गो० टी०-तस्येति । महाप्रभो ग्रहदेवः ॥ ५ ॥

६-८] ति० टी०-कामचरी स्वतन्त्रा ॥ ६-८

रा० टी०-तदाकारमाह-अहमिति । कामचरी स्वेच्छाचारिणी अहं तव वशवर्तिन्यस्मि अतः मां प्रशाधि यथेच्छसि तथा कुरु च ॥ ६ ॥

रा० टी०-तस्या इति । तस्याः इलायाः अद्भुतप्रख्यं वचनं श्रुत्वा हर्षमुपागतः स बुधः तया इलया सह रेमे ॥ ७ ॥

गो० टी०-अहमिति । कामचरी स्वतन्त्रा ॥ ६ ॥ ७ ॥

रा० टी०-बुधस्येति । इलां रमयतो बुधस्य माधवो मासः क्षणवद्गतः ॥ ८ ॥

गो० टी०-बुधस्येति । मासो गत इत्यन्वयः ॥ ८ ॥

९-१०] ति० टी०-प्रजापतिसुत इलः ॥ ९ ॥ १० ॥

रा० टी०-अथेति । प्रजापतिसुतः मासे सम्पूर्णे सति शयने प्रत्यबुध्यत स्वस्वरूपमजानात् ॥ ९ ॥

रा० टी०-स इति । स इलः सोमजं बुधमपश्यत् प्रत्यभाषत च ॥ १० ॥

गो० टी०-अथेति । प्रजापतिसुतः इलः ॥ ९ ॥ १० ॥

११] ति० टी०-विस्मृतस्वकस्त्रीत्वादिवृत्तान्तः पृच्छति-भगवन्निति ॥ ११ ॥

१ अभूतामिति गो. पा. । २ विदृता इति गो. पाठः । ३ वर्जितेति गो. पा. । ४ अहमिति गो. पाठः ।

तच्छ्रुत्वा तस्य राजर्षेर्नष्टसंज्ञस्य भाषितम् । प्रत्युवाच शुभं वाक्यं सान्त्वयन्परया गिरा ॥ १२ ॥
अश्मवर्षेण महता भृत्यास्ते विनिपातिताः । त्वं चाश्रमपदे सुप्तो वातवर्षभयार्दितः ॥ १३ ॥
समाश्वसिहि भद्रं ते निर्भयो विगतज्वरः । फलमूलाशनो वीर निवसेह यथासुखम् ॥ १४ ॥
स राजा तेन वाक्येन प्रत्याश्वस्तो महामतिः । प्रत्युवाच शुभं वाक्यं दीनो भृत्यजनेक्षयात् ॥ १५ ॥
त्यक्ष्याम्यहं स्वकं राज्यं नाहं भृत्यैर्विनाकृतः । वर्तयेयं क्षणं ब्रह्मन्समनुज्ञातुमर्हसि ॥ १६ ॥
सुतो धर्मपरो ब्रह्मञ्ज्येष्ठो मम महायशाः । शशबिन्दुरिति ख्यातः स मे राज्यं प्रपत्स्यते॥१७॥
नहि शक्ष्याम्यहं हित्वा भृत्यदारान्सुखान्वितान् । प्रतिवक्तुं महातेजः किंचिदप्यशुभं वचः ॥ १८ ॥
तथा ब्रुवति राजेन्द्रे बुधः परममद्भुतम् । सान्त्वपूर्वमथोवाच वासस्त इह रोचताम् ॥ १९ ॥
न संतापस्त्वया कार्यः कार्दमेय महाबल । संवत्सरोषितस्याद्यं कारयिष्यामि ते हितम्॥२०॥

रा० टी०–तदाकारमाह–**भगवन्निति**। दुर्गं पर्वतं प्रविष्टः सहानुगोऽहं तत्सैन्यं न पश्यामि तेन मामकाः सेनाधीशाः क्व गता इति न पश्यामि जानामि शब्दानुवृत्तिः ॥ ११ ॥

गो० टी०–इलो विस्मृतस्वश्रीत्वादिवृत्तान्तः पृच्छति—**भगवन्नित्यादि** ॥ ११ ॥

१२] ति० टी०–नष्टसंज्ञस्य । देवीप्रसादवशादिति भावः ॥ १२ ॥

रा० टी०–**तदिति** । गिरा सांत्वयन् सन् प्रत्युवाच बुध इति शेषः ॥ १२ ॥

गो० टी०–**तच्छ्रुत्वेति** । नष्टसंज्ञस्येति । गौरीशापवशादिति शेषः ॥ १२ ॥

१३–१४] ति० टी०–**अश्मवर्षेणेति** । मायावचनमीश्वरवाक्यानुरोधेनेति कतकः ॥ १३ ॥ १४ ॥

रा० टी०–तदाकारमाह–**अश्मेत्यादिभिः** । ते भृत्या अश्मवर्षेण विनिपातिताः त्वं तु वातवर्षभयार्दितस्सन् आश्रमपदे सुप्तः ॥ १३ ॥

रा० टी०–**समिति** । समाश्वसिहि चित्तस्वास्थ्यं कुर्वित्यर्थः फलमूलाशनस्सन् यथासुखमिह निवस ॥ १४ ॥

गो० टी०–**अश्मवर्षेणेति** । अश्मवर्षेणेत्यादि छन्दोवचनं गिरीशशापानुरोधार्थम् ॥ १३ ॥ १४ ॥

१५] ति० टी०–**तेन वाक्येनेति** । इह यथासुखं वसेति वाक्येन ॥ १५ ॥

रा० टी०–**स इति** । भृत्यजनक्षयादीनोऽपि तेन बुधोक्तेन प्रत्याश्वस्त इलः प्रत्युवाच ॥ १५ ॥

गो० टी०–**स इति** । तेन वाक्येनेति । इह यथासुखं निवसेति वाक्येनेत्यर्थः ॥ १५ ॥

१६] ति० टी०–अहं भृत्यैर्विनाकृतोऽपि स्वकं राज्यं न त्यक्ष्यामि त्यक्तुं न शक्नोमि । इह वासत इति शेषः । अतो हे ब्रह्मन्! इह क्षणमपि न वर्तयेयम् । नश्च इहानुकर्षः तस्मान्मां गमनाय समनुज्ञातुमर्हसि ॥ १६ ॥

रा० टी०–तदाकारमाह–**त्यक्ष्यामीत्यादिभिः** । भृत्यैर्विनाकृतोऽहं क्षणमपि न वर्तयेयमतः स्वकं राज्यमहं त्यक्ष्यामि अतः समनुज्ञातुमर्हसि ॥ १६ ॥

गो० टी०–**त्यक्ष्यामीति** । भृत्यैर्विनाकृतोऽप्यहं स्वकं राज्यं न त्यक्ष्यामि त्यक्तुं न शक्नोमि । इह वसान इति शेषः । एतदेवाह—हे ब्रह्मन् ! क्षणमपि न वर्तयेयं । नश्च इहानुकर्षः । तस्मान्मां गमनाय समनुज्ञातुमर्हसि ॥ १६ ॥

१७] ति० टी०–उक्तमेव राज्योत्कण्ठाप्रदर्शनायाह—**सुत इति** । प्रपत्स्यते । मम राज्यम् । प्रतिगमनाभावे इति शेषः ॥ १७ ॥

रा० टी०–**सुत इति** । शशबिन्दुरिति ख्यातो मम सुतोऽस्ति स सुतः राज्यं प्रपत्स्यते प्राप्य पालयिष्यति ॥ १७ ॥

गो० टी०–उक्तवृत्तान्तमेव पुनरौत्कण्ठ्यप्रदर्शनायाह—**सुत इति** । प्रपत्स्यत इति । मया गत्वा कृतादभिषेकादिति भावः ॥ १७ ॥

१८] ति० टी०–सुखान्वितान्देशस्थान्भृत्यदारान्हित्वाहं न शक्ष्यामि । इह स्थातुमिति शेषः । यदेवमतो मां प्रति किंचिदप्यशुभमिह वासनियोगलक्षणानिष्टं वक्तुं नार्हसीति शेषः ॥ १८ ॥

रा० टी०–नन्वीदृश इहैव नित्यं तिष्ठेत्यत आह–**नहीति**। सुखान्वितान् भृत्यदारान् हित्वा प्राप्य असुखं वचः प्रतिवक्तुं न शक्ष्यामि ॥ १८ ॥

गो० टी०–**न हीति** । सुखान्वितानिति । देशस्थानिति शेषः । हित्वा न शक्ष्यामीति । इह स्थातुमिति शेषः । अशुभं वचः इह निवासलक्षणानिष्टवचनं वक्तुं नार्हसीति शेषः१८–२२

१९–२०] ति० टी०–अद्भुतमागम्याद्भुतकर्मसिद्धिजनकं परमं वचः सान्त्वपूर्वं तव किंचित्कालवासेन सुखं भविष्यतीत्येवंवादपूर्वं ते इह वासो रोचतामित्युवाच ॥ १९॥२०॥

रा० टी०–**तथेति** । बुधः सांत्वपूर्वमुवाच तदाकारमाह इहवासस्ते रोचताम् ॥ १९ ॥

---

१ तत इति गो. पाठः । २ क्षयादशुभमिति गो. पा. । ३ इहेति गो. पाठः ।

तस्य तद्वचनं श्रुत्वा बुधस्याक्लिष्टकर्मणः । वासाय विदधे बुद्धिं यदुक्तं ब्रह्मवादिना ॥ २१ ॥
मासं स स्त्री तदा भूत्वा रमयत्यनिशं सदा । मासं पुरुषभावेन धर्मबुद्धिं चकार सः ॥ २२ ॥
ततः सा नवमे मासि इला सोमसुतात्सुतम् । जनयामास सुश्रोणी पुरूरवसमूर्जितम् ॥ २३ ॥
जातमात्रे तु सुश्रोणी पितुर्हस्ते न्यवेशयत् । बुधस्य समवर्णे च इला पुत्रं महाबलम् ॥ २४ ॥
बुधस्तु पुरुषीभूतं स वै संवत्सरान्तरम् । कथाभी रमयामास धर्मयुक्ताभिरात्मवान् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोननवतितमः सर्गः ॥ ८९ ॥

नवतितमः सर्गः ।

एवं संवत्सरमुषित्वा बुधानुमत्या स इलः संवर्तादिमहामुनिप्रसादेनाश्वमेधेनेष्ट्वा धूर्जटेस्तुष्टान्नष्टं पुरुषत्वं पुनरवाप्य यथापूर्वं शाश्वतीः समाः प्रजा अपालयदिति रामोऽनुजावारव्याति स्म ।

तथोक्तवति रामे तु तस्य जन्म तदद्भुतम् । उवाच लक्ष्मणो भूयो भरतश्च महायशाः ॥ १ ॥
इला सा सोमपुत्रस्य संवत्सरमथोषिता । अकरोत्किं नरश्रेष्ठ तत्त्वं शंसितुमर्हसि ॥ २ ॥
तयोस्तद्वाक्यमाधुर्यं निशम्य परिपृच्छतोः । रामः पुनरुवाचेदं प्रजापतिसुते कथाम् ॥ ३ ॥
पुरुषत्वं गते शूरे बुधः परमबुद्धिमान् । संवर्तं परमोदारमाजुहाव महायशाः ॥ ४ ॥
न्यवनं भृगुपुत्रं च मुनिं चारिष्टनेमिनम् । प्रमोदनं मोदकरं तैतो दुर्वाससं मुनिम् ॥ ५ ॥

रा० टी०-नेति । त्वया संतापो न कार्यः संवत्सरोषितस्य ते हितं कारयिष्यामि ॥ २० ॥

२१-२२] ति० टी०-यदुक्तं ब्रह्मवादिना तस्य तद्वचनं श्रुत्वेति संबन्धः ॥ २१ ॥ २२ ॥

रा० टी०-तस्येति । यत् ब्रह्मवादिना बुधेनोक्तं तस्य तद्वचनं श्रुत्वा वासाय बुद्धिं विदधे ॥ २१ ॥

रा० टी०-मासमिति । मासं स्त्री भूत्वा अनिशं रमयति बुधमिति शेषः मासं पुरुषभावेन धर्मबुद्धिं चकार ॥ २२ ॥

२३] ति० टी०-नवमे मासीति न चैवं मध्ये पुरुषत्वावस्थायां गर्भदर्शनेन पूर्वावस्थास्मरणाभावरूपपार्वतीवराव्यथाभावापत्तिः । तद्बलादेव विद्यमानस्यापि गर्भस्यानेनाज्ञानमिति कल्पनेनादोषात् । एतदनुपपत्त्यैव बुधस्य समागममारभ्य नवमे मासि सत्य एव गर्भग्रहणप्रसवाविति-तीर्थः ॥ २३ ॥

रा० टी०-तत इति । नवमे मासि पुरुरवसं सुतं जनयामास ॥ २३ ॥

गो० टी०-तत इति । इला सोमसुतात्सुतं जनयामासेति । योजनगन्ध्यादिः पराशरादेर्व्यासादिमिव निषेकानन्तरमेवेति ज्ञेयम् ॥ २३ ॥

२४] ति० टी०-जातमात्रं तत्क्षण एव पितृसमानाकारं पितृहस्ते उपनयनादिकृत्यार्थं न्यवेदयत्स्थापितवती ॥ २४ ॥

रा० टी०-जातेति । इला जातमात्रं पुत्रं पितुर्हस्ते न्यवेशयत् ॥ २४ ॥

गो० टी०-जातमात्रमिति । जातमात्रं तत्क्षण एव । पितृसमाकारं पितृहस्ते उपनयनादिकृत्यार्थं न्यवेशयत् २४-२५ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोननवतितमः सर्गः ॥ ८९ ॥

२५] ति० टी०-संवत्सरान्तरं संवत्सरान्तरप्राप्त्यपेक्षितावशिष्टमासत्रयपर्यन्तम् ॥ २५ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

रा० टी०-बुध इति । बुधस्तु पुरुषीभूतमिलं धर्मयुक्ताभिः कथाभिः रमयामास ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

१] ति० टी०-तस्य पुरूरवसो जन्म ॥ १ ॥

रा० टी०-रामं प्रति लक्ष्मणभरतयोः पुनः प्रश्नमाह-तथेति द्वाभ्याम् । लक्ष्मणो भरतश्च भूय उवाच ॥ १ ॥

गो० टी०-तथेत्यादि । तस्येति । पुरूरवस इत्यर्थः॥१॥

२] ति० टी०-सोमपुत्रस्य । समीप इति शेषः । किमकरोत् संवत्सरानन्तरमिति शेषः । पुरूरवसः शशबिन्दोश्च तत्पुत्रतया पश्चाज्जातपुरूरवसो राज्यमभूत्र वेति प्रभार्थः ॥२॥

रा० टी०-तदाकारमाह-इलेति । सोमपुत्रस्य समीपे संवत्सरमुषिता इला किमकरोत् तत्त्वं शंसितुमर्हसि ॥ २ ॥

गो० टी०-इलेति । किमिति । संवत्सरात्परमिति शेषः । इलस्य पुरूरवसोपि पुत्रस्य सत्त्वाच्छशबिन्दोः पूर्वपुत्रस्य च सत्त्वात्पुरूरवसो राज्यप्राप्तिरभूत्र वेनि प्रश्नाशयः ॥ २-५ ॥

३-५] ति० टी०-प्रजापतिसुते तद्विषयाम् ॥ ३-५ ॥

१ तथेति गो. पा. । २ शुभेति गो. पा. । ३ जातमात्रमिति गो. पा. । ४ समवर्णाभमिति गो. पाठः । ५ इमामिति गो. पाठः । ६ तथेति गो. पाठः ।

एतान्सर्वान्समानीय वाक्ययज्ञस्तत्त्वदर्शनः । उवाच सर्वान्सुहृदो धैर्येण सुसमाहितान् ॥ ६ ॥
अयं राजा महाबाहुः कर्दमस्य इलः सुतः । जानीतैनं यथाभूतं श्रेयो ह्यत्रै विधीयताम् ॥ ७ ॥
तेषां संवदतामेव द्विजैः सह महात्मभिः । कर्दमस्तु महातेजास्तदाश्रममुपागमत् ॥ ८ ॥
पुलस्त्यश्च क्रतुश्चैव वषट्कारस्तथैव च । ओङ्कारश्च महातेजास्तमाश्रममुपागमन् ॥ ९ ॥
ते सर्वे हृष्टमनसः परस्परसमागमे । हितैषिणो वालिहपतेः पृथग्वाक्यान्यथाब्रुवन्॥ १० ॥
कर्दमस्त्वब्रवीद्वाक्यं सुतार्थे परमं हितम् । द्विजाः शृणुत मद्वाक्यं यच्छ्रेयः पार्थिवस्य हि ॥ ११ ॥
नान्यं पश्यामि भैषज्यमन्तरा वृषभध्वजम् । नाश्वमेधात्परो यज्ञः प्रियश्चैव महात्मनः ॥ १२ ॥
तस्माद्यजामहे सर्वे पार्थिवार्थे दुरासदम् । कर्दमेनैवमुक्तास्तु सर्व एव द्विजर्षभाः ॥ १३ ॥
रोचयन्ति स्म तं यज्ञं रुद्रस्याराधनं प्रति । संवर्तस्य तु राजर्षिः शिष्यः परपुरंजयः ॥ १४ ॥
मरुत्त इति विख्यातस्तं यज्ञं समुपाहरत् । ततो यज्ञो महानासीद्भ्वाश्रमसमीपतः ॥ १५ ॥
रुद्रश्च परमं तोषमाजगाम महायशाः । अथ यज्ञे समाप्ते तु प्रीतः परमया मुदा ॥ १६ ॥
उमापतिर्द्विजान्सर्वानुवाच इलसंनिधौ । प्रीतोऽस्मि हयमेधेन भक्त्या च द्विजसत्तमाः ॥ १७ ॥
अस्य वालिहपतेश्चैव किं करोमि प्रियं शुभम् । तथा वदति देवेशे द्विजास्ते सुसमाहिताः ॥ १८ ॥

रा० टी०–तयोरिति । रामः प्रजापतिसुते तद्विषये कथां पुनरुवाच ॥ ३ ॥

रा० टी०–तदाकारमाह—पुरुषत्वमित्यादिभिः । बुधः संवर्त्तादीन् आजुहाव श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

६] ति० टी०–सुहृदः स्वमित्रसुतान् ॥ ६ ॥

रा० टी०–एतानिति । एतान् सुतान्समानीय उवाच॥६॥

गो० टी०–एतानिति । सुहृदः स्वसखीभूतान् ॥ ६ ॥

७–११] ति० टी०–यथाभूतमीश्वराज्ञयानुभवसिद्धं स्त्रीपुंसरूपप्रकारद्वयं प्राप्तमेनं जानीत ॥ ७–११ ॥

रा० टी०–तदाकारमाह–अयमिति । अयमिलः कर्दमस्य सुतः एनं यथा भूतं यद्धमं प्राप्तं जानीत योगबलेनेति शेषः अत्र अस्मिन् श्रेयः स्त्रीत्वत्यागोपायः विधीयताम् ॥ ७ ॥

रा०टी०–तेषामिति । संवदतां सतां द्विजैस्सह कर्दमः तस्य बुधस्याश्रममुपागमत् ॥ ८ ॥

रा० टी०–द्विजानां नामानि निर्दिशन्नाह—पुलस्त्य इत्यादिभिः । पुलस्त्यप्रभृतिः समुपागमत् ॥ ९ ॥

रा० टी०–ते इति । हृष्टमनसः सर्वे द्विजाः पृथक् वाक्यानि अब्रुवन् ॥ १० ॥

रा० टी०–कर्दम इति । कर्दमोऽब्रवीत् तदाकारमाह पार्थिवस्य इलस्य यच्छ्रेयः तन्मद्वाक्यं शृणुत ११

गो० टी०–अयमिति। यथाभूतमिलस्य वृत्तान्तम ७–११

१२–१४] ति० टी०–वृषभध्वज एव स्वकृतशापनिवर्तनसमर्थस्तत्प्रीतिश्चाश्वमेधेन सर्वदेवताप्रीतिकरणेत्याह—नान्यमिति । नान्यं भैषज्यं पश्यामि । नान्यमित्येतद्विवृणोति—अन्तरा वृषभध्वजम् । नाश्वमेधात्परो यज्ञः । राज्ञां ब्रह्महत्यान्तसर्वपापनिवर्तकत्वादिति भावः । नन्वश्वमेधेन कथं वृषभध्वजसंतोषोऽत आह—प्रिय एव महात्मनः । यद्यपि प्रजापतिर्देवत्यत्वात्प्रजापतिप्रीतिकरः सः, तथापि हिरण्यगर्भावस्थाविशेषस्यैव रुद्रत्वात्र दोषः ॥ १२–१४ ॥

रा० टी०–तदाकारमाह—नेति । वृषभध्वजं शिवमन्तरा अन्यं भैषज्यमिलः श्रेयः प्राप्त्युपायं न पश्यामि अहं पृथक् ननु तस्य प्रसादः कथं स्यादित्यत आह–नेति । अश्वमेधात्परो यज्ञः महात्मनः शिवस्य प्रियो न तस्माद्धेतोः पार्थिवार्थे दुरासदमश्वमेधं यजामहे ॥ १२ ॥

रा० टी०–कर्दमेनेति । द्विजर्षभाः रुद्रस्याराधनं प्रति तमश्वमेधं रोचयन्ति स्म ॥ १३ ॥

गो० टी०–नान्यमिति। वृषध्वज एव स्वकृतशापनिवर्तकः। तत्प्रीतिश्चाश्वमेधेन सर्वदेवताप्रीतिकरणेवेति भावः। नाश्वमेधात्पर इति। राज्ञां ब्रह्महत्यान्तसर्वपापनिवारक इति शेषः। प्रियश्चैव महात्मन इति। यद्यपि प्रजापतिर्देवताकः प्रजापतिप्रीतिकरोऽश्वमेधः तथापि सर्वदेवताप्रीतिकरत्वात् अस्य रुद्रप्रीतिकरत्वमपि सिद्धम्। वस्तुतस्तु "यज्ञो वै विष्णुः" इति श्रुतिवचनाद्यज्ञपुरुषाराधनमश्वमेधः। विष्वाराधनमित्युपक्रमे लक्ष्मणोक्त्या विष्णवाराधनमेवाश्वमेधः। तदाराधनत्वेनैव हरस्यापि प्रियत्वम्। प्रकृतब्रह्महत्यावारकत्वेन तस्य प्रशंसार्थं पुनरपि रामेण तद्विषयार्थवाद उक्तः। एतेन यत् केनचिदुक्तं लक्ष्मणेन विष्णवाराधनयज्ञ प्रस्तुते पुनः रामेण रुद्राराधनत्वप्रदर्शनं विष्णवपेक्षया रुद्राधिक्यस्य प्रतिपादनार्थमिति, तदपास्तम्। ब्रह्महत्यावारकप्रदर्शनार्थत्वादामोक्तस्य ॥ १२–१३ ॥

रा० टी०–संवर्तस्येति । मरुत इति विख्यातः सम्वर्तस्य सुतः तं यज्ञं समुपाहरत् सामग्रीसंपादनमकरोत् ॥१४॥

गो० टी०–संवर्तस्येति । समुपाहरत् संभारजातमुपहृतवान् ॥ १४–२० ॥

१५–१८] ति० टी०–तं यज्ञं समुपाहरत् । इलयज्ञापेक्षितसंभारसमुपाहृतवानित्यर्थः ॥ १५–१८ ॥

१ ह्यस्येति गो. पाठः । २ अत्रत्यपद्यस्य प्रथमचतुर्थचरणौ तथा द्वितीयतृतीयचरणावेकत्र क्रमेण गो. पुस्तके. । ३ राजर्षेरिति गो. पा. ।

प्रसादयन्ति देवेशं यथा स्यात्पुरुषस्त्विला । ततः प्रीतो महादेवः पुरुषत्वं ददौ पुनः ॥ १९ ॥
इलायै सुमहातेजा दत्त्वा चान्तरधीयत । निवृत्ते हयमेधे वै गते चादर्शनं हरे ॥ २० ॥
यथागतं द्विजाः सर्वे तेऽगच्छन्दीर्घदर्शिनः । राजा तु बाह्लिमुत्सृज्य मध्यदेशे ह्यनुत्तमम् ॥ २१ ॥
निवेशयामास पुरं प्रतिष्ठानं यशस्करम् । शशबिन्दुश्च राजर्षिर्बाह्लिं परपुरंजयः ॥ २२ ॥
प्रतिष्ठाने इलो राजा प्रजापतिसुतो बली । स काले प्राप्तवाँल्लोकमिलो ब्राह्ममनुत्तमम् ॥ २३ ॥
ऐलः पुरूरवा राजा प्रतिष्ठानमवाप्तवान । ईदृशो ह्यश्वमेधस्य प्रभावः पुरुषर्षभ ॥
स्त्रीपूर्वैः पौरुषं लेभे ॥ यच्चान्यदपि दुर्लभम् । २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे नवतितमः सर्गः ॥ ९० ॥

एकनवतितमः सर्गः ।

रामो वसिष्ठवामदेवादिद्विजवर्यानुमत्या वाजिमेधाश्वरनिश्चितधिषणो विभीषणः सुग्रीवश्चान्ये भूपतयः सर्वे सानुगपरिग्रहा यागार्थमामन्त्र्यन्तां स तु नैमिषक्षेत्रे निर्वर्त्यतां तदर्थाः सर्वसंभाराश्च भृत्यसूदादिसंबद्धाः पूर्वमेव प्रेष्यन्तामित्यादि लक्ष्मणमब्रवीत् ।

एतदाख्याय काकुत्स्थो भ्रातृभ्याममितप्रभः । लक्ष्मणं पुनरेवाह धर्मयुक्तमिदं वचः ॥ १ ॥
वसिष्ठं वामदेवं च जाबालिमथ कश्यपम् । द्विजांश्च सर्वप्रवरानश्वमेधपुरस्कृतान् ॥ २ ॥

रा० टी०-तत इति । कुशाश्रमसमीपतः यज्ञाश्वमेध आसीत् अत एव रुद्रः परमं तोषं जगाम ॥ १५ ॥

रा० टी०-अथेति । उमापतिः द्विजान् उवाच ॥१६॥

रा० टी०-तदाकारमाह—प्रीत इति । अहं प्रीतोऽस्मि अत बाह्लिपतेः किं प्रियं करोमि ॥ १७ ॥

रा० टी०-तथेति । इला यथा पुरुषः स्यात् तथा देवेशं शिवं प्रसादयन्ति प्रासादयन् ॥ १८ ॥

१९-२०] ति० टी०-देवेशं प्रसादयन्ति स्म पुरुषत्वं विनान्यं वरं वृणीष्वेति पूर्ववद्यथा न वदेत्तथा विशिष्य प्रसन्नमकुर्वित्यर्थः । तदेवोक्तम्—यथा स्यादिति ॥ १९-२० ॥

रा० टी०-तत इति । महादेवः इलायै पुरुषत्वं ददौ अन्तरधीयत च ॥ १९ ॥

रा० टी०-निवृत्त इति । दीर्घदर्शना द्विजाः यथागतमगच्छन् ॥ २० ॥

२१] ति० टी०-बाह्लिमुत्सृज्य । जेष्ठपुत्रशशबिन्दुधिष्ठितमिति शेषः ॥ २१ ॥

रा० टी०-राजेति । राजा इलः बाह्लिं स्वज्येष्ठपुत्रशशबिन्दुधिष्ठितदेशमुत्सृज्य मध्यदेशे अनुत्तमं प्रतिष्ठानं नाम पुरं निवेशयामास शशबिन्दुस्तु बाह्लिमध्युवासेति शेषः सार्द्धश्लोक एकान्वयी ॥ २१ ॥ २२ ॥

गो० टी०-राजेति । बाह्लिमुत्सृज्येति । ज्येष्ठपुत्रशशबिन्दुधिष्ठितमिति शेषः ॥ २१ ॥

२२] ति० टी०-बाह्लिम् । अध्युवासेति शेषः ॥ २२ ॥

गो० टी०-शशबिन्दुस्त्विति । बाह्लिमिति । अध्युवासेति शेषः ॥ २२ ॥

२३] ति० टी०-बली उवासेति शेषः ॥ २३ ॥

२४] ति० टी०-पौरुषं पुरुषत्वम् ॥ २४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे नवतितमः सर्गः ॥ ९० ॥

रा० टी०-प्रतिष्ठान इति । प्रतिष्ठाने पुरे स्थितः इलः अतिप्रतिष्ठितः स इलः काले यथोचितसमये ब्राह्मं लोकं प्राप्तवान् ॥ २४ ॥

रा० टी०-ऐल इति । पुरूरवाः प्रतिष्ठानं पुरमवाप्तवान् अर्द्धं पृथक्—ईदृश इति । स्त्रीपूर्वः इलः पौरुषम् ब्रह्मलोकम् अन्यदपि यद्दुर्लभं तल्लभे ईदृशोऽश्वमेधस्य प्रभावः॥२५॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे नवतितमः सर्गः ॥ ९० ॥

गो० टी०-स इति । काले शरीरावसानकाले । ब्राह्मं ब्रह्मसंबन्धिनम् ॥ २३ ॥

गो० टी०-ईदृश इति । यच्चान्यदिति । उक्तब्रह्मलोकादित्यर्थः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने नवतितमः सर्गः ॥ ९० ॥

१] ति० टी०-अथाश्वमेधयागाय नैमिषे भरतप्रेषणम्—एतदिति । भ्रातृभ्यामिति चतुर्थी ॥ १ ॥

रा० टी०-रामकर्तृकऐलचरितवर्णनानन्तरकालिकं वृत्तमाह—एतदित्यादिभिः । काकुत्स्थः लक्ष्मणं पुनराह ॥ १ ॥

गो०टी०-एतदाख्यायेत्यादि । भ्रातृभ्यामिति चतुर्थी१

२] ति० टी०-अश्वमेधपुरस्कृतानश्वमेधप्रयोगसमर्थान्२

१ स इति गो.पा.। २ तु गतश्चादर्शनं हर इति गो.पा.। ३ त्विति गो.पा.। ४ ब्राह्ममिति रा.पा.। ५ पुरुषर्षभाविति गो.पा.। ६ भूत इति गो.पा.।

एतान्सर्वान्समानीय मन्त्रयित्वा च लक्ष्मण । हयं लक्षणसंपन्नं विमोक्ष्यामि समाधिना ॥ ३ ॥
तद्वाक्यं राघवेणोक्तं श्रुत्वा त्वरितविक्रमः । द्विजान्सर्वान्समाहूय दर्शयामास राघवम् ॥ ४ ॥
ते दृष्ट्वा देवसंकाशं कृतपादाभिवन्दनम् । राघवं सुदुराधर्षमाशीर्भिः समपूजयन् ॥ ५ ॥
प्राञ्जलिः स तदा भूत्वा राघवो द्विजसत्तमान् । उवाच धर्मसंयुक्तमश्वमेधाश्रितं वचः ॥ ६ ॥
तेऽपि रामस्य तच्छ्रुत्वा नमस्कृत्वा वृषध्वजम् । अश्वमेधं द्विजाः सर्वे पूजयन्ति स्म सर्वशः ॥ ७ ॥
स तेषां द्विजमुख्यानां वाक्यमद्भुतदर्शनम् । अश्वमेधाश्रितं श्रुत्वा भृशं प्रीतोऽभवत्तदा ॥ ८ ॥
विज्ञाय कर्म तत्तेषां रामो लक्ष्मणमब्रवीत् । प्रेषयस्व महाबाहो सुग्रीवाय महात्मने ॥ ९ ॥
यथा महद्भिर्हरिभिर्बहुभिश्च वनौकसाम् । सार्धमागच्छ भद्रं ते अनुभोक्तुं महोत्सवम् ॥ १० ॥
विभीषणश्च रक्षोभिः कामगैर्बहुभिर्वृतः । अश्वमेधं महायज्ञमायात्वतुलविक्रमः ॥ ११ ॥
राजानश्च महाभागा ये मे प्रियचिकीर्षवः । सानुगाः क्षिप्रमायान्तु यज्ञभूमिनिरीक्षकाः ॥ १२ ॥
देशान्तरगता ये च द्विजा धर्मसमाहिताः । आमन्त्रयस्व तान्सर्वानश्वमेधाय लक्ष्मण ॥ १३ ॥
ऋषयश्च महाबाहो आहूयन्तां तपोधनाः । देशान्तरगताः सर्वे सदाराश्च द्विजातयः ॥ १४ ॥

रा० टी०–तदाकारमाह–**वसिष्ठमित्यादिभिः** । अश्वमेधपुरस्कृतान् अश्वमेधप्रयोगसमर्थान् अत एव सर्वप्रवरान् एतान् वशिष्ठादीन् समानीय मन्त्रयित्वा तेषां सम्मतिं सङ्गृह्य लक्षणसम्पन्नम् उत्सर्जनयोग्यलक्षणविशिष्टम् हयं समाधिना एकाग्रचित्तेनोपलक्षितोऽहं विमोक्ष्यामि श्लोकद्वयमेकान्वयि२।३

गो० टी०–**वसिष्ठमिति** । द्विजांश्च सर्वप्रवरानिति गुरुवैषम्यमार्षम् । अश्वमेधपुरस्कृतानिति । अश्वमेधप्रयोगकुशलानित्यर्थः ॥ २ ॥

३–६] ति० टी०–मन्त्रयित्वा विचार्य । समाधिना सावधानचित्ततया हयं विमोक्ष्यामीति लक्ष्मणमाहेति पूर्वेण संबन्धः ॥ ३–६ ॥

रा० टी०–**तदिति** । त्वरितविक्रमो लक्ष्मणः द्विजान् समाहूय राघवं दर्शयामास ॥ ४ ॥

रा० टी०–**ते इति** । ते ब्राह्मणा आशीर्भिः राघवं समपूजयन् ॥ ५ ॥

रा० टी०–**प्राञ्जलिरिति** । राघवः अश्वमेधाश्रितमत एव धर्मसंयुक्तं वचः उवाच ॥ ६ ॥

गो० टी०–**एतानिति** । मन्त्रयित्वा विचार्य ॥ ३–६ ॥

गो० टी०–**प्राञ्जलिरिति** । अश्वमेधस्येति । अनुष्ठानविषयकमिति शेषः । उवाच धर्मसंयुक्तमश्वमेधाश्रितं वच इति च पाठः ॥ ६ ॥

७–८] ति० टी०–वृषध्वजं रुद्रम् । त्रेताग्निरूपत्वाद्रुद्रस्य यज्ञनिर्विघ्नार्थं तन्नमस्कारः ॥ ७ ॥ ८ ॥

रा० टी०–**ते इति** । ते ऋषयः अश्वमेधं पूजयन्ति प्रशंसन्ति स्म ॥ ७ ॥

रा० टी०–**स इति** । स रामः अश्वमेधाश्रितं द्विजमुख्यानां वाक्यं श्रुत्वा भृशं प्रीतोऽभवत् ॥ ८ ॥

गो० टी०–**ते त्विति** । वृषध्वजं नमस्कृत्वेति । सोल्लुण्ठनं वचः इलवद्रुद्राराधनं विहायेत्यर्थः । कर्दमकृतयागस्येवास्य रुद्रात्प्रयोजनगन्धाभावात् परदेवतामुद्दिश्याश्वमेधं कर्तुमुद्युक्ता इति भावः । रुद्रस्तु सर्वयज्ञानर्हः शूद्राराध्यः । यज्ञमध्ये च तत्प्रसङ्गे अप उपस्पर्शनादिप्रायश्चित्तस्य प्रसिद्धत्वात् । " इमं पशुं पशुपते ते अग्न वध्राम्यग्ने " इत्यादिश्रुतिस्तु अग्नेरेव यज्ञान्वयप्रतिपादिका । कर्दमकृतयज्ञस्य नाराध्यो रुद्रः । किन्तु स्वाभिमतदेवतारूपविष्ण्वाराधनत्वेन प्रीतो रुद्र इत्युच्यते । उपक्रमे तत्पूर्वसर्गेषु " यज्ञो वै विष्णुः " इत्युक्तरीत्या विष्णोराराध्यत्वसमर्थनात् । यद्वा विष्णुदत्तवरत्वाद्रुद्रस्य । विष्णुमपूजयन् । रामस्त्वश्वमेधं यथापूर्वमकरोत् ॥ ७ ॥ ८ ॥

९] ति० टी०–तत्कर्म विज्ञाय तत्कर्मकरणाङ्गीकारं विज्ञाय ॥ ९ ॥

रा० टी०–**विज्ञायेति** । तेषां ब्राह्मणानां कर्म अश्वमेधप्रवृत्तिं विज्ञाय लक्ष्मणमब्रवीत् तदाकारमाह सुग्रीवाय प्रेषयस्व दूतानिति शेषः ॥ ९ ॥

१०–१४] ति० टी०–महद्भिर्हरिभिर्हनुमदादिभिः । बहुभिश्च वनौकसाम् । अनुचररूपाणां बहुभिः समुदायैरित्यर्थः । अनुभोक्तुं द्रष्टुं यथा यथाकालमागच्छ ॥ १०–१४ ॥

रा० टी०–प्रेषणकालिकं संदेशमाह—**यथेत्यादिभिः** । वनौकसामनुचराणां बहुभिः विशिष्टैः महद्भिरङ्गदादिभिः सार्धं यथावदागच्छ ॥ १० ॥

रा० टी०–**विभीषण इति** । बहुभिः रक्षोभिर्वृतः विभीषणश्च अश्वमेधमायातु ॥ ११ ॥

रा० टी०–**राजान इति** । ये मे प्रियचिकीर्षवो राजानस्तेपि क्षिप्रमायान्तु ॥ १२ ॥

रा० टी०–**देशान्तरेति** । धर्मसमाहिताः ये द्विजाः

१ आचक्षेऽश्वमेधस्य त्वभिप्रायं महायज्ञा इति गो. पाठः । २ दुतं दूतानिति गो. पा. । ३ यज्ञं द्रष्टुमनुत्तममिति गो. पाठः ।

तथैव तालावचरास्तथैव नटनर्तकाः । यज्ञवाटश्च सुमहान्गोमत्या नैमिषे वने ॥ १५ ॥
आज्ञाप्यतां महाबाहो तद्धि पुण्यमनुत्तमम् । शान्तयश्च महाबाहो प्रवर्तन्तां समन्ततः ॥ १६ ॥
शतशश्चापि धर्मज्ञाः क्रतुमुख्यमनुत्तमम् । अनुभूय महायज्ञं नैमिषे रघुनन्दन ॥ १७ ॥
तुष्टः पुष्टश्च सर्वोऽसौ मानितश्च यथाविधि । प्रतियास्यति धर्मज्ञ शीघ्रमामन्त्र्यतां जनः ॥ १८ ॥
शतं वाहसहस्राणां तण्डुलानां वपुष्मताम् । अयुतं तिलमुद्गस्य प्रयात्वग्रे महाबल ॥ १९ ॥
चणकानां कुलित्थानां मापाणां लवणस्य च । अतोऽनुरूपं स्नेहं च गन्धं संक्षिप्तमेव च ॥ २० ॥
सुवर्णकोट्यो बहुला हिरण्यस्य शतोत्तराः । अग्रतो भरतः कृत्वा गच्छत्वग्रे समाधिना ॥ २१ ॥
अन्तरापणवीथ्यश्च सर्वे च नटनर्तकाः । सूदा नार्यश्च बहवो नित्यं यौवनशालिनः ॥ २२ ॥
भरतेन तु सार्धं ते यान्तु सैन्यानि चाग्रतः । नैगमौन्वालवृद्धांश्च द्विजांश्च सुसमाहिताः ॥ २३ ॥

देशान्तरं गताः प्रयोजनवशेन दूरदेशं प्राप्ताः तानप्यामन्त्रयस्व ॥ १३ ॥

रा० टी०–ऋषय इति । देशान्तरगता ऋषयः आह्वयन्तां तथा तालावचराः तालं गृहीत्वैव अवचरणकर्तारः सूत्रधरा इत्यर्थः तथा नटनर्तकाश्च आह्वयन्तां सार्द्धश्लोकैकान्वयी ॥ १४ ॥

गो० टी०–यथेति । महद्भिर्हरिभिः हनुमदङ्गदादिभिः । बहुभिश्चेति । भ्रातृभिरप्रायेण अनुभोक्तुं द्रष्टुमित्यर्थः । तथैवेति । तालं गृहीत्वावचरन्तीति तालावचराः सूत्रधाराः ॥ १–१४ ॥

१५] ति० टी०–तालं गृहीत्वावचरास्तालावचराः । नटाः सूत्रधाराः । गोमत्या नद्याः । तीर इति शेषः ॥ १५ ॥

१६] ति० टी०–आज्ञाप्यतां कार्यताम । तद्धि नैमिषं वनम् ॥ १६ ॥

रा० टी०–यज्ञेति । गोमत्यास्तीरे नैमिषे तदभिधे वने यज्ञवाटः आज्ञाप्यतां हि यतः तद्वनं पुण्यमत एव अनुत्तमम् अतिश्रेष्ठमत एव समन्ततः शान्तयः प्रवर्तन्तां सार्द्धश्लोकैकान्वयी ॥ १५ ॥ १६ ॥

गो० टी०–यज्ञवाटश्चेति । गोमत्या नद्यास्तीर इति शेषः ॥ १५ ॥ १६ ॥

१७] ति० टी०–शतशोऽनेके धर्मज्ञा नैमिषे महायज्ञं महान्तोऽङ्गभूता यज्ञा यस्य तं क्रतुमुख्यमनुभूय दृष्ट्वा कृतार्था भवन्त्विति शेषः ॥ १७ ॥

रा० टी०–शतश इति । धर्मज्ञाः क्रतुमुख्यमत एव महायज्ञमनुभूय कृतार्था भवन्त्विति शेषः ॥ १७ ॥

गो० टी०–शतश इति । धर्मज्ञाः शतशः अनेके नैमिषे महायज्ञमश्वमेधमनुभूयानुष्ठाय कृतार्था इति शेषः । यद्वा धर्मज्ञ इति पाठे अनुभूय दृष्ट्वा, प्रीतिं यास्यतीत्युत्तरेणान्वयः ॥ १७ ॥

१८] ति० टी०–अतः शीघ्रमामन्त्र्यतां जनः । स चास्माभिर्मानितः पूजितः संस्तुष्टः पुष्टश्च भूत्वा प्रतियास्यति ॥ १८ ॥

रा० टी०–तुष्ट इति । जनः प्रेष्यः शीघ्रमामन्त्र्यतामत एव तुष्टत्वादिविशिष्टस्सन् प्रतियास्यति ॥ १८ ॥

गो० टी०–तुष्ट इति । प्रतियास्यतीति च पाठः ॥ १८ ॥

१९] ति० टी०–वपुष्मतां तण्डुलानाम् । अभग्नस्वरूपाणामित्यर्थः । शतं वाहानामनेकानि सहस्राणि । अनेकलक्षं बलीवर्दादय इत्यर्थः । अयुतं वाहकपशवः ॥ १९ ॥

२०] ति० टी०–अतोऽनुरूपमुक्तान्नभोजनीयब्राह्मणभोजनानुरूपं स्नेहम् । घृततैलपयोदध्यादिकमित्यर्थः । संक्षिप्तं गन्धम् । अघृष्टमेवेत्यर्थः ॥ २० ॥

रा० टी०–शतमिति । वपुष्मतां प्रशस्तशरीराणामच्छिन्नावयवानामित्यर्थः वाहसहस्राणां सहस्रसंख्याकबलीवर्दनीतानां तण्डुलानां शतं लक्षसंख्याकबलीवर्दनीततण्डुला इत्यर्थः तिलमुद्गस्य चणकादीनामयुतं च अत एषां तण्डुलादीनामनुरूपं योग्यं स्नेहं घृततैलपयोदध्यादिसंक्षिप्तं स्नेहापेक्षयाल्पं गन्धं किंच शतोत्तराः शतेन शतसंख्यया उत्तीर्यन्ते ज्ञायन्ते शतसंख्याका इत्यर्थः बहुला बहुजनग्रहणयोग्याः च अग्रे प्रयातु श्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

गो० टी०–शतमिति । वपुष्मतामिति । अखण्डानामित्यर्थः । शतं वाहसहस्राणीति । लक्षं बलीवर्दा इत्यर्थः । चणकानामिति । अतोऽनुरूपम् उक्तब्राह्मणभोजनसंविधानानुरूपम् । स्नेहं घृततैलपयोदध्यादिकमित्यर्थः । संक्षिप्तमेव गन्धमिति । अघृष्टमेवेत्यर्थः ॥ १९ ॥ २० ॥

२१] ति० टी०–हिरण्यस्य रजतस्य । शतोत्तराः । कोट्य इत्यनुकर्षः । समाधिना सावधानतया ॥ २१ ॥

रा० टी०–सुवर्णेति । हिरण्यस्य शतोत्तराश्शतैरुत्तारणयोग्याः बहुलाः सुवर्णकोट्यः भरतोग्रतः कृत्वा गच्छतु सुवर्णकोट्यः अग्रे कृत्वा गच्छतु समुदायस्य कर्मत्वेनान्वयात्र द्वितीया ॥ २१ ॥

गो० टी०–सुवर्णकोट्य इति । हिरण्यस्य रजतस्येत्यर्थः । शतोत्तरा इति । कोट्य इत्यर्थः । समाधिना सावधानतया ॥ २१ ॥

२२–२३] ति० टी०–अन्तरा मार्गमध्ये तत्र तत्रापेक्षिता आपणवीथ्यः । तत्प्रवर्तका वणिज इत्यर्थः—सर्व इति । 'दुन्दुभीन्समाघ्नन्ति,' 'वीणागाथिनौ गायतः' इत्यादि

१ नैगमा बलवृद्धाश्च द्विजाश्चेति गो. पा. । २ समाहितानिति रा. पा. ।

कर्मान्तिकान्वर्धकिनः कोशाध्यक्षांश्च नैगमान् । मम मातॄस्तथा सर्वाः कुमारान्तःपुराणि च॥ २४ ॥
काञ्चनीं मम पत्नीं च दीक्षायां ज्ञांश्च कर्मणि । अग्रतो भरतः कृत्वा गच्छत्वग्रे महायशाः ॥ २५ ॥
उपकार्या महार्हांश्च पार्थिवानां महौजसाम् । सानुगानां नरश्रेष्ठं व्यादिदेश महाबलः ॥ २६ ॥
अन्नपानानि वस्त्राणि अनुगानां महात्मनाम् । भरतः स तदा यातः शत्रुघ्नसहितस्तदा ॥ २७ ॥
वानराश्च महात्मानः सुग्रीवसहितास्तदा । विप्राणां प्रवराः सर्वे चक्रुश्च परिवेषणम् ॥ २८ ॥
विभीषणश्च रक्षोभिः स्त्रीभिश्च बहुभिर्वृतः । ऋषीणामुग्रतपसां पूजां चक्रे महात्मनाम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

द्विनवतितमः सर्गः ।

स यागः निर्विघ्नः सबहून्नपानदक्षिणोऽदृष्टश्रुतपूर्वः साग्रवत्सरं समवर्तत ।

तत्सर्वमखिलेनाशु प्रैस्थाप्य भरताग्रजः । हयं लक्षणसंपन्नं कृष्णसारं मुमोच ह ॥ १ ॥

कल्पसूत्रोक्तप्रयोगापेक्षिताः । यौवनशालिन इति 'पुमान्स्त्रिया' इत्येकशेषः ॥ २२ ॥ २३ ॥

रा० टी०–अन्तरेति । अन्तरापणवीथीप्रभृतयः भरतेन सार्द्धमग्रतो यान्तु सार्द्धश्लोक एकान्वयी ॥ २२ ॥

रा० टी०–नैगमानिति । नैगमादीन् भरतोऽग्रतः कृत्वा अग्रे पूर्वं गच्छन्तु तत्र नैगमाः शास्त्राभिज्ञाः कर्मान्तिकाः किङ्कराः अंतःपुराणि भरतादिस्त्रियः काञ्चनीं सुवर्णमयीं ताः पण्डिताः नैगमाः वैदिकाः सार्द्धश्लोकद्वयमेकान्वयि२३-२५

गो० टी०–अन्तरेति । अन्तरा मार्गमध्ये । तत्र चापेक्षिताः आपणवीथ्यः । तत्प्रवर्तका वणिजश्चेत्यर्थः॥ २२ ॥ २३ ॥

२४] ति० टी०–कर्मान्तिकाः किंकराः । अन्तःपुराणि भरतादीनाम् ॥ २४ ॥

गो० टी०–कर्मान्तिकानिति । कर्मान्तिकाः किङ्कराः । कुमारान्तःपुराणीति । भरतलक्ष्मणशत्रुघ्नपत्न्य इत्यर्थः ॥२४॥

२५] ति० टी०–काञ्चनीं काञ्चनमयीम् । दीक्षायां दीक्षानिमित्तम् । कर्मणि ज्ञानकर्मविषयज्ञानवत ऋषीन् । 'ज्ञो विद्वान्सोमजोऽपि च' इत्यमरः । न च पत्न्या अपि यजमानत्वायज्ञस्वामित्वाच्च स्वामिनो यजमानस्य प्रतिनिधिप्रतिषेधात्कथं पत्न्याः प्रतिनिधिः 'स्वामिनोऽग्रेदेवतायाश्च शब्दात्कर्मणश्च प्रतिनिधिर्निवृत्तः' इत्यापस्तम्बसूत्रात्स्वामिनो यजमानस्य पत्न्या वा इति चेन्न । 'यस्य भार्यान्यदेशस्था नेष्यते पतिनाथवा । अशक्ता प्रतिकूला वा तस्याः प्रतिनिधिक्रिया ॥' इत्येवंविधे विषये प्रतिनिधेरनुमतत्वात् । 'अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः । अग्निहोत्रमुपासन्ते यावज्जीवमतन्द्रिताः । सौवर्णीं वा पोडशपलैर्मापकैः षोडशैरपि ॥' इति स्मृतेश्च । 'मृतायामपि भार्यायां वैदिकीं न त्यजेद्द्विजः । उपाधिनापि तत्कर्म यावज्जीवं समापयेत् ॥' इति विष्णुस्मृतेश्च । वस्तुतस्त्वेषां सौवर्णी न प्रतिनिधिः । देवताप्रतिमास्विव तत्त्वबुद्धिरेव, न तु सादृश्यबुद्धिरेवेति प्रतिनिधित्वाभावात्, किंतु भगवत ऋषीणां चावाहनादिसामर्थ्येन घटनाकौशलेन च तत्त्वबुद्धिरेवोत्पादात् । पत्नीकर्मनिर्वाहकत्वं च तत एव । अत एव 'काञ्चनीं मम पत्नीम' इति संगच्छते । एतेन काम्येष्वश्वमेधादिषु कथं प्रतिनिधिरिति परास्तमित्याहुः ॥ २५ ॥

२६–२९.]ति० टी०–उपकार्या वासस्थानानि॥२६–२९॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

रा० टी०–उपकार्या इति । पार्थिवानां उपकार्याः निवासस्थानानि अन्नादींश्च संपादयितुमिति शेषः नरश्रेष्ठो व्यादिदेश सार्द्धश्लोक एकान्वयी ॥ २६ ॥

रा० टी०–भरत इति । तदा रामाज्ञापनसमये भरतो यातः अहं पृथक् ॥ २७ ॥

रा० टी०–आगतवानरादीनां कर्तव्यमाह–वानरा इति । वानराः ये विप्राणां प्रवरास्तेभ्यः परिवेषणं चक्रुः ॥ २८ ॥

रा० टी०–विभीषण इति । विभीषणः ऋषीणां पूजां चक्रे ॥ २९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

गो० टी०–काञ्चनीमिति । काञ्चनीं मम पत्नीमिति । स्वर्णमयीं सीतापतिमामित्यर्थः । पत्न्याश्च प्रतिनिधिसद्भावादिकं सर्वं युद्धकाण्डे सप्रकारं निरूपितम्, तत्रैव द्रष्टव्यम् ॥ २७ ॥ २६ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

१] ति० टी०–अथाश्वमेधप्रवृत्तिः—तत्सर्वमिति । यागोपकरणं सर्वमित्यर्थः । अखिलेनान्यमतया जनेन वा । कृष्णसारं कृष्णसारमृगसमानवर्णम् । यद्वा कृष्णवर्णं सर्वयज्ञपशुभ्यः सारभूतं चेत्यर्थः ॥ १ ॥

---

१ श्रेष्ठ इति गो. पाठः । २ एतदादिपत्रत्रयं गो. पु. नास्ति । ३ समिति गो. पा.

ऋत्विग्भिर्लक्ष्मणं सार्धमन्वे च विनियुज्य चै । ततोऽभ्यगच्छत्काकुत्स्थः सह सैन्येन नैमिषम् ॥२॥
यज्ञवाटं महाबाहुर्दृष्ट्वा परममद्भुतम् । प्रहर्षमतुलं लेभे श्रीमानिति च सोऽब्रवीत् ॥ ३ ॥
नैमिषे वसतस्तस्य सर्व एव नराधिपाः । आनिन्युरुपहारांश्च तान्रामः प्रत्यपूजयत् ॥ ४ ॥
अन्नपानादिवस्त्राणि सर्वोपकरणानि च । भरतः सह शत्रुघ्नो नियुक्तो राजपूजने ॥ ५ ॥
वानराश्च महात्मानः सुग्रीवसहितास्तदा । परिवेषणं च विप्राणां प्रयताः संप्रचक्रिरे ॥ ६ ॥
विभीषणश्च रक्षोभिर्बहुभिः सुसमाहितः । ऋषीणामुग्रतपसां किंकरः समपद्यत ॥ ७ ॥
उपकार्या महार्हाश्च पार्थिवानां महात्मनाम् । सानुगानां नरश्रेष्ठो व्यादिदेश महाबलः ॥ ८ ॥
एवं सुविहितो यज्ञो ह्यश्वमेधो व्यवर्तत । लक्ष्मणेन सुगुप्ता सा हयचर्या प्रवर्तत ॥ ९ ॥
ईदृशं राजसिंहस्य यज्ञप्रवरमुत्तमम् । नान्यः शब्दोऽभवत्तत्र हयमेधे महात्मनः ॥ १० ॥
छन्दतो देहि विप्रेन्द्रो यावत्तुष्यन्ति याचकाः । तावत्सर्वाणि दत्तानि क्रतुमुख्ये महात्मनः ॥ ११ ॥

रा० टी०–अश्वमेधवृत्तं वर्णयन्नाह—तदित्यादिभिः । भरताग्रजः तत आज्ञापितं सर्वम् अखिलेन जनेन सह प्रस्थाप्य लक्षणैः यागोचितचिन्हैः संपन्नं कृष्णो नीलवर्णस्सारः स्थिरो यस्मिन् तं हयं मुमोच ॥ १ ॥

गो० टी०–तत्सर्वमित्यादि । कृष्णसारं कृष्णप्रधानम् । प्रायशः कृष्णवर्णमित्यर्थः । कृष्णशारमिति च पाठः ॥ १ ॥

२–३] ति० टी०–ऋत्विग्भिरिति । तं चतुःशता रक्षन्ति यज्ञस्याघाताय । तथा ' शतेन राजपुत्रैः सहाध्वर्युः पुरस्तात्प्रत्यङ् तिष्ठन्प्रोक्षति ' इति श्रुतेरिति भावः ॥ २ ॥ ३ ॥

रा० टी०–ऋत्विग्भिरिति । ऋत्विग्भिस्सार्द्धं लक्ष्मणः अन्वे तत्सहगमनार्थं विनियुज्यते विन्ययुज्यत काकुत्स्थस्तु नैमिषमभ्यगच्छत् ॥ २ ॥

रा० टी०–यज्ञेति । महाबाहुः प्रहर्षं लेभे श्रीमान् अयं देशः निखिलसम्पत्तिसम्पन्नः इत्यब्रवीच्च ॥ ३ ॥

गो० टी०–ऋत्विग्भिरिति । अश्वतन्त्र इति । "चतुःशता रक्षन्ति यज्ञस्याघाताय तथा शतेन राजपुत्रैः सहाध्वर्युः पुरस्तात्प्रत्यङ् तिष्ठन् प्रोक्षति" इति श्रुतेः । अश्वरक्षादिसंबन्ध-यज्ञप्रयोगनिवर्तनार्थमित्यर्थः ॥ २ ॥ ३ ॥

४] ति० टी०–उपहारानुपदाः ॥ ४ ॥

रा० टी०–नैमिष इति । नैमिषे वसतस्तस्य रामस्य नराधिपाः उपहारानानिन्युः रामस्तु तान् प्रत्यपूजयत् ॥ ४ ॥

गो०टी०–नैमिष इति । उपहाराः उपदाः ॥ ४ ॥ ५ ॥

५–८] ति० टी०–तेषामेव स्वरूपकथनम्—अन्ने-त्यादि । अथ राजसत्कारे भरतशत्रुघ्ननियोगः सुग्रीवादीनां विप्रपरिवेषणे विभीषणस्य ऋषिसत्कारे विनियोग इत्याह—भरत इत्यादि ॥ ५–८ ॥

रा० टी०–अन्नेति । अन्नादि सम्पाद्य विद्यमान इति शेषः भरतः राजपूजने नियुक्तः ॥ ५ ॥

रा० टी०–वानर इति । प्रयता वानराः विप्राणां परि-वेषणं संप्रचक्रिरे ॥ ६ ॥

रा० टी०–विभीषण इति । विभीषण ऋषीणां कि-ङ्करः सेवाकर्ता समपद्यत अभवत् ॥ ७ ॥

रा० टी०–उपकार्या इति । नरश्रेष्ठो रामः पार्थिवाना-मुपकार्याः व्यादिदेश स्थापयितुमाज्ञापयामासेति शेषः ॥ ८ ॥

गो० टी०–राजपूजामाह–अन्नेत्यादि । राजसत्कारे भर-तशत्रुघ्ननियोगः सुग्रीवादीनां विप्रपरिवेषणे विभीषणस्य ब्रह्म-र्षिसत्कारे नियोग इत्याह–भरत इत्यादि ॥ ६–८ ॥

९] ति० टी०–हयचर्याश्वमेधयागानुष्ठानमित्यर्थ इति तीर्थकतकौ । हयमार्गगमनमित्यर्थमन्ये ॥ ९ ॥

रा० टी०–एवमिति । एवं विहितः अश्वमेधो यज्ञो-ऽवर्त्तत हयचर्या लक्ष्मणेन गुप्ता सती प्रवर्त्तत प्रावर्तत ॥ ९ ॥

गो० टी०–एवमिति । हयचर्याम् अश्वमेधयागानुष्ठानम् ९

१०–११] ति० टी० यज्ञप्रवरमुत्तमम् । अभयादिति शेषः । याचका यावत्तुष्यन्ति तावद्देहि देहीति शब्दान्न्यः शब्दो नाभवत् ॥ १० ॥ ११ ॥

रा० टी०–ईदृशमिति । यत् ईदृशमुत्तमं तमोनिवर्तकं यज्ञप्रवरं तस्मिन् हयमेधे विश्रब्धस्सन् यावत् कालं या-चकास्तुष्यन्ति तावत्कालं छन्दतो देहीति इत्येव शब्दोऽभवत् नान्यः अन्यशब्दो नाभवत् सार्द्धश्लोक एकान्वयी ॥ १० ॥

गो० टी०–नेति । याचकाः यावत्तुष्यन्ति तावद्देहि देहीति शब्दादन्यः शब्दो नाभवत् ॥ १० ॥

रा० टी०–तावदिति । क्रतुमुख्ये यावन्ति गौडादीनि प्रतिदिनं स्थापितानीति शेषः तावत् तावन्ति सर्वाणि दत्तानि भवन्ति ॥ ११ ॥

गो० टी०–तावदीति । सर्वाणि दत्तानीत्यस्यैव प्रपञ्चनं–विविधानीत्यादि । गौडानि गुडविकाररूपाणि ॥ ११ ॥

---

१ अश्वतन्त्रे नियोज्य चेति गो. पा. । २ ते इति रा. पा. । ३ वच इति गो. पा. । ४ सानुगानां महात्मनामिति गो. पाठः । सददावाशु शत्रुघ्न-सहितस्तदेति गो. पा. । ६ विप्राणां प्रणताः सर्वे चक्रिरे परिवेषणमिति गो. पा. । ७ सत्त्वैरभिवृत इति गो. पा. । ८ पूजां चक्रे महात्मनामिति गो. पा. । ९ पद्यमिदं परिवेषणं चेति षष्ठश्लोकोत्तरार्धपरं गो. पु. । १० मतिरिति गो. पा. । ११ देहीतीति गो. पाठः ।

विविधानि च गौडानि खाण्डवानि तथैव च । न निःसृतं भवत्योष्ठाद्वचनं यावदर्थिनाम् ॥ १२ ॥
तावद्वानररक्षोभिर्दत्तमेवाभ्यदृश्यत । न कश्चिन्मलिनो वापि दीनो वाप्यथवा कृशः॥१३॥
तस्मिन्यज्ञवरे राज्ञो हृष्टपुष्टजनावृते । ये च तत्र महात्मानो मुनयश्चिरजीविनः ॥ १४ ॥
नास्मरंस्तादृशं यज्ञं दानौघसमलंकृतम् । यः कृत्यवान्सुवर्णेन सुवर्णं लभते स्म सः ॥ १५ ॥
वित्तार्थी लभते वित्तं रत्नार्थी रत्नमेव च । हिरण्यार्थानां सुवर्णानां रत्नानामथ वाससाम् ॥ १६ ॥
अनिशं दीयमानानां राशिः समुपदृश्यते । न शक्रस्य न सोमस्य यमस्य वरुणस्य च ॥ १७ ॥
ईदृशो दृष्टपूर्वो न एवमूचुस्तपोधनाः । सर्वत्र वानरास्तस्थुः सर्वत्रैव च राक्षसाः ॥ १८ ॥
वासोधनान्नकामेभ्यः पूर्णहस्ता ददुर्भृशम् । ईदृशो राजसिंहस्य यज्ञः सर्वगुणान्वितः ॥
संवत्सरमथो साग्रं वर्तते न च हीयते । ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

त्रिनवतितमः सर्गः ।

तस्मिन्क्रतौ वाल्मीकिरपि सशिष्य आजगाम स्वशिष्यौ कुशलवौ पूर्वमात्मना रचितं रामचरितं यज्ञवाटे रामस्येच्छया मधुरया गिरा निःसृतं गायतमित्यादिशच्च ।

वर्तमाने तथाभूते यज्ञे च परमाद्भुते । सशिष्य आजगामाशु वाल्मीकिर्भगवानृषिः॥ १ ॥

१२] ति० टी०–सर्वाणि दत्तानीत्यस्यैव प्रपञ्चः—विविधानीति । यावदर्थिमुखादेहीति वचनं न निःसृतं भवति ॥ १२ ॥

रा० टी०–नेति । यावत् अर्थिनां वचनमोष्ठान्निस्सृतं न भवति तावदेव वानररक्षोभिर्दत्तमेव अभ्यदृश्यत ॥ १२ ॥

गो० टी०–नेति । अर्थिनां मुखादेहीति वचनं यावन्न निस्सृतं, तावद्दत्तमेवाभ्यदृश्यत ॥ १२ ॥ १३ ॥

१३–१४] ति० टी०–तावद्दत्तमेवाभ्यदृश्यत॥१३॥१४॥

रा० टी०–नेति । तस्मिन् यज्ञवरे मलिनत्वादिविशिष्टः कश्चित्न ॥ १३ ॥

रा० टी०–ये इति । ये तत्र चिरजीविनस्तेपि तादृशं यज्ञं नास्मरन् तादृशो यागो नाभवदित्यर्थः ॥ १४ ॥

गो० टी०–ये चेति । चिरजीविनो मुनयः तादृशं यज्ञम् इतः पूर्वं तादृशो नासीदित्याहुरिति शेषः ॥ १४–१६ ॥

१५–१६] ति० टी०–'नास्मरंस्तादृशं यज्ञं न चाप्यासीत्कदाचन' इति पाठे तादृशयज्ञ इतः पूर्वं नासीदित्याहुरिति शेषः ॥ १५ ॥ १६ ॥

रा० टी०–य इति । यः सुवर्णेन कृत्यवान् प्रयोजनवान् सः सुवर्णं लभते स्म ॥ १५ ॥

रा० टी०–हिरण्यानामिति । दीयमानानां हिरण्यादीनां राशिस्समुपदृश्यते ॥ १६ ॥

१७–१८] ति० टी०–उक्त एवार्थ आदरादभ्यस्यते—न शक्रस्येति ॥ १७ ॥ १८ ॥

रा० टी०–नेति । ईदृशो यज्ञः शक्रादेर्दृष्टपूर्वो न तपोधना एवमूचुः ॥ १७ ॥

रा० टी०–सर्वत्रेति । वानरा राक्षसाश्च पूर्णहस्ताः सन्तः वासोधनान्नकामेभ्यः भृशं ददुः ॥ १८ ॥

गो० टी०–उक्त एवार्थ आदरादभ्यस्यते न शक्रस्येत्यादि ॥ १७ ॥ १८ ॥

१९] ति० टी०–वर्तते न च हीयते । संवत्सरात्परमपीति शेषः । पुनः पुनरश्वमेधः प्रावर्ततेत्यर्थः । तात्पर्यन्त्वेकाश्वमेधदीक्षेत्यन्ये ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

रा० टी०–ईदृश इति । ईदृशो राजसिंहस्य यज्ञः साग्रं किञ्चिदधिकं संवत्सरं वर्तते न च हीयते मध्ये विरमति ॥१९॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

गो० टी०—ईदृश इति । संवत्सरं वर्तते न च हीयते । संवत्सरात्परमपीति शेषः पुनः पुनरश्वमेधः प्रावर्ततेत्यर्थः ॥ १२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने द्विनवतितमः सर्गः ॥ ९२ ॥

१] ति० टी०–अथ यज्ञार्थमागतेन वाल्मीकिना कुशलवयो रामायणगाने नियोगः–वर्तमाने इति । तथाभूत उक्तप्रकारे ॥ १ ॥

---

१ तत्रेति गो. पाठः । २ कश्चित् इति गो. पाठः । ३ नाप्यासीत्स कदाचनेति गो. पाठः । ४ रजतानामिति गो. पाठः । ५ अश्मनामिति गो. पाठः ६ धनेशस्येति गो. पा. । ७ वेति गो. पाठः । ८ अन्नपर्थिभ्य इति गो. पाठः । ९ मुनिपुत्रश्च इति गो. पाठः ।

स दृष्ट्वा दिव्यसंकाशं यज्ञमद्भुतदर्शनम् । एकान्त ऋषिसंघातश्चकार उटजान्शुभान् ॥ २ ॥
शकटांश्च बहून्पूर्णान्फलमूलांश्च शोभनान् । वाल्मीकिवाटे रुचिरे स्थापयन्नविदूरतः ॥ ३ ॥
[आसीत्सुपूजितो राज्ञा मुनिभिश्च महात्मभिः । वाल्मीकिः सुमहातेजा न्यवसत्परमात्मवान् ।]
स शिष्यावब्रवीद्धृष्टौ युवां गत्वा समाहितौ । कृत्स्नं रामायणं काव्यं गायतां परया मुदा ॥ ४ ॥
ऋषिवाटेषु पुण्येषु ब्राह्मणावसथेषु च । रथ्यासु राजमार्गेषु पार्थिवानां गृहेषु च ॥ ५ ॥
रामस्य भवनद्वारि यत्र कर्म चैं कुर्वते । ऋत्विजामग्रतश्चैव तत्र गेयं विशेषतः ॥ ६ ॥
इमानि च फलान्यत्र स्वादूनि विविधानि च । जातानि पर्वताग्रेषु आस्वाद्यास्वाद्य गायताम् ॥ ७ ॥
न यास्यथः श्रमं वत्सौ भक्षयित्वा फलान्यथ । मूलानि च सुमृष्टानि न रागात्पैरिहास्यथः ॥ ८ ॥
यदि शब्दापयेद्रामः श्रवणाय महीपतिः । ऋषीणामुपविष्टानां यथायोगं प्रवर्तताम् ॥ ९ ॥

रा० टी०–लवकुशयोर्वृत्तमुपक्रमते—वर्त्तमान इत्यादिभिः । वाल्मीकिराजगाम ॥ १ ॥

गो० टी०–वर्तमान इत्यादि । तथाभूते प्रागुक्तप्रकारं प्रवृत्ते ॥ १ ॥

२] ति० टी०–'एकान्ते ऋषिवाटानाम्' इति पाठे समीपे इति शेषः । 'ऋषिसङ्घातः' इति पाठे वाल्मीकिना सहागतो ऋषिसमूह इत्यर्थः । उटजानिति बहुवचनं बहुशिष्यत्वाच्च ॥ २ ॥

रा० टी०–स इति । ऋषिसंघातः ऋषिसमूहवान् स वाल्मीकिः यज्ञं दृष्ट्वा एकान्ते उटजान् पर्णशालाः चकार कारयामास ॥ २ ॥

गो० टी०–स इति । ऋषिवाटानामिति । समीप इति शेषः । उटजानिति बहुवचनं बहुशिष्यत्वात् ॥ २ ॥

३] ति० टी०–शकटानन्नादिपूर्णान्फलमूलांश्च शोभनान्सर्वतो रुचिरे वाल्मीकिवाटेऽस्थापयन्नित्यर्थः । रुचिरोऽभूदिति शेष इति कतकव्याख्यानुसारी पाठो मृग्यः क्वचित् । 'शकटैर्बहुभिः पूर्णैः फलमूलैश्च शोभनैः । वाल्मीकिवाटो रुचिरः शोभयन्निव सर्वतः ॥' इति पाठः स इत्यन्ये ॥ ३ ॥

रा० टी०–शकटानिति । फलमूलान् फलमूलविशिष्टान् पूर्णान् शकटान् दूरतः एव वियमाने वाल्मीकिवाटे अस्थापयन् शिष्या इति शेषः एतेन रामदत्तं तेन न भुज्यते इति सूचितम् तेन तस्यातिस्नेहान्मिथिलाधिपतादात्म्यं सूचितम् फलमूलैरितिपाठान्तरम् इवशब्दः एवार्थे ॥ ३ ॥

गो० टी०–शकटानिति । रुचिर इति । अभूदिति शेषः ॥ ३ ॥ ६ ॥

४] ति० टी०–शिष्यौ कुशलवौ ॥ ४ ॥

५] ति० टी०–रथ्यासूपमार्गेषु ॥ ५ ॥

रा० टी०–स इति । स वाल्मीकिः शिष्यौ कुशलवौ अब्रवीत् तदाकारमाह युवामृषिवाटादिषु गत्वा रामायणं काव्यं गायतां श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

६] ति० टी०–यत्र कर्म । अश्वमेधयाग इत्यर्थः ॥ ६ ॥

रा० टी०–रामस्येति । रामस्य भवनद्वारि यत्र च कर्म कुर्वते ब्राह्मणा इति शेषः तत्र च ऋत्विजामग्रतश्च विशेषतो गेयम् ॥ ६ ॥

गो० टी०–रामस्येति । यत्र कर्म चेति । अश्वमेधयाग इत्यर्थः ॥ ७ ॥

७] ति० टी०–अत्रास्मद्वाटसमीपपर्वताग्रे विद्यमानानि फलान्यास्वाद्य गायताम् । लोट्प्रथमपुरुषद्विवचनम् । यदा यदा श्रमस्तदा तदा भवन्ताविति शेषः ॥ ७ ॥

रा० टी०–इमानीति । पर्वताग्रेषु जातानि फलानि आस्वाद्य आस्वाद्य गायताम् ॥ ७ ॥

गो० टी०–इमानीति । अत्रास्माकं वाटे । विद्यमानान्यास्वाद्य । गायतामिति लोट्प्रथमपुरुषद्विवचनम् । यदा यदा श्रमः तदा तदैवं कुरुतम् । भवन्ताविति शेषः ॥ ८ ॥

८] ति० टी०–फलानि भुक्त्वा न श्रमं यास्यथो नापि रागात्कण्ठमाधुर्यात्परिहास्यथः । ' नगराद्बहिरास्यथः ' इति पाठे रात्रिकाले इति शेषः । उटजेष्वित्यर्थः । आस्यथोऽवतिष्ठेताम् । आसेरापैं इयन्परस्मैपदे ॥ ८ ॥

रा० टी०–नेति । फलादीनि भक्षयित्वा श्रमं न यास्यथः रागात्परिहास्यथश्च न ॥ ८ ॥

गो० टी०–नेति । नगराद्बहिरास्यथः । क्षत्रियकुलेष्विति शेषः । नगराद्बहिः उटज इत्यर्थः । आस्यथः अधितिष्ठतमिति यावत् । आसेश्छान्दसः इयन् परस्मैपदं च ॥ ९ ॥

९] ति० टी०–शब्दापयेदाह्वययेत् । ऋषीणामग्रे इति शेषः ॥ ९ ॥

रा० टी०–यदीति । ऋषीणां मध्ये विद्यमानो रामः श्रवणाय यदि शब्दापयेत् तदा यथायोगं गीतयोगमनतिक्रम्य प्रवर्त्तन्तां प्रवर्त्तन्ताम् ॥ ९ ॥

गो० टी०–यदीति । शब्दापयेत् आह्वयेत् ॥ १० ॥

१ वाटानामिति गो. संघात इति रा. पा. । २ मूलैरिति गो. पाठः । ३ पद्यमिदमधिकं गो. पाठे । ४ गायेथामिति गो. पाठः । ५ प्रवर्त्तत इति गो. पाठः । ६ वै इति गो. पाठः । ७ बहिरास्थ इति गो. पाठः । ८ तत्तो गेयमिति गो. पाठः ।

दिवसे विंशतिः सर्गा गेया मधुरया गिरा । प्रमाणैर्बहुभिस्तत्र यथोद्दिष्टं[1] मया पुरा ॥ १० ॥
लोभश्चापि न कर्तव्यः स्वल्पोऽपि धनवाञ्छया । किं धनेनाश्रमस्थानां फलमूलाशिनां सदा ॥ ११ ॥
यदि पृच्छेत्स काकुत्स्थो युवां कस्येति दारकौ । वाल्मीकेरथ शिष्यौ द्वौ[3] ब्रूतमेवं नराधिपम् ॥ १२ ॥
इमास्तन्त्रीः सुमधुराः स्थानं वापूर्वदर्शनम्[4] । मूर्च्छयित्वा सुमधुरं गायतां विगतज्वरौ ॥ १३ ॥
आदिप्रभृति गेयं स्यान्न चावज्ञाय पार्थिवम्[5] । पिता हि सर्वभूतानां राजा भवति धर्मतः ॥ १४ ॥
तद्युवां हृष्टमनसौ श्वः प्रभाते समाहितौ[7] । गायतं मधुरं गेयं तन्त्रीलयसमन्वितम् ॥ १५ ॥
इति संदिश्य बहुशो मुनिः प्राचेतसस्तदा । वाल्मीकिः परमोदारस्तूष्णीमासीन्महामुनिः॥ १६ ॥
संदिष्टौ मुनिना तेन तावुभौ मैथिलीसुतौ[8] । तथैव करवावेति निर्जग्मतुररिंदमौ ॥ १७ ॥

तामद्भुतां तौ हृदये कुमारौ निवेश्य वाणीमृषिभाषितां तदा ।
समुत्सुकौ तौ सुखमूषतुर्निशां यथाश्विनौ भार्गवनीतिसंहिताम् ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

१०-११] ति० टी०-दिवसे इति । तत्र रामायणे बहुभिः प्रमाणैर्नानासंख्यश्लोकैर्यथा पुरा मया सर्गाआदिष्टास्तेषु सर्गेषु दिवसे दिवसे विंशतिसर्गा गेयाः ॥ १० ॥ ११ ॥

रा० टी०-गानविधिमाह-दिवस इति । बहुभिः प्रमाणैः श्रुत्यर्थैर्विशिष्टं यद्रामायणं तस्य विंशतिस्सर्गाः दिवसे एकदिने मया यथोद्दिष्टमुपदिष्टं यथा भवति तथा गेयाः ॥ १० ॥

रा० टी०-लोभ इति । फलमूलाशिनां धनेन किं न किमपीत्यर्थः अतः धनवाञ्छया स्वल्पोपि लोभो न कर्त्तव्यः॥११॥

गो० टी०-दिवस इति । तत्र रामायणे बहुभिः सर्गप्रमाणैर्यथा मया पुरा सर्गा उद्दिष्टाः तेषु सर्गेषु दिवसे दिवसे विंशतिसर्गा गेयाः ॥ ११-१२ ॥

१२] ति० टी०-आवां वाल्मीकेः शिष्यौ स्व इत्येवमेव ब्रूतम्, नामुकदारकाविति ॥ १२ ॥

रा० टी०-यदीति । तदा आवां वाल्मीकेशिष्यौ एवं नराधिपं रामं ब्रूताम् ॥ १२ ॥

गो० टी०-यदीति । आवां वाल्मीकिशिष्यौ स्व इत्येवं ब्रूतम्, नामुकदारकाविति ॥ १३ ॥

१३] ति० टी०-इमास्तन्त्रीः वीणाशिरा इत्यर्थः । मधुरा मधुरशब्दाः । अपूर्वदर्शनमपूर्वाणां स्वराणां दर्शनं यत्र तादृशं स्थानं षड्जादिस्वरभेदसिद्धये वीणादण्डोपरि कल्पितशिराधारकाष्ठपट्टिरूपं तत्र मूर्च्छयित्वा तत्रापि नादव्याप्तिं कृत्वा सुमधुरं गायताम् ॥ १३ ॥

रा० टी०-इमा इति । तंत्रीः वीणास्वनान् मूर्छयित्वा मूर्छनया निष्पाद्य मधुराणामनेकविधमधुररसानामास्थानं स्थितिर्यस्मिन् अत एव अपूर्वदर्शनं अदृष्टपूर्वं रामायणं समधुरं यथा भवति तथैव गायतां वा शब्द एवार्थे ॥ १३ ॥

गो० टी०-इमा इति । इमास्तन्त्रीरिति । वीणाशिरा इत्यर्थः । अपूर्वदर्शनम् अपूर्वस्वराणां दर्शनम् यत्र तत्तथा तादृशं स्थानं, षड्जादिस्वरभेदसिद्धये वीणादण्डोपरि कल्पितं शिराणां स्पर्शविशेषसिद्धिप्रयोजनस्थानपट्टिः स्थानमित्युच्यते । तद्वा मूर्छयित्वा तत्र वा नादव्याप्तिं कृत्वा ॥ १४ ॥

१४-१७] ति० टी०-आदिप्रभृति । संक्षेपमारभ्येत्यर्थः । पार्थिवं न चावज्ञाय । स्थलान्तर इव तत्समीपे लीलापरिहासादिकं न कर्तव्यमित्यर्थः । तत्र हेतुः—पिता हीति ॥ १४-१७ ॥

रा० टी०-आदीति । हि यतः राजा सर्वभूतानां पिता अतः नावज्ञाय तदाह्वानेन द्रुतं गत्वैवेत्यर्थः आदिप्रभृति रामायणं ज्ञेयं स्यात् त्वयेति शेषः ॥ १४ ॥

रा० टी०-तदिति । स्वरागामिनि प्रभाते समास्थितौ युवां गेयं गातुं योग्यं तंत्रीलयसमन्वितमत एव मधुरं यथा भवति तथा गायेतम् ॥ १६ ॥

रा० टी०-इतीति । वाल्मीकिरिति सन्दिश्य तूष्णीमासीत् ॥ १६ ॥

रा० टी०-सन्दिष्टाविति । मैथिलीसुतौ तथैव करवावेत्युक्त्वा निर्जग्मतुः ॥ १७ ॥

गो० टी०-आदीति । आदिप्रभृतीति संक्षेपमारभ्येत्यर्थः । पार्थिवं न चावज्ञायेति । तत्समीपे स्थलान्तर इव लीलापरिहासादिकं न कर्तव्यमित्यर्थः । तत्र हेतुः—पिता हि सर्वभूतानामिति ॥ १५-१८ ॥

१८] ति० टी०-भार्गवनीतिसंहितामश्विनाविव तौ तां वाणीं हृदये निवेश्य श्वो गातव्यमित्येवंरूपां गातुं समुत्सुकौ निशामूषिणा सहोषतुः ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

१ उद्दिष्ट इति गो. पाठः । २ उपजीविनामिति गो. पाठः । ३ स्व इति गो. पा. । ४ गायेथामिति गो. पाठः । ५ आस्थितावितिं गो. पाठः । गायेथामिति गो. गायेतमिति रा. पा. । ७ महायशा इति गो. पाठः । ८ समामिति गो. पाठः ।

चतुर्नवतितमः सर्गः ।

यदा रामोऽध्वरशालायामृषिभिर्नानाशास्त्रकलाविद्भिः सममुपविष्टस्तदैव तौ कुशलवौ प्राचेतसादधीतं रामचरितं तन्त्रीलयसमन्वितं सुगीतसंपत्प्रचुरं प्रथमात्प्रभृतिविंशतिसर्गपर्यन्तं प्रागायतां तच्छ्रवणतुष्टकाकुस्थवितीर्ण बहुसुवर्ण किमनेनावयोः फलमूलाशिनोर्वनवास्तव्ययोरिति व्यवकृतवन्तौ तदत्युत्कण्ठितेन रामेण पृष्टौ वाल्मीकिरस्य कर्तेत्याद्यकथयताम् ।

तौ रजन्यां प्रभातायां स्नातौ हुतहुताशनौ । यथोक्तमृषिणा पूर्वं सर्वं तत्रोपगायताम् ॥ १ ॥
तां स शुश्राव काकुत्स्थः पूर्वाचार्यविनिर्मिताम् । अपूर्वां पाक्यजातिं च गेयेन समलंकृताम् ॥ २ ॥
प्रमाणैर्बहुभिर्बद्धां तन्त्रीलयसमन्विताम् । बालाभ्यां राघवः श्रुत्वा कौतूहलपरोऽभवत् ॥ ३ ॥
अथ कर्मान्तरे राजा समाहूय महामुनीन् । पार्थिवांश्च नरव्याघ्रः पण्डितान्नैगमांस्तथा ॥ ४ ॥
पौराणिकाञ्शब्दविदो ये वृद्धाश्च द्विजातयः । स्वराणां लक्षणज्ञांश्च उत्सुकान्द्विजसत्तमान् ॥ ५ ॥

रा० टी०–तामिति । अश्विनौ भार्गवेनोपदिष्टां नीतिसंहितामिव ऋषिभाषितां वाणीं हृदये निवेश्य निशां सुखमूषतुः कालाध्वनोरिति द्वितीया ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥

गो० टी०–तामिति भार्गवनीतिसंहिताम् अश्विनाविव तौ तां वाणीं हृदये निवेश्य । श्रोतव्यां स्मृत्वेत्यर्थः निशां निशायाम् । सममिति । ऋषिभिरित्यर्थः । सममूषतुरिति च पाठः । भार्गवनीतिसंस्कृतौ इति पाठान्तरे तु वाल्मीकिशिक्षितावित्यर्थः ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्रिनवतितमः सर्गः ॥ ९३ ॥

१] ति० टी०–अथ राघवेण परिषदा सह रामायणश्रवणम्—ताविति ॥ १ ॥

रा० टी०–लवकुशकर्तृकमुनिवचनस्वीकारानन्तरकालिकं वृत्तमाह—तावित्यादिभिः । तौ कुशीलवौ ऋषिणा यथोक्तं तत्र ऋष्यादिसमीपे उपगायताम् ॥ १ ॥

गो० टी०–तौ रजन्यामित्यादि । हुतहुताशनौ कृतसमिदाधानौ ॥ १ ॥

२–३] ति० टी०–पूर्वाचार्यविनिर्मितां गाथकानां गानसिद्धये पूर्वाचार्येण भरतेन निर्मिताम् । 'पूर्वचर्यां ततस्ततः' इति पाठे ततस्तस्तोऽयोध्यावनादौ कृतं स्वकीयं पूर्वचरितमित्यर्थः । अपूर्वां प्रागश्रुताम् । पाक्यजातिं पाक्यस्य गेयस्य जातिं षड्जादिस्वरूपामिति कतकः । 'पाक्यजातम्' इति पठित्वा पाक्यं नाम गानाधारस्य केवलवाक्यस्य स्वरूपोच्चारणमात्रमिति तीर्थ आह । गेयेन गानधर्मेण स्वरविशेषेण समलंकृताम् । प्रमाणैर्ध्वनिपरिच्छेदसाधनैर्द्रुतमध्यविलम्बितावृत्तिभिः प्रागुक्तस्थानैर्वा युक्तां तां गीतिं शुश्राव । बालाभ्यां गीतां तां श्रुत्वा कौतूहलपरः । विस्मयवानित्यर्थः ॥ २ ॥ ३ ॥

रा० टी०–तामिति । पूर्वाचार्येण विनिर्मिताम् अपूर्वां पूर्वमश्रुतां पाक्यस्य गानविशेषस्य जातिरुत्पत्तिर्यस्यां गेयेन स्वरेण समलंकृतां बहुभिः प्रमाणैः श्रुत्यर्थैः बद्धां संयुक्तां तन्त्रीलयसमन्वितां तां गाथां काकुत्स्थः शुश्राव श्रुत्वा च कौतूहलपरोऽभवत् श्लोकद्वयमेकान्वयि ॥ २ ॥ ३ ॥

गो० टी०–तामिति । पूर्वेति । गायकाभ्यां पूर्वमाचार्येण निर्मिताम् अपूर्वां प्रागश्रुताम् । पाक्यस्य गेयस्य जातिः षड्जादिः । गेयेन गानधर्मेण ॥ २ ॥

गो० टी०–प्रमाणैरिति । प्रमाणैः ध्वनिपरिच्छेदसाधनैः । कौतूहलपरः विस्मयवान् ॥ ३ ॥

४] ति० टी०–कर्मान्तरे । अश्वमेधप्रयोगाणां विरामकाले इत्यर्थः ॥ ४ ॥

रा० टी०–अथेति । कार्मान्तरे यागप्रयोगविरामकाले राजा रामः एतान् महामुनिप्रभृतीन् समाहूय गातारौ समवेशयन् वृद्धा द्विजातय इत्यत्र सुबन्तसमुदायस्य कर्मत्वेनान्वयात्र द्वितीया तत्र पण्डिताः परमहंसाः नैगमाः वेदाभिज्ञाः शब्दविदः शब्दशास्त्रनिपुणाः लक्षणज्ञाः सामुद्रिका नैगमाः पौराः अत एव न पौनरुक्त्यम् पादाक्षरसमासज्ञाः साहित्यविदः कलामात्राविशेषज्ञाः प्रस्तारविदः क्रियाकल्पविदः कल्पक्रियाभिज्ञत्वेहेतुकविचारकुशलाः व्यवहारकाले युक्तप्रयोगप्रतिपादनसमर्थाः हैतुकाः हेतुप्रतिपादननिपुणाः नैयायिका इत्यर्थः छन्दोविदः वैदिकच्छन्दोभिज्ञाः पुराणज्ञाः प्राचीनवस्तुज्ञानवन्तः चित्रज्ञाः आलेख्यकरणे समर्थाः चित्रकाव्यकरणे समर्था वा सूत्रज्ञाः अल्पोक्त्यैव ज्ञानसमर्थाः श्लोकषट्कमेकान्वयि ॥ ४–९ ॥

गो० टी०–अथेति । कर्मान्तरे अश्वमेधस्य प्रयोगावसाने ॥ ४ ॥

५] ति० टी०–स्वराणां षड्जादिस्वराणाम् । उत्सुकान्रामायणश्रवणोत्सुकान् ॥ ५ ॥

गो० टी०–पौराणिकानिति । स्वराणां षड्जादिस्वराणाम् । उत्सुकान् रामायणश्रवणोत्सुकानित्यर्थः ॥ ५ ॥

१ युक्तामिति गो. पाठः ।

लक्षणज्ञांश्च गान्धर्वान्नैगमांश्च विशेषतः । पादाक्षरसमासज्ञांश्छन्दःसु परिनिष्ठितान् ॥ ६ ॥
कलामात्राविशेषैज्ञाञ्ज्योतिषे च परं गतान् । क्रियाकल्पविदश्चैव तथा कार्यविशारदान् ॥ ७ ॥
[भाषाज्ञानिङ्गितज्ञांश्च नैगमांश्चाप्यशेषतः ।]
हेतूपचारकुशलान्हैतुकांश्च बहुश्रुतान् । छन्दोविदः पुराणज्ञान्वैदिकान्द्विजसत्तमान् ॥ ८ ॥
चित्रज्ञान्वृत्तसूत्रज्ञान्गीतनृत्यविशारदान् । [शास्त्रज्ञान्नीतिनिपुणान्वेदान्तार्थप्रकाशकान् ।]
एतान्सर्वान्समानीय गातारौ समवेशयत् । ॥ ९ ॥
तेषां संवदतां तत्र श्रोतॄणां हर्षवर्धनम् । गेयं प्रचक्रतुस्तत्र तावुभौ मुनिदारकौ ॥ १० ॥
ततः प्रवृत्तं मधुरं गान्धर्वमतिमानुषम् । न च तृप्तिं ययुः सर्वे श्रोतारो गेयसंपदा ॥ ११ ॥
हृष्टा मुनिगणाः सर्वे पार्थिवाश्च महौजसः । पिबन्त इव चक्षुर्भिः पश्यन्ति स्म मुहुर्मुहुः ॥ १२ ॥
ऊचुः परस्परं चेदं सर्व एव समाहिताः । उभौ रामस्य सदृशौ बिम्बाद्बिम्बमिवोद्धृतौ ॥ १३ ॥
जटिलौ यदि न स्यातां न वल्कलधरौ यदि । विशेषं नाधिगच्छामो गायतो राघवस्य वै ॥ १४ ॥

६] ति० टी०–लक्षणज्ञान्सामुद्रिकलक्षणज्ञान्, गान्धर्वान्संगीतशास्त्रज्ञान्, नैगमान्पौरान् । पादाक्षराणां गुरुलघुप्रयोगलक्षणं समासं संबन्धं जानन्ति तान् । छन्दःसु वेदेषु गायत्र्यादिच्छन्दःप्रतिपादकशास्त्रेषु ॥ ६ ॥

गो० टी०–लक्षणज्ञानिति । गान्धर्वान् गान्धर्वशास्त्रज्ञान् । पादाक्षरसमासज्ञान् पादाक्षराणां गुरुलघुसामान्यज्ञान् छन्दस्सु वेदेषु ॥ ६ ॥

७] ति० टी०–कलाः स्वरास्तेषां मात्रा एकद्वित्रिलक्षणास्तेषां विभागज्ञान् । परं गतानन्तर्ज्ञानवतः । क्रियां तत्प्रतिपादकं कल्पसूत्रं च विदन्ति तान् । कार्यविशारदानावापोद्धारादिकृत्यविशेषज्ञान् ॥ ७ ॥

गो० टी०–कलामात्रेति । कलामात्रविभागज्ञान् कलाः स्वराः तेषां मात्राः एकद्वित्रिलक्षणाः तेषां विभागज्ञान् । परं पारं गतान् । क्रियाकल्पविदः क्रियाकल्पः क्रियाप्रयोगप्रतिपादकं कल्पसूत्रं तद्विदस्तज्ज्ञान् । काव्यविदः काव्यलक्षणलक्ष्यविद इत्यर्थः । काव्यविदो जनानिति च पाठः ॥ ७ ॥

८] ति० टी०–हेतुपचारकुशलान्केवलव्यवहारकाले युक्तिप्रयोगसमर्थान् । हैतुकांस्तार्किकान् । छन्दो गायत्र्यादि । वैदिकान्वैदिकपादादिलक्षणज्ञान् ॥ ८ ॥

गो० टी०–भाषाज्ञानिति । भाषाज्ञान् अष्टादशभाषास्वरूपज्ञान् । इङ्गितज्ञान् अभिप्रायविदः । नैगमान्वणिजः । पूर्वत्र पौरानित्यर्थः । वचने चापि केवलव्यवहारेपि, हेतूपचारकुशलान् युक्तिप्रयोगसमर्थान् । हैतुकान् तार्किकान् ॥८॥

गो० टी०–छन्द इति । वृत्तज्ञान् । वृत्तशास्त्रज्ञान् । चित्रज्ञान् चक्रबन्धादिसहितचित्रकाव्यरचनानिपुणान् ॥ ९ ॥

९–१२] ति० टी०–चित्रज्ञान्गोमूत्रमुरजादिचित्रश्लोकनिबन्धनचतुरान् । वृत्तज्ञान्धर्मशास्त्रमुखेन सदाचारज्ञान् । सूत्राणि पदवाक्यादिमत्राणि तज्ज्ञान् । एतानिति । एतेनाशेषविद्यास्थानं रामायणमिति दर्शितम् । समवेशयत् । सर्वपरिषन्मध्ये गानायेति शेषः ॥ ९–१२ ॥

गो० टी०–शास्त्रेति । शास्त्रज्ञान् व्याकरणादिशास्त्रज्ञान् समवेशयत् । सभामध्ये इति शेषः ॥ १०–१२ ॥

रा० टी०–तेषामिति । श्रोतॄणां हर्षवर्द्धनं वचनं संवदतां तौ कुशीलवौ गेयं प्रचक्रमतुः ॥ १० ॥

रा० टी०–तत इति । अतिमानुषं गान्धर्वं गान्धर्वविद्याप्रवृत्तमत एव श्रोतारः गेयसम्पदा तृप्तिं न ययुः ॥११॥

रा० टी०–हृष्टा इति । मुनिगणाः पार्थिवाश्च चक्षुर्भिः पिबन्त इव मुहुर्मुहुः पश्यन्ति स्म ॥ १२ ॥

१३] ति० टी०–बिम्बाद्बिम्बविबिम्बान्तरमिवोद्धृतौ ॥ १३ ॥

रा० टी०–ऊचुरिति । समाहिता एकाग्रचित्ताः सर्वे परस्परमूचुः तदाकारमाह बिम्बात् रामसूर्यः बिम्बं प्रतिबिम्बमिव उद्धृतौ अत एव रामस्य सदृशौ स्त इति शेषः ॥१३॥

१४] ति० टी०–जटिलौ वल्कलधरौ यदि न स्यातां तदा राघवस्य गायतोश्च विशेषं नाधिगच्छाम इत्यूचुः ॥ १४ ॥

रा० टी०–जटिलौ इति । जटिलौ वल्कलधरौ च यदि न स्यातां तर्हि गायतोः लवकुशयोः राघवस्य च विशेषं नाधिगच्छामः ॥ १४ ॥

---

१ भागज्ञाज्योतिषे इति गो. पाठः । २ विदो जनानिति गो. पा. । ३ अर्धमिदमधिकं गो. पु. । ४ वचने चापि हैतुकानिति गो. पाठः । ५ अर्द्धमिदमधिकं गो. पु. । ६ गानेति गो. पा. । ७ दृष्ट्वेति गो. पा. । ८ पद्यमिदं गतनवमपद्योत्तरं गो. पुस्तके । ९ चक्षुर्भ्यां राजानं गायकौ च तावितिं गो. पा. । १० समंतत इति गो. पा. । ११ उत्थितावितिं गो. पा. । १२ अस्मात्परतो गतदशमैकादशपद्ये गो. पुस्तके दृश्येते ।

एवं प्रभाषमाणेषु पौरजानपदेषु च । प्रवृत्तमादितः पूर्वसर्गं नारददर्शितम् ॥ १५ ॥
ततः प्रभृति सर्गांश्च यावद्विंशत्यगायताम् । ततोऽपराह्णसमये राघवः समभाषत ॥ १६ ॥
श्रुत्वा विंशतिसर्गांस्तान्भ्रातरं भ्रातृवत्सलः । अष्टादश सहस्राणि सुवर्णस्य महात्मनोः ॥ १७ ॥
प्रयच्छ शीघ्रं काकुत्स्थ यदन्यदभिकाङ्क्षितम् । ददौ स शीघ्रं काकुत्स्थो बालयोर्वै पृथक्पृथक् ॥१८॥
दीयमानं सुवर्णं तु नागृह्णीतां कुशीलवौ । ऊचतुश्च महात्मानौ किमनेनेति विस्मितौ ॥ १९ ॥
वन्येन फलमूलेन निरतौ वनवासिनौ । सुवर्णेन हिरण्येन किं करिष्यावहे वने ॥ २० ॥
तथा तयोः प्रब्रुवतोः कौतूहलसमन्विताः । श्रोतारश्चैव रामश्च सर्व एव सुविस्मिताः ॥ २१ ॥
तस्य चैवागमं रामः काव्यस्य श्रोतुमुत्सुकः । पप्रच्छ तौ महातेजास्तावुभौ मुनिदारकौ ॥ २२ ॥
किंप्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः । कर्ता काव्यस्य महतः क्व चासौ मुनिपुंगवः ॥ २३ ॥
पृच्छन्तं राघवं वाक्यमूचतुर्मुनिदारकौ । वाल्मीकिर्भगवान्कर्ता संप्राप्तो यज्ञसंविधम् ॥
येनेदं चरितं तुभ्यमशेषं संप्रदर्शितम् । ॥ २४ ॥

१५-१८] ति० टी०-तत्र गेये नारददर्शितं पूर्वसर्गमादितः प्रवृत्तं कृत्वा ततःप्रभृति यावद्विंशतिसर्गानगायताम् । अनेन प्रत्यहं संक्षेपरामायणमादितः कृत्वा यावद्रामायणसमाप्ति विंशतिसर्गाणां गानमिति तीर्थः ॥ १५-१८ ॥

रा० टी०-एवमिति । आदितः आदौ नारददर्शितं पूर्वं सर्गं मूलरामायणमित्यर्थः प्रवृत्तम् ॥ १५ ॥

रा० टी०-तत इति । ततः प्रभृति मूलरामायणादारभ्य यावद्विंशतिसर्गानगायताम् अर्द्धं पृथक् । तत इति । राघवः विंशतिसर्गान् श्रुत्वा भ्रातरं समभाषत ॥ १६ ॥

रा० टी०-तदाकारमाह—अष्टादशेति । सुवर्णस्य स्वर्णमुद्रायाः अष्टादशसहस्राणि अन्यत् ततो भिन्नं यदभिकाङ्क्षितं तच्च महात्मनोः पप्रच्छ ॥ १७ ॥

रा० टी०-ददाविति। काकुत्स्थः भरतः बालयोः पृथक् पृथक् ददौ अष्टादशसहस्राकस्वर्णमुद्रामिति शेषः कुशीलवौ तु दीयमानं सुवर्णं नागृह्णीताम् ॥ १८ ॥

गो० टी०-प्रवृत्तमिति । तत्र गेयेन नारददर्शितं पूर्वसर्गमादितः प्रवृत्तम् ॥ १६-१८ ॥

१९] ति० टी०-कुशीलवौ कुशलवौ विस्मितौ सकृदेव बहुदानतो विस्मयवन्तौ ॥ १९ ॥

रा० टी०-ऊचतुरिति । महात्मानौ कुशलवौ ऊचतुः तदाकारमाह अनेन सुवर्णेन नौ आवयोः किं प्रयोजनमिति शेषः न किमपीत्यर्थः अर्द्धं पृथक् ॥ १९ ॥

गो० टी०-दीयमानमिति । कुशीलवौ, विस्मितौ सकृदेव बहुप्रदानतः विस्मयवन्तौ, किमनेनेत्येवोचतुश्च ॥१९॥

२०-२१] ति० टी०-किमनेनेति क्षेपाशयमेव स्पष्टीकुरुतः—वन्येनेति । निरतौ निरताहारौ । नियताहाराविति यावत् । सुवर्णेन सुवर्णरूपेण हिरण्येन । द्रव्येणेत्यर्थः॥२०॥२१॥

रा टी०-तदेव भंग्यन्तरेणाह-वन्येनेति । फलमूलेन नियतौ नियताहारौ आवां सुवर्णेन अतिशोभनवर्णेन हिरण्येन किं करिष्यावहे ॥ २० ॥

रा० टी०-तथेति । कौतूहलसमन्विताः आश्चर्यगाथाश्रवणविशिष्टाः श्रोतारो रामश्च सुविस्मिता अभवन्निति शेषः ॥ २१ ॥

गो० टी०-तदेव स्पष्टीकरोति—वन्येनेत्यादि । निरतौ निरताहारौ ॥ २० ॥ २१ ॥

२२] ति० टी०-आगमं कुशलवयोस्तत्प्राप्तिकारणम् । तौ ताविति वीप्सा ॥ २२ ॥

रा० टी०-तस्येति । तस्य काव्यस्यागमं प्राप्तिं श्रोतुमुत्सुको रामः मुनिदारकौ पप्रच्छ ॥ २२ ॥

गो० टी०-तस्येति । आगमं प्राप्तिम् ॥ २२ ॥

२३] ति० टी०-प्रथमदिवसश्रुतविंशतिसर्गमध्ये श्रुतस्यैव प्रमाणाद्यर्थस्यादरात्प्रश्ने पुनस्ताभ्यां प्रतिपादनं मुनिना च तदीयोत्तरत्वेन तत्प्रतिपादकग्रन्थग्रथनं किंप्रमाणमित्यादि । महात्मनः कवेः का प्रतिष्ठा । को विषय इत्यर्थः । 'महात्मनोः' इति पाठे महात्मनोर्भवतोः प्रतिष्ठा आश्रयः क इत्यर्थः । कर्ता काव्यस्येत्यत्र क इत्यनुकर्षः । क्व चासौ । आस्ते इति शेषः ॥ २३ ॥

रा० टी०-तदाकारमाह—किमिति । इदं काव्यं किंप्रमाणं कियत्परिमितिकम् महात्मनः अतिप्रयत्नान्निष्पन्नस्य काव्यस्य का प्रतिष्ठा कियत्कालपर्यन्तं स्थितिरित्यर्थः काव्यकर्ता मुनिपुंगवः क्व चास्ति कर्तुः स्थितिमात्रप्रश्ने कर्तृत्वस्य मुनौ निश्चयोस्तीति सूचितम् ॥ २३ ॥

गो० टी०-किंप्रमाणमिदमित्यादि । का प्रतिष्ठा कियत्पर्यन्तमित्याशयः । काव्यस्य कः कर्तेत्यनुकर्षः । मुनिपुङ्गव इति । आस्त इति शेषः ॥ २३ ॥ २४ ॥

२४] ति० टी०-येन काव्येनाशेषमिदं तुभ्यं तव चरितं

१ इदमर्धं गो. पुस्तके न दृश्यते ।

संनिबद्धं हि श्लोकानां चतुर्विंशत्सहस्रकम् । उपाख्यानशतं चैव भार्गवेण तपस्विना ॥ २५ ॥
आदिप्रभृति वै राजन्पञ्चसर्गशतानि च । काण्डानि षट् कृतानीह सोत्तराणि महात्मना ॥२६॥
कृतानि गुरुणास्माकमृषिणा चरितं तव । प्रतिष्ठा जीवितं यावत्तावत्सर्वस्य वर्तते ॥ २७ ॥
यदि बुद्धिः कृता राजञ्छ्रवणाय महारथ । कर्मान्तरे क्षणीभूतस्तच्छृणुष्व सहानुजः ॥ २८ ॥
वाढमित्यब्रवीद्रामस्तौ चानुज्ञाप्य राघवौ[1] । प्रहृष्टौ जग्मतुः स्थानं यत्रास्ते मुनिपुंगवः ॥ २९ ॥
रामोऽपि मुनिभिः सार्धं पार्थिवैश्च महात्मभिः । श्रुत्वा तद्गीतिमाधुर्यं कर्मशालामुपागमत् ॥ ३० ॥
शुश्राव तत्तालललयोपपन्नं सर्गान्वितं सुस्वरशब्दयुक्तम्[2] ।
तन्त्रीलयव्यञ्जनयोगयुक्तं कुशीलवाभ्यां परिगीयमानम् ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

संप्रदर्शितं तस्य काव्यस्य कर्ता वाल्मीकिः । क्वास्ते इत्यस्योत्तरं संप्राप्तो यज्ञसंविधम् । अनुस्वार आर्षः । यज्ञसदः सविधदेशं संप्राप्तः । तत्र तिष्ठतीति भावः । 'संविदम्' इति वा पाठ इति कश्चित् ॥ २४ ॥

रा० टी०-पृच्छन्तमिति । मुनिदारकौ ऊचतुः अर्द्धं पृथक् तदाकारमाह-वाल्मीकिरिति । येन इदं चरितं तुभ्यं प्रदर्शितं त्वत्समीपं प्रेषितमित्यर्थः तस्य कर्ता-वाल्मीकिः यज्ञसम्विधं यागसमीपं प्राप्तः संविधमित्यत्र सकारोत्तरवर्त्यनुस्वार आर्षः इति भट्टाः सार्द्धश्लोक एकान्वयी ॥ २४ ॥ २५ ॥

गो० टी०-वाल्मीकिरित्यादि । येन कृतमिदमशेषं चरितं काव्यं तुभ्यं संप्रदर्शितं सोस्य काव्यस्य कर्ता भगवान् वाल्मीकिः । यज्ञसंविधम् । बिन्दुश्छान्दसः । यज्ञवाटसविधदेशं प्राप्तः ॥ २५ ॥

२५] ति० टी०-चतुर्विंशत्सहस्रकमिति काव्यसंख्या । उपाख्यानशतमिलोपाख्यानान्तम् । भार्गवः कविः । काव्यनिर्माणे तत्तुल्येनेत्यर्थः । यद्वा प्राचेतसत्वेनास्यापि भार्गवत्वम् । भृगोर्वरुणपुत्रत्वात् । भृगोर्भ्राता भार्गव इत्यर्थ इत्यन्ये ॥२५॥

रा० टी०-समिति । श्लोकानां चतुर्विंशत्सहस्राणि यस्मिन् उपाख्यानानां शतानि यस्मिन् तत्काव्यम् भार्गवेण वाल्मीकिना सन्निबद्धं कृतम् ॥ २६ ॥

गो० टी०-सन्निबद्धमिति । चतुर्विंशतिसाहस्रमित्यादिकमग्रे स्पष्टीकरिष्यामः । चतुर्विंशतिसाहस्रं श्लोकानां सन्निबन्धनमिति च पाठः । उपाख्यानशतम् इलोपाख्यानान्तम् । भार्गवेण भृगुवंश्येन । वाल्मीकेरेव भार्गवत्वं प्राचेतसत्वं चाविरुद्धमिति दर्शितम् " तपस्स्वाध्यायनिरतम् " इति श्लोकव्याख्याने ॥ २६ ॥

२६] ति० टी०-यानि सोत्तराणि षट् काण्डानीह कृतानि तत्सर्गसंख्यापञ्चशतानीत्युपलभ्यमानसर्गसंख्याधिक्यं तु केषांचिदेकैकस्य द्विसर्गत्वकरणेन लेखकप्रमादात्पञ्चसर्गशतानीति षट्काण्डसंख्या । चकारादुत्तरकाण्डसर्गसंख्यासमुच्चय इति कश्चित् ॥ २६ ॥

रा० टी०-आदीति । इह रामायणे आदिप्रभृतिषट्काण्डानि कृतानि तत्र पञ्चसर्गशतानि कृतानि सोत्तराणिदशाधिकशतसर्गविशिष्टोत्तरं च कृतानि तथा हि सशब्दो व्योमवाचकः सो वायुः पुत्रोस्यास्तीति व्युत्पत्तेः तेन शून्यलाभः अशब्दः परमात्मवाचकः तेन एको देवः इत्यादिश्रुत्या एकलाभः तयोरेकशेषेण एकद्वयलाभः तैः सहितानि उत्तराणीति समाप्तः बहुत्वं तु तदुपाख्यानानां बहुत्वात् अत एव तथोत्तरमिति बालकाण्डघटकीभूतेन न वैपरीत्यम् अत एव न प्रत्यक्षविरोधः सोत्तराणीत्यस्य बहुव्रीहिणा षट्काण्डानीत्यस्य विशेषणत्वं वा ॥ २७ ॥

गो० टी०-आदिप्रभृतीति । पञ्चसर्गशतानीति षट्काण्डाभिप्रायेण । चकारादुत्तरकाण्डसर्गसंख्यासमुच्चयः २७

२७] ति० टी०-तव चरितमुद्दिश्यास्माकं गुरुणा कृतानि प्रतिष्ठा आजीवितमिति छेदः । काव्यनायकस्य तव जीवितं यावच्छुभाशुभं कर्म तस्य सर्वस्यात्र प्रतिष्ठा निबन्धनं वर्तत इत्यर्थः ॥ २७ ॥

रा० टी०-कृतानीति । अस्माकं गुरुणा यत्तव चरितं कृतं तस्य प्रतिष्ठा यावत्सर्वं लोकस्य जीवितं वर्त्तते तावदस्तीति शेषः ॥ २८ ॥

गो० टी०-प्रतिष्ठेत्यादि । आजीवितमिति पदम् । यावत् काव्यनायकस्य जीवितं तावत्तस्य यत् शुभाशुभं तस्य सर्वस्यात्र प्रतिष्ठा निबन्धनमस्ति ॥ २८ ॥

२८-३१] ति० टी०-हे राजन् ! अस्य सर्वस्य श्रवणाय श्रवणं कर्तुं यदि बुद्धिः कृता तदा कर्मान्तरे यागप्रयोगविरामसमये क्षणीभूतः सुखीभूतस्तच्छृणुष्व ॥ २८-३१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

रा० टी०-यदीति । यदि श्रवणाय बुद्धिः कृता तर्हि कर्मान्तरे कर्मविरामसमये क्षणीभूतः लब्धोत्सवस्त्वं शृणुष्व ॥२९॥

१ राघवमिति गो. पा. । २ सस्वरेति गो. पाठः ।

पञ्चनवतितमः सर्गः ।

राघवस्तौ सीतात्मजौ ज्ञात्वा जानकी श्वः सर्वेषामपरोक्षं स्वसच्चरितविषये यदि शपथं कुर्यात्तर्ह्यहं निःशङ्कमङ्गीकर्तास्मीति संदेशं प्राचेतसाय प्राहिणोत् तं तु तेनानुमतं दूतमुखाज्ज्ञात्वा श्वोभूते इदं करिष्याम इति निखिलानुमत्या निर्णीय सर्वान्विससर्ज ।

रामो बहून्यहान्येवं तद्गीतं परमं शुभम् । शुश्राव मुनिभिः सार्धं पार्थिवैः सह वानरैः ॥ १ ॥
तस्मिन्गीते तु विज्ञाय सीतापुत्रौ कुशीलवौ । तस्याः परिषदो मध्ये रामो वचनमब्रवीत् ॥ २ ॥
दूताञ्शुद्धसमाचारानाहूयात्ममनीषया । मद्वचो ब्रूत गच्छध्वमितो भगवतोऽन्तिके ॥ ३ ॥
यदि शुद्धसमाचारा यदि वा वीतकल्मषा । करोत्विहात्मनः शुद्धिमनुमान्य महामुनिम् ॥ ४ ॥
छन्दं मुनेश्च विज्ञाय सीतायाश्च मनोगतम् । प्रत्ययं दातुकामायास्ततः शंसत मे लघु ॥ ५ ॥
श्वः प्रभाते तु शपथं मैथिली जनकात्मजा । करोतु परिषन्मध्ये शोधनार्थं ममैव च ॥ ६ ॥
श्रुत्वा तु राघवस्यैतद्वचः परममद्भुतम् । दूताः संप्रययुर्वाढं यत्र वै मुनिपुंगवः ॥ ७ ॥

रा० टी०–वाढमिति । रामः वाढमित्यब्रवीत् राघवौ कुशलवौ तु जग्मतुः ॥ ३० ॥

रा० टी०–राम इति । रामः कर्मशालामुपागमत् ॥ ३१ ॥

रा० टी०–प्रथमदिनश्रवणमुपसंहरन्नाह–शुश्रावेति सर्गैः दशाधिकषट्शतसंख्याकैः अन्वितं सस्वरैः षड्जादिसप्तस्वरविशिष्टैः शब्दैर्युक्तं तंत्र्यादियोगेन युक्तं कुशीलवाभ्यां परिगीयमानं रामायणं शुश्राव राम इति शेषः ॥ ३२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुर्नवतितमः सर्गः ॥ ९४ ॥

गो० टी०–यदीति । हे राजन्यदि ! तस्य सर्वस्य श्रवणाय बुद्धिः कृता, तदा कर्मान्तरं क्षणीभूतः सुखीभूतः शृणु ॥ २९–३२ ॥

इति श्रीगो० विर० श्रीरा० भूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

१] ति० टी०–अथ सीतापरित्यहेच्छया दूतमुखेन कर्तव्यांशप्रतिपादनम्—राम इति ॥ १ ॥

रा० टी०–दिनान्तरश्रवणं वर्णयन्नाह–राम इत्यादिभिः रामःबहून्यहानि तयोर्गीतं शुश्राव ॥ १ ॥

गो० टी०–राम इत्यादि ॥ १ ॥

२] ति० टी०–तस्मिन्गीते तस्मिन्नेव प्रबन्धे सीतापुत्रवृत्तान्तप्रतिपादककाव्यश्रवणेन कुशीलवौ सीतापुत्राविति ज्ञात्वा, न तु ततः पूर्वं कस्य चिन्मुखादित्यर्थः ॥ २ ॥

३] ति० टी०–हे दूताः ! इतो गच्छध्वम् । भगवतोऽन्तिके गत्वा चैतन्मद्वचो ब्रूत ॥ ३ ॥

रा० टी०–तस्मिन्निति । गीते गानसमये कुशीलवौ सीतापुत्रौ विज्ञाय परिषदः सभाया मध्ये आत्ममनीषया स्वकीयशुद्धबुद्ध्या विशिष्टान् अत एव शुद्धः समाचारो येषां तान् दूतानाहूय भगवतो वाल्मीकेरन्तिकं गच्छध्वं मद्वचो ब्रूत इति वचनं रामोऽब्रवीत् श्लोकद्वयमेकान्वयि ॥ २–३ ॥

गो० टी०–तस्मिन्निति । गीते तु गीत एव । नतु ततः पूर्वं कस्य चिन्मुखादित्यर्थः ॥ २ ॥ ३ ॥

४] ति० टी०–किं तदित्यत्राह—यदिति । सीतेति शेषः । शुद्धसमाचारानुत्पन्नदोषा यदि वेति । तपोवनवासेन विनष्टदोषा वेत्यर्थः । महामुनिमनुमान्य । तदनुमतिं गृहीत्वेत्यर्थः ॥ ४ ॥

रा० टी०–तदाकारमाह–यदीत्यादिभिः । वीतं नित्यं निवृत्तं कल्मषं यस्याः सा सीता यद्यागतेति शेषः तदा शुद्धमाचाराय शुद्धसमाचारं प्रवर्तयितुं सद्व्यवहारप्रवृत्त्यर्थमित्यर्थः महामुनिमनुमान्य तत्संमतिं गृहीत्वा दिवा दिनमेव आत्मना स्वसञ्चारेण इह यागस्थले शुद्धिं करोतु आगच्छत्वित्यर्थः यदि तु यदीत्यस्य यस्य प्रजापतिनिर्मितस्य दारशोधनं यस्मिन् स तस्मिन्निति यागविशेषणं तदानाध्याहारकल्पनेति दिक् ॥ ४ ॥

गो० टी०–यदीति । महामुनिमनुमान्य महामुनेरनुमतिं कृत्वेत्यर्थः ॥ ४ ॥

५] ति० टी०–छन्दमभिप्रायम् । प्रत्ययं दातुकामाया मनोगतं प्रत्ययदानं यदि तदा तद्विज्ञाय ततो लघु शीघ्रं मे शंसत ॥ ५ ॥

रा० टी०–छन्दमिति । प्रत्ययम् एतल्लोकाधिकरणकस्वस्थितिविषयकजनविश्वासं दातुं छेत्तुं कामोभिलाषो यस्याः सा तस्याः प्रकटसाकेतं जिगमिषोरित्यर्थः सीतायाः मुनेश्च मनोगतं छन्दमभिप्रायं विज्ञाय लघु शीघ्रं यथा भवति तथा मे शंसत एतेन सीतया स्वाभिप्रायः पूर्वं निवेदित इति सूचितम् प्रत्ययं दातुकामाया इत्यस्यार्थान्तरवर्णनं तु न युक्तमसम्भवादिति दिक् ॥ ५ ॥

गो० टी०–छन्दमिति । छन्दमभिप्रायम् ॥ ५–१० ॥

६–७] ति० टी०–यद्यपि सीताशुद्धिर्लङ्कायां ज्ञातपूर्वा, तथापीदानीं प्राप्तापवादमार्जनेन सर्वलोकपुरतो ममैव स्त्रीसौ-

१ एवमिति गो. पाठः । २ अन्तिकमिति गो. पा. । ३ वाढमिति गो. रा. पा. ।

ते प्रणम्य महात्मानं ज्वलन्तमपितप्रभम् । ऊचुस्ते रामवाक्यानि मृदूनि मधुराणि च ॥ ८ ॥
तेषां तद्भाषितं श्रुत्वा रामस्य च मनोगतम् । विज्ञाय सुमहातेजा मुनिर्वाक्यमथाब्रवीत् ॥ ९ ॥
एवं भवतु भद्रं वो यथा वदति राघवः । तथा करिष्यते सीता दैवतं हि पतिः स्त्रियैः ॥ १० ॥
तथोक्ता मुनिना सर्वे राजदूता महौजसैः । प्रत्येत्य राघवं सर्वे मुनिवाक्यं बभाषिरे ॥ ११ ॥
ततः प्रहृष्टः काकुत्स्थः श्रुत्वा वाक्यं महात्मनः । ऋषींस्तत्र समेतांश्च राज्ञश्चैवाभ्यभाषत ॥ १२ ॥
भगवन्तः सशिष्या वै सानुगाश्च नराधिपाः । पश्यन्तु सीताशपथं यश्चैवान्योऽपि काङ्क्षते ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः । सर्वेषामृषिमुख्यानां साधुवादो महानभूत् ॥ १४ ॥
राजानश्च महात्मानः प्रशंसन्ति स्म राघवम् । उपपन्नं नरश्रेष्ठ त्वय्येव भुवि नान्यतः ॥ १५ ॥
एवं विनिश्चयं कृत्वा श्वोभूत इति राघवः । विसर्जयामास तदा सर्वांस्तान्छत्रुसूदनः ॥ १६ ॥

इति संप्रविचार्य राजसिंहः श्वोभूते शपथस्य निश्चयम् ।
विससर्ज मुनीन्नृपांश्च सर्वान्स महात्मा महतो महानुभावः ॥ ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

न्दर्यलुब्ध इति कलङ्कशोधनार्थं शुद्धयापि तया पुनः शपथः कार्य इत्याह—श्वः प्रभात इति ॥ ६ ॥ ७ ॥

रा० टी०–श्व इति । मम शोधनार्थं प्रसादार्थमित्यर्थः परिषन्मध्य आगत्येति शेषः मैथिली शपथं शापपरममङ्गलरूपाप्रकटसाकेताय पथं गमनं करोतु एतेन स्वस्यापि जिगमिषा सूचिता ॥ ६ ॥

रा० टी०–श्रुत्वेति । यत्र मुनिपुङ्गवः तं वाटं शालां दूतास्संप्रययुः ॥ ७ ॥

८–१०] ति० टी०–मृदून्यपरुषाणि । मधुराणि मधुराक्षराणि ॥ ८–१० ॥

रा० टी०–ते इति । दूताः रामवाक्यानि ऊचुः ॥ ८ ॥

रा० टी०–तेषामिति । मुनिरब्रवीत् ॥ ९ ॥

रा० टी०–तदाकारमाह–एवमिति । हि यतः स्त्रियः पतिरेव दैवतमतः यथा राघवो वदति तथा सीता करिष्यते ॥ १० ॥

११–१२] ति० टी०–तथोक्ताः सीता तथैव करिष्यते इत्युक्ताः ॥ ११ ॥ १२ ॥

रा० टी०–तथेति । राजदूताः राघवं प्रत्येत्य मुनिवाक्यं बभाषिरे ॥ ११ ॥

रा० टी०–तत इति । काकुत्स्थः ऋषीन् राज्ञश्च अभ्यभाषत ॥ १२ ॥

गो० टी०–तथोक्ता इति । सीता तथैव करिष्यतीत्युक्ता इत्यर्थः ॥ ११ ॥ १२ ॥

१३–१७] ति० टी०–यश्चान्योऽपि सीतायां दोषारोपकर्ता, योऽपि शपथमाकाङ्क्षते सोऽपि पश्यत्वित्यर्थः॥१३–१७॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

रा० टी०–तदाकारमाह–भगवन्त इति । सशिष्याः भगवन्तो वशिष्ठप्रभृतयः नराधिपाश्च अन्यो यः कांक्षते सोपि सीताशपथं सीताकर्त्रीकसाकेतगमनम् पश्यन्तु ॥ १३ ॥

रा० टी०–तस्येति । राघवस्य वचनं श्रुत्वा वियमानानां ऋषिमुख्यानां महान् साधुवादोऽभूत् ॥ १४ ॥

रा० टी०–राजान इति । त्वय्येव उपपन्नं युक्तं सीतानयनमिति शेषः अन्यतः अन्यस्मिन् ॥ १५ ॥

रा० टी०–एवमिति । श्वोभूते आगामिदिवसे एवं सीतागमनं भविष्यतीति निश्चयं कृत्वा राघवः सर्वान् विसर्जयामास ॥ १६ ॥

रा० टी०–उपसंहरन्नाह—इतीति । राजसिंहो रामः श्वोभूते शपथस्य निश्चयमित्यनेन प्रकारेण संप्रविचार्य संप्रविचारेण कृत्वा विससर्ज ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चनवतितमः सर्गः ॥ ९५ ॥

गो० टी०–भगवन्त इति । यश्चैवान्योपीति । यश्च पापी पापजल्पः प्राकृतः सोपीत्यर्थः ॥ १३–१७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने पञ्चनवतितमः सर्गः ॥ ९५ ॥

---

१ स्त्रिया इति गो. पाठः । २ महौजसमिति गो. पाठः । ३ क्षिप्रमिति गो. पा. । ४ महात्मानमिति गो. पा. । ५ निश्चयं वै इति । गो. निश्चयं तदिति रा. पा. ।

षण्णवतितमः सर्गः ।

प्रभातायां तु शर्वर्यां वसिष्ठादयोऽन्ये च तदपूर्वं द्रष्टुकामा यज्ञवाटे चित्रवदुपविष्टाः प्राचेतसश्च वैदेह्यनुगत आगत्य सीतां निर्दिश्य भो पतिव्रतेयं पूताचारेति च ज्ञानेन चक्षुषापि चासंशयं जानामि यद्यसत्यं भाषेय तर्हि मत्कृतं तपो नश्येत् सापि तव प्रत्ययं दास्यति त्वया शुद्धां जानतापि जनापवादादेव या परित्यक्ता ।

तस्यां रजन्यां व्युष्टायां यज्ञवाटं गतो नृपः । ऋषीन्सर्वान्महातेजाः शब्दापयति राघवः ॥ १ ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः । विश्वामित्रो दीर्घतमा[1] दुर्वासाश्च महातपाः ॥ २ ॥
पुलस्त्योऽपि तथा शक्तिर्भार्गवश्चैव वामनः । मार्कण्डेयश्च दीर्घायुर्मौद्गल्यश्च महायशाः ॥ ३ ॥
गर्गश्च च्यवनश्चैव शतानन्दश्च धर्मवित् । भरद्वाजश्च तेजस्वी अग्निपुत्रश्च सुप्रभः ॥ ४ ॥
नारदः पर्वतश्चैव गौतमश्च महायशाः । [कौत्यायनः सुयज्ञश्च त्यगस्त्यस्तपसां निधिः ।]
एते चान्ये च बहवो मुनयः संशितव्रताः । ॥ ५ ॥
कौतूहलसमाविष्टाः सर्व एव समागताः । राक्षसाश्च महावीर्या वानराश्च महाबलाः ॥ ६ ॥
सर्व एव समाजग्मुर्महात्मानः कुतूहलात् । क्षत्रिया ये च शूद्राश्च वैश्याश्चैव सहस्रशः ॥ ७ ॥
नानादेशगताश्चैव ब्राह्मणाः संशितव्रताः । [ज्ञाननिष्ठाः कर्मनिष्ठाः योगनिष्ठास्तथापरे ।]
सीताशपथवीक्षार्थं सर्व एव समागताः । ॥ ८ ॥
तदा समागतं सर्वमश्मभूतमिवाचलम् । श्रुत्वा मुनिवरस्तूर्णं ससीतः समुपागमत् ॥ ९ ॥
तमृषिं पृष्ठतः सीता अन्वगच्छदवाङ्मुखी । कृताञ्जलिर्वाष्पकला कृत्वा रामं मनोगतम् ॥ १० ॥
तां दृष्ट्वा श्रुतिमायान्तीं ब्रह्माणमनुगामिनीम् । वाल्मीकेः पृष्ठतः सीतां साधुवादो महानभूत् ॥११॥
ततो हलहलाशब्दः सर्वेषामेवमाबभौ । दुःखजन्मविशालेन शोकेनाकुलितात्मनाम् ॥ १२ ॥

१–८] ति० टी०–अथ संमिलितनानादेशीयपरिषन्मध्ये सीतया सह वाल्मीकिरागत्य तत्त्वभूतार्थप्रत्यभिज्ञापनं करोति—**तस्यामिति** । शब्दापयत्याह्वयति स्म ॥ १–८ ॥

रा० टी०–प्रातःकालिकं वृत्तमाह–**तस्यामित्यादिभिः** । रजन्यां व्युष्टायां व्यतीतायां सत्यां राघवः ऋषीन् वशिष्ठप्रभृतीन् शब्दापयति आह्वयत् ॥ १ ॥

रा० टी०–**वशिष्ठ इति** । दीर्घतमा अतिमहान्तः एते वशिष्ठादयः अन्ये च बहवो मुनयः कौतूहलसमाविष्टास्सन्तस्समागताः सार्द्धश्लोकचतुष्टयमेकान्वयि ॥ २–९ ॥

रा० टी०–**राक्षसा इति** । राक्षसा वानराश्च समाजग्मुः ॥ ६ ॥

रा० टी०–**क्षत्रिया इति** । नानादेशगताः नानादेशेभ्य आगताः क्षत्रियादयः सीताशपथवीक्षार्थं सीताकर्वीकाप्रकटसाकेतगमनदर्शनार्थं समागताः सार्द्धश्लोक एकान्वयी ॥७॥८॥

गो० टी०–**तस्यामित्यादि** । शब्दापयति आह्वयति स्म यङभाव आर्षः ॥१–१२॥

९–१०] ति० टी०–अश्मभूतमिवाचलं पर्वतवन्निश्चलं कौतुकदर्शनार्थमिति श्रुत्वा ॥ ९ ॥ १० ॥

रा० टी०–**तदेति** । समागतं सर्वमश्मभूतमिवाचलं जनजातं श्रुत्वा मुनिवरो वाल्मीकिः ससीतस्सन् समुपागमत् ॥ ९ ॥

रा० टी०–**तमिति** । सीता रामं मनोगतं कृत्वा पृष्ठतः पश्चादेशेन ऋषिमन्वगच्छत् ॥ १० ॥

११] ति० टी०–ब्रह्माणमनुगामिनीं श्रुतिमिव वाल्मीकेः पृष्ठतस्तां सीतामायान्तीं दृष्ट्वा । अनयोपमया सीतायाः श्रुतेश्च सकलदोषराहित्येन प्रमाणत्वं दर्शितम् ॥ ११ ॥

रा० टी०–**तामिति** । ब्रह्माणमनुगामिनीं श्रुतिमिव वाल्मीकेः पृष्ठतः आयान्तीं सीतां दृष्ट्वा महान् साधुवादोऽभूत् श्रुतिशब्दः आचारक्विबन्तप्रकृतिकतृक्विबन्तः लाक्षणिको वा॥ ११

१२] ति० टी०–एवं वक्ष्यमाणप्रकारेण । दुःखजन्मना दुःखोत्पत्त्या । विशालेन विस्तीर्णेन शोकेनाकुलात्मनां क्षुब्धान्तःकरणानाम् ॥ १२ ॥

रा० टी०–**तत इति** । दुःखजन्मनः वियुक्तसीतादर्शनजनितदुःखोत्पत्तेः विशालेन विस्तारेण अतिशोकेन च आकुलितात्मनां व्याकुलचित्तानां सर्वेषामृषिप्रभृतीनां हलहलाशब्द आबभौ ॥ १२ ॥

गो० टी०–**तत इति** । दुःखजन्मविशालेन दुःखोत्पत्त्या विस्तीर्णेन ॥ १३–१७ ॥

१ दीर्घतपा इति गो. पा. । २ इदमर्धमधिकं गो. पु. । ३ इदमर्धमधिकं गो. पु. ४ गलेति गो. पा. ५ दृष्ट्वा श्रुतिमिवायान्तीमिति गो. पाठः ।

साधु रामेति केचित्तु साधु सीतेति चापरे । उभावेव च तत्रान्ये प्रेक्षकाः संप्रचुक्रुशुः ॥ १३ ॥
ततो मध्ये जनौघस्य प्रविश्य मुनिपुंगवः । सीतासहायो वाल्मीकिरिति होवाच राघवम् ॥१४॥
इयं दाशरथे सीता सुव्रता धर्मचारिणी । अपवादात्परित्यक्ता ममाश्रमसमीपतः ॥ १५ ॥
लोकापवादभीतस्य तव राम महाव्रत । प्रत्ययं दास्यते सीता तामनुज्ञातुमर्हसि ॥ १६ ॥
इमौ तु जानकीपुत्रावुभौ च यमजातकौ । सुतौ तवैव दुर्धर्षौ सत्यमेतद्ब्रवीमि ते ॥ १७ ॥
प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन । न स्मराम्यनृतं वाक्यमिमौ तु तव पुत्रकौ ॥ १८ ॥
बहुवर्षसहस्राणि तपश्चर्या मया कृता । नोपाश्नीयां फलं तस्या दुष्टेयं यदि मैथिली ॥ १९ ॥
मनसा कर्मणा वाचा भूतपूर्वं न किल्बिषम् । तस्याहं फलमश्नामि अपापा मैथिली यदि ॥ २० ॥
अहं पञ्चसु भूतेषु मनःषष्ठेषु राघव । विचिन्त्य सीतां शुद्धेति जग्राह वननिर्झरे ॥ २१ ॥
इयं शुद्धसमाचारा अपापा पतिदेवता । लोकापवादभीतस्य प्रत्ययं तव दास्यति ॥ २२ ॥

१३-१४] ति० टी०-उभौ सीतारामौ साध्विति प्रचुक्रुशुः ॥ १३ ॥ १४ ॥

रा० टी०-साध्विति । केचित् हे राम ! त्वया साधु कृतमिति केचित्तु हे सीते ! त्वया साधु कृतमिति च अन्ये प्रेक्षकाः उभौ हे सीतारामौ ! युवाभ्यां साधु कृतमिति च सम्प्रचुक्रुशुः १३

रा० टी०-तत इति । वाल्मीकिः जनौघस्य मध्ये प्रविश्य राघवमित्युवाच ॥ १४ ॥

१५-१६] ति० टी०-अपवादैर्हेतुभिर्ममाश्रमसमीपे त्यक्ता इयं वत प्रत्ययं दास्यते तदनुज्ञातुमर्हसि ॥ १५ ॥ १६ ॥

रा० टी०-तदाकारमाह-इयमित्यादिभिः । अपवादात् शास्त्रनिन्दितासमयव्यवायादिभीतेः ममाश्रमसमीपतः परित्यक्ता धर्मचारिणी सीता इयमेव ॥ १५ ॥

रा० टी०-लोकेति । लोकापवादभीतस्य लोके शास्त्रे योऽपवादः असमयव्यवायादिनिन्दा तस्माद्भीतस्य तवाग्रे सीता प्रत्ययं स्वकर्तृकेहलोकस्थितिविषयकनिश्चयं दास्यते निवर्तयिष्यते अतः सीतामनुज्ञातुमर्हसि संज्ञापूर्वकविधेरनित्यत्वात्परस्मैपदाभावः ॥ १६ ॥

१७-१८] ति० टी०-यमजातकौ यमलतयोत्पन्नौ । यथाहं प्रचेतसो दशम औरसः पुत्रः, यद्वा प्रचेतसो दशमः संतानपरम्परया पुत्रोऽपत्यम्, अतोऽहमनृतं वाक्यं मनसापि न स्मरामि कथनं तु दूरे । अत इमौ तव पुत्रकाविति मद्वाक्यं सत्यमेव जानीहीति शेषः ॥ १७ ॥ १८ ॥

रा० टी०-इमाविति । इमौ जानकीपुत्रौ यमजातकौ यमत्वेन युग्मत्वेन जातमेककालावच्छेदेन जन्म ययोस्तावुभौ तवैव सुतौ एतदहं सत्यं ब्रवीमि ॥ १७ ॥

गो० टी०-इमौ त्विति । यमजातकौ यमलतयोत्पन्नौ१८

रा० टी०-प्रचेता इति । अहं प्रचेतसो दशमः पुत्रः अतः अनृतं वाक्यं स्ववचनं नैव स्मरामि अनृतं कदाचिन्नोक्तमित्यर्थः अतः इमौ तवैव पुत्रकौ ॥ १८ ॥

गो० टी०-प्रचेतस इति । यथाहं प्रचेतसो दशमः औरसः पुत्रः तथैव तवेमौ पुत्रौ । अनृतं वाक्यम् अहं मनसा न स्मरामि । कथनं तु दूरत एवेति भावः ॥ १८ ॥

१९] ति० टी०-अथ सीताचारित्रं प्रति मुनिना शपथकरणम्—बहुवर्षेति । यदि मैथिली दुष्टा तदा तपसः फलमहं न प्राप्नुयाम् ॥ १९ ॥

रा० टी०-सीताया दयालुत्वातिशयं बोधयितुमाह-बह्विति । यदीयं मैथिली दुष्टा दूषयित्री स्यात्तदा मया कृता या तपश्चर्या तस्याः फलं नोपाश्नीयां भुञ्जीय ॥ १९ ॥

गो० टी०-बह्विति । तस्याः फलमिति । यथेयमपापा एवं तपश्चर्यायाः फलम् उपाश्नीयाम् । यथा तपसः फलभोगः निश्चितस्तथेयमपापेत्यर्थः । तस्याः फलमुपाश्नीयामपापा यदि मैथिलीति च पाठः ॥ २० ॥

२०] ति० टी०-मनआदिना मम किल्बिषं न भूतपूर्वम् । मया किंचिदपि न कृतमित्यर्थः । यद्यपापा मैथिली तदा तस्य किल्बिषानाचरणस्य फलमश्नाम्यश्नीयाम् । अनेन संकल्पपूर्वनिषिद्धत्यागोऽपि धर्मोऽयेति सूचितम् ॥ २० ॥

रा० टी०-मनसेति । मैथिली यद्यपापा स्वाश्रितपापादर्शनशीला तदैव मनआदिना यत् किल्बिषं न भूतपूर्वं मया ज्ञानपूर्वकं न कृतमित्यर्थः तस्य किल्बिषानाचरणस्य फलमश्नामि अश्नीयामेतेनाज्ञातापराधस्यापि प्रबलत्वं सूचितम् ॥२०॥

गो० टी०-मनसेति। तस्य किल्बिषानाचरणस्येत्यर्थः२१

२१-२२] ति० टी०-पञ्चसु भूतेषु श्रोत्रादिपञ्चेन्द्रियेषु । जग्राह गृहीतवान् ॥ २१ ॥ २२ ॥

रा० टी०-अहमिति । मनसा ब्रह्मणोन्तरिन्द्रियेण सृष्टेषु पञ्चसु भूतेषु पृथिव्यादिषु पर्यटितोहं सीतैव शुद्धा शुद्धिकर्त्रीति विचिन्त्य वननिर्झरे जग्राह आनन्दस्यातिशयात् पारोक्ष्यं ग्रहणकर्मत्वं तु प्रत्यासत्या सीताया एवेति बोध्यम्॥२१॥

रा० टी०-सीताभिप्रायं बोधयन्नाह-इयमिति । इयं

१ अपवादैरिति गो. पाठः । २ तस्याः फलमुपाश्नीयामिति गो. पाठः । ३ सीतामिति गो. पाठः

तस्मादियं नरवरात्मज शुद्धभावा दिव्येन दृष्टिविषयेण मया प्रदिष्टा ।
लोकापवादकलुषीकृतचेतसा या त्यक्ता त्वया प्रियतमा विदितापि शुद्धा ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

सप्तनवतितमः सर्गः ।

वाल्मीकेर्वचनश्रवणानन्तरं भो मुने यद्यपीयं पवित्रा वह्निप्रवेशाच्च देवादिभिरपि मतापि जनापवादात्त्यक्तेति रामो जगाद शपथं ब्रह्मादयो द्रष्टुमागताः तदा जानक्यपि परिषन्मध्ये यदि पतिव्रता अथवा रामैकचित्ता चेत्पृथिवी मह्यं विवरं ददात्विति त्रिरुवाच एवं शपन्तीं तां धरणी दिव्यसिंहासनोपविष्टां बाहुभ्यां गृहीत्वा रसातलं प्रविष्टा तदा सर्वोऽपि प्रेक्षितृवर्गः सहसा संमोहितः ।

वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत । प्राञ्जलिर्जगतो मध्ये दृष्ट्वा तां वरवर्णिनीम् ॥ १ ॥
एवमेतन्महाभाग यथा वदसि धर्मवित् । प्रत्ययस्तु मम ब्रह्मंस्तव वाक्यैरकल्मषैः ॥ २ ॥
प्रत्ययश्च पुरा वृत्तो वैदेह्याः सुरसंनिधौ । शपथश्च कृतस्तत्र तेन वेश्म प्रवेशिता ॥ ३ ॥
लोकापवादो बलवान्येन त्यक्ता हि मैथिली । सेयं लोकभयाद्ब्रह्मन्नपापेत्यभिजानता ॥
परित्यक्ता मया सीता तद्भवान्क्षन्तुमर्हति । ॥ ४ ॥

सीता लोकापवादभीतस्य शास्त्रनिन्दितासमयव्यवायादितो भयं प्राप्तस्य तव समीपे प्रत्ययमिहलोकस्थितिविषयकनिश्चयं दास्यति निवारयिष्यति ॥ २२ ॥

गो० टी०–अहमिति । पञ्चसु भूतेष्विति । श्रोत्रादिपञ्चेन्द्रियेष्वित्यर्थः ॥ २२ ॥ २३ ॥

इति श्रीगोविन्दराजविर० श्रीरा० भूषणे मणिमुकुटाख्याने उ० रामायणव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

२३] ति० टी०–दिव्येन दृष्टिविषयेण दिव्यज्ञानेन तव शुद्धा विदितापि त्वया लोकापवादभीतेन त्यक्तेत्यन्वयः ॥२३॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

रा० टी०–तस्मादिति । लोकापवादकलुषीकृतचेतसा लोके शास्त्रे योपवादः अकालकव्यवायादिनिन्दा तेन कलुषीकृतं भीतं चेतो यस्य तेन त्वया शुद्धभावा कापट्यसंसर्गशून्याभिप्रायविशिष्टा अत एव शुद्धा या प्रियतमा त्वया त्यक्ता वनं प्रापिता सा मया प्रदिष्टा प्रकृष्टभाग्यसंपादिका विदिता ज्ञाता एतेन स्वकल्याणार्थमेवेयं मया सेविते ति सूचितम् ॥ २३ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥

१] ति० टी०–अथ सीतायाः शपथपूर्वं भूमिप्रवेशः—वाल्मीकिनेति । एवमुक्तस्तव प्रत्ययं दास्यतीत्युक्तः ॥ १ ॥

रा० टी०–वाल्मीकिवचनश्रवणानन्तरकालिकं वृत्तमाह–वाल्मीकिनेत्यादिभिः । राघवस्तां सीतां दृष्ट्वा जगतो मध्ये प्रत्यभाषत ॥ १ ॥

गो० टी०–वाल्मीकिनेत्यादि ॥ १ ॥

२-३] ति० टी०–एवमेतथापि लङ्कायां सुरासुरसंनिधौ प्रत्ययो दत्तस्तव वाक्यैश्च शपथरूपैर्मम प्रत्ययो जात एव, तथापि हे महाभाग ब्रह्मन् ! त्वं यथा वदसि तदेवमेव प्रत्ययं करोत्वित्यर्थः ॥ २ ॥ ३ ॥

रा० टी०–तदाकारमाह–एवमिति । हे ब्रह्मन् ! अकल्मषैः कल्मषसंसर्गरहितैः तव वाक्यैः प्रत्ययः सीताप्रभावविषयकविश्वासोस्तीति शेषः अतः यथा त्वं वदसि तदेतदेवमेव ॥ २ ॥

रा० टी०–प्रत्यय इति । सुरसन्निधौ सुराणां परज्ञानप्रदत्वेनातिदानिनां भवतां सन्निधौ वेश्म प्रवेशिता गृहे प्रविष्टा या वैदेही तया वैदेह्या पुरैव प्रत्ययः सज्जनकल्याणविश्वासः वृत्तः कृतः तेन हेतुना तत्र समये एव शपथो मङ्गलगमनं कृतः ॥ ३ ॥

गो० टी०–एवमिति । यथा वदसीति । प्रत्ययं दास्यतीत्येवमात्मनेत्यर्थः । एतदेवमेव कर्तव्यमित्यर्थः । एवंकरणं च न मम विश्वासार्थमित्याह–प्रत्ययो हीति । जात एवेति शेषः । तव वाक्यैरिति । बहुवचेत्यादिना प्रागुक्तशपथवाक्यैरित्यर्थः ॥ २-५ ॥

४] ति० टी०–किमर्थं तर्हि पुनः प्रत्ययकरणं तत्राह—लोकेति । येन लोकापवादेन जानकी त्यक्ता स लोकापवादो बलवान्, अतस्तन्निवृत्तये पुनः प्रत्ययकरणमिति भावः । तवापि लोकवदेवास्यां शङ्कास्ति किं तत्र, नेत्याह—सेयमिति । अपापेत्यभिजानतापि मया लोकभयात्त्यक्ता ॥ ४ ॥

रा० टी०–ननु भवदतिप्रीतिविषय इयं सीता एतावत्कालपर्यन्तं त्वया कथं त्यक्तेत्यत आह–लोकेति । येन मैथिली त्यक्ता स लोकापवादः शास्त्रनिन्दितकर्मभयम् बलवान् अर्द्धं पृथक्–सेति । सीता अपापा पापनिवर्तिका इत्यभिजानतापि मया लोकभयात् शास्त्रभीतेः त्यक्ता एतावत्कालपर्यन्तं नानीतेत्यर्थः तद् त्यागजनितमपराधं भवान् क्षन्तुमर्हति ॥ ४ ॥

१ प्रविष्टेति गो. पाठः । २ त्विति गो. पाठः ।

जानामि चेमौ पुत्रौ मे यमजातौ कुशीलवौ । शुद्धायां जगतो मध्ये मैथिल्यां प्रीतिरस्तु मे ॥ ५ ॥
अभिप्रायं तु विज्ञाय रामस्य सुरसत्तमाः । सीतायाः शपथे तस्मिन्सर्वे एव समागताः ॥ ६ ॥
पितामहं पुरस्कृत्य सर्व एव समागताः । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ ७ ॥
साध्याश्च देवाः सर्वे ते सर्वे च परमर्षयः । नागाः सुपर्णाः सिद्धाश्च ते सर्वे हृष्टमानसाः ॥ ८ ॥
दृष्ट्वा देवानृषींश्चैव राघवः पुनरब्रवीत् । प्रत्ययो मे नरश्रेष्ठ ऋषिवाक्यैरकल्मषैः ॥ ९ ॥
शुद्धायां जगतो मध्ये वैदेह्यां प्रीतिरस्तु मे । सीताशपथसंभ्रान्ताः सर्व एव समागताः ॥ १० ॥
ततो वायुः शुभः पुण्यो दिव्यगन्धो मनोरमः । तं जनौघं सुरश्रेष्ठो ह्लादयामास सर्वतः ॥ ११ ॥
तदद्भुतमिवाचिन्त्यं निरैक्षन्त समाहिताः । मानवाः सर्वराष्ट्रेभ्यः पूर्वं कृतयुगे यथा ॥ १२ ॥
सर्वान्समागतान्दृष्ट्वा सीता काषायवासिनी । अब्रवीत्प्राञ्जलिर्वाक्यमधोदृष्टिरवाङ्मुखी ॥ १३ ॥
यथाहं राघवादन्यं मनसापि न चिन्तये । तथा मे माधवी देवी विवरं दातुमर्हति ॥ १४ ॥
मनसा कर्मणा वाचा यथा रामं समर्चये । तथा मे माधवी देवी विवरं दातुमर्हति ॥ १५ ॥

५] ति० टी०–इमौ मे पुत्राविति च जानामि, अथापि जगतो मध्ये शुद्धायामेव मैथिल्यां मे प्रीतिरस्तु ॥ ५ ॥

रा० टी०–जानामीति । जगतो मध्ये शुद्धायां मैथिल्यां मे पुत्रौ कुशीलवौ जातौ अहं जानामि अतः मे प्रीतिरस्तु अस्ति॥५॥

६–९] ति० टी०–सीतायाः शपथे शपथप्रसङ्गे इत्यर्थः ॥ ६–९ ॥

रा० टी०–अभिप्रायमिति । शपथे सीताकर्तृकाप्रकटसाकेतगमने रामस्य सीतायाश्च अभिप्रायं विज्ञाय सर्वे सुरसत्तमाः समागताः ॥ ६ ॥

रा० टी०–तदेव सविशेषमाह–पितामहमिति । पितामहं पुरस्कृत्य आदित्यादयः समागताः अर्द्धचतुष्टयमेकान्वयि ॥ ७ ॥ ८ ॥

रा० टी०–दृष्ट्वेति । राघवोऽब्रवीत् अर्द्धं पृथक् तदाकारमाह—प्रत्यय इति । ऋषिवाक्यैः वाल्मीकिवचनैः मे प्रत्ययः सीताप्रभावविषयकविश्वासोऽभूदिति शेषः अत एव वैदेह्यां मे प्रीतिरधिकप्रेमास्तु अस्ति ॥ १० ॥

गो० टी०–अभिप्रायमिति । सीतायाः शपथ इति । शपथप्रसङ्ग इत्यर्थः ॥ ६–१२ ॥

१०] ति० टी०–शुद्धायामिति । अस्य तथापीत्यादिः । सीताशपथे तदर्शने संभ्रान्ताः । आहता इत्यर्थः ॥ १० ॥

रा० टी०–सीतेति । सीताशपथे अप्रकटसाकेतगमने संभ्रान्ताः आहताः सन्तः सर्वे समागताः अर्द्धं पृथक्। तत इति। साकेतगमननिश्चयानन्तरं वायुर्जनौघमाह्लादयामास ॥ ११ ॥

११] ति० टी०–शुभपुण्यशब्दौ शैत्यमान्द्योपलक्षणौ । दिव्यगन्धः संनिहितसर्वदेवशरीरवर्तिदिव्यचन्दनमाल्यगन्धः । सुरश्रेष्ठः सर्वपुण्यपापसाक्षी ॥ ११ ॥

१२] ति० टी०–तदद्भुतं दिव्यगन्धवायुवहनं सर्वराष्ट्रेभ्य आगता मानवा निरैक्षन्त । पूर्वं यथा कृतयुगे दिव्यगन्धवायुस्पर्शनं तथा त्रेतायामप्यभूदित्यर्थः । रामसांनिध्यादनाश्चर्यमपि साधारणदृष्ट्याश्चर्यमितीवशब्दः ॥ १२ ॥

रा० टी०–तदिति । अचिन्त्यं चिन्तयितुमशक्यं कृतयुगे इव अद्भुतं तत् सीताकर्तृकसदेहसाकेतगमनं सर्वराष्ट्रेभ्यः पूर्वमागता मानवाः निरैक्षन्त ॥ १२ ॥

गो० टी०–तदिति । अचिन्त्यमचिन्त्यहेतुकं वायुस्वरूपं, यथा पूर्वं कृतयुगे पश्यन्ति स्म तथा तदानीं सर्वे मानवाः निरीक्षन्ते स्म ॥ १३–१६ ॥

१३] ति० टी०–ततः सीता चतुर्दशभुवनस्थजनानेकत्र मिलितान्दृष्ट्वापवादपरिहाराय शपथव्याजेन स्वपदं प्रवेष्टुकामाह—सर्वानिति । काषायवासिनी तपस्युचितवासोधारिणी पातिव्रत्योचितार्धोदृष्टिर्विवरयाचनाय महीनिरीक्षणार्थं च, अत एवावाङ्मुखी ॥ १३ ॥

रा० टी०–सर्वानिति । काषायेषु कषायरक्तवस्त्रधारिषु तपस्विसमीपेष्वित्यर्थः वसति तच्छीला सीता अब्रवीत् ॥१३॥

१४–१५] ति० टी०–यथाहं राघवादन्यं मनसापि न चिन्तये न चिन्तयामीति सत्यम्, तथा सत्येन चिरकालवियोगेऽपि पातिव्रत्यपरिपालनरूपशपथेनास्तजनितपरमदुःखसमाप्तये पुनरपि भुवं प्रवेष्टुं माधवी देवी माधवपत्नी भूदेवी विवरं रन्ध्रं दातुमर्हति । एवमग्रेऽपि व्याख्येयम्१४।१५

रा० टी०–तदाकारमाह–यथेत्यादिभिः । यथाहं राघवादन्यं मनसापि न चिन्तये तथा माधवी माधवनोधृता देवी पृथ्वी राघवादन्यं न चिन्तयति अतः विवरं विमानश्रेष्ठमित्यर्थः दातुमर्हति एतेनोपमालङ्कारेण पृथिव्या अपि राममनोवेदित्वं सूचितम् तेनेदं प्रार्थनं रामाभिप्रेतमेवेति त्वयापि निश्चीयतामिति ध्वनितम् ॥ १४ ॥

रा० टी०–हर्षातिशयात्पुनस्तदेवाह–मनसेति । यथाहं राममेव समर्चये तथा देवी समर्चयति अतः दातुमर्हति ॥१५॥

१ महेन्द्राद्या महौजस इति गो. पा. । २ ह्यश्विनौ समरुद्गण इति गो. पाठः । ३ सुरश्रेष्ठा इति गो. पाठः । ४ इदमर्धमष्टमपद्यानन्तरं गो. पुस्त. । ५ समागत: इति गो. पाठः ।

तत्सत्यमुक्तं मे वेद्मि रामात्परं न च । तथा मे माधवी देवी विवरं दातुमर्हति ॥ १६ ॥
तथा शपन्त्यां वैदेह्यां प्रादुरासीत्तदद्भुतम् । भूतलादुत्थितं दिव्यं सिंहासनमनुत्तमम् ॥ १७ ॥
ध्रियमाणं शिरोभिस्तु नागैरमितविक्रमैः । दिव्यं दिव्येन वपुषा दिव्यरत्नविभूषितैः ॥ १८ ॥
तस्मिंस्तु धरणी देवी बाहुभ्यां गृह्य मैथिलीम् । स्वागतेनाभिनन्द्यैनामासने चोपवेशयत् ॥ १९ ॥
तामासनगतां दृष्ट्वा प्रविशन्तीं रसातलम् । पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत् ॥२०॥
साधुकारश्च सुमहान्देवानां सहसोत्थितः । साधुसाध्विति वै सीते यस्यास्ते शीलमीदृशम् ॥२१॥
एवं बहुविधा वाचो ह्यन्तरिक्षगताः सुराः । व्याजहुर्हृष्टमनसो दृष्ट्वा सीताप्रवेशनम् ॥ २२ ॥
यज्ञवाटगताश्चापि मुनयः सर्व एव ते । राजानश्च नरव्याघ्रा विस्मयान्नोपरेमिरे ॥ २३ ॥
अन्तरिक्षे च भूमौ च सर्वे स्थावरजङ्गमाः । दानवाश्च महाकायाः पाताले पन्नगाधिपाः ॥ २४ ॥
केचिद्विनेदुः संहृष्टाः केचिद्ध्यानपरायणाः । केचिद्रामं निरीक्षन्ते केचित्सीतामचेतसः ॥ २५ ॥

१६] ति० टी०–अयं स्वपदप्रवेशोद्योगः सीताया भृगुप्रार्थनयोपेन्द्रावतारं मानुषे लोकेऽङ्गीकृतपत्नीवियोगस्य प्रागुक्तास्मद्दीत्याङ्गीकृततदर्थवाल्मीकिशापस्य च रामस्याभिप्रायज्ञानादेव वाल्मीक्याश्रमगमनवदिति न रामप्रतिकूलाचरणप्रसक्तिः सीताया इति बोध्यम् । अनन्तरं रामस्य भूमिनाशपर्यन्तं कोपोदयस्तु मनुष्यावतारनटनमात्रमित्यदोषः ॥ १६ ॥

रा० टी०–पुनस्तदेवाह–यथेति । रामात्परमहं न वेद्मि एतद्वचः सत्यमुक्तमतो दातुमर्हति एतेनागमनकालकसीताविमानं पृथिव्यामेव स्थापितमिति सूचितम् ॥ १६ ॥

गो० टी०–यथेति । रामात्परमन्यं पुरुषं न वेद्मीति यथोक्तमेतत्सत्यं चेत् । माधवी माधवपत्नी भूमिः ॥ १७ ॥

१७-१९] ति० टी०–शपन्त्यां एवं त्रिःशपन्त्यां तदनिर्वाच्यमद्भुतं प्रादुरासीत् । किं तदद्भुतं तत्राह—भूतलादुत्थितम् । नागैस्तक्षकादिभिः शिरोभिर्ध्रियमाणं सिंहासनमदृश्यतेति शेषः । दिव्येन वपुषामानुषरचनाविशेषेणोपलक्षितम् । दिव्यरत्नभूषितैरनेकैरित्यर्थः पाद्मे तु—'नानारत्नमयं पीठं पृष्ठे कृत्वा खगेश्वरः । रसातलादाविरभूद्विस्मयं जनयन्नृणाम् ॥ तस्मिन्पीठे महादेवीं हस्ताभ्यां गृह्य मैथिलीम् । स्वागतेनाभिनन्द्येमां संनिवेश्य तिरोदधे ॥ सा च दिव्याप्सरोभिस्तु पूज्यमाना सनातनी । वैनतेयं समारुह्य अर्चिरादिपथाद्गमा ॥ दासीगणैः पूर्वभवैः संवृता जगदीश्वरी । संप्राप्ता परमं धाम योगिगम्यं सनातनम् ॥ रसातलप्रविष्टां तां दृष्ट्वा सर्वे प्रचुक्रुशुः ॥' इत्युक्तम् । नागैर्ध्रियमाणं प्रादुर्भूतं दृष्ट्वा दिव्येन वपुषा गरुडो जग्राहेति शेषो बोध्यः । रसातलं प्रविशन्तीमित्यस्यादृश्यायां जायमानायामित्यर्थः ॥ १७–१९ ॥

रा० टी०–तथेति । वैदेह्यां तथोक्तप्रकारेण शपन्त्यां स्वाभिप्रायं बोधयन्त्यां सत्यामद्भुतमाश्चर्यजनकमनुत्तमं सर्वश्रेष्ठं भूतलादुत्थितं दिव्यं विहारयोग्यं दिव्यं प्राकृतविलक्षणं दिव्येन वपुषोपलक्षितैः नागैर्दिव्यरत्नविभूषितैः शिरोभिर्ध्रियमाणं सिंहासनं सिंहासनविशिष्टविमानं प्रादुरासीत् शपथरूपोर्थस्त्वत्र न युज्यते परस्मैपदत्वानापत्तेः अर्द्धचतुष्टयमेकान्वयि १७–१८

रा० टी०–तस्मिन्निति । धरणी बाहुभ्यां मैथिलीं गृह्य गृहीत्वा स्वागतेनाभिनन्द्य च आसने उपवेशयत् उपावेशयत्१९

गो० टी०–यथेति । तथा शपन्त्याम् त्रिः शपन्त्याम् । तस्मिंहासनम् ॥ १८ ॥

गो० टी०–ध्रियमाणमिति । नागैः शिरोभिः ध्रियमाणमदृश्यतेति शेषः ॥ १९–२३ ॥

२०–२२] ति०टी०–दिव्या स्वर्गभवा । अतः परं भगवतोऽप्यागमनं शीघ्रमिति संतोषेण पुष्पवृष्टिः ॥ २०–२२ ॥

रा० टी०–तामिति । दिव्या पुष्पवृष्टिः सीतामवाकिरत् ॥ २० ॥

रा० टी०–साध्विति । देवानां महान् साधुकारः सहसोत्थितः अर्द्धं पृथक् ॥ २१ ॥

रा० टी०–साधुकाराकारं बोधयन्नाह–साध्विति । यस्यास्ते ईदृशं शीलं तस्यास्तव साधु साधुकृत्यमिति शेषः इत्येवं बहुविधा वाचः सुरा व्याजहुः सार्द्धश्लोक एकान्वयी ॥ २२ ॥

२३] ति० टी०–विस्मयादाश्चर्यमूलकाभिवन्दनव्यवहारान्नोपरेमिरे नोपरता बभूवुः ॥ २३ ॥

रा० टी०–यज्ञेति । मुनिप्रभृतयः विस्मयात् न उपरेमिरे निवृत्ता बभूवुः ॥ २३ ॥

गो० टी०–यज्ञवाटेति । विस्मयात् आश्चर्याभिज्ञावेदनव्यवहारान्नोपरेमिरे नोपरता बभूवुः ॥ २४ ॥

२४] ति० टी०–सर्वे स्थावरजङ्गमाश्चेतनाचेतनाः । तत्राचेतना अपि ससंज्ञा भूत्वा सीताया अयशो गतमिति संहृष्टा बभूवुः ॥ २४ ॥

२५] ति० टी०–अचेतसो विसंज्ञाः ॥ २५ ॥

रा० टी०–अन्तरिक्ष इति । स्थावरादयः ये सन्ति तेषां मध्ये इति शेषः केचिद्विनेदुः केचिद्ध्यानपरायणा बभूवुः केचि-

१ अचेतना इति गो. पाठः ।

सीताप्रवेशनं दृष्ट्वा तेषामासीत्समागमः । तन्मुहूर्तमिवात्यर्थं समं संमोहितं जगत् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

अष्टनवतितमः सर्गः ।

सीतामदृश्यां ज्ञात्वा दाशरथिं महाशोकं सप्तरगणो ब्रह्मासान्त्वयत् वाल्मीकिरचितोत्तरकथाश्रवणाय चोपादिशत् रामस्तु शोकमत्यक्त्वा पुत्रौ स्वीकृत्योत्तरचरितं श्रोतुं पर्णशालां प्राविशत् ।

रसातलं प्रविष्टायां वैदेह्यां सर्ववानराः । चुक्रुशुः साधुसाध्वीति मुनयो रामसंनिधौ ॥ १ ॥
दण्डकाष्ठमवष्टभ्य बाष्पव्याकुलितेक्षणः । अवाक्शिरा दीनमना रामो ह्यासीत्सुदुःखितः॥२॥
स रुदित्वा चिरं कालं बहुशो बाष्पमुत्सृजन् । क्रोधशोकसमाविष्टो रामो वचनमब्रवीत् ॥ ३ ॥
अभूतपूर्वं शोकं मे मनः स्प्रष्टुमिवेच्छति । पश्यतो मे यथा नष्टा सीता श्रीरिव रूपिणी ॥ ४ ॥
सादर्शनं पुरा सीता लङ्का पारे महोदधेः । ततश्चापि मयानीता किं पुनर्वसुधातलात् ॥ ५ ॥

द्रामं केचित् सीतां निरीक्षन्ते केचिदचेतसो बभूवुरिति शेषः अर्द्धचतुष्टयमेकान्वयि ॥ २४ ॥ २५ ॥

गो० टी०–अन्तरिक्ष इति । संहृष्टा इति । सीतायाः अयशो गतमिति संहृष्टाः । अचेतनाः विसंज्ञाः ॥ २५ ॥२६॥

२६] ति० टी०–सीताप्रवेशनं दृष्ट्वा तेषां मुन्यादीनां समागमः संबन्ध आसीत् । हर्षादिभिरिति शेषः । यदेवं तस्मात्समं सर्वं जगन्मुहूर्तमत्यर्थं संमोहितमिव संमोहितमेवाभूत् ॥ २६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

रा० टी०–सीतेति । सीताप्रवेशनं दृष्ट्वा तेषां वाल्मीकिप्रभृतीनां समागमः आसीत् तत्तस्माद्धेतोः जगत् समं सहैव मुहूर्त्तं संमोहितमेवाभवत् ॥ २६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥

गो० टी०–सीताप्रवेशनमिति । तेषां मुन्यादीनाम् । समागमः हर्षसंबन्धः । यदेवमतः संमोहितमिव संमोहितमेवाभूत् ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने सप्तनवतितमः सर्गः ॥ ९७ ॥

१] ति० टी०–अथ रामस्य सीतान्तर्धानजं क्रोधं भगवांस्तत्त्वबोधनेन शमयति—रसातलमिति । साधुसाध्वीति दीर्घ आर्षः ॥ १ ॥

रा० टी०–सीताप्रवेशानन्तरकालिकं वृत्तमाह–रसातलमित्यादिभिः । सर्ववानराः मुनयश्च साधु साध्विति चुक्रुशुः एतेन तेपि सीतारामाभिप्रायाभिज्ञा इति ध्वनितम् साधु साध्वीति दीर्घ आर्ष इति भट्टाः ॥ १ ॥

गो० टी०–रसातलमित्यादि ॥ १ ॥

२–३] ति० टी०–दण्डरूपं काष्ठं दण्डकाष्ठम् । दीक्षितेन सोमक्रयपर्यन्तं धारणीयमौदुम्बरं दण्डमवष्टभ्येत्यर्थः । एतदवष्टम्भः शोकग्लानिवशात् ॥ २ ॥ ३ ॥

रा० टी०–दण्डेति । दण्डकाष्ठं सोमक्रयणपर्यन्तं धारणीयौदुम्बरदण्डरूपकाष्ठमवष्टभ्य रामः सुदुःखितः चिरकालादागतसीताया द्रुतं गमनेन दुःखविशिष्ट आसीत् ॥ २ ॥

रा० टी०–स इति । रामोऽब्रवीत् ॥ ३ ॥

गो० टी०–दण्डकाष्ठमिति । दण्डरूपं काष्ठं दण्डकाष्ठम् ॥ २ ॥ ३ ॥

४] ति० टी०–पूर्वं रावणेनासंनिधौ सीता नष्टा नाशमदर्शनं प्रापिता । संप्रति तु पश्यतो मे पश्यन्तं मामनादृत्य मनोऽभूतपूर्वं शोकं स्प्रष्टुमिवेच्छति ॥ ४ ॥

रा० टी०–तदाकारमाह—अभूतेत्यादिभिः । यथावत् पश्यतो मे अग्रे सीता नष्टा अदर्शनं प्राप्ता अतः मे मनः अभूतपूर्वमिव शोकं स्प्रष्टुमिच्छति एतेन चिरकालं मातृसन्निधौ सीता स्थास्यतीति रामनिश्चयस्सूचितः ॥ ४ ॥

गो० टी०–अभूतपूर्वमिति । मनः शोकमिव, मनः शोकमेव स्प्रष्टुमिति । पश्यतो मेव सा नष्टेति । मामप्यनादृत्य ॥४॥

५] ति० टी०–महोदधेः पारे लङ्कां गता सा सीतादर्शनं प्राप्ता । ततो लङ्कातः ॥ ५ ॥

रा० टी०–वियोगहेतुकरामविलापमाह–सेत्यादिभिः । पुरा सीता अदर्शनं यथा भवति तथा लंकां गतेति शेषः ततो लङ्कातोपि मया आनीता वसुधातलात् अनीता भविष्यतीति किम् ॥ ५ ॥

गो० टी०–सेति । नीता प्रापितवतीत्यर्थः । सा अदर्शनमिति पदच्छेदः ॥ ५–८ ॥

वसुधे देवि भवति सीता निर्यात्यतां मम । दर्शयिष्यामि वा रोषं यथा मामवगच्छसि ॥ ६ ॥
कामं श्वश्रूर्ममैव त्वं त्वत्सकाशात्तु मैथिली । कर्षता फालहस्तेन जनकेनोद्धृता पुरा ॥ ७ ॥
तस्मान्निर्यात्यतां सीता विवरं वा प्रयच्छ मे । पाताले नाकपृष्ठे वा वसेयं सहितस्तया ॥ ८ ॥
आनय त्वं हि तां सीतां मत्तोऽहं मैथिलीकृते । न मे दास्यसि चेत्सीतां यथारूपां महीतले ॥ ९ ॥
सपर्वतवनां कृत्स्नां व्यथयिष्यामि ते स्थितिम् । नाशयिष्याम्यहं भूमिं सर्वमापो भवन्त्विह ॥ १० ॥
एवं ब्रुवाणे काकुत्स्थे क्रोधशोकसमन्विते । ब्रह्मा सुरगणैः सार्धमुवाच रघुनन्दनम् ॥ ११ ॥
राम राम न संतापं कर्तुमर्हसि सुव्रत । स्मर त्वं पूर्वकं भावं मन्त्रं चामित्रकर्शन ॥ १२ ॥
न खलु त्वां महाबाहो स्मारयेयमनुत्तमम् । इमं मुहूर्तं दुर्धर्ष स्मर त्वं जन्म वैष्णवम् ॥ १३ ॥
सीता हि विमला साध्वी तव पूर्वपरायणा । नागलोकं सुखं प्रायात्त्वदाश्रयतपोबलात् ॥ १४ ॥

६-७] ति० टी०–यथा मामवगच्छसि । मद्बलं वराहावतारादौ त्वमेव जानासीत्यर्थः ॥ ६ ॥ ७ ॥

रा० टी०–वसुधे इति । सीता निर्यात्यतां दीयतां यथा यदि मामवगच्छसि अवजानासि तदा रोषं कोपं दर्शयिष्याम्येव वाशब्द एवार्थे ॥ ६ ॥

रा० टी०–कोपमन्तरेव त्वया दातव्यमिति सूचयन्नाह—**काममिति**। फालहस्तेन कामं यथेष्टं कर्षता जनकेन त्वत्सकाशात् मैथिली उद्धृता अतः मम त्वं श्वश्रूरेव एतेन त्वयापहर्तुं न योग्येति व्यञ्जितम् ॥ ७ ॥

८] ति० टी०–विवरं वा प्रयच्छ । प्रविश्य तया सह स्थातुमिति भावः ॥ ८ ॥

रा० टी०–तस्मादिति । तस्माद्वियोगस्य अन्याय्यत्वाद्धेतोः तया सीतया सहित एवाहं वसेयमतः सीता निर्यात्यताम् दीयताम् मे मह्यमपि विवरं तत्सन्निधिप्रापकविमानविशेषं प्रयच्छ वा ॥ ८ ॥

९-११] ति० टी०–अहं मैथिलीकृते मत्तः । प्राप्तमोह इत्यर्थः । महीतले प्रविष्टामिति शेषः ॥ ९-११ ॥

रा० टी०–आनयेति । मैथिलीकृते अहं मत्तोऽसि अतः महीतले गतां सीतां चेयदि न दास्यसि तदा कृत्स्नां त्वां भूमिं व्यथयिष्यामि अत एव ते स्थितिं नाशयिष्यामि ध्वंसयिष्यामि अत एव सर्वं जगत् आपो भवन्तु श्लोकद्वयमेकान्वयि ॥ ९ ॥ १० ॥

रा० टी०–एवमिति । ब्रह्मा रघुनन्दनमुवाच ॥ ११ ॥

गो० टी०–आनयेति । मत्तः प्राप्तमोह इत्यर्थः । महीतल इति । प्रविष्टामिति शेषः ॥ ९-११ ॥

१२] ति० टी०–नन्वु कथमिदानीं संतापापगम इति चेत्तस्य स्वतत्त्वाज्ञाननटनादिमूलकत्वात् । स्वतत्त्वस्मरणनटनमेव कुर्वित्याह—**स्मर त्वं पूर्वकं भावमिति** । वैष्णवमित्यर्थः । 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥' इति श्रुतेः । मन्त्रं देवैः सहावतारसमये कृतम् । मानुषभावमूलरावणवधाश्वमेधयागान्तसर्वकृत्यानां निर्वृत्तत्वेनेदानीं तत्त्वावरणनाटनेन फलाभाव इति भावः ॥ १२ ॥

रा० टी०–तदाकारमाह—**रामेत्यादिभिः**। त्वं पूर्वकं भावमप्रकटसाकेतप्रेषणरूपस्वाभिप्रायं मन्त्रमस्माभिस्सह भाषणं च स्मर अतः सन्तापं कर्तुं नार्हसि ॥ १२ ॥

गो० टी०–राम रामेति । स्मर त्वं पूर्वकं भावं, पूर्वकं स्वभावं विष्णुत्वमित्यर्थः । मन्त्रं देवैः सहावताराय कृतं विचारम् ॥ १२ ॥

१३] ति० टी०–नन्वु किं मां त्वं स्मारयसीत्यत्राह—**नेति**। विस्मृततत्त्वमिव स्मरणं कुर्विति न प्रार्थयामि । किं त्विमं मुहूर्तमस्मिन्काले हे दुर्धर्ष ! वैष्णवमात्मानमिह जन्म प्राप्तवन्तं स्मर । ध्यानेन पश्येत्यर्थः । एतावत्पर्यन्तं कार्यनिर्वाहाय मनुष्योऽहमिति ध्यानेन तथाभावं नादितवानधीदानीं तत्त्यजेत्यर्थः । 'तं खलु त्वाम्' इति पाठेऽनुत्तमं समाभ्यधिकरहितं ब्रह्मस्वरूपं तमुपनिषत्प्रसिद्धं स्मारयेयं स्मरणाय प्रार्थये । किं स्मर्तव्यत्वेन प्रार्थयसीत्यत्राह—**इममिति**। पूर्ववदेवार्थः । भृङ्गकीटन्यायेन तद्ध्यानतस्तद्भावनाटनमिति भावः । भगवतो रामस्य तथानाटनाद्ब्रह्मापि स्मारयेयमित्यादिप्रयुक्तवानिति ध्येयम् । न त्वेतावता भगवतो वस्तुतस्तद्भावप्राप्तिरिति ध्येयम् ॥ १३ ॥

रा० टी०–नेति । अनुत्तमं सर्वश्रेष्ठं त्वाम् अहं न स्मारयेयम् स्मारयितुं न समर्थ इत्यर्थः एतेन तस्य सर्वकालं विस्मृतिराहित्यं सूचितम् ननु तर्हि अहमपि सीतया सह गच्छेयमित्यत आह इमं संकल्पितयागसम्बन्धिनं मुहूर्तं कालं वैष्णवं विष्णुप्रार्थनासम्बधिजन्म स्वप्रादुर्भावं च स्मर एतेन संकल्पितयागं संत्यज्य भवतो गमनं नोचितमिति सूचितम् ॥ १३ ॥

गो० टी०–न खलित्वति । त्वामहं न स्मारयेयम् । सर्वज्ञत्वादिति भावः । पूर्वकं भावमित्युक्तं विशिनष्टि-इममिति ॥ १३ ॥

१४] ति० टी०–मामाश्रिता सीता एवं गतेत्यपि न शोकः कार्य इत्याह—**सीतेति** । विमला स्वत एव सर्वावद्यशून्या । वस्तुतस्तस्यास्त्वदभिन्नत्वादिति भावः । तव पूर्व-

१ हीति गो. पाठः । २ विधमिष्यामीति गो. पाठः ।

स्वर्गे ते संगमो भूयो भविष्यति न संशयः । अस्यास्तु परिषन्मध्ये यद्ब्रवीमि निबोध तत् ॥१५॥
एतदेव हि काव्यं ते काव्यानामुत्तमं श्रुतम् । सर्वं विस्तरतो राम व्याख्यास्यति न संशयः ॥१६॥
जन्मप्रभृति ते वीर सुखदुःखोपसेवनम् । भविष्यदुत्तरं चेह सर्वं वाल्मीकिना कृतम् ॥ १७ ॥
आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम् । नह्यन्योऽर्हति काव्यानां यशोभाग्राघवादृते ॥ १८ ॥
श्रुतं ते पूर्वमेतद्धि मया सर्वं सुरैः सह । दिव्यमद्भुतरूपं च सत्यवाक्यमनाद्दतम् ॥ १९ ॥
स त्वं पुरुषशार्दूल धर्मेण सुसमाहितः । शेषं भविष्यं काकुत्स्थ काव्यं रामायणं शृणु ॥२०॥
उत्तरं नाम काव्यस्य शेषमत्र महायशः । तच्छृणुष्व महातेज ऋषिभिः सार्धमुत्तमम् ॥ २१ ॥

परायणा तव प्रकृतिप्राप्तिसमुत्सुका । त्वदाश्रयस्त्वदाश्रयणं तद्रूपतपोबलात् । नागलोकगमनव्याजेन नागलोकं विष्णुलोकं सुखं प्रायात् । 'तपःपूर्वपरायणा' इति पाठे पूर्वं वेदवतीदेहेऽनुष्ठिततपःशेषानुष्ठानपरायणेत्यर्थ इति कतकः । तदनुष्ठानं रावणवधादिरूपमेवेति भाति ॥ १४ ॥

रा० टी०–ननु सीता क्वास्तीत्यत आह—**सीतेति** । त्वदाश्रयतपोबलात् त्वदाश्रयणरूपतपोबलं प्राप्य वियमाना पूर्वस्मिन् सर्वाधिभूते त्वय्येव परमयनं यस्याः सा सीता नागलोकं प्रायात् अगात् एतेन तस्मिन्नेव लोके पृथिव्यभिमानिदेवताया गृहमस्तीति सूचितम् ॥ १४ ॥

गो० टी०–**सीतेति** । तव पूर्वपरायणा तव पूर्वभावप्रवणा । तव प्रकृतिप्राप्तिसमुत्सुकेत्यर्थः ॥ १४ ॥ १५ ॥

१५] ति० टी०–अस्याः संगमश्च ते भूयः स्वर्गे परस्वर्गे ब्रह्मलोके भविष्यति नान्यत्र । परिषदिति लुप्तषष्ठ्यन्तम्॥१५॥

रा० टी०–ननु कदा संङ्गमो भविष्यतीत्यत आह—**स्वर्ग इति** । स्वर्गे साकेते ते अस्याः सङ्गमो भूयोऽत्यन्तं भविष्यति अतः परिषन्मध्ये यद्ब्रवीमि तन्निबोध ॥ १५ ॥

१६] ति० टी०–एतत्काव्यमेवोत्तमं श्रुतं सर्वं ज्ञापनीयं विस्तरतो व्याख्यास्यति ज्ञापयिष्यति ॥ १६ ॥

रा० टी०–तद्वचनाकारमाह—**एतदित्यादिभिः** । यदेतत्काव्यं त्वया श्रुतं तदेतदेव ते कर्त्तव्यमिति शेषः विस्तरतो व्याख्यास्यति कथयिष्यति ॥ १६ ॥

गो० टी०–**एतदित्यादि** । एतत्काव्यमेवोत्तमं श्रुतं तत्सर्वं ज्ञापनीयम् विस्तरतो व्याख्यास्यति ज्ञापयिष्यति ॥ १६ ॥

१७] ति० टी०–कुत एवं तत्राह—**जन्मेति** । सुखदुःखोपसेवनं सुखदुःखोपसेवाकथनरूपं भविष्यदुत्तरं चेति । सीतोपसंहारादुत्तरं यत्ते चरितं भविष्यति तत्सर्वमिह काव्ये त्रिकालज्ञेन कृतं कृतनिबन्धनम् ॥ १७ ॥

रा० टी०–तथा कथने हेतुमाह—**जन्मेति** । जन्मप्रभृति जन्मकालादारभ्य ते सुखदुःखोपसेवनं भविष्यत् चिन्तयिष्यमाणमुत्तरमुत्तरकालकृत्यं च इह अस्मिन् काव्ये वाल्मीकिना कृतम् ॥ १७ ॥

गो० टी०–तदेवाह–**जन्मप्रभृतीत्यादि** । भविष्यत्युत्तरं चेति । सीतोपसंहारादुत्तरं च यत्ते चरितं भविष्यति, तत्सर्वमपि मदनुग्रहात् त्रिकालज्ञेन वाल्मीकिना कृतं कृतनिबन्धनम् । इह काव्ये । भविष्यत्युत्तरं चेति च पाठः ॥ १७ ॥

१८] ति० टी०–त्वयि त्वच्चरितविषये । त्वत्तो राघवादृतेऽन्यः काव्यानां यशोभाक्काव्यप्रकाश्ययशोभाक्कश्चिदपि नार्हति । काव्यनायकतामिति भावः । अन्येषां वर्णनीयगुणशून्यत्वात्सर्वे कवयोऽद्यापि रामचरितमेव प्रायेणाश्रयन्ति१८॥

रा० टी०–**आदीति** । इदमादिकाव्यं त्वय्येव प्रतिष्ठितं परत्वेन त्वत्प्रतिपादकमित्यर्थः हि यतः काव्यानां सत्कविप्रणीतानां ग्रन्थानां यशोभाक् वर्ण्यमानयशसामाश्रयः राघवात्त्वत्तः ऋते विना न एतेन सर्वेषां काव्यानां त्वय्येव पर्य्यवसानमस्तीति सूचितम् ॥ १८ ॥

गो० टी०–**आदिकाव्यमिति** । त्वयि त्वच्चरितविषये । राघवादृतेऽन्यः काव्यप्रकाशितयशोभाक् कश्चिदपि काव्यनायकतां नार्हति । अत एवाद्यापि सर्वे कवयो रामचरितमेव प्रायेणाश्रयन्ते ॥ १८ ॥

१९] ति० टी०–अस्य काव्यस्य महत्त्वं सर्वमहता मयैव परिग्रहादित्याह—**श्रुतमिति** । ते एतत्त्वत्संबन्धीदं काव्यम् । स्वस्य श्रोतव्यत्वे हेतुः—**सत्यवाक्यमिति** । तत्रापि हेतु अनाद्दतमिति । अविद्यामूलप्रलापरहितम्, अतएव दिव्यम् । पूर्वं श्रुतं काव्यरूपिण्या देव्या सुखादेवेति शेषः ॥ १९ ॥

रा० टी०–ननु मत्पर्यवसानकमेवेदमिति त्वया कथं ज्ञातमित्यत आह—**श्रुतमिति** । दिव्यं प्रकृतविलक्षणवस्तुप्रतिपादकत्वेन प्राकृतविलक्षणमत एव अद्भुतरूपं सत्यानि वाक्यानि यस्मिन् तत् अनाद्दतमज्ञानावरणविनाशकमेतत्काव्यं मया सार्द्धं सुरैस्सह च त्वया श्रुतम् ॥ १९ ॥

गो०टी०–**श्रुतमिति**। अनाद्दतमज्ञानावरणरहितम् ॥१९

२०] ति० टी०–भविष्यं भविष्यद्विषयं शेषं शृणु॥२०॥

रा० टी०–**स इति** । शेषं श्रवणाद्यवशिष्टं भविष्यं भविष्यत्कालकचरितबोधकं रामायणं शृणु एतेन इतः प्रभृति एतदनुसारेणैव कर्त्तव्यमिति प्रार्थना सूचिता ॥ २० ॥

गो० टी०–**स त्वमिति**। भविष्यं भविष्यद्विषयम् ॥२०॥

२१] ति० टी०–किं तत्राह—**उत्तरं नामेति** । उत्तराख्यो यः काव्यस्य शेषोऽस्ति तच्छृणुष्व । हे महातेजः ऋषिभिर्ब्रह्मलोकस्थैर्ऋषिभिः ॥ २१ ॥

१ भविष्यतीति गो. पा. ।

न खल्वन्येन काकुत्स्थ श्रोतव्यमिदमुत्तमम् । परमऋषिणा[1] वीर त्वयैव रघुनन्दन ॥ २२ ॥
एतावदुक्त्वा वचनं ब्रह्मा त्रिभुवनेश्वरः । जगाम त्रिदिवं देवो देवैः सह सबान्धवैः[2] ॥ २३ ॥
ये च तत्र महात्मान ऋषयो ब्राह्मलौकिकाः । ब्रह्मणा समनुज्ञाता न्यवर्तन्त महौजसः[3] ॥ २४ ॥
उत्तरं श्रोतुमनसो भविष्यं यच्च राघवे । ततो रामः शुभां वाणीं देवदेवस्य[4] भाषिताम् ॥२५॥
श्रुत्वा परमतेजस्वी वाल्मीकिमिदमब्रवीत्[5] । भगवञ्श्रोतुमनस ऋषयो ब्राह्मलौकिकाः ॥ २६ ॥
भविष्यदुत्तरं यन्मे श्रोभूते संप्रवर्तताम्[6] । एवं विनिश्चयं कृत्वा संप्रगृह्य कुशीलवौ ॥ २७ ॥
तं जनौघं विसृज्याथ पर्णशालामुपागमत्[7] । तामेव शोचतः सीतां सा व्यतीता च शर्वरी[8] ॥२८॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

एकोनशततमः सर्गः ।

रामस्तु प्रभाते स्वपुत्रगीतमुत्तरचरितं श्रुत्वा तस्य कृतोः समाप्तौ जानकीं विना विमनाः सन्नयोध्यां विवेश ततो बहुविधान्क्रतून् कृत्वापि भार्यान्तरमकुर्वन् काञ्चनीं सीतां चकार कौसल्यादिमातृणां त्रिदिवगमनं ततो रामे शासति काले पर्जन्योऽभवदकालमृत्यादिकं नासीत् ।

रजन्यां तु प्रभातायां समानीय महामुनीन् । गीयतामविशङ्काभ्यां रामः पुत्रावुवाच ह ॥ १ ॥
ततः समुपविष्टेषु महर्षिषु[9] महात्मसु । भविष्यदुत्तरं काव्यं जगतुस्तौ कुशीलवौ ॥ २ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—उत्तरमिति । उत्तरं नाम काव्यस्य शेषमत्र शृणुष्व ॥ २१ ॥

गो० टी०–उत्तरं नामेति । उत्तरकाण्डाख्यकाव्यं शेषभूतम् ॥ २१ ॥

२२] ति० टी०–अतिरहस्यत्वाच्च नायमंशः सर्वैः श्रोतव्य इत्याह—नेति । परमऋषिणा परमराजर्षिणा त्वयैव श्रोतव्यम् । नान्येन लक्ष्मणादिनेत्यर्थः । एवं भगवतः परमादरः । काव्यस्य स्ववतारविषयत्वादिति बोध्यम् ॥ २२ ॥

रा० टी०–नेति । परमऋषिणा सर्वज्ञेन त्वयैव इदमुत्तरं काव्यं श्रोतव्यमन्येन भरतादिद्वारेत्यर्थः न श्रोतव्यम् एतेन रामस्य महान् खेदो ब्रह्मणावलोकित इति सूचितम् ॥ २२ ॥

गो०टी०–नेति । परमर्षिणा परमराजर्षिणा ॥२२॥२३॥

२३] ति० टी०–सबान्धवैर्देवैः सहेत्यर्थः ॥ २३ ॥

रा० टी०–एतावदिति । ब्रह्मा त्रिदिवं जगाम ॥२३॥

२४] ति० टी०–तत्र सदसि । ब्राह्मलौकिका ब्रह्मलौकिकार्हाः । न्यवर्तन्त । उत्तरं श्रोतुमिति शेषः ब्रह्मणा सह चलिता अपि पुनर्निवृत्ता इत्यर्थः ॥ २४ ॥

रा० टी०–ये इति । राघवे भविष्यं भविष्यत्कालकचरितविशिष्टमुत्तरं श्रोतुमनसो ब्रह्मलौकिका ब्रह्मलोकस्था अपि ये ऋषयस्तेपि ब्रह्मणा समनुज्ञाताः सन्तः न्यवर्त्तन्त ब्रह्मणा सह गमनादिति शेषः सार्द्धश्लोक एकान्वयी ॥ २४ ॥

गो० टी०–ये चेति । ये च तत्रेति । यज्ञसदसीत्यर्थः । ब्राह्मलौकिकाः ब्रह्मलोकार्हाः ॥ २४–२६ ॥

२५–२७] ति०टी०–तदेवाह–उत्तरमिति॥२५–२७॥

रा० टी०–तत इति । रामः वाल्मीकिमब्रवीत् ॥ २५ ॥

रा० टी०–तदाकारमाह—भगवन्निति । ब्रह्मलौकिकाः ऋषयः मे भविष्यदुत्तरं चरितं श्रोतुमनसः अतः श्रोभूते सम्प्रवर्तताम् ॥ २६ ॥

रा० टी०–एवमिति । कुशीलवौ सम्प्रगृह्य कर्मशालामुपागमत् राम इति शेषः ॥ २७ ॥

गो० टी०–एवमिति । पर्णशालामुपागमदिति । यज्ञावसान एव सीतान्तर्धानात्, ततः परं दीक्षारहित्येन स्थलान्तरस्य सुगमत्वात्, पुत्राभ्यां सह वाल्मीकिपर्णशालामेव रामः प्राप्तवानित्यर्थः ॥ २७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टनवतितमः सर्गः ॥ ९८ ॥

२८] ति० टी०–'पर्णशालामुपागमत्' इति पाठे यज्ञावसान एव सीतान्तर्धानात्ततः परं दीक्षितत्वाभावेनान्यत्र गन्तुं शक्यत्वात्पुत्राभ्यां सह वाल्मीकिपर्णशालां रामः प्राप्तवानित्यर्थः । 'कर्मशालामुपागमत्' इति पाठान्तरम् ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टनवतितमः सर्गः ॥ ९८ ॥

रा० टी०–तामिति । सीतां शोचत एव रामस्य शर्वरी व्यतीयाय अर्द्धं पृथक् ॥ २८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टनवतितमः सर्गः ॥ ९८ ॥

१–२] ति० टी०–अथ राममातृणां परलोकप्राप्तिः—

१ परमर्षिणेति गो. पाठः । २ देवेनेति गो. पाठः । ३ कर्मेति रा. पा. । ४ व्यतीयायेति गो. पा. । ५ ब्रह्मर्षिभिति गो. पा. ।

प्रविष्टायां तु सीतायां भूतलं सत्यसंपदा । तस्यावसाने यज्ञस्य रामः परमदुर्मनाः ॥ ३ ॥
अपश्यमानो वैदेहीं मेने शून्यमिदं जगत् । शोकेन परमायस्तो न शान्तिं मनसागमत् ॥ ४ ॥
विसृज्य पार्थिवान्सर्वानृक्षवानरराक्षसान् । जनौघं विप्रमुख्यानां वित्तपूर्वं विसृज्य च ॥ ५ ॥
[एवं समाप्य यज्ञं तु विधिवत्स तु राघवः ।]
ततो विसृज्य तान्सर्वान्गमो राजीवलोचनः । हृदि कृत्वा सदा सीतामयोध्यां प्रविवेश ह ॥ ६ ॥
[इष्ट्वैवं यज्ञैः नरपतिः पुत्रद्वयसमन्वितः ।]
न सीतायाः परां भार्यां वव्रे स रघुनन्दनः । यज्ञे यज्ञे च पत्न्यर्थे जानकी काञ्चनीभवत् ॥ ७ ॥
दशवर्षसहस्राणि वाजिमेधानथाकरोत् । वाजपेयान्दशगुणांस्तथा बहुसुवर्णकान् ॥ ८ ॥
अग्निष्टोमातिरात्राभ्यां गोसवैश्च महाधनैः । ईजे क्रतुभिरन्यैश्च स श्रीमानाप्तदक्षिणैः ॥ ९ ॥
एवं स कालः सुमहान्राज्यस्थस्य महात्मनः । धर्मे प्रयतमानस्य व्यतीयाद्राघवस्य चै ॥ १० ॥
ऋक्षवानररक्षांसि स्थिता रामस्य शासने । अनुरञ्जन्ति राजानो ह्यहन्यहनि राघवम् ॥ ११ ॥

रजन्यामिति । गीयतामित्युवाच । अविशङ्काभ्यां मत्पुत्रत्वविषयशङ्कारहिताभ्यां मातृवियोगदुःखरहिताभ्यां च ॥ १॥२॥

रा०टी०–कर्मशालाप्रवेशानन्तरकालिकं वृत्तमाह–**रजन्यामित्यादिभिः** । अविशंकाभ्यां युवाभ्यां गीयतामिति रामः पुत्रावुवाच ॥ १ ॥

रा० टी०–तत इति । कुशीलवौ भविष्यत् भविष्यत्कालकचरितप्रतिपादकमुत्तरं काव्यं जगतुः ॥ २ ॥

गो० टी०–रजन्यां त्वित्यादि । गीयतामित्युवाच । अविशङ्काभ्यां मत्पुत्रत्वविषयशङ्कारहिताभ्याम् । मातृवियोगदुःखरहिताभ्यां वा ॥ १ ॥ २ ॥

३–४] ति० टी०–सत्यसंपदा स्वस्य सत्यवैभवेन । तस्य यज्ञस्यावसाने सीतानिर्याणोत्तरकाले ॥ ३ ॥ ४ ॥

रा० टी०–प्रविष्टायामिति । सत्यसम्पदा सत्यरूपसंपत्त्योपलक्षितायां सीतायां भूतलं प्रविष्टायां सत्यां यज्ञस्य कथाश्वमेधयोरवसाने च सति वैदेहीमपश्यमानः अत एव शोकेन परमायस्तः अत्यन्तं निविष्टः अत एव परमदुर्मनाः रामः इदं जगत् शून्यं प्रियवस्तुरहितं मेने अत एव शान्तिं नागमत् श्लोकद्वयमेकान्वयि ॥ ३ ॥ ४ ॥

गो० टी०–प्रविष्टायामिति । सत्यसंपदा सत्यवैभवेन । तस्यावसाने यज्ञस्येति । सीतानिर्याणसत्पूर्वकाल इत्यर्थः ३॥४

५–६] ति० टी०–वित्तपूर्वं वित्तदानपूर्वम् ॥ ५ ॥ ६ ॥

रा० टी०–विसृज्येति । वित्तपूर्वं धनप्रदानपूर्वकं पार्थिवादीन् विसृज्य रामोवर्ततेति शेषः ॥ ५ ॥

रा०टी०–तत इति । रामः अयोध्यां प्रविवेश ॥ ६ ॥

गो० टी०–विसृज्येति । वित्तपूर्वं वित्तदानपूर्वमित्यर्थः ॥ ५–७ ॥

७] ति० टी०–यज्ञे यज्ञे प्रतिज्ञयम् । भवदभवत् ॥७॥

रा० टी०–नेति । रघुनन्दनः सीतायाः परां भिन्नां भार्यां न वव्रे उदुवाह अत एव यज्ञे यज्ञे सर्वस्मिन् यागे पत्न्यर्थं पत्नीसाध्यकार्यसिध्यर्थं काञ्चनी सुवर्णमयी जानकी भवत् अभवत् ७

गो० टी०–नेति । न सीताया इत्यनेन रामस्य एकदारव्रतं सीताप्रतिनिधिनैव यज्ञनिर्वर्तनं च दर्शितम् ॥ ८ ॥

८–१०] ति० टी०–दशवर्षसहस्राणीति यागकालमर्यादेयम्, न तु सीतावियोगानन्तरं तावान्यागकाल इति कतकः । तत्र सीतावियोगानन्तरं तावतो यागकालस्वे किं बाधकमिति चिन्त्यम् । न तु भूमौ सीतागमनोत्तरमिति वक्तुं युक्तम्८–१०॥

रा०टी०–यागसंख्यां बोधयन्नाह–**दशेति** । दशवर्षसहस्राणि त्रिंशद्वर्षसहस्राणीत्यर्थः राज्यं चकारेति शेषः अथ अनन्तरम् त्रिसहस्रवर्षाणीत्यर्थः वाजिमेधानकरोत् बहुसुवर्णकान् विपुलसुवर्णदक्षिणाकान् दशगुणान् अश्वमेधापेक्षया दशगुणाधिकान् वाजपेयान् अकरोत् किञ्च वर्षसहस्राणि सहस्रत्रयवर्षपर्यन्तमित्यर्थः दशवाजिमेधान् दशगुणान् शतसंख्याकानित्यर्थः वाजपेयांश्चाकरोत् अत एव दशवर्षसहस्राणि दशवर्षशतानि चेत्यादिना न विरोधः अत एव एवं प्रशासतस्तस्य राघवस्य महेश्वरि । अत्ययादशसाहस्रं रममाणस्य सीतयेति पद्मपुराणं संगच्छते ॥ ८ ॥

रा० टी०–अग्नीति । आप्ता पूर्णा दक्षिणा येषु तैरग्निष्टोमादिभिः श्रीमान् राम ईजे ॥ ९ ॥

रा० टी०–एवमिति । धर्मे प्रयतमानस्य रामस्य सुमहान् कालो व्यतीयात् व्यत्ययात् ॥ १० ॥

गो० टी०–दशवर्षेति । दशवर्षसहस्राणीत्यनेन प्रथमयज्ञ एव सीताया भूप्रवेश इत्युक्तम् । बहुसुवर्णकान् बहुसुवर्णकयागान् ॥ ९ ॥

गो० टी०–अग्निष्टोमेति । गोसवैः गोसवाख्ययागैः । अश्वमेधसंक्षेपैरिति संक्षेपवचनमेतत्परं वेदितव्यम् (?) शतशब्दस्य बहुसंख्यावचनत्वात् । गोशतैश्चेति पाठः॥१०–१२॥

११] ति० टी०–स्थिता स्थितानि । अनुरञ्जन्त्यनुरञ्जयन्ति ॥ ११ ॥

१ इदमर्धमधिकं गो. पाठे । २ तदेति गो. पाठः । ३ इदमर्धमधिकं गो. पु. । ४ स्विति गो. पाठः । ५ अनयोरर्धयोर्व्यत्ययेन पाठो गो. पुस्त. ।

काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः । हृष्टपुष्टजनाकीर्णं पुरं जनपदास्तथा ॥ १२ ॥
नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा । नानर्थो विद्यते कश्चिद्रामे राज्यं प्रशासति ॥ १३ ॥
अथ दीर्घस्य कालस्य राममाता यशस्विनी । पुत्रपौत्रैः परिवृता कालधर्ममुपागमत् ॥ १४ ॥
अन्वियाय सुमित्रा च कैकेयी च यशस्विनी । धर्मं कृत्वा बहुविधं त्रिदिवे पर्यवस्थिता ॥ १५ ॥
सर्वाः प्रमुदिताः स्वर्गे राज्ञा दशरथेन च । समागता महाभागाः सर्वधर्मं च लेभिरे ॥ १६ ॥
तासां रामो महादानं काले काले प्रयच्छति । मातृणामविशेषेण ब्राह्मणेषु तपस्विषु ॥ १७ ॥
पित्र्याणि ब्रह्मरत्नानि यज्ञान्परमदुस्तरान् । चकार रामो धर्मात्मा पितॄन्देवान्विवर्धयन् ॥ १८ ॥
एवं वर्षसहस्राणि बहून्यथ ययुः सुखम् । यज्ञैर्बहुविधं धर्मं वर्धयानस्य सर्वदा ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोनशततमः सर्गः ॥ ९९ ॥

रा० टी०–ऋक्षेति । रामस्य शासने स्थिताः ऋक्षादयः राजानश्च राघवमनुरुन्धन्ति ॥ ११ ॥

१२–१३] ति० टी०–सुभिक्षम् । अभवदिति शेषः १२-१३

रा० टी०–काल इति । पर्जन्यः काले उचितसमये एव वर्षति अत एव सुभिक्षमस्तीति शेषः अत एव दिशः विमलाः पुरं जनपदाश्च हृष्टपुष्टजनैराकीर्णम् ॥ १२ ॥

रा० टी०–नेति । रामे राज्यं प्रशासति सति अकालमरणादि न ॥ १३ ॥

गो० टी०–काल इति । सुभिक्षमिति । अभवदिति शेषः ॥ १३–१६ ॥

१४] ति० टी०–पौत्राः कुशलवाद्याः ॥ १४ ॥

रा० टी०–अथेति । दीर्घस्य कालस्य अपगमे सति राममाता न कालस्य धर्मो यत्र तं साकेतमुपागमत् ॥ १४ ॥

१५] ति० टी०–अन्वियाय तस्या अनु पश्चादियाय । कालधर्ममिति शेषः । बहुविधं नानाप्रकारम् ॥ १५ ॥

रा० टी०–अन्विति । सुमित्रा कैकेयी च त्रिदिवे त्रयाणां ब्रह्मादीनां दिवः स्तुतिर्यस्य तस्मिन्साकेते अन्वियाय प्राप अत एव पर्यवस्थिता तत्रैव स्थिता ॥ १५ ॥

१६–१७] ति० टी०–सर्वधर्मं सर्वधर्मसाध्यसुखभोगम् ॥ १६ ॥ १७ ॥

रा०टी०–सर्वा इति । स्वर्गे साकेते दशरथेन समागताः अत एव प्रमुदितास्सर्वाः स्त्रियस्सर्वधर्मं सकलधर्मसाध्यसुखं लेभिरे ॥ १६ ॥

रा० टी०–तासामिति । मातृणां प्रीतये इति शेषः काले काले उचितनिखिलसमये अविशेषेण मातृषु समानभावेनेत्यर्थः महादानं प्रयच्छति ॥ १७ ॥

गो० टी०–सर्वा इति । सर्वधर्मं चेति । सर्वधर्मसाध्यभोगमित्यर्थः ॥ १७–१८ ॥

१८] ति० टी०–पित्र्याणि पितृकर्मापेक्षितानि ब्रह्मरत्नानि ब्राह्मणदेयोत्तमवस्तूनि प्रयच्छति स्मेत्यनुकर्षः 'बहुरत्नानि' इति पाठान्तरम् । पितॄन्देवान्विवर्धयन्पूजयन् । यज्ञांश्चकारेति । पिण्डपितृयज्ञानित्यर्थः ॥ १८ ॥

रा० टी०–पित्र्याणीति । पित्र्याणि पितृसुखकारकाणि ब्रह्मरत्नानि ब्राह्मणयोग्योत्तमवस्तूनि ददाविति शेषः पितॄन् देवांश्च विवर्द्धयन् सन्तोषयन् सन् परमदुस्तरान् यज्ञान् चकार ॥ १८ ॥

गो० टी०–पित्र्याणीति । पित्र्याणि पितृकर्मापेक्षितानि ब्रह्मरत्नानि ब्राह्मणदेयवस्तूनि । प्रयच्छति स्मेत्यनुकर्षः । पितॄन् देवान् विवर्धयन् यज्ञांश्चकारेति । पिण्डपितृयज्ञानित्यर्थः ॥ १९ ॥

१९] ति० टी०–वर्धयानस्य वर्धयमानस्य । 'यज्ञैर्बहुविधैर्देवान्वर्धयानस्य' इति पाठान्तरम् । यत्तु 'एवं प्रशासतस्तस्य राघवस्य महेश्वरि । अत्ययादयुतसाहस्रं रममाणस्य सीतया ॥' इति पाद्मे उक्तम्, तत्र सीतया भूमौ स्थितया स्थितस्य रममाणस्य राज्यं कुर्वत इत्यर्थः । साहस्रमिति स्वार्थेऽण् । 'अत्ययाद्वर्षसाहस्रम्' इति पाठे सहस्राणां समूहः साहस्रं सहस्रसमूह इत्यर्थकतया दशसहस्रेत्यर्थकमेव । आयुस्तस्यैकादशसहस्रवर्षाणि ॥ १९ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

रा० टी०–उपसंहरन्नाह—एवमिति । एवमनेन प्रकारेण यज्ञैर्बहुविधं धर्मं वर्द्धयानस्य वर्द्धयमानस्य रामस्य बहूनि वर्षसहस्राणि सुखं ययुः ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

गो० टी०–एवमिति । वर्धयानस्य वर्धमानस्येत्यर्थः २०

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

---

* वर्धयमानस्येति युक्तं भाति ।

शततमः सर्गः ।

स्वगुरुगार्ग्यद्वारा मातुलेन युधाजिता प्रेषितानि दशाश्वसहस्राणि रत्नानि शुभान्याभरणानि च राघवः प्रतिगृह्य गार्ग्यमुनिं संपूज्य मातुलप्रहितवार्तामपृच्छत् सिंधुमुभयतः पार्श्वे परमशोभनो देशोस्ति यं गन्धर्वा रक्षन्ति तान्विजित्य तत्र स्वे द्वे पुरे स्थापयेति मातुलसंदेशमृषिरकथयत् राघवस्तु तक्षपुष्कलारव्यौ भरतात्मजौ पूर्वमेव तद्देशराज्येऽभिषिच्य तद्गंधर्वजयाय भरतं तत्पुत्रसहितं प्राहिणोत् ।

कस्यचित्त्वथ कालस्य युधाजित्केकयो नृपः । स्वगुरुं प्रेषयामास राघवाय महात्मने ॥ १ ॥
गार्ग्यमङ्गिरसः पुत्रं ब्रह्मर्षिममितप्रभम् । दश चाश्वसहस्राणि प्रीतिदानमनुत्तमम् ॥ २ ॥
कम्बलानि च रत्नानि चित्रवस्त्रमथोत्तमम् । रामाय प्रददौ राजा शुभान्याभरणानि च ॥ ३ ॥
श्रुत्वा तु राघवो धीमान्महर्षिं गार्ग्यमागतम् । मातुलस्याश्वपतिनः प्रहितं तन्महाधनम् ॥ ४ ॥
प्रत्युद्गम्य च काकुत्स्थः क्रोशमात्रं सहानुजः । गार्ग्यं संपूजयामास यथा शक्रो बृहस्पतिम् ॥ ५ ॥
तथा संपूज्य तमृषिं तद्धनं प्रतिगृह्य च । पृष्ट्वा प्रतिपदं सर्वं कुशलं मातुलस्य च ॥ ६ ॥
उपविष्टं महाभागं रामः प्रष्टुं प्रचक्रमे । किमाह मातुलो वाक्यं यदर्थं भगवानिह ॥ ७ ॥
प्राप्तो वाक्यविदां श्रेष्ठः साक्षादिव बृहस्पतिः । रामस्य भाषितं श्रुत्वा महर्षिः कार्यविस्तरम् ॥ ८ ॥
वक्तुमद्भुतसंकाशं राघवायोपचक्रमे । मातुलस्ते महाबाहो वाक्यमाह नरर्षभः ॥ ९ ॥
युधाजित्प्रीतिसंयुक्तं श्रूयतां यदि रोचते । अयं गन्धर्वविषयः फलमूलोपशोधितः ॥१०॥
सिन्धोरुभयतः पार्श्वे देशः परमशोभनः । तं च रक्षन्ति गन्धर्वाः सायुधा युद्धकोविदाः ॥११॥
शैलूषस्य सुता वीर तिस्रः कोट्यो महाबलाः । तान्विनिर्जित्य काकुत्स्थ गन्धर्वनगरं शुभम् ॥१२॥

१-३] ति० टी०-अथ रामेण गन्धर्वदेशं प्रति सपुत्रस्य भरतस्य प्रेषणम्-कस्यचिदिति ॥ १-३ ॥

रा० टी०-भरतपुत्रयोः राज्यप्राप्तिहेतुमाह कस्यचिदित्यादिभिः । कस्यचित्कालस्य अपगमे सतीति शेषः युधाजित् अङ्गिरसः पुत्रं गार्ग्यं गर्गगोत्रं स्वगुरुं राघवाय प्रेषयामास सार्द्धश्लोक एकान्वयी ॥ १ ॥

रा० टी०-दशेति । राजा युधाजित् दशाश्वसहस्राणि कम्बलादीनि च प्रीतिदानं रामाय प्रददौ सार्द्धश्लोक एकान्वयी ॥ २ ॥ ३ ॥

गो० टी०-कस्यचित्त्वित्यादि ॥ १-३ ॥

४-५] ति० टी०-अश्वपतिनः । उमापतेः । अश्वपतेरित्यर्थः ॥ ४ ॥ ५ ॥

रा० टी०-श्रुत्वेति । राघवः आगतं महर्षिमश्वपतिनः अश्वपतेः प्रहितं प्रेषितं महाधनं च श्रुत्वा क्रोशमात्रं प्रत्युद्गम्य च गार्ग्यं सम्पूजयामास श्लोकद्वयमेकान्वयि ॥ ४ ॥ ५ ॥

गो० टी०-श्रुत्वेति । अश्वपतिनः अश्वपतेः ॥ ४ ॥ ५ ॥

६-९] ति० टी०-प्रतिपदं प्रत्येकं सर्वं सर्वप्रकारं कुशलं पृष्ट्वा मातुलस्य कुशलं पृष्ट्वा ॥ ६-९ ॥

रा० टी०-तथेति सम्पूजितमृषिं सम्पूजितात् ऋषेः तत् मातामहप्रेषितधनं प्रतिगृह्य प्रतिपदं प्रत्येकं सर्वं कुशलं पृष्ट्वा उपविष्टं महाभागम् ऋषिं प्रष्टुं प्रचक्रमे सार्द्धश्लोक एकान्वयी ॥ ६ ॥

रा० टी०-प्रश्नाकारमाह-किमिति । यदर्थं भगवान् इह प्राप्तः तत् किम् वाक्यं मातुल आह ॥ ७ ॥

रा० टी०-रामस्येति । महर्षिः कार्यस्य विस्तारो यस्मिन् तत् अद्भुतसङ्काशं राघवाय वक्तुमुपचक्रमे ॥ ८ ॥

रा० टी०-तदाकारमाह-मातुल इत्यादिभिः । ते मातुलः यद्वाक्यमाह तत् यदि रोचते तर्हि श्रूयताम् ॥ ९ ॥

गो० टी०-तथेति । प्रतिपदमिति । प्रत्येकं कुशलं पृष्ट्वेत्यर्थः ॥ ६-९ ॥

१०] ति० टी०-गन्धर्वविषयो गन्धर्वदेशः ॥ १० ॥

रा० टी०-वाक्याकारमाह अयमित्यादिभिः । सिंधोरुभयतः पार्श्वे यः परमशोभनो देशः सोऽयं गंधर्वविषयः गन्धर्वाणां देशः ॥ १० ॥

गो० टी०-अयमिति । सिन्धोः सिन्धुनद्याः । अयं देशः अस्मदेशसमीप इत्यर्थः ॥ १० ॥

११] ति० टी०-सिन्धोः सिन्धुनदस्योभयतः पार्श्वे वर्तमानः परमशोभनोऽयं देशोऽस्मदेशसमीपे वर्तते ॥ ११ ॥

रा० टी०-तमिति । तिस्रः कोट्यः शैलूषस्य सुताः तं सिंधोरुभयतः पार्श्वदेशं रक्षन्ति ॥ ११ ॥

गो० टी०-तं चेति । शैलूषः गन्धर्वराजः ॥ ११ ॥

१२] ति० टी०-शैलूषो गन्धर्वराजः । गन्धर्वनगरं च विनिर्जित्येत्यनुकर्षः ॥ १२ ॥

---

१ ब्रह्मर्षिमिति गो. पाठः । २ भगवन्निति गो. पाठः । ३ ऋषभेति गो. पाठः ।

निवेशय महाबाहो स्वे पुरे सुसमाहिते । अन्यस्य न गतिस्तत्र देशः परमशोभनः ॥
रोचतां ते महाबाहो नाहं त्वामहितं वदे । ॥ १३ ॥
तच्छ्रुत्वा राघवः प्रीतो महर्षेर्मातुलस्य च । उवाच वाढमित्येव भरतं चान्ववैक्षत ॥ १४ ॥
सोऽब्रवीद्राघवः प्रीतः साञ्जलिप्रग्रहो द्विजम् । इमौ कुमारौ तं देशं ब्रह्मर्षे विचरिष्यतः ॥ १५ ॥
भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च । मातुलेन सुगुप्तौ तु धर्मेण सुसमाहितौ ॥ १६ ॥
भरतं चाग्रतः कृत्वा कुमारौ सबलानुगौ । निहत्य गन्धर्वसुतान्द्वे पुरे विभजिष्यतः ॥ १७ ॥
निवेश्य ते पुरवरे आत्मजौ संनिवेश्य च । आगमिष्यति मे भूयः सकाशमतिधार्मिकः ॥ १८ ॥
ब्रह्मर्षिमेवमुक्त्वा तु भरतं सबलानुगम् । आज्ञापयामास तदा कुमारौ चाभ्यषेचयत् ॥ १९ ॥
नक्षत्रेण च सौम्येन पुरस्कृत्याङ्गिरःसुतम् । भरतः सह सैन्येन कुमाराभ्यां विनिर्ययौ ॥ २० ॥
सा सेना शक्रयुक्तेव नगरान्निर्ययावथ । राघवानुगता दूरं दुराधर्षा सुरैरपि ॥ २१ ॥
मांसौशिनश्च ये सत्त्वा रक्षांसि सुमहान्ति च । अनुजग्मुर्हि भरतं रुधिरस्य पिपासया ॥ २२ ॥
भूतग्रामाश्च बहवो मांसभक्षाः सुदारुणाः । गन्धर्वपुत्रमांसानि भोक्तुकामाः सहस्रशः ॥ २३ ॥

रा० टी०–तानिति । तान् गंधर्वान् विनिर्जित्य गन्धर्वनगरं स्वे पुरे निवेशय स्वकीयं पुरद्वयं निर्मापय ॥ १२ ॥

गो० टी०–तानिति । स्वपुरे चेति । तदेश इति शेषः १२

१३] ति० टी०–स्वे पुरे निवेशय । तदेशे इति शेषः । अन्यस्य त्वद्व्यतिरिक्तस्य तत्र देशे गतिः प्राप्तिप्रसक्तिर्जयप्रसक्तिश्च नास्ति । एवं तत्साधने को लाभस्तत्राह—**देशः परमशोभन इति** ॥ १३ ॥

रा० टी०–ननु त्वयैव जीयतामित्यत आह–**अन्यस्येति** । तत्र तेषां जये अन्यस्य न गतिः अतः परमशोभनो देशः ते रोचतामहं तु त्वामहितं न वदे एतेन तैः करो न दीयते इति सूचितम् ॥ १३ ॥

गो० टी०–**अन्यस्येति** । अन्यस्य त्वद्व्यतिरिक्तस्य तत्र देशे गतिः प्राप्तिप्रसङ्ग एव नास्तीत्यर्थः । तत्साधने फलमुक्तं–देशः परमशोभन इति ॥ १३ ॥

१४] ति० टी०–भरतं चान्ववैक्षत । तवायमंश इत्यन्वीक्षयदित्यर्थः ॥ १४ ॥

रा० टी०–**तदिति** । राघवः वाढमित्येव उवाच भरतमन्यवैक्षत च ॥ १४ ॥

गो० टी०–**तच्छ्रुत्वेति** । भरतं चान्ववैक्षतेति । पर्यालोचनार्थमित्यर्थः ॥ १४–२० ॥

१५] ति० टी०–अथ राघवो रामो द्विजमब्रवीत् ॥ १५ ॥

रा० टी०–**स इति** । प्रीतो राघवः द्विजमब्रवीत् अर्द्धं पृथक् ॥ १५ ॥

१६–१७] ति० टी०–तक्ष इत्यकारान्तः । मातुलेन भरतमातुलेन युधाजिता ॥ १६ ॥ १७ ॥

रा० टी०–तदाकारमाह—**इमावित्यादिभिः** । तक्षः पुष्कलश्च कुमाराविमौ भरतस्यात्मजौ मातुलेन सुगुप्तौ सन्तौ तं गंधर्वीयं देशं विचरिष्यतः सार्धश्लोक एकान्वयी ॥ १६ ॥

रा० टी०–**भरतमिति** । कुमारौ भरतमग्रतः कृत्वा गन्धर्वसुतान्निहत्य द्वे पुरे विभजिष्यतः ॥ १७ ॥

१८–१९] ति० टी०–पुरवरे निवेश्य निर्मायात्मजौ संनिवेश्य । तयोः पुरयोरिति शेषः । अतिधार्मिको भरतः ॥ १८ ॥ १९ ॥

रा० टी०–पुरविभागप्रकारमाह—**निवेश्येति** । अतिधार्मिको भरतः द्वे पुरवरे निवेश्य निर्माय आत्मजौ सन्निवेश्य तत्र संस्थाप्य च मत्सकाशमागमिष्यति ॥ १८ ॥

रा० टी०–**ब्रह्मर्षिमिति** । भरतमाज्ञापयामास कुमारौ अभ्यषेचयच्च ॥ १९ ॥

२०] ति० टी०–अङ्गिरःसुतं गार्ग्यम् ॥ २० ॥

रा० टी०–**नक्षत्रेणेति** । सौम्येन नक्षत्रेण अङ्गिरस्सुतं पुरस्कृत्य सैन्येन कुमाराभ्यां च सह भरतो विनिर्ययौ ॥ २० ॥

२१–२३] ति० टी०–शक्रयुक्तेवेन्द्रनियुक्ता देवसेनेव राघवानुगता रामानुगता । दूरम् । एकद्विवासपर्यन्तमित्यर्थः ॥ २१–२३ ॥

रा० टी०–**सेति** । शक्रेण युक्तेव दूरं राघवानुगता सेना नगरान्निर्ययौ ॥ २१ ॥

रा० टी०–**मांसेति** । मांसाशिनः व्याघ्रादयः रक्षांसि च रुधिरस्य पिपासया भरतमनुजग्मुः ॥ २२ ॥

रा० टी०–**भूतेति** । गन्धर्वपुत्रमांसानि भोक्तुकामा बहवो भूतग्रामाः सिंहादीनां बहूनि सहस्राणि च सेनाया अग्रतो ययुः अर्द्धचतुर्थमेकान्वयि ॥ २३ ॥ २४ ॥

गो० टी०–**सेति** । शक्रयुक्तेव इन्द्रयुक्ता देवसेनेव, नगरान्निर्ययौ । दूरमिति । एकद्विवासरैपर्यन्तमित्यर्थः ॥ २१ ॥

---

१ अन्यवैक्षतेति रा. पा. । २ मांसादानि च सत्त्वानीति गो. पाठः । * वासपर्यन्तमिति युक्तं भाति।

सिंहव्याघ्रवराहाणां खेचराणां च पक्षिणाम् । बहूनि वै सहस्राणि सेनाया ययुरग्रतः ॥ २४ ॥
अध्यर्धमासमुषिता पथि सेना निरामया । हृष्टपुष्टजनाकीर्णा केकयं समुपागमत् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे शततमः सर्गः ॥ १०० ॥

एकोत्तरशततमः सर्गः ।

भरतस्तु गन्धर्वैः सप्तरात्रं युध्यमानोऽपि नान्यतरजयं पश्यन् संवर्ताख्यं कालपाशं प्रयुज्य निमेषान्तरमात्रेणैव तान्हत्वा द्वे पुरे निर्माय तत्र प्रजापालनाय स्वपुत्रौ संस्थाप्य पञ्चभिर्वत्सरैः पुना राघवं द्रष्टुं प्रत्यागतः ।

श्रुत्वा सेनापतिं प्राप्तं भरतं केकयाधिपः । युधाजिद्गर्गसहितं परां प्रीतिमुपागमत् ॥ १ ॥
स निर्ययौ जनौघेन महता केकयाधिपः । त्वरमाणोऽभिचक्राम गन्धर्वान्केकयाधिपः ॥२॥
भरतश्च युधाजिच्च समेतौ लघुविक्रमैः । गन्धर्वनगरं प्राप्तौ सबलौ सपदानुगौ ॥ ३ ॥
श्रुत्वा तु भरतं प्राप्तं गन्धर्वास्ते समागताः । योद्धुकामा महावीर्या व्यनदंस्ते समन्ततः ॥ ४ ॥
ततः समभवद्युद्धं तुमुलं लोमहर्षणम् । सप्तरात्रं महाभीमं न चान्यतरयोर्जयः ॥ ५ ॥
खड्गशक्तिधनुर्ग्राहा नद्यः शोणितसंस्रवाः । नृकलेवरवाहिन्यः प्रवृत्ताः सर्वतोदिशम् ॥ ६ ॥
ततो रामानुजः क्रुद्धः कालस्यास्त्रं सुदारुणम् । संवर्तं नाम भरतो गन्धर्वेष्वभ्यचोदयत् ॥ ७ ॥
ते बद्धाः कालपाशेन संवर्तेन विदारिताः । क्षणेनाभिहतास्तेन तिस्रः कोट्यो महात्मना ॥८॥

२४] ति० टी०–सेनाया अग्रतो ययुः । पिशिताशिनामग्रतो यानं शुभशकुनम् । अभिमुखागमनमेवापशकुनमिति भावः ॥ २४ ॥

गो० टी०–सिंहेति । सेनाया अग्रतो ययुरिति । पिशिताशनादीनामग्रतो यानं शुभशकुनम् । अभिमुखतः आगमनमेवापशकुनम् ॥ २४ ॥

२५] ति० टी०–केकयं केकयदेशं युधाजितं वा ॥२५॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे शततमः सर्गः ॥ १०० ॥

रा० टी०–अध्यर्द्धेति । अध्यर्द्धमासं सार्द्धमासं पथ्युषिता सेना केकयं समुपागमत् ॥ २५ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे शततमः सर्गः ॥ १०० ॥

गो० टी०–अध्यर्धमासमिति । केकयम् युधाजितमित्यर्थः ॥ २५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने शततमः सर्गः ॥ १०० ॥

१-२] ति० टी०–अथ भरतेन गन्धर्वविजयः—श्रुत्वेति । सेनापतिं प्राप्तं युद्धसंनाहवन्तमागतं श्रुत्वा ॥ १ ॥ २ ॥

रा० टी०–भरतागमनानन्तरकालिकं वृत्तमाह—श्रुत्वेत्यादिभिः । गर्गसहितं भरतं प्राप्तं श्रुत्वा युधाजित् परां प्रीतिमुपागमत् ॥ १ ॥

रा० टी०–स इति । केकयाधिपः युधाजित् जनौघेन सह निर्ययौ भरतसमीपं जगामेत्यर्थः अर्द्धं पृथक् । त्वरमाण इति । केकयाधिपः गंधर्वान् अभिचक्राम ॥ २ ॥

गो० टी०–श्रुत्वेत्यादि । सेनापतिं प्राप्तं युद्धसन्नाहं श्रुत्वा ॥ १ ॥ २ ॥

३] ति० टी०–लघुविक्रमैः । योधैरित्यर्थः । सबलौ चतुरङ्गबलसहितौ । सपदानुगौ शूद्रवैश्याद्यनुचरसहितौ ॥ ३ ॥

रा० टी०–भरत इति । भरतो युधाजिच्च गन्धर्वनगरं प्राप्तौ ॥ ३ ॥

गो० टी०–भरतश्चेति । सबलौ चतुरङ्गबलसहितौ सपदानुगौ शूद्रवैश्याद्यनुचरसहितौ ॥ ३ ॥

४-५] ति० टी०–व्यनदन्गर्जन्ति स्म ॥ ४ ॥ ५ ॥

रा० टी०–श्रुत्वेति । भरतं प्राप्तं श्रुत्वा समागताः गंधर्वा योद्धुकामाः सन्तः समन्ततो व्यनदन् ॥ ४ ॥

रा० टी०–तत इति । सप्तरात्रं महाभीमं युद्धं समभवत् जयस्तु अन्यतरयोरपि न ॥ ५ ॥

गो० टी०–श्रुत्वेति । व्यनदन् गर्जन्ति स्म ॥ ४ ॥ ५ ॥

६] ति० टी०–खड्गादिरूपा ग्राहा याश्च ताः । नृकलेवराणि वहन्ति ताः ॥ ६ ॥

रा० टी०–खड्गेति । खड्गादयः ग्राहाः नक्रादयो याश्च शोणितस्य संस्रवः प्रवाहो याश्च ताः नृकलेवरवाहिन्यो नद्यः सर्वतो दिशं प्रवृत्ताः ॥ ६ ॥

गो० टी०–खड्गेति । खड्गादिरूपा ग्राहा याश्च ताः । संस्रवः प्रवाहः । नृकलेवराणि नद्यः काष्ठानि वहन्तीति तथा ॥ ६ ॥

७-८] ति० टी०–संवर्तं नाम प्रलयकालानलास्त्रम् ॥७॥८॥

---

१ गार्ग्येति गो.पाठः । २ कामरूपिण इति गो.पाठः । ३ वै इति गो.पाठः । खे समागता इति रा.पाठः । ४ तं घातं घोरसंकाशमिति गो.पाठः ।

तद्युद्धं तादृशं घोरं न स्मरन्ति दिवौकसः । निमेषान्तरमात्रेण तादृशानां महात्मनाम् ॥ ९ ॥
हतेषु तेषु सर्वेषु भरतः केकयीसुतः । निवेशयामास तदा समृद्धे द्वे पुरोत्तमे ॥ १० ॥
तक्षं तक्षशिलायां तु पुष्कलं पुष्कलावते । गन्धर्वदेशे रुचिरे गान्धारविषये च सः ॥ ११ ॥
धनरत्नौघसंकीर्णे काननैरुपशोभिते । अन्योन्यसंघर्षकृते स्पर्धया गुणविस्तरैः ॥ १२ ॥
उभे सुरुचिरप्रख्ये व्यवहारैरकिल्बिषैः । उद्यानयानसंपूर्णे सुविभक्तान्तरापणे ॥ १३ ॥
उभे पुरवरे रम्ये विस्तरैरुपशोभिते । गृहमुख्यैः सुरुचिरैर्विमानैर्बहुभिर्वृते ॥ १४ ॥
शोभिते शोभनीयैश्च देवायतनविस्तरैः । तालैस्तमालैस्तिलकैर्वकुलैरुपशोभिते ॥ १५ ॥
निवेश्य पञ्चभिर्वर्षैर्भरतो राघवानुजः । पुनरायान्महाबाहुरयोध्यां केकयीसुतः ॥ १६ ॥
सोऽभिवाद्य महात्मानं साक्षाद्धर्ममिवापरम् । राघवं भरतः श्रीमान्ब्रह्माणमिव वासवः ॥ १७ ॥
शशंस च यथावृत्तं गन्धर्ववधमुत्तमम् । निवेशनं च देशस्य श्रुत्वा प्रीतोऽस्य राघवः ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

रा० टी०-तत इति । रामानुजो भरतः संवर्तं नाम कालस्यास्त्रं गंधर्वेषु अभ्यचोदयत् प्राक्षिपत् ॥ ७ ॥

रा० टी०-ते इति । कालपाशेन बद्धाः संवर्तेन विदारिताः तिस्रः कोट्यस्ते गंधर्वाः तेन भरतेन क्षणेनाभिहताः ॥८॥

गो० टी०-तत इति । संवर्तं नामेति । प्रलयकालाग्न्याख्यामित्यर्थः ॥ ७ ॥ ८ ॥

९] ति० टी०-दिवौकसो न स्मरन्ति निमेषमात्रेण त्रिकोटिगन्धर्ववधोऽसंभाव्य इति स्थितवन्तः ॥ ९ ॥

रा० टी०-तदिति । दिवौकसः निमेषान्तरमात्रेण प्रवृत्तं महात्मनां तद्युद्धं न स्मरन्ति तेन स्मृतस्यापि तस्यातिभीतिजनकत्वं ध्वनितम् ॥ ९ ॥

गो० टी०-तमिति । तं घातं दिवौकसः न स्मरन्तीति । त्रिकोटिगन्धर्वघातोऽसंभाव्य इत्येव स्मृत्वा स्थितवन्त इत्यर्थः ९

१०] ति०टी०-द्वे पुरोत्तमे तक्षशिलापुष्कलावताख्ये १०

रा० टी०-हतेष्विति । भरतः समृद्धे द्वे पुरोत्तमे निवेशयामास ॥ १० ॥

गो० टी०-हतेष्विति । द्वे पुरे इति । तक्षशिलापुष्कलावताख्ये ॥ १०-१२ ॥

११] ति० टी०-गन्धर्वदेशे तक्षशिलायां तक्षं तक्षाख्यं पुत्रम् । गान्धारदेशे पुष्कलावते नगरे पुष्कलम् ॥ ११ ॥

रा० टी०-तक्षमिति । स भरतः गंधर्वदेशे तक्षशिलायां पुरि तक्षं गान्धारविषये तदभिधदेशे पुष्कलावते पुरे पुष्कलं संस्थापयामासेति शेषः ॥ ११ ॥

१२] ति० टी०-गुणविस्तरैर्हेतुभिरन्योन्यस्पर्धयान्योन्यसंघर्षकृते कृतान्योन्यसंघर्षे । अहमेव गुणोत्तरमिति कृतान्योन्यविवादे इव दृश्यमाने इत्यर्थः ॥ १२ ॥

रा० टी०-पुरं वर्णयति धनेत्यादिभिः । धनरत्नानामुत्तमधनानामोघेन समूहेन संकीर्णं गुणविस्तरैः हेतुभिः स्पर्द्धया अन्योन्यसंघर्षकृते इव अकिल्बिषैः व्यवहारैः सुरुचिरप्रख्ये सुविभक्ता अन्तरापणाः ययोर्विस्तरैर्गृहमुख्यैरुपशोभिते विमानैर्वृते शोभनीयैर्देवायतनविस्तरैः शोभिते तालादिभिरुपशोभिते उभे ओः शंभुगृहस्य भा इव भा ययोस्ते उभे रम्ये पुरवरे पञ्चभिर्वर्षैर्निवेश्य सम्यक् सम्पाद्य राघवानुजो भरतः अयोध्यां पुनरायात् श्लोकपञ्चकमेकान्वयि ॥ १२—१६ ॥

१३] ति० टी०-अकिल्बिषैर्धर्मन्यायोपेतैर्व्यवहारैः क्रयविक्रयादिव्यापारैः ॥ १३ ॥

गो० टी०-उभे इति । अकिल्बिषैः धर्मन्यायोपेतैर्व्यवहारैः क्रयविक्रयादिव्यापारैः ॥ १३ ॥

१४] ति० टी०-विस्तरैरनुक्तपदार्थविस्तरैरुपशोभिते । सुरुचिरैर्गृहमुख्यैरुपशोभिते । विमानैः सप्तभूमिप्रासादैः ॥१४॥

गो० टी०-उभे इति । विमानसमवर्णिभिः देवायतनवद्विस्तारैः । गृहमुख्यैरिति उपशोभिते । विमानैर्बहुभिर्वृत इति च पाठः ॥ १४-१८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकोत्तरशततमः सर्गः ॥ १०१ ॥

१५-१७] ति० टी०-देवतायतनविस्तरैः । विस्तारैरित्यर्थः ॥ १५-१७ ॥

१८] ति० टी०-स्वस्मात्यथावृत्तं गन्धर्ववधं देशस्य निवेशनं च शशंस । अस्य भरतस्य वाक्यं श्रुत्वा राघवो रामः प्रीतो बभूव ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामार्ये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकोत्तरशततमः सर्गः ॥ १०१ ॥

रा० टी०-स इति । भरतः राघवमभिवाद्य यथावृत्तं गन्धर्ववधं शशंस राघवस्तु देशस्य निवेशनं श्रुत्वा अस्य भरतस्य प्रीतोऽभवत् श्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

१ तं घातं घोरसंकाशमिति गो. पा. । २ संपूर्णे इति गो. पा. । ३ विमानसमवर्णिभिरिति गो. पा. विमानै राघवानुज इति रा. पा. ।

द्युत्तरशततमः सर्गः ।

अङ्गदचन्द्रकेत्वभिधौ लक्ष्मणपुत्रौ पृथक्पुरे द्वे निर्माप्य तत्राभिषिच्य तत्पार्ष्णिग्राहौ यथाक्रमं लक्ष्मणभरतौ कृत्वा रामस्तौ प्रैषयत् लक्ष्मणभरतौ तु यथादेशमनुष्ठाय संवत्सरानन्तरं राममाजग्मतुः ।

तच्छ्रुत्वा हर्षमापेदे राघवो भ्रातृभिः सह । वाक्यं चाद्भुतसंकाशं भ्रातॄन्प्रोवाच राघवः ॥ १ ॥
इमौ कुमारौ सौमित्रे तव धर्मविशारदौ । अङ्गदश्चन्द्रकेतुश्च राज्यार्थे दृढविक्रमौ ॥ २ ॥
इमौ राज्येऽभिषेक्ष्यामि देशः साधु विधीयताम् । रमणीयो ह्यसंबाधो रमेतां यत्र धन्विनौ ॥ ३ ॥
न राज्ञां यत्र पीडा स्यान्नाश्रमाणां विनाशनम् । स देशो दृश्यतां सौम्य नापराध्यामहे यथा ॥ ४ ॥
तथोक्तवति रामे तु भरतः प्रत्युवाच ह । अयं कारुपथो देशो रमणीयो निरामयः ॥ ५ ॥
निवेश्यतां तत्र पुरमङ्गदस्य महात्मनः । चन्द्रकेतोः सुरुचिरं चन्द्रकान्तं निरामयम् ॥ ६ ॥
तद्वाक्यं भरतेनोक्तं प्रतिजग्राह राघवः । तं च कृत्वा वशे देशमङ्गदस्य न्यवेशयत् ॥ ७ ॥
अङ्गदीया पुरी रम्याप्यङ्गदस्य निवेशिता । रमणीया सुगुप्ता च रामेणाक्लिष्टकर्मणा ॥ ८ ॥
चन्द्रकेतोश्च मल्लस्य मल्लभूम्यां निवेशिता । चन्द्रकान्तेति विख्याता दिव्या स्वर्गपुरी यथा ॥ ९ ॥

१] ति० टी०–अथ लक्ष्मणकुमारयो राज्ये निवेशनम्–तदिति । भ्रातृभिरिति बहुवचनं द्वित्वे आर्षम् ॥ १ ॥

रा० टी०–भरतविजयश्रवणानंतरकालिकं वृत्तमाह–तदित्यादिभिः । तत् भरतोक्तं श्रुत्वा हर्षमापेदे भ्रातॄन् प्रोवाच च ॥ १ ॥

गो० टी०–तच्छ्रुत्वेत्यादि ॥ १ ॥

२] ति० टी०–हे सौमित्रे ! तवेमौ कुमारौ राज्यार्थे राज्यरक्षणविषये दृढविक्रमौ ॥ २ ॥

३] ति० टी०–अत इमौ राज्येऽभिषेक्ष्यामि । यत्रेमौ रमेतां तादृशो देशः साधु विधीयतां निरीक्ष्यताम् ॥ ३ ॥

रा०टी०–तदाकारमाह–इमावित्यादिभिः । हे सौमित्रे ! अङ्गदश्चन्द्रकेतुश्च तव कुमारौ राज्यार्हौ स्त इति शेषः अतः इमौ कुमारौ राज्ये अभिषेक्ष्यामि अतः यत्र धन्विनौ कुमारौ रमेतां स देशः साधु विधीयताम् श्लोकद्वयमेकान्वयि ॥२–३॥

गो० टी०–इमाविति । राज्यार्थे राज्यरक्षाविषये ॥२॥३॥

४] ति० टी०–नापराध्यामहे । यथा कस्यापि भूतस्येति शेषः ॥ ४ ॥

रा० टी०–नेति । यत्र राज्ञां पीडा न स्यात् आश्रमाणां विनाशनं च न स्यात् अत एव वयं नापराध्यामहे स देशो दृश्यतां कुमाररमणयोग्यत्वेन अन्विष्यताम् ॥ ४ ॥

गो० टी०–नेति । नापराध्यामहे । कस्यापि भूतस्येति शेषः ॥ ४ ॥

५] ति० टी०–कारुपथस्तदाख्यः पाश्चात्यौदीच्यदेशविशेषः ॥ ५ ॥

६] ति० टी०–तत्र देशेऽङ्गदस्य पुरमङ्गदीयेत्याख्यं निवेश्यताम् । चन्द्रकेतोश्चन्द्रकान्ताख्यं पुरं निवेश्यताम् ॥ ६ ॥

रा० टी०–तथेति । भरतः प्रत्युवाच अर्द्धं पृथक् तदाकारमाह–अयमिति । कारुपथो देशः निरामयोऽस्ति तत्र कारुपथे अंगदस्य पुरमङ्गदीयाभिधमित्यर्थः निवेश्यतां चन्द्रकेतोस्तु चन्द्रकान्तं तदभिधं पुरं निवेश्यताम् सार्द्धश्लोक एकान्वयी ॥ ५–६ ॥

गो० टी०–तथेति । कारुपथः कारुपथाख्यः पाश्चात्यदेशविशेषः ॥ ५ ॥

गो० टी०–निवेश्यतामिति । तत्र देशे अङ्गदस्य पुरम् अङ्गदीयाख्यम् निवेश्यतां चन्द्रकेतोः चन्द्रकान्ताख्यम् ६–८

७] ति० टी०–वशे कृत्वा लक्ष्मणभरताभ्यां वशे कारयित्वाङ्गदस्य पुरीं न्यवेशयत् ॥ ७ ॥

रा० टी०–यदिति । भरतेन यदुक्तं तद्राघवः, प्रतिजग्राह अत एव तं देशं वशे कृत्वा अङ्गदस्य पुरमिति शेषः निवेशयत् न्यवेशयत् ॥ ७ ॥

८] ति० टी०–तत्र देशेऽङ्गदस्य पुरी रामेण निवेशिता । लक्ष्मणद्वारेति शेषः ॥ ८ ॥

रा० टी०–अङ्गदीयेति । रामेण निवेशिता निर्मापिता सुगुप्ता च अङ्गदस्य पुरी अङ्गदीया तदभिधाभवदिति शेषः ८

९] ति० टी०–मल्लस्य दृढाङ्गस्य चन्द्रकेतोर्मल्लभूम्यां तदाख्ये औत्तरे । अस्यैव चन्द्रकान्तेति नामान्तरम् । तत्र चन्द्रकान्ताख्या पुरी निवेशिता ॥ ९ ॥

रा० टी०–चन्द्रकेतोरिति । मल्लस्य युद्धक्रियानिपुणस्य चन्द्रकेतोः चन्द्रकान्तेति विख्याता पुरी मल्लभूम्यां कारुपथान्तर्गततदभिधदेशे निवेशिता रामेणेति शेषः ॥ ९ ॥

गो० टी०–चन्द्रकेतोस्त्विति । मल्लस्य श्रेष्ठस्य । मल्लभूम्यां मल्लदेशे उत्तरे ॥ ९–१३ ॥

१ तदा प्रोवाच लक्ष्मणमिति गो. पाठः । २ स्थिते गो. पाठः ।

ततो रामः परां प्रीतिं लक्ष्मणो भरतस्तथा । ययुर्युद्धे दुराधर्षा अभिषेकं च चक्रिरे ॥ १० ॥
अभिषिच्य कुमारौ द्वौ[1] प्रस्थाप्य सुसमाहितौ । अङ्गदं पश्चिमां भूमिं चन्द्रकेतुमुदङ्मुखम् ॥ ११ ॥
अङ्गदं चापि सौमित्रिर्लक्ष्मणोऽनुजगाम ह । चन्द्रकेतोस्तु भरतः पार्ष्णिग्राहो बभूव ह ॥ १२ ॥
लक्ष्मणस्त्वङ्गदीयायां संवत्सरमथोषितः । पुत्रे स्थिते दुराधर्षे अयोध्यां पुनरागमत् ॥ १३ ॥
भरतोऽपि तथैवोष्य संवत्सरमतोऽधिकम् । अयोध्यां पुनरागम्य रामपादावुपास्त सः ॥ १४ ॥
उभौ सौमित्रिभरतौ रामपादावनुव्रतौ । कालं गतमपि स्नेहान्न जज्ञातेऽतिधार्मिकौ ॥ १५ ॥
एवं वर्षसहस्राणि दश तेषां ययुस्तदा । धर्मं प्रयतमानानां पौरकार्येषु नित्यदा ॥ १६ ॥
विहृत्य कालं परिपूर्णमानसाः श्रिया वृता धर्मपुरे च संस्थिताः ।
त्रयः समिद्धाहुतिदीप्ततेजसो हुताग्नयः साधुमहाध्वरे त्रयः ॥ ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

द्व्युत्तरशततमः सर्गः ।

कालस्तापसरूपेण रामं प्रत्यागतस्तथोरहसि भाषणनियमः स्वयोर्भाषणं तृतीयः श्रुणुयाच्चेत्स मम वध्य इति रामप्रतिज्ञोद्घोषणं च ॥

कस्यचित्त्वथ कालस्य रामे धर्मपरे स्थिते । कालस्तापसरूपेण राजद्वारमुपागमत् ॥ १ ॥

१०-१३] ति० टी०-युद्धे दुराधर्षा रामादयोऽभिषेकं चक्रिरे । अङ्गदचन्द्रकेत्वोरिति शेषः ॥ १०-१३ ॥

रा० टी०-तत इति । युद्धे दुराधर्षाः रामादयः परां प्रीतिं ययुः अभिषेकं चक्रिरे लक्ष्मणकुमारयोरिति शेषः॥१०॥

रा० टी०-अभिषिच्येति । कुमारावभिषिच्य अङ्गदं पश्चिमां भूमिं चन्द्रकेतुं तु उदङ्मुखं उदीचीं भूमिमित्यर्थः प्रस्थाप्यातिष्ठत् राम इति शेषः ॥ ११ ॥

रा० टी०-अङ्गदमिति । अङ्गदं सौमित्रिरनुजगाम चन्द्रकेतोः पार्ष्णिग्राहस्तु भरतो बभूव ॥ १२ ॥

रा० टी०-लक्ष्मण इति । अङ्गदीयायां पुत्रे स्थिते सति संवत्सरमुषितो लक्ष्मणः अयोध्यां पुनरागमत् ॥ १३ ॥

१४] ति०टी०-तथैवोष्य । चन्द्रकेतुसमीप इति शेषः १४

रा० टी०-भरत इति । भरतः संवत्सरमतस्संवत्सरात् अधिकमपि उष्य उषित्वा अयोध्यामागम्य रामपादावुपास्त १४

गो० टी०-भरत इति । भरतोपि तथैवोष्येति । चन्द्रकेतुसमीप इति शेषः ॥ १४ ॥

१५] ति० टी०-न जज्ञाते नावगतवन्तौ । संधिरार्षः ॥ १५ ॥

रा० टी०-उभाविति । रामपादावनुव्रतौ सौमित्रिभरतौ गतमपि कालं न जज्ञाते बुबुधतुः ॥ १५ ॥

गो० टी०-उभाविति । न जज्ञाते जानातेर्लिट्द्विवचनम् । नावगतवन्तौ । संधिः छान्दसः ॥ १५ ॥ १६ ॥

१६] ति० टी०-दशसहस्राणि आयुस्त्वेकादशसहस्राणीति स्पष्टमेव ॥ १६ ॥

रा० टी०-एवमिति । धर्मं प्रयतमानानां तेषां दशवर्षसहस्राणि ययुः उपलक्षणमिदं सहस्रत्रयस्यापि ॥ १६ ॥

१७] ति० टी०-धर्मपुरे धर्मसाधने पुरेऽयोध्यायाम् । 'अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायकाः ॥' इति स्मृतेः ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

रा० टी०-विहृत्येति । परिपूर्णं सर्वकामैः पर्याप्तं मानसं येषां धर्मपुरे अयोध्यायां संस्थिताः त्रयो रामादयः कालं यथानियमितसमयं विहृत्य प्रकटविहारं कृत्वा महाध्वरे समिद्धाहुतिभिः दीप्तानि तेजांसि येषां ते त्रयः दक्षिणाग्निगार्हपत्याहवनीयाः हुताग्नय इव विरेजुरिति शेषः ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे द्व्यधिकशततमः सर्गः ॥ १०२ ॥

गो० टी०-विहृत्येति । धर्मसाधनं पुरं धर्मपुरं तस्मिन् ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उ०श्रीरामायणव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

१] ति० टी०-अथ रामाय स्वीयवैष्णवधामागमनकालनिवेदनाय ब्रह्मणो दूतप्रेषणम्—कस्यचिदिति । कस्य चित्कालस्य । अपगमानन्तरमिति शेषः । रामे धर्मपरे स्थिते कालस्तापसरूपेण राजद्वारमुपागमत् ॥ १ ॥

रा० टी०-रामनिर्यानमुपक्रमन्नाह-कस्यचिदित्यादिभिः । धर्मपरे रामे स्थिते सति कस्यचित्कालस्य अपगमे

१ स प्रस्थापयति राघव इति गो. पाठः । २ इवेति गो. पा. । ३ महाध्वरे साहुतास्त्रयोऽग्नय इति गो. पाठः । ४ धर्मपथे इति गो. पाठः ।

[सोऽब्रवील्लक्ष्मणं वाक्यं धृतिमन्तं यशस्विनम् । मां निवेदय रामाय संप्राप्तं कार्यगौरवात् ।]
दूतो ह्यैतिबलस्याहं महर्षेरमितौजसः । रामं दिदृक्षुरायातः कार्येण हि महाबलः ॥ २ ॥
तस्य तद्वचनं श्रुत्वा सौमित्रिस्त्वरयान्वितः । न्यवेदयत रामाय तापसं तं समागतम् ॥ ३ ॥
जयस्व राजधर्मेण उभौ लोकौ महाद्युते । दूतस्त्वां द्रष्टुमायातस्तपसा भास्करप्रभः ॥ ४ ॥
तद्वाक्यं लक्ष्मणोक्तं वै श्रुत्वा राम उवाच ह । प्रवेश्यतां मुनिस्तात महौजास्तस्य वाक्यधृक् ॥ ५ ॥
सौमित्रिस्तु तथेत्युक्त्वा प्रावेशयत तं मुनिम् । ज्वलन्तमेवं तेजोभिः प्रदहन्तमिवांशुभिः ॥ ६ ॥
सोऽभिगम्य रघुश्रेष्ठं दीप्यमानं स्वतेजसा । ऋषिर्मधुरया वाचा वर्धस्वेत्याह राघवम् ॥ ७ ॥
तस्मै रामो महातेजाः पूजामर्घ्यपुरोगमाम् । ददौ कुशलमव्यग्रं प्रष्टुं चैवोपचक्रमे ॥ ८ ॥
पृष्टश्च कुशलं तेन रामेण वदतां वरः । आसने काञ्चने दिव्ये निषसाद महायशाः ॥ ९ ॥
तमुवाच ततो रामः स्वागतं ते महामते । प्रापयास्य च वाक्यानि यतो दूतस्त्वमागतः ॥ १० ॥
चोदितो राजसिंहेन मुनिर्वाक्यमभाषत । द्वन्द्वे ह्येतत्प्रवक्तव्यं हितं वै यदवेक्षसे ॥ ११ ॥
यः शृणोति निरीक्षेद्वा स वश्यो भविता तव । भवेद्वै मुनिमुख्यस्य वचनं यद्यवेक्षसे ॥ १२ ॥

सतीति शेषः तापसरूपेणोपलक्षितः काल रामाज्ञानुसारेण सकलजगत्प्रवर्त्तकः सभयविशेषः राजद्वारमुपागमत् तथा च श्रुतिः ज्ञः कालकालो गुणी सर्वविद् इति ॥ १ ॥

गो० टी०-कस्यचिन्वित्यादि । कालस्य कस्यचिद्-मनानन्तरमिति शेषः ॥ १ ॥ २ ॥

२-३] ति० टी०-अतिबलस्य महर्षेः । जगत्प्राणरूप-त्वाच्चतुर्वेदमुखत्वाच्च सत्यवचस्त्वाच्च ब्रह्मातिबलो महर्षिः ॥ २ ॥ ३

रा० टी०-कालोक्तिमाह—दूत इति । अतिबलस्य मह-र्षेर्दूतोहं कार्येण हेतुना आयातः ॥ २ ॥

रा० टी०-तस्येति । सौमित्रिः समागतं तापसं रामाय न्यवेदयत् ॥ ३ ॥

गो० टी०-दूत इति । महर्षेरिति । ब्रह्मण इत्यर्थः ३-५

४] ति० टी०-उभौ लोकौ जयस्वेत्युक्त्या परलोकप्रवे-शकालसूचनम् ॥ ४ ॥

रा० टी०-निवेदनाकारमाह—जयस्वेति । तपसा भास्करप्रभो दूतः त्वां द्रष्टुमायातः ॥ ४ ॥

५] ति० टी०-तस्य वाक्यधृक् । यस्य दूतस्तस्याज्ञाधा-रीत्यर्थः ॥ ५ ॥

रा० टी०-तदिति । मुनिः प्रवेश्यतामिति वचः राम उवाच ॥ ५ ॥

गो० टी०-तदिति । तस्य वाक्यस्य धृदिति, राम-वाक्यधारीति सौमित्रिविशेषणम् ॥ ६-१० ॥

६-९] ति० टी०-तेजोभिरंशुभिरित्येते पदे शरीरकान्ति-किरणप्रतिपादके इति न पुनरुक्तिः ॥ ६-९ ॥

रा० टी०-सौमित्रिरिति । सौमित्रिः मुनिं प्रावेशयत ६

रा० टी०-स इति । स दूतः राघवमभिगम्य वर्द्ध-स्वेत्याह ॥ ७ ॥

रा० टी०-तस्मै इति । रामः तस्मै दूताय अर्घ्यपुरो-गमां पूजां ददौ कुशलं प्रष्टुमुपचक्रमे च ॥ ८ ॥

रा० टी०-पृष्ट इति । महायशाः दूतः काञ्चने आसने निषसाद ॥ ९ ॥

१०] ति० टी०-अस्य यस्य त्वं दूतस्तस्य वाक्यानि संदेशवाक्यानि प्रापयस्व निवेदय । तत्र हेतुः—यतो दूत इति ॥ १० ॥

रा० टी०-तमिति । ते तव स्वागतं यतस्त्वं दूत आगतः अतः अस्य स्वस्वामिनः वाक्यानि प्रापय कथय इति वचः तं दूतं राम उवाच ॥ १० ॥

गो० टी०-तमिति । वाक्यानि, प्रापयस्व निवेदय । तत्र हेतुः-यतो दूत इत्यादि ॥ ११ ॥

११] ति० टी०-द्वन्द्वे रहस्ये हितं वै यथवेक्षसे । देवानामिति शेषः । देवगोप्यगोपने हि देवानां हितं भवतीति भावः ॥ ११ ॥

रा० टी०-चोदित इति । मुनिरभाषत तदाकारमाह यदि हितमस्माकमिति शेषः अवेक्षसे तर्हि एतत् भवत्पृष्टं द्वन्द्वे द्वयोरेव स्थितौ वक्तव्यम् ॥ ११ ॥

गो० टी०-चोदित इति । मुनिवाक्यं प्रागुक्तमहर्षि-संदिष्टवाक्यम् । द्वन्द्वमेतदिति । " द्वन्द्वं रहस्य० " इत्यादि द्वन्द्वशब्दस्य रहस्यार्थे द्विवचननिपातः । रहस्यमेतत्प्रवक्तव्यमि-त्यर्थः । द्वन्द्वे हि तत्प्रवक्तव्यमिति च पाठः । तदेव विशिनष्टि-न चैषामित्यादि । एषां त्वत्समीपवर्तिलोकानामित्यर्थः १२

१२] ति० टी०-नैतावदेव, किं त्वन्यापि प्रतिज्ञा कार्येत्याह—य इति । यः शृणोत्यस्य तद्वचनं निरीक्षेद्वा । मन्त्रयितारावितिं शेषः । स तव वश्य इति । कथमेवमतिक्रूरा प्रतिज्ञा तत्राह—भवेदिति । तस्य मुनिमुख्यस्य वचनमेवं

१ इदं पद्यमधिकं गो. पु. । २ अस्यतिबलस्येति गो. पाठः । ३ महाबलेति गो. पाठः । ४ रामेति गो. पाठः । ५ लक्ष्मणेनोक्तमिति गो. पाठः । ६ दिति गो. पाठः । ७ धृश्चेति गो. रा. पा. । ८ महामुने इति गो. पाठः । ९ द्वन्द्वमिति गो. पा. । १० अपेक्षसे इति गो. पाठः ।

तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत् । द्वारि तिष्ठ महाबाहो प्रतिहारं विसर्जय ॥ १३ ॥
स मे वध्यः खलु भवेद्वाचं द्वन्द्वसमीरितम् । ऋषेर्मम च सौमित्रे पश्येद्वा शृणुयाच्च यः ॥ १४ ॥
ततो निक्षिप्य काकुत्स्थो लक्ष्मणं द्वारि संग्रहम् । तमुवाच मुने वाक्यं कथयस्वेति राघवः ॥ १५ ॥
तत्ते मनीषितं वाक्यं येन वासि समाहितः । कथयस्वाविशङ्कस्त्वं ममापि हृदि वर्तते ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

चतुरधिकशततमः सर्गः ।

एकादशसहस्राणि संवत्सराणां मया मानुषत्वेन स्थेयमिति परिगणनं भवतैवावतारारम्भे प्रतिज्ञातं तावत्समयस्तु समाप्तोऽतः आजिगमिषाधवाधिकं विवत्साश्च देवः प्रमाणमिति मन्मुखेन पितामहो विज्ञापयतीति तापसवचो निशम्य तदङ्गीकृत्य रामस्तं प्रशशंस ।

शृणु राजन्महासत्व यदर्थमहमागतः । पितामहेन देवेन प्रेषितोऽस्मि महाबल ॥ १ ॥
तवाहं पूर्वके भावे पुत्रः परपुरंजय । मायासंभावितो वीर कालः सर्वसमाहरः ॥ २ ॥

वै भवेत् । उक्तसंकेतपूर्वमेव ब्रूहीत्येवाभवदित्यर्थः । यच्चवेक्षसे तथा संकेतपरिपालनमिति शेषः ॥ १२ ॥

रा० टी०-य इति । मुनिमुख्यस्य वचनं यच्चवेक्षसे मन्यसे तदा भवेत्कुर्वित्यर्थः ननु किंतद्वचनमित्यत आह यः शृणोति आवयोरेकान्तवचनमिति शेषः निरीक्षेद्वा वक्तृश्रोतारावावामिति शेषः स तव वध्यो भविता भवेत् ॥ १२ ॥

गो० टी०-य इति । अस्मद्वचनं निरीक्षेत् मन्त्रयितारौ (?) स तव वध्यः । कथमेवमतिक्रूरसंकेत इत्यत्राह-भवेदिति । तस्य मुनिमुख्यस्य वचनमित्थं संकेतपूर्वकम् वदंति चोदितवानित्यर्थः ॥ यच्चपेक्षस इति । तथा संकेतपरिपालनमिति शेषः ॥ १३ ॥

१३] ति० टी०-प्रतिहारं द्वारपालं विसर्जयान्यतो ऽपसारय ॥ १३ ॥

रा० टी०-तथेति । रामोऽब्रवीत् तदाकारमाह प्रतिहारं द्वारपालं विसर्जय ॥ १३ ॥

गो०टी०-स इति । प्रतिहारं विसर्जय अन्यतोपसारय १४

१४] ति० टी०-किमर्थं तत्राह—स मे इति । सौमित्रे मम ऋषेश्च द्वन्द्वं रहस्यां वाचं यः शृणुयाच्च नौ पश्येद्वा स मे मया वध्य इति खलु समीरितं प्रतिज्ञातम् ॥ १४ ॥

रा० टी०-स्थितेः प्रयोजनमाह—स इति । ऋषेर्मम च द्वन्द्वं परस्परं समीरितां वाचं यः शृणुयात् पश्येद्वा स मे वध्यो भवेत् पश्येद्वेत्यत्र उच्चारयिताराविति प्रत्यासत्या लभ्यते ॥ १४ ॥

गो० टी०-स म इत्यादि । हे सौमित्रे ! ऋषेर्मम च कथाद्वन्द्वं कथारहस्यम् । वाचं द्वन्द्वमिति च पाठः । यः शृणुयात् ॥ १५ ॥

१५] ति० टी०-संग्रहं सम्यगुक्तार्थग्रहणवन्तम् ॥ १५ ॥

रा० टी०-तत इति । संग्रहं स्वोक्तिसंग्रहकारकं लक्ष्मणं काकुत्स्थो द्वारि निक्षिप्य तं दृतमुवाच तदाकारमाह मुनेर्वाक्यं कथयस्वेति ॥ १५ ॥

गो० टी०-तत इति । संग्रहं रक्षितारम् ॥ १५ ॥

१६] ति० टी०-ते मनीषितं येन वा समाहितः प्रेषितस्तस्य मनीषितं कथयस्व । ममापि हृदि वर्तते । किमेवंविधं रहस्यं तदवश्यं मया श्रोतव्यमिति शेषः । यद्वा त्वया वक्ष्यमाणं वैकुण्ठगमनं ममापि हृदि वर्तत इत्यर्थः ॥ १६ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

रा० टी०-यदिति । यद्वाक्यं ते मनीषितं विचारितं येन हेतुना त्वं समाहितः इहागतः तं हेतुं च कथयस्व ममापि हृदि वर्तते तव प्रार्थनीयमिति शेषः ॥ १६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे त्र्यधिकशततमः सर्गः ॥ १०३ ॥

गो० टी०-यदिति । समाहितः । ममापि हृदि वर्तत इति । एवंविधं रहस्यं तन्मयापि श्रोतव्यमित्यर्थः । अहमपि जानामीत्यर्थः ॥ १७ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

१] ति० टी०-अथ ब्रह्मसंदेशकथनम्—शृण्विति । यत्संदेशकथनार्थमहमागतस्तं संदेशं शृणु । किंच येन संदेशः प्रेषितः स भगवान्पितामह एव न केवलं मुनिरेवेत्याह—पितामहेनेति ॥ १ ॥

रा० टी०-रामाज्ञापनानन्तरकालिकं वृत्तमाह—शृण्वित्यादिभिः । पितामहेन प्रेषितो यदर्थमहमागतोस्मि तच्छृणु १

गो० टी०-शृणु राजन्नित्यादि । येन संदेशः कृतः स पितामह एवेत्याह-पितामहेनेति ॥ १ ॥

२] ति० टी०-तत्प्रेषितदूतोऽप्यहं त्वत्संबन्ध्येवे-

१ कथा द्वन्द्वसमीरितमिति गो. पाठः । द्वंद्वं समीरितामिति रा. पाठः । २ पूर्वसङ्गावे इति गो. पाठः

पितामहश्च भगवानाह लोकपतिः प्रभुः । समयस्ते कृतः सौम्य लोकान्संपरिरक्षितुम् ॥ ३ ॥
संक्षिप्य हि पुरा लोकान्मायया स्वयमेव हि । महार्णवे शयानोऽप्सु मां त्वं पूर्वमजीजनः ॥ ४ ॥
भोगवन्तं ततो नागमनन्तमुदकेशयम् । मायया जनयित्वा त्वं द्वौ च सत्त्वौ महाबलौ ॥ ५ ॥
मधुं च कैटभं चैव ययोरस्थिचयैर्वृता । इयं पर्वतसंबाधा मेदिनी चाभवत्तदा ॥ ६ ॥

त्याह--**तवाहं पूर्वके भावे इति** । पूर्वावस्थायां हिरण्यगर्भोत्पत्तिसमये हिरण्यगर्भावस्थायां वा । कथमहं पुत्रस्तत्राह—मायासंभावितो मायया संकल्पेन संभावित उत्पादितः । सर्वसमाहरः सर्वसंहारकर्तेति तीर्थः । कतकस्तु—'तवाहं पूर्वसद्भावे' इति पाठः । पूर्वं सृष्टेः प्राक्सद्भावे 'सदेव सोम्येदमग्र आसीत्' इति श्रुतेः सत्तारूपब्रह्मभावे करिष्यमाणाखिलसंसारस्य सृष्टिस्थितिसंहारनियहानुग्रहलक्षणपञ्चकृत्यनिर्वाहकः कालाख्यः क्षणधारारूपो नाडीदिनपक्षादिविभागनिर्वाहकः पुनो मायासंभावितः । स्वदीयमायापरिणाम इत्यर्थः । शेषं प्राग्वत् । यद्यपि रामो हिरण्यगर्भांशविष्णोरेवावतारस्तथापि तस्य स्वस्वरूपांशेनावृतज्ञानत्वाद्रामदेववदेवं व्यपदेशे न दोष इत्याह । यत्तु कतकेन रुद्रावशब्देन हिरण्यगर्भ उक्तस्तत्तु तुच्छमिति स्पष्टमेवाद्वैतविद्याविदाम् ॥ २ ॥

रा० टी०—नन्वं त्वं कोसीत्यत आह—**तवेति** । पूर्वके प्रथमे भावे उत्पत्तिसमये तव मायया कृपया सम्भावितः उत्पादितः अत एव तव पुत्रः सर्वसमाहरः तवाज्ञानुसारेण सकलसंहारकर्त्ता कालोहमस्मीति शेषः ॥ २ ॥

गो० टी०—अहं च न तापसः किन्तु काल इत्याह—**तवाहमित्यादि** । पूर्वसद्भावे पूर्वजन्मनि. अहं तव पुत्रः । सर्वसमाहरः कालरुद्र इति यावत् । परपुरंजयः त्रिपुरसंहारकः । तवाहं पूर्वके भावे पुत्रः परपुरंजय इति च पाठः । केवलं यमस्य पूर्वभावादुत्थितत्वाभावात्, मायासंभावितः मायया उत्पादितः (?) ॥ २ ॥

३]ति० टी०—एवं स्वस्वरूपमुक्त्वा तत्संदेशमाह—**पितामहश्चेति** । चतुर्मुखाज्जातानां प्रजापतीनां लोकपितृत्वाच्चतुर्मुखः पितामहः । स लोकानां भूरादीनां पतिः पालयिता । स यदाह तद्वदामीति शेषः । तदेवाह—**समयस्ते इति** । 'भवन्तु विगतज्वराः' इत्यन्तो ब्रह्मसंदेशः । लोकान्देवमनुष्यादीन्रावणादितो रक्षितुं यः समयः कृतः । 'दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम्॥' इत्येवंरूपकालविषयः कृतः । स परिपूर्ण इति शेषः ॥ ३ ॥

रा० टी०—आगमनप्रयोजनमाह—**पितामह इति** । पितामह आह तदाकारमाह लोकान्सम्परिरक्षितुं ते त्वया समयः 'दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके पालयन् पृथिवीमिमा' मित्येवंविधः संकेतः कृतः ॥ ३ ॥

गो० टी०—पितामहवाक्यमाह—**पितामहश्चेत्यादि** । स्वान् ब्रह्मलोकादीन् परिरक्षितुं ते समयः । स्वलोकं प्राप्तं समय इत्यर्थः । लोकान्त्संपरिरक्षितुमिति च पाठः ॥ ३ ॥

४] ति० टी०—अथ तत्त्वतो ज्ञानसस्वरूपस्य मम कथं मानुषदेहपरिग्रह इत्यत्र सप्रयोजनं तत्प्रक्रियामाह—**संक्षिप्येति** । पुरा जगत्सृष्टेः पूर्वकाले मायया सर्वसंहारसमर्थस्वशक्त्या संक्षिप्योपसंहृत्य । एतेनाप्रयासेन सकलसंहारकर्तृत्वं ब्रह्मलक्षणमुक्तम् । स्वयमेवेत्यनेनास्य संहारस्य न रुद्रादिद्वारकत्वम् । तेषामपि संहार्यकोटिनिविष्टत्वादिति दर्शितम् । एवं संहारं कृत्वा महदहंकारपञ्चतन्मात्रादिसृष्टिद्वारेणैवं तां सृष्टिं कृत्वा तद्रूपे महार्णवे शयान इत्यनेनैवोदकशायित्वे लब्धे पुनरप्स्विति तदा पृथिवीतत्त्वाद्यभावप्रदर्शनार्थम् । मां पूर्वमजीजनः । 'यो ब्रह्माणं विदधाति पूर्वम्' इति श्रुतेः । हिरण्यगर्भसृष्टिद्वारा ब्रह्माण्डसृष्टौ क्रियमाणायां तदण्डान्ममोद्भव इत्यर्थः ॥ ४ ॥

रा० टी०—ननु तव मम च कस्सम्बन्धः येन तव सन्निधौ संकेतः कृत इत्यत आह—**संक्षिप्येति** । मायया कृपया स्वयमेव लोकान्संक्षिप्य संक्षेपरूपेण कृत्वा महार्णवे अः विष्णुश्शयानो येन स त्वं मामजीजनः त्वन्नाभिकमलद्वारा अजनयः ४

गो० टी०—न केवलं त्वं रक्षकः, किन्तु संहर्ता स्रष्टा चेत्याह—**संक्षिप्येत्यादि** । लोकान् चराचरात्मकाः प्रजाः । मायया विचित्रशक्त्या जनयित्वा । त्वं महाकालाग्निरूपः । सत्त्वौ प्राणिनौ । अजीजन इत्यनुषङ्गः ॥ ४ ॥ ५ ॥

५] ति० टी०—तदुत्पत्तिप्रकारमाह—**भोगवन्तमिति** । ततः परं सृष्टये स्रष्टव्यभूधरणक्षमं भोगवन्तं प्रशस्तभोगमनन्ताख्यं नागमुदकेशयं मायया जनयित्वा तत्र च निर्माय स्थापयित्वा तदुरगेशयनवांस्त्वमभूः । अथ कर्दमप्रायभूविग्रहस्थैर्याय महाबलौ द्वौ सत्त्वौ प्राणिनावजीजनः ॥ ५ ॥

रा० टी०—**भोगवन्तमिति** । भोगवन्तमनन्तं शेषं च जनयित्वा ययोरस्थिचयैर्वृता इयं मेदिनी पर्वतैस्सम्बाधा निविडाभवत् अभवत् तौ मधुं कैटभं च सत्त्वौ जनयित्वा विष्णुकर्णमलादुत्पाद्य च नाभ्यां विष्णुनाभीप्रदेशे उत्पादिते अर्कसंकाशे पद्मे मामप्युत्पाद्य च प्राजापत्यं सर्वं कर्म मयि त्वया निवेशितं प्रकाशितं श्लोकत्रयमेकान्वयि ॥ ५-७ ॥

६] ति० टी०—कौ तौ तत्राह—**मधुं चेति** । तत्र मधुमेदःप्रधानः, कैटभोऽस्थिप्रधानः । तत्सृष्टिप्रयोजनमाह—**ययोरित्यादि** । ययोर्वपानन्तरमियं निर्मिता भूरस्थिचयैर्वृता सती

१ स्वान्लोकान्परिरक्षितुमिति गो. पाठः

पद्मे दिव्येऽर्कसंकाशे नाभ्यामुत्पाद्य मामपि । प्राजापत्यं त्वया कर्म मयि सर्वं निवेशितम् ॥ ७ ॥
सोऽहं संन्यस्तभारो हि त्वामुपास्य जगत्पतिम् । रक्षां विधत्स्व भूतेषु मम तेजस्करो भवान् ॥ ८ ॥
ततस्त्वमसि दुर्धर्षात्तस्माद्भावात्सनातनात् । रक्षां विधास्यन्भूतानां विष्णुत्वमुपजग्मिवान् ॥ ९ ॥
अदित्यां वीर्यवान्पुत्रो भ्रातॄणां वीर्यवर्धनः । समुत्पन्नेषु कृत्येषु तेषां साह्याय कल्पसे ॥ १० ॥
स त्वमुज्जास्यमानासु प्रजासु जगतोवर । रावणस्य वधाकाङ्क्षी मानुषेषु मनोऽदधाः ॥ ११ ॥
दशवर्षसहस्राणि दशवर्षशतानि च । कृत्वा वासस्य नियमं स्वयमेवात्मना पुरा ॥ १२ ॥

पर्वतसंबाधा मेदोयुक्ततया दृक्षायुत्पत्युचितस्निग्धभूप्रदेशयुक्ततया मेदिनीति नाम्नाभूत् । एवं च तस्याः प्रजासर्गयोग्यता सिद्धा ॥ ६ ॥

गो० टी०–का तावित्यत आह–मधुं च कैटभं चैवेति । तत्र मधुः जलोत्पन्नमकरादिवत् मेदःप्रधानः । कैटभस्तु कमठशुक्त्यादिवत् अस्थिप्रधानः । तत्सृष्टिप्रयोजनमाह–ययोरित्यादि । ययोरस्थिचयैर्वृता इयं मही पर्वतसंबाधा मती मेदिनी तन्मेदोयुक्ता । प्रृषोदरादित्वात्सकारलोपः । अस्थिचयैः शिलापर्वतस्थितिहेतुभूता मेदोमयत्वाद्बृक्षलतायुत्पत्तिहेतुर्मृद्प्रदेशाचाभूदित्यर्थः ॥ ६ ॥

७] ति० टी०–अथ चतुर्मुखसृष्टिः—पद्म इति । ततः स्वनिर्मितोरगशयस्वविग्रहस्य नाभिप्रदेशेऽर्कसंकाशमर्कप्रभं दिव्यं पद्ममुपाय तस्मिन्दिव्ये पद्मे मां चतुर्मुखमुत्पाय प्राजापत्यं सृष्टिरूपं कर्म मयि त्वया निवेशितमित्यन्वयं मे प्रजापतिरिति नाम ॥ ७ ॥

गो० टी०–मां त्वं पूर्वमजीजन इत्येतद्विवृणोति–पद्म इत्यादि । नाभ्यां वर्तमाने पद्मे नाभिकमले मामुत्पाय, मयि प्राजापत्यं प्रजापतित्वं निवेशितम् । मम प्रजापतित्वं दत्तवानसीत्यर्थः ॥ ७ ॥

८] ति० टी०–ततः सोऽहं त्वया संन्यस्तभारः संन्यस्तसृष्टिभारः स्वकार्यं सृष्टिलक्षणं संपाद्य तद्रक्षणमपश्यञ्जगत्पतिं त्वामुपास्य यतो भवान्मम तेजस्करः सृष्टिसमर्थज्ञानक्रियाशक्तिमयतेजःप्रदोऽभूः, अतस्त्वमेव भूतेषु रक्षां विधत्स्वेति प्रार्थितवानिति शेषः ॥ ८ ॥

रा० टी०–स इति । सः त्वन्निवेशितकर्मा अत एव संन्यस्तः संस्थापितः भारो यस्मिन् सोहं त्वामुपास्य वर्त इति शेषः अतः भूतेषु रक्षां त्वं विधत्स्व ननु रक्षाकरणे त्वमेव समर्थोसीत्यत आह मम तेजस्करो भवानेव ॥ ८ ॥

गो० टी०–सोहमिति । त्वयि संन्यस्तभारः अहं त्वामुपासे निरन्तरं चिन्तयामि । भूतेषु मत्सृष्टेषु रक्षां विधत्स्व ॥ ८ ॥

९] ति० टी०–ततो हेतो रक्षणस्य सर्वशक्तौ त्वय्येव निवेशितत्वहेतोः । दुर्धर्षात्तस्माद्भावात् 'ब्रह्मैव भूतानां ज्येष्ठम् । तेन कोऽईति स्पर्धितुम्' इति दुर्धर्षत्वस्वभावात् । सनातनात्सकलसंसारमूलकारणत्वेन कालापरिच्छेद्यात् । त्रिगुणमहत्तत्वाख्यहैरण्यगर्भभावात्सत्त्वप्राधान्येन विष्णुत्वं प्राप्तवान् ॥ ९ ॥

रा० टी०–ननु भवतामेव तेजस्करत्वेन प्रसिद्धत्वात् कथमहं तव तेजस्कर इत्यत आह–तत इति । दुर्धर्षात् सनातनात् सनस्य ब्रह्मणोपि आतनात् विस्तारकत्वाद्धेतोः भूतानां रक्षां विधास्यन् त्वमेव विष्णुत्वं पालनशक्तिमुपजग्मिवान् विष्णौ प्राप्तिवान् असि अत एव भ्रातॄणां वीर्यवर्द्धनः अत एव वीर्यवान् योऽदित्यां पुत्रो विष्णुस्तं कृत्येषु समुत्पन्नेषु सत्सु तेषां भ्रातॄणामिन्द्रादीनां साह्याय साहाय्याय कल्पसे प्रवर्तयसि श्लोकद्वयमेकान्वयि ॥ ९–१० ॥

गो० टी०–तत इति । ततः मत्कृतभारसमर्पणेन दुर्धर्षात् दुर्ज्ञेयात्, सनातनात्नित्यात्, भावात् परवासुदेवस्वभावात्स्वभूतानां रक्षार्थं विष्णुत्वमुपजग्मिवान् प्राप्तवान् । रक्षां विधास्यन् भूतानामिति च पाठः । यद्वा सनातनात्तस्मात् वासुदेवविग्रहात्, अदित्यां विष्णुत्वमुपजग्मिवानित्यर्थः । परवासुदेवस्त्वं प्रथमं ब्रह्मरुद्रमध्ये आदिविष्णुतयावतीर्णोसीत्यर्थः ॥ ९ ॥

१०] ति० टी०–ततोऽदित्यां वीर्यवान्दिव्यज्ञानक्रियालक्षणवीर्यवान्पुत्रोऽभूस्त्वं भ्रातॄणामदितिपुत्रेन्द्रादीनां वीर्यवर्धनः उपेन्द्राख्योऽभूः स च तत्तत्कृत्यकाले तेषां साह्याय कल्पसे॥१०॥

गो० टी०–अथ तस्मादुपेन्द्रावतारमाह–अदित्यामिति । भ्रातॄणामिन्द्रादीनाम् वीर्यवर्धनः सन् लोकस्य कृत्येषु रक्षणकार्येषूत्पन्नेषु साह्याय तत्संपादनयोग्यत्वाय कल्पसे । ततो लोकसंरक्षणार्थमुपेन्द्रोभूरित्यर्थः ॥ १० ॥

११–१२]ति० टी०–अतः स त्वं सकलप्रजारक्षणासाधारणकृत्य उपेन्द्रः सांप्रतं रावणेन प्रजासूज्जास्यमानासु हिंस्यमानासु हे जगतोवर जगच्छ्रेष्ठ स्वयमेव सर्वलोकानुग्रहाय रावणस्य वधाकाङ्क्षी भूत्वा दशवर्षसहस्राणि दशवर्षशतानि च वासस्य नियमं परिच्छेदं पुरात्मना स्वयमेव कृत्वा मानुषेषु मानुषभावेषु मनोऽदधाः ॥ ११ ॥ १२ ॥

रा० टी०–स इति सः । विष्ण्वादीनामपि प्रवर्तकः त्वं प्रजासु विनाश्यमानासु सतीषु रावणस्य वधाकाङ्क्षी सन् दशवर्षसहस्राणि त्रिंशत्सहस्रसंख्याकवर्षाणि दशवर्षशतानि त्रिसहस्रसंख्याकवर्षाणि च स्वयमेव वासस्य नियमं कृत्वा

१ उपासे इति गो. पाठः । २ रक्षाय सर्वभूतानामिति गो. पाठः । ३ विनाश्यमानासिति गो. रा. पाठः । ४ नियतिमिति गो. पाठः ।

स त्वं मनोमयः पुत्रः पूर्णायुर्मानुषेष्विह । कालो नरवरश्रेष्ठ समीपमुपवर्तितुम् ॥ १३ ॥
यदि भूयो महाराज प्रजा इच्छस्युपासितुम् । वस वा वीर भद्रं ते एवमाह पितामहः ॥ १४ ॥
अथ वा विजिगीषा ते सुरलोकाय राघव । सनाथा विष्णुना देवा भवन्तु विगतज्वराः ॥ १५ ॥
श्रुत्वा पितामहेनोक्तं वाक्यं कालसमीरितम् । राघवः प्रहसन्वाक्यं सर्वसंहारमब्रवीत् ॥ १६ ॥
श्रुत्वा मे देवदेवस्य वाक्यं परममद्भुतम् । प्रीतिर्हि महती जाता तवागमनसंभवा ॥ १७ ॥
त्रयाणामपि लोकानां कार्यार्थं मम संभवः । भद्रं तेऽस्तु गमिष्यामि यत एवाहमागतः ॥ १८ ॥

स्वं मानुषेषु लोकेषु मनोऽदधाः वस्तुमिति शेषः । श्लोकद्वयमेकान्वयि ॥ ११-१२ ॥

गो० टी०-एवं महाविष्णुरूपादुपेन्द्रावतारमुक्त्वा पुरस्तादावतारमाह-स त्वमिति । हे जगतां वर ! प्रजासु वित्रास्यमानासु सतीषु रावणस्य वधाकाङ्क्षी सन् । स त्वमुज्जास्यमानासु प्रजासु जगतो वरेति च पाठः । आत्मना स्वातन्त्र्येण स्वयमेव पुरा दशवर्षसहस्राणि दशवर्षशतानि च, वासस्य नियतिं वासस्य नियमम् कृत्वा । वासस्य नियममिति च पाठः । मानुषेषु मनोदधा इति श्लोकद्वयमेकान्वयम् ॥ ११॥१२

१३] ति० टी०-स त्वं मानुषेषु मनोमयः स्वसंकल्पमयः स्वसंकल्पादेव कस्यचित्पुत्रो जातः स च तत्र पूर्णायुः । त्वत्संकल्पितायुषः पूर्णत्वमित्यर्थः । यद्वा श्रीमदादिगुरोस्तुरीयब्रह्मणः 'यस्य भासा सर्वमिदं विभाति' इत्यादिश्रुतिसिद्धस्य संकल्पमयो ज्येष्ठपुत्रो हिरण्यगर्भः कार्यब्रह्मरूपस्तदभिन्नस्वभूतब्रह्मण्यनावृतज्ञानः स्वसंकल्पादेव मानुषेष्वपि कस्यचित्पुत्रस्तत्रापि पूर्णायुर्जातः । यदेवमतः हे नरवरश्रेष्ठ ! अयं कालस्ते समीपमुपगत्योपवर्तितुं विज्ञापयितुं प्रेषित इति शेषः ॥ १३ ॥

रा० टी०-स इति । सः कृतवासनियमः मनोमयः प्राकृतमनसामविषयः पुत्रः दशरथनित्यसूनुस्त्वं मानुषेषु लोकेषु पूर्णायुः समापितस्वकृतवासावधिरसीति शेषः अतः अनुवर्तितुं संस्मारयितुमित्यर्थः समीपं त्वत्सन्निधिं कालः त्वदाज्ञानुसारी समयविशेषः ब्रह्मणा प्रेषितोऽहमस्मीति शेषः ॥१३॥

गो० टी०-स त्वमिति । स त्वमुपेन्द्रो भूत्वा यतमानस्त्वं, मनोमयः पुत्र इच्छाकृतदशरथपुत्रभावः । स त्वं पूर्णायुरसि, संकल्पितकालस्य निवृत्तत्वादिति भावः । अतो मत्समीपमुपवर्तितुं प्राप्तुमयं कालः समयः ॥ १३ ॥

१४] ति० टी०-अस्मत्कृत्यमेतावत् । अतः परं त्वं स्वतन्त्रत्वाद्यदि भूयोऽपि प्रजा उपासितुमिह स्थित्वा रक्षितुमिच्छसि तदा हे वीर राम, वस ॥ १४ ॥

रा० टी०-यदिति । प्रजाः मानुषजनान् यदि भूयोऽधिकमुपासितुमिच्छसि तर्हि वस एवं पितामह आह ॥ १४ ॥

गो० टी०-यदीति । उपासितुं रक्षितुम् । तव स्वतन्त्रत्वादिति भावः ॥ १४ ॥

१५] ति० टी०-अथवाथ चेत्स्वकृतनियममङ्गीकृत्य सुरलोकाय विजिगीषा सुरलोकं पालयितुं यदीच्छा तदोपेन्द्ररूपेण विष्णुना देवाः सनाथा विगतज्वरा भवन्त्वित्येवं पितामहः आहेत्यन्वयः ॥ १५ ॥

रा० टी०-नन्वु स्वकृतनियमं न हास्यामीत्यत आह-अथवेति । अथवा साकेतलोकजिगमिषायामित्यर्थः सुरलोकाय सुरलोकं द्रष्टुं यदि ते विजिगीषा तदा विष्णुना सह देवास्सनाथा भवन्तु एतेन स्वर्गमार्गेणैव साकेतो गन्तव्य इति ब्रह्मणः प्रार्थना व्यञ्जिता ॥ १५ ॥

गो० टी०-अथवेति । भूलोकं विहाय स्वर्गलोकाय विजिगीषा चेत्तदा विष्णुना पुनर्विष्णुत्वं प्राप्तेन त्वया देवाः सनाथाः सन्तो विगतज्वराः भवन्तु । भवदागमनमेव समस्तदेवसुखकरं स्यादिति भावः ॥ १५ ॥

१६] ति० टी०-कालसमीरितं दूतरूपकालोक्तम् । प्रहसन्निति । अहमेव स्वकृतमर्यादां न त्यक्ष्यामि । वृथायं संभ्रमः पितामहस्येति हासः । सर्वसंहारं कालम् ॥ १६ ॥

रा० टी०-श्रुत्वेति । कालेन समीरितं कथितं पितामहोक्तं वाक्यं श्रुत्वा राघवः सर्वसंहारं कालमब्रवीत् ॥ १६ ॥

गो० टी०-श्रुत्वेति । प्रहसन्निति । स्वयमेवोपयुक्तस्य पितामहोक्त्या प्रहासः । सर्वसंहारं रुद्रम् ॥ १६ ॥

१७] ति० टी०-देवदेवस्य सर्वदेवोपास्यस्य । परममद्भुतं परमं मदभिप्रायप्रकाशकत्वात् । वाक्यं श्रुत्वा महती प्रीतिर्जाता । तवागमनसंभवा च महती प्रीतिर्जाता ॥ १७ ॥

रा० टी०-श्रुत्वेति । देवदेवस्य देवानां पूज्यस्य ब्रह्मणो वाक्यं श्रुत्वा तवागमनेन संभवः उत्पत्तिर्यस्याः सा मे प्रीतिर्महती जाता प्रीतिर्जातेत्यनेन ममापि तदीप्सितमिति सूचितम् ॥ १७ ॥

गो० टी०-श्रुत्वेति । तवागमनसंभवा प्रीतिर्महती जायत इति योज्यम् ॥ १७ ॥

१८] ति० टी०-एवं संदेशानुमोदनं कृत्वा प्रतिसंदेशमाह-त्रयाणामिति । त्रयाणां भूर्भुवःस्वर्लोकानां कार्यार्थं प्रयोजनार्थं मम स्वेच्छामूलः संभव इति मयाप्यवगम्यते । यद्वा तत्तद्वेषधार्यपि नटस्तत्तद्वेषानुरूपं व्यवहरत्प्यात्मानं जानात्येव, तद्वत्सोऽहं यतो यस्माल्लोकादिहागतस्तमेव गमिष्यामि ॥ १८ ॥

रा० टी०-त्रयाणामिति । मम संभवः प्राकट्यं

१ त्वयं नरश्रेष्ठेति गो. पाठः ।

हृद्गतो ह्यसि संप्राप्तो न मे तत्र विचारणा । मया हि सर्वकृत्येषु देवानां वशवर्तिनाम् ॥
स्थातव्यं सर्वसंहार यथा ह्याह पितामहः । ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुरधिकशततमः सर्गः ॥ १०४ ॥

पञ्चाधिकशततमः सर्गः ।

तापसरामयो रहसि भाषमाणयोर्दुर्वासा आगत्य रामं दिदृक्ष इति द्वारस्थं लक्ष्मणमभाषत रामप्रतिज्ञां जानन्नपि मुनिशापभीतो लक्ष्मणोऽग्रजं न्यवेदयत् स तु तमृषिं यथेष्टभोजिनं विसृज्य लक्ष्मणकृतं स्वप्रतिज्ञाभङ्गं विचिन्त्य दीनमुखो बभूव ।

तथा तयोः संवदतोर्दुर्वासा भगवानृषिः । रामस्य दर्शनाकाङ्क्षी राजद्वारमुपागमत् ॥ १ ॥
सोऽभिगम्य तु सौमित्रिमुवाच ऋषिसत्तमः । रामं दर्शय मे शीघ्रं पुरा मेऽर्थोऽतिवर्तते ॥ २ ॥
मुनेस्तु भाषितं श्रुत्वा लक्ष्मणः परवीरहा । अभिवाद्य महात्मानं वाक्यमेतदुवाच ह ॥ ३ ॥
किं कार्यं ब्रूहि भगवन्को ह्यर्थः किं करोम्यहम् । व्यग्रो हि राघवो ब्रह्मन्मुहूर्तं परिपाल्यताम् ॥ ४ ॥
तच्छ्रुत्वा ऋषिशार्दूलः क्रोधेन कलुषीकृतः । उवाच लक्ष्मणं वाक्यं निर्दहन्निव चक्षुषा ॥ ५ ॥

त्रयाणां लोकानां कार्यार्थं एव अतः यतोहमागतः तत्र गमिष्यामि तेऽपि भद्रमस्त्वित्यनेन त्वल्लोकमार्गेणैव गमिष्यामीति सूचितम् ॥ १८ ॥

गो० टी०–एवं पितामहसन्देशं श्रुत्वा प्रतिसन्देशमाह–त्रयाणामित्यादि । यत एवाहमागतः तदेव स्थानं गमिष्यामि ॥ १८ ॥

१९] ति० टी०–हे संहाररूप काल ! त्वं मे हृद्गत एव प्राप्तोऽसि । अतस्तत्र गमने विचारणा नास्ति । 'हृद्गतो ह्यसि संप्राप्तः' इति पाठे यो भावो मम हृदि गतः शुद्धब्रह्मात्मकः प्राप्तव्यत्वेन स मे प्राप्त एवास्ति, तत्र मे न विचारणा । ननु तर्हि तदेव प्राप्यतां किमनेनोपेन्द्रादिलोकगमनेन तत्राह—मया हीति । वशवर्तिनां मद्विधेयानां सर्वकृत्येषु स्थातव्यम्, अतो यथा पितामह आह तथा करिष्यामीति शेषः । 'वशवर्तिना' इति तृतीयान्तपाठे देवानां सर्वकृत्येषु पितामहस्य वशवर्तिना स्थातव्यमित्यर्थः । प्रजारक्षणोद्देश्यकतपःकालिकमद्वरप्रदानादिति भावः १९॥

इति श्रीरामाभिरामे श्रीरामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे चतुरधिकशततमः सर्गः ॥१०४॥

रा० टी०–कालं प्रत्याह–त्वदिति । हृदि गतः हृदयेन चिन्तित एवं त्वं संप्राप्तः अतः तत्र गमने मे विचारणा संशयो न गमिष्याम्येवेत्यर्थः हि यतः देवानां सर्वकृत्येषु मया स्थातव्यम् पितामहश्च तथैवाह सार्द्धश्लोक एकान्वयी ॥ १९ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे चतुरधिकशततमस्सर्गः ॥ १०४ ॥

गो० टी०–त्वदिति । त्वद्गतो मम संप्राप्तः । मम त्वदि यद्वर्तते तदेव पितामहेन प्रेषितमित्यर्थः । अत्र गमने विषये मे विचारणा नास्ति । ब्रह्मयाञ्चयैव ममात्रावतरणमित्याह–मया हीति । देवानां वशवर्तिना भक्तपरतन्त्रेण मया, पितामहो देवेष्वन्यतमः यथाह, तथा मया सर्वकृत्येषु स्थितिगमनादिषु स्थातव्यम् । तत्रातिक्रमणीयमित्यर्थः । अनेन ब्रह्मणः सृज्यत्वकथनात्परतत्त्वशङ्का निवृत्ता ॥ १९ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

१] ति० टी०–एवं द्वन्द्वकथासमये कालात्मकभगवत्प्रेरणया दुर्वाससः आगमनम्—तथेति ॥ १ ॥

रा० टी०–दुर्वाससः आगमनादि वर्णयति–तथेत्यादिभिः । दुर्वासा राजद्वारमुपागमत् ॥ १ ॥

गो० टी०–तथेत्यादि ॥ १ ॥

२–३] ति० टी०–मेऽर्थोऽतिवर्ततेऽतिक्रामति, अतः पुरा पूर्वमेव शीघ्रं रामं दर्शय ॥ २–३ ॥

रा० टी०–स इति । स दुर्वासः पुरा सकलप्रयोजनपूर्त्योपलक्षितं रामं दर्शय मेऽर्थः प्रयोजनम् निवर्त्तते अतिक्रान्तो भवति इति वचनं सौमित्रिमुवाच ॥ २ ॥

रा० टी०–मुनिरिति । लक्ष्मणः एतद्वाक्यमुवाच ॥३॥

गो० टी०–स इति । पुरा मेऽर्थोऽतिवर्तत इति । यावन्मे प्रयोजनमतिक्रामति ततः पूर्वमेव रामं शीघ्रं दर्शयेत्यर्थः ॥ २ ॥३॥

४–५] ति० टी०–किं कार्यं वक्तव्यं कोऽर्थः किं प्रयोजनम् किं करोमि । वर्तमानसामीप्ये लट् । किं करिष्ये । कस्त एवं संकटकालस्तत्राह—व्यग्रो हीति ॥ ४–५ ॥

रा० टी०–तदाकारमाह–किमिति । राघवो मुहूर्त्तव्यग्रः अतः अहं किं करोमि किंचिदपि कर्तुं न समर्थ इत्यर्थः अतः मया किं कार्यं तत्त्वं ब्रूहि तवापि वक्तुं न योग्य इत्यर्थः अतः मुहूर्त्तं परिपाल्यताम् कोऽर्थः प्रयोजनम् सोऽप्युच्यतामित्यर्थः ॥ ४ ॥

रा० टी०–तदिति । ऋषिशार्दूलः लक्ष्मणमुवाच ॥ ५ ॥

---

१ वर्तिनेति गो. पाठः । २ वार्य इति गो. पाठः । ३ प्रतीति गो. पाठः ।

अस्मिन्क्षणे मां सौमित्रे रामाय प्रतिवेदय । [अस्मिन्क्षणे मां सौमित्रे न निवेदयते यदि ।]
विषयं त्वां पुरं चैव शपिष्ये राघवं तथा । ॥ ६ ॥
भरतं चैव सौमित्रे युष्माकं या च संततिः । नै हि शक्ष्याम्यहं भूयो मन्युं धारयितुं हृदि ॥ ७ ॥
तच्छ्रुत्वा घोरसंकाशं वाक्यं तस्य महात्मनः । चिन्तयामास मनसा तस्य वाक्यस्य निश्चयम् ॥ ८ ॥
एकस्य मरणं मेऽस्तु मा भूत्सर्वविनाशनम् । इति बुद्ध्या विनिश्चित्य राघवाय न्यवेदयत् ॥ ९ ॥
लक्ष्मणस्य वचः श्रुत्वा रामः कालं विमृश्य च । निःसृत्य त्वरितो राजा अत्रेः पुत्रं ददर्श ह ॥ १० ॥
सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा । किं कार्यमिति काकुत्स्थः कृताञ्जलिरभाषत ॥ ११ ॥
तद्वाक्यं राघवेणोक्तं श्रुत्वा मुनिवरः प्रभुः । प्रत्याह रामं दुर्वासाः श्रूयतां धर्मवत्सल ॥ १२ ॥
अद्य वर्षसहस्रस्य समाप्तिर्मम राघव । सोऽहं भोजनमिच्छामि यथासिद्धं तवानघ ॥ १३ ॥
तच्छ्रुत्वा वचनं राजा राघवः प्रीतमानसः । भोजनं मुनिमुख्याय यथासिद्धमुपाहरत् ॥ १४ ॥
स तु भुक्त्वा मुनिश्रेष्ठस्तदन्नममृतोपमम् । साधु रामेति संभाष्य स्वमाश्रममुपागमत् ॥ १५ ॥
[तस्मिन् गते मुनिवरे स्वाश्रमं लक्ष्मणाग्रजः ।]
संस्मृत्य कालवाक्यानि ततो दुःखमुपागमत् । दुःखेन च सुसंतप्तः स्मृत्वा तद्घोरदर्शनम् ॥ १६ ॥

गो० टी०–किं कार्यमिति । किं कार्यं किं कर्तव्यं, को वार्थः किं प्रयोजनम्, अहमस्मिन् काले किं करोमि । वर्तमानसामीप्ये भविष्यति लट् । किं करिष्ये ॥ ४ ॥ ५ ॥

६–८] ति० टी० रामाय प्रतिवेदय । यदि न प्रतिवेदयेस्तर्हि विषयादिकं शपे इत्यर्थः ॥ ६–८ ॥

रा० टी०–तदाकारमाह—**अस्मिन्नित्यादिभिः** । अस्मिन् क्षणे एव मां रामाय प्रतिवेदय बोधय हि यतः मन्युं हृदि धारयितुं नियन्तुं अहं न शक्ष्यामि ॥ ६ ॥

रा० टी०–ननु किं मन्युनेत्यत आह—**विषयमिति** । विषयादीन् युष्माकं या सन्ततिस्तां च शपिष्ये विनाशयिष्ये इत्यर्थः ॥ ७ ॥

रा० टी०–**तदिति** । तस्य दुर्वाससः वाक्यस्य निश्चयं चिन्तयामास लक्ष्मण इति शेषः ॥ ८ ॥

गो० टी०–अस्मिन्निति । मां राघवाय निवेदयेति । न निवेदयसि यदि तर्हि शपिष्य इति ॥ ६–१२ ॥

९–१२] ति० टी०–एकस्य मरणं मेऽस्तु । द्वन्द्वमध्ये पुरुषान्तरसंदर्शकत्वे यथाप्रतिज्ञं मम वधस्य प्राप्तत्वादिति भावः ॥ ९–१२ ॥

रा० टी०–चिन्ताकारमाह—**एकस्येति** । एकस्यैव मे मरणमस्तु निवेदने ममैव विनाशो भविष्यतीत्यर्थः सर्वस्य विनाशनं माभूत् निवेदनाभावे सर्वेषां विनाशो भविष्यतीत्यर्थः इति निश्चित्य न्यवेदयत् ॥ ९ ॥

रा० टी०–**लक्ष्मणस्येति** । रामः अत्रेः पुत्रं दुर्वाससं ददर्श ॥ १० ॥

रा० टी०–**स इति** । कृताञ्जलिः काकुत्स्थः मया किं कार्यमित्यभाषत ॥ ११ ॥

रा० टी०–**तदिति** । दुर्वासाः श्रूयतामिति रामं प्रत्याह ॥ १२ ॥

१३] ति० टी०–वर्षसहस्रस्य । अनशननियमपरिगृहीतवर्षसहस्रस्येत्यर्थः । यथासिद्धं यथोपपन्नम् ॥ १३ ॥

रा० टी०–तदाकारमाह—**अद्येति** । मम वर्षसहस्रस्य वर्षसहस्रसंख्यातानशनव्रतस्याद्य समाप्तिः अतः सः वर्षसहस्रपर्यन्तं कृतोपवासोऽहम् सिद्धं भोजनमिच्छामि ॥ १३ ॥

गो० टी०–अद्येत्यादि । वर्षसहस्रस्येति । अनशननियमोपगृहीतवर्षसहस्रस्येत्यर्थः यथासिद्धं यथोपपन्नम् ॥ १३ ॥

१४–१५] ति० टी०–राघवः प्रीतमानसः । मुनिकोपः परिहृत इति प्राप्तसंतोषः ॥ १४–१० ॥

रा० टी०–**तदिति** । राघवः मुनिमुख्याय यथावत्सिद्धं भोजनमुपाहरत् ॥ १४ ॥

रा० टी०–**स इति** । अमृतोपमं तदन्नं भुक्त्वा साधु रामेति संभाष्य उपागमत् ॥ १५ ॥

गो० टी०–तच्छ्रुत्वेति । राघवः प्रीतमानस इति । मुनिकोपः परिहृत इति प्राप्तसंतोष इत्यर्थः ॥ १४–१७ ॥

१६] ति० टी०–ततोऽनन्तरं कालवाक्यानि मन्त्रश्रोतुरावयोर्द्रष्टुश्च वधविषयकाणि ॥ १६ ॥

रा० टी०–**संस्मृत्येति** । ततः दुर्वासोगमनानन्तरं कालवाक्यानि यः पश्यति स न भविष्यति इत्यादिवचनानि संस्मृत्य दुःखमुपागमत् राम इति शेषः अर्द्धं पृथक्—

१ प्रतिपादयेति गो. पाठः २ इदमर्धमधिकं गो. पु. । ३ इदमर्धम् "अस्मिन्क्षणे मां सौमित्रे" इति षष्ठपद्यपूर्वार्धोत्तरं दृश्यते गो. पु. । ४ एभुपेति गो. पाठः । ५ तपसो संपन्न इति गो. पा. । ६ इदमर्धमधिकं गो. पुस्त. ।

अवाङ्मुखो दीनमना व्याहर्तुं न शशाक ह । ततो बुद्ध्या विनिश्चित्य कालवाक्यानि राघवः ॥
नैतदस्तीति निश्चित्य तूष्णीमासीन्महायशाः । ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

षडुत्तरशततमः सर्गः ।

कृतप्रतिज्ञाभङ्गमात्मानं प्रेक्ष्यावाङ्मुखं दीनमव्रज "जहि मां सौम्य विस्रब्धं प्रतिज्ञां परिपालय । हीनप्रतिज्ञाः काकुत्स्थ प्रयान्ति नरकं नरा" इत्यादि लक्ष्मणेनोक्तो रामः कथमपि वसिष्ठामात्यादिसंमत्या तं व्यसृजत् ततः सरयूतीरे सर्वस्रोतांसि निगृह्य निरुद्धश्वासं तं शक्रादयः सशरीरं स्वर्निन्युस्तत्र तेबहु तं सत्कृतवन्तश्च ।

अवाङ्मुखमथो दीनं दृष्ट्वा सोममिवाप्लुतम् । राघवं लक्ष्मणो वाक्यं हृष्टो मधुरमब्रवीत् ॥ १ ॥
न संतापं महाबाहो मदर्थं कर्तुमर्हसि । पूर्वनिर्माणबद्धा हि कालस्य गतिरीदृशी ॥ २ ॥
जहि मां सौम्य विस्रब्धं प्रतिज्ञां परिपालय । हीनप्रतिज्ञाः काकुत्स्थ प्रयान्ति नरकं नराः ॥ ३ ॥
यदि प्रीतिर्महाराज यद्यनुग्राह्यता मयि । जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव ॥ ४ ॥
लक्ष्मणेन तथोक्तस्तु रामः प्रचलितेन्द्रियः । मन्त्रिणः समुपानीय तथैव च पुरोधसः ॥ ५ ॥
अब्रवीच्च तदा वृत्तं तेषां मध्ये स राघवः । दुर्वासोऽभिगमं चैव प्रतिज्ञां तापसस्य च ॥ ६ ॥

दुःखेनेति । घोरदर्शनं तल्लक्ष्मणवियोगाभासं संस्मृत्य निश्चित्य दुःखेन सुसंतप्तः अत एव दीनमनाः अत एव अवाङ्मुखः रामः व्याहर्तुं न शशाक ॥ १६ ॥

१७] ति० टी०—कालवाक्यानि बुद्ध्या निश्चित्य सभ्रातृभृत्यवर्गस्योपसंहारः कालप्राप्त उचित एवेति निश्चित्य । तन्मम भ्रातृभृत्यादि सर्वं नास्तीति च निश्चित्य तूष्णीमासीत् ॥ १७ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

रा० टी०—तत इति । राघवः कालवाक्यानि विनिश्चित्य एतत्सर्वम् न अस्ति इह स्थास्यति इति निश्चित्य तूष्णीमासीत् ॥ १७ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे पञ्चाधिकशततमः सर्गः ॥ १०५ ॥

गो० टी०—तत इति । ततोऽनन्तरम्, कालवाक्यानि बुद्ध्या विनिश्चित्य सभ्रातृपुत्रभृत्यवर्गस्य मम सर्वोपसंहारकालः प्राप्तः उचित एवेति निश्चित्य, सामान्यतो नैतदस्तीति एतन्मम भ्रातृभृत्यादिपरिकरजातं सर्वमपि नास्तीति चोक्त्वा तूष्णीमासीत् । लक्ष्मणव्यापरायं नोद्भावितवानित्यर्थः ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरा० भूषणे मणिमुकुटाख्याने उ० श्रीरामायणव्याख्याने पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

१] ति० टी०—अथ लक्ष्मणविसर्जनम्—अवाङ्मुखमिति । आप्लुतं राहुग्रस्तम् । हृष्टः । सुमन्त्रवाक्यतः पूर्वमेव रामकर्तव्यस्वपरित्यागस्यावगतत्वाद्विषादरहित इत्यर्थः ॥ १ ॥

रा० टी०—रामं प्रति लक्ष्मणोक्तिमाह—अवाङ्मुखमित्यादिभिः । आप्लुतं राहुणा ग्रस्तं सोममिव दीनं तत्त्वेन प्रतीयमानं राघवं लक्ष्मणोऽब्रवीत् ॥ १ ॥

गो० टी०—अवाङ्मुखमित्यादि । आप्लुतं राहुग्रस्तम् । हृष्ट इति । सुमन्त्रवाक्यतः पूर्वमेव रामेण स्वपरित्यागस्यावगतत्वादविषाद इत्यर्थः ॥ १ ॥

२–४] ति० टी०—तदेवाह—पूर्वेति । पूर्वनिर्माणेन प्राग्भवीयकर्मणा बद्धा कल्पितेदृशी 'संयोगा विप्रयोगान्ता मरणान्तं च जीवितम्' इत्युपदिष्टन्यायवतीत्यर्थः ॥ २–४ ॥

रा० टी०—तदाकारमाह—नेत्यादिभिः । मदर्थं मत्त्यागनिमित्तं संतापं कर्तुं त्वं नार्हसि हि यतः ईदृशी एवं प्रतीयमाना कालस्य समयविशेषस्य गतिः प्राप्तिः पूर्वनिर्माणबद्धा पौर्वकालिकसंकेतसिद्धा ॥ २ ॥

रा० टी०—जहीति । हीनप्रतिज्ञा नराः नरकं प्रयान्ति अतः प्रतिज्ञां स्वकृतनिश्चयं परिपालय अत एव विस्रब्धं यथा भवति तत्तथा मां जहि एतेन त्वत्कर्तृकप्रतिज्ञाया हानौ महाजनो येन गतस्स पंथा इत्यादिरीत्या प्राकृतानामपि प्रतिज्ञायाः हानौ तेषां कल्याणाभावः प्रसज्येत् इति ध्वनितम् ॥३॥

रा० टी०—यदीति । मयि यदि प्रीतिः यद्यनुग्राह्यता स्वत्कर्तृकानुग्रहकर्मता तदा त्वं मां जहि अत एव धर्मं वर्द्धय ४

गो० टी०—नेति । तदेव दर्शयति—पूर्वेत्यादि । पूर्वनिर्माणेन प्राग्भवीयकर्मणा, बद्धा कल्पिता प्रथा । ईदृशीति । "संयोगा विप्रयोगान्ता मरणान्तं च जीवितम्" इत्युपदिष्टन्यायवतीत्यर्थः ॥ २–४ ॥

५–६] ति० टी०—प्रचलितेन्द्रियस्त्यक्तावाङ्मुखमौनतया प्रवृत्तवाग्व्यापारः ॥ ५ ॥ ६ ॥

---

१ पुरोधसमिति गो. पाठः ।

तच्छ्रुत्वा मन्त्रिणः सर्वे सोपाध्यायाः समासत । वसिष्ठस्तु महातेजा वाक्यमेतदुवाच ह ॥ ७ ॥
दृष्टमेतन्महाबाहो क्षयं ते रोमहर्षणम् । लक्ष्मणेन वियोगश्च तव राम महायशः ॥ ८ ॥
त्यजैनं बलवान्कालो मा प्रतिज्ञां वृथा कृथाः । प्रतिज्ञायां हि नष्टायां धर्मो हि विलयं व्रजेत् ॥९॥
ततो धर्मे विनष्टे तु त्रैलोक्यं सचराचरम् । सदेवर्षिगणं सर्वं विनश्येत्तु न संशयः ॥ १० ॥
स त्वं पुरुषशार्दूल त्रैलोक्यस्याभिपालनात् । लक्ष्मणेन विना चाद्य जगत्स्वस्थं कुरुष्व ह ॥ ११ ॥
तेषां तत्समवेतानां वाक्यं धर्मार्थसंहितम् । श्रुत्वा परिषदो मध्ये रामो लक्ष्मणमब्रवीत् ॥१२॥
विसर्जये त्वां सौमित्रे मा भूद्धर्मविपर्ययः । त्यागो वधो वा विहितः साधूनां ह्युभयं समम् १३
रामेण भाषिते वाक्ये बाष्पव्याकुलितेन्द्रियः । लक्ष्मणस्त्वरितः प्रायात्स्वगृहं न विवेश ह ॥ १४ ॥
स गत्वा सरयूतीरमुपस्पृश्य कृताञ्जलिः । निगृह्य सर्वस्रोतांसि निःश्वासं न मुमोच ह ॥१५॥
अनिःश्वसन्तं युक्तं तं सशक्राः साप्सरोगणाः । देवाः सर्षिगणाः सर्वे पुष्पैरभ्यकिरंस्तदा ॥ १६ ॥

रा० टी०–लक्ष्मणेनेति । रामः मन्त्रिणः पुरोधसश्च समुपानीय तेषां मध्ये दुर्वासोऽभिगमं दुर्वासोभिगमहेतुकलक्ष्मणकर्तृकदत्तनिवेदनम् तापसस्य समीपे प्रतिज्ञां च दत्तमब्रवीत् श्लोकद्वयमेकान्वयि ॥ ५ ॥ ६ ॥

गो० टी०–लक्ष्मणेनेति । प्रचलितेन्द्रियः त्यक्तावाङ्मुखमौनतया प्रवृत्तवागादीन्द्रियः ॥ ९–१० ॥

७] ति० टी०–समासत तूष्णीं स्थिताः ॥ ७ ॥

रा० टी०–तदिति । सोपाध्यायाः मन्त्रिणस्समासत तूष्णीं बभूवुः वशिष्ठस्तु एतदुवाच ॥ ७ ॥

८] ति० टी०–दृष्टमेतत्क्षयं क्षय एष दृष्टः । मया तपोबलेनेति शेषः । मां द्रष्टुमागतेन त्वत्पित्रा पृष्टस्य मदाश्रमस्थदुर्वाससो मुखाच्चेति ॥ ८ ॥

रा० टी०–तदाकारमाह—दृष्टमित्यादिभिः । एतत् एवंप्रकारकं ते क्षयं क्षयः साकेतगमनं लक्ष्मणेन वियोगश्च मया दृष्टं प्रादुर्भावान्तरेष्विति शेषः एतेन एवं तव लीला सार्वकालिक्येवेति सूचितम् ॥ ८ ॥

९–१०] ति० टी०–त्यजेत्यादिना प्रतिज्ञापालनं धर्मः क्षत्रियस्य विशेषत इति सूचितम् ॥ ९–१० ॥

रा० टी०–त्यजेति । कालः त्वत्कृतोपदेशः बलवान् अन्यथा न भवतीत्यर्थः अतः एनं लक्ष्मणं त्यज अत एव प्रतिज्ञां वृथा मा कृथा वृथाकरणे दोषमाह धर्मो लोकमर्यादा विलयं विध्वंसं व्रजेत् ॥ ९ ॥

रा० टी०–तत इति । धर्मे विनष्टे सति सर्वं विनश्येत् १०

११–१२] ति० टी०–अभिपालनादभिरक्षणसिद्धिहेतोः । लक्ष्मणेन विना चाद्य । लक्ष्मणत्यागपूर्वकमद्यावस्थानेनेत्यर्थः ॥ ११ ॥ १२ ॥

रा० टी०–उपसंहरन्नाह—स इति । त्रैलोक्यस्य अभिपालनात् धर्मस्थापनद्वारा रक्षणात् हेतोः लक्ष्मणेन विना त्वं जगत् स्वस्थं स्वस्वधर्मे स्थितं कुरुष्व ॥ ११ ॥

रा० टी०–तेषामिति । समवेतानां संगीभूतानां तेषां मन्त्रिप्रभृतीनां परिषदस्सभाया मध्ये तत् वसिष्ठोक्तं वाक्यं श्रुत्वा रामोऽब्रवीत् ॥ १२ ॥

गो० टी०–स त्वमिति । अभिपालनात् । हेतौ पञ्चमी । अभिपालनार्थमित्यर्थः ॥ ११–१३ ॥

१३] ति० टी०–इष्टस्य त्यागो वा वधो वा तदुभयं साधूनां सममेवेति त्वां विसर्जये । वधप्रतिज्ञापालनायेति भावः॥१३॥

रा० टी०–तदाकारमाह—विसर्जय इति । त्वामहं विसर्जये त्यजामि अत एव धर्मस्य प्रतिज्ञापालनस्य विपर्ययः अन्यथाभावो माभूत् वधेन विना प्रतिज्ञापालनं कथं भविष्यतीत्यत आह त्यागो वधश्च उभयं साधूनां महात्मभिः समं तुल्यं विहितः कथित इत्यर्थः ॥ १३ ॥

१४] ति० टी०–रामेण भाषित इत्युक्तरीत्येति शेषः । बाष्पव्याकुलितेन्द्रियो रामवियोगासहिष्णुतया, न तु स्वशरीरहानिभयेनेति भावः । तदेवाह—स्वगृहं न विवेश हेति । प्रायात् । सरयूतीरमिति शेषः ॥ १४ ॥

रा० टी०–रामेणेति । त्वरितः रामाज्ञाकरणे वेगवान् लक्ष्मणः स्वगृहमप्रकटसाकेतं प्रायात् स्वगृहं प्रकटीभूतायोध्यावेश्म न विवेश काकाक्षिगोलकन्यायेन शब्दाकृत्या स्वगृहशब्दः उभयान्वयी ॥ १४ ॥

गो० टी०–रामेणेति । रामेण भाषित इत्युक्तरीत्येति शेषः ॥ १४ ॥

१५] ति० टी०–सर्वस्रोतांसि सर्वेन्द्रियद्वाराणि ॥ १५ ॥

रा० टी०–गमनप्रकारमाह—स इत्यादिभिः । स लक्ष्मणः सरयूतीरं गत्वा उपस्पृश्य आचम्य सर्वस्रोतांसि इन्द्रियद्वाराणि निगृह्य निःश्वासं न मुमोच ॥ १५ ॥

गो० टी०–स इति । सर्वस्रोतांसि सर्वेन्द्रियाणि ॥ १५ ॥

१६] ति० टी०–युक्तं योगयुक्तम् । अभ्यकिरन्नभित्रष्टवन्तः ॥ १६ ॥

१ त्वरितमिति गो. पाठः ।

अदृश्यं सर्वमनुजैः सशरीरं महाबलम् । प्रगृह्य लक्ष्मणं शक्रस्त्रिदिवं संविवेश ह ॥ १७ ॥
ततो विष्णोश्चतुर्भागमागतं सुरसत्तमाः । हृष्टाः प्रमुदिताः सर्वे पूजयन्ति स्म राघवम् १८

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

सप्तोत्तरशततमः सर्गः ।

सौमित्रिविरहमहममानस्तत्रभवान्कौसल्येयस्तत्रतपथं जिगमिषुभरतं राज्येऽभिषेक्तुमैच्छत् तदनङ्गीकृत्य तत्सहगतिमिच्छन्तं भरतं परमार्ताः प्रकृतीश्च वसिष्ठोपदेशेन किमपेक्षितं भवतामित्यपृच्छच्च पौरास्तु यदि एणा तर्हि सपुत्रदारा वयं भवन्तमनुयास्याम इति प्रार्थयन्त खरहन्ता तु बाढमित्यनुगृह्य कुशलवावभिषिच्य शत्रुघ्नाय संदेशहरं प्राहिणोत ।

विसृज्य लक्ष्मणं रामो दुःखशोकसमन्वितः । पुरोधसं मन्त्रिणश्च नैगमांश्चेदमब्रवीत् ॥ १ ॥
अद्य राज्येऽभिषेक्ष्यामि भरतं धर्मवत्सलम् । अयोध्यायाः पतिं वीरं ततो यास्याम्यहं वनम् ॥२॥
प्रवेशयत संभारान्माभूत्कालात्ययो यथा । अद्यैवाहं गमिष्यामि लक्ष्मणेन गतां गतिम् ॥ ३ ॥
तच्छ्रुत्वा राघवेणोक्तं सर्वाः प्रकृतयो भृशम् । मूर्धभिः प्रणता भूमौ गतसत्त्वा इवाभवन् ॥ ४ ॥
भरतश्च विसंज्ञोऽभूच्छ्रुत्वा राघवभाषितम् । राज्यं विगर्हयामास वचनं चेदमब्रवीत् ॥ ५ ॥

रा० टी०–अनिःश्वसन्तमिति । युक्तं स्वाप्रकटायोध्यायां कृतमनस्कमनिःश्वसन्तमनिःशमरहितं तं लक्ष्मणं देवाः पुष्पैरभ्यकिरन् ॥ १६ ॥

गो० टी०–अनिःश्वसन्तमिति । युक्तं योगयुक्तम्, अभ्यकिरन् ॥ १६ ॥

१७] ति० टी०–अदृश्यं योगबलादन्तर्धानमुपगतम्, यद्वा दृश्यं यथा तथा सशरीरं लक्ष्मणं प्रगृह्य शक्रस्त्रिदिवं संविवेश । अनेन मनुष्यशरीरसंस्थानमेव देवशरीरसंस्थानं प्राप्तम्, न तु पूर्वशरीरपरित्यागः शरीरान्तरपरिग्रहश्चेति सूचितम । एतेन जन्मापि तथैवेति च सूचितम् ॥ १७ ॥

रा० टी०–अदृश्यमिति । सर्वमनुजैरदृश्यं सशरीरं शरीरेण सहितं लक्ष्मणं शक्रः प्रगृह्य त्रिदिवं संविवेश ॥ १७ ॥

गो० टी०–अदृश्यमिति । अदृश्यं यथा तथा ॥ १७ ॥

१८] ति० टी०–चतुर्भागं चतुर्थं भागम् । अत्र कतकः–शेषसुपर्णविष्वक्सेनैः शेषशायी विष्णुः स्वमूर्त्या चतुर्भागवान् । तत्र शेषांशो लक्ष्मणः, गरुडांशो भरतः, विष्वक्सेनांशः शत्रुघ्न इति । इदं पाद्मविरुद्धम् । तत्र हि भरतशत्रुघ्नौ शङ्खचक्रांशावित्युक्तमिति प्रागदर्शितम । गरुडस्य स्वरूपेणैव राममविश्य आगमनमुक्तं युद्धकाण्डे तेन विरुद्धं च ॥ १८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

रा० टी०–तत इति । विष्णोः क्षीराब्धीशस्य चत्वारो भागाः सर्वांशा इत्यर्थः यस्मिन् तं राघवं लक्ष्मणम् हृष्टास्मन्तुष्टाः अत एव प्रमुदितास्सुरसत्तमाः पूजयन्ति स्म ॥ १८ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे षडधिकशततमः सर्गः ॥१०६॥

गो० टी०–तत इति । चतुर्थो भागश्चतुर्भागः । शेषसुपर्णविष्वक्सेनविष्णुरूपेण चतुर्विभागो विष्णुस्तत्र शेषरूपश्चतुर्थांशो लक्ष्मणः । सुपर्णभूतो भरतः । विष्वक्सेनरूपः शत्रुघ्न इति रहस्यार्थः । अत एव पुराणान्तरेषु शेषावतारो लक्ष्मण इति प्रसिद्धिः । अनन्तगरुडविष्वक्सेनविष्णुरूपेणात्मानं चतुर्धा व्यूह्य वर्तते सर्वेश्वर इति ज्ञेयम ॥ १८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणेमणिमुकटाख्याने उत्तरश्रीरामायणव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

१] ति० टी०–अथ भरतवचनेन कुशलवयो राज्याभिषेकपूर्वं प्रस्थापनं शत्रुघ्नाय दूतप्रेषणं च—विसृज्येति ॥ १ ॥

रा० टी०–लक्ष्मणगमनानन्तरकालिकं वृत्तमाह—विसृज्येत्यादिभिः । रामः पुरोधःप्रभृतीन् अब्रवीत् तत्र नैगमा वणिजः ॥ १ ॥

गो० टी०–विसृज्येत्यादि ॥ १ ॥

२] ति० टी०–भरतमयोध्यायाः पतिमभिषेक्ष्यामीति मनोरथं करोमि ततोऽहं वनं यास्यामि । महाप्रस्थानविधिनेति शेषः ॥ २ ॥

रा० टी०–तदाकारमाह—अद्येति द्वाभ्याम् । अयोध्यायाः पतिं भरतं राज्ये अद्याभिषेक्ष्यामि ततोऽनन्तरमहं वनमप्रकटसाकेते प्रमोदाटवीं यास्यामि ॥ २ ॥

गो० टी०–अद्येति । भरतमयोध्याधिपतिमभिषेक्ष्यामीति मनोरथं करोमि । ततो वनं यास्यामि । महाप्रस्थानविधिनेति शेषः ॥ २ ॥

३–५] ति० टी०–संभारान्भरताभिषेकार्थान् ॥ ३–५ ॥

रा० टी०–प्रवेशयतेति । लक्ष्मणेन गतां गतिं मार्गमह-

१ दृष्ट्वेति गो. पा. । २ ऽपूजवन्त्समहर्षय इति गो. पा. । ३ पुरोधसमिति गो. पा. । ४ कालेस्त्ययोऽयं इति गो. पा. । ५ राम वमिति गो. पा. ।

सत्येनाहं शपे राजन्स्वर्गभोगेन चैव हि । न कामये यथा राज्यं त्वां विना रघुनन्दन ॥ ६ ॥
इमौ कुशीलवौ राजन्नभिषिच्य नराधिप । कोशलेषु कुशं वीरमुत्तरेषु तथा लवम् ॥ ७ ॥
शत्रुघ्नस्य च गच्छन्तु दूतास्त्वरितविक्रमाः । इदं गमनमस्माकं शीघ्रमाख्यातुं मा चिरम् ॥ ८ ॥
तच्छ्रुत्वा भरतेनोक्तं दृष्ट्वा चापि ह्यधोमुखान् । पौरान्दुःखेन संतप्तान्वसिष्ठो वाक्यमब्रवीत् ॥ ९ ॥
वत्स राम इमाः पश्य धरणीं प्रकृतीर्गताः । ज्ञात्वैषामीप्सितं कार्यं मा चैषां विप्रियं कृथाः ॥१०॥
वसिष्ठस्य तु वाक्येन उत्थाप्य प्रकृतीजनम् । किं करोमीति काकुत्स्थः सर्वान्वचनमब्रवीत् ॥११॥
ततः सर्वाः प्रकृतयो रामं वचनमब्रुवन् । गच्छन्तमनुगच्छामो यत्र राम गमिष्यसि ॥ १२ ॥
पौरेषु यदि ते प्रीतिर्यदि स्नेहो ह्यनुत्तमः । सपुत्रदाराः काकुत्स्थ सर्वं गच्छाम सत्पथम् ॥ १३ ॥

मयवै गमिष्यामि अतः यथा कालात्ययो माभूत् तथा सम्भारान् अभिषेकसामग्रीः प्रवेशयत ॥ ३ ॥

रा० टी०–तदिति । राघवेणोक्तं श्रुत्वा मूर्द्धभिर्भूमौ प्रणतास्सर्वाः प्रकृतयः गतसत्वा इवाभवन् ॥ ४ ॥

रा० टी०–भरत इति । भरतो विसंज्ञोऽभूत् इदमब्रवीच्च ॥ ५ ॥

गो० टी०–प्रवेशयतेति । संभारानिति । भरताभिषेकार्थानित्यर्थः ॥ ३ ॥

गो० टी०–तदिति । सर्वाः प्रकृतयः सुमन्त्रादयः ॥४॥५॥

६] ति० टी०–त्वां विना यथा राज्यं च त्वदाज्ञया यथानुक्रमप्राप्तमयोध्याराज्यं न कामये, त्वां विना प्राप्येण स्वर्गभोगेन च कामये । सुखभोगमिति शेषः । हे राजन् ! इममर्थं सत्येन शपे ॥ ६ ॥

रा० टी०–तदाकारमाह—सत्येनेत्यादिभिः । त्वां विना राज्यमहं यथावन्न कामये सत्येन स्वर्गेण सुखविशेषेण च शपे अत्रार्थे सत्यादिशपथं करोमीत्यर्थः ॥ ६ ॥

गो० टी०–सत्येनेति । स्वर्गलोके न चेत्यादि । हे रघुनन्दन ! त्वां विना प्राप्ये स्वर्गलोके न च कामये । सुखभोगमिति शेषः । तथा त्वां विना यथा राज्यं त्वदाज्ञया यथानुक्रमप्राप्तमयोध्याराज्यं न च कामये । हे राजन् ! इममर्थं सत्येन शपे ॥ ६ ॥

७] ति० टी०–तर्हि किं राज्यं शून्यमेवास्तु तत्राह–इमाविति । उत्तरेषूत्तरकोशलेषु ॥ ७ ॥

रा० टी०–ननु राज्यपालनं कथं भविष्यतीत्यत आह–इमाविति । इमौ कुशीलवौ राज्यार्हाविति शेषः अतः कोशलेषु दक्षिणकोशलदेशेषु कुशमुत्तरेषु उत्तरकोशलेषु लवं चाभिषिच्य गच्छेति शेषः ॥ ७ ॥

गो०टी०–एवं भरत उक्त्वानन्तरं कुशलवावभिषिञ्चेत्याह–इमौ कुशलवावित्यादि । उत्तरेष्विति । उत्तरकोसलेष्वित्यर्थः ॥ ७ ॥

८-९] ति० टी०–इदमस्माकं प्रवर्तमानं गमनं गमनोद्योगं शत्रुघ्नस्य शीघ्रमाख्यातुं कथयितुं मा चिरमविलम्बं यथा भवति तथा दूता गच्छन्तु । आख्यातु मा चिरमित्यत्र तु मोऽनुस्वारलोप आर्षः ॥ ८ ॥ ९ ॥

रा० टी०–शत्रुघ्नस्येति । दूताः अस्माकं गमनमाख्यातु आख्यातुं शत्रुघ्नस्य समीपं गच्छन्तु तुमो मकारलोप आर्षः॥८॥

रा० टी०–तदिति । वसिष्ठोऽब्रवीत् ॥ ९ ॥

गो० टी०–शत्रुघ्नस्येति । इदम् अस्माकं प्रवर्तमानं स्वर्गाय गमनकृत्यन्तं शत्रुघ्नस्याख्यातुं दूता गच्छन्तु, गत्वा चाख्यान्तु । मा चिरं विलम्बो मा भूत् । इदं गमनमस्माकं शीघ्रमाख्यान्तु मा चिरमिति च पाठः ॥ ८ ॥

१०] ति० टी०–एषामीप्सितं ज्ञात्वा यत्कार्यं यत्करणार्हं तत्कर्तव्यम ॥ १० ॥

रा० टी०–तदाकारमाह–वत्सेत्यादिभिः । धरणीं गताः इमाः प्रकृतीः त्वं पश्य एषां प्रकृतीनामीप्सितं ज्ञात्वा कार्यं साधनीयं एषां विप्रियं मा कृथाः—एषामिति । सामान्ये नपुंसकम् ॥ १० ॥

११] ति० टी०–प्रकृतीजनमित्यत्र दीर्घ आर्षः ॥ ११॥

रा० टी०–वसिष्ठस्येति । वसिष्ठस्य वाक्येन प्रकृतीजनं प्रकृतिजनान् उत्थाप्य सम्बोध्य काकुत्स्थः किंकरोमीति सर्वानब्रवीत् ॥ ११ ॥

गो० टी०–वसिष्ठस्येति । प्रकृतीजनम् । छान्दसो दीर्घः ॥ ११ ॥ १२ ॥

१२] ति० टी०–हे राम ! यत्र त्वं गमिष्यसि तत्र गच्छन्तं त्वामनुगच्छामः ॥ १२ ॥

रा० टी०–तत इति । सर्वाः प्रकृतयः राममब्रुवन् तदाकारमाह हे ! राम यत्र त्वं गमिष्यसि तत्र गच्छन्तं त्वामनुगच्छामः ॥ १२ ॥

१३] ति० टी०–सत्पथम् । त्वया गम्यमानं स्वर्गमार्गमित्यर्थः ॥ १३ ॥

रा० टी०–तदेव भङ्ग्यन्तरेणाह—पौरेष्विति । पौरेषु यदि ते प्रीतिः स्नेहः तदा सपुत्रदाराः वयं सत्पथं सर्वं गच्छाम ॥ १३ ॥

---

१ लोकेनेति गो. पाठः । २ स्वर्गायेति गो. पाठः । ३ आख्यान्त्विति गो. आख्यातेति रा. पाठः । ४ समागच्छामेति गो. पाठः ।

तपोवनं वा दुर्गं वा नदीमम्भोनिधिं तथा । वयं ते यदि न त्याज्याः सर्वान्नो नय ईश्वर ॥ १४ ॥
एषा नः परमा प्रीतिरेष नः परमो वरः । हृद्गता नः सदा प्रीतिस्त्वानुगमने नृप ॥ १५ ॥
पौराणां दृढभक्तिं च वाढमित्येव सोऽब्रवीत् । स्वकृतान्तं चान्ववेक्ष्य तस्मिन्नहनि राघवः ॥ १६ ॥
कोशलेषु कुशं वीरमुत्तरेषु तथा लवम् । अभिषिच्य महात्मानावुभौ रामः कुशीलवौ ॥ १७ ॥
अभिषिक्तौ सुतावङ्के प्रतिष्ठाप्य पुरे ततः । [परिष्वज्य महाबाहुर्मूर्ध्न्युपाघ्राय चासकृत् ।]
रथानां तु सहस्राणि नागानामयुतानि च । दशं चाश्वसहस्राणि एकैकस्य धनं ददौ ॥ १८ ॥
बहुरत्नौ बहुधनौ हृष्टपुष्टजनाश्रयौ । स्वे पुरे प्रेषयामास भ्रातरौ तौ कुशीलवौ ॥ १९ ॥
अभिषिच्य ततो वीरौ प्रस्थाप्य स्वपुरे तदा । दूतान्संप्रेषयामास शत्रुघ्नाय महात्मने ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

अष्टोत्तरशततमः सर्गः ।

भरतसंदेशश्रवणेनातिदुःखी शत्रुघ्नो द्राक्स्वात्मजद्वितयाय राज्यं धनादिकं च विभज्य जानकीजानिमुपस्थायात्मानं तमनुजिगमिषुं न्यवेदयत अन्ये च देवर्षिगन्धर्वात्मजाः सुग्रीवश्चाङ्गदमभिषिच्य सकपिर्विभीषणादयश्च तमनुगन्तुमागताः तत्र हनुमद्विभीषणौ यावच्चन्द्रमेदिनीसूर्यं जाम्बवदादिपश्च कपीन् यावत्कलि तिष्ठतेत्यादिदिश्येतरानखिलान्स्वानुगमनेऽन्वमन्यत भगवान् दाशरथिः ।

ते दूता रामवाक्येन चोदिता लघुविक्रमाः । प्रजग्मुर्मधुरां शीघ्रं चक्रुर्वासं न चाध्वनि ॥ १ ॥
ततस्त्रिभिरहोरात्रैः संप्राप्य मधुरामथ । शत्रुघ्नाय यथातत्त्वमाचख्युः सर्व एव तत् ॥ २ ॥

गो० टी०-पौरेष्विति । सत्पथं ब्रह्मलोकमार्गम् । त्वया गम्यमानमिति शेषः ॥ १३ ॥

१४-१५] ति० टी०-वयं त्वदेकशरणा यदि ते न त्याज्यास्तदा गम्यमानतपोवनायन्यतमं तत्रः सर्वान्नय । तत्र हेतुः—ईश्वरेति । भगवदवतारत्वात्सर्वस्वभक्तलोकनयनसमर्थो यतस्त्वमित्यर्थः ॥ १४ ॥ १५ ॥

रा० टी०-तप इति । तपोवनायन्यतमं गच्छतोपीति शेषः ते तव यदि यतो वयं न त्याज्या अतस्सर्वान्नोऽस्मान्नय १४

रा० टी०-एषेति । तवानुगमने हृद्गता नः प्रीतिः सदैवास्त्विति शेषः एषैव नोऽस्माकं परमा प्रीतिः तृप्तिः अतः एष एव नः परमो वरः अतीप्सीतः ॥ १५ ॥

गो० टी०-तपोवनमिति । वयं चेति । न त्याज्या अतः सर्वान्नय । तत्र हेतुः-ईश्वरेति ॥ १४ ॥ १५ ॥

१६]ति०टी०-पौराणामनुगमनविषयां दृढभक्तिमन्ववेक्ष्य स्वकृतान्तं स्वकर्तव्यसिद्धान्तं चान्ववेक्ष्य वाढमित्यब्रवीत्॥१६॥

रा० टी०-पौराणामिति । स रामः पौराणां दृढभक्तिं स्वकृतान्तं स्वकृतसिद्धान्तं च अन्ववेक्ष्य वाढमित्येवाब्रवीत्१६

गो० टी०-पौराणामिति । कृतान्तं च कर्तव्यतासिद्धान्तं च ॥ १६ ॥

१७] ति०टी०-अभिषिच्य । प्रस्थापयामासेति शेषः१७

रा० टी०-कोशलेष्विति । पुरे अयोध्यायां स्थितो रामः कोशलेषु दक्षिणकोशलदेशेषु कुशम् उत्तरेषु उत्तरकोशलदेशेषु लवं च अभिषिच्य अभिषिक्तौ कुशीलवौ अङ्के प्रतिष्ठाप्य च एकैकस्य रथादीनां सहस्रादीनि धनं ददौ सार्द्धश्लोकद्वयमेकान्वयि ॥ १७ ॥ १८ ॥

गो० टी०-कोसलेष्विति । सुतावभिषिच्य प्रस्थापयामास ॥ १७ ॥

१८-२०] ति० टी०-पुरेऽयोध्यायां स्वसमीपे कोशलद्वयराज्यार्थमभिषिक्तौ सुतावङ्के प्रतिष्ठाप्य परिष्वज्य मूर्ध्न्युपाघ्राय च रथादिकं ददौ ॥ १८-२० ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे सप्ताधिकशततमः सर्गः ॥१०७॥

रा० टी०-बह्विति । कुशीलवौ स्वे पुरे तत्तदीयत्वेन प्रसिद्धपुर्यौ प्रेषयामास राम इति शेषः ॥ १९ ॥

रा० टी०-अभिषिच्येति । शत्रुघ्नाय दूतान् सम्प्रेषयामास राम इति शेषः ॥ २० ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे सप्ताधिकशततमः सर्गः ॥ १०७ ॥

गो० टी०-अभिषिक्तौ सुताविति । पुरे अयोध्यायाम्, स्वसमीपे कोसलद्वयराज्यार्थमभिषिक्तौ अङ्के प्रतिष्ठाप्य मूर्ध्न्युपाघ्राय परिष्वज्य रक्षादिकं ददौ । रथानां त्वित्यादि पुनर्दीयमानं राजोपवाह्यदिव्यरथादिविषयम् अभिषिच्येत्युक्तार्थम् ॥ १८-२१ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उ०श्रीरामायणव्याख्याने सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

१-२] ति० टी०-अथानुगमनायागतानां शत्रुघ्न-

---

१ इदमर्धमधिकं गो. पाठे । २ दशायुतानि चाश्वानामिति गो. पाठः ३ आवृतावितिं गो. पाठः । ४ त्विति गो. पाः । ५ सुतौ वीरौ प्रतिष्ठाप्येति गो. पाठः । ६ सर्वानिति गो. पाठः ।

लक्ष्मणस्य परित्यागं प्रतिज्ञां राघवस्य च । पुत्रयोरभिषेकं च पौरानुगमनं तथा ॥ ३ ॥
कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि । कुशावतीति नाम्ना सा कृता रामेण धीमता ॥ ४ ॥
श्रावस्तीति पुरी रम्या श्रावितां च लवस्य ह । अयोध्यां विजनां कृत्वा राघवो भरतस्तथा ॥ ५ ॥
स्वर्गस्य गमनोद्योगं कृतवन्तौ महारथौ । एवं सर्वं निवेद्याशु शत्रुघ्नाय महात्मने ॥ ६ ॥
विरेमुस्ते ततो दूतास्त्वर राजेति चाब्रुवन् । तच्छ्रुत्वा घोरसंकाशं कुलक्षयमुपस्थितम् ॥ ७ ॥
प्रकृतीस्तु समानीय काञ्चनं च पुरोधसम् । तेषां सर्वं यथावृत्तमब्रवीद्रघुनन्दनः ॥ ८ ॥
आत्मनश्च विपर्यासं भविष्यं भ्रातृभिः सह । ततः पुत्रद्वयं वीरः सोऽभ्यषिञ्चन्नराधिपः ॥ ९ ॥
सुबाहुर्मधुरां लेभे शत्रुघ्नार्ती च वै दिशम् । द्विधा कृत्वा तु तां सेनां माथुरीं पुत्रयोर्द्वयोः ॥
धनं च युक्तं कृत्वा वै स्थापयामास पार्थिवः । ॥ १० ॥
सुबाहुं मधुरायां च वैदिशे शत्रुघातिनम् । ययौ स्थाप्य तदायोध्यां रथेनैकेन राघवः ॥ ११ ॥

सुग्रीवविभीषणादीनामनुगमनावस्थानव्यवस्था—ते दूता इति ॥ १ ॥ २ ॥

रा० टी०–दूतप्रेषणानन्तरकालिकं वृत्तमाह—ते इत्यादिभिः । दूताः अध्वनि वासं न चक्रुः अत एव मथुरां शीघ्रं जग्मुः ॥ १ ॥

रा० टी०–तत इति । सर्वे दूताः त्रिभिरहोरात्रैः मथुरां सम्प्राप्य शत्रुघ्नाय यथातत्त्वं याथार्थ्यमनतिक्रम्य आचख्युः॥२॥

गो० टी०–ते दूता इत्यादि ॥ १ ॥ २ ॥

३] ति० टी०–राघवस्य प्रतिज्ञां कालपुरुषं प्रति ब्रह्मलोकागमनप्रतिज्ञाम् । पौरानुगमनं पौरानुगमनानुमतिम् ॥३॥

४] ति० टी०–कुशस्य कुशावतीति नाम्ना पुरी रामेण कृता ॥ ४ ॥

५–६] ति० टी०–लवस्य च पुरी श्रावस्तीति नाम्ना श्राविता लोके प्रसिद्धिं प्रापिता ॥ ५ ॥ ६ ॥

रा० टी०–आख्यानप्रकारं बोधयन्नाह–लक्ष्मणस्येत्यादिभिः । पुत्रयोः कुशलवयोरभिषेकं च निवेद्य विन्ध्यपर्वतरोधसि कुशावतीतिनाम्ना सा प्रसिद्धा कुशस्य नगरी श्रावस्तीति नाम्ना श्राविता प्रसिद्धा लवस्य पुरी च रामेण कृतेति च राघवो भरतश्च स्वर्गस्य साकेतस्य गमनोद्योगं कृतवन्तौ एवमिति च सर्वं शत्रुघ्नाय निवेद्य हे राजन् ! त्वं त्वर शीघ्रं गच्छ इति ब्रुवन अब्रुवन् ततोऽनन्तरं विरेमुश्च सार्द्धश्लोकचतुष्टयमेकान्वयि ॥ ३–६ ॥

गो० टी०–लक्ष्मणस्येति । राघवस्य प्रतिज्ञामिति । कालपुरुषं प्रति ब्रह्मलोकागमनप्रतिज्ञामित्यर्थः । पौरानुगमनं पौरानुगमनानुमतिम् ॥ ३ ॥

गो० टी०–कुशस्येति । कुशस्य कुशावती पुरी, लवस्य श्रावस्तीति श्राविनेत्यन्वयः ॥ ४ ॥ ५ ॥

गो० टी०–एवमिति । त्वर गमनाय त्वरितो भव । राजेति । राजन्नित्यर्थः ॥ ६ ॥

७] ति० टी०–त्वर गमनाय त्वरितो भवेति । राजेति राजन्नित्यर्थः ॥ ७ ॥

८] ति० टी०–काञ्चनं काञ्चनाख्यम् । यथावृत्तमब्रवीत् । लक्ष्मणत्यागस्य निर्हेतुकत्वशङ्काव्यावृत्त्यर्थमिति भावः ॥ ८ ॥

९] ति० टी०–विपर्यासं देहवियोगम् । भविष्यं भविष्यन्तम् । तत एतत्कथनानन्तरम् ॥ ९ ॥

रा० टी०–तदिति । घोरसंकाशं घोरवत्प्रतीयमानमुपस्थितं तत् प्रसिद्धं कुलक्षयं कुलकर्तृकगमनं श्रुत्वा प्रकृतीः कांचनं तदभिधं पुरोधसं च समानीय तेषां मध्ये रघुनन्दनः शत्रुघ्नः भविष्यं भविष्यंतं भ्रातृभिस्सह आत्मनो विपर्यासमप्राकट्येन स्थितिं यथावृत्तमब्रवीत् अर्द्धचतुष्टयमेकान्वयि ॥ ७ ॥ ८ ॥

रा० टी०–तत इति । नराधिपः शत्रुघ्नः पुत्रद्वयमभ्यषिञ्चत् अत एव सुबाहुर्ज्येष्ठः मथुरां लेभे शत्रुघ्नार्ती कनिष्ठस्तु वैदिशं तदभिधनगरं लेभे ॥ ९ ॥

गो० टी०–तच्छ्रुत्वेति । काञ्चनं काञ्चनाख्यम् । विपर्यासं देहवियोगम् ॥ ७–९ ॥

१०–११] ति० टी०–वैदिशं तदाख्यं नगरम् । धनं च युक्तं कृत्वा किंचिदधिकं ज्येष्ठाय कनिष्ठाय च समविभागं दत्त्वा ॥ १० ॥ ११ ॥

रा० टी०–पुर्योः प्राप्तिप्राकारं बोधयन्नाह–द्विधेति । माथुरीं मथुरासबन्धिनीं सेनां युक्तं विभागार्हं धनं च द्विधा कृत्वा द्वयोः पुत्रयोरग्रे पार्थिवश्शत्रुघ्नः स्थापयामास ॥ १० ॥

रा० टी०–सुबाहुमिति । राघवश्शत्रुघ्नः स्थाप्य स्थापयित्वा एकेन रथेनैव अयोध्यां ययौ ॥ ११ ॥

गो० टी०–द्विधेति । धनं युक्तं च कृत्वेति । यथोचितं यथाशास्त्रम् विभागं कृत्वेत्यर्थः ॥ १०–११ ॥

स ददर्श महात्मानं ज्वलन्तमिव पावकम् । सूक्ष्मक्षौमाम्बरधरं मुनिभिः सार्धमक्षयैः ॥ १२ ॥
सोऽभिवाद्य ततो रामं प्राञ्जलिः प्रयतेन्द्रियः । उवाच वाक्यं धर्मज्ञं धर्ममेवानुचिन्तयन् ॥ १३ ॥
कृत्वाभिषेकं सुतयोर्द्वयो[1] राघवनन्दन । तवानुगमने राजन्विद्धि मां कृतनिश्चयम् ॥ १४ ॥
न चान्यदद्य वक्तव्यमतो वीर न शासनम् । विहन्यमानमिच्छामि मद्विधेन विशेषतः[2] ॥ १५ ॥
तस्य तां बुद्धिमक्लीवां विज्ञाय रघुनन्दनः । वाढमित्येव शत्रुघ्नं रामो वाक्यमुवाच ह ॥१६॥
तस्य वाक्यस्य वाक्यान्ते वानराः कामरूपिणः । ऋक्षराक्षससङ्घाश्च समापेतुरनेकशः ॥ १७ ॥
सुग्रीवं ते पुरस्कृत्य सर्व एव समागताः । तं[3] रामं द्रष्टुमनसः स्वर्गायाभिमुखं स्थितम् ॥१८॥
देवपुत्रा ऋषिसुता गन्धर्वाणां सुतास्तथा । रामक्षयं विदित्वा ते सर्व एव समागताः ॥१९॥
[ते रामममिवाद्योचुः सर्वे वानरराक्षसाः ।]
तवानुगमने राजन्संप्राप्ताः स्म[4] समागताः । यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषोत्तम॥२०॥
यमदण्डमिवोद्यम्य त्वया स्म विनिपातिताः । एतस्मिन्नन्तरे रामं सुग्रीवोऽपि महाबलः ॥
प्रणम्य विधिवद्वीरं विज्ञापयितुमुद्यतः । ॥ २१ ॥
अभिषिच्याङ्गदं वीरमागतोऽस्मि नरेश्वर । तवानुगमने राजन्विद्धि मां कृतनिश्चयम् ॥ २२ ॥

१२–१४] ति० टी०–मुनिभिः सार्धम् । आसीनमिति शेषः ॥ १२ ॥ १४ ॥

रा० टी०–स इति । स शत्रुघ्नः अक्षयैर्मुनिभिस्सार्धं सूक्ष्मक्षौमाम्बरधरं रामं ददर्श ॥ १२ ॥

रा० टी०–स इति । स शत्रुघ्नः धर्मं स्वसेवावृत्तिमनुचिन्तयन् सन् धर्मज्ञं रामम्वाच ॥ १३ ॥

रा० टी०–तदाकारमाह—कृत्वेति द्वाभ्याम् सुतयोरभिषेकं कृत्वा तवानुगमने कृतनिश्चयं माम् विद्धि ॥ १४ ॥

१५–१६] ति० टी०–अन्यदद्य न वक्तव्यम् । मां मानुगच्छेति न वक्तव्यमित्यर्थः । अतोऽस्माद्वाक्यादधिकं हे वीर, शासनं दण्डो नेत्यर्थः । ' विलोक्यमानमिच्छामि त्वद्विधेन विशेषतः, इतिपाठे त्वद्विधेन परमानुग्रहसमर्थेन विलोक्यमानमनुगृह्यमाणमेवेच्छामि । आत्मानमिति शेष इत्यर्थः । ' विहन्यमानमिच्छामि मद्विधेन विशेषतः, इति पाठे हे वीर ! तव शासनं मद्विधेन विहन्यमानं नेच्छामीति संबन्धः ॥ १५ ॥ १६ ॥

रा० टी०–नेति । अतः मत्प्रार्थितात् अन्यत् शासनमाज्ञा न वक्तव्यं तत्र हेतुमाह मद्विधेन निहन्यमानमक्रियमाणं शासनं तवाज्ञां विशेषतोऽहं नेच्छामि एतेन तवानुगमनमवश्यमेव करिष्यामीति सूचितम् शासनशब्दः शब्दावृत्त्योभयान्वयी यदि च त्वया वक्तव्यमन्यत् शासनं नेच्छामीत्यन्वयः तदेच्छामीत्यस्याप्यावृत्तिः अत्र पक्षे न शब्दावृत्तिरिति दिक् अत्रत्योत्तरार्द्धे विलोक्यमानमिच्छामि त्वद्विधेन विशेषत इति पाठान्तरं तत्र पक्षे ततोऽन्यत् शासनं मयोग्या नास्ति अतो न वक्तव्यम् तत्र हेतुः त्वद्विधेन विलोक्यमानमात्मानमिति शेषः इच्छामि ॥ १५ ॥

रा० टी०–तस्येति । तस्य शत्रुघ्नस्य अक्लीवां बुद्धिं निश्चयं विज्ञाय रामः वाढमित्येवोवाच ॥ १६ ॥

गो० टी०–न चेति । अन्यत्र वक्तव्यमिति । मास्त्विति न वक्तव्यमित्यर्थः । विलोक्यमानमित्यादि । त्वद्विधेन परमानुग्रहसमर्थेन विलोक्यमानमनुगृह्यमाणमेव संपादयितुमात्मानमिच्छामि ॥ १५–२० ॥

१७–१९] ति० टी०–तस्य वाक्यस्य वाक्यान्ते । उच्चारणान्ते इत्यर्थः ॥ १७ ॥ १९ ॥

२०] ति० टी०–समागता मिलिताः ॥ २० ॥

रा० टी०–तस्येति । वाक्यस्य प्रशस्तवाक्यविशिष्टस्य तस्य रामस्य वाक्यान्ते कामरूपिणः अनेकशो वानरादयः समापेतुः ॥ १७ ॥

रा० टी०–सुग्रीवमिति । सुग्रीवं पुरस्कृत्य समागताः ते वानरादयः स्वर्गायाभिमुखं स्थितं रामं द्रष्टुमनसः ज्ञातुकामा बभूवुरिति शेषः स्वस्वविषयकतदभिप्रायं जिज्ञासवो बभूवुरित्यर्थः ॥ १८ ॥

रा० टी०–देवेति । रामस्य क्षयं साकेतगमनं विदित्वा समागताः ते प्रसिद्धा देवपुत्रादयः हे राजन् ! तवानुगमने सम्प्राप्ताः कृतनिश्चयाः वयं समागताः अतः यदि अस्माभिर्विना त्वं गच्छेस्तदा त्वया यमदण्डमुद्यम्येव वयं विनिपातिताः स्म इत्यूचुरिति शेषः सार्द्धश्लोकद्वयमेकान्वयि ॥ १९ ॥ २० ॥

२१–२२] ति० टी०–यमदण्डमुद्यम्येव त्वया निपातिताः स्म । हताः स्मेत्यर्थः ॥ २१ ॥ २२ ॥

रा० टी०–एतस्मिन्निति । एतस्मिन्नन्तरे समये सुग्रीवोपि रामं विज्ञापयितुमुद्यतो बभूवेति शेषः ॥ २२ ॥

१ युक्तमिति गो. पाठः । २ विलोक्यमानमिच्छामि त्वद्विधेनेति गो. पाठः । ३ ते राममिति गो. पाठः । ४ इदमर्धमधिकं गो. पु. । ५ कृतनिश्चया इति गो. पाठः ।

[तस्य तद्वचनं श्रुत्वा रामो रमयतां वरः । वानरेन्द्रमथोवाचं मैत्रं तस्यानुचिन्तयन् ॥
सखे शृणुष्व सुग्रीव न त्वयाहं विनाकृतः । गच्छेयं देवलोकं वा परमं वा पदं महत् ॥]
तैरेवमुक्तः काकुत्स्थो बाढमित्यब्रवीत्स्मयन् । बिभीषणमथोवाच राक्षसेन्द्रं महायशाः ॥ २३ ॥
यावत्प्रजा धरिष्यन्ति तावत्त्वं वै बिभीषण । राक्षसेन्द्र महावीर्य लङ्कास्थः स्वं धरिष्यसि ॥ २४ ॥
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । यावच्च मत्कथा लोके तावद्राज्यं तवास्त्विह ॥ २५ ॥
शासितश्च सखित्वेन कार्यं ते मम शासनम् । प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि ॥ २६ ॥
किंचान्यद्वक्तुमिच्छामि राक्षसेन्द्र महाबल । आराधय जगन्नाथमिक्ष्वाकुकुलदैवतम् ॥ २७ ॥
आराधनीयमनिशं देवैरपि सवासवैः । तथेति प्रतिजग्राह रामवाक्यं बिभीषणः ॥
राजा राक्षसमुख्यानां राघवाज्ञामनुस्मरन् ॥ ॥ २८ ॥
तमेवमुक्त्वा काकुत्स्थो हनूमन्तमथाब्रवीत् । जीविते कृतबुद्धिस्त्वं मा प्रतिज्ञां वृथा कृथाः ॥ २९ ॥

रा० टी०–तद्विज्ञापनाकारमाह—अभिषिच्येति । अङ्गदमभिषिच्याहमागतोस्मि अतः तवानुगमनं कृतनिश्चयं मां विद्धि ॥ २३ ॥

गो० टी०–यदीति । यमदण्डमुखमेव त्वया विनिपातिताः स्म । हताः स्मेत्यर्थः ॥ २१–२६ ॥

२३] ति० टी०–एवं तेषामनुगमनवचः श्रुत्वा ब्रह्माज्ञापरिपालनाय व्यवस्थामाह—बिभीषणमिति ॥ २३ ॥

रा० टी०–तैरिति । काकुत्स्थो रामः बाढमित्येवाब्रवीत् अथानन्तरं विभीषणमुवाच ॥ २४ ॥

२४–२५] ति० टी०–तत्र विभीषणस्य ब्रह्मणामरत्वप्रदानादिहावस्थानमेव शास्ति—यावदिति । प्रजा धरिष्यन्ति स्थास्यन्ति तावत्त्वं स्वं स्वीयदेहं धरिष्यसि ॥ २४ ॥ २५ ॥

रा० टी०–तदाकारमाह—यावदित्यादिभिः । यावत् प्रजाः जनाः धरिष्यन्ति लोकानिति शेषः तावत्कालं लंकास्थः त्वं स्वं स्वकीयं देहं धरिष्यसि ॥ २५ ॥

रा० टी०–यावदिति । यावच्चन्द्रस्सूर्यश्च तिष्ठति यावन्मेदिनी तिष्ठति यावच्च लोके मत्कथा तिष्ठति तावत्कालमिह राज्यं तवास्तु ॥ २६ ॥

गो० टी०–एवं तेषामनुगमनार्थवचनं श्रुत्वा व्यवस्थामाह–बिभीषणमित्यादि । बिभीषणस्य ब्रह्मणा अमरत्वप्रदानप्रदर्शनात् स्नेहेनैवावस्थानं शास्ति–यावत्प्रजा इति । धरिष्यसीति । देहमिति शेषः ॥ २७–३२ ॥

२६] ति० टी०–शासित आज्ञप्तः ॥ २६ ॥

रा० टी०–शासित इति । सखित्वेन हेतुना त्वं मया शासितः अतः मम शासनं ते त्वया कार्यमत एव प्रजास्संरक्ष अत एव उत्तरं प्रतिवचनं वक्तुं नार्हसि ॥ २७ ॥

२७–२८] ति० टी०–अत्र स्थाने पाठे विशेषः—'ता-

वद्गमस्व राज्यस्थः काले मम पदं व्रज । इत्युक्त्वा प्रददौ तस्मै स्वविश्लेषासहिष्णवे ॥ श्रीरङ्गशायिनं स्वाचामिक्ष्वाकुकुलदैवतम् । रङ्गं विमानमादाय लङ्कां प्रायाद्विभीषणः ॥ इति । तदाह–किंचेति । इदं सार्धश्लोकद्वयं प्रक्षिप्तमित्यन्ये २७।२८॥

रा० टी०–नन्वहं त्वां विना कथं स्थास्यामीत्यत आह—किमिति । अन्यदपि वक्तुमिच्छामि अहं पृथक् ननु वदेत्यत आह—आराधयेति । इक्ष्वाकुकुलदैवतपत एव देवैरप्याराधनीयम् जगन्नाथं त्वमाराधय एतेनाराधनसमये सदैव मां द्रक्ष्यसीति सूचितम् ॥ २८ ॥

रा० टी०–तथेति । रामवाज्ञामनुस्मरन् अनुचिन्तयन् राक्षसमुख्यानां राजा विभीषणः रामवाक्यं तथेति प्रतिजग्राह ॥ २९ ॥

२९] ति० टी०–अथ हनुमतोऽपि ब्रह्मदत्तामरत्वाद्यावद्रामकथाप्रचारं भूलोके तच्छ्रवणस्य प्रार्थितत्वात्तथा रामेणानुज्ञातत्वाच्च तं स्थापयति—जीवित इति । जीवदवस्थाने कृतबुद्धिः कृतनिश्चयः । अतः स्वकृतां प्रतिज्ञां मा वृथा कृथाः । मा विलोपयेत्यर्थः ॥ २९ ॥

रा० टी०–तमिति । काकुत्स्थः हनुमन्तमब्रवीत् तदाकारमाह जीविते प्राणिमात्रे कृतबुद्धिः तत्कल्याणे कृतनिश्चयस्त्वं प्रतिज्ञां वृथा माकृथाः ॥ ३० ॥

गो० टी०–तमिति । अथ हनुमतोपि अमरत्वं प्रति ब्रह्मदत्तवरत्वात् यावद्रामकथाप्रचारः भूलोके तावत् तच्छ्रवणस्य प्रार्थितत्वात् तथा रामेणानुज्ञातत्वाच्च तस्य च स्थापनम् । जीवित इत्यादि । जीविते जीवितावस्थाने, कृतबुद्धिः कृतनिश्चयः सन्, प्रतिज्ञां त्वत्कृतां मा विलोपय । मा प्रतिज्ञां वृथा कृथा इति च पाठः ॥ ३३ ॥

१ पद्यद्वयमिदमधिकं गो. पाठे । २ इदमर्धं गो. पु. न दृश्यते । ३ मते इति गो. पा. । ४ सर्वैर्देवैरिति गो. पा. । ५ विलोपयेति गो. पा. ।

मत्कथाः प्रचरिष्यन्ति यावल्लोके हरीश्वर । तावद्रमस्व सुप्रीतो मद्वाक्यमनुपालयन् ॥ ३० ॥
एवमुक्तस्तु हनुमान्राघवेण महात्मना । वाक्यं विज्ञापयामास परं हर्षमवाप च ॥ ३१ ॥
यावत्तव कथा लोके विचरिष्यति पावनी । तावत्स्थास्यामि मेदिन्यां तवाज्ञामनुपालयन् ॥ ३२ ॥
जाम्बवन्तं तथोक्त्वा तु वृद्धं ब्रह्मसुतं तदा । मैन्दं च द्विविदं चैव पञ्च जाम्बवता सह ॥
यावत्कलिश्च संप्राप्तस्तावज्जीवत सर्वदा ॥ ॥ ३३ ॥
तदेवमुक्त्वा काकुत्स्थः सर्वांस्तानृक्षवानरान् । उवाच बाढं गच्छध्वं मया सार्धं यथोदितम् ॥३४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

नवाधिकशततमः सर्गः ।

दक्षिणसव्यपार्श्वयोः श्रीमद्दीभ्यामुपाश्रितो व्यवसायं पुरस्कृत्य नानाविधायुधैर्गृहीतपुरुषविग्रहैर्ब्राह्मणरूपिभिर्वेदैरनुगतो रामः प्रातिष्ठत तमन्तःपुरस्त्रियो बालदासीसहिताः सप्रकृतयोऽमात्यवर्गा भरतशत्रुघ्नौ द्रष्टुमागतो जानपदोऽपि तिर्यग्योनयः किं बहुना स्थावरचरभूतानि सुसूक्ष्माण्यपि सानन्दमनुजग्मुर्दाशरथिम् ।

प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः । रामः कमलपत्राक्षः पुरोधसमथाब्रवीत् ॥ १ ॥
अग्निहोत्रं व्रजत्वग्रे दीप्यमानं सह द्विजैः । वाजपेयातपत्रं च शोभमानं महापथे ॥ २ ॥

३०-३२] ति० टी०-उक्तमेवार्थं स्पष्टयति—मत्कथा इति ॥ ३० ॥ ३२ ॥

रा० टी०-प्रतिपालनोपायमाह—मदिति । यावत् लोके मत्कथाः प्रचरिष्यन्ति तावत् सुप्रीतस्त्वं मद्वाक्यमनुपालयन् सन् रमस्व एतेन मत्कथयैव सर्वेषां कल्याणं भविष्यतीति सूचितं तेन कथाप्रचारं लोकेषु कारयेत्याज्ञा सूचिता ॥ ३१ ॥

रा० टी०-एवमिति । हनुमान् परं हर्षमवाप वाक्यं विज्ञापयामास उवाच च ॥ ३२ ॥

रा० टी०-तदाकारमाह—यावदिति । मेदिन्यां पृथिव्यां स्थास्यामि ॥ ३३ ॥

गो०टी०-उक्त एवार्थः स्पष्टीक्रियते-मत्कथा इति३४-३६

३३] ति० टी०-एवं जाम्बवतोऽपि ब्रह्मपुत्रत्वाद्ब्रह्मणैव दत्तामरत्वात्स्थापनम् । तथा मैन्दद्विविदयोरपि तत्पित्राग्निनीकुमारानुग्रहेणामृतप्राशनात्स्थापनम् । जाम्बवन्तमिति । ब्रह्मसुतं वृद्धं जाम्बवन्तं मैन्दं द्विविदं तथोक्त्वा प्राणान्धारयतेत्युक्त्वा तेषां देहत्यागकालं तन्त्रेणाह—पञ्चेति । जाम्बवता सह ये पञ्चविभीषणहनुमन्मैन्दद्विविदा अमरास्ते यूयं यावत्कलिः प्रलयरूपो नाशः कलियुगं च तावत्कालं जीवत । तत्र हनुमद्विभीषणयोः प्रलये इतरेषां तु कलौ कृष्णावतारे नाश इति बोध्यम् ॥ ३३ ॥

रा० टी०-जाम्बवन्तमिति । जाम्बवन्तं मैन्दं द्विविदं च तथोक्त्वा सर्वान् प्रत्याहेति शेषः तदाकारमाह जाम्बवता सह पञ्च जाम्बवद्विभीषणहनुमन्मैन्दद्विविदा इत्यर्थः यूयं यावत्कलिं लोके विवादः सम्प्राप्तः तावत् प्रलयकालपर्यन्तमित्यर्थः सर्वदा जीवत सार्द्धश्लोक एकान्वयी ॥ ३४ ॥ ३५ ॥

गो० टी०-जाम्बवन्तमिति । जाम्बवतोऽपि ब्रह्मपुत्रत्वात् ब्रह्मणैव दत्तामरत्वाच्च स्थापनम् । मैन्दद्विविदयोरपि पित्रोरश्विनोरनुग्रहादमृतप्राशित्वाच्च स्थापनम् । विभीषणादयोऽमराः पञ्च, ते यूयं यावत्कलिः यावत्प्रलयः तावज्जीवत । कलौ प्रलये संप्राप्ते सति देहं त्यजतेति शेषः ॥ ३७ ॥

३४] ति० टी०-तदिति । विभीषणादीन्प्रत्येवमुक्त्वा इतरान्प्रति गमनानुज्ञामाहेत्यर्थः । सर्वांस्तान्पूर्वोक्तपञ्चव्यतिरिक्तान् ॥ ३४ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डेऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

रा० टी०-तदिति । एवमुक्त्वा यथोदितं भवद्भिर्यथाप्रार्थितम् तथैव बाढमस्त्विति शेषः अत एव मया सार्द्धं गच्छध्वम् इति वचनं काकुत्स्थः ऋक्षवानगनुवाच ॥ ३६ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे अष्टाधिकशततमः सर्गः ॥ १०८ ॥

गो० टी०-तानिति । सर्वांस्तानिति । पञ्चामरव्यतिरिक्तानित्यर्थः ॥ ३८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने अष्टोत्तरशततमः सर्गः ॥ १०८ ॥

१] ति० टी०-अथ महाप्रस्थानविधिना भगवति निर्याते सर्वेषां तदनुगमनम्—प्रभातायामिति ॥ १ ॥

रा० टी०-रामकर्तृकवानरादिप्रार्थनास्वीकारानन्तरकालिकं वृत्तमाह—प्रभातायामित्यादिभिः । रामः पुरोधसमब्रवीत् ॥ १ ॥

गो० टी०-प्रभातायामित्यादि ॥ १ ॥

२] ति० टी०-वाजपेयातपत्रम् । तस्यैव धर्मानुष्ठाने साधनत्वात् । राजचिह्नस्य च संत्यक्तत्वादिति भावः ॥ २ ॥

---

१ अवाप्येति गो. पाठः । २ त्रयेति गो. पाठः । ३ तामिति गो. पाठः । ४ यथेप्सितमिति गो. पाठः ।

ततो वसिष्ठस्तेजस्वी सर्वं निरवशेषतः । चकार विधिवद्धर्मं माहाप्रस्थानिकं विधिम् ॥ ३ ॥
ततः सूक्ष्माम्बरधरो ब्रह्ममावर्तयन्परम् । कुशान्गृहीत्वा पाणिभ्यां सरयूं प्रययावथ ॥ ४ ॥
अव्याहरन्कचिच्चिकिचिन्निश्चेष्टो निःसुखः पथि । निर्जगाम गृहात्तस्मादीप्यमानो यथांशुमान् ॥ ५ ॥
रामस्य दक्षिणे पार्श्वे पद्मा श्रीः समुपाश्रिता । सव्येऽपि चैं मही देवी व्यवसायस्तथाग्रतः ॥ ६ ॥
शरा नानाविधाश्चापि धनुरायत्तमुत्तमम् । तथायुधांश्च ते सर्वे ययुः पुरुषविग्रहाः ॥ ७ ॥
वेदा ब्राह्मणरूपेण गायत्री सर्वरक्षिणी । ओङ्कारोऽथ वषट्कारः सर्वे राममनुव्रताः ॥ ८ ॥
ऋषयश्च महात्मानः सर्व एव महीसुराः । अन्वगच्छन्महात्मानं स्वर्गद्वारमपावृतम् ॥ ९ ॥

रा० टी०–तदाकारमाह—अग्निहोत्रमिति । दीप्यमानमग्निहोत्रं शोभमानं वाजपेयातपत्रं च महापथे साकेतमार्गे अग्रे व्रजतु ॥ २ ॥

गो० टी०–अग्निहोत्रमिति । वाजपेयातपत्रं चेति । तस्य धर्मानुष्ठानबलप्राप्तत्वाद्राजचिह्नस्य सन्यस्तत्वाच्च सीतायाः पत्न्याः स्थितत्वादग्रेरपि स्थितिरिति पूर्वमेवोक्तम् ॥ २

३] ति० टी०–महाप्रस्थानं नाम परलोकगमनाय संकल्पपूर्वकं प्रस्थानं तदर्हति माहाप्रस्थानिकं विधिमुद्दिश्य यो धर्मः कर्तव्यस्तं धर्मं विधिवच्चकार ॥ ३ ॥

रा० टी०–तत इति । विधिवत् विधीनां वक्ता वशिष्ठः धर्मं वेदविहितं सर्वं महाप्रास्थानिकं विधिं निरवशेषतश्चकार ॥ ३ ॥

गो० टी०–तत इति । महाप्रस्थानमर्हतीति महाप्रास्थानिकम् ॥ ३ ॥

४] ति० टी०–ब्रह्ममावर्तयन्नित्यकारान्तत्वमार्षम् । परं ब्रह्मेत्यर्थः । प्रागगस्त्योपदिष्टं ब्रह्मसिद्धान्तप्रधानमहामन्त्रसर्वस्वं श्रीमद्ब्रह्महृदयमावर्तयन्सम्यङ्मनोवाग्वृत्तिभ्यामनुसंदधान इत्यर्थ इति कतकः । ब्रह्मप्रतिपादकोपनिषद आवर्तयन्नित्यर्थ इत्यन्ये कुशान्गृहीत्वाङ्गुलिविवरप्रसक्तान्कृत्वा प्रययौ । वक्ष्यमाणलक्षणमहाप्रस्थानविधिनेति शेषः ॥ ४ ॥

रा० टी०–तत इति । ततः प्रास्थानिकविधिसमाप्त्यनंतरं सूक्ष्माम्बरधरो रामः पाणिभ्यां कुशान् गृहीत्वा परब्रह्म उपनिषद्भागमित्यर्थः आवर्त्तयन् उच्चारयन्सन् सरयूं तत्तीरं प्रययौ ॥ ४ ॥

गो० टी०–तत इति । परं ब्रह्ममावर्तयन्निति । अकारान्तत्वमार्षम् । देवमन्त्रमित्यर्थः । प्रसज्य गृहीत्वेति । अङ्गुलीविवरप्रसक्तं कृत्वेत्यर्थः ॥ ४ ॥

५] ति० टी०–तदेवाह अव्याहरन्निति । निश्चेष्टः किंचित्पदार्थदर्शनश्रवणस्पर्शनादिविषयकेन्द्रियचेष्टारहितः । निःसुखः पथि पादुकासुखमप्युपेक्ष्य शर्करा कण्टकादिदुःखसहिष्णुः ॥ ५ ॥

रा० टी०–गमनप्रकारमाह—अव्याहरन्नित्यादिभिः । क्वचित् कस्मिंश्चिद्देशे किञ्चित् वेदोच्चारणातिरिक्तशब्दजातम् अव्याहरन् अनुच्चारयन् निश्चेष्टः गमनातिरिक्तव्यापाररहितः निस्सुखः नित्यं प्राकृतसुखापेक्षारहितः अंशुमान् सूर्य इव दीप्यमानो रामः तस्मात् प्रकटीभूतात् गृहात् निर्जगाम ॥ ५ ॥

गो० टी०–अव्याहरन्निति । निश्चेष्टः किंचित्पदार्थदर्शनश्रवणस्पर्शनादिविषयकेन्द्रियचेष्टारहित इत्यर्थः । निःसुखः पथि पादुकादिसुखमुपेक्ष्य शर्कराकण्टकबाधां सोढुमुद्युक्तः । निर्जगामेत्यर्थः ॥ ५ ॥

६] ति० टी०–पद्मा पद्महस्ता, श्रीर्लक्ष्मीः, मही देवी । 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ, इति श्रुतेः । श्रुतौ ह्रीर्मही । व्यवसायो व्यवसायशक्तिः संहारशक्तिः ॥ ६ ॥

रा० टी०–रामस्येति । पद्मा भरतस्य स्त्री श्रीः क्षीराब्धीशलक्ष्मणस्य स्त्री च रामस्य दक्षिणे पार्श्वे समुपाश्रिता मही देवी भूमनारायणशत्रुघ्नस्त्री सव्ये समुपाश्रिता व्यवसायः रामस्य शक्तिस्तु अग्रतस्समुपाश्रितः लिङ्गविपरिणामेनान्वयः ॥ ६ ॥

गो० टी०–रामस्येति । सपद्मा पद्महस्ता ॥ ६–९ ॥

७] ति० टी०–तथा संहारशक्तिसहकारिणामपि मूर्ततयोपासकत्वमाह–शरा इति । एवं रौद्रशक्तिसेवा दर्शिता ॥७॥

रा० टी०–शरा इति । शरादयः पुरुषविग्रहास्सन्तो ययुः ॥ ७ ॥

८] ति० टी०–अथ हैरण्यगर्भशक्तिसेवां दर्शयति—वेदा इति । गायत्री सर्वरक्षिणी सर्ववेदतन्मूलयज्ञयज्ञाधिकृताशेषजगद्रक्षिका तस्या अपि मूलमोङ्कारोऽप्यनुगतः । अनेन सर्वज्ञानयोगो दर्शितः । वषट्कारः कर्मयोगः ॥ ८ ॥

रा० टी०–वेदा इति । वेदाययुस्सर्वे ब्राह्मणरूपेण राममनुव्रता बभूवुरिति शेषः ॥ ८ ॥

९] ति० टी०–स्वर्गद्वारमपावृतं परस्वर्गस्य ब्रह्मलोकस्य द्वारमपावृतमनावृतम् । रामेण सहोपेन्द्रलोकगमनद्वारा रामेण सहागतानां सर्वजन्तूनां ब्रह्मलोकस्यैव प्राप्तेरिति बोध्यम् । अतएव बहुशः प्रागुक्तम् । 'रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति, इति रामस्थितिलोकस्यैव ब्रह्मलोकत्वाच्च ॥ ९ ॥

रा० टी०–ऋषय इति । अपावृतं मायावरणरहितं स्वर्गद्वारं साकेतप्राप्तिसाधकं महात्मानं राममृषिप्रभृतयोन्वगच्छन् ॥ ९ ॥

१ महाप्रास्थानिकमिति गो. रा. पा. । २ प्रसज्येति गो. पाठः । ३ सपद्मा श्रीरुपाश्रितेति गो. पाठः । ४ तु ह्रीर्महादेवीति गो. पाठः । ५ आयुधानीति गो. पाठः ।

तं यान्तमनुगच्छन्ति ह्यन्तःपुरचराः स्त्रियः । सवृद्धबालदासीकाः सवर्षवरकिंकराः ॥ १० ॥
सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ । रामं गतिमुपागम्य साग्निहोत्रमनुव्रताः ॥ ११ ॥
ते च सर्वे महात्मानः साग्निहोत्राः समागताः । सपुत्रदाराः काकुत्स्थमनुजग्मुर्महामतिम् ॥ १२ ॥
मन्त्रिणो भृत्यवर्गाश्च सपुत्रपशुबान्धवाः । सर्वे सहानुगा राममन्वगच्छन्प्रहृष्टवत् ॥ १३ ॥
ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः । गच्छन्तमनुगच्छन्ति राघवं गुणरञ्जिताः ॥ १४ ॥
ततः सस्त्रीपुमांसस्ते सपक्षिपशुबान्धवाः । राघवस्यानुगाः सर्वे हृष्टा विगतकल्मषाः ॥ १५ ॥
स्नाताः प्रमुदिताः सर्वे हृष्टपुष्टाश्च वानराः । दृढं किलकिलाशब्दैः सर्वं राममनुव्रतम् ॥ १६ ॥
न तत्र कश्चिद्दीनो वा व्रीडितो वापि दुःखितः । हृष्टं सँमुदितं सर्वं बभूव परमाद्भुतम् ॥ १७ ॥
द्रष्टुकामोऽथ निर्यान्तं रामं जानपदो जनः । यः प्राप्तः सोपिऽ दृष्ट्वैव स्वर्गायानुगतो जनैः ॥१८॥
ऋक्षवानररक्षांसि जनाश्च पुरवासिनः । आगच्छन्परया भक्त्या पृष्ठतः सुसमाहिताः ॥१९॥
यानि भूतानि नगरेऽप्यन्तर्धानगतानि च । राघवं तान्यनुययुः स्वर्गाय समुपस्थितम् ॥ २० ॥
यानि पश्यन्ति काकुत्स्थं स्थावराणि चराणि च । सर्वाणि रामगमने अनुजग्मुर्हि तान्यपि ॥ २१ ॥

१०] ति० टी०–वर्षवराः षण्ढाः ॥ १० ॥

रा० टी०–तमिति । सवृद्धबालदासीकाः वृद्धादिसहिताः सवर्षवरकिंकराः वर्षवरैः षण्ढैः किंकरैश्च सहिताः अंतःपुरचराः स्त्रियः तं राममनुगच्छन्ति ॥ १० ॥

गो० टी०–तमिति । नपुंसका वर्षधराः ॥ १०–१२ ॥

११] ति० टी०– सान्तःपुरोऽन्तःपुरस्त्रीसहितः । गतिं सर्वलोकगतिदम् । उपागम्य समीपमागत्यानुव्रतः । पश्चाच्चलित इत्यर्थः ॥ ११ ॥

रा० टी०–सान्त इति । सान्तःपुरः अन्तःपुरसामग्रीसहितोऽनुव्रतः नित्यं रामानुसारी भरतो गतिं सर्वाश्रयं साग्निहोत्रं रामसुपागम्य ययौ ॥ ११ ॥

१२] ति० टी०–महात्मानो ब्राह्मणाः ॥ १२ ॥

रा० टी०–ते इति । समागताः सर्वे काकुत्स्थमनुजग्मुः ॥ १२ ॥

१३–१५ ति० टी०–प्रहृष्टवत् । देहविसर्जने समीपावस्थानलाभजः प्रहर्षः पुत्रैस्तु तल्लब्धमिति ॥ १३ ॥ १५ ॥

रा० टी०–मन्त्रिण इति । मन्त्रिप्रभृतयः प्रहृष्टवत् हर्षविशिष्टं यथा भवति तथा राममन्वगच्छन् ॥ १३ ॥

रा० टी०–तत इति । गुणेन रञ्जिताः रामेऽनुरक्ताः सर्वाः प्रकृतयः राघवमनुगच्छन्ति ॥ १४ ॥

रा० टी०–तत इति । सस्त्रीपुमांसः स्त्रीपुंसाभ्यां सहिताः सपक्षिपशुबान्धवाः विगतकल्मषाः सर्वे राघवस्यानुगाः हृष्टा बभूवुरिति शेषः ॥ १५ ॥

गो० टी०–मन्त्रिण इति । प्रहृष्टवत्, देहविसर्जनसमये समीपावस्थानजः प्रहर्षः ॥ १३–१५ ॥

१६] ति० टी०–दृढं दृढानुगमननिश्चयं किलकिलाशब्दैरुपलक्षितं सर्वं वानरबलमिति शेषः ॥ १६ ॥

रा० टी०–स्नाता इति । सर्वे वानराः हृष्टेन सन्तोषेण पुष्टाः अत एव प्रमुदिताः बभूवुरिति शेषः अत एव दृढं राममनुव्रतं सर्वं सैन्यं किलकिलाशब्दैरुपलक्षितं बभूवेति शेषः १६

गो० टी०–स्नाता इति । किलकिलाशब्दैरिति । उपलक्षितमिति शेषः । सर्वमिति । वानरबलमिति शेषः ॥ १६ ॥

१७–१९] ति० टी०–दीनो दीनाकृतिः । व्रीडितः । गते रामे कथमहं तिष्ठामीति लज्जावशान्न रामानुगमनम्, किं तु संतोषेणेत्यर्थः । समुदितं मिलितं सर्वं परमाद्भुतं परलोकगमनायैवंविधहर्षयुक्तमित्यत्याश्चर्यकरमभूदित्यर्थः १७–१९॥

रा० टी०–नेति । तत्र रामगमनकाले कश्चिदपि जनः दीनत्वादिविशिष्टो न बभूव तत्र हेतुः यतस्सर्वं स्त्रीपुत्रमित्रपशुप्रभृति समुदितं सहितं बभूव अत एव परमाद्भुतमत्याश्चर्यं बभूव ॥ १७ ॥

रा० टी०–द्रष्टुकाम इति । रामं द्रष्टुकामोपि यो जानपदो जनः प्राप्तः सोपि दृष्ट्वैव स्वर्गाय साकेताय गन्तुमनुगतः१८

रा० टी०–ऋक्षेति । ससमाहिताः ऋक्षादयः परया भक्त्या पृष्ठत आगच्छन् ॥ १९ ॥

गो० टी०–नेति । व्रीडित इति । भगवदपराधादिना पूर्वकृतेनेति शेषः ॥ १७–१९ ॥

२०] ति० टी०–अन्तर्धानगतानि भूतप्रेतपिशाचादीनि भद्रकाल्यादीनि च ॥ २० ॥

रा० टी०–यानीति । नगरे अयोध्यायां यान्यन्तर्धानगतान्यपि भूतानि तान्यपि राघवमनुययुः ॥ २० ॥

गो० टी०–यानीति । स्वर्गाय ब्रह्मलोकगमनाय ॥२०॥२१

२१] ति० टी०–स्थावराणीति । स्थावराणामनुगमनं भगवतो रामस्य सदयावलोकनेन तदानीं ज्ञानक्रियाशक्तयुद्भवादुपपद्यते ॥ २१ ॥

१ अन्वगच्छंस्तमिति गो. पाठः । २ वाहना इति गो. पा. । ३ प्रेति गो. पाठः । ४ मुदेति गो. पाठः ।

नोच्छ्वसत्तदयोध्यायां सुसूक्ष्ममपि दृश्यते । तिर्यग्योनिगताश्चैव सर्वे राममनुव्रताः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे नवाधिकशततमः सर्गः ॥ १०९ ॥

दशाधिकशततमः सर्गः ।

सर्वैः सह सरयूसमीपमागतः श्रीरामस्तत्रागतपितामहवचनेन सभ्रातृको निजेन शरीरेण वैष्णवतेजो विवेश स्वेन सहागतेभ्य उत्तमं लोकं देहीत्यादिष्टो विधिः सान्तानिकाँल्लोकांस्तेभ्यो ददौ सर्वे चैवं भगवत्प्रसादात्स्वर्गभाजोऽभवन् ।

अध्यर्धयोजनं गत्वा नदीं पश्चान्मुखाश्रिताम् । सरयूं पुण्यसलिलां ददर्श रघुनन्दनः ॥ १ ॥
तां नदीमाकुलावर्तां सर्वत्रानुसरन्नृपः । आगतः सप्रजो रामस्तं देशं रघुनन्दनः ॥ २ ॥
अथ तस्मिन्मुहूर्ते तु ब्रह्मा लोकपितामहः । सर्वैः परिवृतो देवैर्भूषितैश्च महात्मभिः ॥ ३ ॥
आययौ यत्र काकुत्स्थः स्वर्गाय समुपस्थितः । विमानशतकोटीभिर्दिव्याभिरभिसंवृतः ॥ ४ ॥
दिव्यतेजोवृतं व्योम ज्योतिर्भूतमनुत्तमम् । स्वयंप्रभैः स्वतेजोभिः स्वर्गिभिः पुण्यकर्मभिः ॥ ५ ॥
पुण्या वाता ववुश्चैव गन्धवन्तः सुखप्रदाः । पपात पुष्पवृष्टिश्च देवैर्मुक्ता महौघवत् ॥ ६ ॥
तस्मिंस्तूर्यशतैः कीर्णे गन्धर्वाप्सरसंकुले । सरयूसलिलं रामः पद्भ्यां समुपचक्रमे ॥ ७ ॥

रा० टी०–उपसंहरन्नाह—यानीति । यानि सर्वाणि काकुत्स्थं पश्यन्ति तानि सर्वाण्यपि रामगमने अनुजग्मुः २१

२२] ति० टी०–उच्छ्वसत् । प्राणिमात्रमित्यर्थः । सुसूक्ष्ममपि न दृश्यते । अननुयातमिति शेषः ॥ २२ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे नवाधिकशततमः सर्गः ॥ १०९ ॥

रा० टी०–नेति । तिर्यग्योनिगता अपि सर्वे राममनुव्रता बभूवुः अत एव यदुच्छ्वसत् श्वासं गृह्णत् तत्सूक्ष्ममपि अयोध्यायां न दृश्यते ॥ २२ ॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे नवाधिकशततमः सर्गः ॥ १०९ ॥

गो० टी०–नेति । उच्छ्वसत्सप्राणमित्यर्थः । सुसूक्ष्ममपि न दृश्यते । अननुयातमिति शेषः ॥ २२ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने नवोत्तरशततमः सर्गः ॥ १०९ ॥

१] ति० टी०–अथ रामेण स्वस्वरूपं प्राप्य पश्चात्सर्वजन्तूनां पितामहानुमत्या ब्रह्मलोकादर्वाचीने ब्रह्मलोकसमे संतानकलोके प्रापणम्-अध्यर्धेति । अर्धाधिकं योजनं गत्वेत्यर्थः । पश्चान्मुखाश्रितां पश्चान्मुखेन स्वेनाश्रिताम् ॥१॥

रा० टी०–सरयूसमीपागमनानन्तरकालिकं वृत्तमाह—अध्यर्धेत्यादिभिः । पश्चान्मुखेन पश्चिमाभिमुखस्थितेन स्वेन आश्रितां सरयूमध्यर्धयोजनमर्धाधिकयोजनं गत्वा ददर्श तच्छोभामवलोकयामासेत्यर्थः ॥ १ ॥

गो० टी०–अध्यर्धेत्यादि । अर्धाधिकं योजनमध्यर्धयोजनम् । पश्चान्मुखाश्रितां पश्चान्मुखेन स्वेनाश्रिताम् ॥१–४॥

२] ति० टी०–तं देशं स्वर्गप्रापकं देशम् ॥ २ ॥

रा० टी०–तामिति । आकुलावर्त्तामावर्त्तैराकुलां तां सरयूं सर्वतः इतस्ततोऽनुसरन् गच्छन् रामः तमप्रकटसाकेतप्रापकं देशं गोप्रतारमित्यर्थः आगतः प्राप्तः ॥ २ ॥

३] ति० टी०–तस्मिन्मुहूर्ते लोकपितामहो ब्रह्मा आययौ इत्युत्तरेणान्वयः । रामपरिकरस्य यथोचितलोकप्रापणार्थमिति शेषः ॥ ३ ॥

४] ति० टी०–स्वर्गाय स्वर्गं गन्तुम् ॥ ४ ॥

रा० टी०–अथेति । देवैः परिवृतः महात्मभिर्महर्षिभिर्भूषितः अत एव दिव्याभिर्विमानशतकोटीभिरभिसंवृतः ब्रह्मा यत्र यस्मिन्देशे काकुत्स्थः स्वर्गाय स्वर्गं गन्तुं समुपस्थितः आगतः तत्रायौ श्लोकद्वयमेकान्वयि ॥ ३–४ ॥

५] ति० टी०–प्रथमतो दिव्यतेजसा व्याप्तं व्योम स्वयंप्रभैः स्वयमेव प्रकाशान्तरनैरपेक्ष्येण प्रकाशमानैः स्वर्गिभिः स्वतेजोभिः किरणैरनुत्तममतिशयेन ज्योतिर्भूतं ज्योतिर्मयमभूदित्यर्थः ॥ ५ ॥

रा० टी०–दिव्येति । स्वतेजोभिरुपलक्षितैः अत एव स्वयंप्रभैः स्वर्गिभिरनुगतमिति शेषः अत एव दिव्यतेजोवृतमत एव ज्योतिर्भूतं व्योम बभूवेति शेषः ॥ ५ ॥

गो० टी०–दिव्येति । स्वयंप्रभैः स्नेहं विना स्वयमेव प्रकाशमानैः ॥ ५ ॥

६] ति० टी०–महौघवत् । महासमूहमितीत्यर्थः ॥ ६ ॥

रा० टी०–पुण्येति । पुण्यवाताः ववुः देवैर्मुक्ता पुष्पवृष्टिः महौघवत् महासमूहविशिष्टं यथा भवति तथा पपात ॥६॥

गो० टी०–पुण्या इति । महौघवत् महासमूहार्था ॥ ६ ॥

७] ति० टी०–तूर्यशतैः संकीर्णे । तस्मिन्काले इत्यर्थः ।

१ अपीति गो. पाठः । २ ऋषिभिरिति गो.

ततः पितामहो वाणीं त्वन्तरिक्षादभाषत । आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव॥८॥
भ्रातृभिः सह देवाभैः प्रविशस्व स्विकां तनुम् । यामिच्छसि महाबाहो तां तनुं प्रविश स्विकाम्॥९॥
वैष्णवीं तां महातेजो येद्वाकाशं सनातनम् । त्वं हि लोकगतिर्देव न त्वां केचित्प्रजानते ॥ १० ॥
ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम् । त्वामचिन्त्यं महद्भूतमक्षयं चाजरं तथा ॥ ॥
यामिच्छसि महातेजस्तां तनुं प्रविश स्वयम् ॥ ॥ ११ ॥

गन्धर्वाप्सरसंकुले । गन्धर्वाप्सरःसंकुल इति यावत् । पद्भ्यां समुपचक्रमे । गन्तुमिति शेषः ॥ ७ ॥

रा० टी०–तस्मिन्निति । तूर्यशतैः अनेकतूर्यैर्ध्वनिभिः कीर्णे व्याप्ते गंधर्वाप्सरैः गंधर्वाप्सरोभिस्सङ्कुले तस्मिन्समये रामः सरयूसलिलं समुपचक्रमे ॥ ७ ॥

गो० टी०–तस्मिन्निति । गन्धर्वाप्सरसंकुले गन्धर्वाप्सरः संकुले । पद्भ्यां समुपचक्रमे गन्तुमिति शेषः ॥ ७ ॥

८] ति० टी०–अन्तरिक्षान्समीपमागत्य । अभापतेत्यर्थः । हे विष्णो ! लोकानुग्रहाय गृहीतविष्णुशरीर ब्रह्मन्राघव, दिष्ट्या प्राप्तोऽसि । मायागृहीतदुःखमयनटनयोग्यमनुष्यशरीरविसर्जनकाले प्राप्तोऽसि । ते भद्रमस्तु कल्याणमस्तु । अथागच्छ । यतो लोकान्मनुष्यलोकं गतस्तं लोकमित्यर्थः॥८॥

रा० टी०–तत इति । अंतरिक्षात् अन्तरिक्षं प्राप्य पितामहोभाषत अर्द्धं पृथक् तदाकारमाह—आगच्छेति । हे विष्णो ! व्यापकव्यापक आगच्छ दिष्ट्या अस्मद्भाग्यवशेन भ्रातृभिस्सह सम्प्राप्तोसि अतः स्वकामात्मीयां तनुं तनुवत्प्रियं धामेत्यर्थः प्रविशस्व प्रविश ॥ ८ ॥

गो० टी०–तत इति । अन्तरिक्षादभ्याशमागत्याभाषतेत्यर्थः ॥ ८ ॥

९] ति० टी०–तदर्थं च देवाभैर्देवस्य तव सदृशैर्भ्रातृभिः सह स्विकां तनुं स्वतनुवदत्यन्तप्रियं लोकं प्रविश । अत्र भ्रातृभिरिति बहुवचनेन लक्ष्मणस्यापि तदानीं तत्रागमनं सूचयतीति तीर्थः । कतकस्तु यद्यपि शत्रुघ्न एक एव सह गच्छति तथापि पुरोगतस्य सह गच्छतः पश्चादागमिष्यतश्च भ्रातुस्तत्र प्रवेशः सामान्येनाथतनप्रवेश इत्युच्यते इति न विरोध इति व्याचख्यौ । भरतानुगमनं भगवद्देहविसर्जनदर्शनपर्यन्तमिति च पूर्वसर्गे 'सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ' इति पद्ये व्याख्याति स्म च । तत्र भरतस्य पश्चाद्गमनं मूलमन्वेष्टव्यम् । पूजायां बहुवचनमित्यन्ये । नन्वु मदीयतनुनामनेकत्वात्कचित्प्रविशेत्युच्यते तत्राह–यामिति ॥ ९ ॥

रा० टी०–रामप्रवेशनं संप्रार्थ्य रामेण सहागतानां प्रवेशं प्रार्थयन्नाह–यामिति । तां प्रसिद्धां वैष्णवीं विष्णुसम्बन्धिनीं तनुं धामेत्यर्थः सनातनं सनस्य ब्रह्मणः आतनः तत्तत्कार्ये नियोगो यत्र तत् आकाशमाकाशवद्विस्तीर्णं यत् स्वकां तनुं साकेतमित्यर्थः यां व्यक्तिमिच्छसि प्रवेशयितुमिति शेषः तां प्रविश प्रवेशय ॥ ९ ॥

गो० टी०–भ्रातृभिरिति । स्वकां तनुमिति । त्वं विष्णुतनुं लक्ष्मणः शेषतनुं भरतो गरुडतनुं शत्रुघ्नो विष्वक्सेनतनुमित्यर्थः । तद्वाकाशं सनातनम् । "ऋचो अक्षरे परमे व्योमन्" इति श्रुत्युक्तपरमाकाशं विष्ण्ववतारकुलस्थानं वैकुण्ठं वा प्रविशेत्यर्थः ॥ ९ ॥

१०] ति० टी०–तदेव विशदयति–वैष्णवीमिति । हे महातेजः ! वैष्णवीमौपेन्द्रीम् । यतो मनुष्यदेहस्तां वा प्रविश । यद्वाकाशं सनातनम् । यद्वा सनातनमाकाशं शुद्धब्रह्मरूपं वा प्रविश । तद्रूपेण वा तिष्ठेत्यर्थः । आकाशशब्दो हि ब्रह्मणि तत्र तत्र श्रुतिषु प्रसिद्धः । कतकस्तु—'वैष्णवीं तां महातेजः त्वां तनुं प्रविश स्वयम्' इति पाठ्ठः पाठः । यामिच्छसीत्येतत्प्राक्तनमर्थं च प्रामादिकमित्याह । अग्रे च पितामहवच इति श्लोक इति तत्स्वरसः । तीर्थस्तु यद्वाकाशं सनातनमिति व्याख्यायातः परं ब्रह्म स्तौति—त्वं हीति । लोकगतिः । लोकानां स्वर्गादिकं गमयिता लोकैर्गम्यश्च त्वमेवेत्यर्थः । त्वां केचिदतिशयिततपःसंपन्ना अपि न प्रजानते ॥ १० ॥

११] ति० टी०–तर्हि किमज्ञेय एव सर्वथा नेत्याह—ऋते इति । मायां ज्ञानशक्तिरूपां विनान्ये न जानन्तीत्यर्थः । विशालाक्षीमित्यनेन तस्याः सर्वविषयता सूचिता । पूर्वपरिग्रहाम् । तेन सहजत्वं सूचितम् । श्रवणमननिदिध्यासनादिनेदृशी ज्ञानशक्तिर्येषां प्रादुर्भवति त एव त्वां जानन्तीति तात्पर्यम् । तत्र तादृशज्ञानविषयं स्वरूपमाह–त्वामिति । अचिन्त्यं देशतः परिच्छेदशून्यम् । अत एव महद्भूतं प्राप्तम् । अविशेषात्सर्ववस्तुभिरिति शेषः । तेन वस्तुपरिच्छेदशून्यम् । अक्षयं कालपरिच्छेदशून्यम् । अजरमविकारिणम् । एवं स्तुत्वा प्रकृतिं विज्ञापयति–यामिति ॥ ११ ॥

रा० टी०–ननु दिव्यलोकप्रवेशनाधिकारः तवैवास्त्वित्यत आह—त्वमिति । लोकानां निखिलजनानां गतिः निर्वाहकः त्वमेव त्वां तु मायां कृपामयीं तव पूर्वपरिग्रहां नित्यस्त्रियं सितामृते विना केचिन्न प्रजानते अत एव त्वा त्वामचिन्त्यत्वादिविशिष्टमाहुर्वेदा इति शेषः सार्द्धश्लोक एकान्वयी ॥१०–११॥

गो० टी०–अनन्तरोक्तपक्षं विवृणोति–त्वं हीत्यादिना । मायां लक्ष्मीम् । पूर्वपरिग्रहाम् अनादितया परिगृह्यमाणाम्। नित्यानपायिनीमित्यर्थः । त्वामिति । सर्वसंग्रहं सर्वानुग्राहकम्[2] अक्षयं चाजरं तथेति च पाठः ॥ १०–१५ ॥

१ तदिति गो. पा. । २ सर्वसंग्रहमिति गो. पाठः ।

पितामहवचः श्रुत्वा विनिश्चित्य महामतिः । विवेश वैष्णवं तेजः सशरीरः सहानुजः ॥ १२ ॥
ततो विष्णुमयं देवं पूजयन्ति स्म देवताः । साध्या मरुद्गणाश्चैव सेन्द्राः साग्निपुरोगमाः ॥१३॥
ये च दिव्या ऋषिगणा गन्धर्वाप्सरसश्च याः । सुपर्णनागयक्षाश्च दैत्यदानवराक्षसाः ॥ १४ ॥
सर्वे पुष्टं प्रमुदितं सुसंपूर्णमनोरथम् । साधुसाध्विति तैर्देवैस्त्रिदिवं गतकल्मषम् ॥ १५ ॥
अथ विष्णुर्महातेजाः पितामहमुवाच ह । एषां लोकं जनौघानां दातुमर्हसि सुव्रत ॥ १६ ॥
इमे हि सर्वे स्नेहान्मामनुयाता यशस्विनः । भक्ता हि भजितव्याश्च त्यक्तात्मानश्च मत्कृते॥१७॥
तच्छ्रुत्वा विष्णुवचनं ब्रह्मा लोकगुरुः प्रभुः । लोकान्संतानकान्नाम यास्यन्तीमे समागताः ॥१८॥
यच्च तिर्यग्गतं किंचित्त्वामेवमनुचिन्तयत् । प्राणांस्त्यक्ष्यति भक्त्या तैत्संतानेषु निवत्स्यति १९

१२] ति० टी०–अथ स्वसालोक्यकाङ्क्षिणो जनान्संतानापरपर्यायं स्वलोकं प्रापय्य क्रमेण परमं पदं नेतुकामो दयालुर्भगवान्स्वतोऽप्यस्मानुत्तमं लोकं प्रापितवानिति तत्तोपायौपेन्द्रं लोकमेव गच्छति स्मेत्याह—**पितामहेति** । महामतिः सर्वज्ञो भगवान्विनिश्चित्य प्रागुक्तं निश्चयं कृत्वा सशरीरो वैष्णवं तेजो यज्ञज्वालावत्तेजोमयमौपेन्द्रं विवेश । अनेन तेजोमय एव देहो मायया मनुष्यदेहादिभिर्मनुष्यदेहत्वेन गृहीत इति ध्वनितम् । तेजःप्रवेशे जले जलबद्विवेकेनाग्रहात्सहानुज इत्यनेनानुजशरीराणामपि तथैव तेजोमयत्वं सूचितम् । सशरीरशब्दबोधितस्वसाहचर्येण तेषामपि सशरीरप्रवेशबोधनात् ॥ १२ ॥

रा० टी०–**यामिति** । स्वयमपि यां तनुमिच्छसि तां प्रविश अर्धं पृथक्—**पितामहेति** । महामतिः रामः वैष्णवं विष्णुसम्बन्धि तेजः तन्मयवैकुण्ठमित्यर्थः सहानुजस्सशरीरो विवेश ॥ १२ ॥

१३–१४] ति० टी०–ततस्तत्प्रवेशात् । विष्णुमयमुपेन्द्राभेदमापन्नं देवं देवताः पूजयन्ति स्म । कास्ता देवतास्तत्राह—**साध्या इत्यादि** ॥ १३ ॥ १४ ॥

रा० टी०–**तत इति** । विष्णुमयभरतांशभूतविष्णुसमीपं प्राप्तं देवं नित्यक्रीडावन्तं रामं देवतादयः ऋषिगणादयश्च पूजयन्ति स्म दैत्यादिकर्तृकपूजनोक्त्या रामरूपस्य सर्वमोहकत्वं ध्वनितम् अर्धचतुष्टयमेकान्वयि ॥ १३–१४ ॥

१५] ति० टी०–**सर्वमिति** । त्वय्यत्रागते सर्वमिदं त्रिदिवस्थजनजातं पुष्टं प्रमुदितं सुसंपूर्णमनोरथं गतकल्मषं च जातमिति तैर्देवैः साधुसाध्विति भाषितम् ॥ १५ ॥

रा० टी०–**सर्वमिति** । गतकल्मषं सर्वं त्रिदिवमूर्धलोकमित्यर्थः सुसम्पूर्णमनोरथमत एव प्रमुदितमत एव पुष्टमासीदिति शेषः अत एव देवैः साधुसाध्वित्यूचे इति शेषः ॥ १५ ॥

१६] ति० टी०–अथ विष्णुर्विष्णुशरीरसंक्रान्तशरीरो महातेजा रामः पितामहमुवाच किमुवाच तदाह—**एषां लोकमिति** । त्वल्लोकप्राप्तिद्वारा प्रतिसंचरे त्वया सह मोक्षप्रापकं लोकमेषां दातुमर्हसि ॥ १६ ॥

रा० टी०–**अथेति** । विष्णुर्भरतः पितामहमुवाच अर्धं पृथक् ॥ १६ ॥

गो० टी०–**अथेत्यादि** । विष्णुः विष्णुत्वं प्राप्तः रामः । लोकं दातुमर्हसि । आतिवाहिकतया दातुमर्हसीत्यर्थः ॥ १६ ॥

१७] ति० टी०–किमर्थमेवमेतन्मुक्तये यत्नस्तत्राह–**इमे हीति** । यतो मम स्नेहादेते मामनुयाता अनुगमनं प्राप्ताः । भक्ताः अत एव मे भजितव्या भजनीयाः । मत्कृते मद्वियोगासहिष्णुतया त्यक्तात्मानस्त्यक्तशरीराः । अत एषां तादृशलोकदानमुचितमिति भावः 'भक्ता हि भाषितव्या मे' इति पाठे यत इमे भक्ताः, अत इमे भाषितव्याः । एतत्प्रयोजनार्थं भवन्तं प्रत्यवश्यं मया वक्तव्या इत्यर्थः ॥ १७ ॥

रा० टी०–तदाकारमाह—**एषामिति** । हि यतः स्नेहात् मामनुयाता अत एव मत्कृते त्यक्तात्मानः त्यक्तलौकिकप्रयत्नाः तपस्विनः प्रशस्तविचारवन्तः इमे सर्वे भक्ता अत एव भजितव्याः मयापि यथोचितं सेव्याः अतः एषामस्माभिस्सहागतानां जनौघानां लोकं दातुमर्हसि सार्धश्लोक एकान्वयी १७

गो० टी०–कथं ब्रह्मविचाररहितानामेषां ब्रह्मलोकप्राप्तिरित्यत्राह–**इमे हीति** । भक्ताः भक्तिमन्तः, मत्कृते त्यक्तात्मानश्च ॥ १७ ॥

१८] ति० टी०–लोकगुरुः सर्वजगत्कर्ता वेदादिसर्वविद्योपदेष्टा च । प्रभुर्नित्यनैमित्तिकविहितनिषिद्धकर्मणां फलप्रापणे समर्थः । इमे त्वया सह समागताः संतानकान्नाम लोकान्क्रमेण ब्रह्मलोकप्राप्तिद्वारा मुक्तिजनकान्यास्यन्ति॥१८॥

रा० टी०–**तदिति** । विष्णोर्भरतस्य वचनं श्रुत्वा ब्रह्माब्रवीदिति शेषः अर्धं पृथक् तदाकारमाह—**लोकानिति** । समागताः भवद्भिस्सहागता इमे सन्तानकान्नाम लोकान् यास्यन्ति अर्धं पृथक् ॥ १८ ॥

गो० टी०–**तदिति** । सान्तानिकान् सान्तानिकाख्यान् लोकान्, संप्राप्ताः सन्तः यास्यन्ति । त्वल्लोकमिति शेषः ॥१८॥

१९] ति० टी०–ननु कथं ब्रह्मविद्भ्यो ब्रह्मलोको वानरप्राप्यस्तत्राह–**यच्चेति** । तिर्यग्गतमपि यत्किंचित्यत्र क्वापि पदार्थे त्वामेव विष्णुमिति चिन्तयत्यत्किंचित्पदार्थं विष्णुत्वेन

१ मनस्विन इति गो. तपस्विन इति रा. पा. । २ सांतानिकानिति गो. पा. । ३ वैतत्संताने विवत्स्यतीति गो. पा.

सर्वैर्ब्रह्मगुणैर्युक्ते ब्रह्मलोकादनन्तरे । वानराश्च स्विकां योनिमृक्षाश्चैव तथा ययुः ॥२०॥
येभ्यो विनिःसृताः सर्वे सुरेभ्यः सुरसंभवाः । तेषु प्रविविशे चैव सुग्रीवः सूर्यमण्डलम् ॥ २१ ॥
पश्यतां सर्वदेवानां स्वान्पितॄन्प्रतिपेदिरे । तथा ब्रुवति देवेशे गोप्रतारमुपागताः ॥ २२ ॥
भेजिरे सरयूं सर्वे हर्षपूर्णाश्रुविक्लवाः । अवगाह्याप्सु यो यो वै प्राणांस्त्यक्त्वा प्रहृष्टवत् २३
मानुषं देहमुत्सृज्य विमानं सोध्यरोहत । तिर्यग्योनिगतानां च शतानि सरयूजलम् ॥२४॥
संप्राप्य त्रिदिवं जग्मुः प्रभासुरवपूंषि तु । दिव्या दिव्येन वपुषा देवा दीप्ता इवाभवन्॥२५॥
गत्वा तु सरयूतोयं स्थावराणि चराणि च । प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन् ॥ २६ ॥

भावयस्त्वयि विष्णौ भक्त्या युक्तं प्राणांस्त्यक्ष्यति तत्संतानकनामकलोकेषु वत्स्यति । किं पुनर्वक्तव्यं य एते त्वदनुरागेण त्वदनुगमनपूर्वं प्राणांस्त्यजन्ति ते संतानकेषु वत्स्यन्तीति १९

रा० टी०-यदिति । तिर्यग्गतमपि यत्किञ्चित् त्वामनुचिन्तयन्सन् प्राणान् त्यक्ष्यति तत्सर्वं ब्रह्मगुणैः सत्यज्ञानानन्दादिभिर्युक्ते ब्रह्मलोकात् गोलोकादित्यर्थः अनन्तरसमीपवर्तिसाकेते वियमानेषु संतानेषु लोकविशेषेषु निवत्स्यति सार्धश्लोक एकान्वयी ॥ १९ २० ॥

गो० टी०-न केवलमेत एव, इतः परमपि ये रामभक्तास्तेपि विष्णुलोकं प्राप्नुवन्तीत्याह-यच्चेति । ब्रह्मलोकादनन्तरे अव्यवहितोपरिदेशस्थे सर्वैर्गुणैर्युक्ते । "एषु सर्वतः प्रतिष्ठेष्वनुत्तमेषूत्तमेषु" इति श्रुतेः । सर्वगुणैर्नित्ययुक्ते सान्तानिके निवत्स्यतीत्यनुकर्षः ॥ १९ ॥ २० ॥

२०] ति० टी०-कोऽसौ संतानकलोकस्तत्राह-सर्वैरिति । सर्वैर्ब्रह्मगुणैः सत्यसंकल्पत्वादिब्रह्मगुणैर्युक्ते । ब्रह्मलोकादनन्तरे तत्समीपस्थे । अनेन तत्र स्थितानामपि क्रमेण ब्रह्मलोकप्राप्त्या ब्रह्मणा सह मुक्तिः सूचिता । एवं सामान्यतो वानराणां सांतानिकलोकप्राप्तिमुपदिश्य देवांशानां सुग्रीवादीनां तत्तद्देवादिस्वरूपप्राप्तिमाह-वानराश्चेति । वानराः सुग्रीवादयः । ऋक्षा जाम्बवदतिरिक्ताः स्विकां स्वीयां योनिं दैवयोनिं स्वस्वदेवरूपं ययुः ॥ २० ॥

रा० टी०-वानरा इति । सुरसम्भवाः सुरेभ्यस्समागताः ये वानराः ऋक्षाश्च साकेतागतवानरादिषु तत्प्रसादार्थं प्रविष्टाः ते सर्वे येभ्यस्सुरेभ्यो विनिःसृताः तां स्वकां योनिं तथागतप्रकारेणैव ययुः विविशुः ॥ २१ ॥

गो० टी०-वानराणां तु आधिकारिकदेवांशत्वात्तत्तद्देवशरीरप्रवेश एवेत्याह-वानराश्चेत्यादिना ॥ २१ ॥ २२ ॥

२१-२५] ति० टी०-उक्तमेवार्थं स्पष्टयति—येभ्य इति । सुरेभ्य इत्युपलक्षणम् । येभ्यो देवर्ष्यादिभ्यो ये विनिःसृतास्ते सुरसंभवाः स्वपितॄन्प्रतिपेदिरे । तेषु मध्ये सुग्रीवः सूर्यमण्डलं प्राविविशे । अत्र ययुः प्रतिपेदिरे इति निर्देशो भविष्यदर्थे । 'अवतीर्य समीकृत्य स्वांशान्स्वीकुर्वते पुनः' इति शास्त्रात् । उक्तार्थमुपसंहरति—तथेति । देवेशे पितामहे तथोक्तवति । आगच्छ प्रविश स्विकां तनुमित्युक्तवति इत्यर्थः । गोप्रतारं गोप्रतारारव्यं तीर्थं सारवमुपागताः सन्तः सर्वे हर्षपूर्णाश्रुविक्लवा आनन्दजाश्रुपूर्णतया विक्लवविक्षणाः सरयूं भेजिरे । अथ यो यः प्राणी तदा सरयूजलमवगाह्य हृष्टवद्धृष्ट आसीत्स मानुषं देहमुत्सृज्य विमानमध्यरोहत । तिर्यग्योनिगतानां शतान्यनेकानि सरयूजलं तदवगाहं प्राप्य प्रभासुराणि वपूंषि येषां तादृशानि भूत्वा त्रिदिवं जग्मुः । दिव्या दिव्यवपुषः सन्तो दिव्येन वपुषा दीप्ता देवा इवाभवन् ॥२१-२५॥

रा० टी०-तत्र विशेषमाह—तेष्विति । तेषु वानरादिषु मध्ये सुग्रीवः सुग्रीवांशस्सूर्यमण्डलं विविशे अत एव स्वान् पितॄन स्वयोनिं प्रतिपेदिरे सुग्रीवभिन्ना अपि वानरार्यंशा इति शेषः ॥ २२ ॥

रा० टी०-तथेति । देवेशे ब्रह्मणि तथा ब्रुवति सति हर्षपूर्णाश्रुविक्लवाः सहागतभिन्ना अपि जना गोप्रतारमुपागतास्सन्तः सरयूं भेजिरे ॥ २३ ॥

गो० टी०-तथेति । गोप्रतारं गोप्रतारारव्यं तीर्थम् । हर्षपूर्णाश्रुविक्लवाः आनन्दाश्रुपूर्णतया विक्लवदृष्टयः ॥२३-२५

रा० टी०-सहानागतानां वृत्तमाह—अवगाह्येति । अप्सु सरयूजलेषु यो योवगाह्यातिष्ठदिति शेषः स प्रहृष्टवत् प्रहर्षविशिष्टं यथाभवति तथा प्राणांस्त्यक्त्वा मानुषं देहं चोत्सृज्य विमानमध्यरोहत ॥ २४ ॥

रा० टी०-तिर्यगिति । तिर्यग्योनिगतानां शतानि अनेकानि सरयूजलं प्रभासुराणि अतिप्रकाशयुक्तानि वपूंषि च सम्प्राप्य त्रिदिवं जग्मुः ॥ २५ ॥

रा० टी०-दिव्या इति । दिव्येन वपुषोपलक्षिताः दिव्याः प्रमोदमयत्वेन प्राकृतविलक्षणाः देवा इव दीप्ता अभवन् सरयूजलं प्राप्ता इति शेषः अर्द्धं पृथक् तदेव भङ्ग्यन्तरेणाह-गत्वेति । स्थावराणि च चराणि सरयूतोये गत्वा तत्तोयविक्लेदं प्राप्य देवलोकं च साकेतमुपागमन् ॥ २६ ॥

२६] ति० टी०-अथ स्थावराणि चराणि च पश्चादीनि सरयूतोयं गत्वा तत्तोयविक्लेदं प्राप्य तत्तोयमज्जनं प्राप्य देवलोकमुपागमन् । कल्पवृक्षकामगव्यादिस्वरूपं प्राप्नुवन्तीत्यर्थः ॥ २६ ॥

१ जलं योयः प्राणी ह्यासीदिति गो. पा. । २ चेति गो. पा.

तस्मिन्येऽपि समापन्ना ऋक्षवानरराक्षसाः । तेऽपि स्वर्गं प्रविविशुर्देहान्निक्षिप्य चाम्भसि॥२७॥
ततः समागतान्सर्वान्स्थाप्य लोकगुरुर्दिवि । हृष्टैः प्रमुदितैर्देवैर्जगाम त्रिदिवं महत् ॥ २८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे दशाधिकशततमः सर्गः ॥ ११० ॥

एकादशोत्तरशततमः सर्गः ।

पठनादिकर्तॄणां फलकथनम् इति श्रीः शुभं भवतु ।

एतावदेतदाख्यानं सोत्तरं ब्रह्मपूजितम् । रामायणमिति ख्यातं मुख्यं वाल्मीकिना कृतम्॥१॥
ततः प्रतिष्ठितो विष्णुः स्वर्गलोके यथा पुरा । येन व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ २ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । नित्यं शृण्वन्ति संहृष्टाः काव्यं रामायणं दिवि॥३॥

गो० टी०-गत्वेति । तत्तोयविक्षेपं तत्तोयसेचनम्२६॥२७

२७] ति० टी०-तस्मिन्सरयूजले समापन्नास्त्यक्तदेहास्तेऽपि सर्वे एतान्देहानम्भसि निक्षिप्य स्वर्गं संतानकलोकरूपं विविशुः ॥ २७ ॥

रा० टी०-तस्मिन्काले तत्र प्राप्ताः केचनापि न तत्र स्थिता इति बोधयन्नाह-तस्मिन्निति । सरयूजले ये समापन्नाः प्राप्ताः तेपि ऋक्षादयः देहान् अम्भसि निःक्षिप्य स्वर्गं साकेतं प्रविविशुः ॥ २७ ॥

२८] ति० टी०-ततः समागतान्दिव्यैर्देहैरन्तरिक्षे स्वसमीपं प्राप्तान्दिवि तत्तदुचितस्वर्गं स्थापयित्वा स्वयं भगवदागमनाद्धृष्टैर्देवैः सह महत्त्रिदिवं स्वलोकं जगाम ॥ २८ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्डे दशाधिकशततमः सर्गः ॥११०॥

रा० टी०-तत इति । लोकगुरुः सर्वनियन्ता रामः समागतान् सर्वान् वानरार्क्षशान् संस्थाप्य तत्तद्देवलोकेषु नियोज्य समुदितैः हृष्टैः नित्यं संतुष्टैः अत एव दैवैः प्रमोदमयैः भ्रात्रादिभिः सह महत् सर्वेषां पूजनीयं त्रिदिवं सार्वकालिकप्रमोदविशिष्टं साकेतं जगाम ॥ २८ ॥

गो० टी०-तत इति । दिवं परमाकाशम् वैकुण्ठम् । त्रिदशैर्नित्यसूरिभिः, सदा हृष्टैरिति विशेषणात् । हृष्टैः प्रमुदितो देवैर्जगाम त्रिदिवं महदिति च पाठः ॥ २८ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने दशोत्तरशततमः सर्गः ॥ ११० ॥

१] ति० टी०-अथ तत्काव्यफलोपदेशः—एतावदिति । सोत्तरमुत्तरकाण्डसहितम् । ब्रह्मणा चतुर्मुखेन भगवदवतारचरितविषयत्वात्पूजितम् । किंच ब्रह्मभिर्ब्रह्मर्षिभिः पूजितम् । ब्रह्मणा स्वयं प्रवर्त्य वाल्मीकिना कारितत्वात्सर्वाख्यानेभ्यः प्रशस्तं रामायणमिति ख्यातम् । 'परानन्दमयो रामो ह्यते श्रवणादिभिः । अतोऽस्य चाभिधा पुण्या रामायणमितीरिता ॥' वाल्मीकिना कृतमेतदाख्यानमेतावदेव एतावच्छ्लोकसर्गकाण्डसंख्याकमेव । न न्यूनं नाधिकमित्यर्थः ॥१॥

रा० टी०-एतावदिति । ब्रह्मभिः ब्राह्मणहिरण्यगर्भविष्णुप्रभृतिभिः पूजितं सोत्तरमुत्तरकाण्डसहितमेतावत् षट्काण्डात्मकमेव रामायणमिति ख्यातं मुख्यं सर्वाख्यानेभ्यः श्रेष्ठं वाल्मीकिना कृतमेतदेव ॥ २९ ॥

गो० टी०-अस्य काव्यस्य अपवर्गान्तसाधकतया कथाशेषानुवादपूर्वकं पठनश्रवणादिषु फलमुपदिश्यते-एतावदित्यादि । सोत्तरमुत्तरकाण्डसहितम् । मुख्यं सर्वाख्यानेभ्यः प्रशस्तमेतदाख्यानम् । एतावदेव समर्थादं एतावच्छ्लोकसर्गकाण्डसंख्याकमेव । न न्यूनं नाधिकम् ॥ १ ॥

२] ति० टी०-अथ पूर्वसर्गवृत्तानुवादपूर्वं काव्यस्यापवर्गान्तसाधकत्वेन श्रोतव्यार्थत्वप्रतिपादनम्—तत इति । ततो भक्तजनस्य स्वर्गप्रापणानन्तरं स्वयमपि विष्णुरुपेन्द्रत्वं प्राप्तः । स्वर्गलोके उपेन्द्रलोके यथा पुरा यथापूर्वं प्रतिष्ठितः । एवं तर्हि सपरिच्छेदः किं स नेत्याह—येनेति । येन सचराचरं सर्वं त्रैलोक्यं जगदुपादानत्वेन व्याप्तम् स्वर्गप्रतिष्ठितत्वं तु मनुष्यदेहधारणवन्मायिकमिति भावः ॥ २ ॥

रा० टी०-तत इति । ततः रामकर्तृकसाकेतगमानानन्तरं येन त्रैलोक्यं व्याप्तं स विष्णुः भरतावंशभूतः स्वर्गलोके स्वर्गेपि गीयते प्रशस्यते स एव लोकः वैकुण्ठप्रभृतिः तस्मिन् यथा पुरा प्रतिष्ठितोभवदिति शेषः ॥ ३० ॥

गो० टी०-तत इति । ततः स्वभक्तजनस्य स्वर्लोकप्रापणानन्तरम्, विष्णुः स्वर्गलोके परमस्वर्गं वैकुण्ठे, यथापुरं यथापूर्वम् प्रतिष्ठितः स्वर्गशब्दस्य लोकपरत्वभमव्याहत्यर्थं विष्णुं विशिनष्टि-येनेति ॥ २ ॥

३] ति० टी०-ततोऽस्य काव्यस्य जगदुपादानकारणावतारचरित्राख्यानत्वतो देवादयोऽपि दिव्यं रामायणं दिवि शृण्वन्ति ॥ ३ ॥

रा० टी०-तत इति । ततः रामगमनकालादारभ्य दिवि स्थिता देवादयः रामायणं काव्यं नित्यं शृण्वन्ति ॥ ३१ ॥

गो० टी०-इदं च रामायणं न केवलं मनुष्याणां भोग्यं, किन्तु देवतानामपि भोग्यमेवेत्याह-तत इति । ततः ब्रह्मस्थानपूजितत्वादेः ॥ ३ ॥

१ तस्मिन्नपीति गो. पाठः । २ जगाम त्रिदशैः सार्धं सदा हृष्टैर्दिवं महदिति गो. पा. । ३ पुरमिति गो. पाठः ।

इदमाख्यानमायुष्यं सौभाग्यं पापनाशनम् । रामायणं वेदसमं श्राद्धेषु श्रावयेद्बुधः ॥ ४ ॥
अपुत्रो लभते पुत्रमधनो लभते धनम् । सर्वपापैः प्रमुच्येत पौदमप्यस्य यः पठेत् ॥ ५ ॥
पापान्यपि च यः कुर्यादहन्यहनि मानवः । पठत्येकमपि श्लोकं पापात्स परिमुच्यते ॥ ६ ॥
वाचकाय च दातव्यं वस्त्रं धेनुहिरण्यकम् । वाचके परितुष्टे तु तुष्टाः स्युः सर्वदेवताः ॥ ७ ॥
एतदाख्यानमायुष्यं पठन्रामायणं नरः । सपुत्रपौत्रो लोकेऽस्मिन्प्रेत्य चेह महीयते ॥ ८ ॥
रामायणं गोविसर्गे मध्याह्ने वा समाहितः । सायाह्ने वापराह्णे च वाचयन्नावसीदति ॥ ९ ॥
अयोध्यापि पुरी रम्या शून्या वर्षगणान्बहून् । ऋषभं प्राप्य राजानं निवासमुपयास्यति ॥ १० ॥
एतदाख्यानमायुष्यं सभविष्यं सहोत्तरम् । कृतवान्प्रचेतसः पुत्रस्तद्ब्रह्माप्यन्वमन्यत ॥ ११ ॥
[अश्वमेधसहस्रस्य वाजपेयायुतस्य च । लभते श्रवणादेव सर्गस्यैकस्य मानवः ॥
प्रयागादीनि तीर्थानि गङ्गाद्याः सरितस्तथा । नैमिशादीन्यरण्यानि कुरुक्षेत्रादिकान्यपि ॥
गतानि तेन लोकेस्मिन्येन रामायणं श्रुतम् । हेमभारं कुरुक्षेत्रे ग्रस्ते भानौ प्रयच्छति ॥
यश्च रामायणं लोके शृणोति सदृशावुभौ । सम्यक्छ्रद्धासमायुक्तः शृणुते राघवीं कथाम् ॥
सर्वपापात्प्रमुच्येत विष्णुलोकं स गच्छति । आदिकाव्यमिदं त्वार्ष पुरा वाल्मीकिना कृतम् ॥
यः शृणोति सदा भक्त्या स गच्छेद्वैष्णवीं तनुम् । पुत्रदाराश्च वर्धन्ते संपदः सन्ततिस्तथा ॥
सत्यमेतद्विदित्वा तु श्रोतव्यं नियतात्मभिः । गायत्र्याश्च स्वरूपं तद्रामायणमनुत्तमम् ॥
अपुत्रो लभते पुत्रमधनो लभते धनम् । सर्वपापैः प्रमुच्येत पदमप्यस्य यः पठेत् ॥

४–७] ति० टी०–यत एवमतः—इदमाख्यानमायुष्यमिति । श्रुतं पठितं च सदायुर्जनकमित्यर्थः । सौभाग्यं सौभाग्यवर्धनम् । वेदसमम् । वेदवद्ब्रह्मविषयत्वेऽपि पौरुषेयत्वेन वेदतः किंचिन्न्यूनमित्यर्थः ॥ ४–७ ॥

रा० टी०–इदमिति । आयुष्यमायुर्वर्द्धकं सौभाग्यं सौभाग्यजनकं वेदसमं सूर्यान्तर्यामिप्रतिपादकत्वेन वेदसदृशमिदमाख्यानं रामायणं बुधः श्राद्धेषु श्रावयेत् एतेन श्रीमद्रामायणश्रुतेः पितॄणां तृप्तिकारकत्वं सूचितम् ॥ ३२ ॥

रा० टी०–ऐहिकमपि फलमस्तीति बोधयन्नाह—**अपुत्र इति**। अस्य रामायणश्लोकस्य पादमपि यः पठेत् सः सर्वपापैः प्रमुच्येत अत एव अपुत्रः पुत्रं लभते अधनश्च धनं लभते॥३३॥

रा० टी०–**पापानीति** । यः अहन्यहनि प्रतिदिनं पापानि कुर्यात् सोपि एकमपि श्लोकं यदि पठेत् तदा पापात्परिमुच्यते ॥ ३४ ॥

रा० टी०–**वाचकायेति** । यतः वाचके परितुष्टे सति सर्वेदेवताः तुष्टाः स्युः तस्मात् वाचकाय वस्त्रादि दातव्यम्॥३५॥

गो० टी०–**इदमिति** । इदमाख्यानं रामायणरूपम्, आयुष्यम् आयुर्वर्धनम्, सौभाग्यं सौभाग्यवर्धनम्, श्राद्धे च श्रावयेत् । अक्षय्यपितृतृप्त्यर्थमिति शेषः ॥ ४–७ ॥

८–९] ति० टी०–लोकेऽस्मिन्महीयते इत्यर्थः । प्रेत्य मरणोत्तरमपि । इह च, चात्परलोके, इह लोके च महीयते । इह लोके पूजा च कीर्त्यविच्छेदात् ॥ ८–९ ॥

रा० टी०–**एतदिति** । एतद्रामायणमाख्यानं पठन्नरः सपुत्रपौत्रैः पुत्रपौत्रादिसहितैरैश्वर्यजातैरुपलक्षितो भूत्वा प्रेत्य लोकान्तरं गत्वा महीयते सर्वैः पूज्यते किंच इह लोके महीयते प्रेत्य च महीयते इत्यर्थः ॥ ३६ ॥

गो० टी०–**एतदिति**। लोकेस्मिन्महीयत इत्यनुकर्षः॥८॥

१०] ति० टी०–ततः परमयोध्या केन रूपेण स्थितेति शङ्कानिवृत्तये भविष्यद्वृत्तान्तान्तरमाह—**अयोध्यापीति** । रम्या अयोध्यापुर्यपि बहून्वर्षगणान्शून्या सती कालान्तर ऋषभं राजानमवाप्य निवासं जनाश्रयत्वमुपयास्यति । अत्र कतकः–एवं चायोध्याविषयेऽभिषिक्तेन भरतेनायोध्यादेशो नन्दिग्रामे स्थित्वैव रक्षित इति द्रष्टव्यमिति। तत्र मानं चिन्त्यम्। 'सत्येन च शपे राजन्स्वर्गलाभेन चैव हि । न कामये यथा राज्यं त्वां विना रघुनन्दन ॥' इति पूर्वभरतोक्त्या विरुद्धं च। तथा 'भरतश्चापि शत्रुघ्नस्तयोर्दारा उभे शुभे । राघवस्यानुगमने निश्चितार्थाः समाययुः ॥ राघवस्तु चतुर्बाहुरभूत्तस्य कराब्जयोः । उभौ भरतशत्रुघ्नौ शङ्खचक्रौ बभूवतुः ॥' इति पाद्मविरुद्धं चेत्यन्ये ॥ १० ॥

रा० टी०–**अयोध्येति** । बहून् वर्षगणान् शून्या जनरहिता अयोध्या पुरी ऋषभं राजानं प्राप्य निवासं जनस्थितिमुपयास्यति ॥ ३७ ॥

गो० टी०–**अयोध्येति** । निवासं सुजनाश्रयत्वम् ॥ ९ ॥

११] ति० टी०–**एतदिति** । सभविष्यं भगवद्यानानन्तर

१ पदमिति गो. पादमप्येकमिति रा. पा. । २ पद्यमिदं गो. रा. पुस्तकयोर्न दृश्यते

यः पठेच्छृणुयान्नित्यं चरितं राघवस्य ह । भक्त्या निष्कल्मषो भूत्वा दीर्घमायुरवाप्नुयात् ॥
चिन्तयेद्राघवं नित्यं श्रेयः प्राप्तुं य इच्छति । श्रावयेदिदमाख्यानं ब्राह्मणेभ्यो दिने दिने ॥
यस्त्विदं रघुनाथस्य चरितं सकलं पठेत् । सोऽमुक्षये विष्णुलोकं गच्छत्येव न संशयः ॥
पिता पितामहस्तस्य तथैव प्रपितामहः । तत्पिता तत्पिता चैव विष्णुं यान्ति न संशयः ॥
चतुर्वर्गप्रदं नित्यं चरितं राघवस्य तु । तस्माद्यत्नवता नित्यं श्रोतव्यं परमं सदा ॥
शृण्वन्रामायणं भक्त्या यः पादं पदमेव वा । स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥
एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः । प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्य उत्तरकाण्डे एकादशोत्तरशततमः सर्गः ॥ १११ ॥

भगवदयोध्यावृत्तान्तकथनसहितम् । सहोत्तरमेतावदेतदाख्यानमित्यतः प्राक्तनोत्तरकाण्डसहितम् । प्रचेतसः पुत्रो वाल्मीकिः । एतद्रामायणाख्यानं कृतवान् । प्रचेतसः पुत्र इत्यक्षराधिक्यमार्षत्वात् । तद्ब्रह्मा हिरण्यगर्भोऽप्यन्वमन्यत सत्यशब्दतया वेदोपबृंहणतया सर्वार्थसाधकतया चाङ्गीकृतवानिति सर्वेष्टसिद्धिः ११

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके वाल्मीकीय आदिकाव्य उत्तरकाण्ड एकादशोत्तरशततमः सर्गः ॥ १११ ॥

निर्मलं कतकक्षोदादपि रामायणाम्बुधिम् ।
अत्यन्तं निर्मलं चक्रे रामः स्वमतिवाससा ॥
रामो रामायणाम्भोधौ सेतुं कृत्वा सुविस्तृतम् ।
पाखण्डिरक्षोवक्राणि ध्वस्तवान्साधुतोषकः ॥
उत्तरान्तैः सुवर्णिते निषेधावधिके परे ।
सप्तमे राघवे रामे रतिरस्तु चिदात्मके ॥

रा० टी०–उपसंहरन्नाह—**एतदिति**। सभविष्यं सभेषु सभावत्सु विष्यं व्याप्तमेतदाख्यानं प्रचेतसः पुत्रः वाल्मीकिः कृतवान् तदाख्यानं ब्रह्मापि अन्वमन्यत अपूजयत् ॥ ३८ ॥

स्वस्ति श्रीदाता निखिलविधाता श्रितविख्याता सकलपतिः ।
यस्य श्रीसहिता सीता दयिता त्रिभुवनमहिता निखिलनतिः ॥
सोऽयोध्यानाथो निगमसुगाथो गंगापाथोविदिततनुः ।
जयति श्रीरामो जलदश्यामो रमणललामो महाधनुः ॥ १ ॥
वन्दे श्रीभरतं रामे निरतं लक्ष्मणभरतं रिपुसूदम् ।
वन्दे विधिजातं रघुगुरुभातं श्रुतिवत् ख्यातं शिवभूतम् ॥
वन्देऽयोध्येशं दशरथमेशं सुतसर्वेशं रामेशम् ।
वन्दे श्रीजनकं सीताजनकं सज्जनकुलकं मिथिलेशम् ॥ २ ॥
जयति कपीशो रिपुगणदीशो यं जगदीशो भजति भृशम् ।
यो रघुपतिचरणे दुःखविदरणे जनसुखकरणे धरति दृशम् ॥
सोऽस्मत्प्रियकारी दुःखविदारी शुभसुखधारी पवनसुतः ।
श्रीहनुमन्नामा गुणगणधामा रघुवरकामाचरणयुतः ॥ ३ ॥
जयति श्रीगङ्गायमुनासङ्गा वाणी दङ्गा जन्हुसुता ।
यज्जललवपाता त्रिभुवनधाता भवति सुभाता शम्भुयुता ॥
यन्नामोद्धारी श्रीगिरिधारी त्रिभुवनकारी भवति सदा ।
सासुरसुरवन्द्या नतिभिर्नन्द्या योभिर्मन्द्या पातु सदा ॥ ४ ॥
यो वेदशास्त्राङ्गसुसारभूतं रामायणं रामसुखोपकारम् ।
सुनिर्ममे तं महतो महान्तं वाल्मीकिमाचार्यवरं नमामः ॥५॥
श्रीमद्रामकिशोरधूसरपिता श्रीतोडिरामात्मजात्
सीतारामसुधीवरान् सुजनितो वंशीधरः श्रीयुतः ।
प्रण्णस्तस्य हि कारणं समभवत् वाल्मीकिरामायण-
व्याख्याने यदिदं समाप्तिमगमत् श्रीमत्त्रिवेणीतटे ॥ ६ ॥
शिवसहायवुपनिर्मितिरेषा भाति
तत्त्वं दुर्जनवादात् सततं पाति ॥ ७ ॥
चन्द्राब्धङ्कशशाङ्कयुक्तशरदः शुक्लाश्विने दिक्तिथौ
पूर्णं श्रीरघुनाथपादकृपया रामायणाद्यं शिरः ।
अन्ते यस्य विराजते मणिपदं वाल्मीकिरामायण-
व्याख्यानं शुभदं समर्पितमिदं श्रीरामपादाब्जयोः ॥८॥

इति श्रीमद्वाल्मीकीयरामायणव्याख्याने रामायणशिरोमणौ उत्तरकाण्डे दशाधिकशततमः सर्गः ॥ ११० ॥

गो० टी०–**एतदाख्यानमिति**। सहोत्तरमिति। अभिषेकानन्तरवृत्तान्तः। सीताभूप्रवेशानन्तरभाविवृत्तान्तस्तु सभविष्यमित्युच्यते, कृतवान् प्रचेतस इति। तद्रामायणं ब्रह्माप्यन्वमन्यत। अपिः प्राधान्ये। अन्वमन्यत अङ्गीकृतवान्। सदा पठति स्मेत्यर्थः। अत्र यकारो गायत्र्यक्षरम्। तेन गायत्रीविवरणम् रामायणमिति सूचितम् ॥ १०–२५ ॥

इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे मणिमुकुटाख्याने उत्तरश्रीरामायणव्याख्याने एकादशोत्तरशततमः सर्गः ॥१११॥

इति श्रीरामायणं समाप्तम् ।

:rit Series No. 11

RAMAYAṆA OF VĀLMĪKI

WITH THE COMMENTARIES
TILAKA OF RĀMA, RĀMĀYAṆAŚIROMAṆI OF
ŚIVASAHĀYA AND BHŪṢAṆA OF GOVINDARĀJA

EDITED BY

SHASTRI SHRINIVASA KATTI MUDHOLAKARA

INCLUDES AN EXHAUSTIVE INTRODUCTION
IN SANSKRIT AND INDEX OF VERSES

by

SATKARI MUKHOPADHYAYA

Vol. VIII

INDEX OF VERSES

Sole Distributors :
MEHARCHAND LACHHMANDAS
ORIENTAL BOOKSELLERS & PUBLISHERS
DARYAGANJ, NEW DELHI-110 002

Published by
PARIMAL PUBLICATIONS
Publishers & Booksellers
33/17 Shakti Nagar
Delhi-110 007 (India)

© Parimal Publications

1983

Price : **Rs. 140**

Printed by :
A. K. Distributors,
at Delux Offset Printers,
Delhi-110 035.

परिमल संस्कृत ग्रन्थमाला संख्या-११

श्रीमद्वाल्मीकिमहामुनिप्रणीतं

रा मा य ण म्

रामप्रणीतरामायणतिलक—शिवसहायप्रणीत
रामायणशिरोमणि—गोविन्दराजप्रणीत-
रामायणभूषणेति-टीकात्रयेणोपस्कृतम् ।

तच्च

कट्टी श्रीनिवासशास्त्रिभिः

संशोधितं पाठान्तरैः टिप्पण्यादिभिश्च समलंकृतम्

तथा

श्रीसातकडिमुखोपाध्यायशर्मणा

विनिर्मितया विशदभूमिकया श्लोकानुक्रमण्या च
सनाथीकृतम् ।

अष्टमो भागः

[श्लोकानुक्रमणिका]

परिमल पब्लिकेशन्स

दिल्ली — अहमदाबाद

प्रकाशक :

परिमल पब्लिकेशन्स

३३/१७ शक्तिनगर
दिल्ली-११०००७
(भारत)

अधिकृत विक्रेता :

मेहरचन्द लछमनदास

प्रकाशक एवं पुस्तक-विक्रेता
१ अन्सारी रोड, दरियागंज
नई दिल्ली-११०००२ (भारत)

१९८३
मूल्य : रु० १४०

मुद्रक :

ए० के० डिस्ट्रीब्यूटर्स, द्वारा
डीलक्स आफसेट प्रिंटर्स
दिल्ली-११००३५

श्लोकानुक्रमणी

(अ)	काण्ड	सर्ग	श्लोक
अकम्पनवचः श्रुत्वा	३	३१	१२
अकम्पनवचः श्रुत्वा	३	३१	२१
अकम्पनवधं श्रुत्वा	६	५७	१
अकम्पनश्च निहतः	६	१२३	९
अकम्पनश्च निहतः	६	१२३	१२
अकम्पनस्ततस्तेषाम्	६	५५	९
अकम्पनस्तु तद्दृष्ट्वा	६	५६	१८
अकम्पनस्तु शैलाभम्	६	८९	१४
अकर्णधारा पृथिवी	२	८८	२२
अकर्ता चाकृतज्ञश्च	२	७५	३३
अकर्तुरपि कार्यस्य	४	२९	२०
अकर्दममिदं तीर्थम्	१	२	५
अकस्माद्दैन्यमागच्छत्	६	५५	१०
अकस्मान्नागरः सर्वः	२	४१	१४
अकार्यमपि कर्तव्यम्	५	६२	४
अकालफलिनो वृक्षाः	६	१२४	१९
अकाले चापि पुष्पाणि	६	१२०	१०
अकाले चापि मुख्यानि	२	४८	१३
अकाले पुष्पशबलाः	६	१२०	१६
अकीर्तिरतुला लोके	२	१३	१४
अकुण्ठधारैर्निशितैः	६	७६	४८
अकुण्डलधराश्चान्याः	५	९	४७
अकुतश्चिद्भया नाथाः	६	१११	४१
अकुतूहलभावेन	७	१८	९
अकुर्वन्तोऽपि पापानि	३	३८	२६
अकृतात्मानमासाद्य	५	२१	११
अकृत्वा कत्थसे कर्म	६	८८	२४
अकृष्टपच्या पृथिवी	७	८४	८
अक्लिष्टमाल्याभरणाम्	६	११८	४
अक्षतं जातरूपं च	४	२६	२७
अक्षतं जातरूपं च	६	११८	३८
अक्षतैरपि संस्कृतैः	१	७३	२३
अक्षयश्च व्ययश्चैव	७	८३	४
अक्षया तु भवेत्प्रीतिः	३	९	२९

	काण्ड	सर्ग	श्लोक
अक्षया नरशार्दूल	३	५	३१
अक्षया बलवन्तश्च	४	४०	२७
अक्षया बलवन्तश्च	६	७	१०
अक्षयाविषुधी बाणैः	७	२५	१२
अक्षय्यं मधुहन्तारम्	१	७६	१७
अक्षरं ब्रह्म सत्यं च	६	११७	१४
अक्षि सूच्चा प्रमृजसि	३	४७	४१
अक्षौहिण्यो हि तत्रासन्	७	३९	२
अगच्छं जानकीं सीताम्	५	६५	१०
अगत्वा निश्चयं राजा	१	४१	२६
अगत्वा निश्चयं राजा	१	४२	९
अगम्यो मानुषैर्दीप्तः	४	४१	२४
अगस्त्य इति विख्यातः	३	११	७९
अगस्त्यं कौशिकं चैव	२	३२	१३
अगस्त्यचरितामाशाम्	४	५२	७
अगस्त्यभवनं यत्र	४	४१	३५
अगस्त्यमभिगच्छेति	३	११	३६
अगस्त्यमभिगच्छेयम्	३	११	३३
अगस्त्यवचनं श्रुत्वा	७	३०	५२
अगस्त्यस्त्वब्रवीत्तत्र	७	१०	२
अगस्त्यस्त्वब्रवीद्रामम्	७	३६	५१
अगस्त्यस्याश्रमश्चैव	६	१२३	६४
अगस्त्यस्याश्रमः श्रीमान्	३	११	८६
अगस्त्येन तदा देवैः	३	११	६१
अगस्त्येनान्तरे तत्र	४	४१	२०
अगस्त्येनैवमुक्तस्तु	३	१३	२३
अगाधश्चाप्रमेयश्च	६	२०	४
अगाधे च निमग्नाऽस्मि	४	२३	१०
अगुरूर्दह्यते तत्र	६	७५	८
अगुरूणां च दिव्यानाम्	४	५०	३५
अगृह्णां यच्च ते पाणिम्	२	४२	८
अगृह्या यदि गच्छामि	६	१०१	३५
अग्निः कोपः प्रसादस्ते	६	११७	३६
अग्निं कुशान्काष्ठमपः	१	४६	१०

	का०	स०	श्लो०
अग्निकेतुः सुदुर्धर्षः	६	४३	११
अग्निकेतुश्च दुर्धर्षः	६	६	२
अग्निकेतुश्च दुर्धर्षः	६	६६	१३
अग्निचूर्णमिवाविद्धम्	६	४	११४
अग्निज्वालानिकाशेन	३	६६	२६
अग्निदीप्तमुखान्बाणान्	६	६६	४७
अग्निमाधाय तं वेद्याम्	१	७३	२४
अग्निमुख्या अशोकाश्च	३	७३	५
अग्निर्वायुस्तथा धूमः	२	२५	२४
अग्निशाला प्रविश्याथ	२	६१	११
अग्निं शुश्रूषमाणस्य	१	६	७
अग्निष्टेष्वग्निशालासु	६	१०	१०
अग्निष्टोमातिरात्राभ्याम्	७	६६	६
अग्निष्टोमादिभिर्यज्ञैः	४	४	८
अग्निष्टोमादिभिर्यज्ञैः	६	३२	२४
अग्निष्टोमोऽश्वमेधश्च	७	२५	४
अग्निं संशमयत्वार्यः	२	६६	१४
अग्निहोत्रमिवाभाति	७	२४	१०
अग्निहोत्रं व्रजत्वग्रे	७	१०६	२
अग्निहोत्रे च ऋषिणा	२	११६	६
अग्निहोत्रेण संस्कारम्	६	३२	२४
अग्निहोत्रेषु तीर्थेषु	३	३६	४
अग्निं हुत्वा प्रदायार्घ्यम्	३	१२	२७
अग्नेः स्वाहा यथा देवी	३	२४	२६
अग्नेस्तु वचनं श्रुत्वा	१	४६	८
अग्नौ हुतानि शीर्षाणि	७	१०	२६
अग्न्यर्कानलसंकाशम्	६	१२४	२०
अग्रतः कुरु सीतायाः	६	३१	४१
अग्रतः प्रययुस्तस्य	२	८३	२
अग्रतः प्रययौ रामः	३	११	१
अग्रतस्तु ययौ तस्य	४	१३	३
अग्रतस्ते गमिष्यामि	२	२७	१७
अग्रतो गुरवः सर्वे	२	११५	१०
अग्रतो निषसादाथ	१	३१	२२
अग्रतो मम गच्छन्ती	२	६	४५
अग्रहस्तं विधुन्वंस्तु	२	२३	४
अग्राक्ष्णा वीक्षमाणस्तु	२	२३	५

	का०	स०	श्लो०
अग्राण्यारुह्य शैलानाम्	४	२२	५
अग्रे निर्यातुमिच्छामि	३	२२	११
अग्रे यातु बलस्यास्य	६	४	६
अङ्कुराढ्यैः शरावैश्च	१	७३	२२
अङ्केनादाय वैदेहीम्	३	२	१०
अङ्केनादाय वैदेहीम्	६	११२	१२
अङ्कोलाश्च कुरण्टाश्च	४	१	४०
अङ्गदं च महाबाहो	७	४०	३
अङ्गदं चापि बलिनम्	६	२६	३
अङ्गदं चापि सौमित्रिः	७	१०२	१२
अङ्गदं तु पुरस्कृत्य	६	४६	२४
अङ्गदं पतितं दृष्ट्वा	६	७६	५६
अङ्गदं परिरक्षन्तौ	६	७६	१६
अङ्गदं पुरतः कृत्वा	५	६४	२५
अङ्गदं वालितनयम्	६	४१	६०
अङ्गदः पाणिना नेत्रे	६	७६	५२
अङ्गदः प्रतिविद्धाङ्गः	६	७६	७
अङ्गदप्रतिरूपाणाम्	४	२१	१३
अङ्गदप्रमुखान्वीरान्	४	४१	५
अङ्गदप्रमुखाः सर्वे	५	३५	६७
अङ्गदस्तु कुमारोऽयम्	४	१५	१६
अङ्गदस्तु कुमारोऽयम्	४	२१	४
अङ्गदस्तु रणे शत्रून्	६	४४	२८
अङ्गदस्त्वानयेन्माल्यम्	४	२५	१६
अङ्गदस्य गृहं रम्यम्	४	३३	६
अङ्गदस्य चमूं भीमाम्	६	६४	२
अङ्गदस्य वचः श्रुत्वा	४	३२	१
अङ्गदस्य वचः श्रुत्वा	४	४६	११
अङ्गदस्य वचः श्रुत्वा	४	६४	२०
अङ्गदस्य वचः श्रुत्वा	६	६६	४७
अङ्गदानि च चित्राणि	२	३२	४
अङ्गदान्यङ्गुलीवेष्टान्	६	६५	२६
अङ्गदीया पुरी रम्या	७	१०२	४
अङ्गदे चाभिषिक्ते तु	४	२६	३६
अङ्गदेव कृतं कर्म	६	४६	२६
अङ्गदेन यथा मह्याम्	४	३३	२६
अङ्गदेन शिला क्षिप्ता	६	५४	२३

	का०	स०	श्लो०
अङ्गदेन समाख्यातः	४	३३	३०
अङ्गदेनात्र निहतः	६	१२३	८
अङ्गदेनेन्द्रसार्धम्	६	४३	६
अङ्गदेनैष संयातु	६	४	१४
अङ्गदो द्विविदो मैन्दः	६	३	३१
अङ्गदो नाम लक्ष्मीवान्	५	३५	५५
अङ्गदो बहुभिश्छिन्नः	६	३१	३१
अङ्गदो मातुलो दृष्ट्वा	६	७६	४६
अङ्गदो बालिपुत्रश्च	६	३७	२
अङ्गदो बालिपुत्रस्तु	६	३१	२७
अङ्गनानां सहस्रेण	५	११	७
अङ्गनाः शतमात्रं तु	५	१४	१०
अङ्गप्रत्यङ्गजः पुत्रः	२	७४	१४
अङ्गरागेण दिव्येन	२	११४	२०
अङ्गरागोचितां सीताम्	२	३३	६
अङ्गराजेन सख्यं च	१	११	३
अङ्गहारैस्तथैवान्या	५	१०	३६
अङ्गारकसमानानां	४	३७	२४
अङ्गारचूर्णोत्करसंनिकाशैः	४	२८	३०
अङ्गुलीयकदानं च	१	३	२६
अङ्गुल्या न समो रामः	३	४८	१६
अङ्गेश्वरं महेष्वासम्	१	१३	२६
अङ्गेषु प्रथितो राजा	१	६	८
अचन्द्रसूर्यं हरयः	४	५०	१४
अचिन्तनीयम् परिवर्जनीयम्	४	२४	१३
अचिन्तयन्ती वैदेही	५	५६	२३
अचिन्तयन्ती वैदेही	६	१२६	३२
अचिन्तयन्महोत्पातान्	३	६५	५२
अचिन्तयित्वा तान्बाणान्	६	१००	४५
अचिन्तयित्वा बाणौघान्	६	५६	१२
अचिन्तयित्वा स तदा	७	१६	२२
अचिन्त्यकर्मा तपसा	१	५१	१४
अचिन्त्यकल्पं नृपतेः	२	१	४७
अचिन्त्याप्रमेयाणि	१	७२	२
अचिन्त्यामङ्गुताकाराम्	५	२	५२
अचिरप्रोषितं रामम्	२	१०३	३४
अचिरान्मोक्ष्यते सीते	६	३३	३१

	का०	स०	श्लो०
अचिरेण तु कालेन	२	४०	११
अचिरेणाश्रमं भ्रातुः	३	१५	२०
अचिरेणैव कालेन	५	२६	२३
अचेष्टौ मन्दनिःश्वासौ	६	४६	४
अजश्च सुव्रतश्चैव	२	११०	३४
अजानतः शयानस्य	७	५५	१६
अजानतां नः सर्वेषाम्	४	५१	६
अजामुख्या यदुक्तं वै	५	२८	८८
अजायत समं तेन	१	१७	१०
अजिनोत्तरसंस्तीर्णे	२	८८	४
अजीवनार्हेण मया नृशंशा	२	३८	६
अजेयः सत्यवाक्शूरः	६	५८	७४
अज्ञातं नस्ति ते किंचित्	६	३७	३५
अज्ञातरूपैः पुरुषैः	६	१७	५६
अज्ञानात्तु हतो यस्मात्	२	६४	५५
अज्ञानाद्धर्षिता विप्र	७	३०	४०
अज्ञानाद्धि कृतं यस्मात्	२	६४	२५
अज्ञानाद्भवतः पुत्रः	२	६४	१६
अज्ञानाद्यदि वा ज्ञानात्	३	५४	१७
अञ्जनादभिनिष्क्रान्तः	७	५	५
अञ्जनाम्बुदसंकाशाः	४	३७	५
अञ्जनाया वचः श्रुत्वा	४	६६	१७
अञ्जना सुप्रजा येन	६	१४	१८
अञ्जलिं कुर्मि कैकेयि	२	१२	३६
अञ्जलिं प्राङ्मुखं कुर्वन्	५	१	६
अट्टहासं विमुञ्चन्ती	५	५४	४६
अट्टहासान्विमुञ्चतः	७	६	५५
अतः परमतीरोऽयम्	६	४	६८
अत एव च गन्तव्यम्	१	२४	३०
अतदर्हं महाराजम्	२	१३	१
अतश्च त्वामहं ब्रूमि	१	१३	१७
अतिकायं त्रिशिरसम	७	१	३२
अतिकायं हतं श्रुत्वा	६	७२	१
अतिकायस्य नादेन	६	१०२	५४
अतिकायेन सौमित्रिः	६	२१	८१
अतिकायोऽतितेजस्वी	६	६६	२५
अतिकायोऽतितेजस्वी	६	७१	८४

	का०	स०	श्लो०
अतिकायोत्तमाङ्गौ च	५	१७	६
अतिक्रम्य च सौमित्रिम्	६	६७	११५
अतिक्रान्तमतिक्रान्तम्	२	५१	१९
अतिक्रान्तमतिक्रान्तम्	२	८६	१७
अतिक्रान्तवयाः राजा	२	५८	२३
अतिखिन्नः शरीरेऽस्मिन्	३	६८	३
अतिथिः किल पूजार्हः	५	१	११२
अतिथौ परमं प्राप्तौ	१	४८	८
अतिदीर्घस्य कालस्य	४	५६	२२
अतिनासाश्च काश्चिन्न	५	१७	१२
अतिप्रमाणा बलिनः	५	५६	४७
अतिप्रवृत्ते दुर्मेधे	२	३७	२२
अतिबलं बलमाश्रित्यस्तवाहम्	४	४४	१७
अतिबलसदृशैः पराक्रमैस्त्वम्	७	२९	३८
अतिभक्तं त्वया सार्धम्	७	११	३३
अतिमात्रमयं देशः	२	३९	१८
अतिमात्रं प्रहर्षः किम्	२	७	९
अतिमात्रशिरोग्रीवाम्	५	२२	३५
अतिमात्रं शरौघेण	६	८०	३१
अतिमात्रास्यनेत्राश्च	५	१७	१८
अतिमानश्च बालश्च	६	८७	२७
अतिमानिनमग्राह्यम्	३	३३	१६
अतिलक्षणसंपन्नम्	६	११३	२४
अतिवृत्तमिवाचिन्त्यम्	५	१५	१२
अतिवेगोऽतिवेगेन	५	४४	१६
अतिष्ठत्प्रेक्ष्य वैदेहीम्	३	४६	११
अतिष्ठत्सह मैन्देन	६	८१	३९
अतिसर्गाच्च पटवः	५	६२	७
अतिसृज्यददानीति	२	१८	२३
अतीतमाज्ञाय तु पार्थिवर्षभम्	२	६५	२९
अतीतानि महाबाहो	१	४२	१४
अतीता शर्वरीदुःखम्	२	६७	५
अतीत्य मार्गं सहसा महात्मा	५	४८	५७
अतीत्यैकादशाहं तु	१	१८	२१
अतीव कामसंपन्नः	६	११	२
अतीव खलु ते कान्ता	४	२०	६
अतीव चाश्रुप्रतिपूर्णलोचना	२	२५	४४
अतीववातस्तिमिरम्	२	२८	१८
अतीव सा तु संतुष्टा	२	७	३२
अतीव हि समालक्ष्य	६	६३	२९
अतुलं च गता हर्षम्	५	३५	८४
अतुलं बलमेतद्धै	७	३५	२
अतो दुःखतरं किं नु	२	२०	४०
अतो दुःखतरं लोके	२	१०४	१३
अतो निमित्तं त्रस्तोऽहम्	४	३२	८
अतो नु किं दुःखतरम्	२	५९	२५
अतो भूयोऽपि नेदानीम्	२	४६	२२
अतो मूलाः क्रियाः सर्वाः	१	५३	२५
अतोषयन्महाराजम्	२	१८	१५
अतो हृष्टजनाकीर्णम्	७	६४	७
अत्यक्रामच्छुभः कालः	७	४२	२६
अत्यङ्कुशमिवोद्दामम्	२	२३	२०
अत्यद्भुतमिदं ब्रह्मन्	१	४५	२
अत्यद्भुतमिदं वाक्यम्	७	८२	९
अत्यन्तनियताहारैः	३	३५	१४
अत्यन्तं निगृहीतास्मि	२	२०	४२
अत्यन्तसुकुमारस्य	२	१२	२३
अत्यन्तसुखसंचाराः	३	१६	१०
अत्यन्तसुखसंवृद्धः	३	१६	३०
अत्यन्तसुखसंवृद्धम्	३	१	१८
अत्यर्थं च मदग्लानाः	५	६२	७२
अत्यर्थं सक्तमनसः	५	९	५८
अत्युग्रवेगा निशिताः	४	५४	१९
अत्येति रजनी यातु	२	१०५	१९
अत्र किंपुरुषीभूत्वा	७	८८	२२
अत्र तावद्यथाबुद्धिः	४	३२	५
अत्र देवाः सगन्धर्वाः	३	११	८९
अत्र देवाश्च यक्षाश्च	३	११	९१
अत्र पूर्वं महादेवः	६	१२३	२०
अत्र ब्रूहि यथातत्त्वम्	३	५०	१५
अत्र मन्युर्न कर्तव्यः	६	३७	२३
अत्र मां कैकयीपुत्रः	६	१२३	५०
अत्र योजनबाहुश्च	६	१२३	४२
अत्र राक्षसराजोऽयम्	६	१२३	२२

	का०	स०	श्लो०
अत्र विंशतिकोटयस्तु	२	७०	५
अत्र सप्तजनो नाम	४	१३	१४
अत्र सा मृगशावाक्षी	६	२४	७
अत्र सा मृगशावाक्षी	६	४२	८
अत्र सिद्धा महात्मानः	३	११	६२
अत्र सीते त्वया दृष्टा	६	१२३	४६
अत्राहं पुरुषव्याघ्रम्	२	६६	१३
अत्रिः कुलपतिर्यत्र	६	१२३	४८
अत्रैनं हि महाभागाः	३	१	१५
अत्रोद्यानानि शून्यानि	२	५६	६
अथ कर्मान्तरे राजा	७	६४	४
अथ काले गते तस्मिन्	१	३०	७
अथ काले गते तस्य	१	३८	१६
अथ काले तु कस्मिंश्चित्	१	८०	३
अथ किंचिदृष्टं वा	६	२५	१६
अथ कुम्भहनुस्तत्र	६	५८	२३
अथ क्रोधाद्दशग्रीवः	३	५१	७
अथ क्लेशजमेव त्वम्	२	१०	२१
अथ गत्वा मुहूर्तं तु	२	६६	१४
अथ गद्गदशब्दस्तु	२	४२	२६
अथ घोषः सुतुमुलः	६	५७	४१
अथ चीराणि कैकेयी	२	३७	६
अथ चेत्सत्यवचनम्	६	८३	२८
अथ जिज्ञासमे मां त्वम्	२	१२	१६
अथ जित्वा मरुत्तं स	७	१६	१
अथ जीवति नः शत्रुः	६	६४	२४
अथ ज्येष्ठा सुराः सर्वे	१	३५	१६
अथ तं व्यथया दीनम्	२	२२	१
अथ तस्मिन्निमित्तानि	६	४१	१
अथ तस्मिन्मुहूर्ते तु	७	११०	३
अथ तस्मिन्वनोद्देशे	७	८८	८
अथ तस्य कृते राम	१	४५	४०
अथ तस्य च शब्देन	१	६४	१०
अथ तस्य निनादं तम्	४	१५	१
अथ तस्य वचः श्रुत्वा	३	११	६५
अथ तस्या प्रमेयस्य	१	२५	१
अथ तस्याप्रमेयस्य	१	२६	१

	का०	स०	श्लो०
अथ तस्यामवस्थायाम्	६	८६	१
अथ तां जातसंतापाम्	६	३४	१
अथ तानब्रवीत्सर्वान्	४	५२	१
अथ तां नामधेयेन	७	५३	१२
अथ तान्राक्षसान्सर्वान्	६	७४	६
अथ तान्सचिवांस्तत्र	६	३५	३
अथ तामब्रवीद्वीरः	५	३	२५
अथ तां रजनीं तत्र	१	३१	१
अथ तां रजनीमुष्य	१	२७	१
अथ ताश्चारुसर्वाङ्ग्यः	१	३२	१४
अथ तासां वदन्तीनाम्	२	२५	१
अथ तेऽग्निं सुराश्चैव	३	८	३
अथ ते राक्षसामात्याः	७	३४	२३
अथ ते राममामन्त्र्य	१	२८	१५
अथ ते विश्वकर्माणम्	७	५	१८
अथ तेषु ब्रुवाणेषु	६	३७	६
अथ तौ देशकालज्ञौ	१	३०	१
अथ तौ भ्रातरौ दीप्तम्	३	३	१५
अथ त्रिवेणुसंपन्नम्	३	५१	१६
अथ दत्त्वा स्वयं रक्षः	७	१२	३
अथ दाशरथिश्चित्रम्	२	६४	२
अथ दाशरथी रामः	६	६७	११६
अथ दीर्घस्य कालस्य	४	६	१७
अथ दीर्घस्य कालस्य	७	५६	१०
अथ दीर्घस्य कालस्य	७	६६	१४
अथ दीर्घेण कालेन	१	३८	१६
अथ दृष्ट्वा दधिमुखम्	५	६२	२४
अथ दृष्ट्वा दशग्रीवः	६	६२	७
अथ दृष्ट्वा सहस्राक्षम्	१	४८	२६
अथ देवा महादेवम्	१	४५	२१
अथ धौतोपलतलाम्	६	४	६६
अथ नष्टे सहस्राक्षे	७	८६	४
अथ नात्र नरव्याघ्रौ	२	६३	२३
अथ नामाकरोत्तस्य	७	६	३३
अथ नावं सुविस्तीर्णाम्	७	४७	१
अथ निनदंति सादिते निकुम्भे	६	७७	२३
अथ पञ्चवटीं गच्छन्	३	१४	१

	का०	स०	श्लो०
अथपद्मपलाशाक्षीम्	२	३०	२१
अथ पवनसमानविक्रमाः	४	६३	१५
अथ पश्यामि दूरस्थम्	३	६०	१४
अथ पुत्रः पुलस्त्यस्य	७	३	१
अथ पुष्करपर्णेन	३	७३	१८
अथ पूर्वं श्रुतार्थेन	७	१६	११
अथ प्रतिसमादिष्टः	६	३३	१
अथ प्रस्थाप्य स हरीन्	४	४२	१
अथ प्रह्लादितो वाक्यैः	२	६२	२०
अथ भूमिप्रदेशज्ञाः	२	८०	१
अथ भ्रातरमव्यग्रम्	२	३०	१२
अथ मङ्गलवादित्रैः	५	१८	३
अथ मध्यमकक्षायाम्	२	१६	२७
अथ मन्त्रानपि जपन्	६	६६	३६
अथ मामब्रवीत्सीता	५	५८	१०३
अथमामेवमव्यग्राम्	२	३०	१६
अथ मासे तु संपूर्णे	७	८६	६
अथ मेघप्रतीकाशम्	५	६	१८
अथ मे बुद्धिरुत्पन्ना	५	५८	३७
अथ मौर्वीस्वनं कृत्वा	७	७	३४
अथ यज्ञे समाप्ते तु	१	३०	२५
अथ याः कोशलेन्द्रस्य	२	६५	१२
अथ यात्रां समीहन्तम्	२	७८	१
अथ यानप्रवेकैस्तु	२	६२	३६
अथ रक्षांसि भीमानि	५	३७	५३
अथ रविरवदन्निरीक्ष्य रामम्	६	१०५	३१
अथ राक्षससिंहस्य	६	८६	३६
अथ राजन्महाबाहुः	७	१७	१
अथ राजवितीर्णेषु	२	१	५०
अथ राजा विदेहानाम्	१	७४	३
अथ राजा वृतः स्त्रीभिः	२	४०	२८
अथ राज्ञो बभूवैव	२	१	३६
अथ रात्र्यां प्रपन्नायाम्	२	४२	३३
अथ रात्र्यां प्रवृत्तायाम्	७	६७	१
अथ रात्र्यां व्यतीतायाम्	१	५८	१०
अथ रात्र्यां व्यतीतायाम्	१	७४	१
अथ रात्र्यां व्यतीतायाम्	२	५६	१

	का०	स०	श्लो०
अथ रात्र्यां व्यतीतायाम्	२	६५	१
अथ रामः कथामेताम्	७	८६	२
अथ रामः प्रसन्नात्मा	६	१८	१
अथ रामश्च सीता च	२	४०	१
अथ रामस्तदा श्रुत्वा	२	३४	३६
अथ रामोऽब्रवीत्सूतम्	२	४६	२५
अथ रामो महाप्राज्ञः	१	४५	११
अथ रामो मुहूर्तस्य	२	३४	२१
अथ रेणुसमुद्ध्वस्तम्	२	४२	१०
अथर्क्षरजसः पुत्रः	६	३०	२०
अथर्क्षरजसो नाम	७	३६	३६
अथर्षयः समुत्पत्य	६	७०	५४
अथर्षिर्जरया वृद्धः	२	११६	८
अथ लक्ष्मणशत्रुघ्नौ	१	१८	१४
अथ लोकेश्वरोत्सृष्टा	७	१३	१
अथ वज्री तमामन्त्र्य	३	५	२४
अथ वर्षशते पूर्णे	१	३८	६
अथ वर्षसहस्रं च	१	६५	८
अथ वर्षसहस्रेण	१	४५	१६
अथ वर्षसहस्रे तु	७	१०	१२
अथवा किं मयैतेन	२	२२	२८
अथवा चारुसर्वाङ्गी	५	५५	२२
अथवा तदिदं व्यक्तम्	५	५३	३१
अथवा तौ नरव्याघ्रौ	६	६२	४८
अथवा त्वं प्रतिस्तब्धः	६	७१	५४
अथवा त्वरसे मर्तुम्	७	३४	१०
अथवाऽऽदाय रक्षांसि	५	३७	५८
अथवा दुर्बलः क्लीबः	६	८३	२६
अथवा देवि त्वं कंचित्	२	३६	२८
अथ वा धारयिष्यामि	४	११	३३
अथवा ध्रुवमन्येभ्यः	६	६०	६८
अथवा नश्यति प्रज्ञा	६	३२	१३
अथवा न हि तस्यार्थः	५	२६	३८
अथवा नायमुन्मादः	५	३४	२४
अथवा निहिता मन्ये	५	१३	१३
अथवा नैतदेवं हि	५	३४	१७
अथवा नोच्छ्वसिष्यामि	१	६४	१८

	का०	स०	श्लो०
अथवा नौ ध्रुवं मन्ये	२	६७	२२
अथवा न्यस्तशस्त्रौ तौ	५	२६	४२
अथवापि महाबाहुः	२	५६	२३
अथ वा पुष्पमिदम्	७	१६	७
अथवा पृष्ठतः कृत्वा	२	१०६	३२
अथवा मृगशावाक्षी	५	१४	४६
अथवा मृगशावाक्षीम्	३	६०	२३
अथवा मे भवेच्छक्ति	२	७३	१७
अथवा मैथिलीं दृष्ट्वा	५	१	१४८
अथवा मोचयिष्यामि	५	३७	२१
अथ वा यन्निमित्तस्ते	५	५०	१२
अथवा युध्यमानस्य	५	३७	५४
अथ वा रक्ष्यतां रामः	६	४६	३८
अथवा राक्षसेन्द्रस्य	५	१३	१२
अथवा राक्षसेन्द्रेण	५	२६	४३
अथवा रामरूपेण	६	१११	६
अथवा रुचितं स्थानम्	४	१६	१५
अथवाऽर्जुन शंस त्वं	३	६०	१४
अथवा वर्तते तत्र	४	१	४६
अथवा वासवेन त्वम्	६	१११	१०
अथवा विजिगीषा ते	७	१०४	१५
अथवा विहितेनायम्	६	८३	२३
अथवा शक्तिमंतो तौ	५	३६	१४
अथवा स्वयमप्येष	६	६७	७६
अथवा स्वममेवाहम्	२	७५	१४
अथवा स्वयमेवैनम्	४	३३	३५
अथ वा स्वयमेवैषः	६	१७	२३
अथवाहं शरैस्तीक्ष्णैः	६	६३	५
अथ वाहान्परित्यज्य	२	१०३	३६
अथवा ह्रियमाणायाः	५	१३	८
अथ विजयमवाप्य वानरेन्द्रः	६	६७	३७
अथ विष्णुर्महातेजाः	१	२६	१६
अथ विष्णुर्महातेजाः	७	११०	१६
अथ वृक्षान्महाकायाः	६	६७	४
अथ वैदूर्यवर्णेषु	५	१	३
अथवैनं समुत्क्षिप्य	५	१३	४८
अथ वै लोकपालानाम्	७	३	१७

	का०	स०	श्लो०
अथ वैश्रवणो देवः	७	६	४०
अथ शक्तिं समासाद्य	६	७०	३७
अथ शृङ्गं समाविध्य	६	६७	१२३
अथ शैलाद्विनिष्क्रम्य	२	६५	१
अथ संक्षीयमाणेषु	६	६६	१३
अथ स बलवृतः सवाहनः	७	२६	४०
अथ समपनुदन्मनः क्लमंसा	६	११४	३५
अथ समरपरिश्रमं निहन्तुम्	६	८८	७७
अथ रणविगतमुत्तमौजाः	७	२६	३७
अथ संवत्सरे पूर्णे	१	१४	१
अथ संवत्सरे पूर्णे	१	४३	२
अथ संस्कारसंपन्नः	६	१७	५०
अथ संस्मारयामास	६	१०८	१
अथ सा हरिशार्दूलम्	५	३	२०
अथ सीतामनुज्ञाप्य	२	१६	२५
अथ सीता समुत्पत्य	२	२६	६
अथ सुप्तस्य रामस्य	६	३१	२४
अथ सोऽभ्यपतद्रोषात्	७	७	२७
अथ सौम्य दशग्रीवः	६	१२६	२५
अथ हरिवरनाथः प्राप्तसङ्ग्रामकीर्तिः	६	४०	२६
अथ हृष्टो दशरथः	१	६	२०
अथ हैमवतीं राम	१	६५	१
अथाङ्गदवचः श्रुत्वा	४	३१	४२
अथाङ्गददवचः श्रुत्वा	४	६५	१
अथाङ्गदस्तदा सर्वान्	४	६४	१
अथाङ्गदस्तस्य सुतीव्रवाचा	४	३१	३६
अथाङ्गदो मुष्टिविशीर्णमूर्धा	६	६६	६२
अथाङ्गदो मृत्युसमानवेगम्	६	६६	६३
अथाङ्गदो राममनः प्रहर्षणम्	६	६६	६६
अथातिरभसेनागात्	७	३५	३६
अथात्मपरिघानार्थम्	२	३७	६
अथादे सूर्यमरीचिकल्पम्	६	६७	१६४
अथाध्वनि गतौ विप्रौ	७	५४	५
अथाध्वनि परिश्रान्तम्	६	३१	२०
अथानयन्बलाध्यक्षाः	६	६५	२७
अथानुपूर्व्या प्रतिपूज्य तं जनम्	२	११२	३०
अथान्तरिक्षे भूतानाम्	६	६०	७५

	का०	स०	श्लो०
अथान्तरिक्षे व्यनदत्	६	१०४	२७
अथान्तर्गृहमाविश्य	२	४	३
अथान्धकारे त्वश्रौषम्	२	६३	२२
अथान्यद्वपुरादाय	६	६५	४०
अथान्य मार्गण श्रेष्ठम्	६	६०	६४
अथापराह्णसमये	७	४१	२
अथापश्यद्दशग्रीवः	७	१६	२
अथापि किं जीवितमद्य मे वृथा	२	२०	५४
अथापि च महाप्राज्ञ	२	२६	८
अथाप्युचितवृत्तास्ताः	२	५६	१३
अथाब्रवीत्तदा साध्वी	५	४२	८
अथाब्रवीत्स तत्रस्थम्	७	३०	११
अथाब्रवीत्सुरश्रेष्ठम्	१	४८	२०
अथाब्रवीद्दशग्रीवः	७	१०	१५
अथाब्रवीद्दशग्रीवः	७	२६	३०
अथाब्रवीद्दशग्रीवम्	७	२०	२०
अथाब्रवीद्वाष्पगलान्	२	३२	२४
अथाब्रवीन्महातेजाः	७	३०	८
अथाब्रवीन्महाबाहुः	२	५२	६४
अथाब्रवीन्मुनिं रामः	७	१०	१
अथाब्रवीद्राजपुत्रः	६	१२७	४५
अथाब्रवीद्राजपुत्रः	६	१२८	४३
अथाब्रवीद्वानरेन्द्रः	६	५०	४
अथाब्रवीद्वैश्रवणम्	७	३	१६
अथाब्रवीद्वै श्रवणः	७	३	१५
अथाब्रवीद्वै श्रवणः	७	१८	३२
अथायान्तं हनूमन्तम्	६	८३	५
अथारुरोह तेजस्वी	२	५२	७७
अथारुरोह सहसा	६	५६	१२४
अथारोहणमासाद्य	५	१०	१३
अथार्धदिवसं गत्वा	७	४६	२४
अथावसाने यज्ञस्य	७	६५	२०
अथो श्रमादुपावृत्तम्	३	५६	१
अथाश्वस्य महातेजाः	६	५६	६३
अथासनात्समुत्पत्य	६	६५	२५
अथासाद्य तु कालिन्दीम्	२	५५	५
अथासाद्य तु कालिन्दीम्	२	५५	१३

	का०	स०	श्लो०
अथासीनस्य पर्यङ्के	६	६२	८
अथास्मिन्नगरे रामः	२	४३	४
अथास्य कवचं शुभ्रम्	६	६७	१०३
अथास्य चपला माता	२	७२	४६
अथाहं नतबुद्धिस्तु	४	४६	७
अथाहमुत्तरं देव्या	५	६८	१
अथाहमेकस्तं देशम्	२	६४	२८
अथेन्द्रकल्पस्य दुरासदस्य	६	१५	८
अथेन्द्रजित्तं द्रुमचीरबद्धम्	५	४८	४६
अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तं	५	४८	५३
अथेन्द्रजिद्राक्षसमूतये तु	६	८२	२७
अथेन्द्रशत्रुं तरसा जघान	६	५६	१३६
अथेन्द्रशत्रुस्त्रिदशालयानाम्	६	६८	२५
अथैनं छिन्नधन्वानम्	६	६०	१६
अथैनं पृष्ठतोऽभ्येति	१	१८	३२
अथैनं शरधाराभिः	६	७१	६२
अथैनमनुसंक्रम्य	६	५६	१२२
अथैन्द्रमस्त्रं सौमित्रिः	६	६०	६८
अथैवमुक्तः प्रणिधाय लक्ष्मणः	६	२८	६५
अथैवमुक्तः शार्दूलः	६	३०	१६
अथैवमुक्ते वचने	३	३१	२२
अथवमुक्त्वा वचनं सुदारुणम्	२	६	६५
अथोक्षितः शोणिततोयविस्रवैः	४	१६	३६
अथो ज्वलनसंकाशम्	२	४०	१६
अथोत्तमान्याभरणानि देवि	२	३७	३४
अथोत्तरमुदारार्थम्	४	६५	१८
अथोत्थाय जलं स्पृष्ट्वा	२	१११	२४
अथोत्पातवेगेन	६	१२५	२०
अथोपकार्यं जगृहुस्ते	१	७३	४०
अथोपविश्य भगवान्	१	२	२६
अथोपविष्टे नृपतौ	२	१	४६
अथो पुनरिदं वाक्यम्	१	१६	१८
अथो पुनस्तां महिषीं महीक्षितः	२	६	६०
अथोर्ध्वं दूरमागत्य	५	१	१२७
अथोवाच पुनर्वाक्यम्	३	३	१
अथोवाच पुनः सीताम्	६	११३	२७
अथोवाच भरद्वाजः	२	६१	३

	का०	स०	श्लो०
अथोवाच महातेजाः	२	५२	१०
अथोवाच महातेजा	६	५०	१
अथोवाच रघुश्रेष्ठः	६	२२	१
अदग्धस्य हि विज्ञातुम्	७	७१	२९
अदग्धा जानकीत्येव	५	५८	१६३
अदर्शनं च ते वीर	५	५५	६
अदहत्पावकस्तत्र	६	७५	१८
अदितेरात्मजा वीराः	१	४५	४४
अदित्यां वीर्यवान्पुत्रः	७	१०४	१०
अदुष्टस्य हि संत्यागः	२	३६	२९
अदूराच्चित्रकूटस्य	२	११३	१
अदूराद्भूरतस्यैव	२	२	१८
अदूरान्मध्यमे गुल्मे	६	४१	४५
अदृश्यं सर्वमनुजैः	७	१०६	१७
अदृश्यः सर्वभूतानाम्	६	४४	३६
अदृश्यः सर्वभूतानाम्	६	८७	५
अदृश्यः सर्वभूतानाम्	७	६३	२१
अदृश्यतः कबन्धाङ्कः	६	१०२	३५
अदृश्यत तयास्तत्र	६	८९	३१
अदृश्यत दशग्रीवः	६	१०२	३७
अदृश्यमानेन रणे	६	४८	१७
अदृश्यानि च भूतानि	६	२२	१३
अदृश्यो निशितान्बाणान्	६	४४	३४
अदृष्टगुणदोषाणाम्	३	६६	१६
अदृष्टदुखं राजानम्	२	५२	२७
अदृष्टदुःखो धर्मात्मा	२	२४	२
अदृष्टपूर्वरूपत्वात्	२	२९	४
अदृष्टपूर्वव्यसना	२	५८	३५
अदृष्टपूर्वं संक्रुद्धम्	३	६५	३
अदृष्टपूर्वा भगवन्	७	४९	३
अदृष्टप्रतिकारेण	६	८३	२४
अदृष्टं मृत्युमापन्नः	६	३२	१४
अदृष्टरूपास्तास्तेन	१	१०	१३
अदृष्टायां च वैदेह्याम्	४	५३	२२
अदृष्ट्वा किं प्रवक्ष्यामि	५	१२	८
अदृष्ट्वा तत्र वैदेहीम्	३	६१	२
अदेया च यथा सीता	६	१२	२५

	का०	स०	श्लो०
अदेवमातृको रम्यः	२	१००	४५
अदेशकाले संप्राप्तः	६	१७	५६
अद्भिरेव हि सौमित्रे	२	४६	१०
अद्भुतश्च विचित्रश्च	६	४१	४९
अद्य कर्म करिष्यामि	६	१००	५६
अद्य काकाश्च गृध्राश्च	६	९५	२०
अद्य कालवशं प्राप्तम्	६	४७	१०
अद्य गच्छामहे राम	१	२९	२४
अद्य गोमायुसङ्घाश्च	६	८८	२३
अद्य चन्दनसारस्य	२	२३	३८
अद्य चन्द्रोऽभ्युपगमद्	२	४	२१
अद्य तद्वानरानीकम्	६	५९	६
अद्य तप्यति दुर्बुद्धिः	७	७४	२८
अद्य तान्क्षुधितः क्रुद्धः	६	६५	२२
अद्य तुर्यशतैर्भीमम्	६	९२	३१
अद्य तृप्यन्तु मांसादाः	६	५७	१९
अद्य ते कतिचिद्राज्ञः	२	७२	५
अद्य ते भिन्नकण्ठस्य	४	३०	६
अद्य ते मच्छरैश्छिन्नम्	६	१०३	२०
अद्य ते मामका बाणाः	६	७१	६२
अद्य त्वयाहं सौमित्रे	६	६७	१०९
अद्य त्विदानीं रजनीम्	२	३४	३३
अद्य त्वेतस्य कालस्य	४	६३	३
अद्य देवगणाः सर्वे	६	९२	१०
अद्य निर्वानरामुर्वीम्	६	८०	१८
अद्य नूनं दशरथः	२	३३	१०
अद्य नैर्ऋतकन्यानाम्	६	९२	१२
अद्य पर्वतसंकाशम्	६	६३	३८
अद्य पश्यन्तु रामस्य	६	१००	५३
अद्य पश्य महाबाहो	६	६३	३४
अद्य प्रकृतयः सर्वाः	२	४	१६
अद्यप्रभृति भूमौ तु	२	८८	२६
अद्यप्रभृति यामन्याम्	६	१३	१४
अद्यप्रभृति लोकास्त्रीन्	६	९४	३३
अद्यप्रभृति षड्रात्रम्	१	३०	३
अद्य प्राप्ता तपः सिद्धिः	३	७४	११
अद्य बाणैर्धनुर्मुक्तैः	६	९५	१०

	का०	स०	श्लो०
अद्य बार्हस्पतः श्रीमान्	२	२६	९
अद्य भित्त्वा मया मुक्ताः	३	२९	११
अद्य मत्कामुकोन्मुक्ता	६	८५	२६
अद्य मद्बाणनिर्भिन्नैः	६	९५	१९
अद्य मद्बाणवेगेन	६	७९	१४
अद्य मद्बाहुनिष्क्रान्तः	७	६९	७
अद्य मे कुशलं देव	७	३३	११
अद्य मे देवतास्तुष्टाः	७	३६	५३
अद्य मे पौरुषं दृष्टम्	६	११५	४
अद्य मे पौरुषहतम्	२	२३	१९
अद्य मे विगतः शोकः	४	१२	१०
अद्य मे सप्तमी रात्रिः	२	७२	८
अद्य मे सफलं तप्तम्	३	७४	१२
अद्य मेऽप्रभावस्य	२	२३	३७
अद्य यज्ञफलं प्राप्तम्	१	५०	१४
अद्य यज्ञावसानान्ते	७	६५	२१
अद्य युद्धेन महा	६	२१	२०
अद्य यूथप्रचण्डानाम्	६	९५	१७
अद्य राक्षससराजस्य	६	६०	६९
अद्य राज्येऽभिषेक्ष्यामि	७	१०७	२
अद्य राममितः क्षिप्रम्	२	९	२
अद्य रामं वधिष्यामः	६	९	६
अद्य रामं वधिष्यामि	६	७९	११
अद्य रामं ससुग्रीवम्	६	८	११
अद्य रामस्य तद्दृष्ट्वा	६	६३	३५
अद्य रामस्य पश्यन्तु	६	६३	३६
अद्य लोकास्त्रयः कृत्स्ना	६	९२	११
अद्य वर्षसहस्रस्य	७	१०५	१३
अद्य वानरमुख्यानाम्	६	६५	४३
अद्य वानरमुख्यानाम्	६	९५	१३
अद्य वानरसैन्यानि	६	९५	१४
अद्य वा निहतं बाणैः	३	२९	१३
अद्य विप्रसरिष्यन्ति	३	३०	१०
अद्य वै निर्भया लङ्का	६	१११	८२
अद्य शूलनिपातैश्च	६	७८	१२
अद्य शोकपरीतानाम्	६	६३	३७
अद्य शोकरसज्ञास्ताः	३	३०	११

	का०	स०	श्लो०
अद्य सर्वे धनाध्यक्षाः	१	६९	२
अद्य हत्वा रणे यौ तौ	६	८०	१७
अद्याक्षोभ्यमपि क्रुद्धः	६	२१	२३
अद्याङ्गदो वीरवरो न जीवेत्	४	२४	११
अद्यापीदं वनं दुर्गम्	४	४९	७
अद्यायं दुर्मतिः काले	६	६७	१२९
अद्यायमपि ते पुत्रः	२	१०४	७
अद्यायोध्या तु नगरी	२	४६	४
अद्यार्य मुदिताः सन्तु	२	१०६	२९
अद्याहं पर्वकाले तु	७	३५	३५
अद्याहं मार्गणैः प्राणान्	३	१९	८
अद्याहं विजयी शत्रौ	६	९१	१४
अद्येदानीं तवानार्ये	५	२७	३
अद्येन्द्रवैवस्वतविष्णुरुद्र	६	७३	७
अद्येममनयं कृत्वा	२	५७	३०
अद्येमां भक्षयिष्यामि	३	१८	१६
अद्येयं प्रथमा रात्रि	२	५३	२
अद्येह व्यसनम् प्राप्तम्	६	८७	२८
अद्यैनं तावुभौ दृष्ट्वा	६	९२	३९
अद्यैव जहि मां राजन्	२	६४	५२
अद्यैव तं गमिष्यामि	६	६८	१९
अद्यैव तस्य रौद्रस्य	६	८५	२७
अद्यैव ते निरुच्छ्वासाः	७	३५	६३
अद्यैव त्रिदशान्सर्वान्	७	२९	५
अद्यैव दीक्षां प्रविश	१	२९	२९
अद्यैवममरावत्या	७	३३	१०
अद्योपादाय तं मार्गम्	२	१७	९
अद्रोहाय समागम्य	३	७२	१८
अद्वारेण महावीर्यः	५	४	२
अधर्मचारिणौ पापौ	३	२	१२
अधःशय्या विवर्णाङ्गी	५	५९	२७
अधःशय्या विवर्णाङ्गी	५	६५	१५
अधर्मं तु सुसूक्ष्मेण	३	९	२
अधर्मं धर्मवेषेण	२	१०९	६
अधर्मं विद्ध काकुत्स्थ	७	६३	२
अधर्मः परमो राजन्	७	७४	२७
अधर्मः सुमहान्नाथ	३	६	११

	का०	स०	श्लो०
अधर्मभयभीतश्च	२	५३	२६
अधर्ममूलं बहुदोषयुक्तम्	५	५२	१२
अधर्मसंश्रितो धर्मः	६	८३	३०
अधर्मसहिता नार्यः	१	२५	२२
अधर्मात्तु महोत्पातः	५	२६	३२
अधर्षितानां शूराणाम्	४	१६	३
अधस्ताच्चोदरं शान्तम्	२	९	४२
अधस्ताद्व्रजतस्तस्याः	१	७४	२७
अधारयद्यो विविधाः	२	९९	३३
अधार्यं चर्म मे सद्भी	४	१७	३८
अधिकं प्रविभात्येतत्	४	१	८
अधिकं मेनिरे विष्णुम्	१	७५	२०
अधिकं शैलराजस्तु	६	४	७६
अधिकं शैलराजोऽयम्	४	१	७४
अधिगच्छ दिशं पूर्वाम्	४	४०	१९
अधिगन्तासि वैदेहीम्	३	६९	४०
अधिरोहार्यपादाभ्याम्	२	११२	२१
अधिष्ठितं हयज्ञेन	६	९०	१०
अधीतस्य च तप्तस्य	७	७४	३०
अधृष्यः सर्वभूतानाम्	७	४१	१०
अधोभागे तु मे दृष्टिः	५	५८	३८
अधोमुखं स्थितं रामम्	६	११६	२३
अधोमुखीं शोकपराम्	६	३१	१२
अधोमुखौ तौ प्रणतौ	६	२९	६
अध्यर्धमासमुषिता	७	११०	२५
अध्यर्धमिक्ष्वाकुचमूः	२	९७	३०
अध्यर्धयोजनं गत्वा	७	११०	१
अध्यर्धयोजने तात	४	४	२१
अध्यारोहन्त शतशः	६	३८	९
अध्यारोहन्विमानं तत्	६	१२३	३७
अध्यास्ते तु महावीर्यः	३	७५	२७
अध्रुवे हि शरीरे यः	७	१५	२२
अध्वना दुर्विगाहेन	४	४१	३२
अध्वना वातवेगेन	२	६०	१६
अध्वश्रमेण वा खेदः	३	१३	२
अनङ्ग इति विख्यातः	१	२३	१४
अनधीत्य च शास्त्राणि	६	१८	८

	का०	स०	श्लो०
अनन्तभोगेन सहस्रमूर्ध्ना	६	१४	१८
अनन्तरं तत्सरितः	२	९२	१२
अनन्तरं महाविप्रः	७	५५	११
अनन्तरं स राजर्षिः	७	५५	९
अनन्यदेवत्वमियं क्षमा च	५	२८	१२
अनन्यभावामनुरक्तचेतसम्	२	२७	२३
अनन्यहृदयां सीताम्	६	११८	१५
अनपत्येन च स्नेहात्	२	११८	३०
अनपत्योऽसि धर्मात्मन्	१	११	५
अनभिज्ञाय शास्त्रार्थान्	६	६३	१४
अनभिज्ञा वनानां सा	२	४२	२०
अनया चित्रया वाचा	४	३	३३
अनया मृगशावाक्ष्या	७	१२	५
अनयेनाभिसंपन्नम्	५	२२	३१
अनयोपधया राजन्	६	६४	३२
अनरण्यस्य नृपते	७	१९	१४
अनरण्यात्पृथुर्जज्ञे	१	७०	२४
अनरण्यान्महाराज	२	११०	११
अनरण्येन तेऽमात्याः	७	१९	१९
अनर्थदर्शिनी मौर्ख्यात्	२	८	२१
अनर्थभावेऽर्थपरे नृशंसे	२	१२	१०१
अनर्थरूपासिद्धार्था	२	१३	२
अनर्थिनः सुताः स्त्रीणाम्	२	४१	१८
अनलः पनसश्चैव	६	३७	७
अनलश्चानिलश्चैव	७	५	४३
अनवाप्तातपत्रस्य	२	४५	२३
अनवाप्यैव तं कामम्	१	५८	१८
अनष्टसैन्यो ह्यनवाप्तसंशयः	६	६४	३६
अनसूया तु धर्मज्ञा	२	११९	१
अनसूयः महाभागाम्	२	११७	८
अनसूयति या लोके	२	११७	१६
अनागतं च यत्किञ्चित्	१	३	३९
अनागतविधानं तु	३	२४	११
अनाथ इव भूतानाम्	३	२	२३
अनाथवद्विलपसि	३	२१	५
अनाथश्च हि वृद्धश्च	२	५३	८
अनाथस्य जनस्यास्य	२	४०	२

	का०	स०	श्लो०
अनाथो हृतराज्योऽहम्	४	३०	६७
अनादिमध्यनिधनः	६	१११	१२
अनादृत्य तु तद्वाक्यम्	१	६१	५१
अनाधृष्यतमं देवम्	६	२८	१४
अनार्य इति मामार्याः	२	१२	७८
अनार्यजुष्टमस्वर्ग्यं	२	८२	१४
अनार्यस्त्वं कृतघ्नश्च	४	३४	१३
अनार्यस्त्वार्यसंस्थानः	२	१०९	५
अनावृष्टिः सुघोरा वै	१	९	९
अनासिकां सिंहमुखीम्	५	२२	३६
अनिद्रः सततं रामः	५	३६	४४
अनिःश्वसन्तं युक्तं तम्	७	१०६	१६
अनियोगे नियुक्तेन	२	६६	७
अनिर्वेदं च दाक्ष्यं च	४	४९	६
अनिर्वेदः श्रियो मूलम्	५	१२	१०
अनिर्वेदो हि सततम्	५	१२	११
अनिशं दीयमानानान्	७	९२	१७
अनिष्टानि च पापानि	२	७१	३०
अनिष्टे सुभगाकारे	२	७	१५
अनीकं दशसाहस्रम्	६	९३	३०
अनीकमपि संरब्धम्	६	२७	३१
अनीकं यातुमानानाम्	३	२४	२८
अनुकूलं तु सा भर्तुः	२	३०	४६
अनुक्तेनापि वैदेही	३	२०	२०
अनुक्तोऽप्यत्रभवता	२	१९	२३
अनुक्त्वा परुषं किंचित्	३	३६	८
अनुक्त्वा परुषं वाक्यम्	६	२८	२९
अनुक्रोशो दया चैव	२	५०	५
अनुगच्छति काकुत्स्थम्	५	३८	५७
अनुगन्तुमशक्तास्त्वाम्	२	४५	३०
अनुगृह्णीष्व भद्रं ते	१	६३	७
अनुचिन्त्य सुमित्रायै	१	१६	२९
अनुजग्मतुरक्षुद्रौ	१	२२	८
अनुजग्मुश्च ते सर्वे	३	९१	३७
अनुजग्मुश्च भर्तारम्	४	२५	३६
अनुजग्मुस्तथा रामम्	२	१६	३५
अनुजस्त्वेष मे भ्राता	३	१८	३

	का०	स०	श्लो०
अनुजातो हि मां सर्वैः	२	२	११
अनुजानीहि मां सौम्य	६	१२१	२२
अनुजानीहि सर्वान्नः	२	३४	२४
अनुजो नाम तस्यैषः	६	१७	४८
अनुज्ञातं तु रामेण	६	१२३	१
अनुज्ञातः सुमन्त्रोऽथ	२	५७	३
अनुज्ञातस्तु भवता	२	३१	७
अनुज्ञाता मया सर्वे	६	४९	३०
अनुज्ञातास्तता सर्वे	१	८	२१
अनुज्ञातोऽसि रामेण	३	६२	१७
अनुज्ञाप्य महाबाहुः	६	११२	५
अनुज्ञाप्य महाराजम्	६	११२	२३
अनुज्ञाय सुमन्त्रं च	२	५२	८०
अनुत्तमं तद्वचनं नृपात्मजः	२	७९	१६
अनुद्धतमना विद्वान्	२	६	२३
अनुपायेन कर्माणि	६	१२	३१
अनुप्रव्रजितो रामम्	५	३८	५६
अनुप्राप्तं तु तं दृष्ट्वा	२	७२	२
अनुबन्धमजानन्तः	३	५१	२६
अनुभूतानि चेष्टानि	२	४	१४
अनुमन्यस्व मां देवि	२	२१	४६
अनुमानान्तु जानामि	४	६	९
अनुमान्य तदा तारम्	१	१	६९
अनुयातश्च मां तूर्णम्	४	१०	१५
अनुयात्रां नरेन्द्रस्य	४	३६	१०
अनुरक्तजनाकीर्णा	२	५१	१६
अनुरक्तं च भक्तं च	६	११२	१०
अनुरक्ता महात्मानम्	२	४५	१
अनुरक्ता हि मनुजाः	२	४५	५
अनुरक्ता हि वैदेही	५	५९	२४
अनुरक्तेन बलिना	६	११९	२०
अनुरक्तोऽस्मि भावेन	२	२१	१६
अनुरागं च वीर्यं च	६	११२	३
अनुरूपः स नो नाथः	२	२	१३
अनुरूपाणि कर्माणि	४	२२	१२
अनुरूपाविमौ बाहू	२	२३	३९
अनुवालिसुतस्यापि	६	२६	२१

	का०	स०	श्लो०
अनुव्रजिष्याम्यहमद्य रामम्	२	३६	३३
अनुशिष्टास्मि मात्रा च	२	२७	१०
अनुशिष्टोऽस्म्ययोध्यायाम्	१	२६	३
अनुशोचसि काकुत्स्थम्	६	१२५	३७
अनुसृष्टस्तदा काकः	५	३८	३१
अनुसृष्टं सुरैरेकम्	१	७५	१२
अनूत्पेतुर्महात्मानः	६	६९	३४
अनूपे सिन्धुराजस्य	३	३५	२७
अनृणः स महावाहुः	२	११३	१७
अनृतं नोक्तपूर्वं मे	४	७	२२
अनृतं नोक्तपूर्वं मे	६	४८	२९
अनृतं पातयित्वा तु	७	७४	१७
अनृतं बत लोकोऽयम्	२	३०	८
अनृतैर्बत मां सान्त्वैः	२	१२	७७
अनेकवर्णाः सुविनष्टकायः	४	३०	४४
अनेकवर्षसाहस्रः	२	२	२१
अनेकवार्षिको यस्तु	३	६८	२१
अनेकशतसाहस्रम्	२	९	५६
अनेकशतसाहस्रीम्	४	६६	१
अनेकशो वध्यमानाः	६	६७	४१
अनेकैर्बहुसाहस्रैः	४	३९	१८
अनेन च परामृष्टः	७	३५	३२
अनेन च महाराज	६	७	१९
अनेन तपसा त्वां हि	१	५७	६
अनेन तु नृशंसेन	५	२६	३०
अनेन त्वां हरिश्रेष्ठ	४	४४	१३
अनेन दत्तानि वनीपकेषु	६	१०९	२२
अनेन दुष्कृतेन त्वम्	७	५६	२४
अनेन धनुषा रामः	३	१२	३५
अनेन धर्मशीलेन	२	१११	३१
अनेन प्रेषिता ये च	६	३३	१७
अनेन भक्षिता ब्रह्मन्	७	१०	३८
अनेन रात्रिशेषेण	५	३०	१२
अनेन रूपेण मया	५	२	३१
अनेन वनवासेन	२	९४	१७
अनेन शिशुना कार्यम्	७	३६	९
अनेन श्रेयसा सद्यः	२	२	१४
अनेन सीता वैदेही	३	६७	११
अनेन हि समासाद्य	६	७	२२
अनेनैव हि वेगेन	५	१	३९
अनेनैवाभिषेकेण	२	११	२५
अन्तःपुरगतो वाली	४	११	२८
अन्तःपुरनिवासिन्धः	५	२०	३१
अन्तःपुरं प्रवेश्यास्मै	१	१०	३२
अन्तःपुरं प्रवेश्यैनम्	१	११	२९
अन्तःपुरस्य द्वाराणि	२	३	१३
अन्तःपुराणि सर्वाणि	१	११	३०
अन्तःपुरेऽतिसंवृद्धान्	२	७०	२०
अन्तकस्याप्यकष्टेन	६	६७	१०६
अन्तकाले हि भूतानि	२	१०६	१३
अन्तर्दाहेन दहनः	२	८५	१७
अन्तपालाश्च यास्यन्ति	२	३३	२६
अन्तरं त्वहमासाद्य	५	३०	१६
अन्तरं प्रेप्सुना तेन	४	६	४
अन्तरापणवीथ्यश्च	७	६४	३
अन्तरापणवीथ्यश्च	७	९१	२२
अन्तरा मेरुमस्तं च	४	४२	४६
अन्तरिक्षं निरीक्षन्तः	६	४६	८
अन्तरिक्षगतं देवम्	३	५	११
अन्तरिक्षगताः क्रूराः	६	५१	३१
अन्तरिक्षगताः सर्वे	६	६९	११
अन्तरिक्षगता रेजुः	३	२५	२०
अन्तरिक्षस्थितः श्रीमान्	५	४३	२०
अन्तरिक्षात्पपातोल्का	६	९५	४७
अन्तरिक्षे च भूमौ च	७	९७	२४
अन्तरिक्षे च वागुक्ता	२	११८	३१
अन्तरिक्षेऽभिसंपन्ने	६	८९	३२
अन्तरिक्षे समासाद्य	६	८०	३०
अन्तर्गतमपि व्यक्तम्	१	७७	२८
अन्तर्धानगता ह्येते	६	१७	२१
अन्तर्धानगतेनाजौ	६	८८	१५
अन्तर्धानं तु तच्छीर्षम्	६	३२	४०
अन्तर्भौमानि सत्त्वानि	१	४१	३
अन्तर्हिता मुनिगणाः	२	११२	2

	का०	स०	श्लो०
अन्तर्हितैश्चापि तथान्तरिक्षे	६	२१	३५
अन्तश्चरति भूतानाम्	१	३२	१६
अन्ते चादौ च मध्ये च	६	११७	६.
अन्ते पृथिव्या दुर्धर्षाः	४	४६	४४
अन्नकूटाश्च दृश्यन्ते	१	१४	१५
अन्ननिस्यन्दजातानि	४	३७	२६
अन्नपानादिवस्त्राणि	७	६२	५
अन्नपानानि वस्त्राणि	७	६१	२७
अन्नमुच्चावचं भक्ष्याः	२	८७	१५
अन्नं हि विधिवत्स्वादु	१	१४	१७
अन्यत्रापि वरस्त्रीणाम्	५	११	६
अन्यथा क्रियमाणे तु	७	६३	३०
अन्यथा खलु काकुत्स्थ	३	१२	२६
अन्यदा किल धर्मज्ञा	२	७८	१५
अन्यदा मां पिता दृष्ट्वा	२	१८	६
अन्यदेवापरं घोरम्	४	४८	२३
अन्यमिन्द्रं करिष्यामि	१	६०	२३
अन्यां गतिं गमिष्यामि	१	५८	८
अन्याः पुनर्हर्म्यतलोपविष्टाः	५	५	१६
अन्याः स्रवन्तु मैरेयम्	२	६१	१५
अन्याः स्वस्तिकविज्ञेयाः	२	८६	११
अन्या कक्षगतेनैव	५	१०	३८
अन्या कनकसंकाशैः	५	१०	४२
अन्या कमलपत्राक्षी	५	१०	४८
अन्या तु विकटा नाम	५	२३	१४
अन्या तु विकटा नाम	५	२४	२८
अन्या तूशनसः पत्नी	७	५८	६
अन्या वक्षसि चान्यस्याः	५	६	६०
अन्ये च परमक्रुद्धाः	६	५२	१६
अन्ये च बलिनस्तस्य	६	६०	५३
अन्ये च बहवः शूराः	६	७२	५
अन्ये नानाविधाञ्छैलान्	१	१७	३२
अन्ये भेरीः समाजघ्नुः	६	६०	५१
अन्येभ्योऽपि त्वया रक्ष्या	७	२६	२६
अन्येयमिति निश्चित्य	५	११	४
अन्ये वृक्षान्प्रपद्यन्ते	६	४	६१
अन्येषां वानरेन्द्राणाम्	६	१२३	२५

	का०	स०	श्लो०
अन्ये सुनिशितैः शस्त्रैः	६	८८	६६
अन्येष्वपि गतेष्वेवम्	७	१८	६
अन्यैरपि कृतं पापम्	४	१८	३४
अन्यैर्वैखानश्चैव	१	५१	२८
अन्यैश्च रत्नैर्बहुभिः	२	३२	६
अन्यैश्च विविधैर्वृक्षैः	३	७५	२५
अन्योन्यगात्रग्रथितो	६	७६	८१
अन्योन्यं च समाश्लिष्य	६	६०	६३
अन्योन्यं ते प्रमथ्नन्तः	६	५६	३४
अन्योन्यं प्लावयन्ति स्म	६	४	८७
अन्योन्यं बद्धवैराणाम्	६	४४	२
अन्योन्यं लम्बितकरौ	७	३४	४३
अन्योन्यं संपरिष्वज्य	४	५०	२२
अन्योन्यं सहसा दृप्ताः	६	४	२८
अन्योन्यबद्धवैराणाम्	४	३०	६०
अन्योन्यभुजसूत्रेण	५	६	६३
अन्योन्यमतिमास्थाय	६	६	१४
अन्योन्यमभिवीक्षन्तौ	४	५	१७
अन्योन्यमभिसंरब्धा	६	५७	३६
अन्योन्यमभिसंहत्य	६	१०७	२५
अन्योन्यमापीड्य विलग्नदेहौ	६	४०	१७
अन्योन्यमुपकुर्वन्ति	४	५६	११
अन्योन्यैराहताः सक्ताः	६	४	११८
अन्वक्षं लक्ष्मणो भ्रातुः	२	४०	३
अन्वगच्छद्धनुष्पाणिः	३	४७	२०
अन्वास्य पश्चिमां संध्याम्	३	७	२३
अन्वियाय सुमित्रा च	७	६६	१५
अन्विष्य रक्षसां लङ्काम्	५	२६	२१
अन्विष्य वानरैः सार्धम्	३	७२	२५
अन्वीक्ष्यमाणो रामस्तु	२	४०	३६
अन्वीयमानस्तैर्वीली	७	३४	२८
अन्येषमाणास्ते सर्वे	४	४८	४
अपकुर्वन्हि रामस्य	५	५१	३३
अपक्रान्ते च काकुत्स्थे	३	४०	२०
अपक्रान्ते च काकुत्स्थे	३	४०	२२
अपक्रान्तेष्वमात्येषु	७	३२	४६
अपक्षिगणसंपातान्	७	३४	२७
अपक्षो हि कथं पक्षी	४	५६	२३

	का०	स०	श्लो०
अपगच्छत पश्यध्वम्	५	२७	३४
अपगच्छतु ते दुःखम्	२	३४	४६
अपतिश्चास्मि भद्रं ते	१	३३	१७
अपत्यं तु मृगाः सर्वे	३	१४	२३
अपत्यलाभः सुमहान्	१	३८	७
अपत्यं स्वेषु दारेषु	१	३६	२२
अपथ्यव्यञ्जनोपेतम्	२	१२	७१
अपदेशो मे जनकात्	६	११६	१५
अपध्वंसत नश्यध्वम्	६	२६	१४
अपनेष्यति मां भर्ता	५	२१	२८
अपनेष्यामि संतापम्	५	३५	७०
अपयाते त्वयि तदा	६	१२६	१०
अपयाहि जनस्थानात्	३	२१	१८
अपरं चन्द्रसंकाशम्	६	१२८	६६
अपराधं कमुद्दिश्य	२	१२	११
अपराधिषु यो दण्डः	७	७६	६
अपरासांश्च वैदूर्याः	५	६	४६
अपरे दुर्जयं रक्षः	७	१६	४८
अपरेऽपूरयन्कूपान्	२	८०	६
अपरे वानरश्रेष्ठा	४	३६	४२
अपरे वीरणस्तम्बान्	२	८०	८
अपरे स्फोटविक्रान्ताः	६	५०	६३
अपवादभयाद्भीतः	७	४५	१५
अपवाह्य तु दुष्टात्मा	२	७	२६
अपवाह्य त्वया देवि	२	६	१६
अपविद्धश्च भग्नश्च	३	६४	४८
अपविद्धानि कैकेय्या	२	१०	७
अपवृण्वंश्च द्वाराणि	५	१२	१६
अपश्यतस्तु मे रामम्	२	१२	१३
अपश्यतो मे सौमित्रे	४	१	३१
अपश्यत्स यमं तत्र	७	२१	२
अपश्यत्सैनिकांश्चास्य	७	२१	११
अपश्यदुमया सार्धम्	७	४	२८
अपश्यद्राक्षसपतिम्	५	४६	१४
अपश्यद्रावणो विन्ध्यम्	७	३१	१५
अपश्यद्विमलं छत्रम्	३	५	६
अपश्यन्तस्तु ते सर्वे	७	७४	१४
अपश्यन्ती तव मुखम्	२	२०	४७
अपश्यन्तोऽभ्रुवन्को नु	२	१५	१४
अपश्यन्दयितां भार्याम्	२	१०	१८
अपश्यन्नगरं श्रीमान्	२	१७	२
अपश्यमानस्तत्रापि	७	७५	११
अश्यमानस्तं देशम्	७	७६	१६
अपश्यमानो वैदेहीम्	७	६६	४
अपश्यमिषुणा तीरे	२	६३	३६
अपश्यंस्तु ततस्तत्र	२	७२	१
अपसव्यं ततः कुर्यात्	६	१०६	१५
अपसृत्यागतो विन्ध्यम्	७	३१	१४
अपहृत्य शचीं भार्याम्	३	४८	२३
अपहृत्यागतः पाप	५	५८	७३
अपापः पापसंकल्पाम्	२	१०	२८
अपापदर्शिनं शूरम्	२	७३	१२
अपापां मैथिलीमाह	७	४५	८
अपापां वेद्मि सीते ते	७	४६	१०
अपापास्तत्कुलीनाश्च	६	१८	११
अपारमपरिश्रान्तः	५	५७	६
अपारमिव गर्जन्तम्	६	१२३	१८
अपारवारमक्षोभ्यम्	५	३८	४०
अपास्य फालं कुछालम्	२	३२	३१
अपास्य मातृशुश्रूषाम्	२	७५	४८
अपास्य हि रसान्भौमान्	२	६३	१५
अपि कौशिक भद्रं ते	१	५१	७
अपि गोदावरीं सीता	३	६४	२
अपि चाद्याशुभान्राम	२	४	१७
अपि चापि परिक्लिष्टम्	४	२८	६१
अपि चास्मिन्हते नान्यम्	५	५२	२०
अपि चास्या विशालाक्ष्याः	५	२७	४०
अपि जीवेद्दशरथः	२	५१	२४
अपि तां मद्वियोगाच्च	८	३०	१२
अपि ते चरणौ मूर्ध्ना	२	१२	१५
अपि ते जीवितान्ताय	३	३७	५
अपि ते मुनिशार्दूल	१	५१	४
अपि त्वामीश्वरं प्राप्य	३	३७	६
अपिनद्धानि वैदेह्या	४	६४	२७
अपि नौ वशमागच्छेत्	२	६६	२१
अपिबत्तु जलं सर्वम्	१	४३	३६

	का०	स०	श्लो०
अपि मे गुरुणा रामः	१	५१	८
अपि या निर्नमस्कारा	२	२४	२७
अपि रामसहस्राणि	३	३९	१६
अपि रामाय कथितम्	१	५१	६
अपि रामे महातेजाः	१	५१	५
अपि लक्ष्मणसीतायाः	३	५७	२०
अपि वै तस्य कार्यस्य	४	६५	२४
अपि शान्तेन मनसा	१	५१	९
अपि सत्यप्रतिज्ञेन	२	५१	२५
अपि सत्यप्रतिज्ञेन	२	८६	२२
अपि स्वस्ति भवेत्तात	३	३७	४
अपि स्वस्ति भवेत् द्वाभ्याम्	३	५७	९
अपीदानीं तु कैकेयी	२	५३	१५
अपीदानीं स कालः स्यात्	२	२४	३७
अपीदानीं स कालः स्यात्	२	४३	९
अपुत्रेण मया पुत्रः	२	१३	८
अपुत्रो लभते पुत्रम्	७	११०	५
अपूजयत्कर्म स लक्ष्मणस्य	६	९०	२९
अपूजयन्देवगणास्तदा कपिम्	६	५६	३९
अपूरयत्तस्य मुखं शिताग्रैः	६	६७	१६३
अपूरयित्वा तं कालम्	३	६१	८
अपूर्वी भार्यया चार्थी	३	१८	४
अपृच्छत तदा रामः	७	३५	१
अपृष्टवा बुद्धिसंपन्नान्	४	१८	५
अपेतक्लमसंतापाः	२	९२	६
अपेतोदकधूमानि	२	३३	२०
अप्यर्कमपि पर्जन्यम्	५	३९	१६
अप्यावां युगपत्प्राप्तौ	४	६१	५
अप्युपायैस्त्रिभिस्तात	६	९	८
अप्येकरात्रिं काकुत्स्थ	७	४२	३५
अप्येत्र दहनं स्पृष्ट्वा	६	२९	१२
अप्रकम्प्यो यथा स्थाणुः	७	३७	७
अप्रधृष्यश्च संग्रामे	२	१	३०
अप्रमत्तं कथं तं तु	६	९	१०
अप्रमत्तश्च यो राजा	३	३३	२०
अप्रमत्तो बले कोशे	२	५२	७२
अप्रमत्तैश्च सर्वत्र	६	७२	११

	का०	स०	श्लो०
अप्रमादाच्च गन्तव्यम्	३	५४	२७
अप्रमेयं तपस्तुभ्यम्	१	६५	३५
अप्रमेयबला वीराः	१	१७	१८
अप्रमेयं बलं तुभ्यम्	१	५४	१५
अप्रमेयं हि तत्तेजः	३	३७	१८
अप्रविष्टं च भवनम्	७	६३	२९
अप्रवृत्तौ च सीतायाः	६	५३	१५
अप्रशस्तैरशुचिभिः	२	११६	१५
अप्रसन्नमनाः किं नु	२	१८	१२
अप्रहृष्टबलां शून्याम्	२	८८	२५
अप्रहृष्टमनुष्या च	२	५९	१५
अप्राप्तयौवनं बालम्	७	७३	५
अप्राप्तान्येव तान्याशु	७	३२	७०
अप्राप्तामेव तां वाणीः	६	१००	२०
अप्राप्य तं चैव कामम्	४	१११	२३
अप्राप्य सदृशान्दारान्	२	७५	३५
अप्राप्य ताः काञ्चनरा-जिवर्णाः	५	५	२०
अप्रियामिव कस्माच्च	६	१११	८५
अप्रीतेन गुणैर्भर्त्रा	६	११६	१९
अप्सरःसु च मुख्यासु	१	१७	५
अप्सरःसु च मुख्यासु	१	१७	२४
अप्सराऽप्सरसां श्रेष्ठा	४	६६	८
अप्सरोभिस्ततस्ताभिः	३	११	१६
अप्सरोरगसङ्घाश्च	७	४२	२१
अप्सु निर्मथनादेव	१	४५	३३
अफलस्तु कृतो मेषः	१	४९	७
अफलस्तु ततः शक्रः	१	४९	१
अफलोऽस्मि कृतस्तेन	१	४९	३
अबद्ध्वा सागरे सेतुम्	६	२	११
अबद्वा सागरे सेतुम्	६	१९	३९
अबालवद्बालदिवाकरप्रभः	५	४७	२७
अबुद्धिर्बत मे राजा	२	२०	५
अब्रवीच्च तदा रामः	६	९३	३६
अब्रवीच्च तदा रामम्	६	१०२	१३
अब्रवीच्च तदा रामम्	६	१२७	५४
अब्रवीच्च तदा वाक्यम्	६	१६	१८

	का०	स०	श्लो०
अब्रवीच्च तदा वृत्तम्	७	१०६	१६
अब्रवीच्च दशग्रीवः	६	२६	१६
अब्रवीच्च परिष्वज्य	६	१०१	४७
अब्रवीच्च महातेजाः	७	५०	२
अब्रवीच्च वरारोहाम्	२	६५	२
अब्रवीच्च वरारोहाम्	७	४२	३१
अब्रवीच्च स तान्सर्वान्	६	६३	२
अब्रवीच्च हनूमन्तम्	४	४४	२
अब्रवीच्च हनूमांश्च	६	१६	२८
अब्रवीश्चापि मां भूयः	२	५८	२४
अब्रवीच्चैनमासाद्य	६	८८	४४
अब्रवीज्जनको राजा	१	७३	२६
अब्रवीज्जनको राजा	१	७३	३०
अब्रवीज्जननीः सर्वाः	४	८८	२
अब्रवीत्किमिदं भद्रे	७	२४	२६
अब्रवीत्किमिदं भद्रे	७	२६	४५
अब्रवीत्कुपितः कुम्भम्	६	७६	७०
अब्रवीत्कुरु वै वक्रम्	५	१	१५३
अब्रवीत्तमसंक्रुद्धः	६	८	६
अब्रवीत्तानिदं वाक्यम्	२	१५	१६
अब्रवीत्तां तु शोकार्ताम्	६	८१	१२
अब्रवीत्तान्हरि श्रेष्ठः	५	६४	१३
अब्रवीत्तु तदा रामः	६	१२७	६०
अब्रवीत्तु तदा रामम्	६	११८	५
अब्रवीत्तु तदा वाक्यम्	७	२१	५
अब्रवीत्परमोदारः	७	६	१८
अब्रवीत्परमोदारम्	७	११	२६
अब्रवीत्परुषं वाक्यम्	३	४५	२१
अब्रवीत्परुषं वाक्यम्	३	४८	२०
अब्रवीत्प्रश्रितं वाक्यम्	६	१२३	२४
अब्रवीत्प्राञ्जलिर्वाक्यम्	१	५८	१७
अब्रवीत्स महात्मानः	१	५७	१७
अब्रवीत्संप्रहृष्टेव	७	२५	४७
अब्रवीत्स विमानस्थः	६	१२२	१३
अब्रवीत्सान्त्वयित्वा ताम्	७	२४	३२
अब्रवीत्सुमहातेजाः	१	६३	२
अब्रवीद्धरतस्त्वेनम्	२	६१	२

	का०	स०	श्लो०
अब्रवीद्भ्रातरं रामः	३	५	२
अब्रवीद्राक्षसान्सर्वान्	३	२३	१६
अब्रवीद्वानरान्घोरान्	४	५०	१४
अब्रवीद्विधेयवत्कृत्वा	७	१०	८
अब्रवीन्नातिवर्तेत	५	५८	२६
अब्रवीन्नारदं तत्र	७	२०	१८
अब्रवीन्नास्मि शक्रस्य	५	५०	१३
अब्रवीन्मधुरं वाक्यम्	१	५७	५
अब्रवीन्मधुरं वाक्यम्	१	६७	१८
अब्रवीन्मे महाराज	२	५८	१४
अब्रवील्लक्ष्मणस्त्रस्ताम्	३	४५	१०
अब्रवील्लक्ष्मणः सीताम्	३	४५	२८
अब्रवील्लक्ष्मणो रामम्	२	४६	२४
अब्राह्मणस्तदा राजन्	७	७४	१०
अब्रुवन्परमप्रीताः	६	१२०	१६
अब्रुवन्परमोद्विग्नाः	५	६२	१७
अब्रुवन्राक्षसपतिम्	७	३१	१३
अब्रुवंश्चापि रामेण	२	१०३	३५
अभग्नशिरसः केचित्	६	५४	८
अभयं यस्य सङ्ग्रामे	३	३२	१८
अभवच्छोणितोद्गारी	६	५४	२५
अभवन्पन्नगास्त्रस्ताः	६	५०	३५
अभवन्पादपास्तत्र	६	१२४	२१
अभार्याः सहभार्याश्च	४	१६	१६
अभिकालं ततः प्राप्य	२	६८	१७
अभिक्रुद्धः समर्थो हि	४	३२	१६
अभिगच्छमहे शीघ्रम्	३	५	३
अभिगच्छामहे सर्वे	१	२३	१७
अभिगम्य च धर्मज्ञाः	३	६	७
अभिगम्य तमासीनम्	२	५७	२५
अभिगम्य तु तं देशम्	४	६४	३
अभिगम्य तु वैदेहीम्	४	४०	१२
अभिगम्य तु वैदेहीम्	४	४०	६६
अभिगम्य निवृत्तानाम्	२	४८	२
अभिगम्य महाबाहुम्	४	२६	२
अभिगम्य सुदुष्टात्मा	३	४६	१६
अभिघ्नन्तो नदन्तश्च	६	६०	४४

	का०	स०	श्लो०
अभिचक्राम तं देशम्	१	११	१५
अभिजग्मुस्तदा प्रीताः	३	१	११
अभिजघ्नु समासाद्य	६	८६	२४
अभिज्ञानं कुरुष्व त्वम्	४	१२	३८
अभिज्ञानं च मे दत्तम्	५	६५	२०
अभिज्ञानं च रामस्य	५	४०	४
अभिज्ञानप्रदानं च	१	३	३१
अभिज्ञानं मया दत्तम्	६	१२६	४५
अभितो गुणवन्तश्च	१	७	१८
अभित्वरय सुग्रीव	६	१२३	२९
अभिदुद्राव काकुत्स्थम्	१	२६	२५
अभिदुद्राव वेगेन	६	७०	६३
अभिदुद्राव सुग्रीवः	६	७६	६४
अभिद्रवणमाप्लवम्	६	४०	२५
अभिद्रुतमिवारण्ये	२	८	३६
अभिवाद्य तु संसिद्धः	२	९२	३२
अभिवाद्य नमस्यन्तम्	२	४४	२९
अभिवाद्य महाबाहुः	५	३४	३५
अभिवाद्य मुनिश्रेष्ठम्	१	३१	३
अभिवाद्य मुनेः पादौ	७	४९	२
अभिवाद्य वसिष्ठं च	१	१३	२
अभिवाद्य सुमित्रां च	६	१२७	५०
अभिवाद्याब्रवीच्छिश्यः	३	१२	१३
अभिवाद्याब्रवीद्रामः	७	८२	६
अभिवाद्याभिवाद्यांस्त्वम्	१	४१	४
अभिवार्य प्रविष्टानि	४	२६	२०
अभिवृष्टः शरौघेण	६	५९	७७
अभिशापकृतस्येति	३	७१	६
अभिशापादहं घोराम्	३	४	१६
अभिषिक्तः पुरा स्कन्दः	७	६३	१५
अभिषिक्तस्त्वमस्माभिः	२	१०६	२७
अभिषिक्ते च भरते	२	९	४८
अभिषिञ्चते तु काकुत्स्थे	७	३७	९
अभिषिञ्चते तु सुग्रीवे	४	२७	१
अभिषिक्तो न कामेन	४	१०	७
अभिषिक्तौ सुतावङ्के	७	१०७	१८
अभिषिच्य कुमारौ द्वौ	७	१०२	११
अभिषिच्य च लङ्कायाम्	१	१	८५
अभिषिच्य ततो वीरौ	७	१०७	२०
अभिषिच्याङ्गदं वीरम्	७	१०८	२२
अभिषिञ्चस्व राज्ये च	४	२६	१८
अभिषेकं न जानामि	२	७५	३
अभिषेकजलक्लिन्ना	३	५५	२७
अभिषेकविधानं तु	२	२२	११
अभिषेकाय रामस्य	६	१२८	५८
अभिषेकाय रामस्य	२	१५	४
अभिषेके तदर्हस्य	६	१२८	७२
अभिषेको यदा सज्जः	२	२६	१८
अभिषेक्ष्यति रामं तु	२	७२	२७
अभिषेक्ष्यन्ति काकुत्स्थम्	२	८८	२९
अभिषेचनसंयुक्ताः	२	१५	३०
अभिषेचनिकं भाण्डम्	२	७९	३
अभीक्ष्णं निःश्वसन्तौ वै	६	८८	५८
अभूतपूर्वं शोकं मे	७	९८	४
अभिनन्दाम ते सर्वे	७	१	२७
अभिनन्द्य समापृच्छ्य	२	११६	२४
अभिनिर्यान्तु रामस्य	६	१२७	५
अभिनिष्क्रम्य द्वारम्	६	५१	२१
अभिपत्याशु तद्वक्त्रम्	५	५८	३२
अभिपूज्य तदा हृष्टा	१	१४	५
अभिपेतुर्महाकायाः	६	७६	१७
अभिपेतुश्च गर्जन्तः	६	८२	६
अभिपेतुस्ततः सर्वे	२	७७	१०
अभिप्रायं तु जानामि	६	८४	१०
अभिप्रायं तु विज्ञाय	७	९७	६
अभिप्रेतां दिशं तस्मात्	७	४१	१६
अभिप्लुतो गिरेस्तस्य	५	३५	२८
अभिभाषस्व मां देवि	५	३५	७२
अभिभूतमिदं सर्वम्	४	१९	१३
अभिमन्त्र्य ततो रामः	६	१०८	१४
अभिमानं च मानं च	२	५८	१९
अभियाचाम वैदेहीम्	५	५८	८९
अभिरक्षन्ति पुष्पाणि	३	६४	२८
अभिवर्षति कामैर्यः	२	३१	१२

	का०	स०	श्लो०
अभिवादनपूर्वं तु	४	५५	१३
अभिवादयमानं तम्	२	४४	२७
अभिवादय राजानम्	४	२३	२४
अभिवादये त्वां भगवन्	३	११	७२
अभिवाद्य ऋषिश्रेष्ठम्	७	८२	१५
अभिवाद्य गुरुं प्राह	७	११	३४
अभिवाद्य च काकुत्स्थः	६	१२०	२३
अभिवाद्य च तद्भूतम्	१	१६	२२
अभिवाद्य च धर्मात्मा	४	१३	२८
अभिवाद्य च वैदेही	२	११७	२०
अभिवाद्य ततो रामः	१	७७	२
अभिवाद्य तु कौशल्याम्	२	२६	१
अभिवाद्य तु धर्मात्मा	३	१२	२५
अभेद्यवचनं मत्वा	६	९०	३२
अभेद्ये कवचे दिव्ये	२	३०	३०
अभ्यकीर्यतशोकेन	२	१४	५६
अभ्यगच्छत्ततोरामम्	७	४२	२९
अभ्यगच्छन्महातेजाः	३	१	१०
अभ्यतिक्रम्य सौमित्रिम्	६	९९	२१
अभ्यतीत्य ततोऽपश्यत्	२	७०	२७
अभ्यधावं सुसंक्रुद्धः	३	३९	१०
अभ्यधावत काकुत्स्थम्	६	१०२	३
अभ्यधावत संक्रुद्धः	४	४८	१९
अभ्यधावत्सुसंक्रुद्धः	१	५५	६
अभ्यधावत्सुसंक्रुद्धः	३	२	९
अभ्यधावन्त संक्रुद्धाः	१	४०	२८
अभ्यनुज्ञातुमिच्छामः	३	८	७
अभ्यपद्यन्त संहृष्टाः	४	५०	१२
अभ्ययात्प्रत्यरिबलम्	६	७५	६०
अभ्यवर्तत पुष्पाणाम्	३	५२	२८
अभ्यवर्तत वैदेहीम्	३	४६	१०
अभ्यषिञ्चत सुग्रीवम्	४	२६	३६
अभ्यषिञ्चन्त सुहृदः	४	२६	२३
अभ्यषिञ्चन्नरव्याघ्रम्	६	११८	६१
अभ्यागच्छन्महातेजाः	१	१८	३९
अभ्यागतं तु दौरात्म्यात्	३	४०	१५
अभ्यागतैश्चारुविशालपक्षैः	४	३०	३१

	का०	स०	श्लो०
अभ्युत्थानं त्वमद्यैव	६	९२	६२
अभ्युत्थितं ततः सूर्यम्	४	६६	२७
अभ्येत्य त्वरमाणोऽथ	२	५	७
अमनास्तेन शोकेन	२	६२	५
अमन्त्रयत कृत्स्नश्च	२	७८	१४
अमन्यन्त हि ता नार्यः	२	१६	४१
अमरा ऋषयश्चैव	७	६	२४
अमरेन्द्र मया बुद्ध्या	७	३०	१९
अमरोपमसत्त्वस्तम्	२	१०६	६
अमर्षी दुर्जयो जेता	३	३४	१४
अमर्षी दुर्जयो जेता	६	२८	२४
अमात्यप्रमृतीः सर्वाः	२	३	४४
अमात्यानब्रवीद्राजा	१	९	१४
अमात्यानुपधातीतान्	२	१००	२६
अमात्या बलमुख्याश्च	२	१५	२
अमात्या राक्षसेन्द्रस्य	७	२१	३१
अमात्यैः कामवृत्तो हि	३	४१	७
अमात्यैः सह पौरैश्च	२	९८	५
अमात्यैः सहितः सर्वैः	६	३२	३६
अमात्यैर्ब्राह्मणैश्चैव	६	१२८	३६
अमात्यैश्च महावीर्यैः	७	२३	३१
अमात्यैश्च सुहृद्भिश्च	२	११२	१७
अमानुषाणि सत्त्वानि	४	४१	१८
अमितबलपराक्रमा भवन्तः	४	४१	४९
अमित्रमथनार्थाय	२	२३	३१
अमित्राणां मयकरः	७	३६	२२
अमित्रास्तत्कुलीनाश्च	६	१८	१०
अमी पवनविक्षिप्ताः	४	१	१८
अमी रुधिरधारास्तु	३	२४	८
अमी लक्ष्मण दृश्यन्ते	४	१	६०
अमी हि विविधैः पुष्पैः	४	१	९७
अमुञ्चं निशितं बाणम्	२	६३	२४
अमृतं विषसंपृक्तम्	५	३७	२
अमृतोत्पादने दैत्यान्	२	२५	३४
अमृत्यवस्तदा सर्वे	७	७४	११
अमृष्यमाणः पुनरुग्रतेजाः	२	१०९	३०
अमृष्यमाणस्तं घोषम्	६	७०	४४

	का०	स०	श्लो०
अमृष्यमाणस्तत्कर्म	६	५८	२४
अमोघदर्शने देवी	७	८७	२३
अमोघं दर्शनं राम	६	११७	३०
अमोघं दर्शनं राम	६	१२०	२
अमोघं बत मे क्षान्तम्	२	४	४१
अमोघं युधि वीर्यवान्	६	१०८	४
अमोघः सूर्यसंकाशः	६	१२	३३
अमोघशापैः शापस्तु	७	३५	१६
अमोघाः सूर्यसंकाशाः	४	१०	३२
अमोघो ह्येष सर्वेषाम्	७	२	४४
अम्ब केनात्यगाद्राजा	२	७२	२९
अम्ब पित्रा नियुक्तोऽस्मि	२	४	३५
अम्ब मा दुःखिता भूत्वा	२	३९	३४
अम्बरीषस्तु राजर्षिः	१	६१	२४
अम्बरीषस्य पुत्रोऽभूत्	१	७०	४२
अम्बरीषस्य पुत्रोऽभूत्	२	११०	३३
अम्ब संभृत्य संभारान्	२	२१	५०
अम्बा च केकयींरुण्य	१	९७	१२
अम्बा यथा नो नन्देच्च	२	३२	२२
अयं खलु सुदुर्गम्यः	७	२०	२१
अयं गिरिश्चित्रकूटः	२	९३	८
अयं च तनयो राजन्	४	३१	४८
अयं च पुत्रोऽतिबलः	७	३०	५
अयं च राजा व्यसनाभिभूतः	६	१४	१७
अयं च वीर संदेहः	५	३९	२४
अयं च वीर संदेहः	५	५६	७
अयं च वीर संदेहः	५	६८	७
अयं च हर्षादाख्याति	५	६४	१४
अयं चास्मि प्रदातव्यः	५	६५	२२
अयं तु भावो दुर्बुद्धे	७	३०	३३
अयं तु मामात्मभवः	२	२४	६
अयं तु विजयं सौम्य	७	४३	८
अयं तु सारथिस्तस्य	३	६७	१९
अयं तु यद्यनुग्राह्यः	६	१२१	१२
अयं ते सुमहान्कालः	६	६२	१३
अयं त्वां सचिवैः सार्धम्	६	८५	२३
अयं दीर्घायुषस्तस्य	३	११	८६

	का०	स०	श्लो०
अयं देशः समः श्रीमान्	३	१५	१०
अयं परिभवो भूयः	६	८	७
अयं पितुर्वयस्यो मे	३	६७	२७
अयं महात्मा च महांश्चवीर्यतः	५	४७	२७
अयं मां धक्ष्यति क्षिप्रम्	४	१	३३
अयं मुनिसुतो बालः	१	६२	१०
अयं मुहूर्तात्सुग्रीवः	६	६७	७८
अयं मेषः सवृषणः	१	४९	६
अयं यज्ञहरोऽस्माकम्	१	३९	२६
अयं युक्तो महाबाहो	२	४६	२७
अयं राक्षसमुख्यानाम्	६	३	७२
अयं राजा महाबाहुः	७	९०	७
अयं राजा महाभाग	१	६०	२५
अयं रामो महाप्राज्ञ	४	५	२
अयं वसन्तः सौमित्रे	४	१	२२
अयं वसिष्ठो भगवान्	२	१४	५३
अयं वातात्मजः श्रीमान्	५	१	१३८
अयं व्याससमीपे तु	६	११३	४१
अयं शरस्त्वमोघस्य	७	६३	१९
अयं शोणः शुभजलः	१	३५	४
अयं सकालः संप्राप्तः	३	१६	४
अयं सकालः संप्राप्तः	४	२८	२
अयं स नन्दनोद्देशः	७	२९	८
अयं स पुरुषव्याघ्रः	२	३४	६
अयं सर्वैः समस्ताङ्गैः	१	५६	२८
अयं सिद्धाश्रमो नाम	१	२९	१८
अयं सुदर्शनो द्वीपः	४	४०	६१
अयं सुरपते घोरः	१	६४	३
अयं सौम्य नलो नाम	६	२२	४१
अयं हि कृपया राम	३	५२	४
अयं हि जलसंभूतः	५	६६	५
अयं हि मां दीपयतेऽद्यवह्निः	५	४३	२१
अयं हि शोभते तस्याः	५	६६	७
अयं हि सर्वभूतानाम्	४	४३	९
अयं हि सागरो भीमः	६	२२	४६
अयं हि सुप्तः षण्मासान्	६	१२	११
अयं हि सुरसैन्यस्य	७	२९	३४

	का०	स०	श्लो०
अयं ह्यत्सहते क्रुद्धः	५	४९	२०
अयथावच्च ते वर्णः	६	३०	३
अयमनघ तवोदितः प्रियार्थम्	६	८३	४४
अयमात्मभवः शोकः	२	६४	७४
अयमिक्ष्वाकुदायादः	१	६०	२
अयमिक्ष्वाकुदायादः	३	७०	१३
अयमेवाश्रमो राम	३	७	१७
अयाचतार्थैरन्वर्थैः	३	४७	१०
अयात्रां चैव दृष्ट्वेमाम्	४	२८	६०
अयुक्तचारं दुर्दर्शम्	३	३३	५
अयुक्तं तु कपिश्रेष्ठ	५	३७	४५
अयुक्तं निधनं कर्तुम्	६	८९	१७
अयुक्तावुद्धिकृत्येन	६	३३	१३
अयुक्तावावारं मन्ये त्वाम्	३	३३	११
अयुतं रक्षसामत्र	६	३	२८
अयुतेन वृतश्चैव	४	३९	३३
अयुध्यत तदा वाली	४	११	४३
अयुध्यन्त महावीराः	७	२१	३०
अयुध्यमानं प्रच्छन्नम्	६	८०	३९
अयोजालानि निर्मथ्य	३	३५	३५
अयोध्यां गच्छ भरत	२	१०७	१५
अयोध्यां गन्तुमिच्छामः	६	१२२	१९
अयोध्या दृश्यतेदूरात्	२	७१	२०
अयोध्याधिपतिर्वीर	१	३८	२
अयोध्याधिपतिस्तस्य	७	१९	९
अयोध्याधिपतेः पुत्रौ	४	१५	१७
अयोध्याधिपते वीर	१	५८	१६
अयोध्या नाम नगरी	१	५	६
अयोध्या निलयानां हि	२	४५	३
अयोध्यां तु समालोक्य	६	१२५	१
अयोध्यां त्वरितो गत्वा	६	१२५	३
अयोध्यां प्रति यास्यामि	६	१२२	१७
अयोध्यां मनुना राज्ञा	२	७१	१८
अयोध्यां च सचिवाः	६	१२८	३३
अयोध्यां संप्रविश्यैव	२	११४	२८
अयोध्यापि पुरी रम्या	७	१११	१०
अयोध्यामग्रतो दृष्ट्वा	२	७१	१९

	का०	स०	श्लो०
अयोध्यायां पुरा राजा	७	६७	५
अयोध्यायां बले कोशे	२	९०	७
अयोध्याश्च ते मार्गम्	६	१२५	६
अयोनिजां हि मां ज्ञात्वा	२	११८	३७
अयोमुखश्च गन्तव्यः	४	४१	१३
अयोमुखैस्त्रिभिर्विद्धा	६	९०	४०
अरजस्कं तदाक्षोभ्यम्	७	७७	६
अरजापि रुदन्ती सा	७	८०	१८
अरणिं तत्र निक्षिप्य	७	५७	१८
अरण्यं च सह भ्राता	४	६२	५
अरण्यं विचरामांदम्	३	१७	२१
अरण्यभूतेव पुरी	२	७१	२४
अरण्यवासे यद्दुःखम्	२	४४	६
अरण्यां मथ्यमानायाम्	७	५७	१९
अरण्ये मुनिभिर्जुष्टे	७	४६	९
अरयश्च मनुष्येण	४	२	२२
अरविन्दोत्पलवतीम्	३	७५	२१
अराक्षसमिमं लोकम्	६	४१	६७
अरिघ्नं सिंहसंकाशम्	५	६८	२५
अरिष्टं गच्छ पन्थानम्	३	८	११
अरिष्टनेमिनः पुत्रः	४	६६	४
अरिष्टनेमेर्दुहिता	१	३८	४
अरुन्धत्या इवासीनः	७	४२	२४
अरुन्धन्मिथिलां सर्वे	१	६६	२१
अरोगस्तरुणो वाग्मी	२	१	१८
अरोगं सर्वसिद्धार्थम्	२	२५	४१
अरोचयत तद्वाक्यम्	३	३१	३२
अर्कं तुल्यां शरैस्तीक्ष्णैः	३	४९	४
अर्करश्मिप्रतीकाशैः	२	९९	२१
अर्घं च प्रददौ तस्मै	१	१०	३१
अर्घं चोपानयच्छीघ्रम्	२	५०	३८
अर्चयामास तं देवम्	७	५१	१६
अर्चयिष्यति माल्यैश्च	६	२६	७
अर्चिः सहस्त्रविकचः	६	७६	८९
अर्चितस्तैर्यथान्यायम्	७	२३	१५
अर्चितं सततं यत्नात्	६	३२	१७
अर्चितं सर्वलोकस्य	४	१९	२४

	का०	स०	श्लो०
अर्चिभिश्चापि रत्नानाम्	५	६	४०
अर्चिष्मतं श्रिया जुष्टम्	३	५	१३
अर्चिष्मानर्चितोऽर्त्थम्	५	३५	१२
अर्जुनस्य गदा सा तु	७	३२	५६
अर्जुनाभिमुखे तस्मिन्	७	३२	२१
अर्जुनाय तु तत्कर्म	७	३२	३७
अर्जुनेन विमुक्तस्तु	७	३४	१
अर्जुनो जयतां श्रेष्ठः	७	३२	२
अर्जुनो विदधे मृत्युम्	१	७५	२४
अर्थधर्मौ परित्यज्य	२	५३	१३
अर्थं वा यदि वा कामम्	३	५०	६
अर्थसिद्धिं तु वैदेह्याः	५	२७	४२
अर्थसिद्धौ हरिश्रेष्ठ	५	५८	३३
अर्थसिद्धय हरिश्रेष्ठ	५	१	१६०
अर्थस्येते परित्यागे	६	८३	३७
अर्थानर्थनिमित्तं हि	६	१७	५३
अर्थानर्थान्तरे बुद्धिः	५	२	३८
अर्थानर्थान्तरे बुद्धिः	५	३०	३८
अर्थानर्थौ विनिश्चत्य	६	१७	४१
अर्थितो ह्यस्मि कैकेय्या	२	३४	५०
अर्थिनः कार्यनिर्वृत्तिम्	४	४३	७
अर्थिना कार्यसिद्धयर्थम्	७	५३	१८
अर्थिनामुपपन्नानाम्	४	३०	७१
अर्थी येनार्थिकृत्येन	३	४३	३४
अर्थेन विमुक्तस्य	६	८३	३३
अर्थेभ्योऽथ प्रवृद्धेभ्यः	६	८३	३२
अर्थ्यं विज्ञापयन्नेव	६	१२७	२५
अर्दयन्तौ तु समरे	६	१०७	३०
अर्दयामास संक्रुद्धः	६	७३	४७
अर्दयित्वा पुरीं लङ्काम्	५	४२	३६
अर्दिता वानरैर्भ्रष्टा	६	१०८	२५
अर्दिताश्चैव बाणौघैः	६	१००	४२
अर्दितास्तैः द्रुमा रेजुः	६	७६	६७
अर्दिताः स्म मृशं राम	३	१०	११
अर्धमानः शरैः सोऽथ	७	७	६३
अर्धमानस्ततस्तेन	५	४६	२६
अर्धचन्द्रप्रतीकाशा	७	७०	११

	का०	स०	श्लो०
अर्धचन्द्रेण वदने	५	४४	७
अर्धयोजनमात्रं तु	७	३२	१३
अर्धयोजनविस्तीर्णम्	५	६	२
अर्धरात्रे तु शत्रुघ्नः	७	६६	१२
अर्धसप्तशतास्तत्र	२	३४	१३
अर्धासनेन शक्रस्य	७	६७	८
अर्बुदैरर्बुदशतैः	४	३८	३१
अर्हसे च कपिश्रेष्ठ	५	३६	१०
अलक्तरसरक्ताभौ	२	६०	१८
अलक्ष्मीकानि पश्यामि	२	७१	३६
अलंकारं पुरस्यैवम्	२	२	१६
अलंकारविदश्चैताः	६	१२१	३
अलंकारेण वेषेण	४	१२	३०
अलंकारोहि नारीणाम्	१	३३	७
अलंकुरु च तावत्त्वम्	२	२१६	११
अलंकृतमिवात्मानम्	२	३	३८
अलंकृताभिरत्यर्थम्	५	४६	१०
अलंकृतोऽयं देशश्च	३	१३	८
अलंचकार तां वेदिम्	१	७३	२१
अलमद्य हि भुक्तेन	२	१७	१०
अलमश्रुनिपातेन	५	२४	३३
अलम्बुषा मिश्रकेशी	२	६१	४७
अलम्बुषायामुत्पन्नः	१	४७	१२
अलं विक्लवतां गन्तुम्	३	५६	१४
अलं वीर व्यथां गत्वा	४	२७	३४
अलं वैक्लव्यमालम्ब्य	४	७	५
अलं शोकेन भद्रं ते	२	७६	२
अलीकं मानसं त्वेकम्	२	१६	६
अल्पपर्णा हि तरवः	२	११६	७
अल्पपुण्या त्वहं घोरे	६	१११	३१
अल्पभाग्या हि मे माता	२	५३	२४
अल्पवीर्या यदा यक्षी	१	२५	२
अल्पशेषमिदं कार्यम्	५	४१	२
अल्पान्तरगतानां तु	४	१६	१७
अल्पापराधे काकुत्स्थ	७	५४	२
अल्पैरहोभिर्निधनम्	७	७३	६
अल्पोष्णक्षुब्धसलिलाम्	२	११४	४

	का०	स०	श्लो०
अवकाशो न साम्प्रस्तु	५	२	२७
अवकाशो विविक्तोऽयम्	२	५४	२२
अवकीर्णं लतावृक्षैः	४	५०	६
अवकीर्णस्ततस्ताभिः	५	१५	८
अवक्षिपन्ति स्रुग्भाण्डान्	२	११६	१७
अवगम्य तु वैदेहीम्	४	४२	५२
अवगाह्यार्णवं स्वप्स्ये	६	५	६
अवजानन्न संमोहात्	३	३८	१८
अवज्ञया कृतं हन्यात्	१	१३	३४
अवज्ञया च राजर्षिः	७	५८	२१
अवज्ञाताः पुरातेन	१	१६	६
अवरे चापि मां राम	३	४	२२
अवरे ये निधीयन्ते	३	४	२३
अवतीर्णो नदीं स्नातुम्	७	३१	२६
अवतीर्य च विन्ध्याग्रात्	४	६०	१०
अवतीर्य तु धर्मात्मा	६	४१	२४
अवतीर्य तु शालाग्रात्	२	६७	२८
अवतीर्य विमानाच्च	५	१२	२५
अवदारणकाले तु	२	७७	१६
अवदारणशब्दश्च	६	२२	३६
अवदीर्णां च पृथिवीं	२	६६	१३
अवधीस्त्वं जरावृद्धम्	६	२०	२७
अवधूय च तां बुद्धिम्	५	११	१
अवध्यं दैवतैर्विष्णो	१	१५	२२
अवध्यः सर्वभूतानाम्	६	१६	६
अवध्यतां तपोभिर्याम्	५	५१	२६
अवध्यतां प्रेक्ष्य महासुरस्य	३	४	३०
अवध्यत्वं मया प्राप्तम्	७	१६	४१
अवध्यातश्च रुद्रेण	१	२३	१२
अवध्या मम ते देवाः	७	६	२६
अवध्यो देवतानां यः	६	११०	१५
अवध्योऽमिति ज्ञात्वा	५	४८	३७
अवध्यो वध्यता को वा	२	१०	३३
अवन्तीमङ्गलेपां च	४	४२	१४
अवन्दत महाबाहुः	५	३४	१२
अवप्लुत्य महावेगः	५	६	१७
अवप्लुत्य महावेगः	५	५४	५८

	का०	स०	श्लो०
अवमानं कथं कर्तुम्	१	५८	६
अवरुह्य जगामाशु	६	४	६५
अवरुह्य ततो भूमिम्	४	४६	२०
अवर्धताहुतिहुतः	७	३	६
अवलिप्तासि सुश्रोणि	७	१७	२०
अवलिप्ते न जानासि	२	११	५
अवलीनः स निर्वाक्यः	५	२४	१४
अवलेपः समुद्रस्य	६	२१	१४
अवलोक्य ततः सीताम्	२	२५	३०
अवशिष्टाश्च ये तत्र	३	२५	३०
अवश्यं करणीयं च	७	६३	३
अवश्यं करणीयं च	७	८५	५
अवश्यं कुर्वतां तस्य	४	४६	८
अवश्यं च मया कार्यम्	६	११८	२०
अवश्यं च हितं वाच्यम्	६	६३	३२
अवश्यं चापि लोकेषु	६	११८	१३
अवश्यं तु क्षमं वाच्यः	६	१११	६८
अवश्यं तु मया कार्यम्	३	५०	२७
अवश्यं तु मया तस्य	३	४०	६
अवश्यं रक्षणं कार्यम्	२	५२	६५
अवश्यं लभते कर्त्ता	३	२६	८
अवश्यं विनशिष्यन्ति	३	४१	१५
अवश्यं विनशिष्यन्ति	३	४८	२२
अवश्यमेभिः सर्वैश्च	७	१०	१६
अवश्यमेव दातव्या	७	४	२१
अवश्यमेव द्रष्टव्या	५	५३	१५
अवश्यमेव लभते	६	१११	२५
अवश्यमेव वक्तव्यम्	५	३०	१६
अवश्यायतमोनद्धा	३	१६	२३
अवश्यायनिपातेन	३	१६	२०
अवष्टब्धं च मे राम	२	४	१८
अवष्टब्धधनुं रामम्	३	२५	१
अवष्टभ्यावतिष्ठन्तम्	४	१६	२५
अवसज्ज्य शिलां कण्ठे	३	४७	४२
अवसज्ज्यायसे शूले	३	२	८
अवसीदन्ति गात्राणि	६	१०१	७
अवस्थानं यदैव त्वम	४	५४	७६

	का०	स०	श्लो०
अवाक्शिरास्त्रिशङ्कुश्च	१	६०	३२
अवाङ्मुखमथो दीनम्	७	१०६	१
अवाङ्मुखाश्च दीनाश्च	७	७१	१६
अवाङ्मुखो दीनमनाः	७	४४	१३
अवाङ्मुखो दीनमनाः	७	१०५	१७
अवाच्यं वदतो जिह्वा	५	५८	७२
अवातरन्महातेजाः	४	३८	१६
अवाप्तधर्माचरणम्	६	११६	३१
अवार्यं सर्वभूतानाम्	६	६०	६०
अविक्लवमसंभ्रान्तम्	६	१०६	१२
अविक्षोभ्याणि रक्षांसि	६	५	१७
अविचिन्त्य तु तां वेलाम्	७	६	१६
अविच्छिन्नाश्वेगस्तु	४	६	१६
अविज्ञानान्नृपसुता	२	१२	१०
अविज्ञाय फलं यो हि	२	६३	६
अविदूरं ततो गत्वा	६	८७	२
अविदूरस्थितान्सर्वान्	६	३२	४२
अविदूरादयं नद्याः	२	५०	२८
अविध्यत्परमक्रुद्धः	६	६०	३३
अविन्ध्यो नाम मेधावी	५	३७	१२
अविप्रहतमैक्ष्वाकः	१	२४	१३
अविषह्यातपो यावत्	३	८	८
अविस्तरमसंदिग्धम्	४	३	३१
अवीर्या वीर्यसंदिग्धाः	१	६६	२५
अवृक्षं कामशैलम् च	४	४३	२८
अवृक्षेषु च देशेषु	२	८०	७
अवेक्षता भवान्कोशम्	६	१२७	५६
अवेक्षमाणश्चारेण	१	७	२१
अवेक्षमाणः सस्नेहम्	२	४५	५
अवेक्षमाणस्तां देवीम्	५	३०	२
अवेक्षमाणस्तु तदा	५	१८	२६
अवेक्षमाणां बहुशः	३	५२	४३
अवेक्षमाणा वैदेही	६	१२८	७६
अवेक्षमाणो वैदेहीम्	५	२२	३०
अवेक्ष्याञ्जलिपानाश्च	२	६८	१८
अवेक्ष्यावेक्ष्य धावन्तम्	३	४४	५
अवेक्षत हरीन्सर्वान्	६	१२८	८०

	का०	स०	श्लो०
अवोचद्यदि तत्तथ्यम्	५	५८	६२
अव्यक्तरेखामिव चन्द्रलेखाम्	५	५	२६
अव्यग्राश्च प्रहृष्टाश्च	६	१८	१४
अव्यवस्था भवत्युग्रा	६	४६	३३
अव्याहरन्क्वचित्किंचित्	७	१०६	५
अशक्नुवद्भिस्तैर्गन्तुम्	३	७४	२५
अशक्नुवन्तस्ते विष्णुम्	७	८	२२
अशक्नुवन्निष्क्रमितुम्	४	४६	८
अशक्यमिति चाप्युक्तः	१	५७	१३
अशक्यमिति सोवाच	१	५८	४
अशक्यस्तव वैदेहि	३	४५	११
अशक्यं सहसा राजन्	६	१७	६१
अशङ्कितमतिः स्वस्थः	६	१७	३३
अशरण्यं दुराधर्षम्	४	४८	१४
अशरीरः शरीरस्य	७	५६	५
अशास्त्रविदुषां तेषाम्	६	६३	१५
अशिक्षितं च ब्रह्मास्त्रम्	७	१०	३१
अशुभं चाप्ययुक्तं च	४	१७	४५
अशुभं बत मन्येऽहम्	३	५७	४
अशुभानि बहून्येव	७	४६	१४
अशृण्वता तु सुहृदाम्	६	११०	१८
अशोकजैः प्रीतिमयैः	६	१२५	४२
अशोकवनिका चापि	५	१३	५३
अशोकवनिका चेयम्	५	१४	४३
अशोकवनिकामध्ये	३	५६	३०
अशोकवनिकामध्ये	५	१७	२४
अशोकवनिकामध्ये	५	४२	१३
अशोकवनिकामध्ये	५	५६	२१
अशोकवनिकां स्फीताम्	७	४२	१७
अशोक शोकापनुद	३	६०	१७
अशोकांश्च करञ्जांश्च	६	४	३३
अशोको विजयश्चैव	६	१२८	२४
अशोभत तदा रामः	६	७५	३६
अशोभत महान्सेतुः	६	२२	७६
अशोभत मुखं तस्य	४	६७	७
अशोभनं योऽहमिहा०	२	५६	३२
अशोभयन्त वसुधाम्	२	१०	८

	का०	स०	श्लो०
अश्मभिः परिभिन्नाङ्गः	४	१६	२
अश्मवर्षं विमुञ्चन्ती	१	२६	२०
अश्मवर्षेण महता	७	८६	१३
अश्मसारमिदं नूनम्	५	२६	६
अश्रद्धेयमिदं लोके	२	८८	१०
अश्रुत्वा राजवचनम्	२	१४	६२
अश्रुपूर्णमुखीं दीनाम्	३	५५	४
अश्रुपूर्णमुखीं दीनाम्	५	१५	२३
अश्रुसंपूर्णनेत्रा च	२	३७	११
अश्रूणि परिमृदन्तौ	२	७७	२६
अश्रौषं राघवस्याहम्	५	३१	१५
अश्वं मुक्तं गजो दृष्ट्वा	६	७५	२८
अश्वपृष्ठे नागपृष्ठे	६	७१	२६
अश्वमेधो महायज्ञः	७	८४	२
अश्वयुक्तो रथो मह्यम्	७	३०	१३
अश्वानां खादनेनाहम्	२	५०	४५
अश्वानां प्रतिपानं च	२	५०	४७
अश्वानां षष्टिकोटयस्तु	६	६५	२८
अश्वान्यानानि रत्नानि	७	३६	६
अश्विपुत्रौ महावेगौ	५	५६	१७
अश्वैरश्वान्गजैर्नागान्	५	४६	३६
अंशुकान्ताश्च कासांचित्	५	६	५३
अंशुमानकरोत्तात	१	३६	७
अंशुमानपि पुत्रोऽभूत्	२	११०	२७
अष्टकापितृदेवत्यम्	२	१०८	१४
अष्टादशशरैस्तीक्ष्णैः	६	७३	४३
अष्टादश हि वर्षाणि	३	४७	११
अष्टौ च कन्या रुचिराः	२	१४	३६
अष्टौ च कन्या रुचिराः	२	१५	८
अष्टौ बभूवुर्वीरस्य	१	७	२
अष्टौ वर्षसहस्राणि	४	६०	६
असंकल्पितमेवेह	२	२२	२४
असंख्या सुमहत्यासीत्	७	२१	२८
असंख्येयानि कर्माणि	७	६७	४
असंख्येयैस्तु बाणौघैः	३	२६	२१
असंजाल्यं मनुष्यैश्च	२	११८	४०
असंदेशात्तु रामस्य	५	२२	२०

	का०	स०	श्लो०
असंभाव्यं वधं तस्य	७	८५	१५
असंमन्त्र्य मया सार्धम्	६	४१	२
असंमूढस्य गृध्रस्य	३	६८	३५
असंवृत्तायामासीनाम्	५	१६	५
असंशयं प्रज्वलितैः	४	११	२
असंशयं शत्रुरयं प्रवृद्धः	५	५२	१४
असंस्पृशन्तं वसुधाम्	३	५	६
असंहार्यानुपायज्ञान्	१	१७	४
असकृत्तद्भयाद्भग्नाः	७	११	६
असकृत्तैर्महाभागैः	५	६४	२०
असकृत्तैर्महोत्साहैः	५	३६	३७
असकृत्संयुगे भग्ना	५	२०	२०
असकृत्संयुगे येन	३	५०	२४
असत्यः सर्वलोकेऽस्मिन्	२	३६	२०
असत्यमपि नैवाहम्	२	५२	४६
असत्यशीला विकृताः	२	३६	२२
असत्यसंधस्य सतः	२	१०६	१८
असत्यानि च युद्धानि	५	३०	३५
असनाः सप्तवर्णाश्च	४	३०	६२
असमञ्जस्तु पुत्रोऽभूत्	२	११०	२६
असमञ्जो गृहीत्वा तु	२	३६	१६
असमर्थं विजानाति	६	२१	२१
असमीक्ष्य समारब्धम्	२	५८	३०
असर्पत जलं तत्र	१	४३	१६
असाध्यः कुपितो रामः	३	३१	२३
असामर्थ्यफला ह्येते	६	२१	१५
असावत्यन्तनिर्भग्नः	२	८	२५
असिचर्मधरा योधाः	६	११	५
असिताञ्जनसंकाशान्	६	२७	६
असितोऽल्पबलो राजा	१	७०	३०
असिना तीक्ष्णधारेण	२	२३	३२
असिना व्यायतौ छिन्नौ	६	३१	२६
असिपत्रवने चैव	७	२१	१५
असिभिः पट्टिशैः शूलैः	६	६५	२५
असिरत्नं महाबाहुः	१	२७	१४
असुरा दानवाश्चैव	७	६	३६
असुरा वा महावीर्याः	६	५०	४७

	का०	स०	श्लो०
असुरास्तेन दैतेया:	१	४५	३८
असुरेभ्यो सुरेभ्यो वा	६	११०	१४
असुरैर्वा सुरैर्वा त्वम्	३	५६	८
असुरो न्यपतद्भूमौ	४	४८	२१
असुहृद्भिर्ममामित्रै:	४	३२	४
असूर्यरजसो नाम	१	३२	७
असृक्चन्दनदिग्धाङ्गम्	७	६९	१९
असृजद्भगवान्पक्षौ	६	३५	१२
असेव्य: सर्वतश्चैव	३	६४	३४
असौ किरीटो चलकुण्डलास्य:	६	५९	२५
असौ च जीमूतनिकाशरूप:	६	५९	२०
असौ पुनर्लक्ष्मण राक्षसेन्द्र	६	७३	६४
असौ पुनर्व्याकरणं ग्रहिष्यन्	७	३६	४४
असौ रणान्त: स्थिति०	३	३१	४७
असौ हि राक्षस: शेते	३	५९	२५
अस्तं गच्छति यत्रार्क:	४	३७	२१
अस्तं गते सहस्रांशौ	६	८९	३६
अस्तमभ्यागमत्सूर्य:	२	१३	१५
अस्तमस्तकसंनद्ध	४	२३	१९
अस्ति कच्चित्त्वया दृष्टा	३	६०	१२
अस्तिमूलफलं चैतत्	१	८४	१७
अस्ति सूक्ष्मतरं किंचित्	६	१८	९
अस्त्रं तु परमं घोरम्	६	१०२	२०
अस्त्राण्यस्त्रविदां श्रेष्ठौ	६	८८	६३
अस्त्राण्यानन्दजानि त्वम्	८	३३	३०
अस्त्रेण हनुमान्मुक्त:	५	४८	५१
अस्त्रेणापि हि बद्धस्य	५	४८	४३
अस्त्रेणोन्मुक्तमात्मानम्	१	१	७६
अस्त्रे प्रतिहते क्रुद्ध:	६	१०२	२७
अस्त्रैरस्त्राणि यो हन्यात्	६	४९	२१
अस्त्रैर्नयनजै: शूरम्	४	२३	२१
अस्त्रैर्वा गदया वापि	६	७९	१६
अस्थाने वालिनं हत्वा	४	२०	१५
अस्थीनि मेघा ववृषु:	७	६	५४
अस्मत्त्यक्तं प्रपद्यन्तु	२	३३	२४
अस्मदीया च लङ्केयम्	७	११	७
अस्मद्व्यपेक्षान्सौ मित्रे	२	४६	१९

	का०	स०	श्लो०
अस्माकं कस्यचित्स्थानात्	३	११	१४
अस्माकं कामभोगानाम्	६	१११	५५
अस्माकं तु कुले पूर्वम्	२	२१	३२
अस्माकमपि तावत्त्वम्	७	५	२०
अस्माकमपि दारेषु	७	४३	१९
अस्माकमपि मुख्यानि	१	१०	१९
अस्माकमेषा सुश्रोणी	७	८८	१९
अस्माकं विहितावृत्ति:	४	५८	३१
अस्माद्गच्छामकिष्किन्धाम्	४	१२	१३
अस्त्रविज्जयतां राम:	५	४३	८
अस्माद्भीमा जलक्लिन्ना:	६	५२	१२
अस्मानभ्यवपद्यैते	३	१०	७
अस्माभिरुपयुक्तानि	४	५२	१७
अस्माभिस्तु गतं सार्धम्	४	५४	२०
अस्मिञ्जीवति वीरे तु	६	७४	२२
अस्मिन्कार्ये विनिर्वृत्ते	४	४३	५
अस्मिन्काले तु यद्युक्तम्	६	६३	२५
अस्मिन्काले महाप्राज्ञ	६	२	१५
अस्मिन्कुले हि सर्वेषाम्	२	७३	२०
अस्मिन्क्षणे महाबाहो	६	१०५	२७
अस्मिन्क्षणे मां सौमित्रे	७	१०५	६
अस्मिन्द्वापरसंख्याने	७	७४	२४
अस्मिन्नतीते काले तु	६	५३	१३
अस्मिन्नस्त्रहते सैन्ये	६	७४	६
अस्मिन्नहनि यच्छ्रेय:	७	८३	८
अस्मिन्निपतिता: सर्वे	४	५२	१४
अस्मिन्निपतिते भूमौ	४	१७	३
अस्मिन्नेवंगते कार्ये	५	१	१२१
अस्मिन्नेवंगते कार्ये	५	१३	१७
अस्मिन्नेवाभिसंप्राप्तम्	७	२५	२९
अस्मिन्प्रव्रजिते राजा	२	५१	१२
अस्मिन्प्रव्रजिते राजा	२	८६	१३
अस्मिन्मया सार्धमुदारशीला	३	६३	१२
अस्मिन्मुहूर्ते गत्वैक:	६	८	८
अस्मिन्मुहूर्ते न चिरात्	६	१००	४८
अस्मिन्मुहूर्ते भ्रात्रा त्वम्	६	१२५	३८
अस्मिन्मुहूर्ते सुग्रीव	६	४	३

	का०	स०	श्लो०
अस्मिन्मुहूर्ते सुग्रीव	६	४६	२३
अस्मिन्मुहूर्ते सौमित्रे	३	६४	६३
अस्मिल्लंवणतोये च	५	१	११६
अस्मिन्विष्टे नहि भूतं	५	५२	२१
अस्मिन्व्यालानुचरिते	३	४६	१५
अस्मिन्सानुनि रम्ये हि	४	१	१०२
अस्मिंस्तु पुरुषव्याघ्र	३	१६	२७
अस्मिंस्तु शिखरे जाताम्	६	१०१	३४
अस्मीदानीमहं प्राप्ता	३	२१	७
अस्मै देया मया सीता	१	६८	१०
अस्य कार्यविपक्तस्य	५	१	१४६
अस्य क्रूरैर्नृशंसैश्च	५	४६	१६
अस्यता च पुनः सव्यम्	६	२१	७
अस्य त्वं धरमाणस्य	४	१८	१६
अस्य देवप्रभावस्य	३	७०	१५
अस्य धर्मात्मनो राजन्	१	७२	५
अस्य प्रसादादाशंसे	२	८६	६
अस्य प्रसादादाशंसे	२	५१	५
अस्य बालिहपतेश्चैव	७	६०	१८
अस्य मायाविदो माया	३	४३	७
अस्य रूपस्य ते युक्ता	३	१८	७
अस्य वाहनसंयुक्ताभ्	२	५२	६
अस्य विन्ध्यस्य शिखरे	४	६०	४
अस्यां महिष्यां तु भृशं	४	२४	५
अस्यां वत्स्याम सौमित्रे	४	२७	७
अस्यां स्नात्वा महानद्याम्	७	३१	३३
अस्याः कुले प्रमुदिताः	४	१	२८
अस्या देव्या मनस्तस्मिन्	५	१५	५२
अस्याङ्कुतं महावेगम्	४	४०	४६
अस्या नूनं पुनर्लाभात्	५	१६	२३
अस्यां त्वहमवस्थायाम्	४	२२	७
अस्यामायत्तमस्माकम्	३	४३	४७
अस्या हि पुष्पावनताग्रशाखाः	५	१६	३१
अस्या हेतोर्विशालाक्ष्याः	५	१६	७
अस्वाधीनं कथं दैवम्	२	३०	३३
अहं कामचरी सौम्य	७	८६	६
अहं किंचापि वक्ष्यामि	२	५२	४५

	का०	स०	श्लो०
अहं किल कुले जातः	७	४५	४
अहं कोसलराजस्य	५	५६	२०
अहं गमिष्यामि महावनं प्रिये	२	२६	३८
अहं गमिष्यामि वनं संयति	२	२७	२२
अहं च तैं संयति०	५	४१	१३
अहं च नित्यशो राजन्	७	४०	१२
अहं च रघुवंशश्च	६	१	११
अहं च हि मर्यादाश्च	२	१०	३४
अहं चापि प्रतिज्ञां ताम्	२	२६	२८
अहं चैव जटायुश्च	४	६१	३
अहं ज्ञात्वा नरव्याघ्र	३	५	२६
अहं तदाशां धक्ष्यामि	२	२३	२३
अहं तव प्रियं मन्ये	३	४५	२२
अहं तस्य प्रभावज्ञः	३	३६	१६
अहं तात यथाकालम्	४	५६	१२
अहं तान्न हनिष्यामि	७	६	१०
अहं तावदिह प्राप्तः	५	३६	३६
अहं तावदिह प्राप्तः	५	६८	२२
अहं तावन्महाराजे	२	५८	३१
अहं तु खलु ते वीर्यम्	४	२७	४०
अहं तु खलु सर्वान्वः	६	१२	१०
अहं तु तं नरव्याघ्रम्	२	६०	१७
अहं तु नगरी लङ्कां	५	३	४५
अहं तु नष्टं तं ज्ञात्वा	४	६	१६
अहं तु मन्ये तव न क्षमं रणे	३	३७	२५
अहं तु रावणं युद्धे	५	५६	६
अहं तु रावणं हत्वा	६	५०	२५
अहं तु वधमिच्छामि	६	१०१	१७
अहं तु व्यक्ततामस्य	६	१८	१७
अहं तु हनुमान्नाम	५	५१	१५
अहं तु हिमवत्पृष्ठम्	७	१३	२१
अहं तु हृतदारश्च	४	२८	५८
अहं ते नानुवक्तव्यः	२	२६	२६
अहं ते प्रतिजानामि	१	१६	१४
अहं त्यक्ता च ते वीर	७	४८	१३
अहं त्वपचितिं भ्रातुः	२	७४	३०
अहं त्ववगतो बुद्धया	४	६	१६

	का०	स०	श्लो०
अहं दाशरथेनोढा	६	३२	२९
अहं दुर्गं गमिष्यामि	२	२७	११
अहं द्विजिह्वः संह्रादी	६	६४	२२
अहं नियममातिष्ठे	१	१९	४
अहं पञ्चसु भूतेषु	७	९६	२१
अहं पुनर्देवकुमाररूपम्	२	१२	१०३
अहं पौलस्त्यतनयः	७	१२	१५
अहं प्रदातुमिच्छामि	२	३१	३५
अहं प्रभावसंपन्ना	३	१७	२५
अहं प्रस्रवणस्थाय	५	३७	२३
अहं यद्यहरं भार्याम्	६	२०	११
अहं युष्मान्समाश्रित्य	७	३६	५७
अहं योजनसंख्यायाः	४	४५	१५
अहं राक्षसराजस्य	५	३	२८
अहं राक्षसराजेन	६	७८	१०
अहं राघव कैकेय्या	२	३४	२६
अहं रामस्य संदेशात्	५	३४	२
अहं लङ्कापतिर्भद्रे	७	१७	२२
अहं लङ्कापुरी वीर	५	५८	५१
अहं वः कामये सर्वाः	१	३२	१६
अहं वः प्रतिजानामि	४	५५	१२
अहं वा कुम्भकर्णो वा	६	५७	६
अहं वापि विपद्येयम्	५	३७	५६
अहं वास्य रणे मृत्युः	३	२७	४
अहं विनिकृतो भ्रात्रा	४	८	१७
अहं विष्णुरहं रुद्रः	७	६	६
अहं सखा ते काकुत्स्थ	६	५०	४६
अहं समुद्यतो हन्तुम्	७	२०	१९
अहं सुग्रीवसंदेशात्	५	५१	२
अहं सेतुं करिष्यामि	६	२२	४४
अहं हत्वा दशग्रीवम्	६	१९	१९
अहं हि तस्याद्य मनोभवेन	५	३२	१२
अहं हि ते लक्ष्मण नित्यमेव	२	२१	५६
अहं हि नगरी लङ्का	५	३	३०
अहं हि नियमाद्राम	१	३४	१२
अहं हि नैवास्तरणानि०	२	९	६४
अहं हि पुरुषव्याघ्रौ	२	७३	१४

	का०	स०	श्लो०
अहं हि विषमद्यैव	२	१२	४७
अहं हि सीतां राज्यं च	२	१९	७
अहं ह्यतितनुश्चैव	५	३०	१७
अहं ह्याजिस्थितस्यास्य	४	१६	८
अहताङ्गैः समस्तैस्तम्	३	३२	११
अहत्वां तांश्च दुर्धर्षान्	४	३५	१६
अहत्वा नास्ति मे शक्तिः	४	१०	१८
अहत्वा रावणं संख्ये	६	१९	२१
अहत्वा सायकैस्तीक्ष्णैः	३	२३	२२
अहमग्निं विषं तीक्ष्णं	७	५८	१९
अहमप्यत्र ते दद्मि	६	१२४	७
अहमप्यनुरूपस्ते	४	८	५
अहमप्यवनीं प्राप्ते	२	७४	३४
अहमस्मिन्गिरौ दुर्गे	४	५९	७
अहमस्य प्रदास्यामि	७	३६	१२
अहमस्यावरो भ्राता	४	४	१२
अहमाकाशमासक्ता	५	३७	४६
अहमाख्यामि ते राजन्	७	२५	७
अहमाख्यामि ते राम	३	११	३७
अहमामन्त्रये सर्वान्	१	५९	३
अहमावर्जयिष्यामि	५	६२	२
अहमाश्वासयाम्येनाम्	५	३०	७
अहमिक्ष्वाकुनाथेन	५	१	८७
अहमिन्द्रं वधिष्यामि	७	२९	६
अहमुत्सादयिष्यामि	६	१२	३६
अहमुत्सादयिष्यामि	६	६३	४२
अहमेकस्तु संप्राप्तः	५	३५	७५
अहमेको गमिष्यामि	२	५३	१७
अहमेकोऽपि पर्याप्तः	५	५९	७
अहमेको वधिष्यामि	४	४५	१२
अहमेको वधिष्यामि	६	८	२४
अहमेतद्गमिष्यामि	६	६५	१९
अहमेव धनुष्पाणिः	१	२०	५
अहमेव निहन्तास्मि	७	२७	२०
अहमेव सह भ्रात्रा	६	३७	३५
अहमेवाहरिष्यामि	३	५	३३
अहमेवाहरिष्यामि	३	७	१४

	का०	स०	श्लो०
अहमौपयिकी भार्या	५	२१	१७
अहल्यया त्वेवमुक्तः	७	३०	४१
अहल्यादर्शनं चैव	१	५०	२४
अहितं च हिताकारम्	६	६३	१६
अहिंसारतिरक्षुद्रः	५	३१	३
अहो कामस्य वामत्वम्	४	१	६८
अहो खलु कृतं कर्म	५	५५	३०
अहो तम इवेदं स्यात्	२	६७	३६
अहो त्वं कीर्णिकाराद्य	३	६०	२०
अहो दशरथो राजा	२	४९	७
अहो दुःखमहो कृच्छ्रम्	२	१२	७९
अहो दुर्वृत्तमास्थाय	७	२४	१९
अहो धिग्धिक्कृतमिदम्	५	३४	१०
अहो धिङ् नार्हसे देवि	२	१८	२८
अहो धिङ्मन्निमित्तोऽयम्	६	९२	५०
अहो धिङ् मानुषं लोकम्	७	२४	१७
अहो निश्चेतनो राजा	२	४१	६
अहो बत महत्कर्म	३	३०	३२
अहो बतेदं नृवराविषह्यम्	४	२४	१८
अहो बलमहो वीर्यम्	७	३४	३७
अहो भरत सिद्धार्थः	२	१०३	१०
अहोभिर्दशभिर्यै च	६	३७	१२
अहो भीममिदं सत्त्वम्	५	३२	४
अहो महत्कर्म कृतं निरर्थकम्	५	४८	५०
अहो महात्मा राजायम्	२	६	२१
अहोरात्रं च संतोषः	२	२८	१२
अहोरात्राणि गच्छन्ति	२	१०५	२०
अहोरात्राण्यनेकानि	७	५३	१७
अहोरात्रैस्त्रिभिर्वीरः	६	९१	१६
अहो रूपमहो धैर्यम्	५	४९	१७
अहो रूपमहो लक्ष्मीः	३	४३	१५
अहो लक्ष्मण सिद्धार्थः	२	४०	२५
अहो विक्रमशूरस्य	३	२७	१२
अहो शाखामृगत्वं ते	४	२	१७
अहो सुरमणीयोऽयम्	४	२७	२५
अहोऽस्मि परमप्रीतः	२	३	२
अहोऽस्मि व्यसने मग्नः	३	५८	१७

	काण्ड	स०	श्लोक
अहो स्वप्नस्य सुखता	५	३४	२०
अह्ना तृतीयेन तथा	६	२२	६६
(आ)			
आकर्णकृष्टमुक्तेन	४	७६	४०
आकर्णात्स विकृष्याथ	७	२१	४१
आकारश्छाद्यमानोऽपि	६	१७	६४
आकाशप्रभवो ब्रह्मा	२	११०	५
आकाशमिव दुष्पारम्	४	६४	७
आकाशादपतद्रा	१	४३	५
आकाशाद्विधनात्तीव्रात्	६	५३	१४
आकाशे गणशः स्थित्वा	६	८	१७
आकाशे चापि देवानाम्	६	९०	८५
आकुलां नगरीं कृत्वा	५	५७	१२
आक्रन्दमानं तु वने	३	४५	३
आक्रन्दिता निरानन्दा	२	६७	१
आक्रमिष्यति दुर्बुद्धिः	४	२	५५
आक्रोशं मम मातुश्च	२	१०६	३०
आक्षिप्ताः क्षिप्यमाणाश्च	६	६९	५८
आख्याता गृध्रराजेन	४	६४	१
आगच्छत खरः शीघ्रम्	७	२९	३३
आगच्छ त्वं विशालाक्षि	३	६२	७
आगच्छन्तं त्रिशिरसम्	३	२७	९
आगच्छन्त्याश्च विजनम्	२	११८	७
आगच्छ रक्षोधिप मा विषादम्	६	६७	१४३
आगतः क्रूरकार्यायाः	२	७५	६
आगतस्त्वरितं वाक्यम्	३	१७	१३
आगतस्य हि रामस्य	६	३३	२९
आगताः स्म यथोद्दिष्टम्	३	१५	२
आगताः स्माश्रमपदम्	३	११	९४
आगता त्वमियं बुद्धिः	२	११२	१६
आगता विनिविष्टाश्च	४	४०	२
आगताश्च निविष्टाश्च	४	३९	३९
आगतास्तु जलं गृह्य	६	११२	१४
आगता हि महावीर्या	४	३३	६०
आगतेन मया चैवम्	७	१३	३२
आगतेषु च दारेषु	२	३४	१४
आगतो बलवांस्तूर्णम्	४	३९	२८

	का०	स०	श्लो०
आगतो रक्षसां राजा	६	६५	३६
आगत्यापीह हरयः	५	२	२५
आगमं तस्य दीप्तस्य	७	७६	३४
आगमस्तु पथा येन	७	२३	५३
आगमास्ते शिवाः सन्तु	२	२५	२१
आगमिष्यति ते भर्ता	३	४५	१६
आगमिष्यति मे भर्ता	३	४७	२३
आगमिष्यति वैदीहीम्	२	५४	२५
आगमिष्यति सुग्रीवः	५	४३	२५
आगमिष्यन्ति ते राजन्	४	३८	३२
आगमिष्यन्ति ते वक्रम्	५	५८	२८
आगम्य च पुरीं रम्याम्	७	३६	१२
आग्राह्यवीर्य पूर्वाह्णे	३	१६	१६
आग्नेयमस्त्रं तस्मै च	७	१५	२६
आग्नेयास्त्राभिसंयुक्तम्	६	७१	८६
आग्नेयेन तदास्त्रेण	६	७१	८३
आग्नेयेनापि संयुक्तम्	६	५६	८३
आघूर्णिततरङ्गौघः	६	२१	३२
आघ्राय रामस्तं मूर्ध्नि	२	१००	३
आचक्ष्व नो विशालाश्चि	५	४२	७
आचक्ष्व मे महाबाहो	६	५८	३
आचक्ष्व मे महाबाहो	६	७१	२५
आचक्ष्व सुमहान्कोऽसौ	६	६१	७
आचचक्षेऽथ सद्भावम्	२	८६	१
आचम्य च यथाशास्त्रम्	२	५२	७६
आचार्या ब्राह्मणा गावः	२	१४	४०
आचार्यो गुरवो वृद्धाः	६	२६	६
आचितां चित्रपत्तीभिः	४	२५	२३
आच्छादितास्ते वासोभिः	१	१४	२७
आजगाम जनस्थानम्	३	५७	१२
आजगाम ततो ब्रह्म	१	२	२३
आजगाम ततो वाली	४	४६	१०
आजगाम महातेजाः	५	५७	१३
आजगाम ततः पम्पाम्	३	७५	११
आजगाम ततः शीघ्रम्	६	६१	३
आजगाम रिपुं हत्वा	४	६	२२
आजग्मुरथ देशेभ्यः	१	५६	५०

	का०	स०	श्लो०
आजग्मुर्यत्र युध्येते	७	६६	३०
आजग्मुर्वानरश्रेष्ठम्	५	४२	२८
आजग्मुस्तेऽपि हरयः	५	६४	४०
आजग्मुस्ते सहागस्त्याः	८	१	४
आजघान गदां तस्य	६	६७	२२
आजघान तदा नीलम्	६	५८	४६
आजघान तदा मूर्ध्नि	६	७०	२४
आजघानेन्द्रजित्कुद्धः	६	४३	१८
आजहार स धर्मात्मा	६	१२८	५७
आजह्रुरथ संहृष्टाः	६	११२	२०
आजानुलम्बिबाहुः सः	६	१२८	६६
आजा बभूवुर्ध्वमाश्च	३	३५	३१
आजैश्चापि वाराहैः	२	६१	६७
आज्यगन्धप्रतिवाहः	६	५७	२२
आज्ञप्ता राक्षसेनेह	६	११३	४०
आज्ञप्तो रावणेनेत्यम्	३	४१	१
आज्ञापयत्तदा राजा	४	२५	३०
आज्ञापयद्राक्षसेन्द्रः	५	५३	५
अज्ञापय यथातत्त्वम्	५	१०४	२३
आज्ञाप्यतां महाबाहो	७	६१	१६
आज्ञाप्याथ यथाज्ञप्ति	२	८०	१५
आज्ञावशत्वे भरतः	६	१२४	४
आञ्जनीः कङ्कतान्कूर्चान्	२	६१	७७
आढ्यो वापि दरिद्रो वा	४	८	८
आतपी मण्डली मृत्युः	४	१०५	१४
आतिथ्यं कर्तुमिच्छामि	१	५२	१३
आतिष्ठ धर्मज्ञ मया सहेनाम्	६	१२८	६२
आतोद्यानि विचित्राणि	५	१०	४६
आत्मकामा सदा चण्डी	२	७०	१०
आत्मजैः सह दुर्धर्षम्	१	७०	१२
आत्मनः सदृशान्वीरान्	५	४२	२४
आत्मनश्च बलं ज्ञात्वा	३	३७	२४
आत्मनश्च विपर्यासम्	७	१०८	६
आत्मनस्तानि विस्मृत्य	६	६६	५
आत्मना पञ्चमं मां हि	४	६	११
आत्मनो जीवितेनापि	११	१०	३५
आत्मवद्भिर्विगृह्य तम्	३	३३	७

	का०	स०	श्लो०
आत्मवान्को जितक्रोध:	१	१	४
आत्मानं खादतानार्या	५	२७	५
आत्मानं त्वप्रहरणम्	६	५६	१५
आत्मानं त्वम्प्रनुज्ञातम्	२	५२	१५
आत्मानं नियमैस्तैस्तै:	३	६	३१
आत्मानं मां च देवेश	१	४८	२१
आत्मानं मानुषं मन्ये	६	११७	११
आत्मानं विजेतेन्द्रिय:	१	६४	१८
आत्मानं स्त्रीकृतं चैव	७	८७	१६
आत्मानमनुतिष्ठ त्वम्	२	१०५	४१
आत्मानमनुशोच त्वम्	२	१०५	२१
आत्मानमुपमां कृत्वा	५	२१	८
आत्मानुमानामि	४	१०	३४
आत्मा रक्ष्य: प्रयत्नेन	५	४६	१७
आत्मा हि दारा: सर्वेषाम्	२	३७	२४
आददू रक्षसां प्राणान्	३	२५	१६
आददे निशितं बाणम्	६	६०	५८
आददे निशितं शूलम्	६	६५	१८
आदद्वुभुक्षितो मांसम्	६	६०	६३
आदर्शतलसंकाशा	४	४६	१३
आदाय शिबिकां तार:	४	२५	२१
आदिकाव्यमिदं राम	७	६८	१८
आदितस्तद्यथा वृत्तम्	१	१	६०
आदित्य इव तेजस्वी	५	३४	२८
आदित्य इव दुष्प्रेक्ष्य:	६	५६	२७
आदित्यकोटीसदृश: सुतेजा	५	५४	३३
आदित्य: पतितो भूमौ	६	१०६	७
आदित्यभवने चैव	४	३७	४
आदित्य भो लोककृताकृतज्ञ	३	६३	१६
आदित्यमाहरिष्यामि	४	२८	१३
आदित्यमिव कालेन	४	१७	१०
आदित्यमुपतिष्ठन्ति	४	४२	४२
आदित्यमुपतिष्ठन्ते	२	६५	७
आदित्यं प्रेक्ष्य जप्त्वेदम्	६	६३	११
आदित्य: सविता सूर्य:	६	१०५	१०
आदित्य सह चन्द्रेण	२	१४	५०
आदित्यहृदयं पुण्यम्	६	१०५	४
आदित्या वसवो रुद्रा:	३	१४	१५
आदित्यांश्च वसूरुद्रान्	७	२७	४
आदिप्रभृति गेयं स्यात्	७	६३	१४
आदिप्रभृति वै राजन्	७	६४	२६
आदिवंशविशुद्धानाम्	१	१७०	४४
आदिष्टा वानरेन्द्रास्ते	६	७५	४२
आदिष्टा वानरेन्द्रेण	५	३५	५३
आदिष्टा वानरेन्द्रेण	६	१२६	४०
आदीप्तमिव वैदेहि	२	५६	६
आदेशो वनवासस्य	२	२६	१०
आधावमानं मुशलम्	७	३२	४५
आधिराज्येऽभिषेको मे	६	४८	१४
आनन्तर्यमभिप्रेप्सु:	६	४१	५६
आनम्य मूर्ध्नि चाघ्राय	२	२५	४०
आनय त्वं हि तां सीताम्	७	६८	६
आनयद्राघवाभ्याम्	६	५६	११७
आनयिष्यसि चेत्सीताम्	३	४१	१६
आनयिष्यामि वा लङ्काम्	५	१	४१
आनयिष्यामि विक्रम्य	३	३६	१४
आनयेङ्गुदिपिण्याकम्	२	१०३	२०
आनयैनं हरिश्रेष्ठ	६	१८	३४
आनाय्य च महाबाहुम्	२	७४	३१
आनय्य तु महीपाल	१	६	१३
अनीता रामपत्नी सा	६	३	६६
आनीय च वनात्सीताम्	६	३६	८
अनीयतामित: सेना	२	६१	१०
आनीयोवाच सौमित्रिम्	७	४६	५
आनुपूर्व्या च वृत्तं तत्	५	१	३१
आनुपूर्व्यान्निषेदुश्च	२	६१	४०
आनृशंस्यं परो धर्म:	५	३८	३६
आनृशंस्यमनुक्रोश:	२	३३	१२
आपगा: कृतपुण्यास्ता:	२	४८	६
आपतन्तं महावीर्यम्	६	८१	२४
आपतन्तं शरौघेण	६	१०२	६१
आपतन्तीं शिलां दृष्ट्वा	६	५२	२८
आपत्संशयिता श्रेय:	६	५७	११
आपत्सु न प्रकम्पन्ते	३	६७	८

	का०	स०	श्लो०
आपपाताथ संक्रुद्धः	६	८०	१६
आपाते पक्षिसङ्घानाम्	५	१	७८
आपानशाला विचिताः	५	१२	१३
आपापोऽसि यथा पुत्र	२	६४	४०
आपीडैश्च लताभिश्च	४	५०	२७
आपूर्यमाणं शश्वच्च	४	५४	३
आपृच्छामो गमिष्यामः	७	३८	३०
आपृच्छे त्वां पुरिश्रेष्ठ	२	५०	२
आपृच्छे त्वां महाराज	२	३४	२२
आपृच्छेऽहं महाराजम्	२	७०	१३
आपृच्छ्य च तदा विप्रम्	१	२०	२२
आप्लवन्तः प्लवन्तश्च	४	३६	४०
आप्लवन्तः प्लवन्तश्च	४	४	२६
आप्लवन्तः प्लवन्तश्च	६	२२	७३
आप्लवन्तः प्लवन्तश्च	६	४२	१६
आप्लवन्तो हरिवराः	४	२	११
आप्लुत्य गिरिशृङ्गेषु	५	५७	४४
आप्लुत्य च महावेगः	५	५७	१
आबध्य च शुभे तुणी	३	८	११
आबध्यन्तां पताकाश्च	२	३	१७
आबभाषे गजस्तत्र	४	६३	३
आबभाषे च तौ वीरौ	४	३	४
आबभाषे च तौ वृद्धौ	२	६४	४८
आबभाषेऽथ मुख्यज्ञः	६	२६	११
आबोध्य च महाप्राज्ञः	२	३४	४
आम्रवन्तीमवन्तीं च	४	४१	१०
आभाष्य च महावीर्यान्	७	३६	२०
आभिजात्यं हि ते मन्ये	२	३५	१७
आभिषेचनिकं चैव	२	७६	१०
आभिषेचनिकं भाण्डम्	२	१६	३१
आभिषेचनिकं सर्वम्	२	७६	४
आमन्त्रये जनस्थानम्	३	४६	३०
आमन्त्रयेऽहं भगवन्	२	६२	७
आमन्त्र्य तु महात्मानम्	७	७२	२०
आमन्त्र्य तु सहस्राक्षम्	७	६७	१५
आममीनाशनाश्चापि	४	४०	२८
आमिषं यच्च पूर्वेषाम्	७	७४	१६

	का०	स०	श्लो०
आम्रजम्बसनैर्लोध्रैः	२	६४	८
आम्रं चित्त्वा कुठारेण	२	३५	१६
आयच्छत्कापिराज्यं तु	५	३१	१२
आयत्तमग्निहोत्रं च	१	५३	१४
आयत्तमत्र राजर्षे	१	५३	१५
आयताञ्चितदीर्घाणि	५	५७	४३
आयता दश च द्वे च	१	५	७
आयतीभिव विध्वस्ताम्	५	१६	१२
आयतैर्विमलैर्नेत्रैः	२	५७	१६
आयतैर्विमलैर्नेत्रैः	२	५६	१३
आययौ यत्र काकुत्स्थः	७	११०	४
आयसं परिघं गृह्य	५	५८	१५७
आयसं हृदयं नूनम्	२	४०	२३
आयसीं तु गदां गृह्य	६	७६	१३
आयसैः शङ्कुभिस्तीक्ष्णैः	३	२६	११
आयस्ते विपुलः कश्चित्	२	१००	५४
आयागभूतं नृपतेः	१	३१	१३
आयाचमानां दुःखार्ताम्	५	१६	२१
आयान्तं सरथं दृष्ट्वा	५	४८	२४
आयान्ती चासि विज्ञाता	७	४६	८
आयुधं किं च रामस्य	३	३४	३
आयुधे स्यन्दनो वापि	६	५५	२१
आयुधानि च मुख्यानि	२	३६	५
आयुधानि च सर्वाणि	६	६७	१२०
आयुष्यमारोग्यकरं यशस्यम्	६	१२८	१२२
आयुष्यं पुष्टिजननम्	१	४	२८
आरक्षो मे हतस्तात	३	३१	४०
आरभस्व शुभश्रोणि	२	३०	४२
आरम्भस्तु मदर्योऽयम्	५	३७	५६
आराधनीयमनिशम्	७	१०८	२८
आराधयिष्याम्यत्राहम्	३	२	८८
आराधिता हि शीलेन	२	२६	३५
आरामोद्यानसंपूर्णाम्	२	५१	२३
आरमोद्यानसंपूर्णम्	२	८६	२१
आरामैश्च विहारैश्च	७	७०	१३
आरुजंश्चैव शैलाग्रान्	६	२२	११
आरुजन्पर्वताग्राणि	५	६७	६

	का०	स०	श्लो०
आरुरोह ततः श्रीमान्	६	२७	५
आरुरोह नृपं द्रष्टुम्	२	३	३२
आरुरोह पुनर्नावम्	७	४८	२३
आरुरोह रथं युक्तम्	६	५७	२५
आरुह्य गिरिसंकाशाम्	५	४३	४
आरुह्यतामयं शीघ्रम्	३	४२	८७
आरुह्यतु रथं क्षिप्रम्	२	११५	९
आरुह्य पर्वताग्रेभ्यः	६	२७	१३
आरुह्य सीतामारोप्य	७	४५	१७
आरुह्याययतुः शीघ्रम्	३	४२	१०
आरुह्येमं रथं वीर	६	१०२	१६
आरूढः शैलसंकाशम्	५	२७	१३
आरूढो मेघसंकाशम्	६	७०	२
आरोग्यं ब्रूहि कौसल्याम्	२	५२	३१
आरोपयित्वा मौर्वी च	१	६७	१७
आरोपितो विमानं तत्	६	१२७	३९
आरोप्य शिविकां सीताम्	६	११४	१५
आरोप्य सधनू रामः	१	७६	५
आरोप्य सीतां प्रथमम्	२	५५	१८
आरोप्याङ्के महाबाहुः	६	११९	१२
आरोप्याङ्के शिखस्तस्य	४	२५	४०
आरोहतु भवान्नावम्	१	२४	३
आरोह त्वं नरव्याघ्र	२	२५	७५
आरोहस्वेति वैदेहीम्	७	४६	२२
आर्तनादो हि यः पौरैः	२	५२	४४
आर्तस्तस्य बिलद्वारि	४	१०	४
आर्तस्य हृतदारस्य	४	३२	१६
आर्तस्वनं च स्वसताम्	४	५८	१७
आर्तस्वरं तु तं भर्तुः	३	४५	१
आर्तानां राक्षसीनां तु	६	९५	१
आर्तानां संश्रयश्चैव	४	१५	२०
आर्तामनायामपनीयमानाम्	४	२४	४०
आर्तो वा यदि वा दृप्तः	६	१८	२८
आर्द्रः समांसः प्रत्यग्रः	४	११	८७
आर्यकस्ते सुकुशली	२	७२	६
आर्य तातः परित्यज्य	२	१०१	५
आर्यपुत्र पिता माता	२	२७	४

	का०	स०	श्लो०
आर्यपुत्राभिरामोऽसौ	३	४३	१०
आर्यपुत्रेति वादिन्यः	६	११०	४
आर्य लक्ष्मण संप्राह	५	६३	१६
आर्यस्याज्ञां पुरस्कृत्य	७	५२	८
आर्या च धर्मनिरता	२	७०	८
आर्यायाः सदृशं शीलम्	५	५९	३
आर्ये कस्मादजानन्तम्	२	७५	२०
आर्येण किं नु कैकेय्याः	६	३२	३४
आर्येण मम मान्धात्रा	४	१८	३३
आर्येण हि पुरा शून्या	७	६२	१२
आर्येणेव परिक्रुष्टम्	३	५९	७
आर्षभं चर्म खड्गं च	६	९६	२१
आर्षोऽयं देवि निष्पन्दः	३	५५	३५
आलिखन्तमिवाकाशम्	६	२४	९
आलिङ्ग्य चालिङ्ग्य च	६	४०	१८
आलोकं ददृशुर्वीराः	४	५०	२४
आलोकं नगरीं तां च	२	४७	१६
आलोक्य रावणो राजा	४	३६	८
आवर्जयत वैदेहीम्	५	२२	३८
आवर्त इव संजज्ञे	६	५८	२५
आवां च सहितौ देवि	८	५८	१३
आवां च सहितौ देवि	६	७३	६८
आवामिहागतौ सौम्य	६	२५	१६
आवारयद्भिर्गगनम्	२	१७	१८
आवार्य गगनं मेघः	१	३०	११
आवासमादीपयताम्	११	१५	८९
आवासान्राक्षसानां च	६	७५	१४
आविध्य तु स तं दीप्तम्	६	९७	१७
आविध्य परिघं वेगात्	६	७०	१८
आविवेश न तं निद्रा	४	२७	३२
आविवेश महान्क्रोधः	६	९९	२
आविवेश महान्हर्षः	६	१०८	३०
आविश्य लङ्का वेगेन	४	२०	३
आविष्टं तेजसा रामम्	३	२४	२५
आवृतः सः गिरिः सर्वैः	६	४१	५२
आवृत्य रक्षसां तेजः	६	३५	२१
आवृत्याकाशमार्गेण	४	५८	५

	का०	स०	श्लो०
आशङ्के तं निपतितम्	४	६१	१६
आशामाशंसमानानाम्	२	७५	५०
आशीर्भिर्गुणयुक्ताभिः	२	१५	२१
आशंसते जनः सर्वः	२	२	५१
आशंसेयं हरिश्रेष्ठ	५	३७	१४
आशंसे स्वाशिता सेना	२	८४	१८
आश्चर्यमिति तस्यैतत्	३	११	२०
आश्चर्यमिव पश्यामि	२	३५	१४
आश्चर्याणां बहूनां हि	७	९६	३६
आश्चर्यस्मारितोऽस्म्यद्य	७	३०	५३
आश्रमं चिरसंवृद्धम्	१	५५	२७
आश्रमं तत्तयोः शून्यम्	५	२१	३०
आश्रमं तमुपागम्य	३	१७	२
आश्रमं तस्य धर्मज्ञ	२	९२	८
आश्रमं प्रतियाते तु	३	२४	१
आश्रमं समुपागम्य	७	८८	१६
आश्रममृषिविरहितं प्रभुः	२	११६	२६
आश्रमस्याविदूरे मे	७	४९	११
आश्रमे तस्य रामस्य	३	४०	१८
आश्रमैरविदूरस्य	२	५०	१३
आश्रमो दिव्यसंकाशः	७	४५	१८
आश्वसिहि नरश्रेष्ठ	३	६६	६
आश्वस्तश्च विशल्यश्च	६	५९	१२०
आश्वासयन्तं भरतम्	२	१०८	१
आश्वासयन्ती विविधैश्च०	२	४४	३०
आश्वासयन्नुवाचेदम्	६	१०१	२३
आश्वासयित्वा च चमूं०	२	८९	२२
आश्वासितो लक्ष्मणेन	६	५	२३
आश्वास्य भरतं दीनम्	६	११९	४
आसनं पूजयामास	२	९१	३९
आसनानि यथान्यायम्	२	८२	२
आसने भगवानास्ताम्	१	५०	११
आसने सूपविष्टं तम्	३	३२	२३
आससाद च लक्ष्मीवान्	५	६	२
आससाद द्रुमान्फुल्लान्	६	१२५	२८
आससाद महातेजाः	६	११	१४
आससाद वने मित्रम्	५	३१	११

	का०	स०	श्लो०
आसाद्य कवचं दिव्यम्	७	६	६४
आसाद्य च नरव्याघ्रौ	३	६९	११
आसाद्य तं जीवितसंशयस्ते	३	४०	२७
आसाद्य रणमध्ये तम्	६	५९	९१
आसाद्य रामः सौमित्रिम्	२	२२	२
आसामुभयः कूलम्	२	२४	१९
आसां राम सपत्नीनाम्	२	२४	१९
आसितं शयितं भुक्तम्	२	५८	१२
आसीच्चात्रश्रमं पुण्यम्	४	६०	८
आसीत्क्रुद्धस्तु काकुत्स्थः	३	४४	९
आसीत्तव कृतं कर्म	३	३८	१०
आसीद्दशरथो नाम	३	१७	१५
आसीद्राजा निमिर्नाम	७	५५	४
आसीद्देवती तुष्टा	७	५	४
आसीनं पर्वतस्याग्रे	४	४०	५२
आसीनः पर्वतस्याग्रे	४	३०	६
आसीनस्त्वेव भरतः	२	३	१९
आसीनं सूर्यसंकाशे	३	३२	५
आसुरेण समाविष्टः	६	९९	४६
आसेदतुर्महारण्ये	६	१२६	३५
आसेदतुश्च तद्रक्षः	३	६९	२७
आसेदुस्तस्य शैलस्य	४	५०	३
आस्फोटयामास चुचुम्ब०	५	१०	५४
आयैश्च नेत्रैः श्रवणैः	६	५९	११४
आहत्याङ्गारकस्तस्यौ	६	१०२	३६
आह त्वां राघवो रामः	६	४१	७८
आहरिष्यामि ते नित्यम्	२	३०	२६
आहारः सर्वसत्त्वानि	७	६२	३
आहाराश्चाप्यसंपूर्णः	७	६८	७
आहुः सत्यं हि परमम्	२	१४	३
आहूयन्तां प्रकृतयः	७	५३	५
आहूय सोऽङ्गदं कोपात्	६	७६	२
आहूयाहूय च पुनः	३	४३	३
आहृत्य च समुद्रेभ्यः	४	२६	३३
आहो क्षुद्रेण चानेन	५	१३	११
आह्वयन्त इवान्योन्यम्	४	१	९२
आह्वयस्वेति मामुक्त्वा	४	१२	२६

	का०	स०	श्लो०
आह्वयांचक्रिरे तत्र	१	१४	८
आह्वये देवगन्धर्वान्	११	६१	१६
आह्वये लोकपालांस्त्रीन्	२	६१	१३
आह्वये विश्वकर्माणम्	२	६१	१२
(इ)			
इक्षून्मधूंस्तथा लाजान्	१	५३	२
इक्षूंश्च मधुलाजांश्च	२	६१	५६
इक्ष्वाकुकुलवंशस्तु	५	५८	६४
इक्ष्वाकुनगरे रम्ये	७	३६	३०
इस्वाकुपरिभावित्वात्	७	१६	२६
इक्ष्वाकुवंशप्रभवः	१	१	८
इक्ष्वाकुवंशे धर्मिष्ठे	५	५५	१६
इक्ष्वाकूणां कुले जातः	१	११	२
इक्ष्वाकूणां कुले जातः	१	२१	६
इक्ष्वाकूणां कुले जातः	४	५	३
इक्ष्वाकूणां कुले देवि	२	१२	१६
इक्ष्वाकूणां त्वया तुल्यम्	२	५२	२२
इक्ष्वाकूणां वरिष्टस्य	५	३०	४२
इक्ष्वाकूणां हि सर्वेषाम्	१	५७	२२
इक्ष्वाकूणां हि सर्वेषाम्	१	५८	३
इक्ष्वाकूणां हि सर्वेषाम्	२	११०	३६
इक्ष्वाकूणामतिरथः	१	६	२
इक्ष्वाकूणामिदं तेषाम्	१	५	३
इक्ष्वाकूणामियं भूमिः	४	१८	६
इक्ष्वाकूणामिहाद्यैव	११	६७	८
इक्ष्वाकोस्तु प्रसादेन	१	४७	१८
इक्ष्वाकोस्तु सुतः श्रीमान्	१	७०	२२
इक्ष्वाकोस्तु सुतः श्रीमान्	२	११०	८
इक्ष्वाको स्वागतं वत्स	१	५६	२
इङ्गितं तदभिज्ञाय	७	५८	१६
इङ्गितं स तु विज्ञाय	७	७५	६
इच्छतीं कामयानस्य	५	२२	४३
इच्छ मां क्रियतामद्य	५	२०	२१
इच्छामि त्वां समानेतुम्	५	३८	६
इच्छामि शीघ्रं हनुमत्प्रधानान्	५	६३	३२
इच्छामो हि महाबाहुम्	२	२	२२
इच्छाम्यनुगृहीतोऽहम्	१	१८	५७
इच्छाम्यहमपि द्रष्टुम्	४	६२	१५
इच्छेयं गिरिदुर्गाच्च	४	५६	२१
इच्छेयं सुखिनी द्रष्टुम्	२	२७	१६
इतः सुमित्रे पुत्रस्ते	२	१०५	५
इतः स्वां प्रकृतिं बाली	४	२५	६
इत एहीत्युवाचेव	५	६	२१
इतश्च नातिदूरे सा	४	२७	२६
इतश्चोदात्तदन्तानाम्	२	६६	११
इतस्तु किं दुःखतरम्	५	६६	६
इति कथयति रामे	७	५६	२३
इति कर्तव्यमित्येव	३	३५	३
इति कृत्वा मतिं वीराः	६	६६	३७
इति कृत्वा मतिं साध्वीम्	५	१	८६
इति चिन्तापरश्चासीत्	६	१०७	६२
इति चिन्तापरः सुतः	२	५७	८
इति चिन्तासमापन्नः	५	१३	४६
इति तं बहु संदिश्य	७	७६	११
इति तद्वचनं श्रुत्वा	२	२	२३
इति तस्य ब्रुवाणस्य	३	२२	१२
इति तस्य ब्रुवाणस्य	३	७०	१२
इति तस्य ब्रुवाणस्य	४	३६	१२
इति तस्य वचः श्रुत्वा	२	१४	४३
इति तस्याम् ब्रुवाणायाम्	३	१६	२१
इति ते नानुशिष्टस्तु	४	३०	४
इति ते मन्त्रणः सर्वे	६	१२८	२६
इति ते राक्षसाः सर्वे	४	६३	२४
इति तौ पुरुषव्याघ्रौ	२	५५	१२
इति दाशरथी रामः	६	२४	१३
इति दुःखाभिसप्तम्	२	२	१७
इति देवी महेष्वासम्	२	११	१७
इति नरपतिजल्पनाद्विजेन्द्रम्	१	२०	२८
इति नाग इवारण्ये	२	७४	३५
इति निश्चित्य हनुमान्	५	२	४६
इति पन्थानमादिश्य	२	५५	१०
इति पादातयोधाश्च	२	६१	६०
इति पुत्रस्य शेषाश्च	२	२५	३७
इति प्रतिज्ञामारुह्य	७	१७	१६

	का०	स०	श्लो०
इति प्रतिसमादिश्य	५	२२	३६
इति प्रतिसमादिष्टः	६	११३	१
इति प्रतिसमादिष्टः	६	१२५	१६
इति प्रतिसमादिष्टाः	३	१६	२६
इति प्रतिसमादिष्टाः	३	५६	३२
इति प्रतिसमादिष्टौ	६	२५	६
इति प्रतिसमादिष्टौ	६	२५	२६
इति प्रत्यर्चितान्राजा	२	३	३
इति प्रवेगं तु परस्य तर्कयन्	५	४७	२३
इति प्रशस्ता वैदेही	३	४६	३२
इति प्रशस्यमाना सा	२	६५	३
इति पृष्टस्तु भरतम्	२	६२	६
इति बहुविधामाकुलान्तरात्मा	६	६८	२४
इति ब्रुवति रामे तु	२	२३	१
इति ब्रुवन्तं मुदिताः	२	२	१७
इति ब्रुवन्तं राजानम्	६	४२	२८
इति ब्रुवन्तं वचनं सदोषम्	२	१०६	३७
इति ब्रुवन्ती रुदती	६	११६	१७
इति ब्रुवन्नात्मसमम्	२	५२	२०
इति ब्रुवाणं काकुत्स्थम्	६	११७	१२
इति ब्रुवाणं राजानम्	६	११६	२४
इति ब्रुवाणं रामस्तु	६	१६	२४
इति ब्रुवाणं संक्रुद्धः	६	८८	२६
इति ब्रुवाणं सुग्रीवम्	४	३६	१
इति ब्रुवाणा सरमा	६	३३	१६
इति ब्रुवाणो दृढसत्यविक्रमः	३	६६	५१
इति ब्रुवाणो हनुमान्	४	४१	२३
इति भूतानि सर्वाणि	३	५२	४०
इति भ्रातरमाश्वास्य	६	४	५५
इति भ्रातुर्वचः श्रुत्वा	३	१६	१३
इति मातुश्च रामस्य	२	६४	७७
इति मामब्रवीत्सीता	५	६५	२६
इति मामविशच्चिन्ता	२	६३	४७
इति माली सुमाली च	७	६	७
इति माल्यैः सुरगणान्	११	२५	२६
इति मुनिवचनात्प्रसन्नचित्तः	१	२१	२२
इति राजर्षयः सिद्धा	३	२४	२४

	का०	स०	श्लो०
इति राजा दशरथः	२	१५	२७
इति रामं महात्मानम्	४	१	११४
इति राम निवेदितं तु	७	६१	२४
इति रामेण सा प्रोक्ता	३	१८	६
इति रामो धृतिं कृत्वा	६	२१	६
इति रामो मुनेः श्रुत्वा	३	११	४४
इति रोषवशानुगौ	७	५५	२१
इति लक्ष्मणमाश्रुत्य	३	४५	३८
इति लक्ष्मणवाक्यमुत्तमम्	७	..६	२१
इति लोकसमाकुष्टः	२	६६	१७
इति वः पुरुषव्याघ्रः	२	२	४०
इति वाक्यान्तरे तस्य	७	१६	८
इति विद्याधरा वाचः	५	१	२६
इति विलपति पार्थिवे प्रनष्टे	२	५६	३३
इति विलपति राघवे तु दीने	३	६२	२०
इति वैश्रवणो राजा	३	४	१६
इति शोकसमाविष्टः	५	५८	१६१
इति संचिन्तयित्वा तु	१	५४	५
इति संचिन्त्य हनुमान्	५	३७	३५
इति संचिन्त्य हनुमान्	६	१०१	३६
इति संजल्पतां तासाम्	५	३७	१६
इति संविचार्य राजसिंहः	७	६५	१७
इति संभाषमाणे तु	२	७८	५
इति संभाषमाणौ तु	३	१४	२७
इति सर्वविधं महाप्रभावः	५	३०	४४
इति सर्वमशेषतो गता	७	५७	२१
इति सर्वा महिष्यस्ताः	२	२०	६
इति सर्वा महिष्यस्ताः	२	४१	७
इति सर्वं समाख्यातम्	६	३०	३५
इति सान्त्वैश्च तीक्ष्णैश्च	२	३५	३६
इति सा लक्ष्मणेनोक्ता	३	१८	१३
इति सा शोकसंतप्ता	२	३०	२२
इति सीता च रामस्य	२	५६	१६
इति सीता वरारोहाम्	३	५८	१८
इति सुश्राव हनुमान्	५	५५	३३
इति सूतो नरेन्द्रेण	२	५८	१३
इति स्वदोषान्परिकीर्तितां०	३	३३	२४

	का०	स०	श्लो०
इति स्वमन्त्रिणां मध्ये	६	१०	२६
इति हृदयमनोविदारणम्	१	१६	२२
इति हृदयसुखं निशम्य०	१	१८	५६
इतीमां पश्चिमां वाचम्	२	७२	३७
इतीरितः प्राञ्जलिभिस्तप०	२	११६	२२
इतीव तं शोकविधेयदेहम्	३	६३	१८
इतीव तद्वाक्यमदुष्टभावा	३	४७	४६
इतीव तस्यां परुषं वदन्त्याम्	२	१८	४१
इतीव दुःखसंतप्ता	६	३२	३३
इतीव देवी वचनं महार्थम्	५	३६	३१
इतीव बहुधा वाचः	२	४७	१२
इतीव राज्ञो व्यथितस्य सा०	२	१३	२६
इतीव रामो बहुसंगतं वचः	२	६५	१६
इतीव विलपन्तीं ताम्	२	२६	१६
इतीव स महाबाहुः	६	४	१००
इतीव सर्वा रजनीचरस्त्रियः	६	६४	४१
इतीव सौमित्रिमुदग्रपौरुषम्	७	६३	२०
इतो गच्छत रामस्य	६	२६	१६
इतो द्रक्ष्यामि वैदेहीम्	५	१४	४२
इतो द्वियोजने तात	२	१३	१३
इतो द्विपे समुद्रस्य	४	५८	२०
इत्यञ्जलिकृता सीता	७	४६	१८
इत्यहं तस्य शापस्य	६	१३	१५
इत्यादि बहुभिर्वाक्यैः	२	७५	१७
इत्युक्तवति तस्मिंश्च	२	३८	५३
इत्युक्तवति तस्मिंस्तु	७	१७	२४
इत्युक्तं वचनं श्रुत्वा	१	२५	३
इत्युक्तः करुणं वाक्यम्	४	५८	१
इत्युक्तः कैकयीपुत्रः	२	१०१	४
इत्युक्तः क्रोधताम्राक्षः	३	५१	१
इत्युक्तः परमोदारः	१	७३	१३
इत्युक्तः परुषं वाक्यम्	६	१६	१७
इत्युक्तः प्रश्रितं वाक्यम्	४	१८	१
इत्युक्तः सा तु तारेयः	६	४१	७३
इत्युक्तः सा तु रामेण	२	३२	११
इत्युक्तः संपरिक्रम्य	६	१०२	१७
इत्युक्तः सारथिस्तेन	६	८६	२७

	का०	स०	श्लो०
इत्युक्तः सोऽभ्यनुज्ञातः	२	४	२८
इत्युक्तवन्तं रामस्तम्	२	११६	२३
इत्युक्तवाक्यं तद्वक्षः	६	६७	११२
इत्युक्तवास्तारया वाक्यम्	४	३६	१
इत्युक्तस्तु तया राम	१	५४	१७
इत्युक्तस्तु सुरैः सर्वैः	७	६	६
इत्युक्तस्तेन विप्रेण	२	११८	४७
इत्युक्ता राक्षसेन्द्रेण	६	७	१
इत्युक्ताः सीतया घोरम्	५	२७	१
इत्युक्तास्ते गुराः सर्वे	७	६	२२
इत्युक्ते राघवेणाथ	६	१७	३८
इत्युक्तो देवराजेन	६	१०२	८
इत्युक्तो भ्रातृपुत्रेण	६	८७	१८
इत्युक्तो मुनिनातेन	१	२०	२०
इत्युक्तो लक्ष्मणरतस्याः	३	१४	२१
इत्युक्तो लोकपालैस्तैः	६	११७	१०
इत्युक्त्वाऽथ विवृत्ताक्षः	४	२२	२४
इत्युक्त्वा क्रोधताम्राक्षः	३	६४	७१
इत्युक्त्वा क्रोधताम्राक्षः	७	८१	११
इत्युक्त्वा च दितिस्तत्र	१	४६	१६
इत्युक्त्वा चाङ्कमानीय	२	७५	६३
इत्युक्त्वा तु वरारोहा	५	५८	१०४
इत्युक्त्वा दुःखितं सर्वम्	२	३२	२६
इत्युक्त्वा नरशार्दूलः	२	६२	२८
इत्युक्त्वान्यवसत्तत्र	४	२६	२६
इत्युक्त्वा पञ्च नाराचान्	६	८८	३०
इत्युक्त्वा परमक्रुद्धः	१	५५	२८
इत्युक्त्वा परमक्रुद्धः	३	२६	२५
इत्युक्त्वा परमप्रीतः	१	२६	२५
इत्युक्त्वा परुषं वाक्यम्	३	५६	२६
इत्युक्त्वा परुषं वाक्यम्	६	१७	१
इत्युक्त्वा पाणिना शैलम्	५	१	१२५
इत्युक्त्वा प्राक्षिपद्राजा	१	७३	२८
इत्युक्त्वा प्रतिहृष्टाङ्ग	६	१	१४
इत्युक्त्वा बाणमाकर्णम्	६	६०	७०
इत्युक्त्वा भगवान्ब्रह्मा	१	२	३८
इत्युक्त्वा भार्गवो वासम्	७	८१	१७

	का०	स०	श्लो०
इति प्रतिसमादिश्य	५	२२	३६
इति प्रतिसमादिष्टः	६	११३	१
इति प्रतिसमादिष्टः	६	१२५	१६
इति प्रतिसमादिष्टाः	३	१६	२६
इति प्रतिसमादिष्टाः	३	५६	३२
इति प्रतिसमादिष्टौ	६	२५	६
इति प्रतिसमादिष्टौ	६	२५	२६
इति प्रत्यर्चितान्राजा	२	३	३
इति प्रवेगं तु परस्य तर्कयन्	५	४७	२३
इति प्रशस्ता वैदेही	३	४६	३२
इति प्रशस्यमाना सा	२	६५	३
इति पृष्टस्तु भरतम्	२	६२	६
इति बहुविधामाकुलान्तरात्मा	६	६८	२४
इति ब्रुवति रामे तु	२	२३	१
इति ब्रुवन्तं मुदिताः	२	२	१७
इति ब्रुवन्तं राजानम्	६	४२	२८
इति ब्रुवन्तं वचनं सदोषम्	२	१०६	३७
इति ब्रुवन्ती रुदती	६	११६	१७
इति ब्रुवन्नात्मसमम्	२	५२	२०
इति ब्रुवाणं काकुत्स्थम्	६	११७	१२
इति ब्रुवाणं राजानम्	६	११६	२४
इति ब्रुवाणं रामस्तु	६	१६	२४
इति ब्रुवाणं संक्रुद्धः	६	८८	२६
इति ब्रुवाणं सुग्रीवम्	४	३६	१
इति ब्रुवाणा सरमा	६	३३	१६
इति ब्रुवाणो दृढसत्यविक्रमः	३	६६	५१
इति ब्रुवाणो हनुमान्	४	४१	२३
इति भूतानि सर्वाणि	३	५२	४०
इति भ्रातरमाश्वास्य	६	४	५५
इति भ्रातुर्वचः श्रुत्वा	३	१६	१३
इति मातुश्च रामस्य	२	६४	७७
इति मामब्रवीत्सीता	५	६५	२६
इति मामविशच्चिन्ता	२	६३	४७
इति माली सुमाली च	७	६	७
इति माल्यैः सुरगणान्	११	२५	२६
इति मुनिवचनात्प्रसन्नचित्तः	१	२१	२२
इति राजर्षयः सिद्धा	३	२४	२४

	का०	स०	श्लो०
इति राजा दशरथः	२	१५	२७
इति रामं महात्मानम्	४	१	११४
इति राम निवेदितं तु	७	६१	२४
इति रामेण सा प्रोक्ता	३	१८	६
इति रामो धृतिं कृत्वा	६	२१	६
इति रामो मुनेः श्रुत्वा	३	११	४४
इति रोषवशादुभौ	७	५५	२१
इति लक्ष्मणमाश्रुत्य	३	४५	३८
इति लक्ष्मणवाक्यमुत्तमम्	७	५६	२१
इति लोकसमाक्रुष्टः	२	६६	१७
इति वः पुरुषव्याघ्रः	२	२	४०
इति वाक्यान्तरे तस्य	७	१६	८
इति विद्याधरा वाचः	५	१	२६
इति विलपति पार्थिवे प्रनष्टे	२	५६	३३
इति विलपतिं राघवे तु दीने	३	६२	२०
इति वैश्रवणो राजा	३	४	१६
इति शोकसमाविष्टः	५	५८	१६१
इति संचिन्तयित्वा तु	१	५४	५
इति संचिन्त्य हनुमान्	५	३७	३५
इति संचिन्त्य हनुमान्	६	१०१	३६
इति संजल्पमानां ताम्	५	३७	१६
इति संविचार्य राजसिंहः	७	६५	१७
इति संभाषमाणे तु	२	७८	५
इति संभाष्यमाणे तु	३	१४	२७
इति सबहुविधं महाप्रभावः	५	३०	४४
इति सर्वमशेषतो मया	७	५७	२१
इति सर्वा महिष्यस्ताः	२	२०	६
इति सर्वा महिष्यस्ताः	२	४१	७
इति सर्वं समाख्यातम्	६	३०	३५
इति सान्त्वैश्च तीक्ष्णैश्च	२	३५	३६
इति सा लक्ष्मणेनोक्त	३	१८	१३
इति सा शोकसंतप्ता	२	३०	२२
इति सीता च रामस्य	२	५६	१६
इति सीता वरारोहाम्	३	५८	१८
इति सुश्राव हनुमान्	५	५५	३३
इति सूतो नरेन्द्रेण	२	५८	१३
इति स्वदोषान्परिकीर्तितां०	३	३३	२४

	का०	स०	श्लो०
इति स्वमन्त्रिणां मध्ये	६	१०	२६
इति हृदयमनोविदारणम्	१	१६	२२
इति हृदयसुखं निशम्य०	१	१८	५६
इतीमां पश्चिमां वाचम्	२	७२	३७
इतीरित: प्राञ्जलिभिस्तप०	२	११६	२२
इतीव तं शोकविधेयदेहम्	३	६३	१८
इतीव तद्वाक्यमदुष्टभावा	३	४७	४६
इतीव तस्यां परुषं वदन्त्याम्	२	१८	४१
इतीव दु:खसंतप्ता	६	३२	३३
इतीव देवी वचनं महार्थम्	५	३६	३१
इतीव बहुधा वाच:	२	४७	१९
इतीव राज्ञो व्यथितस्य सा०	२	१३	२६
इतीव रामो बहुसंगतं वच:	२	६५	१६
इतीव विलपन्तीं ताम्	२	२६	१६
इतीव स महाबाहु:	६	४	१००
इतीव सर्वा रजनीचरस्त्रिय:	६	६४	४१
इतीव सौमित्रिमुदग्रपौरुषम्	७	६३	२०
इतो गच्छत रामस्य	६	२६	१६
इतो द्रक्ष्यामि वैदेहीम्	५	१४	४२
इतो द्वियोजने तात	२	१३	१३
इतो द्विपे समुद्रस्य	४	५८	२०
इत्यञ्जलिकृता सीता	७	४६	१८
इत्यहं तस्य शापस्य	६	१३	१५
इत्यादि बहुभिर्वाक्यै:	२	७५	१७
इत्युक्तवति तस्मिंश्च	२	३८	५३
इत्युक्तवति तस्मिंस्तु	७	१७	२४
इत्युक्तं वचनं श्रुत्वा	१	२५	३
इत्युक्त: करुणं वाक्यम्	४	५८	१
इत्युक्त: केकयीपुत्र:	२	१०१	४
इत्युक्त: क्रोधताम्राक्ष:	३	५१	१
इत्युक्त: परमोदार:	१	७३	१३
इत्युक्त: परुषं वाक्यम्	६	१६	१७
इत्युक्त: प्रश्रितं वाक्यम्	४	१८	१
इत्युक्त: स तु तारेय:	६	४१	७३
इत्युक्त: स तु रामेण	२	३२	११
इत्युक्त: संपरिक्रम्य	६	१०२	१७
इत्युक्त: सारथिस्तेन	६	८६	२७

	का०	स०	श्लो०
इत्युक्त: सोऽभ्यनुज्ञात:	२	४	२८
इत्युक्तवन्तं रामस्तम्	२	११६	२३
इत्युक्तवाक्यं तद्रक्ष:	६	६७	११२
इत्युक्तस्तारया वाक्यम्	४	३६	१
इत्युक्तस्तु तया राम	१	५४	१७
इत्युक्तस्तु सुरै: सर्वै:	७	६	६
इत्युक्तस्तेन विप्रेण	२	११८	४७
इत्युक्ता राक्षसेन्द्रेण	६	७	१
इत्युक्ता: सीतया घोरम्	५	२७	१
इत्युक्तास्ते सुरा: सर्वे	७	६	२२
इत्युक्ते राघवयाथ	६	१७	३८
इत्युक्तो देवराजेन	६	१०२	८
इत्युक्तो भ्रातृपुत्रेण	६	८७	१८
इत्युक्तो मुनिनातेन	१	२०	२०
इत्युक्तो लक्ष्मयस्तस्या:	३	१४	२१
इत्युक्तो लोकपालैस्तै:	६	११७	१०
इत्युक्त्वाऽथ विवृत्ताक्ष:	४	२२	२४
इत्युक्त्वा क्रोधताम्राक्ष:	३	६४	७१
इत्युक्त्वा क्रोधताम्राक्ष:	७	८१	११
इत्युक्त्वा च दितिस्तत्र	१	४६	१६
इत्युक्त्वा चाङ्कमानीय	२	७५	६३
इत्युक्त्वा तु वरारोहा	५	५८	१०४
इत्युक्त्वा दु:खितं सर्वम्	२	३२	२६
इत्युक्त्वा नरशार्दूल:	२	६२	२८
इत्युक्त्वान्यवसत्तत्र	४	२६	२६
इत्युक्त्वा पञ्च नाराचान्	६	८८	३०
इत्युक्त्वा परमक्रुद्ध:	१	५५	२८
इत्युक्त्वा परमक्रुद्ध:	३	२६	२५
इत्युक्त्वा परमप्रीत:	१	२६	२५
इत्युक्त्वा परुषं वाक्यम्	३	५६	२६
इत्युक्त्वा परुषं वाक्यम्	६	१७	१
इत्युक्त्वा पाणिना शैलम्	५	१	१२५
इत्युक्त्वा प्राक्षिपद्राजा	१	७३	२८
इत्युक्त्वा प्रतिहृष्टङ्ग	६	१	१४
इत्युक्त्वा बाणमाकर्णम्	६	६०	७०
इत्युक्त्वा भगवान्ब्रह्मा	१	२	३८
इत्युक्त्वा भार्गवो वासम्	७	८१	१७

	का०	स०	श्लो०
इत्युक्त्वाभ्यपतद्दृष्टुम्	३	६७	१३
इत्युक्त्वा मुनिशार्दूलः	१	३१	१६
इत्युक्त्वा मूर्ध्नि शत्रुघ्नम्	७	७१	१३
इत्युक्त्वा मृगशावक्षीम्	३	१८	१७
इत्युक्त्वा मैथिलीं राजा	५	२२	३२
इत्युक्त्वा मैथिलीं राजा	५	२३	१
इत्युक्त्वा राघवः क्रुद्धः	१	७६	४
इत्युक्त्वा रावणसुतः	६	६०	८
इत्युक्त्वा लक्ष्मणं चाशु	१	३०	२२
इत्युक्त्वा लक्ष्मणं राजा	६	११६	३२
इत्युक्त्वा लक्ष्मणं रामः	२	४	४५
इत्युक्त्वा लक्ष्मणं रामः	३	४	१२
इत्युक्त्वा लक्ष्मणं रामः	३	४	२६
इत्युक्त्वा वचनं सूतम्	२	५२	६५
इत्युक्त्वा वानरश्रेष्ठः	६	८२	२३
इत्युक्त्वा व्यपमुच्याङ्गात्	७	३६	१६
इत्युक्त्वा शोकसंभ्रान्तः	६	१	१६
इत्युक्त्वा स गतो ब्रह्मा	७	३	२१
इत्युक्त्वा स तदा रामम्	२	५	११
इत्युक्त्वा सप्तभिर्बाणैः	६	८८	४८
इत्युक्त्वा महातेजा	२	८५	३
इत्युक्त्वा स विनिष्क्रम्य	४	११	५१
इत्युक्त्वा सहसोत्पत्य	६	४०	११
इत्युक्त्वा हनुमांस्तत्र	४	५१	१
इत्युक्त्वोत्थाय तं क्षिप्रम्	६	४०	१३
इत्युक्त्वोपायनं गृह्य	२	८४	१०
इत्युदीरितवाक्ये तु	७	१६	२१
इत्युवाच पुनर्वाक्यम्	३	७५	२८
इत्युवाच वचः क्रूरम्	२	६३	३८
इत्येकैस्कतदा तत्र	४	४५	१७
इत्येतद्वचनं श्रुत्वा	१	१६	८
इत्येतद्वचनं श्रुत्वा	१	३७	१३
इत्येतद्वाक्यमादाय	६	६३	६
इत्येतैः कारणैः सौम्य	४	३०	६८
इत्येनमत्यजद्राजा	२	३६	२६
इत्येवं कथयन्तस्ते	२	८३	१०
इत्येवं कपिराजेन	४	२	२८

	का०	स०	श्लो०
इत्येवं घोषयन्तश्च	६	४२	२१
इत्येवं चिन्तयित्वाथ	६	६७	८१
इत्येवं तु वदन्वीरः	६	४१	२३
इत्येवं त्रिदशैरुक्तः	७	६	२८
इत्येवं दैवतैरुक्तः	७	६	१६
इत्येवं परिपृष्टास्ते	६	१७	३४
इत्येवं परुषं वाक्यम्	६	४१	८२
इत्येवं बहुधा सीता	५	३४	२५
इत्येवं बाधमानस्तु	७	३१	६
इत्येवं बुद्धिमास्थाय	३	७१	१०
इत्येवं ब्रुवतस्तस्य	६	१०१	४६
इत्येवं भरतं वीक्ष्य	२	८१	८
इत्येवं भाषमाणौ तौ	७	३२	२०
इत्येवं मतिमास्थाय	७	३४	१८
इत्येवं मां महाबाहुः	२	५८	२५
इत्येवं मैथिलीं दृष्ट्वा	६	६२	५७
इत्येवं रममाणानाम्	२	६१	८१
इत्येवं लक्ष्मणे वाक्यम्	३	१६	३६
इत्येवं वदतः श्रुत्वा	६	११५	१०
इत्येवं वादिनं तं तु	७	७२	५
इत्येवं वादिनं वीरम्	६	४१	१०
इत्येवं विलपन्तं तम्	६	१०१	१५
इत्येवं विलपन्तीनाम्	२	४८	३३
इत्येवं विलपन्दीनः	२	६६	३७
इत्येवं विलपन्राजा	२	४२	२२
इत्येवं विलपन्राजा	३	६०	३६
इत्येवं विलपंस्तत्र	३	१६	४१
इत्येवं विविधा वाचः	२	३३	२६
इत्येवं विविस्तैर्धैस्तैः	२	१	४१
इत्येवं स वदन्वीरः	६	१०३	२३
इत्येवमर्जुनामात्यान्	७	३२	२६
इत्येवमर्थं कपिरन्ववेक्ष्य	५	१६	३२
इत्येवमार्तस्य रघुप्रवीरः	४	२४	२४
इत्येवमुक्तः काकुत्स्थः	३	१७	२६
इत्येवमुक्तः स नरेन्द्र नाकी	७	७७	२१
इत्येवमुक्तः सुग्रीवः	४	२२	१७
इत्येवमुक्तः संहृष्टं	६	६५	१७

	का०	स०	श्लो०
इत्येवमुक्तस्तु तदा महात्मा	६	८६	३५
इत्येवमुक्ता जटिला	३	७४	३२
इत्येवमुक्त्वा दुर्धर्षा	३	२१	६
इत्येवमुक्त्वा वचनं महार्थम्	४	३३	५८
इत्येवमुक्त्वा तां शक्तिम्	६	१००	३०
इत्येवमुक्त्वा ते सर्वे	३	३०	३३
इत्येवमुक्त्वा देवेशः	१	४४	१६
इत्येवमुक्त्वा परिशुष्कवक्त्रः	४	१७	५४
इत्येवमुक्त्वा बहुशः	३	६७	२८
इत्येवमुक्त्वा भरतः	२	७१	४४
इत्येवमुक्त्वा भरतो महात्मा	२	७३	२८
इत्येवमुक्त्वा मदनाभिरीडितः	३	७५	२९
इत्येवमुक्त्वा वचनम्	४	५०	५९
इत्येवमुक्त्वा वचनं महात्मा	२	१०५	४२
इत्येवमुक्त्वा वचनं महार्थम्	६	८०	४३
इत्येवमुक्त्वा विजयी महाबलः	६	११८	२१
इत्येवमुक्त्वा स मुनिः	३	३८	१२
इत्येवमुक्त्वा संरब्धाः	३	२०	१६
इत्येवमुक्त्वा सुरसैन्यनाशनः	६	१०	२९
इत्येवमुक्त्वा हनुमान्	४	४	२९
इत्येवमूचुर्बहवो विशिष्टाः	५	५४	३८
इदं च तथ्यं शृणु मे	५	३	४६
इदं च तीव्रं मम शोकवेगम्	५	४०	२४
इदं च तीव्रं मम शोकवेगम्	५	६७	४३
इदं च दृष्ट्वा निहतं महद्बलम्	५	४८	९
इदं च धनुरुद्यम्य	२	११८	४२
इदं च यदि वा मोहात्	६	१०	२३
इदं च वचनं धृष्टम्	६	३१	१४
इदं चाभरणं सौम्य	७	७६	३०
इदं चिरगृहीतत्वात्	५	१५	४७
इदं चोवाच धर्मज्ञम्	४	१२	७
इदं जगाद भद्रं ते	१	५८	१५
इदं जगाद वचनम्	३	७१	२१
इदं तत्तव रामस्य	६	३१	४४
इदं तथ्यं मम वचः	४	६	७
इदं तावद्यथाकामम्	२	५८	२९
इदं तु ज्ञातुमिच्छामि	२	१९	३

	का०	स०	श्लो०
इदं तु दुःखं यदनर्थकानि मे	२	२०	५२
इदं तु पतितं तस्मात्	७	७३	१४
इदं तु पुरुषव्याघ्रः	५	५८	९९
इदं तु मन्थरे मह्यम्	२	७	३४
इदं तु मम दीनस्य	६	१	१२
इदं तु सुमहच्चित्रम्	६	४८	३५
इदं ते चारु संजातम्	५	२०	१२
इदं ते राज्यकामस्य	२	७५	११
इदं तेषामनाथानाम्	२	१०४	४
इदं त्वयि न वक्तव्यम्	७	५०	१३
इदं त्वसदृशं कर्म	७	२४	२०
इदं त्विदानीं संपश्य	२	९	३
इदं दिव्यं महच्चापम्	३	१२	३२
इदं दिव्यं वरं माल्यम्	२	११८	१८
इदं द्वितीयं दुर्धर्षम्	१	६७	१४
इदं धनुर्वरं ब्रह्मन्	१	६७	८
इदं धनुर्वरं राजन्	१	६७	६
इदं निखिलमत्यग्रम्	२	१०६	२५
इदं नेत्रसहस्रं तु	७	१८	२२
इदं पञ्चाप्सरो नाम	३	११	११
इदं पवित्रं पापघ्नम्	१	१	९८
इदं पुण्यमिदं रम्यम्	३	१५	१९
इदं पुरस्यास्य सराक्षसस्य	६	१४	२१
इदं प्रविष्टाः सहसा	४	५१	२
इदं बहुशलाकं ते	४	१०	३
इदं ब्र्याच्च मे नाथम्	५	३८	६४
इदं भुङ्क्ष्व महाराज	२	१०३	३०
इदं मम महासत्वम्	५	१	१७५
इदं ममापरं वाक्यम्	६	८	१२
इदं मुहूर्तं दुःखानाम्	५	६७	२७
इदं मेध्यमिदं स्वादु	२	९६	२
इदं योजनपर्यन्तम्	७	८१	१४
इदं रक्षामि भवनम्	४	५१	१७
इदं राज्यं च सकलम्	७	६०	१४
इदं राज्यमहंचैव	७	३८	९
इदं राज्यं महाप्राज्ञ	२	११२	१३
इदं वचनमक्लीबम्	७	८३	१८

	का०	स०	श्लो०
इदं वचस्तस्य निगद्य माल्य०	६	३५	३५
इदं वचो बन्धुहितार्थिना०	३	३६	२४
इदं विध्वंसयिष्यामि	५	४१	११
इदं विमानं वैदेहि	६	४८	२५
इदं व्यसनमालोक्य	२	५३	६
इदं शरीरं कृत्स्नस्य	२	२	७
इदं शरीरं निःसंज्ञम्	३	५६	२१
इदं श्रेष्ठमभिज्ञानम्	५	३८	१२
इदं हि तव विस्तीर्णम्	२	७५	१६
इदं हि तेजस्तव यददु०	२	३२	४१
इदं हि मायाविहितं सुदुर्गमम्	४	५३	२६
इदं हि रक्षो मृगसंनिकाशम्	३	५७	२२
इदं हि वृत्तमुचितम्	२	४०	७
इदमत्युद्भुतं श्रुत्वा	३	११	६
इदमद्यनिशा पूर्वा	२	४६	२
इदमप्यृषिभिर्दृष्टम्	५	१३	४१
इदमर्घ्यं प्रतीच्छत्वम्	७	४६	१२
इदमस्य नृशंसस्य	५	४१	१०
इदमाख्यनमायुष्यम्	७	१११	४
इदमाभरणं सौम्य	७	७८	२३
इदमाश्रमसंकाशम्	१	४८	१२
इदमिक्ष्वाकुनाथस्य	२	१०४	१०
इदममुक्तवती देवी	५	६७	२
इदमेव स्मराम्यस्या	२	६०	१४
इदमेववामृतं प्राहुः	२	६४	१६
इदमैन्द्रं महच्चापम्	६	१०२	१५
इदानीं खल्वहं नास्मि	६	६८	१२
इदानीं च विजानामि	६	११६	१७
इदानीमकृतार्थानाम्	४	५३	१२
इदानीं मा कृथा वीर	६	४१	४
इन्द्रं मायापरिक्षिप्तम्	७	२६	२६
इन्द्रः करीन्द्रमारुह्य	७	३५	३८
इन्द्रकर्मा महेन्द्रस्त्वम्	६	११७	१७
इन्द्रजिच्च महाबलः	६	१३	६
इन्द्रजिच्चापमादाय	५	४८	२१
इन्द्रजित्तु ततो दृष्ट्वा	६	८१	४
इन्द्रजित्तु तदा क्रुद्धः	६	७३	३३
इन्द्रजित्तु तदानेन	६	४४	३२
इन्द्रजित्तु महामायः	६	४६	४४
इन्द्रजित्तु रथे स्थाप्य	६	८१	५
इन्द्रजित्पश्चिमं द्वारम्	६	३७	११
इन्द्रजित्त्वात्मनः कर्म	६	४६	११
इन्द्रजित्त्वात्मनः कर्म	६	८८	२१
इन्द्रजित्स रथं दिव्यम्	५	४८	२५
इन्द्रध्वज इवोद्भूतः	४	१६	३७
इन्द्रमस्यां तु वेलावाम्	२	१४	४८
इन्द्रमाशं समानस्तु	७	३५	४२
इन्द्रलोकं गतः श्रीमान्	६	११६	८
इन्द्रलोकं गतो राजा	१	४२	१०
इन्द्रशापादिदं रूपम्	३	१	७८
इन्द्रश्च रावणश्चैव	७	२६	२
इन्द्रश्च मेषवृषणः	१	४६	१०
इन्द्रस्य भवनं गत्वा	७	६७	७
इन्द्राशनिसमप्रख्यम्	६	६५	१६
इन्द्रियाणां जयं बुद्ध्या	२	१००	६६
इन्द्रियार्थैरभिमतैः	१	१०	४
इन्द्रियैरप्रहृष्टैतम्	२	१८	५
इन्द्रेणेवोत्तमं सस्यम्	३	३४	६
इन्द्रो मयूरः संवृतः	७	१८	५
इन्द्रो ह्यश्रुनिपातं तम्	२	७४	२६
इमं तस्य महाभाग	२	५७	२६
इमं तु कालं वीतते विज०	२	६४	२७
इमं देशमनुप्राप्तौ	३	६६	४५
इमं दृष्ट्वा मणिश्रेष्ठम्	५	६६	६
इमं श्रुत्वा तु विक्रान्तः	६	५०	५१
इमं हि सहितुं शोकम्	२	३०	२१
इमं हि सालं प्रहितस्त्वया०	४	२	६२
इममर्थं हि विज्ञाप्य	६	८२	२२
इममार्षं स्तवं दिव्यम्	६	११७	३२
इममार्षं स्तवं दिव्यम्	६	११७	३२
इममाश्रममागम्य	३	७	१८
इमां गिरं दारुणशब्दसंहिताम्	२	६१	२७
इमां च दुःस्वप्नगतिं निशम्य०	२	६६	२१
इमां च मालमाधत्स्व	४	२२	१६

	का०	स०	श्लो०
इमां चाप्येष वैदेहीम्	२	६७	२३
इमां तु शीलसंपन्नाम्	५	१६	२२
इमां त्वविषमां लङ्काम्	५	२	२६
इमां प्रतिज्ञां शृणु शक्रशत्रो:	६	७३	६
इमां बुद्धिं पुरस्कृत्य	३	७१	१८
इमां वा त्वद्गतिं राम	१	७६	७
इमां विरूपामसतीम्	३	१७	२७
इमां विरूपामसतीम्	३	१८	५१
इमां विरूपामसतीम्	३	२८	२०
इमां हत्वा ततो रामम्	६	८१	२७
इमां हि रम्यां राजभूथलो०	२	६५	१८
इमां महेन्द्रोपमजातमर्धिनीम्	२	३८	१५
इमां भवत्य: पश्यन्तु	७	४६	१८
इमां मन्दाकिनीं राम	३	५	३६
इमां महाराज समीक्ष्य०	६	२८	४२
इमा: प्रकृतय: सर्वा	२	१०१	६
इमा: शून्यमथा वाच:	३	५५	३६
इमा: स्फीतगुणा वर्षा:	४	२८	५७
इमानपि वधिष्यामि	१	३०	२१
इमानि खलु पद्मानि	६	४८	६
इमानि च फलान्यत्र	७	६६	७
इमानि च महार्हाणि	२	७०	४
इमानि तु महारण्ये	२	७०	१७
इमानि बहुदुर्गाणि	४	४३	१०
इमानि मुखपद्मानि	५	६	३८
इमानि शुभगन्धीनि	४	१	६१
इमान्पश्य महाबाहो	३	२४	३
इमान्यश्चासहस्राणि	७	६४	२
इमान्यासनमुख्यानि	७	६०	११
इमामन्धां च वृद्धां च	२	६४	३५
इमामपि विशालाक्षीम्	६	११८	१६
इमामपि हतां कुब्जाम्	२	७८	२३
इमामसितकेशान्ताम्	५	१६	२८
इमास्तन्त्री: सुमधुरा:	७	६३	१३
इमास्ता मन्मथवताम्	४	२४	४४
इमास्तास्तव राजेन्द्र	४	२५	४४
इमास्तु खलु राक्षस्य	६	११३	२८

	काण्ड	स०	श्लो०
इमा हि ते परिषद:	२	३	५
इमे गङ्गोदकघटा:	२	१४	३४
इमे च गाभे द्वे दिव्ये	१	६२	२०
इमे च पुरुषव्याघ्र	३	५	१५
इमे च विपुला: साला:	४	२	६७
इमे जम्बूनदमया:	४	५१	७
इमे ते नयने क्रूरे	५	२२	१८
इमे द्वे धनुषो श्रेष्ठे	१	७५	११
इमेऽपि च हया वीर	२	५२	५३
इमे शूराश्च विक्रान्ता:	१	२०	४
इमे शूरा: समर्थाश्च	६	२	७
इमे हि मे महाभाग	४	८	२२
इमे हि सर्वे विष्णो त्वाम्	७	८४	१७
इमे हि सर्वे स्नेहान्माम्	७	११०	१७
इमे हि संख्यतरा:	५	६३	६
इमे हि हरय: शूरा:	६	२	२२
इमौ कुमारौ भद्रं ते	१	४८	२
इमौ कुमारौ सौमित्रे	७	१०२	२
इमौ कुशीलवौ राजन्	७	१०७	७
इमौ ताविति संचिन्त्य	६	८०	२१
इमौ तु जानकीपुत्रौ	७	६६	१७
इमौ तौ सत्त्वसंपन्नौ	६	५०	१५
इमौ मुनी पार्थिवलक्षणान्वितौ	१	४	३५
इमौ राज्येऽभिषेक्ष्यामि	७	१०२	३
इमौ स्म मुनिशार्दूल	१	३१	४
इयं कनकवर्णाङ्गी	५	१५	४८
इयं किल पुरी रम्या	७	२	२८
इयं कुसुमसंघातै:	४	१	८६
इयं गिरिगुहा रम्या	४	२६	१६
इयं च दण्डकारण्यात्	६	१२	१२
इयं च दुहिता ज्येष्ठा	१	४४	५
इयं च नलिनी रम्या	४	२७	११
इयं च नलिनी रम्या	६	१४	४४
इयं तात सुखा शय्या	२	५१	२
इयं तात सुखा शय्या	२	८६	३
इयं तु भवतो भार्या	३	१३	७
इयं दशरथे सीता	७	६६	१५

	का०	स०	श्लो०
इयं धार्मिक कौसल्या	२	३८	१३
इयं पुनरासंभ्रान्ता	६	४८	२७
इयं प्रत्यक्स्थली वेदी	३	७४	२३
इयं वृषी ब्राह्मण काममा०	३	४६	३६
इयं मधुपुरी रम्या	७	७०	५
इयं वापि सरिच्छ्रेष्ठा	७	३१	३०
इयं शय्या मम भ्रातुः	२	८८	१३
इयं शुद्धसमाचारा	७	९३	२२
इयं सराष्ट्रा सजना	२	३४	४१
इयं सा प्रथमा मात्रा	४	३०	६१
इयं सा यत्कृते रामः	५	१५	४९
इयं सा लक्ष्यते लङ्का	६	३७	४
इयं सुमित्रा दुःखार्ता	२	९२	३२
इयं हि कस्यापि करोति०	२	३८	४
इयं हि पूर्वैः संदिष्टा	६	१०९	१८
इयं हेमवती ज्येष्ठा	१	४२	२३
इयमक्षोहिणी पूर्णा	१	२०	३
इयमक्षोहिणी पूर्णा	१	५४	१२
इयमस्म्यागता देव	७	१०	४२
इयमाकाशगङ्गा च	१	३७	७
इयमादित्यसंकाशैः	३	१५	२
इलां निरीक्षमाणस्तु	७	८८	१३
इलायै सुमहातेजाः	७	९०	२०
इला सा सोमपुत्रस्य	७	९०	२
इषुणाऽभिहतः केन	२	६३	२७
इषुभिस्तोमरैः प्रासैः	७	३२	३४
इष्टकाश्च यथान्यायम्	१	१४	२८
इष्टबन्धुजनो नित्यम्	६	४९	१८
इष्टबन्धुजनो नित्यम्	६	१०१	१३
इष्टं मधुवनं ह्येतत्	५	६२	३१
इष्टः सर्वस्य लोकस्य	१	१८	२७
इष्टानुरक्तप्रकृतिः	२	३	४५
इष्टिं तेऽहं करिष्यामि	१	१५	२
इष्ट्या तु वर्तमानायाम्	१	३४	२
इष्ट्वा तुरगमेधेन	६	११९	६
इष्ट्वा तु राजसूयेन	७	८३	६
इष्ट्वा तु देवगणान्सर्वान्	२	५६	३०

	का०	स०	श्लो०
इष्ट्वा संग्रामयज्ञेन	४	२३	२७
इष्वस्त्रवरसंपन्नम्	२	१००	१४
इह कस्मात्प्रसुप्तोऽसि	६	१११	५७
इह तु स्थांडिले शीघ्रम्	२	१११	१३
इह तेनाप्रवेष्टव्यम्	४	११	५३
इह त्वं जातसंवृद्धः	६	८७	११
इह प्राप्तान्वयं सर्वान्	६	१३	८
इह मे भगवान् रामः	२	९१	२०
इह मे भरतो हृष्टः	२	११७	२
इह राम महातेजाः	३	५	३५
इह राम महाबाहो	१	२९	२
इह लोके च पितृभिः	२	२९	१८
इह वा किं निमित्तं त्वम्	३	१७	१९
इह वा मां मृतां कुब्जे	२	९५	८
इह वागश्च कान्तारे	३	४६	२४
इह शीघ्रं सुपर्वाणः	५	२१	२५
इह शेषे महाबाहो	६	३२	१६
इह श्रुता मया देवि	६	११३	३०
इह सन्तो न वा सन्ति	५	२१	९
इहस्थां मां न जानीते	५	२६	१५
इहस्थोऽहं प्रपश्यामि	४	५८	२९
इह हैमवते पार्श्वे	१	३७	१७
इहागतं मां सहितं भवद्भिः	६	५९	३४
इहागतो हि पुत्रत्वम्	७	५१	१८
इहाद्य रजनीमेकाम्	१	४७	१९
इहाद्य रजनीं राम	१	२३	१६
इहाश्रमपदेऽस्माकम्	३	४५	११
इहाश्रमपदोऽस्माकम्	१	१०	१५
इहासीना सुखं सर्वम्	६	३४	१८
इहाहं यदि तिष्ठामि	५	२	४३
इहैकदा किल क्रूरः	३	११	५५
इहैव त्वाभिषिञ्चन्तु	२	१०६	२६
इहैव निधनं यामः	२	४७	७
इहैव नियमाहारः	५	१३	५२
इहैव मरणं श्रेयः	६	१०१	१८
इहैव सह वैदेह्या	३	५	१९
इहैव सीतामन्वीक्ष्य	४	५३	२४

	का०	स०	श्लो०
इहोपयात्यसौ रामः	३	५	२२
इहोपयानं सर्वेषाम्	५	६४	१०
इहोपहारं भूतानाम्	६	४७	४
(ई)			
ईदृशं किमिदं वाक्यम्	७	१०	४८
ईदृशं गर्हितं कर्म	३	५३	७
ईदृशानां सहस्राणि	७	६८	६
ईदृशा बुद्धिसंपन्नाः	४	४	२६
ईदृशास्ते भविष्यन्ति	७	९	१३
ईदृशीं शिबिकां दृष्ट्वा	४	२५	२७
ईदृशे वर्तमाने तु	१	७३	३९
ईदृशैस्तैरमात्यैश्च	१	७	२०
ईदृशैत्वं समाचारैः	७	२५	१८
ईद्रशो द्रष्टपूर्वो न	७	९२	१८
ईदृशोह्यश्वमेधस्य	७	८६	२०
ईदृशं राजसिंहस्य	७	९२	१०
ईदृशं हि महाबाहो	२	५०	३७
ईप्सितं यादृशं तुभ्यम्	७	६८	१८
ईर्ष्यां रोषं बहिष्कृत्य	२	२७	८
ईश्वरस्येश्वरः कोऽस्ति	६	१३	३
ईषच्चहृषितो दास्या	५	२७	६४
ईषत्कार्यमिदं कार्यम्	५	५५	१०
ईषदुत्स्मयमानस्तु	६	१८	७
ईहामृगमुखांश्चापि	६	९९	४३
ईहामृगसमायुक्तैः	५	९	१३
ईहामृगैश्च विविधैः	५	१८	८
(उ)			
उक्तवाक्यं तु राजानम्	१	४२	२१
उक्तवाक्यं तु राजानम्	१	५९	१
उक्तवाक्यं महाप्राज्ञम्	४	६५	२८
उक्तवाक्ये मुनौ तस्मिन्	१	३६	१
उक्तवाक्ये मुनौ तस्मिन्	१	६१	२०
उक्तश्च दुर्गमः पारः	६	८८	१३
उक्थ्यं द्वितीयं संख्यातम्	१	१४	४१
उग्रदर्शनकर्माणः	६	२२	३०
उग्रेण तपसा युक्ताम्	१	३५	२०
उचितं च महाबाहुः	२	१९	३७

	का०	स०	श्लो०
उचितेष्वपि सुत्यक्तम्	५	९	६६
उचितोऽयं जनः सर्वः	२	५१	३
उचितोऽयं जनः सर्वः	२	८६	४
उच्चैर्बद्धानि चीराणि	२	९९	१०
उच्चैःश्रवा हयश्रेष्ठः	१	४५	३९
उच्छिन्नराज्यसंदेहम्	४	२९	६
उच्छिष्टं वा प्रमतं वा	२	११९	२०
उच्छोद्य स्नापयन्ति स्म	२	९१	५३
उच्छोषयति वै प्राणान्	२	६४	६८
उच्यतां गच्छ सुग्रीवः	४	३०	८०
उच्यतां वानरा सर्वे	६	६१	३२
उच्यमानो हि भरतः	२	९७	१८
उच्यमानं न गह्यसि	६	१११	१९
उताहो हतवीर्यास्ते	७	३१	४
उत्कर्षन्त्यां न रशनाम्	५	३८	१७
उत्कृष्टपर्णकमलाम्	५	१९	१५
उत्क्षिप्य च भुजौ काचित्	६	११०	९
उत्क्षिप्य लम्बाभरणम्	७	७	२८
उत्तमं जवमास्थाय	५	५८	२१
उत्तमस्त्रीविमृदितौ	५	१०	२०
उत्तमाङ्गच्युता तस्याः	३	५२	२६
उत्तमानां च गन्धानाम्	२	१७	४
उत्तमेनाभिसंयुक्ता	२	७	८
उत्तमौ रूपसंपन्नौ	६	२०	५
उत्तमं राक्षसावासम्	५	९	४
उत्तरं तीरमासाद्य	१	४५	९
उत्तरं द्वारमागम्य	६	४२	२७
उत्तरं द्वारमासाद्य	६	४१	३५
उत्तरं नगरद्वारम्	६	३७	३१
उत्तरं नहि वक्तव्यम्	७	६३	६
उत्तरं नाम काव्यस्य	७	९८	२१
उत्तरं पर्वतं राम	१	६३	१४
उत्तरं पार्श्वमासाद्य	२	९२	११
उत्तरं पुनरेवाह	५	५८	१०६
उत्तरं श्रोतुमनसः	७	९८	२५
उत्तरस्यां पुरद्वारि	६	३६	१९
उत्तरस्यां रघुश्रेष्ठः	१	४०	२२

	का०	स०	श्लो०
उत्तरां दिशमालोक्य	५	२७	१९
उत्तराफाल्गुनीह्यद्य	६	४	५
उत्तरीयं गृहीत्वा तु	४	६	१५
उत्तरीयमिहासक्तम्	२	८८	१५
उत्तरेण दशग्रीवः	७	२९	१६
उत्तरेण परिक्रम्य	४	४०	५९
उत्तरेण विनिष्क्रम्य	६	११०	३
उत्तरेणावकाशोऽस्ति	६	२२	२९
उत्तरे दिवसे ब्रह्मन्	१	७२	१३
उत्तरे पर्वते राम	१	६३	१६
उत्तरेभ्यः कुरुभ्यश्च	२	९१	३१
उत्तरे सागरे संध्याम्	७	३४	३१
उत्तरोत्तरयुक्तौ च	२	२	४३
उत्तस्थुः सायुधास्तं च	७	३२	२८
उत्तिष्ठत प्रबुध्यध्वम्	२	८९	९
उत्तिष्ठ तावदाख्याहि	३	१९	२
उत्तिष्ठ नरशार्दूल	२	१११	१८
उत्तिष्ठ नरशार्दूल	६	८३	४३
उत्तिष्ठ पश्य किं शेषे	६	१०१	२१
उत्तिष्ठ पुरुषव्याघ्र	२	१०२	७
उत्तिष्ठ मूढे किं शेषे	२	७	१७
उत्तिष्ठ सुमहाराज	२	१४	५१
उत्तिष्ठ हरिशार्दूल	४	२०	५
उत्तिष्ठ हरिशार्दूल	४	६६	३६
उत्तिष्ठोत्तिष्ठ किं शेषे	२	७२	२४
उत्तीर्य पुष्पाण्याजह्रुः	७	३१	३७
उत्तीर्यं सागरं रामः	६	३३	१५
उत्थाप्य च महातेजाः	२	४६	१८
उत्थाय च यथाकालम्	३	८	२
उत्थाय बहवो येन	३	४३	४०
उत्थास्यति च मेदिन्याः	२	४२	१७
उत्थिता मेदिनीं भित्वा	५	१६	१६
उत्थितौ तौ नरव्याघ्रौ	२	७७	२५
उत्पतद्भिर्द्विजगणैः	५	१४	२०
उत्पतन्तमनूत्पेतुः	५	६४	२४
उत्पतन्तमनूत्पेतुः	४	३४	४
उत्पत्य च ततः सर्वे	५	६२	८
उत्पत्य चैनं तरसा	६	६७	४८
उत्पत्स्यति हि मद्वंशः	६	६०	९
उत्पत्स्यति कुले ह्यस्मिन्	७	१९	३०
उत्पत्स्यते हि लोकेऽस्मिन्	७	५३	२०
उत्पन्नस्त्वं गुणज्येष्ठः	२	३	४०
उत्पन्ना तु कथं बुद्धिः	२	७३	१९
उत्पात गिरेः शृङ्गात्	४	६३	१४
उत्पपात ततो हृष्टः	६	४६	४६
उत्पपात तदाकाशम्	६	४०	२८
उत्पपात तदा क्रुद्धः	६	१०२	३४
उत्पपात रजो भूमौ	६	९९	९
उत्पपात हरिश्रेष्ठः	४	३४	३
उत्पपाताग्निसंकाशम्	१	४५	२०
उत्पपाताथ वेगेन	५	१	४२
उत्पपाताथ वेगेन	५	१	१८६
उत्पपाताथ वेगेन	५	५३	६३
उत्पपातासनात्तूर्णम्	७	४४	८
उत्पलाने च फुल्लाने	३	७३	२२
उत्पाटय च महावृक्षान्	६	७६	६५
उत्पाठ च संक्रामयितुम्	६	२५	३१
उत्पातवाताभिरताः	३	५२	३४
उत्पाताश्चापि दृश्यन्ते	६	९४	२८
उत्पेततुस्तदा तूर्णम्	६	९७	२७
उत्पेततुस्तदा पक्षौ	४	६३	९
उत्पेतुश्च विना रात्रिम्	३	२३	१३
उत्प्लुत्य गुणसंपन्नम्	६	९२	३९
उत्सङ्गेनैव भुजगीम्	३	५४	७
उत्सवश्च महानासीत्	१	१८	१८
उत्सवेषु च सर्वेषु	२	२	४१
उत्ससर्ज तदा शापम्	७	२६	५४
उत्ससर्ज महातेजाः	१	३७	१८
उत्सहेयमतिक्रान्तुम्	४	६७	१७
उत्सहेयमहं कर्तुम्	४	६२	१३
उत्सहेयमहं गत्वा	६	३४	३
उत्सहे य हि विस्तीर्णम्	४	६७	११
उत्सहे शत्रुवशगा	३	५३	१६
उत्सादयाते लोकांस्त्रीन्	१	१६	७

	का०	स०	श्लो०
उत्सार्यमाणान्दृष्ट्वाथ	६	११४	२४
उत्साहः पौरुषं सत्वम्	५	३७	९५
उत्साहवन्तः पुरुषाः	४	१	११२
उत्साहो बलवानार्य	४	१	१२१
उत्सृज्य प्रमदामेनाम्	३	३	७
उत्सृज्यार्कमिमं राम	७	३५	४१
उत्सेकेनाभिपन्नस्य	६	१०३	१६
उत्स्मयित्वा महाबाहुः	१	१	६५
नदकुम्भशतानन्ये	६	६०	५२
उदकेन च संमिश्रान्	६	१११	१२१
उदङ्मुखः प्रेक्षमाणः	२	९६	१२
उदतिष्ठत रामस्य	२	१४	५२
उदतिष्ठत्सुधर्मात्मा	१	४५	३२
उदयं तत्र पश्यामि	४	४६	१५
उदयन्तं दिनकरम्	३	८	४
उदयात्प्रस्थितं वापि	४	६७	१५
उदारवृत्तार्थपदैर्मनोरमैः	१	२	४२
उदारसत्त्वाभिजनो हनूमान्	४	४७	१४
उदारस्य नृवीरस्य	१	१४	५७
उदावसोस्तु धर्मात्मा	१	७१	५
उदासीनेषु योऽस्मासु	४	१७	४६
उदितां मरणे बुद्धिम्	४	६३	५
उदिते विमले चन्द्रे	७	२६	२
उदिते विमले सूर्ये	२	१५	३
उदीच्याश्च प्रतीच्याश्च	२	८२	८
उदीर्णसंरम्भतमोवृताननः	२	९	६६
उदीर्यमाणमस्त्रं तत्	१	५५	२२
उद्गात्रे तु तथोदीचीम्	१	१४	४४
उद्घुटं वानराणां च	६	७५	३७
उद्दिष्टं दीर्घमायुस्ते	६	३२	१२
उद्देशे नष्टमार्गेऽस्मिन्	५	३०	३१
उद्धुन्वाना रजो घोरम्	१	९६	१५
अद्धुष्टं वानराणां च	६	७५	३३
अद्भूत इव वायुः खे	६	५८	३५
अद्भूतपुलिनास्तत्र	४	४३	४२
उद्भूतेन च वस्त्रेण	३	५२	१५
उद्भतं हरिरक्षोभिः	६	५५	१९

	का०	स०	श्लो०
उद्धृत्य तैलसंसेकात्	२	७६	४
उद्भ्रमान्निव वेगेन	३	६०	४
उद्भ्रान्तचित्तस्तां दृष्ट्वा	६	८३	९
उद्भ्रान्तहृदयश्चापि	२	१४	१२
उद्यतानां हि युद्धार्थम्	३	२४	९
उद्यतायुधानिस्त्रिंशः	६	८८	२
उद्यन्तं भास्करं दृष्ट्वा	६	२८	१२
उद्यमः क्रियतां वीर	६	८५	९
उद्यम्य गिरिशृङ्गाणि	६	४२	१२
उद्यम्य चानोन्यमधिक्षिपन्तौ	६	४०	२०
उद्यम्य विपुलं खड्गम्	६	७६	२२
उद्यनाने परित्यज्य	२	३३	१७
उद्यनानि पुरा भान्ति	२	७१	२५
उद्यनानि विचित्राणि	७	१३	९
उद्यानाश्रवणोपेतान्	२	५०	९
उद्योगं तव संप्रेक्ष्य	६	१७	६६
उद्योगस्तु चिराज्ञप्तः	४	३३	५९
उद्योगं वानरेन्द्राणाम्	५	१२	२४
उद्वहेयं भुजाभ्यां तु	३	४९	३
उद्विग्नः शङ्कितश्चाहम्	४	११	७७
उद्विग्नहृदयः सर्वा	४	२	२
उद्विग्ना शङ्किताचास्मि	६	३४	१०
उद्विजन्ते यथा सर्पात्	२	१०९	१२
उद्वीक्षमाणा भर्तारम्	२	५८	३६
उद्वीक्ष्योदीक्ष्य नयनैः	३	५२	४१
उद्वेजनीयो भूतानाम्	३	२९	३
उद्वेजयति लोकांस्त्रीन्	१	१५	८
उन्नमत्त इव निश्चितः	२	७७	१२
उन्मत्तेव प्रमत्तेव	५	२६	२
उन्मिषन्तमिवोद्धूतैः	५	५६	२८
उपकल्पितसर्वाग्निम्	२	९१	३५
उपकारं कृतं वीरः	४	३५	४
उपकारेण वीरस्तु	४	२७	४५
उपकारेण वीरो हि	४	२८	४
उपकार्या महार्हाश्च	७	९१	२६
उपकार्या महार्हाश्च	७	९२	८
उपक्लप्तं यदैतन्ते	२	२२	४

	का०	स०	श्लो०
उपगम्य खरं सा तु	३	२०	२३
उपगम्य समाघ्राय	३	४२	२६
उपगम्याब्रवीद्वाक्यम्	३	३२	२४
उपतप्तोदका नद्यः	२	५६	५
उपतस्थुर्महात्मानः	७	३७	१५
उपतस्थे च वैदेहीम	३	४६	६
उपदिष्टं सुसूक्ष्मार्थम्	८	७५	२८
उपद्रुतमिदं सर्वम्	२	४८	२५
उपन्यस्तमपन्यस्तम्	६	४०	२६
उपपन्नं च युक्तं च	२	११८	१५
उपपन्नमिदं वाक्यम्	२	१०७	२
उपपन्नं महार्हैश्च	२	१०	१६
उपप्रदानं सान्त्वं च	६	६३	११
उपप्रदानं सान्त्वं वा	६	१३	७
उपयुक्तं यथा वासः	३	३३	१६
उपयातं च मां सौम्य	६	१२५	२२
उपयाता नरव्याघ्र	१	१३	१६
उपयाति समृद्धार्थः	६	१२५	२५
उपयानापयाने च	६	१०४	२०
उपयानं समुद्रस्य	६	१२५	१०
उपरक्तमिवादित्यम्	२	३४	३
उपरिष्टाच्छरीरेण	५	१	६५
उपरिष्टाद्धि नयनम्	६	४	७
उपरुध्यन्ति मे प्राणाः	३	६८	११
उपर्युपरि सा नूनम्	५	१३	१०
उपलब्धं च मेलध्यम्	४	११	७८
उपलभ्य शनैः संज्ञाम्	३	१६	१२
उपलैरिव संच्छन्नाः	४	६१	८
उपवासकृशां दीनाम्	५	१५	१६
उपवासकृशां दीनाम्	५	३४	१६
उपवासकृशोदीनः	६	१२७	१६
उपवासयितुं वीर	२	५	४
उपवासश्च कर्तव्यः	२	२८	१३
उपवासेन शोकेन	५	१६	२०
उपवासैश्च योगैश्च	२	२०	४८
उपविष्टं महाबाहुम्	२	६६	२८
उपविष्टं महाभागम्	७	१००	७

	का०	स०	श्लो०
उपविष्टस्य वा सम्यक्	५	१३	४०
उपविष्टा गिरेस्तस्य	५	५७	५०
उपविष्टाय च तदा	१	५२	३
उपविष्टास्तु ते सर्वे	४	५६	१
उपवेश्य तमुत्सङ्गे	६	६१	१०
उपशान्तवणिक्पण्या	२	४८	३५
उपसृत्य ततः सर्वाः	१	१०	२६
उपसंश्रित्य भर्तारम्	३	४५	२६
उपस्थानमनुज्ञाप्य	२	१०	१०
उपस्थापयत क्षिप्रम्	४	३८	६
उपस्थापय मे क्षिप्रम्	३	२२	१०
उपस्थापय मे शीघ्रम्	६	१२१	२२
उपस्थापयितव्याः स्युः	२	३	१६
उपस्थितं तु तं कृत्वा	६	१२२	१
उपस्थितः प्रञ्युजानः	२	७	२५
उपस्थितमना धृष्यम्	६	१२१	२६
उपस्थिता सा मृदुसर्वगात्री	५	६८	१८
उपस्थितैरञ्जलिकारिभिश्च	२	१५	४५
उपस्पृशं स्त्रिषवणम्	२	६५	१७
उपस्पृश्योदकं सम्यक्	१	३	२
उपस्पृश्योदकं सर्वे	४	५५	२०
उपहारश्च कर्तव्यः	२	२८	१६
उपागम्य च मे देवः	३	७	११
उपागम्य पितामहः	१	४२	१५
उपाघ्राय च तं मूर्ध्नि	६	४६	४७
उपादाय समाक्रान्तैः	२	१५	३८
उपाधिर्न मया कार्यः	२	१११	२६
उपाध्यायगणाः सर्वे	१	३६	६
उपाध्यायवचः श्रुत्वा	१	६१	६
उपाध्यायः स विधिना	२	२५	२६
उपानीयासनं पूर्वम्	३	४६	३४
उपानृत्यन्त काकुत्स्थम्	७	४२	२२
उपायः को वधे तस्य	१	१६	२
उपायकुशलं वैद्यम्	२	१००	२६
उपायतः सहस्राक्षः	६	१२३	४७
उपायनानि चादाय	५	५७	३३
उपायमेते वक्ष्यन्ति	६	१६	८

	का०	स०	श्लो०
उपायैरभिगच्छामः	६	१६	२६
उपायो दृश्यतां कश्चित्	४	५८	३२
उपालक्ष्य निमित्तानि	३	६०	११
उपालम्भं न शक्ष्यामि	६	४६	२
उपालम्भं न शक्ष्यामि	६	१०१	१६
उपावृत्ते मुनौ तस्मिन्	२	५५	११
उपावृत्योत्थितां दीनाम्	२	२०	३४
उपासां चक्रतुर्वीरौ	१	३०	६
उपासां चक्रिरे सर्वे	२	३	२६
उपासितः स काकुत्स्थः	३	११	३०
उपास्तेऽप्सरसां वीर	७	७७	१२
उपास्य तु शिवां संध्याम्	२	४६	१३
उपास्य पश्चिमां संध्याम्	३	११	६६
उपास्यमानां घोरिभिः	६	३१	१३
उपास्य रात्रिशेषं तु	१	३५	१
उपांशुदण्डेन हि माम्	४	५५	१०
उपेत्य चाश्रमं पुण्यम्	४	६०	१३
उपेत्य तीरं गङ्गायाः	२	८३	२१
उपोपविष्टस्तु तदातिवीर्य ०	२	१०४	३०
उपोपविष्टैः सचिवैः	१	४	३१
उपोपविष्टं रक्षोभिः	५	४६	७२
उभयोरपि राजेन्द्र	१	७२	८
उभाभ्यां राजपुत्राभ्याम्	२	५६	२
उभावपि च शोकार्तौ	२	६४	३७
उभे पुरवरे रम्ये	७	१०१	१४
उभौ सौमित्रिभरतौ	७	१०२	१५
उभौ हि परमेष्वासौ	६	६६	३२
उभौ हि येन व्रजता	६	६६	३३
उमापतिर्द्विजान्सर्वान्	७	६०	१७
उमापतेश्च तत्कर्म	७	८७	१७
उरोगतेन निष्केण	६	७७	५
उरोदेशेण सर्वेषाम्	३	५	१७
उर्वशी त्वगमत्तत्र	७	५६	२२
उर्वश्या एवमुक्तस्तु	७	५६	२१
उल्काशनियुता मेघाः	६	६५	४८
उल्लिखन्तौ सुतीक्ष्णाभिः	६	५८	४७
उवाच कामतो वाक्यम्	४	२	५

	का०	स०	श्लो०
उवाच कांश्चित्परुषाण्यभीतम्	५	६१	२२
उवाच च तदा रामः	२	३२	४०
उवाच च महातेजाः	६	१२८	४८
उवाच च मुनिर्वाक्यम्	७	७१	६
उवाच च विषण्णः सन्	३	६६	३८
उवाच च शुभं वाक्यम्	७	८३	१७
उवाच च समीपस्थम्	६	६७	४
उवाच च समीपस्थान्	६	६५	४
उवाच च सुसंक्रुद्धः	७	६८	१०
उवाच चैनं वचनम्	३	६६	१५
उवाच तारा पिङ्गाक्षम्	४	२३	२२
उवाच दीक्षां विशत	१	८	२४
उवाच परमोदरः	१	१८	५०
उवाच परिपूर्णार्थम्	६	४	४४
उवाच परिसंहृष्टः	४	६७	३१
उवाच प्राञ्जलिर्भूत्वा	२	६२	२०
उवाच प्राञ्जलिर्वाक्यम्	१	४७	८
उवाच प्राञ्जलिर्वाक्यम्	६	१२५	२६
उवाच भरतश्चित्रम्	२	१०६	२
उवाच मधुरां वाणीम्	१	७४	१२
उवाच मधुरां वाणीम्	७	४६	६
उवाच मधुरां वाणीम्	७	६६	२४
उवाच मधुरोदर्कम्	३	५७	१७
उवाच मातलिं रामः	६	१०६	६
उवाच राजा सर्वज्ञः	४	४३	२
उवाच रामो धर्मात्मा	३	६४	२६
उवाच लक्ष्मणो धीमान्	३	६४	२१
उवाच लक्ष्मणं वीरः	३	६४	२६
उवाच वचनं काले	५	२७	६
उवाच वचनं धीमान्	५	१	१३१
उवाच वचनं धीरः	३	७	२०
उवाच वचनं वीरः	३	५५	३४
उवाच वचनं श्रेष्ठः	१	६६	६
उवाच वाक्यं वाक्यज्ञः	१	७०	१६
उवाच वाक्यं वाक्यज्ञः	५	६५	८
उवाच शोकसंतप्तम्	५	६४	२७
उवाच सचिवांस्तत्र	७	३१	२७

	का०	स०	श्लो०
उवाच सुमहात्मानम्	७	४४	४
उवाच हनुमान्वाक्यम्	४	५२	२१
उवाचपि प्रहृष्टेव	२	२५	३९
उवाचैनं स्मितं कृत्वा	१	४५	२३
उवास परमप्रीतः	१	६९	१८
उवास सुखितः कालम्	४	५१	१४
उवास सुखितस्तत्र	३	१७	३
उशना च प्रसन्नार्चिः	४	४	४८
उषित्वा द्वादशा समा	३	४७	४
उषित्वा रजनीं तत्र	२	५५	१
उषित्वा स सुखं तत्र	३	११	२३
उष्ट्रेण कुम्भकर्णश्च	५	२७	२९
उष्णमन्तर्दधे सद्यः	२	६३	१६
उष्णाद्यस्योदनस्यात्र	१	५३	३
उष्णार्दितां सानुसृतान्नकण्ठीम्	५	५	२५
उष्णतां चेह रजनीम्	७	७६	२८
(ऊ)			
ऊचुः खगमृगः सर्वे	६	५५	१२
ऊचु परस्परं चेदम्	७	९४	१श
ऊचः प्राञ्जलयो देवाः	७	३५	५४
ऊचुः प्राञ्जलयः सर्वे	६	१२२	१८
ऊचुः प्राञ्जलयः सर्वे	७	३८	३२
ऊचुः समेता सहसा	१	६०	५
ऊचुः सुरासुराः सर्वे	६	१०२	४५
ऊचुः संश्रवणे ये माम्	६	४८	५
ऊचुर्लक्ष्मणिका ये माम्	६	४८	२
ऊचुश्च देवदेवेशम्	७	६९	२२
ऊचुश्च परमक्रुद्धाः	५	२४	१६
ऊचुश्च परमप्रीतः	१	८	११
ऊचुश्च परमायत्ता	२	३७	१६
ऊचुश्च वचनं सर्वे	१	५९	११
ऊचुश्च सहितास्तुष्टाः	६	९०	८८
ऊचुश्चैव महात्मानः	७	६०	१६
ऊचुस्ते वचनमिदं निशम्य	२	७९	१७
ऊनषोडषवर्षे मे	१	२०	२
ऊरु करिकराकारौ	७	१६	१९
ऊरुपार्श्वकटीपृष्टम्	५	९	६१

	का०	स०	श्लो०
ऊरुभ्यामुदरं छाद्य	५	१९	३
ऊरुवेगोत्थिता वृक्षाः	५	१	४५
ऊर्जितः खलु ते कामः	२	८५	२
ऊर्ध्वबाहुनिरालम्बः	१	६३	२३
ऊर्ध्वबाहूःपञ्चतपाः	१	४२	१३
ऊर्ध्वलोमाञ्चिततनुम्	६	६०	२८
ऊर्ध्वं मासान्न जीवेयम्	५	३८	६५
ऊर्ध्वं मासान्न वस्तव्यम्	४	४०	७०
ऊर्ध्वं मासान्न वस्तव्यम्	४	४२	५३
ऊर्ध्वं वर्षसहस्रान्ते	२	२३	२५
ऊर्मिमालिनमक्षोभ्यम्	२	१८	६
ऋक्षकोटिसहस्राणि	४	३५	२२
ऋक्षममुख्या महात्मानः	४	२४	१८
ऋक्षराज च दुर्धर्षम्	७	४०	६
ऋक्षराजस्तथेत्युक्त्वा	६	८३	४
ऋक्षवन्तं गिरिश्रेष्ठम्	६	२७	९
ऋक्षवानरगोपुच्छाः	१	१७	१९
ऋक्षवानरगोपुच्छैः	४	२७	३
ऋक्षवानरमुख्यास्त्वाम्	४	२३	५
ऋक्षवानरमुख्यैश्च	६	८६	१३
ऋक्षवानररक्षांसि	७	९९	११
ऋक्षवानररक्षांसि	७	१०९	१९
ऋक्षवानरवीराणाम्	६	७४	२८
ऋक्षवानरशार्दूलैः	६	४	५६
ऋक्षवानरसङ्घानाम्	६	२४	३२
ऋक्षाणां भीमकोपानाम्	६	४२	२९
ऋक्षाणां भीमवेगानाम्	४	३९	२०
ऋक्षाणां वानराणां च	६	११४	२२
ऋक्षाश्च वानरा शूराः	४	३८	२८
ऋक्षास्तरक्षवः कङ्काः	३	४६	३०
ऋक्षाः पृषतमुख्याश्च	२	९३	२
ऋक्षाः पृषतसङ्घश्च	३	४३	१२
ऋक्षाःशाखामृगाश्चैव	६	८६	७
ऋक्षाः सिंहाश्च महिषाः	६	३९	१६
ऋक्षीषु च तथा जाता	१	१७	२१
ऋचीके भार्गवे प्रादात्	१	७५	२२
ऋणानि त्रीण्यपाकुर्वन्	२	१०६	२८

	का०	स०	श्लो०
ऋणान् मोचय राजानम्	२	१०७	१०
ऋतधामा वसुः पूर्वम्	६	११७	७
ऋतवश्चापि षट्चान्ये	२	२५	१५
ऋतुकालं प्रतीक्षन्ते	१	४८	१८
ऋतुस्नातां सतीं भार्याम्	२	७५	५२
ऋते तु पुत्राद्दहनं महीपते	२	६६	२७
ऋते नियोगात्सामर्थ्यम्	६	१७	५४
ऋते मायां विशालाक्षीम्	७	११०	११
ऋत्विग्भिरूपदिष्टोऽयम्	१	९	२
ऋत्विग्भिरूपसंदिष्टाः	१	८	२२
ऋत्विग्भिर्ब्राह्मणैः पूर्वम्	६	१२८	६२
ऋत्विग्भिर्लक्ष्मणं सार्धम्	७	९२	२
ऋत्विजोऽपि महात्मानः	१	५०	७
ऋत्विजो द्वावभिमतौ	१	७	४
ऋद्धियुक्ता हि पुरुषाः	२	२६	२५
ऋद्धिं ममानुपश्य त्वम्	५	२०	२५
ऋद्धिं रूपं बलं पुत्रान्	७	१५	२४
ऋषभं च सुविक्रान्तम्	७	४०	७
ऋषभः शरभो नीलः	६	६७	२४
ऋषभेण गवाक्षेण	६	४१	४०
ऋषभो वानरस्तत्र	४	६५	५
ऋषयः पितरो देवाः	६	९०	६३
ऋषयश्च महात्मानः	१	१७	९
ऋषयश्च महात्मानः	३	२४	२०
ऋषयश्च महात्मानः	७	६३	१७
ऋषयश्च महात्मानः	७	१०९	९
ऋषयश्च महान्तोऽपि	६	१११	४
ऋषयश्च महाबाहो	७	९१	१४
ऋषयश्चैव देवाश्च	२	१०९	११
ऋषयस्तत्र बहवः	२	५४	३१
ऋषयस्तुष्टुवुश्चैनम्	५	१	८३
ऋषयः साग्नराः द्वीपा	२	२५	३६
ऋषयोऽप्यद्य पापात्मन्	७	६९	५
ऋषयोऽप्युग्रतपसः	२	२२	२३
ऋषयोऽभ्यागमन्सर्वे	१	१	४४
ऋषयो देवगन्धर्वा	३	२३	२७
ऋषयो वानराश्चैव	६	५९	११६

	का०	स०	श्लो०
ऋषिणा च पितुर्वाक्यम्	२	२१	३१
ऋषिपन्नागकन्याश्च	७	२	९
ऋषिपुत्रं ददर्शाथ	१	११	१६
ऋषिपुत्रप्रभावेण	१	१२	१०
ऋषिपुत्रवचः श्रुत्वा	१	१०	१६
ऋषिपुत्रांश्च तान्सर्वान्	४	४२	५
ऋषिभिसत्रासंभ्रान्तैः	४	६७	४८
ऋषिमध्ये महातेजाः	१	६०	३४
ऋषिमांसाशनः क्रूरः	३	३९	६
ऋषिवाक्यैश्च दृष्टार्थैः	५	५८	१६५
ऋषिवाटाश्च दृश्यन्ते	१	५०	४
ऋषिवाटेषु पुण्येषु	७	९३	५
ऋषिशापाहृतबलः	७	३६	४२
ऋषिसङ्घैस्तदाकाशे	६	१२८	३०
ऋषिस्तु दृष्ट्वा मां तुष्टः	४	६०	१७
ऋषिं वसिष्ठं संदिश्य	२	९९	२
ऋषीणामभयं दत्तम्	३	३३	१३
ऋषीणामभयं दत्तम्	३	३४	११
ऋषीन्यक्षान्सगन्धर्वान्	१	१५	९
ऋषीन्वनगतान्राम	३	७१	३
ऋषीन्सर्वानपुरस्कृत्य	१	७४	८
ऋषीणां च द्विजातीनाम्	१	४	१३
ऋषीणां चैव सर्वेषाम्	७	४५	९
ऋषीणां दण्डकारण्ये	३	१०	१७
ऋषीणां देवतानां च	६	४१	६२
ऋषीणां संधिनौ राजन्	१	९	३
ऋषीश्च तान्यथान्यायम्	१	१८	४८
ऋषींश्चापि महात्मानः	१	७३	३६
ऋषेः कण्वस्य पुत्रेण	६	१८	२६
ऋषेः पुत्रस्य धीरस्य	१	१०	८
ऋषेर्वचनमाज्ञाय	७	८२	१
ऋषेस्तु वचनं श्रुत्वा	७	५०	१५
ऋषिभिस्तोमरैश्चित्रैः	६	५३	८
ऋष्यमूक इति ख्यातः	३	७५	२६
ऋष्यमूकगिरिं गत्वा	६	१२६	३६
ऋष्यमूकं गिरिवरम्	६	१०	२८
ऋष्यमूकसमीपे तु	६	१२३	३८

	का०	स०	श्लो०
ऋष्यमूकस्य गमनम्	१	३	२३
ऋष्यमूकात्स धर्मात्मा	४	१३	१
ऋष्यमूकात्तु हनुमाम्	४	५	२
ऋष्यमूके गिरवरे	३	७२	१२
ऋष्यमूके वसंश्चैव	६	९४	१८
ऋष्यमूको गिरिर्यत्र	३	७५	७
ऋष्यमूको गिरिवर:	६	१२३	३९
ऋष्यशृङ्गं पुरस्कृत्य	१	१४	२
ऋष्यशृङ्ग इति ख्यात:	१	९	४
ऋष्यशृङ्गस्तु जामाता	१	९	१९
ऋष्यशृङ्गाय मुनये	१	१४	५२
ऋष्यशृङ्गो वनचर:	१	१०	३
(ए)			
एकं कनीयसा भ्रात्रा	२	६१	१५
एकं द्वौ त्रीन्वहून्क्रुद्ध:	६	६७	९५
एकं रामं परिक्षिप्य	६	९३	४
एकं सहस्रं बहुभि:	३	२५	१६
एक एव रणे वाली	४	३०	८२
एक एव हि वध्याया:	२	२०	३७
एकचिन्तनमर्थानाम्	२	१००	६६
एकतामगमन्सर्वे	१	४५	४१
एकं त्रीन्पञ्च सप्तेति	६	७१	७६
एकपुत्रा च साध्वी च	२	७४	२९
एकमेकायने कृच्छ्रे	३	६७	२३
एकमेकेन बाणेन	६	९९	२०
एकयामावशिष्टायाम्	२	६	५
एकया दीर्घया वेण्या	५	१९	१९
एकाविंशतियूपास्ते	१	१४	२५
एकवेणी अध: शय्या	५	२०	८
एकवेणीधरां दीना	५	५८	६०
एकवेणी दृढां बद्ध्वा	२	१०	९
एक साले स्थाणुमतीम्	२	७१	१६
एकस्त्वकम्प्यो वलतान्	६	३	१८
एकस्त्वमनुजातोऽसि	६	७६	७२
एकस्य नापराधेन	३	६५	६
एकस्य मरणं मेऽस्तु	७	१०५	९
एकस्य रामस्य वने निवास:	२	३७	३५

	का०	स०	श्लो०
एकस्या खलु कैकेय्या:	२	३९	७
एकस्यैवाभियाने तु	६	६४	११
एकहस्तैकपादाश्च	५	१७	२
एका कथंचिन्मुक्ताहम्	३	३४	१२
एकाकी किं नु मां त्यक्त्वा	६	१०१	२०
एकाक्षानेकवर्णांश्च	५	४	१७
एकाक्षिपिङ्गलीत्येवम्	७	१३	३१
एकाक्षीमेककर्णां च	५	१७	५
एकाक्षीमेककर्णां च	५	२२	३३
एका गर्भविनाशार्थम्	१	७०	३१
एका चरसि कल्याणि	३	४६	३२
एका जनयिता तात	१	३८	८
एकादशानां कोटीनाम्	४	३९	३२
एकान्ते पश्य भगवन्	२	५४	२६
एकाहमपि पश्येयम्	२	१२	४८
एकाह्ना राजपुत्रीणाम्	१	७२	१२
एकांशो वासवं यातु	७	४५	७
एकेन वानरेणेयम्	६	६०	७५
एकेन सह संगम्य	६	१२६	१७
एकेनान्तककल्पेन	६	६९	७५
एकेनाहं प्रमोक्ष्यामि	४	१४	११
एकेनाह्ना त्वसौ वीर:	६	६१	२८
एकेनांशेन वत्स्यामि	६	८६	१३
एकेनारेसि घोरेण	३	६९	३०
एकेषुपातेन भयं निपात्य	७	६९	३८
एकैकमेव याधानाम्	६	२७	४७
एकैकं पादपं गुल्मम्	२	५५	२९
एकैकस्यात्र युद्धार्थे	६	३७	१८
एकैकस्योपकारस्य	७	४०	२३
एकैकं राक्षसं संख्ये	६	९३	१४
एकोऽप्यमात्यो मेधावी	२	१००	२४
एकोऽयं राक्षसेन्द्रस्य	६	८९	८
एकोऽर्थं विमृशेदेक:	६	६	९
एकोऽहं भक्षयिष्यामि	६	८	२३
एको वंशकरो वास्तु	१	३८	१२
एको ह्यहमयोध्यां च	२	५३	२५
एक: कस्या: सुतो ब्रह्मन्	१	३८	१०

	का०	स०	श्लो०
एकः पालयते लोकम्	२	१०६	१५
एकः सत्पुरुषो लोके	२	४४८	८
एतच्च पुष्पकं नाम	७	३	१६
एतच्च वचनं श्रुत्वा	४	१२	१
एतच्च वनमध्यस्थम्	३	११	५१
एतच्चैवोभयं श्रुत्वा	२	१११	२३
एतच्छ्रुत्वा कुमारेण	४	५३	२०
एतच्छ्रुत्वा तदा वाक्यम्	४	४१	३३
एतच्छ्रुत्वा तदा वाली	४	११	६२
एतच्छ्रुत्वा तु काकुत्स्थः	३	६	२१
एतच्छ्रुत्वा तु कौसल्या	२	४	३८
एतच्छ्रुत्वा दशग्रीवा	६	३२	३८
एतच्छ्रुत्वा प्रियं वाक्यम्	१	१५	१५
एतच्छ्रुत्वा महातेजाः	६	१०५	२८
एतच्छ्रुत्वा यमाकारम्	६	१२५	१४
एतच्छ्रुत्वा रहः सूतः	१	६	१
एतच्छ्रुत्वा वचस्तस्य	४	३	२५
एतच्छ्रुत्वा वचस्तस्य	५	५८	७०
एतच्छ्रुत्वा विदित्वा च	५	५८	१०१
एतच्छ्रुत्वा शुभं वाक्यम्	२	११३	१५
एतच्छ्रुत्वा शुभं वाक्यम्	२	११५	४
एतच्छ्रुत्वा शुभं वाक्यम्	६	११८	१
एतच्छ्रुत्वा शुभं वाक्यम्	६	११६	१
एतच्छ्रुत्वा स धर्मात्मा	७	३	३१
एतच्छौटीर्ययुक्तं ते	३	४२	६
एतत्तदाश्रमपदम्	६	१२३	४४
एतत्तदिङ्गुदीमूलम्	२	८७	२२
एतत्तदुक्तमव्यक्तम्	६	११६	३०
एतत्तवायी नृप संयता स	५	६७	४४
एतत्तु वचनं श्रुत्वा	२	१८	२७
एतत्तु वचनं श्रुत्वा	२	२१	२०
एतत्तु वचनं श्रुत्वा	२	२६	१
एतत्तु वचनं श्रुत्वा	२	८४	१४
एतत्तु वचनं श्रुत्वा	४	५	१२
एतत्ते कथितं तत्त्वम्	७	२७	२१
एतत्ते देवि सदृशम्	५	३८	५
एतत्ते बलसर्वस्वम्	३	३०	२

	का०	स०	श्लो०
एतत्ते राजशार्दूल	२	१०३	२७
एतत्ते सर्वमाख्यातम्	१	३२	२२
एतत्ते सर्वमाख्यातम्	४	४	१७
एतत्ते सर्वमाख्यातम्	४	१०	२६
एतत्ते सर्वमाख्यातम्	५	३५	८७
एतत्ते सर्वमाख्यातम्	७	५६	२२
एतत्ते सर्वमाख्यातम्	७	६३	३१
एतत्कुरु नरेन्द्रस्य	२	१८	४०
एतत्राज्यं मम भ्राता	२	१२५	१४
एतत्पश्य यथा क्षिप्रम्	६	१२१	७
एतत्त्वय्युपपन्नं च	७	३८	२६
एतत्संजल्पितं श्रुत्वा	३	७०	७
एनत्सर्वं मया तत्र	५	५८	१६६
एतत्सर्वं महातेजाः	१	५०	२५
एतत्सुनीतं ममदर्शनेन	६	६४	३५
एतत्सुरुचिरं भाति	२	७२	१६
एतदन्तो दशग्रीवः	३	५४	११
एतदन्यच्च करुणम्	२	५३	२७
एतदर्थमहं प्राप्तः	५	६३	२५
एतदर्थमहं प्राप्तः	३	३६	१७
एतदर्थं समग्रं मे	४	५६	२२
एतदर्थं हि राज्यानि	२	५२	२५
एतदस्य धनुर्भग्नम्	३	६७	१८
एतदस्यासमं वीर्यम्	४	११	६८
एतदाख्यातुमिच्छामि	५	३५	६४
एतदाख्यानमायुषम्	१	१	६६
एतदाख्यानमायुष्यम्	७	१११	८
एतदाख्यानमायुष्यम्	७	१११	११
एतदाख्याय काकुत्स्थः	७	६१	१
एतदाख्याय तत्सर्वम्	५	५६	१
एतदाख्याय ते सर्वम्	५	६५	४
एतदाख्याय रामाय	७	८०	१
एतदाचक्ष्व मे देवि	२	१८	१८
एतदायोधनं पश्य	६	१२३	४
एतदालक्ष्यते वीर	३	१३	२१
एतदिच्छाम्यहं श्रोतुम्	१	१	५
एतदुक्तं च मे वाक्यम्	५	२४	२७

	का०	स०	श्लो०
एतदेवमयाख्यातम्	५	६५	२७
एतदेव वचः श्रुत्वा	५	५५	१८
एतदेव हि रत्नम्	१	५३	२३
एतदेवाश्रमपदम्	३	११	४७
एतदेवं नृशंसं ते	३	७१	५
एतदेवं हि काव्यं ते	७	९८	१६
एतद्दर्शय भद्रं ते	१	६६	६
एतद्धि किल देवानाम्	३	५	१८
एतद्ब्राह्मण रामस्य	३	४७	१८
एतद्राघव विस्तीर्णम्	४	१३	१७
एतद्वचस्तस्य निशम्य माता	२	२१	५१
एतद्वचो नेच्छसि पापरूपे	२	३६	३२
एतद्वचो मया तत्र	७	५१	२५
एतद्विद्याद्वये लब्धे	१	२२	१७
एतद्विनापि ह्युदधेस्तवाद्य	६	२१	३४
एतद्विस्तारतः सर्वम्	७	४	७
एतन्निमित्तं दीनोऽहम्	२	६९	१९
एतन्निमित्तं वचनम्	३	९	११
एतन्निमित्तं वैदेही	६	९	१५
एतन्मुहूर्तमेवाहम्	७	१३	३९
एतन्मुहूर्ते तु मया	४	१२	३७
एतन्मे भगवन्सर्वम्	७	३५	१३
एतमेव समुद्योगम्	७	६	११
एतया किल संङ्ग्रामे	७	२५	११
एतया तत्त्वया बुद्धया	२	२२	२५
एतस्मात्कारणान्नत्वाम्	५	२२	५
एतस्मिन्नन्तरे क्रुद्धः	६	१००	१३
एतस्मिन्नन्तरे क्रुद्धः	७	२८	४३
एतस्मिन्नन्तरे क्रुद्धाः	३	२६	१७
एतस्मिन्नन्तरे क्रुद्धाः	७	२३	२८
एतस्मिन्नन्तरे क्रुद्धाः	७	२९	३०
एतस्मिन्नन्तरे क्रोधात्	६	१०२	४७
एतस्मिन्नन्तरे घोरः	६	४२	४१
एतस्मिन्नन्तरे चैव	४	३९	८
एतस्मिन्नन्तरे तत्र	७	२६	१४
एतस्मिन्नन्तरे तस्य	६	९२	५८
एतस्मिन्नन्तरे तेषाम्	६	४३	५
एतस्मिन्नन्तरे तेषाम्	६	७४	२१
एतस्मिन्नन्तरे त्रस्ताः	२	९६	४
एतस्मिन्नन्तरे द्वारात्	७	२१	८
एतस्मिन्नन्तरे देवाः	३	३०	२९
एतस्मिन्नन्तरे नादः	७	२७	२३
एतस्मिन्नन्तरे नादः	७	२९	१९
एतस्मिन्नन्तरे भग्नः	४	१२	२१
एतस्मिन्नन्तरे मैन्दः	६	७६	३२
एतस्मिन्नन्तरे रक्षः	६	४०	२७
एतस्मिन्नन्तरे रामः	१	२९	१०
एतस्मिन्नन्तरे रामः	७	९	१५
एतस्मिन्नन्तरे रामः	७	१४	२१
एतस्मिन्नन्तरे रामः	७	२७	४०
एतस्मिन्नन्तरे रामः	७	३०	१७
एतस्मिन्नन्तरे रामः	६	४९	३
एतस्मिन्नन्तरे वायुः	६	५०	३३
एतस्मिन्नन्तरे विष्णुः	१	१५	२६
एतस्मिन्नन्तरे वीरः	६	१००	२४
एतस्मिन्नन्तरे वीरः	७	२८	१९
एतस्मिन्नन्तरे वीरः	७	६८	३
एतस्मिन्नन्तरे शब्दः	६	३४	२७
एतस्मिन्नन्तरे शूरः	७	२८	२९
एतस्मिन्नन्तरे शूराः	७	२७	२७
एतस्मिन्नाश्रमे वासम्	३	७	२२
एतस्मिन्निहते क्रूरम्	२	९६	२५
एतस्मिन्नेव काले तु	१	३३	११
एतस्मिन्नेव काले तु	१	६१	५
एतस्मिन्नेव काले तु	७	५	३०
एतस्मिन्नेव काले तु	७	५६	१३
एतस्मिन्प्लवमाने तु	७	३५	२५
एतस्मिन्भ्रातरौ वीरौ	६	१२७	३२
एतस्य बलिनः सर्वे	६	२६	३५
एतस्य बाहुवीर्येण	७	३५	९
एतस्य मृगरत्नस्य	३	४३	३५
एतस्य सा मतिः सर्वा	६	२६	१९
एतस्यास्तौ सुतौ देव्याः	२	९२	२४
एतां पश्य दुराधर्षाम्	१	२६	११

	का०	स०	श्लो०
एनां प्रवृत्तिं लङ्कायाम्	६	३७	१९
एतां बुद्धिं तदा कृत्वा	५	३४	२६
एतां बुद्धिं समास्थाय	४	४३	८
एतां मालां च तारां च	११	२८	३२
एतां विरूपामसतीम्	३	१८	११
एतांश्चान्याश्च मायाभिः	६	९९	४५
एतागच्छत गच्छामः	५	६२	१९
एतागच्छत गच्छामः	५	६२	२९
एतानचिन्तयन्घोरान्	६	९५	४८
एतानस्थिचयान्पश्य	७	३४	७
एतानेवंविधान्गुल्मान्	६	३७	१५
एतेनोत्पातिकान्दृष्ट्वा	६	५३	१६
एतान्निहत्यातिबलान्	६	९९	१५
एतान्निहन्तुमिच्छामि	६	५६	५
एतान्वित्रासितान्पश्य	२	९३	१७
एतान्सर्वान्वरांल्लब्ध्वा	७	२५	१३
एतान्सर्वान्समानीय	७	९०	६
एतान्सर्वान्समानीय	७	९१	३
एताभ्यां धर्मशीलाभ्याम्	२	१०१	२२
एतावज्जीवलोकस्य	४	४२	५०
एतावदभिनीतार्थम्	२	३९	३६
एतावदुक्त्वा चोत्थाय	७	३८	१८
एतावदुक्त्वा वचनम्	२	१२	५०
एतावदुक्त्वा वचनम्	४	८	२९
एतावदुक्त्वा वचनं	६	६६	३०
एतावदुक्त्वा वचनं	७	९८	२३
एतावदेतदाख्यानम्	७	१११	१
एतावदेव शेषं वः	६	८६	१६
एतावद्वानरैः शक्यम्	४	४०	६८
एतावद्वानरैः शक्यम्	४	४२	५१
एतावद्वानरैः शक्यम्	४	४३	५८
एता वाचो बहुविधिः	७	५०	९
एता वाचो मनुष्याणाम्	२	४९	८
एताश्चान्याश्च राजानः	७	३९	६
एताश्चान्याश्च सुहृदाम्	२	१७	१२
एते कथा बहुविधाः	७	४३	३
एते च निहता भूमौ	३	२१	१३

	का०	स०	श्लो०
एते च बलवन्तौ वा	६	५६	४
एते चान्ये च बहवः	२	१४	४१
एते चान्ये च बहवः	४	३९	३८
एते चान्ये च बहवः	७	२२	२८
एते चाप्यभिषेकार्द्रा	२	११९	५
एते ते शैलराजस्य	१	३५	२१
एते दुष्प्रसहा राजन्	६	२८	३
एते दुष्प्रसहा वीराः	६	२६	४६
एते देवगणाः सार्थम्	६	६८	१५
एते दोषा मम भ्रातुः	६	८७	२५
एते द्विजर्षभा सर्वे	७	७४	५
एते द्विजाः प्रयान्त्वग्रे	१	६९	५
एते द्विजाः महामात्यैः	२	६७	४
एतेन कारणेनाहम्	७	२१	७
एतेन चात्यद्भुतदर्शनानि	६	५९	१३०
एतेन त्वां नरेन्द्रोऽयम्	२	१८	३९
एतेन देवा युधि दानवश्च	६	६१	१०
एतेन शतशो देवाः	६	७१	३३
एतेन साह्यं तु महत्	६	२७	१२
एतेन हि नृशंसेन	३	४३	३९
एते नागाः काद्रवेयाः	६	५०	४९
एतेनाराधितो ब्रह्मा	६	७१	३१
एते प्रयच्छ संहृष्टः	२	११३	१२
एते बहुविधाः शोका	२	१०५	३५
एते महाबला वीराः	६	७२	३
एते मृगगणा भान्ति	२	९३	१२
एते वयमनुप्राप्ताः	६	४	९७
एते वानरामुख्याश्च	४	३८	२७
एते वृक्षाः प्रकाशन्ते	४	१३	२४
एते वो गणिता वासाः	७	६४	१४
एते सर्वेऽब्रुवंस्तात	७	१९	६
एते सर्वे समागम्य	६	११७	४
एते सुग्रीवसचिवाः	६	२८	५
एते सुरगणाः सर्वे	१	७६	१८
एतेषामाश्रयाः सर्वे	४	४०	२९
एतेषां कपिमुख्यानाम्	४	३३	१२
एतेषां गिरिदुर्गेषु	४	४०	३२

	का०	स०	श्लो०
एतेषु जीवितं मह्यम्	७	४४	१२
एते सेन्द्रास्त्रयो लोकाः	६	११६	२६
एते हि कपयः स्निग्धा	४	८	३७
एते हि फुल्लनयनाः	६	४६	४१
एते हि सचिवा राजन्	६	२५	४६
एते हि समुपसिना	३	१६	२२
एतैरन्यैश्च बहुभिः	२	२१	३४
एतैरन्यैश्च बहूभिः	४	६३	१
एतैर्निमित्तैरपरैश्च सुभ्रूः	५	२६	६
एतैर्ब्रह्मर्षिनित्यम्	१	७	६
एतैश्चान्यैश्च बहुभिः	१	२२	२२
एतैस्तु बहुभियुक्तम्	२	१	३५
एतैः सर्वैरभिज्ञानैः	६	३२	३
एतौ तौ संप्रकाशेते	२	६७	२४
एतौ दृष्ट्वा कृशौ दीनौ	२	७४	२३
एतौ निषण्णौ संप्रेक्ष्य	१	५१	३
एतौ वनमिदं दुर्गम्	४	२	६
एनं भज विशालाक्षि	३	१८	५
एनं शतसहस्राणि	६	२६	४५
एनमापत्सु कृच्छ्रेषु	६	१०५	२५
एनमाश्रममायान्ति	१	२६	२३
एनां राघव दुर्वृत्ताम्	१	२५	१५
एभिरेव घटैः सर्वैः	२	२२	२७
एभिर्बाहुप्रयुक्तैश्च	३	२०	१५
एभिश्च सचिवैः सार्धम्	२	१०१	१२
एभिः प्रधर्षमाणायां च	५	६३	७
एवं कथयमानं तु	६	१०१	४१
एवं कथयामानस्य	३	११	६८
एवं कुरुष्व सौमित्रौ	२	३१	१७
एवं कुशलवौ नाम्ना	७	६६	६
एवं कृत्वा त्विदं कार्यम्	३	४०	२३
एवं कोटिसहस्रेण	६	२८	३८
एवं गते न संतापम्	७	५१	२७
एवं गुणगणैर्युक्ताः	४	३	३५
एवं गृध्रो हस्तेन	४	५७	११
एवं च त्वं सहस्राभिः	२	८	११
एवं च वचनं चोक्त्वा	६	५१	६

	का०	स०	श्लो०
एवं चेदुपसर्पेताम्	६	८	१८
एवं चैवमकामां त्वाम्	५	२०	६
एवं जपन्तोऽपश्यंस्ते	६	१०७	५०
एवं तज्जनसंबाधम्	२	५	२१
एवं तव हतो भर्ता	६	३१	३६
एवं तस्य ब्रुवाणस्य	६	६५	४६
एवं तु क्रुद्धया राजा	२	६२	१
एवं तु गत्वा हनुमान्महात्मा	५	१४	५२
एवं तु तौ सुसंक्रुद्धौ	६	१०७	२८
एवं तु वदतां तेषाम्	५	६४	२३
एव ते ज्ञातिपक्षस्य	२	८	३४
एवं ते भाषमाणस्य	२	७६	१५
एवं ते राक्षसा राम	७	८	२१
एवं ते हरिशार्दूलाः	६	४	३७
एवं तेषां निवसताम्	७	३६	२७
एवं तेषां ययौ मासः	७	३६	२६
एवं तैर्वानरैः शूरैः	६	४३	४२
एवं तौ शापमुत्सृज्य	७	५३	२३
एवं त्वपूर्वदेहस्य	७	५७	६
एवं त्वयि न तच्चित्रम्	४	३६	४
एवं त्वां पापकर्माणम्	५	२१	१४
एवं दत्तास्मि रामाय	२	११८	५४
एवं दत्त्वा प्रहृष्टोऽभूत्	१	१४	४६
एवं दत्त्वा वरांस्तेभ्यः	७	१८	३४
एवं दोषो महानत्र	६	१८	३१
एवं नानाप्रहरणैः	७	२२	१५
एवं निरयगामी त्वम्	७	१५	२५
एवं निःसंशयान्कृत्वा	४	४१	२७
एवं पन्नगकन्याश्च	७	२४	३
एवं पर्वतसंबाधम्	१	३६	२२
एवं पुरुषमुक्तस्तु	६	१०४	१०
एवं पृष्टस्तु कैकेय्या	२	७२	७
एवं पूर्वगतो मार्गः	२	१०५	३०
एवं प्रकारा बहवः	६	१०६	३३
एवं प्रचोदितो राजा	२	१४	११
एवं प्रजा यदि त्वेष	६	६१	२०
एवं प्रभावो लवणः	७	६१	२१

	का०	स०	श्लो०
एवं प्रभाषमाणेषु	७	९४	१५
एवं प्रव्राजितश्चैव	२	९	३३
एवं प्रविश्येव नृपस्तदानीम्	७	५४	१९
एवं प्रवृत्ते सङ्ग्रामे	६	९३	१०
एवं प्रायाणि युद्धानि	६	४६	३१
एवं बलिभ्यो बलिनः	७	३६	२२
एवं बहुविधं तं सा	२	२९	२२
एवं बहुविधं दीनम्	२	५२	५९
एवं बहुविधं दुःखम्	५	१३	४६
एवं बहुविधं वाच्यः	५	६८	२
एवं बहुविधां वाचः	७	४३	२०
एवं बहुविधा वाचः	७	९७	२२
एवं बहुविधां चिन्ताम्	५	३१	१
एवं बहुविधैर्वाक्यैः	७	७३	१९
एवं ब्रुवति काकुत्स्थे	१	२८	३
एवं ब्रुवति काकुत्स्थे	२	३६	१०
एवं ब्रुवति काकुत्स्थे	७	३६	१०
एवं ब्रुवति रामे तु	७	५८	१
एवं ब्रुवत्यां सीतायाम्	३	४७	२५
एवं ब्रुवत्यां सीतायाम्	३	४८	१
एवं ब्रुवन्तं धर्मात्मा	४	४	३०
एवं ब्रुवन्तं पितरम्	२	३८	१२
एवं ब्रुवन्तं राजानम्	१	५२	१८
एवं ब्रुवाणं काकुत्स्थ	७	७२	१३
एवं ब्रुवाणं काकुत्स्थम्	३	४३	९
एवं ब्रुवाणं जनकः	१	७१	१
एवं ब्रुवाणं तं शूरम्	६	६६	२८
एवं ब्रुवाणं तमृषिम्	२	११७	१४
एवं ब्रुवाणं भरतः	२	११२	२०
एवं ब्रुवाणं रामस्तु	७	४०	२०
एवं ब्रुवाणं संरब्धम्	६	३६	१४
एवं ब्रुवाणं संरब्धम्	६	६०	७१
एवं ब्रुवाणं सुहृदम्	२	६९	७१
एवं ब्रुवाणं सौमित्रिम्	३	५९	२१
एवं ब्रुवाणं सौमित्रिम्	४	४	२५
एवं ब्रुवाणमरजाम्	७	८०	१३
एवं ब्रुवाणां तां सीता	६	३४	५

	का०	स०	श्लो०
एवं ब्रुवाणे काकुत्स्थे	७	९८	११
एवं ब्रुवाणे रामे तु	१	२६	१३
एवं ब्रुवाणौ काकुत्स्थौ	१	३०	३
एवं ब्रुवाणः सौमित्रिः	२	३१	६
एवं भवतु भद्रं ते	१	४६	५
एवं भवतु भद्रं वः	१	७२	११
एवं भवतु भद्रं वः	७	९५	१०
एवं भवतु यास्यन्ति	२	१९	१३
एवं भवतु भविष्यथेत्युक्त्वा	७	५	१५
एवं मन्ये गुणवताम्	२	३९	११
एवं मया मयानघ	५	६५	१९
एवं मयि च ते भक्तिः	२	३१	१६
एवं महेश्वरेणैव	७	१६	४५
एवं मे निश्चता बुद्धिः	३	४०	७
एवं राजर्षयः सर्वे	२	१०७	१४
एवं राम प्रयुक्तास्तु	४	५७	१५
एवं राम समुद्भूतः	७	३०	५४
एवं रुद्राद्वरं लब्ध्वा	७	६१	१०
एवं लक्ष्मणमुक्त्वा तु	३	१५	३०
एवं लब्धवरा सर्वे	२	१०७	१४
एवं लालप्यमानायाम्	६	३२	३४
एवं वक्ष्यति राजन्	५	६४	१९
एवंवदन्तस्ते सोढुम्	२	४०	२७
एवं वदन्त्यो रुरुदुः	६	११०	१७
एवं वयं न मृष्यामः	३	६	१८
एवं वर्षसहस्राणि	७	१०	५
एवं वर्षसहस्राणि	७	१०	११
एवं वर्षसहस्राणि	७	७८	६
एवं वर्षसहस्राणि	७	९९	१९
एवं वर्षसहस्राणि	७	१०२	१६
एवं विक्रोशतां तेषाम्	२	४५	३२
एवं विचित्राः पतगाः	४	१	२६
एवं विज्ञाप्यमानं तम्	५	६३	१३
एवं विदेहाधिपतिः	१	६८	१३
एवंविधं कथयताम्	२	६	२५
एवं विधानं लङ्कायाम्	६	३६	२१
एवं विधानि कर्माणि	७	३६	३०

	का०	स०	श्लो०
एवं विधाश्च प्रवराः	२	११८	१२
एवंविधो यस्य दूतः	४	३	३४
एवं विनिश्चयं कृत्वा	७	६५	१६
एवं विभीषणेनोक्तम्	४	१६	३२
एवं विलपतस्तस्य	६	५	२२
एवं विलपतीं ताराम्	४	२५	४८
एवं विलपमानं तम्	२	७६	१०
एवं विलपमानं तम्	६	५०	२०
एवं विलपमानस्य	२	७५	६४
एवं विलपमानस्य	६	६६	१
एवं विलपमानां ताम्	२	७५	१६
एवं विश्वसिता सीता	५	३५	८३
एवं विसृज्य तान्सर्वान्	१	१८	७
एवं वीर्यो महातेजाः	१	२१	२०
एवं शापं मयि न्यस्य	२	६४	५७
एवं श्रुत्वा ततो हृष्टः	४	३७	३७
एवं श्रुत्वा स संवादम्	२	३१	१
एवं संचिन्त्य विप्रेन्द्रः	७	२१	१
एवं संचोदिताः सर्वे	४	४५	६
एवं संचोदिताः सर्वे	४	४५	११
एवं संदिश्य काकुत्स्थः	७	७५	५
एवं संदिश्य तां वाणीम्	७	८५	२२
एवं संबोधितस्तेन	४	१	१२४
एवं संभाषमाणं तम्	२	७६	१४
एवं संभाषमाणस्य	२	८५	१४
एवं संमन्त्रयन्नेव	६	३८	६
एव संमन्त्र्य बलिनः	७	६	४५
एवं संमानितश्चैते	६	१२२	७
एवं स कालः सुमहान्	७	६६	१०
एवं स तेनाभिहतः	७	१५	३३
एवं स देवप्रवरः	१	११	११
एवं स न्यवसत्तत्र	१	१०	३३
एवं स मन्त्रिवृद्धैश्च	६	३४	२३
एवं समधिना युक्तः	२	६१	२२
एवं स राजा तं शापम्	७	५३	२४
एवं स राजा तं शापम्	७	६५	३७
एवं स राजा तद्राज्यम्	७	७६	१६

	का०	स०	श्लो०
एवं स राजा व्यसनाभिपन्नः	२	६४	६०
एवं स राजा समुहान्	७	६७	२२
एवं स रावणः प्राप्तः	७	३३	२१
एवं स विलपंस्तस्मिन्	२	६६	१८
एवं स विलपन्रामः	३	६१	२७
एवं सीतां तथा दृष्ट्वा	५	१५	५४
एवं सुविहितो यज्ञो	७	६२	६
एवं स्म दुःखिता सर्वाः	७	२४	१६
एवं हि कथयन्त्यास्तु	२	६२	१६
एवं हि भविता राट्रम्	२	१४	५५
एवं हि भवेत्स्वस्ति	५	२१	२२
एवमङ्गाधिपेनैव	१	६	१८
एवमप्यनितिद्रस्तु	६	६०	४६
एवमप्रान्तवद्वीर	७	३४	३८
एवमस्तु गमिष्यामि	२	१६	२
एवमस्त्विति तं चाह	७	३०	१६
एवमस्त्विति तं प्रोच्य	७	३६	५६
एवमस्त्रविदां श्रेष्ठः	५	३८	४१
एवमस्मात्स्वकां नारीम्	२	२६	१६
एवमस्माभिरुक्तेन	२	८६	६
एवमस्मि तदा मुक्तः	३	३८	२२
एवमस्मि तदा मुक्तः	३	३६	१
एवमाख्यातवान्वाली	४	३५	१८
एवमाज्ञापय क्षिप्रम्	६	३	३३
एवमादि नरश्रेष्ठः	४	३०	१३
एवमादिविलापार्तम्	६	६२	१६
एवमार्धषितः शूरः	३	२२	३१
एवमाधावमानं तु	७	३५	४६
एवमार्तप्रलापांस्तान्	२	४५	१७
एवमार्ता सपत्न्यस्ताः	२	१०४	१६
एवमार्ताः पतिं दृष्ट्वा	६	११०	११
एवमाश्वासयन्नेव	२	७५	५८
एवमाश्वास्य वैदेहीम्	५	३६	४७
एवमाश्वास्य वैदेहीम्	५	५६	२२
एवमास्ते महाबाहुः	७	३८	१
एवमास्ते महाभागा	५	५६	३२

	का०	स०	श्लो०
एवमुक्तं तदा रक्षः	६	१६	८
एवमुक्तं तु तद्रक्षः	६	३१	४२
एवमुक्तः कपिश्रेष्ठः	५	१	१२३
एवमुक्तः कबन्धस्तु	७	५२	१७
एवमुक्तः स तु ततः	२	११३	८
एवमुक्तः स तेजस्वी	४	१०	३१
एवमुक्तः स धर्मात्मा	३	६६	४
एवमुक्तः स रामेण	६	६१	२४
एवमुक्तः स शक्रेण	७	२७	१४
एवमुक्तः स सोहार्दात्	३	६१	१६
एवमुक्तः सुमन्त्रस्तु	२	८२	२३
एवमुक्तः सुमन्त्रेण	७	४६	६
एवमुक्तः सुरपति	१	३६	१६
एवमुक्तः सुरसया	५	१४	५
एवमुक्तः सुरैः सर्वैः	१	१५	१२
एवमुक्तः सुरैः सर्वैः	७	५७	१४
एवमुक्तवतस्तस्य	३	४६	५
एवमुक्तवतो वाक्यम्	६	६५	६
एवमुक्तस्ततस्तेन	७	१६	४३
एवमुक्तस्ततोऽहम्	४	५६	१६
एवमुक्तस्ततोदेवैः	१	४५	२२
एवमुक्तस्ततो रामः	६	१२१	१६
एवमुक्तस्तथा तेन	१	५२	२०
एवममुक्तयेत्युक्त्वा	३	८	१७
एचमुक्तयेत्युक्त्वा	६	६७	६
एवमुक्तास्तदा ब्रह्मा	७	१०	१७
एवमुक्तस्तदामात्यैः	७	१६	३४
एवममुक्तस्तया राजा	६	१३	६
एवममुक्तस्तदा रामः	७	१२	१७
एवममुक्तस्तया तत्र	७	१७	२६
एवमुक्तस्तु काकुत्स्थम्	६	१२१	८
एवमुक्तस्तु काकुत्स्थः	६	१२१	४
एवमुक्तस्तु कुपितः	३	३६	१७
एवमुक्तस्तु कैकेय्या	२	१३	४
एवमुक्तस्तु जनकः	१	६६	७
एवमुक्तस्तु तेजस्वी	४	८	२०
एवमुक्तस्तु तेनायम्	७	५८	४

	का०	स०	श्लो०
एवमुक्तस्तु देवेन	१	५५	१५
एवमुक्तस्तु देवेन	७	५६	११
एवमुक्तस्तु धर्मात्मा	६	१६	३०
एवमुक्तस्तु धर्मात्मा	७	१०	२१
एवमुक्तस्तु धर्मात्मा	७	२२	४६
एवमुक्तस्तु धूम्राक्षः	६	५१	२०
एवमुक्तस्तु पुत्रेण	३	३	२४
एवमुक्तस्तु ब्रह्मर्षिः	१	५४	६
एवमुक्तस्तु भगवान्	१	५३	२२
एवमुक्तस्तु भद्रेण	७	४३	६
एवमुक्तस्तु भरतः	२	८५	१
एवमुक्तस्तु मुनिना	३	१३	६
एवमुक्तस्तु मुनिना	७	८२	१४
एवमुक्तस्तु राक्षस्या	३	१७	१४
एवमुक्तस्तु रामेण	१	३५	५
एवमुक्तस्तु रामेण	२	३१	१८
एवमुक्तस्तु रामेण	१	६6	१६
एवमुक्तस्तु रामेण	३	७	१६
एवमुक्तस्तु रामेण	३	१५	६
एवमुक्तस्तु रामेण	३	१५	२०
एवमुक्तस्तु रामेण	३	२४	१५
एवमुक्तस्तु रामेण	३	२६	१५
एवमुक्तस्तु रामेण	३	६४	३२
एवमुक्तस्तु रामेण	४	६	२२
एवमुक्तस्तु रामेण	४	१८	४४
एवमुक्तस्तु रामेण	६	१८	१६
एवमुक्तस्तु रामेण	६	११४	१८
एवमुक्तस्तु रामेण	६	११४	३१
एवमुक्तस्तु रामेण	६	१२१	२३
एवमुक्तस्तु रामेण	६	१२२	१०
एवमुक्तस्तु रामेण	७	५५	२
एवमुक्तस्तु रामेण	७	६३	१
एवमुक्तस्तु रामेण	७	६४	१३
एवमुक्तस्तु लङ्केशः	७	१६	८०
एवमुक्तस्तु वचनम्	२	२४	१५
एवमुक्तस्तु वचनम्	२	५४	२३
एवमुक्तस्तु वीरेण	३	६१	२५

	का०	स०	श्लो०
एवमुक्तस्तु वैदेह्या	३	५९	२०
एवमुक्तस्तु वैदेह्या	५	३५	५
एवमुक्तस्तु वैदेह्या	६	११३	२१
एवमुक्तस्तु वैदेह्या	६	११६	२०
एवमुक्तस्तु संहृष्टः	२	१६	१४
एवमुक्तस्तु सुग्रीवः	४	६	१४
एवमुक्तस्तु सुग्रीवः	४	७	१
एवमुक्तस्तु सुग्रीवः	४	८	४५
एवमुक्तस्तु सुग्रीवः	४	१६	२१
एवमुक्तस्तु सुग्रीवः	४	३७	१
एवमुक्तस्तु सुग्रीवः	४	४०	१६
एवमुक्तस्तु सुग्रीवः	५	६३	१५
एवमुक्तस्तु सौमित्रिः	३	१८	८
एवमुक्तस्तु सौमित्रिः	३	५९	५
एवमुक्तस्तु सौमित्रिः	४	३	३६
एवमुक्तस्तु सौमित्रिः	६	१९	२६
एवमुक्तस्तु हनुमान्	५	६७	१
एवमुक्तस्तु हनुमान्	६	११३	४५
एवमुक्तस्तु हनुमान्	७	१०८	३१
एवमुक्ताः सुराः सर्वे	१	१६	३
एवमुक्ताः सुराः सर्वे	१	६०	३०
एवमुक्ताः सुसंक्रुद्धाः	६	८२	५
एवमुक्ताः स्त्रियः सर्वाः	२	३४	१२
एवमुक्ता तदा देव्या	२	९	१०
एवमुक्ता तु कैकेयी	२	७	१७
एवमुक्ता तु कैकेयी	२	९	१
एवमुक्ता तु कैकेयी	२	१९	१२
एवमुक्ता तु कैकेयी	२	७२	४७
एवमुक्ता तु रामेण	२	२४	१४
एवमुक्ता तु रामेण	२	२४	३१
एवमुक्ता तु वैदेही	२	२७	१
एवमुक्ता तु वैदेही	३	४८	२०
एवमुक्ता तु वैदेही	६	११४	११
एवमुक्ता तु वैदेही	६	११६	१
एवमुक्ता तु सरमा	६	३४	१९
एवमुक्ता तु सा कन्या	७	९	१९
एवमुक्ता तु सा कन्या	७	०	२८

	का०	स०	श्लो०
एवमुक्ता तु सा चिन्ताम्	२	२९	२३
एवमुक्ता तु सा देवी	५	१	१४१
एवमुक्ता तु सा देवी	६	११३	१४
एवमुक्ता तु सा देवी	७	२	३२
एवमुक्ता तु सा देव्या	२	९	४
एवमुक्ता तु सा सीता	२	११८	२६
एवमुक्ता तु सुरभिः	२	७४	२१
एवमुक्ता प्रियं पुत्रम्	२	२४	१८
एवमुक्ताऽब्रवीद्रम्भा	७	२६	२८
एवमुक्ता महात्मानः	६	१२८	५१
एवमुक्ता महाभागैः	३	७४	१३
एवमुक्तास्ततस्तेन	७	१५	२६
एवमुक्तास्ततः सैन्याः	२	९३	२६
एवमुक्तास्त्रिजटया	५	२७	७
एवमुक्तास्तु ते दूताः	२	७०	११
एवमुक्तास्तु ते सर्वे	६	४६	२५
एवमुक्तास्तु रामेण	६	१२२	१८
एवमुक्तास्तु शक्रेण	७	२७	५
एवमुक्ता हनुमता	५	१	१४९
एवमुक्ता हनुमता	५	३८	११
एवमुक्ता हनुमता	६	११३	१६
एवमुक्ता हनुमता	६	११३	४७
एवमुक्ते तदा राम	७	१०	१८
एवमुक्ते तयोर्वाक्ये	१	३१	५
एवमुक्ते तु रामेण	७	४३	७
एवमुक्ते तु वचने	१	७०	५
एवमुक्ते तु वचसि	६	४२	१०
एवमुक्ते तु शरेण	७	६३	९
एवमुक्तेन रामेण	२	१११	१२
एवमुक्तोऽथ वैदेह्याः	६	१२३	२६
एवमुक्तोऽशुमान्सम्यक्	१	४१	५
एवमुक्तो गृहीत्वा तु	७	११	४४
एवमुक्तो ततस्तुष्टा	४	६६	२०
एवमुक्तो दशग्रीवः	३	३१	३
एवमुक्तो दशग्रीवः	३	३१	५०
एवमुक्तो दशग्रीवः	७	११	४७
एवमुक्तो धनुर्भीमम्	६	८८	१७

	का०	स०	श्लो०
एवमुक्तो धिगित्येव	२	३६	१७
एवमुक्तो नरपतिः	१	१४	५०७
एवमुक्तो नरव्याघ्रः	३	५	३२
एवमुक्तो नृपतिना	२	२४	२७
एवमुक्तो भरद्वाजम्	२	९०	१४
एवमुक्तो भरद्वाजः	१	२	७
एवमुक्तो महातेजाः	१	२९	३०
एवमुक्तो महातेजाः	१	५६	२२
एवमुक्तो महातेजाः	३	३१	३९
एवमुक्तो महातेजाः	६	५९	५९
एवमुक्तो महातेजाः	६	८७	१०
एवमुक्तो महातेजाः	६	११८	१२
एवमुक्तो महाप्राज्ञः	२	११२	११
एवमुक्तो महाबाहुः	७	१५	३
एवमुक्तो महावृक्षम्	७	६९	८
एवमुक्तो महेन्द्रेण	६	१२०	३
एवमुक्तो मुनिवरः	१	७५	३८
एवमुक्तो वशिष्ठेन	१	५६	१
एवमुक्तो वसिष्ठेन	२	११३	१३
एवमुक्तो सुतसया	५	५८	२४
एवमुक्तो हनुमता	५	६६	१
एवमुक्तो हनुमता	५	११४	५
एवमुक्तो हनुमता	६	११४	५
एवमुक्तो हनुमता	६	१२५	४०
एवमुक्तौ ततौ वीरौ	६	१९	३७
एवमुक्तौ तु तौ वीरौ	३	७२	१
एवमुक्त्वा कुशो राम	१	३४	४
एवमुक्त्वा खर क्रुद्धः	३	२६	२६
एवमुक्त्वा च काकुत्स्थम्	७	६४	१
एवमुक्त्ता च तेनाशु	२	७८	१२
एवमुक्त्वा च सुग्रीवम्	७	४०	९
एवमुक्त्वा चितां दीप्ताम्	३	६८	३१
एवमुक्त्वा ततस्तस्य	७	४६	३३
एवमुक्त्वा ततो गत्वा	६	३४	१४
एवमुक्त्वा ततो राम	७	१६	२५
एवमुक्त्वा ततो रामम्	३	३०	१६
एवमुक्त्वा ततो रामः	६	५९	३२

	का०	स०	श्लो०
एवमुक्त्वा तदा रामम्	६	५०	५५
एवमुक्त्वा तमामन्त्र्य	७	३६	२५
एवमुक्त्वा तु काकुत्स्थः	७	४२	३६
एवमुक्त्वा तु काकुत्स्थः	७	४५	२४
एवमुक्त्वा तु तं रामम्	६	१७	३०
एवमुक्त्वा तु तद्राक्षः	७	६५	१७
एवमुक्त्वा तु तान्दूतान्	३	७७	१४
एवमुक्त्वा तु तान्सर्वान्	६	४६	१७
एवमुक्त्वा तु तां कन्याम्	७	८०	१६
एवमुक्त्वा तु दिव्येन	२	६४	५०
एवमुक्त्वा धर्मज्ञौ	६	४५	१३
एवमुक्त्वा तु धर्मात्मा	२	८२	२१
एवमुक्त्वा तु पुरुषम्	३	४२	१
एवमुक्त्वा तु भर्तारम्	६	५७	१७
एवमुक्त्वा तु मां तत्र	४	१०	२६
एवमुक्त्वा तु राजानम्	२	५२	३०
वमुक्त्वा तु लङ्केशः	७	१३	४०
एवमुक्त्वा तु वचनम्	२	३९	८
एवमुक्त्वा तु वचनम्	६	८५	२८
एवमुक्त्वा तु विबुधाः	७	५७	१७
एवमुक्त्वा तु विरते	२	१०६	१
एवमुक्त्वा तु वैदेही	५	२५	२
एवमुक्त्वा तु वैदेही	६	३२	६
एवमुक्त्वा तु वैदेही	६	११६	२७
एवमुक्त्वा तु वैदेहीम्	५	२२	७
एवमुक्त्वा तु संक्रुद्धः	६	५१	१८
एवमुक्त्वा संरब्धम्	६	६४	१९
एवमुक्त्वा तु सव्रीडौ	६	२९	१५
एवमुक्त्वा तु सुग्रीवम्	४	११	८४
एवमुक्त्वा तु सुग्रीवम्	४	२५	१९
एवमुक्त्वा तु सुग्रीवः	४	११	७३
एवमुक्त्वा तु सौमित्रिम्	२	४६	११
एवमुक्त्वा तु सौमित्रिम्	६	८७	१
एवमुक्त्वा तु हनुमान्	४	३	५४
एवमुक्त्वाथ भरतम्	२	१०३	१४
एवमुक्त्वा ददौ तेभ्यः	७	३९	२५
एवमुक्त्वा दधिमुखः	५	६२	३४

	का०	स०	श्लो०
एवमुक्त्वा दशग्रीवः	७	२०	२६
एवमुक्त्वा दुहितरम्	७	५८	२४
एवमुक्त्वा धनुर्मध्ये	१	२६	६
एवमुक्त्वा धनुष्पाणिः	६	२१	२५
एवमुक्त्वार्घ्यमादाय	१	७४	२३
एवमुक्त्वा नृपस्तत्र	७	५४	१८
एवमुक्त्वा पतद्भ्रातुः	२	११२	१४
एवमुक्त्वा पदुद्राव	४	१६	२०
एवमुक्त्वा प्रविष्टा सा	३	१७	३३
एवमुक्त्वा फलैर्मूलैः	३	१	२२
एवमुक्त्वा फलैर्मूलैः	३	१२	३१
एवमुक्त्वा महाकायः	५	४३	१२
एवमुक्त्वा महातेजाः	१	३४	१६
एवमुक्त्वा महातेजाः	१	४६	७
एवमुक्त्वा महातेजाः	१	४८	३३
एवमुक्त्वा महातेजाः	१	५५	२६
एवमुक्त्वा महातेजाः	१	५६	६
एवमुक्त्वा महातेजाः	१	६१	४
एवमुक्त्वा महातेजाः	१	६४	१४
एवमुक्त्वा महातेजाः	१	६५	३०
एवमुक्त्वा महातेजाः	३	१२	३७
एवमुक्त्वा महातेजाः	६	३०	१६
एवमुक्त्वा महातेजाः	६	६५	१५
एवमुक्त्वा महातेजाः	६	१२५	२५
एवमुक्त्वा महाबाहुः	२	६८	१४
एवमुक्त्वा महाबाहुः	२	१०१	१४
एवमुक्त्वा महाबाहुः	३	१२	२४
एवमुक्त्वा महाबाहुः	६	५६	८७
एवमुक्त्वा महाराजः	२	१०१	२४
एवमुक्त्वा मुनिवरः	१	३१	४
एवमुक्त्वा मुनिश्रेष्ठम्	१	६५	३६
एवमुक्त्वा मुनिश्रेष्ठम्	४	६२	१
एवमुक्त्वा रघुश्रेष्ठम्	६	१८	२०
एवमुक्त्वा रथस्थस्य	६	१०४	२६
एवमुक्त्वा वचः सौम्यम्	१	७२	१४
एवमुक्त्वा शितैर्बाणैः	६	१००	५७
एवमुक्त्वा शुभं वाक्यम्	३	५१	३३
एवमुक्त्वा स विप्रर्षिः	७	३०	४५
एवमुक्त्वा सहस्राक्षः	६	१२०	२२
एवमुक्त्वा सुतं पूरुम्	७	५६	१३
एवमुक्त्वा सुमित्रां ताम्	२	७५	७
एवमुक्त्वासुरान्सर्वान्	१	३६	२३
एवमुक्त्वोदधिर्नष्टः	६	२२	४३
एवमुत्सृज्य सुश्रोणि	७	५६	१८
एवमेकान्तसंपृक्तौ	४	७	२४
एवमेकायनगताः	४	२	६
एवमेतत्कपिश्रेष्ठः	७	४०	२१
एवमेतत्पुरावृत्तम्	३	६	२३
एवमेतत्पुरावृत्तम्	६	१२८	११८
एवमेतत्पुरावृत्तम्	७	३४	४५
एवमेतद्विचेतव्यम्	४	४५	२
एवमेतन्नरश्रेष्ठ	७	५२	१८
एवमेतन्मया दृष्टम्	२	६६	१७
एवमेतन्महाभाग	७	६	२
एवमेते हताः शूराः	५	६३	१२
एवमेतैश्च संयुक्तः	६	२२	३६
एवमेव नरश्रेष्ठ	७	८७	२
एवमेव प्रहस्तस्य	६	५८	४२
एवमेव मनुष्याणाम्	२	१०८	६
एवमेव महावीर्यः	६	६६	२
एवमेषा महाभागा	७	१७	३६
एष आशांसते लङ्काम्	६	२८	१७
एष कारण्डवः पक्षी	४	१	६३
एष केतुः परं संख्ये	६	६०	१६
एष क्रोशति नत्यूहः	२	५६	६
एष च प्रकृतिस्थोऽहम्	४	७	१८
एष चूडामणिर्दिव्यः	५	४०	७
एष चूडामणिः श्रीमान्	५	६५	२३
एष चैव मृगः श्रीमान्	३	४३	३७
एष जेष्यति काकुत्स्थौ	६	५५	४
एष ज्ञातिसहस्रेण	२	८४	१२
एष तं नरशार्दूलः	६	८४	१८
एष तस्मात्प्रणश्यामि	७	२२	४८
एष तारात्मजः श्रीमान्	४	२२	११

	का०	स०	श्लो०
एष तूशनसः मुक्तः	७	५९	२१
एष ते नृप शापस्य	७	५५	१
एष ते यद्यभिप्रायः	६	३४	१३
एष ते राम गङ्गायाः	१	३७	३१
एष ते राम गङ्गायाः	१	४४	२०
एष ते विस्तरो राम	१	३६	२७
एष ते सर्पसंकाशः	६	७१	५६
एष त्वां रामरूपेण	४	२५	४३
एष त्विदानीमेवाहम्	२	७३	२६
एष दत्तवरः शेते	६	१२३	५
एष दत्त्वा च वित्तानि	४	४	१८
एष दर्दुरसंकाशः	६	२६	४१
एष दात्यूहको हृष्टः	४	१	२४
एष दाशरथिः श्रीमान्	६	६२	१४
एष दाशरथी रामः	३	४	२
एष दाशरथी रामः	६	६७	११४
एष देशश्च कालश्च	६	१७	५७
एष दोषो महान्हि स्यात्	५	३०	३६
एष धर्मश्च सुश्रोणि	२	३०	३२
एष धर्मः स्त्रिया नित्यः	२	२४	२८
एष नाम्ना दशग्रीवः	७	२१	६
एष निर्यातितः श्रीमान्	५	४०	८
एष निर्यातितः श्रीमान्	५	६५	२४
एष निर्याम्यहं युद्धम्	६	६५	८
एष नः परमः काम	७	३८	२८
एष पन्था नरव्याघ्र	३	५	३७
एष पन्था महर्षीणाम्	२	११९	२१
एष पर्वतमध्यास्ते	६	२६	३८
एष पर्वतसंकाशः	५	१	२७
एष पस्रवणः शैलः	४	५२	३२
एष पुष्पवहो वायुः	४	१	५३
एष फुल्लाजिनः शैलः	४	२८	९
एष ब्रह्मा च विष्णुश्च	६	१०५	८
एष मह्यं वरं दत्त्वा	२	१८	२२
एष मातुर्वियोगाच्च	७	३५	२२
एष मुष्टिर्महान्बद्धः	४	१६	२०
एष मेघ इवाकाशे	४	१३	१४
एष मे जीवितस्यान्तः	३	४७	९
एष मे दक्षिणो बाहुः	६	५९	५५
एष मे परमः कामः	२	११	२८
एष मे प्रथमः कल्पः	२	५२	६३
एष मे प्रथमः कामः	३	१९	२०
एष मे राम शोकान्तः	४	८	४०
एष यूथपतिर्नेता	४	२७	२६
एष राजन्सहस्राक्षम्	६	२७	१६
एष राजा दशरथः	६	११९	७
एष राम मुनिश्रेष्ठः	१	६५	२९
एष राम शिवः पन्थाः	३	७३	२
एष रामानुजः प्राप्तः	४	३१	३३
एष रावणवीर्येण	६	१०१	१३
एष लोकार्चितः साधुः	३	११	८७
एष वञ्चुलको नाम	३	६९	२३
एष वानरराजेन	६	२६	१७
एष विग्रहवान्धर्मः	१	२१	१०
एष वै तत्र वैदेह्याः	४	१	५६
एष वै सुमहाञ्छ्रीमान्	२	९६	१८
एष शापवशादेव	७	३६	४०
एष शास्ता च गोप्ता च	६	५५	३
एष श्रियं गच्छति राघवोऽद्य	२	१६	४४
एष शैलशिलाभिस्तु	६	३०	११
एष शोकः परित्यक्तः	४	२७	४३
एष सर्वस्वभूतस्तु	६	१	१३
एष सर्वायुधोपेतः	६	१७	७
एष सुप्तेषु जागर्ति	६	१०५	२३
एष सेतुं महोत्साहः	६	२२	४२
एष सेनापतिस्तस्य	६	५८	४
एष स्वभावो नारीणाम्	२	३९	२१
एष हन्ति गजानीकम्	६	९३	२३
एष हि प्रथमो धर्मः	२	१०६	१९
एष ह्यतिबलः सैन्ये	७	२९	१२
एषा एव तनुः पूर्वा	७	६९	२८
एषा गोदावरी सौम्य	३	६४	११
एषा च सुकुमारी च	३	१३	३
एषा ते हृदयं भित्त्वा	६	१००	२९

	का०	स०	श्लो०
एषा देवैः प्रयुक्ता तु	६	९४	३६
एषा धर्मपरिक्लिष्टा	४	२८	७
एषा नः परमा प्रीतिः	७	१०७	१५
एषा प्रसन्नसलिला	४	१	६३
एषा बाणविनिर्भिन्ना	३	३०	३
एषा मया तव नराधिप०	७	८	२८
एषा राम ममोत्पत्तिः	१	३४	१३
एषा रामेण नगरी	२	४७	१७
एषाल्पपुण्या कृपणा	५	२५	१४
एषा वसुमती नाम	१	३२	८
एषा वेदवती नाम	७	१७	३७
एषा वै नियतिः श्रेष्ठ	४	२५	११
एषासि निर्जिता भद्रे	६	११५	२
एषा हि प्रकृतिः स्त्रीणाम्	३	१३	५
एषा ह्यस्य परा प्रीतिः	२	१	३७
एषां कोटिसहस्राणि	६	२८	४
एषां मध्ये स्थितो राजा	६	२७	८
एषां वधार्थं शत्रूणाम्	३	३०	३६
एषेव चान्ये च महाकपीन्द्राः	७	३६	४७
एषैवाशंसते लङ्काम्	६	२६	२३
एषैवाशंसते लङ्काम्	६	२७	४५
एषोऽञ्जलिर्मया बद्धः	४	७१	११
एषोऽत्रिकायो बलवान्	६	७१	३५
एषोऽपि हि महाभागः	२	१११	२१
एषोऽभिगन्ता लङ्कायाम्	६	२८	९
एषोऽस्त्रान्विविधान्वेत्ति	१	२१	११
एषोऽस्थिनिचयस्तस्य	४	११	६६
एषोपमा महाबाहो	२	१०५	१५
एषोपमा महाबाहो	६	१२८	८
एषोऽहिताग्निं महातपाश्च	६	१०९	२३
एषो हि लक्ष्मणो नाम	६	२८	२३
एष्टव्या बहवः पुत्राः	२	१०७	१३
एष्यदस्मादभिप्रायात्	७	८३	१९
एष्यन्ति प्रेषितास्तत्र	४	६२	९१
एहि पश्य शरीराणि	३	६	१६
एहि सिद्धार्थं विजय	२	६८	५
एहीदानीं कृतं यदि	७	२५	१५

	का०	स०	श्लो०
एह्येहीत्यब्रवीद्रामः	६	१०१	४६
ऐकमत्यमुपागम्य	६	६	१२
ऐङ्गुदं बदरैर्मिश्रम्	२	१०३	२९
ऐणेयं मांसमाहृत्य	२	५६	२२
ऐणेयं श्रपयस्वैतत्	२	५६	२५
ऐन्द्रानपि जघानाश्वान्	६	१०२	३०
ऐरावतकुलीनैश्च	१	६	२४
ऐरावतविषाणाग्रैः	५	१०	१६
ऐरावतानैन्द्रशिरान्	२	७०	२३
ऐरावतो निःस्वनमुन्नदन्सः	६	१५	६
ऐरावतं ततो दृष्ट्वा	७	३५	४४
ऐरावतं समारुदः	६	६७	१०८
ऐलधाने नदीं तीर्त्वा	२	७१	३
ऐलः पुरुरवा राजा	७	९०	४
ऐश्वर्यस्य रसज्ञः सन्	२	३३	७
ऐश्वर्यस्य विनाशाय	६	१११	२०
ऐश्वर्यं वा सुविस्तीर्णं	५	३७	३
ऐश्वर्यं च विशालायाम्	५	३८	५५
ऐश्वर्यं पुत्रलाभश्च	६	१२८	११६
ऐश्वर्यं वानराणां च	५	१६	११
ऐषोकं निहतं दृष्ट्वा	६	७१	९०
ऐहलौकिकपारक्यम्	६	६४	९

(ओ)

ओकारोऽथ वषट्कारः	१	६५	२३
ओजस्तेजो बलवताम्	७	५	१९
ओष्ठप्रकारैरपरा	५	२२	११
ओष्ठौ परिलिहञ्शुष्कौ	३	३६	२३
औदार्येणावगच्छामि	३	१२	२३
औदासं दमयन्तीव	५	२४	१२
औदुम्बरीं वृसीमन्यः	१	४	२५
औपवाह्यस्य नागस्य	२	६९	१२
औपवाह्यं रथं युक्त्वा	२	३९	१०
औरसस्तस्य पुत्रोऽहम्	६	२२	४८
औरस्यानपि पुत्रान्हि	२	२६	३६
औषधीर्नावगच्छामि	६	१०१	४०
औषधीं च सुसिद्धार्थाम्	२	२५	३८
औष्ण्यं तथा विक्रमं च	३	४०	१३

	का०	स०	श्लो०
(क)			
क कस्य पुरुषो बन्धुः	२	१०८	३
कः कृष्णसर्पमासीनम्	३	१६	३
कः क्षत्रियकुले जातः	४	१७	२७
क इदानीं महातेजाः	४	६४	१५
क एतच्छ्रद्धेच्छ्रुत्वा	२	२४	४
क एष सुमहाकायः	५	५८	२
क एषां पूर्वको ब्रह्मन्	७	४	६
ककुभः ककुभोरूं तां	३	६०	१५
कक्षान्तरस्थितं क्षिप्रम्	८	४२	२०
कक्ष्यां द्वितीयामासाद्य	२	३	१४
कङ्कगृध्रबकानां च	६	१०४	११
कङ्कगोमायुगृध्राश्च	३	२३	१०
कङ्कपत्रपरिच्छन्नाः	४	८	२३
कच्चिच्च लक्ष्मणः शूरः	५	३६	२६
कच्चिच्चैत्यशतैर्जुष्टः	२	१००	४३
कच्चिज्ज्ञानपदो विद्वान्	२	१००	३५
कच्चिज्जीवति वेदेही	३	५४	६
कच्चित्क्षेमं नु देवर्षे	८	२१	४
कच्चित्ते कुशलं राजन्	१	५२	७
कच्चित्ते कुशलं राजन्	३	३५	४१
कच्चित्ते दयिताः सर्वे	२	१००	४७
कच्चित्ते नियमाः प्राप्ताः	३	७४	६
कच्चित्ते निर्जिता विघ्ना	३	७४	८
कच्चित्ते परुषं किंचित्	२	१८	१७
कच्चित्ते ब्राह्मणः शर्म	२	१००	६४
कच्चित्ते सफला वेदाः	२	१००	७२
कच्चित्ते संभृता भृत्याः	१	५२	८
कच्चित्त्वा नावजानन्ति	२	१००	२८
कच्चित्स कुशली राजा	२	७०	७
कच्चित्स युक्तो भरतः	६	१२४	३
कच्चित्सर्वेऽनुरक्तास्त्वाम्	२	१००	३४
कच्चित्सहस्रैर्मूर्खाणामू	२	१००	२२
कच्चित्स कुशलं राजन्	३	३१	३८
कच्चित्सुखं नदीतीरे	२	८६	५
कच्चित्सुमित्रा धर्मज्ञा	२	७०	६
कच्चित्सौम्य न ते राज्यम्	२	१००	७
कच्चित्स्त्रियः सान्त्वयसे	२	१००	४६

	का०	स०	श्लो०
कच्चित्स्वादुकृतं भोज्यम्	२	१००	७५
कच्चिदक्षौहिणीं भीमाम्	५	३६	२४
कच्चिदग्निषु ते युक्तः	२	१००	१२
कच्चिदत्र सुखारात्रिः	२	६२	३
कच्चिदर्थं च कामं च	२	१००	६३
कच्चिदर्थं विनिश्चित्य	२	१००	१६
कच्चिदर्थेन वा धर्मम्	२	१००	६२
कच्चिदष्टादशान्येषु	३	१००	३६
कच्चिदात्मसमाः शूराः	२	१००	१५
कच्चिदार्योऽपि शुद्धात्मा	२	१००	५६
कच्चिदाशास्ति देवानाम्	५	३६	१६
कच्चिदेषैव ते बुद्धिः	२	१००	७३
कच्चिद् गुरुंश्च वृद्धाश्च	२	१००	६१
कच्चिद्दर्शयसे नित्यम्	२	१००	५१
कच्चिद्दशरथो राजा	२	१००	८
कच्चिद्दुर्गाणि सर्वाणि	२	१००	५३
कच्चिद्वान्धितृन्भृत्यान्	२	१००	१३
कच्चिद्धृष्टश्च शूरश्च	२	१००	३०
कच्चिद्बलस्य भक्तं च	२	१००	३२
कच्चिद्बलेषु कोशेषु	१	५२	६
कच्चिद्व्ययपास्तानहितान्	२	१००	३७
कच्चिद्विनयसंपन्नः	२	१००	११
कच्चिद्वृद्धांश्च बालांश्च	२	१००	६०
कच्चिन्न किंचिद्व्रते	२	१८	१४
कच्चिन्न खलु कापेयी	६	१२७	२३
कच्चिन्न चानुदृश्यन्ते	६	१२७	२४
कच्चिन्न तर्कैर्युक्त्या वा	२	१००	२१
कच्चिन्न तद्हेमसमानवर्णम्	५	३६	२८
कच्चिन्न तस्यापापस्य	२	६०	१३
कच्चिन्न दीनः संभ्रान्तः	५	३६	१६
कच्चिन्न दुष्टो व्रजसि	२	८५	७
कच्चिन्न परदारान्वा	२	७२	४५
कच्चिन्न ब्राह्मणधनम्	२	७२	४४
कच्चिन्न लक्ष्मणे पुत्र	२	८७	१२
कच्चिन्न लोकायतिकान्	२	१००	३८
कच्चिन्न विगतस्नेहः	५	३६	२५
कच्चिन्न व्यथते रामः	५	३६	१०

	का०	स०	श्लो०
कच्चिन्न सागजा साश्वा:	२	५७	७
कच्चिन्न सर्वे कर्मान्ता:	२	१००	५२
कच्चिन्नागवनं गुप्तम्	२	१००	५०
कच्चिन्नानेकचित्तानाम्	६	२४	२६
कच्चिन्निद्रावशं नैषि	२	१००	१७
कच्चिन्तु धरते तात	२	१०१	६
कच्चिन्तु सुकृतान्येव	२	१००	२०
कच्चिन्नोग्रेण दण्डेन	२	१००	२७
कच्चिन्मन्त्रयसे नैक:	२	१००	१८
कच्चिन्मया नापराद्धम्	२	१८	११
कच्चिन्मित्राणि लभते	५	३६	१८
कच्चिन्मुख्या महत्स्वेव	२	१००	२५
कंचित्कालं स धर्मात्मा	३	१५	३१
कञ्चुकोष्णीषिणस्तत्र	६	११४	२१
कतमो राजवंशोऽयम्	१	४५	१२
कतरेण गमिष्यामि	२	८५	४
कति दुर्गाणि दुर्गाया:	६	३	३
कत्थसे कि वृथा रक्ष:	६	७९	१८
कथं गङ्गावतरणम्	१	४२	६
कथं च धर्मार्थविनीतबुद्धि:	५	५२	१६
कथं च राक्षसैरेभि:	६	६३	६९
कथं चाल्पशरीरस्त्वम्	५	३७	३२
कथंचित्परिपश्यामि	६	२	२३
कथंचिदभिविज्ञाय	२	१००	२
कथंचिद्भूवती दृष्टा	५	३८	४९
कथंचिन्मृगशावाक्षी	५	५९	२८
कथं चेदं वनं दुर्गम्	४	५१	१९
कथं जनकराजस्य	५	५	१६
कथं तच्चन्द्रसंकाशम्	३	६८	६
कथं त्रैलोक्यमाक्रम्य	६	१११	६
कथं त्वं कर्मणा शक्त:	२	२३	१२
कथं दशरथाज्जात:	२	८२	१२
कथं दशरथाज्जात:	२	१०६	१०
कथं दशरथौ भूमौ	२	५१	९
कथं दशरथौ भूमौ	२	८६	१०
कथं दासस्य मे दासी	३	१८	९
कथं द्रक्ष्याम्यपावृत्ताम्	२	१२	६४

	का०	स०	श्लो०
कथं नरवरश्रेष्ठ	२	६१	३
कथं नाम दशग्रीव	६	९२	५९
कथं नाम प्रवेक्ष्यामि	३	६२	११
कथं नाम समुद्रस्य	६	१	१७
कथं नु खलु दुष्पारम्	२	३९	२५
कथं नु खलु दुष्पारम्	५	५५	८
कथं नु खलु दुष्पारम्	५	६९	८
कथं नु खलु वाक्यं मे	५	३०	४०
कथं नु खल्वध भवेत्सुखागतम्	५	४१	८
कथं नु चीरं बध्नन्ति	२	३७	१२
कथं नु जीवता शक्य:	५	५५	१४
कथं नु तस्य वैदेहीम्	३	३७	१४
कथं नु पुत्रा: पितरम्	२	९७	१६
कथं नु मयि धर्मेण	२	२	२५
कथं नु शस्त्रेण वध:	२	६३	२८
कथं पितुश्चाप्यधिको महा०	७	१	३६
कथं पुत्रं महात्मानम्	२	५१	१७
कथं प्रकृतिसंपन्ना	२	२२	१९
कथं प्रमाणा: के चैतान्	१	२०	३०
कथं भवमसंबुद्धम्	६	१११	४२
कथं मत्स्याश्च सौपर्णा:	४	५१	८
कथं माता कथं भ्राता	७	२४	१४
कथं रथैर्विमुर्यात्वा	२	१२	९५
कथं रामो महाबाहु:	२	४७	५
कथं वक्ष्यामि शत्रुघ्नम्	६	४९	१०
कथं वा भवता प्राप्तम्	७	७६	३५
कथंवीर्य: कथंरूप:	३	६८	७
कथं वैश्रवणं देवम्	३	४८	२१
कथं शूर्पणखा वृद्धा	६	९४	६
कथं सदसि भोक्तार:	१	५९	१४
कथं स धर्मं जानीते	४	५५	४
कथं स राजा स्त्रीभूत:	७	८८	३
कथं सर्वगुणैर्हीना	६	९४	८
कथं सा मम सुश्रोणि	५	६६	१२
कथं स्वपिति जागर्ति	६	२९	२०
कथं स्वर्गं गमिष्यन्ति	१	५९	१५
कथं हि त्वद्विहीनोऽहम्	२	५२	३९

	का०	स०	श्लो०
कथं हि धेनुः स्वं वत्सम्	२	२४	६
कथं ह्यहं प्रतिज्ञाय	२	१०६	२४
कथमत्र हि पश्यामि	७	४८	२२
कथमस्मद्विधे शस्त्रम्	२	६३	२६
कथमात्मसुतान्हित्वा	१	६२	१४
कथमासीज्जनस्थाने	४	५६	२०
कथमिन्दीवरश्यामम्	२	१३	१०
कथमिन्दीवरश्यामः	२	८८	१६
कथमेका महारण्ये	३	४६	३१
कथमेवं विधो वीरः	६	६८	१३
कथयन्तं तु सौमित्रम्	७	८४	४
कथयन्ति पुरे राजन्	७	४१	२२
कथयन्तीव शशिना	५	३७	२७
कथयन्तो महाभागाः	६	११२	४
कथयस्व च विस्रब्धः	७	४३	११
कथयस्व त्वया दृष्टः	५	२७	८
कथयस्व ममोपायम्	२	६	६
कथयामास धर्मात्मा	१	२४	८
कथयित्वा तु दुःखार्तः	२	५७	१
कथयिष्यन्ति लोकेषु	३	५३	८
कथां कथयतस्तेषाम्	७	६८	१
कथैषा तव तु स्नेहात्	२	६	१६
कदनं तरसा कृत्वा	६	६६	५
कदनं सुमहच्चक्रुः	६	५५	३२
कदम्बसर्जार्जुनकन्दलाढ्या	४	२८	३४
कदर्थकलुषा बुद्धिः	३	६	२८
कदलीकाण्डसदृशौ	३	६२	४
कदलीगृहकं गत्वा	३	४२	२३
कदल्यटविसंशोभम्	३	३५	१३
कदाचिच्छखरे तस्य	३	७३	४२
कदाचित्तु महातेजाः	१	५१	२१
कदाचिदप्यहं वीर्यात्	३	३८	१
कदाचिदुपकारेण	२	१	११
कदा नु खलु मे साध्वी	६	५	२०
कदा नु खलु सुश्रोणीम्	६	५	१२
कदा नु राक्षसेन्द्रस्य	६	५	१६
कदा परिगतो बुद्धया	२	४३	१६
कदा प्राणिसहस्राणि	२	४३	१३
कदा प्रेक्ष्य नरव्याघ्रो	२	४३	११
कदायोध्यां महाबाहुः	२	४३	१२
कदा शोकमिमं घोरम्	६	५	२१
कदा शोणितदिग्धाङ्गम्	६	२४	३८
कदा समभिधावन्ति	६	२४	३७
कदा सुचारुदन्तोष्ठम्	६	५	१३
कदा सुमनसः कन्याः	२	४३	१५
कदाहं पुनरागम्य	२	४६	१४
कदा ह्यहं समेष्यामि	३	१६	४०
कद्रूर्नागसहस्रं तु	३	१४	३२
कनीयानेष मे भ्राता	१	७१	२०
क त्वं प्राक्केवलं धर्मम्	६	१८	१२
कन्दमूलफलं बहु	२	६४	३४
कन्दराणि च शैलाश्च	४	१३	६
कन्दरात्तु विनिष्पिता	४	६३	२
कन्दरादभिनिष्क्रम्य	४	५६	३
कन्दरोदरसंस्थानाम्	५	५६	४५
कन्दर्पदर्पवशगः	१	६३	६
कन्दर्पसमरूपश्च	३	३४	६
कन्दर्पो मूर्तिमानासीत्	१	२३	१०
कन्यया च पितुर्गेहे	२	२६	१३
कन्यया त्वेवमुक्तस्तु	७	६	२६
कन्यापितृत्वं दुःखं हि	७	६	१०
कन्या मन्दोदरी नाम	७	१२	१६
कन्यासहायं तं दृष्ट्वा	७	१२	४
कन्यास्ताः प्रददौ दृष्टाः	७	५	३२
कन्ता हि द्वे कुले नित्यम्	७	१२	१२
कपयो विहरिष्यन्ति	४	४२	१२
कपाटतोरणवतीम्	१	५	१०
कपालपाणिः पृथिवीम्	२	७५	४०
कपिः कथयते हृष्टः	४	४	३१
कपिना कृष्यमाणानि	५	१	७१
कपिपत्न्या वचः श्रुत्वा	४	१६	१०
कपिप्रवीरो वेगेन	५	१	१८७
कपिराजविमुक्तैस्तैः	६	६६	१२
कपिराजा यथाख्यातम्	५	१	१७६

	का०	स०	श्लो०
कपिरूपं परित्यज्य	४	३	२
कपिलेनाप्रमेयेण	१	४१	१८
कपिवातश्च बलवान्	५	१	६८
कपिशोणितदिग्धाङ्गम्	६	६७	५४
कपिस्ततस्तं रणचण्डविक्रमम्	५	४७	१६
कपिस्ततस्तं विचरन्तमम्बरे	५	४७	३४
कपीनां किल लाङ्गूलं	५	५३	३
कपीन्निजघ्निरे तत्र	६	५५	२८
कः पुमास्तु कुले जातः	६	११५	१६
कबन्धानि समुत्पेतुः,	६	५४	१०
कम्पयन्मेदिनीं सर्वाम्	१	७४	१४
कम्बलानां च चित्राणाम्	४	५०	३७
कम्बलानां च मुख्यानाम्	१	७४	४
कम्बलानि च रत्नानि	७	१००	३
करान्तमितमध्यासि	३	४६	२२
कराभ्यां च विकीर्णाभ्याम्	३	२६	१५
कराभ्यां विविधान्गृह्य	३	६६	३२
कराभ्यां सशरं चापम्	२	६३	३४
करालधूम्रकेशिन्यः	५	१७	१६
करालस्य विशालस्य	५	६	२६
करालस्य विशालस्य	५	५४	१४
करिष्यति स साहाय्यम्	४	४	२८
करिष्यामि तव प्रीतिम्	२	१०	३६
करिष्यामि न संदेहः	१	३०	१६
करिष्यामि यथार्थं तु	६	१८	३२
करिष्ये मैथिलीहेतोः	३	६४	६५
करिष्ये सर्वमेवाहम्	२	३६	२७
करेणुमातङ्गरघावसंकुलम्	२	१६	४७
करेणुमिव दिग्धेन	२	१०	२६
करेणुशिशुकल्पैश्च	२	१६	३०
करेणुहस्तप्रतिमः	५	२७	४५
करोति चाश्रीमूलं तत्	७	७४	२६
कर्कशं निरनुक्रोशम्	३	३२	२१
कर्णनासापहारेण	३	३६	१३
कर्णनासाविहीनस्तु	६	६७	८६
कर्णनासे निकृत्ते तु	३	६६	१८
कर्णप्रावरणाश्चैव	४	४०	२६

	का०	स०	श्लो०
कर्णवन्ति हि भूतानि	२	४४	१५
कीर्णकारवनं भद्रे	३	६२	५
कीर्णकारवनैर्दीप्तैः	७	२६	४
कर्तव्यमिह तिष्ठन्त्या	३	४५	६
कर्तव्यं यद्वयस्येन	४	७	१७
कर्तव्यं सुमहत्कर्म	१	२६	३१
कर्तव्यो न तु वैदेहि	६	११६	३३
कर्ता चाहमशेषेण	१	१८	५८
कर्तारमपि लोकानाम्	३	६४	५४
कर्ता सर्वस्य लोकस्य	५	११७	६
कर्तुमर्हसि काकुत्स्य	४	५	२४
कर्तुमर्हसि रामस्य	५	५८	२७
कर्दमः प्रथमस्तेषाम्	३	१४	७
कर्दमस्त्वब्रवीद्वाक्यम्	६	६०	११
कर्म कुर्वन्ति विधिवत्	१	१४	३
कर्म चैव हि सर्वेषाम्	६	६४	७
कर्मणाऽनेन केनापि	३	३१	४५
कर्मणा सूचयात्मानम्	५	७१	५६
कर्मभिः बहुरूपैश्च	७	७६	१३
कर्मभूमिमिमां प्राप्य	२	१०६	२८
कर्म लोकविरुद्धं तु	३	२६	४
कर्मस्त प्रतिमाः सर्वे	४	५३	११
कर्मान्तरे तदा विप्राः	१	१४	१६
कर्मान्तिकाञ्शिल्पकारान्	१	१३	७
कर्मान्तिकान्वर्धकिनः	७	६१	२४
कर्मान्तिकाः स्थपतयः	२	८०	२
कलत्राणि च सौम्यानि	३	३८	३२
कलशीमपविद्धान्या	५	१०	४६
कलशैः स्नापयामासुः	१	२४	२०
कलापिनौ धनुष्पाणी	१	२२	७
कलामात्राविशेषज्ञान्	७	६४	७
कलुषैणाद्य महता	५	६६	२७
कल्कांश्चूर्णकषायांश्च	२	६१	७४
कल्प्यतां मे रथः शीघ्रम्	६	६५	२१
कल्प्यतां मे रथः शीघ्रम्	६	१०६	१६
कल्प्यन्ते मत्तमातङ्गाः	६	३३	२२
कल्माषपादपुत्रोऽभूत्	२	११०	३०

	का०	स०	श्लो०
कल्माषपादः संवृत्तः	७	६५	३३
कल्माषपादोऽप्यभवत्	१	७०	४०
कल्यमुत्थाय देवानाम्	२	२६	३०
कल्याणवृत्तां यो भार्याम्	३	४७	४४
कल्याणाभिजवः साधुः	२	१	२१
कल्याणी बत गाथेयम	५	३४	६
कल्याणी बत गाथेयम्	६	१२६	२
कल्याणे वत नक्षत्रे	२	४	४०
कल्याणे रुचिरं गात्रम्	६	३२	२३
कवचं पातयामास	६	९६	२७
कवचं ब्रह्मदत्तं मे	६	९२	२८
कः शक्तस्तस्य देवस्य	४	३६	६
कशाभिरिव हैमीभिः	४	२८	११
कश्च तावदसौ यं त्वम्	७	१७	२३
कश्च देवेन सौमित्रे	२	२२	२१
कश्च प्रत्यक्षमुत्सृज्य	२	१०६	२०
कश्च प्रवाज्यभागो वा	२	६४	६५
कश्च रामः कथवीर्यः	३	३४	२
कश्च लक्ष्मणमुक्तानाम्	५	५१	१९
कश्च सेनापतिस्तेषाम्	६	२५	८
कश्चित्कमण्डलुं प्रादात्	१	४	२२
कश्चिदाभ्रवणं छित्वा	२	६३	८
कश्चिन्मे त्वत्समो नास्ति	६	६५	११
कश्चेतमानः पुरुषः	२	१०९	७
कश्यपः प्रतिजग्राह	३	१४	११
कस्त्वं किं वर्तसे ब्रह्मन्	१	१०	१२
कस्त्वं केन च कार्येण	५	३	२३
कस्त्वया सुखिना राजन्	३	४१	३
कः स्थितः प्रतिहारः	१	७३	१४
कस्माद्विषण्णवदनाः	६	८२	३
कस्मान्मामपहाय त्वम्	६	३२	२२
कस्मैचिद्याचमानाय	१	१४	५५
कस्यचित्त्वथ कालस्य	१	२५	९
कस्यचित्त्वथ कालस्य	१	३४	५
कस्यचित्त्वथ कालस्य	५	७१	१६
कस्यचित्त्वथ कालस्य	७	९	१
कस्यचित्त्वथ कालस्य	७	५७	७

	का०	स०	श्लो०
कस्यचित्त्वथ कालस्य	७	१००	१
कस्यचित्त्वथ कालस्य	७	१०३	१
कस्यचिन्न हि दुर्बुद्धेः	७	१५	२३
कस्य पत्ररथाः कायान्	३	१९	१०
कस्य प्रसादाहाराश्च	४	६४	१७
कस्य प्रसादाद्यं च	४	६४	१८
कस्य यास्याम्यहं वृत्तम्	२	१०९	८
कस्य रूपमिदं दृष्ट्वा	३	४	३०
कस्य वापररात्रेऽहम्	२	६४	३२
कस्य स्यादीदृशो भाव	७	७७	२०
कस्याय कर्मणः पाकः	७	७८	१३
कस्यायमाश्रमः पुण्यः	१	२३	८
कस्यासि किमिदं भद्रे	७	१७	६
कस्यां योन्यां तपोवृद्ध	६	७५	१६
कस्येदं दारुणं वाक्यम्	२	१२	९९
कस्येमे निहता बाणाः	३	६४	४९
कश्चिच्च गृहमुख्येषु	७	२१	१८
काकपक्षधरं वीरम्	१	१९	९
काका वाश्यन्ति तत्रैव	७	६	५८
काकाः श्येनास्तथा गृध्राः	६	४१	२०
काकाः श्येनास्तथा नीचाः	६	२३	११
काकुत्स्थ तद्गमिष्यामः	७	७६	१८
काकुत्स्थमुपसंगम्य	६	८	१४
का च रामेण ते प्रीतिः	५	५८	९६
काचिच्च वस्त्रमन्यस्य	५	११	३०
काचित्काञ्चनवर्णाङ्गी	५	११	३५
काचिदङ्के शिरः कृत्वा	६	११०	१०
काचिदाडम्बरं नारी	५	१०	४५
काचिदध्यौ सुदुःखार्ता	६	२४	१२
काचिदूनमयीं पात्रीम्	५	१८	१३
काचिद्वीणां परिष्वज्य	५	१०	३७
काचिद्वीणां परिष्वज्य	५	१०	४०
काञ्चनप्रतिमैकाग्रम्	२	१५	३२
काञ्चनं धरणीं प्राप्तम्	१	३७	१९
काञ्चनस्तम्भसंवीतम्	७	१५	३६
काञ्चनस्य च शैलस्य	४	४०	६३
काञ्चनाङ्गदकेयूर	६	६५	२८

	का०	स०	श्लो०
काञ्चनाङ्गदनद्धारम्	६	६०	३०
काञ्चनाङ्गदनद्धाभ्याम्	६	८१	२३
काञ्चनाङ्गदसंवद्धः	५	१०	१५
काञ्चनानि प्रमर्दन्तः	६	४२	२८
काञ्चनानि विचित्राणि	५	२	५१
काञ्चनीं मम पत्नीं च	७	६१	२५
काञ्चनीं शिशपामेकाम्	५	१४	३७
काञ्चनेनावृतां रम्याम्	५	२	१६
काञ्चैनश्चैव भृङ्गारैः	५	१८	१२
काञ्चनोत्पलपद्माभिः	५	१५	४
काञ्चनोरश्छदान्दिव्यान्	३	५१	१५
कातरत्वं प्रकाशं हि	३	६२	१२
का त्वं भवसि रुद्राणाम्	५	३३	६
का त्वं विरूपनयना	५	३	२६
काननानि विचित्राणि	६	४	७१
काननानि सुरम्याणि	५	३५	४६
काननैः कृत्रिमैश्चापि	४	१४	३५
काननं वापि शैलं वा	२	४८	११
का नु पद्मपलाशाक्षि	५	३३	३
कान्ताराणि प्रपन्नाः स्म	४	५६	१३
कान्तिश्रीद्युतिभिस्तुल्यम्	६	१११	३५
कान्तेव युवती कान्तम्	४	४१	१८
कान्वेषेती महाराज	७	१३	२३
कापिलं रूपमास्थाय	१	४०	३
का प्रीतिः राज्यलाभेन	२	३५	१३
कामकारो महाप्राज्ञः	२	१०१	१८
कामकारो ह्ययं राजन्	७	६३	८
कामक्रोधसमुत्थानि	२	३	४३
कामक्रोधसमुत्थेन	४	३१	१३
कामगं रथमा थाय	३	३५	६
कामगं रथमास्थाय	३	३५	१०
कामगं स्यन्दनं दिव्यम्	७	२५	१०
कामं खलु न मे शक्ताः	५	५३	११
कामं खलु शरैः शक्तः	४	२६	२२
कामं खलु सतां वृत्ते	२	४	२६
कामं खल्वहमप्येकः	५	५१	३१
कामदर्पमदैर्युक्तम्	५	१८	२३
कामधेनु वसिष्ठोऽपि	१	५४	१
कामं तिष्ठ महाराज	६	६६	६
कामं तु मम तत्सैन्यम्	३	३८	७
कामं त्वमपि पर्याप्तः	५	३७	५७
कामं त्विदं पुष्पितवृक्षषण्डम्	३	६३	१५
कामं त्विदानीमपि माम्	६	६३	४१
कामं दृष्टा मया सर्वा	५	११	४१
कामं न त्वं समाधेयः	६	१०६	१३
कामभोगाभिसंरक्तः	७	२६	४१
कामभोगैः परित्यक्ता	५	१६	२४
काममन्युपरीतात्मा	५	२२	३६
काममस्य त्वमेवैकः	५	३६	२८
काममस्य त्वमेवैकः	५	५६	११
काममस्य त्वमेवैकः	५	६८	११
काममपि सुपर्याप्तः	६	५६	४६
काममेतद्ध्रुवत्वेवम्	७	५६	२०
काममेवंगतेऽप्यस्य	७	३०	७६
काममेवमिदं कार्यम्	४	४०	६
काममेवंविधो लोकः	४	१७	५३
काममोहाभिभूतस्य	१	६३	१२
काममोहाभिभूतात्मा	७	२६	४६
कामं बह्वपि वक्तव्यम्	३	२६	२३
कामं मध्ये समुद्रस्य	५	२६	१३
कामं राघव ते वाणी	४	११	८१
कामं स्वयमेवाथ	२	७५	१५
कामं शतसहस्रं वा	४	६५	२१
कामं श्वश्रूर्ममैव त्वम्	७	६८	७
कामं हन्तुं समर्थोऽस्मि	५	३०	३४
कामये त्वां विशालाक्षि	५	२०	३
काकरूपः कामचारी	७	३६	२३
कामरूपं कामरूचिम्	१	२८	६
कामरूपधरा सा तु	१	२६	१६
कामरूपधराः शूराः	६	८	१३
कामरुपिभिराविष्टम्	५	१	६
कामरूपो हरिश्रेष्ठः	६	२८	११
कामवृत्तं च सुग्रीवम्	४	३०	३
कामवृत्तोऽन्वयं लोकः	२	१०६	६

	का०	स०	श्लो०
कामस्वभावो यः सोऽसौ	३	५०	१२
कामाद्वा तात लोभाद्वा	२	११२	१९
कामार्थगुणसंयुक्तम्	१	३	८
कामिनामयमत्यन्तम्	४	१	५९
कामी वा न कदर्यो वा	१	६	८
काम्बोजयवनांश्चैव	४	४३	१२
काम्बोजविषये जातैः	१	६	२२
कायक्लेशाश्च बहवः	२	२८	२३
कायमात्रं च मेधावी	५	१	८३
कायवृद्धि प्रवेगं च	५	१	१९६
कायेन कुरुते पापम्	२	१०९	२१
कारणादिति चोक्त्वलासौ	७	३५	५८
कारणानि च वक्ष्यामि	६	४८	२३
कारणैर्बहुभिर्देवि	५	३८	७
कारणैर्बहुभी राजन्	१	५३	१६
कारण्डैः सारसैः हंसैः	४	१३	८
कारयित्वा महत्कर्म	२	७५	२३
कारयिष्यामि ते कुब्जे	२	९	५०
कारिताः सर्व एवैते	१	१४	२४
कारुण्यं सदृशं कर्तुम्	३	७१	२४
कार्तवीर्यभुजासक्तम्	७	३२	५
कार्तिकेयस्य च स्थानम्	३	१२	२१
कार्तिके समनुप्राप्ते	४	२६	१७
कार्यमावेद्य च गिरेः	५	५८	१९
कार्यसिद्धि पुरस्कृत्य	६	३७	५
कार्यस्त्वरभिषेकश्च	२	२८	१५
कार्यहेतोरिहायातः	५	३५	६२
कार्ये कर्माणि निर्वृते	५	४१	५
कालका च महाबाहो	३	१४	१४
कालकेया इति ख्याता	७	२४	२८
कालचक्रनिभं चक्रम्	७	७	४३
कालजिह्वाप्रकाशाभिः	६	७१	१४
कालदण्डस्तु पार्श्वस्थः	७	२२	५
कालधर्मं गते राम	१	४२	१
कालपाशपरिक्षिप्ताः	३	३०	१५
कालपाशं समासज्य	३	१९	४
कालश्च नो महान्यातः	४	४९	४

	का०	स०	श्लो०
कालस्य चाप्यहं कालः	३	३१	६
कालाः काञ्चनसंवाहाः	६	४४	५
कालाग्निनेव घोरेण	७	८५	१४
कालाग्निरिव संक्रुद्धः	६	९२	२४
कालातिक्रमणं ह्येव	२	१००	३३
कालिकानिलवेगेन	२	४१	१२
कालिकाः पाण्डुरैर्दन्तैः	६	३५	२८
कालिन्दीमथ सीतां तु	२	५५	२१
कालिन्दीमध्यमायाता	२	५५	१९
कालिन्दी यमुनां रम्याम्	४	४०	२१
कालीकर्दमलिप्ताङ्गी	५	२७	२७
काले काले तु धर्मात्मा	७	३	३४
काले काले तु मां वीर	७	७२	१५
काले धर्मार्थिकामान्यः	६	६३	१२
कालेनानेन नाभ्येषि	३	५६	२५
काले वर्षति पर्जन्यः	७	९९	१२
कालो गृहाणि सर्वेषाम्	६	३५	३४
कालो द्वादश वर्षाणि	७	६५	३६
कालो निःसशयो नूनम्	४	२०	१४
कालोऽप्यतीतः सुमहान्	७	३८	२६
कार्यमेतेन संग्रामम्	४	१५	८
काव्यं रामायणं कृत्स्नम्	१	४	७
काश्मर्याष्टवरणैः	२	९४	९
काश्यपाय मया दत्ता	१	७६	१३
काञ्चनभ्रमरांश्चैव	४	५०	३३
काष्ठयो स्वेन रूपेण	४	५	१४
का हि ते शक्तिरेकस्य	३	२०	१४
किं करिष्यामि भद्रं वः	३	६	४
किं करिष्याम्ययोध्याम्	२	१०३	८
किं करिष्याम्यहं तेन	६	६०	२१
किं करिष्यावहे वत्स	३	६७	३
किं कार्यं ब्रूत भगवन्	७	१०५	४
किङ्किणीजालघोषाभिः	५	३	७
किङ्किणीजालसंकाशाः	५	९	५१
किं कृतं तव रामेण	२	१२	८
किं कृत्वा श्रेय इत्येवम्	७	९	६
किं कोपमूलं मनुजेन्द्रपुत्र	४	३३	४१

	का०	स०	श्लो०
किं च राक्षसराजस्य	६	६	१३
किं चान्यद्वक्तुमिच्छामि	७	१०८	२७
किंचिदत्युन्नतग्रीवः	३	४२	१७
किंचिदाविग्नहृदयः	६	२६	५
किंचिद्वक्ष्यामि तावत्तु	७	२०	६
किंचिन्नाह तदा रक्षः	७	११	१२
किं चैनां प्रतिवक्ष्यामि	२	१२	६८
किं जीवितेनेह विना त्वया मे	२	२१	५३
किं तु कर्तुं मया शक्यम्	३	४२	४
किं तु कालपरिणामः	४	२५	८
किं तु तस्य बलज्ञोऽयम्	४	११	७६
किं तु नैवं गते शक्यम्	४	६५	१२
किं तु पूर्वं गतास्म्येका	७	२	२१
किं तु मां विद्धि ब्रह्मर्षे	७	६	२०
किं तु यत्नस्त्वया कार्यः	४	७	१६
किं तु यावन्न यात्यस्तम्	३	७१	३१
किं तु व्यादिश मे देशम्	३	१३	११
किं तु शीघ्रमितो वीर	४	३६	१६
किं तु सीताय वैदेहि	१	३	६
किं तु व्यवसितं रांजन्	२	७६	६
किं तु व्याधिसमुत्थानम्	४	६०	२१
किं तु सर्वविनाशेन	३	६६	२०
किं त्वमन्तः पुरे सीते	५	२४	२
किं त्वया तप्यते वीर	६	२	२
किं त्वामन्यत वैदेहः	२	३०	३
किं त्विदानीं मया शक्यम्	७	१६	२०
किं त्विदानीं मया शक्यम्	७	१६	२८
किं त्विदानीं मया शक्यम्	७	२२	४७
किं धावसि प्रिये नूनम्	३	६०	२६
किंनराचरितं देशम्	२	६३	११
किंनरा मदनेनार्ताः	७	२६	७
किंनरीमिव निर्धूताम्	२	१०	२५
किंनरोरगगन्धर्व	३	७५	१६
किंनरोरगगन्धर्व	५	५६	४८
किं न स्मरसि कैकेयि	२	६	६
किं नाम ते तात कनिष्ठ०	६	१५	२
किं नाम तौ मानुषराजपुत्रौ	६	१५	४

	का०	स०	श्लो०
किं नाववुध्यसे क्रूरे	२	७४	१३
किंनिमित्तं तु केनापि	३	५६	१२
किंनिमित्तमिच्छया मे	७	१६	५
किं नु कार्यं हृतस्येह	२	७३	३
किं नु खल्वद्य गम्भीरः	२	११४	१६
किं नु खल्ववशिष्टं मे	५	५४	२
किं नु चन्द्रमसा हीना	५	३३	७
किं नु चित्तं मनुष्याणाम्	२	४	२७
किं नु तत्काणं येन	५	२६	१४
किं नु तस्य मया कार्यम्	२	१०३	६
किं नु तेऽदूषयद्रामः	२	७४	३
किं ते तेषां गृहैः कार्यम्	२	४८	७
किं नु दुःखमलीकं वा	२	१२	६१
किं नु पापं कृतं पूर्वम्	७	४८	४
किं नु मां वानराः सर्वे	५	१२	७
किं नु मृत्योर्भयं नास्ति	६	२६	११
किं नु मे दुष्कृतं कर्म	७	७३	३
किं नु मे दुष्कृतं कर्म	७	७३	४
किं नु मे सीतया कार्यम्	६	४६	५
किं नु रुदकारुणं सुभ्रु	४	३३	३२
किं नु वक्ष्यामि कौसल्याम्	६	४६	८
किं नु वक्ष्यामि धर्मज्ञम्	४	१	१०६
किं नु वक्ष्यामि मुनिषु	७	४८	७
किं नु वक्ष्याम्ययोध्यायाम्	४	१	११२
किं नु वक्ष्याम्यहं देवि	३	१०	३
किं नु शक्यं मया कर्तुम्	३	५०	२५
किं नु शत्रुघ्नमुद्दिश्य	७	४३	६
किं नु स्याच्चित्तमोहोऽयम्	५	३४	२३
किं नो हनूमता कार्यम्	६	८	१०
किं पश्यसि कुमारस्य	४	३३	३३
किं पुनर्मनुजेन्द्रेण	२	१६	८
किं पुनर्गुणश्लाघ्यः	२	११८	४
किं पुनः सहितो वीरैः	५	५६	८
किंप्रभाः कीदृशाः सौम्य	६	३०	१७
किंप्रमाणमिदं काव्यम्	७	६४	२३
किं ब्राह्मणः सर्वपितामहस्य	५	५४	३६
किं भवन्तः समस्ताश्च	४	११	६०

	का०	स०	श्लो०
किं मध्यगुणाः केचित्	५	२६	४०
किं मयापकृतं तस्य	१	५४	४
किं मामसदृशं वाक्यम्	६	११६	५
किं मामेवं प्रलपतीम्	४	२०	२२
किं मां न प्रेक्षसे राजम्	६	३२	२०
किं मां युद्धेन किं प्राणैः	६	१०१	११
किं वक्ष्यति वृद्धश्च	५	१२	९
किं वक्ष्यति सुग्रीवः	५	१३	२०
किं वक्ष्यामो महाबाहुः	२	४७	९
किं वैष्णवं वा कपिरूपमेत्य	५	५४	३७
किं व्यलीकैस्तु तान्सर्वान्	५	६०	१२
किं शक्यं कर्तुमेवं हि	३	५३	१०
किं शेषमिहलोकस्य	६	१०९	८
किं समर्थितमस्येति	६	८१	१३
किं संभ्रमाद्धितं कृत्स्नम्	५	६३	३
किं हि कृत्वा विषण्णस्त्वम्	२	३०	५
किन्नराणां च गात्रेषु	१	१७	६
किमग्नौ निपताम्यद्य	५	५५	१३
किमङ्गदं साङ्गदवीरबाहो	४	२०	२४
किमत्र चित्रं धर्मज्ञ	६	१८	३६
किमत्र धनुषा कार्यम्	२	९७	२
किमयं कामवृत्तस्ते	४	३३	४३
किमयं वध्यते तात	७	२०	७
किमयं वानरो राजन्	५	६३	१४
किमर्थं च नरश्रेष्ठौ	१	४८	६
किमर्थं च वनं घोरम्	४	४	४
किमर्थं चापि निक्षिप्य	२	९१	५
किमर्थं तप्यसे राजन्	१	५५	१४
किमर्थं तव नेत्राभ्याम्	५	३३	४
किमर्थं नगरद्वारम्	४	११	३०
किमर्थं नौ नरव्याघ्र	६	१९	३८
किमर्थमस्त्रं रक्षःसु	५	६७	१९
किमर्थमहमाहत्य	६	६०	६७
किमर्थं मामनादृत्य	६	११४	२६
किमर्थं मामवज्ञाय	६	१०४	४
किमर्थं वाली चैतेन	७	३५	११
किमहं तं प्रतिब्रूयाम्	५	३०	१३

	का०	स०	श्लो०
किमागमनकार्यं वः	७	६०	१३
किमायासेन ते भीरु	२	१०	३९
किमार्यं कामस्य वशंगतेन	४	३०	१६
किमाह सीता वैदेही	५	६६	८
किमाह सीता हनुमन्	५	६६	१९
किमिच्छसि वरारोहे	७	४२	३२
किमिदं कथ्यतां पुत्र्यः	१	३२	२६
किमिदं कारणं येन	२	१५	२६
किमिदं क च वतमिः	७	२१	२०
किमिदं नावगच्छामि	७	४७	८
किमिदं भाषसे राजन्	२	१४	२१
किमिदं भाषसे राम	२	२७	२
किमिदं वर्तसे भद्रे	७	१७	४
किमिदं हृदयोत्कम्पि	१	७४	११
किमिहागमेन कार्यम्	२	९०	१०
किमुक्त्वा बहुधा चापि	६	२	२४
किमुद्यमं व्यर्थमिमम्	३	३७	२१
किमुवाच वचो रामः	२	५८	११
किमेतच्छ्रोतुमिच्छामि	३	२१	४
किमेतज्ज्ञातुमिच्छामि	४	१३	१५
किमेतदिच्छोयमहम्	२	१०१	२
किमेतदेवं सुविनिश्चितं ते	६	७४	६२
किमेतन्मेघसंकाशाम्	१	२८	१७
किमेष वाक्यं भरतोऽद्य०	२	१०४	३१
किरीटिनः श्रिया जुष्टाः	६	६९	३५
किरीटिनः ततः पश्चात्	६	१२८	६७
किल्विषं त्वं नरेन्द्राणाम्	२	१२	४२
किष्किन्धां प्रति याह्याशु	९	१२२	१६
किष्किन्धां यः समध्यास्ते	६	२८	३०
किष्किन्धाया विनिष्काम	४	३८	४
किष्किन्धा ह्यद्य शून्या च	४	२२	२६
कीदृशं तस्य संस्थानम्	५	३५	४
कीदृशं तु महापापम्	५	२५	१८
कीदृशं हृदये तस्य	७	४३	१७
कीदृशो वै प्रभावोऽस्य	७	१	३३
कीर्तिभूतां पतांकां यः	२	४४	७
कीर्त्यर्थं तु समारम्भः	७	४५	१४

	का०	स०	श्लो०
कीर्यमाणः शरौघेण	६	१००	२६
कीर्यमाणः सुपुष्पौघैः	२	१६	३८
कुञ्जरस्येव रौद्रस्य	३	४	११
कुञ्जरस्येव रौद्रस्य	३	४	२५
कुञ्जराश्च खरोष्ट्राश्च	२	६१	६५
कुटुम्बवृद्धिं धनधान्यवृद्धिम्	६	१२८	१२१
कुण्डलाभ्यामुभाभ्यां च	६	७१	२४
कुतः कल्याणसत्त्वायाः	२	११६	६
कुतस्त्वमसि सुश्रोणि	७	८०	६
कुतो निष्क्रमितुं शक्तिः	३	११	६४
कुतोऽभिलषणं स्त्रीणाम्	३	६	५
कुत्राश्रमपदं रम्यम्	३	११	३२
कुपितश्च तदा तत्र	६	८०	२
कुबेरेण स्वयं स्वप्ने	६	६०	४८
कुमाराविव तां रात्रिम्	१	२६	३१
कुमारे भरते वृत्तिः	२	५८	२०
कुमारोऽयं वसुर्नाम	७	५४	८
कुमारौ चारुरूपौ	१	२२	१०
कुमुदस्य सुषेणस्य	४	३३	११
कुमुदाङ्गदयोर्वापि	५	३	१५
कुमुदैरुत्पलैश्चैव	७	११	४२
कुमुदो द्विविदो मैन्दः	६	७१	३६
कुम्भकर्णं प्रतीक्ष्यैव	६	६१	३१
कुम्भकर्णं हतं श्रुत्वा	६	६४	२१
कुम्भकर्णं समीक्ष्यैव	६	६१	२२
कुम्भकर्णं हतं दृष्ट्वा	६	६८	१
कुम्भः पृथूढसुयुजातवक्षाः	६	५६	२०
कुम्भकर्णः प्रजज्वाल	६	६७	४५
कुम्भकर्णः प्रबुद्धोऽसौ	६	६०	८६
कुम्भकर्णः प्रमत्तस्तु	७	६	३८
कुम्भकर्णः शुभं दिव्यम्	६	६२	१०
कुम्भकर्णः सहास्माभिः	७	१३	६
कुम्भकर्णः सुसंक्रुद्धः	६	६७	५
कुम्भकर्णकुले जातः	६	६४	२
कुम्भकर्णप्रहारार्तः	६	६१	१८
कुम्भकर्णबलाभिज्ञः	६	६५	१६
कुम्भकर्णभुजाभ्यां तु	६	६७	२७

	का०	स०	श्लो०
कुम्भकर्ण महावाहो	७	१०	४४
कुम्भकर्णशिरो भाति	६	६७	१६८
कुम्भकर्णस्ततो यत्तः	७	१०	३
कुम्भकर्णस्तत्र भ्राता	६	६८	५
कुम्भकर्णस्तु दुर्धर्षः	६	६०	६०
कुम्भकर्णस्तु दुष्टात्मा	७	२३	३४
कुम्भकर्णस्तु संक्रुद्धः	६	६७	१३१
कुम्भकर्णस्य दौरात्म्यम्	६	६१	१६
कुम्भकर्णस्य निधनम्	१	३	३६
कुम्भकर्णस्य निःश्वासात्	६	६०	२५
कुम्भकर्णात्मजः श्रीमान्	६	७६	५०
कुम्भकर्णादयश्चेमे	५	२७	३३
कुम्भकर्णोऽत्र निहतः	६	१२३	६
कुम्भकर्णो बभौ रुष्टः	६	६०	६४
कुम्भकर्णो महातेजाः	६	६५	२४
कुम्भकर्णो महातेजाः	६	६७	१४६
कुम्भकर्णो महानादः	६	६७	४६
कुम्भकर्णो महाराज	७	२५	२६
कुम्भस्य धनुराक्षिप्य	६	७६	६६
कुम्भस्य पततो रूपम्	६	७६	६२
कुम्भस्योरसि वीर्यवान्	६	७६	८६
कुरु कल्याणमत्यर्थम्	३	७१	२६
कुरु त्वमस्य सुग्रीव	४	२५	१३
कुरु नो याचनां पुत्र	२	३७	१६
कुरु प्रणामं धर्मात्मन्	४	१३	२५
कुरु रामेव सत्येन	३	७२	२२
कुरु रामकथां पुण्याम्	१	२	३६
कुरुष्व पितरं पुत्र	४	२०	१८
कुरुष्व मे प्रियहितमेतदुत्तमम्	६	६२	२२
कुरुष्व सत्यं मम वानरेश्वर	४	३०	८४
कुरुष्व स्वामिसंबन्धम्	४	२६	८
कुरु साधु प्रसादं मे	२	१३	२२
कुर्वता तपसो विघ्नम्	१	४६	२
कुर्वतीं प्रभया देवीम्	५	१५	२६
कुर्वत्यः कलहं घोरम्	६	१०६	३१
कुर्वन्तस्तुमुलं युद्धम्	७	१५	५
कुर्वन्यस्ते महावेगाः	५	३६	१५

	का०	स०	श्लो०
कुर्वन्ति कुसुमापीडान्	२	९३	१३
कुर्वाणा बहुशब्दांश्च	४	३९	४१
कुलं धन्यमिदं मन्ये	१	७२	१०
कुलस्य त्वमभावाय	२	७३	४
कुलस्य वर्धनं तत्तु	१	१४	५९
कुलस्य हेतुः स्फीतस्य	४	२९	१७
कुलीनमकुलीनं वा	२	१०९	४
कुलीनः सत्यसंपन्नः	२	१०१	१६
कुलीनः सत्यसंपन्नः	४	१७	१७
कुलीनान्रूपसंपन्नान्	४	६	३२
कुले जात महाप्राज्ञ	२	११२	५
कुलेमहति संभूते	२	२६	२०
कुलेषु जाताः सर्वेऽस्मिन्	६	६६	२१
कुलोचितमतिः छात्रं	२	१	१६
कुलं व्यपदिशन्वीर	३	३९	१९
कुलं संप्राप्तया पुण्यम्	५	२१	५
कुशकाशशरेषीका	२	३०	१२
कुशचीरधरं वीरम्	२	४४	१९
कुशचीरपरिक्षिप्तम्	३	१	२
कुशचीराजिवधरम्	२	५०	४४
कुशध्वजसुते चोभे	१	७७	१२
कुशनाभसुतस्त्वासीत्	१	५१	१९
कुशनाभसुता देव	१	३२	२०
कुशनाभन्तु राजर्षिः	१	३२	११
कुशमुष्टिमुपादाय	७	६६	६
कुशलं कौशिको राज्ञः	१	१८	४६
कुशलं चाव्ययं चैव	१	१८	४५
कुशलं चाव्ययं चैव	१	६८	५
कुशलं परिपृच्छन्तम्	३	६२	१३
कुशला व्यवहारेषु	१	७	६
कुशलास्ते नरव्याघ्र	२	७०	१२
कुशली यदि काकुत्स्थः	५	३६	१३
कुशस्य नगरी रम्या	७	१०८	४
कुशस्य वचनं श्रुत्वा	१	३२	५
कुशान्तर्धानदत्तेषु	७	१	१५
कुशाम्बं कुशनाभं च	१	३२	३
कुशाम्बस्तु महातेजाः	१	३२	६
कुशाश्वस्य महातेजाः	१	४७	१६
कुशास्तरणसंस्तीर्णे	७	४२	१८
कुशिकानामयं वंशः	१	३४	२०
कुशीलवौ तु धर्मज्ञौ	१	४	५
कुष्ठस्थगरपुंनाग	२	९४	२४
कुसुमान्यपचिन्वन्ती	३	४२	३२
कुसुमावचये व्यग्रा	३	४२	३१
कुसुमिततरुजालसंततानि	५	२०	३६
कूजितं नूपुराणां च	४	३३	२५
कृकलान्विविधांश्छागान्	५	११	१७
कृच्छ्रेण च समाश्वस्ताः	६	६७	८
कृच्छ्रेण तु समाश्वस्य	६	६६	८
कृच्छ्रेणोप्तादितश्चायम्	१	२०	११
कृच्छ्रेष्वपि गतः सौम्य	१	५८	२०
कृतकण्ठगुणाः क्षीबाः	५	१	२५
कृतकामो महीं सर्वाम्	१	६५	२८
कृतकार्यमिदं दुर्गं	२	९८	१३
कृतकृत्या भविष्यामः	४	४२	५६
कृतकृत्या महाभागा	२	९८	११
कृतकृत्या हि वैदेही	११	४०	२४
कृतकौतुकसर्वस्वा	१	७३	१५
कृतं कर्म महत्तेन	५	२६	१७
कृतं कर्म यशः श्लाघ्यम्	६	११९	२३
कृतं कार्यमिति श्रीमान्	३	५२	११
कृतं चेन्नातिजानीषे	४	३४	१७
कृतं त्वया कर्म महत्सु भीमम्	६	५९	१४०
कृतं नः कदनं घोरम्	६	६६	२९
कृतं परमकल्याणम्	६	९१	१३
कृतं भारसहस्तस्य	६	६७	६३
कृतं मया यथा तथ्यम्	७	८३	३
कृतं वो बाष्पमोक्षणम्	४	२५	३
कृतं सुग्रीव तत्सर्वम्	६	४९	२९
कृतं हनूमता कार्यम्	६	१	२
कृतं हि प्रियमस्माकम्	४	४३	६
कृतं हि सुमहत्कर्म	६	४९	२५
कृतक्षणाहं भद्रं ते	२	२९	१५
कृतज्ञः कामरूपी च	३	७२	१९

	का०	स०	श्लो०
कृतज्ञः सत्यसंश्चच	५	१३	२६
कृतदारोऽस्मि भवति	३	१८	२
कृतपुष्पोपहाश्च	२	६	१७
कृतपुष्पोपहारा भूः	५	११	२०
कृतप्रयत्नकर्मणिः	६	१२२	४
कृतप्रसादास्तेनैवम्	७	४०	३०
कृतबुद्धि निवासाय	२	९१	१
कृतप्रतिमं कर्म	६	७९	७७
कृतवानसि यत्कर्म	१	७६	२
कृतशास्तानुगा बुद्धिः	२	७५	२१
कृतश्रमो निरुत्साहः	१	१९	७
कृतस्वस्त्ययनं मात्रा	१	२२	२
कृताञ्जलौ स्थिते तस्मिन्	४	३८	१७
कृतातिथ्योऽथ रामस्तु	३	३	१
कृतादेशा भविष्यामि	२	२९	११
कृतानि गुरुणास्माकम्	७	९४	२७
कृतानि प्रथमेवाह्य	६	१२	६४
कृतानि वेश्मानि च पाण्डु०	५	७	१०
कृतान्त एव सौमित्रे	२	२२	१५
कृतान्तः कुशलः पुत्र	७	५४	१३
कृतान्तस्य गतिः पुत्र	२	२४	३५
कृतान्येव सुघोराणि	६	९३	१९
कृताऽपराधस्य हि ते	४	३२	१७
कृता भवेन्मम प्रीतिः	७	११	२५
कृताभिषेकः स रराज रागः	३	१६	४३
कृताभिषेकैस्तैर्न्यस्ताः	३	७४	२६
कृताभिषेको गङ्गायाम्	१	४३	३०
कृताभिषेको रामस्तु	३	१७	१
कृता मे मनसा बुद्धिः	५	५८	११
कृतार्थं कीर्तिमन्तं च	१	६०	३३
कृतार्था ह्यकृतार्थानाम्	४	३०	७३
कृतार्थो वाऽकृतार्थो वा	३	७२	२७
कृतार्थोऽस्मि महाबाहो	१	३०	२६
कृताश्च वैडूर्यमया विहङ्गाः	५	७	१२
कृता सुसंस्था सौमित्रे	४	३५	२१
कृतास्त्रमकृतास्त्रं वा	१	२१	९
कृतास्त्रैः प्लवगैः शक्तैः	५	६०	७

	का०	स०	श्लो०
कृतास्मि विधवा राजन्	७	२४	२७
कृताह्निकौ महावीर्यौ	१	२३	४
कृतैर्विशेषकैरार्द्रैः	७	२६	१७
कृतोदकं शुचिर्भूत्वा	७	३७	१३
कृतोदकः शुचौ राजा	१	४४	१८
कृतोदकः नरव्याघ्र	७	८१	२२
कृतोदकौ तावपि पक्षिसत्तमे	३	६८	३८
कृतोद्वाहं तु देवेशम्	१	२३	११
कृतोद्वाहं तु राजानम्	१	३३	२५
कृतोद्वाहे गते तस्मिन्	१	३४	१
कृतोपवासं तु तदा	२	६	९
कृत्येषु वाली मेधावी	४	२	२३
कृत्येष्वचोदितः पित्रा	२	२०	२
कृत्रिमां दीर्घिकां चापि	५	१४	३३
कृत्वा कण्ठे स्रजं सा वीरम्	२	३७	१३
कृत्वा केचिद्वदन्त्यन्ये	५	६२	१५
कृत्वा च समयं रामः	४	२७	५
कृत्वा तत्राभिषेकं ते	१	४३	२८
कृत्वा तु तन्महाप्राज्ञः	१	४	३
कृत्वा तु शैलपृष्ठे तु	३	७४	३
कृत्वा तौ सुचिरं कालम्	१	५२	३१
कृत्वा नियुद्धं भृशमुग्रवेगौ	६	४०	१६
कृत्वा निःशब्दमेकाग्राः	४	६०	३
कृत्वा प्रणामं मुदितः	१	६५	२२
कृत्वाभिषेकं सुतयोः	६	१०८	१४
कृत्वा वचनशुश्रूषाम्	३	१०	८
कृत्वा शापसमायुक्तान्	१	६२	१८
कृत्वा स्त्रीरूपमात्मानम्	७	८७	१२
कृत्वैतत्कार्मुकं राज्यम्	४	११	९१
कृत्वैवमुदकं तस्मै	३	६९	१
कृत्वोदकं ते भरतेन सार्धम्	२	७६	२३
कृत्स्नं तु ते सेत्स्यति कार्य०	४	२४	२३
कृत्स्नं तु नगरं तत्तु	४	१२७	२२
कृत्स्नेयं यत्कृते लङ्का	६	४६	१५
कृत्स्नं वनमिदं दृष्टम्	३	१४	२८
कृत्स्नं हि कपिभिर्व्याप्तम्	६	४१	९८
कृमिभिर्भक्ष्यमाणांश्च	७	२१	१३

	का०	स०	श्लो०
कृमिरागपरिस्तोमे	४	२३	१४
कृशाश्वतनयान्राम	१	२८	१०
कृष्णाजिनधरं तं तु	२	९९	२६
कृष्णं रक्ताम्बरधरम्	१	१६	१२
कृष्यमाणः स्त्रिया मुण्डः	५	२७	२१
केकयस्थे च मयि तु	२	१०२	५
केकयाधिपती राजा	१	७३	३
केचिच्चैवासिना छिन्ना	७	७	४८
केचिच्छरण्यं शरणं स्म०	६	६०	९७
केचित्किलकिलां चक्रुः	६	४	६४
केचित्क्षतनिभा देशाः	२	९४	२२
केचित्तमाहता भग्नाः	७	१४	१७
केचित्तेजस्विनः शूराः	७	१६	४७
केचिदङ्गारसदृशाः	१	२८	१२
केचिदन्योन्यमासाद्य	६	५३	२०
केचिदस्त्राणि संत्यज्य	६	५३	२३
केचिदाकाशमाविश्य	६	६९	४६
केचिद्भीमबलाः शूराः	३	२५	२७
केचिद्रजतसंकाशाः	२	९४	५
केचिद्द्विधाकृतः खड्गैः	६	५८	१४
केचिद्द्विनिहताः कृताः	७	२८	३८
केचिद्विनिहता भूमौ	६	५२	२१
केचिद्विनेदुः संहृष्टाः	७	९७	२५
केचिन्मुकुलसंवीताः	४	१	८७
केचिल्लङ्कां परिश्रिताः	६	९०	७९
केतक्यः सिन्दुवाराश्च	६	४	७८
केतक्यः सिन्दुवाराश्च	४	१	७७
केदारस्येव केदारः	६	५	११
केनचित्त्वथ कालेन	१	५५	१३
केनचित्वथ कालेन	७	४	२३
केन ते नागनासोरु	५	३८	२५
केन प्रभावेण भवः	७	१६	२४
केन वा कस्य वा हेतोः	३	५	७
केन स्म निहता सर्वे	२	६३	३३
केनाध दुष्कृतेनायम्	७	७३	८
केनायमुपदिष्टस्ते	३	४१	२
केनेदमुपदिष्टं ते	३	४१	५

	का०	स०	श्लो०
केनोपायेन पश्येयम्	५	२	३५
के पूर्वमभिवर्तन्ते	६	२६	९
केयूराङ्गदवैदूर्यम्	६	३	४३
केवलं हि सहाया मे	४	८	३६
केशान्कर्णललाटं च	६	९३	१३
केशाः सूक्ष्माः समा नीलाः	६	४८	९
कैकेयास्तु सुसंवृत्तम्	२	२	१९
कैकेयि मामकाङ्गानि	२	४२	६
कैकेयी च सुमित्रा च	२	८३	६
कैकेयी तत्र जग्राह	२	९२	१७
कैकेयीमब्रवीत्क्रुद्धः	२	१२	७
कैकेयी मम भर्तारम्	२	४७	१४
कैकेयीं मां च तातं च	२	१०६	१७
कैकेयी विस्मयं प्राप्य	२	९	३८
कैकेय्यां मुक्तलज्जायाम्	२	३६	१३
कैकेय्याः प्रतिगृह्यते	२	२२	१६
कैकेय्याः प्रियकामार्थम्	३	३७	११
कैकेय्याः प्रियकामार्थम्	३	४७	१३
कैकेय्याः प्रियकामेन	२	१३	७
कैकेय्या क्लिश्यमानेन	२	४१	५
कैकेय्या दुष्टमातायाः	२	६६	१९
कैकेय्या न वयं राज्ये	२	४८	२३
कैकेय्या यदि चेद्राज्यम्	२	४८	२१
कैकेय्या यानि चोक्तानि	६	११९	१४
कैकेय्या वचनं श्रुत्वा	२	८	२०
कैकेय्या वञ्चितो राजा	२	२४	११
कैकेय्या विनियुक्तेन	२	५९	१८
कैकेय्यै चावशिष्टार्धम्	१	१६	२८
कैर्गुणैरनुरक्तासि	३	४९	१४
कैलासनिलयप्रख्यम्	५	२	२३
कैलासमिवदुर्धर्षम्	१	७४	१८
कैलासमुग्रं हिमवच्छिलां	६	७४	५७
कैलासशिखराकोर	६	१२३	३
कैलासशिखरावासी	६	७	४
कैलासशिखरे बद्ध्वा	४	६१	४
कैलासशिखरेभ्यश्च	४	३७	२२
कैलासं लङ्घयित्वा तु	७	२७	१

	का०	स०	श्लो०
कोकिलस्य तु शुश्राव	१	६४	६
कोकिलाकुल सीमान्तः	४	१	३२
कोकिलैर्भृङ्गराजैश्च	७	४२	८
कोकिलो हृदयग्राही	१	६४	६
कोटिभिर्दशभिर्व्याप्तः	४	३६	२७
कोटिसूर्यप्रतीकाशम्	६	६५	३३
कोटीशतपरीवारः	६	४	३३
कोटीशतेन संप्राप्तः	४	३६	३६
कोटीसहस्रैर्दशभिः	४	३६	१४
को दाशरथिबाणानाम्	४	५६	४
को नाम स भवेत्तस्य	६	१८	६
को नु दारप्रणाशं ते	३	६५	११
को नु धर्माश्रयः सूत	७	५०	८
को नु पुत्रः पिता भ्राता	५	३३	६
कोऽन्यस्तां वानरीं वेगम्	४	६४	१३
कोन्तनेनाप्रवीतेन	२	४८	२०
कोन्वस्मिन्सांप्रतं लोके	१	१	२
कोपं कथं नाम गुणप्रकृष्टः	४	३३	५२
कोपं राघवसिंहस्य	१	३	२५
कोपाद्वा यदि वा मोहात्	५	३३	८
कोऽपि लोके न मे वेगम्	४	६७	३६
कोपेन च महातेजाः	१	६४	१६
कोपेन महताविष्टः	७	५५	१५
को ब्रह्मदण्डप्रतिमप्रकाशान्	६	१५	१३
को भवान्देवसंकाशः	७	७७	१६
को भवान्रूपसंपन्नः	६	५०	४४
को मां साध्यामुपास्यैव	२	६४	३३
कोऽयं कस्य कुतो वापि	५	४८	५५
कोऽयं कस्य कुतो वायम्	५	४२	६
कोऽयं गिरा घोषयति	४	५६	१६
कोयष्टिभिश्चार्जुनकैः	३	७५	१२
कोऽर्थो मनीषितस्तुभ्यम्	७	७५	१७
कोऽसौ पर्वतसंकाशः	६	६१	६
कोऽसौ रामौ मुनिं द्रष्टुम्	३	१२	१४
को वधेन ममार्थो स्यात्	२	६३	२६
को वीरो योजनशतम्	४	६४	१६
कोशलेषु कुशं वीरम्	७	१०७	१७

	का०	स०	श्लो०
कोशलो नाम मुदितः	१	५	५
कोशसंग्रहणे युक्ताः	१	७	११
को हन्ता लवणं वीरः	७	६२	८
को हि धर्मार्थयोर्हीनम्	२	१०६	१२
को हि नाम सपत्नो माम्	६	२६	४
को हि रूपमिदं श्रेष्ठम्	३	१८	१२
को हि सिंहमिवासिनम्	६	१३	१७
कोह्यविद्वानपि पुमान्	२	५३	१०
कौतूहलं समुत्पन्नः	७	७५	१६
कौतूहलसमन्वितः	१	३६	३
कौतूहल समाविष्टाः	७	६६	६
कौम्भकर्णिस्ततो वीरः	६	८	१६
कौशिकस्तु तथेत्याहः	१	६१	२७
कौशिकीतीरमासाद्य	१	६३	१५
कौशेयवस्त्रां मलिनाम्	६	१२६	४४
कौशेयानि च वस्त्राणि	२	६८	६
कौसल्या चैव राजा च	२	३१	१४
कौसल्या चैव राजा च	२	८६	१५
कौसल्यां च य आशिभिः	२	३२	१५
कौसल्यां च सुमित्रां च	१	१२	६०
कौसल्यां चैव पश्येम	२	५५	२५
कौसल्या तत्र जग्राह	२	६२	१६
कौसल्या तं हयं तत्र	१	१४	३३
कौसल्यानन्तरं राज्ञः	२	६५	१८
कौसल्या धर्मसंयुक्ताम्	२	७४	१२
कौसल्यापि तदा देवी	२	२०	१४
कौसल्या पुत्रशोकार्ता	२	२४	३२
कौसल्या बाष्पपूर्णाक्षी	२	६६	१
कौसल्या बाष्पपूर्णेन	२	१०४	३
कौसल्या बिभृयादार्या	२	३१	२२
कौसल्या मां च रामं च	२	१२	८६
कौसल्याया गृहं शीघ्रम्	२	४२	२७
कौसल्यायां महातेजाः	२	४१	४
कौसल्यायास्तथा कच्चित्	५	३६	२२
कौसल्यायाः यथा युक्तः	२	२०	३
कौसल्या शुशुभे तेन	१	१८	१२
कौसल्या शुशुभे तेन	२	१	

	का०	स०	श्लो०
कौसल्या सुप्रजा राम	१	२३	२
कौसल्या सुप्रजा राम	२	१६	१३
कौसल्या सुप्रजा राम	५	६४	३२
कौसल्या सुप्रजास्तात	३	४	१५
कौशल्या सुषुवे रामम्	२	९२	२२
क्रतुं समाप्य तु तदा	१	१४	४५
क्रन्दन्त्यः सहसा पेतुः	५	५४	२६
क्रममाणं समीक्ष्याथ	५	१	७३
क्रमेण गत्वा प्रविलोकयन्वनम्	३	७५	३०
क्रव्यादा दारुणा वाग्भिः	३	८९	३७
क्रव्यादानां मृगाणां च	६	१०	२१
क्रियतां तत्सखे शोघ्रम्	३	४२	१४
क्रियतामस्य संस्कार	६	१११	१०१
क्रियतां मे दया भद्रे	२	१३	१८
क्रियतां शिल्पिभिः पन्थाः	२	७९	१३
क्रियाभियोगं मनसः प्रसादम्	४	३०	१७
क्रीडतस्त्वेष नः पुत्रान्	२	३६	२२
क्रीडन्तमिवदेवेषम्	४	२९	५
क्रीडन्ती राजहंसेन	३	५६	२०
क्रीडन्तो नन्दनवने	१	१५	२४
क्रीडमानश्च विस्रब्धाः	२	२८	८
क्रीडा गृहाणि चान्यानि	५	६	३७
क्रीडारतिविधिज्ञाभिः	३	३८	२४
क्रीडितेनापराः क्लान्ताः	५	११	५
क्रीडित्वोपरतं रात्रौ	५	१०	१०
क्रुद्धः निःश्वयमानं तम्	४	३४	२
क्रुद्धः परिलिहन्सृक्काम्	६	८	२२
क्रुद्धः पापं न कुर्यात्कः	५	५५	४
क्रुद्धाः सौमित्रिरूत्पत्य	६	७१	४७
क्रुद्धामाज्ञाय रामं तु	२	११०	१
क्रुद्धेन तस्मिंस्तु काकुत्स्थे	४	५७	१९
क्रुद्धेन च तदा राजन्	७	१५	८
क्रुद्धेन विप्रमुक्तोऽयम्	७	२२	४१
क्रुद्धेस्तैरहमुत्प्लुत्य	६	२४	२८
क्रुद्धो रामः शरं घोरम्	३	६७	९
क्रूरैरनार्यैः सोमित्रे	३	१८	१९
क्रोधदूषितनेत्रस्तु	७	३२	३९

	का०	स०	श्लो०
क्रोधप्रमुक्तोरिषुभिः	५	३४	३३
क्रोधमानकृतप्रज्ञाम्	२	९२	२६
क्रोधमाहारयत्तीव्रम्	३	२४	३४
क्रोधमुत्पाद्य नो भर्तुः	३	२०	१३
क्रोधमूर्च्छितरूपस्तु	६	५६	२
क्रोधं भीममहं मोक्ष्ये	६	२५	२५
क्रोधरक्तेक्षणो धीरः	६	६७	१३३
क्रोधलोभौ विमोक्तव्यौ	२	२८	२४
क्रोधवेगेन संयुक्तः	५	४०	८
क्रोधसंरक्तनयनः	१	५९	१७
क्रोधागारं प्रविशाद्य	२	९	२२
क्रोधात्सूतं च दुर्धर्षः	७	२९	४
क्रोधादमर्षादतिविप्रधर्षात्	४	२४	६
क्रोधाद्द्विगुणताम्राक्षाः	६	५२	२७
क्रोधाद्यश्च भवेदग्निः	६	२६	३४
क्रोधेन हि पिता मेऽसौ	७	८०	१२
क्रोशन्तः प्रययुः सर्वे	४	२५	३४
क्रोशन्ती रामरामेति	४	६	१०
क्रोशन्ती रामरामेति	४	५८	१६
क्रोशन्ती रामरामेति	३	५२	८
क्रोशमात्रं ततो गत्वा	२	५५	८
क्रोशमात्रं ततो गत्वा	२	५५	३२
क्रोञ्चं गिरिमतिक्रम्य	४	४३	२५
क्रोञ्चबर्हिणसंघुष्टैः	५	३	११
क्रोञ्चस्य तु गुहाश्चान्याः	४	४३	२७
क्रोञ्चावटे विराधस्तु	६	१०७	६०
क्रौञ्चीनामिव नारीणाम्	२	७६	२१
क्लान्तोरुधिरसिक्ताङ्गः	४	१२	२२
क्लिन्नपक्षोत्तराः स्नाताः	२	६३	१७
क्लिश्यन्तीं पतिदेवा त्वाम्	६	११३	२९
क्लिष्टकौशेयवसनाम्	५	२०	३०
क्लिष्टरूपामसंस्पर्शात्	५	१७	२३
क्लेष्टुमर्हसि मां न त्वम्	४	११	१७
क्व गच्छसि वरारोहे	७	२६	२१
क्व गतिर्मानुषाणां च	१	६७	१०
क्व गतो लप्स्यसे शर्म	३	५३	२३
क्व च ते क्षत्रियबलम्	१	५६	४

	का०	स०	श्लो०
क्व च यक्षार्जवं युद्धम्	७	१५	६
क्व च शस्त्रं क्व च वनम्	३	६	२७
क्व चारण्यं क्व च क्षात्रम्	२	१०६	१८
क्व चासौ तव भर्ता वै	७	२५	४५
क्वचिच्च चतुरो मासान्	३	११	२५
क्वचित्कुमुदखण्डैश्च	२	५०	२१
क्वचित्प्रकाशं क्वचिदप्रकाशम्	४	२८	१७
क्वचित्प्रनृत्तैः क्वचिदुन्नदद्भिः	४	२८	३७
क्वचित्तिमितगम्भीराम्	२	५०	१७
क्वचित्तीररुहैर्वृक्षैः	२	५०	२०
क्वचिदर्धाविशेषाणि	५	११	२६
क्वचिद्वाष्पाभिसंरुद्धान्	४	२८	१४
क्वचिद्वादित्रघोषश्च	४	६१	६
क्वचिद्वादित्रनृत्यादि	७	२०	१३
क्वचिन्न दुष्टस्त्रासीत्	१	७	१५
क्वचिन्नीलोत्पलैश्छन्ना	४	२७	२२
क्वचिन्नैव प्रपीतानि	५	११	२८
क्वचिन्मणिनिकाशोदाम्	२	६५	६
क्वचिन्मत्त इवाभाति	३	६०	३७
क्व चेदानीं स धर्मात्मा	२	७२	४०
क्व ते रामेण संसर्गः	५	३५	२
क्व नु तेऽभूत्पिता तात	२	१००	४
क्व लक्ष्मण वैदेही	३	६१	३
क्व वत्स्यति धर्मात्मा	२	५८	५
क्व यास्यसे महाराज	२	७६	७
क्व वा वसति तद्रक्षः	४	६	२५
क्व स पाणिः सुखस्पर्शः	२	७२	३१
क्व सीता केन वा हृष्टा	४	५६	३
क्व सीता वर्तते देवी	५	६५	५
क्व सीतेति निरीक्षन्वै	३	६४	१७
क्वार्जुनो नृपतिः शीघ्रम्	७	३१	११
क्वासि गन्ता महाकाय	५	५८	४०
(क्ष)			
क्षणभूतेव नौ रात्रिः	१	४५	३
क्षतजार्द्रसवर्णाभा	३	२३	६
क्षतवृत्तिर्वने नित्यम्	२	३२	३५
क्षत्रबन्धुं सदानार्यम्	६	८८	२४
क्षत्रबन्धो स्थितोऽस्म्येषः	१	५६	३
क्षत्रं ब्रह्ममुखं चासीत्	१	६	१६
क्षत्ररोषात्प्रशान्तस्त्वम्	१	७५	६
क्षत्रियाणां तु वीराणाम्	३	६	२६
क्षत्रियाणामिह धनुः	३	६	१५
क्षत्रिया यत्र जायन्ते	७	७४	१२
क्षत्रियाश्च महात्मानः	७	३७	१६
क्षत्रियेण वधो राजन्	२	६४	२३
क्षत्रियैर्बहुभिर्वीरैः	६	७	१६
क्षत्रियोऽहं दशरथः	२	६४	१३
क्षत्रियौ वृत्तसंपन्नौ	३	३	३
क्षमस्व रोषं त्यज राक्षसेन्द्र	५	५२	५
क्षमा ते पृथिवीतुल्या	८	३७	६
क्षमा यशः क्षमा धर्मः	१	३३	६
क्षयोऽस्य दुर्मतेः प्राप्तः	७	८१	५
क्षरन्तीं च पयस्तत्र	७	२३	२१
क्षात्रं धर्ममहं त्यजे	२	१०६	२०
क्षान्तं क्षमवतां पुत्र्यः	१	३३	६
क्षितिक्षमा पुष्करसंनिभेक्षणा	५	५६	३१
क्षिपता पादपाश्चेमे	४	११	५४
क्षिपन्तीन्द्रजितं संख्ये	६	८२	१४
क्षिपन्त्यपि तथान्योन्यम्	५	६२	१३
क्षिप्तं दृष्ट्वा ततः कायम्	४	११	८६
क्षिप्तान्वृक्षान् समाविध्य	४	१६	१२
क्षिप्ताश्चाशु शरास्तेन	६	१०३	२६
क्षिप्रं तव सनाथो मे	५	२१	३३
क्षिप्रं त्वं देवि शोकस्य	५	३६	४६
क्षिप्रं द्रक्ष्यसि वैदेहि	५	३६	४०
क्षिप्रमद्य दुराधर्षाम्	५	४१	२२
क्षिप्रमद्यैव दुर्धर्षाम्	६	२३	१३
क्षिप्रमर्हति धर्मेण	६	१११	१०२
क्षिप्रमानीयतां सीता	५	५८	१४३
क्षिप्रमारोह सुग्रीव	६	१२२	२३
क्षिप्रमुत्पततो मन्ये	५	१३	७
क्षिप्रमेष्यति काकुत्स्थः	५	३६	१४
क्षिप्रमेष्यति काकुत्स्थः	५	५६	२१
क्षिप्रं प्रहर निःशङ्कम्	६	५६	५७

	का०	स०	श्लो०
क्षिप्रं मामपि कैकेयी	२	७५	१३
क्षिप्रं वज्रसमैर्बाणैः	६	१३	१९
क्षिप्रं वनमिदं सौम्य	२	९८	३
क्षिप्रं विसृज वैदेहीम्	३	५०	१६
क्षिप्रं सुव्यथितैर्वाणैः	५	६७	२१
क्षिप्रं संयोजयित्वा तु	२	११५	१८
क्षीणपानोत्तमैर्मग्नैः	२	११४	१४
क्षीणपण्यां च्युतां भूमौ	५	१७	२०
क्षीबो विचित्राभरणः	५	१८	२८
क्षीयमाणं दैवहतम्	७	२०	११
क्षीयमाणे तु लोकेऽस्मिन्	७	८६	६
क्षीरोदं यान्तु सागरम्	६	५०	२९
क्षीरोदवेला निलयाः	४	३७	२५
क्षुत्पिपासे न ते राम	१	२२	१८
क्षुद्रकर्मा हि कैकेयी	२	५३	१८
क्षुद्रधिक्त्वा तु हीनार्थम्	३	३	९
क्षुद्रेण हीनेन नृशंसमूर्तिना	५	१३	६७
क्षुधा चैव सहस्राक्षम्	१	२४	१९
क्षुधितस्य च सिंहस्य	३	४७	३९
क्षुब्धानां सागराणां च	६	१०७	४६
क्षुरक्षुरप्रनाराचैः	६	७६	६
क्षुरप्रैरर्धचन्द्रैश्च	६	६९	६२
क्षुरोपमां नित्यमसत्प्रियंवदाम्	२	१२	११०
क्षेत्राणि सस्ययुक्तानि	७	७०	१०
क्षेत्राणि शोधयता लब्धा	१	६६	१४
क्षेप्तारं पर्वताग्राणाम्	३	३२	१२
क्षेप्तारं पर्वतेन्द्राणाम्	४	१९	२२
क्षोभयेयुश्च वेगेन	१	१७	२७
क्षौमं च दह्यते तत्र	६	७५	९
क्ष्वेडन्तश्च प्लवन्तश्च	६	९०	९१
(ख)			
खगतेन विमानेन	६	१२२	२६
खड्गचापधराः शूराः	२	१६	३६
खड्गं च परमप्रीतः	१	१	४३
खड्गधाराहता मेऽद्य	२	२३	३४
खड्गनिष्पेषनिष्पिष्टैः	२	२३	३३
ड्गपत्रवनं चैव	३	५३	२०

	का०	स०	श्लो०
खड्गप्रहाराभिहतः	६	७०	४१
खड्गशक्तिधनुर्ग्राहाः	७	१०१	६
खड्गशक्त्यृष्टिशूलश्च	६	५८	७
खड्गावेतौ विराजेते	४	३	१९
खड्गिनौ हठधन्वानौ	३	६९	३६
खड्गैश्चक्रर्गदाभिश्च	६	५३	९
खनिष्टपिटके चोभे	२	३७	५
खन्यमाने ततस्तस्मिन्	१	४०	१३
खमुत्पतन्तं तं दृष्ट्वा	४	५३	१
खरं तु रामाभिमुखम्	३	२७	१
खरं तु विरथं रामः	३	२९	१
खरबाहुप्रमुक्ता सा	३	२९	२६
खरश्च निहतः सख्ये	५	१६	१०
खराश्च निहताः सख्ये	६	९४	१५
खरस्तु तन्महत्सैन्यम्	३	२२	१६
खरस्तु निहतो भ्राता	६	१११	१७
खरस्त्रिशिरसा तेन	३	२७	६
खरस्त्वय्यपि चायुक्तम्	२	११६	२१
खरस्य कुम्भकर्णस्य	६	९५	११
खरस्य निधने देवि	३	४५	१९
खरहन्ता स ते भर्ता	६	३१	१५
खराभिस्तनिता घोराः	६	३५	२५
खराश्च खरनिर्घोषाः	६	१०२	४१
खरैर्गोभिरथोष्ट्रैश्च	७	६	४८
खरो यद्यतिवृत्तस्तु	६	९	१४
खरोष्ट्राश्वतरा राजन्	६	१०	१८
खर्जूरपुष्पाकृतिभिः	३	१६	१७
खस्थः स दद्दशे रामः	७	८२	१७
खात्पपाताविनि हृष्टः	६	१९	२
खानितः सगरेणायम्	६	१९	३१
खुरैरुदीरितो रेणुः	२	९२	१५
खे यथा निपतत्युल्का	५	१	६३
ख्यातकर्मापदानाश्च	४	४०	४
ख्यातः प्राज्ञः कृतज्ञश्च	५	२६	११
(ग)			
गगनाद्भूतले चाशु	६	२०	१७
गमने तान्यनेकानि	१	६०	३१

	का०	स०	श्लो०
गङ्गातीरे मया देवि	७	४६	८
गङ्गात्रिपथगा नाम	१	४४	६
गङ्गामन्वगमन्प्रीताः	१	४३	३३
गङ्गायमुनयोः संधिम्	२	५५	४
गङ्गायाः पतनं राजन्	१	४२	२४
गङ्गायाश्चापि सन्तारम्	२	३	१५
गङ्गायाः सलिलक्लिन्ने	१	४२	१९
गङ्गा संप्लावयामास	१	४३	३५
गङ्गा हिमवतो ज्येष्ठा	१	४१	१९
गच्छतश्च हि मे घोरम्	५	५८	९
गच्छ तातानुजाने त्वाम्	२	७०	१७
गच्छता मातुलं कुलम्	२	१	१
गच्छता त्वं कपिशार्दूल	५	६७	४०
गच्छ त्वं वीर निर्याहि	६	५३	३
गच्छन्तं पितरं द्रष्टुम्	७	९	४
गच्छन्तमेव तं दृष्ट्वा	२	४५	२०
गच्छन्तु चैवानयितुम्	२	१९	१०
गच्छन्नेवाथ भरतः	२	९९	४
गच्छ पुत्र मयाज्ञप्तः	६	७८	३
गच्छ पौलस्त्य विस्रब्धम्	७	१६	३९
गच्छ लक्ष्मण पश्य त्वम्	४	१	११३
गच्छ शीघ्रमितो वीर	३	७२	१७
गच्छ सैन्यानि सर्वाणि	६	६१	३४
गच्छ सोम्य द्विजश्रेष्ठम्	७	७५	२
गच्छ सोम्य शिवं मार्गम्	३	४०	२४
गच्छावस्त्वरितं तत्र	३	७५	१०
गच्छेतद्वद्गमिष्यामि	५	१	३८
गच्छेदानीं महाबाहो	२	२४	३६
गच्छन्तं राक्षसं वीरम्	६	६९	८२
गच्छोपवासं काकुत्स्थम्	२	५	२
गजकन्या गजाश्चैव	२	९२	३४
गजतुल्यगती वीरौ	१	५०	१८
गजः पर्येति तं देशम्	४	४३	३५
गजपुष्पीमिमां फुल्लाम्	४	१२	३९
गजयूथानिवारण्ये	२	९६	८
गजश्च गिरिसंकाशः	६	४	१५
बलवान्वीरः	४	३०	२६

	का०	स०	श्लो०
गज सा गजनासोरूः	३	६०	२४
गजस्कन्धगताः केचित्	६	७३	११
गजस्तु मथितात्तूर्णम्	६	९६	२०
गजानां दशसहस्रम्	६	३७	१६
गजानां बृहितैः सार्धम्	६	४२	४०
गजाश्च सगजान्रोहान्	६	५६	२३
गजाश्वरथसंबाधाम्	२	८६	२०
गजाश्वरथसंबाधैः	३	२९	२
गजास्थितैर्महामात्रैः	५	६	५
गजेन समभिद्रुत्य	६	७०	१०
गजेन्द्रक्रीडमथिता	७	२६	४२
गजेन्द्रहस्तप्रतिमश्च पीनः	५	२९	४
गजेन्द्रैः पर्वताकारैः	६	५२	१३
गजैः पर्वतकूटाभैः	३	२५	१०
गजो गवाक्षः कुमुदः	६	३६	३
गजो गवाक्षो गवयः	४	२६	३५
गजो गवाक्षो गवयः	४	६५	२
गजो गवाक्षो गवयः	६	४२	३१
गजो गवाक्षो गवयः सुदंष्ट्र	६	३६	४८
गजं वा वीक्ष्य सिंहं वा	२	६०	२०
गणिकास्तत्र गच्छन्तु	१	१०	५
गतः खलु महाराजः	६	२३	५०
गतं तु गङ्गापरपारमाशु	२	५२	१००
गतप्रभा द्यौरिव भास्करं०	२	६६	२८
गतश्चाहो दिवं राजा	२	११५	३
गतः स नृपतिस्तत्र	२	१०८	१२
गतः स परमल्लोकान्	६	९२	४
गतः सेतुः सुनीतानाम्	६	१०९	६
गतानां तु ततः पूजाम्	१	१०	१७
गतानां तेषु विप्रेषु	१	१२	२२
गता भगवती रात्रिः	१	४५	६
गता विचेतुं पुष्पाणि	३	६०	९
गतासु तासु सर्वासु	१	१०	२४
गतासुर्भीमवेगस्तु	६	१०८	२२
गतासुस्त्वं गतश्रीकः	३	५६	१२
गतिः स्वर इवाश्वस्य	२	१०५	६

	का०	स०	श्लो०
गति स्वर इवाश्वस्य	६	१२८	५
गति मृगयमाणानाम्	३	१०	१३
गतिरेका पतिर्नार्याः	२	६१	२४
गतिर्यः सर्वभूतानाम्	२	७८	२
गतिवेगश्च तेजश्च	३	४४	५
गतिवेगं समापन्नौ	६	१०७	३३
गते च तस्मिन्सुरराजशत्रु:	६	६७	६२
गते तस्मिन्नरश्रेष्ठ	१	४६	८
गते तु शोकात्त्रिदिवं नरा०	२	६६	२६
गते पुरोहिते रामः	२	६	१
गते रामे प्रशान्तात्मा	१	७७	१
गते रामे हि तरुणाः	२	११४	२३
गतेषु तेषु काकुत्स्थः	६	७६	२३
गतेषु पृथिवीरोषु	१	१८	५
गतेषु वानरेन्द्रेषु	४	४६	१
गतेष्वथ नृपो भूयः	२	४	१
गते हि त्वयि विक्रान्ते	५	६८	५
गते हि मयि तत्रेयम्	५	३०	६
गते हि हरिशार्दूल	५	५६	५
गतोदके सेतुबन्धः	२	६	५४
गतो दशरथः स्वर्गम्	२	७६	२
गतो राम इति श्रुत्वा	१	७७	५
गतोऽर्धरात्रः काकुत्स्थ	१	३४	१४
गतोऽस्म्यन्तममर्षस्य	५	११५	३
गतो हि लक्ष्मणं पूर्वम्	६	४४	१०
गत्वा चतुरहं मार्गम्	१	६६	७
गत्वा तस्यास्ततस्तीरम्	२	६४	१६
गत्वा तु नगरी भार्ये	६	१२	२३
गत्वा तु यदि काकुत्स्थम्	५	१३	२१
गत्वा तु रक्षोधिपतेः शशंसुः	६	५६	२
गत्वा तु स महात्मानम्	१	१	३५
गत्वा तु सरयूतोयम्	६	११०	२६
गत्वा तु सुचिरं कालम्	२	४६	१०
गत्वा त्रिभुवनश्रेष्ठम्	६	७८	१२
गत्वा द्रक्ष्यथ दुर्धर्षा	४	४०	४४
गत्वा परममध्वानम्	६	७४	२६
गत्वा रसातलं दिव्यः	६	६६	३५

	का०	स०	श्लो०
गत्वाश्रमपदं तस्य	७	२	१५
गत्वा सौमित्रसहितः	२	२	३७
गदया गरुडेशानम्	७	७	३८
गदयाभिहतस्तेन	७	७	३६
गदां तां सुमहाघोराम्	६	६७	२१
गदां त्यक्त्वा ततस्तत्र	६	५४	२७
गदां शूलासिहस्तानाम्	६	७५	१६
गदानां मुसलानां च	६	१०७	४५
गदापरिघहस्ताश्च	६	११	८
गदापरिघहस्तौ तौ	६	६७	१६
गदाप्रहारं तं घोरम्	६	४३	४०
गदामादाय संक्रुद्धः	६	७०	५३
गदामुसलवर्षेण	६	१०७	४४
गदेयं मामिका मेनम्	७	३	१७
गद्गदस्याथ पुत्रोऽन्यः	६	३०	२१
गन्धर्वनगरोपमाम्	५	२	४६
गन्धर्वनगरं प्रख्या	३	४५	१७
गन्धर्वयक्षप्रवराः	१	४३	३२
गन्धर्वराजप्रतिमौ	२	१६	१६
गन्धर्वाः किन्नरा सिद्धाः	४	४३	४६
गन्धर्वाणामिवावासाम्	६	१०	६
गन्धर्वाणामृषीणां च	६	११०	१३
गन्धर्वाप्सरश्चैव	१	७६	१०
गन्धर्वाप्सरसां सङ्घाः	६	१०७	५१
गन्धवन्ति च पुष्पाणि	६	१२८	७३
गन्धहस्तीव दुर्धर्षः	६	४	१७
गन्धहस्तीव दुर्धर्षः	६	२४	१६
गन्धाढ्यान्यतिरम्याणि	६	६६	७
गन्धानुच्चावचांश्चान्यान्	२	७६	१७
गन्धान्मनोज्ञान्विसृजन्	२	१५	३४
गन्धैश्च परमोदारैः	७	७५	३
गभस्तिभिरिवार्कस्य	४	४३	३६
गम्भीराक्षं महावक्त्रम्	३	१	५
गमनायाभिचक्राम	१	७७	१८
गमिष्यति महारण्यम्	२	३४	८
गमिष्याम्याश्रमं पुनः	३	५८	६
गमिष्ये दण्डकारण्यम्	२	२०	२८

	का०	स०	श्लो०
गम्यतामनुजानामि	२	११३	१०
गम्यतामिति चोवाच	७	४१	१४
गम्यतामिति तानाह	१	२८	१४
गम्यतामिति ताः सर्वाः	६	११?	१२२
गम्यतामिति तेनोक्तः	३	११	७३
गम्यतां वत्स सौमित्रे	३	८	१६
गम्यतां सौम्य किष्किन्धाम्	७	४०	२
गरुडव्यूहमास्थाय	६	३०	१२
गरुडस्तु समाश्वस्तः	७	७	४६
गरुडाधिष्ठितावेतौ	६	५०	२२
गर्गश्च च्यवनश्चैव	७	९६	४
गर्जतोऽस्य सुसंरब्धम्	४	१६	२
गर्जन्ति न वृथा शूराः	६	६५	३
गर्जन्निव महामेघः	४	१४	४
गर्हितं तु कृतं कर्म	४	५८	२८
गवयेन गवाक्षेण	६	४९	२७
गवां कोटिसहस्रं दत्त्वा	१	१	९५
गवाक्षं जाम्बवन्तं च	६	९८	१२
गवाक्षितमिवाकाशम्	६	९९	२९
गवाक्षं शरभं चैव	६	४६	२०
गवां पयसि स्कन्नानि	६	१०	१०
गवां शतसहस्रं च	१	७२	२२
गवां शतसहस्रं च	२	५२	८८
गवां शतसहस्रं च	६	१२५	४४
गवां शतसहस्रेण	१	५३	९
गवां शतसहस्रेण	१	६१	२३
गवां सहस्रमप्येकम्	२	३२	३६
गवां स्पृशतु पादेन	२	७५	३१
गहनेषु च देशेषु	४	४७	१३
गाढं परिहिताः सर्वे	४	४८	१८
गात्रसंवाहनैश्चैव	१	४६	११
गात्राण्यपि तथा शीर्षम्	५	२४	४१
गात्रेषु वलयः प्राप्ताः	२	१०५	२३
गान्धर्वं च भुविश्रेष्ठः	२	२	३
गायनैश्च विराविष्टाः	१	१८	१९
गायन्ति केचित्प्रहसन्ति०	५	६१	१६
गायन्तो नृत्यमानाश्च	१	३२	१३

	का०	स०	श्लो०
गार्ग्यमाङ्गिरसः पुत्रम्	७	१००	२
गिरिं कुबेरस्य गतोऽध्वनाम्	५	२१	३४
गिरिगह्वरसंलीनः	५	५७	२७
गिरिगह्वरसंलीनम्	४	२३	१८
गिरिजालावृता दुर्गाम्	४	४२	१०
गिरिजालावृतान्देशान्	४	५०	७
गिरिदुर्गाद्विनिष्क्रम्य	३	३०	३८
गिरिनिर्झरसंभूता	२	२८	७
गिरिप्रस्थास्तु सौमित्रे	४	१	५७
गिरिप्रस्थेषु रम्येषु	४	१	१९
गिरिमात्रशरीरस्य	६	१२	३७
गिरिमूर्ध्नि स्थितां लङ्काम्	४	२	१९
गिरिवरमभितो निवर्तमानः	६	३३	३५
गिरिशृङ्गमिदं तात	४	२७	१४
गिरिशृङ्गाणि वृक्षाश्च	६	१०७	१८
गिरींश्च सरितः सर्वाः	३	४२	११
गिरेर्वज्राभिमृष्टस्य	६	१०६	८
गिरेः सानूनि रम्याणि	२	९३	९
गीतवादित्रनिर्घोषः	४	२७	२७
गीतवादित्रनिर्घोषः	४	४३	५१
गीतवादित्रनिर्घोषम्	२	६१	६
गीतवादित्रनिर्घोषैः	२	८८	८
गीतभिर्मधुरैः स्निग्धैः	१	१४	९
गीतोऽयं ब्राह्मणा श्लोकः	४	३४	११
गुणदोषकृतं जन्तुः	४	२१	२
गुणदोषौ न निश्चित्य	६	६	१०
गुणवन्तो बहुश्रुताः	२	१२	६५
गुणवान्वा परजनः	६	८७	१५
गुणाद्रूपगुणाश्चापि	१	७७	२७
गुणान्गुणवतो देव	२	२	२७
गुणान्दाशरथेस्तथा	१	३	१२
गुणान्रामस्य कथय	५	३४	१९
गुणा बहुविधा प्राप्ताः	१	६५	३३
गुप्तः कुशिकपुत्रेण	१	६८	१५
गुरवश्च महात्मानः	५	५८	२१
गुरु क्रियावान्वृद्धश्च	२	१०६	११
गुरुणा त्वभ्यनुज्ञातः	२	५	२५

	का०	स०	श्लो०
गुरुपुत्रानहं सर्वान्	१	५७	१६
गुरुलाघवमर्थानाम्	२	६३	७
गुरुशापकृतं रूपम्	१	५६	४
गुरुश्च गुरुपुत्रश्च	४	६५	२७
गुरुश्च राजा च पिता०	२	२१	५६
गुरुणां गुरुकार्याणि	१	७७	२३
गुरुणां च प्रसादेन	४	६७	३४
गुरुणां वचनाच्छीघ्रम्	१	१२	१५
गुरोरप्यवलिप्तस्य	२	२१	१३
गुरोराराधने युक्तः	५	३५	७४
गुरोर्गुणगृहीताश्च	१	७	१७
गुहस्य तत्तु वचनम्	२	८६	६
गुहस्य वचनं श्रुत्वा	२	८७	१
गुहाद्वारे च सौमित्रे	४	२७	१३
गुहाश्च विचिताः सर्वाः	४	४७	१२
गुहाश्च विविधा घोराः	३	६५	१४
गुहाश्च विविधा घोराः	३	६७	६
गुहासमीरणो गन्धान्	२	६४	१४
गुहेन सहितो रामः	१	१	३०
गुहेन सार्धं तत्रैव	२	५६	३
गुहेन सार्धं भरतः समागतः	२	८५	२२
गुहो ज्ञातिसहस्रेण	२	६८	४
गुहोऽपि सह सूतेन	२	५०	५०
गृध्रराजः समुत्पत्य	३	५१	२३
गृध्रराज्यं परित्यज्य	३	६८	२३
गृध्रसंसवराकीर्णाम्	६	५८	३१
गृध्राश्च परिलीयन्ते	६	१०	२०
गृध्रैरनुगताश्चास्य	६	१०६	२७
गृध्रौ द्वौ हृष्टपूर्वौ मे	४	६०	१६
गृहगाढामविच्छिद्राम्	१	५	१७
गृहं च वैनतेयस्य	४	४०	४०
गृहं प्रविष्टे सुग्रीवे	४	३०	१
गृहाण्यशृङ्गाग्रतले विचित्रे	५	५४	४८
गृहाण च वरं सौम्य	७	७६	८
गृहाण पाणि माण्डव्याः	१	७३	३२
गृहाणां बलिकर्माणि	६	३५	२६
गृहाणि नानावसुराजितानि	५	७	३

	क:०	स०	श्लो०
गृहाद्गृहं रक्षसानाम्	५	६	१६
गृहाद्गृहं राक्षसानाम्	५	५४	७
गृहीतचापौ तु नराधिपा०	३	१३	२५
गृहीतधनुषावावाम्	३	६६	२०
गृहीतमूर्ध्वजां दृष्ट्वा	६	८१	१६
गृहीतं भ्रातरं दृष्ट्वा	६	७६	३०
गृहीतश्चैव पृष्टश्च	२	१००	५७
गृहीतसमिधं तत्र	१	४८	२५
गृहीता तेन पृष्टास्मि	७	२६	४८
गृहीतां लडितां स्तम्भे	५	१६	१६
गृहीतास्त्रोऽस्मि भगवन्	१	२८	२
गृहीते वरनारीभ्याम्	३	५	१०
गृहीतौ वा न विज्ञातः	६	२६	१०
गृहीत्वा क्षीरमेकाह्नि	१	३७	२६
गृहीत्वा तानि वैदेही	७	४६	११
गृहीत्वा प्रासमुल्काभम्	६	६६	३०
गृहीत्वा प्रेक्षमाणा सा	५	३६	४
गृहीत्वा फलमूलं च	७	६०	६
गृहीत्वा सुमहाशैलम्	६	५६	१६
गृह्णीयां तु तदा भर्तुः	२	६	१८
गृह्यन्ते यदि रोषेण	५	५२	८
गृह्याङ्गालौ समाकृष्य	२	३	३४
गेयात्पुष्पसमृद्धया च	७	२६	१२
गोकुलाकुलतीरायाः	२	४६	१७
गोघ्ने चैव सुरापे च	४	३४	१२
गोदावरीं प्रविक्ष्यामि	३	४५	३६
गोदावरीयं सरितां वरिष्ठा	३	६३	१३
गोधाङ्गुरित्रैरासक्तैः	२	६६	२३
गोपुरादप्रतोलीषु	६	७५	६
गोप्ता हि रामं सौमित्रिः	२	८	३१
गोब्राह्मणहितार्थाय	१	२६	५
गोमतीं चाप्यतिक्रम्य	२	४६	११
गोरसं गोप्रदातारः	७	२१	१६
गोलभस्य महाबाहोः	४	२२	२८
गोलाङ्गूलमहाराज	४	३६	१६
गोलाङ्गूलानुचरितः	२	५४	२६
गोलाङ्गूला महाकाव्याः	६	४४	२७

	का०	स०	श्लो०
गोलाङ्गूलेश्वरं चैव	६	४६	२१
गोलाङ्गूलो महाकाय्यः	६	४२	२८
गोष्ठमध्ये स्थितामार्ताम्	२	११४	६
गोसहस्रप्रदातारम्	२	२१	८
गोसहस्रप्रदातॄणाम्	३	६४	४४
गोतमस्य नरश्रेष्ठ	१	४८	१५
गोतमस्य सुतो ज्येष्ठः	१	५१	२
गौतमेनैवमुक्तस्य	१	४८	२८
गोतमेऽपि महातेजाः	१	४६	२१
गौरीं कनकवर्णाभाम्	५	१०	५२
ग्रसन्तमिव चाकाशम्	६	१०६	३
ग्रसमान इवाकाशम्	५	५७	५
ग्रस्यमानं यथा चन्द्रम्	५	१	१८५
ग्रहणे चापि रक्षोभिः	५	४८	४४
ग्रहणं वायुसूनोश्च	१	३	३३
ग्रहीतुकामं तं गृह्य	७	३४	२१
ग्रहीतुकामं दृष्ट्वा तं	३	४४	११
ग्रामान्विकृष्टसीमान्तान्	२	४६	३
ग्राहयामास तोयः	६	४१	८५
ग्रीष्मघ्नं तु सुखस्पर्शम्	७	५४	१०
(घ)			
घटेन तेन सौमित्रिः	६	११२	१५
घण्टानामिव संनादः	७	२६	६
घनगजमहिषाङ्गतुल्यवर्णाः	६	७८	२१
घनराजीव गर्जन्ती	५	१	१८२
घनानां वारणानां च	४	३०	२६
घनान्धकारे तिमिरे	६	८०	२७
घनोपगूढं गगनं न तारा	४	२८	४७
घातयिष्यति दण्डेन	४	५३	१६
घातये तीव्ररूपाभिः	६	११३	३५
घुर्णन्त्यो मदशेषेण	५	१८	१७
घृतं श्वेतानि माल्यानि	२	२५	२८
घृतपिण्डोपमान्स्थूलान्	३	७३	१४
घृतपूर्णेषु कुम्भेषु	१	३८	१८
घृताचीमथ विश्वाचीम्	२	६१	१७
घृताच्यां किल संसक्तः	४	३५	७
घोरं ज्यातलनिर्घोषम्	४	३०	७५
घोरं देशमिमं प्राप्तौ	३	६६	४४
घोरमारोदनं मन्ये	५	१३	३५
घोरमिन्द्रजितः संख्ये	६	६२	५
घोरं प्रकृत्या रूपं तत्	६	६२	२१
घोररूपाः शिवा नेदुः	६	६५	४६
घोरास्तु पक्षिणो वाचः	१	७४	६
घोरेण शरबन्धेन	६	४६	१
घोरैर्दत्तवरैर्बद्धौ	६	५१	१५
घोरैर्दत्तवरैस्तीक्ष्णैः	६	७३	४६
घोरैः परशुभिश्चैव	६	८६	२३
घौरैर्हरिपतेः पुत्रम्	६	७०	१६
घोरो राक्षसराजोऽयम्	५	४०	११
घोरं शूरजनाकीर्णम्	६	७५	५८
घोषयन्ति कीपं सर्वे	५	५३	२२
घोषणे महता घोषम्	६	२२	८२
घ्नन्तमन्यं जघानान्यः	६	७५	६५
घ्नन्ति स्म सहिताः सर्वे	५	६२	१०
(च)			
चक्रम्पे जगती चैव	७	६	३२
चक्रम्पे मेदिनी कृत्स्ना	६	१०७	४७
चकर्षुश्च ददंशुश्च	६	४४	६
चकार कदनं घोरम्	६	५३	२६
चकार तद्वचः श्रुत्वा	३	४७	१७
चकार रामः सर्वाणि	१	७७	२२
चकार शरजालेन	६	१०७	४२
चकार सख्यं रामेण	१	१	६१
चकारवाहनं तत्र	१	६०	११
चक्रकृत्तास्यकमलाः	७	४	४७
चक्रकृत्तास्यकमलान्	७	६	१७
चक्रतुश्चैव यच्छेषम्	२	३	२१
चक्रतुस्तुमुलं घोरम्	६	८८	७२
चक्रप्रहारैर्विनिकृत्तशीर्षाः	७	७	५३
चक्रवाकयुता नित्यम्	४	१	६५
चक्रवाकानुचरिताः	६	४	८३
चक्रवाकांश्च भद्रं ते	३	१४	२०
चक्रवाकीव भर्तारम्	४	३०	६५
चक्रवाकैः सकारण्डैः	७	३१	२१

	का०	स०	श्लो०
चक्रहस्तो यथा युद्धे	३	२४	२२
चक्रहस्तो यथा विष्णु	३	२३	२९
चक्रु किलकिलामन्ये	५	५७	४२
चक्रुः सर्वाणि कर्माणि	१	६०	१०
चक्रुस्ता राजभवने	७	६३	१७
चक्रे स सुमहाकायः	३	४४	२१
चक्षुर्मनोहरं पीनम्	७	२६	१६
चञ्चच्चन्द्रकरस्पर्शः	४	३०	४५
चणकानां कुलित्थानाम्	७	९१	२०
चण्डनक्रग्राहघोरम्	६	४	११०
चण्डमारुतनिर्हादाम्	५	३	६
चण्डालरूपिणं राम	१	५८	१४
चतुरंङ्गबलं चापि	१	६९	३
चतुरङ्गबलं चैव	२	३	१०
चतुरं समायुक्तम्	१	२०	१०
चतुरन्तां महीं भुक्त्वा	२	१०४	१२
चतुरस्रमसंबाधम्	२	९१	३४
चतुर्णामाश्रमाणां हि	२	१०६	२२
चतुर्णामेव हि गतिः	५	२	२८
चतुर्थेन तथा चाह्ना	६	२२	६७
चतुर्दश समद्वन्द्वः	५	३५	१९
चतुर्दश समा वत्स्ये	२	३४	४४
चतुर्दश समाः सौम्य	६	११९	२१
चतुर्दश सहस्राणि	३	२२	८
चतुर्दश सहस्राणि	३	२४	३३
चतुर्दश सहस्राणि	३	२६	३५
चतुर्दश सहस्राणि	३	२९	२४
चतुर्दश सहस्राणि	३	३०	३१
चतुर्दश सहस्राणि	३	३३	१२
चतुर्दश सहस्राणि	३	३६	५
चतुर्दश सहस्राणि	३	३६	८
चतुर्दश सहस्राणि	५	१६	९
चतुर्दश सहस्राणि	५	३७	१६
चतुर्दश सहस्राणि	६	९९	१९
चतुर्दश सहस्राणि	६	९३	३१
चतुर्दश सहस्राणि	६	९४	१४
चतुर्दश सहस्राणि	६	१२६	१६

	का०	स०	श्लो०
चतुर्दश सहस्राणि	७	२४	४१
चतुर्दशसु वर्षेषु	२	३४	५३
चतुर्दशसु वर्षेषु	२	५२	२९
चतुर्दश हि वर्षाणि	२	९	२१
चतुर्दश हि वर्षाणि	२	९	३१
चतुर्दश हि वर्षाणि	२	२०	२९
चतुर्दश हि वर्षाणि	२	२६	२३
चतुर्दश हि वर्षाणि	२	४०	१२
चतुर्दश हि वर्षाणि	२	५२	५७
चतुर्दश हि वर्षाणि	२	५२	८४
चतुर्भागे समुद्रस्य	४	४२	२७
चतुर्भिः काञ्चनैर्दीपैः	५	१०	२९
चतुर्भिर्वेगसंपन्नैः	२	२६	१५
चतुर्भिश्चतुरो दीप्तान्	६	१०७	३७
चतुर्भ्योऽपि समुद्रेभ्यः	७	३४	६
चतुर्विंशत्सहस्राणि	१	४	२
चतुर्विषाणैर्द्विरदैः	५	९	५
चतुर्ष्वपि समुद्रेषु	७	३४	३३
चतुःशालानि शुभ्राणि	२	९१	३१
चतुष्पथान्देवपथान्	२	१७	१६
चत्वारस्तु सुरश्रेष्ठ	१	४७	६
चत्वारसे चतसृणाम्	१	७३	३५
चत्वारो दिवसाः सौम्य	७	५३	४
चत्वारो वार्षिका मासाः	४	३०	६४
चन्दनस्य च शीतस्य	५	११	३२
चन्दनागुरुचूतेश्च	७	४२	२
चन्दनागुरुनिर्यासान्	२	७६	१६
चन्दनागुरुपद्मानाम्	४	३३	७
चन्दनागुरुभिश्चैव	६	२१	४
चन्दनागुरुसंपृक्तः	२	७१	२८
चन्दनेन च रक्तेन	५	९	१८
चन्दनेन महार्हेण	२	९९	३५
चन्दनैस्तिलकैः सालैः	४	२७	१०
चन्दनोदकसंसिक्तः	२	८०	१४
चन्द्रप्रकाशाश्च हि वक्त्रमाला	५	५	२२
चन्द्रभा भूषणाभा च	६	७५	५२
चन्द्रभास्करते संकाशम्	२	१५	३६

	का०	स०	श्लो०
चन्द्रमाः रजनीं कुर्यात्	४	३६	३
चन्द्रमाह्वयमानेन	२	६	५१
चन्द्रश्च नाम द्रोणश्च	६	५०	३१
चन्द्रसूर्यांशुसंकाशः	४	४१	२६
चन्द्रहीनमिवाकाशम्	२	४७	१८
चन्द्रादित्याविवोष्णान्ते	६	८६	२६
चन्द्रादित्यौ नभश्चैव	२	११	१४
चन्द्रार्कतरुणाभमासम्	२	६२	३७
चन्द्रांशुकिरणाभाश्च	५	६	४८
चन्द्रे लक्ष्मीः प्रभा सूर्ये	३	६५	५
चन्द्रोदये समुद्भूतम्	६	४	१११
चन्द्रोऽपि साचिव्यमिवास्य०	५	२	५४
चपलश्चपलैः सार्धम्	४	१८	१६
चपलस्य तु कृत्येषु	६	१२	३३
चपलस्येह कृत्यानि	६	६३	१६
चपला ह्याविनीताश्च	६	५७	६
चम्पकागुरुपुंनागम्	७	४२	३
चम्पकान्नागवृक्षाश्च	४	५०	२६
चम्पकाशोकपुंनाग	७	२६	५
चम्पकाशोकबकुल	६	३६	३
चम्पकांस्तिलकांश्चूतान्	६	४	७२
चरणान्नूपुरं भ्रष्टम्	३	५२	२६
चरणेनापि सव्येन	५	२६	८
चरन्तो मृगतां हृष्टाः	३	४३	६
चरन्त्या मम धर्मेण	४	५२	२०
चरामि सायुधो नित्यम्	३	२	१३
चर्म चास्थि च मे राम	४	१७	४०
चर्यमाणं तपस्तीव्रम्	६	३५	२२
चलकुण्डलमौलिस्रक्	७	३६	२
चलाग्रमुकुटप्रांशुः	५	२२	२५
चलं हि यौवनं नित्यम्	१	३२	१७
चातुर्वर्ण्यस्य लोकस्य	६	१२५	३३
चापमानय सौमित्रे	६	२१	२२
चापानि विस्फारयताम्	३	२४	२६
चापापहारे भुजवेगपङ्के	३	३१	४८
चामरण्यजने तस्य	६	११	१२
चारणाश्च सुतान्वीरान्	१	१७	२३
चारप्रणिहितं युक्तम्	६	१७	५५
चारयन्तस्ततश्चक्षुः	४	५२	११
चारणां रावणः श्रुत्वा	६	३०	२
चारणां रावणः श्रुत्वा	६	३१	२
चारास्तु ते तथेत्युक्त्वा	६	२६	२२
चारित्रेण च को युक्तः	१	१	३
चारित्रेण महाबाहुः	४	३३	२७
चारु तद्वचनं तस्याः	५	३५	८५
चारु तद्वचनं तस्याः	५	३६	५
चारुपल्लवपुष्पाढ्यम्	५	४२	१६
चारुस्मिते चारुदति	३	४६	२१
चारुस्मिते चारुदीत	५	२०	२६
चारेण तु सुयुक्तेन	५	३०	४
चारेण विदितः शत्रुः	६	२६	२१
चारो राक्षसराजस्य	६	२०	२
चालनात्पर्वतस्यैव	७	१६	२६
चालयन्तं महासैन्यम्	६	६३	२०
चिक्रीडुः सह भार्याभिः	७	५	३४
चिक्षिपुस्तानि शूलानि	३	२०	१७
चिक्षेप शैलशिखरम्	६	६७	४४
चिच्छिदुर्बिभिदुश्चैव	३	२५	२४
चिच्छेद केतुमुद्दिश्य	६	१०२	२६
चिच्छेद समरे वीरा	३	२६	८
चिता चक्रुः सुबहवः	४	२५	३८
चिता चन्दनकाष्ठैश्च	६	१११	११३
चिताधूमाकुलपथा	५	२६	२२
चितां मे कुरु सौमित्रे	६	११६	१८
चित्यमाल्याङ्गरागश्च	१	५८	११
चित्रकर्म इवाभीत	७	२८	४१
चित्रकूटगिरिं गत्वा	६	१२६	७
चित्रकूटं त्वयि प्राप्ते	३	७४	१४
चित्रकूटमनुप्राप्य	१	१	३१
चित्रकूटमुपादाय	३	७	१०
चित्रज्ञान्वृत्तसूत्रज्ञान्	७	६४	६
चित्राण्यत्र बहूनि स्युः	१	१०	२७
चित्रांश्च रुचिरान्मार्गान्	६	५४	३१
चित्रामष्टापदाकाराम्	१	५	१६

	का०	स०	श्लो०
चिन्तयन्ती तदा तां तु	२	२९	२४
चिन्तयन्ता महाप्राज्ञः	१	२	१७
चिन्तयानस्य तस्यैवम्	१	८	२
चिन्तयामास चतुरः	२	१८	८
चिन्तयामास धर्मात्मा	१	१८	३८
चिन्तयामास विश्वात्मा	५	५८	९३
चिन्तयित्वा ततो दृष्टिम्	६	१२५	२
चिन्तयित्वा तु धर्मात्मा	३	७५	२
चिन्तयित्वा मुहूर्तं तु	६	१७	६
चिन्तयित्वा मुहूर्तं वै	७	११	२०
चिन्तयित्वा स च नृपः	२	६०	२
चिन्तयित्वा स धर्मात्मा	४	२	४
चिन्तां जग्मुः पुनर्भीमाम्	५	३५	७९
चिन्ताबाष्पमहाधूतः	२	२४	७
चिन्तामुपजगामाथ	५	१२	२५
चिन्तिता चोपतस्थेऽस्य	७	१०	४१
चिन्त्यते हि वधोपायः	७	१३	३३
चिरं खलु मया पापे	२	१२	८०
चिरं जीवति वैदेही	५	६६	१०
चिरं जीवतु धर्मात्मा	२	६२	४
चिरं जीवितुमाशंसे	२	१२	७५
चिरनिर्वृत्तमप्येतत्	१	४	१८
चिरमाशां कृतां कष्टाम्	२	६३	४१
चिरस्य खलु काकुत्स्थः	२	५४	२१
चिरस्य वत पश्यामि	२	१००	५
चिरात्सुमाली व्यचरद्र०	७	८	२९
चिरायमाणे द्वते तु	७	६७	१९
चिरार्जितं न चेच्छामः	३	१०	१४
चिरिबिल्वा मधूकाश्च	४	१	७८
चिरिबिल्वा मधूकाश्च	६	४	७९
चीचीकूचीति वाश्यन्तः	६	२५	३२
चीचीकूचीति वाश्यन्तः	३	२३	१५
चीराजिनधरो धीरः	२	११	२७
चीराण्यपास्याज्जनकस्य०	२	३८	५
चीरे गृहीते तु तथा	२	३७	२१
चुकोप च महातेजाः	६	७१	३
चुकोप परमामर्षी	६	७०	५०
चुकोप बाणाभिहतः	५	४४	१०
चुक्रुशुर्वीर वीरेति	४	२५	३२
चुक्रुशुश्च तदा संख्ये	६	७७	१८
चुक्रुशुस्ते ततः सर्वे	६	९०	७४
चूतनीपमहासालान्	३	६०	२१
चूतपुंनागसुरभिः	५	१०	२
चूताः पाटलिकाश्चैव	६	४	८०
चूतैरशोकैस्तिलकैः	३	१५	१७
चेरतुश्च चिरं चित्रम्	६	९९	२६
चेरतुः संयुगमहीम्	६	१०७	३४
चेलुः पेतुश्च नेदुश्च	६	६९	५२
चेष्टन्तीं परतीरस्थाम्	७	४८	२५
चेष्टमानामयाविष्टाम्	५	१९	९
चैत्यं निकुम्भिलामद्य	६	८४	१४
चैत्यप्रासादमुत्लुप्त्य	५	४३	३
चैत्यः स राक्षसेन्द्रस्य	६	३९	२३
चैत्रः श्रीमानयं मासः	२	३	४
चोदयामास तां सेनाम्	१	७७	६
चोदितो राजसिंहेन	७	१०३	११
चोदितो रामवाक्येन	१	३५	१२
च्यवनं च नमस्कृत्य	१	७०	३६
च्यवनं भृगुपुत्रं च	७	९०	५
च्युता गृहाच्च राजाच्च	६	८१	२०

(छ)

छत्रं तस्य च जग्राह	६	१२८	६८
छत्रं धारयत क्षिप्रम्	२	११५	१६
छन्दतस्तव रूपं च	७	१०	२५
छन्दतो देहि विस्रब्धः	७	९२	११
छन्दन्तः पृथिवीं चेरुः	५	५८	१५
छन्दं मुनेश्च विज्ञाय	७	९५	५
छादयन्ती ययौ भीमा	६	४	५८
छादयित्वात्मभावं हि	६	१७	४०
छायां से दिनकरभा:०	२	१०७	१८
छायायां गृह्यमाणायाम्	५	१	१७६
छाया वैगुण्यभावं तु	५	२७	४१
छित्त्वा वज्रनिकाशेन	३	२८	३१
छिद्रं हि मृगयन्त्येते	१	१२	१८

	का०	स०	श्लो०
छिन्दञ्छत्रुशरीराणि	२	९६	२९
छिन्नचारित्र्यकक्ष्येण	४	१७	४४
छिन्नं भिन्नं शरैर्दग्धम्	६	९३	२१
छिन्नवर्मतनुत्राणाः	६	६९	६०
छिन्ना भिन्ना प्रभिन्ना वा	५	२६	१०
छिन्नाभ्रैरिव संवीतम्	३	४४	७
छिन्नेषु तेषु बाणौघैः	६	४९	४५
छिन्नो ही दक्षिणो बाहुः	६	९१	१५
छेत्स्यते ससरे बाहु	३	७१	१६
(ज)			
जगत्यां पुरुष	२	९९	१५
जगत्संतापनः क्रूरः	६	३५	४
जगत्सृष्टयन्तकर्तारम्	७	६	२
जगदद्याभिषिक्तं त्वाम्	६	१२८	९
जगद्भ्रमन्तीऽनिलवद्दुरासदाः	७	५	४५
जगाम च पुनर्गङ्गा	१	४३	३९
जगाम तत्र हृष्टात्मा	७	६६	५
जगाम धन्वी धर्मात्मा	३	२२	८०
जगाम न विकारं च	६	१०७	३९
जगाम मिथिलीं गृह्य	३	५४	६
जगाम रामो धर्मात्मा	६	४	४३
जगाम रावणो मध्ये	७	२५	३५
जगाम शरणं राजा	६	८७	१८
जगाम सरितां श्रेष्ठा	१	४३	३४
जगाम सह मारीचः	१	१	५२
जगाम सुमहाक्रोधम्	६	१०२	३९
जगुः कलं च गन्धर्वाः	१	१८	१७
जगृहुः पादपांश्चापि	६	५८	९
जगृहुश्च महात्मानः	६	६९	३८
जग्मतुस्तौ श्रमं वीरौ	६	९७	२८
जग्मतुस्त्रिदिवं राम	१	४७	१०
जग्मुर्मधुवनं यत्र	५	६२	६
जग्राह गिरिशृङ्गाभम्	३	२६	१०
जग्राह चरणौ तस्य	७	५२	७
जग्राह चार्षभं चर्म	६	५४	३०
जग्राह तरसा सीताम्	६	१२६	२६
जग्राह परमक्रुद्धः	३	२०	१९

	का०	स०	श्लो०
जग्राह भारती रश्मीन्	६	१२८	२८
जग्राह सूर्यं स्वर्भानुः	३	२३	१२
जघनेभ्यः स्फुलिङ्गाश्च	६	१०६	३२
जघन्यमपि ते पुत्रः	२	१०४	६
जघान कपिशार्दूलान्	६	८२	१८
जघान बलिनं रामः	६	९४	१७
जघ्नतुस्तौ तदान्योन्यम्	६	९७	२६
जघ्ने तान्राक्षसान्सर्वान्	६	५३	२७
जङ्घाजानुप्रहारैश्च	६	११३	३३
जज्वाल मृगशावाक्ष्याः	५	५३	२८
जज्वाल रावणः क्रोधात्	६	५९	७८
जज्वाल सहसा कोपात्	५	५८	७५
जज्ञेऽथ तासां संनादः	२	३९	४०
जटाः कृत्वा गमिष्यामि	२	५२	६८
जटाजिनधराः काले	२	९५	६
जटाधरौ तौ द्रुमचीरवाससौ	२	८६	२५
जटाबन्धनमन्यस्तु	१	४	२४
जटायुर्नाम नाम्नाहम्	३	५०	४
जटायुर्मामनापृच्छय	४	६१	१४
जटायुश्च महातेजाः	६	१२३	४३
जटायुषं तु प्रतिपूज्य राघवः	३	१	३५
जटायुषस्त्वेवमुक्तः	४	५८	८
जटायुषो यदि भ्राता	४	५८	९
जटायुषो विनाशेन	४	५६	१४
जटायुस्तमतिक्रम्य	३	५१	३८
जटायो पश्य मामार्य	३	४९	३८
जटायो यदि तत्कोषि	३	६८	४
जटिलं चीरवसनम्	२	१००	१
जटिलौ यदि न स्याताम्	७	९४	१४
जडीकृते तदालोके	१	७६	११
जनकः प्राञ्जलिर्वाक्यम्	१	६५	३१
जनकस्य कुले जाता	१	१	२७
जनकस्य कुले जाता	५	७३	१४
जनकस्य वचः श्रुत्वा	१	६७	१
जनकस्यात्मजां साध्वीम्	५	५८	८७
जनाकानां कुले कीर्तिम्	१	६७	२२
जनकेन समादिष्टाः	१	६७	३

	का०	स०	श्लो०
जनकेन समादिष्टाः	१	६८	१
जननी लक्ष्मणस्य या	२	७०	९
जनन्यस्तास्ततस्तेषाम्	५	४५	५
जनन्या राक्षसेन्द्रो वै	६	३४	२०
जनयामास धर्मज्ञः	७	३	६
जनयिष्यत्ययोध्यायाम्	२	११४	२६
जनवृन्दोर्मिसंघर्षः	२	५	१७
जहृश्च सुमहांस्तत्र	७	११६	२८
जनस्थानवधं चैव	४	५५	२२
जनस्थानवधं बुद्ध्या	५	५१	३०
जनस्थानवधं श्रुत्वा	५	३१	९
जनस्थानसमीपे च	३	२३	५
जनस्थानस्थिता राजन्	३	३१	२
जनस्थाने वसद्भिस्तु	३	५४	२६
जनस्थाने हतस्थाने	३	३०	९
जनस्थाने ह स्थाने	५	२१	२९
जनस्यास्याल्पभाग्यत्वात्	६	९४	९
जनौघैस्तैर्विसर्पद्भिः	२	६	२७
जन्मप्रभृति ते वीर	७	९८	१७
जन्मरामस्य सुमहत्	१	३	१०
जपं च न्यायतः कृत्वा	२	५६	३२
जपतस्तु मुनेस्तस्य	१	२७	२४
जमदग्निभरद्वाजः	७	१	६
जम्बुमालिं सुनिहतम्	५	४४	१९
जम्बुमाली महामाली	६	८९	११
जम्बुमाली रथस्थस्तु	६	४३	२१
जम्बुप्रियालपनसाः	३	७३	३
जयत्यतिबलो रामः	५	४२	३३
जयत्यतिबलो रामः	५	५९	१९
जयत्युरुबलो रामः	६	४२	२०
जयश्च विपुलः प्राप्तः	६	७	१५
जयस्व राजधर्मेण	७	१०३	४
जयस्व शत्रून्नरदेव मेदिनीम्	६	२२	८५
जया च सुप्रभा चैव	१	२१	१५
जयाय जयभद्राय	६	१०५	१७
जयार्थी नित्यमादित्यम्	६	२७	४४
जयाशिषा तु राजानम्	६	३६	१५
जयेन वर्धयित्वा च	७	२३	३
जयेप्सया देवलोकम्	७	६	६२
जराजर्जरितैः पत्रैः	३	१६	२६
जलक्लिन्नेन हस्तेन	६	५०	१४
जलगर्भा महामेघाः	४	३०	२५
जलजानि च पुष्पाणि	२	५९	८
जलप्रपातास्रमुखाः	३	५२	३७
जलप्रपातैरुद्भेदैः	२	९४	१३
जलमेषा परित्रातुम्	५	५८	९१
जलं प्रसन्नं कुसुमप्रहासम्	४	३०	५३
जलाघाताट्टहासोग्राम्	२	५०	१६
जलार्द्रगात्रं तु विलप्य कृच्छ्रम्	२	६३	५३
जलार्द्रश्चक्रवाकाश्च	४	५०	१०
जलार्द्राश्चक्रवाकाश्च	४	५०	१६
जले तरुणसूर्याभैः	४	१	६४
जलेन पतिताग्रैश्च	५	१४	३०
जलोदं सागरं शीघ्रम्	४	४०	४८
जवेन महता युक्तः	४	७४	५१
जहार भार्यां रामस्य	१	१	५३
जहारात्मविनाशाय	४	३९	६
जहि मां सौम्य विस्रब्धम्	७	१०६	३
जहि वीर दुरात्मानम्	६	८६	५
जहि वीर महावीर्यौ	६	८०	३
जहि शत्रुचमूं वीर	६	९७	५
जागर्तव्यमतन्द्रिभ्याम्	२	५३	३
जागर्मि नाहं स्वपिमि	२	८९	३
जाग्रतोरेव तां रात्रिम्	२	४६	१६
जाज्वल्यमानो वपुषा	६	८०	१३
जाज्वल्यमानं वपुषा	६	१०८	७
जातकौतूहलास्तत्र	३	२३	३
जातमात्रे तु सुश्रोणी	७	८९	२४
जातरूपपरिक्षिप्तम्	५	१०	४
जातरूपमयः श्रीमान्	४	४१	२१
जातरूपमयैः शृङ्गैः	५	१	९९
जातरूपमयैर्मुख्यैः	२	३२	५
जातरूपमयैश्चापि	४	४३	४३
जातरूपमयैश्चैव	६	२२	२०

	का०	स०	श्लो०
जातरूपमिति ख्यातम्	१	३७	२२
जातस्वेदस्ततो रामः	३	३०	२०
जाता वनान्ताः शिखिसु०	४	२८	२६
जातिरेव मम त्वेषा	५	५०	१४
जातो वा जायमानो वा	३	५९	१५
जानकी चापि तच्छ्रुत्वा	५	३१	१६
जानकी तु महाराज	२	५८	३४
जानकी न च दृश्यते	५	५८	८२
जानकी पुरुषर्षभ	५	६७	२
जानकी रक्षणार्थं वा	५	४२	१८
जानन्त ऋषयः सर्वे	७	३६	३१
जानन्तस्तु स्वकं वीर्यम्	४	१४	१९
जानन्ती बत दिष्टया माम्	५	३५	६
जानन्नपि समर्थं माम्	४	५९	२२
जानामि कोपं हरिवीरबन्धोः	४	३३	५३
जानामि गमने शक्तिम्	५	३७	४४
जानामि चेमौ पुत्रौ मे	७	९७	५
जानामि धर्मं धर्मज्ञ	२	६२	१४
जानामि परमां भक्तिम्	२	५२	६०
जानामि भरतं क्षान्तम्	२	३	३०
जानामि वारुणांल्लोकान्	४	५८	१३
जानामि वीर्यं तव राक्षसेन्द्र	६	५९	९६
जानामि शीलं ज्ञातीनाम्	६	१६	३
जानासि च यथा शुद्धा	७	४८	१२
जानासि त्वं यथा सौम्य	७	४५	५
जानासि हि यथा सौम्य	२	२२	१७
जानास्यनियतामेवम्	४	२१	५
जानीषे त्वं जनस्थानम्	३	३६	२
जानीषे हि यथा लोकान्	७	१०	३७
जानुभिर्मुष्टिभिर्दन्तैः	६	३०	८
जानुभिश्च हताः केचित्	६	५३	२४
जानुभ्यां पतितौ भूतौ	६	७०	१८
जाने च रामं धर्मज्ञम्	२	९०	२२
जाने चैतन्मनःस्थं ते	२	९०	२१
जाबालेस्तु वचः श्रुत्वा	२	१०९	१
जामदग्न्येन रामेण	२	२१	३३
जामदग्न्यो गतो रामः	१	७७	३

	का०	स०	श्लो०
जाम्बवत्प्रमुखान्सर्वान्	५	५९	६
जाम्बवन्तं तथोक्त्वा तु	७	१०८	३३
जाम्बवन्तं तु दशभिः	६	७३	४५
जाम्बवन्तं त्रिभिर्बाणैः	६	९८	११
जाम्बवन्तं महेष्वासः	६	४६	१९
जाम्बवन्तं हरिश्रेष्ठम्	६	९३	३७
जाम्बवानथ जानुभ्याम्	६	३१	७२
जाम्बवानपि तैः सर्वैः	६	८९	२१
जाम्बवानृषभः सुन्दः	६	४७	३
जाम्बवान्कार्यवृत्तान्तम्	५	५८	३
जाम्बवान्वाक्यमब्रवीत्	६	७४	२१
जाम्बवान्वानरश्रेष्ठः	४	५९	२
जाम्बवांश्च सुषेणश्च	६	४	२०
जाम्बवांश्च सुषेणश्च	६	७६	६०
जाम्बवांश्च हनूमांश्च	६	१३८	५२
जाम्बवान्स हरिश्रेष्ठः	५	५७	२२
जाम्बवांस्तु सुसंक्रुद्धः	६	५८	२२
जाम्बवांस्त्वथ संप्रेक्ष्य	६	१७	४५
जाम्बवेनर्क्षपतिना	६	८५	२२
जाम्बूनदं कोटिसंख्यम्	१	१४	५४
जाम्बूनदमयान्येव	५	६	४१
जाम्बूनदमयैर्द्वारैः	४	५८	२१
जाम्बूनदमयैश्चान्यैः	५	११	२५
जाम्बुनदमहाकम्बुः	६	८०	१४
जालवातायनैर्युक्तम्	५	९	१६
जाह्नवीतीरमासाद्य	७	४६	२६
जाह्नवीं तु समासाद्य	२	८०	२१
जिघृक्षमाणमायान्तम्	७	३४	१६
जिज्ञासमाना वैदेही	६	६१	१७
जिज्ञासुः स तु वाहूनाम्	७	३२	४
जितकामैश्च सिद्धैश्च	३	३५	१५
जितवन्तं कृतार्थं हि	३	५	२३
जितः स्वर्गस्तव भ्राता	३	१६	३३
जिते महेन्द्रेऽतिबले	७	३०	१
जितं हि भवता सर्वम्	७	३०	४
जित्वा तु राक्षसान्देवीम्	५	१३	५५
जित्वा लङ्कां रक्षोघाम्	५	६०	१०

	का०	स०	श्लो०
जित्वा वैश्रवणं देवम्	७	१५	४०
जित्वा शत्रुगणान्रामः	६	१२५	१३
जित्वेन्द्रं कथमद्य त्वम्	६	९२	७
जिहीर्षुरम्भो गुर्वर्थम्	२	६३	३९
जिह्वया परिलिह्यन्तम्	६	६७	१३९
जिह्वया संलिहन्तं च	७	२३	१९
जीमूतयोरिवाकाशे	६	७९	२४
जीर्णानामपि सत्त्वानाम्	७	४१	१९
जीवता दुष्करं मन्ये	४	५२	२६
जीवत्यपि महाराजे	२	६७	३७
जीवन्तीं मां यथा रामः	५	३९	१०
जीवन्त्या हि स्त्रिया भर्ता	२	२४	२१
जीवन्नद्य विपन्नोऽस्मि	६	५०	१९
जीवन्न यदि तेऽभ्येति	३	४३	१९
जीवंस्तु रामस्य न मेक्ष्यसे०	६	१४	६
जीवपुत्रे निवर्तस्व	४	१९	११
जीवितं खलु रक्षस्व	६	५९	८५
जीवितं च सुखं चैव	३	३७	२२
जीवितं च हि राज्यं च	४	२२	६
जीवितं चात्मना रामम्	२	१२	१२
जीवितं त्युक्तुमिच्छामि	५	२५	१९
जीवितं धारयिष्यामि	५	६५	२५
जीवितान्तकरं घोरम्	४	१२	३३
जीवितान्तकरैर्घोरैः	४	३	१८
जीवितुं मुनिशार्दूल	१	२०	९
जीवितं सुखमर्थं च	३	४९	२५
जीवेच्चिरं वज्रधरस्य पश्चात्	३	४८	२४
जीवेदपि च मे माता	२	८६	१६
जीवेदपि हि मे माता	२	५१	१५
जीवेयं खलु सौमित्रे	४	१	१०३
जीवेयुः शर्वरीमिमाम्	२	८६	१५
जुगोप भ्रातरं भ्राता	२	१६	३३
जुह्वतश्चापि तत्राग्निम्	६	८०	६
जृम्भमाणमिवाकाशे	५	५६	३३
जृम्भमाणाश्च विक्रान्ताः	६	४	६७
जेतव्यमिति काकुत्स्थः	६	१०७	७
जेतारं लोकपालानाम्	६	९३	४

	का०	स०	श्लो०
ज्यामुक्त इव नाराचः	५	५७	१४
ज्याशब्दतुमुलां घोराम्	६	२४	४३
ज्याशब्दमकरोत्तीव्रम्	६	५९	१२६
ज्यां विधुन्वन्सुबहुशः	३	२८	५
ज्येष्ठः केसरिणः पुत्रः	६	२८	१०
ज्येष्ठं ज्येष्ठगुणैर्युक्तम्	१	१	२०
ज्येष्ठः श्रेष्ठश्च धर्मात्मा	२	८२	१३
ज्येष्ठस्तस्य महाबाहुः	५	५१	५
ज्येष्ठस्य राजता नित्यम्	२	७९	७
ज्येष्ठा कन्या कला नाम	५	३७	११
ज्येष्टा शैलेन्द्रदुहिता	१	३७	८
ज्येष्ठे धर्मप्रधाने च	१	२०	१२
ज्येष्ठो भ्राता पिता वाऽपि	४	१८	१३
ज्येष्ठो वदान्यः कर्मण्यः	२	३५	३२
ज्येष्ठोऽवितस्त्वं संपाते	४	६०	२०
ज्योतिष्टोमायुषी चैवम्	१	१४	४२
ज्योत्स्ना तुषारमलिना	३	१६	१४
ज्वलत्पावकसंकाशा	३	७४	३२
ज्वलनं समुपादाय	२	२५	२७
ज्वलनार्कप्रतीकाशैः	५	९	१५
ज्वलनेन परीतानि	६	७५	२२
ज्वलन्तं तेजसा नित्यम्	६	६४	१५
ज्वलामाली स तु शरः	७	२१	४३

(ज्ञ)

ज्ञातयश्चापि योधाश्च	२	११२	१२
ज्ञातिदासी यतो जाता	२	७	१
ज्ञातीनां विपुलः शोकः	४	६७	३२
ज्ञातींस्तान्धर्षयित्वेमाः	७	२५	१९
ज्ञातुकामो महातेजाः	१	२४	६
ज्ञात्वा तदामिषं विप्रः	७	६५	२७
ज्ञात्वा तस्य तु तद्वृत्तम्	७	३	३
ज्ञात्वा प्रणाशं तु तदा	७	२८	२१
ज्ञात्वा रक्षो भीमबलम्	६	६०	१५
ज्ञात्वा लोकगतिं सर्वाम्	६	२६	५८
ज्ञानायज्ञाधिकारा हि	२	७२	२५
ज्ञानवृद्धो वयोबालः	२	४५	८
ज्ञानेन खलु पश्यामि	४	५८	२४

	का०	स०	श्लो०
ज्ञायतां तुर्णमेतेषाम्	६	५१	७
ज्ञायतां सौम्य वैदेही	४	४०	११
ज्ञेयाः सर्वे च वृत्तान्ताः	६	१२५	१५
डिण्डिमं परिगृह्यान्या	५	१०	४४
(त)			
तं कथं कामवृत्तं मम संनि०	४	३३	५६
तं कालमेघप्रतिमम्	४	१०	३८
तं कुमारं ततो जातम्	१	३७	१५
तं क्रुद्धो भगवान्नन्दी	७	१६	१५
तं क्षिप्रतरमाप्लुत्य	४	७६	३
तं गजाश्च वराहाश्च	४	४२	३४
तं गजैश्च तुरंगैश्च	६	६५	३४
तं गुणैः समतां प्राप्तः	२	१९	३९
तं गृध्रं प्रेक्ष्य ताम्राक्षम्	३	६८	१९
तं गृहीत्वा नखस्तीक्ष्णैः	३	५१	३४
तं गृहीत्वा महास्कन्धम्	६	५६	२१
तं चतुर्भिः स्वरः क्रुद्धः	३	२८	२४
तं च देहं नरेन्द्रस्य	७	५७	११
तं चन्द्रमिव पुष्पेण	२	२	१२
तं च पीड्यमानं तु	७	३४	२२
तं च राजानमासाद्य	७	१८	७
तं च राजा दशरथः	१	११	८
तं चापि समनुज्ञाप्य	२	४०	२
तं चाप्रतिमकुर्वाणम्	५	१८	२१
तं चैनं परमोदारम्	७	८४	१४
तं छिन्नबाहुं समवेक्ष्य रामः	७	६७	१६०
तं जनौघं विसृज्याथ	७	९८	२८
तं जाग्रतं गुणैर्युक्तम्	२	८६	२
तं जाग्रतमदम्येन	२	५१	५
तं जीवयथ भद्रं वः	७	७६	१२
त इमे कृतकर्माणः	६	१२२	६
त इमे बहुविक्रान्तैः	४	४०	३
त इमे बहुसाहस्रैः	४	४०	७
त इमे सायंकाः सर्वे	६	१०७	६१
तक्षकस्य प्रियां भार्याम्	३	३२	१४
तक्षं तक्षशिलायां तु	७	१०१	११
तक्षैर्नारिकेरैश्च	७	२६	६

	का०	स०	श्लो०
तच्च गङ्गावतरणम्	१	४३	१३
तच्च तस्य तथा मन्ये	६	१३	१३
तच्च दृष्ट्वा धनुः श्रेष्ठम्	२	११८	४३
तच्च दृष्ट्वा महाराजः	२	४२	३१
तच्च मद्भवनं श्रेष्ठम्	६	१२८	४५
तच्च युद्धं मया दृष्टम्	७	७१	११
तच्च रत्नं धनुर्दिव्यम्	१	६८	९
तच्च शूलं महद्दिव्यम्	७	९९	३७
तच्च सर्वं मया क्षान्तम्	७	६८	१५
तच्च सर्वं महाबाहो	३	९	८
तच्चाग्नि सदृशं दीप्तम्	३	५१	१४
तच्चातिकायं हि महत्प्रकाशम्	६	६७	१७०
तच्चापि जानामि तथाविष०	४	३३	५५
तच्चापि न कृतं कार्यम्	४	५२	२५
तच्चाप्यविदितं सर्वम्	१	२	३५
तच्चार्वंश्चितपद्माक्षम्	४	१	१०९
तच्चास्य बलमादास्ये	६	१३	२०
तच्चास्य बलमादास्ये	६	२४	३९
तच्चैत्ररथसंकाशम्	६	३९	८
तच्छरीरं कबन्धस्य	३	७२	३
तच्छिरः सशिरस्त्राणम्	६	७१	१०५
तच्छिरः सशिरस्त्राणम्	६	९०	७१
तच्छीघ्रं जवना दूताः	२	६८	३
तच्छीघ्रं दर्शनं मह्यम्	७	५३	२५
तच्छूलं दीप्यमानं तु	७	६७	२१
तच्छूलं निहतं दृष्ट्वा	६	७९	३६
तच्छूलं परमक्रुद्धः	६	१०२	५१
तच्छूलं राघवो दृष्ट्वा	६	१०२	६०
तच्छूलं वज्रसंकाशम्	३	३	१८
तच्छ्रुत्वा ऋषिशार्दूलः	६	१०५	५
तच्छ्रुत्वा करूणं वाक्यम्	५	५८	१०९
तच्छ्रुत्वा घोरसंकाशम्	१	४१	२४
तच्छ्रुत्वा घोरसंकाशम्	७	१०५	८
तच्छ्रुत्वा तस्य राजर्षेः	७	८९	१२
तच्छ्रुत्वा निपुणं सर्वम्	२	८८	१
तच्छ्रुत्वा पार्थिवेन्द्रस्य	७	६३	३४
तच्छ्रुत्वा भरतस्तेषाम्	२	९३	२४

	का०	स०	श्लो०
तच्छ्रुत्वा भरतस्त्रस्तः	२	७२	४३
तच्छ्रुत्वा भरतेनोक्तम्	७	१०७	९
तच्छ्रुत्वा भरतो वाक्यम्	२	७२	१६
तच्छ्रुत्वा भरतो वाक्यम्	२	८२	९
तच्छ्रुत्वा भाषितं तस्य	७	५०	२०
तच्छ्रुत्वा भाषितं तस्य	७	६९	१
तच्छ्रुत्वा भाषितं तस्य	७	८३	१
तच्छ्रुत्वा मन्त्रिणः सर्वे	२	१०६	७
तच्छ्रुत्वा राक्षसेन्द्रस्य	३	३७	१
तच्छ्रुत्वा राक्षसेन्द्रस्य	६	८८	१२
तच्छ्रुत्वा राक्षसेन्द्रेण	५	५८	११५
तच्छ्रुत्वा राघव प्रीतः	७	१००	१४
तच्छ्रुत्वा राघवेणोक्तम्	१	४८	१३
तच्छ्रुत्वा राघवेणोक्तम्	३	४	१३
तच्छ्रुत्वा राघवेणोक्तम्	७	१०६	४
तच्छ्रुत्वा राघवो वाक्यम्	७	८२	६
तच्छ्रुत्वा राजशार्दूलः	१	२०	१
तच्छ्रुत्वा राजसिंहस्य	१	१९	१
तच्छ्रुत्वा रामपदवीम्	३	४०	२१
तच्छ्रुत्वा लक्ष्मणेनोक्तम्	७	८७	१
तच्छ्रुत्वा लक्ष्मणो वाक्यम्	३	७०	३
तच्छ्रुत्वा वचनं तस्य	१	२१	१
तच्छ्रुत्वा वचनं तस्य	१	२९	१५
तच्छ्रुत्वा वचनं तस्य	१	३५	३
तच्छ्रुत्वा वचनं तस्य	१	३७	९
तच्छ्रुत्वा वचनं तस्य	१	५१	१०
तच्छ्रुत्वा वचनं तस्य	१	५१	१२
तच्छ्रुत्वा वचनं तेषाम्	६	५१	१४
तच्छ्रुत्वा वचनं राजा	७	१०५	१४
तच्छ्रुत्वा विप्रियं घोरम्	७	६७	१४
तच्छ्रुत्वा विषसादैवम्	२	७२	३९
तच्छ्रुत्वा विष्णुवचनम्	७	११०	१८
तच्छ्रुत्वा व्याहृतं वाक्यम्	६०	५१	१०
तच्छ्रुत्वा व्याहृतं वाक्यम्	७	६५	२२
तच्छ्रुत्वा शोकसंतप्ता	२	१२	१८
तच्छ्रुत्वाहं ततो वीर	७	४०	१९
तच्छ्रुत्वा हर्षमावेदे	७	१०२	१

	का०	स०	श्लो०
तच्छैलवेगाभिहतम्	६	६७	१२
तच्छैलयशृङ्गं बहुवृक्षसानुम्	६	५९	३७
तच्छैलशृङ्गं सहसा विभिन्नम्	६	६७	६०
तच्छलक्ष्णसुव्यक्तमृदुप्रलापम्	३	६३	९
तटाकवैरिणचापि	४	१३	१०
तडित्पताकाभिरलंकृतानाम्	४	८८	३१
तत उत्थाय ते सर्वे	२	५६	४
ततः कण्ठगतं माल्यम्	४	३६	३
ततः कतिपयाहः सु	७	३८	२
ततः कतियाहः सु	७	७३	२
ततः कथायां कस्यांचित्	७	४३	४
ततः कथायां कस्यांचित्	७	५१	७
ततः कदाचित्किष्किन्धाम्	७	३४	३
ततः कदाचित्तं देशम्	१	१०	१०
ततः कनकपुङ्खैस्तु	३	२८	२२
ततः कनखलं गत्वा	७	५३	११
ततः कपिं तं प्रसमीक्ष्य०	४	४७	११
ततः कपिं प्राप्तमनोरथार्थः	५	३५	३५
ततः कपिस्तान्ध्वजिनी०	४	४६	४१
ततः कपीनामृषभेण चोदितः	४	६६	३८
ततः कमलपत्राक्षः	३	३४	१
ततः करुणवेदित्वात्	१	२	९४
तत कर्तुं तपोविघ्नम्	३	२	१५
ततः कलापान्संनह्य	२	५२	११
ततः काञ्चनचित्राङ्गम्	६	१२१	२४
ततः काञ्चनचित्राङ्गम्	७	१४	२४
ततः काञ्चनत्मयुग्रम्	६	७४	३०
ततः काञ्चनशैलाभः	४	२६	३
ततः काञ्चनशैलाभ	४	३९	१५
ततः काञ्चनशैलाभः	३	३९	२३
ततः काञ्चीनिनादं च	५	१८	२०
ततः कार्यसमासङ्गम्	४	४४	८
ततः कालयसं शूलम्	७	८१	५
ततः कालेन महता	१	६३	४
ततः कालेन महता	७	५९	१८
ततः काले बहुतिथे	१	१२	१
ततः काले महाबाहुः	६	४१	२६

	का०	स०	श्लो०
ततः किलकिलां चक्रुः	४	३१	३९
ततः कुमारस्तान्वृद्धान्	५	६१	१२
ततः कुमुदखण्डाभः	५	१०	१
ततः कुम्भनिपातेन	६	७६	८४
ततः कुम्भः समुत्पत्य	६	७६	८५
ततः कुम्भस्तु सुग्रीवम्	६	७६	८०
ततः कुम्भं समुत्क्षिप्य	६	७६	८३
ततः कुर्युः समाह्वाम्	५	३०	२६
ततः कुशपरिस्तीर्णम्	४	२६	३०
ततः कृच्छ्रात्समासाद्य	६	६८	९
ततः कृतं दशरथेर्मत्प्रियम्	४	४३	६०
ततः कृतस्वस्त्ययनः	७	१३	४१
ततः कृतार्थाः सहिताः०	४	४३	६१
ततः कृतोदकं स्नातम्	४	६०	१
ततः कृत्वा महर्षीणाम्	७	४६	३०
ततः कृत्वा महानादम्	५	३	३८
ततः कृष्णाजिनधरम्	७	२५	४
ततः कैलासमासाद्य	७	२५	५२
ततः कोपपरीतात्मा	६	४२	३२
ततः कोपसमाविष्टः	१	६०	१२
ततः कोपसमाविष्टाः	६	६०	५०
ततः कौतूहलाद्रामः	३	२	८
ततः क्रुद्धः सहस्राक्षः	५	१	११७
ततः क्रुद्धस्तु सौदासः	७	६५	२९
ततः क्रुद्धस्य वदनात्	७	२२	२१
ततः क्रुद्धेन तेनासि	७	३०	३१
ततः क्रुद्धो गदां तस्य	६	९१	२०
ततः क्रुद्धो दशग्रीवः	६	९५	५०
ततः क्रुद्धो दशग्रीवः	६	१०६	१६
ततः क्रुद्धो दशग्रीवः	९	२३	४३
ततः क्रुद्धो महातेजः	९	९०	५६
ततः क्रुद्धो महाबाहुः	७	७९	२९
ततः क्रुद्धो महेन्द्रस्य	६	६१	१७
ततः क्रुद्धो वायुसुतः	६	५९	११२
ततः क्रोधमयं तोयम्	७	६५	३१
ततः क्रोधसमाविष्टः	६	४३	३८
ततः क्रोधसमाविष्टः	६	१०३	१०

	का०	स०	श्लो०
ततः क्रोधसमाविष्टम्	४	१०	१
ततः क्रोधाद्दशग्रीवः	३	५१	४०
ततः क्रोधाद्दशग्रीवः	४	१०७	८
ततः क्रोधान्महाबाहुः	४	१००	५३
ततः क्रोधेन तेनैव	७	९	४६
ततः क्रोधो ममापूर्वः	३	५४	२३
ततः क्षतजवेगेन	४	४६	६
ततः खड्गेन महता	६	८१	३२
ततः खड्गं समुद्यम्य	६	७०	४०
ततः खनित्रमादाय	३	४	२७
ततः पक्षिनिनादेन	५	४२	१
ततः पञ्चवटीं गत्वा	३	१७	१
ततः पद्मादिभिस्तत्र	७	१५	३४
ततः परं जनस्थानात्	३	६९	५
तत परं तदा राजा	१	१६	१७
ततः परमगम्या स्यात्	४	४०	६६
ततः परमतेजस्वी	६	५४	२९
ततः परमदुर्धर्षः	६	३१	३७
ततः परमसंक्रुद्धः	६	९२	२५
ततः परमसत्कारम्	१	४८	९
ततः परमसंभ्रान्ताः	१	६०	२४
ततः परमसंहृष्टः	४	४	३
ततः परमुवाचेढम्	२	२	२३
ततः परिषदं सर्वाम्	२	२	१
ततः परिहिता गाढम्	६	६०	४२
ततः पर्णकुटीद्वारम्	२	१०३	३२
ततः पर्यन्तरक्ताक्षः	६	४५	१०
ततः पर्वतमासाद्य	५	५८	१६९
ततः पर्वतमुत्पाट्य	६	६७	९
ततः पर्वतशृङ्गाणि	३	१८	२८
ततः पर्वतशृङ्गाभः	३	५०	२
ततः पश्चात्सुखं रामे	३	३६	२१
ततः पश्चात्सुमहती	६	४१	२८
ततः पश्चान्महातेजाः	३	२८	२८
ततः पश्यति धर्मात्मा	१	३	६
ततः पश्यन्त्वमुं दीनम्	५	५३	४
ततः पश्याम्यहं देवीम	५	५८	११

	का०	स०	श्लो०
ततः पाण्डुरमेघाभम्	७	२३	२०
ततः पादपमुक्तेन	५	२	२
ततः पादपमुद्धत्य	६	९६	१८
ततः पादपसंबाधम्	६	४	७०
ततः पादमधर्मस्य	७	७४	२२
ततः पापसमाचारा	२	१४	२०
ततः पार्श्वमुपागम्य	७	१६	९
ततः पावकसंकाशम्	२	१६	२८
ततः पावकसंकशम्	३	३०	२४
ततः पावकसंकाशैः	३	३६	२९
ततः पावसंकाशैः	६	७३	४२
ततः पाशुपतं दिव्यम्	७	२१	४०
ततः पश्यन्ति बाणौघाः	६	६३	४७
ततः पितरमामन्त्र्य	७	५५	८
ततः पितरि स्वर्याते	७	७८	५
ततः पितामहं दृष्ट्वा	७	३६	१
ततः पितामहस्तत्र	७	२३	१०
ततः पितामहो वाणीम्	७	११०	८
ततः पितुस्तद्वचनं निशम्य	५	४८	१५
ततः पुत्रकृतस्नेहात्	७	३३	२
ततः पुनरूपागम्य	५	७	५
ततः पुरस्तात्सहसा विनिःसृतः	२	१४	६७
ततः पुरुषशार्दूलः	२	३२	२३
ततः प्रभातसमये	२	७७	४
ततः प्रभातसमये	२	७९	१
ततः प्रभातां रजनीम्	२	१४	२५
ततः प्रभाते जनकः	१	७०	१
ततः प्रभाते विमले	१	२४	१
ततः प्रभाते विमले	१	४५	५
ततः प्रभाते विमले	१	६६	१
ततः प्रभाते विमले	७	६०	२
ततः प्रभाते विमले	७	६८	२
ततः प्रभृति यक्षोऽसौ	७	१५	१५
तता प्रभृति सर्गाश्च	७	९४	१६
ततः प्रमाथी रभसा	६	८९	४८
ततः प्रयातः सहसा	६	९५	३४
ततः प्रयाते जनके	७	३८	८

	का०	स०	श्लो०
ततः प्रवर्त्यतां यज्ञः	१	६०	८
ततः प्रविशतस्तस्य	७	२८	४
ततः प्रवृत्तं तुमुलम्	६	५३	१८
ततः प्रवृत्तं मधुरम्	७	९४	११
ततः प्रवृत्तं सुक्रूरम्	६	१०७	१
ततः प्रवृत्तं सुमहत्	६	७९	२
ततः प्रव्यथिता लोकाः	७	२८	१५
ततः प्रव्यथिताः सर्वे	३	२	१३
ततः प्रसादितो देवैः	१	६५	२५
ततः प्रस्थाप्य सुग्रीवः	४	४१	१
ततः प्रस्रवणं शैलम्	५	६५	१
ततः प्रहर्षाद्भरतम्	६	१२७	५८
ततः प्रहस्तः कपिराजवाहि०	६	५७	४४
ततः प्रहस्तं निर्यान्तम्	६	५८	१
ततः प्रहस्तं निर्यान्तम्	६	५८	५
ततः प्रहस्य वद्रक्षः	७	६७	२०
ततः प्रहस्य लवणं	७	६९	१२
ततः प्रहृष्टः काकुत्स्थः	७	९५	१२
ततः प्रहृष्टतदनः	४	८	४६
ततः शक्रोपयानं तु	३	५	२७
ततः शक्रो महच्चापम्	७	२८	४५
ततः शतसहस्रेण	६	५४	१८
ततः शत्रुघ्नभरतौ	२	८५	९
ततः शत्रुघ्नवचनात्	६	१२८	१३
ततः शत्रुघ्नवचनात्	६	१२८	१९
ततः शत्रुजयं नाम	६	१२८	३१
ततः शरशतेनैव	६	८८	४९
ततः शरसहस्राणि	३	२५	३८
ततः शरसहस्राणि	६	१०३	६
ततः शरसहस्रेण	३	२५	६
ततः शरसहस्रेण	३	२८	१७
ततः शरसहस्रेण	६	८८	५६
ततः शरसहस्रेण	६	१०२	२८
ततः शरानायततीक्ष्णशल्यान्	५	४८	२८
ततः शरान्दाशरथिः	६	८८	३०
ततः शरासनं गृह्य	७	१८	१४
ततः शरीरं संक्षिप्य	५	१	१९७

	का०	स०	श्लो०
ततः शरेणाभिहतः	४	१७	१
ततः शरैर्भिन्नभुजान्तरः कपिः	५	४७	२५
ततः शरौघैरभिवृष्यमाणः	६	७०	२९
ततः शाखान्तरे लीनम्	५	३२	१
ततः शाखामृगाः सर्वे	४	२	१७
ततः शापभयाद्भीतः	४	२	६४
ततः शासनमाज्ञाय	२	३८	१
ततः शिखरमारुह्य	६	४	९३
ततः शितैः शोणितमासरू०	७	६	७०
ततः शिरः कम्पयित्वा	७	४	२
ततः शिरसि कृत्वा तु	२	११३	१
ततः शिरस्ते निशितैः	६	७१	६१
ततः शुचिसमाचाराः	२	६५	७
ततः शुभतरे तूणी	३	८	१८
ततः शुभं तापसयोग्यमन्नम्	३	७	२४
ततः शुभमतिः प्राज्ञः	४	३१	१०
ततः शुश्रुवुराक्रुष्टम्	६	२४	३
ततः शून्यां गतजनाम्	२	३७	२८
ततः शूर्पणखा घोरा	३	२०	१
ततः शूर्पणखा दीप्ता	३	३३	१
ततः शूर्पणखा दृष्ट्वा	३	३२	१
ततः शूर्पणखा नाम	७	९	३५
ततः प्रहृष्टः सुग्रीवः	४	५	२०
ततः प्रहृष्टः सुग्रीवः	४	७	२३
ततः प्रहृष्टः सुग्रीवः	४	८	१६
ततः प्रहृष्टः कपयः	६	४४	३१
ततः प्रहृष्टाः प्रवभाधर्षस्ते	६	१२४	२३
ततः प्रहृष्टो धर्मात्मा	२	११८	३२
ततः प्रहृष्टो धर्मात्मा	५	६३	२८
ततः प्रहृष्टो हनुमान्	४	४	३
ततः प्राक्रमदिष्टि ताम्	१	१५	१
ततः प्रागुत्तरां गत्वा	१	४०	२४
ततः प्रागुत्तरां गत्वा	१	५०	१
ततः प्राप्तमृषिं ज्ञात्वा	४	६०	१६
ततः प्रासादशिखरम्	६	४१	८८
ततः प्रासादहर्म्याणि	२	३३	३
ततः प्रास्थानिकं कृत्वा	२	६	११

	का०	स०	श्लो०
ततः प्रियतरो नास्ति	४	४१	४८
ततः प्रियं वाक्यमुपेत्य०	३	५४	२९
ततः प्रियान्प्राप्य मनोभिरा०	५	५	२१
ततः प्रियाश्चर्हवणातद०	६	११५	२५
ततः प्रीतमना रामः	१	२७	२८
ततः प्रीतमना रामः	६	११८	११
ततः प्रीतमनस्तेन	१	१	६७
ततः प्रीतः सहस्राक्षः	१	६२	२६
ततः प्रीतो द्विजश्रेष्ठः	१	१३	३३
ततः प्रीतोऽभवद्राजा	१	१२	१४
ततः प्रीतो महादेवः	७	१६	३५
ततः प्रीत्यान्विता देवाः	७	८६	१८
ततः प्रेक्ष्य हनूमन्तम्	६	८२	२४
ततः प्लवङ्गाधिपमन्त्रिसत्तमः	५	४७	१६
ततः प्लवेनांशुमतीम्	२	५५	२२
ततः शक्तिं महाशक्तिः	६	१००	१९
ततः शक्रधनुः प्रख्यम्	७	१९	१८
ततः शक्रसुतो देवः	७	२८	७
ततः शक्रो निरीक्ष्याथ	७	२९	१८
ततः पुरुषसिंहानाम्	२	१०५	१
ततः पुष्करिणीं वीरौ	३	७३	११
ततः पुष्पकमादाय	५	४७	१२
ततः पुष्पकमारोप्य	६	४७	१४
ततः पुष्पबलिं कृत्वा	३	१५	२५
ततः पुष्पातिभाराग्रान्	४	५३	४
ततः पूर्वां दिशं भित्त्वा	१	४०	१७
ततः पूर्वेण तौ गत्वा	३	६९	८
ततः पैतामहं वीरः	५	४८	३६
ततः पौरजनः सर्वः	२	६	१०
ततः पौलस्त्यसचिवाः	६	९२	१
ततः प्रकृतिमान्वैद्यः	२	७७	२१
ततः प्रकृतिमापन्नः	६	९१	२७
ततः प्रगृह्य दीप्ताग्राम्	७	२७	४८
ततः प्रचक्रमे वक्तुम्	२	५५	३
ततः प्रचलिताश्वेन	६	५६	६
ततः प्रचुक्रुशुर्दीनाः	२	६५	२०
ततः प्रचोदिता भूतैः	३	६४	८

	का०	स०	श्लो०
ततः प्रजग्मुः प्रशमं०	६	१०६	३२
ततः प्रजविनाश्वेन	६	९५	४२
ततः प्रजाभिः सहितः प्रजाप०	७	३५	६४
ततः प्रजाः समन्वर्त्ता	७	३५	५३
ततः प्रज्वालयित्वाग्निम्	७	३४	४२
ततः प्रणम्य शिरसा	१	१२	२
ततः प्रतिष्ठितो विष्णुः	७	१११	२
ततः प्रतीत प्लवतां वरिष्ठम्	४	६५	३५
ततः प्रत्युषसि प्राप्ते	६	१०	१
ततः प्रदक्षिणं कृत्वा	२	११३	५९
ततः प्रदीप्तलाङ्गूलः	५	५६	६
ततः प्रदुद्रुवुः सर्वे	७	१४	३०
ततः प्रबुद्धो भरतः	२	८१	४
ततः प्रबुद्धो राजा तु	७	५५	१८
ततः प्रबोधिता भेर्यः	६	४२	३४
ततः शूर्पणखा वाक्यम्	३	३५	१
ततः शूर्पणखा वाक्यात्	१	१	४७
ततः शूर्पणखां दृष्ट्वा	३	३४	१
ततः शूलानि निश्चेरुः	६	१००	३
ततः शैलोपमं वीरम्	६	११२	२२
ततः शोकाभिसंतप्तम्	४	२६	१
ततः शोकेन संवीतः	२	७२	१८
ततः शोणितकुम्भांश्च	६	६०	३३
ततः शोणितदिग्धाङ्गः	६	५८	५०
ततः शोणितदिग्धाङ्गौ	६	९०	३७
ततः श्रान्तोहनुत्सङ्गम्	५	३८	१९
ततः श्रुतो मया शब्दः	२	६४	१५
ततः श्रुत्वा निनादं तम्	५	६४	३९
ततः श्रुत्वा महाराजः	२	१२	१
ततः श्वशुरमामन्त्र्य	२	११८	५२
ततः स्थलमुपासद्य	३	१३	२२
ततः स्नादामसंनद्धम्	६	७७	२
ततः स्वस्तिकविज्ञेयाम्	२	८९	१२
ततः स्वस्त्ययनं कृत्वा	४	१६	१२
ततः स्वायंभुवैर्मन्त्रैः	५	४८	४०
ततः श्वसनचन्द्रार्क	५	५८	१६८
ततः श्वेताम्बुदाकारः	४	२	१६

	का०	स०	श्लो०
ततः षोडशमे वर्षे	४	२२	२९
ततः स कदनं चक्रे	६	९७	७
ततः स कपिशार्दूलः	५	३८	१
ततः स कार्मणा तस्य	५	४९	१
ततः सकामं सुग्रीवम्	६	१०८	३१
ततः स कार्मुकी वाणी	७	२१	३९
ततः स किंकरान्हत्वा	५	४३	१
ततः स कृत्वां जगतीपतेर्महान्	५	४१	२१
ततः संक्षोदयित्वा ताम्	६	१०१	४३
ततः सङ्क्रुद्धता धेनुः	७	५३	९
ततः स चिन्तयामास	५	२	३०
ततः सचिवसंदिष्टाः	६	३१	२३
ततः स जाम्बवन्तं च	६	९१	२
ततः स जीमूतकृतप्रणादः	४	१४	२२
ततः सज्यं धनुः कृत्वा	३	३	१०
ततः संचोदमानो वै	६	८९	७
ततः स तत्स्यन्दनिःस्वनं०	५	४८	२९
ततः स तां कपिरभिपत्य०	५	७	१६
ततः स तामरपुरोगमां०	७	७०	७१
ततः सतामानिहरं परं वरम्	७	३१	४४
ततः स तेनाभिहतः	६	५९	६१
ततः स तेषां सदनां महात्मा	२	१०३	४९
ततः स दण्डः काकुत्स्थ	७	८०	२
ततः संतप्तहृदयः	१	५७	१
ततः संदर्शने तस्य	२	९०	३
ततः संदिश्य सुग्रीवः	४	४३	१
ततः संधाय सौमित्रिः	६	८८	४१
ततः संध्यामुपस्थाय	२	३२	३
ततः स पुरुषव्याघ्रः	२	३२	२८
ततः स पुर्याः सहसा महात्मा	६	६७	९३
ततः स पुष्पकं दिव्यम्	६	११२	२४
ततः स प्रयतो वृद्धः	६	१२८	५९
ततः स प्राञ्जलिर्भूत्वा	२	५२	८
ततः स बलवान्क्रुद्धः	७	२८	२
ततः स बाणासनशक्रकार्मुकः	५	४७	१८
ततः सबालवृद्धाः सा	२	४०	२०
ततः स भार्यां भयमोहमूर्छिता	३	१८	२६

	का०	स०	श्लो०
ततः स भार्यासिजटी महामुनिः	२	३२	४
ततः स मथिताष्टाश्वम्	५	४६	२८
ततः स मध्यं गतमंशुमन्तम्	५	५	१
ततः समभवद्युद्धम्	७	१०१	५
ततः समभिगच्छन्तम्	३	५	२१
ततः समरकोपेन	६	९०	३९
ततः समागतान्सर्वान्	७	११०	२८
ततः समासाद्य महाधनं महत्	४	१५	४१
ततः समासाद्य रणे दशानन०	५	४१	९
ततः समास्थाय रथं महारथः	२	४५	३४
ततः समीक्ष्य शयने	२	४३	१
ततः समुत्कृष्टरवं निशम्य	६	५९	४४
तनः समुत्थाय कुले कुले ते	२	८२	३२
ततः समुत्थाय पुनः	४	४९	१५
ततः समुत्थितः कल्यम्	२	८३	१
ततः समुद्योगमवेक्ष्य वीर्यवान्	४	३८	३४
ततः समुद्रद्वीपांश्च	४	४०	६
ततः समुद्रमासाद्य	६	१२६	४९
ततः समुद्रो धर्मात्मा	४	११	१०
ततः समुपजिघ्रन्ती	४	२	३
ततः समुपविष्टेषु	७	९९	२
ततः समेतावतितीक्ष्णवेगौ	५	४८	२९
ततः संपन्नमित्युक्त्वा	३	२	६२
ततः संप्रस्थितः काले	२	५६	५
ततः सप्रेक्ष्य जग्राह	३	५८	५२
ततः संभावितताम्	६	१००	२२
ततः स योजनशतम्	७	२९	१७
ततः स रक्षोपतिर्महात्मा	६	५९	३३
ततः स रक्षोपतिर्महात्मा	६	७३	५४
ततः सरलतालाश्च	२	९१	५०
ततः स राक्षसो भीमः	६	६७	१०५
ततः स राजा जनकः	१	६७	२
ततः स राजा तरुणः	७	५९	९
ततः स राजा पिशिताशनानाम्	७	३३	२३
ततः स राजा पुनरेव मूर्च्छितः	२	१३	२५
ततः स राजा मनुजेन्द्रपुत्रः	७	७९	२०
ततः स राजा राजेन्द्र	७	१९	३२

	का०	स०	श्लो०
ततः स रामो हरिवाहिनी०	६	३८	१४
ततः स रोषमापन्नः	६	४१	८३
ततः स रौद्राभिरतः	३	९	२२
ततः संरक्तनयनः	७	२२	३२
ततः सर्वाण्यनीकानि	६	४९	३१
ततः सर्वा दिशो दृष्ट्वा	३	२५	३६
ततः सर्वा दिशो राजा	४	४५	८
ततः सर्वा नरेन्द्रस्य	२	६५	२५
ततः सर्वा प्रकृतयः	७	१०७	१२
ततः सर्वाः प्रकृतयः	७	१०९	१४
ततः सर्वाः समापेतुः	२	८७	६
ततः सर्वे महात्मानः	७	८५	१०
ततः सर्वे समागम्य	१	१३	१८
ततः सर्वे सुरगणाः	७	८६	७
ततः स लङ्कापुरोपवनाग्रं	५	५४	३१
ततः स लम्बस्य गिरेः समृद्धे	५	१	२००
ततः सलीलमादाय	६	४६	३४
ततः स वरदः साधुः	२	३५	२५
ततः स वाक्यैर्मधुरैर्हेनुमतः	६	१२६	५५
ततः संवदतोरेवम्	७	५१	२९
ततः स शर्वरीं प्रीतः	२	११९	१६
ततः स शैलाभिनिपातभग्नः	६	७०	३१
ततः स सचिवेभ्यस्तु	४	२	५
ततः स सचिवैः साधम्	७	१४	१
ततः स संज्ञानुपलभ्य कृच्छ्रात्	६	६७	८४
ततः स संदीपितकोपवह्निः	६	७२	१७
ततः स सुमहाप्राज्ञः	४	४	३३
ततः स स्त्रीपुमांसस्ते	७	१०९	१५
ततः स हरिशार्दूलः	५	३	३७
ततः स हरिशार्दूलः	५	३	३९
ततः सहस्राभरणान्	६	११७	५
ततः सहस्रनयनः	७	३६	१०
ततः सहस्रयूथाश्च	६	४२	१७
ततः सागरवेलायाम्	६	२१	१
ततः साध्विति तद्वाक्यम्	१	८	१०
ततः साध्विति तद्वाक्यम्	१	३२	१०
ततः सा नवमे मासि	७	८९	२३

	का०	स०	श्लो०
ततः सायह्नसमये	२	५७	५
ततः सा राक्षसी गर्भम्	७	४	२४
ततः सा राक्षसेन्द्रेण	३	४९	२३
ततः सा शापतोषेण	७	५६	२६
ततः सा संप्रतिश्राव्य	२	१०७	५
ततः सा हीमती बाला	५	२७	४७
ततः सा सरमाभवन्	७	३६	६
ततः सीता ददर्शोभौ	६	४७	१८
ततः सीतामपश्यंस्तु	५	५८	५३
ततः सीतामुपागम्य	५	२३	३
ततः सीतामुपागम्य	५	२७	२
ततः सीतां महाभागाम्	२	११७	२१
ततः सीतां महाभागाम्	६	११४	९
ततः सीतां शिरःस्नाताम्	६	११४	१४
ततः सीतां समस्तास्ताः	५	२४	१
ततः सीतां समानीय	१	७३	२५
ततः सुकेसो वरदानगर्वितः	७	४	३२
ततः सुग्रीवभवनम्	४	३१	२१
ततः सुग्रीवमासीनम्	४	३३	६३
ततः सुग्रीववचनात्	१	१	७०
ततः सुग्रीवसचिवाः	४	२	७
ततः सुग्रीवसचिवाः	४	२	१२
ततः सुग्रीवसहितः	१	१	७९
ततः सुतीक्ष्णवचनम्	३	२	५३
ततः सुतुमुलं युद्धम्	४	१२	१७
ततः सुदर्शनं नागम्	६	६९	२०
ततः सुदामां द्युतिमान्	२	७१	१
ततः सुपर्णः काकुत्स्थौ	६	५०	३८
ततः सुभीमोबहुभिर्निशाचरैः	६	५१	३६
ततः सुभृशसंतप्तः	२	७८	१३
ततः सुमन्त्रः काकुत्स्थम्	२	४०	१०
ततः सुमन्त्रमैक्ष्वाकः	२	३६	१
ततः सुमन्त्रस्त्वरितम्	१	८	५
ततः सुमन्त्रस्त्वागम्य	७	६०	३
ततः सुमन्त्रेण गुहेन चैव	२	९९	४१
ततः सुमन्त्रोपि रथाद्विमुच्य	२	४५	३३
ततः सुमाली माली च	७	६	३९

	का०	स०	श्लो०
ततः सुरगणैः सार्धम्	१	४२	१५
ततः सुराणां तु वरैः	७	३६	२१
ततः सुरैः संप्रहृष्टैः	७	७	४४
ततः सुवेषं मृगयागतं पतित	३	४६	३८
ततः सुवेणप्रमुखाः प्लवङ्गमाः	४	४२	५७
ततः सूक्ष्माम्बरधरः	७	१०९	४
ततः सूनो यथापूर्वम्	२	१४	४६
ततः सूर्यनिकाशेन	३	२८	१४
ततः सूर्योदयं यावत्	२	६५	११
ततः सूर्यं समुत्सृज्य	७	३५	४०
ततः सृजन्तं बाणौघान्	६	५८	३४
ततः सोमाश्रमं गत्वा	४	४३	१४
ततः सौमित्रिराश्वास्य	३	६६	२
ततः संसक्तहस्तस्तु	६	९९	३४
ततः संस्मारितो रामः	६	१०८	३
ततश्चक्राणि निष्पेतुः	६	१००	७
ततश्चक्रुर्महात्मानः	६	६०	३१
ततश्चञ्चूर्यं रम्येषु	४	३०	१४
ततश्च हनुमान्वाचा	४	३	३
ततश्च ख्यातुमारेभे	६	१९	३३
ततश्चानुमताः सर्वे	५	६१	१५
ततश्चाराः संत्वरिताः	६	२९	१७
ततश्चरासीन्महानादः	६	९५	३५
ततश्चिताया वेगेन	३	७२	५
ततश्चीरोत्तरासङ्गः	२	५०	४८
ततश्छिन्नभुजां श्रान्ताम्	१	२६	१८
ततस्तं घटमादाय	२	६४	३
ततस्तत्कर्मसिद्ध्यर्थम्	१	५७	१४
ततस्तत्परितो याता	६	७१	१०८
ततस्तत्प्रहतं बाणैः	३	२८	१८
ततस्तत्र प्रविष्टस्य	२	४२	२९
ततस्तत्र महातेजाः	४	६५	८
ततस्तत्र मुहूर्तेन	२	९१	४१
ततस्तत्र समासीनौ	२	५३	३३
ततस्तथेति प्रतिगृह्य तद्वचः	६	३२	४४
ततस्तथेत्युवाचैनम्	३	४२	९
ततस्तथेत्येवमुदारदर्शनः	२	९०	२४

	का०	स०	श्लो०
ततस्तदद्भुतप्रख्यम्	१	१६	२४
ततस्तदमृतास्वादम्	४	५६	१
ततस्तदस्त्रं चिक्षेप	६	७१	६१
ततस्तदस्त्रं विनिहत्य राघवः	५	६६	५१
ततस्तदा बहुवि०	५	७	१७
तपस्तदा वानरसैन्यमेवम्	६	७३	७०
ततस्तदिक्ष्वाकुवरौ	३	७	३
ततस्तदिन्द्रक्षयसंनिभं पुरम्	२	६	२८
ततस्तद्दारूपं कर्म	४	६१	१
ततस्तद्धैवतबलम्	७	२८	१६
ततस्तद्धनुमान्वीरः	५	४१	१५
ततस्तद्राक्षसं सैन्यम्	३	२२	१७
ततस्तद्राक्षसं सैन्यम्	७	२८	३७
ततस्तद्राम पम्पायाः	३	७३	२८
ततस्तद्वानरं सैन्यम्	६	२५	१०
ततस्तं तु महात्मानम्	६	२६	२३
ततस्तं निर्जितं मत्वा	७	१८	१८
ततस्तपः संग्रहसंचयार्जितम्	५	४७	४
ततस्तमक्षोभ्यबलम्	६	३०	१
ततस्तमक्षीभ्यबलम्	६	३१	१
ततस्तमन्तः पुरनादमुत्थितम्	२	५७	३४
ततस्तमभिदुद्राव	६	५६	१७
ततस्तमभिदुद्राव	७	३२	४६
ततस्तमसि संजति	७	२६	१
ततस्तमादाय जगाम वीरः	६	६७	७०
ततस्तमादाय तदा स मेने	६	६७	७१
ततस्तमृषिमायान्तम्	७	३३	८
ततस्तं पुरुषव्याघ्रम्	३	१०२	४५
ततस्तं प्रस्थितं सीता	५	३६	१६
ततस्तं प्रस्थितं सीता	५	५६	२
ततस्तं भीमधन्वानम्	३	२५	७
ततस्तं भ्रामयामास	५	४३	१८
ततस्तयीरपाये तु	३	३६	२०
ततस्तयीर्महद्युद्धम्	७	२७	४५
ततस्तलेनाभिहतो महारथः	५	४७	५२
ततस्त्वस्माद्भयान्मुक्ताः	५	४२	४३
ततस्तस्मिन्गृहे मुख्ये	५	५४	१६

	का०	स०	श्लो०
ततस्तस्मिन्महाबाहुः	५	३८	२८
ततस्तस्मिन्महाबाहो	५	६७	११
ततस्तस्मै द्विजेन्द्राय	२	२५	३१
ततस्तस्य गिरेर्मूर्ध्नि	५	३५	५
ततस्तस्य गिरेः शृङ्गम्	५	५८	१
ततस्तस्य गिरेः श्वेना	४	११	१५
ततस्तस्य परिज्ञाय	७	३०	२७
ततस्तस्य महाबाणैः	७	२७	४६
ततस्तस्य वचः श्रुत्वा	५	५८	१५२
ततस्तस्याक्षि काकस्य	५	३८	३५
ततस्तस्याक्षि काकस्य	५	६७	१७
ततस्तस्या विदूरेण	३	४१	७५
ततस्तस्या हितं सख्याः	६	३४	२
ततस्तस्यै प्रणम्याहम्	५	५८	१०५
ततस्तस्यैव वचनात्	२	६४	१७
ततस्तां दुर्मुखीं नाम	५	२३	१६
ततस्तां निहतां दृष्ट्वा	७	५१	१३
ततस्ताञ्छबलानश्वान्	३	२२	२२
ततस्तान्कपिवृद्धांश्च	४	५३	६
ततस्तान्पूजितान्दृष्ट्वा	३	१२२	११
ततस्तां पुरुषैर्वीर्यैः	३	४६	२०
ततस्तान्येव रक्षांसि	७	३२	७१
ततस्तान्राक्षसान्सर्वान्	३	६०	४
ततस्तान्राक्षसान्सर्वान्	६	६०	२५
ततस्तान्राक्षसोत्सृष्टान्	६	७६	७८
ततस्तां रजनीं व्युष्य	२	६२	१
ततस्ताँल्लक्ष्य वित्रस्तान्	७	१५	१
ततस्तां शिंशपां सीता	५	२४	१८
ततस्तास्त्रीन्हतान्ज्ञात्वा	५	४६	३३
ततस्तान्हरिवृद्धांश्च	४	६४	१४
ततस्ताभिः समेताभिः	५	५८	८०
ततस्ताभ्यां कुमाराभ्याम्	५	२७	१६
ततस्ताभ्यां कुमाराभ्याम्	५	३५	४६
ततस्तामेव चोत्कृष्य	७	८	११
ततस्तारां हरिश्रेष्ठः	४	३३	३१
ततस्ताः सहिताः सर्वाः	५	५८	८४
ततस्तास्तं समालिङ्ग्य	१	१०	२०

	का०	स०	श्लो०
ततस्तिलौदनं भुक्त्वा	२	६६	१०
ततस्तीरमुपागम्य	७	४७	३
ततस्तु कम्पनं दृष्ट्वा	६	७६	४
ततस्तु गिरिसंकाशम्	५	४२	५
ततस्तु चोदितास्तेन	६	७५	४६
ततस्तु जयशब्देन	७	६	१२
ततस्तु जलशेषेण	२	८७	१६
ततस्तु तद्भीमबलं महाहवे	३	२६	३८
ततस्तु तद्वानरसैन्यमुग्रम्	६	५६	४४
ततस्तु तमसातीरम्	२	४६	१
ततस्तु तं पत्ररथं महीतले	३	५१	४६
ततस्तु तं राक्षससङ्घमर्दनम्	३	३०	४१
ततस्तु तं राघवमुग्रवेगम्	६	२१	३३
ततस्तु तं वानरवीरमुख्यम्	५	५४	४५
ततस्तु तस्मिन्विजने महा०	२	५३	३५
ततस्तु तां पाण्डुरहर्म्यमा०	६	१२३	५४
ततस्तु तां पुरीं लङ्काम्	५	४	५
ततस्तु ताः प्राश्य तमुत्तम०	१	१६	३१
ततस्तु तारा व्यसनार्णवप्लता	४	२२	३१
ततस्तु ताविन्द्रजितो०	६	७३	६६
ततस्तु ते तस्य वधेन भूरिणा	६	६७	१७३
ततस्तु ते राक्षसऋक्षवानराः	७	४०	३७
ततस्तु ते राक्षसपुंगवास्त्रयः	७	५	४४
ततस्तु काञ्चनवित्रकार्मकौ	३	४	३४
ततस्तु तौ रामवचःप्रचोदितौ	१	४	३६
ततस्तु दुर्धरो वीरः	५	४६	२४
ततस्तु देवताः सर्वाः	१	३७	२५
ततस्तु देवर्षिमहर्षिपन्नगाः	६	६७	१७२
ततस्तु द्वारमागम्य	४	११	२६
ततस्तु धारोद्धतमेघकल्पम्	६	६७	१४२
ततस्तु निभृतं धीरम्	४	१४	३
ततस्तु नीलः प्रतिलब्धसंज्ञः	६	७०	३०
ततस्तु नीलो बलवान्	६	६७	२२
ततस्तु नीलो विजयी महा०	६	५८	५६
ततस्तु भयसंत्रस्तम्	४	२	१३
ततस्तु भरतः श्रीमान्	२	११५	२३
ततस्तु रक्षः क्षनजावलिप्सम्	६	६७	१५३

	का०	स०	श्लो०
ततस्तु रक्षोऽधिपतिर्महात्मा	५	४८	१
ततस्तु राजानमुदीक्ष्य दीनम्	६	७३	३
ततस्तु रामस्य निशम्य०	६	५६	१३
ततस्तु रामानुजरामवानराः	४	१३	३०
ततस्तु रामो धर्मात्मा	६	६७	१२४
ततस्तु रामो महता बलेन	६	३७	३७
ततस्तु लक्ष्मे स विहन्यमाने	५	४८	३४
ततस्तु लङ्का सहसा प्रदग्धा	५	५४	३६
ततस्तु वानरामात्याः	७	३४	४
ततस्तु वानराः सर्वे	६	७३	३८
ततस्तु वायोर्वचनं निशम्य	६	७१	८६
ततस्तु विगते बाष्पे	२	५२	२१
ततस्तु विगला नाम	५	२४	२०
ततस्तु वेगवान्वीरः	५	५७	२६
ततस्तु शिंशपामूले	५	५५	१
ततस्तुष्टो महातेजाः	१	४३	३८
ततस्तु सचिवैः सार्धम्	७	२१	४५
ततस्तु संप्राप्य समुद्रतीरम्	५	१	२०१
ततस्तु सागरा शैलान्	४	६०	६
ततस्तु सा चारुदती शुचि०	३	५२	४४
ततस्तु सा राक्षससङ्घसंवृतम्	३	१८	२५
ततस्तु सा लक्ष्मणरामपालिता	६	१२०	२४
ततस्तु सीतामुपलभ्य रावणः	३	५४	३०
ततस्तु सुग्रीववचो निशम्य	६	१८	३६
ततस्तु सुग्रीवविभीषणाङ्गदाः	६	१०८	३३
ततस्तु सुमहाप्राज्ञः	६	३५	६
ततस्तु स्तुवतां तेषाम्	२	६५	४
ततस्तु हनुमान्वीरः	५	३	४२
ततस्तु हुतभोक्तारम्	६	७३	१८
ततस्तु हुतभोजाः	७	३६	३५
ततस्तृप्त इति ज्ञात्वा	६	६०	६४
ततस्ते कारणं सर्वम्	४	११	६१
ततस्ते चुक्रुशुर्हृष्टाः	६	५६	८१
ततस्तेऽञ्जनसंकाशाः	४	३७	२०
ततस्ते त्रिदिशा सर्वे	७	२८	८
ततस्ते त्वरितास्तत्र	६	६०	६२
ततस्ते दद्युर्घोरम्	४	५३	१

	का०	स०	श्लो०
ततस्तदद्भुतप्रख्यम्	१	१६	२४
ततस्तदमृतास्वादम्	४	५६	१
ततस्तदस्त्रं चिक्षेप	६	७१	६१
ततस्तदस्त्रं विनिहत्य राघवः	५	६६	५१
ततस्तदा बहुवि०	५	७	१७
तपस्तदा वानरसैन्यमेवम्	६	७३	७०
ततस्तदिक्ष्वाकुवरौ	३	७	३
ततस्तदिन्द्रक्षयसंनिभं पुरम्	२	६	२८
ततस्तद्दारूपं कर्म	४	६१	१
ततस्तद्धैतबलम्	७	२८	१६
ततस्तद्धनुमान्वीरः	५	४१	१५
ततस्तद्राक्षसं सैन्यम्	३	२२	१७
ततस्तद्राक्षसं सैन्यम्	७	२८	३७
ततस्तद्राम पम्पायाः	३	७३	२८
ततस्तद्वानरं सैन्यम्	६	२५	१०
ततस्तं तु महात्मानम्	६	२६	२३
ततस्तं निर्जितं मत्वा	७	१८	१८
ततस्तपः संग्रहसंचयार्जितम्	५	४७	४
ततस्तमक्षोभ्यबलम्	६	३०	१
ततस्तमक्षीभ्यबलम्	६	३१	१
ततस्तमन्तः पुरनादमुत्थितम्	२	५७	३४
ततस्तमभिदुद्राव	६	५६	१७
ततस्तमभिदुद्राव	७	३२	४६
ततस्तमसि संजति	७	२६	१
ततस्तमादाय जगाम वीरः	६	६७	७०
ततस्तमादाय तदा स मेने	६	६७	७१
ततस्तमृषिमायान्तम्	७	३३	८
ततस्तं पुरुषव्याघ्रम्	३	१०२	४५
ततस्तं प्रस्थितं सीता	५	३६	१६
ततस्तं प्रस्थितं सीता	५	५६	२
ततस्तं भीमधन्वानम्	३	२५	७
ततस्तं भ्रामयामास	५	४३	१८
ततस्तयोरपाये तु	३	३६	२०
ततस्तयोर्महद्युद्धम्	७	२७	४५
ततस्तलेनाभिहतो महारथः	५	४७	५२
ततस्त्वस्माद्भयान्मुक्ताः	५	४२	४३
ततस्तस्मिन्गृहे मुख्ये	५	५४	१६

	का०	स०	श्लो०
ततस्तस्मिन्महाबाहुः	५	३८	२८
ततस्तस्मिन्महाबाहो	५	६७	११
ततस्तस्मै द्विजेन्द्राय	२	२५	३१
ततस्तस्य गिरेर्मूर्ध्नि	५	३५	५
ततस्तस्य गिरेः शृङ्गम्	५	५८	१
ततस्तस्य गिरेः श्वेता	४	११	१५
ततस्तस्य परिज्ञाय	७	३०	२७
ततस्तस्य महाबाणैः	७	२७	४६
ततस्तस्य वचः श्रुत्वा	५	५८	१५२
ततस्तस्याक्षि काकस्य	५	३८	३५
ततस्तस्याक्षि काकस्य	५	६७	१७
ततस्तस्या विदूरेण	३	४१	७५
ततस्तस्या हितं सख्याः	६	३४	२
ततस्तस्यै प्रणम्याहम्	५	५८	१०५
ततस्तस्यैव वचनात्	२	६४	१७
ततस्तां दुर्मुखी नाम	५	२३	१६
ततस्तां निहतां दृष्ट्वा	७	५१	१३
ततस्ताञ्छबलानश्वान्	३	२२	२२
ततस्तान्कपिवृद्धांश्च	४	५३	६
ततस्तान्पूजितान्दृष्ट्वा	३	१२२	११
ततस्तां पुरुषैर्वीर्यै	३	४६	२०
ततस्तान्येव रक्षांसि	७	३२	७१
ततस्तान्राक्षसान्सर्वान्	३	६०	४
ततस्तान्राक्षसान्सर्वान्	६	६०	२५
ततस्तान्राक्षसोत्सृष्टान्	६	७६	७८
ततस्तां रजनीं व्युष्य	२	६२	१
ततस्तांल्लक्ष्य वित्रस्तान्	७	१५	१
ततस्तां शिंशपां सीता	५	२४	१८
ततस्तास्त्रीन्हतान्ज्ञात्वा	५	४६	३३
ततस्तान्हरिवृद्धांश्च	४	६४	१४
ततस्ताभिः समेताभिः	५	५८	८०
ततस्ताभ्यां कुमाराभ्याम्	५	२७	१६
ततस्ताभ्यां कुमाराभ्याम्	५	३५	४६
ततस्तामेव चोत्क्रुष्य	७	८	११
ततस्तारां हरिश्रेष्ठः	४	३३	३१
ततस्ताः सहिताः सर्वाः	५	५८	८४
ततस्तास्तं समालिङ्ग्य	१	१०	२०

	का०	स०	श्लो०
ततस्तिलौदनं भुक्त्वा	२	६९	१०
ततस्तीरमुपागम्य	७	४७	३
ततस्तु कम्पनं दृष्ट्वा	६	७६	४
ततस्तु गिरिसंकाशम्	५	४२	५
ततस्तु चोदितास्तेन	६	७५	४९
ततस्तु जयशब्देन	७	६	१२
ततस्तु जलशेषेण	२	८७	१९
ततस्तु तद्भीमबलं महाहवे	३	२६	३८
ततस्तु तद्वानरसैन्यमुग्रम्	६	५९	४४
ततस्तु तमसातीरम्	२	४६	१
ततस्तु तं पत्ररथं महीतले	३	५१	४६
ततस्तु तं राक्षससङ्घमर्दनम्	३	३०	४१
ततस्तु तं राघवमुग्रवेगम्	६	२१	३३
ततस्तु तं वानरवीरमुख्यम्	५	५४	४५
ततस्तु तस्मिन्विजने महा०	२	५३	३५
ततस्तु तां पाण्डुरहर्म्यमा०	६	१२३	५४
ततस्तु तां पुरीं लङ्काम्	५	४	५
ततस्तु ताः प्राश्य तमुत्तम०	१	१६	३१
ततस्तु तारा व्यसनार्णवप्लता	४	२२	३१
ततस्तु ताविन्द्रजितो०	६	७३	६९
ततस्तु ते तस्य वधेन भूरिणा	६	६७	१७३
ततस्तु ते राक्षसऋक्षवानराः	७	४०	३७
ततस्तु ते राक्षसपुंगवास्त्रयः	७	५	४४
ततस्तु काञ्चनचित्रकार्मुकौ	३	४	३४
ततस्तु तौ रामवचःप्रचोदितौ	१	४	३६
ततस्तु दुर्धरो वीरः	५	४६	२४
ततस्तु देवताः सर्वाः	१	३७	२५
ततस्तु देर्षिमहर्षिपन्नगाः	६	६७	१७२
ततस्तु द्वारमागम्य	४	११	२६
ततस्तु धारोद्धतमेघकल्पम्	६	६७	१४२
ततस्तु निभृतं धीरम्	४	१४	३
ततस्तु नीलः प्रतिलब्धसंज्ञः	६	७०	३०
ततस्तु नीलो बलवान्	६	६७	२२
ततस्तु नीलो विजयी महा०	६	५८	५९
ततस्तु भयसंत्रस्तम्	४	२	१३
ततस्तु भरतः श्रीमान्	२	११५	२३
ततस्तु रक्षः क्षनजावलिप्सम्	६	६७	१५३

	का०	स०	श्लो०
ततस्तु रक्षोऽधिततिर्महात्मा	५	४८	१
ततस्तु राजानमुदीक्ष्य दीनम्	६	७३	३
ततस्तु रामस्य निशम्य०	६	५९	१३
ततस्तु रामानुजरामवानराः	४	१३	३०
ततस्तु रामो धर्मात्मा	६	६७	१२४
ततस्तु रामो महता बलेन	६	३७	३७
ततस्तु लक्ष्मे स विहन्यमाने	५	४८	३४
ततस्तु लङ्का सहसा प्रदग्धा	५	५४	३९
ततस्तु वानरामात्याः	७	३४	४
ततस्तु वानराः सर्वे	६	७३	३८
ततस्तु वायोर्वचनं निशम्य	६	७१	८९
ततस्तु विगते बाष्पे	२	५२	२१
ततस्तु विगला नाम	५	२४	२०
ततस्तु वेगवान्वीरः	५	५७	२९
ततस्तु शिंशपामूले	५	५५	१
ततस्तुष्टो महातेजाः	१	४३	३८
ततस्तु सचिवैः सार्धम्	७	२१	४५
ततस्तु संप्राप्य समुद्रतीरम्	५	१	२०१
ततस्तु सागरा शैलान्	४	६०	६
ततस्तु सा चारुदती शुचि०	३	५२	४४
ततस्तु सा राक्षससङ्घसंवृतम्	३	१८	२५
ततस्तु सा लक्ष्मणरामपालिता	६	१२०	२४
ततस्तु सीतामुपलभ्य रावणः	३	५४	३०
ततस्तु सुग्रीववचो निशम्य	६	१८	३९
ततस्तु सुग्रीवविभीषणाङ्गदाः	६	१०८	३३
ततस्तु सुमहाप्राज्ञः	६	३५	६
ततस्तु स्तुवतां तेषाम्	२	६५	४
ततस्तु हनुमान्वीरः	५	३	४२
ततस्तु हुतभोक्तारम्	६	७३	१८
ततस्तु हृततेजौजाः	७	३६	३५
ततस्तृप्त इति ज्ञात्वा	६	६०	६४
ततस्ते कारणं सर्वम्	४	११	६१
ततस्ते चुक्रुशुर्हृष्टाः	६	५९	८१
ततस्तेऽञ्जनसंकाशाः	४	३७	२०
ततस्ते त्रिदिशा सर्वे	७	२८	८
ततस्ते त्वरितास्तत्र	६	६०	९२
ततस्ते दध्मुर्घोरम्	४	५३	१

	का०	स०	श्लो०
ततस्ते दैवतगणाः	७	२९	३६
ततस्तेन दशग्रीवः	७	१५	२७
ततस्तेन महातेजाः	५	१६	३६
ततस्तेन मृधे हत्वा	५	५१	१०
ततस्तेनैव मार्गेण	२	१०३	३१
ततस्तेनैव सहसा	७	२३	४५
ततस्ते प्रीतमनसः	५	५७	३१
ततस्ते भ्रातरः सर्वे	२	१०३	१७
ततस्ते मार्गमाणा वै	५	३५	५४
ततस्ते यमुनां दिव्याम्	२	११३	२१
ततस्ते राक्षसा दृष्ट्वा	५	४८	४६
ततस्ते राक्षसाः शूराः	५	५८	१५५
ततस्ते रक्षसाः सर्वे	६	७३	३०
ततस्ते राक्षसाः सर्वे	७	२७	३८
ततस्ते राक्षसस्तत्र	६	४२	१
ततस्ते राक्षसस्तत्र	६	४४	१७
ततस्ते राक्षसेन्द्रेण	५	४५	१
ततस्ते रावणं युद्धे	७	२३	३५
ततस्ते वध्यमानास्तु	६	६७	४०
ततस्ते वानरश्रेष्ठम्	४	२६	२९
ततस्ते वानराः श्रुत्वा	४	११	५९
ततस्ते वानराः सर्वे	६	९३	१२
ततस्ते वानराः सर्वे	६	९७	१०
ततस्ते वानराः सर्वे	६	१२३	५३
ततस्ते वानराः हृष्टाः	५	६१	११
ततस्ते विमुखाः सर्वे	७	२३	४८
ततस्तेषां नरव्याघ्र	१	४५	१६
ततस्तेषु प्रघातेषु	५	१	११६
ततस्तेष्ववपन्नेषु	५	४५	१४
ततस्तेष्वसन्नेषु	५	४६	३८
ततस्तेषु सहिसास्तत्र	४	२५	५२
ततस्ते हरयः सर्वे	४	३१	२७
ततस्तैः कपिभिर्व्याप्ताम्	४	३१	२६
ततस्तै रावणामात्यैः	७	३२	३२
ततस्तैर्बहुभिर्वीरैः	५	६३	१०
ततस्तैनदीपांश्च	६	१२८	४७
ततस्तैश्चालितः नौकाम्	२	५२	८१
ततस्तैः स्वगणैरिष्टैः	५	४८	१६
ततस्तोरणमुत्साद्य	७	१४	२७
ततस्तौ देशकालज्ञौ	३	७०	२८
ततस्तौ पादचारेण	२	५६	१२
ततस्तौ राम निघ्नन्तौ	७	१५	२८
ततस्तं समनुज्ञाप्य	२	५०	७३
ततस्तं स्थविरो राजा	५	३३	२३
ततस्त्यक्त्वा रथं शक्रः	७	२९	२५
ततस्त्रयोदशे वर्षे	५	३३	१८
ततस्त्रिनद्या सार्धम्	६	४८	३६
ततस्त्रिभिरहोरात्रैः	७	१०८	२
ततस्त्रियुगमस्त्रिककुत्	७	३६	७
ततस्त्रिविनसं चापम्	३	४४	२
ततस्त्रिशङ्कोर्वचनम्	१	५८	१
ततस्त्रिशिरसा बाणैः	३	२७	११
ततस्त्वचोदयत्सूतः	७	२२	७
ततस्त्वदर्शयन्सर्वान्	६	६०	६२
ततस्त्वभीरवः प्राज्ञाः	७	१९	४
ततस्त्वमसि दुर्धर्षात्	७	१०४	९
ततस्त्वं प्राप्यसे पुत्र	२	२१	२८
ततस्त्वयोध्या रहिता०	२	४१	२०
ततस्त्वहं चोत्तमबाण चाप०	२	८०	२४
ततस्त्वां देवि सुभगे	२	५२	८५
ततस्त्वां निहतं दृष्ट्वा	४	६६	२५
ततस्त्वां प्रस्थितं दृष्ट्वा	३	९	१२
ततस्त्वाश्रममासाद्य	२	५४	१०
ततस्त्वां शरणार्थं च	३	६	१९
ततस्त्विन्द्रजिता लङ्का	९	७३	१६
ततस्त्विरावली नाम	३	१४	२४
ततस्त्वृषिगणाः क्षिषम्	२	११२	४
ततस्त्वेकजटा नाम	५	२३	५
तताप नहि तं सूर्यः	७	१	८२
ततो गच्छति गोकर्णम्	५	३५	८०
ततो गतायां निद्रायाम्	५	४२	३
ततो गत्वा दशग्रीवः	७	२५	१६
ततो गत्वा वयं युद्धम्	६	६४	२३
ततो गत्वाश्रमपदम्	१	५५	२१

	का०	स०	श्लो०
ततस्ते दैवतगणाः	७	२९	३६
ततस्तेन दशग्रीवः	७	१५	२७
ततस्तेन महातेजाः	५	१६	३६
ततस्तेन मृधे हत्वा	५	५१	१०
ततस्तेनैव मार्गेण	२	१०३	३१
ततस्तेनैव सहसा	७	२३	४५
ततस्ते प्रीतमनसः	५	५७	३१
ततस्ते भ्रातरः सर्वे	२	१०३	१७
ततस्ते मार्गमाणा वै	५	३५	५४
ततस्ते यमुनां दिव्याम्	२	११३	२१
ततस्ते राक्षसा दृष्ट्वा	५	४८	४६
ततस्ते राक्षसाः शूराः	५	५८	१५५
ततस्ते रक्षसाः सर्वे	६	७३	३०
ततस्ते राक्षसाः सर्वे	७	२७	३८
ततस्ते राक्षसस्तत्र	६	४२	१
ततस्ते राक्षसस्तत्र	६	४४	१७
ततस्ते राक्षसेन्द्रेण	५	४५	१
ततस्ते रावणं युद्धे	७	२३	३५
ततस्ते वध्यमानास्तु	६	६७	४०
ततस्ते वानरश्रेष्ठम्	४	२६	२९
ततस्ते वानराः श्रुत्वा	४	११	५९
ततस्ते वानराः सर्वे	६	९३	१२
ततस्ते वानराः सर्वे	६	९७	१०
ततस्ते वानराः सर्वे	६	१२३	५३
ततस्ते वानराः हृष्टाः	५	६१	११
ततस्ते विमुखाः सर्वे	७	२३	४८
ततस्तेषां नरव्याघ्र	१	४५	१६
ततस्तेषु प्रघातेषु	५	१	११६
ततस्तेष्ववपन्नेषु	५	४५	१४
ततस्तेष्वसन्नेषु	५	४६	३८
ततस्तेषु सहिसास्तत्र	४	२५	५२
ततस्ते हरयः सर्वे	४	३१	२७
ततस्तैः कपिभिर्व्याप्ताम्	४	३१	२६
ततस्तै रावणामात्यैः	७	३२	३२
ततस्तैर्बहुभिर्वीरैः	५	६३	१०
ततस्तैनदीपांश्च	६	१२८	४७
ततस्तैश्चालितः नौकाम्	२	५२	८१
ततस्तैः स्वगणैरिष्टैः	५	४८	१६
ततस्तोरणमुत्साद्य	७	१४	२७
ततस्तौ देशकालज्ञौ	३	७०	२८
ततस्तौ पादचारेण	२	५६	१२
ततस्तौ राम निघ्नन्तौ	७	१५	२८
ततस्तं समनुज्ञाप्य	२	५२	७३
ततस्तं स्थविरो राजा	५	३३	२३
ततस्त्यक्त्वा रथं शक्रः	७	२९	२५
ततस्त्रयोदशे वर्षे	५	३३	१८
ततस्त्रिनद्या सार्धम्	६	४८	३६
ततस्त्रिभिरहोरात्रैः	७	१०८	२
ततस्त्रियुग्मस्त्रिककुत्	७	३६	७
ततस्त्रिविनसं चापम्	३	४४	२
ततस्त्रिशङ्कोर्वचनम्	१	५८	१
ततस्त्रिशिरसा बाणैः	३	२७	११
ततस्त्वचोदयत्सूतः	७	२२	७
ततस्त्वदर्शयन्सर्वान्	६	६०	६२
ततस्त्वभीरवः प्राज्ञाः	७	१९	४
ततस्त्वमसि दुर्धर्षात्	७	१०४	९
ततस्त्वं प्राप्यसे पुत्र	२	२१	२८
ततस्त्वयोध्या रहिता०	२	४१	२०
ततस्त्वहं चोत्तमबाण चाप०	२	८०	२४
ततस्त्वां देवि सुभगे	२	५२	८५
ततस्त्वां निहतं दृष्ट्वा	४	६६	२५
ततस्त्वां प्रस्थितं दृष्ट्वा	३	९	१२
ततस्त्वाश्रममासाद्य	२	५४	१०
ततस्त्वां शरणार्थं च	३	६	१९
ततस्त्विन्द्रजिता लङ्का	९	७३	१६
ततस्त्विरावली नाम	३	१४	२४
ततस्त्वृषिगणाः क्षिषम्	२	११२	४
ततस्त्वेकजटा नाम	५	२३	५
तताप नहि तं सूर्यः	७	१	८२
ततो गच्छति गोकर्णम्	५	३५	८०
ततो गतायां निद्रायाम्	५	४२	३
ततो गत्वा दशग्रीवः	७	२५	१६
ततो गत्वा वयं युद्धम्	६	६४	२३
ततो गत्वाश्रमपदम्	१	५५	२१

	का०	स०	श्लो०
ततो गदाभिर्मुसलैः	७	१४	११
ततो गदां समाविध्य	७	१५	११
ततो गम्भीरनिर्ह्रादम्	३	२८	२०
ततोऽगर्जद्धरिवरः	१	१	६८
ततो गवाक्षः शरभः	६	६१	३७
ततो गवाक्षी गवयः सुषेणः	६	५६	४२
ततो गिरितटे जाताम्	४	१२	४६
ततो गिरौ पपातैषः	७	३५	४७
ततो गुरुतरं यत्नम्	६	६०	४५
ततो गुहः संत्वरितः	२	८६	८
ततो गृधस्य वचनात्	१	१	७२
ततो गृहीते प्रेष्याभ्याम्	२	३३	२
ततो गृहीत्वा वासस्तु	४	६	१६
ततो गृहीत्वा वैदेहीम्	७	४५	११
ततो गोदावरीं गत्वा	३	६८	३५
ततो गोदावरीं रम्याम्	४	४१	६
ततोऽग्निवचनात्सीताम्	१	१	८३
ततोऽग्निं विधिवद्दत्त्वा	४	२५	५०
ततोऽग्निं स समाधाय	३	५	३८
ततोऽग्निसाक्षिकं सख्याम्	७	२३	१४
तदोऽङ्गदं हनुमन्तम्	५	५७	४०
ततो जग्राह तेजस्वी	६	६७	२३
ततो जघन्यं सहितैः स्व०	२	१०४	२६
ततो जलधरोदग्रः	७	१६	३१
ततो जातपरित्रासा	५	३०	२१
ततो जाम्बवतीवाक्यम्	५	६१	१
ततो जित्वा दशग्रीवः	७	२३	१
ततो जृम्भस्य शयने	२	३५	२०
ततो ज्वलनसंकाशैः	६	७३	५६
ततोऽतिकायं काकुत्स्थः	६	७१	१०
ततोऽतिकायः कुपितः	६	७१	६६
ततोऽतिकायः संक्रुद्धः	६	७१	८६
ततोऽतिकायः बलवान्	६	७१	३७
ततोऽथ तं वालिनमग्रचपौरुषम्	४	२५	५४
ततोऽथ बुद्ध्वा स तदस्त्र०	५	४८	३६
ततो दग्ध्वा पुरीं लङ्काम्	१	१	७७
ततो ददर्श शत्रुघ्नम्	७	६८	५

	क:०	स०	श्लो०
ततो ददर्शोच्छ्रितमेघरूपम्	५	७	५
ततो दशग्रीवमुपस्थितास्ते	६	२६	२६
ततो दशरथः प्राप्य	१	१६	२३
ततो दशरथस्त्रीणाम्	२	५७	२०
ततो दशहेऽतिगते	२	७७	१
ततो दानवदर्पघ्नम्	६	५६	१११
ततो दाशरथी रामः	३	६४	३३
ततो दिव्यममोघं तम्	७	६६	१७
ततो दुःखतरं किं नु	७	५०	३
ततो दुःखतरं भूयः	७	५०	७
ततो दुःखाभिसंतप्तः	६	६१	२३
ततो दुहितरौ राम	३	१४	२७
ततो दूरात्प्रदध्मे	७	१५	१६
ततो दृष्टैव वैदेही	५	१६	२
ततो दृष्ट्वा सरुधिरम्	६	४६	४
ततो देववरः श्रीमान्	६	१०२	६
ततो देवसखानाम	४	४३	१७
ततो देवाः प्रयातास्ते	७	७६	२०
ततो देवाः सगन्धर्वाः	१	१५	४
ततो देवाः सगन्धर्वाः	१	३६	२३
ततो देवाः सगन्धर्वाः	१	४५	२८
ततो देवाः सगन्धर्वाः	३	२४	१६
ततो देवाः सगन्धर्वाः	५	१	१३७
ततो देवाः सगन्धर्वाः	५	५४	५०
ततो देवाः सगन्धर्वाः	६	२२	७१
ततो देवाः सगन्धर्वाः	६	६३	३५
ततो देवा सगन्धर्वाः	६	१०६	१६
ततो देवाः सगन्धर्वाः	६	१०	४८
ततो देवाः सगन्धर्वाः	७	१७	१०
ततो देवाः सगन्धर्वाः	७	२२	१७
ततो देवाः सगन्धर्वाः	७	१११	३
ततो देवासुराः सर्वे	१	४५	२७
ततो देवशस्यः सुप्रीतः	१	२४	२२
ततो दैवतसैन्यानाम्	७	२७	२५
ततो दोषेण मा गच्छेत्	४	१४	१३
ततोऽद्रिकूटाचलमेघसंनिभम्	२	१५	४८
ततो द्रुतं रावणवाक्य०	६	१०४	३७

	का०	स०	श्लो०
ततो द्रुमश्लिहस्ताः	६	७६	५६
ततो द्वादशमे वर्षे	७	७१	१
ततो द्विजा वसिष्ठेन	७	७४	३
ततो द्विजास्ते धर्मज्ञम्	१	१२	२१
ततो द्विविदमैन्दाभ्याम्	६	१२८	८७
ततो द्यां पृथिवीं चैव	६	४६	१
ततो धनुषि संधाय	४	१६	३३
ततो धर्मे विनष्टे तु	७	१०६	१०
ततो धान्यधनोपेतान्	६	५०	८
ततो धारशताकीर्णम्	७	२३	२५
ततो धैर्यमवष्टभ्य	६	८५	२
ततो ध्वजमुपागम्य	३	२३	४
ततो न कृतवाम्बुद्धिम्	४	१२	२०
ततो नगर्याः सहसा महौजाः	६	५६	१०
ततो नरेन्द्रसंकाशैः	४	३६	१०
ततो नष्टप्रभः सूर्यः	६	६५	४३
ततोऽनसूया संहृष्टा	२	११८	१३
ततो नानाप्रहरणाः	६	५५	६
ततो नानाप्रहरणान्	७	२८	१३
ततो नान्दीऽमुखीं रात्रीम्	२	८१	१
ततो नारायणेनोक्ताः	७	६	३२
ततो नारायणे विष्णुः	१	१६	१
ततो नालीकनाराचैः	३	२५	२५
ततो नालीकनाराचैः	३	२८	१०
ततो नालीकनाराचैः	३	५१	४
ततो निकुम्भिला नाम	७	२५	२
ततो निकम्भो रभसः	६	६	१
ततो निक्षिप्तभारोऽहम्	२	११५	१६
ततो निक्षिप्य काकुत्स्थः	७	१०३	१५
ततो निक्षिप्यमा तृस्ताः	२	११५	१
ततो नित्यानुगस्तेषाम्	२	१०३	२२
ततो निपतितां तासाम्	४	२१	१
ततो निरीक्ष्यात्मगनानि०	६	१०६	३६
ततो निर्धूय सहसा	२	३५	१
ततो निविष्टां ध्वजिनीम्	२	८४	१
ततो निविष्टां ध्वजिनीम्	६	२०	१
ततो निश्चित्य मथनम्	१	४५	१८

	का०	स०	श्लो०
ततो निषादाधिपतिम्	२	५०	३५
ततो निष्पततो युद्धे	६	६५	४६
ततो निहतनाथानाम्	५	२६	२०
ततो निहत्य तरसा	५	३५	५०
ततो नीत्वा तु तं देशम्	४	५८	३४
ततो नीलाम्बुप्रख्यः	६	८	१
ततोऽनुद्भ्रान्त चक्षुषाम्	७	३२	१०
ततो नेष्टमिदं सौम्य	६	१६	१०
ततोऽन्तःपुरमाविद्धम्	२	५७	२७
ततोऽन्तराणि सत्त्वादि	७	६२	५
ततोऽन्तरिक्षं विपुलाम्	५	५८	३५
ततोन्यग्रोधमासाद्य	२	५५	६
ततोऽन्यच्छिखरं गृह्य	६	५४	२४
ततोऽन्यत्पुप्लुवे वेश्म	५	५४	६
ततोऽन्यत्र धनुरादाय	३	५२	११
ततोऽन्यं देशमास्थाय	७	२६	१५
ततोऽन्यं पातयत्क्रोधात्	६	६६	३१
ततोऽन्यं वृक्षमुप्लाटच	६	५६	२६
ततोऽन्योन्यं सुसंरब्धौ	६	१०३	६
ततोऽपरेण भल्लेन	६	८६	४०
ततोऽपरेद्युस्तं देशम्	१	१०	२४
ततोऽपश्यत्कुथासीनाम्	५	६	३३
ततोऽपि शिशुनागानाम्	३	७३	३५
ततो बलानां संक्षोभः	७	१४	७
ततो बहुगुणं तेषाम्	२	१०३	१६
ततो बाणमयं वर्षम्	६	७०	२८
ततो बाणमयं वर्षम्	७	६६	११
ततो बाणशतां न्यष्टौ	७	१६	२०
ततो बाष्पपरिक्लिन्नम्	६	११६	४
ततोऽब्रवीत्तदा नाम	७	१६	६
ततोऽब्रवीत्समीपस्थम्	३	२	७७
ततोऽब्रवीन्मुसंक्रुद्धः	७	८	६
ततोऽब्रवीद्दशग्रीवः	७	२५	१४
ततोऽब्रवीद्दाशरथिः सुमन्त्रम्	२	५२	१३
ततोब्रवीद्धरिवरः	६	११३	१५
ततोऽब्रवीद्बलिसुतः	६	२०	२६
ततोऽब्रवीद्द्विजान्वृद्धान्	१	१३	६

	का०	स०	श्लो०
ततोब्रवीन्महातेजाः	१	८	४
ततोऽब्रवीन्महातेजाः	२	३०	९
ततोऽब्रवीन्महातेजाः	४	५८	११
ततोऽब्रवीन्महातेजाः	६	५९	८४
ततोऽब्रवीन्महातेजाः	६	७४	२६
ततोऽब्रवीन्महातेजाः	६	७५	१
ततोऽब्रवीन्महातेजाः	७	३०	९
ततोऽब्रवीन्महाबाहुः	२	५६	१८
ततोऽब्रवीन्मुनिश्रेष्ठः	३	१३	१२
ततोऽब्रुवन्सुराः सर्वे	१	३७	२
ततो भरतसामन्तम्	२	८१	१५
ततो भागार्थिना देवान्	१	५०	१६
ततो भित्त्वा महीं सर्वाम्	१	४०	७
ततो भिन्नप्रहरणौ	६	९७	२५
ततोऽभिवाद्य त्वरिताः	७	४४	१७
ततो भुक्तवतां तेषाम्	२	९१	६३
ततो भुक्तवतां तेषाम्	३	२	५८
ततो भुक्त्वा यथाकामम्	७	७७	१६
ततो भूतोपसृष्ट्वेव	२	६०	१
ततो भूमिमसंस्पृष्ट्वा	४	६७	१६
ततो भेरीमृदङ्गानाम्	६	४४	१२
ततो भेरीः समाजघ्नुः	६	५०	६२
ततो भेरी सहस्रं तु	६	६०	४८
ततोऽभ्यनन्दन्संहृष्टाः	६	९०	८९
ततोभ्यवकिरन्त्वन्ये	२	१२७	८
ततोऽभ्यवर्षन्त घनाः	२	९१	२५
ततो भ्रातरमासीनम्	७	१३	२
ततो भ्रातुर्वचा श्रुत्वा	३	२	५९
ततो मतिं राक्षसराजसूनुः	४	८	३५
ततो मधुरया वाचा	३	१४	३
ततो मध्यात्समुद्रस्य	६	२२	१७
ततो मध्ये जनौघस्य	७	९६	१४
ततो मनोरथं सत्यम्	७	१७	१५
ततो मन्त्रिपुरोगांश्च	७	७१	२
ततो मन्दाकिनीतीरम्	२	१०३	२८
ततो मन्युर्वसिष्ठस्य	७	५५	१६
ततो मम पितृव्येण	४	५७	२१

	का०	स०	श्लो०
ततो मया रूपगुणैः	७	३०	२२
ततो मया वाग्भिरदीन-	५	६८	२९
ततो मरुत्तं नृपतिम्	७	१८	२
ततो मरुतः स नृपः	७	१८	२
ततो मर्मसु मर्मज्ञः	६	४५	१५
ततो महत्साश्वमहारथद्विपम्	५	४१	१२
ततो महात्मा निपपात तस्मिन्	६	७४	६८
ततो महात्मा विपुलं सुयुग्यम्	६	२	२७
ततो महात्मा सधनुर्धनुष्मान्	६	५९	४५
ततो महान्बालदिवाकरप्रभम्	५	४७	३
ततो महामेघमहीधराभम्	२	१५	४६
ततो महाशक्तिशतैः	७	२२	१४
ततो महीतलं राम	७	१६	४६
ततो महेन्द्रप्रतिमः सलक्ष्मणः	६	८९	५३
ततो महीधरः क्रुद्धः	७	२३	३६
ततो मातलिपुत्रस्य	७	२३	१०
ततो मां बुद्धिसंपन्नः	४	४६	२९
ततो मां संपरिक्षिप्य	५	३०	२३
ततो मां समायुक्त	५	३८	१५
ततो मायां प्रविष्टोऽसौ	७	१५	३०
ततो मायां समास्थाय	१	२६	१६
ततो मारुतवत्क्रुद्धः	५	४१	१४
ततो मारुतिवाक्येन	६	५९	६६
ततो मार्गानुसारेण	२	१७	१३
ततो माल्यवता सार्धम्	६	३०	१०७
ततो माल्यानि वासांसि	६	६४	२९
ततो माहिष्मतीं नाम	७	३१	७
ततो मुनिवरस्तूर्णम्	१	४५	१०
ततो मुहूर्तादुत्थाय	६	१२५	४१
ततो मुहूर्तादुद्गडम्	६	५०	३६
ततो मुहूर्तान्निष्पेतुः	६	९५	२४
ततो मुहूर्तं संग्रामः	३	५१	११
ततो मूर्ध्ना निपतितम्	५	६३	१
ततो मृत्युः क्रुद्धतरः	७	२२	२३
ततो मेघा रथे तस्मिन्	७	२८	२५
ततो मे जननी दीना	७	१७	१४
ततो मे बुद्धिरुत्पन्ना	५	५८	११८

	का०	स०	श्लो०
ततो मे बुद्धिरुत्पन्ना	५	८	११८
ततो मैन्दस्तु संप्रेक्ष्य	६	१७	४७
ततोऽम्बरे महाञ्शब्दः	७	८	१७
ततोऽम्बुधरसंकाशाम्	५	१४	२७
ततो यज्ञे समाप्ते तु	१	१८	८
ततो यज्ञे समाप्ते तु	७	५७	१२
ततो यज्ञे समाप्ते तु	७	८६	१०
ततो यथावद्रामेण	२	५	१२
ततो यानगतां सीताम्	६	११४	१८
ततो यानान्युपारूढाः	६	१२७	१५
ततो युद्धपरिश्रान्तम्	६	१०५	१
ततो युद्धं प्रवृतं तु	७	२८	३३
ततो युद्धाय तेजस्वी	६	६५	४१
ततो युद्धं समभवत्	७	१४	८
ततो युद्धं समभवत्	७	२३	३०
ततो युद्धं समभवत्	७	२७	२६
ततो युद्धं समभवत्	७	२७	३७
ततो यूपशताकीर्णम्	७	२५	३
ततो योधाङ्गनाः सर्वाः	२	८२	२५
ततो रक्तजलं प्राप्य	४	४०	३३
ततो रक्तजलं भीमम्	४	४०	३९
ततो वै मृशमुद्विग्ना	५	३	४३
ततो वै यजमानस्य	१	१९	११
ततो वैवस्वतं दृष्ट्वा	२	६४	३८
ततो वैश्रवणी राजा	६	११७	२
ततोऽस्मनगरं नाम	७	२३	१७
ततोऽस्वमेघः सुमहान्	७	८६	९
ततोऽस्तं गत आदित्ये	६	७५	४
ततोऽस्तमगमत्सूर्यः	६	३८	१३
ततोऽस्तुवन्मुनिगणाः	१	५६	२०
ततोऽस्मिन्बहुलीभूते	६	६४	३०
ततोऽस्यघनमाजहृः	२	३२	२७
ततोऽस्य मुसलं घोरम्	७	३२	४३
ततोऽस्य सशरं चापम्	३	२८	१५
ततोऽस्य सशरं चापम्	३	५१	१०
ततोऽस्य हारं चन्द्राभम्	७	४०	२५

	का०	स०	श्लो०
ततोऽहं तत्र रामाय	२	११८	५०
ततोऽहं तत्र निक्षिप्तः	४	४६	५
ततोऽहं तैः समागम्य	४	९	२१
ततोऽहं परमोद्विग्नः	५	५८	६४
ततोऽहं मानयानि त्वाम्	५	१	१२०
ततोऽहं मेघसंकाशः	३	३८	१६
ततोऽहं रुपसादृश्याम्	४	१२	३२
ततोऽहं वालिना तेन	४	४६	१२
ततोऽहं विपुलं रूपम्	५	५८	४३
ततोऽहं शरमुदधृत्य	२	६३	२३
ततोऽहं सुमहद्रूपम्	५	५८	१५६
ततोऽहं हिमवत्पार्श्वे	१	३४	१०
ततोऽहमन्यद्विस्तीर्णम्	७	१३	२५
ततोऽहमहमित्येवम्	६	६९	१०
ततोहतान्राक्षसपुंगवांस्तान्	६	७३	१
ततो हतांस्तान्सहसा निशम्य	७	७३	२
ततो हते महावीर्ये	७	८६	२
ततो हतोऽसिवेगेन	७	३२	४७
ततो हत्वा बलाध्यक्षान्	७	२३	३६
ततो हनूमान्गिरिसंनिकाशः	४	५०	४०
ततो रक्षो महानादान्	७	२३	४७
ततो रजन्यां व्युष्टायाम्	७	४६	१
ततो रथस्थमालोक्य	६	९०	१३
ततो रथं समास्थाय	७	२९	२०
ततो रसातलं रक्षः	७	२३	४
ततो राक्षसमादाय	६	३१	६
ततो राक्षसराजेन	७	१९	२२
ततो राक्षसशार्दूलः	६	९९	११
ततो राक्षससैन्यं च	६	१०७	२
ततो राजानमासाद्य	१	४१	२३
ततो राजानमासाद्य	१	६९	८
ततो राजा विनिश्चित्य	१	९	१५
ततो राजा समादिष्टाः	६	२०	३१
ततो रात्र्यां व्यतीतायाम्	१	६९	१
ततो रामः परां प्रीतिम्	७	१०२	१०
ततो रामः परिष्वज्य	४	१२	१२

	का०	स०	श्लो०
ततो रामः सह भ्रात्रा	४	१३	२७
ततो रामः सुवेलाग्राम्	६	४०	१
ततो राममभिक्रम्य	६	६१	४
ततो राम महादेवः	७	६६	२७
ततो राम शरान्दृष्ट्वा	६	७५	४०
ततो रामस्य सत्कृत्यः	३	१	१६
ततो रामानुजः क्रुद्धः	७	१०७	७
ततो रामाभ्यनुज्ञातम्	६	१२७	३८
ततो रामाभ्यनुज्ञातम्	६	१२७	६१
ततो रामो धनुष्पाणिः	४	१२	१६
ततो रामो धनुष्पाणिः	६	१२६	२८
ततो रामोऽपि संक्रुद्धः	६	१०७	१०
ततो रामो महातेजाः	४	१६	३२
ततो रामो महातेजाः	६	२४	२२
ततो रामो महातेजाः	६	५६	१३४
ततो रामो महातेजाः	६	६१	१
ततो रामो महातेजाः	६	६३	१७
ततो रामो महातेजाः	७	३१	१
ततो रामं यथान्यायम्	३	३४	५
ततो रामं स्थितं दृष्ट्वा	४	८	११
ततो रावणदाराश्च	५	५८	६५
ततो रावणनीतायाः	५	१	१
ततो रावणवेगेन	६	१००	३६
ततो रुचिरताम्राक्षः	२	५०	४
ततो रुदन्त्यो विवशाः	२	७६	२२
ततो रुद्राः सहादित्याः	७	२७	२२
ततो रुधिरसिक्ताङ्गम्	७	२३	२
ततो रुधिरसिक्तानि	६	८८	७५
ततो रोषपरीताङ्गः	४	१५	३
ततो रोषपरीताङ्गौ	६	६७	२६
ततो रोषपरीतात्मा	६	५८	४४
ततोऽर्कवैश्वानरकाञ्चनप्रभम्	७	३५	६५
ततोऽर्जुनेन क्रुद्धेन	७	३२	६०
ततोऽर्धगुणविस्तारः	५	५८	३०
ततोऽर्धंऽदिवसे प्राप्ते	७	५२	२
ततोऽर्धदिवसे प्राप्ते	७	६८	४

	का०	स०	श्लो०
ततोऽर्धदिवसे प्राप्ते	७	८२	१८
ततोऽर्धरात्रसमये	७	६६	२
ततो लक्ष्मणमायान्तम्	३	५७	१४
ततो लक्ष्मणमासाद्य	६	१२७	४१
ततोऽलोकत्रयं लब्धम्	७	२२	६
ततोऽवघोषय पुरे	६	६४	२७
ततो वनं तत्परिभक्ष्यमाणम्	५	६१	२०
ततो वयमितस्तूर्णम्	६	८	१६
ततो वरार्हाः सुविशुद्धभावाः	५	५	१७
ततोऽवर्धत मे कायः	५	५८	११०
ततो वसिष्ठप्रमुखाः	१	१३	४०
ततो वसिष्ठस्तेजस्वी	७	१०६	३
ततो वसिष्ठो भगवान्	१	५२	१२
ततो वस्त्रगतं भुक्त्वा	५	३८	६६
ततोवाच प्रहस्यैतान्	६	६५	६
ततो वाजिरथान्युक्त्वा	२	६२	३३
ततो वानरपत्नीनाम्	६	१२८	१८
ततो वानरराजेन	६	४	८
ततो वानरराजेन	६	४	२३
ततो वानरसैन्येन	६	४२	३८
ततो वायुः शुभः पुण्यः	७	६७	११
ततो वायुः सुखस्पर्शः	१	२२	४
ततो वालिनमुद्यम्य	४	२५	२८
ततो विक्रममासाद्य	७	१३	४७
ततो विचित्रकेयूर	६	५३	६
ततो विचुक्रुशुस्तत्र	४	२२	२५
ततो वितिमिराः सर्वाः	१	७६	२३
ततो वित्रासयन्मर्त्यान्	७	२०	१
ततो विदुद्रुवुः सर्वे	७	२२	३६
ततो विद्याधरा भूताः	६	७१	६५
ततो विद्राव्यमाणेषु	७	२७	४३
ततो विनिक्षिप्य बलम्	६	१२	४
ततो विनेदुः सहसा प्रहृष्टाः	६	६७	२१
ततो विनेदुः संहृष्टाः	६	१०८	२६
ततो विभीषणो नाम	५	५८	१४७
ततो विमुञ्चतुर्वक्त्रः	७	५	१२

	का०	स०	श्लो०
ततो विमनसः सर्वे	१	६६	११
ततो विमानाग्रगतम्	६	१२७	३७
ततो विमुक्त्वा सशरं शरा०	६	१११	१२४
ततो विव्याध गात्रेषु	६	१००	१२
ततो विशिष्टं पश्यामि	२	११७	२५
ततो विषण्णौ श्रान्तौ च	२	७७	२०
ततो विषण्णं समवेक्ष्य सर्वम्	६	७४	२
ततो विष्णुमयं देवम्	७	११०	१३
ततो विष्णुं महाबाहुम्	७	७	३१
ततो विष्णुश्चतुर्भागम्	७	१०६	१८
ततो विसृज्य तान्सर्वान्	७	६६	६
ततो विसृज्य रुचिरम्	७	८२	१६
ततो विसृष्टा रामेण	६	२२	५०
ततो विस्फारयामास	६	७५	३५
ततो विस्फारयामास	६	८६	३
ततो विस्मयमापन्नाः	६	४	१२१
ततो वृक्षैश्च शैलैश्च	७	२१	२६
ततो वृद्धमुपागम्य	६	७४	२४
ततो वृषभमास्थाय	७	४	२७
ततो वेत्सि बलेनाद्य	४	१४	१४
ततो वेदवती क्रुद्धा	७	१७	२७
ततो वेदश्रुति नाम	२	४६	६
ततो वैखानसं मार्गम्	२	५२	७१
ततो वैतसशाखाश्च	२	५३	१५
ततो हयं मारुतुल्यवेगम्	६	६६	६६
ततो हयरथाकीर्णम्	६	७३	२७
ततो हरिगणान्भग्नान्	६	५४	१६
ततो हरिर्गन्धवहात्मजस्तु	६	७४	७३
ततो हरिणां तद्वनीकमुग्रम्	६	६१	३६
ततो हरिणां तद्वनीकमुग्रम्	६	६७	१७
ततो हर्षसमुद्भूतः	६	१२७	३३
ततो हलहलाशब्दः	२	४०	२७
ततो हलहलाशब्दः	२	८१	१४
ततो हलहलाशब्दः	७	३१	३३
ततो हलहलाशब्दः	७	६६	१२
ततो हलहलाशब्दम्	५	५८	६३

	का०	स०	श्लो०
ततो हि दुर्मना रामः	६	११७	१
ततो हि देवा ऋषिपन्नगाश्च	७	६६	३६
ततो हि नः प्रियतरम्	२	१७	११
ततो हि मे भयं देव	१	६४	४
ततो हि हरिशार्दूल	५	३६	२२
ततो हृष्टो भरद्वाजः	२	१३१	७
ततो हेतप्रतिष्ठाने	४	२६	३१
ततो हैमवती ज्येष्ठा	१	४३	३
ततो ह्यभ्युच्छ्रयन्पौरः	६	१२८	५२
ततो मरुतो नृपतिः	७	१८	८
ततौ विभिन्नसर्वाङ्गौ	६	४५	१७
तत्कर्म रामस्य महारथस्य	३	२८	३३
तत्कर्म वालिपुत्रस्य	६	४४	२६
तत्काननं विगाह्याशु	७	८८	६
तत्कार्मुकैराभरणैः रथैश्च	३	२४	३६
तत्कार्यमनुगम्यान्तः	३	३५	२
तात्किं तव यथा वीर	७	२३	५१
तत्किमेवं परिक्लिश्य	७	२०	१५
तत्कुम्भकर्णस्य भुजप्रणुन्नम्	६	६७	६२
तत्कृते च वयं सर्वे	७	६	६
तत्कृत्वा दुष्करं कर्म	६	१२६	१४
तत्क्षणे तु महाघोरम्	३	२६	३४
तत्तथा क्रियतां राजन्	१	३६	११
तत्तथा ह्यस्य कार्यस्य	५	६५	३२
तत्तथेत्यब्रवीद्रामः	४	८	१०
तत्तस्य भाषितं श्रुत्वा	७	६५	६
तत्तस्य रक्तं रक्तेन	५	४४	६
तत्तस्य वाक्यं निपुणं निशम्य	४	३	३६
तत्तस्य वाक्यं ब्रुवतो निशम्य	६	६०	८१
तत्तस्य वाक्यं ब्रुवतो निशम्य	६	७१	४६
तत्तिष्ठद्वसुधां रक्षः	६	७६	३१
तत्तु पक्वं समाज्ञाय	२	५६	२७
तत्तु भाग्यविपर्यासात्	६	१११	७०
तत्तु माल्यवतो वाक्यम्	६	३६	१
तत्तु मिथ्या प्रलप्तं माम्	६	४६	२२
तत्तु शीघ्रमतिक्रम्य	४	४३	२०

	का०	स०	श्लो०
तत्तु श्रुत्वा तथा वाक्यम्	४	५६	१८
तत्तु श्रुत्वा दशग्रीवः	६	६३	२२
तत्तृतीयं हनुमतः	५	१	१६१
तत्ते मनीषितं वाक्यम्	७	१०३	१६
तत्र कश्चिन्मया दृष्टः	४	५६	१४
तत्र कृष्णाजिनधरम्	३	३५	३८
तत्र क्लृप्तमिदं राज्ञा	६	६४	१०
तत्र गत्वाऽऽश्रमपदम्	३	१३	१४
तत्र गात्रं हतं तस्य	१	२३	१३
तत्र चन्द्रप्रतीकाशम्	४	४०	५१
तत्र चानीयमाने तु	१	१०	२६
तत्र चान्तरोद्देशाः	४	४१	३६
तत्र चापि मया देव	२	११	१६
तत्र चार्धप्रदीप्तानाम्	६	७५	५३
तत्र जग्मतुरव्यग्रौ	३	७५	१५
तत्र जातबहुद्रव्यम्	२	१०	३८
तत्र तत्र च दृश्यन्ते	३	११	५०
तत्र तत्र च संनद्धाः	६	३३	२३
तत्र तत्र सहास्माभिः	४	४६	३
तत्र तां च शुभाचाराम्	७	५२	६
तत्र तां प्रवणामेव	२	४	३०
तत्र तां रजनीमुष्य	७	५२	१
तत्र तापसमासीनम्	३	७	५
तत्र ते गुणवन्तश्च	२	६१	१३
तत्र ते जननी क्रुद्धा	२	३५	२१
तत्र ते वत्स हे सीते	३	४८	१३
तत्र त्रयोदशे वर्षे	३	४७	५
तत्र त्रिपथगां दिव्याम्	२	५०	१२
तत्र त्वं मम नैवासि	२	६१	२५
तत्र त्वं वस भद्रं ते	७	३	२७
तत्र रम्ये वने वासम्	२	७१	१२
तत्र राजा गुहो नाम	२	५०	३३
तत्र राजासनं दिव्यम्	२	६१	३८
तत्र रामं भयं तीव्रम्	३	४४	२६
तत्र रावणमासाद्य	६	४६	४५
तत्र रावणमासाद्य	७	३०	२

	का०	स०	श्लो०
तत्र लङ्कां समासाद्य	१	१	७३
तत्र लोध्रवनं रम्यम्	४	४६	१७
तत्र वानरराक्षसाः	६	६६	५४
तत्र वानरसैन्यानाम्	६	४१	४६
तत्र वा सन्निहस्थो वा	४	१५	२६
तत्र वासः सुखोऽस्माकम्	४	४६	२३
तत्र विघ्नं तु तस्येह	७	२६	३७
तत्र वृद्धो महामात्रः	२	३६	१८
तत्र वैखानसा नाम	४	४७	६०
तत्र वैदूर्यवर्णाभः	४	४२	२५
तत्र वैश्रवणो राजा	४	४३	२३
तत्र शुश्राव वै शब्दम्	१	२४	५
तत्र दिव्योपमं मुख्यम्	५	१०	१
तत्र देवान्पितॄन्विप्रान्	७	३७	१४
तत्र देवो मया दृष्टः	७	१३	२२
तत्र दृष्ट्वैव तां हृष्टः	४	१	२
तत्र द्रक्ष्यथ कावेरीम्	४	४१	१५
तत्र धैर्याच्च शूरस्तु	३	६६	३७
तत्र नामुदितः कश्चित्	४	४३	५२
तत्र निद्रां समाविष्टः	७	१३	७
तत्र पञ्चजनं हत्त्वा	४	४२	२८
तत्र पत्नीवियोगं त्वम्	७	७१	१५
तत्र पाण्डुरमेघाभम्	४	४३	२१
तत्र पुण्येऽभिषिञ्चस्व	४	२२	
तत्र पुस्फोट वर्मास्य	६	७७	१६
तत्र पूर्वं पदं कृत्वा	४	४०	५८
तत्र प्रस्थेषु रम्येषु	४	४२	१६
तत्र प्राग्ज्योतिषं नाम	४	४२	३१
तत्र भार्गवकन्यां सः	७	४०	४
तत्र मन्दाकिनी रम्या	७	११	४१
तत्र मां रामराज्यस्थः	३	६६	४१
तत्र मे बुद्धिरुत्पन्ना	७	४५	६
तत्र मे याचितो राजा	२	१८	३३
तत्र म्लेच्छान्पुलिन्दांश्च	४	४३	११
तत्र यज्ञो महानासीत्	७	५५	१६
तत्र यत्नश्च कर्तव्यः	४	४२	२४

	का०	स०	श्लो०
तत्र यद्यन्तरा मृत्युः	५	३६	३६
तत्र यान्यवहीनानि	५	१५	४४
तत्र योजनविस्तारम्	४	४०	५७
तत्र शृण्वन्सुखा वाचः	२	६	६
तत्र शैलनिभा भीमाः	४	४०	४१
तत्र श्रियमिवाचिन्त्याम्	२	५५	१६
तत्र संघातमृत्तिकाम्	३	१५	२१
तत्र सत्त्वसहस्राणाम्	४	५९	१३
तत्र सानुषु रम्येषु	४	४२	२०
तत्र सानुषु रम्येषु	४	४२	३२
तत्र सीता मया सार्धम्	३	४७	३०
तत्र सीते मया सार्धम्	३	५५	३१
तत्र स्वाप्य बलं सर्वम्	७	६४	१२
तत्र हेतिः प्रहेलिश्च	७	४	१४
तत्र हेमगिरिप्रख्यम्	७	३४	१२
तत्राकरोन्महायुद्धम्	२	९	१५
तत्रागस्त्याश्रमपदम्	३	११	४१
तत्रानेनास्मि संरुद्धः	४	१०	२५
तत्रापश्यत्स वै कन्याम्	७	१७	२
तत्रापि खलु मां दोषम्	६	१८	४७
तत्रापि निवसन्तौ तौ	२	१	३
तत्रापि न्यवसद्रामः	३	२	२९
तत्रापि संघ्यामन्वास्य	७	३४	३२
तत्राम्बरादग्निरतिप्रवृद्धः	५	५४	३४
तत्रायुधसहस्राणि	६	५४	५
तत्रार्धं तस्य यः कर्ता	७	३०	३४
तत्राश्रमपदं पुण्यम्	१	२३	६
तत्रासीत्पिङ्गलो गार्ग्यः	२	३२	२९
तत्रासीत्सुमहद्युद्धम्	६	४३	१६
तत्रासुरा महाकायाः	४	४०	३७
तत्रास्यतां जनस्थाने	३	५४	२१
तत्राहं दुर्बलावन्धौ	२	६४	४
तत्राहं सर्वसत्रं तु	५	५८	५२
तत्त्रिकालहितं वाक्यम्	५	५१	२१
तत्रेषुपलयन्त्राणि	६	३	१२

	का०	स०	श्लो०
तत्रैकां रजनीं व्युष्य	३	११	४०
तत्रैनां तर्जनैर्घोरैः	३	५६	३१
तत्रैव क्रोशतस्तस्य	२	७५	५
तत्रैष रमते श्रीमान्	६	२७	२३
तत्रोकमुपस्पृश्य	७	८२	२
तत्रोपधार्य मायानाम्	७	२३	१६
तत्रोपविष्टं राजानम्	७	४३	१
तत्रैव तं नरव्याघ्रम्	२	७९	११
तत्रैव तावत्त्वरितः	६	५६	३
तत्रैवाप्सरसः पञ्च	३	११	१८
तत्समाकुलसंभ्रान्तम्	२	४०	१९
तत्सर्वं तत्त्वतो दृष्ट्वा	१	३	७
तत्सर्वं पृष्ठतः कृत्वा	७	२६	५०
तत्सर्वं प्रत्यनुज्ञासीत्	२	८७	१६
तत्सर्वमखिलेनाशु	७	९२	१
तत्सर्वमखिलेनोक्तम्	१	५९	९
तत्सारमखिलं नृणाम्	३	४३	३३
तत्सितामलचन्द्राभम्	२	३०	२५
तत्सुभीमं महद्युद्धम्	६	५२	२३
तत्सैन्यं विविधैर्बाणैः	३	२५	२६
तत्सैन्यं हरिवीराणाम्	६	७१	४३
तस्थितं पर्वताग्रेषु	६	२५	११
तत्स्वभावो ममाप्येषः	६	२२	२४
तत्परित्रस्तसंभ्रान्तः	२	६५	२७
तत्पुत्र शीघ्रं विपिनाविधिज्ञैः	२	७२	५४
तत्पुरा राम शारीरीम्	२	११६	१९
तत्पुष्पकं कामगमं विमानम्	६	१२१	३०
तत्पूर्वमैक्ष्वाक सुतो महात्मा	२	३३	३०
तत्पृथिव्यां गृहवरम्	२	१७	१९
तत्प्रतिश्रुत्य धर्मेण	२	११	२१
तत्प्रयातं बलं तीव्रम्	३	२३	१
तत्प्रविश्य हरिश्रेष्ठ	५	३	५०
तत्प्रवृत्तं महद्युद्धम्	६	१०७	६४
तत्प्रसुप्तं विरुरुचे	५	९	३५
तत्प्रहस्तप्रणीतेन	६	३१	२१

	का०	स०	श्लो०
तत्फलं प्राप्स्यते चापि	७	५१	१६
तत्त्वतः कथयस्वाद्य	५	५०	११
तत्त्वतो हि नरश्रेष्ठ	३	६६	१५
तत्त्वदीयं सुरश्रेष्ठ	१	४५	२४
तत्त्वं बुद्धिमतां श्रेष्ठः	६	२	१६
तत्त्वं ब्रूहि मनोज्ञाङ्गि	३	३४	४
तत्त्वया चरता लोकान्	६	३५	१५
तत्त्वया पुत्रगर्धिन्या	३	३७	३२
तत्त्वेतत्समतिक्रम्य	२	३८	११
तत्संदिश महाबाहो	६	८४	२०
तत्संनिक्षिप्य भवने	७	६३	२६
तत्सखित्वं मया सोम्य	७	१३	२६
तथा काशिपतिं स्निग्धम्	१	१३	२३
तथा कुरुत राक्षस्य	५	२२	३७
तथा कुरुष्व भद्रं ते	१	१८	१६
तथा केकयराजानम्	१	१३	२४
तथा केतकखण्डांश्च	४	४२	८
तथा कोसलराजानम्	१	१३	२६
तथागतां तां व्यथितामनि०	५	२६	१
तथा चक्रुश्च तत्सर्वम्	१	११	२६
तथा चन्दनकाष्ठानि	६	१११	१०५
तथा चेन्द्रजितो वेश्म	५	६	२१
तथा चेन्द्रजितो वेश्म		५४	११
तथा चेमे बिलद्वारे	४	५०	१७
तथा जातीयमादाय	२	१५	१३
तथा ज्येष्ठा हि मे माता	२	७३	१०
तथा तत्रासतस्तस्य	२	६६	३
तथा तयोः प्रब्रुवतोः	७	६४	२१
तथा तयोः संवदतोः	७	१०५	१
तथा तां क्रियमाणां च	७	६६	११
तथा तांस्तु समाज्ञाप्य	७	६४	१५
तथातिविद्धा महिषीभि०	२	६	६२
तथा तु करुणं तस्य	७	७४	१

	का०	स०	श्लो०
तथा तु तारा करुणं रुदन्ती	४	२०	२६
तथा तु तौ संयति संप्रयुक्तौ	६	६६	३५
तथा तु तं समुद्दिश्य	३	४४	१
तथा तु तं दीनः कथयन्नरा०	२	६४	७८
तथा तु वद्ध्वा भ्रुकुटीम्	२	२३	२
तथा तु भूषितां सीताम्	२	११६	१३
तथा तु विलपन्ती ताम्	२	२१	१
तथा सीतां विनिहत्य दुर्मतिः	६	८१	३४
तथा ते राक्षसाः सर्वे	७	७	२२
तथा तैः कृत्तमात्रैस्तु	६	६६	१
तथात्र प्रतिपत्स्यामि	६	३०	१८
तथा त्वमपि राजानम्	२	३५	२७
तथा त्वमपि सुग्रीवः	५	६४	६
तथा त्वं संपरिष्वज्य	४	३२	१५
तथादिवाश्च दैत्याश्च	२	२५	१६
तथा निगमवृद्धाश्च	७	३७	२१
तथानुपूर्व्या युक्तश्च	२	१०१	१०
तथान्ये तापसाः सिद्धाः	३	१	२३
तथा परिवृतो राजा	७	३७	२२
तथाऽपरेण कोटीनाम्	४	३६	१६
तथापि त्वां मया मुक्तः	६	५६	८६
तथापि सूतेन सुयुक्तवादिना	२	६०	२३
तथापि पृष्टा यथान्यायम्	२	७२	४१
तथा प्रत्यूषसमये	६	१२८	५०
तथा प्रवर्त्यतां यज्ञः	१	६०	४
तथा प्रविद्धैर्नाराचैः	६	१००	५८
तथा प्रोत्साहिता देवी	२	६	५५
तथा ब्रुवति काकुत्स्थे	७	६१	२
तथा ब्रुवति तारे तु	४	५४	१
तथा ब्रुवति देवेशे	७	८५	८
तथा ब्रुवति राजेन्द्रे	७	८६	१६
तथा ब्रुवति रामे तु	१	७६	२१
तथा ब्रुवति वैदेहे	१	७२	१७
तथा ब्रुवाणं भरतम्	६	१२७	५७

	का०	स०	श्लो०
तथा ब्रुवाणं सुग्रीवम्	४	११	६६
तथा ब्रुवाणं सुग्रीवम्	४	४०	१०
तथा ब्रुवाणं सौमित्रिम्	४	३५	१
तथा ब्रुवाणामपि धर्मवत्स०	२	२७	२४
तथा भवन्तः कुर्वन्तु	६	६0	७
तथाभिरामो भरतेन ताम्यता	२	१०६	३३
तथाभूता हि सा चर्या	१	१६	८
तथाभूतं हि रामस्य	७	४२	१६
तथा मत्स्यकालिङ्गाश्च	४	४१	११
तथा मम सतां श्रेष्ठ	२	३७	४
तथा मया विधातव्यम्	५	१	८८
तथाम्रवणसंपन्नन्	५	१४	४
तथा रक्षोधनुर्मुक्ताः	७	७	४
तथा रथ्योपरथ्याश्च	५	५३	२१
तथा रुदन्तीं कौसल्याम्	२	४०	४४
तथा लाङ्गूलहस्तैस्तु	५	१४	१६
तथा वदति काकुत्स्थे	७	४	२१
तथा वदति काकुत्स्थे	७	८२	८
तथा वसिष्ठवचनात्	१	१३	३६
तथा वसिष्ठे ब्रुवति	१	२२	१
तथा विजृम्भते सिंहः	४	६७	६
तथाविधं द्विजं दृष्ट्वा	१	२	१३
तथा विधानं क्रियताम्	१	८	१६
तथा विप्रेक्षमाणस्य	५	१८	१
तथा विलपतां तेषाम्	२	५०	७
तथा वृक्षैर्महाकायाः	६	४२	४३
तथा शपन्त्यां वैदेह्याम्	७	६७	१७
तथा शप्त्वा च वै शक्रम्	१	४८	२६
तथा शयानस्य ततो यनस्विनः	२	५०	५१
तथा शार्ङ्गविनिर्मुक्ताः	७	७	१६
तथा शुचीञ्शास्त्रविदः	१	१३	८
तथाश्वासय हीमन्तम्	२	१६	६
तथा सनियममेव	२	४	३४
तथा सर्वप्रजाकान्तैः	२	१	३३

	का०	स०	श्लो०
तथा सर्वाणि भूतानि	४	५६	१०
तथा सीतामुपासीनाम्	२	११८	२३
तथा संचोदितः सूतः	७	५१	१
तथा संपूज्य तमृषिम्	७	१००	६
तथा संभाषमाणा सा	२	५२	६२
तथा स्म तेषां वसताम्	७	४०	१
तथास्य धावतो रूपम्	७	३५	४५
तथा धर्मनित्यस्य	३	५६	१६
तथा हि पतितं रामम्	२	१०३	४
तथा हि रामं वनवासनि०	२	२४	३८
तथा हि सत्यं ब्रुवति०	२	५१	२७
तथा ह्यलर्कस्तेजस्वी	२	१४	५
तथा ह्याक्तमिदं राज्यम्	२	६१	१८
तथेति ततः सर्वे	१	१२	२०
तथेति च प्रतिज्ञाय	७	१०३	१३
तथेति च स राजानम्	१	१२	३
तथेति च स राजानम्	१	१३	५
तथेति च राजानम्	२	५	३
तथेति तु प्रतिज्ञाय	२	६०	६
तथेति नृपतिः प्रीतः	१	१६	२१
तथेति भरतो वाक्यम्	२	७६	१२
तथेति संपूज्य वचस्तु तस्य	४	२	२६
तथेत्युक्त्वा तु ते सर्वे	६	६०	८८
तथेत्युक्त्वा द्रुततरम्	६	५३	४
तथेत्युक्त्वा महातेजाः	६	८७	७
तथेत्युक्त्वा सुसंहृष्टः	६	११२	१२
तथैव गच्छतस्तस्य	२	४६	२
तथैव च प्रतिज्ञातम्	७	७६	७
तथैव च महाबाहुः	७	२८	४७
तथैव तरुभिर्दिव्यैः	७	४२	७
तथैव तालावचराः	७	६१	१५
तथैव त्वां समासाद्य	५	२१	१२
तथैव मत्ता मदिरोत्कटा नराः	२	६१	८३
तथैव रणरक्तस्तु	७	८	१६

	का०	स०	श्लो०
तथैव रामोऽश्रुमुखः कृता०	२	५८	३७
तथैव रावणेनापि	७	३२	५७
तथैव सकलैर्वृक्षैः	६	८६	१२
तथैवागमनं मन्ये	१	१८	५२
तथैवाप्यपरे तेषाम्	६	७५	६४
तथैवायुधजातानि	२	४०	१५
तथैवांशुमता वत्स	१	४४	९
तथोक्तो राक्षसेन्द्रेण	६	८०	५
तथोक्तवति रामे तु	७	८४	१
तथोक्तवति रामे तु	७	९०	१
तथोक्तवति रामे तु	७	१०२	५
तथोक्ता मुनिना सर्वे	७	९५	११
तथोक्ता साप्सरा राम	१	६४	२
तथोक्ता सा समाश्वस्ता	२	१०	४०
तथोक्तास्ते सुसंभ्रान्ताः	६	५१	८
तथोक्ते तानृषीन्रामः	७	६२	१
तथोक्ते धर्मशीलेन	२	९७	१९
तथोर्ध्ववासिनो दान्ताः	३	६	५
तदक्षयं महद् दुःखद्	२	२०	४६
तद्ग्निना पुनर्व्याप्तम्	१	३६	१८
तदग्र्यवेषप्रमदाजनाकुलम्	२	५	२६
तदज्ञानान्महत्पापम्	२	६४	२
तदत्र कार्यनिर्बन्धे	५	५६	१०
तदद्भुततमं वाक्यम्	७	७९	१
तदद्भुतमचिन्त्यं च	१	७५	२
तदद्भुतमिवाचिन्त्यम्	७	९७	१२
तदद्भुतं राघवकर्म दुष्करम्	६	२२	८४
तदद्भुतं स्थैर्यमवेक्ष्य राघवे	२	१०६	३४
तदद्य नैवानघ राज्यमव्ययम्	२	३४	५
तदद्य भगवन्सर्वम्	२	३	७
तदद्य विपुलं वीर	६	८३	४२
तदद्य व्याहृतं भद्रे	६	११५	२२
तदधीनं हि मे कार्यम्	३	७५	९
तदन्तः पुरमासाद्य	२	१४	३१
तदन्तरमहं लब्ध्वा	१	४६	२३
तदन्नं मैथिली प्राप्य	४	६२	९
तदन्नसंभवं दिव्यम्	४	३७	३०

	का०	स०	श्लो०
तदपत्यं भवानस्तु	२	१०६	१६
तदपूर्वं नरपतेः	२	१८	४
तदप्यशनिसंकाशैः	६	१०७	५७
तदप्यस्त्रं महाघोरम्	१	५६	१६
तदप्रमादमातिष्ठ	६	१०६	११
तदप्रमेयप्रतिकारकृत्रिमम्	५	८	२
तदप्रियं दीनमुखाः	६	५१	११
तदप्रियमनार्यायाः	२	१९	१९
तदप्रियमभित्रघ्नः	२	१९	१
तदर्थोपहितं वाक्यम्	५	३९	३२
तदर्थोपहितं वाक्यम्	५	५६	१४
तदर्थोपहितं वाक्यम्	५	६८	१६
तदलं कालपाशेन	५	५१	३५
तदलं कालसङ्गेन	४	५९	२८
तदलं क्रूरवाक्यैश्च	५	२७	३६
तदलं ते वनं गत्वा	२	२८	२५
तदलं देवि रामस्य	२	३६	३०
तदलं परितापेन	४	१८	३५
तदलं परितापेन	५	३९	४०
तदलं परितापेन	५	६८	२३
तदलं विक्लवां बुद्धिम्	६	२	१३
तदलं शोकमालम्ब्य	६	२	१९
तदवश्यं त्वया कार्यः	३	७२	१०
वदवस्थं तु भारतम्	२	८७	५
तदवस्थं समीपस्थः	६	१००	३७
तदवस्थाप्यतां बुद्धिः	५	३७	४०
तदसुकरमथाभिवीक्ष्य हृष्टाः	६	९०	९४
तदसुखमनुकीर्तितं वचो भुवि	४	५६	१७
तदस्त्रं ज्वलितं घोरम्	६	७१	८५
तदस्त्रं तस्य वीरस्य	४	१७	८
तदस्त्रं तु हतं दृष्ट्वा	६	१००	१०
तदस्त्रबन्धमासाद्य	६	५१	१६
तदस्त्र राघवः श्रीमान्	६	१००	५
तदस्माकं हितार्थाय	७	६	२७
तदस्मिन्कार्यनिर्योगे	५	३९	२७
तदस्मिन्कार्यनिर्योगे	५	६८	१०
तदस्मिन्क्रियतां यत्नः	६	७१	३६

	का०	स०	श्लो०
तदहं ते बलं दृष्ट्वा	१	७५	४
तदहं प्रथमं कृत्वा	४	४७	६
तदहं भाग्यरहितः	५	५५	२०
तदहं यष्टुमिच्छामि	१	८	६
तदहं स्वेन रूपेण	५	२	४४
तदा कुशिकपुत्रं तु	१	२२	६
तदागच्छ महातेजः	१	४६	११
तदागच्छ महाबाहो	४	३३	६१
तदा गदाभिर्गुर्वीभिः	६	६३	१५
तदागन्तव्यमनिशम्	७	३६	५८
तदाचक्ष्व यथा तत्त्वम्	७	२७	१३
तदा चास्यं च मे कुक्षौ	३	७१	१४
तदा चौषधयोऽस्माभिः	४	६६	३३
तदाज्ञापय कः किं ते	४	२६	२७
तदा तदन्तः पुरमुज्झितप्र०	२	११४	२६
तदा तं शपथैः कष्टैः	२	७५	६०
तदा तस्य प्रहृष्टस्य	७	६६	१३
तदातिकायः कुपितः	६	७१	५०
तदात्ममरणे चैव	२	३१	२३
तदा त्वभिहता तीव्रम्	६	१११	५८
तदा त्वं प्राप्स्यसे रूपम्	३	७१	७
तदा दधिमुखः क्रुद्धः	५	६२	१८
तदा देवासुरे युद्धे	२	११	२६
तदा देवासुरे युद्धे	६	१२	२३
तदा देवासुरे युद्धे	६	२७	२१
तदान्तरिक्षे त्रिदशोत्तमा०	६	६६	६५
तदावतन्तं बलवान्	६	६७	४७
तदावतन्तं संप्रेक्ष्य	६	६७	२३
तदाप्रभृति काकुत्स्थः	१	४६	६
तदाप्रभृति चाक्रान्ता	३	११	८३
तदाप्रभृति भूयिष्ठम्	७	३०	३६
तदा भृशार्ता बहु चैव	३	५३	२६
तदामात्यानभिप्रेतान्	२	७०	२२
तदा यथागतेनैव	२	४७	१५
तदा रामः सलक्ष्मणः	३	१२	२५
तदा विवेश महिषः	४	४६	४
तदा वृत्रवधं सर्वम्	७	८६	१

	का०	स०	श्लो०
तदाश्वसिहि भद्रं ते	५	३६	४४
तदाश्वसिहि विस्रब्धम्	६	११३	१३
तदा स गत्वा विपुलं महद्वनम्	३	६०	३८
तदा समागतं सर्वम्	७	६६	६
तदासाद्य दशग्रीवः	३	४६	२
तदासीत्तुमुलं युद्धम्	७	२२	१६
तदासीनस्य रामस्य	३	१७	५
तदासीन्निष्प्रभोऽत्यर्थम्	५	३५	३६
तदा सूतो महाराजम्	२	५८	२
तदा स्त्रियो रामनिमि०	२	४८	३६
तदा स्म दानवा देवान्	६	५०	२७
तदास्वाद्य हरिश्रेष्ठः	५	१	११०
तदाहं दण्डकारण्ये	३	३६	७
तदा हि तारा हितमेव०	४	१५	३१
तदा हि यत्कार्यमुपैति०	२	११५	२४
तदा हुताशनं हुत्वा	२	७६	१८
तदा हेमोपमा तत्र	२	६	५७
तदा ह्ययोध्यानिलयः	२	५	१६
तदिच्छामि त्वज्ञप्तम्	५	५८	१००
तदिदं काकतालीयम्	२	४१	१६
तदिदं घोरसंकाशम्	१	७५	३
तदिदं तथ्यमेवाहम्	६	६२	३५
तदिदं न विभात्यद्य	२	७२	२०
तदिदं मानुषं मन्ये	६	६४	३०
तदिदं मामनुप्राप्तम्	६	६८	२१
तदिदं मार्गितं तावत्	५	११	४५
तदिदं मित्रकार्यं नः	४	२६	१५
तदिदं मेघसंकाशम्	६	१२१	११
तदिदं मेऽनुसंप्राप्तम्	२	६३	१२
तदिदं वचनं राज्ञः	२	२१	७
तदिदं वर्तयिष्यावः	१	५	४
तदिदं वीर संप्राप्तम्	६	१०६	४
तदिदं शाश्वतं पित्र्यम्	२	१०१	१३
तदिदं ह्यन्यथाभूतम्	२	७२	२८
तदिह प्रस्थितोऽहं वै	७	२०	२५
तदिहैव निवेशोऽस्तु	६	४	६६
तदुक्तमतिकायस्य	६	६४	१

	का०	स०	श्लो०
तदुन्नसं पाण्डुरदन्तमव्रणम्	५	१३	६६
तदुपगतसमाससन्धियोगम्	१	२	४३
तदेकदेशेन बलस्य तावत्	५	५२	२४
तदेकवासः संवीता	५	५९	२५
तदेतां त्रिसृजानार्याम्	२	२१	४४
तदेतत्कथितं सर्वम्	७	३६	४९
तदेतत्कारणं पश्य	४	१८	१८
तदेतत्तु मया कार्यम्	२	२१	३७
तदेतत्प्रमीक्ष्याहम्	१	५६	२४
तदेतत्सर्वमातिष्ठ	६	६२	२१
तदेतद्धनुषां श्रेष्ठम्	१	६७	११
तदेतद्भयमुत्पन्नम्	६	६२	१७
तदेभिः कारणैः सर्वैः	४	१८	२८
तदेवं निश्चयं दृष्ट्वा	६	१०९	१९
तदेवं प्रस्तुते कार्ये	४	३३	४९
तदेवं प्रस्तुते कार्ये	६	१०	२२
तदेवं प्राञ्जलिः प्रह्वः	७	२६	२७
तदेवं वैष्णवं राम	१	७५	२७
तदेवं शक्तियुवतस्य	४	२९	२५
तदेव नात्र संदेहः	५	४६	१०
तदेव प्रस्थितस्यास्य	४	४४	१०
तदेवमुक्त्वा काकुत्स्थः	७	१०८	३४
तदेवमुक्त्वा प्रययौ	३	३१	३४
तदेवमेतं त्वमनुव्रता सती	२	११७	२९
तदेव युक्तं प्रणिधाय लक्ष्मणः	४	२७	४६
तदेव रामेण निशम्य	३	४	३२
तदेवाद्य तवैवं हि	६	१११	३७
तदैव यन्न दग्धस्त्वम्	६	१११	२४
तदैव रामः प्लवगाधि०	६	९१	२८
तदोद्यन्तं विवस्वन्तम्	७	३५	२३
तद्गच्छ कुरु साहाय्यम्	८	३	३
तद्गच्छ त्वरितं सूत	२	१४	६१
तद्गच्छ त्वानुजानेद्य	६	११५	१८
तद्गच्छ बत धर्मज्ञ	७	३	१८
तद्गतेनैव मनसा	१	२	२८
तद्गतं हृदयं यस्याः	२	६०	११
तद्द्रव्यं राजशार्दूलः	२	३१	३३

	का०	स०	श्लो०
तद्द्वितीयं हनुमतः	५	१	१२९
तद्दीर्घकालं वेत्तासि	७	३६	३४
तद्दृष्ट्वा विफलं कर्म	७	६९	९
तद्दृष्ट्वा व्यादितं त्वास्यम्	५	१	१५५
तद्दृष्ट्वा व्यादितं त्वास्यम्	५	५८	३१
तद्दृष्ट्वा समुपस्थिताः	६	३७	८
तद्दृष्ट्वा सुमहत्कर्म	६	५६	१
तद्दृष्ट्वेन्द्रजिता कर्म	६	८८	५०
तद्धनुः प्राप्य मे पित्रा	२	११८	४१
तद्धनुर्नरशार्दूल	१	३१	११
तद्धनुस्तौ च तूणी च	३	१२	३६
तद्धस्ति मृदितं घोरम्	६	१२६	११
तद्धि तेजस्तु मित्रस्य	७	५७	६
तद्धि पूर्वं नरश्रेष्ठ	१	३१	८
तद्धि यज्ञफलं तेन	१	३१	१२
तद्बभूव शितैर्बाणैः	३	२८	८
तद्बभूवाद्भुतं घोरम्	६	५२	९
तद्बभूवाद्भुतं युद्धम्	३	५१	३
तद्बभौ चाद्भुतं युद्धम्	६	१०२	१८
तद्बलं हतभूयिष्ठम्	२	२८	३
तद्ब्रूहि वचनं देवि	२	१८	३०
तद्भग्नं वनखण्डं तु	५	५८	१११
तद्भवद्भिर्मम कृते	७	३६	५४
तद्भवन्तः क्षताः शस्त्रैः	७	३१	३१
तद्भवानद्य काशेय	७	३८	१७
तद्भवानस्य कार्यस्य	४	६५	२६
तद्भवान्दण्डसंयोगात्	४	१८	६२
तद्भवान्दृष्धमर्थैः	५	५१	१७
तद्भवान्वृत्तसंपन्नः	४	२९	१२
तद्भवांश्चतुरङ्गेण	६	३७	२४
तद्भवान्स्वपुरं यातु	७	३८	५
तद्यथा ज्ञापयेंकिंचित्	२	५२	२४
तद्यथा तस्य विक्रान्तम्	५	३९	३१
तद्यथा तस्य विक्रान्तम्	५	५६	१३
तद्यथा तस्य विक्रान्तम्	५	५६	१५
तद्यथा नमुचिर्वृत्रः	७	२७	९
तद्यथा विधिपूर्वं मे	१	१२	१९

	का०	स०	श्लो०
तद्यथा स महाराजः	२	५२	२६
तद्यामस्तत्र यत्रास्ते	७	३५	६३
तद्यावदेव मे चेतः	२	४	२०
तद्युद्धसमभवत्तत्र	६	७९	२३
तद्युद्धं तादृशं घोरम्	७	१०१	९
तद्युवां हृष्टमनसौ	७	९३	१५
तद्रक्षो न भवेदेव	३	४३	४५
तद्राक्षसतनूजस्य	६	९०	७२
तद्राक्षसबलं सर्वम्	६	५३	१२
तद्राक्षसानीकमतिप्रचण्डम्	६	५९	११
तद्राजगुणसंपन्नम्	५	६	११
तद्रामबाणाभिहतं पपात	६	६७	१६९
तद्रामवचनं सर्वम्	६	४१	७६
तद्रामविशिखैश्छिन्नम्	३	३	१९
तद्रावणकरान्मुक्तम्	६	१०२	५९
तद्रावणसुतो धीमान्	७	७०	२१
तद्रूपमति संक्षिप्य	५	१	१९८
तद्वचः पितुरेवाहम्	२	१०५	३९
तद्वचः सत्यमक्लीबम्	६	२६	१
तद्वनं मथितैर्वृक्षैः	५	४१	१६
तद्वनं स कथं राजा	७	७९	३
तद्वाक्यं करुणं राज्ञः	२	६२	१०
तद्वाक्यं जनकेनोक्तम्	१	७३	१७
तद्वाक्यं जनकेनोक्तम्	१	७३	१७
तद्वाक्यं धर्मसंयुक्तम्	२	८२	१७
तद्वाक्यं राघवेणोक्तम्	७	९१	४
तद्वाक्यं राघवेणोक्तम्	७	१०५	१२
तद्वाक्यं लक्ष्मणः श्रुत्वा	२	९७	२९
तद्वाक्यं लक्ष्मणोक्तं वै	७	१०३	५
तद्वाक्यमव्यक्तपदम्	७	८८	२०
तद्वाक्यं हरिराजस्य	६	६७	५७
तद्वाक्यमृषिपुत्रस्य	१	६२	२३
तद्वाक्यं भरतोक्तम्	७	१०२	७
तद्वानरबलं दृष्ट्वा	६	८१	१४
तद्वानरानीकमतिप्रचण्डम्	६	६५	५५
तद्वालिवचनच्छान्तः	४	२२	१८
तद्विकृष्य महच्चापम्	७	२८	४६

	का०	स०	श्लो०
तद्विजृम्भस्व विक्रान्त	४	६६	३५
तद्विधैरेव बहुभिः	३	५	७
तद्विनाशेऽपि मे दुःखम्	४	८	३९
तद्वियोगेन्धनवता	६	५	८
तद्विशीर्णं गिरेः शृङ्गम्	६	५९	७४
तद्वधार्थं शिशरं दृष्ट्वा	६	७०	३४
तद्वृत्तं नृपतिः श्रुत्वा	१	९०	८
तद्व्यतीतस्य ते धर्मात्	४	१८	२०
तनुत्राणि च योधानाम्	६	७५	११
तनुमध्या पृथुश्रोणी	६	१२	१४
तं तथा दण्डकारण्ये	३	३८	१३
तं तथा पतितं संख्ये	४	१७	९
तं तथा परितापार्तम्	३	६७	४
तं तथा शोकसंतप्तम्	३	६६	१
तं तथा समतिक्रान्तम्	६	२२	१६
तं तस्य बाहुं सहतालवृक्षम्	६	६७	१५८
तं तु कृच्छ्रगतं दृष्ट्वा	५	१३	२३
तं तु गत्वा परं पारम्	३	३५	३७
तं तु तारा परिष्वज्य	४	१५	६
तं तु तारा परिष्वज्य	४	१६	११
तं तु दुन्दुभिमुद्यम्य	४	११	४५
तं तु दृष्ट्वा तथाभूतम्	७	३०	१८
तं तु दृष्ट्वा बलात्तेन	७	२९	२८
तं तु दृष्ट्वा मणिष्श्रेठम्	५	६६	२
तं तु देशमतिक्रम्य	४	४३	३७
तं तु निष्पतितं दृष्ट्वा	३	२५	४
तं तु नैवंविधः कश्चित्	२	१०५	३४
तं तु पर्वतमासाद्य	२	५६	१३
तं तु पूर्वोदितं शुद्धम्	२	१४	४४
तं तु बोधयत क्षिप्रम्	६	६०	१८
तं तु मां जीवलोकोऽयम्	२	१२	८२
तं तु मायाप्रतिच्छन्नम्	६	४६	९
तं तु राजन्दशग्रीवम्	७	१४	२५
तं तु रामः समाज्ञाय	२	१०१	१
तं तु वज्रमिवोत्सृष्टम्	२	१०३	२
तं तु वेदविदा तेन	७	३६	३
तं तु शोकपरिद्यूनम्	६	२	१

	का०	स०	श्लो०
तं ते भयपरीताङ्गाः	४	३१	२०
तं तैलघातं विमलम्	४	६८	१८
तं तोरणविटङ्कस्थम्	५	४४	६
तं तोलयित्वा बाहुभ्याम्	४	११	४७
तं त्विदानीमहं हत्वा	३	५४	२५
तं ददर्श महेष्वासः	६	८८	४
तं ददर्शाग्रतो रामः	३	१२	२२
तं दीनदीनया वाचा	३	६७	१४
तं दीप्तमिव कालाग्निम्	४	३१	३१
तं दीप्तमिव कालाग्निम्	७	६६	२०
तं दृष्ट्वा कैकयी तत्र	७	६	४१
तं दृष्ट्वा गिरिशृङ्गाभ	३	४६	९८
तं दृष्ट्वा चलसंकाशम्	५	३७	४१
तं दृष्ट्वा जृम्भमाणं ते	४	६७	१
तं दृष्ट्वा तेजसाविष्टम्	३	२४	३५
तं दृष्ट्वा तौ महाभागौ	३	१४	२
तं दृष्ट्वा त्वभिनिर्यान्तम्	६	८१	७
तं दृष्ट्वा त्वरितं यान्तम्	६	४६	३२
तं दृष्ट्वाथ वरारोहा	५	५८	६६
तं दृष्ट्वा नागरा सर्वे	२	३६	२०
तं दृष्ट्वा निहतं भूमौ	६	५६	३१
तं दृष्ट्वा निहतं शूलम्	६	७६	३७
तं दृष्ट्वा पतितं भूमौ	३	५१	४४
तं दृष्ट्वा पतितं भूमौ	६	७६	२५
तं दृष्ट्वा पतितं भूमौ	६	१०८	२३
तं दृष्ट्वा परमप्रीतः	१	५२	१
तं दृष्ट्वा परमप्रीतौ	१	२३	७
तं दृष्ट्वा भरतः श्रीमान्	२	६८	१७
तं दृष्ट्वा भरतः श्रीमान्	२	६६	२६
तं दृष्ट्वा भीमसंकाशम्	१	७४	२०
तं दृष्ट्वा मुनयः सर्वे	१	२६	२६
तं दृष्ट्वा राक्षसश्रेष्ठम्	६	६१	२
तं दृष्ट्वा राक्षसश्रेष्ठम्	६	६७	१४०
तं दृष्ट्वा राक्षसाः सर्वे	६	६६	३२
तं दृष्ट्वा राघवं वाली	४	१७	१४
तं दृष्ट्वा वज्रदंष्ट्रस्य	६	५४	२१

	का०	स०	श्लो०
तं दृष्ट्वा वदनान्मुक्तम्	५	१	१५६
तं दृष्ट्वा बन्दमानं च	५	३४	१३
तं दृष्ट्वा वानरमुखम्	८	१६	१४
तं दृष्ट्वा वानराः सर्वे	४	३१	१८
तं दृष्ट्वा वानराः सर्वे	६	३८	१२
तं दृष्ट्वा सगुणं चापम्	३	२५	२
तं देवदेवोपमसात्मजं ते	२	२	५४
तं देवाः प्रीतमनसः	७	७०	६
तं देशं प्रभया तस्य	७	२१	६
तं द्रक्ष्यसि यदा भद्रे	७	३०	४३
तं द्रुमाणां शिलानां च	६	७३	४१
तं धर्मेऽग्निषु पुत्रेषु	७	३३	१३
तं नखैर्दशनैश्चापि	६	६७	३२
तं न देवा न गन्धर्वाः	३	१६	११
तं न देवा न गन्धर्वाः	६	६४	२७
तं न पश्यामहे लोके	६	६४	३८
तं नर्मदाह्रदं भीमम्	७	३२	२४
तं निकृत्तं शरं दृष्ट्वा	५	७१	६८
तं निनादं निशम्याथ	६	३५	२
तं निवर्तयितुं यामि	२	८५	१०
तं निर्विषाशीविषसंनिकाशम्	६	५६	१३६
तं निशम्य गुहादेशम्	२	५२	७
तं निशम्य सनिस्त्रिंशम्	६	६२	४४
तं निष्प्रभमिवादित्यम्	४	१८	२
तं नीलजीमूतनिकाशकल्पम्	३	५१	४५
तन्त्रीलयवदत्यर्थम्	१	४	३४
तन्त्रीलयसमायुक्तम्	६	७१	१५
तन्त्रीस्वराः कर्णसुखाः प्रवृत्ताः	५	५	६
तन्नक्रमकराकीर्णम्	५	६	७
तन्न खल्वेष ते सौम्य	७	२२	४३
तन्न विश्वसनीयं वः	६	५०	५४
तन्न शक्ष्याम्यहं गन्तुम्	२	५२	४८
तन्न सिध्यति सौमित्रे	३	४५	२५
तन्निमित्तमिदं वैरम्	६	६४	११
तन्निमित्ताभिरासीनो	२	६४	५
तन्निमित्तेन मानार्हः	५	३६	२३

	का०	स०	श्लो०
तन्नियोगे नियुक्तेन	६	१	१०
तन्निवर्तय लङ्केशात्	७	२२	४५
तन्ममैवैष सत्कारः	४	५	१०
तन्मर्षयतु यच्चोक्तम्	६	१६	२५
तन्महन्नो भयं तस्मात्	१	१५	११
तन्मह्यं रोचते संधिः	६	३५	१०
तन्मां सुरवराः सर्वे	१	४६	४
तमर्च्यतां महाबाहो	७	३०	७
तन्मे दहति गात्राणि	६	५	७
तन्मेरुशिखराकारैः	६	६७	१२५
तपनीयगवाक्षाणि	४	५०	३१
तपनीयगवाक्षाणि	४	५१	६
तपनेन गजः सार्धम्	६	४३	६
तपन्तं च तपस्तीव्रम्	७	८८	१०
तपश्चचार धर्मात्मा	१	५७	१०
तपश्चरणयुक्तश्च	७	२	२६
तपश्चरणयोगार्थम्	१	२६	३
तपश्चरन्त्या वर्षाणि	१	४६	१३
तपः संतापलब्धस्ते	५	५१	२५
तपः समाधानपराक्रमार्जितम्	५	८	४
तपसा चाभिसंप्राप्ता	३	३	६
तपसा जितलोकानाम्	३	३५	२०
तपसा न विनाशितम्	५	५६	४
तपसा पुरुषव्याघ्र	३	४	१०
तपसाराधितो देवः	७	५	१४
तपसा सत्यवाक्येन	४	५	५
तपसा सत्यवाक्येन	५	५५	२८
तपसा सेतुबन्धेन	६	३	२
तपसा संभृते चैते	१	२२	२१
तपसो हि महाविघ्नः	१	६३	८
तपस्तप्यति वृत्रे तु	६	८४	११
तपस्तस्यां हि कुर्वताम्	१	४६	६
तपस्तेपे स धर्मात्मा	७	२	८
तपस्यता महाबाहो	७	८४	१२
तपस्यन्तमृषिं तत्र	१	३३	१२
तपः स्वाध्यायनिरतम्	१	१	१

	का०	स०	श्लो०
तपस्विनः स्थिता ह्यत्र	७	८१	२०
तपस्विनां रणे शत्रून्	३	६	२५
तपोबलभृतो ब्रह्मन्	१	६२	३०
तपोबलहताञ्ज्ञात्वा	१	६०	१
तपोमयं तपोराशिम्	१	२६	१२
तपोवनं वा दुर्गं वा	७	१०७	१४
तपोवनानि पुण्यानि	७	४२	३३
तप्तकाञ्चनचित्राणि	५	४५	४
तप्तकाञ्चनवर्णाभा	३	३४	१७
तप्तचामीकराभाय	६	१०५	२१
तप्तबिन्दुनिकाशैश्च	३	६४	४०
तप्ताभरणवर्णाङ्गी	३	५२	१४
तप्यन्तमृषिभिः सार्धम्	१	६२	३
तप्यमानं तदा रामम्	३	६५	१
तप्यमानं तमाज्ञाय	३	६६	३
तप्यमाने तदा देवे	१	३७	१
तमक्षमागतं भग्नम्	५	५८	१२७
तमग्निमिव संशान्तम्	२	६६	१
तमङ्के भ्रातरं कृत्वा	२	११२	१५
तमङ्गदमुपासीनम्	४	६०	२
तमचिन्त्यप्रहारं सः	६	५८	५१
तमजय्यमधृष्यं च	६	११	७६
तमतिक्रम्य चाकाशाम्	४	४३	१६
तमतिक्रम्य लक्ष्मीवान्	४	४१	२८
तमतिक्रम्य शैलेन्द्रम्	४	४२	३३
तमितक्रम्य शैलेन्द्रम्	४	४२	३६
तमतिक्रम्य शैलेन्द्रम्	४	४३	१६
तमतिक्रम्य शैलेन्द्रम्	४	४३	५३
तमथैवं ब्रुवाणं सः	६	६३	२८
तमद्भुततरं दृष्ट्वा	७	३२	१७
तमद्यैव प्रियार्थं मे	४	१२	११
तमद्रिशृङ्गप्रतिमं किरीटिनम्	६	६०	६८
तमनर्थं महाघोरम्	७	८०	१७
तमनुप्लवते वायुः	७	३५	२८
तमन्तकमिव क्रुद्धम्	६	५६	२४
तमन्वारोहत्सुग्रीवः	६	३८	८

	का०	स०	श्लो०
तमपश्यन्प्रियं पुत्रम्	२	७२	५१
तमप्रतिमतेजोभ्याम्	२	११२	१
तमप्रतिमसंस्थानैः	६	८६	३४
तमप्रतिहतं क्रुद्धम्	४	३४	१
तमप्रविष्टं न्यग्रोधम्	६	८७	६
तमब्रवीत्ततो राजा	६	३१	४०
तमब्रवीत्ततो रामः	४	६	१३
तमब्रवीत्तदा रामः	६	२२	२७
तमब्रवीत्प्रियसखः	२	६६	६
तमब्रवीद्दीप्तविशाललोचनम्	३	३२	२५
तमब्रबीन्महातेजाः	६	५६	१७
तमब्रबीन्महातेजाः	६	१२२	३
तमभ्यधावञ्शतशः	६	८२	१३
तमभ्यभाष सौमित्रे	४	३	२७
तमभ्याशगतं दृष्ट्वा	६	७६	२३
तमभ्रघनसंकाशम्	५	५७	२८
तमरिघ्नं कृतात्मानम्	५	३६	४८
तमर्चयित्वा धर्मात्मा	१	६६	२
तमवज्ञाय तु हृतम्	७	६६	१४
तमवध्यं मघवता	६	६६	३
तमश्च लोकमावव्रे	६	२२	७
तमसा बहुलेनेमाः	६	६०	५
तमहं दुर्मतिं क्रूरम्	२	३१	११
तमहं देवसंकाशम्	७	७७	१८
तमहं द्रष्टुमिच्छामि	१	७०	४
तमहं भ्रातरं दृष्ट्वा	४	५८	६
तमहं हेतुभिर्वाक्यैः	६	१७	१४
तमाकाशगतं वीरम्	५	१	१०३
तमागतमभिप्रेक्ष्य	२	५	२३
तमागतमभिप्रेक्ष्य	४	५०	३७
तमागतमृषिं रामः	२	५	६
तमागतं प्रेक्ष्य तदातिकायः	६	७१	१०३
तमागतं वेदविदम्	२	३२	४
तमात्तबाणासनमाहवोन्मुखम्	५	४७	२४
तमात्तबाणासनमुत्पतन्तम्	४	३१	५
तमात्मपञ्चमं दृष्ट्वा	६	१७	५

	का०	स०	श्लो०
तमादाय धनुः श्रेष्ठे	६	७१	७१
तमानय महाभागम्	१	१३	२२
तमापतन्तं गदया	६	४३	३६
तमापतन्तं दृष्ट्वा स	६	५४	२२
तमापतन्तं धूम्राक्षः	६	५२	३३
तमापतन्तं निशितम्	६	७१	६७
तमापतन्तमाकाशे	६	७०	३५
तमापतन्तं बाणौघैः	३	३०	१६
तमापतन्तं विव्याध	६	७६	४७
तमापतन्तं सहसा	६	१०६	४
तमापतन्तं सहसा समीक्ष्य	६	५६	३६
तमापतन्तं संक्रुद्धम्	३	३०	२३
तमापतन्तं सक्रुद्धम्	६	५६	२५
तमापतन्तं संप्रेक्ष्य	६	६७	५१
तमापतन्तं संप्रेक्ष्य	६	६७	५३
तमापतन्तं संप्रेक्ष्य	६	७६	२६
तमापतन्तीं दृष्ट्वैव	६	८२	१०
तमापृष्ट्वा नरपतिम्	१	७२	२०
तमायान्तं तु संप्रेक्ष्य	२	८४	११
तमारुह्य च पश्यामि	५	५८	५६
तमार्जवसमायुक्तम्	२	१८	३१
तमार्तं देवसंकाशम्	२	७२	२२
तमार्तरूपां विमना रुदन्तीम्	३	४५	३६
तमार्तः संपरिष्वज्य	२	५०	३६
तमालोक्य महातेजाः	६	५६	५२
तमालोक्य महातेजाः	६	५६	१२५
तमाविध्य महातेजाः	६	७७	४
तमाशीभिः प्रशस्ताभिः	६	६५	३३
तमाशु प्रतिविव्याध	६	६०	३५
तमाश्रमं पुण्यसुखं शरण्यम्	४	१	१३०
तमाश्रमं महातेजाः	७	५१	३
तमास्थाय रथश्रेष्ठम्	६	११	४
तमाहवे दारुणमाशुविक्रमौ	३	४	२८
तमाह सौमित्रिरदीनसत्त्वः	६	५६	६२
तमाह सौमित्रिरविस्मयानः	६	५६	६५
तमाहूय महातेजाः	१	३३	२१

	का०	स०	श्लो०
तमिक्ष्वाकुर्महातेजाः	७	५७	८
तमिच्छन्प्रथमं योद्धुम्	६	९९	१८
तमिन्द्रकेतुप्रतिमम्	६	७६	५४
तमिन्द्रजितमप्राप्य	६	४२	११
तमिन्द्रं ब्रह्महत्याशु	७	८५	१६
तमिमं मानुषं मन्ये	६	६०	८
तमुक्तवन्तं वैदेहम्	१	७२	१
तमुक्तवाक्यं विक्रान्तम्	६	१०९	२०
तमुग्रतपसं दीप्तम्	३	७	१३
तमुत्क्षिप्य महानादम्	६	१२६	२३
तमुत्तमेषु लोकानाम्	६	१०८	१३
तमुत्थितं तु हरयः	६	१०१	४५
तमुत्थितं महात्मानम्	७	३७	१२
तमुत्पतन्तं समभिद्रवद्बली	५	४७	२२
तमुद्दिश्य तु मे सर्वम्	७	२६	३५
तमुद्धतं रावणमुग्रतेजसम्	१	१५	३३
तमुद्यम्य महातेजाः	६	७७	१५
तमुद्वीक्ष्य महाबाहुः	५	५०	१
तमुद्वीक्ष्य स धर्मात्मा	३	६८	८
तमुपैति सहस्राक्षः	४	४१	२३
तमुवाच किमर्थं त्वम्	३	५९	२
तमुवाच ततस्तत्र	३	४५	५
तमुवाच ततो गङ्गा	१	३७	१५
तमुवाच ततो रामः	३	३	२
तमुवाच ततो रामः	४	८०	३८
तमुवाच ततो रामः	७	१०३	१०
तमुवाच ततः सूतः	२	४	७
तमुवाच दुराधर्षम्	२	२०	२२
तमुवाच परित्रस्तम्	६	४६	३०
तमुवाच महातेजाः	१	४२	१७
तमुवाच महातेजाः	१	६१	१२
तमुवाच महातेजाः	२	१४	३३
तमुवाच महातेजाः	२	१११	१६
तमुवाच महातेजाः	६	५०	४५
तमुवाच महातेजाः	६	८७	९
तमुवाच महातेजाः	७	७६	२५

	का०	स०	श्लो०
तमुवाच महाप्राज्ञः	६	११४	१
तमुवाच वसिष्ठस्तु	७	५५	१०
तमुवाच विराधस्तु	३	३	४
तमुवाच सहस्राक्षः	७	६७	१३
तमुवाच हरिश्रेष्ठम्	४	६५	२०
तमुवाच हरिः प्रीतः	१	२९	१४
तमुवाचाञ्जलिं कृत्वा	२	९२	४
तमुवाचात्मवान्रामः	२	३१	३४
तमुवाचाथ सुग्रीवः	४	११	७०
तमूरुवेगोन्मथिताः	५	१	४६
तमृक्षाः समराः व्याघ्राः	४	६०	१५
तमृत्विजो नैगमयूथवल्लभाः	२	१०६	३५
तमृषिं तु महाप्राज्ञम्	२	११३	१८
तमृषिं द्रष्टुकामोऽस्मि	४	६०	११
तमृषिं पुरुषव्याघ्रम्	२	९२	२
तमृषिं पृष्ठतः सीता	७	९६	१०
तमेवं मायिनं क्षुद्रम्	६	८०	४१
तमेवं कृतसंकल्पम्	५	६०	१४
तमेवं गुणसंपन्नम्	२	२	४८
तमेवं चाभ्यधावन्त	७	२१	३३
तमेवं त्वं महाराज	६	७	२४
तमेवं दिवसं सोऽथ	७	३१	९
तमेवं दिवसं सोऽथ	७	३१	१०
तमेव कालं मित्रोऽपि	७	५६	१२
तमेवमभिभाषन्तम्	२	८५	८
तमेवमभिसंरब्धम्	३	३०	१३
तमेवमर्थं प्रसमीक्ष्य सम्यक्	५	४८	१२
तमेवमुक्त्वा काकुत्स्थः	७	१०८	२९
तमेवमुक्त्वा देवेशः	१	६३	३
तमेवमुक्त्वा राजर्षिः	७	५९	१७
तमेवमुक्त्वा राजानम्	१	४२	२५
तमेवमुक्त्वा रुदतीम्	६	८१	२९
तमेवमुक्त्वा संक्रुद्धः	४	११	३९
तमेवमुक्त्वा सुग्रीवः	४	३८	६
तमेवमुक्त्वा सौमित्रिम्	३	५	२०
तमेवमुक्त्वा सौहार्दात्	२	२१	४५

	काण्ड	सर्ग	श्लोक
तमेवं दुखितं प्रेक्ष्य	२	१०५	१४
तमेवं प्रथमं मासम्	७	८८	५
तमेवं वृत्तसंपन्नम्	२	१	३४
तमेवं शोकसंतप्तम्	२	७६	१
तमेवं सान्त्वयित्वा तु	६	५०	२३
तमेव हत्वा सबलं सबान्धवम्	१	१५	३४
तमेवाद्यावगच्छामि	४	६३	१२
तमेवोवाच वचनम्	४	१४	८
तमोघ्नाय हिमघ्नाय	६	१०५	२०
तं पत्रक्टिपे लीनः	५	१८	२५
तं पद्मदलपत्राक्षम्	५	२५	१६
तं परिष्वज्य धर्मात्मा	२	३२	३६
तं परिष्वज्य बाहुभ्याम्	२	३४	२०
तं पर्वताग्रमाकाशे:	६	५६	१६
तं पुत्रं दुर्विनीतं तु	७	६१	१८
तं पुत्रं पूर्वकं राज्ये	७	७६	६
तं पुत्रवधसंतप्तम्	६	६१	१८
तं पुनः प्रापयित्वा च	४	५८	३५
तं पुरस्तात्स्थितं दृष्ट्वा	६	७०	५५
तं प्रगृह्य महाखड्गम्	६	७६	११
तं प्रत्युवाच कैकेयी	२	८२	१४
तं प्रयान्तं मुनिगणाः	७	८२	१६
तं प्रयान्तं मुनिं सीता	७	४६	१४
तं प्रयान्तं समुद्वीक्ष्य	५	१	१५०
तं प्रविष्टं रिपुं दृष्ट्वा	४	६	१२
तं प्रविष्टं वनं दृष्ट्वा	४	१२	२३
तं प्रविष्टं विदित्वा तु	४	१०	१७
तं प्रसादं तु रामस्य	६	१६	२७
तं प्रसादय गत्वा त्वम्	२	६३	४५
तं प्रस्थितं महात्मानम्	६	७३	१०
तं प्रस्रवणपृष्ठस्थम्	४	४७	१०
तं प्रहस्याब्रवीद्रक्षः	७	१६	२४
तं प्रहृष्टं निधायाङ्के	३	५१	२२
तं प्राप्तविजयं वाली	४	२२	२
तं प्रासमालोक्य तदा विभग्नम्	६	६६	८६

	काण्ड	सर्ग	श्लोक
तं प्रेक्षमाणः सहसातिकायः	६	७१	१०२
तं प्रेक्ष्य भरतं क्रुद्धम्	२	७८	२१
तं प्रेक्ष्य रामः सुमृशम्	३	४	६
तं बाष्पपरिपूर्णाक्षः	२	१६	३०
तं ब्रह्मणोऽस्त्रेण नियुज्य चापे	६	७१	१००
तं ब्रुवाणं तथा वाक्यम्	७	६६	३
तं ब्रुवाणं तु तद्वाक्यम्	७	२	२७
तं ब्रुवाणं मधुं देवः	७	६१	१२
तं भार्या बाणमोक्षेण	४	१६	३
तं भीतमिति विज्ञाय	४	११	१४
तं भीमवपुषं दृष्ट्वा	६	७१	३८
तं भीमवेगा हरयः	६	४५	६
तं भूमौ देवसंकाशम्	६	८३	११
तं भूमौ पतितं दृष्ट्वा	६	७१	१०६
तं भूमौ पितुरार्तेन	२	१०१	६
तं भोगैः संपरित्यक्तम्	२	१०४	१७
तं मत्तमातङ्गविलासगामी	४	१	१२७
तं मत्तमिव मातङ्गम्	२	१०१	१५
तं मत्तमिव मातङ्गम्	५	४८	५४
तं मन्मथशरैर्विद्धम्	२	११	१
तं ममार्थे सुखं पृच्छ	५	३८	५४
तं महर्षिगणैर्जुष्टम्	३	३५	३६
तं महाप्लवगं दृष्ट्वा	६	५६	६
तं महाभ्रमिवादित्यः	६	१	७
तं महोरगसंकाशम्	३	२६	१२
तं महौघनिभं दृष्ट्वा	४	३१	४०
तं मातरो बाष्पगृहीतकण्ठ्यः	१	११२	३१
तं मामेवंगतं पुत्रः	४	५६	८
तं मामेवंगतं मत्वा	२	६०	१८
तं मां शाखाः प्रशाखाश्च	५	१०	२४
तं मुक्तकण्ठमुत्क्षिप्य	३	४	२८
तं मूर्ध्नि समुपाघ्राय	२	७१	४
तं मेरुशिखराकारम्	३	२२	१३
तं मेरुशिखराकारम्	६	१७	२
तं मेरुशिखराकारम्	६	१२१	२७

	काण्ड	सर्ग	श्लोक
तया दत्तवरा चास्मि	४	५१	१८
तयाद्य मम सन्नेऽस्मिन्	२	२६	२२
तया परिगृहीतांस्तान्	७	५१	१२
तया परुषमुक्तस्तु	३	४६	१
तया परुषितः पूर्वम्	३	२२	७
तया भिन्नतनुत्राणः	७	८	१४
तया विहीनः कृपणः	४	१	१०८
तया स राजर्षिसुतोऽभिकामया	१	७७	२६
तया हि देव्या च कृतप्रदक्षिणः	२	२५	४५
तयोः कृतव्रणौ देहौ	६	८८	७१
तयोः क्षतजमार्गेण	६	४५	६
तयोः पादाभिघाताच्च	६	७६	८२
तयोः पुत्रौ तु संभूतौ	७	५८	१०
तयोः पृथकपृथग्भीमः	६	८८	५५
तयोरथ महान्कालः	६	८८	६२
तयोरथ महान्कालः	६	८८	७६
तयोरन्यतरं योद्धुम्	१	२०	२७
तयोरन्योन्यसंभाषात्	५	३५	३३
तयोरन्वेषतोरेवम्	३	६६	२४
तयोरभून्महायुद्धम्	६	६६	३१
तयोन्यत्तिलनिर्घोष	६	१००	६१
तयोर्भूतानि वित्रेसुः	६	६६	२७
तयोर्मध्ये कपिश्रेष्ठः	६	५	१५
तयोर्मध्ये तु सुप्रीतः	४	५	१५
तयोर्युद्धं द्रष्टुकामः	६	८६	२
तयोर्विलपितं श्रुत्वा	२	७७	१८
तयोर्वेगवतोर्वेगम्	५	४६	३१
तयोः शरपथं प्राप्य	६	६६	१७
तयोः शिखरयोर्मध्ये	६	७४	३१
तयोः संवदतोरेवम्	७	६०	१
तयोः स भ्राजते शब्दः	६	८८	६६
तयोः समभवद्युद्धम्	६	६०	६१
तयोः समागमे तस्मिन्	५	३५	७
तयोः सुचरितं स्वार्थम्	२	२३	६
तयोरतदासादितयो	६	७४	१

	काण्ड	सर्ग	श्लोक
तयोस्तद्भाषितं श्रुत्वा	७	८८	४
तयोस्वद्वचनं श्रुत्वा	१	२३	६
तयोस्तद्वचनं श्रुत्वा	१	३८	२
तयोस्तद्वचनं श्रुत्वा	७	२५	१७
तयोस्तद्वाक्यमाधुर्यम्	७	६०	३
तयोस्तु क्रोधसंरम्भात्	४	२	४३
तयोस्तु धनुषी श्रेष्ठः	६	६०	४६
तरसा ता समत्पाह्य	५	४४	२
तरसा पूर्यमाणोऽपि	७	३६	२८
तरस्विना ते तरवः	५	१४	१४
तरस्विनौ धारयता मृगस्य	५	२८	६
तरिष्यति च सुव्यक्तम्	६	६	२७
तरुणां दारुणं वृद्धा	३	१७	२
तरुणादित्यवर्णानि	४	४२	३७
तरुणादित्यवर्णाभ्याम्	५	४२	२८
तरुणादित्यवर्णाश्च	४	३७	७
तरुणादित्यवर्णेषु	४	३०	३
तरुणादित्यवर्णैश्च	४	३६	१३
तरुणादित्यसकाशः	६	१०२	१०
तरुणादित्यसंकाशम्	६	१२७	३१
तरुणादित्यसंकाशाम्	६	११६	३
तरुणादित्यसंकाशैः	४	४३	३४
तरुणी रूपसंपन्ना	३	१६	१७
तरुणी रूपसंपन्ना	४	५८	१५
तरुणी रूपसंपन्नौ	३	१६	१४
तरुप्रवालरक्ता सा	३	५२	१६
तरुशैलैरभिघ्नन्त	६	७५	६२
तरूणां च शिलानां च	७	२१	३५
तर्कयामास सीतेति	५	१५	२७
तर्जयति मां नित्यम्	६	३४	६
तर्पयस्व महाबाहो	२	३२	१४
तर्पयामास मातेव	५	६	३०
तर्पयित्वाथ सलिलैः	३	१६	४२
तर्पयित्वा सहस्राक्षः	४	३०	२
तर्पिता सर्वकामैश्च	२	६१	२

	काण्ड	सर्ग	श्लोक
तलप्रहारमशनेः	६	९६	२
तलेनाभिहनत्कश्चित्	४	४	५८
तलैरशनिकल्पश्च	४	१२	१८
तलैः स्फटिकचित्राङ्गैः	६	१२१	२८
तव कारुण्यसौहार्दात्	७	२५	४६
तव चेदं सुसदृशम्	५	६४	२०
तव चैव गुणैर्बद्धः	३	६६	४
तव चैव महाभागे	७	४६	१९
तव चैवाग्रतः प्राणान्	३	२१	१६
तव त्वहं क्षमं मन्ये	२	१९	१४
तव दुःखेन कैकेयि	२	७	२२
तव दूता महाराज	६	२०	७
तव देव प्रसादाच्च	४	३८	२६
तव पादुकयोर्न्यस्य	२	१२	२५
तव पित्रातितेजसा	१	४४	११
तव प्रसादाद्भवतु	१	१५	१८
तव प्रसादेन नृसिंह वीर	४	५	३०
तव बुद्धिर्महाबाहो	७	४०	१४
तव भक्त्या समायुक्तः	३	७३	१६
तव भार्यापहर्तारम्	६	४१	९
तव भार्या महाबाहो	४	६	८
तव मातुरसद्ग्राहम्	२	३५	१८
तव यज्ञस्य विघ्नाय	१	२८	२१
तव राज्यं नरव्याघ्र	२	१००	६
तव राम रणे शक्ताः	५	६०	२०
तव विश्रामहेतोस्तु	६	१०४	२१
तव शासनमाज्ञाय	७	४१	४
तव शुश्रूषणं मूर्ध्ना	२	४२	५४
तव सत्त्वं बलं चैव	५	३०	४२
तव सर्वमभिप्रायम्	२	३०	२८
तव हि मुखमिदं निरीक्ष्य कोपात्	४	३५	२३
तव हेतोर्विशालाक्षि	६	१३३	१७
तवादर्शनजं चापि	५	६८	६
तवादर्शनजः शोकः	५	३९	२३
तवादर्शनजेनार्य	५	३६	३७
तवादर्शनशोकेन	५	३५	४५
तवानुगमने राजन्	७	१०८	२०

	काण्ड	सर्ग	श्लोक
तवापमानप्रभवः	२	२२	२
तवापि कुब्जाः कुब्जायाः	२	९	५२
तवापि सुमहाभागे	२	७३	२४
तवामरसुतप्रख्य	२	५२	९
तवायं धर्मसंयोगः	२	२३	१४
तवार्थे पुरुषव्याघ्र	३	७४	१८
तवार्थे सद्गुणैर्युक्तः	२	४४	२
तवाहं चक्षुषा सौम्य	३	७४	१३
तवाहं पूर्वके भावे	७	१०४	२
तवाहृतौ नरव्याघ्रौ	३	४३	४
तवेष्टा ननु चैवेमा	४	२०	४५
तवैव तेजसा वीर	२	३१	१९
तवैव वंशे सगरः	२	३६	१६
तस्थुरेकान्तमाश्रित्य	४	२५	३९
तस्थौ तत्राङ्गदः श्रीमान्	५	५७	५२
तस्माच्च यज्ञायतनात्	४	३७	३२
तस्माज्जातोऽहमरुणात्	३	१४	३३
तस्माज्ज्येष्ठे हि कैकेयि	२	८	४२
तस्मात्कालप्रतीक्षोऽहम्	४	२८	६३
तस्मात्क्षिप्रं सहास्माभिः	६	१८	३८
तस्मात्तकापि ब्रह्मर्षे	७	५५	२०
तस्मात्तस्योपघातेन	२	३३	१३
तस्मात्तु मिथुनादेकम्	१	२	१०
तस्मात्पश्यतु काकुत्स्थ	२	८४	१३
तस्मात्पुत्र त्वमात्मानम	२	३	४६
तस्मात्पुत्रेषु दारेषु	७	५२	१२
तस्मात्पुरा दुहितरम्	७	१२	१०
तस्मात्प्रदास्ये विधिवत्	७	७६	३३
तस्मात्प्रवर्त्यतां यज्ञः	१	६०	७
तस्मात्प्रसीद शत्रुघ्न	५	५२	९
तस्मात्प्रासादमद्यैवम्	५	४३	२
तस्मात्त्वं गच्छ सौमित्रे	७	४५	२०
तस्मात्त्वं पुष्ययोगेन	२	३	४१
तस्मात्त्वयाद्यप्रभृति	२	४	२३
तस्मात्त्वया समारब्धम्	६	१२	३५
तस्मात्त्वं वस काकुत्स्थ	७	७२	१७
तस्मात्सज्जीभवार्य त्वम्	३	६९	२२

	काण्ड	सर्ग	श्लोक
तस्मात्स युवतीमन्याम्	७	२६	५५
तस्मात्सर्वास्ववस्थासु	३	४०	१४
तस्मात्सुदृष्टं कुरु जीव लोकम्	७	६८	२०
तस्मात्सुमन्त्रितं साधु	६	६	१५
तस्मादहं सहितः	७	६	४४
तस्मादनिर्वेदकरम्	५	१२	१२
तस्मादन्यत्र गच्छामः	२	११	४७
तस्मादपरितापः सन्	२	२२	२६
तस्मादर्घं गृहाण त्वम्	७	८७	२५
तस्मादाश्वसयात्मानम्	६	४६	४०
तस्मादाहारवीर्येण	४	५८	३०
तस्मादियं नरवरात्मज शुद्धभावा	७	९६	२३
तस्मादुत्सृज्य वैक्लव्यम्	६	४६	३७
तस्मादेकैकशस्तावत्	६	१७	३७
तस्मादेवं महाव्रह्म	७	२०	२३
तस्माद्गच्छ महाबाहो	७	११	४०
तस्माद्गृहीत्वा वैदेहीम	३	२४	१२
तस्मादण्डे महाबाहो	७	७९	१०
तस्माद्दशादपाक्रम्य	४	१०	६
तस्माद्धतहयाद्वीरः	६	९७	१७
तस्माद्यजामहे सर्वे	७	९०	१३
तस्माद्राजगृहादेव	२	८	२३
तस्माद्वै स्त्रीकृतेनैव	७	२४	२१
तस्मान्न लक्ष्मणे रामः	२	८	३२
तस्मान्नियत्यितां सीता	७	९८	८
तस्मान्नृत्यति रम्येषु	४	१	४१
तस्मान्मद्वीर्यसंयुक्ताः	७	१६	१७
तस्मान्मरीचिः संजज्ञे	१	७०	२०
तस्मान्माता पिता चेति	२	१०८	४
तस्मान्मामागतं भद्रे	२	६४	६०
तस्मान्मे शबलां देहि	१	५३	१०
तस्मिञ्जाते ततस्तस्मिन्	७	९	३०
तस्मिञ्जाते महासत्त्वे	७	९	३६
तस्मिञ्जाते जितं सर्वम्	७	२०	१७
तस्मिञ्शूद्रे हते देवाः	७	७६	५
तस्मिन्कालेऽपि कौसल्या	२	४	३२
तस्मिन्काले महातेजाः	७	२	१६

	काण्ड	सर्ग	श्लोक
तस्मिन्काले स धर्मात्मा	५	६७	१२६
तस्मिन्काले सुमित्रायाः	६	६७	१००
तस्मिन्क्षणे बभूवुश्च	३	२३	२४
तस्मिन्क्षणेऽभीक्ष्णमवेक्षमाणः	४	२४	२५
तस्मिन्गिरिवरे पुण्ये	४	३७	२८
तस्मिन्गीते तु विज्ञाय	७	९५	२
तस्मिन्गीते यथावृत्तम्	७	७१	१८
तस्मिन्दग्धे तदा कुक्षौ	६	२२	४०
तस्मिन्द्रवति संत्रस्ते	४	९	१०
तस्मिन्द्वापरसंख्ये तु	७	७४	२३
तस्मिन्नतिसुखे काले	२	६३	२०
तस्मिन्ननागच्छति लोकनाथे	५	२८	६
तस्मिन्नस्तमिते चाथ	७	३६	३८
तस्मिन्नार्जव संपन्ने	२	१२	२१
तस्मिन्नाहूयमानेऽस्ते	६	७५	२५
तस्मिन्निपतिते वीरे	७	६९	१३
तस्मिन्निर्मानुषेऽरण्ये	७	७७	२
तस्मिन्नेवंगते शब्दे	२	९१	२८
तस्मिन्नेव ततः काले	५	१९	१
तस्मिन्पापे कृतघ्ने तु	४	५५	७
तस्मिन्पुनर्जीवति धर्मराजे	२	२१	६१
तस्मिन्पुरवरे हृष्टाः	१	६	६
तस्मिन्प्रतिग्रहीते तु	४	३६	२
तस्मिन्प्रतिहतेऽस्ते तु	५	१००	१
तस्मिन्प्रतिहतेऽस्ते तु	६	१००	६
तस्मिन्प्रदेशे देवेश	७	८७	११
तस्मिन्प्रमग्ने त्रिदशेन्द्रशत्रौ	६	५९	१४४
तस्मिन्प्रविष्टे तु गुहाम	३	२४	१६
तस्मिन्प्रविष्टे पितुरन्तिकं तदा	२	१७	२२
तस्मिन्प्रविष्टे रजनीचरेन्द्रे	६	५९	१४३
तस्मिन्प्रविष्टे लङ्कायाम्	३	४७	१
तस्मिन्प्रवृत्ते तुमुले विमर्दे	६	६९	६५
तस्मिन्प्रवृद्धेऽसमसानुवृक्षे	६	५९	३८
तस्मिन्प्रशासति तदा	७	८४	७
तस्मिन्प्रहस्तुकामे तु	७	२२	३७
तस्मिन्प्लवगशार्दूले	५	१	८५
तस्मिन्प्लवगशार्दूले	६	६७	५०

	काण्ड	सर्ग	श्लोक
तस्मिन्बिल्वा: कपित्थाश्च	२	९१	३०
तस्मिन्महति संग्रामे	२	९	१४
तस्मिन्महाभीषणके प्रवृत्ते	६	४१	९९
तस्मिन्यज्ञवरे नाज्ञ:	७	९२	१४
तस्मिन्यज्ञसमाप्ते च	७	३०	१४
तस्मिन्युगे प्रज्वलिते	७	७४	१५
तस्मिन्येऽपि समापन्ना:	७	११०	२७
तस्मिन्वरास्त्रे तु नियुज्यमाने	६	७१	९९
तस्मिन्वालिनि दुर्वृत्ते	४	५	२७
तस्मिन्विकृष्टे सहसा	६	२२	६
तस्मिन्विनिहते भूमौ	६	९८	२३
तस्मिन्संतप्यमाने तु	१	६३	२५
तस्मिन्संधीयमाने तु	६	१०८	१५
तस्मिन्संध्यामुपासित्वा	७	३४	२९
तस्मिन्संभाविशद्राम:	२	८७	२१
तस्मिन्संपीड्यमाने तु	६	७४	६
तस्मिन्संभ्रियमाणे तु	३	४७	६
तस्मिन्संभ्रियमाणे तु	५	३३	१९
तस्मिन्सरसि तप्यन्तम्	७	७५	१४
तस्मिन्सहस्राक्षसमप्रभावे	३	४७	४८
तस्मिन्सौमित्रिरञ्जलिं कृत्वा	२	५५	७
तस्मिन्हते दैवरिपौ त्रिशीर्षे	६	७०	४८
तस्मिन्हते ब्राह्मणदेवशत्रौ	६	६७	१७१
तस्मिन्हते भीमपराक्रमेण	६	७६	९३
तस्मिन्हते भ्रातरि रावणस्य	६	७०	६६
तस्मिन्हते राक्षसयौधमुख्ये	६	७०	२६
तस्मिन्हते राक्षससैन्यपाले	६	५९	१
तस्मिंश्च निहते पापे	६	८९	९
तस्मिंस्तत: संयति जातहर्षे	५	४८	२२
तस्मिंस्तथा जल्पति विप्रमुख्ये	२	३७	३७
तस्मिंस्तथा ब्रुवाणे तु	७	६८	१३
तस्मिंस्तदाश्रमपदे	२	९	१८
तस्मिंस्तमसि दुष्पारे	६	४४	६
तस्मिंस्तु काले हनुमान्	६	८६	१८
तस्मिंस्तु धरणी देवी	७	९७	१९
तस्मिंस्तु पतिते चापि	७	३५	४८
तस्मिंस्तु पुरुषव्याघ्रे	२	२०	१

	काण्ड	सर्ग	श्लोक
तस्मिंस्तु पुरुषव्याघ्रे	२	४१	१
तस्मिंस्तूर्यशतै: कीर्णे	७	११०	७
तस्मै तु दत्तं परमास्त्रमेतत्	६	७४	४
तस्मै दत्तं नृपतिना	२	२६	२७
तस्मै दत्त्वा तदा सिद्धम्	१	७५	६
तस्मै दृढ़तरं क्रुद्ध:	६	९०	४१
तस्मै दृढ़धन: क्रुद्ध:	६	९०	४४
तस्मै राज्यं समादिश्य	१	४२	३
तस्मै रामो महातेजा:	७	१०३	८
तस्मै सर्वं यथातत्त्वम्	७	२६	४६
तस्मै हस्त्युत्तमांश्रितान्	२	७०	१९
तस्य कल्माषपादस्य	७	६५	३८
तस्य काञ्चनखण्डेषु	४	४३	१८
तस्य काञ्चनचित्राङ्गम्	६	४३	१९
तस्य कामपरीतस्य	६	१२	२७
तस्य कार्मुकनिर्युक्तै:	६	७५	३९
तस्य कोटिदिवं स्पृष्ट्वा	४	४०	५५
तस्य क्रुद्धस्य नेत्राभ्याम्	५	४२	२३
तस्य क्रुद्धस्य नेत्राभ्याम्	६	९२	२२
तस्य क्रुद्धस्य रामस्य	३	६४	७२
तस्य क्रुद्धस्य रोषेण	६	५२	३४
तस्य गात्रेषु पतिता	६	६६	११
तस्य चन्द्रनिकाशेषु	४	४३	२४
तस्य च व्यसनाभावात्	६	८३	१८
तस्य चिन्तयतो नित्यम्	१	४२	७
तस्य चिन्तयमानस्य	१	४	४
तस्य चिन्तयमानस्य	२	२२	४
तस्य चैकतमे देशे	५	१०	३
तस्य चैव शिरो नास्ति	५	४४	१७
तस्य चैवं प्रभावस्य	१	८	१
तस्य चैवं ब्रुवाणस्य	४	१२	२९
तस्य चैवागमं राम:	७	९४	२२
तस्य छिद्राणि मार्गस्व	६	५९	४९
तस्य जज्ञे तत: श्रीमान्	६	५६	२७
तस्य जाज्वल्यमाणस्य	६	६०	५८
तस्य जाम्बनदै: शृङ्गै	५	१	९८
तस्य जृम्भितविक्षेपात्	६	७५	४५

	काण्ड	सर्ग	श्लोक
तस्य ज्यातलघोषेण	४	१६	३४
तस्य ज्यातलनिर्घोषम्	५	८८	३८
तस्य ज्याविप्रमुक्तास्ते	३	५६	७
तस्य ज्येष्ठोऽसि दायादः	२	११०	३५
तस्य तच्छासनं श्रुत्वा	६	३१	४
तस्य तच्छिरसा वाक्यम्	६	११४	१८
तस्य तच्छुशुभे ताम्रम्	५	४४	७
तस्य तच्छुशुभे ताम्रम्	५	४४	८
तस्य तच्छुशुभे भूयः	६	७६	३६
तस्य तद्भाषितं श्रुत्वा	७	५७	३
तस्य तद्वचनं श्रुत्वा	१	३२	१८
तस्य तद्वचनं श्रुत्वा	१	३३	१
तस्य तद्वचनं श्रुत्वा	१	३६	३
तस्य तद्वचनं श्रुत्वा	१	४१	१०
तस्य तद्वचनं श्रुत्वा	१	४५	८
तस्य तद्वचनं श्रुत्वा	१	४५	१३
तस्य तद्वचनं श्रुत्वा	१	४८	७
तस्य तद्वचनं श्रुत्वा	१	५०	२२
तस्य तद्वचनं श्रुत्वा	१	५१	१
तस्य तद्वचनं श्रुत्वा	१	५४	१८
तस्य तद्वचनं श्रुत्वा	१	६२	८
तस्य तद्वचनं श्रुत्वा	१	७५	५
तस्य तद्वचनं श्रुत्वा	२	५४	१७
तस्य तद्वचनं श्रुत्वा	२	५६	२०
तस्य तद्वचनं श्रुत्वा	३	८५	५
तस्य तद्वचनं श्रुत्वा	३	१२	१५
तस्य यद्वचनं श्रुत्वा	३	२०	२
तस्य तद्वचनं श्रुत्वा	२	५६	४६
तस्य तद्वचनं श्रुत्वा	४	४	५
तस्य तद्वचनं श्रुत्वा	४	१०	३५
तस्य तद्वचनं श्रुत्वा	४	२	१८
तस्य तद्वचनं श्रुत्वा	४	२	३१
तस्य तद्वचनं श्रुत्वा	४	२	८२
तस्य तद्वचनं श्रुत्वा	४	२३	१६
तस्य तद्वचनं श्रुत्वा	४	२६	२८
तस्य तद्वचनं श्रुत्वा	४	५६	६

	काण्ड	सर्ग	श्लोक
तस्य तद्वचनं श्रुत्वा	४	३	३५
तस्य तद्वचनं श्रुत्वा	४	३६	१८
तस्य तद्वचनं श्रुत्वा	४	३६	१
तस्य तद्वचनं श्रुत्वा	४	६०	१
तस्य तद्वचनं श्रुत्वा	४	२२	२३
तस्य तद्वचनं श्रुत्वा	४	४७	११
तस्य तद्वचनं श्रुत्वा	४	५७	१६
तस्य तद्वचनं श्रुत्वा	४	६७	१३०
तस्य तद्वचनं श्रुत्वा	४	७८	७
तस्य तद्वचनं श्रुत्वा	४	८३	१०
तस्य तद्वचनं श्रुत्वा	६	८५	१
तस्य तद्वचनं श्रुत्वा	६	६५	६
तस्य तद्वचनं श्रुत्वा	६	६५	२२
तस्त तद्वचनं श्रुत्वा	६	११३	२३
तस्य तद्वचनं श्रुत्वा	६	११४	१३
तस्य तद्वचनं श्रुत्वा	६	११४	२०
तस्य तद्वचनं श्रुत्वा	६	१२८	४६
तस्य तद्वचनं श्रुत्वा	७	२	१
तस्य तद्वचनं श्रुत्वा	७	२६	६
तस्य तद्वचनं श्रुत्वा	७	५६	६
तस्य तद्वचनं श्रुत्वा	७	६०	१५
तस्य तद्वचनं श्रुत्वा	७	६७	३
तस्य तद्वचनं श्रुत्वा	७	७६	१
तस्य तद्वचनं श्रुत्वा	७	८६	५
तस्य तद्वचनं श्रुत्वा	७	८६	२१
तस्य तद्वचनं श्रुत्वा	७	६५	१४
तस्य तद्वचनं श्रुत्वा	७	१०३	३
तस्य तं निश्चयं ज्ञात्वा	७	२६	१०
तस्य त्वं रथमास्थाय	६	४३	२२
तस्य तल्लोकनाथस्य	७	५६	१६
तस्य तं स्वरमाज्ञाय	७	५३	१३
तस्य तां पार्थिवेन्द्रस्य	७	६५	३६
तस्य तां बुद्धिमक्लीबाम्	७	१०८	१६
तस्य तीक्ष्णनखाभ्यां तु	३	५१	६
तस्य तीर्थेषु रम्येषु	४	४०	३४
तस्य तुष्टोऽभवद्राजा	६	३१	१०

	का०	स०	श्लो०
तस्य ते त्रिषु लोकेषु	६	२०	२६
तस्य तेन प्रतिज्ञातम्	५	५१	६
तस्य ते युद्धकामस्य	७	६८	१७
तस्य ते रथसंयुक्ता:	६	७८	१८
तस्य ते विग्रहे ताभ्याम्	५	२१	३२
तस्य ते वीरकार्यस्य	४	६५	३४
तस्य त्वनन्तरं जात:	७	६	३४
तस्य त्वं कुरु वै कार्यम्	४	२६	१८
तस्य त्वं राक्षसेन्द्रस्य	५	२३	११
तस्य त्विदानीं श्रुत्वा मे	७	१३	३८
तस्य त्वेवं ब्रुवाणस्य	७	८०	७
तस्य दक्षिणमन्वागात्	२	४२	४
तस्य दीक्षा समाप्ता हि	७	७६	१७
तस्य दुर्बुद्धिता राजन्	५	५८	११४
तस्य दुष्प्रतिवीक्ष्यं तत्	२	२३	३
तस्य दृष्ट्वा मुखं देवी	६	३३	२२
तस्य देवप्रभावस्य	३	५	४
तस्य देवर्षय: सर्वे	६	३५	११
तस्य देववती नाम	७	५	२
तस्य देवसमानस्य	२	१०४	११
तस्य धर्मकृतादेशा:	४	१८	६
तस्य धर्मात्मन: पत्नीम्	५	२२	१६
तस्य धर्मात्मनो देवि	२	१२	२२
तस्य धर्मार्थविदुष:	२	२	१६
तस्य नानद्यमानस्य	६	६१	१६
तस्य नानद्यमानस्य	६	७४	४३
तस्य निर्याणघोषेण	६	५०	३३
तस्य निष्कर्षत: शक्तिम्	६	१००	४४
तस्य निष्क्रममाणस्य	२	१६	३४
तस्य नि:श्वासवातेन	६	६०	४१
तस्य निष्पततस्तूर्णम्	६	६५	४०
तस्य नेर्ऋतराजस्य	५	२३	१८
तस्य नेवास्थि न शिर:	७	२७	५०
तस्य पत्नी महाभागा	७	६१	१६
तस्य पादौ च संगृह्य	३	५	२६
तस्य पापमभिप्रायम्	७	६७	६
तस्य पुत्रद्वयं ब्रह्मन्	७	७८	४

	का०	स०	श्लो०
तस्य पुत्र: प्रियो ज्येष्ठ	५	३१	५
तस्य पुत्रद्वयं राज्ञ:	१	७१	१३
तस्य पुत्रौ महातेजा	१	४७	१७
तस्य पुत्रो मिथिनमि	१	७१	४
तस्य पुत्रो विशालाक्षि	५	२३	८
तस्य पेतुर्नगा भूमौ	६	७४	३८
तस्य प्रकृत्या रक्ते च	६	६२	२०
तस्य प्रयागे रामस्य	२	५४	३४
तस्य प्रविष्टस्य विनम्	४	६	१५
तस्य प्रादुरभूच्चिन्ता	५	२	४०
तस्य बाणगणानेव	६	५८	४१
तस्य बाणपथं प्राप्य	६	७६	६२
तस्त बाणान्तराद्रक्तम्	३	३०	२१
तस्य बाणा पतन्तस्ते	७	१६	२१
तस्य बाणैश्च चिच्छेद	६	१००	१६
तस्य बाणै: सुविध्वस्तम्	६	८८	५४
तस्य बाहूरूवेगं च	५	५७	२४
तस्य बुद्धिं च विज्ञाय	६	१२५	१८
तस्य बुद्धिरियं जाता	१	२	४१
तस्य बुद्धिरियं जाता	२	११८	३८
तस्य बुद्धि: समुत्पन्ना	६	१०१	३३
तस्य बुद्धि: समुत्पन्ना	७	५५	७
तस्य बुद्धि: समुत्पन्ना	७	७०	१६
तस्य बुद्धि: समुत्पन्ना	७	८४	६
तस्य भार्या जरस्थानात्	४	५०	६
तस्य भार्या जनस्थाने	५	५१	७
तस्य भार्या बभूवेष्टा	७	३५	२०
तस्य भूमौ शयानस्य	२	५०	४६
तस्य मार्गं समारूढ्य	७	४२	३२
तस्य माला च देहश्च	४	१७	७
तस्य मां विद्धि भृत्यं त्वम्	५	५८	६८
तस्य मूर्ध्ना प्रणम्य त्वम्	४	३२	२१
तस्य मूर्ध्ना प्रणामं त्वम्	४	३१	५०
तस्य मे कुरू साचिव्यम्	३	३१	४१
तस्य मे कृच्छ्रभूतस्य	७	७८	२२
तस्य मे दासभूतस्य	२	१०१	८
तस्य मे युद्धकामस्य	७	६८	१२

	काण्ड	सर्ग	श्लोक
तस्य ज्यातलघोषेण	४	१६	३४
तस्य ज्यातलनिर्घोषम्	५	८८	३८
तस्य ज्याविप्रमुक्तास्ते	३	५६	७
तस्य ज्येष्ठोऽसि दायादः	२	११०	३५
तस्य तच्छासनं श्रुत्वा	६	३१	४
तस्य तच्छिरसा वाक्यम्	६	११४	१८
तस्य तच्छुशुभे ताम्रम्	५	४४	७
तस्य तच्छुशुभे ताम्रम्	५	४४	८
तस्य तच्छुशुभे भूयः	६	७६	३६
तस्य तद्भाषितं श्रुत्वा	७	५७	३
तस्य तद्वचनं श्रुत्वा	१	३२	१८
तस्य तद्वचनं श्रुत्वा	१	३३	१
तस्य तद्वचनं श्रुत्वा	१	३६	३
तस्य तद्वचनं श्रुत्वा	१	४१	१०
तस्य तद्वचनं श्रुत्वा	१	४५	८
तस्य तद्वचनं श्रुत्वा	१	४५	१३
तस्य तद्वचनं श्रुत्वा	१	४८	७
तस्य तद्वचनं श्रुत्वा	१	५०	२२
तस्य तद्वचनं श्रुत्वा	१	५१	१
तस्य तद्वचनं श्रुत्वा	१	५४	१८
तस्य तद्वचनं श्रुत्वा	१	६२	८
तस्य तद्वचनं श्रुत्वा	१	७५	५
तस्य तद्वचनं श्रुत्वा	२	५४	१७
तस्य तद्वचनं श्रुत्वा	२	५६	२०
तस्य तद्वचनं श्रुत्वा	३	८५	५
तस्य तद्वचनं श्रुत्वा	३	१२	१५
तस्य यद्वचनं श्रुत्वा	३	२०	२
तस्य तद्वचनं श्रुत्वा	२	५६	४६
तस्य तद्वचनं श्रुत्वा	४	४	५
तस्य तद्वचनं श्रुत्वा	४	१०	३५
तस्य तद्वचनं श्रुत्वा	४	२	१८
तस्य तद्वचनं श्रुत्वा	४	२	३१
तस्य तद्वचनं श्रुत्वा	४	२	८२
तस्य तद्वचनं श्रुत्वा	४	२३	१६
तस्य तद्वचनं श्रुत्वा	४	२६	२८
तस्य तद्वचनं श्रुत्वा	४	५६	६

	काण्ड	सर्ग	श्लोक
तस्य तद्वचनं श्रुत्वा	४	३	३५
तस्य तद्वचनं श्रुत्वा	४	३६	१८
तस्य तद्वचनं श्रुत्वा	४	३६	१
तस्य तद्वचनं श्रुत्वा	४	६०	१
तस्य तद्वचनं श्रुत्वा	४	२२	२३
तस्य तद्वचनं श्रुत्वा	४	४७	११
तस्य तद्वचनं श्रुत्वा	४	५७	१६
तस्य तद्वचनं श्रुत्वा	४	६७	१३०
तस्य तद्वचनं श्रुत्वा	४	७८	७
तस्य तद्वचनं श्रुत्वा	४	८३	१०
तस्य तद्वचनं श्रुत्वा	६	८५	१
तस्य तद्वचनं श्रुत्वा	६	६५	६
तस्य तद्वचनं श्रुत्वा	६	६५	२२
तस्त तद्वचनं श्रुत्वा	६	११३	२३
तस्य तद्वचनं श्रुत्वा	६	११४	१३
तस्य तद्वचनं श्रुत्वा	६	११४	२०
तस्य तद्वचनं श्रुत्वा	६	१२८	४६
तस्य तद्वचनं श्रुत्वा	७	२	१
तस्य तद्वचनं श्रुत्वा	७	२६	६
तस्य तद्वचनं श्रुत्वा	७	५६	६
तस्य तद्वचनं श्रुत्वा	७	६०	१५
तस्य तद्वचनं श्रुत्वा	७	६७	३
तस्य तद्वचनं श्रुत्वा	७	७६	१
तस्य तद्वचनं श्रुत्वा	७	८६	५
तस्य तद्वचनं श्रुत्वा	७	८६	२१
तस्य तद्वचनं श्रुत्वा	७	६५	१४
तस्य तद्वचनं श्रुत्वा	७	१०३	३
तस्य तं निश्चयं ज्ञात्वा	७	२६	१०
तस्य त्वं रथमास्थाय	६	४३	२२
तस्य तल्लोकनाथस्य	७	५६	१६
तस्य तं स्वरमाज्ञाय	७	५३	१३
तस्य तां पार्थिवेन्द्रस्य	७	६५	३६
तस्य तां बुद्धिमक्लीबाम्	७	१०८	१६
तस्य तीक्ष्णनखाभ्यां तु	३	५१	६
तस्य तीर्थेषु रम्येषु	४	४०	३४
तस्य तुष्टोऽभवद्राजा	६	३१	१०

	का०	स०	श्लो०
तस्य ते त्रिषु लोकेषु	६	२०	२६
तस्य तेन प्रतिज्ञातम्	५	५१	६
तस्य ते युद्धकामस्य	७	६८	१७
तस्य ते रथसंयुक्ताः	६	७८	१८
तस्य ते विग्रहे ताभ्याम्	५	२१	३२
तस्य ते वीरकार्यस्य	४	६५	३४
तस्य त्वनन्तरं जातः	७	६	३४
तस्य त्वं कुरु वै कार्यम्	४	२६	१८
तस्य त्वं राक्षसेन्द्रस्य	५	२३	११
तस्य त्विदानीं श्रुत्वा मे	७	१३	३८
तस्य त्वेवं ब्रुवाणस्य	७	८०	७
तस्य दक्षिणमन्वागात्	२	४२	४
तस्य दीक्षा समाप्ता हि	७	७६	१७
तस्य दुर्बुद्धिता राजन्	५	५८	११४
तस्य दुष्प्रतिवीक्ष्यं तत्	२	२३	३
तस्य दृष्ट्वा मुखं देवी	६	३३	२२
तस्य देवप्रभावस्य	३	५	४
तस्य देवर्षयः सर्वे	६	३५	११
तस्य देवती नाम	७	५	२
तस्य देवसमानस्य	२	१०४	११
तस्य धर्मकृतादेशाः	४	१८	६
तस्य धर्मात्मनः पत्नीम्	५	२२	१६
तस्य धर्मात्मनो देवि	२	१२	२२
तस्य धर्मार्थविदुषः	२	२	१६
तस्य नानद्यमानस्य	६	६१	१६
तस्य नानद्यमानस्य	६	७४	४३
तस्य निर्याणघोषेण	६	५०	३३
तस्य निष्कर्षतः शक्तिम्	६	१००	४४
तस्य निष्क्रममाणस्य	२	१६	३४
तस्य निःश्वासवातेन	६	६०	४१
तस्य निष्पततस्तूर्णम्	६	६५	४०
तस्य नैर्ऋतराजस्य	५	२३	१८
तस्य नैवास्थि न शिरः	७	२७	५०
तस्य पत्नी महाभागा	७	६१	१६
तस्य पादौ च संगृह्य	३	५	२६
तस्य पापमभिप्रायम्	७	६७	६
तस्य पुत्रद्वयं ब्रह्मन्	७	७८	४

	का०	स०	श्लो०
तस्य पुत्रः प्रियो ज्येष्ठ	५	३१	५
तस्य पुत्रद्वयं राज्ञः	१	७१	१३
तस्य पुत्रौ महातेजा	१	४७	१७
तस्य पुत्रो मिथिनमि	१	७१	४
तस्य पुत्रो विशालाक्षि	५	२३	८
तस्य पेतुर्नगा भूमौ	६	७४	३८
तस्य प्रकृत्या रक्ते च	६	६२	२०
तस्य प्रयागे रामस्य	२	५४	३४
तस्य प्रविष्टस्य विनम्	४	६	१५
तस्य प्रादुरभूच्चिन्ता	५	२	४०
तस्य बाणगणानेव	६	५८	४१
तस्य बाणपथं प्राप्य	६	७६	६२
तस्त बाणान्तराद्रक्तम्	३	३०	२१
तस्य बाणा पतन्तस्ते	७	१६	२१
तस्य बाणैश्च चिच्छेद	६	१००	१६
तस्य बाणैः सुविध्वस्तम्	६	८८	५४
तस्य बाहूरुवेगं च	५	५७	२४
तस्य बुद्धिं च विज्ञाय	६	१२५	१८
तस्य बुद्धिरियं जाता	१	२	४१
तस्य बुद्धिरियं जाता	२	११८	३८
तस्य बुद्धिः समुत्पन्ना	६	१०१	३३
तस्य बुद्धिः समुत्पन्ना	७	५५	७
तस्य बुद्धिः समुत्पन्ना	७	७०	१६
तस्य बुद्धिः समुत्पन्ना	७	८४	६
तस्य भार्या जरस्थानात्	४	५०	६
तस्य भार्या जनस्थाने	५	५१	७
तस्य भार्या बभूवेष्टा	७	३५	२०
तस्य भूमौ शयानस्य	२	५०	४६
तस्य मार्गं समारूढ्य	७	४२	३२
तस्य माला च देहश्च	४	१७	७
तस्य मां विद्धि भृत्यं त्वम्	५	५८	६८
तस्य मूर्ध्ना प्रणम्य त्वम्	४	३२	२१
तस्य मूर्ध्ना प्रणामं त्वम्	४	३१	५०
तस्य मे कुरु साचिव्यम्	३	३१	४१
तस्य मे कृच्छ्रभूतस्य	७	७८	२२
तस्य मे दासभूतस्य	२	१०१	८
तस्य मे युद्धकामस्य	७	६८	१२

	का०	स०	श्लो०
तस्य यानं च दासीश्च	२	३२	१६
तस्य राक्षसराजस्य	५	१०	२४
तस्य राक्षसराजस्य	६	६३	१
तस्य राक्षसराजस्य	७	२५	४०
तस्य राक्षससैन्यस्य	७	२७	२
तस्य राज्यं च कीर्तिश्च	४	२९	२
तस्य रामकथां श्रुत्वा	३	३६	२२
तस्य रामस्य सुप्तस्य	६	२१	१०
तस्य रामेण विद्धस्य	६	६०	१७
तस्य रूपमरण्यस्य	७	७७	३
तस्य रूपं शरस्यासीत्	७	२१	४२
तस्य रोमाणि केशांश्च	३	५	३९
तस्य रोषपरीतस्य	१	२१	४
तस्य रोषः समभवत्	७	३१	३
तस्य रोषाभिभूतस्य	७	६८	९
तस्य रौद्रस्य सौमित्रिः	३	४	५
तस्यर्क्षराजस्तेजस्वी	६	९८	८
तस्यर्षेः परमोदारम्	१	२३	३
तस्य लाङ्गूलमाविद्धम्	५	१	२२
तस्य लाङ्गूलहस्तस्य	२	११८	२८
तस्य वर्म च पुस्फोट	६	७६	८६
तस्य वाक्यं यदि रुचिः	४	३१	३४
तस्य वाक्यस्य वाक्यान्ते	७	१०८	१७
तस्य वानरराजस्य	४	३७	१६
तस्य वानरशार्दूल	६	७४	३२
तस्य वानरसिंहस्य	५	१	६२
तस्य विक्रमसंपन्नाः	५	३९	३५
तस्य विक्रमसंपन्नाः	५	६८	१८
तस्य विद्युत्प्रभाकाटे	५	१	५६
तस्य विश्रममाणस्य	१	६२	२
तस्य विस्फारघोषेण	५	४४	४
तस्य वीर्यवतः किञ्चत्	५	३८	४३
तस्य वेगप्रविद्धस्य	४	२	४८
तस्य वेगसमुदघुष्टम्	५	१	७१
तस्य वेगसमुद्भूतैः	५	१	५३
तस्य वेगेन तत्रासीत्	६	७६	८७
तस्य वै नरसिंहस्य	३	३७	१९
तस्य वै यजमानस्य	१	६१	६
तस्य व्यापृच्छमानस्य	३	५१	४२
तस्य शब्दं सुमधुरम्	७	७२	२
तस्य शब्दो महानासीत्	१	६७	१८
तस्य शापेन महता	१	६४	१५
तस्य शिष्यास्ततः सर्वे	१	२	३९
तस्य शैलस्य पृष्ठेषु	४	४०	६५
तस्य शैलस्य शिखरे	४	२७	४
तस्य शैलस्य सानूनि	३	६१	२१
तस्य सत्याभिसंधस्य	५	३१	७
तस्य संत्वरमाणस्य	३	५७	२
तस्य सदिदिहे बुद्धि	५	१५	३८
तस्य संनादशब्देद	५	४२	३७
तस्य सर्वसमृद्धस्य	५	२३	१५
तस्य संस्तूयमानस्य	४	६७	५
तस्य सा कायमुद्वीक्ष्य	५	१	१८१
तस्य साध्वनुमन्यन्त	२	१०५	१३
तस्य सानुसु कूजिन्त	६	४	८६
तस्य सा शर्वरी सर्वा	१	४५	४
तस्य साहाय्यमस्माभिः	५	५८	१४२
तस्य सीता हृता भार्या	५	५८	२६
तस्य सूतस्तदा दिव्यम्	७	२२	३
तस्य सैन्यस्य सर्वस्य	३	२६	३६
तस्य हर्म्यस्य मध्यस्थ	५	९	१०
तस्य हस्ताद्धतस्याशु	६	१०८	२१
तस्य कन्यात्रयं ह्यासीत्	७	५	३१
तस्य कौशेयमुद्भूतम्	३	५२	१७
तस्यां गङ्गेयमभवत्	१	३५	१५
तस्यां गतायां गहनम्	३	६९	१९
तस्यां चाति कथं वृत्तः	५	५८	४
तस्यां चीरं वसानायाम्	२	३८	१
तस्यां पुर्यामयोध्यायाम्	१	६	१
तस्यां रजन्यां व्युष्टायाम्	७	३७	२
तस्यां रजन्यां व्युष्टायाम्	७	७२	३
तस्यां रजन्यां व्युष्टायाम्	७	९६	१
तस्यां रात्र्यां व्यतीतायाम्	२	११९	१७
तस्यां रात्र्यां व्यतीतायाम्	३	११	७१

	का०	स०	श्लो०
तस्यां रात्र्यां व्यतीतायाम्	४	६४	११
तस्यां वसत दुर्धर्षाः	७	५	२६
तस्यां वस्त्रं विशालाक्ष्याः	४	६६	१२
तस्यां विलपितं श्रुत्वा	४	२०	२३
तस्यां स फलके खड्गम्	६	७६	१०
तस्यां हुंकारतो जाताः	१	५५	२
तस्यां ह्याकृष्यमाणायाम्	२	७८	१७
तस्याः परमकल्याण्याः	३	५२	१६
तस्याः पुत्रं महात्मानम्	२	७३	११
तस्याः पुत्रो महावीर्यः	७	६१	१७
तस्याः पुनर्बिम्बफलोपमोष्ठम्	५	२६	७
तस्याः प्रसन्नो ब्रह्मर्षिः	१	३३	१८
तस्याः स्फटिकसंकाशम्	२	३०	२४
तस्यागस्त्यो बहुगुणम्	७	८२	३
तस्याग्निदीप्तसदृशे	६	६०	६१
तस्याग्रमधिरूढास्ते	४	४६	१८
तस्याग्रे मुसलस्याग्निः	७	३२	४४
तस्याङ्गदः सरोषाक्षः	६	६८	१३
तस्यातिथ्यं च कृत्वा वै	७	३०	४४
तस्यातिथ्येन दुर्वृत्ते	१	४८	३२
तस्याथ नर्दमानस्य	६	५६	१४
तस्या दिव्या मनस्तस्मिन्	५	१५	५१
तस्या निमित्तं सीतायाः	३	६४	४२
तस्यानीकस्य महतः	६	८६	३
तस्यानुरूपो बलवान्	३	३१	१६
तस्यान्तरं विदित्वा च	१	४८	१७
तस्यान्तरिक्षे चरतः	६	८५	१६
तस्यान्ववाये राजानः	६	१२८	६५
तस्यापहर भार्यां त्वम्	२	३१	३१
तस्यापि हि भवेदस्मिन्	२	२२	१०
तस्याप्रदानान्महर्षे	१	७१	१८
तस्या प्रवेशं ज्ञात्वाहम्	४	११	६५
तस्याभिपतमानस्य	३	२६	१३
तस्याभिप्रायमाज्ञाय	३	३	२२
तस्याभिवादनं कृत्वा	७	२०	२
तस्याभिसंक्रम्य रथं सच	६	५६	१३५
तस्याभूत्सुमहांस्त्रासः	५	५५	२

	का०	स०	श्लो०
तस्या भीषणघोषेण	३	५२	२५
तस्याभ्याशे तु मिथुनम्	१	२	६
तस्यामग्निं विशन्त्यां तु	६	११६	३४
तस्यामात्या गुणैरासन्	१	७	१
तस्याम्बरगतौ बाहू	५	१	५४
तस्यायं कर्मणः प्राप्तः	६	६८	२३
तस्यायं कर्मणो देवि	२	६४	५६
तस्यायमाश्रमः पुण्यः	१	२३	५०
तस्यायमाश्रमो भ्रातुः	३	११	६७
तस्यायं पूर्वजः पुत्रः	४	४	२३
तस्यारण्यस्य मध्ये तु	७	७७	४
तस्या लयवरिष्ठस्य	५	६	१
तस्या विशोकानि तदा बहूनि	५	२८	१६
तस्याः शङ्कामयं दुःखम्	२	२२	७
तस्याः शरीरविवरम्	१	४६	१८
तस्याः शुभं वाममरालपक्ष्म	५	२६	२
तस्याश्चानृजुवृत्तायाः	३	१६	१६
तस्याश्चाप्यनुरूपेयम्	५	१४	५०
तस्याश्चास्यं महद् भीमम्	५	५८	४२
तस्याश्रमपदस्थस्य	७	३	१०
तस्याश्रमपदाभ्याशे	४	६०	१२
तस्या सकाशं दूतोऽहम्	५	१	१४७
तस्यासनानि प्रासादान्	७	२१	२६
तस्याः सा दीर्घबहुला	५	२५	६
तस्यासीद्वीर्यवान्पुत्रः	६	७१	२८
तस्यास्तदद्भुतप्रख्यम्	७	८६	७
तस्याः स्तनान्तराद्भ्रष्टः	३	५२	३३
तस्यास्तद्वचनं श्रुत्वा	१	४६	४
तस्यास्तद्वचनं श्रुत्वा	२	११८	१६
तस्यास्तद्वचनं श्रुत्वा	३	४	४
तस्यास्तद्वचनं श्रुत्वा	४	५२	३
तस्यास्तद्वचनं श्रुत्वा	५	३४	१
तस्यास्तद्वचनं श्रुत्वा	५	३४	८
तस्यास्तद्वचनं श्रुत्वा	६	११३	४८
तस्यास्तद्वचनं श्रुत्वा	६	११४	२२
तस्यास्तद्वचनं श्रुत्वा	७	४६	३२
तस्यास्तद्वचनं श्रुत्वा	७	५८	२२

	का०	स०	श्लो०
तस्यास्तद्विमलं वक्त्रम्	३	५२	१८
तस्यास्तान्यग्निवर्णानि	१	३५	२८
तस्यास्तीरे तदा सर्वे	५	५८	६
तस्यास्तु दर्शनाकाङ्क्षी	५	५८	१३४
तस्यास्तु शीलवृत्ताभ्याम्	७	२	२६
तस्यास्त्रां गाधिपुत्रस्य	१	५६	५
तस्यास्फोटितशब्देन	५	४२	३२
तस्यास्फोटितशब्देन	५	४३	७
तस्यास्य वसतोऽरण्ये	४	५	६
तस्यास्यात्तु प्रवृत्तेन	४	१०	२१
तस्याहं कुर्वतो नित्यम्	७	१७	६
तस्याहमुत्तरं कालम्	२	८८	२७
तस्याहं लोकपालस्य	७	५०	१६
तस्याहं शीघ्रवेगस्य	४	६७	१०
तस्याहं स्वर्गिणो वाक्यम्	७	७८	२६
तस्या हेतोर्विशालाक्ष्याः	५	३१	१४
तस्येत्थं ब्रुवतश्चिन्ता	१	२	१६
तस्येदमाश्रमपदम्	३	११	८३
तस्येन्द्रकल्पस्य दुरासदस्य	४	२४	२६
तस्येमे स्वर्गभूतस्य	७	७८	११
तस्यैकं काञ्चनं शृङ्गम्	४	४१	३०
तस्यैकां पर्णबहुलाम्	४	८	१३
तस्यैतत्क्रोधसंयुक्तम्	२	३६	१५
तस्यैते निशितास्तीक्ष्णाः	६	८४	१६
तस्यैतौ राक्षसेन्द्रस्य	६	२५	१४
तस्यैवं चिन्तमानस्य	७	५२	४
तस्यैवं तपसो विघ्नम्	३	६	१७
तस्यैवं तपसो व्युष्ट्या	६	६२	२७
तस्यैवं तु वधे यत्नम्	६	८०	४०
तस्यैवं त्वमनर्थाय	२	१२	६
तस्यैवं ब्रुवतोऽमात्याः	२	८३	२५
तस्यैवं ब्रुवतो राजा	७	१६	२६
तस्यैवं भाषमाणस्य	७	६८	८
तस्यैवं भाषितं श्रुत्वा	७	४३	२१
तस्यैवं रथचक्रेण	६	४१	३१
तस्यैवं वचनं श्रुत्वा	७	२२	३१
तस्यैवं सदृशं चान्यत्	६	१०७	५५
तस्यैषा धर्मराजस्य	२	८१	६
तस्योग्ररूपस्योग्रं त्वम्	५	४२	२०
तस्यौत्पतनवेगेन	६	४१	८७
तस्योपवनखण्डेषु	५	३८	१४
तस्योरसि निमग्नास्ते	६	६७	११६
तस्योरुवेगोन्मथिताः	५	५६	४४
(ता)			
तां ततः संपरिष्वज्य	२	६६	१३
तां तथा गर्हयित्वा तु	२	७४	१
तां तथा पतितां दृष्ट्वा	३	१६	१
तां तथा ब्रुवतस्तस्य	२	१४	१६
तां तदा दर्शयित्वा तु	२	६६	१
तां तु दृष्ट्वा तथाभूताम्	७	२	१६
तां तु पार्श्वे स्थितां प्रह्वाम्	६	११५	१
तां तु बलां विवर्धन्तीम्	१	२५	८
तां तु भार्यां सुनिर्भर्त्स्य	७	३०	३६
तां तु भिन्नां शिलां दृष्ट्वा	६	६७	१५
तां तु राजा दशरथः	१	५	६
तां तु रामकथां श्रुत्वा	५	३५	१
तां तु विस्तीर्णजघनाम्	३	३४	२१
तां तु शूर्पणखां रामः	३	१८	१
तां तु शोकवशाद्दीनाम्	३	५५	६
तां तु सीतां पुनः प्राप्ताम्	६	३४	१७
तां तु सीतामहं मन्ये	४	५८	१८
तां तु सीतां महाभागाम्	२	११७	१६
तां तेन रुधिरौघेण	१	३०	१३
तां ददर्श महातेजाः	१	६३	५
तां दिशं दक्षिणां गत्वा	२	६६	२
तां दृष्ट्वा घोरसंकाशाम्	६	७०	३६
तां दृष्ट्वा चारुसर्वाङ्गीम्	६	८१	१७
तां दृष्ट्वा तादृशीं नारीम्	५	५८	६२
तां दृष्ट्वा नवहेमाभाम्	५	१६	६
तां दृष्ट्वा परमप्रीताम्	२	८	१३
तां दृष्ट्वा पुण्यसलिलाम्	१	३५	७
तान्दृष्ट्वा भस्मसाद्भूतान्	६	१०२	६३
तां दृष्ट्वा मुनयः सर्वे	६	४८	१०
तान्दृष्ट्वा राक्षसाः सर्वे	६	७६	७

	का०	स०	श्लो०
तां दृष्ट्वा राघवः क्रुद्धाम्	१	२६	९
तां दृष्ट्वा राघवः श्रीमान्	३	२०	३
तां दृष्ट्वा राघवः सीताम्	३	२	१६
तां दृष्ट्वा रूपसंपन्नाम्	७	५६	१४
तां दृष्ट्वा शोकसंतप्ताम्	२	७४	१९
तां दृष्ट्वा श्रुतिमायान्तीम्	७	९६	११
तान्दृष्ट्वा सप्तनिर्भिन्नान्	४	१२	५
तां दृष्ट्वा स हि धर्मात्मा	२	२६	७
तां दृष्ट्वा हनुमान्सीताम्	५	१७	२८
तां देवी दीनवदनाम्	५	१७	२७
तां धर्षनामदूरस्थाम्	२	११८	३६
तां नदीमाकुलावर्ताम्	७	११०	२
तां नयने च संपन्नः	२	४२	५
तां नष्टतिमिरां दीपैः	५	३	१९
तां निरीक्ष्य मुहूर्तं तु	६	८१	११
तां निष्ठितां बद्धकटाम्	२	५६	२१
तां परिष्वज्य दुःखार्ता	२	१०४	२३
तां परिष्वज्य बाहुभ्याम्	२	३०	२६
तां पलयति धर्मात्मा	४	१८	७
तां पुरीं तादृशीं दृष्ट्वा	५	२	३४
तां पुरीं दिव्यसंकाशाम्	७	७०	१४
तां पुरीं समतिक्रम्य	२	१४	२९
तां पुरीं स महातेजाः	१	६	२७
तां प्रतिज्ञां प्रतिज्ञाय	६	१०१	५०
तां प्रविश्य गुहां रम्याम्	६	६०	२६
तां प्रविश्य महाद्वारम्	६	६०	२४
तां प्रविश्य महामायाम्	७	२९	२१
तां प्राञ्जलिरभिप्रेक्ष्य	२	३९	३३
ता बलदायतश्रोणीम्	४	६६	१४
तां भर्त्स्यमानां संप्रेक्ष्य	५	२२	१०
तां भार्यां कुम्भकर्णस्य	७	१२	२४
तां भुजाभ्यां परिष्वज्य	२	३९	१९
तां महोल्कामिवाकाशे	३	५२	३१
तां मालां काञ्चनीं दत्त्वा	४	२२	१९
तां मृत्युपाशप्रतिमाम्	३	१८	१८
तां रक्षां जागृहुस्तां च	७	६६	१०
तां रत्नपूर्णां बहुसंविधानाम्	६	३९	२७

	का०	स०	श्लो०
तां रत्नवसनोपेताम्	५	३	१८
तां रम्यजलसंपूर्णाम्	२	११३	२२
तां राक्षसगणैर्गुप्ताम्	६	५७	३
तां रात्रिमुषितं रामम्	६	१२१	१
तां रात्रिमुषितास्तत्र	६	३९	१
तां लङ्घा तरसा हन्तुम्	५	६०	६
तां लतामिव वेष्टन्तीम्	३	५२	७
तां विनाऽथ विहङ्गोऽसौ	४	१	१५
तां वृक्षपर्णच्छदना	२	५६	३४
तां वेपमानामुपलक्ष्य सीताम्	३	४७	५०
तां शय्यां तमसातीरे	२	४६	१४
तां शीलां तु प्रचिक्षेप	६	७६	४६
तां शुक्लक्षौमसंवीताम्	२	२०	१९
तां शून्यशृङ्गाटकवेश्मरथ्याम्	२	७१	४५
तां शोकनाशिनीं दिव्याम्	५	९	२९
तांश्च प्रतीक्षमाणोऽयम्	४	३५	२०
तांश्च वानरशार्दूलान्	६	८८	६
तांश्च विप्रद्रुतान्दृष्ट्वा	२	९६	६
तांश्च स प्रतियुध्यन्वै	१	७०	२९
तांश्च सर्वान्हरिश्रेष्ठान्	४	६५	१४
तांश्चैव सर्वान्स हरीन्	६	७१	४१
तां श्रुत्वा करुणां वाचम्	२	१०३	१
तां श्रुत्वा दिव्यसंकाशाम्	७	५७	१
तां सत्यनामां दृढ़तोरणार्गलाम्	१	६	२८
तां स नंदनसंकाशाम्	५	१५	३
तां समाश्वसयामास	६	३३	५
तां समीक्ष्य तदा द्वाः स्थः	२	७८	८
तां समीक्ष्य पुरीं लङ्काम्	५	३	१३
तां समीक्ष्य विशालाक्षीम्	५	१५	४०
तां समुत्थाय गच्छन्तीम्	७	२६	२०
तां समृद्धा समृद्धार्थः	७	७०	१५
तां स शुश्राव काकुत्स्थः	७	९४	२
तां सीतां शोकभारार्ताम्	४	९	६
तां सुकेशाय धर्मात्मा	७	५	३
तां सुरैरपि दुर्धर्षाम्	६	४१	३२
तांस्तांस्त्वमानय क्षिप्रम्	४	३७	९
तांस्तु ते संप्रवक्ष्यामि	६	२७	१

	का०	स०	श्लो०
तांस्तु दृष्ट्वा हरिगणान्	६	७६	६३
तांस्तु निर्धावतो दृष्ट्वा	३	२२	२१
तांस्तु विप्रवतो दृष्ट्वा	६	६६	४
तांस्तु विप्रद्रुतान्दृष्ट्वा	६	६६	४
तांस्तुसर्वान्प्रतिव्यूह्य	२	११०	१७
तांस्तु सर्वान्विनिर्भिद्य	७	२१	३६
तां स्त्रियं पश्यतां तेषाम्	६	६१	१५
तां स्मृतिमिव संदिग्धाम्	५	१५	३३
तां हतां वानरेणाशु	५	१	१८८
तां हत्वा पुनरेवाहम्	५	५८	४६
तां हरीणां सहस्राणि	५	५१	१३
तां हारपाशस्य सदोचितान्ताम्	३	६३	१०
तां हि वज्रसमां वाचम्	२	१२	५३
तां हेमवर्णां हेमाङ्गीम्	३	६४	३१
तां कराभ्यां परामृश्य	६	१००	४३
तां कापुरुषदुस्ताराम्	६	५८	३२
तां कृशां दीनवदनाम्	५	२४	१६
तां क्लिष्टमाल्याभरणाम्	३	५२	६
तां क्षामां सुविभक्ताङ्गीम्	५	१७	३०
तां गङ्गा पुनरासाद्य	६	१२६	५४
तां गतिं दृष्ट्वा महावाहो	५	६७	७
तां चारुनेत्रां कपिसिंहनाथाम्	४	२४	२६
तां छादयन्तीमाकाशम्	६	७६	६६
तां: कन्या वायुना भग्नाः	१	३२	२४
तां: क्षीरं जातमात्रस्य	१	३७	२४
ता कथां कौशिको रामे	१	३८	१
तां: कथामैलसंबद्धम्	७	८८	१
तां: कथां श्रोतुमिच्छामि	२	११८	२५
ताञ्छराञ्छरवर्षेण	६	७६	२२
ताञ्छरोघांस्ततो भल्लैः	६	६६	२४
ताञ्छरान्युधि संप्रेक्ष्य	६	७१	७६
ताञ्छरान्संप्रचिक्षेप	६	७१	६६
ताडितस्तेन तं क्रुद्धा	४	१६	२२
ताडितः स तया तत्र	६	५२	३५
ताडितो मणिभद्रस्य	७	१५	१४
तात कच्चिच्च कौशल्या	२	१००	१०
तात यस्मिन्निसृष्टोऽहम्	२	७७	६

	का०	स०	श्लो०
तात राजा दशरथ	२	८	२५
तातस्य प्रियकामेन	२	५२	३६
तादृशं वालिनः क्षिप्रम्	४	२५	३३
तादृशानां सहस्रैस्ताम्	१	५	२२
तादृशान्यप्यरण्यानि	४	४८	६
तानतीत्य समासाद्य	४	१८	२६
तानप्राप्ताञ्छितैर्बाणैः	६	६०	२७
तानब्रवीत्ततो रक्षः	७	२३	४६
तानब्रवीत्ततो वाक्यम्	६	२६	१८
तानर्दयित्वा बाणौघैः	६	४६	२३
तानहं योधयिष्यामि	६	६३	४३
तानहं समतिक्रान्त	७	६	६१
तानहं समतिक्रान्ता	३	१७	२४
तानहं सहसैन्यान्वै	५	५८	१२४
तानानय यथाक्षिप्रम्	१	१३	२६
तानातन्निष्टसंज्ञांश्च	६	५०	२८
तानि चास्त्राणि वेत्त्येषः	१	२१	१८
तानि चास्वाद्य तेजस्वी	१	१०	२१
तानि चिच्छेद बाणौघैः	६	१००	६
तानि तानि च पूर्णानि	५	११	२७
तानि दिव्यानि भद्रं ते	१	२७	४
तानि दृष्ट्वा निमित्तानि	६	७८	२०
तानि दृष्ट्वा महार्हाणि	५	३५	४२
तानि नागसहस्राणि	६	६४	१
तानि नीडानि सिंहानाम्	४	४२	१७
तानि पर्वतशृङ्गाणि	६	६७	१६
तानि प्रयत्नाभिसमाहितानि	५	७	४
तानि माल्यानि जातानि	३	७३	२५
तानि मूल्यानि दिव्यानि	४	३७	३१
तानि युक्तो मया सार्धम्	३	६७	७
तानि शस्त्राणि घोराणि	६	८६	२६
तानुत्पातानचिन्त्यैव	६	५५	१३
तानुत्पातान्महाघोरान्	३	२४	२
तानुवाच कुशः पुत्रान्	१	३२	४
तानुवाच ततः सर्वान्	६	८२	२
तानुवाच ततो राजा	२	३६	२१
तानुवाच नृगो राजा	७	५४	६

	काण्ड	सर्ग	श्लोक
तानुवाच विनीतात्मा	२	१६	५
तानुवाच समासाद्य	४	१६	७
तानुवाच हरिश्रेष्ठः	५	६२	१
तान्काञ्चनान्वृक्षगणान्	५	१४	४०
तान्गुणान्संप्रधार्याहम्	४	१७	२०
तान्गृहीतप्रहरणान्	४	१७	२०
तान्गृहीतायुधान्सर्वान्	६	६	७
तान्दृष्ट्वा निर्धुतान्रामः	६	६७	१३२
तान्दृष्ट्वा निहातान्सर्वे	३	२५	४६
तान्दृष्ट्वा पतितांस्तत्र	४	११	४६
तान्दृष्ट्वा पन्नगान्रामः	६	१०२	२४
तान्दृष्ट्वा राजशार्दूलः	१	७४	१०
तान्दृष्ट्वा रावणश्चक्रे	६	१०७	२३
तान्नरान्बाष्पपूर्णाक्षान्	२	१०३	४७
तान्न हिंस्यान्न चाक्रोशेत्	४	१८	४२
तान्परिष्वज्य बाहुभ्याम्	७	४४	१८
तान्पार्थिवान्वारणयूथपार्हान्	२	६६	४२
तान्पूजयित्वा धर्मात्मा	१	८	७
तान्प्रेक्षमाणः सहसा निकृत्तान्	६	५६	६८
तान्भक्षयित्वा तत्रस्थान्	७	१८	१६
तान्भर्ता मित्रसंकाशाम्	६	६३	१८
तान्भूमौ पतितान्दृष्ट्वा	३	२१	१०
तान्महर्षिः प्रमुदितः	२	५६	१७
तान्मुक्तमात्रानाकाशे	६	६६	१६
तान्मृत्युवशमापन्नान्	६	५६	८
तान्मोघानभिसंप्रेक्ष्य	६	७१	६४
तान्यञ्जलिसहस्राणि	६	१२७	५२
तान्यनीकानि सर्वाणि	६	८५	६
तान्यनीकान्यनेकानि	६	६६	१०
तान्यस्माभिर्गृहीतानि	४	६	१२
तान्यायताक्षाण्यगसंनिभानि	६	७०	४७
तान्यायुधान्यद्भुतविग्रहाणि	६	७१	१०४
तान्येतान्यद्य पश्यामि	२	७१	२६
तान्यौषधान्यानयितुम्	६	५०	२६
तान्राक्षसगणान्सर्वान्	६	५३	२८
तान्वानरवशान्भित्त्वा	६	४६	२२
तान्वेश्मनानाभरणैः	२	१	४७

	का०	स०	श्लो०
तान्समालिङ्ग्य बाहुभ्याम्	७	२८	४०
तान्समीक्ष्याङ्गदो भग्नान्	६	६६	१८
तान्सर्वान्धनुरादाय	३	२५	३१
तान्सर्वान्पं डितान्दृष्ट्वा	१	३६	२५
तान्सर्वान्हि समादिश्य	६	७२	१६
ता पताका इवोद्धूताः	५	६	५४
ता पतिं सहसा दृष्ट्वा	६	११०	७
तापसानामरण्यानि	४	४२	६
तापसाश्रमवासिन्याः	५	३८	१३
तापसो नियताहाराम्	४	५०	३६
तापसो वा भविष्यामि	५	१३	४३
ताः पाणिभिः सुखस्पर्शैः	२	१०४	१६
ताः प्रहृष्टाः प्रकृतयः	२	८२	२४
ता बाष्पपरिपूर्णाक्ष्यः	६	११०	५
ता बाष्पेण च संवीताः	२	६६	२३
ताभिः परिवृतो राजा	५	१८	२७
ताभिराश्वसिता सं ता	५	२२	१२
ताभिः स बलवान्नादः	२	६५	२६
ताभिः सर्वानवद्याभिः	७	२४	५
ताभ्यश्चैवाहृतं तोयम्	२	१५	७
ताभ्यां चराभ्यां सहितः	६	२६	६
ताभ्यां तु धनुषि श्रेष्ठे	६	६०	५०
ताभ्यां ददौ तदा हृष्टः	१	४	२३
ताभ्यामर्घ्यं च पाद्यं च	२	६०	६
ताभ्यामुभाभ्यां संभूय	३	१६	१८
ताभ्यां स परिपूर्णाभ्याम्	५	१०	२२
ताभ्यां स परिपूर्णाभ्याम्	५	२२	२७
ताभ्यां सह महाराजः	१	३८	५
तामकामां स कामार्तः	३	४६	२२
तामग्निमद्भिर्गुणवद्भिरावृताम्	१	५	२३
तामदुःखोचितां दृष्ट्वा	२	२०	३३
तामद्भुतां तौ हृदये कुमारौ	७	६३	१८
तामनुव्याहरच्छक्तिम्	६	१००	३३
तामपश्यत्पुनस्तत्र	१	४३	१०
तामपश्यद्बलाकीर्णाम्	४	३१	१६
तामपश्यन्कपिस्तत्र	५	११	४७

	का०	स०	श्लो०
तामपि ग्रहिलां शक्तिम्	६	१००	४१
तामब्रवीन्महातेजाः	५	३३	२
तामभिक्रम्य संरब्धाः	५	२४	१५
तामवेक्ष्य तु सुग्रीवः	४	१६	२८
तामवेक्ष्य पुरीं सर्वाम्	२	४२	२४
तामशोकस्य शाखां तु	५	३४	११
तामश्वरथसंपूर्णाम्	२	६६	१३
तामसं नरशार्दूल	१	२७	१८
तामसं सुमहाघोरम्	६	६६	८
तामागतामुपश्रुत्य	६	११४	१७
तामादाय तु राक्षस्य	६	४७	१३
तामादाय सुमञ्जुषाम्	१	६७	५
तामापतन्तीं भरतानुजोऽसौ	६	५६	१०७
तामापतन्तीं महतीम्	३	२६	२७
तामापतन्तीं संप्रेक्ष्य	६	६०	४३
तामापतन्तीं सहसा	६	६७	१३
तामारुरोह भरत.	२	८६	१३
तामार्यगणसंपूर्णाम्	२	४२	१
तामार्यां स्वयमेवेह	२	३१	१५
तामाशु वेगेन दुरासदेन	४	२४	१
तामासनगतां दृष्ट्वा	७	६७	२०
तामिन्द्रजित्स्त्रियं हत्वा	६	८१	३१
तामिमां मद्गतिं वीर	१	७६	१५
तामिमां सर्वभूतानाम्	२	११७	१३
तामुत्तमां त्रिलोकानाम्	३	४६	१५
तामुवाच ततो रामः	१	१	८२
तामुवाच ततो रामः	३	७४	३१
तामुवाच दशग्रीवः	५	५८	६८
तामुवाच महाराज	२	११	४
तामुवाच सहस्राक्षः	१	६४	५
तामूर्मिकलिलावर्ताम्	२	५०	२७
तामेवमुक्त्वा जननीम्	२	२१	३८
तामेवमुक्त्वा भ्राजन्तीम्	६	११३	५०
तामेवं ब्रुवतीं ताराम्	४	१६	१
तामेव वेलां वक्तव्यम्	४	१२	२७
ताम्रगैरिकसंपृक्ताः	४	२३	२०
ताम्रपर्णीं ग्रहजुष्टाम्	४	४१	१७
ताम्रा तु सुषुवे कन्या	३	१४	१८

	का०	स०	श्लो०
ताम्रां क्रोधवशां चैव	३	१४	१२
ताम्राः पीताः सिताः श्वेता	६	२६	२८
ताम्राः पीताः सिताः श्वेताः	६	१०६	२६
ताम्रा तु सुषुवे कन्याः	३	१४	१८
तारयस्व च मां गङ्गाम्	७	४६	२६
तारया चाप्यनुज्ञातः	४	३३	६२
तारया चाभ्यनुज्ञाता'	६	१२३	३६
तारया वाक्यमुक्तोऽहम्	४	१७	४१
तारया सहितः कामी	४	३१	२२
ताराङ्गदादिसहितः	४	४५	६
ताराणामिव सुव्यक्तम्	५	६	४३
तारायाः पितरं राजा	४	४२	२
तारिता नरशार्दूल	१	४४	३
तारितोऽहं त्वया पुत्र	६	११६	१६
तार्क्ष्यायमाणो गगने	५	५७	१०
तालान्दाडिमगुल्मांश्च	६	२२	५५
तावत्ते भविता कीर्तिः	७	४०	२२
तावत्ते रावणस्येदम्	७	२	३
तावत्प्रसादयो भगवन्	१	६५	१७
तावत्प्रासहताः पेतुः	६	६६	७२
तावदिच्छामहे गन्तुम्	३	८	६
तावदूर्ध्वमधश्च त्वम्	१	२	३८
तावद्विरेव चिच्छेद	३	२०	१८
तावद्यावद्धि मे प्राप्तम्	१	६४	१६
तावद्रामायणकथा	१	२	३७
तावद्वानररक्षोभिः	७	६२	१३
तावन्योयं जिघृक्षन्यौ	७	३४	१६
तावर्धदिवसं श्रान्तौ	२	७४	१६
तावापतन्तौ सहसा	१	३०	१४
तावारोप्य ततः स्कन्धम्	३	३	२५
तावासीनौ ततो दृष्ट्वा	४	८	१४
तावितौ शोकसंतप्तौ	४	२१	६
तावुत्थाप्य महातेजाः	६	५०	४१
ताबुभावम्बरे बाणौ	६	७१	८७
ताबुभौ पुरुषव्याघ्रौ	५	३८	५०
ताबुभौ पुरुषव्याघ्रौ	५	४०	१५
ताबुभौ युगपद्वीरौ	६	७४	७
ताबुभौ वाहिनीमुख्यौ	६	५८	४६

	काण्ड	सर्ग	श्लोक
ताबुभौ वेगसंपन्नौ	५	४८	३२
तावुवाच महाबाहुः	३	६९	४३
तावूचुस्ते वनचराः	१	११९	१८
तावृष्यमूकस्य समीपचारी	४	१	१८
ताश्च तं पतितं भूमौ	२	८७	७
ताश्चापि स तथैवार्ता	२	३९	३७
ताश्चित्रवेषाः प्रमदाः	२	१०	११
ताश्चैवं पायसं प्राप्य	१	१६	३०
ताश्चैवाप्सरसः पञ्च	४	११	१७
ताः श्रुत्वा सोमपुत्रस्य	७	८८	२४
ताः समेत्य यथान्यायम्	१	१५	५
ताः सर्वा गुणसंपन्नाः	१	३२	१५
ताः सर्वा हनुमान्गृह्य	६	७४	३४
तासां चन्द्रोपमैर्वक्त्रैः	५	१०	३४
तासां तद्वचनं श्रुत्वा	७	४९	१६
तासां तु वचनं श्रुत्वा	१	३२	२३
तासां तु वचनं श्रुत्वा	१	३३	५
तासां नास्ति विशेषो हि	७	३०	२०
तासामाक्रन्दशब्देन	२	६५	२१
तासामुच्छ्वासवातेन	५	११	३१
तासामेकान्तविन्यस्ते	५	१०	५०
तासामेवंविधा वाचः	२	३७	२०
तासां मध्यगतो राजा	६	३२	३
तासां मध्यात्समुत्थाप्य	५	५८	८६
तासां मध्ये महाबाहुः	५	११	११
तासां रामः समुत्थाय	२	१०४	१८
तासां रामो महादानम्	७	९९	१७
तासां विक्लवमानानाम्	६	१११	१
तासां संक्रीडमानानाम्	३	११	१९
तासां संवृतदान्तानि	५	९	३६
तासु चैव प्रसुप्तासु	५	५८	८५
तास्तथा विलपन्त्यस्तु	२	४८	३२
तास्तदा सविषैर्दंष्ट्राः	५	१	२०
तास्तु गत्वा परं तीरम्	२	८९	१८
तास्तु यौवनशालिन्यः	१	३२	१२
ताः स्त्रियः स्वप्नशीलज्ञाः	२	६५	१४
ता हि सर्वाः समं दुःखान्	७	२४	४

	का०	स०	श्लो०
तितीर्षुर्लक्ष्मणो गङ्गाम्	७	४६	३३
तिथिश्चिव महादेवः	३	२५	१२
तिमिनक्रझषा कूर्माः	५	१	७२
तिमिनक्राकुलजलम्	४	४२	११
तिरश्चीनगतान्येव	६	४०	२४
तिरोभावयितुं बुद्धिम्	१	४३	७
तिर्यक्च सह नक्षत्रैः	६	२२	८
तिर्यगूर्ध्वमधश्चैव	५	१	९२
तिलकैर्बीजपूरैश्च	३	७५	२३
तिष्ठ किं प्राकृतैरेभिः	६	६९	८६
तिष्ठतः किं नु मां दृष्ट्वा	३	७०	२
तिष्ठ तिष्ठ दशग्रीव	३	५०	२८
तिष्ठ तिष्ठ मम त्वं हि	६	५९	१२७
तिष्ठ तिष्ठ वरारोहे	३	६०	२७
तिष्ठतैवात्र संतुष्टाः	३	२०	१०
तिष्ठ त्वं हरिशार्दूल	५	१	१०९
निष्ठन्तु शर्वदाशश्च	२	८४	७
तिष्ठ मा मा गमः पुत्र	२	६४	३६
तिष्ठ राम मया सार्धम्	६	७९	१०
तिष्ठ वा किं महाराज	६	७	१८
तिष्ठेति राजा चुक्रोश	२	४०	४६
तिष्ठेदानीं न मे जीवन्	७	१८	१३
तिष्ठेदानीं निहन्मि त्वाम्	६	१०२	५८
तिष्ठेद्वानरवाहिन्याः	६	२४	१५
तीक्ष्णकानास्तु गन्धर्वाः	४	५९	९
तीक्ष्णतापकरः सूर्यः	७	३१	२८
तीक्ष्णः प्रकृत्या सुग्रीवः	४	५३	१४
तीक्ष्णः प्रकृत्या सुग्रीवः	४	५३	२१
तीक्ष्णमल्पप्रदातारम्	३	३३	१५
तीक्ष्णशूलधराश्चैव	५	४	२३
तीक्ष्णसायकनिर्भिन्नान्	६	८८	८
तीक्ष्णाग्रा ऋजुपर्वाणः	४	५	२८
तीक्ष्णाग्रैः प्रतिजग्राह	३	२६	२०
तीक्ष्णा न तावत्तव कङ्कपत्राः	६	१४	१३
तीरजैः शोभिता भाति	४	२७	१९
तीरं तु समनुप्राप्य	२	५२	९३
तीरं दक्षिणमासाद्य	१	२४	१२

	का०	स०	श्लो०
तीर्णप्रतिज्ञश्च वनात्	२	२१	४७
तीर्थोदकानि सर्वाणि	७	६०	१०
तीव्रमुत्पादितं दुःखम्	२	७८	११
तीव्रः स्वेदश्च खेदश्च	४	६१	१०
तुदन्तमन्यः प्रणुदन्नुपैति	५	६१	१६
तुमुलं त्रासजननम्	६	१०७	१६
तुमुलः शङ्खशब्दश्च	६	११	६
तुरगाणां सहस्रैश्च	६	१२७	१४
तुरङ्गौघैरवतता	२	६३	५
तुलितं हि बलं सर्वम्	६	२०	३०
तुल्यं आसीन्नृपस्तस्य	७	३१	८
तुल्यशीलवयोवृत्ताम्	५	१६	५
तुषारपतनाच्चैव	३	१६	२५
तुष्टः पृष्टश्च सर्वोऽसौ	७	६१	१८
तुष्टेन तेन दत्तौ ते	२	६	१७
तूर्णं त्वमुत्थाय सुमन्त्र गच्छ	२	८२	३०
तूर्णमापुप्लुवुः सर्वे	६	४	४१
तूर्णमुत्थाय गच्छत्वम्	२	८२	२२
तूर्णमुत्पत्य चाकाशम्	४	६१	७
तूर्यसंघातनिर्घोषैः	६	१२८	१०
तूष्णीं ते समुपासीनाः	२	१०५	३
तूष्णीं भूते तदा तस्मिन्	७	५१	२४
तृणबिन्दुस्तु राजर्षिः	७	२	२३
तृणमन्तरतः कृत्वा	५	२१	३
तृणवद्भाषितं तासाम्	५	५८	८१
तृतीयः पुरुषो नास्ति	७	१३	२८
तृतीयं यदिदं रौद्रम्	३	६	६
तृतीयसवने चैव	१	१४	७
तृप्तिराश्चर्यभूतानाम्	१	६५	३६
तृषार्तं सति पानीये	२	७५	५७
ते कपिं तं समासाद्य	५	४२	२७
ते कामरूपिणः क्रूराः	६	७८	१४
ते कृत्वा मानुषं रूपम्	६	१२७	४४
ते केवलं संददृशुः शिताग्रान्	६	७३	५३
ते क्षिप्रमभिगम्याथ	४	२	८
ते गतिज्ञा गतिं गत्वा	४	३७	१६
ते गत्वा दूरमध्वानम्	१	३५	६

	का०	स०	श्लो०
ते गत्वा दूरमध्वानम्	२	८३	१६
ते गत्वा दूरमध्वानम्	३	११	५
ते गत्वा दूरमध्वानम्	४	१३	२६
ते गत्वा परमं राम	१	३७	१०
ते गत्वा सर्वमाचख्युः	७	१४	६
ते गदाभिः प्रदीप्ताभिः	६	४२	४२
ते गदाभिर्विचित्राभिः	५	४२	२८
ते गदाभिश्च चित्राभिः	६	६३	६
ते गदाभिश्च भीमाभिः	६	५२	५
ते गदामुसलप्रासैः	७	१५	४
ते गात्रयोर्निपतिताः	६	८८	६८
ते गृहीत्वौषधीः सर्वाः	४	३७	३५
तेऽङ्गदप्रमुखा वीराः	५	६४	४१
ते च कर्मान्तिकाः सर्वे	१	१३	३२
ते च दृष्ट्वा तना सुप्ते	२	६५	१६
ते च सर्वे महात्मानः	१	२४	२
ते च सर्वे महात्मानः	७	१०६	१२
ते चापि पौरा नृपतेर्वचस्तत्	२	३	४६
ते चापि सर्वतः सिद्धाः	२	२५	१२
ते चाप्यनुचरास्तस्य	६	१७	३
ते चार्ता दण्डकारण्ये	३	१०	४
ते चास्य हयमुख्येषु	६	८६	४६
ते छिन्नशिरसः पेतुः	३	२५	२६
तेजः क्षमा धृतिस्थैर्यम्	६	११३	२६
तेजः क्षमायशः प्राप्ताः	१	७	८
तेजसा तस्य संमूढाः	७	६६	२५
तेजसाऽऽदित्यसंकाशः	५	३५	६
तेजसा यशसा बुद्ध्या	६	२८	२६
तेजसा वाऽपि ते भूतम्	४	४४	६
तेजसा संप्रदीप्ताग्राम्	६	७०	५२
तेजस्वी बलवाञ्छूरः	६	१११	६६
तेजो धृतिर्यशो दाक्ष्यम्	६	१२८	८२
तेजोभिर्गतवीर्यत्वात्	१	७६	१२
तेजोविषाणः कुलवंशवंशः	६	१०६	१०
तेजो वीर्यं बलं चौजः	६	५०	४०
ते ज्वलन्तो महावेगाः	६	२१	२७

	काण्ड	सर्ग	श्लोक
ते तत्र पीत्वा पानीयम्	३	७३	३७
ते तथोक्तां भगवता	१	१७	८
ते तथोक्ता: समुत्थाय	१	८९	१०
ते तथोक्त्वा महात्मान:	७	७०	७
ते तदोचुर्महात्मानम्	२	१११	२०
ते तद्वनमुपागम्य	५	६१	१०
ते तपन्तमिवादित्यम्	६	७३	३७
ते तमूचुर्महात्मान:	२	३	२६
ते तं प्रदक्षिणं कृत्वा	१	४०	१६
ते तं प्रदक्षिणं कृत्वा	१	४०	१९
ते तं प्रदक्षिणं कृत्वा	१	४०	३१
ते तं यज्ञहनं ज्ञात्वा	१	४०	२७
ते तव प्रबलं दर्पम्	७	१६	१९
ते तस्य कायं निर्मिद्य	६	९०	२०
ते तस्य कायं भित्त्वा तु	६	९०	४५
ते तस्य घोरं निनदं निशम्य	६	६५	५६
ते तस्य तेजसा दग्धा:	७	२१	४४
ते तस्य रूपमालोक्य	६	७१	८
ते तानि वेशमानि महाधनानि	३	४७	१९
ते तान्सर्वाञ्शराञ्जघ्नु:	६	१०२	२६
ते तामूचुस्ततो देवा:	७	८६	११
ते तार्क्ष्यबलसंपन्न:	१	१७	३४
तेऽतिकायं समासाद्य	६	७१	९
तेऽतिकायं समासाद्य	६	७१	९३
ते तीर्णा इति विज्ञाय	२	५७	११
ते तु तत्र गुणोपेता:	७	२३	२९
ते तु तद्वचनं श्रुत्वा	६	६०	२२
ते तु तं विकृतं सुप्तम	६	६०	२७
ते तु तस्मिन्महावृक्षे	२	५४	१
ते तु तां रजनीमुष्य	२	१५	१
ते तु तेन मुहूर्तेन	४	३७	३४
ते तु तेषां रथा: साश्वा:	७	२३	३९
ते तु त्यक्त्वा रथान्पुत्र:	७	३३	४०
ते तु दिग्भ्य: पुरीं प्राप्ता:	२	६	२६
ते तु दृष्टिगतं दृष्ट्वा	४	४९	१९
ते तु दृष्ट्वा सहस्राक्षम्	७	८६	८
ते तु राज्ञो वच: श्रुत्वा	१	९	१६

	काण्ड	सर्ग	श्लोक
ते तु रामसहस्राणि	६	९४	२६
ते तु रामेण बाणौघै:	६	४४	२१
ते तु रामेण सामर्षा:	३	२३	९
ते तु वानरशार्दूला:	६	७६	८८
ते तु वृक्षान्समादाय	६	७६	१९
ते तु सर्वे तथेत्युक्त्वा	६	९५	७
ते तु सर्वे महात्मान:	१	४०	२५
ते तु सर्वे सुविक्रान्ता:	७	२३	७
ते तु सर्वे हरिवश:	४	३७	३३
ते तु हृष्टाभिनर्दन्त:	६	९५	४०
ते त्वाभिगमिष्यन्ति	४	३८	३३
ते त्विदानीं जनस्थाने	३	३६	६
ते दीनमनस: सर्वे	५	५७	२०
ते दीपावदना दीपाम्	६	१०२	२२
ते दूता रामवाक्येन	७	१०८	१
ते दृष्ट्वा देवसंकाशम्	७	९१	५
ते दृष्ट्वा देहमाहात्म्यम्	६	७१	७
ते दृष्ट्वा राक्षसश्रेष्ठम्	६	६५	५४
ते द्रुमै: पर्वताग्रैश्च	६	४२	१५
ते द्रुमै: पर्वताग्रैश्च	६	७३	४०
ते द्विजास्त्रिविधं वृद्धा:	२	४५	१३
तेन काञ्चनरोम्णा तु	३	४३	२२
तेन किं भ्रष्टराज्येन	३	४८	१६
तेन खड्गप्रहारेण	६	९६	२४
तेन गत्वा पुरीं लोकाम्	१	१	८१
तेन गन्धर्वयक्षाणाम्	५	५७	२५
ते नगाग्रान्नगाग्राणि	५	५७	२५
ते नगान्नगसंकाशा:	६	२२	५१
तेन चक्रेण मारीच:	७	१४	२२
तेन चादित्यकल्पने	६	८०	१५
तेन चापस्वनेनाथ	४	३३	२८
तेन चेमं महाप्राज्ञम्	६	१९	२५
तेन चैव तदा तुल्यम्	२	५	२४
तेन चोत्तमवीर्येण	५	१	१४
तेन तत्र प्रणादेन	२	३८	२
तेन तत्र महारण्ये	५	३१	८
तेन तत्रैव वसता	१	१	४६

	काण्ड	सर्ग	श्लोक
तेन तत्रैव तद्विहितं शस्त्रम्	६	९०	५६
तेन तन्मरुकान्तारम्	६	२२	२३
तेन तस्य निपातेन	६	९८	२२
तेन तिष्ठसि विस्रब्धम्	३	४५	८
तेन तेन स्म पश्यन्ति	३	३१	२०
तेन ते वारुणा युद्धे	७	२३	३७
तेन त्यक्तास्त्रयो बाणाः	३	३९	११
तेन त्वं ग्रहणं शत्रोः	७	३०	४७
तेन दृष्टं प्रविष्टोऽहम्	३	३८	१७
तेन नादेन महता	५	४३	१३
तेन नादेन महता	६	९५	३७
तेन पादपमुक्तेन	५	१	१३
तेन पापानुबन्धेन	१	३३	४
तेन पित्राहमप्यत्र	२	१०७	७
तेन बद्धस्ततोऽस्त्रेण	५	४८	३८
तेन बहुसहस्रेण	७	३२	१९
तेन भाण्डेन विस्तीर्णम्	२	७८	१८
तेन भीमं जनस्थानम्	३	३१	४
तेन मर्मणि निर्विद्धम्	३	४४	२०
तेन मामद्य संयुक्तम्	६	९२	९२
तेन मार्गेण गच्छन्तः	३	६४	१९
तेन मुक्तस्ततो बाणः	३	३८	१९
तेन मुष्टिप्रहारेण	६	५९	११३
तेन मुष्टिप्रहारेण	६	७०	४५
तेन मे कथितं राजन्	५	५८	१३९
तेन नयन्ति परं तीरम्	४	४३	३८
तेन वध्योऽहमाज्ञप्तः	५	५८	१४६
तेन वाक्येन संहृष्टा	२	११	१२
तेन वामांसफलके	६	९८	१९
तेव बालिनमाहत्य	५	५८	१४१
तेन विक्षिपताऽत्यर्थम्	४	१	१६
तेन विज्ञाप्यते सोऽयम्	७	११	२९
तेन विद्रावितो नागाः	२	१०३	४१
तेन विद्धश्च हरयः	६	८०	३६
तेन वीरेण तपसा	६	८५	१२
तेन शक्या रणेहन्तुम्	४	३५	१७
तेन शंखविमिश्रेण	६	३५	१

	काण्ड	सर्ग	श्लोक
तेन शब्देन महता	४	३१	४१
तेन शब्देन महता	६	४१	५६
तेन शब्देन महता	६	४४	२६
तेन शब्देन वित्रस्ताः	१	२६	७
तेन शब्देन वित्रस्तैः	२	१०२	४४
तेन शब्देन विहगाः	२	६५	५
तेन शापं न मुञ्चामः	३	१०	१५
तेन सख्यं च कर्त्तव्यम्	३	७१	३३
तेन संचोदितौ तौ तु	१	२०	१९
तेन सत्याभिसंधेन	१	६	५
तेन सत्येन मां राजन्	७	२६	३६
तेन सिंहप्रणादेन	६	७१	६
तेन सीता जनस्थानात्	६	१७	१३
तेन सुग्रीववाक्येन	६	७६	७९
तेन सृष्टा महावेगाः	६	८८	१८
तेन सैन्यसहायेन	७	२६	४७
तेनाजय्येन मुख्येन	२	११	६
तेनातिविद्धौ तौ वीरौ	६	८०	३४
तेनापूरयता वेगात्	२	११४	४९
तेनासौ निहतः संख्ये	७	२४	३५
तेनास्त्रेण हतं रक्षः	६	७९	३९
तेनास्य मुनिमुख्यस्य	१	२१	१९
तेनास्य राज्ञस्तौ पादौ	७	६५	३२
तेनाहमपविद्धश्च	४	१०	२७
ते निवर्त्य तु संरब्धाः	६	६६	९
ते निवृत्ताः पुनः सर्वे	६	५०	१२
ते निवृत्ता महाकायाः	६	६७	१
ते निसृष्टाः कुमारेण	५	६१	१३
तेनेदं निर्मितं सर्वम्	४	५१	११
तेनेदं शक्रतुल्येन	७	७८	२९
तेनैव च मुहूर्तेन	२	९१	४३
तेनैव तोरणेनाथ	७	१४	२९
तेनैव पूर्वमाक्रान्तः	१	२९	२२
तेनैवमाज्ञाप्य यथावदर्थम्	२	१०९	३२
तेनैवमुक्तः शैलेन्द्रः	४	४२	३९
तेनैवमुक्तो धर्मात्मा	३	२	१०
तेनैवाद्भुतरूपेण	५	४२	१६

	काण्ड	सर्ग	श्लोक
तेनोरसि निबद्धेन	७	४०	२६
तेन्योऽन्यमभिसर्पन्तः	६	७३	५७
ते पतन्ति जले नित्यम्	४	४०	४२
ते पदं विष्णुविक्रान्तम्	४	३७	१७
ते परस्परसंघर्षाः	५	४५	६
ते पश्यंस्तेजसा भूतम्	७	८५	११
ते पादपशिलाशैलैः	६	६६	४८
तेऽपि तैर्वानरैर्भीमैः	५	६२	१६
तेऽपि पुत्राः कुशाश्वस्य	१	२१	१४
ते पिबन्तः सुगन्धीनि	७	३६	२६
तेऽपि रामस्य तुच्छ्रुत्वा	७	६१	७
तेऽप्याजग्मुः सशिष्या वै	७	१	५
ते प्रणम्य महात्मानम्	७	६५	८
ते प्रतस्थुर्महात्मानः	६	६६	३३
ते प्रबुद्धा महावीर्याः	७	२७	२४
ते प्रयाता महात्मानः	७	३६	१
ते प्रसन्नोदकां दिव्याम्	२	६८	१५
ते प्रसाद्य महात्मानम्	१	३६	२४
ते प्रायमुपविष्टास्तु	४	५७	२
ते प्रार्थितान्वरान्सर्वान्	६	१२८	११२
ते प्रीताः पादपाग्रेषु	५	५७	२६
ते बद्धघण्टा बलिनः	६	५१	२३
ते बद्धाः कालपाशेन	७	१०१	८
ते बभुः शुकनीलाङ्गाः	६	४२	३६
ते बलाहकसंकाशाः	३	२५	६
ते बाणाः कालसंकाशाः	६	७१	७७
ते बाणाः वज्रसंकाशाः	३	३६	१२
ते भक्ष्यमाणा हरयः	६	६७	६७
तेऽभिगम्य दशग्रीवम्	६	६०	८५
ते भित्त्वा बाणरूपाणि	६	६६	४०
ते भिन्नगात्राः समरे	६	७३	३६
तेऽभिवाद्य महात्मानम्	२	५०	६
तेऽभिवाद्य महात्मानम्	६	६६	१७
ते भीमवेगा हरयः	६	५२	८
ते भूमिभागान्विविधान्	२	५४	३
ते मया संक्रमा भग्नाः	६	३	२६
ते महाबाणवर्षैश्च	७	२७	४२

	काण्ड	सर्ग	श्लोक
ते महामेघसंकाशे	६	६६	३८
ते मा भवन्तः सिद्धयर्थम्	१	५७	२०
ते मालिदेहमासाद्य	७	७	३५
ते मुक्तकेशाः संभ्रान्ताः	६	५६	३३
ते मुहूर्तं समाश्वस्ताः	४	४६	२१
ते युद्धकुशला रूढाः	६	५३	११
ते यूयमवगाहध्वम्	७	३१	३२
ते रक्तकण्ठिनः सर्वे	७	३७	३
ते रत्नहीनास्तरुणाः	२	४३	८
ते रथान्तचरा एके	६	११	२०
ते राक्षसबलं घोरम्	६	६६	४५
ते राक्षवधनिर्मुक्ताः	६	१०२	२५
ते राजवचनाद्गत्वा	१	६८	२
ते राममुपसंगम्य	२	१६	६
ते रामं पर्णशालायाम्	३	२०	२
ते रावणधनुर्मुक्ताः	६	१०२	२१
ते रावणवधं दृष्ट्वा	६	११२	१
ते रावणसमादिष्टाः	६	६०	२३
ते रुक्मपुङ्खा विशिखाः	३	२६	३०
तेऽर्दिता निशितैर्बाणैः	६	६६	३
तेऽर्दिता बाणवर्षेण	६	७१	४२
ते लक्ष्मण इव क्षिप्रम्	२	३३	१६
ते वध्यमानाः समरे	६	७३	३२
ते वयं कपिराजस्य	४	५७	१८
ते वयं कार्यनैराश्यात्	५	३५	५७
ते वयं दण्डकारण्यम्	४	५७	१६
ते वयं भर्तुरादेशम्	५	३३	२६
ते वयं मार्गविभ्रष्टम्	४	१८	११
ते वयं रावणं श्रुत्वा	७	६१	२३
ते वयं वनमत्युग्रम्	३	१२	४
ते वर्धयित्वा काकुत्स्थम्	६	१२८	३५
ते वसन्तमनुप्राप्तम्	४	५३	५
ते वानरगणाः सर्वे	६	४	२२
ते वानरा गर्वितहृष्टचेष्टाः	६	६६	६४
ते वानरा भग्नहतावशेषाः	६	६७	१५६
ते वार्यमाणा हरिणाणजालैः	७	७	५२
ते वाहनान्यवस्थाय	६	११	२२

	काण्ड	सर्ग	श्लोक
ते विषण्णमुखा दीना:	६	७१	१०७
ते विषं पिबतालोड्य	२	४८	२७
ते विषादार्तवदना:	२	४७	३
ते वीक्षमाणा वृक्षांश्च	४	१३	५
ते वृक्षानुदकं भूमिम्	२	६१	६
तेऽशकुवन्त: संप्रात्पुम्	७	३४	२५
ते शक्रजिद्बाणविशीर्णदेहा:	६	७३	५२
ते शरा: शिखिसंस्पर्शा:	६	८६	४
ते शरास्तमनासाद्य	६	१०७	६
ते शरीरं विराधस्य	३	३	१२
ते शरैर्बहुमिश्रितै:	६	७३	२८
ते शारदाभ्रप्रतिमम्	४	४६	१६
ते शिला: पादपांश्चैव	५	६२	२२
ते शूलशरनिस्त्रिंश	५	३०	२७
ते श्रान्तवाहना दूता:	२	६८	२१
तेषां कथयतां तत्र	४	६५	१०
तेषां गतानामद्यापि	३	७३	२६
तेषां गुप्तिपरीहारै:	२	१००	४८
तेषां गृहसहस्राणि	६	७५	७
तेषां चतुर्णां रामस्तु	६	४३	२७
तेषां चिन्तयतां तत्र	१	४५	१७
तेषां चिन्तयतां तत्र	७	८५	१३
तेषां जन्मक्रियादीनि	१	१८	२४
तेषां तत्रोपविष्टानाम्	७	५१	६
तेषां तत्समवेतानाम्	७	१०६	१२
तेषां तद्भाषितं श्रुत्वा	७	६५	६
तेषां तद्वचनं श्रुत्वा	१	३७	२६
तेषां तद्वचनं श्रुत्वा	१	४०	१०
तेषां तद्वचनं श्रुत्वा	१	४१	१२
तेषां तद्वचनं श्रुत्वा	१	६०	२६
तेषां तद्वचनं श्रुत्वा	१	६२	१५
तेषां तद्वचनं श्रुत्वा	२	६८	१
तेषां तद्वचनं श्रुत्वा	७	६६	४
तेषां तद्वचनं श्रुत्वा	७	६६	२३
तेषां तद्वचनं श्रुत्वा	७	५८	२०
तेषां तप: प्रभावेण	३	७४	२४
तेषां तु गच्छतां तत्र	४	१३	१३

	काण्ड	सर्ग	श्लोक
तेषां तु तुमुलं शब्दम्	६	५१	१
तेषां तु युध्यमानानाम्	७	२३	६
तेषां तु रथघोषेण	६	६५	४६
तेषां तु रुदतां शब्दात्	२	१०३	३३
तेषां तु वचनं श्रुत्वा	१	६	१४
तेषां तु हतशिष्टाये	५	५८	११७
तेष द्रुमाणां प्रभया	५	१४	३६
तेषां धमकरक्षाणाम्	२	७३	२३
तेषां निग्रहणे शक्त:	१	२१	२१
तेषां निपततां शीघ्रम्	६	५८	२०
तेषां विनिशमानानाम्	६	४	१०६
तेषां नृपो वच: श्रुत्वा	१	६७	७
तेषां नो विप्रनष्टानाम्	५	३५	५६
तेषां नो विप्रनष्टानाम्	६	३२६	४१
तेषामक्षौहिणिशतम्	६	४१	६६
तेषामग्रेसरं चैव	४	४१	६
तेषामञ्जलिपद्मानि	२	३	१
तेषामधिष्ठितानां तै:	६	८६	५०
तेषामन्योन्यमासाद्य	६	५८	१०
तेषामपि विशेषेण	१	१३	१६
तेषामवरजस्तात्	७	७६	१४
तेषामविदितं किंचित्	१	७	६
तेषामशीतियानानि	२	३२	२०
तेषामशीतिसाहस्रम्	५	४२	२५
तेषामशीतिसाहस्रम्	५	५८	११६
तेषामाज्ञाय वचनम्	२	१११	२२
तेषामापततां शब्द:	६	४४	१८
तेषामिच्छाम्यहं गन्तुम्	३	७४	२६
तेषामियं वसुमती	३	१४	१६
तेषामुत्सार्यमाणानाम्	६	११४	२३
तेषामेतत्प्रभावेण	४	१३	२०
तेषामेवं ब्रुवाणानाम्	७	४०	१५
तेषामेवं विषण्णानाम्	२	४८	१
तेषामौत्सुक्यमालक्ष्य	२	११६	४
तेषां पुण्याहघोषोऽथ	२	६	८
तेषां पुरस्ताद्बलवान्	६	१२६	१२
तेषां प्रभावो दुर्धर्ष:	६	३५	१८
तेषां प्रभुरहं सीते	३	५५	१५

	काण्ड	सर्ग	श्लोक
तेषां प्रहरान्स चकार मोघान्	६	५८	४३
तेषां बाणैर्महाबाहुः	३	२५	२८
तेषां भाराभितप्तानाम्	३	७३	२४
तेषां मध्ये गिरिवरः	६	२७	६९
तेषां मध्ये विशालाक्षी	३	५३	२
तेषां मध्ये स स्थितो राजा	४	४२	३८
तेषां युद्धं समभवत्	७	२८	९
तेषां रामः शरैः षड्भिः	६	५४	१९
तेषां वचः सर्वगुणोपपन्नः	२	४०	५१
तेषां वरुणसूनूनाम्	२	२३	३८
तेषां वीर्यगुणोत्साहैः	६	७	१७
तेषां वृक्षांश्च शैलांश्च	६	७१	४०
तेषां वेगवतां वेगम्	६	४५	५
तेषां शशंस गङ्गायाम्	२	५७	१०
तेषां शिरोधरान्धूतान्	७	७	१७
तेषां संजल्पमानानाम्	६	९२	४४
तेषां संनह्यमानानाम्	६	७५	४४
तेषां समुपविष्टानाम्	७	३७	२४
तेषां समुपविष्टानाम्	७	४५	१
तेषां संभाषमाणानाम्	६	१७	१०
तेषां संवदतां तत्र	७	९४	१०
तेषां संवदतामेव	७	९०	८
तेषां सुतुमुलं युद्धम्	६	५२	२
तेषां सुभीमस्तुमुलो निनादः	६	५०	६५
तेषां सुविपुलः शब्दः	३	२४	३०
तेषां सेनापतिर्वीरः	६	४	३५
तेषां स्वस्त्ययनं चैव	२	५५	२
तेषु ते प्लवमुत्सृज्य	२	५५	२३
तेषु तेषु महार्हेषु	५	६	२७
तेषु तेषु महार्हेषु	५	५४	१७
तेषु तेष्वाश्रमस्थाने	२	११६	१६
तेषु देवर्षिजुष्टेषु	३	७	१२
तेषु लङ्का प्रविष्टेषु	६	५६	३५
तेषु वानरमुख्येषु	६	६७	३०
तेषां वानरमुख्येषु	६	७५	४४
तेषां संभक्ष्यमाणेषु	६	६१	१४
तेषां सर्वेषु दुर्गेषु	४	४२	४७

	काण्ड	सर्ग	श्लोक
तेषां सर्वेषु भिन्नेषु	४	५४	७
तेष्वारूढेषु सर्वेषु	६	१२२	२५
तेष्वेवं हृतशेषेषु	५	६०	११
ते सत्त्वाः सत्त्वकर्तारम्	७	४०	१०
ते समालोक्य धूमाग्रम्	२	९३	२२
ते समीक्ष्य समायान्तम्	२	१६	४
ते समुद्रेषु गिरिषु	४	३७	१८
ते समेत्य तु कामारिम्	७	६	३
ते समेत्य सभायां वै	६	११	३४
ते संप्रहृष्टा हरयः	६	४५	४
ते सरांसि सरित्कक्षान्	४	४७	२
ते सर्वे निहता युद्धे	६	७२	९
ते सर्वे रामदत्तानि	७	३९	१५
ते सर्वे वानरर्क्षाश्च	६	१२२	२७
ते सर्वे हृष्टमनसः	१	३९	१७
ते सर्वे हृष्टमनसः	७	९०	१०
ते सह्यं समतिक्रम्य	६	४	९४
ते सालैश्चाश्वकर्णैश्च	६	२२	५२
ते साश्वरथपादाताः	१	५५	७
ते सुतीर्थां ततः कृच्छ्रात्	२	१०३	२४
ते सुवेलस्य शैलस्य	६	२९	२४
ते स्थलानि तदा निम्नम्	६	६६	१६
ते स्वद्वारं समास्थाय	२	८०	५
ते हताश्वा हतरथाः	६	९३	३३
ते हयान्काञ्जनापीडान्	६	४४	७
ते हया भथिता भग्नाः	६	८९	५१
ते हयैः काञ्चनापीडैः	६	४३	२
ते हयैर्गौरथैः शीघ्रम्	२	८२	२६
ते हास्तिनपुरे गङ्गाम्	२	७८	१३
तैः प्रासैः परिघैः शूलैः	७	२१	२५
तैरश्वैर्भ्राम्यते भ्रान्तैः	७	७	३०
तैरासीन्नगनं दीप्तम्	६	१००	८
तैरियं पृथिवी शूरैः	१	१७	३६
तैरमुक्तः काकुत्स्थः	७	१०८	२३
तैर्दुरात्मभिराविष्टान्	२	११६	१८
तैर्न तत्स्पर्शनं पापम्	६	२२	३१
तैर्बाध्यमानास्त्रिदशाः	७	५	१७
तैर्भग्नहृदया भूमौ	३	२०	२१

	काण्ड	सर्ग	श्लोक
तैर्भिन्नवर्माभरणाः	३	२६	३२
तैर्मन्त्रिभिर्मन्त्रहिते निवेष्टैः	१	७	२४
तैर्मुक्तकेशैः समरे	६	२६	३३
तैर्मेघवृन्दाचलकूटसंनिभैः	१	१७	३७
तैर्वध्यमाना देवाश्च	७	६	१
तैर्वाक्यैः परुषैर्दुःखै	२	७८	२०
तैर्वासुकिसमस्पर्शैः	६	१०२	२३
तैलद्रोण्यां तदामात्याः	२	६६	१४
तैलद्रोण्यां शायितं तम्	२	६६	१६
तैलेन परिषिच्याथ	५	५३	८
तैश्च दत्तवरः श्रीमान्	६	१२६	५२
तैश्च सर्वैर्दिशापालैः	१	४१	११
तैश्चाहमुक्ता धर्मज्ञैः	३	७४	१५
तैसायकैर्महावेगैः	६	१००	१४
तैस्तन्निषूदितं सर्वम्	१	५५	४
तैस्तु तत्र महामात्यैः	७	१४	१६
तैस्तैः प्रहरणैर्भीमैः	५	४६	२२
तैस्तैरनिष्टोपगमैः	७	२०	१०
तैस्त्वं परिवृतः शूरैः	५	३७	५०
तोयवेगः समुद्रस्य	६	२१	२८
तोरणं दक्षिणार्धेन	२	७१	११
तोरणैः काञ्चनैर्दिव्यैः	५	२	१८
तोलयित्वा महाबाहुः	४	११	८५
तोषयस्व महादेवम्	१८	३२	
तोषिताः कर्मणानेन	१	२६	२२
तौ कबन्धेन तं मार्गम्	३	७५	१
तौ काष्टसंघाटमथो	२	५५	१४
तौ खड्गौ क्षिप्रमुद्यम्य	३	३	२०
तौ च मुक्तौ सुघोरेण	६	५१	९
तौ च याचस्व भर्तारम्	२	९	२०
तौ च वीरौ नरवरौ	५	५६	१७
तौ जातश्च तसौ राजपुत्रौ विदित्वा	५	६५	२८
तौ तत्र विहितौ देवैः	६	५०	३२
तौ तत्र हत्वा चतुरो महामृगान्	२	५२	१०२
तौ तथा युध्यमानौ तु	६	१०७	२९
तौ तदा वीरसंपन्नौ	२	५२	७०
तौ तमाश्रममासाद्य	३	७४	५

	काण्ड	सर्ग	श्लोक
तौ तस्य पादौ प्रदिशौ दिशश्च	६	६७	१६१
तौ तस्य शरवेगेन	६	८०	२३
तौ तस्याः सहितौ पीनौ	६	५	१४
तौ ताबदहमद्यैव	२	११	२४
तौ तु क्रूरेण निहतौ	६	४५	२१
तौ तु गन्धर्वतत्त्वज्ञौ	१	४०	१०
तौ तु तत्र निमित्तानि	६	१०७	६
तौ तु तत्र महारण्ये	७	९	३७
तौ तु तत्र स्थितौ दृष्ट्वा	३	७०	१
तौ तु तद्वचनं श्रुत्वा	१	३०	५
तौ तु तेनाभ्यनुज्ञातौ	३	१३	२४
तौ तु दृष्टवा महात्मानौ	४	२	१
तौ तु बद्धौ शरैस्तीक्ष्णैः	६	५१	५
तौ तु रावणसंदिष्टौ	७	३२	१२
तौ तेन पुरुषव्याघ्रौ	६	४४	३७
तौ त्वदीर्घेण कालेन	६	४१	३०
तौ त्वया प्राकृतेनेव	४	२	२४
तौ दत्तौ च वरौ देव	२	११	२०
तौ ददर्श महातेजाः	६	२५	१३
तौ दृष्ट्वा भ्रातरौ तत्र	६	४७	२०
तौ दृष्ट्वा व्यथितौ रामम्	६	२५	१५
तौ दृष्ट्वा तु तदासिद्धा	३	७४	६
तौ धन्विनौ जिसांसन्तौ	६	९०	२
तौ निराशौ मदर्थं च	५	३७	६१
तौ परस्परमभ्येत्य	६	९०	३८
तौ परस्परमासाद्य	६	४०	२२
तौ परस्परशापेन	७	५६	४
तौ पश्यमानौ विविधान्	३	४४	२
तौ पुत्रमात्मनः स्पृष्ट्वा	१	६४	२९
तौ पुष्करिण्याः पम्पायाः	३	७४	४
तौ प्रयान्तौ महावीर्यैः	४	२३	५
तौ भासयन्तावाकाशम्	६	९०	५४
तौ भ्रातरौ तदा बद्धौ	६	७२	६
तौ भीमबलविक्रान्तौ	४	१६	२५
तौ महाग्रहसंकाशौ	६	९०	६३
तौ मांसरुधिरौघेण	१	४९	५
तौ मुनी तापसश्रेष्ठौ	७	५४	५

	काण्ड	सर्ग	श्लोक
तौ रजन्यां प्रभातायाम्	७	९४	४
तौ राजपुत्रौ कात्स्न्र्येन	१	४	४२
तौ रामं प्राञ्जली भूत्वा	७	८८	२
तौ लोहितस्य प्रियदर्शनस्य	३	६३	८
तौ वनानि गिरिश्चैव	३	६४	२०
तौ विभीषणसुग्रीवौ	६	४४	२७
तौ वीरशयने वीरौ	६	४५	४९
तौ वीरशयने वीरौ	६	४६	४
तौ शरौघैस्तथाकीर्णौ	४	८८	४०
तौ शैलेष्वाचितानेकान्	३	७३	२
तौ शोणिताक्तौ युध्येताम्	४	१६	३०
तौ संप्रबलितौ वीरौ	६	४५	१८
तौ संप्रयुक्तं तु रथं समास्थितौ	२	४६	३३
तौ संस्पृशन्तौ चरणौ	३	८	१०
तौ हत्वा जनभोगार्थे	७	६३	२३
तौ हत्वा तां च दुर्वृत्ताम्	३	१९	२३
तौ हन्यमानौ नाराचैः	६	८०	२९
तौ हि वीरौ नरवरौ	५	३९	४२
तं यानं शीघ्रमारोप्य	२	३६	२४
तं यान्तमनुगच्छन्ति	७	१०९	१०
तं यान्तमनुयान्ती सा	६	४	२५
तं रक्षोधिपतिं क्रुद्धम्	५	५२	३
तं रथं राजपुत्राय	२	३९	१३
तं रथं सूर्यसंकाशम्	२	४०	१३
तं रथस्थं धनुष्पाणिम्	३	२८	११
तं रथस्थमथो दृष्ट्वा	६	४३	३६
तं राक्षसात्मजं चक्रे	७	४	२९
तं राजमार्गस्थमभित्रघातिनम्	६	६०	९६
तं रामः पुरुषव्याघ्रः	२	९६	१५
तं रामः प्रत्युवाचेदम्	३	३	८
तं राममेवानुविचिन्तयन्तम्	२	४२	३५
तं रामोऽभ्यपतत्क्षिप्रम्	२	३४	१८
तं लक्ष्मणोत्सृष्टविवृद्धवेगम्	६	७१	१०१
तं लक्ष्मणोऽथ बाहुभ्याम्	६	८३	१३
तं वज्रजाम्बूनदचारुपुङ्खम्	६	६७	१६५
तं वन्दमानं रुदती	२	४०	४
तं वन्यराजो राजेन्द्रम्	३	४४	३

	काण्ड	सर्ग	श्लोक
तं वानराः प्रेक्ष्य तदा विनेदुः	६	७४	६७
तं वाली क्रोधताम्राक्षम्	४	१९	१९
तं विना कैकयीपुत्रम्	६	१२१	६
तं विप्रं देववर्णिनम्	१	१२	२
तं विप्रमन्यगारस्थम्	२	३२	२
तं विमोक्षयितुं वीरः	६	१००	२५
तं विरुपाक्षयूपाक्षौ	५	४६	२९
तं विह्वलन्तं प्रसमीक्ष्य रामः	६	५९	१३८
तं विसृज्य ततो रामः	७	३८	१५
तं वृद्धं तरुणी भार्या	२	३२	३०
तं वैश्रवसंकाशम्	२	१६	८
तं व्रजन्तं प्रियो भ्राता	१	१	२५
तं व्रजन्तं मुनिवरम्	१	३१	१७
तं शब्दं काङ्क्षमाणस्तु	३	६९	२६
तं शब्दमभिनिध्याय	१	२६	८
तं शब्दमवसुप्तस्तु	३	५०	१
तं शयानं नरव्याघ्रम्	७	७२	१
तं शीघ्रमभिगच्छ त्वम्	४	११	२३
तं शैलमिव शैलाभाः	६	६७	३१
तं शैलशृङ्गैर्भुसलैर्गदाभिः	६	६०	४०
तं शोचमानं काकुत्स्थम्	४	२७	३३
तं शोणितपरीताङ्गम्	१	२	११
तं श्रुत्वा निनदं भ्रातुः	४	१२	१६
तं श्रुत्वा समनुप्राप्तम्	२	४	९
तं स दृष्ट्वा महाबाहुः	४	१६	१६
तं समासाद्य लंकेशः	७	२५	५
तं समासाद्य वेगेन	६	९८	१६
तं समीक्ष्य तदा राजा	२	१	४२
तं समीक्ष्य महातेजाः	४	४४	११
तं समीक्ष्य महातेजाः	६	९०	४७
तं समीक्ष्य महासत्त्वम्	५	५१	१
तं समीक्ष्य व्यवसितम्	२	२४	१
तं समीक्ष्यागतं रामम्	४	१२	२५
तं समुत्क्षिप्य बाहुभ्याम्	३	३०	१८
तं समुत्थाय काकुत्स्थः	६	१२७	४०
तं समुत्पाट्य चिक्षेप	६	६७	१०
तं समुत्सृज्य सा शक्तिः	६	५९	११८

	काण्ड	सर्ग	श्लोक
तं सान्त्वयामास ततः	३	६१	३०
तं समासाद्य विशुद्धसत्त्वम	४	२४	३०
तं सिंहमिव विक्रान्तम	३	२८	१२
तं सिंहमिव संक्रुद्धम	६	६४	१४
तं स्यंदनमधिष्ठाय	२	४६	२८
तं स्वयं पूजयित्वा च	३	३५	४०
तं स्वयं पूजयित्वा तु	३	३१	३७
तं हि चिन्तयमानायाः	२	६२	१८
तं हि नित्यं महाराजाः	२	७३	१५
त्यक्तधर्मा त्वधर्मात्मा	३	३६	१२
त्यक्तप्रहरणा सर्वे	६	५६	३२
त्यक्तभोगस्य मे राजन्	२	३७	२
त्यक्ताभरणसंयोगाः	६	७५	२४
त्यक्तां यज्ञायुधैः सर्वैः	२	११४	८
त्यक्त्वा ज्ञातिजनं सीते	२	११७	२२
त्यक्त्वात्तु तं ततो देशम्	४	४८	७
त्यक्त्वा पुत्रांश्च दारांश्च	४	५३	१६
त्यक्त्वा प्राणान्विचेष्टन्तः	६	८२	२१
त्यक्त्वा राज्यं च मानं च	३	१६	२८
त्यक्त्वा वराण्यात्मविभूषितानि	४	३०	४०
त्यज तद्वानरानीकम्	६	६७	५६
त्यज राजन्निमं शोकम्	६	८५	८
त्यज शोकं च दुःखं च	६	४८	३३
त्यज शोकं च मोहं च	२	६०	५
त्यज शोकं च मोहं च	४	१८	६३
त्यजाशु कोपं सुखधर्मनाशनम्	६	९	२२
त्यजैनं बलवान्कालः	७	१०६	९
त्यज्यतां कामवृत्तत्वम्	४	१	१२३
त्यज्यतां मानुषो भावः	३	४९	१३
त्यज्यमानमहासानुः	४	६७	४६
त्यागिनं संग्रहीतारम्	६	१२२	८
त्रयाणां पञ्चधा योगम्	६	६३	७
त्रयाणां भरतादीनाम्	५	५५	२५
त्रयाणां वानरेन्द्राणाम्	६	७६	१८
त्रयाणामपि लोकानाम्	३	१९	११
त्रयाणामपि लोकानाम्	३	५५	२५
त्रयाणामपि लोकानाम्	४	५९	२७
त्रयाणामपि लोकानाम्	७	१०४	१८
त्रयाणामेव भूतानाम्	५	३९	२६
त्रयाणामेव भूतानाम्	५	६८	९
त्रयाणामेव भूतानाम्	७	३४	३९
त्रयोदशोऽयं दिवसः	२	७७	२२
त्रयोऽपि लोकाविहितं विधानम्	४	२४	४३
त्रयो लोका इवाव्यग्राः	७	५	७
त्रस्तगात्रस्तु भरतः	२	११२	९
त्रस्तरूपं तु विज्ञाय	१	२१	५
त्रस्तव्याबिद्धवसना	५	५६	४६
त्रस्तानां गच्छतां तूर्णम्	६	७५	१७
त्रस्ताः सर्वे हरिगणाः	६	५४	१५
त्रातुमर्हसि नः सर्वान्	४	५२	२४
त्रातुमर्हसि मां सौम्य	१	६२	५
त्रायन्ते संक्रमास्तत्र	६	३	१७
त्रासनं सर्वभूतानाम्	६	१०२	५०
त्राहि मामद्य काकुत्स्थः	३	५२	५
त्रिदशा नातिवर्तन्ते	६	७६	७३
त्रिनतं मेघनिर्ह्रादिम्	६	७१	१८
त्रिपञ्चरात्रादूर्ध्वं यः	६	२९	३२
त्रिभिर्लोकैः समुदितैः	३	४५	१५
त्रिभिस्त्रिवेणून्बलवान्	३	२८	३०
त्रिभ्यो युगेभ्यस्त्रीन्वर्णात्	७	७४	२५
त्रिलोकनाथो ननु देवराजः	६	१५	५
त्रिवर्गफलभोक्ता च	४	३८	२३
त्रिवलीमांस्त्र्यवनतः	५	३१	१८
त्रिविक्रमान्प्रक्रमतः	२	२५	३५
त्रिविक्रमे मया तात	४	६६	३२
त्रिविधाः पुरुषा लोके	६	६	६
त्रिविष्टपं ब्रह्मलोकम्	१	५७	७
त्रिशङ्कुरिति विख्यातः	१	५७	११
त्रिशङ्कुर्विमलो भाति	६	४	४९
त्रिशङ्कुलोपिताङ्गश्च	१	४१	१०
त्रिशङ्कुस्तु महातेजाः	१	५७	१५
त्रिशिराः काञ्चनः केतुः	४	४०	५३
त्रिशिराः रथमास्थाय	६	६९	२३
त्रिशिराश्च महाबाहुः	३	३६	३

	काण्ड	सर्ग	श्लोक
त्रिशिराश्चातिकायश्च	७	१	२३
त्रिशिरास्तं प्रचिच्छेद	६	७०	७
त्रिशिरास्तु रथेनैव	३	२७	७
त्रिशिरोवक्षसि क्रुद्धः	३	२७	१४
त्रिशूलमस्त्रं धीरं च	१	५६	१२
त्रिषु चैतेषु यच्छ्रेष्ठम्	६	६३	१०
त्रिषु लोकेषु कोऽन्योऽस्ति	७	१८	१०
त्रिषु लोकेषु धर्मज्ञ	१	३६	४
त्रिषु लोकेषु रत्नानि	६	६२	४०
त्रिषु लोकेषु वा राम	१	२२	१५
त्रिषु लोकेषु विख्यातम्	३	४६	११
त्रिषु लोकेषु विख्यातः	३	४६	७
त्रिस्थिरस्त्रिप्रलम्बश्च	५	३५	१७
त्रीणिद्वन्द्वानि भूतेषु	३	७७	२३
त्रीण्येव व्यसनान्यद्य	३	६	३
त्रीन्पथो हेतुना केन	१	३६	३
त्रीन्पदानथ भिक्षित्वा	१	२६	२०
त्रीन्मासनष्टमासांश्च	३	२	२६
त्रींल्लोकान्धारयन्राम	६	११७	२३
त्रीन्सिंहांश्चतुरो व्याघ्रान्	२	२	७
त्रेताग्नयोऽपि दीप्यन्ते	४	१३	२३
त्रेतायुगे च वर्तन्ते	७	७४	१६
त्रेधाभूतं करिष्यामि	७	८५	६
त्रैलोक्यं तु करिष्यामि	३	४४	४२
त्रैलोक्यं येन संभ्रान्तम्	१	४५	६
त्रैलोक्यहितकामार्थम्	१	३४	२
त्रैलोक्याधिपतिं विष्णुम्	७	१७	२५
त्रैलोक्ये नास्ति यो द्वन्द्वम्	७	१६	२५
त्र्यहोश्वमेधः संख्यातः	१	१४	४०
त्वं कत्थसे महाराज	२	१३	३
त्वं कर्म कृतवानेतत्	३	४६	२८
त्वं क्रुद्धस्त्विह कामात्मा	७	३०	२६
त्वं क्ष्याम्यहं स्वकं राज्यम्	७	८६	१४
त्वं गच्छारिष्टमव्यग्रः	७	८२	१३
त्वं गतिः परमेशान	७	८५	१८
त्वं गतिस्त्वगतीनां च	२	४४	१०
त्वं च धर्मादतिक्रान्तः	४	१८	२४

	काण्ड	सर्ग	श्लोक
त्वं च लंकेश्वरस्तात	७	२	६
त्वं चापि मां तस्य मम प्रियस्य	४	२४	३
त्वं चैव नरशार्दूल	७	३१	७
त्वत्कृते च निमिष्यन्ति	७	५७	१४
त्वं तु कामप्रधानश्च	४	१७	३३
त्वं तु ह्यो वा किमर्थंवा	३	७०	१४
त्वं तु धर्ममविज्ञाय	४	१८	४३
त्वं तु रावण दुर्बुद्धि	३	३३	२२
त्वं तु लुब्धः प्रमत्तश्च	३	३३	१४
त्वं तु शक्र तदा नारीम्	७	३०	२५
त्वं तु संक्लिष्ट धर्मश्च	४	१८	१२
त्वं तु सौम्य परित्रस्तः	४	२४	३
त्वं धारयसि भूतानि	४	११७	२२
त्वं नराधिपतेः पुत्रः	४	१७	२४
त्वं नित्यं सुविषण्णं माम्	४	४६	१३
त्वं पद्ममिव वातेन	२	६	४१
त्वं पुनर्जम्बुकः सिंही	३	४७	३७
त्वं पौरजनवद्त्यालान्	२	६५	१५
त्वं प्रमत्तो न जानीषे	४	३२	१३
त्वं मृत्योरपि मृत्युः स्याः	४	३	४८
त्वं मे बहुमतो राम	७	७४	२४
त्वचा प्रधानया ह्येषः	३	४३	४६
त्वच्छोकविमुखो रामः	५	४०	१३
त्वत्कृते तमनिन्दा च	५	३५	४४
त्वत्कृतेन मया प्राप्तम्	२	५२	५१
त्वत्कृतेनैव नाम्ना वै	१	४७	७
त्वत्कृते मे पिता वृत्तः	२	७४	४
त्वत्तो जनाः पूर्वतरे द्विजाश्च	२	१०६	३५
त्वत्तो मया श्रुतं वीर	७	४३	४
त्वत्प्रसादात्समेष्यामः	५	५७	४७
त्वत्सनाथः सखे संख्ये	४	३६	५
त्वत्समीपं महाबाहो	७	२	२७
त्वत्समीपे च ये सत्त्वा	७	८१	१५
त्वत्सहायनिमित्तं हि	४	३५	१६
त्वदधीना वयं सर्वे	४	१२	३४
त्वदस्त्रबलमासाद्य	५	४८	३
त्वदाननरसस्याद्य	५	२४	२२

	काण्ड	सर्ग	श्लोक
त्वद्गतानि च सर्वेषाम्	४	४७	३५
त्वद्दर्शनकृतोत्साहम्	५	३७	२५
त्वद्दर्शनकृतोत्साहौ	५	४७	२८
त्वद्दर्शनैः कृतोत्साहाः	५	३५	४८
त्वद्दर्शने विशुद्धात्मा	४	३३	३४
त्वद्वाक्यैर्नैव तु मां शक्यम्	३	४०	४
त्वद्विधः कामवृत्तो हि	३	३७	७
त्वद्विधा न हि शोचन्ति	३	४४	१४
त्वद्विधास्तु गुणैर्युक्ताः	२	११७	२८
त्वद्वियोगान्न मे कार्यम्	२	२१	२४
त्वद्वियोगेन दुःखार्तः	५	३४	३४
त्वन्निमित्तमिदं तावत्	२	११४	१०
त्वमद्य भवनो राजा	२	७९	३
त्वमप्यस्य पिता दाता	४	२२	१०
त्वमप्रतिमकर्माणम्	४	८०	४
त्वमशोकस्य शाखाभिः	३	४२	१
त्वमस्माकं चतुर्णां वै	४	१२७	४४
त्वमस्मिन्कार्यनियोगे	५	३९	४
त्वस्मिन्कार्यनिर्वाहे	५	३८	६३
त्वमस्त्रविच्छस्त्रभृतां वरिष्ठः	५	४८	२
त्वमात्तबाणासनबाणपाणिः	४	२४	३२
त्वमिक्ष्वाकुकुलस्यास्य	३	६	८
त्वमिहासुरसङ्घानाम्	५	१	९०
त्वमेव राजा धर्मज्ञ	१	१	३६
त्यमेवाज्ञापय विभो	४	४०	१४
त्वमेषां ज्ञातवीर्याणाम्	५	१	९१
त्वया कार्यं नरव्याघ्र	२	४६	९
त्वया किलैषु नृपतिः	७	४६	७
त्वया च सह गन्तव्यम्	२	२९	५
त्वया चैव मया चैव	२	३१	५
त्वया जीवपितः सुतः	७	७६	२७
त्वया तस्मै वरो दत्तः	१	१५	७
त्वया तस्य निरस्तस्य	४	१५	११
त्वया तु नृपशार्दूल	७	११६	१४
त्वया तेन च वीरेण	२	६६	२१
त्वया त्विदानीं धर्मज्ञ	२	७२	५२
त्वया दत्तोऽयमस्माकम्	७	३५	५५

	का०	स०	श्लो०
त्वयाऽदृश्येन तु रणे	४	१७	४८
त्वया हि ममानार्यः	४	१०४	५
त्वया नाथेन काकुस्थ	४	१७	४२
त्वया निवेशिता सौम्य	७	२	२४
त्वयाऽपि खलु तत्कार्यम्	४	६२	१४
त्वयापि च यदज्ञानात्	२	६४	५३
त्वया पुनर्नृशंसेन	४	११०	२२
त्वया पुनर्ब्राह्मणगौरवादियाम्	७	६०	१८
त्वयाप्युक्तं महाराज	७	२५	४४
त्वया मया च वैदेह्या	२	२१	४९
त्वयायमतुलो धर्मः	७	६१	७
त्वया राघव संप्राप्तम्	२	९६	२१
त्वया राज्यमयोध्यायाम्	२	१०१	२३
त्वया लक्ष्मण नाथेन	४	९१	१९
त्वयाविगण्य वातापे	३	४३	४४
त्वया विज्ञातपूर्वश्च	५	५१	११
त्वया विप्रकृताभिश्च	४	३	६६
त्वया विरहिता देवी	३	६७	१६
त्वया विहसिता चाहम्	५	३८	१८
त्वया विहीनामिह माम्	२	२४	८
त्वया विहीनो यत्राहम्	६	१२३	४१
त्वयाऽशेषो जनश्चायम्	२	४४	२५
त्वया सकृद्धि शस्त्रेण	६	६९	५
त्वया सान्त्वैरुपक्रान्तम्	४	३३	३७
त्वया सृष्टिमिदं सर्वम्	७	२७	१२
त्वयाहं पुरुषव्याघ्र	३	५	३०
त्वया हि नित्यशः साध्वम्	७	८४	१८
त्वया ह्यनुक्तैर्हरिभिः	५	६४	२२
त्वया ह्यनुगृहीतेन	४	१८	२६
त्वयि चानागते पूर्वम्	६	४१	६
त्वयि धर्मः परः साधोः	७	८३	१०
त्वयि पञ्चत्वमापन्ने	६	३	८६
त्वयि प्रव्रजिते वीर	६	८३	४१
त्वयि मद्बांहुनिष्क्रान्तः	७	६९	६
त्वयि ये चापि वत्स्यन्ति	४	४२	४०
त्वयि वीर विपन्ने हि	४	१२	३४
त्वयि संनिहितेप्येवम्	२	२०	४१

	का०	स०	श्लो०
त्वयि संन्यस्य जीवन्ती	५	६५	१२
त्वयेदं महदारब्धम्	६	१२	३४
त्वयैव नूनं दुष्टात्मन्	३	५३	४२
त्वय्यस्ति मम च स्नेहः	६	६२	२०
त्वरते कार्यकालो मे	५	१	१२४
त्वरमाणश्च धर्मात्मा	२	६६	१५
त्वरमाणस्ततो गत्वा	३	३१	१
त्वरमाणो जगमसः	६	८७	१
त्वरमाणो जगामाथ	३	६०	३
त्वरयस्व महाराजम्	२	१४	४२
त्वरयायुपयातोऽहम्	१	७३	६
त्वरामहे वयं द्रष्टुम्	३	८	६
त्वरिताशीघ्रमागत्य	२	३	४७
त्वां कृत्वोपरतो मन्ये	५	२०	१३
त्वां च मां च नरव्याघ्र	३	६६	४६
त्वां च मां च पुरा तूर्णम्	३	७०	४
त्वां चैव मैथिलीं चैव	७	५०	१२
त्वां चैवोपगताः सर्वे	४	५२	१६
त्वां तु काञ्चनकर्णाभाम्	३	४७	२७
त्वां तु दिष्ट्या कुशलिनम्	७	१	१७
त्वां तु दृष्ट्वा कुशलिनम्	६	११६	१५
त्वां तु धर्मे स्थिता नित्यम्	३	७३	२७
त्वां तु निःसंशयं सीता	३	६६	१६
त्वां तु पृष्टगतां कृत्वा	५	३७	२२
त्वां तु वेदितुमिच्छामि	३	१७	१८
त्वां दृष्ट्वा पुत्र जीवामि	२	८७	१०
त्वां दृष्ट्वा प्रियवक्तारम्	५	४०	२
त्वां द्रष्टुमुपयातोऽहम्	५	३४	४०
त्वां नियोक्ष्यामहे विष्णो	१	१५	१६
त्वां नेतुमागतो वीरः	१	७७	१७
त्वां नैते ह्यनुरञ्जेयुः	४	५४	१०
त्वां पुरा चीरवसनम्	६	१२४	५
त्वां प्राप्य तु वधो वापि	७	८०	१५
त्वां प्राप्यं हि पिता मेऽद्य	२	७३	६
त्वां यदाप्रभृति ह्यस्मिन्	२	११६	१३
त्वां राघवकुले जातः	४	१२	६४
त्वां वेत्य तावद्वनितावियोगः	४	२४	३६

	का०	स०	श्लो०
त्वां वै महाराजकुलप्रसूतः	४	२०	१०
त्वां श्वः प्रभाते लवणं महात्मन्	७	६७	२६
त्वां समर्थतरः पित्रा	४	५४	८
त्वां समासाद्य वैदेहि	५	२०	१४
त्वां सर्वगुणसंपन्ना	७	१७	२१
त्वां हि कर्तुं वने शक्तः	२	२७	१४
त्वां हि त्रिपथगे देवि	२	५२	८६
त्वां हि देववर श्रेष्ठ	५	१	११८
त्वां हि नारायणः श्रीमान्	७	२७	२१
त्वां हि पाणिप्रदानेन	४	८	२७
त्वां हि बाणधनुष्पाणिः	३	६	१४
त्वां हि मायामयं दृष्ट्वा	३	४०	१६
त्वां हि रूपं बहुगुणम्	१	६४	७
त्वां हि शूरश्च बलवान्	३	२४	१४
त्वां हि सत्यव्रतः शूरः	६	१७	३६
त्वानप्येतादृशो भावः	२	६४	५६
त्वामप्युगतं तूर्णम्	४	६६	२३
त्वामहं सत्यमिच्छामि	२	३४	४८
त्वामासाद्य महात्मानम्	३	६	१०
त्वामाह स वरारोहम्	५	३५	६६
त्वामिदानीं कथं तात	७	१२	१४
त्वामेव शोचंस्तव दर्शनेप्सुः	२	१०२	६
दक्षः प्रगल्भो द्युतिमान्	३	७२	१४
दक्षयज्ञवधे पूर्वम्	१	६६	६
दक्षिणद्वारमासाद्य	६	४२	२५
दक्षिणं तीरमुदधेः	५	५८	४७
दक्षिणं त्यागशीलं च	५	२४	२४
दक्षिणं मण्डलं चोभौ	६	६७	३०
दक्षिणस्य समुद्रस्य	४	४१	२६
दक्षिणस्य समुद्रस्य	४	६४	४
दक्षिणस्य समुद्रस्य	५	६५	११
दक्षिणस्यामपि दिशि	४	३६	१५
दक्षिणस्योदवेस्तीरे	७	६०	२५
दक्षिणाग्रेषु दर्भेषु	२	१०४	८
दक्षिणा दिगनुक्रान्ता	५	३५	७६
दक्षिणादुत्तरं पारम्	५	५६	४०

	का०	स०	श्लोक
दक्षिणा दिशमाक्रामत्	७	७५	१३
दक्षिणा दिशमास्थाय	१	६०	६२
दक्षिणाभिमुखाः सर्वे	३	६४	१८
दक्षिणाभिमुखाः सर्वे	६	१११	११०
दक्षिणेन च मार्गेण	२	६२	१३
दक्षिणो दक्षिणं बाहुम्	३	७०	६
दक्षो धैर्यसमन्वितः	७	१	१०
दग्धस्त्वयाऽहमवरे	३	७१	३२
दग्धेयं नगरी लङ्का	५	५५	३२
दण्ड एव परो लोके	६	२२	४५
दण्डकारण्यनिलयम्	६	२१	१५
दण्डकारण्यमेषोऽहम्	२	१६	११
दण्डकाष्टमवष्टभ्य	७	६८	२
दण्डनिर्घातकादिन्यः	६	३३	२०
दण्डस्य विषयो यावत्	७	८१	१०
दण्डानन्ये प्रगृह्णन्ति	६	२२	६०
दण्डश्च यः पातयेदण्डम	४	१८	६१
दत्तं नतेऽति सूक्ष्मोऽपि	७	७८	१६
दत्तपश्यशना दूताः	२	६८	१०
दत्तप्रहारव्यथिताः	७	६७	२६
दत्तमासनमालभ्य	२	२०	२५
दत्तविष्टं हुतं चैव	२	१०६	१४
दत्ता चास्मीष्टवद्देयै	२	११८	३३
दत्ताभयवधो नाम	४	१२	३५
दत्ता ममेयं पित्रा तु	७	११	३१
दत्ता मात्रा महाभागा	७	५	३३
दत्त्वा तु तनयां राजा	७	२	२८
दत्त्वा तु दक्षिणं नेत्रम्	५	३८	३५
दत्त्वा तु सहवैदेज्ञा	२	३३	१५
दत्त्वा त्वाभरणं तस्यै	२	७	३३
दत्त्वा महेन्द्रनिलयः	१	७५	२७
दत्त्वा रामाय हनुमान्	५	६५	६
दत्त्वा वरं चापि तपो धनानाम्	३	६	२६
दत्त्वा कान्ताश्च समालभन्त्यः	५	५	१३
दत्त्वा च खरसैन्यं तत्	३	२४	३३
दत्त्वोवाच ततः शम्भुः	७	२६	४४
ददर्श च नगात्तस्मात्	५	१४	२६

	काण्ड	सर्ग	श्लोक
ददर्श च पतन्नेव	५	१	१६३
ददर्श तं राजपथम्	२	१७	६
ददर्शतुर्मृगपतिम्	५	३५	२५
ददर्श पतितं भूमौ	३	६७	१०
ददर्श पर्णशालां च	३	६०	५
ददर्श पृथिवीदेशम्	६	२६	७
ददर्श पौर्णमासश्च	१	५६	२४
ददर्श भरतं दीनम्	६	१२५	३०
ददर्श भवने तस्मिन्	२	६६	७
ददर्श भीमसंकाशम्	१	७४	१७
ददर्श भूमौ निष्क्रान्तम्	३	६४	३६
ददर्श मध्यमे गुल्मे	५	४	१५
ददर्श महतीं सेनां	४	५८	६
ददर्श राक्षसश्रेष्ठम्	७	२५	५०
ददर्श राक्षसेन्द्रस्य	५	६	३८
ददर्श रावणस्तत्र	७	२३	२२
ददर्श लङ्कां सुन्यस्ताम्	६	४०	३
ददर्श वध्यमानांश्च	७	२१	१२
ददर्श शिरसा चैनम्	१	७०	१३
ददर्श स कपिस्तस्य	५	१०	२१
ददर्श स महाबाहुः	७	२१	२१
ददर्श स महासत्त्वम्	५	१	१७८
ददर्श सहमारीचः	३	४२	१२
ददर्श सा इला तस्मिन्	७	८८	६
ददर्श सीतां वैदेहीम्	४	५७	१०
ददर्श हनुमांस्तत्र	५	१७	२५
ददर्शदूरतस्तस्य	३	५	८
ददर्शान्तर्हितं वीरम्	६	४६	१०
ददर्शायुधजालानि	६	४१	३८
ददर्शावस्थितं वीरम्	६	८८	४३
ददामि कुञ्जराणां ते	१	५३	१८
ददामि ते महाबाहो	१	२७	७
ददामि ते शतान्यष्टौ	१	५३	१६
ददाह हरिसैन्यानि	६	६६	७१
ददुश्च परमप्रीताः	१	६६	२४
ददुश्चैवं वरान्सर्वे	१	४	२६
ददृशाते गिरौ तत्र	३	६६	१०

	का०	स०	श्लोक
ददृशुः काञ्चनान्वृक्षान्	४	५०	२५
ददृशुः शिखरे तस्य	६	३८	१०
ददृशुः सर्वभूतानि	६	२२	७४
ददृशुः सर्वभूतानि	७	६६	३६
ददृशुर्भीमकर्माणम्	४	४८	१७
ददृशुर्वानरानीकम्	६	६६	४०
ददृशुर्वानराः शूराः	४	५०	३८
ददृशुश्च महात्मानम्	६	६६	६८
ददृशुस्तत्र हरयः	४	५०	३२
ददृशुस्तां त्रयो लोकाः	६	११६	३३
ददृशुस्ता महाकायम्	६	१०	६
ददृशुस्तां महाभागाम्	६	११६	३१
ददृशुस्तां विशालाक्षीम्	६	११६	३०
ददृशुस्ते तदा युद्धम्	६	१०२	४४
ददृशुस्ते महात्मानः	६	४	१२०
ददृशुस्ते समायान्तम्	६	१२८	३४
ददृशे ज्वलितप्रासम्	६	७५	५६
ददौ कन्याशतं तासाम्	१	७४	५
ददौ चास्त्राणि दिव्यानि	२	४४	११
ददौ तस्य ततः प्रीतः	४	४४	१२
ददौ तां कालकेन्द्राय	७	१२	२
ददौ धर्मेण हिमवान्	१	३५	१७
ददौ नागसहस्रस्य	१	२५	७
ददौ राजा सुसंहृष्टः	१	७४	६
ददौ शतवृषान्पूर्वम्	६	१२८	७४
दद्यान्न प्रतिगृह्णीयात्	५	३३	२५
दनुर्नाम दितेः पुत्रः	४	४	१५
दन्तान्विद शतस्तस्य	४	६२	२३
दन्तैः पादैर्मुखैर्हस्तैः	७	२८	३५
दन्तोलूखलिनश्चैव	३	६	३
दमः शमः क्षमा धर्म	४	१७	१६
दयिता त्वं सदा भर्तुः	२	६	२४
दरीमुखश्च बलवान्	४	३६	२४
दर्पणान्परिमृष्टांश्च	२	६१	७६
दर्पश्च व्यवसायश्च	४	१५	१२
दर्पान्निराकृता पूर्वम्	२	८	३७
दर्भमुष्टिप्रहरणान्	५	४	१६

	का०	सर्ग	श्लोक
दर्शनं चापि लङ्काया	५	५७	५१
दर्शनं चाप्यगस्त्यस्य	१	३	१६
दर्शनं चित्रकूटस्य	२	६५	११
दर्शनं ते महाराज	७	६०	४
दर्शनं तेऽभिकाङ्क्षन्ते	२	१५	२४
दर्शनं रावणस्यापि	१	३	३०
दर्शनं शरभङ्गस्य	१	३	१८
दर्शनादर्शनेनैव	३	४४	८
दर्शनादेव यः प्राणान्	७	२२	३४
दर्शनादेव रामस्य	३	४१	१८
दर्शनार्थं तु वैदेह्याः	४	४७	१
दर्शनीयं निराबाधम्	७	१३	४
दर्शनीयं मृगाकीर्णम्	१	२८	१८
दर्शनीयं हि यां रक्षः	७	२४	२
दर्शने मा कृथा बुद्धिम्	३	५५	२३
दर्शयञ्छब्दवेधित्वम्	१	२६	२४
दर्शयन्ति हि बीभत्सैः	२	११६	१४
दर्शयन्ति शरनद्यः	४	३०	५८
दर्शयन्तौ बहुविधाम्	४	१०७	३२
दर्शयामास काकुत्स्थम्	३	१२	१५
दर्शयामास चात्मानम	१	१	८०
दर्शयित्वा तु रामाय	३	७३	१
दर्शयित्वा तु वैदेहीम्	३	५५	१३
दर्शयेश्वाकुशार्दूल	६	६७	१४६
दर्शिता भवता प्रीतिः	७	३८	१८
दशकोटिसहस्राणि	६	१६	१५
दशकोटिं सुवर्णस्य	१	१४	५१
दशक्रोधवशा राम	३	१४	२१
दशक्रोश इतस्तात	२	५४	२८
दशग्रीवं जयेत्याहुः	६	१०२	४६
दशग्रीव तथा यत्नम्	७	६	४३
दशग्रीवं महादंष्ट्रम्	७	६	२६
दशग्रीवं हतं दृष्ट्वा	६	१११	२
दशग्रीवस्तु तं जित्वा	७	२२	४६
दशग्रीवस्तु वैदेहीम्	५	१६	४
दशग्रीव स्थितौ धर्मे	३	५०	३
दशग्रीवोऽभयं तस्मै	३	३१	६

	का०	सर्ग०	श्लोक
दशग्रीवो महातेजा:	६	७१	२७
दशग्रीवो महाबाहु:	७	२	३७
दशग्रीवो विंशतिभुज:	३	३५	६
दशनागबला: केचित्	४	३१	२५
दशनागबला: केचित्	४	४१	४७
दशपञ्चचतुर्वर्गान्	२	१००	६८
दशपद्मो दशबृहत्	५	३५	२०
दशयोजनविस्तार:	५	१	१५४
दशयोजनविस्तार:	५	५६	५०
दशयोजनविस्तीर्णा	५	१	७४
दशयोजनविस्तीर्णा	५	३६	४०
दशयोजनविस्तीर्णम्	६	२२	७२
दशरथनृपसूनुबाणवेगै:	६	६६	४१
दशरथनृपसूनुसत्तमाभ्याम्	१	२२	२४
दशरथसुतराक्षसेन्द्रयोस्तयो:	६	१०७	६७
दश राक्षससाहस्रम्	६	६०	४३
दशरात्रं हि यज्ञस्य	१	१६	१८
दशवर्षसहस्राणि	१	१	६७
दशवर्षसहस्राणि	२	११७	११
दशवर्षसहस्राणि	१	१०	१०
दशवर्षसहस्राणि	७	६६	८
दशवर्षसहस्राणि	७	१०४	१२
दश वानरकोट्यश्च	६	३०	२७
दश सप्त च वर्षाणि	२	२०	४५
दशानन: क्रोधविवृत्ततेत्र:	६	६५	५३
दशभागगतो हीन:	३	७२	६
दशाविभागपर्यये	६	३	६०
दशास्यो विंशतिभुज:	३	४६	८
दहता च मया लंकाम्	५	५८	१६०
दहन्तीमिव नि:श्वासै:	५	१७	२६
दह्यन्ते मृदमङ्गानि	६	७६	१२
दह्यमानं ततो दृष्ट्वा	५	४३	१६
दह्यमानस्तु शोकाभ्याम्	२	६२	६
दह्यमानाग्निना तेन	१	३७	१६
दह्यमाने च लाङ्गूले	५	३५	२६
दह्यमानो दिवारात्रम्	१	५८	१३
दाक्षिणात्यान्नरेन्द्रांश्च	१	१३	२८

	काण्ड	सर्ग	श्लोक
दातव्यमन्नं विधिवत्	१	१३	१४
दातुं च तावदिच्छामि	२	८३	२४
दातुं दुहितरं तस्मै	७	१२	१७
दातुमर्हसि मूल्येन	१	६१	१५
दातुमिच्छति तस्मै तु	७	१७	१३
दातृप्रतिग्रहीतृभ्याम्	१	७३	१२
दात्यूहकोयष्टिबकै:	६	३६	६
दात्यूहशुकसंघुष्टा:	७	४२	१२
दानमानप्रसादैस्त्वाम्	७	२४	३३
दानमानादिसत्कारै:	४	१५	२७
दानयज्ञविवाहेषु	२	५७	१३
दानवेन्द्रो महाबाहो	६	७	८
दानसंवनना ह्येते	२	१०८	१६
दान्तकाञ्चन चित्राङ्ग:	५	१०	२
दान्तका राजताश्चैव	३	५५	१०
दान्तकैस्तापनीयैश्च	३	५५	८
दान्तराजतसौवर्ण:	२	१०	१४
दान्तराजतसौवर्णै:	२	१०	१५
दान्तै: सर्वप्रजाकान्तै:	२	२	४७
दारयन्निव सर्वेषाम्	६	६७	१४५
दारयन्स च मां काक:	५	३८	१६
दारा: पुत्रा: पुरं राष्ट्रम्	७	३४	४१
दारुपात्राणि सर्वाणि	६	३	११६
दारुणि परिभिन्नानि	२	५४	७
दावाग्निदीप्तानि यथा	६	७५	२३
दाशास्त्वनुगमिष्यन्ति	२	८५	६
दासीदासांश्च यानानि	२	७७	३
दासोऽहं कोसलेन्द्रस्य	५	४२	३४
दिक्षु सर्वासु गगने	६	११७	२१
दिक्षु सर्वासु तां देवीम्	५	३१	१३
दिक्षु सर्वासु बलवान्	६	६६	७३
दिति यत्र तप: सिद्धाम्	१	४७	११
दितिस्त्वत्वजयनद्दैत्यान्	७	२	१६
दिते: पुत्रा: न तां राम	१	४५	३७
दिदृक्षमाणो वैदेहीम्	५	१७	४
दिदृक्षमाणो:वैदेहीम्	३	६६	७
दिदृक्षवो देवगणा:	१	४३	२०
दिदेश राजा रुचितम्	२	३	३५

	काण्ड	सर्ग	श्लोक
दिनानि च मुहूर्ताश्च	२	२५	१०
दिलीपस्तु महातेजाः	१	४२	५
दिलीपस्तु महातेजाः	१	४२	८
दिलीपस्य भगीरथः	१	७०	३८
दिलीपेन महाभाग	१	४४	११
दिवः क्षिप्तामिवलोक्यां ताम्	६	७०	३८
दिवं जगाम काकुत्स्थ	१	६०	१७
दिवं तु तस्यां यातायाम्	३	७५	१
दिवमावृत्य गच्छन्तम्	४	६७	२२
दिवसं परिकीर्णानाम्	२	११६	४
दिवसश्चाद्य मर्यादा	४	२	५८
दिवसस्याष्टभागेन	६	६३	३२
दिवसे दिवसे तत्र	१	१४	२०
दिवसे विंशतिः सर्गाः	७	६३	१०
दिवाकरसमाकरम्	१	१६	१४
दिवि नक्षत्रभूतं च	६	३२	१६
दिव्यं च मानुषं चैव	३	६६	१६
दिव्यगन्धरसस्पर्शाः	४	४३	४४
दिव्यगन्धैः कुसुमितैः	४	४०	४५
दिव्यचन्दनदिग्धाङ्गान्	३	३८	२७
दिव्यतेजोवृतं व्योम	७	११०	५
दिव्यदुन्दुभिनिर्घोषम्	३	५५	६
दिव्यं तं रथमास्थाय	६	११३	६
दिव्यन्तरिक्षे भूमौ च	२	१	४३
दिव्यमुत्पद्यते यत्र	४	४१	४१
दिव्यं संमूर्च्छितं जिघ्रन्	५	६	२०
दिव्याङ्गरागा वैदेहि	५	२४	२५
दिव्याङ्गरागा वैदेहि	६	११४	१०
दिव्याङ्गरागां वैदेहीम्	६	११४	७
दिव्यानि च सुगन्धीनि	६	६५	२७
दिव्यैर्गुणैः शक्रसमः	२	२	२८
दिव्योचन्दनलिप्ताङ्गो	७	२६	१५
दिशं ह्युदीचीं विक्रान्त	४	४३	४
दिशः पर्याकुलाश्चासन्	४	३६	६
दिशः पर्याकुलाः सर्वाः	२	४१	१३
दिशः सर्वाभिधावन्तम्	५	१४	११
दिशमप्युत्तरां सर्वाम्	४	४७	८

	काण्ड	सर्ग	श्लोक
दिशमास्थाय कैकेयि	२	६	७२
दिशश्च प्रदिशश्चैव	६	८६	३५
दिशश्च प्रदिशः सर्वा	६	१०६	३०
दिशस्तस्यास्ततो भूयः	४	४६	१७
दिशागजस्तु तच्छ्रुत्वा	१	४१	६
दिशो विचेतुं तां सीताम्	३	७२	२६
दिशो विप्रद्रुताः सर्वे	६	३५	२०
दिशो वै तव शासनात्	१	४७	६
दिष्ट्या खलु महाराज	२	१६	१८
दिष्ट्या च कुशली रामः	५	३६	१२
दिष्ट्या जीवति सीतेति	४	५६	१८
दिष्ट्या जीवसि वैदेहि	५	३४	३७
दिष्ट्या ते वत्स संप्राप्तः	७	२	४
दिष्ट्या ते विजयो वत्स	७	७०	२
दिष्ट्या त्वया हतो रामः	७	१	१६
दिष्ट्या त्वं राक्षसेन्द्रेण	७	१	२४
दिष्ट्या त्वं विजयी रामः	७	३८	२७
दिष्ट्या त्वां गुह्य पश्यामि	२	५०	४२
दिष्ट्या दृष्टा त्वया देवी	५	५७	४८
दिष्ट्या न चलितो धर्मात्	२	७५	६२
दिष्ट्या प्रहस्तो विकटः	७	१	२१
दिष्ट्यायमद्य पापात्मा	६	५६	३१
दिष्ट्या सर्वस्य लोकस्य	६	११६	३
दिष्ट्यासि कुशली प्राप्तः	४	१०	२
दिष्ट्यासि दर्शनं रामः	६	७६	१३
दिष्ट्यासि मम मन्दात्मन्	६	१०३	१६
दिष्ट्यासि मे राघव दृष्टिमार्गम्	६	५६	६४
दीक्षितं व्रतसंपन्नम्	२	१६	२३
दीक्षितः पात्रसहितः	१	३६	१६
दीनया तुरया वाचा	२	१०	५६
दीनवक्त्रः क्षणः श्यामाः	७	२४	११२
दीना दीनस्वराः क्रूराः	६	२३	७
दीनां विलपतीं मन्दाम्	६	१११	६१
दीनो वा राज्यहीनो वा	५	२४	६
दीपयन्तीव मे कामम्	४	१	१००
दीपानां च प्रकाशेन	५	६	३२
दीपिकाः काञ्चनीः कांश्चित्	५	१८	११

	काण्ड	सर्ग	श्लोक
दीपकाभिरनेकाभिः	५	१८	२२
दीप्तजिह्वो महादंष्ट्रः	३	३९	३
दीप्तपावकसंकाशैः	६	१६	२३
दीप्तपावकसंकाशैः	६	१०२	४
दीप्तभोगैरिवाकीर्णम्	६	४	११२
दीप्तमग्निमरण्यं वा	२	२१	१६
दीप्तशूलगदाखड्गैः	६	७५	५५
दीप्तानलरविप्रख्यैः	६	६९	४२
दीप्तान्क्षिपति नाराचान्	३	३४	७
दीप्तास्यं च महाबाहुम्	३	१७	७
दीप्तमानमिवाकाशे	६	१०६	६
दीप्यमानं स्वया लक्ष्म्या	६	११९	१०
दीयतां दीयतामन्नम्	१	१४	१४
दीयतां नगरी लङ्का	६	२	३५
दीयतां निखिलेनेव	२	३४	४३
दीयतां संप्रदानं च	४	२२	३४
दीयते द्वन्द्वयुद्धं ते	७	१९	१०
दीयमानं सुवर्णं तु	७	९४	१९
दीयमानां न तु तदा	२	११८	५१
दीर्घकालं प्रसुप्तस्य	७	६३	५४
दीर्घकालं मम क्रोधात्	१	५९	२२
दीर्घकालात्समुत्थाय	२	७५	१
दीर्घकालोषितस्तस्मिन्	२	९४	१
दीर्घकेश्यः सुचार्वङ्ग्यः	७	२४	७
दीर्घगम्भीरनिर्घोषाः	४	३०	२३
दीर्घबाहुं महासत्त्वम्	२	३	२८
दीर्घबाहू विशालाक्षौ	४	२	२०
दीर्घमायुः स मे प्रादात्	३	७१	९
दीर्घमुष्णं च निःश्वस्य	४	२४	८
दीर्घमुष्णं विनिःश्वस्य	२	५३	२
दीर्घवृत्तभुजः श्रीमान्	४	३३	१०
दीर्घाभिर्द्रुमयुक्ताभिः	५	१४	२५
दीर्घायुर्भव पुत्रेति	४	२३	२६
दीर्घायुश्च महात्मा च	७	३६	२०
दीर्घायुषो नराः सर्वे	१	६	१८
दीर्घिकाः पुष्करिण्यश्च	३	५५	१२
दुःखजं विसृजत्यश्रु	२	४४	१८

	काण्ड	सर्ग	श्लोक
दुःखमेव सदा वनम्	२	२८	६
दुःखं बलेदं ननु दुःखितायाः	५	२८	७
दुःखशोकसमाविष्टाः	७	२४	१३
दुःखस्यानुचितो दुःखम्	२	५८	६
दुःखानि च बहुनीह	७	६२	१३
दुःखाभितप्तो भरतः	६	९९	३८
दुःखार्ता रुदती सीता	२	२१	२
दुःखिता स्वरघातेन	३	५८	१६
दुःखेन बुबुधे सीताम्	५	१५	३९
दुःखेन महताविष्टः	१	५७	८
दुःखे मे दुःखमकरोः	२	७३	३
दुःशलीः कामवृतो वा	२	११७	२४
दुद्रुवुर्बहुधा भीताः	६	९०	७८
दुद्रुवुर्यत्र निःशब्दम्	३	२४	३१
दुधुवे च स रोमाणि	५	१	३०
दुन्दुभिस्वननिर्घोषः	५	३५	१६
दुन्दुभीभिर्मृदङ्गैश्च	१	५	१८
दुरवापं महच्छूलम्	६	७९	३२
दुरात्मन्नात्मनाशाय	६	८१	१८
दुराधर्षो भवत्येष	६	८४	१५
दुरात्मा पृच्छ्यतामेषः	५	५०	५
दुरासदश्च संजज्ञे	६	७७	९
दुरासदा हि ते वीराः	६	४२	२३
दुर्गगम्भीरपारेखाम्	१	५	१३
दुर्गन्धं दुःसहं घोरम्	५	२७	२५
दुर्गमृक्षविलं गाम	४	५०	८
दुर्गे विनाशिते कर्म	५	५४	४
दुर्जयः करवीराक्षः	३	२३	३२
दुर्जयः करवीराक्षः	३	२६	२७
दुर्जयेनाप्रमेयेण	४	१५	२२
दुर्ज्ञेयाः कार्यगतयः	६	१२	२२
दुर्दर्शमिव घोरं च	४	५०	१३
दुर्दर्शां पारियात्रस्य	४	४२	१०
दुर्धरेण प्रहस्तेन	५	४९	११
दुर्मना व्यथिता दीना	५	१३	२७
दुर्मुखः पुनरुत्थाय	६	५८	२१
दुर्लभस्त्वीदृशो बन्धुः	७	५३	२

	का०	स०	श्लोक
दुर्लभस्य च धर्मस्य	४	१८	४१
दुषणोऽस्य बलाध्यक्षः	७	२४	३९
दुष्करं कुरुते रामः	५	१६	२७
दुष्करं कृतवान्रामः	५	१५	५३
दुष्करं कृतवान्रामः	७	४३	१४
दुष्करं क्रियते पुत्र	२	३४	३५
दुष्कालेन व भग्नानि	२	३३	२१
दुष्कुलैतदयुक्तार्थम्	२	४०	३
दुष्कृतं यत्र पश्येथः	७	७४	३२
दुष्णापं स्वशरीरेण	१	६०	१४
दुहिता जनकस्याम	५	३६	१६
दुहिता वानरेन्द्रस्य	४	६६	१०
दूतवध्या व दृष्टा हि	५	५८	१९
दूतवाक्यं तु तच्छ्रुत्वा	१	३८	१४
दूता वैवस्वतस्यैते	२	६४	६६
दूताञ्शुद्धसमाचरान्	७	९५	३
दूतोऽहं कोशलेन्द्रस्य	४	४१	७७
दूतोऽहमिति विज्ञाय	५	५०	१९
दूरपारमसंबाधम्	६	४	१०९
दूरं नीत्वाऽथ मारीचः	३	५७	८
दूरेऽपि निवसन्तं त्वाम्	२	५२	४२
दूषणं च स्वरं चैव	३	३२	२
दूषणस्तु स्वकं सैन्यम्	३	२६	१
दूषणस्य च हन्तारौ	६	४६	१२
दूषयेयुर्दरात्मानः	६	४	११
दृढप्राकारपरिखाम्	७	५	२९
दृढ़बद्धकपाटानि	६	३	११
दृढं खल्ववालेप्तोसि	३	३०	१४
दृढ़ं हि हृदये बुद्धिः	४	१	५१
दृश्यते च महाज्वालः	५	५३	३०
दृश्यते न यथावच्च	६	४१	१९
दृश्यते न स मायावी	७	२९	२९
दृश्तते चास्य कर्माणि	४	११	७५
दृश्यमाने भवेत्प्रीतिः	५	२६	३९
दृश्यमानो वसन्तश्च	४	१	३५
दृश्यमानास्तु युध्येथा	४	१७	४७
दृश्यादृश्यानि रक्षांसि	६	४४	१०

	का०	स०	श्लोक
दृश्यैश्च परमोदारैः	५	६	८
दृष्ट एव हि नः शोकम्	१	४०	४
दृष्टमेतन्महाबाहो	७	१०६	८
दृष्टमन्तः पुरं सर्वम्	५	७२	६
दृष्टवीर्यस्तु काकुत्स्थः	१	६८	१६
दृष्टं तद्वै त्वयाराम	२	५२	४३
दृष्टं मे नन्दनं भग्नम्	७	१३	१९
दृष्ट काश्चिदुपायो मे	६	६४	३२
दृष्टश्चाहं पुनस्तेन	३	४२	२
दृष्टा देवीति हनुमद	५	६४	४३
दृष्टास्माभिः प्ररुदिता	५	४९	५
दृष्टि दृष्टिविषस्येव	६	१००	५३
दृष्टो दोषो हि योऽस्माभिः	६	६३	२
दृष्टो मयाऽऽश्रमः सौम्यः	३	७५	३
दृष्टौ मे परिपूर्णार्थैः	६	३३	१६
दृष्ट्वोवाच महातेजाः	६	६९	८१
दृष्ट्वा कथंचिदवति	५	४०	२४
दृष्ट्वा कामशराविद्धः	३	४६	१४
दृष्ट्वा गाधिसुतः श्रीमान्	१	२६	२१
दृष्ट्वा च भगवान्देवीम्	१	३६	६
दृष्ट्वा च विमलं व्योम	४	३०	५
दृष्ट्वा चाङ्गदमागतम्	४	१९	२८
दृष्ट्वा चाप्रकृतिस्थां ताम्	७	५८	१७
दृष्ट्वा तथैव विकृतम्	७	२२	९
दृष्ट्वा तं पतितं भूमौ	३	२६	१६
दृष्ट्वा तामशुचिं शक्रः	१	४६	१७
दृष्ट्वा तां हि पुरीं लंकाम्	६	२	१०
दृष्ट्वा तु करूणापूर्वम्	६	१२४	७
दृष्ट्वा तु तद्वनं घोरम्	३	६९	९
दृष्ट्वा तु देवान्संप्राप्तान्	७	७६	२१
दृष्ट्वा तु नृपतिः श्रीमान्	२	४०	३६
दृष्ट्वा तु मैथिली सीताम्	७	५०	१
दृष्ट्वा तु राघवः पत्नीम्	७	४२	३०
दृष्ट्वा तु राघवः प्राप्तौ	७	८३	२
दृष्ट्वा ते राक्षसाः सर्वे	६	७९	४०
दृष्ट्वा त्वामभिषेकार्हम्	६	१२२	२०
दृष्ट्वा दाशरथिलंकाम्	६	२४	६

	का०	स०	श्लो०
दृष्ट्वा दाशरथिलंकाम्	६	४२	७
दृष्ट्वा देवानृषींश्चैव	७	९७	९
दृष्ट्वा देवास्तु तद्रक्षः	७	१८	४
दृष्ट्वा धर्मात्मना मुक्तौ	६	२५	२८
दृष्ट्वा निपतितं भूमौ	३	५१	२०
दृष्ट्वा निषूदितं सैन्यम्	१	५५	५
दृष्ट्वा पतन्तं तं वृक्षम्	३	५४	२०
दृष्ट्वा पथि हनुमांश्च	६	८३	६
दृष्ट्वा प्रणाशं पुत्रस्य	७	२८	२३
दृष्ट्वा प्राप्तान्मुनींस्तांस्तु	७	१	१३
दृष्ट्वा फलं वा पुष्पं वा	५	३६	४५
दृष्ट्वा भस्मारुणं तच्च	२	७७	८
दृष्टवाऽभिजनसंपन्ना	४	३३	२३
दृष्ट्वाभिषिक्तं लंकायाम्	६	११२	१८
दृष्ट्वा रामं क्रियादक्षम्	४	१४	५
दृष्ट्वा वयं प्रव्यथिताः	४	५१	४
दृष्ट्वा विदेहं राजानम्	७	५७	१०
दृष्ट्वा विनाशितान्सर्वान्	१	५५	८
दृष्ट्वा शतक्रतुं तत्र	३	५	१२
दृष्ट्वाऽऽश्रमपदं शून्यम्	४	६१	१
दृष्ट्वा श्रुत्वा च संभ्रान्ताः	६	९४	४
दृष्ट्या श्रेयस्करी बुद्धिम्	७	३	७
दृष्ट्वा स नृपतिस्तत्र	१	५०	१३
दृष्ट्वा समभिसंक्रम्य	५	७४	१५
दृष्ट्वा समागतं देवी	६	११३	५
दृष्ट्वा स रोषताम्राक्षः	६	५४	१३
दृष्ट्वा सर्वे महात्मानः	६	१२८	८८
दृष्ट्वा सर्वे सुरोत्तमाः	५	१२०	१८
दृष्ट्वा सीता परामृष्टाम्	३	५२	१२
दृष्ट्वा सीता महाबाहो	५	६३	२६
दृष्ट्वा हि हरयः शीघ्रम्	५	४६	१२
दृष्ट्वा ह्रीयं मया देवी	५	५१	२२
दृष्ट्वैव चासुरश्रेष्ठम्	७	८५	१२
दृष्ट्वैव तु तदा रामम्	२	२०	१०
ष्ट्वैव तु रथस्थं तम्	६	८६	१७
दृष्ट्वैव विललापार्तः	२	९९	३०
दृष्ट्वैव सागरं वीक्ष्य	७	३५	४

	काण्ड	सर्ग	श्लोक
दृष्ट्वैवाभ्यगतं त्वां मे	३	५९	३
देवकल्पमृजुं दान्तम्	२	२१	६
देवकार्यनिमित्तं च	२	२०	१७
देवकार्यनिमित्तं च	२	११७	१२
देवकार्यमिदं देव	१	३७	११
देवकार्यस्य सा कृत्वा	२	२६	४
देवकार्याणि कुर्वद्भिः	३	७४	२७
देवगन्धर्वकन्याभिः	५	५८	७९
देवगन्धर्वकन्याश्च	५	२	४६
देवगन्धर्वकन्याश्च	५	२२	४५
देवगन्धर्वगोलोकान्	२	३०	३७
देवगन्धर्वपुत्राश्च	४	३८	२९
देवगन्धर्वभूतानाम्	३	१९	६
देवगन्धर्वभूतानाम्	३	३२	६
देवगन्धर्वसंकाशाः	१	१	३२
देवतानां पितृणां च	२	२८	१४
देवतानां पितृणां च	२	७५	४६
देवतानां प्रतिज्ञाय	१	३७	१२
देवतानां वचः श्रुत्वा	१	३६	१२
देवतानां वचः श्रुत्वा	१	३७	५
देवतानां वचः श्रुत्वा	१	४०	१
देवतानां हितार्थाय	६	९४	३२
देवताभ्यो वरं प्राप्य	१	१	८६
देवता मानुषा यक्षाः	७	१६	३८
देवतायतनान्याशु	१	७७	१३
देवतार्थे च पित्र्यर्थे	२	१००	५५
देवताश्चाभवन्हृष्टाः	५	१	१३०
देवदानवगन्धर्वाः	१	२०	२२
देवदानवगन्धर्वाः	४	२९	२४
देवदानवगन्धर्वाः	६	७९	२५
देवदानवगन्धर्वैः	१	५१	२४
देवदानवगन्धर्वैः	२	५०	१४
देवदानगन्धर्वैः	६	५९	५४
देवदानगन्धर्वैः	६	६०	७
देवदानवदुर्धर्षम्	७	४८	२४
देवदानवदैत्यानाम्	७	२०	८
देवदानवयक्षाणाम्	६	१	४

	काण्ड	सर्ग	श्लोक
देवदानवयक्षाणाम्	६	४१	८०
देवदानवयक्षाणाम्	६	१०७	६५
देवदानवरक्षोभिः	१	४१	७
देवदानववीराणाम्	६	५६	२८
देवदुन्दुभयो नेदुः	७	२६	५७
देवदुन्दुभिनिर्घोषः	१	७३	२६
देवदूतादुपश्रुत्य	७	६	६३
देवदेव महादेव	१	३६	६
देव देवी भृशं क्रुद्धा	२	१०	२१
देवदेव गते तस्मिन्	१	४३	१
देवदेवं ब्रुवाणं तम्	७	८	६
देवनिष्टानभूतं तत्	७	२१	२७
देवपुत्रा ऋषिसुताः	७	१०८	१६
देव यस्या भयाद्रामम्	२	५७	३१
देव याचे हं संतत्यै	१	४२	२०
देवराज गजाक्रान्ते	५	१	१६८
देवराजरथं दृष्ट्वा	२	५६	११
देवराजेन संदिष्टः	६	१०२	१२
देवराजोपवाह्यैश्च	२	५०	२३
देवराज्यं चिकीर्षेत	१	६५	१८
देवराज इति ख्यातः	१	६६	८
देवराजस्य राजर्षेः	१	७५	२१
देवर्षयश्च संभ्रान्ताः	१	५६	१५
देवर्षियक्षप्रवरः	४	४१	२२
देवसंघाप्लुतजलाम्	११	५०	१८
देवसागरमक्षौभ्यम्	७	६	४१
देवाक्रीडशताकीर्णाम्	२	५०	१५
देवागाराणि शून्यानि	२	७१	४०
देवा देवान्निजघ्नुस्ते	७	२८	१८
देवानां दानवानं च	२	९२	३१
देवानां भयभीतानाम्	७	६	३३
देवानां भाषितं श्रुत्वा	७	७०	४
देवानां भाषितं श्रुत्वा	७	७६	६
देवानां भाषितं श्रुत्वा	७	८६	१२
देवानां मध्यतः स्थित्वा	१	४५	३१
देवानां वशमानीतम्	७	११	१८
देवान्तकमभिद्रुत्य	६	७०	१५
देवान्तकाय तं वीरः	६	७०	६
देवान्तको वापिनरान्तकोवा	६	१४	१६
देवान्तकः समादाय	६	६९	३१
देवान्तकश्च संक्रुद्धः	६	७०	११
देवा रोमाणि गार्त्रेषु	६	११७	२४
देवासुरगणान्वापि	१	२७	३
देवासुरनरेन्द्रेषु	५	५१	४०
देवासुरमनुष्याणाम्	२	२	३४
देवासुरविमर्देषु	३	३२	७
देवासुरे च संग्रामे	२	१०७	४
देवाः सर्षिगणाः सर्वे	१	५७	६
देवाश्च क्रतवश्चैव	६	१०५	२४
देवाश्च निशाचरेन्द्र	५	५१	४३
देवाश्च राक्षशान्घोरान्	७	२७	३६
देवाश्च सर्वे तुष्यन्ति	६	१२८	११६
देवाश्च सर्वे मुनिपुङ्गवाश्च	५	५४	४६
देवा हि मां हसिष्यन्ति	६	६८	२०
देवोद्यानेषु सर्वेषु	६	३	३२
देवोपवाह्यमक्षय्याम्	७	१५	३८
देवो मानुषो वा त्वम्	६	१२५	४३
देव्यानूढा त्वमभवः	२	६३	१४
देव्यः समस्ता रुरुदुः समेता	२	३४	६१
देव्या दग्धं प्रभावेण	७	१३	३०
देव्या दिव्यप्रभावेण	७	१३	२४
देशकालनयैर्युक्तः	४	४०	१८
देशकालविहीनानि	६	६३	६
देशकालाभियुक्तं तु	५	२	१०
देशकालोपपन्नं च	६	१७	६५
देशकालौ च विज्ञेयौ	६	१०४	१८
देशकालौ भजस्वाद्य	४	२२	२०
देशस्य पूजां तां दृष्ट्वा	१	२४	२४
देशस्य रमणीयत्वात्	७	२	११
देशाञ्जनपदांस्तांस्तान्	१	६१	१०
देशान्तरगता ये च	७	९१	१३
देशे देशे कलत्राणि	६	१०१	१४
देशो निर्वृत्तसंग्रामः	३	६५	८

	काण्ड	सर्ग	श्लोक
देशं कथमिमं प्राप्तौ	४	३	६
देहधर्मगतस्यास्य	४	३५	९
देहस्यान्यस्य सद्भावे	७	५६	९
देहीत्यन्यो ददात्यन्तः	६	७५	६६
दैत्यदानवसंघानाम्	६	३७	२९
दैत्यैर्निशाचरैश्चैव	७	२८	३१
दैन्यं हि नगरी गच्छेत्	२	५२	४१
दैवतं देवतानां च	२	४४	१६
दैवतानि च यान्यस्मिन्	३	४९	३२
दैवतानि च सर्वाणि	६	१२७	२
दैवतानि न नन्दन्ति	७	१५	२०
दैवतैर्मम सा दत्ता	७	१२	७
दैवतैश्च समागम्य	६	१०५	२
दैवतैस्ते समागम्य	६	९४	३४
दैवेनाक्रम्यते सर्वम्	१	५८	२३
दैवं च मानुषं चैव	१	१८	४७
दैवं पुरुषकारेण	२	२३	१७
दोधूयर्वदनं तस्य	७	७७	१४
दोषज्ञः प्रतिसामर्थ्ये	४	३६	१७
दोषतस्तु विसर्जयेत्	६	१८	४१
दोषैरेतैः परित्यक्तः	६	८७	२६
दोषं गुणं वा संपृष्टः	३	४०	८
दौरात्म्येनात्मनोद्भूतः	७	२५	३०
दौरात्म्यं रावणे दृष्ट्वा	६	१७	५८
द्युतिमानेतदाख्याय	६	१२८	४१
द्युमत्सेनसुतं वीरम्	२	३०	६
द्रक्ष्यथादित्यसंकाशम्	४	४१	१६
द्रक्ष्यन्ति त्वद्य दैवरय	२	२३	१८
द्रक्ष्यन्ति निपतन्तं च	४	६७	२१
द्रक्ष्यन्ति नूनं पुरुषाः	२	४२	१८
द्रक्ष्यन्ति सुखिनो रामम्	२	६४	७२
द्रक्ष्यन्त्यद्य विमुक्तानाम्	३	६४	६६
द्रक्ष्यन्त्यरिं ममाङ्कस्थम्	७	३४	१७
द्रक्ष्यसे दृष्टरम्याणि	३	८	१५
द्रक्ष्यसे शाल्मलीं तीक्ष्णम्	६	५३	२१
द्रक्ष्यस्यद्यैव कैकेयि	२	३७	३३
द्रक्ष्यस्यद्यैव वैदेहि	५	३७	२४

	काण्ड	सर्ग	श्लोक
द्रक्ष्यामि नगरीं लङ्काम्	५	३	३३
द्रवन्ति स्म न तिष्टन्ति	३	२७	२०
द्रवमाणास्तु ते वीरः	६	६६	३१
द्रष्टुकामोऽथ निर्यान्तम्	७	१०९	१८
द्रष्टुं त्वां काङ्क्षते राजा	६	६०	८९
द्रष्टुं दृष्टिर्हि मन्यते	४	१	७१
द्रष्टुं सर्वत्र निर्माता	२	२७	१८
द्राविडाः सिन्धुसौवीराः	२	१०	३७
द्रुमवर्षाणि मुञ्चन्तः	३	२५	३४
द्रुमशाखावभग्नोहम्	४	२४	११
द्रुमशैलप्रहाराणाम्	६	५५	१५
द्रुमशैलान्तरे पश्यन्	४	४६	१८
द्रुमाः कण्टकिनश्चैव	२	२८	२२
द्रुमाणां च शिलानां च	६	५३	२१
द्रुमान्पश्येह सौमित्रे	४	१	८४
द्रुमांश्च विपुलस्कन्धान्	६	६९	४७
द्वन्द्वे यस्य न तिष्ठन्ति	६	३६	१०
द्वात्रिंशच्छतसाहस्रम्	१	४२	४
द्वादशैतानि वर्षाणि	७	७२	११
द्वादशैते महावीर्या	३	२३	३३
द्वादशैते महावीर्या	३	२६	२८
द्वाभ्यां भुजाभ्यां संगृह्य	६	९८	१४
द्वाभ्यामूर्ध्वं तु मासाभ्याम्	५	२२	९
द्वाराणां परिघाणां च	६	१०८	९
द्वारेण वैजयन्तेन	२	७१	३३
द्वारे द्वारे हरीणां तु	६	४१	४४
द्वारेषु तासां चत्वारः	६	३	१६
द्वारेषु संस्कृता भीमाः	६	३	१३
द्वावन्धौ निहतौ बुद्धौ	२	६३	४०
द्वावयाचत भर्तारम्	३	४७	८
द्वाःस्थैरावेदितं तस्य	२	४	५
द्विजः सुहृदभृत्यजनोऽथवा तदा	२	३२	४५
द्विजातिचरितो धर्मः	२	६१	२३
द्विजातिमुख्यैर्धर्मात्मा	६	१२७	१६
द्विजातिवेषेण समीक्ष्य मैथिली	३	४६	३५
द्विजातिवेषेण हितम्	३	४६	३३
द्विजातीन्हि पदातींस्तान्	२	४५	१

	काण्ड	सर्ग	श्लोक
द्विजान्वित्रासयन्धीमान्	५	१	४
द्विजेन्द्रपक्षवातेन	७	८	१८
द्विजैरभिविनीतश्च	२	२	३६
द्वितीयामूर्मिलां चैव	१	७१	२२
द्वितीयेन तथैवाह्वा	६	२२	६५
द्वितीयो बलिभोजनाम	४	५८	२५
द्वितीयं कारणं यच्च	५	३८	४
द्वितीयं रावणशिरः	६	१०७	५६
द्विधा मध्येचमप्येवम्	६	३६	११
द्विरात्रमन्तरे शूर	७	६५	२
द्विविदं च हनूमन्तम्	६	४५	३
द्वौ सुषेणस्य दायादौ	६	४५	२
धक्ष्यामस्त्वां वयं वीर	३	७१	२५
धनत्यागः सुखत्यागः	४	८	९
धनदस्य सुतः श्रीमान्	१	१७	१२
धनदेन परित्यक्ताम्	७	२	४८
धनदेन समस्त्यागे	१	१	१९
धनधान्यसमृद्धाऽपि	४	२३	१३
धनरत्नौघसं कीर्णे	७	१०१	१२
धनं वा यौवराज्यं वा	२	६४	६३
धनानि रत्नानि सुभूषणानि	६	१५	१४
धनानि व्यवसायेन	३	४३	३२
धनुरादाय सगुणम्	२	३१	२५
धनुर्गं हीत्वा तूणी च	७	७५	९
धनुर्ज्यातन्त्रिमधुरम्	६	५२	२४
धनुर्विस्फारमाणस्य	४	३६	९
धनुर्वेदविदां श्रेष्ठः	२	१	२९
धनुर्वेदे च निरतः	१	१८	२८
धनुर्वेदो समानघ	१	५५	१६
धनुर्व्यादितदीप्तास्यम्	३	३७	१६
धनुषस्तस्य वीर्यं हि	१	३१	१०
धनुषा ज्यागुणवता	३	३	११
धनुषीन्द्रजितस्तुल्यः	६	७६	७५
धनुः शक्रधनुः प्रख्यम्	५	४४	३
धनुः शतपरिणाहः	६	६५	४१
धनूंषि कृत्वा सज्जानि	७	२३	४१
धनूंषि च विचित्राणि	६	५८	८

	काण्ड	सर्ग	श्लोक
धनूंषि चास्य सज्जानि	६	७१	१५
धनेश्वरस्वथ पितृवाक्यगौरवान्	७	११	५०
धन्यस्त्वं न त्वया तुल्यम्	२	८५	१२
धन्या देवाः सगन्धर्वा	५	२६	३७
धन्या द्रक्ष्यन्ति रामस्य	२	६४	७०
धन्योऽस्म्यनुगृहीतोऽस्मि	१	४७	२२
धन्योऽस्म्यनुगृहीतोऽस्मि	७	८२	७
धन्यं यशस्यमायुष्यम्	१	४४	२१
धन्यः खलु महाभागः	२	८८	२०
धन्याः खलु महात्मानः	५	२६	४५
धन्याः खलु महात्मानः	५	५५	३
धन्वना नागवृक्षाश्च	३	७३	४
धन्विनौ तौ सुखं गत्वा	२	५४	८
धन्विनः खड्गिनश्चैव	५	४	१८
धरते मारुतिस्तात	६	७४	२३
धर्मकामार्थतत्त्वज्ञः	२	१	२२
धर्मचक्रं कालचक्रम्	१	५६	१०
धर्मचक्रं ततो वीर	१	२७	५
धर्मज्ञ इति धर्मिष्ठ	२	२१	२३
धर्मज्ञः सत्यसन्धश्च	१	१	१२
धर्मज्ञः सत्यसन्धश्च	२	२	३१
धर्मज्ञश्च कृतज्ञश्च	५	५२	७
धर्मज्ञश्च कृतज्ञश्च	७	८४	६
धर्मज्ञस्य कृतज्ञस्य	४	३६	१६
धर्मज्ञस्य कृतज्ञस्य	५	१६	१८
धर्मज्ञस्य वदान्यस्य	१	१५	२०
धर्मज्ञो गुणवान्दान्तः	२	८	१४
धर्मतः स विशुद्धात्मा	२	४५	१६
धर्मतस्ते सुतस्याहम्	७	२६	३२
धर्मदारान्परित्यज्य	२	७५	५५
धर्मदोषप्रसङ्गेन	२	२३	६
धर्मनित्यः प्रजाः पुत्र	७	५४	१४
धर्मनित्या यथाकालम्	२	५८	१८
धर्मप्रधानस्य महारथस्य	६	१४	१२
धर्मबन्धेन बद्धोऽस्मि	२	१४	२४
धर्मबन्धेन बद्धोऽस्मि	२	१०६	९
धर्ममर्थं च कामं च	२	९७	५
धर्ममर्थं च कामं च	३	४१	८
धर्ममर्थं च कामं च	४	१८	४

	काण्ड	सर्ग	श्लोक
धर्ममर्थं हि कामं वा	६	६३	९
धर्ममूलमिदं राम	२	१८	२४
धर्मयुक्तमिदं ब्रह्मन्	१	३६	२
धर्मयुक्तं च युक्तं च	६	१९	४
धर्मराजः पितृव्यस्ते	४	५४	२१
धर्मराजोऽब्रवीद्राम	७	१८	२४
धर्मलोपो महांस्तावत्	४	६३	४७
धर्मवादी शठो भर्ता	२	७	२४
धर्मविद्धर्मशीलश्च	२	७२	३४
धर्मव्रतस्थाभेत्तारम्	६	३	५३
धर्मशास्त्रेषु मुख्येषु	२	१००	३९
धर्मश्च नियतो नित्यम्	७	३८	२२
धर्मस्तु गजनासोरु	२	३०	३०
धर्मस्य पुत्रो बलवान्	६	४३	१४
धर्मस्यैवाभिकामार्थम्	२	१४	९
धर्मात्प्रच्युतशीलं हि	६	८७	२१
धर्मात्मा तस्य सत्येन	२	३	२७
धर्मात्मा राक्षसश्रेष्ठः	६	४१	६८
धर्मात्मा सुशुभैः कृत्स्नैः	२	१०५	३२
धर्मादर्थ प्रभवति	३	९	३०
धर्मापदेशान्त्यजतः स्वराज्यम्	५	३६	२९
धर्मार्थकामाः खलु जीवलोके	२	२१	५७
धर्मार्थगुणसंपन्नम्	४	१८	३
धर्मार्थसहितं युक्तम्	१	१२	८
धर्मार्थसहितं वाक्यम्	६	९४	१९
धर्मिष्ठं तु वचः श्रुत्वा	६	१४	३२
धर्मिष्ठं त्वं यथा वत्स	७	१०	३२
धर्मिष्ठः सत्यसंधश्च	३	९	७
धर्मेणोषलभेद्धर्मम्	६	८३	१९
धर्मे रताः सत्पुरुषैः समेताः	२	१०९	३६
धर्मो वै ग्रसतेऽधर्मम्	६	३५	१२
धर्मो हि श्रूयते पक्षः	६	३५	१३
धर्षणां तां परां श्रुत्वा	७	२६	५२
धर्षणामर्षितो रामः	६	१०६	१७
धर्षयन्तिस्म दुर्धर्षाः	३	१०	१२
धर्षयित्वा च काकुत्स्थम्	६	८७	२९
धर्षयित्वा पुरीं लङ्काम्	५	४३	२
धर्षयित्वा पुरीं लङ्काम्	७	३५	५
धर्षयित्वाहृता राजन्	७	२५	२७
धर्षितं च वनं कृत्स्नम्	५	६३	२४
धर्षितं मर्षणीयं च	५	६३	३१
धर्षिता च प्रविष्टा च	६	६	२
धर्षितायास्त्वयानार्य	७	१७	२९
धातुभिर्मण्डितः शैलः	६	२२	२१
धातुर्विधातुः स्थानं च	३	१२	१९
धातुनामिव शैलेन्द्रः	४	१५	२१
धात्रा विधानं विहितं तथैव	४	२४	४४
धात्रास्तु वचनं श्रुत्वा	२	७	१२
धान्यकोशश्च यः कश्चित्	२	३	६७
धारयन्ब्राह्मणं रूपम्	३	२२	५६
धारयन्मनसा दुःखम्	२	१९	३५
धारयन्माहिषं वेषम्	४	२२	२५
धारयिष्यामि मासं तु	५	४०	१०
धारयिष्याम्यहं तेजः	१	३६	१३
धारानिपातैरभिहन्यमानाः	४	२८	२९
धारितुं शक्ष्यसि चिरम्	३	५३	२२
धार्मिकश्च सुभीमश्च	२	११०	२२
धार्मिकेणानृशंसेन	२	१०५	४०
धिक्कष्टमिति निःश्वस्य	२	१९	१७
धिक्कते शौर्यं च सत्वं च	३	५३	९
धिक्त्वां पापसमाचारम्	६	८१	१९
धिक्त्वामिति च मामुक्त्वा	४	१०	१२
धिक्त्वामिति परे लोके	३	६१	९
धिगस्तु राजसं भावम्	५	५५	१६
धिग्बलं क्षत्रियबलम्	१	५६	२३
धिङ्मामनार्यामसतीम्	५	२६	७
धिङ्मां दुष्कृतकर्माणम्	६	२९	१२
धिगस्तु कुब्जामसीतम्	६	९२	५६
धिगस्तु खलु निद्रांताम्	२	४७	४
धिगस्तु खलु मानुष्यम्	५	२५	२०
धिगस्तु मां सुदुर्बुद्धिम्	२	५५	७
धिगस्तु योषितो नाम	१	१२	१००
धुन्धुमारान्महातेजाः	१	७०	२५
धुन्धुमारान्महातेजा	१	११०	१३
धुरमेकाकिना न्यस्ताम्	६	१२८	३
धूपगन्धांश्च ससृप्तुः	६	६०	३५
धूपितं सिक्तसंमृष्टम्	१	२२	२५

	काण्ड	सर्ग	श्लोक
धूमगन्धं वपायास्तु	१	१४	३७
धूम्राक्षवचनं श्रुत्वा	६	५१	२२
धूम्राक्षस्तु धनुष्पाणिः	६	५२	२५
धूम्राक्षस्य शिरोमध्ये	६	५२	३६
धूम्राक्षस्याथ संपातेः	५	६	२३
धूम्राक्षेण च वीरेण	७	१४	२
धूम्राक्षेण समागम्य	७	१५	१०
धूम्राक्षेणार्दितं सैन्यम्	६	५२	२६
धूम्राक्षं ताडितं दृष्ट्वा	७	१५	१२
धूम्राक्षं निहतं श्रुत्वा	६	५३	१
धूम्राक्षं प्रेक्ष्य निर्यान्तम्	६	५२	१
धूम्राक्षः परमामर्षी	६	७२	२
धृतनानाप्रहरणम्	३	२४	३२
धृतिप्रकालः प्रसभाज्यपुष्पः	६	१०६	६
धृष्टं भवन्तो युध्यन्तु	६	६०	६
धृष्टं रभसमेव च	१	२८	४
धृष्टश्च जितकामी च	२	११६	१२
धृष्टिर्जयन्तो विजयः	१	७	३
धृष्टिर्जयन्तो विजयः	६	१२७	२२
धैर्यवन्तौ सुवर्णाभौ	४	३	८
ध्यात्वा पुनरुवाचेदम्	६	१	१५
ध्यात्वा मुहूर्तं तामाह	७	४८	२१
ध्याननिर्दरशैलेन	२	८५	१६
ध्यानसंविग्नहृदया	२	७१	४२
ध्रियमाणं शिरोभिस्तु	७	६७	१८
ध्रुवं तु भरत रामः	२	८	२७
ध्रुवं तु रक्षो बहुला	५	१३	६०
ध्रुवमद्य पुरी राम	२	५३	२६
ध्रुवमद्य महाराजः	२	५३	६
ध्रुवमद्यैव संहृष्टाः	६	६८	१६
ध्रुवं मां प्रातराशार्थम्	५	२६	३३
ध्रुवं लोकविनाशाय	६	६१	२३
ध्वजनिस्त्रिंशसंपन्नम्	३	२२	१५
ध्वजयष्टिभिराकीर्णम्	५	६	३६
ध्वजभृङ्गप्रतिष्ठेन	६	७१	१७
ध्वजाग्रे ग्रथिताश्चैव	६	५१	३२

	काण्ड	सर्ग	श्लोक
ध्वजाग्रे धनुषश्चाग्रे	६	५६	७६
ध्वजैर्विमथितैर्भग्नैः	६	५२	१२
ध्वजो रथस्य प्रज्ञानम्	२	६७	३०
ध्वंसयित्वा तु तद्वाक्यम्	२	६०	१५
(न)			
न कच्चिद्भगवत्किंचित्	२	११६	५
न कथंचन गन्तव्यम्	४	४३	५६
न कर्ता कस्यचित्कश्चित्	४	२५	५
न कश्चित्रिषु लोकेषु	५	४८	४
न कादली न प्रियकौ	३	४३	३६
न कामकारः कामं वा	६	११०	२३
न कामतन्त्रे तव बुद्धिरस्ति	४	३३	५५
न कामान्न च लोभाद्वा	६	२२	२५
न कार्मुकविकर्षन्तम्	३	३४	८
न कालस्य न शक्रस्य	७	३५	८
न कालस्यातिभारोऽस्ति	६	४८	१६
न कालस्यास्ति बन्धुत्वम्	४	२५	७
न कालः कपिराजेन्द्र	६	४६	३६
न कालः कालमत्येति	४	२५	६
न किंचिदवदद्विप्रम्	१	६५	१
न किंचिदाहाहितमप्रियं वचः	२	१२	१०८
न किंचिन्मम कर्तव्यम्	२	४	१५
न कुम्भकर्णः काकुत्स्थम्	६	६६	२६
न कुम्भकर्णेन्द्रजितौ च राजन्	६	१४	५
न कुलं न कृतं विद्या	२	३६	२३
न कुलेन न रूपेण	६	३	२८
न कोपकालः क्षितिपाल पुत्र	४	३३	५१
नक्तंचराणां वेगस्तु	७	३२	६८
न क्रुध्यत्यभिशप्तोऽपि	२	२०	४
न क्रुध्यत्यभिशप्तोऽपि	२	४१	३
नक्षत्रग्रहताराणाम्	६	१०५	१५
नक्षत्रपक्षगो महान्	३	३१	३५
नक्षत्राणि च सर्वाणि	२	२५	१४
नखह्वियं मतिश्रेष्ठ	५	४८	१३
न खल्वेतन्न कुर्या ते	६	१२१	१८
न खल्वेतन्मयैकेन	२	२१	३५
नखाग्रैः केन ते भीरु	५	६७	८
नखैस्तुदन्तो दशनैर्दशन्तः	५	६१	२४

	काण्ड	सर्ग	श्लोक
न गन्तव्यं वनं देव्या	२	३७	२३
नगरं यमुनाजुष्टम्	७	६२	१८
नगरस्थो वनस्थो वा	२	११७	२३
नगराणि च राष्ट्राणि	१	५१	२२
नगरीं त्वां गतं दृष्ट्वा	२	५२	६१
नगरीमाकुलां कृत्वा	५	५६	२४
नगरोपवनं गत्वा	२	६०	६
नगर्या विटपावत्वा	६	७७	८
न गृहाणि न वस्त्राणि	६	११४	२७
न च काँचनचित्रे ते	२	२६	१७
न चकार व्यथां चैव	७	१४	१३
न च कार्यो विषादस्ते	४	१६	५
न च कालमतीतं ते	४	२६	१६
न च कौतुहलं कार्यम्	६	५०	५७
न च तत्र ततः किंचित्	२	३०	१७
न च तं जानकी सीता	५	४२	१४
न च ते मर्षय पापम्	४	१८	२२
न च ते विषये कश्चित्	२	३५	११
न च तैरिह वक्तव्यम्	४	११	५६
न च तौ राघवादन्यः	१	१६	१२
न च त्वया व्यथा कार्या	३	६८	१७
न च दर्शयते रूपम्	६	२१	१२
न च दिग्ज्ञायते याम्या	५	६१	११
न च धर्मगुणैर्हीनः	३	३७	६
न च नः कुरुषे वाक्यम्	५	२४	३०
न च पश्यामहेऽश्वं ते	१	४०	६
न च पश्यामितत्सदृशम्	६	११३	१६
न च पश्याम्यहं तत्र	७	२	२२
न च पित्रा परित्यक्तः	३	३७	८
न च पुत्रकृतां प्रीतिम्	१	३६	२४
न च प्रार्थयते कश्चित्	२	८८	२३
न च मां स पिता तेभ्यः	७	१७	११
न च मे भविता तत्र	२	३०	११
न च राजा गृहं शून्यम्	२	१०	१६
न च रोषवशं तात	४	३५	१०
न च वै ग्लानतां यान्ति	३	७३	२३
न च शक्तः सुदुष्टात्मा	६	११८	१७

	काण्ड	सर्ग	श्लोक
न च शक्यं मया तात	२	३४	४६
न च शक्ष्ये त्वया सार्धम्	५	३७	४८
न च सर्पन्ति सत्त्वानि	२	५६	६
न च सीता त्वया हीना	२	५३	३१
न च सीतां दशग्रीवः	६	६४	१२
न च सुप्तं प्रमत्तः वा	१	२२	१४
न चाकुलीना न च हीनरूपा	५	६	७१
न चाग्निजं भयं किञ्चित्	१	१	६२
न चातिक्रमितुं शक्यम्	६	४६	२८
न चातिप्रणयः कार्यः	४	२२	२३
न चात्मानमहं शोचे	४	१८	५०
न चात्र वृक्षा नौषध्यः	४	४८	१०
न चाधर्म्यं वचः श्रुत्वा	२	२१	२२
न चानृतकथो विद्वान्	२	१	१४
न चान्यदद्य वक्तव्यम्	७	१०८	१५
न चान्यः सदृशो राजन्	३	४३	१३
न चान्यो राक्षसान्हत्वा	७	८	२५
न चापि क्षुद्भयं तत्र	१	१	६३
न चापि तनयो राम	१	३६	७
न चापि त्रिषु लोकेषु	५	५१	२०
न चापि मम हस्तात्त्वाम्	५	२०	२८
न चापि रावणः काचित्	३	५५	३७
न चाप्यदृष्ट्वा वैदेहीम्	५	६३	२७
न चाप्यस्य कपेर्वाते	५	५२	१८
न चावज्ञा प्रयोक्तव्या	१	१३	१५
न चासौ रक्षसां योग्यः	१	२०	८
न चास्य कार्यस्य पराक्रमाद्ऋते	५	४१	४
न चास्य महतीं लक्ष्मीम्	२	१६	३२
न चास्य माता न पिता न चान्यः	५	३६	३०
न चाहमनुशोचामि	२	५२	२८
न चाहं हरिराज्यस्य	४	२१	१४
न चाहुतमभूत्तत्र	१	१४	१०
न चाहृष्यन्न चामोदन्	२	४८	१
न चिन्तयति राज्यार्थम्	४	३३	४४
न चिन्तयाम्यहं वीर्यात्	३	२३	२०
न चिरं पापकर्माणः	३	२६	७

	काण्ड	सर्ग	श्लोक
न चिरात्तं वधिष्यामि	४	३६	७
न चिरात्प्राप्यते लोके	३	२६	६
न चिराद्रक्ष्यसे रामम्	५	३४	३७
न चुक्रुशुर्नानृतमाह कश्चित्	६	२	३०
न चेदं प्रहणं प्राप्य	६	२५	२०
न चेयं तव काकुत्स्थ:	१	७६	१६
न चैच्छत्पितुरादेशात्	१	१	३७
न चैतकर्म रामस्य	६	३	८
न चैतदाश्चर्यतमम्	२	३४	३८
न चैतदिष्टं माता मे	२	६०	१६
न चैतन्मे प्रियं पुत्र	२	३४	३६
न चैनमाश्वासयसि	६	३	६४
न चैव मानुषं रूपम्	३	३७	३३
न चैव रावणस्यान्त:	६	१०७	५८
न जानकी मानववंशनाथ	४	३०	१८
न जानाति पुरा वीर्यम्	६	२४	४२
न जाने निलयं तस्य	४	७	२
न जीवन्यास्यते शत्रु:	६	१०१	५३
न जीवितं मेऽस्ति कुतं पुन: सुखम्	६	१२	१११
न ज्ञातित्वं न सौहार्दम्	६	८७	१२
नटनर्तकसङ्घानाम्	२	६	१४
न ततर्प समायान्तम्	२	३	३०
न तत्र कश्चिद्वने वा	७	१०६	१७
न तत्र कश्चिदुद्देश:	५	४२	१७
न तत्रकश्चित्प्रमदा: प्रसह्य	५	६	७०
न तत्र किंचिन्न कृतं प्रयत्नत:	५	८	३
न तत्राक्रमितुं नागा:	३	७३	२६
न तत्समाचरेद्धीर:	३	५०	८
न तथास्मि महाबाहो	६	११६	६
न तदग्निशिखा कुर्यात्	५	५६	५
न तं पश्यामहे लोके	२	२१	५
न तप्तश्याम्यहं रक्ष:	३	५६	१०
न तं वध्यमहं मन्ये	३	३१	२८
न तस्य मृत्युरन्योऽस्ति	७	६४	६
न तात मन्ये तव निश्चयोऽस्ति	६	१५	६
न तात मोहं परिगन्तुमर्हसे	६	७३	४
न तारां नापि बान्धवान्	४	१८	५०

	काण्ड	सर्ग	श्लोक
न तावत्कृतकृत्योऽस्मि	५	५६	३
न तावत्सदृशं नाम	६	२६	७
न तावदेष दुष्टात्मा	७	२७	१५
न तावदेषा मतिरक्षमा न:	५	६०	२०
न ता: स्म प्रतिगृह्णन्ति	१	४५	३५
न तु कामं करिष्यामि	२	७३	२५
न तु केकयराजानम्	२	१	४८
न तु कौतूहलाद्युक्तम्	७	७१	२४
न तु क्षमं वीर्यवता	६	६	१६
न तु धर्मोपसंहारम्	५	५१	२८
न तु पश्यामि तच्छल्यम्	२	६७	२६
न तु प्रतिज्ञां संश्रुत्या	३	१०	१६
न तु माभिह तिष्ठन्तम्	३	२६	२१
न तु राघवनन्दिनी	५	१२	२०
न तु राम विना देहे	२	१२	१४
न तु शक्यमपक्रोशम्	२	५६	२२
न तु संकालनं राज्ञ:	२	६६	१५
न तु सोमकलोत्पन्ने	७	५६	१६
न ते कश्चिद्दशरथ:	२	१०८	१०
न ते क्षौद्रं च दधि च	२	२६	१३
न ते वारयितुं शक्या:	६	३०	५
न ते ददृशिरे रामम्	६	६३	२५
न तेन जन्मप्रभृति	१	१०	६
न तेन शक्नोमि पितु: प्रतिज्ञाम्	२	२१	६०
न ते पापमिदं कर्म	३	५६	१३
न तेऽम्बा मध्यमा तात	३	१६	३७
न ते शतशलाकेन	२	२६	१०
न तेष्महःसु श्रान्तो वा	१	१४	११
न ते संभाषितुं शक्या	६	२४	२६
न तेऽस्त्यपचितिर्धर्मे	४	१७	३४
न तेस्त्यशक्यं समरेषु कर्मणाम्	५	४८	५
न तेऽद्दमभिजानामि	२	१०	२८
न त्वं कामं समाधेया	६	११६	३५
न त्वं तयो शरस्पर्शम्	३	५३	१२
न त्वं स्त्रीसंनिधो वीर	४	२	३२
न त्वमश्वपते: कन्या	२	७४	६
न त्वस्य ब्रुवतो जातु	६	१७	६२

	काण्ड	सर्ग	श्लोक
न त्वहं त्वां विना सीताम्	३	६२	१६
न त्वहं मनसा त्वन्यम्	२	३०	७
न त्वां क्रोधयितुं शक्तः	२	६	२५
न त्वां जिघांसामि चरेति यन्माम्	४	२४	८
न त्वां त्यजामि शबले	१	५४	१०
न त्वां पश्यामि कौसल्ये	२	४२	३४
नत्वा पादावहं तस्य	४	६	२६
न त्वां प्रव्यथये दुःखम्	२	१०६	३
न त्वामनुदहेत्क्रुद्धः	२	६३	४४
न त्वामस्मिन्वने हातुम्	३	४५	१४
न त्वामिहस्थां जानीते	५	३६	३३
न त्वमिव रणेर्युक्तम्	२	१०६	७
न त्वां शक्तः परित्रातुम्	५	२४	३२
न त्वां हन्याच्छरैस्तीक्ष्णैः	३	५३	२५
न त्वेवममुगच्छन्ति	२	११७	२६
न त्वेवं वानरा हन्तुम्	६	३३	६
न त्वेवं सीतां परमाभिजाताम्	५	५	२३
न त्वेवानागते काले	२	३६	५
नदतां भीमघोषाणाम्	२	६६	१०
नदतां राक्षसानां च	६	५७	४२
न ददर्श च मधुं तत्र	७	२५	३६
न ददर्श स्त्रियं राजा	२	१०	१२
नदन्ति कामं शकुना	४	१	४६
नदन्तौ च पुनः पुनः	६	६७	२६
नदन्तः काननौकसः	६	८२	१३
नदन्तश्चोन्नदन्तश्च	४	४५	१०
नदन्नादेन महता	५	५७	११
नदन्नादेन महता	५	५७	१६
नदन्नुभयतः पार्श्वम्	६	५७	३८
नदन्प्रतपनो घोरः	६	४३	२३
नदीं गज इव क्रीडन्	७	१३	१०
नदीं गोदावरीं चैव	४	४१	१२
नदीं गोदावरीं रम्या	२	६४	३
नदीघनप्रस्रवणोदकानाम्	४	३०	४३
नदीनिलयनाः सर्पा	२	२८	२०
नदीं बाहुसहस्रेण	७	३२	१५
नदीशतानां पञ्चानाम्	६	१२८	५३

	काण्ड	सर्ग	श्लोक
नदीस्रोतांसि सर्वाणि	६	४	५६
न दुताध्रिन्ति काकुत्स्थ	६	२०	१८
न दृष्टपूर्वं कल्याणम्	२	२०	३८
न देवलोकाक्रमनम्	२	३१	५
न देवा नर्षयः केचिन्	१	२१	१२
न देवि बतः दुःखेन	२	३०	२७
न देवेषु न नागेषु	७	८८	१४
न देवेषु न यक्षेषु	३	५५	२०
न दोषं त्वयि पश्यामि	२	१०१	१७
न दोषं दोषेणावगन्तव्या	२	६२	३०
न दैत्यदानवेभ्यो वा	६	६०	७३
नद्रूवैदूर्यसंकाशम्	३	३२	६
नद्यः समद्वाहितचक्रवाकाः	४	२८	३६
न द्रक्ष्यामि यदि त्वां तु	२	११२	२६
न धर्मवादे न च लोकवृत्ते	५	५२	१७
न धर्मे वियुज्येरन्	६	८३	२०
न धारये कोपमुदीर्णवेगम्	४	३१	४
ननन्दतुर्दशरथः	१	२	२३
ननन्द स्वजनैः राजा	१	७७	१०
ननर्द क्रूरनादेन	४	१४	२०
ननन्द दृष्ट्वा स च तान्सुरूपान्	५	५	१६
ननर्द युधि सुग्रीवः	६	६६	६
न नागा नापि गन्धर्वा	५	३८	४२
ननाद च तदा तत्र	६	२२	३४
ननाद च महानादम्	६	६६	२
ननाद सुमहानादम	५	५७	१७
न नास्तिकानां वचनं ब्रवीम्यहम्	२	१०६	३८
ननु जानामि कस्यायम्	३	६५	६
नानु नाम कृतार्थेन	४	३४	१४
ननु नाम महाबाहो	६	३	३
ननु नामविनीतानाम्	३	४६	२६
ननु पर्याप्तमेवं ते	२	३८	६
ननु भोज्येषु पानेषु	२	७७	१५
ननु वारुणमाग्नेयम्	६	४८	१६
ननु सद्योऽविनीतस्य	३	४६	२७
न नूनं दैवतं किंचित्	३	८८	११
न नूनं बुध्यसे रामम्	३	३७	३
न नूनं मयि कैकेयी	२	१६	२४

	काण्ड	सर्ग	श्लोक
न नूनं मां महाराजः	२	७२	३०
न नूनमिक्ष्वाकुवरस्य कार्मुकात्	४	३४	१९
न नूनं राम जानासि	३	५२	३
ननृतुश्चाप्सरः सद्याः	१	७३	३८
न नो देवकृतं किंचित्	६	६०	७२
नन्दनं प्रतिमं त्वन्यत्	१	२७	१३
नन्दनं वानरेन्द्राणाम्	६	१०८	१२
नन्दन्त्युदित आदित्ये	२	१०५	२४
नन्दिग्रामं गमिष्यामि	२	११५	२
नन्दिग्रामेऽकरोद्राज्यम्	१	१	३९
नन्दिग्रामे जटांहित्वा	१	१	८९
नन्वसौ काञ्चनैर्बाणैः	२	६१	२१
नन्वहं तेऽप्रियः पुत्र	२	६४	३१
नन्वायोपि च धर्मात्मा	२	७३	९
न परः पापमादत्ते	६	११३	४२
न परेणाहृतं भक्ष्यम्	२	६१	१६
न पर्यदेवन्विधवाः	६	१२८	९८
न पश्यति रजोऽप्यस्य	२	४२	३२
न पश्यामि भयस्थानम्	२	६९	२०
न पिता नात्मनो वात्मा	२	२७	६
न पित्र्यमनुवर्तन्ते	३	१६	३४
न पिबेयं न खादेयम्	५	३३	२०
न पुत्रमरणं केचित्	१	१	६१
नप्ता शक्रस्य दुर्धर्षः	६	३०	२५
न प्रमाणीकृतः पाणिः	६	११६	१६
न पवेक्ष्यामि हनुमन्	४	२६	१०
न प्रावर्तत मे बुद्धिः	४	९	२४
न बभूव तदा कश्चित्	७	२८	५
न बभौ तद्वनं तस्य	५	४१	१८
न बलं क्षत्रियस्याहुः	१	५४	१४
न बुद्धिपूर्वं नावुद्धम्	२	२२	८
न ब्राह्मणधनं किंचित्	२	७२	४८
न भरिष्यति कौसल्याम्	२	३१	१४
न भवन्तं मतिश्रेष्ठम्	६	१७	५१
न भविष्यन्ति मातरः	५	१३	२५
न भीतोऽस्मि न मूढोऽस्मि	६	१०४	११
न भूमौ नान्तरिक्षे वा	४	४४	३

	काण्ड	सर्ग	श्लोक
न भेतव्यं न गन्तव्यम्	७	२८	६
नभः समीक्षाम्बुधरैर्विक्तम्	४	३०	३३
नभस्तलं विशेषश्च	१	१७	२८
नम उग्राय वीराय	६	१०५	१८
न मतिर्न बलोत्साहः	५	४६	१४
न मत्तो निर्गतान्बाणान्	६	१३	१८
न मत्सकाशमागच्छेत्	५	६४	२९
न मद्विधो दुष्कृतकर्मचारी	३	६३	३
न मन्ये ब्रह्मचर्ये वा	२	५२	१७
न मया शासनं तस्य	२	१०५	३८
न मया सत्कृता देवी	२	१२	७०
न मर्षयन्ति चात्मानम्	६	६५	४
नमस्कृत्वाऽथ रामाय	५	१७	३२
नमस्कृत्वा समुद्राय	६	७४	४४
न मातुर्न पितुस्तत्र	२	३०	१६
न मानुषौ राक्षसस्य	५	२४	८
न मानुषौ राक्षसस्य	५	२५	३
न मामसज्जनेनार्या	२	३९	२८
न मां त्वमवजानीषे	७	५८	२०
न मां प्रार्थयितुं युक्तः	५	२१	४
न मांसं राघवो भुङ्क्ते	५	३६	४१
न मिथ्यावचनश्च त्वम	६	६१	२६
न मिथ्याहं ब्रवे राम	७	७६	३
न मुखे नेत्रयोश्चामि	४	३	३०
न मे गर्वितमायस्तम्	४	१६	९
न मे जानाति सत्त्वं वा	५	३७	३४
न मे तथा पार्थिव हीयते मनो	२	३४	५७
न मे तत्र मनस्तापः	४	१८	३७
न मे तूणीशयान्बाणान्	६	२४	४१
न मे दशरथस्नेहात्	४	६३	८
न मे दुखं प्रिया दूरे	६	५	५
न मे दुर्ग्याहृतं किंचन्	४	३२	३
न मे परं किंचिदितो वरं पुनः	२	७	३६
न मे प्रतिमुखः कश्चित्	६	६३	४५
न मे वचः पश्यमिदं त्वयाकृतम्	४	२३	३०
न मे विकाङ्क्षा जायेत	२	७३	१८
म मेऽसि मित्रं न तथानुकम्प्यः	६	२०	२३
न मे सौम्य तथागतम्	३	६८	२५

	का०	स०	श्लोक
न मेऽस्त्यविदितं किंचित्	२	५१	७
न मेऽस्य बन्धस्य च शक्तिरस्ति	५	४८	४१
न मे स्वर्गो बहु मतः	६	११९	१३
न मेक्ष्यसे रावण राघवस्य	६	२०	२५
नमोऽस्तु रामाय सलक्ष्मणाय	५	१३	५७
नमोऽस्तु वाचस्पतये सवज्रिणे	५	३२	१४
नमः पूर्वाय गिरये	६	१०५	१६
न यक्षगन्धर्वमहोरगेभ्यः	६	१४	८
नयनं चास्फुरद्वामम्	६	९५	४५
नयनाभ्यां प्रसुप्तो वा	३	३३	२१
नयनेभ्यः प्रमुमुचुः	४	५५	१८
नयने मुखवर्णं च	६	३२	२
नयनैर्भ्रुकुटीभिश्च	२	११६	३
नय नौ नृप तं देशम्	२	६४	२६
नय मामपि तं देशम्	५	६६	११
नय मामपि दुःखार्ताम्	६	१११	६०
नय मां यत्र काकुत्स्थः	२	६०	२
नय रथमधिरोप्य वासवम्	७	२९	३९
नयश्च विनयश्चोभौ	४	१७	३२
नयश्च विनयश्चोभौ	४	१८	८
न याचे पितरं राज्यम्	२	१११	२५
न यास्यथः श्रमं वत्सौ	७	९३	८
नरकं कालकं चैव	३	१४	१७
नरमांसाशिना लोके	३	७२	२३
नर रमे दारुणेनाहम्	७	८७	२०
नरवानरराजानौ	६	३७	१
नरश्रेष्ठ सरोषाभ्याम्	७	५४	१५
न राजा कुपितो राम	२	१८	२०
न राज्ञां यत्र पीडा स्यात्	७	१०२	४
न राज्यभ्रंशनं भद्रे	७	९४	३
नराधिपकुले जाता	२	७	२३
नरान्तकं हृतं दृष्टवा	६	७०	१
न नरान्तकः कुम्भहनुः	६	५८	१९
नरान्तकः क्रोधवशं जगाम	६	६९	९१
नरान्तकस्य कुम्भस्य	५	४५	१५
न रामं गणये वीर्यात्	३	२२	३

	का०	सर्ग	श्लोक
न रामः कर्कशस्तात	३	३७	१२
न रामस्तपसा देवी	५	२०	३४
न रामरामानुजशासनं त्वया	४	३२	४२
न रामेण वियक्ता सा	५	११	२
न रावणसहस्रं मे	५	४२	३५
न रावणसहस्रं मे	५	४३	१०
न रावणो नातिबलस्त्रिशीर्षः	६	१४	१५
नराश्च नार्यश्च समेत्य संघश	२	६६	२९
नरेन्द्रं पश्यते राजा	७	३२	२५
नरेन्द्राम्बुजपत्राक्ष	५	३३	१४
नरेन्द्रेणाभिषिक्तोऽस्मि	४	५३	१८
नरेन्द्रेणैवमुक्तस्तु	२	३९	१६
नरैरिपोल्काभिरणोह्यमानः	२	२१	५४
नरैर्नरेन्द्रा इव पर्वतेन्द्राः	४	२८	४६
न रोचते ममाप्येतत्	२	२१	२
नरोत्तमः काल इवान्तकोपम्	४	१६	३८
नरो यानेन यःस्वप्ने	२	६९	१८
नर्दतस्तीक्ष्णदंष्ट्रस्य	६	६३	४४
नर्दतामसुराणां च	४	९	१८
नर्दमानांश्च नादेन	१	१७	२९
नर्मदाजलशीतश्च	७	३१	२९
नर्मदापुलिने यत्र	७	३२	१
नर्मदासलिलात्तस्मात्	७	३१	४०
नलकूबरमासाद्य	७	२६	४४
न लक्ष्मणास्मिन्मम राज्यविघ्ने	२	२२	३०
नलश्चक्रे महासेतुम्	६	२२	५९
नलिनौस्तत्र ददृशुः	४	५०	३०
नलिनैरपि संछन्ना	४	१	७
नलिन्यो ध्वस्तकमलाः	३	५२	३५
न लुब्धो बुध्यते दोषाम्	२	६६	६
न लोका धारयिष्यन्ति	१	३६	१०
नवं व्यपत्रपसे नीच	३	५३	३
नवं शक्तस्त्वं बलाद्धर्तुम्	३	५०	२२
नवं शक्तोऽधास्यहं द्रष्टुम्	२	१४	१८
नवं शक्यते वारयितुम्	२	२५	२
न वनं गन्तुकामस्य	२	१९	३३

	का०	स०	श्लोक
नवनागसहस्राणि	२	८३	३
नवनागसहस्राणि	६	१२८	३२
न वने नन्दनोद्देशे	३	४३	२६
न वनेषु न शैलेषु	५	१३	३२
नव पञ्च च वर्षाणि	२	३४	२६
नवमासधृतं गर्भम्	४	२८	३
न वयं तत्कुलीनाश्च	६	१८	१३
न वयं भवता चिन्त्याः	४	१८	६०
नव सप्त दशाष्टौ च	६	६०	१७
न वाक्यमात्रेण भवान्प्रधानः	६	७१	५८
नवाग्रयणपूजाभिः	३	१६	६
न वाति पवनः शीतः	२	४१	१७
न वाति मारुतस्तत्र	३	५२	१०
न वादान्नापि संघर्षान्	६	१७	५२
न वानरः स्थास्यति साधुवृत्ते	४	३१	२२
नवाम्बुधाराहतकेसराणि	४	२८	४२
न वासवेनापि सहस्रचक्षुषा	६	१३	२१
न वासवेनापि सहस्रचक्षुषा	६	२४	४४
न विद्यते नृपं तत्र	७	६२	१६
न विनश्येत्कथं कार्यम्	५	२	३६
न विनश्येत्कथं कार्यम्	५	२	३६
न विनश्येत्कथं कार्यम्	५	३०	३६
न विन्दते तत्र तु शर्म मैथिली	३	५६	३६
न विप्रमोक्षो बाणानाम्	६	८६	३०
न विरोधो बलवता	१	१	५१
न विवेश तदा वाली	४	४६	४४
न विषादस्य कालोऽयम्	६	१००	३६
न विषादे मनः कार्यम्	४	६४	६
न विस्मृतं तु मे सर्वम्	२	११८	८
न वीरसेना गणशोच्यवन्ति	५	४८	११
न वृथा ते श्रमोऽयं स्यात्	६	११६	१३
नवैर्नदीनां कुसुमप्रहासैः	४	३०	५१
न शक्यं खल्वियं लंका	५	३	२४
न शक्यं मामवज्ञाय	५	३	२६
न शक्यं सौप्तिकं कर्तुम्	६	३३	८
न शक्या यज्ञमध्यस्था	३	५६	१८
न शक्यो वायुराकाशे	३	५५	२४

	काण्ड	सर्ग	श्लोक
न शशाक रुजं कर्तुम्	६	७१	६६
न शेकुरश्वाः संस्थातुम्	७	७	१२
न शेकुर्ग्रसणे तस्य	१	६६	१६
न शेकुर्भाषितुं वीराः	६	६६	७४
न शोकपरितापेन	४	२५	२
न शोचामि तथा रामम्	६	४८	२०
न शोच्यास्ते न चात्मा ते	२	६०	२१
न शोभार्थाविमौ बाहू	२	२३	३०
नष्टं दृष्ट्वा नाभ्यनन्दन्	२	४८	५
नष्टचित्तो यथोन्मत्तः	२	१२	५५
नष्टज्वलनसंतापा	२	४८	३४
नष्टधर्मव्यवस्थानाम्	७	८	२७
नष्टौजसं रणे कृत्वा	५	५८	१२६
न संतप्येद्यथा चासौ	२	४५	१०
न संतापस्त्वया कार्यः	७	५०	१०
न संतापस्त्वया कार्यः	७	८६	२०
न संतापं महाबाहो	७	१०६	२
न सकामां करिष्यामि	२	७६	१२
न स क्षमः कोपयितुम्	४	३२	२०
न सत्यं दानमानौ वा	२	३०	३५
न सन्ति महिषा यत्र	४	४८	६
न सर्वे भ्रातरस्तात	४	१८	१५
न स शक्यस्तुलयितुम्	५	३७	१७
न स संकुचितः पन्थाः	४	३०	८१
न स संकुचितः पन्थाः	४	३४	१८
न सा धर्षयितुं शक्या	३	३७	२०
न साम रक्षःसु गुणाय कल्पते	५	४१	३
न सीतायाः परां भार्याम्	७	६६	७
न सुहृद्भिर्न चामात्यैः	२	५६	१६
न सूक्ष्ममपि संमोहम्	६	१०७	४१
न सौभाग्ये न दाक्षिण्ये	१	२२	१६
न स्थातुं वानराः शेकुः	६	५६	७
न स्मराम्यनृतं वाक्यम्	७	७३	७
न स्मराम्यप्रियं वाक्यम्	२	१२	३२
न स्वयं कामकारेण	३	५६	६
न हन्तव्यं न हन्तव्यम्	१	४६	२१
न हन्तव्याः स्त्रियश्चेति	६	८१	२८

	काण्ड	सर्ग	श्लोक
न हस्ती चाग्रतः श्रीमान्	२	२६	१६
न हि कंचन पश्यामः	२	३६	२७
न हि किंचदयुक्तं वा	२	१२	२०
न हि कोपपरीतानि	६	४८	२४
नहि गन्धमुपाघ्राय	५	२१	३१
न हि चक्षुः पथं प्राप्य	३	५३	११
न हि चिन्ता ममान्येषु	८	१०	२०
न हि जातु दुराधर्षो	३	५१	२८
न हि तं परिपश्यामि	५	१	३
न हि तं वेद्मि वै राम	३	६४	५
न हि तत्पुरुषव्याघ्रः	२	४०	४२
न हि तद्भुविता राष्ट्रम्	२	३७	२६
न हि तद्विद्यते कर्म	७	१०४	८
न हि तस्मान्मनः कश्चित्	२	१७	१३
न हि तस्यास्त्यविज्ञातम्	३	७१	३४
न हि तातं न शत्रुघ्नम्	२	५३	३२
न हि तावदतिक्रान्तां	२	५२	६७
न हि तावद्गुणैर्जुष्टम्	२	४३	१६
न हि तावद्भवेत्कालः	४	२६	१६
न हि तुल्यं बलं मह्यम्	१	५४	११
न हि तुल्यं बलं सौम्य	७	२६	५१
न हि ते निष्ठुरं वाच्यः	२	६७	१५
न हि ते परितुष्यामि	३	५६	२३
न हि ते स्त्रीबधकृते	१	२५	१७
न हि त्वं शोचितव्यो मे	६	१११	७४
न हि त्वस्मिन्कुले जातः	२	६४	४५
न हि त्वां प्राकृतं मन्ये	५	३६	६
न हि त्वां रावणो दृष्ट्वा	६	११५	२४
न हि दृष्टिपथं प्राप्य	६	४८	१८
न हि धर्मविरुद्धेषु	५	५१	१८
न हि धर्मात्मनस्तस्य	५	५५	२३
न हि धर्माभिरक्तानाम्	७	१०	३३
न हि निष्क्रमितुं शक्यम्	४	५२	२८
न हि पश्यामि धर्मज्ञम्	२	६४	६७
न हि पश्यामि मर्त्येषु	५	३६	१५
न हि पश्यामि सदृशम्	६	११३	१८
न हि पश्याम्यहं कंचित्	७	२	१७

	काण्ड	सर्ग	श्लोक
न हि पश्याम्यहं भूतम्	७	४५	१६
न हि पश्याम्यहं लोके	३	१६	७
न हि प्रतिज्ञां कुर्वन्ति	७	१०१	५१
न हि प्रव्रजिते रामे	२	४८	२६
न हि प्रेषयिता तात	४	६५	२२
न हि भारः स ते राम	७	१	१८
न हि मद्बाहुसृष्टानाम्	६	७१	५२
न हि मन्ये नृशंसे त्वम्	२	७३	२१
न हि मम हरिराजसंश्रयात्	४	२१	१६
न हि मां केवलं त्वत्सर्म.पस्थाम्	२	२६	६
न हि मिथ्या प्रतिज्ञातम्	२	३५	३१
न हि मे काङ्क्षितं राज्यम्	२	३४	४५
न हि मे क्रमणाया	६	३४	४
न हि मे जीवमानस्य	३	५०	२३
न हि मे जीवमानस्य	३	५०	२६
न हि मे जीवितं रक्ष्यम्	६	५७	१६
न हि मे जीविते किंचित्	२	४३	२०
न हि मे जीवितेनार्थः	५	२६	५
न हि मे जीवितेनार्थः	६	१०१	४८
न हि मे जीवितं स्थाने	३	४५	२
न हि मे तप्यमानस्य	१	६४	२०
न हि मे परदाराणाम्	५	११	३६
न हि मे रोचते वीर	३	६	१३
न हि मेऽविदितं किंचित्	२	८६	८
न हि मे विप्रियं कृत्वा	३	३१	५
न हि मे संप्रयातस्य	५	३७	२८
न हि रथ्याः सुशक्यन्ते	२	३३	४
न हि राजत्ययोध्येयम्	२	११४	२५
न हि राजा न जानीते	६	६४	३
न हि राज्ञः सुताः सर्वे	२	८	२३
न हि राज्यमधर्मेण	६	४१	६६
न हि रामं तदा कश्चित्	६	११६	२२
न हि रामं पराक्रमस्य	३	४२	३
न हि रामात्प्रियतमः	२	५१	४
न हि रामात्प्रियतरः	२	८६	५
न हि रामो दशग्रीव	३	३१	१७
न हि लोकविरुद्धस्य	४	१८	२१
न हि वः प्लवने कश्चित्	५	६०	६

	का०	सर्ग	श्लोक
न हि वृत्तं हि पश्यामि	३	६५	६
न हि वेदितवान्मन्ये	७	३५	१२
न हि वै त्वद्विधो लोके	४	३१	६
न हि वैदेहि रामस्त्वाम्	५	२०	२७
न हि व्रो गमने सङ्गः	४	६४	२२
न हि शक्ति प्रपश्यामि	६	१२	२६
न हि शक्या प्रवेष्टुं सा	२	५२	५५
न हि शक्यं क्वचित्स्थातुम्	५	२	४१
न हि शक्यः स्विया हन्तुम्	७	१७	३१
न हि शक्ष्याम्यहं हित्वा	७	८६	१८
न हि सत्यात्मनस्तात	२	३४	३२
न हि सामोपन्नानाम्	४	५६	१६
न हि सा विलपन्तं माम्	३	६२	८
नहीयं हरिभिर्लङ्का	६	२०	१२
नहुषस्य सुतो राजा	७	५८	७
नह्यकार्यतमं किंचित्	२	३५	६
नह्यकृत्वा हरिपतेः	४	६५	३०
न ह्यतिक्रमितुं शक्तः	२	६	२६
न ह्यतो धर्मचरणम्	२	१६	२२
न ह्यदत्तां महीं पित्रा	२	३७	३०
न ह्यनाथा वयं राज्ञा	२	२४	२२
न ह्यन्यः साधने हेतुः	५	६३	२०
न ह्यन्यविषयस्थानाम्	७	७३	११
न ह्यन्यो देवदेवेश	७	२७	१०
नह्ययं वैष्णवो दिव्यः	१	७६	८
न ह्यर्थास्तत्र तिष्ठन्ति	७	६४	६
न ह्यल्पकारणे सुप्तम्	६	६०	७०
नह्यविद्धं तथोगात्रे	६	४५	२०
नह्यव्यवसितः शत्रुम्	४	२७	३६
नह्यस्माभिः प्रतिग्राह्यम्	२	८७	१७
नह्यस्य कर्मणो हेतुः	५	६४	३३
नह्यस्य विकृतं वक्त्रम्	६	१०१	२५
नह्यस्य वृजिनं किंचित्	१	६५	१२
नह्यहं तं कपि मन्ये	५	४६	६
न ह्यहं त इमे सर्वे	४	५४	११
न ह्यहं निर्जितो रक्षः	७	१६	२७
न ह्यहं पापसंकल्पे	२	७४	३२

	का०	स०	श्लो०
नह्यहं रावणो युद्धे	७	२३	१२
नह्येकः साधको हेतुः	५	४१	६
नह्येनां शापसंसृष्टाम्	१	२५	१६
नह्येनामुत्सहे हन्तुम्	१	२६	१२
नह्येवं रमणीयेषु	४	१	६६
नह्येष राघवस्यार्थे	६	२८	२५
नह्येष राम सुग्रीवः	७	३६	४१
नह्येष हन्तुं शक्योऽद्य	७	२६	१३
नह्येषा बुद्धिरास्थेया	४	२१	५१
नाकाले म्रियते कश्चित्	७	६६	१३
नाकीर्तयदवज्ञानात्	१	१५	१४
नाकुण्डली नामुकुटी	१	६	१०
नागकन्या वरारोहाः	५	१२	२१
नागगन्धर्वकन्याश्च	७	२४	६
नागन्तुमिह शक्यं तैः	५	६४	२८
नागराजगतिर्वीरः	२	४३	६
नागः शत्रुंजयो नाम	२	३२	१०
नागाः किंपुरुषाश्चैव	१	१७	२२
नागानां दशसाहस्रम्	७	१६	१२
नागानां बध्यमानाम्	१	३६	२०
नागाश्च तुष्टवुर्यक्षा	५	१	८४
नागैरश्वैः खरैरुष्ट्रैः	६	५३	५
नाग्निर्नास्त्राणि शस्त्राणि	६	१६	७
नाग्निहोत्राण्यहूयन्त	२	४१	६
नाघातयत्तदा रामः	६	२०	३४
नाजानाज्जीवतीं रामः	५	२६	३५
नाज्ञापयितुमीशोऽहम्	५	६४	१७
नातन्त्री विद्यते वीणा	२	३६	२६
नातिक्रमन्तमिदं लोके	२	५२	१६
नातिक्रान्तं मुनिश्रेष्ठ	१	५१	११
नातिस्थूलान्नातिकृशान्	५	४	१६
नातृप्तान्नाति च व्यग्रान्	४	३३	२४
नात्मनः कामकारोहि	२	१०५	१५
नात्यर्थमभिकाङ्क्षामि	२	४६	१५
नात्यासादयितव्यास्ते	४	४२	२२
नात्र कश्चिद्यथाभावम्	२	१०५	२८
नात्र जीवेन्मृषावादी	३	११	६०

	काण्ड	सर्ग	श्लोक
नात्र शक्यं बलं ज्ञातुम्	४	११	८९
नाथ पतगलोकस्य	३	८८	२८
नाथ पर्वतदुर्गेषु	३	६९	१६
नाथयांश्च शुनः शेपः	१	६२	१२
नाददानं शरान्घोरान्	३	२५	३९
नादितन्यचलाभानि	६	७५	२१
नादेयैः पार्वतेयैश्च	४	३९	१२
नाद्यापि श्रूयते शब्दः	२	७१	२७
नाधर्मे जायते बुद्धिः	७	१०	३५
नाधस्तादवनौ नाप्सु	४	२९	२६
नाध्यगच्छद्विशिष्टं वा	१	७	२३
नानागन्धर्वमिथुनैः	४	६७	४५
नाना चित्राः कथाश्चान्या	१	३	११
नानादेशगताश्चैव	४	९६	८
नानादेशादनुप्राप्ताः	१	१४	१६
नानाद्रुमविकीर्णेषु	४	६७	३८
नानानगरवास्तव्यान्	२	१	४६
नानानिनदैरुद्यानम्	१	१५	१४
नानापण्यसमृद्धेषु	२	६	१२
नानापताकाध्वजछत्रजुष्टम्	६	५९	१२
नानाप्रस्तवणोपेतम्	६	७४	५३
नानाप्रहरणाः क्षिप्रम्	३	५४	२१
नानाप्रहरणान्याशु	७	२५	३४
नानाप्रहरणैर्वीरैः	६	८४	२
नानाप्रहरणैर्व्यग्रैः	५	१०७	४
नानाप्रहरणैः शूरैः	५	३७	१२
नानाभरणवस्त्राणि	६	१२८	७५
नानामाल्योपगन्धैश्च	२	१७	७
नानामृगगजाकीर्णम्	३	२	२
नानामृगगणाकीर्णाम्	५	१८	९
नानामृगगणैः कीर्णम्	५	५६	३५
नानामृगगणैर्द्वीपि	२	९४	७
नानामृगाणामयुतम्	७	८७	१०
नानामेघघनप्रख्यम्	३	६९	६
नानारत्नपरिक्षिप्तम्	६	९५	३१
नानावर्णविचित्राङ्गः	३	४३	१४
नानावाद्यानि वाद्यन्त	७	११	६

	का०	स०	श्लो०
नानाविकृतवेषाश्च	६	११	६
नानाविकृतसंस्थानम्	६	७५	१०
नानाविधान्नरसान्	२	५४	१८
नानाविधैस्तरुहैः	२	९५	४
नानाविहगसंकीर्णे	३	७३	३१
नानाविहगसंघुष्टाम्	६	३९	२५
नानावृष्टिर्बभूवास्मिन्	२	११०	१०
नानाशकुन्तविरुतैः	५	४१	१७
नानाशस्त्रप्रहरणाः	३	३६	७
नानाशास्त्रेषु संग्रामे	५	४८	१४
नानास्वादुरसानां च	१	५३	४
नानाहिताग्निना यज्वा	१	६	१२
नानुकीर्त्यागुणास्तस्य	६	२	५
नानुतिष्ठति कार्याणि	३	३३	१७
नानृग्वेदविनीतस्य	४	३	२८
नानेतुं कपिराजेन	५	६०	१६
नान्यत्र हि मया शक्या	५	११	४८
नान्यं नरमुपस्थातुम्	५	११	३
नान्यं गतिं गमिष्यामि	१	५८	२४
नान्यो विक्रमपर्याप्तः	६	७४	२७
नापराधो भवेत्कृष्टः	१	८	१७
नापराध्यन्ति मे कायम	६	६५	४४
नापहर्तुं महं शक्या	५	२२	२१
नापि शूलं प्रजग्राह	७	६९	१५
नापि संभाषितुं शक्याः	६	३०	६
नाप्येवं वेगवान्वायुः	७	३५	२६
नाभागस्य वभूवाज	१	७०	४३
नाभ्यजानन्त चान्योन्यम्	७	२८	१७
नाभ्यभाषत कैकेयीम्	२	१२	५२
नाम तस्य च दण्डेति	७	७९	१५
नाम स्व श्रावयन्रामः	२	३	३३
नामित्राणां न मित्राणाम्	२	५९	१४
नामृष्टभोजी नादाता	१	६	११
नाम्नां चेयं भगवतः	३	११	८४
नाम्ना सुदर्शनं नाम	४	४०	४६
नाम्ना संरोचनो नाम	६	२६	२६
नायं विनष्टो निश्चेष्टः	६	१०९	१४

	का०	स०	श्लो०
नायं मया शरः पूर्वम्	७	६३	२४
नायमुद्योगसमयः	४	२६	१५
नारदः पर्वतश्चैव	७	५४	७
नारदः पर्वतश्चैव	७	९६	५
नारदस्तु महातेजाः	७	२०	३
नारदस्तु महातेजाः	७	२०	२७
नारदस्तुम्बुरुर्गोपः	२	९१	४६
नारदस्य तु तद्वाक्यम्	१	२	१
नारदस्य तु तद्वाक्यम्	७	७५	१
नाराचैर्बहुभिश्छिन्नः	६	३१	३०
नाराजके जनपदे	२	६७	९-३१
नारायणगिरिं ते तु	७	७	१
नारायण न जानीषे	७	८	३
नारायणशस्त्रस्तम्	७	७	२४
नारायणश्च रुद्रश्च	७	६	४२
नारायणन निहताः	७	६	३८
नारणयणोऽपीषुवराशनीभिः	७	७	४९
नारायणो मम पतिः	७	१७	१७
नारीचौर्यमिदं क्षुद्रम्	६	१११	६८
नारीजनस्य धूम्रेण	६	७५	३१
नारीणामभिपूर्णास्तु	२	८९	१७
नारी प्रवेकैरिव दीप्यमानम्	५	७	७
नारीषु मैथुनीभावम्	७	२६	५९
नार्जुनः खेदमायाति	७	३२	५८
नार्हा त्वं शोचितुं देवि	२	४४	२६
नार्हामि संमानमिमं प्रजानाम्	४	२४	१५
नालं ते विप्रियं कर्तुम्	३	६५	१२
नालं द्वितीयं वचनम्	२	१२	८५
नाल्पसंन्निचयः कश्चित्	१	६	७
नावज्ञा रिपवे कार्या	६	५९	४
नावज्ञेयश्च भूतानाम्	२	१	३१
नावश्चारुरुहुस्त्वन्ये	२	७९	२०
नावसीदन्ति राजानः	७	७२	१४
नावां प्रकृतयः सर्वाः	२	२६	१४
नावां शतानां पञ्चानाम्	२	८४	८
नाशक्नोदभिसंधातुम्	६	१०२	३८
नाशयत्येष वै भूतम्	६	१०५	२२
नाशयन्ति बलं सर्वम्	१	५४	१९
नाशयामि जगत्सर्वम्	३	६४	१७
नाशुक्लवासास्तत्रासीत्	२	९१	६५
नाश्रेयसि रतो यश्च	२	१	१७
नाश्रौषमिति राजानम्	२	४०	४५
नाश्वाबन्धोऽस्वमाजानान्	२	९	५७
नाषडङ्गविदत्रासीत्	१	१४	२१
नाषडङ्गविदत्रास्ति	१	६	१५

	काण्ड	सर्ग	श्लोक
नासहायमहं मन्ये	४	१५	१३
नास्तिके नानृती वापि	१	६	१४
नास्तिक्यमनृतं क्रोधम्	२	१००	६५
नास्ति धन्यतरो राम	१	५१	१५
नास्ति धर्मः कुतः सत्यम्	३	५२	३९
नास्ति नः शरणं किंचित्	६	९४	३९
नास्ति रामस्य सदृशः	६	३०	२९
नास्ति शक्तिः पितुर्वाक्यम्	२	२१	३०
नास्त्यभाग्यतरो लोके	३	६७	२६
नास्मरंस्तादृशं यज्ञम्	७	९२	१५
नास्मिन्नर्थे महाराज	६	१०४	१३
नास्मि विप्रकृता देव	२	११	२
नास्मिश्चिरं वत्स्यसि देवि देशे	५	३९	५४
नास्य देवा न गन्धर्वाः	१	३१	९
नास्य दैन्यं कृतं किंचित्	२	६०	८
नास्यापराधं पश्यामि	२	२१	४
नास्यमित्रैर्गतं गच्छेः	४	२२	२२
नाहं ज्येष्ठं नरश्रेष्ठ	१	६१	१६
नाहं तामनुशोचामि	४	७	७
नाहं धर्ममपूर्वं ते	२	२१	३६
नाहं समवबुध्येहम्	२	९	४०
नाहं स्वप्नमिमं मन्ये	५	३४	२२
नाहत्वा समरे शत्रुम्	७	२७	१८
नाहमज्ञासिषं युध्यन्	७	२४	३४
नाहमर्थपरो देवि	२	१९	२०
नाहमर्हामि संस्कर्तुम्	६	१११	९४
नाहमस्मिन्प्रभु कार्ये	४	४०	१३
नाहुषेणैवमुक्तस्तु	७	५९	७
निकुम्भं निहतं दृष्ट्वा	६	७८	१
निकुम्भस्तु रणे नीलम्	६	४३	२९
निकुम्भिलामधिष्ठाय	६	८२	२५
निकुम्भिलामसंप्राप्तम्	६	८५	१४
निकुम्भिलायां संप्राप्तम्	६	८५	११
निकुम्भो भूषणैर्भाति	६	७७	६
निकुम्भो भ्रातरं दृष्ट्वा	६	७७	१
निकुलवृक्षमासाद्य	२	६८	१६
निकृत्तकर्णनासा तु	३	१८	२२
निकृत्तचापं त्रिभिराजघान	६	५९	१०४
निकृत्तनासाकर्णेन	६	६८	४
निकृत्तपक्षं रुधिरावसिक्तम्	३	६७	२९
निकृत्तबाहुर्विनिकृत्तपादः	६	६७	१६२
निकृत्तशिरसः केचित्	६	९५	५१
निकृत्तशिरसस्तस्य	६	९७	३३
निकेतान्निर्ययौ श्रीमान्	२	१६	३२
निक्षिप्त देहो काकुत्स्थ	७	५७	२

	का०	सर्ग०	श्लोक
निक्षिप्तमात्रे गर्भे तु	१	३७	२१
निक्षिप्तविजयो रामः	५	२०	२६
निक्षिप्य दीर्घौ निश्चेष्टौ	६	१०९	३
निक्षिप्य देहौ काकुत्स्थ	६	५६	२
निक्षिप्य परमायत्तः	६	७७	२१
निखिलेन कथां सर्वाम्	१	३६	५
निखिलेनानुपूर्व्या च	२	२	३९
निगृहीतस्त्वया ब्रह्मन्	१	५६	२१
निगृह्य तरसा मृत्युम्	३	११	५४
निगृह्य तरसा मृत्युम्	३	११	८१
निगृह्य शेषं शोकं च	२	२२	३
निघ्नन्तमृक्षाधिपतिम्	६	७९	२२
निघ्नन्मृगसहस्रोणि	७	८७	१५
निघ्नन्मृगान्कुञ्जरांश्च	२	३६	६
निजघान रणे रामः	१	१	४८
निजघान विरूपाक्षाम्	६	४३	२६
निजघ्नुः संयुगे क्रुद्धाः	६	६९	५०
नित्यं ते बन्धुलुब्धस्य	२	११५	६
नित्यं त्वं रामपार्श्वेषु	७	४६	२७
नित्यं ध्यानपरो रामः	५	३६	४३
नित्यं प्रमुदिता सर्वे	१	१	९४
नित्यं शस्त्रं परिवहन्	३	९	२१
नित्यं शुचिमतिः सोम्य	३	९	३२
नित्यं श्रेयसि संमूढम्	७	२०	९
नित्यं बलिभ्यात्रस्तः	३	७	५८
नित्यस्वाध्यायशीलत्वात्	२	३२	१९
नित्यक्रोधतया तस्याः	२	२०	४४
नित्यमत्तविहंगानि	६	३९	१०
नित्यमत्तैः सदा पूर्णा	१	६	२६
नित्यमन्योन्यसंहृष्टाः	६	१६	५
नित्यमस्थिरचित्ता हि	४	५४	९
नित्यमुत्साहयुक्तस्य	५	३९	११
नित्यमूला नित्यफला	६	१२८	१०२
निदधे रावणः सीताम्	३	५४	१८
निदर्शयित्वात्मबलं समुद्यताम्	६	८७	३०
निदेशवर्तिनः सर्वे	४	४०	६
निद्रामदपरीताक्ष्यः	५	१८	१५
निद्राभिभूते तु तदा	७	१३	८
निद्रावशसमाविष्टः	६	६०	१६
निद्राविशदनेत्रस्तु	६	६०	६५
निद्रा शनैः केशवमभ्युपैति	४	२८	२५
निद्रोपहतचेतसः	५	९	४४
निन्दाम्यहं कर्मकृतं पितुस्तत्	२	१०९	३३
निपत्य मम शुक्लेषु	५	१	१०५
निपत्योरसि गृध्रास्ते	६	१०३	२१
निपपात तदा मत्तः	६	७०	६५

	काण्ड	सर्ग	श्लोक
निपपातान्तरिक्षाच्च	६	१०८	२८
निपपातावशो भूमौ	३	६७	२२
निपातितमहावीरम्	६	५९	१२१
निपातितमहावीरम्	६	७६	३७
निपातितान्प्रेक्ष्य रणे तु राक्षसान्	३	२०	२५
निपात्य हन्तुमिच्छामि	६	११३	३४
निपाने महिषं रात्रौ	२	६३	२१
निपीड्योमाना धर्मात्मा	६	४२	९
निपीड्योपनिविष्टाश्च	६	४१	४३
निपेतुः केचिदपरे	६	६६	१७
निपेतुरौन्द्राशयनः	६	१०६	२९
निपेतुः शोणितस्नाताः	३	२०	२२
निपेतुश्च नराः सर्वे	१	६७	१९
निपेतुस्तुरगास्तस्य	३	२३	२
निबर्हयन्तश्चान्योन्यम्	६	९०	३
निभृतः संवृताकारः	२	१	२३
निमन्त्रयमाणः प्रतिपूर्णभाषिणीम्	३	४६	३७
निमन्त्रयस्व नृपतीन्	१	१३	२०
निमित्तं लक्षणं स्वप्नम्	३	५२	२
निमित्तभूतमेतत्तु	५	२७	४३
निमित्तानि च घोराणि	३	५७	१०
निमित्तानि च पश्यामि	६	४	६
निमित्तानि च भूयिष्ठम्	६	१०४	१७
निमित्तानि निमित्तज्ञः	६	२३	१
निमित्तानीह सौम्यानि	६	१०६	३५
निमित्तान्युपपश्यामि	६	८८	४०
निमिस्तु क्षत्रियः शूरः	७	५८	३
निमिस्तु राजा विप्रांस्तान्	७	५५	१२
निमेषान्तरमात्रेण	२	११८	४८
निमेषान्तरमात्रेण	४	३९	११
निमेषान्तरमात्रेण	४	५२	३०
निमेषान्तरमात्रेण	४	६७	२४
निमेषान्तरमात्रेण	५	६२	३५
निमेषान्तरमात्रेण	६	४४	२२
निमेषान्तरमात्रेण	६	५४	३३
निम्नेषु वनदुर्गेषु	६	४	१२
नियतं भावितात्मानम्	६	१२५	३२
नियता नियताहारा	२	२४	३०
नियतिः कारणं लोके	४	२५	४
नियमैर्विविधैराप्तम्	२	११८	१४
नियम्य कोपं परिपाल्यतां शरत्	४	२७	४८
नियम्य पृष्ठे तु तलाङ्गुलिश्रवान्	२	८७	२३
नियुक्तः स्त्रीनिमित्तेन	२	९०	१२
नियुक्तास्तत्र पशवः	१	१४	३०
नियुक्तैर्मन्त्रिभिर्वाच्यः	४	३२	१९
नियुक्तो नृपतेः कार्यम्	६	१	८

	काण्ड	सर्ग	श्लोक
नियुङ्क्ष्व मां महातेजः	१	५४	१६
नियुज्यमानाश्च गजाः सुहस्ताः	५	७	१४
नियुज्यमानो राज्याय	१	१	३४
नियुतं रक्षसामत्र	६	३	२५
नियोगात्तु नरेन्द्रस्य	३	१७	१७
निरनुक्रोशता चेयम्	६	८७	१७
निरन्तरमिवाकाशम्	६	८९	३४
निरन्तरशरीरौ तु	६	४५	८
निरर्चिषौ भस्मकृतौ	६	७१	८८
निराकारा निरानन्दा	२	११३	२५
निराकृतश्च बहुशः	७	१३	२०
निरानन्दा निराशाऽहम्	४	२०	९
निरानन्दा महाराज	२	५९	१६
निरायुधानां क्रमताम्	६	६६	२०
निरायुधो महातेजाः	६	६९	८५
निराशस्तु तया तद्वा	३	६४	१०
निराशा निहते पुत्रे	६	९२	५५
निराहारो निरालोकः	२	१११	१४
निरीक्षमाणं तं दृष्ट्वा	७	६५	१५
निरीक्षमाणः सहसा	५	६७	९
निरीक्षमाणः सहसा महात्मा	४	१	१२६
निरीक्षमाणश्च ततः	५	११	३७
निरीक्षमाणस्तां शक्रः	२	७४	१८
निरीक्ष्यमाण गच्छ त्वम्	७	४८	१९
निरीक्ष्यानुत्थितां सेनाम्	२	८३	५२
निरुच्छ्वासा हताः केचित्	६	९५	५२
निरुच्छ्वासाः पुनः केचित्	६	५८	१३
निरुत्साहस्य दीनस्य	६	२	६
निरुद्धतोयं सौमित्रे	६	२१	१८
निर्गच्छतस्तु शक्रस्य	७	२८	२८
निर्गच्छति महाबाहो	२	४०	३३
निर्गतं मकराक्षं ते	६	७९	१
निर्गतां नगरद्वारात्	६	१११	६२
निर्गुणस्यापि पुत्रस्य	२	३३	११
निर्जगाम च स प्रीत्या	२	१४	६४
निर्जगाम नृपावासात्	२	१५	२८
निर्जघ्नुः शैलशृङ्गैश्च	६	६९	५९
निर्जघ्नुः सहसा वीरान्	६	६९	५१
निर्जलेषु च देशेषु	२	८०	१२
निर्जितस्त्वं नरेन्द्रेण	८	४१	५
निर्जिताः स्मेति वा ब्रूत	७	१९	३
निर्जिताः स्मेत्यभाषन्त	७	१९	५
निर्जिता जीवलोकस्य	६	११५	१४
निर्जितास्ते महाबाहो	६	७	९
निर्जित्य दैवतगणान्	१	२९	५

	काण्ड	सर्ग	श्लोक
निर्जित्य राक्षसेन्द्रस्तम्	७	१५	३५
निर्दग्धं तद्बलं सर्वम्	१	५४	२३
निर्दग्धपक्षो गृध्रोऽहम्	४	५८	१२
निर्दग्धपक्षः पतितः	४	५८	७
निर्ददाह स तान्बाणान्	६	१०२	६२
निर्दस्युरभवल्लोकः	६	१२८	९९
निर्दहेच्च पुरीं लङ्काम्	५	२६	१९
निर्धूतपत्रशिखराः	५	१४	१५
निर्धूतान्वायुना पश्य	२	९५	१०
निर्धूय तांस्तदा भृत्यान्	१	५४	६
निर्बिभेद ततो बाणैः	६	१०२	६७
निर्बिभेदोरसि तदा	६	१०१	६८
निर्मनुष्यामिमां सर्वाम्	२	२१	१०
निर्मर्यादं करिष्यामि	६	२१	२४
निर्मर्यादस्तु पुरुषः	२	१०९	३
निर्मलग्रहनक्षत्रा	४	३२	१४
निर्मलं प्राशुभावत्वात्	५	१५	१८
निर्मलेन सुधौतेन	६	५४	३४
निर्मितं सर्वकामैस्तु	७	१५	३९
निर्मितायां च देवेन्द्र	७	३०	२४
निर्ययुस्तुरगाक्रान्ताः	६	१२७	१३
निर्ययू राक्षसा वीराः	६	४३	३
निर्ययौ प्राप्य सुग्रीवः	४	३८	१४
निर्याणादेव तूर्णं च	६	५७	८
निर्यातयितुमिच्छामि	३	५४	२४
निर्यातास्तेन वीरेण	२	४७	११
निर्याय सेनामथ सोऽग्रतस्तदा	७	६४	१८
निर्यासरसमूलानाम्	३	३५	२१
निर्विघ्ना व्रतचर्या सा	१	२०	६
निर्विशङ्का निरुद्विग्ना	६	४७	९
निर्वर्त्ते तु ऋतौ तस्मिन्	१	१८	१
निर्वृत्तो भव काकुत्स्थ	७	७६	१४
निवर्तयानस्त्वरितः	३	५७	११
निवर्तमानः काकुत्स्थः	६	१२६	३३
निवर्तमानः संहृष्टः	७	२४	१
निवर्तय रथं शीघ्रम्	२	६०	३
निवर्तय रथं शीघ्रम्	६	१०४	९
निवर्तयामास ततः	१	१	३८
निवर्तयामास ततः	१	३१	१९
निवर्तयितुकामस्तु	२	११०	२
निवर्तयित्वा रामं च	२	७३	२७
निवर्तस्व दशग्रीव	७	१६	१०
निवर्तस्व सह स्त्रीभिः	४	१६	६
निवर्तस्वेत्युवाचैनम्	२	५२	१४
निवर्तितेऽतीव बलात्	२	४५	२

	काण्ड	सर्ग	श्लोक
निवर्त्यमानो रामेण	२	५२	३७
निवसन्त्यन्तिमगिरौ	६	२७	४०
निवातकवचानां तु	६	१११	५२
निवातकवचानां तु	७	२३	११
निवातकवचास्तत्र	७	२३	६
निवारयति बाहुभ्याम्	३	३२	१७
निवार्यमाणस्तु सुहृदा मया भृशम्	३	३८	३३
निवार्यमाणस्य मया हितैषिणा	३	४१	२०
निवार्यमाणस्य मया हितैषिणा	६	१६	२६
निवासं कथयामास	७	५	२२
निवासनं न मे देवः	७	३	२३
निवासं वा प्रभावं वा	३	७१	२३
निविष्टं निविशच्चैव	६	२५	१२
निविष्टमात्रे सैन्ये तु	२	९८	२
निविष्टायां तु सेनायाम्	६	५	३
निविश्य वदनं मेऽद्य	५	१	१५१
निवृत्तकार्यं सिद्धार्थम्	४	२९	३
निवृत्तवनवासोऽसि	६	११९	२२
निवृत्तवनवासं च	५	६८	२८
निवृत्तवनवासं तम्	२	४४	२०
निवृत्तवनवासं तम्	२	४४	२१
निवृत्तवनवासस्त्वाम्	२	५०	३
निवृत्तस्त्वत्कृतेनार्थः	६	२११	७३
निवृत्ताकाशशयनाः	३	१६	१२
निवृत्ताः संविगाहन्ते	३	७३	३८
निवृत्तास्तु पुनः सर्वे	३	२५	३२
निवृत्तिश्चागता सौम्य	७	५२	१९
निवृत्तोऽहमनुज्ञातः	२	११३	१४
निवृत्यैव निवृत्यैव	२	४२	१२
निवेदयत मां क्षिप्रम्	६	१७	१७
निवेदयामास तथा	७	४४	१२
निवेदयित्वा धर्मज्ञाः	३	१	१८
निवेदयित्वाभिज्ञानम्	१	१	७४
निवेद्यतां दाशरथेः	७	१	९
निवेद्यमाने दोषः स्यात्	५	१३	१६
निवेद्य रामाय तदा महात्मने	४	२६	४२
निवेशनानां विविधाश्च शालाः	५	७	२
निवेशयत मे सैन्यम्	२	८३	२३
निवेशयत महाबाहो	७	६२	१७
निवेशय महाबाहो	७	१००	१३
निवेशयामास पुरम्	७	९०	२२
निवेश्य गङ्गामनु तां महानदीम्	२	८३	२६
निवेश्य ते पुरवरे	७	१००	१८
निवेश्यतां तत्र पुरम्	७	१०२	६
निवेश्य चक्रुश्चमिवर्षः	७	१०९	१६
निवेश्य सेनां तु विभुः	२	९८	१

	काण्ड	सर्ग	श्लोक
निशम्य तल्लक्ष्मणमातृवाक्यम्	२	४४	११
निशम्य नदतो नादम्	५	५७	२१
निशम्य मारुतेः सर्वे	५	५७	४१
निशम्य रामागमनं नृपात्मजः	६	१२५	४६
निशम्य रामेण शरैरजिह्मगैः	३	३४	२६
निशम्य वाक्यं तु विभीषणस्य	६	१४	७
निशम्य सीतावचनं कपेश्च	५	३१	१७
निशाचरा आश्रयन्ति	७	६	६१
निशाचराणामधिपोऽनुजस्य	५	५२	२५
निशाचराणि भूतानि	२	११	१५
निशाचरीणां प्रत्यक्षम्	५	३०	११
निशाचरेन्द्रस्य निशम्य वाक्यम्	६	१४	१
निशाचरैस्ताड्यमानः	७	७	७
निशा नक्षत्रहीनेव	२	६६	२४
निशि भान्त्यचलेन्द्रस्य	२	९४	२१
निश्चितार्थस्ततः साम्ना	५	५२	४
निश्चितार्थं ततस्तस्मिन्	५	६४	४४
निश्चितैव हि मे बुद्धिः	३	१६	३८
निश्चित्य मनसा कृत्यम्	२	१०	२
निषण्णं तं ततो दृष्ट्वा	४	३८	२०
निषसाद च हस्तेन	५	५७	३७
निषादविषयं हत्वा	३	३५	३३
निष्कम्पपत्रास्तस्वा	३	४८	९
निष्कुटश्चैव देशोऽयम्	२	८४	१६
निष्कुटान्तररथ्याश्च	५	१२	१४
निष्कूजमानशकुनि	३	२	३
निष्कूजमिव भूत्वेदम्	२	९३	१४
निष्क्रमो वा प्रवेशो वा	६	७२	१२
निष्क्रान्तमात्रे भवति	२	१०२	६
निष्क्रान्तस्य जनस्थानात्	३	७१	२२
निष्क्रान्ते राक्षसेन्द्रे तु	५	२३	२
निष्टमन्निव चागत्य	६	९१	५
निष्पतन्ति ततः सैन्याः	६	४२	३७
निष्पतन्तो महोत्साहाः	६	५३	१९
निष्पतिष्यत्यसंगेन	४	१४	१८
निष्पन्दास्तस्थुः सर्वे	१	३४	१५
निष्पन्दौ तु तदा दृष्ट्वा	६	४६	२७
निष्पपात च गृध्रोऽस्य	६	६५	५०
निष्पपात तदा चोल्का	६	६५	५१
निष्प्रधानामनेकाग्राम्	२	१०३	११
निष्प्रभासा विवर्णा च	२	६५	१७
निष्प्रमाणशरीरः सन्	५	१	११
निष्फलाः खलु संवृत्ताः	६	५१	१७
निस्यन्दिर्धूमकेतुश्च	७	२२	२५
निहतं दूषणं दृष्ट्वा	३	२८	१
निहतं सारथिं दृष्ट्वा	६	८९	४६

	का०	स०	श्लोक
निहतस्य मया संख्ये	३	१६	६
निहतस्यास्य सत्त्वस्य	३	४३	२०
निहताः किंकरा सर्वे	५	४८	७
निहताः पतिताः क्षीणाः	३	२५	४२
निहतानाममित्राणाम्	६	६६	३
निहतानि शरैर्दीप्तैः	६	६४	३
निहतानि शरैर्दीप्तैः	३	३६	६
निहतानि शरैस्तीक्ष्णैः	३	३४	१०
निहता ब्रह्मतेजोभिः	४	४०	४४
निहताश्च हि ते सर्वे	७	६८	१६
निहते राक्षसेन्द्रे च	५	३६	४५
निहते राक्षसेन्द्रे च	५	५६	२०
निहते कुञ्जरैर्मत्तैः	६	४३	४४
निहतो रावणो राम	६	११७	२६
निहत्य तं मुनिश्रेष्ठ	१	७१	१६
निहत्य तं वज्रधरं प्रतापवान्	६	५४	३७
निहत्य तां यक्षसुता स रामः	१	२६	३६
निहत्य तां राक्षसराजवाहिनीम्	६	६३	३८
निहत्य दण्डकारण्ये	३	३६	५
निहत्य दितिपुत्रांस्तु	१	४५	४५
निहत्य पृषतं चान्यम्	३	४४	२७
निहत्य राघवस्यास्त्रम्	६	६६	४१
निहत्य वज्रिसुतोपमं रणे	५	४७	३८
निहनिष्यति सङ्ग्रामे	६	६७	१०
निहन्तृन्परसैन्यानाम्	५	६	३३
निहन्म्हं त्वां ससुतं सबन्धुम्	६	२०	२४
निहन्यमाना हरिपुंगवैस्तदा	६	४३	४६
निःश्रेयसपरा मोहात्	४	२०	१२
निःश्रेयसफलावेव	६	६४	८
निश्वसद्भिस्तदा तैस्तु	६	६७	४७
निःश्वसन्तं तु तं दृष्ट्वा	४	३३	३
निःश्वसन्तं यथा नागम्	५	१०	१२
निःश्वसन्तौ यथा सर्पौ	६	४६	५
निःसर्प महाघोरम्	६	४	४०
निःसाध्वसमिदं प्रोक्तम्	१	६२	१६
निसृता दक्षिणद्वारात्	६	५३	१३
निःसृतान्विषमात्तस्मात्	४	५२	३१
निःसृताः स्मो मुनिश्रेष्ठ	१	२८	१६
निःसंशयं कार्यमवेक्षितव्यम्	४	३०	२०
निःसंशयं मया मन्ये	२	४३	१७
निःस्रोतसस्ते सर्वे तु	७	८६	५
निःस्वनं चक्रवाकानाम्	४	३०	१०
निःस्वाध्यायवषट्कारम्	७	३५	५२
नीचस्य क्षुद्रशीलस्य	३	३०	५
नीतः संनिहितश्चैव	७	३०	४६

	काण्ड	सर्ग	श्लोक
नीयमाना तु सबला	१	५४	२
नीरुजो निर्व्रणाश्चैव	६	१२०	१४
नीरुजो निर्व्रणाश्चैव	६	१२०	६
नीलजीमूतवर्णानाम्	३	२२	७६
नीलजीमूतसंकाशम्	६	१११	२६
नीलजीमूतसंकाशम्	६	४०	५
नीलजीमूतसंकाशम्	६	८७	३
नीलजीमूतसंकाशः	३	३८	२
नीलजीमूतसंकाशः	५	२२	२४
नीलजीमूतसंकाशः	७	६	२
नीलं नवभिराहत्य	६	४६	१८
नीलनागाभया वेण्या	५	१५	२५
नीलमग्निसुतं चैव	४	४१	२
नीलमेघनिभाश्चास्य	६	१००	१७
नीलमेघाश्रिता विद्युत्	४	२८	१२
नीललोहितमाञ्जिष्ठ	५	१	५
नीलवैदूर्यवर्णाश्च	४	४३	३६
नीलश्च द्विविदो मैन्दः	६	४६	३
नीलं सतोयमेघाभम्	७	२६	१८
नीलः सेनापतिश्चैव	५	४६	१३
नीलाः किल पुरा बर्हाः	७	१८	२३
नीलाञ्जनचयप्रख्यम्	५	४६	७
नीलाञ्जनचयप्रख्य	६	६७	६१
नीलाञ्जनचयप्रख्यः	६	६७	१०४
नीलाञ्जननिभाः केचित्	५	१५	११
नीलाय व्यसृजद्बाणान्	६	५८	३७
नीलेन सह संयुक्तम्	६	५६	७२
नीलेषु नीला नववारिपूर्णाः	४	२८	४०
नीलोत्पलदलश्यामाः	४	३०	२४
नीलोत्पलवनैश्चित्रैः	४	४३	४१
नीवारान्पनसान्सालान्	३	११	७४
नीहारकृतगम्भीरैः	५	५६	३२
नीहारपरुषो लोकः	३	१६	५
नूनं काञ्चनपृष्ठस्य	४	३०	७४
नूनं जात्यंतरे तात	२	५३	१६
नूनं तुच्छुभदन्तोष्ठम्	३	६०	३१
नूनं तु बलबाल्लोके	२	२४	५
नूनं त्रिभुवनस्यापि	६	६६	३
नूनं न तु वसन्तस्तम्	४	१	४८
नूनं न ते जनः कश्चित्	५	२२	१३
नूनं पुरुषशार्दूलः	२	४८	३१
नूनं प्राप्ता स्म सभेदम्	२	५४	६
नूनमन्यां मया जातिम्	६	३२	३०
नूनं ममैव शोकेन	५	२६	२६
नूनमस्ति महाराज	६	३२	३७
नूनमापूर्यमाणायाः	४	२८	३६

	काण्ड	सर्ग	श्लोक
नूनं राक्षसकन्यानाम्	५	२६	२७
नूनं रामप्रभावेण	५	५५	२४
नूनं लङ्काहते पापे	५	२६	२५
नूनं विक्षिप्यमाणौ तौ	३	६०	३३
नूनं व्याकरणं कृत्स्नम्	४	३	२९
नूनं स कालो मृगरूपधारी	५	२८	१०
नूनं सर्वे गमिष्यामः	२	३५	१२
नूपुराणां च घोषेण	५	६	४३
नूपुरेत्वभिजानामि	४	६	२३
नूपुरोत्कृष्टलीलेव	२	६०	१९
नृणां शतानि पञ्चाशत्	१	६७	४
नृत्यन्तश्च हसन्तश्च	२	९१	६२
नृत्यवादित्रकुशला	५	१०	३२
नृपश्चोवाच तां देवीम्	२	३५	२२
नृपेशान्तांगुणे जाते	२	६५	२४
नृमसभोजना रौद्राः	२	२५	२०
नृशंसमनृशंसं वा	१	२५	१८
नृशंसवृत्ते व्यसनप्रहारिणि	२	१२	१०७
नृशंसशील क्षुद्रात्मन्	३	३०	१२
नृशंसा केकयी द्रष्टुम्	२	१३	१९
नृशंसे पापसंकल्पे	२	१३	१३
नेच्छता तात मां हन्तुम्	३	३८	२०
नेदमत्र त्वया ग्राह्यम्	४	३१	७
नेदानीं गुह योग्योऽयम्	२	५२	६६
नेदानीं श्रूयते पुर्याम्	२	११४	२२
नेदारास्फोटयामासुः	६	६०	३७
नेदुर्दुन्दुभयः स्वस्थाः	६	२४	२२
नेदुर्बलस्याभिमुखम्	३	२३	११
नेदृशं दृष्टपूर्वं मे	७	७३	९
नेदृशेषु विमुह्यन्ति	७	५२	१४
नेमं मोक्षयितुं शक्ताः	६	५०	४८
नेमौ मोक्षयितुं शक्यौ	७	४६	१३
नेमौ शक्यौ रणे जेतुम्	६	४८	३०
नेयं नरयितुं शक्या	५	५१	२४
नेयमन्येन नगरी	५	३	१४
नेयमर्हति वैक्लव्यम्	६	११८	१८
नेह किंचिन्मनुष्या वा	५	२०	४
नेह पश्यामि लोकेऽन्यम्	५	२०	१९
नैकान्तविजयो युद्धे	६	१०९	१७
नैतच्चित्रं नरव्याघ्रे	२	११३	१६
नैतच्छिथिलया बुद्धया	६	८७	१४
नैतत्किंचन रामस्य	६	४६	३९
नैतत्सुरगणाः सर्वे	१	६७	९
नैतदाश्चर्यमार्यायाम्	२	११८	२
नैतदौपयिकं राम	२	५३	३०

	का०	स०	श्लोक
नैतन्मनसि कर्त्तव्यम्	६	६३	३१
नैतस्य सहिता लोका	२	६१	२०
नैनं दुःखेन संतप्तः	२	३९	२
नैनं सूर्यः प्रतपति	१	१५	१०
नैनां पश्यामि तीर्थेषु	३	६४	४
नैपुण्यान्मोचयित्वैनम्	६	९६	२९
नैमिषे वसतस्तस्य	७	९२	४
नैराश्यमुपगन्तुं च	६	१०१	५२
नैर्ऋतं क्रोधशोकाभ्याम्	६	७८	२
नैर्ऋतं नैर्ऋतानां च	६	४	५१
नैर्ऋताधिपते वाक्यम्	६	८५	३
नैर्ऋतानामधिपतिः	६	३१	११
नैर्ऋतानां सहस्रैस्तु	७	३	३२
नैर्ऋतेन्द्र महावीर्य	६	७४	१७
नैर्ऋतो रावणो नाम	४	६२	६
नैशानि सर्वभूतानि	१	३४	१८
नैष वारयितुं शक्यः	३	४९	३९
नैषा पश्यति राक्षस्य	५	१६	२५
नैषा बुद्धिर्महाबुद्धेः	५	६०	१५
नैषामकृतकार्याणाम्	५	६३	१७
नैषा रक्षो भवेदद्य	७	२२	२४
नैषा हि सा स्त्री भवति	२	६२	१३
नैव चक्रे मनः स्थातुम्	४	२	३
नैव चित्रं सपत्नेषु	३	४५	२३
नैव ज्यातलनिर्घोषः	६	८०	२६
नैव त्वमसि नैवासौ	७	१३	३५
नैव देवा महात्मानः	३	३१	१८
नैव देवी न गन्धर्वी	३	३१	३०
नैव देवी न गन्धर्वी	३	३४	१८
नैव दंशान्नमशकन्	५	३६	४२
नैवं भव गृहाणेदम्	२	३५	२९
नैवमर्हथ मां वक्तुम्	३	६	२२
नैव यक्षा न गन्धर्वाः	३	६४	५८
नैवं रणगताः शूराः	६	८८	५२
नैवं राक्षसशार्दूल	५	५८	१४८
नैवं राजनि सुग्रीवे	६	७४	२०
नैवं रात्रि न दिवसम्	६	१०७	६६
नैवं रूपा मया नारी	३	४६	२३
नैवं लक्ष्मण वक्तव्यः	४	३५	२
नैवं लोभान्न मोहाद्वा	२	१०९	१७
नैवं वाचा न मनसा	६	११८	६
नैवं विधमसत्कारम्	२	६१	१९
नैवं विनष्टाः शोच्यन्ते	६	१०९	१५
नैवं शूरास्तु युध्यन्ते	६	८८	५३
नैवं सा क्षम्यते देवी	२	३५	३७

	काण्ड	सर्ग	श्लोक
नैवं सा निर्गमं लेभे	१	४३	९
नैव नूनमथवा	३	६०	२९
नैव साम्ना न दानेन	६	८४	१२
नैवाकृतज्ञः सुग्रीवः	४	३५	३
नैवान्तरिक्षं न दिशः	६	९५	१२
नैवायोध्यां गमिष्यामः	२	९१	५९
नैवार्यं वानरान्राक्षन्	६	६७	१२७
नैवार्थेन च कामेन	६	११०	२५
नैवास्ति नूनं मम दोषमत्र	५	२८	५
नैवाहं तं कपिं मन्ये	५	४६	७
नैवाहं राज्यमिच्छामि	२	३४	४७
नो चेत्करोषि मारीच	३	४०	२६
नोच्छ्वसत्त दयोध्यायाम्	७	१०९	२२
नोत्सवाः संप्रवर्तन्ते	२	११४	२४
नोत्सहत्यमृतो मोक्तुम्	६	३४	२४
नौरेषा हि सुखस्तीर्णा	१	४५	७
न्यग्रोधं समुपागम्य	२	५५	८४
न्यन्तेनापरतालस्य	२	६८	१२
न्यपतत्पततिः पूर्वम्	३	२७	१९
न्यपतत्सा महावेगा	६	१००	३५
न्यपातयत तेजस्वी	३	२७	१५
न्यर्बुदं रक्षसामत्र	६	३	२७
न्यवर्तत जनो राज्ञः	२	४०	४९
न्यवसत्स सुखं तत्र	१	२३	२२
न्यवारयमहं सर्वान्	५	६३	६
न्यवेदयत चात्मानम्	२	५४	१३
न्यवेदयत्ततः सर्वम्	२	११९	१४
न्यस्तदण्डा वयं राजन्	३	१	२१
न्यस्तां सागरतोये वा	४	१७	५१
न्यस्यतां कलशस्त्रात	१	२	६
न्यायवादी यथावाक्यम्	३	४५	३८
न्यायेन राजकार्याणि	६	१२	३०
न्यासभूतमिदं राज्यम्	४	१०	९
न्यासभूतं तदा न्यस्तम्	१	६६	१३
न्यासभूता मया पुत्र	७	५९	११
पक्षयोर्यद्बलं तस्य	४	६६	६
पक्षलाभो ममायं वः	४	६३	१३
पक्षवातबलोद्धूतः	३	८	२०
पक्षाभ्यां च मया गुप्तः	४	६१	१५
पक्षिणश्चतुष्पदो वा	७	३०	१०
पक्षिणश्च मृगाः सर्वे	६	३५	३३
पक्षिणो वर्जयन्त्येतत्	४	१३	२१
पक्षी च शाखानिलयं प्रविष्टः	५	२७	४६
पक्षौ च ते प्रपक्षौ च	४	६२	२
पङ्कमासाद्य विपुलम्	३	६१	१३

	काण्ड	सर्ग	श्लोक
पञ्च दास्यः सहस्राणि	३	४७	३१
पञ्च पञ्चनखा भक्ष्याः	४	१७	३९
पञ्चभिर्हरिकोटीभिः	४	३९	३१
पञ्चमीमद्य रजनीम्	६	१२५	२४
पञ्चमेन तथा चाह्ना	६	२२	६८
पञ्च रूपाणि राजानः	३	४०	१२
पञ्चवर्षसहस्राणि	७	१०	८
पञ्चवर्षसहस्राणि	७	५५	१३
पञ्च सेनाग्रगान्हत्वा	१	१	७५
पञ्चाशत सुतांल्लेभे	१	२१	१६
पटहं चारुसर्वाङ्गी	५	३०	३९
पट्टिशान्परिघांश्चक्रान्	६	३१	२२
पट्टिशेन शिताग्रेण	५	४६	३५
पठन्द्विजो वागृषभत्वमीयात्	१	१	१००
पतङ्गा वृश्चिका: कीटाः	२	२८	२१
पततां हरिवीराणाम्	६	६९	७७
पतत्पतङ्गसकाशः	५	१	६४
पतत्येवाद्यमांल्लोकान्	७	४५	१३
पतत्रिणस्तस्य वपाम्	१	१४	३६
पतत्रिणा तदा सार्धम्	१	१४	३४
पतद्भिः पतितैश्चैव	१	४३	१७
पतन्त्यो रेजिरेऽभ्रेभ्यः	५	५४	२७
पताकाध्वजसंयुक्तम्	६	७५	५४
पताकाभिर्वराहाभिः	२	७	३
पताकाभिश्च चित्राभिः	६	१११	१०९
पताकामालिनीं रम्याम्	६	४१	३१
पताकालंकृतं दीप्तम्	६	५३	७
पताकाश्च पताकाभिः	६	१०७	३६
पताकिन्यस्तु ता नावः	२	८९	१६
पतितं समभिज्ञाय	६	९०	७६
पतितायां शिलायां तु	६	८२	१२
पतिता सागरे चाहम्	५	३७	४७
पतितेनाम्भसाऽऽच्छन्नः	२	६३	१८
पतितैः पतमानैश्च	४	१	१३
पतितैः पर्वताकारैः	६	७४	९
पतित्वममराणां हि	६	५८	५
पतिरप्सरसां नास्ति	६	२६	४०
पतिर्मम वनस्थायम्	५	६३	१९
पतिव्रतात्वमास्थाय	७	४७	१८
पतिव्रता धर्मरता	५	१११	६७
पतिव्रतानां नाकस्मात्	६	१११	६७
पतिव्रताभिः साध्वीभिः	७	२४	२३
पतिशोकातुरां शुष्कम्	५	१९	१६
पतिसमानिता सीता	२	१६	२१
पतिसंयोगसुलभम्	२	११८	३४

	काण्ड	सग	श्लोक
पतिहीना तु या नारी	२	२९	७
पत्नी च तमनुप्राप्ताम्	२	११७	७
पत्नीभिः सन्तु काकुत्स्थाः	१	७३	३४
पत्रपुष्पोपहारेण	५	९	८
पत्रं मूलं फलं यत्तु	२	३०	१५
पत्रिणः शितधारास्ते	६	८८	२२
पदवीं देवतानां च	६	४१	६५
पदशब्दं तु मे श्रुत्वा	२	६४	७
पदातयश्च वहवः	६	६५	३७
पदातिं त्यक्तसर्वस्वम्	६	१२४	६
पदातिनौ च दानार्हौ	२	४०	४१
पदातिबलसंपन्नान्	५	५८	१२२
पदातिं सानुजं दृष्ट्वा	२	३३	५
पद्भ्यां दृढमवस्थानम्	५	१	३६
पद्भ्यामभिगमाश्चैव	२	५०	४१
पद्भ्यामेव नगामाथ	२	४५	१८
पद्भ्यामेव तु धर्मज्ञः	२	९०	२
पद्भ्याश्चैव शोभन्ते	४	१	७९
पद्मकेसरसंकाशः	४	३९	१७
पद्मकेसरसंमृष्टः	४	१	७२
पद्मकोशपलाशानि	४	१	७१
पद्मगन्धि शिवं वारि	३	७३	१७
पद्मनाभमहानाभौ	१	२८	६
पद्मपत्रतलौ हस्तौ	६	१०१	२६
पद्मपत्रविशालाक्षम्	४	९९	१३
पद्मपत्रविशालाक्षीम्	४	१	६७
पद्मपत्रविशालाक्षौ	१	४८	३
पद्मपत्रसमानाक्षम्	२	११०	२३
पद्मपत्रेक्षणः श्यामा	३	१६	३१
पद्मपत्रेक्षणौ वीरौ	४	३	१२
पद्मपुष्करसंबाधम्	३	११	६
पद्ममातपसंतप्तम्	२	१०४	२५
पद्मवर्णं सुकेशान्तम्	२	६१	८
पद्मसौगन्धिकवहम्	४	१	१०४
पद्मसौगन्धिकैस्तीरम्	३	७५	२०
पद्मानना पद्मपलाशनेत्रा	३	६३	१४
पद्मिनीनां प्रसुप्तानाम्	५	११	३६
पद्मिन्यो विविधास्तत्र	३	११	३९
पद्मे दिव्येऽर्कसंकाशे	७	१०४	७
पद्मैः सौगंधिकैः फुल्लैः	६	४	८५
पद्मोत्पलयुता भान्ति	२	१५	९
पद्मोत्पलसमाकीर्णम्	७	७७	५
पन्नगप्रतिमैर्भीमैः	६	५९	६९
पन्नगाशनमाकाशे	४	६७	१४
पन्नगैः सह दीप्तास्यैः	६	२२	१८

	काण्ड	सर्ग	श्लोक
पन्नगैः सुमहाकायैः	७	२८	३०
पपात चरणौ तस्याः	२	७५	१८
पपात प्रथमं रामः	६	४५	२२
पपात रुधिराक्लिन्नः	६	९६	३२
पपात सहसा भूमौ	६	५२	३७
पपाताङ्के मुने राम	१	६२	४
पप्रच्छ कुशलं राज्ञः	१	५०	९
पप्रच्छ मुनिशार्दूलम्	१	३१	२३
पफाल च तदाक्रान्तम्	६	४१	४९
पम्पातीरुहान्वृक्षान्	४	३	७
पम्पानदीनिवासानाम्	३	६	१७
पम्पायामिषुभिर्मत्स्यान्	३	७३	१५
परदाराभिगमनम्	३	९	४
परदाराभिमर्शात्तु	३	३८	३०
परदारावपेक्षास्य	५	११	३८
परमान्नं च वैदेह्याः	४	६२	८
परमास्तरणास्तीर्णम्	५	१०	६
परमो ह्येष मे कामः	७	४१	८
परमं खलु ते वीर्यम्	३	५३	६
परम्पराणां भक्षिष्ये	४	५६	५
परलोके महाराजः	३	६१	७
परवानस्मि काकुत्स्थ	३	१५	७
परश्वधहतस्याद्य	३	२२	५
परस्परं केचिदुपाश्रयन्ति	५	६१	१७
परस्परकृताश्चासौ	५	३५	३३
परस्परं घ्नतोस्तत्र	४	११	४४
परस्परं चाधिकमाक्षिपन्ति	५	५	११
परस्परमभित्रघ्नौ	४	१६	२६
परस्परवधे युक्तौ	६	१०७	३१
परस्परस्य सदृशौ	१	५०	२१
परस्परस्याभिमुखौ	६	१०७	३५
परस्परं स्वेदविदिग्धगात्रौ	६	४०	१४
परस्परेण रहिताः	४	५०	५
परस्पर्शान्तु वैदेह्याः	३	२	२१
परस्य वीर्यं स्वनलं च बुद्धवा	६	१४	२२
परस्वहरणे युक्तम्	६	८७	२२
परस्वानां च हरणम्	६	८७	२३
पराक्रमज्ञो रामस्य	३	३९	१३
पराक्रमोत्साहमतिप्रताप	७	३६	४
पराक्रमोत्साहमनस्विनां च	५	५२	२२
पराक्रमोत्साहविजृम्भिताचिः	६	१०९	११
पराक्रमोत्साहविवृद्धमानसः	५	४७	२८
परार्ध्यास्तरणोपेताम्	५	९	२७
पराङ्मुखवधं कृत्वा	४	१७	३६
पराङ्मुखवधं पापम्	७	८	४

	काण्ड	सर्ग	श्लोक
पराङ्मुखे कृते देवे	७	७	४०
पराङ्मुखोप्युत्ससर्ज	४७	७	४२
परा त्वत्तो गतिर्वीर	३	६	२०
परावमन्ता विषयेषु सङ्गतात्	३	३३	२३
परावरज्ञो यश्च स्यात्	२	१०६	५
परिकाल्यमानस्तु तदा	४	४६	१६
परिकीर्णो ययौ तत्र	४	३८	१५
परिक्रमति यः सर्वान्	६	३७	३०
परिक्रान्ता मही सर्वा	१	४०	८
परिक्लान्तस्य मे तात	३	६८	१०
परिक्लिष्टैकवसनाम्	६	८१	१०
परिक्षिता समुद्रेण	३	५५	१६
परिक्षिप्य हरिश्रेष्ठम्	५	४३	१६
परिखान्पूरयन्तश्च	६	४२	१६
परिखाश्च शतघ्न्यश्च	६	३	२३
परिमृह्य च बाहुभ्याम्	६	७७	२२
परिगृह्य तु कैकेयी	३	४७	७
परिगृह्य ययुर्हृष्टाः	५	५३	१७
परिगृह्योदकं शीतम्	६	२३	२
परिगृह्य योदकं दर्शयन्	६	६७	१७
परिघाग्रेण तान्वृक्षान्	६	७०	६
परिघाग्रेण पुस्फोट	६	७७	७
परिघान्पट्टिशाञ्छूलान्	६	६	४
परिघान्पट्टिशाश्चैव	६	६३	७
परिघेणातिवोरेण	५	५८	१२१
परिघेणाभिदुद्राव	६	७०	२३
परिघैर्भिन्दपालैश्च	६	५१	२५
परिघैर्मथिताः केचित्	६	५२	२०
परिघैश्च गदाभिश्च	६	८६	२२
परिघोपमबाहुस्तु	६	७७	११
परिघो व्यक्कीर्णस्ते	६	१११	८४
परिचर्यामहे राज्यात्	५	३५	२७
परिणीय च सर्वत्र	६	३०	६

	काण्ड	सर्ग	श्लोक
परितुष्टं मुनिं ज्ञात्वा	१	३३	१५
परितुष्टः स रामस्य	६	१०६	१४
परितुष्टस्तु सुग्रीवः	४	८	१
परितुष्टाऽस्मि भद्रं ते	५	२४	२२
परितुष्टोऽस्मि ते वत्स	७	३	१४
परितुष्टोऽस्मि धर्मात्मन्	७	१०	२८
परितुष्टोऽस्मि भद्रं ते	१	२७	२
परितुष्टोऽस्मि सुश्रोणि	७	२	३०
परितुष्टोऽस्म्यहं सीते	३	१०	२१
परितोषं न गच्छन्ति	१	५८	२२
परित्यक्ता वसिष्ठेन	१	५४	३
परित्यक्ष्याम्यहं प्राणन्	६	४६	७
परित्यजेयुः पितरोऽपि पुत्रान्	२	१२	१०२
परिदेवयमानस्य	२	५१	२६
परिदेवयमानस्य	२	८६	२३
परिदेवयमानां ताम्	६	४८	२२
परिद्यूनं विवर्णं च	५	३८	३४
परिपालयमानस्य	२	७५	२४
परिपृच्छति वैदेही	२	६०	१२
परिपेतुर्बिले तस्मिन्	४	५०	२३
परिप्रक्ष्यन्ति काकुत्स्थम्	२	१२	६६
परिभोक्तुं व्यवस्यन्ति	६	१२५	३५
परिभ्रमति चित्राणि	३	४२	२८
परिमृज्य च पाणिभ्याम्	२	१०	२७
परिरब्धुं न शक्नोमि	४	२३	१५
परिवादो हि ते देवि	२	३५	३३
परिवार्य च ते सर्वे	५	५७	३२
परिवार्य महाकायाः	६	७८	१५
परिवार्याङ्गदं सर्वे	४	५५	१६
परिवार्याभिनर्दन्ते	६	२७	३४
परिवार्य यथा मे स्युः	७	५४	१३
परिवृत्तेऽर्धरात्रे तु	५	६	३४
परिव्राजकरूपेण	३	४६	४
परिश्रमाच्च सुप्ता हे	५	३८	२१
परिश्रान्ते तु तं दृष्ट्वा	३	५१	२१
परिष्वज्य च राघवः	६	६१	२०

	काण्ड	सर्ग	श्लोक
परिष्वज्य दशग्रीवम्	५	२२	४०
परिस्तरणिकां राज्ञः	६	१११	११८
परुषः दारुणं तीक्ष्णम्	५	१३	२२
परुषाणि हि वाक्यानि	५	२२	६
परेण तपसा: लब्धाम्	७	१२	२२
परेण तपसा लेभे	५	६	१२
परेतकाले पुरुषः	३	५१	३१
परे पारे समुद्रस्य	६	१२	२४
परेषामभियानार्थम्	६	२२	७७
परो धर्मः कृतो मह्यम्	१	७२	१५
पर्णशालां सुविपुलाम्	३	१५	२१
पर्यङ्कमृग्यास्तरणम्	२	३२	६
पर्यवस्थापयामासुः	६	१११	८६
पर्याप्तोऽहं गदापाणिः	३	२६	२२
पर्यायेण च सुप्तस्त्वम्	५	६७	४
पर्वतं पृष्ठतः कृत्वा	१	४५	३०
पर्वतप्रभवा नद्यः	४	४०	३५
पर्वताग्रनदीदुर्गान्	४	४८	३
पर्वतादिव निष्क्रम्य	२	१६	२६
पर्वतारोहणं चैव	१	३	२७
पर्वतांश्चूर्णयिष्यामि	४	६७	१८
पर्वतेषु च ये केचित्	६	२७	७
पलायनेन चोद्दिष्टाः	६	६६	२७
पल्वलानि तटाकानि	५	१३	४
पवनाहतवेगाभिः	४	१	६६
पवनेनाबधूतेन	७	२६	४३
पवित्रपाशैराबद्धः	१	६२	१६
पशव्यश्चाल्परोगश्च	६	२२	३८
पशुकाभिश्च सर्वाभिः	२	३२	१८
पशुमिन्द्रो जहार ह	१	६१	६
पशुरभ्याहृतो राजन्	१	६१	७
पशूनां त्रिशतं तत्र	१	१४	३२
पशोरर्थे महाभाग	१	६१	१४
पश्य चन्दनवृक्षाणाम्	४	२७	२४
पश्यतस्तां तु रामस्य	६	११५	११
पश्यतां नृसहस्राणाम्	१	६७	१६
पश्य तावन्महाबाहो	७	२०	१२
पश्यतां वानरेन्द्राणाम्	६	४०	७
पश्यतां सर्वदेवानाम्	७	११०	२२
पश्यतो मे तदा राम	७	७७	१५
पश्य द्रोणप्रमाणानि	२	५६	८
पश्यध्वं विपरीतस्य	७	८१	४
पश्यन्ती विविधान्देशान्	६	१११	३३
पश्यन्ती सिद्धयात्रं त्वाम्	२	१६	४०
पश्यन्तो विविधाश्चापि	२	६८	२०
पश्यन्दाशरथेभार्याम्	४	५६	२०
पश्यन्धातुसहस्राणि	२	११३	४
पश्यन्निव च तां सीताम्	३	६२	२
पश्यन्वनानि चित्राणि	३	११	४५
पश्य भल्लातकान्बिल्वान्	२	५६	७
पश्य मत्तविहङ्गानि	६	२४	१२
पश्यमानस्ततो बिन्ध्यम्	७	३१	१६
पश्य मे तपसो वीर्यम्	१	६०	१३
पश्य मे निशितान्बाणान्	६	७१	५५
पश्य मे मुद्गरं भीमम्	६	६७	१४७
पश्य रूपाणि सौमित्रे	४	१	११
पश्य लक्ष्मण गृध्रोऽयम्	३	६८	२२
पश्य लक्ष्मण दुर्वृत्तान्	१	३०	१५
पश्य लक्ष्मण पुष्पाणि	४	१	४४
पश्य लक्ष्मण यक्षिण्या	१	२६	१०
पश्य लक्ष्मण वैदेह्याः	३	४३	२५
पश्य लक्ष्मण वैदेह्याः	३	६४	३६
पश्य लक्ष्मण वैदेह्याः	४	६	२०
पश्य लक्ष्मण शीतेषुम्	१	३०	२०
पश्य लक्ष्मण संनादम्	४	१	५७
पश्य लक्ष्मण संरागः	४	१	४२
पश्य शत्रुघ्न कैकेय्या	२	८१	५
पश्य शीतजलां चेमाम्	४	१	६८
पश्य शून्यान्यरण्यानि	२	४६	३
पश्य सीतापदेशेन	४	५६	७
पश्य सौम्य नरेन्द्रस्य	३	२	१७
पश्यंस्तदवशस्तस्याः	६	१२	१७
पश्याद्य रामं सह लक्ष्मणेन	६	७३	५
पश्यामीह हि कण्ठे त्वाम्	३	५३	१८
पश्याश्रमपदं रम्यम्	३	८	१२

	काण्ड	सर्ग	श्लोक
पश्यास्य जृम्भमाणस्य	३	४३	२८
पश्येदानीं जगच्चित्रम्	७	३४	६
पश्येममचलं भद्रे	२	६४	४
पश्यैतद्वल्गुवचसः	२	६५	११
पश्चाच्छूर्पणखा नाम	६	१२६	२०
पश्चादपि हि दुःखेन	२	३०	२०
पश्चिमं साधु संदेशम्	२	७२	३५
पश्चिमां च दिशं घोराम्	४	४५	७
पश्चिमायामथ द्वारि	६	३६	१८
पश्चिमायामपि दिशि	१	४०	२०
पश्चिमायां विशालायाम्	१	६१	३
पश्चिमेन तु तं दृष्ट्वा	७	३२	६
पल्लवान्नाशयामास	१	५४	२०
पाठ्ये गेये च मधुरम्	१	४	८
पाणिप्रदानकाले च	२	११८	८
पाणिभिर्निहताः केचित्	५	६३	११
पाणिभ्यां च कुचौ काचित्	५	१०	४७
पाणौ पार्णि स निष्पिष्य	७	६६	२
पाण्डुरं गगनं दृष्ट्वा	४	३०	२
पाण्डुरं छत्रमादाय	६	१२७	१८
पाण्डुरं राक्षसेन्द्रस्य	६	११	११
पाण्डुराणि विशालानि	३	३५	१६
पाण्डुराभिः पताकाभिः	६	२२१	२५
पाण्डुराभिः प्रतोलीभिः	५	२	१७
पाण्डुराभ्रप्रकाशानि	५	३३	१३
पाण्डुराभ्रमिवाकाशम्	२	१०	१२
पाण्डुरा रक्तपादाश्च	५	३५	३१
पाण्डुरारुणवर्णानि	२	६३	१६
पाण्डुरारुणवर्णानि	५	१	७६
पाण्डुरारुणवर्णानि	५	५७	७
पाण्डुरेण तु शैलेन	४	३३	१४
पाण्डुरेणापविद्धेन	५	१०	२७
पातयामास कायेभ्यः	६	६८	३
पातयामास वाणौघैः	६	६०	१५
पातयित्वा ततश्चक्षुः	५	१२३	२
पातयित्वा तु कैकेय्या	२	४३	५
पातिताश्च त्वया वीराः	६	६७	५५

	काण्ड	सर्ग	श्लोक
पातिते त्वनृते तस्मिन्	७	७४	१८
पातितोऽहं तदा तेन	३	३८	२१
पात्रभूतोऽसि मे ब्रह्मन्	१	१८	५३
पात्रीणां च सहस्राणि	२	६१	७१
पादचारमिवादित्यम्	७	३३	५
पादच्छाया सुखं भर्तुः	२	४८	१७
पादपान्काञ्चनान्नूनम्	३	४७	३८
पादपाः पर्वताग्रेषु	२	४८	१५
पादप्रहारैस्तु मया	४	१०	२४
पादबद्धोऽक्षरसमः	१	२	१८
पादमूलगताश्चापि	५	१०	३०
पादमूलं गमिष्यामि	४	१६	१६
पादयोर्निपपाताथ	६	१६	३
पादुकाग्र्याभिषेकं च	१	३	१७
पादुके ते तु रामस्य	६	१२७	५३
पाद्यमर्घ्यं तथातिथ्यम्	१	४६	१८
पाद्यमाचमनीयं तु	३	७४	७
पानभूमिगतं हित्वा	५	१	२३
पानभूमिर्विनावह्निम्	५	११	२१
पानश्रेष्ठां तथा भूमिम्	५	११	२६
पानानि च महार्हाणि	४	४३	४८
पानीयदूषके पापम्	२	७५	५६
पानीयं याचमानांच	७	२१	१६
पापं कृत्वेव किमिदम्	२	१४	२
पापमाचरतां घोरम्	३	२६	१०
पापयोस्ते कथं नाम	२	२३	८
पापस्य कर्ताऽस्मि विगर्हितस्य	४	२४	१६
पापात्मायं दशग्रीवः	६	१००	४७
पापानां वा शुभानां वा	६	११३	४३
पापानुबन्धौ वै यस्य	३	५१	३२
पापान्यपि च यः कुर्यात्	७	१११	६
पापापहं स्वर्नयनम्	१	१४	५८
पापेनानृतसान्त्वेन	२	७	२६
पाप्मानमिन्द्रस्य मही जलं च	४	२४	१४
पाययामास काकुत्स्थः	७	४२	१६
पायसं कृसरं छागम्	२	७५	३०
पायादग्रे महाराजः	१	४३	३१

	काण्ड	सर्ग	श्लोक
पारं शोकार्णवस्याशु	२	१२	३८
पारिप्लवगताश्चापि	१	४३	१६
पारिप्लवशतैर्जुष्टा	४	२७	२३
पार्थिवव्यञ्जनैर्युक्ताः	५	३१	१
पार्थिवेन्द्रस्य तद्वाक्यम्	१	८	२०
पार्श्वतः पृष्ठतश्चापि	२	४०	२१
पार्श्वतः पृष्ठतश्चास्य	६	९६	८
पार्श्वे तत्र च वैदेह्या	२	५५	१७
पार्श्वेषु दारिताः केचित्	६	५२	११
पालयास्मान्महाबाहो	१	४५	२९
पालितां राक्षसेन्द्रेण	५	२	२०
पावकस्य सुतः श्रीमान्	१	१७	१३
पावकात्मजमालोक्य	६	५९	७८
पावितस्तेन यज्ञेन	७	३०	४८
पाशमुद्गरदण्डैश्च	६	७९	५
पाषाणांश्च गिरिप्रख्यान्	६	२२	६२
पांसुरूषितसर्वाङ्गः	३	३०	७
पासुशोणितदिग्धाङ्गम्	२	६३	३७
पिङ्गे पिङ्गाक्षमुख्यस्य	५	१	५७
पितरं गुरुभूतं माम्	७	५९	१५
पितरं चानुशोचामि	२	४६	६
पितरं देवसंकाशम्	१	७७	२१
पितरं रोचयामास	१	१५	३२
पितरि स्वर्गमापन्ने	२	७७	१७
पितरो वसवः साध्या	६	१०५	९
पितर्युपरते तस्मिन्	४	९	२
पिता ज्येष्ठमविक्रेयम्	१	६१	२१
पिता ज्येष्ठो जनन्या न	७	२५	२३
पिता दशरथो हृष्टः	१	१८	३६
पितामहनियोगाच्च	६	७	२३
पितामहं पुरस्कृत्य	७	९७	७
पितामहपुरोगास्तान्	१	१५	२७
पितामहवचः श्रुत्वा	१	४०	५
पितामहवचः श्रुत्वा	७	११०	१२
पितामहवचः सत्यम्	३	७१	१२
पितामहश्च भगवान्	७	१०४	३
पितामहसुतश्चापि	७	३३	२०
पितामहस्तु मामाह	७	७८	१४
पितामहस्तु सुप्रीतः	१	२५	६
पितामहस्तु सुप्रीतः	७	१०	१३
पितामहस्य भवनम्	६	१३	११
पितामहादेष वरः	५	५०	१७
पितामहाद्वरं लेभे	४	५१	१३
पितामहानां सर्वेषाम्	१	४४	७
पितामहानां सर्वेषाम्	१	४४	१५
पितामहान्भस्मकृतान्	१	२३	२१
पितामहेन प्रीतेन	६	९२	२९
पिता यन्मां न जानीते	२	६३	४२
पिता हि दैवतं तात	२	३४	५२
पिता हि प्रभुरस्माकम्	१	३२	२२
पिता हि भवति ज्येष्ठः	२	७२	३३
पिता हि राजा काकुत्स्थः	२	२०	३०
पिता ह्येनं जनयति	२	१११	३
पितुः प्रतिज्ञां तामेव	२	११३	१०
पितुर्ग्रहीष्ये पादौ च	२	७२	१३
पितुर्निदेशेन तु धर्मवत्सल	२	३३	३१
पितुर्निदेशं नियमेन कृत्वा	५	२८	१४
पितुर्भवनमासाद्य	६	१२८	४४
पितुर्मम ददौ दिव्यम्	१	७५	२३
पितुर्वचननिर्देशात्	१	६२	२
पितुर्वचनमासाद्य	१	४०	१२
पितुर्वाक्यानुरोधेन	२	३७	१७
पितुर्हि महीषीं देवीम्	२	९२	२१
पितुर्हि समतिक्रान्तम्	२	१०६	१५
पितुः सत्यं प्रतिश्रुत्य	२	९७	३
पितुः समीपं गच्छन्तम्	२	३	३१
पितुस्तु मम जामाता	७	१७	१२
पितृमत्यः स्म भद्रं ते	१	३३	३
पितृमाहात्म्यसंयोगात्	६	५९	८९
पितृवद्वर्तते रामे	५	३८	५८
पितृव्यं निहतं दृष्ट्वा	६	७०	३२
पितृव्यं निहतं श्रुत्या	६	६८	७
पितृव्यौ चापि संदृश्य	९	७१	२
पितृशुश्रूषणरताः	१	१८	१७

	का०	स०	श्लोक
पितृशुश्रूषया पुत्र	२	२५	६
पित्रा दशरथेन त्वम्	६	३२	१८
पित्रा नियुक्ता भगवन्	२	५४	१६
पित्रा प्रव्रज्यमानं माम्	२	५४	१५
पित्रा भ्राता च ते दत्तम्	२	८२	७
पित्र्यं राज्यं समुत्सृज्य	३	१०८	७
पित्र्यः सौमनसश्चैव	१	२८	८
पित्र्याणि ब्रह्मरत्नानि	७	९९	१८
पिधायेन्दुनिभं सीता	३	५५	३३
पिनाकमस्त्रं दयितम्	१	५६	९
पिप्पलीनांच पक्वानाम्	३	११	४९
पिबन्निव बभौ चापि	५	१	५५
पिब विहर रमस्व भुङ्क्ष्व भोगान्	५	२०	३५
पिबंस्तैलं हसन्नृत्यन्	५	२७	२२
पिबामिश्वा विषं तीक्ष्णम्	३	४५	३७
पिशाचान्दानवान्यक्षान्	६	१८	२३
पीठे काष्णायिसे चैव	२	६९	१४
पीडया पीडितं सर्वम्	२	३३	१४
पीडां कुर्वन्ति रक्षांसि	५	५३	१६
पीडितां दुखसंतप्ताम्	५	१५	२२
पीडितास्तु ततस्तस्य	७	१६	२८
पीडयमानस्तदस्त्रं तु	६	६७	१०२
पीडयमानस्तु बलिना	५	१	१५
पीडयमानास्तु बलिना	७	९४	३१
पीतं कनकपट्टाभम्	५	१५	४५
पीतकौशेयकेनासि	३	६०	२८
पीतेनैतेन सवीताम्	५	१५	२१
पीत्वा घटसहस्रे द्वे	६	६०	९३
पीत्वाऽप्युपरतं चापि	५	१०	१०
पित्वा मधु यथाकामम्	५	६४	१५
पीनोन्नतमुखौ कान्तौ	३	४६	२०
पीनौ समसुजातांसौ	५	१०	१७
पुच्छेन च प्रदीप्तेन	५	५८	१५८
पुण्यं च रमणीयं च	७४	७	१६
पुण्यश्च रमणीयश्च	२	५४	४१
पुण्यान्पुण्याहघोषाश्च	६	१०	८
पुण्या वाता वतुश्चैव	७	११०	६

	काण्ड	सर्ग	श्लोक
पुण्यैश्च नियता हारैः	३	१	८
पुण्योत्सवसमृद्धा च	५	२६	२६
पुत्रकस्य यशः पीतम्	७	३३	१६
पुत्रः किल जवस्याहम्	३	३	५
पुत्रः किल स शक्रस्य	५	३८	२७
पुत्रः कीर्तिरथस्यापि	१	७१	१०
पुत्रः केकयराजस्य	१	७३	२
पुत्रः तं वारयित्वा तु	७	२८	३२
पुत्रत्वं तु गते विष्णौ	१	१७	१
पुत्रद्वयविहीनं च	२	४२	३०
पुत्रप्रवादेन तु रावणस्य	६	१५	१०
पुत्रयोरुभयोः प्रीतिम्	१	६९	१०
पुत्र वैश्रवणं पश्य	७	९	४२
पुत्रव्यसनजं दुःखम्	२	६४	५४
पुत्रव्याधिनं ते कश्चित्	२	८७	९
पुत्रशोकाकुलो दीनः	६	९२	६
पुत्रः सन्तर्जितो वाग्भिः	४	६३	७
पुत्रस्ते वरदः क्षिप्रम्	२	४४	२८
पुत्रस्ते सदृशः पुत्र	१	३४	३
पुत्रस्त्वङ्गस्य राज्ञस्तु	१	११	४
पुत्रस्य भाषितं श्रुत्वा	७	५८	१५
पुत्रा दशरथस्येमे	१	७२	७
पुत्रान्पञ्चाशतं पुनः	१	२१	१७
पुत्रान्मृतान्समीक्ष्याथ	५	१३	२५
पुत्रार्थं हयमेधेन	१	१२	९
पुत्रा वैवस्वतस्याथ	६	३०	२६
पुत्राश्च पितृवद्राजन्	९	८३	१२
पुत्राश्चास्य भविष्यन्ति	१	११	१०
पुत्रांश्चिरगतान्ज्ञात्वा	१	४१	१
पुत्रास्त्रैलोक्यभर्तृन्वै	३	१४	१३
पुत्रि प्रदानकालोऽयम्	७	९	८
पुत्रेण मम किं कार्यम्	१	१९	१८
पुत्रेति मधुरां वाणीम्	५	५८	१३
पुत्रैरनुगरः श्रीमान्	१	७७	९
पुत्रैर्दासैश्च भृत्यैश्च	२	७५	३४
पुत्रो दशरथस्यायम्	२	५२	८३
पुत्रो दशरथस्यास्ते	३	३१	१०

	काण्ड	सर्ग	श्लोक
पुत्रो दशरथस्याहम्	७	६८	११
पुत्रो दशरथस्येमौ	१	६६	५
पुत्रो दशरथस्यैष	६	३०	६२
पुत्रो मे शक्रनिर्जेता	६	१११	४०
पुत्रो विश्रवसः साक्षात्	३	६७	१६
पुत्रो विश्रवसः साक्षात्	४	५८	१६
पुत्रो हुतवहस्यात्र	६	३०	२४
पुत्रो दशरथस्यात्ताम्	३	२०	७
पुनः पुनरथोत्पत्य	५	३८	२३
पुनः प्रविष्टं दृष्ट्वा तम्	२	४४	२३
पुनः प्राप्ते बसन्ते तु	१	१३	१
पुनरन्तर्गतमना	१	२	३०
पुनरप्यहमार्यां ताम्	५	६७	२५
पुनरप्यागतस्तत्र	५	६७	१५
पुनराकामाविश्य	१	४३	२६
पुनराख्यायिकां जल्पन्	१	१	८८
पुनरावृत्ततोयां च	५	१४	३१
पुनेरेव ततो दूरात्	३	४४	१२
पुनरेवं ब्र वाणं तम्	२	१०७	१
पुनरेव मया दृष्टः	५	२७	२३
पुनरेव महाबाहुः	२	५२	२१
पुनरेवाङ्गदः प्राह	४	६४	२१
पुनरेवाथ तं रामः	६	६६	३६
पुनरेवाब्रवीत्प्रीतः	४	६	१
पुनर्गत्वा निवृत्तश्च	३	४२	२५
पुनर्दुर्लभसंस्पर्शम्	६	१११	४५
पुनर्नदन्तो गच्छन्ति	३	६४	२०
पुनर्नः निश्चयः कार्यः	२	४५	२६
पुनर्मार्गामहे शैलान्	४	४६	१३
पुनर्वसुमहामीनम्	५	५७	३
पुनः शरशतेनाथ	६	४३	३०
पुनः स मुदितोत्पत्य	६	६२	६
पुनश्च सोऽचिन्तयदात्तरूपः	५	६	७३
पुनश्च चिन्तयत्तत्र	५	५५	२७
पुनस्तं परिपप्रच्छ	१	५०	१७
पुनस्तानि भविष्यन्ति	५	१०	२४

	का०	सर्ग	श्लोक
पुनस्त्रिदिवमाक्रामत्	७	३०	५०
पुनस्त्वयि निवृत्ते तु	२	२४	३४
पुन्नाम्नो नरकाद्यस्मात्	२	१०७	१२
पुरं च राष्ट्रं च मही च केवल	२	३४	५५
पुरमाकाशगं प्रादात्	७	४	३०
पुररोधस्य मूलं तु	६	६५	४५
पुरःसरा राक्षसानाम्	७	६	६०
पुरस्तात्तस्य वीरस्य	५	३	२२
पुरस्तादिह वातापिः	३	४३	४१
पुरस्तादृषभो नीलः	६	४	३०
पुरस्य चाकरोन्नाम	७	७६	१८
पुरस्य सुकृतं नाम	६	५५	६
पुरस्योपनिविष्टस्य	६	५७	५
पुरा किल महाबाहो	३	६	१६
पुरा किल महाबाहो	७	८४	४
पुरा कृतयुगे राम	७	२	४
पुरा कृतयुगे राम	७	७६	५
पुरा च यदहं वीर	५	६७	३६
पुराणं पुण्यमत्यर्थम्	७	७७	७
पुराणि स नदीः शैलान्	७	१४	३
पुराणे सुमहत्कार्यम्	४	६२	३
पुरा त्रेतायुगे राम	७	७७	१
पुरा देवासुरे युद्धे	२	६	११
पुरा देवासुरे युद्धे	२	१८	३२
पुरा नाम्ना हि दुर्वासा	७	५१	२
पुरा प्राकारमायाति	६	३०	१३
पुरा प्राकारमायन्ति	६	२४	३४
पुरा प्रेक्ष्य सुवृत्तं माम्	२	१०३	१३
पुरा भ्रातः पिता नः स	२	१०	७३
पुरा राम पितुर्वाक्यात्	७	५०	६
पुरा राम महाबाहो	३	७१	१
पुरा वृत्रवधे वृत्तं	४	५८	४
पुरा वैदर्भको राजा	७	७८	३
पुरा शरत्सूर्यमरीचिसंनिभात्	६	६	२१
पुरा स्वयंभुवे धीरः	३	३२	१८

	का०	सर्ग	श्लोक
पुराहमाश्रमे वासम्	७	४८	५
पुराहं वलिना राम	४	८	३२
पुरुषत्वं गते शूरे	७	९०	४
पुरुषत्वमृते सोम्य	७	८७	२०
पुरुषस्येह जातस्य	२	१११	२
पुरुषस्येह जातस्य	२	१११	२
पुरुषादी महायशी	१	२५	१३
पुरेत मे चारुदतीमनिन्दिताम्	३	६४	७६
पुरोधसं च काकुत्स्थ	७	६३	११
पुरोधा ऋत्विजश्चैव	१	५०	१२
पुरोहितं च कुशलम्	२	७०	१८
पुरोहितं वसिष्ठं च	१	१२	६
पुरोहितं वसिष्ठं च	७	६४	१७
पुरोहितश्च तत्पूर्वम्	२	८९	१४
पुरोहितस्त्वां कुशलम्	२	६८	७
पुरोहितस्त्वां कुशलम्	२	७०	३
पुरोहितस्याग्निसमस्य तस्य वै	२	१०४	२८
पुरोहितस्यात्मसखस्य राघवः	७	१२७	६३
पुरोहितोऽयं गृह्यार्घ्यम्	७	३३	७
पुलस्त्य इति विज्ञाय	७	३३	६
पुलस्त्यवंशादुद्भूता	७	४	४
पुलस्त्यश्च ऋतुश्चैव	७	९०	९
पुलस्त्यस्य तु तेजस्वी	५	२३	७
पुलस्त्याज्ञां प्रगृह्याथ	७	३३	१७
पुलस्त्येनापि सत्यक्तः	७	३३	१९
पुलस्त्योऽपि तथा शक्तिः	७	९६	३
पुलिनैरतिरम्यैश्च	४	२७	२१
पुष्करांक्ष महाबाहो	६	११९	२
पुष्पकं नाम भद्रं ते	७	१२१	९
पुष्पकस्य गतिश्छिन्ना	७	१६	२३
पुष्पकादवरुह्याथ	७	३४	१३
पुष्पकादवरुह्याशु	७	३१	२४
पुष्पध्वजवतीः पूर्णाः	२	९१	६८
पुष्पनद्धां वसन्तान्ते	२	११४	१२
पुष्पभारसमृद्धानि	४	१	९
पुष्पभारातिभारैश्च	५	१५	८
पुष्परत्नशतैश्चित्रम्	५	१५	१३
पुष्परेण्वनुलिप्ताङ्गी	७	३१	२३
पुष्पवद्भिः कलोपेतैः	२	९४	१०
पुष्पवर्षाणि मुञ्चन्तः	७	२६	१०
पुष्पवृष्टिं च तरवः	५	२३	१७
पुष्पवृष्टिर्महत्यासीत्	१	२२	५

	काण्ड	सर्ग	श्लोक
पुष्पवृष्टिर्महत्यासीत्	१	४९	१९
पुष्पवृष्टिर्महत्यासीत्	१	७३	३७
पुष्पवृष्टिर्महत्यासीत्	७	७६	६
पुष्पसंछन्निशखराः	४	१	२०
पुष्पसंसर्गसुरभिः	६	३९	१३
पुष्पाढ्यैः समभिच्छन्नाम्	४	२५	२६
पुष्पाणि च तमालस्य	३	३५	२२
पुष्पार्ककेतकामाश्च	२	९४	६
पुष्पावकीर्णः शुशुभे	५	१४	११
पुष्पाह्वयं नाम विराजमानम्	५	७	११
पुष्पितान्पुष्पिताग्राभिः	३	११	७५
पुष्पितांश्चासनान्दृष्ट्वा	४	३०	८
पुष्पितैः शोभिता लङ्का	६	२४	११
पुष्पैरन्यैश्च राघवम्	३	१	२२
पुष्पोपहारं शनकैः	७	३१	३४
पुष्पौघेण सुगन्धेन	५	१	५२
पुष्ये जातस्तु भरतः	१	१८	१५
पूजनीयश्च मान्यश्च	३	१	१९
पूजयन्ति महात्मानम्	१	४३	३७
पूजयस्वैनमेकाग्रः	६	१०५	२६
पूजयामास तं देवम	१	२	२५
पूजयामास पूजार्हौ	१	४	६७
पूजयामासुरत्यर्थम्	१	६६	२०
पूजां च परमां कृत्वा	१	४७	२१
पूजितं चोपनृत्तं च	३	१	४
पूजितान्दधिपात्रैश्च	६	१०	९
पूजिता मामिका माता	६	१२८	२
पूजिते त्वयि धर्मज्ञे	५	१	११४
पूजितोऽस्मि त्वया वीर	६	१२३	१७
पूजितोऽहं त्वया ब्रह्मन्	१	५३	८
पूज्यते नित्यशः सोम्य	७	८७	६
पूज्यमाना तु ताभिः	१	११	३१
पूज्यमानो हरिगणैः	६	११२	८
पूज्या राज्ञो भवन्तश्च	२	१५	१७
पूज्यास्ते मन्कृते देवि	२	२४	२९
पूरयन्स महीं सर्वाम्	६	७१	४८
पूरितः शरजालेन	६	१०३	४
पूरिता तेन शब्देन	६	९९	७
पूरुश्चकार तद्राज्यम्	६	५९	१९
पूरुस्तु दयितो राज्ञः	७	५८	११
पूरोर्वचनमाज्ञाय	७	५९	८

	काण्ड	सर्ग	श्लोक
पूर्णचन्द्रप्रतीकाशम्	३	५१	१७
पूर्णचन्द्रमुखं रामम्	७	११३	४६
पूर्णचन्द्राननं श्यामः	३	४७	३६
पूर्णचन्द्राननं श्यामः	२	४८	२६
पूर्णवल्गुस्वराश्चेमे	६	४	४७
पूर्णावितविसृष्टेन	६	७१	७२
पूर्ण चतुर्दशे वर्षे	६	१२	४१
पूर्णे वर्षसहस्रान्ते	७	३	१२
पूर्णे वर्षसहस्रे तु	१	४६	६
पूर्णे वर्षसहस्रे तु	१	६३	१
पूर्णे वर्षसहस्रे तु	१	६५	३
पूर्णे वर्षसहस्रे सा	१	४६	१२
पूर्वंकात्प्रत्ययाच्चाहम्	६	११४	४
पूर्वंकाले महाबाहो	३	१४	६
पूर्वंकेण हि ते राजन्	१	४४	८
पूर्वं कृतयुगे तात	५	१	११५
पूर्वं कृतयुगे राजन्	७	६१	३
पूर्वं कृतयुगे राम	१	४५	१५
पूर्वं कृतार्थो मित्राणाम्	४	३४	१०
पूर्वं क्रोधहृतं शत्रुः	६	१७	४५
पूर्वं क्षत्रवधं कृत्वा	१	७४	२२
पूर्वजा भगिनी चापि	१	३४	७
पूर्वजोऽप्युक्तवाक्यस्तु	३	६७	१
पूर्वं तु कथितो योऽसौ	६	१०१	३०
पूर्वं ते भरते स्नाते	६	१२८	१४
पूर्व दत्तवरा देवी	१	१	२२
पूर्वद्वारं तु कुमुदः	६	४२	२३
पूर्वद्वारं तु लंकायाः	६	३७	२६
पूर्वं प्रतिज्ञा विदिता	१	६८	७
पूर्वं प्रहस्तः सबलः	६	३७	१०
पूर्वं मया नूनमभीप्सितानि	३	६३	४
पूर्वमर्थं प्रतिश्रुत्य	१	२१	२
पूर्वमस्माकमप्यासीत्	४	६५	११
पूर्वमापतितः क्रोधात्	४	१५	१०
पूर्वमासीन्महावक्षः	१	२५	५
पूर्वमुक्तोऽहमनया	७	४५	२३
पूर्वमेतत्कृतं द्वारम्	४	४०	६४
पूर्वमेव तु निर्व्याजः	२	७८	४
पूर्वमेव मया वीर	४	१५	१५
पूर्वमेव मया सृष्टः	१	१७	७

	काण्ड	सर्ग	श्लोक
पूर्वराजर्षिवृत्स्थाहि	२	२३	२६
पूर्वं समभवत्तत्र	७	५७	५
पूर्वं संविष्टिताः शूराः	५	५७	१६
पूर्वं सौहृदबद्धोऽस्मि	७	२८	४
पूर्वस्यां दिशि निर्माणम्	४	०	५४
पूर्वां दिशं ततो गत्वा	४	४६	१४
पूर्वां दिशं वज्रधरः	२	१६	२४
पूर्वापकारिणं हत्वा	२	६६	२४
पूर्वाभिभाषी मधुरः	२	४८	३०
पूर्वाह्णे धर्मकार्याणि	७	४२	२७
पूर्वोऽयं वार्षिको मासः	४	२६	१४
पृच्छतः शंस मे सर्वम्	७	१७	७
पृच्छन्तमसकृतं वै	७	५५	१८
पृच्छन्तं राघवं वाक्यम्	७	६४	२४
पृच्छ्यमानो विशंकेत	६	१०	६०
पृथक्स्त्रीणां प्रचारेण	६	११६	७
पृथिवीं चाखिलां प्राप्य	१	७५	२५
पृथिवी चान्तरिक्षं च	६	१०२	५३
पृथिवीधरसंकाशः	६	७४	४१
पृथिवीमपि काकुत्स्थ	४	२७	३८
पृथिवीमिव विस्तीर्णम्	५	६	२६
पृथिवी वायुराकाशम्	६	२२	२३
पृथिव्यम्बुचरा राम	४	४०	५
पृथिव्यां केतुभूतोऽसौ	६	६१	६
पृथिव्याश्चापि निर्भेदः	१	४०	४
पृथिव्यामसि कुञ्जानाम्	२	६	३६
पृथिव्या ये च पुरुषाः	७	८३	१४
पृथिव्यां राजसिंहानाम्	५	३३	१५
पृथिव्या सह वैदेह्या	२	४४	१७
पृथिव्यां सागरान्तायाः	२	१२	३५
पृषदाज्येन संपूर्णम्	६	१११	११५
पृष्टश्च कुशलं तेन	७	१०३	६
पृष्टश्च लंकागमनम्	५	५८	३३
पृष्ट्वा कुशलमव्यग्रम्	१	६८	६
पृष्ट्वा च कुशलं राज्ञः	७	१३	१४
पृष्ट्वा सर्वत्र कुशलम्	१	६१	१३
पृष्ठतो न व्रजध्वं माम्	६	८२	४
पृष्ठतोऽनुगमिष्यामि	२	५२	६६
पृष्ठतोऽनुययुस्तानि	६	१११	११२
पृष्ठतो लक्ष्मणश्चैनम्	६	३८	७
पृष्ठतो हनुमान्वीरः	४	१३	४
पृष्ठमारोप्य तं देशम्	५	३५	३१

	का०	स०	श्लो०
पृष्ठमारोह मे देवि	५	३७	२६
पेयमानीयतां क्षिप्रम्	५	२४	४३
पैशाचमस्त्रं दयितम्	१	२७	१७
पौण्डरीकाश्वमेधाभ्याम्	६	१२८	९४
पौरकार्याणि यो राजा	६	१५३	६
पौरजानपदाकीर्णम्	२	१४	३०
पौरजानपदान्स्थाप्य	७	३६	५५
पौराणां दृढभक्ति च	७	१०७	१६
पौराणामहिते युक्तः	१	३८	२२
पौराणिकाञ्शद्ववविदः	७	९४	५
पौरान्स्वजनवन्नित्यम्	२	२	३८
पौरापवादभीतेन	७	४७	१४
पौरापवादः सुमहान्	७	४५	३
पौरापवादः सुमहान्	७	४५	१२
पौराः प्रमुदिताश्चासन्	७	९३	१६
पौरा ह्यात्मकृताद्दुःखात्	२	४९	२३
पौरुषे प्रेषयामास	१	११	२४
पौरुषे यदि ते प्रीतिः	७	१०७	१३
पौर्णमासीमिव निशाम्	५	१९	१३
पौलस्त्यवंशप्रभवः	१	२०	१६
पौलस्त्यस्य वरिष्ठस्य	५	२३	४
प्रकम्पते च रोषेण	६	२६	३३
प्रकाशचन्द्रोदयनष्टदोषः	५	५	८
प्रकाशं चाभिरामं च	४	५०	२१
प्रकाशं यदि वा रहः	१	२	३४
प्रकाशरूपस्तु यदा न शक्तः	६	४४	३८
प्रकाशीकरणार्थं च	२	६	१८
प्रकाशेते यथेन्द्रस्य	४	३	१७
प्रकीर्णं किङ्किणीजालैः	६	१२१	२६
प्रकीर्णहंसाकुलमेखलानाम्	४	३०	४९
प्रकृतिस्थस्तु काकुत्स्थः	४	७	१६
प्रकृतीनां विषादं च	१	३	१४
प्रकृतीस्तु समानीय	७	१०८	८
प्रकृत्या कोपनं ह्येनम्	६	९२	१७
प्रकृत्या धर्मशीलस्य	६	१९	३४
प्रकृत्या निपुणश्चैव	४	१५	१४
प्रकृत्या राक्षसाः सर्वे	६	५०	५३
प्रकृत्या राक्षसो ह्येष	६	१७	२५
प्रकृत्या शीतलस्पर्शः	३	१६	१५
प्रकृत्या संपदान्तिताः	१	७	१८
प्रकृत्या हिमकोशाढ्यः	३	१६	९
प्रकृत्या ह्येष तेजस्वी	६	६१	१२

	का०	स०	श्लो०
प्रक्षाल्य वदनं हृष्टः	६	६०	९१
प्रक्षिप्तः कुम्भकर्णेन	६	६७	३५
प्रक्षिप्य प्रहसन्नित्यम्	१	३८	२१
प्रक्षिप्यमाणैरचलैः	६	२२	५७
प्रक्षीणं स्ववलं दृष्ट्वा	६	९७	३
प्रख्याय नर्मदां सोऽथ	७	३१	२६
प्रगीतमिव विस्पष्टम्	५	५६	२९
प्रगृहीतायुधः क्रुद्धः	६	८२	१७
प्रगृहीतायुधस्येह	६	६७	१०७
प्रगृहीताः प्रकाशन्ते	६	२७	३
प्रगृह्य खड्गं चिच्छेद	६	१२६	२१
प्रगृह्य गिरिशृङ्गाणि	६	२४	२०
प्रगृह्य गिरिशृङ्गाभाम्	६	९८	९
प्रगृह्य तु महीपालः	२	१०३	२६
प्रगृह्य नियमान्घोरान्	७	५	१०
प्रगृह्य परमक्रुद्धाः	६	९	५
प्रगृह्य रामो बाहू वै	२	१०३	३
प्रगृह्य विपुलां घोराम्	६	९७	१२
प्रगृह्य शिरसा पात्रीम्	२	६	२
प्रगृह्य सहसा सीताम्	६	१२६	२७
प्रचकाशे तदाकाशम्	६	२२	९
प्रचक्रू राक्षसेन्द्रस्य	६	१११	११४
प्रचचाल च वेगेन	६	२४	२
प्रचचाल मही चापि	३	२३	१६
प्रचरं स तु संगृह्य	७	३५	४९
प्रचरेत नरः कामात्	४	१८	२३
प्रचुक्रुशुः स्त्रियः सर्वाः	६	११६	३२
प्रचेतसोऽहं दशमः	७	९६	१८
प्रचोद्यमानेन मया	३	५९	९
प्रच्छन्नौ च विमुञ्चेमौ	६	२५	२१
प्रच्छादनार्थं भावस्य	३	४२	३०
प्रच्छादयत्वेष हि राक्षसेन्द्रः	६	७३	६७
प्रच्छादयन्तौ गगनम्	६	८०	२४
प्रजङ्घतरसाभ्यां च	६	४१	४१
प्रजङ्घसहितो वीरः	६	७६	१२
प्रजङ्घस्तु महावीरः	६	७६	१४
प्रजङ्घेन संपातिः	६	४३	७
प्रजघ्ने स नृपोऽरण्ये	७	८७	९
प्रजज्वाल तदा लङ्का	५	४	७
प्रजापतिः पुरा सृष्ट्वा	७	४	९
प्रजापतिसमः श्रीमान्	१	१	१३
प्रजापतिसुतत्वेन	७	२	६

	का०	स०	श्लो०
प्रजापतिसुतं वाक्यम्	७	८७	१६
प्रजापतिसुतस्त्वासीत्	१	५१	१८
प्रजापतिसुतस्य वै	७	८६	२
प्रजापति सुराः सर्वे	७	१०	३६
प्रजापतिस्तु तान्सर्वान्	७	४	११
प्रजापतीनां षण्णां तु	५	२३	६
प्रजापतेस्तु दक्षस्य	३	१४	१०
प्रजापतेस्तु पौत्रस्त्वम्	६	६७	५८
प्रजालंकार भूतं च	२	५	२०
प्रजाः शृणुध्व तत्सर्वम्	७	३५	५६
प्रजाश्च बहुसाहस्रीः	६	१२५	२७
प्रजासुखत्वे चन्द्रस्य	२	२	३०
प्रज्वाल्य तत्र चैवाग्निम्	७	१२	२०
प्रणमन्ति हि ये तेषाम्	४	१३	२६
प्रणम्य दैवतेभ्यश्च	६	११६	२४
प्रणम्य मूर्ध्ना पतिता	४	२६	२१
प्रणम्य रामं च ययाचिरे सह	२	१०६	३४
प्रणम्य रामस्तान्वृद्धान्	२	२०	१२
प्रणम्य शिरसा देवीम्	५	४०	२०
प्रणम्य शिरसा देवीम्	५	५८	१०२
प्रणम्य शिरसा शैलम्	४	४१	३१
प्रणयाद्बहुमानाच्च	६	१२१	१५
प्रणष्टजनसंबाधम्	५	५२	६८
प्रणाममकरोत्तेषाम्	१	१४	५६
प्रणिधाय हि चारेण	६	१७	४४
प्रणिधी राक्षसेन्द्रस्य	६	१७	२२
प्रणिपत्य उमा देवीम्	७	८७	२२
प्रपिपातप्रसन्ना हि	५	२७	३६
प्रणुन्नं सर्वतो दिग्भ्यः	७	२७	३४
प्रतपित्वा मुहूर्तं तु	६	६८	३
प्रतप्त इव दुःखेन	२	१०	२३
प्रतस्थे सहसा वीरः	४	४५	५
प्रताम्य वा प्रज्वल वा०	२	१२	१०६
प्रतारं च समुद्रस्य	१	३	३५
प्रतिकर्म च रामस्य	६	१२८	१६
प्रतिकर्म च सीतायाः	६	१२८	१७
प्रतिकूलं वतौ वायुः	६	१०६	२८
प्रतिकूलितुमिच्छामि	३	२४	१३
प्रतिक्रियास्य युक्ता स्यात्	५	५३	३५

	का०	स०	श्लो०
प्रतिगन्तुं मनश्चक्रे	५	५६	२५
प्रतिगृह्णीष्व काकुत्स्थ	७	७६	३१
प्रतिगृह्य च काकुत्स्थम्	३	१२	२६
प्रतिगृह्य च काकुत्स्थः	१	२७	२७
प्रतिगृह्य च तत्सर्वम्	४	३८	१
प्रतिगृह्य च तत्सर्वम्	७	३६	१३
प्रतिगृह्य च तत्सीता	२	११८	२२
प्रतिगृह्य च तं विप्रम्	१	११	७
प्रतिगृह्य ततः पूजाम्	७	७६	२२
प्रतिगृह्य ततो रामः	७	१५	३२
प्रतिगृह्य ततो वीरः	५	३८	६७
प्रतिगृह्य ततोऽस्त्राणि	१	२८	१
प्रतिगृह्य तदा पूजाम्	७	६५	७
प्रतिगृह्य तु तत्सर्वम्	२	७०	६
प्रतिगृह्य तु तद्वाक्यम्	२	४	४
प्रतिगृह्य तु तां पूजाम्	१	१०	१८
प्रतिगृह्य तु तां पूजाम्	१	५२	४
प्रतिगृह्य तु तां पूजाम्	१	७४	२४
प्रतिगृह्य तु तामर्चाम्	२	५४	२०
प्रतिगृह्य तु धर्मेण	७	३	४
प्रतिगृह्य विलोकार्थम्	१	३५	१८
प्रतिघातश्च ते मा भूत्	७	४१	१५
प्रतिच्छन्नाश्च दृश्याश्च	४	१८	३८
प्रीतजग्मुश्च ताः सर्वाः	२	६१	८२
प्रतिजग्राह ते विद्वे	१	२२	२२
प्रतिजग्राह धर्मात्मा	३	२६	४
प्रतिजग्राह विशिखैः	३	२५	१३७
प्रतिजानामि ते सत्यम्	३	२७	३
प्रतिजाने च ते वीर	२	२३	२८
प्रतिजाने च देवेन्द्र	७	२७	१६
प्रतिज्ञा च मया दत्ता	४	१८	२७
प्रतिज्ञातश्च रामेण	१	१	४५
प्रतिज्ञातं मा तावत्	२	३८	१०
प्रतिज्ञातं रणार्थिना	७	३८	१०
प्रतिज्ञातस्त्वया वीर	३	६	१०
प्रतिज्ञां प्रतिजानीष्व	२	११	३
प्रतिज्ञां मम राजेन्द्र	१	६८	१२
प्रतिज्ञाय तदा तेषाम्	७	६२	७
प्रतिपद्य त्वमद्यैव	४	२२	५
प्रतिपानहृदान्पूर्णान्	२	६१	७८

	का०	स०	श्लो०
प्रतिपूर्णमिवाकाशम्	६	४१	५०
प्रतिपूज्य यथान्यायम्	६	६५	८
प्रतिपेदे स्वकं रूपम्	३	४६	६
प्रतिपयाते काकुत्स्थे	६	१२०	१
प्रतिबुद्धो मुहूर्तेन	२	६३	१
प्रतिबुद्धच ततो राजा	२	१६	२५
प्रतियाते तु भरते	२	११६	१
प्रतियोत्स्याम्यहं गत्वा	४	१६	७
प्रतिलोमं ववौ वायुः	६	५१	३४
प्रतिलोमानुलोमाश्च	३	४३	२७
प्रतिलोमेन वातेन	५	१	१७७
प्रतिवक्तुं प्रकृष्टे हि	४	१८	४६
प्रतिवेदितमाज्ञाय	२	१६	७
प्रतिवेष्टितसुस्कन्धम्	५	६	६५
प्रतिश्रुत्य करिष्येति	१	२१	८
प्रतिषिद्धोऽपि मर्यादाम्	७	३६	३२
प्रतिषिध्य शुभं छत्रम्	२	१६	३४
प्रतिष्ठाने इलो राजा	७	६०	२३
प्रतिस्रोत तृणाग्राणाम्	२	६५	१५
प्रतीक्षमाणमव्यग्रम्	२	३४	२५
प्रतीक्षमाणस्तं मासम्	४	४५	४
प्रतीक्षमाणस्त्वामेव	३	७	६
प्रतीक्षमाण भर्तारम्	६	१२	१६
प्रतीक्षमाणोऽभिजनं तदार्तम्	२	३३	२६
प्रतीच्छ चैनां भद्रं ते	१	७३	२७
प्रतीच्छ प्राणि गृह्णीष्व	१	७३	३१
प्रतोदामीषुहस्तोऽयम्	३	६४	५०
प्रतोदो न्यपतद्धस्तात्	६	५७	३६
प्रत्यक्षमेव भववाम्	५	५८	८
प्रत्यक्षं यद्यहं तस्य	३	५६	५
प्रत्यक्षं वानरस्यास्य	६	११६	५२
प्रत्यगात्ममिमं धर्मम्	२	१०६	१६
प्रत्यगारमिवायान्ती	२	४०	४३
प्रत्यदृश्यत कोटीभ्याम्	४	३६	३४
प्रत्यभाषत काकुत्स्थ	४	५	२५
प्रत्यभाषत मां देवी	५	५८	६५
प्रत्ययश्च पुरा वृत्तः	७	६७	३

	का०	स०	श्लो०
प्रत्ययार्थं ततः सीता	७	४५	७
प्रत्ययार्थं तवानीतम्	५	३६	३
प्रत्यविध्यद्वयांस्तस्य	६	६०	३०
प्रत्यवेक्ष्य तु ताम्राक्षः	६	६२	३३
प्रत्याख्याता नृपतयः	१	६६	२०
प्रत्याख्यातो वसिष्ठेन	१	५७	२१
प्रत्याख्यातोऽसि दुर्मेधः	१	५८	२
प्रत्याख्यातो हि भद्रं वः	१	५७	१८
प्रत्याख्यानं न जानाति	५	२६	६
प्रत्याश्वस्ते जने तस्मिन्	१	६७	२०
प्रत्याश्वस्तो यदा राजा	२	५८	१
प्रत्याश्वस्व मुहूर्तं तु	२	८७	३
प्रत्यासन्न क्रमेणानि	२	८	७
प्रत्युज्जगाम संहृष्टः	१	१८	४३
प्रत्युद्गम्य च काकुत्स्थः	७	१००	५
प्रत्युद्ययौ तदा रामम्	६	१२७	२०
प्रत्युवाच ततः सर्वान्	४	५२	१६
प्रत्युवाच ततः सा तु	७	५६	१६
प्रत्युवाच ततः सीताम्	३	५६	२४
प्रत्युवाच ततो रामम्	४	१८	४५
प्रत्युवाच ततो रामः	६	५६	२६
प्रत्युवाच तदा रामम्	४	५	२१
प्रत्युवाच प्रसन्नात्मा	५	६२	३
प्रत्युवाच महाभागम्	३	३८	६
प्रत्युवाच शुभं वाक्यम्	७	७४	८
प्रत्युवाच शुभं वाक्यम्	७	८७	२४
प्रत्युवाच शुभं वाक्यम्	७	८७	२८
प्रत्युवाच हनूमन्तम्	४	२६	६
प्रत्युवाच हनूमन्तम्	४	५१	१०
प्रत्यूचुस्तां ततो देवाः	७	८६	१७
प्रथमं चोपविश्याथ	३	१२	२८
प्रथमं मरणं नार्या	६	३६	६
प्रथम वै महाराज	६	६३	४
प्रदक्षिणं च राजानम्	७	३८	१३
प्रदक्षिणं ततः कृत्वा	६	५०	६०
प्रदक्षिणं तु तां कृत्वा	७	२३	२४
प्रदक्षिणऋषिं कृत्वा	१	३८	१५

	का०	स०	श्लो०
प्रदक्षिणं रथं कृत्वा	६	७८	८
प्रदक्षिणावर्तशिखः	६	७३	२३
प्रदक्षिणावर्तशिखः	६	८०	१०
प्रदक्षिणेनातितलेन पक्षिणा	३	४३	५१
प्रदग्धकायानपरान्	६	७५	३२
प्रदातुं तव काकुत्स्थ	१	२२	२०
प्रदानेन तु सीतायाः	६	५७	१४
प्रदाने हि मुनिश्रेष्ठ	१	७१	२
प्रदीप्तमग्निं पवनः	५	५४	२२
प्रदीप्तमग्निमुत्सृज्य	५	५४	२०
प्रदीप्तामिव तत्रस्थः	५	१५	६
प्रदीप्ते नरशार्दूल	१	२७	८
प्रदेयांश्च ददौ राजा	१	१८	२०
प्रदेहि सुभगे हारम्	६	१२८	८१
प्रदोषकाले हनुमान्	५	२	४८
प्रदोषे वार्धरात्रे वा	६	७२	१४
प्रधर्षितायां वैदेह्याम्	३	५२	६
प्रधानं साधकं वैद्यम्	६	१६	४
प्रधावन्नुरुवेगेन	६	५६	२२
प्रध्यायत इवापश्यत्	५	६	३१
प्रनष्टमशुभं यन्नः	३	७५	५
प्रनष्टा श्रीश्च कीर्तिश्च	४	३६	५
प्रनष्टा श्रीश्च कीर्तिश्च	४	३८	२५
प्रनेष्ट तु शरीरेऽसौ	७	७८	२८
प्रनष्टो जीवितान्ताय	४	४८	१३
प्रपत्स्येत राज्यमिदं हि०	२	६	६१
प्रपद्यतां हि कैकेयी	२	३३	२५
प्रपातपतितैः शीतैः	७	३१	१६
प्रपेदे हरिशार्दूलः	५	५६	४२
प्रफुल्लबाणासनचित्रितेषु	४	३०	५६
प्रबुद्धानीत पद्मानि	५	६	३७
प्रभग्नधन्वा विरथः	३	२८	३२
प्रभग्न समरे दृष्ट्वा	६	६७	११
प्रभग्नान्वानरान्दृष्ट्वा	६	६७	४२
प्रभग्ने राक्षसबले	७	७	२५
प्रभया पर्वतेन्द्रोऽसौ	४	३	११
प्रभवं निधनं चापि	६	११७	२०
प्रभवन्तं पदस्थं हि	६	३६	७
प्रभवानि नदीनां च	४	४८	१५
प्रभाकराद्यैः सुस्निग्धैः	२	११४	१०
प्रभातायां तु शर्वर्याम्	१	२३	१
प्रभातायां तु शर्वर्याम्	१	३१	२
प्रभातायां तु शर्वर्याम्	२	४७	१
प्रभातायां तु शर्वर्याम्	२	५२	१
प्रभातायां तु शर्वर्याम्	२	५	३६
प्रभातायां तु शर्वर्याम्	७	१०६	१
प्रभाते काल्यमुत्थाय	७	७७	८
प्रभाते काल्यमुत्थाय	७	८२	५
प्रभाते पुनरुत्थाय	१	७३	८
प्रभाते पुनरुत्थाय	७	४६	२०
प्रभाते विमले सूर्ये	२	८४	२४
प्रभाते सुमहावीर्यः	७	६६	१४
प्रभामिव तमोध्वस्ताम्	५	१६	१४
प्रभावद्भिर्महावीर्यैः	१	५४	२२
प्रभावं सर्वभूतानि	६	४४	३०
प्रभिन्नगजसंकाशाः	३	२३	७
प्रभुः प्रदाणे दाने च	७	२४	३४
प्रभृष्टोऽथ करात्तस्य	६	७८	१७
प्रमत्तः कामभोगेषु	३	३३	२
प्रमत्तसंनादितबर्हिणानि	४	३४	४१
प्रमत्तानप्रमत्तान्वा	४	१८	३६
प्रमतेष्वभियुक्तेषु	६	६	६
प्रमथ्य राक्षसेन्द्रेण	५	१२	२२
प्रवतौ सुरभिर्गन्धः	५	११	३४
प्रवाति पवनस्तस्मिन्	६	७८	१६
प्रवालकृतसोपानम्	५	१५	१७
प्रवालजाम्बूनदपुष्पपक्षाः	५	७	१३
प्रविविक्तमहं मन्ये	२	५४	३२
प्रविवेश तदा लङ्काम्	६	१२६	३०
प्रविवेश पुरीं रम्याम्	४	२६	१६
प्रविवेश पुरीं लङ्काम्	३	५४	१२
प्रविवेश पुरीं लङ्काम्	७	२४	२४
प्रविवेश महातेजाः	६	११	१६

	का०	स०	श्लो०
प्रविवेश महाबाहुः	२	९१	३६
प्रविवेश स्वनिलयम्	१	७४	७
प्रविवेशाय रामस्तु	२	२६	५
प्रविवेशाश्रमं वीरः	३	३०	३९
प्रमदाजनसंबाधम्	६	१०	५
प्रममायोरसा कांश्चिद्	५	४५	१३
प्रमाणैर्बहुभिर्बद्धाम्	७	९४	३
प्रमादाच्चरितं किंचित्	२	११६	६
प्रमुमोद च लोकस्तम्	१	४४	१९
प्रमोहानन्तसत्त्वेन	२	८५	२०
प्रयच्छ शीघ्रं काकुत्स्थ	७	९४	१८
प्रयत्नं महदास्थाय	५	४६	१५
प्रयत्नान्निर्मितां धात्रा	१	४९	१४
प्रययौ तूर्णमास्थाय	२	१६	३१
प्रययौ शीघ्रतुरगम्	७	४६	१३
प्रयागमभितः पश्य	२	५३	५
प्रयातजलनिर्घोषैः	५	५६	३०
प्रयाता देवलोकाय	७	६	५०
प्रयाता रजनी देवि	२	१४	१५
प्रयाता राक्षसास्तूर्णम्	७	५	५२
प्रयाताश्च गता हर्षम्	६	६७	३
प्रयाताश्चार्यसंघाता	२	८३	७
प्रयाते तु महारण्यम्	२	४०	१८
प्रयाते तु सहस्राक्षे	३	५	२५
प्रयान्तं नैर्ऋतपतिम्	५	१८	१८
प्रयान्तं लक्ष्मणं दृष्ट्वा	७	४४	६
प्रयाहि जानामि रणादित०	६	५९	१४१
प्रयुतं रक्षसामत्र	६	३	२६
प्रयुध्यातोरथ तयोः	७	२८	४८
प्रलोभनार्थं वैदेह्याः	३	४२	२१
प्रलोभयित्वा वैदेहीम्	३	४२	८
प्रलोभ्यमाना विविधम्	६	११८	९
प्रवर्ग्यं शास्त्रतः कृत्वा	१	१४	४
प्रववुश्चोत्तमा वाता	२	९१	२६
प्रविश्य शापोपहतां हरीश्वरः	५	३	५१
प्रविश्य सह वैदेह्या	३	११	२२
प्रविश्य सीता बहुवृक्षखण्डाम्	६	४८	३७
प्रविश्याश्वास्य चापि त्वम्	६	६४	३१
प्रविष्टं तु तदा रामम्	६	९३	१८
प्रविष्टमात्रे ज्ञातोऽहम्	६	३०	७
प्रविष्टं राजभवनम्	७	६०	८
प्रविष्टः सत्त्वमाश्रित्य	६	१	५
प्रविष्टः सत्त्वसंपन्नः	५	४	४
प्रविष्टस्तु वनं घोरम्	३	७	४
प्रविष्टायां तु तारायाम्	४	१६	१३
प्रविष्टायां तु सीतायाम्	७	९९	३
प्रविष्टायां हुताशं तु	७	१८	१
प्रविष्टा राजभवनम्	७	६३	१३
प्रविष्टावाश्रमपदम्	३	१२	८
प्रविशन्तमयोध्यायाम्	२	५९	१०
प्रविशन्तीव गात्राणि	६	११६	३
प्रविशन्तौ कदायोध्याम्	२	४३	१४
प्रविशन्नभ्रजालानि	५	१	८०
प्रविशन्नभ्रजालानि	५	५७	८
प्रविशन्नेव च श्रीमान्	२	४	१०
प्रविशन्नेव सततम्	४	३३	२१
प्रविशुद्धसमाचाराम्	७	७५	१२
प्रविश्य च पुरीं लङ्काम्	६	११३	२
प्रविश्य चात्मनो वेश्म	२	४	२९
प्रविश्य तु तदा रामः	२	२०	१६
प्रविश्य तु महारण्यम्	१	१	४१
प्रविश्य तु महारण्यम्	३	१	१
प्रविश्य नगरीं लङ्काम्	६	२५	२२
प्रविश्य वेश्मातिभृशं मुदा०	२	१९	४०
प्रविष्टा हरीशार्दूलाः	४	५०	१९
प्रविष्टो नगरीं लङ्काम्	५	३४	३९
प्रविष्टो विधिवद्वीरः	४	२६	११
प्रविष्टोऽस्मि हि ते वक्त्रम्	५	१	१५८
प्रविष्टो हनुमान्वीर्यात्	६	१११	१८
प्रविष्टोऽहमविज्ञातः	५	५८	४८
प्रविष्टौ दण्डकारण्यम्	३	२	११
प्रवृत्तिर्लभ्यतां तावत्	४	१	११८
प्रवृत्ते संकुले तस्मिन्	६	७६	१
प्रवृद्धः काञ्चनो वृक्षः	६	६१	२५

	का०	स०	श्लो०
प्रवृद्धनिद्रेश्च शीयेत	३	३०	८
प्रवृद्धमन्युस्तु खरः खरस्वरः	३	२२	२४
प्रवेक्ष्ये दण्डकारण्यम्	२	१०७	१६
प्रवेशं चैव रामस्य	६	१२३	३५
प्रवेशयत सभारान्	७	१०७	३
प्रवेशयामास तदा	७	६०	७
प्रवेश्य चैनं त्वरितः	२	४	६
प्रवेश्यन्तां महाभागाः	७	६०	६
प्रवेश्यमानं सत्कृत्य	१	११	२८
प्रवेश्य मैथिली वाक्यैः	६	१२६	३१
प्रव्रज्यामुपपन्नानाम्	६	३२	२५
प्रशरांसुः प्रशस्तन्यौ	१	४	१७
प्रशस्तमन्नं गुणवत्	२	३	१४
प्रशान्तगीतोत्सवनृत्यवादना	२	४८	३७
प्रशान्तं च जगत्सर्वम्	७	८६	१६
प्रशान्तपीडाबहुलः	६	६०	८३
प्रशान्तहरिणाकीर्णम्	३	१२	१७
प्रशुची परमं जाप्यम्	१	२६	३२
प्रष्टव्या चापि सीतायाः	४	४३	३३
प्रष्टव्यो मेरुसावर्णिः	४	४२	४६
प्रसक्ताश्रुमुखी त्वेवम्	५	२६	१
प्रसन्नमुखवर्णश्च	४	४	३२
प्रसन्नसलिलाः सौम्य	४	३०	५६
प्रसन्नस्तु महादेवः	६	६४	३५
प्रसन्नस्ते पिता राम	२	५	६
प्रसन्नाः सुरसाश्चापः	६	४	५३
प्रसन्नौ वल्कलं कश्चित्	१	४	२१
प्रसयिष्यसि सुश्रोणि	७	६	२४
प्रसव्यं चापि तं चक्रुः	२	७६	२०
प्रसह्यमानः शिरसा मया	२	८८	३०
प्रसादं कुरु मे क्षिप्रम्	३	५५	३६
प्रसादं कुरु सुश्रोणि	६	८०	१४
प्रसादं क्रियतां भद्रे	२	१३	२१
प्रसादयन्ति देवेशम्	७	६०	१६
प्रसादयन्नरवृषभः स मातरम्	२	२१	६४
प्रसादयस्व त्वं चैनम्	५	२१	२१
प्रसादयामास पुनः	२	१३	२०

	का०	स०	श्लो०
प्रसादयित्वा सुग्रीवम्	४	३१	४४
प्रसादये त्वां कौसल्ये	२	६१	७
प्रसादये त्वां धर्मज्ञ	४	३५	१२
प्रसादये त्वां बन्धुत्वात्	६	६	२०
प्रसादितश्च वै पूर्वम्	२	२६	१४
प्रसादिते च पवने	४	६६	२७
प्रसाद्य भ्रातरं ज्येष्ठम्	६	१०	१३
प्रसाद्यमानश्च मया	३	४	१७
प्रसाद्य वाक्यैर्विविधैः	४	२६	७
प्रसीद च न मे पापम्	७	४७	६
प्रसीद पथ्यं शृणु जल्पितं हि	४	१५	३०
प्रसीद लङ्केश्वर राक्षसेन्द्र	३	३१	४६
प्रसीद लङ्केश्वर राक्षसेन्द्र	५	५२	१३
प्रसीद शिरसा याचे	२	६२	१२
प्रसीद सुमहाबाहो	५	३	४४
प्रसीदेच्छामि तेऽरण्ये	२	५२	५२
प्रसुप्त इव शोकार्ताम्	६	१११	८०
प्रसुप्तमिव चान्यत्र	४	६४	५
प्रसुप्तस्तु ततो भ्राता	२	५६	३
प्रसुप्तस्तु मम भ्राता	४	६	६
प्रसूतं कलभक्षेत्रम्	४	१४	१६
प्रसूतः सर्वगात्रेभ्यः	२	८५	१८
प्रसूताश्च परे ऋस्ताः	६	३१	३३
प्रस्तराः पुष्पशबलाः	७	४२	१५
प्रस्तरेषु च रम्येषु	४	१	१२
प्रस्तरेषु च रम्येषु	६	४	७४
प्रस्थाप्य चीरवसनम्	२	७५	१२
प्रस्थाप्य तु स शत्रुघ्नम्	७	७३	१
प्रस्थितं दण्डकारण्यम्	३	५८	२
प्रस्थितं स दशग्रीवः	५	२२	४४
प्रस्थितो दक्षिणामाशाम्	५	२७	२६
प्रस्थितौ तं व्रजस्वेति	३	७३	४४
प्रस्रवाणि मनोज्ञानि	३	३५	२५
प्रस्रविष्यन्ति तोयानि	२	४८	१४
प्रस्वपनं प्रशमनम्	१	२७	१५
प्रहरन्तं शरीरेषु	६	६३	२२
प्रहर्षमतुलं लेभे	३	२३	२६

	का०	स०	श्लो०
प्रहर्षमतुलं लेभे	४	६३	१०
प्रहर्षमतुलं लेभे	७	४६	१०
प्रहर्षमीयुर्बहवश्च वानराः	७	६७	१७५
प्रहर्षमुपनीताश्च	६	६६	३२
प्रहर्षयुक्ता बहवस्तु वानराः	६	७१	१०६
प्रहर्षिताः केतकिपुष्पगन्धम्	४	२८	२८
प्रहसन्तीव राजानम्	२	६६	१६
प्रहसन्निव काकुत्स्थः	६	१०७	२२
प्रहसन्प्राह दैत्येन्द्रः	७	१२	१८
प्रहसन्राघवो वाक्यम्	७	३८	२१
प्रहस्तं पतितं दृष्ट्वा	७	३२	४८
प्रहस्तः प्रश्रितं वाक्यम्	७	११	१३
प्रहस्तमवधीन्नीलः	६	१२६	५०
प्रहस्त राजा च महोदरश्च	६	१४	१०
प्रहस्तवाक्यं त्वहितं निशम्य	६	१४	६
प्रहस्तस्तु समाश्वस्तः	७	३२	६७
प्रहस्तस्य वचः श्रुत्वा	६	१२	६
प्रहस्तस्य शिलां नीलः	६	५८	५३
प्रहस्तादपि संश्रुत्य	७	११	३०
प्रहस्तेऽकम्पनश्चैव	७	५	३६
प्रहस्तोऽथ दशग्रीवम्	७	११	४५
प्रहस्तोऽथ विरूपाक्षः	६	७	३
प्रहस्तो निहतो वीरः	६	८६	१०
प्रहस्य च महानादम्	५	५८	३६
प्रहारे च पराक्रान्तः	४	२३	१२
प्रहिताः कपिराजेन	४	५६	२६
प्रहितो रावणेनैष	५	५८	१३०
प्रहृष्टकोयष्टिभकोकिलस्वनैः	२	५४	४३
प्रहृष्टनरनारीकः	२	१००	४४
प्रहृष्टमनसश्चापि	६	४७	१७
प्रहृष्टमनुजां काले	५	१४	८
प्रहृष्टीमह ते वक्त्रम्	४	२५	४२
प्रहृष्टमुदिता. सर्वे	६	४	६६
प्रहृष्टमुदितो लोकः	१	१	६०
प्रहृष्टयोधा ध्वजिनी महा०	६	२५	३३
प्रहृष्टरूपाविव रामलक्ष्मणौ	३	४	३३
प्रहृष्टवदनः सर्वा	२	११५	८

	का०	स०	श्लो०
प्रहृष्टवदनो राजा	१	१८	४४
प्रहृष्टस्त्वभवत्तेन	३	४२	५
प्रहृष्टस्त्वभवद्रामः	२	११६	१५
प्रहृष्टा विस्मिताश्चापि	४	६७	३
प्रहृष्टा हरयस्तत्र	४	६७	३०
प्रहृष्टो वा हते रामे	३	२७	५
प्रहेतिर्धार्मिकस्तत्र	७	४	१५
प्रह्लः कलशहस्तस्तु	३	१६	३
प्रह्लाः प्राञ्जलयो भूत्वा	७	४४	१५
प्राकम्पतः भुजः सव्यः	३	२३	१७
प्राकारान्तरवीथ्यश्च	५	१२	१८
प्राकारावृतमत्यन्तम्	५	४	२६
प्राकोरण परिक्षिप्ता	३	४८	११
प्राकारेणार्कवर्णेन	४	५८	२२
प्राकारैर्विविधाकारैः	७	४२	१३
प्राकृतान्राक्षसान्हत्वा	३	२६	१६
प्राकृतास्त्वकृतात्मानः	३	२६	१८
प्रकृतोऽन्यः कथ चेमाम्	५	३७	४३
प्राक्स्रोतसश्च या नद्यः	२	६१	१४
प्रागुदक्प्रवणां वेदिम्	२	६६	२४
प्रागुदक्प्रवणे देशे	४	२७	१२
प्रागेव चागता तत्र	२	४	३१
प्रागेव तु माहाभागः	५	३३	२८
प्राङ्मुखं विधिवन्मन्त्रैः	४	२६	३२
प्राचीनवाहिनीं चैव	४	२७	१६
प्राचीं होत्रे ददौ राजा	१	१४	४३
प्राच्योदीच्याः प्रतीच्याश्च	२	३	२५
प्राञ्जलि प्रणतो भूत्वा	१	६३	२०
प्राञ्जलिर्भरतो भूत्वा	६	१२७	३५
प्राञ्जलिर्वज्रसहितः	१	४६	२२
प्राञ्जलि. स तदा भूत्वा	७	६१	६
प्राज्यकामा जनपदाः	३	१६	७
प्राज्यधूमाकुलवनः	३	११	८०
प्राज्यमूलकलैश्चैव	३	१३	१६
प्राज्वलद्ब्रह्मदण्डश्च	१	५६	१६
प्राणत्यागविशङ्केन	४	२६	२३
प्रागवन्तमिमं दृष्ट्वा	७	३६	५

	का०	स०	श्लो०
प्राणश्यत तदा सर्वम्	७	१६	१५
प्राणैः प्रियतरो नित्यम्	१	१८	३३
प्राणैरपि प्रियं कार्यम्	७	८	८
प्राणैरपि प्रियं तस्मात्	७	८	८
प्रातस्त्वामभिषेक्ता हि	२	५	१०
प्रादुर्बभूवुरस्त्राणि	६	१०३	२५
प्रादुर्भूतं ततः क्षीरम्	१	३७	२८
प्राद्रवद्भयसंत्रस्तः	४	१०	१६
प्राद्रवन्सहिता राम	१	५८	१२
प्रापणे चास्य मन्त्रस्य	६	१०	२५
प्रापद्यन्त तदा क्षिपम्	६	२०	१६
प्रापिविषुजालेन	६	४५	१२
प्राप्तं दुःख महद्घोरम्	६	१००	५०
प्राप्तं धर्मफलं तावत्	५	५१	२६
प्राप्तकालं कृतं तेन	६	६४	४०
प्राप्तकालं यथैषोऽस्मान्	२	६७	१३
प्राप्तचारित्रसंदेहा	६	११५	१७
प्राप्तभूयिष्ठपारस्तु	१	१८	४२
प्राप्तमुद्योगकालं तु	४	३२	१५
प्राप्तराज्यस्य रामस्य	७	१	१
प्राप्तव्यं तु दशायोगात्	६	११३	३६
प्राप्तां वसुमतीं प्रीतिम्	२	८	१०
प्राप्ताः स्म ध्वजयन्त्राढ्याम्	४	१४	६
प्राप्तिज्ञं परमोदारम्	१	१३	२७
प्राप्तुं लक्ष्मण लोकेऽस्मिन्	६	२१	१७
प्राप्ते यूपोच्छ्रये तस्मिन्	१	१४	२२
प्राप्तो वाक्यविदां श्रेष्ठः	७	१००	८
प्रात्नुवन्त्ययशश्चैव	२	११७	२७
प्राप्नोति शाश्वतीं राम	३	६	१३
प्राप्य चास्त्राणि देवेशात्	१	५५	१६
प्राप्य दुःखं वने श्यामा	४	१	१११
प्राप्य पूजां दशग्रीवः	७	२५	५१
प्राप्य राज्यमयोध्यां च	६	११६	५
प्राप्य राम वरानेष	७	३६	२७
प्राप्य वर्षसहस्राणि	२	२	८
प्राप्य सीतामयुद्धेन	३	४०	२५
प्राप्स्यसे त्वं महाप्राज्ञ	३	६१	२४
प्राप्स्यामि तपसा कामम्	७	६	४७
प्राप्स्यामि यानद्य गुणान्	२	३४	४०
प्राप्स्याम्यहमियं देवि	५	३५	७८
प्राबुद्धयेतामविच्छिन्नम्	६	१०७	२६
प्राभज्यत बलं सर्वम्	६	५४	१२
प्रायश्चितं महद्धचेतत्	१	६१	८
प्रायात्प्रतीचीं हरितम्	७	७५	१०
प्रायदग्रे महातेजाः	१	४३	१५
प्रायेण गतसत्त्वानाम्	६	४८	३२
प्रायेण च निमित्तानाम्	२	४	१६
प्रायेण हि नरश्रेष्ठ	१	६१	१६
प्रायोपवेशमस्माकम्	५	३५	६१
प्रावर्तत महारौद्रम्	६	७५	६८
प्रावृषीन्दुरिवाभाति	५	१	१७२
प्रावेशयद्यथान्यायम्	३	१२	१६
प्रावोषयत हृष्टश्च	६	४७	१५
प्रांशुभिगिरिशृङ्गैश्च	६	६६	१०
प्रासकार्मुकबिभ्रद्भिः	२	१६	२
प्रासमुद्भरहस्तश्च	७	२२	४
प्रासादमालावितताम्	५	२	४६
प्रासादमालासंयुक्ताः	२	८०	१६
प्रासादवरवर्येषु	२	८८	७
प्रासाद संघातयुतम्	५	६	४४
प्रासादस्थ दशरथः	२	३	२७
प्रासादस्य महांस्तस्य	५	४३	१७
प्रासादाग्रीवमानेषु	२	८८	५
प्रासादाग्रे विमानैर्वा	२	२७	६
प्रासादै रत्नविकृतैः	१	५	१५
प्रसादैर्विविधाकारैः	२	१००	४२
प्रसादैश्च विमानैश्च	६	३६	२१
प्रासादो धर्षितश्चैत्यः	६	६	३
प्रासैः प्रमथिताः केचित्	६	५२	१६
प्रासैः शूलैः शितैर्बाणैः	६	७३	६१
प्राह राजानमासाद्य	७	१६	८
प्राहृष्यत भृशं रामः	५	६३	२६
प्रियकाजिनसंवृत्तम्	६	११	१५

	का०	स०	श्लो०
प्रियकामश्च ते मातुः	४	५४	२२
प्रियं कृतं हि रामस्य	४	५६	१२
प्रियङ्गुभिः कदम्बैश्च	७	४२	५
प्रियङ्गून्गन्धपूर्णांश्च	५	२	१०
प्रियं चेद्भरतस्यैतत्	२	१२	६२
प्रियं जनमपश्यंतीम्	५	१५	२४
प्रियं त्वत्कृतमिच्छामि	१	४७	३
प्रियं त्वामप्रियं वक्तुम्	२	१८	२१
प्रियमाख्यामि ते देवि	६	११३	६
प्रियमेतादिहाख्याहि	६	११२	२५
प्रियमेतदुपश्रुत्य	६	११३	१७
प्रियया च तथोक्तः सः	२	३५	२४
प्रियाख्यानोन्मुखाः सर्वे	५	६१	६
प्रियात्प्रियतरं लब्धम्	६	१२२	२२
प्रियान्न सभवे दुःखम्	५	२६	४६
प्रियान्वितानां नलिनीप्रिया०	४	३०	३५
प्रियाप्रिये सुखे दुःखे	६	१२	७
प्रियां बहुमतां भार्याम्	५	२३	१२
प्रियां बहुमतां भार्याम्	५	२७	३५
प्रियाभिभाषी मधुरः	३	१६	३२
प्रियार्हा प्रियमाख्यातुम्	२	१०	११
प्रियाविहीने दुःखार्ते	४	३०	६६
प्रियेण किल दत्तं हि	२	१०२	८
प्रिये त्वं सह नारीणाम्	६	१२३	३१
प्रीतश्चास्मि महाबाहो	७	५६	१२
प्रीतस्तेऽहं नरश्रेष्ठ	१	४३	३
प्रीतिमत्सूपविष्टेषु	५	५८	२
प्रीतिमन्तस्ततः सर्वे	५	६१	२
प्रीतियुक्तस्तु सर्वेषाम्	१	६६	१२
प्रीतियुक्तस्य विहिताम्	६	१२१	१४
प्रीतिश्चास्मिन्परा जाता	७	७१	१०
प्रीतिसंजननं तस्य	५	६७	३०
प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ	५	६३	३३
प्रीतेन यदि दातव्यः	७	१०	३०
प्रीतो नाम ततो भूत्वा	६	६४	२८
प्रीतोऽस्मि तत धर्मज्ञ	७	१३	२७
प्रीतोऽस्मि तत वीरस्य	७	१६	३६
प्रीतोऽस्मि ते महत्कर्म	३	१५	२८

	का०	स०	श्लो०
प्रीतोऽस्मि परमोदार	७	७६	८
प्रीत्या च परमोपेतः	५	६४	४५
प्रीयते सततं रामः	६	१२८	११७
प्रीयन्ते पितरस्तस्य	१	४४	२२
प्रीयमाणा नरव्याघ्र	७	६०	५
प्रीयमाणैः प्लवङ्गैस्तु	६	४	८२
प्रेक्षणीयाः सुगन्धाश्च	४	४८	११
प्रेक्षतो राक्षसेन्द्रस्य	६	४२	१३
प्रेक्षमाणः स सुग्रीवः	६	६६	७६
प्रेक्षमाणाश्चमूं तां च	६	२६	२५
प्रेक्षामि सरितां श्रेष्ठाम्	२	५०	२६
प्रेतकार्याणि यान्यस्य	२	७६	११
प्रेतगोपाः सुसंक्रुद्धाः	७	२१	२४
प्रेत्यभावे हि कल्याणः	२	२६	१७
प्रेम्णा च बहुमानाच्च	४	३८	१६
प्रेषणं वायुपुत्रस्य	१	३	३८
प्रेषयामास दौत्येन	७	११	२२
प्रेषयिष्यति दुर्धर्षः	५	३६	११
प्रेषितस्ते महावीरः	६	११६	११
प्रेषिताः प्रथमं ये च	४	३७	१०
प्रेषिता भरतेनैव	६	८	१५
प्रेषिताश्च त्वया शूरा	३	२१	८
प्रेष्याश्चेटाश्च वध्वश्च	२	६१	६४
प्रेष्ये मयि स्थिते राजन्	७	६२	१५
प्रैष्यं पापीयसां यातु	२	७५	२२
प्रोत्साहयति यश्च त्वाम्	३	३१	४४
प्रोत्साहितोऽय कैकेय्या	२	२१	१२
प्रोद्यमाने जगन्नाथम्	१	१८	१०
प्रोवाच कुशलो वक्ता	३	७१	२७
प्रोवाच पितरं तत्र	२	११८	४६
प्रोषिते मयि यत्पापम्	२	१०६	८
प्लक्षशाखासु यज्ञानाम्	१	१४	३६
प्लक्षश्चैव प्रभावश्च	४	३१	४३
प्लवगप्रवरैर्हृष्टः	५	१	१०
प्लवङ्गमानां तु भयार्दितानाम्	४	५३	२५
प्लवगरस्योरुवेगेन	५	५६	१५
प्लवङ्गानामनीकानि	६	६६	४
प्लवगा वृश्चिका दंशाः	२	२५	१८

	का०	स०	श्लो०
प्लवतो धारयिष्यन्ति	४	६७	३६
प्लवमानं तु तं दृष्ट्वा	५	१	१८
प्लवमानश्च मे दृष्टः	२	६६	६
प्लवमानाः खमाप्लुत्य	५	६१	७
प्लवमाना महाबला	४	२	१०
प्लवमाना हि गत्वा त्वाम्	६	३	३२
प्लवैः क्रौञ्चैश्च संपूर्णाम्	४	१	६६
प्लावयस्व त्वामात्मानम्	१	४४	१४
फणाभिश्चलजिह्वाभि	७	३१	१८
फलतीवास्य घोषेण	५	५७	१८
फलपुष्पैः किसलयैः	२	५०	२४
फलमूलवता नील	६	४	१०
फलमूलाशन नित्यम्	४	१७	२५
फलमूलाशना नित्यम्	२	२७	१६
फलमूलाशनैर्दान्तैः	१	५१	२७
फलमूलाशनैर्दान्तैः	३	१	७
फलमूलाशनो दान्तः	१	५७	३
फलमूलाशनो भूत्वा	७	६२	१४
फलमूलाशनो वीर	२	११२	२४
फलमूलाशनौ दान्तौ	३	१६	१५
फलमूलाशनौ दान्तौ	३	२०	८
फलमूलाशिनं दान्तम्	६	१३५	३१
फलमूलाशिनां देव	७	४२	३४
फलमूलेन जीवन्तः	४	३७	२३
फलमूलेन भगवन्	१	५२	१६
फलानि मूलानि च भक्षयन्तेन	२	३४	५६
फलान्यमृतकल्पानि	३	७३	६
फलान्यमृतकल्पानि	३	७३	१०
फुल्लद्रुमकृतोत्तसांम्	७	३१	२२
फुल्लनानातरुगणम्	६	१०१	३७
फुल्लपङ्कजखण्डानि	३	६	१४
ब			
बकुलानथ पुंनागान्	३	६०	२२
बद्ध कालस्य पाशेन	६	१६	२२
बद्धं गोधाङ्गुलित्रञ्च	६	१६	१२
बद्धगोधाङ्गुलित्राणे	२	२३	३५
बद्धवैराच्च पापाच्च	६	१७	४६
बद्धस्त्वं कालपाशेन	३	५१	२७
बद्धस्य बहुभिः पाशैः	५	५८	१५४

	का०	स०	श्लो०
बद्धाञ्जलिपुटं दीनम्	६	१८	२७
बद्धाञ्जलिपुटा सर्वे	१	६८	३
बद्धाञ्जलिपुटाः सर्वे	४	३८	८
बद्धासिर्धनुरादाय	३	४४	४
बद्धौ तु तौ वीरशये शयानौ	६	४५	२८
बद्धौ तु शरबन्धेन	५	४५	१६
बद्ध्वा राक्षसराजानम्	५	१	४०
बब्ध्वा ह्येते दुरात्मानः	५	६२	३३
बध्नन्तः सागरे सेतुम्	६	२२	७५
बध्यमाने दशग्रीवे	७	३२	६२
बन्दिभिर्बन्दितः काले	२	८८	६
बन्धनाच्चावसादान्मे	४	५५	११
बन्धयिष्यति वा पाशैः	२	८४	४
बवन्धुर्बन्धनीयाश्च	२	८०	१०
बभुञ्जर्वानरास्तत्र	६	४	८८
बभूव च समुद्विग्ना	७	२	१८
बभूव जलदं नीलम्	३	५२	१६
बभूव तिमिरं घोरम्	३	२३	८
बभूव द्विगुणं वीर्यम्	६	१०३	२४
बभूव परमप्रीतः	१	१८	३४
बभूव परमप्रीता	२	१०	५
बभूव पश्यन्मनसोऽप्रियाणि	२	७१	४६
बभूव बुद्धिस्तु हरीश्वरस्य	५	६	७२
बभूव भूयो भूतानाम्	१	१८	२५
बभूव राघवस्यापि	३	४३	२३
बभूव रामः संध्याभ्रैः	३	२५	१५
बभूवर्क्षरजो नाम	४	५७	५
बभूव स्वर्गसंप्राप्तः	३	४	२४
बभूव हि समाभूमिः	२	६१	२६
बभूव ह्यस्य हृदये	२	७०	२५
बभूव हृष्टा वैदेही	३	३०	४०
बभूवाथ परित्रस्तः	६	६७	६५
बभूवायोधनं घोरम्	६	४३	४५
बभूवास्य मनश्चिन्ता	१	६४	१७
बभूवुर्यूथपश्रेष्ठान्	१	१७	३१
बभूवुर्वनपार्श्वेषु	२	६१	६६
बभूवुर्वानराः सर्वे	६	१२०	१८
बभूवुस्तेन घोषेण	६	२४	४

	का०	स०	श्लो०
बभूवुः स्वस्थहृदयाः	६	१०७	१६
बर्हिणानां च निर्घोषः	२	५२	३
बलं च तदनाहूतम्	२	११५	११
बलं च सुभृतं वीर	७	६४	५
बलं च चाकाशमावृत्य	६	२०	६
बलं नागसहस्रस्य	१	२४	२६
बभौ वुद्धिश्च तेजश्च	४	६६	७
बलमप्रतिमं राम	७	३४	४६
बलं मम न खल्वेतत्	७	२२	३०
बलमात्मनि पश्यन्ती	२	११	१०
बलमारोग्यमायुश्च	२	२	५०
बलमिच्छामहे ज्ञातुम्	५	१	१४०
वलमुख्यैश्च युक्तैश्च	६	१२५	३४
बलमुद्योजयामासुः	६	५७	२०
बलमेष किमाश्रित्य	२	२१	१४
बलवन्तश्च कच्चित्ते	२	१००	३१
बलवन्तोऽस्रविदुषः	६	५३	२६
बलवान्दुर्जयश्चैव	७	३०	६
बलवान्निहतामित्रः	१	६	३
बलवान्वीर्यसंपन्नः	२	७८	३
बलवान्हि ममामर्षः	४	८	४३
बलविक्रमसंपन्ना	३	१९	५
बलव्यूहेन महता	६	९१	१७
वलस्य परिमाणं च	६	३	४
बलस्य यदि चेद्धर्मः	६	८३	२७
बलाग्रे तिष्टते वीरः	६	२६	१४
बलात्कुक्कुटवृत्तेन	६	१३	४
बलाध्यक्षाश्च संस्थाप्य	६	९५	२९
बलाध्यक्षास्तु संयुक्ता	६	९५	२३
बलानि सुसमृद्धानि	५	४८	८
बलान्निवारयन्तश्च	५	६२	२३
बलान्यपरिमेयानि	६	९	१२
बलावमर्देस्त्वयि संनिकृष्टे	५	४८	१०
बलिकर्मविहीनानि	२	७१	३८
बलिनां वानरेन्द्राणाम्	५	४३	२१
बलिवैरोचनिर्विष्णो	१	२९	७
बलिषड्भागमुद्धृत्य	२	७५	२५

	का०	स०	श्लो०
बलिहोमार्चितं पुण्यम्	३	१	६
बलीमुखं प्रजङ्घं च	७	३९	२२
बलेन गुप्तो भरतो महात्मा	२	७०	३०
बलेन महता युक्तः	६	५१	१९
बलेन येन वै सीताम्	६	४१	६६
बलैः समग्रैर्यदि माम्	५	६८	१२
बलैः समग्रैर्युधि माम्	५	३९	२९
बलैस्तु संकुलां कृत्वा	५	५९	३०
बलैस्तु संकुलां कृत्वा	५	२६	१२
बलैस्तु संकुलां कृत्वा	५	६८	१४
बलोद्धूतौ यथा नागौ	७	३२	५२
वहवः पार्थिवाः राजन्	७	६०	१७
बहवः पार्थिवा राम	७	६१	२२
वहवः पार्थिवाः सौम्य	७	७१	७
बहवः साधवो लोके	३	३९	२१
बहवः साधवो लोके	३	४१	१३
बहवः सारवन्तश्च	४	११	६
बहवो दुर्लभाश्चैव	१	१	७
बहवो राक्षसा युद्धे	६	५८	११
बहिर्निष्पतितान्सर्वान्	६	३	६३
बहिर्लक्ष्मण निष्क्रामति	३	१२	२३
बहिष्कृतोऽहमर्थेषु	७	५९	५
बहुदंष्ट्रस्य च तथा	५	६	२०
बहुधा निपतिष्यन्ति	३	६४	६८
बहुधा मारुतस्तस्य	५	२२	३३
बहुनात्र किमुक्तेन	६	७९	१५
बहुपांसुचयाश्चापि	२	८०	१८
बहुपुष्पफले रम्ये	२	९४	१६
बहुभिः कारणैर्देव	१	६५	२२
बहुभिर्हरिभिर्युक्तम्	४	३८	१२
बहुभिश्चैकमत्यस्यन्	२	२३	३६
बहुभी राक्षसैः सार्धम्	५	५८	१२५
बहुभृत्यो दरिद्रश्च	२	७५	४९
बहुमानात्परिष्वज्य	६	११०	८
बहुमान्य च तं वीरम्	४	१७	१३
बहुमूलफलं चित्रम्	२	११६	२०
बहुमूलफलो रम्यः	३	७३	४१
बहुयोजनसाहस्रम्	७	३४	३०

	का०	स०	श्लो०
बहुयोजनसाहस्रम्	७	३५	२९
बहुरत्नसमाकीर्णम्	५	६	७
बहुरत्नौ बहुधनौ	७	१०७	१९
बहुरूपा सुमधुराः	७	७१	५
बहुवर्षसहस्राणि	७	५३	१९
बहुवर्षसहस्राणि	७	९६	१९
बहुशः स तु निश्वस्य	३	६१	२९
बहुश सेविते वीरैः	५	१	१६९
बहुशश्चोदयामास	६	९२	४६
बहुशो हि मया दृष्टः	४	६३	५
बहुश्रुतानां बृद्धानाम्	२	२	३३
बहुसत्त्वझषाकीर्णम्	६	१२	२१
बहुसैन्यं महावीर्यम्	३	५४	२२
बहूनां विततां यज्ञाः	२	४५	२८
बहूनां स्त्रीसहस्राणाम्	२	१२	२७
बहूनि च करोति स्म	७	१५	३२
बहूनि नाम वर्षाणि	६	१२६	१
बहूनि रक्षसां वासे	३	६८	२०
बहूनि रत्नान्यादाय	१	१३	३५
बहूनि वानरेन्द्राणाम्	५	२६	२०
बहूनीह सहस्राणि	१	५०	३
बहून्यप्रतिरूपाणि	५	२४	२९
बहून्वर्षगणान्ब्रह्मन्	७	१८	२१
बह्वनामुत्तमस्त्रीणाम्	३	५७	२८
बह्वनामुत्तमस्त्रीणाम्	३	५५	१७
बह्वीरपि मतीर्गत्वा	६	६	१३
बह्वीश्च विविधाकाराः	६	३३	२२
बह्वेतत्कामयानस्य	६	५	१०
बाढं कल्य गमिष्यामि	३	३१	३३
बाढमित्यब्रवीद्राजा	१	६७	१५
बाढमित्यब्रवीद्रामः	७	९४	२९
बाढमित्येव काकुत्स्थः	१	२८	११
बाढमित्येव गाधेयः	१	५२	१९
बाढमित्येव विबुधा	७	५७	१५
बाढमित्येव सौमित्रिः	७	४४	५
बाणजालै. शरीरस्थैः	६	८८	७४
बाणधारासहस्रं तु	६	१०३	३
बाणपातान्तरे रामम्	६	४५	२५
बाणशल्यस्फुरज्जिह्वः	४	३१	३०
बाणाभिहतमर्मत्वान्	६	४९	१६

	का०	स०	श्लो०
बाणैश्चतुर्भिराकाशे	६	७९	३५
बाणोघैर्विततः सर्वः	६	७९	२८
बाणोघैर्रदिनाश्चापि	६	७९	६
बाल एव तु मातुल्यम्	२	८	२८
बालं मे तनय ब्रह्मन्	१	२०	२५
बालवृद्धावशेषां तु	६	५०	५८
बालश्चकृतबुद्धिश्च	४	१८	५२
बालस्त्वमसि सौमित्रे	६	७१	५१
बाला अपि क्रीडमाना	२	६	१६
बालानां वरनारीणाम्	७	३२	१६
बालायास्तत्त्विदानीं ते	२	१२	५८
बालार्काभिमुखो बालः	७	३५	२४
बालिशस्तु नरो नित्यम्	४	७	१०
बालिशस्त्वं नरश्रेष्ठ	१	५८	५
बालिशो बत कामात्मा	२	१२	८३
बालिशो बत कामात्मा	६	११८	१४
बालेन जातमात्रेण	६	६१	१३
बालेन पूर्वजस्याज्ञा	७	६२	२१
बालेन विष्णुना लोकाः	६	७१	६४
बालेन्द्रगोपान्तरचित्रितेन	४	२७	२४
बालेन्द्रऽप्येतेन यत्कर्म	७	३५	१७
बालेव रमते सीता	३	६०	१०
बालो बतायमैक्ष्वाकः	२	१२	६५
बालोऽयमिति विज्ञाय	६	७१	६३
बालो ह्यकृतविद्यश्च	१	२०	७
बाष्पगद्गदया वाचा	५	३९	७
बाष्पच्छन्नान्यरण्यानि	३	१६	१६
बाष्पपर्याकुलजनाः	२	६६	२५
बाष्पपर्याकुलमुखः	२	४१	१६
बाष्पपूर्णमुखी मन्दम्	५	३८	२०
बाष्पमापतितं धैर्यात्	४	७	८
बाष्पमुत्सृज्य कण्ठेन	२	७२	२१
बाष्पवेगं तु सहसा	४	८	३०
बाष्पवेगोपहतया	२	६०	४
बाष्पसंछन्नसलिलाः	३	१६	२४
बाष्पः संधार्यतामेष	३	२२	४
बाष्पसंरुद्धकण्ठस्तु	४	१८	४९
बाष्पाम्बुपरिपूर्णेन	५	१५	३६
बाष्पैः पिहितकण्ठश्च	२	९९	३९

	का०	स०	श्लो०
बाहु चास्यसनिस्त्रिंशम्	६	७६	२४
बाहुच्छायामवष्टब्धः	५	३४	३१
बहुभिर्बद्धकेयूरैः	५	२९	८
बाहु भुजङ्गभोगाभम्	६	२१	२
बाहुभ्यां पीडितस्तेन	४	६७	४३
बाहुभ्यां वानरान्सर्वान्	६	६७	३४
बाहुभ्यां संप्रयुध्यस्व	६	८६	३१
बाहुविक्षेपकरणाम्	७	३२	४१
बाहुविक्षेपमीनोऽसौ	२	५९	२९
बाहुवेगप्रणुन्नेन	४	६७	१२
बाहू उपनिधायान्याः	५	९	५९
बाहूत्तमैः रिणवारणाभैः	६	४०	२१
बाहूनुच्छित्य कृपणा	२	६६	१७
बाहू संस्तम्भयामास	५	१	३३
बिडालोलूकचरिताम्	२	११४	२
बिभेद च पुनः सालान्	१	१	६६
बिभेद समरे क्रुद्धः	६	४४	३५
बिलानि दंष्ट्रिणः सर्वे	२	३३	२३
बिल्वकैः सप्तपर्णैश्च	६	२२	५३
बिल्वा मादंङ्गिका आसन्	२	९१	४९
बीजमात्रं पिता जन्तोः	२	१०८	११
बुद्धपद्मोत्पलवनाः	५	१४	२४
बुद्धिप्रधानान्रुचिराभिधानान्	५	५	१५
बुद्धिः प्रणीता येनेयम्	२	२२	१४
बुद्धिमान्नीतिमान्वाग्मी	१	१	९
बुद्धिमान्मधुराभाषी	२	१	१३
बुद्धिर्वैरं विना हन्तुम्	३	९	२५
बुद्धिविक्रमसंपन्नम्	४	४२	४
बुद्धिश्च ते महाप्राज्ञ	३	६६	१८
बुद्धस्व राजशार्दूल	२	१५	२३
बुद्धचा चाहं प्रपश्यामि	४	६७	२६
बुद्धचा हृष्टाङ्ग ा युक्तम्	४	४५	२
बुधस्तु तां समीक्ष्यैव	७	८८	१२
बुधस्य पुत्रो राजर्षिः	७	५६	२५
बुधस्य माधवो मासः	७	८९	८
बुभुक्षापनयं दत्त्वा	७	३५	३४
बभक्षितः शोणितमांसगृध्नुः	६	६७	९४

	का०	स०	श्लो०
बृसीषु रुचिराख्यासु	७	६०	१२
बृहत्सालप्रतीकाशम्	७	३२	१४
बृहद्रथस्य शूरोऽभूत्	१	७१	७
बृहस्पतिसम बुद्धया	४	५४	४
बृहस्पतिस्त्वजनयत्	१	१७	११
बृहस्पतेस्तुल्यमतेर्वचस्तत्	६	१५	१
ब्रवीमि त्वां हितं वाक्यम्	६	४१	७२
ब्रवीमि सत्येन न ते स्म य०	२	३२	४२
ब्रवीहि कोऽयैव भया वियु०	२	२३	४०
ब्रह्मक्षत्रं च तत्सर्वम्	७	७४	१३
ब्रह्मक्षत्रर्हिंसन्तस्ते	१	७	१३
ब्रह्मणा च समागत्य	१	१५	१८
ब्रह्मणा निर्मितं पूर्वम्	६	१०८	५
ब्रह्मणा निर्मितं पूर्वम्	६	१२८	६४
ब्रह्मणा समनुज्ञातः	१	२	२८
ब्रह्मणा समनुज्ञाता	६	२७	७
ब्रह्मणोऽर्थे कृतं दिव्यम्	५	९	११
ब्रह्मणोऽस्त्रेण स तु मांम्	५	५८	१३१
ब्रह्मण्यश्च शरण्यश्च	७	६१	४
ब्रह्मदण्डप्रतीकानाम्	६	६०	३
ब्रह्मदण्ड सयुद्यम्य	१	५६	२
ब्रह्मदत्तवरो ह्येष	६	७१	९७
ब्रह्मदत्तास्ति ते शक्तिः	६	६९	४
ब्रह्मन्न प्रतिजानीमः	१	६५	१५
ब्रह्मपुत्रो वसिष्टो माम्	१	६५	२४
ब्रह्मयोनिर्महानासीत्	१	३२	१
ब्रह्मर्षिगणसंकीर्णम्	१	५१	२५
ब्रह्मर्षित्वमनुप्राप्तः	१	१८	५५
ब्रह्मर्षिमेवमुक्त्वा तु	७	१००	१९
ब्रह्मर्षिस्त्वं न संदेहः	१	६५	२६
ब्रह्मर्षिस्त्वेवमुक्तोऽसौ	७	११	३६
ब्रह्मलोकं चरत्वेक	१	४७	५
ब्रह्मविद्भिर्महाभागैः	३	१	९
ब्रह्मशापभयाद्भीताः	७	२	१४
ब्रह्मशापाभिभूतस्तु	६	६०	१४
ब्रह्मशापाभिभूतोऽथ	६	६१	२४
ब्रह्महत्याकृतं तापम	२	६३	५०

	का०	स०	श्लो०
ब्राह्मणं वरदं ज्ञात्वा	७	५	१३
ब्रह्मास्त्रं ग्रसमानस्य	१	५६	१७
ब्रह्मा स्वयंभूर्भगवान्	५	१३	६३
ब्रह्मा स्वयंभूश्चतुराननो वा	५	५१	४४
ब्रह्मशानाच्युतेशाय	६	१०५	१९
ब्राह्मणश्चातिथिश्चैव	३	४७	२
ब्राह्मणः सुमहातेजाः	१	६४	१३
ब्राह्मणाञ्छ्रुतसंवृद्धान्	१	९	१०
ब्राह्मणानां सहस्राणि	३	२	६०
ब्राह्मणान्क्षत्रियान्योधान्	२	८१	१२
ब्राह्मणान्भोजयामास	१	१८	२३
ब्राह्मणा भुञ्जते नित्यम्	१	१४	१२
ब्राह्मणायोद्यतां पूजाम्	२	७५	५४
ब्राह्मणार्थे नियुक्तस्य	६	१२४	१०
ब्राह्मणावसथाश्चैव	१	१३	१०
ब्राह्मणेभ्यः रत्नानि	२	११६	२४
ब्राह्मणेभ्यो धनं रत्नम्	२	७७	२
ब्राह्मणेष्वपि वृत्तेषु	२	६१	१४
ब्राह्मणैः क्षत्रियैर्वैश्यैः	२	१००	४१
ब्राह्मणोऽसीति पूज्योमे	१	७६	६
ब्राह्मणो ह्येकपार्श्वेन	२	१११	१७
ब्राह्मण्यं कृत्स्नमेतत्त्वाम्	२	४५	२१
ब्राह्मण्यं तपसोग्रेण	१	६५	२०
ब्राह्मस्त्रं ततो धीमान्	६	७४	५
ब्राह्मणास्त्रेण संयोज्य	६	२२	५
ब्रुवतश्चाङ्गदस्यैवम्	५	६४	१८
ब्रुवत्येवं दशरथे	१	७५	१०
ब्रुवद्भिरेवमृषिभिः	७	६१	१
ब्रुवन्त्यामेवमार्तायाम्	२	१०४	२७
ब्रुवाणोऽपि हितं वाक्यम्	६	११०	१९
ब्रूयाश्चापि महाराजम्	२	५५	३२
ब्रूया गच्छ दशग्रीवम्	७	२२	३२
ब्रूयाः प्रत्युपकारार्थम्	४	५२	१८
ब्रूया ब्रूहिति राम य	३	६८	१७
ब्रूहि यद्रघवो वाच्यः	५	३८	५२
ब्रूहि लक्ष्मण वैदेही	३	५८	११
ब्रूहि सुग्रीव कं देशम्	४	६	२४

	का०	स०	श्लो०
भक्तश्च यः कार्तिकेय	१	३७	३२
भक्तां पतिव्रतां दीनाम्	२	२९	२०
भक्ताश्चैवानुरक्ताश्च	३	२१	३
भक्तिमन्तीह भूतानि	२	४५	२९
भक्त्या रामस्य ये चेमाम्	६	१२८	१२०
भक्त्या विवदमानेषु	२	७५	५८
भङ्क्त्वा प्रासादशिखरम्	६	४१	९०
भङ्क्त्वा वनं महातेजा	५	५४	४७
भक्षयन्तं महाघोरान्	३	६९	३१
भक्षयन्तं सुगन्धीनि	५	६१	१४
भक्षयन्तं सुगन्धीनि	६	४	२७
भक्षयन्तीं मृगान्भीमान्	३	६९	१३
भक्षयन्भृशसंक्रुद्धः	६	६७	३६
भक्षयित्वा विशालाक्षीम्	३	६७	१२
भक्षयेयं विषं तीक्ष्णम्	२	१८	१९
भक्षार्थं गरुडः शाखाम्	३	३५	२९
भक्षार्थं जातसंरम्भा	१	२५	११
भक्षितायां हि वैदेह्याम्	३	६४	५३
भक्षितो राघवोऽस्माभिः	६	६४	२६
भक्ष्यन्ते राक्षसैर्भीमैः	३	१०	६
भगवंश्चापहस्तोऽहम्	२	६४	१४
भगवन्साधु पश्येस्त्वम्	७	४९	४
भगवंस्तद्वनं घोरम्	७	७९	२
भगवंस्तनया मे त्वम्	७	२	२५
भगवंस्त्वत्प्रसादेन	१	१५	६
भगवंस्तत्र विश्वात्मा	४	४३	५५
भगवञ्छ्रोतुमिच्छाभि	१	३५	११
भगवञ्छ्रोतुमिच्छावः	१	३०	२
भगवन्कि परित्यक्ता	१	५४	८
भगवन्कि प्रमाणेन	७	५१	८
भगवन्तः कुम्भकर्णम्	७	१	१३०
भगवन्तः सशिष्यावै	७	९५	१३
भगवन्दृष्टवीर्योमे	१	६७	२१
भगवन्द्रष्टुमिच्छाभि	६	७२	४
भगवन्नित आसन्नः	२	५४	२४
भगवन्निमिशापेन	७	५६	७
भगवन्नीदृशान्पुत्रान्	७	८	२५

	का०	स०	श्लो०
भगवन्पर्वत दुर्गम्	७	७९	११
भगवन्पूर्वमध्येषा	७	४	३
भगवन्पृथिवी सर्वा	१	३९	२५
भगवन्प्राणि नित्यम्	८	१०	१६
भगचन्ममवंशस्य	७	६१	११
भगवन्राक्षसः क्रूर	७	३१	२
भगवन्रामपत्नी सा	७	६६	३३
भगवन्वस्तुमिच्छामि	७	६५	४
भगवन्व्रणयुक्तत्वात्	४	६१	२
भगवान्स्वागतं तेऽस्तु	१	६६	३
भगीरथ महाराज	१	४२	१६
भगीरथस्तु राजर्षिः	१	४२	११
भगीरथस्तु राजर्षिः	१	५४	१७
भगीरथात्ककुत्स्थश्च	१	७०	३९
भगीरथात्ककुत्स्थश्च	२	११०	२८
भग्नदण्डमिदं सौम्य	३	६४	४६
भग्नधनुश्च तूणी च	३	६४	३८
भग्नमादाय वेगेन	३	३५	३२
भग्नविच्छिन्नविध्वास्तन्	७	३६	२९
भग्नां वो न पश्यामि	६	६६	१९
भग्नांस्तु तान्समालक्ष्य	७	१४	२०
भजन्त्येते यथाकामम्	२	६थ	१९
भजस्वसीते मामेव	३	५५	२२
भद्रं तेऽस्तु गमिष्यामः	८	८५	९
भद्रे हृदयमप्येतत्	२	११	९
भद्रैर्मन्द्रैर्मृगैश्चैव	१	६	२५
भयं कच्चिन्न चास्मासु	२	७४	२०
भयं त्यजत भद्रं व.	१	१५	२८
भयदामरूपसत्त्वानाम्	३	६९	१२
भयं न पश्यामि कुतश्चिद०	६	१०	२८
भयाद्यस्योपतिष्टेताम्	७	३३	१५
भयानामपि सर्वेषाम्	७	२५	४३
भरणे हि भवाञ्शक्तः	६	७६	३२
भरतः कामयुक्तानाम्	४	१८	२५
भरतं किं नु वक्ष्यामि	६	१०१	१७
भरतः कुशलं वाच्यः	२	५८	२१
भरतं कैकयीपुत्रम्	१	७७	१७

	का०	स०	श्लो०
भरतः कोशलपतेः	४	१८	३८
भरतः क्षिप्रमागच्छत्	२	७१	१७
भरतः खलु धर्मात्मा	२	३९	७
भरतं च परिष्वज्य	२	५२	३३
भरतं चाग्रतः कृत्वा	७	१००	१७
भरतं चैव सौमित्रे	७	१०५	७
भरतः पालयेद्राज्यम्	२	१९	२९
भरतं प्रत्युवाचेदम्	२	९१	६
भरतः प्राञ्जलिर्वाक्यम्	७	४१	१७
भरतं मूर्छितं दृष्ट्वा	२	८७	४
भरतः शिरसा कृत्वा	२	११५	९
भरतश्च महाबाहुः	२	३६	९
भरतश्च युधाजिच्च	७	१०१	३
भरतश्च विसंज्ञोऽभूत्	७	१०७	५
भरतश्च सशत्रुघ्नः	२	३७	२७
भरतश्चापि नान्हुतान्	२	७०	१३
भरतश्चापि रामस्य	२	८	१६
भरतश्चापि वक्तव्यः	२	५२	३४
भरतश्चाभिषिच्येत	२	१८	३६
भरतश्चेत्प्रतीतः स्यात्	२	४२	९
भरतस्तु ततः क्षिप्रम्	२	११५	१३
भरतस्तु त्वया वाच्य.	६	१२५	७
भरतस्तु रथस्थ. सन्	२	११४	१८
भरतस्य कुमारस्य	१	७२	६
भरतस्य तु तद्वाक्यम्	७	८३	१६
भरतस्य तु तस्याज्ञाम्	२	८२	२८
भरतस्य वचः कुर्वन्	२	१११	७
भरतस्य वचः श्रुत्वा	२	७८	२४
भरतस्य वचः श्रुत्वा	२	०३	२१
भरतस्य वचः श्रुत्वा	६	१२८	१२
भरतस्य वचः श्रुत्वा	७	६२	१०
भरतस्यात्मजौ वीरौ	७	१००	३६
भरतस्याथ पक्ष्यो वा	२	२१	११
भरतस्यानृशंसत्वम्	२	४६	८
भरतस्यार्यपुत्रस्य	३	४३	१८
भरतादेव रामस्य	२	८	५
भरतानुवशात्सोऽपि	२	८	२९

	का०	स०	श्लो०
भरताय प्रदातव्यम्	३	४१	१५
भरताय महाराजः	२	२०	३०
भरतार्धतृतीयेषु	२	६२	१०
भरतेन तु सार्धं ते	७	६१	२३
भरतेन महाबाहो	६	४१	५
भरतेन वयं पश्चात्	७	३६	४
भरतेनात्मना चाहम्	२	१२	४६
भरतेनाथ संदिष्टा	२	६७	२६
भरतेनैवमुक्तस्तु	२	७०	१६
भरते ब्रुवति स्वप्नम्	२	७०	१
भरते राज्यमारोप्य	६	४१	८
भरतो दुःखसंततः	२	७३	१
भरतो नाम कैकेय्याम्	१	१८	१३
भरतोऽपि तथैवोष्य	७	१०२	१४
भरतो लक्ष्मणश्चात्र	७	३१	१७
भरतो लक्ष्मणश्चैव	७	३६	११
भरद्वाजप्रसादेन	६	१२७	२६
भरद्वाजस्ततः शिष्यः	१	२	२१
भरद्वाजाभिगमनम्	२	५७	२
भरद्वाजाश्रमं गत्वा	१	१	८७
भरद्वाजाश्रमं ग वा	२	६०	१
भरद्वाजाश्रम. श्रीमान्	६	१२३	५१
भरद्वाजो महर्षिस्तम्	२	६२	२६
भर्ता चैव सखा चैव	२	८४	६
भर्ता तु खलु नारीणाम्	२	६२	८२
भर्ता दशरथो यस्या.	३	१६	३५
भर्ता नाम परं नार्याः	५	१६	२६
भर्तारं च वरं मन्ये	३	४६	२७
भर्तारं तमपश्यन्ती	५	२५	१५
भर्तारं तु परित्यज्य	२	६६	५
भर्तारं न ममेहाद्य	७	२५	४२
भर्तारं नानुवर्तते	२	२४	२६
भर्तारं निहतं दृष्ट्वा	४	२३	११
भर्तारं निहतं दृष्ट्वा	६	४८	१
भर्तरिमनवद्याङ्गी	६	४७	२२
भर्तुः पुनः परित्यागः	२	२४	१२
भर्तुः प्रियहिते युक्ते	६	११३	२२
भर्तुः प्रियार्थं कुलरक्षणार्थम्	२	६८	२२

	का०	स०	श्लो०
भर्तुर्भवित पुरस्कृत्य	५	३७	६२
भर्तुरर्थे परिश्रान्तम्	४	५४	५
भर्तुर्जेन तु दुःखेन	५	१३	३०
भर्तुर्भाग्यं तु नार्येका	२	२७	५
भर्त्रा परिगृहीतस्य	५	२७	१५
भर्त्सितामर्षिपे याचध्वम्	५	२७	३८
भल्लैश्चान्यैर्गदाभिश्च	६	४३	४३
भवतामग्रतः स्थातुम्	५	४६	१६
भवतामभ्यनुज्ञातः	५	५६	११
भवतामर्थसिद्ध्यर्थम्	३	६	२४
भवता सख्यकामौ तौ	४	५	७
भवतीमनुवर्तते	२	२४	२३
भवतोऽनुमते ब्रह्मन्	१	६७	२४
भवत्प्रसादात्काकुत्स्थ	४	२६	४
भवत्प्रसादाद्व्यसनम्	६	५०	४२
भवत्वधर्मो धर्मो वा	२	१२	४६
भवत्वविधवा भूमिः	२	१०१	११
भवद्व्रतं हि मे राज्यम्	६	१६	६
भवनानि व्यशीर्यन्त	५	५४	२३
भवनानीव सिद्धनाम	५	५४	२४
भवन्तः कृतशास्त्रार्थ	७	४४	२०
भवन्तः प्रत्ययं प्राप्ताः	४	५३	१०
भवन्तश्चापि विक्रान्ताः	४	४२	५५
भवन्त सर्वभूतानाम्	६	१६	५
भवन्तु मार्गे भगवन्	६	१२४	२०
भवन्तो मम सर्वस्वम्	७	४४	१६
भवन्तौ वानरं सैन्यम्	६	२५	४
भव मैथिलि भार्या मे	५	२०	१६
भव स्वदारनिरतः	३	३८	३१
भवस्व भद्रे भार्याणाम्	६	३१	१७
भवाङ्गपतितं तोयम्	१	४३	२७
भवानपि तथेत्येव	११	१०७	६
भवानपि सदाचारः	३	१३	२०
भवानेव महीं कृत्स्नाम्	१	१४	४७
भवान्कलत्रमस्माकम्	४	६५	२३
भवान्क्रियापरो लोके	४	२७	३५
भवान्धर्मविनीतश्च	४	५	८
भवान्नारायणो देवः	६	११७	१३

भवान्नारायणो देवः	७	८	२८
भवान्मे विप्रकामार्थम्	२	१०९	२
भवान्वर्षसहस्राय	२	३४	२८
भवान्सर्वत्र कुशलः	३	७	१५
भवान्स्निग्ध सुहृन्मह्यम्	१	१३	४
भवान्हि गतिरव्यग्रा	७	३८	३
भवांस्तु सह वैदेह्या	२	३०	२७
भवितव्यतया नूनम्	२	५९	२०
भवितव्यं हि तच्चापि	३	७२	१६
भविता राघवो राजा	२	८	२२
भविष्यति तवादेशम्	७	२४	३८
भविष्यति दृढं रामः	८	५०	११
भविष्यति हि मे पन्थाः	४	६७	२०
भविष्यति हि मे रूपम्	४	६७	२५
भविष्यत्येवमेतत्ते	७	१०	२२
भविष्यदुत्तरं यन्मे	७	९८	२७
भविष्यन्ति मम क्रोधात्	३	६४	६७
भविष्यन्ति वने यानि	२	५२	५०
भवेच्च ते महाराज	७	३८	३१
भवेदिन्द्रेण वा सृष्टम्	५	४६	८
भवेद्भूतोऽयं वातापिः	३	४३	४६
भस्मना चावृतं सर्वम्	१	१४	१५
भस्मन्यथाल्पते राम	१	४४	२
भस्मराशीकृतानेतान्	१	४१	२०
भस्मीभूता दुरात्मानः	१	५९	१८
भगीरथीं दुष्प्रतराम्	२	७१	९
भात्याभरणभाभिर्यत्	६	१११	४४
भारावतरणार्थं हि	७	५३	२२
भार्गवं च्यवनं चैव	७	६०	४
भार्गवश्च यवनो नाम	१	७०	३२
भार्गवश्च यवनो नाम	२	११०	२०
भार्गवस्य कुले जाता	७	५८	१२
भार्गवस्य सुतां विद्धि	७	८०	८
भार्गवाणां कुले जातः	१	७५	७
भार्यया च महाभाग	४	४	११
भार्याणामनुरूपाणाम्	१	१६	२०
भार्या तस्योत्तमा लोके	३	३१	२९
भार्या ममेयं कल्याणी	१	५४	१४
भार्याविद्भूगिनीवच्च	२	१२	६९
भार्यावियोगनं दुःखम्	४	६	५
भार्ये परमरूपिण्यौ	७	११	१५
भावज्ञेन कृतज्ञेन	३	१५	२९
भावमस्य तु विज्ञाय	६	१७	४९
भावो मयि तवात्यर्थं	३	५९	१७
भावो राज्यागमस्तस्य	४	४	२
भाषतस्तस्य शूद्रस्य	७	७६	४
भाषमाणं नरव्याघ्रम्	१	३८	९
भाषितं रुचिरं श्रुत्वा	७	७५	८
भासकर्णश्च संक्रुद्धः	५	४६	३४
भास्करस्यौरसः पुत्रः	१	७२	२१
भास्करोदयकालोऽसौ	२	५२	२
भास्करो निष्प्रभश्चैव	१	६५	१६
भिक्षुरूपं परित्यज्य	४	४	३४
भिक्षुरूप प्रतिच्छन्नम्	४	३	२३
भित्त्वा तु तां गदां बाणैः	३	३०	१
भित्त्वा न तावत्प्रविशन्ति०	४	१४	१४
भित्त्वा रथं शरैः रामः	६	७९	३०
भित्त्वा वेलां समुद्रस्य	३	३१	२५
भित्त्वेव वसुधां भाति	१	९४	२३
भिद्यतेऽयं गिरिर्भूतैः	५	१	२२
भिद्यमानभिवाशक्तः	२	६३	४३
भिद्यमानस्ततो गर्भः	४	४६	१९
भिद्यमानाः शरैः संख्ये	७	७	१४
भिन्दिपालाश्च परिघान्	६	६५	३९
भिन्नगात्रः शरैस्तीक्ष्णैः	६	४३	२४
भिन्नमन्त्रोऽपराद्धश्च	४	५५	९
भिन्नमर्याद निर्लज्ज	६	१०३	१४
भिन्नलाङ्गुलहस्तोरु	६	७४	८
भिन्नाञ्जनचयश्यामः	६	४५	१४
भिन्नातपत्रं पतमानशस्त्रम्	७	७	५०
भीतामप्सरसं दृष्ट्वा	१	६३	१३
भीतैश्च संपरित्यक्तः	५	६७	१४
भीमनासापुटं तं तु	६	६०	२९
भीममद्य कृतं कर्म	५	१	१७९

भीममन्तर्दधे लोकम्	६	४	५०
भीमरूपा महाकायाः	३	६४	४७
भीरोः प्रवादाः श्रूयन्ते	६	६६	२३
भीषणोऽयं महाकायः	३	७०	५
भुक्त्वाऽशनं विशालाक्षी	२	६१	५
भुंक्ष्व भोगान्यथाकामम्	५	२०	२३
भुजगाचरितां गुप्ताम्	५	३	५
भुजपाशान्तरस्थेन	५	१०	४३
भुजश्च चार्वाञ्चितवृत्तपीनः	५	२९	३
भुञ्जाना मानुषान्भोगान्	३	४८	१४
भुजान्विक्षिप्य शैलाश्च	६	४	६५
भुजाभ्यां पीनवृत्ताभ्याम्	४	२३	२५
भुवनं स्वं गमिष्यामि	३	४	२०
भूतग्रामाश्च बहवः	७	१००	२३
भूतले सागरे वापि	१	४५	१६
भूतानां स्थावराणां च	१	८३	१५
भूतानि च भयं जग्मुः	५	१	११६
भूतानि भयदर्शीनि	७	६	५१
भूतानि राक्षसेन्द्रेण	३	६४	७
भूताश्चार्थं विनश्यन्ति	५	१	३७
भूताश्चार्थं विरुध्यन्ति	५	८०	३७
भूतोपहतचित्तेव	२	१०	३०
भूतोपहृतचित्तेव	२	१२	५७
भूत्वा शकुनयः सर्वे	६	३७	८
भूमिः कीर्तिर्यशो लक्ष्मीः	२	१०९	२२
भूमिभीतिरपे तत्र	६	५३	३२
भूमिर्हिरण्यं रूपं च	४	१७	३१
भूमीगृहांश्चैत्यगृहान्	५	१२	१५
भूमौ निपतितस्यापि	४	१७	४
भूमौ सुतनुमासीनाम्	५	१५	१३
भूमौ स्थितस्य रामस्य	६	१०२	५
भूम्यामहं सर्वकालम्	७	८६	१४
भूय एव महातेजाः	५	३६	१
भूय एव सुसंक्रुद्धः	६	१०७	१७
भूय एव हि राजेन्द्र	१	११	१
भूय एवासृजद्घोरान्	१	५४	२१
भूयः खनत भद्रं वः	१	४०	११
भूय परमशोभत	६	७५	६१
भूयश्चोर्ध्वं गतिं प्राप्य	१	१	१२८
भूय स चिन्तयामास	५	५३	३४
भूयस्तु मम विज्ञाप्यम्	६	८५	७
भूयस्तु शरमुद्धृत्य	३	४४	१३
भूयिष्ठमृद्धैराकीर्णं	२	७१	२१
भूयिष्ठं लोलिता लङ्का	५	१३	३
भूयो बन्धाद्विमुक्तेन	७	३५	७
भूषणानि च मुख्यानि	१	५५	२९
भूषणानि च मुख्यानि	५	१५	४६
भूषणानि महार्हाणि	२	३०	४४
भूषणैरुत्तमैर्हीनाम्	५	१७	२१
भूषयन्ताविमं देशम्	१	४८	५
भृग्वङ्गिरःसमं दीप्त्या	२	३२	३३
भृङ्गराजाधिगीतानि	६	३९	११
भृत्यवत्सल तिष्ठन्तम्	२	४२	५८
भृशं नियुक्तस्तस्यां च	५	१८	५
भृशमसुखमर्मर्षिता यदा	२	२०	५५
भृशमाव्रजमानस्य	३	६०	१
भृशं शोकार्णवे भग्नः	५	३४	६०
भेजिरे सरयूं सर्वे	७	११०	२३
भेजेऽम्बरं निरालम्बम्	५	१	१७३
भेरीणामिव सनादः	६	२६	३७
भेरीमृदङ्ग वीणानाम्	२	७१	२९
भेरीमृदङ्गाभिरुतम्	५	६	१२
भेरीशङ्खमृदङ्गाश्च	६	६०	४६
भैरवाभिरुते भीमे	६	९०	६२
भैरवैः श्वापदैः कीर्णम्	१	२४	१४
भैरवो हि महान्नादः	६	९२	४९
भोक्तुमारब्धवानन्नम्	१	६५	५
भोगवन्तं ततो नागम्	७	१०४	५
भोजयन्ति किल श्राद्धे	२	६१	१२
भो महेन्द्राग्निवरुणाः	७	३६	८
भौमाश्चैवान्तरिक्षाश्च	१	७४	९
भ्रमन्तीं काञ्चनीं कोटिम्	६	९३	२७
भ्रमरैरुपगीतश्च	३	६०	१६
भ्रष्टस्तस्य महाकायः	३	२६	१४

	का०	स०	श्लो०
भ्राजमानं ततो दृष्ट्वा	५	४६	१६
भ्राजमानं महाहेंण	५	४६	२
भ्रातरं दयितो भ्रातुः	१	१	२६
भ्रातरं निहतं दृष्ट्वा	६	१०१	८
भ्रातरं निहतं दृष्ट्वा	६	१०६	१
भ्रातरं निहतं श्रुत्वा	६	६८	८
भ्रातरं सपरिष्वज्य	६	६५	३२
भ्रातरं संस्कृतं कृत्वा	३	११	५७
भ्रातरं सुरथं राज्ये	७	७८	६
भ्रातरस्ते महेष्वासम्	२	१०३	५
भ्रातरावुपतस्थुस्ते	१	१७	३३
भ्रातरौ रामलक्ष्मणौ	४	२	१
भ्रातरौ रामलक्ष्मणौ	६	८०	३
भ्राता कथं नाम मया गुणस्य	४	२४	६
भ्राता चास्य च द्वैमात्रः	५	३५	२२
भ्राता चास्य महातेजाः	३	३४	१३
भ्राता चास्य महावीर्यः	३	२१	२१
भ्राता तु गृध्रराजस्य	६	१२६	४२
भ्राता निरस्तः क्रुद्धेन	६	१२६	३७
भ्राता भव यवीयांस्त्वम्	१	२६	१७
भ्राता मम महातेजाः	१	७०	२
भ्राता मे क्वावसद्रात्रिम्	२	८७	१३
भ्राताऽयं लक्ष्मणो नाम	३	१७	१६
भ्राता वैश्रवणस्याहम्	३	४८	२
भ्रातुरन्तःपुरं सौम्यम्	४	२६	२२
भ्रातुरर्थे महाबाहो	६	६२	१६
भ्रातुरैश्वर्ययुक्तस्य	७	५६	२३
भ्रातुर्जटायुषस्तस्य	४	२४	३६
भ्रातुर्ज्येष्ठस्य यो भार्याम्	४	५५	३
भ्रातुर्भयार्तमासीनम्	५	३५	२६
भ्रातुर्वचनमाज्ञाय	२	५६	२४
भ्रातुः शृणु समादेशम्	४	५१	३
भ्रातुः स भवनं गत्वा	६	६२	५
भ्रातुः समीपे शोकार्ता	३	२०	२४
भ्रातुः समीपे शोकार्ता	३	२१	२२
भ्रातुस्ते वदतः पुत्र	२	२१	२१
भ्रातृत्वमायभावश्च	४	२४	१२
भ्रातृपुत्रसमौ चापि	२	२६	३३
भ्रातृपुत्रेण चैतेन	६	५०	१६
भ्रातृभिश्च सुरान्सर्वान्	३	३६	१५
भ्रातृभिः सह देवाभैः	७	११०	६
भ्रातृभिः सहितो राजन्	७	७३	१३
भ्रातृव्यसनसंतप्तः	६	७०	३
भ्रातृणां त्वरिगस्ते तु	२	१०३	३६
भ्रातृणां संग्रहार्थं च	२	६७	६
भ्रातॄन्भृत्यांश्च दीर्घायुः	२	८	१५
भ्रात्रा तु मपि संन्यासः	२	११५	१७
भ्रामयन्तं कपिं दृष्ट्वा	५	४४	१३
भ्रामयन्ती महच्छूलम्	५	२४	३६
भ्रुवौ विव्याध बाणाभ्याम्	६	७६	५१
भ्रूणहत्यामसि प्राप्ता	२	७४	४

(म)

मकराक्षवचः श्रुत्वा	६	७६	१७
मकराक्षस्य तच्छ्रुत्वा	६	७८	१३
मकराक्षं हतं श्रुत्वा	६	८०	१
मघा ह्यद्य महाबाहो	१	७१	२४
मङ्गलाद्यप्रयोगं च	२	१००	६७
मङ्गलानि प्रयुञ्जनाः	३	१	१७
मङ्गलान्यर्थसिद्धयर्थम्	६	६७	३३
मङ्गलालभ्यनीयानि	२	६५	८
मङ्गलैरभिषिञ्चस्व	२	२३	२६
मङ्गलैरुपसंपन्नः	२	२५	४२
मच्छरीरं समासाद्य	७	१८	३०
मणिकाञ्चनकेयूर	६	२१	३
मणिकाराश्च ये केचित्	२	८३	१२
मणिप्रदानं सीतायाः	१	३	३२
मणिप्रवरशृङ्गाग्र	३	४२	१६
मणिभिर्बरमाल्यानाम्	२	१५	३३
मणिमुक्ताप्रवालानि	६	१११	१०६
मणिमुक्तासुवर्णानि	२	६	२७
मणिरत्नमिदं दत्तम्	५	६६	४
मणिरत्नं कपिवरः	५	३८	६८
मणिरत्नं सुवर्णं वा	१	१४	४६
मणिवरमुपगृह्य तं महार्हम्	५	३८	७०
मणिविद्रुमचित्राणि	६	७५	२०

	का०	स०	श्लो०
मणिस्फटिकमुक्ताभिः	५	३	६
मणिं दत्त्वा ततः सीता	५	३६	१
मणिं दृष्ट्वा तु रामो वै	५	३६	२
मण्डलानि विचित्राणि	६	४०	२३
मण्डलान्यभिधावन्ति	६	६०	२६
मण्डले पन्नगो रुद्धः	२	१२	५
मतङ्गवनमित्येव	३	७४	२२
मतङ्गेन तदा शप्तः	४	४६	२२
मतयः क्षत्रविद्याश्च	२	६	४७
मतिक्षयाद्रम्यसुखेषु सक्तः	४	३१	३
मतिमद्भिर्महामात्रैः	६	१०	३
मतिमाञ्शास्त्रवित्प्राज्ञः	६	२	४
मत्कथाः प्रचरिष्यन्ति	७	१०८	३०
मत्करोत्सृष्टवज्रेण	७	३६	११
मत्कार्मुकनिसृष्टेन	६	२२	३
मत्कृते काकमात्रेऽपि	५	३८	३७
मत्कृते विप्रयुक्ता ये	६	१०२	६
मत्कृते व्यसनं प्राप्तः	२	६६	१६
मत्तकोकिलसनादैः	४	१	१५
मत्तप्रमत्तानि समाकुलानि	५	५	१०
मत्तमातङ्गनिश्वासैः	६	१०	४
मत्तः प्रियतरा नूनम्	४	२३	३
मत्त प्रियतरो नित्यम्	५	३८	६०
मत्ता गजेन्द्रा मुदिता गवेन्द्राः	४	२८	४३
मत्तानीकं महात्मा सः	४	७०	६४
मत्तान्गिरितटोद्भुष्टान्	४	१३	११
मत्तैनगिसहस्रैश्च	६	१२७	१२
मत्तो महायुधानां च	७	३६	१८
मत्तोऽयमिति मा मंस्थाः	४	११	३८
मत्पुरीमप्रधृष्यां वै	५	५०	६
मत्प्रियं यदि कर्तव्यम्	६	३४	७
मत्प्रियेष्वभिरक्ताश्च	६	१२०	८
मत्संदेशयुता वाचः	५	३६	१२
मत्स्यकच्छपसंबाधाम्	३	७५	१८
मत्स्यैः पुष्पैर्द्रुमैः शैलैः	३	२२	१४
मथितामृतफेनाभम्	५	१८	२४
मदङ्गे जीर्णतां यातु	७	४०	२४

	का०	स०	श्लो०
मदधीनं तु यत्तन्मे	६	११६	६
मदप्रगल्भेषु च वारणेषु	४	३०	३२
मदव्याकुललोलाक्षम्	६	३	३६
मदव्यायामखिन्नास्ताः	५	१०	३५
मदान्धो न कृपां चक्रे	५	६२	२६
मदीयं नगरं यातु	१	२	२०
मदीयान्मन्त्रिणो बद्ध्वा	४	६	२३
मद्दोषकृतदोषां ताम्	४	१८	५५
मद्बलेन विरुद्धाय	२	२३	२४
मद्भयार्तः परित्यज्य	३	४८	५
मद्यप्रसक्तो भवतु	२	७५	४१
मद्द्वितीयो धनुष्पाणिः	३	६५	१३
मद्विशिष्टः पुमान्कोऽद्य	७	२६	२५
मद्विशिष्टाश्च तुल्याश्च	५	३६	३८
मद्विशिष्टाश्च तुल्याश्च	५	६८	२१
मधुं च कैटभं चैव	७	१०४	६
मधुकैटभयोर्वीर	७	६३	२२
मधुदध्यक्षतघृतैः	२	२५	३०
मधुपुष्परजः पृक्तम्	७	२६	११
मधुरंश्लक्ष्णया वाचा	७	३६	२३
मधुरं सान्त्वितस्तेन	४	७	१५
मधुरा मधुरालापा	५	६६	१५
मधूच्छिष्टेन केचिच्च	५	६२	११
मधूनि च महार्हाणि	६	२७	३७
मधूनि द्रोणमात्राणि	५	६२	६
मधूनि पीत्वा जुष्टानि	४	४१	३४
मध्यं तु समनुप्राप्य	२	५२	८२
मध्ये चैषां दधिमुखः	५	६२	२१
मध्ये तु राजा सुग्रीवः	६	४	३१
मध्येन मुदितं स्फीतम्	२	५०	११
मध्ये वानरकोटीनाम्	५	३४	३८
मध्येसमं समीपस्थौ	१	४	१५
मनः परिगृहीतां ताम्	५	४२	२१
मनः शिलायास्तिलकः	५	४०	५
मनः समाधाय तु शीघ्र०	५	८	५
मनः समीक्ष्यमाणश्च	२	३५	३
मनसा काङ्क्षितं ह्यस्य	३	१२	११

	का०	स०	श्लो०
मनस कर्मचेष्टाभिः	२	६४	१२
मनसा कर्मणा वाचा	७	९६	२०
मनसा कर्मणा वाचा	७	९७	१५
मनसा चिन्तयामास	५	१	१७४
मनसा तत्तदा पेक्ष्य	६	३०	१४
मनसा ध्यायतस्तस्य	२	९१	२३
मनसापि दुरारोहम्	६	३९	१९
मनसा प्रसहामि त्वाम्	२	८	३
मनसा ब्रह्मणा सृष्टे	६	१२७	३६
मनसाऽस्मि गतो यताम्	४	६६	१८
मनसेव कृतां लङ्काम्	५	२	२२
मनस्यपि तथा राम	३	९	६
मनस्वी तद्गतमनाः	१	७७	२६
मनश्च मे दीनमिहाप्रहृष्टम्	३	५७	२३
मनश्च मे हतं भूयः	४	६१	१२
मनुः प्रजापतिः पूर्वम्	१	७०	२१
मनुजवर न कालविप्रकर्षः	६	८४	२१
मनुजेन्द्रार्तरूपेण	६	८४	९
मनुर्मनुष्याञ्जनयत्	३	१४	२९
मनुष्या वानरा ऋक्षाः	६	३५	२३
मनोजवं कामगमम्	७	१५	३७
मनोज्ञगन्धैः प्रियकैरनल्पैः	४	३०	३४
मनोज्ञा यत्र ता दृष्टा	१	१०	२५
मनोज्ञां काञ्चनवतीम्	६	३९	२४
मनोज्ञोऽयं गिरिः सौम्य	२	५६	१४
मनोरथः स्यादिति चिन्तयामि	५	३२	१३
मनोरथ महानेष	१	४२	२२
मनोरथोऽयमिष्टोऽस्या	३	१९	२४
मनोहरस्निग्धवर्णः	३	४२	१९
मनोहरं सर्वसुखम्	७	१३	६
मनो हि हेतुः सर्वेषाम्	५	११	४२
मन्त्रग्रामं गृहाण त्वम्	१	२२	१३
मन्त्रज्ञो मन्त्रयामास	१	३३	१०
मन्त्रपूतैर्महाभागैः	१	३९	१३
मन्त्रमूलं च विजयम्	६	६	५
मन्त्रयित्वा तु दुर्धर्षम्	६	३१	५
मन्त्रयित्वा स धर्मिष्टैः	३	३७	२३

	का०	स०	श्लो०
मन्त्रवच्च यथान्यायम्	१	३०	१०
मन्त्रसंवरणे शक्ताः	१	७	१९
मन्त्रस्त्रिभिर्हि संयुक्तः	६	६	७
मन्त्रिणश्च यथामुख्याः	६	११	२५
मन्त्रिणस्तु नरेन्द्रस्य	१	३८	१९
मन्त्रिणः शीघ्रमायान्तु	६	३१	३
मन्त्रिणां वचनं श्रुत्वा	२	११५	७
मन्त्रिणो नैगमाश्चैव	७	७४	६
मन्त्रिणो बाढमित्याहुः	१	६८	१८
मन्त्रिणो भृत्यवर्गाश्च	७	१०९	१९
मन्त्रिणो ये च रामस्य	६	२५	५
मन्त्रिपुत्रान्हतान्श्रुत्वा	५	५८	१२३
मन्त्रिभिर्मन्त्रतत्त्वज्ञैः	५	४९	१३
मन्त्रिभिस्त्वं यथोद्दिष्टम्	२	१००	७१
मन्त्रिष्वाधय तद्राज्यम्	१	४२	१२
मन्त्रे ब्यूहे नये चारे	६	१७	२०
मन्त्रो विजयमूलं हि	२	१००	१६
मन्थरा तु वचः श्रुत्वा	२	७	१८
मन्थरा त्वभ्यसूयैनाम्	२	८	१
मन्थराप्रभवस्तीव्र	२	७७	१३
मन्थराया वचः श्रुत्वा	२	७	३१
मन्दप्रख्यायमानेन	५	१५	२०
मन्दमारुर्ता नःश्वासम्	४	२८	६
मन्दरस्यापि शृङ्गाणि	६	९२	८
मन्दरं पर्वतश्रेष्ठम्	३	४७	४०
मन्दाकिनीं नदीं रम्याम्	२	११३	३
मन्दाकिन्यास्तु यदिदम्	४	१	९४
मन्निमित्तमिदं दुःखम्	२	९९	३६
मन्नियोगादिमं देशम्	१	२४	३१
मन्मथस्य शराणां च	३	३४	२३
मन्मथाभिपरीतस्य	४	१	३८
मन्युर्न च त्वया कार्यः	२	१९	४
मन्ये खलु मया पूर्वम्	२	३९	४
मन्ये तु हृदयस्तस्याः	६	९२	५३
मन्ये दशरथान्ताय	२	५३	१४
मन्ये दीर्घा भविष्यन्ति	३	६४	१४
मन्ये न तावदात्मानम्	६	६७	७७

	का०	स०	श्लो०
मन्ये प्राप्तास्म तं देशम्	२	६६	६
मन्ये प्रीतिविशिष्टा सा	२	५३	२२
मन्ये भर्तुः सुखा शय्या	२	८८	१६
मन्ये लक्ष्मण वैदेही	३	६४	४१
मन्ये वानरसेना सा	६	१२७	२८
मन्ये साभरणा सुप्ता	२	८८	१४
मन्ये सालवनं रम्यम्	६	१२७	२६
मन्ये स्वयंभूर्भगवानचिन्त्यः	६	७३	६६
मन्येऽहमागतोऽयोध्याम्	२	६७	६
मम कायात्प्रसूतौ हि	२	७४	२४
मम चाप्यन्तरात्माऽयम्	६	१८	३७
मम चाप्यल्पभाग्यायाः	५	६८	४
मम चेदं मतं तात	६	८३	३१
मम चेमा गिरिः श्रुत्वा	४	२३	६
मम चैवानुजा साध्वी	२	११८	५३
मम चैवाल्पभाग्यायाः	५	३६	२१
मम चैवाल्पभाग्यायाः	५	५६	४
मम तावन्नियोगस्था.	२	५२	४७
मम त्वश्वा निवृत्तस्य	२	५६	१
मम दयिततमा हृता वनात्	४	६	२७
मम दुःखमिदं पुत्र	२	७५	६१
मम नाम त्वया वीर	६	६२	१४
मम पारे समुद्रस्य	३	४८	१०
मम पित्र निरुद्धो हि	४	५७	१३
मम पुत्रो मम भ्राता	६	६४	२२
मम पृष्ठगतौ तौ च	५	३६	४१
मम पृष्ठगतौ तौ च	५	६८	२४
मम प्रतिप्रदानं हि	५	३७	१०
मम प्रव्राजनादद्य	२	२२	१२
मम प्राणैः प्रियतरम्	४	२२	६
मम भक्ष्यः प्रदिष्टस्त्वम्	५	१	१४३
मम भक्ष्यः प्रदिष्टस्त्वम्	५	५८	२३
मम भार्या जनस्थानात्	६	१०३	११
मम भुजबलवेगवेगितः	२	२	२६
मम मातुर्महद्दुःखम्	२	२१	४०
मम मातुर्वरो दत्तः	६	२२	४७
मम मातुष्वसुर्भ्राता	७	६८	१४

	का०	स०	श्लो०
मम रूपं च संप्रेक्ष्य	५	३०	२५
मम रूपं समास्थाय	१	४८	२७
ममर्द च महाकायः	६	६६	१०
ममर्दाश्वान्गजांश्चापि	६	६७	११
मम लालप्यमानस्य	१	८	८
मम वर्णो मणिनिभः	६	४८	१२
मम वृद्धस्य कैकेयि	२	१२	३४
मम शल्यमनुद्धृत्य	६	६८	११
मम सत्या प्रतिज्ञा सा	१	६७	२३
मम सन्ना मतिः सीते	२	३०	३६
मम सर्वविनाशाय	१	७५	६
मम संजातरोषस्य	३	४८	७
मम हेतोरनार्याया	६	३२	२८
मम हेतोः पराक्रान्ताः	६	१२०	५
मम ह्यसितकेशान्ते	५	२०	३२
ममागमनमप्यग्रे	७	३१	१२
ममानुरूपं तपसो बलं च ते	५	४८	६
ममापचाराब्दालोऽसौ	७	७६	११
ममापराधाद्भ्रष्टोऽयम्	१	४७	२
ममापि च विवक्षास्ति	६	१८	२
ममापि त्वं सुदयितः	७	७२	१६
ममापि दयितं विद्धि	१	६१	१८
ममापि दयितो रामः	७	४६	२८
ममापि पद्मपत्राक्षम्	७	४६	३१
ममापि परमा प्रीतिः	७	४१	६
ममापि परमा प्रीतिः	७	७१	१२
ममापि प्रतिगृह्णीष्व	३	२७	१३
ममाप्येवं विशालाक्षी	४	१	४३
ममायमात्मप्रभवः	४	१	३४
ममायं नूनमर्थेषु	३	६८	२
ममाश्रुवेगप्रभवः	२	५६	३०
ममास्त्रबाणसंपूर्णम्	३	६४	५६
ममेदं लङ्घनं व्यर्थम्	५	१३	१६
ममेष्टं नित्यशो हव्यैः	७	३०	१२
ममैतां मातरं विद्धि	२	६२	२७
ममैव दुष्कृतं किंचित्	५	३८	४६
ममैव नूनं मरणं न विद्यते	२	२०	५०

	का०	स०	श्लो०
ममैवाभिमुखं स्थित्वा	४	२	२६
ममोत्पतनसंभ्रान्ता	५	६७	३४
ममोरुजङ्घावेगन	४	६७	१३
मयस्य भवनं तत्र	४	४३	३०
मयस्य मायाविहितम्	४	५३	२७
मयस्य मायाविहितम्	४	५७	१७
मया खलु तदेवेदम्	५	५५	१५
मया च परिहर्तव्यम्	७	४८	१४
मया च पुनरागम्य	६	१२६	४६
मया च यदनुष्ठेयम्	४	७	२०
मया च यदिदं वाक्यम्	४	७	२१
मया च रामेण सलक्ष्मणेन	२	१२	१०६
मया च सीतया चैव	२	११२	२८
मया चेष्टं क्रतुशतम्	१	५८	१६
मया चैव भवत्या च	२	२४	१६
मया तु पुत्र श्रुत्वैव	२	७२	४६
मया तु मोक्षतस्यास्य	६	६७	७६
मया तु हितकामेन	६	१०४	१२
मया ते यद्यनुकोशः	३	२१	१४
मया त्वं समनुज्ञातः	३	६८	३०
मया त्विदानीं शूरास्ते	३	२१	२
मया त्वेतद्वचः श्रुत्वा	४	६	१४
मया दत्तमिदं सीते	२	११८	१६
मयाद्य इह सौमित्रे	२	३०	११
मया पश्येत्सुदुःखार्ता	२	६६	२६
मया पार्श्वे सधनुषा	२	२१	६
मयापि व्यसनं प्राप्तम्	४	७	६
मया प्रतिगृहीते तु	७	७८	२७
मयाऽयाचरितं पूर्वैः	२	२	६
मयाभिमन्त्रिता पूर्वम्	७	५६	२३
मया महत्या यायिन्या	२	६३	१
मया रोषपरीतेन	७	६५	३५
मयार्चिता देवगणाः शिवादयः	२	२५	४३
मया वर्षसहस्राणि	६	६२	२६
मया विरहिता बाला	३	६०	३४
मया विरहितां दीनाम्	६	१०३	१२
मया विसृष्टां भरतो मही०	२	३४	५६

	का०	स०	श्लो०
मया विहीना विजने वने सा	२	६३	११
मया विहीनां वरद	२	३८	१४
मया वैरोचने यज्ञे	४	६५	१५
मया समेतोऽरण्यानि	२	३१	४
मया हते संयति कुम्भकर्णे	६	६७	७५
मया हि चिरपुष्टेन	२	५३	२०
मया हि भगवन्क्रोधात्	७	२०	२४
मया ह्यलब्धनिद्रेण	६	११३	११
मयि चीराजिनधरे	२	२२	१३
मयि जीवितमायत्तम्	५	३७	६०
मयि दृष्टे तु रक्षोभिः	५	२	४०
मयि पञ्चत्वमापन्ने	२	६३	३२
मयि भावो हि वैदेह्याः	४	१	५२
मयूखैरुपसर्पद्भिः	३	१६	१८
मयूरनादाभिरतः	२	५४	४०
मयूरनादिता रम्याः	३	१५	१४
मयैकेन तु निर्युक्तः	३	६६	३६
मयैतत्प्राप्यते सर्वम्	६	११३	३८
मयैव निहता लङ्का	५	५६	१८
मयोक्तमपि चैतावत्	३	४०	१६
मयोक्तं चारुसर्वाङ्गि	५	२३	६
मयोच्यमानं यदि ते	२	६	७
मध्यगच्छति चेहस्थे	५	१३	३७
मरणान्तानि वैराणि	६	१०६	२५
मरुत्त इति विख्यातः	७	६०	१५
मरुद्रोधाद्विनिर्भुक्ताः	७	३६	६
मर्दयन्तीव ते सर्वे	६	२७	४३
मलदाश्च करूषाश्च	१	२४	१८
मलदाश्च करूषाश्च	१	२४	२३
मलदाश्च करूषाश्च	१	२४	२५
मलदाश्च करूषांश्च	१	२४	२६
मलपङ्कधरान्दीनान्	७	२१	१७
मलपङ्कधरां दीनाम्	५	१५	३७
मलमण्डनदिग्धाङ्गीम्	४	१६	५
मलयं दर्दरं चैव	२	६१	२४
मलं तस्याभवत्तत्र	१	३७	२०
मलिनं चाश्रुपूर्णाक्षम्	२	७१	४३

	का०	स०	श्लो०
मलिनेन तु वस्त्रेण	५	१७	२६
मसारगल्वर्कमुखः	३	४३	२९
महता तपसा चापि	३	६६	३
महता तपसा लब्धः	२	९६	१२
महता पक्षवातेन	६	५०	३४
महता हरिसैन्येन	६	८५	३२
महता हि शरौघेण	६	५८	२६
महति स्फाटिके चित्रे	५	४९	९
महतीमुत्थितामेनाम्	६	६६	७
महतीयमितः सेना	२	८४	२
महतेवाम्बुवेगेन	२	१०५	५
महत्या सेनया सार्धम्	३	२६	२५
महत्येषा हि ते बुद्धिः	२	४०	२६
महत्त्वमृषिमुख्यत्वम्	१	६९	१९
महत्सु तस्य शैलेषु	१	४३	१५
महत्सोपाश्रयं भेजे	६	११	१७
महदद्भुतमाश्चर्यम्	७	५९	२
महदासीत्ततस्तेषाम्	७	२३	३४
महद्गृध्रकुलं चास्य	६	१०६	२२
महदुःखं प्रपन्नाया	६	३२	१०
महद्धरण्या विवरम्	४	५१	३
मपद्वलपरीवारा	५	४५	२
महद्भिरुच्छ्रितः शृङ्गैः	४	६७	४२
महद्भिः काञ्चनैर्वृक्षैः	४	५०	२९
महद्भ्यामिव संस्पृष्टौ	६	४	४२
महर्षयो धर्मतपोभिरामाः	४	३३	५७
महर्षिगणगन्धर्वं	५	१	१६७
महर्षिपुत्रं मारीचम्	४	४२	३
महर्षियक्षगन्धर्वं	५	५६	३६
महर्षियों वसिष्ठस्तु	३	६६	८
महर्षिशब्दं लभताम्	१	६३	१७
महर्षिस्तमनादृत्य	४	११	६३
महर्षिः परमामर्षी	४	४८	१२
महर्षीणां वधो घोरः	६	८७	२४
महर्षीस्तु पुरस्कृत्य	७	६४	११
महर्षेर्वचनाद्रामः	१	६७	१३
महाकपालः स्थूलाक्षः	३	२६	१८

	का०	स०	श्लो०
महाकपिर्भूमितले निपीड्य०	५	४७	३७
महाकायोऽतिकायश्च	७	२७	३१
महागजैश्चापि तथा नदद्भिः	५	५	१४
महागिरिमिवाकम्प्यम्	३	४७	३३
महाजनसपीपे च	७	५०	१४
महाजलदनिर्घोषम्	६	५७	२६
महाज्वरेण दुर्धर्षम्	६	७	१४
महाञ्छब्दोऽभवत्तत्र	६	४१	५५
महात्मनां तु भूयिष्टम्	४	९	६
महात्मनां सुदुष्प्रापम्	४	२६	५
महात्मानौ महाभागौ	१	१	१४
महात्मा बलसंपन्नः	६	१११	१००
महादेववचः श्रुत्वा	६	११९	९
महाद्विपाश्च सिंहाश्च	२	२५	१९
महानयं वरस्तात	६	१२०	१२
महानादान्प्रमुञ्चन्ति	६	४	६६
महानुभावस्य वचो निशम्य	४	७	२५
महानूपुरकेयूरैः	५	११	१९
महान्ति दारुणं भीमम्	३	६९	३४
महान्ति कूटानि महीधराणाम्	४	२८	४८
महापद्मं महात्मानम्	१	४०	१८
महापर्वतसंकाशाः	६	२७	४२
महापार्श्वं प्रवदतः	६	१३	१०
महापार्श्वो महातेजाः	६	६९	३२
महाप्रमाणमुद्यम्य	६	८८	३
महाप्रस्रवणोपेतः	४	११	१३
महाप्रस्थानमासाद्य	४	६३	४
महाबलनिभैर्घोरैः	४	३९	२१
महाबलं महात्मानम्	६	२०	२८
महाबलं महावीर्यम्	६	१११	११
महाबलनां रुदताम्	२	१०३	३४
महाबलनां हरियूथपानाम्	४	२४	१९
महाबलत महावीर्याः	६	१२६	१८
महाबलो महाबाहुः	१	१७	३५
महाबलो महावीर्यः	१	२०	१७
महाबाहु.महोरस्कम्	३	४७	३५
महाब्रह्मर्षिसृष्टा वा	२	३५	१५

	का०	स०	श्लो०
महाभागेन रामेण	४	३४	१६
महाभोगानि मत्स्यानाम्	६	२१	१६
महामतिं महोत्साहम्	५	४६	२१
महामात्रवचः श्रुत्वा	२	३७	१
महामेघसमप्रख्यम्	२	१५	३६
महायज्ञे तदा तस्य	२	११८	३६
महारजतवासोभ्याम्	२	६६	२२
महारत्नसमाकीर्णम्	५	६	१४
महाराजकुलीनेन	२	८८	३
महाराजाङ्गनं शूरः	२	३	२०
महारोम्णस्तु धर्मात्मा	१	७१	१२
महार्हक्षौमसंवीतं	५	४६	४
महार्हवस्त्रसंबद्धः	२	१२	६८
महार्हाणि च पानानि	५	२०	१०
महार्हाणि च यानानि	४	५०	३६
महालतानां दामानि	५	१४	२०
महावनेपि चरतः	२	२५	१६
महावातसमुद्भवम्	२	३०	१३
महाविघ्न. प्रवृत्तोऽयम्	१	६१	२
महाविमर्दं समरे	६	७६	७६
महावीर्यौ महातेजाः	१	७०	३५
महावृन्दसहस्रेण	६	२८	३६
महाशैलगुहावासाः	४	३७	६
महासत्त्वो महातेजा	४	६६	१६
महाह्रदमिवाक्षोभ्यम्	२	४२	२५
महिषैः सूमरैः [illegible]हैः	७	३१	२०
महिषो दुन्दभिर्नाम	४	११	७
महीकृता पर्वतराजिपूर्णा	५	७	६
महीतलगतास्ते तु	७	२३	३३
महीतलात्केचिदुदीर्णवेगाः	५	६१	१८
महीतले स्वर्गमिव प्रकीर्णम्	५	७	६
महीध्रकसुतो राजा	१	७१	११
महीपालाश्च सर्वे त्वाम्	७	८३	११
महीमहमियां कृत्स्नाम्	२	१	४०
महीं कालमहीं चापि	४	४०	२२
महीं जग्मुर्महावेगाः	६	५८	३८
महीं संछाद्य निष्क्रान्तम्	७	१६	१३

	का०	स०	श्लो०
महेन्द्रकान्तां वनषण्डमण्डि०	४	४०	७१
महेन्द्रदत्तैः श्रीसद्भिः	४	३३	१६
महेन्द्रध्वजसंकाशः	२	६१	७
महेन्द्रपुत्रं पतितम्	४	१७	११
महेन्द्रमथ संप्राप्य	६	४	६२
महेन्द्रमेघसंकाशः	५	५७	१५
महेन्द्रश्च कृतो राजा	६	११७	२७
महेन्द्रसद्मप्रतिमं च वेश्म	२	१५	४४
महेन्द्रहिमवद्विन्ध्य	४	३७	२
महेन्द्राय पुनः प्रादात्	१	२६	२१
महेश्वरगृहप्रख्यम्	७	५	२१
महेश्वरसखित्वं तु	७	१३	३६
महोत्सवसमायुक्ताम्	२	१४	२८
महोदरमहापार्श्वौ	६	६६	१
महोदरवचः श्रुत्वा	६	६०	८३
महोदरस्तु संक्रुद्धः	६	७०	२७
महोदरस्य च तथा	५	६	१६
महोदरं तु विनिपात्य भूमौ	६	६७	३६
महोदरं प्रहस्तं च	७	१	३१
महोदरं महापार्श्वम्	६	६५	५
महोदरः सुसंक्रुद्धः	६	६७	६
महोदरा महादंष्ट्रा	५	४२	२६
महोदरे तु निहते	६	६८	१
महोदरोऽयं रामात्तु	६	६५	१०
महोरस्को महेष्वासः	१	१	१०
महोर्मिजालचलितः	६	२१	२६
महौजसा वीर्यभयः	६	२६	३४
महौजसो महावीर्या	५	२	३२
महौषध्यस्ततः सर्वाः	६	७४	६०
मागधांश्च महाग्रामान्	४	३०	२३
माङ्गल्यं मङ्गलं सर्वम्	६	११२	२१
मां च दृष्ट्वा वने तस्मिन्	५	५८	११
मां च पञ्चत्वमापन्नम्	२	१२	७३
मां तु ज्येष्ठं पिता राज्ये	१	७१	१४
मां तु दृष्ट्वा प्रधावन्तम्	६	४६	४२
मां तु शोकाभिसंतप्तम्	४	१	५

	का०	स०	श्लो०
मां तूर्णमनुसंप्राप्तौ	३	६८	४६
मां त्वं प्रोत्साहिता पापैः	२	३५	३०
मां दृष्ट्वा नागनासोरू	५	२०	२
मां नियोजय विक्रान्तम्	३	२७	२
मां निवर्तयितुं योऽसौ	६	१२१	१९
मां निहत्य किल त्वा हि	६	६३	४०
मां निहत्य तु रामोऽसौ	३	४१	१७
मां पुनर्मृगशावाक्ष्या	४	१	१०१
मां प्रधृष्य स ते कालः	३	५६	१७
मां प्राप्य हि गुणो दोषः	३	६४	५३
मां भजस्व चिराय त्वम्	३	४९	१२
मां वा गृह्णीयुरावृत्य	५	३०	२९
मां वा हरेयुस्त्वद्धस्तात्	५	३७	५५
मां समाह्वयत क्रुद्धः	४	१०	१४
मांसशोणितदिग्धाङ्गीः	५	१७	१७
मांसशोणितभक्ष्याभिः	५	५८	५९
मांसशोणितसंक्लेदाम्	६	६७	३७
मांसहेतोरपि मृगान्	३	४३	९१
मांसशिनश्च ये सत्त्वाः	७	१००	२२
मांसैः कुशलसंयुक्तैः	५	११	२५
मां हि धर्मात्मनः पत्नीम्	५	२२	१४
मां हि पल्लवताम्राक्षि	४	१०	३०
मां हि शोकसमाक्रान्तम्	४	१	२३
मा च तं व्यूढबाह्वंसम्	२	७५	२९
मा च बुद्धिमधर्मे त्वम्	७	४०	११
मा च लक्ष्मण संतापम्	२	२२	२९
मा चास्मै प्रोषितं रामम्	२	६८	८
मा चोत्कण्ठां कृथा देव	२	३४	५१
माणिक्यकृतसोपानाः	७	४२	११
मातङ्ग इव सिंहेन	६	६०	२
मातङ्गयास्त्वथ मातङ्गाः	३	१४	२६
मातङ्गयूथानुसृतम्	२	५६	१०
मातङ्गरथकूलाश्च	६	९३	११
मातङ्गीमथ शार्दूलीम्	३	१४	२२
मातर चैव मे ताराम्	४	५५	१५
मातरं चैव वैदेह्या	३	६४	१२
मातरं पितरं चोभौ	२	६३	३१

	का०	स०	श्लो०
मातरं पितरं विप्रम्	७	१५	२१
मातरं मां च संपश्यन्	२	३४	३४
माता च मम कौसल्या	२	२६	३१
माता च मम कौसल्या	२	५८	१७
माता ते पितरं देवी	२	३५	२३
मातापितृसुतस्नेह	७	२०	१४
मातापित्रोर्विनाशेन	५	१३	२९
मातामहस्य योऽस्माकम्	७	२५	२२
माता मातङ्गसंकाशम्	२	७२	२३
मातास्मत्कारणाद्देवी	२	५३	१६
मातुस्तद्वचनं श्रुत्वा	७	९	४४
मातुः कुलं पितृकुलम्	७	९	११
मातृरूपे ममामित्रे	२	७४	७
मातृष्वसुरथास्माकम्	७	२५	२४
मातृश्चापि नरश्रेष्ठः	१	७७	१९
मात्रा प्रतिहते राज्ये	३	७०	१४
मात्मनः संततिं द्राक्षीत्	२	७५	३६
मादनं चैव दुर्धर्षम्	१	२७	१६
माननीयो मम त्वं हि	७	२६	३८
मानयन्तु भवन्तो माम्	७	४५	२२
मानयंस्तं महात्मानम्	४	९	२५
मानवं परमोदारम्	१	३०	१७
मानवं मोहनं चैव	१	५६	७
मा निषाद प्रतिष्ठां त्वम्	१	२	१५
मानुषं कृपणं रामम्	६	३६	४
मानुषं देहमुत्सृज्य	७	११०	२४
मानुषं धारयन्रूपम्	५	१	१०४
मानुषं मांसमासाद्य	५	२४	४५
मानुषाणामविषये	६	१११	७
मानुषान्न गणे देव	७	१६	४२
मानुषी मानुषं तं तु	५	२४	५
मानुषे मानुषस्यैव	५	२४	३
मानुषौ तौ न शक्नोषि	३	२१	१९
मानुषौ शस्त्रसंपन्नौ	३	१९	२२
मानुष्ये चिन्तयामास	१	१५	३१
मान्धातुस्तु महातेजाः	२	११०	१४
मान्धातुस्तु सुतः श्रीमान्	१	७०	२६

	का०	स०	श्लो०
मान्या गुरुविनीतस्य	५	१६	३
मान्यो गुरुरिवाचार्यः	६	६३	२३
मा भूत्ते विफला वाणी	७	६१	१३
मा भूत्स कालो दुर्मेधः	१	३२	२१
मा भूत्स कालो यत्कष्टम्	२	८५	६
मामकैर्वा बलैर्ब्रह्मन्	१	२०	१४
मामनाथां विहायैकाम्	४	२३	८
मामनिर्जित्य दुर्बुद्धे	५	३	३६
मामप्यवगतं धर्मात्	४	१८	४८
मामाश्रितानि कान्याहुः	७	४३	५
मामाह सुहृदां मध्ये	४	१०	१३
मा मां स्पृश बलाद्राजन्	७	८०	६
मामिकेयं तनुर्नूनम्	७	३८	३
मामिहोत्सृज्य करुणम्	३	६१	१०
मामृक्षा भक्षयिष्यन्ति	३	४	३
मामेवं हि पुरा वीर	३	६६	१७
मामेष वरदो राम	३	५	२८
मायया मम वत्सेन	६	६२	३४
मायया रमतां नित्यम्	२	७५	५१
मायाविदश्च शूरांश्च	१	१७	३
मायावी नाम तेजस्वी	४	६	४
मायावी प्रथमस्तात	७	१२	१३
मायां प्रविष्टो मायावी	५	३४	१४
मायूरकाः क्रकचिका	२	८३	१३
मारीचकुम्भकर्णाभ्याम्	६	१११	७८
मारीचदर्शन चैव	६	१२४	११
मारीच श्रूयतां तात	३	३६	१
मारीचश्च प्रहस्तश्च	७	११	२
मारीचश्च प्रहस्तश्च	७	२७	२८
मारीचश्च सुबाहुश्च	१	१६	५
मारीचश्च सुबाहुश्च	१	३०	१२
मारीचस्य तु तद्वाक्यम्	३	४०	१
मारीचस्य तु मायैषा	३	त४	२३
मारीचस्यैव हृदयम्	३	४४	१६
मारीचान्मे भयं घोरम्	३	३८	५
मारीचेन तु विज्ञाय	३	५७	५
मारीचो राक्षसः पुत्रः	१	२४	२७

	का०	स०	श्लो०
मारुतस्य समो वेगे	४	६७	२७
मारुतस्यौरस पुत्रः	४	६६	३०
मारुतस्यौरसः श्रीमान्	१	१७	१६
मारुतः सुखसंस्पर्शः	६	४	७५
मारुतेन तदा वत्स	५	५८	१७
मारुतोद्धूतशिखरैः	२	६५	८
मा रुदो मा रुदश्चेति	१	४६	२०
मार्कण्डेयोऽश मौद्गल्यः	२	६७	३
मार्कण्डेयोऽथ मौद्गल्यः	७	७४	४
मार्गणैर्बहुभिर्युक्तः	६	१०७	५६
मार्गध्वं गिरिदुर्गेषु	४	४०	२०
मार्गमाणस्तु तां देवीम्	५	५१	८
मार्गमाणस्तु वैदेहीम्	५	६	३
मार्गमाणस्तु वैदेहीम्	६	१२६	३४
मार्गमाणो वने सीताम्	१	१	५५
मार्गमाणो वरारोहाम्	५	१४	६
मार्गमालोकयन्दूरात्	५	१	३५
मार्गं निरोद्धं सततम्	३	११	८५
मार्गानुगः शैलवनानुसारी	४	२८	३२
मार्जारा द्वीपभिः सार्धम्	६	३५	३०
मार्तण्डस्त्वब्रवीत्तत्र	७	३६	१३
मालतीकुन्दगुल्मैश्च	३	७५	२४
मालतीकुन्दगुल्मैश्च	४	२७	१०
मालिनं निहत दृष्ट्वा	७	७	४५
मालिनं विमुखं कृत्वा	७	७	३६
मालेर्धनुश्चयुता बाणाः	७	७	३२
मालेस्तु वसुदा नाम	७	५	४१
माल्यमोदकहस्तेश्च	२	७	४
माल्यवद्भुजनिर्मुक्ता	७	८	१०
माल्यवन्त सुमालि च	७	५	६
माल्यवन्तं स्थितं दृष्ट्वा	७	८	६
माल्यापणेषु राजन्ते	२	७१	४१
मावमंस्था दशरथम्	२	३५	८
मा विषादं महाबुद्धे	३	६१	१४
मा वीरभार्ये विमतिं कुरुष्व	४	२४	४२
मा शुचः पुरुषव्याघ्र	७	५२	१०
मा शोकं मा च संतापम्	२	७२	५३

	का०	स०	श्लो०
मा शोको देवि दुःखं वा	२	४४	२४
माषराशिप्रतीकाशम्	५	१०	२८
मासं स स्त्री तदा भूत्वा	७	८६	२२
मासं स्त्रीत्वमुपासित्वा	७	८७	२७
मासि प्रौष्ठपदे ब्रह्म	४	२८	५४
मा स्म प्रासं वृथा वीर	३	६६	४२
मा स्म सीमन्तिनी काचित्	२	५३	२१
मा स्मैनं प्रत्युदीयेथाः	२	६	२३
मास्य धर्मे मनो भूयात्	२	७५	४२
माहेश्वरमिदं सत्रम्	७	१८	१६
माहेश्वरे प्रवृत्ते तु	७	२५	६
मितं ददाति हि पिता	२	३६	३०
मितं व्यक्ताक्षरपदम्	४	११	२६
मित्रं चैवोपदेक्ष्यामि	३	७१	२०
मित्रं ह्यर्थगुणश्रेष्ठम्	४	३३	४८
मित्रकार्यं कृतमिदम्	४	१२२	१४
मित्रभावेन संप्राप्तम्	६	१८	३
मित्रमौपयिकं कर्तुम्	५	२१	१६
मित्राटविबलं चैव	६	१७	२४
मित्राणां सग्रहः शेषः	४	२६	१०
मित्रावरुणजं तेजः	७	५६	१०
मिथिलाधिपतिर्वीरः	२	११८	२७
मिथिलामप्युपागम्य	१	६६	१८
मिथिलोपवने तत्र	१	४८	११
मिथ्या प्रव्राजितो रामः	२	४८	२८
मीनोपसंदर्शितमेखलानाम्	४	३०	५४
मुक्तमिन्द्रजिता तत्तु	६	६०	२३
मुक्तवर्षमिवाकाशे	६	८८	७
मुक्तस्तु वज्रनिर्घोषः	४	१६	३५
मुक्ताप्रवालसिकताः	५	१४	२३
मुक्तामणिचितं चेदम्	३	६४	४३
मुक्तामणिविचित्राङ्गम्	३	४२	३३
मुक्तामणिविचित्रेण	५	१०	२५
मुक्तामणिसमायुक्त	५	१०	५१
मुक्तावैदूर्यचित्राणि	४	४३	४५
मुक्तासमाभं सलिलं पतद्वै	४	२८	३५
मुक्ताहारवृताश्चान्याः	५	६	४६

	का०	स०	श्लो०
मुक्ताहारं नरेन्द्राय	६	१२८	७१
मुक्त्वा वज्रहृदौ मह्यम्	५	६७	३१
मुखं ते प्रेक्ष्य मां शोकः	२	१०४	२६
मुखं द्रक्ष्यन्ति रामस्य	२	६४	६६
मुखं नासिकया तस्य	५	१	५८
मुखतो ब्राह्मणा जाताः	३	१४	३०
मुखवर्णं विवर्णं तु	२	१२	६३
मुख्यैर्यज्ञैर्यजन्त्येते	६	३५	७६
मुख्यो वानरमुख्यानाम्	६	२७	३८
मुचुकुन्दार्जुनाश्चैव	४	१	८१
मुञ्चन्ति कुसुमान्येते	२	६३	१०
मुञ्च मां साधु धर्मज्ञ	७	२२	२६
मुञ्च मुञ्चेति भाषन्तः	७	३२	६६
मुदा परमया युक्तः	७	३	५
मुदितप्रमदारत्नम्	५	६	१०
मुद्गराः कूटपाशाश्च	६	१००	४
मुद्गरैराय-ते शूलैः	३	२५	८
मुद्गरैर्मुसलैश्चापि	६	६०	४७
मुद्गरैः पट्टिशैः शूलैः	३	२२	१८
मुद्गरैः पट्टिशैः शूलैः	५	४२	२६
मुनयश्च महात्मानः	२	५६	१५
मुनयः सलिलाहाराः	३	६	४
मुनिगुप्तौ च काकुत्स्थौ	१	६७	२६
मुनिमव्यक्तया वाचा	२	६४	११
मुनिवेषं सहस्रक्षः	१	४८	१६
मुनीनामन्यथा कर्तुम्	३	१०	१८
मुनेर्वचनमक्लीबम्	१	२६	१
मुनेस्तद्वचनं श्रुत्वा	१	६२	१३
मुनेस्तपस्विनस्तस्य	७	२	१२
मनेस्तु भाषितं श्रुत्वा	७	१०५	३
मुनेस्तु वचनं श्रुत्वा	१	३८	१३
मुमुचुर्वैद्युतानग्नीन्	६	२२	१२
मुमूर्षवो हरिश्रेष्ठाः	४	५५	२१
मुमोच च दशग्रीवः	६	१०७	२१
मुमोच च महातेजाः	६	६६	३७
मुमोच च शरान्घोरान्	६	८८	५१
मुमोच च शिलाः शैल	५	१	१६

	का०	स०	श्लो०
मुमोच ज्वलितं दीप्तम्	३	४४	१५
मुमोच निशितान्बाणान्	६	१०७	३८
मुमोच यदि रामाय	३	५४	३
मुमोच राघवः प्राणान्	३	२०	२०
मुमोच राघवः वीरः	६	१०७	४३
मुमोच लीलया कङ्क	३	२५	१८
मुमोच सलिलोत्पीडान्	४	६७	४४
मुरजपणवमेघघोषवत्	२	५६	४१
मुरजेषु मृदङ्गेषु	५	११	६
मुष्टिनाऽभिहतस्तेन	६	७६	६१
मुष्टिना शरभं हत्वा	६	६७	२८
मुष्टिप्रहाराभिहतः	६	६६	२६
मुष्टिप्रहारैश्च तलप्रहारैः	६	४०	१५
मुष्टिभिर्जानुभिः पद्भिः	४	१६	२६
मुष्टिभिर्बाहुभिः पद्भिः	३	४	७
मुष्टिभ्यां च कराभ्यां च	६	६७	१२१
मुसलानि विचित्राणि	७	२३	४४
मुहुरूर्ध्वंपथं गत्वा	१	४३	२५
मुहुर्मुहुश्च वैदेहीम्	७	४६	१६
मुहूर्तं चिन्तयामास	२	१०	४
मुहूर्तं त्वरितं गत्वा	२	४६	३१
मुहूर्तं ध्यानमास्थितः	६	६२	२
मुहूर्तं भव सौमित्रे	३	२०	४
मुहूर्तं विघ्नमाचर	५	१	१३८
मुहूर्तमथ विश्रान्तौ	१	२६	२८
मुहूर्तमपि राम त्वाम्	७	८२	१०
मुहूर्तमासीत्स गतासुकल्पः	६	७०	६०
मुहूर्तात्क्रोधताम्राक्षः	७	२६	५३
मुहूर्तात्लब्धसंज्ञस्तु	६	६८	१०
मुहूर्तात्लब्धसंज्ञस्तु	७	६६	१६
मुहूर्तेन यमं ते तु	७	२२	८
मुहूर्तेनावृता भूमिः	६	६६	५५
मूढोऽप्रगल्भोऽविनयोपपन्नः	६	१५	१२
मूर्धा तु सप्रधा तस्य	७	२६	५६
मूर्ध्नि चैवमुपाघ्राय	६	६१	१२
मूर्ध्नि राममुपाघ्राय	१	२६	३३
मूर्ध्नि स्थास्याम्यहं यत्तः	६	२४	१७

	का०	स०	श्लो०
मूलं ह्येष मनुष्याणाम्	२	३३	१५
मूलपत्रफलैः सर्वाः	७	८८	२३
मूलमर्थस्य संरक्ष्यम्	४	६५	२५
मृगं हत्वाऽऽनय क्षिप्रम्	२	५६	२३
मृगपक्षिगणाश्चैव	१	३१	१८
मृगपक्षिभिरासीनः	२	५४	१६
मृगयूथनिपीतानि	२	६५	५
मृगयूथपतिभ्रष्टाम्	३	५५	५
मृगयूथैरनुगतः	३	४२	२७
मृगसिंहमुखैर्युक्तम्	६	५१	२८
मृगाः प्रशमयन्त्येते	१	७४	१३
मृगाः सिंहा गजाश्चैव	२	२६	३
मृगाणां महिषाणां च	५	११	१४
मृगाणां महिषाणां च	६	६०	३२
मृगा मृगीभिः सहिता	२	६३	१६
मृगीवोत्फुल्लनयना	२	३३	८
मृगो भूत्वाऽऽश्रमद्वारि	३	४२	१५
मृगो ह्येवंविधो रत्न	३	४३	८
मृतसंजीवनीं चैव	६	७४	३३
मृतायामपि वैदेह्याम्	३	६६	१३
मृते मयि गते त्वयि	३	५८	७
मृते मयि गते रामे	२	१२	८६
मृते मयि गते रामे	२	१२	६३
मृते मयि गते रामे	२	१३	५
मृत्युं चतुर्भिर्विशिखैः	७	२२	२०
मृत्युकाले यथा मर्त्यः	३	५३	१७
मृत्युकालोपमस्याज्ञाम्	४	३७	१६
मृत्युतस्ते भयं नास्ति	७	१८	२६
मृत्युदण्डमहाग्राहम्	६	७	१३
मृत्युमापादितो राजा	२	७३	५
मृत्युं मरणधर्मेण	३	२३	२१
मृत्युं मर्त्येन लम्भितः	६	११०	१६
मृत्यो प्रसादयामि त्वाम्	७	२४	१५
मृदङ्गवीणापणवान्	७	७७	१३
मृदिताश्चापविद्धाश्च	२	६४	२५
मृदुं लोकहिते युक्तम्	३	६४	५५
मृदुर्नित्यं शुचिर्दक्षः	५	३८	६२

	का०	स०	श्लो०
मृदुशष्पाङ्कुराहारान्	४	१३	६
मृदुश्च स्थिरचित्तश्च	२	२	३२
मृदुष्वङ्गेषु कासांचित्	५	६	५२
मृदुसूर्याः सुनीहाराः	३	१६	११
मृष्टमन्नमुपानीतम्	१	१८	३१
मेखलादामभिश्चित्रैः	२	७८	७
मेघकृष्णाजिनधरा	४	२८	१०
मेघनादमसबाधम्	२	१६	२६
मेघपर्वतसंकाशात्	४	३७	१४
मेघप्रतिमनादेन	३	३५	७
मेघश्यामं महाबाहुम्	२	८३	८
मेघस्तनितनिर्घोषान्	५	६	३४
मेघाभिकामा परिसंपन्ती	४	२८	२३
मेघाभै पर्वताभैश्च	६	२२	६१
मेघाम्बुसिक्तो वर्षासु	७	१०	४
मेघाः क्रव्यादसंकाशाः	६	२३	५
मेघाः क्रव्यादसंकाशाः	६	४१	१४
मेघाः समुद्भूतसमुद्रनादाः	४	२८	४४
मेघोदरविनिर्मुक्ता	४	२८	८
मेदोवसाशोणितदिग्धगात्रः	६	६७	६६
मेधावी तु ततो ध्यात्वा	१	१५	१
मेनिरे वज्रनिष्पेषम्	७	१६	३०
मेरुमन्दरसंकाशः	५	३७	३७
मेरुमन्दरसंकाशा	५	६१	३
मेरुमन्दरसंकाशान्	५	१	७०
मेरुमन्दरसंकाशैः	५	६	१४
मेरुशृङ्गसम सूतः	२	१५	३७
मेरो. पार्श्वे महागिरेः	७	२	७
मैथिलस्य नरश्रेष्ठ	१	३१	६१
मैथिली तु हरिश्रेष्ठा	५	३७	३०
मैथिलीमाहृतां दृष्ट्वा	६	१११	७१
मैथिली रक्ष्यमाणा तु	६	६२	४३
मैथिली रूपसंपन्नाम्	६	६२	६१
मैथिलीं सान्त्वयस्वैनाम्	६	१२०	२०
मैथिलीं हन्तुमारब्धः	५	५८	७६
मैथिलो जनको राजा	१	६८	४
मैथिल्यन्वेषणं चैव	६	१२५	६

	का०	स०	श्लो०
मैनाकमिति विख्यातम्	५	५८	१४
मैन्दं च द्विविदं चैव	४	४१	४
मैन्दं च द्विविदं नीलम्	६	७३	५६
मैन्दं नलं ज्योतिमुखम्	६	७४	११
मैन्दश्च द्विविदश्चैव	४	५०	६
मैन्दश्च द्विविदश्चोभौ	४	३६	२५
मैन्दश्च द्विविदश्चोभौ	६	५	२
मैन्दश्च द्विविदश्चोभौ	६	३१	२८
मैन्दश्च परमक्रुद्धः	६	५५	३१
मैन्दस्तु भ्रातरं तत्र	६	७६	४२
मैन्दस्तु वानरस्तत्र	४	६५	७
मैरेयांश्च वरासवान्	१	५३	२
मोक्तुं तद्बन्धनं घोरम्	६	७२	७
मोक्षितं चात्मनो दृष्ट्वा	६	६६	३०
मोक्षितं भ्रातरं दृष्ट्वा	६	१००	२७
मोक्षितं सोऽपि रामेण	६	२६	२७
मोक्षितस्ते बलश्लाघिन	६	१००	२८
मोक्षितौ च महाघोरात्	६	५०	५२
मोक्ष्यामि शत्रुसैन्येषु	२	६६	२८
मोघं हि धर्मश्चरितो०	५	२८	१३
मोचितो रामवाक्येन	६	२४	२४
मोहनार्थं तु पौराणाम्	२	४६	३०
मोहनार्थं तु सर्वेषाम्	६	८१	६
मोहमापेदिवान्भूयः	२	१२	६
मोहमेतौ प्रहास्येतें	५	४६	३२
मोहितास्तपसा तस्य	१	६५	१०
मोहितां राक्षसेन्द्रेण	६	३३	२
मौनं वर्षसहस्रस्य	१	५६	२
मौर्ख्यात्पूर्वं कृतो रोष	५	६४	८
(य)			
य एते राक्षसाः प्रोक्ताः	३	५६	६
य एनमभिसरब्धम्	६	२७	१५
य एष निशितैः शूलैः	६	७१	१३
य एष रक्ष शार्दूलः	६	७१	१६
यकृत्प्लीहमहापङ्क्ताम्	६	५८	३०
यक्षत्वममरत्वं च	३	११	६३
यक्षाणां तु प्रहस्तेन	७	१५	७

	का०	स०	श्लो०
यक्षा न शेकुः संस्थातुम्	७	१४	५
यक्षिण्या घोरया राम	१	२४	३२
यक्ष्ये त्वां गोसहस्रेण	२	५५	२०
यच्च किंचन तत्सर्वम्	७	८७	१४
यच्च तस्य महाच्छूलम्	७	६३	२५
यच्च तिर्यग्गतं किंचित्	७	११०	१६
यच्च तेन पुरा शुभ्रम्	७	७०	१२
यच्च ते सुकृतं कर्म	३	५५	२८
यच्च पापं कृतं मोहात्	६	४१	६३
यच्च मे हृदये किंचित्	७	५३	३
यच्च शोकाभिभूतस्य	४	३६	२०
यच्चान्यत्किंचिदेष्टव्यम्	२	३	१२
यच्चापि मन्यते भवान्महात्मा	४	२४	३७
यच्चैतच्चरितं दिव्यम्	७	४०	१८
यजन्पुण्येषु देशेषु	२	३६	८
यजस्व ध्रुवसंधेस्तु	१	७०	२७
यजुर्वेदविनीतश्च	५	३५	१४
यज्वनो महिषीं ये माम्	६	४८	३
यज्ञं चकार सुमहान्	१	२६	६
यज्ञवाटं गताः सर्वे	१	१३	४१
यज्ञवाटं महाबाहुः	७	६२	३
यज्ञवाटगताश्चापि	७	६७	२३
यज्ञविघ्नकरौ तौ ते	१	२०	२६
यज्ञशत्रुश्च दुर्धर्षः	६	४४	२०
यज्ञस्यान्ते नरश्रेष्ठ	१	६६	१३
यज्ञार्थं प्रसवार्थं च	१	११	६
यज्ञियं च कृतं सर्वम्	१	१३	३७
यज्ञियं च हयं तत्र	१	४१	१४
यज्ञोपवीतमार्गेण	६	८१	३०
यज्ञोपसदनं ब्रह्मन्	१	५०	१५
यज्ञो मे क्रियतां ब्रह्मन्	१	१३	३
यतस्व मुनिशार्दूल	१	६३	२२
यतो मूलं नरः पश्येत्	२	१८	१६
यतो हि ददृशाते तौ	६	८०	३२
यत्करोति परं धर्मम्	३	६	१४
यत्कर्तव्यं मनुष्येण	६	११५	१३
यत्किंचित्कारिणा त्वया	६	३५	१७
यत्कृते च वयं लङ्काम्	७	११	५
यत्कृते चिन्तयानस्य	६	४६	१४
यत्कृते पितरः पुत्रान्	१	६२	६
यत्कृत्वा न भवेद्धर्मः	३	५०	१६
यत्तत्प्रेतस्य मर्त्यस्य	३	६८	३४
यत्तत्र भवतः किंचित्	२	१६	२१
यत्तदा दण्डकारण्ये	६	७६	११
यत्तदाभिप्रसन्नेन	६	६२	३०
यत्तदुक्तं त्वया वाक्यम्	५	३३	२१
यत्तन्मधुवनं नाम	५	६१	८
यत्तादृशं चारुरवम्	१	२	२६
यत्ता भवन्तस्तिष्ठन्तु	२	६३	२५
यत्तु कार्यं मनुष्येण	६	२	१४
यत्तु कार्यं वयस्येन	६	१२२	१५
यत्तु पौरजने राजन्	७	४८	१६
यत्तु फल्गु बलं किंचित्	६	४	१३
यत्तु मां त्वमभाषिष्ठाः	७	२७	१७
यत्तु मे हृद्यं वाक्यम्	१	१६	३
यत्तु रामो विजानीयात्	५	४०	१७
यत्तु वीर्यबलोत्साहैः	६	६७	११०
यत्ते देवगणैर्वन्द्यौ	७	३३	१२
यत्तैश्च खलु भाव्यं स्यात्	५	४६	५
यत्त्वं कथमिदं मोहात्	६	१०४	७
यत्त्वया करुणं कर्म	२	६१	१०
यत्त्वया धार्मिको रामः	२	७४	१०
यत्त्वया हीदृशं पापम्	२	७४	५
यत्त्वयोक्तं विनष्टानाम्	३	३०	४
यत्त्वशक्यं बलवता	६	६४	५
यत्त्विदं भवता किंचित्	२	५०	४३
यत्नवन्तो यवद्वीपम्	४	४०	३०
यत्ववांश्च स दुष्टात्मा	४	८	३४
यत्नान्मृग्यमाणस्तु	३	६०	१०
यत्नेन महता भूयः	५	६१	१३
यत्प्रधानासि तत्पापम्	२	७४	११
यत्र गच्छत्युपादातुम्	३	६	२०
यत्र जातो महातेजाः	१	३६	१६
यत्र तिष्ठति धर्मज्ञः	४	४२	४८

	का०	स०	श्लो०
यत्र तिष्ठाम्यहं तत्र	३	४८	८
यत्र ते सुकृतात्मानः	३	७४	३५
यत्र त्रयं त्रयो लोकाः	२	३०	३४
यत्र त्वं राक्षसेन्द्रेण	६	१२३	४५
यत्र भागीरथीं गङ्गाम्	२	५४	२
यत्र यत्र च याति स्म	७	३१	४२
यत्र यत्र वनोद्देशे	७	८७	१३
यत्र रामसखा वीरः	२	८३	२०
यत्र वन्ध्यफला वृक्षाः	४	४८	८
यत्र सागरमुत्तीर्य	६	१२३	१६
यत्राहं सक्षयिष्यामि	७	५४	९
यत्राहमपि तेनैव	२	१०५	३७
यैत्राहमाभिः क्रूराभिः	५	२५	१३
यत्रैतदिन्दुप्रतिमं विभाति	६	५९	२४
यत्सृष्टासि मया सार्धम्	२	३०	२९
यथा काष्टं च काष्ठं च	२	१०५	२६
यथाक्रमं तदा पाणिम्	१	३३	२२
यथाक्रमं तैः स कापिश्च पृष्टः	५	४८	६१
यथाक्रमेण शपसे	२	११	१३
यथा क्षेमेण संपश्यन्	२	५४	४
यथाख्यातमगस्त्येन	३	१५	१२
यथागतं द्विजाः सर्वे	७	९०	२१
यथागमं च यो राजा	६	६३	८
यथाऽऽगारं दृढस्थूणम्	२	१०५	१८
यथा ग्रामान्तरं गच्छन्	२	१०८	५
यथा च तव कैकेयी	२	५२	३५
यथा च निहते तस्मिन्	६	१२४	१५
यथा च मन्ये दुर्जीवम्	२	५७	२२
यथा च स महाबाहुः	५	३०	१०
यथा च स महाबाहुः	५	३९	९
यथा च स महाबाहुः	५	४०	२३
यथा च स महाबाहुः	५	६७	४२
यथा चारोपितो वृक्षः	६	१२८	६
यथा चेच्छति सौमित्रे	३	३	२३
यथा जरा यथा मृत्युः	३	६४	७५
यथाज्ञप्तं महाबाहो	६	८५	५
यथाज्ञं कुरु सौमित्रे	७	४८	९

	का०	स०	श्लो०
यथा तस्याप्रमेयस्य	५	३०	६
यथा तं पुरुषव्याघ्रम्	५	४०	३
यथा तातं दशरथम्	६	५०	४३
यथा तु रोपितो वृक्षः	२	१०५	८
यथा त्वमसि दुर्धर्षः	७	३७	८
यथा त्वया कृतं कर्म	३	५१	२९
यथा त्वय्यङ्गदो नित्यम्	४	१८	६४
यथा त्वं न प्रजानाति	७	६४	८
यथा दशरथस्येयम्	१	७२	१६
यथा दूतैस्त्वमानीतः	६	१२६	६
यथा दृप्तश्च मातङ्गः	५	२२	१६
यथा दृष्टिः शरीरस्य	२	६७	३३
यथा देवेश्वरो नित्यम्	७	३७	२३
यथा नगाग्रं बहुधातुचित्रम्	५	७	८
यथा नन्दति तेजस्वी	२	१४	४७
यथा निगदितं मात्रा	२	२४	१०
यथानुयाने काकुत्स्थ	२	१०५	१२
यथा नैनां पुमान्स्त्री वा	३	५४	१५
यथान्यः पुरुषः कश्चित्	२	६३	१३
यथान्ये विविधैः रोगैः	७	१८	२५
यथापवादः पौराणाम्	७	४८	१७
यथापसव्यं पतता	६	१०६	१०
यथापुरमविज्ञाय	२	१०	२०
यथापुराणि ते गत्वा	७	३९	८
यथा पुष्करपत्रेषु	६	१६	११
यथापूर्वं गजः स्नात्वा	६	१६	१५
यथा प्रतिज्ञातमिदं नरेन्द्र	४	२४	४
यथा प्रव्राजितो रामः	६	१२६	५
यथाफलानां पक्वानाम्	२	१०५	१७
यथा बलौ निरुद्धे च	७	२९	१४
यथा बाणपतं प्राप्य	६	८८	१६
यथा ब्रवीषि हनुमन्	४	३	३८
यथा भ्रातृषु वर्तेथाः	७	४८	१५
यथा मधुकरस्तर्षात्	६	१६	१३
यथा मधुकरस्तर्षात्	६	१६	१४
यथा मनुर्महातेजाः	१	६	४
यथा महद्भिर्हरिभिः	७	९१	१०

	का०	स०	श्लो०
यथा मां शुद्धचारित्राम्	६	११६	२६
यथा मृतस्तथा जीवन्	२	१०६	४
यथा मे हृदयं नित्यम्	६	११६	२५
यथा यथा दाशरथिः	२	४५	११
यथा यथा समीपं सः	५	३४	६
यथा यथा सान्त्वयिता	५	२२	२
यथा रामे तथा तस्मिन्	२	१०४	२१
यथारूपा हि दृष्टा सा	५	१५	२८
यथार्हमजपन्सन्याम्	१	२३	२१
यथार्हमृषिभि सर्वैः	१	५०	१०
यथार्हं चक्रिरे पूजाम्	१	२६	२७
यथार्हं चापि संपूज्य	२	१७	८
यथार्हं पूजितास्तेन	१	१८	३
यथार्हं पूजिताः सर्वे	६	१२८	८६
यथा लब्धेन कर्तव्यः	२	२८	१७
यथा वक्ष्यसि धर्मज्ञ	१	६६	१५
यथावत्पूजितस्तेन	१	२	२
यथावयो हि राज्यानि	२	३५	६
यथावृत्तं तु विज्ञाय	७	१३	११
यथा वै भरतो मान्यः	२	८	१८
यथा वै मृगसंघाश्च	३	५७	२१
यथाशक्तिप्रदानेन	२	१११	१०
यथाशक्ति मयोक्तं तु	६	१७	६८
यथा शची महाभागा	५	२४	१०
यथाशनिरवेभ्यरतु	७	३२	५५
यथा शरदि मेघानाम्	६	१६	१२
यथा शरीरो बालस्य	७	७५	४
यथा शुष्काण्यरण्यानि	६	६७	३६
यथा श्रुत्वैव न चिरात्	५	५८	१०७
यथा सदृशदारेषु	१	१८	५१
यथा सर्वं सुविहितम्	१	१३	१७
यथासुखं पर्वतनिर्झरेषु	४	३६	४४
यथासुखं यथावच्च	६	३	५
यथा सुनयनं वक्त्रं	५	३६	३६
यथा सूर्यस्य सोमस्य	३	७१	२
यथा सेना समग्रा मे	४	२८	३०
यथासौ संप्रहृष्टानाम्	६	५१	३

	का०	स०	श्लो०
यथास्तं गत आदित्ये	६	६०	८१
यथाहमिक्ष्वाकुवरम्	५	२४	१३
यथाह वचनं सर्वम्	१	५६	१३
यथाहं तस्य वीरस्य	५	६८	१३
यथाह राघवादन्यम्	७	६७	१४
यथा हि कुर्याच्छत्रुर्वा	२	७	२८
यथा हि चोरः स तथा हि बुद्धः	२	१०६	३४
यथा हि तव वै दैन्यम्	५	३३	१३
यथा हि तेज सु वरः सदा रविः	४	११	६३
यथा हि त्वं महाबाहो	४	२२	२१
यथा हि रामो धर्मात्मा	४	३१	५१
यथा हि सार्धं गच्छन्तम्	२	१०५	२६
यथा हिमे वनस्यास्य	३	११	४८
यथा ह्यनुदका नद्यः	२	६७	२६
यथा ह्यपालाः पशवः	२	१४	५४
यथा मे पुरुषा नित्यम्	६	६	११
यथेष्टं भुङ्क्ष्व लोकांस्त्रीन्	७	२६	३५
यथैतत्सत्यमुक्तं मे	७	६७	१६
यथैते नियमं पौराः	२	४६	२०
यथैव ते पुत्र पिता तथाहम्	२	२१	५२
यथैव धेनुः स्रवति	५	६६	३
यथैव मां वनं यान्तम्	६	४६	१७
यथैव मां वनं यान्तम्	६	१०१	१२
यथैव राजा पूज्यस्ते	२	२१	२५
यथैव स्थावरं व्यक्तम्	६	८३	१६
यथैवाहमिहप्राप्तः	५	३७	२६
यथैषा रमते राम	३	१३	४
यथोक्तकारी वचनम्	४	३१	१२
यथोक्तमेतत्तव सर्वमीप्सितम्	४	२७	४७
यथोक्तवचनं प्रीतौ	२	३	२२
यथोक्तं तत्करिष्यामः	१	१३	१६
यथोक्तं लक्ष्मणेनैव	३	१२	७
यथोक्तास्तन्मया प्राप्तम्	६	६०	१२
यथोद्दिष्टानि सर्वाणि	४	४६	१४
यदग्निदायके पापम्	२	७५	४५
यदचिन्त्यं तु तद्दैवम्	२	२२	२०
यदत्रानन्तरं कार्यम्	१	३७	४

	का०	स०	श्लो०
यदत्रानन्तरं तत्त्वम्	३	१२	९
यदन्तरं काञ्चनसीसलोहयोः	३	४७	४६
यदन्तरं वायसवैनतेययोः	३	४७	४७
यदन्तरं सिंहशृगालयोर्वने	३	४७	४५
यदन्यथा भवेदेतम्	५	५८	१०८
यदब्रवीन्मां नरलोकसत्कृतः	२	१०१	२६
यदयं किल्मिषाद्भेदः	२	२३	१३
यदयं न्यायदृष्टार्थः	४	२१	७
यदर्थमयमारम्भः	४	३०	७७
यदर्थमयमारम्भः	५	५५	९
यदर्थं निर्जिता मे त्वम्	६	११५	२१
यदर्थं प्रतिषेधो मे	२	३१	८
यदर्थं मैथली त्यक्ता	७	५२	१५
यदर्थं वानरं सैन्यम्	६	१००	५१
यदवप्लुत्य विस्तीर्णम्	५	५७	४६
यदसौ मातुलकुले	२	६८	२
यदहं गात्रसंस्पर्शम्	५	३७	६३
यदहं गात्रसंस्पर्शम्	६	११६	८
यदहं तं मुनिवरम्	३	११	३४
यदहं नोपचारेण	२	५२	३८
यदहं पुत्रशोकेन	२	६४	६१
यदा क्षयं गत सर्वम्	१	४५	४२
यदाचरति कल्याणि	२	६३	६
यदा च रामः पृथिवीमवाप्स्यते	२	८	३८
यदा च शस्त्रं नारेभे	६	१०३	२८
यदा च शास्त्राण्यध्येतुम्	७	३६	१४
यद्राज्ञप्तं महाराज	७	७२	१०
यदा तु तद्वनं श्वेतः	७	७८	१८
यदातु ते वरं दद्यात्	२	९	२९
यदा तु दुन्दुभि नाम	४	४६	३
यदा तु युद्धमाकाङ्क्षन्	७	६३	२७
यदा तु रामस्य सलक्ष्मणस्य	६	१२	२८
यदा त्वां वानरः कश्चित्	५	३	४७
यदा त्वेतद्वनं घोरम्	१	४८	३१
यदा न खलु दुर्बुद्धिः	२	८४	३
यदा पर्वणि काकुत्स्थ	१	४०	१५
यदा प्रकृतिमापन्न.	३	४	१८
यदाप्रभृति लङ्कायाम्	६	७४	७१
यदाप्रभृति वैदेही	६	१०	१४
यदा भृशार्तैर्निनदैर्महात्मा	६	६०	३९
यदा वक्तुं स्वयं दैन्यात्	२	१४	५९
यदा विनाशो भूतानाम्	३	५६	१६
यदाश्रयादवष्टब्धा	६	४७	८
यदा समेता बहवः	२	१२	४०
यदाह वचनं सम्यक्	१	६०	६
यदा हि दर्पितोदग्रः	५	६४	३६
यदा हि प्रीतीसंयोगम्	७	८४	१५
यदा हि रामः पृथिवीमवा०	२	८	३९
यदि कश्चित्समर्थो वः	४	६४	१९
यदि किंचिदतिक्रान्तम्	४	३६	११
यदि खल्वस्ति मे स्नेह	६	६३	२६
यदि गच्छति पातालम्	४	१	११७
यदि गन्तुं कृता बुद्धिः	२	२१	३
यदा ग्रहणमभ्येति	३	४३	१६
यदा चेत्त्वं तु मां दर्पात्	५	५८	६९
यदा चेद्राङ्क्ष्यं राजन्	६	६३	५१
यदि जीवति मे भर्ता	४	६२	१०
यदि जीवति वैदेही	३	५८	९
यदि जीवति सा देवी	५	१४	५१
यदि तद्वक्ष्यते राजा	२	१८	२५
यदि तद्धितं कार्यम्	५	५५	१२
यदि तस्यागमः कश्चित्	३	६४	२३
यदि ताल त्वया दृष्टा	३	६०	१८
यदि तावच्छिशोरस्य	७	३५	२७
यदि तावत्त्वमिन्द्रेण	५	५०	८
यदि तावत्समुद्रस्य	५	५३	३२
यदि तावत्समुद्रे तु	६	३६	१२
यदि प्रतिगच्छामि	५	१३	४४
यदि तुष्टस्तु भरतः	२	८४	९
यदि तुष्टो महादेव	१	५५	१६
यदि ते गमने बुद्धिः	२	२४	२०
यदि ते प्रथमे युद्धे	६	८८	४७
यदि ते मत्प्रियं कार्यम्	४	१५	२९
यदि तौ पुरुषव्याघ्रौ	५	३८	४५

	का०	स०	श्लो०
यदि त्वं प्रस्थितो दुर्गम्	२	२७	७
यदि त्वं मन्यसे तात	५	५६	३
यदि त्वं यास्यसि वनम्	२	२१	२७
यदि त्वभिहितं राज्ञा	२	१८	२६
यदित्ववश्यं वस्तव्यम्	२	१११	२६
यदि त्वस्ति मया किंचित्	७	१७	३२
यदि त्वार्यं न शक्ष्यामि	२	८२	१८
यदिदं क्षुभितं स्थानात्	१	३६	१४
यदिदं मम दुःखाय	२	१०	२९
यदिदं मेऽनुरूपार्थम्	२	२	१५
यदिदं राज्यतन्त्रं मे	३	५५	१६
यदिदं लोकविद्विष्टम्	५	२४	७
यदि दग्धा त्वियं सर्वा	५	५५	८
यदि दत्त्वा वरौ राजन्	२	१२	३९
यदि त्वार्यं न शक्ष्यामि	२	८२	१८
यदि दुःखमकृत्वा तु	२	१३	१२
यदि दुःखमिदं प्राप्तम्	३	६६	५
यदि दुःस्थो न रक्षेत	२	३१	२०
यदि दृश्यते सा साध्वी	४	१	९५
यदि दृष्टं बल सर्वम्	६	२५	१८
यदि दृष्टा त्वया जम्बो	३	६०	१९
यदि देवाः प्रसन्ना मे	७	७६	१०
यदि दोषो महांस्तस्मिन्	६	१७	४२
यदि धर्मभृतां श्रेष्ठः	२	२४	३१
यदि धर्मे भवेद्भूतः	६	८३	२९
यदि न प्रत्ययो स्मासु	४	११	८३
यदि नाख्याति मे सीताम्	३	६४	३५
यदि नाम कथा यस्य	६	३४	११
यदि नाम स शूरो माम्	५	२६	२९
यदि नामात्र शक्यं स्यात्	७	११	८
यदि नाहं गमिष्यामि	४	६५	२९
यदि निर्यातिता ते स्यात्	६	११०	२०
यदि नोत्सहसे यातुम्	५	३८	१०
यदिन्द्रो वर्षते वर्षम्	४	३९	२
यदि पञ्चदशे वर्षे	२	६१	११
यदि पश्येत्स रामस्त्वाम्	३	५६	१०
यदि पुत्र न जायेथाः	२	२०	३६
यदि पृच्छेत्स काकुत्स्थः	७	९३	१२

	का०	स०	श्लो०
यदि प्रव्राजितो रामः	२	५८	२८
यदि प्रीतिः समुत्पन्ना	६	१२०	४
यदि प्रीतिर्महाराज	७	१०६	४
यदि बुद्धिः कृता द्रष्टुम्	३	११	४३
यदि बुद्धिः कृता राजन्	७	९४	२८
यदि भर्तुर्हितार्थाय	५	५३	१२
यदि भर्तुः प्रियं कार्यम्	२	१२	६०
यदि भुक्तमिहान्येन	२	१०८	१५
यदि भूयो महाराज	७	१०४	१४
यदि मत्संनिधौ सीता	६	१०३	१८
यदि मामभियुञ्जीरन्	६	२६	२
यदि मामाश्रमगतम्	३	५८	१०
यदि मामिह जानीयात्	५	२६	१८
यदि मां दुःखितामेवम्	२	२९	२१
यदि मां प्रतियुद्धथन्ते	६	३०	१५
यदि मां प्रतियुद्धथरन्	६	२४	३६
यदि मे भगवान्नाह	१	६३	२१
यदि मे भगवान्प्रीतः	१	४२	१८
यदि मे याचमानस्य	२	५२	४९
यदि मे राघवः कुर्यात्	२	१२	८६
यदि मे व्याहृतं वाक्यम्	५	२४	३८
रदियं याति दितेर्गर्भम्	४	१	११९
यदियं युद्धेऽसमर्थस्त्वम्	४	११	१९
यदियं राज्यस्य हेतोस्त्वम्	२	९७	१७
यदियं रामस्य दूतस्त्वम्	५	३४	१८
यदियं रामः समुद्रान्ताम्	५	१६	१३
यदि रामो दशग्रीवम्	५	३७	६४
यदि वधमिच्छसि रावणस्य०	६	१०१	५५
यदि वाचं प्रदास्यामि	५	३०	१८
यदि वा त्वेकपत्नीत्वम्	५	५३	२७
यदि वापि त्वरा तुभ्यम्	७	३२	३१
यदि वा मन्यसे वीर	५	३९	२०
यदि वा मन्यसे वीर	५	६८	३
यदि वायं यथा मन्ये	३	४३	३८
यदि वा सहनीयं ते	७	५८	१४
यदि वा स्वयमन्तकः	६	९४	२४
यदि वास्ति त्वभिप्रायः	७	३५	१८

	का०	स०	श्लो०
यदि वीर समग्रा ते	७	६७	११
यदि वैश्रवणस्य त्वम्	५	५०	६
यदि वोद्योजयिष्यामि	५	३०	१५
यदि वो रोचते वृत्तम्	१	६८	१७
यदि शक्रजितोऽस्त्राणि	५	५६	१०
यदि शब्दापयेद्रामः	७	६३	६
यदि शुद्धसमाचारा	७	६५	४
यदि शूर्पणखाहेतोः	३	३६	२४
यदि शूर्पणखाहेतोः	३	५०	१४
यदि सत्यप्रतिज्ञं त्वम्	२	१८	३४
यदि सत्यं ब्रवीम्येतत्	२	१२	६७
यदि सत्स्यात्सतां मुख्य	६	८३	२५
यदि सीतामदृष्ट्वाऽहम्	५	१३	१८
यदिहोत्पद्यते भूतम्	१	३६	८
यदि ह्यकाले मरणं यदृच्छया	२	२०	५३
यदि ह्यस्मिन्निपतिते	७	२२	४१
यदि ह्यहं सतीमेनाम्	५	३०	८
यदीदं ते क्षमं राजन्	१	२१	३
यदीदृशैरहं विप्रैः	३	१०	६
यदीन्द्रवैवस्वतभास्करान्वा	६	५६	१२८
यदीह शरदोऽनेकाः	२	६४	१५
यदुक्तमिह ते पूर्वम्	६	६३	२१
यदुक्तमेतत्तव सर्वमीप्सितम्	४	२८	६६
यदुक्तवन्तो रामस्य	६	३५	५
यदुक्तं कपिराजेन	६	१७	३२
यदुस्तद्वचनं श्रुत्वा	७	५६	४
यदुस्तु जनयामास	७	५६	२०
यदेतच्चिन्तयानेन	२	६४	५८
यदेतद्राक्षसानीकम्	६	८६	२
यदेतावन्मया कालम्	७	१३	३७
यदेवं विहिते कार्ये	४	३०	८३
यदेषा साध्विति ब्रूयात्	४	२२	१४
यदो त्वमसि धर्मज्ञः	७	५६	२
यद्धि दशरथेः कार्यम्	४	५६	२५
यद्धि न्याय्यं मया कर्तुम्	६	६७	७४
यद्धि मात्राकृत पापम्	२	८२	१५
यद्बलं त्वं समाश्रित्य	६	२५	२३

	का०	स०	श्लो०
यद्यत्पश्यामि ते गात्रम्	५	२०	१५
यद्यत्पश्यामि सर्वस्य	३	७१	१७
यद्यत्फलं प्रार्थयते	२	५५	२८
यद्यदिच्छसि भद्रं ते	१	२७	२६
यद्यदिच्छेत्तदैवास्याः	३	५४	१६
यद्यद्यापि ममैवाज्ञा	२	५६	२२
यद्यधर्मो न बलवान्	५	४६	१८
यद्यधर्मो भवेद्भूयः	६	८३	१७
यद्यपि त्रिषु लोकेषु	२	६१	२
यद्यपि त्वं क्षितितलात्	२	३७	३१
यद्यपि प्रतिपत्तिस्ते	२	२३	१५
यद्यप्यकृतकृत्यानाम्	५	६४	३०
यद्यप्यहं नरेन्द्रेण	७	५०	१८
यद्यप्येष तु वृत्तान्तः	६	१	१८
यद्यप्येष भवेद्भूतो	२	११८	३
यद्यप्रियं किंचिदसंप्रधार्य	४	२०	२५
यद्यसौ तप आतिष्ठेत्	७	८४	१३
यद्यस्य कृतमस्मामिः	४	३३	३४
यद्यहं तस्य पृष्ठेन	६	६२	५२
यद्यहं भ्रातृहन्तारम्	६	६८	१८
यद्याविशसि लोकांस्त्रीन्	६	८१	७१
यद्येतदशुभं कर्म	२	६४	२२
यद्येवं स्वागतं तेऽस्तु	७	४१	१२
यद्येष भूमिं विशते दिवं वा	६	८०	४२
यद्येष वरलब्धः स्यात्	७	१०	३६
यद्रक्षति महावीर	५	६१	६
यद्रक्ष्यसि महाबाहुम्	५	६७	३५
यदृच्छया तदा दृष्टः	७	३४	१४
यदृच्छयेव गां प्राप्तौ	१	४८	७
यदृच्छयेव गां प्राप्तौ	१	५०	१६
यदृच्छयेव संप्राप्तौ	४	३	१३
यद्रव्य बान्धवानां वा	२	६७	४
यद्वा दहनकर्माऽयम्	५	५५	२६
यद्वानरेन्द्रस्य बलम्	६	८५	२१
यद्वा पुरेष्वयुक्तानि	७	७३	१७
यद्वामृतरसः पीतः	७	३४	८
यद्विना भरतं त्वां च	२	६७	८

	का०	स०	श्लो०
यद्वयलीकं कृत पुत्र	२	६४	६
यन्न दर्पात्प्रहस्तो वा	६	१०६	५
यन्न देवैः कृतो राजा	६	६०	७७
यन्न हन्ति दशग्रीवम्	५	५६	३०
यन्नावगच्छत्सुग्रीवम्	४	१२	२०
यन्निमित्तमिदं तात	२	६४	८
यन्निमित्तमिमं देशम्	२	१०१	३
यन्निमित्तोऽयमारम्भः	६	११४	२
यन्निवेदयसे लङ्काम्	६	४	२
यन्मङ्गलं सहस्राक्षे	२	२५	३२
यन्मङ्गलं सुपर्णस्य	२	२५	३३
यन्मन्यसे नरव्याघ्र	४	४०	८
यन्मया वार्यमाणस्त्वम्	७	१५	१८
यन्महेन्द्रमिवाजय्यम्	२	३५	७
यन्मातापितरौ वृत्तम्	२	१११	६
यन्मां लोभयसे रम्भे	१	६४	१२
यन्मे धनं च रत्नं च	२	७२	६
यमक्षयमनुप्राप्ता	२	६४	६२
यमदण्डमिवोद्यम्य	७	१०८	२१
यमशक्रसमोवीर्ये	२	१	३६
यमस्य च महाबाहो	७	२१	३२
यमस्य वा मां विषयं गता०	२	६	६३
यमहं त्वत्कृते पुत्र	१	४६	१४
यमं च शमयिष्यामि	६	६३	५२
यमाश्रित्य तपस्तप्तम्	७	७५	१८
यमिच्छेत्पुनरायातम्	२	४०	५०
यमेव दिवसं ह्येष	७	३५	३१
यमेवधातुमिच्छन्ति	२	६६	१२
यमो दण्डादवध्यत्वम्	७	३६	१६
यमो वैश्रवणः शक्रः	२	६७	३५
यया च राजा रामश्च	२	६६	२२
यया पुत्रश्च भर्ता च	२	४८	२२
यया मूलफले सृष्टे	२	११७	१०
ययाहं सर्वभूतानाम्	३	२	२०
ययुः पिबन्तः स्वस्थास्ते	६	४	८६
ययोर्वीर्यमुपाश्रित्य	६	५०	१८
यवद्वीपमतिक्रम्य	४	४०	३१

	का०	स०	श्लो०
यवीयानस्य तु भ्राता	६	२७	१०
यवीयानात्मनः पुत्रः	४	१८	१४
यवीयान्स मम भ्राता	४	५८	२
यशस्वी ध्रुवसंधेस्तु	२	११०	१५
यशो ह्यु हं केवलराज्यका०	२	२१	६३
यश्चन्द्रं नभसो भूमौ	३	५६	११
यश्च माममियुञ्जीत	७	६१	६
यश्च यश्च सुरेन्द्रः स्यात्	७	३०	३५
यश्च रामं न पश्येत्तु	२	१७	१४
यश्च वो वितथं कुर्यात्	६	७५	४३
यश्चार्थस्तत्र वक्तव्य	५	५८	६
यश्चावरो भवेत्ताभ्याम्	७	६६	८
यश्चैष चापासिशरौघजुष्टम्	६	५६	२२
यश्चष जाम्बूनदवज्रजुष्टम्	६	५६	२१
यश्चैष नानाविधघोररुपैः	६	५६	२३
यश्चैष विन्ध्यास्तमहेन्द्रकल्पः	६	५६	१६
यश्चैष शक्त्या निहतस्त्वयाद्य	६	५६	१२६
यश्चैष शूलं निशितं प्रगृह्य	६	५६	१६
यष्टिभिर्विविधैश्चक्रैः	६	६५	१६
यष्टीश्च तोमरान्प्रासान्	६	३१	२३
यस्तयोः पूर्वजो जातः	७	६६	७
यस्तवार्ये गतः पुत्रः	२	४४	३
यस्तां वक्ष्यति तं वक्ष्ये	३	७१	२८
यस्तु कर्णौ विवृणुते	६	२६	३२
यस्तु दोषस्त्वया प्रोक्तः	६	१८	१२
यस्तु भीमां प्रवल्गन्तीम्	६	२६	४०
यस्तु मेघ इवाकाशम्	६	२६	३६
यस्तु राजा स्थितोऽधर्मे	४	३४	८
यस्य भृत्याश्च दासाश्च	२	२४	३
यस्य यज्ञैर्यथादि ष्टैः	२	६६	३४
यस्य यस्य यथाकामम्	१	५२	२२
यस्य रामविमुक्तेन	४	२३	१६
यस्य रामः प्रियः पुत्रः	४	५६	२४
यस्य वाजेषु पवनः	६	१०८	६
यस्य विक्रममाणस्य	६	२७	२०
यस्य सत्त्वस्य या योनिः	५	११	४४
यस्य सव्यमसौ पक्षम्	६	२८	२६

	का०	स०	श्लो०
यस्य सीता भवेद्भार्या	३	३४	१९
यस्य गतिरनाथायाः	२	७७	७
यस्या मदभिषेकार्थे	२	२२	६
यस्यायं पूर्व आश्रमः	१	२३	९
यस्यार्था धर्मकामार्थाः	६	८३	३८
यस्यार्थास्तस्य मित्राणि	६	८३	३५
यस्यार्थाः स च विक्रान्तः	६	८३	३६
यस्यास्तव परित्यक्तः	२	३५	५
यस्याहं हरिणः क्षेत्रे	५	३५	८१
यस्या ह्येवंविधः स्वप्नः	५	२७	३७
यस्या स्तम्भसहस्रेण	६	३९	२२
यस्या कृते नरव्याघ्रौ	२	९२	२५
यस्या कृते वने रामः	२	७८	९
यस्या पुत्रसहस्राणि	२	७४	२८
यस्या पुत्रसहस्रैस्तु	२	७४	२५
यस्याः प्रसादे जीवामि	२	१२	४१
यस्येयं प्रथमं दत्ता	२	११०	७
यस्येयं वसुधा कृत्स्ना	१	४०	२
यस्येषुपथमासाद्य	२	४४	१३
यस्यैते प्रतिराजानः	१	७०	२८
यस्यैते प्रतिराजानः	२	११०	१६
यस्यैते दक्षिणे पार्श्वे	६	२८	२२
यस्यैषा काञ्चनी माला	६	२८	३१
यं तस्मै प्रथमं प्रादात्	६	१०८	४
यं पश्यसि तिष्ठन्तम्	६	२८	८
यं पश्यसि तिष्ठन्तम्	६	२८	२८
यं दृष्ट्वा देवताः सर्वाः	६	७९	३३
यं दृष्ट्वा राघवो नैव	५	३८	६१
यं पालयसि धर्मं त्वम्	२	२५	३
यं पृष्टतोऽनुगच्छन्ति	६	२७	४
यं मुहूर्तमपश्यंस्तु	२	११	७
यं यं देशं समुद्रस्य	५	१	६६
यं यान्तमनुयाति स्म	२	३३	६
यं यान्तमनुयान्ति स्म	२	५८	७
यं यान्तं वानराः घोराः	५	२६	३१
यं समाश्रित्य जीवन्ती	७	२३	२३
यं सूर्यस्तुल्यवर्णाभम्	६	२७	३५

	का०	स०	श्लो०
यं शृणोति च काकुत्स्थ	१	४४	२३
यं शृणोति निरीक्षेद्वा	७	१०३	१२
यं शृणोति सदा लोके	६	१२८	१०६
यं स कुम्भो रघुश्रेष्ठ	७	५७	४
यं समुत्पतितं क्रोधम्	५	५५	६
यं स वासवनिर्जेता	६	८६	३३
यं संसदि प्रकृतिभिः	२	९९	३१
यं सुखेनोपधानेषु	२	४२	१५
यं स्वपक्षं परित्यज्य	६	८७	१६
यं स्थित योजने शैलम्	६	२७	१७
यः कृतः समयोऽस्मासु	४	५२	२२
यः क्षीबं स्त्रीगतं चैव	७	३२	२९
यः खल्वपि वनं प्राप्य	६	१३	२
यः पश्चात्पूर्वकार्याणि	६	१२	३२
यः पश्चात्पूर्वकार्याणि	६	६३	५
यां कपीनां सहस्राणि	५	३०	३
यां गतिं सगरः शैव्यः	२	६४	४२
यां च रात्रिं मरिष्यामि	६	२०	३३
यां चेमां मन्यसे धात्रीम्	४	५४	१३
यां ब्रुवन्ति नरा लोके	७	२३	२४
यां विना नोत्सहे वीर	३	५८	४
यां वृत्तिं वर्तते तातः	२	१००	७४
यां वृत्तिं वर्तते रामः	२	११८	५
यां सीतेत्यभिजानासि	५	५१	३४
यांस्तु धर्मार्थकामांस्त्वम्	६	६४	६
यां हि शूरा गतिं यान्ति	२	६४	४१
या गतिर्यज्ञशीलानाम्	३	६८	२९
या गतिः सर्वभूतानाम्	२	६४	४३
या गतिः सर्वभूतानाम्	२	७२	१५
या च राज्ञः कुबेरस्य	५	९	९
या चान्या शैलदुहिता	१	३५	१९
याचितेन सुरश्रेष्ठ	१	४६	१५
याचितो निवर्तस्व	२	४५	२७
याचितौ प्रशमं तत्र	१	७५	१९
याचे त्वां शिरसा राजन्	४	१०	१०
या चेयं जगतो माता	३	६६	९
याच्यमानः सुबहुशः	६	८४	११

	का०	स०	श्लो०
याजकश्च महातेजाः	१	६०	६
यात सेनाग्रगाः सर्वे	५	४६	४
याताः प्राञ्जलयो भूत्वा	७	३७	१८
यातुधानस्य दौहित्रिः	६	१११	८१
यातु वानरवाहिन्याः	६	४	१६
याते च मयि कल्याणि	२	२६	२६
याते तस्मिन्दशग्रीवे	५	५८	८१
या ते नरपते वृत्तिः	४	१८	५४
यात्रादण्डविधानं च	२	१००	७०
या त्वं विरहिता नीता	६	११५	५
या दत्ता देवराजेन	४	२३	२८
यादृशं लक्ष्यते रूपम्	२	६३	७
यादृशा इह कूजन्ति	३	२४	६
यादृशानि तु दृश्यन्ते	५	२६	२४
यादृशी परिषत्तत्र	२	१६	१६
यादृशी वः क्षमा पुत्र्यः	१	३३	८
यानप्रवरघोषश्च	२	११४	२१
या न शक्या पुरा द्रष्टुम्	२	३३	८
यानशालां ततो गत्वा	३	३५	४
यानि कर्मापदानानि	६	१६	१८
यानि कानिचिदप्यत्र	३	४६	३३
यानि त्वत्तीरवासीनि	२	५२	६०
यानि त्वौषधजालानि	५	१	२१
यानि दत्तानि तेऽस्त्राणि	२	२५	५
यानि देवेषु चास्त्राणि	१	५५	१७
यानि पश्यन्ति काकुत्स्थम्	७	१०६	२१
यानि भूतानि नगरे	७	१०६	२०
यानि माल्यानि देवेषु	२	६१	४८
यानि मिथ्याभिशस्तानाम्	२	१००	५६
यानि यान्यत्र योग्यानि	२	४	३७
यानि राज्ञा हृदि न्यस्तानि	७	४७	१३
यानि रामस्य चिह्नानि	५	३५	३
यानि रामस्य चिह्नानि	५	३५	७
यानि वैश्रवणे सुष्ठु	५	२०	३३
यानि स्म रमणीयानि	४	१	७०
यानैश्च मुख्यैः परिचारिकैश्च	२	३७	३६
यानैश्च शकटैश्चैव	२	११३	२०

	का०	स०	श्लो०
यान्ति राजर्षयश्चात्र	४	१८	४०
यान्त्येव न निवर्तन्ते	७	६	५६
यान्यस्माभिस्त्वया सार्धम्	४	२०	८
यान्याभरणजालानि	५	३५	३७
यान्येतानि तु रत्नानि	७	३८	७
या पुत्रमीदृशं राज्ञः	२	४६	६
या पुत्रं पार्थिवेन्द्रस्य	२	४८	२४
य पुरा कलहंसानाम्	४	३०	६
या प्रीतिर्बहुमानश्च	२	४५	६
या भाति लक्ष्मीर्भुवि मन्द०	५	५	३
याभिर्गृहीतः पुरुषः	२	६१	४५
या मयासीन्न संबुद्धा	६	१११	३६
या मामनुगता मन्दम्	४	१	१०७
या मे दर्शनमागच्छेत्	७	२	१३
या मेरुदुहिता राम	१	३५	१४
यामेव रात्रिं ते दूताः	२	६६	१
यामेव रात्रिं शत्रुघ्नः	७	६६	१
यामोषधीमिवायुष्मन्	३	६७	१५
यावच्चन्द्रश्च सूर्यश्च	७	१०८	२५
यावज्जानामि वैदेहीम्	५	२	२६
यावज्जीवति काकुत्स्थः	२	२४	१३
यावता चित्रकुटस्य	२	५४	३०
यावत्करस्थः शूलोऽयम्	७	६१	१४
यावत्त नहि पश्येयम्	४	१०	३३
यावत्तव कथा लोके	७	१०४	३२
यावत्तु निर्यतस्तस्य	२	४२	१
यावत्तुरगसंदर्शः	१	३६	१५
यावत्ते दर्शयाम्यद्य	५	६७	३७
यावत्पितरि धर्मज्ञ	२	१०१	२१
यावत्पृषतमेकेन	३	४३	५०
यावत्प्रजा धरिष्यन्ति	७	१०८	२४
यावत्त्वं न वनं यातः	२	१६	१६
यावत्सीतां न पश्यामि	५	१३	५०
या त्सुघोरा महती	६	६	१८
यावत्सुरैश्च विप्रैश्च	७	६१	८
यावत्सूर्यः प्रतपति	३	७२	२४
यावदावर्तते चक्रम्	६	१२८	११

	का०	स०	श्लो०
यावदिच्छसि रत्नानि	१	५३	२१
यावदेव तु संसुप्ताः	२	४६	२१
यावदेव न जानाति	२	२१	८
यावद्गच्छामि सौमित्रे	३	४३	४८
यावद्धि केशग्रहणात्सुहृद्भिः	६	१४	१६
यावद्विक्रमितुं बुद्धिम्	६	६६	७०
यावद्राजा प्रियं पुत्रम्	२	४२	२
यावद्रामकथा वीर	७	४०	१७
यावन्न गृह्णन्ति शिरांसि	६	१४	४
यावन्न चन्द्रसकाशम्	२	६८	७
यावन्न चरणौ भ्रातुः	२	६८	८
यावन्न ते व्यतिक्रामेत्	५	२४	३५
यावन्न राज्ये राजार्हः	२	६८	१०
यावन्न रामं द्रक्ष्यामि	२	६८	६
यावन्न लङ्कां समभिद्रवन्ति	६	१४	३
यावन्न सगजां साश्वाम्	६	६	१७
यावन्नाधिगमिष्यामः	३	६५	१५
यावन्मातरमापृच्छे	२	१६	२५
यावल्लोका धरिष्यन्ति	१	६०	२६
याश्चवस्तेऽम्बरातारा:	५	६	४२
या श्रीः शौर्यं च रामस्य	२	४४	१४
यास्यामि बलमध्येऽहम्	६	४	१८
या हि नः सततं बुद्धिः	२	४५	२४
याहि वैश्रवणे लक्ष्मीः	५	६	८
युक्तं कवाटं पाण्डयानाम्	४	४१	१६
युक्तं परमसंपन्नैः	६	१०६	२
युक्तं यत्प्राप्नुयाद्राज्यम्	४	१७	५२
युक्तः परमसंविग्न	६	३७	१३
युक्तदण्डा हि मृदवः	३	६५	१०
युक्तरूपं त्वया देवि	५	३८	२
युक्तां वाजिसहस्रेण	५	२७	१०
युक्ता रामस्य भवती	६	६५	३३
युक्ते मुहूर्ते विजये	१	७३	६
युगपत्पतमानैश्च	३	२५	४१
युगपद्विहितं मात	४	२२	४
युगान्तकालानलतुल्यरूपः	५	५४	३२
युगान्तपरिवर्ते च	७	२२	२७

	का०	स०	श्लो०
युञ्जानः स्वानिव प्राणान्	३	६	१२
युज्यतां महती सेना	२	७६	६
युद्धकामेन ताः सर्वाः	६	६	६६
युद्धश्रद्धथवा तेऽस्ति	७	८	५
युद्धाय निर्ययुः क्रुद्धाः	७	६	४६
युद्धाय निर्ययुः सर्वे	७	६	४७
युद्धार्थं समनुप्राप्तः	७	३२	२७
युद्धार्थी रावणः प्राप्तः	७	२३	२७
युद्धे कापुरुषैर्नित्यम्	६	६५	६
युद्धे विक्रमितश्चैव	६	११५	८
युद्धे हतो महाराज	६	६२	२
युद्धोन्मत्तश्च मत्तश्च	६	१२३	१०
युद्धोन्मत्तश्च मत्तस्य	५	६	२५
युद्धोन्मत्तश्च मत्तस्य	५	५४	१३
युद्धोन्मत्तं च मत्तं च	६	६६	१६
युधाजित्तु तथेत्याह	७	३८	१२
युधाजित्प्रीतिसंयुक्तम्	७	१००	१०
युधि तौ रामलक्ष्मणौ	६	८०	२२
युध्यतामेव तेषां तु	६	४४	१
युध्यतां तु ततस्तेषाम्	६	४३	१
युध्यमानमनालक्ष्यम्	६	४५	११
युध्यमानस्य रक्षोभिः	५	३७	१२
युध्यमानौ ततो दृष्ट्वा	६	८६	१
युध्यस्व मा धृतिं कृत्वा	६	४१	७०
यध्यस्व यदि शूरोऽसि	३	५०	२३
यध्यस्व यदि शूरोऽसि	३	५१	३०
यध्यस्व यदि शूरोऽसि	४	८६	३०
युयुधाते तदा वीरौ	६	८८	३५
युयुधाते महात्मानौ	६	८८	३६
युवयोः पापयोश्चाहम्	३	२	१४
युवराजं पुरस्कृत्य	५	६५	२
युवराजोऽङ्गदः प्राप्तः	४	३६	३०
युवामसंख्येयगुणौ	१	७२	१८
युवाभ्यामात्मभूताभ्याम्	७	८३	५
युवाभ्यां स हि धर्मात्मा	४	३	२२
युवां खलु महायुद्धे	६	८८	४५
युष्मत्तो भयभीतानाम्	७	८	७

	का०	स०	श्लो०
युष्माकं तु बलं ज्ञातम्	३	५४	२८
युष्माकं पूर्वको राजा	७	६५	१०
युष्माकं राघवोऽरण्ये	२	४८	१६
युष्माकमेतत्प्रत्यक्षम्	३	२३	२४
युष्मान्पापात्मकान्हन्तुम्	३	२०	६
युष्माभिरुद्धृतश्चाहम्	७	३६	२४
युष्माभिर्निहतौ दृष्ट्वा	३	१६	२५
युष्माभिः प्रहितैः सर्वैः	५	४६	६
यूथपानां सहस्रेण	६	२६	१२
यूथपा हरिराजस्य	६	२७	५
यूथपाः समनुप्राप्ताः	४	३६	३६
यूथबंधाश्च पृषता	३	११	४
यूपाक्षमभिसंक्रुद्धः	६	७६	३४
यूपाक्षः शोणिताक्षश्च	६	७५	४७
यूयमेवास्य जानीत	५	४२	६
ये केचन समुद्देशाः	४	४१	७
ये गताभिमुखं विष्णुम्	१	४५	४३
ये च तत्र महात्मानः	७	६८	२४
ये च तत्रापरे सर्वे	२	८३	११
ये च त्वामनुजीवन्ति	२	४२	७
ये च त्वां घोरचक्षुभिः	७	८२	११
ये च दिव्या ऋषिगणाः	७	११०	१४
ये च बाणैर्न विध्यन्ति	१	५	२०
ये च मद्विषयस्था वै	७	१८	२७
ये च राज्ञो ददौ दिव्ये	२	३०	२६
ये च स्त्रीघातिनां लोकाः	६	८१	२२
ये चाप्यन्येऽत्र युध्यन्ति	६	६१	२३
ये चैनमभिवर्त्तन्ते	१	२६	८
ये चैनमुपजीवन्ति	२	३६	४
ये तत्र चित्रकूटस्य	२	११६	२
ये तीक्ष्णमन्त्राः सचिवाः	३	४१	१२
ये तु ते राक्षसेन्द्रस्य	७	१४	१०
ये तु त्वरयितुं याता	४	३७	२७
ये तु पूर्वं महात्मानः	६	६६	७८
ये तु रामस्य सुहृदः	२	४१	१६
ये तु विष्टभ्य गात्राणि	६	२६	२२
ये त्वग्नयो नरेन्द्रस्य	२	७६	१३

	का०	स०	श्लो०
येत्वङ्गदपरीवारा	४	१६	५
ये त्वन्तपालाः प्लवगाः	४	२६	३१
ये त्वन्ये राक्षसा वीराः	६	४४	२३
ये त्वया कीर्तिता दोषाः	२	२६	२
ये त्वया दण्डकारण्ये	३	२६	१२
ये त्वया निहतास्ते तु	७	८	२४
ये त्वां देवं ध्रुवं भक्ताः	६	११७	३१
येन कालेन रामश्च	२	६	३४
येन केन तु मार्गेण	६	३	३०
येन धर्मो न विज्ञातः	६	३८	५
येन पूर्वं जनस्थाने	६	६४	१२
येन मे धार्मिको भ्राता	६	१०१	१६
येन याति मुहूर्तेन	३	६८	१२
येन युद्धं तदा दत्तम्	६	२७	१६
ये न रक्षन्ति विषयम्	३	३३	६
येन लोकास्त्रयः सेन्द्राः	७	२०	२८
येन वित्रासितः शक्रः	६	११०	१२
येन वित्रासिता लोकाः	३	४७	२६
येन वैवस्वतो युद्धे	६	६१	६
येन वैश्रवणो भ्राता	३	४८	४
येन शक्रो महातेजाः	६	६०	६७
येन शप्तोऽस्मि कैलासे	५	५०	३
येन सप्त महाताला	४	१२	६
येन सर्वगुणोपेताः	४	४	२२
येन संस्तम्भनीयोऽयम्	२	३४	५४
येन सेनापतिर्देव	१	३७	३
येन सेन्द्रास्त्रयो लोकाः	६	१०६	१६
येनाद्य त्वं महाबाहो	६	६२	६
येनाद्य बहवो युद्धे	६	४६	१४
येनासौ याति बलवान्	५	१	७७
येनाहं सहसा स्पृष्टः	४	११	५०
येनेदमीदृशं प्राप्तम्	७	५०	१६
येनेदं काञ्चनं दिव्याम्	४	५१	१२
येनैव बाणेन हतः प्रियो मे	४	२४	३३
यैनैवमागता द्वैधम्	२	२३	११
ये पूर्वं निर्जितास्तेन	६	६४	१३
ये प्रसक्ताश्च कामेषु	४	३७	११

	का०	स०	श्लो०
येभ्यः प्रणमसे पुत्र	२	२५	४
येभ्यो विनिःसृता सर्वे	७	११०	२१
ये ये महाबलाः सन्ति	६	७५	३
ये ये मे सुमहात्मानः	७	४०	८
ये राक्षसा मुख्यतमाः	६	६२	१६
ये शोकमनुवर्तन्ते	४	७	१२
येषामुषितवाम्	३	११	२४
येषां चाराश्च कोशश्च	३	३३	६
येषां नश्यत्ययं लोकः	६	८३	४०
येषां नोपरि नाधस्तात्	५	३६	३६
येषां नोपरि नाधस्तात्	५	६८	१६
येषां स सगरो नाम	१	५	२
ये स्युः हन्यते रणे तत्र	६	७४	७२
ये हयाः पुरुहूतस्य	३	५	१४
ये हि संभिन्नमर्यादा	२	६७	३२
यैर्विवासस्तदारण्ये	२	२३	२२
यैः परीक्रीडसे सीते	३	६१	५
यैः सायकैः सालवरा निकृ०	६	६७	१५१
योगक्षेमं तु तेऽयग्रम्	२	७६	८
यो गङ्गामपर्येति	६	२७	२५
योजनानां शतं चापि	५	१	१०८
योजनानां शतं महत्	४	६५	१६
योजनानां शतं श्रीमान्	५	२	३
योजनानां सहस्राणि	१	३६	२१
योजनानि चतुःषष्टिः	४	४२	३०
योजनानि सहस्राणि	४	४२	४३
योजनायामविस्तारम्	१	३६	१८
योजयस्व धनुः श्रेष्ठे	१	७५	२८
योधानामग्निकल्पानाम्	१	६	२१
यो न देवासुरैः सर्वैः	२	५१	१०
यो न देवासुरैः सर्वैः	२	८६	११
यो न शक्यः सुरैर्हन्तुम्	६	११०	१६
यो न सदा पालयति	२	४७	६
योनिदेशाच्च यवना	१	५५	३
यो नियुक्तः परं कार्यम्	६	१	८
यो निवेशस्त्वभिप्रेतः	२	८०	१६
योज्यस्त्वेवंविधं ब्रूयात्	६	१६	१६

	का०	स०	श्लो०
योऽपि पालयते विप्रः	७	५३	१४
यो ब्राह्ममस्त्र वेदाश्च	५	३४	३
यो भिन्द्याद्गगनं बाणैः	६	२८	२०
यो मन्त्रतपसा लब्धः	२	५१	११
यो मे भ्राता पिता बन्धुः	२	७२	३२
योऽयमंशस्तृतीयो मे	७	८६	१५
योऽयं विमर्देष्वविभग्नपूर्वः	६	१०६	२१
यो राजा पर्वतेन्द्राणाम्	६	२७	२२
यो रामस्य प्रियां भार्याम्	३	४७	४३
यो रामं प्रतियुध्येत	३	४५	१३
यो रामं प्रतियुध्येत	५	५१	४२
यो वज्रपाताशनिसंनिपातान्	६	५६	१३७
यो विधाता च धाता च	७	२०	३१
यो विषादं प्रसहते	४	६४	१०
यो वीर्यबलसंपन्नः	६	१	६
योऽसौ गजस्कन्धगतो महा०	६	५६	१४
योऽसौ चक्रगदापाणिः	७	६	३०
योऽसौ नवार्कोदिततास्रचक्षुः	६	५६	१७
योऽसौ रथस्थो मृगराजकेतुः	६	५६	१५
योऽसौ शतसहस्राणि	६	२६	२७
योऽसौ हयं काञ्चनचित्र०	६	५६	१८
योऽहं पावकसंकाशम्	२	२६	६
यो हि कल्यतीतेषु	४	२६	१४
यो हि देवान्सगन्धर्वान्	७	५०	५
यो हि नः सुमहान्नाथः	२	८१	७
यो हि भृत्यो नियुक्तः सन्	६	१	७
यो हि मत्तं प्रमत्तं वा	४	११	३६
यो हि मामनृतं कुर्यात्	७	२२	४०
यो हि मामुद्यतस्त्रातुम्	३	५३	५
यो हि मां सेवते कश्चित्	२	२०	४३
यो हि मोहाद्विषं पीत्वा	७	१५	१६
यो हि शत्रुमवज्ञाय	६	६३	२०
यो ह्ययं मम लाङ्गूले	५	५४	५
यौगंधरविनिद्रौ च	१	२४	७
यौ तावित्रजिता युद्धे	६	५१	१२
यौ तौ देवासुरे युद्धे	२	६	२८
यौ तौ पश्यसि तिष्ठन्तौ	६	२८	६

	का०	स०	श्लो०
यौ धर्मौ जगतो नेत्रौ	३	६६	१०
यौवनोत्सेकजाद्दर्पात्	६	४	६३
यौवराज्यं च लङ्कां च	६	९२	१३
यौवराज्याभिषेकश्च	२	१५	१५
यौवराज्येन संयोक्तुम्	१	१	२१
(र)			
रकारादीनि नामानि	३	३९	१८
रक्तकण्ठगुणो धीरः	६	७१	२२
रक्तचन्दनकर्पूरैः	६	१२८	५५
रक्तचन्दनदिग्धेन	५	१०	२६
रक्तचन्दनसकाशा	६	२३	६
रक्तचन्दनसंकाशा	६	४१	१५
रक्तमाल्यमहादामम्	६	६५	२०
रक्तमाल्याम्बरधरः	५	४४	२
रक्तवासा पिबन्मत्तः	५	२७	२०
रक्ताक्षाः सुबहुव्यामाः	६	६५	३८
रक्षकस्त्व सह भ्रात्रा	३	१०	१६
रक्षणार्थं च देहस्य	५	५०	१६
रक्षणीया विशेषेण	३	५०	७
रक्षता तु मया वृत्तम्	६	११५	१६
रक्षन्तु त्वां विशालाक्षि	३	४५	३४
रक्ष राक्षसभर्तारम्	३	४८	१७
रक्षसां नर्दतां घोरः	३	२४	१०
रक्षसां निहतान्यासन्	१	१	४९
रक्षसां भूषणस्थाभिः	६	७५	५०
रक्षसां रावणं चापि	६	१०७	५
रक्षसां रुवतां रावम्	७	७	४१
रक्षसां वश्मापन्नम्	३	४५	४
रक्षसां सिंहनादैश्च	६	६९	३९
रक्षसा तेन बाणौघैः	६	९७	१४
रक्षसा तेन रोषाच्च	७	१६	२९
रक्षसाऽपहृता भार्या	४	४	१४
रक्षसाऽपहृता भार्या	४	६	३
रक्षसा भीमरूपेण	५	३५	६५
रक्षसामद्य शूराणाम्	६	१०२	५७
रक्षसामीश्वरं मां च	६	३६	५
रक्षसां कदनं चक्रे	६	८९	२६

	का०	स०	श्लो०
रक्षसां कामरूपाणाम्	७	२४	४०
रक्षसां च विनाशाय	५	५८	८८
रक्षसां तु शतं रामः	३	२६	३१
रक्षिणश्चात्र विहिता	५	१३	६१
रक्षितव्या क्रिया ब्रह्मन्	१	२८	२२
रक्षितं राक्षसैर्भीमैः	५	६	३
रक्षितं सुमहावीर्यैः	५	४	२९
रक्षिता जीवलोकस्य	५	३५	१०
रक्षिता स्वस्य धर्मस्य	१	१	१४
रक्षिता स्वस्य वृत्तस्य	५	३१	६
रक्षितुं सुमहद्राज्यम्	२	११२	११
रक्षोगणस्योपरिभ्रष्टात्	७	६	५७
रक्षोधिपतिनिर्दिष्टम्	५	४	२४
रक्ष्यतां नगरी शूरैः	४	१९	१४
रक्ष्यमाणा सुघोराभिः	५	५७	३९
रक्ष्यमाणो वरस्त्रीभिः	७	१२	३२
रघुनन्दन वक्ष्यामि	६	८५	१०
रक्षाम इति तत्रान्यैः	७	४	१२
रक्षाम इति यैरुक्तम्	७	४	१३
रक्षां चैव विधास्यामि	६	८	५
रक्षांसि निहनिष्यन्तः	५	२१	२६
रक्षांसि पुरुषादानि	२	११९	१९
रक्षांसि वक्षांसि च विक्षि०	५	५	१२
रक्षांसि संध्याकाले तु	१	२६	२३
रघोस्तु पुत्रतेजस्वी	२	११०	२९
रजः प्रशान्तं स हिमोऽद्य वायुः	४	२८	१५
रजकास्तुन्नवायाश्च	२	८३	१५
रजतं वा सुवर्णं वा	४	८	७
रजनीचरसत्त्वानि	२	११९	८
रजन्यां तु प्रभातायाम्	७	९९	१
रजन्यां सुप्रभातायाम्	२	१०५	२
रजन्यामप्रशस्तश्च	६	४१	१७
रजसाभ्यवकीर्णानि	२	३३	१९
रज्जुबन्धनबद्धाभिः	६	६०	५४
रणाग्रे समरश्लाघी	६	९०	३४
रणे दारुणविक्रान्त	४	२०	४

	का०	स०	श्लो०
रणे प्रहरणस्यार्थे	३	३०	१७
रणे रामेण युद्धस्व	३	३६	२०
रताः स्वाध्यायकरणे	१	१४	४८
रत्नकुम्भेन महता	६	१२८	५६
रत्नमाल्याम्बरधरः	६	२२	१६
रत्नैर्नानाविधैश्चैव	६	१२८	६६
रत्नौघजलसंनादम्	६	४	११६
रथकुञ्जरवाजिभ्यः	६	१२७	३४
रथकूबरसंकाशैः	७	२४	८
रथनेमिस्वनस्तत्र	६	५३	२२
रथप्रवरमास्थाय	६	५१	३०
रथमादित्यसंकाशम्	६	७०	४
रथमारोह भद्रं ते	२	४०	११
रथमार्गानुसारेण	२	४७	१४
रथमार्गानुसारेण विपुलम्	६	५५	७
रथवाजिगजानां च	६	३३	२५
रथश्च सम्यगास्तीर्णः	२	१५	५
रथस्थः स तु धर्मात्मा	२	११५	१२
रथस्य युगमेकेन	३	२८	२६
रथं च तस्याथ जवेन सार०	६	१०३	३१
रथं तस्य समासाद्य	६	५६	६३
रथं राक्षसराजस्य	६	१०६	५
रथं शीघ्रमिमं सूत	६	१०४	२५
रथान्नागान्खरानुष्ट्रान्	७	२८	३६
रथान्मंडलचक्रांश्च	२	७०	२६
रथान्सर्वान्द्रुमाञ्छैलान्	६	७६	२०
रथाश्वगजसंबाधाम्	२	५१	२२
रथाश्वनागाश्च हताः	६	६४	२३
रथाह्वह्वसानत्यूहाः	२	१०३	४३
रथिनो वानरेन्द्राणाम्	६	६७	१३
रथेन खरयुक्तेन	५	४४	५
रथेन च रथं चापि	६	६६	६१
रथेन तु रवरो वेगात्	३	२३	३१
रथेन मम भूमिष्ठम्	६	१०२	७
रथेनार्तिरथः शीघ्रम्	६	५६	६८
रथेनादित्यवर्णेन	६	५८	३७
रथे स्थितोऽहं शरचापपाणिः	६	७१	४५

	का०	स०	श्लो०
रथैश्चातिरथाः शीघ्रम्	६	११	७
रथैः क्वचिनस्त्वन्ये	६	५१	२६
रथोद्वहनखिन्नाश्च	६	१०४	१६
रथ्यासु राजमार्गेषु	१	४	२६
रमणीयं हि भर्तारम्	६	६४	३३
रमणीयान्बहुविधान्	२	५५	३०
रमणीया पुरी सा हि	७	३	२८
रमतश्चानुकूल्येन	३	११	२७
रमते यत्र वैदेही	३	१५	४
रमते वानरश्रेष्ठः	६	२७	२८
रममाणस्त्वया सार्धम्	२	१२	८१
रमयामास धर्मात्मा	७	४२	२३
रमयामास वैदेहीम्	७	४२	२५
रमस्व कामं पिब चाग्र्यवा०	६	१२	४०
रमस्व राजन्पिब चाद्य वारु०	६	६३	५६
रमेयं कथया ते तु	२	११६	३
रम्भामप्सरसं तत्रः	१	६३	२६
रम्यचत्वरसंस्थानाम्	२	५१	२१
रम्यचत्वरसंस्थानाम्	२	८६	१६
रम्योपवनसंबाधाम्	३	७५	१७
ररास भूमिर्न ततापं भानु०	५	४७	१३
ररास विविधैर्भूतैः	५	५६	४३
रविसंक्रान्तसौभाग्यः	३	१६	१३
रश्मिकेतुश्च भवनम्	५	६	२२
रश्मिकेतुश्च भवनम्	५	५४	१२
रश्मिमन्तमिवोद्यन्तम्	५	४६	२०
रश्मिमन्तं समुद्यन्तम्	६	१०५	६
रसाकुलं षट्पदसंनिकाशम्	४	२८	१६
रसातलं प्रविष्टः सन्	७	६	५
रसातलं प्रविष्टायाम्	७	६८	१
रसातलमुपागच्छत्	१	४३	४०
रसातले वा वर्तन्तीम्	४	६	६
रसेनान्नेन पानेन	१	५२	२३
रसैः शृङ्गारकरुणः	१	४	६
रहितां सूर्यचन्द्राभ्याम्	३	४६	५
रंस्यते तत्र वैदेही	३	११	४२
राक्षसत्वं भजस्वेति	१	२५	१२

	का०	स०	श्लो०
राक्षसस्त्वं मया जातः	७	५९	१४
राक्षसस्य सखित्वं च	७	२३	१३
राक्षसस्य स्तनाभ्याशे	६	९८	२१
राक्षसं क्रूरकर्माणम्	६	३१	३
राक्षसं च दुरात्मानम्	४	१७	५०
राक्षसं तु विरूपाक्षम्	६	३६	२०
राक्षसं मृगरूपेण	३	५७	१
राक्षसं रूपमास्थाय	५	१	१३९
राक्षसं वा मनुष्यं वा	७	३४	२
राक्षसं प्रचकम्पेऽथ	६	७१	७४
राक्षसाधम रामस्य	५	२२	१५
राक्षसाधम रामस्य	५	५८	७१
राक्षसाधिपतिं चापि	५	४८	५९
राक्षसाधिपते सौम्य	६	११४	१९
राक्षसाधिपते सौम्य	७	२०	४
राक्षसानामनीकेषु	६	९६	११
राक्षसानामयं वासः	३	४६	२५
राक्षसानामयं वासः	३	४६	२९
राक्षसानामिदं वत्स	३	६४	४४
राक्षसानां च निनदैः	६	५४	२५
राक्षसानां च सदृशाः	६	२७	१४
राक्षसानां च सर्वेषाम्	६	३४	२६
राक्षसानां जनस्थाने	५	२६	१२
राक्षसानां पिशाचानाम्	२	२५	१७
राक्षसानां बलं श्रेष्ठम्	६	७५	६१
राक्षसानां बलौघस्य	६	२४	३३
राक्षसानां वधं कृत्वा	५	३७	६
राक्षसानां वधे साह्यम्	६	१९	२३
राक्षसानां वरिष्ठश्च	६	३०	३४
राक्षसानां विनाशाय	६	९४	१०
राक्षसानां विशेषश्च	५	३०	५
राक्षसानां सहस्राणि	६	९४	२
राक्षसानां सहस्राणि	७	७	२३
राक्षसानां सहस्रैश्च	६	६२	२
राक्षसानां सुघोराणाम्	३	२२	२०
राक्षसा निहता येन	३	५३	२४
राक्षसान्पञ्चसाहस्रान्	३	२६	२
राक्षसान्प्रवरान्हत्वा	५	५६	२३
राक्षसान्समरे हृष्टान्	७	६	१८
राक्षसाभ्यामहं द्वाभ्याम्	३	३९	२
राक्षसा मथिताः केचित्	६	५२	१०
राक्षसा ये विकर्तारः	१	१९	१०
राक्षसा राक्षसश्रेष्ठम्	६	११	१३
राक्षसा राक्षसांश्चापि	६	५५	२३
राक्षसा वानराश्चापि	६	७७	१०
राक्षसा वानरेन्द्रेषु	६	८६	११
राक्षसा विस्मयं जग्मुः	६	४१	५४
राक्षसा विस्मयं जग्मुः	६	४१	९७
राक्षसश्च यथा स्निग्धाः	६	३	८
राक्षसश्च विनिष्पिष्टाः	६	१२६	१९
राक्षसाश्चापि तिष्ठन्तु	६	६०	१३
राक्षसाश्चापि मुख्यास्ते	६	५४	३
राक्षसास्तुत्प्लवंगानाम्	६	२४	५
राक्षसास्तद्वचः श्रुत्वा	६	११	१९
राक्षसात्वपरे भीमाः	६	४२	४५
राक्षसास्त्वभिसंक्रुद्धाः	६	५२	४
राक्षसा हरयस्तूर्णम्	६	५५	२६
राक्षसांश्च महाकायान्	५	६	६१
राक्षसांस्तर्पयिष्यामि	६	६०	८०
राक्षसांस्त्रासयामास	७	३२	७२
राक्षसाः कपिमुख्यास्ते	६	५८	३३
राक्षसाः क्रूरकर्माणः	५	५३	१८
राक्षसाः प्रययुः सर्वे	७	२५	३७
राक्षसाः शितैर्बाणैः	६	८७	८
राक्षसाः सिद्धसंनाहाः	५	५८	१५३
राक्षसी तर्जनं चैव	१	३	२८
राक्षसी तर्जनं चैव	१	३	३१
राक्षसीनां वचः श्रुत्वा	५	२४	६
राक्षसीनां वचः श्रुत्वा	५	४२	२२
राक्षसीभिर्विरूपाभिः	५	५९	२६
राक्षसीभिर्विरूपाभिः	५	६५	१३
राक्षसीभिश्च पत्नीभिः	५	९	६
राक्षसीभिः परिवृता	५	५९	२२
राक्षसी भ्रातरं क्रूरम्	३	३२	२२

	का०	स०	श्लो०
राक्षसीवशमापन्ना	५	२५	४
राक्षसीं तनुमास्थाय	१	३९	८
राक्षसेनानुसृतायाः	३	६४	३७
राक्षसेनाहते तस्य	६	५९	१३३
राक्षसेनेरितं वाक्यम्	३	५९	१३
राक्षसेन्द्र गतो वाली	७	३४	५
राक्षसेन्द्र महासर्पान्	५	२१	२७
राक्षसेन्द्रसमाधूतम्	३	५२	२२
राक्षसेन्द्रसुतासाधो	६	८७	१९
राक्षसेन्द्रस्तु तच्छ्रुत्वा	७	२३	३२
राक्षसेन्द्रस्तु तैः सार्धम्	६	३२	४१
राक्षसेन्द्रस्य विख्यातम्	५	४	२५
राक्षसेन्द्रः स तु तदा	७	९	३
राक्षसेन्द्रः स तु तदा	७	९	७
राक्षसेन्द्रा गिरिनिभाः	७	७	६
राक्षसेन्द्रोऽपि विस्फार्य	७	२२	१९
राक्षसेन्द्रोऽभिषिक्तस्तु	७	१२	१
राक्षसेषु पिशाचेषु	३	४५	१२
राक्षसैरभिभूताः स्मः	७	६	२६
राक्षसैर्बहुभिः कीर्णम्	३	६७	५
राक्षसैर्बहुभिः सार्धम्	५	५८	१२०
राक्षसैर्बध्यमानानाम्	६	९३	१६
राक्षसैर्वानरा घोराः	६	५२	३
राक्षसैस्तु मुहूर्तेन	७	३१	३८
राक्षसैस्तैः परिवृतः	६	८९	६
राक्षसैः सहितैर्नूनम्	३	५७	७
राक्षसैः संवृतो घोरैः	६	५५	८
राक्षसो जिह्मया बुद्धया	६	१७	२८
राक्षसो जिह्मया बुद्धया	६	१८	१८
राक्षसो भैरवाकारः	१	२४	२८
राक्षसो रावणो मूर्ख	१	१५	२३
राक्षसोऽसीति हरयः	६	४४	३
राक्षस्यस्ता विरूपाक्ष्यः	५	५३	२३
राक्षस्यस्त्रिनटा चापि	६	४७	६
राक्षस्यो दारुणकथाः	६	११३	३२
राक्षस्यो विविधाकारा	५	१२	१९
रागरक्तो मधुकरः	४	१	८८

	का०	स०	श्लो०
राघवप्रत्ययार्थं तु	१	१	६४
राघवशोकसंतप्तः	१	१	५४
राघवश्च तमेवार्थम्	७	३६	६०
राघवश्चापि धर्मात्मा	६	१२८	९७
राघवश्चापि विपुलम्	६	८३	१
राघवस्तमुपागम्य	७	७५	१५
राघवस्तवसंयुक्ताः	६	१०८	२९
राघवस्तु रिपोर्ज्ञात्वा	६	८५	२०
राघवस्त्वपयातेषु	२	११७	१
राघवस्त्वां वरारोहे	५	६७	२९
राघवस्य च यः कार्यम्	४	२२	१५
राघवस्य तु तद्वाक्यम्	७	७६	१३
राघवस्य प्रमत्तस्य	५	२६	३
राघवस्य प्रसादेन	५	५८	१६८
राघवस्य प्रियार्थं तु	६	२३	१६
राघवस्य वचः श्रुत्वा	४	८	२५
राघवस्य वचः श्रुत्वा	६	४	२१
राघवस्य वचः श्रुत्वा	६	५९	५०
राघवस्य वचः श्रुत्वा	६	५९	१३१
राघवस्य वचः श्रुत्वा	६	८५	४
राघवस्य वचः श्रुत्वा	६	८५	२४
राघवस्य वचः श्रुत्वा	७	४	८
राघवस्य वचः श्रुत्वा	७	३१	५
राघवस्य वचः श्रुत्वा	७	३५	१४
राघवस्य वचः श्रुत्वा	७	६२	२
राघवस्य विलापं च	१	३	२१
राघवस्य हरीणां च	६	१२६	३
राघवं च महात्मानम्	६	८४	४
राघवं लक्ष्मणं चैव	६	६३	४९
राघवं परमप्रीतः	६	११२	७
राघवं प्राह विज्ञाने	३	७४	१९
राघवः संनिवेश्यैव	६	४१	५८
राघवः सर्वमाचष्टे	७	७४	७
राघवः सह सैन्येन	६	४२	६
राघवाय च संन्यासम्	२	११५	२०
राघवाय ददौ वायुः	६	१२८	७०
राघवार्थे चरञ्श्रीमान्	५	४	९

	का०	स०	श्लो०
राघवाश्वासनं चैव	१	३	३४
राघवे चार्थनिवृत्तिम्	५	६१	५
राघवेण तु वीरेण	४	३२	११
राघवेण यथा माता	६	१२८	१०८
राघवेण समादिष्टः	६	६१	३६
राघवेणाभये दत्ते	६	१६	१
राघवेणैवमुक्तस्त्	३	४	३४
राघवेणैवमुक्तस्तु	६	७६	२१
राघवेणैवमुक्तस्तु	७	४३	१२
राघवेणैवमुक्तस्तु	७	६२	६
राघवेणैवमुक्तस्तु	७	८५	२
राघवे नरशार्दूले	२	४३	२
राघवे हि वनं प्राप्ते	२	१२	८७
राघवैः सह संबन्धात्	१	६६	१२
राघवो नृपशार्दूलः	५	६०	१७
राघवोऽपि महच्चापम्	३	२०	६
राघवोऽपि महातेजा	२	५२	७८
राघवोऽपि सह भ्रात्रा	४	१२	२४
राघवो भ्रातरं दृष्ट्वा	६	१०१	६
राघवो रावणं तूर्णम्	६	६६	२५
राघवौ तु तदा तस्याः	१	४६	१७
राघवौ पतितौ दृष्ट्वा	६	४६	७
राजदारास्तथामात्याः	६	१२७	४
राजदोषपरामृष्टाः	४	१४	२१
राजदोषैर्विपद्यन्ते	७	७३	१६
राजद्वारि मरिष्यामि	७	७३	१२
राजधानीं यमस्यैषा	४	४१	४५
राजनीत्यां विनीतश्च	५	३५	१३
राजन्दास्यामि शबलाम्	१	५३	१२
राजन्धर्मविरुद्धं च	५	५२	६
राजन्नापदयुक्तेयम्	६	७	२५
राजन्पितुर्गमिष्यामि	२	७०	१५
राजन्प्रभुर्यतोऽस्माकम्	७	६५	३०
राजन्मन्त्रितपूर्वं नः	६	५७	१३
राजन्वदामि ते सर्वम्	७	१३	१७
राजन्वनमिदं दुर्गम्	५	५८	११३
राजन्वैधव्यशब्दं च	७	२४	३०

	का०	स०	श्लो०
राजस कालसंकाशः	६	६८	२
राजपत्न्यश्च गच्छन्त्यः	२	१०४	२
राजपुत्रि श्रुतं त्वेतत्	२	११७	१५
राजपुत्रौ महारण्यम्	२	७१	८
राजप्रभावजुष्टां च	२	२	६
राजभावे नियुक्तोऽहम्	४	१०	११
राजभावे नियोगोऽयम्	४	१०	८
राजभिर्धृतदण्डाश्च	४	१८	३१
राजभोगाननुभवन्	२	१०८	६
राजमार्गमसंबाधम्	६	१२७	१०
राजमार्गं यथौ रामः	२	१७	३
राजमार्गं श्रिया जुष्टम्	६	११	१०
राजमार्गेण महता	१	५	८
राजमूलो हि धर्मश्च	३	४१	१०
राजर्षयः शास्त्रविदः	७	२२	२६
राजर्षिणा गुणवता	१	४४	१०
राजर्षिविप्रदैत्यानाम्	५	६	६८
राजर्षीणां हि लोकेऽस्मिन्	२	४६	१६
राजलक्षणयुक्तेन	२	२	३
राजलक्षणसंयुक्तः	४	४	१०
राजवंशाञ्छतगुणान्	१	१	६६
राजवंशांश्च बहुशः	७	५१	२२
राजवासगृहे दूतैः	२	७२	१०
राजवेषा कृता लक्ष्मी	६	६५	७
राजसिंह महाबुद्धे	१	६२	२२
राजसूयाश्वमेधैश्च	४	५	४
राजस्त्रीबालवृद्धानाम्	२	७५	३७
राजहंसप्रतीकाशम्	५	१८	१४
राजहा ब्रह्महा गोघ्नः	४	१७	३६
राजस्त्वं तेजसा तस्य	१	६०	१५
राजा कृत्स्नस्य जगतः	४	५७	७
राजा च कृतकार्यः स्यात्	१	६२	६
राजा जयति सुग्रीवः	६	४२	४४
राजा तस्माद्वरान्भोगान्	३	१	२०
राजा तु धर्मेण हि पाल०	२	१००	७६
राजा तु रजसा सूतम्	२	५८	४
राजा त्वं मानुषे लोके	७	६७	१०

	का०	स०	श्लो०
राजा दशरथः श्रीमान्	३	६८	२६
राजा दशरथः स्वर्गम्	१	१	३३
राजा दशरथो नाम	३	१२	२
राजा दशरथो नाम	३	५६	२
राजा दशरथो नाम	४	४	६
राजा दशरथो नाम	४	६२	४
राजा दशरथो नाम	५	५१	४
राजा दशरथो नाम	५	३१	२
राजा दशदथो राजन्	१	७३	११
राजा धर्मश्च कामश्च	३	५०	१०
राजानं प्रश्रितैर्वाक्यैः	१	६७	२५
राजानं स्तुवतां तेषाम्	२	६५	३
राजानश्च महात्मानः	७	६५	१५
राजानश्च महाभागा.	७	६१	१२
राजापति तौ महा.जाः	२	१	४
राजापि यजते यज्ञम्	७	६५	१८
राजा भवति भूयिष्ठम्	२	७२	१२
राजा भवतु ते पुत्रः	२	३५	१०
राजाभूत्रिषु लेकेषु	१	७१	३
राजाभ्रष्टस्य दीनस्य	३	५८	३
राजार्हं परमं दिव्यम्	१	७०	१०
राजा वानरमुख्यानाम्	५	३४	३६
राजा वा राजपुत्रो वा	२	६६	६
राजा वा राजमात्रो वा	७	३१	३
राजा सत्यं च धर्मश्च	२	६७	३४
राजा सत्वरमाहूय	२	३६	१४
राजा सर्वस्य लोकस्य	३	१२	३०
राजा सर्वस्य लोकस्य	४	५२	४
राजासीदेष धर्मात्मा	१	५१	१७
राजा हि वृद्धः संतापम्	७	३८	१०
राजीवचित्रपृष्ठः सः	३	४२	२४
राज्यं गतधनं साधो	२	३६	१२
राज्यं गृहाण भरत	२	७६	५
राज्यं च सुमहत्प्राप्य	४	४६	६
राज्यं दशसहस्राणि	६	१२८	६५
राज्यं द्विजातिभिर्जुष्टम्	२	१६	२२
राज्यं पालयितुं शक्यम्	३	४१	११

	का०	स०	श्लो०
राज्यं प्रशाधि धर्मेण	७	६२	२०
राज्यं प्रशासतस्तस्य	४	६	३
राज्यं प्राप्स्यसि धर्मज्ञ	६	५०	२१
राज्यं प्रार्थयमानस्तु	६	१७	६७
राज्यं भ्रष्टं वने वासः	३	६७	२४
राज्यं यदि हि रामस्य	२	८	१६
राज्यं वा त्रिषु लोकेषु	५	१६	१४
राज्यं सुखं च संत्यज्य	३	३७	१७
राज्यकामो मम क्रोधः	३	२	२५
राज्यनाशं वने वासम्	६	१००	४६
राज्यप्रणाशः स्वजनैर्वियोगः	३	६३	५
राज्यभारनियुक्तानाम्	१	२५	१६
राज्यभ्रष्टेन दीनेन	३	५५	२१
राज्यश्रीर्न जहाति त्वाम्	४	२३	२६
राज्यहेतोः स चेद्भ्राता	४	१६	६
राज्याच्च हीनो भ्रात्रा च	४	६१	१७
राज्याद्भ्रंशस्व कैकेयि	२	७४	२
राज्येन नास्ति मे कार्यम्	६	६८	१७
राज्ये पुत्रं प्रतिष्ठाप्य	४	५५	८
राज्ञः पादौ गृहीत्वा तु	६	११	२३
राज्ञः पुत्रा महात्मानः	१	१८	१६
राज्ञः शासनमाज्ञाय	७	६३	१२
राज्ञः शासनमादाय	७	४७	१५
राज्ञः संप्रतिबुद्धस्य	२	१५	१८
राज्ञस्तु प्रकृतीः सर्वा	२	८२	४
राज्ञस्तु भवनद्वारि	७	५२	५
राज्ञस्तूपरते वाक्ये	२	३	५
राज्ञा तु खलु कैकेय्या	२	५८	२७
राज्ञामृद्धिविशेषा हि	४	२५	३२
राज्ञा सत्यप्रतिज्ञेन	२	२६	२१
राज्ञा हि भगवन्नित्यम्	२	६१	७
राज्ञो वचनमाज्ञाय	२	३६	१२
राज्ञो विप्रतिकूलस्थः	३	४०	२६
राज्ञो विलपमानस्य	२	१३	१६
राज्ञो वृद्धस्य सततम्	२	२४	२५
रात्रियुद्धे तदा पूर्वम्	६	८८	१०
रात्रि कथंचिदेवेमाम्	२	५३	४

	का०	स०	श्लो०
रात्रिः शशाङ्कोदितसौम्यव०	४	३०	४६
रात्रौ लङ्काप्रवेशं च	१	३	२६
रात्रौ सा दृश्यते लङ्का	६	७५	२७
रात्र्यां तु तस्यां व्युष्टायाम्	२	५४	३८
राधेयो बहुमानी च	७	६	३५
रामं कमलपत्राक्षम्	६	४५	२६
राम च लक्ष्मणं चैव	५	६२	३६
रामं चैव महात्मानम्	४	२६	४०
रामं तत्रानयांचक्रे	२	३	२४
रामं दशरथं विद्धि	२	४०	६
रामं दशरथिं रामः	१	७६	२४
रामं दृष्ट्वा सुसंक्रुद्धम्	६	१०२	४२
रामं प्रदक्षिणीकृत्य	७	६४	१६
रामं प्राञ्जलयो भूत्वा	१	२८	१३
रामं प्रेक्ष्य तु सीतायाः	२	३७	१५
रामं रक्तान्तमयनम्	५	२६	३४
रामं वा लक्ष्मणं वापि	२	६०	१३
रामं विना क्षणमपि	३	४५	२७
रामं शुश्रूष भद्रं ते	६	११६	२८
रामं समनुगच्छति	३	५६	१८
रामः कमलपत्राक्षः	५	३५	८
रामः कमलपत्राक्षः	६	३३	२७
रामः कमलपत्राक्षः	७	३६	१७
रामः कृतात्मा भक्ता	२	३	२३
रामः क्रोधं परं लेभे	३	२६	५
रामः परबलामर्दी	४	१५	१६
रामः पूर्वो हि नो भ्राता	२	७६	८
रामः प्रदीप्तैर्बहुभिः	३	२५	१४
राम. प्रेक्ष्य तु तं गृध्रम्	३	६८	१
रामः सत्पुरुषो लोके	२	२	२६
रामः समभिचक्राम	३	६४	५
रामः संतप्तहृदयः	७	४७	१२
रामः संसाध्य ऋषिगणम०	२	११६	२५
रामः स्नात्वा तु नियतः	२	५६	२६
रामः स्वबाहुवीर्येण	६	१२६	३८
रामकोपादशेषाणाम्	४	५६	१६
रामक्षयमनुप्राप्तम्	५	३७	१३

	का०	स०	श्लो०
रामचन्द्रमसं दृष्ट्वा	६	१०२	३२
रामचापविसृष्टेन	४	२०	१
रामतेजोभिभूतो हि	३	२१	२०
रामदर्शनशीघ्रेण	५	५६	३८
राम दशरथे वीर	१	७५	१
रामदूतं च मां विद्धि	५	५८	१३५
रामधर्ममिमं प्रेक्ष्य	२	११२	१०
रामप्रव्रजनं दूरम्	२	६	३०
रामप्रव्रजनं चैव	२	६	३२
रामप्रसादात्कीर्तिं च	४	३५	५
रामप्रियार्थं प्राणानाम्	६	२७	४६
राम प्रीतोऽस्मि भद्रं ते	३	१३	१
राममक्लिष्टकर्माणम्	५	३०	४१
रामामर्षं तदा दृष्ट्वा	६	१०२	३१
रामाश्वासने तु	६	८४	१
रामिन्दीवरश्यामम्	२	२	५३
राममुक्तांस्तु बाणौघान्	६	७६	२७
राममेव हि पश्यामि	३	३६	१७
राममेवं तु धर्मज्ञ	२	५२	१२
राममेवानुगच्छामि	२	८२	१६
राम राम न संतापम्	७	६८	१२
राम राम महाबाहो	६	१०५	३
रामरामविवादं च	१	३	१२
रामरावणमुक्तानाम्	६	१००	५६
रामरावणयोरर्थे	६	५५	१६
रामरावणयोर्युद्धम्	६	१०७	५२
रामलक्ष्मणगुप्ता सा	६	४१	५७
रामलक्ष्मणयोरर्थे	१	७०	४५
रामलक्ष्मणयो राजन्	१	७२	३
रामलक्ष्मणयोर्दृष्ट्वा	६	४६	२६
रामलक्ष्मणयोर्नाम	४	५६	२१
रामलक्ष्मणयोर्मध्ये	५	३०	१२
रामलक्ष्मणयोर्वासम्	४	५६	१५
रामलक्ष्मणयोश्चापि	१	६६	२६
रामलक्ष्मणयोश्चैव	२	६३	२
रामलक्ष्मणयोः पश्चात्	१	२३	२०
रामलक्ष्मणसीताभिः	१	१	१

	का०	स०	श्लो०
रामलक्ष्मणसीतार्थम्	२	४०	४५
रामवाक्यमुपश्रुत्य	६	६१	३८
रामवृक्षं रणे हन्मि	६	६६	४
रामवृद्धोऽस्मि दीर्घायुः	२	४	१२
रामवेश्म सुमन्त्रस्तु	२	१५	३१
रामशोकमहावेगः	२	५६	२८
रामशोकाभिभूतोऽहम्	४	८	२६
रामशोकाभिसंतप्ता	५	१४	४७
राम षड्युक्तयो लोके	३	७२	८
रामश्च हि महातेजाः	३	५६	७६
रामश्चिक्षेप तेजस्वी	६	१०७	१२
रामश्चिच्छेद बाणेन	३	२७	१६
राम संजातवालूकाम्	३	७३	१२
रामसुग्रीवयोरैक्यम्	५	३५	६१
रामसुग्रीवसख्यं च	५	५६	२६
रामसुग्रीवसख्यं च	५	६५	१८
राम सेनापतिस्तस्य	६	१६	११
रामस्तथा सत्यवृत्तिः	३	८२	६
रामस्तस्य तु विज्ञाय	३	६७	२१
रामस्तु पुनरालक्ष्य	१	१	४०
रामस्तु बहुभिर्हृष्टैः	६	४१	६३
रामस्तु भृशमायस्तः	२	२०	८
रामस्तु मुनिशार्दूलम्	१	५०	२
रामस्तु यदि पृच्छेन्माम्	५	३०	१३
रामस्तु व्यथितं श्रुत्वा	६	७६	५७
रामस्तु सहसौमित्रिः	३	८	१
रामस्तु सहितो भ्रात्रा	३	७	१
रामस्त्वनेन वाक्येन	२	३१	२८
रामस्त्वाश्रममासाद्य	२	५४	६
रामस्य गदितं श्रुत्वा	५	६५	६
रामस्य चरितं कृत्स्नम्	१	२	३२
रामस्य च सुता ये स्युः	७	५१	६
रामस्य तुरगान्दीप्तैः	६	१०७	१५
रामस्य तु वचः कुर्वन्	४	२६	३८
रामस्य तु वचः श्रुत्वा	२	१६	२७
रामस्य तु वचः श्रुत्वा	२	३६	१
रामस्य तु वचः श्रुत्वा	२	४६	३२
रामस्य तु वचः श्रुत्वा	६	१८	३५
रामस्य तु वचः श्रुत्वा	६	३४	२३
रामस्य तु विशालाक्षी	३	३४	१५
रामस्य दक्षिणे पार्श्वे	७	१०६	६
रामस्य दुष्कृतं किंचित्	७	७३	१०
रामस्य धनुषः शब्दम्	५	२१	२४
रामस्य न कृतं कार्यम्	४	५६	८
रामस्य पुरुषव्याघ्रः	३	४७	१६
रामस्य बाहुवीर्येण	७	३६	५
रामस्य भवनद्वारि	७	६३	६
रामस्य भाषितं श्रुत्वा	७	४०	१३
रामस्य भाषितं श्रुत्वा	७	५४	१
रामस्य भाषितं श्रुत्वा	७	५६	१
रामस्य यदिदं कार्यम्	४	५८	१४
रामस्य राजशार्दूल	१	१६	१३
रामस्य लक्ष्मणस्यैव	६	४६	१६
रामस्य लोकरामस्य	१	१८	२६
रामस्य लोकरामस्य	१	७३	१६
रामस्य वचनं श्रुत्वा	१	५०	५
रामस्य वचनं श्रुत्वा	१	७७	४
रामस्य वचनं श्रुत्वा	३	१४	५
रामस्य वचनं श्रुत्वा	४	११	१
रामस्य वचनं श्रुत्वा	६	४	१०३
रामस्य वचनं श्रुत्वा	४	२२	२८
रामस्य वचनं श्रुत्वा	७	४४	३
रामस्य वचनं श्रुत्वा	७	७६	४
रामस्य व्यवसायज्ञा	५	१६	४
रामस्य व्यवसायं च	६	२५	७
रामस्य शीलवृत्तेन	१	७७	२४
रामस्य सह सौमित्रे	१	२	३४
रामस्यापि निमित्तानि	६	१०६	३४
रामस्याभ्यवहारार्थम्	७	४२	२०
रामस्यार्थे पराक्रम्य	६	७३	३६
रामस्यास्य महाघोरम्	३	२५	३५
रामस्यैतद्वचः श्रुत्वा	७	७२	१८
रामस्यैवं ब्रुवाणस्य	१	३०	८
रामस्यैष हितार्थैव	५	१	१३४

	का०	स०	श्लो०
रामस्योपरि संहृष्टाः	३	३०	३०
रामहस्ताद्दशग्रीवः	६	६४	२६
रामादपि हितं मन्ये	२	१२	६२
रामाद्विशिष्टः कोऽन्योऽस्ति	५	३६	५३
रामानुजेन वीरेण	७	६६	२६
रामान्नान्यद्बलं लोके	३	३८	६
रामाभिषेकयुक्ताश्च	२	६	१५
रामाभिषेकसकल्पात्	२	६	३६
रामभिषेकसंभारैः	२	१४	१६
रामाय चाचचक्षेताम्	२	११७	६
रामाय तु यथातत्त्वम्	३	४६	४०
रामाय वेदितं सर्वम्	१	१	६२
रामा रम्या वनोद्देशे	३	६४	३०
रामार्थं वानरार्थं च	५	१	२८
रामास्त्रविद्धो घोरं वै	६	६७	११८
रामेण कुशलं पृष्टाः	७	१	१६
रामेण तापसी पृष्टा	३	७४	१०
रामेण त्वं वरारोहे	३	४५	१८
रामेण बाणाभिहतं	३	२५	४५
रामेण भाषिते वाक्ये	७	१०६	१४
रामेण यदि ते पापे	२	३८	७
रामेण संगता सीता	५	२७	१२
रामेण हि प्रतिज्ञातम्	५	५१	३२
रामेण हि महत्कर्म	४	२०	२०
रामेणाभिनिरस्तस्य	६	६०	२०
रामेङ्गुदिपिण्याकम्	२	१०४	१४
रामेति मधुरां वाणीम्	१	२२	१२
रामेति राजा विलपन्	२	७२	३६
रामेति रामेति सदैव बुद्ध्या	५	३२	११
रामेत्युक्त्वा तु वचनम्	२	१८	३
रामे दुःखाभिभूते च	५	६७	२६
रामे वा भरते वाहम्	२	७	३५
रामे हि यौवराज्यस्थे	२	३५	३५
रामो दाशरथिः श्रीमान्	५	५८	२५
रामो धर्मभृतां श्रेष्ठः	५	५८	१८
रामो नाम महातेजाः	३	३१	१५
रामो नाम श्रुतो लोके	७	३०	४२
रामो नाम स धर्मात्मा	३	५६	३
रामोपरोधव्यथिताम्	५	१५	३५
रामोऽपि परमां पूजाम्	१	४६	२२
रामोऽपि मुनिभिः सार्धम्	७	६४	३०
रामोऽपि रात्रिशेषेण	२	४६	१
रामोऽपि रेमे तैः सार्धम्	७	३६	२८
रामोऽपि सहसैन्येन	६	१११	१२३
रामोऽपि सहसौमित्रिः	१	३४	२३
रामोऽपि सहसौमित्रिः	३	६८	३२
रामोऽभ्युत्थाप्य राजानम्	२	१६	१८
रामो बहून्यहान्येव	५	३५	११
रामो भामिनि लोकस्य	७	६५	१
रामोऽभिवाद्य प्रयत	७	१	१४
रामो मातरमासाद्य	६	१२७	४६
रामोऽयमिति विज्ञाय	६	६७	१४८
रामो याहीति तं सूतम्	२	४०	३२
रामो रमयतां श्रेष्ठः	७	५८	५
रामो राज्यमुपासित्वा	७	५१	२१
रामो रुधिरसिक्ताङ्गम्	३	४८	२२
रामो लोकाभिरामोऽयम्	२	२	४८
रामो विग्रहवान्धर्मः	३	३७	१३
रामोऽहमस्मि भगवन्	३	७	६
रामो हि भरताद्भूयस्	२	१२	२५
रावणं क्रुद्धमाज्ञाय	६	१३	१
रावणं जहि राक्षेन्द्र	७	१५	२
रावणं जानकी तत्र	३	५६	२३
रावणं तु मुमोचाथ	७	३४	३४
रावणं निहतं दृष्ट्वा	६	११०	१
रावणं पृष्ठतः कृत्वा	५	२१	६
रावण प्राञ्जलिं यान्तम्	७	३१	४१
रावणं प्रेक्ष्य गच्छन्तम्	७	२५	३८
रावणं प्रेक्ष्य राजानम्	६	५७	२४
रावणं प्रेक्ष्य हृष्टात्मा	६	१०५	३०
रावणं भज भर्तारम्	५	२४	२३
रावणं भज भर्तारम्	५	२४	३७
रावणं राक्षसाधीशम्	६	१११	१०८
रावणं सगणं हत्वा	४	७	४

	का०	स०	श्लो०
रावणं समरे हत्वा	६	३३	३३
रावणं सहिताः सर्वे	५	५२	८
रावणः पुत्रशोकेन	६	९२	३७
रावणः प्रहसन्नेव	६	२४	२५
रावणः सगणो युद्धे	७	३८	२४
रावणः स महावीर्यः	७	२६	१३
रावणग्रहणं तत्तु	७	३३	१
रावणध्वजमुद्दिश्य	६	१०७	११
रावणश्च दुराधर्षः	७	४३	१५
रावणश्च मया हृष्टः	५	३५	७१
रावणश्च यतस्तत्र	६	१०६	२५
रावणश्चापि चिक्षेप	६	३१	४३
रावणस्तवसंयुक्तान्	५	४	१४
रावणस्तु ततः स्वस्थः	७	२२	१३
रावणस्तु परं चक्रे	६	४१	९२
रावणस्तु महाबाहुः	६	९५	३८
रावणस्तु महावीर्यः	७	२६	३
रावणस्तु समासाद्य	७	२९	३१
रावणस्तु सहामात्यः	६	३६	१६
रावणस्त्वब्रवीद्धृष्टः	६	६०	८७
रावणस्य गृहे रुद्धा	५	२४	३१
रावणस्य च बाणौघैः	६	९९	१६
रावणस्य तु तेऽमात्याः	७	३२	३६
रावणस्य पुनर्वाक्यम्	३	३१	१४
रावणस्य पुरीं रात्रौ	५	२	४५
रावणस्य महाकान्ताम्	५	९	२२
रावणस्य रथं क्षिप्रम्	६	१०६	४
रावणस्य वचः श्रुत्वा	५	५०	७
रावणस्य वचः श्रुत्वा	६	४१	८४
रावणस्य वचः श्रुत्वा	५	५९	५८
रावणस्य वचः श्रुत्वा	६	६१	२७
रावणस्य वचः श्रुत्वा	६	७८	४
रावणस्य वधं घोरम्	६	११२	२
रावणस्य वधो घोरः	७	७१	९
रावणस्य शिरोऽच्छिन्दत्	६	१०७	५४
रावणस्य समीपं च	५	५८	१३२
रावणस्य समीपे तु	५	४२	१२

	का०	स०	श्लो०
रावणस्य सुताः सर्वे	५	२७	२८
रावणस्य ह्यान्रामः	६	१०७	२७
रावणस्ऽग्निहोत्रं	६	१११	१०४
रावणस्यानुजो भ्राता	६	१७	२६
रावणस्याप्रसह्यं तम्	६	९६	२
रावणस्योपशायिन्यः	५	६	२९
रावणस्योरुवेगेन	५	१३	९
रावणाङ्कपरिक्लिष्टाम्	६	११५	२०
रावणात्कुम्भकर्णाच्च	७	४	५
रावणाद्विनिवृत्तार्था	५	५८	६१
रावणाधिष्ठितं भीमम्	६	४१	३६
रावणाननशङ्काश्च	५	९	५७
रावणानन्तरो भ्राता	६	१९	१०
रावणानुचरो घोरः	६	१२६	२२
रावणान्तः पुरे घोरे	५	२४	३१
रावणान्तःपुरे रुद्धा	४	५८	२३
रावणान्तःपुरे रुद्धा	५	६५	१४
रावणान्तःपुरे रोधम्	५	६५	३
रावणाय शरान्घोरान्	६	१०२	२
रावणावरजः कश्चित्	२	११६	११
रावणावरजः श्रीमान्	५	३७	२१
रावणिस्तु दिशः सर्वाः	५	८०	३३
रावणिस्तु सुसंक्रुद्धः	६	७३	२९
रावणिस्त्वथ संक्रुद्धः	७	२८	२२
रावणे तु गते देवाः	७	१८	२०
रावणे देवकण्टके	६	१२४	१५
रावणेन जनस्थानात्	५	३३	१२
रावणेन तु वैदेही	३	४७	१
रावणेन प्रणिहितम्	६	१८	१७
रावणेन प्रणीतं हि	६	१७	२७
रावणेन रणे शक्तिः	६	१००	३४
रावणेन हृतां दृष्ट्वा	५	२४	४०
रावणेनापनीतैषा	६	११८	७
रावणेनाभ्यनुज्ञातौ	६	९५	३९
रावणेनैवमुक्तस्तु	६	५७	१२
रावणेनैवमुक्तस्तु	६	५९	६४
रावणेनैवमुक्ता तु	३	४७	३२

	का०	स०	श्लो०
रावणे सुखसंविष्टे	५	६	६७
रावणेस्तु शिरश्छिन्नम्	६	६१	६
रावणोत्सादनार्थानि	७	३६	२४
रावणोऽथ महातेजाः	६	५६	७३
रावणो नाम दुर्वृत्तः	६	१७	१२
रावणो नार्हते पूजाम्	६	३	६५
रावणो नो निहन्तव्यः	६	४	२६
रावणोऽपि ततः क्रुद्धः	६	१०७	६३
रावणोऽपि महातेजाः	६	५६	८०
रावणोऽपि महातेजाः	६	५६	११६
रावणो मोचयामास	७	२१	२२
रावणोऽयमिति ज्ञात्वा	४	४८	२०
रावणोऽयं महाबाहुः	५	१८	३०
रावणो राक्षसश्रेष्ठः	७	२५	४१
रावणोऽर्धसमाप्तं तम्	७	३२	८
रावणो हि महावीर्यः	६	५६	४८
राष्ट्रे भरतमागीनम्	२	१२	५६
राहुशत्रोः प्रियां पत्नीम्	२	११४	३
राहोर्वचनमास्थाय	७	३५	६०
राहोर्विक्रोशमानस्य	७	३५	४३
रिपुः प्रच्छन्नचारी त्वम्	३	५६	१६
रिपुशोणितदिग्धाङ्गाः	६	६६	५४
रिपुणां प्रतिकूलानाम्	६	२६	८
रुक्मनिष्कसहस्रे द्वे	२	७०	२१
रुक्मपुङ्खैः प्रसन्नाग्रैः	६	४५	२३
रुचिराण्यपि पुष्पाणि	४	१	४५
रुणद्धि मृदु सोत्सेधम्	२	६३	४६
रुदता सुमहान्मुक्तः	७	१२	३०
रुदतां वाहनानां च	६	३५	२६
रुदन्तमिव वृक्षैश्च	३	६०	६
रुदन्तं प्राञ्जलिं दृष्ट्वा	७	४७	७
रुदन्तौ रुदती दुःखात्	२	७५	१०
रुदन्नार्तः प्रियं पुत्रम्	२	३४	३०
रुद मा देवि शोकेन	५	३६	५२
रुदितं व्यपमृष्टास्रम्	३	५२	२१
रुदिताश्रुपरिप्लुतम्	२	४०	३४
रुद्धा चान्तः पुरे गुप्ता	६	११८	८
रुद्धां तु नगरीं दृष्ट्वा	६	५७	४
रुद्धां तु नगरीं श्रुत्वा	४	४२	२
रुद्रकालाविव क्रुद्धौ	७	३२	५३
रुद्रश्च परमं तोषम्	७	६०	१६
रुद्राणामष्टमो रुद्रः	६	११७	८
रुद्रादित्यमसाग्राहम्	६	७	२१
रुद्रैर्वसुभिरादित्यैः	७	२८	२७
रुद्रो वा यदि वा विष्णुः	६	६४	२४
रुधिरविलिप्तगात्रस्तु	६	६१	१
रुधिराक्तः स वेगेन	६	१०८	१६
रुधिरार्द्रा तदा चक्रुः	६	५५	२४
रुधिरेणावसिक्ताङ्गम्	२	६४	२७
रुधिरौघेण संछन्ना	६	५३	३१
रुधिरोक्षितगात्रस्य	६	५४	३५
रुधिरोक्षितसर्वाङ्गः	६	५४	१६
रुधिरौघविवाहिनीम्	३	५३	१६
रुमां तु वीरः परिरभ्य गाढम्	४	३३	१६
रुमां मां चाङ्गदं राज्यम्	४	३५	१६
रुमाद्वितीयं सुग्रीवम्	४	३४	६
रुरून्पेतान् जघान्	३	७३	३६
रुरोद सहसा सीता	५	३२	६
रुरोध वर्णनेत्राणि	६	४४	११
रुरोध दुःखं जनयन्	६	३५	५६
रूपद्रविणसंपन्नौ	१	१७	१४
रूपमप्रतिमं तस्य	३	२४	२६
रूपमुत्सिष्टतस्तस्य	६	६०	६०
रूपयौवनदृप्तानाम्	४	२०	१३
रूपयौवनसंपन्ना	७	३०	३७
रूपलक्षणसंपन्नौ	१	४	११
रूपलक्षणसंपन्नौ	५	३५	३०
रूपवान्सुभगः श्रीमान्	५	३४	३०
रूपसंहननं लक्ष्मीम्	३	१	१३
रूपं च ते प्रजाः सर्वाः	७	३०	३८
रूपाजीवाश्च वादित्राः	२	३६	३
रूपौदार्य गुणैः पुंसाम्	२	३	२६
रूप्यकोपहितैश्चित्रैः	५	६	४

	का०	स०	श्लो०
रेमिरे मुदिताः सर्वाः	१	७७	१४
रेमे तु सार्धं पतिना	७	४	२५
रोचते यदि ते वाक्यम्	३	३४	२४
रोचते यदि मे सख्यम्	४	५	११
रोचयति स्म तं यज्ञम्	७	९०	१४
रोचयस्यभिरामस्य	२	१२	२४
रोदनादतिनिःश्वासात्	५	३३	१०
रोमकूपेषु सर्वेषु	१	५६	१८
रोमजं वालजं चर्म	६	७५	१२
रोमपादमुवाचेदम्	१	२०	२
रोमभिर्निशितैस्तीक्ष्णैः	३	६९	२८
रोषमाहारयत्तीव्रम्	१	६०	२०
रोषरोदनताम्राक्षी	३	५३	२
रोषवेगप्रकुपितः	४	३३	२६
रोषात्तु ताम्रनयनः	३	१६	१२
रोषात्प्रस्फुरमाणोष्ठः	४	३१	१७
रोषामर्षपरीतात्मा	५	५३	९
रोषितः शरवर्षेण	६	५८	४३
रोषेण महताविष्टः	१	४०	३०
रोषेण महताविष्टः	६	५९	१३२
रोषेण महताविष्टः	१	६६	२२
रोहिणीं शशिना हीनाम्	३	४६	६
रोहणीमिव शशाङ्केन	२	१६	४२
रोहिण्यजनयद्गात्रः	३	१४	२८
रोहिता नाम गन्धर्वाः	४	४१	४२
रोहिमांसानि चोद्धृत्य	३	६८	३३
रौक्मेषु च विशालेषु	५	११	१५
रौद्रचापप्रयुक्तां ताम्	६	९९	३५
रौद्रेण कश्चिदस्त्रेण	५	३६	२७
रौप्यकाञ्चनवर्णाभे	३	४६	१६
रौप्यैर्बिन्दुशतैश्चित्रम्	३	४२	२२
(ल)			
लक्षणज्ञांश्च गान्धर्वान्	७	९४	६
लक्षणिभ्यो द्विजातिभ्यः	२	२९	९
लक्षयस्व तयोर्भावम्	४	२	२५
लक्षयामास लक्ष्मीवान्	५	१७	१९
लक्षयामास स ऋषिः	२	६३	४८
लक्षयित्वा ह्यभिप्रायम्	२	१६	१६
लक्षिप्यो रत्नभूताश्च	६	२५	१७
लक्षितेयं मया सीता	५	५१	२३
लक्ष्मणं चानुजानिहि	२	३४	२३
लक्ष्मणं चैव दृष्टवा तु	३	१	१२
लक्ष्मणं त्वेवमुक्त्वासौ	२	४०	८
लक्ष्मणं परवीरघ्नः	६	८९	२७
लक्ष्मणं परिवार्यैवम्	६	१००	४६
लक्ष्मणश्च महातेजाः	५	३४	४
लक्ष्मणश्च महाबाहुः	३	४४	२५
लक्ष्मणश्च सुमन्त्रश्च	२	५०	३०
लक्ष्मणश्चात्र धर्मात्मा	६	३०	३१
लक्ष्मणश्चापि तत्रैव	२	३७	८
लक्ष्मणश्चापि रामस्य	२	६०	६
लक्ष्मणश्चैव धर्मात्मा	२	९५	१६
लक्ष्मणस्तु ततः क्रुद्धः	६	८०	३७
लक्ष्मणस्तु महातेजाः	३	६९	२०
लक्ष्मणस्तु महोल्काभिः	३	७२	२
लक्ष्मणस्तु सुसंक्रुद्धः	२	५८	२६
लक्ष्मणस्त्वङ्गदीयायाम्	७	१०२	१३
लक्ष्मणस्य च नाराचा	४	५४	१५
लक्ष्मणस्य च यद्वेष्म	२	३२	२५
लक्ष्मणस्य तु तद्वाक्यम्	७	५३	१
लक्ष्मणस्य तु तद्वाक्यम्	७	८५	१
लक्ष्मणस्य परित्यागम्	७	१०८	३
लक्ष्मणस्य भयेनेह	४	५५	६
लक्ष्मणस्य वच श्रुत्वा	४	२५	२०
लक्ष्मणस्य वचः श्रुत्वा	४	३१	३५
लक्ष्मणस्य वचः श्रुत्वा	७	४८	१
लक्ष्मणस्य वचः श्रुत्वा	७	१०५	१०
लक्ष्मणस्य हि तद्वाक्यम्	४	२७	४१
लक्ष्मणस्यात्मनश्चैव	२	५२	६९
लक्ष्मणादथ चादाय	३	६४	७३
लक्ष्मणानय दारुणि	२	५६	१९
लक्ष्मणानुचरो रामः	४	१७	१२
लक्ष्मणाय समुद्दिश्य	६	१००	३१
लक्ष्मणारक्षितां शीघ्रम्	४	३८	११

	का०	स०	श्लो०
लक्ष्मणेन तथोक्तस्तु	७	१०६	५
लक्ष्मणेन तु तद्वाक्यम्	६	१०२	१
लक्ष्मणेन यदानीतम्	२	८७	१८
लक्ष्मणेन समाहितः	३	६१	१६
लक्ष्मणेन समुत्पाट्य	४	४	६
लक्ष्मणेन सह भ्रात्रा	२	११८	४५
लक्ष्मणेन सह भ्रात्रा	४	५२	५
लक्ष्मणेन सह भ्रात्रा	४	५७	८
लक्ष्मणेन सह भ्रात्रा	५	२७	१८
लक्ष्मणेन सह भ्रात्रा	५	५१	६
लक्ष्मणेन सह भ्रात्रा	६	६६	१२
लक्ष्मणेन सह भ्रात्रा	६	१२१	१३
लक्ष्मणेन सहायेन	३	३७	१८
लक्ष्मणेन सहायेन	७	३८	१४
लक्ष्मणेनानुयात्रेण	७	३८	११
लक्ष्मणेनैवमुक्तस्तु	७	५४	४
लक्ष्मणेनैवमुक्तस्ते	७	५५	३
लक्ष्मणेनैवमुक्तस्तु	७	५६	३
लक्ष्मणेन्द्रजितौ वीरौ	६	६०	३६
लक्ष्मणेमां मया सार्धम्	२	४	४३
लक्ष्मणे वा महाबाहो	६	१८	१६
लक्ष्मणो रावणिं युद्धे	६	८८	७३
लक्ष्मणो लक्ष्मिसंपन्नः	१	१८	३०
लक्ष्मणो वानरेन्द्राय	५	३५	३५
लक्ष्मणो हि महाबाहुः	२	८	६
लक्ष्मीवांल्लक्ष्मणो वाक्यम्	५	६०	६६
लक्ष्मीश्चन्द्रदपेयाद्वा	२	११२	१८
लक्ष्म्या समुदितो ब्राह्म्या	१	३३	१६
लक्ष्यालक्ष्याविमौ चैव	१	२८	५
लक्ष्या लक्ष्येण रूपेण	५	२	३३
लग्नमुत्कर्षतः खड्गम्	६	६७	३२
लघुः संप्रति निर्मांसः	५	५३	१४
लघुत्वेनोपपन्नं तत्	५	१	५१
लघुसत्त्वतया ते हि	७	२२	१०
लङ्कां चारयितव्या मे	५	५३	१४
लङ्कां चालोकयिष्यामः	६	३८	४
लङ्कां नाशयितुं शक्तौ	५	६०	५

	का०	स०	श्लो०
लङ्कां प्रशाधि धर्मेण	७	४०	१०
लङ्कां राक्षससंपूर्णाम्	६	३८	११
लङ्कां वापि समुत्क्षिप्य	६	६७	२६
लङ्कां समस्तां संपीड्य	५	५४	४६
लङ्काचेयं पुरी रम्या	५	२७	३१
लङ्कादुर्गं समासाद्य	७	५	२७
लङ्काद्वीपे महेन्द्रेण	७	४५	१०
लङ्कानाम पुरी दुर्गा	७	६	१५
लङ्का नाम पुरी रम्या	७	३	२६
लङ्कानाम समुद्रस्य	३	४७	२६
लङ्का पुनर्निरालम्बा	६	३	२०
लङ्का प्रतिहता सर्वा	६	२६	१३
लङ्काभरणमित्येव	५	६	१५
लङ्कामभिभुञ्जः कोपात्	६	२६	१५
लङ्कामुपनिविष्टस्तु	६	४१	३४
लङ्कायां तु कृतं कर्म	६	६	१
लङ्कायां दह्यमानायाम्	६	७५	२६
लङ्कायां सचिवैः सर्वम्	६	३७	२०
लङ्कायां सौम्य पश्येयम्	६	११२	११
लङ्कायाः सुमहद्राज्यम्	३	५५	२६
लङ्काया दुष्प्रवेशत्वात्	५	३८	८
लङ्काया वचनं श्रुत्वा	५	३	३१
लङ्कायास्तूत्तरद्वारम्	६	४१	३३
लङ्का राक्षसवीरैस्तैः	६	५७	२१
लङ्घन च समुद्रस्य	६	३४	२२
लङ्घनार्थं च घोरस्य	६	२	२०
लङ्घयन्तः प्रधावन्तः	६	६६	१४
लङ्घयित्वा पितृपथम्	६	१२५	२१
लङ्घयित्वा पुरीं लङ्काम्	६	४१	६१
लङ्घिते तत्र तैः सैन्यैः	६	२	२१
लज्जतीव हि मे वीर्यम्	६	१०१	६
लज्जया स्ववलीयन्ती	६	११४	१३
लता समनुवर्तन्ते	४	१	८५
लताकण्टकसंकीर्णाः	२	२८	१०
लतागृहैश्चित्रगृहैश्च सादितैः	१	४१	१६
लतानां माधवे मासि	५	६	६४
लतानां विविधं पुष्पम्	४	६७	१६

	का०	स०	श्लो०
लता वल्लीश्च गुल्मांश्च	२	८०	६
लताशतैरवतताः	५	१४	२६
लब्धकामस्य ते पश्चात्	६	१३	५
लब्धव्यान्येव लभते	७	५४	१७
लब्धशब्देन कौसल्ये	२	६३	११
लब्धसंज्ञस्तु षड्रात्रात्	४	६०	५
लब्धार्था च प्रतीता च	२	६	४६
लब्धोऽयं विजयः सीते	६	११३	१०
लब्ध्वानुज्ञां संप्रहृष्टः	२	८४	१५
लब्ध्वा पुरस्ताद्वैदेहीम्	६	६४	२०
लब्ध्वा भार्यां कपिवरः	४	२७	२८
लभतामसितायाङ्गे	२	१३	२३
लम्बकर्णललाटां च	५	१	७
ललस्व मयि विस्रब्धा	५	२०	२४
ललाटे च रूजो जाता	३	२३	१४
ललाटे भ्रुकुटीभिश्च	६	६२	१४
ललामभूतो लङ्काया:	५	५८	११६
लवणः कोधसंयुक्तः	७	६६	३३
लाक्षया मधुमांसेन	२	७५	३४
लाक्षारससवर्णं च	६	७०	१६
लभते मनुजो लोके	६	१२४	१०७
लाघवाद्राघवः श्रीमान्	६	८६	४२
लाघवेन तु संयुक्तः	६	४३	३७
लाङ्गूलं च समाविद्धम्	५	१	५६
लाङ्गूलचक्रो हनुमान्	५	१	६०
लाङ्गूलानि प्रविध्यन्तः	६	६०	६२
लाङ्गूलेन प्रदीप्तेन	५	५३	२४
लाजगन्धोदवर्षैस्तु	६	६७	८३
लाजपूर्णैश्च पात्रीभिः	१	७३	२३
लाजान्माल्यानि शुक्लानि	२	२०	१८
लाजैश्चैव तथा पुष्पैः	७	४१	१३
लाभो जनस्यास्य यदेष सर्वम्	२	१६	४५
लालप्यमानस्य विचेतनस्य	२	७५	६५
लालितश्चाङ्गदो वीरः	४	२०	१७
लिप्ता चन्दनसारेण	२	७८	६
लिलिपुश्च परार्ध्येन	६	६०	३४
लीनपुष्करपत्राश्च	२	५६	७

	का०	स०	श्लो०
लीनया गहने शून्ये	६	३३	६
लुब्धाया विदितो मन्ये	२	७३	१३
लेह्यानुच्चावचान्भक्ष्यान्	५	१	२४
लोकं सुवृष्ट्या परितोषयित्वा	४	३०	५७
लोकक्षयकरं भीमम्	६	२३	३
लोकक्षयकरं भीमम्	६	४१	१२
लोकक्षोभयितारं च	६	१११	५०
लोकनाथस्य रामस्य	६	४०	१०
लोकपालसमाः शूराः	६	२५	२६
लोकपालाः समस्तास्ते	२	२३	२१
लोकपीडाकरं कर्म	७	८३	२०
लोकविद्विष्टमारब्धम्	२	२३	१०
लोकवृत्तमनुष्ठेयम्	४	२३	५
लोकस्य पापानि विनाशय०	५	५	२
लोकस्वभाव एवैषः	३	६६	७
लोकहिंसाविहाराणाम्	६	११३	४४
लोकप्रवादः सत्योऽयम्	५	२५	१२
लोकानां च हिते युक्तः	३	५०	५
लोकानां संप्रियार्थं तु	७	५१	१७
लोकानां स्वस्ति चैवं स्यात्	७	१०	४०
लोकानां स्वस्ति चैवं स्यात्	७	६७	२४
लोकापवादभीतस्य	७	६६	१६
लोकापवादो बलवान्	७	६७	४
लोकस्त्वप्रतिमा राम	१	७६	१६
लोकेभ्यो यानि रत्नानि	५	२०	१७
लोकेषु प्रथितं राजन्	१	६	६
लोकेषु सर्वेषु न नास्ति किं०	३	६३	१७
लोचने कोपसंरक्ते	२	३५	२
लोध्रनीपार्जुनैर्नागैः	७	४२	४
लोध्रपद्मकखण्डेषु	४	४३	१३
लोपामुद्रा यथाऽगस्त्यम्	५	२४	११
लोभश्चापि न कर्तव्यः	७	६३	११
लोभात्तु मत्कृते नूनम्	३	४५	७
लोभात्पापानि कुर्वाणः	३	२६	५
लोभितस्तेन रूपेण	३	४३	२४
लोलिता वसुधा सर्वा	५	१३	५
लोहितार्द्रास्तु बहवः	६	६६	१३

	का०	स०	श्लो०
लोहितेनानुलिप्ताङ्गम्	५	१०	८
(व)			
वक्तव्यं च नरश्रेष्ठ	१	७२	४
वक्तव्यश्च महाबाहुः	२	५८	२२
वक्ता सर्वेषु कृत्येषु	१	७०	१७
वक्तुं न शक्तो रामस्य	६	३०	३०
वक्तुकामा ह्यहं हि मे	३	६४	१६
वक्तुमद्भुतसंकाशम्	७	१००	६
वक्ष्यन्ति चिन्तयित्वा ते	१	६	१७
वक्ष्यति ते महीपालम्	१	६	१२
वचनं राघवस्तूक्तम्	२	३६	३६
वचनाच्च नरेन्द्रस्य	१	६६	६
वचनादेव तास्तस्य	३	५६	२८
वचनान्ते तु रामस्य	४	२५	१२
वचसा मम वित्तेशम्	७	११	२३
वचसा सान्त्वयित्वैनम्	६	१६	७
वचोभिरग्र्यैर्ह्यर्थ्यैस्थाः	२	१६	३६
वचो मिथ्याप्रणीतात्मा	५	२१	१०
वचो विज्ञाय हनुमान्	४	३	१
वज्रं वज्रधरस्येव	६	१११	८३
वज्रं विष्टम्भितं येन	६	७१	३०
वज्रदंष्ट्रं हलं दृष्ट्वा	६	५४	३६
वज्रदंष्ट्रं हतं श्रुत्वा	६	५५	१
वज्रदंष्ट्रश्च दंष्ट्रश्च	६	१२३	११
वज्रदंष्ट्रस्य च तथा	५	५४	१०
वज्रदंष्ट्रोऽङ्गदश्चोभौ	६	५४	१७
वज्रदंष्ट्रोऽथ तं दृष्ट्वा	६	५३	२५
वज्रनिष्पेषसदृशम्	६	६६	७६
वज्रप्रहारमभितः	६	१११	४७
वज्रप्रहारानचलाः	७	३२	५४
वज्रमस्त्रं नरश्रेष्ठ	१	२७	६
वज्रमुत्सृज्य वृत्राय	७	५६	२८
वज्रमुष्टिश्च मैन्देन	६	४३	१२
वज्रवैदूर्यगर्भाणि	५	१०	३३
वज्रवैदूर्यचित्रं च	७	१२	६
वज्रसंयोगसंयुक्तैः	५	४६	३
वज्रसंस्पर्शबाणस्य	३	५१	२४
वज्रसारं महानादम्	६	१०८	१०
वज्रसारं महानादम्	६	१०२	४८
वज्रसारमयं नूनम्	२	६१	६
वज्रस्पर्शतलैर्हस्तैः	६	५८	१६
वज्रस्य च निपातेन	४	६६	२८
वज्रहस्तं रणे हन्याम्	३	२३	२५
वज्रहस्तो यथा शक्रः	६	६७	३८
वज्राह कृष्णनिकाशैश्च	५	४	६
वज्राननं वज्रवेगम्	७	६६	१८
वज्राशनिसमस्पर्शैः	६	४३	३२
वज्राशनिसमस्पर्शैः	५	१	१६५
वज्रिणाभिहतः कालम्	३	७१	१३
वज्रिवज्रहतानीव	६	७५	२५
वज्री महेन्द्रस्त्रिदशेश्वरो या	५	५४	३५
वज्रेण भगवान्पक्षौ	५	५८	१६
वञ्चना या तु लब्धा मे	२	३४	३७
वञ्चयित्वा वने रामम्	५	३१	१०
वञ्चित पितरं दृष्ट्वा	३	३७	१०
वत्सः श्रेयसि जातस्ते	२	२	४६
वत्स राम क्षमाः पश्य	७	१०७	१०
वत्स राम चिरंजीव	२	४	३६
वत्स रावण तुष्टोऽस्मि	७	३०	३
वत्सला स्वं यथावत्सम्	२	८७	८
वत्स्यामि मानुषे लोके	१	१५	३०
वदतो वै वसिष्ठस्य	१	५५	२५
वदन्त हेतुमद्वाक्यम्	६	१०६	१३
वधं स्वरश्मिशिरसोः	१	३	२०
वधमप्रतिरूपं तु	२	६४	१
वधस्तु रामस्य मया त्वया च	६	१८	११
वधाय देवशत्रूणाम्	१	१५	२६
वधायेन्द्रजितो राम	६	८५	१६
वधार्थं रक्षसां यानि	१	२७	१३
वधार्थं रावणस्येह	६	११७	२८
वधार्हमपि काकुत्स्थ	५	६७	१६
वधिष्यति पुरीं लङ्काम्	६	२५	३२
वधिष्यामि मुनिश्रेष्ठ	३	३८	४
वधूनाटकसंघैश्च	१	५	१२

	का०	स०	श्लो०
वधूपतिग्रहे युक्ता:	१	७७	११
वधे तस्य समाज्ञप्ते	५	५२	२
वधेन ते दाशरथेः सुखावहम्	६	६३	५५
वधेन वै दाशरथेः सुखावहम्	६	१२	३९
वधेनाप्रतिरूपेण	६	५३	१७
वधो हि मे मतो नासीत्	४	२४	१०
वध्यतामेष तीव्रेण	६	१७	२९
वध्यन्ते पापकर्माण:	६	८३	२२
वध्यमानास्तु ते वीराः	६	६६	१५
वध्याः खलु न वध्यन्ते	३	४१	६
वनं कुरुषु यद्दिव्यम्	२	९१	१९
वनं गते धर्मरते	२	६१	१
वनं गतो दशग्रीवः	७	११	२१
वनं तु नेतुं न कृतामतिर्यदा	२	२८	२६
वनं नगरमेवास्तु	२	३३	२२
वनं प्रज्वलयन्रम्यम्	३	४२	२०
वनं महामेघनिभं प्रविष्ट	३	३	२६
वनं राक्षसराजस्य	५	५०	१५
वनं सर्वं विचिनुवः	३	६१	१८
वनं सुविचितं सर्वम्	३	६१	२६
वनपालं पुनर्वाक्यम्	५	६३	३०
वनप्रचण्डा मधुपानशौण्डाः	४	३०	५२
वनभङ्गेन जानामि	५	६४	३७
वनरामण्यकं यत्र	३	१५	५
वनवासं न जानामि	२	७५	४
वनवासं वसन्नेव	२	१०९	२९
वनवासं हि संख्याय	२	४०	१४
वनवासकृता बुद्धिः	२	३४	४२
वनवासाय रामस्य	२	६२	१७
वनवासे क्षयं प्राप्ते	२	५२	५६
वनवासे हि जानामि	२	२९	१२
वनानि गिरयश्चैव	४	२५	३७
वनानि गिरयो नद्यः	४	४९	२
वनानि च व्यतिक्रम्य	२	९२	३९
वनान्युपवनानीह	५	३	३४
वनेचराणां सततम्	५	१४	४८
वने त्वदृष्टदुःखानाम्	२	४३	७
वने प्रव्रज काकुत्स्थ	३	४७	१६
वनभ्यो गह्वरेभ्यश्च	४	३७	२६
वने वनचरांश्चान्यान्	४	१३	१२
वने वा चीरवसनम्	२	१०१	२०
वनेषु च सुरम्येषु	४	३७	८
वनेऽस्मिन्मामके नित्यम्	४	११	५७
वन्दितव्याश्च ते नित्यम्	२	२६	३२
वन्दित्वा चरणौ राज्ञः	२	१९	२८
वन्येन फलमूलेन	७	९४	२०
वपुः प्रकर्षेण बबुः	६	२२	१०
वप्रप्राकारजघनाम्	५	२	२१
वमन्ति पावकज्वालाः	६	५७	३५
वयं खलु हता राम	२	५२	१९
वयं परिचरिष्यामः	२	४८	१८
वयं प्रेष्या भवान्भर्ता	२	५०	३९
वयं युद्धादिहैष्यामः	६	६४	२५
वयं वनचरा राम	४	१७	३०
वयं सर्वे परिश्रान्ताः	४	५०	१५
वयमद्य गतप्राणा	४	६६	३१
वयमस्य यथा लोके	२	१०१	१०
वयमाश्वयुजे मासि	४	५३	९
वयमेव हि गत्वा तान्	५	६०	१३
वयसः पतमानस्य	२	१०५	३१
वयस्य इति कृत्वा च	४	८	२८
वरं वरद सुप्रीतः	१	२९	१६
वर खलु मयैतस्मै	७	२२	३९
वर एष पुरा दत्तः	५	१	१४४
वरदानं महेन्द्रेण	६	१२५	११
वरदानकृतत्राणे	७	३२	६१
वरदानात्पितुर्व्यस्ते	६	७६	७४
वरदास्तु महाबाहो	७	७०	३
वरप्रदाननसंमूढः	७	११	३९
वरप्रदानाद्बलवान्	७	२७	८
वरप्राप्ति पितुस्ते तु	३	५	९
वरयस्व नरश्रेष्ठ	७	८०	११
वरयामासुरागत्य	१	६६	१६
वरं लब्ध्वा तु ते सर्वे	७	५	१६

	का०	स०	श्लो०
वराभरणहारैश्च	४	२५	२५
वरा मन्दोदरी नाम	५	५८	७७
वरायुधधरं रामम्	१	७६	६
वरायुधधरौ वीरौ	१	५०	२०
वराहमृगसिंहाश्च	२	१०३	४२
वराहरुधिराभेण	२	१६	६
वराहवाध्रीणसकान्	५	११	१६
वराहै श्वापदैः सिंहैः	६	७३	१२
वरिष्ठा सर्वनारीणाम्	२	११८	११
वरुण. पाशहस्तश्च	५	१३	६४
वरुणश्च वरं प्रादात्	७	३६	१५
वरुणश्चाग्निरिन्द्रश्च	२	१५	२२
वरुणस्त्वब्रवीद्धंसम्	७	१८	२८
वरुणस्त्वब्रवीद्वाक्यम्	७	५६	१७
वरुणस्य ततः कन्या	१	४५	३६
वरुणो जनयामास	१	१७	१५
वरो दत्तो महाबाहो	६	८५	१५
वर्जयन्नगराभ्याशान्	६	४	३६
वर्जयित्वा महातेजा	५	५४	१६
वर्जयेद्वज्रमुत्सृष्टम्	५	२१	२३
वर्णेष्वन्यचतुर्थेषु	१	६	१७
वर्णो मनोरमः सौम्य	७	१८	२६
वर्तते चोत्तमां वृत्तिम्	२	४४	५
वर्तते दशमो मासः	५	३७	८
वर्तमाने तथाभूते	७	६३	१
वर्धमानं महावेगम्	५	४०	२१
वर्धमानगृहैश्चापि	५	४	८
वर्धयित्वा प्रहृष्टास्ताः	२	२०	१३
वर्षप्रवेगा विपुलाः पतन्ति	४	२८	४५
वर्षाः समयकालं तु	४	३०	७८
वर्षेणैवागतं विप्रम्	१	१०	३०
वर्षोदकाप्यायितशाद्वलानि	४	२८	२१
वलीमुखः प्रजङ्घश्च	६	४	३६
वल्गुस्वरा निकूजन्ति	३	७३	१३
ववन्दे पद्मपत्राक्षी	१	७०	३३
ववन्दे पद्मपत्राक्षी	२	११०	१६
ववर्ष रुधिरं देवः	६	६५	४४

	का०	स०	श्लो०
ववर्ष रुधिरं देवः	६	१०६	२१
ववर्ष रुधिरं देवः	७	६	३१
ववर्षुः पुष्पवर्षाणि	६	६०	८६
ववर्षुः रुधिरं चास्य	६	५७	३७
ववल्गुश्चात्र कासांचित्	५	६	५५
वसतस्तस्य तु सुखम्	३	१६	१
वसतीति मया नित्यम्	३	११	३१
वसतो ऋष्यमूके मे	५	५८	१३८
वसतो दण्डकारण्ये	३	२६	६
वसतो दण्डकारण्ये	५	३३	३०
वसन्तं भ्रातुरर्थाय	२	८८	२८
वसन्तः कालकालेषु	३	१०	५
वसन्तपुष्पोत्करचारुदर्शनम्	५	८	८
वसन्ति मन्नियोगेन	३	३६	४
वसन्ति हि महात्मानः	४	४३	२६
वसन्तीह दृढं भक्त्या	२	३१	३६
वसन्तो यदि तत्रापि	४	१	४७
वसन्त्यग्निनिकाशानाम्	४	४२	२१
वसानं चर्म वैयाघ्रम्	३	२	६
वसिष्ठं तु पुरस्कृत्वा	१	७३	१०
वसिष्ठं मुनिशार्दूलम्	२	३	६
वसिष्ठं वामदेवं च	७	६१	२
वसिष्ठः पुरतः कृत्वा	२	१०४	१
वसिष्ठः स तदा रामम्	२	१११	१
वसिष्ठपुत्र तु सुयज्ञभार्यम्	२	३१	३७
वसिष्ठप्रमुखाः सर्वे	१	१२	११
वसिष्ठप्रमुखाः सर्वे	१	१६	१७
वसिष्ठमथ दृष्ट्वैव	२	६०	४
वसिष्ठवाक्यं तच्छ्रुत्वा	१	१३	३०
वसिष्ठस्य च ये शिष्याः	१	५५	२३
वसिष्ठस्य तु वाक्येन	७	१०७	११
वसिष्ठस्य वचः श्रुत्वा	२	७६	३
वसिष्ठस्याश्रमपदम्	१	५१	२३
वसिष्ठस्याश्रमपदम्	१	५५	२४
वसिष्ठादिभिरृत्विभिः	२	६०	१६
वसिष्ठे जपतां श्रेष्ठे	१	५६	१३
वसिष्ठो गुणसंपन्नः	२	१४	२६

	का०	स०	श्लो०
वसिष्ठोऽपि महातेजाः	१	१६	१५
वसिष्ठो वामदेवश्च	१	६६	४
वसिष्ठो वामदेवश्च	२	११३	२
वसिष्ठो वामदेवश्च	७	६६	२
वसिष्ठो विजयश्चैव	६	१२८	६०
वसुंधरायां पतितः	३	६४	२५
वसुधे देवि भवति	७	६८	६
वसूनां वा वरारोहे	३	४६	२८
वसून्रुद्रांस्तथादित्यान्	५	१३	५४
वसेत्सह सपत्नेन	६	१६	२
वस्त्राणि च महार्हाणि	७	४६	१२
वस्वोकसारप्रतिमाम्	५	३	१२
वस्वौकसारां नलिनीम्	२	६४	२६
वहता हव्यमत्यन्तम्	५	१	१६६
वहन्तं किं तुदसि माम्	२	३६	१४
वहन्ति यत्कुण्डलशोभित०	५	८	७
वहन्ति वर्षन्ति नदन्ति भान्ति	४	२८	२७
वहन्तो जवना रामम्	२	४५	१४
वह्न्यालयं वैश्रवणालयं च	६	७४	५६
वाक्यं वाक्यविदां श्रेष्ठः	१	६६	१४
वाक्यं वाक्यविदां श्रेष्ठः	१	७०	१६
वाक्यमप्रतिकूलं तु	३	४०	१०
वाक्यमप्रतिरूपं तु	३	४५	२६
वाक्यमेतत्ततः श्रुत्वा	३	२०	५
वाक्यमेतत्तु वैदेह्या	३	१०	१
वाक्यवज्ज्ञैरनुपमैः	२	३५	४
वाग्बलं त्यज दुर्बुद्धेः	६	८८	२७
वाग्मिनो बदिनश्चापि	२	२६	१२
वाग्यतः सह वैदेह्या	२	६	४
वाङ्भात्रेण तदा राजा	२	११	२२
वाचकाय च दातव्यम्	७	१११	७
वाचा मधुरया रामः	२	१६	३८
वाच्यं यदनुरक्तेन	४	२७	४२
वाच्यस्तातो यवीयान्मे	४	५५	१४
वाच्यावाच्यं प्रकुपितः	५	५५	५
वाजिमुख्या मनुष्याश्च	२	६१	८
वाजिवारणशालाश्च	१	१३	१२
वाजिह्रेषितसंघुष्टम्	५	४	२७
वाणि त्वं राक्षसेन्द्रस्य	७	१०	४३
वातभक्षा निराहारा	१	४८	३०
वातसंघातजालोर्मि	५	५७	४
वातस्कन्धा इमे सप्त	१	४७	४
वातस्य तरसा वेगम्	३	३१	७
वातायनगतानां च	२	५७	१५
वाताश्च कलुषा वान्ति	६	२३	४
वाताश्चापि प्रवान्त्येते	७	४१	२१
वाता हि परुष वान्ति	६	४१	१३
वाति नैकरसस्वाद	४	१	८६
वादयन्ति तदा शान्तिम्	२	६६	४
वादित्ररवसंघुष्टम्	२	१०	१३
वादित्राणि च सर्वाणि	३	१५	१२
वानरं पर्वतेन्द्राभम्	४	२०	३
वानरांश्च रणे भग्नान्	६	६६	१४
वानरांस्तु महातेजाः	४	६५	६
वानराः शुश्रुवुः शब्दम्	६	८१	३३
वानरा एव वश्चिह्नम्	६	३७	३४
वानरा घनत संभूय	६	८६	१६
वानरणां च नादेन	६	५६	८२
वानराणां च शूरास्तु	६	५४	४
वानराणां प्रभावोऽयम्	५	५८	१४४
वानराणां प्रहृष्टानाम्	६	६८	२४
वानराणां महत्सैन्यम्	४	३८	१८
वानराणां विनाशोऽयम्	६	११०	२४
वानराणां शरीरैस्तु	६	५८	२७
वानराणां सहस्रैस्तु	६	८५	३१
वानराणां सुघोराणाम्	४	४	६८
वानराणां सुसंरब्धः	६	६८	४
वानराणां हि धीराणाम्	६	६	१६
वानराणां हि सा तीर्णा	६	२२	८३
वानराणामनीकानि	६	७३	४८
वानराणामपि चमूः	६	४३	४
वानराधिपतिः श्रीमान्	५	३६	२५
वानराधिपतिः श्रीमान्	६	१२३	३०

	का०	स०	श्लो०
वानरान्मोहयित्वा तु	६	८४	१३
वानरान्वानरैरेव	६	६६	५७
वानरान्वानरश्रेष्ठ	५	१	३७
वानरा बलिनो युद्धे	६	४४	८
वानरा राक्षसाश्चापि	६	५४	११
वानरा राक्षसाः क्रुद्धाः	६	५८	१८
वानरा राजसिंहस्य	४	१६	४
वानराश्च महात्मानः	६	६७	१४
वानराश्च महात्मानः	७	६१	२८
वानराश्च महात्मानः	७	६२	६
वानराश्च महावीर्याः	७	३७	१६
वानराश्च महासत्त्वाः	६	६७	८
वानराश्चापरे घोराः	६	४३	१५
वानराश्चापि संक्रुद्धाः	६	४२	४६
वानराश्चैव रक्षःसु	६	५४	६
वानरेन्द्रं महेन्द्राभम्	१	१७	१०
वानरेन्द्र महेन्द्राभ	७	३४	३६
वानरेन्द्रश्च बलवान्	६	३७	३२
वानरेन्द्रस्तु सुग्रीवः	६	४३	१०
वानरेन्द्रा जहृषिरे	६	८६	२०
वानरेन्द्रो महावीर्यः	३	७२	१३
वानरेषु समासक्तम्	६	२	१८
वानरैरर्दितास्ते तु	६	२६	२८
वानरैर्बलवद्भिश्च	६	४१	५३
वानरैर्भीमविक्रान्तैः	६	५२	१४
वानरैर्वध्यमानास्ते	६	६०	७७
वानरैश्चापि संक्रुद्धैः	६	५८	१५
वानरैः पर्वताकारैः	६	६०	७४
वानरैः पातयन्तस्ते	६	५२	१७
वानरो दुष्टघोषश्च	७	७५	३८
वानरोऽयमिति ज्ञात्वा	५	४६	७
वानरोऽहं महाभागे	५	३६	२
वानीरैस्तिमिदैश्चैव	४	२७	१८
वापीश्च विविधाकाराः	५	१४	२२
वाप्यो मैरेयपूर्णाश्च	२	६१	७०
वामः कामो मनुष्याणाम्	५	२२	४
वामनाञ्जनपद्माद्यैः	७	३१	३६

	का०	स०	श्लो०
वामेन सीतां पद्माक्षीम्	३	४६	१७
वायव्यं प्रथमं नाम	१	२७	११
वायव्यमादाय ततोऽपरास्त्रम्	६	६७	१५४
वायसः सङ्कुशः क्रूराः	६	१०	१६
वायसेन च तेनैवम्	५	६७	६
वायुः सर्वात्मको राजन्	१	३३	२
वायुना संपरित्यक्तम्	७	३५	६२
वायुप्रकोपान्त्रैलोक्यम्	७	३५	५१
वायुरप्यत्र नाज्ञातः	५	२	४२
वायुसंरोधजं दुःखम्	७	३५	५७
वायोरिव गतिस्तेषाम्	४	५०	२०
वारणानां सहस्रं च	६	६०	५५
वारणैश्च चतुर्दन्तैः	५	४	२८
वारमुख्यास्तु तच्छ्रुत्वा	१	१०	७
वारयन्तो भृशं प्राप्ताः	५	६३	१८
वाराणसीं ययौ तूर्णम्	७	३८	२०
वारिणो भिद्यमानस्य	१	२४	७
वारितान्राक्षसान्दृष्ट्वा	६	७६	६
वारिवेगेन महता	६	१२८	४
वारिसंक्षोभजो रामः	१	२४	११
वारुणं चैव सौम्यं च	१	५६	६
वारुणं पाशमस्त्रं च	१	२७	६
वारुणीमदगन्धश्च	२	११४	२०
वार्यमाणः सुबहुशः	६	११०	२
वार्यमाणः सुसंक्रुद्धः	६	६२	४२
वार्याफलकपर्यन्ताम्	१	७०	३
वार्यामि त्वां निरीक्षन्तो	४	२३	१७
वालव्यजनहस्ताभिः	५	१०	५
वालिजेन तु दुःखेन	५	१३	२८
वालिनं प्रति सामर्षः	४	१६	२८
वालिनः पौरुषं यत्तद्	४	११	३
वालिनः सदृशः पुत्रः	६	२६	१८
वालिनश्च बलं तत्र	१	१	६३
वालिनश्च भयात्तस्य	४	१०	३०
वालिना निकृतो भ्रात्रा	४	५	२३
वालिना हृतराज्येन	५	५८	१४०
वालिनो मे भयार्तस्य	४	८	१६

	का०	स०	श्लो०
वालिपुत्राय धृतिमान्	६	१२८	७७
वालिप्रणिहितावेव	४	२	२१
वालिप्रमथनं चैव	१	३	२४
वालिमार्गादपाक्रामन्	७	३४	२६
वालिसंज्ञममित्रं ते	४	८	२४
वाली दंष्ट्राकरालस्तु	४	१५	४
वाली नाम मम भ्रात्रा	४	६	१
वाली नम गहाप्राज्ञः	४	११	२१
वाली विनिहतो यावत्	४	१४	१२
वाली व्यापदयङ्चके	४	११	४१
वालुकावेदिमध्ये तु	७	३१	४३
वाल्मीकिनैवमुक्तस्तु	७	९७	१
वाल्मीकिरथ तं दृष्ट्वा	१	२	२४
वासमौपयिक्र मन्ये	२	५४	३९
वासं चक्रुर्मुनिगणाः	१	३१	२०
वासवस्य भवेददूतः	५	४२	१५
वासवस्य वचः श्रुत्वा	५	६१	२१
वासवस्य सवज्रस्य	४	६७	२८
वासितामध्यगं मत्तम्	७	३२	३०
वासिष्ठा मुनिशार्दूल	१	५९	१६
विंशतिर्दश चाष्टौ च	६	७१	२०
विंशद्भुजं दशग्रीवम्	३	३२	८
विकुक्षेस्तु महातेजाः	२	११०	९
विकृतं च विरूपं च	५	१	१४२
विकृताः पिङ्गलाः काली:	५	१७	९
विकृता च विरूपा च	३	१७	२६
विकृता विकृताकाराः	६	११३	३१
विकृताश्च विरूपाश्च	१	५९	२०
विकृष्य चापं परिधाय साय०	३	५९	२६
विकृष्य बलवच्चापम्	३	२८	४
विक्रमस्ते यथा विष्णोः	७	३७	५
विक्रमिष्यति रक्षःसु	६	३३	२८
विक्रमेण समानेष्ये	६	२	८
विक्रमेणोपपन्नश्च	५	३४	२९
विक्रम्यैवाशनिं गृह्य	४	५१	१५
विक्रान्तविजयो वीरौ	६	५८	४८
विक्रान्तस्त्वं समर्थस्तवम्	५	३६	७

	का०	स०	श्लो०
विक्रान्तस्यार्यशीलस्य	५	१६	१७
विक्रान्ता बलवन्तश्च	६	२६	४३
विक्रान्ता बलवन्तश्च	६	३७	१७
विक्रान्ता बलवन्तो वा	३	२९	१७
विक्रान्ताश्चापि शूराश्च	६	१२०	७
विक्रान्तो रक्षिता नित्यम्	६	३३	११
विक्रान्तौ बलसंपन्नौ	६	८८	३४
विक्रीडंश्च पुनर्भूमौ	३	४२	२६
विक्रीतमाहितं क्रीतम्	२	११	२८
विक्रोशन्तीं तदा सीताम्	३	५४	५
विक्रोशन्तीं दृढं सीताम्	३	५२	४२
विक्रोशमानस्त्राहीति	१	६०	१९
विक्रोशमानस्य तु मे	४	१०	२३
विक्लवानां ह्यबुद्धीनाम्	६	६५	५
विक्लवो वीर्यहीनो यः	२	२३	१६
विक्षिपन्विविधाः शाखाः	२	१	१४
विक्षिप्तां पवनेनैताम्	४	१	५८
विख्यातं त्रिषु लोकेषु	६	२२	३७
विख्याः स्त्रिषु लोकेषु	७	२६	३३
विख्याता त्रिषु लोकेषु	४	६६	९
विगर्हमाणः कैकेयीम्	२	१०३	४६
विगर्हमाणोऽनुजमार्तरूपम्	३	५८	१९
विगर्हितं च नीचं च	३	५९	११
विगृह्यासनमाहुः	४	५४	१२
विग्रहं मा कृथा वीर	४	१५	२४
विघातं चाभिषेकस्य	१	३	१३
विघूर्णतो विचेष्टस्य	२	६३	५२
विचचार ततस्तत्र	३	४२	३५
विचचाराम्बरे वीरः	५	४२	४१
विचरन्ति वनान्तेषु	२	५४	४२
विचरन्ति विशालेऽस्मिन्	४	४२	१८
विचराम द्विजश्रेष्ठ	३	४७	२२
विचरिष्यन्ति भद्रं ते	१	४७	९
विचिताः पर्वता. सर्वे	४	४७	११
विचित्य गिरिदुर्गाणि	५	६५	५८
विचित्य तु दिशं पूर्वाम्	४	४७	७
विचित्य तु वनं सर्वम्	४	५२	९

	का०	स०	श्लो०
विचित्य दिवसं सर्वे	४	४७	४
विचित्य सर्वशः शैलम्	३	६१	२२
विचित्रं दशनीयैश्च	५	४६	५
विचित्रकुसुमापीडा	२	४८	१२
विचित्रकुसुमोपेतैः	६	३६	६
विचित्रपुलिनां रम्याम्	२	६५	३
विचित्रमाल्याभरणा	४	६६	११
विचित्रवालुकजलाम्	२	५५	३१
विचित्रवाससः सर्वे	६	५३	१०
विचित्राणि च माल्यानि	२	६१	२१
विचित्राणिच माल्यानि	५	२०	६
विचित्रान्भवनाद्धातून्	५	५४	२८
विचित्रार्थपदं सम्यक्	१	४	३३
विचिन्त्य दक्षिणामाशाम्	५	६३	२३
विचिन्वन्तौ महीं कृत्स्नाम्	५	३५	२४
विचिन्वन्नाभिजानासि	६	२२	४
विचेतनं विधूर्णन्तम्	१	३०	१६
विच्छिन्नाश्च विकीर्णाश्च	६	१००	६०
विजनेऽपि वने सीता	२	६०	७
विजयस्वार्यपुत्रेति	६	३२	३५
विजयोऽपि हि मे शूर	६	१०१	१०
विजयो मधुमत्तश्च	७	४३	२
विजित्य पृथिवीं सर्वाम्	५	२०	१८
विज्ञातस्त्वं हि मे राजन्	७	१७	१८
विज्ञानं हि महद्दृष्टम्	३	७१	३०
विज्ञाप्यं तु ममैतद्धि	७	३६	५४
विज्ञाय कर्म तत्तेषाम्	७	६१	६
विज्ञाय तु मनस्तस्य	६	८१	१
विज्ञाय नृपपुंगवाः	१	६६	२१
विज्ञाय परमप्रीतः	१	२३	१६
विज्ञाय रामस्य वचः	२	५२	४
विज्ञाय वचनं सीता	२	३६	२६
विज्ञायैषामशक्तिं च	३	३४	२५
विण्मूत्राशयमावृत्य	७	३५	५०
वितत्य रुचिरौ पक्षौ	४	१	४०
वितार्दिभिरवाकाशे	२	८०	२०
वित्तमन्यच्च सुबहु	१	७२	२४

	का०	स०	श्लो०
वित्तार्थी लभते वित्तम्	७	६२	१६
वित्तेशो गुरुरस्माकम्	७	११	११
वित्रस्तां परमोद्विग्नाम्	५	५८	६७
वित्रासयन्तो विहगान्	६	३६	१४
वित्रास्य कारण्डवचक्रवाकान्	४	३०	४१
विददार नरवैरस्य	३	५१	३५
विदधत्यमरश्रेष्ठाः	५	२२	४२
विदर्शिता यदा देवी	२	१०	१
विदारयन्त्यभिक्रम्य	६	५५	३०
विदार्यमाणा रक्षोभिः	६	५२	६
विदितं भवतामेतत्	२	२	४
विदितः सर्वधर्मज्ञः	५	२१	२०
विदितश्चास्तु भद्रं ते	६	११५	१५
विदिता नौ गुणा विद्वन्	४	३	३७
विदितायां च वैदेह्याम्	६	१२४	१३
विदितो ह्येष वृत्तान्तः	३	१३	१५
विदित्वा तु महाबाहु	३	४६	३५
विदित्वा तेन सा दत्ता	७	१२	२१
विदुषः क्षत्रचारित्रे	२	८	८
विदेहराजस्य सुता	२	६६	६
विद्धमन्योन्यगात्रेषु	६	७६	२६
विद्यते गोषु संपन्नम्	६	१६	६
विद्याद्वयमधीयाने	१	२२	१६
विद्याधरा मदक्षीबाः	७	२६	८
विद्यास्वभिविनीतो यः	६	३५	७
विद्युज्जिह्वं च मयाजम्	६	३१	७
विद्युज्जिह्वस्तदागृह्य	६	३१	३६
विद्युज्जिह्वोऽत्र निहतः	६	१२३	१३
विद्युज्जिह्वोपमांश्चापि	६	६६	४८
विद्युत्केशो हेतिपुत्रः	७	४	१८
विद्युत्पताकाः सबलाक०	४	२८	२०
विद्युद्भिरिव नद्धानि	६	७५	२२
विद्युद्भिरिव विक्षिप्तैः	१	४३	२२
विद्युन्माली रथस्थस्तु	६	४३	३५
विद्युन्माली हृतश्चात्र	६	१२३	७
विद्युन्मालेश्च संपाते	४	३३	१०
विद्रवत्सु तदा तेषु	६	७६	८

	का०	स०	श्लो०
विद्राव्य राक्षसं सैन्यम्	६	५२	३२
विद्राव्य शरवर्षेण	७	७	६
विद्रुतां वाहिनीं दृष्ट्वा	६	६१	४
विद्रुतां वाहिनीं दृष्ट्वा	६	६७	७२
विद्रुतां वाहिनीं दृष्ट्वा	६	६६	८०
विद्रुताश्च भयत्रस्ताः	५	४२	२
विद्रुमेण विचित्रेण	५	६	१७
विधनुः स कृतस्तेन	६	५८	४५
विधमन्तो गिरिवरान्	६	४	६०
विधमिष्यति मां रौद्रः	६	६२	५१
विधमिष्याम्यहं वृक्षान्	४	४५	१४
विधवा पृथिवी राजन्	२	७६	६
विधवा हतपुत्राश्च	६	६४	५
विधास्यति विनाशाय	३	५३	१४
विधास्ये येन गन्तासि	६	२२	२६
विधिः किल नरं लोके	४	५६	४
विधिना मन्त्रदृष्टेन	६	११२	१६
विधिर्नूनमसंहार्यः	५	३७	४
विधिहीनस्य यज्ञस्य	१	८	१८
विधूतकल्मषैः सिद्धैः	२	६५	१३
विधूतकेशी युवतिः	५	१४	१८
विधूतवर्मा नाराचैः	६	८८	५५
विधूमवैश्वानरभीमदर्शनः	६	६७	१६६
विधूमामिव हेमाभाम्	२	११४	५
विधूय शोकं परिहृष्टमानसा	२	६०	२२
विधूयाथ चितां तां तु	६	११८	२
विधेयानां च दासीनाम्	६	११३	३७
विध्वंसयन्तं तरसा	६	८६	२०
विध्वस्तकवचां रुग्ण	२	११४	६
विध्वस्तकवचौ वीरौ	६	४७	१६
विनतं क्वचिदुद्धूतम्	१	४३	२४
विनदन्तो महानादम्	५	६४	२६
विनद्य सुमहानादम्	२	५१	१३
विनद्य सुमहानादम्	२	८६	१४
विनयावनतो भूत्वा	७	४४	७
विनश्योद्धि पुरी लङ्का	६	६१	६
विनष्टः पश्यतस्तस्य	६	१८	३०

	का०	स०	श्लो०
विनष्टमिह मां श्रुत्वा	४	५५	१६
विनष्टशीताम्बुतुषारपङ्कः	५	५	६
विनष्टा जानकी व्यक्तम्	५	५५	११
विनष्टा जानकी व्यक्तम्	५	५८	१५६
विनष्टा भक्षिता वापि	३	५७	१६
विनष्टायां तु सीतायाम्	५	५५	१७
विनष्टा वा प्रणष्टा वा	५	१३	१५
विनष्टे नृपतौ पश्चात्	२	५१	१८
विनष्टौ भ्रातरौ श्रुत्वा	५	१३	२४
विनायकाश्च शाम्यन्ति	६	१२८	११३
विना वराहोत्तमहेममालिना	४	२४	४१
विनाशकामामहितामिमाम्	२	१२	१०५
विनाशयति त्रैलोक्यम्	१	६५	१३
विनाशयति यः क्रोधात्	३	३२	१६
विनाशयन्तो भर्तारम्	६	६३	१७
विनाशितं प्रेक्ष्य विरूपनेत्रम्	६	६६	३६
विनाशितो महाराजः	२	७३	७
विनाशे बहवो दोषाः	५	१३	४५
विना हि सूर्येण भवेत्प्रवृत्तिः	२	१२	१०४
विनिपात्य च यक्षौघान्	६	७	६
विनिपात्य तमेकं तु	७	६५	१४
विनियुक्तास्ततो राज्ञा	७	१३	३
विनिर्मथितशैलाग्रम्	३	६४	६१
विनिवर्तयितुं वीर	२	२४	३३
विनिष्पतद्भिः शतशः	५	१५	७
विनिष्पेतुरतीवोग्राः	३	२५	२१
विनिष्पेतुस्तदा भूमौ	३	२०	२१
विनिःश्वसन्वै भूशदुर्मनास्ततः	२	८५	२१
विनीतं भ्रातरं भ्राता	४	२७	६
विनीतवीरपुरुषम्	२	३३	२८
विनीतैरन्तपालैश्च	५	६	६
विनेदुर्मुदिताः केचित्	५	५७	३४
विनेदुर्विस्वरं नागा	५	४५	१५
विनेदुश्च महाघोषाः	६	४२	३५
विनेदुश्च महानादान्	६	४६	२६
विनेदुश्च यथाप्राणम्	६	५६	३७
विन्दो नाम मुहूर्तोऽसौ	३	६८	१३

	का०	स०	श्लो०
विन्ध्यपर्वतजैर्मत्तैः	१	६	२३
विन्ध्यपर्वतमासाद्य	१	३६	५
विन्ध्यमन्दरसंकाशम्	६	६७	१३८
विन्ध्यमेरुगिरिप्रख्यैः	४	३३	८
विन्ध्यस्य तु गिरेः पादे	४	५३	३
विन्ध्यं कृष्णगिरिं सह्यम्	६	२६	३०
विन्यस्ता विधिवत्तत्र वै	१	१४	२६
विपक्वशालिप्रसवानि भुक्त्वा	४	३०	४७
विपञ्चीं परिगृह्यान्या	५	१०	४१
विपद्मामिव पद्मिनीम्	५	१५	२१
विपन्नं कर्म तद्रदृष्ट्वा	५	४४	१२
विपरीत इवाकाश	४	१४	१०
विपरीतश्च वृद्धश्च	२	२१	३
विपरीते तुष्टिहीना	२	५२	६२
विपर्यये तु तत्सर्वम्	३	४१	६
विपुलपरिघबाहु कुम्भकर्ण	६	६५	५७
विपुलां वितता चैव	२	११४	१६
विपुलांसो महाबाहुः	५	३५	१५
विपुलेनोरसा बिभ्रत्	६	२२	२२
विप्रकारमपाकर्तुम्	३	६	२३
विप्रकीर्णाजिनकुशम्	३	६०	७
विप्रलम्भितवस्त्रं च	३	७५	६६
विप्रलम्भितशस्त्रं च	६	७५	६७
विप्रलुप्तप्रजातस्य	२	७५	५३
विप्रियं कृतपूर्वं ते	२	६७	१४
विप्रियं च न कर्तव्यम्	२	२६	३४
विप्रोषितश्च भरतः	२	४	२५
विबुधानां समुद्योगम्	७	६	२३
विबुध्य तु महाभागः	५	१६	४
विभक्तरक्षः संबाधम्	५	५३	३७
विभजन्वानरीं सेनाम्	६	२६	२५
विभज्य सततं वीर	४	३८	२१
विभागं च बलौघस्य	६	३	६
विभाति रक्षोराजोऽसौ	६	५६	३०
विभिन्नशिरमस्तस्य	६	५८	५५
विभिन्नशिरसः पेतुः	६	५३	३०
विभिन्नशिरसो भूत्वा	६	५२	३१
विभिन्नहृदयाः केचित्	६	५२	२२
विभीषणं च धर्मज्ञम्	६	३८	२
विभीषणं च भरतः	६	१२७	४७
विभीषणं च सुग्रीवः	६	५०	८
विभीषणः समुत्पत्य	६	३१	२५
विभीषणमथोवाच	७	१०	२७
विभीषणमुखं दृष्ट्वा	६	८४	६
विभीषणमुखानां च	६	६१	२६
विभीषणमुवाचेदम्	६	१११	६७
विभीषणवचः कुर्यात्	६	६४	२०
विभीषणवचः श्रुत्वा	६	६	२३
विभीषणवचः श्रुत्वा	६	६१	३३
विभीषणवचः श्रुत्वा	६	७४	१६
विभीषणवचः श्रुत्वा	६	७४	२१
विभीषणवचः श्रुत्वा	६	८५	१७
विभीषणवचः श्रुत्वा	६	८६	६
विभीषणवचस्तावत्	६	८८	१
विभीषणश्च रक्षोभि	७	३७	२०
विभीषणश्च रक्षोभिः	७	६२	७
विभीषणसहायास्ते	६	१११	११६
विभीषणस्तु धर्मात्मा	३	१७	२३
विभीषणस्तु धर्मात्मा	७	६	३६
विभीषणस्तु धर्मात्मा	७	१०	६
विभीषणस्तु रामस्य	६	५०	१३
विभीषणस्तु संक्रुद्धः	७	२५	२१
विभीषणस्य चैश्वर्यम्	६	४१	८१
विभीषणस्य तु वचः	६	१६	१७
विभीषणस्य शूरस्य	६	१६	४०
विभीषणस्यानुचराः	६	८६	५
विभीषणाभिषेकं च	१	३	३७
विभीषणाय च ददौ	७	३६	१४
विभीषणेन तत्रस्था	६	२६	२६
विभीषणेन वीरेण	६	२८	४१
विभीषणेन सहितः	६	८५	३०
विभीषणेन सहितः	६	८५	३५
विभीषणोऽथ सुग्रीवः	६	१२८	८५

	का०	स०	श्लो०
विवर्जितो नरैः पापैः	२	१००	४६
विवर्णया कृपणया	५	२२	४१
विवर्णवदनं दृष्ट्वा	२	२६	८
विवर्णवनाः सर्वे	४	५२	१०
विवर्णो मुखवर्णश्च	६	५५	११
विवर्तमानं बहुशः	६	२७	३२
विवर्धमानं च हि माम्	५	६७	३३
विवर्धमानो वीर्येण	१	५५	२०
विवस्वतस्तनूजस्य	५	३	१६
विवस्वान्कश्यपाज्जज्ञे	२	१०१	६
विवास्य रामं सुभगा	२	४३	३
विविक्तेषु च तीर्थेषु	३	११	५२
विविधममलशस्त्रभास्वरम्	६	८५	३६
विविधाकृतिरूपाणि	५	४	१०
विविधानस्त्रसंघातान्	६	७५	१३
विविधानि च गौडानि	७	९२	१२
विविधानि विशालानि	४	५०	३४
विविधान्यपि यानानि	२	९२	३५
विविधाभ्रघनापन्न	५	५७	९
विविधायुधहस्ताश्च	६	५१	२४
विविधा विविधैः पुष्पैः	४	१	९०
विविधैर्मृगसङ्घैश्च	५	१४	३४
विविधैर्वृक्षषण्डैश्च	४	२७	९
विविशुः पूजितास्तेन	१	१८	४९
विवृत्तकर्मायतनः	४	२८	५५
विवृत्तनयनं क्रोधात्	६	९६	३३
विवृत्य नाने कोपात्	५	२३	१०
विवृद्धमूला बहवः	५	१५	१०
विवेश चाङ्गदो भूमौ	४	५५	१७
विवेश नलिनीं रम्याम्	३	७५	१६
विव्याध दशभिर्बाणैः	६	९०	३०
विशल्यः क्रियतां क्षिप्रम्	६	९१	२२
विशल्यकरणीं नाम्ना	६	१०१	३१
विशल्योऽयं महाप्राज्ञः	६	९१	२१
विशल्यौ च महात्मानौ	६	७५	३४
विशस्ते वा गृहीते वा	५	३०	३२
विशस्येमां ततः सर्वान्	५	२४	४२

	का०	स०	श्लो०
विशाम्यहं हि पातालम्	१	४३	६
विशावं जघनं पीनम्	३	४६	१९
विशालरथ्या दुर्धर्षा	४	४१	३७
विशालस्य सुतो राम	१	४७	१३
विशालाक्षं विरूपाक्षी	३	१७	१०
विशालाक्षो महाबाहुः	३	४७	१२
विशाला नलिनी यत्र	४	४३	२२
विशालान्कोसलान्रम्यान्	२	५०	१
विशीर्णमेदोमस्तिष्कं	६	३	३९
विशीर्णं पतितं भूमौ	३	६४	४५
विशुद्धभावस्य हि दुष्टभावा	२	१३	२४
विशुद्धभावां निष्पापाम्	६	११९	१०
विशुद्धवंशाभिजनाग्रहरतः	३	३१	४६
विशुद्धा त्रिषु लोकेषु	६	११९	१९
विशेषमालम्ब्य विशेषसं०	५	८	६
विशेषं ज्ञातुमिच्छामि	२	९२	१९
विशेषेण तु सुग्रीवः	४	४४	१
विशेषेणाश्रमस्थाने	३	६२	६
विशोधितजटः स्नातः	६	१२८	१५
विश्रम त्वं पृथुश्रोणि	७	२६	२६
विश्रमार्थं हनुमतः	६	१२३	१९
विश्राणयन्तो रत्नानि	४	२५	३१
विश्रुतस्त्रिषु लोकेषु	१	७	२०
विश्रवकर्मवचः श्रुत्वा	७	५	२८
विश्रवकर्मसुतो वीरः	६	३०	३३
विश्वकर्मा च दृष्ट्वेमम्	७	३६	१९
विश्वामित्रं पुरस्कृत्य	१	३१	२१
विश्वामित्रं पुरस्कृत्य	१	७३	२०
विश्वामित्रं पूजयन्तः	१	२६	३२
विश्वामित्रं महात्मानम्	१	३५	१०
विश्वामित्रं महात्मानम्	३	६५	१९
विश्वामित्रः सरामस्तु	१	६७	१५
विश्वामित्रमनुप्राप्तम्	१	५०	६
विश्वामित्रवचः श्रुत्वा	१	३९	१
विश्वामित्रवचः श्रुत्वा	१	४५	१
विश्वामित्रवचः श्रुत्वा	१	४९	१२
विश्वामित्रवचः श्रुत्वा	१	७२	९

	का०	स०	श्लो०
विभीषणोऽपि धर्मात्मा	६	१२८	६०
विभीषणोऽयं संप्राप्तः	६	५०	६
विभीषणो हनूमांश्च	६	६०	६०
विभूषणरवाश्चात्र	४	१३	२२
विभूषितां मणिस्तम्भैः	५	६	२४
विभ्रमाच्चित्तमोहाद्वा	६	६३	२४
विभ्राजमानं वपुषा	३	५	५
विभ्राजमानान्वपुषा	४	५०	२८
विभ्राजमानो वपुषा	४	१२	४२
विमलग्रहनक्षत्रा	२	३	३७
विमले च प्रकाशेते	६	४	४३
विमानं परमोदारम्	७	७७	११
विमानं पुष्पकं तत्तु	६	४८	३५
विमानं पुष्पकं तस्य	३	३२	१५
विमानं पुष्पकं दिव्यम्	५	६	१६
विमानं पुष्पकं दिव्यम्	६	१२७	३०
विमानं पुष्पकं दिव्यम्	६	१२७	६२
विमानं प्रेक्ष्य सुग्रीवम्	६	१२३	२७
विमानं सूर्यसंकाशम्	३	५५	३०
विमानमास्थाय महानुभाव	६	११६	३७
विमानमिव सिद्धानाम्	१	५	१६
विमानस्थास्तदा देवाः	६	१०२	४३
विमानस्तु स संक्रम्य	५	१३	१
विमानात्पुष्पकाद्य	५	२७	२०
विमानेनापि गत्वा तु	६	४७	१६
विमाने भास्वरे तिष्ठन्	३	७२	६
विमानैर्बहुभिर्लङ्का	६	२४	१०
विमिश्रा विहगाः पृभिः	६	१	२७
विमुक्तकवचः क्रुद्धः	७	२१	३८
विमुक्तकवचस्तत्र	७	२६	२३
विमुक्तधर्माश्चपलाः	३	४५	३०
विमुक्तमिव मायाभिः	६	१०४	३
विमुक्तास्तस्य वेगेन	५	१	५०
विमुक्तोऽप्यहमस्त्रेण	५	५०	१८
विमुक्तोऽसौ सरस्वत्या	७	१०	४७
विमुक्तौ शरबन्धेन	६	५१	१३
विमुच्य राघवरथम्	६	१०७	२०

	का०	स०	श्लो०
विमृज्य बाष्पं परिसान्त्व्य०	२	२३	४१
विमृज्य वदन तत्र	६	४६	३५
विमृशंश्च न पश्यामि	५	३०	३३
विमृश्य बुद्ध्या प्रश्रितम्	६	३	६३
वियुक्ता पतिना तेन	१	२	१२
वियूथां सिंहसंरुद्धाम्	५	१७	२२
विरराज महाबाहुः	३	१७	४
विरराज महावीर्यः	६	५६	२८
विरराज समीपस्थम्	६	४	१०
विरराम महातेजाः	१	१६	२०
विराजमानं प्रतिपूर्णवस्तुना	५	४७	६
विराजमानो वपुषा	६	११	१५
विराजयन्राजसुतः	२	२६	२
विराधश्च हतः संख्ये	५	१६	८
विरूपरूपा विकृता विवर्चसः	५	१२	८
विरूपं यच्च मे रूपम्	३	७०	१६
विरूपाक्षस्तु महता	६	३७	१८
विरूपाक्षः स्वकं नाम	६	६६	१४
विरूपान्बहुरूपांश्च	५	४	२०
विरूपितास्मि क्रूरेण	३	३४	२२
विरेमुस्ते ततो दूताः	७	१०८	७
विरोधं जनयामास	१	७५	१६
विरोप्यन्तां बहुविधाः	७	५४	११
विलपन्तीं तथा तां तु	२	४४	१
विलपन्तीं तथा दीनाम्	२	२१	२६
विलपन्तीं तथा दृष्ट्वा	२	५७	३३
विलम्बमानैर्मणिहारशुक्लै	७	७	५४
विलयं जग्मुराकाशे	६	६६	४६
विललाप भृशं सीता	५	३२	५
विललाप स दुःखार्तः	२	४२	१३
विललापार्तवद्दुःखम्	२	१३	१७
विलापोपरतं रामम्	२	५३	२८
विलिखन्ती मुहुर्भूमिम्	७	६	१७
विलीयमानैर्विहगैः	४	२८	५२
विलेपुरेवं दीनास्ताः	६	११०	२६
विवत्सां वेपमानां च	६	४६	६
विवदन्तौ ततोऽन्योन्यम्	७	५३	१६

	का०	स०	श्लो०
विवर्जितो नरैः पापैः	२	१००	४६
विवर्णया कृपणया	५	२२	४१
विवर्णवदनं दृष्ट्वा	२	२६	८
विवर्णवदनाः सर्वे	४	५२	१०
विवर्णो मुखवर्णश्च	६	५५	११
विवर्तमानं बहुशः	६	२७	३२
विवर्धमानं च हि माम्	५	६७	३३
विवर्धमानो वीर्येण	१	५५	२०
विवस्वतस्तनूजस्य	५	३	१६
विवस्वान्कश्यपाज्जज्ञे	२	१०१	६
विवास्य रामं सुभगा	२	४३	३
विविक्तेषु च तीर्थेषु	३	११	५२
विविधममलशस्त्रभास्वरम्	६	८५	३६
विविधाकृतिरूपाणि	५	४	१०
विविधानस्त्रसंघातान्	६	७५	१३
विविधानि च गौडानि	७	६२	१२
विविधानि विशालानि	४	५०	३४
विविधान्यपि यानानि	२	६२	३५
विविधाभ्रघनापन्न	५	५७	६
विविधायुधहस्ताश्च	६	५१	२४
विविधा विविधैः पुष्पैः	४	१	६०
विविधैर्मृगसङ्घैश्च	५	१४	३४
विविधैर्वृक्षषण्डैश्च	४	२७	६
विविशुः पूजितास्तेन	१	१८	४६
विवृत्तकर्मायतनः	४	२८	५५
विवृत्तनयनं क्रोधात्	६	६६	३३
विवृत्य नयने कोपात्	५	२३	१०
विवृद्धमूला बहवः	५	१५	१०
विवेश बाहुदो भूमौ	४	५५	१७
विवेश नलिनीं रम्याम्	३	७५	१६
विव्याध दशभिर्बाणैः	६	६०	३०
विशल्यः क्रियतां क्षिप्रम्	६	६१	२२
विशल्यकरणीं नाम्ना	६	१०१	३१
विशल्योऽयं महाप्राज्ञः	६	६१	२१
विशल्यौ च महात्मानौ	६	७५	३४
विशस्ते वा गृहीते वा	५	३०	३२
विशस्येमां ततः सर्वान्	५	२४	४२

	का०	स०	श्लो०
विशाम्यहं हि पातालम्	१	४३	६
विशालं जघनं पीनम्	३	४६	१६
विशालरथ्या दुर्धर्षा	४	४१	३७
विशालस्य सुतो राम	१	४७	१३
विशालाक्षं विरूपाक्षी	३	१७	१०
विशालाक्षो महाबाहुः	३	४७	१२
विशाला नलिनी यत्र	४	४३	२२
विशालान्कोसलान्रम्यान्	२	५०	१
विशीर्णमेदोमस्तिष्कं	६	३	३६
विशीर्णं पतितं भूमौ	३	६४	४५
विशुद्धभावस्य हि दुष्टभावा	२	१३	२४
विशुद्धभावां निष्पापाम्	६	११६	१०
विशुद्धवंशाभिजनाग्रहस्तः	३	३१	८६
विशुद्धा त्रिषु लोकेषु	६	११६	१६
विशेषमालम्ब्य विशेषसं०	५	८	६
विशेषं ज्ञातुमिच्छामि	२	६२	१६
विशेषेण तु सुग्रीवः	४	४४	१
विशेषेणाश्रमस्थाने	३	६२	६
विशोधितजटः स्नातः	६	१२८	१५
विश्रम त्वं पृथुश्रोणि	७	२६	२६
विश्रमार्थं हनुमतः	६	१२३	१६
विश्राणयन्तो रत्नानि	४	२५	३१
विश्रुतस्त्रिषु लोकेषु	१	७	२०
विश्रवकर्मवचः श्रुत्वा	७	५	२८
विश्रवकर्मसुतो वीरः	६	३०	३३
विश्रवकर्मा च दृष्ट्वेमम्	७	३८	१६
विश्वामित्रं पुरस्कृत्य	१	३१	२१
विश्वामित्रं पुरस्कृत्य	१	७३	२०
विश्वामित्रं पूजयन्तः	१	२६	३२
विश्वामित्रं महात्मानम्	१	३५	१०
विश्वामित्रं महात्मानम्	३	६५	१६
विश्वामित्रः समासस्तु	१	६७	१८
विश्वामित्रमनुप्राप्तम्	१	५०	६
विश्वामित्रवचः श्रुत्वा	१	३६	१
विश्वामित्रवचः श्रुत्वा	१	४५	१
विश्वामित्रवचः श्रुत्वा	१	४६	१२
विश्वामित्रवचः श्रुत्वा	१	७२	६

	का०	स०	श्लो०
विश्वामित्रस्तथेत्युक्त्वा	१	२४	४
विश्वामित्रस्तु ब्रह्मर्षिः	१	२६	१४
विश्वामित्राय धर्मेण	१	५०	८
विश्वामित्राश्रमे सौम्ये	१	६३	६
विश्वामित्रे गते राजा	१	७४	२
विश्वामित्रेण धर्मात्मा	१	५३	११
विश्वामित्रोऽपि धर्मात्मा	१	६२	२८
विश्वामित्रोऽपि धर्मात्मा	१	६५	२७
विश्वामित्रोऽपि धर्मात्मा	१	६५	४०
विश्वामित्रोऽब्रवीद्वाक्यम्	१	२५	४
विश्वामित्रो महातेजाः	१	५१	२०
विश्वामित्रो महातेजा.	१	५२	५
विश्वामित्रो महातेजाः	१	६१	१
विश्वामित्रो ययावग्रे	१	२२	६
विश्वामित्रो हि राजर्षिः	१	५३	६
विश्वासात्कथितं किंचित्	२	७५	३२
विश्वासार्थं तु वैदेहि	५	३५	८२
विश्वेदेवाश्च वसवः	४	४२	४१
विषण्णः श्रान्तहृदयः	२	७१	३२
विषण्णः सन्विषण्णेन	३	५७	१५
विषण्णवदनं दृष्ट्वा	६	८८	३६
विषण्णवदनं दृष्ट्वा	६	८६	४७
विषण्णवदनां हि त्वाम्	२	७	१७
विषण्णवदनाः सर्वे	६	६७	३५
विषण्णवदना भूयः	६	५२	५५
विषण्णवदना ह्येते	६	५०	५
विषण्णस्य महाबाहोः	६	१०१	२२
विषण्णां वाहिनीं दृष्ट्वा	४	६४	८
विषण्णां हरयः सर्वे	४	६६	३७
विषमुद्बन्धनं वापि	५	१३	३४
विषये ते महाराज	२	५६	४
विषये वा पुरे वाते	३	५०	१३
विषये वा पुरे वा ते	४	१७	२४
विषयेषु प्रसक्तेन	६	३५	१७
विषसाद पुनर्भूयः	२	१०	२२
विषाणयोर्गृहीत्वा तम्	४	११	४०
विषादं मा कृथा वीर	६	१०१	२७
विषादनाध्युषिते	३	२१	१२
विषादविमुखाः सर्वे	६	६८	५
विषादो नैव कर्तव्यः	७	२६	७
विष्टम्भयित्वा बाणौघैः	५	३६	३५
विष्टब्धं किमिदं कस्मात्	७	१६	४
विष्टिकर्मान्तिका सर्वे	२	८२	२०
विष्टीरनेकसाहस्रीः	६	१२७	६
विष्ठितोऽहं सरस्तीरे	७	७७	१०
विष्णुचक्रनिपातैश्च	३	३२	१०
विष्णुना च पुरा राम	१	२५	२१
विष्णुना दैत्यघातश्च	७	८०	५
विष्णुना प्रोषितो वापि	५	५०	१०
विष्णुना सदृशो वीर्ये	१	१	१८
विष्णुर्यथा गरुत्मन्तम्	६	५६	१२३
विष्णोः पदं प्रेक्षमाणा	२	६८	१६
विष्णोः स्थानं महेन्द्रस्य	३	१२	१८
विष्णो कथं करिष्यामि	७	२७	७
विष्णो पुत्रत्वमागच्छ	१	१५	२१
विष्णोरर्धं महाभागम्	१	१८	११
विष्णोर्द्वेषस्य नास्त्येव	७	५	४३
विसंज्ञं वानरं दृष्ट्वा	६	५६	६०
विसंज्ञो मूर्च्छितश्चासीत्	६	५६	११५
विसर्जयामास ततः स०	६	३६	२२
विसर्जयामास तदा	७	३८	२६
विसर्जयित्वा सचिवांस्तत०	६	५६	३५
विसर्जयित्वा स हरीन्	४	३८	२
विसर्जयित्वा स्वं वेश्म	१	८	२३
विसर्जये त्वां सौमित्रे	७	१०६	१३
विसर्जयैनान् चिरान्	४	२५	४७
विससर्ज ततो गङ्गाम्	१	४३	११
विससर्जैकवेगेन	६	४६	२०
विसार्य निपुणा दृष्टिम्	१	४१	१६
विसार्य सर्वतो दृष्टिम्	४	१४	२
विसृजन्तो महाकाया	५	४३	१४
विसृजन्तो महानादान्	६	५०	६४
विसृजास्मै वधाय त्वम्	६	१०८	२
विसृज्य च महाबाहुः	७	४१	१

	का०	स०	श्लो०
विसृज्य तु सुहृद्वर्गम्	७	४४	१
विसृज्य पार्थिवान्सर्वान्	७	६६	५
विसृज्य लक्ष्मणं रामः	७	१०७	१
विसृज्य शिबिकां तस्मात्	६	११४	३०
विसृतास्त्रिषु लोकेषु	३	६	६
विसृष्टस्तु तदा काकः	५	६७	१८
विस्तीर्णविपुलोरस्का	३	५	१६
विस्तीर्णो योजनशतम्	७	८४	५
विस्फारयितुमारेभे	६	६६	१५
विस्फार्य च धनुर्घोरम्	६	५४	२
विस्मयं तु महद्गत्वा	७	३४	१५
विस्मयं परमं जग्मुः	६	६०	१४
विस्मयव्यग्रमनसः	४	५०	११
विस्मयस्त्वेष चास्माकम्	७	१	२८
विस्मयाच्च प्रहर्षाच्च	६	११४	३४
विस्मयाविष्टहृदयः	५	३	८
विस्मयोत्फुल्लनयना	३	४२	३४
विस्मितास्तु बभूवुस्ते	६	१०१	४२
विस्रस्तकवचं भूमौ	६	८८	२५
विस्वरं चोत्सृजन्नादान्	६	५१	३३
विहगैर्मृगसङ्घैश्च	५	१४	६
विहङ्गसङ्घैर्हीनास्ते	५	१४	१७
विहाय तन्द्रीं शोकं च	४	४६	५
विहाय मां गतो रामः	२	६६	४
विहाय सीतां विजने	३	५७	१६
विहारशीलाः सततम्	७	११	४३
विहृतं बहिरन्तश्च	६	१२	५
विहीना कामभोगैश्च	६	१११	५६
विहृत्य कालं परिपूर्णमानसाः	७	१०२	१७
विहृत्य ते बर्हिणपूगनादिते	११	५५	३३
वीक्षमाणं धनुः सज्यम्	३	६५	२
वीक्षमाणश्च ददृशे	५	५३	३६
वीक्षमाणस्तु तं वै	५	३८	२६
वीक्षमाणस्ततो लङ्काम्	५	५४	१
वीक्षमाणस्तु मन्दासुः	४	२२	१
वीक्षमाणा दिशः सर्वाः	६	४७	४
वीज्यमानस्ततो वीरः	६	७३	१५

	का०	स०	श्लो०
वीरं शतबलिं चैव	७	४०	५
वीरः प्रतपनो घोरः	६	४३	१३
वीरद्वेषेण वा शङ्के	६	३६	६
वीरपार्थिवपत्नीनाम्	६	४८	४
वीरबाहुः सुबाहुश्च	६	४२	२२
वीरमानरलोकस्य	४	६६	२
वीरविक्रान्तविख्याय	६	१०६	२
वीर सौम्य प्रबुध्यस्व	७	३७	४
वीरस्तस्य सखा राज्ञः	४	५२	६
वीराणां राजपुत्राणाम्	२	२७	३
वीराश्च नियतोत्साहाः	१	७	१२
वीरैरध्युषितां पूर्वम्	२	१००	४०
वीरो विश्ववसु पुत्रः	३	१७	२२
वीर्यविक्रमदृप्तानाम्	६	२७	२६
वीर्यशुल्केति भगवन्	१	६६	१७
वीर्यशुल्केति मे कन्या	१	६६	१५
वीर्यहीनमिवाणवतम्	१	७६	३
वीर्यादभिहता वृक्षैः	६	८२	१६
वीर्ये युद्धे च दर्पे च	३	३६	१६
वृषणभूमितलां निम्नाम्	२	११४	१५
वृक्षमूले निरानन्दाम्	५	११३	४
वृक्षशूलनिपातैश्च	६	७६	३
वृक्षाग्रादवरोह तम्	२	६७	२७
वृक्षादवृक्षं प्रधावन्तः	३	६०	११
वृक्षान्धकारानिर्गम्य	६	८६	१५
वृक्षेणावार्य यदि माम्	३	६१	४
वृक्षेभ्यः पतितैः पुष्पैः	५	१४	१३
वृक्षे वृक्षे हि पश्यामि	३	३६	१५
वृतं नानाविधैः पुष्पैः	४	६७	४०
वृतः कोटिसहस्रेण	४	३६	३५
वृतः कोटिसहस्रेण	४	२७	२४
वृतः परमनारीभिः	५	१८	२६
वृतः शतसहस्रेण	४	४३	३
वृतः सर्वगुणैर्नित्यम्	७	१०	२६
वृतैर्नानाविधैर्वृक्षैः	५	१४	७
वृतो राजाहि कैकेय्या	२	१११	३२
वृतो हि बालस्तरुणीं	६	१४	२

	का०	स०	श्लो०
वृत्तं कथय धीरस्य	१	३	३३
वृत्तं वानरकोटीभिः	६	३६	६
वृत्तकामौ भवेन्द्राता	६	११०	२१
वृत्तज्ञो वृत्तसंपन्नम्	४	२६	१२
वृत्तदंष्ट्रो महेष्वासः	२	५६	२४
वृत्तमाभरणैर्दिव्यैः	५	१०	६
वृत्तशीले कुले जाताम्	५	१६	१०
वृत्तां पुष्करिणीभिश्च	५	१८	७
वृत्ता यात्रा नरेन्द्राणाम्	४	२८	५३
वृथा गर्जितानिश्चेष्टा	५	५८	८३
वृथा च दर्शितं वीर्यम्	५	६०	१६
वृद्धं परमसंतप्तम्	२	५८	३
वृद्धभावादपक्षत्वात्	४	५८	३
वृद्धश्चैवाल्यपुत्रश्च	२	६६	११
वृद्धानां धर्मशीलानाम्	२	२०	२३
वृद्धाश्च व्याधिताश्चैव	१	१४	१३
वृद्धिकामो हि लोकस्य	२	१	३८
वृद्धे पितरि स्वर्यांते	१	७१	१५
वृद्धोपसेवी लक्ष्मीवान्	५	३८	५६
वृद्धोऽहं त्व युवा धन्वी	३	५०	२१
वृन्दवृन्दैरयोध्यायाम्	२	५	१६
वेगं चक्रे महावेगः	६	६८	६
वेगवद्भिर्नदद्भिश्च	६	३३	२४
वेगवन्तः प्लवन्तो ये	५	१	१११
वेगितान्नां समर्थानाम्	६	५७	४३
वेगिनी च कुलिङ्गाख्याम्	२	७१	६
वेणुभिर्मारुतोद्धूतैः	५	५६	३१
वेणुस्वरव्यञ्जिततूर्यमिश्रः	४	३०	५०
वेदये न च संयुक्तान्	२	६४	७३
वेदविद्याव्रतस्नातः	४	६२	६०
वेदवेदाङ्गविदुषः	७	१	८
वेदाः सहाङ्गा विद्याश्च	२	१४	४६
वेदा ब्राह्मणरूपेण	७	१०६	८
वेदिस्थलविधानानि	२	५६	३३
वेदैश्च ब्रह्मचर्यैश्च	२	१२	८४
वेपते स्माधिकं सीता	५	२५	५
वेपमानां श्रमेणाद्य	४	४५	१३

	का०	स०	श्लो०
वेलातलनिविष्टेषु	४	४२	१३
वेलावनमुपागम्य	६	४	१०५
वैरवानसाः वालखिल्याः	३	६	२
वैदर्भदुहिता राम	१	३८	३
वैदूर्यकृतसोपानम्	७	१३	५
वैदूर्यवक्ततसोपानैः	५	३	१०
वैदूर्यविमलैस्तोयैः	४	१३	७
वैदूर्यसंकाशखुरः	३	४२	१८
वैदेहराजन्यसुता	२	१०४	२४
वैदेहीं च महाभागाम्	३	१२	१०
वैदेहीं च महाभागाम्	३	३६	८
वैदेहीं प्रार्थयानं तम्	६	६४	१३
वैदेहीं लक्ष्मणं रामम्	३	१	१४
वैदेही कुशलीरामः	६	११३	७
वैदेही वव नु सा गता	३	६४	१३
वैदेही रमसे कच्चित्	२	६४	१८
वैदेही शोकसंतप्ता	५	५३	२५
वैदेह्यां ह्रियमाणायाम्	३	५४	१०
वैदेह्याः प्रियकामेन	४	५६	६
वैदेह्या चोद्यमानस्तु	७	४७	१०
वैदेह्या मां च कुशलम्	५	११२	२४
वैदेह्या यानि चाङ्गेषु	५	१५	४१
वैदेह्या वचनं श्रुत्वा	५	३८	४७
वैदेह्या वचनं श्रुत्वा	५	४०	७२
वैदेह्या वचनं श्रुत्वा	५	४२	११
वैधव्यं यान्ति यैनार्थिः	६	४८	७
वैधव्यं शोकसंतापम्	४	२०	१६
वैनतेयं समारुह्य	१	१५	१७
वैनतेयसमाः केचित्	५	५१	१४
वैनतेयस्ततः क्रुद्धः	७	८	१८
वैनतेयस्य वा शक्तिः	४	६७	२३
वैनतेयेन संस्पृष्टाः	६	५०	३६
वैरं शतगुणं पश्य	३	६४	५१
वैरूप्यमङ्गेषु कषाभिघातः	५	५२	१५
वैवस्वत महाबाहो	७	२२	३८
वैश्वदेवबलिं कृत्वा	२	५६	३१
वैष्णवीं तां महातेजः	७	११०	१०

	का०	स०	श्लो०
वैहायसौ युवामेतौ	६	२२	७९
वैहारिकाणां शिल्पानाम्	२	१	२८
व्यक्तं दैवादहं मन्ये	७	५०	४
व्यक्तं नभः शस्त्रविधौतव०	४	३०	३६
व्यक्तं रामस्य विज्ञाय	२	४४	८
व्यक्तं रामाभिषेकार्थे	२	१४	६५
व्यक्तं सा भक्षिता बाला	३	६०	३०
व्यक्तं हिरण्मयांस्वं हि	३	५३	१९
व्यक्तमद्य त्वया वीर	४	२०	७
व्यक्ताक्षरपदं चित्रम्	२	११९	२
व्यचरन्दण्डकारण्यम्	३	३८	३
व्यजनाभ्यां च मुख्याभ्याम्	२	२६	११
व्यञ्जनानि हि ते यानि	५	३३	११
व्यञ्जनार्थं च सौमित्रे	२	३२	२१
व्यतिक्रमं न वेत्स्यामि	२	२७	२१
व्यतिक्रम्य तु वेगेन	३	६९	४
व्यतीतायां तु शर्वर्याम्	२	६७	२
व्यथयन्राक्षसान्सर्वान्	६	४१	९१
व्यथिताः पन्नगाश्चासन्	६	२१	३०
व्यथितो विप्लवश्चैव	२	१२	४
व्यध्वंसयत्समं क्रुद्धः	७	२७	३३
व्यनदद्भैरवं नादम्	३	४४	१७
व्यपेतदोषमस्यन्तौ	६	८८	६४
व्यपेतपङ्कासु सवालुकासु	४	३०	४२
व्यपेतमलसंघाताम्	२	५०	२०
व्यपेते तु जीवे निकुम्भस्य	६	७७	२४
व्यभ्रमाकाशमाविश्य	६	५०	३४
व्यराजयत वैदेही	२	३९	१८
व्यरोचत तदा तोयम्	१	४३	२९
व्यलोकयन्त ते तत्र	१	४३	१८
व्यवधूय भयं तीव्रम्	५	३५	७०
व्यवसायश्च ते वीर	४	४०	१४
व्यवसायश्च वीर्यं च	५	६३	२१
व्यवसायश्च शौर्यं च	५	६४	३४
व्यवसायस्तु ते नीच	३	५२	१५
व्यवस्थितं हनुमन्तम्	६	५६	१०
व्यवस्थिता या भरतेन सा	२	९३	२७

	का०	स०	श्लो०
व्यशीर्यत महद्दिव्यम्	६	८८	५७
व्यसनं जीवितान्ताय	३	६९	४८
व्यसनं सुमहत्क्रूरः	७	८०	१०
व्यसनी वा समृद्धो वा	२	४०	६
व्यसने कश्चिदार्यस्य	२	१००	५८
व्यसनेनात्मनः सीते	६	३१	१६
व्यसने वार्थकृच्छ्रे वा	४	७	९
व्यसनेषु न कृच्छ्रेषु	६	११४	२८
व्यसृजच्छरवर्षाणि	६	९९	२२
व्यस्मयन्त मनुष्यास्ते	२	९१	८०
व्याकोशपद्मवक्त्राणि	६	९५	१५
व्याधूर्णितमहाशस्त्रम्	६	७५	५७
व्याघ्रादिभिः समाकीर्णम्	५	५६	३७
व्याघ्रो मृगमिवादाय	७	३२	६६
व्याघ्रो वराहो जीमूतः	७	१५	३१
व्याजह्रुरभिदीप्तायाम्	३	२३	६
व्यादाय विपुलं वक्त्रम्	५	१	१५
व्यादिदेश च पूर्वस्याम्	६	३६	१७
व्यादिदेश प्रियाग्येभ्यः	२	३	४८
व्यादिदेश महासत्त्वः	६	११२	१३
व्यादिदेश सुसंक्रुद्धः	५	५८	१२८
व्यामिश्रं सर्जकदम्बपुष्पैः	४	२८	१८
व्याला गोमायवो गृध्राः	६	३५	२७
व्यालैर्मृगैश्चरितम्	२	५८	८
व्याविद्धहारकेयूराः	५	१८	१६
व्यावृत्तकायपीनस्तक्	५	९	४४
व्यावृत्तातिलकाः काश्चित्	५	९	४५
व्याहरन्त मृगा घोराः	६	५३	१५
व्याहृतं दुर्वचो घोरम्	७	६३	५
व्युष्टामेव तु तां रात्रिम्	२	६९	२
व्युष्य रात्रिं तु तत्रैव	२	८९	१
व्यूहानि कपिसैन्यानि	६	४	५४
व्यूढेनैव सुघोरेण	६	५७	३१
व्योमनाभस्तमोभेदी	६	१०५	१३
व्रजन्तं राक्षसं प्रेक्ष्य	६	९२	३८
व्रणैः समुत्थैः शोभेताम्	६	५४	३२
व्रीडान्वितः स्वयं यच्च	२	१९	१५

	का०	स०	श्लो०
व्रीडितं लक्ष्मणं दृष्ट्वा	२	६७	२१
व्रीडितं शोकसंतप्तम्	६	८४	५
(श)			
शंस कस्माद्भयं त्र	६	६२	१२
शंसन्तीव हि मे देवीम्	३	६२	६
शकटांश्च बहून्पूर्णान्	७	६३	३
शकुनैरपि दुष्प्रापे	७	५	२४
शक्तस्त्रैलोक्यमप्येषः	२	२	४५
शक स्त्वमा मनात्मानम्	७	५२	१३
शक्तिखड्गगदाकुन्तैः	६	७६	४
शक्तितोमरमीनं च	६	७	२०
शक्तिद्वयं च काकुत्स्थ	१	२७	१२
शक्तिद्वयं च चिक्षेप	१	५६	११
शक्तिभि परिघैर्घोरैः	३	२२	१६
शक्तिमानतिविक्रान्तः	४	२६	२१
शकि वृक्षायुधांश्चैव	५	४	२१
शक्तया निपातित दृष्ट्वा	६	१०१	१
शक्तया ब्राह्मया तु सौमित्रि	६	५६	११०
शक्यं खलु भवेद्राम	४	८	३
शक्यं त्व ऽपि तत्कार्यम्	४	१८	३०
शक्यं दिवं चार्जयितुम्	४	१८	५७
शक्यः कर्तुमयं यज्ञः	१	१२	१७
शक्यमम्बरमारुह्य	४	२८	४
शक्यमापतितः सोढुम्	२	६२	१६
शक्या लोभयितुं नाहम्	५	२१	१५
शक्या सीतासमा नारी	६	४६	६
शक्यो जेतुं सुरासुरैः	७	२७	१५
शक्यो धारयितुं कामः	४	१	६६
शक्रतुल्यपराक्रान्तम्	४	१६	२३
शक्रदत्ता वरा माला	४	१७	५
शक्रबाणासनप्रख्यम्	४	३१	११
शक्रं याश्चोपतिष्ठन्ति	२	६१	१८
शक्रादिष्वपि देवेषु	३	६६	१२
शक्रायुधनिकाशैश्च	२	६६	२०
शक्राशनिसमस्पर्शैः	५	८८	४२
शक्रोऽपि विजितस्तेन	७	१	३५
शङ्कमानस्तु तं दृष्ट्वा	३	४३	५
शङ्कया त्वेतयाहं च	४	८	३५

	का०	स०	श्लो०
शङ्काहतात्मा दध्यौस	५	५०	२
शङ्कितं तु गमद्भान्तम्	३	४४	६
शङ्खचक्रधरं देवम्	७	६	१३
शङ्खणस्प तु पुत्रोऽभूत्	२	११०	३१
शङ्खदुन्दुभिनादेन	६	१२७	२१
शङ्खदुन्दुभिनिर्घोषः	६	४२	३६
शङ्खदुन्दुभिनिह्रादैः	१	११	२७
शङ्खप्रभ क्षीरमृणालवर्णम्	५	२	५५
शङ्खभेरीनिनादैश्च	६	१२७	१७
शङ्खभेरीसहस्राणाम्	६	७८	१६
शङ्खराजरवः सोऽथ	७	७	११
शङ्खशब्दप्रणादैश्च	६	१२८	३३
शङ्खांश्च पुरयामासुः	६	६०	३६
शङ्खे नेत्रे करौ पादौ	६	४८	१०
शचीसुतश्चापि तथा	७	२८	११
शतो नेकृतिकः क्षुद्रः	४	१७	४३
शतं क्रतुनामाहृत्य	२	१०६	२६
शतं खर्वसहस्राणाम्	६	२८	३७
शतं च शातकुम्भानाम्	२	३	११
शतं पद्मसहस्राणाम्	६	२८	३६
शतं वाहसहस्राणाम्	७	६१	१६
शतं वृन्दसहस्राणाम्	६	२८	३५
शतं शङ्कुसहस्राणाम्	६	२८	३४
शतं शतसहस्राणाम्	६	२८	२३३
शत शतसहस्राणाम्	६	४१	५१
शतं शतसहस्राणि	१	१७	३०
शतं शतसहस्राणि	६	२७	३३
शत सहस्राण्यश्वानाम्	२	८३	५
शतकोटिसहस्राणि	४	३५	१५
शतक्रतुं बधिष्यामि	६	६३	५३
शतक्रतोर्वचः श्रुत्वा	१	४६	५
शतघ्नीमुसलप्रास	७	२८	१४
शतमश्वानृते हन्ति	४	३४	६
शतयोजनविस्तीर्णः	५	३६	८
शतयोजनविस्तीर्णम्	६	३६	१८
शतशश्चापि धर्मज्ञाः	७	६१	१७
शतशः पक्षिसङ्घैश्च	४	२७	२०

	का०	स०	श्लो०
शतशोऽथ सहस्राणि	६	३	२८
शतह्रदानां लोलत्वम्	३	१३	६
शतादित्यमिवाभाति	१	४३	२१
शतानि त्रीणि गत्वाथ	४	६६	२२
शतानि सप्त चाष्टौ च	६	६७	६
शतानि सप्त चाष्टौ च	६	६७	६८
शतान्यथ सहस्राणि	४	३७	१३
शतान्यहं योजनानाम्	५	२	४
शतैः शतसहस्रैश्च	४	३८	३०
शतैः शतसहस्रैश्च	६	४	२४
शत्रवस्तव सुव्यक्तम्	३	४१	४
शत्रुः पतिप्रवादेन	२	७	२७
शत्रुघ्न च परिष्वज्य	२	११२	२७
शत्रुघ्नं च महात्मानम्	६	१२०	२१
शत्रुघ्नभवनं गत्वा	७	४४	६
शत्रुघ्नविक्षेपविमूढसंज्ञाम्	२	७८	२६
शत्रुघ्नशरनिर्भिन्नः	७	६६	३६
शत्रुघ्नश्च तदाज्ञाय	२	७८	१०
शत्रुघ्नश्च तदा रामम्	६	१२७	४८
शत्रुघ्नश्चापि तेजस्वी	७	६६	१०
शत्रुघ्नश्चापि भरतम्	२	७७	११
शत्रुघ्नश्चापि रामस्य	२	६६	४०
शत्रुघ्नस्त्वतुलमतिस्तु ते स०	२	१०७	१६
शत्रुघ्नस्त्वब्रवीद्वाक्यम्	७	६२	११
शत्रुघ्नस्य च गच्छन्तु	७	१०७	८
शत्रुघ्नस्य वचः श्रुत्वा	७	६५	५
शत्रुघ्ने वाथ सुग्रीवे	६	११५	२३
शत्रुघ्नोत्थाय किं शेषे	२	८६	२
शत्रुघ्नो न तदा जातः	७	६६	४
शत्रुस्त्रीशोकदातारम्	६	१११	५४
शत्रूणां कदनं चक्रुः	६	८२	१५
शत्रोः प्रख्यातवीर्यस्य	६	१०४	६
शत्रोः सकाशात्संप्राप्तः	६	१७	३६
शनैर्विमुच्यते सन्ध्या	१	३४	१६
शप्तो ब्रह्मर्षिणा तेन	७	८१	१६
शबरी दर्शनं चैव	१	३	२२
शबरी दर्शयामास	३	७४	२१

	का०	स०	श्लो०
शबर्या पूजितः सम्यक्	१	१	५८
शबला सा रुदन्ती च	१	५४	७
शब्द दुर्मर्षणं श्रुत्वा	४	१५	५
शब्दापिहितकर्णश्च	२	७७	५
शमीशाखाभिरास्तीर्य	३	१५	२२
शम्बरो देवराजेन	६	६६	७
शयनानि च मुख्यानि	२	५०	४०
शयनानि प्रसूयन्ते	५	४३	४७
शयनीयं नरेन्द्रस्य	२	१५	२०
शयनीयानि यानानि	२	३०	४५
शयने चोत्तमाङ्गेन	६	२१	५
शयानः पुरुषो रामः	३	७३	३३
शयानः शत्रुनाशार्थम्	६	६५	१२
शयानः शरतल्पेऽस्मिन्	६	४६	१५
शयानमनघं रात्रौ	२	४४	१०
शयामहे वा निहताः	६	६६	२४
शरजालपरिक्षिप्ताम्	३	३८	२६
शरजालाचितौ वीरौ	६	५०	३
शरजालावृतः सूर्यः	३	२८	६
शरजालांशुभाञ्छूरः	५	३७	१८
शरणं काञ्चनं दिव्यम्	४	४१	३६
शरणान्यशरण्यानि	७	६	५
शरणाभिगताः सर्वे	६	१११	१११
शरणे निहतस्याद्य	३	२	२४
शरण्यं सर्वभूतानाम्	३	१	३
शरण्यः सर्वभूतानाम्	४	४	६
शरतल्पगतौ वीरौ	६	४७	२१
शरत्कालं प्रतीक्षस्व	४	२७	३६
शरत्काले प्रतीक्षिष्ये	४	२७	४४
शरदभ्रप्रतीकाशा	६	६६	३६
शरद्गुणायितरूपशोभाः	४	३०	३८
शरधारा विमुञ्चन्तम्	३	१०६	७
शरधारासमूहान्तः	३	२७	८
शरधारास्ततो रामः	६	६६	२३
शरनिर्दग्धतोयस्य	६	२२	२
शरनिर्भिन्नगात्रास्ते	६	५२	७
शरवद्गमिवाभाति	६	१०७	२४

	का०	स०	श्लो०
शरबन्धाद्विमुक्तौ तौ	६	७२	८
शरबन्धेन घोरेण	६	४६	२४
शरभङ्गाश्रमं पुण्यम्	३	३०	३५
शरभङ्गे दिवं प्राप्ते	३	६	१
शरभङ्गे दिवं प्राप्ते	६	१२६	१५
शरभस्त्वथ निश्चित्य	६	१७	४३
शरभेण यथा सिंहाः	७	७	२०
शरभो वानरस्तत्र	४	६५	४
शरभप्रतिमं राम	१	७६	२०
शरवर्षं ततो घोरम्	६	८८	६१
शरवर्षैरविच्छिन्नम्	३	२६	३
शरस्तेजोमयो वत्सा	७	६६	२६
शरहोमसमिद्धस्य	६	८०	६
शरांश्च सुमहावेगान्	६	१०६	१८
शराणामग्रतस्तस्य	५	४८	३१
शराणामन्तरेष्वाशु	५	४८	३०
शरा नानाविधाश्चापि	७	१०६	७
शरान्खरमुखांश्चान्यान्	६	६६	४४
शरान्धकारमाकाशम्	३	२५	४०
शरान्धकारमाकाशम्	६	६६	३०
शराभिघातसंरब्धः	६	१०३	८
शराभितप्तेन विचेतसा मया	४	१८	६६
शरार्चिषमनाधृष्यम्	३	३७	१५
शराहतेनैव तदार्तया गिरा	३	५६	२७
शरीरं हि विना वायुम्	७	३५	६१
शरीरजं महेन्द्रस्य	१	२४	२१
शरीरजसमाप्टिा	३	१७	१२
शरीरशवसंकीर्णा	६	५५	२५
शरीरे तव पश्यामि	१	२६	१३
शरेण मुक्तो रामस्य	३	३६	१४
शरेणैकेन च हरीन्	६	७३	३४
शरेणोरसि विव्याध	१	२६	२६
शरैः परशुभिस्तीक्ष्णैः	६	८६	२३
शरैः पूर्णयतोत्सृष्टैः	७	७	८
शरैरतिमहावेगैः	६	८८	१६
शरैरभ्यकिरत्सैन्यम्	३	२६	६
शरैरभ्यनिकृत्तैस्तम्	३	२६	७

	का०	स०	श्लो०
शरैरावारितस्तस्य	३	५१	१२
शरैरिमावलं विद्धौ	६	५०	१७
शरैर्विदारयामास	६	५४	१४
शरैर्विनिहितं भूमौ	४	५	२६
शरैश्च विददारैनम्	६	६७	१६
शरौघानभिवर्षंतौ	६	८६	२८
शरौ प्रतिहतौ दृष्ट्वा	६	६०	५४
शर्करासवगन्धः स	५	६	५६
शर्करासवमाध्वीकाः	५	११	२३
शर्वरीं भगवन्नद्य	२	५४	३७
शलभा इव केदारम्	७	७	३
शलभा इव संछाद्य	४	४५	३
शल्यसंपीडितं शस्तम्	६	६१	११
शशक्षतजकल्पेन	५	१०	१६
शशमालक्ष्य सिंहो वा	७	३४	१५
शशलोहितरागेण	६	४०	६
शशंस च यथावृत्तम्	७	१०१	१८
शशास कपिसेनां ताम्	६	२४	१४
शशास चैव तान्सर्वान्	६	७५	४८
शशिप्रकाशवहना	५	१०	३१
शस्त्रपुष्पोपहारा च	६	४४	१५
शस्त्राणि शरपत्राणि	६	७३	२०
शस्त्रैश्च निशितैस्तीक्ष्णैः	५	४६	१६
शस्त्रैश्च विविधाकारैः	६	८६	१०
शाखां चन्दनवृक्षस्य	४	५	२०
शाखावसक्तान्खड्गांश्च	२	६४	१२
शाखासु सप्तच्छदपादपा०	४	३०	२८
शातकुम्भनिभाः केचित्	७	४२	६
शातकुम्भमयैः शृङ्गैः	५	१	६७
शाद्वलानि च नीलानि	५	२	६
शाद्वलिन्यां ध्रुवं भूम्याम्	४	६	२१
शाद्वलेषु यदा शिष्ये	२	३०	१४
शाद्वले परमोपेताम्	७	४२	१४
शान्तं पापं न वः किंचित्	२	७४	२२
शान्तयश्चापि वर्धन्ताम्	१	८	१६
शान्तया प्रययौ सार्धम्	१	१८	६

	का०	स०	श्लो०
शान्तरश्मिरिवादित्यः	६	६०	८२
शापिताऽसि मम प्राणैः	४	१६	१०
शापिता हि मया यूयम्	७	४५	२१
शापितोऽसि नरेन्द्रेण	७	४७	६
शापोत्सर्गाद्धि तस्येदम्	७	३०	४६
शामित्रे तु हयस्तत्र	१	१४	३१
शायिता निहता यत्र	४	२३	७
शारदस्तिमिरोन्मुक्तः	५	६६	१३
शारदाभ्रैरिवाकीर्णम्	१	४३	२३
शारदाम्बुधरप्रख्यैः	५	३	३
शारीरो मानसो वापि	२	१८	१३
शार्ङ्गचापविनिर्मुक्ताः	७	७	१३
शार्ङ्गधन्वा हृषीकेशः	६	११७	१५
शार्दूलमृगसंघुष्टम्	४	२७	२
शार्दूल यदि सा दृष्टा	३	६०	२५
शार्दूलरूपिणौ घोरौ	७	६५	१२
शार्दूलसिंहाविव जातदृप्तौ	६	४०	१६
शार्दूलस्य वचः श्रुत्वा	६	२०	८०
शालायास्त्वग्रतस्तस्या	२	६६	५
शालिशूकनिभाभासम्	६	३५	२१
शाल्मल्यः किंशुकाश्चैव	४	१	८२
शाश्वतः कामभोगश्च	४	५१	१६
शाश्वती खलु ते कीर्तिः	२	८५	१३
शाश्वती शबला मह्याम्	१	५३	१३
शाश्वतोऽयं सदा धर्मः	२	१०२	२
शासनात्कपिराजस्य	४	५३	८
शासनात्तु नरेन्द्रस्य	१	७०	६
शासनात्पार्थिवस्य नः	७	६५	२४
शासनाद्वापि मोक्षाद्वा	४	१८	३२
शासितश्च सखित्वेन	७	१०८	२६
शास्त्रतश्च कृतज्ञश्च	२	१	२५
शास्त्रदृष्टेन विधिना	३	६८	३६
शास्त्रदृष्टेन विधिना	६	१११	११७
शास्त्रप्रयोगाद्विविधाच्च वेदात्	४	२४	३८
शिंशपामलकी जम्बूः	२	६१	५१
शिखरं तु त्रिकूटस्य	६	३६	१७
शिखरं सूर्यसंकाशम्	५	५८	१२

	का०	स०	श्लो०
शिखराणि महेन्द्रस्य	४	६७	३७
शिखरैर्विकिरामैताम्	६	४२	११
शिखरैर्विकिरामैनाम्	६	२४	२१
शिखिनी मन्मथार्तेषा	४	१	३६
शितशूलधराः शूलैः	६	८६	२१
शितिकण्ठस्य विष्णोश्च	१	७५	१५
शितिकण्ठस्य विष्णोश्च	१	७५	१७
शिथिलां वनितां वृद्धाम्	२	११७	१८
शिबिकाभिश्च यानैश्च	२	७६	१६
शिबिकायामथारोप्य	२	७६	१४
शिबिका विविधाकाराः	५	६	३६
शिरसा चरणावेषां	२	४४	२२
शिरसा त्वाभियाचेऽहम्	२	१०६	३१
शिरसा धारयिष्यामि	१	४३	३
शिरसाभिनतो ब्रूयाः	७	४८	११
शिरसा मे शिरश्चास्य	६	३२	३२
शिरसा वन्द्य धरणीम्	७	४४	११
शिरसा वन्द्य धरणीम्	७	४८	२०
शिरसा वन्द्य वैदेहीम्	५	३६	६
शिरसा संप्रणम्यैनाम्	५	६७	३२
शिरस्यञ्जलिमाधाय	६	१२८	१
शिरस्येकेन बाणेन	३	२८	२७
शिरांसि सहसा जह्रुः	६	७५	६३
शिरांस्यपातयत्तीक्ष्णैः	३	२७	१८
शिरो जहार तद्रक्षः	३	२६	६
शिरो जहार धर्मात्मा	६	६०	२८
शिरोभि पृथुभिर्नागाः	५	१	१६
शिरोभिर्दशभिर्वीरः	५	४६	६
शिरो मायामयं गृह्य	६	३१	८
शिलाः शैलस्य शोभन्ते	२	६४	२०
शिलागुहैरवततम्	५	१४	२८
शिलातलं प्राप्य यथा मृगेन्द्रः	५	५	७
शिलानां क्षिप्यमाणानाम्	६	२२	६३
शिलापादपवर्षाणि	६	७६	४६
शिलापिधाना काकुत्स्थ	३	७३	४०
शिलाप्रहाराभिहतः	६	४३	४१
शिलावर्षं महत्तस्या	१	२६	१७

	का०	स०	श्लो०
शिलाश्च शकलीकुर्वन्	४	३१	१५
शिवमित्थब्रवीद्धृष्टः	६	४६	१६
शिवः सर्वेषु कालेषु	२	४४	६
शिवोदकं च पम्पायाम्	३	७३	२१
शिशिरे सलिलेशायो	१	६३	२४
शिशुरेष त्वदोषज्ञ	७	३५	३०
शिष्टमत्रापविद्धन्ति	५	६३	८
शिष्टैराचरिते सम्यक्	२	४४	४
शिष्यस्तु तस्य ब्रुवते	१	२	१६
शिशुमारैश्च नक्रैश्च	२	५०	२५
शीघ्रं खल्वभ्युपेतं त्वाम्	६	६३	३
शीघ्रं तं रूपसंपन्नौ	३	८	२०
शीघ्रं निर्यान्तु दुर्धर्षः	६	५५	२
शीघ्रं प्रवेगा विपुलाः प्रपाताः	४	२८	५०
शीघ्रं प्रेषय सर्वांस्तान्	५	६४	१२
शीघ्रं भेरीनिनादेन	६	३२	४३
शीघ्रं यास्यामि देवेन्द्र	६	१०२	६
शीघ्रं वरय धर्मज्ञ	७	१०	१४
शीघ्रं व्यादिश नो राजन्	६	१७	६
शीघ्रगस्त्वग्निवर्णस्य	१	७०	४१
शीघ्रगस्य मरुः पुत्रः	२	११०	३२
शीघ्रमाख्यात मां प्राप्तम्	१	१८	४०
शीघ्रमागच्छ सौमित्रे	७	४५	१६
शीघ्रमानय सौमित्रिम्	७	४४	२
शीघ्रमेव हि राक्षस्यो	३	५६	२७
शीघ्रस्रोतसमासाद्य	२	१०३	२५
शीतमङ्गलतोयाभिः	३	३५	१२
शीतीकृत्वा तु गात्राणि	२	७१	७
शीर्येत पुष्पितो भूत्वा	६	१२८	७
शीलवृद्धैर्ज्ञानवृद्धैः	२	१	१२
शीलेन साम्ना विनयेन सी०	३	६५	१६
शुकनाभस्य चक्रस्य	५	६	२४
शुकस्तु वानरैश्चण्डैः	६	२०	३२
शुकस्य वचनं रामः	६	२०	१६
शुकस्य वचनं श्रुत्वा	६	२४	३५
शुकेन तु समादिष्टान्	६	२६	१
शुक्रः सोमश्च सूर्यश्च	२	२५	२३

	का०	स०	श्लो०
शुक्लमाल्यानि लाजांश्च	२	३	६
शुक्लमाल्याम्बरधरः	५	२७	१७
शुक्लमाल्याम्बरधरौ	५	२७	१४
शुक्लानंशुमतश्चापि	२	६१	७५
शुक्ले च वालव्यजने	४	२६	२४
शुक्लैः प्रासादतिखरैः	५	३३	१५
शुक्लैः सुविमलैर्दन्तैः	३	५२	२०
शुक्लैश्च वालव्यजनैः	४	३८	१३
शुचीनामेकबुद्धीनाम्	१	७	१४
शुचीन्यभ्यवहाराणि	४	५१	५
शुद्धा आपो नभश्चैव	६	६०	८७
शुद्धात्मन्प्रेमभावाद्धि	२	२६	१६
शुद्धात्मानौ यदि त्वेतौ	४	२	२७
शुद्धायां जगतो मध्ये	७	६७	१०
शुनःशेपं नरश्रेष्ठ	१	६२	१
शुनः शेपो गृहीत्वा ते	१	६२	२१
शुभं तु तस्य तद्वाक्यम्	७	८८	१८
शुभं पुनर्हेमसमानवर्णम्	५	२६	५
शुभं वा यदि वा पापम्	४	३०	७२
शुभक्षेत्रगतश्चाहम्	१	१८	५६
शुभलक्षणसंपन्नम्	१	१६	१३
शुभानि तव पश्यामि	६	४	४६
शुभान्येतानि चिह्नानि	६	१०३	२६
शुभाशुभानि वाक्यानि	७	४३	१०
शुभे वर्त्मनि तिष्ठन्तम्	६	८३	१४
शुभैर्ऋषभशृङ्गैश्च	४	२६	३४
शुशुभे पुष्पिताग्रैश्च	६	३६	५
शुशुभे राक्षसेन्द्रस्य	५	१०	१४
शुशुभे स महातेजा	५	१	७६
शुश्राव च वचस्तेषाम्	२	५७	१२
शुश्राव जपतां तत्र	५	४	१३
शुश्राव तत्तालयोपपन्नम्	७	६४	३१
शुश्राव रामचरितम्	७	७१	१६
शुश्राव सुमहान्कोपात्	६	५५	१८
शुश्रुवे चाग्रतः स्त्रीणाम्	२	४०	२६
शुश्रुवे शङ्खशब्दश्च	६	५७	२६
शुश्रूषमाणाः पितरम्	१	७७	१५

	का०	स०	श्लो०
शुश्रूषमाणा ते नित्यम्	२	२७	१३
शुश्रूषां गौरवं चैव	२	१२	२६
शुश्रूषुर्जननीं पुत्र	२	२१	२४
शुष्ककाष्ठैर्भवेत्कार्यम्	३	३३	१८
शुष्काः समग्रपत्रास्ते	६	१२४	२२
शुष्यन्तीं रुदतीमेकाम्	६	१६	८
शूद्रयोन्यां प्रजातोऽस्मि	७	७६	२
शूद्रायामस्मि वैश्येन	२	६३	५१
शून्यचत्वरवेश्मान्ताम्	२	४२	२३
शून्यसंवरणारक्षाम्	२	८८	२४
शून्यामेव च पश्यामि	७	४६	१६
शून्या रक्षोगणैः सर्वैः	७	३	२६
शून्या सा नगरी लङ्का	७	११	४६
शून्ये येनापनीताऽसि	५	३४	३२
शून्योऽयं शयनीयस्ते	२	७२	११
शूरभार्या हतां पश्य	४	२३	६
शूरश्च कृतविद्यश्च	१	४१	२
शूरश्च कृतविद्यश्च	२	१३	६
शूरश्च शूरमानी च	४	११	७४
शूरः शूरेण संगस्य	६	६२	३
शूराणां युध्यमानानाम्	६	५४	७
शूराश्च बलवन्तश्च	६	७	१२
शूराश्च बलवन्तश्च	६	१०	२४
शूराश्च बलवन्तश्च	३	६६	५०
शूरेण धनदभ्रात्रा	५	२२	२२
शूरेण धनदभ्रात्रा	६	१०३	१५
शूरो धीमान्रथी खड्गी	६	६२	६३
शूरोऽस्मिति चात्मानम्	६	१०३	१७
शूर्पणख्याश्च भर्तारम्	७	२३	१८
शूलपाणिं बिरूपाक्षम्	६	६१	११
शूलं भग्नं हनुमता	६	६७	०४
शूलं शूलाद्विनिष्कृष्य	७	६१	०
शूलमुद्गरखड्गैश्च	६	६६	५३
शूलमुद्गरहस्ताश्च	३	२५	३३
शूलमुद्गरहस्ताश्च	५	६	३०
शूलस्य च बलं घोरम्	७	६७	२५
शूलस्य च बलं ब्रह्मन्	७	६७	२

	का०	स०	श्लो०
शूलानि च भुशुण्डयश्च	६	६०	५६
शूलैः प्रमथिताः केचित्	६	५८	१२
शूलैरशनिकल्पैश्च	१	३६	१६
शूलैस्त्रिशूलैः कुलिशैः	७	२३	८
शूलोऽयं वज्रभारस्ते	६	१०२	५६
शृङ्गवेरपुरं चैतत्	६	१२३	५२
शृङ्गवेरपुरं प्राप्य	६	१२५	४
शृङ्गवेरपुरं प्राप्य	६	१२५	२२
शृङ्गवेरपुराद्भूयः	२	११३	२३
शृङ्गवेरपुरे सूतम्	१	१	२६
शृङ्गे तस्य महद्दिव्यम्	४	४२	४४
शृङ्गैरिव वृषायुध्यन्	७	३२	५६
शृणु चापि वरो भूयः	७	१०	२३
शृणु चापि समादेशम्	५	५८	१३६
शृणु चाप्यपरं भूयः	४	१८	३६
शृणु तत्कर्म साहाय्ये	३	४०	१७
शृणु तस्मात्सुतान्भद्रे	७	६	२३
शृणु ब्रह्मन्पुरा वृत्तम्	७	७८	२
शृणुमः किमिदं स्वप्ने	७	७१	२१
शृणु राजन्नवहितः	६	६३	३०
शृणु राजन्पुरावृत्तम्	६	५१	११
शृणु राजन्महासत्त्व	७	१०४	१
शृणु राजन्यथा पौराः	७	४३	१३
शृणु राम तथा वृत्तम्	७	२	२
शृणोति य इदं काव्यम्	६	१२८	११०
शृणोति स्वगतानां च	५	५८	४५
शेषुः परमसंक्रुद्धाः	६	५८	६
शेषुरेनं रघुश्रेष्ठ	७	३६	३३
शेषं च हविषस्तस्य	२	६	३
शेषाः सर्वे महाभागाः	७	२५	३६
शेषा हता महावीर्याः	३	२६	३७
शेषे स्वं विषमे दुःखम्	४	२३	२
शैलपुत्र्या यदुक्तं तद्	१	३७	६
शैलप्रस्थेषु रम्येषु	२	६४	११
शैलराजो महारण्ये	४	११	१२
शैलशृङ्ग महद्गुह्य	६	६७	४३
शैलशृङ्गाणि शतशः	६	४१	२६

	का०	स०	श्लो०
शैलसंघातसंकाशः	६	६९	८४
शैलस्य तस्य पृष्टेषु	४	४०	६२
शैलांश्च तरुसंछन्नान्	५	२	७
शैलाः सर्वे समुद्रस्य	२	२५	१३
शैलाग्रचयसंकाशम्	६	१०	२
शैलाग्रे रचिता दुर्गाः	६	३	२२
शैलानि प्रवरांश्चैव	३	३५	२४
शैलाभं मेघनिर्घोषम्	४	४०	१७
शैलाम्बुदनिकाशानाम्	५	३९	५०
शैलाम्बुदनिकाशानाम्	५	६८	२७
शैलूषस्य सुतावीर	७	१००	१२
शैलूषो ग्रामणीः शिक्षः	४	४१	४३
शैलेन्द्रमिव गन्धाढ्यम्	५	१५	१५
शैलेन्द्रमिव वाराभिः	३	२५	११
शैलेन्द्रो हिमवान्राम	१	३५	१३
शैलेषु तेषु सर्वेषु	५	४०	६७
शैलैः शूलैश्च खड्गैश्च	६	२३	१२
शैलैः शैलैश्च खड्गैश्च	६	४१	२१
शैलैर्वृक्षैस्तले पादैः	६	६७	२५
शैलोपलप्रस्खलमानवेगाः	४	२८	४९
शैव्यः श्येनकपीतीये	२	१२	४३
शोकं विसृज्याद्य धृतिं भजस्व	३	६३	१९
शोकं संधार्यतां मातः	२	२१	४८
शोकजालेन महता	५	१५	३२
शोकजाश्रुपरिप्लुना	२	४७	२
शोकदुःखभयत्रस्ता	७	२४	९
शोकपर्यायसंतप्तः	३	४१	१५
शोकरक्तेक्षणः श्रीमान्	२	१४	५७
शोकश्च किल कालेन	६	५	४
शोकश्च मम विस्तीर्णः	४	२८	५९
शोकसंजननीं चिन्ताम्	६	१०१	२४
शोकसंतापदीनाङ्गीम्	५	५८	८
शोकसंतापनित्येन	६	१२	१८
शोकसंविग्नहृदयः	४	१०	५
शोकस्ते विगतः सर्वं	६	३३	१४
शोकस्यास्य कथं पारम्	५	३७	५
शोकाद्भ्रष्टस्वरमपि	४	५७	१

	का०	स०	श्लो०
शोकाभितप्ता बहुधा विचिन्त्य	५	२८	१७
शोकाभिभूते रामे तु	४	४	२४
शोकार्तश्चोदकं कृत्वा	४	९	२०
शोकार्तं तु वरारोहे	३	५५	३२
शोकार्तस्यापि मे पम्पा	४	१	६
शोकेन महता त्रस्ता	३	५६	३५
शोकेन महताविष्टः	१	१९	२१
शोकेनाभिप्रपन्नस्य	४	७	१३
शोको नाशयते धैर्यम्	२	९२	१५
शोकोपहतचित्तश्च	२	६४	६
शोकपहतचेताश्च	२	५२	२३
शोचता च मया दृष्टम्	५	५८	५४
शोचन्त्याश्चाल्पभाग्यायाः	२	५३	२३
शोचामि दुर्मतिस् वं ते	२	८	४
शोच्यस्त्वमसि दुर्बुद्धे	६	८७	१३
शोच्या शोचसि कं शोच्यम्	४	२१	३
शोणिताक्षस्ततः क्षिप्रम्	६	७६	८
शोणितार्द्रमिमं वीरम्	६	१०१	४
शोणितार्द्रो महाकाय	६	६७	९०
शोणितोदकनिष्पन्दा	७	२८	४२
शोधयित्वा जनस्थानम्	६	४८	१५
शोभन्ते सर्वतस्तत्र	३	७३	९
शोभमानमसंबाधम्	२	१७	५
शोभयन्तु च वेश्मानि	६	१२७	९
शोभयन्दण्डकारण्यम्	३	३८	१५
शोभयिष्यन्ति काकुत्स्थम्	२	४८	१०
शोभितं तरुभिश्चित्रैः	४	४२	४५
शोभिते शोभनीयैश्च	७	१०१	१५
शोषणं दारणं चैव	१	५६	८
शौर्यं दाक्ष्यं बलं धैर्यम्	७	३५	३
श्यामं रुधिरपर्यन्तम्	३	२३	३
श्यामः पृथुयशाः श्रीमान्	३	३१	११
श्यामां कमलपत्राक्षीम्	५	५८	५७
श्यामानि चिरयुक्तत्वात्	५	१५	४३
श्यामा पद्मपलाशाक्षी	४	१	५०
श्यामा पद्मपलाशाक्षी	४	१	१०५
श्यामावदातस्तैविष्णुः	७	७	२

	का०	स०	श्लो०
श्येनाश्चतुर्थं गच्छन्ति	४	५८	२६
श्येनी श्येनांश्च गृध्रांश्च	३	१४	१६
श्रद्धेयं हनुमन्वाक्यम्	५	४०	१६
श्रमं तवावगच्छामि	६	१०४	१५
श्रमं नावाप्नुयात्किंचित्	२	२४	२४
श्रमं मोक्षाय पूजां च	५	१	१२२
श्रमणां धर्मनिपुणाम्	१	१	५७
श्राद्धं कृत्वा विधानतः	१	७२	२१
श्रान्ताश्चान्योन्यमालिङ्ग्य	७	१४	१८
श्रान्तो दूरादनुप्राप्तः	५	६४	७
श्रान्तोऽहं सततं कामात्	६	१२	२०
श्रावयिष्यामि सर्वाणि	५	३०	४३
श्रावस्तीति पुरी रम्या	६	१०८	५
श्रीमतां गच्छतां तेषाम्	१	१८	४
श्रीमता राजराजेन	६	२८	२७
श्रीमन्तश्च महात्मानः	१	७	७
श्रीमन्तौ रूपसंपन्नौ	४	३	१०
श्रीमान्पद्मविशालाक्षः	५	४८	१७
श्रीमान्समुदितस्तत्र	४	४२	२६
श्रीवत्सवक्षा नित्यश्रीः	६	१११	१३
श्रुतं ते पूर्वमेतद्धि	७	६८	१६
श्रुतं प्रत्यक्षमिच्छामि	३	७४	२०
श्रुतं मया महातेजः	२	६५	३४
श्रुतकीर्तेर्महाबाहो	१	७३	३३
श्रुतश्च मन्ये वैदेह्या	३	५८	१४
श्रुताश्च दृष्टा हिंसया प०	५	३७	६५
श्रुतिमान्समदर्शी च	७	२	३३
श्रुतिस्तु खलियं सत्या	२	१०४	१५
श्रुतेन बाल स्थानेन	२	१०६	२३
श्रुत्वा कर्तव्यतां राजन्	७	७४	६
श्रुत्वा किंपुरुषोत्पत्तिम्	७	८६	१
श्रुत्वागस्त्यस्य कथितम्	७	३६	५०
श्रुत्वागस्त्येरितं वाक्यम्	७	४	१
श्रुत्वाऽप्रदस्यापि वचोऽनुकू०	४	५३	२७
श्रुत्वा च विस्मयं जग्मुः	६	१२८	४०
श्रुत्वा च स पितुर्वृत्तम्	२	७३	१
श्रुत्वा चैतत्त्रिलोकज्ञः	१	१	६
श्रुत्वा जनकराजस्य	७	३८	२५
श्रुत्वा जाम्बवतो वाक्यम्	६	७४	१६
श्रुत्वा जाम्बवतो वाक्यम्	६	७४	३५
श्रुत्वा तं भीमनिर्ह्रादम्	६	८२	१
श्रुत्वा तथेति राजा च	१	१०	६
श्रुत्वा तस्यागुणान्सर्वे	६	१११	६६
श्रुत्वा तां मैथिलीं रामः	६	१२६	४७
श्रुत्वातिकायस्य वचः स०	६	७१	५७
श्रुत्वा तु जामदग्न्यस्य	१	७६	१
श्रुत्वा तु तस्य निनदम्	४	१५	२
श्रुत्वा तु परमानन्दम्	६	१२७	१
श्रुत्वा तु पापसंयुक्तम्	७	५४	३
श्रुत्वा तु भरतं प्राप्तम्	७	१०१	४
श्रुत्वा तु भाषितं वाक्यम्	७	७८	१
श्रुत्वा तु भाषितं सीता	७	४६	१३
श्रुत्वा तु मां कुशलिनम्	६	१२५	५
श्रुत्वा तु राघवस्यैतत्	७	४०	२७
श्रुत्वा तु राघवस्यैतत्	७	८३	६
श्रुत्वा तु राघवस्यै ात्	७	६५	७
श्रुत्वा तु राघवो धीमान्	७	१००	४
श्रुत्वा तु राजा कैकेय्या	२	१२	५१
श्रुत्वा तु रावणं प्राप्तम्	७	२७	३
श्रुत्वा तु वचनं तस्य	४	४०	१
श्रुत्वा तु वचनं तस्य	६	१६	२२
श्रुत्वा तु वचनं तस्य	६	१२०	११
श्रुत्वा तु वचनं तस्याः	६	४८	३४
श्रुत्वा तु वचनं तासाम्	१	१०	२८
श्रुत्वा तु वचनं तेषाम्	५	६५	७
श्रुत्वा तु वचनं तेषाम्	७	१	२६
श्रुत्वा तु वाक्यं काकुत्स्थः	७	४३	२३
श्रुत्वा तु व्याहृतं वाक्यम्	७	५१	२८
श्रुत्वा तु सिद्धार्थवचः	२	३६	३१
श्रुत्वा तूष्णीमवं कुम्भम्	७	५६	१
श्रुत्वा तूष्णीमसौ वाक्यम्	७	८१	१२
श्रुत्वा त्रिशिरसो वाक्यम्	६	६६	८
श्रुत्वा त्रिशिरसो वाक्यम्	६	६६	६
श्रुत्वा त्वयोध्यायाम्	१	७३	५

	का०	स०	श्लो०
श्रुत्वा दधिमुखस्येदम्	५	८	४३
श्रुत्वा न भेतव्यमिति	७	३२	३८
श्रुत्वा नियोगं ब्रह्मर्षेः	७	८१	१६
श्रुत्वा परमविस्मितौ	७	६८	२६
श्रुत्वा परिषदो मध्ये	७	४७	११
श्रुत्वा पितामहेनोक्तम्	७	१०४	१६
श्रुत्वा पुरुषशार्दूलः	७	७१	१७
श्रुत्वा पुष्पे च पुत्र य	२	४	३३
श्रुत्वा प्रव्राजितं मां हि	२	६७	१०
श्रुत्वा प्राप्तान्मुनीं स्तांस्तु	७	१	१२
श्रुत्वा मातृवधं कोपात्	५	३५	६३
श्रुत्वा मे देवदेवस्य	७	१०४	१७
श्रुत्वा राज्ञोऽथ तद्वाक्यम्	१	११	६
श्रुत्वा रामस्य वचनम्	२	५२	६६
श्रुत्वा रामस्य वचनम्	६	३	६
श्रुत्वा रामायणमिदम्	६	१०८	१०६
श्रुत्वा वस्तु समग्रं तद्	१	३	१
श्रुत्वा विंशतिसर्गांस्तान्	७	६४	१७
श्रुत्वा विदेहाधिपतिः	१	६६	१६
श्रुत्वा विनिहतं संख्ये	४	६८	६
श्रुत्वा सर्गगितं वाक्यम्	३	१	१५
श्रुत्वा सेनापतिं प्राप्तम्	७	१०१	१
श्रुत्वा हनुमतो वाक्यम्	४	५	८
श्रुत्वा हनुमतो वाक्यम्	४	५५	१
श्रुत्वा हनुमतो वाक्यम्	६	४	१
श्रुत्वा हनुमतो वाक्यम्	६	७४	२५
श्रुत्वा हिमवतो वाक्यम्	४	११	२४
श्रुत्वैतच्च वचो रामः	४	८	४१
श्रुत्वैतद्राघवो वाक्यम्	७	३६	५२
श्रुत्वैतद्वचनं यत्ते	२	२	२४
श्रुत्वैतद्वानरेन्द्रस्य	६	५०	२६
श्रुत्वैतस्य पुरा शब्दम्	४	१	२५
श्रुत्वैव च वचो मह्यम्	५	३६	३४
श्रुत्वैव च वचो मह्यम्	५	३६	२०
श्रुत्वैव तु महावीर्य	६	६१	७
श्रुत्वैव गचनं तस्याः	२	६	८

	का०	स०	श्लो०
श्रुत्वैवोपस्थितौ वीरौ	२	४३	१०
श्रूयतां क्रियतां चैव	४	१५	२३
श्रूयतां चाभिधास्यामि	१	५१	१६
श्रूयतां तत्र वक्ष्यामि	४	५६	२४
श्रूयतां त्वभिधास्यामि	६	१०४	१४
श्रूयतां प्रतिदास्यामि	६	१०४	१४
श्रूयतां राम तत्त्वार्थम्	३	१७	२०
श्रूयतां राम वक्ष्यामि	२	७२	११
श्रूयतां राम शङ्कस्य	१	५४	१४
श्रूयतां वत्स काकुत्स्थ	१	२४	१७
श्रूयतां विस्तरो राम	१	३६	४
श्रूयतां सर्वमाख्यास्ये	६	३	७
श्रूयतां सर्वमाख्यास्ये	७	१२	६
श्रूयतामिह वैदेह्या	४	५६	६
श्रूयते तुमुलो युद्धे	६	५५	२२
श्रूयते धीमता तात	२	१०७	११
श्रूयते हि कपोतेन	६	१८	२४
श्रूयते हि द्रुमः कश्चित्	२	८	३०
श्रूयते हि पुरा राजा	७	५३	७
श्रूयते हि पुरावृत्तम्	७	८४	३
श्रूयते हि पुरा शत्रः	१	२५	२०
श्रूयते हि पुरा सौम्य	७	८७	३
श्रूयते हस्तिभिर्गीताः	६	१६	६
श्रेणयस्त्वां महाराज	२	१०५	११
श्रेयसे वृद्धये तात	२	३४	२१
श्रेयोऽद्य मन्ये मम शैलमुख्ये	४	२४	७
श्रेयो मे जीवितान्मर्तुम्	५	२६	४१
श्रेयो हि मरणं मेऽद्य	७	४१	५
श्रेष्ठं ह्यनार्यमेव स्यात्	२	१०६	२३
श्रेष्ठं चात्रसमूहेषु	२	१	२७
श्रोणिसूत्रं च खड्गं च	७	६	६५
श्रोणिसूत्रेण महता	५	२२	२६
श्रोणिसूत्रेण महता	६	६५	२६
श्रोतव्य सर्वमेतस्य	४	४२	५४
श्रोतुमिच्छामि भद्रं ते	१	३१	२४
श्रोतुमिच्छामि भद्रं ते	१	३६	२
श्रोत्रयोरुभयोर्मध्ये	३	४५	३१

	का०	स०	श्लो०
श्रोष्यते चैव काकुत्स्थः	५	३८	६
श्लक्ष्णकाषायसंवीतः	३	४६	३
श्लाघनीयोऽनिलस्य त्वम्	६	११३	२५
श्लिष्टं मुष्टि समुद्यम्य	४	१६	१८
श्लेष्मातकमयो दिष्टः	१	१४	२३
श्लोक एवास्त्वयं बद्धः	१	२	३१
श्वः काल्ये नगरीं लङ्काम्	६	२५	२४
श्वः प्रभाते गमिष्यामः	१	२६	३५
श्वः प्रभाते तु लवणम्	७	६७	२३
श्वः प्रभाते तु शपथम्	७	६५	६
श्वः प्रभाते महातेजः	१	६५	३७
श्व एव पुण्यो भविता	२	४	२
श्वमांसभोजिनः सर्वे	१	६२	१७
श्वश्रूणामविशेषेण	७	४८	१०
श्वश्रूणां चैव मे वीर	७	४६	१७
श्वसनेन च संयोगात्	५	४५	२१
श्वसनेन समो बली	५	५४	२१
श्वस्तु गंतासि तं देशम्	२	६०	२३
श्वापदाः परिकर्षन्तु	२	६६	३०
श्वेतं च व्यालव्यजनम्	६	१२८	२६
श्वेतच्छत्रपर्यन्तम्	६	४०	४
श्वेताभिः कृष्णताम्राभिः	४	२७	८
श्वेताभ्रघनराजीव	५	१	७५
श्वेतो ज्योतिर्मुखश्चाग्र	६	३०	३२
षट्पादतन्त्रीमधुराभिधानम्	४	२८	३६
षडङ्गवेदविदुषाम्	५	१८	२
षडर्धनयनः श्रीमान्	६	११७	३
षड्भागस्य च भोक्तारौ	७	७४	३१
षष्टिं पुत्रसहस्राणि	१	३८	१४
षष्टिं पुत्रसहस्राणि	१	३६	१२
षष्टिः कोट्योऽभवंस्तासाम्	१	४५	३४
षष्टिः शतसहस्राणि	६	२६	४२
षष्टिः शतसहस्राणि	६	३७	२२
षष्टिवर्षसहस्राणि	३	५०	२०
षष्टिं रथसहस्राणि	२	८३	४
षष्ठस्तु पन्था हंसानाम्	४	५८	२७
षोडशाष्टौ च दश च	६	६७	७

(स)	का०	स०	श्लो०
स इति सवितुसूनुस्तत्र०	६	४०	३०
स इदानीमहं वृद्धः	४	६५	१६
स इदानीमहं वृद्धः	४	६६	३४
स उवाच महाप्राज्ञः	६	१७	११
स एवं ब्रुवती सीताम्	२	२८	१
स एवमुक्तः कुपितः ससर्ज	६	५६	६७
स एवमुक्तः प्लवगाधिपस्तदा	६	२०	२२
स एवमुक्तो हतदर्पहर्षः	६	५६	१४२
स एवमुक्त्वा ज्वलनप्रकाशम्	६	५६	७
स एवमुक्त्वा त्रिदशेन्द्रशत्रुः	६	७३	८
स एवमुक्त्वा द्विजपुंगवाग्र्य	७	५८	२५
स एव संशयस्तात	४	११	६०
स एव सुखसंस्पर्शः	४	१	७
स एष इन्द्रजिन्नाम	७	१२	२६
स एष कपिशार्दूल	५	१	६३
स एष किल सैन्येन	६	८५	१३
स एष जाम्बवान्नाम	६	२७	११
स एष दुर्धरो राजन्	६	२७	३०
स एष निर्गतो वीर	६	६१	३०
स एष राघव भ्राता	४	३१	४७
स एष सुमहाकायः	२	६७	२५
स कक्षमिव विस्तीर्णम्	७	१४	१५
स कक्षा धन्विभिर्गुप्ताः	२	१७	२०
स कच्चिद्ब्राह्मणो विद्वान्	२	१००	६
स कथंचिद्विमुक्तैर्वा	५	६२	२८
स कथं नु कथयाणि	२	१२	६७
स कदाचिच्चिरालोके	३	४३	४२
स कदाचित्क्षुधार्तस्य	४	५६	१०
स कदाचित्प्रभातायाम्	३	१६	२
स कदाचिद्वनं कोटीः	७	५३	८
स कपिर्व्यरयामास	५	४६	२५
सकलत्रस्य संदेहः	२	११६	२२
स कल्पवृक्षप्रतिमः	५	२२	२६
स काञ्चनमयं दिव्यम्	६	६०	४
स काञ्चनमयं पीठम्	२	८१	११
स काञ्चनं भारसहं निवातम्	६	६५	३०
स काञ्चनाद्यैर्मुनिभिः समेतैः	७	६६	१७

	का०	स०	श्लो०
सकामा भगिनी मेऽस्तु	३	२३	२३
सकामा भव कैकेयि	२	४२	२१
सकामा भव कैकेयि	२	६६	३
सकामा भव कैकेयि	६	३२	४
स कामिनं दीनमदीनसत्त्वम्	४	३१	१
सकामो भव सुग्रीव	४	२०	२१
स कालं परिसंख्याय	७	४	१६
स कालभगिनीं कन्याम्	४	३०	६६
सकाशमागतो राज्ञः	७	५५	१४
स किमर्थं नरवरः	५	६७	२२
स किष्किन्धां प्रविश्य त्वम्	४	३०	७०
स कीर्यमाणः कुसुमाक्षतोत्करैः	७	३२	७३
स कुम्भं च निकुम्भं च	६	७५	४६
स कुम्भकर्णस्य भुजो निकृतः	६	७१	१५६
स कुम्भकर्णस्य वचो निशम्य	६	६७	५६
स कुम्भकर्णस्य वचो निशम्य	६	६७	१५०
स कुम्भकर्णस्य शरान्	६	६७	१०१
स कुम्भकर्णं कुपितो जघान	६	६७	१८
स कुम्भकर्णं कुपितो महेन्द्रः	६	६१	१५
स कुम्भकर्णं सुरसैन्यमर्दनम्	६	६७	१७६
स कुम्भकर्णोऽथ विवेश लङ्काम्	६	६७	८२
स कुम्भकर्णोऽस्रनिकृत्तबाहुः	६	६७	१५७
स कुम्भकर्णो हृतकर्णनासः	६	६७	८७
स कुरुष्व महोत्साहाम्	५	३८	३८
स कृत्तचापः शरताडितश्च	६	५६	१०५
स कृत्तमूलः सहसैव वृक्षः	६	७०	५६
सकृत्तु प्रहरेदानीम्	६	५६	६५
स कृत्वाथोदकं तूर्णम्	२	६४	५१
स कृत्वा निनदं घोरम्	५	४५	११
स कृत्वा निश्चयं राम	१	६५	४
स कृत्वा निश्चयं विष्णुः	१	१६	१०
स कृत्वा पृथिवीं कृत्स्नाम्	७	६७	६
स कृत्वा भैरवं नादम्	३	२५	३७
स कृत्वा सागरे सेतुम्	६	२४	३१
स कृत्वा हृदयेऽमर्षम्	७	६७	१६
सकृदेव कृतो रावः	७	३२	२२
सकृदेव प्रपन्नाय	६	१८	३३
सकृदेव समिद्धस्य	६	७३	२२
सकृद्दृष्टास्वपि स्त्रीषु	२	११८	६
सक्तं ग्राम्येषु भोगेषु	३	३३	३
सक्ता रुधिरधाराभिः	३	७३	३६
सक्थिनी च शिरश्चैव	३	७१	११
स क्रोधात्प्राहिणोत्तस्मै	४	७६	३४
स क्रोधेन मया चोक्तः	७	२	३८
स क्षिप्रं समतीयाय	३	५४	८
स खरस्याज्ञया सूतः	३	२५	३
स खातं पितृभिर्मार्गम्	१	४१	६
स सखा तु तव काकुत्स्थ	६	१२५	२३
सखा परमको विप्रः	७	४७	१७
सखित्वात्तस्य वै राज्ञः	१	११	१७
सखिवच्च विगाहस्व	२	६५	१४
सखे राघव धर्मज्ञ	६	५०	५६
सख्यं च रामः सुग्रीवे	६	१२८	३६
सख्यं संबन्धकं चैव	१	११	१८
स गङ्गां प्राप्यटे तीर्त्वा	२	७१	१०
सगणं राक्षसं हत्वा	५	५६	१८
सगणं रावणं हत्वा	५	३६	४३
स गतासुर्गतश्रीकः	६	५८	५४
स गत्वा गणितान्वासान्	७	७१	३
स गत्वा तप आतिष्ठत्	१	३६	२६
स गत्वा दूरमध्वानम्	२	६३	६
स गत्वा दूरमध्वानम्	३	७	२
स गत्वा दूरमध्वानम्	६	२०	१४
स गत्वा दूरमध्वानम्	६	८५	३३
स गत्वा नगरीं लङ्काम्	७	१३	१३
स गत्वा निलयं राजा	१	७२	२१
स गत्वा मनसा पूर्वम्	५	१३	५६
स गत्वा यमुनातीरम्	७	६६	१५
स गत्वा लक्ष्मणः श्रीमान्	३	१५	२४
स गत्वा विप्रियाण्याह	७	६७	१८
स गत्वा सरयूतीरम्	७	१०६	१५
स गत्वा सागरं राजा	१	४४	१
स गत्वा हिमवत्पार्श्वे	१	५५	१२
सगरस्य च पुत्राणाम्	१	४०	१

	का०	स०	श्लो०
सगरस्य नरश्रेष्ठ	१	३८	२३
सगरस्यासमञ्जस्तु	१	७०	३८
स गान्धर्वेण गान्धर्वम्	६	१०२	१९
स गिरेश्चित्रकूटस्य	२	९८	१६
स गृध्रराजः कृतवान्यशस्क०	३	६८	३७
स गृहीत्वा धनुर्घोरम्	४	१२	२
स गृहीत्वा महावीर्यः	६	१०२	५५
सग्राहाः सरितश्चैव	२	२८	९
स ग्रीष्म अपयाते तु	७	६४	१०
सघोषवद्भिश्च हयैः सनागैः	२	१६	४६
सघोषाः समशीर्यन्त	५	५६	३९
सङ्ग्रामसञ्जाः संहृष्टाः	६	५७	२३
सङ्ग्रामे तं तया दृष्ट्वा	६	५९	६२
सङ्ग्रामे सुमहद्व्यूहे	६	१९	१३
स च कामपराधीनः	५	१८	१९
स चकार तदात्मानम्	६	७१	८२
सचक्रवाकानि सशैवलानि	४	३०	५५
स चचालाचलश्चापि	५	१	१२
स च ज्येष्ठो नरश्रेष्ठः	१	३८	२०
स च तां कालयोगेन	१	३३	१४
स च ता दयिता-भग्ना	१	३२	२५
स च तानब्रवीद्वाक्यम्	४	३२	२
स च तान्राघवो ज्ञात्वा	१	२८	१६
स च ताभिः परिवृतः	५	९	४१
स चतुर्णामुपायानाम्	४	५४	६
स चतुर्दशभिर्बाणैः	६	५६	२६
स च न प्रतिजग्राह	६	१७	१५
स चनित्यं प्रशान्तात्मा	२	१	१०
सचन्द्रकुमुदं रम्यम्	५	५७	२
सचन्द्रतारागणमण्डितं यथा	५	८०	२२
स च पत्रलघुर्भूत्वा	६	२०	२०
स च प्रमाण धर्मात्मा	२	१०१	२५
स च भूमिधरः श्रीमान्	५	५६	४८
स च मायामयो दिव्यः	३	४९	१९
स च मेघाचलप्रख्यः	६	१७	४
स च मे प्रेषयामास	१	७१	१७
स च मे विहितो मृत्युः	५	२६	३१

	का०	स०	श्लो०
स च राजा नरश्रेष्ठ	१	६२	२७
स च रोषेण संवीतः	२	७८	१६
स च वाग्भि प्रशस्ताभिः	५	४१	१
स च श्रीमानचिन्त्यात्मा	२	४०	३१
स च सर्वगुणोपेतः	१	१	१७
स च सर्वस्मिमानीय	१	१	७१
स च सर्वैर्विचेतव्यः	४	४३	२९
स च सेतुर्यथा बद्धः	६	२५	६
स च हत्वा विराधस्य	६	२४	३०
स चाप ताप आतिष्ठत्	१	४८	१६
स चापमादाय भुजगकल्पम्	६	६७	१३४
स चापमुद्यम्य महत्	३	२४	१८
स चापि कालोऽयमुपागतः	२	१०९	३९
स चापि रामः प्रतिपूर्ण०	२	३२	४४
स चाप्यन्तर्हितः शैलः	५	५८	२०
स चाप्तपुत्रो नृपति	१	१६	९
स चाभिषिक्तः क्षणदाच०	७	११	४०
स चारुनानाविधरूपधारो	५	१	१९९
स चिच्छेद शितैर्बाणैः	६	७६	५५
स चित्रकूटे तु गिरौ निशम्य	२	९८	१८
स चित्यो राजसिंहस्य	१	१४	२९
स चिन्तया दुःसहया परीतम्	४	३०	१५
स चिन्तयानो वैदेहीम्	३	५५	२
स चिन्तयामास ततो महा०	५	१२	२
स चिन्तयित्वा सुचिरम्	६	४२	५
स चित्रविविधं वन्यम्	३	७१	४
सचिवोऽय कपीन्द्रस्य	४	३	२६
स चीरं पुरुषव्याघ्रः	२	३७	७
स चेद्राजन्यनेकाग्रे	२	२३	२७
स चेद्भूयाद्वा मोहाद्वा	६	१८	२९
स चैनं प्रश्रितं दृष्ट्वा	२	५	८
स चैनमब्रवीद्वाक्यम्	१	४१	१७
स चोद्धूतेन बाणेन	२	६४	१८
सच्छत्राः सवितर्दीकाः	५	१४	३६
स च्छिन्नधन्वा रुधिरम्	६	९०	२१
स च्छिन्नपक्षः सहसा	३	५१	४३
स जगाम वनं वीरः	१	१	२४

	का०	स०	श्लो०
स जातमन्यु प्रसमीक्ष्य: वि०	५	४७	१०
स जित्वा धनदं राम	७	१६	१
स जीर्णमानुषं देहम्	२	१०५	३३
स जृम्भमाणोऽतिबल:	६	६०	५६
सज्जं तिष्ठति रामस्य	२	१५	१०
सज्जं तु तद्बलं दृष्ट्वा	२	८२	२७
सज्जं द्युतिकरं श्रीमत्	२	१५	११
सज्जीभवन्तु प्लवगा:	४	२५	१८
स ज्वालापरिवारस्तु	७	२२	३५
स ज्ञास्यति महावीर्य:	४	४	१६
स तं गृहीत्वानिलतुल्यवेगम्	६	५६	३६
स तं दृष्ट्वा कृतं सौम्यम्	३	१५	२६
स तं दृष्ट्वा पतन्तं तु	६	७६	३८
स तं दृष्ट्वा परिम्लानम्	७	२६	३२
स तं दृष्ट्वा महाकायम्	६	७१	११
स तं द्विपमथारुह्य	६	६६	१५
स तं निपतितं भूमौ	५	३८	३३
स तं परमदुर्धर्षम्	६	५८	३६
स तं परिघमादाय	५	४२	४०
स तं परित्यज्य महारथो र०	५	४७	३३
स तं पितृमखं मत्वा	३	१४	४
स तं प्रतिविगाह्याशु	७	२८	४४
स तं प्रदक्षिणं कृत्वा	१	४१	८
स तं प्रमुच्य त्रिदशारिमर्जुन	७	३३	१८
स तं भ्रातरमाश्वस्य	६	६१	२०
स तं महामेघनिकाशरूपम्	६	६७	६६
स तं यदा परिश्रान्तम्	२	२६	२७
स तं राजा समारुह्य	७	१५	४०
स तं रुचिरमाक्रम्य	३	१५	६
स तं वृक्षं समासाद्य	२	५३	१
स तं शिरस्युपाघ्राय	६	६१	६
स तं समाविध्य सहस्रश:	५	४७	३५
स तं समासाद्य गृहीतचापम्	४	२४	३
स तं समासाद्य महानगेन्द्रम्	६	७४	५४
स तं हरिं हरीक्षण:	५	४७	८
स तं समीक्ष्यानलराशिदी०	६	७४	५८
स तं समुत्पाट्य समुत्पपात	६	७४	६४

	का०	स०	श्लो०
स तं सैन्यसमुद्भूतम्	२	६६	५
स तच्छस्त्रमनुप्राप्य	३	६	१६
स तच्छ्रुत्वा वचस्तस्य	२	३५	२६
स तच्छ्रुत्वा वच: क्रूरम्	२	६४	२०
सततं राजपुत्रेषु	२	७३	२२
सततं विविधैर्बाणै:	६	६६	२८
सततं संकुलं श्रीमत्	१	५१	२६
स तत्कबन्ध: प्रतिपद्यरूपम्	३	७३	४६
स तत्तथा भग्नमवेक्ष्य शूलम्	६	६७	६६
स तत्तथा सूर्य इवाभ्रजालम्	६	६२	४
स ततोऽभिहतस्तेन	६	७६	३१
स तत्प्रकर्षन्हरिणां महद्ब०	४	४४	१६
स तत्प्रहर्षं लभत्	५	१	१३५
स तत्र कांश्चित्परिषस्वजे०	२	१०३	४८
स तत्र कैलासनिभा: स्व०	२	१५	४२
स तत्र व्यवसद्रात्रा	२	१	२
स तत्र पुनरेवाथ	५	३८	२२
स तत्र मणिभूमीश्च	५	१४	२१
स तत्र मायाबलवान्	७	२६	२६
स तत्र मासमुषित:	७	३४	४४
स तत्र मुनिभि: सार्धम्	७	६६	१६
स तत्र शुश्राव च हर्षयुक्ता:	२	१५	४३
स तत्र सीतां परिहाय मै०	३	१४	३६
स तत्राग्निं समास्तीर्य	६	७३	२१
स तत्राभिहतस्तेन	६	७६	८८
स तत्रोत्तमपर्यङ्के	७	१३	१६
स तथा चिन्तयंस्तत्र	५	५५	२६
स तथाप्युग्रतेजा:	५	१८	३१
स तथाभिहतस्तेन	६	७७	१४
स तथा विप्रकीर्णस्तु	६	५६	२७
स तथा ह्रियमाणोऽपि	६	७७	१६
स तथेति तत: कृत्वा	७	३८	६
स तथेति प्रतिज्ञाय	७	७६	१६
स तथैवागत: पूर्वम्	५	६४	३
स तथोक्तस्तु निर्भर्त्स्य	६	६५	१
स तथोक्त्वा मुनिजनम्	७	८१	१३
स तदन्त:पुरद्वारम्	२	१६	१
स तदा गृध्रराजेन	३	५१	३६

	का०	स०	श्लो०
स तदा भाषमाणं तु	३	११	६३
स तदा राक्षसेन्द्रेण	६	२०	१३
स तदा वालिनं हत्वा	४	२८	१
स तदासादितस्तेन	५	१	१०२
स तद्गृह्य हरिश्रेष्ठः	४	४४	१५
स तद्दत्तं मघवता	३	३०	२५
स तद्दुरात्मा सुहृदा निवे०	६	६२	६४
स तद्विहाय शयनम्	७	३७	११
स तन्महापर्वतकूटसंनिभम्	६	६७	१६७
स तमध्वानमैक्ष्वाकः	२	४६	१७
स तमन्तःपुरे घोरम्	२	४१	८
स तमाश्रममागम्य	२	११३	६
स तमाश्वासयद्रामः	४	१८	५६
स तमुच्छ्रितमत्यर्थम्	५	१	१०१
स तमुद्यम्य चिक्षेप	६	६७	२४
स तमुन्मादयामास	३	४४	१०
स तयाभिहतस्तेन	६	७०	५६
स तया मालया वीरः	४	१७	६
स तया शुशुभे श्रीमान्	४	१२	४१
स तया सह धर्मात्मा	७	३०	२८
स तलाभिहतस्तेन	६	७०	४२
स तवादर्शनाहार्यं	५	३५	४३
स तस्मात्पादपाद्धीमान्	५	३७	३६
स तस्मिन्नचले तिष्ठन्	५	२	८
स तस्य गतिमन्विच्छन्	६	४५	१
स तस्य गन्धमाघ्राय	६	६१	२५
स तस्य गिरिवर्यस्य	५	१	७
स तस्य चापनिर्घोषात्	६	६७	१४१
स तस्य तानष्टवरान्महाह०	५	४७	३१
स तस्य तु महानादम्	७	२२	१
स तस्य ददृशे मार्गः	६	६६	६६
स तस्य दृष्ट्वर्षणसंचोदित	५	४७	२
स तस्य पततः खड्गम्	६	७०	४३
स तस्य बाहुर्गिरिशृङ्गकल्पः	६	६७	१५५
स तस्य मधुपर्कं गाम्	७	३३	६
स तस्य मध्ये भवनस्य सं०	५	८	१
स तस्य मध्ये भवनस्य सं०	५	१२	१

	का०	स०	श्लो०
स तस्य रथनिर्घोषम्	५	४८	२०
स तस्य वचनं श्रुत्वा	५	५२	१
स तस्य वाक्यं प्रतिपूर्ण०	६	५६	६३
स तस्य वाक्यं मधुरं निशम्य	१	१४	६०
स तस्य वाक्यं महात्मानः	४	१८	६५
स तस्य वाक्यैः करुणैर्महात्मा	६	१०६	२४
स तस्य वीरः सुमुखान्वत०	५	४७	१४
स तस्य वीरस्य महारथस्य	५	४८	२७
स तस्य वेगं च कपेर्महात्मनः	५	४७	६
स तस्य शीर्षाण्यसिना शितेन	६	७०	४६
स तस्य शुक्लं मनगं सनागम्	६	७४	६३
स तस्य स्वरमाज्ञाय	३	५७	३
स तस्यां जनयामास	७	४	१७
स तस्यां जनयामास	७	५	३५
स तस्याः परिपृच्छन्त्या	६	८२	२६
स तस्या वचनं श्रुत्वा	४	३३	४२
स तां दृष्ट्वा तत. पम्पाम्	३	७५	२२
स तां दृष्ट्वा महाबाहुः	५	१०	५३
स तां पद्मपलाशाक्षीम्	३	४६	१३
स तां पद्मपलाशाक्षीम्	७	५६	१५
स तां परिवृतां दीनाम्	५	२०	१
स तां परिषदं कृत्स्नान्	६	१२	१
स तां पुष्करिणीं गत्वा	४	१	१
स तां बाणसहस्रेण	६	८१	२५
स तां बुद्धिं पुरस्कृत्य	२	१०८	१८
स तां बुद्ध्यर्थतत्त्वेन	५	१	१८
स तां भुजाभ्यां दीर्घाभ्याम्	४	६६	१५
स तां मातलिना नीताम्	६	१०२	६४
स तां रत्नमयीं दिव्याम्	४	३३	४
स तां लोकात्ससतां कीर्त्याः	२	७५	४७
स तां वेगधरं पापम्	४	१	२३
स तां शिलामापतन्तीम्	६	६६	२३
स तां श्रुत्वा विशालाक्षि	६	३३	१८
स तां सधूमानलसंनिकाशाम्	६	५६	१०६
स तां समीक्ष्यैव हरीशप०	४	३३	२६
स तांस्तु प्रियकान्प्राप्य	२	७१	११
स तां स्त्रीरूपविकृताम्	५	३	३२

	का०	स०	श्लो०
स तां पप्रच्छ धर्मात्मा	७	८८	१७
स ताः प्रोवाच राजासौ	३	५६	२६
स ताञ्छरांस्तस्य हरिर्वि०	५	४७	२३
स ताञ्छित्त्वा शितैर्बाणैः	२	७१	७०
स तादृशः सिंहबलः	६	६१	२२
स ता दृष्ट्वा महाबाहुः	५	४२	४
स तानि द्रुमजालानि	२	९८	१५
स तानि शरजालानि	३	५१	५
स तानुपागमद्वीरः	५	६४	५
स तान्दृष्ट्वा महावीर्यः	३	५४	१९
स तान्निहत्वा रणचण्ड०	५	५३	४०
स तान्प्रचिच्छेद हि राक्षसे०	६	५९	१०२
स तान्प्रवृद्धान्निहत्य रा०	५	४५	१७
स तान्बाहुद्वयासक्तान्	६	४१	८६
स तान्वृक्षान्समासाद्य	६	५९	७६
स ताभ्यां पूजितः पूज्यः	५	५७	३६
स ताभ्यां विक्षतैर्गात्रैः	५	४९	३६
स ताभ्यां सहसोप्लुत्य	५	४६	३०
स तामभ्यवदत्प्रीतः	२	११०	२१
स तामभ्यवदद्विप्रः	१	७०	३४
स तामसितकेशान्ताम्	३	४९	१०
स तामसितकेशान्ताम्	५	१८	३२
स ता महात्मा हनुमानपश्यन्	६	७४	६१
स तामासाद्य वै रामः	३	७५	१४
सतारागणनक्षत्रम्	३	३१	२४
सतीं त्वामहमत्यन्तम्	२	१२	७६
स तीर्त्वा सरयूपारम्	२	३२	३८
स तीव्रेण च कोपेन	६	६७	१२२
स तु कृत्वा सुवेलस्य	६	३८	१
स तु क्रुद्धो महावेगः	६	९८	१७
स तु क्षिप्तो बलवता	६	९८	१५
स तु गत्वा मुनिर्ध्यानम्	७	९	२१
स तु तं छादयामास	७	७	२६
स तु तं तादृशं दृष्ट्वा	७	२२	११
स तु तत्र दशग्रीवः	७	२६	१
स तु तत्रावसत्प्रीतः	७	३	३३
स तु ताभ्यति धर्मात्मा	६	१२१	५

	का०	स०	श्लो०
स तु तारं विनिर्भर्त्स्य	७	३४	११
स तु तां रामरामेति	२	५२	१३
स तु तीरं समासाद्य	१	२	४
स तु तीर्त्वार्णवं रामः	६	३६	१३
स तु तेन तदा बोधात्	६	१०३	१
स तु तेन प्रहर्षेण	३	३५	३४
स तु तेन प्रहारेण	६	७६	४५
स तु तेन प्रहारेण	६	७६	९०
स तु तेन प्रहारेण	६	७७	१३
स तु तौ राक्षसौ दृष्ट्वा	७	६५	१३
स तु दत्तवरः प्रीत्या	६	१२६	५३
स तु दत्त्वा दशग्रीवः	७	२५	१
स तु दिव्येन रूपेण	२	६४	४७
स तु दिव्यो महाभीमः	७	२८	२४
स तु दीन परिन्नस्तः	७	२७	६
स तु दीर्घं विनिःश्वस्य	६	९५	२
स तु दूरमुपागम्य	४	४८	२
स तु देशो दुरन्वेषः	४	४८	५
स तु देशो विसूर्योऽपि	४	४३	५४
स तु दृष्टो मया शत्रुः	४	१०	२०
स तु दृष्ट्वा नदीतीरे	२	५२	७४
स तु दृष्ट्वा बलं सर्वम्	७	२९	३
स तु दृष्ट्वा यमः प्राप्तम्	७	२१	३
स तु दृष्ट्वा रुदन्दीनः	२	७७	९
स तु द्वाराणि संयम्य	६	४१	९५
स तु धर्मप्रसङ्गेन	७	२	७
स तु ध्यात्वा मुहूर्तं तु	६	५७	२
स तु नालीकनाराचैः	६	७३	३१
स तु निर्धूय ताः सर्वाः	४	९	८
स तु निहतरिपुः स्थिरप्रतिज्ञः	६	१०८	३४
स तुन्न इव तीक्ष्णेन	११	१४	२३
स तु पवनसुतो निहत्य०	६	५२	३८
स तु प्रहाराभिहतः	६	९६	१९
स तु बद्धाञ्जलिपुटः	६	१२२	२
स तु बाहुसहस्रेण	७	३२	६४
स तु भुक्त्वा मुनिश्रेष्ठः	७	१०५	१५

	का०	स०	श्लो०
स तु भोगवतीं गत्वा	७	२३	५
स तु मर्मणि घोरेण	५	३६	५१
स तु मेधाविनो दृष्ट्वा	४	६	६
स तु मे भ्रातरं दृष्ट्वा	४	६	६
स तु मोहात्सुसंक्रुद्धः	६	१०४	१
स तु राक्षसशार्दूलः	६	६	१
स तु राजात्मजश्चापि	२	७५	८
स तु राज्यं चिरं कृत्वा	७	३६	३७
स तु राममवेक्षन्तम्	२	१११	१५
स तु रामस्य वचनम्	२	५२	५
स तु रावणमासाद्य	७	२२	१२
स तु रुद्रैर्महाघोरैः	७	२८	३६
स तु वर्षसहस्राणि	७	३	११
स तु विज्ञाय तं शापम्	७	२	२४
स तु विज्ञाय तपसा	४	११	५२
स तु विपुलयशा कपिप्रवीरः	४	४	३५
स तु वीर्यवतां वीर्यम्	१	२०	२३
स तु वीर्यवतां श्रेष्ठः	५	२	५
स तु वृक्षेण निर्भग्नः	४	१६	२४
स तु वेश्म पुनर्मातुः	११	३३	२७
स तु वै निःसृतः क्रोधात्	४	६	७
स तु वैवस्वतो देवैः	७	२२	५०
स तु वैश्रवणस्तत्र	७	३	६
स तु वैहायसरथः	६	८०	२२
स तु शारदमेघाभम्	७	२०	२२
स तु शूरो महावेगः	६	६७	३१
स तु शूलगदाप्रासान्	७	२१	३८
स तु शोकेन चाविष्टः	६	८२	६
स तु श्रेष्ठैर्गुणैर्युक्तः	२	१	१६
सतुषारावृतां साभ्राम्	१	४६	१५
स तु संज्ञां पुनर्लब्ध्वा	२	१०३	६
स तु संज्ञामुपागम्य	४	३०	४
स तु संविश्य मेदिन्या	२	५३	५
स तु संहृष्टवदनः	२	८५	११
स तु संहृष्टसर्वाङ्गः	५	१४	२
स तु सर्वं समर्थ्यैव	६	३२	३६
स तु सिंहवृषस्कन्धः	४	५३	७

	का०	स०	श्लो०
स तु सुप्ते जने रात्रौ	४	६	५
स तु स्वबलवीर्येण	३	३	२४
स तूत्पातांस्ततो दृष्ट्वा	६	५१	३५
स तूर्णतरमादाय	७	३२	४०
स तूर्यघोषः सुमहान्	२	८१	३
स तूष्णीमेव तच्छ्रुत्वा	२	५७	२६
स तूर्णैरावृतं दुर्गम्	४	६	११
स तेजसा विपुलमवाप्य तं०	७	१५	४१
स ते जीवितशेषस्थ	३	५६	६
स तेन परमास्त्रेण	१	३०	१८
स तेन बाणैः प्रसभं निपातितैः	५	४७	२१
स तेन राजा दुःखेन	२	५६	२७
स तेन शैलेन भृशं रराज	६	७४	६६
स तेन सह संयुक्तः	३	३१	१७
स तेन सह सैन्येन	६	८३	७
स तेनाग्निनिकाशेन	३	२४	१७
स तेनाभिहतः क्रुद्धः	६	५८	४०
स ते प्रतिग्रहीतव्यः	३	७४	१६
स तेभ्यस्तु नमस्कृत्वा	५	१३	५८
स ते मोक्षयिता शापात्	७	५३	२१
स ते वीर्यं बलं दर्पम्	३	५६	१५
स तेषां द्विजमुख्यानाम्	७	६१	८
स तेषां यातुधानानाम्	३	२५	५
स तेषां राजपुत्राणाम्	१	४१	१५
स ते सहायो मित्रं च	३	७२	१५
स ते सुखोचितो बालः	२	८	३५
स तेऽहं पितुराचार्यः	२	१११	४
स तैः क्रीडन्धनुष्मद्भिः	५	४५	१०
स तैः पञ्चभिराविद्धः	५	४६	२३
स तैः परिवृतः शूरैः	५	४२	३६
स तैः प्रबुद्धैः परिभत्स्यमानः	५	६१	२१
स तैः शरैर्भिन्नसमं निपा०ः	५	४७	१५
स तैः संपूजितः पूज्यः	५	१	१६१
स तैः सपीड्यमानोऽपि	५	४६	१५
स तैर्बाणैर्महावीर्यः	३	५१	८
स तैर्मदावप्रतिवार्यवेगैः	५	६१	२३
स तैर्महात्मा भरतः	२	६६	५

	का०	स०	श्लो०
स तैर्वानरमुख्यैस्तु	६	८२	७२
स तैस्तथा भारकरतुल्यदर्शनैः	६	६६	१४
स तैस्तु सहितो राजा	६	१६	१६
सतोयाम्बुदसंकाशम्	६	६१	३
स तौ प्रसार्योरगभोगकल्पौ	६	७४	४७
स तौ महात्मा गजमन्दगामी	४	१	१२६
सत्कृत्य द्विजमुख्यानाम्	११	३	१५
सत्कृत्य निहतं सर्वम्	२	३०	३१
सत्क्रियां हि भवानेताम्	१	५२	१४
सत्क्रियार्थं क्रियादक्षम्	६	१६	३५
सत्त्वं बलमत शीघ्रम्	६	५७	७
सत्त्वयुक्ता हि पुरुषा	४	३५	११
सत्त्वाभिजनसंपन्नः	४	३४	७
सत्त्वेन लोकाञ्जयति	२	१२	२६
सत्त्वेन वीर्येण पराक्रमेण	६	१५	३
सत्यं च धर्मं च पराक्रमं च	२	१०६	३१
सत्यं तु प्रतिजानामि	४	७	३
सत्यं ते प्रतिजानामि	७	६	४५
सत्यं वतेदं प्रवदन्ति लोके	५	२८	३
सत्यं राक्षसराजेन्द्र	५	५१	३८
सत्यं समनुवर्तस्व	२	१४	८
सत्यं सत्याभिसंधश्च	४	२२	६
स त्यक्त्वा तु रथं तस्य	६	५२	३०
सत्यधर्मरतः श्रीमान्	५	३५	२१
सत्यनामानि पद्मानि	६	४७	८
सत्यप्रतिज्ञं पितरम्	२	२०	२४
सत्यमस्तु वचस्तव	१	३८	१०
सत्यमस्त्रं महाबाहुः	१	२७	१६
सत्यमागमयोगेन	६	२८	१६
सत्यमेकपदं ब्रह्म	२	१४	७
सत्यमेतद्रघुश्रेष्ठ	६	३५	१५
सत्यमेवानृशंसं च	२	१०६	१०
सत्यमेवेश्वरो लोके	२	१०६	१३
सत्यरूपं तु तद्वाक्यम्	२	५७	२३
सत्यवन्तं सत्यकीर्तिम्	१	२८	४
सत्यवाक्शीलवान्दान्तः	७	३	२
सत्यश्चात्र प्रवादोऽयम्	२	३५	२७

	का०	स०	श्लो०
सत्यसन्धस्य वीरस्य	१	१७	२
सत्यसन्ध शुचिर्भूत्वा	२	७०	४
सत्यसन्धो महातेजा	२	११	१६
सत्यसन्धौ महाभागौ	४	३१	४५
सत्यात्पाणिगृहीतश्च	४	५५	५
सत्यार्जवदमोपेतैः	७	५	११
स त्रिभिर्नैर्ऋतश्रेष्ठैः	६	७०	१२
स त्रिभिर्वेदपारगैः	६	७०	५
स त्रिरात्रोषितस्तत्र	६	२१	११
स त्व ग्राम्येषु भोगेषु	४	३४	१५
स त्वं जीवति सुग्रीवे	६	६२	१५
स त्वं तत्र निवाराय	७	३	३०
स त्वं धर्मं परित्यज्य	२	१२	४५
स त्वं धर्मपरो भूत्वा	१	७५	८
स त्वं नाम च गोत्रं च	३	४७	२४
स त्वं पुरुषशार्दूल	१	११	१२
स त्वं पुरुषशार्दूल	७	५२	१६
स त्वं पुरुषशार्दूल	७	६३	२८
स त्वं पुरुषशार्दूल	७	६८	२०
स त्वं पुरुषशार्दूल	७	१०६	११
स त्वं प्रदीप्तं चिक्षेप	५	६७	१३
स त्वं प्रसादं धर्मज्ञ	१	२०	२१
स त्वं प्रसादं लोकानाम्	७	८४	१६
स त्वं भ्रान्तोऽसि मे राजन्	६	१६	१६
स त्वं मनोमयः पुत्रः	७	१०४	१३
स त्वं रामेण लङ्कायाम्	७	४१	७
स त्वं सुपुष्टमाहारैः	७	७८	१७
स त्वं सुरहितार्थाय	१	२६	६
स त्वं हीनः सुहृद्भिश्च	४	५४	१८
स त्वनेकाग्रहृदयः	२	७१	३४
स त्वपश्यद्विनिष्क्रान्तम्	२	१४	३२
स त्वमर्थस्य हीनार्थः	६	८८	१४
स त्वमस्मद्धितार्थाय	७	६	१६
स त्वमिक्ष्वाकुनाथं वै	५	२२	१७
स त्वमिन्द्राशनिप्रख्यैः	६	८६	४
स त्वमज्ञास्यमानासु	७	१०४	११
स त्वमेवंविधं यज्ञम्	७	८३	१३

	का०	स०	श्लो०
स त्वया नावमन्तव्यः	२	३९	२५
स त्वया निहतः पापः	७	७१	८
स त्वया निहतो युद्धे	७	२४	३१
स त्वर्जनप्रयुक्तेन	७	३२	६२
स त्वां द्रष्टुं उपगतः	१	७०	१४
स त्वां पश्यतु भद्रं ते	२	३४	७
स त्वां मनुजशार्दूलः	५	३५	४७
स त्वां रामेति कुप्तम्	५	१	१०६
स त्वां विनिहतं मानम्	४	१७	२२
सत्संग्रहानुग्रहणे	२	१	२६
स दक्षिणां दिशं गत्वा	१	५७	२
स दण्डस्तव राजाभूत्	७	७९	१७
स दत्तं केसरीन्द्रेण	२	७०	२४
स दत्वा तुमुलं युद्धम्	६	१०१	२
स ददर्श कपिश्रेष्ठम्	५	८६	२५
स ददर्श ततस्तस्या	४	६६	१३
स ददर्श ततः श्रीमान्	४	१६	१५
स ददर्श ततः सालम्	४	८	१२
स ददर्श ततः सीताम्	५	१७	३
स ददर्श ततो रामः	६	१०७	४०
स ददर्श महाराजा	५	४८	५८
स ददर्श महात्मानम्	१	७०	९
स ददर्श महात्मानम्	६	६७	१३६
स ददर्श महात्मानम्	७	१०८	१२
स ददर्श महावीर्यो	६	८०	२०
स ददर्श मृता सङ्घाम्	६	४२	३
स ददर्श हनूमन्तम्	६	८१	९
स ददर्श शिरुरथम्	५	१५	१६
स ददर्शासने रामः	२	१८	१
स दधौ पावकं लग्न	६	१११	१२०
स दर्भचमसमुष्टका	१	३०	९
स दर्भसंस्तराद् गृह्य	५	३८	२९
स दर्भसंस्तराद् गृह्य	५	६७	१२
स दर्शनीयो बहुधा	३	२८	२३
सदस्यानुमते राजा	१	६२	२४
सदस्या मम यज्ञेषु	७	३६	५६
सदानृणमिमं रामम्	२	११२	६

	का०	स०	श्लो०
सदार्यौ राजपुत्रौ द्वौ	२	११२	३
सदा सक्तं च तद्वेश्म	२	१५	१९
सदा सुखमहं मन्ये	४	१	५४
स दिशो दश घोषेण	६	९९	६
स दीन इव शोकार्तः	२	१८	१०
स दीनवदनो भूत्वा	५	६२	३८
स दीनो दीनया वाचा	३	६४	१
स दीप्तनयनोऽमर्षात्	६	१०३	२
स दीर्घमभिनिःश्वस्य	६	११४	६
स दीर्घेणमहोच्छ्वासः	४	३१	२९
स दुःखवशमापन्नः	१	४१	१३
स दुःखेन च संतप्तः	६	७४	२
स दुष्टो वाप्यदुष्टो वा	६	१८	५
स दुष्टो वाप्यदुष्टो वा	६	१८	२२
स दूरं सहसोत्पत्य	५	४६	२७
स दूरे चाश्रमं गत्वा	३	३१	३६
सदृशं खलु वो वीर्यम्	४	४९	१२
सदृशं तत्तु तस्यैव	२	६४	६४
सदृशं यच्च कालेऽस्मिन्	६	६३	३३
सदृशं राजशार्दूल	१	१९	२
सदृशं शतपत्रस्य	२	६०	१७
सदृशश्चासि रामेण	४	३६	१८
सदृशाच्चापकृष्टाच्च	२	११८	३५
सदृशीयं मम भवेत्	७	८८	१५
सदृशो धर्मसंबन्धः	१	७२	३
स दृष्ट्वा तत्र राजानम्	७	१३	१५
स दृष्ट्वा तां सुदुर्मेधाः	७	८०	५
स दृष्ट्वा तादृशं सैन्यम्	७	१४	९
स दृष्ट्वा दिव्यसंकाशम्	७	९३	२
स दृष्ट्वा भ्रातरं संख्ये	७	१५	१७
स दृष्ट्वा राक्षसं सैन्यम्	३	२८	२
स दृष्ट्वा राघवं दीनम्	७	५२	६
स दृष्ट्वा रूपसंपन्नाम्	७	१७	३
स दृष्ट्वा लक्ष्मणं दीनम्	३	५८	१
स दृष्ट्वा वानरैः सर्वैः	६	४२	४
स दृष्ट्वा वायुना मुक्ताः	१	३३	२४
स दृष्ट्वा सूर्यसंकाशम्	७	५१	४

	का०	स०	श्लो०
स देवगन्धर्वगणैरभिप्लुतः	७	३	३५
सदेर्षिगणं तुष्टम्	१	१	८४
स देवलोकस्य तमो निहत्य	६	६७	१७४
सदेवासुरगन्धर्वम्	७	६६	२१
सदेवासुरयक्षेषु	५	५६	१६
स देवि नित्यं परितप्यमानः	५	३६	४६
स दैव्या व्यवसायं च	२	१२	५४
स देशः प्रभया तेषाम्	५	१५	६
स देशः श्लाघनीयश्च	३	१३	१८
स दैवतबलं सर्वम्	७	२७	३२
सद्यः सौम्य परित्यज्य	३	४६	६
सद्योनिपतितानन्दम्	२	६५	२८
सद्योपलब्धिगर्भस्य	७	४	३१
सद्योऽहं त्वत्प्रतीक्षोऽस्मि	१	७३	१६
सद्रव्यं च शिरो नित्यम्	७	१८	३३
सधनुर्धन्विनां श्रेष्ठः	३	२८	२६
सधनुर्धन्विनां श्रेष्ठः	६	७६	३८
सधूमिव कालाग्निम्	६	१०८	८
सधूमिव तीक्ष्णाग्रम्	६	१०२	४६
सधूमाश्च शराः सर्वे	३	२४	५
सध्वजः सपताकश्च	६	७१	१६
स नष्टां गां क्षुधार्तो वै	७	५३	१०
स नागभोगाचलशृङ्गकल्पौ	६	६०	५७
सनातने वर्त्मनि संनिवि०	५	५	२४
स नानाकुसुमैः कीर्णः	५	१	४६
स नास्ति परमित्येतत्	२	१०८	१७
स निःश्वस्य महारोषः	४	१६	१४
स निकृत्तोऽपतद्भूमौ	६	१०७	१३
स निकृत्तौ भुजौ दृष्ट्वा	३	७०	११
स निक्षिप्य शिरो भूमौ	३	६८	१८
स निक्षिप्य सुतं ज्येष्ठम्	७	८४	१०
स निगृह्य तु तं वाष्पम्	४	८	३१
स निगृह्य महाबाहुः	३	६७	२
स निद्रात्कान्तसंवीतः	४	३१	३८
स निपत्य महावीरः	५	६२	३७
स निमित्तैश्च दृष्टार्थैः	५	५५	३४
स नियुक्तस्तत्रस्तेन	५	५८	७

	का०	स०	श्लो०
स निरीक्ष्य ततो धीरः	३	७	७२
स निरुच्छ्वासवत्तत्र	७	१४	१२
सनिर्घाता दिवोल्काश्च	६	१०६	२४
स निर्जित्य पुरीं लङ्काम्	५	४	१
स निर्ययौ जनौघेन	७	१०१	२
स निर्यातो महावीर्यः	६	५१	२६
स निश्चितार्थः परवीरहन्ता	५	४८	४५
स निश्चितां मतिं कृत्वा	१	८	३
स निहत्य महाबाहुः	१	१५	५६
स नीलमिव जीमूतम्	४	१०१	३८
स नूनं क्वचिदेवाद्य	२	४२	१६
स नृपेणाभ्यनुज्ञातः	१	११	२२
सन्ततिश्च यथा दृष्टा	४	२१	१०
सन्ति चौघबलाः केचित्	५	४३	२३
सन्ति चौघबलाः केचित्	६	४१	४८
सन्ति शुष्काणि काष्ठानि	२	४७	८
सन्त्यन्या प्रमदास्तुभ्यम्	६	१११	२७
सन्नामिव महाकीर्तिम्	५	१६	११
सपक्षिराजोपमतुल्यवेगैः	५	४८	१८
सपत्रवाजिता बाणाः	६	८८	३१
सपत्नीनां सहस्रेण	६	१२३	१५
सपत्न्या तु गरस्तस्यै	१	७०	३७
सपत्न्या तु गरस्तस्यै	२	११०	२४
सपदि हरिवरस्ततो हनूमान्	६	११३	५१
स पन्थाश्चित्रकूटस्य	२	५५	६
स पपात खरो भूमौ	३	३०	२७
स पपात महाबाहुः	३	७०	१०
स पपात हतो भूमौ	३	२६	२२
स परिष्वज्य वैदेहीम्	३	५१	३७
स पर्वततटाग्रस्थः	६	७४	३६
सपर्वतवनां कृत्स्नाम्	७	६८	१०
सपर्वतवनोद्देशाम्	५	३७	३६
सपर्वतसमुद्राभ्याम्	५	१	१२६
स पर्वतं समारुह्य	७	१६	३
स पर्वताग्रमुत्क्षिप्य	६	६७	५२
स पर्वतान्पक्षिगणान्सरांसि	६	७४	४६
सपर्वता मही वीर	७	११	१७

	का०	स०	श्लो०
स पश्चिमेन द्वारेण	६	८१	३
स पश्यन्विविधा देशान्	४	४६	१९
सपाण्डुराविद्धविमानमालिनीम्	५	२	५३
सपात्यमानैर्गिरिशृङ्गवृक्षैः	६	६०	५६
स पादुके ते भरतः स्वलंकृते	२	११२	२९
स पावकं पावकदीप्ततेजाः	६	७३	२९
स पिता मम काकुत्स्थः	१	३४	६
स पितुर्वचनं श्रीमान्	५	३३	२४
स पितुश्चरणौ पूर्वम्	२	१८	२
स पितृव्यस्य संक्रुद्धः	६	९०	४६
स पित्रा च परित्यक्तः	५	३८	३२
स पुच्छमुद्यम्य भुजंगकल्पम्	६	७४	४५
स पुण्यकर्मा भुवने द्विजर्षभः	३	५	४२
सपुत्रं मूर्ध्न्युपाघ्राय	१	२२	३
सपुत्रदारः सामात्यः	५	१३	३३
सपुत्रबान्धवं दत्वा	५	३५	७९
सपुत्रबान्धवामात्यः	६	१२४	१४
स पुत्रमेकं राज्याय	१	५५	११
स पुत्रया त्वया नैव	२	१४	१७
स पुत्रराज्यां सिद्धार्थाम्	३	५८	८
स पुत्रवधसंतप्तः	६	९२	१९
स पुत्रवधसंतप्तः	६	९२	३२
स पुत्रान्सपरिष्वज्य	६	६९	१५
सपुत्रां त्वां त्यजाभीति	६	११९	२५
स पुनः पतितां दृष्ट्वा	३	२१	१
स पुनस्त्वपरान्पुत्र	३	२८	१६
स पुरा दिव संकाशः	७	७०	९
स पुरोगामिभिस्तूर्यैः	६	१२८	३७
स पुष्पवर्षैरवकीर्यमाणः	६	६५	३६
स पूज्यमानो रक्षोभिः	६	१०	१०
स पूरयन्खं च महीं च सबलाम्	५	४७	७
स पूर्वज तीव्रविवृद्धकोपम्	४	३०	८५
स पूर्वजायावरजः शशंस	६	११	२८
स पृष्टो राजपुत्रेण	६	७१	२६
स पृष्टो राजपुत्रेण	६	१२६	४
सप्तच्छदानां कुसुमोपगन्धी	४	३०	३०
सप्तजातिशतान्येव	१	५९	१९

	का०	स०	श्लो०
सप्तधा तु कृते गर्भे	१	४७	१
सप्तधा तु भवेन्मूर्धा	२	६४	२४
सप्तभिस्तु महावीर्यः	६	७३	४४
सप्तभौमाष्टभौमैश्च	५	२	५०
सप्तमी चान्वगात्तासाम्	१	४३	१४
सप्तरात्रं तु काकुत्स्थः	७	७२	१९
सप्तरात्रे कृताहाराः	४	१३	१९
सप्तरात्रेण राजासौ	७	८१	७
सप्तषष्टिर्हता कोट्य	५	७४	१२
सप्त सप्त च वर्षाणि	२	१८	३७
सप्तानां च समुद्राणाम्	३	७५	४
सप्ताष्टदिवसान्राजा	१	११	१९
साप्ताहाद्धूममसाद्भूतम्	७	८१	१८
स प्रचक्रे महाबाहुः	७	८७	८
स प्रणम्य च सुग्रीवम्	५	६४	२
स प्रभावेण शूलस्य	७	६१	२०
स प्रमाणात्प्रवृद्धस्ते	६	३५	१६
स प्रविश्य तु तद्वेश्म	३	५५	३
स प्रविश्य पुरीं लङ्काम्	६	६०	१
स प्रविश्य महात्मानम्	२	५४	११
स प्रविश्य मुनिश्रेष्ठम्	३	१२	६
स प्रविश्य विचित्रां ताम्	५	१४	५
स प्रविश्य सभां राजा	६	९३	१
स प्रविश्याश्रमपदम्	१	२	२२
स प्रविश्याश्रमपदम्	३	१२	१
स प्रविश्याष्टमीं कक्ष्याम्	२	१७	२४
स प्रविश्यैव धर्मात्मा	२	७२	३
स प्रविष्टः पुरीं रम्याम्	७	७२	७
स प्रविष्टो मधुवनम्	५	६४	४
स प्रहस्तः प्रणीतात्मा	६	१२	३
स प्रहस्य महातेजाः	६	३६	१३
स प्रहस्य महारौद्रः	३	३	१६
स प्रहस्याब्रवीन्मन्त्रम्	४	११	३७
स प्राकारमवप्लुत्य	५	५८	५५
स प्राङ्मुखो राजगृहात्	२	७१	१
स प्राप्तकालमाज्ञाय	३	४४	१९
स प्रासमाविध्य तदाङ्गदाय	६	६९	८८

	का०	स०	श्लो०
सफलं जीवितं भवेत्	४	४३	६
सफलां कुरु तां क्षिप्रम्	४	१४	७
सफलो राघवोद्योगः	५	५६	२
सफालपिटकं गृह्य	२	३६	२५
सफेनां सस्वनां भूत्वा	२	११४	७
स बद्ध इव पाशेन	२	४०	४०
स बद्धस्तेन वल्केन	५	४८	४८
स बद्धो वाग्भिरग्र्याभिः	१	६२	२५
स वद्ध्वा भ्रुकुटिं वक्त्रे	६	३६	२
सबन्धुरगमत्तत्र	१	७०	१५
स बभूव कृशो राजा	६	११	१
स बभूव तदा कूपः	६	२२	३५
स बभूव महाभीमः	६	८८	३३
स बभूव रणे घोरः	६	८८	७०
स बली बलवत्क्रोधात्	२	७८	१६
सबले सागरं तीर्णे	६	२५	१
सबलो वा मुनिश्रेष्ठ	१	२०	२४
स बाणजालान्यपि तानि०	६	५६	१००
स बाणवर्षं तु ववर्ष तीव्रम्	६	५६	६६
स बाणवर्षैरभिवृष्यमाणः	६	७३	६३
स बाल एव सौदासः	७	६५	११
स बालभावाद्युधि वीर्यदर्पितः	५	४७	२०
सबाष्पकलया वाचा	२	८२	१०
स बाष्पपूर्णवदनः	२	६४	२१
स बाष्पपूर्णेन सुखेन पश्यन्	४	२४	२
सबाष्पशोकाभिहता समीक्ष्य	६	४७	२३
स बुद्धिं कृतवान्राजा	१	३३	२०
स ब्रह्मकोशं रजतालयं च	६	७४	५५
सब्राह्मणस्याश्रममभ्युपेत्य	२	८६	२३
स भग्नधन्वा विरथः	३	५१	१६
स भग्नबाहुः संविग्नः	३	४	६
स भग्नबाहूरूकटीपयोधरः	५	४७	३६
स भग्नबाहूरूमुखः	५	६२	२७
स भर्तुर्वचनं श्रुत्वा	६	६६	८३
सभाग्यश्चासि धर्मज्ञ	६	५०	५०
सभाजिता त्वं रामेण	६	३३	३४
सभाज्यमानं भूतैस्तम्	५	६१	४

	का०	स०	श्लो०
सभाज्य मुदिता रामम्	३	३०	३४
स भारः सौम्य भर्तव्यः	३	५०	१८
सभार्यं सप्रसुप्तं तु	२	४६	१५
स भार्यायां वचः श्रुत्वा	२	३२	३२
सभार्ये हि गते रामे	२	६३	३
स भास्करसहस्रस्य	६	७१	४
स भास्कराभ्यानमनुप्रपन्नः	६	७४	६५
स भीमकार्मुकशरः	६	८६	१६
स भुक्तवान्नरश्रेष्ठः	७	७१	१४
स भुक्तवान्नरश्रेष्ठः	७	८२	४
स भूतले भीमबलाभिपिष्टः	६	६७	८८
स भूत्वा तु महाकायः	५	४२	३१
स भूत्वा तु महाकायः	५	४३	६
स भूमावल्पतेजोमुः	४	१७	१५
स भूमौ व्यस्तसर्वाङ्गः	४	१७	२
स भूयः सर्वतः श्रीमान्	५	११	४८
स भूयस्त्वं समुत्साह	५	३६	३
स भोजनं वसिष्ठाय	७	६५	२६
स भ्रातुश्चरणौ गाढम्	२	३१	२
स भ्रातुः शासनं कृत्वा	२	५२	७६
समः समविभक्तांगः	१	१	११
समग्रं सागरं तीर्णम्	६	२५	२
समग्रयवमच्छिद्रम्	६	४८	१३
स मत्तकोयष्टिभकान्	५	१	४४
स मधुवीर्यसंपन्नः	७	६१	५
समन्ततस्तदा देवीम्	१	३७	१४
समन्तादभिसंपत्य	३	५२	३६
समन्ताद्विप्रधावद्भिः	२	७१	२३
समन्ताद्यस्य ताः शाखाः	३	३५	२८
समन्ताद्योजनशतम्	७	८१	८
समन्तान्नरनारीणाम्	२	७१	२२
स मन्दराग्रस्थ इवांशुमाली	५	४७	१७
समन्मथा तीव्रतरानुरागा	४	३०	३६
समन्युरुशपत्तवान्	१	३६	२१
समभूमितले रम्ये	२	५६	११
समभ्युपेत्याङ्गुतघोरवीर्यम्	६	६७	६८
स ममादर्शनाद्दीनः	४	१८	५१

	का०	स०	श्लो०
समयश्च कृतः सीते	६	१२३	४०
समयं च ममार्येमम्	२	१४	१०
स मया न्यासभूता तु	७	३०	२६
स मयाऽऽहारसंरोधात्	४	५६	११
समरे युध्यमानानाम्	६	८३	८
समरे वानरश्रेष्ठः	६	६८	७
समर्थश्चाप्यहं सेतुम्	६	२२	४६
समर्था गगनं गन्तुम्	७	३४	६
समर्थाधिष्ठितश्चाश्वः	१	८	१५
समर्थो नास्मि ते दातुम्	४	११	११
समर्थौ सहितौ यन्माम्	५	६७	२४
समवेक्ष्याब्रवीद्वाक्यम्	१	१६	१६
समसौम्यानि रम्याणि	६	३६	२
स महात्मा कुलीनायाम्	१	३२	२
स महात्मा मुहूर्तेन	५	१	६६
स महात्मा समुद्यम्य	७	१४	१४
स महान्सत्त्वसंनादः	५	१	१८
स महाबाहुरत्यर्थम्	३	६६	३५
स महामेघसंकाशम्	५	१	१६५
स महार्णवमासाद्य	६	४	१०६
स महीं मनुना राज्ञा	२	४६	१२
स महेश्वरसम्येन	६	७	५
समहोदरभूभ्राक्षाः	७	३१	३५
स मां जिघांसु र्दुष्टात्मा	४	४६	११
स मां दृष्ट्वा नरपतिः	२	११८	२६
स मां दृष्ट्वा महाबाहुः	५	३८	२४
समाः शिखरिणः स्निग्धाः	३	४६	१८
समाकुलममर्यादम्	३	६४	६४
समाक्रम्य युधस्तस्थौ	६	१०२	३३
समाक्षरैश्चतुर्भिर्यः	१	२	४०
समागतास्तत्र तु नागयक्षाः	५	२८	२३
समागम्य च राज्ञा ते	२	७०	२
समागम्य प्रवासान्ते	६	१२८	१११
समागम्य महावेगः	६	१०१	३६
समागम्य वसिष्ठेन	२	६०	५
समाजश्च महान्वृतः	५	२७	३०

	का०	स०	श्लो०
समाज्ञापय काष्ठानि	४	२५	१४
स मातरं चैव विसंज्ञकल्पम्	२	२१	५५
स मातरमुपक्रान्ताम्	२	२०	२१
स मातलि समायान्तम्	७	२६	२४
स मातामहमापृच्छ्य	२	७०	२८
समादिशन्तु नियमम्	१	६	११
समा द्वादश तत्राहम्	५	३३	१७
समानयत मे क्षिप्रम्	६	११	१८
समानयत मे शीघ्रम्	६	५७	१८
समानयत्स तान्सर्वान्	१	१२	७
समानयस्व सत्कृत्य	१	१३	२१
समानसारं काकुत्स्थ	१	७५	१४
स मानुषमथो मांसम्	७	६५	२५
समानेष्यति सुग्रीव	४	३५	१४
समान्भूमिप्रदेशांश्च	६	४	६०
स मा पिता यथा शास्ति	२	३०	३८
समाप्तकर्मा हि स राक्षस०	६	८४	२२
समाप्तदीक्षानियमः	१	१८	२
समाप्तवनवासानाम्	३	४३	१७
समाप्तवनवासं माम	२	१०३	१२
समाप्ते नियमे तस्मिन्	७	१३	२६
समाप्ते नियमे तस्य	७	१०	७
समाप्रतिमवृत्तायाः	२	७४	२७
स मामनाथां विधवाम्	२	३६	८
स मामनादाय वनम्	२	३०	१०
स मामुपागत क्रुद्धः	५	१	१८
समायातः समुद्रान्तम्	६	३१	१८
समालभ्य ततः सर्वे	१	४०	२३
समालम्भनमादाय	६	२६	२८
समालोक्य तु ते रूपम्	६	६५	१४
समावृत्य महीं कृत्स्नाम्	६	४	६१
समाश्वसिहि भद्रं ते	५	५६	१६
समाश्वसिहि भद्रं ते	७	८६	१४
समाश्वासय दीनं त्वम्	४	२५	१५
समाश्वासय पुत्रं त्वम्	४	२०	१६
समाश्वास्य च सुग्रीवम्	४	६	४३
समासाद्य च लक्ष्मीवान्	५	२	१४

	का०	स०	श्लो०
समासाद्य तु राजेन्द्रान्	७	१९	२
स मासाश्चतुरः कृत्वा	४	३३	४५
समास्थाय महातेजाः	६	७३	९
समाहिता वेदविदः	२	८३	१६
समित्कुशपवित्राणि	२	२५	७
समित्रबन्धुः सामात्यः	३	५१	२५
समिद्भिस्तोयकलशैः	३	१	५
समीकृततलां रम्याम्	३	१५	२३
समीक्षमाणां रुदतीमनिन्दि०	५	१९	२२
समीक्ष्य च महाबाहो	५	३	१७
समीक्ष्य तं संयति चित्र०	५	३७	६६
समीक्ष्य तूर्णमायान्तम्	६	४०	१२
समीक्ष्य विमलं व्योम	४	२९	१
समीक्ष्य स्वबलं संख्ये	७	२३	३२
समीक्ष्यापततस्तांस्तु	६	७६	६१
समीननक्रमकरः	७	३२	६
समीपजान्द्रुमान्भञ्जन्	४	११	२७
समीपं राघवस्याशु	७	१	१०
समीपं राजसिंहस्य	५	१९	७
समीपस्थं च रामस्य	६	२९	२
समीपस्थं बलाध्यक्षम्	६	७८	६
समीपस्थमुवाचेदम्	६	१०१	२९
समीयुस्तत्र शतशः	६	११	२६
समुतिष्ठन्तु ते सर्वे	६	१२०	१३
समुत्थाने च तद्रूपम्	३	४३	४३
समुत्थितमसङ्गेन	५	१	१००
समुत्पतति वेगात्तु	५	१	४३
समुत्पतितमेघस्य	६	४	११७
समुत्पाद्य गिरेः शृङ्गम्	५	४६	३७
समुत्पेतुरथोत्पाताः	६	१०६	२०
समुत्पेतुमहावेगाः	५	४६	१८
समुदीरितवीर्यास्ते	६	६७	२
सयुद्धतनिधानानि	२	३३	१८
समुद्वहन्तः सलिलातिभारम्	४	२८	२२
समुद्यतमहाशैलाः	६	६९	४३
समुद्यम्य महच्चापम्	४	१३	२
समुद्यम्य महाकायः	६	१०२	५२

	का०	स०	श्लो०
समुद्रं क्षोभयामासुः	६	२२	५८
समुद्रं नेतुमिच्छामि	४	५८	३३
समुद्रं लङ्घयित्वा तु	६	२	५
समुद्रं लङ्घयित्वा तु	६	९	११
समुद्रं लङ्घयित्वैव	५	५१	१६
समुद्र इव निर्वेगः	१	५५	९
समुद्रमवगाहश्च	४	४०	२५
समुद्रमहिषीं गङ्गाम्	२	५०	२६
समुद्रमालिनीं सर्वाम्	१	३९	१४
समुद्रमिव गम्भीरम्	५	६	१३
समुद्रमुच्छोषयति	६	६	१८
समुद्रस्य ततः क्रुद्धः	६	२१	१३
समुद्रात्पश्चिमात्पूर्वम्	४	११	४
समुद्राश्चापि संक्षुब्धाः	७	१६	३१
समुद्रेण च तेनैव	६	२८	४०
समून्मूलय शोकं त्वम्	४	२७	३७
समुपस्थापयामासुः	४	३८	१०
स मुमोच महाबाणम्	७	६९	३४
स मुष्टिनिर्भिन्ननिमग्नवक्षाः	६	६९	९४
स मुष्टिनिष्पिष्टविभिन्न०	६	७०	२५
स मुहूर्तं गते तस्मिन्	१	२	३२
स मुहूर्तं समाश्वस्य	२	८७	१२
स मुहूर्तमिव ध्यात्वा	५	१४	१
स मुहूर्तमिव ध्यात्वा	५	१६	२
स मुहूर्तमिव ध्यात्वा	६	१००	३८
स मुहूर्तमिवासंज्ञः	२	३९	३
स मुहूर्तादुपश्रुत्य	७	८१	१
स मूर्च्छितो भूमितले पपात	६	७०	६१
स मूर्ध्ना न्यपतद्भूमौ	४	१२	६
समूलांश्च विमूलांश्च	६	२२	५४
समृद्धं स्त्रीसहस्रेण	५	२३	१३
समृद्धागामयोध्यायाम्	२	१०८	८
समृद्धार्थं च सुग्रीवम्	४	२९	२
समृद्धार्थं समृद्धार्थाम्	६	४	४५
समृद्धार्थस्य सिद्धार्था	३	१८	१०
स मे कपिश्रेष्ठ सलक्ष्मणं०	५	३७	६८
स मे ज्येष्ठसुतः श्रीमान्	२	१२	१७

	का०	स०	श्लो०
समेत्य ते मन्त्रयितुम्	२	२	२०
समेत्य संघशः सर्वे	२	६	२०
स मे नाथो ह्यनाथस्य	१	६२	७
स मे प्रसादं काकुत्स्थ	७	७२	१२
स मेरुशृङ्गाग्रगतामनिन्दिताम्	३	७२	२७
स मे वध्यः खलु भवेत्	७	१०३	१४
स मैथिलीं धर्मपरामवस्थिताम्	५	२२	४६
स मैथिलीं पुनर्वाक्यम्	३	४६	२
सम्यक्प्रतिगृहीतस्तु	३	११	७०
सम्यगुक्तं हि भवता	५	५३	२
स यथा कथितं पूर्वम्	१	३	६
स यथा पुष्पितो भूत्वा	२	१०५	६
स यथा यौवनं भद्रम्	७	४	१६
स याचमानः काकुत्स्थः	२	४५	४
स याच्यमानो गुरुणा	२	११३	६
स यातरतेजसा व्योम	४	५६	१७
स यूपाक्षवचः श्रुत्वा	६	६०	७८
स यूपाक्षोऽभ्युपूर्णाक्षः	६	७६	२८
स योजनसहस्राणि	६	७४	५६
सरः प्रवृत्ता सरयूः	१	२४	१०
सरथं भूपयित्वाथ	६	६०	६०
सरथी धन्विनां श्रेष्ठः	५	४८	१६
स रथेनाग्निवर्णेन	६	८७	८
स रथो राक्षसेन्द्रस्य	३	३१	३५
सरमा नाम धर्मज्ञाम्	७	१२	१५
सरय्वाश्चोत्तरे तीरे	१	८	१२
सरय्वाश्चोत्तरे तीरे	१	१२	४
सरय्वाश्चोत्तरे तीरे	१	१२	१६
स रराज रथे तस्मिन्	६	६६	२८
सरलान्कर्णिकारांश्च	५	२	६
सरतदा मानसं हु	७	१२	२६
सरस्वतीं च गङ्गां च	२	७१	५
स राक्षसगणैर्मुख्यैः	६	६०	११
स राक्षसपरीवारम्	६	१११	१५
स राक्षसरथे पश्यन्	३	५१	६
स राक्षसस्तत्र महानुजस्तदा	७	६	४८
स राक्षसानां कदनम्	६	८२	८

	का०	स०	श्लो०
स राक्षसानां तत्सैन्यम्	६	८६	१६
स राक्षसानां निहतं महाबलम्	५	४२	४४
स राक्षसेन्द्रः शुशुभे	५	२	१२
स राक्षसेन्द्रो हरियूथमध्ये	६	७१	४४
स राघवं समासाद्य	६	६६	२२
स राघवः सत्यधृतिश्च लक्ष्मणः	२	१०४	३२
स राघवः सत्यधृतिः प्रतापवान्	२	८२	२६
स राघवस्तत्र तदा प्रलापान्	२	१६	४३
स राघवाणां कुलधर्ममात्मनः	२	११०	३७
स राजकुलमासाद्य	२	१७	१७
स राजदृष्टिसंपन्नम्	५	१०	११
स राज पुत्रं शत्रुघ्नम्	२	८१	१३
स राजपुत्रः प्रियया विहीनः	३	६३	१
स राजपुत्रो प्रतिवेदितार्थः	५	४०	२५
स राजभवनप्रख्यात्	२	५	१५
स राजमार्गं वपुषा प्रकाशयन्	६	६०	६५
स राजमार्गमध्येन	२	५७	१६
स राजराजो भव सत्यसंगरः	२	२	२६
स राजा तादृशोऽप्यासीत्	६	८७	७
स राजा तेन वाक्येन	७	८६	१५
स राजा पतितो भूमौ	७	१६	२३
स राजा पुत्रमायान्तम्	२	३४	१६
स राजा पुत्रशोकार्तः	२	६३	५
स राजा पुनरेवैतान्	१	५८	७
स राजा पृथिवीं सर्वाम्	७	८७	४
स राजा ब्रह्मदत्तस्तु	१	३३	१६
स राजा रजनीं पश्चीम्	२	६३	४
स राजा रोषताम्राक्षः	५	५०	४
स राजा वीर्यसंपन्नः	७	५५	५
स राजा सगरो नाम	२	११०	२५
स राजा सत्यवाग्देव्याः	५	३३	२२
स राजा सुमहानासीत्	१	४२	२
स राज्यमखिलं शासन्	६	१२८	६१
स राज्ये स्थापितस्तेन	४	५७	१४
स रामं दृश्य सहसा	७	१	११
स रामं मन्त्रिमध्यस्थम्	७	७२	८
स रामं सर्वकामैस्तम्	२	५४	३३

	का०	स०	श्लो०
स रामः सूर्यसंकाशैः	६	८०	२८
स रामः पितरं कृत्वा	२	१९	२९
स रामः स्वर्गतं श्रुत्वा	२	१०३	७
स रामप्रेषितः क्षिप्रम्	२	३४	२
स रामबाणैरतिविद्धगात्रः	६	१०२	७०
स रामभवनं प्राप्य	२	५	५
स राममपि तावन्मे	२	५२	४०
स राममासाद्य तदा	२	३२	३४
स रामस्य वचः कुर्वन्	२	४०	४८
स रामाय नमस्कृत्वा	५	३८	३६
स रामो बहुभिर्बाणैः	३	२८	२५
स रामो रथमास्थाय	२	१७	१
स रामो विविधान्वृक्षान्	३	७५	१३
स रावणं त्रस्तविषण्णचेताः	३	३६	२४
स रावणं महात्मानम्	६	१०	१२
स रावणं वारणहस्तबाहुम्	६	५९	५१
स रावणं शस्त्रभृतां मनस्विनाम्	६	११	३१
स रावणं समागम्य	३	३५	३९
स रावणाय संक्रुद्धः	६	१०४	१६
स राहोर्वचनं श्रुत्वा	६	३५	३६
सरांसि च सुफुल्लानि	२	६८	१४
सरांसि च सुफुल्लानि	६	४	३८
सरांसि सरितो वापीः	४	३०	११
सरितं चापि संप्राप्ता	३	६१	१६
सरितां तु पतिः स्वल्पाम्	२	१४	६
सरितां शरणं गत्वा	३	५४	९
सरिसृपाश्च बहवः	२	२८	१९
स रुदित्वा चिरं कालम्	२	७२	२६
स रुदित्वा चिरं कालम्	७	९८	३
स रोचयामास परैश्च बन्धम्	५	४८	४७
सरो मा वर्धतेत्युक्तम्	७	१२	२७
स रोषसंवर्तिताम्रदृष्टिः	५	४८	६०
स रोषसंवर्तिताम्रलोचनः	५	४४	२०
सर्पमाशीविषं बद्ध्वा	३	५०	१७
सर्पराजो महाघोरः	४	४१	३८
सर्पाः पञ्चानना भूत्वा	३	३१	१९
सर्पैश्चण्डैः खरैश्चैव	६	६५	३५

	का०	स०	श्लो०
सर्वं च तद्विचेतव्यम्	४	४०	२४
सर्वं च सुखदुःखं ते	६	१२४	९
सर्वं चैतद्विनाशाय	६	४	५२
सर्वं चैवाङ्गदे दोषम्	५	६२	३०
सर्वं तत्खलु मे मोघम्	६	६०	५
सर्वं तु दुःखं मम लक्ष्मणेदम्	३	६३	६
सर्वं पुरुषशार्दूल	७	८३	१५
सर्वं पुष्टं प्रमुदितम्	७	११०	१५
सर्वं मुदितमेवासीत्	६	१२८	१००
सर्वं मे शंस भगवन्	१	२८	२०
सर्वं व्यपानयच्छोकम्	३	६४	१३
सर्वं सलिलमेवासीत्	२	११०	३
सर्वं सुराणां कर्मैतत्	१	६३	११
सर्वं एव तु तस्येष्टाः	२	१	५
सर्वं एव समाजग्मुः	७	९६	७
सर्वकामफलैर्वृक्षैः	३	५६	३३
सर्वकामफलैर्वृक्षैः	४	४१	३३
ससर्वकाममृद्धं	६	१२५	१६
सर्वकामैरुपहृतैः	१	१३	३८
सर्वकृत्यानि युष्माभिः	६	१२	८
सर्वक्षपितकोशं च	६	६२	१८
सर्वतश्च महाभीमाः	६	३	१५
सर्वतश्चापि तिष्ठध्वम्	६	७२	१३
सर्वतश्चार्यतां दृष्टिः	३	१५	३
सर्वतोऽग्निं समास्तीर्य	६	८०	८
सर्वत्र कुशलं राजा	१	५२	१०
सर्वत्र खलु दृश्यन्ते	३	६८	२४
सर्वत्रोत्सृष्टदण्डं च	६	२१	१६
सर्वथा कुशलं सूत	११	७१	३१
सर्वथा कृतकार्योऽसौ	५	५७	२३
सर्वथा च महाप्राज्ञ	१	५२	१७
सर्वथातिप्रकृष्टोऽसौ	५	५९	४
सर्वथा तु कृतं कष्टम्	३	५८	१५
सर्वथा तु न गन्तव्यम्	४	६२	१२
सर्वथा तु महत्कर्म	७	२७	१९
सर्वथा तु लघुत्वं ते	३	२९	२०
सर्वथा तेन हीनायाः	५	२५	१७

	का०	स०	श्लो०
सर्वथा त्वपनीतं	३	५६	२८
सर्वथा दुष्कृतं कृतम्	२	५८	२८
सर्वथा धर्म इत्येव	४	१८	२६
सर्वथा निश्चितार्थोऽयम्	४	४४	६
सर्वथा नैतदाश्चर्यम्	४	३२	१०
सर्वथा प्रणयात्क्रुद्धः	४	३२	१२
सर्वथा प्राप्स्यसे पुत्रान्	१	१२	१३
सर्वथा प्रायमासीनान्	४	५७	३
सर्वथा रक्षसा तेन	३	५८	१३
सर्वथा सदृशं सीते	२	३०	४१
सर्वप्रजानिराभं हि	२	५८	३३
सर्वबीजानि गन्धाश्च	२	१४	३५
सर्वभूतकृतं लक्ष्मान्	२	३५	१६
सर्वभूषणभूषार्हाः	४	३	१५
सर्वमङ्गलमाङ्गल्यम्	६	१०५	५
सर्वमर्थं च पूपाश	६	६०	७६
सर्वमन्तःपुरं वाक्यम्	२	५८	१६
सर्वमप्यवकाशं च	५	१२	१७
सर्वमाणु विचेतव्यम्	४	४२	१६
सर्वमानीतमुत्तमम्	१	५३	५
सर्वमुक्तं यथादिष्टम्	६	२०	१५
सर्वमेतत्समालोक्य	४	४१	४६
सर्वमेतान्विचेतव्यम्	४	४३	५६
सर्वमेत महाबाहो	६	१२६	६
सर्वमेतन्महाराज	६	१२	२६
सर्वमेवाभिषेकार्थम्	६	१२८	२५
सर्वरत्नमयः श्रीमान्	४	४१	४०
सर्वराक्षसराजानाम्	५	५६	१८
सर्वर्तुकांश्च देशेषु	४	४७	५
सर्वर्तुकुसुमै रम्यैः	५	१५	५
सर्वर्तुपूपभोग्यत्वात्	७	२	१०
सर्वर्तुसुखसेव्यानि	४	४३	४६
सर्वलक्षणसंपन्नम्	२	६५	१०
सर्वलक्षणसंपन्नम्	३	४७	३४
सर्वलोकप्रभुर्ब्रह्मा	२	२५	२५
सर्वलोकप्रियं स्मृत्वा	२	५८	३२
सर्वलोकस्य धर्मात्मा	४	४	२०

	का०	स०	श्लो०
सर्ववानरमुख्येषु	१	१७	१७
सर्वविद्यान्नतस्नातः	२	१	२०
सर्वशास्त्रार्थतत्त्वज्ञः	१	१	१५
सर्वसंग्रहणं येषाम्	१	२७	२३
सर्वसत्त्वानि यानीह	७	८१	६
सर्वां सागरपर्यन्ताम्	६	८	४
सर्वाः प्रमुदिताः स्वर्गे	७	६६	१६
सर्वाः सेना निवेश्यन्ताम्	६	४	१०१
सर्वाञ्जिघ्यान्नमाहूय	१	५६	७
सर्वाण्यनुचरिष्यामि	३	६४	१५
सर्वात्मना पर्यनुनीयमानः	६	१२८	६३
सर्वानेता विलादस्मात्	४	५२	२७
सर्वान्कामान्यथेच्छसि	७	७८	२५
सर्वान्पुष्पफलोपेतान्	३	१४	३१
सर्वान्भोगान्परित्यज्य	५	१६	१६
सर्वास्समभिधावन्तम्	६	६७	१३७
सर्वास्समागतान्दृष्ट्वा	७	६७	१३
सर्वा पूर्वमियं येषाम्	१	५	२
सर्वाभरणजुष्टाश्च	६	१२८	२२
सर्वाभरणसर्वाङ्गः	६	६५	३१
सर्वायुधसमायुक्तः	६	६६	२१
सर्वायुधसमायुक्तः	६	७१	६०
सर्वावध्यत्वमतुलम्	५	६०	३
सर्वासु विद्यासु तपोविधाने	७	३६	४६
सर्वास्ताः विद्रुता दृष्ट्वा	७	८६	३
सर्वास्त्राणि कृशाश्वस्य	१	२१	१३
सर्वाल्लोकान्समुत्पाद्य	५	५१	३६
सर्वाश्चाहूय सुग्रीवः	४	४५	१
सर्वे धान्यानां निचयाः	२	१०५	१६
सर्वे धान्यानां निचयाः	७	५२	११
सर्वे च ऋतवस्तत्र	३	७३	८
सर्वे च ते बाष्पकलाः	७	४०	२६
सर्वे च हरिणाधूलाः	४	२१	८
सर्वे च ज्ञानोपसंपन्नाः	१	१८	२६
सर्वे तु शिरसा भूमौ	७	४३	२२
सर्वे ते त्वरितं गत्वा	४	१२	१४
सर्वे ते त्वरितं गत्वा	४	१४	१

	का०	स०	श्लो०
सर्वे ते वानरश्रेष्ठाः	६	४६	२
सर्वे नराश्च नार्यश्च	१	६	६
सर्वे परिसृताः शैलाः	४	३७	३६
सर्वे पर्वतसंकाशाः	६	५६	२६
सर्वे प्रमत्ता विश्वस्ताः	६	८	३
सर्वे ब्राह्मया श्रिया युक्ताः	३	६	६
सर्वे भवन्तस्तिष्ठन्तु	६	८	२०
सर्वे भवन्तः सर्वेण	६	६३	३
सर्वे महाराज महाप्रभावाः	६	२७	४८
सर्वे यथा मां वक्ष्यन्ति	५	६४	१६
सर्वे लक्षणसंपन्ना	६	१२८	१०४
सर्वे वयमपि प्राप्ताः	५	६४	२१
सर्वे वानरवृद्धाश्च	६	१२८	८४
सर्वे विकृतलाङ्गूलाः	६	४१	४६
सर्वे विशल्या विरुजाः क्षणेन	६	७४	७०
सर्वे वैश्वानरसमाः	६	२७	४१
सर्वे शृणुत भद्रं वः	७	४५	२
सर्वेषां कपिमुख्यानाम्	५	६०	१८
सर्वेषां देहहीनानाम्	७	५६	८
सर्वेषां नः प्रभुश्चैव	७	११	१०
सर्वेषां समतिक्रम्य	५	६	२८
सर्वेषां समतिक्रम्य	५	५४	१४
सर्वेषां हरिवीराणाम्	५	५७	४५
सर्वेषां स हि धर्मात्मा	२	१७	१५
सर्वेषामेव पर्याप्तः	५	५३	१३
सर्वेषामेव भूतानाम्	७	१६	११
सर्वे सुकृतकर्माणः	१	६२	११
सर्वे सुकृतकर्माणः	४	४३	५०
सर्वे सुबलसंपन्नाः	६	६६	१२
सर्वैः ऋतुशतैरिष्टम्	७	६	३७
सर्वैः परिवृतो देवैः	६	१११	१४
सर्वैरेव समागम्य	३	१०	१०
सर्वैर्ब्रह्मगणैर्युक्ते	७	११०	२०
सर्वोपायं तु वर्तिष्ये	२	८२	१६
सर्वोऽप्यभिजनः श्रीमान्	२	१६	३६
सर्वो हि तपसा देव	७	३०	१५
सर्वौषधिरसैश्चापि	६	१२८	६३

	का०	स०	श्लो०
सर्वौषधीभिर्गन्धैश्च	६	६६	१८
सलक्षणं लक्ष्मणप्रधृष्यम्	४	३०	१६
सलक्षणं लक्ष्मणसंनिधानम्	४	३३	३८
स लक्ष्मणं भीमबलम्	४	३६	४
सलक्ष्मणं राघवमाजिमर्दनम्	५	३७	६७
स लक्ष्मणं शोकवशाभिपन्नम्	३	६३	२
स लक्ष्मणं समुद्दिश्य	६	६०	२२
स लक्ष्मणः कृष्णमृगम्	२	५६	२६
स लक्ष्मणः संवरितः	२	६६	११
स लक्ष्मणश्चापि शिताञ्शि०	६	५६	१०१
स लक्ष्मणस्य रामस्य	२	६६	६
स लक्ष्मणस्योत्तमपुष्कलं वचः	२	५३	३४
स लक्ष्मणो भीमबलम्	४	३८	३
स लक्ष्मणो रावणसायकार्तः	६	५६	१०३
स लङ्घयित्वा प्राकारम्	६	६५	५३
स लङ्घयित्वा प्राकारम्	६	६६	१
स लब्धमानैर्विनयान्वितैर्नृपैः	२	२	५१
स लब्धसंज्ञो गदया	६	५४	२६
स लब्धसंज्ञोऽतिबलः	६	६७	४६
स लम्बशिखरे लम्बे	५	३	१
स ललाटे महावीर्यम्	६	७६	२६
स ललाटे शरो मग्नः	६	७१	७३
सलिलं प्रपतन्त्यन्ये	६	२२	८१
सलिलङ्घयिषुर्भीमम्	५	५६	५१
सलिलेन सहस्राक्षम्	६	१२८	६१
सलोकपालप्रतिमप्रभावः	२	५२	१०१
स लोकानाहिताग्नीनाम्	३	५	४१
स वक्त्र इव दुर्धर्षः	६	१०८	१७
स वध्यमानः सुभृशम्	३	३	२१
स वनानि सुगन्धीनि	२	५१	४
स वराहस्ततो भूत्वा	२	११०	४
स ववर्ष ततो वृक्षान्	६	७०	८
स वाच्यः संश्वरस्वेति	५	३७	७
स वाजिभिश्चतुर्भिस्तु	६	८०	१२
स वाजियुक्तेन रथेन सारथिः	२	१५	४०
स वाजिरथमातङ्गा	५	४६	११
स वानरगणैस्तैस्तु	६	६७	१३५

	का०	स०	श्लो०
स वानरमहाराज:	४	१६	१
स वानरवर: श्रीमान्	६	२२	६६
स वानरसहस्राणाम्	५	३६	३४
स वानरसहस्राणाम्	५	५६	१६
स वानरसहस्रैस्तु	६	६७	३३
स वानरानिमान्सर्वान्	५	६२	३२
स वानरान्सप्त शतानि वीर:	६	६६	६७
स वायुमार्गमास्थाय	७	३३	३
स वायुसूनु: कुपित:	६	७०	३३
स वारिधारा इव सायका०	६	६७	१५२
स वार्यमाणो यक्षेण	७	१४	२६
सवालव्यजनं छत्रम्	२	११५	२२
स वाली गात्रसंवीत:	४	१६	१७
स विज्ञाय मनश्छन्दम्	६	११६	२१
स विद्धो दशभिर्बाणै:	६	१००	११
स विद्धो न्यस्य वैदेहिम्	३	३	१३
स विद्धो बहुभिर्बाणै:	३	४	८
स विद्युज्जिह्वेन सहैव त०	६	३१	४५
स विधूय चितामाशु	३	७२	४
स विनद्य महानादम्	३	३	१४
सविभीषणसुग्रीवा:	६	२३	१५
स विमुक्तो महाबाण:	३	३०	२६
स विरूपाक्षयूपाक्षौ	५	४६	२
स विमुच्य ततो राम:	७	४२	१
स विमृष्टो बलवता	४	१२	३
स विमृष्टो महावेग:	६	१०८	१८
स विस्फार्य तदा चापम्	६	७१	५
सविस्फुलिङ्गं सज्वालम्	६	७०	२२
स विहायेमं लोकम्	७	६१	१६
स विहायोत्तरीयाणि	५	३३	२६
स विह्वलं तदा लक्ष्य	७	३२	६३
स विह्वलितसर्वाङ्ग:	३	६१	२८
स वीक्षमाणस्तत्रस्थ:	५	१५	१
स वीरशयने शिश्ये	६	४५	२४
स वीरशोभामभजन्महाक०	६	५६	३८
स वीरो वज्रसंकाशम्	६	६८	२०
स वीर्यमस्त्रस्य कपिर्विचार्य	५	४८	४२

	का०	स०	श्लो०
स वीर्यवान्कथं सीताम्	५	४०	६
स वीर्योत्सेकदुष्टात्मा	४	११	८
स वृक्षं तं महाबाहुम्	५	६२	१५
स वृक्षखण्डांस्तरसा जहार	६	७४	४६
स वृक्षाग्रे यथा सुप्त:	४	३८	२२
स वृक्षेण हस्तेन	६	५६	३०
स वृत्र इव वज्रेण	३	३०	२८
स वृष्यमाणो बाणौघै:	६	७१	६५
स वेग: रार्तवीर्येण	७	३२	७
स वेगवान्महावेगम्	६	७०	१३
स वेगवान्वेगवदभ्युपेत्य	६	७०	५८
स वेगवान्वेगसमाहितात्मा	४	६७	४६
स वेश्मजालं बलवान्ददर्श	५	७	१
स वै गदाभिर्हरियूथमुख्याम्	६	७३	६२
सर्वैजयन्तास्तु गजा:	२	८६	१६
स वै दत्तवर: शैल:	५	१	१३६
सख्यं कृत्वा महात्मानम्	३	५७	१३
सख्यमुष्टिप्रहारेण	५	५८	५०
सख्येनरक्तकराङ्गुल्या	७	३२	११
सन्नद्धै: प्रथमं गात्रै:	६	१२०	१७
सन्नीरुध इव सवृत्त:	१	६३	१०
स शक्तिमाञ्शक्तिसमाहत:	६	५६	१०८
स शक्रेण समागम्य	६	१२६	५१
स शङ्खनिनदै: पूर्णै:	६	७३	१३
सशङ्खभेरीपणवप्रणादम्	६	६०	३८
स शङ्खभेरीपणवप्रणादै:	६	५६	८
स शङ्खरुक्मनिबर्णेन	६	७३	१४
सशब्दां द्यां च भूमिं च	२	६१	२७
स शम्बर इति ख्यात:	२	६	१३
स शरान्वव्यचयामास	५	४५	६
स शरीरस्य भद्रं व:	१	६०	२७
सशरीरा गता स्वर्गम्	१	३४	८
स शरै: पूरिततनु:	५	४४	१५
स शरै: शरजालानि	६	१०३	५
स शरै: सूर्यसंकाशै:	६	७३	३५
स शरै: सूर्यसंकाशै:	६	७३	४७
सशररतिविद्धाङ्ग:	६	८८	२०

	का०	स०	श्लो०
सशरैरद्य वदनैः	६	६५	१६
सशरैरभिविद्धाङ्ग	६	४३	३४
स शरैरभिविद्धाङ्गः	३	२८	१६
स शरैराहतस्तेन	६	८८	३२
स शरैभिन्नसर्वाङ्गः	६	१०२	६६
स शरो रावणं हत्वा	६	१०८	२०
स शरौघसमायस्तः	६	५	७४
सशल्यः स समासाद्य	६	१०१	४४
स शतीं परितः कटचाम्	२	३२	३७
स शिष्यहस्तादादाय	१	२	८
सशिष्यान्सुहृदश्चैव	१	५६	८
सशिष्यावब्रवीद्धृष्टौ	७	६३	४
स शून्यामिव निःशब्दाम्	२	५७	६
स शूरः पुरुषव्याघ्रः	२	४४	१२
स शूलनिर्भिन्नमहाभुजान्तरः	६	६७	२०
स शूलनिस्त्रिंशपरश्वधानि	६	७३	५५
स शूलमाविध्य तडित्प्रकाशम्	६	६७	१६
स शैलजीमूतनिकाननाम्	६	५६	६
स शैलशिखराभेण	७	१४	२८
स शैलशृङ्गाभिहतश्चुकोप	६	६७	६१
स शैलशृङ्गाभिहतो विसंज्ञः	६	६७	६७
सशैलसागरानूपम्	३	३५	११
स शोणितसमादिग्धः	६	१०३	७
स श्रुत्वा पुरुषव्याघ्रम्	२	५०	३४
स श्वेतबालव्यजनः	३	३५	८
स षट् चाष्टौ च वर्षाणि	२	२०	३१
स संक्षिप्यात्मनः कायम्	५	१	१५६
स सङ्ग्रामो महाभीमः	६	६३	८
स सत्यवचनादीना	१	१	२३
स सत्यवचनाद्धीरः	२	११०	१२
स सत्यवाक्यो धर्मात्मा	२	३४	६
स सप्त कक्ष्या धर्मात्मा	४	३३	१६
स समर्थो महाप्राज्ञः	४	११	२२
स समाश्वासितस्तेन	५	६३	४
स समीपस्थितो राज्ञः	२	१४	४५
स समृद्धां मया सार्धम्	२	१०२	३
ससर्ज निशितान्बाणान्	३	२५	१७

	का०	स०	श्लो०
स सर्वमखिलं राज्ञः	७	५१	२३
स सर्वाः समतिक्रम्य	२	१७	२१
स सर्वा देवतास्त्यक्त्वा	७	२६	२२
स सर्वा सान्त्वयामास	६	६०	५६
स सर्वाभरणैर्युक्तः	५	१८	६
स सर्वाश्च दिशो बाणैः	३	२८	६
स संज्ञा प्राप्य तेजस्वी	६	७६	३
स संज्ञां प्राप्य तेजस्वी	६	७६	२७
स संज्ञा इव तत्रासन्	१	७४	१६
स संज्ञामुपलभ्यैव	२	६२	३
स संतीर्य महाबाहुः	२	४६	२६
स संत्रस्य महातेजान्	६	७१	८०
स संप्रतस्थे धर्मात्मा	२	६३	३
स संप्रहारस्तुमुलः	३	२७	१०
स संप्रहारस्तुमुलः	३	५१	२
स संप्रहारस्तुमुलः	६	४७	४७
स संप्रहारस्तुमुलः	६	८६	६
स संप्रहारस्तुमुलः	६	८६	२४
स संप्राप्य चिरात्संज्ञाम्	६	७०	५७
स संप्राप्य धनुष्पाणिः	६	८५	३४
स संप्राप्य महातेजाः	६	७३	१७
स संभ्रमं त्रस्तविषण्णराक्ष०	५	५४	४२
स संभ्रान्तश्च निष्क्रान्तः	६	३३	७
स संरब्धस्तु सौमित्रिः	६	६०	५५
स संविशद्भिर्बहुभिर्गोधरः	४	५५	३३
स सागरं घूर्णितवीचिमालम्	६	७४	४८
स सागरं दानवपन्नगायुतम्	५	१	२०
स सागरजलं भित्त्वा	५	१	६५
स सागरमनाधृष्यम्	५	१	१६
स सागरमनाधृष्यम्	५	२	१
स सागरवनां कृत्स्नाम्	४	३	१६
स सायकार्तो विपरीतचेताः	६	५६	४१
स सायकैर्दुर्विषहैः	३	२८	७
स सायको राघवबाहुचोदितः	६	६७	१६६
स सायको रावणबाहुमुक्तः	६	५६	४०
स सारथिमुवाचेदम्	६	५६	२६
स सालवृक्षमासाद्य	५	४६	३२

	का०	स०	श्लो०
स सिद्धदेवर्षिमहोरगैश्च	७	६	६८
स सीतामार्गणे व्यग्र:	५	५१	१२
स सुग्रीवं च तारां च	४	२५	१
स सुग्रीवस्य सङ्ज्ञानम्	६	१८	२१
स सुतीक्ष्णकृतसोदानै:	१	७२	२५
स सुधाकुट्टिमतल:	२	८०	१३
स सुरेन्द्रेण संयुक्त:	३	३१	१३
स सुवर्णलक्ष्मि: श्रीमान्	५	३५	२३
स सुहृज्जनसामान्य	२	३१	३२
स सुहृदो विपुलार्थम्	६	६३	२७
स सूनुर्दो भरतेन गच्छन्	२	८२	३१
स सूतो रामसादाय	२	३४	१५
सगूढवृत्तार्थपदं महार्थम्	६	३६	४५
स सूर्याय महेन्द्राय	५	१	८
सगैन्यस्ते हता वीरा:	६	७२	४
सगैन्यस्य तदाशिष्यम्	६	१२७	२७
सगैन्यान्त: गच्छाम:	६	८४	१६
सगोमहनक्षत्रै:	६	१२	६
स सौष्ठवोपेतगतीनवाहन:	५	५१	४५
सस्फुलिङ्गै: सधूमार्चि:	६	१०	१५
स स्नानविनीतस्य	२	२०	२६
स स्वपृत्ति समास्थाय	२	७२	५०
स स्वपेक्षाभ्यतिक्रम:	२	७०	२६
स स्वस्थो भव मा शोक:	२	१०५	३६
स हतस्तरसा तेन	५	४४	१८
स हत्वाऽस्य रामेण	१	७६	२२
सह ताराङ्गदाभ्यां तु	४	४८	१
सह ताराङ्गदाभ्यां तु	४	५०	१
स हताश्वादवप्लुत्य	६	९९	५२
स हताश्वादवप्लुत्य	६	९०	४२
स हताश्वो महातेजा:	६	९०	१
स हतो मन्दबुद्धि: स्यात्	७	६८	१९
सह त्वया विशालाक्ष	२	२७	२०
स हत्वा राक्षसान्वीर:	५	४२	४२
स हत्वा राक्षसान्सर्वान्	१	३०	२४
स हत्वा तस्य सैन्यस्य	३	३६	११
सह राक्षसराजेन	५	२४	३६
सह राघव वैदेह्या	२	५२	१८
सह रामेण निर्यात:	२	५७	२१
स हरीन्द्रप्रतिसंमुक्तान्	४	५९	५
स हर्षवेगानुगतान्तरात्मा	६	४६	४८
स हविर्लाजसत्कारै:	६	७३	१९
सह शूरैर्हयगणै:	६	५०	२४
सह सर्वै सुरगणै:	१	६०	१७
सह सर्वैर्द्विजश्रेष्ठै	१	६९	११
सह सर्वैर्हरिश्रेष्ठ:	६	४१	४२
सह सद्भावभावेन	६	११६	१०
सहसा सं समुपस्तम्	५	५८	१२६
सहसा चरितां स्थानात्	२	११८	११
सहसा तत्र निष्क्राम:	४	१५	९
सहसा पतिता भूमौ	७	२४	२५
सहसा पिबतुर्दृष्टिम्	४	५२	२९
सहसाभिहतस्तेन	६	७६	४१
सहसाभ्युत्तितो वेगात्	६	२२	१५
सहसा युद्धशौण्डेन	२	११४	१७
सहसा शोकमुत्सृज्य	४	६७	२
सहसा स तदोत्पत्य	६	९६	२५
सहसोत्थाय संभ्रान्त:	५	२७	२४
सहस्त्रीबालवृद्धाश्च	५	५३	१०
सहस्रबाहोस्तुल्यद्ध्	७	३२	५०
सहस्ररश्मिर्भगवान्	१	२२	२३
सहस्रशिरसं विष्णुम्	४	४१	८
सहस्रशृङ्गो वेदात्मा	६	११७	१८
सहस्राक्षवच: श्रुत्वा	७	८५	३
सहस्राक्षस्य तत्सर्वम्	१	६४	११
सहस्राक्षेण काकुत्स्थ	६	१०२	१४
सहस्राण्यपि मूर्खाणाम्	२	१००	२३
सहामीभिस्त्वया लङ्का	६	१२२	५
सहायकृत्यं किं तस्य	४	३६	८
सहायं वरयामास	१	१	५०
सहायार्थं तु तस्यैव	६	४२	२४
सहायेन तु सुग्रीव	४	३६	१५
स हि कल्याणचारित्र:	२	४५	७
स हि क्रोधसमाविष्ट:	७	२८	१२

	का०	स०	श्लो०
स हि चान्तःपुरे घोरम्	२	२०	७
स हि तं प्रतिजग्राह	६	१८	२५
स हि तस्यापि संगृह्य	४	६६	२२
स हि तारयितुं सौम्य	७	७८	१६
स हि तेपे तपस्तीव्रम्	१	१६	४
स हि तेपे तपस्तीव्रम्	३	२	१२
सहितो मन्त्रयित्वा यः	६	६	८
सहितौ मधुरं रक्तम्	१	४	१६
सहितौ रामसुग्रीवौ	५	३५	४८
स हि देवरसंयुक्तः	३	५६	१४
स हि देशस्तु वध्यस्य	४	४१	२५
स हि देशो दुरन्वेष्यः	४	५०	४
स हि देशो नरव्याघ्रः	१	३६	६
स हि धूमान्धकारं च	६	८०	२५
स हि नाथः स चास्माकम्	२	६६	२०
स हि प्रमादे चात्यर्थं	४	६५	३१
स हि प्राप्तं न जानीते	४	३५	८
स हि ब्रह्मास्त्रवित्प्राज्ञः	६	८५	१८
स हि मायाबलः क्रूरः	६	३४	८
स हि मे समयः सौम्य	५	३	४८
स हि योधान्हतान्मत्वा	३	२२	२
स हि राजगुणैर्युक्तः	२	४५	६
स हि राजसुतः पुत्रः	२	७२	४२
स हि राजा दशरथः	२	३	२
स हि राज्यस्य सर्वस्य	२	५३	१२
स हि राज्याच्च विभ्रष्टः	४	४	२७
स हि रूपोपपन्नश्च	२	१	६
स हि शूरो महाबाहुः	२	४८	१६
स हि सागरपर्यन्तम्	५	३६	१७
स हि सोमगिरिर्नाम	४	४३	५७
स हेमजालविततम्	६	११	३
स हेमजालविततम्	६	६२	३
स हेमनिष्काङ्गदचारुकुण्डलः	५	४७	१२
सहैभिर्वनचारिभिः	५	६३	६
सहैव मृत्युव्रजति	२	१०५	२२
संकीर्णं बदरीभिश्च	१	२४	१६
संकुलं दानवेन्द्रैश्च	४	६४	६

	का०	स०	श्लो०
सकेताद्भरतेन त्वम्	३	५६	१८
संकुद्धमभिधावन्तम्	७	१५	१३
संक्षिप्तोऽयं मयात्मा च	५	१३	६२
संक्षिप्य मुहुरात्मानम्	५	१	१८४
संक्षिप्य हि पुरा लोकान्	७	१०४	४
संक्षेपस्त्वेष मे राम	४	८	३८
संख्ये तस्य न किंचित्तु	७	१	२५
संख्ये प्रहस्तं निहतं निशम्य	६	५६	३
संगच्छ शूलमादाय	६	६५	१३
संगतस्तु महाक्रोधः	६	४३	८
संगता मुनयः सर्वे	१	७४	२१
संगत्यां भरतः श्रीमान्	६	१२५	१७
संगृहीतमनुष्यश्च	२	६	३५
संगृह्य तं तु दौहित्रम्	७	२८	२०
संगृह्य पादौ पितुरुग्रतेजाः	४	३१	३७
संग्रहानुग्रहं रतः	५	३५	२१
संग्रामे समुपोढे च	२	७५	३६
संचचाल [illegible]लवंगानाम्	६	७५	५६
संचिताश्चास्य वित्तानि	२	७५	४३
संचिन्त्यतां हि पिङ्गेश	४	३८	२४
संत्रोदितो रथः शीघ्रम्	३	२२	२३
संछिन्नबाहोः सद्यो वै	३	५१	३६
संजीवनार्थं वीरस्य	६	१०१	३२
संजीवितं क्षिप्रमहं व्यजेष्यम्	५	२८	१६
संज्ञा तु प्रतिलभ्यैव	२	३६	६
संतताम्बिविधैर्वृक्षैः	५	२	१३
संतता शुशुभे भूमिः	५	११	२४
संतानकलताभिश्च	५	१५	२
संतापयति सौमित्रे	४	१	३६
संतापस्य च ते स्थानम्	६	२	३
संतार्यमाणान्वैतरणीम्	७	२१	१४
संतुष्टपञ्चवर्गोऽहम्	२	१०६	२७
संतुष्टस्तेन वाक्येन	६	१०४	२४
संतुष्टः प्रददौ तस्मै	१	१६	५
संतुष्टा फलमूलेन	५	१६	२०
संत्यज्य सर्वकर्माणि	४	२६	१३
संत्रस्तहृदयाः सर्वे	६	५१	१०

	का०	स०	श्लो०
संदधानो हि कालेन	६	३५	८
संदधे धनुषि श्रीमान्	३	६४	७४
संदर्शयामास तदा	६	६०	२४
संदश्य दशनैरोष्ठम्	६	६५	३
संदिदेश दशग्रीवः	५	४६	३
संदिदेशाविमतिमान्	४	६६	२६
संदिश्य राक्षसान्घोरान्	३	५५	१
संदिश्य रामं नृपति.	२	५	१
संदिष्टो राक्षसेन्द्रेण	५	४४	१
संदिष्टौ मुनिना तेन	७	६३	१७
संदीप्यमानां विश्वरताम्	५	५५	१
संदृश्य न प्रकम्पन्ते	३	४६	७
संधाय चान्यं गुरुराम्	६	७६	४४
संधाय सदृढं चापे	३	४४	१४
संध्यया चावृता लङ्का	६	१०६	२३
संध्याकालघना: श्यामा	५	१४	४६
संध्यागतमिवादित्यम्	७	४४	१६
संध्यानुरक्ते जनदे	६	१११	८८
संध्यामुपासितुं वीर	७	८१	२१
संध्यामुपास्य विधिवत्	७	३६	६१
संध्यारागोत्थितैस्ताम्रै:	४	२८	५
संनतिश्च प्रभावश्च	६	७६	७१
संनद्धस्तु महावीर्य:	६	४२	३०
संनद्ध: कवची खड्गी	६	८५	२५
संनह्य तु सुग्रीव:	६	४१	२५
संनाहजननी क्षिप्रा	६	३३	२१
संनिकर्षं तु न: शूर	३	२४	८
संनिदेशे पितुस्तिष्ठ	२	१८	३५
संनिपत्य च रक्षांसि	६	६५	४२
संनिपातस्तदोग्रश्चासीत्	६	६०	५२
संनिबद्धं हि श्लोकानाम्	७	६४	२५
संनियच्छति मे क्रोधम्	५	२२	३
संनिरुद्धग्रहगणम्	३	६४	६०
संनिवर्त्य परानीकम्	६	८२	२०
संनिविष्टं गिरौ तस्मिन्	७	१४	४
संनिविष्टं समुद्रस्य	६	३१	१६

	का०	स०	श्लो०
संनिवेश्य सतां सेनाम्	२	८५	१५
संपतद्भिरयोध्यायाम्	२	११४	२७
संपन्त्यथ भूतानि	७	६	५६
संपन्नं राज्यमिच्छंस्तु	२	६६	१७
संपन्नानि सुगन्धीनि	३	४६	२६
संपन्नां श्रियमन्विच्छन्	२	८४	५
संपपात त्रिधा छिन्ना	६	१००	२१
संपरिक्रम्य हनुमान्	६	१३	२
संपतिर्नाम नाम्ना तु	४	५६	२
संपातिवचनाच्चापि	५	१३	५१
संपातिस्तु प्रजङ्घेन	६	४३	२०
संपातेर्वचनं श्रुत्वा	४	६४	२
संपीड्य च धनुर्घोरम्	६	२१	२६
संपीड्योरसि सस्कन्धम्	६	७६	५३
संपूज्यमानो यातस्तु	७	३४	२८
संपूर्णमपि चेदद्य	३	६७	२५
संपूर्णं गिरिसंकाशम्	७	६	६६
संपूर्णां प्राविशद्राजा	१	७७	८
संपूर्णां राक्षसवरैः	५	२	२४
संपूर्णौ निशितैर्बाणै.	३	७२	३४
संपृक्तं नभसाप्यम्भः	६	४	११६
संपृष्टेन तु वक्तव्यम्	३	४०	६
संपृष्टो राजपुत्रेण	६	६१	८
संप्रत्यनाथो विषयः	७	७३	१५
संप्रत्यनेकाश्रयचित्रशोभा	४	४०	२६
संप्रत्येतावदेवाद्य	४	६५	१७
संप्रदीप्तोऽभवत्क्रोधात्	६	१०७	१४
संप्रधृष्य च दुर्धर्षः	५	४३	५
संप्रयुद्धौ तु तौ दृष्ट्वा	६	१०७	३
संप्रविध्यथिरे चापि	६	२२	१४
संप्रविश्य यथान्यायम्	६	११३	३
संप्रवृत्ता निशा सीते	२	११६	६
संप्रसक्तस्य वैरस्य	४	२३	२३
संप्रस्थिता मानसवासलुब्धाः	४	२८	१६
संप्रस्थितस्तदा मेघः	६	६७	६६
संप्रहर्षकरः श्रीमान्	७	६३	१४
संप्रहारस्तु सुमहान्	३	२४	७

	का०	स०	श्लो०
संप्रहृष्टजनाकीर्णम्	२	७	५
संप्रहृष्टमना भूत्वा	७	८७	२६
संप्रहृष्टा वचः श्रुत्वा	३	२२	६
संप्रहृष्टाः कथाः शुभाः	२	६१	६१
संप्राप्तमवमानं यः	६	११५	६
संप्राप्तोऽभिनदंस्तस्य	४	३६	३७
संप्राप्तोऽयमरिर्वीर	२	६६	२३
संप्राप्य त्रिदिवं जग्मुः	७	११०	२५
संप्राप्यैते महात्मानः	७	१	७
संभारानभिषेकस्य	७	६३	१०
संभारा सम्नियन्तां ते	१	८	१२
संभ्रमश्च च कर्तव्यः	६	११८	१२
संभ्रमस्त्यज्यतामेषः	४	२	१४
संभ्रमाच्चाब्रवीद्राम	६	११४	२५
संभ्रमात्तु दशग्रीवः	३	५४	४
संभ्रमो रक्षसामेष	६	३३	२६
संभ्रान्त शोकवेगेन	२	६३	३५
संभ्रान्तःमनसः सर्वे	१	१८	४१
संभ्रान्तश्च सुराः सर्वे	४	६६	२६
संमतस्त्रिषु लोकेषु	२	१	३२
संभतः सर्वलोकस्य	१	३८	२३
संमार्गिता कथं देवी	५	५८	५
संमार्जनविहीनानि	२	७१	३७
संमूढ इव दुःखेन	७	४८	२४
संमूढनिगमां सर्वाम्	२	११४	१३
संयुगे युगसंकाशम्	६	२१	६
संरक्ततरमत्यर्थम्	१	४	२०
संरक्तनयनः क्रोधात्	६	६२	११
संरक्तनयनः क्रोधात्	७	८	२
संरक्तनयनः श्रीमान्	३	४६	७
संरक्तनयनः श्रीमान्	४	३४	५
संरक्तनयना घोरा	३	२०	१२
संरक्तनेत्रः शिथिलाम्बर०	२	७४	३६
संरब्धतरमत्यर्थम्	१	५३	१७
संरुद्धस्तैस्तु परितः	५	३०	२८
संरूढकक्ष्यां बहुलाम्	३	५४	१३
संवर्त इव लोकानाम्	७	२२	१८

	का०	स०	श्लो०
संवर्तो नाम ब्रह्मर्षिः	७	१८	३
संवासात्पुरुषं किंचित्	२	३६	३८
संवाहन्यः समाषेतु	२	६१	५४
संविधानं यथाहुस्ते	६	३७	६
संविधास्यति कार्याणि	६	२६	६
संविवेशावला भूमौ	२	१०	६
संवृतं स्वैरथानीकैः	७	२७	४४
संवृतानि च भूतानि	६	५५	२०
संवृतान्भूमिभागांश्च	५	५३	२०
संवृतो राक्षसेन्द्रस्तु	७	३२	२३
संवृत्तौ परिघाकारौ	५	१०	१८
संवेश्य शयने चाग्र्ये	२	७६	५
संवेष्टितमिवात्यर्थम्	३	६६	२५
संवेष्ट्यमाने लाङ्गूले	५	५३	७
संशयश्च जये नित्यम्	७	१८	१७
संशयस्थमिदं सर्वम्	६	६४	१६
संशये स्थाप्य मां वेदम्	६	४१	३
संश्रित्य गृह्णता पाणिम्	६	३२	२१
संश्रुत्य च तपस्विभ्यः	२	७५	२६
संश्रुत्य च पितुर्वाक्यम्	२	२१	४२
संश्रुत्य शैव्य श्येनाय	२	१४	४
संसृज्य बाणवर्षं च	६	७३	५०
संस्कारक्रमसंपन्नाम्	४	३	२२
संस्कारयितुमारेभे	६	१११	१०३
संस्कारः क्रियतां भ्रातुः	६	१११	६२
संस्कारास्त्वभवन्वेदा	६	११७	२५
संस्कार्यो हरिराजस्तु	४	२१	११
संस्कृत्य बालिनं तं तु	४	२५	५१
संस्तम्भ राम भद्रं ते	४	१	११५
संस्तूयमानो हनुमान्	४	६७	४
संस्मराम्यस्य वाक्यानि	३	१६	३६
संस्मृत्य कालवाक्यानि	७	१०५	१६
संहर्षयति तान्सर्वान्	६	५५	२६
संहृत्य च भुजौ श्रीमान्	५	१	३४
संहृत्य वा पुनर्लोकान्	३	३१	२६
संहृत्यैव शशिज्योत्स्नाम्	३	६४	५७
संहृष्टा दर्शयामासु	५	३५	३८

	का०	स०	श्लो०
संह्रादिः प्रथमश्चैव	७	५	४०
संह्रादी विकटोऽरिघ्नः	६	८९	१२
संह्रादो धूमकेतुश्च	७	२७	२९
सा कथं ह्याश्रमे सौम्य	७	४८	६
सा कोसलेन्द्रदुहिता	२	९५	२३
साक्षाद्वैश्रवणभ्राता	१	२०	१८
सा क्षिप्ता भीमवेगेन	६	१००	३२
सा क्षिप्ता राक्षसेन्द्रस्य	६	१०२	६६
सा क्षौमवसना हृष्टा	२	२०	१५
सागरं नाम्बरप्रख्यम्	६	४	११५
सागरं सागरानूपान्	५	१	१९४
सागरः समयं कृत्वा	२	१२	४४
सागरप्रतिमौघेन	६	५७	३२
सागरश्च मयाक्रान्तः	५	१६	१२
सागरस्य च तीरेषु	६	३१	३५
सागरस्य जलं लोके	१	४४	४
सागरस्येव मे वेगः	६	१३	१६
सागरस्येव मे वेगः	६	२४	४०
सागरस्योत्तरे तीरे	६	२४	२७
सागरस्योर्मिजालाम्	५	१	६७
सागराः क्षुभिताः सर्वे	१	६५	१४
सागरानूपजेदेशे	५	१३	३९
सागरानिव संक्षुब्धौ	७	३२	५१
सागरे पतिताः केचित्	६	३१	३४
सागरे सेतुबन्धं तम्	६	२५	३
सागरोऽप्यतियाद्वेलाम्	५	५९	१३
सागरौघनिभं भीमम्	६	४	१४
सागरौघनिभं भीमम्	६	७४	१३
सागरौघनिभा सेना	२	९३	४
सा गृहीतातिचुक्रोश	३	४९	२१
सा घूर्णितमहाद्वारा	६	७४	४०
सा च कामैः प्रलोभ्यन्ती	४	६२	७
सा च तं प्रणता भूत्वा	१	३३	१३
सा च दैवतकार्येण	७	१२	८
सा चित्रकूटे भरतेन सेना	२	९७	३१
सा चिरस्यात्मजं दृष्ट्वा	२	२०	२०
साचिव्यमिव कुर्वन्तः	५	१७	२

	का०	स०	श्लो०
सा ज्वलन्तीव रोषेण	७	१७	२८
सा तं जलाशयं सर्वम्	७	८८	११
सा तं समीक्ष्यैव भृशं विपन्ना	५	३२	८
सा तं संप्रेक्ष्य सुश्रोणी	३	४३	१
सा तं हरिवरं दृष्ट्वा	५	३	२१
सा तथोक्ता तु वैदेही	३	५६	१
सा तथोक्त्वा महाराजम्	२	५७	३२
सा तदर्थमना देवी	२	११	११
सा तदा करुणा वाचः	३	४९	३६
सा तदाश्रुतपूर्वं हि	६	११६	२
सा तदा समलंकृत्य	२	११९	१२
सा तप्ततपनहेमाभा	६	११६	२९
सा तमार्तस्वरं श्रुत्वा	३	५९	८
सा तमुत्तमसंविग्ना	२	३०	२
सा तमुद्वीक्ष्य सुश्रोणी	३	४९	३७
सा तयोः कुशलं देवी	५	३४	५
सा तस्य धर्मार्थसमाधियुक्तम्	४	३३	५०
सा तस्य रौद्रा समुपेत्य देहम्	६	७०	६२
सा तस्य वचनं श्रुत्वा	४	२१	१२
सा तस्य वचनं श्रुत्वा	५	३३	१४
सा तस्य शुशुभे शाला	५	९	४०
सा तस्योपरि चोल्काभा	७	२७	४९
सा तस्योरसि विस्तीर्णे	७	८	१३
सा तानि शरजालानि	३	५१	१३
सा तिर्यगूर्ध्वं च तथा ह्य०	५	३१	१८
सा तु कृत्वाञ्जलिं दीना	७	२	२०
सा तु चिन्तयते नित्यम्	६	४८	२१
सा तु तत्रैव संभ्रान्ता	४	६६	१६
सा तु तद्वचनं श्रुत्वा	७	९	१४
सा तु ताराधिपमुखी	३	५२	१
सा तु नीलेन विधिवत्	६	५	१
सा तु रावणवेगेन	३	५२	२७
सा तु वेदश्रुतिं श्रुत्वा	७	२	१७
सा तु शूर्पणखा नाम	३	१७	६
सा तु शोकपरीताङ्गी	३	५६	३४
सा तु सत्यवती पुण्या	१	३४	११
सा तेन शापेन जगाम भूमिम्	७	५६	२९

	का०	स०	श्लो०
सा तेनेक्ष्वाकुनाथेन	१	६	२०
सा तोलिता बलवता	६	१०२	६५
सा त्वं धर्मपरा नित्यम्	२	६२	६
सा त्वं भव सुविस्रब्धा	६	४८	२८
सा त्वं मुनिवरं श्रेष्ठम्	७	६	१२
सा त्वं वसेह कल्याणि	२	२६	३७
सा त्वमग्निं प्रविश वा	२	७४	३३
सा त्वमभ्युदये प्राप्ते	२	८	१७
सा त्वस्माद्विलादस्मान्	४	५२	२३
सा त्वया धर्षिता शक्र	७	३०	३०
सा त्वया समतिक्रान्ता	१	४४	१२
सा त्वशोकस्य विपुलाम्	५	२५	६
सा त्वां देवि नमस्यामि	२	५२	८७
सा त्वां सुप्तं प्लुतं ज्ञात्वा	६	३२	२७
सा त्वेवमुक्ता धर्मज्ञा	२	११८	१७
सा त्वेवमुक्ता वैदेही	२	११८	१७
साऽथ दृष्ट्वा हरिश्रेष्ठम्	५	३२	३
सा ददर्श कपिं तत्र	५	३२	२
सा ददर्श ततस्त्रस्तान्	४	१६	६
सा ददर्श विमानाग्रे	३	३२	४
सा ददर्श सखी सीताम्	६	३३	४
सा दर्शनं पुरा सीता	७	६८	५
सा दह्यमाना क्रोधन	२	७	१३
सा दीना निश्चयं कृत्वा	२	१०	३
सा दुःखभारावनता यश०	७	४८	२६
सा दुःखैर्विविधैर्मुक्ता	५	५८	६०
सा दृष्ट्वा कर्म रामस्य	३	३२	३
साधनानि मुनिश्रेष्ठ	१	६६	२३
साधुकारश्च सुमहान्	७	६७	२१
साधु किं तेऽन्यथाबुद्धयो	३	५५	१८
साधु कृत्वाऽऽत्मनः पथ्यम्	३	५३	१३
साधु क्रोधमिमं वीर	४	१५	७
साधु घातय मां क्षिप्रम्	६	३२	३१
साधु ते तत्त्वतो देवि	५	२३	१६
साधु धर्ममवेक्षस्व	५	२१	७
साधु पर्याप्तमेतावत्	७	१३	१८
साधु पश्यामि ते रूपम्	५	२०	२२

	का०	स०	श्लो०
साधु बाणनिपातेन	६	७१	७५
साधु राघव मा भूत्ते	२	१०८	२
साधु रामेति केचित्तु	७	६६	१३
साधु रावण रामेण	५	२१	१८
साधुर्वा यदि वाऽसाधुः	५	५२	१६
साधु लक्ष्मण तुष्टोऽस्मि	६	६१	८
साधु साध्विति काकुत्स्थम्	१	२६	२७
साधु साध्विति तावूचुः	१	४	१६
साधु साध्विति देवस्ताम्	१	४६	२०
साधु साध्विति संहृष्टाः	५	६२	५
साधु सैन्याः प्रतिष्ठन्ताम्	२	६३	२०
साधु सौम्या निवर्तध्वम्	६	६६	६
साध्याश्च देवाः सर्वे ते	७	६७	८
साध्वत्र प्रविशामेति	४	५२	१३
साध्वर्थमभिसंधाय	२	१०६	१८
साध्वीनां तु स्थितानां तु	२	३६	२४
साध्वेनमधिरोहन्तु	६	६७	१२८
सा ननाश मुहूर्तेन	६	५७	४०
सा निःश्वसन्ती शोकार्ता	५	२५	१०
सा निकृत्तेव सालस्य	२	२०	३२
सानुक्रोशां वदान्यां च	२	७८	१५
सानुक्रोशो जितक्रोधः	२	१	१५
सानुक्रोशो महोत्साहः	४	१७	१८
सा नूनं जनकस्येष्टा	२	४२	१६
सा नूनं तरुणी श्यामा	२	६१	४
सा नूनं नगरी दीना	२	४७	१०
सा नूनमसितापाङ्गी	६	५	१५
सा नूनमार्या मम राक्षसेन	३	६३	७
सान्त पुरश्च भरतः	७	१०६	११
सान्तःपुरः महामात्यः	१	११	१४
सान्त्वयन्सर्वभूतानि	२	१२	२८
सान्त्वयित्वा ततस्तां तु	२	२८	२
सान्त्वयित्वा तु तां रामः	२	१०३	१६
सान्त्वयित्वा प्रकृतयः	६	११२	१६
सान्त्विता मामिका माता	२	१०५	४
सान्त्वेनानुप्रदानेन	५	१३	३१
सान्धकारा हतद्योता	५	२६	२८

	का०	स०	श्लो०
सा पद्मपीता हेमाभा	३	५२	२४
सा पादमूले कैकेय्या	२	७८	२५
सा पानयोगाच्च निवृत्तलज्जा	४	३३	४०
सा पुण्या ध्वजिनी गङ्गाम्	२	८६	२१
सा पुरा सुखसंवृद्धा	६	६४	३४
सा पुरी परमाकीर्णा	६	११	२१
सा प्येवं ब्रुवतीं सीताम्	६	३४	१२
सा प्रकृत्यैव त वङ्गी	५	५६	३१
सा प्रमथ्य रथं तस्य	६	५२	२६
सा प्रयाता महासेना	२	६२	३८
सा प्रविष्टा ततस्तत्र	६	३४	१६
सा प्रसह्य मया भुक्ता	६	१३	१२
सा प्रस्खलन्ती मदविह्वलाक्षी	४	३३	३८
सा प्रहृष्टा महाराज	२	१६	१७
सा प्राप्तकालं कैकेयि	२	७	३०
सा बभूव निशा घोरा	६	४४	१६
सा बभूव मुहूर्तेन	६	७५	३०
सा बहून्यमनोज्ञानि	२	२०	३६
साऽब्रवीद्दत्तमेवार्हो	५	४०	१८
साऽब्रवीन्मां ततो देवी	५	६७	३८
सा भस्स्यमाना भीमाभी	५	२४	१७
सा भीमवेगा समराभिका०	३	२३	३४
सा भूमिर्बहुभिर्यानैः	२	१०३	४०
साम दानं क्षमा धर्मः	४	१७	२६
सामन्तराजमंत्रैश्च	१	५	१४
सा मया नरशार्दूल	५	६५	१७
सा मही रुधिरौघेण	६	५८	२८
सामात्यपरिषत्क्रीडान्	४	३०	७६
सामात्यो मन्त्रिसहितः	१	५३	७
सा मानुमन्यस्व वनं व्रजन्तम्	२	२१	६१
सा मुहूर्तमिवासंज्ञा	७	४८	२
सा मुहूर्तात्समाश्वस्य	६	३२	७
सा मूर्ध्नि बद्ध्वा रुदती	२	६२	११
सा मे न शय्यामारोढुम्	६	१२	१३
सा मेऽपनयते दुःखम्	४	६३	६
सामोपहितया वाचा	४	३१	८
सायकस्तु मुहूर्तेन	४	१२	४

	का०	स०	श्लो०
सायकैश्चापविभ्रष्टैः	७	२३	४२
सायाह्ने विचरन्राम	३	७३	१६
सायुधा बहवो व्योम्नि	५	३७	५१
सारणस्य वचः श्रुत्वा	६	२८	१
सारणाचक्ष्व मे सर्वम्	६	२६	१०
सारथिं वज्रहस्तस्य	६	१०४	४०
सारथिः स रथं हृष्टः	६	१०६	१
सारथे तुरगाञ्शीघ्रान्	७	४६	२
सारथेश्चापि बाणेन	६	१००	१५
सारथेश्चास्य वेगेन	३	५१	१८
सारवन्तोऽथ ये वृक्षाः	५	१	४८
सारसारावसंनादैः	४	३०	७
सारसांश्चक्रवाकांश्च	३	११	३
सारसैः संप्रसादितम्	३	३५	१८
सा राक्षसानां प्रवरेणबाला	५	१२	३
सा राक्षसीमध्यगता	५	२५	४
सा राक्षसीमध्यगता च भीरुः	५	२८	२
सा राक्षसेन्द्रस्य वचो निशम्य	५	२८	१
सा राघवमुपासीनम्	२	२०	३५
सा राज्यफलमप्राप्य	२	१०१	७
सा रामं पर्णशालायाम्	३	१८	१४
सा राममब्रवीद्दृष्ट्वा	६	१२६	२३
स रामसंकीर्तनवीतशोका	५	३६	४७
सा रामा राजमहिषी	५	१४	४५
सार्वभौमकुले जात	२	८८	१८
सालं चतुर्भिश्चिच्छेद	५	४४	१४
सालतालाश्वकर्णानाम्	२	६६	१६
सालतालाश्वकर्णैश्च	४	३१	१४
सालतालैश्च कर्णैश्च	५	५६	३४
सालन्यास्तीर्य सुग्रीवः	४	५	१६
सालानशोकान्भव्यांश्च	५	१४	१३
सालैस्तालैस्तमालैश्च	३	१५	१६
सालैस्तालैस्तमालैश्च	४	४०	५६
सावमर्दं तु तद्वाक्यम्	३	४०	११
सा वस्त्रमङ्गरागं च	२	११८	२१
सा वानराणां ध्वजिनी	४	६४	१२
सा वानराणां ध्वजिनी	६	४	१०७

	का०	स०	श्लो०
सा विक्षरन्ती रुधिरम्	३	१८	२४
सावित्री पतिशुश्रूषाम्	२	११८	१०
सा विद्वज्जनसंपूर्णा	२	८२	३
सा विनीय तमायासम्	२	२५	१
सा विरूपा महाघोरा	३	१८	२३
सा विशीर्णा शरैर्भिन्ना	३	२९	२८
सा विषण्णतरा भूत्वा	२	७	१९
सा विषण्णा च संत्रस्ता	२	३६	११
सा विसृष्टभुजा भीमा	५	५८	४४
सा विस्फुरन्ती परिरभ्य०	४	२४	२७
सा विह्वलाशोकलताप्रताना	५	४१	२०
सा वीक्षमाणा पृथुभग्नव०	५	३२	७
सा वीतशोका व्यपनीततन्द्रा	५	२९	८
सा वीरसमिती राज्ञा	६	२४	१
सा वेगिता बलवता	६	१००	२३
सा वेपमाना पतिता	५	२५	८
सा व्रजन्ती ददर्शाथ	४	१९	२१
सा व्यपत्रपमाणेव	२	३७	१०
सा श्रुत्वा निश्चयं तस्य	६	३४	१५
सा श्रुत्वा वचनं तस्य	१	६४	८
सा श्वश्रूर्मम कौसल्या	६	३२	११
सा सपुत्राऽप्रियं श्रुत्वा	४	१९	४
सा समासाद्य तौ वीरौ	३	६९	१४
सा समासाद्य भर्तारम्	४	२०	२
सा संप्रहृष्टद्विपवाजियूथा	२	९२	४०
सा सा भवतु धर्मिष्ठा	७	१०	३२
सा सीता तच्छिरो दृष्ट्वा	६	३२	१
सा सीता वचनं श्रुत्वा	५	३७	१
सा सीता स्वर्गतं श्रुत्वा	२	१०३	१८
सा सुकेशी सुनाभोरूः	३	३४	१६
सा सुजाता सुजातानि	२	३९	१७
सासुरा सहगन्धर्वाः	४	४४	४
सा सुशीला वपुःश्लाघ्या	३	३४	२०
सा सेना शक्रयुक्तेव	७	१००	२१
सा सेना शीघ्रमागच्छत्	७	७०	८
सा स्नापयन्ती विपुलौ	५	२५	७
सास्मि सीता समुद्विग्ना	३	२१	११

	का०	स०	श्लो०
सास्म्यगाधे भये मग्ना	२	७	२१
साहं गौरिव सिंहेन	२	४३	१८
साहं तपश्चरिष्यामि	१	४६	३
साहं तस्याग्रतस्तूर्णम्	५	३३	२७
साहं त्यक्ता प्रियेणैव	५	२६	४७
साहं त्वदर्थं संप्राप्ता	२	८	२६
साहं त्वया गमिष्यामि	२	२७	१५
साहमद्यैव दिष्टान्तम्	२	६६	१२
साहमेवं गता श्रेष्ठा	२	८९	३१
साहमेवंविधे काले	५	२६	४४
सा हर्षोत्फुल्लनयनाम्	२	७	७
साहाय्यं वानरेन्द्रस्य	५	१	८६
सा हि गौतमवाक्येन	१	४९	१६
सा हि चन्दनवर्णाभा	३	६०	३२
सा हि जन्म च बाल्यं च	६	९२	५४
सा हि तत्र कृतामित्रम्	६	६३	३
सा हि दिष्टानवद्याङ्गी	२	३०	४०
सा हि देवी महाराजम्	२	५३	७
सा हि राज्यमिदं प्राप्य	२	३१	१३
सा हि शोकसमाविष्टा	६	११४	३
सा हेमवर्णा नीलाङ्गम्	३	५२	२३
सा हृता मधुना राजन्	७	२५	२५
सा हृता राक्षसेन्द्रेण	३	६८	९
सा हृष्टा तस्य तद्वाक्यम्	२	१९	१२
साह्यं कृतं ते सुमहत्	५	१	१३३
सांकाश्यां ते समागम्य	१	७०	७
सांप्रतं कालमस्माकम्	४	६५	१३
सांप्रतं तु समृद्धार्थम्	६	१२४	८
सिंहकुञ्जरशार्दूल	५	१	१६४
सिंहद्वीपिमृगव्याघ्रान्	३	७१	१५
सिंहनादं भृशं कृत्वा	७	६९	३२
सिंहनादान्विनेदुश्च	६	६९	४०
सिंहनादाश्च शूराणाम्	२	१६	३७
सिंहर्क्षलाङ्गूलककुद्विषाणः	६	१०९	१२
सिंहविप्रक्षितौ वीरौ	४	३	९
सिंहव्याघ्रतनुत्राणैः	५	६	६
सिंहव्याघ्रमुखांश्चापि	६	९९	४२

	का०	स०	श्लो०
सिंहव्याघ्रवराहाणाम्	१	५२	२१
सिंहव्याघ्रवराहाणाम्	७	१००	२४
सिंहव्याघ्रवराहैश्च	१	२४	१५
सिंहशार्दूलजुष्टाश्च	४	५०	२
सिंहशार्दूलवाञ्छैलः	६	१०२	४०
सिंहशार्दूलसदृशः	१	१७	२५
सिंहस्कन्धं महाबाहुम्	२	९९	२७
सिंहस्कन्धौ महोत्साहौ	४	३	१४
सिंहादितानामिव कुञ्जराणाम्	७	७	५१
सिंहासनं व्याघ्रतनुः	२	१४	३९
सिंहव्याघ्रैर्वराहैश्च	७	६	४९
सीतया च कृते शब्दे	५	३०	२२
सीतया तव किं कार्यम्	५	५८	७८
सीतयाप्युषितव्या	२	४	३६
सिक्तराजपथारम्याम्	१	७७	७
सिक्तराजपथां कुत्स्नाम्	२	७	२
सिक्तसंमार्जितपथाम्	२	१४	२७
सिक्तसंमृष्टरथ्या हि	२	५	१८
सितमेघनिभं चापि	२	९१	३३
सिताभ्रशिखरामेषु	२	६	११
सिद्धगन्धर्वयक्षाश्च	१	१५	२५
सिद्धानामपि राध्यानाम्	६	११७	१९
सिद्धार्थः खलु सूत त्वम्	२	५८	१०
सिद्धार्थः खलु सौमित्रिः	२	९८	८
सिद्धार्थाः खलु ते राम	६	११९	१९
सिद्धार्थाः पितरं वृत्तम्	२	५१	२०
सिद्धार्थाः पितरं वृत्तम्	२	८६	१८
सिद्धार्था खलु कौसल्या	६	११९	१८
सिद्धार्था खलु वैदेही	२	८८	२१
सिद्धार्थास्तु नरा रामम्	२	७२	३८
सिद्धा वैखानसा यत्र	४	४३	३२
सिद्धाश्रम इति ख्यातः	१	२९	४
सिद्धा श्रमनिवासं च	१	५०	२३
सिद्धिं सर्वाणि भूतानि	५	१३	६५
सिद्धेषु किंनरेन्द्रेषु	५	५१	४१
सिन्धुसागरयोश्चैव	४	४२	१५
सिन्धोरुभयतः पार्श्वे	७	१००	११

	का०	स०	श्लो०
सीतयाप्येवमुक्तोऽहम्	५	६७	३६
सीतया रहितोऽहं वै	३	६१	६
सीतया सह काकुत्स्थः	३	२	४
सीतां गृहीत्वा गच्छन्तम्	६	१२६	२८
सीतां ताभिरनार्याभिः	५	२७	४
सीतां तु मोहितां दृष्ट्वा	६	३३	१
सीतां तु रुदतीं दृष्ट्वा	७	४९	१
सीतां धर्षयता मान्याम	६	१११	२१
सीतां पद्मपलाशाक्षीम्	५	१५	३०
सीतां प्राप्स्यति धर्मात्मा	४	३६	७
सीतां रामाय भद्रं ते	१	७१	२१
सीतां सर्वनिवद्याङ्गीम्	६	१११	२२
सीतां हत्वा तु तद्यातु	६	४	४
सीतां हत्वा तु न चिरम्	६	८१	२१
सीताकपीन्द्रलक्षणदाचराणाम्	४	५	३१
सीता तु परमायत्ता	७	४६	२५
सीतातृतीयः काकुत्स्थः	२	५४	३५
सीतातृतीयानागदान्	२	४०	१७
सीता त्वेतद्वचः श्रुत्वा	२	११७	१७
सीता दुःखमाविश्य	६	९२	४५
सीता नाम वरारोहा	३	५०	६
सीतानिमित्तं राज्ञस्तु	५	३	४९
सीतानिमित्तं सौमित्रे	३	५८	७
सीतानिमित्तजो मृत्युः	६	१११	३०
सीतापहरणात्तेन	५	२	१५
सीतापि चरणांस्तामाम्	२	१०४	२२
सीतापि देवकार्याणि	७	४२	२८
सीता पुरस्ताद्व्रजतु	२	१०३	२१
सीताप्रवेशनं दृष्ट्वा	७	९७	२६
सीताप्यनुगता रामम्	१	१	२८
सीताभ्रशिखरप्रख्यम्	२	५	२२
सीतामदृष्ट्वा ह्यनवाप्य०	५	१२	५
सीतामपश्यन्धर्मात्मा	३	६२	१
सीतामपश्यन्मनुजेश्वरस्य	५	५	२७
सीतामभ्यवपन्नोऽहम्	३	६७	१७
सीतामादाय गच्छ त्वम्	२	५५	२७
सीतामादाय वैदेहीम्	३	६७	२०
सीतामिहागतः सौम्य	३	५७	१८

	का०	स०	श्लो०
सीतामिहानयस्वेति	३	३१	४३
सीतामुत्पलपत्राक्षीम्	६	११५	१२
सीता यस्य स्नुषा चासीत्	४	४	१९
सीताया निश्चितं बुद्ध्वा	५	३४	२७
सीताया वचनं श्रुत्वा	२	३९	३२
सीताया वचनं श्रुत्वा	३	४९	१
सीताया वचनं श्रुत्वा	५	२२	१
सीताया वचन श्रुत्वा	५	२२	२३
सीताया वचनं श्रुत्वा	५	३६	३२
सीतायाश्च ततः पुत्रौ	७	५१	२६
सीतायाश्च विनाशोऽयम्	३	६२	१९
सीतायाश्चानृशंस्येन	५	५३	३३
सीतायास्तद्वच. श्रुत्वा	५	३९	१३
सीतायास्तु वचः श्रुत्वा	५	३७	३३
सीतायास्तेजसा दग्धाम्	५	५१	३६
सीतायै प्रददौ रामः	६	१२८	७८
सीतासंदेशरहितम्	५	३०	१४
सीता सौमित्रिणा सार्धम्	७	४६	२३
सीतास्नेहप्रवृत्तेन	४	६	१७
सीताहरणजं दुःखम्	३	६८	२५
सीता हि राजवचनात्	७	४६	३
सीता हि विमलां साध्वी	७	९८	१४
सीते पर्याप्तमेतावत्	५	२४	२१
सीते महाकुलीनासि	२	२८	३
सीते मृतस्ते श्वशुरः	२	२८	४
सीते राक्षसराजेन	५	२४	३४
सीते विमुच्यतामेषा	२	२८	५
सीदते हि बलं सर्वम्	६	८४	१७
सीदन्महति कान्तारे	४	६७	४८
सीदमानासुतान्दृष्ट्वा	७	२३	४६
सीदमानो निवृत्ताङ्गः	२	६३	४९
सीधुपानचलाक्षाणाम्	६	७५	१५
सुकुमारं च बालं च	२	७७	१४
सुकुमारं महासत्त्वम्	३	१७	८
सुकुमारी च बाला च	२	३८	३
सुकुमारी च बाला च	३	५८	१२

	का०	स०	श्लो०
सुकुमारीं सुजाताङ्गीम्	५	१९	१७
सुकुमार्या तपस्विन्या	२	५८	९
सुकृतं दुष्कृतं च त्वम्	६	१११	७५
सुकृतेहामृगाकीर्णम्	२	१५	३५
सुकृतौ कर्णवेष्टौ च	५	१५	४२
सुकेतोरपि धर्मात्मा	१	७१	६
सुकेशं धार्मिकं दृष्ट्वा	७	५	१
सुकेशं राक्षसं जाने	७	६	२०
सुकेशतनया देव	७	६	२५
सुकेशतनयैर्देव	७	६	१८
सुकेशपुत्रैर्भगवन्	७	७	४
सुखं पश्यथ दुर्धर्षाः	६	१००	५४
सुखं वने निवत्स्यामि	२	२७	१२
सुखं हि कारणं श्रुत्वा	४	८	४२
सुखदुःखे भयक्रोधौ	२	२२	२२
सुखप्रसुप्तं कालाग्निम्	६	७१	५३
सुखमत्र वसिष्यामि	६	५४	१२
सुखमापुर्मुहूर्तं ते	६	२१	२३
सुखसुप्ता त्वया सार्धम्	५	६७	३
सुखाद्विहीनं बहुदुःखपूर्णम्	५	२८	४
सुखोपविष्टं राजानम्	१	५२	६
सुखोपविष्टं रामं तु	४	८	१५
सुखोषिताः स्म भगवन्	३	८	५
सुखोषितोऽस्मि भगवन्	२	९२	५
सुगन्धि मम रामस्य	२	६४	७१
सुगन्धीनि च माल्यानि	४	२६	२६
सुगुप्तामनरण्येन	७	१९	७
सुग्रीवं केकयीपुत्रः	६	१२७	४२
सुग्रीवं च सहामात्यम्	५	३९	९
सुग्रीवं ते पुरस्कृत्य	७	१०८	१८
सुग्रीवं बूहि गत्वाशु	६	२०	९
सुग्रीवं सहनुमन्तम्	६	८	२१
सुग्रीवः क्रोधनो राजा	४	४९	९
सुग्रीवः पण्डितो नित्यम्	६	१९	३६
सुग्रीवः पतिरव्ययः	५	६४	२१
सुग्रीवः परमप्रीतः	४	३८	५

	का०	स०	श्लो०
सुग्रीवः स च रामेण	७	४०	२८
सुग्रीवः सप्तपर्णेन	६	४३	२५
सुग्रीवः स्थापितो राज्ये	६	१२६	३६
सुग्रीव कुरु तं शब्दम्	४	१४	१७
सुग्रीव दोषेण न माम्	४	२२	३
सुग्रीवप्रियकामार्थम्	४	१५	१८
सुग्रीवमञ्जदं नीलम्	६	७४	१०
सुग्रीव मन्त्रिते युक्तो	७	३६	१८
सुग्रीव श्रूयतां तात	४	१२	२६
सुग्रीवश्च ततो रामम्	४	५६	२
सुग्रीवश्च महातेजाः	६	२५	३०
सुग्रीवश्च महाभाग	५	५८	१३७
सुग्रीवश्चैव वाली च	४	५७	६
सुग्रीवसचिवं वीरं	५	३५	७३
सुग्रीवस्तान्कपीन्दृष्ट्वा	६	६६	६
सुग्रीवस्तु शुभं वाक्यम्	४	२	१६
सुग्रीवस्तथ तद्वाक्यम्	६	१८	४
सुग्रीवस्त्वरितो रामे	४	३६	४३
सुग्रीवस्त्वं च रामश्च	६	८१	२६
सुग्रीवस्य गृहं रम्यम्	४	३३	१८
सुग्रीवस्य तु तद्वाक्यम्	६	१७	३१
सुग्रीवस्य त्वया भार्या	४	२०	११
सुग्रीवस्य पुरी रम्या	६	१२३	२३
सुग्रीवस्य प्रमादं च	४	३१	२८
सुग्रीवस्य महात्मनः	४	४	२
सुग्रीवस्य वचः श्रुत्वा	६	३	१
सुग्रीवस्य वचः श्रुत्वा	६	१७	८
सुग्रीवस्य वचः श्रुत्वा	६	५०	२
सुग्रीवस्य वचः श्रुत्वा	६	१२३	३३
सुग्रीवस्य वयं प्राप्तः	४	२३	४
सुग्रीवाय स्रजं दिव्याम्	६	१२८	७६
सुग्रीवे चाङ्गदे चैव	४	१८	५३
सुग्रीवेण च ते सख्यम्	६	१२४	१२
सुग्रीवेण च संप्रीतिम्	४	१५	२५
सुग्रीवेण ततः सार्धम्	४	२५	४६
सुग्रीवेण तु निःशङ्कम्	४	१६	२३

	का०	स०	श्लो०
सुग्रीवेण समं त्वस्य	७	३६	३६
सुग्रीवेण समाख्याताः	४	४७	३
सुग्रीवेण सह भ्राता	४	१८	५८
सुग्रीवेणाभ्यनुज्ञाताः	६	१२३	३४
सुग्रीवेणैव दीनेन	४	२५	५३
सुग्रीवेणैवमुक्तस्तु	५	६४	१
सुग्रीवेणैवमुक्तस्तु	६	५०	११
सुग्रीवेणैवमुक्ते तु	४	३२	६
सुग्रीवे स शरान्घोरान्	६	६६	१६
सुग्रीवो ग्रीवया सीते	६	३१	२६
सुग्रीवो च देवोऽयम्	५	५१	२७
सुग्रीवो नाम धर्मात्मा	४	३	२०
सुग्रीवोऽप्यनदद्धृष्टं नम्	४	१२	१५
सुग्रीवो राघवं वाक्यम्	४	५	१८
सुग्रीवो राघवश्चैव	४	५	१६
सुग्रीवो वानरश्रेष्ठः	६	१२८	८६
सुग्रीवो विलग्नीव	४	१५	२८
सुचक्षाक्षं सुसंयुक्तम्	६	६६	२६
सुचक्षुश्चैव सीता च	१	४३	१३
सुचन्दनवनोद्देशः	४	४१	१४
सुजातमूला सुभगा	५	१३	४२
सुजीवं नित्यशस्तस्य	२	१०५	७
सुतः किल सु शक्रस्य	५	६५	१०
सुतः सुलभ्यः सुजनः सुवश्यः	४	२४	२०
सुतस्य यदि मे भार्या	७	२६	३१
सुताभिलाषो मत्तस्ते	७	६	२२
सुताविनाशसंतप्तः	३	६२	१४
सुतीक्ष्णं चाप्यगस्त्यं च	१	१	४
सुतीक्ष्णः प्रत्युवाचेदम्	३	११	३५
सुतीक्ष्णस्याश्रमपदम्	३	११	२८
सुतीक्ष्णेनाभ्यनुज्ञातम्	३	६	१
सुतीक्ष्णेनोपदिष्टेन	३	११	४६
सुतो धर्मपरो ब्रह्मन्	७	८६	१७
सुदीर्घस्य तु कालस्य	२	११८	४४
सुदुःखयितः पूर्वम्	४	३५	६
सुदुःखारोहणश्चैव	३	७३	१२

	का०	स०	श्लो०
सुदुर्गं दुर्गमार्गं तम्	४	४	११३
सुदुश्चरो गिरिश्चायम्	२	९६	१०
सुदुष्करमिदं पुत्रि	६	११९	३४
सुदृष्टां कुरु किष्किन्धाम्	४	११	३५
सुधामणिविचित्राणि	३	५५	११
सुधृतेरपि धर्मात्मा	१	७१	८
सुनियुक्तां विशालां च	४	२५	२४
सुनिविष्टं हितं वाक्यम्	६	१६	१
सुनीतं हितकामेन	६	१६	२०
सुन्दे तु निहते राम	१	२५	१०
सुपत्रमनुवृत्ताङ्गम्	६	९०	६५
सुपत्रेण सुवर्चसा	६	८९	४०
सुपर्णनागयक्षाणाम्	७	१०	१९
सुपर्णपक्षानिलनुन्नपक्षम्	७	६	६९
सुपर्णपृष्ठे स बभौ	७	६	६७
सुपर्णः पर्णबहुलाम्	३	३५	३०
सुपुष्टबलसपुष्टाम्	५	३	४
सुपुष्पिताग्रान्रुचिरान्	५	१४	४१
सुपुष्पिताग्रैर्बहुभिः	५	१	४७
सुपुष्पितांस्तु पश्यैतान्	४	१	२१
सुप्तघ्नो यज्ञकोपश्च	७	५	३६
सुप्तघ्नो यज्ञकोपश्च	७	२७	३०
सुप्तमुत्थाय भीमाक्षम्	६	६०	८४
सुप्तायास्ते गमिष्यन्ति	२	३९	३५
सुप्तेव पुनरुत्थाप्य	४	१९	२७
सुप्तैकहंसां कुमुदैरुपेतम्	४	३०	४८
सुप्यते पर्णशय्यासु	२	२८	११
सुप्रभाजनयच्चापि	१	२१	१७
सुप्रभाता निशा राम	१	३५	२
सुप्राज्यफलमूलानि	३	८	१३
सुप्रीतमनसः सर्वे	१	१४	५३
सुप्रीतस्तेन वाक्येन	३	१५	८
सुप्रीताश्च सुराः सर्वे	७	५७	१३
सुप्रीताश्चाब्रुवन्रामम्	७	७६	७
सुप्रीतौ तावनुज्ञाप्य	३	७३	४५
सुबाहुं मधुरायां च	७	१०८	११
सुबाहुर्मधुरां लेभे	७	१०८	१०

	का०	स०	श्लो०
सुबाहूरसि चिक्षेप	१	३०	२३
सुभगा किल कौशल्या	२	८	९
सुमतिस्तु नरव्याघ्रः	१	३८	१७
सुमतिस्तु महातेजाः	१	४७	२०
सुमन्त्रं चैव सरथम्	७	४७	२
सुमन्त्रः करुणं श्रुत्वा	३	१४	५८
सुमन्त्रमभिधावन्तः	२	५७	९
सुमन्त्र राजा रजनीम्	२	१४	६०
सुमन्त्र रामं द्रक्ष्यामि	२	१४	६३
सुमन्त्राश्चापि शत्रुघ्नम्	२	७७	२४
सुमन्त्रश्चोदितो राज्ञा	१	१०	१
सुमन्त्रस्तु तथेत्युक्त्वा	७	४६	४
सुमन्त्रस्तैर्नृपसुतैः	२	१०३	२३
सुमन्त्रस्त्वपि शत्रुघ्नम्	२	९९	३
सुमन्त्रस्य वचः श्रुत्वा	१	११	१३
सुमन्त्रानय मे दारान्	२	३४	१०
सुमन्त्रावाह्य क्षिप्रम्	१	१२	५
सुमन्त्रोऽप्यवतीर्याथ	२	५०	३२
सुमहत्यपराधेऽपि	५	५८	१५०
सुमहानरानीकम्	६	४	७७
सुमहद्वैष्णवं यत्तत्	३	२८	२१
सुमहन्नो बलं कस्मात्	६	७	३
सुमहान्त्यपि भूतानि	३	६६	११
सुमागधी नदी रम्या	५	३२	९
सुमालिनं सुमासाद्य	७	८	२३
सुमालिनं हतं दृष्ट्वा	७	२८	१
सुमालिनोऽपि भार्यासीत्	७	५	३७
सुमाली जनयामास	७	५	३८
सुमाली वरलब्धांस्तु	७	११	१
सुमाली सचिवैः सार्धम्	७	११	३
सुमालेरनुजस्तस्याम्	७	५	४२
सुमालेर्नर्दतस्तस्य	७	७	२९
सुमित्रया तु सहिता	२	५७	२८
सुमित्रा प्रक्ष्य वै भीता	२	१२	७२
सुमुखो दुर्मुखश्चात्र	६	३०	२३
सुयज्ञं वामदेवं च	१	८	६
सुयज्ञोऽप्यथ जाबालिः	१	७	५

	का०	स०	श्लो०
सुरकार्यमिदं रम्भे	१	६४	१
सुरतामर्दविच्छन्नाः	४	२८	५१
सुरभीणि च पुष्पाणि	७	४२	१०
सुरम्यमासाद्य तु चित्रकूटम्	२	५६	३५
सुरलोकजयाकाङ्क्षी	७	२५	४८
सुरलोकं गमिष्यामि	७	२५	३३
सुरसेनागणपतिम्	१	३७	३०
सुरां सुरापाः पिबतः	२	९१	५२
सुराः शृणुत मद्वाक्यम्	७	२९	११
सुराघटसहस्रेण	२	५२	८९
सुराणामपि दुर्धर्षौ	५	६७	२३
सुराणाममृतं वीरौ	५	६०	४
सुराणामसुराणां च	५	३३	५
सुराश्च सर्वे संहृष्टाः	१	२६	२८
सुरासुराधृष्यमसङ्गचारिणम्	५	४७	५
सुरासुरैराचरितम्	७	११	१९
सुरा हि कथयन्ति त्वाम्	७	७६	२७
सुरुष्टेनापि वीरेण	७	४९	१९
सुरैश्च परमोदारैः	७	४७	५
सुलभाः पुरुषा राजन्	७	१६	२१
सुलोहिततलौ श्लक्ष्णौ	६	१२	१५
सुवर्णकाराः प्रख्याताः	२	८३	१४
सुवर्णकोट्यो बहुलाः	७	९१	२१
सुवर्णकोणाभिहतः	२	८०	२
सुवर्णचक्रप्रतिमम्	७	२६	२४
सुवर्णनानामणिभूषणानाम्	६	११	२९
सुवर्णपुङ्खैर्नाराचैः	६	८८	६७
सुवर्णपुङ्खैर्विशिखैः	६	४४	२४
सुवर्णमणिमुक्ताभिः	७	२१	२०
सुवर्णमणिमुक्तेन	२	९१	४४
सुवर्णशृङ्गयः संपन्नाः	१	७२	२३
सुवर्णेन न मे ह्यर्थः	२	९	५८
सुवारिणा राघवसागरेण	६	२४	२०
सुवाससः सुवेषाश्च	१	३७	१६
सुविभक्तमहाव्यूहा	६	२४	१९
सुवेलं साधुशैलेन्द्रम्	६	३८	३
सुवेल इति चाप्यन्यः	७	५	२३

	का०	स०	श्लो०
सुवेषाः शुद्धवसनाः	२	८३	१७
सुव्यक्तं महती प्रीतिः	६	५१	४
सुव्यक्तं राजदोषो हि	७	७३	१८
सुशुभश्चित्रकूटोऽसौ	२	९८	१२
सुश्रोणि परितुष्टोऽस्मि	१	४८	२२
सुषुवे यममित्रघ्नम्	२	९०	११
सुषेणं कुमुदं नीलम्	४	२९	४
सुषेणं च नलं चैव	६	१२७	४३
सुषेणं पनसं वीरम्	७	३९	२१
सुषेणं श्वशुरं वीरम्	७	४०	४
सुषेणः पश्चिमद्वारम्	६	४२	२६
सुषेणः पश्चिमामाशाम्	४	४७	९
सुषेणः सत्त्वसंपन्नाः	४	१२८	५४
सुषेण दुहिता चेयम्	४	२२	१३
सुषेणप्रमुखा यूयम्	४	४२	६
सुषेणस्तु महातेजाः	४	६५	९
सुषेणो जाम्बवांश्चैव	६	४	३४
सुरसंरब्धंतु भरतम्	२	९७	१
सुसंवृतं पार्थिवलक्षणैश्च	४	२४	२८
सुसंहृष्टः परिष्वज्य	३	१५	२७
सुसुखे हि बहुद्रव्ये	४	२७	३०
सुस्कन्धविटपैः शैलैः	६	८२	१९
सुस्राव नयनैः स्त्रीणाम्	२	४०	३५
सुहोत्रं च शरारिं च	४	४१	३
सुहृदश्चाप्रमत्तास्ताम्	२	४	२४
सुहृदां हितकामानाम्	६	१११	७६
सुहृदामर्थकृच्छ्रेषु	६	१७	३३
सुहृद्भिस्तत्र रामोऽपि	२	५	१३
सुहृद्द्वितीयो विक्रान्तः	४	४०	१५
सूक्ष्मः परमविज्ञेयः	४	१८	१५
सूत इत्येव चाभाष्य	२	४९	१३
सूत मद्वचनात्तस्य	२	५८	१५
सूतमाराधसंबाधाम्	१	५	११
सूत यद्यस्ति ते किंचित्	२	५९	२१
सूत रत्नसुसंपूर्णा	२	६६	२
सूतश्चित्ररथश्चार्यः	२	३२	१७
सूयस्तत: संत्वरितः	२	४६	२६

	का०	स०	श्लो०
सूतस्तु रथनेतास्य	६	१०३	३०
सूतस्य वचनं श्रुत्वा	२	५९	१७
सूता: परसंस्काराः	२	६५	२
सूता: स्तुतिपुराणज्ञा:	७	१२७	३
सूताश्च संस्तवैर्दिव्यैः	७	३७	१०
सूपकारा: सुधाकारा	२	८०	३
सूर्यदत्तवरस्वर्णः	७	३५	१९
सूर्यपुत्रौ महावीर्यः	४	१६	२७
सूर्यप्रभेव शैलाग्रे	४	५८	१७
सूर्यशत्रुश्च निहतः	६	१२३	१४
सूर्यस्यापि भवेत्सूर्यः	२	४४	१५
सूर्यातपक्रामणनष्टपङ्काः	४	३०	३७
सूर्यादिव कराघोराः	७	७	१८
सूर्याननं ज्योतिमुखम्	६	७३	६०
सूर्ये चास्तंगते रात्रौ	५	२	४७
सूर्येणोदयता काले	७	२४	१८
सूर्येऽभ्युदितमात्रे श्वः	२	३	१६
सृजतः शरवर्षाणि	६	८८	९
सृजन्तो बाणवृष्टिं ते	५	४५	७
सृजन्दक्षिणमार्गस्थान्	१	६०	२१
सृञ्जयस्य सुतः श्रीमान्	१	४७	१५
सृष्टः शरोऽयं काकुत्स्थ	७	६३	२०
सृष्टान्द्विविदमैन्दाभ्याम्	६	७६	२१
सृष्टो महात्मना तेन	७	६९	२७
सेतुबन्ध इति ख्यातम्	६	१२३	२१
सेतुबन्धः समुद्रे च	६	२	१२
सेतुरत्र यथा बद्धश्चेत्	६	२	९
सेनाग्रगा मन्त्रिसुताः	७	३५	६
सेनानीर्ग्रामणीः सर्वम्	५	११७	१६
सेनापतीन्पञ्च स तु प्रमा०	५	४७	१
सेनापते यथा ते स्युः	६	१२	२
सेनायास्तु तथैवास्याः	२	९१	४
सेन्द्रानपि सुरान्सर्वान्	४	१२	८
सेवं कनकवर्णाङ्गी	५	१६	२१
सेयं मम सुता राजन्	१	६८	८
सेवं सीता महाभागा	६	६०	११
सेयमालोक्य ते रूपम्	५	३०	२०

	का०	स०	श्लो०
सेवमाने दृढं सूर्ये	३	१६	८
सेवितं देवपत्नीभिः	३	३५	१७
सेविते वारिधाराभिः	५	१	१६३
सैनिकानक्षमोऽस्माकम्	७	१७	२३
सैन्यं तु विद्रुतं दृष्ट्वा	६	५२	१८
सैन्यैः परिवृतो गच्छ	६	६५	२३
सैन्यैः परिवृतो हृष्टैः	७	२७	३५
सैवान्येवास्मि संवृत्ता	६	१११	३४
सैषा जनकराज्यस्य	७	१७	३४
सैषा विपद्गता चैव	६	११४	२९
सैषा शापकृतामर्षा	१	२५	१४
सैषा हि मागधी राम	१	३२	१०
सैषा सोऽग्रजेनानुशिष्टार्थः	४	३१	९
सोऽङ्गदं निशितैर्बाणैः	६	७६	५
सोऽङ्गूदं रोषनाम्राक्षः	४	३१	३२
सोऽङ्गदेन तदा वीरः	४	६५	३३
सोच्छ्वासं हृदयं वीर	४	१०१	२८
सोढुं न च समर्थोऽहम्	४	१६	४
सोऽनिपत्य मुहूर्तेन	४	४१	७४
सोऽतिविद्धः शितैर्बाणैः	६	९६	१७
सोऽतिविद्धो बलवता	६	९०	२६
सोत्तरीयमिवाम्भोदैः	५	५६	२७
सोऽत्रेराश्रममासाद्य	२	११७	५
सोऽनृस्मृत्य वधं तेषाम्	६	८१	२
सोऽन्तमाश्रित्य लोकानाम्	७	८६	३
सोऽन्तरिक्षगतो वाक्यम्	३	७२	७
सोऽन्तर्धानगतः पापः	६	४४	३३
सोऽन्तः पुरमतीत्यैव	२	३४	११
सोऽन्तःपुरं प्रविश्यैव	१	१६	२६
सोऽन्यत्कार्मुकमादाय	६	९०	१८
सोऽपश्यत्तन्नरेन्द्रस्तु	७	१९	१७
सोऽपश्यत्स महाबाहुः	७	११	१०
सोऽपश्यत्सोमजं तत्र	७	८९	१०
सोऽपश्यदरजां दीनाम्	७	८१	२
सोऽपश्यद्रामतीर्थं च	६	१२५	२६
सोऽपश्यद्भूमिभागांश्च	५	१४	३८
सोऽपश्यन्नन्दिनं तत्र	७	१६	१३

	का०	स०	श्लो०
सोऽपश्यंस्तां महाबाहुः	५	१२	२३
सोपसर्गा यथा सिद्धिम्	५	१५	३४
सोपाध्यायो महाराज	१	६८	११
सोपाननिनदांश्चापि	५	४	१२
सोऽपि गन्धवहं पुत्रम्	७	३६	२६
सोऽपि त्वया हतस्तात	७	२४	२९
सोऽपि प्रवृद्धस्तान्सर्वान्	६	५६	३६
सोऽपि वेलामिमं नूनम्	३	१६	२९
सोऽपि सैन्यानि संक्रुद्धः	६	६६	१२
सोऽपृच्छदभिवाद्यैनम्	६	१२४	२
सोऽब्रवीत्प्रणतो भूत्वा	७	७५	७
सोऽब्रवीत्स्नेहसंयुक्तम्	७	१८	१५
सोऽब्रवीद्राघवः प्रीतः	७	१००	१५
सोऽब्रवीद्रावणो भूयः	७	१७	१९
सोऽभिगम्य गृहं भ्रातुः	६	६२	६
सोऽभिगम्य तु सौमित्रिम्	७	१०५	२
सोऽभिगम्य महात्मानम्	१	१	७८
सोऽभिगम्य महात्मानम्	६	८४	३
सोऽभिगम्य महात्मानम्	६	११४	१६
सोऽभिगम्य महात्मानः	१	५७	१६
सोऽभिगम्य रघुश्रेष्ठम्	७	१०३	७
सोऽभिदुद्राव वेगेन	२	३४	१७
सोऽभिनिर्याय नगरात्	६	८०	१६
सोऽभिनिष्क्रम्य नगरात्	६	९०	१२
सोऽभिपद्याथ तद्वक्रम्	५	१	१५७
सोभिवाद्य गुरौ पादौ	६	८५	२९
सोभिवाद्य ततः पादौ	७	५६	६
सोभिवाद्य ततः पादौ	७	७१	४
सोभिवाद्य ततो रामम्	७	१०८	१३
सोभिवाद्य दशग्रीवम्	६	७८	५
सोभिवाद्य महात्मानम्	७	६५	३
सोभिवाद्य महात्मानम्	७	७२	९
सोभिवाद्य महात्मानम्	७	७६	२४
सोभिवाद्य महात्मानम्	७	१०१	१७
सोभिवाद्य महात्मानम्	७	१०५	११
सोभिवाद्य मुनिश्रेष्ठम्	७	७२	६
सोऽभिषेकनिवृत्त्यर्थैः	२	२२	१८

	का०	स०	श्लो०
सोऽभिषेकं ततः कृत्वा	१	२	२०
सोऽभ्यतिक्रामदत्यग्रः	४	१	१२५
सोऽभ्यद्रवद्विजेन्द्रं तम्	३	२	६६
सोऽभ्युपेत्य शरान्खड्गान्	६	८६	२८
सोमदापि सुतं दृष्ट्वा	१	३३	२६
सोऽमरावतिसंकाशम्	७	३३	४
सोमश्च राजसूयेन	७	८३	७
सोमस्याहं सुदयितः	७	८९	४
सोऽमात्यमध्ये भरतः	२	७५	२
सोमास्त्रं शिशिरं नाम	१	२७	२०
सोऽम्बुजो हरिणाश्मातः	७	७	१०
सोऽयमद्य रणे पापः	६	१००	५२
सोऽयमर्थं परित्यज्य	६	८३	३४
सोऽयं तत्प्रतिकारार्थी	५	१	१०७
सोऽयं ब्राह्मणभूयिष्ठः	३	६	१५
सोऽयं मामनुपस्थाने	६	९२	४७
सोऽयं रोषपरीताक्षः	४	३१	४९
सोऽर्थं विदित्वा सकलम्	७	८८	२१
सोऽवतीर्य द्रुमात्तस्मात्	५	३३	१
सोऽवतीर्य रथाच्छीघ्रम्	२	५७	१७
सोऽश्वकर्णद्रुमाञ्शालान्	६	५९	७५
सोऽश्वकर्णं महाद्युतिः	६	५६	२१
सोऽश्वकर्णं समाराद्य	६	५६	२०
सोऽश्वान्सुमन्त्रः संयम्य	२	४६	१२
सोष्णीषेणोत्तमाङ्गेन च	३	२५	४३
सोऽसौ व्यसनमापन्नः	६	६१	२९
सोऽस्त्रमाहारयामास	६	७३	२४
सोऽस्त्रमुक्तेन बाणेन	६	५९	७८
सोऽहं कथमिमं भारम्	२	७३	१६
सोऽहं गुरुवचः कुर्वन्	१	७६	१४
सोऽहं गृहीत्वा नियमम्	२	५२	६७
सोऽहं तव भयं घोरम्	६	६५	२
सोऽहं तासां विशेषार्थम्	७	३०	२१
सोऽहं त्रस्तो भये मग्नः	४	८	१८
सोऽहं त्वामागतो द्रष्टुम्	२	२६	२४
सोऽहं दानैश्च मानैश्च	६	५७	१५
सोऽहं दुःखपरीतानाम्	६	१२६	४१

	का०	स०	श्लो०
सोऽहं हृष्टबलस्तुभ्यम्	७	३४	४०
सोऽहं द्वितीयं काकुत्स्थ	७	६३	७
सोऽहं न शक्ष्यामि पुनः	२	२१	४३
सोऽहं निमित्तं कस्मिंश्चित्	७	७८	७
सोऽहं नैव गमिष्यामि	५	१३	३६
सोऽहं परापराधेन	३	३९	२२
सोऽहं पुरुषितस्तेन	६	१७	१६
सोऽहं पितुर्निदेशं तु	२	१०९	१६
सोऽहं पितुर्वचः श्रुत्वा	१	२६	४
सोऽहं प्रवेक्ष्याम्यतिदीप्तम०	४	२४	२२
सोऽहं प्रियसखं रामम्	२	३७	६
सोऽहं प्रियसखं रामम्	२	८६	७
सोऽहं भगवतः श्रुत्वा	७	७८	२०
सोऽहं रिपुविनाशाय	६	५९	५
सोऽहं वनगतं रामम्	३	३९	९
सोऽहं वनमिदं दुर्गम्	७	७८	८
सोऽहं वनमिदं प्राप्तः	२	१०७	८
सोऽहं वर्षसहस्राणि	७	७८	१०
सोऽहं वाससहायस्ते	३	१४	३४
सोऽहं विगवेगस्तु	५	५८	३६
सोऽहं विश्राममिच्छामि	२	२	१०
सोऽहं शत्रुविनाशाय	६	६३	४८
सोऽहं शासनमाज्ञाय	७	४१	९
सोऽहं सभाज्यो बन्धूनाम्	४	८	४
सोऽहं संन्यस्तभारो हि	७	१०४	८
सोऽहं सुराणामपि दर्पहन्ता	६	१५	७
सोऽहमभ्यवहारार्थम्	४	५९	१५
सोऽहमाश्रवणं छित्त्वा	२	६३	१०
सोऽहमिक्ष्वाकुभिः सर्वैः	२	२	५
सौभ्रात्रदर्शनार्थं तु	७	१३	१२
सौभ्रात्रं नास्ति शूराणाम्	७	११	१४
सौमित्रिं मित्रसंपन्नम्	६	११२	९
सौमित्रिं लक्ष्मणमिति	१	१८	२२
सौमित्रिं शरणं प्राप्ताः	६	९०	१७
सौमित्रिरपि ताः सर्वाः	२	१०४	२०
सौमित्रिस्तु ततः पश्चात्	२	८७	२०
सौमित्रिस्तु तथेत्युक्त्वा	७	१०३	६

	का०	स०	श्लो०
सौमित्रिस्तु परं दैन्यम्	७	५२	३
सौमित्रे दुःसहो रोषः	७	५८	६
सौमित्रे पश्य पम्पायाः	४	१	४
सौमित्रे पश्य पम्पायाः	४	६१	१
सौमित्रे पश्य पम्पायाः	४	६१	७३
सौमित्रे भुङ्क्ष्व भोगांस्त्वम्	२	४	४४
सौमित्रे योभिषेकार्थे	२	२२	५
सौमित्रे शृणु वन्यानाम्	२	५६	२
सौमित्रे शोभते पम्पा	४	१	३
सौमित्रेश्चापनिर्घोषम्	६	७१	४९
सौमित्रे हर काष्ठानि	३	६८	२७
सौम्य नूनं हनुमता	६	८३	२
सौम्य राम निरक्षस्व	७	४१	३
सौम्य रोषो न कर्तव्यः	५	६४	६
सौम्य वैकल्यतां दृष्ट्वा	४	६०	१८
सौम्यं तस्या मुखं दृष्ट्वा	६	११३	६
सौर्येणास्त्रेण तं वीरः	६	९०	५७
सौवर्णस्तु महांस्तस्याः	६	३	१४
सौवर्णस्त्वं मृगो भूत्वा	३	३०	१८
सौवर्णान्वानरेन्द्राणाम्	६	१२८	४९
सौवर्णैः राजतैस्ताम्रैः	३	१५	१५
स्कन्द इत्यब्रुवन्देवाः	१	३७	२७
स्कन्दश्च भगवान्देवः	२	२५	११
स्कन्दोत्सृष्टेव सा शक्तिः	७	८	१२
स्कन्धवन्तमुपासीनाः	५	१७	८
स्कन्धावारनिवेशेन	२	११७	३
स्कन्धे चासज्ज्य परशुम्	१	७४	१९
स्तनौ चाविरलौ पीनौ	६	४८	११
स्तम्भैः पक्षैरिवात्युच्चैः	५	९	२५
स्तिमितं गन्तुमारेभे	३	४६	८
स्तुतिभिः प्रणतो भूत्वा	७	१६	३३
स्त्रिया नियुक्तः कैकेय्या	२	१०१	६
स्त्रियो ज्वलन्तीस्त्रपयोपगूढाः	५	५	१८
स्त्रियो रजस्वलाः श्रुत्वा	६	१२८	११४
स्त्रियो वृद्धास्तरुण्यश्च	२	२	५२
स्त्रीचापलादेतदुपाहृतं मे	३	९	३३
स्त्री चेति मन्यमानेन	५	३	४१

	का०	स०	श्लो०
स्त्रीणामश्वमुखीनां तु	४	४३	३१
स्त्रीणां मदनबिद्धानाम्	५	४	११
स्त्रीतृतीयेन च तथा	१	३	५
स्त्रीत्वाद्दुष्टस्वभावेन	३	४५	३३
स्त्रीत्वान्न त्वं समर्थासि	५	३८	३
स्त्री प्रनष्टेति कारुण्यात्	५	१५	५०
स्त्रीभिः परिवृताः सर्वे	६	१२३	२८
स्त्रीभिः सपुत्रैः पौत्रैश्च	६	१२५	२९
स्त्रीभूतश्च परं मासम्	७	८७	२१
स्त्रीरत्नमसि मैवं भूः	५	२०	११
स्त्रीषु शूर विनाशासु	६	१०३	१३
स्त्रीसहस्रनिनादश्च	२	३४	१९
स्त्रीहेतोर्वालिना भ्राता	६	३५	३४
स्थलनिम्नानि भूमेश्च	६	१०४	१९
स्थलीप्रायवनोद्देशे	३	११	३८
स्थाणुं देवमिवाचिन्त्यम्	१	२२	११
स्थाणूर्मरीचिरचित्रश्च	३	१४	१८
स्थातव्यं दुष्टभावानाम्	१	२०	१५
स्थातुं प्रतिमुखे शक्तः	३	२१	१७
स्थानमस्मि महत्प्राप्तः	२	६४	४९
स्थानं तथैव गायत्र्याः	३	१२	२०
स्थानं वृद्धिं च हानिं च	६	६४	४
स्थानानि च निरस्यन्ताम्	६	१२७	७
स्थापयित्वा प्रियं पुत्रम्	३	४८	१५
स्थाप्य राज्ये मम सुतम्	२	१४	२२
स्थाल्यः कुम्भ्यः करम्भ्यश्च	२	९१	७२
स्थितं पन्थानमावृत्य	५	५८	१०
स्थितः ककुद्मानिव तीक्ष्णशृ०	५	५	५
स्थितमावृत्य पन्थानम्	३	६९	३३
स्थितया पार्श्वतश्चापि	२	१६	१०
स्थितस्तु प्राङ्मुखो भूत्वा	१	२७	२२
स्थितान्पश्यसि यानेतान्	६	२८	२
स्थिता पारे समुद्रस्य	६	३	२१
स्थितेन राज्ञो वचने	६	१२६	८
स्थितो मुहूर्तं तेजस्वी	६	५९	६०
स्थितोऽयमिति मत्वाहम्	४	१०	१९
स्थित्वा मुहूर्तं तत्रैव	६	४०	२
स्थित्वा मुहूर्तं संप्रेक्ष्य	६	४०	९
स्थिरमिच्छसि राजेन्द्र	१	१९	१६
स्थिरं नु हृदयं मन्ये	२	२०	४९
स्थिरं हि नूनं हृदयं ममायसम्	२	२०	५१
स्थिरा मया प्रतिज्ञाता	२	१०९	२५
स्थिरास्मि या देहमिमम्	६	१११	५६
स्थिरे तस्योरसि व्यूढे	६	७७	१२
स्थूलाक्षः पट्टिशं गृह्य	३	२६	१९
स्थूलान्पींतांश्च पम्पायाम्	३	७३	२०
स्थैर्यदात्ममनः शौचम्	४	५५	२
स्नपयन्ती तदास्त्रेण	६	१११	९१
स्नातांश्च कृतजप्यांश्च	१	२३	१८
स्नाताः प्रमुदिताः सर्वे	७	१०९	१६
स्नानानि चाङ्ग रागाणि	६	१२१	२
स्निग्धगम्भीरघोषेण	२	११४	१
स्निग्धगम्भीरनिर्घोषम्	६	५१	२
स्निग्धपत्रा यथा वृक्षाः	३	११	७८
स्निग्धपल्लवसंकाशम्	३	६०	१३
स्निग्धस्य भजमानस्य	७	२५	४९
स्निग्धा यस्य बहुश्यामाः	६	२७	२
स्निग्धो धर्मरतो धीरः	२	३०	१०
स्निग्धोऽनुनादः संजज्ञे	२	२	१८
स्नुषा दशरथस्य त्वम्	७	४९	७
स्नुषा दशरथस्यैषा	७	४९	१७
स्नुषास्मि यदवोचस्त्वम्	७	२६	३९
स्नेहेनाद्रान्तहृदयः	२	९७	११
स्नेहोपस्कन्नहृदया	६	१११	८७
स्नेहो मे परमो राजन्	७	४०	१६
स्पन्दते मे दृढं बाहुः	३	६९	२१
स्पर्शात्तु वरदानेन	३	३	१७
स्पर्शानिव प्रहारांस्तान्	६	६७	२६
स्पर्शिता राजसिंहेन	७	५३	१५
स्पृशन्सुविपुलं शीतम्	३	६६	२१
स्पृष्टमात्रस्ततः सोऽथ	७	३६	४
स्पृष्टमात्रे तदा पाणौ	१	३३	२३
स्फाटिकैरावृततलाम्	५	९	२३
स्फिग्देशेनातिताम्रेण	५	१	६१

	का०	स०	श्लो०
स्फीताञ्जनपदान्रम्यान्	४	४२	७
स्फुरते नयनं सत्यम्	३	५९	४
स्फुरन्तं परिवर्तन्तम्	६	९६	३४
स्फोटयत्यतिसंरब्धः	६	२६	१६
स्मरञ्जाम्बवतो वाक्यम्	६	७४	५२
स्मरन्तः पुत्रदाराणाम्	४	५४	१७
स्मर राजन्पुरा वृत्तम्	२	११	१८
स्मितपूर्वाभिभाषी च	२	२	४२
स्मितहास्यान्तरयुतम्	४	१	११०
स्मृतिर्न तेऽस्ति वा मन्ये	४	८८	११
स्मृतिर्वा नास्ति ते मन्ये	६	८८	४६
स्मृत्वा तद्वचनं रक्षः	३	४४	१८
स्मृत्वा वियोगजं दुःखम्	४	१	११६
स्यन्दनांस्तुरगोपेतान्	२	९३	१६
स्यन्दनैः स्यन्दनगताः	७	७	५
स्यन्दनैश्चन्दनैर्नीपैः	३	१५	१८
स्रग्विणस्त्वनुलिप्तांश्च	५	४	२२
स्रग्वी भास्करवर्णाभः	३	७३	४३
स्रवता रुधिरेणाथ	५	४५	१६
स्रुग्भाण्डन्यग्निहोत्राणि	७	३६	२९
स्रोतोभ्यो बहु रक्तं तु	४	११	४६
स्वकर्मनिरता नित्यम्	१	६	१३
स्वकर्मसु प्रवर्तन्ते	६	१२८	१०३
स्वकृतैर्हन्यमानस्य	५	२१	१३
स्वच्छन्दतश्च मरणम्	४	६६	२९
स्वदत्तकृतसाक्षी यः	७	२०	२९
स्वधर्मं प्रचरिष्यन्ति	३	३०	३७
स्वधर्मः परमस्तेषाम्	७	७४	२०
स्वधर्मस्य च संयोगात्	४	२५	१०
स्वधर्मो रक्षसां भीरु	५	२०	५
स्वधीतं दत्तमिष्टं च	७	६	४०
स्वनन्ति पादपाश्चेमे	४	१	२९
स्वनवन्त्यवकीर्णानि	५	३५	३९
स्वनैर्घनानां प्लवगाः प्रबुद्धाः	४	२८	३८
स्वपादुके संप्रणम्य	२	११२	२३
स्वपुरं त्वगमच्छ्रीमान्	१	४१	२५
स्वपुरं प्राविशद्वीरः	१	७७	२०

	का०	स०	श्लो०
स्वप्तुं वर्षाण्यनेकानि	७	१०	४५
स्वप्ने चाद्य मया दृष्टा	५	२७	११
स्वप्ने पितरमद्राक्षम्	२	६९	८
स्वप्नेऽपि यदहं वीरम्	५	३४	२१
स्वप्नेऽपि सागरं शुष्कम्	२	६९	११
स्वप्नो मयायं विकृतोऽद्य दृष्टः	५	३२	९
स्वप्नो हि नायं नहि मेऽस्ति०	५	३२	१०
स्वप्नो ह्यद्य मया दृष्टः	५	२७	६
स्वबलस्य च घातेन	६	५४	१
स्वबलस्य तु घातेन	६	९७	२
स्वबलं व्यथितं दृष्ट्वा	६	७१	१
स्वबलं समुपाश्रित्य	६	७	११
स्वभावतनुका नूनम्	६	५	१८
स्वमनीकं विषण्णं तु	६	८६	१४
स्वमाश्रमं स प्रविगाह्य वीरः	३	५८	२०
स्वमाश्रममिदं सौम्य	७	६५	६
स्वयं कार्याणि यः काले	३	३३	४
स्वयं गत्वा दशरथम्	३	३८	४
स्वयं तु भार्यां कौमारीम्	२	३०	८
स्वयं प्रकृतिमापन्नः	६	३	१९
स्वयंभुवा दत्तवरो महात्मा	६	७३	६५
स्वयंभूरिव भूतानाम्	१	७७	२५
स्वयंभूरिव संमतः	१	१८	२५
स्वयं रक्षोधिपश्चापि	६	६०	७६
स्वयंवरे किल प्राप्ता	२	११८	२४
स्वयं विराधेन हि मुत्युमा०	३	४	३१
स्वयं सारथ्यमकरोत्	६	८९	४३
स्वयं सुतीक्ष्णं पुरुषर्षभाभ्याम्	३	७	२४
स्वयमातिथ्यमादिश्य	२	११७	६
स्वयमेव हि धर्मात्मा	१	१३	३१
स्वयमेव हि विश्रम्य	६	२८	६२
स्वयमेवागतः शत्रुः	७	६८	१९
स्वयूथभृत्यगोप्तारम्	६	१११	५१
स्वर्यैव प्रभया मेरुम्	२	३	३९
स्वराज्यं राघवः पातु	२	३५	३४
स्वरेण वर्चसा चैव	४	१२	३१
स्वर्गकामैरुपेतां च	५	११	१३

	का०	स०	श्लो०
स्वर्गस्थश्च महाराज:	२	६७	६
स्वर्गस्य गमनोद्योगम्	७	१०८	६
स्वर्गे ते संगमो भूय:	७	९८	१५
स्वर्गेऽपि खलु रामस्य	२	१३	६
स्वर्गेऽपि पद्मामलपत्रनेत्र	४	२४	३४
स्वर्गेऽपि शोकं च विवर्णतां च	४	२४	३५
स्वर्गो धनं वा धान्यं वा	२	३०	३६
स्वर्गोऽपि हि तया हीन:	३	६२	१५
स्वर्गोऽस्तु सशरीरस्य	१	६०	२८
स्वर्णकुम्भनिभौ पीनौ	७	२६	२३
स्वर्णप्राकारसंवीता	७	५	२५
स्वर्पितर्मर्मसु भृशम्	६	१११	४६
स्वर्याता: परमर्षय:	३	११	९२
स्वलंकृतान्साश्वरथान्सकु०	२	१५	४७
स्वलंकृताश्च पुरुषा:	१	१४	१८
स्वल्पं हि कृतमिन्द्रेण	४	५४	१४
स्वशरीरं त्वया पुष्टम्	७	७८	१५
स्वसैन्यमुत्सृज्य समेत्य तूर्णम्	६	७३	५१
स्वस्ति गोब्राह्मणेभ्यस्तु	३	२३	२८
स्वस्ति गोब्राह्मणेभ्यस्तु	६	१०७	४९
स्वस्ति तेऽस्तु गमिष्याम:	७	३	२०
स्वस्ति तेऽस्त्वान्तरिक्षेभ्य:	२	२५	२२
स्वस्ति प्राप्नुहि भद्रं ते	१	६५	२१
स्वस्ति प्राप्नुहि भद्रं ते	१	७२	१९
स्वस्ति प्राप्नुहि भद्रं ते	७	७६	१६
स्वस्ति वोऽस्तु गमिष्यामि	१	३१	१५
स्वस्ति साध्याश्च विश्वे च	२	२५	८
स्वस्त्रीभि: क्रीडमानैश्च	७	३१	१७
स्वस्त्रीयं मम राजेन्द्र	१	७३	४
स्वस्त्ययस्तु लोकेभ्य इति	६	८९	३८
स्वस्त्यात्रेयश्च भगवान्	७	१	३
स्वं परित्यज्य रूपं य:	५	३४	१५
स्वं राज्यं प्राप्य सुग्रीव:	५	३५	५२
स्वं स्वं निलयमागम्य	२	४८	३
स्वागतं तव चेत्युक्त:	१	५२	२
स्वागतं ते नरश्रेष्ठ:	१	५१	१३
स्वागतं ते महाबाहो	६	१२७	५१

	का०	स०	श्लो०
स्वागतं ते मुनिश्रेष्ठ	७	४९	१५
स्वागतं ते रघुश्रेष्ठ	३	७	८
स्वागतं वां नरव्याघ्रौ	३	७०	१८
स्वाद्वदस्योत्तरे तीरे	४	४०	५०
स्वानि मित्राणि मन्त्रीश्च	५	५१	३७
स्वानि राज्यानि मुख्यानि	७	३९	७
स्वामिना प्रतिकूलेन	३	४१	१४
स्वामिसंदेशनि:शङ्का:	५	४२	३८
स्वाशिताश्नापि मांसेन	६	७९	२०
स्वास्थ्यं भद्र भजस्वार्य	४	१	१२०
स्वां च पत्नीमभिप्रेतम्	४	२९	४
स्वां स्वां भार्यामुपादाय	७	१२	२८
स्वां स्वां शोभां समुत्सृज्य	६	४	१०२
स्वेच्छया न मया वीर	६	१०४	२२
स्वेनानेन शरीरेण	१	६०	३
स्वे स्वे गृहपरित्राणे	५	५४	२५
स्वै: पक्षै: पवनोद्धूतै:	४	१	३७
हतं त्वया राष्ट्रमिदं सराज्यम्	२	६१	२६
हतं त्रिशिरसं दृष्ट्वा	६	७०	४९
हतं लवणमाशंसु:	७	६३	१८
हत: स निपपाताथ	६	९०	७३
हत दारय चैहीति	६	४४	४
हतपुत्रबलो दीन	१	५५	१०
हतपुत्रास्मि भगवन्	१	४६	२
हतप्रवीरा रामेण	६	९४	२५
ततप्रवीरा व्यथिता:	६	७६	३५
हतमिन्द्रजितं दृष्ट्वा	६	९०	८०
हतवीरप्रधाना हि	६	४८	२६
हतवीरौघवप्रां तु	६	५८	२९
हतश्चायं त्वया वृत्र:	७	८५	१९
हतस्य महिषस्यास्थि	४	२	७२
हता इन्द्रजिता सीता	६	८४	७
हतानां गच्छतां स्वर्गम्	७	१४	१९
हतारय: प्रनष्टेन्द्रा:	७	८५	१७
हतविन्द्रजिताख्यान	६	४७	७
हताश्वात्तु तदा वेगात्	६	१००	१८
हते तस्मिंश्चमूमुख्ये	६	५८	५८

	का०	स०	श्लो०
हते तु लवणे देवाः	७	७०	१
हते तु वीरे प्लवगाधिपते०	६	२२	३०
हते प्रहस्ते नीलेन	६	५८	५६
हते प्लवगशार्दूले	६	२२	२७
हतेषु तेषु पुत्रेषु	१	४६	१
हतेषु तेषु सर्वेषु	७	१०१	१०
हतेऽसुरे संयति शम्बासादने	५	३५	८८
हतैर्गजपदात्यश्वैः	६	६३	३४
हतैर्वानरमुख्यैश्च	६	४४	१४
हतो दुरात्मा दुर्बुद्धिः	७	३८	२३
हतो भ्राता च येषां वै	६	६५	१८
हतो योजनबाहुश्च	६	६४	१६
हतोऽस्मि यदि मामेवम्	२	६०	१५
हतोऽहं पुरुषव्याघ्र	३	४	१४
हत्वा च रावणं संख्ये	७	४३	१६
हत्वा च समरक्रूरम्	५	३८	५१
हत्वा च वानरैः सार्धम्	६	६७	३४
हत्वा तु तं भीमबलम्	३	५	१
हत्वा तु पञ्चसाहस्रैः	३	२६	२३
हत्वा तु समरे रक्षः	५	४०	१६
हत्वा तु संयुगे तस्य	७	२७	४०
हत्वा त्रिशिरसं चापि	३	३६	१०
हत्वा बहुसहस्राणि	७	६२	४
हत्वा बाणेन काकुत्स्थ	४	१७	३५
हत्वाहं रावणं युद्धे	६	४१	७
हत्वैव ब्राह्मणं कामात्	२	४२	११
हनुमत्प्रमुखान्स्तावत्	६	४६	२२
हनुमद्वचनं श्रुत्वा	५	३	२७
हनुमद्वचनाच्चैव	१	१	५६
हनुमानङ्गदो नीलः	६	४७	२
हनुमानपि विक्रान्तः	५	३०	१
हनुमान्मेघजालानि	५	१	१७०
हनूमता कीर्तिमता यशस्विना	५	५७	५३
हनूमता वेगवता	५	१४	१६
हनूमता वेगवना	५	५४	३०
हनूमत्कर्मदृप्तानाम्	५	६४	३८
हनूमत्पृष्टमारूढम्	६	८८	५
हनूमन्तं कपिं व्यक्तम्	५	३५	८६
हनूमन्तं च नृपतिः	७	३६	१६
हनूमन्तं च सुग्रीवम्	७६	७३	५८
हनूमन्तं जिघांसन्तम्	६	८६	३२
हनूमन्तं त्वमारोह	७	२२	७८
हनूमन्तमुवाचेदम्	६	११३	३६
हनूमन्दूरमध्वानम्	५	३७	३१
हनूमन्यत्वमास्थाय	५	३६	५
हनूमन्सिंहसंकाशौ	५	४०	२२
हनूमन्सिंहसंकाशौ	५	६७	४१
हनूमन्हरिराजस्य	४	६६	३
हनूमांस्तु गुरुन्वृद्धान्	५	५७	३५
हनूमांस्तु समुत्पत्य	६	५७	३५
हनूमांस्तु हारेण	६	१२८	८३
हनूमांश्च महाबाहुः	५	६४	४२
हनूमांश्चाप्यधिष्ठाता	५	६३	२२
हनूमांश्चाप्यधिष्ठाता	५	६४	३५
हनूमांश्चारयामास	५	५३	१६
हनूमांश्चिन्तयामास	६	६७	७३
हनूमानथ विज्ञाय	६	७०	२०
हनूमानपि तेजस्वी	५	४२	३०
हनूमानपि तेजस्वी	६	५६	७१
हनूमानपि संक्रुद्धः	६	८६	२५
हनूमानब्रवीत्पृष्ठः	५	५७	३८
हनूमान्पश्चिमद्वारम्	६	३७	२८
हनूमान्पुरतस्तेषाम्	६	८१	८
हनूमान्राक्षसेन्द्राणाम्	५	५४	२६
हनूमान्वक्षसि व्यूढे	६	५६	६७
हनूमान्शैलशृङ्गाणि	६	६७	१५
हन्त ते कथयिष्यामि	१	४८	१४
हन्त पश्यस्व लङ्कायाम्	६	६२	१५
हन्त लक्ष्मण पश्येह	२	६६	७
हन्त शीघ्रमितो गत्वा	२	१६	२०
हन्ता परबलौघानाम्	६	३३	१२
हन्तारं सर्वसैन्यस्य	३	२८	१२
हन्तारो ब्राह्मणान्ये तु	६	८६	१६
हन्तास्मि त्वां सहामात्यम्	६	४१	७६

	का०	स०	श्लो०
हन्तुकामस्य मे वाष्पम्	६	८९	१८
हन्तेदानीं प्रपश्य त्वम्	२	९	५
हन्तेदानीं सकामा तु	३	४९	२९
हन्तेष नियमाद्वध्यान्	२	२	४६
हन्यतां दह्यतां वापि	५	४८	५६
हन्यमानस्ततः क्रूरैः	५	४८	५२
हन्यमाने बले तस्मिन्	७	८	१
हन्यमाने बले तूर्णम्	६	९७	१
हन्या एतान्न संशयः	३	२४	१४
हन्यामहं त्विमौ पापौ	६	२९	१३
हन्यां निशितधारेण	३	७	२१
हयमुच्चैः श्रवः प्रख्यम्	६	६९	२९
हयस्य यानि चाङ्गानि	१	१४	३८
हयं च तस्य देवस्य	१	४०	२६
हयानां स्तनमानाम्	६	४४	१३
हयान्काञ्चनसंनाहान्	३	२५	२३
हयान्गजान्खरानुष्ट्रान्	२	९१	५५
हयेषु व्यग्रहस्तं तम्	६	८९	४४
हयैरन्ये गजैरन्ये	२	१०३	३७
हयैर्नागैस्तुरङ्गैश्च	५	४६	४०
हयैश्च द्विपमुख्यैश्च	३	२५	४४
हयैः परमशीघ्रैश्च	६	५१	२७
हयोत्तमसमायुक्तम्	६	६९	२२
हयोष्ट्रखरवक्त्राश्च	५	१७	१५
हरणं चापि वैदेह्याः	४	५५	२२
हरता मैथिलीं येन	४	६	२६
हरयश्चापि तं दृष्ट्वा	६	४५	२७
हरयस्तु विजानन्ति	६	५०	३०
हरयो भीमकर्माणः	६	५५	२७
हरयो मधुना मत्ताः	५	६२	१४
हरयो मथितो नागैः	६	३१	३२
हरयो राक्षसाश्चैव	६	५४	९
हरयो राक्षसाश्चैव	६	५५	१७
हरयो राघवस्यार्थे	६	४	६२
हरावाप्य तै मन्त्रम्	७	३६	३१

	का०	स०	श्लो०
हरामि वीर्यदुःखं ते	२	२१	१८
हरिः पर्वतसंकाशः	५	३७	३८
हरिः शतबलिर्वीरः	६	४	३२
हरिचन्दनसंपृक्तम्	२	६५	८
हरिणा पीयमानेन	५	१	१७
हरिदश्वः सहस्रार्चिः	६	१०५	११
हरिपादविनिर्भग्नः	६	७४	३७
हरिभिः संवृतद्वारम्	४	३३	१७
हरिभिः सूर्यसंकाशैः	६	१०२	११
हरिभिर्वह्यमानश्च	६	३०	१०
हरियुक्तं सहस्राक्षः	६	१२८	२७
हरिराजसदेहेभ्यः	६	४३	१७
हरिरूपे पितरं वृद्धम्	२	२१	१९
हरींश्च भक्षयिष्यामि	६	६३	५०
हरींश्च वृद्धानुपयातु साङ्गदः	४	२९	३३
हरीणां चाश्मनिकरैः	६	१०३	२७
हरीणां वाहिनीमुख्यः	६	२७	२७
हरीनभ्यहनत्क्रुद्धः	६	९०	१६
हरीश्वरमुपागम्य	६	२९	९
हतारिं जहि काकुत्स्थ	१	३९	१०
हतारिं रावणं वापि	४	४८	१६
हर्म्यप्रासाद संबाधम्	३	५५	७
हर्म्यप्रासादसंबाधाम्	४	३३	५
हर्म्यैर्विमानैः प्रासादैः	२	५७	१८
हर्म्यैर्विमानैः प्रासादैः	२	५९	१२
हर्यश्वस्य मरुः पुत्रः	१	७१	९
हर्यश्च हरयोऽपत्यम्	३	१४	२५
हर्षजानि च सोऽश्रूणि	५	१७	३१
हर्षरश्मिभिरुद्योतम्	१	१६	२५
हर्षं किमर्थमस्थाने	२	८	२
हर्षं च शत्रो भगवान्	६	९०	८४
हर्षः कामश्च दर्पश्च	६	८३	३९
हर्षात्तदाब्रवीदिन्द्रः	७	१८	२१
हर्षेण तु समाविष्टः	६	४६	२८
हर्षेण महता युक्तः	५	३८	६९

	का०	स०	श्लो०
हर्षेण महता युक्ताः	१	६६	१७
हर्षेण महताविष्टः	६	११६	११
हर्षेणापूर्यमाणोऽसौ	५	५७	३०
हविराज्यं पुरोधशः	२	६१	१७
हविधानेषु यः सोमम्	३	३२	२०
हविष्पन्दो मधुष्पन्दः	७	६५	२३
हंसकारण्डवाकीर्णाः	३	१५	१३
हंसकारण्डवाकीर्णाः	४	१	६३
हंसकारण्डवाकीर्णाः	५	२	१२
हंसकारण्डवोपेताः	५	६	५०
हंसकौञ्चप्लवाकीर्णम्	३	३५	१८
हंससारसचक्राह्वैः	४	३०	६३
हंसासारससंघुष्टाम्	२	५०	१६
हंसासारससंघुष्टाम्	३	४६	३१
हंसानां हि पुरा राम	७	१८	३१
हंसो नीलमिवोदकम्	५	१७	१
हंसो यथा राजतपञ्जरस्थः	५	५	४
हसितं भाषितं चैव	१	३	४
हस्तग्राहं त तं मत्वा	७	३४	२०
हस्तदानो मुखादानो	५	१३	३८
हस्तान्दन्तांश्च संपिष्य	७	१३	३४
हस्ताभ्यामेव संरभ्य	६	६३	४६
हस्तिपद्यश्वपद्यौ च	५	२२	३४
हस्तिपादा महापादा	५	१७	१३
हस्तिपृष्ठकमासाद्य	२	७१	१५
हस्तिमात्रान्महाकायाः	६	२२	५६
हस्तिहस्तैर्विमृदितान्	३	२	७६
हस्ते गृहीत्वा मारीचम्	३	४२	१३
हस्त्यश्वरथगाढानि	३	३५	२६
हस्त्यश्वरथसंबाधम्	३	४८	१२
हस्त्यश्वरथसंबाधा	२	७५	२७
हस्त्यश्वरथसबाधे	२	२७	१८
हा कौसल्ये न पश्यामि	२	६४	७६
हा तात हा पुत्रक कान्त मित्र	५	५४	४०
हा नृशंसाद्य कैकेयीं	२	४६	५
हा महाराज रामेण	२	६६	१८
हा महार्हं महाबाहो	४	२५	४१
हारनूपुरकेयूर	५	१	२६
हारं च हेमसूत्रं च	२	३२	७
हा राघव महाबाहो	२	६४	७५
हा राम रामानुज हा	२	५६	२६
हा राम सत्यव्रत दीर्घबाहो	५	२८	११
हा राम लक्ष्मण हा सुमित्रे	५	२८	८
हा रामेति च दुःखार्ता	५	२५	११
हा रामेति जनाः केचित्	२	४०	३८
हा लक्ष्मण महाबाहो	३	४६	२४
हा लक्ष्मण महाबाहो	३	६०	३५
हलाहलं विषं घोरम्	१	४५	२६
हा वीर रिपुदर्पघ्न	६	६८	१०
हा सकामाद्य कैकेयी	३	६२	१०
हा सीते लक्ष्मणेत्येवम्	३	४४	२४
हा हतास्मि महाबाहो	६	३२	८
हा हतोऽस्मीति कृपणम्	२	७२	१७
हा हतोऽस्मि नृशंसोऽस्मि	२	८८	१७
हा हेति पततस्तोये	२	६३	२५
हितमुक्तं त्वया देवि	३	१०	२
हितबुद्धया खलु वचः	२	२८	६
हितबुद्धया यदहितम्	६	३६	२
हितं तथ्यं च पथ्यं च	४	२६	८
हितं महार्थं मृदु हेतुसंहितम्	६	१०	२७
हितं वयस्यभावेन	४	७	१४
हितानुबन्धमालोक्य	६	६३	१३
हितार्थमेतदुक्तं वः	४	४६	१०
हिताश्च शूराश्च समाहिताश्च	५	५२	२३
हितेन गुरुणा पित्रा	२	१६	५
हित्वा यानानि यानार्हा	२	६२	१५
हिन्तालास्ते निशाश्चैव	४	१	८३
हिन्तालैर्जुनैर्नीपैः	६	३६	४
हिमवच्छिखराणीव	६	७५	२६
हिमवत्प्रतिमे राम	१	४३	८
हिमवन्तं च मेरुं च	४	४६	२०
हिमवानब्रवीद्वाक्यम्	१	२	२०

	का०	स०	श्लो०
हिमवान्मन्दरो मेरुः	६	५६	१०६
हिमवांश्चैव विन्ध्यश्च	४	६१	६
हिमहतनलिनीव नष्टशोभा	५	१६	३०
हिमान्ते पश्य सौमित्रे	४	१	६१
हिरण्यकशिपोर्मृत्युः	७	६	३४
हिरण्यगर्भः शिशिरः	६	१०५	२१
हिरण्यनाभ शैलेन्द्र	५	१	१३२
हिरण्यस्य सुवर्णस्य	७	६४	४
हिरण्यं च सुवर्णं च	२	७६	१५
हिरण्यं वा सुवर्णं वा	६	११३	२०
हिंसाभिरुचयो हिंस्युः	५	३०	३०
हिंसविहारा वैदेहि	३	४५	२०
हीनं रतिगुणैः सर्वैः	६	१२२	६
हीनबुद्धिगुणो बालः	२	१०६	२४
हीनरूपा नृपश्रेष्ठ	७	७४	२६
हीनवीर्यमिवाशक्तम्	६	१०४	२
हीनार्थस्तु समृद्धार्थम्	६	६४	१७
हीना हिमवत पार्श्वे	२	१२	७४
हीना भ्रात्रा च पित्रा च	२	७७	१८
हीयमानमथापश्यत्	४	१६	३१
हीयमानेन कर्तव्यः	६	३५	६
हुताग्निरर्चिः संकाशाम्	६	१२	१६
हुताग्निहोत्रं दृष्ट्वैव	२	५४	१२
हुताशनज्वालसमावृता सा	५	५४	४१
हुत्वाग्निं तर्पयित्वाथ	६	८०	११
हुत्वा चैवाग्निहोत्राणि	१	३५	६
हुंकारेण महादेवः	१	७५	१८
हूयमानः प्रजज्वाल	६	८२	२६
हृतादारान्सदारांश्च	३	३८	२८
हृतभार्यो वने त्रस्तः	४	५	२२
हृतं निर्जित्य संग्रामे	६	१२१	१०
हृता भार्या च मे तेन	४	८	३३
हृता मृता वा नष्टा वा	३	६०	८
हृता मृता वा वैदेहि	३	६४	५२
हृता मृता वा सौमित्रे	३	६४	६६
हृता हि भार्यां स्मरतः	४	२७	३१

	का०	स०	श्लो०
हृतेति मां योऽधिगत्य	५	२६	१६
हृद इव तिमिनागसंवृतः	२	८१	१६
हृदयं च प्रहृष्टं मे	५	५८	१६
हृदयं चैव सौमित्रे	७	४६	१५
हृदयं सुस्थितं मह्यम्	४	२०	१०
हृदयस्थं च ते छन्दः	३	१३	१६
हृदये ते निविष्टास्ताः	२	६	४६
हृदये मे नरव्याघ्र	३	७५	६
हृदयेष्ववतिष्ठन्ते	२	४५	२५
हृदि कृत्वा स बहुशः	४	६	१८
हृद्गतं मे महच्छल्यम्	७	४७	४
हृद्गतो ह्यसि संप्राप्तः	७	१०४	१६
हृष्टनारीनरयुतम्	२	१५	१४
हृष्टपक्षिगणाकीर्णः	४	६	७
हृष्टपुष्टजनाकीर्ण	४	२६	४१
हृष्टप्रमुदिता लङ्का	६	३	१०
हृष्टप्रमुदितैः पौरैः	२	७	६
हृष्टः कथय विश्लब्धः	४	८	४४
हृष्टः प्रमुदितः सूतः	२	१५	२६
हृष्टः स परया प्रीत्या	६	७३	४६
हृष्टः सौहृदमालम्ब्य	४	५	१३
हृष्टा नेदुस्ततः सर्वे	६	६६	५०
हृष्टा प्रतीता कैकेयी	२	६	३७
हृष्टा मुनिगणाः सर्वे	७	६४	१२
हृष्टाः खलु भविष्यन्ति	२	८	१२
हृष्टाः प्रमुदिता वीराः	६	३६	१२
हृष्टाः समधिगच्छन्ति	४	४०	४७
हृष्यस्यृतुमुखं दृष्ट्वा	२	१०५	२५
हेतूपचारकुशलान्	७	६४	८०
हेत्वर्थयुक्तं विधिवत्	६	३	७७
हेमचन्द्रार्धचन्द्राणि	६	७५	१६
हेमचन्द्रो महाबलः	१	४७	१४
हेमजालपरिक्षिप्तैः	५	४५	३
हेमजालैरविच्छिन्नः	५	६	३५
हेमदामपिनद्धश्च	२	१४	३८
हेमपट्टपरिक्षिप्तम्	६	७७	३

	का०	स०	श्लो०
हेमपट्टपरिक्षिप्तम्	६	७०	५१
हेमवर्णाः सुनासोरुः	६	१२५	४५
हेमराजतपर्यङ्कैः	४	३३	२०
हैहयाधिपयोधानम्	७	३२	३५
होताध्वर्युस्तथोद्गाता	१	१४	३५
ह्रदा पूर्णा रसालस्य	२	६१	७३
ह्रस्वतां परमां प्राप्तः	५	५३	३८
ह्रस्वां दीर्घां च कुब्जां च	५	१७	८८
ह्रस्वो रूक्षो प्रशस्तश्च	६	४१	१८
ह्रस्वो रूक्षोऽप्रशस्तश्च	६	२३	६
ह्रियमाणां तु मां दृष्ट्वा	५	३७	४६
ह्रियमाणा तु वैदेही	३	४५	१
ह्रियमाणां तु वैदेहीम्	३	५२	३८
ह्रियमाणां प्रियां भर्तुः	३	४६	३४
ह्रियमाणौ तु काकुत्स्थौ	३	४	१
ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीः	३	४६	१७
ह्रीमन्तः कीर्तिमन्तश्च	१	१८	३५
ह्री श्री कीर्तिसमद्युति	७	५	३१
ह्लादितस्तेन वाक्येन	२	११२	८
ह्लादिनीं दूरपारां च	२	७१	२
ह्लादिनी पावनी चैव	१	४३	१२